परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

जिनवाणी-महोत्सव

सहस्रग्रन्थसंग्रह

❊ जन्मदिवस 19–03–1971 ❊ मुनिदीक्षा–11–05–1989 ❊ आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणाः–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

शब्दकल्पद्रुम

भाग – 02

लेखक

राजा राधाकान्त देव

प्रकाशक

चौखम्बा संस्कृत सीरीज

वाराणसी (उत्तरप्रदेश)

(परम्परानायक)

परम पूज्य चारित्र-चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)

परम पूज्य तीर्थभक्त-शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)

परम पूज्य सिद्धान्त-चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)

परम पूज्य तपश्चर्या-चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्रायः होता है। फलतः उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तृत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि-परिवार

॥ श्रीः ॥

शब्दकल्पद्रुमः

द्वितीयो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः



श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन-संपरिवर्द्धितः ।

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

PK.
925
D47
1967
V.2

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART TWO

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi.
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145

शब्दकल्पद्रुमः।

द्वितीयकाण्डम्।

क

क, ककारः। (वर्णस्य स्वरूपग्रहणाय कारः।) स तु व्यञ्जनप्रथमवर्णः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (तथा चोक्तम् "तुल्यास्य प्रयत्नं सवर्णं"। १। १। ९। सिद्धान्तकौमुद्याम्। "अकुहविसर्जनीयानाङ्कण्ठः"॥ इति॥ *॥) (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—

"वामरेखा भवेद्ब्रह्मा विष्णुर्द्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो माचा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्यशून्यं सदाशिवः।
कदम्बगोलकाकारं ककारं भावयेत् सुधीः"॥

इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा,—

"कः क्रोधीशो महाकाली कामदेवप्रकाशकः।
कपाली तेजसः शान्तिर्वासुदेवो जयानलः॥
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः।
अनन्तः पार्थिवो विन्दुस्तापिनी परमात्मकः॥
वर्गाद्यश्च सुखी ब्रह्मा सखाद्योऽम्भः शिवो जलम्।
माहेश्वरी तुला पुण्या मङ्गलश्वरयां करः॥
नित्या कामेश्वरी मुख्यः कामरूपो गजेन्द्रकः।
श्रीपुरं रमणो रङ्गकुसुमा परमात्मकः"॥

इति तन्त्रशास्त्रम्॥

"अधुना संप्रवक्ष्यामि ककारतत्त्वमुत्तमम्।
रहस्यं परमाश्चर्यं त्रैलोक्यानाञ्च संप्लवम्॥
वामरेखा भवेद्ब्रह्मा विष्णुर्द्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो माचा साक्षात् सरस्वती॥
कुण्डली अङ्कुशाकारा मध्ये शून्यः सदाशिवः।
जवायावकसंकाशा वामरेखा वरानने!॥
शरच्चन्द्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्।
अधोरेखा वरारोहे! महामरकतद्युतिः॥
शङ्खकुन्दसमा कीर्त्तिर्म्माचा साक्षात् सरस्वती।
कुण्डली अङ्कुशा या तु कोटिविद्युल्लताकृतिः॥
कोटिचन्द्रप्रतीकाशो मध्ये शून्यः सदाशिवः।
शून्यगर्भे स्थिता काली कैवल्यपददायिनी॥
ककाराज्जायते सर्व्वं कामं कैवल्यमेव च।
अर्थश्च जायते देवि! तथा धर्म्मश्च नान्यथा॥
ककारः सर्व्ववर्णानां मूलप्रकृतिरेव च।

कं

ककारः कामदा कामरूपिणी क्षुरदक्षया॥
कामनीया महेशानि! स्वयं प्रकृतिसुन्दरी।
माता सा सर्व्वदेवानां कैवल्यपददायिनी॥
ऊर्द्धकोणे स्थिता कामा ब्रह्मशक्तिरितीरिता।
वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता॥
दक्षकोणे स्थिता विन्दू रौद्री संहाररूपिणी।
ज्ञानात्मा स तु चार्व्वङ्गि! कलाचतुष्टयात्मकः॥
इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुश्च ज्ञानशक्तिमान्।
क्रियाशक्तिर्भवेद्रुद्रः सर्व्वे प्रकृतिमूर्त्तिमान्॥
आत्मविद्या शिवस्तत्र सदा मन्त्रः प्रतिष्ठितः।
आसनं त्रिपुरादेव्याः ककारं पञ्चदैवतम्॥
ईश्वरो यस्तु देवेशि! त्रिकोणे तस्य संस्थितिः।
त्रिकोणमेतत् कथितं योनिमण्डलमुत्तमम्॥
केवलं प्रपदे यस्याः कामिनी सा प्रकीर्त्तिता।
ॐ जवायावकसिन्दूरसदृशीं कामिनीं परम्॥
चतुर्भुजां त्रिनेत्राञ्च बाऽवस्त्रीविराजिताम्।
कदम्बकोरकाकारस्तनद्वयविभूषिताम्॥
रत्नकङ्कणकेयूरमञ्जीरैरुपशोभिताम्।
रत्नहारैः पुष्पहारैः शोभितां परमेश्वरीम्॥
एवं हि कामिनीं ध्यात्वा ककारं दशधा जपेत्।
प्रफुल्लश्च ततो ध्यात्वा जपस्य फलभाग्भवेत्॥
एतत्ते कथितं देवि! ककारतत्त्वमुत्तमम्"॥

इति कामधेनुतन्त्रम्॥ (अनुबन्धविश्लेषः। यथाह कविकल्पद्रुमः। "कच्छुरादिः किन्तु वा"। एतेन गणात् क संख्याने गणयति कथत् क वाक्यप्रबन्धे कथयति इत्यादि स्यात्॥)

कं, क्ली, (कायति शब्दो निर्गच्छति यतः यस्मिन् सतीत्यर्थः सजिह्वदनस्य शिरोऽन्तर्वर्त्तित्वात्। यद्वा कायति वर्णात्मकं ध्वन्यात्मकं वा शब्दं करोति जीवः यस्मिन् सतीति यावत्॥ कै शब्दे "अन्येभ्योऽपि दृश्यते" डः। ३। २। १०१।) शिरः॥ (यथा, तन्त्रसारे।

"द्वाभ्यामोष्ठौ दिशन्मध्ये चैकेन घ्राणयेत्करम्।
मुख-घ्राण-नेत्र-श्रोत्र-नाभ्युरस्कं भुजौ क्रमात्"॥

अत्र कं शिरः इति तट्टीका॥ कायति शब्दायते स्रोतोवेगेनालोड़नेन वेति यावत्।) जलम्॥

कः

(यथा, भागवते ६। १। ४२।

"सूर्य्योऽग्निः खं मरुद्भावः सोमः सन्ध्याहनीदिशः।
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥

कायन्ति ध्यानदोत्सवध्वनिं कुर्व्वन्ति यस्मिन् समागते उपस्थिते इत्यर्थः गृहिण इति शेषः। ध्यानन्दध्वनेस्तु सुखानुवर्त्तित्वात्।) सुखम्। इति मेदिनी॥

(यथा, छान्दोग्योपनिषदि। ४। १०। ५।

"प्राणो ब्रह्मेकं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत् प्राणो ब्रह्मेकञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च ह्यस्मै तदाकाशञ्चोचुः"॥

"तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यमयः ऊचुः। यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशम् इत्येवं खेन विशेषयिष्यामो कं विषयेन्द्रियसंयोगजातसुखान्निवर्त्तितं स्यान्नीलेनेव विशेषयिष्यामो मृत्पलं रक्तादिभ्यः॥ यदेव खमाकाशमवोचाम तदेव च कं सुखमिति जानीहि एवञ्च सुखेन विशेषयिष्यामो खं भौतिकादचेतनात् खान्निवर्त्तितं स्यान्नीलोत्पलवदेव"॥ इति भाष्यम्॥ कचते दीप्यते मस्तकोपरि शोभते इति भावः। यद्वा कच्यते बध्यते संयम्यते कराभ्याम्। कच् बन्धने डः।) केशः॥ इति धरणी॥

कः, पुं, (कचति दीप्यते स्वेन ज्योतिषा ज्योतिर्म्मयत्वात् कच् + ड।) ब्रह्मा (यथा, भागवते। ३। १२। ५१।

"एवं युक्तक्रतस्तस्य देवं यज्ञेक्रतस्तदा।
कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते"॥)

विष्णुः। (यथा महाभारते। १३। विष्णोः सहस्रनामकथने। १४९। ९१।

"एको नैकः सवः कः किं यत् तत्पदमनुत्तमम्"॥

प्रजापतिः। यथा भागवते। ८। ५। ३९।

"स्वेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः
प्रसीदतां नः स महाविभूतिः"॥)

दक्षः। (यथा भागवते। ९। १०। १०॥

"जघ्नेऽद्भुतैणवपुषाऽश्रमतोऽपकृष्टो

कंसका

मारीचमाश्च विश्वामित्रेण यथा कमुग्रः" ॥)
कामदेवः । अग्निः । वायुः । यमः । सूर्य्यः । आत्मा । राजा । ग्रन्थिः ॥ मयूरः । इति मेदिनी । मनः । शरीरम् । काजः । धनम् ॥ शब्दः । इत्यनेकार्थकोषः ॥ प्रकाशः ॥ इत्येकाक्षरकोषः ॥

कः, त्रि, सर्व्वनाम । इति विश्वः । के किं इति भाषा ॥ (यथा विष्णुपुराणे । १ । १७ । २० ।
"तस्ते परमात्मानं तात ! कः केन शास्यते" ॥)

कंशः, पुं क्ली, कंसः । पानपात्रम् । इत्यमरटीका ॥

कंसं, क्ली पुं, (कामयति काम्यते वा अनेन पातुमितिव्युत्पत्तेः । "दृकृवदिहनिकमीति" सः । उणां । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमरः ॥ २ । ९ । ३२ । कंशम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरजतादिनिर्म्मितपात्रमात्रम् । मानविशेषः तत्तु षाढ्कपरिमाणम् । इति मेदिनी ॥ (चतुःषष्टिपलात्मकाढ्कस्वरूपम् ॥ यथा भावप्रकाशे ।
"शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुः प्रस्थैस्तथाढ्कः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलञ्चसः" ॥
ताम्रवङ्गमिश्रितधातुविशेषः । काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्रार्द्धम् ४ । इति चिकाण्डशेषः । (वर्तुलाकारयष्टिश्चयपात्रभेदः । यथा शतपथब्राह्मणे ।१४।९।३।१ ।
"औडुम्बरे कंसे चमसे वा" ।)

कंसः, पुं, (कामयति पित्रादिबन्धुवर्गान् अभिभूय पापात्मकं राज्यविषयादिभोगं यः । कम् + सः । यद्वा कंसे श्यति शूचून् कंस शासने इत्यस्मात् सः ।) विष्णुदेवद्विषसुरविशेषः । इति हेमचन्द्रः ॥ स तु मथुरादेशराजा । यदुवंशीयोग्रसेनराजपुत्रः । श्रीकृष्णमातुलः । तेन वधः प्राप्तः । (एतद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् ॥ कंसनामकारणं हरिवंशे यथा,
"कस्य त्वमिति यच्चाहं त्वयोक्तो मत्तकाशिनि ।
कंसस्तस्माद्रिपुध्वंसी तव पुत्रो भविष्यति" ॥
अतएव कंसधातुनिष्पन्नत्वमेव प्रशस्यते ॥)

कांसकं, क्ली, (कामयतेऽनेन चक्षुर्दृष्ट्यादिकमिति शेषः । कम् + सः । ततो जातौ संज्ञायां वा कन् ।) चक्षुरौषधधातुविशेषः । स तु हीराकसीप्रभेदः । तत्पर्य्यायः । पुष्पकासीसम् २ । नयनौषधम् ३ । इति हेमचन्द्रः ॥

कंसकारः, पुं, स्त्री, (कंसं तन्मयपात्रादिकं करोति यः । कंस + ञ + "कर्म्मण्यण्" । ३ । २ । १ । केचित्तु तालव्यशकारमिच्छन्त्यत्र ।) जातिविशेषः । काँसारि इति भाषा । तस्योत्पत्तिर्यथा ।
"वैश्यायां ब्राह्मणाज्जातः अम्बष्ठो गान्धिको वणिक् ।
कंसकारश्शकारौ ब्राह्मणात् सम्बभूवतुः" ॥
इति वृहद्धर्म्मपुराणम् ॥ अपि च ।
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च षड्वै शिल्पप्रकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षड्वै शिल्पिनो नराः" ॥

ककुत्

इति ब्रह्मवैवर्त्तपुराणम् ॥
कंसजित्, पुं, (कंसं जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति हलायुधः ॥
कंसवती, स्त्री, (कंसः शासनशक्तिरस्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंसः भाद्यत्वेनास्यस्याः ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च । (यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
कंसहा, [न्] पुं, (कंसं हन्ति हतवान् वा । कंस + हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥
कंसा, स्त्री, (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः ॥ १ । १ । २१ ॥
कंसारिः, पुं, (कंसस्य अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा राजतरङ्गिण्यां । १ । ५९ ।
"साहाय्यकार्थमाहूतो जरासन्धेन बन्धुना ।
समं रुरोध कंसारेर्मथुरां पृथुभिर्बलैः" ॥)
कंसास्थि, क्ली, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति चिकाण्डशेषः ॥
कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषसम्बन्धात् उद्भवति या । यद्वा कंसायाः निर्झरिण्या उद्भवो कंसायां उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंस इव शुभत्वात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । षाढ्की २ तुवरी ३ काक्षी ४ मदाक्ष्या ५ सौराष्ट्री ६ पार्व्वती ७ कालिका ८ पर्पटी ९ सती १० । इति हेमचन्द्रः ॥
कक इ ड वञ्चने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ कर्म्मणि ककते । ड काङ्क्षते । इति दुर्गादासः ॥
कक इ ड इच्छायां । गर्व्वे । चापले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं-च-सेट् ।) इच्छेह दृष्ट्या । चापलं चञ्चलीभावः । ड ककते काकः । सदृष्ट्यञ्चलो वा स्यादित्यर्थः । गर्व्वः कैश्चिन्न पठ्यते । इति दुर्गादासः ॥
ककन्दः, पुं, (ककोः गर्व्वस्यापत्यं वा भवत्यस्मात् । कक + अन्दच् । यद्वा ककं गर्व्वं चापल्यं दृष्ट्यां वा ददातीति । कक् + दा + डः ।) स्वर्णः । इत्युणादिकोषः ॥
ककुञ्जलः, पुं स्त्री, (कं जलं कूजयति याचते इति यावत् । क + कूज् + अलच् । एषोदरादित्वात् नुम् ह्रस्वश्च ।) चातकपक्षी । इति राजवल्लभः ॥
ककुत्, [द्] स्त्री, (कं सुखं कावयति शब्दयत्यस्य औन्नत्यं प्रापयतीति यावत् । वृषाणां हि ककुत् शब्दस्यस्य सुखलक्षणमिति भावः । ककुद्हीनवृषपालने दरिद्रता इति स्मरणात् ! क + कु + क्विच् + एषोदरादित्वात् ह्रस्वः तुगागमश्च ।) वृषाङ्गविशेषः । घाँड़ेर झुँट् इति भाषा । (यथा, अथर्व्ववेदे । ९ । ८९ । ३ । "सम्राड़स्य सुरामो ककुन् मनुष्याणाम् । देवानामर्द्धभागसि त्वमको वृषो भव" ॥ स्कन्धभागः ॥
यथा, भागवते ५ । २५ । ७ । "ध्यायमानः सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविलुलितविकचलोचनः सुललितसुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिस्खलनरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति" ॥) ध्वजः । वरः । इति मेदिनी ॥ (यथा, ऋग्वेदे । ८ । ४४ । १६ ।
"अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्" ॥)

ककुत्स्थः, पुं, (वृषरूपधरस्य देवेन्द्रस्य ककुदि तिष्ठति यः सः । ककुत् + स्था + कः ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामायं ।) शशादराजपुत्रः । इक्ष्वाकुराजपौत्रश्च ॥ (येन चासौ ककुत्स्थनामासीत् तत्कथा हरिवंशे श्रेलोत्क्तौ । ११ । १९—२० ॥
"शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ॥
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन सः स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः" ॥
तथा च महाभारते १ । १ । २२९ ।
"पुरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः ।
अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः" ॥
स्कन्दादेशस्थिते च ॥)

ककुदः, पुं क्ली, (कं सुखं उत्कर्षं वा कौति प्रकाशयति धातूनामनेकार्थत्वात् कुधातुरत्र प्रकाशनार्थः अन्तर्णीतार्थश्च । कु + क्विप् तुक् च एषोदरादित्वात् तस्य दः । यद्वा कस्य सुखस्य शरीरस्य वा कुं भूमिं मूर्द्धानं आकरमिति यावत् ददातीति । कक + दा + कः । यद्वा "ककुदस्यावस्थायां लोपः" । ५ । ४ । १४६ । अर्द्धर्चादि-पां । २ । ४ । ३१ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १० । १० । १९ ।
"ऊर्द्धो विन्दुरुदचरद् ब्रह्मणः ककुदादधि" ।
रघुश्च । ६ । ७१ ॥
"इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः" ॥)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा रघुः । ३ । ७० ।
"अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम्" ॥)
वृषाङ्गम् । झुँट इति भाषा । इत्यमरः ॥ १ । ३ । ९१ ॥ (यथा महाभारते । १३।१४ । २३९-२३९ ।
"वृषरूपधरं साक्षात् क्षीरोदमिव सागरम् ।
कृष्णपुच्छं महाकायं मधुपिङ्गलोचनम् ॥

ककुभ्

वज्रसारमयैः पृष्ठैर्निष्प्रकनकप्रभैः ।
सुतीक्ष्णैर्मुद्गरक्षाग्रैरुत्किरन्तमिवावनिम् ॥
जाम्बूनदेन दाम्ना च सर्व्वतः समलङ्कृतम् ।
सुवक्त्रखुरनासञ्च सुकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ।
ककुदं तस्य चाभाति स्कन्धमापूर्य्य धिष्ठितम्" ॥)
पर्व्वताग्रभागः । इति अमरटीकायां स्वामी ॥

ककुद्मान् [त्] पुं, (ककुदस्यास्तीति । मतुप् इति "मादुपधायाश्च मतो र्वो यवादिभ्यः" । ८।२।९ । न मस्य वकारत्वम् ।) वृषभः । इति हेमचन्द्रः ॥
(यथा, कुमारे । १ । ५६ ।
"तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्" ॥)
पर्व्वतः । इत्यमरटीकायां स्वामी ॥
(यथा, विष्णुपुराणे २ । ४ । २७ ।
"ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु" ॥)
ऋषभौषधम् । इति राजनिर्घण्टः॥ अत्र क्वचिदपवादविषयेऽप्युत्पत्तेर्गोऽभिनिविशते इति न्यायात् वतुप्राप्तौ मतुप्रत्ययः ॥ इति मुग्धबोधमतम् ॥
(ऊर्म्मिः । यथा, यजुर्व्वेदे । ९ । ६ ।
"ऊर्म्मिः प्रतूर्त्तिः ककुद्मान्" ॥)

ककुद्मती, स्त्री, (ककुदिव वृषस्कन्धवत् अतिप्रशस्तो मांसपिण्डः अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्वं स्त्रियां ङीप्।) कटिः। इत्यमरः॥ २।६। ७४ । पाछा इति भाषा ॥

ककुन्दरं, क्ली, (कस्य शरीरस्य कुं भूमिं नितम्बस्थलविशेषं दृणातीति । ककु + दृ + खच् मुम् च ।) कुकुन्दरम् । नितम्बस्थकूपकहृदयम् । इत्यमरटीकायां रमानाथः राजनिर्घण्टश्च ॥ (यथाह, याज्ञवल्क्यः । ३ । ९६ ।
"कनीनिके चाक्षिकूटे श्रुक्कुलीकर्णपत्रकौ ।
कर्णौ शष्कौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे" ॥
"सक्थ्नश्चतुरस्रः ककुन्दरविभागश्रोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः" ।
इति दक्षकुमारे ॥)

ककुप्, [प्] स्त्री, (कं वातं स्खुभ्नाति विस्तारयति या । स्खुभ इति सौत्रः । क्विप् । एषोदरादित्वात् सलोपः ।) दिक् । इत्यमरः ॥ १ । ३ । १ । प्रवेणी । श्रोभा । चम्पकमाला । इति मेदिनी ॥ शाखम् । इति विश्वः ॥

ककुभ्, स्त्री, (कं सुखं आनन्दं स्खुभ्नाति विस्तारयति या एषोदरादित्वात् सलोपः ।) रागिणीविशेषः । तस्या नामान्तरम् । कुब्जः । तस्या लक्षणम् ।
"पीतं वसाना वसनं सुकेशी
वने रुदन्ती विकनाददूना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्तिः प्रदिष्टा ककुभस्तथेयम्" ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा, भागवते । २ । ७ । २५ ।
"वक्षःस्थलस्पर्शरुजमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम्" ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
"भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती" ॥)

ककुभः, पुं, (कस्य वातस्य कुः भूमिः स्थानं प्रकाशरूपविशेष इति यावत् भात्यस्मात् । ककु + भा + कः । यद्वा कं वातं स्खुभ्नाति विस्तारयति । क + स्खुभ + कः + एषोदरादित्वात् सलोपः ॥) अर्জ্জুनवृक्षः । (यथा, चक्रपाणिदत्तस्य संग्रहे ॥
"गोधूमककुभचूर्णं क्षागपयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं समयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातग्निघ्नास्रयोजितम् ।
संवत्सरप्रयोगेन जीवेत् वर्षशतं नरः" ॥)
वीणादण्डम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमरः ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाधःशुष्कगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणाच्छाद्य दीयते तच्चेत्यन्ये । वीणास्थितालावुफले इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥
(शिवः । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १७ । १३० ।
"हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्" ॥)

ककुभा, स्त्री, (केन आदित्येन कुत्सितानि भानिनक्षत्राण्यस्याम् । टावन्तोऽपीति कश्चित् तन्न । व्यधिकरणबहुव्रीहिप्रसङ्गात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्य्येण दिनप्रकाशेनेति भावः कुत्सिता भाति । भा दीप्तौ । इति धातोः सुपीति कः । भिदाद्यङ् वा । राचावेवास्या माधुर्य्यस्याधिक्यमिति तात्पर्य्यार्थः ।) रागिणीविशेषः । इति हलायुधः ॥

ककुभादनी, स्त्री, (ककुभः अर्জ্জुन इव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ + अद् + कर्म्मणि ल्युट् + स्त्रियां ङीप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कक्का हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्कति । इति दुर्गादासः ॥

कक्कोलः, पुं क्ली, (ककते गच्छति दिशि प्रकाशते इत्यर्थः ततः क्विप् कक्कोलति संख्यायति कुलधातोर्व्वलादित्वात् णः । कक्चासौ कोलश्चेति । "पूगकक्कोलकर्पूरलवङ्गसुमनःफलैरित्युक्तेः" ।) सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणाः । कटुत्वम् । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥ (यथा रामायणे ३ काण्डे ।
"वनानि च सुरम्याणि कक्कोलानां त्वचस्य च" ॥)

कक्कोलकं, क्ली, (कक्कोलस्य + इदमर्थे स्वार्थे वा कन् । शाल्मलिद्वीपान्तर्गतसप्तमवर्षपर्व्वतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम् ॥) गन्धद्रव्यविशेषः । काँकला इति ख्यातम् । तत्पर्य्यायः कोलकम् २ कोषफलम् ३ । इत्यमरः ॥ क्षुतफलम् ४ कटुकफलम् ५ हेयम् ६ स्थूलमरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ कालम् १० कटफलम् ११ मरिचम् १२ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम् । पाचनत्वम् । रुचिकारित्वम् । कफवातरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥
("कक्कोलकं लवङ्गञ्च तिक्तं कटुकषायहम् ।
लघुदृष्यापहं वक्त्रक्लेददौर्गन्ध्यनाशनम्" ॥
इति सुश्रुतः ॥)

कक्खं हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्खति । इति दुर्गादासः ॥

कक्खटः, त्रि, (कक्खति हसति यः ॥ प्रफुल्लमुखो जनः । इति व्युत्पत्त्यर्थः । अन्यस्तु रूक्षार्थः । कक्ख अटन् । अथवा कक्खं प्रसन्नभावं अटति अद्यति कर्कशान्तर्हृत्वात् कक्ख + अट् + अच् । यदा कठिण्यां वर्त्तते तदा कक्खति हृष्या प्रकाशयति वर्णान् । अन्तर्णिजर्थः ।) कठिनः । इत्यमरः ॥

कक्खटपत्रकः, पुं, (कक्खटानि प्रकाशान्वितानि पत्राणि यस्य । कप् ।) वृक्षविशेषः । पाट इति भाषा । तत्पर्य्यायः । षट्टः २ वाजशूलः ३ शाणिः ४ चिमः ५ । इति शब्दमाला ॥

कक्खटी, स्त्री, (कक्खति भूकर्षणेन प्रकाशयति वर्णान् । अच्प्यन्तर्णिच् शकादिभ्योऽटन् गौरादित्वात् ङीष् ।) खटिका । खड़ी इति भाषा । तत्पर्य्यायः । वर्णलेखा २ कठिनी ३ खटी ४ । इति त्रिकाण्डशेषः ॥

कक्षः, पुं, (कषतीति । कष् हिंसायां "वृतृवदिहनिकमिकषिभ्यः सः" । उणां ३ । ६२ । इति सः ।) बाहुमूलम् । इत्यमरः । २ । ६ । ७९ ॥ काँख् वगल् इति च भाषा ॥
(यथा, महाभारते ४ । ६ । १ ।
"वदर्य्यरूपान् प्रतिमुच्य काञ्चना-
नक्षान् स कक्षे परिरभ्य वाससा" ॥)
वृक्षम् । वीरुत् । इत्यमरः ॥ ३ । ३ । २१८ ।
(यथा, मनुः ७ । ११० ।
"यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति" ॥
"यथा क्षेत्रे धान्यवृक्षादिकयोः सङ्गोत्पन्नयोरपि धान्यानि लवनकर्त्ता रक्षति वृक्षादिकञ्चोद्धरति" । इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कवृक्षम् । इति धरणी ॥ (यथा, माघः । २ । ४२ ।
"प्रक्षिप्योदर्चिषं कक्षे शोरते तेऽभिमारुतम्" ॥)
कक्षः । (यथा महाभारते । ९ । वारुणावतगमने । १४६ । २२ ॥
"कक्षघ्नः शिशिरघ्नश्च महाकक्षे विलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति" ॥
विलौकसो महाकक्षे वृहत्कक्षे इत्यर्थः ॥) शुष्कवनम् । पापम् । इति हेमचन्द्रः ॥ अरण्यम् । इति रुद्रः ॥ (यथा महाभारते १ । खाण्डवदहनपर्व्वणि । २३१ । ३ ।
"अयमग्निर्दहन् कक्षमित आयाति भीषणः" ॥)
भित्तिः । पार्श्वः । इति भरतधृताजयः ॥
(यथा, रामायणे । ५ । ५ । २५ ।
"तस्य वानररिंहस्य क्रममाणस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्জ্জति" ॥)

कक्षरुहा, स्त्री, (कक्षे कक्षे जलप्राये रोहति इति । कक्ष + रुह + क । अस्या अनूपजातत्वात् तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

कक्ष्या

कक्ष्या, स्त्री, (कक्ष-हिंसादौ + सः टाप् च।) हस्तिरज्जुः। काञ्ची। गेहप्रकोष्ठकः।
(यथा, भागवते ३। १५। २७।
"तस्मिन्नतीत्य मुनयः षड़सञ्जमानाः
कक्ष्याः समानवयसावथ सप्तमायाम्" ॥)
भित्तिः। साम्यम्। रथभागः। अन्तरीयपश्चिमाञ्चलम्। परिधानवस्त्रस्य एष्ठतो निहितान्चलम्। उदग्याहिणी। इति हेमचन्द्रः॥ (काछा काँचा आँचल इत्यादि भाषा॥ यथाह योगियाज्ञवल्क्यः।
"परिधानात् बहिः कक्ष्या निबद्धा ह्यासरी भवेत्" ॥)
"वामे एष्ठे तथा नाभौ कक्ष्यात्रयमुदाहृतम्।
एभिः कक्ष्यैः परीधत्ते यो विप्रः स शुचिः स्मृतः" ॥
इति स्मृतिः॥
स्पर्द्धापदम्। इति मेदिनी रत्नम्॥ कक्ष्या। हस्तिमध्यदेशबन्धनरज्जुः। इत्यमरटीकायां भरतः॥ क्षुद्ररोगविशेषः। तस्य लक्षणं यथा,—
"वाऊपार्श्वांसकक्षेषु क्षय्यस्फोटां सवेदनाम्।
पित्तप्रकोपसम्भूतां कक्ष्यामित्यभिनिर्दिशेत्" ॥
इति माधवकरः॥ तच्चिकित्सा यथा,—
"कक्ष्यायां गन्धनाम्नीञ्च चिकित्सेत् चिकित्सकः।
पैत्तिकस्य विसर्पस्य क्रियया पूर्ब्बमुक्तया" ॥
इति भावप्रकाशः॥

कक्ष्यापटः, पुं, (कक्ष्याकारः हस्तिरज्जुतुल्यः पटोवस्त्रम्।) कौपीनम्। इति हलायुधः॥ (कक्ष्यायाः गृहप्रकोष्ठकस्य पटः इति विग्रहे गृहभित्तिस्थपटः॥)

कक्ष्यावान्, [त्] पुं, (कक्ष्या सर्ब्बवस्तुनि साम्यं सा विद्यते यस्य। कक्ष्या + मतुप् मस्य वः।) मुनिविशेषः। इति हेमचन्द्रः॥

कक्ष्यावेष्टकः, पुं, (कक्ष्यायाः अवेष्टकः यद्वा कक्ष्यां वनोपवनादिकं राजान्तःपुरं वा अवेक्षते इति। अव + ईक्ष् + ण्वुल्।) सुद्वान्तपालः। उद्यानपालः। रङ्गाजीवः। कविः। भिड़्गः। द्वाःस्थः। इति मेदिनी॥

कक्ष्योत्था, स्त्री, (कक्ष्यात् जलप्रायदेशात् उत्तिष्ठति जायते या। कक्ष्य + उत् + स्था + कः टाप् च।) भद्रमुस्ता। इति राजनिर्घण्टः॥

कक्ष्यं, क्ली, (कक्ष्याये साम्याय भवम्। कक्ष्या + यत्।) एषणिकास्थकटोरा। इति मिताक्षरा। निक्किर वाटी इति भाषा॥ (त्रि, कक्ष्यपूरकः। यथा, ऋग्वेदे ५। ४४। ११।
"ग्रैवेण आसामदितिः कक्ष्यो मदो-
विश्ववारस्य यजतस्य मायिनः" ॥)

कक्ष्या, स्त्री, (कक्षे भवा। कक्ष्य + शरीरावयवात् + यत् टाप् च।) कक्षरज्जुः। काछड़ड़ी इति ख्याता। चर्म्मरज्जुः। इत्यन्ये। इति भरतः॥ गजमध्यबन्धनचर्म्मरज्जुः इति सारसुन्दरी॥ तत्पर्य्यायः। चूषा २ वरत्रा ३। इत्यमरः॥ २।८।४२। वृषा ४ दृश्या ५ दृष्या ६ कक्षा ७। इति तट्टीका। हर्म्म्यादिप्रकोष्ठः। राजगृहादेर्वेष्टनावच्छिन्नो देशः। (महल इति भाषा। यथा रामायणे। २। २०। ११।
"प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्"॥)
काञ्ची। इत्यमरः॥ ३।३।१५७। अन्तर्गृहमिति सुभूतिः। (यथा, कुमारे ७। ७०।
"क्रान्तानि पूर्ब्बं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश" ॥)
सादृश्यम्। उद्योगः। दृढतिका। उत्तरीयवस्त्रम्। इति हेमचन्द्रः॥ गुञ्जा। इति शब्दरत्नावली॥

कख ए म हासे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) एदित् घटादिः इति वोपदेवः। पाणिनीमते तु एदित्वं न तेन अकखीत् अकाखीत् इति स्यात्।) म कखयति ए अकखीत्। इति दुर्गादासः॥

कख्या, स्त्री, (कखति हसतीव प्रकाशते शोभते। कख् + यत् + स्त्रियां टाप्।) कक्षा। हर्म्म्यादिप्रकोष्ठः। इति शब्दरत्नावली॥

कग म ए क्रियासु। क्रियामात्रे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्। घटादि एदित् इति वोपदेवः। नैदित् इति पाणिनिः। अकगीत् अकागीत्॥) तेन म कगयति। एं अकगीत्। क्रियामात्रे। कगति लोकः गच्छतीत्यर्थः। इति दुर्गादासः॥

कङ्कः, पुं, (कङ्कते उद्गच्छति इति। ककि गतौ। कक् + अच् + इदित्वान्नुम्।) पक्षिविशेषः। काँक् इति भाषा। तत्पर्य्यायः। लोहपृष्ठः २। इत्यमरः। २। ५। १६॥ सदंशुवदनः ३ खरः ४ रक्तालङ्गरथः ५ क्रूरः ६ आमिषप्रियः ७। इति राजनिर्घण्टः॥ अरिष्टः ८ कालपुष्टः ९ किंशारुः १० लोहपृष्ठकः ११। इति जटाधरः॥ दीर्घपादः १२ दीर्घपात् १३। इति शब्दरत्नावली॥ (यथा भागवते ३। १०। २३।
"कङ्कगृध्रवटश्येनभासभासकवर्हिणः"।) यमः। कृष्णद्विजः। इति मेदिनी॥ युधिष्ठिरराजः। इति चिकाण्डशेषः॥ (यथा, महाभारते। ४। ६। १४।
"पृच्छन्तु मे जानपदाः समागताः
कङ्को यथाहं विषये प्रभुस्तथा" ॥
शालमलिद्वीपान्तर्गतपञ्चमवर्षपर्ब्बतः। तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्। क्षत्रियः। इति शब्दमाला॥ कंसासुरभ्राता। स तु उग्रसेनपुत्रः। (यथा, भागवते ९। २४। २४।
"कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा"॥)
महाराजचूतः। इति राजनिर्घण्टः॥

कङ्कटः, पुं, (कं देहं कटति आवृणोतीति। क + कट + अच्। अथवा-ककि लौल्ये इति कङ्कते क्षुधेन नाशतां याति अचिरस्थायित्वात् ककि + अटन्।) (कवचः। इत्युणादिकोषः॥ प्रतिसंस्कृतेनामरश्च॥ (यथा, रघुः। ७। ५९। "सर्व्वायुधैः कङ्कटभेदिभिश्च"॥)

कङ्कटकः, पुं, (कङ्कट + स्वार्थे कन्।) सन्नाहः। इत्यमरः। २। ८। ९४। साँजोया इति भाषा॥

कङ्कणं क्ली, (कं सुखं कणतीति। क + कण शब्दे + कर्त्तरि अच्-एषोदरादित्वात् णत्वम्।) स्वनामख्यातहस्ताभरणम्। तत्पर्य्यायः। करभूषणम्२॥ इत्यमरः २। ६। १०८॥ कौशुकम् ३। इति शब्दरत्नावली॥ (यथा, भागवते ६। १६। ३०।
"म्रक्षाजगौरं सितिवाससं स्फुरत्
किरीटकेयूरकटिचकङ्कणम्" ॥)
हस्तसूत्रम्। मङ्गनम्। शेखरम्। इति विश्वः॥

कङ्कणी, स्त्री, (ककि गतौ घञ् कङ्कः तस्मिन् अणति-अण शब्दे ततः अच् गौरादित्वात् ङीष्। शकन्ध्वादिवत् सन्धिः। यद्वा कं सुखं कणति इति कण + पचाद्यच्।) किङ्किणी। क्षुद्रघण्टिका। इत्यमरटीकायां भरतः॥

कङ्कणीका, स्त्री, (चङ्क्रम्यते पुनः पुनः कणति। कण शब्दे अस्मात् यङ्लुगन्तात् "चङ्क्रिणः कङ्कण च"॥ ४। १८। उणां इति ईकन् धातोः कङ्कणादेशश्च।) क्षुद्रघण्टिका। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कङ्कतं, क्ली, (कङ्कते शिरोमलं प्राप्नोतीति। ककि गतौ + अतच्।) कङ्कतिका। इत्यमरटीकायां भरतः॥ चिरुणी इति ख्यातम्॥

कङ्कतः, पुं, (कङ्कते भूमिं भित्त्वा उद्गच्छति झटिति नाशं गच्छति वा। ककि गतौ इति धातोः अतच्।) वृक्षः। इत्युणादिकोषः॥ (केशप्रसाधनी कङ्कती। चिरुणीइति भाषा। यथा, अथर्ब्ववेदे १४। २। ६८। "क्षत्रियस्य कङ्कतः शतदन्य एषः। अपास्याः केशं मलमपशीर्षण्यम् लिखात्" ॥ अल्पविषप्राणिविशेषः। यथा, ऋग्वेदे। १। १६१। १।
"कङ्कतो नकङ्कतोऽयो सतीनकङ्कतः" ॥)

कङ्कतिका, स्त्री, (कङ्कते मूर्द्धजेन सम्बन्धं गच्छतीति। ककिगतौ बाहुलकादतच्। गौरादित्वात् ङीष् स्वार्थे कन् केश इति ह्रस्वः। यद्वा कस्य शिरसोऽङ्गः। शकन्ध्वादित्वात् सन्धिः। कङ्केषु अतति ततः कुन्। तत इत्वं टाप् च।) केशप्रसाधनार्थकाष्ठादिनिर्म्मितद्रव्यम्। चिरुणी काँकुइ इत्यादि भाषा। तत्पर्य्यायः। प्रसाधनी २। इत्यमरः। २। १६०॥ कङ्कती ३ कङ्कतम् ४ प्रसाधनम् ५। इति तट्टीका। केशमार्জ্জनम् ६। इति जटाधरः॥ फली ७ फलिका ८ फलिः ९। इति शब्दरत्नावली॥ अस्य गुणाः। धूलीजन्तुमलकण्डुशिरोरोगनाशित्वम्। कान्तिकेशवृद्धिकेशप्रसन्नताकारित्वञ्च। इति राजवल्लभः। नागबला। इति वैद्यकम्॥

कङ्कती, स्त्री, (कङ्कते शिरोरुहं प्राप्नोति। ककि गतौ + बाहुलकादतच् गौरादित्वात् ङीष्।) कङ्कतिका। इत्यमरटीकायां भरतः॥

कङ्कचोटः, पुं, (कङ्कात् पक्षिविशेषात् आत्मानं त्रायति। कङ्क + त्रा + अटन् एषोदरादित्वात् साधुः। यद्वा कङ्कवत् चोटयति कङ्क + चुट् + णिच् + कर्त्तर्य्यच्।) मत्स्यविशेषः। काँकिला इति भाषा। तत्पर्य्यायः। जलशूचिः २। इति जटाधरः॥

कङ्कचोटिः, पुं, (कङ्कस्य चोटिरिव चोटिश्चञ्चुर्यस्य।) मत्स्यविशेषः। काँकिला इति भाषा। तत्पर्य्यायः। जलशूचिः २। इति जटाधरः॥

कङ्कास्थ

कङ्कपत्रः, पुं, (कङ्कस्य पक्षिविशेषस्य पत्रमेव पत्रं पक्षो यस्य ।) बाणविशेषः । इति हलायुधः ॥ (यथा रामायणे ६ । २८ । ४ ।
"विद्यधुर्घोररूपास्ते कङ्कपत्रैरजिह्मगैः" ॥
कङ्कस्य पक्षिविशेषस्य पत्रम् । यथा,
"नखप्रभाभूषितकङ्कपत्रैः" ॥ रघुः २ । ३१ ॥)

कङ्कमाला, स्त्री, (कङ्कं चापल्यं करचाञ्चल्यं मलते धारयति । ककि चापल्ये + घञ् । कङ्क + मल धृतौ । मलधातोः उपपदे कर्म्मण्यण् टाप् च ।) करतालीवाद्यम् । इति शब्दरत्नावली ॥

कङ्कमुखः, पुं, (कङ्कस्य मुखमिव मुखं यस्य ।) सन्दंशः । इति हेमचन्द्रः ॥ साँड़ाशि इति भाषा । (स्त्री, नाल्योद्धरणार्थं यन्त्रभेदः । स तु अस्थिविनष्टशल्योद्धरणार्थमुपदिश्यते ॥) अस्य प्रशंसा यथा,
"निर्व्वर्त्तते साध्ववगाहने च
शल्यं प्रगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव" ॥ सुश्रुते ॥
(त्रि, यथा रामायणे ६ । ७६ । ६६ ॥
"व्याघ्र-सिंहमुखान् बाणान् काककङ्कमुखानपि" ॥)

कङ्करं, क्ली, (कं जलं कीर्य्यतेऽत्र । कं + कॄ आधारे अप् ।) तक्रम् । इति हेमचन्द्रः ॥

कङ्करः, त्रि, (कं सुखं किरति क्षिपतीति । कं + कॄ + अच् ।) कुत्सितः । इति हेमचन्द्रः ॥

कङ्करोलः, पुं, (कङ्क इव लोलः लस्य रः ।) निकोचकवृक्षः । इति शब्दचन्द्रिका ॥ काँकरोल इति ख्याता लता च ॥

कङ्कलोह्यं, क्ली, (कङ्क इव लोह्यते आलोह्यते । इति कङ्क + लोड् + ण्यत् ।) कङ्कलोहम् । चटिचिता चिचोड़मूल इति च भाषा । अस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतलत्वञ्च । इति कश्चिद्राजवल्लभः ॥

कङ्कशुभ्रुः, पुं, (कङ्कस्य शुभ्रुः । एतन्नामकत्वमाऽस्य अत अस्य तथात्वम् ।) एतन्नामकः । इति शब्दचन्द्रिका ॥

कङ्कश्यायः, पुं, (कङ्क इव श्येते । श्यैङ् + घञ् ।) कुक्कुरः । इति शब्दमाला ॥

कङ्का, स्त्री, (कङ्कते चापल्यं गच्छति या पित्राद्यादरवशात् । ककि + अच् ।) उग्रसेनराजकन्या । सा तु वसुदेवानुजपत्नी । (यथा, श्रीभागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
गोशीर्षचन्दनम् । तद्यथा ।
"गोशीर्षं चन्दनं क्षय्याताम्रमुत्पलगन्धिकम् ।
कङ्का" इत्यादि शब्दमाला ॥

कङ्कालः, पुं, (कं सुखं श्लिष्टो वा कालयति क्षिपतीति कं + कालि + अच् ।) शरीरास्थि । इत्यमरः । २ । ६ । ६६ ॥ समुदितशरीरास्थिसंघातरक्तमांसरहितः । इति भरतः ॥ तत्पर्य्यायः । करङ्कः २ अस्थिपञ्जरः ३ । इति वैद्यकम् ॥ (यथा, सुन्दोपसुन्दोपाख्याने २ । २४ । "अस्थिकङ्कालसङ्घीर्णां भूर्बभूव" ॥)

कङ्कालमाली, [न्] पुं, (कङ्कालानां माला अस्ति अस्य व्रीह्यादित्वादिनिः ।) महादेवः । इति शब्दरत्नावली ॥

कङ्कुः, पुं, (कङ्कते औद्धत्यं लौल्यं वा प्राप्नोतीति । ककि गतौ + उन् ।) उग्रसेनपुत्रः । स तु कंसासुरभ्राता । (यथा, श्रीभागवते ९ । २४ । २४ ॥
("कंसः सुनामा न्यग्रोधः कङ्कः कङ्कुः सुहूस्तथा" ॥)
क्वचित् शब्दकुरितिपाठः ।) कङ्कटश्च । इति हिरूपकोषः ॥

कङ्कुः, क्ली, (कङ्कुस्तृणविशेषस्य तस्य समीपे तिष्ठति । कङ्कु + स्था + क + षत्वम् ।) पर्व्वतीयमृत्तिकाविशेषः । तत्पर्य्यायः । कालकुष्ठम् २ विरङ्गम् ३ रङ्गदायकम् ४ रेचकम् ५ पुलकम् ६ शोधकम् ७ कालपालकम् ८ । तद्द्विधा रजताभं स्वर्णाभञ्च । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातव्रण-शूलनाशित्वम् । रेचकत्वञ्च । इति राजनिर्घण्टः ॥ अपिच ।
"पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् ।
श्यामं पीतं लघु व्यक्तसत्त्वं नेष्टं हि रेणुकम्" ॥
(इदञ्च हिमालयशिखरे जायते । यदुक्तं —
"हिमवत् पादशिखरे कङ्कुष्ठमुपजायते ।
तच्चैकं नालिकाख्यं स्यात्तदन्य रेणुकं स्मृतम्" ॥
"कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
क्षमिशोथोदराध्मानगुल्मानाह कथापहम्" ॥)

कङ्केयः, पुं, (कङ्कते भक्षणाय लौल्यं गच्छति । ककि + एयः ।) काकविशेषः । तत्पर्य्यायः । द्वारवलिभुक् २ । इति त्रिकाण्डशेषः ॥

कङ्केलिः, पुं, (कं सुखं तस्मै केलिः यत्र ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

कङ्केल्लः, पुं, (ककि + एल्लप्रत्ययः ।) वास्तूकम् । इति शब्दमाला ॥

कङ्केल्लिः, पुं, (कङ्क + बाहुलकात् एलिः एषोदरादित्वात् लच्च ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कङ्कुं, क्ली, (कं सुखं खलत्यनेन । खल + बाहुलकात् डः ।) भोगः । इति शब्दमाला ॥ (कं + खं । ब्रह्म । यथा छान्दोगोपनिषदि ४ । १० । ५ ।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सहोवाच विजानाम्यहं यत्प्राणो ब्रह्म कञ्चतु खञ्च न विजानामीति ते होचुर्यदेव कं तदेव खं यदेव खं तदेवकमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः" ॥)

कङ्कुः, स्त्री, (कं सुखं अङ्कति अङ्कयति वा अगि गतौ + ण्यन्तादस्मात् मृगय्वादित्वात् कुः शुकनृभ्वादित्वात् अकारस्य लोपश्च ।) पीतशङ्खा । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ । इत्यमरः ॥ २ । ६ । २० । कङ्गूः ३ प्रियङ्गुः ४ । इति तट्टीका ॥ (तथाचोक्तम् ।
"स्त्रियां कङ्कुप्रियङ्गू द्वे कृष्णरक्तसितास्तथा ।
पीता चतुर्व्विधा कङ्गुस्तासां पीता वरा स्मृता" ॥)

कङ्कुका, स्त्री, (कं सुखं अङ्कयति प्रापयति ज्ञापयति वा । अगि गतौ ण्यन्तान् मृगय्वादित्वात् कुः इदित्वात् नुम् शुकनृभ्वादित्वात् अलोपे सन्धिः । स्वार्थे कन् ततष्टाप् ।) कङ्कुः अस्य गुणाः । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वम् । वायुवर्द्धकत्वम् । पुष्टिकारित्वम् । गुरुत्वम् । भग्नसन्धानकारित्वञ्च । इति राजवल्लभः ॥

कङ्कुनी, स्त्री, (कंङ्गवा नीयते कङ्कुशब्देन ज्ञायते इत्यर्थः । कङ्क + नी + बाहुलकात् कर्म्मणि डः । गौरादित्वात् ङीष् ।) धान्यविशेषः । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ कङ्गुः ३ चीनकः ४ पीततण्डुलः ५ अत्यन्तसुकुमारः ६ । अस्या गुणाः । मधुरत्वम् । रुचिकारित्वम् । कषायत्वम् । स्वादुत्वम् । शीतलत्वम् । वातकारित्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । भग्नास्थिबन्धकारित्वञ्च । इति राजनिर्घण्टः ॥

कङ्कुनीपत्रा, स्त्री, (कङ्कुन्याः पत्रमिव पत्रमस्याः ।) पण्यान्धाढ्यम् । इति राजनिर्घण्टः ॥

कङ्कुलः, पुं, (कङ्कुं जाति गृह्णाति अनेन कङ्कु + ला + बाहुलकात् घञर्थे करणे कः ।) पाणिः । इति शब्दचन्द्रिका ॥

कच रवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कचति । रवः शब्दः । इति दुर्गादासः ॥

कच इ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-परं बन्धे सकं दीप्तौ अकं-इदित्-सेट् ।) इ कचति । इति दुर्गादासः ॥

कच उ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं बन्धे सकं दीप्तौ अकं-सेट् ।) उ कचते कचते । त्विट् दीप्तिः । इति दुर्गादासः ॥

कचः, पुं, (कचते शोभते शिरसीति । कच् + घञ् अच् । कच्यते बध्यते इति कच बन्धे + कर्म्मणि अप् वा ।) केशः । इत्यमरः ॥ २ । ६ । ८५ ॥ (यथा, महाभारते १ । १२८ । १६ ॥)
"कचेषु च निगृह्यैतान् निविकृष्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ दृढमानुशिरोरुहान्" ॥)
बृहस्पतिपुत्रः । (कचते दीप्यते तपस्तेजसेति कच् + दीप्तौ + घञर्थे क । पुरा किल सुरासुरसंग्रामे असुराणां यानेव देवा निजघ्नुस्तांश्चासुरगुरवस्तेषां सञ्जीवनीविद्यया पुनर्जीवयामास । सुरगुरवेऽहस्पतिः पुनस्तद्विद्याभिज्ञतया सुरान् रणनिहतान् जीवयितुं न शशाक । तद्दर्शनभीता देवा गुरुसुतं कचमुपागम्य अर्थ्यामिर्वाग्भिः सन्तोष्य तं सञ्जीवनीलाभाय शुक्रसकाशं प्रेरयामासुः । कचोऽपि सुरकार्य्यसिद्धये गुरुत्वेनाङ्गीकृत्य नितरां भक्त्या परिचर्य्यया च काव्यं परितोषयन् ब्रह्मचर्य्यमालम्बाधीतवान् । क्रूरप्रकृतयो दैत्याः खलु कचाभिसन्धिं विज्ञाय तं वारद्वयं निहत्यापि यदा पूर्णकामा नासन् तदा भूयोऽपि तन्मांसादिकं लवशः कृत्वा शुक्रमेव सुरयासह भोजयामासुः शुक्रस्तु स्वदुहितुर्देवयान्याः सस्नेहनिर्ब्बन्धातिशयेन खोदरगतं कचं सञ्जीवनीविद्यां प्रदायाजीवयत् । ततः प्राप्तजीवः कृतार्थश्च कचोऽतीवहृष्टचित्तया देवयान्या पतित्वेन अनुरुद्धोऽपि सम्बन्धानुरोधात् नैव स्वीचकार । सुतरां क्रोधपरतन्त्रया तया निष्फलविद्यो भवेत्यभि-

कच्चरं

शप्रभृतेनापि त्वमपि क्षत्रियभार्य्या भविष्यसीति शप्ता देवयानी । एतद्विवरणं सविस्तरं महाभारतीयसम्भवपर्व्वणि १ । ७६ अध्याये दर्शनीयम् ॥ बन्धः । शुष्कव्रणः । इति मेदिनी ॥ मेघः । इति शब्दमाला ॥

कचङ्गलं, क्ली, (कचस्य जनकोलाहलरवस्य अङ्गनम् । प्रकम्ध्वादित्वात् सन्धिः ।) विक्रयस्थानम् । तत्पर्य्यायः । निर्मुटः २ पण्याजिरम् ३ । इति त्रिकाण्डशेषः ॥

कचङ्गलः, पुं, (कच्यते बध्यते वेलया अथवा कच्यते आत्मानं वेलाभूमिं न लङ्घयतीति यावत् बाहुलकात् अङ्गलच् ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कचपं, क्ली, (कच्यते शोभते । "उषिकटिदलिकचिखजिभ्यः कपन्" इति उणां । ३ । १४२ । कच + कपन् ।) द्यूतम् । शाकपत्रम् । इत्युणादिकोषः ॥

कचपक्षः, पुं, (कचानां केशानां पक्षः समूहः ।) केशसमूहः । इत्यमरः ॥ २ । ६ । ८८ ॥

कचपाशः, पुं, (कचानां केशानां पाशः । समूहः ।) केशसमूहः । इत्यमरः ॥ २ । ६ । ८८ ॥

कचमालः, पुं, (कचं कचवत् वर्णं मलते धारयतीति । कच + मल् + कर्म्मण्यण् ।) धूमः । इति हारावली ॥ खतमाल इति च पाठः ॥

कचरिपुफला, स्त्री, (कचस्य रिपुः फलमस्याः ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

कचहस्तः, पुं, (कचानां हस्तः समूहः ।) केशसमूहः । इत्यमरः ॥ २ । ६ । ८८ ॥

कच्चा, स्त्री, (कच्यते बध्यते लौहशृङ्खलादिभिरिति यद्वा कच्यते शोभते राजगृहे इति ।) कच + अच् + टाप् ।) हस्तिनी इति मेदिनी ॥ शोभा । इति शब्दरत्नावली ॥

कचाकु, त्रि, (कच इव अकति वक्रं गच्छति । अक + उन् ।) दुराधर्षम् । दुःशीलम् । इति मेदिनी ॥

कचाकुः, पुं, (कच इव कचनिर्म्मितवेणीवत् अकति कौटिल्यं यथा तथा गच्छतीति अक + उन् ।) सर्पः । इति मेदिनी ॥

कचाटुरः, पुं, (कचवदटति मेघवत् शून्ये विहरतीति । कच + अट् + उरच् ।) पक्षिविशेषः । डाक् इति भाषा । तत्पर्य्यायः । शितिकण्ठः २ दात्यूहः ३ काकमर्दुकः ४ । इति त्रिकाण्डशेषः ॥

कचामोदं, क्ली, (कचं आमोदयतीति-आ-मुद्-णिच्-अच् ।) वालकम् । इति राजनिर्घण्टः ॥ बाला इति भाषा ।

कचुः, स्त्री, (कच्यते शोभते । कच् + उन् ।) कञ्ची । स्वनामख्यातगुल्मः । इति शब्दरत्नावली ॥ मूलशाकविशेषः । यथा,—

"कदली दोडिमी खाद्यं हरिद्रा माणकं कचुः ।
विल्वोऽम्लोको जयन्ती च विज्ञेया नवपत्रिका" ॥

इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

कचटं, क्ली, (कु कुत्सितं चटतीति । चट् + अच् । बाहुलकात् कोः कत् । कुत्सितम् ।) जलपिप्पली । इति वैद्यकम् ॥

कचरं, त्रि, (कु कुत्सितं चरतीति । कु + चर + अच् कोः कदादेशः । अथवा चरेष्टः ।) मलिनम् । इत्यमरः ॥ ३ । १ । ५५ । कुत्सितम् । इति मेदिनी ॥

कचरं, क्ली, (कु कुत्सितं चर्य्यते आचर्य्यते यत् यद्वा केन जलेन चर्य्यते व्यवक्रियते यत् एषोदरादित्वात् चकारस्य द्वित्वम् ।) तक्रं । इति मेदिनी ॥

कचित्, य, (कच चिच्च अनयोः समाहारः । कोः कदादेशः । अथवा कान्यते इति कद् चीयते निश्चीयते यस्मात् । कम + क्विप् । चि + क्विप् ततः एषोदरादित्वात् मस्य दकारत्वम् ।) कामप्रवेदनम् । इष्टपरिप्रश्नः । इत्यमरः । ३ । ४ । १ । यथा, "कच्चित् जीवति मे तातः" ॥ (तथा, रघुः । ५ । ५ । "आपद्यते न व्ययमन्तरायैः
कच्चिन्महर्षे स्त्रिविधं तपस्तत्" ॥)

कच्छः, पुं, (केन जलेन छृणाति दीप्यते क्षाद्यते वा, उच्छृदिर दीप्तिदेवनयोः छृद् वा अन्येभ्यपि इति डः । कं जलं च्यति परिक्षिनत्ति इति वा, छो छेदने + आतोऽनुपेति कः" । ३ । २ । ३ । इति कः ।) अनूपप्रायस्थानम् । इत्यमरः । २ । १ । २ । काछाड् इति भाषा । (यथा, किराते १२ । ५४ ।
"कच्छान्ते सरसरितो निधाय सेना-
मन्वीतः स कतिपयैः किरातवर्य्यैः" ॥)
सिन्धूनां सरसाञ्च प्रान्तभागः । इति मधुः ॥ जलाशयप्रान्तदेशः । इति रमानाथः । नदीपर्व्वतादिसमीपम् । इति साङ्ख्यः ॥ (यथा महाभारते । १ सम्भवपर्व्वणि शाकुन्तले ७० । १६ । "नदीकच्छोद्भवं कान्तमुक्षितध्वजसन्निभम्" ॥)
तुन्नरुक्षः । इत्यमरः । २ । ४ । १२८ तुंद इति भाषा । परिधानाञ्चलम् । इत्यमरमेदिनीकरौ ॥ काछा कौंचा कँड़सी इतिभाषा । श्रोणस्य पर्य्यायः । कक्षा २ कक्ष्या ३ कक्षोटिका ४ । इति हेमचन्द्रः ॥ कक्षटिका ५ कक्षाटिका ६ । इति शब्दरत्नावली ॥ नौकाङ्गम् । इति हेमचन्द्रः ॥ (देशविशेषः । यथोक्तञ्च ।
"गङ्गेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे ।
कच्छदेशः समाख्यातस्तत्रे श्रीशङ्किसङ्गमे" ॥)

कच्छः, त्रि, (केन जलेन छृणाति दीप्यते इति । छृद् + बाहुलकात् डः ।) जलप्रान्तः । इति नानार्थे अमरः ॥

कच्छटिका, स्त्री, (कच्छं कच्छस्थं अटति प्राप्नोति शकन्ध्वादित्वात् अलोपे सन्धिः । अट् अच् संज्ञायां कन् अत इत्वं च । यद्वा कच्छेन पश्चाद्भागस्थवस्त्राञ्चलविशेषेण अश्यते प्राप्यते ज्ञायते वा अट् कर्म्मणि अप् । ततः कन् इत्वं च ।) कच्छः । इति शब्दरत्नावली । काछा इति भाषा ॥

कच्छपः, पुं, (कच्छं आत्मनो मुखसम्पुटं पाति स हि किञ्चिददृश्य शरीरे एव मुखसम्पुटं प्रवेशयति सम्पुटे हि कच्छशब्दः प्रसिद्धः । यद्वा कच्छे अनूपदेशे पाति आत्मानं रक्षतीति । कच्छ + पा + कर्त्तरि डः ।) स्वनामख्यातजलजन्तुः । काछिम् इति भाषा । तत्पर्य्यायः । कूर्म्मः २ कमठः ३ । इत्यमरः ॥ १ । १० । २१ । गूढाङ्गः ४ धरणीधरः ५ कच्छेशः ६ पल्वलावासः ७ कठिनपृष्ठकः ८ । पञ्चनखः ९ क्रोडाङ्गः १० । इति शब्दरत्नावली ॥ पञ्चनखः ११ गुह्यः १२ पीवरः १३ जलगुल्मः १४ । इति जटाधरः । अस्य मांसगुणाः ।
वातहरत्वम् । शुक्रवर्द्धकारित्वम् । चक्षुर्हितत्वम् । बलवर्द्धनत्वम् । मेधास्मृतिकारित्वम् । पथ्यत्वम् । श्लेष्मदोषनाशित्वञ्च । तस्य चर्म्म पित्तनाशकम् । पादः कफहारकः । अण्डं स्वादु वाजीकरञ्च ॥ (अवतारविशेषः । यथा भागवते ८ । ७ । १० ।
"सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्गपृष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥)
नन्दीवृक्षः । इति राजनिर्घण्टः । कुबेरस्य निधिविशेषः । मक्षस्य बन्धविशेषः । इति मेदिनी ॥ मदिरायन्त्रविशेषः । इति शब्दचन्द्रिका ॥ (ऋषिविशेषः स तु विश्वामित्रपुत्रः ॥ यथा हरिवंशे २७ । ४७ — ५० ॥
"विश्वामित्रस्य पुत्रास्तु देवराजादयः स्मृताः ।
विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु ॥
देवश्रवाः कतिश्चैव यस्मात् कात्यायनाः स्मृताः ।
शालावत्यां हिरण्याक्षो जज्ञे रेणौ तु रेणुमान् ॥
साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुताः ।
मधुच्छन्दादयश्चैव देवलश्च तथाष्टकः ॥
कच्छपः पूरितश्चैव विश्वामित्रस्य वै सुताः ।
तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां" ॥
नागविशेषः । यथा महाभारते १ । १२३ । ६८ ।
"कर्क्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गमः ।
कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरगः" ॥)

कच्छपिका, स्त्री, (कच्छेन पातीति कच्छ + पा + डः + स्वार्थे कन् । अत इत्वं टाप् च । कफवाताभ्यां जातानि कच्छप इव पञ्च षट् वा दारुणानि उन्नतानि यस्यां संज्ञायां कन् टापि इत्वं च ।) क्षुद्ररोगविशेषः । तस्य लक्षणम् ।
"ग्रथिता पञ्च वा षड्वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यां जातायां पिड़का ज्ञेयाः कच्छपिका बुधैः" ॥
प्रमेहोपेक्षया जातदृश्यपिड़कान्तर्गतपिड़काविशेषः । तस्य लक्षणम् ।
"सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः" ।
इति सुश्रुतः ॥
("अवगाढ़ार्त्तिनिस्तोदा महावास्तुपरिग्रहा ।
मृद्वण्डा कच्छपपृष्ठाभा पिड़का कच्छपी मता" ॥
इति चरकः ॥ चिकित्सा तु कच्छपशब्दे द्रष्टव्याः ॥)

कच्छपी, स्त्री, (कच्छं कच्छेन वा पाति । पा + सुपीति कः । ३ । २ । ४ । अथवा कच्छेन पिबति । अत्र तु गापोष्टक् न पिबतेः सुराशीध्वोरिति वचनात् ङीषेरिति ङीष् । ४ । १ । ६३ ।) कूर्म्मी । तत्पर्य्यायः । डुलिः २ दुलिः ३ कमठी ४ । वीणाविशेषः । सा तु सरस्वतीवीणा । इत्यमरः ॥ ३ । ३ । १३१ । क्षुद्ररोगविशेषः । इति मेदिनी । कच्छपिकारोगः । तच्चिकित्सा यथा,
"कच्छपीं खेदयेत् पूर्व्वं तत एभिः प्रलेपयेत् ।
कल्कीकृतैर्निशाकुष्ठसितातागरदारुभिः ॥

तां पक्वां साधयेच्छीघ्रं भिषग्व्रणचिकित्सया" ॥
इति भावप्रकाशः ॥

कच्छरुहा, स्त्री, (कच्छे रोहति या। कच्छ + रुह् + इगुपधेति कः। ३। १। १३५। स्त्रियां टाप् च।) दूर्व्वा। इति शटाधरः ॥

कच्छा, स्त्री, (कच्छं पश्चात्प्रदेशं छादयतीति। छद् + णिच् + डः एषोदरादित्वात् ह्रस्वः। टाप् च। कच्छाद्यतेऽनया वा।) परिधानापरावस्त्रम्। इति हेमचन्द्रः ॥ चीरिका। भिँभी धोका इति भाषा। वागड़ी। इति मेदिनी ॥

कच्छाटिका, स्त्री, (कच्छ एव स्वार्थे अटन् ततः स्वार्थे कन् टाप् च।) कच्छटिका। इति शब्दरत्नावली ॥

कच्छुः, स्त्री, (कर्षति देहं। कष हिंसायां + "कषेश्छश्चेति"१।८६। उणां ऊ छान्तादेशश्च।) एषोदरादित्वात् वा ह्रस्वः। रोगविशेषः। तस्य लक्षणम्।

"सूक्ष्मा बह्व्यः पिड़काः सावयव्यः
पामेत्युक्ता कण्डूमत्यः सदाहाः।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरत्यङ्गिचोच्चैः" ॥

इति निदानम् ॥ तच्चिकित्सा यथा।

"अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम्।
नाशयेत् सार्षपं तैलं पामाकच्छूविचर्चिकाम्" ॥

इति अर्कतैलम् ॥१॥

"मनःशिलालं कासीसं गन्धाश्मा सिन्धुजन्म च।
स्वर्णक्षीरी शिलाभेदी सुराष्ट्री कुष्ठञ्च मागधी ॥
लाङ्गलीरसयोश्चैव दद्रुघ्नः क्षमिहानलः।
दन्ती निम्बदलैश्चैभिः पृथक् कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम्।
अर्कक्षीरद्रुदुग्धेन पृथक् पलमितेन च ॥
गोमूत्रस्याढकेनापि प्रत्नैर्मृद्वग्निना पचेत्।
अभ्यङ्गेन हरेदेतत् कच्छूदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं त्वग्व्याधिबधिरामयान्।
कच्छुराक्षसनामेदं तैलं हारीतभाषितम्" ॥
कच्छुराक्षसनाम तैलम् ॥२॥ इति भावप्रकाशः ॥
("अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम्।
मार्गिमध्येन तुल्यांशं मस्तुकाम्लिकपेषितम्।
कच्छुं कण्डूं जयत्युग्रां सिद्धतैलप्रयोगराट् ॥
कोमलं सिंहास्यदलं सनिम्बं सुरभिजलेन पिष्टम्।
दिवसत्रयेण नियतं क्षपयति कच्छुं विलेपनतः।
हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम्।
पिबेन्नरः कामचारी कच्छुपामाविनाशनम् ॥
प्लीहयकृद्व्रणयहरी गुल्मभेदकफापहा।
कच्छुपामाहरी चैव पथ्या गोमूत्रसाधिता ॥*॥
खरसेऽपि च दूर्व्वायाः पचेत्तैलं चतुर्गुणम्।
कच्छूर्विचर्चिका-पामा अभ्यङ्गादेव नाशयेत्" ॥

इति दूर्व्वाद्यं तैलम् ॥*॥

"सोमराजी हरिद्रे द्वे सर्षपारग्वधं गदम्।
नक्तमालीजैडगजं गर्भं दत्त्वा विपाचयेत् ॥
तैलं सर्षपसम्भूतं गाड़ीदुग्धप्रमापकम्।
अनेनाशु प्रणश्यन्ति कुष्ठान्यष्टादशैव तु ॥
नीलिकापि पुरोथ्यङ्गगम्भीरं वातशोणितम्।
कण्डूकच्छूप्रशमनं कच्छुपामा विनाशनम्" ॥

इति सोमराजीतैलम् ॥*॥

इति चक्रपाणिदत्तसंग्रहः ॥)

कच्छुघ्नी, स्त्री, (कच्छुं हन्ति या। कच्छु + हन् + टक् + ङीप्।) पटोलः। इषुधामेदः। इति राजनिर्घण्टः ॥

कच्छुरः, त्रि, (कच्छूरस्यास्य। "कच्छ्वा ह्रस्वश्चेति"रः। ह्रस्वश्च। पा। ५। २। १०७। वार्त्तिके।) कच्छुरोगयुक्तः। खोसरोगी इति भाषा। तत्पर्य्यायः। पामनः २। इत्यमरः ॥ २। ६। ५८
पुंश्चलः। इति मेदिनी ॥

कच्छुरा, स्त्री, (कच्छुं कण्डूरोगं राति ददातीति। आत इति कः। टाप् च। एषोदरादित्वात् ह्रस्वः पूर्ब्बस्य। यद्वा कच्छूः साध्यत्वेनास्ति अस्यां ह्रस्वश्चेति केयाच्छिम्बतम्।) शूकशिम्बी। शटी। दुरालभा। इति मेदिनी ॥ यवासः। इति राजनिर्घण्टः ॥ ग्राहिणीवृक्षः। इति रत्नमाला ॥ छी गइ इति भाषा ॥

कच्छूः, स्त्री, (कषति हिनस्ति देहं "कषेश्छश्च"। इति ऊः। १। ८६। उणां।) रोगविशेषः। खोस् पाँचड़ा इति भाषा। तत्पर्य्यायः। पामः २ पामा ३ विचर्चिका ४। इत्यमरः ॥ २। ६। ५६ ॥

कच्छूमती, स्त्री, (कच्छूः साधनत्वेनास्त्यस्यां अस्यर्थे मतुप् ततो ङीप्।) शूकशिम्बी। इति शब्दचन्द्रिका ॥

कच्छोटिका, स्त्री, (कच्छ + अटन् वा कन्। अत इत्वं टाप् च। एषोदरादित्वात् ओकारादेशः।) कच्छः। इति हेमचन्द्रः। काछा इति भाषा ॥

कच्छोरं, क्ली, (केन शिरसा शरीरेण वा कुर्य्यते लिप्यते इति। क + कुर लेपे + कर्म्मणि घञ्।) शटी। इति रत्नमाला ॥

कच्ची, स्त्री, (कचते दीप्यते ग्रोभते। कच् उन्। ततः कचुशब्दात् ङीप्।) कन्दविशेषः। कचु इति ख्याता। तत्पर्य्यायः। वितण्डा २। इति शटाधरः ॥ अस्या गुणाः। भेदकत्वम्। गुरुत्वम्। कटुत्वम्। आमवातपित्तकारित्वम्। पिच्छिलत्वञ्च। इति राजवल्लभः ॥
("कच्ची सरा गुरुः सामवातक्षत् कटुपित्तला" ॥ इति वैद्यकदव्यगुणे ॥) कचु इति हिन्दीभाषा ॥
"महिषासुरयुद्धेषु कचीरूपासि सुव्रते।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे" ॥
इति शारदीयदुर्गार्चापद्धतिः ॥

कज, इ रुहे। जन्मनि। सौत्रधातुरयम्। इति कविकल्पद्रुमः ॥ इ कल्लारः। रुहो जन्म। छन्दोऽनुभावे इति भावे कः। इति दुर्गादासः ॥

कजं, क्ली, (के जले जायते जातं वा। ज + कर्त्तरि + डः।) कमलम्। इति राजनिर्घण्टः ॥

कज्जलं, क्ली, (कु कुत्सितं जलं यस्मात् सुभगमपि जलं संयोगात् स्वदर्शनं नयतीति यावत् यद्वा कुत्सितं ऊर्द्ध्वगं चक्षुर्योर्जलं दूरीभूतं भवत्यस्मात्। कोः कादेशः।) अञ्जनम्। इति हेमचन्द्रः ॥ काजल इति भाषा। तत्पर्य्यायः। लोचकः २। इति चिकित्साशब्दसंग्रहः ॥
("ततः साकारयद्भूरि चेटीभिः कुङ्कुमस्थितम्।
कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितम्" ।
इति कथासरित्सागरे। ४। ४७ ॥ तथा, भागवते ६। २। २७।
"धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्" ॥)

कज्जलः, पुं, (कत् कुत्सितं यथा तथा जालयति आच्छादयति व्याप्तपादिकं। यद्वा कुत्सितमपि लतागुल्मादिकञ्चेति यावत् जालयति जीवयति वर्द्धयतीति शेषः। कु + जल + णिच् अच् ततो ह्रस्वः।) मेघः। इति शब्दमाला ॥

कज्जलध्वजः, पुं, (कज्जलं ध्वज इव यस्य।) दीपः। इति चिकित्साशब्दसंग्रहः ॥

कज्जलरोचकः, पुं क्ली, (कज्जलं रोचयति। दीपेनोद्भासयति। कज्जल + रुच् + णिच् ततोऽच् स्वार्थे कन्। ण्वुल् वा।) दीपाधारः। पिलसुज् देरको इत्यादि भाषा। तत्पर्य्यायः। कौमुदीवृक्षः २ दीपवृक्षः ३ शिखातरुः ४ दीपध्वजः ५। इति शटाधरः ॥ ज्योत्स्नावृक्षः ६। इति चिकित्साशब्दसंग्रहः ॥

कज्जली, स्त्री, (कु कुत्सितं जलति जीवतीति। जल + टक् ङीप् च कोः कत्। यद्वा कुत्सितं रोगयुक्तम् जालयति आरोग्यं नयति। जल + णिच् + अच् गौरादित्वात् ङीष् ह्रस्वश्च। यद्वा कज्जलमिवाचरतीति कृ + जल + क्विप् + अच् ङीष् च।) मत्स्यविशेषः। तत्पर्य्यायः। कज्जला २ अनन्ता ३ इति शब्दरत्नावली ॥ मिश्रितरसगन्धकम्। (यथा
"गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्बिधक्।
कज्जलाभो यथा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः।
असौ रोगचयं हन्यादनुपानस्य योगतः" ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

कज्जलं क्ली, (कं ऊर्द्ध्वगतं चक्षुर्योर्जलं चक्षुरोगविशेषं ज्वालयति ग्रोषयति नाशयतीति यावत्। ज्वल + णिच् + अच् ह्रस्वश्च।) कज्जलम्। इति चिकित्साशब्दसंग्रहः ॥

कज्झटं, क्ली, (कचते दीप्यते लतादामादिभिः ग्रोभते इति भावः। कचि + अटच्।) जलजशाकविशेषः। काँचड़ादाम इति भाषा। तत्पर्य्यायः। जलभूः २ लाङ्गली ३। इति शब्दचन्द्रिका ॥ शारदी ४ तोयपिप्पली ५ शकुलादनी ६। इति रत्नमाला ॥ जालतगुलीयम् ७। इति भावप्रकाशः ॥ तस्य गुणाः। श्लेष्मकारित्वम्। धारकत्वम्। हिमत्वम्। पित्तरक्तनाशित्वम्। लघुत्वञ्च। इति राजवल्लभः ॥ अपि च। तिक्तत्वम्। वायुहरत्वञ्च। इति भावप्रकाशः ॥

कज्झड़ः, पुं, (कचते वध्नाति मध्यगतं मनुष्यादिजीवम्। कचि धातोरड़न् वाऊलकात् इदित्वान्नुम्। कज्झते ग्रोभते वा।) कज्झटप्रभेदः। तत्पर्य्यायः। कज्झटः २ काचः ३ चक्रमर्दः ४ अम्बुपः ५। इति शब्दचन्द्रिका ॥

कज्झारः, पुं, (कचेर्भावे घञ् कज्झं प्रकाशं तं अटच्छति प्राप्नोतीति ऋ + कर्म्मण्यण्। अथवा कं पृथ्वीं चारयति चालयति यद्वा कं जलं चारयति निजरश्मिभिरितिशेषः। कचि + णिच् अच्। कर्म्मणि उपपदे अण् वा।) सूर्य्यः। इति शटाधरः ॥

कञ्चुलि

कञ्चिका, स्त्री, (कञ्चते वेष्टो प्रकाशते। कचि + ण्वुल् स्त्रियां टाप् इत्वञ्च।) वेशशाखा। कञ्ची इति भाषा। तत्पर्य्यायः। कुञ्चिका २ क्षुद्राणुः ३। इति शब्दचन्द्रिका॥ क्षुद्रस्फोटः। इति वैद्यकम्॥

कञ्चुकः, पुं, (कञ्चते आपुच्छात् सर्पशरीरमुखपर्य्यन्तं व्याप्तो दीप्यते प्रकाशते ग्रीष्मे वा कञ्चते आच्छादयति शत्रुनिक्षिप्तास्त्रादिनिवारणाय। कचि + बाहुलकादुकन्।) सर्पत्वक्। सापेर खोलोस इति भाषा। तत्पर्य्यायः। निर्म्मोकः २।

(यथा पञ्चतन्त्रे। १। ६६।

"भोगिनः कञ्चुकाविष्टाः कुटिला क्रूरचेष्टिताः।
सदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव" ॥)

भटादेस्त्वोलाङ्गतिसन्नाहः। साँजोया इति भाषा। तत्पर्य्यायः। वारवाणः २ वाणवारः ३। इत्यमरभरतौ॥ (तथा हि रामायणे ६। ६६। २३।

"कञ्चुकोष्णीषिणस्तत्र वेत्रकर्कशपाणयः।
उत्सारयन्तः सहसा समन्तात्परिचक्रमुः" ॥)

चोलकम्। काँचलि इति भाषा। तत्पर्य्यायः। चोलः २ कञ्चुलिका ३ कूर्पासकः ४ अङ्गिका ५। वर्द्धापकस्यहीताङ्गस्थितवस्त्रम्। इति हेमचन्द्रः॥ (यथाऽमरशतके ८२।

"सख्यः किं करवाणि यान्ति
शतधा यत् कञ्चुके सन्धयः" ॥)

वस्त्रम्। इत्युणादिकोषः॥ (यथा भागवते ८।७ १५।

"देवांश्च तत्प्रभाप्रुषिताहतप्रभान्
धर्म्माम्बरस्रग्वरकञ्चुकाननान्" ॥)

कञ्चुकालुः, पुं, (कञ्चुकोऽस्यास्य। कञ्चुक + आलुच्।) सर्पः। इति शब्दचन्द्रिका॥

कञ्चुकी, [न्] पुं, (कञ्चुकोऽस्यास्तीति। कञ्चुक + अस्त्यर्थे इनिः।) महत्तरत्वकः। अन्तःपुराध्यक्षः। स तु वर्षाधरसम्भवस्त्रीणां पुरस्त्रीणां प्रेक्षकपुरुषान्तरवारणाय राज्ञा स्त्रागारे यो वेत्रधरो नियुक्तः। तत्पर्य्यायः। सौविदल्लः २ स्त्रापत्यः ३ सौविदः ४। इत्यमरः॥ २।८। ८॥ (यथा रत्नावलीनाटिकायां २ अङ्के।

"नहं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"॥

अस्य कञ्चुमुल्लं भरतेन।

"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते" ॥)

यवः। चणकः। सर्पः। इति राजनिर्घण्टः॥ विष्कः। जोङ्गकद्रुमः। इति मेदिनी॥

कञ्चुकी, स्त्री, (कञ्चयति शरीरकान्त्यादिकं प्रकाशयति रोगादिकमुपशमयति वा। कञ्च णिच् बाहुलकादुकन् गौरादित्वात् ङीष् जातिवाचकत्वात् ङीप् वा।) औषधिभेदः। इति मेदिनी॥ क्षीरीवृक्षः। इति रत्नमाला॥

कञ्चुलिका, स्त्री, (कञ्चते हृदयाद्यङ्गान्याच्छादयतीति। कचि + उलच् + स्वार्थे कन् गौरादित्वात् ङीष् ह्रस्वः। टाप् च।) कञ्चुकः। स्त्रीणामङ्गरक्षिणी। इति हेमचन्द्रः॥ काँचुलि इति भाषा॥

(यथा अमरशतके। २३। "त्वं मुग्धाक्षि विनैव-

कटः

कञ्चुलिकया धत्से मनोहारिणीम्।)

कञ्जं, क्ली, (कम् क्षीरोदधौ जायते सागरस्यापि जलमयत्वात् तदति इति सूच्यते। कम् जले जातम्। जनेः कर्त्तरि डः।) अमृतम्। पद्मम्। इति मेदिनी॥ (यथा, भागवते। ८। ६। ३।

"विरिञ्चो भगवान् दृष्ट्वा सह पुत्रैर्व्वेण तां तनुम्।
स्वच्छामरकतश्यामां कञ्जगर्भारुणेक्षणाम्" ॥)

कञ्जः, पुं, (कम् के जले शिरसि च जायते। जनेर्डः।) ब्रह्मा। केशः। इति मेदिनी॥

कञ्जकः, पुं, (कञ्जते मनुष्यवत् प्रायेणोच्चारयितुं शक्नोतीति। कञ्जि + कर्त्तरि ण्वुल्।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जजः, पुं, (कञ्जात् विष्णोर्नाभिपद्मात् जातः। जन + कर्त्तरि डः।) ब्रह्मा। इति शब्दरत्नावली॥

कञ्जनः, पुं, (कं सुखं जनयतीति। कम् + जनि + अण्।) कन्दर्पः। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जरः, पुं, (कं जलं एकार्णवस्यसलिलं जरयति शोषयति। कम् ज्वलति रश्मिभिराकर्षति। कञ्जि + अरन्।) ब्रह्मा। सूर्य्यः। उदरम्। हस्ती। इत्युणादिकोषः॥

कञ्जलः, पुं, (कञ्जते उपदिष्टविषयं पठितुं शक्नोति। कञ्जि + कलच्।) मदनपक्षी। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कम् जलं शुक्लरसादिकं जारयति। कम् + जलं जारयति शोषयति रश्मिभिः। कम् एकार्णवस्यप्रलयसलिलं जारयति योगबलेन जापयति। कं जलं जारयति शोषयति सुखेनेतिशेषः। कम् + जॄ + णिच् + अण्। यद्वा "कञ्जिमृजिभ्यां चित्" । इति आरन्। ऊणां ३।१३७।) जठरम्। सूर्य्यः। विरिञ्चिः। वारणः। मुनिः। इति मेदिनी॥ (मयूरः। व्यञ्जनम्। इत्युणादिकोषः॥ ४। १३७॥ कम् जलं सागरं जारयति शोषयति गण्डूषीकृत्य योगबलेन इति विग्रहे अगस्त्यमुनिः॥)

कञ्चिका, स्त्री, (कञ्चते तरसा भूमिं भित्त्वा उत्पद्यते। कञ्जि + कर्त्तरि + ण्वुल् + टाप् इत्वञ्च।) ब्राह्मणयष्टिकाशब्दः। इति शब्दरत्नावली॥ वामनहाटी इति भाषा॥

कट गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कटति। इति दुर्गादासः॥

कट इ गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्। इ-कटयते। इति दुर्गादासः॥

कट ई गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। कटति अकटीत् अकाटीत् चकाट। ई कट्टः इति दुर्गादासः॥

कट ए शतौ। रुधि। इतिरावरत्नम्। वट् वर्त्मणम्। (भ्वां-परं-सकं-अकं च सेट्।) कटति। एदित् अकटीत् चकाट।) ए अकटीत् पटो गात्रम्। कटति मेघः। इति दुर्गादासः॥

कटः, पुं, (कटति मदवारि वर्षति यः। कट वर्षणे-कर्त्तर्य्यच्।) हस्तिगण्डस्थलम्। "कण्डू-

कटकी

यनेन कटं कदाचित् वन्यद्विपेनोन्मथिता लगस्य"। इति रघुः"। २। ३७।) कटिदेशः तत्पार्श्वश्च। किञ्जिल्कः। इत्यमरः॥ माँदुर् दरमा इत्यादि भाषा। काशादिरचितरज्जुः येन कुसूलं वेष्ट्यते। कुसूलश्च मराय इति टीकान्तरम्॥ वृक्षरचितटाटी इतिख्यात इत्यन्ये। इति तट्टीकायां भरतः॥

(यथा भागवते। १। ३। १८।

"चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम्।
ददार करजैर्वक्षस्येरकां कटकृद्यथा" ॥)

अतिशयः। प्रहरः। समयः। इति मेदिनी॥ दृढम्। इति धरणी॥ (यथा मनु २। २०४।

"गोऽश्वोष्ट्रयानप्रासादस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च" ॥

"कटेषु वृक्षादिनिर्म्मितेषु" इति कुल्लूकभट्टः॥) शवः। शवरथः। श्मशानम्। इति हेमचन्द्रः॥ तक्षितकाष्ठम्। तक्ता इति भाषा। इति शब्दरत्नावली॥ (यथा,—रामायणे। २। ५६। २१।

"तां निष्ठितां वल्कटां दृष्ट्वा रामः सुदर्शनाम्।
सुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत्" ॥

"वल्कटां वल्कवाटाम्" इति तट्टीका॥ खनामप्रसिद्धराक्षसः। यथा,—रामायणे।५। १२। १३।

"शुकनासस्य वक्त्रस्य कटस्य विकटस्य च।
रक्षसो लोमहर्षस्य दंष्ट्रालक्रखकर्णयोः" ॥)

कटः, चि, (कटयति प्रकाशयति क्रियामितिशेषः। कट् + णिच् + अच्।) क्रियाकारः। इति हेमचन्द्रः॥

कटकः, पुं क्ली, (कटति वर्षति अस्मिन् मेघ इति। अथवा कट्यते निर्गम्यते अस्मात् निर्झरिण्यादिभिः "कृञादिभ्यः संज्ञायां वुन्"। ५। ३५। उणां इति वुन्।) पर्व्वतमध्यभागः। तत्पर्य्यायः। नितम्बः २। इत्यमरः॥ २। ३। ५॥ मेखला ३ इति भरतः॥ (यथा रघुः। १६। ३१। "मार्गे विभक्ते स कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना"॥) वलयः। चक्रम्। इत्यमरः॥ २। ६। १०७। हस्तिदन्तमयूनम्। सामुद्रलवणम्। राजधानी। इति मेदिनी॥ नगरी। इति शब्दरत्नावली॥ सेना। इति हेमचन्द्रः॥ (यथा हितोपदेशे १। ३१२। "स च दिग्विजयकमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते"॥) सानुः। पर्व्वतस्य समभूभागः। इति विश्वः॥

("गिरिकूटेषु दुर्गेषु नानाजनपदेषु च।
जगाकौर्य्येषु देशेषु कटकेषु परेषु च"॥
इति महाभारतम्। ४। २४। १२।)

कटकी, [न्] पुं, (कटकोऽस्यास्य अस्त्यर्थे इनिः।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कटकोलः, पुं, (कटति वर्षति स्रवति इति। कट् + अच्। कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र। कुल संख्याने अधिकरणे घञ्।) निष्ठीवनपात्रम्। इति त्रिकाण्डशेषः॥ पिकदानी इति भाषा॥

("स्यादाचामनकः प्रोक्तः कटकोलः पतद्ग्रहः"।)
कटखादकं, त्रि, (कटं तृणादिकं सर्व्वमपि खादति इत्यर्थः। कट्+खाद्+ण्वुल्। सर्व्वभक्षम्।) खादकम्। भक्षकम्। इति मेदिनी॥

कटखादकः, पुं, (कटस्य आवरणस्य खं मध्यस्थितच्छिद्रं अत्ति। कट+ख+अद्+ण्वुल्।) काचकलसः। काकः। जम्बूकः। इति मेदिनी॥ (कटं शवं खादतीति व्युत्पत्त्या शवखादके त्रि।)

कटङ्कटः, पुं, (कटं शवं कटति च्छालया आवृणोतीति। कट+कट्+बाहुलकात् खच्।) अग्निः। यथा,—
"कटङ्कटाय भीमाय नमः पञ्चमुखाय च।
अघोरघोररूपाय घोरघोरतराय च"॥
इति वह्निपुराणे अग्निस्तवनामाध्यायः॥

कटङ्कटेरी, स्त्री, (कटङ्कटं वह्निजं सुवर्णं तत्कान्तिमितिश्लेषः ईरयति प्रापयति ज्ञापयति वात्मानं सुवर्णकान्तितुल्यपीतवर्णत्वात्। कटङ्कट+ईर गतौ+अण्। ङीप् गौरादित्वात् ङीष् वा।) हरिद्रा। इति चिकाण्डशेषः॥ दारुहरिद्रा। इति रत्नमाला॥

कटपूः, पुं, (कटे श्मशाने पवते। कटं कटेन वा पवते। पुङ् गतौ क्विप् निपातनात् दीर्घः। पां। ३। २। १७। "क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च"।) उणां २। ५७।) महादेवः। राक्षसः। विद्याधरः। अक्षदेवनः। इति मेदिनी। कीटः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटभङ्गः पुं, (कटानां शस्यानां ओषधीनामितियावत् हस्तेन भङ्गः छेदनम्। कटस्य सैन्यसंघस्य भङ्गः यस्मात् हेतोः सैन्यभङ्गस्तु राजमरणहेतुरेव।) शस्यानां हस्तच्छेदः। हात दिया शस्य छेंड़ा कुड़न इत्यादि भाषा। नृपात्ययः। राजविनाशः। इति मेदिनी॥

कटभी, स्त्री, (कटवद् भाति। कट+भा+डः। गौरादित्वात् ङीष्।) ज्योतिष्मती लता। इत्यमरः। २। ४। १५०॥ नया फटिकी इति भाषा। अपराजिता। वृक्षभेदः। तत्पर्य्यायः। नाभिका २ शौण्डी ३ पाटली ४ किणिही ५ मधुरेणुः ६ क्षुद्रश्यामा ७ कैडर्य्यः ८ श्यामला ९। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफाजीर्णरोगभ्रमताकारित्वम्। श्वेता चेत् गुणयुक्तत्वञ्च। "तत्फलं तद्गुणं श्वेतं विशेषात् कफशुक्रजित्"। इति राजनिर्घण्टः॥ (यथा भावप्रकाशे।
"कटभी तु भ्रमेहार्शोनाड़ीव्रणविषक्रिमीन्।
हन्त्युष्णा कफकुष्ठघ्नी कटुरुष्णा च कीर्त्तिता"॥)
वृक्षभेदः। काँटाशिरीष इति ख्यातः। इति रत्नमाला॥

कटमालिनी, स्त्री, (कटानां किण्वाद्योषधीनां माला साधनत्वेनास्ति अस्याः अस्त्यर्थे इनिः ततो ङीप्। मदिरामादकतायास्तु किण्वाद्योषधीगणप्रभवत्वात्। "मद्यादौ किण्वशक्तिवत्"। इति चार्व्वाकदर्शनं १ अध्यायः।) मदिरा। इति शब्दभाला॥

कटम्बः, पुं, (कटतीति "वृकदिकडिकटिभ्योऽम्बच्"। उणां। ४। ८२। इति अम्बच् धातूनामनेकार्थत्वात् अत्र वादनेऽपि।) वाद्यभेदः। (कट्यते आव्रियते शूचुरनेनेति करणे अम्बच्।) बाणः। इत्युणादिकोषः॥

कटम्बरा, स्त्री, (कटं गुणातिशयम् दधाति धारयतीति। दृ+अच्+टाप् च।) कटुकी। इत्यमरः। २। ४। ८५॥ कटम्भरा इति च पाठः॥

कटम्भरः, पुं, (कटं गुणातिशयं बिभर्त्ति। भृ+धारणपोषणयोः संज्ञायां भृतॄजिधारिसहितपिदमीति खच् मुम् च पां ३। २। ४६।) श्लोनाकवृक्षः। इति राजनिर्घण्टः॥ कटभीवृक्षः। इति वैद्यकम्॥

कटम्भरा, स्त्री, (कटं बिभर्त्ति या। भृ+खच् मुम् टाप् च।) राजबला। इत्यमरः। २। ४। १५३॥ प्रसारणी। गन्धभादालिया इति भाषा। रोहिणी। कटकी इति भाषा। हस्तिनी। कलम्बिका। गोला। वर्षाभूः। मूर्व्वा। इति मेदिनी॥

कटव्रणः, पुं, (कटः उत्कटो व्रणो युद्धकण्डूरस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥

कटशर्करा, स्त्री, (कटः नलः मिष्टरसत्वात् शर्करेव यस्याः।) गाङ्गेरीलता। इति हारावली॥ नाटा इति ख्याता।

कटाकुः पुं, (क्रटति क्षुच्छेन जीविकां निर्व्वाहयति॥ कट् क्षुच्छजीवने "कटिकथिभ्यां काकुः" उणां ३। ७७। इति काकुः।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटाच्चः, पुं, (कटावतिशयितौ अक्षिणी यत्र। कट+अक्षिन्+यच्। यद्वा कटं गण्डं अक्षति व्याप्नोति। अक्षु व्याप्तौ+अच् कर्म्मण्यण् वा।) अपाङ्गदर्शनम्। आड़चके देखन इति भाषा। इत्यमरः। २। ६। ८४॥ (यथा, मेघदूते ३७। "आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्"॥)

कटाधनं, क्ली, (कटस्य स्वनामख्यातासनस्य अयनं उत्पत्तिस्थानम्।) वीरणम्। इति शब्दरत्नावली॥

कटारः, पुं, (कटं कन्दर्पमदं ऋच्छति। कट+ऋ+अण्।) नागरः। कामी। इति शब्दमाला।

कटाहः, पुं, (कटं उत्तापादिकं आहन्ति निवारयतीति। कट्+आ+हन्+ड।) कूर्म्मकर्परः॥ दीपप्रभेदः। (कटं कटुगन्धादिकं आहन्ति तैलादिकटुगन्धः आहन्यतेऽत्र वा।) तैलादिपाकपात्रम्। (कटं शवं आहन्यतेऽसौ जायमानविषाद्याग्रमहिषीशावकः। इति मेदिनी॥ (कटः पापी आहन्यतेयत्र।) नरकः। इति हारावली॥ कर्व्वूरः। इति जटाधरः॥ कूपः। इति शब्दरत्नावली॥ (यथा सिद्धान्तकौमुद्याम्। ५। १। ५२। "प्रस्थं सम्भवति प्राप्तिकः कटाहः"॥)

कटिः, पुं, स्त्री, (कट्यते वस्त्रादिना व्रियतेऽसौ सर्व्वधातुभ्य इन् इति कट्+इन्।) शरीरावयवविशेषः। काँकालि इति भाषा। तत्पर्य्यायः। कटः २ श्रोणिफलकं ३ श्रोणी ४ ककुन्मती ५। इत्यमरः। २। ६। ७४॥ श्रोणिफलम् ६ कटी ७ श्रोणिः ८।

इति तट्टीका॥ कलत्रम् ९ कटीरम् १० काञ्ची-पदम् ११। इति हेमचन्द्रः। करभः १२। इति जटाधरः॥ अत्र पूर्व्वद्वयं कटिपार्श्वः। इति भरतः॥ (यथा, भागवते। ३। १५। २०।
"येषां दृढत् कटितटाः स्मितशोभिमुख्यः"।
दृष्ट्वात्मनां न रज आदधुरुत्स्मयाद्यैः"॥)

कटिचं, स्त्री, (कटिं चायते इति। कटि+चै+कः।) रसना। कटिवस्त्रम्। कटिवर्म्म। इति मेदिनीकरहेमचन्द्रौ॥ (यथा भागवते। ६। १६। ३०।
"मृणालगौरं श्रितिवाससं स्फुरत्
किरीटकेयूरकटिचकङ्कणम्"।)

कटिप्रोथः, पुं, (प्रोथतीति प्रोथृ+पर्य्याप्तौ एंसीति घः। कट्याः प्रोथः मांसपिण्डः।) कटिदेशस्थमांसपिण्डम्। गुदपुला पोदेर पेलो इति भाषा। तत्पर्य्यायः। स्फिक् २। इत्यमरः। २। ६। ९५॥ पूषकः ३ कटीप्रोथः ४। इति रभसः॥ कटिः ५ प्रोथः ६। इति केचित्॥ पूलः ७। इति भरतः॥

कटिरोहकः, पुं, (कटिं हस्तिपश्चाङ्गागं रोहतीति। कटि+रुह्+ण्वुल्।) हस्तिपश्चाङ्गारोहकः। इति शब्दमाला॥

कटिल्लकः, पुं, (कटति लतायां प्रकाशते उत्पद्यते वा। कट+बाहुलकादिल्लप्रत्ययः। ततः स्वार्थे कन्।) कारवेल्लः। इत्यमरः। करला इति भाषा॥

कटिशीर्षकः, पुं, (कटिः शीर्षमिव। संज्ञायां कन्।) कटिदेशः। इति हलायुधः॥

कटिशूलः, पुं, (कटिस्थः शूलः शूलरोगः।) कटिदेशस्थशूलरोगः। तस्यौषधं यथा।
"रजनीकदलीक्षारलेपः सिध्यविनाग्रनः।
कुलस्य भागमेकन्तु पथ्याभागद्वयं तथा॥
उष्णोदकेन संपीत्वा कटिशूलविनाशनम्"।
इति गारुड़े १८८ अध्यायः॥
("गुड़ूच्यारग्वधस्यैव क्वाथमेषां विपाचयेत्।
सुण्ठीचूर्णेन संयुक्तं पिबेच्छूलकटिग्रहे"॥
इति शार्ङ्गधरः॥)

कटिशृङ्खला, स्त्री, (कट्यां धार्य्या शृङ्खला। यद्वा कट्याः शृङ्खला।) चितिका। कटिधार्य्यक्षुद्रघण्टिका। इति हारावली॥

कटिसूत्रं, क्ली, (कट्यां धार्य्यं सूत्रम्। शाकपार्थिवादित्वात् मध्यपदलोपः।) कटिभूषणविशेषः। इति हलायुधः। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, भागवते। ५। ३। ४। "स्फुटकिरण प्रवरमणिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमतिकृतदरस्मितवदनपरिपोऽधना इव"॥)

कटी, [न्] पुं, (कटः गण्डस्थलं प्राशस्त्येनास्यास्तीति अस्त्यर्थे इनिः।) हस्ती। इति त्रिकाण्डशेषः॥

कटी, स्त्री (कट्यते कटुरसेषु गृह्यतेऽसौ। कट्यते आव्रियते वस्त्रादिना। सर्व्वधातुभ्यइन्। कटात् श्रोणिवचन इति गौरादिषु पाठाद्वा ङीष्।) पर्य्याय। ४। १। ४१।) पिण्डली। श्रोणिदेशः। इति मेदिनी॥ (यथा, महाभारते। १। वकवधपर्व्वणि १६४। २७।

कटु

"सद्येन च कटीदेशे गृहीत्वा वाससि पाण्डवः।
तद्रक्तो द्विगुणं चक्रे रवन्तं भैरवं रवम्" ॥)

कटीतलः, पुं, (कट्यां तलमास्पदमस्य। अस्य कटिदेशे धारणप्रसिद्धेस्तथात्वम्।) नुजानुकङ्कः। इति चिकाण्डशेषः। बाँका खाँड़ा इति भाषा॥

कटीरं, क्ली, (कट्यते आव्रियतेऽसौ वाससेतिशेषः। कट् + "कृगृपृकटिपटिशौटीभ्यः ईरन्"। उणां। ४। ३०॥ इति ईरन्।) कटिः। इति हेमचन्द्रः॥

कटीरः, पुं, (कट्यते आव्रियतेऽसौ अथवा कट्यते गम्यते अनेन। कर्म्मणि करणे वा ईरन्। उणां। ४। ३०।) जघनम्। कन्दरः। इत्युणादिकोषः॥ कटिः। इति जटाधरः॥

कटीरकः, पुं, (कटीर एव स्वार्थे संज्ञायां वा कन्।) नितम्बः। इति चिकाण्डशेषः॥

कटु, क्ली, (कटति सदाचारमाच्छादयतीति। कट् + उन्।) अकार्य्यम्। इत्यमरः। ३। ३। २५॥ दूषणम्। इति विश्वः॥

कटुः, पुं, (कटति तीक्ष्णतया रसनां मुखं वा आच्छादयति यद्वा कटति वर्षति चक्षुर्मुखनासादिभ्यो जलं स्रावयतीति। कट् + उन्। "कटिवटिभ्यां च"। उणां। १। ९।) सर्षपशेषः इत्यमरः। १। ५। ९। झाल इति भाषा॥ अस्य गुणाः कफजदोषशोथमन्दाग्निश्वित्ररोगनाशित्वम्। अस्य बह्वसेवने क्षयदाहत्वम्। वीर्य्यबलापहत्वञ्च। इति राजनिर्घण्टः॥ अपि च। आरोग्यपित्ताग्निवायुकारित्वम्। कृमिकण्डूविषरोगस्तनदुग्धमेदःस्रौल्यनाशित्वम्। लघुत्वम्। अतिशूयमत्वञ्च। अमस्तैर्य्यतालुशोषातिदाहकारित्वञ्च। इति राजवल्लभः॥ (तथा चोक्तम्। भावप्रकाशे।

"कटूरूक्षः स्तन्यमेदःश्लेष्मकण्डूविषापहः।
वातपित्तज्वदाग्नेयः शोथी पाचनरोचनः" ॥

अस्य लक्षणं यथाह वाग्भटः॥

"उद्वेजयति जिह्वाग्रं कुर्व्वन्निमिचिमां कटुः।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च" ॥

गुणकर्म्माणि च यथा, तत्रैव।

"कटुर्गलामयोदर्दकुष्ठानलसकश्वोफजित्।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः॥
दीपनः पाचनो रुच्यः शोषणोऽग्नस्य कर्षणः।
क्विनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः॥
कुरुते सोऽतियोगेन तृष्णां मुखबलक्षयम्।
मूर्च्छामाकुञ्चनं कम्पं कटीएठादिषु व्यथाम्" ॥*॥

कटुको रसो वक्त्रं शोधयति अक्षिं दीपयति, मुखं शोधयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि अलसकश्वयथूपचयोदर्द्दाभिष्यन्द-स्नेह-स्वेद--क्लेदमेदानुपहन्ति, रोचयत्यन्नं, कण्डूर्विनाशयति, व्रणानवसादयति, क्रिमीन् क्विनत्ति, मांसं विलिखति, श्लेष्मितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च॥ स एवंगुणोऽप्येकएवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पैत्तिकमुपहन्ति, रसवीर्य्यप्रभावान्मोहयति, ग्लापयति, सादयति, कर्षयति, मूर्च्छयति, नमयति, क्लमयति, भ्रमयति, कण्ठं परिदहति शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति, वाय्वग्निवाङ्ल्याद् भ्रम-मद-दवथु-क्लम्य-तोद-भेदैश्वरण-भुजपार्श्व-एष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति॥) चम्पकवृक्षः। इति शब्दचन्द्रिका॥ चीनकर्पूरः। पटोलः। कट्फलता। इति राजनिर्घण्टः॥

कटुः, स्त्री, (कट्यते कटुत्वेनास्वाद्यते इति। कट् + उ।) कटुकी। इत्यमरः॥ प्रियङ्गुवृक्षः। राजिका। इति विश्वमेदिन्यौ॥

कटुः, त्रि, (कटति परलक्ष्मीदर्शनेन क्षपयतां गच्छतीति। कट् + उः।) मत्सरः। तीक्ष्णः। इत्यमरः। ३। ३। २५॥ (यथा, महाभारते १। पौष्यपर्व्वणि ३। ५५। "क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्यैरुपहतोऽन्धो बभूव"।) कटुरसयुक्तः। (यथा, भागवते। ३। २६। ४२।

"कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा।
भौतिकानां विकारेण रस एको विभिद्यते" ॥)

सुगन्धिः। इति मेदिनी॥ (यथा, रघुः। ५। ४८।

"क्षणच्छदच्छीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्" ॥)

प्रियः। इति चिकाण्डशेषः॥ (यथा, रघुः। ६। ८५

"इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः" ॥)

दुर्गन्धः। इत्यमरटीकायां स्वामी॥

कटुकं, क्ली, (कटुकानां कटुरसानां चयं कटोः संज्ञायां कन्।) त्रिकटु। इति मेदिनी॥ तच्च शुण्ठी पिप्पली मरिचञ्च॥ (कटु एव। स्वार्थे कन्। इति विश्वे वाच्यलिङ्गः। अप्रियम्। यथा, महाभारते। २। अनुद्यूतपर्व्वणि ७७। १६।

"दुर्य्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम्।
इति सर्व्वमिदं राजन्नाकुलं प्रतिभाति मे" ॥)

कटुकः, पुं, (कटुरेव कटुकः स्वार्थे कन्।) कटुरसः। (यथा, सुश्रुते "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुको रसः" ॥) पटोलः। इति राजनिर्घण्टः॥ सुगन्धिद्रव्यम्। इति शब्दरत्नावली॥ कुटजवृक्षः। अर्कवृक्षः। इति शब्दचन्द्रिका॥ राजसर्षपः। इति हारावली॥

कटुकन्दः, पुं, (कटुः कन्दोमूलमस्य।) प्रियङ्गुवृक्षः। आर्द्रकम्। लशुनम्। इति मेदिनी॥

कटुकफलं, क्ली, (कटुकं फलमस्य।) कक्कोलकम्। इति राजनिर्घण्टः॥

कटुका, स्त्री, (कटु + संज्ञायां कन्। स्त्रियां टाप्।) क्षुद्रचक्षुर्वृक्षः। वृक्षविशेषः। कटकी इति भाषा। तत्पर्य्यायः। जननी २ तिक्ता ३ रोहिणी ४ तिक्तरोहिणी ५ चक्राङ्गी ६ मत्स्यपित्ता ७ वकुला ८। शकुलादनी ९ सादनी १० शतपर्व्वा ११ द्विजाङ्गी १२ मलभेदिनी १३ अशोकरोहिणी १४ कृष्णा १५ कृष्णभेदी १६ महौषधी १७ कट्वी १८ अम्लनी १९ काण्डरुहा २० कटुः २१ कटुरोहिणी २२ केदारकटुका २३ अरिष्टा २४ पाम्नी २५। इति राजनिर्घण्टः॥ कटम्भरा २६ कटुम्भरा २७ अशोका २८। इत्यमरः तट्टीका च॥ (अस्य गुणाः।

"कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति शब्दार्थचिन्तामणिधृतवैद्यकवचनम्॥)

अतिकटुत्वम्। तिक्तत्वम्। शीतत्वम्। पित्तरक्तदाहबलाशुक्रौचकश्वासज्वरनाशित्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः। सारकत्वम्। रूक्षत्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥ ताम्बूली। इति शब्दचन्द्रिका॥ कुक्किकवृक्षः। इति रत्नमाला॥

कटुकालाबुः पुं, (कटुका अलाबुः।) कटुतुम्बी। इति रत्नमाला॥ तित्लाउ इति भाषा॥

कटुकी, स्त्री, (कटु + स्वार्थे कन्। गौरादित्वात् ङीष्।) कटुका। इति मेदिनीशब्दरत्नावल्यौ। कट्की इति भाषा॥ (अस्या गुणाः।

"कटुकी तु सरा रूक्षा कफपित्तज्वरापहा"।
इति वैद्यकद्रव्यगुणग्रन्थे॥
"कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति भावप्रकाशः॥)

कटुकीटकः, पुं, (कटुः तीक्ष्णः दंशनेन दुःखप्रदत्वात् कीटः। ततः स्वार्थे कन्।) मशकः। इति जटाधरः॥

कटुकाण्डः, पुं, (कटुः कर्कशः काण्डः काण्डनं शब्दो यस्य।) टिट्टिभपक्षी। इति हेमचन्द्रः॥

कटुग्रन्थि, क्ली, (कटुस्तीव्रो ग्रन्थिर्मूलमस्य।) पिप्पलीमूलम्। शुण्ठी। इति राजनिर्घण्टः॥

कटुचातुर्जातकं, क्ली, (चतुर्भ्यो जातकं ततः स्वार्थे अण् ततः कर्म्मधारयः।) एलात्वक्पत्रकमरिचात्मकचतुष्कम्। इति राजनिर्घण्टः॥

कटुच्छदः, पुं, (कटुश्छदः पत्रं यस्य।) तगरवृक्षः। इति शब्दरत्नावली॥

कटुतिक्तकः, पुं, (कटुश्चासौ तिक्तश्चेति। अस्यार्थे कन्।) शुण्ठवृक्षः। इति राजनिर्घण्टः॥ भूनिम्बः। इति वैद्यकम्॥

कटुतिक्तका, स्त्री, (विपाके कटुः स्वादे तिक्ता। स्वार्थे कन्। अत इत्वम्॥) कटुतुम्बी। इति शब्दरत्नावली॥

कटुतुण्डी, स्त्री, (कटु तीव्रं तुण्डमस्याः।) लताप्रभेदः। कटुतरादि इतिख्याता। तत्पर्य्यायः। तिक्ततुण्डी २ तिक्ताख्या ३ कटुका ४ कटुतुण्डिका ५ विषा ६॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। कफवान्तिविषारोचकरक्तपित्तनाशित्वम्। सदा पथ्यत्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

कटुतुम्बी, स्त्री, (कटुश्चासौ तुम्बी चेति।) लताविशेषः। तित्लाउ इति भाषा। तत्पर्य्यायः। इक्ष्वाकुः २। इत्यमरः। २। ४। १५६॥ कटुकालाबुः ३ नृपात्मजा ४। इति रत्नमाला॥ कटुतिक्तिका ५। इति शब्दरत्नावली॥ कटुफला ६

तुम्बिनी ७ कटुतुम्बिनी ८ बृहत्फला ९ राजपुत्री १० तिक्तबीजा ११ तुम्बिका १२ ॥ अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । वान्तिकारित्वम् । श्वास-वातकासश्लेष्मव्रणशूककृमिविषनाशित्वम् । श्लेष्मन-त्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुरामिककफवार्य-नाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥ ("कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्" ॥)

कटुत्रयं, क्ली, (कटूनां कटुरसानां त्रयम् ।) त्रिकटु । इति राजनिर्घण्टः ॥ (अस्य गुणाः । "त्रयं त्रिक-टुकं जयेत् । स्थौल्याग्नि-सदन-श्वास-कास-श्लीपद-पीनसान्" ॥ इति वाभटः ॥)

कटुदला, स्त्री, (कटु दलं पत्रं यस्याः ।) कर्कटी । इति राजनिर्घण्टः । काँकुड़ इति भाषा ॥

कटुनिष्पावः, पुं, (कटुश्चासौ निष्पावश्चेति ।) नदी-निष्पावधान्यम् । इति राजनिर्घण्टः ॥

कटुपत्रः, पुं, (कटु तीव्रं पत्रं यस्य ।) पर्पटः । सिता-र्जकः । इति राजनिर्घण्टः ॥

कटुपत्रिका, स्त्री, (कटु पत्रं यस्याः । ततः कप् । अत इत्वं टाप् च ।) कारीवृक्षः । इति राजनिर्घण्टः ॥

कटुफलः, पुं, (कटु फलं यस्य । अस्य पत्रस्यतिक्तत्वेपि फले कटुपाकत्वात् ।) पटोलः । इति राजनिर्घण्टः ॥

कटुफला, स्त्री, (कटु फलं यस्याः ।) श्रीवल्लीवृक्षः । इति राजनिर्घण्टः ॥

कटुभङ्गः, पुं, (कटुः एकैकदेशभङ्गश्च यस्य ।) शुण्ठी । इति त्रिकाण्डशेषः ॥

कटुभद्रं क्ली, (कट्वपि भद्रं सेवनेन हितजनकम् ।) शुण्ठी । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति केचित् ॥

कटुमञ्जरिका, स्त्री, (कटुः तीक्ष्णा मञ्जरी अस्ति अस्याः । अच् गौरादित्वात् ङीष् संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च ।) अपामार्गः । इति राजनिर्घण्टः ॥

कटुमोदं, क्ली, (कटुरेव मोदः गन्धो यस्य तत् ।) जवादिनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥

कटुरं, क्ली, (कटति मथ्यनेन रसान्तरं गुणान्तरं वा वर्धतीति । कट + उरन् । यद्वा कथ्यते प्रकथ्यते मथ्यनात् रसान्तरेण गुणान्तरेण च प्रकाश्यते इति ।) तक्रम् । इति जटाधरः ॥ कट्वरं इत्यपि पाठः ॥

कटुरवः, पुं, (कटुः कर्कशो रवः ध्वनिर्यस्य ।) मण्डूकः । इति राजनिर्घण्टः ॥

कटुरोहिणी, स्त्री, (कटुश्चासौ कट्वी चासौ वा रो-हिणी चेति । केचित्तु कटुः सती रोहतीति + रुह + णिनिः ततो ङीप् ।) कटुकी । इत्यमरः । २ । ४ । ४५ ॥

कटुवार्त्ताकी, स्त्री, (कटुः कट्वी वार्त्ताकी ।) श्वेत-कण्टकारी । इति राजनिर्घण्टः ॥

कटुबीजा, स्त्री, (कटु बीजं यस्याः ।) पिप्पली । इति राजनिर्घण्टः ॥

कटुभद्रकाद्यं क्ली, (कटूनां भद्रकाय प्राधान्याय अञ्चति पर्य्याप्नोतीति । अञ् + अच् ।) गौरसुवर्णग्रा-कम् । इति राजनिर्घण्टः ॥

कटुस्नेहः, पुं, (कटुः तीक्ष्णः स्नेहः रसविशेषो यस्य ।) सर्षपः । इति त्रिकाण्डशेषः ॥ गौरसर्षपः । इति राजनिर्घण्टः ॥

कटूत्कटं, क्ली, (कटुषु उत्कटम् ।) आर्द्रकम् । इति रत्नमाला ॥

कटूत्कटकं, क्ली, (कटुषु उत्कटम् । ततः संज्ञायां कन् ।) शुण्ठी । इति राजनिर्घण्टः ॥

कटोरं, क्ली, (कथ्यते दृश्यते निधिक्षते वा भक्ष्यद्रव्यं यत्र । कट + अधिकरणे ओलच् । रलयोरैक्यात् लस्य रत्वम् ।) पात्रविशेषः । कटोरा इति भाषा । यथा,—मेरुतन्त्रे पञ्चमप्रकाशः ॥ * ॥

"मृत्कर्पटे संयुतकाचकूप्यां
दत्त्वा मुखं लोहपलोहसूत्रैः ।
निष्कासितो धूमरसस्तु तस्य
सौगन्धिकैः काचकटोरके यः" ॥

किञ्च ।

"रम्यान्नं देवकीदत्तं पात्रे काञ्चननिर्म्मिते ।
कटोराणां चतुःषष्टिः पात्रस्योभयतः स्थिता" ॥

इति जैमिनिभारते आश्वमेधिके पर्व्वणि ६अध्यायः ॥

कटोरा, स्त्री, (कथ्यते दृश्यते दीयते स्थाप्यते वा भक्ष्यद्रव्यादिकमस्याम् । कट + ओलच् । लस्य रत्वम् ।) खनामख्यातपात्रम् । इति ब्रह्मवैवर्त्त-पुराणम् । वाटि इति भाषा ॥

कटोलः, पुं, (कटति सदाचारं मिष्टाद्यन्नरसञ्च आद-त्तोतीति । "कपिगतिगर्ग्गिकटिपटिभ्य ओलच्" । उणा १ । ६७ । इति ओलच् ।) चण्डालः । इत्युणादिकोषः ॥ कटुरसः । इति सिद्धान्तकौमु-द्यामुणादिवृत्तिः ॥

कटोलवीणा, स्त्री, (कटोलस्य चाण्डालस्य वीणा वाद्ययन्त्रविशेषः ।) वीणाविशेषः । इति शब्द-रत्नावली । केन्दुड़ा इति ख्याता ॥

कट्फलः, पुं, (कटति कटुतया अन्यरसमाहत्तोतीति । कट् + क्विप् । कट् फलं यस्य सः ।) खनाम ख्यातफलवृक्षविशेषः । कायफल इति भाषा । तत्पर्य्यायः । श्रीपर्णिका २ कुमुदिका ३ कुम्भी ४ कैटर्य्यः ५ । इत्यमरः २ । ४ । ४० ॥ सोमवल्कः ६ ६ सोमवृक्षः ७ रोहिणी ८ । इति रत्नमाला ॥ कृष्णगर्भः ९ प्रचेतसी १० भद्रावती ११ महा-कुम्भी १२ रामसेनकः १३ कुमुदा १४ उग्रगन्धः १५ भद्रा १६ रङ्गनकः १७ लघुकाश्मर्य्यः १८ श्री-पर्णी १९ कायफलः २० परुषः २१ कुमुदी २२ । इति शब्दरत्नावली ॥ अपि च ।

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥
कट्फलस्तुवरस्तिक्तः कटुर्व्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कासश्वासज्वरोग्रदाहनाशित्वम् । रुचि-कारित्वम् । मुखरोगघ्नम्प्रदत्वञ्च । इति राजनि-र्घण्टः ॥ कफरोगनाशित्वम् । इति राजवल्लभः ॥ ("कट्फलः कफरोगघ्नः कासश्वासज्वरापहः" ॥ इति वैद्यकद्रव्यगुणाः ॥)

कट्फला, स्त्री, (कटति इति । कट् + क्विप् तदेव फल-मस्याः ।) गम्भारीवृक्षः । इति रत्नमाला ॥ बृ-हती । काकमाची । देवदाली । वार्त्ताकी । मृगे-र्व्वारुः । इति राजनिर्घण्टः ॥

कट्वङ्गः, पुं, (कटु अङ्गमस्य ।) श्योनाकवृक्षः । इत्य-मरः । २ । ४ । ५६ ॥ कटूनि उग्राणि वीर्य्यव्यञ्जकानि अङ्गानि यस्य ।) दिलीपराजः । इति त्रिकाण्डशेषः ॥

कट्वरं, क्ली, (कटति वर्द्धति रसान्तरम् । "क्वित्वर-च्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वर-कट्वरसंवदराः" उणा ३ । १ । इति कट् + वरच् । निपातनात् साधु ।) दधिसरः । इति रत्नमाला ॥ व्यञ्जनम् । इत्युणादिकोषः ॥

तक्रम् । यथा ।

"दध्नः ससारकस्याच्च तक्रं कट्वरमुच्यते" ।

इति चक्रपाणिदत्तसंग्रहे ॥

("सुवर्चिका-नागर-कुष्ठ-मूर्व्वा
लाक्षा-निशा-लोहितयष्टिकाभिः ।
तक्रं ज्वरे षड्गुणतक्रसिद्ध-
मभ्यञ्जनाच्छीतविदाहनुत् स्यात्" ॥

इति षट्कट्वरं तैलम् ॥)

कट्वी, स्त्री, (कथ्यते कटुरसतया स्वाद्यते अनुभूयते वा । कट् + उन् । ततः स्त्रियां ङीप् । वोतो-गुणवचनादिति ङीष् वा । पां । ४ । १ । ४४ ।) कटुका । लताविशेषः । तत्पर्य्यायः । कटुकवल्ली २ सकाष्ठा ३ काष्ठवल्लिका ४ सुवल्ली ५ महावल्ली ६ पशुमोहनिका ७ कटुः ८ ॥ अस्या गुणाः । मधु-रत्वम् । शीतत्वम् । कफश्वासनानाज्वरहारित्वम् । रुचिकारित्वम् । राजयक्ष्मनिवारणत्वञ्च । इति राजनिर्घण्टः ॥ (कटुकाशब्देऽस्या गुणादयो व्या-ख्याताः ॥)

कठ ङ कि आध्याने । उत्कण्ठापूर्व्वकस्मरणे इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्-इदित् ।) ङ कर्म्मणि कण्ठ्यते । कि कण्ठयति । आध्यानं स्मृ म औत्के इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

कठ तङ्गने । तङ्गनं दुःखेन जीवनम् । इति कवि-कल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कठति दीनः । इति दुर्गादासः ॥

कठ ङ ड आध्याने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट्-इदित् ।) ङ कर्म्मणि कण्ठ्यते । ड कर्त्तरि कण्ठते । "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" । इति दुर्गादासः ॥

कठः, पुं, (कठेन प्रोक्तमधीते यः । कठशाखां अभि-जानाति वा "कठचरकात् लुक्" । इति लुक् । ४ । ३ । १०७ ।) मुनिविशेषः । कठशाखाध्ययनकर्त्ता कठशाखाज्ञः । (यथा महाभारते । १ । पौलमे ८ । २४ ।

"उद्दालकः कठश्चैव श्वेतश्चैव मुनिप्रवरः" ॥

ऋग्भेदः । स्वरः ।

("कठो मुनौ तदाख्यातवेदाध्येष्टर्ष्यणोः स्वरे" ।)

इति हेमचन्द्रः ॥ ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि ।

"ईषा-क्षेत्र-कठ-प्रस्र-मुण्ड-माण्डव्य-तित्तिरि" ॥)

कठमर्दः, पुं, (कठं कण्ठजीवनं मर्दतीति। कठ मर्द + अण्।) शिवः। इति चिकाण्डशेषः॥

कठरः, त्रि, (कठ + अरन्।) कठिनः। इति जटाधरः॥

कठशाखा, स्त्री, (यजुर्वेदान्तर्गता कठेन प्रोक्ता शाखा।) यजुर्व्वेदस्य शाखाविशेषः। एतद्विवरणं वेदशब्दे द्रष्टव्यम्॥

कठाहकः, पुं, (कठं कठिनमाहन्तीति। आ + हन् + डः। कठाहः तादृशं कं शिरो यस्य।) दात्यूहपक्षी। इति शब्दरत्नावली॥

कठिञ्जरः, पुं, (कठिं कठिनं जरयति। जॄष् वयोहानौ तस्मात् अण्। षुगेदरादित्वात् साधुः। यद्वा जॄ + णिच् + बाहुलकात् + खच् मुम् च।) तुलसीवृक्षः। तत्पर्य्यायः। पर्णासः २ कुठेरकः ३। इत्यमरः। २। ४। ७९॥ ("जोगिका-जातकपर्णिका-पत्तूर-जीवक-सुवर्चला-कुरुवक-कठिञ्जर-कुन्तिका-कुरण्टिकाप्रभृतीनि"॥ इति सुश्रुते द्रष्टव्यम्॥)

कठिनं, त्रि, (कठ् + इनन्। उणादिमते तु इनच्। "बहुलमन्यत्रापि"। उणां। २। ४। ९।) कठरम्। तत्पर्य्यायः। कक्खटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९। इत्यमरः। ३। १। ७९॥ खक्खटम् १० कठोलम् ११ जरठम् १२। इति तट्टीका। कर्करम् १३ कठरम् १४। इति जटाधरः॥ काठरम् १५ कमठायितम् १६। इति शब्दरत्नावली॥ स्तब्धम्। इति मेदिनी॥ ("उन्मूलयंश्च कठिनान् नृपान् वायुरिव द्रुमान्"। कथासरित्सागरे १९। ८९॥ तथा कुमारे ४। ५। "न विदीर्य्ये कठिनाः खलु स्त्रियः"॥ अपि च "भक्ष्यांश्चातिकठिनान् दन्तरोगी विवर्जयेत्"। सुश्रुते॥)

कठिनं, क्ली, स्त्री, (कठ् + "बहुलमन्यत्रापि"। उणां २। ४९। इति इनच्।) स्थाली। इति मेदिनीशब्दरत्नावल्यौ॥

कठिनष्ठकः, पुं, (कठिनं ष्ठकमस्य। ष्ठ स्वार्थे संज्ञायां वा कन्।) कच्छपः। इति राजनिर्घण्टः॥

कठिना, स्त्री, (कठ + इनच्। स्त्रियां टाप्।) गुडशर्करा। इति विश्वमेदिन्यौ॥

कठिनिका, स्त्री, (कठ + इनच् + गौरादित्वात् ङीष् स्वार्थे कन्। टापि ह्रस्वश्च।) कठिनी। इति हारावली। खड़ी इति भाषा॥

कठिनी, स्त्री, (कठिन + गौरादित्वात् ङीष्।) खड़िका। इति मेदिनी। खड़ी इति भाषा॥ तत्पर्य्यायः। पाकशुक्ला २ श्वभिलाधातुः ३ कक्खटी ४ खटी ५ खड़ी ६ वर्णालेखिका ७। इति रत्नमाला॥ धातुपलः ८ कठिनिका ९। इति हारावली॥ (तथा च हितोपदेशे १। १८। "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य। तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम"॥)

कठिल्लः, पुं, (कठति भोजने दुःखं उद्वेगं वा जनयति। अतीवतिक्तत्वात् तथात्वं। कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः।) कारवेल्लः। इत्युणादिकोषः। करला इति भाषा॥ (वाभटे शाकवर्गाणां मध्ये गणितम्॥ यथा,—

"कठिल्लं केम्बुकं पीतं स कोशातक कर्कशम्। तिक्तं पाके कटुग्राहि वातलं कफपित्तजित्"॥)

कठिल्लकः, पुं, (कठिल्ल + स्वार्थे कन्।) कारवेल्लः। पुनर्नवा। तुलसी। इति चिकाण्डशेषः॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येतवाचित्वेन जातित्वात् ङीष्। कठप्रोक्तमधीयाना इत्यर्थः।) ब्राह्मणी। इति जटाधरः॥

कठेरः, पुं, (कठति क्लेशेन जीवति जीविकां निर्व्वाहयति। "पतिकठिकुठिगडिगुडिदंशिभ्यरक्"। उणां। १। ५९ इति रक्।) क्लेशजीवी। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कठोरः, त्रि, (कठति पारुष्यमाचरति। "कठिरकिभ्यामोरन्" उणां १। ६५। इतिकठ + ओरन्॥) कठिनः। इत्यमरः। ३। १। ७९॥ (यथा, भागवते ३। १९। १५।

"प्रहृष्टरोषः स कठोरसूचिना
नदन् प्रहृत्यान्तरधीयतासुरः"॥

दारुणः। तथाहि भागवते। ५। १३। ३।
"कठोरदंशैर्मशकैरुपद्रुतः"॥ अतिविस्तृतः। तत्रैव ६। १२। २। "युगान्ताग्निकठोरजिह्वं"॥ पूर्णः। तथाहि।

"स तप्तकार्त्तस्वरभास्वराम्बरः
कठोरतारापरिपालकानकृविः"।

इति माघः। १। २०॥ "कठोरतारापरिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः॥)

कठोलः, त्रि, (कठ + ओलच् "कपिगतिगडिकटिपटिभ्य ओलच्" उणां। १। ६७।) कठोरः। इत्यमरटीकायां नीलकण्ठः॥

कड इ ड अ दर्पे। हर्षे इत्यर्थः। इति कविकल्पद्रुमटीकायां दुर्गादासः। (भ्वां-आत्मं-अकं-सेट्-पक्षे उभं-इदित्।) इ कर्म्मणि कण्डते। अ कण्डति कण्डते। ड कण्डते जनो हृष्टः स्यादित्यर्थः। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो अकारः। अनेकार्थत्वात् तुदादावयं च। (भ्वां-आत्मं-सकं।) "कण्डते तण्डुलं लोकः"। इति दुर्गादासः॥

कड प्र अ अदने। दर्पे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-दर्पे अकं-सेट्।) प्र कड़ती कड़न्ती। प्राच्यस्तु वेदे तूच्चारणभेदार्थं भ्वादावप्येवं पठन्ति। तथा च। "कड मद इति धातुः पठ्यते भूतुदादयोः कड़ति कड़ति रूपं तुल्यमेव द्वयोः स्यात्। तदुभयगणपाठे किं पदं नेति वाच्यं स्वरकृत इह भेदः प्रत्ययोरस्ति यस्मात्" इति। स्वरकृत इति उदात्तानुदात्तस्वरितविरिञ्चिसंज्ञकचतुर्व्विधस्वरकृत इत्यर्थः। इति दुर्गादासः॥

कड इ क भेदे। रव्यशे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) इ कण्डयति। इति दुर्गादासः॥

कड़ः, त्रि, (कड़ति माद्यतीति। कड़ मदे + पचाद्यच्।) मूर्खः। इति हलायुधः॥

कड़कं, क्ली, (कण्ड्यते अद्यते इति। कड अदने + अच् संज्ञायां कन्। कर्म्मणि अप् स्वार्थे संज्ञायां वा कन्।) लवणविशेषः। करकच इति भाषा॥ तत्पर्य्यायः। सामुद्रम् २ त्रिकूटम् ३। इति रत्नमाला॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः॥

कड़ङ्गरः, पुं, (कड़ं मादकतां शक्तिं गमयति जनयति वा कड़ात् गमेर्डः। अन्तर्भूतो णिजन्तो वा।) सुराविशेषः। इत्युणादिकोषः॥

कड़ङ्करः, पुं, (कड़ात् भक्षणीयतण्डुलादेः सकाशात् ग्रियते क्षिप्यते दूरीक्रियते इति भावः। कड़ + गिरतेः कर्म्मणि खच्। यद्वा कड़ं भक्षणीयं शूकादि गिरति उद्गिरति आत्मनः सकाशात्। गॄ + अच्।) वुषं इत्यमरः। २। ९। २२। आगड़ा इति भाषा॥

("नीवारशाकादि कड़ङ्करीयै-
रास्मद्यते जानपदैर्न कश्चित्"।

इति रघुः। ५। ९॥ कड़ङ्करं वुषम् अर्हन्तीति कड़ङ्करीया इति तट्टीकायां मल्लिनाथः॥)

कड़ञ्चं, क्ली, (गद्यते सिच्यतेऽत्र जलादिकम्। गड़ + अचन् गड़ेरादेश्च कः।) पात्रविशेषः। इति उणादिकोषः॥ (गद्यते सिच्यतेऽनेन। गड़ + सेचने "गड़ेरादेश्च कः" उणाम्। ३। १०९। इति अचन् प्रत्ययः ङलयोरैकात्म्यस्मरणात् कलञ्चम्॥

कड़म्बः, पुं, (कड़ + "ककदिकड़िकटिभ्योऽम्बच्" उणाम्। ४। ८२। इति कड़धातोरम्बच् प्रत्ययः।) शाकनाड़िका। डाँटा इति भाषा॥ तत्पर्य्यायः। कलम्बः २। इत्यमरः। २। ९। ३५॥ कोणम्। प्रान्तभागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (कलम्बशब्दे विशेषो ज्ञेयः॥)

कड़म्बी, स्त्री, (कड़म्बः कलम्बो भूयसा विद्यते अस्याः। इति अर्शआदित्वात् अच् ततः गौरादित्वात् ङीष्।) कलम्बीशाकम्। इति शब्दरत्नावली॥ (कलम्बीशब्दे गुणादयोऽस्या वक्तव्याः॥)

कड़ारः, पुं, (गड़ । सेचने इति + "गड़ेः कड़ च"। उणाम्। ३। १३५। इति आरन् कड़ादेशश्च धातोः।) पिङ्गलवर्णः। तद्वर्ण्ययुक्ते त्रि। इत्यमरः। १। ५। १६॥ (यथा माघः। ५। ३।

"सविद्युरम्बरविकाशि घमूसमुत्थं
पृथ्वीरजः करभकण्ठकड़ारमाभाः"॥)

कड़ारलृणवत्क्रिवत् इत्यन्ये इति भरतः॥ दासः। इति मेदिनी॥

कड़ितुलः, पुं, (कड्यां तुला तोलनं ग्रहणं यस्य षषोदरादित्वात् टस्य डः।) खड़्गः। इति शब्दरत्नावली॥

कडु कार्कश्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टवर्गद्वतीयोपधः। क्विपि संयोगान्तलोपे कड्। कड्डति पद्मस्यानं कर्कशं स्यादित्यर्थः। इति दुर्गादासः॥

कण क्षुद आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (भ्वां-

कणाटी

परं–अकं–सेट्।) भ्वा अचीकणत् अचकाणत्। कणति भीतः। इति दुर्गादासः॥

कण, म गतौ। इति कविकल्पद्रुमः। (भ्वां–परं–सक्–सेट्–घटादि।) म कणयति। इति दुर्गादासः॥

कण, क निमीलने। इति कविकल्पद्रुमः॥ (चुरां–परं–सकं–सेट्।) निमीलनं पक्ष्मावरणम्। क काणयति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः। इति दुर्गादासः॥

कणः, पुं, (कणति अतिसूक्ष्मत्वं गच्छति। कण + पचाद्यच्।) अतिसूक्ष्मः। ("आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः"। इति शान्तिशतकम् ५॥) धान्यांशः। इत्यमरः। ३। १। ६२॥ (यथा, मनुः। ११। ६२।

"कणान् वा भक्षयेद्दध्नं पिण्याकं वा सकृन्निशि"॥) तस्य स्त्रीलिङ्गे कणी कणिका। वनजीरकः। इति राजनिर्घण्टः॥

कणगुग्गुलुः, पुं, (कणाख्यासौ गुग्गुलुश्चेति।) गुग्गुलुप्रभेदः। तत्पर्य्यायः। गन्धराजः २ सर्वकर्णः ३ सुवर्णः ४ कनकः ५ वंशप्रीतः ६ सुरभिः ७ पलङ्कषः ८॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वातश्लेष्मगुल्मोदराध्मानकफनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

कणजीरः, पुं, (कणाख्यासौ जीरश्चेति नित्यकर्म्मधारयः।) श्वेतजीरकः। इति राजनिर्घण्टः। (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः॥)

कणजीरकं, क्ली, (कणं क्षुद्रं जीरकम्। कणजीर + स्वार्थे कन्।) क्षुद्रजीरकम्। तत्पर्य्यायः। हृद्यगन्धि २ सुगन्धम् ३। इति रत्नमाला शब्दचन्द्रिका च॥

कणभक्षकः, पुं, (कणान् भक्षयति भक्षति वा। कण + भक्ष + ण्वुल्।) भारिटपक्षी। इति राजनिर्घण्टः॥

कणलाभः, पुं, (कणानां लाभो यस्मात् सः। पेषणस्वाधनयन्त्रविशेषः स सादृश्येनास्यास्य। अर्शआदिभ्यः अच्।) आवर्त्तः। इति त्रिकाण्डशेषः। जलेर घूर्णा इति भाषा॥

कणा, स्त्री, (कण + स्त्रियां टाप्।) जीरकम्। कुम्भीरमल्लिका। पिप्पली। इति मेदिनी॥ ("द्राक्षां कणां पद्ममूलं दध्याख्यञ्च पचेज्जले। तेन क्षीरं घृतं पीतं पिबेत् समधुशर्करम्"॥ इति पित्तकासचिकित्सायां वाग्भटेनोक्तम्।) श्वेतजीरकम्। इति राजनिर्घण्टः॥ ("कणा स्याद्दीर्घजीरकः"॥ इति भावप्रकाशः॥ * ॥) अल्पम्। यथा,—

"कदलीफलमध्यस्थं कणामात्रमपक्वकम्"। इति तिथ्यादितत्त्वम्॥

कणाटीनः, पुं, (कणाय भटतीति। कण + भट + इनन् दीर्घत्वञ्च पृषोदरादित्वात्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

कणाटीरः, पुं, (कणाय भटति। कण + भट + ईरन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणटक

कणाटीरकः, पुं, (कणाटीर + स्वार्थे कन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणादः, पुं, (कणं अत्ति भक्षयति। कण अद + कर्म्मणि उपपदे अण्।) स्वनामख्यातमुनिविशेषः। तत्पर्य्यायः। काश्यपः २। त्रिकाण्डशेषः॥ स च वैशेषिकदर्शनकर्त्ता। स्वर्गकारः। कलादो रत्नकारक इत्यमरोपरि कणाद इत्यपि पाठः। इति सारसुन्दरी॥

कणिकः, पुं, (कणैव इति स्वार्थे कन् अत इत्वम्।) कणा। शत्रुः। नीराजनविधिः। इति सारस्वतः॥ शुष्कगोधूमचूर्णम्। इति राजनिर्घण्टः॥ (कणा विद्यतेऽस्य अस्त्यर्थे ठन्। स्वार्थे ठन् वा। "नाभेरभूत् सकणिकाद् वटवन्महाद्रौ" इति भागवतम्। ७। ६। ३३॥ धृतराष्ट्रमन्त्रिविशेषः। यथा महाभारते। १। सम्भवपर्व्वणि १४१। २।

"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम्। कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः"॥)

कणिका, स्त्री, (कणाः सन्त्यस्याः। "अत इनठनाविति ठन्" ५। २। ११५। कणति स्थूलरूपात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः। पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च।) अत्यन्तसूक्ष्मवस्तु। अग्निमन्थवृक्षः। इति मेदिनी। कणा। तण्डुलविशेषः। इत्यमरटीकायां रायमुकुटः॥ (जलादीनां सूक्ष्मांशः। यथा, मेघदूते ६६।

"तामुत्पाप्य स्थलकमलिनीमप्रफुल्लेननीलेन प्रत्यावृत्तां सममभिनवैर्जालकैर्मालतीनाम्"॥) कणितं, क्ली, (कण आर्त्तनादे + भावे क्तः।) पीड़ितानां शब्दः। इति हेमचन्द्रः॥

कणिशं, क्ली, (कणो विद्यतेऽस्य इति इनिः तं शृणाति। कणि + शॄ + कः। यद्वा कणिनः शूरेतेऽस्मिन्। कणिन् + शॄ + डः। कणाः सन्त्यस्य इत्यमरटीका च क्षत्।) शस्यमञ्जरी। इत्यमरः। २। ६। २१। धान्यादिर शिष इति भाषा॥

कणी, स्त्री, (कण + स्त्रियां ङीष् गौरादित्वात् ङीष् वा।) कणिका। इत्यमरटीकायां भरतः॥

कणीकं, त्रि, (कण + ईकन्।) अल्पम्। इत्युणादिकोषः॥

कणीयः, [स्] त्रि, (कण + ईयसुन्।) अत्यल्पम्। इत्यमरः॥ कनिष्ठम्। इति तट्टीका॥ (यथा हठयोगदीपिकायां १।१२। "कणीयसि भवेत् खेदः कन्यो भवति मध्यमे"॥)

कणेरः पुं, (कण + एरप्रत्ययः।) कर्णिकारवृक्षः। इत्युणादिकोषः॥

कणेरा, स्त्री, (कण + एरच् + टाप् च।) वेश्या। हस्तिनी। इत्युणादिकोषः॥

कणेरुः स्त्री, (कण + एरु।) वेश्या। करिणी। कर्णिकारवृक्षे पुं। इति मेदिनी॥

कणटकः, पुं, क्ली, (कणटति इति कटि ण्वुल्। अर्द्धर्चादिपां २। ४। ३१।) क्षुद्रशत्रुः। (यथा विष्णुपुराणे १। १६। ३१। "प्रह्लादः कथ्यतां सम्यक् तथा कणटकशोधने'॥) मत्स्यादयस्थि। नैयायिकादिदोषोक्तिः। रोमाञ्चः। द्रुमाङ्कुरः। इति मेदिनी॥

कणटका

काँटा इति भाषा॥ (तथा चोक्तं चाणक्यशतके २२।

"उपकारग्रहीतेन शत्रुणा शत्रुमुद्धरेत्। पादलग्नं करस्थेन कण्टकेनेव कण्टकम्"॥) केन्द्रम्। इति दीपिका॥

कणटकः, पुं, (कटि + ण्वुल्।) सूच्यग्रम्। क्षुद्रशत्रुः। (यथा, मनुः। ६। २५२।

"सम्यङ्निविष्टदेशश्च कृतदुर्गश्च शास्त्रतः। कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्"॥) लोमहर्षः। इत्यमरः ३। ५। ३२॥ कर्म्मस्थानम्। दोषः। इति जटाधरः॥ मकरः। इति विश्वः॥ वेणुः। इति हेमचन्द्रः॥ (लोकोपद्रवकारी। यथा, भागवते। ३। १८। २३।

"अन्वेषन्नप्रतिरथो लोकानटति कण्टकः"॥)

कणटकद्रुमः, पुं, (कणटकप्रधानो द्रुमः। कण्टकेनाचितोद्रुमो वा।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (यथा मृच्छकटिके। १४०। ४।

"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्। भवन्ति नितरां क्षीताः सुक्षेत्रे कण्टकद्रुमाः"॥ "दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः"। इति भागवतम्। ७। ५। १७॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः॥)

कण्टकप्रावृता, स्त्री, (कण्टकैः प्रावृता व्याप्ता। कण्टक + प्र + आ + वृ + कर्म्मणि क्त + टाप्।) यष्टिकन्या। इति राजनिर्घण्टः। धृतकुमारी इति भाषा॥

कण्टकफलः पुं, (कण्टकैराचितं व्याप्तं फलं यस्य। शाकपार्थिवादिवत् मध्यपदलोपी समासः।) पनसवृक्षः। इत्यमरटीकायां भरतः॥ गोक्षुरवृक्षः। इति रत्नमाला॥ (अस्य गुणादयः कण्टाफलशब्दे ज्ञेयाः॥)

कण्टकबल्लाकी, स्त्री, (कण्टकाचिता बल्लाकी। शाकपार्थिवादित्वात् मध्यपदलोपश्च।) वार्त्ताकी। इति राजनिर्घण्टः॥

कण्टकश्रेणी, स्त्री, (कण्टकानां श्रेणिर्यत्र। श्रेणी यस्यां वा।) कण्टकारी। इति शब्दचन्द्रिका॥

कण्टकागारः, पुं, (कण्टका आगारो यस्य। यद्वा कण्टकं आगिरति। या + गॄ + अच्।) सरटजन्तुः। इति राजनिर्घण्टः॥

कण्टकाक्षः, पुं, (कण्टकैराक्ष्यते।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

कण्टकारिका, स्त्री, (कण्टकान् इयर्त्ति ऋच्छति वा कण्टक + ऋ + कर्त्तरि + ण्वुल्। स्त्रियां टाप् इत्वं च। यद्वा कण्टकं ऋच्छति + ऋ कर्म्मण्यण् ततः कन् च ततः प्राग्वत्। तत्फले तु अणि कृते हरीतक्यादित्वात् लुक्।) स्वनामख्यातक्षुद्रवृक्षः। तत्पर्य्यायः। निदिग्धिका २ स्पृग्वी ३ व्याघ्री ४ वृहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुष्पर्शा ९ राष्ट्रिका १०। इत्यमरः॥ धनाक्रान्ता ११ भण्टाकी १२ सिंही १३ धावनिका १४। इति रत्नमाला॥ कण्टकारी १५ कण्टकिनी १६ दुष्पर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बृहत्कण्टा २१ क्षुद्रफला २२ कण्टा-

चिका २३ चित्रफला २४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। श्वास-कास-प्रतिश्याय-दोष-कफ-वात-ज्वर-नाशित्वञ्च। इति राजनिर्घण्टः। दद्यानाशित्वम्। इति राजवल्लभः। तस्याः फलगुणाः। पित्तकफकण्डूकुष्ठकृमिनाशित्वम्। लघुत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वञ्च। इति राजनिर्घण्टराजवल्लभौ॥

("मुस्तामृतामलक्यश्च नागरं कण्टकारिका। कषायचूर्णान्वितः क्वाथस्तथा मधुसमन्वितः। एकाह्निकं वा वेलायां ज्वरजातं व्यपोहति"॥ इति हारीतः॥*॥ अस्या विशेषस्य कण्टकारी-शब्दे ज्ञातव्यः॥)

कण्टकारी, स्त्री, (कण्टकं ऋच्छति। कण्टक + ऋ + अण् + ङीप् वा।) कण्टकारिकाख्यः। इति राजनिर्घण्टः॥ शाल्मलीवृक्षः। इति जटाधरः॥ विकङ्कतवृक्षः। इति शब्दरत्नावली वँइचि इति भाषा॥ तत्पर्य्यायगुणाः।

"कण्टकारी तु दुष्पर्शा क्षुद्रा व्याघ्री निदिग्धिका। कण्टालिका कण्टकिनी धावनी वृहती तथा"॥ उभे च वृहत्यौ। यदाह शाश्वतः॥

"क्षुद्रायां क्षुद्रसंज्ञायां वृहतीति निगद्यते। श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षीरदूतिका॥ गर्भदा चन्द्रभा चन्द्रा चन्द्रपुष्पा प्रियङ्करी। कण्टकारी स्मरा तिक्ता कटुका दीपनी लघुः॥ रूक्षोष्णा पाचनी कासश्वासज्वरकफापहा। निहन्ति पीनसं पार्श्वपीडाहृल्लिङ्गदामयान्॥ तयोः फलं कटुरसे पाके च कटुकं भवेत्। मुखस्य रेचनं भेदि तिक्तं पित्तास्रदाहघ्नं॥ हन्यात् कफमरुत्कण्डूकाग्निमेदःक्रिमिज्वरान्। तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्दुर्भकारिणी"॥ इति भावप्रकाशः॥ (शब्दार्थचिन्तामणिधृत-वैद्यकम्। यथा

"कण्टकारी कण्टकिनी तथा स्वादुश्च मुक्तला। चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत्। दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित्"॥

"कण्टकार्य्यम्लतामार्गी नागरेन्द्रयवासकम्। भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी॥ कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम्। दाहहृल्लासरुचिच्छर्दिकासहृत् पार्श्वशूलनुत्"॥ इति वैद्यकचक्रपाणिसंग्रहः॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम्। पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत्॥ एषक् पलांशान्येतानि गुडूचीधन्वयवचित्रकाः। मुस्तं कर्कटशृङ्गी च व्योषं धन्वयासकम्॥ भार्गी रास्ना यष्टीचैव शर्करा पलविंशतिः। प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः॥ पक्त्वा लेहत्वमानीय पूते मधुपलाष्टकम्। चतुष्पलं तु गाङ्गेर्य्याः पिप्पलीनां चतुष्पलम्॥ क्षिप्त्वा निदध्यात् सुदृढे मृण्मये भाजने शुभे। लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानजेयतः"॥ कण्टकार्य्यवलेहः॥*॥ इति च शार्ङ्गधरः॥)

कण्टकालुः, पुं, (कण्टकैः कण्टकाकीर्णैः फलैः अलति

शोभते। कण्टक + अल् + अच्। कण्टं कण्डकाकारं फलं कालयति वा। कल् + अण्।) पनसवृक्षः। इति शब्दचन्द्रिका॥

कण्टकालुकः, पुं, (कण्टकैरलति पर्य्याप्नोति कण्टकालयति वा कण्टक + अल् + उकञ्।) यवासवृक्षः। इति राजनिर्घण्टः॥ (यवास-शब्देऽस्य गुणादयो बोद्धव्याः॥)

कण्डकाश्नः, पुं, (कण्टकं अश्नातीति। कण्टक + अश् भोजने + कर्त्तरि + क्नुः।) उष्ट्रः। इति चिकाण्डशेषः॥

कण्टकाष्ठीलः, पुं, (कण्टकः अष्ठीलेव यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। कुलिशम् २। इति चिकाण्डशेषः॥

कण्डकिनी, स्त्री, (कण्डकाः सन्त्यस्याः। इनिः। ईप् च।) वार्त्ताकी। प्रोथभिण्टी। मधुखर्ज्जुरी। इति राजनिर्घण्टः॥

कण्टकिफलः, पुं, (कण्टकि कण्टकयुक्तं फलं यस्य।) वृक्षविशेषः। काँटाल इति भाषा। तत्पर्य्यायः। पनसः २। इत्यमरः। २। ४। ६१॥ पलसः ३ कण्टकीफलः ४ कण्टकफलः ५। इति तट्टीकायां भरतः॥ महासर्जः ६ फलिनः ७ फलवृक्षकः ८ स्थूलः ९ कण्टाफलः १० मूलफलदः ११ अपुष्पफलदः १२ पूतफलः १३ चम्पकोषः १४ चम्पालुः १५ रसालः १६ मदङ्गफलः १७ पानसः १८। इति शब्दरत्नावली॥ अस्य गुणाः कण्टाफलशब्दे पनस-शब्दे च द्रष्टव्याः॥ समस्थिवृक्षः। इति राजनिर्घण्टः॥

कण्टकिलः, पुं, (कण्टकोऽस्यास्य। कण्टक + अस्यर्थे इलच्।) वंशविशेषः। इति शब्दचन्द्रिका। वेड़ वाँश इति भाषा॥

कण्टकिलता, स्त्री, (कण्टकिनी चासौ लता चेति।) चपुषी। इति राजनिर्घण्टः। घुसा इति भाषा॥ (चपुषीशब्दे विशेषोऽस्या द्रष्टव्यः॥)

कण्टकी, [न्] पुं, (कण्टकोऽस्यास्य अस्त्यर्थे इनिः।) मत्स्यः। इति शब्दरत्नावली॥ खदिरवृक्षः। इति शब्दमाला॥ मदनवृक्षः। इति रत्नमाला॥ गोक्षुरवृक्षः। वंशः। वदरवृक्षः। इति राजनिर्घण्टः॥ (यथा, महाभारते १। शाकुन्तले ७०।७।

"नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी"॥)

कण्टकी, स्त्री, (कण्टक + अर्श आदित्वात् अच् गौरादित्वात् ङीष्।) वार्त्ताकीविशेषः। काँटा वेगुन इति भाषा। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपणत्वम्। कण्डूकच्छुहरत्वम्। दोषघ्नत्वञ्च। इति राजवल्लभः॥

कण्टकीद्रुमः, पुं, (कण्टकी द्रुमः। एषोदरादित्वात् दीर्घः।) खदिरवृक्षः। इति रत्नमाला॥ (खदिरशब्दे विशेषो वक्तव्यः॥ कण्डकी एव द्रुमः। वार्त्ताकीवृक्षः॥)

कण्टकीफलः, पुं, (कण्टकि कण्टकाचितं फलमस्य। एषोदरादित्वात् साधुः।) कण्टकिफलः। इत्यमरटीकायां भरतः॥ काँटाल इति भाषा॥

कण्टकुरुण्टः, पुं, (कण्टः कण्टकप्रधानः कुरुण्टः।)

झिण्टी। इति राजनिर्घण्टः॥ (झिण्टीशब्दे ऽस्य विशेषो ज्ञेयः॥)

कण्टतनुः, स्त्री, (कण्टा कण्टकान्विता तनुर्यस्याः।) वृहती इति राजनिर्घण्टः॥ (एषा हि तिक्त-कटुका। इति वैद्यकद्रव्यगुणः॥)

कण्टदला, स्त्री, (कण्टं कण्टकाचितं दलं यस्याः। प्राकृपार्थिवादित्वात् मध्यपदलोपः।) केतकी। इति राजनिर्घण्टः॥

कण्टपत्रः, पुं, (कण्टं कण्टकान्वितं पत्रं यस्य।) विकङ्कतवृक्षः। इति शब्दमाला। वँइचि इति भाषा॥

कण्टपत्रफला, स्त्री, (कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः। कण्डकान्विते पत्रफलेऽस्य वा।) ब्रह्मदण्डीवृक्षः। इति राजनिर्घण्टः॥

कण्टपादः, पुं, (कण्टः कण्टकान्वितः पादो मूलं यस्य।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

कण्टफलः, पुं, (कण्टं कण्टकान्वितं फलं यस्य।) क्षुद्रगोक्षुरः। पनसः। धुस्तूरः। लताकरञ्जः। इति राजनिर्घण्टः॥ तेजःफलः। एरण्डः। इति केचित्॥

कण्टफला, स्त्री, (कण्टं कण्टकाकीर्णं फलं यस्याः।) देवदालीलता। इति राजनिर्घण्टः॥ (देवदाली-शब्दे ऽस्या गुणादयो ज्ञेयाः॥)

कण्टलः, पुं, (कण्टः अस्यास्य। मत्वर्थे अलच्। यद्वा कण्टेन कण्टकेन अलति पर्य्याप्नोति शोभते वा। कण्ट + अल् + अच्। प्राक्तन्ध्वादिवत् अस्य लोपः।) वृक्षविशेषः। बाबला इति भाषा। तत्पर्य्यायः। बाबलः २ स्वर्णपुष्पः ३ सुपत्रः ४। इति शब्दचन्द्रिका॥

कण्टवल्ली, स्त्री, (कण्टा कण्टकान्विता वल्ली।) श्रीवल्लीवृक्षः। इति राजनिर्घण्टः॥

कण्टवृक्षः, पुं, (कण्टप्रधानः कण्टकमयः कण्टकवल्लो वा वृक्षः। मध्यपदलोपी।) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

कण्टाफलः, पुं, (कटि + भावे + अप्। कण्टा कण्टकमयवेष्टनं तदुपलक्षितं फलमस्य।) पनसवृक्षः। इति शब्दमाला। काँटाल इति भाषा॥ अस्य पक्वफलगुणाः। सुमधुरत्वम्। रक्तवर्द्धकत्वम्। स्निग्धत्वम्। शीतलत्वम्। दुर्ज्जरत्वम्। वायु-पित्तनाशित्वम्। श्लेष्मशुक्रबलप्रदत्वञ्च। इति राज-वल्लभः॥ पिच्छिलत्वम्। गुरुत्वम्। हृद्यत्वम्। भ्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥*॥ तद्बीज-गुणाः। रक्तपित्तनाशित्वम्। स्वादुत्वम्। फल-तुल्यगुणत्वञ्च। इति राजवल्लभः॥ ईषत् कषा-यत्वम्। मधुरत्वम्। रुचिवायुवृद्धिकारित्वम्। गुरुत्वम्। त्रिदोषतत्फलविकारनाशित्वञ्च। इति राजनिर्घण्टः॥*॥ तस्यापक्वस्य गुणाः। कषा-यत्वम्। स्वादुत्वम्। वायुकारित्वम्। इति राज-वल्लभः॥ शीतलत्वञ्च॥*॥ घृतयुक्तस्य तस्य गुणाः॥ स्निग्धत्वम्। हृद्यत्वम्। बलप्रदत्वम्। क्रिमिनाशि-त्वम्। अचक्षुष्यत्वम्। शुक्रकारित्वम्। वातपित्त-नाशित्वञ्च॥ तन्मज्जगुणाः। शुक्रकारित्वम्। वात-पित्तकफनाशित्वम् च॥ विशेषात् पनसं वर्ज्यं

गुल्मिभिर्मन्दवह्निभिः ॥ इति राजनिर्घण्टः ॥ (अन्यत्सर्व्वं पनसशब्दे द्रष्टव्यम् ॥)

कण्टार्त्तगला, स्त्री, (कण्टा कण्टयुक्ता आर्त्तगला ॥ आर्त्तः क्षीणः गलदेशो यस्याः ।) नीलझिण्टी । इति राजनिर्घण्टः ।(नीलझिण्टीशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कण्टालुः, पुं, (कण्टाय कण्टकाय अलति पर्य्याप्नोति । कण्ड + अल् + उन् ।) वंशः । दृष्टनी । वार्त्ताकी । वर्व्वूरः । इति राजनिर्घण्टः ॥

कण्टाक्षयं, क्ली, (कण्टं कण्टकमाक्षयते स्पर्द्धते । कण्ट + आ + क्षे + कः ।) पद्मकन्दः । इत्ति राजनिर्घण्टः ॥

कण्टी, [न्] पुं, (कण्टः कण्टकः अस्त्यस्य । अस्त्यर्थे इनिः ।) कषायः । अपामार्गः । खदिरः । गोक्षुरः । इति राजनिर्घण्टः ॥

कण्ठः, पुं, (कठि + अच् + इदित्वात् नुम् ।) मदनवृक्षः । इति मेदिनी ॥ होमकुण्डादहिरङ्गुलिपरिमितस्थानम् । यथा,—

"खातादाक्षोऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः" ॥ इति तिथ्यादितत्त्वम् ॥ (कण्ठशब्द "कण्ठेष्ठः" । इति ठः । उणां १ । १०५ ।)

ग्रीवापुरोभागः ॥ तत्पर्य्यायः ।

गलः २ । इत्यमरः । २ । ६ । ८८ ॥

(यथा, शाकुन्तले । ५म अङ्के ।

"विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिवकमलिन्याः कर्कशं वन्तजालम्" ॥)

अत्र विशुद्धनामषोड़शदलपद्ममस्ति । यथा,—

"तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शभिर्युक्तं धूमवर्णैर्महाप्रभम् ॥
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम्" ॥
इति गौतमतन्त्रम् ॥ निकटः । ध्वनिः । इति मेदिनी ॥

कण्ठकूणिका, स्त्री, (कण्ठ इव कण्ठध्वनिरिव कूणयतीति । कण्ठ + कूण् + ण्वुल् । टापि अत इत्वं च वीणायाः कण्ठतुल्यस्वरध्वनिरितिप्रसिद्धेः ।) वीणा । इति हेमचन्द्रः ॥

कण्ठतलासिका, स्त्री, (कण्ठतले अश्वानां कण्ठदेशे आस्ते इति । कण्ठ + आस + ण्वुल् + टापि अत इत्वं च ।) अश्वग्रीवावेष्टकरज्जुचर्म्मादि । इति शब्दमाला ॥

कण्ठनीड़कः, पुं, (कण्ठे निकटस्थे नीड़े शब्दान् दृष्ट्वा कायति शब्दायते । कण्ठ + कै + कः । यद्वा कण्ठे प्रासादशृङ्गादीनां शिरोभागे नीड़ं यस्य + कप् ।) चिल्लपक्षी । इति त्रिकाण्डशेषः । चिल् इति भाषा ॥

कण्ठनीलकः, पुं, (कण्ठं धारकस्य कण्ठादिकमूर्द्धस्थानं नीलयति स्वशिखाकज्जलेन नीलवर्णं करोतीति । कण्ठ + नील् + णिच् + ण्वुल् । अथवा कण्ठे शिखाग्रभागे नीलवर्णोऽस्य कप् ।) उल्का । इति शब्दमाला । मसाल इति भाषा ॥

कण्ठप्राशकः, पुं, (कण्ठे प्राश इव कायति प्रकाशते । कण्ठप्राश + कै + कः ।) हस्तिगलवेष्टकरज्जुः । इति शब्दमाला ॥

कण्ठभूषा, स्त्री, (भूष्यतेऽनया इति भूषा । कण्ठस्य भूषा ।) ग्रीवालङ्कारः । तत्पर्य्यायः । ग्रैवेयकम् २ । इत्यमरः । २ । ६ । १०४ ॥ ग्रैवेयम् ३ ग्रैवम् ४ । इति शब्दरत्नावली ॥ रुचकः ५ निष्कम् ६ । इति जटाधरः ॥

कण्ठमणिः, पुं, (कण्ठे कण्ठस्थले धारणीयो मणिः । कण्ठस्य मणिर्वा ।) गलदेशधारणीयमणिः । तत्पर्य्यायः । काकलम् २ । इति त्रिकाण्डशेषः ॥

कण्ठ्यः, त्रि, (कण्ठे + भवः । शरीरावयवत्वात् यत् । ६ । १ । २१३ ।) कण्ठोद्भवशब्दादिः । इति व्याकरणम् ॥ "अकुहविसर्ज्जनीयानां कण्ठ्यः" । पा । १ । १ । ९ वार्त्तिके ॥)

कण्ठाग्निः, पुं, (कण्ठे कण्ठाभ्यन्तरे अग्निः पाचनरूपाग्निर्यस्य ।) पक्षी । इति त्रिकाण्डशेषः ॥

कण्ठाङ्गः, पुं, (कठि + आलच् ।) शूरणः । युद्धम् । नौका । खनित्रम् । इति विश्वः ॥ क्रमेलकः । गोणीप्रभेदः । इति मेदिनी ॥

कण्ठाला, स्त्री, (कटि + आलच् + टाप् ।) जालगोणीका । इति त्रिकाण्डशेषो मेदिनी च ॥

कण्ठिका, स्त्री, (कण्ठो भृत्यतयास्त्यस्याः । कण्ठ + ठन् टाप् च । यद्वा कण्ठयति कण्ठं भूषयति या । कठि + णिच् + ण्वुल् + टाप् अत इत्वञ्च ।) कण्ठाभरणम् । इति हेमचन्द्रः ॥ एकनरी कण्ठी इति भाषा ॥

कण्ठी, स्त्री, (कण्ठ + अल्पार्थे ङीप् ।) अश्व कण्ठवेष्टनरज्जुचर्म्मादि । इति शब्दमाला ॥ गलः । इत्यमरटीकायां भरतः ॥

कण्ठीरवः, पुं, (कण्ठां रवो यस्य ।) सिंहः । इति त्रिकाण्डशेषः ॥ पारावतः । इति राजनिर्घण्टः ॥ मत्तहस्ती । इति सारस्वतः ॥

कण्ठीरवी, स्त्री, (कण्ठीरव + गौरादित्वात् ङातौ वा ङीष् ।) वासकवृक्षः । इति राजनिर्घण्टः ॥

कण्ठेकालः, पुं, (कण्ठे + कालः क्षीरोदमथनोद्भवविषपाननिदर्शनरूपनीलवर्णो यस्य । सप्तम्या अलुक् ।) महादेवः । इति त्रिकाण्डशेषः ॥ (कण्ठे जीवानां कण्ठदेशे कालः कालस्वरूपेण वर्त्तते । यद्वा कण्ठदेशपर्य्यन्तं आक्रम्य तमःप्रधाना माया अस्त्यस्य । परमात्मनः मायाग्रवलितचिपादत्वात् तथात्वम् । एष सर्व्वज्ञः सर्व्वान्तर्यामीश्वरः । एतस्मात् पादत्रयादन्यत् तुरीयं निष्कलं निरुपाधिकं शिवपादमस्ति ।

यथा, माण्डुक्योपनिषदि ।

"सर्व्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" । २ ॥

"जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः प्रथमः पादः" ॥३॥

"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः" ॥ ४॥

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः" ॥ ५ ॥

"एष सर्व्वेश्वरः एष सर्व्वज्ञ एषोऽन्तर्याम्येष योनिः सर्व्वस्य प्रभावाप्ययौ हि भूतानाम्" ॥ ६ ॥

"नान्तः प्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्राज्ञमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थमन्यन्ते स आत्मा स विज्ञेयः" ॥ ७ ॥)

कण्डनं, क्ली, (कडि + भावे ल्युट् ।) उदूखलादिना तण्डुलादेर्निर्म्मलीकरणं । इति हेमचन्द्रः । काँड़ान इति भाषा ॥

कण्डनी, स्त्री, (कण्ड्यते तुषादिरपनीयतेऽनया । कडि + करणे ल्युट् । ङीप्च ।) उदूखलम् । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करम् ।
कण्डनीचोदकुम्भश्च बध्यते यास्तु वाहयन्" ॥)

कण्डरा, स्त्री, (कडि + अरन् टापच् ।) महास्नायुः । महानाड़ी । इति हेमचन्द्रः ॥

("महत्यः स्नायवः प्रोक्ताः कण्डरास्तासु षोड़श ।
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥
चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ।
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः" ॥

"तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः ग्रीवानिबन्धनानामधोभागगतानां प्ररोहा मेढ्रः पृष्ठनिबन्धनां प्ररोहो नितम्बमूर्द्धोरुवक्षोऽन्तनपिण्डाः" ॥ इति भावप्रकाशः ॥

"तलं प्रत्यङ्गुलीनां याः कण्डरा बाह्यतोऽन्तरः ।
बाह्योः कर्म्मत्रयकरी विश्वक्षेति हि सोच्यते" ॥
इति च सुश्रुतः ॥)

कण्डुः, स्त्री, (कण्डते शरीरं माद्यति अस्मात् उष्णशोणितत्वात् । यद्वा कण्डयति कण्डुयुक्तं करोति शरीरम् । कडि + मदे । "सृगण्वादयश्च" । उणां १ । ३८ । इति कुः ।) कण्डूः । इति रायमुकुटः ॥ (पुं ऋषिविशेषः ।

(यथा, विष्णुपुराणे १ । १५ । ११ ।

"कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः ।
सरय्वे गोमतीतीरे स तेपे परमं तपः" ॥

तद्विवरणं तत्रैव १मांशे १५ अध्याये द्रष्टव्यम् ।)

कण्डुरः, पुं, (कण्डूं राति ददातीति । "आतोनुपसर्गे कः" । ३ । २ । ३ । एषोदरादित्वात् क्रस्वः ।) कारवेल्लवृक्षः । कुन्दरलक्षम् । इति राजनिर्घण्टः ॥

कण्डुरा, स्त्री, कण्डूं राति । कण्डू + रा + कः । ह्रस्वश्च । ततष्टाप् ।) कपिकच्छूः । अत्यङ्गपर्णी । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्दे विशेषोऽस्य वक्तव्यः ॥

कण्डूः, स्त्री (कण्डूय + सम्प्रदादित्वात् क्विप् यलोपयलोपौ ।) रोगविशेषः । चुल्कनि खोस् इत्यादि भाषा । (यथा, भागवते । २ । ७ । १३ ।

"षष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्त्त कषाण कण्डूं" ॥)

तत्पर्य्यायः । खर्জ्जुः २ कण्डूया ३ । इत्यमरः । २ । ६ । ५३ ॥ कण्डूति ४ । इति तट्टीका ॥ कण्टूय नम् ५ । इति राजनिर्घण्टः ॥

तच्चिकित्सा यथा,—

कण्डोल

"दूर्व्वानिघ्नायतो लेपः कण्डूघ्नामविनाशनः।
क्षमिदद्रुहरश्चैव श्वेतपित्तापहः स्मृतः ॥१॥
हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा।
क्षीराढ़केन संयुक्तं खण्डस्यार्द्धशतं तथा ॥
पचेन्मृदग्निना वैद्यो भाजने मृण्मये दृढ़े।
त्रिकटुत्रिजातकञ्चैव क्षमिघ्नं चित्रता तथा ॥
त्रिफला केशरं मुस्तं लौहं प्रति पलं पलम्।
संचूर्ण्य प्रक्षिपेत्तत्र कर्षमेकन्तु भक्षयेत् ॥
कण्डूविष्फोटदद्रूणां नाशनं परमौषधम्।
प्रतप्तकाक्षनाभासो देहो भवति नान्यथा ॥
श्वेतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत्।
हरिद्रानामतः खण्डः कण्डूनां परमौषधम्"॥
इति हरिद्राखण्डः ॥ २ ॥
"अमृतहपटोलं मुस्तकं सप्तपर्ण
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे।
विविधविषविसर्पान् कुष्ठविष्फोटकण्डू
रपनयति मसूरीं श्वेतपित्तं ज्वरञ्च" ॥
इति अमृतादि ॥ ३ ॥ इति भैषज्यरत्नावली।
("द्विधा ते कोठपिड़का कण्डू गण्डान् प्रकुर्व्वते"।
इति वाभटः ॥ * ॥ "चन्दननलदक्षतमालनक्त-
मालनिम्बकुटजसर्षपमधूकदारुहरिद्रामुस्तानीति
दशेमानि कण्डूघ्नानि भवन्ति"॥ इति चरकः॥)

कण्डूकरी, स्त्री, (कण्डूं करोति इति। कण्डू + कृ + टः। स्त्रियां ङीप्।) शूकशिम्बीवृक्षः। इति शब्द चन्द्रिका ॥

कण्डूघ्नः, पुं, (कण्डूं हन्ति। कण्डू + हन् + टक्।) आरग्वधः। गौरसर्षपः। इति राजनिर्घण्टः ॥

कण्डूतिः, स्त्री, (कण्डूय + भावे क्तिन्। अलोपयलोपौ।) कण्डूः। इति भरतश्लेषायुधौ॥ चुलकनि इति भाषा ॥("राज्ञां वघटदेव्याः स निर्दयैः सुरतोत्सोत्वैः। खण्डयामासकण्डूतिम् खाण्यस्यार्थे बद्धां धनैः"॥ इति राजतरङ्गिण्याम्। ५। २८६॥)

कण्डूयनं, क्ली, (कण्डूय + भावे ल्युट्।) कण्डूः। इति हलायुधः ॥ (यथा, भागवते। ७। ६। ३५।
"यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम्" ॥)

कण्डूया, स्त्री, (कण्डू + "कण्ड्वादिभ्योयक्" ३। १। २७। अप्रत्ययात् स्त्रित्वात् टाप् च।) कण्डूः। इत्यमरः। २। ६। ५३ ॥

कण्डूरा, स्त्री, (कण्डूं राति। कण्डू + रा + कः। टाप्।) क्षुद्रविशेषः। आनकुची इति भाषा। तत्पर्य्यायः। आत्मगुप्ता २ जड़ा ३ अत्यङ्गा ४ प्राङ्गायणी ५ कण्ड्यपोल्ला ६ शूकशिम्बिः ७ कपिकच्छूः ८ मर्कटी ९। इत्यमरः। २। ४। ६॥ अजड़ा १० अत्यङ्गा ११ कण्डूरा १२ शूकशिम्बी १३ शूकशिम्बा १४ कपिकच्छूः १५। इति तट्टीका॥ ऋषभः १६ खगुप्ता १७। इति रत्नकोषः ॥

कण्डूलः पुं, (कण्डू + अस्त्यर्थे + लच्। कण्डूतिकारकत्वात् तथात्वम्।) शूरणः। इति राजनिर्घण्टः ॥ कण्डूयुक्ते त्रि ॥

कण्डोलः, पुं, (कण्डि + बाहुलकात् ओलच्।) नलवंशादिरचितधान्यादिस्थापनपात्रम्। ङीप् इति भाषा। तत्पर्य्यायः। पिटः २। इत्यमरः। २। ९। २६॥ पिटकः ३ पेटकः ४। इति भरतः॥ उड़्डः। इत्युणादिकोषः ॥

कण्डोलकः, पुं, (कण्डि + बाहुलकादोलच्। स्वार्थे कन्।) कण्डोलः। इति हेमचन्द्रः ॥

कण्डोलवीणा, स्त्री (कण्डोल इव वीणा। कण्डोलस्य वीणा वा।) चण्डालवीणा। कँदड़ा इति ख्याता। तत्पर्य्यायः। चाण्डालिका २ चण्डालवल्लकी ३। इत्यमरः। २। १०। ३२॥ चण्डालिका ४ कटोलवीणा ५। इति भरतः॥

कण्डोली, स्त्री, (कण्डोलस्तदाकारोऽस्त्यस्याः। अर्श आदित्वात् अच् + गौरादित्वात् ङीष्।) कण्डोलवीणा। इतिशब्दरत्नावली॥

कण्ठघोषः, पुं, (कण्ठनामोषः संघोषयस्मात् शूककीटस्तस्मै कण्ठबद्धजलमिति प्रसिद्धेस्तथात्वम्।) शूककीटः। इति शब्दचन्द्रिका ॥ शूयापोका इति भाषा ॥

कण्ठं, क्ली, (कण्ठते अपोह्यते इति। कण्ठ् + क्विप्।) पापम्। इति मेदिनी ॥

कण्वः, पुं, (कण्व् + क्विप्।) मुनिविशेषः। इति मेदिनी॥ स तु पुरुवंशजाताप्रतिरथनामक्षत्रियपुत्रः। यथा,—
"सुमतिर्भ्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः।
तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः"॥
इति श्रीभागवते। ९। २०। ६॥ (अपर ऋषिभेदः। अनेनैव मुनिशार्दूलेन यजुर्व्वेदीयकाण्वशाखा प्रणीता। यथा, यजुर्व्वेदे १७। ७४।
"धामस्य कण्वोऽदुहत् प्रयोनां
सहस्रधारां पयसा महीं गाम्"॥
तथा, भागवते च १२। ६। ७४।
"यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः।
जगृहुर्वाजसन्नास्ताः काण्वमाध्यन्दिनादयः"॥
अयन्तु काण्वपवंशोद्भवः शकुन्तलायाः प्रतिपालकपिता। यथा, महाभारते १। शाकुन्तले। ७०। ३०।
"महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम्"॥
एतस्य सविस्तरन्तु तत्रैव ७१ अध्याये द्रष्टव्यम्। अयमेव गोत्रप्रवर्त्तकः। ऋग्वेदे १। ४४—५० सूक्तेषु ऋषिगोत्रप्रवर्त्तक काण्वशब्दान्तमन्त्रमध्येयम्॥ कण्व इत्यस्यार्थः कण्वः सुखमयः तत्त्वविद्याप्रभावात् नत्वयं संसारजन्यसुखमयः नहि तत्त्वज्ञानिनां क्वचित् संसारासक्तिः अविद्याधर्म्माभावादिति गौडकण्ठः। विद्या क्रियाकुशलः मेधावी च। इति ऋग्वेदभाष्यहृदयानन्दः॥ स्वनामाख्यातीर्थविशेषः। यथा, महाभारते। ३। ८२। ४४।
"कण्वाश्रमं ततो गच्छेत् श्रीजुष्टं लोकपूजितम्।
धर्म्मारण्यं हि तत्पुण्यमाद्यञ्च भरतर्षभ!"॥)

कतः, पुं, मुनिविशेषः। इत्युणादिकोषः॥ (अयन्तु विश्वामित्रपुत्रानामेकतमः। कं जलं शुद्धं तनोति कं + तन + ड।) कतकवृक्षः। इति राजनिर्घण्टः ॥

कतकः, पुं, (तक् + हासे + बाहुलकाद्वः। कस्य जलस्य तकः हासः प्रकाशः प्रसाद इति यावत् यस्मात्।) वृक्षविशेषः। निर्म्मली इति भाषा। तत्पर्य्यायः। अम्बुप्रसादः २ कतः ३ तिक्तफलः ४ रजः ५ क्षेदनीयः ६ गुच्छफलः ७ कतफलः ८ तिक्तमरिचः ९। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। चक्षुर्हितत्वम्। रुचिकारित्वम्। क्षमिदोषशूलदोषनाशित्वञ्च। तस्य बीजं अम्बुप्रसादनम्। इतिराजनिर्घण्टः ॥ (यथा, मनुः। ६। ६७।
"फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्।
न नामग्रहणादेव तस्य वारिप्रसीदति" ॥
"पयः प्रसादि कतकयुक्तकं तत्फलञ्च तद्।
कतकस्य फलं नेत्र्यं जलनिर्म्मलता करम्।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु" ॥
इति भावप्रकाशः॥)

कतफलः पुं, (कं जलं तनोति प्रसन्नं सम्पादयति। क + तन् + ड। तादृशं फलमस्य।) कतकवृक्षः। इति राजनिर्घण्टः ॥

कतमाक्षः, पुं, (तम + घञ् क्षः। कस्य जलस्य तमाय शोषणाय अलति पर्य्याप्नोति। क + तम + अल् + अच्।) अग्निः। इति शब्दमाला ॥ कथमाक्षः खतमाक्षश्च पाठः ॥

कति, त्रि, (का सङ्ख्या किं परिमाणं वा यस्यां "किमः सङ्ख्यापरिमाणे डति" ५। २। ४१। इति डति) कियत्परिमाणम्। इति व्याकरणम्॥ कत इति भाषा। (यथा, अथर्ब्ववेदे १०। २। ४।
"कति देवाः कतमे त आसन् य उरोरोवाचिक्लृपुः पुरुषस्य कतिस्तनौ व्यदधुः कः कपोड़ौ कतिस्कन्धान् कतिष्टधौ रचिन्वन्"॥ पुं। विश्वामित्रस्य पुत्रानामेकतमः। यदवंशोद्भूत सूरसुतात् कात्यायनर्षिः॥)

कतिपयः, त्रि, (किम् + डति कति अयच् पुगच्च।) कति। इति व्याकरणम्। कतकगुलि इति भाषा। (यथा, मेघदूते २५।
"सम्पत्स्यन्ते कतिपयदिनस्थायिहंसादशार्णाः"॥)

कत्तृणं, क्ली, (कद् कुत्सितं तृणं इति। अत्र कद् खार्थे कोः कादेशः "तृणं च जातौ"। ६। ३। १०२।) सुगन्धितृणविशेषः। रामकर्पूर इति ख्यातम्। तत्पर्य्यायः। पौरम् २ सौगन्धिकम् ३ धाम ४ देवजग्धकम् ५ रौहिषम् ६। इत्यमरः। २। ४। १६६॥ सुगन्धम् ७ तृणगन्धीतम् ८ सुगन्धितृणम् ९। इति रत्नमाला ॥ रोहिषतृणम् १० कात्तृणम् ११ भूति १२ भूतिकम् १३ श्यामकम् १४ धान्यकम् १५ पूति १६ मुद्गजम् १७ देवजग्धकम् १८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफग्रहणीदोषवातज्वरविनाशित्वञ्च। इति राजनिर्घण्टः ॥ (तुवरत्वम्। हृत्कण्ठव्याधिपित्तास्रशूलकासज्वरनाशित्वञ्च। इति भावप्रकाशः॥)

कत्रिः, पुं, इति मेदिनी ॥ चाकुलिया इति भाषा।

कत्तोयं, क्ली, (कु कुत्सितं तोयं यत्र।) मद्यम्। इति त्रिकाण्डशेषः ॥

कत्थ, ङ श्लाघे। इति कविकल्पद्रुमः॥ (भ्वां—आत्मं—सकं—सेट्। क्वचित् अकं च।) दन्त्यवर्गाद्योपधः।

कतक

कत्थ

श्लाघः प्रशंसा । ङ कत्थते गुणिनं गुणी । इति दुर्गादासः ॥

कत्थ, त् क श्लैघिल्ये । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) कत्थयति कत्थापयति । इति दुर्गादासः ॥

कत्सवरं, क्ली, (कद् वैकल्ये + स । कत्सः विह्वलता तया त्रियते शिर एवान्तःकरणस्थानं स्कन्धस्य शिरोऽन्तवर्त्तित्वात् तथात्वम् । कत्स + ट + अप् ।) स्कन्धः । इति शब्दचन्द्रिका ॥

कथ, त् क वाक्यप्रबन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कथयति । इति दुर्गादासः ॥ ("हन्त ! ते कथयिष्यामि सेतिहासं पुरातनम्" । इति भागवतम् ॥)

कथं व्य, कथम् । किंप्रकारम् । इति व्याकरणम् ॥ (यथा, मनुः ५ । २ ।
"कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो" ! ॥)

कथकः, त्रि, (कथयति यः । कथ + कर्त्तरि ण्वुल् ।) वक्ता । कथोपजीवी । नाटकवर्णनकर्त्ता । तत्पर्य्यायः । एकनटः २ कथाप्राणः ३ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । २१५ । ३ ।
"कथकाख्यापरे राजन् श्रमणाश्च वनौकसः" ॥
ग्रन्थकर्त्तृविशेषः । (यथा, अनुमानचिन्तामणिः ।
"वाचस्पत्यसाधनियमच्युतोऽपि कथकैरयाधिरुद्धाद्यः" ॥)

कथङ्कथिकः, त्रि, (कथं कथमिति प्रश्नतेनास्यास्य इति । कथंकथं + वाऽलङ्कात् ठन् ततस्त्रिलोपः ।) प्रश्नः । प्रश्नकर्त्ता । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥

कथङ्कथिकता, स्त्री, (कथङ्कथिक + भावे तल् ।) पृच्छा । प्रश्नः । इति हेमचन्द्रः ॥

कथनं, क्ली, (कथ्यते इति । कथ्यत्व वाक्यप्रबन्धे । भावे + ल्युट् ।) कथा । इति हलायुधः ॥ कहन इति भाषा । (यथा पञ्चतन्त्रे १ । १३ ।
"मिथ्याक्रमकथनं कूटतुलामानम्" ॥)

कथम्, व्य, (कस्मिन् प्रकारे इति प्रकारार्थे + "किमसेति" । ५ । ३ । २५ । थमुः कादेशश्च ।) हर्षः । गर्हा । प्रकारार्थः । सम्भ्रमः । प्रश्नः । सम्भावना । इति मेदिनी ॥ (यथा शाकुन्तले १ अङ्के
"कथमिदानीमात्मानं निवेदयामि
कथं वा आत्मापहारं करोमि" ॥)

कथा, स्त्री, (कथ + "चिन्तिपूजिकथिकुम्बिचर्चि-रेति" । ३ । ३ । १०५ । अङ् । टाप् च ।) प्रबन्धकल्पना । इत्यमरः । १ । ६ । ६ । प्रबन्धेन कल्पना अथवा प्रबन्धस्य अभिधेयस्य कल्पना स्वयं रचना इति भारतसुन्दरी ॥ "प्रबन्धस्य कल्पना रचना बृहन्नतास्तोकसत्या" । इति भरतः ॥
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः ।
परम्पराश्रया या स्यात्सा मताख्यायिका क्वचित्" ॥
इति कोलाहलाचार्य्यः ॥ ("नैयायिकमते हि नानावक्तृकपूर्व्वपक्षसिद्धान्तवान् वाक्यसन्दर्भः" । यथा, मनुः । ३ । २३१ ।
"यदयद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ।
ब्रह्मोद्याश्च कथाः कुर्य्यात्पितृणामेतदीप्सितम्" ॥

वार्त्ता । वाक्यम् । यथा, रघुः । ८ । ४३ ।
"अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु" ॥
विवरणम् । यथा, रामायणे । १ । ८ । ६ ।
"सनत्कुमारो भगवान् पुरा कथितवान् कथाम् ।
भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम्" ॥)

कथाप्रसङ्गः, त्रि, (कथायां प्रसङ्गो यस्य ।) जल्पाकः । इति शब्दरत्नावली ("तेन सह नानाकथाप्रसङ्गेनावस्थितः" ॥ इति हितोपदेशः ॥) वातूलः । विषवैद्यः । इति मेदिनी । (किरातार्জ্জुनीये । १ । २४ । "कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताऽखण्डलसूनुविक्रमः" ॥ वार्त्ता । गोष्ठीवचनम् । उक्तञ्च कथासरित्सागरे २२ । १८१ ।
"मिथः कथाप्रसङ्गेन विवादं किल चक्रतुः" ॥)

कथाप्राणः, त्रि, (कथया प्राणिति जीवति कथां आवर्त्तयित्वैव जीवनोपायं करोतीत्यर्थः । प्र + अण् + अच् । यद्वा कथायां प्राणाः जीवनोपायाः यस्य ।) कथकः । स तु नाटकवक्ता । इति शब्दरत्नावली ॥

कथितः, त्रि, (कथ्यतेऽसौ । कथ + कर्म्मणि + क्तः ।) उक्तः । (यथा, श्रीभागवतम् । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः" ॥
कथ + भावे क्तः । कथनम् । यथा रघुः । ११ । १० ।
"पूर्व्वसूक्तकथितैः पुराविदः
सानुजः पितृसखस्य राघवः" ॥)

कद, इ रोदने । आह्वाने । वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं अकं च-सेट्-इदित् ।) इ कर्म्मणि कन्द्यते । इति दुर्गादासः ॥

कद, ष म ङ वैक्लव्ये । विह्वलीभावे । इति कविकल्पद्रुमः । (भ्वादिं-आत्मं-अकं-सेट्-घटादि ।) ष कदा । म कदयति । ङ कदते । इति दुर्गादासः ॥

कदः, पुं, (कं जलं ददाति । क + दा + क ।) मेघः । इति शब्दरत्नावली ॥

कदकः, पुं, (कदः मेघ इव कायति प्रकाशते उपरिभागे । कद् + कै + क ।) वितानम् । इति हेमचन्द्रः ॥ चाँदोया इति भाषा ॥

कदक्षरं, क्ली, (कुत्सितं अक्षरं । कोः कादेशः ।) कुत्सितवर्णः ॥

कदध्वा, [न्] पुं, (कुत्सितोऽध्वा । कुगतीति समासः । कोः कत् तत्पुरुषेचेति कादेशः ।) निन्दितपथः । तत्पर्य्यायः । अध्वः २ दुरध्वः ३ विपथः ४ कापथः ५ । इत्यमरः २ । १ । १६ ॥

कदनं, क्ली, (कदयति दुःखं वैक्लव्यं वा प्राप्नोत्यनेन कद्यते दुःखं प्राप्यतेऽनेन वा । कद् + णिच् + करणे ल्युट् । घटादित्वात् न वृद्धिः । कद्यते इति भावे ल्युट् । कद्यते आह्वन्यते विह्वलीक्रियते निहन्यते वा यत्र । अधिकरणे णिच् ल्युट् यद्वा कद्यते म्रियते यत्र ।) पापम् । (यथा, भागवते ७ । ६ । १६ ।
"त्वत्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्र-
संसारचक्रकदनात् ग्रसतां प्रणीतः" ॥)
मर्द्दः । (यथा, रामायणे । ६ । २८ । २० ।
"क्रोधेन कदनं चक्रे वानराणां युयुत्सताम्" ॥)
युद्धम् । इति मेदिनी ॥ (यथा, भागवते । ७ । २ । १३ ।
"इति ते भर्त्तृनिर्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः" ॥)
मारणम् । इति भूरिप्रयोगः जटाधरश्च ॥

कदन्नं क्ली, (कुत्सितं अन्नं । कोः कादेशश्च ।) कुत्सितान्नम् । इति व्याकरणम् ॥
(यथा, भागवते । ५ । ६ । ८ । "मिष्टं कदन्नं वा अभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्" ॥
"इविर्विना हरिर्याति विना पीठेन माधवः ।
कदन्नैः पुण्डरीकाक्षः प्रहारेण धनञ्जयः" ॥ इत्युद्भटः ॥)

कदम्बं, क्ली, ("कदकदिकडिकटिभ्योऽम्बच्" । उणां । ४ । ८२ । कद् + अम्बच् ।) निकुरम्बम् । समूहः । इति मेदिनी ॥

कदम्बः, पुं, (कद्यते दर्शनात् विरहिणां चित्तवैक्लव्यं जायतेऽनेन । कद् + करणे अम्बच् ।) वृक्षविशेषः । कदम् इति भाषा । तत्पर्य्यायः । नीपः २ प्रियकः ३ हलिप्रियः ४ । इत्यमरः । २ । ४ । ८६ ॥ कादम्बः ५ । इति तट्टीका ॥ षट्पदेष्टः ६ प्रावृषेण्यः ७ हरिप्रियः ८ । इति रत्नमाला ॥ वृत्तपुष्पः ९ सुरभिः १० ललनाप्रियः ११ कादम्बर्य्यः १२ सीधुपुष्पः १३ महाद्रुः १४ कर्णपूरकः १५ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । वातपित्तकफार्त्तिनाशित्वम् । शीतलत्वम् । शुक्रबर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा भावप्रकाशे ।
"कदम्बो मधुरः शीतो कषायो लघवो गुरुः ।
सरो विरेचनश्छर्द्दिकफरक्तव्रणप्रदः" ॥
तथा च सुश्रुतः ।
"गरदोषहरं नीपं प्राचीनामलकं तथा" ॥)
अत्र नीपहलिप्रियौ धाराकदम्बवाचिनावपि कदम्बसाम्यात् पठितौ । यथा साङ्गः ॥
"नीपो महाकदम्बः स्याद्धाराकदम्ब इत्यपि ।
द्वितीयोऽल्पप्रसरश्च वृत्तपुष्पः कदम्बकः" ॥
इत्यस्य भेदः । तथा रत्नेऽपि । हारिद्रस्तु रजो बलः । यथामरटीकायां भरतः ॥
"धूलीकदम्बका धारा कदम्बः षट्पदप्रियः ॥
वृत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः ।
नीपो महाकदम्बोऽपि तथा बब्भलको मतः" ॥
(यथा, —साहित्यदर्पणम् । "यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः" ॥ कविभिस्तु प्रायशो वर्षाकाले एव अस्य वर्णनं क्रियते । माघे रैवतकपर्व्वतवर्णने द्रष्टव्यम् ॥*॥) सर्षपः । इति मेदिनी ॥ देवताड़काष्ठम् । इति रत्नमाला ॥
(कं प्रजापतिमधिष्ठातृकं श्रोत्रस्येन्द्रियं दमयति इति व्युत्पत्त्या जितेन्द्रियतत्त्वज्ञानी । कदं कदनं विनाशं वाति गच्छति प्रलये इति शेषः । इति व्युत्पत्त्या जगत् । यथा,—
"स एव सौम्य नित्यं राजते मूले विश्व कदम्बस्य परमो वै पुरुष आत्मा" ॥ इति श्रुतौ ॥)

कदम्बकं, क्ली, (कदम्ब + संज्ञायां कन् ।) समूहः । इत्यमरः । २ । ५ । ४० ॥ (यथा, शाकुन्तले २ अङ्के । "गाहन्तां महिषा निपानसलिलं शृङ्गै-

मुष्टस्ताड़ितं क्वाथबद्धकदम्बकं मृगकुजं रोमन्थमभ्यस्यतु" ॥)

कदम्बकः, पुं, (कदम्ब इव कायति प्रकाशते । हरिद्रा पीतवर्णत्वात् कदम्बकोरकोपरिस्थितसूक्ष्मांशतुल्यफलत्वाच्च सर्षपस्यापि तथात्वम् । वस्तुतु कदम्ब एव स्वार्थे कन् ।) सर्षपः । हरिद्रुः । इति राजनिर्घण्टः ॥ कदम्बवृक्षः । इति शब्दरत्नावली ॥

कदम्बदः, पुं, (कदम्बः कदम्बस्योपरिस्थः सूक्ष्मांशइव दीयतेऽसौ । कदम्ब + दो खण्डने + कर्म्मणि + घञर्थे कः । सर्षपस्य कदम्बकोरकोपरिस्थसूक्ष्मांशतुल्यफलत्वात् तथात्वम् ।) सर्षपः । इति शब्दचन्द्रिका ॥

कदम्बपुष्पा, स्त्री, (कदम्बस्येव पुष्पमस्यस्याः । अर्श आदित्वात् अच् ततष्टाप् ।) मुण्डितिकावृक्षः । इति रत्नमाला । मुण्डिरी इति भाषा ॥ (विशेषोऽस्या मुण्डितिकाशब्दे ज्ञातव्यः ॥)

कदम्बपुष्पी, स्त्री, (कदम्बपुष्पमिव पुष्पमस्याः । कदम्बपुष्प + ङीप् ।) महाश्रावणिकावृक्षः । इति राजनिर्घण्टः शब्दचन्द्रिका च । मुण्डिरी इति भाषा ॥

कदम्बी, स्त्री, (कद + करणे अम्बच् गौरादित्वात् ङीष् ।) देवदालीलता । इति राजनिर्घण्टः ॥ (देवदालीशब्दे गुणादयोऽस्या ज्ञातव्याः ॥)

कदरं, क्ली, (कं जलं दृणाति विदारयति नाशयतीत्यर्थः । क + दॄ + अच् ।) पायसभेदः । इति शब्दमाला ॥

कदरः, पुं, (कं जलं दृणाति श्लेष्मणा संहतजलं नाशयतीत्यर्थः । क + दॄ + अच् ।) श्वेतखदिरः । काँटा वावला इति भाषा । तत्पर्य्यायः । सोमवल्कः २ । इत्यमरः । २ । ४ । ४० ॥ ब्रह्मशल्यः ३ खदिरोपमः ४ । इति रत्नमाला ॥ (श्वेतसारः ५ । खदिरः ६ । सोमवल्कलः ७ । इति भावप्रकाशः ॥

गुणानाह तत्रैव ।

"कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्" ॥

व्यवहारो यथा, चरके ।

"तिन्दुकपियालबदरकदरखदिरसप्तपर्णार्ष्ककर्ण्यर्ज्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति" ॥) क्रकचः । करात् इति भाषा ॥ व्याधिभेदः । इति मेदिनी ॥ कड़ा जामुड़ा इति भाषा ॥ तस्य लक्षणम् । यथा निदाने ।

"शर्करोन्मथिते पादे क्षते वा कण्टकादितः ।
ग्रन्थिः कोलवदुत्पन्नो जायते कदरस्तु सः" ॥
("शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
मेदोरक्तानुगैश्चैव दोषैर्वा जायते नृणाम् ॥
सकोलः कठिनो ग्रन्थिर्निःसमश्चोन्नतोऽपि वा ।
कोलमात्रः सरक्तस्रावी जायते कदरस्तु सः" ॥
इति सुश्रुतः ॥) तच्चिकित्सा यथा भावप्रकाशे ॥

"दहेत् कदरमुद्धृत्य तैलेन दहनेन वा" ॥

अद्भुतः । इति हारावली ॥

कदर्य्यः, त्रि, (कुत्सितोऽर्थः स्वामी ॥ कुगतीतिसमासः ।) क्षुद्रः । कृपणः । इत्यमरः । ३ । १ । ४८ ॥

"आत्मानं धर्म्मकृत्यञ्च पुत्रदारांश्च पीड़यन् ।
यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृतः" ॥
इति स्मृतिः ॥ (तथा, छान्दोग्योपनिषदि । ५ । १९ । ५ । "तेभ्योऽप्राप्तेभ्यः एधगर्हाणि कारयाञ्चकार । सहप्रातः सञ्जिहान उवाच नमेत्तेनो जनपदे न कदर्य्यो न मद्यपो नानाहिताग्निर्नाविद्वानिति" ॥)

कदलः, पुं, (कद + कृषादित्वात् कलच् ।) कदलीवृक्षः । एरण्डलता । इति मेदिनी ॥ (यथा, अमरशतके । ९५ ।

"ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यश्च वेणिरतुलं स्तनयुग्ममस्याः" ॥)

कदलकः, पुं, (कदल + स्वार्थे कन् ।) कदलीवृक्षः । इति शब्दरत्नावली ॥

कदला, स्त्री, (कदल + टाप् ।) एरण्डी । चाकुलिया इति भाषा । डिम्बिका । शाल्मलीवृक्षः । इति मेदिनी ॥

कदली, स्त्री, (कदल + गौरादित्वात् ङीष् । यद्वा कायजलाय दल्यते लवस्य गौरादित्वात् ङीष् ।) स्वनामप्रसिद्धौषधिविशेषः । कला इति भाषा । तत्पर्य्यायः । वारणवृसा २ रम्भा ३ मोचा ४ अंशुमत्फला ५ काण्डीला ६ । इत्यमरः ॥ कदलः ७ वारणवुधा ८ वारवुधा ९ । इति तट्टीका ॥ सुफला १० सुकुमारा ११ सद्यःफला १२ गुच्छफला १३ हस्तिविषाणी १४ गुच्छदन्तिका १५ निःसारा १६ राजेष्टा १७ बालकप्रिया १८ ऊरुस्तम्भा १९ भानुफला २० वनलक्ष्मीः २१ । कदलकः २२ मोचकः २३ रोचकः २४ लोचकः २५ वारवृधा २६ । इति शब्दरत्नावली ॥ वारणवल्लभा २७ चर्म्मरुवती २८ । इति जटाधरः ॥ (यथा, महाभारते २ । दूतपर्व्वणि ६६ । १२ ।

"कदलीसुगुप्तसदृशं सर्व्वलक्षणसंयुतम् ।
गजहस्तप्रतीकाशं वज्रप्रतिमगौरवम्" ॥)

अस्याः पक्वफलगुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्तास्रविमर्दनत्वम् । गुरुतरत्वम् । मन्दानले अपथ्यत्वम् । सद्यः शुक्रविवर्द्धनत्वम् । क्षमाष्टक्षारत्वम् । कान्तिदाढ्यत्वम् । दीप्ताग्नौ सुखदत्वम् । कफामयकरत्वम् । सन्तर्पणत्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ (यथा हारीते ।

"हृद्यं मनोज्ञं कफवर्द्धिकारि
शीतञ्च सन्तर्पणमेव वल्यम् ।
रक्तं सपित्तं श्वसनञ्चदाहं
रम्भाफलञ्चापि नरस्य हन्ति ॥
अपक्वकं याहि च शीतलञ्च
कषायकं वातकफं करोति ।
विशेषभि वल्यं गुरु दुर्ज्जरञ्च
आरण्यरम्भाफलमेव तद्वत्" ॥)

मोचकगुणाः । हृद्यत्वम् । कफक्षमिनाशित्वम् । कुष्ठक्षीहज्वरहरत्वम् । अग्निदीपनत्वम् । वस्तिशोधनत्वञ्च ॥ * ॥

("मोचाफलं स्वादु शीतं विशेषभि कफनुद्गुरु ।
स्निग्धं पित्तास्रवद्दाहक्षतक्षयसमीरजित् ॥
पक्वं स्वादु हिमं पाके स्वादु वृष्यञ्च बृंहणम् ।
क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृत्" ॥
इति भावप्रकाशः ॥ कदली पुष्पगुणांश्चाह ॥
"कदल्याः कुसुमं स्निग्धं मधुरन्तुवरं गुरु ।
वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत्" ॥)

अस्या मूलगुणाः । बलकारित्वम् । वातपित्तनाशित्वम् । गुरुत्वञ्च ॥ * ॥

"माणिक्यमर्त्यामृतचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।
उक्ता गुणास्तेष्वधिका भवन्ति
निर्द्दोषता स्वाल्पघुता च तेषाम्" ॥

इति राजनिर्घण्टः ॥ * ॥ चम्पकाख्यकदलीफलगुणाः । वातपित्तहरत्वम् । गुरुत्वम् । शुक्रवृद्धिकारित्वम् । अतिशीतलत्वम् । रसे पाके मधुरत्वञ्च । दुग्धदधितक्रतालयुक्तं कदलं दुर्ज्जरम् । इति राजवल्लभः ॥ * ॥ हरिणाविशेषः । पताका । इति मेदिनी ॥ करिवैजयन्ती । इति हलायुधः ॥ हातिर उपरेर निशान इति भाषा ॥

कदा, व्य, (किम् + काले दा । "सर्व्वैकान्यकिंयत्तदः काले दा" । ५ । ३ । १५ ।) कस्मिन् काले । इति व्याकरणम् ॥ कबे कखन इति भाषा ॥ (यथा, ऋग्वेदे १ । ८४ । ८ । "कदा नः शुश्रवद्गिर इन्द्रो अङ्ग" ॥ तथा हितोपदेशे । १ । १२२ ।

"जातिद्रव्यबलानाञ्च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किन्तद्भविष्यति" ॥)

कदाकारः, पुं, (कुत्सितः आकारः । नैवाच नञ्ब्रीहिः निषिद्धत्वात् । यथा, "कोः कत्तत्पुरुषेऽचि" । ६ । ३ । १०१ ।) कुत्सिताकारः ॥ (कुत्सिताकारविशिष्टे, त्रि ॥)

कदाख्यं, क्ली, (कुत्सिता आख्या नाम यस्य ।) कुष्ठवृक्षः । कुड़ इति भाषा । तत्पर्य्यायः । कौबेरम् २ दुरुष्टम् ३ व्याघ्रम् ४ । इति शब्दचन्द्रिका ॥

कदाचन, व्य, (कदा + अनिर्द्धारिते चनप्रत्ययः ।) कस्मिन् काले । इति व्याकरणम् । कोन समये इति भाषा । (यथा, मनुः । २ । ५८ ।

"ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन" ॥)

कदाचित्, व्य, (कदा + अनिर्द्धारिते चित् ।) कस्मिंश्चित् काले । तत्पर्य्यायः । जातु २ । इत्यमरः । ३ । ४ । ४ ॥ कर्हिचित् ३ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । ७४ ।

"नाद्यैः क्रीड़ेत् कदाचित्तु स्वयं नोपानहौ हरेत् ।
शयनस्थो न भुञ्जीत न प्राणिस्थं नचासने" ॥)

कदुष्णं, क्ली, (कद् ईषत् उष्णं ईषदर्थे कोः "कवषोष्णे" । ६ । ३ । १०७ । चकारात् । कादेशः ।) ईषदुष्णम् । तत्पर्य्यायः । कोष्णम् २ कवोष्णम् ३ मन्दोष्णम् ४ । (यथा भट्टिः । ३ । १८ ।

"ससीतयोराघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश" ॥)

तद्वति त्रि । इत्यमरः । १ । ४ । ३५ ॥

कद्ड कार्कश्ये । (भ्वां-परं-चकं-सेट्) ववर्गद्वतोथोपधः । क्विपि संयोगान्तलोपे कद् इति । कद्रुति पद्मम्मशालं कर्कशं स्यादित्यर्थः । इति दुर्गादासः ॥

कद्रथः, पुं, (कुत्सितः रथः । कोः कादेशः । "रथवदयोश्च" । ६ । ३ । १०२ ।) कुत्सितरथः । इति व्याकरणम् ॥ (यथा, भट्टिः ५ । १०३ ।

"युधिकदधवङ्गीमं वभञ्ज ध्वजग्रालिनम्" ॥)

कद्रुः, पुं, (कद्+रुः।) पिङ्गलवर्णः। तदति चि। इत्यमरः। १। ५। १६॥

कद्रुः, स्त्री, (कद्+रुः। यद्वा मृगय्वादित्वात् साधुः।) नागमाता। इति मेदिनी॥ सा तु दक्षकन्या काश्यपपत्नी च। इति पुराणम्॥ (यथा, रामायणम्। ३। २०। २९।

"रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनस्तथा। सुरसाऽजनयन्नागान् राम! कद्रुश्च पन्नगान्"॥)

कद्रुपुत्रः, पुं, (कद्रोः पुत्रः।) नागः। इति शब्दचन्द्रिका॥

कद्रुसुतः, पुं, (कद्रोः सुतः।) नागः। तत्पर्य्यायः। काद्रवेयः २। इति शब्दरत्नावली॥ कक्षुकालुः ३ कद्रुपुत्रः ४ इति शब्दचन्द्रिका॥

कददः, त्रि, (कुत्सितं वदति यः। वदेः पचाद्यच्। कुत्सितः वदः इति वा "रथवदयोश्च"। ६। २। १०२। इति कदादेशः।) कुत्सितवक्ता। तत्पर्य्यायः। गर्ह्यवादी २। इत्यमरः। ३। १। ३७॥ दुर्व्वाक् ३। अतिकुत्सितः। इति हेमचन्द्रः॥ (यथा, भट्टिः ६। ७५।

"सर्व्वत्र दयिताधीनं सुव्यक्तं रामणीयकम्। येन जातं प्रियापाये कदर्दं हंसकोकिलम्"॥)

कन, ई णि प्रीतौ। गतौ। द्युतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट् ईदित्।) ई णि कान्तोऽस्ति। इति दुर्गादासः॥

कनकं, क्ली, (कनति दीप्यते इति। कनी दीप्तौ+ऋज्वादिभ्यो वुन्।) स्वर्णम्। इत्यमरः। २। ९। ९४॥ (यथा, मेघदूते। २।

"तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः"॥)

कनकः, पुं, (कनति दीप्यते यः। कनी दीप्तौ+ऋज्वादिभ्यो वुन्।) धत्तूरवृक्षः। नागकेशरवृक्षः। धूस्तूरवृक्षः। (यथा, इन्द्रजालतन्त्रे।

"कपालं मानुषं गृह्य कनकस्य पलानि च"॥)

काञ्चनारवृक्षः। कासीसवृक्षः। चम्पकवृक्षः। इति मेदिनी॥ कासमर्दवृक्षः। कणगुग्गुलुवृक्षः। इति राजनिर्घण्टः॥ खाखातरुः। इति शब्दमाला॥ (त्रिवः। यथा, महाभारते। १३। १७। ९२।

"उपकारः प्रियः सर्व्वः कनकः काञ्चनच्छविः"॥

यदुवंशीयस्य दुर्द्दमस्य पुत्रः।

यथा, हरिवंशे ३३। ६।

"दुर्द्दमस्य सुतो धीमान् कनको नाम नामतः"॥)

कनकक्षारः, पुं, (कनकस्य द्रावणार्थं क्षारः।) टङ्कणः। इति राजनिर्घण्टः। सोयागा इति भाषा॥ (टङ्कणशब्दस्य गुणा व्याख्येयाः॥)

कनकदण्डकं, क्ली, (कनकस्य कनकनिर्म्मितो वा दण्डः यत्र। कप् स्वार्थे कन् वा।) राजच्छत्रम्। इति त्रिकाण्डशेषः॥

कनकपलः, पुं, (कनकस्य कर्षचतुष्टयरूपपलं तत्परिमाणम्।) पलपरिमाणम्। तच्च सुवर्णादिपरिमाणकषोड़शमाषकम्। तत्पर्य्यायः। कुरुविन्दः २। इति हारावली॥ (कनकमिव पलं मांसमस्य इति व्युत्पत्त्या मत्स्यविशेषः॥)

कनकप्रभा, स्त्री, (कनकस्य प्रभेव प्रभा यस्याः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ (स्वनामख्यातो ज्वरातीसाररोगस्यौषधविशेषो यथा।

"सुवर्णवीजं मरिचं विराल-पदं कणा टङ्कणकं विषञ्च। गन्धं जयाद्विस्त्रिदिनं विमर्द्य गुञ्जा प्रमाणा वटिका विधेया॥ रक्तातिसारग्रहणीज्वराग्नि-मान्द्यादि हन्यात् कनकप्रभेयम्। दध्योदनं भोज्यमनुव्रजारि-मांसं भजेत्तित्तिरिलावकानाम्"॥

इति वैद्यकरत्नेन्द्रसारसंग्रहः॥*॥)

कनकप्रसवा, स्त्री, (कनकवत् प्रसवः पुष्पं यस्याः।) स्वर्णकेतकी। इति राजनिर्घण्टः॥

कनकरम्भा, स्त्री, (कनकवर्णरम्भा। यद्वा कनकवर्णफलिनी रम्भा।) सुवर्णकदली। इति राजनिर्घण्टः॥

कनकरसः, पुं, (कनकवर्णो रसः।) हरितालम्। इति राजनिर्घण्टः॥ ("कतमोऽयं पूर्व्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते"। इति शाकुन्तले ७ अङ्के॥)

कनकलोद्भवः, पुं, (कनति दीप्यते इति। कना दीप्ता कला अवयवः तया उद्भवतीति। कनकला+उद्+भू+अच्।) राजः। इति राजनिर्घण्टः। धुना इति भाषा॥

कनकाचलः, पुं, (कनकमयो अचलः पर्व्वतः।) अस्ताचलः। सुमेरुपर्व्वतः। इति सिद्धान्तशिरोमणिः॥ दानविशेषः। इति स्मृतिः॥ (अस्य परिमाणमुक्तं ब्रह्माण्डपुराणे यथा,—

"अथ वापहरं वक्ष्ये सुवर्णाचलमुत्तमम्। यस्य प्रसादाद्भवनं विरिञ्चेर्याति मानवः॥ उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः। तदर्द्धेनाधरस्तद्वत् अल्पवित्तोऽपि शक्तितः॥ दद्यादेकपलादूर्द्धं यथा शक्त्या विमत्सरः। धान्यपर्व्वतवत् सर्व्वं विदध्यात् विधिमुत्तमम् विघ्नभयैलाक्षद्यच्च ऋत्विग्भ्यः प्रतिपादयेत्"॥)

कनकाध्यक्षः, पुं, (कनकस्य रूप्यस्य अध्यक्षः मध्यपदलोपः।) सुवर्णरक्षकः। तत्पर्य्यायः। भौरिकः २। इत्यमरः। २। ८। ७॥

कनकारकः, पुं, (कनकं दीप्तस्वर्णदीप्तिमिव सर्व्वतो ऋच्छति व्याप्नोतीति। कनक+ऋ+अण्; स्वार्थे+कन्।) कोविदारवृक्षः। इति राजनिर्घण्टः॥ (कोविदारशब्दस्य गुणादिकं ज्ञातव्यम्॥)

कनकालुका, स्त्री, (कनकनिर्म्मितं आलुः। सलिलाद्याधारपात्रविशेषः संज्ञायां कन् टाप् च।) स्वर्णकलसः। तत्पर्य्यायः। भृङ्गारः २। इत्यमरः। २। ८। ३२॥

कनकाङ्गं, क्ली, (कनकस्याङ्गा नाम यस्य।) नागकेशरपुष्पम्। इति राजनिर्घण्टः॥ (नागकेशरशब्दस्य विशेषो द्रष्टव्यः॥)

कनकाङ्क्यः, पुं, (कनकं आङ्क्योऽस्य। कनकमाङ्क्यते स्पर्द्धते वा। कनक+आ+अङ्क+कः।) धुस्तूरवृक्षः। इत्यमरः। २। ४। ७७॥ नागकेशरवृक्षः। इति शब्दचन्द्रिका॥

कननः, त्रि, (कन्+युच्।) कामुकः। इति हेमचन्द्रः॥

कनिष्ठः, त्रि, (अतिशयेन युवा अल्पो वा। इष्ठन्। कनादेशश्च।) अतियुवा। अल्पः। पश्चाज्जातः। तत्पर्य्यायः। जघन्यजः २ यवीयान् ३ अवरजः ४ अनुजः ५। इत्यमरः। २। ६। ४३॥ कनीयान् ६ कन्यसः ७ यविष्ठः ८। इति तट्टीकासारसुन्दरी॥ (यथा, मनुः। ९। ११३।

"ज्येष्ठस्यैव कनिष्ठस्य संहरेतां यथोदितम्। येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्"॥ स्त्रियः। यथा, महाभारते। १३। १७। १३१।

"पवित्रं चिरकुन्मन्त्रः कनिष्ठः क्षयाधिकलः"॥)

कनिष्ठकं, क्ली, (कनिष्ठमिव कायति प्रकाशते। कनिष्ठ+कै+कः।) शूकशमी। इति राजनिर्घण्टः॥

कनिष्ठा, स्त्री, (कनिष्ठ+ङीषादिकं बाधित्वा अजादित्वात् टाप्।) दुर्बलाङ्गुलिः। इत्यमरमेदिनीकरौ॥ कड़े आङ्गुल इति भाषा। (यथा, रामायणे ३। ५१। ७।

"कनिष्ठायामपत्यानां भ्रातुर्म्मम स राक्षसः। दुःखं कर्त्तुमपर्य्याप्तो देवि! कस्मादविधीदसि"॥) धीरादितिरुद्धां द्विधाभेदान्तर्गतनायिकाविशेषः। अस्या लक्षणम्। परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा। इति रसमञ्जरी॥ (त्रि, मनुः ९। १२२॥

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायाञ्च पूर्व्वजः"।

"यदि प्रथमोढ़ायां कनीयान् पुत्रो जातः पश्चादूढ़ायाञ्च ज्येष्ठः"॥ इति कुल्लूकभट्टः॥)

कनी, स्त्री, (कन+अच्+गौरादित्वात् ङीष्।) कन्या। इति हेमचन्द्रः॥

कनीचिः, स्त्री, (कन्+बाऊलकात् इचि प्रत्ययः। एषोदरादित्वात् दीर्घश्च।) गुञ्जा। इति शब्दरत्नावली॥ कुँच इति भाषा॥ पुष्पयुक्तलता। शुकटः। इत्युणादिकोषः॥ मूर्द्धन्यणमध्योऽपि पाठः॥

कनीनिका, स्त्री, (कन्+ईन। संज्ञायां कन्। ततष्टाप्+अत इत्वम्।) चक्षुस्तारा। कनिष्ठाङ्गुलिः। इति मेदिनी॥

कनीनी, स्त्री, (कन्+ईन् ततो ङीष्।) कनिष्ठाङ्गुलिः। इत्यमरटीका॥

कनीयसं, क्ली, (कन् दीप्तौ+अच्। कनः सूर्य्यः तस्येदम्। कन+छः कनीयम्। तद्रूपत्वेन सीयते अवसीयते इति। सो+घञर्थे कर्म्मणि कः। सूर्य्यदेवाधिष्ठातृत्वमिति तात्पर्य्यात्।) ताम्रम्। इति हेमचन्द्रः॥

कनीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा अल्पो वा इत्यर्थे ईयसुन्। ततः कनादेशः।) अनुजः। अतियुवा। अत्यल्पः। इति मेदिनी॥ (यथा, ऋग्वेदे। ४। २४। ९। "स भूयसा कनीयो नारिरेचीद्दीनां दत्ता विदुष्टन्ति प्रवाणम्"॥

"मातुः पितुः कनीयांसं न नमेद् वयसाऽधिकः। प्रणमेच्च गुरोः पत्नीं ज्येष्ठभार्य्यां विमातरम्"॥ इति स्मृतिः॥)

कन्तुः, पुं, ("कंशमभ्यां वभयुस्तितुतयसः इति तुः"। ५। २। १३८। कम्+तुः। कामयते इति कमु कान्तौ। अर्जिदृशीत्यादिना कुप्रत्यये तुकि सिद्धत्वात्। "कमिमनिजनिगामायाहिभ्यश्च"। उणां १। ७३।) कामदेवः। इति चिकाण्डशेषः॥ हृदयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (चित्रम्। इति उज्ज्वलदत्तः। कं सुखं अस्यास्तीति व्युत्पत्त्या सुखी जनः॥)

कन्था, स्त्री, (कम्+बाहुलकात् थन्+टाप्।) स्यूतकर्पटः। इति स्त्रीलिङ्गसंग्रहे अमरः॥ काँथा इति भाषा। (यथा, यतिपञ्चके २। "कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः"॥) मृगमयभित्तिः। इति मेदिनी। काँथ् इति भाषा॥ उसीनराख्यजनपदप्रसिद्धयामाख्यां नामसु विषयभूतेषु षष्ठ्यन्तात् परा कन्था स्त्रीवे स्यात्। यथा सौसमीनां कन्था सौसमिकन्थम्। आङ्गीनां कन्था आङ्गिकन्थम्। इत्यमरटीकायां भरतः॥

कन्थारी, स्त्री, (कम्+आरन्। एषोदरादित्वात् थुक् गौरादित्वात् ङीष्।) वृक्षविशेषः। तत्पर्य्यायः। कन्थरी २ कन्था ३ दुर्द्धर्षा ४ तीक्ष्णकण्टका ५ तीक्ष्णगन्धा ६ क्रूरगन्धा ७ दुष्पुवेशा ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातव्रणोदरकृमिश्वित्रनाशित्वम्। दीपनत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

कन्दं, क्ली पुं, (कन्दयति शिक्षायां वैक्लव्यं जनयति रोदयति वा भक्षयन्तं जनम्। कदि+णिच्+अच्। यद्वा कन्द्यते कन्द इति नाम्ना ज्ञायते। कदि+कर्म्मणि+घञ्।) शूरणः। अस्य मूलम्। इति मेदिनी॥ गुच्छनम्। इति राजनिर्घण्टः॥ (यथा, महाभारते १३। १७। ११६॥
"वने निवसतां नित्यं कन्दमूलफलाशिनाम्"॥
यथा च, प्रायश्चित्ततत्त्वे। २। २०।
"घृतं निर्झरवारिपानमशनं कन्दः सहाया मृगाः"॥
शूरणशब्दे अस्य विशेषो ज्ञेयः॥)

कन्दः, पुं, (कं जलं ददातीति। क+दा+कः। कन्दति कन्दयति कन्द्यते वा। कदि आह्वाने रोदने च। अच् घञ् वा।) मेघः। इति मेदिनी॥ योनिरोगविशेषः। तस्य निदानलक्षणे। यथा,—
"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा॥
पूयशोणितसङ्काशं लकुचाकृतिसन्निभम्।
उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः"॥
स चतुर्विधः। वातिकः १ पैत्तिकः २ श्लैष्मिकः ३ सान्निपातिकश्च ४। एषां यथाक्रमं लक्षणानि।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत्।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तम्॥
नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः।
सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः"॥
इति माधवकरः॥ (अस्य चिकित्सामाह भावप्रकाशः॥
"गौरिकामाक्षिकं जन्तुघ्नं रजन्यञ्जनकट्फलाः।

परूषेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः॥
क्षिपेत्तायाः कषायेण सक्षौद्रेण च सेवयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते"॥
अन्यत्सर्व्वं योनिशब्दे द्रष्टव्यम्॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची। शाकपार्थिवादिवत् समासः। मध्यपदलोपश्च।) गुडूचीविशेषः। तत्पर्य्यायः। कन्दोद्भवा २ कन्दामृता ३ बडुच्छिन्ना ४ बडुरहा ५ पिण्डालुः ६ कन्दरोहिणी ७। इति राजनिर्घण्टः॥

कन्दटं, क्ली, (कदि+अटन्।) श्वेतोत्पलम्। इति शब्दरत्नावली। सादा सुँदि इति भाषा॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फलं यस्याः।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कन्दबल्ला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बल्ला वा।) चिपर्णिका। इति राजनिर्घण्टः॥

कन्दमूलं, क्ली, (कन्द एव कन्दरूपं वा मूलं यस्य।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्देऽस्य गुणा वक्तव्याः॥)

कन्दरं, क्ली, (केन जलेन दीर्य्यते। दृ+विदारे+कर्म्मणि अप्। कं जलं श्लेष्मजनितं दृणाति नाशयतीति वा। दृ+अच्।) आर्द्रकम्। इति राजनिर्घण्टः॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेयाः॥)

कन्दरः, पुं क्ली, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ। दृ+कर्म्मणि अप्।) गुहा। इति मेदिनी॥
"निझरादीचेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्"।
इति मेघदूते ५८॥) क्षत्रिमोऽकृत्रिमो वा सजलो निर्जलो वा महाकारो गिरिनितम्बदेशः। इति भरतः॥ तत्पर्य्यायः। दरी २ कन्दरा ३ इत्यमरः। २। ३। ६॥ कन्दरी ४। इति पङ्क्तिका॥ दरः ५। इति स्वामी॥ (यथा, भागवते। ४। ६। ११।
"नानाऽमलप्रस्रवणोर्ज्जनाकन्दरसानुभिः"॥)

कन्दरः, पुं, (कं मातङ्गशिरो दीर्य्यतेऽनेन। दृ+करणे अप्।) अङ्कुशः। इति मेदिनी॥

कन्दरा, स्त्री, (कन्दर+टाप्।) गुहा। इत्यमरः। २। ३। ६॥

कन्दराकरः, पुं, (कन्दरस्य आकरः।) पर्व्वतः। इति हारावली॥

कन्दरालः, पुं, (कन्दराय अङ्कुशाय अलतीति। कन्दर+अल+अच्॥) गर्ज्जभाण्डवृक्षः। क्षत्रवृक्षः। इति मेदिनी॥ आखोटवृक्षः। इति राजनिर्घण्टः॥

कन्दरालकः, पुं, (कन्दराल एव स्वार्थे कन्।) क्षत्रवृक्षः। इति शब्दरत्नावली॥ (क्षत्रशब्दे विशेषोऽस्य ज्ञातव्यः॥)

कन्दरी, स्त्री, गुहा। इत्यमरः। २। ३। ६॥

कन्दरोद्भव, स्त्री, (कन्दरे उद्भवतीति। कन्दर+उद्+भू+अच्+टाप्।) क्षुद्रपाषाणभेदीवृक्षः इति राजनिर्घण्टः॥

कन्दर्पः, पुं, (कमित्यव्ययं कुत्सायां, कं कुत्सितो दर्पः यस्मात्। यद्वा कं सुखं तेन तत्र वा, दृप्यति। दृप्+अच्। कं ब्रह्माणं प्रति दर्पितवान् वा।) कामदेवः। इत्यमरः। १। १। २६॥ (यथा, महाभारते १। २१५। १८।
परयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः॥
क्षिपेत्तायाः कषायेण सक्षौद्रेण च सेवयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते"॥
अन्यत्सर्व्वं योनिशब्दे द्रष्टव्यम्॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची। शाकपार्थिवादिवत् समासः। मध्यपदलोपश्च।) गुडूचीविशेषः। तत्पर्य्यायः। कन्दोद्भवा २ कन्दामृता ३ बडुच्छिन्ना ४ बडुरहा ५ पिण्डालुः ६ कन्दरोहिणी ७। इति राजनिर्घण्टः॥

कन्दटं, क्ली, (कदि+अटन्।) श्वेतोत्पलम्। इति शब्दरत्नावली। सादा सुँदि इति भाषा॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फलं यस्याः।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कन्दबल्ला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बल्ला वा।) चिपर्णिका। इति राजनिर्घण्टः॥

कन्दमूलं, क्ली, (कन्द एव कन्दरूपं वा मूलं यस्य।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्देऽस्य गुणा वक्तव्याः॥)

कन्दरं, क्ली, (केन जलेन दीर्य्यते। दृ+विदारे+कर्म्मणि अप्। कं जलं श्लेष्मजनितं दृणाति नाशयतीति वा। दृ+अच्।) आर्द्रकम्। इति राजनिर्घण्टः॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेयाः॥)

कन्दरः, पुं क्ली, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ। दृ+कर्म्मणि अप्।) गुहा। इति मेदिनी॥
"निझरादीचेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्"।
इति मेघदूते ५८॥) क्षत्रिमोऽकृत्रिमो वा सजलो निर्जलो वा महाकारो गिरिनितम्बदेशः। इति भरतः॥ तत्पर्य्यायः। दरी २ कन्दरा ३ इत्यमरः। २। ३। ६॥ कन्दरी ४। इति पङ्क्तिका॥ दरः ५। इति स्वामी॥ (यथा, भागवते। ४। ६। ११।
"नानाऽमलप्रस्रवणोर्ज्जनाकन्दरसानुभिः"॥)

कन्दरः, पुं, (कं मातङ्गशिरो दीर्य्यतेऽनेन। दृ+करणे अप्।) अङ्कुशः। इति मेदिनी॥

कन्दरा, स्त्री, (कन्दर+टाप्।) गुहा। इत्यमरः। २। ३। ६॥

कन्दराकरः, पुं, (कन्दरस्य आकरः।) पर्व्वतः। इति हारावली॥

कन्दरालः, पुं, (कन्दराय अङ्कुशाय अलतीति। कन्दर+अल+अच्॥) गर्ज्जभाण्डवृक्षः। क्षत्रवृक्षः। इति मेदिनी॥ आखोटवृक्षः। इति राजनिर्घण्टः॥

कन्दरालकः, पुं, (कन्दराल एव स्वार्थे कन्।) क्षत्रवृक्षः। इति शब्दरत्नावली॥ (क्षत्रशब्दे विशेषोऽस्य ज्ञातव्यः॥)

कन्दरी, स्त्री, गुहा। इत्यमरः। २। ३। ६॥

कन्दरोद्भव, स्त्री, (कन्दरे उद्भवतीति। कन्दर+उद्+भू+अच्+टाप्।) क्षुद्रपाषाणभेदीवृक्षः इति राजनिर्घण्टः॥

कन्दर्पः, पुं, (कमित्यव्ययं कुत्सायां, कं कुत्सितो दर्पः यस्मात्। यद्वा कं सुखं तेन तत्र वा, दृप्यति। दृप्+अच्। कं ब्रह्माणं प्रति दर्पितवान् वा।) कामदेवः। इत्यमरः। १। १। २६॥ (यथा, महाभारते १। २१५। १८।

"संहन्त्वामभिषेकार्थमवतीर्णं समुद्रगाम्।
दृष्ट्वैव पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता"॥)
ध्रुवकभेदः। यथा,—सङ्गीतदामोदरः॥
"त्रयोविंशतिवर्णाद्भिर्ध्रुवः कन्दर्पसंज्ञकः।
वीरे वा करुणे वा स्यात् खण्डताले विधीयते"॥

कन्दर्पकूपः, पुं, (कन्दर्पस्य कूप इव।) योनिः। इति जटाधरः॥

कन्दर्पजीवः, पुं, (कन्दर्पं जीवयति परिवर्द्धयतीति। कन्दर्प+जीव+अच्।) कामलक्षिनामवृक्षः। इति राजनिर्घण्टः॥

कन्दर्पमुषलः पुं, (कन्दर्पस्य मुषल इव।) लिङ्गः। इति चिकाण्डशेषः॥

कन्दर्पभट्टङ्कलः, पुं, (कन्दर्पः भट्टङ्कलः यत्र। यद्वा कन्दर्पाय भट्टङ्कलः।) भट्टङ्कारबन्धविशेषः। तस्य लक्षणम्। यथा रतिमञ्जरी।
"नारी पदद्वयं स्याप्य कान्तस्योरुद्वयोपरि।
कटिश्लेषोलयेदाशु बन्धः कन्दर्पभट्टङ्कलः"॥

कन्दलं, क्ली, (कदि+अलच्।) कपालः। उपरागः। नवाङ्कुरः। कलध्वनिः। इति मेदिनी॥ अपवादः। इति शब्दरत्नावली॥ (कदलीविशेषः। यथा, अमरशतके ४८। "प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोविन्दवः"॥)

कन्दलः, पुं, (कदि+अलच्।) कनकम्। युद्धम्। कपालः। इति धरणी॥

कन्दलता, स्त्री, (कन्दप्रधाना लता।) मालाकन्दः। इति राजनिर्घण्टः॥

कन्दली, स्त्री, (कन्दल+गौरादित्वात् ङीष्।) मृगविशेषः। यस्य चर्म्म व्यवह्रियते। गुल्मप्रभेदः। (यथा, मेघदूते २१।
"आविर्भूतप्रथमसुकुलाः कन्दलीश्चानुकच्छम्"॥)
कदली। इति मेदिनी॥ (यथा, विक्रमोर्व्वश्यां। ७८।
"आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः"। इति॥)
पताका। इति चिकाण्डशेषः॥ पद्मबीजम्। इति राजनिर्घण्टः॥

कन्दलीकुसुमं, क्ली, (कन्दल्या इव कुसुममस्य।) शिलीन्ध्रम्। इति जटाधरः॥

कन्दवर्द्धनः, पुं, (कन्देन वर्द्धते इति। वृध्+ल्युः।) शूरणः। इति राजनिर्घण्टः॥ (शूरणशब्देऽस्य गुणादयो द्रष्टव्याः॥)

कन्दवल्ली, स्त्री, (कन्दाकारा+वल्ली।) वन्याकर्कोटकी। इति राजनिर्घण्टः॥

कन्दशूरणः, पुं, (कन्देषु शूरणः श्रेष्ठः।) ओल्लः। इति राजनिर्घण्टः॥ (ओल्लशब्देऽस्य गुणादयो व्याख्याताः॥)

कन्दसंज्ञं, क्ली, (कन्द इति संज्ञा यस्य कन्दनाम्ना संज्ञायते वा।) योनिरक्तरोगविशेषः। तत्पर्य्यायः। योन्यर्शः २। इति चिकाण्डशेषः॥ तस्य निदानादि कन्दशब्दे द्रष्टव्यम्॥

कन्दसारं, क्ली, (कन्दानां सारो यत्र।) नन्दनवनम्। इति चिकाण्डशेषः॥ [राजनिर्घण्टः॥

कन्दाढ्यः, पुं, (कन्देन आढ्यः।) धरणीकन्दः। इति

कन्यका

कन्दार्हः, पुं, (कन्देषु अर्हः आदरणीयः।) शूरणः। इति राजनिर्घण्टः॥

कन्दालुः, पुं, (कन्दमय आलुः।) कासालुः। धरणी-कन्दः। त्रिपर्णिका। इति राजनिर्घण्टः॥

कन्दिरी, स्त्री, (कन्द + इरच् + गौरादित्वात् ङीष्।) लज्जालुवृक्षः। इति वैद्यकम्॥ (लज्जालुशब्दे विशेषोऽस्या ज्ञातव्यः॥)

कन्दी, [न्] पुं, (कन्दोऽस्यास्य। अस्त्यर्थे इनिः।) शूरणः। इति राजनिर्घण्टः॥

कन्दुः, पुं स्त्री, (स्कन्दति स्रोषयति जलादिकं स्कन्देः सलोपश्चेत्युः।) लौहमयपाकपात्रम्। ताओया इति लोहता इति च भाषा। तत्पर्य्यायः। खेदनी २। इत्यमरः। २। ९। ३०॥

कन्दुकः, पुं, (कं सुखं ददातीति। कम् + दा + मितद्वादित्वात् डुः संज्ञायां कन्।) गेण्डुकः। इत्यमरः। २। ७। १३८॥ गेँड़ु इति भाषा॥ (यथा, कुमारे। १। २९। "सा कन्दुकैः क्वचिमपुष्पकैश्च"॥)

कन्दुपक्वं, क्ली, (कन्दौ पक्वम्।) जलोपसेकं विना केवलपाचे यत् वह्निना पक्वं भक्षतण्डुलादि। यथा,—
"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि"॥
इति तिथ्यादितत्त्वे कूर्म्मपुराणम्॥

कन्दोटं, क्ली, (कदि + ओटन्।) नीलोत्पलम्। इति शब्दरत्नावली॥

कन्दोटः, पुं, (कदि + ओटन्।) शुक्लोत्पलम्। इति शब्दरत्नावली॥

कन्दोतः, पुं, (कन्दे मूले उतः। कन्द + वेञ् + क्तः।) कुमुदम्। इति चिकाण्डशेषः॥

कन्धः, पुं, (कं जलं दधाति धारयति। कं + धा + कः।) मेघः। इति शब्दरत्नावली॥

कन्धरः, पुं, (कं जलं धरति धारयति वा। कम् + धृ + अच्।) मेघः। इति मेदिनी॥ मारिषवृक्षः। इति राजनिर्घण्टः॥ (कं शिरो धरतीति।) ग्रीवा। इत्यमरटीकासारसुन्दरी॥ (भागवते ६। १२। ३३।
"वज्रस्तु तत्कन्धरमाशु वेगः
क्षुन्नन्समन्तात् परिवर्त्तमानः"॥)

कन्धरा, स्त्री, (कं शिरो धरतीति। कम् + धृ + अच् + टाप्।) ग्रीवा इत्यमरः। २। ६। ८८॥ (यथा, याज्ञवल्क्यः। २। २२३।
"कन्धरा बाहुसक्थ्नां च भङ्गे मध्यमसाहसः"॥)

कन्धिः, स्त्री, (कं शिरः समुद्रपत्ते जलं धियते यत्र। धृ + अधिकरणे + किः।) ग्रीवा। समुद्रे पुं। इति राजनिर्घण्टः॥

कन्नं, क्ली, (कन्यते प्राप्यते दुःखमनेन। कन गत्यां + करणे क्तः।) पातकम्। मूर्च्छा। इति शब्दमाला॥ कल्लमिति च पाठः॥

कन्यका, स्त्री, (कन्या + अज्ञातादौ कन् पूर्ब्बहस्वश्च।) कुमारी। इति चिकाण्डशेषः॥ यथा।
"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी।
दशमे कन्यका प्रोक्ता अत ऊर्द्धं रजस्वला"॥
इति स्मृतिः॥ परकीयनायिकाविशेषः। यथा।
"अप्रकटपरपुरुषानुरागा परकीया। सा च द्विविधा परोढ़ा कन्यका च। कन्यायाः पित्राद्यधीनतया परकीयत्वम्। अस्या गुप्तैव सकला चेष्टा"। इति रसमञ्जरी॥

कन्यकाजातः, पुं स्त्री, (कन्यकायां अनूढ़ायां जातः। कन्यका + जन + कर्त्तरि क्तः।) अविवाहितापुत्रः। तत्पर्य्यायः। कानीनः २। इत्यमरः। २। ६। १३७॥ (यथाह याज्ञवल्क्यः। १२। १३२।
"कानीनः कन्यकाजातो मातामहसुतो मतः"॥
कर्णः। स तु अनूढ़ायां कुन्त्यां जातः॥)

कन्यकापतिः, पुं, (कन्यकायाः पतिः।) जामाता। इति शब्दरत्नावली॥

कन्यसः, पुं, (कन + अन्नादित्वात्। ४। १११। उणां।) निपातनात् कन्यः। कन्यत्वेन कामयत्वेन सीयते अवसीयते इति। कन्य + सो + घञर्थे कः।) कनिष्ठभ्राता। इत्यमरटीकासारसुन्दरी॥ (यथा रामायणम्। ५। ३३। १०।
"रामस्य कन्यसो भ्राता सुमित्रा येन सुप्रजाः"॥)

कन्यसा, स्त्री, (कन्यस + टाप्।) कनिष्ठभगिनी। इत्यमरटीका॥

कन्या, स्त्री, (कन् दीप्तौ + अन्नादित्वात् यक् इत्युणादौ ४। १११। कन्यायाः कनीन् चेति निर्देशात् पाणिनिमतानुसारेण न ङीष् अतश्टाप्।) कुमारी। इत्यमरः॥ २। ६। ८। सा तु दशमवर्षीया। इति स्मृतिः॥ (यथा महाभारते वनपर्ब्बणि।
"यस्मात् कामयते सर्व्वान् कमेर्धातोश्च भाविनि!।
तस्मात् कन्येह सुश्रोणि! खतन्त्रा वरवर्णिनि!"॥)
नारी। ओषधीविशेषः। घृतकुमारी इति ख्याता। इति मेदिनी॥ यथा सुश्रुते निदानस्थाने॥
("कान्तैर्दादशभिः पत्रैर्मयूराङ्गरुहोपमैः।
कन्दजां काञ्चनक्षीरी कन्या नाम महौषधीं"॥
"ग्रोथघ्नी कासहा कन्या"॥ इति वैद्यकद्रव्यगुणः॥ विशेषगुणादयोऽस्या घृतकुमारीशब्दे द्रष्टव्याः॥) स्थलैला। वाराहीकन्दः। वन्याकर्कोटकी। इति राजनिर्घण्टः॥ •॥ मेषादिद्वादशराशेरन्तर्गतषष्ठराशिः। सा तु उत्तरफल्गुनीशेषपादचयहस्तासमुदाययुक्तचित्राप्रथमार्द्धेन भवति। तदधिष्ठातृदेवतायाः स्वरूपं यथा। जले।नौकास्थस्त्र्याभिधारिणी स्त्री। इति दीपिका॥ अपि च। नीलकण्ठीजातके॥
"पाण्डुर्द्विपात् स्त्रीदितनुर्यमाशा-
निशामरुच्छोतसमोदयश्च।
कन्यार्द्धशब्दा शुभभूमिवैश्य-
रूक्षाल्पसङ्गप्रसवा शुभा च"॥*॥
मतान्तरे सा तु शीर्षोदया। दिनबला। पिङ्गलवर्णा। दक्षिणदिक्स्वामिनी। वायुप्रकृतिः। प्रीतस्वभावा। शुद्धभूमिचरा। वैश्यवर्णा। रूक्षा। स्त्र्याख्या। खटच्छब्दा। अल्पसन्ताना। अल्पपुंसङ्गा च॥*॥ तत्र जातफलम्। "वेदशास्त्रे श्रद्धावान् स्थानरोषे खेदितः भार्य्यायां। सदा विरसश्च"। इति ज्योतिषम्॥*॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम्। यथा कोष्ठीप्रदीपः॥

कन्या

"युवतिगे शशिनि प्रमदाजन-
प्रबलकेलिविलासकुतूहलैः।
विमलशीलयुता जननोत्सवैः
सुविधिना विधिना सहितः पुमान्"॥*॥
तस्या उदये तन्नामकलग्नं भवति। तस्य गणितप्राप्तपरिमाणं दशम्यङ्कलाधिकपञ्चाङ्कुलप्रभे देशे वर्त्तमानोनविंशायनांशे ऊनचिंशत्पलाधिकपञ्चदण्डाः। इति ज्योतिषम्॥*॥ तत्र जातफलम्।
"कन्याजन्मोद्भवो मर्त्यो नानाशास्त्रविशारदः।
सौभाग्यगुणसम्पन्नः सुन्दरः सुरतप्रियः"॥
इति कोष्ठीप्रदीपः॥*॥ सुता। तस्या विवाहं विनान्यसंस्कारकर्म्मणि वृद्धिश्राद्धनिषेधो यथा,—
"कन्याया निष्क्रमो नास्ति वृद्धिश्राद्धं न विद्यते।
नामान्नप्राशनं चूड़ां कुर्य्यात् स्त्रीणाममन्त्रकम्"॥
"जातकर्म्मादिचूड़ान्तं कुमार्य्यास्याप्यमन्त्रकम्।
कर्त्तव्यं पञ्चभिर्व्वर्षैरेकं निष्क्रमणं विना"॥
इति च महानिर्व्वाणतन्त्रे नवमोल्लासः॥
(तीर्थविशेषः। यथा महाभारते ३। ८३। १०४।
"ततो गच्छेत धर्म्मज्ञ! कन्यातीर्थमनुत्तमम्।
कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्"॥)

कन्याका, स्त्री, (कन्यैव इति स्वार्थे कन् अनुक्तपुंस्कत्वात् न ह्रस्वः।) कुमारी। इति शब्दरत्नावली॥

कन्याकुब्जः, पुं, (कन्याः कुब्जाः यत्र देशे सः। वायुना हि अस्मिन् देशे कन्याः कुब्जीकृता अतोऽस्य तथात्वम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः॥ (यथा, महाभारते। वनपर्ब्बणि॥
"कन्याकुब्जेऽपिबत्सोममिन्द्रेण सह कौशिकः"॥
वायुना हि अस्मिन् देशे पुरा कन्याः कुब्जीकृताः। तद्विवरणमुच्यते। पुरा किल कुशनाभो राजर्षिर्घृताच्यां कन्याशतं जनयामास। रूपयौवनसम्पन्नास्तास्तु कदाचित् उद्यानभूमिमागम्य परयानन्दसन्तप्ता चिक्रीड़ुः। अथ सर्व्वगो वायुस्ताश्चसर्व्वाङ्गीस्ता अवलोक्य कामशरपीड़ितोऽब्रवीत्। अहं वः कामये, भवत्यो मे भार्य्या भवन्तु। अथ ता अङ्गनास्तस्य तदचनं श्रुत्वा उच्चैर्विहस्य तमब्रुवन् भो वायो! त्वं भूतानां अन्तश्चरसि तत्कथमस्माकं मनोभावं न वेत्सि। वयं किल कुशनाभसुताः कथं पितरं कामतः समतिक्रम्य स्वयं वरमभिलषामः। पिता हि अस्मान् यस्मै दास्यति स नो भर्त्ता भविष्यतीति। अतः क्षन्तव्याः खलु भवन्नियोगं कर्त्तुमशक्ता वयम्। वायुस्तु तासामेतद्वचनमाकर्ण्य कोपसमन्वितः खतेजसा तासां शरीरेषु प्रविश्य मध्ये ववल्ग। ततः प्रभृति देशोऽयं कन्याकुब्ज इत्येव ख्यातः॥ अस्य विस्तृतिस्तु रामायणे आदिकाण्डे ३५ अध्याये द्रष्टव्या॥
अयन्तु काशीनदीतटे स्थितः। अधुना कुशस्थल इत्याख्यया प्रसिद्धः। इति कनिंहामेनोक्तम्॥ अस्य समीपे जाह्नवीप्रवहमाना वर्त्तते। इति महाभारते अनुशासनपर्ब्व॥)

कन्याटः, पुं, (कन्या अटति अत्र। कन्या + अट् + अधिकरणे घञ्।) वासगृहम्। इति चिकाण्डशेषः॥

कन्याट

कन्यादा

कन्यादानं. क्ली, (कन्याया दानं वराय सम्प्रदानम् ।) वराय कन्यासम्प्रदानम्। तद्दानफलादि यथा। यम उवाच।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम्। ब्रह्मदेया द्विजश्रेष्ठ! ब्रह्मलोकं व्रजन्ति ते ॥ कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम्" ॥*॥

तद्ग्रहणे दशकुलत्यागो यथा,—

"महान्यपि समृद्धानि गोऽजाविधनधान्यतः। स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥ हीनक्रियातिषु पाषण्डे सूने उद्वेगकारिणाम्। क्षयामयसदावाद्यचित्रिकुष्ठिकुलानि च ॥ यस्यास्तु न भवेत् भ्राता न च विज्ञायते पिता। नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्म्मशङ्कया" ॥*॥

ततोऽष्टप्रकारविवाहानन्तरम्।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम्। विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे। क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥ श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः। विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥ ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति। ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्मादैः पूजितः सुरैः ॥ दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति। भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥ गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति। गन्धर्व्वलोकमासाद्य क्रीड़ते देववच्चिरम् ॥ शुल्केन दत्त्वा यः कन्यां तां पश्चात् सत्यगर्च्चयेत्। स किन्नरैश्च गन्धर्व्वैः क्रीड़ते कालमक्षयम् ॥ न मन्युं कारयेत्तासां पूज्याश्च सततं गृहे। ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥ कन्यायां ब्रह्मदेयायामश्नन् सुखमश्नुते। अथ भुञ्जति यो मोहात् सुक्ता स नरकं व्रजेत् ॥ अप्रजायाश्च कन्यायां न सृष्टीयात् कदाचन। दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥ महासत्रसमाकीर्णान्नास्ति ते नरकाद्भयम्। तीर्थत्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥ दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा। यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ॥ मातापितृभ्यां विज्ञेयं तच्छुभस्याभिगामिनः। मातुः पितुर्हिरण्यस्य दौहित्रोऽर्हमवाप्नुते ॥ दत्त्वा कन्यां न शोचेत क्षुधितां मुदितां तथा। नग्नां दुःखाभिभूतां वा तथैव क्षपणां क्षुधाम्। कुर्य्यान्मन्युं नचैवास्या आगतायापि रोषयेत् ॥ यद्भूतमर्थयेत् किञ्चित् सर्व्वं तत् प्रतिपादयेत्। अप्रयच्छन् पतेत् ब्रह्मन्! नरके नात्र संशयः" ॥*॥

"शोचन्ति यामयो यत्र विनश्यत्याशु तत्कुलम्। न भुञ्जन्ति च यत्रैव निर्दहन्त्यप्रपूजिताः ॥ तस्मादेताः समभ्यर्च्या भूषणाच्छादनाशनैः। भूतिकामैर्नरैर्नित्यं सुतयुक्तास्तु सर्व्वदा ॥ संदृश्याः स्युस्तथा पूज्याः श्राद्धे चैवोत्सवेषु च। यस्मिन्नेवं कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥ इह कीर्त्तिर्भवेत् स्वर्गे परत्र द्विजसत्तम!। तिष्ठराग्निः कृतो यावत् दिवाकरसमं कृतः ॥

कपटी

वर्षान्ते गृह्यमाणन्तु तिल एको भवेद् यदा। सोऽक्षयं लभते तावत् ब्रह्मलोकं सनातनम् ॥ शतगव्याः प्रमाणेन सङ्गते रोमसञ्चये। विशीर्य्यते तु वा लोकं वर्षे पूर्णे सताप्रदः। तावत् स्वर्गे लभेत् सोऽपि यावल्लोमस्य संक्षयः ॥ महीदातुश्च गोदातुः कन्यादातुस्तथैव च। कन्यादानुगाः पश्चात्सर्म यान्ति त्रयो यथाः ॥ कन्यादानं दरिद्रस्य यो ददाति सुसत्कृतैः। पूर्व्वं धर्म्ममवाप्नोति यथावत् विधिकल्पितम्। तस्मात्कन्या प्रयत्नेन दातव्या श्रेय इच्छता" ॥

इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥

कन्यापतिः, पुं, (कन्यायाः पतिः।) जामाता। इति जटाधरः ॥

कन्यापालः, पुं, (कन्याप्रधानः पालः। पालाख्यवणिगिति यावत्।) पालवणिक्। शूद्रजातिविशेषः। इति चिकाण्डशेषः ॥

कन्याशमः, पुं, बुद्धभेदः। इति चिकाण्डशेषः ॥

कन्यिका, स्त्री, (कन्या एव स्वार्थे कन् टाप् अतइत्वम्।) कन्यका। इति शब्दरत्नावली ॥

कन्युषं, क्ली, (कन+इन्। कन्या दीप्या कान्त्या तेजसा वा ओषति इव। कनि+उष्+कः।) हस्तपुच्छः। इति हारावली। हातेर पोँछा इति भाषा ॥

कप चलने। सौत्रधातुरयं। इति कविकल्पद्रुमः ॥ (भ्वां—परं—चकं—सेट्।) कपोलः। इति दुर्गादासः ॥

कप इ ड सञ्चलने। इति कविकल्पद्रुमः ॥ (भ्वां—आत्मं—चकं—सेट्—इदित्।) इ कर्म्मणि कम्पते ॥ ड कम्पते वायुना वृक्षः। इति दुर्गादासः ॥

कपटः, पुं, क्ली, (पटतीति पटः। पट्+अच्। कस्य सतो ब्रह्मणोऽपि पटः आवरकः। यद्वा कप+अटन्।) अयथार्थव्यवहारः। प्रतारणा। तत्पर्य्यायः। व्याजः २ दम्भः ३ उपधिः ४ क्रुद्म ५ कैतवम् ६। इत्यमरः। १। ७। ३०॥ कूटम् ७ कल्कम् ८ छलम् ९ मिषम् १० कैरवम् ११। इति शब्दरत्नावली ॥

("नरेन्द्रसिंह! कपटं न वेद्मि त्वमिहार्हसि"। इति महाभारते १। ७४। १०१॥ दनुपुत्रः। यथा महाभारते १। ६४। २५।

"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा। एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" ॥)

कपटिकः, त्रि, (कपटः विद्यतेऽस्मिन् अस्यस्य वा। कपट+मत्वर्थे+ठन्।) कपटविशिष्टः। इति शब्दरत्नावली ॥

कपटिनी, स्त्री, (कपटिन्+गौरादित्वात् ङीष्।) चोड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

कपटी, स्त्री, (कप+अटन्। गौरादित्वात् ङीष्।) परिमाणविशेषः। इति शब्दरत्नावली। एक आँकाड़ इति भाषा ॥

कपटी, [न्] त्रि, (कपटोऽस्यस्य अस्मिन् वा अस्यर्थे+इनिः।) कपटविशिष्टः। कपटधारी। इति शब्दरत्नावली ॥

कपाटं

कपटेश्वरी, स्त्री, (कमिव सुखः पटः वसनं तत्तुल्यं फलं ईष्टे+प्रेरयतीति। कपट+ईश्+क्वरप्+स्त्रियां ङीप्।) श्वेतकण्टकारी। इति राजनिर्घण्टः ॥

कपर्दः, पुं, (पर्व्व पूरणे+सम्पदादित्वात् भावे क्विप्। "रात् सोपः"। ६। ४। २१। इति वलोपे पर् पूर्त्तिः। केन सुखेन जलेन वा परं पूर्त्तिं ददातीति। क+पर्+दा+सपीति योगविभागात् कः। कस्य ब्रह्मणोजलस्य परा पूरणेन दापयति शुध्यति वा। क+पर्+दैप् शोधने "आतोऽनुपसर्गे कः"। ३। २। ३। इति कः।) शिवजटा। इत्यमरः। १। १। ३७॥ (यथा काशिखण्डे। २६। ४४।

"कमनीयजलाकाङ्क्षा कपर्द्दिसुकपर्दगा" ॥)

वराटकः। इति मेदिनी ॥ ("पञ्चभिः कपर्दः पञ्चिका नाम द्यूतमस्ति"। इति पां २। १। १०। सूत्रस्य सरला टीका ॥)

कपर्दकः, पुं, (कपर्द+कन्।) शिवस्य जटाजूटः। वराटकः। इति मेदिनी। कड़ि इति भाषा ॥ ("यद्यहमिमं शक्रशरावं विक्रीय दश कपर्दकान् प्राप्नोमि"॥ इति हितोपदेशः॥) शेषस्य पर्य्यायः। वराटः २ कपर्दः ३ वराटिका ४ चराचरः ५ चरः ६ वर्व्वः ७ बालक्रीड़कः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कर्णशूलव्रणगुल्मशूलनेत्रदोषनाशित्वञ्च ॥ तस्य भेदाः। सुवर्णवर्णा सिंही १ धूम्रवर्णा व्याघ्री २ पीतरक्तासितेदरा मृगी ३ श्वेतवर्णा हंसी ४ नातिदीर्घिका विदन्ता ५। इति राजनिर्घण्टः ॥ (वराटकशब्देऽस्य गुणादयो व्याख्येयाः ॥)

कपर्दी, [न्] पुं, (कपर्दो जटाजूटोऽस्यस्य। इनिः।) शिवः। इत्यमरः। १। १। ३४॥ (यथा, महाभारते १३। १७। ४५।

"अजश्च वृक्षरूपश्च गन्धधारी कपर्द्यपि" ॥

"कपर्दी कैलासं करिवरमधोऽयं कुलिशभृत्" ।

इति कालिदासः ॥

यथा, ऋग्वेदे। १०। १०२। ८।

"मुनयश्च व्यचरद् कपर्दी" ॥)

कपाटं, क्ली, (कं वायुं मस्तकं वा पाटयतीति। पटगतौ+णिच्+कर्म्मणि उपपदे अण्।) स्वनामख्यातद्वाराच्छादककाष्ठफलकविशेषः। तत्पर्य्यायः। अररम् २। इत्यमरः। २।२।१७॥ कवाटः ३ कपाटी ४ कवाटी ५ अररी ६ अरटिः ७। इति तट्टीका ॥ द्वारकण्टकम् ८ असारम् ९। इति शब्दरत्नावली ॥ (यथा महाभारते १। जतुगृहपर्व्वणि। १४८। १७।

"चक्रे च वेश्मनस्तस्य मध्ये नातिमहाविलम्। कपाटयुक्तमज्ञातं समं भूम्याञ्च भारत"! ॥

कं शिरः इत्युपलक्षणेन मनुष्यादीनां गृह्यमिति बोध्यम्। कं वातं वा पाटयति वारयति गृहद्वारदेशं आवृणोतीत्यर्थः। मनुष्यवातादीनां गतिं रुणद्धि वा। क+पट्+णिच्+अण्। यथा,

"द्वाराणि समुपाहृत्य कपाटान्यवघट्टयन्"।

इति रामायणम्।

कपालः, पु क्ली, (कं मस्तकं पालयतीति । क + पालि + अण् । यद्वा कम्पते यः । कपि चलने + "तमि विशिविडिभ्यिकुलिकपिपलिपक्षिभ्यः कालन्" । उणां १ । ११७ । इति कालन् । कपिर्निर्देशाद् नलोपः ।) शिरोऽस्थि । माथार खुलि इति भाषा । तत्पर्य्यायः । कर्परः इत्यमरः । २ । ६ । ६८ ॥ (यथाह याज्ञवल्क्यः । ३ । ६० ।

"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा" ॥) घटादेः खण्डम् । खापरा खोला इत्यादि भाषा ॥ (यथा, भाषापरिच्छेदे । ११ ।

"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" ॥) समूहः । इति मेदिनी ॥ (मत्स्यकर्परादिभिक्षापात्रम् । यथा, मनुः । ६ । ४४ ।

"कपालं वृक्षमूलानि कुचेलमसहायता । समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥) पुरोडाशः । यथा घृतपथब्राह्मणे ।

"कपालानि चोपदधातिपुरोडाशं चाधिश्रयति" ॥) कुष्ठरोगविशेषः । इति हेमचन्द्रः ॥ तस्य लक्षणम् । यथा, माधवकरः ॥

"क्षणाक्षणकपालाभं यद्भूतं परुषं तनु । कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्" ॥

कपालनालिका, स्त्री, (कपालस्य सूत्रसंघस्य नालिका ।) तकुः । इति त्रिकाण्डशेषः ॥ टेको इति भाषा ॥

कपालभृद्, पुं, (कपालं भिक्षापात्रं ब्रह्मकपालं वा बिभर्त्ति धारयति । कपाल + भृ + क्विप् तुक् च ।) शिवः । इत्यमरः । १ । १ । ३४ ॥

कपालिका, स्त्री, (कपाल + कन् + टाप् ।) दन्तरोगविशेषः । तस्य लक्षणम् ।

"कपालेष्विव दीर्य्यन्ते दन्ता यस्यां सदैव हि । कपालिकेति पठिता सदा दन्तविनाशिनी" ॥ इति माधवकरः ॥ तस्याश्चिकित्सा दन्तरोगशब्दे द्रष्टव्या ॥ (घटकपालिका । यथा, विष्णुपुराणे । २ । १२ । ४१ ।

"मृद्दीघटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणुः । जनैः स्वकर्म्मस्तिमितात्मनिश्चयैः आलक्ष्यते ब्रूहि किमत्र वस्तु" ॥)

कपालिनी, स्त्री, (कपालोऽस्त्यस्य । कपाल + इनि + स्त्रियां ङीप् ।) दुर्गा । इति हेमचन्द्रः ॥

कपाली, [न्] पुं, (कपालोऽस्त्यस्य । कपाल + इनिः ।) महादेवः । इति हलायुधः ॥ स्वनामख्यातजातिविशेषः । स तु ब्राह्मण्यां कन्यायां तीवराज्जातः । इति पराशरपद्धतिः ॥ (चि, कपालविशिष्टः । यथा, कुमारे । ५ । ७८ ।

"कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्त्तेरवधार्य्यते वपुः" ॥

"नटी कपालिनी वेश्या कुलटा नापिताङ्गना" ॥ इति च तन्त्रम् ॥ योगिविशेषः । यथा, हठयोगदीपिकायां १ । ७ ।

"कपाली भिन्दुनाथश्च कालचण्डीश्वराह्वयः" ॥)

कपिः, पुं, (क्रम्यते यः सदा । कपि चलने । "कुण्डिकम्योर्नलोपश्च" उणां । ४ । १४३ । इ प्रत्ययः ।) वानरः । इत्यमरः । २ । ५ । ३ ॥ (यथा, मनुः । ११ । १५४ ॥

"विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः । प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणञ्चरेत्" ॥) सिङ्गकः । मधुसूदनः । इति मेदिनी ॥ (यथा, महाभारते १३ । १४६ । १०६ ।

"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥) धाचिका । इति शब्दमाला ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ (कादुदकात् एत्वीं पाति इति । वराहः । रक्तचन्दनम् । पिङ्गलम् । तद्वर्णवति च ॥)

कपिकच्छुः, स्त्री, (कपीनामपि कच्छुर्यस्याः कण्डूहेतुत्वात् ।) वृक्षविशेषः । आलकुशी इति भाषा । केँऊाँच इति हिन्दीभाषा । तत्पर्य्यायः । आत्मगुप्ता २ जङ्घा ३ अधर्षा ४ कण्डूरा ५ प्रावृषायणी ६ ऋष्यप्रोक्षा ७ शूकशिम्बिः ८ मर्कटी ९ । इत्यमरः । २ । ४ । ८७ ॥ स्वगुप्ता १० । अजहा ११ कण्डुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छूः १७ । इति भरतः ॥ स्वयंगुप्ता १८ महर्षभी १९ लाङ्गली २० कुण्डली २१ चण्डा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुष्पर्षा २६ अजड़ा २७ प्रावृषेण्या २८ वदरी २९ गुरुः ३० आर्षभी ३१ शिम्बी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालुः ३५ वनशूकरी ३६ कोशरोमा ३७ रोमवल्ली ३८ । शूकशिम्बिः ३९ वानरी ४० कपीकच्छुः ४१ शुकपिण्डी ४२ शूकपिण्डी ४३ कपिप्रभा ४४ । इति शब्दरत्नावली ॥ अस्या गुणाः । स्वादुरसत्वम् । शुक्रवर्द्धिकारित्वम् । वातत्वयपित्तास्रविक्षतत्रयनाशित्वम् । शीतत्वञ्च । तस्या बीजगुणौ । वातघ्नत्वम् । परमवाजीकरत्वञ्च । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्देऽस्या विशेषञ्च ज्ञेयः ॥)

कपिकच्छुफलोपमा, स्त्री, (कपिकच्छुफलस्य उपमाच ।) जतुकालता । इति राजनिर्घण्टः ॥

कपिकच्छुरा, स्त्री, (कपिभ्यः कच्छुं कण्डूं राति ददाति । कपिकच्छु + रा + कः ।) कपिकच्छुः । इति शब्दमाला ॥ (यथा, गारुड़े १९७ अध्याये ।

"एरण्डशारिका पर्णी गुडूची कपिकच्छुरा । एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले" ॥)

कपिकन्दुकं, क्ली, (कपि + कदि + उकः । अतोलोपः । कस्य शिरसः पिकन्दुकं अस्थि । यद्वा कपिः परमात्मा विष्णुः कन्दति क्रीड़ति यत्र तच्चत्वं अस्थि ।) शिरोऽस्थि । इति शब्दचन्द्रिका । माथार खुलि इति भाषा ॥

कपिका, स्त्री, (कपिरिव कायति यद्वराहवत् नीलवर्णतया प्रकाशते शोभते वा । एकदेशसाम्यात् तथात्वम् ।) नीलसिन्दुवारवृक्षः । इति राजनिर्घण्टः ॥ (नीलसिन्दुवारशब्देऽस्या गुणादयो व्याख्येयाः ॥)

कपिकोलिः, पुं, (कपीनां प्रियः कोलिः ।) कोलिविशेषः । इति रत्नमाला । शेयाकुल इति भाषा ॥

कपिचूड़ा, स्त्री, (कपीनां चूड़ा इव । आम्रातकमुकुलस्य कपिचूड़ातुल्यत्वात् ।) आम्रातकवृक्षः । इति राजनिर्घण्टः । (आम्रातकशब्दे विशेषोऽस्या ज्ञेयः ॥)

कपिचूतः, पुं, (कपीनां चूत इव अत्यन्तप्रियत्वात् ।) आम्रातकवृक्षः । इति त्रिकाण्डशेषः ॥

कपिजः, पुं, (कपेः शिलायाः जायते । जन् + डः । कपितैलम् ॥) तुरुष्कः । इति राजनिर्घण्टः । शिलारस इति भाषा ॥

कपिजङ्घिका, स्त्री, (कपेः वानरस्य जङ्घा इव जङ्घा यस्याः । संज्ञायां कन् । कपिसदृशजङ्घाया दैर्घ्यात् इत्येवम् ।) तैलपिण्डिका । इति राजनिर्घण्टः ॥

कपिञ्जलः, पुं, (कपिरिव जवते वेगेन गच्छति यद्वा कम् श्रुतिसुखदं शब्दम् पिञ्जयति कपिवत् पिञ्जलो वा । ईषत्पिङ्गलवर्णो हरितावर्णो वा । एषोदरादित्वात् साधुः ।) चातकपक्षी । तन्मांसगुणाः । लघुत्वम् । शीतत्वम् । कफरक्तपित्तनाशित्वम् । अग्निदीप्तत्वञ्च । इति राजवल्लभः ॥ पक्षिविशेषः । तत्पर्य्यायः । तेजलः २ ॥ तस्य मांसं शुक्रवर्द्धिकरम् । इति राजनिर्घण्टः ॥ तित्तिरिपक्षी । इति त्रिकाण्डशेषः ॥ (यथा,—

"कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः । कपिञ्जल इति ख्यातो लोके कपिञ्जतित्तिरः" ॥ इति भावप्रकाशः ॥

"पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः । मन्दवातेषु शस्यन्ते श्लैष्मधार्य्यसाधवात्" ॥ इति चरकः । तथा सुश्रुतश्च ।

"रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः । कफोत्थेषु च रोगेषु मन्दवाते च शस्यते" ॥ ऋषिकुमारभेदः । अयन्तु श्वेतकेतुपुत्रस्य पुण्डरीकस्य बन्धुः । यथा कादम्बर्य्याम् महाश्वेतोपाख्याने ।

"सखे ! कपिञ्जल ! किं मामन्यथा सम्भावयसि" ॥)

कपितैलं, क्ली, (कपिभिर्वानरैः शिलायाः विदारणात् सम्पादितं यत् तैलम् ।) तुरुष्कनामगन्धद्रव्यम् । इति भावप्रकाशः ॥ (तथाचोक्तम् ।

"सिक्थकन्तु तुरुष्कः स्याच्चतो यवनदेशगः । कपितैलञ्च सङ्ख्यातं तथा च कपिनामकः" ॥)

कपित्थः, पुं, (कपिः तिष्ठति फलप्रियत्वात् लोभात् वा यत्र । कपि + स्था + कः । एषोदरादित्वात् सलोपे साधुः ।) वृक्षविशेषः । कत्वेल इति भाषा तत्पर्य्यायः । दधित्थः २ ग्राही ३ मन्मथः ४ दधिफलः ५ पुष्पफलः ६ दन्तशठः ७ । इत्यमरः २ । ४ । २१ ॥ कगित्थः ८ । इति भरतः ॥ मालूरः ९ मङ्गल्यः १० नीलमल्लिका ११ ग्राहिफलः १२ चिरपाकी १३ ग्रन्थिफलः १४ कुचफलः १५ कपीलः १६ गन्धफलः १७ दन्तफलः १८ करभवल्लभः १९ काठिन्यफलः २० करञ्जफलकः २१ । अस्यामफलगुणाः । अम्लत्वम् । उष्णत्वम् । कफनाशित्वम् । ग्राहित्वम् । वायुवर्द्धकत्वम् । कण्ठरोगजिह्वाधिकजड़ताकारित्वम् । त्रिदोषवर्द्धकत्वम् । विषहरत्वम् । रोचकत्वञ्च । तत्पक्वफलगुणाः । दोषत्रयहरत्वम् । मधुरास्वरसत्वम् ।

गुरुत्वम्। श्वासवमिश्वमलक्षमहरत्वम्। दिक्षापनोदक्षमत्वम्। ग्राहित्वम्। रुचिप्रदत्वम्। ततः सर्व्वदा सेव्यम्। इति राजनिर्घण्टः॥
"कपित्थमामं कण्डघ्नं विषघ्नं ग्राहि वातलम्।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्"॥
इति राजवल्लभः॥ (तथा च चरके॥
"कपित्थं विषकण्ठघ्नमामं संग्राहि वातलम्॥
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्।
परिपक्वं सदोषघ्नं विषघ्नं ग्राहि गुर्व्वपि"॥
"कुशद्वीपेश्वरस्य राज्ञो ज्योतिष्मत्संज्ञकस्य सप्तपुत्राणामेकतमः। तद्वर्षमपि तन्नाम्ना ख्यातम्। तद्विवरणन्तु विष्णुपुराणे २ यांशे ४ अध्याये द्रष्टव्यम्")

कपित्थत्वक्, स्त्री, (कपित्थस्य मालूरस्य त्वगिव त्वग् यस्य।) एलवालुकम्। इति राजनिर्घण्टः॥ (एलवालुकशब्देऽस्य विशेषगुणा ज्ञातव्याः॥)

कपित्थपर्णी, स्त्री, (कपित्थस्य पर्णमिव पर्णं पत्रं यस्याः। कपित्थपर्ण+गौरादित्वात् ङीष्।) वृक्षविशेषः। कपित्थानीति ख्याता। तत्पर्य्यायः। विरजा २ सुरसा ३ चित्रपत्रिका ४। इति रत्नमाला॥

कपित्थास्यः, पुं, (कपित्थवत् कपित्थफलवत् वर्त्तुलाकारं आस्यं मुखं यस्य।) वानरविशेषः। तत्पर्य्यायः। गोलाङ्गूलः २ दधिशोभः ३ नगाटनः ४। इति चिकाण्डशेषः॥

कपिध्वजः, पुं, (कपिर्हनूमान् ध्वजे यस्य सः। प्रतिज्ञापालनपरतन्त्रेण महावीरेण हनूमतांधिष्ठितध्वजत्वात् वानरलाञ्छनध्वजत्वाद्वा तथात्वम्।) अर्জ্জুनः। इति चिकाण्डशेषः॥
(यथा गीतायाम्। १। २०।
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः"॥)

कपिनामा, [न्] पुं, (कपेर्नामेव नाम यस्य।) सिल्लकः। इति रत्नमाला॥ (स्वार्थे कन् प्रत्ययेनास्य प्रमाणमुक्तं भावप्रकाशे यथा,—
"कपिनैलञ्च संख्यातं तथा च कपिनामकः"॥)

कपिपिप्पली, स्त्री, (कपिः कपिवत् रक्तवर्णा पिप्पलीव रक्तवर्णपिप्पलीतुल्येति यावत्।) रक्तापामार्गः। इति वैद्यकम्॥ सूर्य्यावर्त्तवृक्षः। इति रत्नमाला॥

कपिप्रभा, स्त्री, (कपिष्वपि प्रभा निजप्रभूतगुणप्रसारणं यस्याः। कपीनामपि कण्डूयनादस्यास्तथात्वम्।) कपिकच्छूः। इति शब्दरत्नावली॥

कपिप्रभुः, पुं, (कपीनां हनूमदादीनां प्रभुः नियन्ता।) रघुनाथः। इति शब्दरत्नावली॥ (वानरराजः बाली सुग्रीवश्च॥)

कपिप्रियः, पुं, (कपीनां प्रियः।) आम्रातकः। इति राजनिर्घण्टः॥ कपित्थः। इति जटाधरः॥

कपिरथः, पुं, (कपिर्हनूमान् रथ इव वहनकारी वाहनं वा यस्य।) श्रीरामः। इति शब्दरत्नावली॥ (कपिः महावीरः हनूमान् रथे यस्य इति व्युत्पत्त्या कपिलाञ्छितध्वजः अर्জ্জुनः॥)

कपिलः पुं, (कमु कान्तौ "कमेः पश्च"। उणां १।

५६। इलच्। पश्चान्तादेशः।) मुनिविशेषः। स तु ज्ञानभक्तिसांख्ययोगप्रचारार्थभगवदवतारः। कर्दमप्रजापतेरौरसाद्देवहूतिगर्भजातः। इति श्रीभागवतम्॥ (यथा गीतायां १०। २६।
"गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः"॥
सगरराजसन्ततिध्वंसकारी रसातलस्थः कपिलो मुनिः केषाञ्चिन्मते साङ्ख्ययोगप्रचारकर्त्ता न। अयन्तु अपरः कश्चित् खनामख्यातो मुनिः। एतदर्थं प्रमाणं यथा, रघुः ३। ५०।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः"॥)

अग्निः। कुक्कुरः। इति हेमचन्द्रः॥ सिक्थकनामगन्धद्रव्यम्। इति रत्नमाला॥ पिङ्गलवर्णः। तद्युक्ते त्रि। इत्यमरः। १। ५। १६—१९॥ नीलपीतः। कपिलः। इति रभसः॥ "कपिलो रोचनाच्छविरित्यन्ये"। इतिभरतः॥ (यथा, महाभारते ३। ३। २४।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः"॥
महादेवः। यथा तत्रैव १३। १७। ९७।
"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥
विष्णुः। यथा तत्रैव १३। १४९। १०९।
"सनात्सनातनतमः कपिलः कपिरव्ययः"॥
नागविशेषः। यथा, हरिवंशे ३। ११४।
"शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा"।
दानवभेदः। यथा तत्रैव ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा"॥)

कपिलद्युतिः, पुं, (कपिला रक्ता पिङ्गलवर्णा वा द्युतिः यस्य।) सूर्य्यः। इति शब्दचन्द्रिका॥

कपिलद्राक्षा, स्त्री, (कपिला द्राक्षा।) द्राक्षाविशेषः। तत्पर्य्यायः। मर्दीका २ गोस्तनी ३ कपिलफला ४ अमृतरसा ५ दीर्घफला ६ मधुवल्ली ७ मधुफला ८ मधुली ९ हरिता १० हारहारा ११ सुफला १२ मर्दी १३ हिमोत्तरा १४ पथिका १५ हेमवती १६ शतवीर्य्या १७ काश्मरी १८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। हृद्यत्वम्। मदहर्षदाहत्वम्। दाहमूर्च्छाज्वरश्वासतृष्णाहल्लासनाशित्वञ्च। इति राजनिर्घण्टः॥ (मर्दीकाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

कपिलद्रुमः, पुं, (कपिलः कपिलवर्णो द्रुमः।) काश्मीरनामसुगन्धिकाष्ठम्। इति शब्दचन्द्रिका॥

कपिलाधारा, स्त्री, (कपिलानां धारा इव दुग्धधारा-सदृशी शुद्धा धारा यस्याः। यद्वा कपिलानां दुग्धधाराभिः सम्भृता निर्म्मला धारा यस्याः। संज्ञायां ङाप्पोरिति पाणिनिसूत्रानुसारेण ह्रस्वः।) स्वर्णदी। तीर्थभेदः। इति हेमचन्द्रः॥

कपिलपिङ्गपा, स्त्री, (कपिला रक्तपीतमिश्रितवर्णा पिङ्गपा।) पिङ्गपावृक्षविशेषः। तत्पर्य्यायः। कपिला २ पीता ३ सारिणी ४ कपिलाह्वी ५ भस्मगर्भा ६ कुपिङ्गपा ७। अस्या गुणाः। तिक्तत्वम्। शीतवीर्य्यत्वम्। श्लेष्मपित्तज्वरच्छर्द्दिहिक्कानाशित्वञ्च इति राजनिर्घण्टः॥

कपिला, स्त्री, (कपिलो वर्णोऽस्त्यस्याः अर्শ आद्यच्। टाप् च।) पुण्डरीकनामदिग्गजपत्नी। इत्यमरः।

१। ३। ४॥ भस्मगर्भा पिङ्गपा। रेणुकानाम गन्धद्रव्यम्। इत्यमरः। २। ६३—१२०॥
(यथाह राजवल्लभः।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका"॥
अस्या गुणादिकं रेणुकाशब्दे द्रष्टव्यम्॥) गोविशेषः। इति हेमचन्द्रः॥ सा तु स्वर्णवर्णा। इति पुराणम्॥ (यथा, महाभारते १। ८४। ८२।
"कपिला सहवत्सा वै पर्व्वते विचरत्युत"॥
दक्षकन्या। यथा, महाभारते १। ६५। १२॥
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥
कपिलवर्णयोगात्। अनुदात्तत्वाभावात् वर्णादिति न ङीप्।) स्त्रीकन्या। पिङ्गपा। राजरीतिः इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—
"कज्जला चलशैलाच्च पूर्ब्बस्मिन् शुभपर्व्वतः।
पुण्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः॥
तत्पूर्ब्बस्यां महादेवी नदी कपिलसंज्ञिता।
तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात्"॥
इति कालिकापुराणे ८१ अध्यायः॥ (तीर्थविशेषः। यथा, महाभारते ३। ८३। ४५।
"कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः।
तत्र स्नात्वार्च्चयित्वा च पितॄन् स्नान् दैवतान्यपि।
कपिलानां सहस्रस्य फलं विन्दति मानवः"॥
कपिलानां पयस्विनीधेनूनाम् इत्यर्थः॥ पिङ्गलवर्णा। यथा, विष्णुपुराणे २यांशे। ४। ३१।
"कपिलाश्चाश्वगाः पीताः शुभ्राश्चैव पृथक् पृथक्"॥
कपिला कन्या गोपयन्तया यदुक्तं मनुना ३। ८।
"नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्"॥)

कपिलाह्वी, स्त्री, (कपिलं अत्ति तद्वत् पुष्पं यस्याः।) मृगेर्व्वारुः। कपिलपिङ्गपा। इति राजनिर्घण्टः॥

कपिलाश्वः, पुं, (कपिलाः कपिलवर्णाः अश्वाः यस्य।) इन्द्रः। इति चिकाण्डशेषः॥

कपिलोमफला, स्त्री, (कपिलोमवत् लोमसमूहवत् फलति कण्डूप्रदानाय प्रभवति या।) कपिकच्छूः। इति राजनिर्घण्टः॥ (शूकशिम्बीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिलोमा, स्त्री, (कपिलोमवत् लोमसमूहो यस्याः।) रेणुका। इति राजनिर्घण्टः॥ (विस्तृतिस्तु रेणुका शब्दे द्रष्टव्या॥)

कपिलोहं, क्ली, (कपिरिव कपिवर्णतुल्यं लोहम्।) पित्तलम्। इति हेमचन्द्रः॥ (पित्तलशब्देऽस्य गुणा ज्ञातव्याः॥)

कपिल्लिका, स्त्री, (कपिवर्णा वल्लिका। पृषोदरादित्वात् वकोपे साधुः।) गर्জাপিप्पली। इति रत्नमाला॥ (गर्জাপিप्पलीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिवक्त्रः, (कपेर्वानरस्य वक्त्रमिव वक्त्रं यस्य भागिनेयपर्व्वतमुनिशापप्रभावात् मातुलस्य देवर्षेस्तथात्वम्।) नारदः। इति चिकाण्डशेषः॥ (यथा हि नारदस्य कपिवक्त्रत्वं जातम् तदुच्यते।
पुरा किल मातुलभागिनेयौ दाक्षायिमत्तमौ नारदपर्व्वतौ मानुषेषु सम्प्रीत्या विहर्त्तुकामौ देवलोकादिहागतवन्तौ। आगत्य च सञ्जयं राजानमभ्येत्य तदाज्ये ऊषतुः। आसीच

जिज्ञासयोः समयः शुभमशुभं वा हृदि जातं सङ्गत्यं परस्परेण कथनीयमिति। अथ कदाचित् राजा तावभ्युपेत्य स्वसुतां तदाराधनाय नियोजितवान्। अथ गच्छति काले नारदस्तु कन्दर्पबाणवशगः राजदुहितरि मनो निदधे। धर्म्मविदपि नारदः व्रीड्मानः तीव्रमिदं मनोभावं भागिनेयाय न शशंस। भागिनेयः पर्व्वतस्तु इङ्गितादिभिर्मातुलं कामार्त्तं वीक्ष्य समयभङ्गादतिक्रुद्धः "इयं नृपसुता तव भार्य्या भविष्यति त्वमपि वानरमूर्त्तिधरोऽत्र विचरिष्यति" इति तं शशपवान्। एतच्छापात् खलु नारदो वानरमुख आसीत् इति पौराणिकी कथा अत्र अनुसन्धेया॥ विस्तृतिस्तु महाभारते शान्तिपर्व्वणि ३० अध्याये द्रष्टव्या॥)

कपिवल्ली, स्त्री, (कपिरिव कपिलोमसदृशी वल्ली।) गजपिप्पली। इत्यमरः। १। ५। १६॥

कपिशः, पुं, (कपिः वर्णविशेषः अस्त्यस्य कपिनामास्त्यस्ति वा लोमादित्वात् शः।) श्यावः। कृष्णपीतमिश्रितवर्णः। तद्युक्ते त्रि। इत्यमरः १।५।१६॥ (यथा, रघुः १२। २८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिरुन्मार्गमारुह्य रामस्येन्दोरिव ग्रहः"॥

सर्व्ववर्णमयत्वात् शिवः। यथा, महाभारते १३। शिवसहस्रनामकीर्त्तने १७। ९७।

"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥)

सिक्थकनाम गन्धद्रव्यम्। इति मेदिनी॥

कपिशाञ्जनः, पुं, (कपिशं अञ्जनं कपिशयुक्तं अञ्जनं वा यत्र। अञ्जनस्य कृष्णवर्णतया तस्य श्वेतवर्णत्वाच्च एवमुच्यते।) शिवः। इति त्रिकाण्डशेषः॥

कपिशापुत्रः, पुं, (कपिशायाः मदोन्मत्तायाः पिशाच्याः पुत्रः।) पिशाचः। इति शब्दमाला॥

कपिशी, स्त्री, (कपिश इति वर्णवाचितया ङीष्।) माधवी। मदिरा। इति मेदिनी जटाधरश्च॥ (हलायुधमतेऽस्य क्लीबत्वमपि दृश्यते॥)

कपिशीका, स्त्री, (कपिश + स्वार्थे बाहुलकात् ईकन् टाप् च।) मदिरा। इति त्रिकाण्डशेषः॥

कपिशीर्षं, क्ली, (कपीनां प्रियस्थानं शीर्षं वृक्षप्राकारादीनां शिर्षदेश्य एव कपिप्रियत्वात् प्रसिद्धः। शाकपार्थिवादित्वात् समासः।) प्राकाराग्रम्। तत्पर्य्यायः॥ खोड़कशीर्षकम् २ क्रयशीर्षम् ३। इति त्रिकाण्डशेषः॥

कपिशीर्षकं, क्ली, (कपीनां शीर्षवर्णवत् कायति प्रकाशते। कै + कः।) हिङ्गुलम्। इति शब्दचन्द्रिका॥ (हिङ्गुलशब्दे अस्य गुणादयो ज्ञातव्याः॥)

कपीकच्छुः, पुं, (कपिकच्छुरिति संज्ञायां वा दीर्घः।) कपिकच्छुः। इति शब्दरत्नावली॥

कपीज्यः, पुं, (कपिभिर्वानरैरतिप्रियत्वात् इज्यते पूज्यते। कपि + यज् + क्यप्।) क्षीरिकावृक्षः। इति जटाधरः॥ (रामचन्द्रः। इति व्युत्पत्त्यर्थः॥)

कपोतः, पुं, (कं जलं तत्तुल्यश्वेतवर्णं अपि इतः प्राप्तः कपेरक्षोपः। यद्वा कपिभिरितः प्रियत्वेन प्राप्तः।) श्वेतवृक्षवृक्षः। इति रत्नमाला॥

कपीतनः, पुं, (कपीनां ईं लक्ष्मीं तनोति विस्तारयतीति। कपि + ईं + तन् + पचाद्यच्। कपीनां कपेर्वर्णस्य वा तनः। अन्येषामपीति। ६। ३। १३७। दीर्घः।) आम्रातकवृक्षः। गर्दभाण्डवृक्षः। शिरीषवृक्षः। इत्यमरः। २। ४। २७॥ अश्वत्थवृक्षः। इति मेदिनी। गुवाकवृक्षः। विल्ववृक्षः। इति शब्दरत्नावली॥ (आम्रातकशब्दे शिरीषशब्दे अश्वत्थशब्दे विल्वशब्दे चास्य गुणादयो ज्ञातव्याः॥)

कपीन्द्रः, पुं, (कपिश्चासौ इन्द्रश्चेति कपिरिन्द्र इव इति वा।) हनूमान्। इति शब्दरत्नावली॥ (कपीनां वानराणामिन्द्रः। सुग्रीवः। वाली। इति रामायणम्॥ विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने १४९। ६६।

"शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः"॥)

कपीष्टः, पुं, (कपीनां इष्टः प्रियः।) राजादनीवृक्षः। कपित्थः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादय उक्ताः॥)

कपोतः, पुं, (को वायुः पोतः नौरिवास्य। यद्वा कः वर्णो + "कवेरोतच् पश्च"। उणां। १। ६३। इति ओतच् + वस्य पश्च।) गृहकपोतः। पायरा इति भाषा। तत्पर्य्यायः। कलरवः २ पारावतः ३। इत्यमरः। २। ५। १४॥ पारापतः ४ क्रव्यः ५ रक्तलोचनः ६। इति रभसः॥ गृहकुक्कुटः ७। यथा,—

"मार्जारस्तिष्ठते दुःखं यादृशं गृहकुक्कुटे"।
इति प्रयोगात् इति सारसुन्दरी॥
(यथा, रामायणे। ५। ९१। ४।

"श्रूयते हि कपोतेन शत्रुः शरणमागतः।
अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः"॥)

वनकपोतः। घुघु इति भाषा। तत्पर्य्यायः। चित्रकण्ठः २। इति मेदिनी॥ कोकदेवः ३ धूसरः ४ धूम्रलोचनः ५ दहनः ६ अग्निसहायः ७ भीषणः ८ गृहनाशनः ९। तन्मांसगुणाः। वीर्य्यबलवृद्धिकारित्वम्। स्वादुत्वम्। कफपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥ मधुरत्वम्। शीतत्वम्। कषायत्वम्। वातपित्तनाशित्वम्। सार्षपतैलभर्জनेन विशदत्वञ्च। इति राजवल्लभः॥
(अस्य गुणान्तरं यथा,—

"पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः"॥
इति भावप्रकाशः॥

"कपोतो वृंहणो बल्यो वातपित्तविनाशनः।
तर्पणः शुक्रजननो हितो नृणां रुचिप्रदः"॥
इति हारीतः॥ कपोतविशेषस्य गुणाः॥ यथा,—

"गुरुः सलवणः काणकपोतः सर्व्वदोषकृत्"॥
इति वाभटः॥

"कषायमधुराः शीता रक्तपित्तनिवर्हणाः।
विपाके मधुराश्चैव कपोता गृहवासिनः॥१॥
तेभ्यो लघुतराः किञ्चित् कपोता वनवासिनः।
शीताः संग्राहिणश्चैव स्वल्पं मदुतराश्च ते"॥२॥
इति चरकः॥

"सर्व्वदोषहरस्तेषां भेदाग्नी मलदूषकः।
कषायस्वादुलवणो गुरुः काणकपोतकः"॥
इति सुश्रुतः॥)

कपोतकं, क्ली, (कपोत इव कपोतवर्णवत्कायति प्रकाशते। कै + कः।) सौवीराञ्जनम्। इति राजनिर्घण्टः॥

कपोतचरणा, स्त्री, (कपोतचरणः चरणाकारो अस्त्यस्याः।) नलीनामगन्धद्रव्यं। इति जटाधरः॥

कपोतपालिका, स्त्री, (पालयति इति। पाल रक्षणे + कर्त्तरि ण्वुल्। कपोतानां पालिका कपोतान् पालयति इति वा कर्म्मण्यण्।) विटङ्कः। सौधादिप्रान्तकाष्ठादिरचितपक्षिस्थानम्। इत्यमरः। २। २। १५॥ पायरार खोप इति भाषा॥

कपोतपाली, स्त्री, (कपोतान् पालयति इति। पाल कर्म्मण्यण् ङीप् च। केचित्तु पाल + अच् गौरादित्वात् ङीष्।) कपोतपालिका। इति हलायुधः॥ (यथा माघे ३। ५१।

"चिक्रंसया क्षत्रिमपत्रिपङ्क्तेः
कपोलपालीषु निकेतनानाम्"॥)

कपोतवङ्गा, स्त्री, (कपोतो वङ्ग्यते प्रत्यर्थतेऽनया। वन्च + करणे घञ् कुत्वं टाप् च।) ब्राह्मीवृक्षः। इति राजनिर्घण्टः॥ (यथा सुश्रुते।

"कपोतवङ्गामूलं हि पिबेदश्वसुरादिभिः"॥)

कपोतवर्णी, स्त्री, (कपोतस्य वर्ण इव वर्णो यस्याः गौरादित्वात् ङीष्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (सूक्ष्मैलाशब्देऽस्या विशेषो ज्ञेयः॥)

कपोतवाशा, स्त्री, (कपोतवाद इव येा वाशः तद्वदाकारोऽस्याः।) नलिकानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कपोतसारं, क्ली, (कपोतः कपोतवर्ण इव सारः क्षय्यवर्णो यत्र।) सोतेाञ्जनम्। इति राजनिर्घण्टः॥

कपोताङ्घ्रिः, स्त्री, (कपोतस्य पक्षिरिव।) नलीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२१॥

कपोताभः, पुं, (कपोतस्य आभा इव आभाऽस्य।) कपोतवर्णः। इति हेमचन्द्रः॥ (मूषिकभेदः। "मूषिकश्च कपोताभस्त्वेवाष्टादश स्मृताः"। इति सुश्रुतः॥)

कपोतारिः, पुं, (कपोतानां अरिः शत्रुः।) श्येनपक्षी। इति शब्दरत्नावली॥

कपोलः, पुं, (कम्यते "कपिगडि कटिपटिभ्य ओलच्"। उणां १। ६७। इति ओलच् कपि इति निर्देशात् नलोपः। कं सुखं पोलयतीति वा पुलमहत्त्वे कर्म्मण्यण्।) हनुतिर्य्यक्सन्निधिभागः। गाल इति भाषा। तत्पर्य्यायः। गण्डः २। इत्यमरः। २। ६। ९०॥ गल्लः ३। इति राजनिर्घण्टः॥ (यथा रघुः। ४। ६८।

"तत्र क्षणावरोधानां भर्त्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम्"॥)

कफः, पुं, (केन जलेन फलति इति। फल निष्पत्तौ "अन्येभ्योऽपि" ३। २। १०१। इति डः। केशिरसि फलति वा प्राग्वत्।) शरीरस्थधातुविशेषः। तत्पर्य्यायः। श्लेष्मा २ संघातः ३ सौम्यधातुः ४

घनः ५ बली ६ । अस्य गुणाः । गुरुत्वम् । स्निग्धविश्लेषकारित्वम् । मृदुत्वम् । प्रमर्दनत्वम् । स्निग्धत्वम् । कटुत्वम् । शीतत्वम् । जड़ताकारित्वम् । शुक्लत्वम् । शीते वसन्ते निशामुखे पूर्ब्बाह्णे भुक्ते च प्रकोपणत्वम् । इति राजनिर्घण्टः ॥ * ॥ अस्य प्रकोपहेतुः । "गुरुमधुरस्रसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" ॥ • ॥ तस्य कर्म्माणि । "श्लक्ष्णित्वं मधुरास्यता स्निग्धिरता शौक्ल्यं प्रसेको मलप्राचुर्य्यं स्थिरता रसस्य लवणः कण्डूरतिस्रप्रता । आलस्यं चिरकारिता कठिनता शैत्योपचिक्लिग्धता तन्द्राहृष्टपदेहकासगुरुता एताः कफोत्था रुजः" ॥ * ॥

अस्य प्रशमताकारणम् ।

"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः । श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः" ॥ "रूक्षोत्तारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम् । धूमातपोष्णाग्निरोविरेकवमनस्वेदोपनाहादिकं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्" ॥

स च पञ्चविधो यथा,—

"अवलम्बक इत्येकः क्लेदकः श्लेषकोऽपरः । बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः" ॥ * ॥

एतेषां लक्षणानि यथा,—

"कफधाम्नान्तु श्लेष्माणां यत्करोत्यवलम्बनम् । ततोऽवलम्बकाख्यातिं श्लेष्मा प्राप्नोत्युरःस्थितः ॥१॥ आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः ॥२॥ श्लेषकश्लेषणात् सन्धेः स च सन्धौ व्यवस्थितः ॥३॥ रसनावस्थितश्चैष बोधको रसबोधनात् ॥४॥ शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात् ॥५॥" ॥

अस्य स्थानानि ।

"उरःकण्ठशिरः क्लोमपर्ब्बणामाशयो रसः । मेदो घ्राणञ्च जिह्वा च कफस्थानमुरः परम्" ॥ *

(सन्धिसंश्लेषणस्नेहनरोपणपूरणबलश्लेष्मत्वञ्च श्लेष्मा पञ्चधा प्रविभक्त उदकवर्ष्मणामनुग्रहं करोति । इति तु प्रकारभेदेनास्य कार्य्यमुक्तम् ।

अतः परमस्य स्त्रीणलक्षणमाह ।

श्लेष्मक्षये कफक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिग्लैथिल्यं क्षया दौर्ब्बल्यं प्रजागरणञ्च । तत्र स्वयोनिवर्द्धनक्षयाश्चैव प्रतीकारः । अतःपरमस्यातिवृद्धौ यल्लक्षणं तदाह ।

श्लेष्मवृद्धौ शौक्ल्यं श्लैत्यं श्लैष्म्यं गौरवमवसादस्तन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च ॥)

तत्प्रकृतिकस्य लक्षणम् ।

"गम्भीरबुद्धिः स्थूलाक्षः स्निग्धकेशो महाबलः । स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः" ॥ * ॥

(अपरञ्च यथाह हारीतः ।

"सुस्निग्धवर्णः सितनेत्रदीप्तः श्यामः सुकेशो न च दीर्घरोमा । गम्भीरबुद्धिः श्रुतशास्त्रनिद्रा-तन्त्राप्रियस्त्रिल्लकटूष्णभोजी ॥ सुमांसलः स्निग्धरसप्रियश्च संगीतवाद्योऽतिसहिष्णुचित्तः । व्यायामशीलो रतलालसोऽसौ भवेत् कफात्मप्रकृतिर्मनुष्यः ॥ शुक्लाक्षः स्थिरकुटिलातिनीलकेशो बह्वीवान् जलदमदङ्गसिंहघोषः । सुप्तः सन् सकमलहंसचक्रवाकान् सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥ रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्त्वगुणोपपन्नः । श्लेष्मक्षमोमानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्मनुष्यः ॥ दृढ़शास्त्रमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु । परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा ॥ ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः । तार्क्षहंससमानूकाः श्लेष्मप्रकृतयो नराः" ॥

इति सुश्रुतश्च ॥

श्लेष्मस्थानान्यत ऊर्द्धं वक्ष्यामः । तत्रामाशयपित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्धगतित्वात् तेजसत्वञ्च इवादितस्य स चतुर्व्विधस्याहारस्याधारः । स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति ।

"माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च । आमाशये सम्भवति श्लेष्मा मधुरशीतलः" ॥

स तत्रस्थ एव स्वप्रकृत्या श्लेष्माणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति । उरस्यः स्निग्धसन्धारणमात्मवीर्य्येणाग्नेरसहितेन हृदयावलम्बनं करोति । जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते । शिरस्थः स्नेहसन्तर्पणाधिष्ठितत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति । सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति । भवति चात्र ।

"श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च । मधुरस्त्वविदग्धः स्यादिदग्धो लवणः स्मृतः" ॥)

तस्याविकृतस्य कर्म्म ।

"स्नेहो बन्धः स्थिरत्वञ्च गौरवं क्षमता बलम् । क्षमा धृतिरलोभश्च कफकर्म्माविकारजम् ॥ * ॥

इति सुखबोधः ॥ फेनः । यथा अब्धिफेनः इत्यादि ॥

कफकूर्चिका, स्त्री, (कफं कूर्चति विक्षतं करोतीति । कफ + कूर्च + विकारे + स्वुल् + टाप् इत्वञ्च ।) जाला । जाल् युतु सिकनि इत्यादि भाषा ॥ तत्पर्य्यायः । श्लेष्मिका २ स्यन्दिनी ३ जाला ४ आस्रावः ५ । इति हेमचन्द्रः ॥

कफघ्नी, स्त्री, (कफं कफविकृतिं हन्तीति । कफ + हन् + टक् + ङीप् ।) हपुषाभेदः । इति राजनिर्घण्टः ॥ (यथा, राजनिर्घण्टे गुडूच्यादिवर्गचतुर्थे ।

"हीहपुर्विषघ्नी च कफघ्नी चापराजिता" ॥)

कफजिः, पुं, स्त्री, (केन सुखेन फलति अनायासेन सङ्कोचविकोचनत्वं प्राप्नोति स्फुरति वा । फल गतौ, स्फुर सञ्चलने इति वा धातोः इन् एषोदरादित्वात् साधुः ।) कफोजिः । इति हेमचन्द्रः ॥

कफवर्द्धनः, पुं, (कफं कफजनितं विकारं वर्द्धयतीति । कफ + वृध् + णिच् + ल्युः ।) पिण्डीतगरवृक्षः । इति चिकित्साशेषः ॥ श्लेष्मवर्द्धिकारके त्रि । इति वैद्यकं ॥ (दिवास्वप्नाद्यायामाजसमधुरास्लवणगुरुस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवनैषधेक्षुकटमाषमहामाष-गोधूमतिलपिण्याकविष्टम्भिदधिदुग्धक्षीरापायसेक्षुविकारानूपौदकमांसवसाविसमृणालकशेरुकभृष्टाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्माप्रकोपमापद्यते ॥

"सशीतैः शीतकाले च वसन्ते च विशेषतः । पूर्ब्बाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति" ॥

इति सुश्रुतः ॥)

कफविरोधि, क्ली, (कफं विशेषेण रुणद्धीति । कफ + वि + रुध् + णिनिः ।) मरिचम् । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । मरिचशब्देऽस्य गुणा ज्ञेयाः ॥)

कफान्तकः, पुं, (कफस्य अन्तकः नाशकः । यद्वा । कफं अन्तयतीति । कफ + अन्त + करोत्यर्थे णिच् + ण्वुल् ।) वर्व्वुरवृक्षः । इति राजनिर्घण्टः ॥ (अस्य गुणादिकं वर्व्वूरशब्दे द्रष्टव्यम् ॥ कफनाशके, त्रि ॥)

कफारिः, पुं, (कफस्य अरिः दमयितेत्यर्थः ।) शुण्ठी । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । शुण्ठीशब्देऽस्य विशेषो ज्ञेयः ॥)

कफी, [न्] त्रि, (कफोऽस्यास्य । कफ + अस्त्यर्थे । "इन्दोपतापेति" । ५ । २ । १२८ । इनिः ।) श्लेष्मयुक्तः । तत्पर्य्यायः । श्लेष्मलः २ श्लेष्मलः ३ । इत्यमरः । २ । ६ । ६० ॥ गजे पुं । इति शब्दरत्नावली ॥

कफेलुः, त्रि, (कफं लाति आदत्ते इति । कफ + ला आदाने + "सन्दू-दृग्लू-ज्रम्भु-क्रम्भू-कफेलू-कर्कन्दूदिधिषु" । उणां १ । ६५ । इति कुप्रत्ययान्तो निपातितः ।) कफयुक्तः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पुं, श्लेष्मातकवृक्षः । "कफेलूः श्लेष्मातकतरौ पुंस्यौणादिकरूपमञ्जरी" । इति "उज्ज्वलदत्तधृतवचनात्" ॥ १ । ६५ ॥)

कफोजिः, पुं, (कं सुखं स्फोरयति । स्फुर स्फुरणे सञ्चलने च औणादिकात् अच इः । अथवा केन सुखेन फलति स्फुरतीति वा । स्फुर, फल वा + इन् उभयतः एषोदरादित्वात् साधुः ।) सुजमध्यग्रन्थिः । कनुइ इति भाषा ॥ तत्पर्य्यायः । कुर्परः २ । इत्यमरः । २ । ६ । ८० ॥ (कुर्परशब्देऽस्य विशेषो ज्ञेयः ॥)

कब, ऋ ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) वर्णः शुक्लादिक्रिया । ऋ अचकावत् । ङ कवते कविर्विश्वमुः । कवते पतिमां चित्रकारः । इति दुर्गादासः ॥

कबन्धं, क्ली, (कस्य प्राणवायोः बन्धः आश्रयः । जलयानमेव प्राणधारणकारणम् । कदापि प्राणस्थितिः जलं विना नैव स्यात् । यथा, श्रुतिः ।

"मद्यदशाहानि माऽग्नीः काममपः पिबापोमयः प्राणो न पिबतस्ते विच्छेत्स्यते"।) जलम्। इत्यमरः। १। १०। ४॥ (यथा, ऋग्वेदे ५। ८५। ३॥ "नीचीनबारं वरुणः कबन्धं प्रससर्ज रोदसी अन्तरीचम्"॥)

कबन्धः, पुं, (कं सुखं बध्यते रुध्यतेऽस्मात्। क + बन्ध + घञ्।) राजः। रक्षोविशेषः। (यथा, रघुः १२। ५७।

"बधनिर्द्धूतशापस्य कबन्धस्योपदेशतः।
मुमूर्च्छसख्यं रामस्य समानव्यसने हरौ"॥

अस्य विवरणादिकमुच्यते। पुरा किल दनुनामा कश्चिद्दानवः उग्रेण तपसा पितामहं सन्तोषयन् दीर्घमायुः प्राप्तवान्। प्राप्तदीर्घायुरतिगर्व्वः सुरराजेन सह योद्धुं सुरपुरमगच्छत्। शक्रस्तु रणभूमिगतः प्रमुक्तेन वज्रेणास्य सक्थिनी शिरश्च शरीरमध्ये प्रावेशयत्। न त्वसौ पितामहवरप्रभावतया प्राणान् मुमोच। अथ स एवं विक्षतविग्रहोऽनाहारादितया क्लिश्यमानो बज्रधरं याचमानः सुरपतिं प्रसादयामास। इन्द्रस्तु प्रसन्नो योजनमायतौ बाहू तीक्ष्णदंष्ट्रञ्च वदनमस्यै वक्षसि प्रादात्। तदा प्रभृत्येवासौ वने विचरन् सुदीर्घबाहुभ्यां वनजादीन् प्राणिनो ग्रहीत्वा भक्षयन् विचचार। अथ गच्छति काले दशरथात्मजो रामः ससीतालक्ष्मणः पितृसत्यपालनार्थं वने भ्रममाणः कबन्धेन सम्प्राप्तः। प्रभूतबलशालिनानेन ग्रहीतोऽपि रामः खड्गेनैनं व्यापादयामास। अथ रामहस्तनाशात् प्राप्तशापमोचनसमयोऽयं कबन्धः विक्षतरूपं विहाय दिव्यमूर्त्तिधरः स्वर्लोकं ययौ। इति वाल्मीकियरामायणम्। महाभारतमते तु अयं विश्वावसुनामा गन्धर्व्व आसीत् ब्राह्मणशापेन राक्षसयोनिं प्राप्तवान्। यदुक्तं तत्रैव ३। २७८। ४२।

"तस्माच्चाहं गन्धर्व्वो विश्वावसुरहं नृप!।
प्राप्तो ब्राह्मणशापेन योनिं राक्षससेविताम्"॥)

उदरम्। इति मेदिनी॥ (केन वायुना बध्यते संबध्यते वा। धूमकेतुः। प्रवहवायुगोपचीयमानत्वात् तथात्वं तस्य च लोकसुखनाशकत्वं प्रसिद्धम्॥)

कबन्धः, पुं, क्ली, (केन प्राणवायुना पुनर्बध्यते सम्बध्यते मस्तकहीनस्यापि दैवेन प्राणावेशात् जीवतो नरस्येव क्रियाकारित्वप्रक्तित्वात्तथात्वम्। क + बन्ध + घञ्।) क्रियायुक्तापमूर्द्धकलेवरम्। इत्यमरः २। ८। ११८॥ यथा, मार्कण्डेये ८२। ६३।

"कबन्धाच्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः"॥

अपि च। "नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं पत्तीनां दशकोटयो निपतिता एकः कबन्धो रणे। ताटक्कोटिकबन्धनर्त्तनविधौ खेलच्छतं खे शिरस्तेषां कोटिनिपातने रघुपतेः कोदण्डघण्टारवः"॥ इति प्राचीनाः॥

कवित्थः, पुं, (कपित्थस्यापत्यम्। "सुपित्थाः" इति कः। एषोदरादित्वात् साधुः।) कपित्थवृक्षः। इत्यमरटीका॥ कगित्थः। इत्यमरमालायां पाठः॥

कविलः, पुं, (कद्रूवर्णे + इलच्।) कपिलवर्णः।

इति भरतो द्विरूपकोषश्च॥

कम, उ क ड स्तुहि। इति कविकल्पद्रुमः॥ (पुरां-आत्मं-सकं-सेट्।) उ कमिता कान्त्वा। क ड कामयते। अन्यैर्भादौ पठ्यमानस्याप्यस्य कित्करणं कम ऋत इत्यादिना विहितस्य ङिडो ज्ञापनार्थं तेन चरे ङिडोऽप्राप्तिपक्षे अचकमत। चकमे कमिता इत्यादि सिद्धम्। इति दुर्गादासः॥

कम, उ ड कान्तौ। इति मुग्धबोधव्याकरणम्। (भां-आत्मं-अकं-सेट्॥)

कम्, क्य (कमुकान्तौ ङिडभावे विच्।) जलम्। शिरः। सुखम्। मङ्गलम्। पादपूरणम्। इति शब्दरत्नावली॥ (यथा ऋग्वेदे। १। १२३। ११॥ "सुसंकाशा मातृमृष्टेव योषा विस्नेव्यं दधुषे दृशे कम्"। "अत्र कमिति पादपूरणे अथवा कमिति सुखवचनं सुखं यथा भवतीति" भाष्यम्॥)

कमठं, क्ली, (कम + 'कमेरठः"। उणां १। १०२। इति + अठ।) भाण्डभेदः। तत्तु मुनीनां जलपात्रम्। इति मेदिनी॥

कमठः, पुं, (के जले मठति वसतीति। क + मठ वासे + पचाद्यच्।) कच्छपः। इत्यमरः। १। १०। २१॥ (यथा महाभाटके।

"कमठपृष्ठकठोरमिदं धनु-
र्मधुरमूर्त्तिरसौ रघुनन्दनः"॥

मकठात्कामठं मांसं रामठेन समन्वितम्।
यदि सर्पिःसमायुक्तं का सुधा वसुधातले"॥
इत्युद्भटः॥*॥ गुणादयोऽस्य कच्छपशब्दे ज्ञातव्याः॥ भगवद्विष्णोर्द्वितीयावतारः। यथा हटयोगदीपिकायाम्। १। १०।

"अथेदं कथ्यते पीठं मत्स्येन्द्राद्यैश्च सेवितम्।
अथेदयोगयुक्तानामाधारकमठो हठः"॥)

वंशः। इति शब्दरत्नावली॥ दैत्यविशेषः। मुनिभाजनम्। इति हेमचन्द्रः॥ शङ्खकी इति ख्याती॥ (नृपविशेषः। यथा महाभारते। २। ४। २२।

"कक्षसेनः क्षितिपतिः क्षेमकश्चापराजितः।
काम्बोजराजः कमठः कम्पनश्च महाबलः"॥)

कमठी, स्त्री, (कमठ + ङ्योगादिति जातेरिति वा ङीष् प्रत्ययः।) कच्छपी। इत्यमरः। १। १०। २४॥ (यथा भ्रान्तिशतके ४। १३।

"इदानीमस्माकं जठरकमठीपृष्ठकठिना-
मनोवृत्तिस्तत् किं व्यसनविमुखैव क्षपयसि"॥)

कमण्डलुः, पुं, क्ली, (कस्य प्रजापतेः जलस्य वा मण्डः सारः तं लाति आदत्ते। का + मितद्रादित्वात् डुः।) सन्न्यासिनां मृत्काष्ठादिमयपात्रम्। तत्पर्य्यायः। कुण्डी २। इत्यमरः ७। २। ४६॥ करकः ३। (यथा मनुः २। ६४॥

"मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्"॥)

शुक्लवर्णः। इति मेदिनी॥

कमण्डलुतरुः, पुं, (कमण्डल्वाकारफलतरुः।) शुक्लवर्णः। इति रत्नमाला॥

कमनं, त्रि, (कम + निङ्भावे युच्। अनुदात्तश्चेति

कमेर्युच् वा।) कामुकम्। अभिरूपम्। इति मेदिनी॥ (यथा भागवते १। ६। ३३।

"त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने"॥)

कमनः, पुं, (काम्यतेऽनेन। कमेः + करणे + युच्।) कामः। अशोकवृक्षः। इति मेदिनी। ब्रह्मा॥ इति हेमचन्द्रः॥

कमनच्छदः, पुं, (कमनः कमनीयः छदः पत्रो यस्य।) कङ्कपक्षी। इति हेमचन्द्रः॥

कमनीयं, त्रि, (काम्यते यत् कमेः कर्म्मणि अनीयर्।) कामनायोग्यम्। तत्पर्य्यायः। चारु २ हारि ३ रुचिरम् ४ मनोहरम् ५ वल्गु ६ कान्तम् ७ अभिरामम् ८ वल्गुरम् ९ वामम् १० रुच्यम् ११ सुषमम् १२ शोभनम् १३ मञ्जु १४ मञ्जुलम् १५ मनोरमम् १६ साधु १७ रम्यम् १८ मनोज्ञम् १९ पेशलम् २० हृद्यम् २१ सुन्दरम् २२ काम्यम् २३ कम्रम् २४ सौम्यम् २५ मधुरम् २६ प्रियम् २७। इति हेमचन्द्रः॥ (यथा, कुमारे १। ३७।

"आरोपितं यद्गिरिशेन पश्चात्
सव्यनयारीकमनीयमङ्गम्"॥)

कमन्यं, क्ली, (कम् शिरः अन्यं शून्यं यस्य।) कबन्धम्। (कमं कान्तिं जीवनं वा दधाति विदधातीति। कम + धा + ड। एषोदरादित्वात् साधुः।) जलम्। इत्यमरटीकायां रायमुकुटः॥

कमरः, त्रि, (कामयते इति। कम् + "अर्त्ति-कमि-भमीति" उणां ३। १३२। अरच्वित्।) कामी। इत्यादिकोषः॥

कमलं, क्ली, (कमेः णिङ् भावे दृषादित्वात् कलच्। कम् जलं अलति अलंकरोति वा। अल् + अच्। अन्तर्णिजन्तो वा।) जलजपुष्पविशेषः। तत्पर्य्यायः। पद्मम् २ पाथोजम् ३ नलम् ४ नलिनम् ५ अम्भोजम् ६ अम्बुजन्म ७ अम्बुजम् ८ श्रीः ९ अम्बुरुहम् १० अम्बुपद्मम् ११ सुजलम् १२ अम्भोरुहम् १३ सारसम् १४ पङ्कजम् १५ सरसीरुहम् १६ कुटपम् १७ पाथोरुहम् १८ पुष्करम् १९ वार्ष्मम् २० तामरसम् २१ कुशेशयम् २२ कञ्जम् २३ कजम् २४ अरविन्दम् २५ शतपत्रम् २६ विसकुसुमम् २७ सहस्रपत्रम् २८ महोत्पलम् २९ वारिरुहम् ३० सरसिजम् ३१ सलिलजम् ३२ पङ्केरुहम् ३३ राजीवम् ३४। (यथा रघुः। ३। ३६।

"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्"॥)

अस्य गुणाः शीतलत्वम्। स्वादुत्वम्। रक्तपित्तभ्रमार्त्तिनाशित्वम्। सुगन्धित्वम्। भ्रान्तिसन्तापशान्तिपरमहृद्यकारित्वञ्च। इति राजनिर्घण्टः॥ (तथाच भावप्रकाशः।

"कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित्।
दृष्णादाहास्रविस्फोटविषवीसर्पनाशनम्॥
विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्"॥)

जलम्। ताम्रम्। क्षोम। औषधम्। इति मेदिनी॥ सारसपक्षी। इत्यमरः।१।१०।४०॥

कमठः, पुं, (कमेः+कलच्। यद्वा को वायुः तस्य अमः गतिः तं लाति आदत्ते। क+अम+ला+कः।) मृगविशेषः। इति मेदिनी॥ ध्रुवकभेदः। यथा, सङ्गीतदामोदरः॥

"उत्तो मलयतालेन जघनमध्ये स्फुरेद्गुरुः।
सप्रदग्धाक्षरैर्युक्तः कमठोऽयं भयानके"॥

कमला, स्त्री, (काम्यतेऽसौ कमेः दृषादित्वात् कलच् कमलं अस्त्यस्याः इति वा। अर्श+आद्यच्। टाप् च।) लक्ष्मीः। ("कमला श्रीर्हरिप्रिया" इत्यमरः।१।१ २८।) वरस्त्री। इति मेदिनी॥ खनामख्यातनिम्बुकः। कमलालेबु इति भाषा। यथा,—

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि रुच्योऽन्यानि विवर्ज्जयेत्"॥

इति तन्त्रसारे पुरश्चरणप्रकरणम्॥

(छन्दोविशेषः। यथा, वृत्तरत्नाकरे।

"दिगुणनगणसहितः सगण इह हि विहितः।
पक्षिपतिमतिविमला क्षितिपमवति कमलेति"॥

नर्त्तकीविशेषः। यथा राजतरङ्गिण्याम् ४।४२४।

"नर्त्तकी कमला नाम कान्तिमन्तं ददर्श तम्।
असामान्याङ्गतेः पुंसः सा ददर्श सविस्मया"॥

पुरीविशेषः। यथा तत्रैव ४। ४८३।

"राजा मङ्गाख्यपुरतश्चक्रे विपुलकेशवम्।
कमला सा खनाम्नापि कमलाख्यं पुरं व्यधात्"॥

गङ्गा। यथा काशीखण्डे २९। ४४।

"कमला कल्पलतिका काली कलुषवैरिणी"॥)

कमलासनः, पुं, (कमलमासनमस्य। विष्णोर्नाभिपद्मजातत्वात् तथात्वम्।) ब्रह्मा। इत्यमरः।१। १। १७॥ (यथा भागवते ५।२०। ३०। "यस्मिन् इदमुष्कं व्यलनग्निखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याधासनं परिकल्पितम्"॥ क्ली, कमलाया लक्ष्म्या आसनं क्षेपणं दानमित्यर्थः। यथा, ग्रन्थविरचिते राजेन्द्रकर्णपूरे ५३।

"तात्पर्य्यं कमलासने विचरितं गौरिहितैः पालिता"॥

"कमलाया लक्ष्म्या आसने क्षेपणे याचकेभ्यो दाने इत्यर्थः। अथच कमलरूपे विस्तरे ब्रह्मणः पद्मासनत्वात्"। इति तट्टीका॥)

कमलिनी, स्त्री, (कमलानि सन्त्यत्र। पुष्करादिभ्यो देशे इति इनिः।) पद्मिनी। (यथा रघुः ९।२७।

"अभियुः सरसो मधुसम्भृतां कमलिनीमलिनीरुपतस्थिरे"॥) पद्माकरः। इति शब्दरत्नावली॥ (गङ्गा यथा काशीखण्डे २९। ४०।

"कुमुदती कमलिनी कान्तिः कल्पितदायिनी"॥)

कमलोत्तरं, क्ली, (कमलमिव उत्तरं। यदा कमलादुत्तरं उत्कृष्टमिव।) कुसुम्भपुष्पम्। इत्यमरः। २। ९। १०९॥

कमा, स्त्री, (कम क्विबभावे वाऽजनकात् स्त्रियां भावे अः। टाप्।) शोभा। इति राजनिर्घण्टः॥

कमिता, [ऋ] त्रि, (कम+क्विबभावे इच्।) कामुकः। इत्यमरः। ३। १। २३॥

कम्पः, पुं, (कपि चलने+भावे घञ्।) गात्रादिचलनम्। तत्पर्य्यायः। वेपथुः २। इत्यमरः १।७। ३८॥ वेपनम् ३ वेपः ४ कम्पनम् ५। इति राजनिर्घण्टः॥ (यथा विक्रमोर्व्वश्याम्। "सुचिरेण तावदस्या भयकम्पः कुसुमकोमलं हृदयम्"। "न कम्पो वायुना विना"। इति वैद्यकम्॥)

कम्पनं, त्रि, (कपि चलनशब्दार्थादिति युच्।) कम्पयुक्तः। काँपुने इति भाषा। तत्पर्य्यायः। चलनम् २ कम्पम् ३ चलम् ४ लोलम् ५ चलाचलम् ६ चञ्चलम् ७ तरलम् ८ प्रास्रिस्रवम् ९ परिस्रवम् १०। इत्यमरः। ३। १। ७४॥ चपलम् ११ चटुलम् १२। इति तट्टीका॥

(यथा महाभारते १३। १४। ७२।

"हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पनः"॥

यथा सिद्धान्तकौमुद्याम्॥ "कम्पा कम्पना ग्राहा"। पा ३।२। १५३॥ कपि+भावे+ल्युट्।) कम्पे क्ली। इति मेदिनी॥

कम्पनः, पुं, (कम्पयति वेपथुयुक्तं करोति शिशिरेऽवेति यावत् कपि+णिच्+युच्। ल्युर्वा।) शिशिरऋतुः। इति राजनिर्घण्टः॥

(नृपविशेषः। यथा महाभारते २। ४। २२।

"काम्बोजराजः कमठः कम्पनश्च महाबलः।
सततं कम्पयामास यवनानेक एव यः"॥)

कम्पलक्ष्मा, [न्] पुं, (कम्पः चलनं लक्ष्म लक्षणं यस्य।) वायुः। इति शब्दरत्नावली॥

कम्पाकः, पुं, (कम्पया चलनेन कायति प्रकाशते इति। कम्प+कै+कः।) वायुः। इति हेमचन्द्रः॥

कम्पितं, क्ली, (कपि+भावे+क्तः।) चलनम्। तत्पर्य्यायः। कम्पनम् २ कम्पः ३ वेपनम् ४ वेपथुः ५। इति शब्दरत्नावली॥ (कपि+कर्त्तरि+क्तः।) कम्पयुक्ते त्रि॥ (यथा रघुः। २। १३।

"एकस्तम्बरेणिरिनिर्झराम्बु-
मनोकहाकम्पितपुष्पगन्धी"॥)

कम्पिलः, पुं, (कम्प+इलच्।) रोचनी। कमला गुँड़ि इति भाषा। तस्य रूपान्तराणि काम्पिल्लः। कम्पिल्लः। कम्पीलः। कम्पिल्यः। इत्यमरटीकायां मुकुटादयः॥

कम्पिल्लकः, पुं, (कम्पिल्ल+स्वार्थे+कन्।) वृक्षविशेषः। कमिला इति देशान्तरभाषा। तत्पर्य्यायः। रक्ताङ्गः २ रेची ३ रेचनकः ४ रक्तकः ५ लोहिताङ्गः ६ कम्पिल्लः ७ रक्तचूर्णकः ८। तस्य गुणाः। विरेचकत्वम्। कटुत्वम्। उष्णत्वम्। व्रणकफकासतन्तुकृमिनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ (अस्य तैलगुणाः। तुम्बीकोशाम्रदन्तीद्रवन्तीक्षीरामसप्तला नीलिकाकम्पिल्लकशुद्धिनीस्नेहाक्तिक्तकटुककषाया अधोभागदोषहराः क्रिमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च॥ इति सुश्रुतः॥)

कम्प्यः, त्रि, (कपि+णमि-कम्पीति रः।) कम्पयुक्तः। कम्पान्वितः। इत्यमरः। ३। १। ७४॥ (यथा नैषधे। १। १४२।

"सतां कमाङ्क्य चिराय चूडते-

विधाय कम्राणि सुखानि कं प्रति"॥)

कम्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कम्रति। इति दुर्गादासः॥

कम्बरः, पुं, (कम्ब+अरन्।) चित्रवर्णः। कर्ब्बुरवर्णः। तद्वति त्रि। इति शब्दरत्नावली॥

कम्बलं, क्ली, (कम्यते। इति कमु कान्तौ+कमेर्बुक् चेति कलः। कम्बगतौ दृषादित्वात् कलच् वा।) जलम्। इति शब्दरत्नावली॥

कम्बलः, पु, (कं कुत्सितं शिरो वा कं सलिलं वा बलते बल संवरणे सञ्चारणे च अच्। यद्वा कम्ब+गतौ इति धातोः दृषादित्वात् कलच्।) खनामख्यातमेषादिलोमरचितवस्त्रासनादि। तत्पर्य्यायः। रङ्कवः २। इत्यमरः। २। ६। ११६॥ वेणुकः ३ रोमयोनिः ४ रेणुका ५। इति शब्दरत्नावली॥ प्रावारः ६। इति जटाधरः॥

(यथा महाभारते ३। ३। ५१।

"न तथा सुखयत्यग्निर्न प्रावारा न कम्बलाः।
शीतवातार्दितं लोकं यथा तव मरीचयः"॥)

नागराजः। साक्षा। प्रावारः। क्ष्मिः। इत्यमरः। ३। ३। १९३। मेदिनी च॥ उत्तरासङ्गः। इति मेदिनी॥ मृगविशेषः। इति जटाधरः॥

(नागभेदौ। अनयोरेकः अधस्तात् पाताले वासुकिप्रमुखो निवसति अपरस्तु वरुणदेवसभास्थः।

यथाक्रमं उदाहरणे द्रष्टव्ये।

यथा, भागवते ५। २४। ३१।

"ततोऽधस्तात् पातालेनागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति"॥

यथा महाभारते। २। ९। ९।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ"॥

कम्बलाद्यधिष्ठितप्रयागान्तर्वर्त्तितीर्थविशेषः। यथा, महाभारते।३। तीर्थयात्रापर्व्वणि ८५। ७५।

"प्रयागं सम्प्रतिष्ठानं कम्बलाश्वतरौ तथा।
तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः"॥

कम्बलिवाह्यकं, क्ली, (कम्बलः साक्षा अस्ति एषाम् इति इनिः। कम्बलिभिर्वह्यते। वह+कर्म्मणि ण्यत् स्वार्थे संज्ञायां वा कन्।) दृषदङ्गनीयप्रकटम्। तत्पर्य्यायः। गल्ली २। इत्यमरः। २। ८। ५२॥ गाल्ली ३। इति तट्टीका॥

कम्बिः, स्त्री, (कमु+बाहुलकात्+विन्। यद्वा कम्बति प्राप्नोति जानाति वा अन्नादि अनया। कम्ब+करणे इन्।) दर्व्विः। इत्यमरः। २।९।३४। हाता इति भाषा॥ इति मेदिनी। वंशांशः। बाँशेर पाव् इति भाषा॥

कम्बुः, पुं क्ली, (कमु+जचादयश्चेति नियातनात्। साधुः। कमु+उन् वुक्चेति वा।) शङ्खः। इत्यमरः।१।१०।२३॥ (यथा भागवते।८।७। २०।

"कम्बलचक्रशरचापगदासिचर्म-
ध्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः"॥)

कम्बुः, पुं, (कम्ब गतौ इति भृगव्यादित्वात् उन् वुगागमो वा। निपातनात् वा साधुः॥) वलयम्।

(यथा महाभारते ३ । २३२ । ४४ ।
"अतं दासीसहस्राणि कौन्तेयस्य महात्मनः ।
कम्बुकेयूरधारिण्यो निष्कग्रीवाः सलङ्कृताः" ॥)
शम्बूकः । इक्षी । इत्यमरः ।३।३ १३३। मेदिनी च॥
कर्व्वूरवर्णः । ग्रीवा । मलकम् । इति हेमचन्द्रः ।
काँपा हाड़ इति भाषा ॥
कम्बुका, स्त्री, (कम्बरिव कायति ग्रीभते प्रकाशते वा । कै + कः टाप् च ।) अश्वगन्धावृक्षः । इति रत्नमाला । (गुणादयोऽस्या अश्वगन्धाशब्दे ज्ञेयाः ॥)
कम्बुकाष्ठा, स्त्री, (कम्बु चिह्नवर्णं काष्ठं यस्याः ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥
कम्बुग्रीवा, स्त्री, (कम्बुवत् रेखात्रयशोभिता ग्रीवा ।) कम्बादृतिरेखात्रययुक्तग्रीवा । इत्यमरः ।२।६।८८॥
(कम्बुःशङ्खस्तद्वत् रेखात्रययुक्ता ग्रीवा यस्येति विग्रहे वाच्यलिङ्गः । यथा महाभारते । १ । १५३ । १८ ।
"कम्बुग्रीवः पुण्यराज्ञो भर्त्ता युक्तोभवेन्नम" ॥)
कम्बुपुष्पी, स्त्री, (कम्बुः शङ्खः तद्वत् शुक्लं पुष्पं यस्याः ।) शङ्खपुष्पीवृक्षः । इति राजनिर्घण्टः । (शङ्खपुष्पीशब्देऽस्या गुणा आख्येयाः ॥)
कम्बुमालिनी, स्त्री, (कम्बुतुल्यपुष्पाणां माला समूहः अस्ति अस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥
कम्बोजः, पुं, (कम्ब + ओज ।) शङ्खविशेषः । देशभेदः । (यथा तन्त्रशास्त्रम् ।
"पश्चनदं समारभ्य क्षेच्छाद्यित्यपूर्व्वतः ।
कम्बोजदेशो देवेशि ! वाजिराशिपरायणः" ॥)
हस्तिप्रभेदः । इति मेदिनी । (तद्देशवासिनि त्रि॥)
कम्बातायी, [न्] पुं, (कम्बुः शङ्खः स इव आतायी । शङ्खतुल्यशुक्लपूर्व्वकायत्वात्तथात्वम् ।) शङ्खचिल्लः । इति महाभारतम् ॥
कम्भारी, स्त्री, (कं जलं बिभर्त्ति धारयतीति । डु भृ धारणपोषणयोः + कर्म्मण्यण् + ङीप् गौरादित्वात् ङीष् वा ।) गम्भारीवृक्षः । इति शब्दमालाराजनिर्घण्टौ । (गम्भारीशब्देऽस्या गुणादयो वक्तव्याः ॥)
कम्भु, क्ली, (कं जलं तत्तुल्यं श्वेतं बिभर्त्ति । भृ + डुः ।) उशीरम् । इति राजनिर्घण्टः ॥
कम्रः, त्रि, (कामयतीति । कम् + नमिकम्मीति रः । ३ । २ । १६७ ।) कामुकः । मैथुनेच्छाविशिष्टः । इत्यमरः । ३ । १ । २४ ॥
(स्त्री, गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमनीयजला कम्रा कपर्द्दिसुकपर्द्दगा" ॥
जह्नुं प्रतीपं श्रान्तनुं कामितवती कम्रा कामुका ॥
इति तट्टीका । काम्यतेऽसौ इति ।)
कमनीयम् । यथा,—
"लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमामाभुग्नेन विवर्त्तिता बलिमता मध्येन कम्रस्तनी" ।
इति श्राकुन्तले १ अङ्के ॥
कयस्या, स्त्री, (को वायुः स इव वेगेन याति अथवा कं जलं तस्य स्रोत इव याति । क + या + डः । तत्र तिष्ठति । स्था + कः टाप् च ।) वयस्या । इत्यमरटीकायां स्वामी ॥ काकोली इति ख्याता ॥
करः, पुं, (कं सुखं राति ददातीति । रा + कः ।) राजस्वम् । खाजाना इति पारस्यभाषा । तत्पर्य्यायः । भागधेयः २ बलिः ३ । इत्यमरः । २ । ८ । २७ ॥
कारः ४ । इति तट्टीका ॥ प्रत्यायः ५ । इति मेदिनी ॥ * ॥
अथ राज्ञां करग्रहणप्रकारः । क्रयविक्रयादिना लाभादीन् संप्रेक्ष्य राज्ञा करो ग्रहीतव्यः ।
यथा, मनुः । ७ । १२७-१३३ ।
"क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणां ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्" ॥*॥
राज्ञा राज्ञात् वार्षिकः करोऽल्पाल्पं ज्ञत्वा ग्रहीतव्यः । यथा,—
"यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः" ॥
मूलादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागरूपः करो ग्राह्यः । धान्यानां भूम्युत्कर्षापेक्षया कर्षकाणां क्लेशलाघवगौरवापेक्षया च षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्रहीतव्यः ।
यथा,—
"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा" ॥*॥
द्रुमाश्ममधुसर्पिरादीनां
षड्भागो लाभात् ग्रहणीयः । यथा,—
"आददीताथ षड्भागं द्रुमाश्ममधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानाञ्च चर्म्मणां वैदलस्य च ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च" ॥*॥
अतिक्लीयधनोऽपि राजा
श्रोत्रियब्राह्मणात् करं न गृह्णीयात् । यथा,—
"क्षियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधास्य संसीदेच्छोत्रियो विषये वसन्" ॥*॥
(कीर्य्यते विक्षिप्यतेऽसौ कर्म्मणि + अप् । हस्तकरिशुण्डयोस्तु करेऽपि अप् ॥) वर्षोपलः । किरणः । (यथा रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः षट्दिनकरः करैस्तापयते जगत्" ॥)
हस्तः । (अमरः । ३ । ३ । १६३ ।). हस्तिशुण्डः । इति मेदिनी ॥ (यथा, महाभारते ३ । ११ । २८ ।
"एवन्तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते ।
ऊर्द्धं गजकराकारं करेणाभिजघान सः" ॥)
कर्म्मोपपदे कर्त्तृवाचकः । यथा । सुखकर इत्यादि ॥ (यथा, रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः षट्दिनकरः करैस्तापयते जगत् ।
प्रतिलोमस्त्वं ते वायुस्त्वत्पराभवलक्षणम्" ॥)
करकं, क्ली पुं, (किरति विक्षिपति जलं अस्मात् करोति जलमत्र वा । कृ + वा क "कृत्रादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) करङ्गः । कमण्डलुः । इति मेदिनी ॥ (यथा, मनुः । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च" ॥)
करकः, पुं, (करोति वाय्वादिजनितदोषामावं छणोति फलपत्रादिभिः वायुपित्तादिदोषं नाशयति वा छण् हिंसायां "छणादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) दाड़िमवृक्षः । राजकरः । पक्षिविशेषः । जङ्घाकरङ्कवृक्षः । इति हेमचन्द्रः ॥ फलाशवृक्षः । इति हारावली ॥ कोविदारवृक्षः । वकुलवृक्षः । करीरवृक्षः । नारिकेलास्थि । इति राजनिर्घण्टः । माला इति भाषा ॥ (यथा, रामायणे ५ । १४ । ४८ ।
"हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि" ॥)
करकच्छपिका, स्त्री, (कच्छपस्यादातिरस्त्यस्याः ठन् । करे स्थिता कच्छपिका कच्छपाकारमुद्रा ।) कूर्म्ममुद्रा । यथा,—कालिकापुराणे ५६ अध्यायः ॥
"करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः" ॥
करकशटकः, पुं, (करे हस्ते कशटक इव ।) नखः । इति त्रिकाण्डशेषः ॥
करका, स्त्री पुं, (छणोति हिनस्ति आत्मादिफलम् । "छणादिभ्यो वुन्" । वुनन्तात् टापि च्छिपकादित्वात् प्रत्ययस्यादिति इत्वेन किरति क्षिपति जलं वा ।) मेघभवशिला । शिल इति भाषा । तत्पर्य्यायः । वर्षोपलः २ । इत्यमरः । १ । ३ । १२ ॥ मेघोपलः ३ । इति मेदिनी ॥ बीजोदकम् ४ घनकफः ५ मेघास्थि ६ वार्घरः ७ करः ८ करकः ९ । इति शब्दरत्नावली ॥ राधरजुः १० धाराशुरः ११ । इति जटाधरः ॥ मेदिन्यां राधरज इति पाठः ॥ (यथा मेघदूते ५६ ।
"ताम्कुर्व्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्" ॥)
करकाम्भाः, [स्] पुं, (करकावत् शीतलं चम्भो जलं यत्र ।) नारिकेलवृक्षः । इति त्रिकाण्डशेषः ॥
करग्रहः, पुं, (करः इयं मम भार्य्या इति प्रतिज्ञया गृह्यतेऽत्र वरेणेति यावत् । ग्रह + अधिकरणे अप् ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशती । ६०२ ।
"सा गुणमयी स्वभावस्वच्छा सतनुः करग्रहायत्ता ।
भ्रमिता वज्रमन्त्रविदा भवता काश्मीरमालव" ॥)
करग्रहणञ्च ॥ (यथा, आर्य्यासप्तशती । ६२६ ।
"सकरग्रहं सरदितं
साक्षेपं सनखमुपि सजिगीषम्" ॥)
करग्रहारम्भः, पुं, (करग्रहस्य करादानस्य आरम्भः प्रज्ञाभ्यः ।) राज्ञां प्रजाभ्यो नववर्षीयकरस्य प्रथमादानम् । तद्दिनं पुण्याह इति ख्यातम् । तस्यापभाषा पुण्या । तस्य शुभदिननिरूपणम् यथा,—
"तीक्ष्णोग्रवक्रीतरभेषु लग्ने
शुभे वर्षादये भानुदिने शुभाह्ने ।
कुर्य्यादनुक्तानि समीहितानि
करग्रहारम्भमपि प्रजाभ्यः" ॥
इति ज्योतिषम् ॥ अस्यार्थः । अश्लेषार्द्राज्येष्ठामूलापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदमघाभरणीकृत्तिकाभिन्नलग्नेषु । मिथुनसिंहकन्यातुलाधनुःकुम्भमीनलग्नेषु । रविसोमबुधबृहस्पतिशुक्रवारेषु करग्रहारम्भः कर्त्तव्यः ॥
करघर्षणः, पुं, (कराभ्यां घृष्यतेऽसौ । कर + घृष् +

कर्म्मणि ल्युट्।) दधिमन्थनदण्डः। तत्पर्य्यायः। वैशाखः २ दधिचारः ३ तक्राटः ४। इति हारावली। इक्षुघर्म्मजे स्त्री।

करघर्षी, [न्] पुं, (कराभ्यां करयोर्वा घर्षः घर्षणं अस्ति अस्यास्मिन् वा। करघर्ष + इनिः।) मन्थानदण्डः। इति शब्दमाला।

करञ्जः, पुं, (कस्य शिरस इव।) मस्तकम्। (कीर्य्यते जलमत्र इति करः। कॄ + अप्। जलहोनः अङ्गे गर्भो यस्य शकन्ध्वादित्वात् अजोपे साधुः।) अग्निस्थनारिकेलफलास्थि। इति मेदिनी। नारिकेलेर खोल इति भाषा। शरीरास्थि। इति हेमचन्द्रः। इक्षुभेदः। इति राजनिर्घण्टः। (पात्रविशेषः। यथा, "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी।)

करङ्कशालिः, पुं, (करङ्क इति नाम्ना शाकते शोभते इति। करङ्क + शाक + इन्।) करङ्कनामेक्षुः। इति राजनिर्घण्टः।

करञ्जदः, पुं, (करवत् आवरणकारी छदो यस्य।) शाखोटवृक्षः। शेओड़ा इतिभाषा। इति भावप्रकाशः। (अस्य गुणादिकं शाखोटशब्दे द्रष्टव्यम्।)

करञ्जदा, स्त्री, (कर इव किरण इव लोहितवर्णः छदः पुष्पं यस्याः। कर इव आवरकश्छदो वा यस्याः।) सिन्दूरपुष्पीवृक्षः। इति राजनिर्घण्टः।

करजं, क्ली, (करे जायते इति। कर + जन् + ड।) व्याघ्रनखवदस्त्राक्तेस्तथात्वम्।) व्याघ्रनखनामगन्धद्रव्यम्। इत्यमरः।२।४।११९। (नवमीशब्देऽस्य गुणा वक्तव्याः।)

करजः, पुं, (कं सुखं जलं वा राजयतीति। राजेः कर्म्मण्यण्।) करञ्जवृक्षः। ("करञ्जकः स्यात् करजः पत्रसूची पलाशनः"। इति शब्दरत्नावली। करे जायते इति। जन + ड।) नखः। इति मेदिनी। (यथा, मनुः। ४। ७०।

"नखलोष्टमृदीषान्न छिन्द्यात् करजैस्तृणम्"॥)

करजाख्यः, पुं, (करजस्याख्या एव आख्या यस्य।) नखीनामगन्धद्रव्यम्। इति रत्नमाला।

करण्डोड्रिः, पुं, इक्षुण्डोड्रिवृक्षः। इति राजनिर्घण्टः। (केचित् करञ्जोड्रिरिति वदन्ति।)

करञ्जः, पुं,(कं सुखं शिरो जलं वा राजयतीति। क + राज + विच् + अच्।) खगनामख्यातवृक्षविशेषः। करमुचा इति भाषा। तत्पर्य्यायभेदौ यथा,—

"करञ्जकः स्यात् करजः पत्रसूची पलाशनः।
अङ्गारमञ्जी षड्ग्रन्थो मर्कटाङ्गारवल्लरी।
करञ्जभेदाश्चत्वारो विज्ञेया लोकतस्त्रिमे"॥

इति शब्दरत्नावली। अपि च।

"शिरविल्वो नक्तमालः करजश्च करञ्जकः।
सोमवल्कः कबिल्लस्तु पूतिकः कबिकारकः॥
प्रकीर्य्यः पूतिकरजः पट्टिजः सुभगा अपि।
करञ्जभेदाः षड्ग्रन्थो मर्कटाङ्गारवल्लरी"॥

इति जटाधरः। स च षड्विधः। तत्र डरकरञ्जपर्य्यायः। नक्तमालः २ पूतिकः ३ शिरविल्वकः ४ पूतिमर्कटः ५ षड्ग्रन्थः ६ रोचनः ७। इति राजनिर्घण्टः॥ शिरविल्वः ८ करजः ९ करञ्जकः १०। इत्यमरः।२।४।४७॥ शिरिविल्वः ११। इति तट्टीका॥ उदकीर्य्यः १२। इति रत्नमाला॥*॥ अस्य फलगुणाः। कटुत्वम्। उष्णत्वम्। चक्षुर्हितत्वम्। वातनाशित्वञ्च। इति राजनिर्घण्टः॥ वातकफमेहव्रणकृमिकुष्ठनाशित्वञ्च॥*॥ तत्पत्रगुणाः। कफवातार्शःकृमिशोथनाशित्वम्। भेदकत्वम्। पाके कटुत्वम्। वीर्य्योष्णत्वम्। पित्तवर्द्धकत्वम्। लघुत्वञ्च। इति भावप्रकाशः॥*॥ तत्तैलगुणाः। अतिस्निग्धत्वम्। वातनाशित्वम्। स्निग्धदीप्तिदाढत्वम्। नयनामयवातरोगकुष्ठकण्डूविसूचिकानाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। लेपेन नानाविधचर्म्मदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ किटिमत्वम्। कृमिनाशित्वम्। रक्तपित्तदोषकारित्वञ्च। इति राजवल्लभः॥*॥ अथ नाटाकरञ्जपर्य्यायः। प्रकीर्य्यः १ पूतिकरजः २ पूतिकः ३ कलिकारकः ४। इत्यमरः २।४।४८॥ पूतीकरञ्जः ५ सकण्टकः ६। इति रत्नमाला॥*॥ षड्ग्रन्थः। काँटाकरञ्ज गाँटिया करञ्ज इति भाषा॥*॥ मर्कटी। माकड़ाकरञ्ज इति भाषा॥*॥ अङ्गारवल्लरी। इत्यमरभरतौ विषकरञ्ज इति भाषा॥*॥ अथ अस्त्रकरञ्जपर्य्यायः। करमर्दी १ वनेक्षुका २ कराञ्जः ३ करमर्दकः ४। इति रत्नमाला॥ क्षुद्व्याधिकफलः ५ व्रविघ्नः ६ सुघेणुः ७। इत्यमरः।२।४।६७॥ अस्य फलगुणाः। पिपासानाशित्वम्। रुचिपित्तकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ करमर्दकशब्दे द्रष्टव्यौ॥

(यथा, महाभारते ३। २२९। ३५।

"पादपानाञ्च या माता करञ्जनिलया हि सा।
वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी।
करञ्जे तां नमस्यन्ति तस्मात् पुत्रार्थिनो नराः"॥

किरति विक्षिपति धार्म्मिकानिति। कॄ विक्षेपे + बाहुलकादौणादिकोऽञ्जन्प्रत्ययः। धर्म्मदेवेऽपि, त्रि। यथा ऋग्वेदे। १। ५३। ८।

"त्वं करञ्जमुत पर्णयं वधी-
स्तेजिष्ठयातिथिग्वस्य वर्त्तनी"॥)

करञ्जकः, पुं, (करञ्ज + स्वार्थे कन्।) करञ्जवृक्षः। इत्यमरः।२।४।४७॥ भृङ्गराजवृक्षः। इति जटाधरः॥ (यथा महाभारते। १३। १२८। ८।

"यस्तु संवत्सरं पूर्णं दद्यादीपं करञ्जके।
सुवर्चलामूलहस्तः प्रजास्तस्य विवर्द्धते"॥)

करञ्जफलकः, पुं, (करञ्जफलमिव फलं यस्य। ततः स्वार्थे कन्। करञ्जफलमिव कायते इति वा। कै + कः।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

करटः, पुं, (कं कुत्सितं रटति शब्दं करोतीति। रट शब्दे + पचाद्यच्।) काकः। (यथा गङ्गास्तोत्रे।

"वरमिह गङ्गातीरे सरटः करटः।" इति॥

किरति विक्षिपति मदवारि इति। कॄ + अटन्।) हस्तिगण्डः। इत्यमरः।१। ३। २४॥ (यथा महाभारते। १। २७७ द्रौपदीहरणपर्व्वणि १८।

"कथं हि भिन्नकरटं पद्मिनं वनगोचरम्।
उपस्थाय महानागं करेणुः शूकरं स्पृशेत्"॥)

कुसम्भवृत्तः। निन्द्यजीवनः। एकादशाहादिश्राद्धम्। दुर्द्धुरूटः। नास्तिक इति यावत्। (अयं तु क्षत्रियभेदाभिप्रायेणोक्तः। तथा च महाभारते ६। ९। ६२।

"मालवा वल्लवाश्चैव तथैवापरवर्त्तकाः।
कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा"॥)

वाद्यविशेषः। इति मेदिनी॥

करटकः, पुं, (करट + स्वार्थे कन्।) काकः। इति शब्दरत्नावली॥ (पिङ्गलकनाम्नः सिंहस्य मन्त्रिपुत्रविशेषः। यथा हितोपदेशे २।२५।

"स च तथाविधः करटकदमनकाभ्यां तन्मन्त्रिपुत्राभ्यां भ्रष्टराज्याभ्यां दृष्टः"॥ स्तेयशास्त्रप्रवर्त्तकः कर्णीसुतः। यथा कादम्बरीटीकायाम्।

"कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः"॥)

करटा, स्त्री, (करट + "अजाद्यतष्टाप्"। ४।१।४। इति टाप्।) दुःखदोह्या गवी। इति हेमचन्द्रः॥

करटी, [न्] पुं स्त्री, (करटः मदस्रवणशीलगण्डः प्राशस्त्येन अस्ति अस्य। करट + इनिः।) हस्ती। इति हेमचन्द्रः॥ (यथा, खड्गेश्वरविरचितश्लोकस्तुतौ। ४।

"कपर्दिनि कुमुदतीरमणखण्डचूड़ामणौ
कटोतटपटाभवत्करटिचर्मणि ब्रह्मणि॥)

करटुः, पुं, (कॄ + अटुः।) पक्षिविशेषः। इति हेमचन्द्रः। करकटिया इति भाषा॥

करणं, क्ली, (क्रियतेऽनेन। कॄ + करणे + ल्युट्।) साधकतमम्। इत्यमरः। १। ३। ५४॥ तच्च षट्कारकान्तर्गतकारकविशेषः। तस्य लक्षणम्।

"क्रियायां साध्यायां बहूनां कारणानां मध्ये कारणान्तरव्यवधानाभावे यद्धि क्रियानिष्पत्तिकारकं विवक्षितं तस्मिन् करणत्वं प्रकीर्त्तितम्। तेन दात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारणत्वेऽपि दात्रस्यैव करणत्वं विवक्षितम्। तथाचोक्तम्।

"कारणान्तरव्यवधानेऽपि क्रिया निष्पत्तिकारणम्।
यद्धि विवक्षितं तेषु करणत्वं प्रकीर्त्तितम्"॥

इति मुग्धबोधटीकायां दुर्गादासः॥*॥ तिथ्यर्द्धपरिमितववादेकादशसंख्यककालविशेषः। तेषां नामानि। ववः १ बालवः २ कौलवः ३ तैतिलः ४ गरः ५ वणिजः ६ विष्टिः ७ शकुनिः ८ चतुष्पदः ९ किन्तुघ्नः १० नागः ११। तेषां यथाक्रमेणाधिष्ठातृदेवाः। इन्द्रः १ कमलजः २ मित्रः ३ अर्य्यमा ४ भूः ५ श्रीः ६ यमः ७ कलिः ८ रुद्रः ९ क्षणी १० मारुतः ११। एकैकस्मिन् तिथौ द्वे द्वे करणे भवतः। तेषां ववादयः सप्त अष्टावृत्त्या शुक्लप्रतिपच्छेषार्द्धमारभ्य कृष्णपक्षीयचतुर्दशीप्रथमार्द्धपर्य्यन्तं भवन्ति। शेषाश्चत्वारः कृष्णचतुर्दशीशेषार्द्धावधिशुक्लप्रतिपत्प्रथमार्द्धपूर्य्यन्तं नियमेन भवन्ति अतो ध्रुवाणि करणानि। पूर्व्वे सप्ताध्रुवाणि॥ तेषामानयनक्रमो यथा।

"तिथिर्द्विघ्ना करोनागश्चतुष्करणमादिमे।
परे दले तु सैकं तत्करणं ववपूर्व्वकम्"॥

इति ज्योतिषम्॥*॥ क्षेत्रम्। गात्रम्। इन्द्रि-

यम्। इत्यमरः। ३। ३। ५४॥ (यथा गीतायां १८। १४।
"अधिष्ठानं तथाकर्त्ता करणञ्च पृथग्विधम्"॥)
हेतुः। कर्म्म। हस्तलेपः। नृत्यप्रभेदः। गीतविशेषः। (तले व्यवस्थापकस्ताड़नविशेषः।
यदुक्तं राजकन्दर्पेण।
"नृत्यवादित्रगीतानां प्रयोगवशभेदिनां।
संस्थानं ताड़नं रोधः करणानि प्रचक्षते"॥
अस्य प्रमाणं यथा कुमारे ६। ४०।
"शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।
अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः"॥)
क्रियाभेदः। संवेशनम्। कायस्थः। इति मेदिनी॥
कायस्थसंहतिः॥ वर्णानां स्पर्शतादि। योगिनामासनादि। क्षतादि। इति हेमचन्द्रः॥ (सर्व्वेषामादिकारणत्वात् विष्णुः। यथा, महाभारते १३। १७६। ५४।
"कारणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"॥
लेख्यपत्रसाक्षिदिव्यादि। यथा मनुः ८। ४१।
"अर्थेऽपव्ययमानन्तु करणेन विभावितम्।
दापयेदधिकस्यार्थं दण्डलेशञ्च शक्तितः"॥
भावे ल्युट्। क्षतिः। यथा रामायणे ४।१७।५६॥
"धर्म्मतः श्रेयकरणे प्रतीच्छिष्यामहे वयम्"॥)
करणः, पुं, शूद्रावैश्ययोर्जातजातिविशेषः। इत्यमरः। २। १०। २॥ अयं लिखनवृत्तिः कायस्थ इति ख्यातः। इति भरतः॥ यथा,—
"शूद्राविशोस्तु करणोऽम्बष्ठो वैश्यादिजन्मनोः"।
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥ *॥
अपि च।
"कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते"।
इति करणशब्दार्थे मेदिनी॥ *॥ अन्यच्च।
"झल्लो मल्लश्च राजन्याद् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसद्रविड़ एव च"।
इति मानवे १०। २२॥ झल्लोमल्लश्चेति। "क्षत्रियात् व्रात्यात् सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविड़ाख्या जायन्ते। एतान्यपेक्षयैव नामानि"। इति तट्टीकायां कुल्लूकभट्टः॥ *॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्धि कीटस्त्रिजन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥
तमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणिग् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्॥
विन्दैकलिपिकर्त्ता च भक्ष्यदातुर्धनं हरेत्॥
कायस्थेनोदरस्थेन मातुर्म्मांसं न खादितम्।
तत्र नास्ति क्षमा तस्य दन्ताभावेन केवलम्॥
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर।
नरेषु मध्ये ते धूर्त्ताः क्षमाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्।
व्रतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ॥
सुबुद्धिः शिवयुक्तिश्च शास्त्रज्ञो धर्म्ममानसः।
न विन्यसेत्तेषु तात स्वात्मकल्याणहेतवे"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः॥
करणाध्यं, क्ली, (करणं ज्ञानकर्म्मादिरूपं इन्द्रियं चायतेऽनेन। करण + चै + करणे + ल्युट्। मस्तकस्य प्रधानकरणैकादशस्य मनसः स्थलत्वात्। करणैर्हस्तादिकर्म्मेन्द्रियादिभिः चायते वा इति कर्म्मणि ल्युट्।) मस्तकम्। इति हेमचन्द्रः॥
करणीयं, त्रि, (कर्त्तुमुचितं कर्त्तुमर्हं वा। कृ + अनीयर्।) कर्त्तव्यम्। कार्य्यम्। इति व्याकरणम्॥ (यथा रामायणे ३। १४। १०।
"मया किं करणीयञ्च इत्युक्ते द्विजसन्निधौ।
सर्व्वैरेव च तैरार्त्तैर्वागियं समुदाहृता"॥)
करण्डः, पुं, (कृ + "कृसृभृवृञः"। इत्यण्डन्। उणां। १।१२८।) मधुकोषः। मौचाक् इति भाषा। असिः। कारण्डवपक्षी। दलाढ़कम्। इति मेदिनी हेमचन्द्रश्च॥ वंशादिरचितभाण्डविशेषः समुद्गश्च। इत्यमरः। ३। ५। १८॥ साजि झाँपि इत्यादि भाषा। (यथा भागवते ५। १४। ४। "एवमेव मद्दाश्रमः कर्म्मक्षेत्रं यस्मिन् न हि कर्म्माण्युत्सीदन्ति यदयं कामकरण्ड इव आवसथः"॥)
करण्डी, [न्] पुं (करण्डस्येव आकारोऽस्यास्तीति। करण्ड + इनिः।) मत्स्यः। इति चिकाण्डशेषः। (मत्स्यशब्दे ऽस्य गुणादिकथनं द्रष्टव्यम्॥)
करतलः, पुं, (करस्य हस्तस्य तलः।) हस्ततलः। हातेर तेलो इति भाषा। (यथा। जयदेवः। १।४५॥
"करतलतालतरलवलया वलिकलितलसनवंशे"
अपि च। यथा, श्रीभागवते। ८। ७। ४२॥
"ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन् महादेवः कृपया भूतभावनः"॥)
करतालं, क्ली, (कराभ्यां हस्ताभ्यां दीयमानस्तालो यत्र।) वाद्यविशेषः। यथा,—
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम्।
दुर्गागारे वंशिवाद्यं मधुरीश्च न वादयेत्"॥
झल्लकं कांस्यनिर्म्मितकरतालकम्। इति तिथ्यादितत्त्वे रघुनन्दनभट्टाचार्य्येण व्याख्यातम्॥
करताली, स्त्री, (करताल + गौरादित्वात् ङीष्।) वाद्यविशेषः। करताल खरताल इति ख्याता। तत्पर्य्यायः। कर्त्तरिः २। इति त्रिकाण्डशेषः॥ करतलध्वनिः। तथा च। "यथा न स्यादाक्षीकपटकरतालीपटुरवः"। इति उद्भटः॥
करतोया, स्त्री, (करात् शङ्करस्य हस्तात् च्युतं तोयं जलं अस्ति यत्र। अर्श आद्यच्।) खनामख्यातउत्तरदेशस्थनदीविशेषः। तत्पर्य्यायः। सदानीरा २। इत्यमरः। १। १०। ३३॥ सदागीरवहा ३। इति शब्दरत्नावली॥ *॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्करस्य तोयं विद्यतेऽत्र इति करतोया। आवश्ये एतद्दर्शं सर्व्वा नद्यो रजस्वलाः इयं तु न रजस्वला अतएव सदा सर्व्वदा नीरमस्या इतिसदानीरा। तथा च स्मृतिः।
"अषाढ़ी कार्त्तिके देवी यद्यं गङ्गा रजस्वला।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी"॥
इत्यमरटीकायां भरतः॥ (इयं हि तीर्थविशेषः। यथा महाभारते ३। तीर्थयात्रापर्व्वणि। ८५। ३॥
"करतोयां समासाद्य त्रिरात्रोपोषितो नरः।
अश्वमेधमवाप्नोति प्रजापतिकृतो विधिः"॥)
करद्रुमः, पुं, (किरति शाखाः सर्व्वतः यः। स चासौ द्रुमश्चेति।) कारस्करवृक्षः। इति राजनिर्घण्टः॥
करपत्रं, क्ली, (करेण कराद् वा पततीति। पत + "सर्व्वधातुभ्यः ष्ट्रन्" इति ष्ट्रन्।) क्रकचः। इत्यमरः। २। १०। ३५॥ करात् इति भाषा। (करौ पत्रमिव नौरिव यत्र।) जलक्रीड़ा। इति जटाधरः॥
करपत्रवान्, [त्] पुं, (करपत्राकारपत्रमस्ति यस्मिन् मतुप् मस्य वः।) तालवृक्षः। इति शब्दचन्द्रिका॥
करपत्रिका, स्त्री, (करौ पत्रं नौरिव यस्याः। पत्र + कप् + टाप् + अत इत्वम्।) जलक्रीड़ा। इति जटाधरः॥
करपर्णः, पुं, (करो हस्तः तदर्त्तयं यस्य।) भिण्डावृक्षः। रक्तैरण्डः। इति राजनिर्घण्टः॥ (एरण्डशब्देऽस्य विशेषः उक्तः॥)
करपल्लवः, पुं, (करस्य पल्लव इव।) अङ्गुलिः। यथा, मार्कण्डेये ८४। २६।
"करपल्लवसङ्कीर्णैः तैरस्मान्नृत्त सर्व्वतः"॥
करपात्रं, क्ली, (करः पात्रमिव यत्र।) जलक्रीड़ा। इति हारावली॥
करपालः, पुं, (करं पालयति रक्षति। पाल + कर्म्मण्यण्।) खड्गः। इत्यमरः। २। ८। ८६॥
करपालिका, स्त्री, (करपाल् + खुल् + टाप् अत इत्वम्।) क्षुरगदाकारहस्तदण्डः। खाँटा इति ख्यातः। इति भरतः॥ एकधाराखड्गम्। इति खामी। तत्पर्य्यायः। ईजो २। इत्यमरः। २। ८। ८६॥ ईजी ३ इजिः ४ करवालिका ५। इति तट्टीका॥
करबालः, पुं, (करस्य बालः पुत्र इव। नखस्य करजातत्वात् तथात्वम्।) नखम्। इति शब्दमाला॥ (करं बलति संदधोति बल + अण्।) खड्गः। इत्यमरटीकायां भरतादयः। करवाल इति भाषा। (यथा, गीतगोविन्दे। १। १०॥
"क्ष्वेड़क्षिवड़निधने कलयसि करवालम्"॥)
करबालिका, स्त्री, (कर + बल + खुल् + टाप् + अत इत्वम्।) करपालिका। इत्यमरटीकायां रायमुकुटादयः॥
करभः, पुं, (क्षरति कीर्य्यतेऽनेन वा। क्षर् हिंसायां कॄ विक्षेपे वा "कॄशॄगृज्जिकलिगर्दिभ्योऽभच्"। उणां। ३।१२२। इति अभच्। करे भाति शोभते इति वा। भा + कः।) मणिबन्धावधिकनिष्ठापर्य्यन्तं करस्य बहिर्भागः। (यथा, रघुः। ६। ८३।
"धात्री कराभ्यां करभोपमोरुः"॥)
उष्ट्रशिशुः। इत्यमरः॥ २। ६। ७५।
करिशावकः। इत्यमरटीकासारसुन्दरी॥ (यथा भागवते ८।२।२२।
"सघर्म्मतप्तः करिभिः करेणुभिर्दृतोमदच्युत्करभैरनुद्रुतः"॥)
उष्ट्रः। इति मेदिनी॥ नखनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ कटिः। इति जटाधरः॥
करभकाण्डिका, स्त्री, (करभप्रियं काण्डमस्याः।

करमकाण्ड + कप् + अत इत्वम् ।) उष्ट्रकाण्डीवृक्षः । इति राजनिर्घण्टः ॥

करभप्रिया, स्त्री, (करभस्य करिशावकस्य उष्ट्रस्य वा प्रिया ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभवल्लभः, पुं, (करभस्य हस्तिशावस्य वल्लभः प्रियः ।) कपित्थवृक्षः । पीलुवृक्षः । इति राजनिर्घण्टः ॥

करभादनी, स्त्री, (करभेण उष्ट्रेण अद्यतेऽसौ । अद् + कर्म्मणि ल्युट् । ततो + ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभी, [न्] पुं, (कर इव भाति करभः शुण्डः स अस्यास्ति । करभ + इनिः । यद्वा करभः हस्तावयवविशेषः सोऽस्य शुण्डावच्छेदे अस्तीति इनिः ।) हस्ती । इति राजनिर्घण्टः ॥

करभी, स्त्री, (करभ + ङीप् ।) उष्ट्री । तत्पर्य्यायः । वामी २ । इति जटाधरः ॥

करभीरः, पुं, (करभिणं हस्तिनं ईरयति प्रेरयति मृत्युमुखम् । करभि + ईर् + अच् ।) सिंहः । इति शब्दरत्नावली ॥

करभूषणं, क्ली, (करस्यभूषणम् ।) कङ्कणम् । इत्यमरः । २ । ६ । १०८ ॥ हस्ताभरणमात्रञ्च ॥

करमट्टः, पुं, (करं करिशुण्डमपि अट्टति तुच्छीकरोति । अस्य सरलकाण्डत्वात् तथात्वम् । अट्ट अनादरे + खसुम् प्रत्ययः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः । (गुवाकशब्देऽस्य गुणा द्रष्टव्याः ॥)

करमरी, [न्] पुं, (किरति क्षिपति अत्र दण्डान् इति करः कारागारः । कृ + अधिकरणे अप् । तस्मिन् करे मरः मरणं मृत्युवत् यातना यस्य वाऽलकात् इनिः । तच्च म्रियते वा ।) बन्दी । इति त्रिकाण्डशेषः । कयेदी इति भाषा ॥

करमर्दः, पुं, (करं मृद्नातीति । करमृद + कर्म्मण्यण् । करेण मृद्यते इति कर्म्मणि अप् वा ।) करमर्दकवृक्षः । इति शब्दरत्नावली ॥ (यथा भावप्रकाशे,—अस्य गुणा उक्ताः ।
"लघुर्दीपनलाभ्यान्तु करमर्दद्वयं मतम् ।
करमर्दद्वयं त्वाममस्रं गुरुत्वाद्दरम् ॥
उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् ।
तत्पक्वं मधुरं वृष्यं लघुपित्तसमीरजित् ॥
करमर्दः सुवेद्यः स्यात् क्षुद्व्याधाक्षमलस्तथा ।
तस्माल्लघुफलायास्तु सा ज्ञेया करमर्दिका ॥)

करमर्दकः, पुं, (कर + मृद + ण्वुल् । करमर्द एव स्वार्थे कन् इति वा ।) वृक्षविशेषः । इत्यमरटीकासारसुन्दरी । पाखि आमला इति भाषा ॥ इति रत्नमालाराजनिर्घण्टादयः । करौन्दा इति करमुचा इति च भाषा । तत्पर्य्यायः । क्षुद्व्याधाकफलः २ अविघ्नः ३ सुवेद्यः ४ । इत्यमरः । २ । ४ । ६७ ॥ क्षुद्व्याधाकः ५ पाकफलः ६ क्षुद्व्याफलः ७ पाकक्षुद्व्याफलः ८ क्षुद्व्याफलपाकः ९ पाकक्षुद्व्याः १० फलक्षुद्व्याः ११ पाकफलक्षुद्व्याः १२ वनालयः १३ वनालकः १४ करान्धुकः १५ बोलः १६ वघ्रः १७ व्याघ्रिघ्नः १८ । इति तट्टीकायां भरतः ॥ करमर्दी १९ तनेचुद्रा २० कराक्षः २१ । इति रत्नमाला ॥

करमर्दुः २२ पाखिमर्दः २३ । तद्वृक्षफलगुणाः । तिक्तत्वम् । अम्लत्वम् । दीपनत्वम् । दाहदाढत्वञ्च । तत्पक्वफलगुणाः । त्रिदोषघ्नमनलत्वम् । अरुचिविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पिपासानाशित्वम् । अम्लत्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (यथा, वामटः ।
"गुरुष्णवीर्य्यं वातघ्नं सरञ्च करमर्दकम् ॥)

करमर्दी, स्त्री, (करं मृद्नातीति । कर + मृद् + अण् ङीप् ।) करमर्दकवृक्षः । इति रत्नमाला ॥

करमालः, पुं, (करः करिशुण्डः तदाकारा माला समूहः यस्य मेघस्य धूमस्य वा क्रमशः करिशुण्डवत् प्रसरत्वात् तथात्वम् ।) खतमालः । धूमः । इति हेमचन्द्रः ॥

करमाला, स्त्री, (कराङ्गुलीभिर्मालयेव जपनात् करूपा माला । कराङ्गुल्य मालेव वा ।) करपर्व्वरूपमाला । यथा,
"अनामिकात्रयं पर्व्व कनिष्ठाच्चितयं तथा ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" ॥
इति मुग्धमाजातन्त्रे सामान्यविषयम् ॥ * ॥
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्" ॥
इति शिवरहस्ययं शक्तिभिन्नविषयम् ॥ * ॥
"अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्" ॥
इति सनत्कुमारसंहितावचनं शक्तीतरेषामष्टवारविषयम् ॥ * ॥
"अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्विका ॥
करमाला समाख्याता आरभ्यानामिकान्तरात् ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत्" ॥
इति शक्तिविषये सुग्धमाजातन्त्रम् ॥ * ॥ तथा ।
"अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" ॥
इदमपि शक्तिविषये अष्टवारपरम् । इति श्यामारहस्यम् ॥

करमुक्तं, क्ली, (करेण सुदृढं धृत्वा शस्त्रं प्रति मुच्यते । कर + मुच् + कर्म्मणि क्तः ।) अस्त्रविशेषः । इति हलायुधः । बरछी भाला इत्यादि भाषा ॥

करम्बः, पुं, (क्लम् करणे + "क्लकदि कडीत्यम्बच्" । उणा० । ४ । ८२ ।) करम्भः । इत्यमरटीकायां नीलकण्ठः ॥ मिश्रिते त्रि । इति हेमचन्द्रः ॥

करम्बितः, त्रि, (करम्बः मिश्रणं जातोऽस्य । करम्ब + इतच् ।) मिश्रितः । खचितः । इति त्रिकाण्डशेषः ॥ ("लवितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥
इति गीतगोविन्दः । १ । २ ॥)

करम्भः, पुं, (केन जलेन रभ्यते मिश्रीक्रियते । रभिधातोरनेकार्थत्वात् "अकर्त्तरि चेति" घञ् । ३ । ३ । १९ । रभेरशब्लिटोः । ७ । १ । ६३ । इति नुम् ।) दधिमिश्रितशक्तुः । इत्यमरः । २ । ९ । ४८ ॥ (यथा शतपथब्राह्मणे । २ । ५ । २ । ४ ।
"अतुषानिव यवान् कृत्वा तानोषदोषोप्तप्य तेषां करम्भपात्राणि कुर्व्वन्ति" ॥ उदमथ्यः । यथा, यजुर्व्वेदे १९ । २१ ।
"धानाः करम्भः सक्तवः परिवापः पयोऽधि" ।
"करम्भः उदमथ्यः । इति वेददीपिनिः ॥
भक्ष्ययवमात्रम् । यथा मनुः १२ । ७६ ।
"करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" ।
करम्भवालुकातापान् करम्भैर्यैवैः सह भक्षा या वालुकाः तद्वत्तप्तवालुकादीन् इत्यर्थः ॥ मिश्रगन्धः । यथा भागवते ३ । २६ । ४५ ।
"करम्भपूतिसौरभ्य शान्तोदग्रादिभिः पृथक् ।
द्रव्यावयववैषम्याद् गन्ध एको विभिद्यते" ॥)

करम्भकं, क्ली, (करम्भ एव स्वार्थे कन् ।) करम्भः । दधिसक्तवः । तत्पर्य्यायः । कर्कसारम् २ । इति हारावली ॥

करम्भा, स्त्री, (केन जलेन रभ्यते सिच्यते इति । अथवा केन वायुना रभ्यते मिश्रीक्रियते नानागन्धो यस्याः । रभेर्नानार्थत्वात् क + रभ + घञ् + नुम् टाप् च ।) घृतावरी । प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥ (खनामख्याता कलिङ्गदेशोत्पन्ना रमणी । सा तु पूरुवंशीयस्याक्रोधनस्य पत्नी । यथा महाभारते १ । ९५ । २२ ।
"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः" ॥)

करम्भः, पुं, (करे रोहतीति कराङ्गुलीभ्य उत्पद्यते इत्यर्थः । कर + रुह + "इगुपधेति" । ३ । १ । १३४ । कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा आर्य्यासप्तशती ३७ । "अस्याः करम्भरुधिरकाण्ड-पटप्रकटनिर्गता दृष्टिः" ॥)

करर्द्धिः, स्त्री, (करस्य ऋद्धिः करेण ऋद्ध्यिर्यस्य वा । करसम्पत् ।) करताली । इति त्रिकाण्डशेषः ॥

करवालिका, स्त्री, (करं वलते । वल हिंसादानयोः अच् । करेण वाल्यते वा । ण्यन्तादच इः ततः कन् + टाप् च ।) करपालिका । इत्यमरटीकायां भरतः ॥

करवी, स्त्री, (कस्य वायोः रवो यत्र । गौरादित्वात् ङीष् ।) कवरी । शिरुपत्रम् । इति शब्दचन्द्रिका ॥

करवीरः, पुं, (करं वीरयति । वीर + विक्रान्तौ + कर्म्मण्यण् ।) खड्गः । दैत्यविशेषः । इति मेदिनी ॥ प्रसङ्गानम् । इति हेमचन्द्रः ॥ ब्रह्मावर्त्ते दृषद्वतीनदीतीरे चन्द्रशेखरराजपुरम् । इति कालिकापुराणे ४६ अध्यायः ॥ (पर्व्वतविशेषः । यथा, भागवते ५ । १९ । २८ ।
"एवमपरेण यवनपारियात्रौ
दक्षिणेन केवास करवीरौ प्रगायतौ" ॥
नागविशेषः । यथा, महाभारते १ । ३५ । १२ ।
"करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डरः" ॥)
वृक्षविशेषः । करवी इति भाषा ॥
(यथा रामायणे ३ । १७ । १० ।
"दाडिमान् करवीरांश्च अशोकांस्तिलकांस्तथा" ॥)
तत्पर्य्यायः । प्रतिहासः २ घृतप्रासः ३ चण्डातः ४ हयमारकः ५ । इत्यमरः । २ । ४ । ७६ ॥ प्रतीहासः

ई । इति तट्टीका ॥ अश्वघ्नः ७ हयारिः ८ अश्वमारकः ९ शीतकुम्भः १० तुरङ्गारिः ११ । इति रत्नमाला ॥ अश्वहा १२ वीरः १३ हयमारः १४ हयघ्नः १५ शतकुन्दः १६ अश्वरोधकः १७ वीरकः १८ कुन्दः १९ शकुन्दः २० श्वेतपुष्पकः २१ अश्वान्तकः २२ नखराङ्कः २३ अश्वनाशनः २४ स्थलकुमुदः २५ दिव्यपुष्पः २६ हरिप्रियः २७ गौरीपुष्पः २८ सिद्धपुष्पः २९ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । कुष्ठकण्डूतिनाशित्वम् । व्रणार्त्तिविषविस्फोटकश्रमनत्वम् । अश्मरीतिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (श्वेतरक्तभेदेन यथा,—

"करवीरः श्वेतपुष्पः शीतकुम्भोऽश्मारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुड़स्तथा ॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणालाघवकृन्मेध्यकोपकुष्ठव्रणापहम् ।
वीर्य्याणां क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्" ॥

इति भावप्रकाशः ॥ नागविशेषः । इति भारतम् ॥)

करवीरकः, पुं, (करवीर इव कायति प्रकाशते । कै + कः । करं वीरयतीति । कर + वीर विक्रान्तौ + ण्वुल् ।) अर्जुनवृक्षः । इति राजनिर्घण्टः ॥ खड्गः । इति शब्दमाला ॥ (करवीर एव स्वार्थे कन् ।) करवीरः । विषभेदः । स तु करवीरस्य मूलम् । इति हेमचन्द्रः ॥

करवीरकन्दसंज्ञः, पुं, (करवीरकन्दसंज्ञया संज्ञा यस्य । करवीरकन्द इति संज्ञा यस्य वा ।) तैलकन्दः । इति राजनिर्घण्टः ॥

करवीरभुजा, स्त्री, (करवीरस्य भुज इव शाखावत् भुजः शाखाऽस्याः ।) आढकीवृक्षः । इति राजनिर्घण्टः ॥ अरहर इति भाषा ॥

करवीरी, स्त्री, (किरति क्षिपति राक्षसासुरादीन् इति । कृ + अच् । करः तादृशः वीरः पुत्रो यस्याः । यद्वा कं सुखं राति ददातीति क + रा + कः । सुखप्रदः वीरपुत्रो यस्याः ।) अदितिः । मेषगवी । पुत्रवती । इति मेदिनी ॥

करशाखा, स्त्री, (करस्य शाखा इव ।) अङ्गुली । इत्यमरः । २ । ६ । ८१ ॥ तासां परिमाणं यथा ।

"अष्टभिस्तैर्भवेत् ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरद्दिष्टमङ्गुलं मुनिसत्तम ॥
मानन्तु पार्श्वेन । षड्यवाः पार्श्वसम्मिताः । इति कात्यायनदर्शनात्" । इति तिथ्यादितत्त्वम् । तत्पर्य्यायः । अयुवः १ अष्ट्यः २ क्षिप्रः ३ त्रिप्रः ४ शूर्य्याः ५ रघ्नयः ६ धीतयः ७ अधर्य्यः ८ विपः ९ काक्ष्याः १० अवनयः ११ हरितः १२ ससारः १३ जामयः १४ सनाभयः १५ योक्त्राणि १६ योजनानि १७ धुरः १८ शाखाः १९ अभीशवः २० दीधितयः २१ गभस्तयः २२ । इति हारावलिनामानि । इति वैद्यनिघण्टौ २ अध्यायः ॥

करश्रीकरः, पुं, (करात् करिशुण्डात् निःसृतः श्रीकरः । करस्य गजशुण्डस्य श्रीकरो वा ।) हस्तिशुण्डनिर्गतजलकणा । तत्पर्य्यायः । वमथुः २ । इत्यमरः । २ । ८ । ३७ ॥ (यथा रघुः । ७ । ४८ ।

"उद्यन्तमग्निं शमयाम्बभूवु-
गंजा विविग्नाः करश्रीकरेण" ॥)

करसूकः, पुं, (करस्य सूकः सूच्याय इव सूच्यय इव वा ।) नखः । इति त्रिकाण्डशेषः ॥

करहाटः, पुं, (करेण किरणेन सूर्य्यस्येति यावत् हाट्यते दीप्यते इति । हट् + घञ् + कर्म्मण्यण् ।) पद्ममूलम् । मदनवृक्षः । इति मेदिनी ॥ महापिण्डीतरुः । इति राजनिर्घण्टः ॥

करहाटकः, पुं, (करहाट एव इति स्वार्थे कन् । करं हाटयतीति ण्वुल् वा ।) मदनवृक्षः । इत्यमरः । २ । ४ । ५२ ॥ हस्तोपस्कर इति स्त्री ॥

करामर्दः, पुं, (करं आमृद्नातीति । कर + आ + मृद् + अण् ।) करमर्दवृक्षः । इति शब्दरत्नावली ॥ करमचा इति भाषा ॥

करामुकः, पुं, (कीर्य्यते क्षिप्यते । कॄ + कर्म्मणि अप् । करं अम्बु यस्मात् कप् ।) क्षण्यपाकफलवृक्षः । इति शब्दचन्द्रिका भरतधृतवाचस्पतिश्च ॥ पाणि आमला इति भाषा ॥

करास्फकः, पुं, (कीर्य्यते इति करं कीर्य्यमाणं अस्फं यतः । अस्फ + कप् ।) करमर्दवृक्षः । इति राजनिर्घण्टः ॥

करायिका, स्त्री, (करावि आचरति उड्डीनादिकाले करवल्लम्बमानत्वात्तथात्वम् । कर + आचारे क्यङ् । ततो + ण्वुल् + टाप् च ।) बलाकापक्षी । लम्बकः । इति भूरिप्रयोगः ॥

करारोटः, पुं, (करे आरोटते दीप्यते । आ + रुट् + अच् ।) अङ्गुरीयकम् । इति त्रिकाण्डशेषः ॥

करालं, क्ली, (कराय चक्षुरोगादिनाशाय अलति पर्य्याप्नोतीति । अल् + अच् ।) क्षण्यकुठेरकः । इति मेदिनी ॥ काल तुलसी इति भाषा ॥

करालः, पुं, (करं आलाति गृह्णाति । आ + ला + कः । कराय क्षेपाय अलति पर्य्याप्नोति वा ।) सर्जरसयुक्ततैलम् । इति मेदिनी ॥ गर्जनतेल इति भाषा ॥ तैले हृते वा यक्षवेसवारः । इति पाकराजेश्वरः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथा,

"तप्तस्नेहे पचेत् पूर्वं वेसवारकसंज्ञकम् ।
पाकप्रापितसौरभ्यं करालं खदकैर्मतम्" ॥

गन्धर्व्वभेदः । यथा, महाभारते । १ । १२३ । ५४ ।

"सद्रा वृहद्रा वृहकः करालश्च महामगः" ॥)

करालः, त्रि, (कराय क्षेपाय भयप्रदर्शनाय अलति पर्य्याप्नोति ।) दन्तुरः । दाँतो इति भाषा ॥ (यथा,

"कराल वदनां घोरां मुक्तकेशीं चतुर्भुजां" ।

इति चामुण्डाध्यानम् ॥) तुण्डः । उचु इति भाषा ॥ भीषणः । इति मेदिनी । भयानक इति यावत् ॥ (यथा, रघुः । १२ । ९८ ।

"तद्योधि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम्" ॥)

करालकः, पुं, (कराल एव स्वार्थे कन् । करालवत् कायति वा ।) क्षण्यतुलसी । इति रत्नमाला ॥ करालशब्दार्थश्चात्र ॥

करालचिपुटा, स्त्री, (करालानि त्रीणि पुटानि यस्याः ।) लङ्गधान्यम् । इति राजनिर्घण्टः ॥

कराला, स्त्री, (करालनाम्ना नाम यस्याः ।) शारिवा । अनन्तमूल इति ख्याता । इति रत्नमाला ॥ (शारिवाशब्दे अस्या गुणा व्याख्येयाः ॥)

करालिकः, पुं, (कराणां करसदृशशाखानां आलिः श्रेणिर्यत्र । कप् ।) वृक्षः । इति हेमचन्द्रः ॥

करालो, स्त्री, (कराल + गौरादित्वात् ङीष् ।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः । इति जटाधरः ॥ (यथा मुण्डकोपनिषदि । १ । २ । ४ ।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वाः' ।)

करिकणावल्ली, स्त्री, (करिकणाया इव वल्ली ।) चविकाख्यवृक्षः । इति राजनिर्घण्टः । घइ इति भाषा ॥ (चविकाशब्देऽस्या विशेषो ज्ञेयः ॥)

करिकुसुमः, पुं, (करीति नागकेशरः त्वदत् कुसुमः ।) नागकेशरचूर्णकम् । इति हारावली ॥

करिगर्ज्जितं, क्ली, (करिणः गर्ज्जितं गर्ज्जनं । करि + गर्ज्ज + भावे क्तः ।) हस्तिगर्जनम् । तत्पर्य्यायः । हंहितम् २ । इत्यमरः । २ । ८ । १०७ ॥

करिजः, पुं, (करिणो जायते इति । करि + जन् + कर्त्तरि डः ।) हस्तिशिशुः । इति शब्दमाला ॥

करिणी, स्त्री, (करिन् + स्त्रियां ङीप् ।) हस्तिनी । तत्पर्य्यायः । धेनुका २ वशा ३ । इत्यमरः । २ । ८ । ३६ ॥ करेणुः ४ करेणुः ५ करेणुका ६ रेणुका ७ वासिता ८ वासा ९ हस्तिनी १० । इति शब्दरत्नावली ॥ कटभरा ११ पुष्करिणी १२ कषा १३ गणिका १४ गजयोषित् १५ । इति जटाधरः ॥ पद्मिनी १६ इत्यमरटीका ॥ (यथा भागवते । ४ । ६ । ५३ ।

"आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम्" ॥)

करिदारकः, पुं, (करिणं दृणाति छिनत्ति दारयतीत्यर्थः । दॄ विदारे + ण्वुल् ।) सिंहः । इति शब्दरत्नावली ॥

करिपत्रं, क्ली, (करिणः कर्णवत् पत्रं यस्य ।) ताडीवृक्षपत्रम् । इति राजनिर्घण्टः ॥

करिपिप्पली, स्त्री, (करिसंज्ञया संज्ञा यस्याः पिप्पल्याः सा । करिनामिका पिप्पली ।) गजपिप्पली । इत्यमरः । २ । ४ । ९७ ॥

करिपोतः, पुं, (करिणः पोतः शिशुः ।) करिशावकः । इति हलायुधः । २ । ६९ ॥

करिबन्धः, पुं, (करी बध्यते बध्यतेऽत्र । यद्वा करिणं हस्तिनं बध्नाति अत्र । बन्ध + अधिकरणे घञ् ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । प्रारब्धिः २ । इति हारावली ॥

करिमाचलः, पुं, (मच शब्दमभयो रितिधातोः भावे घञ् । करिणि हस्तिवधविषये माचं शब्दं लाति गृह्णातीति । ला + कः ।) सिंहः । इति त्रिकाण्डशेषः ॥

करिमुखः, पुं, (करिणो मुखमिव मुखं यस्य ।) गणेशः । इति त्रिकाण्डशेषः ॥

करिरः, पुं, क्ली, (कॄ + इरन् ।) करीरः । इति शब्दरत्नावली ॥

करिशावकः, पुं, (करिणः शावकः शिशुः ।) हस्तिशिशुः । तत्पर्य्यायः । कलभः २ । करभ इत्यपि पाठः । इत्यमरः । २ । ८ । ३५ ॥ करिपोतः ३ । इति हलायुधः ॥ करिजः ४ । इति शब्दमाला ॥ विक्कः ५ । धिक्कः ६ । यथा, शब्दरत्नावल्यो ॥

"यावत् पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च ।
विक्कधिक्कौ तथा स्त्री तु करभी कलभीत्यपि" ॥

करी, [न्] पुं, (करः शुण्डः अस्यास्तीति इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा भागवते । ८ । २ । २२ ।

"स घर्म्मतप्तः करिभिः करेणुभि-
र्वृतो मदच्युत्कलभैरनुद्रुतः" ॥)

करीरः, पुंक्ली, (किरति विक्षिपति खदेहजावरणादीनिति । "कॄशॄपॄकटिपटि ग्रौटिभ्य ईरन्" । उणां । ४ । ३० । इति ईरन् ।) वंशाङ्कुरः । इत्यमरः । २ । ४ । १७३ ॥ बाँसेर कोँड़ा इति भाषा ॥ (यथा, माघे ४ । १४ ।

"रन्ध्रैः पुनर्यत्र रुचा रुचंखा-
मानिन्यिरे वंशकरीरनीलैः" ॥

"वंशशब्दस्याज्ञानताहेतोरलूनतायाः प्रतिपत्यर्थत्वादपौनरुक्त्यम् ॥ अतएवैकार्थपदमप्रयोज्यमित्युक्ता करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोष इत्याह वामनः" ॥ इति तट्टीकायां मल्लिनाथ ॥)

अस्य गुणाः । श्लेष्मनाशित्वम् । कषायत्वम् । दाहजनकत्वञ्च । इति राजवल्लभः ॥ (यथाह वाभटः ।

"करीरमाध्मानकरं कषायखादुतिक्तकम्" ॥

"वेणोः करीराः कफला मधुरा रसपाकतः ।
विदाहिनो वातकराः स कषाया विरूक्षणाः" ॥

इति सुश्रुतः ॥)

करीरः, पुं, (कीर्य्यते क्षिप्यते जलमत्र "कॄशॄपॄकटीति" ईरन् । उणां । ४ । ३० ।) घटः । इति मेदिनी ॥ (कीर्य्यते दूरे निक्षिप्यते दूरतः त्यज्यते कण्टकादिभयादिति यावत् ।) मरुभूमिज उष्ट्रप्रियः कण्टकिवृक्षः । करील इति भाषा । तत्पर्य्यायः । ककरः २ ग्रन्थिलः ३ । इत्यमरः । २ । ४ । ७७ ॥ ककचः ४ । इति तट्टीका ॥ निष्पत्रिका ५ करिरः ६ गूढपत्रः ७ करकः ८ तीक्ष्णकण्टकः ९ । अस्य गुणाः । (यथा भावप्रकाशे ।

'करीरः कटुकस्तिक्तः खेद्युष्णो भेदनः स्मृतः ।
दुर्नामकफवातामगरग्रोथव्रणप्रणुत्' ॥)

आध्मानकारित्वम् । कषायत्वम् । कटुत्वम् । उष्णत्वम् । क्षतिशयकफकारित्वम् । श्वासानिलारोचकसर्व्वशूलविच्छर्द्दिखर्जूव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

करीरा, स्त्री, (करिर + "अजाद्यतष्टाप्" । ४ । १ । ४ । इति टाप् ।) चीरिका । भिँभि पोका इति भाषा ॥ हस्तिदन्तमूलम् । इत्युणादिकोषः ॥

करीरिका, स्त्री, (करीरमिवाकृतिरस्त्यस्याः । करीर + ठन् + टाप् च ।) हस्तिदन्तमूलम् । इति चिकाण्डशेषः ॥

करीरी, स्त्री, (कॄ + ईरन् + गौरादित्वात् ङीष् ।)

चीरिका । हस्तिदन्तमूलम् । इति मेदिनी ॥

करीषः, पुं क्ली, (कीर्य्यते विक्षिप्यते इति । "कॄतॄभ्यामीषन्" । उणां । ४ । २६ । इति कॄ + ईषन् ।) शुष्कगोमयम् । इत्यमरः । २ । ९ । ५१ ॥ घूँटे इति भाषा । तत्पर्य्यायः । गोग्रन्थिः २ छगणः ३ । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । १०० । ७ ।

"ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषीणाञ्च करीषैः शीतकारणात्" ॥)

करीषाग्निः, पुं, (करीषे करीषस्थितो वा अग्निः ।) शुष्कगोमयवह्निः । घूँटेर आगुन इति भाषा । तत्पर्य्यायः । छागणः २ । इति चिकाण्डशेषः ॥

करुणः, पुं, (करोति मनः आनुकूल्याय । कॄ + "कॄदारिभ्य उनन्" । उणां । ३ । ५३ । इति उनन् ।) वृत्तविशेषः । करुणा लेबुर गाछ इति भाषा । तत्फलगुणाः । कफवाय्वाममेदोनाशित्वम् । पित्तप्रकोपकत्वञ्च । इति राजवल्लभः ॥ बुद्धभेदः । इति चिकाण्डशेषः ॥ षट्कारात्यरसान्तर्गततृतीयरसः । इत्यमरः । १ । ७ । १७ । तस्य लक्षणादि । "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥
अनुभावा दैवनिन्दा भूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च ॥
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥
शोकं विनश्वरबन्धुप्रभृति । यथा राघवविलासे ।

विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटना विधेः स्फुटं
ननु खड्गेन शिरीयकर्त्तनम् ॥

अत्र रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगवित्तनाशादावपि उदाहार्य्यम् ॥ परिपोषस्तु महाभारते स्त्रीपर्व्वणि बोद्धव्यः" । इति साहित्यदर्पणे ३ । १९९ ॥ (सर्व्वजीवेषु दयावान् । यथा भागवते । ३ । २७ । ८ ।

"यदृच्छयोपलब्धे सन्तुष्टो मितभुग् मुनिः ।
विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्" ॥)

करुणमल्ली, स्त्री, (करुणा करुणाया अर्हा मल्ली ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

करुणविप्रलम्भः, पुं, (करुणयुक्तो विप्रलम्भः ।) पूर्व्वरागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भविशेषः । अस्य लक्षणम् । यथा साहित्यदर्पणे ३ परिच्छेदे १९३ ।

"यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः" ॥

यथा, कादम्बर्याम् । "पुण्डरीकमहाश्वेतावृत्तान्ते पुनरलभ्ये पुरीरान्तरे वा लभ्ये करुणाख्य एव रसः ॥ किञ्चाकाशसरस्वतीभाषानन्तरमेव शृङ्गारः । सङ्गमप्रत्याशायां रतेरुद्भावात् प्रथमत्वं करुण एवेत्यभियुक्ता मन्यन्ते यच्चाच सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य

प्रवासाख्यो भेद एवेति केचिदाहुः तदन्ये मरणरूपविशेषसम्भवात्तद्भिन्नमपि मन्यन्ते" ॥

करुणा, स्त्री, ("कृतृदारिभ्य उनन्" । उणां । ३ । ५३ । इति कॄ + उनन् । टाप् च ।) परदुःखहानीच्छा । तत्पर्य्यायः । कारुण्यम् २ घृणा ३ कृपा ४ दया ५ अनुकम्पा ६ । अनुक्रोशः ७ । इत्यमरः । १ । ७ । १ ॥ शूकः ८ । इति हेमचन्द्रः ॥ (यथा रघुः ८ । ९७ ।

"करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्" ॥

गङ्गानामविशेषः । यथा काशीखण्डे २९ । ४३ ।

"कूटस्था करुणा कान्ता कूर्मयाना कलावती" ॥

करुणा दयास्वरूपा । इति तट्टीका ॥)

करुणापरः, त्रि, (करुणा परा यस्य करुणायां परः अनुरागी वा ।) दयापरः । तत्पर्य्यायः । दयालुः २ कृपालुः ३ सूरतः ४ । इति हेमचन्द्रः ॥

करुणी, स्त्री, (कॄ + उनन् + ङीप् ।) पुष्पवृक्षविशेषः । ककरखिरुणि इति कोङ्कणे प्रसिद्धा । तत्पर्य्यायः । ग्रीष्मपुष्पी २ रक्तपुष्पी ३ चारिणी ४ राजप्रिया ५ राजपुष्पी ६ सुभ्रा ७ ब्रह्मचारिणी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुताध्मानविषविच्छर्द्दिजन्तूर्द्ध्वश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥

करेटः, पुं, (करे कराङ्गुलीषु चटति उत्पद्यते इति चट + अच् चलुक्समासः ।) नखः । इति चिकाण्डशेषः ॥

करेटया, स्त्री, (करे चटं चटनं चयतीति । चे + डः ततष्टाप् ।) धनच्छूपत्त्री । इति चिकाण्डशेषः ॥

करेटुः, पुं, (के जले वायौ वा रेटतीति । रेटृ भाषणयाचनयोः + सृगव्यादित्वात् कुः ।) पक्षिविशेषः । करकटिया इति भाषा । तत्पर्य्यायः । कर्करेटुः २ । इत्यमरः । २ । ५ । १९ ॥ करटुः ३ कर्कराटुकः ४ । इति हेमचन्द्रः ॥

करेणुः, पुं, ("कॄहृभ्यामेणुः" । उणां । २ । १ । इति कॄ + एणुः । के मस्तके रेणुः पांशुर्यस्य वा । मस्तके शुण्डाकृष्टधूलीनिक्षेपणात् तथात्वम् ।) हस्ती । इत्यमरः । २ । ३ । ५२ ॥ (यथा माघे १२ । ५ ।

"उत्क्षिप्तगात्रः स्म विडम्बयद्गजः
समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोद्धनिरूपितक्रमं
करेणुरारोहयते निषादिनम्" ॥)

कर्णिकारवृक्षः । इति विश्वः ॥

करेणुः, स्त्री, (कॄ + एणुः ।) हस्तिनी । इत्यमरः । २ । ३ । ५२ ॥ (यथा रामायणे २ । ४० । २९ ।

"शुश्रुवे चाग्रतः स्त्रीणां रुदतीनां महास्वनः ।
यथा नादः करेणूनां बद्धे महति कुञ्जरे" ॥

अस्या दुग्धगुणा यथोक्ताः सुश्रुते ।

"हस्तिन्याः [दुग्धं] मधुरं हृद्यं कषायानुरसं गुरु ।
स्निग्धं श्लेष्मकरं शीतं चक्षुष्यं बलवर्द्धनम्" ॥)

करेणुभूः, पुं, (करेणौ करेणुविषये भवति हस्त्यायुर्व्वेदप्रवर्त्तनाय प्रभवतीत्यर्थः । भू + क्विप् ।) पालकाप्यमुनिः । इति हेमचन्द्रः ॥

कर्कट

करेणुसुतः, पुं, (करेणुश्चासौ करेणाय उत्पन्नः सुतः ।) मुनिविशेषः । इति चिकाण्डशेषः ॥ (करेणोः सुतः । इति व्युत्पत्त्या करभः ॥)

करेणुः, पुं स्त्री, (कृ + एनुः ।) हस्ती । हस्तिनी । इत्यमरटीकायां रायमुकुटः ॥

करेन्दुकः, पुं, (करेण रश्मिना दीप्त इति यावत् इन्दुरिव कायति शोभते । कै + कः ।) भूतृणम् । इति राजनिर्घण्टः ॥ (भूतृणशब्देऽस्य गुणादयो ज्ञेयाः ॥)

करेवरः, पुं, (कीर्य्यते क्षिप्यते पाषाणः कपिभिरिति यावत् करः तस्मिन् व्रियते उत्पद्यते ।) तुरङ्गः । इति राजनिर्घण्टः ॥ शिलारस इति भाषा ॥

करोटः, क्ली, (कं वायुं अन्तर्वायुम् । रोटते प्रतिहन्ति के मस्तके रोटते दीप्यते वा । रुट् + अच् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

करोटिः, स्त्री, (केन वायुना अन्तर्वायुना रुध्यते प्रतिहन्यते । के शिरसि रोटते दीप्यते शोभते वा । रुट् + इन् ।) शिरोऽस्थि । इत्यमरः । २ । ६ । ६६ ॥ मातार खलि इति भाषा ॥

करोटी, स्त्री, (करोट + गौरादित्वात् ङीष् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

कर्क, हासे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कर्कायः । इति दुर्गादासः ॥

कर्कः, पुं, (करोति व्यादिशं पालयति "कृदाधारार्च्चिकलिभ्यः कः" । उणां ३ । ४० । इति कः । वक्रलवचनान्न ककारस्येत् संज्ञा ।) शुक्राश्वः । इत्यमरः । २ । ८ । ४६ ॥ कुलीरः । दर्पणः । (क्रियतेऽसौ) घटः । कर्कटराशिः । (कृणोति हिनस्ति) अग्निः । इतिहेमचन्द्रः शब्दरत्नावली च ॥ कर्कटवृक्षः । इति राजनिर्घण्टः ॥

कर्कचिर्भिटी, स्त्री, (कर्कवत् कर्करूपा चिर्भिटी वा । कर्कवर्णा वा चिर्भिटी ।) चिर्भिटा । कर्कटीभेदः । इति राजनिर्घण्टः ॥

कर्कटः, पुं, (कर्क + अटन् प्रत्ययः ।) वृक्षविशेषः । तत्पर्य्यायः । कर्कः २ क्षुद्रधात्री ३ क्षुद्रामलकसंज्ञः ४ कर्कफलम् ५ ॥ * ॥ जलजन्तुविशेषः । काँकड़ा इति भाषा । तत्पर्य्यायः । कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पञ्चवासः ६ तिर्य्यग्गामी ७ । (यथाह आर्य्याशतके । ३२२ ।

"अयमुद्गृहीतवड़िशः कर्कट इव मर्कटः पुरतः") अस्य गुणाः । वृक्षविषमूत्रत्वम् । भस्मसन्धाटत्वम् । वायुपित्तनाशित्वञ्च ॥ क्षुद्रकर्कटगुणाः । बलकारित्वम् । ईषदुष्णत्वम् । अनिलापहत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ पक्षिविशेषः । इति मेदिनी करकटिया इति भाषा ॥ पद्मकन्दः । तुम्बी । इति जटाधरः ॥ * ॥ मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः । स तु पुनर्व्वसुश्लेषपादेन सह पुष्याश्लेषाभ्यां भवति । अस्य देवता कुलीराकृतिः । स तु पृष्ठोदयः । श्वेतवर्णः । कफप्रकृतिः । स्निग्धः । जलचरः । विप्रवर्णः । उत्तरदिक्स्वामी । वक्रस्त्रीसङ्गः । वक्रसन्तानश्च । अत्र जातस्य फलम् । कपटमनस्त्वं मृदुभाषित्वं मन्त्रित्वं अप्रवासित्वं

कर्कटि

अक्षगणित्वञ्च । इति ज्योतिषम् ॥ * ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।

"श्रुतकलामलनिर्म्मलवृत्तयः
सुहृदगन्धजलाशयकेलयः ।
किल नरास्तु कुलीरगते विधौ
वसुमतः सुमतोऽर्थिलब्धयः" ॥

इति कोष्ठीप्रदीपः ॥ ० ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं यथा । दशव्यङ्गुलाधिकपञ्चाङ्गुलप्रभे कलिकाताख्यदेशे वर्त्तमानोनविंशायनांश चत्वारिंशदधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तच्च जातफलम् ।

"कर्किलग्ने समुत्पन्नो भोगी सर्व्वजनप्रियः ॥
मिष्टान्नपानभोगी च जायते स्वजनप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ (नागविशेषः । यथा पुराणम् ।

"अनन्तो वासुकीः पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खश्चाष्टौ नागाः प्रकीर्त्तिताः" ॥)

कर्कटकः, पुं, (कर्कट एव स्वार्थे कन् ।) कुलीरः ॥ इत्यमरः । १ । १० । २१ ॥ (यथाह सुश्रुतः ।

"क्षयकर्कटकस्त्वेषां वल्यः कोष्णोऽनिलापहः ।
शुक्राः सन्धानकृत् स्वस्थ-विम्मूत्रोऽनिलपित्तहा" ॥)

कर्कटपृङ्खिका, स्त्री, (कर्कटतुल्यं पृङ्खं अस्याः कर्कटपृङ्खेव स्वार्थे कन् ततस्टाप् इत्वम् ।) कर्कटपृङ्खीवृक्षः । इति शब्दरत्नावली ॥

("नीलोत्पलं मृणालञ्च यष्टी कर्कटपृङ्खिका ।
गोक्षीरैश्च हितीये च पीत्वा शाम्यति वेदना" ॥
इति इन्द्रजाले गर्भस्रावचिकित्सा ॥)

कर्कटपृङ्खी, स्त्री, (कर्कटस्य पृङ्खमिव दंशकमिवेत्यर्थः पृङ्खमयभागो यस्याः ।) वृक्षविशेषः । काँकड़ाशिङ्खी इति भाषा । तत्पर्य्यायः । कर्कटाख्या २ महाघोषा ३ पृङ्खी ४ कुलीरपृङ्खी ५ चक्राङ्गी ६ कुलिङ्गी ७ कासनाशिनी ८ । इति रत्नमाला ॥ घोषा ९ वनमूर्द्धजा १० चक्रा ११ शिखरी १२ कर्कटाङ्गा १३ कर्कटी १४ विषाणिका १५ कौलीरा १६ चक्रास्पदा १७ बलाङ्गा १८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वायुहिक्कातिसारकासश्वासपित्तास्रनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्कटाख्या, स्त्री (कर्कटस्याख्येव आख्याऽस्याः ।) कर्कटपृङ्खीवृक्षः । इति रत्नमाला ॥

कर्कटाङ्गः, पुं, (कर्कटं आङ्क्यते स्पर्द्धते कण्टकमयत्वात् । आ + ङ्कै + कः । कर्कट इति नाम्ना आह्वयते वा ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

कर्कटाङ्गा, स्त्री, (कर्कटाङ्ग + टाप् ।) कर्कटपृङ्खीवृक्षः । इति वैद्यकम् ॥

कर्कटिः स्त्री, (करं कटति प्राप्नोति । कटः + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् । कर्कं परिणामे शुक्लतां अटति गच्छति वा कर्क + अट् + इन् । पृषोदरादित्वात् अलोपे साधुः ।) कर्कटी । इति शब्दरत्नावली । काँकुड़ इति भाषा ॥

कर्कटिनी, स्त्री, (कर्कटाकारः अस्यस्याः । कर्कट + इन् ततो ङीप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

कर्कन्धु

कर्कटी, स्त्री, (कर्कं कण्टकं अटति गच्छति । कर्क + अट् + इन् । पृषोदरादित्वात् साधुः ततो ङीष् । करं कटति वा कटेः इन् ततो ङीष् ।) शाल्मलिफलम् इति मेदिनी ॥ सर्पः । इति शब्दरत्नावली ॥ देवदालीलता । कर्कटपृङ्खीवृक्षः । एर्व्वारुः । वड़ काँकुड़ इति भाषा । घोटिकावृक्षः । फललताविशेषः । काँकुड़ इति भाषा ॥ तत्पर्य्यायः । कटुफली २ कृर्द्दापनिका ३ पीनसा ४ मूत्रफला ५ त्रपुषा ६ हस्तिपर्णी ७ लोमशकाण्डा ८ मूत्रला ९ वक्रकन्दा १० । इति राजनिर्घण्टः ॥ कर्कटाक्षः ११ शान्तनुः १२ । इति रत्नमाला ॥ चिर्भटी १३ वालुकी १४ एर्व्वारुः १५ त्रपुषी १६ । इति हेमचन्द्रः ॥ अस्या गुणाः । मधुरत्वम् । शीतत्वम् । तिक्तायास्तु रक्तपित्तनाशित्वम् । कफदोषकारित्वञ्च । पक्वायास्तु मूत्ररोधार्त्तिनाशित्वम् । इति राजनिर्घण्टः ॥ (तथा च भावप्रकाशे ।

"कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तहृत्" ।

अस्याः पाकप्रकारस्तु ।

"त्वग्बीजरहिता प्रौढ़ा गुलिकाकारखण्डिता ।
तलिता सुपृते तप्ते कर्कटी वाऽवलेहिता ॥
विषागुडखण्डं घृतदुग्धसार्द्धं
विभावितं वल्लजशर्करार्द्धं ।
घृतैलवासञ्च कटुष्णमेतत्
प्रतिच्छदं रोचनमातनोति ॥)

कर्कटुः, पुं, (कर्क निपातनात् साधुः । कर्कट + मृगय्यादित्वात् कुः वा ।) करेटुपक्षी । इति शब्दरत्नावली ॥ करकटिया इति भाषा ॥

कर्कन्धुः, पुं स्त्री, (कर्कं करटकं दधातीति । धा + निपातनात् कुः नुम् च ।) कोलिवृक्षः । इत्यमरटीकायां स्वामी ॥ (बदरीफलम् । अस्य पर्य्यायगुणा यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥

"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि ।
फेनिलं कुवलं घोटा सौवीरं बदरं महत् ।
अजप्रिया कुहा कोली विषमोभयकण्टका" ॥

तत्र बदरविशेषाणां लक्षणानि गुणाश्च ।

"पक्वमानं सुमधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरुशीतलम् ॥
दृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
मुष्कं भेद्यग्निकृत्सर्व्वं लघुतृष्णाक्लमाखजित्" ।

क्वचित् स्त्रीत्वेऽपि दृश्यते यथा,

"कर्कन्धुकोलबदरमामं पित्तकफावहम् ।
पक्वं पित्तानिलहरं स्निग्धं संमधुरं सरम् ॥
पुरातनं वृष्यगमनं श्रमघ्नं दीपनं लघु ।
सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित्" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

कर्कश

कर्कन्धूः, पुं स्त्री, (कर्कं कण्टकं दधातीति। धा + "अन्दू दृन्भू जम्भू कम्भूकर्मूलूकर्कन्धूदिधिषु"। उणा-१। ६५। इति कूः निपातनात् साधुः।) बदरीवृक्षः। इत्यमरः। २। ४। ३६॥ (यथा भागवते। ३। ३१। २। "कालनं लेकराजेश पक्वराजेश बुदबुदम्। टशाहेन तु कर्कन्धूः पेशखंडं वा ततः परम्"॥ कर्कन्धुशब्देऽस्या विवरणं ज्ञेयम्॥)

कर्करं, त्रि, (कर्क + अरन्।) कठिनम्। इति मेदिनी॥

कर्करं, क्ली, (कर्कं चूर्णजनकत्वेन हास्यवत् शुक्लताप्रकाशं राति। कर्क + रा + कः।) चूर्णजनकद्रव्यपाषाणखण्डम्। तत्पर्य्यायः। चूर्णखण्डम् २। इति हारावली। काँकर घुटिं इत्यादि भाषा॥ ("किन्नोदुम्बरकर्करैः प्रियशतैराक्रम्य विक्रीयते"॥ इति अमरशतके ७॥)

कर्करः, पुं, (कर्कं हासं प्रतिबिम्बप्रकाशं राति। रा + कः। कर्क + अरन् वा।) दर्पणः। इति मेदिनी॥ (नागभेदः। इति भारते १। ३५। १६॥)

कर्कराङ्गः, पुं, (कर्करतुल्यं अङ्गं यस्य।) कालकण्ठपक्षी। इति शब्दमाला॥

कर्कराटुः, पुं, (कर्कं हासं रटति प्रकटयतीव। रट + कुः। कुन् वा। ञिजन्तात् कुर्वा।) कटाहः। इति जटाधरः॥

कर्कराटुकः, पुं, (कर्कं कठिनं कर्कशमित्यर्थः रटति रौतीति रट + उकञ्।) कर्करेटुपक्षी। इति शब्दरत्नावली। करकटिया इति भाषा॥

कर्करान्धुकः, पुं, (कर्करः कठोरः अन्धुः। अत्यन्तान्धकारतया दुर्दृश्यत्वात्। संज्ञायां कन्।) अन्धकूपः। इति त्रिकाण्डशेषः॥

कर्करालः, पुं क्ली, (कर्करः रूक्षतया कठिनोपि व्यलति पर्य्याप्नोति। अल + अच्।) चूर्णकुन्तलः। इति हेमचन्द्रः॥

कर्करी, स्त्री, (कर्कं हासं हास्यप्रकाशवत् निर्म्मलसलिलं रातीति। रा + कः + गौरादित्वात् ङीष्।) खल्पवारिधानिका। झारी इति भाषा। तत्पर्य्यायः। आलुः २ गलन्तिका ३। इत्यमरः। २। ९। ३१॥ अलुः ४ आरः ५। इति तट्टीका॥

कर्करीका, स्त्री, (कर्करी + स्वार्थे कन् ह्रस्वो ण।) कर्करी। इत्युणादिकोषः॥

कर्करेटं, क्ली, (कर्कं कर्क इतिशब्दं गलेहस्तमाधाय दूरीकुरु इत्याकारं रेटते यत्र। रेट् + अधिकरणे घञ्।) गलेहस्ताधानम्। गलाटिपि इति भाषा। तत्पर्य्यायः। अर्द्धचन्द्रम् २ अङ्गुलितोरणम् ३। इति हारावली॥

कर्करेटुः, पुं, (कर्कं कर्केतिशब्दं वा रेटते भाषते रौति इत्यर्थः। रेट् भाषणे याचने च + मृगय्वादित्वात् साधुः।) करेटुपक्षी। इत्यमरः। २। ५। १९। करकटिया इति भाषा॥

कर्कशः, पुं, (कर्कशब्दात् मत्वर्थे लोमादित्वात् शः।) काम्पिल्यवृक्षः। इत्यमरः। २। ४। १४६। गुँड़ा रोचनी इति भाषा॥ (व्यवहारोऽस्य यथा, चरके विमाने ८ अध्याये॥ "कर्कोटकवार्त्ताकुकर्कशकाकमाचीकारवल्लीत्यादिषु"॥) क्लमर्दः। इत्युः। (क्रुशोति हिनस्ति शत्रुं क्रुश् हिंसायां + अन्येभ्योऽपीति विच्। कशति कशशब्दे इति पचाद्यच्। कर्चासौ कशखेति। करे कशति वा।) खड्गः॥ इति हेमचन्द्रः॥

कर्कशः, त्रि, (कर्कात् लोमादित्वात् शः। ततः प्राग्वत् ह्रस्वादिधातोर्निंद्यादितार्थे च।) साहसिकः। कठोरः। (यथा भागवते। ३। १७। ११। "खरान्त कर्कशैः क्षुत्तः खुरैर्भ्रन्तो धरातलम्"॥) अमङ्गलः। (यथा रघौ। ३। ४५। "हरेः कुमारोऽपि कुमारविक्रमः सुरद्विषस्कालनकर्कशाकुलौ"॥) दुर्ग्रहः। इत्यमरः। ३। ३। २१६॥ क्रूरः। निर्दयः। इति मेदिनी॥ (यथा रामायणे। ५। ४६। ५। "तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः"॥) क्षपणः। इति विश्वः॥

कर्कशच्छदः, पुं, (कर्कशः छदः पत्रं यस्य।) पटोलः। इति शब्दमाला॥ शाकोटवृक्षः। शेओड़ा इति भाषा। इति त्रिकाण्डशेषः॥

कर्कशच्छदा, स्त्री, (कर्कशः अमङ्गलश्छदो यस्याः।) कोशातकी। झिङ्गाः इति भाषा। दग्धवृक्षः। इति राजनिर्घण्टः॥ (झिङ्गाकेऽस्या विवरणं ज्ञातव्यम्॥)

कर्कशदलः, पुं, (कर्कशं दलं पत्रं अस्य।) पटोलः। इति रत्नमाला॥

कर्कशदला, स्त्री, (कर्कशं दलं यस्याः।) दग्धवृक्षः। इति राजनिर्घण्टः॥ कोशातकी। झिङ्गा इति भाषा॥

कर्कशवाक्यं, क्ली, (कर्कशं च तत् वाक्यञ्चेति।) निष्ठुरवचनम्। परुषा वाक्। इति शब्दरत्नावली॥

कर्कशा, स्त्री, (कर्कशब्दात् लोमादित्वात् शः ततः टाप् च।) दग्धिकालीवृक्षः। इति राजनिर्घण्टः॥

कर्कशिका, स्त्री, (कर्कश + संज्ञायां कन् ततष्टाप् अत इत्वम्।) वनकोलिः। इति रत्नमाला॥

कर्कसारं, क्ली, (कर्कः कर्कशः कठिनो वा सक्तुकादिः सारो यत्र।) करम्भकम्। दधिसक्तुः। इति हारावली॥

कर्कारुः, पुं, (कर्कं हास्यवत् शुक्लं ऋच्छति प्राप्नोतीति। कर्क + ऋ + बाहुलकात् उण्।) कुष्माण्डः। इत्यमरः। २। ४। १५५॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता। कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः॥ पक्का तिक्ताग्निजननी सक्षारा कफवातनुत्"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ मे भागे॥ एर्व्वारुयोगेनास्य गुणभेदोऽपि दृश्यते। तथाच सुश्रुते सूत्रस्थाने ४६ अध्याये।

"एर्व्वारुकं सकर्कारु सम्यक्कं कफवातक्षत्। सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम्"॥)

कर्कारुकः, पुं, (कर्कं हासं भोजने हितकारित्वात् स्वादुत्वाच्च आनन्दं अर्पयतीति। कर्क + ऋ + ण्वुच् + उकञ्। कर्कं हासं हितजनकत्वात् आह्लादकरत्वम् ऋच्छति वा।) कालिङ्गवृक्षः। इति हारावली॥ (तत्फलगुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"त्रपुषैर्व्वारुकर्कारुकशीर्णोद्दालप्रभृतीनि। गुरुविष्टम्भिशीतानि स्वादूनि कफवृद्धिनि च॥ रूक्षमूत्रपुरीषाणि सक्षारमधुराणि च"॥)

कर्किः, पुं, (कर्क + इन्।) कर्कटराशिः। इति ज्योतिषम्॥

कर्केतनं, क्ली पुं, (कर्कं हास्यादौ तनोतीति। कर्कं + तन् + अच्। सप्तम्या अलुक्।) रत्नविशेषः। तदुत्पत्त्यादि यथा, गारुड़े ७५ अध्यायः॥

सूत उवाच।

"वायुर्नखान् दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यग्व वनेषु हृष्टः।
ततः प्रसूतं पवनोपपन्नं
कर्केतनं पूज्यतमं पृथिव्याम्॥
वर्णेन तद्रुधिरसोममधुप्रकाश-
मात्राम्रपीतदहनोज्ज्वलितं विभाति।
नीलं पुनः खलसितं परुषं विभिन्नं
व्याध्यादिदोषकरणेन न तद्विभाति॥
स्निग्धा विशुद्धाः समरागिणश्च
आपीतवर्णा गुरवो विचित्राः।
त्रासव्रणव्याधिविवर्जिताश्च
कर्केतनास्ते परमाः पवित्राः॥
पत्रेण काञ्चनमयेन तु वेष्टयित्वा
हस्ते गलेऽथ धृतमेतदतिप्रकाशम्।
रोगप्रणाशनकरं कलिनाशनञ्च
आयुष्करं कुलकरञ्च सुखप्रदञ्च॥
एवंविधं बहुगुणं मणिमावहन्ति
कर्केतनं शुभमलं क्षतये नरा ये।
ते पूजिता बहुधना बहुबान्धवाश्च
नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति॥
एकेऽपनह्य विकृताकुलनीलभासः
प्रस्नानरागकलुषिताः कलुषा विरूपाः।
तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः
कर्केतनस्य सदृशं वपुरुद्वहन्ति॥
कर्केतनं यदि परीक्षितवर्णरूपं
प्रत्यग्रभासरविकरप्रकाशम्।
तस्योत्तमस्य मणिशास्त्रविदा महिम्ना
तुल्यन्तुमूल्यमुदितं तुलितस्य काय्यम्"॥

हस्ते गलेऽथ धृतमेतदतिप्रकाशमित्यत्र तप्तं यदा ऊतवस्ते भवति प्रकाशमिति पुस्तकान्तरे पाठः॥

कर्कोटः, पुं, (कर्क + ओटप्रत्ययः।) नागराजविशेषः। इति त्रिकाण्डशेषः॥

कर्कोटकः पुं, (कर्कं कण्टकमयत्वात् कठोरं वटति प्राप्नोति तद्रूपतया कायति प्रकाशते। एधोदरादित्वात् ओकारादेशे साधुः।) विम्बवृक्षः। (कर्कोट + संज्ञायां कन्।) कद्रुपुत्रनागराजविशेषः। इति मेदिनी॥ (यथा, महाभारते। १। आस्तीके। ३५। ५। "ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ"॥)

कर्कोट

कर्कं हासं हितजनकत्वात् आह्लादकरत्वम् ऋच्छति वा।) कालिङ्गवृक्षः। इति हारावली॥ (तत्फलगुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"त्रपुषैर्व्वारुकर्कारुकशीर्णोद्दालप्रभृतीनि। गुरुविष्टम्भिशीतानि स्वादूनि कफवृद्धिनि च॥ रूक्षमूत्रपुरीषाणि सक्षारमधुराणि च"॥)

कर्किः, पुं, (कर्क + इन्।) कर्कटराशिः। इति ज्योतिषम्॥

कर्केतनं, क्ली पुं, (कर्कं हास्यादौ तनोतीति। कर्कं + तन् + अच्। सप्तम्या अलुक्।) रत्नविशेषः। तदुत्पत्त्यादि यथा, गारुड़े ७५ अध्यायः॥

सूत उवाच।

"वायुर्नखान् दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यग्व वनेषु हृष्टः।
ततः प्रसूतं पवनोपपन्नं
कर्केतनं पूज्यतमं पृथिव्याम्॥
वर्णेन तद्रुधिरसोममधुप्रकाश-
मात्राम्रपीतदहनोज्ज्वलितं विभाति।
नीलं पुनः खलसितं परुषं विभिन्नं
व्याध्यादिदोषकरणेन न तद्विभाति॥
स्निग्धा विशुद्धाः समरागिणश्च
आपीतवर्णा गुरवो विचित्राः।
त्रासव्रणव्याधिविवर्जिताश्च
कर्केतनास्ते परमाः पवित्राः॥
पत्रेण काञ्चनमयेन तु वेष्टयित्वा
हस्ते गलेऽथ धृतमेतदतिप्रकाशम्।
रोगप्रणाशनकरं कलिनाशनञ्च
आयुष्करं कुलकरञ्च सुखप्रदञ्च॥
एवंविधं बहुगुणं मणिमावहन्ति
कर्केतनं शुभमलं क्षतये नरा ये।
ते पूजिता बहुधना बहुबान्धवाश्च
नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति॥
एकेऽपनह्य विकृताकुलनीलभासः
प्रस्नानरागकलुषिताः कलुषा विरूपाः।
तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः
कर्केतनस्य सदृशं वपुरुद्वहन्ति॥
कर्केतनं यदि परीक्षितवर्णरूपं
प्रत्यग्रभासरविकरप्रकाशम्।
तस्योत्तमस्य मणिशास्त्रविदा महिम्ना
तुल्यन्तुमूल्यमुदितं तुलितस्य काय्यम्"॥

हस्ते गलेऽथ धृतमेतदतिप्रकाशमित्यत्र तप्तं यदा ऊतवस्ते भवति प्रकाशमिति पुस्तकान्तरे पाठः॥

कर्कोटः, पुं, (कर्क + ओटप्रत्ययः।) नागराजविशेषः। इति त्रिकाण्डशेषः॥

कर्कोटकः पुं, (कर्कं कण्टकमयत्वात् कठोरं वटति प्राप्नोति तद्रूपतया कायति प्रकाशते। एधोदरादित्वात् ओकारादेशे साधुः।) विम्बवृक्षः। (कर्कोट + संज्ञायां कन्।) कद्रुपुत्रनागराजविशेषः। इति मेदिनी॥ (यथा, महाभारते। १। आस्तीके। ३५। ५। "ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ"॥)

इक्षुः। इति राजनिर्घण्टः॥ फलजतादिविशेषः॥ काँकरोल इति भाषा। तत्पर्य्यायः। किलासघ्नः २ तिक्तपत्रः ३ सुगन्धकः ४। इति हेमचन्द्रः॥ अस्य गुणाः। शुक्रकफपित्तनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥ ("तद्वत् कर्कोटकं प्रोक्तम्"॥ इति सुश्रुते। सूत्रे। ४६ अध्याये॥ विरेचनाम्बुर्व्वारुकशब्दे प्रदर्शितः॥)

कर्कोटकी, स्त्री, (कर्कोटक+गौरादित्वात् ङीष्।) पीतघोषा वृक्षः। इति रत्नमाला॥ (अस्याः पर्य्यायमाह चरकः कल्पे ४ अध्याये।

"कर्कोटकी कटुफला महाजालिनिरेव च।
धामार्गवस्य पर्य्याया राजकोशातकी यथा"॥

विशेषविवरणञ्चास्या धामार्गवशब्दे ज्ञातव्यम्॥ फललतादिविशेषः। काँकुड़ इति भाषा॥ एतद्फलगुणपाकादि उक्तं वैद्यके। यथा,—

"कर्कोटकी फलं रूक्षं कफहृल्लासनाशनम्।
श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम्।
ईषद्विभिन्नमरिचैः परिपूर्णगर्भं
तैलेन रन्धितसुसैन्धवपातयोगम्।
वाल्लीकयुक्तपयसा विहिताभिषेकं
कर्कोटकीफलमिदं रुचिकृत्तरुण्याम्"॥)

कर्कोटिका, स्त्री, (कर्कोट+स्वार्थे कन् तत टाप् अत इत्वञ्च।) कर्कोटकः। काँकरोल इति भाषा। तत्पर्य्यायः। कुष्माण्डी २ कर्कोटी ३। तत्फलम् कारवेल्लकतुल्यगुणम्। इति राजनिर्घण्टः॥

कर्चरिका, स्त्री, कं सुखं यथा तथा चर्य्यते उपयुज्यते यद्वा कं जलं चुर्य्यते स्रुन्थीक्रियतेऽत्र। क+चर्+वा चुर्+एषोदरात् रेफादेशे कनादिभिः साधुः।) पिष्टकविशेषः। इति पाकरानेश्वरः। कचरी इति भाषा॥

कर्चूरं, क्ली, (कर्च्च+खर्च्जूरादित्वात् ऊरः। एषोदरादित्वात् ककारस्य चकारे साधुः।) कर्व्वुरम्। खर्जम्। कचुरमपिपाठः। इत्यमरटीका॥

कर्चूरः, पुं, (कर्च्च+ऊरः। एषोदरादित्वात् साधुः।) वृक्षविशेषः। कचूर इति भाषा। तत्पर्य्यायः। द्राविड़ः २ कार्ष्यः ३ दुर्लभः ४ गन्धमूलकः ५ वेधमुख्यः ६ गन्धसारः ७ जटालः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफकासगलगण्डादिदोषनाशित्वम्। मुखवैशद्यजननत्वञ्च। इति राजनिर्घण्टः॥ (यथा चरके सूत्रे २७ अध्याये।

"रोचनो दीपनो हृद्यः सुगन्धिस्त्वग्विवर्द्धितः।
कर्चूरः कफवातघ्नः श्वासहिक्कार्शसां हितः"॥)

कर्चूरकः, पुं, (कर्चूरं स्वर्णमिव कायति प्रकाशते। कर्चूर+कै+कः। कर्चूर+स्वार्थे कन् वा।) कर्व्वूरकः। इत्यमरटीकायां स्वामी। काँचा हलुद इति भाषा॥

कर्च्च पीड़े। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कर्चति। इति दुर्गादासः॥

कर्च त् क भिदि। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) कर्चयति कर्चापयति। आङ्पूर्व्वोऽयं अवखे। देवाकर्षय येन येन सहसा यत्यत् समासादितमिति। उपसर्गास्तत्तदर्थानां द्योतका एव न तु वाचकाः। केवलधातोरनेकार्थत्वेऽवश्यवक्तव्ये उपसर्गपूर्व्वस्याप्यन्यार्थो धातोरेव कल्प्यते लाघवात्। क्वचिदुपसर्गा धात्वर्थमेवानुवर्त्तन्ते। तथा च।

"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा"॥

इति विस्तरवृत्तिः॥ क्रमेणोदाहरणानि। आदत्ते गृह्णातीत्यर्थः। प्रसूयतेऽत्र प्रसव एव धात्वर्थः। प्रशब्दस्तमेवार्थं द्योतयति। प्रयमति प्रकर्षेण नमतीत्यर्थः। केचित्तु अनर्थकोऽन्यः प्रयुज्यते। इति चतुर्थचरणं पठन्ति तच्चिन्त्यम्। इति दुर्गादासः॥

कर्णः, पुं, (कीर्य्यते क्षिप्यते। शब्दो वायुना यत्र। किरति शब्दग्रहणेन मनसि सुखं क्षिपति ददातीत्यर्थः। कॄ वित्तेपे+"कॄदृसृस्वीति" नन् निच्च। उणा ३। १०। यद्वा कर्ण्यते आकर्ण्यते अनेन। कर्ण+करणे अप्।) श्रवणेन्द्रियम्। काण् इति भाषा। तत्पर्य्यायः। शब्दग्रहः २ श्रोत्रम् ३ श्रुतिः ४ श्रवणम् ५ श्रवः ६। इत्यमरः। २। ६। ९४॥ श्रौत्रम् ७। इति तट्टीका॥ वचोग्रहः ८। इति राजनिर्घण्टः।

(यथा रघुः। १। ९।

"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः"॥)

कर्णस्तु श्रवणेन्द्रियस्य गोलकं स्थानम्। तच्च श्रोत्रमिन्द्रियम्। तत्तु कर्णशष्कुल्यवच्छिन्नभोभागः। तस्य देवता दिक्। विषयः शब्दः। इति श्रीभागवतम्॥ युधिष्ठिरायजः। स तु कुन्त्याः कन्याकाले सूर्य्यौरसजातः। एतेन काणीन इत्याख्यापि प्रसिद्धः। अस्य जन्मादिविवरणन्तु महाभारते १। १११ अध्याये द्रष्टव्यं॥ तत्पर्य्यायः। राधेयः २ वसुषेणः ३ अर्कनन्दनः ४ घटोत्कचान्तकः ५ चाम्पेयः ६ सूतपुत्रकः ७। इति त्रिकाण्डशेषः॥ चाम्पाधिपः ८ अङ्गराट् ९ राधासुतः १० अर्कतनयः ११। इति हेमचन्द्रः॥ अङ्गाधिपः १२। इति भूरिप्रयोगः॥ (यथा महाभारते। १। सम्भवपर्व्वणि १११। ३१।

"प्राग्नाम तस्य कथितं वसुषेण इति क्षितौ।
कर्णो वैकर्त्तनश्चैव कर्म्मणा तेन सोऽभवत्"॥

अयं हि दातॄणामग्रगण्यः। अस्य किमपि नादेयमासीत्। अन्यैरेषं सहजमपि खदेहकवचं शरीरात् समुत्कृत्य ब्राह्मणरूपधारिणे याचमानाय इन्द्राय दत्तवान् तथा उपोषितं दिव्यरूपधारिणं विष्णुं स्वपुत्रमांसेन प्रीणयामास। एतद्विवरणन्तु जैमिनिभारते सुप्रसिद्धमस्त्येव। अयं परशुरामशिष्यो महावीर्य्यः भारतयुद्धे दुर्य्योधनपक्षावलम्बी आसीत्। अष्टादशदिवसव्यापे भारतसंग्रामे भीष्मदेवः सेनापतिपदमधिरुह्य दशाहं यावत् युद्धमकरोत्। ततः शरशय्यां गते तस्मिन् द्रोणश्चतुर्दिनानि अयुध्यत। एतस्मिन्नेव समयेऽयं कर्णोऽपि स्वसेनावलमादाय पाण्डवैः सह युयुधे। ततो गतजीविते द्रोणे सैनापत्यमधिरूढोसौ दिवसद्वयं विपुलं क्षयसहायेनाव्यूनेन निहत आसीत्॥) सुवर्णनिष्कः। इति मेदिनी॥ (धृतराष्ट्रशतपुत्रेषु एकः पुत्रः। यथा महाभारते १। ११७। ३।

"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च"।

नौकायाः क्षेपणीविशेषः। (दाँड़ इति भाषा॥ यथा रामायणे ६। २२। ३०।

"हतप्रवीरा विध्वस्ता निरुत्साहा निरुद्यमा।
सेना भवति संग्रामे हतकर्णेव नौर्जले"॥

कर्णः अस्यस्य प्राग्रूपेण। अर्ग्घ आद्यच्। दीर्घकर्णे च, यथा यजुर्व्वेदे। २। ४। ४०।

"खड्गो वैश्वदेवः श्वाक्ष्णया कर्णो गर्दभः"॥)

कर्णकण्डुः, पुं, (कर्णस्य कर्णे वा जातो कण्डुः।) कर्णरोगविशेषः। तस्य निदानम्। "मारुतः कफसंयुक्तः कर्णकण्डं करोति च"। इति माधवकरः॥

("कर्णेन कण्डूः प्रचितेन कर्णयोर्-
भृशं भवेत् स्रोतसि कर्णसंश्रिते"॥

इति सुश्रुते उत्तरतन्त्रे २० अध्याये॥

चिकित्सास्य यथा।

"विधिश्च कफहृत्सर्व्वः कर्णकण्डूमपोहति"॥

इति तत्रैवोत्तरतन्त्रे २१ अध्याये॥)

कर्णकीटी, स्त्री, (कर्णस्थितः कर्णस्य भेदकः क्षुद्रः कीटी कीटविशेषः। यद्वा कर्णयति भिनत्ति तादृशी कीटी। कर्ण+अच्। स्वल्पः कीटः कीटी स्वल्पार्थे ङीष् ततः कर्म्मधारयः।) कीटविशेषः। कानकोटारी केर्काइ इत्यादि भाषा। तत्पर्य्यायः। कर्णजलौका २ घृतपदी ३। इतिहेमचन्द्रः॥ चिचाङ्गी ४। इति राजनिर्घण्टः॥ पृथिका ५ कर्णदुन्दुभिः ६। इति शब्दमाला॥

कर्णक्ष्वेड़ः, पुं, (कर्णस्य कर्णे जातः क्ष्वेड़ो वा।) कर्णरोगविशेषः। (तस्य लक्षणम्।

"वायुः पित्तादिभिर्युक्तो वेगुघोषोपमं स्वनम्।
करोति कर्णयोः क्ष्वेड़ं कर्णक्ष्वेड़ः स उच्यते"॥

इति माधवकरः। कर्णरोगशब्देऽस्यापि विस्तृतनिदानचिकित्सितादिकं द्रष्टव्यम्॥)

कर्णगूथं, क्ली, (कर्णस्य कर्णे स्थितं कर्णजातं वा गूथं मलम्।) कर्णमलम्। इति हारावली। कानेर खलि इति भाषा॥

कर्णगूथकः, पुं, (कर्णगूथ+संज्ञायां कन्। कर्णगूथमिव कायति वा। कै+कः।) कर्णरोगविशेषः। तस्य निदानम्। यथाह माधवकरः।

"पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः"॥

("विशोषिते श्लेष्मणि पित्ततेजसा
न्यां भवेत् स्रोतसि कर्णगूथकः"॥

इति सुश्रुते उत्तरतन्त्रे २० अध्याये॥

चिकित्सास्य वैद्यकचक्रपाणिसंग्रहे॥ यथा,

"क्लेदयित्वा तु तैलेन स्वेदेन प्रविलाप्य च।
शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया"॥)

कर्णजलूका, स्त्री, (कर्णस्य कर्णे वा जलूका इव।) कर्णकीटी। इति शब्दरत्नावली॥

कर्णजलौका, स्त्री, (कर्णे जलौकेव।) घृतपदी। इत्यमरः। २। ५। १६॥

कर्णजलौकाः, [स्] स्त्री, (कर्णे जलौका इव।) कर्ण-

जलौका । इत्यमरटीकायां भरतः ॥

कर्णजाहं, क्ली, (कर्णस्य मूलम् । "तस्य पाकमूले" ५ । २ । २४ इत्यादिना जाहच् ।) कर्णमूलम् । इति व्याकरणम् ॥

कर्णजित्, पुं. (कर्णं जितवान् । कर्ण + जि + क्विप् भूते वर्त्तमाने च इति भूते क्विप् तुगागमश्च ।) अर्জ্জুनः । इति हेमचन्द्रः ॥

कर्णटर्पणः, पुं. (कर्णे दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति चिकाताड़ङ्केषः । कानतड़का इति भाषा ॥

कर्णदुन्दुभिः, स्त्री, (कर्णे कर्णाभ्यन्तरे प्रविश्य ध्वनिजनकतया दुन्दुभिरिव ।) कर्णकोटी । इति शब्दमाला ॥

कर्णधारः, पुं, (कर्णं धरति धारयति वा । कर्ण + धृ + "कर्म्मण्यण्" ३ । २ । १ । इति अण् ण्यन्तादच् वा ।) नाविकः । इत्यमरः । १ । १० । १२ ॥ काण्डारि माझि इत्यादि भाषा ॥ (यथा हितोपदेशे । ३ । ४ ।

"यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव" ॥)

कर्णपाली, स्त्री, (कर्णं पालयति स्त्रीयौज्ज्वल्येन अतीव शोभां सम्पादयतीति । कर्ण + पाल + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) कर्णान्दूः । इति हारावली । कानबाला इति भाषा ॥

कर्णपिशाची, स्त्री, (कर्णं स्वरूपं पिनष्टीति । कर्ण + पिश् + क्विप् । कर्णपिट् अक्षानं तदाचयति नाशयति स्वरूपदर्शनेन । ततः आ + चि + णिच् अच् ङीष् च ।) देवीविशेषः । तन्मन्त्रादि यदुक्तं तन्त्रान्तरे ।

"कर्णस्थेत्ययोद्दितो वक्त्रगतोऽनन्तसंस्कारो वदातीतानागतशब्दयुक्तभुवनेशी वह्निजायान्विता ।
तारादो मनुरेष लक्षजपतो व्यासेन संसेवितः
सार्व्वज्ञं लभतेऽचिरेण नियतं पैशाचिकी भक्षितः" ॥

अस्यार्थः । कर्णः स्वरूपः । आस्ये आदौ ईत्थं इकारः । तत्युक्तो लोहितः पकारः । वक्त्रः शकारः । स अनन्तयुक्त आकारयुक्तः । चि स्वरूपम् । वदातीतानागतं स्वरूपम् । ततो ङीं स्वाहा । एतेन ॐ कर्णपिशाचि वदातीतानागतं ङीं स्वाहा ॥ * ॥ मन्त्रान्तरम् ।

"कह युग्मं कालिके च शङ्ख युग्मं तथैव च ।
पिशङ्गं पिशाचि स्वाहेति नृपार्णः कथितः प्रिये" ॥

कह कह कालिके शङ्ख शङ्ख पिशङ्गं पिशाचि स्वाहा ॥ * ॥ ध्यानं यथा ।

"श्यामां रक्तविलोचनां त्रिनयनां खर्व्वाञ्च लम्बोदरीं
वन्धूकारुणजिह्विकां वरवराभीयुक्करामुन्मुखीम् ।
धूम्राविर्जटिलां कपालविलसत्पाणिद्वयां चञ्चलां
सर्व्वज्ञां शवहृत्कृताधिवसतीं पैशाचिकीं तां नुमः" ॥

अथ पूजा ।

"निशायामर्द्धरात्रौ च हृदि न्यस्य पिशाचिकीम् ।
दग्धमीनं बलिं दत्त्वा रात्रौ संपूज्य संजपेत्" ॥

ॐ कर्णपिशाचि दग्धमीनबलिं शङ्ख शङ्ख मम सिद्धिं कुरु कुरु स्वाहेति दग्धमीनं बलिं दद्यात् ।

"रक्तचन्दनवन्यूकजवापुष्पादिकञ्च यत् ।
अमृतं कुरु देवेशि स्वाहेति प्रोच्चयेज्जलैः" ॥

पूर्व्वाह्णे किञ्चिज्जप्त्वा मध्याह्ने एकभक्तं निरामिषं भुक्त्वा रात्रावपि तत् संख्यं जपेत् । अन्यत् किञ्चिन्न भोक्तव्यं ताम्बूलादिकं विना । जपस्य दशांशं तर्पणम् । ओम् कर्णपिशाचीं तर्पयामि क्ष्रीं स्वाहा । एवं क्रमेण लक्षमेकं पुरश्चरणं कृत्वा दशांशं होमयेत् । तदभावे दशांशं तर्पणं कृत्वा वरं प्रार्थयेत् । मूलं रक्तचन्दनेन लिखित्वा यन्त्रोपरि इष्टदेवतां पूजयेत् ॥ * ॥

अथ सिद्धिलक्षणमुच्यते । गगने हूंकारादिशब्दीर्घामिश्रिखारूपसन्दर्शनात् सिद्धिर्भविष्यतीति ज्ञात्वा तथाविधमाचरेत् ॥ * ॥

मन्त्रान्तरम् । "प्रणवं माया कर्णपिशाचि मे कर्णे कथय हूं फट् स्वाहा" । इति प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत् । ततः सर्व्वज्ञो भवति । नास्याः पूजा ध्यानम् ॥ * ॥ तथा तारं कामबीजं जयादेवी स्वाहा । अस्या अपि ऋष्यादिन्यासादेरभावः । पूर्व्वं लक्षं जप्त्वा गुहगोधिकां निधाय तदुपरि जयादेवीं यथाशक्ति सम्पूज्य तावत् जपेत् यावत् सा जीवति । ततः सिध्यति । सिद्धिस्तु मानसादिप्रश्ने कृते सा आयाति ततस्तस्याः एष्टे सर्व्वं भूतभविष्यदादिकं पश्यति । इति ज्ञानानन्दकृततन्त्रसारः ॥

कर्णपुष्पः, पुं, (कर्णवत् कर्णाकृति पुष्पं यस्य । यद्वा कर्णभूषणार्हं पुष्पं यस्य ।) मोरटलता । इति राजनिर्घण्टः ॥

कर्णपूः, [ऊ] स्त्री, (कर्णस्य सूर्य्यौरसजातस्य कुन्त्याः प्रथमपुत्रस्य पूः पुरम् ।) कर्णराजपुरम् । तत्पर्य्यायः । चम्पा २ मालिनी ३ लोमपादपूः ४ । इति हेमचन्द्रः ॥

कर्णपूरः, पुं, (कर्णं पूरयति अलंकरोतीति । कर्ण + पूर् + उपपदेकर्म्मण्यण् इति अण् ।) शिरीषवृक्षः । नीलोत्पलम् । अवतंसः । इति मेदिनी ॥ (यथा, अमरुशतके १ ।

"व्याक्षिप्तिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसम्वलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभट्टकाट्टाः" ॥)

अशोकवृक्षः । इति राजनिर्घण्टः ॥

कर्णपूरकः, पुं, (कर्णं पूरयति अवतंसयति । कर्ण + पूर + ण्वुल् । यद्वा कर्णपूर स्वार्थे कन् । शिरीषवृक्षः । नीलोत्पलम् । अशोकवृक्षः । एतेषां सर्व्वेरेव कुसुमैः कामिनीनां कर्णाभरणं स्यात् अतोऽस्य तथात्वम् ।) कदम्बवृक्षः । इति राजनिर्घण्टः ॥ (कदम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कर्णप्रतिनाहः, पुं, (कर्णे जातः प्रतिनाहः रोगविशेषः ।) कर्णरोगविशेषः । तस्य सम्प्राप्तिरूपे ।

"सकर्णगूथो द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद् विकारः शिरसोऽर्द्धभेदवत्" ॥

इति माधवकरः ॥ (अस्य चिकित्सा यथा,—

"अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्" ॥

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारः ॥

कर्णफलः, पुं, (कर्णः फलमिव यस्य ।) मत्स्यविशेषः काणलि माछ इति भाषा ॥ अस्य गुणः । अजीर्णरोगश्लेष्मकारित्वम् । इति राजवल्लभः ॥

कर्णमलं, क्ली, (कर्णस्य मलं गूथम् ।) कर्णजमलम् तत्पर्य्यायः । कर्णगूथम् २ । इति हारावली ॥

कर्णमुकुरः, पुं, (कर्णे मुकुरः दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति भूरिप्रयोगः ॥

कर्णमोटी, स्त्री, (कर्णं कर्णोपलक्षितरोगविशेषं मोटयति नाशयतीति । यद्वा कर्णं शरीरभेदिरोगविशेषं मोटयतीति । कर्ण + मुट् + इन् वा ङीप् ।) चामुण्डादेवी । इति हेमचन्द्रः ॥

कर्णरोगः, पुं, (कर्णस्य कर्णे गतः कर्णे जातो वा रोगः ।) श्रवणव्याधिः । यथा । अथ कर्णरोगाधिकारः । तत्र कर्णरोगाणां नामानि सङ्ख्याञ्चाह ।

"कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड एव च ।
कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
प्रतिनाहो जन्तुकर्णो विद्रधिर्विविधस्तथा ।
कर्णपाकः पूतिकर्णस्तथैवार्ज्शस्त्वनुर्व्विधम् ॥
तथार्ब्बुदं सप्तविधं ग्रीवास्वापि चतुर्व्विधः ।
एते कर्णगता रोगा अष्टाविंशतिरीरिताः" ॥ * ॥

तेषु कर्णशूलस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।

"समीरणः श्रोत्रगतोऽन्यथा चरन्
समन्ततः शूलमतीव कर्णयोः ।
करोति दोषैश्च यथास्वमाहतः
स कर्णशूलः कथितो दुराचरः" ॥

अन्यथाचरन् प्रतिलोमं चरन् । दोषैः पित्तकफरक्तैः । रक्तस्यापि रुजादिकर्त्तृत्वेन दोषसाम्यात् दोषत्वमेव । यथास्वं यथात्मीयनिदानं कुपितैः अथवा यथास्वमिति शूलविशेषणम् । दुराचरः दुरुपचरः मूर्च्छाद्युपद्रवयोगात् ॥ * ॥

कर्णशूलस्यासाध्यतां चाह ।

"मूर्च्छा दाहो ज्वरः काश्यः क्लमोऽथ वमथुस्तथा ।
उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः" ॥ * ॥

कर्णनादस्य लक्षणमाह ॥

"कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वनान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते" ॥ * ॥

बाधिर्य्यलक्षणमाह ।

"यदा शब्दवहो वायुः स्रोतसात्य तिष्ठति ।
शुद्धश्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते" ॥ * ॥

असाध्यबाधिर्य्यमाह ।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत्" ॥ * ॥

क्ष्वेडमाह ।

"वायुः पित्तादिभिर्युक्तो वेणुघोषसमस्वनम् ।
करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते" ॥

क्ष्वेडशब्दार्थं व्यनक्ति । वेणुघोषसमस्वनमिति । यत उक्तम् । क्ष्वेडनं वेणुघोषवदिति । ननु कर्णनादकर्णक्ष्वेडयोः को भेदः । उच्यते । कर्णनादः केवलेन वातेन जन्यते तत्र नानाशब्दांश्च शृणोति ।

कर्णच्छेदन्तु पित्तादियुक्तेन वातेन जन्यते तच्च नियमेन वेणुघोषमिव शृणोतीति भेदः ॥ * ॥

कर्णस्रावमाह ।

"शिरोऽभिघातादथवा निमज्जतो
जलप्रपाकादथवापि विव्यधेः ।
स्रवेद्विपूयं श्रवणोऽनिलादितः
स कर्णसंस्राव इति प्रकीर्त्तितः" ॥

पूयमित्युपलक्षणं जलं रसञ्च स्रावयेत् ॥ श्रवणशब्दः पुंलिङ्गोऽप्यस्ति ॥ * ॥ कर्णकण्डूमाह ।

"मारुतः कफसंयुक्तः कर्णे कण्डूं करोति हि" ॥*॥

कर्णगूथमाह ।

"पित्तान्वितः श्लेष्मा कुरुते कर्णगूथकम्" ॥
कर्णे गूथं यस्मात् स कर्णगूथव्याधिः ॥ * ॥

प्रतिनाहमाह ।

"स कर्णगूथो द्रवतां यदा गतो
विलापितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽर्द्धभेदकृत्" ॥

घ्राणञ्च मुखञ्च एकत्वं द्वन्द्वे । शिरसोऽर्द्धभेदकृत् अर्द्धविभेदकाख्यशिरोरोगकृत् ॥ * ॥

कृमिकर्णमाह ।

"यदा तु मूर्च्छत्यथवाऽऽ जन्तवः
स्वजत्यपत्यान्यथवापि मक्षिकाः ।
तदक्षनत्वात् श्रवणो निरुध्यते
भिषग्भिराद्यैः कृमिकर्णको गदः" ॥

तदक्षणत्वात् कृमिलक्षणत्वात् ॥ श्रवणे कृमिकर्णको गदो निरुध्यत इत्यन्वयः ॥ * ॥

पतङ्गादिषु कर्णप्रविष्टेषु लक्षणमाह ।

"पतङ्गाः घृतपद्यञ्च कर्णश्रोत्रं प्रविश्य हि ।
अरतिं व्याकुलत्वञ्च भृशं कुर्व्वन्ति वेदनाम् ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कोटे चरति रुक् तीव्रा निस्यन्दे मन्दवेदना" ॥
निस्यन्दे निश्चले ॥ * ॥ द्विविधकर्णविद्रधिमाह ।

"क्षतोभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽकरः पुनः ।
सरक्तपीतारुणमक्षमाक्षवेत्
प्रतोदधूमायनदाहचोषवान्" ॥

क्षतप्रभवोघातप्रभवश्च तयोरथागन्तुजत्वादिक्यम् ॥ अक्षं श्राक्षावमित्यर्थः ॥ * ॥ कर्णपाकमाह ।

"कर्णपाकस्तु पित्तेन कोथविस्फोटकृद्भवेत्" ।
कोथः पूतिभावः । स्फोट आर्द्रता ॥ * ॥

पूतिकर्णमाह ।

"कर्णविद्रधिपाकाद्वा सकर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूतिं स ज्ञेयः पूतिकर्णकः" ॥ * ॥

कर्णस्रावाद्भेदार्थमाह ।

पूतन्ति नियमेन पूति यथा स्यादेवं स्रवति ॥ * ॥

कर्णगतानां श्लोथार्व्बुदार्शसां लक्षणान्याह ।

"कर्णश्लोथार्व्बुदार्शांसि जानीयादुक्तलक्षणैः" ॥
कर्णश्लोथाश्च चत्वारो वातपित्तकफरक्तजाः ।
एवमर्शोऽपि चतुर्व्विधम् । अन्येषां श्लोथानामर्शसाञ्चासम्भव आधारप्रभावात् ॥ अर्व्बुदं सप्तविधम् । वातपित्तकफरक्तमांसमेदःसिराजम् ॥

एते कर्णरोगा अष्टाविंशतिः सुश्रुतोक्ता उक्ताः ॥*॥
इदानीं चरकोक्तकर्णरोगचतुष्टयं वातपित्तकफसन्निपातकृतमाह । तत्र वातजमाह ।

"नादोऽतिरुक् कर्णतले तु शोथः
स्रावस्तनुश्यावरुजश्च वातात्" ॥*॥

पित्तजमाह ।

"शोथः सरागो दरुणं विदाहः
सपूतिपीतस्रवणश्च पित्तात्" ॥ * ॥

कफजमाह ।

"वैसुत्य कण्डूस्थिरशोथमुक्त-
स्निग्धस्रवतिस्वल्परुजः कफाच्च" ॥

वैसुत्यं अन्यथा स्रावणम् ॥ * ॥

त्रिदोषजमाह ।

"सर्व्वाणि रूपाणि च सन्निपातात्
स्रावश्च तत्राधिकदोषवर्णः" ॥ * ॥

कर्णपाल्याः सक्तार्णावयवत्वात् तद्विकारमप्यत्रैवाह । तत्र सनिदानं परिपोटकलक्षणमाह ॥

"सौकुमार्य्यात् चिरोत्सृष्टे सहसैवातिवर्द्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ॥
क्षणारुणनिभः स्रस्रः सवातात् परिपोटकः" ॥*॥

उत्पातमाह ।

"गुर्व्वाभरणसंयोगात् ताड़नात् घर्षणादपि ।
शोथः पाल्यां भवेत् स्रावो दाहपाकरुजान्वितः ॥
रक्ते वा रक्तपित्ताभ्यामुत्पातः स गदः स्मृतः" ॥*॥

उन्मथकमाह ।

"कर्णं बलाद्दर्द्दयतः पाल्यां वायुः प्रकुप्यति ।
कफं संगृह्य कुरुते शोथस्तत्रमवेदनम् ॥
उन्मथकः सकण्डूको विकारः कफवातजः" ।
अवेदनं ईषद्वेदनम् ॥ * ॥ दुःखवर्द्धनमाह ।

"संवर्द्धमाने दुर्व्विद्धे कण्डूदाहरुजान्वितः ।
शोथो भवति पाकश्च चिरोषो दुःखवर्द्धनः" ॥
संवर्द्धमाने दुर्व्विद्धे कर्णे इति शेषः ॥ * ॥

परिलेहिनमाह ।

"कफासृक् कृमयः क्रुद्धाः सर्षपाभा विसारिणः ।
कुर्व्वन्ति पिड़कां पाल्यां कण्डूदाहसमन्विताम् ॥
कफासृक्कृमिसम्भूतः स विसर्पान्वितस्ततः ।
लिह्यात् सशुष्कलीं पालीं परिलेही स च स्मृतः" ॥
स पीड़कात्मकः परिलेहिसंज्ञो गदः । लिह्यात् निर्मांसीकुर्य्यात् ॥ * ॥

अथ कर्णरोगाणां चिकित्सा ।

"कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ॥
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ।
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कटुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्" ॥ १ ॥

"लशुनार्द्रकशिग्रूणां वारुणा मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुष्णः कर्णपूरणे" ॥
वारुणी वरुणः ॥ २ ॥

"अर्कांकुरान सक्षिप्तान् सतैलान् लवणान्वितान् ।
सन्निधाप्य सुधाकाण्डे कोरिते मृतयाऽऽहते ॥
पुटपाकक्रमस्विन्नं पीड़येदारसागमात् ।
सुखोष्णं तद्रसं कर्णे प्रक्षिपेच्छूलशान्तये" ॥ ३ ॥

"अर्कस्य पत्रं परिणामपीत-
माज्येन स्निग्धं शिखियोगतप्तम् ।
आपीड्य तस्याम्बुसुखोष्णमेव
कर्णे निषिक्तं हरतेऽतिशूलम्" ॥ ४ ॥

"तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि ।
छागमूत्रं प्रशंसन्ति कोष्णं सैन्धवसंयुतम् ॥ ५ ॥
तैलं श्लोणाकमूलेन मन्देऽग्नौ विधिना हृतम् ।
हरेदाशु चिरोत्थं कर्णशूलं प्रपूरणात् ॥ ६ ॥
हिङ्गुसैन्धवशुण्ठीभिस्तैलं सर्षपसम्भवम् ।
विपक्वं हरतेऽवश्यं कर्णशूलं प्रपूरणात् ॥ ७ ॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ ८ ॥
शिखरीक्षारतोयाभ्यां तत्कृतक्षारेण साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः" ॥
शिखरी अपामार्गः ॥ ९ ॥

"गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम्" ॥
क्षीरमाकं ग्राह्यम् । बिल्वतैलम् ॥ १० ॥

"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म कुर्व्वीत योगान् वैशेषिकानपि ॥११॥
खर्जिकाचूर्णसंयुक्तवीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥ १२ ॥
आम्रजम्बूप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ १३ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ १४ ॥
शुद्धं रसाञ्जनं नार्य्याः क्षीरं क्षौद्रेण संयुतम् ।
प्रशस्यते चिरोत्थे तत् सस्रावे पूतिकर्णके ॥ १५ ॥
कुष्ठहिङ्गुवचादारुघृताक्षविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम्" ॥
कुष्ठादितैलम् ॥ १६ ॥

"गृम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति" ॥
गृम्बूकाख्यं तैलम् ॥ १७ ॥

"चूर्णेन गन्धकशिलारजनीभवेन
मुष्ट्यंशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जयेच्चिरभवामपि कर्णजाताम्" ॥
मुष्टिः पलम् । निशा तैलम् ॥ १८ ॥

"कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥ १९ ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥ २० ॥
चिकित्सा कर्णशोथानां तथा कर्णार्शसामपि ।
कर्णार्व्बुदानां कुर्व्वीत शोथार्शोऽर्व्बुदवद्भिषक्" ॥*॥

अथ कर्णपालीविकाराणां चिकित्सा ।

"पालीसंशोषणे कुर्य्यात् वातकर्णरुजक्रियाम् ।
खेदयेत्यत्नतस्ताञ्च स्निग्धां संवर्द्धयेत्तिलैः ॥ १ ॥
घृतावरीवाजिगन्धापयस्यैरण्डबीजकैः ।
तैलं विपक्वं सक्षीरं पालीं संवर्द्धयेत् सुखम्" ॥
पयस्यत्र क्षीरकाकोली । घृतावरीतैलम् ॥ २ ॥

"जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत् ।
चिकित्सेत्तेन तैलेन हतास्रं परिपोटकम् ॥ ३ ॥
शीतलेपैर्जलौकाभिरुत्पातं समुपाचरेत् ॥ ४ ॥

हरिणीसूरसाभ्यां च गोधाकङ्कवसान्वितम् ।
तैलं विपक्वमभ्यङ्गादुन्मत्तं नाशयेद्ध्रुवम् ॥ ५ ॥
दुःखवर्द्धनकं सिक्ता जम्ब्वाम्बष्ठपत्रजैः ।
क्वाथैस्तैलेन सुस्निग्धं तच्चूर्णैश्चावधूनयेत् ॥
बडिशो गोमयैस्तप्तैः स्वेदितं परिलेपितम् ।
वनसारैः समालिम्पेदशामूत्रेण कल्कितैः" ॥ ६ ॥
इति कर्णरोगाधिकारः । इति भावप्रकाशः ॥*॥

("प्रतिश्यायजलक्रीड़ाकर्णकण्डूयनैर्भवेत् ।
मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥
प्राप्य श्रोत्रशिराः कुर्याच्छूलं स्रोतसि वेगवत् ।
अर्द्धविभेदकं स्तब्धं शिरोरागमिनन्दनम् ॥
चिराच्च पाकं पक्वन्तु सशिकामरुषश्चः स्रवेत् ।
श्रोत्रं शून्यमकस्माच्च स्यात् सञ्चारविचारवत् ॥
शूलं पित्तात् सदाहोषा शीतेच्छाश्चयथुं ज्वरम् ।
आशुपाकं प्रपक्वञ्च स पीतसशिकास्रुतिः ॥
सा वसीकास्यशब्देयद्यत्तत्पाकमुपैति च ।
कफाच्छिरोरुहनुयोवा गौरवं मन्दतारुजः ॥
कण्डूः श्वयथुरल्पेच्छा पाकात् श्वेतघनास्रुतिः ।
करोति श्रवणे शूलमभिघातादिदूषितम् ॥
रक्तं पित्तसमानार्त्ति किञ्चिदाधिक्यलक्षणम् ।
शूलं समुदितैर्दोषैः सशोफज्वरतीव्रकृत् ॥
पर्य्यायादुल्बणप्रीतेच्छं जायते श्रुतिजाड्यवत् ।
पक्वं सितासितारक्तघनपूय प्रवाहि च ॥
शब्दवाहिशिरासंस्थे शब्दोति पवने मुहुः ।
नादानकस्मादिविधान् कर्णनादं वदन्ति तम् ॥
श्लेष्मानुगतो वायुर्नादो वा समुपेक्षितः ।
उग्रैः क्षुच्छ्रुतिं कुर्य्यादधिरत्वं क्रमेण च ॥
वातेन स्रोतसि श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानञ्च सप्रतीघाह संज्ञितः ॥
कण्डूश्रोफौ कफात् श्रोत्रे स्थिरौ तत्संज्ञया स्मृतौ ।
कफो विदग्धः पित्तेन सरुजं नीरुजन्वपि ।
स्रवति बडिशोदं कुरुते पूतिकर्णकम् ।
वातादिदूषितं श्रोत्रं मांसाङ्कुरैरुदजं रुजम् ॥
खादन्तो जन्तवः कुर्युस्तीव्रां सक्रिमिकर्णकः ।
श्रोत्रकण्डूयनाज्जाते क्षते स्यात् पूर्व्वलक्षणः ॥
विद्रधिः पूर्व्ववच्चान्यः श्रोफोऽर्शोऽर्ब्बुदमीरितम् ।
तेषुरक्तं पूतिकर्णत्वं बधिरत्वञ्च बाधते ॥
गर्भेऽनिलात्सङ्कुचिता शष्कुलीकुचिकर्णकः ।
एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः ॥
पिप्पली पिप्पलीमानः सन्निपातादिदारिका ।
सर्व्वैः सरुजलक्षैः श्वयथुः स उपेक्षितः ॥
कटुतैलनिभं पक्वः स्रवेत् क्षुद्रेण रोहति ।
सङ्कोचयति रूढ़ा च सा ध्रुवं कर्णशष्कुली ॥
शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम् ।
शुष्का शुष्का च तन्त्रीवत् पालीवातेन तन्त्रिका ॥
सुकुमारशिरोत्पातात् सहसैव प्रवर्द्धते ।
कर्णश्रोफः सरुक्पाल्यामरुणः परिपोटवान् ॥
परिपोटः सपवनादुत्पातः पित्तशोणितात् ।
गुर्व्वभिघातभारादेः श्यावो यदीह पाकवान् ॥
श्वयथुः स्फोटपिटका रागोषाक्लेदसंयुतः ।
पाल्यां श्रोफोऽनिलकफात् सर्व्वतो निर्व्यथःस्थिरः ॥
लक्ष्यः सर्व्वैः कण्डूमान् उन्मन्थो गम्भीरश्च सः ।
दुर्व्विद्धे वर्द्धिते कर्णेसकण्डूदाहपाकरुक् ॥
श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ।
कफाद्रक् क्रिमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः ॥
लेह्याख्याः पिटिकास्ताहि लिह्युः पालीमुपेक्षिताः ।
पिप्पली सर्व्वजं शूलं विदारीकुचिकर्णकः ॥
एषामसाध्या याप्येका तन्त्रिकान्यांस्तु साधयेत् ।
पञ्चविंशतिरित्युक्ताः कर्णरोगविभागतः" ॥
इत्युत्तरस्थाने सप्तदशेऽध्याये वाभटेनोक्तम् ॥*॥
अस्य चिकित्सा तेनोक्ताष्टादशेऽध्याये, यथा,—
"कर्णशूले पवनजे पिबेद्राज्ञो रसाघृतम् ।
वातघ्नसाधितं सर्पिः कर्णं स्निग्धञ्च पूरयेत् ॥
पत्राणां एरण्डस्यार्त्यविल्वार्कैरण्डजन्मनाम् ।
तैलसिन्धूत्थदिग्धानां स्निग्धानां पुटपाकतः ॥
रसैः कवोष्णैस्तद्वच्च मूलकस्यारनालोरपि ।
गण्डे वातहरैःस्नेहैः मूत्रेषु च विपाचितः ॥
महास्नेहो द्रुतं हन्ति सुतीव्रामपि वेदनाम् ।
महतः पञ्चमूलस्य काथात् क्षौमेण वेष्टितात् ॥
तैलसिक्तात् प्रदीप्तायात् स्नेहः सद्यो रुजापहः ।
योज्यस्त्वेवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारणात् ॥
वातव्याधि प्रतिश्याय विहितं हितमत्र च ।
वर्ज्जयेच्छिरसा स्नानं शीताम्भःपानमक्रमम् ॥
पित्तशूले सितायुक्तं घृतस्निग्धं विरेचयेत् ।
प्राच्यायस्थिघृतं स्नेह्यं ग्रस्यते कर्णपूरणम् ॥
यष्ट्याह्वनन्ता हिमोशीरकाकोलीरोधजीवकैः ।
मञ्जाष्ठविषमञ्जिष्ठासारिवाभिश्च साधयेत् ॥
यष्टीमधुरसप्रस्थं क्षीरद्विप्रस्थसंयुतम् ।
तैलस्य कुडवं नस्यपूरणाभ्यञ्जनेरिदम् ॥
गिलन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।
यष्ट्यादिभिश्च सघृतैः कर्णौ दिह्यात् समन्ततः ॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्धं कफोद्भवे ।
धूमगण्डूषखेदान् कुर्य्यात् कफापहान् ॥
वचायुगार्कश्रियूणां सुरस्या मूलकस्य च ।
कदल्याः खरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥
अर्कार्कपुराणसर्पिर्द्विस्तैलाक्षौद्रवह्न्यन्वितान् ।
सन्निधाय कुशीलाग्रे कोरिते तच्छदाहृतान् ॥
खेदयेत् पुटपाकेन स रसः शूलजित्परम् ।
रसेन बीजपूरस्य कपित्थस्य च पूरयेत् ॥
सूक्ष्मेण पूरयित्वा वा फेनेनाम्लवचूर्णयेत् ।
अजाऽविमूत्रवंशत्वक् सिद्धं तैलञ्च पूरणम् ॥
सिद्धं वा सार्षपं तैलं हिङ्गुतुम्बुरुनागरैः ।
रक्तजेपित्तवत् कार्य्यं शिराद्यासु विमोक्षयेत् ॥
पक्वे पूयवहे कर्णे धूमगण्डूषनावनम् ।
युञ्जाद्वाढ़ी विधानञ्च दुष्टव्रणहरञ्च यत् ॥
स्रोतः प्रमृज्य दिग्धन्तु द्वौ कालौ पिचुवर्त्तिभिः ।
पूरयेद्भूपयित्वा तु माक्षिकेण प्रपूरयेत् ॥
सुरसादिगणक्वाथफाणिताक्षाद्य योजयेत् ।
पिचुवर्त्तिसुसूक्ष्मैश्च तच्चूर्णैरवचूर्णयेत् ॥
शूलस्रोदगुरुत्वानां विधिरेषनिवर्त्तकः ।
प्रियङ्गु मधुकाम्बष्ठा धातक्युत्पलपर्पटैः ॥
मञ्जिष्ठलोध्रलाक्षाभिः कपित्थस्य रसेन च ।
पचेत्तैलं तदाख्यं निगदाख्यातु पूरणात् ॥
नाद्यबाधिर्य्ययोः कुर्य्यादातशूलोक्तमौषधम् ।
श्लेष्मानुबन्धे श्लेष्माणं प्राग्जयेद्वमनादिभिः ॥
एरण्डशिग्रुवरुणमूलकात् पञ्चमे रसे ।
चतुर्गुणे पचेत्तैलं क्षीरे चाष्टगुणोन्मिते ॥
यष्ट्याह्वाक्षीरकाकोलीकल्कयुक्तं निहन्ति तत् ।
नादबाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥
पक्वं प्रतिविधाहिङ्गुमिश्रितक् खर्ज्जिकोदयैः ।
सक्षौद्रैः पूरणात्तैलं रुक्स्रावश्रुतिनादनुत् ॥
कर्णनादे हितं तलं सर्षपोत्थञ्च पूरणे ।
शुष्कमूलकखण्डानां क्षारो हिङ्गुमहौषधम् ॥
घृतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम् ।
सौवर्चलयवक्षारखर्ज्जिकौद्भिदसैन्धवम् ॥
भूर्ज्जत्वक्षिविड़ं मुक्ता मधुस्रक्तं चतुर्गुणम् ।
मातुलुङ्गरसस्तद्वत् कदलीस्वरसस्तथैः ॥
पक्वं तैलं जयत्याशु सूक्ष्मक्रानपि पूरणात् ।
कण्डूं क्लेदञ्च बाधिर्य्यं पूतिकर्णञ्च रुक्क्रिमीन् ॥
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च ।
अथ सुप्तावविस्रावां कर्णौ रक्तं हरेत्ततः ॥
सशोफक्लेदयोर्मन्दस्रुतेर्वमनमाचरेत् ।
बाधिर्य्यं वर्ज्जयेद्बालवृद्धयोश्चिरजञ्च यत् ॥
प्रतिनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनानु कर्णौ तैलस्य पूरयेत् ॥
सक्षौद्रसैन्धवमधोर्मांसुलुङ्गरसस्य वा ।
शोधनाद्घृतोत्थत्वौघृतमण्डस्य पूरणम् ॥
क्रमोऽयं सर्वपूर्णेऽपि कर्णे कण्डूं कफापहम् ।
नस्यादितद्धरेत्फेऽपि कटूष्णैश्चाच लेपनम् ॥
कर्णस्रावोदितं कुर्य्यात् पूतिक्रिमिजकर्णयोः ।
पूरणं कटुतैलेन विशेषात् क्रमिकर्णके ॥
वमिपूर्व्वाहितात्कर्णे विद्रधौविद्रधिक्रिया ।
पित्तोत्थकर्णशूलोक्तं कर्त्तव्यं क्षतविद्रधौ ॥
अर्शोऽर्ब्बुदेषु नासावदामार्कर्णविदारिका ।
कर्णविद्रधिवत्साध्या यथा दोषोदयेन च ॥
पालीशोथेऽनिलश्लेष्मशूलवन्नस्य लेपनम् ।
खेदञ्च कुर्य्यात् स्निग्धाञ्च पालीमुद्वर्त्तयेत्तिलैः ॥
प्रियालबीजयष्ट्याह्वहृयगन्धा यवान्वितैः ।
ततः पुष्टिकरैः स्नेहैरभ्यङ्गं नित्यमाचरेत् ॥
घृतावरी वाजिगन्धा पयस्यैरण्डजीवकैः ।
तैलं विपक्वं सक्षीरं पालीनां पुष्टिवत्परम् ॥
कल्केन जीवनीयेन तैलं पयसि पाचितम् ।
आनूपमांसखाद्येन च पालीपोषणं वर्द्धनम् ॥
पालीं छित्त्वातिसंक्षीणां श्लेष्मां सन्धाय पोषयेत् ।
याप्यैवं तन्त्रिकास्थापि परिपाटेऽप्ययं विधिः ॥
उत्पाते घृतलैर्लेपो जलौको हृतशोणिते ।
जम्ब्वाम्रपल्लववलायष्टीरोध्रतिलोत्पलैः ॥
सधान्याक्षैः संमक्षिकैः सकदम्बैः ससारिवैः ।
सिद्धमभ्यञ्जनं तैलं विसर्पोक्तघृतानि च ॥
उन्मन्थेऽभ्यञ्जनं तैलं गोधाकङ्कवसान्वितम् ।
तालपत्र्याम्रगन्धार्कवाकूचीतिलसैन्धवैः ॥
सुरसाजाक्षलीभ्याञ्च सिद्धं तीक्ष्णञ्च नावनम् ।
दुर्व्विद्धेऽभ्रमजम्ब्वाम्रपल्लवाद्येन सेचितम् ॥
तैलेन पालीं खण्डाक्षां सक्षद्धरैरपि चूर्णयेत् ।
चूर्णैर्मधुकमञ्जिष्ठा प्रपुण्ड्राञ्जनिशोद्भवैः ॥
नाड्याविड़ङ्गसिद्धञ्च तैलमभ्यञ्जने हितम् ।

स्निग्धां गोमयजैः पिण्डैर्बद्धग्रः परिलेपिकाम् ॥
विड्वराहारैरालिप्येदुरभ्रीमूत्रकल्कितैः ।
कौटजेङ्गुदकारञ्जबीजशिग्म्याकवल्कलैः ॥
अथवाभ्यञ्जने तैर्वा कटुतैलं विपाचयेत् ।
सनिम्बपत्रमरिचमदनैर्लेपिकावृते ॥
छिन्नन्तु कर्णं शुद्धस्य बन्धमालोच्य यौगिकम् ।
शुद्धाखं लागयेल्लग्ने सद्यश्छिन्ने विशोधनम् ॥
अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम् ।
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम् ॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुस्रोतावगुण्ठितम् ।
सूत्रेणागाढ़ग्रन्थिलं बद्धा चूर्णैरवाकिरन् ॥
प्रोक्षितस्यापनेर्व्रणमाचारश्चादिशेत्ततः ।
संशोधादामतैलाक्तं व्रनैरपनयेत् पिचुम् ॥
सुरूढ़ं जातरोमाणं श्लिष्टसन्धिसमस्थिरम् ।
सुवर्णाभं सुरागञ्च व्रनैः कर्णं विवर्द्धयेत् ॥
जलसूकाः स्वयं गुप्ता रजन्यौ रुहतीर्द्वयम् ।
अश्वगन्धा बला हस्तिपिप्पली गौरसर्षपाः ॥
मूलं कोशातकाश्वघ्नरूपिका सप्तपर्णजम् ।
कुक्कुन्दरी कालमृता ग्रहं मधुकरीक्षतम् ॥
जन्तुका जलजन्मा च तथा शावरकन्दकम् ।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम् ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात् कर्णवर्द्धनम् ।
अथ कुर्याद्यस्यास्य छिन्नां शुद्धस्य नासिकाम् ॥
छिन्द्यान्नासासमं पत्रं तत्तुल्यञ्च कपोलतः ।
त्वङ्मांसं नासिकासन्ने रज्जुस्तत्तनुतां नयेत् ॥
सीव्येद्वृढं ततः सूच्या सेविन्या पिचुयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्योपरित्वचम् ॥
कपोलबन्धं सन्दध्यात् सीव्येन्नासाञ्च यत्नतः ।
नाड़ीभ्यामुत्क्षिपेदन्तः सुखोच्छ्वासप्रवृत्तये ॥
आमतैलेन लिप्ता तु पतङ्गमधुकाञ्जनैः ।
प्रोक्षितस्यापनेच्चान्यैः सुस्निग्धैरेव चूर्णयेत् ॥
ततो मधुघृताभ्यक्तं बद्धाचारिकमादिशेत् ।
ज्ञात्वावस्थान्तरं कुर्यात् सद्यो व्रणविधिन्ततः ॥
छिन्द्याद्बहुऽप्यधिकं मांसं नासोपान्ते च चर्म्मवत् ।
सीव्येत्तच्च सुस्निग्धं हीनं संवर्द्धयेत् पुनः ॥
निवेशिते यथान्यासं सद्यश्छेदेऽप्ययं विधिः ।
नाड़ीयोगादिनौक्तस्य नासासन्धानवद्विधिः" ॥
इति वाभटे उत्तरस्थाने १८ अध्यायः ॥ * ॥
"सामान्यं कर्णरोगेषु घृतपानं रसायनम् ।
अध्यायामो ऽशिरःस्नानं ब्रह्मचर्य्यमकत्थनम् ॥
कर्णशूले प्रणादे च बाधिर्य्यक्ष्वेड़योरपि ।
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः ॥
स्निग्धं वातहरैः स्वेदैर्नरं स्नेहविरेचितम् ।
नाड़ीस्वेदैरुपचरेत् पिण्डस्वेदैस्तथैव च ॥
विल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभिः ।
वस्तगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभिः ॥
आरनालः घृतैरेभिर्नाड़ीस्वेदः प्रयोजितः ।
कफवातसमुत्थानं कर्णशूलं निरस्यति ॥
मीनकुक्कुटलावानां मांसजैः पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्व्वीत कर्णशूलनिवारणम् ।
अश्वत्थपत्रखण्डं वा विधाय बड्धपत्रकम् ।
तप्ताक्तमस्तसम्मूर्णं निदध्याच्छ्रवणोपरि ॥
यत्तैलं च्यवते तस्मात् खल्लादङ्गारसाधितात् ।
तत्प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम् ॥
क्षौमगुग्गुल्वगुरुभिः सघृतैर्धूपयेच्च तम् ।
भक्तोपरि हितं सर्पिर्वस्तिकर्म्म च पूजितम् ॥
निरन्नो निशि तत्सर्पिः पीत्वोपरि पयः पिबेत् ।
मूर्द्धवस्तिषु नस्ये च मस्तिष्के परिषेचने ॥
घृतपाकं बलातैलं प्रयुञ्जन्चापि भोजने ।
कण्टकारीमशाक्षीरे पक्वा क्षीरेण तेन च ॥
विपचेत् कुक्कुटवसां कर्णयोस्तत्प्रपूरणम् ।
तगड़ुलीयकमूलानि फलमङ्कोठजन्तथा ॥
अहिंसाकेन्द्रकामूलं सरलं देवदारु च ।
लसुनं शृङ्गवेरञ्च तथा वंशावलेखनम् ॥
कल्कैरेषां तथाक्षैश्च पचेत् स्नेहं चतुर्विधम् ।
वेदनायाः प्रशान्त्यर्थं हितं तत्कर्णपूरणम् ॥
लसुनार्द्रकशिग्रूनां मुरङ्गा मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुष्णः कर्णपूरणे ॥
शृङ्गवेररसः क्षौद्रं सैन्धवं तैलमेव च ।
कटुष्णं कर्णयोर्देयमेतद्धा वेदनापहम् ॥
वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक् ।
सर्पिः पचेत्तेन कर्णं पूरयेत् कर्णशूलिनः ॥
महतः पञ्चमूलस्य काण्डमध्यादशाङ्गुलम् ।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः ॥
यत्तैलं च्यवते तेभ्यो घृतेभ्यो भाजनोपरि ।
क्षेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥
कुर्य्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारवे ।
मतिमान्दीपिकातैलं कर्णशूलनिवर्हणम् ॥
अर्काङ्कुरान्सपिप्पलीसैलाक्तान् लवणान्वितान् ।
सन्निदध्यात् खड़ीकाखे कोरिते तच्छदावृते ॥
पुटपाकक्रमस्विन्नान् पीड़येदारसागमात् ।
सुखोष्णां तन्रसं कर्णे दापयेच्छूलशान्तये ॥
कपित्थमातुलुङ्गास्थ्नृङ्गवेररसैः शुभैः ।
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥
कर्णं कोष्णेन चुक्रेण पूरयेत् कर्णशूलिनः ।
समुद्रफेनचूर्णेन युक्ता वाप्यवचूर्णयेत् ॥
अङ्गानामिह मूत्राणां मूत्रेणाभ्यन्तरेण वा ।
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥
मूत्रेष्वस्तेषु वातघ्ने गवे च क्षपिते भिषक् ।
पचेच्चतुर्व्विधं स्नेहं पूरणं तच्चकर्णयोः ॥
एता एव क्रियाः कुर्य्यात् पित्तघ्नैः पित्तसंयुते ।
काकोल्यादौ दशक्षीरं तिक्तक्षाच्च हितं हविः ॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ।
कल्कक्काथे परं पक्वं शर्करामधुकैः सरैः ॥
इक्षुदीसर्षपस्नेहौ सकफे पूरणे हितौ ।
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥
सुरसादौ कृतं तैलं पञ्चमूले महत्यपि ।
मातुलुङ्गरसः शुक्तं लसुनार्द्रकयो रसः ॥
एकैकः पूरणे पथ्यस्तैलं तेष्वथवा कृतम् ।
तीक्ष्णा मूर्द्धविरेकाश्च कवलाश्चाच पूजिताः ॥
कर्णशूलविधिः कृत्स्नः पित्तघ्नः प्रोक्षितावृते ।
शूलप्रशादबाधिर्य्यस्त्रेड़ानान्तु प्रकीर्त्तितम् ॥
सामान्यतो विशेषेण बाधिर्य्ये पूरणं हृतु ।
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकबिल्वैर्भिः सिद्धं वाजे पयस्यथ ॥
सिद्धं वा बिल्वनिःक्काथे प्रीतीभूतं तदुद्धृतम् ।
पुनः पचेद्दशक्षीरं सितामधुकचन्दनैः ॥
बिल्वाम्बुगाढ़ं यत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ॥
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ।
कर्णस्रावे पूतिकर्णे तथैव क्रिमिकर्णके ॥
समानं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ।
शिरोविरेचनञ्चैव धूपनं पूरणन्तथा ॥
प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत् ।
राजवृक्षादितो येन सुरसादिगणेन वा ॥
कर्णप्रक्षालनं कार्य्यं चूर्णैरेषाञ्च पूरणम् ।
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितम् ॥
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ।
सर्ज्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः ॥
योजितो मधुना वापि कर्णस्रावे प्रशस्यते ।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणम् ॥
सर्षपबलमञ्जिष्ठाजम्बवप्रसवायुतम् ।
कुलीरक्षौद्रमण्डूकी सिद्धं तैलञ्च पूजितम् ॥
तिन्दुकान्यभयारोध्रं समङ्गामलकं मधु ।
पूरणञ्चात्र पथ्यं स्यात् कपित्थरसयोजितम् ॥
रसमाम्रकपित्थानां मधूकधवशाजजम् ।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥
प्रियङ्गुमधुकाम्बष्ठा धातकी शीतपर्णिभिः ।
मञ्जिष्ठालोध्रवाताभिः कपित्थस्य रसेन वा ॥
पचेत्तैलं तदाखावमवश्यहति पूरणात् ।
वृक्षं रसाञ्जनं गार्य्याः क्षीरेण क्षौद्रसंयुतम् ॥
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ।
निर्गुण्डीस्वरसे तैलं सिन्धूर्धूसरजोगुड़ः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ।
कृमिकर्णकनाशार्थं क्रिमिघ्नं योजयेद्विधिम् ।
वार्त्ताकुधूमश्च हितः सार्षपश्चैव च ।
क्रिमिघ्नं हरितालेन गवां मूत्रयुतेन च ।
गुग्गुलुः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते ।
कृष्णं धूमपानञ्च कवड़स्य च धारणम् ।
कर्णश्लेड़ हितं तैलं सार्षपश्चैव पूरणम् ।
विद्रधौ वापि कुर्व्वीत विद्रधुक्तं चिकित्सितम् ।
प्रक्षोद्यधीमांस्तेन खेदेन प्रविलाप्य च ।
शोधयेत् कर्णविट्कन्तु भिषक् सम्यक् प्रयत्नया ।
नाड़ीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनम् ।
विधिश्च कर्णशूलघ्नः कर्णकण्डूमपोहति ।
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।
ततोऽतिरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ।
कर्णपाकस्य भेषज्यं कुर्य्यात् पित्तविसर्पवत् ।
कर्णच्छिद्रे वर्त्तमानं कीटं क्लेदमलादि वा ।
शृङ्गेणापहरेद्धीमानथवापि प्रयत्नया ।
शेषाण्यन्तुविकाराणां प्राक्चिकित्सितमीरितम्" ।
इति सुश्रुते उत्तरतन्त्रे एकविंशतितमोऽध्यायः ॥*॥

चिकित्सितस्थाने ४२ अध्याये सविदानलक्षण-चिकित्सितान्युक्तानि हारीतेन यथा,—

"सिक्थेन वा तोयविपूरणेन

मक्षेण वा याति भवेद्बुजा च ।
उच्छ्वासरोधाद्भवते तथापि
वातादिकैर्वा कुपितैरथापि ॥
संसर्गदोषैरपि सर्व्वदोषैः
क्रिमिप्रकोपेनापि तथैव चान्या।
सञ्जायते कर्णरुजा नरस्य
पूयोति तेनापि बडिशनांश्च ॥
निःस्रावमेघध्वनिदन्तशब्दान्
शूलं सदाहञ्च शिरोव्यथा च ।
वेणुस्रवं वत्स ! पूयोति सर्व्वं
पित्तेन तं विद्धि भिषग्वरिष्ठ ! ॥
तथा च मूर्च्छां प्रतनोति शब्दं
मेघस्वनं वा कफजे पूयोति ॥
क्रिमिदोषे स्रवेत् पूयं सरक्तं याति सत्तम ! ।
तथा चैवाभिघातेन जायते तीव्रवेदना ॥
क्षतेन पूयं स्रवते बाह्याद्भवति चापरः।
तस्यापिलूतिदोषेण जायते कर्णजा रुजा ॥
न कर्णरोगे जलपूरणञ्च
न चूर्णमेतत् कथितं विधिज्ञैः ।
तैलं हितं स्वेदनमेव कर्णे
स वाष्पविन्दुश्च हितो मतश्च ॥
समुद्गपेनं सिन्धूत्थं सूक्ष्मचूर्णञ्च कारयेत् ।
सौवीरकरसेनापि याति कर्णपूरणम् ॥
आर्द्रसौवीरकरसं शुण्ठीसैन्धवशुण्ठुलम् ।
माक्षिकाज्यान्वितोयेन तैलं पक्वातिचोष्यकम् ।
तुम्बीरसञ्च धार्य्यते कर्णरोगे प्रशस्यते ॥
यष्टीमधुः कुष्ठमरिष्टपत्रं
निम्बाविशाला सुमनः प्रवालाः ।
विपाठितं कर्णभवे च शूले
च पैत्तिके वा हृतमेव शस्तम् ॥
ब्राह्मीरसं सैन्धवकं विड़ङ्गं
सभृङ्गराजस्य हृतेन युक्तम्।
तथैव सौवीररसञ्च पथ्या
स्रुतञ्च वस्त्रं परिपूर्णमेतत् ॥
शिवम्भवेत्तत् श्रुतिपूरणाय
पूयं सरक्तं क्रिमिजं निहन्ति ॥
सर्व्वे प्रोक्ताः शिरोरोगास्तैलानि च घृतानि च ।
जात्यादिकान् वा युञ्जीत शिरोरोगविदाम्बरः ।
वातहारीणि पथ्यानि विदाहीनि गुरूणि च"॥१॥)

कर्णजलिका, स्त्री, (कर्णस्य जलिका जलेव ।) पालिः । इति हेमचन्द्रः । कानेर पाता इति भाषा ॥

कर्णबंशः, पुं, (कर्णः कर्णाकृतिः कर्णवत् सञ्जो वा बंशो यत्र ।) मञ्चः । इति हारावली ॥

कर्णबधिरितः, पुं, (कर्णेन श्रवणेन्द्रियेण बधिरितः हीनः । अस्य दर्शनेन्द्रियेणैव श्रोत्रकार्य्यकारित्वात् तथात्वम् ।) सर्पः । इति शब्दचन्द्रिका । कर्णहीने त्रि ॥

कर्णवेधः, पुं, (कर्णयोः कर्णस्य वा वेधः वेधनम् ।) कर्णयोश्छिद्रकरणम् । कानछेदान इति भाषा । तस्य विधिर्यथा । मदनरत्ने वशिष्ठश्रीधरौ ॥
"मासे षष्ठे सप्तमे वाष्टमे वा
वेध्यौ कर्णौ द्वादशे षोड़शेऽब्दि ।
मध्येनाह्नः पूर्व्वभागे न रात्रौ
नक्षत्रे द्वे द्वे तिथी वर्ज्जयित्वा" ॥
अत्र जन्ममासो वर्ज्यः । ज्योतिर्निबन्धे गर्गः ।
"मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे ।
कर्णवेधं प्रशंसन्ति पुष्ट्यायुःश्रीविवृद्धये" ॥
मदनरत्ने ।
"प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा ।
द्वादशे च तथा कुर्य्यात् कर्णवेधं शुभावहम्" ॥
हेमाद्रौ व्यासः ।
"कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने" ॥
श्रीधरः ।
"हरिहरकरचित्रासौम्यपौष्णोत्तरार्या-
दितिवसुषु घटाली सिंहवर्ज्ज्येषु लग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्व्वरिक्ता-
रहिततिथिषु शुद्धे नैधने कर्णवेधः" ॥
मदनरत्ने बृहस्पतिः ।
"द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी श्रेष्ठा तृतीया कर्णवेधने ॥
सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ।
शूद्रस्य चायसी स्रष्टी मध्यमाष्टाङ्गुलात्मिका" ॥
हेमाद्रौ देवलः ।
"कर्णरन्ध्रं रवेश्छाया न विशेदयजन्मनः ।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः"॥ शङ्खः ।
"अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि ।
तस्मै श्राद्धं न दातव्यं दत्तश्चेदासुरं भवेत्" ॥
इति निर्णयसिन्धुः । कर्णवटकदोषनिवारणार्थं कर्णस्य वेधनम् । सोदरभ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमः कर्णवेधस्यासंस्काररूपत्वात् न तथा नियमः । यथा,—
"यदापत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च ।
कर्णवटकं विजानीयादूर्द्ध्वं तत्तयस्य च ।
इत्याह च तयोर्म्मध्ये शुद्धिर्यस्याथ वत्सरे ।
कर्णवेधो हितस्तस्य तस्य व्यूढविचारणा ।
यट्कर्णोत्पत्तिमाह च भानोः शुद्धासमेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्"।
इति मलमासतत्त्वे माधवधृतवचनम् । अस्य कालनियमो यथा,—राजमार्त्तण्डे ।
"न जन्ममासे न च चैत्रपौषे
न वर्षयुग्मे न हरौ प्रसुप्ते ।
रवौ च दुष्टे न च कृष्णपक्षे
न जन्मभे कर्णविधिः प्रशस्तः" ॥
तथा दीपिकायाम् ।
"नो जन्मेन्दुभमाससूर्य्यरविजप्राजाहसप्ताष्यते
प्रस्तेऽर्के लघुविष्णुयुग्ममृदुभस्वात्युत्तरादित्रयैः ।
सौम्यैस्स्वायविकौणकरतकगतैः पापैस्त्रिलाभारिगै
रोजोऽब्दे श्रुतिवेध इष्यसितभे लग्ने तु काले शुभे ॥
अत्रापि तिथ्यृक्षादिविदुषश्चं वर्ज्जयेत् ।
यथाह गर्गः ।
"कर्णवेधव्रते कुर्य्यादुदक्सार्गस्थिते रवौ ।
दक्षिणाशास्थिते भानौ नैव कुर्य्यात् कथञ्चन" ॥
इति ज्योतिषतत्त्वम् ॥

कर्णवेधनी, स्त्री, (विध्यतेऽनया । विध + करणे ल्युट् । ततो ङीप् ।) कर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः ॥

कर्णवेष्टकं, क्ली, (कर्णौ वेष्टयति । वेष्ट् + ण्वुल् ।) कुण्डलम् । इति हेमचन्द्रः ॥

कर्णवेष्टनं, क्ली, (कर्णौ वेष्ट्येतेऽनेन । वेष्ट् + करणे ल्युट् ।) कुण्डलम् । इत्यमरः । २ । ६ । १०३ ॥

कर्णशष्कुली, स्त्री, (कर्णयोः कर्णस्य वा शष्कुलीव ।) कर्णगोलकम् । तत्पर्य्यायः । वेष्टनम् २। इति हेमचन्द्रः ॥

कर्णशूलः, पुं, (कर्णस्य शूलः शूलवत् यन्त्रणादायकः ।) कर्णरोगविशेषः । तस्यौषधं यथा,—
"हिङ्गुताम्बुरुशुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥ १ ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्षमयञ्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥२॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
घृतपुष्पी वचा कुष्ठं दारु ग्रियु रसाञ्जनम् ।
सौवर्चलं यवक्षारः सामुद्रं सैन्धवं तथा ।
भृङ्गरस्रि विड़ं मुस्तं मधु शुक्तञ्चतुर्गुणम् ।
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः ।
पूरणादस्य तैलस्य क्षमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कस्तोयशेखर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥३॥
प्रस्थे द्वे गव्यमात्राणां क्षारयेत् क्षीरमभसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिण्डान्येतानि दापयेत् ।
पुनर्नवा गोक्षुरकं सैन्धवं शुषवं वचा ॥
सरलं सुरदारुञ्च दहती कण्टकारिका ।
नस्यपानाञ्जनैश्चैव कर्णशूलं हनुग्रहम् ।
बाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर !"॥ ४ ॥
इति गारुड़े १९८ अध्यायः ॥ (कर्णरोगशब्देऽस्य विवरणं ज्ञेयम् ॥)

कर्णसंस्रावः, पुं, (कर्णस्य कर्णयोर्वा संस्रावः पूयशोणितादेः निःस्रावणम् यत्र रोगे ।) कर्णरोगविशेषः । तस्य निदानसम्प्राप्तिरूपाणि ।
"शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्दितः
सकर्णसंस्राव इति प्रकीर्त्तितः" ॥
इति माधवकरः ॥

कर्णस्फोटा, स्त्री, (कर्णस्य स्फोटेव स्फोटा विदारणं यस्याः ।) लताविशेषः । काणफाटा इति भाषा । तत्पर्य्यायः । श्रुतिस्फोटा २ त्रिपुटा ३ क्षणात ४ गुहा ५ चित्रपर्णी ६ कोपलता ७ चन्द्रिका ८ अर्द्धचन्द्रिका ९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हिमत्वम् । सर्व्वविषयग्रहभूतादिदोषसर्व्वव्याधिनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्णाटः, पुं, (कर्णेषु अटति प्रभूतयशस्त्विन एतद्देशस्यराज्ञो गुणादिकीर्त्तनेन सर्व्वेषां कर्णेषु

भ्रमतीति। कर्ण + अट + अच्। शकन्ध्वादिवत्-साधुः।) खनामख्यातदेशविशेषः। इति शब्द-रत्नावली। यथा कर्णाटवर्णने राजपुत्तिः।

"अर्व्वन्तो यदि गद्यपद्यनिपुणा श्वेतच्छमत्कुर्व्वते तेषां मूर्द्धिदधानि वामचरणं कर्णाटराजप्रिया"॥

अयं देशः कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते॥)

कर्णाटी, स्त्री, (कर्णाट + स्त्रियां ङीष्। पारिभाषिको ऽयं शब्दः।) रागिणीविशेषः। इति हनुमुधः॥ सा तु मालवरागस्य पत्नी। इति सङ्गीतदामोदरः॥ हंसपरीवृत्तः। इति राजनिर्घण्टः॥

कर्णानुजः, पुं, (कर्णस्यानुजः कर्णमनुजातवानित्यर्थः। अनु + जन् + ड।) युधिष्ठिरराजः। इति त्रिकाण्डशेषः॥

कर्णान्दुः, स्त्री, (कर्णस्य आन्दुरिव।) कर्णपाली। काञ्चतडुका इति भाषा। उत्क्षिप्तिका। इति हेमचन्द्रः। काञ्चकड़ा इति ख्याता॥

कर्णान्दूः, स्त्री, कर्णान्दुः। कर्णपाली। इति हारावली॥

कर्णाभरणकः, पुं, (कर्णस्य आभरणमिव पुष्पैः कायति प्रकाशते। के + कः।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥

कर्णारा, स्त्री, (अर्य्यते विध्यतेऽनया। कर्ण + ऋ + करणे घञ् टाप् च। धातूनामनेकार्थत्वात् ऋधातोरत्र वेधनार्थः।) कर्णवेधनी। इति त्रिकाण्डशेषः॥

कर्णारिः पुं, (कर्णस्य अरिः शत्रुः।) अर्ज्जुनः। इति पुरुषम्॥ नदीसर्जवृक्षः। इति राजनिर्घण्टः। खाजन् इति भाषा॥

कर्णाक्षालः, पुं, (कर्णयोरक्षालः आक्षालनम्।) भ्रूलज्झाला। हस्तिकर्णाक्षालनम्। इति त्रिकाण्डशेषः॥

कर्णिका, स्त्री, (कर्ण + इकन् + टाप् च। यद्वा कर्ण + खुल्। ततष्टाप् अत इत्वम्।) कर्णाभरण-विशेषः। काञ्चतडुका इति भाषा। तत्पर्य्यायः। तालपत्रम् २। इत्यमरः। २। ६। १०३॥

ताड़ङ्कः ३ दन्तपत्रम् ४। इति भरतः॥ करि-हस्ताङ्गुलिः। करिणः शुण्डाग्रवर्त्ताङ्गुल्याकृतिः। पद्मबीजकोषी। इत्यमरः। २। ३। १५॥

(यथा भागवते। ३। ८। १६।

"तस्यां सचाम्भोरुहकर्णिकाया-मवस्थितो लोकमपश्यमानः"॥)

करमध्याङ्गुलिः। अमुकादिच्छटांशः। इति मेदिनी। वोंटा इति भाषा॥ लेखनी। इति हारावली॥ अग्निमन्थवृक्षः। अजशृङ्गीवृक्षः। इति राजनिर्घण्टः॥ (अम्बरीषभेदः। यथा, महाभारते १। १२३। ६१।

"मेनका सहजन्या च कर्णिका पुञ्जिकस्थला"॥

सेवती। गोलावपुष्प इति भाषा।

"शतपत्री तरण्युक्ता कर्णिका चारुकेशरा।
महाकुमारी गन्धाढ्या लक्षपुष्पातिमञ्जुला"॥

अस्या गुणा यथा,—

"शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः।
दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी"॥

इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥

योनिरोगविशेषः। यथा,

"अकाले वाऽसमानाया गर्भेण पिहितोऽनिलः।
कर्णिकाञ्जनयेद्योनौ श्लेष्मरक्तेन मूर्च्छितः"॥

इति चरके चिकित्सास्थाने। ३० अध्याये॥)

कर्णिकाचलः, पुं, (कर्णिकायां स्थितः अचलः।) सु-मेरुपर्व्वतः। इति हेमचन्द्रः॥ (अस्य विवरणं यथा भागवते। ५। १६। ७। "यस्य नाभ्यामव-स्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्दीपा-यामसमुन्नाहः कर्णिकाभूतः कुबलयकमलस्य"॥)

कर्णिकारः, पुं, (कर्णिं भेदनं करोतीति। कर्णि + कृ + कर्म्मण्यण्। उदरमलभेदकतत्त्वात् अस्य तथात्वम्।) वृक्षविशेषः। कणियार इति भाषा॥ (यथा, महाभारते। १। सम्भवे। १२५। २।

"कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः"॥)

तत्पर्य्यायः। द्रुमोत्तमः २ परिव्याधः ३। इत्यमरः। २। ४। ६०॥ वृक्षोत्पलः ४। इति रत्नमाला॥ (यथा, महाभारते ३। २४। १७।

"तत्शालतालाम्रमधूकबीप-कदम्बसर्ज्जार्জ্জুनकर्णिकारैः।
तमालये पुष्पधरैरुपेतं
महावनं राष्ट्रपतिर्ददर्श"॥

कर्णिकारस्य पुष्पम्। "अवयवे च प्राण्योषधि-वृक्षेभ्यः"। ४। ३। १३५। इति उत्पन्नस्य तद्धि-तस्य "पुष्पमूलेषु बहुलम्"। इति लुक्।

तथा कुमारसम्भवे। ३। २८। "वर्षाप्रकर्षे सति कर्णिकारम्"॥ कर्णिकारस्य कुसुममित्यर्थः।॥)

आरग्वधविशेषः। छोट सोनालु इति भाषा। तत्पर्य्यायः। राजतरुः २ प्रयाहः ३ क्षतमालकः ४ सुफलः ५ चक्रः ६ परिव्याधः ७ व्याधिरिपुः ८ पिच्छबीजकः ९ लम्बारग्वधः १०। अस्य गुणाः। सारकत्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफशूलोदरकृमिमेहनाशित्वम्। ब्रणगुल्मनिवा रकत्वञ्च। इति राजनिर्घण्टः॥

कर्णिकी, [न्] पुं, (कर्णिका हस्तिशुण्डाग्रभूषा अस्त्यस्य इनिः।) हस्ती। इति जटाधरः॥

कर्णी, [न्] पुं, (कर्णौ पक्षौ स्तः अस्य। पुरा किल पर्व्वतानां पक्षाः सन्ति इति पौराणिकी गाथा। "तुन्दादिभ्य इलच्च"। ५। २। ११७। इति अकारा-दिनिः।) वर्षपर्व्वतसप्तकान्तर्गतपर्व्वतविशेषः। यथा। "हिमवान् हेमकूटश्च निषधो मेरुरेव च।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः"॥

इति हारावली॥ वाद्यविशेषः। यथा।

"करोति कर्णिनो यस्तु यस्तु खड्गादिक्षेपणम्।
प्रयान्ति ते विशसने नरके भृशदारुणे"॥

इति विष्णुपुराणे २। ६। १६॥ कर्णिनो वाद्य-विशेषान्। इति तट्टीका॥

कर्णीरथः, पुं, (कर्णसाधा अवयवक्रिया उपचारात् कर्णः। कर्णोऽस्यास्ति इनिः। कर्णी चासौ रथ-श्चेति शब्दमात्रेण रथो न वस्तुतः। यद्वा साभी प्यात् कर्णशब्देनस्कन्धो लक्ष्यते। सोऽस्यास्य वाह-कत्वेन इनिः। कर्णी चासौ रथश्च। अन्येषामपीति दीर्घः।) क्रोडार्थनिर्म्मितक्षुद्ररथः। पुरुषस्कन्ध-नीयमानरथः। इति भरतः॥ स्त्रीवहनार्थमुप-रि वस्त्राच्छादितरथविशेषः। इति मञ्जरी॥ चतुर्दोल इति ख्यात इति पिटरसनः॥ इति सारसुन्दरी॥ स्त्रीरत्नवहनार्थमुपरिवस्त्राच्छादि-तमनुष्यवाह्ययानविशेषः। इति भरतः॥ तत्प-र्य्यायः। प्रवहणम् २ वहनम् ३। इत्यमरः। २। ८। ५२॥ प्रहरणम् ४ वहनम् ५। इति तट्टीका॥

कर्णीसुतः, पुं, (कर्णस्य सुतः।) मूलदेवः। इति त्रिकाण्डशेषः॥ (यथा हारावली ३२।

"कर्णीसुतो मूलदेवो मूलभद्रः कलाकुरः"॥

तथा च कादम्बरीटीकायाम्।

"कर्णीसुतः करटकः लेखशास्त्रप्रवर्त्तकः"॥)

कर्णेजपः, त्रि, (कर्णे जपति यः। जपादित्वात् खश्च-कर्णयोरित्वञ्च। वृषदन्तादित्वलुक्।) अप्रकाशे-नानुचितप्रबोधकः। कर्णेजपित्वा परापकारं वदति यो जनः। ठक् इति ख्यातः। तत्पर्य्यायः। सूचकः २ पिशुनः ३ दुर्जनः ४ खलः ५। इत्यमरः। ३। १। ३७॥ कर्णेजपादिद्वयं परापकारवादिनि। पिशुना-दित्रयं परस्परभेदनशीले॥ कर्णेजपादिपञ्चकं सूचके इति केचित्। त्रयमिति मेदिनीत्। इति भरतः॥

कर्णेन्दुः पुं, (कर्णयोः कर्णे वा इन्दुरिव।) कर्णान्दुः। अर्द्धचन्द्राकृतिकर्णभूषणम्। इति शब्दरत्नावली॥

कर्त्तृ, त् क गैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-अकं-सेट्।) रेफस्याधस्कारः कर्त्तयति कर्त्तापयति धूर्ज्जिर्व्वेग। इति दुर्गा-दासः॥

कर्त्तः, पुं, (कर्त्त + भावे + अप्।) भेदः। यथा।

"सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं
जह्युः खराज्ञिव निपानखनित्रमिन्द्रः"॥

इति श्रीभागवते २। ७। ३८॥ "कर्त्तो भेदः तन्नि-रासो ऽकर्त्तः तत्र हेतिं साधनं जह्युः"। इति तट्टीकायां श्रीधरस्वामी। (कर्त्तयति छिनत्तीति करोति भिनत्ति वा। कर्त्त + अच्। भेदके, त्रि॥)

कर्त्तनं, क्ली, (कृत् + भावे + ल्युट्।) छेदनम्। नारीणां सूचनिर्म्मितिः। इति मेदिनी। काट्না काटा। इति भाषा॥

कर्त्तरी, स्त्री, (कृन्ततीति। कृति छेदने + बाहुलका-दरप्रत्ययः ततो ङीष्। यद्वा कृत् + वच्। कर्त्तं राती ति। "आतोनुपेति"। ३। २। ३। कः। गौरादित्वात् ङीष्।) क्षुराणी। इत्यमरः। २। १०। ३४॥ पत्रीकृतखड्गादेः कर्त्तनास्त्रम्। काति इति ख्याते॥ केशकर्त्तनिका। इति भरतः। काँचि इति भाषा। काटारी इति ख्याता च॥ (योगविशेषः। यथा, ज्योतिषशास्त्रे।

"क्रूरमध्यगतश्चन्द्रो लग्नं वा क्रूरमध्यगम्।
कर्त्तरी नाम योगोऽयं कन्या निधनकारकः"॥)

कर्त्तव्यं, क्ली, (कृ + तव्य।) करणीयम्। करणयोग्यम्। कार्य्यम्। इति व्याकरणम्॥

कर्त्तव्यः, त्रि, (कर्त्तुं योग्यं कर्त्तुं उचितं वा। यद्वा

अवश्यं करणीयं यत् तत् कर्त्तव्यमिति स्मृतम्। कृ+तोगर्हार्थे तव्यः।) करणयोग्यः। यथा, हितोपदेशे।

"हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः।
अजा सिंहप्रसादेन वने चरति निर्भयम्"॥

कर्त्ता, [ऋ] त्रि, (करोति क्रिया निष्पादयतीति वा। करोति यः कर्म्मेति शेषः। कृ+कर्त्तरि तृच्।) कारकः। इति मेदिनी॥ षट्कारकान्तर्गतकारकविशेषः। वोपदेवेनास्य घसंज्ञा कृता। अत्र उक्तार्थे प्रथमा अनुक्तार्थे तृतीया विभक्तिर्भवति॥ तस्य लक्षणम्। "क्रियानुकूलकृतिमत्त्वम्"। इति सारमञ्जरी। "यः करोति सः"। इति सर्व्ववर्म्मा॥ "कृत्याश्रयः"। इति तार्किकाः॥ "चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकचेतनः कर्म्मकरणादिकारकचक्रप्रयोक्ता वा"। इति प्रायश्चित्तविवेकः॥ "क्रियामुख्यप्रयोजको कर्त्ता"। इति क्रमदीश्वरः॥ स तु पञ्चविधः। क्रियामुख्यः १ हेतुकर्त्ता २ प्रयोजकः ३ अनुमन्ता ४ ग्रहीता ५। तथा च।

"क्रियामुख्ये भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः।
अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः स्मृतः"।

इति गोयीचन्द्रटीकाकृद्दोषाजचक्रवर्त्ती॥ स च त्रिविधः। सात्त्विकः १ राजसः २ तामसः ३।

सात्त्विको यथा,—

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते"॥

राजसो यथा,—

"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः"॥

तामसो यथा,—

"अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"॥

इति श्रीभगवद्गीता। १८। २६-२८॥

कर्त्ता, [ऋ] पुं, (करोति सृजति चतुर्दशभुवनानि यः सर्व्वलोकसृष्टेति यावत्। कृ+तृच्।) परमेष्ठी। ब्रह्मा। इति मेदिनी॥ क्रियानुकूलकृतिमान्। स च त्रिविधः। यथा,—

"त्रिधैव ज्ञायते कर्त्ता विशेषेण प्रतिक्रियाम्।
योग्यत्वप्रतिषिद्धत्वविशेषपदान्वयैः"॥

अस्यार्थः। क्रियां प्रति प्रकारत्रयेण कर्त्ता विज्ञायते तस्य विवरणम्। स्वाध्यायोऽध्येतव्य इत्यत्र योग्यत्वेन लब्धविधिस्त्रैवर्णिकः॥१॥ अहरहर्दद्यात् दीक्षितो न ददातीत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरपरः॥२॥ स्वर्गकामो यजेतेत्यत्र विशेषपदान्वयेन स्वर्गकामः कर्त्ता ज्ञायते॥३॥*॥

नित्ये निषेधे च यद्यत् साधनं तदभावस्तदभावसाधनं इत्यनुभवसिद्धा नित्याकरणं निषिद्धाचरणञ्च प्रत्यवायसाधनं शास्त्रावगतं अतस्तदभावो नित्याचरणं निषिद्धाकरणञ्च प्रत्यवायाभावसाधनमिति प्रत्यवायपरिहारार्थी नियोज्योऽन्वेति तद्बोधकविशेषपदाध्याहारादिति गोथं ततस्त्रेयं विधिवाक्यशब्दधीः। यथा, काम्ये स्वर्गकामो यजेतेत्यत्र स्वर्गकामस्य कर्त्तुर्यागविषयकं कार्य्यम्। नित्ये अहरहः सन्ध्यामुपासीत इत्यत्र प्रत्यवायपरिहारार्थिनः कर्त्तुः प्रत्यहं सन्ध्यावन्दनविषयकं कार्य्यम्। न कलञ्जं भक्षयेदित्यत्रापि प्रत्यवायपरिहारार्थिनः कर्त्तुः कलञ्जभक्षणाभावविषयकं कार्य्यमित्येवं रूपा। इति धर्म्मदीपिका॥

(महादेवः। यथा, महाभारते। १३। १७। ६४।

"संग्रहो निग्रहः कर्त्ता सर्पचीरनिवासनः"॥

विश्वस्रष्टुर्ब्रह्मणोऽपि कर्त्तृत्वात् आदिकर्त्ता विष्णुः॥ यथा महाभारते १३। १४६। ४७।

"क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधरः"॥)

कर्त्तृका, स्त्री, (कृन्तति छिनत्तीति। कृत्+तृच्। स्वार्थे कन् टाप् च।) क्षुद्रखड्गः। यथा,—

"हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तृकाकराम्"॥

इति तन्त्रसारे श्यामाध्यानम्॥

कर्त्तृत्वं, क्ली, (कर्तुर्भावः। कर्त्तृ+भावे त्वम्।) कर्त्तृधर्म्मः। यथा, श्रीभगवद्गीतायां। ५। १३॥

"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः"॥

कर्त्र, त्र क शैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) रेफहययुक्तकारः। कर्त्रयति कर्त्राययति धूलिर्जलेन। इति दुर्गादासः॥

कर्त्री, स्त्री, (करोति या कर्म्माणीति शेषः। कृ+तृच्+ङीप् च।) कर्त्तरी। इति शब्दरत्नावली॥ कारिका। इति मुग्धबोधव्याकरणम्॥

कर्द, कुत्सितरवे। इति कविकल्पद्रुमः। (भां-परं-अकं-सेट्।) उदरशब्दे। इति रमानाथः॥ एकोऽर्थः। कर्दति काकः। रमानाथस्तु कौत्तेः कर्दतीति भट्टमल्लदर्शनादुदरसम्बन्धिशब्द एव अस्य प्रयोग इति मन्वानः कर्दति गिरतीति यदुदाजहार तज्ज्ञेयम्। यत्तन्मते कर्दत्युदरमित्येव स्यात्। इति दुर्गादासः॥

कर्दः, पुं, (कर्द+अच्।) कर्दमः। इति शब्दरत्नावली॥ कादा इति भाषा॥

कर्दटः, पुं, (कर्दं कर्दमं अटति कारणत्वेन प्राप्नोतीति। कर्द+अट्+अच्। प्रकन्ध्वादित्वात् अलोपे साधुः।) करहाटः। पङ्कः। पङ्कारः। इति मेदिनी॥

कर्दनं, क्ली, (कर्दते इति। कर्द+भावे ल्युट्।) उदरशब्दः। इति हेमचन्द्रः। पेटेर डाक इति भाषा॥

कर्दमं, क्ली, (कर्द+"कलिकर्दोरमः"। उणां। ४। ८४ इति अमः।) मांसम्। इति शब्दचन्द्रिका॥

कर्दमः, पुं, (कर्द कुत्सितरवे+"कलिकर्दोरमः"। उणां ४। ८४ इति अमः।) कर्दः। कादा इति भाषा। तत्पर्य्यायः। निषदरः २ जम्बालः ३ पङ्कः ४ शादः ५। इत्यमरः। १। १०। ६॥ (तथाहि याज्ञवल्क्यः। १। १६७।

"रथ्याकर्दमतोयानि स्पृशन्त्यन्यश्वपायसैः।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च"॥)

अस्य गुणाः। शीतलत्वम्। रूक्षत्वम्। विषरोगवेदनादाहशोथनाशित्वम्। व्रणशोधनरोपणत्वञ्च। इति राजवल्लभः॥

("कर्दमो दाहपित्तास्रशोथघ्नः शीतलः सरः"। इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥) स्वायम्भुवमन्वन्तरे प्रजापतिविशेषः। स तु ब्रह्मणश्छायायां जातः। तस्य भार्य्या स्वायम्भुवमनुकन्या देवहूतिः। पुत्रः कपिलदेवः कन्याः कलाद्या नव। इति श्रीभागवतम्। ३। १२। २७॥ पापम्। इत्युणादिकोषः। ४। ८४॥ छाया। यथा,—

"वेदेषु कर्दमः शब्दश्छायायां वर्त्तते स्फुटम्।
बभूव कर्दमाद्भालः कर्दमस्तेन कीर्त्तितः"॥

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः॥ (नागविशेषः। यथा महाभारते १। ३५। १६।

"कर्दमश्च महानागो नागश्च बहुमूलकः"॥)

कर्दमाटकः, पुं, (कर्दमो मलादिः अत्यते निक्षिप्यते यत्र। कर्दम+अट्+अधिकरणे घञ्। ततः कप्। यद्वा कर्दमस्य मलादेः आटो निक्षेपोऽत्र। कर्दमे इव आटोगतिरत्रेति केचित्। ततः कप्।) विष्ठादिनिक्षेपस्थानम्। इति शब्दरत्नावली॥

कर्दमी, स्त्री, मुद्गरवृक्षः। इति वैद्यकम्॥

कर्पटः, पुं, (कीर्य्यते क्षिप्यते इति। कृ+कर्म्मणि विच्। कर् चासौ पटश्च इति कर्म्मधारयः। यद्वा करस्यः पटः। प्रकन्ध्वादित्वात् अलोपे साधुः।) मलिनत्वादिदुष्टजीर्णवस्त्रखण्डम्। नेकड़ा इति ख्याता। (यथा कथासरित्सागरे ४। ६१।

"चोरखण्डैककर्पटः"॥) तत्पर्य्यायः। लक्तकः २। इत्यमरः। ३। ५। ३३॥ नक्तकः ३। इति भरतः॥ पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥

"नीलशैलस्य पूर्व्वस्मिन् स्वरूपं प्रतिपादितम्।
नाभिमण्डलपूर्व्वस्यां भस्मकूटस्य दक्षिणे॥
पूर्व्वस्यां कर्पटो नाम पर्व्वतो यमरूपधृक्।
तत्र याम्यशिला क्षुण्णा नीलाञ्जनसमप्रभा॥
अधित्यकायां राजेन्द्र यामपञ्चसु विस्तृता।
पूजयेत्तत्र शमनं याम्यौ दण्डं सदैव यः॥
धत्ते तु प्राणिनां नित्यं प्राणदण्डस्य साधनम्।
क्षुण्णवर्णान्तु दिग्भुजं किरीटमुकुटोज्ज्वलम्॥
दधतञ्चासिपुत्रीञ्च वामपार्श्वौ सदैव हि।
क्षुण्णवस्त्रं स्थूलपदं वह्निनिःसृतदन्तकम्॥
वराभयकरं नित्यं नृणां महिषवाहनम्।
पूजयेत् परया भक्त्या याम्यबीजेन साधकः॥
उपान्त्यवर्गस्यादिर्यो वर्णो विन्दुसंयुतः।
यमबीजमिति ख्यातं यमस्य प्रीतिकारकम्॥
अनेनैव तु मन्त्रेण शमनं यस्तु पूजयेत्।
कर्पटाख्येऽचलवरे नापमृत्युं समाप्नुयात्"॥

कर्पटधारी, [न्] त्रि, (कर्पटं धरति धारयति शीलमस्य। कर्पट+धृ+णिनिः।) मलिनजीर्णवस्त्रखण्डधारी। भिक्षुकः। इति शब्दरत्नावली॥

कर्पटिकः, त्रि, (कर्पटोऽस्त्यस्य। कर्पट+अस्त्यर्थे ठन्।) कर्पटधारी। इति शब्दरत्नावली॥

कर्पटी, [न्] त्रि, (कर्पटोऽस्त्यस्य। कर्पट+इनिः।) भिक्षुकः। कर्पटधारी। इति शब्दरत्नावली॥

कर्परः, पुं, (क्षृ+बाहुलकात् अरन्। लत्वाभावश्च।) कपालः। इत्यमरः। २। ६। ६८॥ मातार खुलि इति भाषा। शस्त्रभेदः। कटाहः। इति मेदिनी॥ उड़म्बरः। इति शब्दचन्द्रिका॥

कर्पूर

कर्परांशः, पुं, (कर्परस्य अंशः।) शर्करा। इति शब्दरत्नावली। खोलाकुचि इति भाषा॥

कर्पराजः, पुं, (कर्पर इवालति पर्य्याप्नोति। कर्पर + अल् + अच्। कर्परं अलति इति केचित्। अल् + कर्म्मण्यण्।) कन्दराजः। पर्व्वतजातपीलुवृक्षः। इत्यमरटीकायां रमानाथः। आखरोट् इति भाषा॥

कर्परिकातुल्यं, क्ली, (कर्पर्य्येव। इति स्वार्थे कन् तत स्वाम् अत इत्वं कर्परिकैव तुल्यम्।) तुल्यविशेषः। कर्परी। इति हेमचन्द्रः॥

कर्परी, स्त्री, (क्षप् + बाहुलकात् अरट्। लत्वाभावश्च। टित्त्वात् ङीम्। केचित्तु क्षपधातोररन् प्रत्ययेन निष्पादितोऽयं तन्मते गौरादित्वात् ङीष्।) कार्पासवृक्षतुल्यम्। दारुहरिद्रार कार्पेर तुलिया इति भाषा। तत्पर्य्यायः। दार्व्विका २। इत्यमरः। २। ९। १०१॥ तुल्याङ्गनम्। इति तट्टीकायां स्वामी॥

कर्पासः, पुं क्ली, ("क्षञः पासः"। उणां ५। ४५ इति क्षधातोः पासः।) कार्पासः। इत्यमरटीका। कापास् इति भाषा॥

कर्पासी, स्त्री, (कर्पास इति जातित्वात् गौरादित्वात् वा ङीष्।) कार्पासी। इति भरतः॥ कापासगाछ इति भाषा॥

कर्पूरः, पुं, क्ली, (क्षप् + "खर्जूरादित्वात्" उणां ४। ९०। इति ऊरः।) खनामख्यातसुगन्धिद्रव्यम्। काफुर इति पारस्य भाषा। कपूर् इति हिन्दी भाषा। (यथा,—राजेन्द्रकर्णपूरे ३३।

"कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाप्लाविते
जाते क्षन्त! दिवापि देव! ककुभां गर्भे भवत्कीर्त्तिभिः"॥) तत्पर्य्यायः। घनसारः २ चन्द्रसंज्ञः ३ सिताभः ४ हिमवालुका ५। इत्यमरः २। ६। १३०॥ सिताभः ६। इति तट्टीका॥ घनसारकः ७ सितकरः ८ शीतः ९ शशाङ्कः १० शिला ११ शीतांशुः १२ हिमवालुकः १३ हिमकरः १४ शीतप्रभः १५ शशभवः १६ शुभांशुः १७ स्फटिकाभः १८ कारमिहिका १९ ताराभः २० चन्द्रार्द्धकः २१ चन्द्रः २२ लोकतुषारः २३ गौरः २४ कुमुदः २५ हनुः २६ हिमाक्ष्यः २७ चन्द्रभस्म २८ वेधकः २९ रेणुसारकः ३०। इति शब्दरत्नावली॥ अस्य गुणाः शिशिरत्वम्। तिक्तत्वम्। कटुत्वम्। श्लेष्मरक्तपित्तक्षयाविदाहकण्ठस्यदोषोष्मरोगनाशित्वञ्च॥

"कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णाखदाहदः।
चिरस्थो दाहशोषघ्नः स धौतः शुभकृत्परः"॥
इति राजनिर्घण्टः॥

अपि च। पाके शीतलत्वम्। चक्षुर्हितकारित्वम्। पक्वकर्पूरादपक्वस्याधिकगुणत्वञ्च। इति राजवल्लभः॥ तद्भेदा यथा। पोतासः १ भीमसेनः २ सितकरः ३ शशावासंज्ञः ४ पांशुः ५ पिञ्जः ६ अब्दसारः ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिमः ११ शीतलः १२ पचिकाख्यः १३। इति राजनिर्घण्टः॥

कर्ब्बुदा

(तत्रादौ कर्पूरस्य नाम गुणाश्च।
"कर्पूरः शीतलो दृश्यश्चक्षुष्यो लेखनो लघुः।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः।
दाहछर्द्यास्यवैरस्यमेदो दौर्गन्ध्यनाशनः॥
कर्पूरोद्विविधः प्रोक्तः पक्वापक्वप्रभेदतः।
पक्वात् कर्पूरतः प्राङ्गरपक्वं गुणवत्तरम्"॥
अथ चीनाककर्पूरः। चीनेकर्पूर इति भाषा।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः।
कुष्ठकण्डूविसर्पघ्नस्तथा तिक्तरसश्च सः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे॥
"सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः।
छर्द्यायां मुखशोषे च वैरस्ये चापि पूजितः"॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

कर्पूरकः, पुं, (कर्पूर इव कायति प्रकाशते शोभते वा। कर्पूर + कै + कः।) कर्ब्बुरकः। कर्पूरकः। इति शब्दचन्द्रिका॥

कर्पूरतिलकः, पुं, (कर्पूर इव शुक्लं तिलकं ललाट् चिह्नं यस्य। खनामख्यातो हस्ती। यथा-हितोपदेशे १। ३४६।
"अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती"॥)
स्त्री, उमासखिभेदः। जया। इति शब्दमाला॥

कर्पूरतैलं, क्ली, (कर्पूराज्जातं तैलं स्नेहः। कर्पूरस्य तैलमिव स्नेहो वा।) कर्पूरस्नेहः। तत्पर्य्यायः। हिमतैलम् २ सुधांशुतैलम् ३ शीतांशुतैलम् ४ तुहिनांशुतैलम् ५ सितांशुतैलम् ६। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातामयनाशित्वम्। दन्तदार्ढ्यपित्तकारित्वञ्च। इति राजनिर्घण्टः॥

कर्पूरनालिका, स्त्री, पक्वान्नविशेषः। कर्पूरनारि इति नेओयाला इति च ख्याता। यथा भावप्रकाशः।
"घृताढ्यया समितया क्षुत्वा जम्बुपुटं ततः।
लवङ्गोषणकर्पूरयुतया सितयान्वितम्।
पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका।
संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका"॥

कर्पूरमणिः, पुं, (कर्पूरवर्णो मणिः।) पाषाणभेदः।
"कर्पूरमणिनामायं युक्त्या वातादिदोषनुत्"॥
इति राजनिर्घण्टः॥

कर्परः, पुं, (कीर्य्यते क्षिप्यते इति। कॄ + विच्। कर्। पल्यते इति पलः प्रतिबिम्बः। पल + कः। लस्य रः। कीर्य्यमाणः पलः प्रतिबिम्बः यत्र। दर्पणे हि मुखादीनां प्रतिबिम्बपतनात् तथा बोध्यते।) दर्पणः। इति जटाधरः॥

कर्ब्ब गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफोपधः। कर्ब्बति। इति दुर्गादासः॥

कर्ब्बुदारः, पुं, (कर्ब्बुरिव कर्ब्बुः सन् वा श्लेष्माणं मलं वा दारयतीति। कर्ब्बु + दॄ + णिच् + अच्।) कोविदारवृक्षः। इति शब्दमाला॥ श्वेतकाञ्चनः। अस्य गुणौ। ग्राहित्वम्। रक्तपित्तरोगे विशेषेण पथ्यत्वञ्च। इति राजवल्लभः॥
("शशस्य कोविदारस्य कर्ब्बुदारस्य शाल्मलेः।
पुष्पं ग्राहि प्रशस्तस्य रक्तपित्ते विशेषतः"॥
इति चरके सूत्रस्थाने। २७ अध्याये॥)
नीलभिण्टी। इति शब्दचन्द्रिका॥

कर्म्म

कर्ब्बुदारकः, पुं, (कर्ब्बुदारवत् कायति। कै + कः। यद्वा कर्ब्बुः सन् कर्ब्बुरिव वा श्लेष्माणं कफं दारयति। दॄ + णिच् + ण्वुल्।) श्लेष्मान्तकवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरं, क्ली, (कर्ब्बति गर्ब्बत्यस्मात् यस्मिन् सति वा गर्ब्बो भवति कर्ब्बयत्यनेन वा। कर्ब्ब दर्पे इति "मदुगुरादयश्च" उणां १। ४२। इति उरच्।) स्वर्णम्। धुस्तूरवृक्षः। इत्यमरः। २। ६। ६४॥ जलम्। इति मेदिनी॥

कर्ब्बुरः, पुं, (कर्ब्बति हिनस्ति जीवम्। कर्ब्ब हिंसायां + "मदुगुरादयश्च"। उणां। १। ४२। इति उरच्।) राक्षसः। ("कर्ब्बुरः श्वेतरक्षसोः" उणाम्। १। ४२। कर्ब्बति नानावर्णतां गच्छति। कर्ब्ब गतौ + उरच्। उणां १। ४२।) नानावर्णः। तत्पर्य्यायः। चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शबलः ५ एतः ६॥ (यथा कुमारे। ४। २७।
"इति चैनमुवाच दुःखिता
सुहृदः पश्य वसन्त! किं स्थितम्।
तदिदं कथयो विकीर्य्यते
पवनैर्भस्म कपोतकर्ब्बुरम्"॥)
तद्यति चि। इत्यमरः। १। ६। १७॥ शटी। इत्यमरटीका॥ पापम्। इति मेदिनी॥ नदीनिष्पावधान्यम्। इति राजनिर्घण्टः॥

कर्ब्बुरपलाशः, पुं, (कर्ब्बुरं चित्रवर्णं पलाशं यस्य।) साकुवृक्षवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरा, स्त्री, (कर्ब्बुर + टाप्।) क्षुद्रवृन्ताकवृक्षः। इति मेदिनी। पारल इति भाषा॥ बर्ब्बरा। इति जटाधरः॥ बाबुइ तुलसी इति भाषा॥ (अजौकोजातिविशेषः।
"वर्म्मिमत्स्यवदायता क्षिप्तोन्नतकुक्षिः कर्ब्बुरा"॥
इति सुश्रुते। १३ अध्याये॥)

कर्ब्बुरी, स्त्री, (कर्ब्बुर + गौरादित्वात् ङीष्।) दुर्गा। इति चिकाण्डशेषः॥

कर्ब्बूरं, क्ली, (कर्ब्बति गर्ब्बं प्राप्नोति यस्मात् कर्ब्ब दर्पे गतौ वा खर्ज्जूरादित्वात् ऊरः। उणां ४। ९०। एषोदरादित्वात् दीर्घो वा।) स्वर्णम्। इति मेदिनी॥ हरितालम्। इति चिकाण्डशेषः॥

कर्ब्बूरः, पुं, (कर्ब्बति गर्ब्बति हिनस्ति वा। कर्ब्ब + ऊरः।) शटी। इत्यमरः। २। ६। ६४॥ राक्षसः। इत्युणादिकोषः॥ द्राविड़कः। इति शब्दरत्नावली। काँचहल्दि इति भाषा॥

कर्ब्बूरकः, पुं, (कर्ब्बूर + स्वार्थे कन्।) हरिद्राभवृक्षः। काँचहल्दि इति ख्यातः। इति भरतः॥ काललहरिद्रा। इति सारसुन्दरी॥ कर्पूरहरिद्रा। इति सारमञ्जरी॥ काकवसन्तः। इति भगीरथः॥ काञ्चिला हरिद्रेति ख्याता। इति टीकासर्ब्बस्वम्॥ हरिद्राभकचोरा इति ख्याता। इति मधुमाधवी॥ तत्पर्य्यायः। द्राविड़कः २ काल्यकः ३ वेधमुख्यकः ४। इत्यमरः। २। ४। १९५॥ काल्यकः ५ इति टीका सर्ब्बस्वम्॥

कर्म्म, [न्] क्ली, (यत्क्रियते तत्। कृ + मनिन्। कर्त्तुः क्रियया यदाप्यते तदा क्रियाशाप्यं कर्म्मेति

कर्म्म

केचित्। तत्तु मतभेदेन त्रिधा चतुर्धेति विभक्तमुच्यते।) यट्कारकान्तर्गतकारकविशेषः। वोपदेवेनास्य ढ इति संज्ञा कृता। अत्र द्वितीया विभक्तिर्भवति। तस्मिन् उक्ते प्रथमा। तस्य लक्षणम्। "परसमवेतधात्वर्थजन्यफलशालित्वं कर्म्मत्वम्"। इति सारमञ्जरी॥ "यत्क्रियते तत्"। इति प्रतिज्ञम्। करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैर्यत् साध्यते तदित्यर्थः। अतएव "क्रियाव्याप्यं कर्म्म"। इति क्रमदीश्वरः। तच्चतुर्व्विधम् निर्व्वर्त्यम् १ यथा घटं करोति पुत्रं प्रसूते॥ विकार्य्यम् २ तच्च द्विविधम्। प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकञ्च। आद्यं यथा काष्ठं भस्म करोति। अन्त्यं यथा सुवर्णं कुण्डलं करोति। यथा चोक्तं भर्त्तृहरिणा।

"यदसव्व्यायते पूर्व्वं जन्मना यत् प्रकाश्यते।
तन्निर्व्वर्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूतं विकार्य्यं काष्ठभस्मवत्।
अन्यद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्"॥

प्राप्यम् ३ यथा ग्रामं गच्छति चन्द्रं पश्यतीत्यादि॥ अनीप्सितञ्च ४ यथा पापं त्यजति इत्यादि। इति कारके २ मुग्धबोधसूत्रस्य टीकायां दुर्गादासः॥ *॥

सप्तपदार्थान्तर्गतद्वितीयपदार्थः। तत्तु पञ्चविधम्। यथा,—भाषापरिच्छेदे ६, ७।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥
भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते"॥

कुसुमाञ्जलिमते यागहिंसादि॥ तत्तु त्रिविधम्। सात्त्विकम् १ राजसम् २ तामसम् ३।

सात्त्विकं यथा,

"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते"॥

राजसं यथा,—

"यत्तुकामेप्सुना कर्म्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्"॥

तामसं यथा,—

"अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते"॥

इति श्रीभगवद्गीता। १८। २३-२५॥

क्रमात् दशमलक्षम्। इति ज्योतिषम्॥ क्रिया। इत्यमरः। तच्च पञ्चविधम्। नित्यनैमित्तिककाम्यप्रायश्चित्तनिषिद्धभेदात्। तत्र आद्यानि चत्वारि धर्म्माणि। अन्त्यं अधर्म्माम्। तच्च जन्मभेदात् चतुर्व्विधम् सञ्चितं प्रारब्धं क्रियमाणं भावि च। इति वेदान्तमतम्॥ *॥

ब्राह्मणादीनां स्वाभाविककर्म्माणि यथा।

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजम्॥
शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रकर्म्म स्वभावजम्॥
कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजम्।

कर्म्मज

परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजम्"॥ *॥

स्वकर्म्माभिरतस्य फलं यथा।

"स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्म्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम्।
स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म्म कुर्व्वन्नाप्नोति किल्बिषम्॥
सहजं कर्म्म कौन्तेय सदोषमपि न त्यजेत्।
सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥
असक्तबुद्धिः सर्व्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति"॥

इति श्रीभगवद्गीतायाम्। १८। ४२-४९॥

कर्म्मकरः, त्रि, (कर्म्म करोति मूल्येन। डुकृञ् करणे + "कर्म्मणि भृतौ"। ३। २। २२। इति टः।) मूल्यं गृहीत्वा कर्म्मकारकः। मजुर ठिकाचाकर इत्यादि भाषा। तत्पर्य्यायः। भृतकः २ भृतिभुक् ३ वैतनिकः ४॥ वेतनोपजीवी। तत्पर्य्यायः॥ भरण्यभुक् २। इत्यमरः। ३। १। १९॥ कर्म्मण्यभुक् ३। इति तट्टीका॥ कर्म्मकर्त्तृमात्रञ्च॥ (यथा, मिताक्षरायां नारदः।

"शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेयाः"॥)

कर्म्मकरः, पुं, (कृञ् हिंसायां + मन्। कर्म्म हिंसां करोतीति। कृ + हेत्वादौ टः। यद्वा, जीवहतकर्म्माधिकृत्य करोति सुखदुःखयोर्व्यवस्थां निष्पादयति नरकस्वर्गादिव्यवस्थां करोति वा। धर्म्माधर्म्मात्मकं कर्म्म समीक्ष्य सर्व्वान् शास्तीत्यर्थः। कर्म्मफलानुसारेण पापात्मनां दण्डप्रदानरूपहिंसायामधिकारित्वात् अस्य तथात्वम्।) यमः। इति मेदिनी॥

कर्म्मकरी, स्त्री, (कर्म्म + कृ + टः। टित्त्वात् + ङीप्।) मूर्व्वा लता। बिम्बिका लता। इति मेदिनी॥ दासी। इति शब्दरत्नावली॥

(यथा भागवते ३। २३। २७।

"वयं कर्म्मकरीस्तुभ्यं शाधि नः करवाम किम्"॥)

कर्म्मकारः, पुं, (कर्म्म वेतनं गृहीत्वा लोहादिभिः खड्गकर्त्तरिकादिकं करोति निर्म्मातीति। कर्म्म + कृ + उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्।) वर्णसङ्करविशेषः। लौहकारः। कामार इति भाषा। स तु शूद्रायां विश्वकर्म्मणो जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ वृषः। इति शब्दचन्द्रिका॥

कर्म्मकारः, त्रि, (कर्म्म करोति भृतिमृते। कर्म्म + कृ + अण्।) वेतनं विना भारवहनादिकर्म्मकारकः। वेगार इति भाषा॥ तत्पर्य्यायः। कर्म्मक्रियः २। इत्यमरः। ३। १। १९॥

कर्म्मकीलकः, पुं, (कर्म्मणा कीलक इव वस्त्रक्षालनरज्जनादिना गृहस्थानां मानरक्षाकपाटकीलकस्वरूपः।) रजकः। इति त्रिकाण्डशेषः॥

कर्म्मजः, पुं, (कर्म्मणो जातः। विषयभोगवासनावशात् क्रमशः मलिनायमानो वृत्तिभिर्जात इत्यर्थः। जन + ड।) कलियुगः। इति शब्दरत्नावली॥

कर्म्मभू

वटवृक्षः। इति जटाधरः॥ क्रियाजन्ये त्रि। (यथा, मनुः। १२। १०१।

"तथा दहति वेदज्ञः कर्म्मजं दोषमात्मनः"॥

कारणभेदेन रोगभेदो यथा।

"बहुभिरुपचारैस्तु येन यान्ति समन्ततः।
ते कर्म्मजाः समुद्दिष्टा व्याधयो दारुणाः पुनः"॥

इति हारीते चिकित्सितस्थाने २ अध्यायः॥)

कर्म्मजगुणः, पुं, (कर्म्मणो जायते यो गुणः क्रियाहेतोर्जातो गुण इत्यर्थः।) क्रियाजन्यगुणः। तद्यथा।

"संयोगश्च विभागश्च वेगश्चेते तु कर्म्मजाः"॥

इति भाषापरिच्छेदे॥ ६७॥

कर्म्मठः, त्रि, (कर्म्मणि घटते इति। "कर्म्मणि घटोऽठच्"। ५। २। ३५। इति अठच्।) कर्म्मकुशलः। यथा। मट्टिः। १। ११।

"ज्ञातास्यस्तस्य ततो व्यतानीत्
स कर्म्मठः कर्म्मसुतानुबन्धम्"॥

प्रयत्नेन प्रारब्धं कर्म्म समापयति यः। तत्पर्य्यायः। कर्म्मशूरः २। इत्यमरः। ३। १। १८॥

कर्म्मण्यः, त्रि, (कर्म्मणि साधुः तत्र साधुरिति यत्। यद्वा कर्म्मणा सम्पादि।) कर्म्मयोग्यः। क्रियार्हः। कामुया इति भाषा। कर्म्मणा व्याप्तते इत्यर्थे यप्रत्ययः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, ऋग्वेदे १। ९१। २०। "सोमोवीरं कर्म्मण्यं ददाति"॥)

कर्म्मण्यभुक्, त्रि, (कर्म्मण्यं वेतनं भुङ्क्ते। भुज् + क्विप्।) भरण्यभुक्। वेतनोपजीवी। इत्यमरटीकायां स्वामी॥

कर्म्मण्या, स्त्री, (कर्म्मणा सम्पद्यते तत्र साधुरिति यत्। टाप् च।) वेतनम्। मूल्यम्। इत्यमरः। २। १०। ३८॥

कर्म्मन्दी, [न्] पुं, (कर्म्मन्देन भिक्षुसूत्रकारेण स्वनामख्यातऋषिविशेषेण प्रोक्तं भिक्षुसूत्रमधीते यः। कर्म्मन्द + इनिः।) भिक्षुः। सन्न्यासी। इत्यमरः। २। ७। ४२॥

कर्म्मफलं, क्ली, (कर्म्मणः जीवकृतशुभाशुभस्य शास्त्रविहितस्य निषिद्धस्य वा सुखदुःखादिरूपं फलं परिणाम इत्यर्थः।) कर्म्मविपाकः। (यथा, विष्णुपुराणे १। १९। ७१।

"समस्तकर्म्मभोक्ता च कर्म्मोपकरणानि च।
त्वमेव विष्णो! सर्व्वापि सर्व्वकर्म्मफलञ्च यत्"॥

तथा च मनुः। ११। २३१।

"एवं सञ्चिन्त्य मनसा प्रेत्य कर्म्मफलोदयम्"॥)

कर्म्मरङ्गफलम्। इति मेदिनी॥ कामरांगा इति भाषा॥

कर्म्मभूः, स्त्री, (कर्म्मणः कृषिकार्य्यस्य कर्म्मणि वा उचिता उपयोगिनी वा या भूः।) कृषभूमिः। तत्पर्य्यायः। कर्म्मान्तः २। इति हेमचन्द्रः॥ (आर्य्यावर्त्तदेशः। यथा, विष्णुपुराणम्।

"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा यतोऽन्या भोगभूमयः"॥)

कर्म्मभूमिः, स्त्री, (कर्म्मणः पुण्यात्मसम्पाद्यस्वर्गादिरूपक्रियायाः भूमिः।) आर्य्यावर्त्तदेशः। इति

हेमचन्द्रः ॥ (भारवर्षं यथा, विष्णुपुराणे २।३।१-२।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्" ॥
तथा च रामायणे २।१०९।२८। हेमा।
"कर्म्मभूमिमिमां प्राप्य कर्त्तव्यं कर्म्म यत् शुभम्"॥)

कर्म्ममूलं, क्ली, (कर्म्म यज्ञादिक्रियाजन्यं सत्कर्म्महेतुकं वा मूलं यस्य। कर्म्मणो मूल मिव मूलं यस्य वा।) कुशटङ्गम्। इति शब्दचन्द्रिका ॥

कर्म्मयुगं, क्ली, (क्रियाति हिनस्ति अन्योन्यं यत्र युगे तत् कर्म्म। क्त हिंसायां + मनिन्प्रत्ययः। कर्म्म हिंसाप्रधानं युगं इति कर्म्मधारयः। कलेः हिंसाप्रधानत्वात् तथात्वम्।) कलियुगम्। इति चिकाण्डशेषः ॥

कर्म्मयोगः, पुं, (कर्म्मसु योगस्तत्कौशलम्।) चित्तशुद्धिजनकवैदिककर्म्म। यथा। निष्कामकर्म्मणात्मज्ञानमित्युक्तं यथा।
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ॥
सोऽपि दुरितक्षयद्वारा न साक्षात्"। इति मलमासतत्त्वम् ॥ *॥ तदनुष्ठानस्यावश्यकत्वं यथा।
श्रीभगवानुवाच ॥
"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!।
ज्ञानयोगेन सांख्यानां कर्म्मयोगेण योगिनाम् ॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥
कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्জ্জुन!।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥
यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः।
तदर्थं कर्म्म कौन्तेय! मुक्तसङ्गः समाचर ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥
अन्नाद्भवन्ति भूतानि पर्জ্জन्यादन्नसम्भवः।
यज्ञाद्भवति पर्জ্জन्यो यज्ञः कर्म्मसमुद्भवः ॥
कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥
एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति ॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।

आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥
नैव तस्य कृते नार्थो नाकृतेनेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥
तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः ॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्त्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि ॥
यदि ह्यहं न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ! सर्व्वशः ॥
उत्सीदेयुरिमे लोका न कुर्य्यां कर्म्म चेदहम्।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः।
अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥
प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥
मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्व्वज्ञानविमूढ़ांस्तान् विद्धि नष्टानचेतसः ॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः"॥
इति श्रीभगवद्गीतायां कर्म्मयोगो नाम ३ अध्यायः ॥*॥ अन्यत् भगवन्मन्दिरादिकरणं वह्निपुराणे यमानुग्रासननामाध्याये द्रष्टव्यम् ॥

कर्म्मरङ्गः, पुं, क्ली, (कर्म्मणो हिंसाक्रियायै तत्फलभक्षणकारिणां रोगादिजननक्रियायै इत्यर्थः रज्यते पर्य्याप्यते। क्त हिंसायां इति धातोर्मनिन् प्रत्ययेन निष्पन्नत्वात् ततो कर्म्मन् + रञ्ज + घञ्।) फलवृक्षविशेषः। कामरङ्गा इति भाषा ॥ (यथा, रामायणे। ३।१७।८। गौ।
"सोमवल्लान् कर्म्मरङ्गान् प्रियालांश्चकचित् कचित्"॥)
तत्पर्य्यायः। शिरालः २ हृद्यदलः ३ दशाकरः ४। इति शब्दचन्द्रिका। कर्म्मारः ५ कर्म्मरकः ६ पीतफलः ७ कर्म्मरः ८ मुद्गरकः ९ मुद्गरः १० धरापलः ११ कर्म्मारकः १२। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातहारित्वम्। पित्तकारित्वञ्च। इति राजनिर्घण्टः ॥ तीक्ष्णत्वम्। कटुपाकित्वम्। अम्लपित्तकारित्वञ्च। इति राजवल्लभः ॥ तत्पक्वफलगुणाः। मधुराम्लत्वम्। बलपुष्टिरुचिप्रदत्वञ्च। इति राजनिर्घण्टः ॥
("कर्म्मरङ्गं हिमं ग्राहि स्वादम्लं कफवातहृत्"॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

कर्म्मरी, स्त्री, (कर्म्म भैषज्योपयोगक्रियां राति ददाति। रा + कः। ततो गौरादित्वात् ङीष्।) वंशरोचना। इति राजनिर्घण्टः। (वंशरोचनाशब्देऽस्या विस्तृतिर्ज्ञातव्या ॥)

कर्म्मवश्यः, पुं, (कर्म्म श्रौतस्मार्त्ताद्यनुष्ठानं तत्तच्छास्त्रादेरध्ययनमाचरणादिकं वा वश्यं वश्य तुल्यदृढ़ं यस्य। द्विजेतरजातेः श्रौतादिकर्म्मश्रुतिगोचराज्ञेयतादिहेतुकत्वात् वश्यवत् कठिनं प्रतिभातीति भावः।) शूद्रः। इति महाभारतम् ॥

कर्म्मवाटी, स्त्री, (कर्म्मणां शास्त्रोक्ततिथिनिमित्तीभूतक्रियाणां चन्द्रकलाक्रियाणां वा वाटीव। पुष्पवाटिका यथा पुष्पादेराधारस्तद्वदित्यर्थः। तिथीनां हि कर्म्मनिमित्ततया तथात्वम्।) तिथिः। इति हेमचन्द्रः ॥

कर्म्मविपाकः, पुं, (कर्म्मणः अधर्म्ममूलकस्य अशुभफलजनकस्येति यावत् विपाकः परिणामः। इह रोगादिभोगजनकदुःखमयपरिणामः। अमुत्र नरकभोगादिजनकदुःखमयपरिणामश्च।) अशुभकर्म्मजन्यफलस्य विपाकः। रोगादिरूपजन्मान्तरीयाशुभकर्म्मफलभोग इति यावत्। तद्विवरणं यथा,—
"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
पतितात् प्रतिगृह्याधावरयोनिं व्रजेद्बुधः ॥
नरकात् प्रतिमुक्तस्तु क्षमिर्भवति पातकः।
उपाध्यायस्य शीलन्तु ज्ञात्वा श्वा भवति द्विजः ॥
तल्पायां मनसा वाञ्छंस्तद्दग्धं वाप्यसंशयम्।
गर्दभो जायते जन्तुर्म्मित्रस्त्रैवार्षमाप्नुयात् ॥
मात्रादीतरमाक्रम्य शारिका संप्रजायते।
पितरौ पोड़यित्वा तु कच्छपत्वञ्च गच्छति ॥
भर्त्तुः पिण्डमुपाश्नन्तो हित्वान्यानि निषेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते क्षमिः।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः ॥
परदारांभिमर्षात्तु शुको घोरोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गे कोकिलो जायते नरः ॥
गुर्व्वादिभार्य्यागमनात् शूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् क्षमिः ॥
देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते।
प्रसुप्तो नरकाद्यापि वायसः स प्रजायते ॥
ज्येष्ठभ्रातरमानाद्य क्रौञ्चयोनौ प्रजायते।
शूद्रश्च ब्राह्मणीं गत्वा क्षमियोनौ प्रजायते ॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
क्षतघ्नः क्षमिकः कीटः पतङ्गो वृश्चिकस्तथा ॥
अश्वत्थं पुरुषं हत्वा नरः संजायते खरः।
क्षमिः क्षीरवधकर्त्ता च नापहन्ता च जायते।

भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
हत्वान्नमेव मार्ज्जारस्तिलहन्नेव मूषिकः ॥
घृतं हत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हत्वा नरो दंशः पूपं हत्वा पिपीलिकः ॥
अपो हत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
कार्पासिके हृते कौञ्चो वह्निहर्त्ता बकस्तथा ॥
मयूरो वर्णकं हत्वा शाकं पचस्य जायते ।
जीवञ्जीवकतां याति रत्नवस्त्रापहारकः ॥
कुकुन्दरिः सुधान् गन्धान् वंशं हत्वा शशो भवेत् ।
घण्टः कलापहरणे काकहृत् काकटीटकः ॥
पुष्पापहारिद्रस्तु पक्षुर्व्वापहारकः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
गृहक्षतरकान् गत्वा रौरवादीन् सुदारुणान् ।
दृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥
एष एव क्रमो दृष्टो गोसुवर्णादिहारिणां ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ।
असमिद्धेऽग्नौ हुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मविघातनम् ।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ।
निरूप्य वक्ष्यं नृणां कार्पण्यञ्च दृशां बुधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकादनु ॥
दयाभूतेषु सम्वादः परलोकं प्रतिक्रिया ।

सत्यं हितार्थता चोक्तिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं फलम्" ॥
इति गारुडे कर्म्मविपाकः २२९ अध्यायः ॥

ज्ञातातपभृगुभरतोक्तः पापरोगप्रायश्चित्तानां विवरणग्रन्थः । प्रायश्चित्तविहीनपापिनां नरकान्ते प्रतिजन्म तत्पापसूचितरोगयुक्तं शरीरं भवति । तद्यथा दुष्कर्म्मजा रोगा जपदेवार्चनहोमदानादिभिः शमं यान्ति ॥ महापातकजा रोगाः सप्तजन्मसु जायन्ते । तद्यथा—कुष्ठम् । राजयक्ष्मा । प्रमेहः । ग्रहणी । मूत्रकृच्छ्रम् । अर्शरी । कासः । अतीसारः । भगन्दरः । दुष्टव्रणः । गण्डमाला । पक्षाघातः । अश्मरीरोगम् । इत्यादयः । अत्र सम्पूर्णं प्रायश्चित्तम् ॥ उपपापोद्भवा रोगाः षड्जन्मसु जायन्ते । तद्यथाः—जोलदरम् । यक्ष्मा । प्लीहा । शूलम् । व्रणः । श्वासः । जीर्णज्वरः । हृद्रोगः । भ्रमः । मोहः । गलग्रहः । रक्तार्ब्बुदम् । विसर्पः । इत्यादयः । अत्र अर्द्धं प्रायश्चित्तम् ॥

पापसमुद्भवा रोगाः त्रिषु जन्मसु जायन्ते । तद्यथाः—दण्डापतानकः । चित्रवपुः । कम्पः । विचर्चिका । वल्मीकः । पुण्डरीकम् । इत्यादयः । अत्र षडांशं प्रायश्चित्तम् ॥ अतिपापात् अर्शं आद्याः रोगा भवन्ति अन्ये बहुधा रोगसङ्कराश्च ॥ अथ दानादिषु साधारणविधिः । गोदाने सुशीला सवत्सा पयस्विनी गौः । वृषदाने शुक्लवस्त्रकाञ्चनसहितः सुधोऽनड्वान् । भूदाने दशनिवर्त्तनपरिमिता भूः । सुवर्णदाने घृतनिष्कं स्वर्णं तदर्द्धार्द्धं वा । अश्वदाने उपस्करसहितसुशीलाश्वः । महिषदाने स्वर्णायुधयुक्तमहिषी । गजमहादाने सुवर्णघण्टासहितगजः । देवार्च्चने लक्षोद्भवपुष्पदानम् । ब्राह्मणभोजने सहस्रद्विजेभ्यो मिष्टान्नदानम् । रुद्रजपे लक्षसङ्ख्यकपुष्पकरवीरकृष्णकपूजनानन्तरं एकादशरुद्रजपः तद्दशांशघृतगुग्गुलहोमः वरुणमन्त्रैरभिषेचनञ्च । धान्यदाने यष्टिसङ्ख्यकखारी परिमितधान्यम् । वस्त्रदाने कर्पूरमिश्रितण्डवस्त्रद्वयम् ॥ *॥

अथ प्रायश्चित्तग्रहणानुष्ठानादि । दश पञ्चाश्चतुरो वा ब्राह्मणानुपवेश्य तेषामनुज्ञया प्रायश्चित्तमुपक्रम्य विष्णुं सम्पूज्य निजकाम्यया सङ्कल्प्य द्विजेभ्यो धेनुं शक्तितो दक्षिणाञ्च दत्त्वा तान् वस्त्रालङ्कारैरलङ्कृत्य दण्डप्रमाणेन प्रायश्चित्तं याचेत । तेषामनुज्ञया प्रायश्चित्तं यथाविधि कृत्वा परिपूर्णार्थान् तान् यथाविधि अर्चयित्वा तेभ्योऽनुज्ञामाशिषञ्च प्रतिगृह्य ब्राह्मणान् भोजयित्वा बन्धुभिः सह भोक्तव्यम् । इति ज्ञातातपीयकर्म्मविपाकप्रथमाध्यायविवरणम् ॥* जन्मान्तरीयमहापातकशेषचिह्नकुनखादिरोगाणां प्रायश्चित्तं पराकव्रतं महापातकादतिपातकस्य गुरुत्वात्तच्छेषजन्यगलत्कुष्ठरोगस्य प्रायश्चित्तं द्विगुणम् । इति स्मार्त्ताः ॥*॥

अथ ज्ञातातपोक्तहिंसास्तेयाऽगम्यागमनाऽगतिप्रायश्चित्तानि क्रमेण लिख्यन्ते ॥

पापी	रोगी	प्रायश्चित्तम्
१ अजाघाती	१ अधिकाङ्गः	१ विचित्रवस्त्रयुक्तां अजां दद्यात् ॥
२ अश्वहन्ता	२ वक्रतुण्डः	२ घृतपलानि चन्दनानि दद्यात् ॥
३ उरभ्रघाती	३ पाण्डुरोगी	३ ब्राह्मणाय पलपरिमितकस्तूरिकां दद्यात् ॥
४ उष्ट्रहन्ता	४ विकृतस्वरः	४ कर्पूरकं पलं दद्यात् ॥
५ काकघाती	५ कर्णहीनः	५ छण्णां गां दद्यात् ॥
६ कारुहन्ता	६ रूक्षः	६ शुक्लवर्णवृषभं दद्यात् ॥
७ खरहन्ता	७ खररोमा	७ छणगुल्मिवत् प्रायश्चित्तं कुर्य्यात् ॥
८ गजघाती	८ सर्व्वकार्य्येष्वसिद्धार्थः ...	८ प्रासादं कारयित्वा गणेशप्रतिमां स्थापयेत् अथवा कृतप्रासादैः पूपैश्च गणशान्तिपूर्व्वकं लक्षसंख्यकगणेशमन्त्रं जपेत् ॥
९ गोघ्नहा	९ कुष्ठी निर्व्वंशश्च	९ घृतप्राजापत्यव्रतञ्चरित्वा ब्राह्मणाय भूमिं दक्षिणां दत्त्वा भारतं शृणुयात् ॥
१० गोवधी	१० कुष्ठी	१० पञ्चपल्लवसंयुक्तपञ्चवर्णसमन्वितरक्तचन्दनलिप्ताङ्गरक्तपुष्पाम्बरान्वितैकरक्तकुम्भं दक्षिणस्यां दिशि संस्थाप्य तत्र तिलचूर्णपूरिततास्रपात्रं विन्यस्य तदुपरि निष्कमितसुवर्णनिर्म्मितयमदेवं पुरुषसूक्तमन्त्रेण संपूज्य पापं मे शाम्यतामिति प्रार्थयेत् । ततः सामविद् ब्राह्मणस्तत्र कलसे सामपारायणं कुर्य्यात् । ततो दशांशं सर्व्वं दत्त्वा पात्रमाल्याभिषेचनं कुर्य्यात् । ततो "यमोऽपि महिषारूढो दण्डपाणिर्भयानकः । दक्षिणाशापतिर्देवो मम पापं व्यपोहतु" ॥ इति मन्त्रेण यजमानो यमं विसृज्य तं आचार्य्याय निवेद्य सद्दक्षिणामाचरेत् ।
११ तरुहन्ता	११ केकरेक्षणः	११ गुल्ममयीं धेनुं दद्यात् ॥

पापी	रोगी—	प्रायश्चित्तम्
१२ पिटहा	१२ चेतनाहीनः	१२ त्रिंशत् प्राजापत्यानि कृत्वा पलपरिमितां सुवर्णनावं कारयित्वा ताम्रपात्रे रूप्यमयं ऊर्ध्वं स्थापयित्वा निष्कपरिमितसुवर्णनिर्म्मितं विष्णुं पट्टवस्त्रेण संवेष्य विधानतः पूजयेत्। तत् सर्व्वं ब्राह्मणाय दत्त्वा ब्राह्मणं विसर्जयेत्। अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात्॥
१३ बालघाती	१३ मृतवत्सः	१३ ब्राह्मणोद्वाहनं यथाविधि हरिवंशश्रवणञ्च कुर्य्यात्। महाब्रह्मयज्ञान् कारयेत्। तद्ब्राह्मणेन अयुतसंख्यकदूर्व्वया च हुत्वा दक्षिणासहितनिष्कपरिमितैकादशसुवर्णानि द्विजानुसारतः एकादशपलानि च दद्यात्। अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात्। तत आचार्य्यो वरुणदैवतमन्त्रैर्दम्पतीः स्नापयेत्। यजमान आचार्य्याय वस्त्राभरणानि दद्यात्॥
१४ ब्रह्महा	१४ पाण्डुकुष्ठी	१४ यजमानश्चतुर्दिक्षु पञ्चपल्लवपञ्चवर्णसंयुक्तचतुरः कलसान् संस्थाप्य तन्मध्ये कुम्भोपरि रौप्यमयदलपद्मं विन्यस्य तदुपरि पलार्द्धार्द्धपरिमितसुवर्णनिर्म्मितदशहस्तं चतुर्म्मुखदेवं संन्यस्य प्रत्यहं त्रिकालं पुरुषसूक्तेन पूजयेत्। ततः पूर्व्वादिकुम्भेषु ब्रह्मचारिणो ब्राह्मणाः ऋग्वेदप्रभृतीन् स्वस्ववेदान् मूलैः पठेयुः। ततो मध्यकुम्भे तिलाक्तघृतहोमैरभिर्यइशान्तिपुरःसरं दशांशेन होमं कुर्य्यात्। ततो ब्राह्मणो द्वादशाहेनेदं कर्म्म समाप्य तत्र पीठे यथाविधि यजमानमभिषिञ्चेत्। ततो यजमानो ब्राह्मणेभ्यो यथाशक्ति गोभूहेमतिलोदकानि दत्त्वा कुम्भादीन् आचार्य्याय निवेदयेत्॥
१५ मातृहा	१५ मूकः	१५ चान्द्रायणव्रतं चरित्वा "सरस्वति जगन्मातः शब्दब्रह्मादिदेवते। दुष्कर्म्मकरणात् पापात् पाहि मां परमेश्वरि"॥ इमं मन्त्रमुच्चार्य्य पलपरिमितसुवर्णसहितपुस्तकं ब्राह्मणाय दत्त्वा तं ब्राह्मणं विसर्ज्जयेत्।
१६ महिषीघाती	१६ ह्यग्रगुल्मी	१६ निष्कत्रयपरिमितस्वर्णमयीं प्रकृतिं दद्यात्॥
१७ मातृहा	१७ अन्धः	१७ पितृहवत् प्रायश्चित्तं कुर्य्यात्॥
१८ मार्जारहा	१८ पीतपायिः	१८ निष्कमितस्वर्णनिर्म्मितं पारावतं दद्यात्॥
१९ राजहा	१९ क्षयरोगी	१९ गोभूहिरण्यमिष्टान्नजलवस्त्राणि घृतधेनुं तिलधेनुञ्च दद्यात्॥
२० वकघाती	२० दीर्घनसः	२० शुक्लां गां दद्यात्॥
२१ वैश्यहन्ता	२१ रक्तार्बुदी	२१ चत्वारि प्राजापत्यव्रतानि चरित्वा सप्तधान्यानि उत्सृजेत्॥
२२ शुकसारिकाघाती... ...	३२ स्खलितवाक्	२२ ब्राह्मणाय सदक्षिणं सच्छास्त्रपुस्तकं दद्यात्॥
२३ शूकरहन्ता...	२३ दन्तुरः	२३ सदक्षिणं घृतकुम्भं दद्यात्॥
२४ शूद्रहन्ता	२४ दण्डापतानकः	२४ एकं प्राजापत्यव्रतञ्चरित्वा सदक्षिणैकधेनुं दद्यात्॥
२५ सृगालहा	२५ विषादकः	२५ खञ्जवत् प्रायश्चित्तं कुर्य्यात्॥
२६ स्त्रीहन्ता	२६ अतिसारी	२६ दशाश्वत्थरुक्षान् रोपयेत् घृतधेनुं दद्यात् शतं ब्राह्मणांश्च भोजयेत्॥
२७ हरिणघाती...	२७ खञ्जः	२७ पलपरिमितसुवर्णाश्वं दद्यात्॥ * ॥ "हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता। तदर्द्धार्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात्"॥ इति श्रातातपोक्तकर्म्मविपाकद्वितीयाध्यायहिंसाप्रायश्चित्तविवरणम्॥ * ॥
१ अभक्ष्यभोक्ता	१ कृमिकोदरः	१ भीमपञ्चकोपवास कुर्य्यात्॥
२ असृग्दृक्स्पृष्टान्नभोक्ता ...	२ कृमिकोदरः	२ त्रिरात्रमुपवसेत्॥
३ गर्भपातकर्त्ता	३ यक्ष्मक्षीहजलोदररोगी ...	३ पलत्रयपरिमितसुवर्णरूप्यताम्रान्वितजलधेनुदानं कुर्य्यात्॥
४ दावाग्निदः	४ रक्तातिसारी	४ उदपानं वटवृक्षरोपणञ्च कुर्य्यात्॥
५ दुष्टवाग्मी	५ खण्डितः	५ दुग्धसमन्वितघटद्वयं पलद्वयपरिमितरूप्यञ्च द्विजातये दद्यात्॥
६ द्रव्ये सति कदन्नदः... ...	६ मन्दोदराग्निः	६ प्राजापत्यत्रयं कृत्वा शतं द्विजान् भोजयेत्॥
७ धूर्त्तः...	७ अपस्मारी	७ ब्रह्मकूर्च्चमयीं धेनुं दत्त्वा सदक्षिणां गां दद्यात्॥
८ परनिन्दावान्	८ खल्लीटः	८ काञ्चनसहित धेनुं दद्यात्॥
९ परान्नविघ्नकर्त्ता	९ अजीर्णी	९ यथाविधि लक्षहोमं कुर्य्यात्॥
१० परोपतापी	१० शूली	१० अन्नदानं यज्ञयज्ञञ्च प्रकुर्व्वीत॥
११ परोपहासकृत्	११ काणः	११ सकाञ्चनां गां दद्यात्॥
१२ मिथुनः	१२ श्वासकासी	१२ सहस्रपलसम्मितं घृतं दद्यात्॥

पापी	रोगी	प्रायश्चित्तम्
१३ प्रतिमाभङ्गकारी	१३ अप्रतिष्ठः	१३ वत्सरत्रयपर्य्यन्तं प्रतिदिनं अश्वत्थसेचनानन्तरं शास्त्रोक्तविधिना समां गम्यामुद्वाहयेत् सुपूजितं विप्रराजञ्च संस्थापयेत् ॥
१४ मद्यपः	१४ रक्तपित्ती	१४ सर्पिषो घटं सहिरण्यं मधुनोऽर्द्धघटञ्च दद्यात् ॥
१५ मार्गहा	१५ पादरोगी	१५ अश्वं दद्यात् ॥
१६ रजस्वलादृष्टान्नभोक्ता ...	१६ कृमिलोदरः	१६ चिरात्रं गोमूत्रयावकं भुञ्जीत ॥
१७ विघदः	१७ कृर्द्दिरोगी	१७ दश पयस्विनीर्गा दद्यात् ॥
१८ सभायां पक्षपाती	१८ पक्षघातवान्	१८ सत्यवर्त्तिने निष्कत्रयपरिमितं हेम दद्यात् ॥
१९ सुरापः	१९ श्यावदन्तः	१९ प्राजापत्यव्रतञ्चरित्वा सप्ततुलापरिमितशर्करां दत्त्वा महारुद्रं जप्त्वा तद्दशांशं तिलैर्जुहुयात् वरुणदैवतमन्त्रैरभिषेकं कुर्य्यात् ॥
२० सुरालये जले वा मूत्रोच्चारकारी ...	२० गुदरोगी	२० मासं व्याप्य सुरार्चनं गोद्वयदानं प्राजापत्यमेकञ्च कुर्य्यात् ॥ * ॥ इति शातातपोक्तकर्म्मविपाकाष्टतीयाध्यायप्रकीर्णप्रायश्चित्तविवरणम् ॥ * ॥
१ अगम्याभिगामी	१ ध्रुवमण्डली	१ कार्पासभारकांस्यदोहसंयुक्तसवत्सकतिलषष्टिमितहेमधेनुं "सुरभी वैष्णवी माता मम पापं व्यपोहतु" इमं मन्त्रमुच्चार्य्य दद्यात् ॥
२ अश्वयोनिगामी	२ गुदभ्रंशी	२ मासं व्याप्य प्रतिदिनं सहस्रसङ्ख्यकमलकरवकशिरःस्नानं कुर्य्यात्। स्त्रीणामपि तत्तत्पुरुषसंसर्गात्तत्तत्प्रायश्चित्तम् ॥
३ आमान्नहारी	३ हीनदीप्तिः	३ निष्कद्वयस्वर्णनिर्म्मिताश्विनीकुमारौ दद्यात् ॥
४ इक्षोर्विकारहारी... ...	४ उदरगुल्मवान्	४ गुडधेनुं प्रदद्यात् ॥
५ ऊर्णाहारी	५ लोमशः	५ कम्बलान्वितनिष्कमितस्वर्णनिर्म्मितवह्निमूर्तिं अर्चयित्वा ब्राह्मणाय दद्यात् ॥
६ औषधापहर्त्ता	६ सूर्य्यावर्त्तरोगी	६ मासं व्याप्य सूर्य्यार्घ्यं काञ्चनञ्च दद्यात् ॥
७ कन्दमूलहारी	७ रूक्षपाणिः	७ यथाशक्ति देवगृहं उद्यानञ्च कुर्य्यात् ॥
८ कांस्यहारी	८ पुण्डरीकसमन्वितः ...	८ ब्राह्मणमलङ्कृत्य तस्मै घृतपलं कांस्यं दद्यात् ॥
९ गुरुजायाभिगामी... ...	९ मूत्रकृच्छ्री	९ नीलमाल्यादिभूषितनीलवस्त्राच्छन्नघटं पश्चिमस्यां दिशि संस्थाप्य तदुपरि ताम्रपात्रे षड्गुणिष्कस्वर्णनिर्म्मितवरुणं पुरुषसूक्तेन यजेत। सामवेदी ब्राह्मणस्तच्च सामवेदमाचरेत् विंशतिनिष्कमितसुवर्णपुत्तलिकां निष्पापोऽहमित्युच्चार्य्य ब्राह्मणाय दद्यात्। "यादसामधिपो देवो विश्वेषामधिपो वरः। संसारनौकर्णधारो वरुणः पावनोऽस्तु मे" ॥ इति मन्त्रेण आचार्य्याय स्वर्णवरुणं दद्यात् ॥
१० चाण्डालीगामी	१० हीनमुष्कः	१० मातृगामिवत् प्रायश्चित्तं कुर्य्यात् ॥
११ तपस्विनीप्रसङ्गी	११ प्रमेहगदी	११ मासं व्याप्य रुद्रं जपेत् यथाशक्ति काञ्चनञ्च दद्यात् ॥
१२ तपस्विनीसङ्गमी	१२ अश्मरीगदी	१२ मधुधेनुं हिरण्यसहितघृतद्रोणपरिमिततिलञ्च दद्यात् ॥
१३ ताम्बूलहारी...	१३ श्वेतौष्ठः	१३ सदक्षिणोत्तमविद्रुमहयं दद्यात् ॥
१४ ताम्रचौरः	१४ औडुम्बरी	१४ प्राजापत्यव्रतं घृतपलपरिमिततास्रदानञ्च कुर्य्यात् ॥
१५ तैलचौरः	१५ कण्डूादिपीड़ितः	१५ उपोष्य विप्राय तैलघटद्वयं दद्यात् ॥
१६ चक्षुहारी	१६ नेत्ररोगवान्	१६ उपोष्य विधिवद्घृतधेनुं दद्यात् ॥
१७ दधिचौरः	१७ मदवान्	१७ विप्राय दधिधेनुं दद्यात् ॥
१८ दारहारी	१८ खिन्नपाणिः	१८ विदुषे पलद्वयपरिमितकुङ्कुमं दद्यात् ॥
१९ दीक्षितस्त्रीप्रसङ्गी... ...	१९ दुष्टरक्तदृक्रोगी	१९ प्राजापत्यद्वयं कुर्य्यात् ॥
२० दुग्धहारी	२० बभ्रुमूत्रकः	२० ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात् ॥
२१ देवहारी	२१ विविधज्वरी	२१ तत्र ज्वरे कर्णे रुद्रं जपेत् महाज्वरे महारुद्रं रौद्रज्वरे अतिरौद्रं वैष्णवज्वरे महारुद्रातिरौद्रौ च जपेत् ॥
२२ नानाविधद्रव्यचौरः ...	२२ ग्रहणीयुक्तः	२२ शक्त्यनुसारेणाम्बोदकवस्त्राणि हेम च दद्यात् ॥
२३ पक्वान्नहारी	२३ जिह्वारोगी	२३ लक्षसंख्यकगायत्रीं जपेत् तिलकरवकं तद्दशांशहोमञ्च कुर्य्यात् ॥
२४ पट्टसूत्रहर्त्ता	२४ विलोमा	२४ धेनुं दद्यात् ॥
२५ पशुयोनिगमी	२५ मूत्राघाती...	२५ तिलपात्रद्वयं दद्यात् ॥
२६ पिठ्यस्त्रगन्ता	२६ दक्षिणांशभ्रंशी	२६ शक्तितः अजां दद्यात् ॥
२७ पुत्रजायाभिगामी	२७ क्षयकुष्ठी	२७ खसुतागमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरवकदशांशहोमञ्च कुर्य्यात् ॥

पापी	रोगी	प्रायश्चित्तम्
२८ फलहारी	२८ व्रणिताङ्गुलिः	२८ द्विजातये अयुतसंख्यकनानाफलं दद्यात् ॥
२९ भाट्टजायाभिगामी ...	२९ गुल्मकुष्ठी	२९ स्वसुतागमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरणकदशांशहोमञ्च कुर्य्यात् ॥
३० मधुचौरः	३० नेत्ररोगवान्	३० उपवासं कृत्वा मधुधेनुं दद्यात् ॥
३१ मातुलानीगन्ता	३१ एठकुब्जः	३१ कृष्णाजिनं प्रदद्यात् ॥
३२ भाट्टगामी	३२ लिङ्गहीनः	३२ उत्तरतः कृष्णमाल्यादिभूषितकृष्णवस्त्रसमाच्छन्नकुम्भं विन्यस्य तदुपरि कांस्यपात्रे निष्कषट्कमितसुवर्णनिर्म्मितनरवाहनकुबेरं पुरुषसूक्तेन यजेत् । अथर्व्ववेदविद्ब्राह्मणस्तत्र अथर्व्वोक्तकर्म्म कुर्य्यात् । ब्राह्मणाय विंशतिनिष्कपरिमितसुवर्णनिर्म्मितपुत्रिकां निष्पापोऽहमिति ब्रुवन् दद्यात् । "निधीनामधिपो देवः शङ्करस्य प्रियः सखा । सौम्याग्राधिपतिः श्रीमान् मम पापं व्यपोहतु" ॥ इति मन्त्रेण तं कुबेरं आचार्य्याय दद्यात् ॥
३३ भाट्टस्वस्रगन्ता	३३ नानाङ्गे व्रणवान्	३३ दासदानं अगम्यागमनप्रायश्चित्तञ्च कुर्य्यात् ॥
३४ मृतभार्य्याभिगामी... ...	३४ मृतभार्य्यः	३४ एकब्राह्मणं विवाहयेत् ॥
३५ रक्तवस्त्रप्रवालहारी ...	३५ रक्तवातवान्	३५ मणिरागसमन्वितां सवत्सां महिषीं दद्यात् ॥
३६ लौहहारी	३६ कर्व्वूराङ्गः	३६ एकदिनमुपोष्य घृतपललौहं दद्यात् ॥
३७ वस्त्रहारी	३७ कुष्ठी...	३७ निष्कमितहेमनिर्म्मितप्रजापतिं वस्त्रयुग्मञ्च दद्यात् ॥
३८ विद्यापुस्तकहारी... ...	३८ मूकः	३८ ब्राह्मणाय सदक्षिणं न्यायेतिहासं दद्यात् ॥
३९ विप्ररत्नापहारी	३९ अनपत्यः	३९ महारुद्रजपादिकं कुर्य्यात् तद्दशांशघृतलाक्षसमिद्भिर्यथाविधि जुहुयात् मृतवत्सोक्तसर्व्वकर्म्म च कुर्य्यात् ॥
४० विप्रहेमहृत्	४० कुलघ्नः	४० चान्द्रायणव्रतानन्तरं सुवर्णघृतं दद्यात् ॥
४१ शाकहारी	४१ नीललोचनः	४१ ब्राह्मणाय महानीलमणिद्वयं दद्यात् ॥
४२ शुक्तिहारी	४२ पाण्डुमूर्द्धजः	४२ उपवासानन्तरं पलघृतशुक्तिं दद्यात् ॥
४३ सौगन्धिकहारी	४३ दुर्गन्धाङ्गः	४३ अग्नौ लक्षसंख्यकपद्मैर्होमं कुर्य्यात् ॥
४४ खगोवस्त्रीप्रसङ्गी... ...	४४ भगन्दररोगी	४४ महिषीं दद्यात् ॥
४५ स्वजातिस्त्रीगामी	४५ हृदयव्रणी	४५ प्राजापत्यद्वयं कुर्य्यात् ॥
४६ स्वसुतागामी	४६ रक्तकुष्ठी	४६ पूर्ब्ववत् पीतमाल्यादिभूषितपीतवस्त्रसमाच्छन्नकलसं संस्थाप्य तस्योपरि स्वर्णपात्रं निष्कषट्कमितसुवर्णनिर्म्मितवासवं पुरुषसूक्तेन यजेत् । तत्र ऋग्यजुःसामानि समाचरेत् ब्राह्मणं सम्पूज्य निष्पापोऽहमिति ब्रुवन् तस्मै घृतसुवर्णनिर्म्मितपुत्रिकां दद्यात् । "देवानामधिपो देवो वज्री विष्णुनिकेतनः । घृतयज्ञः सहस्राक्षः पापं मम निकृन्ततु" ॥ इति मन्त्रं पठेत् ॥*॥

इति श्रीतातपीयकर्म्मविपाके चतुर्थाध्यायोक्तस्यैप्रायश्चित्तस्य तथा पञ्चमाध्यायोक्तागम्यागमनप्रायश्चित्तस्य च विवरणम् ॥*॥

पापयुक्तः—	मरणविशेषविशिष्टः—	और्द्धदेहिकपूर्ब्वकालीनतत्पुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१ अनध्यायेऽध्ययनकर्त्ता ...	१ विद्युदाहृतः	१ विद्यादानं कुर्य्यात् ॥
२ अस्पृश्री	२ अस्पृश्यसङ्गी मृतः... ...	२ वेदपारायणं कुर्य्यात् ॥
३ करवृत्तिः	३ उल्कहृतः उपहृतः ...	३ यथाशक्ति काञ्चनं दद्यात् ॥
४ कुमतिप्रदः	४ विषहृतः	४ क्षेत्रसंयुतां मेदिनीं दद्यात् ॥
५ कुमारीगन्ता	५ व्याघ्रादिहृतः	५ परकन्यां विवाहयेत् ॥
६ क्षत्रवासाः निक्षन्तनश्च ...	६ क्षुमिहृतः	६ द्विजाय गोधूमान्नं दद्यात् ॥
७ क्रतुनिन्दकः श्रुतिनिन्दकोऽपि पाठः ...	७ शस्त्रहृतः	७ सदक्षिणां महिषीं दद्यात् ॥
८ गुरुघाती	८ शय्यामृतः	८ निष्कमितसुवर्णनिर्म्मितपात्रस्थितविष्वधिष्ठिततूलीसमन्वितशय्यां दद्यात् ॥
९ दक्षिणाचौरः	९ दवहृतः दारुहृतः ...	९ सदने सभां कुर्य्यात् ॥
१० दोही	१० संस्कारहीनमृतः	१० कुमारं विवाहयेत् ॥
११ द्विजनिन्दाकर्त्ता	११ प्रस्तरहृतः	११ सवत्सां पयस्विनीं गां दद्यात् ॥
१२ द्विजवस्त्रहृत्	१२ अनपत्यमृतः	१२ नवतिं लक्षाणि चरेत् ॥

पापयुक्तः—	मरणविशेषविशिष्टः—	और्द्ध्वदेहिकपूर्व्वकालीनपुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१३ निक्षेपहारकः	१३ कुक्कुरहतः	१३ अत्र प्रायश्चित्तस्यानुक्तत्वात् व्याघ्रादिहत इत्यत्रादिपददर्शनाच्च तत्रोक्तप्रायश्चित्तं युक्तम् ॥
१४ न्यासापहारकः	१४ गजहतः	१४ चतुर्निष्कमितहेमगजं दद्यात् ॥
१५ पशुहिंसकः	१५ चौरहतः	१५ धेनुं दद्यात् ॥
१६ पाखिकः	१६ अरण्ये शूकरहतः ...	१६ कुक्कुरहतवत् ॥
१७ मत्सरी	१७ शौचहीनमृतः	१७ द्विनिष्कस्वर्णजहरिं दद्यात् ॥
१८ मद्यविक्रेता...	१८ पतितमृतः...	१८ षोड़शप्राजापत्यानि कुर्य्यात् ॥
१९ मित्रभेदी	१९ वैरिहतः	१९ वृषं दद्यात् ॥
२० मेदिनीचौरः	२० भृगुपातहतः	२० धान्यपर्व्वतं दद्यात् ॥
२१ यज्ञहानिकर्त्ता	२१ वह्निहतः	२१ स्वशक्तित उपानहं दद्यात् ॥
२२ राजकुमारघ्नः	२२ राजहतः	२२ हिरण्मयपुरुषं दद्यात् ॥
२३ राजदन्तिहृत्	२३ वृक्षहतः	२३ स्वर्णसंयुतं सौवर्णवृक्षं दद्यात् ॥
२४ वीरहृत्	२४ अतीसारमृतः	२४ संयतो लक्षसङ्ख्यकगायत्रीं जपेत् ॥
२५ विषदः	२५ सर्पदष्टः	२५ नागबलिदानं काञ्चनदानञ्च कुर्य्यात् ॥
२६ शूद्रस्त्रीहृत्	२६ गृहक्षिप्तः	२६ वस्त्रसंयुक्तवृषभं दद्यात् ॥
२७ शास्त्रहृत्	२७ वान्तमाश्रित्य मृतः-असच्छास्त्रसर्गनमृतश्च ...	२७ सच्छास्त्रपुस्तकं दद्यात् ॥
२८ सूचकः	२८ शकटहतः...	२८ उपस्करान्वितं अश्वं दद्यात् ॥
२९ सेतुभेदी	२९ जलहतः	२९ निष्कत्रयमितस्वर्णवृषभं दद्यात् ॥
३० स्वदर्पकार्य्यकारकः... ...	३० साकिन्यादिहतः	३० यथोचितं रुद्रं जपेत् ॥
३१ हिंस्रः	३१ उद्बन्धनमृतः	३१ पयस्विनीं गां दद्यात् ॥
	३२ हयाहतः	३२ निष्कत्रयमितं स्वर्णं दद्यात् ॥
	३३ कपिहतः	३३ कनकनिर्म्मितकपिं दद्यात् ॥
	३४ विसूचिकामृतः	३४ घृतं द्विजान् भोजयेत् ॥
	३५ कण्ठकबलमृतः	३५ तिलधेनुं दद्यात् ॥
	३६ केशरोगमृतः	३६ अष्टौ छत्रान् समाचरेत् ॥ * ॥
		इति ज्ञातातीयकर्म्मविपाके अगतीनां विशेषप्रायश्चित्तम् ॥ * ॥

अगतीनां साधारणप्रायश्चित्तम् ।

सपलसप्तधान्योपरि पञ्चपल्लवसर्व्वौषधिसंयुक्तं क्षौमवस्त्रसमाच्छन्नमकालमृतं कलसं संस्थाप्य तत्र महिषासनसंस्थितं चतुर्भुजं दण्डहस्तं स्वर्णकुण्डलसंयुतं निष्कपरिमितं प्रेतरूपिणं पुरुषं संस्थाप्य पूजयेत् । प्रत्यृचं पुरुषसूक्तेन दुग्धेन तर्पयेत् तत्र कलसे षड़ङ्गवृतं जपेत् । यमसूक्तेन यमपूजादिकं आत्मविशुद्ध्यर्थं गायत्रीजपं ग्रहशान्तिपूर्व्वकदशांशप्रतिकहोमञ्च कुर्य्यात् । अज्ञातगोत्रविप्राय सतिलमुदकं दद्यात् ।

"इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् ।
ददामि तवैे प्रेताय यः पीड़ां कुरुते मम" ॥

इति मन्त्रेण मधुघृतायुक्तप्रस्थमितकृष्णतिलपिण्डपिण्डं प्रेतरूपाय दद्यात् । यजमानः प्रेतमुद्दिश्य तिलपात्रसंयुतान् द्वादशकृष्णकलसान् विष्णुमुद्दिश्यैकं कलसञ्च दद्यात् । वरायुधधरः शुचिराचार्य्यः वरुणदेवतमन्त्रैः कलसोदकैर्दम्पती अभिषिञ्चेत् । ततो यजमान आचार्य्याय दक्षिणां दद्यात् नारायणबलिञ्च कुर्य्यात् ॥ * ॥

"एवं कृते विधानेन प्रकुर्य्यादौर्द्ध्वदेहिकम् ।
ततः प्रेतत्वनिर्म्मुक्ताः पावितास्तर्पितास्तथा ॥
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः" ॥

इति ज्ञातातीयकर्म्मविपाकषष्ठाध्यायोक्तागतिप्रायश्चित्तविवरणम् ॥ * ॥

(मार्कण्डेयोक्ताः कर्मविपाकाश्च । यथा, तत्रैव १५ अध्याये उक्ताः ।

"पतितात् प्रतिगृह्यार्थं खरयोनिं व्रजेद्द्विजः ।
नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः ॥
उपाध्यायस्यलीकन्तु कृत्वा श्वा भवति द्विजः ।
तल्पायां मनसा वाक्ष्य तद्द्रव्य चाप्यसंशयम् ॥
गर्द्दभो जायते जन्तुः पित्रोश्चाप्यवमानकः ।
मातापितरावाक्रुश्य शारिका सम्प्रजायते ॥
भ्रातुः पत्नीवमन्ता च कपोतत्वं प्रपद्यते ।
तामेव पीड़यित्वा तु कङ्कत्वं प्रपद्यते ॥
भर्त्तृपिण्डमुपाश्नन् यस्तदिष्टं न निषेवते ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः ।
असूयकश्च नरकात् मुक्तो भवति राक्षसः ॥
विश्वासहन्ता च नरो मीनयोनौ प्रजायते ।
धान्यं यवांस्तिलान्माषान् कुलत्थान् सर्षपांस्तथा ॥
कलायान् कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्यान्यन्यानि वा हृत्वा मोहाच्छन्तुरचेतनः ॥
सञ्जायते महावल्गो मूषिको वभ्रुसन्निभः ।
परदारानिमर्षात्तु वको घोरोऽभिजायते ॥
श्वा गृहगोवको गृध्रो व्याड़ः काङ्क्षस्तथाक्रमात् ।
भ्रातृभार्य्याञ्च दुर्बुद्धिर्योधर्षयति पापकृत् ॥
पुंस्कोकिलत्वमाप्नोति स चापि नरकाच्युतः ॥
सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्याञ्च पापकृत् ।
प्रधर्षैव हि कामात्मा शूकरो जायते नरः ॥
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
पुनर्दाता च कन्याया कृमिरेवोपजायते ॥
देवता पितृविप्राणामदत्त्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकात् सोऽपि वायसः सम्प्रजायते ॥
श्लेष्मं पित्तसमं वापि भ्रातरं योऽवमन्यते ।
नरकात् सोऽपि विभ्रष्टः क्रौञ्चयोनौ प्रजायते ॥
शूद्रस्य ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।

सूकरः क्रमिको मद्गुश्चण्डालश्च प्रजायते ॥
अक्षतश्चोऽधमः पुंसां विमुक्तो नरकान्नरः ।
क्षतघ्नः क्रमिकः कीटः पतङ्गो वृश्चिकस्तथा ।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥
अश्रस्रं पुरुषं हत्वा नरः सञ्जायते खरः ॥
क्रमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः ॥
तत्राप्यस्ति विशेषो वै भोजनस्य गुणव्रतत् ।
हत्वान्नन्तु स मार्जारो जायते नरकाच्युतः ॥
तिलपिण्याकसंमिश्रमन्नं हत्वा तु मूषिकः ॥
घृतं हत्वा तु नकुलः काको मद्गुरजाभिषम् ॥
मत्स्यमांसापहृत् काकः श्येनो मार्गामिषापहृत् ।
वीचीकाकस्त्वपहृते लवणे दधनि क्रमिः ॥
चोरयित्वा पयस्त्वापि बलाका सम्प्रजायते ॥
यस्तु चोरयते तैलं तैलपायी स जायते ॥
मधु हत्वा नरो दंशः पूपं हत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते गृहगोलदः ॥
आसवस्त्वोरयित्वा तु तित्तिरित्वमवाप्नुयात् ॥
अयो हत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो रूप्यभाजने ।
हत्वा तु काञ्चनं भाण्डं क्रमियोनौ प्रजायते ॥
पत्नीर्णं चोरयित्वा तु ककरत्वञ्च गच्छति ।
कोषकारस्य कौषेये हृते वस्त्रेऽभिजायते ॥
दुकूले शार्ङ्गिके पापो हृते चैवांशुके शुकः ।
तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते ॥
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता वकस्तथा ।
मयूरो वर्णकान् हृत्वा शाकपक्षश्च जायते ॥
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ।
कुकुन्दरिः शुभान् गन्धान् वासो हृत्वा शुभो भवेत् ॥
गृध्रः फलापहरणात् काष्ठस्य घुणकीटकः ।
पुष्पापहृद्विहङ्गश्च पङ्गुर्यानापहृन्नरः ॥
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ।
भूहर्त्ता नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लिवल्कसारतरुत्वं क्रमात् ।
प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः ॥
क्रमिः कीटः पतङ्गोऽथ पक्षी तोयचरो मृगः ।
गोत्वं प्राप्य च चण्डालपुक्कशादि जुगुप्सितम् ।
षण्ढवन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीड़ितः
मुखरोगात्तिरोगैश्च गुदरोगैश्च बाध्यते ॥
अपस्मारी च भवति शूद्रत्वं च स गच्छति ॥
एष एव क्रमो दृष्टो गोसुवर्णापहारिणाम् ।
विद्यापहारिणश्चोग्रा निष्कृयश्चंश्चिनो गुरोः ॥
जायामन्यस्य पुरुषः पारक्यां प्रतिपादयन् ।
प्राप्नोति गृध्रतां मूढ़ो यातनाभ्यः परिच्युतः ॥
यः करोति नरो हीममसमिद्धे विभावसौ ।
सोऽजीर्णाध्याधिदुःखार्त्तो मन्दाग्निः संप्रजायते" ॥१॥
नानापुराणोक्तकर्म्मविपाकसंक्षेपमाह ।

१ । अकिञ्चनता । यः किल प्रभूतधनवानपि धर्म्मनिन्दको देवाग्निब्राह्मणादरिद्रेभ्यः किञ्चिदपि धनं न दत्तवान् । स तु आयुषोऽवसाने मृतो यमदूतैः प्रपीड़िती लोलाख्यनरके, सर्व्ववस्त्वांन पशूनपि निराशः परमं दुःखमाप्नोति । ततो जन्मान्तरं परिगृह्याकिञ्चनत्वमासाद्य जीर्णवस्त्रधरः बह्वना क्लेशेनापि स्वजीविकां निष्पादयेत् ॥

२ । अपुत्रता बहुपुत्रता च । यस्तु गवीमुखात् भोजनीयद्रव्यं आहृत्य दूरतो विसर्जयेत् । स मन्वन्तरत्रयं निर्जने घोरे मरुप्रभृतिस्थले उषित्वा पुनर्जन्मान्तरं प्राप्य पुत्रविहीनो बहुपुत्रो वा भवेदिति ॥

३ । अर्शोरोगः । यः खलु पतिव्रतां धर्म्मनियतां ऋतुस्नातां पत्नीं नोपगच्छेत् । यश्च आत्महा भ्रूणहा गोहन्ता च स्यात् । स मृतः गाढ़ान्धतमसावृतं तामिस्राख्यं नरकं गत्वा कर्म्मक्षयम् प्राप्य जन्मान्तरेण पुनर्मानुषयोनिमभिगम्य अर्शोरोगेणाक्रान्तो भवेदिति ॥

४ । अल्पायुःसन्तानता । यो हि क्षुधार्त्तां वारिपानरतां गां निवारयति । अनेनैव पापेन तस्य अल्पायुषः सन्ताना भवेयुः ॥

५ । अस्रशरीरोगः । यस्तु ऋतुस्नातां स्त्रियं क्रोधादप्रीत्या वा नोपगच्छति । स मृतः पूयशोणितसंमिश्रे नरके प्रपीड़ितः पुनर्मानुषत्वं प्राप्य अस्रशरीरोगाक्रान्तो जायते इति ॥

६ । उन्मादरोगः । यस्तु ब्राह्मणं वैष्णवं पितरौ द्विजादिकं मार्गार्हं नार्चयेत् परं निन्देत् स मृतः पुरीषाख्ये नरके अधःशिरा नाना दुःखभाक् भवेत् । ततः कर्म्मक्षये मानुषीं तनुमुपलभ्य उन्मादरोगवान् जायते । तथा येन च ब्राह्मणेषु गुरौ च दम्भाचारः कृतः तेभ्यः स्मृतिभ्रमकराणि द्रव्याणि च दत्तानि सोऽपि जन्मान्तरे उन्मादरोगवान् भवेदिति ॥

७ । कासः । कासस्तु पञ्चविधः । येन कर्म्मणा यद्रूपो भवेत्तदुच्यते । अतिकठोरैर्मिथ्यावाक्यैर्यस्तु लोकं पीड़येत् स पित्तप्रबलकेन कासेन पीड़ितो भवेत् । यो हि ब्राह्मणस्थानविनष्टकारी स वातकासेन पीड़ितो भवेत् । यस्तु जलाशयध्वंसकारी स श्लेष्मकासेन पीड़ितः स्यात् । यो हि ब्रह्म विष्णुं शिवञ्च भेदबुद्ध्या पश्यति स सन्निपातोत्थकासपीड़ितः स्यात् । यश्च विना पशुं हत्वा तन्मांसभक्षणकारी सर्व्वदोषोत्थकासेन गृह्यते । यदुक्तं तन्त्रे पुराणे च,—
"अयज्ञेन पशुं हत्वा भुङ्क्ते मांसन्तु यो नरः ।
सर्व्वदोषोत्थकासेन गृह्यते गृध्रभूपते!" ॥

८ । कुब्जत्वम् । यदुक्तं पुराणेषु ।
"देवतामतिमां दृष्ट्वा यस्तां नैवाभिवादयेत् ।
ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् ॥
श्मशाने जायते दुष्टः काकगृध्रोपसेवितः ॥
भुक्त्वा कालमशेषञ्च मानुषत्वमवाप्य सः ।
कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषं भुवम्" ॥

९ । गर्भस्रावः । या काचित् नारी हिंसापरतन्त्रा सती सपत्नादीनामन्यासां स्त्रीणां दुष्टौषधादिभिर्दुर्म्मन्त्रैर्वा गर्भं अपत्यानि च नाशयति सा नरकान्निर्मुक्ता पुनर्मानुषीं योनिमासाद्य पुत्रान्तरेण ऐश्वर्य्यवत्यपि गर्भस्रावदुःखैः प्रपीड़िता भवेत् ।

१० । गलगण्डः । यः खलु मोहाद् गुरुस्त्रीकण्ठदर्शनं कृतवान् । स मृतो यमकिङ्करैः निर्जने प्रान्तरे देशे दिव्यवर्षायुतत्रयं पात्यते । पुनर्जन्म समासाद्य च गलगण्डरोगाक्रान्तः सीदेत् ॥

११ । ग्रहणी । ये च धनलुब्धकाः प्रभूतधनसंग्रहं कृत्वा न यच्छन्ति न चाश्नन्ति न किमपि धर्म्मकार्य्यं कुर्व्वन्ति । तथा ये च परस्वापहारिणः तथा अदुष्टामपतितां भार्य्यां ये च यौवने परित्यजन्ति ते मृताः घोरीषाख्ये नरके कल्पकोटिशतं दग्धाः कर्म्मान्ते मानुषीं योनिमासाद्य ग्रहणीरोगाक्रान्ता अवसीदेयुः ॥

१२ । छिन्ननासिकता । श्रुतिस्मृतिकथाविघ्नकारी देवनिन्दको हि मृत्युं प्राप्य नैर्ऋते पश्चिमे भागे स्थितायां पिङ्गलेति नगर्य्यां पिशाचैः सह बहुकालमुषित्वा महाघोरं दुःखञ्च भुक्त्वा कर्म्मान्ते मानुषयोनिमासाद्य छिन्ननासिको जायते ॥

१३ । छिन्नहस्तता, छिन्नपादता च । यस्तु पितरौ गुरुं विनापराधतो वृद्धं वा ताड़येत् स मृतो यमलोके बहूनि कष्टान्यनुभूय छिन्नहस्तश्छिन्नपादो वा इह जायते ॥

१४ । जलोदरः । यदुक्तं पुराणेषु ।
"ब्रह्मविष्णुमहेशेषु भिन्नभावं करोति यः ।
भक्षते स तु दुष्टात्मा जलोदररुजा ततः" ॥

१५ । दौर्भाग्यम् । येन च सर्व्वासु ऋतीयासु वेलासु तैलस्पर्शः क्रियते स दुर्भगत्वमाप्नोतीति ॥

१६ । नेत्ररोगः । दीपहरणकर्त्ता परस्त्रीप्रेक्षकः कामतः परस्परतिदर्शनकारी च नेत्ररोगेणाक्रान्तो भवेत् ॥

१७ । पक्षरोगः । यो हि सशस्त्रः सन् शस्त्ररहितं पुरुषं हन्ति । स मूढ़ः आयुःशेषे क्रकराख्ये निरये उषित्वा महादुःखेन पच्यते । ततो रासभयोनौ ततः क्रमशो मृगव्याघ्रयोनौ सम्भूय शस्त्रेण हन्यते । ततः सारमेयो भूत्वा मत्स्ययोनौ जायते । ततो मानुषीं योनिमासाद्य अनेनैवरोगेण पीड्यते ॥

१८ । पाण्डुरोगः । यः खलु परभार्य्यारतः परस्त्रीरमणप्रियः स मृतो यमकिङ्करै र्बहुधा दुःखं प्रापितः पुनः कर्म्मपाकेन मानुषीं योनिमासाद्य पाण्डुरोगेण जिघ्यते ॥

१९ । प्रदरम् । या योषित् बुभुक्षितं पतिं त्यक्त्वा पत्यनुमतिं विना पूर्व्वं भुङ्क्ते सा मृता नरकं भुक्त्वा दशवर्षाणि वायसी ततः शुकी ततो मानुषी भूत्वा श्वेतप्रदरयुक्ता भवेत् ॥

२० । वन्ध्यता । येन जलपिपासुर्वत्सः प्रतिनिषिद्धः । यस्तु अदक्षिणं व्रतं करोति यो हि मिश्रफलादिकं प्राप्य देवायानिवेद्य भुङ्क्ते यः खलु मैथुनीभावमवलोक्य विघ्नं कुरुते ते सर्व्वे वन्ध्यत्वमाप्नुवन्तीति ॥

२१ । भगन्दररोगः । आचार्य्यभार्य्यागन्तारो-नराधमाः स्त्रीबालवृद्धधनापहारिणश्च मृत्युमधि

गत्य विण्मलाख्ये नरके बहुदुःखं प्राप्य जन्मान्तरे भगन्दररोगेणाक्रान्ता भवन्ति ॥

२२। मूत्रकृच्छ्रम्। येन मूढ़ेन विधवागमनं मद्यपानं वा कृतम्। स मृतो नरकं प्राप्य कर्म्मान्ते शरीरनाशकारिया अनेन रोगेणाक्रान्तो भवेत्।

२३। मृतभार्यता। यस्तु ज्येष्ठं भ्रातरमतिक्रम्य उद्वहेत् स मृतभार्य्यो जायेत। यस्तु सप्तम्यां तैलं स्पृशति तस्य ज्येष्ठा भार्य्या विनश्यति ॥

२४। मेहः। यदुक्तं पुराणेषु
"मेहाश्च विंशतिः ख्याताः पृथक्कर्म्मप्रभावजाः।
तेषां नामान्यहं वक्ष्ये क्रमादुत्पद्यते यतः ॥
मधुमेहः सान्द्रमेहः सुराशुक्रोदकस्तथा।
इक्षुः सिकतसीधुश्च सितमेहस्तथैव च ॥
फेनः क्षीरश्च नीलश्च हारिद्रः कालसंज्ञकः।
वसारक्तश्च माञ्जिष्ठो मञ्जाक्षारस्तथा गजः ॥
सदृश्यस्योपदेशेन ज्ञात्वा मेहान् पृथक् पृथक्।
नामानुसारतः पूर्व्वं कर्म्म ज्ञात्वा विधिश्चरन्।
पूर्व्वं मैथुनहृद्यस्तु शौकरीयोनिमाव्रजेत् ॥
तस्यान्ते मानुषीं प्राप्य जलमेहार्दितो भवेत् ॥
माहिषगामी बलान्मोहात् मधुमेही भवेन्नरः।
रजकीगमनाच्चैव क्षारमेही प्रजायते ॥
सतीविपर्य्ययं कृत्वा सान्द्रमेहान्वितो भवेत्।
रोगिणीगमनान्मर्त्यो भवेन्माञ्जिष्ठमेहवान् ॥
मित्रस्त्री धर्षिता येन स भवेच्छुक्रमेहवान् ॥
चतुष्पदाभिगमने भवेत् सिकतमेहवान् ॥
स्वर्णहर्त्ता क्षीरमेही सितमेही सुरारतः।
कालमेहो भवेत्सोऽपि पुण्यवत्याश्च धर्षणात् ॥
रजस्वलायां रतिमुद्रक्तमेहार्दितो भवेत्।
मज्जामेहयुतः सोऽपि योऽन्त्यजागमनञ्चरन् ॥
इक्षुमेहस्तिदुर्वृत्तो विधवागतिदोषतः।
ब्राह्मणीगमनाद्देही हस्तिमेहेन मेहति ॥
अन्यतागमनासक्तो हरिद्राभश्च मेहति ॥
मातरं येऽभिगच्छन्ति भगिनीश्चात्मनः सुताम् ॥
श्वश्रूञ्चैवाच्चतारक्तां भ्रातृभार्य्याश्च मातुलीम्।
गुरुस्त्रीं राजपत्नीश्च मित्रस्त्रीं वा कुटुम्बिनीम्।
मृता वैवस्वतपुरीं यान्ति भूतैः प्रपीड़िताः ॥
तावन्ते तत्र दुर्वृत्ता मत्तः शृणु वदामि ते ॥
अङ्गारराशौ प्रक्षिप्य तान् दहन्ति यमाज्ञया।
दूतास्तु महतीं घोरां ज्वलन्तीमायसीं शिलाम्।
खादयन्ति च तान् पश्चात् नरके च क्षिपन्ति वै ॥
नरकान्ते पुनस्तेऽपि मृताः स्युः शूकरा भृशम् ॥
शूकराः पञ्चवर्षाणि दशवर्षाणि कुक्कुराः।
पिपीलिकास्त्रयो मासा ऋक्षिकाश्चाब्दमात्रकम्।
भूत्वा प्रयान्ति गोयोनौ सरुजा विफलेन्द्रियाः ॥
तत्राधर्म्मक्षयं कृत्वा ततो मानुषयोनिषु।
प्रमेहगदवन्तः स्युः प्राप्नुवन्ति मनोव्यथाम्" ॥

२५। यक्ष्मरोगः। विप्रहन्ता न्यासापहर्त्ता वृत्तिच्छेदकारी प्रजापीड़को गुरुविद्वेषी मूढ़ो यक्ष्मकासाक्रान्तो भवेत् ॥

२६। रक्तपित्तम्। अतिदुराचारी परद्रव्याभिलाषी पितृव्यबधूगन्ता अनेनैव रोगेण पीड़ितो भवेत् ॥

२७। वैधव्यम्। या नारी मृते भर्त्तरि परपत्यभिलाषिणी सा मृता यमलोके तप्तं आयसं पुरुषमालिङ्गन्ती अतिघोरं नरकदुःखमनुभूय जन्मान्तरे वेश्या भूत्वा अश्लेषपुरुषैः रममाणा अश्लेषक्लेशमधिगच्छेत् ॥

२८। वैधव्यम्। या खलु यौवनेनातिगर्व्विता रमणी विरूपन्त्वात्मवशगं पतिं दिवा निन्दति रात्रौ शय्यां न भजते आज्ञा च रुष्टा भवति सा जन्मान्तरं प्राप्य वैधव्ययन्त्रणया पीड़िता भवेत् ॥

२९। श्वासकासः। श्वासकासस्तु महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदात् षड्धा। १। यस्तु यक्ष्मनाशाद्य श्वासं निरुध्य पशुं हन्ति मोहात् तन्मांसादिकं भक्षयति स महाश्वासेन पीड्यते। २। पुराणकथासमये यस्तु अन्यवाक्यं वदेत् स ऊर्द्ध्वश्वासेन निगृह्यते। ३। निषिद्धदानग्रहणात् छिन्नश्वासयुतो भवेत्। ४। यो हि शास्त्रार्थं मृषा दूषयति स तमकश्वासैः पीड्यते। ५। पापविप्लुतो हि जीवः क्षुद्रश्वासैर्गृह्यते ॥

३०। हृद्रोगः। यस्तु लोभात् द्वेषाद्वा परपीड़ाप्रदायको भवेत् यस्तु प्रजानां मर्म्मव्यथां जनयेत् स मृतो दुर्वहं नरकमधिगम्य कर्म्मान्ते अतिदारुणैर्हृद्रोगैः पीड़ितो भवेदिति ॥ * ॥)

कर्म्मशीलः, त्रि, (कर्म्म शीलं कर्म्मकरणरूपस्वभावो यस्य। कर्म्म शीलयतीति वा।) यः फलनिरपेक्षः स्वभावतः कर्म्म करोति सः। तत्पर्य्यायः। काम्मिः २। इत्यमरः। ३। १। १८॥

कर्म्मशूरः, त्रि, (कर्म्मणि शूरः दक्षः।) कर्म्मठः। फलपर्य्यन्तकर्म्मसमापकः। इत्यमरः। ३।१।१८॥

कर्म्मसचिवः, पुं, (कर्म्मणि कर्म्मसु वा सचिवः सहायः।) कर्म्मोपयुक्तसचिवः। अच्छपटलाध्यक्षादिः। इत्यमरः। २। ८। ४॥

कर्म्मसन्न्यासिकः, पुं, (कर्म्मणां सन्न्यासः स अस्यास्य इति ठन्।) यतिः। सन्न्यासी। इति हलायुधः। २। २३९॥

कर्म्मसाक्षी, [न्] पुं, (कर्म्मणां साक्षी। यद्वा कर्म्म साक्षात् पश्यति प्रतक्षं करोतिति।) सूर्य्यः। इति हेमचन्द्रः॥ (उक्तञ्च वैदिकक्रियापद्धतौ यथा,
"सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च च।
एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः" ॥
क्रियासाक्षात्कारिणि, त्रि। यथा,—महाभारते। १। ४७। २९।
"हृदि स्थितः कर्म्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति"॥)

कर्म्मक्षमः, त्रि, (कर्म्मणि कर्म्मसु वा क्षमः समर्थः।) कर्म्मकरणसमर्थः। तत्पर्य्यायः। अलंकर्म्मीणः २। इत्यमरः। ३। १। १८॥

कर्म्मान्तः, पुं, (कर्म्मणः जीवकृतसुकृतदुष्कृतक्रियायाः अन्तो यत्र। कर्म्मणः कृषिकार्य्यस्य तत्फलस्य धान्यादिसंग्रहरूपक्रियायाः अन्तो यत्र वा।) कर्म्मभूः। क्षेत्रभूमिः। इति हेमचन्द्रः॥
("अहन्यहन्यवेक्षेत कर्म्मान्तान् बाहनानि च"॥ इति मनुः। ८। ४१९॥)

कर्म्मारः, पुं, (कर्म्म लोहनिर्म्माणादिकार्य्यं ऋच्छति गच्छति प्राप्नोति वा। कर्म्म + ऋ + अण्।) कर्म्मकारः। कामार इतिभाषा॥ (यथा, अथर्व्ववेदे। ३। ५। ६।
"ये धीवानो रथकाराः कर्म्मारा ये मनीषिणः"॥
तथा, मनुः। ४। २१५।
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च"॥)
वंशजः। वाँश इति ख्यातः। कर्म्मरङ्गः। इति राजनिर्घण्टः। कामराङ्गा इति भाषा॥

कर्म्महः, पुं, (कर्म्म अर्हतीति। अर्ह + अण्।) पुरुषः। इति राजनिर्घण्टः। क्रियायोग्ये त्रि॥

कर्म्मिष्ठः, त्रि, (अतिशयेन कर्म्म कर्तुं समर्थः कर्म्मी वा। कर्म्म + इष्ठन्। इनेर्लुक्।) क्रियावान्। अतिशयकर्म्मविशिष्टः। इति व्याकरणम्॥

कर्म्मी, [न्] त्रि, (कर्म्मास्यस्य "व्रीह्यादिभ्यश्च"। ५। २। ११६ इति इनिः।) कर्म्मविशिष्टः।
("यत्कर्म्मिणो न प्रवेदयन्ति रागात्तेनातुराः स्त्रीगालोकाश्चवन्ते"॥ इति मुण्डकोपनिषदि। १। २। ९। यथा च, भागवते १। ३। ८।
"तृतीयमृषिसर्गञ्च देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्म्यं कर्म्मिणां यतः" ॥)

कर्म्मोरः, पुं, (कर्म्म + ईरन्।) किर्म्मीरवर्णः। इत्यमरटीका॥

कर्म्मेन्द्रियं, क्ली, (कर्म्मणां गमनादिपञ्चविधक्रियाणां सम्पादनाय इन्द्रियं कर्म्मनिमित्तं इन्द्रियं वा।) कर्म्मनिष्पादकविषयिपञ्चकम्। यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। इति वेदान्तः॥ (यथा च, मनुः। २। ९१।
"बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वकाः।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते" ॥)

कर्व्व दर्पे। इति कविकल्पद्रुमः॥ (भ्वां-पं-अकं-सेट्।)

कर्व्वः, पुं, (किरति विक्षिपति चित्तं विषयेषु। कॄ + "कॄगॄशॄदॄभ्यो वः"। उणां। १। १५५ इति वः।) कामः। (क्षयाति हिनस्तीति। कु + वः।) उन्दुरुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कर्व्वटं, क्ली, (कर्व्वं सुन्दरत्वात् सर्व्वं चटति प्राप्नोतीति। पृषोदरादित्वात् चलोपे साधुः।) पुरम्। नगरम्। इति जटाधरः॥

कर्व्वटः, पुं क्ली, (कर्व्व + चटन्प्रत्ययः।) द्विशतग्राममध्ये मनोरमस्थानम्। ग्रामशतस्थगनाः क्रयविक्रयादिना सेवादिना वा येन ग्रामेण जीवन्ति सः। इति केचित्॥ चतुःसमग्रामः। इत्येके॥ चतुःसमं गृहस्थानम्। इत्यपरे॥ इत्यमरटीकायां भरतः॥ चतुःशतग्रामसंग्रहस्थानम्। इति सारसुन्दरी॥ (तथा हि याज्ञवल्क्यः। २। १६७।
"धनुःशतं परीहारो ग्रामक्षेत्रान्तरं भवेत्।
द्वे शते कर्व्वटस्य स्यात् नगरस्य चतुःशतम्"॥
देशभेदः। यथा, महाभारते। २। ३०। २२।
"तामलिप्तं च राजानं कर्व्वटाधिपतिं तथा।
सुह्मानामधिपञ्चैव ये च सागरवासिनः" ॥)

कर्व्वुरः, पुं, (क्षयाति हिनस्ति प्राणिनः। किरति विक्षिपति जीवानिति वा। कॄ + "कॄगॄशॄदॄभ्यश्च-

तिभ्यः ष्वरच्" । उणां । २ । १२३ । इति ष्वरच्) राक्षसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ व्याघ्रः । इति मेदिनी ॥ (यथा, उणादिटीकायां "कर्व्वुरो व्याघ्रराक्षसोः" । २ । १२३ ॥)

कर्व्वरी, स्त्री, (कर्व्वर + षित्वात् ङीष् ।) शिवा । इति विश्वमेदिन्यौ ॥ हिङ्गुपत्री । इति जटाधरः ॥ (व्याघ्री । राक्षसी । इत्युणादिवृत्तिः । २ । १२३ ॥)

कर्व्वुरः, पुं, (कर्व्वति हिनस्ति सदर्पो भवति वा । कर्व्व दर्पे हिंसायाञ्च । "मन्नुरादयश्चेति" + उरच् ।) राक्षसः । इति शब्दार्णवः ॥ चित्रवर्णः । इत्यमरः । २ । ९ । ९४ ॥ शटी । इति भरतः ॥

कर्व्वूरः, पुं, (कर्व्व + खर्व्वूरादित्वात् ऊरः । उणां १ । ८२ ।) राक्षसः । शटी । इत्यमरः । २ । ९ । ९४ ॥

कर्षूः, पुं, (कृष् + यत् ।) कर्चूरः । इति राजनिर्घण्टः । कचूर इति हिन्दीभाषा ॥

कर्षः, पुं क्ली, (कृष् विलेखने घञाद्यच् । कर्मणि करणे वा घञ् ।) षोडशमाषकपरिमाणम् । अग्नीतिरत्तिकाः । तत्पर्य्यायः । अक्षः २ । इत्यमरः । २ । ९ । ८९ ॥ वैद्यकमते तोलकद्वयम् । तत्पर्य्यायः । सुवर्णम् २ अक्षः ३ विड़ालपदकम् ४ पिचुः ५ पाणितलम् ६ उड़ुम्बरम् ७ तिन्दुकम् ८ कवड़ग्रहः ९ । इति परिभाषा ॥ दशमाषकः । इति राजनिर्घण्टः ॥

("कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमानिका । अक्षः पिचुः पाणितलं किञ्चिपाणिश्च तिन्दुकम्" ॥ इति भाङ्गधरे पूर्व्वखण्डे । १ अध्याये ॥)

कर्षः, पुं, (कृष् + भावे घञ् ।) कर्षणम् । इति मेदिनी ॥ विभीतकवृक्षः । इति शब्दरत्नावली ॥

कर्षकः, त्रि, (कर्षति भूमिमिति । कृष् + ण्वुल् ।) कृषिजीवी । कृषाण इति भाषा ॥ ("सुखमापतितं सेवेत् दुःखमापतितं सहेत् । कालप्राप्तमुपासीत ह्यात्मानमिव कर्षकः" ॥ इति महाभारते । ३ । २५८ । १५ ॥) तत्पर्य्यायः । क्षेत्रजीवः २ कृषिकः ३ कृषीबलः ४ । इत्यमरः । २ । ९ । ९९ ॥ कार्षकः ५ । इति तट्टीका ॥ आकर्षणकर्त्ता च ॥

कर्षणं, क्ली, (कृष् + भावे ल्युट् ।) कृषिकर्म्म । लाङ्गलादिना भूम्यादिखननम् । इति हेमचन्द्रः । चास इति भाषा ॥ आकर्षणम् । टानन् इति भाषा ॥ (प्रोषणम् । पीड़नम् । यथा मनुः ७ । ११२ । "शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा । तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्" ॥)

कर्षणिः, स्त्री, (कृष् + अनिः ।) असती । इत्युणादिकोषः ॥

कर्षणी, स्त्री, (कर्षण + गौरादित्वात् ङीष् ।) स्त्रीरिणीवृक्षः । इति राजनिर्घण्टः ॥

कर्षफलः, पुं, (कर्षः कर्षमात्रं फलं यस्य ।) विभीतकवृक्षः । इत्यमरः । २ । ४ । ५८ ॥ (अस्य पर्य्यायाः यथा,—

"विभीतकस्त्रिफलकः स्यात्कर्षः कर्षफलस्तु सः । कलिद्रुमो भूतवासस्तथा कलियुगालयः" ॥

गुणाश्चास्य विभीतकशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्व्वखण्डे । १ भागे ॥)

कर्षफला, स्त्री, (कर्षफल + टाप् ।) आमलकीवृक्षः । इति रत्नमाला ॥ (आमलकीशब्देऽस्या गुणादिकं ज्ञातव्यम् ॥)

कर्षार्द्धं, क्ली, (कर्षस्य अर्द्धम् ।) तोलकपरिमाणम् । इति वैद्यकपरिभाषा ॥ ("कर्षार्द्धं वा कणाशुण्ठ्योः" । "कर्षः कर्षार्द्धमथो पलं पलद्वयमथाकर्षश्च" ॥ इति वैद्यकचक्रपाणिसंग्रहव्याख्याधिकारकासाधिकारयोः ॥)

कर्षिणी, स्त्री, (कर्षति इति । कृष् + णिनिस्ततो ङीप् ।) स्त्रीरिणीवृक्षः । अश्वमुखबन्धनरज्जुस्थितलौहम् । तत्पर्य्यायः । खलीनः २ कवीयम् ३ कविका ४ । इति जटाधरः ॥ (त्रि । मनोहारी । यथा रघुः १९ । ११ ।

"घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः" ॥)

कर्षूः, पुं, (कृष् + "कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः" । उणां १ । ८२ । इति ऊः ।) वार्त्ता । करीषाग्निः । इत्यमरः । ३ । ३ । २२१ ॥ वार्त्ता अत्र कृषिः । इति रमानाथः ॥ जीविका । इति भरतः ॥

कर्षूः, स्त्री, (कृष् विलेखने + "कृषिचमितनीति" ऊः उणां १ । ८२ ।) कुल्या । अल्पा कृत्रिमा सरित् । इत्यमरः । ३ । ३ । २२१ ॥ नदीमात्रम् । इति रत्नकोषः ॥ इक्षुखातः । इति मेदिनी ॥ तद्यथा । चतुरङ्गुलपृथ्वीस्तावदन्तः रास्तथाधः खाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् कर्षूसभीपे अग्नित्रयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्नाज्याहुतित्रयं जुहुयात् । इति श्राद्धविवेकधृतविष्णुसूत्रम् ॥

कर्हि, व्य, (किम् + "अनद्यतने र्हिलन्यतरस्याम्" । ५ । ३ । २१ इति । र्हिल् कादेशः ।) कदा । कस्मिन् काले । इति व्याकरणम् ॥ कखन कबे इति भाषा ॥ (यथा, ऋग्वेदे ६ । ३५ । २ ।

"कर्हिस्वित्तदिन्द्र यद्भिर्भवन्वी-
रैर्वीरान् नीलयासे जयाजीन्" ॥)

कर्हिचित्, व्य, (कर्हि च चिच्चेति विग्रहः । पाणिनिमतानुसारेण भिन्नपदद्वयम् मुग्धबोधमते तु "किमः क्यङ्क्याच्विनौ" । इति चित् ।) कस्मिंश्चित् काले । कोनकाले इति भाषा । तत्पर्य्यायः । जातु २ कदाचित् ३ । इति हेमचन्द्रः ॥ (यथा, भागवते १० । ८४ । १३ ।

"यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचित्
जनेष्वभिज्ञेषु स एव गोखरः" ॥)

कल, त् क गतौ । सङ्ख्यायाम् । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) अन्त्यस्थलतीयोपधः । कलयति कालं धीरः । इति दुर्गादासः ॥

कल, ङ सङ्ख्यानयोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं च-सेट् ।) ङ कलते दिवसं दक्षः गणयतीत्यर्थः । रुत् शब्दः । इति दुर्गादासः ॥

कल, क नुदौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क कालयति । नुदिरिति नुद प्रेरणे इत्यस्य ञ्नीत्यादिकक्रिप्रत्यये रूपम् । इति दुर्गादासः ॥

कलं, क्ली, (कड़ति माद्यति अनेन । कड़ मदे + "हलश्च" । ३ । ३ । १२१ । इति घञ् । संज्ञापूर्व्वकत्वात् वृद्धभावः । डलयोरैक्यत्वम् ।) शुक्रम् । इति मेदिनी ॥ कोलिवृक्षः । इति शब्दचन्द्रिका ॥

कलः, पुं, (कल + भावे घञ् वृद्धभावः ।) मधुरास्फुटध्वनिः । इत्यमरः । १ । ७ । २ ॥ ("जगौ कलं वामदृशां मनोहरम्" ॥ इति भागवतम् । १० । २९ । ३ ॥) सालवृक्षः । इति राजनिर्घण्टः ॥

कलः, त्रि, (कलयति मान्यं नयति ज्ञाठराग्निम् । कल + णिच् + अच् । धातूनामनेकार्थत्वात् विशेषतः कलिहलिरित्युक्तेश्च तथात्वम् ।) अजीर्णः । इति मेदिनी ॥ (अव्यक्तमधुरध्वनिः । यथा रघुः । १ । ४१ । "सारसैः कलनिर्हादैः क्वचिदुन्मिलितानगौ" ॥)

कलकः, पुं, (कलते इति । कल + ण्वुल् । स्वार्थे कन् वा ।) शकुलमत्स्यः । इति हेमचन्द्रः ॥ (शकुलशब्देऽस्य गुणादयोऽवगन्तव्याः ॥)

कलकण्ठः, पुं, (कलप्रधानः कण्ठो यस्य ।) कलध्वनिः । हंसः । पारावतः । पिकः । इति मेदिनी ॥ (यथा, राजेन्द्रकर्णपूरे ३ । "युष्माकं रतिकान्तकाम्मुकलताक्रीङारकान्ते रुते, सोत्कण्ठं कलकण्ठकण्ठकुहरोद्भूतेऽपि माभून्मनः" ॥)

कलकलः, पुं, (कलादपि कलः । युगपत्समसुत्थितबहुलशब्दानामेकीभूततया तुमुलत्वात्तथात्वम् । कलशब्दे + घञ् । वृद्धभावः । यद्वा कलः प्रकारः गुणवचनत्वात् प्रकारे द्वित्वम् ॥) कोलाहलः । (यथा, गीतगोविन्दे । १ । ३८ । "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः" ॥) सालनिर्य्यासः । इति मेदिनी ॥

कलघोषः, पुं, (कलो मधुरो घोषो ध्वनिर्यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

कलङ्कः, पुं, (कलयति इति । कल + क्विप् । कल् चासौ अङ्कश्चेति ।) चिह्नम् । अपवादः । ("उत्तमस्य विशेषेण कलङ्कोत्पादको जनः" ॥ इति कथासरित्सागरे । २४ । २०४ ॥) लौहमलम् । इति मेदिनी ॥

कलङ्कषः, पुं, (करेण कषति हिनस्ति नाशयति वा । बाहुलकात् खच् मुम् च ह्रस्वः । कलेन गर्ज्जनेन कषति वा ।) सिंहः । इति शब्दमाला ॥

कलङ्कषा, स्त्री, (कलङ्कष + टाप् ।) करतालो । इति शब्दरत्नावली ॥

कलङ्की, [न्] त्रि, (कलङ्कोऽस्यास्य । इनिः ।) अपवादग्रस्तः । यथा,—तिथ्यादितत्त्वे ।

"कलङ्की जायते विल्वे तिर्य्यग्योनिञ्च निम्बके" ।

चिह्नयुक्तः । लौहमलविशिष्टः ॥ चन्द्रः ॥

कलङ्कुरः, पुं, (कं जलं लङ्घयति गमयति भ्रामयतीत्यर्थः । लकि गतौ + णिच् + उरच् ।) आवर्त्तः । जलभ्रमः । इति त्रिकाण्डशेषः ॥

कलन

कलङ्कः, पुं, (कं जलं लञ्जयति । लञ्जि + अच् ।) विभाखण्डितमृगपक्षिणौ । इति त्रिकाण्डशेषः । तामकूटः । दोक्का तामाक् इति भाषा । यथा । विष्णुसिद्धान्तसारावल्यां वैद्यके । अथ धूमपानगुणाः ।

"कलङ्कसंवेष्टनधूमपानात्
स्याद्दन्तमुद्धिर्मुखरोगहानिः ।
कफघ्नमामय्वरहानिरुक्तं
गान्धर्व्वविद्याप्रवणैकसेव्यम्" ॥

कलटं, क्ली, (कं जलं लटति आच्छादयति । लट आच्छादने वा । क + लट + अच् ।) गृहाच्छादनम् । इति शब्दरत्नावली । चाल इति भाषा ॥ कुटलमिति च पाठः ॥

कलतूलिका, स्त्री, (कं सुखं विषयत्वेन लाति गृह्णातीति कलः । कलं कामं तूलयति निष्कर्षति पूरयति वा या । कल + तूल निष्कर्षे पूरणे वा ण्वुल् । टापि अत इत्वम् ।) इच्छावती । कामुका । तत्पर्य्यायः । वाह्निनी २ लङ्घिका ३ । इति त्रिकाण्डशेषः ॥

कलत्रं, क्ली, (गड़ सेचने + "गड़ेरादेश्च कः" । उणां । ३ । १०६ । अत्रन् गकारस्य ककारश्च । डलयो रैक्यस्मरणात् डस्य लः । यद्वा कलं गायते । गै + कः । यद्वा कल्यते ग्रिह्यते इति ।) कड़-ग्रासने बाहुलकात् अत्रन् । श्रोणिः । भार्य्या । इत्यमरः । ३ । ३ । १७८ ॥ (यथा मेघदूते । ४० ।

"तां कस्याश्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः" ॥)

राज्ञां दुर्गस्थानम् । इति हेमचन्द्रः ॥

कलधृतं, क्ली, (कलेन अव्ययेन धूतं शुद्धम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

कलधौतं, क्ली, (कलेन अव्ययेन धौतम् ।) स्वर्णम् । ("कन्येयं कलधौतकोमलरुचिः कीर्त्तिस्तु नातःपरा" । इति महानाटकम् ॥ महाभारते च ४ । गोहरणे ४० । ६ ।

"इमे च कस्य नाराचाः सहस्रं लोमवाहिनः ।
समन्तात्कलधौताया उपासङ्गे हिरण्मये" ॥)

रजतम् । इति मेदिनी ॥ कलध्वनिः । इति विश्वः ॥

कलध्वनिः, पुं, (कलः अस्फुटमधुरः ध्वनिर्यस्य ।) पारावतः । कोकिलः । मयूरः । इति मेदिनी ॥ मधुराव्यक्तशब्दः । इति कलशब्दार्थे अमरः । १ । ७ । २ ॥ (यथा महानिर्व्वाणतन्त्रे । १ । ३ ।

"अस्फुरोगमसङ्गीतकलध्वनिनिनादिते" ॥)

कलनं, क्ली, (कल्यते लक्ष्यते दुष्यते वा । कल + ल्युट् ।) चिह्नम् । दोषः । इति हलायुधः ॥ (कल्यते शुक्रशोणिताभ्यामन्योन्यं मिश्रीयते ।) गर्भे मिश्रितं शुक्रशोणितम् ॥ यथा, भागवते । ३ । ३१ । २ ।

"कलनं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्" ॥

क्वचित् कललं इत्यपि पाठो दृश्यते । कलयति जानात्यनेन । कल गतौ गत्यर्था ज्ञानार्थाश्च । कल + करणे ल्युट् । ज्ञानम् ॥)

कलनः, पुं, (कं जलं लाति । तथा सन् नमति ।

कलम्ब

क + ला + कः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

कलना, स्त्री, (कल + भावे युच् । टाप् च ।) वशीभूतत्वम् । वशता । यथा,—आनन्दलहर्य्याम् । २९ ।

"करारं यत् त्वेड़ कवलितवतः कालकलना" ।

जल्पना च ॥

कलन्दरः, पुं, (कलं ग्राम्यविहितवाक्यं गिरत्याचारं वा वृणाति । कल + दृ + खच् । मुम् च ।) वर्णशङ्करजातिविशेषः । स तु लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कलन्दिका, स्त्री, (कं सुखं लाति विषयत्वेन इति । कलं कामं सर्व्वाभीष्टं ददाति । कल + दा + कः । सञ्ज्ञायां कन् । ततष्टाप् अत इत्वं एषोदरादित्वात् मुम् च ।) सर्व्वविद्या । इति हेमचन्द्रः ॥

कलन्धुः, स्त्री, (कलायाः मात्रायाः अन्धुरिव । प्रकन्ध्वादित्वात् अलोपे साधुः ।) घोलीशाकः । इति राजनिर्घण्टः ॥

कलभः, पुं, (कलेन करेण शुण्डेनेति यावत् भाति । कल + भा + कः । यद्वा + कल् गतौ "क्वृशृग्रिकलिगर्द्दिभ्योऽभच् । उणां । ३ । १२२ । इति । अभच् ।) करभः । हातिर् छा इति भाषा । स तु पञ्चवर्षपर्य्यन्तम् । इति सुभूतिः ॥ तत्पर्य्यायः । करिशावकः २ । इत्यमरः । २ । ८ । ३५ ॥ दुर्द्दान्तः ३ बालः ४ । (यथा रघौ । ३ । ३२ ।

"महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव" ।)

धत्तूरवृक्षः । इति राजनिर्घण्टः ॥

कलभवल्लभः, पुं, (कलभस्य हस्तिशावकस्य वल्लभः प्रियः ।) पीलुवृक्षः । इति राजनिर्घण्टः ॥

कलभी, स्त्री, (कं जलं आश्रयतया लभते । लभ + अच् । गौरादित्वात् ङीष् ।) चञ्चुवृक्षः । इति राजनिर्घण्टः ॥

कलमः, पुं, (कलते कलयति वा अक्षरं प्रकाशयति जनयति वा । कल + "कलिकदीरमः" । उणां । ४ । ८४ इति अमः ।) खनामख्यातलिपिसाधनवस्तु । तत्पर्य्यायः । लेखनी २ वर्णतूली ३ अक्षरतूलिका ४ । इति जटाधरः ॥ खनामख्यातशालिधान्यविशेषः । (यथा, रघुः । ४ । ३७ ।

"शापादपप्रपतितां कलमा इव ते रघुम् ।
फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः" ॥)

अस्य गुणाः । रक्तदोषत्रिदोषनाशित्वम् । चक्षुर्हितकारित्वम् । कषायत्वञ्च । इति राजवल्लभः ॥ "रक्तशालिर्महाशालिः कलमः षष्टिकोऽपरः" । इति हारीते प्रथमस्थाने १० अध्याये ॥ ("शूकजेषु वरस्तत्र रक्तषष्टिकदोषहा ॥ महांस्तस्यानुकलमस्तस्याप्यनु ततः परे" ॥ इति वाभटे सूत्रस्थाने ६ अध्याये ॥) चौरः । इति मेदिनी ॥

कलमोत्तमः, पुं, (कलमेभ्यः कलमेषु वा उत्तमः ।) गन्धशालिः । इति राजनिर्घण्टः ॥

कलम्बः, पुं, (कल्यते क्षिप्यते शत्रुं प्रति । कलच्क्षेपे + अम्बच् ।) शरः । शालकनाड़िका । इत्यमरः । २ । ८ । ८७ । कदम्बः । इति विश्वः ॥

कलवि

("कलम्बनालिका मार्व्वकुटिच्चरकुतुम्बकम्" ॥ इत्यादीनां समष्टिगुणा यथा,—

"शाकं गुरु च रूक्षञ्च प्रायो दिशति जीर्य्यति ।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्" ॥

इति चरके सूत्रस्थाने २७ अध्याये ॥)

कलम्बकः, पुं, (कलम्ब + संज्ञायां कन् ।) धाराकदम्बः । इति राजनिर्घण्टः ॥

कलम्बिका, स्त्री, (कलम्बी एव स्वार्थे कन् टाप् च अत इत्वम् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥ (यथा चक्रपाणिदत्तस्य शाकवर्गे ।

"कलम्बिका गुरुर्वृष्या कषायास्त्यग्निदा" ॥

कलम्बीव कायते प्रकाशते निधीयते वा । कलम्बी + कै + कः । टाप् इत्वञ्च । संज्ञा हेतुत्वात् एषोदरादित्वात् । ह्रस्वः ।) ग्रीवापश्चान्नाड़ी । तत्पर्य्यायः । मन्या २ । इति हेमचन्द्रः ॥

कलम्बी, स्त्री, (कं जले लम्बते । लबि संसने + अच् ङीष् ।) जलजलताशाकविशेषः । कलमी इति भाषा । तत्पर्य्यायः । कड़म्बी २ कलम्बूः ३ कलम्बिका ४ । इति शब्दरत्नावली ॥ अस्या गुणाः । स्तन्यदुग्धशुक्रश्लेष्मकारित्वम् । मधुरत्वम् । कषायत्वम् । गुरुतरत्वञ्च । इति राजवल्लभः ॥

कलम्बुटं, क्ली, (कं जले लम्बते भासते । क + लम्ब + बाहुलकात् उटन् ।) नैयङ्गवीनम् । नवनीतम् । इति हारावली ॥

कलम्बूः, स्त्री, (कं जले लम्बते । लम्ब + बाहुलकात् ऊङ् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥

कलरवः, पुं, (कलः मधुरास्फुटो रवः ध्वनिर्यस्य ।) कपोतः । पायरा इति भाषा । इत्यमरः । २ । ५ । १४ ॥ (यथा आर्य्यासप्तशती ५६७ ।

"पूर्णप्रासादोपरि जिगीषुरिव कलरवः जागर्ति" ॥)

कोकिलः । इति राजनिर्घण्टः ॥ (यथा, ब्रह्मपुराणे ५२ । ३४ । "कोकिलैः कलरवैश्च" ॥) मधुराव्यक्तध्वनिः । इति कलशब्दार्थे अमरः ॥ (कलश्चव रवः । कर्म्मधारयः ॥ यथा कथासरित्सागरे १ । ६ ।

"नवविसकिसलयकवलन-
कषायकलहंसकलरवो यत्र" ॥)

कललः, पुं क्ली, (कल्यते वेष्ट्यतेऽनेन । कल + रुगादिभ्यः कलच् ।) जरायुः । गर्भवेष्टनचर्म्म । इत्यमरः । २ । ६ । ३८ ॥

("ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धते गर्भिण्या गर्भजलवम् ।
कललं जायते तस्या वर्द्धितं मेदकैर्गुणैः" ॥
इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कललजः, पुं, (कललमिव जायते । जन + डः ।) रालः । इति राजनिर्घण्टः ॥ धुना इति भाषा ॥

कललजोद्भवः, पुं, (कललवत्यस्मात् उद्भवः । कललजस्य उद्भवः ।) सालवृक्षः । इति राजनिर्घण्टः ॥

कलविङ्कः, पुं, (कलं मधुरास्फुटं वङ्कते रौति । वकि वा गतौ + अच् एषोदरादित्वात् अत इत्वे साधुः ।) चटकः । इत्यमरः । २ । ५ । १५ ॥

(यथा, मनुः। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्कं ग्रामकुक्कुटम्" ॥)
कलिङ्ककल्चः। इति मेदिनी ॥ कलङ्कः। श्वेतचामरः। इति सारस्वतः। (त्वष्टृपुत्रविश्वरूपस्य शिरोभेदः। पुरा किल कदाचित् ऐश्वर्य्यमत्तेन सुरेश्वरेण यदा समागतः सुराचार्य्यो गीष्पतिरसम्मानितोऽन्तरधीयत। तदा ब्रह्मोपदिष्टैरसुरप्रपीड़ितैरमरैस्त्वाङ्गं विश्वरूपं पौरोहित्ये वरयित्वा भूयः सन्नद्धैरसुरा बबाधिरे। विश्वरूपस्तु मातामहकुलस्यापेक्षया परोक्षमसुरेभ्योऽपि यज्ञभागं प्रददौ तदभिज्ञाय सुरपतिर्भीतः क्रुद्धश्च विश्वरूपस्य शिरांस्यक्षिनत्। तस्य खलु त्वाङ्गस्य कपिञ्जलः कलविङ्कस्तित्तिरिरिति त्रीणि शिरांस्यासन् तेषु सुरापायि शिर एव कलविङ्क इति बोध्यम्। एतद्विवरणन्तु श्रीमद्भागवते ६। ९ अध्याये सविस्तरं दर्शनीयम् ॥)
कलशः, त्रि, (कलं मधुराव्यक्तशब्दं शवति जलपूरणसमये प्राप्नोति। कल + शु गतौ + डः।) जलाधारविशेषः। कलशी इति ख्यातः। (यथा आर्य्यासप्तशती ६९०।
"प्रबलो विदरविध्यति जलकलशं नीरलेखेव" ॥)
तत्पर्य्यायः। घटः २ कुटः ३ निपः ४। इत्यमरः। २। ९। ३२ ॥ कलसः ५ कलसिः ६ कलसी ७ कलसम् ८ कलशिः ९ कलशीः १० कलशम् ११। इति तट्टीका ॥ कुम्भः १२ करीरः १३। इति हेमचन्द्रः। कलावतीदीक्षाप्रकरणोक्तं तस्य परिमाणं। यथा, तन्त्रसारे।
"पञ्चाशदङ्गुलव्याम उत्सेधः षोड़शाङ्गुलः।
कलशानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम् ॥
षट् त्रिंशदङ्गुलं कुम्भं विस्तारोन्नतिशालिनम्।
षोड़शं द्वादशं वापि ततो न्यूनं न कारयेत्" ॥
कलशिः, स्त्री, (कलं शरीरमालिन्यं श्लथति नाशयति। कल + शो + बाहुलकात् इन्। कं जलं लाति आदत्ते तथा सती शीर्य्यते। कल + शॄ + डिः।) एन्द्रिपर्णी। चाकुलिया इति भाषा। इत्यमरः। २। ४। ९३ ॥ (एन्द्रिपर्णीशब्देऽस्या गुणावली ज्ञातव्या ॥) घटः। इत्यमरटीकायां रायमुकुटः॥ यथा, माघे ११। ८।
"कलशिमुदधिगुर्व्वीं वल्लवा षोड़यन्ति" ॥)
कलशी, स्त्री, (कलशि ङीदिकारान्तत्वात् वा ङीप्।) खनामख्यातजलपात्रम्। एन्द्रिपर्णी। इत्यमरटीकायां रायमुकुटः॥
कलसः, त्रि, (केन जलेन लसति शोभते। क + लस् + अच्।) कलशः। घटः। इति हेमचन्द्रः॥ द्रोणपरिमाणे, पुं। इति वैद्यकपरिभाषा॥
("चतुर्भिराढ़कैर्द्रोणः कलसो नल्वणोन्मितः" ॥
इति शार्ङ्गधरे पूर्ब्बखण्डे १ अध्याये ॥
"स एव कलसः ख्यातो घटस्तन्मानमेव च" ॥
इति चरके कल्पस्थाने १२ अध्याये॥)
कलसः, पुं, (केन जलेन लसतीति। लस् + अच्।) कुम्भः। अगस्त्योत्पत्त्यादिर्यथा,—
"सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलाः कलास्तु देवानामसितास्ताः पृथक् पृथक्।
यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत।
गोह्योपगोह्यो मरुतो मयूरश्च तथापरः ॥
मनोहा कृषिभद्रश्च विजयस्तनुशोधकः।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्रूप नव नामानि यानि तु।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः।
पवनाग्नी ततो द्वौ तु यजमानस्ततः परः।
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ॥
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः।
विजयो नाम कलसो योऽसौ नवम उच्यते ॥
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक्।
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयं तथा ॥
यथा काष्ठास्थितः सम्यक् वामदेवादिगामतः।
मण्डलस्य च पद्मान्तः पञ्चवक्त्रघटं न्यसेत् ॥
क्षितीन्द्रं पूर्ब्बतो न्यस्य पश्चिमे जलसम्भवम्।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैर्ऋते यजमानन्तु ऐशान्यां कोषसम्भवम्।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्येवं कलसांश्चैव तेषु चैतान् विचिन्तयेत्।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः।
मूले तु संस्थितो विष्णुर्म्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वे वेष्टयन्ति दिशो दश।
कुक्षौ तु सागराः सप्त सप्तद्वीपास्च संस्थिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः।
गङ्गाद्याः सरितः सर्व्वा वेदास्चत्वार एव च।
कलसे संस्थिताः सर्व्वे तेषु तानि विचिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ॥
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः।
सर्व्वधाममयं बिल्वं नागरोडुम्बरं तथा ॥
बीजपूरकजम्बीरकाम्रास्रातकदाड़िमान्।
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ॥
कुङ्कुमागुरुकर्पूरमदनं रोचनं तथा।
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ॥
कर्पूरपत्रचण्डञ्च जलं निर्य्यासकाम्बुदम्।
शैलेयं वदरं जातीपत्रपुष्पे तथैव च ॥
कालशाकं तथा एक्षां देवीं पर्णकमेव च।
वचां धात्रीं समङ्गिळां तुरुष्कं मङ्गलाष्टकम् ॥
दूर्व्वां मोहनिकां भद्रां शतमूलीं शतावरीम्।
पर्णानां शवलां क्षुद्रां सहदेवां गजाभ्रुशाम् ॥
पूर्णकोषां सितां पाठां गुह्यां सरसिकालसौ।
श्यामकं गजदन्तञ्च शतपुष्पां पुनर्णवाम् ॥
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वौषधानिकां तथा।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथा देवान् विधिं शृणु गदाधरम्।
यथाक्रमं पूजयित्वा शृणु मुख्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शृणुतन्त्रेण शङ्करम्।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ॥
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत्।
पूर्ब्बं बहिःस्थापितेषु ग्रहाणां कलसेषु च ॥
नवग्रहान् पूजयेत्तु मातृर्मातृघटेषु च।
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ॥
नवैव तत्र पूर्ब्बोक्ताः स्मृता मुख्यतमा नृप।
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ॥
यावकैः पायसैश्चापि यथासम्भवयोजितैः।
पुण्याहवाचनं कृत्वा पूजयेत् सकलान् सुरान्" ॥
इति कालिकापुराणे पुण्याभिषेकः ८७ अध्यायः ॥ * ॥ अन्यत् धारकशब्दे द्रष्टव्यम् ॥
कलसिः, पुं, (केन जलेन लसतीति। क + लस् + इन्।) एन्द्रिपर्णी। इत्यमरटीका शब्दरत्नावली च ॥ गर्गरी। इत्यमरटीका हारावली च ॥
कलसी, स्त्री, (कलस + स्त्रियां ङीप्।) एन्द्रिपर्णी। इति शब्दरत्नावली ॥ (कलसी वृद्धतीद्राक्षेत्यादिष्वस्या व्यवहारः ॥ इत्युत्तरतन्त्रे। ३९ अध्याये सुश्रुतेनोक्तम् ॥) कलसः। इत्यमरटीका ॥ (स्वार्थे कन्प्रत्ययेनोक्तं यथा, नैषधे। २। ८।
"अलम्बितकर्ब्बशृङ्खलीकलसीकं रचयन्नवोचत" ॥)
कलसीसुतः, पुं, (कलस्यां जातः सुतः।) अगस्त्यमुनिः। इत्यमरटीकायां वाचस्पतिः ॥
कलसोदधिः, पुं, कलस इव उदधिः। मन्थनाधारत्वात्। समुद्रः। इति महाभारतम् ॥
कलहः, पुं क्ली, (कलं कामं हन्त्यत्र। हन् + अधिकरणे डः।) विवादः। लड़ाइ झगड़ा इति भाषा ॥ (यथा मनुः ४। १२१।
"न विवादे न कलहे न सेनायां न सङ्करे" ॥)
तथा विष्णुपुराणे १ मांशे ९। १४५।
"अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन" ॥)
तत्पर्य्यायः। युद्धम् २ आयोधनम् ३ जन्यम् ४ प्रधनम् ५ प्रविदारणम् ६ मृधम् ७ आस्कन्दनम् ८ संख्यम् ९ समीकम् १० साम्परायिकम् ११ समरः १२ अनीकः १३ रणः १४ विग्रहः १५ सम्प्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समुदायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युध् ३१। इत्यमरः। २। ८। १०४ ॥ शूमीकम् ३२ साम्परायकम् ३३ संस्फोटः ३४ युत् ३५। इति तट्टीका ॥
कलहः, पुं, (कल + हन् + "अन्येभ्योऽपीति" ३। २। १०१। डः।) वाटः। खड्गकोषः। भण्डनम्। इति मेदिनी ॥
कलहंसः, पुं, (कलेन मधुरास्फुटध्वनिना विशिष्टो हंसः। शाकपार्थिवादित्वात् मध्यपदलोपि समासः।) हंसविशेषः। बालिहाँस इति भाषा। तत्पर्य्यायः। कादम्बः २। इत्यमरः। २। ५। २३ ॥ कलनादः ३ मरालकः ४। इति राजनिर्घण्टः॥ राजहंसः। (यथा भट्टिः। २। १८।
"कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः" ॥)
नृपोत्तमः। इति विश्वमेदिन्यौ ॥ परात्मा। ब्रह्म। इति शब्दरत्नावली ॥ (अतिजगती छन्दः। सा

च त्रयोदशाक्षरा। लक्षणमुक्तं यथा, छन्दोमञ्जर्य्याम् ७।
"सजसाः सगौ च कथितः कलहंसः"।
अस्योदाहरणमुक्तं तत्रैव। यथा,
"यमुनाविहारकुतुके कलहंसो
व्रजकामिनी कमलिनीलतकेलिः।
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः"॥
सिंहनादः क्वापि॥)
कलहनाशनः, पुं, (कलहं नाशयतीति। कलह + नश् + णिच् + ल्युः। अस्य कलहनाशकता कामंदविद्यायां प्रसिद्धा।) धूतिकरञ्जः। इति शब्दमाला॥
कलहप्रियः, पुं, (कलहः प्रियो यस्य।) नारदः। इति महाभारतम्॥ (कलहप्रिये त्रि।) यथा गोः रामायणे ५। १७। २७।
"दुर्म्मुखोः कपिलाः क्षुधाः क्रोधनाः कलहप्रियाः"॥)
कलहप्रिया, स्त्री, (कलहस्य कलहे वा प्रिया।) शारिकापक्षी। इति राजनिर्घण्टः॥
कलहान्तरिता, स्त्री, (कलहादन्तरिता पश्चात् परितापमाप्ता।) नायिकाभेदः। अस्या लक्षणम्। पतिमवमन्य पश्चात् परितप्ता। अस्याः क्रिया। भ्रान्तिः। सन्तापः। सम्मोहः। निश्वासः। ज्वरः। प्रलापादिः। इति रसमञ्जरी॥ (तथा च साहित्यदर्पणे ३। ८६।
"चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा"॥
उदाहरणमाह तत्रैव। "नो चाटुश्रवणं कृतं न च दृष्टा हारोऽन्तिके वीक्षितः, कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः। पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढ़या, पाणिभ्यामवरुध्य हन्त! सहसा कण्ठे कथं नार्पितः"॥)
कला, स्त्री, (कलयति शब्दितो धनं संगृह्णाति सञ्चिनोतीत्यर्थः। कल + अच् + टाप्।) मूलधनशब्दिः। सुद इति भाषा। शिल्पादि। (यथा रामायणे १। ६। ८।
"गीतवादित्रकुशला नृत्येषु कुशलास्तथा।
उपायज्ञाः कलाज्ञाश्च वैद्यिके परिनिष्ठिताः"॥)
अंशुमात्रम्। चन्द्रस्य षोड़शांशः। (यथा, वक्रोक्तिपञ्चाशिकायाम्। "साभरणतया त्वया मम कथं नेन्दोः कला दृश्यते, पश्यामीन्दुकलां स्फुटं पुनरिदं लक्षीकृता नास्मि यत्"॥) कालमानः। स तु त्रिंशत्काष्ठात्मकः। इति मेदिनी॥ ("त्रिंशत् काष्ठाः कलाः"। इति सुश्रुते सूत्रे ६ अः॥ शरीरस्यांशविशेषो यथा,—
"मांसास्रङ्मेदसां तिस्रो यकृत्प्लीह्नोस्तुरीयका।
पञ्चमी च तथान्त्राणां षष्ठीचाग्निधरा मता।
रेतोधरा सप्तमी स्यादिति सप्तकलाः स्मृताः"॥
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥) स्त्रीरजः। नौका। कपटः। इति विश्वः। राशेस्त्रिंशद्भागोऽंशस्तस्य षष्टिभागः। यथा,—
"विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते"॥
इति सूर्य्यसिद्धान्तः॥ अथ श्रीवैतन्त्रोक्ताश्चतुःषष्टिकला लिख्यन्ते। गीतम् १ वाद्यम् २ नृत्यम् ३ नाट्यम् ४ आलेख्यम् ५ विशेषकच्छेद्यम् ६ तण्डुलकुसुमबलिविकाराः ७ पुष्पास्तरणम् ८ दशनवसनाङ्गरागाः ९ मणिभूमिकाकर्म्म १० शयनरचनम् ११ उदकवाद्यम् १२ उदकघातः १३ चित्रायोगाः १४ माल्यग्रथनविकल्पाः १५ शेखरापीड़योजनम् १६ नेपथ्ययोगाः १७ कर्णपत्रभङ्गाः १८ गन्धयुक्तिः १९ भूषणयोजनम् २० ऐन्द्रजालम् २१ कौचुमारयोगाः २२ हस्तलाघवम् २३ चित्रशाकपूपभक्ष्यविकारक्रिया २४ पानकरसरागासवयोजनम् २५ सूचीवापकर्म्माणि २६ सूत्रक्रीड़ा २७ प्रहेलिका २८ प्रतिमाला २९ दुर्व्वचकयोगाः ३० पुस्तकवाचनम् ३१ नाटिकाख्यायिकादर्शनम् ३२ काव्यसमस्यापूरणम् ३३ पट्टिकावेत्रवाणविकल्पाः ३४ तर्कुकर्म्माणि ३५ तक्षणम् ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवादः ३९ मणिरागज्ञानम् ४० आकरज्ञानम् ४१ वृक्षायुर्व्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकशारिकाप्रलापनम् ४४ उत्सादनम् ४५ केशमार्জ্জনकौशलम् ४६ अक्षरमुष्टिकाकथनम् ४७ म्लेच्छितकविकल्पाः ४८ देशभाषाज्ञानम् ४९ पुष्पशकटिकानिमित्तज्ञानम् ५० यन्त्रमातृका ५१ धारणमातृका ५२ सम्पाठ्यम् ५३ मानसीकाव्यक्रिया ५४ क्रियाविकल्पाः ५५ छलितकयोगाः ५६ अभिधानकोषच्छन्दोज्ञानम् ५७ वस्त्रगोपनानि ५८ द्यूतविशेषः ५९ आकर्षक्रीड़ा ६० बालकक्रीड़नकानि ६१ वैनायिकीनां विद्यानां ज्ञानम् ६२ वैजयिकीनां विद्यानां ज्ञानम् ६३ वैतालिकीनां विद्यानां ज्ञानम् ६४। इति श्रीभागवतटीकायां श्रीधरस्वामी॥ क्वचित् पुस्तके सूचीवापकर्म्मसूचक्रीड़ा इत्येकं पदं तदुत्तरं वीणाडमरुकवाद्यानि-वैतालिकीनामित्यत्र वैयासिकीनामिति च पाठः॥ (जिह्वा। यथा हठयोगप्रदीपिकायाम् ३। ३७।
"कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत्"॥
"कलां जिह्वां पराङ्मुखमास्यं यस्याः सा तथा तां प्रत्यङ्मुखीं कृत्वा तिस्रणां नाड़ीनां पथ्यां तस्मिन् कपालकुहरे संयोजयेत्"। इति तट्टीका॥ शिवः। यथा महाभारते १३। १७। १४०।
'कलाःकाष्ठा लवा मात्रा मुहूर्त्ताः क्षणाःक्षणाः'॥)
कलाकूलं, क्ली, (कलया मात्रयापि व्याकूलयति व्याकूलयतीति। व्याकूलि इति नामधातोः + अच्।) विषम्। इति राजनिर्घण्टः॥
कलाकेलिः, पुं, (कलाभिः केलिः विलासो यस्य। कलासु केलिर्यस्य वा।) कामदेवः। इति त्रिकाण्डशेषः॥
कलाङ्कुरः, पुं, (कलानां अङ्कुरो यत्र।) सारसपक्षी। (स्त्रैणशास्त्रप्रवर्त्तककर्णसुतः।) कंसासुरः। इति त्रिकाण्डशेषः॥
कलाचिका, स्त्री, (कलामञ्चति गच्छति प्राप्नोति वा। कला + अच + उपपदे कर्म्मण्यण्। ततः स्वार्थे कन् + टाप्। अत इत्वच्।) प्रकोष्ठः। स तु कफोणेरधो मणिबन्धपर्य्यन्तः। इति हेमचन्द्रः॥
कलाची, स्त्री, (कलां अञ्चति। कला + अच् + अण्। गौरादित्वात् ङीष्।) कलाचिका। इति हारावली॥
कलादः, पुं, (अलङ्कारनिर्म्माणाय गृहस्थैः समर्पितानां सुवर्णादीनां कलां अंशं आदत्ते गृह्णाति। अलङ्कारनिर्म्माणहेतुना गृहस्थोपार्জ্জितधनांशं वा आदत्ते। आ + दा + कः।) सुवर्णकारः। इत्यमरः। २। १०। ८॥
कलानिधिः, पुं, (कलाः निधीयन्तेऽस्मिन्। कला + नि + धा + अधिकरणे किः।) चन्द्रः। इत्यमरः। १। ३। १४॥ (यथाह कश्चित्।
"अहो महत्त्वं महतामपूर्व्वं
विपत्तिकालेऽपि परोपकारः।
यथाऽस्य मध्ये पतितोऽपि राहोः
कलानिधिः पुण्यचयं ददाति"॥)
कलानुनादी, [न्] पुं, (कलं अनुनदतीति। कल + अनु + नद् + णिनिः।) रोलम्बः। भ्रमरः। कलविङ्कः। चटकः। कपिञ्जलः। चातकः। इति मेदिनी॥
कलान्तरं, क्ली, (अन्या कला अंशः। सुप्सुपेति समासः।) वृद्धिः। लाभः। इति लीलावती॥ सुद इति भाषा। (चन्द्रस्य अन्या कला। यथा कुमारे १। २५।
"उपोढ़ लावण्यमयान् विशेषान्
व्योत्स्नान्तराणीव कलान्तराणि"॥)
कलापः, पुं, (कलां मात्रां आप्नोति। कला + आप् + "कर्म्मण्यण्" ३। २। १। इति अण्। यद्वा कला आप्यतेऽनेन "हलश्च" ३। ३। १२१। इति घञ्।) समूहः। (यथा भागवते ४।२४।६२।
"क्रियाकलापैरिदमेव योगिनः
श्रद्धान्विताः साधु यजन्ति सिद्धये"॥)
मयूरपिच्छः। (यथा, गोः रामायणे ५। ५२। १३
"संप्रदीप्तकलापाया विप्रकीर्णाश्च वर्हिणः"॥)
काञ्ची। भूषणम्। (यथा कुमारे १। ४२।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य"॥
"मुक्ताकलापस्य मुक्ताभूषणस्य"। इति मल्लिनाथः॥) तूणः। (यथा हेः रामायणे २। ५२। ११।
"ततः कलापान् सन्नह्य खड्गौ बद्ध्वा च धन्विनौ"॥) चन्द्रः। विदग्धः। व्याकरणविशेषः। इति मेदिनी॥ (यथा, वृहत्कथासारः।
"अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति।
तदाहनकलापस्य नाम्ना कालापकं तथा"॥)
ग्रामविशेषः। यथा, भागवते। ९। १२। ६।
"देवापिर्योगमास्थाय कलापग्राममाश्रितः।
सोमवंशे कृतौ नष्टे कृतादौ स्थापयिष्यति"॥
(अस्त्रविशेषः। यथा महाभारते ४। ५। २८।
"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्।
विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह"॥)
कलापकः, पुं, (कलाप + संज्ञायां कन्।) हस्तिकण्ठ-

बन्धः । इति हेमचन्द्रः ॥ (स्वार्थे कन् । कलापार्थः । स्त्री, यस्मिन् काले मयूराः कलापिनी भवन्ति स उपचारात् कलापी तत्र देयमन्नम् । "कलाप्यश्वत्थयवबुसाट्टन्" । ४ । ३ । ४८ । ऋणविशेषः । इति सिद्धान्तकौमुदी ॥ पद्यविशेषः । यथा, साहित्यदर्पणे ६ । २४७ ।

"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं स्मृतम्" ॥)

कलापिनी, स्त्री, (कलापश्चन्द्रः अस्ति अस्याम् । कलाप + मत्वर्थे इनिः + ततो ङीप् ।) रात्रिः । नागरमुस्ता । इति राजनिर्घण्टः ॥

कलापी, [न्] पुं, (कलापाः फलपत्रसमूहाः सन्त्यस्मिन् । कलाप + इनिः ।) वृक्षविशेषः । (कलापोवर्हः अस्ति अस्य इनिः ।) मयूरः । इति मेदिनी ॥ (यथा रघुः ६ । ६ ।

"पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्तहेतौ" ॥)

कोकिलः । इति धरणी ॥ (त्रि, तूणवान् । कलापव्याकरणाध्यायी ॥)

कलापूर्णः, पुं, (कलाभिः पूर्णः ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (त्रि, कलापरिपूर्णः । यथा महाभारते । ४ । ६७ । १३ ।

"सदा भवान् फाल्गुनस्य गुणैरस्मान् विकत्थते ।
न चाप्नुनः कलापूर्णो मम दुर्योधनस्य वा" ॥)

कलाभृत्, पुं, (कलां बिभर्त्ति । कला + भृ + क्विप् । तुगागमश्च ।) चन्द्रः । इति हेमचन्द्रः ॥ (कलां गीतादिकं बिभर्त्तीति । गीतादिकलाभिज्ञे वाच्यलिङ्गत्वम् । यथा मनुः २ । १३४ ॥

"दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्वं श्रोत्रियाणां सख्येनापि सयोनिषु" ॥)

कलामकः, पुं, (कलम + कनि एषोदरादित्वात् साधुः ।) कलमधान्यम् । इति हेमचन्द्रः ॥ (कलमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

कलाम्बिका, स्त्री, (कला अर्थः विक्रायते प्रयुज्यते अस्याम् । कला + वि + कै + क + टाप् । एषोदरादित्वात् मुमि साधुः ।) अर्थानां प्रयोगः । ऋणदानम् । इति त्रिकाण्डशेषः ॥ धार देओया इति भाषा ॥

कलायः, पुं, (कलां अयते । "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शमीधान्यविशेषः । मटर वाँटुला इति भाषा । तत्पर्य्यायः । सतीलकः २ हरेणुः ३ खण्डिकः ४ । इत्यमरः । २ । ६ । १६ ॥ त्रिपुटः ५ अतिवर्त्तुलः ६ । इति रत्नमाला ॥ मुण्डचणकः ७ शमनः ८ नीलकः ९ कराटी १० सतीलः ११ हरेणुकः १२ सतीनः १३ सतीनकः १४ । (यथा, माघः । १३ । २१ । "विकसत्कलायकुसुमास्तितद्युतेः" ॥) अस्य गुणाः । वातश्लेष्मपुष्टामदोषकारित्वम् । पित्तदाहकफनाशित्वम् । शीतलम् । कषायत्वञ्च ॥ (अस्य पर्य्यायोगुणाश्च यथा, भावप्रकाशस्य पूर्ब्बखण्डे धान्यवर्गे ।

"कलायो वर्त्तुलः प्रोक्तः सतिलश्च हरेणुकः ।
कलायो मधुरः स्वादुःपाके रूक्षश्च वातलः" ॥)

अस्य गुणाः । मधुरत्वम् । पित्तश्लेष्महरत्वम् । गुरुत्वम् । कषायानुरसत्वम् । रूक्षत्वम् । मलभेदित्वम् । वायुकोपनत्वञ्च । इति राजनिर्घण्टः ॥ ("भेदनं मधुरं रूक्षं कषायमतिवातलम्" ॥ इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

कलायनः, पुं, (कलानां नृत्यगीतादीनां अयनं प्राप्तिर्यत्र ।) नर्त्तकः । इति शब्दरत्नावली ॥

कलायी, स्त्री, (कलाय + स्त्रियां टाप् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (गण्डदूर्व्वाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कलालापः, पुं, (कलं मधुरास्फुटं आलपतीति । कल + आ + लप् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) भ्रमरः । इति राजनिर्घण्टः ॥ (मधुरालापकर्त्तरि त्रि ॥)

कलावती, स्त्री, (कला गान्धर्व्वकलाः संगीतरागालापादयः सन्ति अस्याम् । कला + मतुप् मस्य वः स्त्रियां ङीप् ।) तुम्बुरुगन्धर्व्वस्य वीणा । इति हेमचन्द्रः ॥ (यथा माघस्य १ । १० श्लोकस्य टीकायां मल्लिनाथधृतवैजयन्तीवचनम् ।

"विश्वावसोस्तु बहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी" ॥

खनामख्याता द्रुमिलस्य राज्ञः पत्नी । यथा ब्रह्मवैवर्त्ते ब्रह्मखण्डे । २० । १२ ।

"कान्यकुब्जे च देशे च द्रुमिलो नाम राजकः ।
कलावती तस्य पत्नी बन्ध्या चापि पतिव्रता" ॥)

श्रीराधामाता । सा तु वृषभानुपत्नी । इति ब्रह्मवैवर्त्तपुराणम् ॥ अप्सरोविशेषः । यथा ऋतिलव कलावतीति श्लिष्टकाव्ये जयदेवः ।

(कलाः चतुःषष्टिकलाः विद्यन्ते यस्याः । गङ्गा । यथा, काशीखण्डे २६ । ४७ ।

"कूटस्था करुणाकान्ता कूर्म्मयाना कलावती" ॥)

दीक्षाविशेषः । तस्याः क्रमो मन्त्रं विना लिख्यते । शिष्यः पूर्ब्बमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्ब्बकं सङ्कल्पं कुर्य्यात् । ततो गुरुं वृणुयात् । अथ गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्य्यात् । तदर्घ्यजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्य्यात् । ततो दक्षिणपादपुरःसरं द्वारवामशाखां स्पृशन् दक्षिणाङ्गं सङ्कोचयन् मण्डपान्तः प्रविश्य नैर्ऋत्यां वास्तुपुरुषं ब्रह्माणञ्च संपूज्य देयमन्त्रेण दिव्यदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य्य अस्त्रमन्त्रेण जलेनान्तरीक्षगान् विघ्नानुत्सार्य्य वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य्य सप्तधास्त्रमन्त्राभिमन्त्रितविकिरानादाय भूतनिवारणार्थमस्त्रमन्त्रेण तान् विकिरेत् । तत आसनशुद्धिं कृत्वा मन्त्रेण स्वस्तिकादिक्रमेणोपविशेत् । उपविश्य वा विघ्नानुत्सारयेत् । ततः पञ्चगव्येन मूलेन मण्डपं प्रोक्षयेत् । ततः खदक्षिणे पूर्णाद्रथाग्नि वामे सुवासिताम्बुपूर्णकुम्भं हस्तप्रक्षालनार्थं पात्रमेकं एकदेशे स्थापयेत् । सर्व्वत्र घृतप्रदीपांश्च स्थापयित्वा पुटाञ्जलिर्भूत्वा वामे गुरुपरमगुरुपरापरगुरून् प्रणम्य दक्षिणे गणेशं मध्ये खेष्टदेवताञ्च प्रणम्य अस्त्रमन्त्रेण गन्धपुष्पाभ्यां करौ संप्रोक्ष्य ऊर्द्धोर्द्धतालत्रयं दत्त्वा क्षोटिकाभिर्दशदिग्बन्धनं कृत्वा वह्निबीजेन जलधारया वह्निप्राकारं विचिन्त्य भूतशुद्धिं कुर्य्यात् । ततो मातृकान्यासः प्राणायामः पीठन्यासः ऋष्यादिन्यासः मन्त्रन्यासः । ततो मुद्रां प्रदर्श्य ध्यानं मानसपूजां अर्घ्यस्थापनञ्च कुर्य्यात् । ततोऽर्घ्यपात्रात् किञ्चित् जलं प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणञ्च मूलेन चिरभुक्त्वा पीठमन्त्रेण शरीरे धर्म्मादीन् पूजयेत् । ततो हृत्पद्मस्य पूर्ब्बादिकेशरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत । तत्र हृदये मूलदेवतां नैवेद्यं विना गन्धाद्यैः पूजयेत् । तत उत्तमाङ्गहृदयमूलाधारपादसर्व्वाङ्गेषु मूलेन पञ्चपुष्पाञ्जलीन् दत्त्वा यथाशक्ति मन्त्रं जप्त्वा जपं समर्पयेत् । सर्व्वमेतत् प्रोक्षणीपात्रस्थवारिणा विदध्यात् । ततः प्रोक्षणीस्थोयं विसृज्य पूर्ब्ववदर्घ्यं वह्निःपूजामारभेत । तत्र शरदोक्तसर्व्वतोभद्रमण्डलाद्यन्यतममण्डलं विधाय तत्र घटं संस्थाप्य मण्डलं संपूज्य शालिभिः कर्णिकामापूर्य्य तदुपरि तण्डुलानास्तीर्य्य तेषु दर्भानास्तीर्य्य विस्तरं चात्मतसंयुक्तं तदुपरि न्यसेत् । ततो मण्डले पीठोक्तदेवताः पूजयेत् । ततो मण्डले प्रादक्षिण्येन वह्नेर्दशकला विन्यस्य पूजयेत् । ततो हेमादिरचितं कुम्भं अस्त्रमन्त्रेण प्रक्षाल्य चन्दनागुरुकर्पूरैर्धूपयित्वा त्रिगुणतन्तुना संवेष्ट्य कुम्भं संपूज्य तत्र विसृराक्षतं नवरत्नानि च प्रक्षिप्य प्रणवमुच्चरन् कुम्भपीठयोरैक्यं विभाव्य पीठे स्थापयेत् । कुम्भे प्रादक्षिण्येन सूर्य्यस्य द्वादशकला विन्यस्य संपूजयेत् । ततः क्षीरिद्रुमकषायेण पलाशत्वम्बेन वा तीर्थजलैर्व्वा सुवासितजलैर्व्वा आत्मामेदेन मातृकां मन्त्रञ्च प्रतिलोमतो जपन् पूरयेत् कुम्भं देवताधिया । ततश्चन्द्रस्यामृतादिषोडशकला जले प्रादक्षिण्येन विचिन्त्य मन्त्रेण संपूज्य शङ्खान्तरं क्षीरिद्रुमकषायादिद्रव्येणापूर्य्य गन्धाद्यङ्कं विलोप्य तस्मिन् जले सकलाः कला आवाह्य पूजयेत् । तत्रादौ वह्नेर्दशकलाः पूजयेत् । ततो मूलमन्त्रं प्रतिलोमेन जपन् मन्त्रस्य देवतां मनसा ध्यायन् आसां प्राणप्रतिष्ठां कृत्वा गन्धादिभिः पूजयेत् । ततः प्रत्येकेन पूजयेत् । ततः सूर्य्यस्य तपिन्यादिद्वादशकलाः आवाहनादिकं कृत्वा संपूज्य प्रत्येकं पूजयेत् । ततश्चन्द्रस्यामृतादिषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः पञ्चाशत्कलाः पूजयेत् । यथा वृष्ट्यादिकचवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूर्ब्ववत् संपूज्य प्रत्येकेन पूजयेत् । ततो जरादिटतवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततस्तीक्ष्णादिपयवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः शीतादिवशवर्गपञ्चकलाः (वं-सं-हं-क्षं) प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततो निवृत्त्यादिअवर्गषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् । शक्तीश्च प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ।

ततः कलात्मकं तत्पञ्चस्थं क्षार्धं कुम्भे निःक्षिपेत्। ततोऽश्वत्थपनसचूतपल्लवैरिन्द्रवल्लीवेष्टितैः कल्पवृक्षवृद्धा कुम्भवक्त्रं पिधाय तस्मिन् वस्त्रे सफलाक्षतं चषकं कल्पवृक्षफलबुद्धा स्थापयेत्। ततः कुम्भं निर्म्मलेन क्षौमयुग्मेन संवेष्ट्य मूलेन कुम्भे मूर्त्तिं सङ्कल्प्य यथोक्तरूपेण देवतां ध्यात्वा तस्यामावाहनादिकं कृत्वा पूजयेत्। देवताङ्गे अङ्गन्यासं कृत्वा धेनुमुद्रापरमीकरणमुद्रे प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोड़शोपचारादिभिः पूजयेत्। ततोऽष्टोत्तरं सहस्रं शतं वा संजप्य जपं समर्पयेत्। ततो मन्त्रस्य दशसंस्कारान् कृत्वा गुरुः शिष्यमानीय मन्त्रेण शिष्यनेत्रं वस्त्रेणाच्छाद्य शिष्याञ्जलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मन्त्रं जपन् कलसे देवतामावाह्य क्षिपेत्। ततो नेत्रबन्धनं दूरीकृत्य दर्भान्तरे आसीनं शिष्यं स्वकृतपूजाकर्म्माद्भुतशुद्धादिकं विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात्। कुम्भस्थां देवतां पुनः षष्ठोपचारैः संपूज्याज्ञप्तं शिष्यमन्यस्मिन्नुपवेशयेत्। ततो मङ्गलाचारपूर्ब्बकं तत्कुम्भं समुद्धृत्य तन्मुखस्थान् सुरद्रुरूपान् पल्लवान् शिष्यशिरसि निधाय माष्टकां मनसा जपन् मूलेन साधितैस्तोयैर्वैशिष्ठसंहितोक्ताभिषेकमन्त्रैस्तमभिषिञ्चेत्। शिष्योऽवशिष्टजलेनाभग्न वाससी परिधाय गुरोः सन्निधावुपविशेत्। ततस्तामेव गुरुरात्मनो देवतां शिष्यसंक्रान्तां तयोरैक्यं विभाव्य गन्धादिभिः पूजयेत्। ततो मन्त्रेण शिष्यस्य शिखां बद्धा संरक्ष्य शिष्यशरीरे कलान्यासं कुर्य्यात्। ततः शिष्यशिरसि हस्तं दत्त्वा अष्टोत्तरशतं जप्त्वा अमुकमन्त्रं तेऽहं ददामीति शिष्यहस्ते जलं दद्यात्। ददस्वेति शिष्यो ब्रूयात्। तत ऋष्यादियुक्तं मन्त्रं गुरुर्द्विजातीनां दक्षिणकर्णे त्रिः श्रावयेत् वामे सकृत्। स्त्रीशूद्राणां वामकर्णे त्रिः श्रावयेत् दक्षिणे सकृत्। ततः शिष्यो गुरुचरणे पतित एव तिष्ठेत्। ततो गुरुर्म्मन्त्रेण तमुत्थापयेत्। ततः शिष्यो जप्यमन्त्रं अष्टोत्तरशतं जपेत्। ततः शिष्यः कुशतिलजलान्यादाय गुरवे दक्षिणां सवर्णं काञ्चनं वा दद्यात्। दीक्षायज्ञसामग्रीश्च निवेदयेत्। अन्यांश्च ब्राह्मणान् परितोषयेत्। गुरुः स्वशक्तिरूपत्वार्थाय अष्टाधिकं सहस्रं शतं वा मन्त्रं जपेत्। ततः शिष्यो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वयं भुञ्जीत। दीक्षादिवसे गुरुशिष्ययोरुपवासे दोषः। इति तन्त्रसारोक्ता कलावतीदीक्षा समाप्ता॥

कलाविकः, पुं, (कलं आविकायति विक्रेतेव रौतीति कल + आ + वि + कै + कः।) कुक्कुटः। इति त्रिकाण्डशेषः॥

कलाविकलः, पुं, (कलः मधुराव्यक्तः आविकलः रवो यस्य सः। यद्वा कलया कामावेशेन विकलः चञ्चलः।) चटकः। इति शब्दरत्नावली॥

कलाहकः, पुं, (कलमाहन्तीति। कल + आ + हन् + डः। संज्ञायां कन्।) काहलवाद्यम्। इति शब्दरत्नावली॥

कलिः, पुं, (कलते कलेराश्रयत्वेन वर्त्तते इति। कल + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) विभीतकवृक्षः। (विभीतकस्य कलिद्रुमत्वकारणमुक्तं यथा, वामने २७ अध्याये।

"इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं ययौ"॥

अस्य गुणादिकं विभीतकशब्दे द्रष्टव्यम्॥*॥

कलते स्पर्द्धते इति कल + "सर्व्वधातुभ्यः इन्"। उणां-४।११७। इति इन्।) शूरः। (कलन्ते स्पर्द्धमाना भावन्तेऽस्मिन्निति। कल + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) विवादः। (यथा, भागवते ६। ६। ४४।

"तासां कलिरभूद्भूयांस्तदर्थऽपोह्य सौहृदम्।
समानरूपो नायं व इति तद्गतचेतसाम्"॥)

युद्धम्। (कल्यते पापेषु निक्षिप्यते अनेन यद्वा कलयति पापेन जड़यति कलुषितं करोति। कल + इन्।) अन्त्ययुगम्। इति हेमचन्द्रः॥

तस्योत्पत्तिर्यथा।

"प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः।
ससर्ज्ज घोरं मलिनं पृष्ठदेशात् सपातकम्॥
सचाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात्।
श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते॥
अधर्म्मस्य प्रिया रम्या मिथ्या माय्यार्लोचना।
तस्याः पुत्रोऽतितेजस्वी दम्भः परमकोपनः॥
स मायायां भगिन्यान्तु लोभं पुत्रञ्च कन्यकाम्।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥
स हिंसायां भगिन्यान्तु जनयामास तत्कलिम्।
वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम्॥
काकोदरं करालास्यं लोलजिह्वं भयानकम्।
पूतिगन्धं द्यूतमद्यस्त्रीसुवर्णकृताश्रयम्॥
भगिन्यान्तु दुरुक्त्यां स भयं पुत्रञ्च कन्यकाम्।
मृत्युं संजनयामास तयोश्च निरयोऽभवत्॥
यातनायां भगिन्यान्तु लोभपुत्रायुतायुतम्।
इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः"॥

इति कल्किपुराणे १ अध्यायः॥*॥

कलिधर्म्मो यथा।

"यदा सदाऽतं तन्द्रानिद्रा हिंसा विषादनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जगाः कामिनः स्युः शश्वत्कटुकभाषिणः।
दस्युकृष्टा जनपदा वेदाः पाषण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
अव्रता वटवो ऽशौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा न्यासिनो ऋद्धलोलुपाः।
कृषकाया महाहाराश्चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं तापसान्त्वखिलं व्रतं।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः॥
उद्दिमाखानलङ्काराः पिशाचसदृशाः प्रजाः।
श्वश्रूतभोजनेनाग्निदेवतातिथिपूजनम्॥
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्।
स्त्रीपराश्च जगाः सर्व्वे शूद्रप्रायाश्च शौनक॥
वडप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः।
शिरःकण्डूयनपरा आद्यां भेत्स्यन्ति सत्पतेः॥

विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः॥
कलेर्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः क्रतुम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्माद्ध्यायो हरिर्नित्यं ध्येयः पूज्यश्च शौनक"॥

इति गारुड़े युगधर्म्मे २२७ अध्यायः॥

(माघपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः।) तद्युगमानम्। द्वात्रिंशत्सहस्राधिकचतुर्लक्षवत्सराः (४३२०००)।

(आर्य्यभट्टमते ऽब्द १५७७९१७५० दिवसाः। सूर्य्यसिद्धान्तमते १५७७९१७८२। ४८ दिवसाः। ज्योतिषसैद्धान्तिकमते च १५७७९१७८२ दिवसाः॥ अतो वर्षमाणमार्य्यभट्टमते ३६५। १५। ३१। १५। दिवसाः।

सूर्य्यसिद्धान्तमते ३६५। १५। ३१। ३१। २४। दिवसाः। ज्योतिषसैद्धान्तिकमते च ३६५। १५। ३१। ३० दिवसाः।)

तस्यातीताब्दाः १८०९ शाकपर्य्यन्तं ४९८८॥

(कलेस्त्रिपञ्चाशदधिकषट्शतमितेषु (६५३) वत्सरेषु गतेषु युधिष्ठिरादयो जाताः। यदुक्तं राजतरङ्गिण्यां १। ५१।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः"॥

ऋतुपक्षशरद्विमितेषु (२५२९) युधिष्ठिराब्देषु कलेर्ग्रहसिन्धिन्दुनेत्रमितेषु (३१७९) वत्सरेषु गतेषु च महाविषुवसंक्रान्त्यां शालिवाहनस्य राज्ञो जन्मदिनमारभ्य शकाब्दः प्रवर्त्तितः। यदुक्तं तत्रैव १। ५९।

"आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विपञ्चद्वियुतः शककालस्तस्य राज्यस्य"॥ अयन्तु महाविषुवसंक्रान्तिमधिगम्य परिगणितो भवति॥

कलेश्चतुश्चत्वारिंशदधिकत्रिसहस्रपरिमितेषु (३०४९) वत्सरेषु गतेषु चैत्रशुक्लप्रतिपदि उज्जयिनीपतेर्विक्रमादित्यस्य राज्यप्राप्तिकालमारभ्य संवत् इत्याख्यया प्रसिद्धो वत्सरः प्रचलितः। अयन्तु चैत्रशुक्लप्रतिपत्तिथिमधिगम्य परिगणितो भवति॥

कलेरेकोर्द्धशताधिकत्रिसहस्रपरिमितेषु (३१०१) वत्सरेषु गतेषु प्रायशो सौरपौषस्य अष्टादशदिवसे यीशुखीष्टोब्दः प्रचलितः॥

पञ्चनवत्यूर्द्धषट्शताधिकत्रिसहस्रपरिमितेषु (३६९५) कलेरतीताब्देषु सप्तदशाधिकपञ्चशततमिते (५१७) च शकाब्दे प्रचलति भाद्रशुक्लादशम्यां उत्कलदेशप्रचलितः विजयाति इत्याख्यया प्रसिद्धो वत्सरः प्रवर्त्तितः। अयन्तु भाद्रशुक्लादशमीमधिगम्य परिगणितो भवति॥

त्र्योविंशत्यूर्द्धसप्तशताधिकत्रिसहस्रपरिमितेषु (३७२३) कलेरतीताब्देषु पञ्चचत्वारिंशदधिकपञ्चशततमिते (५४५) च शकाब्दे प्रचलति ज्यैष्ठस्य विंशतितमदिवसीय शुक्रवारात् महम्मदस्य मक्का-

प्रस्थानकालमारभ्य "हिजरि" इति प्रसिद्धो ह्ययनः प्रचलितः। अयन्तु चान्द्रमानेन परिगणितो भवति। अतः प्रायशः सौरसप्तनवतितमवर्षैरस्य शततमा वत्सरा भवेयुः॥

पञ्चाशीत्यूर्द्धपञ्चशताधिकचतुःसहस्रपरिमितेषु कलेरतीताब्देषु (४५८५) सप्ताधिकचतुर्दशशतपरिमिते (१४०७) च शकाब्दे प्रवर्त्तति फाल्गुनीयोनविंशदिवसे शुक्रवारे पूर्णिमायां भगवांश्चैतन्यदेवः प्रादुर्बभूव। अस्य जन्मदिनमारभ्य चैतन्याब्दः प्रचलितः॥)

अस्मिन् युगे धर्म्म एकपादः। अधर्म्मस्त्रिपादः। आयुः शतवर्षाणि। अवतारः श्रीकृष्णः। तद्युगशेषे पापिनां विनाशाय भगवद्यशमावतारः कल्किर्भविष्यति। तद्युगधर्म्मो यथा।

"कलौ तु धर्म्मपादानां तुर्य्यांशोऽधर्म्महेतुभिः। एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति॥ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः। दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः"॥

"यदा मायान्वितं तन्द्रा निद्रा हिंसा विषादनम्। शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः॥ यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः। कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥ दस्युप्रायाः जनपदा वेदाः पाषण्डदूषिताः। राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः। तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः॥ रूक्षकाया महाहारा वह्वपत्या गतह्रियः। शूश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः॥ पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः। अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम्॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम्। भृत्यं विपन्नं पतयः कौलं गाङ्गेयपर्यिनीः॥ पितॄन् भ्रातॄन् सुहृद्ज्ञातीन् हित्वा सौरतसौहृदाः। ननान्दृश्यालसम्वादा दीनाः स्त्रैणाः कलौ नराः॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः। धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम्॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः। निरन्ने भूतले राजन्नाहृष्टिभयातुराः॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः। हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यन्ति हि प्रियान् प्राणान् हनिष्यन्ति स्वकानपि॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि। पुत्रान् भार्य्याश्च कुलजां क्षुद्राः शिश्नोदरम्भराः॥

कलौ न राजन् जगतां परं गुरुं
त्रिलोकनाथानतपादपङ्कजम्।
प्रायेण मर्त्या भगवन्तमच्युतं
यक्ष्यन्ति पाषण्डविभिन्नचेतसः॥ *॥

कलिकृतदोषविनाशोपायः। यथा,

"यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान्।
विमुक्तकर्म्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः॥
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान्।
सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः॥
श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा।
नृणां क्षिणोति भगवान् हृत्स्थो जन्मायुताशुभम्॥
यथा हेम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम्।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम्॥
विद्यातपःप्राणनिरोधमैत्री
तीर्थाभिषेकव्रतदानजप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते॥
तस्मात् सर्व्वात्मना राजन् हृदिस्थं कुरु केशवम्।
म्रियमाणो ह्यवहितस्ततो याहि परां गतिम्"॥
"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्"॥
इति श्रीभागवते महापुराणे १२। ३ अध्यायः॥*॥
तद्युगशेषधर्म्माः यथोक्तास्तत्रैव १२।१।३६-४७॥
"सौराष्ट्रावन्त्याभीराश्च शूरा अर्ब्बुदमालवाः।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः॥
सिन्धोस्तटं चन्द्रभागां कान्तीं काश्मीरमण्डलम्।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छा ब्रह्मावर्चसः॥
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः।
एतेऽधर्म्मोत्तरा राजन् पशुदास्त्रीबालकद्रुहः॥
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः।
उदितास्तमितप्राया अल्पसत्वाल्पकायुषः॥
असंस्कृताः क्रियाहीना रजसा तमसा वृताः।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः"॥
तत्रैव १२। २। १-१६।
"ततश्चानुदिनं धर्म्मः सत्यं शौचं क्षमा दया।
कालेन बलिना राजन् नङ्क्ष्यत्यायुर्बलं स्मृतिः॥
वित्तमेव कलौ नृणां जन्माचारगुणोदयः।
धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यवहारिके।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥
लिङ्गमेवाश्रमाख्यातावन्योन्यापत्तिकारणम्।
अलक्ष्या न्यायदौर्ब्बल्यं पाण्डित्ये चापलं वचः॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव हि।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम्॥
दूरे वार्य्ययनं तीर्थं लावण्ये केशधारणम्।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि॥
दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम्।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले।
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः॥
प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्म्मभिः।
आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम्॥
शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः।
अनाढ्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः॥
शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः।

क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया॥
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम्।
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः॥
वर्णाश्रमवतां धर्म्मे नष्टे वेदपथे नृणाम्॥
पाषण्डप्रचुरे धर्म्मे दस्युप्रायेषु राजसु।
चौर्य्यानृतवृथाहिंसानानावृत्तिषु वै नृषु॥
शूद्रप्रायेषु वर्णेषु च्छागप्रायासु धेनुषु।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु॥
अनुप्रायासोषधीषु शमीप्रायेषु स्थास्नुषु।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु॥
इत्थं कलौ गतप्राये जनेषु खरधर्म्मिषु।
धर्म्मत्राणाय सत्वेन भगवानवतरिष्यति"॥
(देवगन्धर्व्वविशेषः। स तु कश्यपात् दनुकन्यायां मुनौ जातः। यथा, महाभारते १। ६५। ४४।
"तथा शालिशिरा राजन् पर्ज्जन्यश्च चतुर्दश।
कलिः पञ्चदशस्त्वेषां नारदश्चैव षोड़शः"॥
शिवः। यथा महाभारते। १३। १७। ७८।
"दम्भोद्भवो वैदम्भो वशो वशकरः कलिः"॥)

कलिः, स्त्री, (कलयति ईषत्प्रकाशते उद्भवति वा कल + ततः इन्।) कलिका। इति मेदिनी॥

कलिकः, पुं, (कलौ मन्दगम्भीरध्वनिरस्त्यस्ति। कल + मत्वर्थे ठन्।) क्रौञ्चपक्षी। इति शब्दरत्नावली॥

कलिका, स्त्री, (कलिरेव। स्वार्थे कन् टाप् च।) अस्फुटितपुष्पम्। तत्पर्य्यायः। कोरकः २। इत्यमरः। २। ४। १६॥ कलिः ३ कली ४। कोरकम्। ५ इति तट्टीका॥ (यथा, साहित्यदर्पणे ३। १६८।
"मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः"॥)
वीणाभूषणम्। इति हेमचन्द्रः॥ पदसन्ततियुक्तरचनाविशेषः। तद्विवरणम् यथा,—
"सुश्लिष्टाकलिकारम्भे श्लोकान्तं युगपद्यः स्मृताः।
अन्यासां कलिकानान्तु भवन्त्येकैकशो हि ते॥
पूर्त्तौ द्वौ कलिकाभिस्तु विरदास्तुल्यसङ्ख्यकाः"॥*॥

कलिकालक्षणम्।

"कला नाम भवेत्तालनियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः।
कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका।
तथा त्रिभङ्गी वृत्ताख्या मधा मिश्रा च केवला"॥

चण्डवृत्ते दशधा संयुक्तवर्णाः।

"अत्र संयुक्तवर्णानां नियमो दशधा च ते।
मधुरं श्लिष्टविश्लिष्टग्रथितक्रादिनस्वमौ॥
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा।
ह्रस्वान्मधुरसंयोगाः शङ्खराङ्कुशकिङ्कराः॥
तस्मात्तु श्लिष्टसंयुक्ता दर्पकर्परसर्पवत्।
ततो विश्लिष्टसंयुक्ता भल्लकल्याणचिल्लयः॥
तथा ग्रथितसंयुक्ताः पद्म कश्यप वज्रवत्।
प्रोक्ता क्रादियुता मध्यं सङ्घं गृह्यं प्रसङ्गवत्॥
गर्हादीन् क्रादिसंयुक्तभेदान् केचित् समूचिरे।
दीर्घात्तुक्राङ्कार्पासं वाद्यं वैद्यश्च वाह्यकम्"॥

कषायपरिमाणमुक्तम्।

"अधिकास्वेचतुःषष्टिर्न्यूना द्वादश ताः कलाः।
एताभ्यो नाधिकाः कार्य्या न्यूनाप्यपि न पण्डितैः"॥
तत्र तावच्चतुःषष्टिकलिका द्विधा। नखो विंशिखश्चेति भेदात्। तत्र रत्नादि-विंशतिभेदस्य नखस्येह वर्জ্জितादयो नव भेदा गृहीताः।
"वर्জ্জितं वीरभद्रञ्च समयोऽच्युत उत्पलम्।
तुरङ्गः श्रीगुरुरतिस्तथा भातङ्गखेलितम्।
तिलकश्चेति कलिका नखश्चेहोदिता नव"॥इत्युक्तेः॥

अथ विंशिखः। पद्मकुन्दचम्पकबञ्जुलभेदात् पञ्चविधः। तेष्वादिमं पद्मं पङ्केरुहसितकञ्जपाथोजपलेन्दीवरदयाम्भोरुहकञ्जारभेदात् षड्विधम्। द्वितीयं वकुलन्तु भासुरमङ्गल्यभेदात् द्विविधमित्येकादशभेदो विंशिखः।
"पङ्केरुहं सितकञ्जं तथा पाथोजपत्रं परम्।
इन्दीवरदयाम्भोजे कञ्जारश्चेति षड्विधम्॥
ईषद्भेदेन कथितं पद्ममेव मनीषिभिः।
चम्पकं बञ्जुलं कुन्दं वकुलं द्विविधं तथा"॥
इति पञ्चविधस्यापि विंशिखस्येहग्रन्थका इत्युक्तेः।
एवं चतुःषष्टिकलिका विंशतिधा गृहीताः॥*॥

अथ षष्टिधा दिगादिगजदन्तकाकलिका मञ्जरीत्यभिहिता क्रमात् कोरकगुच्छकसंपुष्पकुसुमगन्धाख्या। तस्याश्चाच कोरकगुच्छकुसुमानि गृहीतानि। कोरको गुच्छकुसुमैर्मञ्जरी त्रिविधाच त्वित्युक्तेः। त्रिभङ्गी कलिका तु शिखरिण्यादिपूर्व्या सोढ़ा। तस्याश्चाच दग्धकपूर्व्या विदग्धपूर्व्या च गृहीता। दग्धकाख्या विदग्धाख्या त्रिभङ्गीह द्विधा मतेत्युक्तेः॥*॥ अथ मिश्रकलिका तु कलिकागद्यसंपृक्ता सप्तविंशतिका वा। अच्छमयी सर्व्वलघ्वी चेति द्विभेदा केवला चेत्यष्टौ। तदेवं षड्भ्यो महाकलिकाभ्यो ऽष्टाविंशतिरिह कलिका गृहीताः। रत्नादय एकादश नखभेदाः। संपुष्पगन्धौ मञ्जरीभेदौ। शिखरिण्यादयः त्रिभङ्गीभेदा मध्यकलिका च त्वत्प्राधान्यताधिक्यविरहात्। इति रूपगोस्वामिसनातनगोविन्दविरुदावलीभाष्ये बलदेवविद्याभूषणः॥ (छन्दोभेदः। यदुक्तं हरिवंशे ४ अध्याये।
"प्रथममपरचरणमुत्थं
श्रयति स यदि तृतीयम्।
इतरदितरगदितमपि यदि च तूर्य्यम्
चरणयुगलकमविलसितमपरमिति कलिका सा"॥
कला। यथोक्तं सिद्धान्तशिरोमणौ।
"तन्यन्ते कलिका यस्मात्तस्मात्तास्तिथयः स्मृताः"॥)

कलिकापूर्व्व, क्ली, (कलिकया व्यंग्येन जन्यं अपूर्व्वं अदृष्टम्।) अङ्गप्रधानान्यतरजन्यकर्म्मसाध्यस्वर्गादिफलजनकापूर्व्वोत्पत्तौ तत्तत्फलैककर्म्मजन्यमदृष्टम्। इति स्मृतिः॥

कलिकारः, पुं, (कलिं चिचिकुचीतिशब्देन कलहं करोतीति। कलि+कृ+अण्।) धूम्राटपक्षी। पीतमस्तकपक्षी। (कलिं खदेहस्यकण्टकैरनिष्टं करोतीति।) पूतिकरञ्जः। इति मेदिनी॥

कलिकारकः, पुं, (कलिं कण्टकैरनिष्टं करोति। कलि+कृ+णिच्+ण्वुल्।) पूतिकरञ्जः। काँटाकरञ्ज गाटाकरञ्ज इति च भाषा। इत्यमरः। २। ४। ४८॥ (कलिं कलहं कारयति। कलि+कृ+णिच्+ण्वुल्।) नारदमुनिः। इति हेमचन्द्रः॥

कलिकारी, स्त्री, (कलिं गर्भपातान्यनिष्टं करोतीति। कलि+कृ+अण्। जातित्वात् ङीष्।) उपविषभेदः। विषलाङ्गलीया इति भाषा। तत्पर्य्यायः। लाङ्गली २ हलिनी ३ गर्भपातनी ४ दीप्ता ५ विशल्या ६ अग्निमुखी ७ हली ८ नक्ता ९ इन्द्रपुष्पिका १० विद्युज्ज्वाला ११ अग्निजिह्वा १२ ग्रन्थहृत् १३ पुष्पसौरभा १४ खर्ब्बपुष्पा १५ वह्निशिखा १६। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। गर्भान्तःशल्यनिष्क्रामकारित्वम्। परमसारित्वञ्च। इति राजनिर्घण्टः॥

कलिङ्ग, क्ली, (कलि+गम्+ड। निपातनात् साधुः।) इन्द्रयवम्॥ इत्यमरः। २। ४। ६७॥

कलिङ्गः, पुं, (कलिं पूतिगन्धादिकं गच्छति प्राप्नोति कलि+गम्+ड। निपातनात् साधुः।) पूतिकरञ्जवृक्षः। (के मस्तके लिङ्गं पीतादिचिह्नमस्य।) धूम्राटपक्षी। देशविशेषः। इति हेमचन्द्रः॥ (खनामख्यातो नृपतिविशेषः। अस्य नामानुसारेणैव कलिङ्ग इति देशाख्या जाता। यदुक्तं महाभारते। १। १०४। ७६,५०।
"अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सह्यश्च ते सुताः।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि॥
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः"॥)
मेदिनीमते जलपदार्थे पुं भूम्नि। (यदुक्तं तत्रैव गत्रिके ३२।
"कलिङ्गः पूतिकरञ्जे धूम्राटे भूमि नीहति"॥
अस्य प्रमाणं यथा, गौरामायणे। ४। १०। २१।
"ततः शकपुलिन्दांश्च कलिङ्गांश्चैव मार्गतः"॥
तद्देशवासिमानवादयः। यथा, महाभारते। ३। ११४। ३।
"ततः समुद्रतीरेण जगाम बहुधाधिपः।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत"॥)
कुटजवृक्षः। (अस्यपर्य्यायो यथा भावप्रकाशे पूर्व्वखण्डे १ भागे।
"उक्तं कुटजवीजन्तु यवभिन्द्रयवस्तथा।
कलिङ्गश्चापिकालिङ्गं तथा भद्रयवा अपि"॥
इन्द्रयवशब्दे अस्य गुणावली ज्ञेया॥
अवहारो यत्र तदुयथा।
"विल्वं छागपयः सिद्धं सितामोचरसान्वितम्।
कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम्"॥
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)
शिरीषवृक्षः। शुक्लवृक्षः। इति राजनिर्घण्टः॥

कलिङ्गकः, पुं, (कलिङ्ग+संज्ञायां कन्। कलिङ्ग इव कायति वा। कै+कः।) इन्द्रयवम्। इति रत्नमाला॥ (यथा, वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।
"कलिङ्गकाः पटोलस्य पाठा कटुकरोहिणी"॥)

कलिङ्गा, स्त्री, (कं सुखं लिङ्गतीति। क+लिङ्ग+टाप्।) नितम्बिनी। महिषी। इति मेदिनी॥ हरेणुः। इति शब्दचन्द्रिका। तेउड़ि इति भाषा॥

कलिङ्गः, पुं, (कं वातं लङ्घति तिरस्करोति रोधनेनेति यावत्। क+लङ्घि भर्त्सने+"कर्म्मण्यण्" ३। २। १। इति अण्। निपातनात् साधुः।) कटः। इति हेमचन्द्रः॥ चाँच् दरमा इत्यादि भाषा॥

कलितं, त्रि, (कल्+कर्म्मणि क्त।) विदितम्। आप्तम्। इति मेदिनी॥ मेदितम्। गणितम्। इति शब्दरत्नावली॥ धृतम् यथा,—
"करकलितकपालः कुण्डली दण्डपाणिः"। इति भैरवध्यानम्॥
(प्राप्तः। यथा आर्य्यासप्तशती ३५५।
"विंशिख इव कलितकर्णः प्रविशति हृदं न निःसरति"॥ भावे+क्त। ज्ञानम्॥)

कलिद्रुमः, पुं, (कलिना आश्रितो द्रुमः शाकपार्थिवादिवत् मध्यपदलोपः।) विभीतकवृक्षः। इत्यमरः। २। ४। ५८। बयड़ा इति भाषा॥ (अस्य पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे। १ भागे।
"विभीतकस्त्रिफलिङ्गः स्याद्भाक्षः कर्षफलस्तु सः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः"॥
विशेषविवरणमस्य विभीतकशब्दे ज्ञेयम्॥)

कलिन्दः, पुं, (कलिं ददाति श्यति वा खच् मुम् च।) विभीतकवृक्षः। इति राजनिर्घण्टः॥ (विभीतकशब्देऽस्य विशेषो ज्ञातव्यः॥) सूर्य्यः। पर्व्वतविशेषः। यस्मात् यमुना निर्गता। इति कालिन्दीशब्दव्युत्पत्तौ भरतः॥ (यथा रघुः ६। ४८।
"कालिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥)

कालिन्दकन्या, स्त्री, (कालिन्दस्य पर्व्वतविशेषस्य कन्या तदुत्पन्नत्वात्।) यमुनानदी। इति राजनिर्घण्टः॥
("कालिन्दकन्यामथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥
इति रघुः। ६। ४८॥)

कालिन्दनन्दिनी, स्त्री, (कालिन्दं नन्दयति। कालिन्द+नन्द+णिनिः ङीप् च। कालिन्दस्य नन्दिनी वा।) यमुनानदी। इति शब्दरत्नावली॥

कलिप्रियः, पुं, (कलिः कलहः प्रियो यस्य।) नारदमुनिः। यथा। "कलिप्रियस्य प्रियशिष्यवर्गः"। इति रघुः॥ (कलेः प्रियः। दुष्टप्रकृतिकः॥) वानरः। इति शब्दरत्नावली॥

कलिमारकः, पुं, (कलीनां कलिकानां माला यत्र। अस्य रः कप् संज्ञायां कन् वा। यद्वा कलिना खदेहस्यकण्टकाघातदुःखेन मारयतीति। कलि+मृ+णिच्+ण्वुल्।) कलिकारकः। इत्यमरटीकायां रमानाथः। २। ४। ४८॥

कलिमालकः, पुं, (कलीनां माला यत्र। कप् कलिना मारयति वा रस्य लः।) कलिकारकः। इति स्वामी इत्यमरटीकायां भरतः॥

कलिमाल्यः, पुं, (कलीनां माल्यं यत्र।) पूतिकरञ्जः। इति राजनिर्घण्टः॥

कलुषः

कलियुगं, क्ली, (कलिरेव युगम्। अन्ने: शिखा राहोः शिर इति वत् कलेर्युगं वा।) चतुर्थं युगम्। (यथा मनुः १। ८५।

"अन्ये कृतयुगे धर्म्मा स्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः" ॥)

तस्योत्पत्त्यादि यथा। माघीपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः। तत्र अवतारः कल्किः। पुण्यमेकपादम्। पापं त्रिपादम्। गङ्गा तीर्थम्। ब्राह्मणो निरग्निः। अन्नगताः प्राणाः। सार्द्धत्रिहस्तपरिमितो मनुष्यदेहः। अशीत्यधिकशतवर्षं परमायुः। भोजनपात्रस्य नियमो नास्ति। इति कलियुगस्य लक्षणम्। कलियुगाब्दाः ४३२०००। आदौ कलिराजा धर्म्मपुत्रो युधिष्ठिरः। हरिश्चन्द्रः मुनिचन्द्रः तेजशेखरः विक्रमादित्यः विक्रमसेनः लाउसेनः बल्लालसेनः देवपालः भूपालः महीपालः। एते राजचक्रवर्त्तिनः।

तन्नामाख्यं यथा,—

'धर्म्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरं गतम्।
लोका धर्म्महता द्विजाश्च लुभिता नारीवशा मानवाः'।

तत्र तारकब्रह्मनाम।

"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे"।

इति केचित्॥

कलियुगाद्या, स्त्री, (कलियुगस्य आद्या आद्यतिथिः।) माघीपौर्णमासी। तत्स्नानं युगाद्याशब्दे द्रष्टव्यम्॥

कलिलः, त्रि, (कल्यते मिश्र्यते इति। "सलिकलि" उणां १। ५५। इति इलच्।) गहनः। इत्यमरः। ३। १। ८५॥ (यथा गीतायाम् २। ५२।

"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति"॥)

मिश्रः। इत्युणादिकोषः॥ (यथा भागवते ६। २। ४६।

"न यत्पुनः कर्म्मसु सज्जते मनो
रजस्तमोभ्यां कलिलं ततोऽन्यथा"॥)

कलिवृक्षः, पुं, (कलिराश्रयरूपो वृक्षः।) कलिद्रुमः। वहेडुकवृक्षः। इति हेमचन्द्रः।

कली, स्त्री, (कल्+"सर्व्वधातुभ्य इन्" ततः वा ङीप्।) कलिका। इत्यमरटीकायां भरतः॥

कलुषं, क्ली, (कं सुखं लुषति हिनस्ति। क+लुष्+अण्। यद्वा कल्+"पुनष्टिकलिभ्य उषच्"। उणां ४। ७५। इति उषच्।) पापम्। इत्यमरः। १। ४। २८॥ (यथा शङ्करार्य्यकृतात्मबोधे ५।

"अज्ञानकलुषं जीवं ज्ञानाभ्यासादिनिर्म्मलम्।
कृत्वा ज्ञानं स्वयं नश्येत्फलं कतकरेणुवत्"।

मालिन्यं यथा ऋतुसंहारे। १। २३।

"विगतकलुषमम्भः प्रालिपक्वा धरित्री।
विमलकिरणचन्द्रं व्योम ताराविचित्रम्"॥)

कलुषः, पुं क्ली, (कस्य जलस्य लुषः हिंसकः। आविलकारक इत्यर्थः। क+लुष्+क।) महिषः। इति राजनिर्घण्टः॥ (वञ्जः। यथा शुकुन्तलायां "कण्ठः स्तम्भितवाष्पवृत्तिकलुषः"। निन्दितः। यथा मनुः १। ५७।

"वर्षापेतमविज्ञातं नरं कलुषयोनिजम्"॥)

कलुषः, त्रि, (कल्+उषच्।) अनच्छः। आविलः। इत्यमरः। १। १०। १४॥ ("निर्मलमकलुषे नेत्रे" इति सुश्रुते उत्तरतन्त्रे। ३१ अध्याये॥)

कलेवरं, क्ली, (कले सुखे वरं श्रेष्ठं देहोत्पत्तिहेतुकत्वात् पवित्रम्। समन्या अलुक्।) शरीरम्। इत्यमरः। २। ६। ७०॥ (यथा गीतायाम्। ८। ६।

"यं यं भावं स्मरन् देही त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः"॥)

कल्कः, पुं क्ली, (कल् गतौ+"कृ दाधारार्चिकलिभ्यः कः"। उणां ३। ४०। इति कः।) कृततैलादिप्रक्षेपः। (यथा याज्ञवल्क्यः। १। २७७।

"स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकम्।
गौरसर्षपकल्केन साध्येनोत्सादितस्य च"॥)

दम्भः। (यथा महाभारते १। १। २७१।

"तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः।
प्रसङ्गवित्तादरणं न कल्कः
तान्येव भावोपहतानि कल्कः"॥)

विभीतकवृक्षः। विष्ठा। किट्टम्। पापम्। इति मेदिनी॥ (यथा भागवते २। २। २४।

"विधूतकल्कोऽथ हरेरवस्रजात्
प्रयाति चक्रं नृप! पृष्ठतोऽरिहम्"॥

यस्य कस्यचित् वस्तुनो चूर्णम्। यथा कुमारे। ७। ६।

"तां लोध्रकल्केन कृताङ्गतैजा-
मास्यानकालेयकृताङ्गरागाम्"॥)

कर्पूरमञ्जः। इति शब्दरत्नावली॥ तुरुष्कनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ कृततैलादिपाके देयमौषधद्रव्यम्। तत्तु पञ्चकषायान्तर्गतदृष्टादि वेदितम्। अस्य पूर्णवीर्य्यं यावन्मेकं तिष्ठति। यथा,—

"द्रव्यमात्रं स्निग्धपिष्टं शुष्कं वा जलमिश्रितम्।
तदेव सूरिभिः पूर्व्वैः कल्क इत्यभिधीयते"॥

तत्पर्य्यायः। पिण्ड २ विनीयः ३। इति रत्नमाला॥ आवापः ४ प्रक्षेपः ५। इति वैद्यकपरिभाषा॥ ("द्रव्यमार्द्रं स्निग्धपिष्टं शुष्कं वा सजलं भवेत्। प्रक्षेपावापकल्कास्ते तन्मानं कर्षसम्मितम्॥ इति मध्यखण्डे। ५। १। शार्ङ्गधरेणोक्तम्॥ यस्तु कृततैलपर्युष्यते सभूयः कल्क इति संज्ञां लभते निरुद्गालेपनसंज्ञस्तेनासावसंनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषतान्नग्रहणशुद्धिश्च भवति"॥ इति सुश्रुते सूत्रस्थाने। १८ अध्याये॥) श्राद्धम्। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥

कल्कः, त्रि, (कलयति पापमाचरति। कल्+कः।) पापाशयः। पापात्मा। इति मेदिनी॥

कल्कफलः, पुं, (कल्कस्य विभीतकस्य फलमिव फलं यस्य अवयवसादृश्यात्।) दाड़िमवृक्षः। इति राजनिर्घण्टः॥ (दाड़िमशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कल्किः, पुं, (कल्कः पापं हार्य्यतया अस्ति अस्य। कल्क+इन्।) विष्णोर्दशमावतारः। स तु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे

कल्किः

भविष्यति। यथा,—

"सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति"॥

तस्य कर्म्म यथा,—

"अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः।
असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥
विचरन्नाशुना क्ष्मौणां हयेनाप्रतिमद्युतिः।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति"॥

इति श्रीभागवतम्॥ तस्योत्पत्तिर्यथा,—

"स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्।
तं श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्॥
सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो धन्यायां तन्निदेशतः॥
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिच्छिदम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥
इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति।
बृहद्रथस्य भूपस्य कौसुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्यैषा पद्मा नाम्नी भविष्यति॥
यात यूयं भुवं देवाः स्वांशावतरणे रताः॥
राजानो मरुदेवापौ स्थापयिष्याम्यहं भुवि।
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्ब्बवत्।
कलिच्छलं संनिरस्य प्रयास्ये स्वालयं विभो॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः॥
महीमाश्वास्य भगवान् निजजन्मक्षतोद्यमः।
सम्भलग्रामविप्रस्य विवेश परात्मकः॥
सुमत्यां विष्णुयशसो गर्भमाधत्त वैष्णवम्।
यद्गन्धर्व्वचराप्सरादिसेवितश्रीपदाम्बुजम्॥
सरित् समुद्रा गिरयो लोकाः सस्याम्बुजङ्गमाः।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ॥
बभूव सर्व्वसत्त्वानामानन्दो विविधाश्रयः।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः॥
चक्रुर्व्वाद्यादि गन्धर्व्वा ननृतुश्चाप्सरोगणाः।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।
जातो ददृशतुः पुत्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाड़ीच्छेत्री तदम्बिका।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता॥
तस्य विष्णोरनन्तस्य वसुधाऽदात् पयः सुधाम्।
माद्रका माङ्गल्यवचः क्षणाज्जन्मदिनेऽभवन्॥
ब्रह्मा तदुपधार्य्याशु स्वासुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ विचारितम्॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सुप्रीतः प्राह तरसा ब्रह्मणो वचनादृतः।
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु सम्भलग्रामे सोत्सवा जीवजातयः॥
मङ्गलाचारवज्राद्याः पापतापविवर्ज्जिताः।
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्॥
पूर्णकामा विप्रमुख्यानाहूयादाद्धनं शतम्।

हरेः कल्याणकृद्विष्णुयशाः शुद्धेन चेतसा ॥
सामर्ग्यजुर्व्विद्विरयोक्तनामकरणे रतः ।
तदा रामः क्रतो व्यासो द्रौणिर्भिक्षुः परीक्षितः ॥
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ।
तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान् ।
हृष्टरोमा द्विजवरः पूजां चक्रे स ईश्वरान् ॥
पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः ।
हरिं क्रोडगतं तस्य ददृशुः सत्त्वमूर्त्तयः ॥
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः ।
कल्किं कल्किविनाशार्थमाविर्भूतं विदुर्बुधाः ।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः ।
ततः स ववृधे तत्र सुमत्या परिपालितः ॥
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी ।
कल्केर्व्वंशोद्भवाः शूराः कविप्राज्ञसुमन्त्रकाः ॥
तातमाद्यप्रियकरा गुरुविप्रप्रतिष्ठिताः ।
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः ॥
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः ।
विशाखयूपभूपालपालितास्तापवर्ज्जिताः ।
ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः ॥
ततो विष्णुयशाः पुत्रं धीरं सर्व्वगुणाकरम् ।
कल्किं कमलपत्राक्षं प्रोवाच पठनादृतम् ।
तात ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् ।
सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्कि-
जन्मोपनयनम् २ अध्यायः ॥

कल्की, [न्] पुं, (कल्कः पापं नाशतया अस्ति अस्य । कल्क + इनि ।) कल्किः । भगवतो दशावतारेषु चरमोऽवतारः । यथा पुराणे ।
"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्चरामश्च बुद्धः कल्की च ते दश" ।
(अस्य जन्मादिविवरणन्तु कल्किशब्दे द्रष्टव्यम् ।)

कल्पः, पुं, (कल्प्यते विधीयते असौ । क्लृप् + कर्म्मणि घञ् ।) विधिः । (यथा मनुः १ । १४७ ।
"एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः" ।
(कल्पयति कृप्तिं नाशं वा अत्र । क्लृप् + णिच् + अधिकरणे घञ् ।) प्रलयः ।
("युगानां सप्ततिः सैकामन्वन्तरमिहोच्यते" ।
"कृताब्दसंख्यस्यान्ते सन्धिः प्रोक्तो जलप्लवः" ।
"सप्तसप्तयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश ।
कृतप्रमाणकल्पादौ सन्धिः पञ्चदशस्मृतः" ।
ते एकसप्ततियुगरूपा मनवः स्वायम्भुवाद्याः सप्तनवयः स्वस्वसन्धिसहिताः कल्पकाले ज्ञातव्याः । सप्तसन्धियुक्तचतुर्दशमनुभिः कल्पो भवेदित्यर्थः । इति सूर्य्यसिद्धान्तोक्तकल्पपरिमाणम् । आत्यन्तिकनैमित्तिकप्राकृतिकनित्यमहाप्रलयानां विवृतिस्तु ततच्छब्दे द्रष्टव्यम् । *)

कल्प्यते स्वक्रियायै समर्थो भवत्यत्र । क्लृप् + अधिकरणे घञ् ।) ब्राह्मं दिनम् । तत्तु दैवदिसहस्रयुगम् । इत्यमरः । १ । ४ । २१ ॥ (यथा विष्णुपुराणे १, मांशे २ । १२ ।

"कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्म्मांश्च तत्त्वज्ञः" ॥)
त्रिंशत्कल्पैर्ब्रह्मणः एको मासो भवति तेषां नामानि यथा । श्वेतवाराहः १ नीललोहितः २ वामदेवः ३ गाधान्तरः ४ रौरवः ५ प्राणः ६ बृहत्कल्पः ७ कन्दर्पः ८ सद्यः ९ ईशानः १० ध्यानः ११ सारस्वतः १२ उदानः १३ गरुडः १४ कौर्म्मः १५ अयं ब्रह्मणः पौर्णमासो । नारसिंहः १६ समाधिः १७ आग्नेयः १८ विष्णुजः १९ सौरः २० सोमकल्पः २१ भावनः २२ सुप्तमाली २३ वैकुण्ठः २४ आर्चिषः २५ वल्मीकल्पः २६ वैराजः २७ गौरीकल्पः २८ माहेश्वरः २९ पितृकल्पः ३० अयं ब्रह्मणोऽमावास्या । इति क्रमसन्दर्भे प्रभासखण्डम् । एतादृशैर्दादशमासैर्ब्रह्मणः सम्वत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशद्वर्षाणि व्यतीतानि एकपञ्चाशदारम्भे अधुना श्वेतवाराहकल्पः । इति महाभारतम् । (कल्पारम्भकालश्च ब्रह्मसिद्धान्ते उक्तस्तद्यथा,—
"चैत्रसितादेर्भानोर्वर्षर्तुमासयुगकल्पाः ।
सृष्ट्यादौ ब्रह्मणायमिह प्रवृत्ता दिनैर्वत्स !" ॥
चैत्रसितादेश्चैत्रशुक्लप्रतिपदमारभ्य इत्यर्थः ।
तथा च ब्रह्मपुराणम् ।
"चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ।
प्रवर्त्तयामास तदा कालस्य गणनामपि" ।
इति कालसामान्यगणनायास्तदारभ्य कथनात् ॥
एवं चैत्रशुक्लप्रतिपदि कल्पारम्भेऽपि ।
"माघसुक्लाष्टतीयायां कृष्णायां फाल्गुनस्य च ।
पञ्चमी चैत्रमासाद्या यथैवाद्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पनामादयो ह्येता दत्तस्याक्षयकारकाः" ॥
इति वराहवाक्यानि समूलानि चेत् तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत् तिथिषु श्राद्धकर्त्तव्यतोपयोगिपारिभाषिकपरत्वेन वा समर्थनीयानि । अत एव सूर्य्यसिद्धान्ते उक्तम् । यथा—
"सुरासुराणामन्योन्यमहोरात्रविपर्य्ययात् ।
यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥
मन्वन्तरस्यवस्था च प्राजापत्यमुदाहृतम् ।
न तत्र युगसन्धेर्भेदो ब्राह्मकल्पः प्रवर्त्तितः" ॥
इत्यादीनां युगमन्वन्तरकल्पानां सौरत्वेन उक्तिः। सौरमाने च नियतयुगादिकालेषु क्वचियततिथिसम्भवेऽपि सर्व्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता प्रागुक्तवचनप्रामाण्यात् । किन्तु प्रागुक्तसप्तम्यै ब्राह्मकल्पानां चान्द्रत्वकथनात् तिथिभेदसम्भवः । इति सूर्य्यसिद्धान्तवाक्यं ग्रहस्पष्टीकरणोपयोगीत्यविरोधः ।) विकल्पः । कल्पवृक्षः । न्यायः । शास्त्रविशेषः । स तु वेदषडङ्गान्तर्गतो यागक्रियाणामुपदेशकः । इति हेमचन्द्रः ॥ (यथा रघुः १ । ९४ ।
"कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" ॥)

व्याकरणस्य प्रत्ययविशेषः । स च स्याद्यन्तत्याद्यन्तपदाभ्यामीषदूनार्थे भवति । तत्र वाक्यलिङ्गत्वे यथा, ईषदूनो विद्वान् विद्वत्कल्पः । ईषदूनं पचति पचतिकल्पम् । इति मुग्धबोधव्याकरणम् । (तथा महाभारते १ । १२६ । ५ ।
"ते परस्परमामन्त्र्य देवकल्पा महर्षयः" ॥)

कल्पकः, पुं, (कल्पयति क्षौरकर्म्मादिना वेषादिकं रचयतीति । क्लृप् + णिच् + ण्वुल् ।) नापितः । इति शब्दमाला ॥ कर्च्चूरः । इति भावप्रकाशः ॥ (कल्पयति गद्यपद्यादिकमुद्भाव्य रचयतीति वाक्ये रचयिता । ग्रन्थकर्त्ता ॥)

कल्पनं, क्ली, (क्लृप् + भावे ल्युट् ।) कृप्तिः । छेदनम् । इति त्रिकाण्डशेषः ॥

कल्पना, स्त्री, (क्लृप् + णिच् + भावे युच् टाप् ।) हस्तिसज्जना । नायकस्यारोहणार्थं गजसज्जीकरणम् । इत्यमरः । २ । ८ । ४२ ॥ अनुमितिः । इति न्यायशास्त्रम् ॥ रचना । यथा "प्रबन्धकल्पना कथा" । इत्यमरः । १ । ६ । ६ ॥

कल्पनी, स्त्री, (कल्पयति केशानीन् छिनत्ति अनया । क्लृप् छेदने + करणे ल्युट् । ततो ङीप् ।) कर्त्तनी । इति हेमचन्द्रः । काँची इति भाषा ॥

कल्पपादपः, पुं, (कल्पयति सर्व्वकामं सम्पादयति । इति कल्पः । स चासौ पादपश्चेति कर्म्मधारयः ।) कल्पवृक्षः । यथा नैषधे । १ । १५ । "मघा न चक्रेऽल्पितकल्पपादपः" ॥

कल्पपादपदानं, क्ली, (कल्पपादपस्य सुवर्णनिर्म्मितपादपाच्छतेर्दानम् ।) महादानविशेषः । तद्विधानं यथा,
"कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्व्वपातकनाशनम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कृत्वा लोकेशावाहनन्तथा ॥
ऋत्विक्सम्भारभूषणाच्छादनादिकम् ।
काञ्चनं कारयेद्वृक्षं नानाफलसमन्वितम् ॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्धं मासहस्रात् प्रकल्पयेत् ॥
अर्द्धकृतं सुवर्णस्य कारयेत् कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च सितवस्त्रयुगावृतम्" ॥
अर्द्धकृतं यावदुक्तसुवर्णस्यार्द्धेन निर्म्मितम् ।
"ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ।
कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ॥
सन्तानं पूर्व्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं हृतोपरि" ॥
सन्तानं पूर्व्वतस्तद्वदिति गुडप्रस्थं सितवस्त्रयुगावृतमित्यर्थः। कामदेवमधस्ताच्चेति सन्तानवृक्षस्याधस्तात् सकलत्रं कामदेवं प्रकल्पयेदिति योजनम् । मन्दारादिवृक्षैकैकदेवतासम्बन्धश्रुतेः ॥
"पश्चिमे पारिभद्रन्तु सावित्र्या सह शौरकेः ।
सुरभीसंयुतं तद्वत्तिलेयं हरिचन्दनम् ॥
हृतीयांशेन कुर्व्वीत सौम्येन पनसंयुतम् ।
कौशेयवस्त्रसंयुक्तानित्यमाल्यफलान्वितान्" ॥
हृतीयांशेन सन्तानघटनावस्थितसुवर्णहृतीयभागेन । सौम्येन उत्तरदिग्विभागेन ॥

"तथाष्टपूर्णकलसान् पादुकासनभाजनान् ।
दीपिकोपानद्दच्छत्रचामरासनसंयुतम्" ॥

पादुकासनभाजनान् पादुकासनभाजनसहितानित्यर्थः । आसनपदञ्चात्र कलसावस्थानोचितासनपरम् । चामरासनसंयुतमिति पुनरासनपदश्रवणात् ।

"फलपत्तियुतं तद्वदुपरिष्टादितानकम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
होमाधिवासनान्ते तु स्थापितो देवपुङ्गवैः ।
त्रिःप्रदक्षिणमाहृत्य मन्त्रमेतमुदीरयेत् ॥
नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये ॥
यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।
मूर्त्तामूर्त्तपरं बीजमतः पाहि सनातन ! ॥
त्वमेवामृतसर्व्वस्वमनन्तपुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतः सन् पाहि संसारसागरात् ॥
एवमामन्त्र्य तं दद्यादृत्विजे कल्पपादपम् ।
चतुर्थ्यन्तापि ऋत्विग्भ्यः सन्तानादीनि कल्पयेत्" ॥

एतेन चत्वार एवर्त्विजः कर्त्तव्याः । कृच्छ्रमयाश्चत्वारो ब्रह्माद्या इत्युक्तं सम्भवति ॥

"स्वल्पेष्वेकाग्निवत् कुर्य्यात् गुरुरेवाभिपूजितः ।
न वित्तशाठ्यं कुर्व्वीत न च विस्मयवान् भवेत्" ॥

न च विस्मयवान् इदम्मया दत्तमिति गर्व्वाङ्गारवान् भवेदित्यर्थः ॥

"अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्व्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान्भव्यांश्च मनुजांस्तारयेदात्मसम्मितान् ॥
स्तूयमानो दिवः एष्ठे पुत्रपौत्रप्रपौत्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ।
दिवि-कल्पशतं तिष्ठेदाजराजो भवेत्ततः ॥
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणपुरं व्रजेत् ॥
यो वा पठेत् कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्म्मन्वन्तरं वसति पापविमुक्तदेहः" ॥ * ॥

अत्र यजमानः समुपजातकल्पपादपमहादानदानेच्छुस्तुलापुरुषलिखितं खड्गचर्म्ममयाच्छत्रसहितं तुलास्थाप्यहरिप्रतिमालङ्कारतुलाहस्तग्राह्यप्रतिमाऋत्विक्चतुष्टयवस्त्रादिदक्षिणासामग्रीवहिः सर्व्वसम्भारं अधिकृत्येन पलत्रयाद्धसहस्रपलावधियथेष्टकाञ्चनमुपादाय तस्यार्द्धेन कल्पपादपमपरार्द्धेन समभागेन सन्तानं मन्दारं पारिभद्रं हरिचन्दनमेवं पञ्चतरून् पञ्चशाखान् सौवर्णनानाफलपत्तिसुवर्णनिर्म्मितानेकवसनाकारसहितान् केयूरकुण्डलाद्यभिमतालङ्कारभूषितान् एषामाच्छादनार्थं श्वेतवस्त्रयुगपञ्चकं तरूणामवस्थापनार्थं गुड़प्रस्थद्वयं प्रत्येकं प्रस्थपरिमितान् पाचस्रुतशीरकतिलांश्च कल्पवृक्षाधःस्थापनार्थमभीष्टसुवर्णान्तरयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमाः यथोक्तक्रमतरुचतुष्टयाधःस्थापनार्थमभिमतसुवर्णान्तरयन्त्रोत्खाटिताः सरतिकामदेवलक्ष्मीसावित्रीसुरभिप्रतिमाश्च कल्पतरुपार्श्वस्थापनार्थमष्टौ कुम्भान् तदधःस्थापनार्थं कुशादिनिर्म्मितासनाष्टकं कुम्भाच्छादनार्थं कौषेयवस्त्राष्टकं कुम्भपार्श्वस्थापनार्थमिक्षुदण्डाष्टकं पुष्पमालाष्टकसामग्रीं यथेष्टफलाष्टकं पादुकायुगाष्टकं कांस्यभाजनाष्टकञ्च कल्पतरुपार्श्वार्पणार्थं दीपिकोपानद्युगच्छत्रचामरासनाष्टादशधान्यानि च उत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने यजमानगुर्व्वृत्विग्जापकास्तुलापुरुषवद्विघ्नभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्य्युः । ततोऽपरदिने यजमानस्तुलापुरुषवदोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरव्रतवाक्येषु तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषव्रतञ्च अनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः कल्पतरुमानीय प्रधानवेद्यां लिखितक्रमध्ये गुड़प्रस्थं दत्त्वा तदुपरि स्थापयेयुः । ततस्तस्याधो गुड़प्रस्थोपरि पद्मक्रमेण सुवर्णयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमाः स्थापयेयुः । तत्पूर्व्वतः अधस्तादारोपितसरतिकामदेवप्रतिमां गुड़प्रस्थोपरि सन्तानं कल्पतरुदक्षिणतः अधःसमारोपितलक्ष्मीप्रतिमां घृतप्रस्थोपरि मन्दारं कल्पतरोः पश्चिमतः अधःसमारोपितसावित्रीप्रतिमां जीरकप्रस्थोपरि पारिभद्रं कल्पतरूत्तरतः अधःसमारोपितसुरभिप्रतिमां तिलप्रस्थोपरि हरिचन्दनञ्चारोपयेयुः । सर्व्वांश्च वृक्षान् प्रत्येकं सितवस्त्रयुगेनाच्छादयेयुः । अथासु दिक्षु प्रत्येकं कौषेयवस्त्राच्छादितान् इक्षुदण्डफलान्वितान् माल्यालङ्कृतानष्टौ पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजनासनेष्वारोप्य कल्पतरुपार्श्वे पूर्व्वोक्तदीपिकाद्युपकरणमारोपयेयुः । ततो मङ्गलतूर्य्यगीतवन्दिघोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो घृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं त्रिः प्रदक्षिणीकृत्य नमस्ते कल्पवृक्षायेत्यादि पाहि संसारसागरादित्यन्तमन्त्रान् पठित्वा पुष्पाञ्जलिनाभ्यर्च्य गुर्व्वृत्विग्भ्यो यथायथं दद्यात् ॥ ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्पुराणोक्तकल्पपादपमहादानदानफलप्राप्तिकामोऽहं मत्पुराणोक्तभागव्यवस्थया एतं गुड़प्रस्थारोपितसौवर्णब्रह्मविष्णुमहेश्वरभास्करप्रतिमासितवसनयुगान्वितगुड़प्रस्थारोपितसौवर्णसरतिकामदेवप्रतिमासितवसनयुगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपितसौवर्णलक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णमन्दारसहितं जीरकप्रस्थारोपितसौवर्णसावित्रीप्रतिमासितवसनयुगलान्वितसौवर्णपारिभद्रसहितं तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवसनयुगान्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्रयुगवेष्टितयोर्वेत्तुमाल्यफलान्वितकुशासनपादुकायुगकांस्यभाजनयुतपूर्णकुम्भाष्टकदीपिकोपानद्युगच्छत्रचामरासनफलमाल्ययुतपत्रवर्णवितानकाष्टादशधान्ययुतं कल्पपादपमहादानमहं ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथं अमुकपादपोऽयं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो दक्षिणादानम् ।

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहमिन्दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं शरून् मूलेषु सृग्रेयुः । ततो यजमानस्तुलापुरुषवत् जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनञ्च कुर्य्यात् । ततः कल्पपादपं गुरवे सन्तानकादींश्चतुरो वृक्षान् ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत् । स्वल्पकल्पपादपदाने तु गुरुरेवैकाग्निवत् स्वयञ्चोक्तविधिना सर्व्वं ब्रह्माण्डदानवत् कुर्य्यात् । इति कल्पपादपमहादानं समाप्तम् ॥* ॥ इति महाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महादानदानावर्त्तः ॥

कल्पलतादानं, क्ली, (महादानान्तर्गता सुवर्णकल्पिता लता तस्या दानम् ।) महादानविशेषः ।

तस्य विधिर्यथा ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलतं नाम पातकावलिनाशनम् ॥
पुण्यान्तिथिमथासाद्य स्नात्वा ब्राह्मणवाचनम् ।
ऋत्विक्षण्डपसम्भारभूषणाच्छादनादिकम् ॥
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम् ।
चामीकरमयीः कुर्य्याद्दशकल्पलताः शुभाः ॥
नानापुष्पफलोपेता नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः" ॥

सुपर्णागां किन्नराणाम् ॥

"हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ।
लोकपालानुसारिण्यः कर्त्तव्यास्ताश्च देवताः" ॥

लोकपालानुसारिण्य इति लोकपालसमानाज्ञतयः ॥

"ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्ताच्च तयोर्मध्ये महाखड्गधरे शुभे" ॥

पद्मशङ्खकरे इति क्वचित् पाठः ॥

"स्वर्णासनस्था माहेन्द्री पूर्व्वतः कुलिशायुधा ।
रजनीसंस्थिताग्नेयी श्रुवपाणिरथाचला" ॥

रजनी हरिद्रा ॥

"याम्या तु महिषारूढ़ा गदिनी तण्डुलोपरि ।
नैर्ऋत्यां नैर्ऋती स्थाप्या सखड्गा च घृतोपरि ॥
वारुणे वारुणी क्षीरे सर्पस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था शर्करोपरि ॥
सौम्या तिलेषु संस्थाप्या कौबेरदिशि संस्थिता ।
माहेश्वरी वृषगता नवनीते तु शूलिनी ॥

मौलिन्यो वरदास्तद्वत् कर्त्तव्या बालकान्विताः। शक्त्या पञ्चपलादूर्द्धमासहस्रात् प्रकल्पयेत्" ॥

मौलिन्यो मुकुटवत्यः। वरदाः प्रसन्नमूर्त्तयः। बालकान्विताः क्रोड़निहितपुत्रकाः। एतेन क्रोड़निविष्टवामकरधृतपुत्रका दक्षिणहस्तविधृत यथोक्तशस्त्राः प्रसन्नमूर्त्तयो बद्धमुकुटाः सवाहना घटनीयाः। अनुक्तवाहनानान्तु ब्राह्म्यामेयी नैर्ऋतीनान्तत्तल्लोकपालवाहनानि। लोकपालानुसारिण्य इति श्रुतेः। तेन हंसारूढ़ा ब्राह्मी छागारूढ़ामेयी नरारूढ़ा नैर्ऋती घटनीया। अनन्तस्य तु क्वचिदाहनादर्शनात् अनन्तशक्तिर्व्वाहनमूत्वैव कर्त्तव्या ॥

"सर्व्वासामुपरिष्टाच्च पञ्चवर्णवितानकम्। धेनवो दशकुम्भाश्च वस्त्रपुष्पाणि चैव हि ॥ मध्यमे ह्ये तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च। ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः। त्रिः प्रदक्षिणमादृत्य मन्त्रमेतमुदीरयेत्" ॥

"नमो नमः पापविनाशिनीभ्यो ब्रह्माच्युतेशेश्वरपालनीभ्यः। आसंश्रिताधिक्यपदप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥ इति सकलदिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति। अभिमतफलदे स नाकलोके वसति पितामहवत्सराणि विंशत् ॥ पितृशतमथ तारयेदभव्ये- र्गुरुदुरितौघविघातशुद्धदेहम्। सुरपतिवनितासहस्रसंघः परिवृतमम्बुरुहोद्भवाभिनन्द्यम् ॥ इति विधानमिदं सदिगङ्गना कनककल्पलताविनिवेदने। पठति यः स्मरतीह तथेच्छते स पदमेति पुरन्दरसेवितम्" ॥ * ॥

अथ यजमानः समुपजातमहाकल्पलतामहादानदानेच्छः तुलापुरुषलिखितं खड्गचर्म्म मषाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहेमब्राह्मप्रतिमाबहिः सर्व्वसम्भारमधिकलेन पलपञ्चकादूर्द्धपलसहस्रावधिवयेच्छ हेमनिर्म्मिता स्थानस्थानघटितविद्याधरकिन्नरमिथुनसिद्धगणाः पक्षवायुनिर्म्मितयथेच्छाकृतिफलकुसुमपल्लवशोभितपत्रिण्यः सिद्धहस्तासक्तयथेच्छसङ्कुसुमाहारसहिता नानाविधचित्रनेत्रादिवस्त्रोपशोभिता दशलताः। तासामधः स्थापनार्थं यथेच्छहेमयन्त्रोत्खाटिता यथोक्तरूपा ब्राह्मादिदशप्रतिमाः। तदारोपणार्थं लवणगुड़हरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतानि। लतापार्श्वस्थापनार्थं धेनुदशकं कुम्भदशकञ्च वस्त्रयुगदशकञ्चोत्पादयेत्। ततो यजमानस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानज्ञापकास्तुलापुरुषवत्हविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्यतुलापुरुषपदस्थाने महाकल्पलतापदं निवेश्य निवेदनं सङ्कल्पञ्च कुर्य्युः। अपरदिने च यजमानः पूर्व्ववदविघ्नाद्याराधनादिमधुपर्कदानान्तं कर्म्म गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने महाकल्पलतामदं प्रक्षिप्य कुर्य्यात्। ततो गुर्व्वृत्विग्यजमानज्ञापका उपवेशेयुः। अपरदिने कृतनित्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः। एवञ्च मध्यब्राह्मणवचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत ऋत्विजः प्रधानवेद्यां लिखितचक्रोपरि लतानां मध्ये पूर्व्वादिदिक्क्रमेणाष्टौ लताः समारोप्य लतामण्डलमध्ये लताद्वयञ्चारोप्य तदधोलवणं दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्च आरोप्य पूर्व्वादिदिक्क्रमारोपिताष्टलताधःक्रमेण गुड़ादिद्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमाः समारोपयेयुः। लतापार्श्वे दशधेनूः पूर्णकुम्भदशकं दशवस्त्रयुगानि च स्थापयेयुः। ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः। ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः पुण्याञ्जलिमादाय लताः त्रिः प्रदक्षिणीकृत्य नमो नमः पापविनाशिनीभ्य इत्यादिमन्त्रेण पुण्याञ्जलिनार्घ्यं गुर्व्वृत्विग्भ्यो दद्यात्। तद्यथा। ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पलतामहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थयैता लवणगुड़हरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतार्पितकलधौतब्रह्मानन्तकुलिशायुधवज्रिशमननिर्ऋतिवरुणवायुसोममहेश्वरशक्तिप्रतिमासहिताः पञ्चवर्णवितानकधेनुदशककुम्भदशकवस्त्रयुगदशकान्विताः दशकल्पलता सम्प्रददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठेयुः। ततो गुरुः कल्पलतेयं विष्णुदैवतेति ब्रूयात्। ऋत्विजस्तु प्रत्येकं कल्पलतेयं विष्णुदैवतेति ब्रूयुः। ततो यथाशाखं कामस्तुतिं पठेयुः। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि सम्प्रददे ॥ ब्राह्मणाः स्वस्तीत्युक्त्वा कल्पलताः स्पृशेयुः। ततस्तुलापुरुषवज्ज्ञापकेभ्यो दक्षिणां दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया कल्पलतानां यथायथं प्रतिपादनञ्च कुर्य्यात्। इति कल्पलतामहादानं समाप्तम्। इति दानसागरः ॥

कल्पवृक्षः, पुं, कल्पस्य सङ्कल्पस्य दाता वृक्षः। कल्पस्थायी वृक्ष इति वा। इति सारसुन्दरी। देवतरुः। इत्यमरः। १। १। ५३ ॥ (यथा, दानसागरे।

"नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च। विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये" ॥)

कल्पान्तः, पुं, (कल्पस्य अन्तो यत्र।) ब्रह्मणो दिनान्तः। प्रलयः। इत्यमरः। १। ४। २२ ॥ (यथा, गोः रामायणे ३। १०। ४।

"उपवासरतास्त्वञ्च जले कल्पान्तवासिनः" ॥)

कल्पितः, पुं, (कल्प्यते सञ्जीक्रियते असौ। कृप् + णिच् + कर्म्मणि क्तः।) सज्जितहस्ती। इति हेमचन्द्रः ॥ रचिते त्रि ॥ (यथा, महानिर्व्वाणोक्ता ज्ञाननिर्णये।

"ब्रह्मादिस्तम्बपर्य्यन्तं मायया कल्पितं जगत्। सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेत्" ॥)

कल्मषं, क्ली, (कर्म्म शुभकर्म्म स्यति नाशयति रस्य लत्वे षत्वे च षोदरादित्वात् साधुः।) पापम्। इत्यमरः। १। ४। २३ ॥ (यथा, मनुः १२। २२।

"यामीस्ता यातनाः प्राप्य सजीवो वीतकल्मषः। तान्येव पञ्चभूतानि पुनरप्येति भागशः" ॥)

हस्तपुच्छम्। इति त्रिकाण्डशेषः ॥ (मालिन्यम्। यथा, ऋेः रामायणे २। ३६। २७।

"न हि कञ्चन पश्यामो राघवस्यागुणं वयम्। दुर्ज्जनोऽप्यस्य निरयः शशाङ्कस्येव कल्मषम्" ॥)

कल्मषः, पुं, (कर्म्म शुभकर्म्म स्यति नाशयति। कर्म्म + सो + कः। रस्यः लः सस्य षत्वञ्च निपातनात्।) नरकविशेषः। इति मेदिनी ॥ मलिने त्रि। इति जटाधरः ॥

कल्माषः, पुं, (कलयति इति क्विप् कल्। माषयति सभासा अभिभवति अन्यवर्णान्। मष् हिंसायां णिच् + अच्। कल् चासौ माषश्चेति।) चित्रवर्णः। तद्वति त्रि। इत्यमरः। १। ६। १७ ॥ कृष्णपाण्डुरवर्णः। कृष्णवर्णः। (कलं शुभकर्म्म माषयति हिनस्ति। कल + मष् + णिच् + अच् वा।) राक्षसः ॥ इति मेदिनी ॥ गन्धशालः। इति राजनिर्घण्टः ॥ (नागविशेषः। यथा, महाभारते १। ३५। ७।

"नीलानीलौ तथा नागौ कल्माष शबलौ तथा" ॥)

कल्माषकण्ठः, पुं, (कल्माषः कृष्णवर्णः कण्ठो यस्य।) शिवः। इति हारावली ॥

कल्माषपादः, पुं, (कल्माषौ शापजलप्रक्षेपणात् कृष्णवर्णौ पादौ यस्य।) सौदासराजः। इति श्रीभागवतम् ॥ (यथा, महाभारते १। १७७। १।

"कल्माषपाद इत्येवं लोके राजा बभूव ह। इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि" ॥)

अस्य यथा कल्माषपादत्वं जातं तदुच्यते।

नलसख्यस्य ऋतुपर्णस्य वंशजः सौदासनामा नृपतिः पुरा मृगयां चरन् एकं राक्षसमवधीत्। अस्य रक्षसो भ्राता तु वैरशोधनं चिकीर्षुः सूदरूपधरोऽस्य राज्ञो गृहं प्रत्युवास। एकदा तु असौ राक्षसः भोक्तुकामाय नृपतेः सौदासस्य गुरवे वशिष्ठाय नरामिषं पक्त्वा ददौ। वशिष्ठस्तु तदभोज्यं दृष्ट्वातिक्रुद्धः "राक्षसो भविष्यतीति" राजानमशपत्। राजा तु शापवृत्तान्तं विदित्वा विनापराधेन प्रदत्तः शापः इति विचिन्त्य जलमादाय गुरुं प्रतिशप्तुं समुद्यतः। एतस्मिन्नन्तरेऽस्य पत्नी मदयन्ती दृष्ट्वैवमकरणीयोद्यतं पतिं निवारयामास। राजा तु तया निवारितः स्वपादयोः शापजलं प्रक्षिप्तवान्। एतदारभ्यायं पादयोः कल्माषतां प्राप्तवान्॥ अस्य अन्या विस्तृतिस्तु भागवते ९। ९ अध्याये, तथा महाभारते १। १७७ अध्याये द्रष्टव्या॥)

कल्यं, क्ली, (कल्यते आगम्यते। कल गतौ + कर्म्मणि यत्।) प्रत्यूषः। इत्यमरः। १। ४। २ ॥ (यथा,

भागवते ४ । २४ । ७८ ।
"इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्म्मबन्धनैः" ॥
कलयति मिश्रतां सम्मादयतीति । अन्नादित्वात् यक् ।) मधु । इति हेमचन्द्रः ॥
कल्यः, त्रि, (कलासु साधुः इति यत् ।) सज्जः । (यथा, महाभारते १ । ५ । ३ ।
कथयस्व कथामेतां कल्याः स्म श्रवणे तव" ॥)
निरामयः । इत्यमरः । ३ । ३ । १५९ ॥ वाक्श्रुतिवर्जितः । दक्षः । कल्याणवचनम् । उषायवचनम् । इति मेदिनी ॥
कल्यजग्धिः, स्त्री, (कल्ये प्रातर्जग्धिर्भोजनम् ।) प्रातराशः । प्रातर्भोजनम् । इति जटाधरः ॥
कल्यत्वं, क्ली, (कल्य + भावे "तस्य भावस्त्वतलौ" । इति त्वम्) आरोग्यम् । इति जटाधरः ॥
कल्यपालः, पुं, (कल्यं मधु मद्यमित्यर्थः पालयतीति । कल्य + पाल् + अण् ।) शौण्डिकः । इति हेमचन्द्रः ॥
कल्यपालकः, पुं, (कल्यं पालयति । कल्य + पाल् + ण्वुल् ।) शौण्डिकः । इति शब्दमाला ॥
कल्यवर्त्तः, पुं, (कल्ये प्रातः वर्त्यते प्राप्यते ग्रह्यते इति वा यद्वा वर्त्यते जीव्यते अनेन । वृत् + घञ् + कर्म्मणि करणे वा अप् ।) प्रातर्भोजनम् । इति त्रिकाण्डशेषः ॥
कल्या, स्त्री, (कड्यति मादयति । कड मदे घञ् अन्नादित्वात् यक् टाप् च । ड्यस्य लत्वम् । कलयति मादयति वा । कल् + घञ् + यक् टाप् च ।) मद्यम् । इति मेदिनी ॥ शुभात्मिका वाणी । कल्याणवचनम् । इत्यमरः । १ । ६ । १८ ॥ हरीतकी । इति शब्दरत्नावली ॥
कल्याणं, क्ली, (कल्ये प्रातः अश्नुते ग्रह्यते इति । कल्य + अण् + "अकर्त्तरीति" ३ । ३ । १९ । घञ् ।) मङ्गलम् । (यथा, विष्णुपुराणे ।१।१२।१०२।
"स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्व्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति" ॥)
तत्पर्य्यायः । स्वः २ श्रेयसम् ३ शिवम् ४ भद्रम् ५ शुभम् ६ भावुकम् ७ भविकम् ८ मद्यम् ९ कुशलम् १० क्षेमम् ११ शस्तम् १२ । तद्युक्ते त्रि । इत्यमरः । १ । ४ । २५, २६ ॥ (यथा, मनुः ८ । १९२ ।
"प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" ॥)
स्वर्णम् । इति मेदिनीकरहेमचन्द्रौ ॥
कल्याणबीजः, पुं, (कल्याणं बीजं यस्य ।) मसूरः । इति राजनिर्घण्टः ॥ (मसूरशब्दे विशेषोऽस्य ज्ञेयः ॥)
कल्याणिका, स्त्री, (कल्याण + संज्ञायां कन् ततष्टाप् अत इत्वम् ।) मनःशिला । इति राजनिर्घण्टः ॥ (मनःशिलाशब्देऽस्या विवृतिर्ज्ञेया ॥)
कल्याणिनी, स्त्री, (कल्याणमस्यास्तीति इनिः ततः स्त्रियां ङीप् ।) वला । इति राजनिर्घण्टः ॥ कल्याणविशिष्टे त्रि ॥
कल्याणी, स्त्री, (कल्याण + स्त्रियां ङीप् । माषपर्णी । गौः । इति राजनिर्घण्टः ॥ (यथा, रघुः १ । ८७ ।
"उपस्थितेयं कल्याणी मासि कीर्त्तित एव यत्" ॥
कल्याणवती । यथा महाभारते । ३ । ७४ । ५ ।
"दमयन्त्यपि कल्याणी प्रासादस्था ह्यपश्यत" ॥)
कल्यापालः, पुं, (कल्यां मद्यं पालयतीति । कल्या + पालि + अण् ।) शौण्डिकः । इति त्रिकाण्डशेषः ॥
कल्क, ड कृजने । शब्दे । अशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) लट्यान्तः । ड कल्कते लोकः अव्यक्तशब्दं करोति शब्दं न करोतीत्यर्थः । कूजने इति चान्द्रा जौमराश्च ॥ शब्दमात्रे इति केचित् । अशब्दे इति कालापाः । इति दुर्गादासः ॥
कल्कः, त्रि, (कल्कते शब्दं न करोति इति । कल्क + अच् ।) बधिरः । इति त्रिकाण्डशेषः । काला इति भाषा ॥
कल्कत्वं, क्ली, (कल्कस्य भावः । कल्क + त्वम् ।) स्वरभेदः । इति हेमचन्द्रः ॥ बधिरता च ॥
कल्लोलः, पुं, (कल्क + वाऊलकात् ओलच् । यद्वा कं जलं लोलं चपलं यस्मात् निपातनात् साधुः ।) महातरङ्गः । वड़ ढेउ इति भाषा । तत्पर्य्यायः । उल्लोलः २ । इत्यमरः । १ । १० । ६ ॥
("कालिन्दीजलकल्लोलकोलाहलकुतूहली" ॥
इत्युद्भटः ॥) हर्षः । मद्यौ त्रि । इति मेदिनी ॥
कव, ऋ ड स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट् । ऋदित् ।) ऋ अचकावत् । ड कवते । इति दुर्गादासः ॥
कवकं, क्ली, (कवते आच्छादयति विस्तारयति वा ॥ कव् + अच् । संज्ञायां कन् ।) छत्राकम् । यथा,—
"देवतार्थं हविः शिग्रुं शोहितान् ब्रह्मणांस्तथा ।
अनुपाकृततमांसानि विड्जानि कवकानि च" ॥
कवकानि छत्राकाराणि । वर्ज्यानीदमिति प्रत्येकमभिसम्बध्यते । इति मिताक्षरायामाचाराध्यायः ॥
कवकः, पुं, (कव + अच् + संज्ञायां कन् ।) कवलः । ग्रासः । इति हेमचन्द्रः ॥
कवचः, पुं क्ली, (कं देहं वचति विपक्षास्त्राणि वचयित्वा रक्षति इति ग्रेषः । क + वन्च् + अच् । कं वातं वचति वा अन्तर्गधौ वा । यद्वा कवते-इति कुधातोरच् प्रत्यय इति केचित् इत्युणादिकोषः ४२ । २ ।) सन्नाहः । साँजोया इति भाषा । (यथा, विष्णुपुराणे । १ । १३ । ४० ।
"शरांश्च दिव्या नभसः कवचञ्च खपातह" ॥)
तत्पर्य्यायः । तनुत्रम् २ वर्म्म ३ दंशनम् ४ उरश्छदः ५ काञ्चटकः ६ जगरः ७ । इत्यमरः । २ । ८ । ६४ ॥ दंसनम् ८ जागरः ९ अजगरः १० । इति तट्टीका ॥ कटकः ११ योगः १२ सन्नाहः १३ कञ्चुकः १४ । इति जटाधरः ॥ * ॥ तस्य युक्तिर्यथा ।
खड्गादीनान्तु गणना पूर्व्वमेव निदर्शिता ।
अस्त्रात्मनैव निर्द्दिश्य कवचादिरपीष्यते ॥
तल्लक्षणं संग्रहेण प्रवक्ष्यामि निबोधत ।
काष्ठं चर्म्म च सकणं त्रयमेतत्तु दुस्तरम् ॥
यथोत्तरं गुणयुतं तथा पूर्व्वन्तु निन्दितम् ।
शरीरावरकत्वन्तु लघुत्वं दृढ़ता तथा ॥
दुर्भेद्यतेति कथितः कवचे गुणसंग्रहः ।
सच्छिद्रतातिगुरुता तनुता सुखभेद्यता ॥
कवचानां विनिर्द्दिष्टैः समासाद्दोषसंग्रहः ।
अत्र वर्णो विनिर्द्दिष्टः क्रमादेव चतुर्व्विधः ॥
सितो रक्तस्तथा पीतः कृष्णो ब्रह्मादिषु क्रमात् ।
केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम् ॥
कनकं रजतं ताम्रं लौहं तेषु यथाक्रमम्" ॥
इति युक्तिकल्पतरुः ॥ * ॥
"यथा शस्त्रप्रहाराणां कवचं प्रति वारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम्" ॥
इति मलमासतत्त्वम् ॥ लौहादिवर्म्मवत् अङ्गादिरक्षणार्थं देवतामन्त्रविग्रहम् । तच्च पूजायां पाद्यं भूर्ज्जे विलिख्य कण्ठादौ धार्य्यञ्च । इति तन्त्रम् ॥ गर्द्दभाण्डलक्षः । पटहवाद्यम् । इति मेदिनी ॥
कवचपत्रं, क्ली, (कवचलेखनसाधनपत्रमिव पत्रं वल्कलं यस्य ।) भूर्ज्जपत्रम् । इति शब्दचन्द्रिका ॥
कवटी, स्त्री, (कौति शब्दायते इति । कु + अटन् + गौरादित्वात् ङीष् ।) कवाटः । इति भरतो द्विरूपकोषश्च ॥
कवयी, स्त्री, (कात् जलात् वयते गच्छति इति । क + वय् गतौ + इन् "इदिकारान्तत्वात्" वा ङीष् ।) मत्स्यविशेषः । कयी माछ इति भाषा ॥ तत्पर्य्यायः । ककचष्ठी २ । इति त्रिकाण्डशेषः ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । बलकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ किञ्चित्पित्तकरीति केचित् ॥ ("कवय्यः स्निग्धमधुराः" । इति चक्रपाणिदत्तद्रव्यगुणे ॥)
कवरं, त्रि, (के मस्तके वरं श्रोभमानत्वात् श्रेष्ठम् ।) केशपाशः । इत्यमरटीका ॥ (यथा भागवते ५ । २ । ७ । "वयुःस्यन्दनलसत्कलशुभ्रकवरभाररशनां देवीम्" ॥) संपृक्तम् । खचितम् । इति हलायुधः ॥
कवरः, पुं क्ली, (कं जलं वृणोति । क + वृ + अच् ।) शैवलः । अस्त्रः । इति मेदिनी हेमचन्द्रश्च ॥ (कौतीति । कुशब्दे + "कोरन्" । उणां ४ । १५४ । इति अरन् । पाठकः । इत्युज्ज्वलदत्तः ॥ कर्बुरवर्णः । इति हलायुधः । यथा, माघे ५ । १९ ।
"वृद्धैव निर्व्वर्त्तितकालपक्षरामर्धसाद्याकीर्णमाल्यकवरां कवरीं तरुण्याः" ॥)
कवरकी, स्त्री, (कवरं केशपाशं किरति विक्षिपति यत्र इति । कवर + कॄ + वाऊलकात् ड गौरादित्वात् ङीष् । कारावासदुःखेन केशादिपारिप्लवराहित्यात् तथात्वम् ।) कारागारवज्रः । इति हारावली । कयेदी इति भाषा ॥
कवरा, स्त्री, (कवर + अजादित्वात् टाप् ।) खरमुख्या । इति शब्दचन्द्रिका । वावुइ इति भाषा ॥
कवरी, स्त्री, (कं शिरः वृणोति आच्छादयति । क + वृ + अच् + जानपदेत्यादिना ङीप् । कु + अरन् ङीष् वा ।) केशविन्यासः । चुलेर खोपा टिकी इति भाषा । तत्पर्य्यायः । केशवेषः २ कवरः ३ केशगर्भकः ४ । इति शब्दरत्नावली ॥
("गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी विस्रसन्ती विशालम्" ॥
इति पदाङ्गदूते । १ ॥) भ्रमरा । वावुइ इति

भाषा। कारवी। इत्यमरो मेदिनी च। हिङ्गेर पाता इति भाषा॥

कवलः, पुं, (केन जलेन वलते चलतीति। वल्+अच्।) ग्रासः। इत्यमरः। २। ९। ५४॥ ("चिकटुकमजमोदा सैन्धवं जीरके द्वे समधरयुतानामष्टमो हिङ्गुभागः। प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-ज्जनयति जठराग्निं वातरोगांश्च हन्ति"॥ इति वैद्यकचक्रपाणिसंग्रहे अग्निमान्द्याधिकारे। "अक्षन्नन् कवलान्नागा गावोवत्सान् न पाययन्"। इति हेरामायणे। २। ४१। ९॥) मत्स्यविशेषः। इति शब्दचन्द्रिका॥ वेने माच इति भाषा॥

कवलितः, त्रि, (कवलं करोति। कवल+णिच्+कर्म्मणि क्तः।) भुक्तः। इति जटाधरः॥ ("ग्रस्यत् कवलितानेकजीवम्"। इति कथासरित्सागरः। २६। १४२॥)

कवसः, पुं, (कौति कवते वा। कुशब्दे+"ऋतनी-त्यादिना" उणां ४। २। असुन्।) कवचः। इत्यु-णादिकोषः॥

कवाटः, त्रि, (कुशब्दे+भावे अप्। कवं शब्दं अटतीति। कव+अट्+अच्। यद्वा कं वातं वटति रुणद्धि वारयतीत्यर्थः क+वट्+अण्।) कपाटः। इत्यमरटीकायां वाचस्पतिः। (यथा हेरामायणे २। ७१। ३७।

"असंयतकवाटानि श्रीविहीनानि सर्व्वशः"॥)

कवाटवक्त्रं, क्ली, (कवाटं वक्त्रं यस्मात्।) रुक्षविशेषः। कवाटवेटु इति भाषा। कवाडवेटुया इति केचित्॥ तत्पर्य्यायः। वक्राग्रम् २ कपोतवक्त्रम् ३ अक्षजित् ४। इति रत्नमाला॥

कवाटी, स्त्री, (कवाट+अल्पार्थे+ङीप्।) कपाटम्। इत्यमरटीकायां भरतः॥

कवारं, क्ली, (कं जलं आश्रयत्वेन वृणोति। क+वृ+अण्।) पद्मम्। इति त्रिकाण्डशेषः॥

कविः, पुं, (कवते सर्व्वं जानाति सर्व्वं वर्णयति सर्व्वं सर्व्वतो गच्छति वा। कव्+इन्। यद्वा कुशब्दे+"अचः इः"। उणां ४। १३८। इति इः।) ब्रह्मा। इति हेमचन्द्रः॥ (अयमादिकविः यथा, "तेने ब्रह्महृदा य आदिकवये" इति भागवते। १। १॥) "वाल्मीकिमुनिः। (एकोऽभून्निलनात् ततस्तु पुलिनात् वल्मीकतश्चापरस्त्र एव प्रथिताः कवीन्द्रगुरवस्तेभ्यो नमस्कुर्म्महे"। इत्युद्भटः॥) शुक्राचार्य्यः। (यथा महाभारते १। ६६। ४२। "ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान् भृगुः। भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः"॥) सूर्य्यः। काव्यकरः। (यथा रघुः १। ३।

"मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्"॥) खलीने क्ली। इति मेदिनी॥ (विष्णुः। यथा महाभारते १३। १४९। २७।

"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"॥) कल्किदेवस्य ज्येष्ठभ्राता। यथा,—

"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्तकाः। तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः"॥

इति कल्किपुराणे २ अध्यायः॥ * अपि च।

"विशाखयूपभूपालः प्रायात् साधुजनप्रियः। कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥ कविं प्राज्ञं सुमन्तञ्च पुरस्कृत्य महाप्रभम्। गार्ग्यभर्ग्याविशालैश्च ज्ञातिभिः परिवारितम्। विशाखयूपो ददृशे चन्द्रं तारागणैरिव"॥ इति तत्रैव ३ अध्यायः॥ * ॥ चौरयोद्धा। यथा।

"वेधस्थाने रणे भङ्गो दुर्गे खड्गिः प्रणायते। कविप्रवेशनं तच्च योधाघातश्च तच्च वै"॥ इति सर्व्वतोभद्रचक्रे ज्योतिस्तत्त्वम्॥

कविः, त्रि, (कवते श्लोकान् ग्रथते वर्णयति वा। कव्+इन्।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा मनुः २। १५१।

"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः"॥)

कविः, स्त्री, (कवति शब्दायते इति। कुशब्दे "अच इः"। उणां। ४। १३८ इति इः। अश्वमुखे शब्दायमानत्वात्तथात्वम्।) खलीनः। इति मेदिनी। लागाम इति भाषा॥

कविकं, क्ली, (कवि+स्वार्थे कन्।) खलीनः। इति हलायुधः॥

कविका, स्त्री, (कवि+स्वार्थे कन् टाप् च।) खलीनः। इत्यमरः। २। ८। १९॥ लागाम इति भाषा। केविकापुष्पम्। इति राजनिर्घण्टः॥ कवची मत्स्यः। इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"कविका मधुरा स्निग्धा कफघ्ना रुचिकारिणी। किञ्चित् पित्तकरी वात-नाशिनी वह्निवर्द्धिनी"॥ इति च भावप्रकाशस्य पूर्व्वखण्डे मांसवर्गे॥)

कविज्येष्ठः, पुं, (कविषु ज्येष्ठः।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥

कविता, स्त्री, (कवेः रचयितुर्भावः तल्।) कवित्वम्। काव्यम्। यथा,—

"कविता वनिता वापि आयाता सुखदायिनी"। इत्युद्भटः॥

कविवेदी, [न्] त्रि, (कविं कवित्वं वेत्ति। कवि+विद्+णिनिः।) कविः। इति जटाधरः॥

कविर्यं, क्ली पुं, (कं सुखं अजति। क+अज्+क। अजस्थाने विः।) खलीनः। इति त्रिकाण्डशेषः॥

कविरामायणः, पुं, (कविना कवितया कविषु काव्येषु वा रामः अयनं आश्रयो यस्य।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कविलासिका, स्त्री, (कं सुखं विलासयति उद्दीपयतीति। क+वि+लस्+णिच्+ण्वुल् टाप् अत इत्वम्।) वीणाविशेषः। इति शब्दरत्नावली॥

कविवाल्मीकिः, पुं, (कविश्चासौ वाल्मीकिश्चेति।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कवी, स्त्री, (कवि वा ङीष्।) खलीनः। इति मेदिनी भरतश्च॥ [जटाधरः॥

कवीर्यं, क्ली, (कवि+स्वार्थे घ्यञ्।) खलीनः। इति कवेलं, क्ली, (कं जलं विलति स्तृणाति। क+विल्+अच्।) कुवलयम्। उत्पलम्। इति शब्दचन्द्रिका॥

कवोष्णं, क्ली, (कुत्सितं उष्णं ईषदुष्णं वा।) ईषदुष्णम्। (यथा रघुः १। ६०।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया। पयः पूर्व्वैः सुनिश्वासैः कवोष्णमुपभुज्यते"॥) तद्वति त्रि। इत्यमरः। १। ४ ३५॥

कव्यं, क्ली, (क्रूयते पितृभ्यः। पितृदेशेन दीयते यदन्नादिकम्। कु+"अचो यत्" ३। १। ९७। इति यत्।) पित्रन्नम्। पितृसम्प्रदानकान्नम्। इत्यमरः। २। ७। २४॥ (यथा, मनुः ३। २५॥

"यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किम्भूतमधिकं ततः"॥

कव्यानि तु वेदतत्त्वविदे ब्राह्मणाय दातव्यानि अन्यथा तद्दानं निष्फलं स्यात्यदुक्तं मनौ ३ अध्याये।

"श्रोत्रियायैव देयानि हव्यकव्यानि दाक्षभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि॥ दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्। तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः॥ सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते। एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः॥ ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः॥ यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्यायोगुडान्॥ ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे। तपःस्वाध्यायनिष्ठास्तु कर्म्मनिष्ठास्तथापरे॥ ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः। हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि॥ एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सद्भिरनुष्ठितः॥ मातामहं मातुलञ्च स्वकीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्॥ येऽस्तेनपतितक्लीबा ये च नास्तिकवृत्तयः। तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्याःस्युर्हव्यकव्ययोः"॥ इत्यादि। विस्तृतिस्तु तत्रैव द्रष्टव्या।)

कव्यवाडः, पुं, (कव्यं वह्यते दीयते अस्मै। कव्य+वह् दाने+सम्प्रदाने घञ्।) पितृगणविशेषः। इति त्रिकाण्डशेषः॥ (यथा, वायुपुराणे।

"कव्यवाडोऽनलः सोमः यमश्चैवार्य्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः"॥)

कश, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) कशति। इति दुर्गादासः॥

कशा, स्त्री, (कशति शब्दायते ताड्यति वा। कश्+करणस्य कर्त्तरि अच् टाप् च। ताड्यत्यनया वा।) अश्वादेस्ताड़नी। इत्यमरः। २। १०। ३१। कोड़ा चाबुक् इति च भाषा॥ ("जघान कशया मोहात् तदा राक्षसवन्मुनिम्"। इति महाभारते। १। १७७। १०॥) मांसरोहिणी। इति भावप्रकाशः॥

कशार्हः, त्रि, (कशां अर्हति इति। कशा+अर्ह+

अण् ।) कशाघातयोग्यः । कोड़ा मारिवार उपयुक्त इति भाषा । तत्पर्य्यायः । कश्यः २ । इत्यमरः । ३ । १ । ४४ ॥

कश्मिपुः, पुं, (कश्यति दुःखं कश्यते वा कश्यगतिशासनयोः । कश्य + मृगय्वादित्वात् निपातनात् साधुः ।) भक्तम् । आच्छादनम् । एकोत्तरान्तवस्त्रे कश्मिपू इति द्विवचनान्तम् । इति मेदिनी ॥ (यथा । यथा, भागवते २ । २ । ४ ।

"सत्यां क्षितौ किं कश्मिपोः प्रयासैः" ॥)

कश्मीरः, क्ली पुं, (के देहे श्रीर्य्यते । क + श्रृ + "केऽश्रः रड च सः" । उणां १ । ६० । इति उः रड्चान्तादेशः ।) एष्टाक्षि । पिठेर दाँड़ा इति भाषा । इति हलायुधः ॥ (पुं सि उदाहरणं ।

"किं कुर्व्वता वराहेण खाद्यन्ते हि कश्मीरवः" । इत्युणादिकाधृतचन्द्रवचनम् ।)

कश्मीरः, क्ली, (कं जलं वातं वा श्रृणाति । क + श्रृ + उणादित्वात् उः । रड्चान्तादेशः ।) कश्मीरजा । केशुर इति भाषा । इति रत्नमाला ॥

राजनिर्घण्टे दन्त्यसकारवान् पुंलिङ्गोऽप्ययं शब्दः ॥ ("कश्मीरं द्विविधं तत्तु महद्राजकश्मीरकम् ।

मुक्ताक्षतिखघुः स्यात् यत् तच्चिवोटमिति स्मृतम्" ॥ इति वैद्यकम् ॥)

कश्मीरः, पुं, (क + श्रृ + उ + रड् ।) जम्बुद्वीपस्य खण्डविशेषः । इति शब्दमाला ॥

कश्मीरकं, क्ली, (कश्मीर + स्वार्थे कन् ।) दलकन्दः । केशुर इति भाषा । अस्य गुणाः । गुरुत्वम् । विशदकारित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

("तरुठविसप्रालूकक्रौञ्चादनकशेरुकम् ।

पद्मकाटकं कलोड्यञ्च गुरु विशदि शीतलम्" ॥ इति चरके सूत्रस्थाने २७ अध्याये ॥)

कश्मीरका, स्त्री, (कश्मीर + स्वार्थे कन् टाप् च ।) एष्टाक्षि । इति रत्नमाला । पिठेर दाँड़ा इति भाषा ।

कश्मीरूः, स्त्री, (क + श्रृ + "केऽश्रः रड्चास्य" । उणां १ । ६० । इति ऊः । रड्चान्तादेशः ।) दलकन्दः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ केशुर इति भाषा ।

कश्चन, व्य, (किम् + चन् इति मुग्धबोधमतम् । पाणिनिमते एथक् पदमिति भेदः ।) कञ्चित् । इति व्याकरणम् ॥ कोन । केह इति च भाषा । (यथा माघः १६ । १ ।

"दमघोषसुतेन कश्चन

प्रतिशिश्रुः प्रतिभानवानघ" ॥)

कश्चित्, व्य (किम् + चित् । पाणिनिमते एथक् पदम् ।) कश्चन । इति व्याकरणम् ॥ (यथा मेघदूते १ ।

'कश्चित्कान्ता विरहगुरुणा स्वाधिकारप्रमत्तः' ॥)

कश्मलं, क्ली, (कश्म् गतिशातनयोः + कलच् । "कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्" ॥ उणां १ । १०८ इति मुट् ।) मूर्च्छा । इत्यमरः । २ । ८ । १०६ । (मोहः । यथा, गीतायाम् २ । २ ।

"कुतस्त्वाकश्मलमिदं विषमे समुपस्थितम्" ।)

पापम् । इति शब्दमाला ॥ मलिने त्रि । इति हेमचन्द्रः ॥

कश्मीरः, पुं, (कश्म् + "कश्मेर्मुट् च । उणां ४ । ३० इति ईरन् मुट् च ।) काश्मीरदेशः । इति त्रिकाण्डशेषः ॥ (अस्य सीमादि यथा,—श्रूयते सङ्गमतन्त्रे ७ पटले ।

"शारदामठमारभ्य कुङ्कुमादितटान्तकः ।

तावत् कश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" ॥)

कश्मीरजन्मा, [न्] पुं, (कश्मीरे कश्मीरदेशे जन्म यस्य ।) काश्मीरजन्मा । कुङ्कुमम् । इत्यमरटीकायां रायमुकुटः ॥

कश्यं, क्ली, (कश्यं अर्हतीति । कश्य + दन्त्यादित्वात् । ५ । १ । ६६ । यत् ।) अश्वमध्यभागः । (कश्यति अनेन । कश्य + बाहुलकात् करणे यत् ।) मद्यम् । यथा,—मार्कण्डेयपुराणे १०४ । ३ ।

"ब्रह्मशल्लनयो योऽभूत् मरीचिरिति विश्रुतः ।

कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" ॥

कश्यार्हे त्रि । इत्यमरः । ३ । १ । ४४ ॥

कश्यपः, पुं, (कश्यं सोमरसादिजनितं मद्यं पिबतीति । कश्य + पा + क । अस्य नामनिरुक्तिर्यथा मार्कण्डेयपुराणे । १०४ । ३ ।

"ब्रह्मशल्लनयो योऽभूत् मरीचिरिति विश्रुतः ।

कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" ।)

मुनिभेदः । कलागर्भजो मरीचिमुनेरौरसः पुत्रः । अस्य भार्य्या दक्षस्य सप्तदशकन्याः । तासां तत्पुत्राणाञ्च नामानि यथा । अदितेर्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्ठायाः अश्वादयः ४ अरिष्टायाः गन्धर्व्वाः ५ सुरसायाः राक्षसाः ६ इलायाः वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशायाः सर्पाः ९ ताम्रायाः श्येनगृध्रादयः १० सुरभेर्गोमहिषाः ११ सरमायाः श्वापदाः १२ तिमेर्यादोगणाः १३ विनतायाः गरुड़ारुणौ १४ कद्रोर्नागाः १५ पतङ्ग्याः पतङ्गाः १६ यामिन्याः शलभाः १७ । इति श्रीभागवतम् ॥ * ॥

(मार्कण्डेयपुराणमते अस्य त्रयोदशभार्य्याः । यदुक्तं तत्रैव १०४ अध्याये । अदितिः १ दितिः २ दनुः ३ विनता ४ खसा ५ कद्रुः ६ मुनिः ७ क्रोधा ८ रिष्टा ९ इरा १० ताम्रा ११ इला १२ प्रधा १३ । महाभारतमतेऽपि अस्य त्रयोदश भार्य्या । यदुक्तं तत्रैव १ । ६५ । ११—१३ ।

"सुरभिश्चैव कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।

प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥

अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।

क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ।

कद्रुश्च मनुजश्रेष्ठ ! दक्षकन्यैव भारत" ! ॥

परमेश्वरस्यैव कश्यप इति नामास्ति । यथा,

"तेनेमाः सर्व्वाः प्रजाः उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यपः कस्मात् पश्यको भवतीति निरुक्त्या पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगद्विजानाति स पश्यः । पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येवातः पश्यक इति । आद्यन्ताक्षरविपर्य्ययासिद्धेः सिंहः क्षतेस्तर्कुरित्यादिवत् कश्यप इति हयवरट् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति" ॥ इति दयानन्दकृतायां वेदभाष्योपक्रमणिकायां २९१ सङ्ख्यकपत्रे ॥ कश्यं अज्ञानं अविद्यामित्यर्थः । तत्पिबति शोषयति नाशयति । यद्वा कश्यं विज्ञानघनम् पाति रक्षति स्वात्मनीति । परब्रह्म । तथा च तापनिश्रुतिः २ । ११ ॥

"सा होवाच गान्धर्व्वी ऋषिं वै दुर्व्वाससं कोऽयं ब्रह्मन् ! वा एतस्य प्रजालोकस्य पालयिता भर्त्ता वा जगतः । सहोवाच तत्त्ववित् प्रवरो महान् दुर्व्वासाः । तदेव ब्रह्म वा आत्मा एतस्य पाता हर्त्ता प्रजानां गोप्ता वावह कश्यपो ह योऽयमज्ञानभोक्ता गान्धर्व्वि" ॥

कच्छपः । तथा च शतपथब्राह्मणे—

"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्यः" ॥

यथा यजुर्व्वेदे २४ । २७ ।

"अपामुद्रो मासां कश्यपः" । "काश्यपः कच्छपः" । इति वेददीधितिः ॥ कश्यं मद्यं पिबतीति । कश्य + पा + क । "सुरापः श्यावदन्तः स्यात्" । इति वचनात्तथात्वम् । श्यावदन्ते त्रि, यथा, कात्यायनश्रौतसूत्रे १० । २ । ३५ ।

"प्रक्षत्रेभ्यान्यत् कश्यकाश्यपयाचमानवर्ज्जम्" ॥) मृगविशेषः । इति मेदिनी । मत्स्यभेदः । इति विश्वः ॥

कश्यपनन्दनः, पुं, (कश्यपस्य नन्दनः ।) गरुड़ः । इति हलायुधः ॥ (देवासुरादयोऽपि ॥)

कष वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) कषति । अयमुभयपदीति चतुर्भुजसुरौ ॥ रमानाथस्तु इमं परस्मैपदिनं मत्वा उभयपदिनं तानत्यन्तं अन्यं मन्यते । इति दुर्गादासः ॥

कषः, पुं, (कष्यतेऽनेन वा । कष् + अच् ।) कषपट्टिका । कष्टिपाथर इति भाषा । तत्पर्य्यायः । शानः २ निकषः ३ । इत्यमरः । २ । १० । ३२ ॥

कषणः, त्रि, (कष्यते. विलाद्यते । कष् + कर्मणि ल्युट् ।) अपक्वः । इति शब्दचन्द्रिका ॥ (पुं, कषत्यत्र । अधिकरणे ल्युट् । निकषोपलम् । यथा, आर्य्यासप्तशती ४१८ ।

"भूषणतां भजतः सखि ! कषणविशुद्धस्य जातरूपस्य" ॥ भावे ल्युट् । क्ली, कषणीयम् ।

यथा किराते ५ । ४७ ।

"कषणकर्म्मनिरस्तमहाहिभिः

क्षतविमत्तमतङ्गजवर्जितैः" ॥

"इहादौ कषणेन कषणीयेन यः कर्म्मस्तेन निरस्ता महाहयो येभ्यस्तैः" ॥ इति तट्टीकायां मल्लिनाथः ॥)

कषा, स्त्री, (कष्यते ताड्यते अनया । कष् + बाहुलकात् करणे अच् । ततष्टाप् ।) कशा । इत्यमरटीकायां रमानाथः ॥ चाबुक् इति भाषा ॥ (यथा गीतरा ॥ यशे ६ । २७ । ४१ ।

कषायः

"उद्दान् हयान् खरान् नागान् शमयेदर्शःकषायाङ्गुलैः"॥)

कषाकुः, पुं, (कष् + आकुः ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥

कषायः, पुं क्ली, (कषति कण्ठम् । कष् + आयः ।) रसविशेषः । कषा इति भाषा । एथिव्यनिलगुणबाऽल्पात्तस्योत्पत्तिः । इति शिवदासः ॥

(यथा, मनुः ११ । १५३ ।

"मुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः" ॥)

तत्पर्य्यायः । तुवरः २ तद्युक्ते त्रि । इत्यमरः । १ । ५ । ९ ॥ कुवरः ३ तूरवः ४ । इति तट्टीका ॥ अस्य गुणाः । ग्रहणादिरोपणत्वम् । ग्राहित्वम् । शोषणत्वम् । वायुकोपकारित्वञ्च । अतियुक्तस्य तस्य गुणाः । मलमूत्रग्रहाध्मानहृत्पीड़ाक्षेपणादिरोगकारित्वम् । अन्यच ।

"कषायः शोषणः स्तम्भी ग्रहणग्राकार्त्तिनाशनः ।
कफशोणितवातघ्नो रूक्षः शीतो गुरुस्तथा" ॥

इति राजवल्लभः ॥ अपि च ।

"कषायनामा निरुणद्धि शोफं
वर्णान्तनोर्दीपनपाचनश्च ।
सत्त्वापहोऽसौ शिथिलत्वकारो
निषेवितः पाण्डु करोति मात्रम्" ॥

इति राजनिर्घण्टः ॥ * ॥ पाचनादिः । तस्य पूर्णवीर्य्यं यामभेकं तिष्ठति । तत्पर्य्यायः । क्वाथः २ निर्य्यूहः ३ । स तु पञ्चविधो यथा । खरसः १ कल्कः २ क्वथितः ३ शीतः ४ फाण्टम् ५ । इति वैद्यकपरिभाषा ॥ * ॥

("जिह्वां कण्ठं ग्रसति नितरां ग्राहकत्वातिसारे
श्लेष्माधिक्यप्रशमकरः श्वासकासापहर्त्ता ।
हिक्कां शूलं हरति नितरां शोधनं स्याद्व्रणानां
प्रोक्तस्वायं समधिकगुणो नाम श्रेष्ठः कषायः" ॥

इति हारीते प्रथम स्थाने ७ अध्याये ॥

"कषायो जड़येच्जिह्वां कण्ठस्रोतो विबन्धकृत्" ॥

"कषायः पित्तकफहा गुरुरक्तविशोधनः ।
पीड़नो रोपणः शीतः क्लेदमेदो विशोषणः ।
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः ॥
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः ।
वट्कार्य्यं पौरुषभंशस्रोतोरोधमलग्रहान्" ॥

इति वाग्भटे सूत्रस्थाने १० अध्याये ॥

"कषायो रसः संग्रहणः संग्राही सन्धारणः पीड़नो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्च ।

स एवं गुणोऽपेक एवात्यर्थमुपयुज्यमानः आस्यं शोषयति, हृदयं पीड़यति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, ग्लानत्वमापादयति, पौंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषाण्यवष्टभ्नाति, कर्षयति, ग्लापयति, तर्षयति, स्तम्भयति, खरविषदरूक्षत्वात् पञ्चवध-ग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयतीति" ।

"वैद्यत्वस्तम्भजाड्यैर्यो रसनं योजयेद्रसः ।
बध्नातीवच यः कण्ठं कषायः स विकास्यपि" ॥

कषाया

"पवन एथिव्यतिरेकात् कषायः" ॥

इति चरके सूत्रस्थाने २६ अध्याये ॥)

निर्य्यासः । (यथा, महाभारते अनुशासनपर्व्वणि ।

"वृक्षो वटकषायेण अनुलिप्तः प्रियङ्गुणा ।
क्षीरेण यष्टिकान् भुक्त्वा सर्व्वपापैः प्रमुच्यते" ॥)

विलेपनम् । (यथा कुमारे ७ । १७ ।

"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनिताम्तगौरे" ॥

"लोध्रस्य रूक्षविश्लेषस्य कषायेण विलेपनेन" ॥

इति मल्लिनाथः ॥) अङ्गरागः । इति मेदिनी ॥

कषायः, पुं, (कष् + आयः ।) श्योनाकवृक्षः । इति धरणी । रागः । इत्यमरटीकायां स्वामी ॥ (यथा छान्दोग्योपनिषदि ।

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति" ।

"तस्मै मृदितकषायाय वार्त्तारादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनरूपत्वात् ज्ञानवैराग्याभ्यासरूपपत्तारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै" । इति भाष्यम् ॥)

कलियुगम् । इत्यमरटीकासारसुन्दरी ॥ (निर्व्विकल्पसमाधेर्व्विघ्नभेदः । यथा, वेदान्तसारे समाधिकल्पे ८१ ।

"लयविक्षेपाभावेऽपि चित्तरूक्षरागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनम्" । तत्रानेक जन्माभ्यस्त बाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेनान्तर्मुखमपि चैतन्यग्रहणसामर्थ्याभावात् मथ्य एव स्तब्धीभवति यथा राजदर्शनाय खण्डद्वारेगत्य, राजमन्दिरं प्रविशस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्त बाह्यविषयस्य अखण्डवस्तुग्रहणप्रवृत्तस्योद्भुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषायः ॥)

कषायः, त्रि, (कष + आयः ।) सरभिः । (यथा मेघदूते ३३ ।

"प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः" ॥)

लोहितः । इति मेदिनी ॥ (यथा कुमारे ३ । ३२ ।

"चूताङ्कुराखादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज" ॥)

रक्तपीतमिश्रितवर्णः । इत्यमरटीकायां स्वामी ॥ धवरूक्षः । इति राजनिर्घण्टः ॥

कषायकृत्, पुं, (कषायं कषायरागं करोति इति । कषाय + कृ + क्विप् तुगागमश्च ॥) रक्तलोध्रः । इति शब्दरत्नावली ॥

कषाययावनालः, पुं, (कषायः रक्तवर्णः यावनालः ।) तुवरयावनालधान्यम् । इति राजनिर्घण्टः ॥

कषाया, स्त्री, (कष + आय टाप् च ।) क्षुद्रदुरालभालता । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"यासोपवासो दुर्ग्राही धन्वयासः कुनाशकः ।
दुरालभादुरालम्भा समुद्रान्ता च रोदिनी ।
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा" ।)

कस

यिकषातः, त्रि, (कषायो रक्तपीतवर्णादिर्जातोऽस्य । कषाय + तारकादित्वात् इतच् ।) क्षतजोद्भितः । (यथा कुमारे ४ । ३४ ।

"अमुनैव कषायितस्तनी
सभगेन प्रियगात्रभस्मना" ॥)

कषायी, [न्] पुं, (कषायो विद्यते अस्य । कषाय + इनिः ।) शालवृक्षः । इति शब्दरत्नावली ॥ लकुचवृक्षः । खर्जूरीवृक्षः । इति राजनिर्घण्टः ॥

कषिः, त्रि, (कषति हिनस्ति यः । कष + "खनि कषि" इत्यादिना इः । उणां ४ । १३९ ।) हिंसकः । इत्युणादिकोषः ॥

कषीका, स्त्री, (कषतीति । कष + "कषि घृषिभ्यां ईकन्" । उणां ४ । १९ । इति ईकन् + टाप् च ।) पक्षिजातिः । यदुक्तं उणादिकोषे ॥

"कषीका पक्षिजातौ स्यात् दूषिका नेत्रयोर्म्मले" ॥

कषेरुका, स्त्री, (कष + एरक् + ततः उः । संज्ञायां कन् टाप् च ।) कशेरुका । एठाखि । इत्यमरटीकायां रायमुकुटः ॥

कष्टं, क्ली, (कष्यते इति । कष् + भावे क्तः । "क्तक्तवतूनयोः कमः" । ७ । २ । २२ । इति नेट् ।) पीड़ामात्रम् । तत्पर्य्यायः । पीड़ा २ बाधा ३ व्यथा ४ दुःखम् ५ अमानस्यम् ६ प्रसूतिजम् ७ क्लेशम् ८ आभीलम् ९ । इत्यमरः । १ । ९ । ३ । आबाधा १० वेदना ११ दुःखम् १२ आमानस्यम् १३ । इति तट्टीकायां भरतः ॥ कलाकलम् १४ । इति वाचस्पतिः ॥ आर्त्तिः १५ आर्त्तिः १६ पीड़नम् १७ बाधनम् १८ आमनस्यम् १९ विबाधनम् २० विश्लेषणम् २१ विधानकम् २२ पीड़ितम् २३ । इति शब्दरत्नावली ॥ क्वाथः २४ अग्रम्मं २५ । इति शटाधरः ॥ (यथा महानिर्व्वाणोक्तात्मज्ञानिर्णये ।

"कुर्व्वाणः सततं कर्म्म ज्ञात्वा कष्टशतान्यपि ।
तावन्न लभते मोक्षं यावज्ज्ञानं न जायते" ॥)

कष्टः, त्रि, (कष्यतेऽसौ । कष् + कर्म्मणि + क्तः ।) पीड़ायुक्तः । गर्हणः । इत्यमरमेदिनीकरौ ॥ (यथा मनुः १२ । ७८ ।

"बन्धनानि च कष्टानि परप्रेष्यत्वमेव च" ॥

अतिकष्टकरम् । विषादादौ प्रयोक्तव्यम् । यथा, महाभारते १ । १ । २१५ ।

"कष्टं ! युद्धे दग्धशेषाः श्रुता मे ।
वयोऽस्माकं पाण्डवानाञ्च सप्त" ॥)

कष्टकारकः, पुं, (कष्टं करोति उत्पादयति बन्धकत्वात् । कष्ट + कृ + कर्म्मण्यण् । ततः कन् । कष्टं करोतीति । कृ + ण्वुल् वा ।) संसारः । इति त्रिकाण्डशेषः ॥ पीड़ाकरे त्रि ॥

कष्टस्थानं, क्ली, (कष्टं कष्टकरं स्थानम् ।) दुःखजनकस्थानम् । इति हारावली ॥

कस ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्-ज्वलादिः ।) ज कासः कसः । विपूर्व्वोऽयं प्रफुल्लीभावे । तथा च ।

"प्रफुल्लोत्फुल्लसंफुल्लव्याकोषविकचस्फुटाः ।
फुल्लश्चैते विकसिते" इत्यमरः । २ । ४ । ७-८ ।

कस्तूरी

विकसित पङ्कजकलिका। इति दुर्गादासः॥
कस इ ल ड ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ ग्राते च। (अदां–आत्मं–सकं–सेट्। इदित्।) इ कंस्यते। ल ड कंस्ते हरिः कंसम्। चकारात् गतौ च। ग्रात इह ध्वंसना। इति दुर्गादासः॥
कस ल ड ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ (अदां–ग्राते च। आत्मं–सकं–सेट्।) ल ड कस्ते हरिः कंसम्। चकारात् गतौ च। ग्रात इह ध्वंसना। इति दुर्गादासः॥
कसः, पुं, (कसति विकसतीति। कस + अच्। कसति विकसति स्वर्णादिरत्र वा। कस + आधारे अच्।) कमः। इत्यमरटीकायां भरतः॥ कष्टिपातर इति भाषा। पूर्ब्बोक्तधात्वर्थोऽप्यत्र॥
(यथा नैषधे २। ६६।
"कसपाषाणनिभे नभस्तले"॥)
कसनोत्पाटनः, पुं, (उत्पाटयतीति उत्पाटनः। उत् + पाटि + ल्युः। कसनस्य कासरोगस्य उत्पाटनः नाशकः।) वासकवृक्षः। इति शब्दचन्द्रिका॥
कसिपुः, पुं, (कश्यति शास्ति दुःखम्। कश गतिशासनयोः निपातनात् सिद्धम्।) कशिपुः। अन्नम्। इति जटाधरः॥
कसेरुः, पुं, (कं शृणातीति शृगिहिंसायां बाहुलकादुप्रत्यये प्रकृतेरेरङादेशः। निपातनात् शस्य सत्वम्।) कशेरुः। केशुर इति भाषा। तत्पर्य्यायः। गुण्डकन्दः २ क्षुद्रमुस्ता ३ कसेरुका ४ शूकरेष्टः५। सुगन्धिः ६ शूकन्दः ७ कसेरुकः ८। अस्य गुणाः। कषायत्वम्। अल्पमधुरत्वम्। अल्पिकटुत्वम्। रक्तपित्तप्रशमनत्वम्। शीतत्वम्। दाहश्रमापहत्वञ्च। इति राजनिर्घण्टः॥
कसेरुका, स्त्री, (कसेरुरेव। स्वार्थे कन् स्त्रियां टाप्।) कसेरुः। एष्ठास्थि। इति राजनिर्घण्टः॥
कस्तीरं, क्ली, रङ्गम्। इति हेमचन्द्रः॥ (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम्।
"रङ्गं वङ्गञ्च कस्तीरं शुद्धं पुत्रपिचठम्"॥)
कस्तुरिका, स्त्री, (कसति गन्धोऽस्याः दूरतः। कस + ऊरः। तुट् च। स्वार्थे कन् टाप् च पृषोदरादित्वात् साधुः।) कस्तूरी। इति भूरिप्रयोगः॥
कस्तूरिका, स्त्री, (कस्तूरी + स्वार्थे कन् टाप् पृषोदरादित्वात् साधुः।) कस्तूरी। इति रत्नमाला॥ (यथा, माघे। ४। ६१।
"कस्तूरिकामृगविमर्दसुगन्धिरेति"॥
अस्या गुणादयः कस्तूरीशब्दे ज्ञातव्याः। वैद्यकरसेन्द्रसारसंग्रहे दृढ़बलरचूड़ामणिरसे अस्याः प्रयोगो यथा "कस्तूरिकाविद्रुमरौप्यलौहं"। इत्यादि॥)
कस्तूरी, स्त्री, (कसति गन्धोऽस्याः। कस + खर्च्चूरादित्वात् ऊरः। ङीप् तुटि पृषोदरादित्वात् साधुः।) मृगस्य नाभीजातसुगन्धिद्रव्यम्। तत्पर्य्यायः। मृगनाभिः २ मृगमदः ३। इत्यमरः।२।६।१२६। मृगः ४ मृगी ५ नाभिः ६ मदः ७। इति भरतः॥ वातामोदः ८ योजनगन्धिका ९। इति रभसः॥

कांस्यं

मदनी १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ वङ्कगन्धदा १५ सहस्रवेधी १६ श्यामा १७ कामान्धा १८ मृगाङ्गजा १९ कुरङ्गनाभिः २० ललिता २१ श्यामला २२ मोदिनी २३ कस्तूरिका २४ कस्तूरिका २५ नाभी २६ लता २७ योजनगन्धा २८ मार्गः २९ गन्धबोधिका ३० कालाङ्गी ३१ धूपसञ्चारी ३२ मिश्रा ३३ गन्धपिशाचिका ३४ इति शब्दरत्नावली॥ अस्या गुणाः। सुरभित्वम्। तिक्तत्वम्। चतुर्हितत्वम्। मुखरोगकिलासकफदौर्गन्ध्यवन्ध्यालक्ष्मीमलापहत्वञ्च। इति राजनिर्घण्टः॥ रक्तपित्तच्छर्द्दिनाशित्वम्। इति राजवल्लभः॥ तद्भेदाः। खरिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५। अपि च।
"कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात्। नेपालेऽपि च काश्मीरे कामरूपेऽपि जायते॥ कामरूपोद्भवा श्रेष्ठा नैपालो मध्यमा भवेत्। काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता"॥ इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो गुणा उत्पत्तिश्च यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे।
"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्। कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता॥ काश्मीरोकपिलच्छाया कस्तूरी त्रिविधा स्मृता। कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्॥ कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक्। काश्मीरदेशसम्भूता कस्तूरीह्यधमा मता॥ कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः। कफवातविषच्छर्दिग्रहीतदौर्गन्ध्यशोषहृत्"॥)
कस्तूरीमल्लिका, स्त्री, (कस्तूरीगन्धयुक्ता मल्लिका।) मृगमदवासा। इति राजनिर्घण्टः॥
कस्मलं, क्ली, (कश गतिशातनयोः + कल + सुट् च। निपातनात् शस्य सः।) कश्मलम्। मोहः। इत्यमरटीकायां रायमुकुटः॥
कङ्कारं, क्ली, (कस्य जलस्य हार इव के जले क्वादते वा इति। क + क्वाद + पचाद्यच् पृषोदरादित्वात् साधुः।) श्वेतोत्पलम्। सुँदि इति भाषा। तत्पर्य्यायः। सौगन्धिकम् २। इत्यमरः १। १०। ३६॥ (कत्तृणम् ३। गन्धकञ्च ४। इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥ यथा, भागवते ४। ६। १८।
"कुमुदोत्पलकङ्कारशतपत्रवनर्द्धिभिः"॥)
तत्पुष्पगुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः॥
कङ्कः, पुं, (के जले क्रमति शब्दायते स्पर्द्धते वा। क + के + कः।) वकपक्षी। इत्यमरः॥ २। ५। २२॥
कांसीयं, क्ली, (कंसस्य विकारः इति छः।) कांस्यम्। इति राजनिर्घण्टः॥
कांस्यं, क्ली, (कंसाय पानपात्राय हितं कांसीयं तस्य विकारः इति। "कंसीयपरिखय्ययोरिति"। ४। ३। १६८ यञ् कंसस्य लुक् च। यद्वा कंसमेव इति स्वार्थे यञ् प्रत्ययः।) ताम्ररङ्गमिश्रितधातुः। काँसा इति भाषा। तत्पर्य्यायः। कंसम् २ कंसाख्यि ३ ताम्रार्द्धम्

काकः

४। इति चिकाण्डशेषः॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वङ्गिलोहकम् ८ दीप्तिलोहम् ९ घोरघुष्यम् १० दीप्तिकांस्यम् ११ कास्यम् १२। अस्य गुणाः तिक्तत्वम्। उष्णत्वम्। चतुर्हितकारित्वम्। वातकफविकारनाशित्वम्। रूक्षत्वम्। कषायत्वम् रुचिकारित्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ अम्लरसत्वम्। विशदत्वम्। लेखनत्वम्। सारकत्वम्। पित्तनाशित्वम् इति राजवल्लभः॥ दृढ़देहायुर्वृद्धिकारित्वम्। इति सुखबोधः॥
("उपधातुर्भवेत् कांस्यं द्वयोस्तरलिरङ्कयोः। कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः। संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः॥ कांस्यङ्कषायतिक्तोष्णं लेखनं विशदं सरम्। गुरुनेत्रहितं रूक्षं कफपित्तहरम्परम्"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥)
तत्शोधनमारणमाह।
"अनेनैव विधानेन कांस्यं विड्गन्धलेपितम्। मारयेद्बुद्धिमान् वैद्यो मृतं भवति चूर्णवत्"॥
अन्यच्च।
"द्विसारं पञ्चलवणं संग्रधास्तेन भावयेत्। कांस्यारकूटपत्राणि तेन कल्केन लेपयेत्। बद्धा गजपुटे पच्याच्छुद्धिमायाति नान्यथा"॥
अन्यच्च।
"ताम्रवच्छोधनं कृत्वा ताम्रवन्मारयेद्बुधः"॥
अन्यच्च।
"कञ्चलीं तत्समां दत्त्वा मर्द्दयेन्निम्बुकद्रवैः। एवं पुटत्रयेणैव निरुत्थं भस्म जायते"॥
इति सुखबोधः॥
कांस्यकारः, पुं, (कांस्यं तत्पात्रं करोतीति। कांस्य + कृ + अण्।) कंसकारः। इति जटाधरः। काँसारि इति भाषा॥
कांस्यनीलः, पुं, (कांस्येन कृतः नीलः।) अञ्जनभेदः। नीलतुत्थम्। तत्पर्य्यायः। मूषातुत्थम् २ हेमतारम् ३ वितुन्नकम् ४ इति हेमचन्द्रः॥ (कांस्योद्भवाञ्जनवन्नीलः इति विग्रहे वाच्यलिङ्गत्वम्। यथा, गोः रामायणे ४। ३६। २३।
"कांस्यनीलो हरिर्नीलः कोटिभिर्द्दृग्भिरर्चितः"॥ क्वचित् कांस्यनील इति पाठः॥)
काकं, क्ली, (काकस्य समूहः इति सङ्घार्थे अण्।) काकसमूहः। इति मेदिनी॥ (ईषत्कं जलम् कोः कादेशः। ईषज्जलम्। इति व्याकरणम्॥)
काकः, पुं, (कायते शब्दायते। कै शब्दे "इगुपधज्ञाप्राकृल्यतिमर्च्छिभ्यः कन्"। उणा-३। ४३। इति कन्।) खगामख्यातपक्षिविशेषः। काग् इति भाषा। तत्पर्य्यायः। करटः २ अरिष्टः ३ बलिपुष्टः ४ सङ्कल्पजः ५ घ्राङ्क्षः ६ आत्मघोषः ७ परभृत् ८ बलिभुक् ९ वायसः १०। इत्यमरः।२। ५। २०॥ वातजवः ११ बलः १२ दीर्घायुः १३ सूचकः १४ कृष्णः १५ ग्रामीणः १६ पिशुनः १७ कटखादकः १८ द्विजः १९ कागः २०। इति

जटाधरः। काकः २१ धूलिजङ्घः २२ निमित्तज्ञः २३ कौशिकारिः २४ चिरायुः २५ मुखरः २६ खरः २७ महालोलः २८ चिरञ्जीवी २९ चलाचलः ३० करटकः ३१ नागवीरकः ३२ गाढ़मैथुनः ३३ लुण्टाकः ३४ श्रावकः ३५ रतञ्चरः ३६। इति शब्दरत्नावली॥ * ॥ अथ शाकुनं काकचरित्रम्। तद्यथा।

"अथोच्यते काकरुतं रुतानां
मूर्द्धि स्थितं शाकुनभाषितानाम्।
अचिन्तितावेदितकार्य्यसिद्धिं
पूर्व्वादिकाष्ठाप्रहरक्रमेण॥
ये ब्राह्मणक्षत्रियवैश्यशूद्राः
काका भवन्त्यन्त्यजपक्षमास्ते।
वर्णाकृतिभ्यां ऋषिभाषिताभ्यां
सदाभियुक्तैरुपलक्षणीयाः॥
दृढ़त्रमाणो गुरुदीर्घतुण्डो
दृढ़स्वरः कृष्णवपुः स विप्रः।
पिङ्गाञ्जनीलाञ्जविमिश्रवर्णः
स्यात् क्षत्रियस्तीक्ष्णरवोऽतिशूरः॥
यः पाण्डुनीलः सितनीलचञ्चु-
र्नात्यर्थरूढ़ो रटितश्च वैश्यः।
भस्माच्छविर्भूरिककारशब्दः
शूद्रः कृशाङ्गस्खलनो निरुक्तः॥
विरूक्षसूक्ष्मास्यतनुर्विशङ्को
यः कन्धरादीप्तनवं बिभर्त्ति।
स्थिरारवः स्वेर्थसमेतबुद्धिः
काकोऽन्त्यजातिः खलु पक्षमोऽत्र॥
द्रोणाभिधः कृष्णवपुर्द्विजो यो
याच्ञाः स काकः खलु मुख्यवृत्त्या।
तस्माद्दृते श्यामगलो निरीक्ष्यः
श्वेतश्च निन्द्योऽद्भुतदर्शनोऽसौ॥
विप्रः स्फुटे जल्पति रूक्षमाणे
न्यूनं ततः क्षत्रियजातिराजः।
आख्यातिवैश्यस्त्वधिवासनेन
ब्रवीति शूद्रो बलिदानलोभात्॥
प्रश्नं शृतं जल्पति कृष्णवर्णः
सदा समस्तं विहगोऽन्त्यजातिः।
सद्यस्त्रिमप्याहृदयाहृपक्षैः
पक्षापि काकाः फलदाः क्रमेण॥
प्रान्ते प्रदीप्ते च रटन् विहङ्गः
शुभप्रदो दीप्तपराङ्मुखः सन्।
न क्वापि रौद्रो रटितः प्रशस्तः
सव्यत्र शस्तो मधुरश्च रक्तः॥
दीप्तस्थितो यः परुषस्वरेण
विरौति दीप्ताभिमुखः स कार्य्यम्।
निष्पाद्य निर्नाशयते च सद्य-
र्दीप्तोन्मुखः शान्तरवो हि सिद्धौ॥
शान्तप्रदीप्ताभिमुखो विधाय
शब्दं प्रविश्याथ पुनः प्रदीप्तम्।
यो रौति काको मधुरस्वरेण
हत्वा विरुद्धं स ददाति सिद्धिम्॥
विधाय दीप्ताभिमुखो विरावं

ततः प्रशान्ताभिमुखो विरौति।
यो वायसोऽसौ विनिहन्त्यसम्यक्
कार्य्याणि सर्व्वाणि पुनः करोति॥
सूर्य्योदये पूर्व्वदिशि प्रशस्त-
स्थाने स्थितो योऽभिमुखं विरौति।
नाशं रिपोश्चिन्तितकार्य्यसिद्धिं
स्त्रीरत्नलाभं स करोति काकः॥
प्राङ्मुखः प्रभाते यदि वह्निभागे
विरौति तिष्ठन् रमणीयदेशे।
प्रचून् प्रयश्यत्यचिराद्विशङ्कः
प्रयाति योषित्समवाप्यते तत्॥
रवन् प्रभाते दिशि दक्षिणस्यां
काकः समावेदयतेऽतिदुःखम्।
रोगार्त्तिमृत्युं परुषस्वरेण
रम्येण चेष्टागमयोषिदाप्तिम्॥
नैर्ऋत्यभागे यदि च प्रभाते
करोति काकः सहसा विरावम्।
क्रूरं ततः कर्म्म समभ्युपैति
दूतागमो मध्यमिका च सिद्धिः॥
प्रातः प्रतीच्यां यदि रौति काको
ध्रुवं तदा वर्षति वारिवाहः।
स्त्रीवस्त्रभूभृत्पुरुषागमश्च
कलिः कलत्रेण समं तदा स्यात्॥
ध्वाङ्क्षस्य शब्दे पवनालयस्थे
वस्त्रान्नयानाभिमतागमाः स्युः।
प्राच्यागमः प्राक्तनवृत्तिनाशः
स्यादन्यदेशे गमनं स्वदेशात्॥
दिक्षूत्तरस्यां सुरवः प्रभाते
निरीक्षमाणो बलिभुग् नराणाम्।
ददाति दुःखं भुजगाच्च भीतिं
दरिद्रतां नष्टधनेष्टलाभम्॥
दिक्षीशवत्यां यदि रौति काक
आगच्छतस्तद्दनितान्त्यजाती।
व्याधेर्निमित्तं प्रियवस्त्रलाभो
भवेत्तदा रोगबलेऽवसानम्॥
ब्रह्मप्रदेशे स्थितवायसस्य
प्रभातकाले मधुरस्वरेण।
अभीप्सितार्थागमनं ध्रुवं स्यात्
स्वामिप्रसादो द्रविणस्य लाभः"॥
इति वसन्तराजे दिक्प्रहरे सूर्य्योदयः॥ * ॥
"पूर्व्वेच याम्ये प्रथमे सशब्दः
काको भवेच्चिन्तितकार्य्यसिद्धौ।
अभीष्टलोकागमनं तथास्या-
न्नष्टार्थलाभो नियतं नराणाम्॥
आग्नेयभागे यदि चाद्ययामे
स्त्रीलाभविद्वेषिवधौ भवेताम्।
हतान्तभागे बलिभुग् विरावः
स्त्रीलाभसौख्यप्रियसङ्गकारी॥
नैर्ऋत्यकोणे प्रिययोषिदाप्ति-
र्म्मिष्टान्नं सिध्यति चिन्तितोऽर्थः।
दिशि प्रतीच्यां विरुते भवेता-
मभ्यर्थनीयागमनाम्बुलाभौ॥

वायव्यकोणे करटः शुभः स्यात्
नृपप्रसादोऽध्वगदर्शनं च।
सौम्ये च भीस्खरशोकवार्त्ता
सौम्या च वार्त्ता धनलाभवार्त्ता॥
ईशानदेशेऽभिमतेन भ्रंस-
स्त्रासो ऋताशाद् बहुलोकसङ्गः।
ब्रह्मप्रदेशे सुखकामभोगः
सम्मानसम्पद्द्रविणाऋसिद्धिः"॥
इति प्रथम प्रहरः॥ * ॥
"प्राच्यां द्वितीये प्रहरे विरावैः
काकस्य कश्चित् पथिकोऽभ्युपैति।
चौराद्भयं व्याकुलता च वङ्गे
जायेत काचिन्महती च भङ्गा॥
ऋताग्रदेशे नियतं कलिः स्यात्
प्रियागमाकर्षणयोषिदाप्तिः।
याम्ये तु वृष्टिर्महती च भीतिः
प्रियस्य चेष्टस्य समागमः स्यात्॥
रक्षोदिशि प्राणभयं तदा स्युः
स्त्रीभोज्यलाभाखिलसुखप्रणाशाः।
भवेत् प्रतीच्यां प्रबलाबलाग्नि-
र्योगागमो वृद्धि कुवर्षणञ्च॥
समीरभागे ध्वजचौरसङ्गो
दूतागमस्त्रीपिशिताम्बलाभः।
सौम्ये गणेशागमनं जयश्च
रम्ये रवे चौरभयं त्वरण्ये॥
महेश्वराशाविरुतस्य काक-
स्यौराभिसन्नासविरुद्धवार्त्ताः।
ब्रवीति रूक्षैरटनैररूक्षैः
सदार्थगर्व्वागमनं जयश्च॥
ब्रह्मप्रदेशे प्रहरे द्वितीये
काकः सुशब्दो नृपतिप्रसादम्।
मिष्टान्नभोज्यञ्च ददाति पुंसां
करोत्यसौ चौरभयं कुशब्दः"॥
इति द्वितीयप्रहरः॥ * ॥
"ऐन्द्र्यां विरूक्षः प्रहरे तृतीये
वृद्धिं तथा चौरभयं ब्रवीति।
कृष्णस्तु राज्ञागमनं जयश्च
करोति यात्रां शुभकार्य्यसिद्धिम्॥
अग्नेर्विभागेऽग्निभयं कलिश्च
विरुद्धवार्त्ता विफला च यात्रा।
भवेद्विरुद्धैर्बलिभुग्भिरावै-
र्जयादिवार्त्ता च भवेद्विशुद्धिः॥
काकुभ्यवाचां कुरुतेऽतितूर्णं
रोगं तथाप्तागमनं विहङ्गः।
क्षुद्राणि कार्य्याणि च यान्ति सिद्धिं
सर्व्वाणि तन्मुखतया नराणाम्॥
कृष्णादेशे जलदागमः स्या-
न्मिष्टान्नलाभो रिपवो न सन्ति।
शूद्रागमः स्वामिविरुद्धवार्त्ता
भवन्ति यात्रासु च कार्य्यनाशः॥
स्यात् पश्चिमे नष्टधनस्य लाभो
दूराध्वयानं सुहृदागमश्च।

योगागमोऽभीष्टजयादिवार्त्ता
याम्यासु रम्ये रटितेऽर्थसिद्धिः ॥
वातालये दुर्दिनमेव वार्त्ता
चौराभिनष्टार्थसमागमश्च ।
सन्तोषवार्त्ता वरयोषिदाग-
र्याचा रवे स्यान्मधुरे प्रशस्ता ॥
यामे तृतीये विरुवन्युदीच्यां
कार्यार्थलाभो नृपसेवकानाम् ।
भोज्यप्रवृद्धौ शुभदा च वार्त्ता
प्रयाणकं वैश्यसमागमश्च ॥
दिग्भ्रान्तकारैः कुरुते सुशब्दं
भोज्यं जयं हानिकलौ कुशब्दम् ।
ब्रह्मप्रदेशे तिलतण्डुलाभ्यां
भोज्यं च ताम्बूलयुतं ददाति" ॥
इति तृतीयप्रहरः ॥ * ॥
ऐन्द्र्यां तुरीयप्रहरेऽर्थलाभो
भूमीशपूजाभयवृद्धिरोगाः ।
वह्नेर्विभागे भयरोगमृत्युः
श्लिष्टागमो वायसरासितेन ॥
याम्ये रवे तस्करवैरिभीती
स्यातां विश्लिष्टागमरोगमृत्युः ।
स्यात् यातुधान्यां महती प्रवृद्धि-
रभीष्टसिद्धिः यदि चौरतुण्डम् ॥
दिशि प्रतीच्यां प्रहरे चतुर्थे
द्विजातिरभ्येति ततोऽर्थलाभः ।
आयाति योषिद्विजयाम्बुवृष्टिः
सिद्धिः प्रयाणे नृपतेर्वरस्य ॥
वायव्यभागे करटस्य शब्दै-
रायाति योषित् प्रियमानिनी या ।
ध्रुवं प्रवासो दिनसप्तकेन
शीघ्रागमः स्यात् गमने कृते च ॥
कुबेरभागे पथिकोऽभ्युपैति
ताम्बूललाभः कुशलस्य वार्त्ता ।
वैश्याङ्गनाग्निसुरगादिरूढ़ा
यात्राविरुद्धे म्रियते च रोगी ॥
स्थाणौ स्थितश्चेद् बलिभुग् विरौति
सुवर्णवार्त्ता सरुजो विनाशः ।
ब्रह्मप्रदेशे प्रहरे चतुर्थे
वार्त्ता भवेन्मध्यमिका च सिद्धिः" ॥
इति चतुर्थप्रहरः ॥ * ॥
"यद्भाषितं शाकुनिकैर्विमिश्रं
शुभाशुभं दिक्प्रहरक्रमेण ।
तत्राशुभं यच्छति दीप्तशब्दः
श्रेयस्करः शान्तरवश्च काकः ॥
रम्यं रवं दीप्तदिशि प्रसर्पन्
शान्तां दिशं भूरि फलं ददाति ।
तदेव तुच्छं वितरत्यसौ वै
दीप्तस्थितः पश्यति दीप्तकाष्ठाम् ॥
यद्योपदिष्टं फलमत्र दुष्टं
तथैव तद्दीप्तदिशि स्थितः सन् ।
श्वाङ्गोऽधिरूढ़ो विरुवन् करोति
निरीक्षमाणः ककुभं प्रदीप्ताम् ॥

काकः प्रशान्ताभिमुखोऽतितुच्छं
दीप्ताश्रितो दुष्टफलं ददाति ।
शाखाश्रितः शान्तदिगोक्षणेन
रूक्षारवोऽल्पं कथयत्यनिष्टम् ॥
शान्तस्वरः शान्तककुप्प्रदेशे
तिष्ठन् प्रदीप्तां ककुभञ्च पश्यन् ।
दरात्यभीष्टं फलमेवमल्पं
दीप्तां स पश्यंस्तु तदेव तूर्णम् ॥
आकारचेष्टारवभागविज्ञा-
स्वत्वारि काष्ठादिनयोः क्रमेण ।
सदाभियुक्ताश्च निरूपयन्ति
यस्माच्च ते काकरुतं मनुष्याः" ॥
इति काकरुते दिक्चक्रप्रकरणम् ॥ * ॥
"वर्षाकालमधिकृत्य किञ्चन
प्रोच्यते बलिभुजो यथाक्रमात् ।
आलग्नशकुनविचारसुन्दरं
शाकुनं सकलशाकुनोत्तमम् ॥
वैशाखमासे निरुपद्रवेषु
द्रुमेषु काकस्य शुभाय नीड़म् ।
निम्नेषु शुष्केषु सकण्टकेषु
द्रुमेषु दुर्भिक्षभयायहेतुः ॥
प्रशस्तवृक्षे यदि पूर्वशाखा-
माश्रित्य काकेन कृतं कुलायम् ।
तदृक्षिरिष्टाशकुनप्रमोदो
नीरोगता स्याद्विजयश्च राज्ञः ॥
आग्नेयशाखारचिते च नीड़े
स्याद्वृष्टिरिष्टाप्ति भयं कलिश्च ।
दुर्भिक्षशत्रूद्भवदेशभङ्गो
भवन्ति रोगाश्च चतुष्पदानाम् ॥
याम्यासु शाखासु च वायसेन
नीड़े कृतेऽल्पं जलपातमाहुः ।
व्याधिप्रकोपं मरणं समन्ता-
दन्नक्षयं शत्रुविरोधिताश्च ॥
नैर्ऋत्यशाखारचिते च नीड़े
यस्माच्छनैर्वर्षति वर्षकाले ।
पीड़ा नृणां विध्वरचौरभीति-
दुर्भिक्षयुद्धानि भवन्त्यवश्यम् ॥
नीड़े कृते पश्चिमवृक्षशाखा-
माश्रित्य काकैः कथिता च वृष्टिः ।
नीरोगताक्षेमसुभिक्षवृद्धि-
सम्मत्रमोदाश्च भवन्ति लोके ॥
वायव्यशाखासु कृते च नीड़े
प्रभूतवाताब्दजलाश्च मेघाः ।
सुर्मूषिकोपद्रवशस्यनाश-
पक्षद्वयोद्वेगमहाविरोधाः ॥
कौबेरशाखामधिकृत्य नीड़े
कृते भवेत् प्राकृषि वृष्टिरिष्टा ।
भवन्ति च क्षेमसुभिक्षसौख्य-
नीरोगताहृद्विसम्भवोऽस्मिन् ॥
ईशानशाखासु च वृष्टिरल्पा
वैरं प्रजानामुपसर्गदोषः ।
स्याद्वान्धवानां कलहप्रवृत्ति-

र्मर्य्यादया क्षीयत एव लोकः ॥
वृक्षाग्रनीड़े त्वतिवर्षकाले
मध्ये पुनर्मध्यमतोयपातः ।
तुच्छापि वृष्टिर्न प्रवत्यधस्तात्
स्फुटं दिशोक्तं न दिशः स्फुटत्वम् ॥
अवृष्टिरोगादिभयादिवृद्धिं
विद्याच्च भूमौ बलिभुक्कुलाये ।
शुष्के च वृक्षे डमराननाशौ
प्राकारस्थेषु भयं प्रभूतम् ॥
निम्नप्रदेशे तरुकोटरे वा
वल्मीकरन्ध्रे व्रततिष्वधीह ।
काकस्य नीड़े रुगवृष्टिदोषै-
र्भवन्ति शून्या नियमेन देशाः" ॥
इति वसन्तराजे काकरुतप्रकरणम् ॥ * ॥

अथ काकाण्डविचारः ।

"एकं भवेदण्डमभिसंज्ञं
द्वितीयकं मारुतकं तृतीयम् ।
ऐन्द्रं तथा नाम चतुर्थमेव-
मण्डानि काक्याः परिकीर्त्तितानि ॥
काक्या भवेदण्डमण्डकं चेत्
पृथ्वी तदा नन्दति सर्व्वशस्यैः ।
मन्दप्रवर्षोऽनलसंज्ञकेऽण्डे
नोप्तस्य बीजस्य भवेत् प्ररोहः ॥
जातानि शस्यानि समीरणेऽण्डे
खादन्ति कीटाः शलभाः शुकाद्याः ।
क्षेमं सुभिक्षं सुखिता धरित्री
स्यादैन्द्रजेऽण्डेऽभिमता च सिद्धिः" ॥
इत्यण्डप्रकरणम् ॥ * ॥
"यात्रा निमित्तानि च कीर्त्तयामः
सत्तत्रजानां शकुनानि तानि ।
विज्ञाय यानि प्रजहात्यनर्था-
नर्थांश्च सर्व्वान् कुरुतेऽध्वगीनः ॥
भुङ्क्ते बलिं पक्षिषु मन्त्रपूतं
त्वं प्राणिषु प्राणिषि वर्मजन्म् ।
शुभेन च स्त्रीं भजसे नमोऽस्तु
तुभ्यं खगेन्द्राय सत्तत्रजाय ॥
विलोक्य काकं विनिवेद्य तस्मै
मन्त्रेण पूजां दधिभक्तयुक्ताम् ।
उदीर्य्य कार्य्यं निजमध्वगेन
विलोकनीयं शकुनं तदर्थम् ॥
वामेन शब्दं मधुरं विमुञ्चन्
व्रजंस्तवामेन करोति काकः ।
सर्व्वार्थसिद्धिं पुनरागमञ्च
शुभप्रदेशे तु तदन्यरूपः ॥
प्रदक्षिणं संप्रविधाय मार्ग
वामेन काको विनिवर्त्ततेऽसौ ।
यातुः करोतीहितकार्य्यसिद्धिं
क्षेमञ्च शीघ्रं पुनरागमञ्च ॥
वामे कृतं रौद्रमनुत्तमं यत्
यो वायसोऽसौ सकलार्थसिद्धौ ।
स्यातां क्रमाद्दक्षिणवामशब्दौ
सिद्धौ विरुद्धौ विपरीतभूतौ ॥

काक

एष्ठे विरावं मधुरं विमुञ्च-
न्नुन्नम्रजंघापि मतो हिताय ।
प्रायेण यातारमनुव्रजन्तः
सर्व्वेऽपि काकैः कथिता विहङ्गाः ॥
ज्ञात्वा रवं यः पुरतः प्रयाति
उपस्थितो यो मुदमादधाति ।
कण्डूयते यः खशिरोऽङ्घ्रिघासौ
पुंसां तदाभीष्टफलं ददाति ॥
स्तम्भे गजानां नियतं गजाग्निं
गजेऽधिरूढः पृथिवीपतित्वम् ।
तुरङ्गमे वाहनभूमिलाभं
करोति काको विजयं ध्वजेन ॥
प्रणष्टलाभं विजयं च कूपे
क्षिप्रं नदीरोधसि कार्य्यसिद्धिम् ।
पूर्णे घटेन्द्रे च धनाग्निवृद्धिं
ध्वाङ्क्षोऽधिरूढः कुरुते सगुब्दः ॥
प्रासादधान्योक्षयवह्निमृत्यु-
निष्पन्नशस्यावनिशाद्वलादौ ।
ध्वाङ्क्षोऽधिरूढो धनसाधनाय
रौति श्रियं यच्छति युग्मरावः ॥
एष्ठे पुरो वा यदि गोमयस्थो
तथा वटाग्रेषु तरुष्वपीह ।
स्थितो रवन् भोजनपानमिष्टं
विष्ठां च कुर्व्वन् वितरत्यवश्यम् ॥
अन्नाग्रविष्ठाफलमूलपुष्प-
मत्स्यादिभिः पूर्णमुखः सदैव ।
संदृष्टमात्रोऽभिमतार्थसिद्धौ
मिष्टान्नभोज्याय सदैव काकः ॥
नारीशिरःपूर्णघटस्थितस्य
काकस्य शब्दैर्व्वनिताधनाग्निः ॥
गृह्याधिरूढस्य च तस्य शब्दैः
समागमः स्यात् सुजनेन सार्द्धम् ॥
गोएष्ठदूर्व्वातरुगोमयेषु
तुष्टानि घर्षन्नवलोकितानि ।
आहारमन्यस्य तथा ददानो
ददाति भोज्यं बलिभुग्विचित्रम् ॥
धान्यं यवं वा दधि वापि चाज्यं
विरौति पश्यन्निधिलाभकारी ।
करोति लाभं पुरतः स दृष्टो
यस्यास्ति वह्नेरुदयस्तथास्तम् ॥
वृक्षेषु रम्याङ्कुरपत्रपुष्प-
च्छायाफलाढ्येषु सदात्मजस्य ।
शब्देन सिध्यन्त्यसकृन्नराणां
सदैव सर्व्वाणि समीहितानि ॥
प्रशान्तनादः शिखरे तरूणां
स्त्रीसङ्गसौख्यं करटोऽभिधत्ते ।
धान्यादिकूटेषु तथान्नलाभो
गोएष्ठगो गोवनिताधनाग्निम् ॥
क्षेमं विधत्ते करभस्य एष्ठे
खरस्य एष्ठेऽरिभयं वधश्च ।
क्रोड़स्य एष्ठे वधमर्थलाभं
तस्यैव एष्ठे घनलाभमग्रे ॥

काक

सद्यो ज्वरं सैरिभपृष्ठसंस्थो
मृताङ्गसंस्थो मरणं करोति ।
कार्य्यक्षतिं रिक्तघटस्थ संस्थः
काकः कलिं काष्ठमधिष्ठितश्च ॥
यो दक्षिणं कूजति दक्षिणेन
प्रयाति यश्चाभिमुखोऽभ्युपैति ।
यो याति पृष्ठे प्रतिलोममत्या
क्षतारवः पातयते स रक्तम् ॥
वामे रवो दक्षिणतस्ततो यः
सोऽनर्थहेतुर्बलिभोजनस्य ।
वामप्रदेशे प्रतिलोमयानं
विघ्नाय लाभो गृह एव तेन ॥
प्रयाति पृष्ठे यदि दक्षिणेन
क्षतारवस्तद्रुधिरं पुरः स्यात् ।
वल्मीवरक्षादि च यो गृहीत्वा
प्रदक्षिणं याति स सर्पभीत्यै ॥
गोपुच्छवल्मीकक्षतास्रदक्ष
रवन् भवेत् सर्पविलोकनाय ।
स्यान्मृत्यवेऽङ्गारचिताग्निसंस्थः
काकः प्रकुर्व्वन् करचर्व्वणं च ॥
रवन् पुरो हानिरुजौ करोति
मृत्युं पुनर्निष्ठुरपृष्ठशब्दः ।
प्रसार्य्य रिक्तं वदनं य आस्ते
सर्व्वत्र निन्द्यो बलिभोजनोऽसौ ॥
वामोऽप्यरण्यातभयं मृतिं वा
संताड़यित्वा रसचर्म्मखण्डम् ।
चञ्चाग्निभङ्गं ध्रुवमग्निभङ्ग-
बन्धे वधं जल्पति युध्यमानः ॥
वामोऽपि रोगं कुरुते विमुक्ते
तिक्तेऽपि वृक्षे कलिकार्य्यनाशौ ।
पक्षौ विधुन्वन् विरवंश्च रूक्षं
सकण्टके मृत्युमुपाददाति ॥
वधो भवेद्भूरुहभग्नशाखे
बन्धो जलाभिः परिवेष्टिते स्यात् ।
रम्ये तरौ कण्टकयुक्तवृक्षे
सदा भवेतां कलिकार्य्यसिद्धी ॥
क्षुन्नाधिरूढो न रवेण यायात्
प्रयाति चेत् स्यात् खलु रक्तपातः ।
अवस्करं भूस्तृणकाष्ठकूप-
भस्मादिसंस्थो विनिहन्ति कार्य्यम् ॥
वल्मीवरक्षाकचमुष्ककाष्ठ-
चर्म्मास्थिनीर्याम्बरवल्कलानि ।
अङ्गाररक्तोत्पलकर्परांश्च
दृष्टानि चेत् काकमुखे तदानीम् ॥
पुण्यक्षयः पापसमागमश्च
मद्यद्वयं रोगसमुद्भवश्च ।
बन्धो वधः सर्व्वधनापहार
इत्यादिकं स्यात् पथि मन्दिरे च ॥
ऊर्द्धाननश्चञ्चलपक्षयुग्मः
काकः कुनादो विदधाति मृत्युम् ।
छायायुधक्षत्रघटास्थियान-
वादिश्च काष्ठादिकुटुकानि ॥

काक

सङ्गोचितैकाङ्घ्रिरुपेतवित्तो
दीप्तस्वरो भास्करमीक्षते च ।
काष्ठादिकं कुट्टयतेऽथवा यो
युद्धाधिकानर्थकरः खगोऽसौ ॥
तुण्डेन पिच्छं विलिखन् रवेण
यो रौति तूर्णञ्च निरीक्षते कम् ।
एकेन पादेन तथोपविष्टो
ब्रूते स बन्धं पुरतो जनस्य ॥
विड्गोमयौ न्यस्यति यस्य मूर्द्ध्नि
तस्यानलभ्रासरुजौ भवेताम् ।
यस्यास्थिखण्डं विहगस्त्वसौ तु
प्रयाति तूर्णं नगरीं यमस्य ॥
ब्रह्मप्रदेशे विरवन् पियासोः
कलत्रदोषं जनयत्यवश्यम् ।
मनुष्यमातङ्गतुरङ्गमाणां
शिरोऽधिरूढो निधनाय तेषाम् ॥
नदीतटे वाथ रटन्नटव्यां
खरस्वरो व्याघ्रभयाय गन्तुः ।
नैवातुरः क्वापि मतो हिताय
न दुष्टचेष्टो वितनोति भ्रान्तिम् ॥
यात्रोद्यमे सैन्यवधाय काको
दृष्टो रथे साश्वनरस्तकेषु ।
आयाति यस्याभिमुखो बलस्य
युद्धोद्यमे तस्य पराजयः स्यात् ॥
सगुब्रुवद्भिः कटके नृपस्य
काकैः प्रविष्टैः पिशितं विनापि ।
संयुध्यमानैररिभिः समं स्या-
न्महाहवः सन्धिरयुध्यमानैः ॥
चिरध्वजच्छिन्नलताधिरोहः
समुद्यतं शत्रुबलं प्रपश्यन् ।
आजौ जयं जल्पति भूमिपानां
कृतध्वनिः क्षीरतरौ च काकः ॥
गतिस्वरौ वायससंप्रयुक्तौ
प्राच्यां फलायोदितवैपरीत्यात् ।
एवं जनोऽप्याचरति प्रभूतौ
यथोदितं तत्र तथागमार्थम् ॥
दिग्यामचक्रोऽपि शुभाशुभानि
फलानि यानि प्रतिपादितानि ।
प्रतिष्ठमानस्य भवन्ति यानि
तथाविधानीति वदन्ति तज्ज्ञाः" ॥
इति काकरुते यात्राप्रकरणम् ॥ * ॥
"स्थानस्थितानां कथयन्ति काका-
श्चेष्टाविशेषेण शुभाशुभानि ।
प्रबोधिताः प्राक्तनकर्म्मभिर्ये
तल्लक्षणाय क्रियते प्रयत्नः ॥
निष्कारणं संवलिता रवन्तो
ग्रामेऽन्ननाशाय भवन्ति काकाः ।
रोधश्च चक्राङ्कतयो वदन्ति
सव्यापसव्यभ्रमणाद्भयञ्च ॥
विघातमाडम्बरवर्गसंस्था
रात्रौ रवन्तो जनताविनाशम् ।
लोकश्च चञ्चूचरणप्रहारै-

रुद्वेजयन्तः परचक्रवद्भिम् ॥
यः खाति धूल्यान्तु विलोक्य रौति
वृष्टिं समाशंसति वायसोऽसौ।
जलस्थलप्राणिविपर्य्ययेण
वर्षासु वृष्टिं भयमन्यदा तु ॥
मध्यं दिने वेश्मनि यस्य काको
विरौति रौद्रं विधुनोति वाक्षे।
हरन्ति चौरा द्रविणानि तस्य
ध्रुवं तथान्यो भवति प्रमादः॥
रवन्नटस्तुल्यपूर्यवक्त्रो
ऊताग्रभीतिं करटः करोति !
स्यात् प्रस्थितस्याप्यथवा स्थितस्य
दुःखं प्रभूतं दिवसचयेण ॥
छायासु जाभं भुवि भूमिजाभं
विघ्नं जले यावणि कार्य्यनाशम्।
करोति काको विरवन्नरस्य
प्राख्यायिनः स्थानगतस्य वापि ॥
द्वारप्रदेशेरुधिरानुलिप्तो
विरौति काकः शिशुनाशनाय।
पक्षौ विधुन्वन् विरवंश्च रूक्षं
ग्लाने च दीप्ते भवने न ग्रस्तः ॥
भूयस्तथोर्द्धे प्रविधाय पक्षौ
काकः कुलादं प्रलयं करोति।
कुद्धोऽधिरूढः करटान्तरच्च
रोगेण मृत्युं कुरुते नराणाम् ॥
द्रव्ये हृते वापहृते खगेन
विनाशलाभावपि तादृशस्य।
रक्तस्य पीते रजतस्य शुक्ले
चौलस्य कार्पासमये भवेताम् ॥
प्रश्ने कृते रोगविनाशबुद्धा
हन्याशु रोगं सरवः प्रदीप्ते।
ग्लाने प्रदेशे करटस्विरेण
वल्यारवो रोगमपाकरोति ॥
प्रश्ने शुभे ग्लान्तदिगाश्रयस्थः
ग्लान्तस्वरो यः शुभमादधाति।
यो वायसस्तं शुभदं वदन्ति
तद्व्यत्यये व्यत्ययहेतुरुक्तः ॥
विरौति कुम्भे मणिकेऽथवा यः
स गर्भवत्याः सुतजन्महेतुः।
उड्डीयते करटकिनीश्च शाखा-
मादाय राजागमनाय काकः॥
अन्नादिविष्ठापिशितादिभिर्द्यः
पूर्वाह्णनोऽभीष्टफलप्रदोऽसौ।
मन्त्रादिसिद्धौ बलिजादिलाभे
ग्रस्तो विवाहादिविधौ च काकः ॥
इष्टार्थदोऽन्यादिकवाहनस्य-
स्वजादिसंस्थस्तदवाप्तकारी।
वध्वागमं जल्पति तोरणस्थो
दृष्टार्थदो दृष्टतरुस्थितश्च ॥
वायसः कुलकुलध्वनिं यदा
आहरेद्भवनसंमुखं तदा।
अभ्युपैति पथिकस्तदा ध्वनिं
सर्व्वकार्य्यशुभदं वदत्यसौ ॥
इदं त्विहोत्पातयुगं पृथिव्यां
महाभयं शाकुनिका वदन्ति।
यद्वायसो मैथुनसन्निविष्टो
दृश्येत यद्वा धवलः कदाचित् ॥
उद्वेगविद्वेषभयप्रवास-
धनक्षयव्याधिभयप्रहाराः।
बुद्धिप्रणाशाकुलताप्रवादा
नृणां भवन्त्यद्भुतदर्शनेन ॥
शमाय तत्सूचितदुःखराशेः
स्नानं वहित्वत्तृणमेव कुर्य्यात्।
आत्मीयशक्त्या च सदक्षिणानि
द्विजाय दद्यात् वसनानि तानि ॥
नयेदहःशेषमपुण्यहान्या
शयीत भूमावकृतान्नभक्षः।
हविष्यभोजी न भजेच्च नारीं
दिनानि सप्त त्रिगुणानि यावत् ॥
अकाकघातव्रतमादधीत
बलिं च दद्याद्बलिभोजनेभ्यः।
स्नात्वा प्रभाते विदधीत शान्तिं
दद्यात् स्वशक्त्या द्रविणं गुणिभ्यः ॥
देशे तु यच्चाद्भुतमेतदुग्र-
माख्योक्तये तत्र समापतन्ति।
अस्थिदुर्भिक्षभयोपसर्ग-
चौराग्निशस्त्रध्रुवधर्म्मनाशाः ॥
कर्म्माणि तस्योपशमाय राजा
प्रवर्त्तयेत् शान्तिकपौष्टिकानि।
अन्नाद्यगोभूमिवसूनि दद्याद्
युद्धं विदध्यान्न च यावदन्तम्" ॥
इति काकरुते स्थानस्थितप्रकरणं पञ्चमम् ॥ * ॥

अथ स्वरविचारः।

"काकामिति क्षेमविधौ विरावः
कोकामितीष्टाशनयानहेतुः।
करोति कूं कूमिति चार्थलाभं
कांकां ध्वनिः काञ्चनलाभमाह ॥
कें केमिति स्त्रीवरयोर्विदार्य्यै
भोगाय कां कामिति शब्दितः स्यात्।
अपत्यलाभः कु कु इत्यनेन
गन्तुः फलं केकव इत्यनेन ॥
कौं कौमितीदं शुभलाभकारि
कुं कुं निनादः प्रियसङ्गमाय।
क्रां क्रूमिति क्रामिति च क्रयोऽमी
क्रां क्रामिति द्यौ च रवौ रणाय ॥
क्रां क्रामिति क्रौमिति च दिवक्षां
क्रूं क्रूमिति क्रौ कुकु कू इतीदम्।
वर्त्तं प्रदिष्टं मरणाय नृणां
गन्तुः प्रयाणं कुरुते खगाख्यः ॥
क्रौं क्रौमितीष्टार्थविनाशनाय
व्यलव्यलेत्यभिभयाय शब्दः।
कोकीति कोकाविति यः कथञ्चिन्-
मुऊर्मुऊः स्यात् स मतो वधाय ॥
स्यात् का इतीदं विपणं सदैव
मिश्राग्नये स्यात् क इतीष्टशस्त्र।
काका इतीदं तु विघातकारि
करोति काको वदति स्वतुष्ट्यै ॥
आहारदोषाय च काकटीति
स्यादाकुलं कुक्कुनिभं रणाय।
केकेध्वनिश्काकुटि किं टिकीति
त्रयं त्विदं स्यात् पुरदूषणाय ॥
यत् का इति त्रिस्वदनुस्वरेण
शब्दद्वयं स्यान्महते रणाय।
कामित्ययं वाहननाशनश्च
ददाति हर्षं कुकुकुर्व्वितीदम् ॥
यत्का इतीदं विरुतं सुदीर्घ-
लुप्तस्वरेणोच्चरितं प्रमादात्।
उत्साहहीनः श्रमदैन्ययुक्तः
स वायसः कार्य्यविनाशनाय ॥
सामिषं वक्रवक्रेति भोजये-
दारयेत् कलिकलीति रासनम्।
अभ्युपैति खररूक्षभाषिते
प्रोषितः शवशवारवे शवः ॥
स्यात् कलिः कवकवध्वनौ नृणां
जायते कणकणाध्वनौ खरः।
आव्रजेत् कुलुकुलुध्वनौ प्रियः
सौदनं कटकटध्वनौ दधि ॥
एवं प्रकारा बहवोऽपरेऽपि
प्रश्नान्तदीप्तावलिभोजनानाम्।
भवन्ति शब्दाः खलु तेषु केचि-
दस्माभिरुक्ताः खलु लक्षणीयाः" ॥
इति काकरुते स्वरप्रकरणं षष्ठम् ॥ * ॥

"हितं नरेभ्यो सुनिभिः पुराणै-
र्ज्ञानं यदुक्तं बलिपिण्डयुक्त्या।
तदुच्यते संप्रति येन काका
वदन्ति नित्यं बलिजाभतुष्टाः ॥
यदक्षिणस्यां दिशि यत्र काके-
ष्युतो भवेत् क्षीरतरुः प्रभूतौ।
गत्वा निशान्तेऽहनि तत्र काका
निमन्त्रणीया बलिपिण्डभाज्ये ॥
प्रातस्ततः क्षीरतरोरधस्ता-
द्दिशोत्थ लिखेत् सह गोमयेन।
भूमिप्रदेशे चतुरस्रमस्य
मध्येऽर्चयेत् ब्रह्ममुरारिभानून् ॥
इन्द्राग्निवैवस्वतयातुधान-
जलेशवायुद्रविणेशशम्भून्।
अभ्यर्चयेदस्य दिशु क्रमेण
क्रमेण चाष्टावपि लोकपालान् ॥
नमोयुतैः सप्रणवैश्च सर्व्वा-
न्निजाभिधानैः प्रयतो मनुष्यः।
अर्घासनाद्यैरुपपुष्पधूप-
नैवेद्यदीपाक्षतदक्षिणाभिः ॥
आव्रह्मकाकांस्तदसन्निविष्टा-
नाध्याय तत्प्राक्षणमन्त्रयुक्त्या।
ततस्तदर्थं बलिमाज्यसिक्तं
मन्त्रेण दद्यात् दधिपिण्डयुक्तम्" ॥

मन्त्रः। इन्द्राय यमाय वरुणाय धनदाय भूतवाय-
साय बलिं गृह्णातु मे स्वाहा ॥
"उदीर्य्य कार्य्यं स्नपयावरुह्य
ततः प्रदेशे करटस्य चेष्टाः
स्पृष्टीकृताङ्गानि शुभाशुभार्थं
सलक्षयेन्निश्चलपाणिपादः ॥
पूर्व्वेण खादन् सुखवित्तवृद्धिं
करोति वह्निर्दिशि वह्निभीतिम् ।
काकोऽर्थनाशं दिशि दक्षिणस्यां
नैर्ऋत्यगो दिग्वरलक्षयेदिदृक्षुः ॥
जलेशदेशेऽभिमतार्थसिद्धि-
र्व्वायोर्दिशीति प्रभवाल्पवृद्धिः ।
सौम्ये सुखारोग्यसमीहितार्थ-
मीशानदेशे वितरत्यभीष्टम् ॥
बली विलुप्ते करटः समन्तात्
कार्य्ये विमिश्रं परिभावनीयम् ।
बलिं विकीर्य्यापि न भक्षयन्ति
काकास्तदानीं भयदा भवन्ति ॥
क्षीरद्रुमारामचतुष्पदेषु
सरित्समीपे चिदगारयेषु ।
देयो बलिर्भूततदिनाष्टमीषु
कुल्माषदध्योदनतण्डुलाद्यैः" ॥
इति काकरुते पिण्डप्रकरणं सप्तमम् ॥ * ॥
"पिण्डत्रयस्याथ विधानमेत-
दाख्यायते यत् किल नारदाद्यैः ।
दृष्टं मुनीन्द्रैरशुभं शुभञ्च
यथावदस्मिन् कथयन्ति काकाः ॥
गत्वा शुभेऽह्नि प्रहरे चतुर्थे
देशेषु पूर्व्वप्रतिपादितेषु ।
नरेण पिण्डत्रयभोजनार्थं
काकाः प्रयत्नेन निमन्त्रणीयाः ॥
ततः प्रभाते ह्युपलिप्य भूमिं
तस्याञ्च पूर्व्वोदितमन्त्रयुक्त्या ।
ब्रह्माच्युतेशाप्यतिलोकपालाः
काकाश्च पुंसां क्रमतोर्चनीयाः ॥
दध्योदनाद्यैर्विहितं प्रवेश्य
पिण्डत्रये मण्डलकस्य मध्ये ।
अभ्यर्च्चयेदत्ततपुष्यधूपै-
र्मनोहरैर्यत्नपरो मनुष्यः ॥
तेषु क्षिपेत् प्राग्दिगनुक्रमेण
पिण्डेषु हेमप्रथमे द्वितीये ।
रूप्यं तथा लौहलवं तृतीये
प्रेषञ्च कुर्य्याद्बलिपिण्डतुल्यम् ॥
त्रिःसप्तकृत्वो विनिवेश्य पिण्डे
पिण्डा निवेश्या बलिभोजनेभ्यः ।
मन्त्रोक्तमावाहनतोषितेभ्यः
कार्य्यं विचार्य्यापसरेत्ततश्च" ॥
मन्त्रः। ॐ हिवि टिमि विटि काकचण्डालाय
स्वाहा। इति पिण्डाभिमन्त्रणार्थम्। ॐ ब्रह्मणे
विष्णवे काकचण्डालाय स्वाहा। काकाह्वानमन्त्रः॥
"काकेन भुक्ते ससुवर्णपिण्डे
श्रेयं नरेणोत्तममात्मकार्य्यम् ।

भुक्ते सरूप्ये खलु मध्यमं स्याद्-
भुक्ते सलौहे त्वधमं प्रदिष्टम् ॥
विवादवाणिज्यविवाहदृष्टि-
क्षेमाश्च वित्ताः क्षविभोगरोगाः ।
संग्रामसेवान्यकार्य्यदेशा
इत्यादयोऽस्मिन् परिभावनीयाः ॥
चेष्टामवामां विदधाति याति
प्रदक्षिणं दक्षिणपक्षमुच्चैः ।
ग्रीवां तथोचां कुरुते सशब्दः
स्थानं मनोज्ञं श्रयति द्रुमञ्च ॥
एवंविधां यो विदधाति चेष्टां
पिण्डं समादाय शुभं खगोऽसौ ।
अभीष्टकार्य्यादधिकं करोति
चेष्टाविपर्य्यासतयान्यथात्वम् ॥
पिण्डं समादाय यदि प्रधानं
म्लानं दिशं गच्छति काकपत्ती ।
पूर्णं फलं तत् कुरुते नराणां
चिकीर्षिते वस्तुनि यत्र तत्र ॥
काको गृहीत्वा यदि मुख्यपिण्डं
प्रयाति दीप्तां ककुभं तदानीम् ।
अत्युत्तमं कार्य्यफलं प्रदर्श्य
ततः समस्तं विनिहन्त्यवश्यम् ॥
द्वितीयकं यद्यपहृत्य पिण्ड-
मुड्डीयते म्लानदिगाश्रयेण ।
फलं तदानीं शुभदं नराणाम्
याप्यं खगो जल्पति कार्य्यजातम् ॥
काके समादाय जघन्यपिण्डं
याते प्रदीप्तां ककुभं वदन्ति ।
कार्य्यं जघन्यादधिकं जघन्यं
स्यान्मध्यमं मध्यमपिण्डभागे" ॥
इति वसन्तराजे पिण्डत्रयप्रकरणमष्टमम् ॥ * ॥
"महर्षयो वायसशाकुनस्य
वदन्ति सारादपि सारभूतम् ।
पिण्डाष्टकं यत्तदशेषमेत-
दाख्यायते कार्य्यविनिश्चयार्थम् ॥
शुभेऽह्नि काकानधिवास्य सायं
पिण्डाष्टकं भोक्तुमथ प्रभाते ।
तत्कालयोग्यानि समस्तवस्तू-
न्यादाय यायाद्बहिरप्रमत्तः ॥
एकान्तदेशे तरुपार्श्वभूमौ
मृद्गोमयाभ्यामुपलेपितायाम् ।
सत्पक्षगत्येन समुत्थितायां
सौम्योपहारैरुपशोभितायाम् ॥
विधाय पूजां कुलदेवतानां
मध्ये ततोऽष्टस्वपि दिक्षु देयम् ।
भक्तेन सर्पिर्दधिमिश्रितेन
पिण्डाष्टकं प्रागादिगनुक्रमेण ॥
पक्षीन्द्रवक्त्रान्तकरात्सेन्द्रान्
विष्णुं विरिञ्चिं धनदं महेशम् ।
पूर्व्वादिकाष्ठाक्रमयोजितेषु
न्यसेत् क्रमादष्टसु पिण्डकेषु ॥
नमोयुतैस्तान् प्रणवञ्च सर्व्वां-

स्ततोऽर्च्चयेत्तन्निजनाममन्त्रैः ।
अर्घ्यासनालेपनपुष्यधूपै-
र्नैवेद्यदीपाच्छतदक्षिणाभिः ॥
अभ्यर्चितेभ्यो विधिनोदितेन
पिण्डाष्टकं तत् ददतु द्विजेभ्यः ।
मन्त्रेण संमन्त्र्य निवेदनार्थं
कार्य्यं विचिन्त्यापसरेच्च किञ्चित्" ॥
अथ मन्त्रः। ॐ नमः खगपतये गरुड़ य
द्रोणाय पक्षिराजाय स्वाहा ॥
"द्रोणाढ़कसमं पिण्डं गृहाण त्वमधोक्षितः ।
यथादृष्टं निमित्तं च कथयस्वाधमे स्फुटम् ॥
काकेन पिण्डे प्रथमे गृहीते
तिष्ठन् व्रजन् वापि भवेत् कृतार्थः ।
उद्वेगशोकौ विफलः प्रयासे
हानिः कलिर्व्वा भवति द्वितीये ॥
याम्ये रुगापद्भयमृत्यवः स्युः
पिण्डे चतुर्थे विजयो रणेषु ।
स्यादैक्यवेऽभीष्टमकृष्टसाध्यं
भवेत् प्रवासो विफलश्च षष्ठे ॥
नास्तीह तन्निश्चयमेव कार्य्यं
भुक्ते न यत् सिध्यति सौम्यपिण्डे ।
सन्तापशोकौ विफला च याचा
पिण्डेऽष्टमे वायसभक्षिते च ॥
पिण्डं न गृह्णात्यथवा न भुङ्क्ते
चञ्चूनखैर्व्विक्षिपति द्विजो यः ।
कार्य्येषु सर्व्वेषु स न प्रशस्तो
ब्रवीति घोरं समरं स पुंसाम्" ॥
इति वसन्तराजे काकरुते पिण्डाष्टकप्रकरणं
नवमम् ॥ ० ॥
"आद्यं पञ्चाशता द्वाभ्यां वृत्तैर्दिक्चक्रमीरितम् ।
काकालयपरीक्षा च द्वितीये दशभिस्त्रिभिः ॥
वृत्तैस्त्रिभिस्तृतीये च काकाश्रुकनिरूपणम् ।
द्वाचत्वारिंशता वृत्तैर्याचा तुर्ये प्रकीर्त्तिताः ॥
वृत्तानि विंशतिस्त्रीणि स्यानं स्याप्ये च पञ्चमः ।
खरप्रकरणं षष्ठं वृत्तैर्द्वादशभिस्ततः ॥
एकादशभिराख्यानं बलिसंज्ञञ्च सप्तमम् ।
पिण्डत्रयविधानाय चतुर्द्दशभिरष्टमम् ॥
पिण्डाष्टकविधानाय नवमे यदुदाहृतम् ।
अन्यप्रकरणं तच्च वृत्तान्येकादशैव तु ॥
वसन्तराजशाकुने सदागमार्थशोभने ।
समस्तसत्कौतुके विचारितोऽत्र वायसः" ॥ * ॥
समुदायेन १८१ वृत्तानि। इति वसन्तराजशाकु-
नान्तर्गतवायसशाकुनामकाकचरित्रं समाप्तम् ॥
काकमांसगुणाः। दोषत्वयापहृत्वम्। चक्षुर्हितत्वम्।
कृंहणत्वम्। बलायुर्हितकारित्वम्। लघुत्वम्।
दीपनत्वञ्च। इति राजनिर्घण्टः ॥
("काकः कोकिलशूकरास्त्वथ खरो-
ष्ट्राश्वादयो भक्षुका
व्यालाः सौरभयो वृकप्रभृतयो
ये चान्यजीवा नृणाम्।
मण्डूकाश्च सरीसृपादिकगणा
यूका कलिङ्गाश्च ये

कोकः सारसशारिका शुक इमे
भक्ष्या न गृध्रास्तथा ॥
गृहचटकचकोराः काकजात्याश्च श्येनाः
पिकशुकविषघ्नङ्कोभृङ्गदात्यूहकल्काः ।
जलकरटकपोता प्रोतकी खञ्जरीटाः
कलविकमशकाद्या यूकपिङ्गादयोऽन्ये ॥
एते भक्ष्या नैव भक्ष्या न चेष्टा
ये चाप्यन्येऽज्ञातनामाखुजाश्च ।
अन्ये चापि श्वापदा ये च निन्द्या-
स्ते चाखाद्या वर्ज्जिताश्चात्र सर्व्वे" ॥
इति हारीते प्रथमशाखे । ११ अः ॥
"काककङ्कुररुचाषभासगृध्रघात्युलूकचिल्लिश्ये-
नशशघ्रप्रभृतयः प्रसहाः ॥
"एते सिंहादिभिः सर्व्वे समाना वायसादयः ।
रसवीर्य्य विपाकेषु विशेषाच्छोषिणे हिताः" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अः ॥) पीठसर्पी ।
खोंड़ा इति भाषा ॥ द्वीपविशेषः । परिमाणभेदः ।
वृक्षविशेषः । शिरोऽवक्षालनम् । इति हेमचन्द्र-
मेदिनीकरौ ॥ तिलकः । अतिधृष्टः । इति शब्द-
रत्नावली ॥
काककङ्कुः, स्त्री, (काकप्रियः कङ्कुः ।) चीनकः । इति
हेमचन्द्रः ॥
काककला, स्त्री, (काकस्य कला अङ्गं जङ्घावयवः
तद्वत् अङ्गं यस्याः ।) काकजङ्घावृक्षः । इति
जटाधरः ॥
काकघ्नी, स्त्री, (काकं हन्तीति । काक + हन् + टः
टित्त्वात् ङीप् ।) महाकरञ्जः । इति राज-
निर्घण्टः ॥
काकचिञ्चा, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली । कूँच् इति भाषा । (गुञ्जाशब्दे-
ऽस्या विवरणं बोद्धव्यम् ॥)
काकचिञ्चिः, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली ॥
काकचिञ्ची, स्त्री, (काकचिञ्चि + वा ङीप् ।) गुञ्जा ।
इत्यमरः । २ । ४ । ९८ ॥ (अस्याः पर्य्यायो भाव-
प्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । यथा,—
"श्वेता रक्तोचटा प्रोक्ता कृष्णा चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥
गुञ्जाशब्दे विवरणान्तरं ज्ञेयम् ॥)
काकच्छदः, पुं, (काकस्य छदः पक्ष इव छदो यस्य ।)
खञ्जनपक्षी । इति शब्दरत्नावली ॥
काकच्छदिः, पुं, खञ्जनपक्षी । इति चिकाण्डश्लेषः ॥
(खञ्जरीटशब्देऽस्य विवृतिर्ज्ञेया ॥)
काकजङ्घा, स्त्री, (काकस्य जङ्घेवाकृतिर्यस्याः ।)
स्वनामख्यातवृक्षविशेषः । केउया ठेङ्गा इति
भाषा । तत्पर्य्यायः । काकाङ्घोरु २ काकाङ्घी ३ काक-
नासिका ४ । इति शब्दरत्नावली ॥ कृष्णवर्णः । इति
रत्नमाला ॥ भृङ्गजङ्घा ६ काकाङ्घा ७ सुलोमशा
८ पारावतपदी ९ दासी १० नदीकान्ता ११ ।
अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कृमिव्रण-
कफबाधिर्य्याजीर्णजीर्णविषमज्वरनाशित्वञ्च । इति
राजनिर्घण्टः ॥
("काकजङ्घा वला श्यामा ब्रह्मदण्डी सुताङ्गुलिः ।
एतस्मिन्पर्व्वणि त्वामार्गस्तथा भृङ्गरजोऽष्टमः ॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः ।
रक्तसूत्रेण संवेष्ट्य बद्धमेकाह्निकं जयेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
मसीति लोके । अस्याः पर्य्यायो गुणाश्च यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गुञ्जा । इति रत्नमाला ।
काकजम्बुः, स्त्री, (काकवर्णा जम्बुः ।) भूमिजम्बुः ।
क्षुद्रजम्बुः । इति शब्दमाला । वनजाम् इति
भाषा ॥
काकजम्बूः, स्त्री, (कं जलं अकति आश्रयत्वेन गच्छा-
तीति । क + अक् + अण् + टाप् च । काका
जम्बूः । यद्वा काकवर्णा जम्बूः ।) जम्बूप्रभेदः ।
तत्पर्य्यायः । काकफला २ नादेयी ३ काकवल्लभा
४ भृङ्गेष्टा ५ काकनीला ६ भृङ्गजम्बूः ७ धन-
प्रिया ८ । अस्या गुणाः । कषायत्वम् । अम्लत्वम् ।
पाके मधुरत्वम् । गुरुत्वम् । दाहश्रमातिसार-
नाशित्वम् । वीर्य्यवर्द्धिबलप्रदत्वञ्च । इति राज
निर्घण्टः ॥
काकणं, क्ली, (कु ईषत् कणति निमीलति इति ।
अच् काकणं गुञ्जाफलं तद्वदाकृतिरस्यास्तीति
कृष्णरक्तचिह्नितत्वादस्य तथात्वम् ।) कुष्ठविशेषः ।
तस्य लक्षणम् । यथा,—
"यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥
इति माधवकरः ॥ ("काकणं तीव्रदाहरुक् ॥
"पूर्व्वं रक्तञ्च कृष्णञ्च काकणन्तीफलोपमम् ।
कुष्ठलिङ्गैर्युतं सर्व्वैर्नैकवर्णं ततो भवेत् ॥
दोषभेदीयविहितैरादिशेल्लिङ्गकर्म्मभिः" ॥
इति वाभटे निदानस्थाने १४ अः ॥
"काकणन्तिका वर्णान्यादौ पश्चात् सर्व्वकुष्ठ-
लिङ्गसमन्वितानि पापीयसां सर्व्वकुष्ठलिङ्गसम्भवे
नानेकवर्णानि काकणानीति विद्यात् ।
इति निदानस्थाने ५ अः । चरकेणोक्तम् ॥)
काकणन्तिका, स्त्री, (कु ईषत् कणन्ती निमीलन्ती ।
कन् निमीलने शब्द ङीप् कोःकादेशः । ततः कन्
टाप् च पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
रत्नमाला । कुँच् इति भाषा ॥
("यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम्" ।
इति चरके चिकित्सास्थाने ७ अः ॥)
काकतिक्ता, स्त्री, (काकमांसवत् तिक्ता इति मध्यपद-
लोपि समासः ।) काकचिञ्चा । इति रत्नमाला ।
कुँच् इति भाषा । (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काकतिन्दुकः, पुं, (कं जलं अकति इत्यण् । काकः
तिन्दुकः काकवर्णो वा तिन्दुकः काकप्रियस्तिन्दुको
वा ।) वृक्षविशेषः । माकड़ा केन्दु । माकड़ो
गाछ् । काकतेँदु इति च भाषा । तत्पर्य्यायः । का-
केन्दुः २ कुलकः ३ काकपीलुकः ४ । इत्यमरः
। २ । ४ । १९ ॥ काकपीलुः ५ काकाण्डः ६ काक
स्फूर्ज्जः ७ काकाङ्कः ८ काकबीजकः ९ । अस्य
गुणाः । कषायत्वम् । अम्लत्वम् । गुरुत्वम् ।
वातविकारनाशित्वञ्च । पक्वस्य तस्य गुणाः ।
मधुरत्वम् । किञ्चित्कफकारित्वम् । वान्तिपित्त-
नाशित्वञ्च । इति राजनिर्घण्टः ॥ (काकाण्डशब्दे-
ऽस्य विवरणं ज्ञेयम् ॥)
काकतुण्डः, पुं, (काकतुण्डस्येव वर्णोऽस्यास्य । अर्श-
आदित्वात् अच् ।) कालागुरु । इति हेमचन्द्रः ॥
काकतुण्डिका, स्त्री, (काकतुण्डस्येव वर्णः फलांशेऽस्याः
इति ठन् । स्त्रियां टाप् च ।) काकचिञ्चा । गुञ्जा ।
इति हलायुधः ॥
काकतुण्डी, स्त्री, (काकं ईषदुःखं तुण्डते नाशयतीति ।
तुण्ड् ड गधे + अण् । गौरादित्वात् ङीष् ।)
राजरीतिः । राजपितव इति भाषा । इति राज-
निर्घण्टः ॥ (काकतुण्डस्येवाकृतिर्विद्यते ऽस्याः ।
अर्श आदित्वादच् । गौरादित्वात् ङीष् ।) वृक्ष-
विशेषः । कौआड़ोड़ी । इति हिन्दी भाषा ।
तत्पर्य्यायः । काकादनी २ काकपीलुः ३ काक-
श्रिम्बी ४ रक्तफला ५ भृङ्गादनी ६ वक्रशल्या ७
दुर्म्मोहा ८ वायसादनी ९ भृङ्गनखी १० वायसी
११ काकदन्तिका १२ भृङ्गदन्ती १३ । अस्य
गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । द्रव-
त्वम् । रसायनत्वम् । वातदोषहारित्वम् । रुचि-
कारित्वम् । पलितलम्बित्वञ्च । इति राज-
निर्घण्टः ॥
काकध्वजः, पुं, (काकमीषल्लम्बं वासं ध्वज इवास्य ।)
वाड़वाग्निः । इति त्रिकाण्डश्लेषः ॥
काकनामा, [न्] पुं, (काकस्य नाम नाम यस्य ।)
वकवृक्षः । इति रत्नमाला ॥ (काकशीर्षशब्दे-
ऽस्य विवरणं बोधम् ।)
काकनासः, पुं, (काकस्य नासाया वर्णः इव फले यस्य ।)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥
काकनासा, स्त्री, (काकस्य नासा इव फलमस्याः ।)
काकजङ्घावृक्षः । इति जटाधरः । (अस्याः पर्य्याया
गुणाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"काकनासा तु काकाङ्घ्री काकतुण्डफला च सा ।
काकनासा कषायोष्णा कटुका रस पाकयोः ।
कफघ्नी वामनीतिक्ता प्रोथार्शः श्वित्रकुष्ठहृत्" ॥
काकनासिका, स्त्री, (काकनासा ततः स्वार्थे कन्
टाप् अत इत्वम् ।) काकजङ्घावृक्षः । इत्यमरः ।
२ । ४ । ११८ ॥ रक्तचिल्लः । इति राजनिर्घण्टः ।
काकपक्षः, पुं, (काकस्य पक्ष इव आकारोऽस्यास्य ।
काकपक्ष + अच् ।) मस्तकपार्श्वद्वये केशरचना-
विशेषः । काकपाटा जुल्पी इति च भाषा ।

तत्पर्य्यायः। शिखण्डकः २। इत्यमरः। २। ६। ९९॥ शिखाण्डकः ३ शिखण्डः ४। इति तट्टीका॥ (यथा, रघुः। १९। १।

"कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचित-
स्तेजसां हि न वयः समीक्ष्यते"॥)

काकपदः, पुं, (बन्धस्य काकपदवदाकारवत्त्वात् काकपद इव आकृतिरस्यस्य।) रतिबन्धविशेषः तस्य लक्षणम्। यथा,—

"पादौ द्वौ स्कन्धयुग्मस्थौ क्षिप्त्वा सिक्थं भगे बधु।
कामयेत् कामुकी कामी बन्धः काकपदो मतः"॥
इति रतिमञ्जरी॥

काकपर्णी, स्त्री, (काक इव श्यामं पर्णं यस्याः। गौरादित्वात् ङीष्।) मुद्गपर्णी। इति भावप्रकाशः॥ ("मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला।
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत्।
दोषत्रयहरी मध्वी ग्रहणार्शोऽतिसारजित्"॥
इति च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥)

काकपीलुः, पुं, (काकप्रियः पीलुः।) काकतिन्दुकः। काकतुण्डी। श्वेतगुञ्जा। इति राजनिर्घण्टः। (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे।

"श्वेता रक्तोत्कटा प्रोक्ता शाखाला चापि सा स्मृता।
रक्ता सा काकचिञ्ची स्यात् काकानन्दा च रक्तिका।
काकादनी ककापीलुः सा स्मृता काकवल्लरी"॥
विशेषविवरणमस्य च गुञ्जाशब्दे ज्ञेयम्॥)

काकपीलुकः, पुं, (काकपीलु + संज्ञायां कन्।) काकतिन्दुकवृक्षः। इत्यमरः। २। ४। ३९। माकड़ाकेन्दु इति भाषा॥

काकपुच्छः, पुं, (काकस्य पुच्छ इव पुच्छो यस्य।) कोकिलः। इति शब्दरत्नावली॥

काकपुरुषः, पुं, (काकेन पुरुषः। कोकिलया हि निजाण्डस्फोटनाशङ्कतया काकाण्डं तन्नीड़ात् निक्षिप्य तत्र स्वकीयाण्डं स्थापयित्वा काकद्वारा स्वापत्यपोषयात् अस्य तथात्वम्।) कोकिलः। इति त्रिकाण्डशेषः॥

काकपुष्पं, क्ली, (काकवत् श्यामं पुष्पमस्य।) गन्धपर्णम्। इति राजनिर्घण्टः॥

काकफलः, पुं, (काकप्रियं फलमस्य।) निम्बवृक्षः। इति राजनिर्घण्टः॥ (निम्बशब्देऽस्य गुणादयो ज्ञातव्याः॥)

काकबलिः, पुं, (काकेभ्यो देयो बलिरन्नादिकम्।) काकसम्प्रदानकान्नादि। तद्दानविधिर्यथा।

ॐयमदारावस्थितनानादिग्देशीयवायसेभ्यो नमः। इति पाद्यादिभिरभ्यर्च्च प्रार्थयेत्।

"ॐ काकत्वं यमदूतोऽसि प्रहाय बलिमुत्तमम्।
यमलोकगतं प्रेतं त्वमाप्यायितुमर्हसि॥
ॐ काकाय काकपुरुषाय वायसाय महात्मने।
अत्र पिण्डं प्रयच्छामि कथ्यतां धर्म्मराजनि"॥
इति पूरकपिण्डदानान्ते हलायुधः॥ *॥
बलिवैश्वदेवान्तर्गततद्विधिर्यथा,—

"ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्"॥
ॐ काकेभ्यो नमः। इति दद्यात् तदुपरि अद्भिः सिञ्चेत्। इत्याह्निकाचारतत्त्वम्॥ *॥
गयायां तद्विधिर्यथा,—

"बलिः काकशिलायाञ्च काकमोक्षणमोक्षदः"।
इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः॥ तत्र तृतीयदिनकृत्ये काकबलिदानं यथा,—

"ततः काकबलिं क्षिप्त्वा पुनः स्नानं समाचरेत्।
ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा॥
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्"॥
इति श्रीवायुपुराणे ७ अध्यायः॥

काकभाण्डी, स्त्री, (काकस्य मुखोष्ठवरसकारणस्य ईषच्चलस्य भाण्डी क्षुद्रभाण्डमिव। तत्फलभक्षणेन मुखात् ईषच्चलत्वरत्वात् अस्यात्तथात्वम्।) महाकरञ्जः। इति राजनिर्घण्टः॥

काकभीरुः, पुं, (काकात् भीरुर्भयशीलः।) पेचकः। इति त्रिकाण्डशेषः॥

काकमद्गुः, पुं, (काक इव श्यामो मद्गुर्जलचरपक्षिविशेषः) दात्यूहपक्षी। इति त्रिकाण्डशेषः। (डाउकपाखी इति भाषा॥ यथा, महाभारते १३। दानधर्म्मे संसारचक्रकथने १११। १२१।

"घृतं हृत्वा तु दुर्ब्बुद्धिः काकमद्गुः प्रजायते"॥)

काकमर्दः, पुं, (काकं मृद्नातीति। काक + मृद् + अण्।) महाकालवृक्षः। इति राजनिर्घण्टः॥

काकमर्दकः, पुं, (काकमर्द + संज्ञायां कन्।) महाकाललता। इति रत्नमाला। माकाल् इति भाषा॥

काकमाचिका, स्त्री, (काकमाची + स्वार्थे कन्।) काकमाचीवृक्षः। इति शब्दरत्नावली॥

काकमाची, स्त्री, (काकान् मक्षते अर्चयति फलदानेनेति। मक्षि + अण् + गौरादित्वात् ङीष् एषोदरादित्वात् न लोपः।) क्षुद्रवृक्षविशेषः। गुड़कामाइ इति भाषा। तत्पर्य्यायः। वायसी २। इत्यमरः। २। ४। १५१॥ ध्वाङ्क्षमाची ३ वायसाङ्गा ४ सर्व्वतिक्ता ५ वञ्जुफला ६ कटफला ७ रसायनी ८ गुच्छफला ९ काकमाता १० स्वादुपाका ११ सुन्दरी १२ तिक्तिका १३ वञ्जुतिक्ता १४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफशूलार्शःश्लोथदोषकुष्ठकण्डूनाशित्वञ्च। इति राजनिर्घण्टः॥ त्रिदोषशमनताकारित्वम्। रुच्यत्वम्। रसायनत्वम्। नातिशीतत्वम्। नात्युष्णत्वम्। हृद्यत्वम्। भेदकत्वञ्च। इति राजवल्लभः॥ (तथाच भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥

"काकमाची त्रिदोषघ्नी स्निग्धोष्णाक्षरसुप्रदा॥
तिक्ता रसायनी श्लोथकुष्ठार्शोज्वरभेदजित्।
कटुर्नेत्रहिता हिक्काच्छर्दिहृद्रोगनाशिनी"॥)

काकमाता, स्त्री, (काकस्य मातेव पोषिका। काकस्य तत्फलप्रियत्वात्।) काकमाची। इति राजनिर्घण्टः॥ (काकमाचीशब्दे पर्य्यायगुणादिकं द्रष्टव्यं॥

काकमुद्गा, स्त्री, (काकेन ईषच्चलेन मुद्गं गच्छतीति। काकमुद् + गम् + ड + टाप्।) मुद्गपर्णीवृक्षः। इत्यमरः। २। ४। १९३॥ मुगाणी इति भाषा॥

(अस्याः पर्य्यायो यथा,—

"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्येल्पिका सहा।
काकमुद्गा च सा प्रोक्ता तथा माञ्जीरगन्धिका"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणादयोऽस्या मुद्गपर्णीशब्दे ज्ञेयाः॥)

काकयवः, पुं, (काकमीषच्चलं यत्र तादृशो यव इव नीरसत्वात्, यद्वा काकवन्निर्गुणो यवः।) तण्डुलशून्यधान्यम्। आगड़ा इति भाषा॥

("यथा फलाः पद्मतिलाः यथा चर्म्ममया मृगाः।
तथैव पाण्डवाः सर्व्वे यथा काकयवा इव"॥ इति महाभारते सभापर्व्व॥ तथा पद्मतन्त्रे २। ९५।

"यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः"॥)

काकरट्टा, स्त्री, (काक इव रोहति मूलशून्यतया वृक्षाद्यवलम्बनेन जायते इति। काक + रुह + कः। काकवत् परपुष्टतयास्यात्तथात्वम्। यद्वा काकपुरीषात् रोहति उत्पद्यते वृक्षोपरीत्यर्थः अतएव तत् संज्ञयाख्यायते।) वन्दाकवृक्षः। इति त्रिकाण्डशेषः॥

काकरूकः, पुं, (कुं कुत्सितं करोतीति। कु + रु + ऊकः। कोः कादेशः।) स्त्रीजितः। उलूकः। दम्भः। दिगम्बरभीरुकनिर्घनेषु त्रि। इति हेमचन्द्रः॥

काकलं, क्ली, (ईषत्कालो यस्मात्। कोः कादेशः।) कण्ठमणिः। इति त्रिकाण्डशेषः॥ (ग्रीवास्थोन्नतदेशः। इति सुश्रुतः॥ टुँटि इति भाषा।)

काकलः, पुं, (का इत्याकारः कालो यस्य।) क्रोडकाकः। इति शब्दरत्नावली॥

काकलकः, पुं, (काकलं ततः कप् पुंस्त्वञ्च।) कण्ठमणिः। इति हेमचन्द्रः॥

काकलिः, स्त्री, (कल् + इन् कलिः। कु ईषत् कलिः। कोः कादेशः।) सूक्ष्ममधुरास्फुटध्वनिः। इत्यमरटीकायां भरतः॥ ("कोकिलकाकलिकूजितकुञ्जम्"। इति शिशुप्रयोगः॥)

काकली, स्त्री, (काकलि + ह्रस्वादिकारान्तत्वात् वा ङीप्।) सूक्ष्ममधुरास्फुटध्वनिः। इत्यमरः। १। ७। २॥ (यथा, गीतगोविन्दे। १। ४। ११।

"उन्मीलन् मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः"॥

काकलीद्राक्षा, स्त्री, (काकलीव सूक्ष्मा द्राक्षा।) द्राक्षाप्रभेदः। किसमिस् इति ख्याता। तत्पर्य्यायः। जम्बूका २ फलोत्तमा ३ लघुद्राक्षा ४ निर्वीजा ५ सुदृश्या ६ रसाधिका ७। तस्या गुणाः। मधुरत्वम्। अम्लत्वम्। रसालत्वम्। रुचिकारित्वम्। स्निग्धित्वम्। श्वासकासनाशित्वम्। जनवल्लभत्वञ्च। इति राजनिर्घण्टः॥

काकलीरवः, पुं, (काकली मधुरास्फुटो रवो यस्य।) कोकिलः। इति राजनिर्घण्टः॥ (सूक्ष्ममधुरास्फुटध्वनौ तु कर्म्मधारयः॥)

काकवल्लरी, स्त्री, (काकप्रिया वल्लरी।) सर्व्वदा

काकाद

इति राजनिर्घण्टः ॥

काकशीर्षः, पुं, (काकः शीर्षे अग्रेऽस्य । काकस्य तदग्रे वासयोग्यत्वात् ।) वकवृक्षः । इति जटाधरः ॥ (पर्य्यायोऽस्य यथा,—वैद्यकरत्नमालायाम् ।

"वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुवृक्षः खपूरकः" ॥)

काकस्फूर्ज्जः, पुं, (काकः स्फूर्ज्जति यत्र । काक + स्फूर्ज्ज + आधारे घञ् ।) काकतिन्दुकवृक्षः । इति राजनिर्घण्टः ॥

काकी, स्त्री, (काकवदाकारोऽस्यस्या इति अच् ततष्टाप् ।) काकनासालता । काकोलीवृक्षः ॥ काकजङ्घावृक्षः । पर्य्यायो यथा भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकजङ्घा नदी कान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काकी चापि प्रकीर्त्तिता" ॥

गुणादयोऽस्याः काकजङ्घाशब्दे बोद्धव्याः ॥) रक्तिकालता । मलपूवृक्षः । काकमाचीवृक्षः । इति मेदिनी ॥

काकाङ्गा, स्त्री, (काकस्य अङ्गं जङ्घेवाकारो यस्याः वा ङीष् । पक्षे टाप् ।) काकाङ्गीवृक्षः । इत्यमरटीकायां रमानाथः ॥

काकाङ्गी, स्त्री, (काकस्य अङ्गं जङ्घा इव आकृतिर्यस्याः । ङीष् ।) काकजङ्घावृक्षः । इत्यमरः । २ । ४ । १८ ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकनासा तु काकाङ्गी काकतुण्डफला च सा" ॥)

काकाच्ची, स्त्री, (काकं तज्जङ्घाकारं अञ्चति गच्छतीति । काक + अन्च् + अण् + ङीप् ।) काकजङ्घावृक्षः । इति शब्दरत्नावली ॥

काकाण्डः, पुं, (काक्या अण्ड इव फलं यस्य । काकीत्यस्य पुंवद्भावः ।) महानिम्बः । काकतिन्दुः । इति राजनिर्घण्टः ॥

("मायैः समानं फलमात्मगुप्त-
मुक्तञ्च काकाण्डफलन्तथैव" ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥ यस्मिन् व्यवक्रियते तद्यथा,—

"काकाण्डसुरसगवाच्या
पुनर्नवा वायसी शिरीषफलैः ।
उद्बुद्धविषजलमते
लेपौषधनस्यपानानि" ॥

इति चरके चिकित्सास्थाने । २५ अध्याये ॥)

काकाण्डा, स्त्री, (काकस्याण्डमिव बीजमस्याः ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकाण्डी, स्त्री, (काकाण्ड + गौरादित्वात् ङीष् ।) महाज्योतिष्मती लता । इति राजनिर्घण्टः ॥ (महाज्योतिष्मतीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

काकाण्डोला, स्त्री, (काकाण्डमोरति तत्सादृश्यं बीजे प्राप्नोतीति । उर गतौ + अच् । रस्य लत्वम् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकादनी, स्त्री, (काकैरद्यते सुच्यतेऽसौ इति । काक + अद + कर्म्मणि ल्युट् ततो ङीप् च ।) गुञ्जा । इति शब्दरत्नावली ॥ श्वेतगुञ्जा । इति राजनिर्घण्टः ॥ वृक्षविशेषः । कालियाकड़ा इति भाषा । तत्पर्य्यायः । हिंसा २ गृध्रनखी ३ तुण्डी ४ काला ५ अहिंसा ६ कटुका ७ पाण्डिः ८ कापाली ९ कुलिकः १० । इति रत्नमाला ॥ (अस्याव्यवहारो यत्र तद्यथा,—

"विकङ्कतारग्वधकाकगन्धी
काकादनीतापसवृक्षमूलैः ।
आलेपयेदेनम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाद्यधिकारे ॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥

"श्वेता रक्तोचटा प्रोक्ता कृष्णाला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकान्तीच रक्तिका ॥
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥)

काकायुः, पुं, (काकस्य आयुर्यस्मात् ।) खर्जूरवल्ली । इति राजनिर्घण्टः ॥

काकारिः, पुं, (काकः अरिर्यस्य । काकस्यारिर्वा ।) पेचकः । इति हेमचन्द्रः ॥

काकालः, पुं, (का इति शब्दं कलते रौति । का + कल + अण् ।) द्रोणकाकः । इति शब्दरत्नावली ॥

काकिणी, स्त्री, (ककलौल्ये । ककते गमनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् । एषोदरादित्वात् नस्य णः ।) पञ्चचतुर्थांशः । पाँच गण्डाकड़ि इति भाषा ॥ यथाह लीलावती ।

"वराटकानां दशकद्वयं यत् सा काकिणी" ॥)

मानदण्डः । काठा गज इत्यादि भाषा । कृष्णला । कुँच इति भाषा । एकवराटी । एक कड़ा इति भाषा ।

("तस्मात्पथ्यं काकिणीं वा फलं पुण्यमथापि वा ।
प्रदद्याद् दक्षिणां यज्ञे यया स सफलो भवेत्" ॥

इति शुद्धितत्त्वे वृहस्पतिः ॥) उन्मानस्थांशकः । इति मेदिनी ॥

काकिनी, स्त्री, (ककलौल्ये । ककते गमनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् ।) काकिणी । इत्यमरटीकायां रायमुकुटः ॥ (यथा,—पञ्चतन्त्रे २ । ७४ ।

"ईश्वरा भूरिदानेन यज्ञमन्ते फलं किल ।
दरिद्रस्तत्र काकिन्या(ण्या)प्राप्नुयादिति नःश्रुतिः" ॥)

काकिलः, पुं, (कु–ईषत् किलतीति । कु + कृ + कः । कोः कादेशः रस्य लत्वम् ।) काकवः । कण्ठमणिः । इति शब्दमाला ॥

काकुः, स्त्री, (कक लौल्ये + उण् ।) शोकभयादिभिर्ध्वनिविकारः । इत्यमरः । २ । ६ । १२ ॥ (यथा, साहित्यदर्पणे । २ । २३ ।

"भिन्नकण्ठध्वनिर्घोरः काकुरित्यभिधीयते" । इति काकुं लक्षीकृत्य उदाहरणं यथा, तत्रैव

"गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ ॥ नैष्यति, अपि तु एष्यति एवेति-काक्षा व्यज्यते" ॥) जिह्वा । इति चिकित्साशेषः ॥

काकुत्स्थः, पुं, (ककुत्स्थस्य नृपतेरपत्यम् । शिवादित्वात् ४ । १ । ११२ । अण् ।) श्रीरामचन्द्रः । इति रामायणम् ॥ (यथा, रघुः १२ । ४६ ।

"असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः" ॥

ककुत्स्थवंशोद्भवमात्रम् । अजराजार्थे यथा रघुवंशे ६ । २ ।

"काकुत्स्थमालोकयतां नृपाणां
मनो बभूवेन्दुमतीनिरागम्" ॥

दशरथार्थे यथा रामायणे ६ । १०५ । १ ।

"प्रतिप्रयाते काकुत्स्थे महेन्द्रः पाकशासनः" ॥

ककुत्स्थ एव स्वार्थे अण् । पुरा किल महोत्तरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा असुरान् जितवानतोऽस्य तथात्वम् ।) पुरञ्जयराजः । इति चिकित्साशेषः ॥ (विवरणन्तु ककुत्स्थशब्दे द्रष्टव्यम् ॥)

काकुदं, क्ली, (काकुं ददातीति । काकु + दा + क ।) तालु । इत्यमरः २ । ६ । ९१ ॥

काकेक्षुः, पुं, (काकमीषच्चलमक्ष्णोः कादेशः । ततः कर्म्मधारयः ।) खगड़ः । इति रत्नमाला चिकित्साशेषश्च ॥ खागड़ा आक् इति भाषा ॥ काण्डः । इति राजनिर्घण्टः ॥

काकेन्दुः, पुं, (काकस्य इन्दुराह्लादकः ।) कुलकवृक्षः माकड़ा केन्दु इति ख्यातः । इत्यमरः । २ । ४ । ३९ ॥

काकेष्टः, पुं, (काकस्य इष्टः ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ (निम्बशब्देऽस्य गुणादयो ज्ञेयाः ॥)

काकोचिकः, पुं, (कु ईषत् कोची सङ्कोचो । कुच + णिच् स्वार्थे कन् । कोः कादेशः ।) काकोची मत्स्यः । इति हारावली ॥ काउची इति भाषा ॥

काकोची, स्त्री, (काकोच + ङीष् ।) काकोचिमत्स्यः । इति हारावली ॥

काकोडुम्बरः, पुं, (काकप्रियः उडुम्बरः इति मध्यपदलोपी कर्म्मधारयः ।) काकोडुम्बरिका । इति शब्दरत्नावली । काकडुमुर इति भाषा ॥

काकोडुम्बरिका, स्त्री, (काकोडुम्बरस्वतः स्वार्थे कन् टाप् च अत इत्वम् ।) वृक्षविशेषः । कोठडुमुरि डुमुरि इति च ख्याता । काकडुमुर इति भाषा । तत्पर्य्यायः । फल्गुः २ मलभूः ३ जघनेफला ४ । इत्यमरः । २ । ४ । ६२ ॥ मलभुः ५ फल्गुफला ६ काकोडुम्बरः ७ । इति शब्दरत्नावली ॥ फलवाटिका ८ वज्रफला ९ । इति जटाधरः ॥ अस्या गुणाः । काकोडुम्बरिकाशब्दे द्रष्टव्याः ॥ (अस्याः व्यवहारो यत्र तद्यथा,—वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे ।

"काकोडुम्बरिका गोजी पचैर्विस्रावयेद्भिषक् ।
क्षौद्रयुक्तैश्च लवणैः सद्योघैः प्रतिसाधयेत्" ॥)

काकोदरः, पुं, (कु कुत्सितं अकति । कु + अक वक्रगतौ + अच् । कोः कादेशः । काकं कुटिलगतिकारि उदरं यस्य बहुव्रीहिः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, राघवपाण्डवीये ।

"यः पूतनामारणलब्धवर्णः
काकोदरो येन विनीतदर्पः ।
यशोदयालङ्कृतमूर्त्तिरस्या-
ह्यासो यदूनामथवा रघूणाम्" ॥)

काकोदुम्बरिका, स्त्री, (काकप्रिया कृष्णा वा उदुम्ब-

रिका ।) काकोडुम्बरिका । काकडुमुरि इति भाषा । अस्याः पर्य्यायः । क्षुद्रोदुम्बरिका २ खरपत्री ३ राजिका ४ क्षुद्रोदुम्बरिका ५ कुष्ठघ्नी ६ पन्नगवाटिका ७ अजाजी ८ फल्गुनी ९ मलपूः १० चित्रभेषजा ११ भ्राङ्गनाम्नी १२ । अस्या गुणाः । शीतत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भरक्षाहितत्वम् । स्तनदुग्धप्रदत्वञ्च । इति राजनिर्घण्टः ॥

काकोलं, क्ली, (काकयति शोषयति दुःखदत्वात् । कक शोषे + णिच् + ओल । काकेन उल्लास्यते भक्ष्यते अत्र वा आधारे घञर्थे कः पृषोदरादित्वात् साधुः ।) नरकविशेषः । इति मेदिनी ॥ (यथा, मनुः ॥

"महानरककाकोलं सञ्जीवनमहायसम्" ॥)

काकोलः, पुं क्ली, (कुः कुत्सितं तीव्रतरं यथा स्यात् तथा कोलति पीड़यति विह्वलीकरोति वा-ऽनेन करणे घञ् ।) क्षुद्वर्गस्थावरविषविशेषः । इत्यमरः । २ । ८ । १० ॥

"काकोलमुग्रतेजः स्यात् क्षुद्राच्छविमहाविषम्" । इति वैद्यकम् ॥ (अस्य पर्य्यायो यथा,—

"काकोली क्षरलश्वेड़ो वत्सनाभः प्रदीपनः ।
ग्रौलिकेयो ब्रह्मपुत्रो विषं स्याद्धरणो विषः" ॥

इति वैद्यकरत्नमाला ॥)

काकोलः, पुं, (कं जलमाकोलति संस्त्यायतीति । आ + कुल संस्त्याने + अण् ।) कुलालः । (कक लौल्ये स्वार्थे णिच् + वाऽलकात् ओल ।) द्रोणकाकः । इति मेदिनी । (यथा, मनुः ५ । १४ ।

"वकश्चैव बलाकाश्च काकोलं खञ्जरीटकम् ।
मत्स्यादान् विप्लवाहांश्च मत्स्यानेव च सर्व्वशः" ॥)

सर्पः । सूकरभेदः । इति शब्दरत्नावली ॥ काकोली नामख्यातौषधिविशेषः । इति धरणी ॥

काकोली, स्त्री, (काकोल + गौरादित्वात् ङीष् ।) अष्टवर्गे प्रसिद्धौषधविशेषः । तत्पर्य्यायः । मधुरा २ काकी ३ कालिका ४ वायसोली ५ क्षीरा ६ भ्राङ्गिका ७ वीरा ८ शुक्ला ९ धीरा १० मेदुरा ११ भ्राङ्गोली १२ स्वादुमांसी १३ वयःस्था १४ जीवनी १५ शुक्लक्षीरा १६ पयस्विनी १७ । इति राजनिर्घण्टः ॥ पयस्या १८ शीतपाकी १९ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । मधुरत्वम् । क्षयपित्तानिलार्त्तिरक्तदाहज्वरनाशित्वम् । कफशुक्रवर्द्धकत्वञ्च । इति राजनिर्घण्टः ॥

(क्षीरकाकोलीशब्दे चास्या विशेषविवरणं ज्ञातव्यम् । काकोल्यादिगणोयथा, "काकोली-क्षीरकाकोलीजीवकर्षभकमृद्वीपर्णीमाषपर्णीमेदा-महामेदाद्विहिरण्यहाटकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्योमधुकञ्चेति" ।

"काकोल्यादिरयं पित्तश्रोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा" ॥

इति सुश्रुते सूत्रस्थाने । ३८ अध्याये ।)

काकोलूकिका, स्त्री, (काकश्च उलूकश्च नित्यविरोधित्वात् द्वन्द्वः । ततो वरे वुञ् स्त्रियां टाप् च ।) काकोलूकयोर्वैरता । इति शब्दरत्नावली ॥

काक्ष इ काङ्क्षणे । आकाङ्क्षायामिति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्-इदित् ।) इ काङ्क्षति धनं लोकः । नमथ्यपाठेनैवेऽसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

काक्षः, पुं, (कु कुत्सितं अक्षं अत्र । "का पथ्यक्षयोः" ६ । ३ । १०४ । इति कोः कादेशः ।) कटाक्षः । इति हेमचन्द्रः ॥ (यथा, भट्टिः । ८ । २४ ।

"आज्ञालाभोन्मुखो दूरात् काक्षेणानादरेक्षितः" ॥)

काक्षी, स्त्री, (कक्षे कक्षे भवः । "तत्र भवः" । ४ । ३ । ५२ । इत्यण् ततो ङीप् च ।) तुरङ्गिका । अड़र इति भाषा । सौराष्ट्रमृत्तिका । इति मेदिनी ॥

काक्षीवः, पुं, (कु ईषत् क्षीवयति । क्षीव + णिच् + अच् । कोः कादेशः ।) शोभाञ्जनवृक्षः । इत्यमरः । (गौतमात् शूद्रायामौशीनर्य्यां जातः पुत्रविशेषः । यथा महाभारते २ पर्व्वणि ।

"शूद्रायां गौतमो यत्र महात्मा संशितव्रतः ।
औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान्मुनिः" ॥)

काक्षीवकः, पुं, (काक्षीव + स्वार्थे कन् । यद्वा ईषत् क्षीवयतीति । क्षुल् ।) शोभाञ्जनः । इति शब्दरत्नावली ॥

कागः पुं, (का इति शब्दं गायतीति । का + गै + कः ।) काकः । इति जटाधरः ॥

कागदं, क्ली, (कागः काकवर्णः मस्यादिर्दीयते अत्र इति । काग + दा + घञर्थे आधारे कः । कस्य चित्तस्य आगदो विस्तारितभावगंत्र वा ।) लेखनपत्रविशेषः । कागज इति आर्व्वी भाषा । यथा,

"भूर्जे वा वसने रक्ते क्षौमे वा तालपत्रके ।
कागदे चाऽगन्धेन पङ्कगन्धेन वा पुनः ॥
चिरन्तेनाथवैकेन विलिख्य धारयेन्नरः ।
पञ्च सप्तत्रिकोकैर्व्वा शोधितं कवचं शुभम्" ॥

इति श्रीघनानन्ददासविरचितमन्त्रकल्पद्रुमे हनूमत्कवचम् ॥

काङ्क्षा, स्त्री, (कुत्सितं अङ्क्षं यस्याः । काङ्क्ष + टाप् ।) वधा । इति शब्दचन्द्रिका ॥

काचं, क्ली, (कथ्यते बध्यते अनेन इति । कच बन्धने + घञ् न कुत्वम् । तस्य बन्धनहेतुत्वात् तथात्वम् ।) सिक्थकम् । मोम इति भाषा । (काचः क्षारमृत्तिकाऽस्यस्याकरत्वेन इति अच् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचः, पुं, (कच दीप्तौ + णिच् + घञ् ।) मृत्तिकाविशेषः । काँच् इति भाषा । तत्पर्य्यायः । क्षारः २ । इत्यमरः । २ । ९ । ९९ ॥ अस्य गुणाः । क्षाररसत्वम् । उष्णवीर्य्यत्वम् । अश्मनात् दृष्टिकारित्वञ्च । इति राजवल्लभः ॥ स्निग्धम् । स्निग्धा इति भाषा ॥ मणिविशेषः । (यथा,

"आकरे पद्मरागाणां जन्म काचमणेः कुतः" ।
इत्युद्भटः ॥) नेत्ररोगविशेषः । इति मेदिनी ॥ तस्य लक्षणम् ।

"अस्मिन्नपि तमोभूते नातिरूढे महागदे ।
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः ॥
निर्म्मलानि च तेजांसि भास्विन्मूनीव पश्यति ।

स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" ॥

इति माधवकरः ॥

("प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते ।
तेनोर्द्धमीक्षते नाधस्तनुचेलाहतोपमम् ॥
यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात् ।
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ॥
लिङ्गनाशं मनः कुर्व्वन् हृदयेदृष्टिमण्डलम् ।
तच्च वातेन तिमिरे व्याविद्धमिव पश्यति ॥
चलाविलारुणाभासं प्रसन्नेक्षेत मुह्यतः ।
जालानि केशान् मशकान् रज्जूंश्चोपेक्षितेऽपि च ॥
काचीभूते दृगरुणापश्यत्यास्यमनासिकम् ।
चन्द्रदीपाद्यनेकत्वं वक्रमज्वपि मन्यते ॥
दृङ्नःकाचोदृशं कुर्य्याद्रजोधूमहताभिव ।
स्यात्तारणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ॥
सलिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः ।
दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता ॥
पित्तजे तिमिरे विद्युत् खद्योतोद्योतदीपितम् ।
शिखितित्तिरिपिच्छाभं प्रायोनीलञ्च पश्यति ॥
काचे दृक् काचनीलाभा ताप्तगेव च पश्यति ।
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ॥
भृङ्गनीला निरालोका दृङ्स्निग्धालिङ्गनाग्रतः ।
दृष्टिःपित्तेन कृष्णाख्या सा कृष्णा कृष्णदर्शना ॥
भवेत्पित्तेऽविदग्धाख्या पीतापीताभदर्शना ।
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ॥
शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ।
काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम् ॥
सिताभा सा च दृष्टिः स्यालिङ्गनाशे तु लक्ष्यते ।
मूर्त्ता कफोदृङ्गतः स्निग्धोदर्शननाशनः ॥
विन्दुर्जलस्थेव चलः पद्मिनीपुटसंस्थितः ।
उष्णे सङ्कोचमायाभिश्छायायां परिसर्पति ॥
शङ्खकुन्देन्दु कुमुदस्फटिकोपमशुक्लिमा ।
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता कृष्णा वा दृष्टिस्ताद्दक् च पश्यति" ॥

इति वाभटे उत्तरस्थाने । १२ अध्याये ॥

विस्तृतविवरणमस्य नेत्ररोगशब्दे ज्ञातव्यम् ॥)

काचनं, क्ली, (कचबन्धने + स्वार्थे णिच् + भावे ल्युट् ।) पत्रनिबन्धनम् । इति त्रिकाण्डशेषः ॥ काचेल इत्यपि पाठो दृष्टः ॥ (मुग्धबोधमते "किमः क्षेपे" इति । का + चनप्रत्ययेन) स्त्रीलिङ्गकिम्शब्दार्थे क्षेपे । इति व्याकरणम् ॥ (यथा, प्रबोधचन्द्रोदये । "मूढा काचन कन्यका खलु मया तेनास्मि वाताधिकः" ॥)

काचनकं, क्ली, काच्यते लेखो निबध्यते येन (कच् + णिच् + ल्युट् । ततः स्वार्थे कन् ।) पत्रनिबन्धनम् इति हारावली ॥

काचनकी, [न्] पुं, (काचनक + अस्त्यर्थे इनिः ।) लिपिः । तत्पर्य्यायः । वर्णदूतः २ खस्तिमुखः ३ लेखः ४ वाचिकहारकः ५ तात्रिकः ६ । इति जटाधरः ॥

काचभाजनं, क्ली, (काचनिर्म्मितं भाजनम् ।) काचपात्रम् । काँचेर बासन इति भाषा । तत्पर्य्यायः । शिल्पानम् २ । इति त्रिकाण्डशेषः ॥

काच्चनं

काचमलं, क्ली, (काचस्य क्षारमृत्तिकाया मलमिव ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचलवणं, क्ली, (काचात् क्षारमृत्तिकाया जातं लवणम् ।) लवणविशेषः । कालालुण इति भाषा । तत्पर्य्यायः । नीलम् २ काचोद्भवम् ३ काचम् ४ नीलकम् ५ काचसम्भवम् ६ काचसौवर्च्चलम् ७ क्षाराम्लवणम् ८ पाकजम् ९ काचोत्थम् १० हयगन्धम् ११ काललवणम् १२ कुरुविन्दम् १३ काचमलम् १४ क्षत्रिमम् १५ । अस्य गुणाः । रुचिकारित्वम् । ईषत्क्षारत्वम् । पित्तवृद्धिकारित्वम् । दाहदाढत्वम् । कफवातगुल्मशूलनाशित्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

काचसम्भवं, क्ली, (सम्भवत्यस्मादिति सम्भवः । काचः क्षारमृत्तिका सम्भव उत्पत्तिस्थानमस्य ।) काचलवणम् ॥ इति राजनिर्घण्टः ॥

काचसौवर्च्चलं, क्ली, (काचस्यानिकं सौवर्च्चलं लवणम् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचस्थाली, स्त्री, (काचस्य क्षारस्य स्थालीव ।) मसेरहाख्यः । पाखल गाछ इति भाषा । इत्यमरः । २ । ४ । ५४ ॥ (अस्याः पर्य्यायो यथा—

"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
काणस्थाली कुबेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ।
मुष्ककी मोचकोवृष्टा पाटलिः काष्ठपाटला" ॥

काणस्थालीत्यत्र काचस्थालीत्येके ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्याः पाटलिशब्दे ज्ञेयाः ॥ काचनिर्म्मिता स्थाली ।) काचपात्रम् ॥

काचिघः, पुं, (कचते दीप्यते इति बाहुलकात् इन् । काचिं कान्तिं हन्ति गच्छति । हन गतौ + ड । एषोदरादित्वात् हस्य घः ।) काञ्चनम् । छैमड़ः । छिमड़ा । इति भाषा । सूचिकः । इति मेदिनी ॥

काचित्, अ (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते "किमःक्यन्ताच्चिच्चनौ" इति का + चित्प्रत्ययः ।) काचन । कापि स्त्री । इति व्याकरणम् । (यथा, पदाङ्कदूते १ ।

"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विषण्णम्" ॥)

काचितं, त्रि, (कच्यते बध्यतेऽसौ । कच् + क्विप् + कर्म्मणि क्तः ।) ग्रथितम् । गिथान्ना उपित वस्तु । इत्यमरः । ३ । १ । ८९ ॥ गिथाय तोला द्रव्य इति भाषा ॥

काचिमः, पुं, (कच बन्धे + क्विप् + इमन् ।) देवकुलोद्भववृक्षः । तत्पर्य्यायः । भद्रारः २ । इति त्रिकाण्डशेषः ॥

काञ्चनं, क्ली, (काञ्चते दीप्यते इति । कचि ड दीप्तौ + ल्युः ।) स्वर्णम् । इत्यमरः । २ । ६ । ९५ ॥ (यथा मनुः । २ । २३९ ।

"अभिशापादपि सदुत्तममेध्यादपि काञ्चनम्" ॥)

पद्मकेशरम् । इति मेदिनी ॥ धनम् । नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (भावे ल्युट् । दीप्तिः । काञ्चनमये त्रि, यथा, मनुः । ५ । ११२ ।

काञ्चना

"निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" ॥)

काञ्चनः, पुं, (काञ्चते दीप्यते इति कर्त्तरि ल्युः ।) स्वनामख्यातपुष्पवृक्षविशेषः । रक्तश्वेतभेदेन स द्विविधः । आद्यस्य पर्य्यायः । रक्तपुष्पः २ कोविदारः ३ युग्मपत्रः ४ कुद्दालः ५ ॥ द्वितीयस्य पर्य्यायः । काञ्चनालः २ कर्ब्बुदारः ३ पाकारिः ४ । इति रत्नमाला ॥ अस्य राजनिर्घण्टोक्तगुणपर्य्यायौ कोविदारशब्दे द्रष्टव्यौ ॥ * ॥ चम्पकः । नागकेशरः । उदुम्बरः । धुस्तूरः । इति मेदिनी ॥ (पुरूरवसो वंश उद्भवस्य भीमस्य पुत्रः । यथा, भागवते । ९ । १५ । ३ ।

"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः" ॥)

काञ्चनकं, क्ली, (काञ्चन + संज्ञायां कन् ।) हरितालम् । इति राजनिर्घण्टः ॥

काञ्चनकः, पुं, (काञ्चन + स्वार्थे कन् ।) कोविदारवृक्षः । इति वैद्यकम् ॥

("काञ्चनारः काञ्चनको गण्डारिः श्रोणपुष्पकः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्य कोविदारशब्दे ज्ञेयाः ॥)

काञ्चनकदली, स्त्री, (काञ्चनवर्णा कदली ।) सुवर्णकदली । इति राजनिर्घण्टः । चाँपाकला इति भाषा ॥

काञ्चनकारिणी, स्त्री, (काञ्चनं वज्रमूलेन बन्धनं करोति । काञ्चन + कृ + णिनिः । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका ॥ (शतावरी शब्दे ऽस्या विवरणं बोद्धव्यम् ॥)

काञ्चनक्षीरी, स्त्री, (काञ्चनमिव क्षीरमस्याः । गौरादित्वात् ङीष् । काञ्चनवर्णस्य क्षीरमिव क्षीरमस्य वा ।) क्षीरिशोलता । इति राजनिर्घण्टः ॥

काञ्चनगिरिः, पुं, (काञ्चनमयो गिरिः । शाकपार्थिवादित्वात् समासः ।) सुमेरुपर्व्वतः । इति हेमचन्द्रः । (यथा भागवते । ५ । १६ । २८ ।

"जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः" ॥ दानाय श्रुतः सुवर्णपर्व्वतः ॥)

काञ्चनपुष्पकं, क्ली, (काञ्चनमिव पीतं पुष्पं यस्य । काञ्चनपुष्प + कप् ।) आङ्खल्यवृक्षः । इति राजनिर्घण्टः ॥

काञ्चनपुष्पी, स्त्री, (काञ्चनमिव पुष्पं यस्याः ङीप् ।) गण्डिकारीवृक्षः । इति राजनिर्घण्टः ॥ (गण्डिकारिका शब्दे ऽस्या विशेषो ज्ञातव्यः ॥)

काञ्चनारः, पुं, (काञ्चनं वर्णं ऋच्छति पुष्पैः । काञ्चन + ऋ + अण् ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥ कचनार इति हिन्दी भाषा ॥ ("काञ्चनारः काञ्चनकः" इत्यादि पर्य्यायाः काञ्चनकशब्दे गुणाश्च कोविदारशब्दे ज्ञातव्याः ॥ व्यवहार्य्यते यत्र तद्यथा,—

"काञ्चनारत्वचः क्वाथः सुण्ठीचूर्णेन नाशयेत् ।
गण्डमालान्तधात्वाधः क्षौद्रेण वटजत्वचः" ॥

काञ्जिकं

इति मध्यखण्डे २ अः शार्ङ्गधरेणोक्तम् ॥)

काञ्चनालः, पुं, (काञ्चनं काञ्चनवर्णं अलति । काञ्चन + अल + अण् ।) कोविदारवृक्षः । इति शब्दरत्नावली ॥ (काञ्चनारशब्देऽस्य गुणादयो ज्ञेयाः ॥ अस्य विवृतिः कोविदारशब्दे द्रष्टव्या ॥)

काञ्चनाक्षयः, पुं, (काञ्चनं स्वर्णं आक्षयते सार्द्धते स्वभासा । आ + क्षै + कः । काञ्चन इत्याक्षयो नाम यस्य वा ।) नागकेशरवृक्षः । इत्यमरः । २ । ४ । ६५ ॥

काञ्चनी, स्त्री, (काञ्चते दीप्यते अनया । करणे ल्युट् ङीप् ।) हरिद्रा । इति मेदिनी ॥ स्वर्णक्षीरीवृक्षः । गोरोचना । इति राजनिर्घण्टः ॥

काञ्चनीया, स्त्री, (काञ्चनाय हिता । काञ्चन + छः टाप् च ।) गोरोचना । इति राजनिर्घण्टः ॥

काञ्चिः, स्त्री, (काञ्चते इति "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काञ्ची । इत्युणादिकोषः ॥ (यथा आर्य्यासप्तशती ६९३ ।

"हृतकाञ्चिवल्लिबन्धोत्तरजघनादपरभोगसुप्तायाः ।
उल्लसति रोमराजिः स्तनशृम्भोर्गरलरेखेव" ॥)

काञ्चिकं, क्ली, (काञ्चि + संज्ञायां कन् ।) काञ्जिकम् । इति हेमचन्द्रः ॥

काञ्ची, स्त्री, (काञ्चि, "ऋदिकारान्तत्वात्" वा ङीष् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा । तत्पर्य्यायः ॥ मेखला २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रशना ७ कट्टा ८ कट्या ९ सप्तका १० सारशनम् ११ रसनम् १२ बन्धनम् १३ । इति शब्दरत्नावली ॥

("वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः" । इति मेघदूते । ३० ॥) केचित्तु

एकयष्टिर्भवेत् काञ्ची मेखला सप्तयष्टिका ।
रसना षोडश ज्ञेया कलापः पञ्चविंशकः" ॥

इति पठन्ति इह त्वमेदात् पर्य्यायता । इति तट्टीका ॥ मोक्षदसप्तपुर्य्यन्तर्गतपुरीविशेषः । इति मेदिनी ॥ (यदुक्तम् ।

"अयोध्या मथुरा माया काञ्ची काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" ॥

इयं हि भूर्म्मेर्विभागे दक्षिणस्यां दिशि स्थिते द्राविड़देशे अनुमीयते ॥) गुह्या । इति विश्वः ॥

काञ्चीपदं, क्ली, (काञ्च्याः पदं स्थानम् ।) जघनम् । इति हेमायुधहेमचन्द्रौ ॥

काञ्जिकं, क्ली, (अम्ल + धात्वर्थनिर्द्देशे ण्वुल् + टाप् अत इत्वञ्च । अञ्जिका । कु कुत्सिता अञ्जिका व्यक्तिर्यस्य कोः कादेशः ।) वारिपर्य्युषिताम्लाञ्जनम् । काँजी इति भाषा । तत्पर्य्यायः । क्षारनाथकम् २ सौवीरम् ३ कुल्माषम् ४ अभियुतम् ५ अवन्तिसोमम् ६ धान्याम्लम् ७ कुल्मलम् ८ । इत्यमरः । २ । ९ । ९९ ॥ कुल्माषम् ९ कुल्माषाभियुतम् १० काञ्जिकम् ११ काञ्जीकम् १२ काञ्जिका १३ कञ्जिकम् १४ काञ्जी १५ भक्तवारि १६ धान्यमूलम् १७ धान्ययोनि १८ तुषाम्बु १९ । इति तट्टीका ॥ मूलाम्लम् २०

महारसम् २१। इति रत्नमाला॥ तुबोदकम् २२ शुक्लम् २३ चुक्रम् २४ धातुघ्नम् २५ उन्नाहम् २६ रुग्घ्नम् २७ कुष्ठगोलकम् २८ सवीरारुक्षम् २९। इति हेमचन्द्रः॥ वीरम् ३० अभिशूकम् ३१ अस्रसारकम् ३२। अस्य गुणः। वातश्लेष्मपित्तज्वरदाहमूर्च्छाशूलाध्मानविबन्धनाशित्वम्।

"काञ्जिकं दधि तैलन्तु बदरीपलितनाशनम्। दाहकं गात्रशैथिल्यं वस्त्यं सन्तर्पणं परम्"॥ मर्दनान्न च भक्षणात्। इति राजनिर्घण्टः॥ अपि च। भेदकत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पित्तरुधिरवस्तिशुद्ध्यग्निरुद्धिकारित्वम्। स्पर्शे शीतलत्वम्। अमक्षमनाशित्वञ्च। पुरातनस्य तस्य गुणः। कृत्याकुष्ठकृमिरोगनाशित्वम्। अग्निरुद्धिकारित्वञ्च। इति राजवल्लभः॥*॥

"कुल्माषधान्यमण्डेन चाप्लुतं काञ्जिकं भवेत्॥ यन्मस्त्वादिप्लुतौ भाण्डे स गुडश्चौद्रकाञ्जिकम्। धान्यराशौ चिराच्छ्यं शुक्लं चुक्रं तदुच्यते"॥ इति वैद्यकपरिभाषा॥

काञ्जिकवटकः, पुं, (काञ्जिकयोगेन कृतो वटकः।) वटकविशेषः। काँजि वड़ा इति भाषा। तस्य पाकप्रकारो यथा,—

"मञ्चनी नूतना धार्य्या कटुतैलेन लेपिता। निर्म्मलेनाम्बुनापूर्य्य तस्याधूर्णं विनिक्षिपेत्॥ राजिकाजीरकाजाजिहिङ्गुशुण्ठीनिशाक्षतम्। निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत्॥ ततो दिनत्रयादूर्द्धमस्त्राः स्युर्वटका ध्रुवम्"॥ अस्य गुणाः।

"काञ्जिकवटको रुच्यो वातहरः श्लेष्मकारकः प्रीतः। दाहं शूलमजीर्णं हरते नेत्रामयेष्वहितः"॥ इति भावप्रकाशः॥

काञ्जिका, स्त्री, (कुत्सिता ईषदा अञ्जिका।) जीवन्तीलता। पलाशीलता। इति राजनिर्घण्टः॥

काञ्ची, स्त्री (कं जलं अनक्ति। क + अन्ज + कर्म्मणि + अण्। गौरादित्वात् ङीष्।) महाद्रोणवृक्षः। इति राजनिर्घण्टः॥ काञ्जिकम्। इत्यमरटीका॥ ("तुम्बीबीजं सौद्भिदन्तु काञ्जीपिण्डं गुडीचयम्। अर्शोघ्नं गुदस्रंसाद्धिमाहिषमश्नतः"॥ इति तु काञ्जिकार्थे ज्ञेयम्। इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे।)

काठः, पुं, (काष्ठते वक्ष्यते इति। कठ + कर्म्मणि घञ्।) पाषाणः। इति त्रिकाण्डशेषः॥

काठिन्यं, क्ली, (कठिनस्य भावः। कठिन + ष्यञ्।) कठिनता। यथा। "शीते मा कुरु सम्भ्रमञ्च मृदुना काठिन्यमङ्गीकृतम्"। इत्युद्भटः॥ (यथा च कुमारे। ६। ७३।

"काठिन्यं स्थावरे काये भवता सर्व्वमर्पितम्"॥)

काठिन्यफलः, पुं, (काठिन्यं फले यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादयो बोद्धव्याः॥)

काणः, पुं, (कणति एकचक्षुर्निमीलतीति। कण संज्ञायां कर्त्तरि घञ्।) काकः। इति मेदिनी॥

काणः, त्रि, (कणति एकचक्षुषा पश्यति। कण् + घञ्।) एकचक्षुः। इति मेदिनी॥ काणा इति भाषा। (यथा, मनुः। ३। २४२।

"खञ्जो वा यदि वा काणो दातुः श्रेष्ठोऽपि वा भवेत्"॥)

काणकः, पुं, (कणति शब्दायते। कण शब्दे + "शृकणिभ्यामूकोकणौ"। उणां ४। ३९। इत्यूकण्।) काकः। इत्युणादिकोषः॥

काण्डं, क्ली, (कण्यतीति। कण शब्दे + डः। बाहुलकात् दीर्घः।) सन्धिविच्छिन्नैकखण्डास्थि। यथा।

"भग्नं समासाद्विविधं ऋजाग्र-काण्डे च सन्धौ च हि तत्र सन्धौ। उत्पिण्डविश्लिष्टविवर्त्तितञ्च तिर्य्यग्गतं च्छिन्नमधश्च षट् च"॥

इति रोगविनिश्चयः॥ सन्धिविच्छिन्नमेकखण्डमस्थि-काण्डम्। काण्डेन च जलककपालवलयतरणयश्च-कानां ग्रहणम्। तत्र भग्नं काण्डभग्नम्। इति तट्टीकाख्यामधुकोषः॥

काण्डः, पुं क्ली, (कण्डि दीप्तौ + अमन्तात् डः। ह्रस्वादिभ्यः कित् अनुनासिकस्येति दीर्घः।) दण्डः। (यथा, कात्यायनश्रौतसूत्रे ८। ७। २७।

"एषता वरत्राकाण्डेनाहन्ति"।

"वरत्राकाण्डेन वंशदण्डेन"। इति कर्कः॥) नालम्। वाणः। (यथा, महाभारते १३। ५। ३।

"विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः। सविषं काण्डमादाय मृगयामास वै मृगम्"॥) शरस्तम्बः। अर्व्वा। कुत्सितः। वर्गः। (वर्गश्च एकजातीयसमवायः। यथा, भागवते। ४। २४। ९।

"क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह॥) परिच्छेदः। (यथा, अथर्व्ववेदे १२। ३। ४५।

"इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात्परमेष्ठी समाप"॥) अवसरः। प्रस्तावः। वारि। जलम्। इत्यमरः। ३। ३। ४३॥ (यथा, हेः रामायणे २। ८९। १८।

"तान्तु गत्वा परं तीरमवरोप्य च तं जनम्। निवृत्ताः काण्डचित्राणि क्रियन्ते दाशबन्धुभिः"॥

"क्रीड़ार्थं काण्डचित्राणि काण्डे जले चित्राणि चित्रगमनानि लघुत्वात् क्रियन्ते स्रोतसोर्थः"॥ इति तट्टीका॥) स्तम्बः। (यथा, अमरशतके ९५।

"उरुदयं मृगदृग्भः कदलस्य काण्डौ मध्यश्च वेणिरतुलं स्तनयुग्ममस्याः"॥)

इत्यादिशुद्धः। (यथा, भट्टिः ५। १८।

"दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला"॥) तरुस्कन्धः। गुँड़ि इति भाषा। (यथा, रामायणे।

"वृक्षकाण्डमितो भाति"॥ वृक्षाणां शाखा। यथा, मनुः १। ४९।

"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः"।

"केचित्काण्डात् शाखा एव रोपिता वृक्षतां यान्ति"॥ इति तट्टीका॥ वृन्दः। समूहः। रुद्रः। निर्जनस्थानम्। इति मेदिनी॥ श्लाघा। इति हेमचन्द्रः॥ पापीयान्। इति धरणिः॥

काण्डकटुकः, पुं, (काण्डे स्कन्धे लतायामित्यर्थः कटुकस्तिक्तः।) कारवेल्लः। इति राजनिर्घण्टः॥ (कारवेल्लशब्देऽस्य विवरणं ज्ञेयम्॥)

काण्डकाण्डकः, पुं, (काण्डस्य शरस्तम्बस्य काण्डमिव काण्डं यस्य। काण्डकाण्ड + कप्।) काशतृणम्। इति राजनिर्घण्टः॥

काण्डकारं, क्ली, (काण्डं स्कन्धं किरति दीर्घतया उत्क्षिपति। काण्ड + कृ + अण्।) गुवाकः। इति शब्दमाला॥ (पुंसि तु काण्डं वाणं करोति इति काण्डकारः। वाणकारकः॥)

काण्डकीलकः, पुं, (काण्डे स्कन्धे कीलकमिव यस्य। काण्डकील + कप्।) लोध्रः। इति राजनिर्घण्टः। लोधकाठ इति भाषा॥

काण्डगुण्डः, पुं, (काण्डेन गुच्छेन गुण्डयति वेष्टयति भूमिम्। काण्ड + गुडि वेष्टने + अण्।) गुण्ड-नामतृणम्। इति राजनिर्घण्टः॥

काण्डगोचरः, पुं, (काण्डस्य वाणस्य गोचर इव गोचरो यस्य।) नाराचः। लौहमयवाणः। इति त्रिकाण्डशेषः॥

काण्डयी, स्त्री, (काण्डेन स्तम्बेन नीयतेऽसौ काण्डं नयति आत्मानं वा। काण्ड + नी + क्विप्। एषोदरादित्वात् यत्वम्।) सूक्ष्मपर्णलता। रामदूती इति ख्याता। इति शब्दचन्द्रिका॥

काण्डतिक्तः, पुं, (काण्डे स्कन्धे तिक्तः।) भूनिम्बः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"किराततिक्तः कैरातः कटुतिक्तः किरातकः। काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। गुणादयोऽस्य किराततिक्तशब्दे ज्ञेयाः॥)

काण्डतिक्तकः, पुं, (काण्डतिक्त + स्वार्थे कन्।) भूनिम्ब वृक्षः। इति शब्दचन्द्रिका। चिराता इति भाषा॥

काण्डनीलः, पुं, (काण्डे स्कन्धे नीलः।) लोध्रः। इति राजनिर्घण्टः॥

काण्डपटः, पुं, (काण्डे काष्ठादिनिर्म्मितस्तम्भे आवरकत्वात् स्थितः पटः।) यवनी। तिरस्करिणी। इति हेमचन्द्रः। कानात इति भाषा॥

काण्डपुङ्खा, स्त्री, (काण्डस्य वाणस्य पुङ्ख इव पुङ्खो यस्याः।) शरपुङ्खा। इति राजनिर्घण्टः॥

काण्डपुष्पं, क्ली, (काण्डात् स्कन्धं प्राप्य पुष्पं यस्याः।) क्षुद्रसुगन्धिपुष्पविशेषः। इति शब्दचन्द्रिका। दोना इति भाषा॥

काण्डपृष्ठं, क्ली, (काण्डं तरुस्कन्ध इव स्थूलं पृष्ठं यस्य।) कार्ष्मधनुः। इति महाभारतम्॥

काण्डपृष्ठः, त्रि, (काण्डः वाणः पृष्ठे यस्य।) काण्डस्पृक्। शस्त्राजीवः। इत्यमरटीकायां स्वामी॥ ("स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ!। अजया ब्राह्मणास्तेव श्राद्धे नार्हन्ति केतनम्"॥ इति महाभारते। १३। २३। २२॥) वैश्यापतौ पुं। इति दानधर्म्मः॥

काण्डवारिणी, स्त्री, (काण्डान् संग्रामापतितान् वाणान् स्मरणादेव निवारयतीति। काण्ड + वृ + णिच् + णिनिः।) दुर्गा। यथा,—

"महागजघटाटोपसंयुगे नरवाजिनाम्। स्मरणादारते वाणान् तेन सा काण्डवारिणी"॥ इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

काण्डरुहा, स्त्री, (काण्डात् छिन्नस्कन्धात् रोहतीति। काण्ड + रुह + कः टाप् च।) कटुकी। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ अस्याः गुणाः कटुकाशब्दे ज्ञेयाः॥)

काण्डर्षिः, पुं, (काण्डस्य वेदविभागस्य ऋषिः। यद्वा काण्डेषु एकजातीयक्रियादिसमवायेषु ऋषिर्विचारकः।) वेदकाण्डविभागाध्यापकमुनिभेदः। स तु जैमिन्यादिः। इति चिकाण्डशेषः॥ (जैमिनिस्तु पूर्ब्बमीमांसाशास्त्रप्रणयनेन क्रियाकाण्डस्य विचारकः। तथा वेदव्यासः उत्तरमीमांसारूपवेदान्तशास्त्रप्रणयनेन ज्ञानकाण्डस्य विचारकः। इत्यादि सूरिभिर्निरूपणम्॥)

काण्डवान्, [त्] त्रि, (काण्डः शरःप्रहरणतया अस्त्यस्य इति। काण्ड + मतुप्। मस्य वः।) काण्डीरः। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥

काण्डसन्धिः, पुं, (काण्डस्य स्कन्धस्य सन्धिः भेदनस्थानम्।) ग्रन्थिः। इति राजनिर्घण्टः॥ पाव् गाँट इति च भाषा॥

काण्डस्पृक्, त्रि, (स्पर्शं गृहीतं काण्डं येन निष्कान्तत्वात् परनिपातः।) काण्डस्पृक्कः। शस्त्रजीवी। इत्यमरः। २। ८। ६७॥

काण्डहीनं, क्ली, (काण्डेन स्कन्धेन हीनम्।) भद्रमुस्तकम्। इति शब्दचन्द्रिका॥

काण्डिका, स्त्री, (काण्डः गुच्छः प्राशस्त्येन अस्त्यस्याः। काण्ड + ठन् + टाप्।) लङ्गानामकधान्यविशेषः। वालुकीनामकर्कटीभेदः। इति राजनिर्घण्टः॥

काण्डीरः, त्रि, (काण्डः वाणः अस्त्यस्य। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। ११९। इति ईरन्।) काण्डास्त्रवान्। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥ (यथा भट्टिः ४। १०।
"काण्डीरः खाण्डिकः शार्ङ्गी रक्तन् विप्रस्तनुत्रवान्"॥)

काण्डीरः, पुं, (काण्डः स्तम्बः अस्यास्तीति। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। ११९। इति ईरन्।) अपामार्गवृक्षः। लताप्रभेदः। काण्डवेध इति ख्यातः। तत्पर्य्यायः। काण्डकटुकः २ नासासंवेदनः ३ षट्पुः ४ अग्रकाण्डः ५ स्तोमवल्ली ६ कारवल्ली ७ सुकाण्डिका ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारकत्वम्। दुष्टव्रणलूतागुल्मोदरश्लीहशूलमन्दाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥

काण्डीरी, स्त्री, (काण्डीर + गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति रत्नमाला॥ काण्डीरा इत्यपि पाठः॥ (मञ्जिष्ठाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

काण्डेक्षुः, पुं, (काण्डे इक्षुरिव।) कोकिलाक्षवृक्षः। इत्यमरः। २। ४। १०४॥ कुलिया खाड़ो इति भाषा॥ (अस्य पर्य्यायाः। यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥
"कोकिलाक्षस्तु काक्षेक्षुरिक्षुरः क्षुरकः क्षुरः।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षु वालिका"॥
गुणाऽस्य क्षुरकशब्दे ज्ञेयाः॥) काण्डलक्षम्। इति राजनिर्घण्टः॥

काण्डेरी, स्त्री, (काण्डं वाणाकारं पुष्पं ईर्त्ते। काण्ड + ईरङ् गतौ + अण्। गौरादेराकृतिगणत्वात् ङीष्।) नागदन्तीवृक्षः। इति रत्नमाला॥

काण्डेरुहा, स्त्री, (काण्डे रोहति इति कः टाप्। सप्तम्या अलुक्।) कटुकी। इति रत्नमाला॥ (कटुकीशब्दे ऽस्या विशेषो बोध्यः॥)

कातरः, त्रि, (कु कष्टेन तरतीति। कु + तॄ + अच्। कोः कादेशः।) व्यसनाकुलचित्तः। व्याकुलः। तत्पर्य्यायः। अधीरः २। इत्यमरः। ३। १। २६॥ (यथा रघुः ११। ७८।
"कातरोऽसि यदि वोढुतार्द्धिया
तर्ज्जितः परसुधारया मम"॥)

कातरः, पुं, (कं जलं आतरति। क + आ + तॄ + अच्।) कातलमत्स्यः। इति शब्दरत्नावली॥

कातलः, पुं, (कातर एव स्वार्थे कः। अयं हि रोहितादिवत् न तेजस्वी अतोऽस्य तथात्वम्। यद्वा, कस्य जलस्य तलं स्पृशत्येन न अस्ति अस्य। अर्शं आदित्वादच्।) मत्स्यविशेषः। कात्ला इति भाषा। तस्य गुणाः। उष्णत्वम्। मधुरत्वम्। गुरुपाकित्वम्। चिदोषकारित्वञ्च। इति राजवल्लभः॥ (यथा, वैद्यके।
"कातलो मधुरस्निग्धो गुरुपाकी चिदोषजित्"॥)

काट्यं, क्ली, (कुत्सितं टयं टुटं टयं वा। कोः कादेशः।) रोहितमत्स्यम्। इति राजनिर्घण्टः॥

कात्यः, पुं, (कतस्य ऋषेर्गोत्रापत्यं। कत + "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्।) कात्यायनमुनिः। इति चिकाण्डशेषः॥

कात्यायनः, पुं, (कतस्य गोत्रापत्यम्। गर्गादित्वात् यञ् यञन्तत्वात् यनिञ्।) धर्म्मशास्त्रकर्त्तृमुनिविशेषः। (यथोक्तं याज्ञवल्क्येन १। ४। ५।
"मन्वत्रि विष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
वररुचिः। इति मेदिनी॥

कात्यायनी, स्त्री, (कतस्यापत्यं स्त्री। "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्। "सर्व्वत्रौहितादिकतस्तेभ्यः"। ४। १। १८। इति ङ्यः। ङित्वात् ङीष्।) दुर्गा। (यथा मार्कण्डेये ९१। २३।
"एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तुते"॥)
अर्द्धरुद्रा कात्यायवसगा विधवा। इत्यमरः। २। ६। १७॥ (याज्ञवल्क्यमुनेः पत्नीरेका पत्नी। यदुक्तं बृहदारण्यकोपनिषदि। "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च। तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी"॥ पत्न्यां ङीष्। कात्यायनस्य नप्त्रेः पत्नी"॥)

कादम्बः, पुं, (कदम्बे समूहे भवः। कदम्ब + अण्।) कलहंसः। वालि हाँस इति भाषा। इत्यमरः। २। ५। २३। (यथा रघुः। १३। ५५।
"क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पद्मिनीः"॥)
अस्य मांसस्य गुणाः। वायुरक्तपित्तनाशित्वम्। भेदकत्वम्। शुक्रकारित्वम्। शीतत्वञ्च। इति राजवल्लभः॥ (कदम्ब एव। स्वार्थे अण्।) कदम्बवृक्षः। इत्यमरटीकायां भरतः॥ (कदम्बस्येदमिति व्युत्पत्त्या अण्। कदम्बसम्बन्धिनि, त्रि। कदम्बकुसुमम्। यथा रघुः १३। २७।
"गन्धर्व्व धाराहतपल्वलानां
कादम्बमर्द्धोद्धृतकेसरञ्च"॥)
वाणः। इति मेदिनी॥

कादम्बकः, पुं, (कादम्ब + स्वार्थे कन्।) वाणः। इति हारावली॥

कादम्बरं, क्ली, (कादम्बम् कदम्बोद्भवं रसं लाति गृह्णातीति। कदम्ब + ला + कः। अस्य रः।) कदम्बपुष्पोद्भवमद्यम्। इति मेदिनी॥ (यथा, माघे।
"निषेव्य मधुमाधवाः सरसमत्र कादम्बरम्"॥)
दधिसारः। इति हेमचन्द्रः॥ घृतम्। इति विश्वः॥ (इक्षुजातगुड़ादि। इति मल्लिनाथः॥)

कादम्बरः, पुं, (कादम्बं कदम्बरसवत् लाति गृह्णातीति। ला + कः। अस्य रत्वञ्च।) दध्यम्। दधिसरः। इति मेदिनी॥

कादम्बरी, स्त्री, (कुः कुत्सितो वर्णः नीलवर्णमित्यर्थः अम्बरं वस्त्रं यस्याः। कोः कादेशः। कादम्बरो बलरामस्तस्य प्रिया। कदम्बर + अण् ततः स्त्रियां ङीप्। यद्वा कादम्बे जातो रसः कादम्बः। "तत्र जातः"। ४। ३। २५। इत्यण्। कादम्बं राति ददातीति। रादाने + "आतोऽनुपसर्गे कः"। ३। २। ३। इति कः। गौरादित्वात् ङीष्।) मदिरा। इति मेदिनी॥ (यथा,—
"कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्"॥
इत्युद्भटः॥) कोकिला। सरस्वती। शारिकापक्षिणी। इति मेदिनी॥ (बाणभट्टविरचितकाव्यविशेषः। स्वनायिकानाम्नैव प्रसिद्धोऽयं ग्रन्थः। इयं कादम्बरी तु बाणभट्टेनासमाप्ता पुनरस्य पुत्रेण समाप्तिं नीता॥ नायिकाविशेषः। सातु तुम्बुरुप्रभृतीनां कन्यां गन्धर्व्वाणां ज्येष्ठस्य हंस इत्याख्यया प्रसिद्धस्य गन्धर्व्वस्य कन्या। अस्या जननी मेनामयूखसम्भवाप्सरसां कुले जाता गौरीति नाम्ना प्रसिद्धा। अस्या अन्यद्विवरणन्तु कादम्ब्यां द्रष्टव्यम्॥)

कादम्बरीबीजं, क्ली, (कादम्ब्यैः बीजं आसवः।) सुरावीजम्। इति रत्नमाला॥

कादम्ब्यः, पुं, (कादम्ब्यै हितः इति यत्।) कदम्बवृक्षः। इति जटाधरः॥

कादम्बा, स्त्री, (कादम्ब इव आचरति। कादम्ब + आचारे क्विप् + अच् + टाप्।) कदम्बपुष्पीवृक्षः।

कान्तं

इति शब्दचन्द्रिका ॥ मुखिरी इति भाषा ॥

कादम्बिनी, स्त्री, (कादम्बाः कलहंसाः सन्ति अस्यां । कादम्ब + इनि ङीष् ।) मेघमाला । मेघश्रेणिः । इत्यमरः । १ । ३ । ८ ॥

कादाचित्कं, क्ली, कदाचिद्भवम् । इति मुग्धबोधव्याकरणम् ७ । १५ ॥ (यथा, साहित्यदर्पणे ३ । २७ ।
"यद्यपि रसाभिन्नतया चर्व्वणस्यापि न कार्य्यत्वं तथापि तस्य कादाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते" ॥)

काद्रवेयः, पुं, (कद्रोरपत्यं पुमान् । कद्रु + "सुभ्रादिभ्यश्च" । ४ । १ । १२३ । इति ढक् । "ढे लोपोऽकाद्वाः" । ६ । ४ । १४ । इति न लोपः ।) कद्रुसन्तानः । नागः । इत्यमरः । १ । ८ । ४ ॥
(यथा, महाभारते १ । ६५ । ४१ ।
"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ॥)

कानकं, क्ली, (कनकं फलमिव उग्रं फलं अस्यास्य । कनक + अण् ।) जयपालवीजम् । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । सारकत्वम् । उत्क्लेदकारित्वञ्च । इति राजवल्लभः ॥ (वैद्यकचक्रपाणिसंग्रहे दन्तिखिंनादगुग्गुलौ व्यवहारोऽस्य यथा ।
"सहस्रं कानकफलं सिद्धे संचूर्ण्य निक्षिपेत् ।
ततो मासद्वयं जग्ध्वा पिबेत्तप्तजलादिकम्" ॥)

काननं, क्ली, (कं जलं अननं जीवनमस्य । यद्वा काननयति दीपयति । कनदीप्तौ + णिच् + ल्युट् ।) वनम् । (यथा, मेघदूते ४४ ।
"प्रीतो वायुः परिणमयिता काननोदुम्बराणाम्" ॥
कस्य ब्रह्मणः आननं मुखम् ।) ब्रह्मणो मुखम् । गृहम् । इति मेदिनी ॥

काननारिः, पुं, (काननस्य अरिरिव । अग्नीगर्भोत्थितेनाग्निना सर्व्वकाननस्य दहनात् तथात्वम् ।) अग्नीवृक्षः । इति शब्दचन्द्रिका ॥ (अस्य गुणादयः अग्नीशब्दे द्रष्टव्याः ॥)

कानीनः, पुं स्त्री, (कन्यायां अनूढ़ायां जातः कन्याया जातो वा । कन्या + "कन्यायाः कनीन च" । ४ । १ । ११६ । इति अण् कनीनादेशश्च ।) अनूढ़ापुत्रः । तत्पर्य्यायः । कन्यकाजातः २ । इत्यमरः । २ । ६ । २४ ॥ सा कन्या यद्यनूढ़ा पितृगृह एव तिष्ठति तदा तत्पुत्रो मातामहस्यैव यथा,—
"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥
इति याज्ञवल्क्यः ॥ यद्यूढ़ा तदा वोढुरेव यथा,—
"पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुःकन्यासमुद्भवम्" ॥
इति मनुः ॥ व्यासे कर्णे च पुं । इति मेदिनी ॥

कान्तं, क्ली, (कनते दीप्यते इति । कन + कर्त्तरि क्तः ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥ लौहविशेषः । तस्य लक्षणं यथा,—
"स्वादुर्यत्र भवेन्निम्बकल्को रात्रिन्दिवोषितः ।
कान्तं तदुत्तमं यत्र रूप्येणावर्त्तितं भिद्येत्" ॥
तस्य परीक्षा । यथा ।
पात्रे यस्मिन् विसरति जले तैलबिन्दुर्निबिद्धो
विद्वं गन्धं विसृजति निजं रूपितं निम्बकल्कैः ।

कान्तलोहं

पाके दुग्धं भजति शिखराकारतां नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत्" ॥
इति सुखबोधः ॥ अपि च ।
"यत्पात्रे न प्रसरति जले तैलबिन्दुर्निबिद्धो
दिङ्मुर्गन्धं त्यजति भजते स्वादुतां निम्बकल्कः ।
पाथं दुग्धं भवति सिकतापुञ्जवन्नैति भूमौ
क्षय्याङ्कः स्यात् सजलचणकः कान्तलौहं वदन्ति" ॥
इतिवैद्यकम् ॥ (वैद्यकरसेन्द्रसारसंग्रहे रहत्सर्व्वज्वरहरलौहेऽस्य व्यवहारो यथा,—
"पारदं गन्धकं शुद्धं ताम्रमभ्रञ्च माक्षिकम् ।
हिरण्यं तारताम्रञ्च कर्षमेकं पृथक् पृथक् ॥
मृतं कान्तं पलं देयं सर्व्वमेकीकृतं शुभम्" ॥)

कान्तः, त्रि, (काम्यते इति । कम् + कर्म्मणि क्तः "यस्य विभाषा" । ७ । २ । १५ । इति नेट् । अनुनासिकस्येति दीर्घः ।) मनोरमः । शोभनः । इत्यमरमेदिनीकरौ ॥ (यथा,
"मलिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति" ।
इति शाकुन्तले १ अङ्के ॥)

कान्तः, पुं, (कम् + क्तः ।) श्रीकृष्णः । चन्द्रः । इति शब्दरत्नावली ॥ पतिः । (यथा मेघदूते । १०१ ।
'कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः' ॥)
चन्द्रसूर्य्ययोः पर्य्यायान्तः शिला । यथा । चन्द्रकान्तसूर्य्यकान्तायस्कान्तादयः । इति मेदिनी ॥ हिज्जलवृक्षः । वसन्त ऋतुः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥
शिवः । यथा, तत्रैव १३ । १७ । १४८ ।
"गुह्यः कान्तो निजः सर्गः पवित्रं सर्व्वपावनः" ॥
कार्त्तिकेयः । यथा, तत्रैव २ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवागनुसूयकः" ॥)

कान्तपत्री, [न्] पुं, (कान्तस्य कार्त्तिकेयस्य पत्री । मयूरस्य कार्त्तिकवाहनत्वात्तथात्वम् ।) मयूरः । इति शब्दचन्द्रिका ॥

कान्तपुष्पः, पुं, (कान्तानि मनोरमाणि पुष्पाण्यस्य ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥

कान्तलकः, पुं, (कान्तं लक्ष्यते आस्वाद्यते । कान्त + लक आस्वादने + घञर्थे कः । यद्वा काम्यते इति "मति बुद्धिपूजार्थेभ्यश्च क्तिः" । ३ । २ । १८८ । इति क्तिः । कान्तिः । ततः लकतीति । लक + अच् । कान्तिरासौ लकश्चेति ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । १२८ ॥ तुँद इति भाषा ॥

कान्तलोहं, क्ली, (कान्तं लौहश्रेष्ठत्वात् कमनीयं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥ (अस्य परीक्षादिकं कान्तशब्दे द्रष्टव्यम् ॥ अस्य निरुत्थीकरणं यथा, ॥
"शुद्धस्य सूतराजस्य भागौ भागद्वयं बलेः ।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः ॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।
आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयाद्भवेत् ॥
चिदिदं धान्यराशिस्थं तप्ततोयमर्द्दयेद्दृढम् ।
रजसादस्यगलितं नीरे तरति हंसवत् ॥

कान्तारः

तोऽयं सुखं कान्तलोहं निरुत्थं जायते ध्रुवम्"
"ततः कोटिसहस्रैर्व्वा कान्तलोहं महागुणम्" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

कान्ता, स्त्री, (काम्यते असौ । कम् + णिच् + कर्म्मणि क्तः + टाप् ।) नारी । (यथा शृङ्गारतिलके ६ ।
"झटिति प्रविश गेहं मावहिस्तिष्ठ कान्ते !
यहयासमयवेला वर्त्तते प्रीतरश्मेः ।
अयि ! सुविमलकान्तिं वीक्ष्य नूनं स राजयंसति तव मुखेन्दुं पूर्णचन्द्रं विहाय" ॥) प्रियङ्गुवृक्षः । इति मेदिनी ॥ सर्व्वाङ्गसुन्दरी स्त्री । इत्यमरः । २ । ६ । ३ ॥
(गङ्गा यथा, काशीखण्डे २९ । ४३ ।
"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)
वृहद्देशा । रेणुका । नागरमुस्ता । इति राजनिर्घण्टः ॥

कान्ताङ्घ्रिदोहदः, पुं, (कान्तायाः स्वङ्घ्रिणा चरणस्पर्शेनैव दोहदः पुष्पोद्गमो यस्य । "पादाघातादशोको विकशति" इति कविप्रौढ़ोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कान्ताचरणदोहदः, पुं, (कान्ताचरणेन रमणीचरणस्पर्शेन दोहदः पुष्पोद्गमो यस्य । "पादाघातादशोको विकशति" । इति कविप्रौढ़ोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति भूरिप्रयोगः ॥

कान्तायसं, क्ली, (अय एव आयसम् । कान्तं कमनीयं आयसम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥

कान्तारं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति गच्छतीति । कान्त + ऋ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) उपसर्गादि । (कान्तं मनोज्ञं ऋच्छति प्राप्नोतीति । कर्म्मण्यण् ।) काननम् । (यथा, हेः रामायणे २ । २८ । ५ ।
"सीते विमुञ्चतामेषा वनवासकृता मतिः ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते" ॥)
पद्मविशेषः । इति हेमचन्द्रः ॥

कान्तारः, पुं, (कान्तं मनोज्ञं रसं ऋच्छति प्राप्नोति । कान्त + ऋ + अण् ।) इक्षुविशेषः । कतारे इति हिन्दी भाषा । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"कान्तार तावसाविक्षुवंशकानुगुणौ मतौ" ।)
अस्य गुणाः । गुरुत्वम् । शुक्रश्लेष्मरक्तकारित्वम् । दृंहणत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ कोविदारवृक्षः । वंशः । इति राजनिर्घण्टः ॥

कान्तारः, पुं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति यत्र । हिंससङ्कुलत्वात् । कान्त + ऋ + आधारे घञ् ।) महावनम् । (यथा, गोः रामायणे । ४ । ४३ । ११ ।
"कैकेयान् सिन्धुसौवीरान् कान्तारगिरयश्च ये ।
गिरिजालावृतां दुर्गां मार्गध्वं पश्चिमां दिशम्" ॥)
दुर्गमपथः । इत्यमरः । ३ । १ । ७१ ॥ (उक्तञ्च—
"सिंहेभ्युक्षकरीन्द्रकपोगमृगणितं रक्षाक्षसुक्षाफलम् कान्तारे वदरीभमादद्भुतमगाद्विलस्य पत्नी मुदा" इति ।) विलम् । छिद्रम् । इति मेदिनी ॥

कान्तारकः, पुं, (कान्तार + स्वार्थे कन् । इक्षुविशेषः । इत्यमरः । २ । ४ । १६३ ॥ काजले आक् इति भाषा ॥

कान्तारी, स्त्री, (कान्तार + गौरादित्वात् ङीष् ।) इक्षुभेदः । काजले आक् इति भाषा । अस्या गुणाः । मधुरत्वम् । लघुत्वम् । क्षाररसत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥

कान्तिः, स्त्री, (कमु कान्तौ क्तिन् दीप्तौ वा + भावे क्तिन् ।) दीप्तिः । तत्पर्य्यायः । श्लोभा २ द्युतिः ३ रुचिः ४ । इत्यमरः । १ । ३ । १० ॥ शुभा ५ दीप्तिः ६ भा ७ श्रीः ८ भासा ९ भाः १० । इति शब्दरत्नावली ॥ अभिख्या ११ । इति जटाधरः ॥ * ॥ (यथा, विष्णुपुराणे १ मांशे ८ । २३ ।

"शुभ्राङ्गः श्रीधरः कान्तिः श्रीवत्सश्चैवनपायिनी" ॥)

कान्तिकारकपर्य्यायो यथा । रश्मि १ उष्मसि २ वेति ३ वेनति ४ वेसति ५ वाञ्छति ६ वष्टि ७ वनोति ७ जूषते ९ हर्षति १० आचके ११ उशिक् १२ मन्यते १३ क्तसत् १४ चाकनत् १५ चकमानः १६ कमति १७ कानिषत् १८ इत्यष्टादशकान्तिकर्म्माणः । इति वैद्यनिघण्टौ २ अध्यायः ॥ स्त्रीशोभा । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे ।

"रूपयौवनलावण्यं भोगाद्यैरङ्गभूषणम् ।
शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युतिः" ॥)

इच्छा । स्पृहार्थकमधातोर्भावे क्तिन् प्रत्ययः । दुर्गा । यथा,—देविपुराणे देवीनिरुक्तनाम ४५ अध्याये ॥

"स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च या ।
लक्ष्मीर्वा लजना वापि क्रमात् सा कान्तिरुच्यते" ॥

(गङ्गा । यथा, काशीखण्डे गङ्गास्तोत्रे २९ । ४० ।

"कुमुदती कमलिनी कान्तिः कल्पितदायिनी" ॥

"कान्तिश्चन्द्रतेजोरूपा" । इति तट्टीका ॥)

कान्तिदं, क्ली, (कान्तिं ददाति नाशयतीति । कान्ति + दो + क ।) पित्तम् । इति शब्दचन्द्रिका ॥ (कान्तिं ददातीति । कान्ति + दा + कः ।) शोभादायके त्रि ॥

कान्तिदा, स्त्री (कान्तिद + टाप् ।) वाकुचीवृक्षः । सोमराजी इति ख्याता । इति राजनिर्घण्टः ॥

कान्तिदायकं, क्ली, (कान्तिं ददातीति । कान्ति + दा + ण्वुल् ।) कालीयकवृक्षः । इति जटाधरः ॥ शोभादायके त्रि ॥

कान्दविकः, त्रि, (कन्दौ संस्कृतं कान्दवं । कन्दु + अण् । कान्दवं पण्यं अस्य "तदस्य पण्यम्" । ४ । ४ । ५१ । इति ठक् ।) आपूपिकः । पूपविक्रयकर्त्ता । इत्यमरः । २ । ९ । २८ ॥

कान्दिगभूतः, त्रि, (कां दिशं गच्छामि इत्याकुलीभूतः । कान्दिश + भू + कर्त्तरि क्तः ।) भयेन पलायितः । इति पुराणम् ॥

कान्दिशीकः, त्रि, (कां दिशं यामि इत्याह । तदा हेति मा शब्दादिश्य उपसङ्ख्यानमिति ठक् एषोदरादित्वात् साधुः ।) भयद्रुतः । भयेन पलायितः । इत्यमरः । ३ । १ । ४२ ॥

कान्यकुब्जं, क्ली, (कन्याः कुब्जा न्युब्जीकृता वायुना यत्र । ततः स्वार्थे अण् ।) गङ्गातीरस्थपुरविशेषः । कनौज इति भाषा । तत्पर्य्यायः । महोदयम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६ । इति हेमचन्द्रः ॥ (यथा, महाभारते ३ । ११५ । १९ ।

"एतस्मिन्नेव काले तु पृथिव्याः पृथिवीपतिः ।
कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम ह" ॥

एतद्पुरविवरणं कन्याकुब्जशब्दे द्रष्टव्यम् ॥)

कान्यजा, स्त्री, (कात् जलात् अन्यस्मिन् जायते । कान्य + जन + डः + टाप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कापटिकः, पुं, (कपटेन चरति इति ठक् ।) क्षाचः । अन्यमर्म्मज्ञः । ("तत्र परमर्म्मज्ञः प्रगल्भश्चाचः कपटव्यवहारित्वात् कापटिकः । तं वृत्त्यर्थिनमर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत् तदानीमेव मयि वक्तव्यम् । इति मनुसंहितायां ७ । १५४ । श्लोकस्य टीकायां कुल्लूकभट्टः ।) शठे त्रि । इति मेदिनी ॥

कापट्यं, क्ली, (कपटस्य कार्य्यं भावो वा । कपट + ष्यञ् ।) कपटता । शठता । कपटशब्दात् भावार्थे ष्यञ्प्रत्ययः ॥ इति मुग्धबोधव्याकरणम् ।

कापथः, पुं, (कुत्सितः पन्थाः । कु + पथिन् + अच् । "कापथ्यक्षयोः" । ६ । ३ । १०४ । इति कादेशः ।) कुत्सितपथः । तत्पर्य्यायः । अध्वः २ दुरध्वः ३ विपथः ४ कदध्वा ५ । इत्यमरः । २ । १ । १६ ॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ ("आख्यातुं कापथं दुःखं विषमम् वङ्कटकण्टकम्" ॥ इति हेः रामायणे । २ । १०८ । ७ ॥)

कापालं, क्ली, (कपालमेव कपालस्येदं वा । कपाल + अण् ।) अष्टादशकुष्ठान्तर्गतवातिककुष्ठम् । इति माधवकरः ॥ अस्य निदानं कपालशब्दे द्रष्टव्यम् ॥

कापालः, पुं, (कपाल + अण् ।) कर्कटः । इति शब्दचन्द्रिका रत्नमाला च ॥ काकड़ा इति भाषा ॥

कापालिकः, पुं, (कपालेन नृकपालेन चरति अभ्यवहारादिकं करोतीति । कपाल + ठक् ।) वर्णसङ्करजातिविशेषः । इति तन्त्रसारः ॥ कापालि इति भाषा । वामाचारिविशेषः । यथा,—

"अथ तीर्थकरायणीः प्रतस्थे
कापालिकजालकं विजेतुम्" ।

इति शङ्करविजयः ॥ (योगिविशेषः । यथा हठयोगदीपिकायां १ । ८ ।

"भानुको नारदेवश्च खण्डः कापालिकस्तथा" ॥

तत्सम्प्रदायश्च यथा तत्रैव ३ । ९९ ।

"निषेव्यते शीतलमध्यधारा
कापालिके खण्डमते ऽमरोली" ॥

"कापालिकस्यायं कापालिकस्तस्मिन् कापालिके खण्डकापालिकसम्प्रदाये इत्यर्थः" ॥ इतितट्टीका ॥)

कापाली, स्त्री, (कपाल + ङीष् ।) विड्लवणम् । इति राजनिर्घण्टः ॥ (शिवः । यथा महाभारते । १३ । १७ । १०२ ।

"अजैकपाच्च कापाली त्रिशङ्करजितः शिवः" ॥)

कापिलः, पुं, (कपिलेन प्रोक्तं शास्त्रं वेत्ति अधीते वा इति अण् ।) साङ्ख्यशास्त्रज्ञः । इति हेमचन्द्रः ॥ (कपिलमधिकृत्य कृतो ग्रन्थः । अण् । कपिलाधिकारेण कृत उपपुराणभेदः । यथा कूर्म्मपुराणे ।

"कापिलं मानवञ्चैव तथैवोशनसेरितम्" ॥)

पिङ्गलवर्णः । तद्वति त्रि । इत्यमरटीकायां भरतः ॥

कापिशं, क्ली, (कापिशा माधवी तत्पुष्पमधूद्भवम् । कपिशा + अण् ।) मद्यम् । इति हेमचन्द्रः ॥

कापिशायनं, क्ली, (कपिशैव स्वार्थे अण् । तत्र जातम् । "कापिशायाः ष्फक्" । ४ । २ । ९९ । इति ष्फक् ।) मद्यम् । इति जटाधरः ॥ देवता । इति धरणी ॥

कापिशेयः, पुं, (कपिशायाः अपत्यम् । ढक् ।) पिशाचः । इति चिकाण्डशेषः ॥

कापुरुषः, पुं, (कुत्सितः पुरुषः । "विभाषा पुरुषे" । ६ । ३ । १०९ । इति कोः कादेशः ।) कुपुरुषः । कुत्सितपुरुषः । इति व्याकरणम् ॥ यथा हितोपदेशे ॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति" ॥

कापेयः, त्रि, (कपेर्भावः कर्म्म वा । कपि + ढक् । कपिसम्बन्धी । इति हलायुधः ॥ (स्त्रियां प्रमाणं यथा, गोः रामायणे । ६ । १११ । १९ ।

"कच्चिन्न खलु कापेयी सैव ते चलचित्तता" ॥)

कापोतं, क्ली, (कपोतानां समूहः । अण् ।) कपोतगणः । इत्यमरः । २ । ५ । ४७ । पायरा झाँक् इति भाषा ॥ (कपोतस्येदम् । "तस्येदम्" । ४ । ३ । १२० । इत्यण् । यथा भागवते । ९ । १८ । २५ ॥

"दुर्म्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ।
स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात्" ॥

कापोतीं कपोतसम्बन्धिनीं वृत्तिं परोच्छिष्टोपजीवित्वमित्यर्थः ॥) सौवीराञ्जनम् । इति राजनिर्घण्टः ॥

कापोतः, पुं, (कपोत + अण् ।) सर्जिकाक्षारः । इत्यमरः । २ । ९ । १०९ ॥ रुचकः । इति मेदिनी । कपोताभवर्णः । तद्वति त्रि । इति हेमचन्द्रः ॥

कापोताञ्जनं, क्ली, (कापोतञ्च तत् अञ्जनञ्चेति ।) सौवीराञ्जनम् । स्रोतोञ्जनम् । इत्यमरः । २ । ९ । १०० ॥

काप्यकरः, पुं, (कुत्सितं काप्यं कार्य्यं पापं करोतीति । काप्य + कृ + ताच्छील्यादौ टः ।) स्वयं कृतं पापं चित्ते आधाय यः कथयति सः । इति शब्दरत्नावली ॥

काप्यकारः, पुं, (काप्यं करोतीति । काप्य + कृ + अण् । चित्ते पापं आधाय यः शंसति सः । इति चिकाण्डशेषः ॥ स्वपापवक्ता । इति शब्दरत्नावली ॥

कापथः, पुं, (कुत्सितं फलं यस्य । कोः कादेशः ।) कटफलः । इति शब्दरत्नावली ॥

काम, अ, अभ्यनुज्ञा । इति विश्वः ॥

कामं, क्ली, (कामाय हितम् । कम + अण् ।) रेतः । निकामः । काम्यम् । इति मेदिनी ॥ वाढम् । अनुमतिः । इति हेमचन्द्रः ॥ (यथा माघे २ । ४३ ।

"मगागनभ्याहृत्या वा कामं क्षाम्यतु यः क्षमी" ॥

कामः पुं, (काम्यते असौ कर्म्मणि घञ् ।) काम्य

इच्छा । इति हेमचन्द्रः ॥ (यथा मनुः २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥)
कामस्तु ब्रह्मणो हृदयाज्जातः । यथा ।
"हृदि कामो भ्रुवोः क्रोधो लोभश्चाधोरदच्छदात्" ।
इति श्रीभागवतम् ॥ (काम्यते इति । कम्मार्थे घञ् वरः । यथा रघुः २ । ६५ ।
"सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा" ॥
कामं वरं प्रतिश्रुत्य प्रतिज्ञाय इत्यर्थः । मनोरथः । यथा तत्रैव ३ । ६७ ।
"तथेति कामं प्रतिशुश्रुवान्
रघोर्यथागतं मातलिसारथिर्ययौ" ॥
महादेवः । यथा महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च" ॥
विष्णुः । यथा तत्रैव १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)
बलदेवः । इति शब्दरत्नावली । महाराजचूतः । इति राजनिर्घण्टः ॥ कामदेवः । (यथा कुमारे ३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्विह्निमुखं विविक्षुः" ॥)
स तु श्रीकृष्णपुत्रः । तत्पर्य्यायः । मदनः २ मन्मथः ३ मारः ४ प्रद्युम्नः ५ मीनकेतनः ६ कन्दर्पः ७ दर्पकः ८ अनङ्गः ९ पञ्चशरः १० स्मरः ११ शम्बरारिः १२ मनसिजः १३ कुसुमेषुः १४ अनन्यजः १५ पुष्पधन्वा १६ रतिपतिः १७ मकरध्वजः १८ आत्मभूः १९ ब्रह्मसूः २० विश्वकेतुः २१ । इत्यमरः १ । १ । २६–२८ ॥ * ॥ स तु पञ्चशब्दिधो यथा । कामः १ कामदः २ कान्तः ३ कान्तिमान् ४ कामगः ५ कामचारः ६ कामी ७ कामुकः ८ कामवर्द्धनः ९ रामः १० रमः ११ रमणः १२ रतिनाथः १३ रतिप्रियः १४ राज्ञिनाथः १५ रमाकान्तः १६ रममाणः १७ निशाचरः १८ नन्दकः १९ नन्दनः २० नन्दी २१ नन्दयिता २२ पञ्चबाणः २३ रतिसखः २४ पुष्पधन्वा २५ महाधनुः २६ भामणः २७ भमः २८ भममाणः २९ भमोऽपरः ३० भान्तः ३१ भामकः ३२ भङ्गः ३३ भान्तचारः ३४ भमावहः ३५ मोहनः ३६ मोहकः ३७ मोहः ३८ मोहवर्द्धनः ३९ मदनः ४० मन्मथः ४१ मातङ्गः ४२ भङ्गनायकः ४३ नायनः ४४ गीतिजः ४५ नर्त्तकः ४६ खेलकः ४७ उन्मत्तोन्मत्तकः ४८ विलासः ४९ लोभवर्द्धनः ५० ॥
"दाड़िमीकुसुमाभाश्च वामाङ्गे शक्तिसंयुताः ।
सौम्या रक्ताम्बराः सर्व्वे पुष्पबाणेक्षुकार्म्मुके ॥
बिभ्राणाः सर्व्वभूषाढ्याः कामाः पञ्चाग्रदीरिताः" ।
इति शारदातिलकटीकायां राघवभट्टः ॥ तेषामेकपञ्चाशत्प्रभवो रतिशब्दे द्रष्टव्यः ॥ * ॥
तस्य स्थानानि यथा ।
"पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि ।
कण्ठे कण्ठे च ओष्ठे च गण्डे नेत्रे श्रुतावपि ।
ललाटे भ्रूधनुष्केषु कामस्थानं तिथिक्रमात् ॥

दक्षे पुंसां स्त्रिया वामे शुक्ले कृष्णे विपर्य्ययः ॥
पादाङ्गुष्ठे प्रतिपदि द्वितीयायाञ्च गुल्फके ।
ऊरुदेशे तृतीयायां चतुर्थ्यां भगदेशतः ॥
नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले ।
सप्तम्यां हृदये चैव अष्टम्यां कण्ठदेशतः ॥
नवम्यां कण्ठदेशे च दशम्यां ओष्ठदेशतः ।
एकादश्यां गण्डदेशे द्वादश्यां नयने तथा ॥
त्रयोदश्यां ललाटे च चतुर्दश्यां जलाटके ।
पौर्णमास्यां भ्रिखायाञ्च ज्ञातव्यञ्च इति क्रमात् ॥
यत्र स्थाने वसेत् कामस्तत्रैव नखक्षतम् ।
मन्त्रेणानेन कर्त्तव्यं ज्ञातव्यं रतिकोविदैः" ॥
इति क्षारदीपिका ॥ मन्त्रस्तु प्रणवादिसविन्दुप्रत्येकषोड़शस्वरयुक्तनमोऽन्तप्रत्येकचन्द्रषोड़शकलारूपः ॥ उत्पन्नमात्रशरीरिषु कामस्यानुत्पत्तिकारणं यथा । मार्कण्डेय उवाच ।
"ब्रह्मापि तनयां सन्ध्यां दृष्ट्वा पूर्व्वमथात्मनः ।
कामायाशु मनश्चक्रे त्यक्त्वा सा च सुतेति वै ॥
तस्याश्च चलितं चित्तं कामबाणविशोड़ितम् ।
ऋषीणां प्रेक्षतां तेषां मानसानां महात्मनाम् ॥
भर्गस्य वचनं श्रुत्वा सोपहासं विधिं प्रति ।
आत्मनश्चलचित्तत्वममर्य्यादमृषीन् प्रति ॥
कामस्य तादृशं भावं मुनिमोहकरं मुहुः ।
दृष्ट्वा सन्ध्या स्वयं तत्र त्रपामापातिदुःखिता ॥
ततस्तु ब्रह्मणा ग्रस्ते मदने तदनन्तरम् ।
अन्तर्भूते विधौ ग्रस्तौ गते चापि निशास्पदे ॥
अमर्य्यादमापन्ना सन्ध्या ध्यानपराभवत् ।
ध्यायन्ती क्षणमेवात्र पूर्व्वरूपं मनस्विनी ॥
इदं विमन्यते सन्ध्या तस्मिन् काले यथोदितम् ।
उत्पन्नमात्रां मां दृष्ट्वा युवतीं मदनेरितः ॥
अकार्य्यात्मानुरागोऽयमभिलाषं पितामहः ।
दृष्ट्वैव माममर्य्यादं सकाममभवन्मनः ॥
ममापि मथितं चित्तं मदनेन दुरात्मना ।
येन दृष्ट्वा मुनीन् सर्व्वांश्चलितं मन्मनो भृशम् ॥
फलमेतस्य पापस्य मदनः स्वयमाप्तवान् ।
यस्तं शशाप कुपितः भ्रूभोरग्रे पितामहः ॥
ममोचितं फलमहमाप्नुमिच्छामि साध्वतम् ।
यस्मां पिता भ्रातरञ्च सकामामधरोक्षतः ॥
दृष्ट्वा चक्षुः स्पृहां तस्मान्न मत्तः कापि यास्यति ।
ममापि कामभावोऽभूदमर्य्यादं समीक्ष्य तान् ॥
पत्यावित्र स्वके तातेसर्व्वेषु सहजेष्वपि ।
करिष्याम्यस्य पापस्य प्रायश्चित्तमहं स्वयम् ॥
आत्मानमग्नौ होष्यामि वेदमार्गानुसारतः ।
किन्त्वेकां स्थापयिष्यामि मर्य्यादामिह भूतले ॥
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः ।
एतदर्थमहं ज्ञात्वा तपः परमदारुणम् ॥
मर्य्यादां स्थापयित्वैव पश्चात् त्यक्ष्यामि जीवितम् ।
यस्मिन् शरीरे पित्रा मे क्षमिलाषः स्वयं कृतः ॥
अष्टभिस्तेन कायेन किञ्चिन्नास्ति प्रयोजनम् ।
येन स्वेन शरीरेण तातेऽथ सहजे स्वके ॥
उद्भावितः कामभावो न तत्सुकृतसाधनम् ।
इति संचिन्त्य मनसा सन्ध्या ध्यानपरं ततः ।
जगाम चन्द्रभागाख्यं चन्द्रभागा यतः स्रुता ॥

तया स ध्यानः समधिष्ठितः सदा
सौवर्णगौर्य्यादिसमप्रभाश्रिता ।
सोमेन सन्ध्यासमयोदितेन
यथोदयाद्रिर्व्विरराज शश्वत्" ॥
इति कालिकापुराणे १९ अध्यायः ॥ * ॥
मार्कण्डेय उवाच ।
"अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिक्षीणं जटाग्रातैः पवित्रं मूर्द्धि राजितम् ॥
हिमागौतर्च्छिताम्भोजसदृशं वदनं तदा ।
निरीक्ष्य तपसाविष्टो हरिः प्रोवाच तामिदम्" ॥
श्रीभगवानुवाच ।
"प्रीतोऽस्मि तपसा भद्रे भवत्याः परमेण वै ।
स्तवेन च शुभे प्रश्ने वरं वरय साम्प्रतम् ॥
येन ते विद्यते कार्य्यं वरेणास्मि मनोगतम् ।
तत् करिष्ये च भद्रं ते प्रसन्नोऽहं तव व्रतैः" ॥
सन्ध्योवाच ।
"यदि देव प्रसन्नोऽसि तपसा मम संप्रति ।
कृतस्तदायं प्रथमं वरो मम विधीयताम् ॥
उत्पन्नमात्रा देवेश प्राणिनोऽस्मिन् भुवःस्थले ।
न भवन्तु क्रमेणैव सकामाः सम्भवन्तु वै" ॥
श्रीभगवानुवाच ।
"प्रथमं शैशवो भावः कौमाराख्यो द्वितीयकः ।
तृतीयो यौवनो भावश्चतुर्थं वार्द्धकं तथा ॥
तृतीयेष्वथ संप्राप्ते वयोभागे शरीरिणः ।
सकामाः स्युर्द्वितीयान्ते भविष्यन्ति क्वचित् क्वचित् ॥
तपसा तव मर्य्यादा जगति स्थापिता मया ।
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः" ॥
इत्यादि श्रीकालिकापुराणे २२ अध्यायः ॥ * ॥
अभिलाषः । तस्य रजोगुणादुत्पत्तिर्यथा,—
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" ॥
इति श्रीभगवद्गीतायां ३ । ३७ ॥
कामकला, स्त्री, (कामस्य कला प्रिया ।) रतिः । कामदेवपत्नी । इति शब्दरत्नावली ॥ चन्द्रस्य यः षोड़शकलात्मा एव कामकलाः ॥
कामकूटः, पुं, (काम एव कूटं प्रधानं यस्य ।) वेश्या प्रियः । वेश्यातिभ्रमः । इति मेदिनी ॥
कामकेलिः, पुं, (कामे तद्धेतुकरतौ केलिर्यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (कामनिमित्ता केलिः ।) सुरते क्लीं । इति हेमचन्द्रः ॥
कामकन्दला, स्त्री, (कामं कामनीयं स्कन्द इव दर्शं पत्रं यस्याः ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥
कामगामी, [न्] त्रि, (कामं यथेष्टं योनिविचारमकुर्व्वन्नेव वा गच्छतीति । काम + गम + णिनिः ।) कामङ्गामी । स्वेच्छागमनशीलः । इत्यमरटीकायां ॥
कामगुणः, पुं, (कामञ्जनो गुणः ।) रागः । विषयः । आभोगः । इति मेदिनी ॥
कामङ्गामी, [न्] त्रि, (कामं यथेच्छं गमनशीलः । सुपीति णिनिः । काममव्ययम् ।) स्वेच्छागमनशीलः । तत्पर्य्यायः । अनुकामीनः २ । इत्यमरः ॥ २ । ८ । ७६ ॥
कामचारी, [न्] त्रि, (कामेन स्वेच्छया चरति ।

काम + चर + णिनिः ।) कामुकः । (यथा "गुरुन्दरं च जानीते परस्त्रीकामचारिणम्" ॥ इति महाभारतम् ॥) स्वच्छन्दः ॥ कणविशुः । इति मेदिनी ॥

कामचारी, [न्] पुं, (कामेन इच्छानुसारेण चरति विहरति । काम + चर + णिनिः ।) गरुडः । इति शब्दरत्नावली ॥

कामजानः, पुं, (कामं जनयति कुरुध्वनिना । काम + जन + णिच् + अच् । निपातनात् न वृद्धिः । यद्वा कामजं कन्दर्पभावं आनयति । कामज + आ + नी + ड ।) कोकिलः । इति शब्दरत्नावली ॥ कामजनि इति च पाठः ॥

कामतालः, पुं, (कामं तालयति प्रतिष्ठापयति । काम + तल प्रतिष्ठायां + णिच् + अच् ।) कोकिलः । इति त्रिकाण्डशेषः ॥

कामदः, त्रि, (कामं अभिलाषं ददाति । काम + दा + कः ।) कामदाता । अभिलाषदः । इति मेदिनी ॥ (यथा हरेः रामायणे २ । ३३ । ७ ।
"ऐश्वर्य्यस्य रसज्ञः सन् कामानाञ्चैव कामदः" ॥
कामं कामस्य रूपं स्वसौन्दर्य्येण द्यति अवखण्डयतीति । यद्वा कामं मदनं द्यति लाघयतीति । ऊर्द्धरेतस्त्वादस्य तथात्वम् । काम + दो + कः । कार्त्तिकेयः । यथा, महाभारते ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यधाम्नुवनेश्वरः" ॥)

कामदा, स्त्री, (कामं अभीष्टं ददाति या । काम + दा + कः + टाप् ।) कामधेनुः । इति मेदिनी ॥

कामदुघा, स्त्री, (कामं दोग्धि । काम + दुह + "इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः । ततष्टाप् ।) कामधेनुः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भागवते २ । १० । ४ ।
"कामं ववर्ष पर्জन्यः सर्व्वकामदुघा मही" ॥)

कामदूतिका, स्त्री, (कामस्य उद्दीपकत्वात् दूतिकेव ।) नागदन्तीवृक्षः । इति रत्नमाला ॥

कामदूती, स्त्री, (कामस्य दूतीव कामोद्दीपकत्वात् ।) पाटलावृक्षः । इति शब्दरत्नावली ॥

कामधरः, पुं, (कामरूपं कामस्य संज्ञां वा धरति धारयति वा । काम + धृ + अच् ।) कामरूपस्थ मत्स्यध्वजपर्व्वतस्थसरोवरः । यथा,—
"मणिकूटाचलात् पूर्व्वं मत्स्यध्वजकुलाचलः ।
निर्दग्धो यत्र मदनो हरनेत्राग्निना पुनः ॥
शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् ।
तत्र मत्स्यस्वरूपस्तु कामदेवेन संस्थितः ॥
अधिकायां पृथिव्यां वीक्ष्यमाणः समन्ततः ।
वदा तु शाश्वती नाम तत्रास्ते दक्षिणश्रवा ॥
सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः ।
शास्त्रयां विधिवत् स्नात्वा पीत्वा कामधराम्भसि ॥
विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ॥
इति श्रीकालिकापुराणे ८१ अध्यायः ॥

कामधेनुः, स्त्री, (कामप्रतिपादिका धेनुः ।) स्वनामख्यातगौः । तस्या उत्पत्तिर्यथा,—
"दक्षस्य तनया बाभ्रुः सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी" ॥

तस्यान्तु तनया जज्ञे कश्यपात्तु प्रजापतेः ।
गान्धा सा रोहिणी शुभ्रा सर्व्वकामदुघा वृषा ॥
तस्यां जज्ञे शूरसेनाद्वसोरतितपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता" ॥
"तस्यां जज्ञे सुनःशैफान्मुनेरतितमोज्ज्वलात्" ।
इति पुस्तकान्तरे पाठः ॥
"सा सिताभ्रप्रतीकाशा चतुर्व्वेदचतुष्पदा ।
स्तनेषुतुर्भिर्धर्म्मार्थकामाप्रसवकारिणी" ॥ * ॥
तस्या गर्भे शिववाहनवृषोत्पत्तिर्यथा,—
"सा स्वयम्भुशरीरात्तु कालेन महता सती ।
निर्म्मलं यौवनं कामधेनुरूपं मनोहरम् ॥
तां चरन्तीं मेरुपृष्ठे चारुरूपां मनोहराम् ।
ददर्श स तु वेताशः कामुकस्त्वाभ्यपद्यत ॥
तं कामुकन्तु वेतालं विदित्वा कामधेनुका ।
पशुधर्म्मात् स्वयं भेजे तं पुत्रं शृङ्गभृङ्गतः ॥
सोऽवाप तस्यां परममामोदं शृङ्गरात्मजः ।
सा चापि परमं तस्मिन् मदनात् प्रतिहर्षिता ॥
तयोः प्रवृत्ते सुरते तस्या गर्भोऽभवत्तदा ।
काले प्राप्ते तु सुषुवे कामधेनुर्म्महाबलम् ॥
सोऽचिरेणैव कालेन बृहान् वृषभोऽभवत् ।
महाककुदसंयुक्तश्चारुशृङ्गदयान्वितः ॥
उत्पत्तिप्रविचलत्कर्णयुगलो दीर्घवालधिः ।
ककुदेन च शृङ्गाभ्यां कर्णाभ्यां स सिताभवत् ॥
विचरन् ददृशे देवैः शृङ्गैरिव हिमाचलः ।
वेतालस्त्वकरोत्तस्य नाम भर्गः इति द्विजाः ! ॥
स तु भर्गो जगन्नाथी समाराधयदीश्वरम् ।
सोऽपि तुष्टो वरं तस्मै ददावित्थं महेश्वरः ॥
तमेव वाहनं चक्रे ज्ञात्वा देवतनुं वृषम् ।
स चिरायुश्च बलवान् पृथिवीधरवत्क्षमः ॥
भर्गो नाम महातेजाः केतुश्चाप्यभवत् पतेः ।
भर्गोऽभूद्वाहनो यस्माच्छङ्करस्य महात्मनः ॥
अतो भर्गीरिति ख्यातिं स च प्राप महेश्वरात्"॥
इति श्रीकालिकापुराणे ९१ अध्यायः ॥ * ॥
अभीष्टप्रदा धेनुः । तद्दानफलं यथा,—
"वर्षौ हरिः सर्व्व एव पवित्र-
स्तत्रापि वर्षे शरदेव शुद्धा ।
तस्यां शुभः कार्त्तिको नाम मास-
स्तत्रापि पुण्यो हि बभूव दर्शः ॥
यस्यां हरेर्दैत्यभयादिमुक्ता
उरःस्थलं प्राप्य सुखं सुषुप्ते ।
लक्ष्मीः पुराप्यापि विनिर्म्मिता वै
कामप्रदा धेनव एव यत्र ॥
अहर्मुखे यत्र दिने समस्ताः
सुधेनवो भूमितले भ्रमन्ति ।
गृहे न यस्मिन् कथयन्ति जीवां
हानिः क्षयस्तत्र च प्रत्ययो मे ॥
तस्मात्त्वमत्रैव च कामधेनुं
दद्याः समुद्दिश्य तु केशवस्य ।
विप्राय वै सर्व्वगुणोपपन्नां
ज्ञात्वा व्रतं कृष्णमतो हरेस्तु ॥
सम्यक् प्रदत्तैस्तु गवां सहस्रैः
सवत्सवस्त्रैः सहितैश्च हेम्ना ।

काले फलं यल्लभते मनुष्यो
न कामधेनोश्च समं द्विजेभ्यः ॥
कन्यारथानां करिवाजियुक्तैः
शतैः सहस्रैः सततं द्विजेभ्यः ।
दत्तैः फलं यल्लभते मनुष्यः
समं तथा स्यान्नतु कामधेनोः" ॥ * ॥
तद्भेदाः तद्दानविधिश्च यथा,—
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा
निर्गता मथ्यमानेऽब्धौ उपःस्नानं शुभप्रदम् ॥
तत्र स्नात्वा समभ्यर्च्च्य धेनुं पूज्य प्रयत्नतः ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
नक्ताशी गोरसैर्हैविः पूजयेन्मधुसूदनम् ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्राभरणकुण्डलैः ॥
शङ्खासिचक्रोद्यतबाहुविष्णो-
र्गदाब्जहस्तस्य तु शङ्खपाणेः ।
अर्घं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥
श्रियः पतिं श्रीधरमेव कान्तं
श्रियाः सखायं हि श्रियोऽधिमूलम् ।
नमाम्यहं श्रीधरं श्रीनिवासं
समर्च्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रिया युक्तैस्तु नामभिः ।
एषक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पतेः ॥
या देवी भार्गवं भेजे कुलं सर्व्वत्र पूजिता ।
आयातु सा गृहं नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसञ्च सा देवी सुनन्दा प्रत्यपद्यिता ।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
सदाभवद्गृहं साच्च ममायातु सुरार्च्चिता ॥
सुशीला कश्यपं या तु भेजे सर्व्वत्र कामदा ।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वशिष्ठन्तु संप्राप्य मुमुदे शुभा ।
सा मे गृहं सदायातु कामदा देवपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनसुसंस्तृते ॥
तिलप्रस्थेन धाकीर्णे चतुःस्वर्णविभूषिते ।
क्षौमवस्त्रान्विते शुभे मध्याह्नपात्रसंयुते ॥
शुभवस्त्रैः समाच्छन्ने सर्व्वरत्नैरलङ्कृताम् ।
सुवर्णशृङ्गीं सुखुरां चतुःस्वर्णां मनोरमाम् ॥
क्षीराब्धिपयसोपेतां धेनुं मन्त्रैः प्रपूजयेत् ।
या धेनुः सर्व्वदेवानां ऋषीणां भावितात्मनाम् ॥
क्षीराब्धेर्निर्गता या च सा मे भवतु सुस्थिरा ।
घृतक्षीराभिषेकञ्च कृत्वा विष्णोः प्रयत्नतः ॥
समभ्यर्च्च्य यथान्यायं गन्धपुष्पादिभिः क्रमात् ।
गावो ममाग्रतः सन्तु गावः पार्श्वे च पृष्ठतः ॥
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् ।
प्राङ्मुखोदङ्मुखो वापि सितयज्ञोपवीतिनीम् ॥
इमां त्वं प्रतिगृह्णीष्व देवदेव ! जगत्पते ! ।

सवत्सामङ्कितां धेनुं गोविन्द ! प्रीयतामिति ॥
एवं विप्राय तां दद्यात् क्षत्वा चैव प्रदक्षिणम् ।
अनुव्रजेच्च गच्छन्तं पदान्यष्टौ नराधिप ! ॥
अनेन विधिना यस्तु कामधेनुं प्रयच्छति ।
सर्व्वकामसमृद्धार्थः स्वर्गलोकञ्च गच्छति ॥
किं दत्त्वा घृतशोर्वेन्ति राज्यस्ते दिवाकरे ।
तत्फलं प्राप्यते राजन् कामधेन्वा यदद्भुते" ॥
इत्याग्नेये वह्निपुराणे कामधेनुप्रदाननामाध्यायः॥*॥
अन्यत् वाल्मीकीयरामायणे बालकाण्डे ५३ सर्गे महाभारते १ । १०१ अध्याये च द्रष्टव्यम् ॥ * ॥

अथ कामधेनुमहादानम् ।

"अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्व्वकामफलं नृणां महापातकनाशनम् ॥
लोकेशावाहनं तद्वद्धोमकर्म्माधिवासनम् ।
तुलापुरुषवत्कार्य्यं कुशहस्तप्रवेदिकम् ॥
खल्वे होमाग्निवत् कुर्य्यात् गुरुरेव समाहितः ।
काञ्चनस्यातिमुद्गस्य धेनुं वत्सञ्च कारयेत्" ॥

धेनुं वत्सञ्चेत्यनेन धेन्वर्थोपात्तसुवर्णेनैव स्वेच्छया वत्सकल्पनमुक्तम् ॥

"उत्तमा पलसाहस्री तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ॥
अङ्गितस्त्रिपलादूर्द्धमशक्तोऽपीह कारयेत् ।
वेद्यां क्षत्वाजिनं न्यस्य गुड़प्रस्थसमन्वितम् ॥
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ।
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्" ॥
महारत्नैरित्यत्र रत्नैः ॥
"तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ।
इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम् ।
भाजनञ्चासनं तद्वत्ताम्रदोहनकन्तथा ॥
कौषेयवस्त्रद्वयसंप्रयुक्तां
दीपातपत्रामरशोभिरामाम् ।
सचामरां कुशहलिनीं सघण्टां
मणिचिकां चन्द्रकरौप्यपादाम्" ॥

मणिचिका जलमाला ।

"रसैश्च सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैश्चनेकैः ।
अजाजिकुस्तुम्बुरुधान्यकैराभि-
र्व्वितानकञ्चोपरि पञ्चवर्णम्" ।

रसैः सर्व्वैरिति लवणादिभिः षड्भिः । अजाजी जीरकः । कुस्तुम्बुरु धान्यकम् ।

"ज्ञातस्ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य सपुष्पहस्तः ।
आवाहयेत्तां गुड़धेनुमग्रे-
द्विजाय दद्यादथ दर्भपाणिः" ॥

बह्वृचरमत्स्यपुराणपुस्तकेषु गुड़धेनुमग्रेरिति पाठदर्शनात् गुड़धेनूनया लक्ष्मीरित्यादिमन्त्रपाठस्त्रात्र कर्त्तव्यः । द्विजाय दद्यादिति श्रुतेः क्षत्वैव कामधेनुर्गुरवे देया ऋत्विग्भ्यस्तु दक्षिणामात्रम् ।

"त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम् ।
तद्वाग्रसङ्गसुकृतोक्षितपातकौघः

प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ।
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतश्च कामं
त्वां कामधेनुमिति देवगणा वदन्ति ।
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः" ॥*॥

अत्र यजमानः समुपजातकामधेनुमहादानेच्छः तुलापुरुषलिखितं खड्गचर्म्ममयाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहस्तप्रापप्रतिमावहिःसर्व्वसम्भारमधिकत्वेन सुवर्णपलसहस्रनिर्म्मितामुत्तमां सुवर्णपलशतपञ्चकनिर्म्मितां मध्यमां सुवर्णार्द्धपलशतदयनिर्म्मितां कनीयसीं अशक्तौ पलपञ्चादूर्द्धं यथाशक्त्युपात्तसुवर्णघटितामुत्क्षष्टरत्नालङ्कृतां सवत्सां धेनुम् । धेन्ववस्थापनार्थं क्षत्वाजिनं गुड़प्रस्थञ्च धेन्वलङ्करणार्थं यथेच्छकाञ्चनघटितचन्द्रतिलकलक्षाटपट्टिकाकुण्डलयुगघण्टारौप्यखुरचतुष्टयस्फाटिकाक्षमालाचामराणि । धेन्वाच्छादनार्थं कौषेयवस्त्रयुगम् । धेनुपार्श्वस्थापनार्थं कुम्भाष्टकातिप्रसूरविविधफलाक्षादशधान्येक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपसामग्रीकृत्रपादुकायुगानि । धेन्वग्रतः स्थापनार्थं मधुरादिरसषट्कहरिद्रानानाविधकुसुमार्हणद्रव्यजीरकधान्याकशर्करोद्धारोत्पादयेत् । ततस्तुलापुरुषोक्तसमयानानन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानजापकास्तुलापुरुषवद्वविध्यभोजनादिकं क्षत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च कुर्य्युः । अपरदिने च यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसंकल्पपूर्णाहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च क्षतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथान्यायं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः सवत्सां धेनुं प्रधानवेदीमध्यलिखितचक्रोपरि क्षत्वाजिनमास्तीर्य्य तदुपरि गुड़प्रस्थं निधाय तत्रारोप्य पूर्व्वोक्तालङ्कारैरलङ्कृत्य कौषेयवस्त्रयुगेनाच्छाद्य धेनुपार्श्वे च पूर्णकुम्भाष्टकं नानाविधफलानि अष्टादशधान्यानि रत्ननानाविधफलमिक्षुदण्डाष्टककांस्यभाजनपट्टिकाताम्रदोहनदीपातपत्रपादुकायुगान्यारोपयेयुः । धेन्वग्रतः मधुरादिरसषट्कहरिद्राविविधपुष्पार्हणसामग्रीजीरकधान्याकशर्करोद्धारान्यारोप्य मङ्गलगीतवाद्यवन्दिघोषेषु यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वाभरणः कुशहस्तः पुण्याञ्जलिमादाय कामधेनुं प्रद-

क्षिणीकृत्य या लक्ष्मीरित्यादि देवगणा वदन्तीत्यन्तं पठित्वा कामधेनुं पुण्याञ्जलिना सम्भूय गुरवे दद्यात् । तद्यथा,ओं अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकशर्म्मणे तुभ्यं मत्स्यपुराणोक्तहिरण्यकामधेनुमहादानफलप्राप्तिकामोऽहं एतां क्षत्वाजिनन्यस्तगुड़प्रस्थारोपितां उत्कृष्टरत्नसौवर्णचन्द्रतिलकपट्टकुण्डलयुगलघण्टारौप्यखुरस्फाटिकाक्षमालाचामरालंकृतां कौषेयवस्त्रयुगाच्छादितां पूर्णकुम्भाष्टकनानाफलाष्टादशधान्यफलसहितेक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपकृत्रपादुकायुगधर्व्वरसहरिद्रानानाविधकुसुमफलजीरकधन्याकशर्करायुतां पञ्चवर्णवितानकसहितां सवाससां हिरण्यकामधेनुं ददे । गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा हिरण्यकामधेनुरियं विष्णुदैवतेति उक्त्वा यथाम्नायं कामस्तुतिं पठेत् । ततो गुर्व्वृत्विग्भ्यो दक्षिणान्दद्यात् । ओं अद्य क्षतैतद्दानदक्षिणामिमां उत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे । स्वस्तीति ब्राह्मणा ब्रूयुः । गुरुस्तु स्वस्त्ययनान्तरं धेनुपुच्छं गृह्णीयात् । ततो यजमानस्तुलापुरुषवज्ज्ञातिभ्यो दक्षिणां दत्त्वा दीनानाथादींस्तर्पयित्वा ब्राह्मणवाचनञ्च क्षत्वा त्वरया गुरवे कामधेनुं प्रतिपादयेत् । पलशताद्यूर्द्धं यथाशक्ति स्वस्यमहादानदाने तु गुरुरेव सम्पूर्णोक्तविधिना सर्व्वं ब्रह्माण्डवत् कुर्य्यात् ॥ इति हिरण्यकामधेनुमहादानं समाप्तम् । इति दानसागरः ॥

कामध्वंसी, [न्] पुं, (कामं कन्दर्पं ध्वंसयतीति । काम + ध्वंस् + णिच् + णिनिः ।) शिवः । इति हेमायुधः ॥

कामनः, त्रि, (कामयति इति । कम् + णिङ् + युच् ।) कामुकः । इत्यमरः । २ । १ । २४ ॥

कामना, स्त्री, (कम + अनुदात्तादेरिति णिङ्नात् भावे युच् टाप् च ।) इच्छा । इति हेमायुधः ॥

कामन्धमी, [न्] पुं, (कामं यथेष्टं धमति । काम + ध्मा + णिनिः । बाहुलकात् धमादेशः । निपातनात् मुमि साधुः ।) कांस्यकारः । इति जटाधरः ॥

कामपत्नी, स्त्री, (कामस्य पत्नी ।) रतिः । इति शब्दरत्नावली ॥

कामपालः, पुं, (कामान् पालयति । काम + पाल + अण् ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

कामप्रदः, पुं, (कामं कामरतिभेदं प्रददाति । काम + प्र + दा + कः ।) रतिबन्धविशेषः । यथा,—
"द्वौ पादौ स्तन्यसंलग्नौ क्षिप्त्वा शिरं भगे तथा ।
कामयेत् कामुकः प्रीत्या बन्धः कामप्रदो हि सः" ॥
इति स्मरदीपिका । (कामानां सर्व्वेषां पुरुषार्थानां प्रदः । विष्णुः । यथा महाभारते । १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)

कामफलः, पुं, (कामं यथेष्टं फलमस्य ।) महाराजाम्रवृक्षः । इति राजनिर्घण्टः ॥

कामम्, य (कमेर्णिजन्तात् असुं ।) अकामानुमतिः । इत्यमरः । ३ । ३ । १२३ । (यथा, भाकुन्तले ५ अङ्के

"महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्दर्शानामपथमपन्नष्टोऽपि भजते" ॥)
अनुमतिः। प्रकामम्। असूया। अनुगमनम्।
इति मेदिनीकरहेमचन्द्रौ ॥

कामन्दः, पुं, (कामस्य मदः उत्सवो यत्र।) चैत्री पूर्णिमा। इति चिकाण्डशेषः ॥

कामयिता, [तृ] त्रि, (कामयते। काम्+णिच्+तृच्।) कामुकः। इत्यमरः। ३। १। २४ ॥

कामरूपः, पुं, (मूलप्रकृतिर्भगवती कामरूपिणी सती यत्र देशे विराजमाना स देशस्तन्नाम्ना एव उच्यते।) स्वनामख्यातदेशः। तत्पर्य्यायः। प्राग्ज्योतिषः २। इति चिकाण्डशेषः ॥ तत्र कामगिरौ योनिपीठे कामाख्या देवी वर्त्तते। यथा।
"योनिपीठं कामगिरौ कामाख्या तत्र देवता"।
"सर्व्वत्र विरजा चाहं कामरूपे तटे तटे" ॥
इति तन्त्रचूड़ामणौ पीठमाला ॥ (अयं हि गयेशगिरिश्चिखरस्थो देशः। यदुक्तं तन्त्रे।
"कालेश्वरं श्वेतगिरिं चैत्रं नीलपर्व्वतम्।
कामरूपाभिधो देशो गयेशगिरिमूर्द्धनि" ॥
कालेश्वरं श्वेतगिरिं चैत्रं नीलपर्व्वतं यावत् ॥
अयं खलु वङ्गदेशस्य ईशानभागे आसामप्रदेशस्य पश्चिमभागे वर्त्तते ॥)

कामरूपः, त्रि, (कामं काम्यं मनोहरं रूपं यस्य।) मनोहररूपः। स्वेच्छारूपः। (यथा महाभारते। १। सुपर्णस्तुतौ २३। ६।
"कामरूपः कामगमः कामवीर्य्यो विहङ्गमः" ॥)
तथा च। मेघदूते ६।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" ॥

कामरूपिणी, स्त्री, (कामं मनोज्ञं रूपं अस्यस्याः। कामरूप+इनि+ङीप्।) अश्वगन्धाख्यः। इति राजनिर्घण्टः ॥

कामरूपी, [न्] पुं, (कामं कमनीयं रूपमस्यास्तीति। कामरूप+इनिः।) विद्याधरः। इति चिकाण्डशेषः ॥ नाट्यज्ञजन्तुः। इति राजनिर्घण्टः ॥ (कामेन स्वेच्छया रूपं धार्य्यतेनास्यस्य इनिः।) मनोज्ञरूपिणि स्वेच्छारूपिणि च त्रि। यथा,—
"सर्व्वमास्तु विचेतव्यं हरिभिः कामरूपिभिः" ॥
इति रामायणम् ॥

कामरेखा, स्त्री, (कामानां कामव्यापाराणां रेखा चिह्नं लक्षणं राजिर्वा यत्र।) वेश्या। इति शब्दमाला ॥

कामलः, पुं, स्त्री, (क्रम+णिच्+कलच्।) रोगविशेषः। काँओल कामला इति च प्रसिद्धिः। इति मेदिनी ॥ तस्य निदानसम्प्राप्ती यथा,—
"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमरक्तांसं दग्ध्वा रोगाय कल्पते" ॥
तस्य लक्षणम्।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्मुखाननः।
रक्तपीतशरीरश्च भेकवर्णो हतेन्द्रियः ॥
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः।
कामला मक्षपित्तेव कोष्ठशाखाश्रया मता।
कालान्तरात् खरीभूता क्षय्या स्यात्कुम्भकामला"॥

तस्यारिष्टलक्षणम्।
"क्षय्यापीतशरीरश्च भृशं श्यावश्च मानवः।
सरक्ताक्षिमुखच्छर्द्दिविष्मूत्रो यश्च ताम्यति ॥
दाहारुचिज्वरार्त्तानामोहसमन्वितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
इति माधवकरः ॥

कामला, पुं, (कामयते अभीष्टमस्मिन्। कम+अधिकरणे+कलच्।) वसन्तकालः। मदभूमिः। (कामं जाति रक्षतीति। काम+जा+कः।) कामुके च इति मेदिनी।

कामलता, स्त्री, (कामस्य लतेव।) प्रियङ्गुः। इति हेमचन्द्रः ॥

कामला, स्त्री पुं, (कामल+टाप्।) स्वनामख्यातरोगः। अथ पाण्डुरोगभेदस्य कामलाया निदानपूर्ब्बिकां संप्राप्तिमाह।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमरक्तांसं दग्ध्वा रोगाय कल्पते" ॥
पित्तं कटुं। दग्ध्वा संदूष्य। रोगाय कामलारूपाय। पाण्डुरोगिण एवातिशयितपित्तलसेवया कामला भवति। नायं नियमः। किन्तु कामला स्वतन्त्रापि भवति। यथा राजयक्ष्मा कासादुपेक्षिताद्भवति। नायं नियमः। किन्तु राजयक्ष्मा स्वतन्त्रापि भवति। तद्वदेषापि। *।

कामलाया लक्षणमाह।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्मुखाननः।
पीतरक्तशरीरश्च भेकवर्णो हतेन्द्रियः॥
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः"॥
हारिद्रं हरिद्रावर्णम्। पीतरक्तशरीरमस्यास्तीति। पीते रक्ते वा शरीरमस्ये यस्य सः। भेकवर्णः दृष्टभेकवर्णः। तस्या भेदानाह। "कामला मक्षपित्तेव कोष्ठशाखाश्रया मता"। एषा कोष्ठाश्रया अपरा शाखाश्रया। तत्र कोष्ठकामलामाह। "कालान्तरात् खरीभूता क्षय्या स्यात् कुम्भकामला"। कालान्तरात् खरीभूता अतिरूक्षीभूतसर्व्वधातुः। कुम्भकामला कोष्ठकामलेत्यर्थः। सा क्षय्या कष्टसाध्या। *। कुम्भकामलिनोऽरिष्टलक्षणमाह।
"हर्षरोचकहृल्लासज्वरश्लेष्मनिपीड़ितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली"॥
उभयोरपि कामलयोररिष्टलक्षणमाह।
"क्षय्यापीतशरीरश्च भृशं श्यावश्च मानवः।
सरक्ताक्षिमुखच्छर्द्दिविष्मूत्रो यश्च ताम्यति॥
दाहारुचिज्वरार्त्तानामोहसमन्वितः।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते"॥*॥

अथ कामलाचिकित्सा।
"त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः।
प्रातर्म्माक्षिकसंयुक्तः प्रीतये कामलापहः॥
अन्नेन कामलार्त्तानां श्रोत्रीहुप्पीरसौ हितः।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली॥
धात्रीलोहरजोयोनिशाक्षौद्राण्यूर्ब्बरारसाः।
जीर्णा निवारयन्त्याशु कामलामुद्गतामपि॥
कुम्भाख्यकामलायान्तु हितः कामलिको विधिः।
गोमूत्रेण पिबेत् कुम्भकामलार्त्तो हरीतकीम्॥

दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्ब्बापितमष्टवारान्।
विचूर्णजीर्णं मधुनाविरेच्य
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति भावप्रकाशः ॥ *॥
"मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम्" ॥
इति गारुड़े १८७ अध्यायः ॥
"तद्वत्पीयकगोक्षुरमूलं पीतं पयोऽन्वितम्।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा"॥
इति तत्रैव १८८ अध्यायः ॥

कामवती, स्त्री, (कामः कमनीयता अस्त्यस्याः। काम+मतुप्। मस्य वः। ङीप् च।) दारुहरिद्रा। इति राजनिर्घण्टः। (कामः कन्दर्पभावः अस्त्यस्याः। मैथुनानुरागयुक्ता स्त्री। यथा महाभारते १। आस्तीकपर्व्वणि ६७। ५।
"त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः"॥)

कामवल्लभः, पुं, (कामः कमनीयः स्पृहणीय इत्यर्थः अत एव वल्लभः प्रियः। यद्वा कामस्य कन्दर्पस्य वल्लभः। कन्दर्पप्रियवसन्तकालोद्भवत्वात् तथात्वम्।) आम्रः। इति राजनिर्घण्टः ॥

कामवल्लभा, स्त्री, (कामस्य कन्दर्पस्य वल्लभा प्रिया। कामोद्दीपकत्वात् तथात्वम्।) ज्योत्स्ना। इति राजनिर्घण्टः ॥

कामवृद्धिः, पुं, (कामस्य वृद्धिर्यस्मात्।) क्षुपविशेषः। कामण इति कर्णाटके प्रसिद्धः। तत्पर्य्यायः। स्मरवर्द्धिसंज्ञः २ मनोवृद्धिः ३ मदायुधः ४ कन्दर्पजीवः ५ जितेन्द्रियाङ्गः ६ कामैकजीवः ७ जीवसंज्ञः ८। अस्य वीर्य्यगुणाः। मधुरत्वम्। बलवर्द्धनत्वम्। कामवृद्धिवर्द्धिकारित्वम्। वङ्क्षेन्द्रियवर्द्धिदत्वञ्च। इति राजनिर्घण्टः ॥

कामवृन्ता, स्त्री, (कामं कमनीयं वृन्तं यस्याः।) पाटलावृक्षः। इति शब्दमाला ॥

कामवृक्षः, पुं, (कामं यथेच्छं बीजाद्यनपेक्षतया उत्पन्नो वृक्षः।) वन्दाकः। इति राजनिर्घण्टः ॥

कामशरः, पुं, (कामस्य कन्दर्पस्य शर इव कामोद्दीपकत्वात्।) आम्रः। इति राजनिर्घण्टः ॥

कामसखः, पुं, (कामस्य सखा। "राजाहःसखिभ्यष्टच्"। ५। ४। ९१। इति टच्।) वसन्तकालः। इति राजनिर्घण्टः ॥

कामसुतः, पुं, (कामस्य सुतः।) अनिरुद्धः। इति हेमचन्द्रः ॥

कामाख्या, स्त्री, (कामयते भक्तानां कामं पूरयति यद्वा भक्तैः साधकैः काम्यतेऽसौ इति कामा। कामा आख्या यस्याः।) देवीविशेषः। तन्नामकारणं यथा।

श्रीभगवानुवाच।
"कामार्थमागता यस्मात्त्वया सार्द्धं महागिरौ।
कामाख्या प्रोच्यते देवी नीलकूटे रहोगता॥
कामदा कामिनी कामा कान्ता कामाङ्गदायिनी।
कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते॥*॥

तत्पीठकारकं यथा,—
"अथ काले वङ्गतिथौ वर्त्तते प्राङ्मिलज्जने।

अयज्ञां दक्षतनयां भार्य्यार्थेऽहं वधूवराम् ॥
सा मेऽभूत् प्रेयसी भार्य्या प्रदाय समयं पितुः ।
अनिष्टकारी त्वद्वेत् स्याः प्राणांस्त्यक्ष्ये तदा त्वहम् ॥
ततो यज्ञे समस्तन्तु स च वव्रे चराचरम् ।
न मां नापि सतीं वव्रे तदनिष्टान्मृता तु सा ॥
ततो मोहसमापन्नस्तामादाय मृतामहम् ।
प्राप्तः पीठवरं तन्तु भ्रममाण इतस्ततः ॥
तस्यास्त्वङ्गानि पर्य्यायात् पतितानि यतो यतः ।
तत्तत् पुण्यतमं जातं योगनिद्राप्रभावतः ॥
तस्मिंस्तु कुब्जिकापीठे सत्यास्तद्योनिमण्डलम् ।
पतितं तत्र सा देवी महामाया बलीयत ॥
लीनायां योगनिद्रायां मयि पर्व्वतरूपिणि ।
स नीलवर्णः शैलोऽभूत् पतिते योनिमण्डले ॥
स तु शैलो महातुङ्गः पातालतलमाविशत् ।
तस्या आक्रमणाद्दार्ढ्यं ततस्तं द्रुहिणोऽभ्ययात् ॥
स तु पूर्व्वं ब्रह्मशक्तिशिलां धर्त्तुं चतुर्मुखः ।
शैलरूपोऽभवत्तेन शैलरूपेण मामधात् ॥
ब्रह्मा पर्व्वतरूपेण मयि पर्व्वतरूपिणि ।
संसक्तोऽधोऽगमद्गाढ़माक्रान्तो मायया विधेः ॥
ततो वराहः संसक्तो मयि मां स तु माधवः ।
शैलरूपः शैलरूपं धर्त्तुं समुपचक्रमे ॥
सोऽप्यधोऽगान्मया सार्द्धं तदा पर्व्वतरूपिया ।
आक्रम्य देवीं पृथिवीं स्थितो भुवि लिखातकः ॥
शतं शतं योजनानां तुङ्गमासीद्गिरित्रयम् ।
तदाक्रान्तं महादेव्या सर्व्वमेव ह्यधोगतम् ॥
क्रोशमात्रे स्थितं तुङ्गं शैलं तत्त्रितयस्य तु ।
एका समस्तजगतां प्रकृतिः सा यतस्ततः ॥
ब्रह्मविष्णुशिवैर्देवैर्वेष्टिता सा जगतां प्रसूः ।
तत्र पूर्व्वो ब्रह्मशैलः श्वेत इत्युच्यते बुधैः ॥
मध्यरूपधारी शैलस्तु नील इत्युच्यते तथा ।
स तु मध्यगतः शैलस्त्रिकोणोर्द्धमुखाकृतिः ॥
विभ्राजमानः सततं मध्ये ब्रह्मवराहयोः ।
वराहः शैलरूपो यः स चित्र इति कथ्यते ॥
स सर्व्वेषां स्थितः पश्चात् दीर्घः सर्व्वेभ्य एव तु ।
ऐशान्यां योऽभवत् कूर्म्मः शैलरूपो महाद्युतिः ॥
महिषवर्णः स नाम्ना तु ख्यातो देवौघसेवितः ।
योऽनन्तरूपः शैलस्तु वायव्यां समवस्थितः ॥
महिषपर्व्वतसंज्ञोऽसौ पर्व्वतो माधवप्रियः ।
महामायागिरिर्यस्तु नैर्ऋत्यां समवस्थितः ॥
स गन्धमादनो नाम्ना सर्व्वदा गह्वरप्रियः ।
वराहस्योत्तमवने यत्र स्थितौ महासुरौ ॥
हरिश्चा तत्र संजातः पुरुहूत इति स्मृतः ।
ब्रह्मशक्तिशिलायास्तु पूर्व्वभागे तु मध्यतः ॥
यस्तु पर्व्वतरूपोऽहं स तु भस्माचलाह्वयः ।
एवं पुण्यतमे पीठे कुब्जिकापीठसंज्ञके ॥
नीलकूटे मया सार्द्धं देवी रहसि संस्थिता ।
सत्यास्तु पतितं तत्र विशीर्णं योनिमण्डलम् ॥
शिलात्वमगमत् शैले कामाख्या तत्र संस्थिता ।
संस्पृश्य तां शिलां मर्त्यो ह्यमर्त्यत्वमवाप्नुयात् ॥
अमर्त्यो ब्रह्मसदनं तत्स्थो मोक्षमवाप्नुयात् ।
तस्याः शिलाया माहात्म्यं यत्र कामेश्वरी स्थिता ॥
अदृश्यं यस्य गुह्ये तु लोहं भस्म भवेदृतम् ।

सा चापि प्रलयं तत्र पञ्चमूर्त्तिधरा भवेत् ॥
मोहार्थं सर्व्वलोकानां ममापि प्रीतये शिवा ।
अहं पञ्चमुखेनात्तु पञ्चभागे व्यवस्थितः ॥
ईशानः पूर्व्वभागस्थः कामेश्वर्य्याः प्रधानतः ।
ऐशान्यां वै तत्पुरतो ह्यघोरस्तस्य सन्निधौ ॥
सद्योजातोऽथ वायव्यां वामदेवस्तु सङ्गतः ।
देव्याश्चापि नरश्रेष्ठ पञ्चरूपाणि भैरव ! ॥
गृह्णातु वेताल ! गुह्यानि देवैरपि सदैव हि ।
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा ॥
सारदाथ महोत्साहा कामरूपगुणैर्युता ।
मयि लिङ्गत्वमापन्ने शिलायां योनिमण्डले ॥
सर्व्वे शिलात्वमगमन् शैलरूपाश्च निर्ज्जराः ।
यथाहं निजरूपेण रेमे वै सह कामया ॥
शिलारूपप्रतिच्छन्नास्तदा सर्व्वास्तु देवताः ।
शिलारूपप्रतिच्छन्नाः शैले शैले व्यवस्थिताः ॥
रमन्ते च स्वरूपेण नित्यं रहसि संस्कृताः ।
ब्रह्माविष्णुरहस्यात्र दिक्पालाः सर्व्व एव ते ॥
अन्येऽप्यत्र स्थिता देवाः सानुकूलाः सदा मयि ।
उपासितुं तदा देवीं कामाख्यां कामरूपिणीम् ॥
नीलशैलस्त्रिकोणस्तु मध्ये निम्नः सदाशिवः ।
तन्मध्ये मण्डलं चारु यन्त्रशक्तिसमन्वितम् ॥
गुहा मनोभवा तत्र मनोभवविनिर्म्मिता ।
योनिरूपास्थां शिलायान्तु शिलारूपा मनोहरा ॥
वितस्तिमात्रविस्तीर्णा एकविंशाङ्गुलायता ।
क्रमसूक्ष्मविनिर्म्माणभस्मशैलानुगामिनी ॥
सिन्दूरकुङ्कुमाराक्ता सर्व्वकामप्रदायिनी ।
तस्यां योनौ पञ्चरूपा नित्यं तिष्ठति कामिनी ॥
महामाया जगद्धात्री मूलभूता सनातनी ।
तत्राष्टौ योगिनीर्नित्यं मूलभूताः सनातनीः ॥
पूर्व्वोक्ताः शैलपुत्र्याद्याः स्थिता देव्याः समन्ततः ।
तासान्तु पीठनामानि शृणु चैकत्र भैरव ! ॥
गुप्तकामा च श्रीकामा तथा च विन्ध्यवासिनी ।
कटीश्वरी धनश्या तु पाददुर्गा तथापरा ॥
दीर्घेश्वरी क्रमादेव प्रकटा भुवनेश्वरी ।
खयोगिन्यः पीठनाम्ना ख्याता अष्टौ च देवताः ॥
सर्व्वतीर्थानि चैकत्र जलरूपाणि भैरव ! ।
स्थितानि नाम्ना सौभाग्या वरेण्या प्राणिपुण्यदा ॥
विष्णुस्तु तीरे तस्याः स नाम्ना कमल इत्युत ।
कामुकायान्तु वटुकः कामाख्याभ्यर्णसंस्थितः ॥
लक्ष्मीः सरस्वती देव्यौ देव्या अङ्के व्यवस्थिते ।
जलिताख्याऽभवल्लक्ष्मीर्मातङ्गी तु सरस्वती ॥
गयाध्यक्षः पूर्व्वभागे तस्य शैलस्य संस्थितः ।
सिद्धः स नाम्ना विख्यातो हरि देव्याः प्रियः सुतः ॥
कल्पवृक्षः कल्पवल्ली तिन्तिड़ी चापराजिता ।
भूतास्तस्मिन्महाशैले स्थिते देव्या धृतप्रिये ॥
वराहः पाण्डनाथाख्यः स्थितस्तत्र हरिर्यतः ।
जघने शिरसी कृत्वा जघान मधुकैटभौ ॥
तस्यासन्ने ब्रह्मकुण्डं ब्रह्मणा निर्म्मितं पुरा ।
ईशानाख्यं शिरोरत्नं तत् सिद्धेश्वरसंज्ञकम् ॥
शिलारूपं सिद्धकुण्डं मध्यस्थं विद्धि भैरव ! ।
तस्यासन्न गयातीर्थं तीर्थं वाराणसी तथा ॥
योनिमण्डलसङ्काशं कुण्डं भूत्वा व्यवस्थितम् ।

तत्रैवास्तकुण्डन्तु सुधासंघप्रपूरितम् ॥
मम प्रियार्थमिन्द्रेण स्थापितं सह निर्ज्जरैः ।
वामदेवाङ्कयं श्रीमं श्रीकामेश्वरसंज्ञकम् ॥
कामकुण्डं महापुण्यं तस्यासन्ने व्यवस्थितम् ।
केदारसंज्ञकं क्षेत्रं मध्यस्थं सिद्धकामयोः ॥
दीर्घं चतुर्हस्तमानं छायाच्छत्राङ्कयं तु तत् ।
तस्यासन्ने शैलपुत्री गुप्तकामाङ्कया तु सा ॥
गुप्तकुण्डस्य मध्यस्था कामेशग्न्याख्या सङ्गता ।
कामेश्वरशिलासङ्गा कामाख्यासंज्ञिता सदा ॥
पूर्व्वभागेन संसक्ता योनेस्तु परभागतः ।
कामकामाख्ययोर्म्मध्ये कालरात्रिर्व्यवस्थिता ॥
पीठे दीर्घेश्वरी नाम्ना सीमाभागे प्रचण्डिका ।
कामाख्या प्रस्तरप्रान्ते कुब्जाख्डी नाम योगिनी ॥
पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता ।
यच्चाधोराङ्कयं श्रीमं तत् कामायास्तु दक्षिणे ॥
पीठे भैरवनामा तु गीयते परमर्षिभिः ।
वामुण्डाभैरवी नाम्ना भैरवासन्नसंस्थिता ॥
नायिका कामदा भक्ते चण्डमुण्डविनाशिनी ।
कामाभैरवयोर्म्मध्ये स्वयं देवी सुरापगा ॥
हिताय सर्व्वजगतां देव्यास्तु प्रीतये स्थिता ।
सद्योजाताङ्कयं श्रीमं पीठे त्वाम्रातकेश्वरम् ॥
भैरवाख्ये गह्वरे तु स्थितं देवर्षिसेवितम् ।
विद्धि तत्रैव दुर्गाख्यां नायिकां योगरूपिणीम् ॥
सिद्धकामेश्वरी नाम्ना ख्याता देवेषु नित्यशः ।
अजीर्णपत्रः सच्छायो वृत्तस्तत्र तु संस्थितः ॥
आम्रातकः कल्पवृक्षः कल्पवल्लीसमन्वितः ।
पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता ॥
आम्रातकस्य निकटे मम प्रीतिविवृद्धये ।
पुष्कराख्यन्तु तत् क्षेत्रं पीठे त्वाम्रातकाङ्कयम् ॥
ऐशान्यां तत्पुरुषाख्यं मम श्रीमं व्यवस्थितम् ।
भुवनेश्वरनाम्ना तु पीठे ख्यातश्च भैरव ! ॥
गह्वरं भुवनेशस्य भुवनानन्दसंज्ञकम् ।
तस्यासन्ने तु सुरभिः शिलारूपेण संस्थिता ॥
कामधेनुरिति ख्याता पीठे कामप्रदायिनी ।
योऽसौ सरभमूर्त्तिर्म्मे मध्यखण्डः प्रचण्डकः ॥
महाभैरवनामाभूत् कोटिलिङ्गाङ्कयस्तु सः ।
मूर्त्तिभिः पञ्चभिः पञ्चभागेषु सममास्थितः ॥
अहं प्रसादतिप्रीत्या भैरवाख्यः स्थितोऽधरे ।
महागौरी तु या देवी योगिनी सिद्धरूपिणी ॥
सा ब्रह्मपर्व्वते चास्ते शिलारूपेण चोर्द्धतः ।
सतीवरूपसम्पन्ना नाम्ना सा भुवनेश्वरी ॥
यत्र ब्रह्मा तु संसक्तो मयि पर्व्वतरूपिणि ।
कल्पवल्ली तु तत्रास्ते नाम्ना सा त्वपराजिता ॥
कामधेनोरदूरस्था पूर्व्वभागे महेश्वरी ।
श्रीकामाख्या योनिरूपा चण्डिका सा तु योगिनी ॥
आमेय्यां विद्धि तां संस्थां सर्व्वकामप्रदां शुभाम् ।
योगिनी चण्डघण्टाख्या पीठेऽभूत् विन्ध्यवासिनी ॥
योगिनी स्कन्दमाता तत्पीठेऽभूदनवासिनी ।
कात्यायनी पीठनाम्ना पाददुर्गेति गद्यते ॥
नैर्ऋत्यां नीलशैलस्य प्रान्ते सा संस्थिता शिवा ।
योऽसौ नन्दी मम तनुः स तु पाषाणरूपधृक् ॥
संस्थितः पश्चिमद्वारि हनूमान् पीठगामतः" ॥ *॥

कामाख्या

श्रीऔर्व्व उवाच ।
"इति तस्य वचः श्रुत्वा शम्भोरमिततेजसः ।
भैरवस्तं तु पप्रच्छ वेतालोऽपि ससुत्सुकः" ॥
श्रीवैतालभैरवावूचतुः ।
"श्रुतः पीठक्रमस्तात देव्याः पूजाक्रमस्ततः ।
श्रोतुमिच्छामि मूर्त्तीनां पञ्चानामपि शङ्कर ! ॥
रूपाणि पञ्चमूर्त्तीनां मन्त्राणि च समन्ततः ।
तथा यन्त्राणि तन्त्राणि वद नौ वृषभध्वज !" ॥
ईश्वर उवाच ।
"शृणु वक्ष्यामि वेताल मन्त्रं तन्त्रं पृथक् पृथक् ।
कामाख्यापञ्चमूर्त्तीनां रूपं कल्पञ्च भैरव ! ॥
कामस्यं काममध्यस्यं कामदेवपुटीकृतम् ।
कामेन कमयेत् कामी कामं कामे नियोजयेत् ॥
व्येष्ठन्तु व्यञ्जनं ब्रह्म न परः शान्त उच्यते ।
प्रथमं क्रमतः कुर्य्यात् तत्संसक्तं सुधामयम् ॥
प्रजापतिस्तथा शुक्रबीजसंस्थादिसंयुतम् ।
चन्द्रार्द्धसहितं बीजं कामाख्यायाः प्रचक्षते ॥
इदं धर्म्मप्रदं काममोक्षार्थानां प्रदायकम् ।
इदं रहस्यं परममन्यत्र तु सुदुर्लभम् ॥
श्रोत्रेणेदं यः शृणुयाद्भक्त्या श्रद्धान्वितोत्तमः ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥*॥
"श्रुतिसकलितसारं देवकण्ठौघहारं
सकलकलुषहारि श्रीधरामर्त्यकारि ।
सुनयसुभयशोभिर्योजयेद्यस्तु गोभि-
स्तदिह शिवसमस्तं विघ्नधर्म्माङ्कितास्तम् ॥
नयनकलितकारि ध्यानिनां दत्तपारि
प्रणयसुनयसंस्थं देवमत्यादिकस्थम् ।
परमपदविशीर्णं शुद्धदौर्भाग्यजीर्णं
शृणु शिवपदरूपं कामदेव्याः स्वरूपम् ॥
श्रवणगमनमात्रान्मार्गितं यस्य नाम
प्रभवति बहुभूत्यै नीतिमार्गैकधाम ।
सुरगणगणसंघा कुण्डली यस्य शक्ति-
स्तदिह परमरूपं चिन्तनीयं कृतीशैः ॥
रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरवरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शुभहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
स्मितसुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री क्षेत्रवक्त्रा सुकेशी
दलितकरकदम्बा सासिचन्द्रावतम्बा ।
मनसिजशरदिष्टा योनिमुद्रां वहन्ती
पवनचलनशक्ता संश्रुतस्थानभागा ॥
चिन्त्या चैवं विद्युदग्निप्रकाशा
धर्म्मार्थाद्यैः साधिता वाञ्छितार्थैः ।
कथ्यं तन्त्रं शृणिदं सम्यगर्थं
वेतालत्वं भैरवत्वं प्रतिष्ठम् ॥
तस्मिन्नाद्यं मण्डलं विद्धि पश्चात्
कार्य्यं तद्वै चन्दनैः पुष्पगन्धैः ।
तत्पर्य्यन्ते लेखने पूर्व्वमुक्तो

कामान्धः

देवीतन्त्रे सोऽत्र पूर्व्वं विधेयः" ॥
इति श्रीकालिकापुराणे ६१ अध्यायः ॥
कामाग्निसन्दीपनमोदकं, क्ली, (सन्दीप्यते अनेनेति सन्दीपनम् । कामाग्नीनां सन्दीपनमुद्दीपकम् । कामाग्निसन्दीपनञ्च तत् मोदकञ्चेति ।) औषध-विशेषः । यथा,—
"कर्षौ रसो गन्धकमभ्रकञ्च
द्वित्रारचित्रे लवणानि पञ्च ।
शृटी यमानीद्वयकीटहारि
तावीशपत्राण्यपरं द्विकर्षम् ॥
जीरं चतुर्ज्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सदड्दारं कटुकत्रयञ्च
तथा चतुःकर्षमितं निबोध ॥
धन्याकयष्टीमधुकं कषेण-
कर्षाः पृथक् पञ्च वरी विदारी ।
वरेभकर्णोभवलात्मगुप्ता-
बीजं तथा गोक्षुरबीजयुक्तम् ॥
सबीजपत्रेन्द्ररजःसमानं-
समाक्षिता क्षौद्रहृतञ्च तुल्यम् ।
कर्षैकमिन्दोरथमोदकं तत्
कामाग्निसन्दीपनमेतदुक्तम्" ॥ * ॥
"अन्यं ततः परतरं नृतनं न दृष्ट-
मेनं निषेव्य मनुजः प्रनंदासहस्रम् ।
गच्छन्न लिङ्गशिथिलत्वमवाप्नुयाच्च
नागाधिपं विजयते बलतः प्रमत्तः ॥
कान्या ऊताग्रनमपि स्खलतो मयूरान्
वाहं यवेन नयनेन महाविहङ्गम् ।
वातानलीतिमथपित्तगदं समग्रं
श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम् ॥
दुर्म्नामकामजभगन्दरपाण्डुरोग-
मेहातिसारशमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलाश्मपित्तसहितांश्चिरजान् समस्तान् ॥
हत्वा गदानपि च तत् पुनरत्वकारि
सर्व्वर्त्तुपथ्यमथ सर्व्वसुखप्रदायि ।
हृद्यं बलीपलितहारि रसायनं स्यात्
श्रीमूलदेवकथितं परमं प्रशस्तम्" ॥
इति भैषज्यरत्नावली ॥
कामाङ्गुशः, पुं, (कामे कामोद्दीपने अङ्गुश इव । नखाघातेन कामोद्दीपनादस्य तथात्वम् ।) नखः । इति चिकाण्डशेषः ॥ (कामस्य अङ्गुश इव ।) शिश्नः । इति जटाधरः ॥
कामाङ्गः, पुं, (कामं कामोद्दीपकं अङ्गं सुकुमारं यस्य ।) आम्रवृक्षः । इति जटाधरः ॥
कामातुरः, त्रि, (कामेन आतुरः ।) कामार्त्तः । यथा ।
"अर्थोलाघवमुच्छ्रितो निपतनं कामातुरो लाम्पटम्" ॥ इति नवरत्नमध्ये धन्वन्तरिः ॥
कामान्धः, पुं, (कामेन अन्धयति निजध्वनिजनित-मन्मथोद्दीपनेन हतज्ञानं करोतीति । काम + अन्ध + णिच् + अच् ।) कोकिलः । इति राज-निर्घण्टः ॥ (कामेन अन्धः । स्मरान्धः । कामवेगेन

कामिनी

कर्त्तव्यताज्ञानशून्यः ॥)
कामान्धा, स्त्री, (कामं यथेष्टं अन्धयति । अन्ध + णिच् + अच् + टाप् ।) कस्तूरी । इति राजनिर्घण्टः । (स्मरेण अन्धा । कर्त्तव्यज्ञानशून्या । प्रगल्भा-नायिकाविशेषः । यथा, साहित्यदर्पणे ३ । ७० ।
"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीड़ा प्रगल्भाश्चान्तनायका" ॥
अस्या उदाहरणं यथा तत्रैव ।
"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि" ॥)
कामायुः [स्] पुं, (कामं यथेष्टं आयुर्यस्य ।) गवयः । इति चिकाण्डशेषः ॥
कामायुधः, पुं, (कामस्य आयुधमिव मुकुले आकारो-ऽस्ति अस्य । अर्श आदित्वात् अच् ।) महा-राजचूतः । आम्रः । इति राजनिर्घण्टः ॥ काम-देवास्त्रे क्ली ॥
कामारण्यं क्ली, (कामं मनोहरं अरण्यम् ।) मनोज्ञ-वनम् । इति शब्दमाला ॥
(कामस्य अरण्यमिति विग्रहे कन्दर्पवनम् ॥)
कामारिः, पुं, (कामस्य अरिः ।) विटमाल्लिकधातुः । इति हेमचन्द्रः ॥ महादेवः कन्दर्पनाशकत्वात् ॥
कामार्त्तः, त्रि, (कामेन ऋतः ।) कामपीड़ितः । कामातुरः । यथा, मेघदूते ५ ।
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" ॥
कामालुः, पुं, (कामं यथेष्टं अलति पुष्पविकाशेन पर्य्याप्नोतीति । अल पर्य्याप्तौ + उण् ।) रक्तका-ञ्चनवृक्षः । इति शब्दचन्द्रिका ॥
कामावसायिता, स्त्री, (कामेन स्वेच्छया अवसाययति सर्व्वाणि अविद्याबासनाजालानि । काम + अव + सो + णिच् णिनि ततो भावार्थे तल् ।) कामान् स्वेच्छया अवसाययितुं शीलमस्य कामावसायी तस्य भावः । इति सारसुन्दरी ॥ शिवस्यामिमा-दयैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इत्यमरः शब्द-रत्नावली च ॥ सा तु सत्त्वसङ्ख्यता ॥ (अष्टैश्व-र्य्याणि यथा,
"अणिमा लघिमा व्याप्तिः प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)
कामावसायित्वं, क्ली (कामावसायिनो भावः । त्व-प्रत्ययः ।) कामावसायिता । इति हेमचन्द्रः ॥
कामिः, पुं, (कामयते इति । कम् + णिच् + इञ् ।) कामुकः । स्त्यां स्त्री । इति मेदिनी ॥
कामिकः, पुं, (कामः अस्त्यस्य ठन् ।) कारण्डवपक्षी । इति शब्दरत्नावली ॥ (कामेन निर्वृत्तम् । ठन् । कामनिर्वृत्तकर्म्मणि क्ली । यथा, महाभारते अनुशासनपर्व्वणि ।
"देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति" ॥)
कामिनी, स्त्री, (अतिशयेन कामः अस्या अस्ति इति । काम + इनिः + ङीप् ।) अतिशयकामयुक्ता नारी । इत्यमरः । २ । ६ । ३ । (यथा, मनुः ८ । ११२ ।
"कामिनीषु विवाहेषु गवाञ्चैव यवेन्धने ।

ब्राह्मणाभ्युपपत्तौ च ग्रपघे नास्ति पातकम्" ॥) भीरवी। वन्दा। इति मेदिनी ॥ दारुहरिद्रा। मदिरा। स्त्रीसामान्यम्। इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशती २७०।

"कर्णं इव कामिनीनां न ग्रोभते निर्भरः प्रेमा"॥)

कामिनीग्रः, पुं, (कामिन्याः कामिनीप्रियाङ्गनस्य ईग्रः तत्साधनत्वात्।) ग्रोभाञ्जनवृक्षः। इति ग्रब्दचन्द्रिका ॥

कामी, [न्] पुं, (अतिग्रयेन कामयते। कम + णिच् + णिनिः।) चक्रवाकः। पारावतः। कामुकः। इति मेदिनी ॥ (यथा, मेघदूते। ७४।

"सभ्रूभङ्गं प्रहितनयनैः कामिनश्चेष्वमोघैः" ॥)

घटकः। इति ग्रब्दरत्नावली ॥ चन्द्रः। इति त्रिकाण्डग्रेषः ॥ ऋषभौषधिः। सारसपक्षी। इति राजनिर्घण्टः ॥ (सर्व्वकामवत्त्वात् विष्णुः। यथा, महाभारते १३। १४६। ८३।

"कामदेवः कामपालः कामी कान्तः कृतागमः" ॥)

कामीकः, पुं, (कामनमुत्पद्यते इति खः। एषोदरादित्वात् साधुः।) रामशुक्लकः। इति त्रिकाण्डग्रेषः ॥ (कामीन इत्यपि दृश्यते ॥)

कामुकः, त्रि, (कामयते इति। "लषपतपदेत्यादिना"। ३। २। १५४। उकञ्।) कामी। तत्पर्य्यायः। कमिता २ अनुकः ३ कम्यः ४ कामयिता ५ अभीकः ६ कामनः ७ कामनः ८ अभिकः ९। इत्यमरः। ३। १। २०॥ (यथा, भागवते ९। २३। १७।

"दुष्यन्तः स पुनर्भेजे स्ववंग्रं राज्यकामुकः" ॥)

कामुकः, पुं, (कम + उकञ्।) अग्नीकवृक्षः। अतिमुक्तकलता। इति मेदिनी ॥ घटकः। इति राजनिर्घण्टः ॥

कामुककान्ता, स्त्री, (कामुकानां कान्ता प्रिया।) अतिमुक्तकलता। इति राजनिर्घण्टः ॥

कामुका, स्त्री, (कम + उकञ् + स्त्रियां टाप्। न ङीप्।) धनादीच्छाविग्रिष्टा। तत्पर्य्यायः। इच्छावती २। इत्यमरः। २। ६। ९॥

कामुकी, स्त्री, (कम + उकञ् + "नागपदकुग्रेति"। ४। १। ४२। ङीष्।) मैथुनेच्छावती। तत्पर्य्यायः। इच्छन्ती २। इत्यमरः। २। ६। ९॥ (यथा, नैषधे १९। २४।

"अग्निग्रभवदनुरागादेनं जनः खलु कामुकी सुभगमभिधास्यत्युद्दामापराङ्गवदावदः" ॥)

कामेश्वरी, स्त्री, (काम्यन्ते इति कामा विषयास्तेषां भोग्यानां प्रदायित्वेन ईश्वरी।) कामाख्यापीठमूर्त्तेरन्तर्गतमूर्त्तिविग्रेषः। यथा,—

"देव्याग्रापि नरग्रेष्ठ! पञ्च रूपाणि भैरव!। ग्रृणु वेताल! गुह्यानि देवैरपि सदैव हि॥
कामाख्या त्रिपुरा चैव तथा कामेश्वरी ग्रिवा। सारदाग्र महोत्साहा कामरूपनिवासिनी" ॥
इति कालिकापुराणे ६१ अध्यायः ॥ * ॥

अस्या मन्त्रं यथा, श्रीभगवानुवाच।

"देव्याः कामेश्वरीं मूर्त्तिं ग्रृणु वक्ष्यामि भैरव!। यस्याश्चिन्तनमात्रेण साधको जायते प्रियान्॥
तन्त्रं तस्याः प्रथमतस्ततोऽनुध्यानगोचरम्। ततः पूजाक्रमं वक्ष्ये क्रमादेतालभैरव!॥
प्रणवस्तिसृतो वह्निरिन्द्रवीजं ततः परम्॥
चूड़ाचन्द्रार्द्धसहितं चतुर्थस्वरसंयुतम्।
इदं कामेश्वरीमन्त्रं सर्व्वकामार्थसाधनम्" ॥ * ॥

तस्या ध्यानं यथा,—

"रूपन्तु चिन्तयेद्देव्याः कामेश्वर्य्या मनोहरम्। प्रभिन्नाञ्जनसंकाग्रां नीलस्निग्धग्रिरोरुहाम्॥
वक्त्रञ्च द्वादग्रभुजां ग्रग्दाद्यग्रविलोचनाम्। प्रत्येकं षट्सु ग्रीर्षेषु चन्द्रार्द्धकृतग्रेखराम्॥
मणिमुक्तादिमाणिक्यलतां मालामुरःस्थले। कण्ठे च बिभ्रतीं नित्यं सर्व्वालङ्कारमण्डिताम्॥
पुस्तकं सिद्धसूत्रञ्च पद्मवाग्वरं तथा। खड्गं ग्रक्तिञ्च शूलञ्च बिभ्रतीं दक्षिणैः करैः॥
ग्रङ्खमालां महापद्मं कोदण्डाभयं तथा। चर्म्म पश्चात् पिनाकञ्च बिभ्रतीं वामपाणिभिः॥
शुक्लं रक्तञ्च पीतञ्च हरितं ग्यामलं च। विचित्रं क्रमतः ग्रीर्षं ऐग्नान्यां पूर्व्वमेव च॥
दक्षिणं पश्चिमञ्चैव तथैवोत्तरग्रीर्षकम्। मध्यञ्चेति महाभाग! क्रमात् ग्रीर्षाणि वर्णतः॥
शुक्लं माहेश्वरीवक्त्रं कामाख्यारक्तमुच्यते। त्रिपुरापीतसंकाग्रं सारदाहरितं तथा॥
ग्यामं कामेश्वरीवक्त्रं चण्डायाश्चित्रमिष्यते। धम्मिल्लसंयतकचं प्रतिग्रीर्षं प्रकीर्त्तितम्॥
सिन्दूरपरिसिक्तप्रेतं तस्मिंल्लोहितपङ्कजम्। कामेश्वरी स्थिता तत्र ईषत्प्रहसितानना॥
विचित्रांशुकसंप्रीता व्याघ्रचर्म्माम्बरा तथा। एवं कामेश्वरीं ध्यायेदधर्म्मकामार्थसिद्धये" ॥
इत्यादि कालिकापुराणे ६२ अध्यायः ॥

कामोदकं, क्ली, (कामेन स्वेच्छया दत्तं उदकम्।) मतोदेग्ये स्वेच्छया दत्तोदकम्। इति मिताक्षरा।

कामोदा, स्त्री, (कुत्सितो मोदो यस्याः। सहृदयमनोहरत्वाभावात्।) रागिणीविग्रेषः। इति हलायुधः ॥

काम्पिल्यः, पुं, (कम्पिलः नदीविग्रेषः तस्य अदूरे भवः ग्यञ्।) काम्पिल्यदेग्यः। इति ग्रब्दरत्नावली ॥ (अयन्तु पाञ्चालस्य दक्षिणांग्रे वर्त्तते। इति हरिवंग्रः ॥)

काम्पिल्यः, पुं, (कम्पिल + ज्ञातार्थे ष्यञ्।) गुग्गारोचनीनामसुगन्धिद्रव्यम्। इत्यमरटीकायां भरतः॥ (कम्पिलाया अदूरे भवः इति सङ्गग्रादित्वात् ग्यञ्।) उत्तरदेग्यविग्रेषः। इति ग्रब्दरत्नावली ॥ (यथा, महाभारते। १। १३९। ६८।

"माकन्दीमथगङ्गायास्तीरे जनपदायुताम्। सोऽध्यवात्सीत् दीनमनाः काम्पिल्यञ्च पुरोत्तमम्। दक्षिणाञ्चापि पाञ्चालान् यावच्चर्म्मण्वती नदी" ॥)

काम्पिल्लः, पुं, (काम्पिल्य + ग्यञ् निपातनात् साधुः।) गुग्गारोचनी। कमलागुँड़ी इति भाषा। इत्यमरः। २। ४। १४६ ॥ तस्य रूपान्तराणि कम्पिल्लः। कम्पीलः। कम्पिलः। काम्पिल्यः। इति भरतः ॥

काम्पिल्लका, स्त्री, (काम्पिल्ल + स्वार्थे कन् टाप् च।) काम्पिल्लः। इति ग्रब्दरत्नावली ॥ (क्वचित् क्लीवेऽपि दृग्यते। यथा सुग्रुते सूत्रग्थाने ४५ अः।

"चूर्णं काम्पिल्लकं वापि तत्पीतं गुटिकाकृतम्"।)

काम्पीलः, पुं, (काम्पिल + ग्यञ् निपातनात् साधुः।) काम्पिल्लः। इति ग्रब्दरत्नावली ॥ ("देवीं काम्पीलवासिनीम्"। इति यजुर्व्वेदे ॥)

काम्पीलकः पुं, (काम्पील + स्वार्थे कन्।) काम्पिल्लः। इति रत्नमाला ॥

काम्बलः, पुं, (कम्बलेनाहृतः। कम्बल + ग्यञ्।) कम्बलाहृतरग्यः। इत्यमरः। २। ८। ५३ ॥

काम्बविकः, पुं, (कम्बुः ग्रङ्खं भूग्यत्वेन ग्रिल्पमस्य ठक्।) ग्रङ्खकारः। इत्यमरः। २। १०। ८। गाँखारी इति भाषा ॥

काम्बुका, स्त्री, (कुत्सितं अम्बु यस्याः कम्। कोः कादेग्यः।) अम्लगन्धा। इति रत्नमाला ॥

काम्बोजः, पुं, (कम्बोजदेग्ये भवः इति। ग्यञ्।) कम्बोजदेग्यजघोटकः। इत्यमरः। २। ८। ४५ ॥ सोमवल्कः। पुन्नागवृक्षः। इति मेदिनी ॥ (कम्बोजः अभिजनो यस्य सिग्ध्वादित्वात् ग्यञ्।) म्लेच्छजातिविग्रेषः। स तु यवनतुल्यः सगररालेनास्य सर्व्वग्मिरोमुण्डनं कृतम्। यथा। हरिवंग्रे।

"अर्द्धं शकानां ग्मिरसो मुण्डयित्वा व्यसर्ज्जयत्। यवनानां ग्मिरः सर्व्वं काम्बोजानां तथैव च"।

काम्बोजी, स्त्री (कम्बोजेषु भवः कच्छादित्वात् ग्यञ् ङीप्।) माषपर्णी। माषाणी इति भाषा। इत्यमरः २। ४। १९८। वज्रवल्लखदिरः। इति मेदिनी। पापिड़ि खएर इति भाषा। गुञ्जा। कुँच इति भाषा। वाकुची। हाकुच् इति भाषा। इति राजनिर्घण्टः ॥

काम्यं, त्रि, (काम्यते इति। कम् + णिच् + कर्म्मणि यत्।) कमनीयम्। सुन्दरम्। इति हेमचन्द्रः ॥ ("काम्यानां खण्डनार्थञ्च दोषघातार्थमेव च। अतः काम्यं नैमित्तिकं प्रायश्चित्तमिति स्थितिः"। इति जाबालः ॥) कामनायुक्तव्यक्तिः। कर्त्तव्यकर्म्म। यथा, मुग्धबोधटीकाग्रामतर्कवागीग्वृद्धता स्मृतिः

"यत् किञ्चित् फलमुद्दिग्य यज्ञदानजपादिकम्। क्रियते कायिकं यच्च तत्काम्यं परिकीर्त्तितम्" ॥

काम्यदानं, क्ली, (काम्यञ्च तत् दानञ्चेति।) कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनी दानं कामनया वा दानं। इति भरतः ॥ तत्पर्य्यायः। प्रवारणम् २। इत्यमरः। २। २। ३ ॥ (यथा, गरुड़पुराणे।

"अपत्यविजयैश्वर्य्यस्वर्गार्थं यत्प्रदीयते। दानं तत् काम्यमाख्यातं ऋषिभिर्धर्म्मचिन्तकैः"॥)

कायं, क्ली, मनुष्यतीर्थम्। इति मेदिनी ॥ (कः प्रजापतिर्दैवतास्य। "कस्येत्"। ४। २। २५। इत्यण् इदन्तादेग्यञ्च ततः आदिवृद्धिः।) प्राजापत्यतीर्थम्। तच्च खल्वांङ्गुल्योर्मूलम्। कनिष्ठानामिकयोरधोभाग इति यावत्। इत्यमरभरतौ ॥ (यथा मनुः २। ५९।

"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूले ऽग्रे दैवं पित्र्यं तयोरधः" ॥)

कायः, पुं, (कः ब्रह्मास्य देवता "कस्येत्"। ४। २।

२५ । इत्यण् । इदन्तादेशश्च । यस्येतिलोपात् परश्चादादिर्हिः कदैवतम् । स तु ब्राह्मतीर्थम् । (कायति प्रकाशते इति चच् ।) मूर्त्तिः ।
("कायः सन्निहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्व्वमुत्पादि भङ्गुरम्" ॥
इति हितोपदेशः ॥) संघः । लक्ष्यः । स्वभावः । इति मेदिनी ॥ प्राजापत्यविवाहः । इति स्मृतिः ॥ (यथा मनुः ३ । ३८ ।
"आर्षेगवाजः सुतस्त्रीन्
षट् षट् कायोऽजः सुतः" ॥)
अस्य लक्ष्यं उदाहरणशब्दे द्रष्टव्यम् ॥ मूलधनम् । यथा,—नारदः ।
"कायविरोधिनी ग्रस्यत् पणार्द्धाद्या तु कायिका" ॥
कायमानं, क्ली, (कायस्य मानमिव मानमस्य ।) द्रव्यकुटीरः । इति त्रिकाण्डशेषः ॥
कायवलनं, क्ली, (कायो वल्यते आच्छाद्यते अनेन । वलस्तृतौ करणे ल्युट् ।) कवचम् । इति हारावली । ७२ ॥
कायस्थः, पुं, (कायेषु सर्व्वभूतशरीरेषु अन्तर्यामितया तिष्ठतीति । काय + स्था + कः ।) परमात्मा । (यथा उत्तरगीतायाम् ।
"कायस्थोऽपि न कायस्थः कायस्थोऽपि न जायते ।
कायस्थोऽपि न भुञ्जानः कायस्थोऽपि न बध्यते" ॥
काये ब्रह्मकाये तिष्ठतीति । काय + स्था + कः ।) नरजातिविशेषः । इति मेदिनी ॥ तत्पर्य्यायः । कूटस्थत् २ पङ्क्तीकरः ३ । इति त्रिकाण्डशेषः ॥ करणः ४ पङ्क्तिकारकः ५ । इति जटाधरः ॥ तस्योत्पत्त्यादिर्यथा* ।

श्रीहर उवाच ।
"भूयश्चेदं प्रवक्ष्यामि वगश्चेति मनूत्तमम् ।
यस्य ग्रहणमात्रेण कायस्थो विप्रसेवकः ॥
पार्व्वत्युवाच ।
अतीव चित्रं ब्रूमो ! त्वमुक्तवानावयोरपि ।
शूद्रात् कनीयसी जातिरभवद्विप्रसेवकः ॥
श्रोष्याम्यादौ हि कायस्थवृत्तान्तं ब्रूहि विस्तरात् ।
कायस्थः क्षत्त्रविट्शूद्रान्वते विप्रार्चकः कथम् ॥
केन प्रकारेण च वा वगश्चेति गृहीतवान् ।
ततश्च सिद्धविद्यार्था वगणाया वरेश्वर ! ॥
श्रोष्यामि महिमानञ्च साधनं त्वत्त एव हि ॥
हर उवाच ।
ब्रह्मपादांशतो जन्म यातः कायस्थनामभृत् ।
ककारं ब्राह्मणं विद्यादाकारं नित्यसंयुतम् ।
यत्तु निकटं ज्ञेयं तत्र काये हि तिष्ठति ।
कायस्थोऽतः समाख्यातो मसीग्रं प्रोक्तवांश्च यम् ॥
जीवेच्छये भृगुपदे जन्मलाभात् शोभना श्रियः ।
गृहत्व शूरता किञ्चिदनेकप्रतिपालकत्वं ॥
जन्मावधि द्विजार्चायां मतिरेव निरन्तरम् ।
कुशासनादि सकलं गृहीत्वा मस्तकोपरि ॥
अनुगच्छामि सततमिति चिन्तामणाः सदा ।
गृहत्वाच्चतुरत्वाच्च विप्रसेवामनुत्तमम् ॥
वाक्छत्वेन मसीग्रः स सदोद्देगीतिभावहन् ।
ब्राह्मणं ईश्वरं ज्ञात्वा भक्त्या स्तौति पुटाञ्जलिः ॥
यं यं गच्छति विप्रस्य मसीग्रस्यानुगच्छति ।
नद्यादौ गत्वा चेद्विप्रः स्नात्वा कुर्य्यात्तर्पोऽपि च ॥
यावत्तावच्च तिष्ठेत् स क्षुधया पीड़ितोऽपि च ।
तथापि नासनं याति शिरे धर्त्तुं, द्विजोऽपि च ।

मसीग्रायादीक्षिताय क्षत्त्रवैश्योपमाय च ।
अमूद्रायेति वोढुं न ददात्येवासनादिकम् ॥
पार्व्वत्युवाच ।
चित्रं ब्रवीषि हे नाथ कायस्थोऽमूद्र एव किम् ।
जाने शूद्रकनिष्ठं तं शूद्रतुल्यः कथं स न ॥
क्षत्त्रवैश्योपमो क्षुत्क्षत्त्रयैव कथमीश्वर ! ॥
हर उवाच ।
ब्रह्मपादांशतः शूद्रमसीग्रौ द्वौ बभूवतुः ।
शूद्रात् परः कनिष्ठः स ज्ञातः काले ! ऋतश्च तत् ।
किन्तु सामादिवेदान् हि क्षत्त्रो विट् शूद्र एव हि ।
गृहीतवान्न तत् किञ्चिन्मसीग्रोऽसतः शिवे ! ॥
अतो यज्ञोपवीती न ते हि यज्ञोपवीतिनः ।
एते स्वैर्वेदिकाचारा मसीग्रो हि स्वभावतः ॥
मत्या सह तु लेखन्या सर्व्वं लेखितुमीश्वरः ।
लेखितुं नैव शक्नोति वैदिकं किञ्चितं क्वचित् ॥
अतो हृदि विचार्य्याथ खेदेन विप्रमीश्वरम् ।
ज्ञात्वा भक्त्यानुगच्छेद्धि यत्र याति धरासुरः ॥
शतत्रेताद्वापरेषु गतेष्वपि मसीग्रकः ।
तदपि त्वत्त्वावैव दृढां भक्तिं द्विजेषु च ॥
ततो हि कृपया विप्रः कायस्थमनुगृह्य हि ।
सासनं प्रादद्दिद्यां वगश्चेति तव प्रिये ! ॥
यतो दीक्षामात्रमेव पवित्रः कार्य्यसिद्धिदा ।
ततः कुशासनादींश्च वोढुं प्रादात् शिरोपरि ॥
एवं प्रकारेण काले ! विप्राणामनुगाः कलौ ॥
कायस्थाः कालिके ! देवि ! पुनस्तद्भिन्नं शृणु ॥
कलिप्रथमतो राजा क्षत्त्रियाद्यां महाबलः ।
सुयज्ञनामा गोमेधमखमारब्धवान् प्रिये ॥
आहूतवांश्च सर्व्वान् स चतुर्योजनमध्यतः ।

---

* कायस्थोत्पत्त्यादौ मन्यद्यता राज्ञा यानि प्रमाणानि संगृहीतानि तद्दितराण्यधुना प्राप्तानि । कतिपयप्रशस्तप्रामाण्यप्रमाण्यान्यवोदृतानीति । तद् यथा,—
"चर्चं ध्यानस्थितस्यास्य सर्व्वकायाद्विनिर्गतः ।
दिव्यरूपः पुमान् दक्षे मसीपात्रञ्च लेखनी ॥
चित्रगुप्त इति ख्यातो धर्म्मराजसभीपतः ।
प्राधिनां सदसत्कर्म्मलेखाय स निरूपितः ।
ब्रह्मणोत्क्रियमाणो देवान्योर्थ्यमुक्तस्य वै ।
भोजनाच्च सदा तस्मादाकृतिर्दीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते ।
नागरोत्तम तद्भ्राः कायस्था भुवि संज्ञिताः" ॥
इति पद्मपुराणे क्रियाखण्डम् ॥ * ॥
दक्षायज्ञ उवाच ।
"चित्रगुप्तं महाप्राज्ञं पुलस्त्यमुनिपुङ्गवम् ।
उपसङ्गम्य पप्रच्छ भीतः शस्त्रभृतांवरः ॥
चतुर्णामपि पर्व्वानामाश्रमाणां तथैव च ।
सम्भवः सङ्करादीनां श्रुतो विस्तरतो मया ॥
कायस्थोत्पत्तयो लोकेष्वातायैव महामने ।
भूय एव महाप्राज्ञ ! श्रोतुमिच्छामि तत्त्वतः ॥
वैश्याया दानशीलाश्च पितृयज्ञपरायणाः ।
सुधियः सर्व्वशास्त्रेषु कायस्थद्वारबोधकाः ॥
पोद्दारो मिजवर्गाणां ब्राह्मणानां विशेषतः ।
तानहं श्रोतुमिच्छामि कथयस्व महामुने ! ॥
एतन्मे संशयं विप्र ! वक्तुमर्हस्यशेषतः ।
इति पृष्टो मुनिप्राज्ञः, गाङ्गेय ! शृणु तत्त्वतः ॥
पुलस्त्य उवाच ।
शृणु गाङ्गेय ! वक्ष्यामि कायस्थोत्पत्तिकारणम् ।
न श्रुतं यत् त्वया पूर्व्वं तन्मे कथयतः शृणु ॥
येनेदं सकलं विश्वं स्थावरं जङ्गमं तथा ।
उत्पाद्य पाल्यते भूयो निधनाय प्रकल्पते ॥
अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः ।
यथाऽसृजत् पुरा विश्वं कथयामि तव प्रभो" ॥
"मुखतोऽस्य द्विजा जाता बाहुभ्यां क्षत्त्रियास्तथा ।
ऊरुभ्यान्तु तथा वैश्याः पद्भ्यां शूद्राः समुद्भवाः ॥
द्विचतुःषट्पदादींश्च सवयवसरीसृपान् ।
एककालोऽसृजत् सर्व्वं चन्द्रसूर्य्यप्रभाविधौ ॥
एवं बहुविधानेन विश्वमुत्पाद्य भारत ! ।
उवाच तं सुतं ज्येष्ठं कायपं चातिवेजसम् ॥
प्रतियत्नेन भोः पुत्र जगत् पालय सुव्रत ! ।
इत्याज्ञाप्य सुतं ज्येष्ठं ऋषिसङ्घवचेतुकम् ॥
ततस्तु ब्रह्मणा येन यत् कृतं तन्निबोध मे" ॥
"दशवर्षसहस्राणि दशवर्षशतानि च ।
समाधिस्थोऽभवत् प्राज्ञः संयम्य ज्ञानमानसः ॥
ततः समाहितमतिर्यत्कृतं तद्ददामि ते ।
तच्छरीरान्महाबाहुः श्यामः कमललोचनः ॥
कम्बुग्रीवो गूढशिराः पूर्णचन्द्रनिभाननः ।
लेखनीपेदनीहस्तो मसीभाजनसंयुतः ॥
निःसृत्य दक्षिणे तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तमः सुविचित्राङ्गः श्यामस्निग्धसलोचनः ॥
त्यक्त्वा समाधिं गाङ्गेय ! तं ददर्श पितामहः ।
अथोर्द्धमस्तकिरीट्याय पुरुषायाग्रतः स्थितः ॥
नामधेयं हि मे तात ! वक्तुमर्हस्यतःपरम् ।
यथोचितञ्च यत् कार्य्यं तत् त्वं मामनुशासय" ॥
पुलस्त्य उवाच ।

"इत्याकर्ण्य ततो ब्रह्मा पुरुषं समरीरजम् ।
प्रहृष्य प्रत्युवाचेदमानन्दितमतिः पुनः ॥
शिरश्चिह्नं समाधाय ध्यानस्थमतिसुन्दरम् ।
मच्छरीरात् समुद्भूतत्वात् कायस्थसंज्ञकः ॥
चित्रगुप्तेति नाम्ना वै ख्यातो भुवि भविष्यसि ।
धर्म्माधर्म्मविवेकार्थं धर्मराजपुरे सदा ॥
स्थितिर्भवतु ते वत्स ! समाज्ञां प्राप्य सिद्धताम् ।
चत्रवर्णोचितो धर्मः पालयोचो यथाविधि ॥
प्रजाः सृजस्व भोः पुत्र भुवि भारसमन्विताः ।
तस्मै दत्त्वा वरं ब्रह्मा तत्रैवान्तरधीयत" ॥
पुलस्त्य उवाच ।
"चित्रगुप्तान्वये जाताः शृणु तान् कथयामि ते ।
सौमङ्गा नागरा गौराः श्रीवास्तव्याश्च माथुराः ॥
अम्बष्ठाः सौरसेनाः श्रैवसेनाश्चैव च ।
वर्षावर्षेश्वरैश्चैव चन्द्रध्वजाश्च सत्तम ! ॥
शृणु वेणाश्च कर्णाटि कुलवंशविवर्द्धन ! ।
पुत्रान् वै त्वापयामास चित्रगुप्तो मसीतले ॥
धर्म्माधर्म्मविवेकज्ञश्चित्रगुप्तो महामतिः ।
भूक्षणं वेधयामास सर्व्वसाधनमुत्तमम् ॥
पूजनं देवतानाञ्च पितृणां यज्ञसाधनम् ।
वर्द्धनं ब्राह्मणानाञ्च सर्व्वदातिथिसेवनम् ॥
प्रजानां करणादाय धर्म्माधर्म्मविशेषणम् ।
कर्त्तव्यं हि प्रयत्नेन पुत्राः स्वर्गञ्च काम्यया ॥
या माया प्रकृतिः सृष्टिश्चण्डी चण्डप्रमर्दिनी ।
तस्माच्च पूजनं कार्य्यं सिद्धिं प्राप्य दिवं गताः ॥
स्वर्गाधिकारमासाद्य यतो यज्ञभुजः सदा ।
भवद्भिः सा सदा पूज्या ज्ञात्वा सप्तशतादिभिः ॥
भवन्तो सिद्धिदा नित्यं पूजदा सा तु चण्डिका ।

कायस्थः

ब्राह्मणान् भ्रान्तिवशतः केवलं सुतपसं विना ॥
प्राप्ताङ्गणद्विजान् यातो दृष्ट्वा सुतपसः प्रिया ।
धवं तिरस्कृतवती यथैतच्छृणु कालिके ! ॥
हे स्वामिंस्त्वां नृपो मूर्खं मत्वा नाद्रृतवान् मखे ।
केवलं तव पाण्डित्यं मत्समीपे न शोभते ॥

सुतपा उवाच ।

कान्ते ! ब्रवीमि विप्राणां यत् कर्त्तव्यं शृणुष्व तत् ।
याचामाचं वहन्नन्नं काङ्क्षितव्यं न चाधिकम् ॥
विद्वांश्चेद्विद्यया दात्या ज्ञापि नानार्ज्जवं चरेत् ।
मूर्खश्चेत् केवला सन्था सदोपास्या प्रयत्नतः ॥
प्रिये तेन च वक्तव्यमतमेवाप्रियन्त्वपि ।
विप्रेण सततं कार्य्यं वैद्यमागमिकञ्च तत् ॥
ऋतौ गच्छेच्च स्वां कान्तां मुदा कालञ्च पालयेत् ।
कालीं कालादिकं वापि जपेद्विप्रो निरन्तरम् ॥
स्वयं स्वभावतो नृणां ज्ञात्रादीनां शिवे वचः ।
वक्तव्यं चेन्न शङ्कन्ति विप्रद्वानिर्न तत्क्षतिः ॥

ब्राह्मण्युवाच ।

सुमानुषत्वं ते कान्त ! सुविप्रत्वं ध्रुवं ! त्वयि ।
तिष्ठत्येव चिरं विप्र तेऽस्तौ मे मरणं शिवम् ।
कांस्यकङ्कणवत्यौ सङ्गिनौ मे मृतावधि ॥

सुतपा उवाच ।

प्रिये ते शृणु तीव्रं धनान्तःकरणं सदा ।
विना निमन्त्रितेनापि गत्वा चानीयते धनम् ॥
इत्युक्त्वा सुतपाः कान्तां गत्वा राजसभां प्रिये ! ।
रान्तं सुयज्ञं वरं प्रोवाच नृपतिं द्विजः ॥
रे सुयज्ञ ! विनाङ्कानैरगच्छं ते सभामहम् ।
विप्राणां वरणं राजन् ! ज्ञात्रियाणां तथैव च ॥
ज्ञातं तदपि नाहं रे त्वया दृष्टः स्वचक्षुषा ।

कायस्थः

भ्रष्टो भवतु ते यज्ञः शीघ्रं यातु स्थलान्तरम् ॥
क्रुधैतदुक्त्वा सुतपास्ततो नृपसदः स्थलात् ।
विप्रो निःसृतवान् राजा भीतेन मनसाब्रवीत् ॥
हे पुरोहित ! हे विप्र ! हेऽङ्गिरोऽसौ गतः सकः ।
रे इत्युक्त्वा सभामध्ये वृत्तान्तं वद विस्तरात् ॥
नृपाज्ञया ज्ञात्रियार्थं षट्टादिवस्त्रसंकुलम् ।
स्वर्णाङ्गुरीयकमपि चानेतुं गतवान् हि यः ।
कोषमन्दिरमालोक्य राजान्तिकमथागतः ॥
इत्यब्रवीच्च राजानं चिन्वन्ते कोषमन्दिरे ।
किञ्चिच्च वस्तु दृष्टं न दृष्टं भस्मट्टणादिकम् ॥
श्रुत्वैतत् विस्मितो राजाऽब्रवीच्चैतत् पुरोहितम् ।
हे पुरोहित ! विप्र ! त्वं कृतवान् यत्त्वभूच्च तत् ॥
कोऽपराधोऽस्ति मे विप्रः कथं शप्ता गतः प्रभो ! ।
कोषमन्दिरसंपातसंवादं दत्तवानयम् ॥
कोषे नास्ति धनं किञ्चित् सर्व्वं भस्मट्टणादिकम् ।
श्रुत्वेतदङ्गिरा ब्रूते सुतपा यत्र तत्पटे ॥
ततो दुर्गे स राजा च तूर्णं स्वर्णकुठारकम् ।
गले बद्धा द्विजकुलैर्गतवान् सुतपोऽन्तिकम् ॥
अङ्गिरादिद्विजाः सर्व्वे तत्राद्य सुतपोद्विजम् ।
स्तुतिञ्चक्रुः स राजा च दूरस्थो भक्तितोऽस्तवीत् ॥

अङ्गिरःप्रभृतय ऊचुः ।

धरामरवर ! प्राज्ञ ! नो वरस्त्वं धरातले ।
राज्ञः शिवं नो मानं त्वदयाचामह उमेशगृहत् ! ॥
देवस्त्वं देवताश्चस्त्वं पण्डितानाञ्च पण्डितः ।
दयालो ! नो दयस्व ज्ञ ! नमस्ते वरतो वर ! ॥
ब्रह्म ब्रह्मज्ञ एव त्वं ब्राह्मणेश्वर मानद ! ।
राज्ञः शिवं नो मानं त्वद्याचामह उमेशगृहत्" ! ॥

सुयज्ञराज उवाच ।

हे नाथ ! हे धरेशेश ! धर्म्मकर्म्मविधायक ! ।
वर्णेश्वर ! नमस्तुभ्यं वन्दे ते चरणाम्बुजम् ॥
हे ब्रह्मण्यदेव ! हे नाथ हे धरामर हे प्रभो ! ।
कृपां कुरु नमस्तुभ्यं प्रणमामि पदं तव ।
नाहं जानामि ते पूजां नाहं जानामि ते स्तुतिम् ॥
नाहं जानामि ते ध्यानं मूढ़ं मां कृपया दय ॥

सुतपा उवाच ।

किमर्थं स्तुथ हे विप्राः किमर्थं स्तौषि हे नृप ! ।
गच्छ यात मखं गत्वा सुखेन सफलं कुरु ॥
श्रुत्वेति सुतपोवाक्यं सुयज्ञः सुखमानसः ।
कृताञ्जलिपुटो राजा चाब्रवीदिदमुत्तमम् ॥

राजोवाच ।

निमन्त्रयन्तु विप्रेन्द्र ! भोज्यञ्च सकलोत्तमम् ।
यज्ञापराधसाहस्रं क्षमस्व मे कृपां कुरु ॥
अपराधसहस्राणि कृतवानहमव्यय ! ।
यज्ञ मद्राजतीं मुद्रामयुतां मां कृपां कुरु ॥
सत्यभाष्या द्विजा ह्येते प्रोचुः पाण्डित्यगर्ह्यतम् ।
गुणांश्च ते बहुविधान् श्रुत्वाहं सुखमानसः ॥
क्षमस्व नाथ ! मे दोषमेकं प्रश्नोत्तरं वद ।
सत्यभाष्यो बुधः कोऽपि न ब्रवीति विदाम्बर ! ॥
आगच्छति कलिर्घोरस्तत्र के भक्षितो द्विजान् ।
अर्च्चिष्यन्तीति श्रुत्वा मे वरञ्च मरणं शिवम् ॥
श्रुत्वैतत् सुतपा विप्रोऽब्रवीच्च सदयो नृपम् ॥

सुतपा उवाच ।

हे सुयज्ञ नृपश्रेष्ठ ! ब्राह्मणातिप्रियो नृपः ।
पश्यैतान् विप्रभृत्यांस्त्वमासनादिग्निरोधतान् ॥
एतद्घोरकलावेते भविष्यन्ति द्विजार्चकाः ।
ज्ञात्वा मसीभ्राः कायस्था ब्राह्मणेश्वरमानसाः ॥

तथाचोक्ता सुरापेया यानपेया द्विजातिभिः ॥
वैश्यवं धर्मसाम्रित्य मदाज्ञां प्रतिपालय ।
कर्मणं हि प्रयत्नेन लोकदयहिताय वै ॥
चतुर्भिश्च सुतानेवं चित्रगुप्तो दिवं ययौ ।
धर्मराजस्याधिकारी चित्रगुप्तो बभूव ह ॥
स्वयं भीष्म ! समुत्पन्नाः कायस्था ये प्रकीर्त्तिताः ।
ये दृष्टास्ते मया ज्ञाताः संवादं शृणु तत्परः ॥
श्रुतं ते कथयिष्यामि विचित्रं परमाद्भुतम् ।
प्रभावं चित्रगुप्तस्य समुद्भूतं यथा पुनः" ॥

पुलस्त्य उवाच ।

"सौदासो नाम राजाभूत् समस्ते क्षितिमण्डले ।
सदा पापरतः सोऽथ धर्माधर्मं न विन्दति ॥
स यथा स्वर्गमासाद्य क्रमेण पुण्यफलं भुवि ।
सर्व्वपापी दुराचारः सर्वधर्मविवर्जितः ॥
राजनीतिगतं धर्मं स जानाति कथञ्चन ।
ज्ञातिश्चजयकर्मादि तत्साधनमुत्तमम् ॥
न कर्त्तव्यं द्विजैः क्वापि मयाग्नेर्मेदीतले ।
स्वमाज्ञप्तवांल्लोके दैवपित्र्यकर्मणि ॥
परित्यज्य सकं देशं ततो देशान्तरं ययौ ।
ये केचिद्यज्ञियं चक्रुर्लोकेषु ब्राह्मणादिषु ॥
ततः प्रभृति राजेन्द्र ! न यज्ञस्वमं क्वचित्" ॥
"न कोऽपि कुरुते भीष्म ! पुण्यं तत्र निवेदितम् ।
यद्दौत्वा ब्राह्मणादिभ्यः करं कर्मविदूषकः ॥
यदा धर्मभृतां श्रेष्ठ शृणु कर्म विपाकजम् ॥
कालेनानेन राजेन्द्र सौदासो विचरन् महीम् ।
कार्त्तिके शुक्लपक्षे च द्वितीया चोत्तमा तिथिः ।
तस्यां कार्य्यञ्च कायस्थैश्चित्रगुप्तस्य पूजनम् ॥

मद्यतीर्थाभिषेकेण धूपदीपादिभिस्तथा ॥
दैवयोगात्तथायातः सौदासः पर्य्यटन्महीम् ।
यदायुक्तशरीरेण दृष्ट्वा च पूजनं ततः ।
कृत्वा सुपूजनं तत्र चित्रगुप्तस्य भक्तिमान् ॥
गतपापोऽभवत् सद्यः सौदासोऽसौ महीपतिः ।
चित्रगुप्तप्रभावेण गतो लोकं सुरालयम् ॥
दृष्ट्वं विचित्रमाहात्म्यं चित्रगुप्तप्रभावजम् ।
कथितं ऋषयश्चैव ! किमन्यत् श्रोतुमिच्छसि ॥
इत्याकर्ण्य ततो भीष्मः प्रत्युवाच मुनिं ततः ।
विधिना केन तत्रापि पूजा कार्य्या महामुने ! ॥
को मन्त्रः को विधिश्चत्र सर्व्वं तद्वद मे प्रभो ।
यामासाद्य मुनिश्रेष्ठ ! सौदासः स्वर्गमाप्तवान् ॥

पुलस्त्य उवाच ।

चित्रगुप्तस्य पूजाया विधानं कथयाम्यहम् ।
नैवेद्यैर्दृषदन्नैश्च यथाकालोद्भवैः फलैः ॥
गन्धपुष्पोपहारैश्च धूपदीपैः समाहतः ।
चित्रगुप्तञ्च संपूज्य ब्रह्माभक्तिसमन्वितः ॥
नवकुम्भं समानीय पानीयपरिपूरितम् ।
शर्करापूरितं कृत्वा पात्रं तस्योपरि न्यसेत् ॥
पूजान्ते च प्रयत्नेन दातव्यञ्च द्विजन्मने ।
ब्राह्मणान् भोजयेत्तत्र कायस्थानपि मन्त्रवित् ॥
मसीभाजनसंयुक्तः सदा चरसि भूतले ।
लेखनोच्छेदनीदक्षचित्रगुप्त ! नमोऽस्तु ते ॥
चित्रगुप्त नमस्तुभ्यं नमस्ते धर्मरूपिणे ।
तेषां त्वं पालको नित्यं नमः शान्तिं प्रयच्छ मे ॥
मन्त्रेणानेन राजेन्द्र चित्रगुप्तस्य पूजनम् ।
एवं संपूज्य विधिवत् सौदासो भक्तिभावतः ॥

चिरात् पापसमुद्भूतो राज्यं कृत्वा मृतो नृपः ।
नीतोऽसौ यमदूतैश्च यमलोकं भयानकम् ॥
चित्रगुप्तस्तदाश्चर्य्यधर्मराजोऽपि भारत ! ॥

धर्मराज उवाच ।

सौदासोऽसौ दुराचारः पापकर्मसदारतः ।
यानि कानि च पापानि राजासौ कृतवान् भुवि ॥
दृष्टोऽसौ यमराजेन धर्माधर्मविशारदः ।
धर्मराजं ततः प्राह चित्रगुप्तो महामतिः ॥
विपाकं धर्मजं ज्ञात्वा तं प्रश्नाब्रवीद्दयः ॥

चित्रगुप्त उवाच ।

जानेऽहं पापकर्मासौ राजार्थं विदितः सदा ।
त्वत्प्रसादादहं सौरे ! पूर्व्वोऽस्मि वसुधातले ॥
त्वया दत्तं वरं स्थानं भक्तोऽहं सदा प्रियः ।
इति ज्ञात्वा वदाम्यत्र राजापापोऽयि मे मतिः ॥
पूजां चकार राजासौ दृष्ट्वा पूजाञ्च मामकीम् ।
अतश्चष्टोऽस्मि हे देव ! यातु विष्णुपदं नृपः ॥
यमेनाज्ञापितो राजा वैश्यवं पदमाप्तवान् ।
ये चान्ये पूजयिष्यन्ति चित्रगुप्तं महीतले ॥
कायस्थाः पापनिर्मुक्ता यास्यन्ति परमां गतिम् ।
तस्मात् त्वमपि राजेन्द्र ! पूजां कुरु विधानतः ॥

दत्तात्रेय उवाच ।

मुनेर्वचनमाकर्ण्य भीष्मः प्रयतमानसः ।
चकार पूजनं तत्र चित्रगुप्तस्य तत्परः ॥
कार्त्तिके शुक्लपक्षे तु द्वितीयायाञ्च भारत !
यमश्च चित्रगुप्तश्च यमदूतांश्च पूजयेत् ॥
अतो यमद्वितीयेति संज्ञा लोके बभूव ह ।
तेनैव भगिनीहस्ते भोक्तव्यं पृथिवीदनम् ॥

कायस्थः

महाविद्योपासकाश्च गुणतः क्षत्रियोपमाः ।
कलौ हि क्षत्रियाभावात् वैश्याभावाच्च सुव्रत ! ॥
एते भक्त्या भविष्यन्ति विप्रामानसहिष्णवः ।
विप्रप्रिया विप्रभक्ता विप्रमानप्रदा यतः ॥
महाविद्याप्रितश्चैते क्षत्रकर्म्मव्रतः कलौ ।
मय्या एवेश इत्यस्मात् मसीशोऽसौ निगद्यते ॥
ब्रह्मणो विप्रमूर्त्तस्तु पादांशे सम्भवन्ति तत् ।
कायस्था इति संज्ञाः स्युः सुयज्ञैषां शिवा मतिः ॥
श्रुत्वैतत् सकलं राजा वृत्तान्तं सुतपोमुखात् ।
प्रेमाश्रुभिर्न्दित्यकारी कृताञ्जलिपुटोऽब्रवीत् ॥

राजोवाच ।

इतः परम्यदेहश्चेत् स्थिये तदपि मच्छिवम् ।
श्रुतं यत्तव जातीनां क्षत्रहीनकलौ सुखम् ॥
ततो ऽतितुष्टः सुतपा उवाच मधुरं वचः ।
सुयज्ञ ! सुमतिस्त्वं हि त्वत्तो विप्रप्रियो न हि ॥
मानेन ब्राह्मणानां हि वरश्च मरणं नयेः ॥

सुयज्ञोवाच ।

हे नाथ सुतपो विप्र ! श्रुतं यन्मेऽङ्गजन्मुखात् ।
कृपया वृणु तत् सर्व्वं ते जातेर्म्महिमानमु ॥
ब्राह्मणो ब्रह्म जानाति नान्यजातिरिति श्रुतिः ।
ब्रह्मज्ञानी सदा विप्रो न चेद्ब्राह्मणसंज्ञकः ॥
विना प्रयुक्तिं यो विप्र उपकारी स्वयं भवेत् ।
आशीः करोति ब्रूते च क्षत्रादीनां शिवं वचः ॥
स एव साक्षाद्ब्रह्मेति विप्राणां जातिलक्षणम् ।
ब्राह्मणाज्ञावचो ये न गृह्णन्ति पालयन्ति च ॥
गुर्व्वीज्ञालङ्घनं पापं स्पृशेत्तेषां शरीरतः ।
पित्रेति सकलं चोक्तं ते च सन्दिग्धजातयः ॥
वशीकारादि सकलं सृष्टिस्थितिलयश्च यत् ।
शक्नुवन्ति हि कर्त्तुं ते विप्राः पित्रेति चोक्तमु ॥
विनायासैर्मुदा यो यत् विप्राय शक्तितो ददत् ।
मुदा तदेव गृह्णाति विप्राणामिति लक्षणम् ॥
केषामपि न कापट्यं कुरुते ब्राह्मणः क्वचित् ।
विनापराधैर्न शपेदिति तज्जातिलक्षणम् ॥
हिंसे भवति हिंसः स शठे शाठ्यं समाचरेत् ।

कायस्थः

आर्जवश्चेन्द्रियग्रामान् खवशे स्थापयेच्चिरम् ॥
दयालुश्च सदा विप्र इति पुत्र हृदि स्मरन् ।
भीत्या भक्त्या सदा पूज्यः पितेति ब्रूतवांश्च मे ॥
कटूक्त्या यदि गृह्णाति हृदा दुःखेन राति चेत् ।
तद्विप्रो दुःखं भजते दातुर्नैव शिवं क्वचित् ॥
वित्तशाठ्यं गृहशाठ्यं कार्य्यं नोभयतः क्वचित् ।
इत्यप्यात्मज विप्राच्च श्रुतं शासनसम्मतम् ॥
शृणु पुत्र प्रवक्ष्यामि सावधानं समाचर ।
भ्रान्तं बऊशपन्नं वा नैव दुष्यति भूसुरम् ॥
सुतपो नाथ मे पित्रा यदयदुक्तं तदुक्तवान् ।
त्वयापि ब्राह्मण ब्रह्म यथारुचि तथा कुरु ॥
श्रुत्वैतत् सुतपा विप्र उवाच परमादरम् ।
राजन् वरं वृणु वृणु यत्ते मनसि वाञ्छितम् ॥

सुयज्ञ उवाच ।

ऋषे ! वरेण ते नैक उपकार इहाधुना ।
यज्ञे समाप्तौ मे मत्तश्चेत्ता रामो भविष्यति ॥

सुतपा उवाच ।

यज्ञं समाप्य सुखतः प्रगच्छेर्विघ्ननैर्ऋतिम् ! ।
तत्र वै स्वर्णदानाद्या मध्ये दोषोऽस्ति सुन्दरः ॥
द्वादशक्रोशमानी हि तदूत्वा वसतिं कुरु ।
यदा परशुरामस्ते क्वचिच्चेत्ता भविष्यति ॥
भविष्यति च कार्य्यः स नय ते वाञ्छितं वरम् ।
ततः पुनः कृते राजन् जम्बूद्वीपेश्वरो भवान् ॥
भविष्यतीति त्वं वोजरूपेण तिष्ठ तत्र हि ।
वरं ते वाञ्छितं गृह्ण तुष्टोऽहं भक्तितस्तव ॥
इतः परतो यदयत् परमानन्द मुत्तमम् ॥

सुयज्ञराजोवाच ।

नाथ ! नाहं वरं याचे याचे केवलमङ्घ्रिते ।
चिरं मम मतिस्तिष्ठेदिति देहि वरोत्तमम् ॥
तेऽङ्घ्री पवित्रे परमे सर्व्वत्र सुखदे किल ।
तदेवास्तु इति प्रोच्य सुतपा गतवान् गृहम् ॥
राजापि च मखं कृत्वा विप्रेभ्यो दक्षिणां ददत् ।
परिवारयुतोऽगच्छद्वीपे काञ्चनदान्तरे ॥
वसतिं वरतः प्राप्तां चतुर्हिस्तु जलप्लुताम् ।

कायस्थः

अवस्थाः प्रापटन् विप्राः पण्डिताः सुखवासभूम् ॥
एको मसीशः सर्व्वाख्यः सर्व्वाणीहृदयद्विजात् ।
कुलप्रदीपः स्वीयानां जातीनां पूततास्पृहः ॥
वगलेति महाविद्यां गृहीत्वा साधयन् मुदा ।
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादतः ॥
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं गुरो ! ।
कृपया कुरु मां नाथ ! त्वमेव वगला मम ॥
गुरुस्त्वपि वरं दत्तो राज्यं भुक्त्वा पुनर्भवन् ।
त्रिलोकाधिपतिर्भूय मुदा तत्र सुखिष्यसि ॥
गुर्व्वाज्ञया मसीशः स राज्यभोगो द्विजार्चितः ।
विहाय देहं भूयश्च त्रिधारूपो बभूव ह ॥
चित्रगुप्तश्चित्रसेनश्चित्राक्षद इति त्रयः ।
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तमः ॥
चित्रगुप्तो महाविद्यां प्राप्य कुलाख्यविव्रतः ।
पुत्रान् याचितवान्नैव गुरोर्देवत्वमावहन् ॥
यमान्तिस्थो बभूवापि स्वर्म्मर्त्याधोविवेचकः ।
चिरं शुभाशुभं कर्म्म विविच्य शमनान्तिके ॥
यद्ददेत् सकलानां तु तदेवाभोजयेत् यमः ।
चित्रसेनो महाविद्यां वगलेति गुरोर्नयन् ॥
जप्त्वा संतोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः ।
राज्यं चकार सुदृयुक्तश्चित्राक्षद अधोगतः ॥
अधोगतस्य हेतुं त्वं वगले शृणु कालिके ! ।
वगलेति मनुं प्राप्य विप्रोऽस्मि इति वाञ्छया ॥
तपश्चकार पद्माब्दं नान्नं किञ्चित् गृहीतवान् ।
फलमूलादिकं किञ्चित् सायमक्ति यथा मिलेत् ॥
विहाय विप्रस्य गुरोरपि पूजाञ्च पार्व्वति ! ।
जपेन्नित्यं हि वगलामन्यविप्रञ्च नेक्षयन् ॥
ज्ञात्वेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राक्षदं क्रुधा ।
वचो हि मधुरं किञ्चित् प्रियादभक्ताच्च सुन्दरि ! ॥
रे चित्राक्षद ! अवश्यं त्वत्सु विप्रत्वमिच्छसि ।
कदाप्युपानन्मस्तश्चो नैवेति न हि बुध्यसि ॥
वत्स ! शीघ्रमधो गच्छ चिरं कुरु तपो मुदा ।
ततः श्रुत्वेति शापं स भक्त्यातिशयमानसः ॥
कृताञ्जलिपुटो ब्रूते चित्राक्षद इतीश्वरि ! ॥

नित्यं यशस्यमायुष्यमर्व्वैकामार्थसिद्धिदम् ।
दानानि दापयेत्तेषु भगिन्यै च विशेषतः ॥
काले तत्र च संपूज्य चित्रगुप्तञ्च लेखकम् ।
चित्रैश्च चित्रपुष्पैश्च रक्तचन्दनमिश्रितैः ॥
नैवेद्यं दीयते तस्मै मोदकं गुडमिश्रितम् ॥
श्रीशोक्तप्रार्थना यथा.—
उत्पत्तौ प्रलये चैव भोग्ये दाने कृताकृते ।
लेखकस्त्वं सदा श्रीमांश्चित्रगुप्त नमोऽस्तु ते ॥
त्रिया सह समुत्पन्न समुद्रमथनोद्भव ! ।
चित्रगुप्त महाबाहो ! ममाद्य वरदो भव ॥
चित्रगुप्तस्तु सन्तुष्टो श्रीशाय च वरं ददौ ।
मत्प्रसादान्महाबाहो मृत्युस्ते न भविष्यति ॥
स्मरिष्यसि यदा मृत्युं तदा मृत्युर्भविष्यति ।
इति तस्मै वरं दत्त्वा चित्रगुप्तो दिवं ययौ ॥
अनेन विधिना यस्तु चित्रगुप्तस्य पूजनम् ।
करिष्यति महाबुद्धे तस्य पुण्यफलं शृणु ॥
इहैव विपुलान् भोगान् भुक्त्वा सर्व्वान् मनोरथान् ।
अन्तय विष्णुलोकञ्च नरो याति न संशयः ॥
चित्रगुप्तकथां दिव्यां कायस्थोत्पत्तिसंयुताम् ।

भक्तियुक्तेन मनसा ये शृण्वन्ति नरोत्तमाः ॥
दीर्घायुषो भविष्यन्ति सर्व्वव्याधिविवर्जिताः ।
सर्व्वे विष्णुपदं यान्ति यत्र यान्ति तपोधनाः" ॥
इति भविष्यपुराणे चित्रगुप्तकायस्थोत्पत्तिमाहात्म्यकथा समाप्ता ॥ * ॥
"एवं श्रुत्वार्जुनं रामः सत्याय निश्चितान् शरान् ।
एक एव ययौ हन्तुं सर्व्वानेवातुरान् क्षपान् ॥
केचित् गह्वरमाश्रित्य केचित् पातालमाविशन् ।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ" ॥
"ततो रामः समायातो दाल्भ्याश्रममनुत्तमम् ।
पूजितो मुनिना सद्यः पाद्यार्घ्याचमनादिभिः ॥
ददौ मधाऊसमये तस्मै भोजनमादरात् ।
रामस्तु याचयामास हृदिस्थं स्वमनोरथम् ॥
याचयामास रामञ्च कामं दाल्भ्यो महामुनिः ।
ततस्तौ परमप्रीतौ भोजनं चक्रतुर्मुदा ॥
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति ।
यज्ञया प्रार्थितं देव तत् त्वं शंसितुमर्हसि ॥

राम उवाच ।

तवाश्रमे महाभाग गर्भो स्त्री समागता ।

चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः ॥
तस्मै त्वं प्रार्थितं देहि हिंसेयं तां महामुने ।
ततो दाल्भ्यः प्रत्युवाच ददामि तव वाञ्छितम् ॥

दाल्भ्य उवाच ।

स्त्रियो गर्भमसुं बालं तस्मै त्वं दातुमर्हसि ।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः ॥
क्षत्रियाणकरस्थाद्यं तत् त्वं याचितवानसि ।
प्रार्थितश्च त्वया विप्र ! कायस्थो गर्भ उत्तमः ॥
तस्मात् कायस्थ इत्याख्या भविष्यति शिशोः शुभा ॥
एवं रामो महाबाऊर्हिला तं गर्भमुत्तमम् ।
निर्जगामाश्रमात् तस्मात् क्षत्रियाणकरः प्रभुः" ॥
"कायस्थ एव उत्पन्नः क्षत्रियां क्षत्रियाणतः ।
रामाज्ञया च दाल्भ्येन चन्द्रधर्माद्विनिष्कृतः ॥
कायस्थधर्मोऽयं दत्तश्चित्रगुप्तश्च यः स्मृतः ।
तद्बीजजाश्च कायस्था दाल्भ्यगोत्राश्रितोऽभवन् ॥
दाल्भ्योपदेशतस्ते वै धर्मिष्ठाः सत्यवादिनः ।
सदाचारपरा नित्यं रता हरिहरार्चने ॥
देवद्विजपितृभक्ताश्च अतिथीनाञ्च पूजकाः" ॥
इति स्कान्दे रेवुकामाहात्म्ये ॥ * ॥

चिन्नाङ्गद उवाच ।
"हे ब्राह्मणा हे गुरवो ! मामेवातिनिरागसम् ।
कथं श्रेयुर्भवन्तो हि विप्ररूपा ह ईश्वराः ।
मुखादेवो श्रुतवान् यद्यल्लतिः का तत्समाचरन् ।
उपास्तो यत्प्रभवितुं सर्व्वे ह्युद्योगिनः सुत ।
जानेऽहं ब्राह्मणो ब्रह्म खेच्छया विविधाकृतिः ।
नानालीलामाचरितुं मानुषाकृतिरप्यभूत् ।
तद्ब्रह्म ब्राह्मणं जाने जाने तत् सर्व्वरूपधृक् ।
राजेति संज्ञाधारी कः किं वा तच्च प्रजाभिधम् ।
तदेव सकलव्यापि तदेव सर्व्वकर्तृ च ।
तदेव सर्व्वपाद्य स्यात्तदेव सर्व्वहर्तृ च ।
पुंरूपं चैव स्त्रीरूपं जीवरूपच्च नान्यथा ।
आत्मा एवैकरूपं तत् स्वमेवानेकमाकरोत् ।
नानाप्रकारजीवादि चात्मनात्मानमेव हि ।
स्थावरं जङ्गमं विप्राश्चैव नात्र संशयः ।
भवन्तो ह्रीश्वराः सर्व्वे किमर्चयथ तत् कथम् ।
कथं चिन्तयथात्मानं देवमर्चनजातृतः ।
कृत्वेन भूतशुद्धादि ज्ञात्वा देवाः स्मरेव किम् ।
ईशोऽपि मानुषाज्ञात्वा ईशत्वप्राप्तये पुनः ।
यद्युद्योगी भवेत्तत् किं मानुषोऽहं न तत्परे ।
अन्यायि न भवेद्ब्रह्म यूयमन्यायिनः कथम् ।
वगलापि च या जप्या सा च ब्राह्मण एव हि ।
क्वचिदिशेषो भेदोऽपि वगलायां द्विजेऽपि न ।
अतस्तद्भवितुं विप्रा अहमप्येव तापसः ।
गुर्व्वाज्ञा मे पुराभूच्च सर्व्वं त्यक्त्वा जपं कुरु ।
अतोऽहं सकलं त्यक्त्वा केवलां वगलां जपे ।
वगलायां द्विजे नैव क्वचिद्भेदोऽस्ति शासने ।
अतो विप्रोऽस्मीति कामं ब्रुतवान् जपकर्म्मणि ।
गुरौ विप्रे मनौ चापि देवे चात्मनि भूसुराः ।
मसीग्रजातिः किञ्चिच्च न विशेषं विचिन्तयेत् ।
ब्राह्मणोऽप्यविशेषेण तस्मिंस्तस्मिंश्च भूसुराः ।
आत्मन्यात्मनि कीटेऽपि चेति वेदा जातिलक्षणम् ।
मूर्खोऽहं यच्च श्रुतवान् प्रभवो ब्राह्मणास्ततः ।
तदाचरितवान् मे को दोषोऽस्ति वदत द्विजाः ।
विनापराधतो विप्रा यूयं वामनरूपतः ।
बलिश्चातिप्रियं भक्तमधः प्राप्तापयन् यदि ।
अहं कीटोऽत्र नाश्चर्य्यं किमधो न पटे कथम् ।
कृताङ्गिपुटोऽहं वत्सरं यंतसंख्यया ।
प्रणमे सप्तटं विप्रा गच्छताहमधः पटे ।
अधोगच्छाम्यहं तत्र किञ्चित् खेदं करोमि न ।
वाग्व्ययामीति चाशा वो न कदापि भवतु क्वचित् ।
इत्यादि श्रुत्वा हे काश्यि ! जल्पां प्राप्यातिखेदिताः ।
ब्रुवन्ति चातिमधुरं क्रन्दन्त इव ते द्विजाः ।
हे चिन्नाङ्गद ! हे विद्वन् ! दौर्ब्बल्यं त्यज वत्सक !।
दुश्चिन्तां कुरु मा तात भद्रं ते कथयामि ते ।
जनस्योपरोधेनैव सर्व्वं भवितुमर्हति ।
नार्हतीशं विना तात ब्राह्मणो भवितुं क्वचित् ।
इतीश्वराज्ञा वेदेऽस्ति प्रतिजानीहि तत्त्वतः ।
वरं प्राप्नोति देवत्वं ब्राह्मणत्वं कदापि न ।
यथामरत्वमीशेन विना क्वापि न आसने ।
मा दुःखी त्वमधो गच्छ सुखेन वगलां जप ।
कृत्वेदृशसहस्राणि वगलोपेश्वरो भव ।

ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि ।
राज्यं भुक्त्वा ततो नैव पुनरावर्त्तनं तव ।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु ।
के जानन्तीदृशं त्वां हि भक्तश्रेष्ठं विवेचकम् ।
आपं दारुणमाऽस्त्वमधुना तन्न खण्डति ।
तात गच्छ सुखं भुङ्क्ष्व नागलोकेऽपि वित्तराट् ।
तत आनन्दमनसा गतचिन्ताऽदत्तजम् ।
स्वस्थानं ब्राह्मणाश्चापि जागच्छन् लब्धितान्तराः ।
भूयो मसीग्रः सर्व्वोऽपि विप्रदासाभिधोऽभवत् ।
विप्रप्रसादात् शूद्राणामपि श्रेष्ठो बभूव ह ।
वगलेति महामन्त्रं सर्व्वेषां सर्व्वकामदम् ।
केवलेन जपेनैव लक्षेण काजि। सिध्यति ।
वशीकरणकर्म्मादि दशसाहस्रतो भवेत् ।
अथ वक्ष्ये महेशानि। वगलासाधनं तव ।
वगलेति मनोः संख्या पुरश्चरणकर्म्मणि ।
लक्षेण मन्त्रसिद्धिः स्यात् नास्त्यत्र युगसंख्यकम् ।
ततो वश्यादि कर्त्तव्यं दशसाहस्रसंख्यया ।
शरीरारोग्यतो वापि धनेच्छुश्चायुतं जपेत् ।
कलावेतस्य हि मनोः प्रभावं किं ब्रवीमि ते ॥
सहस्रमात्रहोमेन सर्व्वसिद्धिर्न चान्यथा ।
नास्त्यपेक्षा हि ऋष्यादेः स्तुतिपाठादिकस्य वा ।
स्तुतिर्व्वा कवचं वापि ऋष्यादिन्यास एव वा ।
वगलेति स्वयं सर्व्वं सिद्धविद्या इति प्रिये !।
त्वयाद्यारूपया काजि ! जपयुक्ता पुरैकदा ।
शरीरारोग्यतो देवि ! वैरिनिग्रहतोऽपि वा ॥
दिवा नक्तञ्च कर्त्तव्या सहस्रमानतो ऊतिः ।
केवलाऽऊतिमात्रेण राजावारोग्यतां जभेत् ॥
वगले इति यो विद्यामाद्यामादौ विचार्य्य च वारयेत् ।
पथिस्था विघ्नदाः सर्व्वे पलायन्ते तमीक्षिताः ॥
भवेद्धि सपदं कर्म्म वगलेति स्मरन् जनः ।
वगलाजापिनं दृष्ट्वा सर्व्वे भीतिमवाप्नुयुः ॥
केवलं पटलमिदं पठन् ह्रदयन् मनोरथम् ।
जभेत् काजि! वपुस्थाता वगलाच्च न संशयः ॥
एवा विद्या मसीग्रेण सदोपास्या न संशयः ।
ब्राह्मणे वगलायाच्च चिन्तयेदेकरूपतः॥
विना प्रयुक्तिमपि च मसीग्रं आवयेद्द्विजः ।
आवयायां धनाकाङ्क्षी न भवेद्ब्राह्मणोत्तमः ॥
आलस्याद्वा प्रमादाद्वा आवयेद्यदि द्विजः ।
मसीग्रहत्यामागी स्याच्छावयित्वा तव प्रियः ।
ब्राह्मणोऽपि वरारोहे ! ह्रदयुयात् भक्तितत्परः ।
निर्व्वाणं लभते काजि! निष्कामी कोऽपि चेत् पठेत्।
एतदुक्तेऽपि कायस्थः ह्रदयुयान्न यदि प्रिये !।
पटलं काम्यदायुः ब्रह्महत्यापलं लभेत्" ।
इति आचारनिर्णयतन्त्रे वासुदेवसम्मते हर-पार्व्वतीसंवादे वगलिंग्रहमः पटलः ॥
"चाटचारणचौरेभ्यो वधबन्धभयादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थेभ्यो विशेषतः" ।
इति वह्निपुराणे पाशुपतदानाध्यायः ॥ * ॥

गौड़देशे तेषामागमनकारणम् । तत्रादौ मङ्गलाचरणं यथा,—
"यस्याभूद्भूमिदेवो वदनसरसिजेयद्भुजेभूमिपालो वक्षोर्व्वैश्य एव द्विजसजनरतिर्यस्य शूद्रःपदाब्जे ।

कृत्वा पातिव्यतीदं जगदिति प्रकृतिर्यः स्वयं पूजयन्तं
वन्देऽहं देवदेवं त्रिगुणमयवरं सर्व्वलोकानुकम्पम्"॥

अथ आदिशूररराजप्रशंसा ।
"श्रीमद्राजादिशूरोभवदवनिपतिर्धर्म्मराजो व आद्या
सल्लोकः सद्विचारैरदितिसुतपतिः स्वर्यथासीदतथासीत् । प्रातापादित्यतप्ताखिलतिमिररिपुस्तत्त्ववेत्ता महात्मा जित्वा बुद्धांश्चकार स्वयमपि नृपतिर्गौड़राज्यान्निरस्तान्" ॥ * ॥ अथादिशूरस्य पात्रं प्रति क्रतुश्च ब्राह्मणकुलीनशूद्रयोः प्रश्नस्योत्तरञ्च ।"पात्रं पप्रच्छ पूतं परमसुरपदद्वन्द्वपद्मार्चकोऽसौ कासन्ते काश्यपीग्राः क्रतुक्षतिकुशलाः क्वापि शूद्राः कुलीनाः । पात्रन्तेभ्यः सवोचत् परिचयमखिलं भूपवाक्यात् द्विजास्ते कोलाक्षस्याः कुरङ्गा इव किल तपसा नैव केषामधीनाः । कोलाक्षस्य महीपतिः क्षितिभुजामेकप्रधानः प्रधी खेटे निष्कमतिर्महाग्रयवरं श्रीवीरसिंहः स्वभूत् । तद्देशवासिनः समाधिक्षतिनः पापाक्षिसंहारिणः सन्ति ह्यासप्तमाः समासद हतो गौड़ेन्द्रभूमीश्वराः"। * ।

अथ वीरसिंहं प्रति जिपिप्रेरणम् ।
"भूपोऽभूद्भवने स्वचेष्टितपरः सद्भृत्यभार्य्यान्वितान् भूदेवान् हयवान् विचिन्त्य जिखनैरानेतुकामः स्वयम्। प्राचेग्र प्रणयप्रमोदरचितां श्रीवीरसिंहे जिपिं गौड़श्चापतिरेव पुण्यसमतिर्दूतेन प्राह्यापयत्" ॥*॥

अथ जिपिप्रकारः ।
"सज्जातसज्जतसंज्ञाः सर्व्वग्राह्यार्थदक्षा
जपितहतविपक्षाः स्वस्तिवाक्याः श्रुतिज्ञाः ।
सजितसुगतछन्दे गौड़राज्ये मदीये
द्विजकुलवरजाताः सानुकम्याः प्रयान्तु ।
नृपतिसुकृतिसारः खीयवंग्रावतारः
प्रवलबलविचारो वीरसिंहोऽतिवीरः ।
मयि वरसखिताक्षे भूमिदेवान् सशूद्रान्
पुनरपि मम गौड़े प्रापय त्वं नितान्तम्" ॥*॥
अथ ब्राह्मणशूद्राणां गौड़देशे गमनेच्छा ।
"मुदा गन्तुकामाः पुरावासगौड़ाः
समाहाय कोलाक्षदेग्रं क्षितीग्रम् ।
नृपाद्याश्च लब्ध्वा सदारादिभत्वा
महायोगिनस्ते बभूवुः सशूद्राः" । * ।
अथादिशूरसभीपे ब्राह्मणप्रेरणम् ।
"महाराजराजादिशूरो महात्मा
त्वया वीरसिंहस्य मेऽख्यादिसख्यम् ।
तवाज्ञानुसारात्रि प्रह्यापयामि
द्विजान् पञ्चगोत्रान् सदारादिभत्वान्"। *।

अथ ब्राह्मणानां गमनम् ।
"चलच्चलाश्वाखियानाः प्रधाना
दृढत्रमश्रुगुम्फातिशोभानलाभाः ।
क्रतुज्ञाः श्रुतिज्ञाः प्रतिज्ञासमाधाः
सवर्म्मास्त्रशस्त्राः प्रयाताः प्रयागम् ।
ततः स्नानदानादि कृत्वा च विप्राः
ययस्तेऽपि वाराणसीं पञ्चगोत्राः ।
ततो विश्वनाथं समालोक्य दानैर्-
यंग्रः प्राप्य तस्माद्ययाभू मिमाग्रः" । * ।

अथ ब्राह्मणानां गौड़राज्यप्रवेशो राजसमीपे आशिरर्थं गमनञ्च ।

"पितॄन् बान्धवांस्तारयित्वा गयायां
गताः प्राप्तिं गौड़राज्येश्वराज्यम् ।
ततस्तेजसा ते दिग्नो भासयन्तः
श्रुतिं व्याहृतिं भारतीं पाठयन्तः ॥
ततो हस्तदूर्व्वाक्षतान् पञ्चगोत्रा
नृपश्चाशिषं कर्त्तुमेव प्रतस्थुः ।
अमी पञ्च मध्याह्नमार्त्तण्डतुल्या
द्विजाः स्थापिताश्चाः परश्रेयसञ्च" ॥ * ॥

अथैषां वेषं दृष्ट्वा राज्ञोऽवज्ञा तेषां शुष्कवृत्तेः आशिषो निक्षेपञ्च । "दृष्ट्वैवं वेषमेषामवनिपतिरसौ भ्रान्तचित्तो द्विजानां तैरालापं न कृत्वा स्वगृहमपि ययौ गन्तुकामाः पुनस्ते । बुद्धा भूपालबुद्धिं त्वगमपि च बुधाः शुष्कवृत्ताशिषस्ते तद्वस्तात् प्राप्य दूर्व्वाक्षतंमपि स वभौ शुष्कवृत्तः सुवृत्तः" ॥ * ॥ अथ राज्ञा ब्राह्मणानां प्रश्नान्तनं गोत्रनामप्रश्नञ्च ।

"सविस्मया वै गजबद्धवस्त्रा
भूपादयस्ते चरणारविन्दम् ।
पवित्रकीर्त्तिं भुवि भूसुराणां
श्रुत्वा च पेतुः सकलाः प्रणम्य ॥
क्षमध्वमस्माकमुचित्तवादं
मूढ़ात्मनाचापराधं हि विप्राः ।
भो ब्रूत विप्राः किमु नाम गोत्रं
ततश्च सर्व्वे गदितुं प्रवृत्ताः" ॥ * ॥

अथ पञ्चब्राह्मणानां परिचयः ।

"अभूदन्ध्रवंशोद्भवो भट्टनारायणोऽयञ्च शाण्डिल्यगोत्रे गरीयान् । तपस्वान् यज्ञस्वान् दयावान् सुविद्वान् विवस्वानिवास्यां सभायां विभाति ॥ श्रुतितत्त्वतदङ्गविचारकरोऽवनिपालक काश्यपगोत्रवरः । क्रतुदत्तसमः किल दत्तमहाग्नयो नाम इति भुवि भाति यतिः ॥ समस्तशास्त्रपण्डितस्तथागतप्रखण्डितः प्रचण्डसर्व्ववैरिदर्पगर्व्वखर्व्वकारकः । सावर्णगोत्रसम्भवोऽत्र भाति वेदगर्भकः छान्दड़ः प्रभाति भूप वात्स्यगोत्रसम्भवः ॥ यज्ञः-सुधाकरोत्पत्यप्तिसङ्गयोषितानन्दाब्जे महातपस्तपोवह्नीकृतेन्द्रियः ॥ अयं श्रीलहर्षोऽनिशं दानहर्षो महर्षिर्यथास्यां तपोभिः प्रभाति । क्षितीन्द्र! क्षितौ यो भरद्वाजगोत्रेश्वरो विप्रवर्य्यः प्रतापारिशौर्य्यः" ॥ * ॥

अथ शूद्रपरिचयप्रश्नः ।

"के यूयं नाम किं वा कथयत कृतिनः स्वागताः क्वापि देशात् ? कोलाञ्चात् पञ्चशूद्रा वयमपि नृपते ! किङ्करा भूसुराणाम् । धन्या यूयं पृथिव्यां परिचयमखिलं ब्रूत भो विप्रभक्ताः श्रुत्वोचुर्व्विप्रवर्य्याः सकलपरिचयं भूपतेरन्ति चैषाम् ॥ * ॥

अथ पञ्चशूद्राणां परिचयः ।

"सुकृतालिकृताम्बर एष कृती
क्षितिदेवपदाम्बुजचारुरतिः ।
मकरन्द इति प्रतिभाति यति-
र्द्विजवन्द्यकुलोद्भवभट्टगतिः ॥

स च घोषकुलाम्बुजभानुरयं
प्रथिमेन्दुयशःसुरलोकवशः ।
सततं सुसखी सुमतिश्च सुधीः
शरदिन्दुपयोऽम्बुधिकुन्दयशाः ॥
वसुधाधिपचक्रवर्त्तिनो
वसुतुल्या वसुवंशसम्भवाः ।
वसुधाविदिता गुणार्णवै-
र्नियतं ते जयिनो भवन्तु नः ॥
दशरथो विदितो जगतीतले
दशरथप्रथितः प्रथमः कुले ।
दशदिशां जयिनां यशसा जयी
विजयते विभवैः कुलसागरे ॥
यशस्विनां यशोधरः सदा हि सर्व्वसादरः
प्रमत्तसत्वमत्तहृच्छरत्सुधांशुवद्यशः ।
प्रतापतापनोत्पद्दिधालियोविदालिको
विभाति मित्रवंशसिन्धुकालिदासचन्द्रकः ॥
द्विजालिपालनार्थकोऽप्यसौ च हर्षसेवकः ।
कुलाम्बुजप्रकाशकः यथान्धकारदीपकः ॥
अयं गुहकुलोद्भवो दशरथाभिधानो महान्
कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वितः ।
निशम्य गुहभाषितं सकलसभ्यहास्यं बभूत्
स वङ्गगमनोद्यतो विविधमानभङ्गो यतः ॥
अहञ्च पुरुषोत्तमः कुलभट्टयशगणः कृती
सदत्तकुलसम्भवो निखिलशास्त्रविद्योत्तमः ।
विलोकितुमिहागतो द्विजवरैश्च राज्यं प्रभो!
चकार नृपतिः सतं विनयहीनतो निष्कुलम्" ॥ * ॥

अथाष्टौ सिद्धमौलिकाः ।

"गौड़ेऽष्टौ कीर्त्तिमन्तस्तिरवसतिकृता मौलिका ये हि सिद्धास्ते दत्ताः सेनदासाः करगृहसहिताः पालिताः सिंहदेवाः । ये वापाद्याभिमुख्याः स्थितिविनयजुषः सप्ततिस्ते द्विपूर्व्वा होड़ाद्या वीक्ष्य राज्ञा चरणगुणयुता मौलिकत्वेन साध्याः" ॥ * ॥

अथ द्विसप्ततिः साध्यमौलिकाः ।

"होड़ः खर धर धरणीवान आदश्च सोमः पै सुर सामः । भद्रो विन्दो गुह वस लोधः शर्म्मा वर्म्मा ऊर भुद्र चन्द्रः ॥ रक्षो रक्षित राजादित्यो विष्णुर्नागः खिल पिल गूतः । इन्द्रो गुप्तः पालो भद्र ओमशङ्कर बन्धुर नाथः ॥ शाँई हेरश्च मनो गरुडो राहा राणा राऊत साना दाहा दाना गण उपमाना । खामः क्षोमो घर वैओमो वीरस्तेजस्वार्णव आप्तः ॥ शक्तिर्भूतो ब्रह्मः ज्ञानः क्षेमो हेमो वर्द्धन रङ्कः । गुहः कीर्त्तिर्यशः कुण्डुर्नन्दी शीलो धनुर्गुप्तः ॥ * ॥ इति दक्षिणराढ़ीयषटकारिका ॥ * ॥ * ॥ * ॥

अथ वङ्गजकुलाचार्य्यकारिका लिख्यन्ते ।

अथ शूद्रोत्पत्तिः ।

तथा चाग्निपुराणोक्तजातिमालायाम् ।

"आदौ प्रजापतेर्जाता मुखाद्विप्राः सदारकाः ।
बाहोश्च क्षत्रिया जाता उर्व्वोर्व्वैश्या विजज्ञिरे ॥
पादाच्छूद्रश्च सम्भूतस्त्रिवर्णस्य च सेवकः ।
होमनामा सुतस्तस्य प्रदीपस्तस्य पुत्रकः ॥
कायस्थस्तस्य पुत्रोऽभूद्भभूव लिपिकारकः ।

कायस्थस्य त्रयः पुत्राः विख्याता जगतीतले ॥
चित्रगुप्तश्चित्रसेनो विचित्रश्च तथैव च ।
चित्रगुप्तो गतः स्वर्गे विचित्रो नागसन्निधौ ॥
चित्रसेनः पृथिव्यां वै इति शूद्रः प्रचक्षते" ॥ * ॥

अथ चित्रसेनादिसुताः ।

"वसुर्घोषो गुहो मित्रो दत्तः करण एव च ।
मृत्युञ्जयश्च सप्तैते चित्रसेनसुता भुवि ॥
करणस्य सुता जाता नागो नाथश्च दासकः ।
मृत्युञ्जयतनूद्भूता देवः सेनश्च पालितः ॥
सिंहश्चैव तथा ख्यातश्चैते पञ्चतिकारकाः ।
एते पञ्चतिकाराश्च मुनिभिः कथिताः पुरा" ॥ * ॥

अथ द्वादशशुद्धवंशजाः ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नाथकः ।
दासो देवस्तथा सेनः पालितः सिंह एव च ॥
एते द्वादशनामानः प्रसिद्धाः शुद्धवंशजाः" ॥ * ॥

अथ सप्ताग्नीतिः पञ्चतिकाराः ।

"मृत्युञ्जयवंशभूतो नित्यानन्दो नृपेश्वरः ।
तस्यापि वंशसंजाताः सप्ताग्नीतिः प्रकीर्त्तिताः ॥
तेऽपि पञ्चतिकाराश्च मुनिभिः कथिताः पुरा" ॥ * ॥

तेषां नामानि ।

करो भद्रो धरो नन्दी पालश्चाङ्कुरदामकः ।
सारो धरश्चिहोड़ौ च वानश्चाश्चसोमकौ ॥
पै सुरः शोनकश्चैव भद्रो विन्दुर्गुहस्तथा ।
वसश्च लोदकश्चैव शर्म्मा वर्म्मा च भूमिकः ॥
ऊरश्च रक्षकश्चैव चन्द्रो रक्षितराजकौ ।
आदित्यविष्णुगुप्ताश्च खिलश्च पीलकस्तथा ॥
चाग्निर्हेरश्च बन्धुश्च शाक्तिश्च सुमनस्तथा ।
गरुडो राहकश्चैव राणाराऊतदाहकाः ॥
दाना गणश्च मानाश्च खामाप्तक्षेमधारकाः ।
वैतोषवेदकाश्चैन्द्रवार्णवश्चावशक्तिकः ॥
भूतो ब्रह्मः संज्ञः क्षोमो वर्द्धनो हेमरङ्कौ ।
भूमिः कीर्त्तिर्यशः कुण्डुः शीलश्चैव धनुर्गुणः ॥
दाँड़िर्मनोरितिश्चैव चाकिश्च नन्दनस्तथा ।
श्यामश्चाङ्कुश पूजिश्च तेजको नाद एव च ॥
रोहश्चोमश्च हाथिश्च ढोलश्च दूतकस्तथा ।
एते पञ्चतिकाराश्च सप्ताग्नीतिः प्रकीर्त्तिताः" ॥
एताः सप्ताग्नीतिपञ्चतयः द्वादशशुद्धपञ्चतयश्च मिलित्वा नवाधिकनवतिपञ्चतयो भवन्ति । एतेषां पुरोहितगोत्रप्रवरेण गोत्रप्रवरत्वं मुनिभिरुक्तम् ॥ *

अथ कान्यकुब्जात् पञ्चानां विप्राणां शूद्राणाञ्चागमनमाह देवीवरः ।

"अम्बष्ठकुलसम्भूत आदिशूरो नृपेश्वरः ।
राढ़गौड़वरेन्द्राश्च वङ्गदेशस्तथैव च ॥
एतेषां नृपतिश्चैव सर्व्वभूमीश्वरो यथा ।
अमात्यैर्बान्धवैश्चैव मन्त्रिभिर्द्विजवन्दकैः ॥
एतैः सह महीपाल एकदा स निजालये ।
उपविष्टो द्विजान् प्रष्टुं धर्म्मशास्त्रपरायणः ॥
केन यज्ञेन भगवन्प्रीतिर्भवति निश्चितम् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयध्वं द्विजोत्तमाः ॥
इति श्रुत्वा द्विजाः सर्व्वे खर्व्वीकृतकलेवराः ।
कथयन्ति नृपाग्रे तु सर्व्वे विस्मृतमानसाः ॥
केन केन विधानेन यज्ञो वा क्रियते बुधैः ।

कायस्थः

वयं सर्व्वे न जानीमो विधानं कीदृशं क्रतोः ॥
इति तेषां वचः श्रुत्वा चिन्तायुक्तो महीपतिः।
किं करोमि क्व गच्छामि विललाप पुनः पुनः ॥
कान्यकुब्जात् समानीतान् दूतेन द्विजपञ्चकान्।
वेदशास्त्रेष्ववगतान् सर्व्वास्त्रे च विशारदान् ॥
गोयानारोहितान् विप्रान् खड्गचर्म्मादिभिर्युतान्।
पत्तिवेशान् समालोच्य विषादो जायते हृदि ॥
अश्रद्धा जायते राज्ञ इति ज्ञात्वा द्विजोत्तमाः।
आशीर्व्वादार्थनिर्म्माल्यं मस्तकाळोपरि स्थितम् ॥
तदा काष्ठं सजीवं स्यात् फलपल्लवसंयुतम्।
इति दृष्ट्वा नृपस्तस्मिन् कम्पान्वितकलेवरः ॥
लोचञ्च वङ्कधा तेषामकरोत् स नृपोत्तमः।
आसनं पाद्यमानीय ददौ विनयपूर्व्वकम्।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ॥
राजंस्ते कुशलं सर्व्वं प्रोचुस्तेत्यवदत् स तान्।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
पूतञ्च भवनं जातं युष्माकं गमनं यतः।
एवञ्च क्रियते स्तोत्रं दृष्ट्वान्यत् शूद्रपञ्चके ॥
युष्माकं गोत्रमाख्या च किमर्थं वा द्विजैः सह।
तत् सर्व्वं श्रोतुमिच्छामि ब्रूत भोः शूद्रपुङ्गवाः ॥
इति राज्ञो वचः श्रुत्वा कथयन् नामगोत्रके।
काश्यपे चैव गोत्रे च दत्तनामा महामतिः ॥
तस्य दासो गौतमस्य गोत्रे दशरथो वसुः।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः स्मृतौ ॥
सौकालिनस्य दासोऽयं घोषः श्रीमकरन्दकः।
भरद्वाजेषु विख्यातः श्रीहर्षो मुनिसत्तमः ॥
दासस्तस्य विराटाख्यो गुहकः काश्यपः स्मृतः।
सावर्णगोत्रनिर्द्दिष्टो वेदगर्भमुनिस्त्वयम् ॥
तस्य दासो मित्रवंश्यो विश्वामित्रस्य गोत्रकः।
कालिदास इति ख्यातः शूद्रवंशसमुद्भवः ॥
वात्स्यगोत्रेषु सम्भूतश्छान्दड़सेति संज्ञितः।
मौद्गल्यगोत्रजो दत्तः पुरुषोत्तमसंज्ञकः ॥
एतेषां रक्षणार्थाय आगतोऽस्मि तवालये।
इति श्रुत्वा नृपस्तत्र मनसा हर्षमागतः ॥
विधानेनैव निर्व्वर्त्त्य क्रतुञ्च धर्म्मसंज्ञितम्।
ग्रामं सुवर्णं गाञ्चैव वस्त्राणि विविधानि च ॥
दक्षिणार्थं द्विजातिभ्यः प्रददौ स नृपोत्तमः।
अत्र देशे कृतावासाः सर्व्वे च द्विजशूद्रकाः ॥
बहवश्च प्रजा जाता नानादेशनिवासिनः" ॥ * ॥

अथ वङ्गजक्षत्रश्रेणिविभागः।

"अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः।
कुरुतेऽतिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरादीनतिविप्रान् शूद्रांश्चैव तथापरान्।
एतेषां सन्ततीः सर्व्वा आनयत् स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र ग्रामे निरोपिताः।
श्रेणीकृत्यन्तु निर्णीतं राढ़ीवारेन्द्रसंज्ञितम् ॥
तथैव द्विविधं प्रोक्तं कुलञ्च सद्विजोत्तमे।
शूद्रस्याथ चतस्रश्च नृपेण श्रेणयः कृताः ॥
उदग्दक्षिणराढ़ौ च वङ्गवारेन्द्रकौ तथा।
इति चतस्रः संज्ञाः स्युस्तत्तद्देशनिवासनात् ॥
कुर्णं चतुर्व्विधं तेषां श्रेणीश्रेणीविशेषतः" ॥ * ॥

अथ वङ्गजकायस्थश्रेणिनिर्णयः।

"तत्र वङ्गेषु यैः शूद्रैर्निवासः क्रियतेऽधुना।
तेषां निर्णयमाचक्षे कुलञ्चैव विशेषतः ॥
वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ।
घोषेषु च समाख्यातश्चतुर्भुजमहाह्वती ॥
गुहे दशरथश्चैव मित्रे तारापतिस्तथा।
दत्ते नारायणश्चैव एते च वङ्गजाः स्मृताः" ॥

अपरन्तु।

"नागे दशरथश्चैव महानन्दस्तु नाथकः।
चन्द्रशेखरदासस्तु सेने गङ्गाधरस्तथा ॥
दामोदरकरः ख्यातो दामस्तूषापतिस्तथा।
पालिते जनसंज्ञः स्यात् चन्द्रे नारायणाख्यकः ॥
पाले आवः समाख्यातो राहावंशे च लक्ष्मणकः।
भद्रे दिगम्बरश्चैव धरे तु व्याससंज्ञकः ॥
प्रभाकरस्तु नन्दी स्यात् केशवो देववंशजः।
अवीपतिरिति ख्यातः कुण्डुवंशे प्रकीर्त्तितः ॥
सोमे वंशधरश्चैव सिंहे रत्नाकरस्तथा।
नारायणः समाख्यातो रक्षिते च तथापरे ॥
वेदगर्भाङ्कुरश्चैव दैत्यारिर्विष्णुसंज्ञकः।
आढ्ये विलोचनः ख्यातो नन्दने च उषापतिः ॥
एते वङ्गजनिर्द्दिष्टा वल्लालेन महात्मना।
अन्येऽपि शूद्रा विख्यातास्तत्र देशनिवासिनः ॥
ते वङ्गजाः समाख्याताः करणेषु प्रतिष्ठिताः" ॥ * ॥

अथ वङ्गजकुलीनादिनिरूपणम्।

"कुलीन इति संज्ञा स्यात् मध्यन्यश्च तथापरः।
महापात्रोऽचलश्चैव इति संज्ञाचतुष्टयम्" ॥

तद्यथा।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नाथकः।
दासः सेनः करो दामः पालितश्चन्द्रपालकौ ॥
राहो भद्रो धरो नन्दी देवः कुण्डुश्च सोमकः।
रक्षिताङ्कुरसिंहाश्च विष्णुराहुश्च नन्दनः ॥
चत्वारोऽग्र्याख्यया मध्या महापात्राः परे तथा।
सप्तविंशतिः शूद्राणां वल्लालेन प्रशंसिताः" ॥ * ॥

इति कुलीनमध्यन्यमहापात्राः। अचलान् वक्ष्यामि।

"होड़श्च सारकश्चैव धरणीवान एव च।
आढ्यः पैसुरश्चैव ज्ञानश्च भञ्जविन्दुकौ ॥
गुहश्च बलभोधौ च शर्म्मा च भूमिकः।
ऊढश्च रक्षकश्चैव राणादित्यौ च पीलकः ॥
खिलश्च गुप्तचाकी च बन्धुश्च शाण्डिसंज्ञकः।
हेशश्च सुमगुर्गण्डो राणाराऊतदाहकाः ॥
दानागणापमानाख्याः खामः क्षेमश्च तोषकः।
वैद्यापि घरवेदौ च भूतार्णवकत्रक्षकाः ॥
एन्दश्च शक्तिसङ्गौ च क्षेमाग्नौ वर्द्धनस्तथा।
हेमश्च बन्धकश्चैव भूजिः कीर्त्तिश्च श्रीकरः ॥
धनुर्गुणो यशश्चैव मनोरीतिश्च दाड़िकः।
चाकिश्च श्याम पूर्णिश्च गरुड़को नादकस्तथा ॥
रोहश्च होमकश्चैव चाशकश्च तथैव च।
ढोलश्च दृतकश्चेति द्विसप्तत्यवलाः स्मृताः" ॥

एतेषां प्रतिपुरुषक्रमेण कुलार्च्चनात् महापात्रभावो जायते ॥ * ॥ इति वङ्गजघटकरामानन्दशर्म्मकृतकुलदीपिका ॥

कायस्था, स्त्री, (कायस्तिष्ठत्यनया। काय + स्था + घञर्थे कः।) हरीतकी। इति मेदिनी ॥ धात्री-

कायस्था

वृक्षः। इति जटाधरः ॥ काकोली। इत्यमरटीकायां भरतः ॥ एलादयम्। तुलसी। इति राजनिर्घण्टः ॥ कायस्थस्त्रीजातिः। कायस्थपत्न्यां कायस्थी ॥

कायिकः, त्रि, (कायेन निष्पादितः निष्पन्नो वा कायेन निर्वृत्त इति वा। काय + ठक्।) शारीरिकः। कायनिष्पन्नः। यथा।

"अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्" ॥

इति तिथ्यादितत्त्वम् ॥ (स्त्री, शरीरसम्बन्धिनी चक्रवृद्धिः। यथा मनुः ८। १५३।

"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या" ॥)

कायिकावृद्धिः, स्त्री, (गोबलीवर्द्दादीनां कायपरिश्रमसाध्या या वृद्धिः।) गवादिबलीवर्द्दादिकर्म्मयुता वृद्धिः। यथा।

"दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता" ॥

इति व्यासः ॥ मूलधनाविरोधिनी प्रत्यब्ददेयपणतदर्द्धादिरूपा वृद्धिः। यथा।

'कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका"।

इति नारदः ॥ हलायुधस्तु पणार्द्धाद्या इत्यत्र पणवाह्येति पठित्वा पणस्य मूलधनस्य यावदवस्थानं तावत् शश्वत् वर्षसहस्रमपि उत्तमर्णेन या वाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् तत्राद्या भोगलाभान्तर्गता अपरा च तद्भिन्ना इति मिश्राः। इति विवादार्णवसेतुः ॥

कारः, पुं, (कृ हिंसायां + भावे घञ्।) वधः। निश्चयः। (धातूनामनेकार्थत्वात् अत्र निश्चयार्थेऽपि॥ कं सुखं ऋच्छत्यनेन। क + ऋ + करणे + घञ्।) बलिः। यत्नः। यतिः। (कं सुखं निर्वृतिं ऋच्छतीति। क + ऋ + कर्त्तरि अण्।) पतिः। इति शब्दरत्नावली ॥ (कं निष्यन्दजलमृच्छतीति।) तुषारशैलः। इति मेदिनीकरहेमचन्द्रौ॥ कर्म्मोपपदे कर्त्रर्थवाचकः। यथा कर्म्मकारः स्वर्णकार इत्यादि। इति व्याकरणम् ॥ क्रिया। यथा करणं कारः क्रिया। इति रामतर्कवागीशाः ॥ (अक्षरान्ते तदक्षरवाचकः। यथा ककारः। मकारः। इत्यादिः ॥)

कारकं, स्त्री, (क्रियाभिरन्वितं इति। भाष्यमते तु करोति क्रियां निर्वर्त्तयतीति। कृ + कर्त्तरि ण्वुल्।) क्रियानिमित्तं लोकतः सिद्धम्। इति दुर्गसिंहः ॥ फणिभाष्यमते पुं, यथा भवितुः स प्रयोजकः कारकः। तत्तु षड्विधम्। कर्म्म १ यथा रामं नमति। करणम् २ यथा नेत्रैः शिवो दृष्टः। कर्त्ता ३ यथा जनैः शिवो दृष्टः। सम्प्रदानम् ४ यथा हरिः सद्भ्यः सुखं ददातु। अपादानम् ५ यथा बिभीषणः पदाद्भ्रष्टः। अधिकरणम् ६ यथा रेमे शरदि गोविन्दः। इति बोपदेवः ॥ वर्षोपलोदकं जलम्। इति राजनिर्घण्टः ॥

कारकः, त्रि, (करोति कर्म्मादिकम्। कृ + "ण्वुल्तृचौ"। ३। १। १३३। इति ण्वुल्।) कर्त्ता। इति मेदिनी ॥ (यथा मनुः ७। २०४।

"आदानमप्रियकरं दानञ्च प्रियकारकम्" ॥)

कारकुचीयः, पुं, (कारकुचि + छः।) शाक्यदेशः।

(तत्र भवः अण् बहुषु तस्य लुक्।) तद्देशीयजने बहुवचनान्तः। इति हेमचन्द्रः॥

कारणं, क्ली, (कार्य्यतेऽनेन। णिजन्तात् ल्युट्।) येन विना यन्न भवति तत्। तत्पर्य्यायः। हेतुः २ बीजम् ३। इत्यमरः। १। ४। २८॥ निमित्तम् ४ प्रत्ययः ५। इति जटाधरः॥ (यथा, विष्णुपुराणे। १। १७। ३०।

"यतः प्रधानपुरुषौ यतश्चैतत् चराचरम्।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु"॥)

कारणत्वमाह। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ब्ववर्त्तित्वम्। तच्चिविधम्। समवायिकारणत्वम् १ असमवायिकारणत्वम् २ निमित्तकारणत्वम् ३ परमाणुपरिमाणभिन्नानां कारणत्वम्। इति भाषापरिच्छेदः। १६-१७॥ अणुपरिमाणन्तु न कस्यापि कारणम्। इति सिद्धान्तमुक्तावली (यथा, हरेः रामायणे। १। ६४। ११।

"बहुभिः कारणैर्देव! विश्वामित्रो महामुनिः।
लोभितः क्रोधितश्चैव तपसा चाभिवर्द्धते"॥)

करणम्। (क्त बधे + स्वार्थे णिच् भावे ल्युट्।) बधः। इति मेदिनी॥ (आदिः। मूलम्। यथा, मनुः। ११। ८४।

"ब्राह्मणः सम्भवेनैव देवानामपि दैवतम्।
प्रमाणञ्चैव लोकस्य ब्रह्मात्रैव हि कारणम्"॥

प्रमाणम्। यथा, मनुः। ८। २००।

"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित्।
आगमः कारणं तत्र न सम्भोग इति स्थितिः"॥)

इन्द्रियम्। (यथा, गीतायाम्। १३। २०।

"कार्य्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते"॥

"कार्य्यं शरीरं कारणानि सुखदुःखसाधनानीन्द्रियाणि तेषां कर्त्तृत्वे तदाकारपरिणामे"। इति तट्टीकायां श्रीधरस्वामी॥) देहः। (यथा, शार्ङ्गधरपद्धतौ। १३।

"अनाद्यविद्याऽनिर्व्वाच्या कारणोपाधिरुच्यते।
उपाधिचितयादन्यमात्मानमवधारयेत्"॥)

साधनम्। (करणमेव स्वार्थे अण्।) कर्म्म। (यथा, चाणक्ये। २३।

"न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचित् रिपुः।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा"॥)

कायस्थः। (करणशब्दोऽस्य विशेषो ज्ञेयः॥) वाद्यप्रभेदः। गीतप्रभेदः। इति भरतधृतरत्नकोषः॥ (आदिकारणत्वात् विष्णुः। यथा महाभारते। १३। १७६। ५४।

"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"॥

शिवः। यथा शङ्करः शते वेदसारशिवस्तवे ७।

"अजं शाश्वतं कारणं कारणानाम्
शिवं केवलं भासकं भासकानाम्"॥)

कारणगुणोद्भवगुणः, पुं, (कारणगुण उद्भवो यस्य। स चासौ गुणश्चेति कर्म्मधारयः।) कारणगुणपूर्ब्बकगुणः। तद्यथा। रूपम् १ रसः २ गन्धः ३ पाकजस्पर्शः ४ द्रवत्वम् ५ स्नेहः ६ वेगः ७ गुरुत्वम् ८ एकत्वम् ९ पृथक्त्वम् १० परिमाणम् ११ स्थितिस्थापकसंस्कारः १२। इति भाषापरिच्छेदे। ६६॥

कारणशरीरं, क्ली, (कारणं अविद्या सैव शरीरम्। अनाद्यविद्याऽनिर्व्वचनीयं शरीरद्वयकारणमात्मम्। सत्स्वरूपाज्ञानं यदस्ति तत्कारणशरीरमित्याहुः।) सत्त्वप्रधानमज्ञानम्। (किन्तु बीजावस्थायां सूक्ष्मवृत्तित्वात् विषयव्यापाररहितस्यान्तःकरणस्य सततं सुखस्वरूपेणानुभूयतेऽसौ ह्यहा।) तत्पर्य्यायः। आनन्दमयकोषः २ सुषुप्तिः ३। (यदुक्तं वेदान्तसारे। १६।

"अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरं आनन्दप्रचुरत्वात् कोषवदाच्छादकत्वाच्च आनन्दमयकोषः सर्व्वोपरमत्वात् सुषुप्तिः अतएव स्थूलसूक्ष्मशरीरलयस्थानमिति घोष्यते"॥ अत्र सुबोधिनी यथा।

"प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इन्द्रियतद्विषयाभावे व्यासङ्गाभावादानन्दबाहुल्यादानन्दमयत्वं आच्छादकत्वात्कोषत्वञ्च युक्तमितिभावः। ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्ब्ववत् संज्ञाभेद इति वक्तुं तत्र युक्तिमाह सर्व्वोपरमत्वादिति। पञ्चीकृतस्थूलशरीरस्य व्यावहारिकस्य स्वाप्नप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः। तथा चोक्तम्।

"लये फेनस्य तद्धर्म्मा द्रव्याद्याः स्युस्तरङ्गके।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा॥
व्यवहारिक देहस्य लयः स्यात् प्रतिभासिके।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि"॥)

कारणा, स्त्री, (कृ हिंसायाम्। णिजन्तात् ल्युट्। "ण्यासश्रन्थेति"। ३। ३। १०७। युच् ततः टाप्।) यातना। गाढ़वेदना। इत्यमरः। १। ८। ३॥ नरकराजा यमयातना। इति केचित्। इति भरतः॥

कारणिकः, त्रि, (कारणैः कारणैर्वा चरति। "चरतीति"। ४। ४। ८। ठक्।) परीक्षकः। इत्यमरः। ३। १। ७॥

कारणोत्तरं, क्ली, (कारणेन उत्तरम्।) प्रत्यवस्कन्दनम्। सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूपकारणं ब्रूयात् तदा तदुत्तरम्। तच्चिविधम्। बलवत् १ तुल्यबलम् २ दुर्ब्बलम् ३। आद्यं यथा मया त्वत्तः शतं गृहीतमिति सत्यं किन्तु तत् परिशोधितम्। द्वितीयं यथा मदीयेयं भूमिः क्रमागतत्वादिति वादिनोऽपि तथोत्तरम्। तृतीयं यथा ममेयं भूमिः क्रमागतत्वात् इति वादिनो ममेयं भूमिः दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम्। इति व्यवहारतत्त्वम्॥

कारण्डवः, पुं स्त्री, (जमनाडड इति रमेर्ड। रण्डः। ईषत् रण्डः। "ईषदर्थे" ६। ७। १०५। इति कोः कादेशः। कारण्ड वाति। वा गतौ + "आतोनुपेति"। ३। २। ३। कः। कारण्डस्येदं कारण्डं तदाकारं वाति वा।) हंसविशेषः इत्यमरः। २। ५। ३४॥ खड़हाँस इति भाषा। (यथा ऋतुसंहारे। शरद्वर्णने ८।

"कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः"॥)

कारण्डव्यूहः, पुं, (बहुभेदः। इति चिकाण्डशेषः। (बौद्धशास्त्रविशेषः॥)

कारन्धमी, [न्] पुं, (कर एव कारन्धं धमतीति। ध्मा + इनिः। एषोदरादित्वात् साधुः।) कांस्यकारः। धातुवादरतः इति मेदिनी॥

कारम्भा, स्त्री, (ईषत् रम्भा। कोः कादेशः।) प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ५६॥

कारवः, पुं, (का इति रवो यस्य। कुत्सितो वो यस्येति वा।) काकः। इति चिकाण्डशेषः॥

कारवल्ली, स्त्री, (कारा इतस्ततो विच्छिन्ना वल्ली यस्याः। यद्वा कुत्सित आरो गतिर्यस्याः। सा चासौ वल्ली चेति।) कारवेल्लः। काण्डीरः। इति राजनिर्घण्टः॥

कारवी, स्त्री, (कारं वाति। वा + कः। ङीः जलोपलक्षितवर्षाकाले रवो यस्य। कारवः केकावरो मयूरस्तस्य पुच्छमिवाकारोऽस्यस्य अच्। यद्वा कृ हिंसायां स्वार्थे णिच्ततः क्विप्। कारमवति। कर्म्मण्यण्। गौरादित्वात् ङीष्।) मधुरा। मौरी इति भाषा। दीप्यः। मयूरशिखा। वनजटा इति भाषा। क्षेत्रयमानिका इति केचित्। सवयी। केचे जीरा इति भाषा। हिङ्गुपत्री। हिङ्गेर पाता इति भाषा। इत्यमरभरतौ॥ क्षुद्रकारवेल्ली। इति राजनिर्घण्टः। छोट करला इति भाषा।

कारवेल्लं, क्ली, (कारं वेल्लति। वेल्ल चलने कर्म्मण्यण्। यद्वा कारेण वातगमनेन वेल्लति चलति गच्छति वा वेल्ल चलने अच्।) कठिल्लकम्। करला इति भाषा। तत्पर्य्यायगुणाः।

"कारवेल्लं कठिल्लं स्यात् कारवेल्ली ततो लघुः।
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम्।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत्।
तदूना कारवेल्ली स्यादिशेषाद्दीपनी लघुः"।

इति भावप्रकाशः॥ अमरे पुंलिङ्गोऽयम्॥

कारवेल्लः, पुं, (कारेण वायुवत् गत्वा वेल्लति चलतीति। कार + वेल्ल + अच्।) लताविशेषः। करला इति भाषा। तत्पर्य्यायः। कठिल्लकः २ सवयी ३। इत्यमरः। २। ४। १५४॥ सुवयी ४ सुग्रवी ५। इति तट्टीका॥ कण्डुरः ६ कायडकटुकः ७ सुकायडः ८ उग्रकायडः ९ कठिल्लः १० गान्धासम्बेदनः ११ पटुः १२। इति राजनिर्घण्टः। तत्पुष्पगुणाः। धारकत्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च॥ तत्फलगुणाः। शुक्रकफपित्तनाशित्वम्। रुचिकरत्वञ्च। इति राजवल्लभः॥

कारवेल्लकः, पुं, (कारवेल्ल एव। स्वार्थे कन्।) कारवेल्लः। इति रत्नमाला॥ (स्त्रीत्वमपि दृश्यते। यथा सुश्रुते सूत्रस्थाने ४६ अध्याये।

"तद्वत् कर्कोटकं प्रोक्तं कारवेल्लकमेव च"॥)

कारवेल्ली, स्त्री, (कारवेल्ल + अल्पार्थे ङीष्।) क्षुद्र-

कारवेल्लम्। करेलो इति हिन्दी भाषा। उच्चे इति वङ्गभाषा॥ (यदुक्तं पाकराजेश्वरे।
"कारवेल्लीफलं तिक्तं श्लेष्मितं हिक्कमर्दितम्।
भर्ज्जितं नवनीतेन सैन्धवेन समन्वितम्॥
विदलितमुखमीषत् कारवेल्लीकठोरं
पुलकितमिव तैले साधितं रामठेन।
रुचितमरिचचूर्णं सैन्धवेनातिपूर्णम्
सुललितरसनाग्रं लोलता मातनोति"॥
अन्यत् कारवेल्लशब्दे द्रष्टव्यम्॥)

कारमिहिका, स्त्री, (कारस्य तुषारशैलस्य मिहिका नीहार इव।) कर्पूरम्। इति राजनिर्घण्टः॥

कारस्करः, पुं, (कारं वधं करोतीति। कृ+"कृञो हेतुताच्छील्यानुलोम्येषु"। ३।२।२०। इति टः निपातनात् सुट्।) वृक्षविशेषः। तत्पर्य्यायः। किम्पाकः २ विषतिन्दुः ३ करद्रुमः ४ रम्यफलः ५ कुपीलुः ६ कालकूटः ७। (यथा महाभारते २। द्यूतपर्व्वणि ६६। २१।
"आवर्ज्जिता इवाभान्ति नीपाश्चित्रककौकुराः।
कारस्करा लौहजङ्घा युधिष्ठिरनिवेशने"॥)
अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। कुष्ठवातामयास्रकण्डूतिकफार्शोव्रणनाशित्वञ्च।
इति राजनिर्घण्टः॥

कारस्कराटिका, स्त्री, (कारस्कर इव अटति। अट्+ण्वुल्टाप् अत इत्वञ्च।) कर्णजलौका। इति त्रिकाण्डशेषः॥ केर्णो केनुइ इति च भाषा॥

कारा, स्त्री, (कीर्य्यते क्षिप्यते दण्डार्हो यस्याम्। कॄ विक्षेपे भिदादित्वात् अङ्। "ऋदृशोऽङीति" ७।४।१६। गुणे दीर्घत्वं निपात्यते।) कारागारम्। तत्पर्य्यायः। बन्धनालयः २ इत्यमरः। २। ८। ११६॥ दूती। प्रसेवकः। सुवर्णकारिका। बन्धनम्। इति मेदिनी॥ पीड़ा। इति त्रिकाण्डशेषः॥

कारागारं, क्ली, (कारैव आगारं कारायै बन्धनाय आगारं वा।) बन्धनगृहम्। यथा। "रिपुः कारागारं कलयति च तं केलिकलया"। इति तन्त्रसारे श्यामारहस्योक्तम्॥

कारागुप्तः, त्रि, (कारायां बन्धनागारे गुप्तः रक्षितो वा।) कारागारस्थः। इति हेमचन्द्रः। कयेदी इति भाषा॥

कारायिका, स्त्री, (कं जलं आरातिं आदत्ते प्रचरणस्थानतया इति यावत्। आ+रा+ण्वुल् टाप् इत्वञ्च।) बलाका। इति जटाधरः॥

कारावेश्म, [न्] क्ली, (कारैव कारायै वा वेश्म गृहम्।) कारागारम्। तत्पर्य्यायः। वधाङ्गकम् २। इति त्रिकाण्डशेषः॥

कारिः, स्त्री, (क्रियतेऽसौ। कृ+"विभाषाख्यानपरिप्रश्नयोरिञ्च"। ३।३।११। इति इञ्।) क्रिया। (यदुक्तं सिद्धान्तकौमुद्यां। "त्वं कां कारिमकार्षीः। सर्व्वां कारिमकार्षम्"॥) करोतीति डु कृञ् करणे। "कृञ उदीचां कारुषु" उणां। ४।१२८। इति इञ्।) श्लिष्यति चि। इति मेदिनी॥

कारिका, स्त्री, (धात्वर्थे निर्द्देशे करोतेरण्वुल् शित्त्वाद्वृद्धिः। यद्वा करोतीति ण्वुल् प्रत्ययस्यादिति इत्वम्।) नटस्त्री। क्षतिः। विवरणश्लोकः। (यथा, महाभारते। २।११। ३३।
"नाटका विविधाः काव्याः कथाख्यायिकाकारिकाः"॥)
श्लिष्यम्। ग्रातना। इति मेदिनी॥ वृद्धिः। इत्यमरटीकायां रमानाथः। सुद इति भाषा॥ स्वल्पाक्षरत्वेन बह्वर्थज्ञापिका कविता। यथा,—
"कारिका तु स्वल्पवृत्तौ बह्वोरर्थस्य सूचनी"।
इति हेमचन्द्रः॥

कारित, त्रि, (कृ+णिच्+कर्म्मणि क्तः।) कुर्व्वन् प्रेरितः। कराण इति भाषा। यथा, मार्कण्डेये। देवीमाहात्म्ये ८१। ६५।
"विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्"॥

कारिता, स्त्री, (कारित+टाप्।) ऋणिकेन या स्वकार्य्यसाधकतया अधीतिसमागदिकशतादितोऽधिका वृद्धिर्व्यवस्थापिता सा। अधिक् सुद इति भाषा। यथा, विवादार्णवसेतौ कात्यायनः॥
"ऋणिकेन तु या वृद्धिरधिका संप्रकीर्त्तिता।
आपत्कालकृता नित्यं दातव्या सा तु कारिता"॥
(तथा च मनुः ८।१५३।
"नाति सम्वत्सरीं वृद्धिं न चाटां पुनर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या"॥)
तत्पर्य्यायः। कारिका २ कारितावृद्धिः ३। इति मिताक्षरा॥

कारी, स्त्री, (कृणाति हिनस्ति कण्टकैः। कॄ हिंसायां+इन् ततो ङीष्।) वृक्षविशेषः। कण्टकारी आकर्षकारीत्येषा द्विधा। तत्पर्य्यायः। कारिका २ कार्य्या ३ गिरिजा ४ कटुपत्रिका ५। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। पित्तनाशित्वम्। दीपनत्वम्। ग्राहित्वम्। रुचिकरत्वम्। ज्वरघ्नौषधकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

कारीषं, क्ली, (करीषाणां समूहः। भिदादित्वात् अण्।) करीषसमूहः। इत्यमरः। ३। २। ४३॥ घुटेर राशि इति भाषा। (यथा, हरिवंशे।
"कारीषेषु प्रदीप्तेषु दीप्यमानेषु सर्व्वशः"॥

कारुः, पुं, (करोति इति। "कृवापाजिमीति"। उणां १।१। उण्।) विश्वकर्म्मा। इति मेदिनी॥ (भावे उण्।) श्लिष्यम्। इति हेमचन्द्रः॥

कारुः, त्रि, (करोति इति। कृ+उण्। उणां।१।१।) कारकः। (यथा, भट्टिः ७। २८।
"राघवस्य ततः कार्य्यं कारुर्व्वानरपुङ्गवः।
सर्व्ववानरसेनानामाश्वागमनमादिशत्"॥)
श्लिष्यी। इति मेदिनी॥ (यथा, कूर्म्मपुराणे।
"कारयित्वा तु कर्म्माणि कारुं पश्चान्न वञ्चयेत्"॥)

कारुकः, त्रि, (कारु+स्वार्थे कन्।) श्लिष्यी। (यथा मनुः। ४। २१६।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति"॥)

कारुजः, पुं, (कं जलं आरुजति। आ+रुज+कः।) करभः। फेनः। वल्मीकः। नागकेशरः। गैरिकम्॥

कार्त्तस्व (कारोः कारुतो जायते। कारु+जन+डः।) श्लिष्यिणां चित्रम्। स्वर्णं जातलिङ्गः। इति हेमचन्द्रः॥

कारुणिकः, त्रि, (करुणा शीलमस्य। शीलमिति ठक्।) दयालुः। इत्यमरः। ३। १। १५॥ (यथा, रघुः। १५। ७१।
"कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम्"॥)

कारुण्डी, स्त्री, (कुत्सितः ईषत् वा रण्डी मूर्द्धहीना इव।) जलौकाः। इति शब्दचन्द्रिका॥ कारुण्डिका इति च पाठः॥

कारुण्यं, क्ली, (करुणः करुणावान्। तस्य भावः। करुणैव वा ष्यञ्।) करुणा। इत्यमरः। १। ७। १८॥ (यथा गोः रामायणे १। २। १५।
"मुनेः शिष्यसहायस्य कारुण्यं समजायत"॥)

कारूषाः, पुं, (करूषो अभिजन एषाम्। भर्गादित्वात् अण् बहुषु न तस्य लुक्।) करूषदेशवासिनः। तत्पर्य्यायः। दक्षब्रह्माः २। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥ (यथा, विष्णुपुराणे २। ३। १६।
"कारूषा मालवास्चैव पारियात्रनिवासिनः"।)

कारोत्तमः, पुं, (कारेण सुरागालनेन उत्तमः। मद्यस्य उत्तमतया तथात्वम्।) कारोत्तरः। इत्यमरटीकायां स्वामी॥

कारोत्तरः, पुं, (कारेण सुरागालनक्रियया उत्तरति। उत्+तॄ+अच्।) सुराग्रभागः। तत्पर्य्यायः। सुरामण्डः २। इत्यमरः। २। १०। ४३॥ कूपः। इति हारावली॥

कार्कश्यं, क्ली, (कर्कशस्य भावः। कर्कश+ष्यञ्।) कर्कशता। (यथा, अमरुशतके २४।
"कार्कश्यंगमितेपि चेतसि तनू रोमाञ्चमालम्बते"॥)

कार्त्तवीर्य्यः पुं, (कृतवीर्य्यस्य अपत्यं अण्।) चन्द्रवंशीयकृतवीर्य्यराजपुत्रः। तत्पर्य्यायः। हैहयः २ दोःसहस्रभृत् ३ अर्জ্জुनः ४। (यथा, भागवते ६। २३। २४।
"न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञदानतपोयोगश्रुतवीर्य्यजयादिभिः"॥

अस्य खलु माहिष्मती नाम पुरी राजधान्यासीत्। भुजवीर्य्येणायं सप्तद्वीपां धरामजयत्। दत्तात्रेययोगात् बाहुसहस्रप्रभावं लब्धवान्। दिग्विजये आगतो रावणोऽनेन पराजितो निगडे बद्धः पितामहेन पुलस्त्यमुनिना ततो मोचितः। अयन्तु जमदग्नेराश्रमं गत्वा दनात् सवत्सां होमधेनुं जहार। ततः क्रुद्धेन जामदग्नेन सबलोनिहतोऽसौ कार्त्तवीर्य्यः। अथ वैरशुद्धिं चिकीर्षुभिः दुरात्मभिः कार्त्तवीर्य्यपुत्रैरागत्य स्वाश्रमे ध्यानस्थो जमदग्निर्निपातितः। ततोऽनेन पितृवधामर्षात् जातक्रोधेन परशुरामेण सर्व्वे हैहयाः निपातिताः॥ जैनराजचक्रवर्त्तिविशेषः। तत्पर्य्यायः। सुभूमः २। इति हेमचन्द्रः॥

कार्त्तस्वरं क्ली, (कृतस्वरे आकरभेदे भवम् अण् कृताः पठिताः स्वरा येन सः कृतस्वरः सामगानकर्त्ता तस्मै दक्षिणात्वेन देयं वा। "शैषे"। ४। २

६२ इत्यण्।) स्वर्णम्। (यथा, माघे १। २०। "स तप्तकार्त्तस्वरभास्वराम्बरः"॥)
धुस्तूरः। इत्यमरः। २। ४। ७७॥

कार्त्तान्तिकः, पुं, (कृतान्तं वेत्ति। "कृतूक्थादि सूत्रान्ताट्ठक्"। ४। २। ३०। इति ठक्।) ज्योतिर्व्वित्। दैवज्ञः। इत्यमरः। २। ८। १४॥

कार्त्तिकः, पुं, (कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे इति पाक्षिको अण्।) वैशाखादिद्वादश मासान्तर्गतसप्तममासः। कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे सः। अयं तुलास्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रः। सौरस्तु तुलाराशिस्थरविककालः। इति स्मृतिः॥ तत्पर्य्यायः। बाऽलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४। इत्यमरः। १। १७॥ कौमुदः ५। इति शब्दरत्नावली॥ *॥

अथ कार्त्तिककृत्यम्।

पद्मपुराणे।

"तुलामकरमेषेषु प्रातःस्नानं विधीयते"।

तत्र संकल्पः अरुणोदयकाले मज्जनं कृत्वाचम्य ॐ तत्सदद्य कार्त्तिके मासि अमुकपक्षे अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रः श्री अमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये इति संकल्प्य यथोक्तविधिना इतिकर्त्तव्यतां विधाय—

"ॐकार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन!। प्रीत्यर्थं तव देवेश! दामोदर! मया सह"॥

इति स्नायात्। मया सहेत्यत्र। प्रतिदिनसंकल्पे तु आरभ्य तुलास्थरविं यावत् प्रत्यहं इति न वक्तव्यम्। किन्तु मासीत्यनन्तरं तुलास्थरवाविति विधिकं वक्तव्यम्। चान्द्रस्नानवाक्यन्तु वैशाखकृत्ये अनुसन्धेयम्। तथा वायुपुराणे।

"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्। कार्त्तिकं सकलं स्नात्वा प्रातःस्नायी भवेन्नरः"॥ *॥

तथा च गारुडे।

"गवामयुतदानेन यत् फलं लभते खग!। तुलसीपत्रकैकेन तत् फलं कार्त्तिके स्मृतम्"॥

ॐअद्येत्यादि तुलसीपत्रकैकसमसंख्यायुतधेनुदानजन्यफलसमफलप्राप्तिकामः एतानि तुलसीपत्राणि श्रीविष्णवेऽहं ददे। इत्यभिलप्य एतानि तुलसीपत्राणि श्रीविष्णवे नमः। इत्यनेन दद्यात्॥ *॥

ब्रह्माण्डपुराणे।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम्। अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः॥
ॐदामोदराय नमसि तुलायां लोलया सह। प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे"॥

लोलया लक्ष्म्या।

"इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना। आकाशे मरुपे वापि स चाक्षयफलं लभेत्"॥

स्नानवत्। ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अक्षयदीपदानफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा आकाशे मरुपे वापि श्रीविष्णवे दीपदानमहं करिष्ये। इति संकल्प्य दामोदरायेत्यादिना दद्यात्। द्वितीयादिदिने ॐदामोदरायेत्यनेनेति विशेषः। विष्णुगृहे तु। ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अयुतगोसहस्रजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीविष्णवेश्मनि श्रीविष्णवे दीपदानमहं करिष्ये। इति संकल्प्य ॐ दामोदरायेत्यादिना दद्यात्। द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः॥ *॥

हविष्यान्नादौ तु ब्रह्मपुराणे।

"व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति। देवो वैमानिको भूत्वा स याति परमं पदम्"॥

तत्र अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा वैमानिकदेवत्वभवनपूर्ब्बकपरमपदप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा हविष्येतरभोजननिवृत्तिमहं करिष्ये। इत्यादिवाक्ये विशेषः। एवं फलाहारादावपि॥ *॥ हविष्यद्रव्याणि च।

"हैमन्तिकं सिताखिन्नं धान्यं मुद्गास्तिला यवाः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥
यष्टिका कालशाकञ्च मूलकं केमुकेतरत्। लवणं सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली॥
कदली लवली धात्री फलान्यगुड़मैक्षवम्। अतैलपक्वं मुनयो हविष्यान्नं विदुर्ब्बुधाः"॥

हैमन्तिकमित्यभिधायागस्त्यसंहितायाम्।

"नारिकेलफलञ्चैव कदलीं लवलीन्तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्॥
व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः"।

अत्र च आरब्धव्रतोपवासादौ फलजलादिभक्षणमप्याहतुरुद्योगपर्व्ववौधायनौ।

"अहो तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम्"॥ *॥

फलाहारादावपि तुलसीराहित्ये दोषमाह।

"तुलसीं विना या क्रियते न पूजा स्नानं न तद्यत् तुलसीं विना कृतम्।
भुक्तं न तद्यत् तुलसीविवर्ज्जितं पीतं न तद्यत्तुलसीविवर्ज्जितम्"॥ *॥

नारदीये।

"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि। चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्"॥

तथा च महाभारते।

"कौमुदन्तु विशेषेण शुक्लपक्षे नराधिप!। वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते"॥

कौमुदं कार्त्तिकम्। कार्त्तिकमधिकृत्य ब्रह्मपुराणम्।

"एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु। दिने दिने च स्नातव्यं शीतलासु नदीषु च।
वर्ज्जितव्या तथा हिंसा मांसभोजनमेव च"।

ततश्च मांसभोजननिषेधे कार्त्तिकमासतत्शुक्लपक्षतदेकादश्यादिपञ्चदिनानि शुक्लाशुक्लभेदात् पाप्मतारतम्याद्वा निर्दिष्टानि।

"कार्त्तिके शौकरं मांसं यस्तु भुङ्क्ते दुर्म्मतिः। षष्टिवर्षसहस्राणि रौरवे स परिपच्यते"॥ ओलपटोलकदम्बस्तनाककांस्यसन्धिजानि वर्জ्जयेत्।

"पटोलानि कदम्बानि स्तनाकसहितानि च। भुञ्जानः कार्त्तिके मासि यावदाहूतनारकी"॥ *॥

भूतचतुर्दश्यां कृत्यं तत्शब्दे द्रष्टव्यम्। तत्र दीपदाने विशेषो यथा,—

"ततः प्रदोषसमये दीपान्दद्यात् प्रयत्नतः। ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च।
कूटागारेषु चैत्येषु गृहासु च नदीषु च"॥

दीपदानमन्त्रः।

"ॐ नमः पितृभ्यः प्रेतेभ्यो नमो धर्म्माय विष्णवे। नमो धर्म्माय रुद्राय कान्तारपतये नमः"॥ *॥

दीपान्विताङ्गत्यं तत्शब्दे द्रष्टव्यम्। तत्र विशेषो यथा। तत्र बालातुरवृद्धव्यतिरेकेण दिवा न भोक्तव्यम्। तत्र पार्व्वणश्राद्धं कृत्वा प्रदोषे प्राचीनावीती दक्षिणामुखो व्यजनदुष्कान्।

"ॐ अस्माच्चास्मत्कुलानाञ्च मृतानां भूतदर्शयोः। उज्ज्वलज्योतिषा देहं दहेयं व्योमवर्त्मना"॥

इत्यनेन गृह्णीयात्।

"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्"॥

इत्यनेन भूमौ क्षापयेत्।

"ॐ यमलोकं परित्यज्य आगता ये महालये। उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते"॥

इत्यनेन पितॄन् विसर्জ्जयेत्। यद्येवं पूर्व्वदिन एव प्रदोषव्यापिन्यमावास्या तदा पूर्व्वदिन एव श्राद्धमङ्गत्वापि उल्कादानं कर्त्तव्यम्। आचारात् पञ्चभूतोपाख्यानञ्च श्रोतव्यम्। उभयतः प्रदोषव्याप्तौ परदिन एव युग्मात्। उभयतः प्रदोषाप्राप्तावपि उल्कादानं परदिने पार्व्वणानुरोधात्। अत्रैव पूर्व्वदिने लक्ष्मी रात्रौ पूज्या।

"अमावस्या यदा रात्रौ दिवाभागे चतुर्द्दशी। पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका"॥

इति वचनात्। लक्ष्मीपूजाविषयेऽप्येवं व्यवस्था। ततो गृहमध्ये उत्तराभिमुखो लक्ष्मीं पूजयेत्। ततः स्वस्तिवाचनपूर्ब्बकं ॐ सूर्य्यः सोम इति ॐ तद्विष्णोरिति च पठित्वा तिलपुष्पजलान्यादाय ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा परमविभूतिलाभकामो लक्ष्मीपूजनमहं करिष्ये। इति संकल्प्य शालग्रामे घटादिस्थजले वा भूतशुद्ध्यादिकं कृत्वा लक्ष्मीपूजयेत्। तद्यथा। ॐ पाद्मासनायै नमः इत्यादिना ध्यात्वा। ॐ भूर्भुवःस्वर्म्महालक्ष्मि! इहागच्छ इत्याद्यावाह्य एतत्पाद्यं ॐ लक्ष्म्यै नमः। एवमर्घ्याचमनीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलादि प्रत्येकं दद्यात्।

"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!। या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्"।

इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत्।

ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये! शुभे!।
सर्व्वतः पाहि मां देवि महालक्ष्मि! नमोऽस्तु ते"॥
ततः। "सुखरात्र्याः प्रदोषे तु कुबेरं पूजयन्ति ये"॥
इति स्कन्दधरवचनात्। कुबेरमपि पाद्यादिभिः पूजयेत्।
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः"॥
इति पठित्वा। ॐ कुबेराय नम इति त्रिः पूजयेत्। ततो गृहादिषु दीपान्दद्यात्। तत्र मन्त्रः।
ॐ अग्निर्ज्योती रविर्ज्योतिश्चन्द्रर्ज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥
ततो ब्राह्मणान् बन्धून् भोजयित्वा स्वयं भुञ्जीत। तत्र प्रत्यूषे भविष्योक्तं कर्म कर्त्तव्यम्। गोरोचनातिलकधारणं प्रदीपवन्दनं कृत्वा लक्ष्मीं त्रिः पूजयेत्॥ तत्र मन्त्रः।
"ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये! शुभे!।
महालक्ष्मि! नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रि! प्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
सम्वत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वलोकानां देवानां कृत्तिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि! नमोऽस्तु ते"॥
ॐ लक्ष्म्यै नमः इति त्रिः पूजयेत्। अन्यत् सुखरात्रिशब्दे द्रष्टव्यम्॥*॥

अथ द्यूतप्रतिपत्। तत्र प्रभाते अक्षक्रीड़ादिकं कार्य्यम्। तत्र जयेवर्षं शुभम्। पराजये वर्षमशुभम्। ततः संकल्प्य ग्रामे जले वा एतत् पाद्यं ॐ बलये नमः। इत्यादि संपूज्य।
"ॐ बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो!।
भविष्येन्द्र सुरारते! पूजेयं प्रतिगृह्यताम्"॥
अनेन पुष्पाञ्जलित्रयं दद्यात्।
"यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि"॥
तथा।
"महापुण्या तिथिरियं बलिराज्यविवर्द्धिनी।
स्नानं दानं व्रतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥*॥

अथ भ्रातृद्वितीया। तत्राश्वयुजशुक्लद्वितीयायां मध्याह्नात्पूर्व्वायां द्वितीयायां उभयदिने तथा चेत्परदिने तत्रैव युग्मात्। तत ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा खरक्तयमकामो यमादिपूजनमहं करिष्ये। इति संकल्प्य ग्रामे घटादिस्थजले वा पूजयेत्। एतत् पाद्यं ॐ यमाय नमः। एवं क्रमेण संपूज्य।
"एह्येहि मार्त्तण्डज! प्राग्रहस्त!
यमान्तकालोकधरामरेश!।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते"॥
इदमर्घ्यं ॐ यमाय नमः तत आचमनीयादिकं दत्त्वा प्रणमेत्।
"ॐ धर्म्मराज! नमस्तुभ्यं नमस्ते यमुनाग्रज!।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र! नमोऽस्तु ते"।

ततः ॐ चित्रगुप्ताय नमः। इत्यनेन पूजयेत्। ततः ॐ यमदूतेभ्यो नमः। इत्यनेन पाद्यादिभिः पूजयेत्। यमुनाञ्च पाद्यादिभिः संपूज्य प्रणमेत्।
"ॐ यमस्वसर्नमस्तेऽस्तु यमुने! लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्रि! नमोऽस्तु ते"॥
ततो भ्रातृभोजनकाले अन्नादिकं दत्त्वा भगिनी पठेत्।
"भ्रातस्त्वयानुज्ञाताहं भुञ्जे भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः"॥
ज्येष्ठा चेत् तवाग्रजाताहमिति वदेत्। ततः पुष्टिकामो भ्राता भुञ्जीत। "यत्नेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनं" इति वचनात्॥*॥

विष्णुत्यागं उत्थानैकादशीशब्दे द्रष्टव्यम्। तत्र कार्त्तिकशुक्लैकादश्यादितिथित्रयवृद्धौ वृद्धपद्मकम्।
"वृद्धोऽपि तत्र नाम्नीयान्मत्स्यश्चैव कदाचन"।
इति वचनात्॥ कार्त्तिक्यां गोदानादौ फलाधिक्यम्। "कार्त्तिक्यां गोप्रदो भवेत्"। इति वचनात्। इति कृत्यतत्त्वम्॥*॥*॥ अपि च।
अथ कार्त्तिकव्रतनित्यता। स्कान्देब्रह्मनारदसंवादे।
"दुर्ल्लभ्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न हि।
धर्म्मं धर्म्मभृतां श्रेष्ठ! स मातृगोघातकः॥
अव्रतेन च्छिपेद्यस्तु मासं दामोदरप्रियम्।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः॥
स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदानृती।
न करोति मुनिश्रेष्ठ! यो नरः कार्त्तिके व्रतम्॥
विधवा च विशेषेण व्रतं यदि न कार्त्तिके।
करोति मुनिशार्दूल! नरकं याति सा ध्रुवम्॥
व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही।
इष्टापूर्त्तं वृथा तस्य यावदाहूतसंप्लवः॥
संप्राप्ते कार्त्तिके मासे द्विजो व्रतपराङ्मुखः।
भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः॥
इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च।
स्वर्गं नाप्नोति विप्रेन्द्र! अकृत्वा कार्त्तिके व्रतम्॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी।
कार्त्तिके नरकं यान्ति अकृत्वा वैष्णवं व्रतम्॥
वेदैरधीतैः किं तस्य पुराणपठनैश्च किम्।
हुतं यदि न विप्रेन्द्र! कार्त्तिके वैष्णवं व्रतम्॥
जन्मप्रभृति यत्पुण्यं विधिवत्समुपार्जितम्।
भस्मी भवति तत्सर्व्वमकृत्वा कार्त्तिके व्रतम्॥
यद्दत्तञ्च परं जप्तं हुतञ्च सुमहत्तपः।
सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम्॥
सप्तजन्मार्ज्जितं पुण्यं वृथा भवति नारद!।
अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम्॥
पापभूतास्तु ते ज्ञेया लोके मर्त्या महामुने!।
वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्"॥
किञ्च।
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद!"॥
किञ्च।
"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने!।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कृताधमः"॥
किञ्च।

"पितृदानं पितृगणाः पितृपक्षे न वै कृतम्।
व्रतं न कार्त्तिके मासि श्रवणाम्भःपितर्पणम्॥
चैत्रे नान्दोलितो विष्णुर्भाद्रखानं न सञ्चले।
न कृता मद्दकी पुण्ये श्रावणे रोहिणाष्टमी॥
सङ्क्रमे न कृता येन द्वादशी श्रवणान्विता।
कुत्र यास्यन्ति ते मूढ़ा नाहं जानामि नारद!"॥
पाद्मे च। श्रीसौनकादिमुनिगणसंवादे।
"मानुषः कर्म्मभूमौ यः कार्त्तिकं नयते मुधा
चिन्तामणिं करे प्राप्य क्षिपते कर्दमाम्बुनि॥
नियमेन विना विप्राः कार्त्तिकं यः क्षिपेन्नरः।
कृष्णः पराङ्मुखस्तस्य यस्मादूर्ज्जोऽस्य वल्लभः"॥*॥
तत्र विशेषेण स्नानदानादिसत्कर्म्मनित्यता।
स्कान्दे तत्रैव।
"यैर्न दत्तं हुतं जप्तं न स्नानं न हरेर्व्रतम्।
न कृतं कार्त्तिके पुत्र! द्विजास्ते वै नराधमाः"।
किञ्च।
"यैर्न दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम्।
तेनात्मा हारितो नूनं न प्राप्तं प्रार्थितं फलम्"।
किञ्च।
"संप्राप्ते कार्त्तिके मासि ये रता न जनार्द्दने।
तेषां सौरिपुरे वासः पितृभिः सह नारद"॥
किञ्च।
"कार्त्तिके नार्चितो यैस्तु भक्तिभावेन केशवः।
नरकं ते गमिष्यन्ति यमदूतैस्तु यन्त्रिताः॥
जन्मकोटिसहस्रैस्तु मानुष्यं प्राप्य दुर्ल्लभम्।
कार्त्तिके नार्चितो विष्णुर्हारितं तेन जन्म वै॥
विष्णोः पूजा कथा विष्णोर्विष्णवानाञ्च दर्शनम्।
न भवेत् कार्त्तिके यस्य हन्ति पुण्यं दशाब्दिकम्"॥
अथ कार्त्तिकमाहात्म्यम्। स्कान्दे।
"कार्त्तिकस्य तु माहात्म्यं प्राक् सामान्येन लिख्यते।
ततो विशेषतस्तच्च कर्म्म देशादिभेदतः"॥
अथ सामान्यतः स्कान्दे तत्रैव।
"कार्त्तिकस्य तु मासस्य कोट्यंशेनापि नार्हति।
सर्व्वतीर्थेषु यत् स्नानं सर्व्वदानेषु यत् फलम्॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञा सदक्षिणाः।
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले॥
मेरुतुल्यसुवर्णानि सर्व्वदानानि चैकतः।
एकतः कार्त्तिको वत्स! सर्व्वदा केशवप्रियः॥
यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्त्तिके
तदक्षयं भवेत्सर्व्वं सत्योक्तं तव नारद!॥
कार्त्तिकं खलु वै मासं सर्व्वमासेषु चोत्तमम्।
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम्॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद!।
उदधीनाञ्च विप्रर्षे! क्षयो नैवोपपद्यते॥
पुण्यं कार्त्तिकमासे तु यत् किञ्चित् क्रियते मुने!
न तस्यास्ति क्षयो ब्रह्मन् प्रायश्चाप्येवमेव च॥
न कार्त्तिकसमो मासो न कृतेन समं युगम्।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम्॥
कार्त्तिकः प्रवरो मासो वैष्णवानां प्रियः सदा।
कार्त्तिकं सकलं यस्तु भक्त्या सेवेत वैष्णवः॥
पितॄनुद्धरते सर्व्वान् नरकस्थान् महामुने"॥
पाद्मे च तत्रैव।

"द्वादशस्वपि मासेषु कार्त्तिकः कृष्णवल्लभः।
तस्मिन् संपूजितो विष्णुरखण्डैरप्युपायनैः॥
ददाति वैष्णवं लोकमित्येवं निश्चितं मया।
यथा दामोदरो भक्तवत्सलो द्विदितो जनैः॥
तस्मायन्नादृशो मासः खल्पमप्युपकारकः।
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः॥
तत्रापि दुर्लभः कालः कार्त्तिको हरिवल्लभः।
दीपेनापि हि यत्रासौ प्रीयते हरिरीश्वरः॥
सुगतिञ्च ददात्येव परदीपप्रबोधनात्"॥*॥

अथ व्रतमाहात्म्यं स्कान्दे तत्रैव।

"व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम्।
कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम्॥
अक्रूरतीर्थे विप्रेन्द्र! कार्त्तिक्यां समुपोष्य च।
स्नात्वा यत् फलमाप्नोति तच्छ्रुत्वा वैष्णवं व्रतम्॥
वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्ब्बुदे।
गत्वा यत् फलमाप्नोति व्रतं श्रुत्वा तु कार्त्तिके॥
अनिद्रो च सदा यत्नैर्न श्रुत्वा पितृभिः सधाम्।
व्रतेन कार्त्तिके मासि वैष्णवन्तु पदं व्रजेत्॥
प्रदत्तानाञ्च भक्ष्याणां कार्त्तिके नियमे श्रुते।
अवश्यं कृष्णरूपत्वं प्राप्यते मुक्तिदं शुभम्"॥

किञ्च।

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मुनिसत्तम!।
वियोनिं न व्रजत्येव व्रतं श्रुत्वा तु कार्त्तिके"॥

किञ्च।

"कार्त्तिके मुनिशार्दूल! सश्रद्धया वैष्णवं व्रतम्।
यः करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता॥
सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते।
क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम्"॥*॥

अथ कर्म्मविशेषमाहात्म्यम्। स्कान्दे तत्रैव।

"दानं दत्तं श्रुतं जप्तं तपश्चैव तथा श्रुतम्।
तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजोत्तम"!॥

किञ्च।

"यत् किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः।
तदक्षयं लभ्यते वै अन्नदानं विशेषतः"॥

किञ्च।

"यस्तु सम्वत्सरं पूर्णमग्निहोत्रमुपासते।
कार्त्तिके स्नात्वा समेतन्न संशयः॥
कार्त्तिके या करोत्येवं केशवालयमण्डनम्।
स्वर्गस्था शोभते सा तु कपोती पक्षिणी यथा॥
यः करोति नरो नित्यं कार्त्तिके पत्रभोजनम्।
न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्दश॥
जन्मप्रभृति यत्पापं मानवैश्च श्रुतं भवेत्।
तत्सर्व्वं नाशमाप्नोति ब्रह्मपत्रेषु भोजनात्॥
सर्व्वकामफलं तस्य सर्व्वतीर्थफलं लभेत्।
न वापि नरकं पश्येत्ब्रह्मपत्रेषु भोजनात्॥
ब्रह्म चैव स्मृतः साक्षात् पलाशः सर्व्वकामदः।
मध्यमं वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम!॥
भुञ्जन्नरकमाप्नोति यावदिन्द्राश्चतुर्दश।
तिलदानं नदीस्नानं सत्कथा साधुसेवनम्॥
भोजनं ब्रह्मपत्रेषु कार्त्तिके मुक्तिदायकम्।
जागरं कार्त्तिके मासि यः करोत्यरुणोदये॥
दामोदराग्रे विप्रेन्द्र! गोसहस्रफलं लभेत्।

जागरं पश्चिमे यामे यः करोति महामुने!॥
कार्त्तिके सन्निधौ विष्णोस्तत्पदं करसंस्थितम्।
साधुसेवा गवां ग्रासः कथा विष्णोरथार्च्चनम्।
जागरः पश्चिमे यामे दुर्लभः कार्त्तिके कलौ"॥

किञ्च।

"जलधेनुसहस्रञ्च दृषसंस्थे दिवाकरे।
तोयं दत्त्वा यदाप्नोति स्नानं श्रुत्वा तु कार्त्तिके॥
सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे।
सूर्य्यवारेण यत्स्नानं तदेकाहेन कार्त्तिके॥
पितॄनुद्दिश्य यद्दत्तं कार्त्तिके श्रुत्वल्लभे।
अन्नोदकं मुनिश्रेष्ठ! अक्षयं जायते ध्रुवम्"॥*॥

किञ्च।

"गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नरः।
न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय!"॥

किञ्च।

"प्रदक्षिणञ्च यः कुर्य्यात् कार्त्तिके विष्णुसन्निधौ।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः॥
गीतं वाद्यञ्च नृत्यञ्च कार्त्तिके पुरतो हरेः।
यः करोति नरो भक्त्या लभते चाक्षयं फलम्॥
हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम्।
कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते॥
कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः।
वसते श्वेतद्वीपे तु पितृभिः सह नारद!॥
नैवेद्यदानेन तु हरेः कार्त्तिके यवसंख्यया।
युगानि वसते स्वर्गे तावन्ति मुनिसत्तम!॥
अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रतः।
कार्त्तिके तु मुनिश्रेष्ठ! युगान्ते न पुनर्भवः"॥

किञ्च।

"नियमेन कथां विष्णोर्ये शृण्वन्ति च भाविताः।
श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम्॥
सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः।
शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने!॥
श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम्।
कार्त्तिके मुनिशार्दूल! कुलानां तारयेच्छतम्॥
नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः।
निर्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत्॥
न तथा तुष्यते दानैर्न यज्ञैर्योगजादिकैः।
यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः॥
कार्त्तिके मुनिशार्दूल! यः शृणोति हरेः कथाम्।
स नित्यरति दुर्गाणि जन्मकोटिशतानि च॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने!।
अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्"॥

किञ्च।

"सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः।
कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्"॥

पाद्मे च तत्रैव।

"कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक्।
पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत्॥
स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ।
मोदते विष्णुसदृशो भजनानन्दनिर्वृतः"॥

किञ्च।

"कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः।

जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते॥
कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम्।
सूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते"॥

किञ्च।

"पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः।
निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते॥
मध्यमैश्वरं पत्रं वर्जयेद्ब्राह्मणेतरः"।

किञ्च।

"अपराधसहस्राणि पातकानि महान्त्यपि।
क्षमतेऽस्य हरिर्देवः पूजितः कार्त्तिके प्रभुः॥
नैवेद्यं पायसं विष्णोः प्रियं खण्डं घृतान्वितम्।
निभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने"॥

तत्रैव श्रीकृष्णसत्या संवादे।

"स्नानं जागरणं दीपं तुलसीवनपालनम्।
कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः॥
इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते।
देवानामपि ते वन्द्याः किंपुनर्जन्मतः कृतम्"॥*

तत्रैव कार्त्तिकव्रताङ्गानि।

"हरिजागरणं प्रातःस्नानं तुलसिसेवनम्।
उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके"॥

किञ्च।

"पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती।
फलमाप्नोति तत् प्रोक्तं भुक्तिमुक्तिफलप्रदम्॥
विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम्।
कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च॥
आपद्गतो यदाप्यम्भो न लभेत् सवनाय सः।
व्याधितो वा पुनः कुर्य्याद्विष्णोर्नामापमार्ज्जनम्॥
उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः।
ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत्।
तेषां वा रक्षणं कुर्य्याद्दातादिभ्यः प्रयत्नतः॥
अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम्।
सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि॥
सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे"॥*॥

अथ दीपदानमाहात्म्यम्। स्कान्दे तत्रैव।

"श्रुत्वा कोटिसहस्राणि पातकानि बहून्यपि।
निमेषार्द्धेनदीपस्य विलयं यान्ति कार्त्तिके"॥

किञ्च।

"शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम्।
दीपदानेन विप्रेन्द्र! न पुनर्जायते भुवि॥
रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे।
तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके॥
घृतेन दीपको यस्य तिलतैलेन वा पुनः।
ज्वलते मुनिशार्दूल! अश्वमेधेन तस्य किम्॥
मन्त्रहीनं क्रियाहीनं श्रौषहीनं जनार्द्दने।
सर्व्वं सम्पूर्णतां याति कार्त्तिके दीपदानतः॥
तेनेष्टं क्रतुभिः सर्व्वैः श्रुतं तीर्थावगाहनम्।
दीपदानं श्रुतं येन कार्त्तिके केशवाग्रतः॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले।
यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः॥
श्रूयते चापि पितृभिर्गाथा गीता पुरा द्विज!।
भविष्यति कुलेऽस्माकं पितृभक्तः सुतो भुवि॥

कार्त्तिके दीपदानेन यत्तोषयति केशवम् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"मेरुमन्दरमात्राणि हत्वा पापान्यशेषतः ।
दहते नात्र सन्देहो दीपदानात्तु कार्त्तिके ॥
गृहे वायतने वापि दीपं दद्याच्च कार्त्तिके ।
पुरतो वासुदेवस्य महापातकविघातिनः ॥
स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् ।
प्रदत्तः कार्त्तिके मासि दीपो वै मधुहायतः ॥
निमिषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके ।
न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि ॥
सर्व्वानुष्ठानहीनोऽपि सर्व्वपापरतोऽपि सन् ।
पूयते नात्र सन्देहो दीपं दत्त्वा तु कार्त्तिके ॥
तन्नास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! ।
यन्न शोधयते दीपः कार्त्तिके केशवाग्रतः ॥
पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके ।
प्राप्नोति शाश्वतं स्थानं सर्व्वाबाधाविवर्जितम् ॥
यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम् ।
द्वादश्याञ्च विशेषेण तस्य पुण्यं वदामि ते ॥
कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ! ।
समतीताश्च ये केचिद् येषां सङ्ख्या न विद्यते ॥
क्रीड़ित्वा सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"घृतस्यालेन विप्रेन्द्र ! कार्त्तिके केशवालयम् ।
द्योतयेद् यो महाभाग ! पुनात्यासप्तमं कुलम् ॥
कार्त्तिके दीपदानन्तु कुर्य्याद् यो वैष्णवालये ।
धनं पुत्रो यशः कीर्त्तिर्भवेत्तस्य च सर्व्वदा ॥
यथा च मधुसूदनः सर्व्वकालेषु दृश्यते ।
तथा च दृश्यते धर्म्मो दीपदाने न संशयः" ॥
किञ्च ।
"निर्द्धनेनापि विप्रेन्द्र ! हत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
वैष्णवो न स मन्तव्यः संप्राप्ते कार्त्तिके मुने ! ।
यो न यच्छति मूढ़ात्मा दीपं केशवसन्निधौ" ॥
नारदीये श्रीवल्लभदामोदिनीसंवादे ।
"एकतः सर्व्वदानानि दीपदानानि चैकतः ।
कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः" ॥
पाद्मे च तत्रैव ॥
"कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ ।
दिव्यकान्तिविमानाग्रे रमते स हरेः पुरे" ॥ * ॥
अथ तत्र परदीपप्रबोधनमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"घिष्टपक्षेऽन्नदानेन ज्यैष्ठाषाढ़े च वारिणा ।
कार्त्तिके तत् फलं पुंसां परदीपप्रबोधनात् ॥
बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात् ।
कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥
दीयमानन्तु ये दीपं बोधयन्ति हरेर्गृहे ।
परेद्यवपशार्दूल ! निर्ज्जीर्णा यमयातनां ॥
न तद्भवति विप्रेन्द्र ! इष्टैरपि महामखैः ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
एकादश्यां परैर्दत्तं दीपं प्रज्वाल्य मूषिका ।
मानुष्यं दुर्ल्लभं प्राप्य परां गतिमवाप सा" ॥ * ॥
अथ शिखरदीपमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"यदा यदा भासयते दीपकः कलसोपरि ।
तदा तदा मुनिश्रेष्ठ ! द्रवते पापसञ्चयः ॥
यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! ।
शिखरोपरि दीपस्य कलां नार्हति षोड़शीम्" ॥
किञ्च ।
"यः करोति परं दीपं मूल्येनापि महामुने ! ।
शिखरोपरि मध्ये च कुलानां तारयेच्छतम् ॥
विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके ।
केशवस्य महाभक्त्या कुले तेषां न नारकी ॥
दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम् ।
कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा ॥
कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्ल्लभम्" ॥ * ॥
अथ तत्र दीपमालामाहात्म्यम् ।
स्कान्दे तत्रैव ।
"दीपवृक्षेषु रचनां सवाह्याभ्यन्तरे हरेः ।
विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृत् ॥
दीपवृक्षेषु रचनां कुरुते केशवालये ।
तस्यालये प्रसूतानां लक्षाणां नरकं न हि ॥
विष्णोर्विमानं दीपाढ्यं सवाह्याभ्यन्तरे मुने ! ।
दीपोद्यतकरे मार्गे तेन प्राप्तं परं पदम्" ॥
भविष्ये च ।
"यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः ॥
सूर्य्यायतप्रकाशस्तु तेजसा भासयन् दिशः ।
तेजोराशिविमानस्थो जगदुद्योतयंस्त्विषा ॥
यावत्सदीपसङ्ख्या तु हृतेनापूर्य्य बोधिता ।
तावदर्षसहस्राणि विष्णुलोके महीयते" ॥ * ॥
अथ आकाशादिदीपमाहात्म्यम् ।
पाद्मे तत्रैव ।
"उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः ।
सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके ।
आकाशस्थं जलस्थञ्च गृहे तस्यापि यत्फलम् ॥
धनं धान्यं समृद्धिञ्च पुत्रवानीश्वरो गृहे ।
लोचने च शुभे तस्य विद्वानपि च जायते" ॥
किञ्च ।
"विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥
दीपदानादि सर्व्वत्र महाफलमवाप्नुयात्" ॥ *
आकाशदीपदानमन्त्रः । तत्रैव ।
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

अथ देशविशेषे कार्त्तिकमाहात्म्यविशेषः ॥
पाद्मे तत्रैव ।
"यत्र कुत्रापि देशेऽयं कार्त्तिकः स्नानदानतः ।
अग्निहोत्रसमफलः पूजायाञ्च विशेषतः ॥
कुरुक्षेत्रे कोटिगुणो गङ्गायाञ्चापि तत्समः ।
ततोऽधिकः पुष्करे स्याद्वाराणस्यां च माधव ! ॥
त्रयाणामेव मासानां पूजास्नानेषु कार्त्तिकः ।
अन्याः पूर्य्यन्तसमाना मुनयो मथुरां विना ॥
दामोदरत्वं हि हरेरत्रैवासीदयतः किल ।
मथुरायां ततश्चोर्ज्जो वैकुण्ठप्रीतिवर्द्धनः ।
कार्त्तिको मथुरायां वै परमावधिरिष्यते ।
यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ॥
कार्त्तिके मथुरा सेव्या ततोत्कर्षः परो न हि ॥
मथुरायां नरैरूर्ज्जे स्नात्वा दामोदरोऽर्च्चितः ।
त्रयाणामपि हि ते ज्ञेया नात्र कार्य्या विचारणा ॥
दुर्ल्लभः कार्त्तिको विप्र ! मथुरायां त्रयामिह ।
यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति ॥
मुक्तिं मुक्तिं हरिर्द्यादर्चितोऽन्यत्र सेविनाम् ।
भक्तिञ्च न ददात्येव यतो वश्यकरी हरेः ॥
सा त्वङ्गसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ।
मथुरायां सकृदपि श्रीदामोदरपूजनात् ॥
मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम् ।
मन्यते कार्त्तिके देवो मथुरायां सदर्शनम् ॥
यस्य पापस्य युज्येत मरणान्ता हि निष्कृतिः ।
तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम् ।
कार्त्तिके मथुरायां वै श्रीदामोदरपूजनम् ॥
कार्त्तिके मथुरायां वै पूजनाद्दर्शनं ध्रुवः ।
शीघ्रं संप्राप्तवान् बाको दुर्ल्लभं योगतत्परैः ॥
सुलभा मथुरा भूमौ प्रत्यब्दं कार्त्तिकस्तथा ।
तथापि संसरन्तीह नरा मूढ़ा भवाम्बुधौ ॥
किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः ।
कार्त्तिके मथुरायाञ्चेदर्च्यते राधिकाप्रियः ॥
यानि सर्व्वाणि तीर्थानि यदा गच्छः सरांसि च ।
कार्त्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले ॥
कार्त्तिके जन्मसदने केशवस्य च ये नराः ।
सङ्कल्पविद्याः श्रीकृष्णं ते यान्ति परमव्ययम् ॥
परोपहासमुद्दिश्य कार्त्तिके हरिपूजया ।
मथुरायां लभेद्भक्तिं किं पुनः श्रद्धया नरः" ॥ इति ॥
"इत्थं कार्त्तिककृत्यानि व्याख्यान्येव खतोऽभवन् ।
तत्र किञ्चिद्विशेषेण तद्विधिर्लिख्यतेऽधुना" ॥ * ॥
अथ कार्त्तिककृत्यविधिः । तत्रोपक्रमकालश्चोक्तः
श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥
नित्यं जागरणायान्ते यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
निशम्य वैष्णवान् धर्म्मान् वैष्णवैः सह हर्षितः ।
कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः ॥
नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत् ।
प्रभुं प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि ॥
तत्र सङ्कल्पमन्त्रः ।
"कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! ।

प्रीत्यर्थं तव देवेश दामोदर ! मया सह" ॥
प्रार्थनमन्त्रस्तु ।
"तव ध्यानेन देवेश ! जलेऽस्मिन् स्नातुमुद्यतः ।
तत्प्रसादाच्च मे पापं दामोदर ! विनश्यतु" ॥
अर्घ्यमन्त्रः ।
"व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम" ।
अर्घ्यं गृहाण देवेश ! नमामि त्वां सुरेश्वर !" ॥
काशीखण्डे ।
"व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ।
दामोदर ! गृहाणार्घ्यं दनुजेन्द्रनिसूदन ! ॥
नित्ये नैमित्तिके प्राप्ते कार्त्तिके पापशोषणे ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे !" ॥*॥
"तिलैरालिप्य देहं स्वं नामोच्चारणपूर्व्वकम् ।
स्नात्वा स विधिना सन्ध्यामुपास्य गृहमाव्रजेत् ॥
उपलिप्याथ देवाग्रे निर्म्माय स्वस्तिकं प्रभुम् ।
तुलसीमालतीपद्मागस्त्यपुष्पादिनार्चयेत् ॥
नित्यं वैष्णवसङ्गत्या सेवेत भगवत्कथाम् ।
सर्पिषाहर्निशं दीपं तिलतैलेन चार्चयेत् ॥
विशेषतश्च नैवेद्यान्यर्पयेदाचरेत्तथा ।
प्रणामांश्च यथाशक्त्या एकभक्तादिकं व्रतम्" ॥
तथा च पाद्मे तत्रैव ।
"प्रातरुत्थाय शौचादि कृत्वा गत्वा जलाशये ।
स्नात्वा च विधिवत् स्नानं ततो दामोदरार्चनम्" ॥
किञ्च ।
"मौनेन भोजनं कार्य्यं कार्त्तिके व्रतधारिणा ।
घृतेन दीपदानं स्यात्तिलतैलेन वा पुनः ॥
दिनञ्च कृष्णकथया वैष्णवानाञ्च सङ्गमैः ।
नीयतां कार्त्तिके मासि सङ्कल्पव्रतपालनम् ॥
आश्विने शुक्लपक्षस्य प्रारम्भो हरिवासरे ।
अथ वा पौर्णमासीतः संक्रान्तौ वा तुलागमे ॥
दीपदानमखण्डञ्च दद्याद्वै विष्णुसन्निधौ ।
देवालये तुलस्यां वा आकाशे वा तदुत्तमम्" ॥
किञ्च ।
"रजत कनकं दीपान् मणिमुक्ताफलादिकम् ।
दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्त्तिके नरः" ॥
स्कान्दे च श्रीवक्त्राङ्गदमोहिनीसंवादे ।
"न गृहे कार्त्तिके कुर्य्याद्विघ्नेघ्नेषु तु कार्त्तिकीम् ।
तीर्थे तु कार्त्तिकीं कुर्य्यात् सर्व्वयत्नेन भाविनि !"॥*॥
अथ कार्त्तिके वर्ज्यानि ।
तत्रैव ब्रह्मनारदसंवादे ।
"कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावदाहूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकं सन्धितानि च ।
न त्यजेत् कार्त्तिके मासि यावदाहूतनारकी ॥
कार्त्तिके मासि धर्म्मात्मा मत्स्यमांसं न भक्षयेत् ।
तत्रैव यत्नतस्त्याज्यं ग्राम्यकं शौकरं तथा" ॥
किञ्च ।
"परान्नं परशय्याञ्च परवादं पराङ्गनाम् ।
सर्व्वदा वर्ज्जयेत् प्राज्ञो विशेषेण तु कार्त्तिके ॥
तैलाभ्यङ्गं तथा श्राद्धं परान्नं कांस्यभोजनम् ।
कार्त्तिके वर्ज्जयेद्यस्तु परिपूर्णव्रती भवेत् ॥
संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने तु कृच्छ्रस्य फलं प्राप्नोति मानवः" ॥
तत्रैव श्रीवक्त्राङ्गदमोहिनीसंवादे ।
"कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्लसन्धितम् ॥
न माद्यं भक्षयेन्मांसं स कौर्म्मं नान्यदेव हि ।
चाण्डालः स भवेत् सुभ्रु ! कार्त्तिके मांसभक्षणात्"॥
अथ श्रीराधादामोदरपूजाविधिः । पाद्मे तत्रैव ।
"ततः प्रियतमा विष्णो राधिका गोपिकासु च ।
कार्त्तिके पूजनीया च श्रीदामोदरसन्निधौ ॥
हित्वा दामोदरं कृत्वा तत्पत्नीं राधिकां तथा ।
कार्त्तिके पूजनीयौ तौ वासोऽलङ्कारभोजनैः ॥
राधिकाप्रतिमां विप्राः पूजयेत् कार्त्तिके तु यः ।
तस्य तुष्यति तत्पत्नीवे श्रीमान् दामोदरो हरिः" ॥
"दामोदराष्टकं नाम स्तोत्रं दामोदरार्चने ।
नित्यं दामोदराकर्षि पठेत् सत्यव्रतोदितम्" ॥*॥
अथ श्रीदामोदराष्टकम् । तत्रैव ।
"नमामीश्वरं सच्चिदानन्दरूपं
लसत्कुण्डलं गोकुले भ्राजमानम् ।
यशोदाभियोलूखलाद्धावमानं
परामृष्टमत्यन्ततो द्रुत्य गोप्या ॥
रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं
कराम्भोजयुग्मेन सातङ्कनेत्रम् ।
मुहुः श्वासकम्पत्रिरेखाङ्ककण्ठ-
स्थितग्रैवदामोदरं भक्तिबन्धम् ॥
इतीदृक् स्वलीलाभिरानन्दकुण्डे
स्वघोषं निमज्जन्तमाख्यापयन्तम् ।
तदीये ग्रिहत्वेषु भक्तैर्ज्जितत्वं
पुनः प्रेमतस्त्वं शतावृत्ति वन्दे ॥
वरं देव मोक्षं न मोक्षावधिं वा
न चान्यं वृणेऽहं वरेशादपीह ।
इदन्ते वपुर्नाथ गोपालबालं
सदा मे मनस्याविरास्तां किमन्यैः ॥
इदन्ते मुखाम्भोजमत्यन्तनीलै-
र्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या ।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे
मनस्याविरास्तामलं लक्षलाभैः ॥
नमो देव ! दामोदरानन्त ! विष्णो !
प्रसीद प्रभो ! दुःखजालाब्धिमग्नम् ।
कृपादृष्टिवृष्ट्यातिदीनं वतानु-
गृहाणेश मामज्ञ मेऽध्यक्षिदृश्यः ॥
कुबेरात्मजौ बद्धमूर्त्यैव यद्व-
त्त्वया मोचितौ भक्तिभाजौ कृतौ च ।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥
नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदराय्याथ विश्वस्य धाम्ने ।
नमो राधिकायै त्वदीयप्रियायै-
नमोऽनन्तलीलाय देवाय तुभ्यम्" ॥*॥
अथ तत्र श्रीकृष्णाष्टमीकृत्यम् ।
पाद्मे तत्रैव ।
"गोवर्द्धने गिरौ रम्ये राधाकुण्डं प्रियं हरेः ।
कार्त्तिके बहुलाष्टम्यां तत्र स्नात्वा हरेः प्रियः ॥
नरो भक्तो भवेद्विप्राश्चक्रि तस्य प्रतोषणम् ॥
यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्व्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा" ॥
किञ्च । तत्रैव श्रीराधिकोपाख्यानान्ते ।
"वृन्दावनाधिपत्यञ्च दत्तं तस्याः प्रतुष्यता ।
कृष्णेनान्यच्च देवी तु राधा वृन्दावने वने ॥
तत्कुण्डे कार्त्तिकाष्टम्यां स्नात्वा पूज्यो जनार्दनः ।
सुबोधन्यां यथा प्रीतस्तथा प्रीतस्ततो भवेत्" ॥*॥
अथ तत्र कृष्णत्रयोदशीकृत्यम् ।
पाद्मे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्द्द्याद्यमत्युर्विनश्यति" ॥
तत्र मन्त्रः ।
"मृत्युना पाशदण्डाभ्यां कालः श्यामलया सह ।
त्रयोदश्यां दीपदानात् सूर्य्यजः प्रीयतामिति" ॥*॥
अथ कृष्णचतुर्दशीकृत्यम् । तत्रैव ।
"चतुर्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः" ॥
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः"॥
किञ्च । पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नाममिः ।
जीवत्पिता न कुर्व्वीत तर्पणं यममीश्वरोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ।
देवत्वञ्च पितृत्वञ्च यमस्यास्ते हिरूपता ॥
नक्तं यमचतुर्दश्यां यः कुर्य्यात्क्षितिसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा श्वेतपोषणान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेत्क्षितपुरं नरः" ॥
किञ्च ।
"अमावस्याचतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः" ॥*॥
अथामावास्याकृत्यम् । पाद्मे तत्रैव ।
"दिवा तत्र न भोक्तव्यं विना बालातुरान् जनान् ।
प्रदोषसमये लक्ष्मीं पूजयेच्च यथाक्रमम्" ॥
किञ्च ।
"प्रदोषसमये विप्राः कर्त्तव्या दीपमालिका ।
दीपदानात् ततः पश्चाल्लक्ष्मीं सम्यं प्रबोधयेत् ॥
त्वं ज्योतिः श्रीरविश्चन्द्रो विद्युत् सौवर्च्चतारकाः ।
सर्व्वेषां ज्योतिषां ज्योतिर्दीपज्योतिःस्थिते नमः ॥
मन्त्रेणानेन कमलां दीपहस्ताः स्त्रियो द्विजाः ।
देवीं प्रबोधयेयुश्च ततः कुर्य्युश्च भोजनम् ॥
प्रदोषसमये लक्ष्मीं भोजयित्वा सुभक्ति यः ।
पुमान् संवत्सरं यावत् लक्ष्मीस्तं नैव मुञ्चति"॥*॥
अथामावास्यानिर्णयः । यथा निर्णयामृते ।
उपवासादिरूपमावास्या प्रतिपदृयुतैव ग्राह्या तदुक्तम् ।

"अमावास्या तृतीया च सा उपोष्या परान्विता" ॥
इति । चतुर्दशीविद्धानिषेधश्च निगमे ।
"भूतविद्धा त्वमावास्या निष्फलं स्नानदानयं त्विदम्" ।
स्कान्देऽपि ।
"भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गवैः" ॥
अथ शुक्लप्रतिपत्कृत्यम् । स्कान्दे ।
"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः ।
शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्योऽत्र वैष्णवैः" ॥
"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्" । इति
क्वचित् पाठः । तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम् ।
अत्र दिननिर्णयः । यदाह देवलः ।
"प्रतिपद्दर्शसंयोगे क्रीड़नन्तु गवां मतम् ।
परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः" ॥
निर्णयामृततृतीयपुराणान्तरवचनम् ।
" या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ! ।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपतेः" ॥
ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वोक्तात्पर्य्यकम् ।
द्वितीयासमये तु सर्व्वथा निषिद्धम् ।
तत्रैव । तद्यथा ।
"नन्दायां दर्शने रात्रावलिदानदशासु च ।
भद्रायां गोकुलक्रीड़ा देशनाशाय जायते" ॥
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयासंयोग एव निषिध्यते ।
"गवां क्रीड़ादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा" ॥
तदुदयसम्भावनञ्च निर्णयामृते निर्णीतम् । प्रतिपद्यपराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्न्याधानविषये वृद्धशातातपेन ।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अग्न्याधानञ्चतुर्दश्यां परतः सोमदर्शनात्" ॥ इति
अपराह्णश्च पञ्चधाविभक्तस्याह्नस्तुर्थो भागः । ततश्च यत्र प्रतिपदि घन्मुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति । अन्यदा तूत्तरैव प्रतिपत्तत्र ग्रहीता । तथैव पुराणसमुच्चये ।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते" ॥
किञ्च । यदा पूर्वप्रतिपत् परत्र च निष्क्रामति तदाप्युत्तरैव कार्य्या । यथोक्तं भविष्योत्तरे ।
"यथा द्वादशभिर्म्मासैर्म्मासो वृद्धो मलिम्लुचः ।
तथैवाहोरात्रिवृद्धा तिथिः प्रोक्तो मलिम्लुचः ॥
यथा मलिम्लुचः पूर्व्वो मासो देवैस्तथापरः ।
त्याज्या तिथिस्तथा पूर्व्वा ग्राह्या चैव तथोत्तरा" ॥
इति निर्णयामृतमतम् । किन्तु बह्वृचीन्यायेन पूर्व्वैव मन्तुं शक्यते । तदेवत्रापि देवलादि वचनप्रामाण्यमस्तीति ॥ * ॥
अथ गोवर्द्धनपूजाविधिः । पाद्मे तत्रैव ।
"मथुरायां तथान्यत्र कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन महास्नानं तत्र पूज्यो गिरिर्यथा ॥

मथुरायां तथा साक्षात् कृत्वा चैव प्रदक्षिणम् ।
वैष्णवं धाम संप्राप्य मोदते हरिसन्निधौ" ॥
पूजामन्त्रः ।
"गोवर्द्धनधराधार गोकुलत्राणकारक ! ।
विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भव" ॥ इति
गोपूजामन्त्रः । स्कान्दे तत्रैव ।
"लक्ष्मी र्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थं यमपाशं व्यपोहतु ॥
अयतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्" ।
अथ गोक्रीड़ा तत्रैव ।
"क्रीड़ापयेद्वावयेच्च गोमहिष्यादिकं ततः ।
दृषान् कर्षापयेद्दोषैरुक्तिप्रत्युक्तिवादनात्" ॥
पाद्मे च तत्रैव ।
"महिष्यादेस्तथा भूषा क्रीड़नं वारणन्तथा" ।
तन्माहात्म्यञ्च तत्रैव ।
"एवं गोवर्द्धनं गाश्च पूजनीया विधानतः ।
गोवर्द्धनमखो रम्यः कृष्णसन्तोषकारकः" ॥*॥
अथ श्रीबलिदैत्यराजपूजा ।
"लिखित्वा श्रीबलिं पट्टे विन्यावल्यान्वितं मुदा ।
प्रदोषे तत्प्रतिपदो भगवद्भक्तमर्च्चयेत्" ॥
तथा च स्कान्दे ।
"बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।
सर्व्वाभरणसम्पूर्णं विन्यावल्या सहासितम् ॥
कुम्भाण्डमयजम्भोरु मुरदानवसंवृतम् ।
सम्पूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ॥
द्विभुजं दैत्यराजानं कारयित्वार्च्चयेन्नृप !" ।
तत्पूजाकारणम् । पाद्मे तत्रैव ।
"यथार्पितं देहमनेन विष्णवे
भीतेन भिक्षावचसो महात्मना ।
दैत्येन तेनाथ कठोरचेतसा
बद्धो बलिर्व्वामनमूर्त्तिना वत ॥
बद्धानीतोऽथ पातालं विमनाः खिन्नमानसः ।
नाभ्यसूयद्धरिं दैत्यस्यक्ताहंममतः सुधीः ॥
तदोवाच हरिः प्रीतस्तस्मै दैत्याय भागवत् ।
अश्रोत्रिये दत्तममन्त्रकं हुतं
जप्तं तथा व्यग्रधिया जनेन यत् ।
तथोर्ज्जशुक्लप्रतिपद्दिनेन तु
त्वामर्च्चयेत्तत्सुकृतं तवास्तु ॥
इति तस्मै वरो दत्तो हरिणा दितिजाय च ।
ततोऽवश्यं प्रपूज्योऽसौ बलिराजदिने मुदा ।
कृष्णसान्निध्यतश्चापि पूजनीयः प्रयत्नतः" ॥ * ॥
अथ बलिपूजाविधिः । स्कान्दे तत्रैव ।
"गृहस्य मध्ये शालायां विशालायां ततोऽर्च्चयत् ।
भ्रातृभार्य्याजनैः सार्द्धं सन्तुष्टो बन्धुभिस्तथा ॥
कमलैः कुमुदैः पुण्यैः कह्लारैः रक्तकोत्पलैः ।
गन्धपुष्पादिनैवेद्यैरक्षतैर्गुड़पूपकैः" ॥
तत्र पूजामन्त्रः ।
"बलिराज ! नमस्तुभ्यं विरोचनसुतप्रभो ! ।
भविष्येन्द्रसुरारीते ! पूजेयं प्रतिगृह्यताम् ॥
दीपोत्सवैर्जनितसर्व्वजनप्रमोदैः
कुर्व्वन्ति ये सुमतयो बलिराजपूजाम् ।

दानोपभोगसुखवृद्धिशताकुलानां
नूनं प्रयाति सकलं प्रमुदैव वर्षम्" ॥
अथ यमद्वितीयाकृत्यम् । स्कान्दे पाद्मे च ।
"ऊर्ज्जे शुक्लद्वितीयायां मध्याह्ने यममर्च्चयेत् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति" ॥
किञ्च ।
"तस्यां निजगृहे विप्र ! न भोक्तव्यं ततो बुधैः ।
स्वेच्छेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।
सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपत्सुताः" ॥
किञ्च ।
"यस्यां तिथौ यमुनया यमराजदेवः
संभोजितस्त्वतिशयस्वसृसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति वित्तसुभगं धनमुत्तमं सः" ॥ * ॥
अथ शुक्लाष्टमीकृत्यम् ।
पाद्मे तत्रैव कूर्म्मपुराणे च ।
"कार्त्तिके शुक्लपक्षे तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ।
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"
प्रबोधनीकृत्यं तत्पृष्ठे द्रष्टव्यम् । इति श्रीगोपालभट्टविलिखिते लिखिते भगवद्भक्तिविलासे श्रीदामोदरप्रियो नाम १६ षोड़शविलासः ॥
तत्र जातस्य फलम् ।
"दत्तः क्रये विक्रयणे धनाढ्यः
स्यादावदूकोऽखिलकौशलज्ञः ।
यः कार्त्तिके कार्त्तिकरूपधारी
जातो भवेद्युद्धविशारदश्च" ॥
इति कोष्ठीप्रदीपः ॥* वर्षविशेषः । स च कृत्तिकारोहिण्योरेकतरस्मिन् वृहस्पतेरस्तोदयैकतरसम्बन्धे भवति । इति मलमासतत्त्वम् ॥ कार्त्तिकेयः यथा,—ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
"दृष्ट्वा तान् कृत्तिकाः सर्व्वा भयविह्वलमानसाः ।
कार्त्तिकं कथयामासुर्ज्वलन्तं ब्रह्मतेजसा" ॥
कार्त्तिकिकः, पुं, (कार्त्तिकी पौर्णमासी अस्मिन् मासे इति ।"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः" । ४ । २ । २३ । इति ठक् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥
कार्त्तिकेयः, पुं, (कृत्तिकानामपत्यम् । "स्त्रीभ्यो ढक्" । ४ । १ । १२० । इति ढक् ।) शिवपुत्रः । यथा,—
"या बभूव रहःक्रीड़ा पार्व्वतीशिवयोः पुरा ।
दृष्टस्य च सुरैः शम्भोर्व्वीर्य्यं भूमौ पपात ह ॥
भूमिस्तदद्धिपत् वह्नौ वह्निश्च शरकानने ।
तत्त्वं लब्धःकृत्तिकाभिरधुना गच्छ साम्प्रतम् ॥
तवाभिधेकं विष्णुश्च करिष्यति सुरैः सह ।
हनिष्यसि तारकाख्यं सर्व्वशस्त्रं लभिष्यसि ॥
पुत्रत्वं विश्वसंहर्तुस्त्वां गोप्तुमक्षमा इमाः ।
नाग्निं गोप्तुं यथाशक्ताः शुष्कवृक्षाः सकोटरे" ॥
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
स एव कल्पभेदे वह्निपुत्रः । यथा,—
"कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः ।

कार्पटः

वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः ॥
तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
तदा क्षीरप्रदानार्थं कृत्तिकाः संन्ययोजयन् ॥
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्यादस्माकमयं पुत्रः ख्यातो नाम्नेति राघव ! ॥
अन्योन्यं पिबतस्तासां तनयस्य मुखानि षट् ।
समभूवन् महाबाहो ! षण्मुखस्तेन विश्रुतः ॥
ततस्ता देवता ऊचुः कार्त्तिकेय इति प्रभुः ।
पुत्रोऽयं जगति ख्यातो भविष्यति न संशयः" ॥
इति वाल्मीकीयरामायणम् ॥*॥ तत्पर्य्यायः महासेनः २ शरजन्मा ३ षडाननः ४ पार्व्वतीनन्दनः ५ स्कन्दः ६ सेनानीः ७ अग्निभूः ८ गुहः ९ बाहुलेयः १० तारकजित् ११ विशाखः १२ शिखिवाहनः १३ षाण्मातुरः १४ शक्तिधरः १५ कुमारः १६ कौञ्चदारणः १७ । इत्यमरः । १ । १ । ४१-४३ ॥ आग्नेयः १८ दीप्तकीर्त्तिः १९ अनमेयः २० मयूरकेतुः २१ धर्म्मात्मा २२ भूतेशः २३ महिषार्दनः २४ कामजित् २५ कामदः २६ कान्तः २७ सत्यवाक् २८ भुवनेश्वरः २९ शिशुः ३० शीघ्रः ३१ शुचिः ३२ चण्डः ३३ दीप्तवर्णः ३४ शुभाननः ३५ असोघः ३६ अनघः ३७ रौद्रः ३८ प्रियः ३९ चन्द्राननः ४० दीप्तशक्तिः ४१ प्रशान्तात्मा ४२ भद्रकृत् ४३ कूटमोहनः ४४ षष्ठीप्रियः ४५ पवित्रः ४६ मातृवत्सलः ४७ कन्याहर्त्ता ४८ विभक्तः ४९ खाहेयः ५० देवतीसुतः ५१ प्रभुः ५२ नेता ५३ नैगमेयः ५४ सुदुश्चरः ५५ सुव्रतः ५६ ललितः ५७ बालक्रीडनप्रियः ५८ खचारी ५९ ब्रह्मचारी ६० शूरः ६१ शूरवणोद्भवः ६२ विश्वामित्रप्रियः ६३ देवसेनाप्रियः ६४ वासुदेवप्रियः ६५ प्रियकः । ६६ इति वनपर्व्व ॥ गाङ्गः ६७ स्वामी ६८ द्वादशलोचनः ६९ । इतिजटाधरः ॥ सिद्धसेनः ७० शम्भुतनयः ७१ देवसेनापतिः ७२ बालचर्य्यः ७३ कृत्तिकावाकुध्वजः ७४ महाबाहुः ७५ युद्धरङ्गः ७६ शिखिध्वजः ७७ । इति शब्दरत्नावली ॥ (पावकात्मजः ७८ । रुद्रसूनुः ७९ । षट्शिराः ८० । दितिजान्तकः ८१ । इति महाभारतम् ॥ *॥)

अस्य ध्यानम् । यथा ।

"कार्त्तिकेयं महाभागं मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥
द्विभुजं शत्रुहन्तारं नानालङ्कारभूषितम् ।
प्रसन्नवदनं देवं सर्व्वसेनासमावृतम्" ॥
इति कार्त्तिकेयपूजापद्धतिः ॥

कार्त्तिकेयप्रसूः, स्त्री, (कार्त्तिकेयं प्रसूते या । प्र + सू + क्विप् । कार्त्तिकेयस्य प्रसूर्वा ।) दुर्गा । इति शब्दरत्नावली ॥

कार्त्तिकोत्सवः, पुं, (कार्त्तिक्यां कार्त्तिकीपौर्णमास्यां भव उत्सवः । तत्सम्बन्धी तत्कर्त्तव्यः उत्सवो वा ।) कौमुदी । कार्त्तिकी पूर्णिमा । इति त्रिकाण्डशेषः ॥

कार्पटः, पुं, (कार्पट इव आकारोऽस्यस्य । कार्पाट + अच् ।) जतु । जौ इति भाषा । कार्य्यौ । इति हेमचन्द्रः ॥ दरवारी उमेदोयार इत्यादि पारस्यभाषा ॥ (कर्पट एव ! स्वार्थे अण् । जीर्णवस्त्रखण्डम् ॥)

कार्पटिकः, पुं, (कार्पटं अन्तस्तत्त्वं वेत्ति इति कर्पटेन चरति इति वा । ठक् । कार्पटोऽस्यस्य वा ठन् ।) मर्म्मवेत्ता । इति त्रिकाण्डशेषः ॥ तीर्थसेवी । इति काशीखण्डम् ॥

("सायं च तत्रैव वहिः सकुटुम्बस्तरोस्तले ।
समावसत् कार्पाटिकैः सोऽन्यदेशागतैः सह" ॥
इति कथासरित्सागरे ॥)

कार्पण्यं, क्ली, (कृपणस्य भावः । कृपण + ष्यञ् ।) कृपणता । तत्पर्य्यायः । दैन्यम् २ । इति हेमचन्द्रः ॥ (यथा, भगवद्गीतायाम् २ । ७ ।

"कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्म्मसंमूढचेताः" ॥)

कार्पासः, पुं, क्ली, (कर्पास एव । स्वार्थे अण् ।) कर्पासवृक्षः । कापास इति भाषा ॥ (अस्य पत्रादिना सर्पदष्टः पुरुषो नीरोगो भवति । इदानीं पत्रादीनां व्यवहारक्रम उच्यते ।

दंशनानन्तरमेव दष्टं पुरुषं सार्द्धद्वितोलकपरिमितः कार्पासपत्ररसः पाययितव्यः । अथ क्षतप्रदेशं विधौतं परिष्कृतञ्च विधाय तत्र पत्ररसः प्रदेयः । क्षतस्थानोपरि च कार्पासपत्रैः प्रलेपो दातव्यः । एवं कृतेऽपि यदि शरीरस्य कस्मिंश्चिदंशः क्षीतो भवेत् तदा तत्रैव एतत्पत्ररसेन पेषयितव्यम् । आसुस्थात् प्रतिसपाददण्डमेवं कृते सर्पदष्टः पुरुषः सुस्थो भविष्यतीति निश्चयः ॥)

कार्पासं, त्रि, (कर्पासस्यः विकारे अवयवे वा अण् विल्वादयण् वा ।) कार्पासजातवस्त्रादि । तत्पर्य्यायः । फालम् २ बादरम् ३ । इत्यमरः । २ । ६ । १११ ॥ (यथा, महाभारते २ । ५० । २४ ।

"श्लक्ष्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्" ॥)

कार्पासधेनुः, स्त्री, (दानार्थं कल्पिता कार्पासवस्त्रनिर्म्मिता धेनुः ।) दानार्थकार्पासादिनिर्म्मितधेनुः । यथा ।

होतोवाच ।

"अथातः संप्रवक्ष्यामि धेनुं कार्पासिकीं नृप ! ।
यत्प्रदानान्नरा यान्ति ऐन्द्रलोकमनुत्तमम् ॥
विधुवे स्वयने पुण्ये युगादिग्रहणे तथा ।
ग्रहपीड़ासु घोरासु दुःखप्रारिष्टदर्शने ॥
पुण्ये ह्यायतने राजन् शुचिदेशे गवां गणे ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य वै तिलान् ॥
तन्मध्ये स्थापयेत् धेनुं वस्त्रमाल्यानुलेपनैः ।
नैवेद्यधूपदीपाद्यैः पूजयेच्च विमत्सरः ॥
उत्तमा चतुर्भिर्भारैस्तदर्द्धेन तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्जयेत् ॥
चतुर्थांशेन कृत्वा वै वत्सन्तु परिकल्पयेत् ।
कर्त्तव्या रुक्मशृङ्गैस्तु रजतक्षुरसंयुता ॥
नानाफलमया दन्ता रत्नगर्भसमन्विता ।
इत्येवं सर्व्वसंपूर्णां कृत्वा श्रद्धासमन्वितः ॥
आवाहयेत्तां कार्पासधेनुं मन्त्रैर्द्विजातये ।
दद्यादथ दर्भपाणिः प्रयतः श्रद्धयान्वितः ॥

कार्मुकं

पूर्व्वोक्तस्तु विधिः कार्य्यो दानमन्त्रपुरःसरः" ॥
पूर्व्वोक्तविधिः सवत्सधेनूक्तविधिः ।
"यथा देवगणाः सर्व्वस्वया हीनो न वर्त्तते ।
तथा मामुद्धरेर्देवि ! पाहि संसारसागरात्" ॥
इत्यादिवराहपुराणे श्वेतोपाख्याने कार्पासधेनुमाहात्म्यम् ॥

कार्पासनासिका, स्त्री, (कार्पासस्य नासिका इव ।) तर्कुः । इति शब्दरत्नावली । टेको इति भाषा ॥

कार्पासिका, स्त्री, (कार्पासी + कन् । ततष्टाप् ।) कार्पासी । इति शब्दरत्नावली ॥ (त्रि, कार्पासाज्जातः । कार्पासनिर्म्मितम् । यथा गोः रामायणे । ५ । ४९ । ५ ।

"अवेष्टयन्त लाङ्गूलं जीर्णैः कार्पासिकैः पटैः" ॥)

कार्पासी, स्त्री, (कार्पास + जातित्वात् ङीष् । यद्वा कर्पासोऽस्यस्याः प्रज्ञाद्यण् ततो ङीप् ।) कार्पासवृक्षः । कापास इति भाषा ॥ तत्पर्य्यायः । बदरा २ तुण्डिकेरी ३ समुद्रान्ता ४ । इत्यमरः । २ । ४ । ११६ ॥ पटदः ५ । इति रत्नमाला ॥ सारिणी ६ चथा ७ तूला ८ गुडः ९ तुण्डकेरिका १० मरुद्भवा ११ पिचुः १२ बादरः १३ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । स्तनदुग्धकारित्वम् । पित्तकफछर्द्यादाहश्रमभ्रान्तिमूर्च्छानाशित्वम् । बलकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पत्रगुणाः । वायुनाशित्वम् । रक्तकारित्वम् । मूत्रवर्द्धकत्वम् । कर्णपिण्डिकादिपूयास्रावनाशित्वञ्च । तद्बीजगुणाः । स्नेह्यत्वम् । हृद्यत्वम् । स्निग्धत्वम् । कफकरत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥

कार्म्मः, त्रि, (कर्म्मणि शीलं अस्य । कृत्रादित्वात् णः । "कार्म्मस्ताच्छील्ये" । ६ । ४ । १७२ । इति सूत्रानुसारेण निपातनात् टिलोपः । यत्र मनपेक्ष्य कर्म्मसु प्रवृत्तः ।) कर्म्मशीलः । इत्यमरः । ३ । १ । १८ ॥

कार्म्मणं, क्ली, (कर्म्मैव इति । कर्म्मन् + "तदधीते तद्वेद" इत्यस्य "तदधीतवेदत्वात् कर्म्मणोऽण्" । ५ । १ । ४ । २६ । इति अण् । कर्म्मणे हितमिति अण् वा ।) मूलकर्म्म । इत्यमरः । २ । २ । ४ ॥ ओषध्यादिमूलेन यत् चासनोच्चाटनस्तम्भनवशीकरणादिकर्म्म तत् । इति भरतः ॥ (यथा माघे । १० । ३७ ।

"चाटु चाटुकसभ्रममासां
कार्म्मणत्वमगमन् रमणेषु" ॥

तथा च, काशीखण्डे ४५ । ९ ।

"काचित्कार्म्मणतत्त्वज्ञा काचित्मौक्तिकगुम्फिका" ॥)

मन्त्रतन्त्रादियोजनम् । (कर्म्म साध्यत्वेन अस्त्यस्य इति अण् ।) कर्म्मठे त्रि । इति मेदिनी ॥

कार्म्मिकः, त्रि, (कर्म्मणा चित्रकर्म्मणा निर्वृत्तः । इति ठक् ।) विचित्रवस्त्रादि । ("कार्म्मिकं कर्म्मणा चित्रेण निर्म्मितं यत्र निष्पन्ने पटे चक्रसस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्म्मिकमित्युच्यते" ।) इति मिताक्षरा । (तथा च याज्ञवल्क्यः । २ । १८१ । "कार्म्मिके रोमवज्रे च चिंगद्भागत्रयो मतः" ॥)

कार्म्मुकं क्ली, (कर्म्मणे प्रभवतीति । "कर्म्मण

उकञ्" । ५ । १ । १०३ । इति उकञ् ।) धनुः । इत्यमरः । २ । ८ । ८३ । धनुक् इति भाषा ॥ (यथा, माघे । २ । ९७ ।
"कार्म्मुकेज्येव गुणिना वाचः सन्धानमेष्यति" ॥)
कार्म्मुकः, पुं, (कार्म्मुकं धनुः साधयत्येनमस्येति ष्यञ्) वंशः । बाँश इति भाषा । (कर्म्मणे कार्य्याय प्रभवतीति । कर्म्मन् + उकञ् ।) कर्म्मक्षमे त्रि । इति मेदिनी ॥ श्वेतखदिरः । हिज्जलः । महानिम्बः । इति राजनिर्घण्टः ॥
कार्य्यं, क्ली, (क्रियते यत् तत् । कृ + "विभाषा कृ दृचोः" । ३ । १ । १२० । इति व्यवभावे "ऋहलोर्ण्यत्" । ३ । १ । १२५ । इति ण्यत् । ततो वृद्धिः ।) क्रियते यत् । इति व्याकरणम् । काज इति भाषा । ("कार्य्यन्तु तद्यस्याभिनिर्वृत्तिरभिसन्धाय प्रवर्त्तते कर्त्ता" । इति चरके विमानस्थाने । ८ अध्यायः ॥ तथा मनुः । ९ । २९९ ।
"आरभेत ततः कार्य्यं सञ्चिन्त्य गुरुलाघवम्" ॥ कर्त्तव्यम् । यथा तत्रैव । ३ । ८० ।
"आशासते कुटुम्बिभ्यस्तेभ्यः कार्य्यं विजानता" ॥) तत्पति कारणम् त्रिविधम् । समवायिकारणम् १ यथा घटकार्य्यं प्रति कपालम् । असमवायिकारणम् २ यथा घटकार्य्यं प्रति कपालसंयोगादि । निमित्तकारणम् ३ यथा घटं प्रति दण्डचक्रादि । इति तर्कशास्त्रम् ॥ हेतुः । प्रयोजनम् । इति मेदिनी ॥ ऋणादिविवादः यथा,—
"यस्मात् कार्य्यसमारम्भश्चिरात्तेन विनिश्चितः । तस्मान्न लभते कालमभियुक्तश्च कालभाक्" ॥ इति व्यवहारतत्त्वे कात्यायनः ॥
(तथा च मनुः । ८ । ४३ ।
"नोत्पादयेत् स्वयं कार्य्यं राजा नाप्यस्य पूरुषः" ॥) अपूर्व्वम् । यथा,—
"विधिप्रत्ययस्य कार्य्ये शक्तिरिति मीमांसकाः" ॥ व्याकरणमते आदेशप्रत्ययागमाः । इति दुर्गादासः ॥ (चि, करणीयम् । कर्त्तव्यम् । यथा मनुः । २ । २४८ ।
"सहपिण्डक्रियायान्तु ज्ञातायामस्य धर्म्मतः । अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः" ॥) -
कार्य्यकुशलः, त्रि, (कार्य्ये कर्म्मणि कुशलः निपुणः ।) कर्म्मठः । इति भूरिप्रयोगः ॥
कार्य्यपुटः, पुं, (कार्य्यां क्रियायां न पुटति । कारि + पुट् संश्लेषणे + कः ।) छद्मयुक्तः । उन्मत्तः । अनर्थकरः । इति विश्वमेदिन्यौ ॥
कार्य्यप्रदेशः, पुं, (कार्य्यं प्रदेष्टि अनेन । प्र + दिश् + करणे घञ् ।) आलस्यम् । इति राजनिर्घण्टः ॥
कार्य्या, स्त्री, (कृ + ण्यत् । टाप् ।) कारीवृक्षः । इति राजनिर्घण्टः ॥
कार्य्यी, [न्] पुं, (कार्य्यं अस्यस्य इति इनिः ।) यस्य निर्द्दिश्यते कार्य्यं सः । इति दुर्गादासः ॥ कर्म्मार्थी । इति कार्पटशब्दार्थे हेमचन्द्रः । (यथा मनुः । ८ । २ ।
"विनीतवेषाभरणः पश्येत्कार्य्याणि कार्य्यिणाम्" ॥)
कार्ष्मरी, स्त्री, (कृष् + स्वार्थे णिच् भावे मनिन् कार्ष्म तत् राति । रा + कः गौरादित्वात् ङीष् ।) काश्मरी । गम्भारीवृक्षः । इत्यमरटीकायां भरतः ॥
काश्यः, पुं, (कृश् + स्वार्थे ष्यञ् ।) कार्य्यः । सालवृक्षः । इत्यमरटीकायां भरतः ॥ कचूरः । लकूचः । इति राजनिर्घण्टः ॥ (कृशस्य भावः । "वर्णदृढादिभ्यः ष्यञ्" । ५ । १ । १२३ । इति ष्यञ् ।) कृशतायां स्त्री ॥ (यथा, मेघदूते ३१ ।
"सौभाग्यन्ते सुभग ! विरहावस्थया व्यञ्जयन्ती काश्यं येन त्यजति विधिना स त्वयैवोपपाद्यः" ॥)
कार्षकः, पुं, (कर्षति इति । कृष + "कृषेर्वृद्धिश्चोदीचां" । उणां । २ । ३८ । इति क्वुन् । यद्वा कृषिः शीलमस्य कृत्रादित्वात् णः स्वार्थे कन् ।) कर्षकः । इत्यमरटीकायां रायमुकुटः ॥
कार्षापणः, पुं क्ली, (कर्षस्यायं "तस्येदम्" । ४ । ३ । १२० । इत्यण् । नित्यं पणः परिमाणे इत्यप् गोचरसञ्चरेति घो वा कार्षस्य कार्षेण वा आपणः व्यवहारो यत्र । यद्वा कर्षस्येदं स्वार्थे वा अण् तेन आपण्यते । आ + पण कर्म्मणि घः ।) कार्षिकः । षोडशपणः । इति मेदिनी ॥ रूप्यकर्षकृतव्यवहारद्रव्यम् । लोके तु तन्मूल्ये षोडशपणसमुदाये कार्षापणस्योपचारेण प्रवृत्तिः । तथा हि शास्त्रीयो रजतमाषो द्विकृष्णलः । द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः । इति मनुः ॥ आद्ये कृतयुगे रजतकृष्णलयोर्द्दशगञ्जा मूल्यमिति दाक्षिणात्या कृष्णलाभौ रजतकर्षस्य षोडशपणा एव मूल्यम् । पुराणशब्दस्याच्च कार्षिकं पुराणाश्च कार्षापणा इति वोपालितः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ८ । १३६ ।
"कार्षापणस्तु विज्ञेयस्तात्रिकः कार्षिकः पणः" ॥)
कार्षिकः, पुं, (कर्ष + स्वार्थे ठक् ।) कार्षापणः । इत्यमरः । २ । ९ । ८८ ॥ (यथा याज्ञवल्क्यः । १ । ३६५ ।
"निष्कः सुवर्णाश्चत्वारः कार्षिकस्तात्रिकः पणः" ॥ कर्षः कर्षं शीलमस्य । कर्ष + ठक् ।) कृषकः । इति हेमचन्द्रः ॥ (कर्षस्यायम् । कर्ष + ठञ् । शास्त्रीयपलचतुर्भागः । कर्षः परिमाणमस्य ठक् । कर्षपरिमितद्रव्यम् । कर्षेण क्रीतः । ठञ् । कर्षक्रीतः ॥)
कार्ष्णिः, पुं, (कृष्णस्यापत्यम् । अत इञ् ।) कामदेवः । इति त्रिकाण्डशेषः । (यथा हरिवंशे । १६३ । १९ ।
"तामापतन्तीं मायान्तु कार्ष्णिः कमललोचनः" ॥ गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५३ ।
"युगपत्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा" ॥)
कार्ष्णी, स्त्री, (कार्ष्ण + ङीप् ।) शतावरी । इति राजनिर्घण्टः ॥ (शतावरीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
कार्ष्ण्यः, पुं, (कृष्ण + "इगुपधेति" ३ । १ । १४५ । कः । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) सालवृक्षः ॥ इत्यमरः । २ । ४ । ४४ ॥ (अस्य पर्य्यायो यथा । "शालस्तु सर्ज्जकार्ष्यश्चकर्णिकाशस्यसम्बरः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काल त् क कालोपदेशे । इति करिकल्पद्रुमः । (अदन्तपुरां-परं-सकं-सेट् ।) यथा अचकालत् कालमियत्तया गणकः । एतावती वेलेति कथितवानित्यर्थः । इति दुर्गादासः ॥
कालं, क्ली, (ईषत् कृष्णत्वं लाति गृह्णाति । ला + कः धातुषु कुत्सितरूपतया चलति वा । अच् + यच् । कोः कादेशः ।) लौहम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥ कालोलकम् । इति राजनिर्घण्टः ॥ कालीयकम् । इति शब्दचन्द्रिका ॥
कालः, पुं, (कलयति आयुः । कल् संख्याने घञादयच् ततः प्रज्ञाद्यण् । यद्वा कालयति सर्व्वाणि भूतानि । कल् प्रेरणे ण्यन्तात् घञादयच् ।) क्षणदण्डमुहूर्त्तप्रहरदिनरात्रिपक्षमासायनवत्सरादिः । इति दुर्गादासः ॥ तत्पर्य्यायः । दिष्टः २ अनेहा ३ समयः ४ । इत्यमरः । १ । ४ । १ ॥ "जन्यानां जनकः कालो जगतामाश्रयो मतः । परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः" ॥ (यथा विष्णुपुराणे । १ । २ । १४ ।
"परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ! । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम्" ॥)
अस्य गुणाः । सङ्ख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥
"अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः । कलनात् सर्व्वभूतानां स कालः परिकीर्त्तितः" ॥ इति तिथ्यादितत्त्वम् ॥ * ॥
("कालस्तु त्रिविधो ज्ञेयोऽतीतोऽनागत एव च । वर्त्तमानस्तृतीयस्तु वक्ष्यामि शृणु लक्षणम् ॥ कालः कलयते लोकं कालः कलयते जगत् । कालः कलयते विश्वं तेन कालोऽभिधीयते ॥ कालस्य वशगाः सर्व्वे देवर्षिसिद्धकिन्नराः । कालो हि भगवान्देवः स साक्षात्परमेश्वरः ॥ सर्गपालनसंहर्त्ता स कालः सर्व्वतः समः । कालेन कल्प्यते विश्वं तेन कालोऽभिधीयते ॥ येनोत्पत्तिश्च जायेत येन वै कल्प्यते कला । सोऽन्तश्च भवेत्कालो जगदुत्पत्तिकारकः ॥ यः कर्म्मणि प्रपश्येत प्रकर्षे वर्त्तमानके । सोऽपि प्रवर्त्तको ज्ञेयः कालः स्यात् प्रतिपालकः ॥ येन मृत्युवशं याति हृतं येन जयं व्रजेत् । संहर्त्ता सोऽपि विज्ञेयः कालः स्यात् कलनापरः ॥ कालः सृजति भूतानि कालः संहरते प्रजाः । कालः स्वपिति जागर्त्ति कालो हि दुरतिक्रमः ॥ काले देवा विनश्यन्ति काले चासुरपन्नगाः । नरेन्द्राः सर्व्वजीवाश्च काले सर्व्व विनश्यति ॥ त्रिकालात् परतो ज्ञेय आगन्तुर्गतचेष्टकः । तथा वर्षाहिमोष्णाख्या ऋतवः काल इमे मताः ॥ तथा त्रयोऽन्येऽपि ज्ञेया उद्यन्मध्यास्तरूपिणः । सूक्ष्मोऽपि सर्व्वगः स वै व्यक्ताद्यक्ततरः शुभः" ॥ इति प्रथमस्थाने ४अः । हारीतेनोक्तम् ॥)
यमः । (यथा गोः रामायणे । ३ । ३५ । ४३ ।
"आपतन्तीञ्च तां दृष्ट्वा कालदण्डोपमां गदाम्" ॥)
कृष्णवर्णः । कृष्णगुणवति त्रि । इत्यमरः । १ । ५ । १४, १६ । (यथा गोः रामायणे । ६ । ६७ । २ ।
"उद्यतायुधनिस्त्रिंशे रथे च समलङ्कृते । कालाभ्रयुक्ते महति स्थितः कालान्तकोपमः" ॥)
मृत्युः । (यथा भागवते । ९ । ९ । २ ।

"दिलीपस्तत्सुतस्तद्वदग्रक्षः कालमेयिवान्।
भगीरथस्तस्य पुत्रस्तेषे स समहत् तपः" ॥)
महाकालः। इति मेदिनी॥ भूनिः। इति दीपिका॥ कासमर्द्दः। रक्तचित्रकः। रालः। कोकिलः। इति राजनिर्घण्टः॥ (सर्व्वकलनात् ग्विव। यथा महाभारते। १३। १७। ४७।
"गजहा दैत्यहा कालो लोकधाता गुणाकरः"॥
कालनियन्तृत्वात् विष्णुः। यथा महाभारते। १३। १। १९। ५८।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः"॥
पर्व्वतविशेषः। यथा गोः रामायणे। ४। ४४। २१।
"ततो महाश्रमं गत्वा देवगन्धर्व्वसेवितम्।
कालं नाम सदा शान्तं गमिष्यथ गिरोत्तमम्"॥)

कालकं, क्ली, (काल + स्वार्थे कन्। यद्वा, कलयति गोदयति रक्षतीम्। कल गोदने + ण्वुल्।) कालशाकम्। इति भावप्रकाशः॥ (कालशाकशब्देऽस्य गुणादिकं बोध्यम्॥) यकृत्। इति हेमचन्द्रः॥

कालकः, पुं, (कालयतीति। कलत्वक्षेपे + "ण्वुलृतौ" ३। १। १३३ इति ण्वुल्।) जतुकः। इत्यमरः। २। ४। ४९॥ जड़ुर इति भाषा॥ ("वर्णो वानित्ये"। "रक्ते"। "कालाच्च"। ५। ४। ३१, ३३ इति कन्। कालकः पटः। कालिका शाटी। कालकं मुखं इति सिद्धान्तकौमुदी॥) अलगर्द्दसर्पः। इति शब्दरत्नावली॥ (राक्षसविशेषः। यथा गोः रामायणे ३। २९। ३०।
"दुर्ज्जयः कालकाख्यश्च परघः कालिकामुखः"॥)

कालकटङ्कटः, पुं, (कालरूपः कटङ्कटः।) शिवः। शालकटङ्कटोऽपि पाठः। इति दानधर्म्मे शिवसहस्रनामसु पठितः॥ (यथा, महाभारते १३। शिवसहस्रनामकथने। १७। ५७।
"वैणवी पणवी तालो खली कालकटङ्कटः"॥)

कालकण्ठः, पुं, (कालः कृष्णवर्णः नीलो वा कण्ठोऽस्य।) शिवः। पीतसारः। मयूरः। खञ्जनः। कलविङ्कः। दात्यूहपक्षी। इति मेदिनी॥

कालकण्ठकः, पुं, (कालः कृष्णः कण्ठोऽस्य। ततः रूप् स्वार्थे कन् वा।) दात्यूहपक्षी। इत्यमरः। २। ५। २१॥ (दात्यूहशब्देऽस्य गुणपर्य्याया वक्तव्याः॥)

कालकन्दकः, पुं, (कालं कृष्णसर्पं कन्दति स्पर्द्धते यद्वा कालः सन् कन्दते वैक्लव्यं गच्छति। काल + कदि + अच्। स्वार्थे कन्।) जलसर्पः। इति शब्दरत्नावली॥

कालकर्णिका, स्त्री, (कालस्य कर्णिका इव।) अलक्ष्मीः। इति हेमचन्द्रः॥

कालकर्णी, स्त्री, (कालः कर्णोऽस्याः। अच् ततः स्त्रियां ङीप्।) अलक्ष्मीः। इति शब्दरत्नावली॥

कालका, स्त्री, (कालकेयाख्यासुराणां माता कालाः एव कन्। बाहुलकात् न इत्वम्।) कालकेयनामासुरगणमाता। इति जटाधरः॥ (सा च वैश्वानरकन्या। यथा, भागवते ६। ६। ३२।
"वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः।
उपदानवी हयशिरा पुलोमा कालका तथा"॥)

कालकीलः, पुं, (कालं प्रकृतकालोपयुक्तं सत् प्रसङ्गादिकं कीलयति च्यादयोति नाशयति वा। काल + कील + अण्। कोलाहलस्य सत्कथादिनाशकत्वात् तथात्वम्।) कोलाहलः। इति शब्दरत्नावली॥

कालकुण्ठः, पुं, (कालेन कालरूपिणा परमेश्वरेण कुण्ठ्यते असौ। कुण्ठ + कर्म्मणि घञ्।) यमः। इति शब्दमाला॥

कालकूटं, क्ली, (कालात् कृष्णपर्व्वतात् कुथ्यते निष्कृष्यते। कुष् + कर्म्मणि क्तः।) कङ्कुष्ठम्। पर्व्वतीयमृत्तिकाविशेषः। इति राजनिर्घण्टः॥

कालकूटः, क्ली, (कालं शिवमपि कूटयति अवसादयति यद्वा कालस्य मृत्योः कूटं व्यायोजनसमष्टिः दूत इव वा।) वोलम्। विषम्। इति राजनिर्घण्टः॥ (यथा, भागवते ८। ६। २५।
"नभेतव्यं कालकूटात् विषाज्जलधिसम्भवात्"॥)

कालकूटः, पुं क्ली, (कालस्य मृत्योः कूटः कृष्णदूत इव।) स्थावरविषभेदः। इत्यमरः॥ १। ८। १०। (यथा भागवते ३। २। २३।
"अहो बकी यं स्तनकालकूटं
जिघांसयाऽपाययदप्यसाध्वी"॥
अस्य स्वरूपं यथा,—
"देवासुरराणे देवैर्हृतस्य पृथुमालिनः।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः॥
निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः
सो हि क्षेत्रे पतत्तूवेरे कोङ्कणे मलये भवेत्"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे शोधनमारणाधिकारे॥*॥
देशविशेषः। यथा, महाभारते २। २०। २६।
"कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम्।
रम्यं पद्मसरो गत्वा कालकूटमतीत्य च"॥)

कालकूटकः, पुं, (कालस्य कूटमिव कायति प्रकाशते। कै + कः।) कारस्करवृक्षः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १। १२८। ४४।
"ततो दुर्य्योधनः पापस्तद्भक्ष्ये कालकूटकम्।
विषं प्रक्षेपयामास भीमसेनजिघांसया"॥
कारस्करशब्दस्य गुणपर्य्याया ज्ञेयाः॥)

कालकृत्, पुं, (कालं करोतीति। कालस्य परिमाणं उदयास्ताभ्यां दण्डपलादिक्रमेण सम्पादयतीति। कृ + क्विप् तुगागमश्च।) सूर्य्यः। इति चिकित्साशब्देः॥

कालकृतः, पुं, (कालेन परमेश्वरेण कृतः सृष्टः। यद्वा कालं काष्ठाकलादिमानं कृतः कर्त्ता। कृ + कर्त्तरि + क्तः।) सूर्य्यः। इति शब्दरत्नावली॥ कालजाते, त्रि। यथा, पुराणे,—
"सर्व्वं कालकृतं मन्ये कालो हि बलवत्तरः"॥

कालखञ्जनं, क्ली, (कालेन कालान्तरेण खञ्जति विकृतिं गच्छतीति। काल + खञ्जि + ल्युः।) यकृत्। इति हेमचन्द्रः॥

कालखण्डं, क्ली, (कालं कृष्णं खण्डम्।) यकृत्। दक्षिणकुक्षिस्थमांसखण्डम्। इत्यमरः। २। ६। ६६॥ (यकृत्शब्देऽस्य विशेषो ज्ञातव्यः॥)

कालग्रन्थिः, पुं, (कालस्य ग्रन्थिरिव।) वत्सरः। इति चिकित्साशब्देः॥

कालङ्कृतः, पुं, (कुत्सितोऽपि अलङ्कृतः ईषदलङ्कृतो वा। कोः कादेशः।) वृत्तविशेषः। कालकासुन्दे इति भाषा। तत्पर्य्यायः। अरिमर्द्दः २ कासमर्द्दः ३ कर्कशः ४। इति रत्नमाला॥

कालचक्रं, क्ली, (कालस्य कालगतेश्चक्रमिव।) कालरूपचक्रम्। यथाह—हेमचन्द्रः।
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीषु भेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षड्रा उत्सर्पिण्यां त एव विपरीताः।
एवं द्वादशभिरैर्विवर्त्तते कालचक्रमिदम्"॥
ज्योतिश्चक्रविशेषः। यथा,—
"चिनाभिमति पञ्चारे षण्णेमिन्यक्षयात्मके।
सम्वत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम्"॥
इति विष्णुपुराणे २। ८। ४। चक्रमेवोपासनार्थं विशिष्यन्नाह। चिनाभिमतीति। नाभिः स्तम्भः यत्राक्षः प्रोतः स च चिमेखलः। अक्षस्याच नाभित्वेनोपास्यत्वात् मेखलारूपाक्षिणो नाभयः पूर्ब्बाह्णमध्याह्नापराह्णास्त्रयुक्ते। पञ्चारे पञ्च संवत्सरपरिवत्सरादयो वक्ष्यमाणा अराः प्रणाका यस्य सः तस्मिन्। षण्णेमिनि षट् ऋतवो नेमयः प्रान्तवलयानि तद्वति। कालात्मकत्वादक्षयात्मके। संवत्सरमये संवत्सरावयवमासारम्भकत्वात् संवत्सरत्वेनोपास्यत्वाच तन्मयम्। तदुक्तं मात्स्ये।
"अहश्चिनाभिः सूर्य्यस्य त्वेकचक्रस्य वै स्मृतम्।
अराः संवत्सराः पञ्च नेमयः षड्ऋतवः स्मृताः"॥
इति। तस्मिन् कालचक्रं कालोपलक्षणभूतं कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितं आश्रितम्। सूर्य्यगत्यधीनत्वात् कालचक्रफलस्य। इति तट्टीकायां श्रीधरस्वामी॥ ("स एष निमेषादियुगपर्य्यन्तः कालश्चक्रवत् परिवर्त्तमानः कालचक्रमुच्यत इत्येके"॥ इति सुश्रुते सूत्रस्थाने ६ अध्याये॥)

कालज्ञः, पुं (कालं कालानुयायिकर्त्तव्यादिकं कालगतिं वा जानातीति। काल + ज्ञा + कः।) कुक्कुटः। इति राजनिर्घण्टः॥ (कालवेत्तरि त्रि, यथा, मनुः ७। २१७।
"तत्रात्मभूतैः कालज्ञैरार्य्यैः परिचारकैः"॥)

कालञ्जरः, पुं, (कालं जरयति। काल + जॄ + णिच् + अच्। बाहुलकात् मुम्।) योगिचक्रमेलकम्। (कालं मृत्युं जरयतीति।) भैरवः। (कालेन जीर्य्यति। जॄ + अच्।) पर्व्वतविशेषः। इति मेदिनी॥ (यथा, महाभारते ३। तीर्थयात्रापर्व्वणि ८५। ५६।
"अत्र कालञ्जरं नाम पर्व्वतं लोकविश्रुतम्।
तत्र देवह्रदे स्नात्वा गोसवफलं लभेत्"॥)
देशविशेषः। इति धरणी॥

कालञ्जरी, स्त्री, (कालं जरयति। कालं + जॄ + णिच् + अच्। मृत्युञ्जयः तस्य पत्नी ङीप्।) चण्डी। इति धरणी॥ (स्वयमेव कालं जरयतीति व्युत्पत्त्या टाबेव।) तदा कालञ्जरा इति रूपान्तरम्॥

कालतालः, पुं, (कालतायै कृष्णत्वात् अलति पर्य्याप्नोति। कालता + अल + अच्।) तमालवृक्षः।

इति राजनिर्घण्टः ॥ (अस्य गुणादिकन्तमालशब्दे-ज्ञेयम् ॥)

कालधर्म्मः, पुं, (कालस्य धर्म्मः । आयुषः परिणाम-काले पञ्चत्वप्राप्तिरूपो धर्म्मः ।) मृत्युः । इत्यमरः । २ । ८ । १९६ ॥ समयस्य स्वभावः ॥ (यथा, हरेः रामायणे । २ । ७२ । ३७ ।

"कालधर्म्मपरिक्षिप्तः पार्थैरिव महागजः" ॥)

कालनिर्य्यासः, पुं, (कालः कृष्णवर्णो निर्य्यासः ।) गुग्गुलुः । इति रत्नमाला ॥

कालनेमिः, पुं, (कालस्य मृत्योः नेमिरिव चक्रवत् ।) स्वनामख्यातराक्षसः । स च लङ्कापते रावणस्य मातुलः । यथा,—

"कालनेमिं दुराधर्षं रक्षःपरमदुर्जयम् ।
चतुरास्यं चतुर्हस्तमरुनेत्रं भयावहम्" ॥
इति गोः रामायणे ६ । ८२ । ६४ ॥ दैत्यविशेषः । यथा,—श्रीभागवते ।

"आत्मानमिह संजातं जानन् प्राग्विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स ववृधयत" ॥
स तु हिरण्यकशिपुपुत्रः । इति हरिवंशः ॥ (कालचक्रम् ॥)

कालनेमिरिपुः, पुं, (कालनेमेः कालनेमिसंज्ञकासुरस्य रिपुः हन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (कालनेमे रावणमातुलस्य रिपुः हन्ता । हनूमान् । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कालनेमिहा, [न्] पुं, (कालनेमिं तन्नामानं असुरं हतवान् । हन् + क्विप् ।) विष्णुः । इति त्रिकाण्ड-शेषः ॥ (यदुक्तं महाभारते १३ । १४९ । ८२ ।

"कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः" ।
कालनेमिं स्वनामख्यातरावणमातुलं हतवानिति व्युत्पत्त्या हनूमान् ॥)

कालनेमी, [न्] पुं, (कालस्येव नेमिरस्यस्य श्रीह्या-देराकृतिगणत्वात् इनिः ।) कालनेमिः । इति द्विरूपकोषः ॥

कालनेम्यरिः, पुं, (कालनेमेः अरिः शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

कालपर्णः, पुं, (कालं कृष्णं पर्णं पत्रं यस्य ।) तगर-वृक्षः । इति शब्दरत्नावली ॥

कालपालकं, क्ली, (कालं कृष्णवर्णं पालयति धार-यतीति । काल + पाल + ण्वुल् ।) कङ्गुयुक्तिका । इति राजनिर्घण्टः ॥

कालपीलुकः, पुं, (कालः कृष्णः पीलुः । स्वार्थे कन् ।) कुपीलुः । इति भावप्रकाशः ॥ (गुणाः पर्य्यायाश्चास्य कुपीलुशब्दे बोद्धव्याः ॥)

कालपुरुषः पुं, (कालः कालचक्रं पुरुष इव ।) यम-सहायः । इति जटाधरः ॥ ज्योतिःशास्त्रम् । यथा

"किन्त्वस्य कालपुरुषाख्यमहार्थवस्य
गच्छेत् कदाचिदन्तर्धिमनसापि पारम्" ॥
कालपुरुषः स चाख्या नाम यस्यासौ तस्य ज्योतिःशास्त्रविस्तीर्णसमुद्रस्य । इति भट्टोत्पलः ॥*॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिद्वादशराशिकल्पितपुरुषाकारः । यथा,—

"शीर्षमुखबाहुहृदयोदरराशिकटिवस्तिगुह्यसंज्ञ-कानि । ऊरुजानुकजङ्घेचरणाविति च राशयो-ऽङ्गाद्याः" ॥ इति दीपिका ॥ * ॥ नराणां शुभा-शुभज्ञानार्थं जन्मलग्नादिराशिद्वादशकाग्रघटितपुरु-षाकारः । यथा, "कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते करठांशूकबाहुपार्श्वहृदयक्रो-ड़ानिनाभिस्ततः । वस्तिः शिश्नगुदे ततश्च वृषणा-वूरूततो जानुनी जङ्घाङ्घ्री ह्युभयत्र वाममुदितै-र्द्वादशभागैरेखिधा" ॥ इति "कालनरस्याङ्गे सद-सद्ग्रहयोगतः । पुंसामपि तदङ्गेषु शुभाशुभफलं वदेत्" ॥ इति बृहज्जातकम् ।

कालपृष्ठं, क्ली, (कालं कृष्णं पृष्ठं यस्य ।) कर्णधनुः । धनुर्म्लेच्छम् । इति हेमचन्द्रः ॥

कालपृष्ठः, पुं, (कालं कृष्णवर्णं पृष्ठं पृष्ठभागो यस्य ।) कङ्कपक्षी । मृगविशेषः । इति हेमचन्द्रः ॥

कालपेषी, स्त्री, (पिष्यतेऽसौ । पिष् + कर्म्मणि घञ् । पेषः । कालः पेषः । ततः स्त्रियां ङीप् ।) श्याम-लता । इति रत्नमाला ॥ (अस्या पर्य्यायो यथा ।

"कालपेषी महाश्यामा सुमद्रोत्पलशारिवा ।
दीर्घमूला च पालिन्दीमसूरविदला च सा" ॥)

कालप्रभातं, क्ली, (कालं कृष्णं प्रभातं यत्र ।) शर-दृतुः । शरत्कालः । इति त्रिकाण्डशेषः ॥

कालभाण्डिका, स्त्री, (कालभाण्डे कृष्णप्रभाण्डे अण्डति उच्छ्रयति । अण्ड + ण्वुल् टाप् इत्वञ्च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

कालमानः, पुं, (कालो मन्यते यः जनैरितिशेषः । काल + मन + कर्म्मणि घञ् ।) कृष्णार्ज्जकः । इति रत्नमाला ॥ कालतुलसी इति भाषा । राजनिर्घण्टे लान्तशब्दोऽयम् ॥ (लकारान्तस्यास्य व्यवहारो यत्र तद्यथा ॥ सुश्रुते सूत्रस्थाने । ३८ अः ॥

"सुरसा-श्वेतसुरसा-फणिज्झकार्ज्जक-भूस्तृण-सुग-न्धक-सुमुख-कालमाल-कासमर्द-बबुक-खरपुष्पा-विड्ङ्ग-कट्फल-सुरसीत्यादयः, सुरसादिगणे ॥)

कालमुष्ककः, पुं, (कालो मुष्क इव कायति प्रका-शते । कै + कः ।) घण्टापारलिवृक्षः । इति रत्न-माला ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—

"प्रश्नस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्व्वकम् ।
कालमुष्कमाहृत्य दग्ध्वा भस्म समाहरेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे कुच-चित्तारनामकौषधे ॥)

कालमूलः, पुं, (कालं मूलं यस्य ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

कालमेण्ढिका, स्त्री, (कालः मिण्ढते कालोऽयमिति कथ्यते जनैरिति शेषः । मिण्ढ + कर्म्मणि घञ् गौरादित्वात् ङीष् ततः कन् टाप् ह्रस्वश्च ।) कालमेषिका । इत्यमरटीकायां रायमुकुटः ॥

कालमेषी, स्त्री, (कालमेष + ङीष्) कालमेषिका । इत्यमरटीकायां भरतः ॥

कालमेषिका, स्त्री, (कालं मिषति स्पर्द्धते स्वकायेन । मिष + अण् । गौरादित्वात् ङीष् स्वार्थेकन् टाप् ह्रस्वश्च ।) मञ्जिष्ठा । कृष्णचित्रता । इत्यमरः २ । ४ । १०९ ॥ अस्याः पर्य्याया यथा,—

"चित्रश्यामार्द्धचन्द्रा च पालिन्दी च सुघण्टिका ।
मसूरविदला कोलकैथिकाकालमेषिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

कालमेषी, स्त्री, (कालमेष + ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखाकृष्णफला सोमा पूतिफलीति च" ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा-स्साम्या वाकुचीशब्दे ज्ञेयाः ॥) मञ्जिष्ठा । इति शब्दरत्नावली ॥ चित्रक् । इति राजनिर्घण्टः ॥

कालरात्रिः, स्त्री, (कालः कालरूपा ब्रह्मैकदिने चतु-र्द्दशमन्वन्तराधिकारावसाने सृष्टिसंहारहेतुभूता रात्रिः ।) रात्रिविशेषः । सा तु कालः संहारः । मरणं तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्यावागीशः ॥ भीम-रथी । इति हारावली ॥ दुर्गायाः शक्तिविशेषः । यथा,—

"सा दुर्गा शक्तिभिः सार्द्धं काशीं रक्षति सर्व्वतः ।
ताः प्रयत्नेन संपूज्याः कालरात्रिमुखा नरैः" ॥
इति काशीखण्डम् ॥ (दीपावली । यथा,—

"दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" ।
इत्यागमवचनात् ।
क्रियायोग्यकालविशेषः । यदुक्तं दीपिकायाम् ।

"रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
प्रणवाद्यं तथा चान्तं रात्रौ कालं विवर्जयेत्" ॥)

कालरुद्रः, पुं, (कालः कालरूपः सर्व्वसंहारको रुद्रः ।) कालाग्निरुद्रः । यथा, देवीपुराणे,—

"येषु नः कालरुद्रस्य नानास्त्रीभूतसङ्गता ।
विचित्रहर्म्म्यविन्यासा कृतास्ते मेरुपृष्ठतः ॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता" ॥

कालवल्कं, क्ली, (कालं कृष्णवर्णं वल्कम् ।) विड्-लवणम् । इति रत्नमाला ॥

("न कालवल्के गन्धः सौवर्च्चलगुणाश्च ते" ॥
इति चरके सूत्रस्थाने २७ अः ॥)

कालवलौहं, क्ली, (कालं कृष्णं लौहं आयसमित्यर्थः ।) कालायसम् । तिखा इति भाषा । तत्पर्य्यायः । कृष्णायसम् २ रुक्मम् ३ तीक्ष्णम् ४ । इति रत्न-माला । (कालायसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कालवलनं, क्ली, (कलयति उपभुनक्ति विषयं । कल + णिच् + अच् । काल्यते प्रेर्य्यतेऽसौ कालेन वा णिच् कर्म्मणि घञ् । कालः कायः तस्य वलनं आव-रणम् । वल संवरणे + करणे ल्युट् ।) वर्म्म । इति त्रिकाण्डशेषः ॥ कायवलनमिति साधुपाठः ॥

कालवृन्तः, पुं, (कालं वृन्तं यस्य ।) कुलत्थवृक्षः । इति रत्नमाला ॥

कालवृन्ती, स्त्री, (कालवृन्त + गौरादित्वात् ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

कालवेला, स्त्री, (कालस्य वेला ।) क्रियानर्हकालवि-शेषः । सा तु रव्यादिवारे कालस्य प्रहरोक्तस्तद्-यामार्द्धरूपवेला । यथा । रवौ दिवा पञ्चमयामार्द्धं नक्तं षष्ठयामार्द्धम् । सोमे दिवा द्वितीययामार्द्धं

नक्तं चतुर्थयामार्द्धम्। कुजे दिवा षष्ठयामार्द्धं नक्तं सप्तमयामार्द्धम्। बुधे दिवा तृतीय यामार्द्धं नक्तं सप्तमयामार्द्धम्॥ गुरौ दिवा सप्तमयामार्द्धं नक्तं पञ्चमयामार्द्धम्। शुक्रे दिवा चतुर्थयामार्द्धं नक्तं तृतीययामार्द्धम्। शनौ दिवा प्रथमाष्टमयामार्द्धं नक्तं तदेव। इति दीपिका॥

कालशाकं, क्ली, (कालं क्षणं शाकम्।) खनामख्यातशाकम्। करचा इति हिन्दी भाषा। तत्पर्य्यायः। नाडिकम् २ आढ्यशाकम् ३ कालकम् ४। अस्य गुणाः। सारकत्वम्। रुचिवायुबलकारित्वम्। कफशोथरक्तपित्तनाशित्वम्। मेथित्वम्। हिमत्वञ्च। इति भावप्रकाशः॥ तिक्तपूतिका। कुलत्थशाकं इति केचित्। अस्य गुणाः। कटुत्वम्। अग्निदीपनत्वम्। गुरुत्वम्। श्लेष्मनाशित्वञ्च। इति राजवल्लभः॥ (यथा च वाभटे सूत्रस्थाने। ६ अध्याये।

"वर्षाभ्वौ कालशाकञ्च सक्षारं कटुतिक्तकम्।
दीपनं भेदनं हन्ति गरश्लेष्मकफानिलान्"॥)

कालश्यालिः, पुं, (कालः क्षण्याः श्यालिः उत्कृष्टधान्यविशेषः।) क्षण्याश्यालिः। इति राजनिर्घण्टः॥

कालश्येयं, क्ली, (कलश्यां भवम्। कलश्री + ढक्।) कालसेयम्। घोलम्। इत्यमरटीकायां भरतः॥

कालसंरोधः, पुं, (कालस्य संरोधः।) चिरकालावस्थानम्। इति मिताक्षरा॥ यथा।

"न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः"।
इति याज्ञवल्क्यः॥

कालसर्पः, पुं, (कालः क्षण्याः सर्पः।) क्षण्यासर्पः। तत्पर्य्यायः। अजगर्द्धः २ महाविषः ३। इति चिकित्सितशेषः॥ (यथा काश्मीरखण्डे १०० अध्याये।

"स दष्टः कालसर्पेण स दग्धो मत्युना स्फुटम्।
स मुक्तस्तत्र दिवसे विश्वेशो यत्र नेक्षितः"॥)

कालसारं, क्ली, (कालः सारः प्रधानं यस्य।) पीतचन्दनम्। इति भावप्रकाशः॥ (कालीयकशब्देऽस्य गुणादयो बोद्धव्याः॥)

कालसारः, पुं, (कालः सारः प्रधानं यस्य।) खनामख्यातहरिणः। तत्पर्य्यायः। क्षण्यासारः २। इति शब्दरत्नावली॥

कालसूत्रं, क्ली, (कालस्य यमस्य बन्धनहेतुकायाः सूत्रमिव।) नरकविशेषः। इत्यमरः। १। ८। २॥ तत्तु कुलालचक्रसूत्रच्छेदनरूपम्। इति मनुः॥ (यथा मार्कण्डेये १४। ८९।

"कालसूत्रे तथाच्छेदमनेकाश्चैव यातनाः।
प्राप्य निष्कृतिमेतस्मात् न वेद्मि कदमेष्यति"॥)

कालसेयं, क्ली, (कलश्यां भवम्। कलश्री + ढक्।) घोलम्। इत्यमरः। २। ९। ५३॥

कालस्कन्धः, पुं, (कालः क्षण्याः स्कन्धो यस्य।) तमालवृक्षः। तिन्दुकवृक्षः। धौवकद्रुमः। इति मेदिनी॥ दुग्धखदिरः। उदुम्बरः। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा,—सुश्रुते सूत्रस्थाने। ३८ अध्याये कालसादिवर्गे॥

"कालसारार्जकार्कखदिरकदंरकालस्कन्धकमुकभूर्जमेषशृङ्ग्यादिश्च"॥)

काला, स्त्री, (कालो वर्णोऽस्यस्य अर्शं आदिभ्य अच् टाप् च। अत्र वर्णस्याविवक्षायां जानपदेति न ङीष्। अर्शं आद्यजन्तात् न ङीष् इत्यर्थः।) नीलिनी। कृष्णत्रिवृता। कृष्णजीरकः। इत्यमरः। २। ४। ९४॥ मञ्जिष्ठा इति मेदिनी॥ कुलिकवृक्षः। कालियाकड़ा इति भाषा। इति रत्नमाला॥ अश्वगन्धावृक्षः। इति राजनिर्घण्टः॥ पाटलावृक्षः। इति भावप्रकाशः॥ (दक्षकन्याविशेषः। सा तु कश्यपपत्नी। यथा महाभारते १। सम्भवपर्व्वणि ६५। १२।

"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा"॥)

कालागुरु, क्ली, (कालं क्षणं अगुरु।) कृष्णागुरु। इत्यमरः। २। ६। १२०॥ (यथा रघुः ४। ८१।

"चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"॥

कृष्णागुरुशब्देऽस्य पर्य्यायः गुणाश्चज्ञेयाः॥)

कालाग्निः, पुं, (कालः सर्व्वसंहारकः अग्निः। प्रलयाग्निः। यथा महाभारते १। ५४। २५।

"ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम्।
नाशयिष्यामि माञ्च त्वं भयं कार्षीः कथञ्चन"॥

तदधिष्ठातृरुद्रदेवस्य प्रियत्वात् पञ्चमुखरुद्राक्षोऽपि कालाग्निनाम्नाख्यायते।) पञ्चमुखरुद्राक्षः। यथा स्कान्दे।

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्"॥

इति तिथ्यादितत्त्वम्॥

कालाग्निरुद्रः, पुं, (कालः संहारकः अग्निः सम्वर्त्ताग्निरित्यर्थः। तस्याधिष्ठाता रुद्रः। कालाग्निरिव रुद्रो वा।) संहारकारिरुद्रः। यथा। कालाग्निरुद्र ऋषिरित्यादि वैदिकसन्न्यायां रुद्रोपस्थानम्॥ * ॥ तद्विवरणं यथा,—

शुक्र उवाच।

"भगवंस्तव वाक्यानां न तृप्तिर्भवते मम।
कालाग्निपार्थिवं मानं श्रोतुमिच्छामि तत्त्वतः"॥

भगवानुवाच।

"न हि पार्थिवदीपेषु मेरुपृष्ठेऽपि वासव!।
भोगाकादकरा नृणां तथा पातालवासिषु॥
येषु नः कालरुद्रस्य नानास्नीघृतसंकुला।
विचित्रहर्म्यविन्यासा कृतस्ते मेरुपृष्ठतः॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता।
सा पराशिवभावेन परमापददायिका॥
तस्या यदुःसहं तेजो ब्रह्मादीनां क्षयं करम्।
तं विद्धि कालरुद्रेति सौम्यरूपं सदाशिवम्॥
कालाग्नेर्यसनं लक्षं योजनानां प्रमाणतः।
अर्द्धोच्छ्रयतस्तस्य पादाः पादेन वासव!॥
सिंहरूपा महाघोरा महानका महाबलाः।
कालाग्निरुद्ररूपो यो बहुरूपसमाहवः॥
अनन्तपद्मरूपस्य धातारः कारणेश्वरः।
दारुणाग्निश्च रुद्रस्य यमहन्ता क्षमान्तकः॥
लोहितः क्रूरतेजात्मा घनो दहिर्बलाहकः।
विद्युतश्चलशीघ्रश्च प्रसन्नः शान्तसौम्यदृक्॥
सर्व्वज्ञो विविधो बुद्धो द्युतिमान् दीप्तिसुप्रभः।
एते रुद्रा महात्मानः कालिकाशक्तिसंहिताः॥
संहरन्ति समस्तेदं ब्रह्माद्यं सचराचरम्।
कालाग्निभुवनेशोऽयं बज्रकोटिभिरावृतः॥
तस्याः पुरस्य विस्तारं शतकोटिमुवर्त्तुलम्।
देवगन्धर्व्वसिद्धानां तत्र भोगाः सुदुर्लभाः॥
पूर्व्वोत्तरपरा पश्चिर्याम्योत्तरस्थिता परा।
अनलानिलपरा च नैर्ऋतेशानगापरा॥
एतेषां मध्यतो राजन् कालरुद्रस्तु शोभने।
पङ्क्त्याकारैः पुरैः सर्व्वं कटकं तस्य संस्थितम्॥
समन्ताद्वेष्टितवनं प्राकाराट्टालगोपुरैः।
वज्रेन्द्रनीलवैदूर्य्यैः प्राकारैः सर्व्वतोऽन्वितम्॥
कालाग्निनरकान्ते तु पुरं कालस्य संस्थितम्।
पञ्चाशल्लक्षविस्तारं समन्तात् परिवर्त्तुलम्॥
जाम्बूनदमयैर्हैमैः खचितं रत्नधातुभिः॥
प्रमदाजनसंजुष्टं नानावर्णसमावृतम्॥
कामोन्मत्तप्रमत्तञ्च तद्भाति जनसंकुलम्।
कालस्य भुवनं दिव्यं वृत्ताकारं मनोहरम्॥
वेष्टितं हेमप्राकारैर्योजनायुतमुच्छ्रितम्।
प्राकारावहिरुद्यान्ते अन्तरं योजनायुतम्॥
अग्निज्वालेश्च निर्विड़ैर्भयदैः किंशुकप्रभैः।
हरितालनिभा ज्वाला सिन्दूरगैरिकाप्रभा॥
अत ऊर्द्धं प्रजज्वाल वातोद्भूताग्निभास्वरा।
वीचितरङ्गकल्लोलज्वालामालाकुलाम्बरा॥
प्रवृत्तास्ताः प्रमाणेन योजनद्वयकोटयः।
अष्टानवतिलक्षाणि ज्वाला ऊर्द्धन्ततः शिखा॥
वज्रभूता सदा तप्ता तस्य तेजोनियामिका।
चत्वारि कोटिमानेन कारणेन तु स्थापिता॥
तस्यार्द्धेन भवेत् किञ्चित् कोट्यश्चत्वारि वासव!।
एवं कालाग्निरुद्रस्य माहात्म्यं कीर्त्तितं मया॥
श्रवणात् सर्व्वपापानि शाम्यन्ति कालजान्यपि"॥
इत्याद्ये देवीपुराणे कालाग्निरुद्रपुरकथनम्॥
(कृष्णयजुर्व्वेदगतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"कालाग्निरुद्रमैत्रेयी सुवालक्षुरिकान्तिका"॥

वटिकौषधविशेषः। यथा,—

"सूतकान्ताभ्रलौहानां भस्ममात्तिकगन्धकम्।
भूधरास्थे पुटे पश्चाद्दिनैकं तद्विपाचयेत्॥
दशमांशं विषं योज्यं माषमात्रञ्च भक्षयेत्।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत्"॥

कालाग्निरुद्ररसः॥

इति रसेन्द्रसारसंग्रहे वीसर्पाधिकारे॥*॥)

कालाङ्गनी, स्त्री, (अज्यतेऽनया। अनज् + करणे ल्युट् + ङीप्। काली अङ्गनी ततः ऐवङ्भावः।) क्षुपविशेषः। कालिकाङ्गसिकिनी इति ख्याता। तत्पर्य्यायः। अङ्गनी २ रेचनी ३ शिलाङ्गनी ४ नीलाङ्गनी ५ कृष्णाभा ६ काली ७ कृष्णाङ्गनी ८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अमेध्यत्वम्। कृमिशोधनत्वम्। अपानावर्त्तशमनत्वम्। जाठरामयनाशित्वञ्च। इति राजनिर्घण्टः॥

कालानुनादी, [न्] पुं, (कल एव कालः अव्यक्तमधर-

ध्वनिः । तं अनुनदतीति । अनु + नद् + णिनिः ।) रोलम्बः । भ्रमरः । कलविङ्कः । चटा इति भाषा । कपिञ्जलः । चातकपक्षी । इति मेदिनी ॥

कालानुशारिवा, स्त्री, (कालेन कृष्णवर्णेन अनुकृता शारिवा ।) तगरपादिकम् । तगरमूल इति भाषा । श्वेतलोजटा । इति रत्नमाला । श्वीउलीक्षोप् इति भाषा ॥ (तगरशब्दे ऽस्या गुणादयो बोध्याः ॥)

कालानुसारकं, क्ली, (कालं कृष्णवर्णं मृगमदं अनुसरति गन्धेन । अनु + सृ + गवुल् ।) तगरम् । इति राजनिर्घण्टः ॥ पीतचन्दनम् । इति भावप्रकाशः ॥

कालानुसारिः, पुं, (कालं कृष्णवर्णं मृगमदं अनुसरतीति । काल + अनु + सृ + इञ् ।) शैलेयम् । शैलजनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥

कालानुसार्य्यं, क्ली, (कालेन मृगमदेनानुसिध्यते । अनु + सृ गतौ + "ऋहलोर्ण्यत्" ।३ । १ ।१२४ । इति ण्यत् ।) शैलेयम् । शैलज इति भाषा । कालीयकम् । कालीयानामपीतवर्णसुगन्धिकाष्ठम् । इत्यमरः । २ । ४ । १२२ ॥ ग्रिंग्रपाहृच्चः । इति मेदिनी । ग्रिंग्रु इति भाषा ॥ तगरम् । इति भावप्रकाशः ॥

कालानुसार्य्यकं, क्ली, (कालानुसार्य्य + कप् ।) शैलेयम् । इति राजनिर्घण्टः ॥

कालान्तरविषः, पुं, (कालान्तरे दंशनादन्यस्मिन् काले विषं विक्रतिकारि यस्य ।) मूषिकादिः । इति हेमचन्द्रः ॥

कालापः, पुं, (कालः मृत्युराप्यते यस्मात् । काल + आप् + अपादाने घञ् ।) सर्पभोगः । राक्षसः । इति धरणी ॥ (कलापं स्वनामख्यातं व्याकरणं वेत्तीति । अण् ।) कलापव्याकरणवेत्तरि त्रि । (ऋषिविशेषः । यथा महाभारते । २ । ४ । १७ ।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च ।
मुनयो धर्म्मविदांसो धृतात्मानो जितेन्द्रियाः" ॥)

कालायसं, क्ली, (कालश्च तत् अयश्चेति । "अनोभ्रायः सरसां जातिसंज्ञयोः" । ५ । ४ । ९४ । इति टच् ।) लौहम् । इत्यमरः । २ । ९ । ९८ । (यथा, गोः रामायणे । ५ । ४९ । ३२ ।
"ददर्श वीक्षमाणश्च परिघं तोरणाश्रयम् ।
तमादाय महाबाहुः कालायसमयं दृढम्" ॥
अस्य पर्य्यायो यथा,—
"लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी" ।
अस्य सप्तदोषा यथा,—
"गुरुता दृढतोत्क्लेदः कृष्णत्वं दाहकारिता ।
कृष्णदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कालिकं, क्ली, (कालः कृष्णो वर्णोऽस्यास्य इति ठन् ।) कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालायकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ (काले भवम् । ठञ् । कालेन निर्वृत्तं ठक् वा ।) सामयिके त्रि । (यथा, भाषापरिच्छेदे १२२ ।
"दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम्" ॥)

कालिकः, पुं, (काले वर्षाकाले चरति ठञ् । के जले अलति पर्य्याप्नोति । अल् + वाऽलकात् इकन् वा ।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालिका, स्त्री, (कालो वर्णोऽस्यास्याः इनिठनाविति ठन् । यद्वा, काल + ज्ञानपदात् ङीष् स्वार्थे कन् ह्रस्वश्च । षड्विकाभेदः । काली । तन्नामकारणं यथा ।
"सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् ।
गङ्गावतारनिकटे महामायांप्रतुष्टुवुः ॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्तरैः ।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ।
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः ।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्व्वधायाहं स्तूयेऽद्य सकलैः सुरैः ॥
विनिःसृतायां देह्यान्तु मातङ्ग्याः कायतस्तदा ।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी कृणादपि ॥
कालिकाख्याऽभवत्सापि हिमाचलकृताश्रया ।
तामुग्रतारां ऋषयो वदन्तीह मनीषिणः ।
उग्रादपि भयात्राति यस्माद्भक्तान् सदाम्बिका ॥
एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च ।
एषैवैकजटा ख्याता यस्मात्तस्या जटैकिका ।
पृच्छतुं चिन्तनं चास्याः सम्यग्वेतालभैरवौ ! ॥
यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः ।
कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् ॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् ।
मुण्डमालाधरां श्रीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् ॥
साट्टहासमहाघोररावयुक्तातिभीषणा ।
चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः ॥
एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः ।
महाकाल्यथ रक्ताक्षी उग्रा भीमा तथैव च ॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" ॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ।
कार्षापणम् । दक्षिकपक्षदक्षः । क्रमदेयवस्तुमूल्यम् । धूसरी । नवमेघः । पटोलशाखा । रोमाली ॥ मांसी । काकी । शिवा । मेघावलिः । इति मेदिनी ॥ (यथा रघुः ११ । १५ ।
"ताड़का चक्रकपालकुण्डला
कालिकेव निविड़ा बलाकिनी" ॥)
स्वर्णदोषः । इति जटाधरः ॥ क्षीरकीटः । इति हारावली ॥ मसी । इति शब्दरत्नावली ॥ काकोली । श्यामापक्षी । इति राजनिर्घण्टः ॥ प्रतिमासीया वृद्धिः । यथा,—
"प्रतिमासं खवति या वृद्धिः सा कालिका मता" ।
इति विवादार्णवसेतौ नारदः ॥ सुरा । इति हेमचन्द्रः ॥ कुष्माण्डिका । इत्यमरटीकायां भरतः ॥ हिमाचलभवा चिरिण्टा हरीतकी । सा गन्धयोगकरणे प्रशस्ता । इति राजवल्लभः ॥ (नदीविशेषः । यथा महाभारते ३ । ८४ । १४६ ।
"कालिकासङ्गमे स्नात्वा कौशिक्याश्चरणयोर्यतः ।
त्रिरात्रोपयितो विद्वान् सर्व्वपापैः प्रमुच्यते" ॥)

कालिकाव्रतं, क्ली, (कालिकायाः प्रीतये यद्व्रतं विहितनियमादिकम् ।) अमावास्यायां स्त्रीकर्त्तव्यव्रतविशेषः । यथा,—
युधिष्ठिर उवाच ।
"कालिकाव्रतमाहात्म्यं वद वेदविदाम्बर ! ।
किमेतस्य फलं देव को वा तद्विधिरेव च ॥
कस्माद्भृतमिदं भूतं मर्त्यैः केन प्रकाशितम् ।
त्वत्तस्तत् श्रोतुमिच्छामि तत्सर्व्वं ब्रूहि केशव !" ॥
श्रीकृष्ण उवाच ।
"पुरा भविष्यशास्त्रेषु यदुक्तं धर्म्मसंहितम् ।
तत्सर्व्वं शृणु राजेन्द्र ! कालिकाव्रतमुत्तमम् ॥
स्वर्गे पुरन्दरश्चासीत्तस्यैव राजसद्मनि ।
यद्वृत्तान्तमभूत्तत्र तच्छृणुष्व युधिष्ठिर ! ॥
सभायां संस्थितो राजा नृत्यासक्तो हि नित्यशः ।
दिनैकस्य च वृत्तान्तं श्रुत्वा हृष्टो बभूव सः ॥
अत्यामोदं समभ्येत्य पुष्पवृष्टिरमुक्तदा ।
पुरन्दरः स्वयं प्राप्य पारिजातं गृहीतवान् ॥
घ्रात्वा राजा तदा पुष्पं प्रदत्तं तद्विजातये ।
लज्जितो ब्राह्मणः सोऽपि मानहीनोऽभवत्तदा ॥
क्रोधेन महताविष्टः ग्रसितुं कामसमन्वितः ।
शप्तं विसृज्य चेन्द्राय शापो दत्तः सुदारुणः ॥
व्याधालयेषु मार्জ্জारो द्वादशाब्दं भविष्यसि ।
तेन कर्म्मविपाकेन मदयुक्तो विचेतनः ॥
प्राप्तमार्জ্জारदेहोऽसौ राजा विपिनमाश्रितः ।
पत्नी तस्य च तत्रासीत् पत्युः सर्व्वाधिकारिणी ॥
ततो व्याधगृहे राजा मार्জ্জारीभूय तिष्ठति ।
ततः पुरन्दरपुरं राजशून्यमभूत्तदा ॥
शचीं तु चिन्तायामास अन्नपानं विहाय सा ।
उपवासं समाचर्य्य मासमेकन्तु तिष्ठति ॥
ततो देवगणाः सर्व्वे चिन्तया व्याकुलेन्द्रियाः ।
गत्वा तु राजभवनं व्याकुलां तां विलोक्य च ॥
विस्मृत्य चामराः सर्व्वे शचीं वाक्यमुदाहरन् ।
शचि ! त्वं राजजायासि कथमेतत् करोषि च ॥
मासमेकमनाहारं कृत्वा तिष्ठसि सुव्रते ! ।
किं वा त्वदीप्सितं देवि ! सत्वरं वद पण्डिते ॥
तच्छ्रुत्वा तु तदा देवी कृताञ्जलिरभाषत ।
यूयमेव जगन्नाथाः सृष्टिस्थित्यन्तकारकाः ॥
क्व गतो मम भर्त्ता च तन्न जानामि कथ्यताम् ।
परिचिन्त्यामराः सर्व्वे ध्यानमास्थाय संस्थिताः ॥
मार्জ্जाररूपमास्थाय स्थीयते चान्यजाश्रये ।
तच्छ्रुत्वा राजपत्नी च वेपमाना मुहुर्मुहुः ॥
उवाच कुशलं प्रश्नं राज्ञार्थं किं करोम्यहम् ।
पत्युर्यथा विमोक्षः स्यात् तत् कुरुष्वं सुधाशनाः ॥
प्रत्यूचुस्तामराः सर्व्वे याहि त्वं द्विजसन्निधिम् ।
संभाष्य मधुरं प्रश्नं द्विजसेवां समाचर ।
द्विजगेहं समागत्य द्विजसेवापराऽभवत् ॥

स तस्याः प्रियकार्य्येण सन्तुष्टो द्विजसत्तमः।
हिंसाद्रोहविमुक्तश्च बलिहोमपरायणः।
शान्तो दान्तः क्षमायुक्तः सदा मधुरभाषितः॥
सर्व्वप्राणिहितार्थी च लोभमोहविवर्ज्जितः।
जितेन्द्रियो जितक्रोधो दक्षोऽसौ ब्राह्मणोत्तमः॥
राजपत्न्याः सुसेवाभिः प्रीतोऽसौ द्विजसत्तमः।
प्रत्युवाच स तां प्रीत्या शुचि! त्वं चातिदुर्ल्लभे।
किं वा त्वदीप्सितं देवि! सत्यं वद पण्डिते"॥
शुच्युवाच।
"पापं यज्ज्ञानतो भर्त्रा समस्तं कर्म्मणा कृतम्।
तत् क्षमस्व महाभाग! रक्षस्व सुरपालकम्॥
वासवस्तव शापेन मार्ज्जारत्वमुपागतः।
इन्द्रो व्याधगृहे देव! विद्यते हि न संशयः।
पुरन्दरस्य शापान्तः केनोपायेन सिध्यति"॥
ब्राह्मण उवाच।
"शुचि! त्वं पतिभक्तासि मद्वाक्यमवधारय।
पतिव्रते! महाभागे! कालिकाव्रतमाचर॥
दारुणं यत् कृतं तेन व्रतेनैव विमुच्यते।
कोपात् शापो मया दत्तो तन्मोक्षं कुरु सुव्रते!"॥
शुच्युवाच।
"विधानं ब्रूहि मे ब्रह्मन् कालिकाया व्रतस्य च।
तदा तव प्रसादेन करोमि तद्व्रतं द्विज!"॥
ब्राह्मण उवाच।
"अश्वत्थतरुमूलेऽस्ति वटको नाम हिंसकः।
तस्यैव भवनं गच्छ शापान्मोक्षं च कारय॥
पत्नी सुभद्रा तस्यास्ति पतिशुश्रूषणे रता।
तस्याः कुलव्रतं कर्म्म तत्परा भव शोभने।
ततश्च प्राङ्मुखीभूय गता सा तस्य मन्दिरम्॥
दृष्ट्वा व्याधः शुचीं देवीं प्रत्युवाच सुभद्रिकाम्।
आयान्तीयं शुची देवी तस्याः सम्भाषणं कुरु॥
इति तस्य वचः श्रुत्वा सुभद्रा हृष्टमानसा।
तस्याः सम्भाषणार्थन्तु सुभद्रा चागता बहिः।
ताञ्च दृष्ट्वा शुचीं देवीं सार्घ्यपाद्यादिकं ददौ॥
शुचि! त्वं राजभार्य्यासि कस्मादागमनं तव।
किं कार्य्यं कथय त्वं हि इत्युवाच शुचीं प्रति॥
प्रत्युवाच शुची तान्तु भर्त्ता मे सुरपालकः।
स च ब्राह्मणशापेन मार्ज्जारत्वाभवद्द्रुतम्॥
क्व गतः प्राणनाथोऽसाविति चिन्तापरायणम्।
ज्ञात्वा केनाप्युपायेन प्राप्ता च भवतीगृहम्॥
इत्युक्ता राजपत्नी च दृष्टो मार्ज्जारकस्तदा।
सा ज्ञात्वा तं प्रियं शुक्रं चिन्तां प्राप्ता दुरत्ययाम्॥
दृष्ट्वा मार्ज्जारतां प्राप्तं विललापाकुलेन्द्रिया।
विलपन्तीं शुचीं दृष्ट्वा सुभद्रा प्रत्युवाच ताम्॥
पतिव्रते महाभागे! त्वमेव राजगेहिनी।
त्वं दुःखेन विलिप्तासि सन्देहो नास्ति तत्र वै॥
किन्तु तस्याप्युपायोऽस्ति कालिकाव्रतमाचर।
अतिप्रत्यक्षरूपा सा अस्माकं कुलदेवता॥
कालिका सा महादेवी शुभसन्ततिदायिनी।
व्रतस्यास्य प्रभावेण साकल्यमुपजायते"॥
शुच्युवाच।
"विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च।
ममोपदिश्यतामेव तद्व्रतञ्च करोम्यहम्॥
शुक्लकाले समारभ्य कृष्णपक्षे चतुर्दशीम्॥
सकल्प्य विधिना पूर्ब्बममावास्यां व्रतं चरेत्।
समारभ्य गुरौकेन दिगुणं परिशोधयेत्॥
न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया।
सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा॥
वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकस्य चाखिलम्।
द्विषट्कां विप्रजायाञ्च सधवां भोजयेत्ततः॥
एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम्।
ततः शुद्धदिने प्राप्ते भौमाह्ने मन्दवासरे॥
यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः।
तथापराह्णकाले तु सन्ध्योपसमये तथा॥
रात्रौ तु कदलीकाण्डे गृहं निर्म्माय प्राङ्गणे।
तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा॥
पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा।
धूपैर्दीप्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा॥
पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम्।
निवेद्य सकलं देव्यै बलिं दत्त्वा प्रयत्न च॥
तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादिबलिं तथा।
महारण्ये प्रदातव्यं श्रुत्वैतत् व्रतमुत्तमम्॥
वैल्ववे कदलीमूले या कुर्य्यात् कालिकाव्रतम्।
कार्य्यसिद्धिर्भवेत् तस्या भविता गतिरुत्तमा॥
एतद्व्रतविधानन्तु श्रुत्वा सिद्धिर्भविष्यति।
एतद्व्रतमिदं भद्रे कुरु गत्वा निजालयम्॥
तस्यास्तद्वचनं श्रुत्वा सा शुची हर्षमानसा।
गृहमागत्य सा तस्या वार्धिकं व्रतमाचरत्॥
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरुत्तमैस्तथा।
कृत्वा चाम्रमयीं देवीं पूजयेत् भक्तिसंयुता॥
नानासुगन्धिपुष्पाणि दिव्यरत्नाद्यलङ्कृतम्।
सिद्धान्नं पायसञ्चैव शर्करान्वितपिष्टकम्॥
अमृतायुतहावञ्च दीयते च प्रयत्नतः।
लुलापच्छागमेषादिबलिं दत्त्वा प्रभूतकम्॥
नानावाद्योद्यमैर्गीतैः प्रणिपत्य पुनः पुनः।
कृताञ्जलिपुटा लोलं भक्तिनम्रा चकार सा॥
तुष्टा प्राह महाकाली वरं वृणु शुभानने!।
तत् श्रुत्वा राजपत्नी सा बभाषे च मुदान्विता॥
मत्यमुराखुभुक् भूतत्वन्मोक्षं कुरु चेश्वरि!।
वरं दत्त्वा हैमवती बभूवान्तर्हिता नृप!॥
द्वादशाब्दाच्च तत्शापान्मोचितो वत्सरे तदा।
मार्ज्जारूपं सन्त्यज्य स गतोऽन्तेऽमरावतीम्॥
पुष्पवृष्टिश्च दुन्दुभ्या वाद्यं देवगणैः कृतम्।
कालिकायाः प्रसादेन गतः शुक्रो निजालयम्॥
अनेनैव विधानेन या कुर्य्यात् कालिकाव्रतम्।
सत्वरं कार्य्यसिद्धिः स्यात्तस्या अत्र न संशयः"॥
इति भविष्यपुराणे कालिकाव्रतकथा समाप्ता॥

कालिङ्गं, क्ली, (केन जलेन आलिङ्ग्यतेऽसौ। आ+लिगि+कर्म्मणि घञ्।) फलविशेषः। तरमुज् इति ख्यातम्। तत्पर्य्यायः। कालिन्दकम् २ कृष्णबीजम् ३ फलवर्त्तुलम् ४। अस्य गुणाः। शीतलत्वम्। ग्राहित्वम्। स्वादुपाकरसत्वम्। गुरुत्वम्। विष्टम्भित्वम्। स्यन्दित्वम्। दृक्शुक्रकफपित्तनाशित्वम्। कफवातकारित्वञ्च। पक्वस्य तस्य गुणाः। पित्तरक्तिकारित्वम्। उष्णत्वम्। क्षारत्वम्। कफवातनाशित्वञ्च। तत्पक्वगुणौ। रुधिरस्रावनत्वम्। तिक्तत्वञ्च। इति पथ्यापथ्यविवेकः॥

कालिङ्गः, पुं, (केन जलेनालिङ्ग्यते इति। क+आलिगि+कर्म्मणि घञ्।) भूमिकर्कारुः। (कं जलमालिङ्गति। आ+लिगि+कर्म्मण्यण्।) हस्ती। (कं वातं आलिङ्गति गृह्णाति अत्तीति वा।) सर्पः। इति मेदिनी॥ (कुत्सितं लिङ्गं अङ्गादिचिह्नं यस्येति कोः कादेशः।) लौहभेदः। अस्य लक्षणम्। "कालिङ्गो लिङ्गवान् यः स्याद्दृढः सूक्ष्माङ्गको मतः"। इति सुखबोधः॥ (कलिङ्गे भवः। अण्। कलिङ्गदेशोद्भवः। यथा महाभारते ८। कर्णशल्यसंवादे ४५। १४।
"कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः।
कोसलाः काशयोऽङ्गाश्च कालिङ्गा मागधास्तथा"॥
कलिङ्गदेशस्य राजा। अण्। कलिङ्गराजः। यथा रघुः ४। ४०।
"प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः।
पक्षच्छेदोद्यतं शक्रं गिरिमारुर्वीव पर्व्वतः"॥)

कालिङ्गिका, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष्। स्वार्थे संज्ञायां वा कन् टाप् ह्रस्वश्च।) त्रिवृत्। इति राजनिर्घण्टः॥

कालिङ्गी, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष्।) राजकर्कटी। इति मेदिनी॥ (कालिङ्गदेशोद्भवा। यथा महाभारते १। ९५। २२।
"अक्रोधनः खलु कालिङ्गीं करभां नामोपयेमे"॥)

कालिदासः, पुं, (काल्याः दासः। संज्ञायां ह्रस्वः।) खनामख्यातकविः। तत्पर्य्यायः। रघुकारः २ मेधारुद्रः ३ कोटिजित् ४। इति त्रिकाण्डशेषः॥ स तु रघुकुमारसम्भवश्रुतबोधमेघदूताभिज्ञानशाकुन्तलनलोदयपुष्पबाणविलासादिग्रन्थकर्त्ता विक्रमादित्यराजसभास्थनवरत्नमध्ये सप्तमरत्नञ्च॥ (यदुक्तम्।
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य"॥)

कालिदासकः, पुं, (कालिदास+स्वार्थे कन्।) कालिदासः। इति शब्दरत्नावली॥

कालिनी, स्त्री, (कालः शिवः अधिष्ठातृतया यद्वा कालः पुरुषाकारः आकाशस्थो लुब्धकः संश्लिष्टत्वेन अस्त्यस्याः।) आर्द्रागन्धत्वम्। इतिहेमचन्द्रः॥

कालिन्दकं, क्ली, (कालिं जलराशिं ददातीति। दा+कः। स्वार्थे कन्।) कालिङ्गम्। इति राजनिर्घण्टः॥

कालिन्दी, स्त्री, (कलिन्दाख्यपर्व्वते तत्सन्निहितदेशे वा जाता। कलिन्दात् निःसृता वा "तत्र भवः"। ४।३।५३। इति अण् ततो ङीप्।) यमुना नदी। इत्यमरः। १। १०। ३२॥ (यथा रघुः १५। २८।
"उपकूलं स कालिन्द्याः पुरीं पौरवभूषणः।
निर्म्ममे निर्म्ममोऽर्थेषु मथुरां मधुराकृतिः"॥)
रक्तचित्रत्वम्। इति राजनिर्घण्टः॥

कालिन्दीकर्षणः, पुं, (कालिन्दीं कर्षति यः। कृष+कर्त्तरि ल्युः। कालिन्द्याः कर्षणो वा।) बलदेवः। इति हलायुधः॥

(कालिन्दीसङ्गमकथा हरिवंशे १०२ अध्याये उक्ता। तद्यथा.—
"रामस्तु यमुनामाह खातुमिच्छे महानदि !।
एहि मामभिगच्छस्व रूपिणी सागरङ्गमे॥
सङ्गर्षणस्य मत्तोक्तां भास्वतीं परिभूय सा।
नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता॥
ततश्चुकोध बलवान् रामो मदसमीरितः।
चकार स हलं हस्ते कर्षणाधोमुखं बली॥
तस्यामुपरि मेदिन्यां पेतुस्तामरसस्रजः।
मुमुचुः पुष्पकौषैश्च पुष्परेणवरुणं जलम्॥
स हलेनानताग्रेण कुले गृह्य महानदीम्।
चकर्ष यमुनां रामो युवतिनां वनितामिव॥
सा विह्वलजलस्रोता स्रुदत्पङ्कितसङ्घया।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता॥
पुलिनश्रोणिबिम्बोष्ठी स्रुदितैस्तोयताड़ितैः।
फेनमेखलसूत्रैश्च वेगगाम्बुदगामिनी॥
तरङ्गविषमापीड़ा चक्रवाकोन्मुखस्तनी।
वेगगम्भीरवक्राङ्गी त्रस्तमीनविभूषणा॥
सितहंसेक्षणापाङ्गी काशशौमोक्षितांबरा।
तीरजोद्भूतकेशान्ता जलस्खलितगामिनी॥
लाङ्गलोल्लिखितापाङ्गी क्षुभिता,सागरङ्गमा।
मत्तेव कुटिला नारी राजमार्गेण गच्छती॥
दृश्यते सा स्म वेगेन स्रोतःस्खलितगामिनी।
उन्मार्गा गीतमार्गा सा येन वृन्दावनं वनम्॥
वृन्दावनस्य मध्येन सा नीता यमुना नदी।
रोरूयमाणैव खगैरन्विता तोयवासिभिः॥
सा यदा समभिक्रान्ता नदी वृन्दावनं वनम्।
तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत्॥
प्रसीद नाथ ! भीतास्मि प्रतिलोमेन कर्म्मणा।
विपरीतमिदं रूपं तोयञ्च मम जायते॥
अस्मत्यहं नदीमध्ये रौहिणेय ! त्वया धृता।
कर्षणेन महाबाहो स्वमार्गव्यभिचारिणी॥
प्राप्तां मां सागरे नूनं सप्तस्रोता वेगगर्व्विताः।
फेनहासैर्हसिष्यन्ति तोयान्यत्तगामिनीम्॥
प्रसादं कुरु मे वीर ! याचे त्वां शरणपूर्व्वज !।
सुप्रसन्नमना नित्यं भव त्वं सुरसत्तम !॥
कर्षणायुधशस्त्रास्मि रोषोऽयं विनिवर्त्त्यताम्॥
गच्छामि चरणौ मूर्द्धा तवैषा लाङ्गलायुध !।
मार्गमादिशमिच्छामि न गच्छामि महाभुज !"॥)

कालिन्दीभेदनः, पुं, (कालिन्दीं भिनत्ति। भिद्+कर्त्तरि ल्युः। कालिन्द्या भेदनो वा।) बलदेवः। इत्यमरः।१।१।२५॥ ("कालिन्दीभेदनो हली"ति पुराणम्॥)

कालिन्दीसूः,स्त्री,(सूते इति। सू+क्विप्। कालिन्द्याः यमुनायाः सूः माता प्रसवित्रीत्यर्थः। कालिन्दीं सूते सूतवती वा) सूर्य्यपत्नी। यमुनामाता। इति त्रिकाण्डशेषः॥

कालिन्दीसोदरः, पुं, (कालिन्द्याः सोदरः सहोदरः।) यमः। इति हेमचन्द्रः॥

काली,स्त्री,(कालः कृष्णवर्णोऽस्त्यस्याः। काल+'ज्ञा-नमदकुण्डगोलस्थजनाजनागकाजलीलेत्यादिना"। ४।१।४२। ङीष्।) शान्तनुराजपत्नी। इति चिकाण्डशेषः॥ (कालः शिवः। तस्य पत्नीति ङीष्।) कालिका। अम्बिकाललाटनिष्क्रान्ता देवी। यथा,
"ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम्।
काली करालवदना विनिष्क्रान्तासिपाशिनी"॥
इति मार्कण्डेयपुराणे ८७। ५॥*॥ अन्यच्च।
"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव !॥
समाग्निसहितो दन्त्यः प्रान्त्यस्तस्मात् पुरःसरः।
वह्निरामिविन्दिन्दुसहितो मादिरेव च॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम्।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सैकाग्रमनाः शृणु॥
नीलोत्पलदलश्यामा चतुर्बाऽसमन्विता।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे॥
वामे चर्म्म च पाशञ्च ऊर्द्धाधो भावतः पुनः।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मवराम्बरा॥
छिन्नाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा।
लोलजिह्वा निमग्नरक्तनयना नादभैरवा॥
कबन्धवाहना पीनविस्तारश्रवणानना।
एषा ताराख्या देवी श्मशानेति च कथ्यते॥
एतस्या योगिनीश्चाष्टौ पूजयेच्चिन्तयेदपि।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधात्रिका॥
करालाऽमूलिनी चेति अष्टौ ताः परिकीर्त्तिताः।
एषातिकामदा देवी जाड्यहानिकरी सदा॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते"।
इति श्रीकालिकापुराणे उत्तरतन्त्रे ६० अध्यायः।
क्षीरकीटः। मातृभेदः। उमा। नवमेघसमूहः। परीवादः। इति हेमचन्द्रः॥ कालाञ्जनी। तुवरी। चित्रक। राजिः। इति राजनिर्घण्टः॥ अग्निशिखाभेदः। इति जटाधरः॥ (यथा, मुण्डकोपनिषदि १।२।४।
"कालीकरालीच मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वा"॥
वृश्चिकालीवृक्षः। इति रत्नमाला। (कालिया विकाटी इति भाषा॥ लता। यथा वैद्यके।
"सप्तपर्णस्तथा काली गुडुची पिचुमर्दकम्"॥*॥
भीमसेनस्य पत्नीभेदः। यथा, भागवते ९।२२।३१।
"युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः।
भीमसेनात् हिडिम्बायां, काल्यां सर्व्वगतस्ततः"॥
मातृकाध्यानं चामुण्डाशब्दे द्रष्टव्यम्। कालिकाया ध्यानं लिख्यते यथा—
"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्धकराम्बुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्धाधपाणिकाम्॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम्॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥
घोररावां महारौद्रीं श्मशानालयवासिनीम्।
बालार्कमण्डलाकारलोचनत्रितयान्विताम्॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्।
शवरूपमहादेवहृदयोपरिसंस्थिताम्॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन च समं विपरीतरतातुराम्॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम्"॥
इति तन्त्रसारधृतकालतन्त्रम्॥
(कालशक्त्या सर्व्वमिदं जगत् परिचाल्यते सैव काली प्रकीर्त्तिता यद्वा कालयति कलयति वा उत्पादयति पालयति प्रलये पुनरात्मन्येव विलापयतीति काली आद्या मूलप्रकृतिः महत्तत्वादेरुत्पत्तिलयादीनामाधारभूता। कलिहलि कामधेनुरिति कलधातुः बहुर्थबोधिनी स्वरूपतः ब्रह्मणः सकाशात् नानाविधजगद्विचित्रनिर्म्माणसमर्था बुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः कालीति संज्ञया प्रकीर्त्यते। एतत् प्रबोधनाय समासतः कतिपयवचनान्यत्रोद्धृतानि यथायथं द्रष्टव्यानि। तथाहि ज्ञानसङ्कलिनीतन्त्रे। भागवते च।
"सा माया पालिनीशक्तिः सृष्टिसंहारकारिणी।
सा वा एतस्य संस्रष्टुः शक्तिः सदसदात्मिका॥
माया नाम महाभाग ! ययेदं निर्म्ममे विभुः"।
एषैव पारमेश्वरी मूलशक्तिः दुर्ब्बलाधिकारिणामुपासनासौकर्य्याय तन्त्रादिशास्त्रेषु कालीश्यामातारादिविविधनामरूपैः कल्पिता॥
यथा,—
"या देवी सर्व्वभूतेषु विष्णुमायेति शब्दिता"।
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगदिति"॥
इति मार्कण्डेयपुराणीयदेवीमाहात्म्ये देवकृतदेव्याः स्तुतौ। ८५। १२,१४। तथा च महानिर्व्वाणोक्ते ४र्थ उल्लासे। देवीं प्रति सदाशिववोक्तिः।
"त्वं परा प्रकृतिः साक्षात् ब्रह्मणः परमात्मनः।
महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत्॥
निमित्तमात्रं तद्ब्रह्म सर्व्वकारणकारणम्।
तस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा॥
करोषि पासि हंस्यन्ते जगदेतच्चराचरम्।
कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः।
महाकालस्य कलनात् त्वमाद्या कालिकापरा॥
कालत्वादादिभूतत्वादाद्या कालीति गीयते॥
ध्यानन्तु द्विविधं प्रोक्तं स्वरूपारूपभेदतः।
स्वरूपं तव यज्ज्ञानमवाङ्मनसगोचरम्॥
मनसोधारणार्थाय क्षीघ्रं स्वाभीष्टसिद्धये।
सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते॥
अरूपायाः कालिकायाः कालमातुर्महाद्युतेः।
गुणक्रियानुसारेण क्रियते रूपकल्पना"॥
तस्या अरूपाया महाकाल्याः कथमेव रूप-

कल्पनादिकमिति जिज्ञासितवतीं पार्व्वतीं प्रति भगवतः शिवस्योत्तरदानं तत्रैव १३ उल्लासे ॥
"उपासकानां कार्य्याय पुरैव कथितं प्रिये ! ।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम् ॥
श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्व्वभूतानि शैलजे ! ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
स्थितायाः प्राप्तयोगानां वर्णः कृष्णो निरूपितः ॥
नित्यायाः कालरूपाया अव्ययायाः शिवात्मनः ।
अमृतत्वात् ललाटेऽस्याः अग्निचिह्नं निरूपितम् ॥
अग्निसूर्य्याभिभिर्नित्यै रखिलं कालिकं जगत् ।
सम्प्रसूयति यत्तस्मात् कल्पितं नयनत्रयम्" ॥
तस्याः स्थूलध्यानं यथा तत्रैव ५म उल्लासे ।
"मेघाङ्गीं अग्निशैखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्द स्थिताम् ॥
मेघाङ्गीमिति वर्णेनास्याः कृष्णवर्णत्वं सूचितं परं अरूपाया निराकृतेः कालशक्तेरेव ध्यानालम्बनतया ज्ञापकत्वमिति यावत् ॥
अग्निशैखरेत्युक्त्या अग्नी चन्द्रः जीवसमष्टिः सर्व्वजीवबीजस्वरूपो हिरण्यगर्भो ब्रह्मा एव चन्द्रनाम्नाख्यायते अतएवास्या देव्या ललाटे ऊर्द्ध-देशे इति निर्देशात् समस्तजड़शक्तिभ्यः एथक् कृत्वा जीवशक्तेरुत्कर्षं बोधयति यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवरूपां महाबाहो ! ययेदं धार्य्यते जगत्" ॥
अतोऽस्या जीवशक्त्याधायकतया सैव परमात्मरूपिणी चिदानन्दमयीति प्रबोध्यते । यदि च स्थानभेदे क्वचित् परब्रह्मणः सकाशादस्याः पार्थक्यं दृश्यते तत्तु केवलमज्ञानां क्रियाविशेषबोधनायैव स्वरूपतः अग्नेर्दाहिकाशक्तिवत् सर्व्वत्रैव शास्त्रतद्विदुषोरभेदः प्रतिपादितः । त्रिनयनमित्युक्त्या सर्व्वज्योतिःपदार्थानां प्रधानभूतासोमसूर्य्याग्नयः प्रकाशशक्तेराधिक्यात् तैरेवास्या देव्या नयनत्रितयत्वेन प्रकल्पितं वस्तुतः सर्व्वप्रकाशकानां सूर्य्यादीनां सैवान्तर्यामितयाधिष्ठात्रीदेवतात्मरूपिणीति बोध्यम् ॥
रक्ताम्बरं बिभ्रतीं इति रक्तिकरणार्थं सैव परमात्मरूपिणी रजोगुणोद्रेकरूपमम्बरं वस्त्रं आवरणशक्तिमिति भावः बिभ्रतीं धारयतीं । पाणिभ्यामभयं वरञ्च इति भक्तसाधकानां रक्षार्थं कुशलार्थञ्च वराभयदानरूपशक्तिद्वयस्य पाणिद्वयत्वेन कल्पितं रक्तारविन्दस्थितामिति रजोगुणसमुद्भवाया इच्छाशक्तेरेवारविन्दत्वेन प्रकल्पनं कृतमिति बोध्यम् । अतः स्थूलध्यानादीनां यदिचायातनतः स्थूलदृष्ट्या नामरूपादिस्थूलजड़भावो लक्ष्यते परं सर्व्वत्रैव तेषां सूक्ष्मार्थरूपपरमात्मन्येव गूढतात्पर्य्यार्थः प्रतिफलत्येव विज्ञानद्विरेव तत्सर्व्वतोज्ञातुं शक्यते । न ह्येतदस्माकं केवलं स्वकपोलकल्पनामात्रं श्रीमद्भगवद्गीताप्रभृतितत्त्वज्ञानप्रतिपादकशास्त्रेषु विशेषतोनिश्चितं किञ्च प्रकृतिपुरुषयोरपि तत्तच्छास्त्रे भूयोभूयोऽविनश्वरत्वमनादित्वं चाङ्गीकृतम् ।
"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादि" । भूरिभूरि प्रमाणानि सन्ति बाहुल्यभिया नैवा स्माभिस्तान्युद्धृतानि ॥)
कालीकः, पुं, (के जले अलति पर्य्याप्नोति प्रभवतीत्यर्थः । अल + इकन् पृषोदरादित्वात् दीर्घः । यद्वा के जले + अलीकः मत्स्यलाभाय कपटशान्तमूर्त्तिरिव।) क्रौञ्चः । इति शब्दरत्नावली ॥
कालीची, स्त्री, (काल्या यमभगिन्या चीयतेऽत्र । चिञ् + बाहुलकात् अधिकरणे ङः । गौरादित्वात् ङीष् ।) यमविचारभूमिः । इति त्रिकाण्डशेषः ॥
कालीतनयः, पुं, (काल्याः यमरूपाया यमभगिन्याः यमत्वशक्तेर्वा तनयः इव यमवाहनत्वात्तथात्वम् । यद्वा, कालीं इतः प्राप्तः सन् बलिदानाय आत्मानं नयति प्रापयति । नी + अच् । कालीं प्रति उद्दिश्य वा इतः प्राप्तः उपस्थित इत्यर्थः आत्मनो नयः प्रापणं यस्य । महिषस्य कालीसन्निधाने बलिदानाय नीयमानतया तथात्वम् ।) महिषः । इति हेमचन्द्रः ॥
कालीयं, क्ली, (कालस्य कृष्णवर्णस्यायं कालस्थाने भवं वा "दृड्वाक्ष्णः" । ४ । २ । ११४ । इति छः ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ (अस्य व्यवहारो यथा, वैद्यकचक्रपाणिसंग्रहे एकादशग्रहणीकप्रसारणीतैले । "कालीयोत्पलपद्मकाक्षयनिशेत्यादि" ॥)
कालीयकं, क्ली, (कालीय + स्वार्थे कन् । कालीयमिव कायति वा । कै + कः ।) कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीकासारसुन्दरी॥ (यथा, महाभारते २ । ५१ । १० ।
"चन्दनागुरुकाष्ठानां भारान् कालीयकस्य च ।
चर्म्मरत्नसुवर्णानां गन्धानाञ्चैव राशयः" ॥)
तत्पर्य्यायः । जायकं २ कालानुसार्य्यं ३ । इत्यमरः । २ । ६ । १२६ । जायकम् ४ । इति टीकासर्व्वस्वम् ॥ कालेयम् ५ वर्णकम् ६ कान्तिदायकम् ७ । इति भरतधृतव्याड़िः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पीतचन्दनशब्दे द्रष्टव्यौ ॥ कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालिकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यथा तत्रैव, "सालसारादि कर्णखदिरकदरकालस्कन्धकमुकभूर्जमेष वृक्षोक्ति निम्बचन्दनकुचन्दनश्रिंशपा शिरीषासनधवार्ज्जुनतालशाकनक्तमालभूतीकाश्वकर्णागुरूणि कालीयकस्येति" ॥ इति सुश्रुते । सूत्रस्थाने । ३८ अध्यायः ॥)
कालीयकः, पुं, (कालीय + संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इति शब्दरत्नावली ॥ (अस्य पर्य्याया यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्यापर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्यचा ॥
सैवकालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कालेयं, क्ली, (कं सुखं आलेयं आदेयं यस्मात् ।) कालियानामपीतवर्णसुगन्धिकाष्ठम् । इति व्याड़िः रमानाथश्च ॥ (यथा, कुमारे ७ । ९ ।
"तां लोध्रकल्केन हृताङ्गतैला-
माघ्राणकालेयकृताङ्गरागाम्" ॥
कालेये रक्तधारिण्यै 'हितं इति ठक् ।) कालखण्डनम् । यकृत् इति यावत् । इति मेदिनी ॥
कालेयः, पुं, (कालाया अपत्यं ढक् ।) दैत्यभेदः । इति मेदिनी ॥ (यथा, महाभारते १ । ६५ । ३४ ।
"कालायाःप्रथिताः पुत्राः कालकल्पाः प्रहारिणः ।
प्रविख्याता महावीर्य्या दानवेषु परन्तपाः ॥
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुश्चतुर्थश्च कालेया इति विश्रुताः" ॥)
कालेयकं, क्ली, (कालेय + स्वार्थे कन् ।) कालीयकम् । कालियानाम पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीका ॥ ("मधुकरकुलकलङ्ककालीलुतकालेयककुसुमकुज्झलेषु" । इति कादम्बरी ॥)
कालेयकः, पुं, (कालेय + संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इत्यमरः २ । ४ । १०१ । (यथा, सुश्रुते सूत्रस्थाने ३९ अध्यायः । "कालेयकागुरुतिलपर्णी कुष्ठहरिद्रेति" ॥ कालीयकशब्देऽस्य विवरणं ज्ञातव्यम् ॥ कलये विवादाय साधुः । कलि + ढक् + संज्ञायां कन् । कुक्कुराणां हि अन्योन्यकलहपरत्वं प्रसिद्धम् ।) कुक्कुरः । इति राजनिर्घण्टः ॥
काल्यः, पुं, (कल्पे विधौ भवः । "तत्र भवः" ४ । ३ । ५३ । इति यञ् ।) हरिद्राविशेषः । काँचा हलुद इति भाषा । तत्पर्य्यायः । कर्व्वूरः २ द्राविड़कः ३ द्राविड़भूतिकः ४ । इति शब्दरत्नावली ॥
काल्यकः,पुं,(कल्पे विधौ भवः। "तत्र भवः"। ४।३।५३। इत्यणन्तात् संज्ञायां स्वार्थे वा कन् ।) कर्व्वूरकः । इत्यमरः २।४।१२५ ॥ काँचा हलुद इति भाषा ॥
काल्पनिकः, त्रि, (कल्पनायाः आगतः । ठञ् ।) कल्पनाभवः । कल्पितः । यथा । "रसः खाद्यते इति काल्पनिकं भेदमुरीकृत्य कर्म्मकर्त्तरि वा प्रयोगः" । इति साहित्यदर्पणम् ॥
काल्यं, क्ली, (कलयति चेष्टाम् । अन्नादयश्चेति कलेर्यक् । ततः प्रज्ञाद्यण् ।) प्रत्यूषः । इति हेमचन्द्रः॥ (यथा हेः रामायणे २ । ३४ । ३४ ।
"तर्पितः सर्व्वकामैस्त्वं सः काल्ये साधयिष्यसि" ॥)
काल्यकः, पुं, (काले साधुः । तत्र साधुरिति यत् । स्वार्थे कन् ।) काल्यकः । इति शब्दरत्नावली ॥
काल्या, स्त्री, (कालः प्राप्तोऽस्याः । कालादयत् । टाप् च ।) गर्भग्रहणप्राप्तकाला ऋतुमती गौः । तत्पर्य्यायः । उपसर्य्या २ । इत्यमरः । २ । ९ । ७० ॥ ("उपसर्य्या काल्या प्रजने" । इति वाचिनिः । ३ । १ । १०४ ॥)
कावचिकं, क्ली, (कवचिनां समूहः । "ठञ् कवचिनश्च" । ४ । २ । ३१ । इति ठञ् ।) वर्म्मभृतां

गजः। कवचधारियोद्धृसमूहः। इत्यमरः। २। ८। ६६॥

कावारं, क्ली, (कं जलं आवृणोतीति। आ + वृ + अण्।) गैवलः। इति चिकाण्डशेषः॥

कावारी, स्त्री, (कावार + ङीष्।) वृत्तादिच्छत्रम्। तत्पर्य्यायः। जङ्गमकुटी २ भ्रमत्कुटी ३। इति चिकाण्डशेषः॥

काशकः, पुं, (कुत्सितः शक इव ईषत् शक इव वा। कोः कादेशः।) कुक्कुटः। चक्रवाकः। पीतमस्तकपक्षी। इति विश्वमेदिन्यौ॥

कावेरं, क्ली, (कस्य सूर्य्यस्येव आ ईषत् वेरं अङ्गं यस्य। ज्योतिर्मयत्वात् तथात्वम्।) कुङ्कुमम्। इति जटाधरः॥ (कुङ्कुमशब्देऽस्य विवरणं ज्ञातव्यम्॥)

कावेरी, स्त्री, (कं जलमेव वेरं शरीरं। तस्येयम्। "तस्येदम्"। ४।३।१२०। इति अण्। ङीप्।) नदीविशेषः। इत्यमरः। १। १०। ३५॥ (यथा, महाभारते ३। ८५। २२।

"ततो गच्छेत कावेरीं दृतामम्बरसां गवैः।
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्"॥

इयं हि सह्याद्रेः मलयपर्व्वतस्य च सानुसन्निकटस्था। इति रघुः॥ कुत्सितं अपवित्रं वेरं शरीरं यस्याः। कोः कादेशः।) वेश्या। हरिद्रा॥ इति मेदिनी॥

काव्यं, क्ली, (कवेरिदं कर्म्म भावो वा। ष्यञ्।) ग्रन्थः। इति मेदिनी॥ रसयुक्तवाक्यम्। यथा,—

"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः"॥

एषां प्रत्येकं लक्षणानि लिख्यन्ते। तत्रादौ वाक्यलक्षणं यथा,—

"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"॥

रसलक्षणं यथा,—

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"॥

दोषलक्षणं यथा,—

रसापकर्षका दोषास्ते पुनः पञ्चधा मताः।
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेऽपि यत्"॥

गुणलक्षणं यथा,—

"रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा।
गुणा माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा"॥

अलङ्कारलक्षणं यथा,—

"शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः।
रसादीनुपकुर्व्वन्तोऽङ्गदारास्तेऽङ्गदादिवत्"॥

रीतिलक्षणं यथा,—

"पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा"॥

इति साहित्यदर्पणम्॥ *॥ तत् काव्यं त्रिविधं ध्वनिर्गुणीभूत व्यङ्ग्यश्चित्रभेदेन। तत्राद्यस्य लक्षणम्।

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः"। द्वितीयस्य लक्षणम्।

"अतादृशि गुणीभूतव्यङ्ग्ये व्यङ्ग्ये तु मध्यमम्"॥

तृतीयस्य लक्षणम्।

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्"।

इति काव्यप्रकाशः॥

"एतेषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि"॥

काव्यः, पुं, (कवेः भृगोरपत्यं पुमान् इति "कुर्व्वादिभ्यो ण्यः"४। १। १५१। इति ण्यः। यञ् इति केचित्।) शुक्राचार्य्यः। इति मेदिनी॥ (यथा, महाभारते १। सम्भवपर्व्वणि ७६। ६।

"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम्।
पौरहित्येन याज्यत्वे काव्यं तूशनसं परे"॥

तामसमन्वन्तरीयऋषिविशेषः। यथा, मार्कण्डेये ७४। ५६।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्"॥)

काव्यचौरः, पुं, (काव्यस्य चौर इव। अन्यरचितकावस्य स्वकीयत्वेन प्रख्यापकत्वात् तस्य तथात्वं बोध्यम्।) चन्द्ररेणुः। इति त्रिकाण्डशेषः॥

काव्या, स्त्री, (कवर्णने स्तुतिगाने च। बाहुलकादित्वात् ण्यत्। टाप् च। पूतनाया हि वाक्विलासविन्यासादिना नारीणां मनो मोहयित्वा ताभ्यो शिशूनाकृष्य नाशकारितया तथात्वं बोध्यम्।) पूतना। बुद्धिः। इति मेदिनी॥

काश ऋ उ द्युतौ। कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ अचकाशत्। उ काशते चन्द्रः। दन्त्यान्त इति केचित्। इति दुर्गादासः॥

काश्य उ ऋ ड द्युतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) य ड काश्यते। उ काशित्वा काश्वा। ऋ अचकाशत्। इति दुर्गादासः॥

काश्मः, पुं क्ली, (काश्यते दीप्यते श्लोभते इति यावत्। काश्र उ दीप्तौ + पचाद्यच्।) वृक्षभेदः। केश्या इति भाषा। इति मेदिनी॥ (यथा रघुः ४। १७।

"पुण्डरीकातपत्रस्तं विकसत् काश्यचामरः।
ऋतुर्विडम्बयामास न पुनः प्राप तत्क्रियम्"॥)

तत्पर्य्यायः॥ इक्षुगन्धा २ पोटगलः ३। इत्यमरः। २। ४। १६२॥ कासः ४। इति भरतः॥ काश्मी। ५। इति मुकुटादयः॥ काश्या ६। इति नयनानन्दः॥ वायसेक्षुः ७ काण्डेक्षुः ८ अमरपुष्पकः ९। इति रत्नमाला॥ काशकः १० वनहासकः ११। इति शब्दरत्नावली॥ इक्षारिः १२ काकेक्षुः १३ इक्षुरः १४ इक्षुकाण्डः १५ शारदः १६ सितपुष्पकः १७ नादेयः १८ दर्भपत्रः १९ लेखनः २० काण्डकाण्डकः २१ कक्कशकारकः २२। अस्य गुणाः। शिशिरत्वम्। गौल्यत्वम्। रुचिकारित्वम्। पित्तदाहनाशित्वम्। दृष्टिबलशुक्रकारित्वम्। श्रमशोषकषापहत्वञ्च। इति राजनिर्घण्टः॥ कण्डकण्डूयनम्। इति शब्दरत्नावली॥ तत्पर्य्यायगुणाः।

"काश्मः काकेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा।
इक्षालिकेक्षुगन्धा च तथा पोटगलः स्मृतः॥
काश्मः स्यान्मधुरस्तिक्तः स्वादुपाके हिमः सरः।
मूत्रकृच्छ्राश्मदाहासृक्क्षयपित्तज्वरोगजित्"॥

इति भावप्रकाशः॥

काश्मः, पुं, (केन जलेन कफात्मकेन व्याप्यते-ऽच। क + अश + अधिकरणे घञ्।) क्षतम्।

इति शब्दरत्नावली॥ क्षनामख्यातरोगविशेषः। काश्मी इति भाषा। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। क्षवथुः २ काशिका ३। इति शब्दरत्नावली॥ कासः ४। इत्यमरः। २। ४। १६१॥ कासयति कुत्सितशब्दं कारयति कासः। कासृ कुशब्दे ञान्तात् पचाद्यच् कासो दन्त्यान्तः। कश शब्दे इत्यस्मात् ञान्तात् पचाद्यनि काश्मस्तालव्यान्तश्च। शालूरकाश्मशल्लक्य इत्युणभेदे दन्त्यतालव्यान्तमध्ये पाठात्।

"वाराणस्यां भवेत् काशी क्षवथौ नाटके स्त्रिया"। मिति तालव्यान्तेषु रभसः। इति तट्टीकायां भरतः॥ *॥ तस्य निदानं यथा,—

धन्वन्तरिरुवाच।

"आशुकारी यतः काश्मः स एवातः प्रवक्ष्यते।
पञ्च काश्माः स्मृता वातपित्तश्लेष्मक्षतक्षयैः॥
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः॥
शुष्ककर्णास्यकण्ठत्वं तत्राधो विक्षितोऽनिलः।
ऊर्द्धं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संरुजन्॥
शिरः श्रोतांसि संपूर्य्य ततोऽक्ष्यान्युत्क्षिपन्ति च।
क्षिपन्निवाक्षिणी एष्ठमुरः पार्श्वे च पीड़यन्॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः।
हृत्पार्श्वशिरःशूलमोहच्छोमक्षरक्षयान्॥
करोति शुष्ककाश्मश्च महावेगरुजा क्षनम्।
सोऽङ्गमर्दी कफं शुष्कं क्षच्छ्रान्मुक्तोऽल्पतां व्रजेत्॥
पित्तात्तु पीताक्षिकता तिक्तास्यत्वं ज्वरो भ्रमः।
पित्तात्क्षवथनं तृष्णा वैस्वर्य्यं धूमको मदः॥
प्रततं काश्यवेगे च ज्योतिषामिव दर्शनम्।
कफादुरोऽक्ष्यरुक्शूर्द्धहृदयं स्तिमितं गुरु॥
कण्ठे प्रलेपदमनं पीनसच्छर्द्यरोचकः।
रोमहर्षघनस्निग्धश्लेष्मक्षश्च प्रवर्द्धनम्॥
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरत्यबलम्।
उरस्यन्तःक्षितो वायुः पित्ते चानुगतो बली॥
कुपितः कुरुते काश्मं कफं तेन सशोणितम्।
पीतश्यावच्च शुष्कच्च ग्रथितं क्षथितं बहु॥
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना॥
पर्व्वभेदज्वरश्वासक्षयावैस्वर्य्यकम्पवान्।
पारावत इवोत्कूजन् पार्श्वशूली ततोऽस्य च॥
कफादैर्वमनं पक्तिर्बलं वर्णश्च हीयते।
ष्ठीवस्य साहसूत्वं श्यावष्ठकटीग्रहः॥
वायुप्रधानाः कुपिता धातवो राजयक्ष्मणः।
कुर्व्वन्ति यक्ष्मायतनैः काश्मं ष्ठीवेत् कफं ततः॥
पूतिपूयोपमं पीतं विस्रं हरितलोहितम्।
लुप्यते तुद्यत इव हृदयं पचतीव च॥
अकस्मादुद्यं प्रीतेच्छा बङ्गाग्नित्वं बलक्षयः।
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेक्षता॥
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च।
इत्येवं क्षयजः काश्मः क्षीणानां देहनाशनः॥
याप्यो वा बलिनां तद्वत् क्षतजोऽपि नवौ च तौ।
सिध्येतामपि सामर्थ्यात् साध्यादौ च पृथक्क्रमः॥
मिश्रायाप्यास्तु ये सर्व्वे जरसः स्थविरस्य च।

काश्यश्वासक्षयच्छर्दिस्वरसादयो गदाः ॥
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत् ।
इति गारुडे काश्यरोगनिदानं १५४ अध्यायः ॥ * ॥

अथ काश्यस्य चिकित्सा ।

तत्र वातकाश्यस्य चिकित्सा ॥
"वास्तूको वायसीशाकं मूलकं सुनिषण्णकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौड़िकाः ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च ।
श्रस्यते वातकाश्येषु खादस्नेहवणानि च ॥
वायसी काकमाची कवई इति लोके । सुनिषण्णकं सिनुवारि इति लोके शाकविशेषः । चाङ्गेरी-सदृशचतुष्पत्रा सजलदेशे भवति । चौपति इति लोके ॥
"ग्राम्यानूपोदकैः शालियवगोधूमषष्टिकान् ।
रसैर्म्मांसात्मगुप्तानां यूषैर्व्वा भोजयेद्धितान्" ॥
ग्राम्यानूपोदकैः रसैरित्यन्वयः । आत्मगुप्ता किवाङ्क इति लोके ॥
"दशमूलीकृता काश्यश्वासहिक्काजयप्रदा ।
यवागूर्दीपनी रुच्या वातरोगविनाशिनी ॥
रसः कर्कटकानां वा घृतभृष्टः स नागरः ।
वातकाश्यप्रशमनः पुष्टिकृन्मत्स्यस्य वा पुनः" ॥ * ॥

अथ पित्तकाश्यस्य चिकित्सा ।

"कण्टकारीयुगद्राक्षावासार्कचूरवालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ॥
शर्करामधुसंयुक्तं पित्तकाश्यहरं परम्" ॥ * ॥

अथ कफकाश्यस्य चिकित्सा ।

"पिप्पली कटफलं शुण्ठी पुष्करी भार्गी तथोषणम् ।
कारवी कण्टकारी च सिन्धुवारो यवानिका ॥
चित्रको वासकश्चैषां कषायं विधिवत् कृतम् ।
कफकाश्यविनाशाय पिबेत् क्षारयुतम्" ॥
पिप्पल्यादिक्वाथः ॥ * ॥

अथ क्षतजकाश्यस्य चिकित्सा ।

"इक्ष्विक्षुवालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा पुष्करी घृतावरी ॥
द्विगुणा च त्वगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकाश्यनिवृत्तये" ॥
इक्ष्वालिका इक्षुभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विशम् । उत्पलं कमलम् । चन्दनमत्र धवलम् चूर्णत्वात् । पुष्करी कर्कट-पुष्करी । त्वगाक्षीरी वंशलोचना । सा चेक्षोर्द्वि-गुणा ॥ * ॥ अथ क्षयकाश्यचिकित्सा । "चूर्णं काकु-भमिदं वासकरसभावितं बहून् वारान् । मधु-घृतसितोपलाभिर्लेह्यं क्षयकाश्यरक्तपित्तहरम्" ॥
काकुभं चूर्णं ककुभत्वक्चूर्णम् ॥ * ॥

अथ काश्यस्य सामान्यतश्चिकित्सा ।

"ताम्यमानस्य काश्येन नासाखावे स्वरे जड़े ।
क्षवथौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥
मनःशिलालमरिचं मांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं व्यहं च तस्यानु पयश्च सगुड़ं पिबेत् ॥
एष काश्यान् पृथक् द्वन्द्वसर्व्वदोषसमुद्भवान् ।
शुक्लैरपि प्रयोगाणामसाध्यान् साधयेत् ध्रुवम्" ॥
आलं हरितालम् ॥ इङ्गुदमिह पुन्नजीवकफलम् ॥

"बदरीदलमालिप्तं शिलाया घर्म्मशोषितम् ।
तद्धूमपानं सक्षीरं महाकाश्यनिवारणम् ॥
कण्टकारिक्षतक्वाथः सक्षौद्रः सर्व्वकाश्यहा ।
कण्टकार्य्याः कषायाश्च चूर्णं समधु काश्यहृत् ॥
लवङ्गजातीफलपिप्पलीनां
भागान् प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं
पलानि चत्वारि महौषधस्य ॥
सितासमक्षेन समाप्य चूर्णं
रोगांनिमानाशु बलाग्निहन्ति ।
काश्यज्वरारोचकमेहगुल्म-
श्वासाग्निमान्द्यग्रहणीविकारान्" ॥
समशर्करचूर्णं वटिका वा ॥
"कुनटीसैन्धवव्योषविड्भिमयहिङ्गुभिः ।
लेहः साज्यमधुः काश्यश्वासहिक्कानिवारणः" ॥ * ॥
"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काश्यघ्नो मोदकः प्रोक्तः परं वह्नेः प्रदीपनः" ॥ * ॥
"कर्षः कर्षांशौ पलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाड़िमगुड़यावशूकानाम्" ॥
सर्व्वौषधैरसाध्याः काश्या ये वैद्यनिर्म्मुक्ताः ।
अपि यूयं कृर्द्दयतां तेषामिदमौषधम्" ॥
पथ्यम् ॥ वङ्गसेनस्तु कर्षांश इति पाठे कर्षांशः कर्षार्द्धमिति व्याचष्टे ॥
"मरिचं कर्षमात्रं स्यात् पिप्पली कर्षसंमिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मञ्च दाड़िमम् ॥
एतच्चूर्णीकृतं युञ्जादष्टकर्षगुड़ेन हि ।
प्राणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥
अस्याः प्रभावात् सर्व्वेऽपि कासा यान्त्येव संक्षयम्" ॥
दाड़िमं दाड़िमफलवल्कलं ग्राह्यम् । मरिचादि-वटिका ॥ * ॥

"समूलवल्कच्छदकण्टकार्य्या-
स्तुलां ततो द्रोणमितं जलञ्च ।
हरीतकीनां शतमेकपाचे
विपच्य कुर्य्याच्चरणाम्बुशेषम् ॥
तस्मिन् कषाये तनुवस्त्रपूते
हरीतकीभिः सहितो गुड़स्य ।
तुलां विनिःक्षिप्य पचेत् सुपक्व-
मेतत् समुत्तार्य्य सुशीतले च ॥
पलं पलञ्चापि कटुत्रयञ्च
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥
प्रयुज्यमानो विधिनष लेहो
यथाबलञ्चापि यथानलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं
द्विदोषजातानपि च त्रिदोषम् ॥
क्षतोद्भवञ्च क्षयजञ्च काश्यं
श्वासञ्च हन्यात् सह पीनसेन ।
यक्ष्माणमेकादशमुग्ररूपं
हरीतकीयं भृगुणोपदिष्टा" ॥
पुष्परसो मधु । चतुर्जातं त्वगेलापत्रनागकेशराः ।
भृगुहरीतकी ॥ * ॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुड़ूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च व्योषं धन्वयासकः ॥
भार्गी राम्ना सटी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥
पक्त्वा लेहत्वमानीय गृहीते मधुपलाष्टकम् ।
चतुष्पलं तुगाक्षीर्याः पिप्पलीश्च चतुष्पलाम् ॥
क्षिप्त्वा निदध्यात् सुदृढ़े मृण्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिकासश्वासानशेषतः" ॥
कण्टकार्य्यावलेहः । इति कासाधिकारः । इति भावप्रकाशः ॥ * ॥ अपि च ।

"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काश्यघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशनः ॥
कण्टकारीगुड़ूचीभ्यां पृथक् त्रिंशत्पलादधे ।
प्रस्थसिद्धो घृताद्धातकाश्यनुद्वह्निदीपनः" ॥
इति गारुडे १७४ अध्यायः ॥

"मनःशिला बलामूलं काकपर्णञ्च गुग्गुलुम् ।
जातिपत्रं कोलिपत्रं तथा चैव मनःशिला ॥
एभिश्चैव कृता वर्त्तिर्वदरामौ महेश्वर ! ।
धूमपानं काश्यहरं नाच कार्य्या विचारणा" ॥
इति च गारुडे १९४ अध्यायः ॥

"कृतकस्य फलं शृङ्गं सैन्धवं व्योषं वचा ।
फेनोरसाञ्जनं क्षौद्रं विड्भानि मनःशिला ।
एषां वर्त्तिर्हन्ति काश्यं तिमिरं पटलं यथा" ॥
इति तत्रैव १९८ अध्यायः ॥

"अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
शृङ्गं पुनर्नवा शुण्ठी जग्ध्वा काश्यं निहन्ति वै" ॥
इति च तत्रैव १९९ अध्यायः ॥

काश्यकः, पुं, (काश्यते दीप्यते इति । काश् + कर्त्तरि ण्वुल् ।) काश्यः । इति शब्दरत्नावली ॥ केश्या इति भाषा ॥

काश्यमर्द्दः, पुं, (काश्यं मृद्नाति उपशमयति नाश-यति वा । मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) कासमर्द्दवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कासमर्द्दशब्दे ऽस्य गुणाः पर्य्या-यास्च ज्ञेयाः ॥)

काश्या, स्त्री, (काश्यते इति । काश् + यच् + टाप् ।) काश्यद्रव्यम् । इत्यमर-टीकायां भरतः ॥

काश्यालक्ष्मिः, स्त्री, (कुत्सिता श्यालक्ष्मिः । कोः कादेशः ।) कुटश्यालक्ष्मिः । इति जटाधरः ॥

काश्निः, स्त्री, (काश् + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काशी । इत्युणादिकोषः ॥ (यथा हैः रामायणे १ । १३ । २३ ।
"तथा काश्निपतिं स्निग्धं सतां प्रियवादिनम् ।
सदृत्तं देवसङ्काशं स्वयमेवानयस्व हि" ॥)
काश्निनगरोपलक्षिते जनपदे पुंभूम्नि ।
यथा महाभारते ६ । ९ । ४१ ।
"अत ऊर्द्धं जनपदान्निबोध गदतो मम" ।
"बोधा मद्राः कलिङ्गाश्च काश्यो ऽपरकाश्यः" ॥
मुष्टिः । इति निरुक्तिः । यथा ऋग्वेदे ७ । १०४ । ८ । "आप इव काश्निना संगृभीतो असन्नस्त्वा-

सत इन्द्र वक्षा" ॥ "काशिना मुखिना" इति भाष्यम् ॥) सूर्य्ये उं । इति जुमरव्याकरणम् ॥

काशिका, स्त्री, (काशि + स्वार्थे कन् टाप् । यद्वा काश्यते ज्ञानं भक्तानां इति । काश + णिच् + ण्वुल् टाप् अत इत्वञ्च ।) काशी । इति शब्दरत्नावली ॥ (पारिभाषिककाशिकाया लक्षणमुक्तं यथा शङ्कराचार्य्येण ।

"मनोनिवृत्तिः परमोपशान्तिः
सा तीर्थवर्य्या मणिकर्णिका वै ।
ज्ञानप्रवाहा विमला हि गङ्गा
सा काशिकाऽहं निजबोधरूपः" ॥ ० ॥

वामनकृता पाणिनिवृत्तिः ॥)

काशिकाप्रियः, पुं, (काशिकाप्रिया यस्य । काशिकायाः प्रियो वा ।) दिवोदासः । इति शब्दरत्नावली ॥

काशिराजः, पुं, (काश्याः राजा । "राजाहः सखिभ्यष्टच्" । ५ । ४ । ९१ इति टच् ।) वाराणसीराजः । तत्पर्य्यायः । धन्वन्तरिः २ दिवोदासः ३ सुधोद्भवः ४ । इति त्रिकाण्डशेषः ॥

(यदि च क्रमाख्येन तत्र बहवो राजान आसन् । तथापि तत्स्थानाधिकारित्वात् यदा योऽधिकारी स एव काशिराजः अतो नासाधुप्रयोग इति मन्यामहे ॥ "अथ खलु भगवन्तममरवरमधिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनव वैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ॥

इति सुश्रुते सूत्रस्थाने १ अः ॥)

काशी, स्त्री, (काश्यते शिवत्रिशूलोपरि । काश्यते दीप्यते + अच् गौरादित्वात् ङीष् । काश + इन् ङीप् वा । अथवा काश्यति प्रकाश्यतेऽदं सर्व्वं या । काश् + णिच् अच् गौरादित्वात् ङीष् ।) खनामख्याततीर्थम् । शिवपुरी । तत्पर्य्यायः । वाराणसी २ तीर्थराजी ३ तपःस्थली ४ । इति जटाधरः ॥ काशिका ५ । इति शब्दरत्नावली ॥ काशिः ६ । इत्युणादिकोषः ॥ अविमुक्तम् ७ आनन्दवनम् ८ आनन्दकाननम् ९ अपुनर्भवभूमिः १० रुद्रावासः ११ महाश्मशानम् १२ । तस्या उत्पत्तिर्यथा,—

"ततस्तदैकदेशेऽपि स्वैरं विहरता मया ।
स्वविग्रहात् स्वयं सृष्टा स्वशरीरानपायिनी ॥
प्रधानं प्रकृतिं त्वां तु मायां गुणवतीं पराम् ।
बुद्धितत्त्वस्य जननीमाऊर्व्विकृतिवर्जिताम् ॥
युगपच्च त्वया शक्त्या साकं कालस्वरूपिणा ।
मयाच्च पुरुषेणैतत् क्षेत्रमप्यपि विनिर्म्मितम्" ॥

स्कन्द उवाच ।

सा शक्तिः प्रकृतिः प्रोक्ता स पुमानीश्वरः परः । ।
ताभ्याञ्च रममाणाभ्यां तस्मिन् क्षेत्रे घटोद्भव ! ॥
परमानन्दरूपाभ्यां परमानन्दरूपिणि ! ।
पञ्चक्रोशपरीमाणे स्वपादतलनिर्म्मिते ॥
मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन ।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः ॥
न यदा भूमिवलयं न यदापां समुद्भवः ।
तदा विहर्त्तुमीशेन क्षेत्रमेतत् विनिर्म्मितम् ॥
इति काशीखण्डम् ॥ तत्र कर्त्तव्ययात्राविधानं यथा,—

सूत उवाच ।

"यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्याः सुतोत्तम ! ॥

व्यास उवाच ।

निशामय महाप्राज्ञ लोमहर्षण ! वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा ॥
सचेलमादौ संस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विघ्नं दण्डपाणिमहेश्वरम् ।
नमस्कृत्य ततो गच्छेत् ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महापातकनाशिनी" ॥ * ॥
"ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिवसप्रायतनाच्च कार्य्या यात्रा प्रयत्नतः ॥
क्षपां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रशुद्धिमभीप्सुभिः ॥
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः ।
चिपिटेशं महादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरं चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ॥
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः" ॥ * ॥
"अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ॥
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यक्षमि विघ्नेषतः ।
दृश्यान्येतानि लिङ्गानि महापापोपशान्तये" ॥*॥
"अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणासङ्गमपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्नदीतीर्थे सुस्नातः पश्येत् स्वर्नदीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भेशं तत्र तीर्थकृतोदकः ।
पञ्चचूडहृदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ॥
शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
मौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
क्वचिन्न जायते भूयः संसारे दुःखसागरे ॥

समारभ्य प्रतिपदं यावत्कृष्णां चतुर्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते" ॥*॥
"अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
अग्नीश्वरकुण्डे सुस्नातः पश्येदग्नीश्वरीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्तत्रस्तु नकुलीश्वरम् ।
आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः ॥
काङ्कालीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः" ॥ ० ॥
"अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ॥
शुक्लपक्षतृतीयायां या यात्रा विश्वसिद्धिदा ।
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरीं संपूज्य ज्ञानवाप्यां कृतोदकैः ॥
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितां पूजयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या विन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं श्रियलक्ष्मीसमृद्धये ॥
इमां यात्रां नरः कृत्वा क्वेचेऽस्मिन् मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे" ॥ ० ॥
"भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रां षष्ठां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठां चण्डीयात्रा शुभावहा" ॥ ० ॥
"अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातः स्नानं विधायादौ नत्वा पद्म विनायकान् ॥
नमस्कृत्याथ विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नत्वा वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशमवप्यथ ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्त्येश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनन्ततः ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतडागञ्च दृष्ट्वा वै कीकटेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशस्त्वथ वीरेशो विघ्नेशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ॥
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ।

काशी

वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ ॥
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वकाङ्क्षका ।
आशाविनायकश्चाथ रुद्रावित्यस्ततः पुनः ॥
चतुर्व्वक्त्रेश्वरं लिङ्गं ब्रह्मेशन्तु ततः परम् ।
ततो मनःप्रकामेशं ईशानेशस्ततः परम् ॥
चण्डीचण्डेश्वरौ दृष्ट्वौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजेशमर्च्चयेत् ॥
लाङ्गलीशन्ततोऽभ्यर्च्च्य ततस्तु नकुलीश्वरम् ।
परान्नेशमथो नत्वा परब्रह्मेश्वरं ततः ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततश्चाघोरेश्वरम् ॥
गङ्गेशोऽर्च्चास्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥
विनायकांस्ततः पश्च विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेनमुदीरयेत् ॥
अन्तर्गृहस्य याचेयं यथावत् या मया कृता ।
न्यूनातिरिक्तया शम्भः क्षीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य त्र्यां वै मुक्तिमण्डपे ।
विश्राम्य यायात् भवनं निष्पापः पुण्यवान् नरः"॥*
"संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
कार्य्या याचा प्रयत्नेन महापुण्यसमृद्धये ॥
नभस्यपञ्चदश्याञ्च कुर्य्यात्तस्मं समर्च्चयेत् ।
दुःखं रुद्रपिशाचत्वं न भवेदस्य पूजनात् ॥
श्रद्धापूर्व्वमिमा याचाः कर्त्तव्याः क्षेत्रवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या याचाश्च सर्व्वतः ॥
न वन्द्यं दिवसं कुर्य्याद्विना याचां क्वचित् क्षती ।
याचादयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ॥
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्ध्रुवम् ।
यस्य वन्द्यं दिनं यातं काश्यां निवसतः सतः ॥
निराशाः पितरस्तस्य तस्मिन्नेव दिने भवेत् ।
स दष्टः कालसर्पेण स दग्धो मन्युना स्फुटम् ॥
स मृतस्तच्च दिवसे विश्वेशो यत्र नेक्षितः ।
सर्व्वतीर्थेषु सस्नौ स सर्व्वयाचा अधात् स च ॥
मणिकर्णान्तु यः स्नातो यो विश्वेशं निरैक्षत ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ॥
दृष्टो विश्वेश्वरो नित्यं स्नातया मणिकर्णिका" ॥
इति श्रीस्कन्दपुराणे काशीखण्डे १०० अध्यायः ॥

(चिच्छक्तिः । सुषुम्नाख्या नाड़ी च । अन्या नाड़ी चिद्भासया सम्यगाभासिता सती प्रकाशते अतएव इयं हि ब्रह्मप्रकाशरूपिणी चिन्मयी ज्ञानप्रकाशकतया अस्यास्तथात्वं वेदतन्त्रादि-ज्ञानप्रतिपादकशास्त्रैः सुषुम्नाया एव ब्रह्मनाड़ीत्वं प्रतिपादितं तथा सर्व्वप्रकाशकतया चिच्छक्तेरेव स्वरूपकाशीत्वं विज्ञाप्यते यथा,—
"यथेदं काश्यते सर्व्वं सा काशी परिकीर्त्यते" ॥
यदि चिच्छक्तिरेव काश्याः स्वरूपार्थवाचिका तर्हि तस्या वाराणसीत्याख्यायां कागतिरिति संशयश्चेत् ततोऽवधीयताम्।

काश्मरी

"तदिदं मन्ये देवानां देवयजनं सर्व्वेषां भूतानां ब्रह्मसदनं अत्र हि जन्तोः प्राणेषूत्क्रममाणस्य रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेदेवमेवैतद्याज्ञवल्क्यः । अथहैनमत्रिः पप्रच्छ याज्ञवल्क्य। य एषोऽनन्तोऽव्यक्त आत्मा कथमहमिमं विजानीयामिति सोऽविमुक्त उपास्य इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायामस्याञ्च प्रतिष्ठित इति का च वरणा भवति का चासिर्भवति । सर्व्वान् इन्द्रियकृतान् दोषान् वारयति तेन वरणा भवति सर्व्वाणि इन्द्रियकृतानि पापानि नाशयति तेनासि र्भवति कतममस्याः स्थानं भवति इति भ्रुवोर्घ्राणस्योभयसन्धिः स यौ-लौकिकस्य परस्य च सन्धिर्भवति। एवमेवैनं सन्धिं सन्ध्यां ब्रह्मविद उपासते कोऽसौ रुद्र इति रुद्र-स्तापचयात्मकं संसारदुःखं तद्धेतुर्वा तत्सर्व्वं द्राव-यति शरणागतानामुपासकानामिति अतएव चिच्छक्तिमयः सर्व्वज्ञः परमेश्वर एव रुद्रः । तथा हि "एको रुद्रो न द्वितीयायावतस्थुः" ॥ इति श्रीश्री-मद्भगवत्पूज्यपादपरमहंसपरिव्राजकाचार्य्यसुरे-श्वरसूरिप्रणीतकाशीमुक्तिविवेकः ॥)

काश्मलम् । इत्यमरटीकायां भरतः ॥ (मुष्टिः । इति निरुक्तिः ॥)

काश्मी, [न्] त्रि, (काश्मोऽस्यास्ति इति । इनिः । काश्मरोगयुक्तः । इति राजवल्लभः ॥ (काश्मते इति काश्म णिनिः । प्रकाशशीलः ॥)

काश्मीनाथः, पुं, (काश्म्याः नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा काशीखण्डे,—
"काश्मीनाथं समाश्रित्य कुतः कालभयं नृणाम्" ॥)

काश्मीराजः, पुं, (काश्म्याः काश्मीप्रदेशस्य राजा । "राजाहः सखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) दिवोदासः । इति शब्दरत्नावली ॥ (अयं हि योगरूढ्यर्थः । यौगिकार्थेन तु सर्व्वस्मिन्नेव काश्मीदेशाधिकारिणि प्रयोगो दृश्यते । यथा गीतायाम् १ । ५ ।
"धृष्टकेतुश्चेकितानः काश्मीराजश्च वीर्य्यवान्" ॥)

काश्मीरं, क्ली, (कुत्सितं ईषत् वा श्मीरमिव । कोः कादेशः । काश्मिं दीप्तिं इष्टे इति केचित् । ईश् + कः ।) उपधातुविशेषः । हिराकसी इति भाषा । तत् द्विविधम् । धातुकाश्मीरम् १ । तत् हरिद्वर्णं लोहितञ्च । पुष्पकाश्मीरम् २ । तत् शुक्लवर्णं क्षणञ्च । इति रत्नमाला ॥
(अस्य पर्य्यायाः गुणाश्च यथा,—
"काश्मीरं धातुकाश्मीरं पांशुकाश्मीरमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकाश्मीरमुच्यते ॥
काश्मीरमम्लमुष्णञ्च तिक्तञ्च तुवरन्तथा ।
वातश्लेष्महरञ्चेयं नेत्रकण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्चिनाशनं परिकीर्त्तितम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्विदन्त्यसकारोऽपि पाठः ॥ (काश्मीदेशाधिपतौ शिवे च पुं ॥)

काश्मरी, स्त्री, (काश्यते इति । "अनेभ्योऽपि" । ३ । ३ । ७५ । इति वनिप् "वनोरच" । ४ । १ । ७ । इति ङीत्रौ । एषोदरात् वस्य मत्वम् ।) गम्भारी-वृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्याया यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मरी काश्मरी धीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणा-स्तस्या यथाचैव ॥
"काश्मरी तु वरा तिक्ता वीर्य्याण्या मधुरा गुरुः ।
दीपनी पाचनी मेध्या मेदिनी भ्रमशोषजित् ॥
दोषदृष्ट्याऽमशूलार्शोविषदाहज्वरापहा ।
तत्फलं कृमिहृद्यं दृश्यं गुरुकेश्यं रसायनम् ॥
वातपित्तदृवारक्तक्षयमूत्रविबन्धनुत् ।
स्वादु पाके हिमं स्निग्धं तुवरास्रविशुद्धिकृत् ॥
हन्याद्दाहक्षयावातरक्तपित्तक्षयान् तथा" ॥ * ॥
यथा, महाभारते ३ । १५८ । ४४ ।
"विद्वान् कपित्थान् जम्बूंश्च काश्मरीबदरीस्तथा" ॥)

काश्मर्य्यः, पुं, (काश्मरीति शब्दोऽस्यास्ति अस्मिन् वा । अत्रेभ्योपीति यप् । स्वार्थे व्यञ् इति केचित् ।) गम्भारी । इत्यमरः । २ । ४ । ३६ ॥ क्लीवलिङ्गोऽप्ययम् । इति भरतः ॥
("हृद्यं मूत्रविबन्धघ्नं पित्तास्रवातनाशनम् ।
केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अध्यायः ॥)

काश्मीरं, क्ली, (काश्मीरे काश्मीरे वा भवं "कच्छा-दिभ्यश्च" । ४ । २ । १३३ । इति अण् ।) पुष्कर-मूलम् । इत्यमरः । २ । ४ । १४५ ॥ टङ्कः । कुङ्कुमम् । इति मेदिनी ॥ (रोधनमस्य यथा,—
"काश्मीरश्चापि सर्षपः" ॥
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥)

काश्मीरः, पुं, (काश्मीर एव स्वार्थे अण् । काश्मीर इति नाम्नाख्यायते वा ।) स्वनामख्यातदेशः । इति जटाधरः । (उक्तञ्च शक्तिसङ्गमतन्त्रे ।
"शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ।
तावत्काश्मीरदेशः स्यात्सञ्चाशत्योजनात्मकः" ॥
अत्र कपिलेश्वरनाना महादेवो वर्त्तते शि-वनामकोर्त्तने "काश्मीरे कपिलेश्वरः" ॥ इति वचनात् ॥ (यथा गौः रामायणे ४ । ४३ । २२ ।
"काश्मीरमण्डलं चैव शमीमीलुवनानि च ।
पुराणि च सशैलानि विचिन्वन्तु वनौकसः" ॥
तद्देशवासिनि त्रि । यथा, महाभारते ६ । ९ । ५३ ।
'काश्मीराः सिन्धुसौवीरा गन्धारा दर्शकास्तथा' ॥)

काश्मीरजं, क्ली, (काश्मीरे जायते । जन + "सप्त-म्यां जनेर्डः" । ३ । २ । ९७ । इति डः ।) कुङ्कुम् । कुङ्कुमम् । इति मेदिनी ॥ पुष्करमूलम् । इति विश्वः ॥ (गुणाः पर्य्यायाश्चास्य कुङ्कुमशब्दे कुङ्कुमशब्दे च ज्ञातव्याः ॥)

काश्मीरजन्म, [न्] क्ली, (काश्मीरे जन्म यस्य तत् ।) कुङ्कुमम् । इत्यमरः । २ । ६ । १२ ॥

काश्मीरा, स्त्री, (काश्मीरे भवः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् । काश्मीरदेश उत्पत्तिस्थानत्वे-

नास्ति अस्याः। अच् टाप् च इति केचित्।) अतिविषा। इति मेदिनी॥ कपिलद्राक्षा। इति राजनिर्घण्टः॥

काश्मीरी, स्त्री, (काश्मीरदेशे भवः। "तत्र भवः"। ४।३।५३। इत्यण्। स्त्रियां ङीप्।) गम्भारी। इति भावप्रकाशः॥ (अस्याः पर्य्यायगुणाः काश्मरीशब्दे ज्ञेयाः॥)

काश्यं, क्ली, (कुत्सितं आश्यं यत्र। कं जलं आश्यं वा यत्र। (मद्यम्। इति राजनिर्घण्टः॥) नृपविशेषे पुं। यथा महाभारते १।१०२।४६।

"अक्षतः क्षयमित्वारीन् संख्येऽसंख्येयविक्रमः।
आनयामास काश्यस्य सुताः सागरगासुतः"॥)

काश्यपं, क्ली, (काश्यं मद्यं पिबत्यत्र। पा+घञर्थे कः। मांसस्य हि मद्यपानाङ्गत्वेन प्रसिद्धेस्तथात्वम्।) मांसम्। इति हेमचन्द्रः॥

काश्यपः, पुं, (काश्यपस्य गोत्रापत्यम्। विदाद्यञ्।) कण्वादमुनिः। इति त्रिकाण्डशेषः॥ मृगभेदः॥ इति मेदिनी॥ गोत्रविशेषः। तत्प्रवरान्तर्गतमुनिविशेषः। इति स्मृतिः॥ काश्यपस्यापत्यमात्रञ्च॥ (विभाण्डकमुन्यर्थे यथा, महाभारते ३।१११।२०।

"स्वाध्यायवान् दत्तसमाधियुक्तो
विभाण्डकः काश्यपः प्रादुरासीत्"॥*॥

स्वनामख्यातो द्विजविशेषः। अयं हि विषविद्यापारदर्शी। अस्य विवरणमुच्यते।

यदा भूमीकपुत्रेण गरुडेण 'स कौरवाग्रमः सप्तमेऽहनि सर्पराजेन तक्षकेण दष्टो यमसदनं गमिष्यतीति' शप्तः परीक्षित्, तदा राज्ञ एतच्छापवृत्तान्तमाकर्ण्यासौ काश्यपो नाम ब्राह्मणः राजानं परीक्षितं तक्षकविषात् रक्षितुं धनार्थी हस्तिनापुरमुद्दिश्य प्रस्थितः। गच्छन्तमेनं पथि तक्षको दृष्टवानाह च को भवान् कुत्र वा गच्छति। अथ तक्षकेनैवमुक्तोऽसौ काश्यपः सर्व्वं निवेदयामास। एवमुक्तवति तु काश्यपे तक्षकस्तस्य विद्याप्रभावं दिदृक्षुः सम्मुखस्थमेकं न्यग्रोधं अदशत्। दष्टो वृक्षस्तु प्रचण्डविषतेजसा क्षणात् प्रज्वाल। एवम्भूतेऽसौ काश्यपः स्वविद्याप्रभावं विज्ञापयितुकामो न्यग्रोधभस्मकणामादाय तरसा मन्त्रबलेन पुनर्वृक्षस्थितिं जीवयामास। अथ नागराजस्तक्षक एतदालोक्य सविस्मयस्तस्मै प्रभूतधनं दत्त्वा विसर्जयामास। एतद्विवरणन्तु महाभारते १।४३। अध्याये द्रष्टव्यम्।)

काश्यपिः, पुं, (काश्यपस्यापत्यं बाह्वलकात् इञ्।) अरुणः। "काश्यपिर्गरुडाग्रजः"। इत्यमरः १।३।३२॥ गरुड़ः। इति हेमचन्द्रः॥ (महाभारते १ पर्व्वणि तद्योत्पत्तिविवरणम्। यथा,—

"एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा।
विनता नाम कल्याणी पुत्रकामा यशस्विनी॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः।
उपचक्राम भर्त्तारं तामुवाचाथ काश्यपः॥
आरम्भः सफलो देवि! भविता यस्त्वयेप्सितः।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ।
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा"॥)

काश्यपी, स्त्री, (काश्यपस्येयं। "तस्येदम्"। ४।३। १२०। इत्यण् स्त्रियां ङीप्।) पृथिवी। इत्यमरः। २।१।२॥

("अथागम्य महाराज! नमस्कृत्य च काश्यपम्।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः"॥
इति महाभारते॥ दानधर्म्मे। १३।१५४।७॥
प्रजा। एतद्विषयकप्रमाणं कूर्म्मशब्दे द्रष्टव्यम्॥)

काश्यपेयः, पुं, (काश्यपस्येयम्। काश्यप+अण् ङीप् च काश्यपी काश्यपपत्नी अदितिः। तत्र भवः इति ढक्।) सूर्य्यः। इति शब्दरत्नावली॥ (यथा,

"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्"॥
इति सूर्य्यप्रणामः॥ देवमात्रं। काश्यपीसुतत्वात्॥)

काश्मरी, स्त्री, (काश्म+वनिप् "वनोरच"। ४।१।७ इति ङीप् रुच्च। जातौ ङीष् वा।) काश्मरी। इति भरतो द्विरूपकोषश्च॥

काष्ठं, क्ली, (काश्यते दीप्यते काश्यत्यनेन वा। काश्+"हनिकुषीत्यादिना" उणां। २।२। क्थन्। ब्रश्चेति षत्वम् तितुत्रेति नेट्।) दारु। इत्यमरः। २।४।१३॥ काठ् इति भाषा। (उक्तञ्च।

"संसारमतिशुष्कं यत् मुष्टिमध्ये समेष्यति।
तत्काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्"॥)

काष्ठकं, क्ली, (काष्ठं सत्कायति। काष्ठ+कै+कः केचित्तु काष्ठं विद्यतेऽस्य नड़ादित्वात् च्छः कुक् च विल्वकादित्वात् च्छमात्रस्य लुक्। प्रशस्तकाष्ठत्वात् अस्य तथात्वं।) अगुरु। इति राजनिर्घण्टः॥

काष्ठकदली, स्त्री, (काष्ठवत् कठिना कदली।) कदलीभेदः। काटकला इति भाषा। तत्पर्य्यायः। सुकाष्ठा २ वनकदली ३ काष्ठिका ४ शिलारम्भा ५ दारुकदली ६ फलाढ्या ७ वनमोचा ८ अश्मकदली ९। अस्या गुणाः। रुचिकारित्वम्। रक्तपित्तनाशित्वम्। हिमत्वम्। गुरुत्वम्। मन्दाग्निजनकत्वम्। दुर्ज्जरत्वम्। मधुरत्वम्। हितत्वञ्च। इति राजनिर्घण्टः॥

काष्ठकीटः, पुं, (काष्ठे जातः कीटः। काष्ठलेखकः कीटो वा।) घुणः। इति हेमचन्द्रः॥

काष्ठकुट्टः, पुं, (काष्ठं कुट्टतीति। कुट्ट+अण्।) पक्षिविशेषः। काठठोकरा इति भाषा। तत्पर्य्यायः। घृतच्छदः २। इति त्रिकाण्डशेषः॥

काष्ठकुद्दालः, पुं, (कुं भूमिं उद्दालयति विदारयति निपातनात् साधुः। काष्ठस्य कुद्दालः काष्ठेन निर्म्मितः काष्ठमयः कुद्दालो वा।) नौकादेर्मलापनयनार्थं काष्ठघटितकुद्दालः। तत्पर्य्यायः। अवृश्चिः २। इत्यमरः॥

काष्ठजम्बूः, स्त्री, (काष्ठप्रधाना जम्बूः।) भूमिजम्बूः। इति राजनिर्घण्टः॥

काष्ठतक्षकः, पुं, (काष्ठं तक्षति। काष्ठ+तक्ष+ण्वुल्।) काष्ठतट्। इति शब्दरत्नावली॥

काष्ठतट्, [त्] पुं, (काष्ठं तक्षति। तक्षू तनूकरणे क्विप्।) वर्णसङ्करजातिविशेषः। कुतार इति भाषा। तत्पर्य्यायः। तक्षा २ वर्द्धकिः ३ त्वष्टा ४ रथकारः। ५। इत्यमरः। २।१०।९॥

काष्ठतन्तुः, पुं, (काष्ठे तन्तुरिव विस्तृततयावस्थितत्वात्।) काष्ठकृमिः। तत्पर्य्यायः। कोषकारः २। इति शब्दरत्नावली॥

काष्ठदारुः, पुं, (काष्ठं दारुसंज्ञकं। काष्ठप्रधानो दारुरिति केचित्।) देवकाष्ठम्। इति राजनिर्घण्टः॥

काष्ठद्रुः, पुं, (काष्ठप्रधानो द्रुर्वृक्षः।) पलाशवृक्षः। इति राजनिर्घण्टः॥

काष्ठधात्रीफलं, क्ली, (काष्ठमिव शुष्कं धात्रीफलम्।) आमलकम्। इति राजनिर्घण्टः॥

काष्ठपाटला, स्त्री, (काष्ठवत् कठिना पाटला।) सितपाटलिका। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा॥ "अपरा स्यात्पाटला सिता। मुष्ककी मोचकी घण्टा पाटलिः काष्ठपाटला"॥ इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे॥)

काष्ठमठी, स्त्री, (काष्ठरचिता मठीव।) चिता। इति त्रिकाण्डशेषः॥

काष्ठमल्लः, पुं, (काष्ठं मल्लः वाहक इव यत्र।) प्लवयानम्। इति शब्दरत्नावली॥

काष्ठलेखकः, पुं, (काष्ठं लिखति। कर्त्तृत्वेन लेखनाकारं करोतीति। लिख+ण्वुल्।) घुणः। इति शब्दरत्नावली॥

काष्ठलोही, [न्] पुं, (काष्ठेन युक्तं लोहं विद्यते यत्र। यद्वा काष्ठं च लोहं च ते स्तोऽत्र। इनिः।) लौहयुक्तमुद्गरः। तत्पर्य्यायः। वातहिः २। इति त्रिकाण्डशेषः॥

काष्ठवल्लिका, स्त्री, (काष्ठवत् शुष्का वल्लिका।) कटुका। इति वैद्यकम्॥ (कट्वीशब्देऽस्या गुणादयो बोद्धव्याः॥)

काष्ठशारिवा, स्त्री, (काष्ठमिव शुष्का शारिवा।) शारिवा। इति राजनिर्घण्टः। अनन्तमूल इति भाषा॥

काष्ठा, स्त्री, (काश्यते प्रकाश्यते। काश् दीप्तौ। "हनिकुषिनीरमिकाशिभ्यःक्थन्"। उणां २।२। इति क्थन्। ब्रश्चेति षत्वं ततः टाप्।) दिक्। (यथा, माघे ११।१२।

"स्फुरति विशदमेषा पूर्व्वकाष्ठाङ्गनायाः"॥)

स्थितिः। सीमा। उत्कर्षः। (यथा, कठश्रुतौ।

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः"॥

अष्टादशनिमेषात्मककालः। इत्यमरः। १।४।११॥ (यथा मनुः १।६४।

"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला"॥

विष्णुपुराणमते पञ्चदशनिमेषात्मकः कालः। यदुक्तं, तत्रैव १।३।७।

"काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम!"॥)

दारुहरिद्रा। इति मेदिनी॥ (कश्यपपत्नीभेदः। यथा, भागवते ६।६।२५।

"अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला"॥)

काष्ठाम्बुवाहिनी, स्त्री, (अम्बूनां जलानां वाहिनी

अम्बुवाहिनी । काष्ठेन निर्म्मिता काष्ठस्य वा अम्बुवाहिनी ।) काष्ठादिछिद्रच्छिन्नाग्रनौकाकृति जलसेचनी । सेंच्योत् इति भाषा । तत्पर्य्यायः । द्रोणी २ । इत्यमरः । १ । १० । ११ ॥

काष्ठीलः, पुं, (काष्ठिना ह्लयते क्षिप्यते इति । काष्ठि + इल् क्षेपणे + कर्म्मणि घञ् ।) राजार्कः । इति राजनिर्घण्टः ॥

काष्ठीला, स्त्री, (कुत्सिता ईषदर्था अष्ठीलेव । क्षुद्राष्ठीलेव इति वा ।) कदलीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥

कास, ऋ ड कुशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्-ऋदित् ।) कुशब्द इह रोगहेतुककुत्सितशब्दः । ऋ अचकासत् । ड कासते रुजः । इति दुर्गादासः ॥

कासः, पुं, (कासतेऽनेन । कास् शब्दकुत्सनयोः । "हलश्च" ३ । ३ । १२१ । इति घञ् ।) रोगविशेषः । कासी इति भाषा । तत्पर्य्यायः । क्षवथुः २ । इत्यमरः । २ । ६ । ५२ ॥ तस्य निदानं यथा,—

"धूमोपघाताञ्जसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव" ॥

सम्प्राप्तिर्यथा । "प्राणो ह्युदानानुगतः प्रदुष्टः" ॥ लक्षणं यथा ।

"संभिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषो
ननोषिभिः कास इति प्रदिष्टः" ॥

स च पञ्चविधो यथा,—

"पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ।

तेषां पूर्व्वरूपं यथा,—

"पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते" ॥

वातिको यथा,—

"हृच्छङ्खमूर्द्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव" ॥

पैत्तिको यथा,—

"उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् सधूमं परिदह्यमानः" ॥

श्लैष्मिको यथा,—

"प्रलिप्यमानेन मुखेन सोदन्
शिरोरुजार्त्तः कफपूर्णदेहः ।
श्यामक्षरुग्गौरवसादयुक्तः
कासेद्घनं साम्रकफः कफेन" ॥

क्षतजो यथा,—

"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ।
स पूर्व्वं कासते शुष्कं ततः क्षीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णाविस्वर्य्यपीड़ितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्" ॥

क्षयजो यथा,—

"विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् ।
क्षपणानां शोचतां नृणां व्यापन्नेऽग्नौ क्षयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्हेतुक्षयप्रदम् ॥
सगात्रशूलज्वरदाहमोहान्
प्रायःक्षयश्चोपलभेत कासी ॥
शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ।
तं सर्व्वलिङ्गं भृशदुस्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ॥

इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥
नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्य्याप्यांस्तु याप येत्" ॥ इति माधवकरः ॥ * ॥

("आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति" ॥

अस्य प्रायूपसहितासंप्राप्ती रूपाणि च यथा ।

"तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥
शूकपूर्णाभकण्ठत्वं, तचाधो विहतोऽनिलः ।
ऊर्द्धं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन् ॥
शिरः स्रोतांसि संपूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी एष्ठमुरः पार्श्वे च पीड़यन् ॥
प्रवर्त्तते सवक्त्रोष्मा भिन्नकांस्योपमध्वनिः ।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥
यद्वुना शब्दवैषम्यं कासानां जायते ततः ।
कुपितो वातजैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् ।
करोति शुष्कं कासञ्च महावेगरुजाक्षनम् ॥
सोऽल्पहर्षो कफं शुष्कं कृच्छ्रान्मुक्त्वान्यतां व्रजेत् ।
पित्तात् पीतात्ति कफता तिक्तास्यत्वं ज्वरोष्मभमः ॥
पित्तास्रवमनंतृष्णा वैस्वर्य्यं धूमको मदः ।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ॥
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु ।
कण्ठोपलेपः सदनं पीनसश्छर्द्यरोचकाः ॥
रोमहर्षोघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च यद्यितं कुथितं बहु ।
क्षीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णाविस्वर्य्यकम्यवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमादीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ॥
क्षीणस्य साहसमूलत्वं स्याच्च एष्ठकटीग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मणः ॥
कुर्व्वन्ति यक्ष्मायतनैः कासं क्षीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥
लुप्यते इव पार्श्वे च हृदयं पततीव च ।
अकस्मादुष्णशीतेच्छा वह्नाग्नित्वं बलक्षयः ॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्घ्राननेक्षता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥
सिध्येतामपि सानाथ्यात् साध्यादोषैः पृथक्क्षयः ।
मिश्रा याप्या द्वयात् सर्व्वे जरसा स्थविरस्य च ॥
कासाक्षात्क्षयच्छर्द्दि स्वरसादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत्" ॥

इति वाभटे निदानस्थाने । ३ अध्याये ॥ * ॥

अथ कासस्य चिकित्सा यथा ॥

"केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥
लेहैर्धूमैस्तथाभ्यङ्गैः स्वेदसेकावगाहनैः ।
वस्तिभिर्बृंहविड्वातं सपित्तन्तूर्द्धभक्तिकैः ॥
घृतैः क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ॥
प्रस्थः सिद्धो घृतादातकासनुत् वह्निदीपनः ।
क्षारराखावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ॥
द्विपलांशैः सर्पिषः प्रस्थं पक्वकोलयुतैः पचेत् ।
दशमूलस्य निर्य्यूहे पीतोमण्डानुपायिना ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्राद्धा दशमूलशृतावरीः ॥
पलोन्मितादिकुड़वं कुलत्थं बदरं यवम् ।
तुलार्द्धञ्चाजमांसस्य तेन साधं घृताढ़कम् ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनबस्तिभिः ॥
पञ्चकासान् शिरःकम्पं योनिबस्त्यक्षिवेदनाम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सन्नीहोर्द्धानिलान् जयेत्" ॥ *॥

"दुरालभां शृङ्गवेरं शृङ्गीं द्राक्षां सितोपलाम् ॥
लिह्यात् कर्कटशृङ्गीञ्च कासे तैलेन वातजे ।
दुष्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकं शृङ्गीम् ॥
पुराणगुड़तैलाभ्यां चूर्णितान्यवलेहयेत् ।
तद्वत् सक्षौद्रां शृङ्गीञ्च सभार्गीं तद्वदेव च ॥
पिबेच्च क्षौद्रां कोष्णेन सलिलेन ससैन्धवाम् ।
मस्तुना सशितां शृङ्गीं दग्ध्वा वा कवरेणुकाम् ॥
पिबेद्दधरमज्ज्ञो वा मदिरा दधिमस्तुभिः ।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् ॥
कासीसपीतनोधूमं स्नैहिकं विधिना पिबेत्" ।

"यवानीपिप्पलीविल्वमध्यनागरचित्रकैः ।
राजाजाजी पृथक्पर्णी पलाशशृङ्गीपौष्करैः ॥
सिद्धां स्निग्धाम्लवणां पेयामनिलजे पिबेत् ।
कटिहृत् पार्श्वकोष्ठार्त्तिश्वासहिक्काप्रणाशनीं" ॥

"पित्तकासे तनुकफे चिरतां मधुरैर्युताम् ।
युञ्जाद्विरेकायुतां घनश्लेष्मणि तिक्तकैः ॥
हृतदोषो हिमं स्वादु स्निग्धं संसर्ज्जनं भजेत् ।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् ॥
लेहः पैत्ते सिता धात्री क्षौद्रद्राक्षा हिमोत्पलैः ।
सकफे साब्दमरिचः सघृतः सानिले हितः ॥

मृद्वीकार्द्धशतं त्रिंशत्पिप्पलीः शर्करापलम्।
लेहयेन्मधुना गोर्व्वा क्षीरस्य शृतस्य वा ॥
त्वगेलापत्रमृद्वीकापिप्पलीमूलपौष्करैः।
लाजमुस्ता यष्टीरास्ना धात्रीफलविभीतकैः ॥
शर्करार्द्धौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा।
मधुरैर्भाङ्गलरसैर्यवश्यामाककोद्रवाः ॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः।
धन्वजैश्चापि लेहाश्च तिक्तकामधुसंयुताः ॥
शालयः शुल्लनुकपे यष्टिकाश्च रसादिभिः।
शर्करामोऽनुपानार्थं द्राक्षेक्षुरसाः पयः ॥
काकोली क्षीरशुक्लामेदाद्वयैः स क्षीरनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्" ॥
"पुनर्नवा शिवाटिका सरलकासमर्द्दाम्रता।
पटोलदृतीपफलिञ्जकरसैः पयः संयुतैः ॥
घृतं चिकटुना च सिद्धमुपयुज्य सञ्जायते।
न कासविषमज्वरक्षयगुदाङ्गरेभ्यो भयम्" ॥ * ॥
"दशमूलं क्षयक्षुण्णां शृङ्गपुष्पीं शठीं बलाम् ॥
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्।
भार्गीं पुष्करमूलञ्च द्विपलांशान् यवाढ़कम् ॥
हरीतकीशतञ्चैकं जलेषड्ढ़के पचेत्।
यवखिन्ने कषाये तं पूतन्तच्चाभयाशतम् ॥
पचेद्गुड़तुलां दत्त्वा कुड़वञ्च पृथग्घृतात्।
तैलात् सपिप्पलीचूर्णात् सिद्धगीतेि च माक्षिकात् ॥
लेहं हे चाभये नित्यमतः खादेद्रसायनात्॥
तदग्नीपलितं हन्याद्वर्णायुर्बलवर्द्धनम् ॥
पञ्चकासान् क्षयं श्वासं सहिक्कं विषमज्वरम्।
मेहगुल्मव्रणार्शांसि हृद्रोगारुचिपीनसान् ॥
अगस्तिविहितं धन्यमिदं श्रेष्ठं रसायनम्" ॥

इति अगस्त्यरसायनम् ॥ * ॥

"विधिश्च यज्ञविहितो यथावस्यं क्षते हितः ॥
निहत्ते क्षतदोषे तु कफे रुद्धे उरः शिरः।
दाह्यते कासिनो यस्य धूमानापिवेदिमान् ॥
द्विमेदा द्विबलाबल्लीकल्कैः क्षौमे सुभाविते।
वर्त्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः ॥
मनःशिला पलाशाग्रगन्धात्वक्क्षीरिनागरैः।
तद्वदेवानुपानन्तु शर्करेक्षुगुड़ोदकम् ॥
पिष्ट्वा मनःशिलां तुल्यां मार्द्रया वटपट्टक्या।
सर्पिष्मन्तं पिबेद्धूमं तित्तिरिप्रतिभोजनम् ॥
क्षयजे कृंहणं पूर्वं कुर्यादग्नेश्च वर्द्धनम्।
बद्धदोषाय सस्नेहं मृदुदद्याद्विरेचनम् ॥
ग्राम्याकेन चिरुतया मृद्वीकारसयुक्तया।
तिल्वकस्य कषायेण विदारीस्वरसेन च ॥
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम्।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान् ॥
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्।
विदारीभिः कदम्बैर्वा तालशस्यैश्च साधितम् ॥
घृतं पयश्च सूत्रस्य वैवर्ण्ये क्षक्षिनिर्गमे।
शूने सवेदने मेढ्रे पायौ सञ्जोगिवङ्क्षणे ॥
घृतमण्डेन लघुनानुवास्यो मिश्रकेण वा।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या विलेशयाः ॥
क्रमशः प्रसहास्तद्वत् प्रयोज्याः पिशितान्नगाः।
श्लेष्मणात्यर्थमाविष्टा वाश्च स्रोतोभ्यश्चायवन्ति ते ॥

कफं शुद्धैश्च तःपुष्टिं कुर्य्यात्सम्यग्वहन् रसः।
चविकात्रिफलाभार्गी दशमूलः स चित्रकैः ॥
कुलत्थपिप्पलीमूलपाठाकालयवैर्जले।
घृतैर्नागरदुस्पर्शा पिप्पलीशठिपौष्करैः ॥
पिष्टैः कर्कटशृङ्गी च समैः सर्पिर्विपाचयेत्।
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च ॥
दत्त्वा युक्त्यापिबेन्मात्रां क्षयकासनिपीड़ितः।
कासमर्द्दोऽभयामुस्तापाठाकट्फलनागरैः ॥
पिप्पल्या कटुरोहिण्या काश्मर्य्याः स्वरसेन च।
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षा रसाढके ॥
पचेच्छोषज्वरक्षीहसर्व्वकासहरं शिवम्" ॥ * ॥
"वृषव्याघ्री गुडूचीनां पञ्चमूलफलाङ्कुरान् ॥
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः"।
"स्थूलैरघवद्भः कण्ठोरः स्रोतसाञ्च विशुद्धये ॥
प्रस्थोन्मिते यवक्वाथे विंशतिर्विंशयाः पचेत्।
खिन्नामदित्वा तान्तस्मिन् पुराणात्षट्पलं गुड़ात् ॥
पिप्पल्या द्विपलं कर्षं मनोक्षाया रसाञ्जनात्।
दत्त्वार्द्धांशं पचेद्भूयः सलेहः श्वासकासनुत्" ॥
"तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम्।
पथ्यासुण्ठी घनगुड़ैर्गुटिकां धारयेन्मुखे ॥
सर्व्वेषु श्वासकासेषु केवलं वा विभीतकम्।
पक्वकल्कं घृतभृष्टं तिक्तस्य सशर्करम् ॥
पेयावोल्लारिकाक्षर्द्दिहिक्काकासामातिसारनुत्।
कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः ॥
स गौरामलकः साक्षः सर्व्वकासभिषग्जितम् ॥
वातघ्नौषधनिक्वाथे क्षीरं यूषान् रसानपि।
वैष्किरान् प्रातुदान् वैलान् दापयेत् क्षयकासिने ॥
क्षतकासे च वेधूमाः सानुपानानि दर्शिताः।
क्षयकासेऽपि ते योज्या वक्ष्यन्ते यच्च यज्ञजि ॥
कृंहणं दीपनक्षाग्रे स्रोतसाञ्च विशोधनम्।
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्व्वं प्रशस्यते ॥
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः।
यथादोषबलन्तस्य सन्निपातहितं हितम्" ॥
इति वाभटे चिकित्सास्थाने २ अध्याये ॥ * ॥

अस्य सकारणसम्प्राप्तिकं लक्षणं चिकित्सितञ्च यथा,—

"तपसा यज्ञसा धृत्या धिया च परयान्वितः।
आत्रेयः कासशान्त्यर्थं सिद्धं प्राह चिकित्सितम् ॥
वातादिभिस्त्रयो ये च क्षतजः क्षयजस्तथा।
पञ्चैते सुर्द्दारुणा कासा वर्द्धमानाः क्षयप्रदाः" ॥
"ऊर्द्धप्रतिहतो वायुरूर्द्धस्रोतः समाश्रितः।
उदानभावमापन्नः कण्ठं सङ्गस्तथोरसि ॥
आविश्य शिरसः खानि सर्व्वाणि प्रतिपूरयन्।
आभज्ञन्नाक्षिपन्देहं हनुमन्ये तथाक्षिणी ॥
नेत्रे रुणद्धि मुरः पार्श्वे निर्भिन्द्य स्तम्भयंस्ततः।
शुष्को वा सकफो वापि कासनात् कास उच्यते।
प्रतिघातविशेषेण तस्य वायोः सरंहसः ॥
वेदनाशब्दवैषम्यं कासानामुपजायते।
रूक्षशीतकषायाल्पप्रमिताशनशीलिनः ॥
वेगधारणमायासो वातकासप्रवर्त्तकाः।
हृत्पार्श्वोरः शिरःशूलस्वरभेदकरो भृशम् ॥
शुष्कोरःकण्ठवक्त्रास्यहृल्लोमहर्षः प्रताम्यतः।

निर्घोषोत्क्लेशतो देन्यदौर्ब्बल्यक्षयमोहजित् ॥
शुष्ककासः कफं शुष्कं छिन्द्यान्मुक्ताल्पतां व्रजेत्।
स्निग्धाम्ललवणोष्णैश्च भुक्तमात्रे प्रशाम्यति ॥
ऊर्द्धवातस्य जीर्णेऽन्ने वेगवान्मारुतो भवेत्।
कटूष्णाविदाह्यम्लक्षाराणामतिसेवनम् ॥
पित्तकासकरं क्रोधः सन्तापाग्निसूर्य्यजः।
पीतनिष्ठीवनाक्षित्वं तिक्तास्यत्वं क्षरामयः ॥
उरो धूमायनं दृष्ण दाहोमोहोऽरुचिर्भ्रमः।
प्रतनं कासमानञ्च ज्योतींषीव च पश्यति।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥
गुर्व्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः।
रुद्धः श्लेष्मानिलं रुद्धा कफकासं करोति हि ॥
मन्दाग्निरल्पच्छर्द्दिः पीनसोत्क्लेशगौरवैः।
लोमहर्षास्यमाधुर्य्यक्लेदसंसदनैर्युतम् ॥
कृंहणं मधुरं स्निग्धं निष्ठीवति घनं कफम्।
कासमानोऽतिरुग्वक्त्रः सम्मूर्च्छन्निव मन्यते" ॥
"दुर्गन्धं हरितं रक्तं ष्ठीवेत् पूयोपमं कफम्।
स्थानादुत्कासमानस्य हृदयं मन्यते च्युतम् ॥
अकस्मादुष्णशीतार्त्तो बद्धाग्नीदुर्ब्बलः क्षयः।
स्निग्धाच्छमुखवर्णत्वक् श्रीमद्दशनलोचनैः ॥
पाणिपादतलौ श्लक्ष्णौ सततासूयकोदृशौ।
ज्वरो मिश्राल्पतिक्तास्य पार्श्वरुक् पीनसोऽरुचिः ॥
भिन्नसङ्घातवर्चस्त्वं स्वरभेदोऽनिमित्ततः।
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः" ॥
"रूक्षस्यानिलजं कासं आदौ स्नेहैरुपाचरेत्।
सर्पिर्भिर्वसाभिः पेयायूषक्षीररसादिभिः।
वातघ्नसिद्धैः स्नेहाद्यैर्धूमैर्लेह्यैश्च युक्तितः ॥
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान्।
वस्तिभिर्बद्धविड्वातं शुष्कोद्धं चोर्द्धभक्तिकैः ॥
घृतैः सपित्तं सकफं जयेत् स्नेहविरेचनैः"।
"पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः।
धान्यपाठावचाग्रास्ता यष्ट्याह्वक्षारहिङ्गुभिः।
कोलमात्रैर्घृतप्रस्थाद्दशमूली रसाढ़के ॥
सिद्धां चतुर्थिकां पीत्वा पेयामण्डं पिबेदनु।
तच्छ्वासकासहृत्पार्श्वग्रहणीदोषगुल्मनुत्" ॥
"ऋषभं चिपलां द्राक्षां काश्मर्य्याणि परूषकम्।
द्वे पाटे सरलं व्याघ्रीं खगुप्ताचित्रकं शठीम्।
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम्।
चिरुटकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात् ॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥
कामलार्शोऽनिलाष्ठीला क्षतक्षीणक्षयापहम्।
ऋषभं नाम विख्यातमेतद्घृतमनुत्तमम्" ॥

इति ऋषभाद्यं घृतम् ॥ * ॥

"द्रोणेऽपां साधयेद्राज्ञां दशमूलीं शतावरीम्।
पलिकां माषिकां श्राम्तु कुलत्थान् वदरान् यवान् ॥
तुलार्द्धाजमांसस्य पादशेषेण तेन च।
घृताढ़कं समक्षीरं जीवनीयैः पलोन्मितैः ॥
सिद्धं तद्गुणभिः कल्कैः सस्नेपानानुवासनैः।
समीक्ष्य वातरोगेषु यथावस्यं प्रयोजयेत् ॥
पञ्च कासान् शिरःकम्पं शूलं वङ्क्षणयोनिजम्।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्धनिलान् जयेत्" ॥

"दशमूलीं सवङ्गुप्तां शृङ्गवेर्यौ शठीं बलाम् ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥
भार्गीं पुष्करमूलञ्च द्विपलांशयवार्द्धकम् ।
हरीतकीशतञ्चैकं जलप्रस्थार्द्धके पचेत् ॥
यवे खिन्ने कषायन्तम्मूतन्तच्चाभयाशतम् ।
पचेत् गुडतुलां दत्त्वा कुडवञ्च पृथग् घृतात् ॥
तैलात् सर्पिष्मलीचूर्णात् सिद्धघृतेऽ चमाक्षिकात् ॥
लिह्याद्दे चाभये नित्यमतः खादेद्रसायनात् ॥
तद्वलीपलितं हन्ति वर्णायुर्बलवर्द्धनम् ।
पञ्चकासान् क्षयं कासं हिक्कां सविषमज्वराम् ॥
हन्यात्तथार्शोग्रहणीदुष्टदोषारुचिपीनसान् ।
अगस्त्यविहितं श्रेष्ठं रसायनमिदं शुभम्" ॥

इत्यगस्त्यहरीतकी ॥ * ॥

"शिरसः सदने स्रावे नासाया हृदि तास्यति ।
कासप्रतिश्यायरसे धूमं वैद्यः प्रयोजयेत् ॥
दशाङ्गुलोन्मितां नाड़ीं अथवाष्टाङ्गुलोन्मिताम् ।
शरावसंपुटच्छिद्रे कृत्वाच्छां विचक्षणः ॥
वैरेचनं मुखेनैव कासवान् धूममापिबेत् ।
तमुरः केवलं प्राप्तं मुखेनैवोद्धमेत् पुनः ॥
सद्यस्य तैक्ष्ण्यादिच्छिद्य स्नेहाक्तमुरसि स्थितम् ।
निष्कृष्य श्लेष्मयेत् कासं वातश्लेष्मसमुद्भवम्" ॥
"मनःशिलालमधूकमांसीमुस्तैर्द्रुदैः पिबेत् ।
धूमं तस्यानु च क्षीरं सुखोष्णं सगुड़ं पिबेत् ॥
एष कासान् पृथग्दोषसन्निपातोद्भवान् जयेत् ।
प्रसह्य पर्य्यसंसिद्धानन्यैर्योगशतैरपि" ॥
"मनःशिलैलामरिचत्वाराङ्गनकुटत्वटैः ।
वंशलोचनशैवालक्षौमनक्तकरोहिषैः ॥
पूर्ब्बकल्पेन धूमोऽयं सानुपानो विधीयते ।
श्वासं मनःशिला तद्वत् पिप्पलीनागरैः सह ॥
त्वगेकदीहहत्यौ द्वे तालमूलं मनःशिला ।
कार्पासास्थ्यग्निगन्धा च धूमः कासविनाशनः" ॥
"पैत्तिके स कफे कासे वमनं सर्पिषा हितम् ।
तथा मदनकाम्पर्य्यमधूककथितैर्जलैः ॥
यष्ट्याह्वफलकल्कैर्वा विदारीक्षुरसायुतैः ।
हृतदोषस्ततः पीतं मधुरञ्च क्रमं भजेत् ॥
पैत्ते तनुकफे कासे जिह्वतां मधुरैर्यूतम् ।
दद्याद्वनकफे तिक्तैर्विरेकार्थे यतां भिषक् ॥
"शर्करावन्दनद्राक्षा मधुधात्रीफलोत्पलैः ।
पैत्तेसमुस्तमरिचः सकफे सघृतोऽनिले ॥
मृद्वीकार्द्धघृतं क्षिप्त्वा पिप्पलीशर्करायुतम् ।
लेह्येन्मधुना गोर्व्वा क्षीरस्य शृतशीतस्य" ॥
"वमिनं वमनैरादौ शोधयेत् कफकासिनम् ।
यवान्नैः कटुरूक्षोष्णैः कफघ्नैश्चाप्युपाचरेत् ॥
पिप्पलीत्रिफलाक्षैर्यूषैः कौलत्थं मूलकस्य च ।
लघून्यन्नानि भुञ्जीत रसैर्वा कटुकान्वितैः" ॥
कासमर्द्दस्विबिट्शुक्तशोवार्त्ताकुजारसाः ।
सक्षौद्राः कफकासघ्नाः सुरसस्यासितस्य च" ॥
"घृतकासाभिभूतानां वृत्तिः स्यात् पित्तकासिकी ।
क्षीरसर्पिर्मधुप्रायो संसर्गे तु विशेषतः ॥
वातपित्तार्दितेभ्यश्च गात्रभेदज्वरार्दितः ।
तैलैर्मारुतरोगघ्नैः पीड्यमाने च वायुना ॥
घृतमार्द्धर्तिकं पानं स्याज्जीवनीयस्य सर्पिषः ।
सदाहं कासिनो रक्तं क्षीवतः सबलेऽनिले ।
मांसोचितेभ्यः कामेभ्यो जाबादीनां रसा हिताः" ॥
"निहृते घृतदोषे तु कफे रूढे उरः शिरः ।
दाह्यते कासिनो यस्य मधूमाघ्रापिबेदिमान् ॥
द्वे मेदे मधुकं द्वे च बलेतैः क्षौमनक्तकैः ।
वर्त्तितैर्धूममापीय जीवनीयघृतं पिबेत्" ॥
"सम्पूर्णरूपं क्षयजं दुर्ब्बलस्य विवर्ज्जयेत् ।
नवोत्थितं बलवतः प्रत्याख्यायाचरेत् क्रियाम्" ॥
"पित्ते कफे च संक्षीणे परिक्षीणेषु धातुषु ।
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्" ॥
"घृतकासे च ये धूमाः सानुपाना निदर्शिताः ।
घृतकासेऽपि तानेव यथावस्थं प्रयोजयेत्" ॥
"सन्निपातभवेऽप्येष क्षयकासः सुदारुणः ।
सन्निपातहितं तस्मात् सदा कार्य्यं भिषग्जितम् ॥
दोषानुबलयोगाच्च हरेद्रोगबलाबलम् ।
कासेष्वेषु गरीयांसं जानीयादुत्तरोत्तरम्" ॥

इति चिकित्सास्थाने २२ अध्याये चरकेणोक्तम् ॥ * ॥

कासस्य निदानसम्प्राप्तिलक्षणसहितं प्रायूपं चिकित्सितञ्च यथा,—
"उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च ते ज्ञेयास्तत्र वोत्पत्तिहेतवः" ॥
"स वातपित्तप्रभवः कफाच्च
क्षतात्तथान्यः क्षयजोऽपरश्च ।
पञ्चप्रकारः कथितो भिषग्भि-
र्विवर्द्धितो यक्ष्मविकारलक्षणात् ॥
भविष्यतस्तस्य तु कण्ठकण्ड-
र्भोज्योपरोधोगलतालुशैपः ।
स्वरश्च वैषम्यमरोचकोऽग्नि-
सादश्च लिङ्गानि भवन्त्यमूनि" ॥
"वृद्धत्वमासाद्य भवत्ययो वै
याप्यन्तमाऽभिभवजस्तु कासम् ॥
पृष्ठग्रीवाच कट्फलकृत्तशब्द-
धान्याभयाभार्य्यमरांश्विश्वम् ।
उष्णाम्बुना हिक्कयुतं तु पीत्वा-
वद्यास्यमप्यासु जहाति कासम् ॥
फलत्रिकव्योषविडङ्गपट्वी
रास्नावचापद्मकदेवकाष्ठैः ।
लेहः समैः क्षौद्रसिताघृताक्तः
कासं निहन्यादचिरादुदीर्णम् ॥
पथ्यां सितामामलकानि लाजां
समागधीञ्चापि विचूर्ण्य गुग्गुलोम् ।
सर्पिर्मधुभ्यां विलिहीतकासी
स सैन्धवां वोष्णजलेन क्षुण्णाम् ॥
खादेद्गुड़ं नागरपिप्पलीभ्यां
द्राक्षाञ्च सर्पिर्मधुनावलिह्यात् ।
द्राक्षां सितां मागधिकाञ्च तुल्याम्
सपृक्तवेगं मधुकन्तुगाञ्च ॥
लिह्याद्घृतक्षौद्रयुतां समांसां
सितोपलां वा मरिचांशयुक्ताम् ।
धात्रीफलाबिल्वसितोपलाश्च
सचूर्ण्य मद्येन पिबेच्च दध्ना ॥
हरेणुकां मागधिकाञ्च तुल्याम्
दध्ना पिबेत् कासगदाभिभूतः" ॥
"पिबेच्च सीधुं मरिचान्वितं वा
तेनास्य कासं श्रमरभ्युपैति ।
द्राक्षाम्बुमल्लिष्ठपुराड्यधाभिः
क्षीरं श्रुतं माक्षिकसंप्रयुक्तम् ॥
निदिग्धिकानागरपिप्पलीभिः
खादेच्च मुद्गान् मधुना सुसिद्धान् ।
उत्कारिकां सर्पिषि नागराढ्याम्
पक्वां समूलैस्तुटिकोलपत्रैः ॥
एभिर्निषेवेत घृतानि चैषाम्
तन्वीं सुगीतां मधुना विमिश्राम् ।
यत्क्षीरि सर्पिर्विहितं षड़ङ्गम्
तद्घातकासं जयति प्रसह्य ॥
विदारि गन्धादिहृतं घृतं वा
रसेन वा वासकजेन पक्वम् ।
विरेचनं स्नैहिकमत्र चोक्त-
मास्थापनञ्चाप्यनुवासनञ्च ॥
धूमं पिबेत् स्नैहिकमप्रमत्तः
पिबेत् सुखोष्णं घृतमेव चात्र ।
हिता यवान्नञ्च रसेषु सिद्धाः
पयांसि लेहाः स घृतास्तथैव ॥
प्रच्छर्दनं कायशिरो विरेको
स्तथैवधूमाकवलग्रहाश्च ।
उष्णाश्च लेहाः कटुकानि हन्युः
कफं विशेषेण विशोषणं वा" ॥
"खर्ज्जूरभार्गीमगधापियाल-
मधूलिकैलामलकैः समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढ-
न्त्रीन् हन्ति कासानुपयुज्यमानः" ॥
"प्रस्थत्रयेणामलकीरसस्य
गुड़स्य दत्त्वार्द्धतुलां गुड़स्य ॥
चूर्णीकृतैर्यष्टिकचव्यशीर-
श्योषेभकृष्णा ह पृथाजमोदैः ।
विड़ङ्गसिन्धुत्रिफाजमानी
पाठाग्निधान्यैश्च पिचुप्रमाणैः ॥
दत्त्वा चिरत्वक्पलाशि चाष्टा-
वष्टौ च तैलस्य पचेदयावत् ।
तन्मात्रयेदक्षफलप्रमाणम्
यथेष्टचेष्टं त्रिसुगन्धि युक्तम् ॥
अनेन सर्व्वे ग्रहणी विकाराः
स श्वासकासस्वरभेदशोथाः ।
शाम्यन्ति चाशं चिरमन्तरग्ने-
र्हृतस्य पुंस्त्वस्य च वृद्धिहेतुः ॥
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रतीतः" ॥

इति कल्याणको गुड़ः ॥ * ॥

"कुलीर शुक्ती चटकैणलावा-
न्निःक्काथ्य वर्गैर्मधुरैस्तथान्यैः ॥
पचेद्घृतं तत्तु निषेव्यमाणम्
हन्यात् क्षतोत्थं क्षयजञ्च कासम्" ॥

इति सुश्रुते उत्तरतन्त्रे । ५२ अध्याये ॥ * ॥

"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
राज्ञा विड्ङ्गत्रिफला देवदारुकचित्रकम् ।
अम्लतां पञ्चकं क्षौद्रं विषञ्चैव विचूर्णयेत् ।
द्विगुञ्जं वातकासार्त्तिः सेवयेदमृतार्णवम्" ॥

इति अमृतार्णवो रसः ॥ * ॥

"भक्षताम्राभ्रकान्तानां कासमत्यर्दयो रसैः ।
मुनिभिर्वेतसाख्येन दिनं सर्वं प्रयत्नतः ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।
श्वासकासाग्निमान्द्यञ्च क्षयकासं निकृन्तति" ॥

इति पित्तकासान्तको रसः ॥ * ॥

"समुद्रं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्दयेच्च पृथक् पृथक् ॥
विश्वाग्निमत्यग्न्योनाकाक्षस्यर्थः पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहतीत्यपञ्चकम् ॥
विदारी बृहतीपुत्री च एषां कर्षरसैः पृथक् ।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमानकम् ॥
पलमात्रन्तु कृष्णाभ्रं तदर्द्धन्तु शिलाह्वयम् ।
जातीकोषफलं मांसी तालीशैला लवङ्गकम् ।
प्रत्येकं कोलमानन्तु वासागीरैर्विमर्दयेत् ।
शोषयित्वा ततः पश्चाद्विदारी रसमर्दितः ॥
चिञ्चाक्षां तां वटीं खादेत्पिप्पली मधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्च कासान्निहन्त्याशु चिरकालसमुद्भवम् ।
राजयक्ष्माणमत्युग्रमित्यादि बहवो गुणाः" ॥

इति नित्योदयो रसः ॥ * ॥

"शुद्धं कृष्णाभ्रचूर्णद्विपलपरिमितं
शाणमानं यदन्यत्
कर्पूरं जातिकोषं सजलमिभकणा-
तेजपत्रं लवङ्गम् ।
मांसीतालीशचोचं गजकुसुमगदं-
धातकीचेति तुल्यम्
पथ्याधात्री विभीतं त्रिकटुरपि पृथक्
त्वर्द्धशाणं द्विशाणम् ॥
एला जातीफलाख्यं क्षितितलविधिना
शुद्धगन्धस्य कोलम्
कोलार्द्धं पारदस्य प्रतिपदविहितं
पिप्पलेकत्र मिश्रम् ।
पार्थीयेनैवकार्य्याः परिमृतचणक-
स्विन्नतुल्याश्च वट्यः
प्रातःखादाच्चतस्रस्तदनु खलु कियत्
भृङ्गवेरं सपर्णम् ॥
पार्थीयं पीतमन्ते ध्रुवमपहरति-
क्षिप्रमेतान् विकारान्
कोष्ठे दुष्टाग्निजातान् ज्वरमुदररुजं-
राजयक्ष्मक्षतञ्च ।
कासं श्वासं सशोथं नयनपरिभवं-
मेहमेदो विकारान्
हृन्नादामानिलोत्थान् कफपवनकृतान्
पित्तरोगान् विशेषान् ॥
वल्योऽयञ्च योगस्त्रणकरवरः-
सर्व्वरोगप्रशस्तः
पथ्यं मांसैश्च यूषैर्घृतपरिप्लुतै-

र्गव्यदुग्धञ्च भूयः ।
भोज्यो योज्यो यथेष्टं ललितलवनया-
दीयमानो मुदा यत्
भृङ्गाराभ्येणकामी युवतिजनभृता-
भोगयोगादतुष्टः ॥
वर्ज्यं शाकाम्लमादौ न च कतिपयचित्-
खेच्छया भोज्यमानः" ॥

इति भृङ्गाराभ्रः ॥ * ॥

"जीर्णं सुवर्णं लौहं वा यद्यच्चैव प्रदीयते ।
तदायं सर्व्वरोगाणां सार्व्वभौमो न संशयः" ॥

इति सार्व्वभौमो रसः ॥ * ॥

"त्रिकटु त्रिफलाधान्यं चव्यं चित्रकसैन्धवम् ।
दिव्यौषधिहृतश्चापि सर्व्वतुल्यन्तयोरजः ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसैर्व्वापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम् ।
सरक्तमथवा रक्तं कासश्वाससमन्वितम् ॥
दृष्ट्वाहृभ्रमशूलघ्नी रुच्या वह्निप्रदीपनी ।
बलवर्णकरी हृद्या जीर्णज्वरविनाशिनी ॥
इयं चन्द्रामृता नाम्ना चन्द्रनाथेन निर्म्मिता ।
वासागुडूचिका भार्गी मुस्तकं कण्टकारिका ।
भोजनान्ते प्रकर्त्तव्या वटिका कार्य्यसिद्धये" ॥

इति श्रीचन्द्रामृता वटी । चन्द्रामृतं लौहमित्यपि पाठः ॥ * ॥

"रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्कणस्य पलं दत्त्वा मरिचस्य पलार्द्धकम् ॥
त्रिकटुत्रिफलाचव्य धान्यजीरकसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरससप्लुताम् ।
नीलोत्पलरसेनापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं वातरक्तकफोद्भवम् ।
सरक्तमथवा रक्तं ज्वरश्वाससमन्वितम् ॥
हृच्छूलं पार्श्वशूलञ्च जीर्णज्वरविनाशनः ।
चन्द्रामृतरसो नाम चन्द्रनाथेन भाषितः" ॥

इति वृहच्चन्द्रामृतो रसः ॥ * ॥

इति वैद्यकरसेन्द्रसारसंग्रहे कासरोगाधिकारे ॥ * ॥ * ॥

अथ कासपथ्यम् ॥

"स्नेहो विरेचनं छर्दिर्धूमपानं समाशनम् ।
शालिषष्टिकगोधूमयवाभामाकयवकोद्रवाः ॥
आत्मगुप्ता मांसमुद्गकुलत्थानां रसाः पृथक् ।
ग्राम्यौदकानूपधन्वमांसानि विविधानि च ॥
सुरा पुरातनं सर्पिश्छागञ्चापि पयो घृतम् ।
वास्तुकं वायसी शाकं वार्त्ताकुं बालमूलकम् ॥
कण्टकारी कासमर्द्दी जीवन्ती सुनिषण्णकम् ।
द्राक्षाबिम्बी मातुलुङ्गं पौष्करं वासकस्फुटिः ॥
गोमूत्रं शुनं पथ्या व्योषसुण्ठोदकं मधु ।

लाजा दिवसनिद्रा च लघून्यन्नानि यानि च ॥
पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे" ॥

अथापथ्यमाह ॥

"वस्तिं नस्यमरुक्षोक्षं व्यायामं दन्तधर्षणम् ।
आतपं दूरपवनं रजोमार्गनिषेवणम् ॥
विरुग्भीनि विदाहीनि रूक्षाणि विविधानि च ।
शुक्तम्लोद्गारकासवमिवेगनिधारणम् ॥
मत्स्यं कन्दं सर्षपञ्च तुम्बीफलमुपोदिकाम् ।
दुष्टाम्बु चान्नपानञ्च विरुद्धान्यशनानि च ॥
गुरुशीतस्वान्नपानं कासरोगी परित्यजेत्" ॥

इति वैद्यकपथ्यापथ्यविधौ कासरोगाधिकारः ॥*॥) काशहरणम्। इत्यमरटीकायां भरतः ॥ शोभाञ्जनः। इति शब्दचन्द्रिका ॥

कासकन्दः, पुं, (कासहेतुः कन्दः ।) कासालुः। इति राजनिर्घण्टः ॥

कासघ्नी, स्त्री, (कासं हन्ति । कास + हन् + टक् । स्त्रियां ङीप् ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (कण्टकारीशब्देऽस्या गुणादिविवरणं ज्ञेयम् ॥)

कासजित्, स्त्री, (कासं जयतीति । कास + जि + क्विप् ।) भार्गी । इति राजनिर्घण्टः ॥

कासनाशिनी, स्त्री, (कासं नाशयतीति । कास + नश् + णिच् + णिनिः ।) कर्कटशृङ्गी वृक्षः । इति रत्नमाला ॥

कासन्दीवटिका, स्त्री, (कासं यति नाशयतीति । दो + कः ततो ङीष् । कासन्दीं वटति वक्ति तन्नाम्ना प्रकाशते इत्यर्थः । वट् + णवुल् । टाप् अत इत्वम् । कासन्दीवटिका इति पारिभाषिकनाम्ना आख्यायते वा ।) वेसवारविशेषः। गोटा कासुन् इति भाषा। अस्या गुणाः। हृद्यत्वम्। वातश्लेष्मरोगनाशित्वम्। रुच्यत्वम्। वायुमलानुलोमकारित्वञ्च । इति राजवल्लभः ॥

कासमर्द्दः, पुं, (कासं मृद्नाति। कास + मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) पेषितजल मिश्रितवस्त्रगलितवेसवारः। इति पाकराजेश्वरः। कासन्दी इति ख्यातः। गुल्मभेदः। इत्यमरभरतौ। काश कासुन्दा इति भाषा ॥ शोभस्य पर्य्यायः। अरिमर्द्दः २ कासारिः ३ कासमर्द्दकः ४ कालः ५ कनकः ६ जरठः ७ दीपनः ८। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। मधुरत्वम्। कफवातार्जीर्णकासपित्तनाशित्वम्। पाचकत्वम्। कण्ठशोधनत्वञ्च। इति राजनिर्घण्टः ॥ अग्निदीपनत्वम्। स्वादुत्वञ्च। इति राजवल्लभः ॥ अस्य पञ्चगुणाः। रुचिकारित्वम्। शुक्रवर्द्धकत्वम्। कासविषरक्तकफवातपित्तनाशित्वम्। मधुरत्वम्। पाचनत्वम्। कण्ठशोधनत्वम्। लघुत्वम्। विशेषतः कासहरत्वम्। पाचकत्वञ्च। इति राजनिर्घण्टः ॥

कासमर्द्दनः, पुं, (कासं मृद्नाति । कास + मृद् + कर्त्तरि ल्युः । कासस्य मर्द्दनो वा ।) पटोलः । इति राजनिर्घण्टः ॥

कासरः, पुं, (के जले आसरति । आ + सृ + अच् । महिषस्य प्रायेण जलवासात्तथात्वम् ।) महिषः। इत्यमरः ।२।५।४॥ (यथा, आर्य्यासप्तशती ५२१ ।

"आरोहं मानिन्याश्चेतोदिवः कासरं कलमभूमेः। वह्निमलिं च नलिन्याः प्रभातसन्ध्यापसारयति" ॥)

कासारः, पुं, (कास + "तुषारादयश्च" उणां ३।१३९ इति आरन् प्रत्ययः। कस्य जलस्य आसारो यत्र वा। अथवा कासं शब्दं ऋच्छति प्राप्नोति जलगमनपतनादिकाले। ऋ + "कर्म्मण्यण्" ।३।२।१। इति अण्।) सपद्मो निष्पद्मो वा महाजलाशयः। सरोवरः। इत्यमरः। १। १०। २८ ॥ (यथा,—गीतगोविन्दे २। २०।

"दुरालोकस्तोकस्तवकनवकाशोकलतिका-
विकाशः कासारोपवनपवनोऽपि व्यथयति" ॥)

कासारिः, पुं, (कासस्य अरिः नाशकः।) कासमर्द्दः। इति राजनिर्घण्टः ॥

कासालुः, पुं, (कासहेतुः कासजनको वा आलुः।) कन्दविशेषः। कोङ्कणदेशे प्रसिद्ध आलुविशेषः। तत्पर्य्यायः। कासकन्दः २ कन्दालुः ३ आलुकः ४ आलुः ५ विशालपत्रः ६ पत्रालुः ७। अस्य गुणाः। उग्रत्वम्। कण्डुवातश्लेष्मामयारोचकनाशित्वम्। स्वादुत्वम्। पथ्यत्वम्। अग्निदीपनत्वञ्च। इति राजनिर्घण्टः ॥

कासीसं, क्ली, (कासौ क्षुद्रकासं स्यति नाशयतीति। सो + कः।) उपधातुविशेषः। हिराकसी इति भाषा। (यथा सुश्रुते सूत्रे ३६ अध्याये।

"कासीसकट्वोहिण्योर्जातीकन्दहरिद्रयोः" ॥)

तत्पर्य्यायः। धातुकासीसम् २ खेचरम् ३ धातुशेखरम् ४। इति हेमचन्द्रः ॥ केसरम् ५ हंसलोमशम् ६ शोधनम् ७ पांशुकासीसम् ८ शुभ्रम् ९। अस्य गुणाः। कषायत्वम्। शिशिरत्वम्। विषकुष्ठकृमिखर्ज्जूनाशित्वम् चक्षुर्हितत्वम्। कान्तिवर्द्धनत्वञ्च। इति राजनिर्घण्टः ॥ (विस्तृतविवरणमस्य काशीशब्दे ज्ञेयम् ॥)

कासूः, स्त्री, (कशति कुत्सितशब्दं गच्छतीति। कश गतौ + "शित् कशिपशेतेः"। उणा १। ८७। इति ऊः एषोदरादित्वात् सत्वम्।) विकलवाक्। शब्दयष्टम्। इति मेदिनी ॥ (कासते प्रकाशते इति कास् + ऊ।) दीप्तिः। भाषा। इति शब्दरत्नावली ॥ रोगः। बुद्धिः। इति हेमचन्द्रः ॥

काहका, स्त्री, (काहला इति। एषोदरादित्वात् लस्य कः।) काहलावाद्यम्। इति हिरूपकोषः ॥

काहलं, क्ली, (कुत्सितं अस्पष्टमव्यक्तं हलं वाक्यं ध्वनिर्वा यत्र। विलेखनार्थकस्यापि हलधातोरत्रधातूनामनेकार्थत्वात् तथात्वम्।) अव्यक्तवाक्यम्। इति हेमचन्द्रः ॥

काहलः, पुं, (कुत्सितं यथा स्यात् तथा हलति। लिखति नखैर्भूमिमिति शेषः। हल + अच्। कोः कादेशः।) कुक्कुटः। शब्दमात्रम्। इति मेदिनी ॥ विड़ालः। इति शब्दमाला ॥ दहद्ढक्का। तत्पर्य्यायः। महानादः २। इति हारावली ॥

काहलः, त्रि, (केन जलेन अहलः अस्पृष्टः।) शुष्कः। भग्नम्। खलः। इति मेदिनी ॥

काहला, स्त्री, (कुत्सितं अव्यक्तं वा हलति शब्दं करोति। हल् + अच् टाप् च।) वाद्यभाण्डभेदः। (ईषदपि न हलं कुत्सितं अङ्गं यस्याः। कोः कादेशः।) अक्षरोविशेषः। इति मेदिनी ॥

काहलापुष्पः, पुं, (काहलाकृतिरिव पुष्पमस्याः।) धुस्तूरः। इति शब्दमाला ॥

काहली, स्त्री, (कं सुखं आहलति ददातीति। आ + हल + इन्। ततो ङीप्।) तरुणी। युवती। इति मेदिनी ॥

काहारकः, पुं, (कुत्सितं शिविकादिकमालम्ब्य जीवनयात्रामाहरति। आ + हृ + ण्वुल्।) शिविकावाहकजातिः। काहार इति वेहारा इति च भाषा। यथा,—

"तथा गारुड़िका वीराः क्षुरकर्म्मोपजीवकाः।
व्याधाः काहारकाः पुष्टाः क्षणं संवाहयन्ति ये" ॥

इति जैमिनिभारते आश्वमेधिके पर्व्वणि १० अध्यायः ॥

काही, स्त्री, (केन वायुना आहन्यते। आ + हन् + ङः ङीप्। यद्वा कं सुखं आहन्ति ददाति प्रापयति। आ + हन् + अन्तर्णिजन्तात् ङः। ङीप् च।) कुटजवृक्षः। इति राजनिर्घण्टः ॥

कि र लि ज्ञाने। इति कविकल्पद्रुमः ॥ (क्र्यादिः परं-सकं-सेट्।) र वैदिकः। लि चिकेति। इति दुर्गादासः ॥

किं, व्य, किम्। इति मेदिनी ॥ (यथा विष्णुपुराणे १ मांशे १७। २४।

"न केवलं तात! मम प्रजानां
स ब्रह्मभूतो भवतश्च विष्णुः।
धाता विधाता परमेश्वरश्च
प्रसीद कोपं कुरुषे किमर्थम्" ॥)

किं, [म्] चि, जिज्ञासार्थम्। किं इति भाषा। सर्व्वनामकिम्शब्दस्य क्लीवलिङ्गे रूपमिदम्। इति व्याकरणम् ॥ अस्यार्थान्तराणि किम्शब्दे द्रष्टव्यानि ॥ (सर्व्वशब्दमयत्वात् विष्णुः। यथा, महाभारते १३। १४९। ९२।

"एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्" ॥)

किंवदन्तिः, स्त्री, (किं + वद + झिच्।) किंवदन्ती। इत्यमरटीकायां भरतः ॥

किंवदन्ती, स्त्री, (किम् + वद + झिच् ङीष् च।) जनश्रुतिः। सत्यमसत्यं वा लोकवादः। इत्यमरः। १। ६। ७ ॥ ("अस्ति किलैषा किंवदन्ती अस्माकं कुले कालरात्रिकल्पा विद्या नाम रात्रसी समुत्पत्स्यते"। इति प्रबोधचन्द्रोदयनाटकम् ॥)

किंवा, व्य, (किम् च वा च। इति द्वन्द्वसमासः।) विकल्पः। अथवा। तत्पर्य्यायः। उताहो २ यदि वा ३ यद्वा ४ नेति ५। इति चिकाण्डशेषः ॥

किंशारुः, पुं, (किं किञ्चित् कुत्सितं वा शृणातीति शॄ हिंसायां + "किञ्शॄस्थोः शिरुः"। उणां १। ४। इति रुण्।) शूल्यशूकम्। सुँश इति भाषा। इत्यमरः। २। ६। २१ ॥ वाणः। कङ्कपक्षी। इति मेदिनी ॥

किंशुकः, पुं, (किञ्चित् अवयवैकदेशः शुक इव शुकतुण्डाभपुष्पत्वात् तथात्वमिति बोध्यम्।) पलाशवृक्षः। इत्यमरः। २। ४। २६ ॥ (अस्य पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥

यथा गोः रामायणे ६। ६८। ३१।

"तयोः कृतव्रणौ देहौ सुशुभाते महात्मनोः।
पुष्पिताविव निष्पत्रौ यथा शाल्मलिकिंशुकौ" ॥

तत्पुष्पादयोऽपि। यथा चाणक्ये ७।

"रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" ॥)

विवरणमस्यान्यत् पलाशशब्दे ज्ञातव्यम् ॥ नन्दीवृक्षः। इति राजनिर्घण्टः ॥

किंशुलुकः, पुं, (किंशुक + निपातनात् साधुः।) पलाशवृक्षविशेषः। इति शब्दरत्नावली ॥

किकिः, पुं, (कक + इन्। एषोदरादित्वात् आदेरित्वम्।) किकीदिविः। इति शब्दमाला। नारिकेलः। इति राजनिर्घण्टः ॥

किकिदिविः, पुं, (किकीति अस्फुटनादेन दीव्यतीति। दिव् + इन्।) चामपक्षी। इति शब्दमाला ॥

किकीदिवः, पुं, (किकीति अव्यक्तशब्देन दीव्यति। दिव + कः।) चामपक्षी। इति शब्दमाला ॥

किकीदिविः, पुं, (किकी इति अस्फुटनादं कुर्व्वन् दीव्यति। "क्वविष्टब्बिच्छविस्विवि किकीदिविः"। उणां ४। ५६ इति किन् निपातनात् सिद्धम्।) स्वर्णचातकः। सोणाचड़া इति भाषा। नीलकण्ठ इति क्वचित् ख्यातः। इति भरतः ॥ तत्पर्य्यायः। चाषः २। इत्यमरः। २। ५। १६ ॥ चासः ३ किकीदीविः ४। इति भरतः ॥ किकी ५ दिविः ६। इति स्वामी ॥ किकिः ७ किकिदिवः ८ किकिदीविः ९। इति शब्दमाला ॥ किकीदिवः १० स्वर्णचूड़ः ११ इति जटाधरः ॥

किकीदीविः, पुं, (किकी इत्यव्यक्तशब्देन दीव्यति क्रीड़ति। निपातनात् दीर्घत्वे साधुः।) चामपक्षी। इति शब्दमाला ॥

किखिः, स्त्री, (खदति हिनस्ति। खद हिंसायां निपातनात् साधुः।) अघुष्टगालः। इति हेमचन्द्रः ॥ ख्याँक्शेयालि इति भाषा ॥

किखिः, पुं, (किखिरिति कुत्सितशब्दं करोति यः।) कपिः। इति भूरिप्रयोगः ॥

किङ्करः, त्रि, (किञ्चित् करोति। दिवाविभेत्यत्र किं यत्तद्भ्यश्चित्यच्।) दासः। इत्यमरः। २। १०। १७ ॥ (यदुक्तं पुराणे।

"विप्रस्य किङ्करो भूपो वैश्योभूपस्य भूमिप!।
सर्व्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः" ॥)

किङ्किणी, स्त्री, (किमपि किञ्चिद् वा कणति। कण शब्दे + इन् + ङीप् च। एषोदरात् साधुः।) कण्ठाभरणविशेषः। घाघर इति भाषा। तत्पर्य्यायः। क्षुद्रघण्टिका २। इत्यमरः। २। ६। ११० ॥ कङ्किणी ३। इति भरतः ॥ किङ्किणिका ४ किङ्किणिः ५। इति केचित् ॥ क्षुद्रघण्टी ६ प्रतिसरा ७ किङ्किणीका ८ कङ्किणिका ९ क्षुद्रिका १०। इति शब्दरत्नावली ॥ घर्घरी ११। इति जटा-

धरः ॥ (यथा, महाभारते १३ । ५३ । ३१ ।
"किञ्जिल्कोत्खननिर्घातो युक्तस्तोरणकल्पनैः" ॥)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

किञ्जिरं, क्ली, (किं कुत्सितं मदवारि किरति विक्षिपति । कृ + कः ।) गजकुम्भः । इति सारस्वतः ॥

किञ्जिरः, पुं, (किमपि अनिर्व्यचनीयं मधुरास्फुटं किरति रौति । किञ्चित् किरति क्षिपति चित्तं विरहिणां वा ।) कोकिलः । भ्रमरः । घोटकः । कामदेवः । इति सारस्वतः ॥

किञ्जिरा, स्त्री, (किञ्चित् कुत्सितं वा किरति शरीरात् निःसरति । किं + कृ + कः टाप् च ।) रक्तम् । इति सारस्वतः ॥

किञ्जिरातः, पुं, (किञ्जिरं रक्तवर्णत्वं अतति पुष्पकाले निरन्तरं प्राप्नोति । अत + अण् ।) अशोकवृक्षः । कामदेवः । शुकपक्षी । कोकिलः । इति सारस्वतः ॥ रक्तास्नानः । राङ्गा झाँटी इति भाषा । इति जटाधरः ॥ पुष्पवृक्षविशेषः । तत्पर्य्यायः । हेमगौरः २ पीतकः ३ पीतभद्रकः ४ विप्रलोभी ५ पीतास्नानः ६ षट्पदानन्दः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । अग्निदीपनत्वम् । कफवायुकण्डूश्वोथरक्तव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"किञ्जिरातो हेमगौरः पीतकः पीतभद्रकः ।
किञ्जिरातो हिमस्तिक्तः कषायश्च हरेदसौ ॥
कफपित्तपिपासास्रदाहश्वोषवमिक्रिमीन्" ॥
इति भावप्रकाशः ॥

किञ्जिरालः, पुं, (किञ्जिराय रक्तत्वाय अलति । पर्य्याप्नोति । अल + अच् । किञ्जिरेण रक्तत्वेनालति वा । वर्ब्बूरवृक्षः । इति वैद्यकम् ॥

किञ्जिरी, [न्] पुं, (किञ्जिरं रक्तवर्णफलमस्त्यस्मिन् अस्य वा । किञ्जिर + इनिः ।) विकङ्कतवृक्षः । इति जटाधरः ॥ वँइचि इति भाषा ॥ (विकङ्कतशब्देऽस्या गुणादिकं बोद्धव्यम् ॥)

किञ्च, व्य, (किम् च, च च । द्वन्द्वसमासः ।) आरम्भः । साकल्यम् । इति मेदिनी ॥ अवान्तरम् । इति जटाधरः ॥

किञ्चन, व्य, (किम् च चन च । मुग्धबोधमते तु "किमः क्षेपात्" इति चनप्रत्ययः ।) असाकल्यम् । अकार्त्स्न्यम् । इत्यमरः । ३ । ४ । ३ ॥

किञ्चनः, पुं, (किम् + चन् + अच् ।) हस्तिकर्णपलाशः । इति शब्दरत्नावली ॥

किञ्चित् व्य, (किम् च चित् च पाणिनिमते पदद्वयम् । मुग्धबोधमते तु "किमः क्षेपात् चिच्चनौ" । इति चित्प्रत्ययः ।) अल्पम् । तत्पर्य्यायः । ईषत् २ मनाक् ३ । असाकल्यम् । यथा । असाकल्ये तु चिच्चन । इत्यमरः । ३ । ४ । ३ ॥
(यथा विवेकचूड़ामणौ ११ ।
"चित्तस्य शुद्धये कर्म्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्म्मकोटिभिः" ॥)

किञ्चिलिकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प इति सौत्रधातुः । डुः संज्ञायां कन् । पृषोदरात् उभयत्र उस्याने इत्वम् ।) किञ्चुलुकः । इत्यमरटीकायां भरतः ॥

किञ्चुलुकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प् + डुः + संज्ञायां कन् ।) कोटविशेषः । कँचो इति भाषा । तत्पर्य्यायः । महीलता २ गरुडपदः ३ । इत्यमरः । १ । १० । २२ । ("वाह्या यूकाः प्रसिद्धाः स्युः किञ्चुलूकास्त्वधान्तराः" ॥ इति हारीते चिकित्सितस्थाने ५ अध्याये ॥)

किञ्जं, क्ली, (किञ्चिज्जलं यत्र । पृषोदरादित्वात् जलोपे साधुः ।) किञ्जल्कम् । इति राजनिर्घण्टः ॥

किञ्जल्कः, पुं, (किञ्चित् जलं अत्र ।) किञ्जल्कः । इति शब्दरत्नावली ॥

किञ्जल्कं, क्ली, (किञ्चित् जलति । जल् अपवारणे + बाहुलकात् कः ।) नागकेशरपुष्पम् । पद्माभ्यन्तरस्थं केशाकारं करहाटकवेष्टनम् । केसर इति ख्यातम् । (यथा, रघुः १५ । ५२ ।
"स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतप्रश्रु करणेनालादपातयत्" ॥)
तत्पर्य्यायः । मकरन्दम् २ केशरम् ३ पद्मकेशरम् ४ किञ्जम् ५ पीतपरागम् ६ तुङ्गम् ७ चाम्पेयकम् ८ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कटुत्वम् । आस्यव्रणापहत्वम् । शिश्निरत्वम् । रुच्यत्वम् । पित्तदाहादिनाशित्वञ्च । इति राजनिर्घण्टः ।

किञ्जल्कः, पुं, (किम् + जल + बाहुलकात् कः ।) केशरः । इत्यमरः । १ । १० । ४७ ॥ पद्मकेशरः ।
तत्पर्य्यायगुणाः ।
"किञ्जल्कः केशरः प्रोक्तश्चाम्पेयश्चापि स स्मृतः ।
किञ्जल्कः शीतलो रूक्षः कषायोग्राहकोऽपि सः ॥
कफपित्तदाहरक्तार्शोविषशोथजित्" ।
इति भावप्रकाशः । (वैद्यचक्रपाणिसंग्रहे रक्तपित्ताधिकारे दूर्व्वादितैले व्यवहारो यथा,—
"दूर्व्वासोत्पलकिञ्जल्कमञ्जिष्ठासैलवालुकाः" ॥)

किट गतौ । भयभीषयोः । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं अकच्च-सेट् ।) भीषा स्वतो भयोत्पादना । केटति जनो व्याघ्रो जनं भीषयतीत्यर्थः । इति दुर्गादासः ॥

किटिः, पुं, (केटति शत्रुं प्रति वेगेन गच्छति मलादीनुद्दिश्य गच्छति वा । किट्-गतौ इन् इगुपधात् कित् च ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किटिभः, पुं, (किटिरिव भाति । भा + कः ।) केशकीटः । इति हेमचन्द्रः । उकुण इति भाषा ॥

किट्ट, क्ली, (केटति लोहादिधात्ववयवात् निर्गच्छतीति । गत्यर्थेतिक्तः । आगमशास्त्रस्यानित्यत्वात् नेट् ।) मलः । इत्यमरः । ६ । २ । ६५ ॥
(यदुक्तं चिन्तामणौ ।
"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्" ॥
अस्य कस्यापि असारांशे । यथा,—)
"आहारस्य रसः सारः सारहीनो मलद्रवः ।
शिराभिस्तज्जलं नीतं वह्निं मूत्रत्वमाप्नुयात् ॥
श्लेष्मं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किट्टवर्ज्जितं, क्ली, (किट्टेन मलेन वर्ज्जितम् ।) शुक्रम् । इति हेमचन्द्रः ॥

किट्टालः, पुं, (किट्टेन मलेन अलति पर्य्याप्नोति । अल + अच् ।) ताम्रकलसः । लोहगूथकम् इति मेदिनी ॥

किणः, पुं, (कण् गतौ + अच् । पृषोदरादित्वात् अत इत्वम् ।) मांसग्रन्थिः । निर्घर्षणजव्रणचिह्नम् । इति क्षिप्रादिसंग्रहे अमरभरतौ । कड़ा इति भाषा ॥ (यथा, रघुवंशे । १६ । ८४ ।
"तदेतदाजानुविलम्बिना ते
व्यायामरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमे-
रर्द्धं तु योगं पुनरंसलेन" ॥
यथा च—वाभटे उत्तरस्थाने ३७ अध्याये ॥
"राजकोषातकी मूलं किणो वा मथितोद्भवः" ॥)
घुणः । इति हारावली ॥

किणिः, स्त्री, (किणाय तन्निवृत्तये प्रभवति । बाहुलकात् इन् ।) अपामार्गः । इति शब्दरत्नावली ।
(अपामार्गशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

किणिही, स्त्री, (किणाः अस्त्यस्मिन् अस्य वा इति इनिः । किणिनो व्रणान् हन्ति । हन् + डः गौरादित्वात् ङीष् ।) अपामार्गवृक्षः । इत्यमरः । २ । ४ । ८६ । (यत्रास्य व्यवहारस्तद्यथा,—
"रसं शिरीषो किणिही पारिभद्रककेम्बुकात्" ॥
इति वाभटे चिकित्सास्थाने २१ अध्याये ॥
अस्याः पर्य्यायो यथा,—
"अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किण्वं, क्ली, (कण + "उल्यादयश्च" । उणां ४ । ९५ इति साधुः । यद्वा "अप्रूपुषि लटीति" । उणां १ । १५१ । इति क्वन् बाहुलवचनादित्वम् ।) सुराबीजम् । (यथा, मनुः । ८ । ३२६ ।
"सूचकार्पासकिण्वानां गोमयस्य गुड़स्य च" ॥)
पापम् । इति मेदिनी ॥

किण्वः, पुं, क्ली, (कण् + "अप्रूपुषीति" उणां १ । १५१ । इति क्वन् बाहुलवचनादित्वम् ।) सुराबीजम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥

कित संज्ञाने । इच्छायां । वासे । आरोग्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकच्च-सेट् ।) विचिकित्सति मनः सञ्जेते इत्यर्थः । आरोग्ये चिकित्सत्यातुरं वैद्यः । इच्छानिवासयोस्तु केततीति वोपदेवः ॥ तत्र तिवादयो न प्रयुज्यन्ते । इति रमानाथः ॥ इति न वनितामेतां हन्तुं मनो विचिकित्सते । इति तु ण्यन्तभूतज्ञार्थतया कर्म्मकर्त्तरि सनन्तण्यन्तस्यइत्यादिना यक्निषेधे सिद्धम् । इति दुर्गादासः ॥

कित र लि मतौ । इति कविकल्पद्रुमः ॥ (क्रादिपरं-सकं-सेट् ।) र वैदिकः । लि चिकेत्ति । इति दुर्गादासः ॥

कितवः, पुं, (कितं वायति कितेन वाति वा । कित + वा + कः ।) अक्षदेवी । (यथा, मनुः । ३ । १५१ ।
"जटिलञ्चानधीयानं दुर्ब्भलं कितवन्तथा ।

याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत्"।) धुस्तूरः। इत्यमरः। २। ४। ७७॥ ("कितवाङ्गप्रयोर्वीजं नागरं सहरीतकम्। चूर्णीकृत्यार्द्धकरसैः" ॥ इति वैद्यककषायसंग्रहे कासाधिकारे शृङ्गभरीगुड़िकायाम्॥) मत्तः। वञ्चकः। इति मेदिनी॥ (यथा, भागवते। ८। २०। ३। "स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम्। प्रतिश्रुत्य ददामीति प्राक्फादिः कितवो यथा" ॥ धूर्त्तः। यथा, आर्य्यासप्तशती ३३। "अस्थिररागः कितवो मानी चपलो विदूषककल्प-मसि। मम सख्याः पतसि करे पश्यामि यथा ऋजुर्भवसि"॥) खलः। इति शब्दरत्नावली॥ (यथा महाभारते। १। १। १५६। "यदाश्रौषं वाससां तत्र राशिं समाक्षिपत् कितवो मन्दबुद्धिः" ॥) रोचननामगन्धद्रव्यम्। इति जटाधरः राज-निर्घण्टश्च॥

किन्तनुः, पुं, (किं कुत्सिता तनुरस्य।) अश्वपादः। इति चिकाण्डशेषः। माकड़सा इति भाषा॥

किन्तमाम्, व्य, (कुत्सितार्थे किम्। बहूनां मध्ये एकस्य अतिशये तमप्। "किमेत्तिङव्ययेति"। ५। ४। ११। इति आमुः।) एतैकतमम्। इति शब्दरत्नावली। इदमेषामतिशयेन किम्। इति व्याकरणम्॥

किन्तरां, व्य, (द्वयोर्मध्ये एकस्यातिशये तरप् आमुश्च।) एतैकतरम्। इति शब्दरत्नावली। इदमनयो-रतिशयेन किम्। किम् शब्दोऽत्र कुत्सार्थः। अतिकुत्सितं रूपमित्यर्थः। इति मुग्धबोध-टीकायां दुर्गादासः॥

किन्तु, व्य, (किं च तु च इति द्वन्द्वसमासः।) किं-स्वनुः। प्रागुक्तविरुद्धार्थम्। यथा,— "भृत्याभावे भवति मरणं किन्तु सम्भावितानाम्"। इति प्राचीनाः॥

किन्तुघ्नः, पुं, ववाद्येकादशकरणान्तर्गतशेषकरणम्। इति दीपिका॥ तत्र जातफलम्। "मिथामित्रे नैव किञ्चित् विशेषो धर्म्माधर्म्मे तुल्यता मानवस्य। स्तोत्रे वादे सर्व्वदा प्रीतियुक्तः किन्तुघ्नाख्ये यस्य नूनं जनिः स्यात्"॥ इति कोष्ठीप्रदीपः॥

किन्धी, [न्] पुं, (किं कुत्सिता धीरस्यस्य। इनिः।) अश्वः। इति चिकाण्डशेषः॥

किन्नरः, पुं स्त्री, (किं कुत्सितो नरः। अश्वमुखत्वा त्तथात्वम्।) खनामख्यातदेवयोनिः। स तु अश्वमुखत्वात् कुत्सितनरः स्वर्गगायकः तुम्बुरु-प्रभृतिः। तत्पर्य्यायः। किम्पुरुषः २ तुरङ्गवदनः ३ मयुः ४। इत्यमरः। १। १। ७४॥ अश्वमुखः ५ गीतमोदी ६ हरिणान्तर्त्तकः ७। इति शब्दरत्नावली॥ (यथा,— "राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा। यक्षाश्च मनुजश्रेष्ठ! पुत्रास्तस्य च धीमतः" ॥

इति महाभारते। १। ६६। ७॥) अर्हदुपासकविशेषः॥ इति हेमचन्द्रः॥

किन्नरेशः, पुं, (किन्नराणां ईशो राजा।) कुबेरः। इत्यमरः। १। १। ७२॥

किन्नरेश्वरः, पुं, (किन्नराणां ईश्वरः।) कुबेरः। इति हलायुधः॥

किम्, व्य, (किं च नु च। इति द्वन्द्वसमासः।) प्रश्नः॥ (यथा हेः रामायणे। २। ७४। ३। "किन्न तेऽदोषयद्राजा रामो वा भ्रष्टधार्म्मिकः। ययोर्भ्रष्टयुर्विवासश्च त्वत्कृते तुल्यमागतौ" ॥) वितर्कः। (यथा शकुन्तलायां १ अङ्के। "किन्नु खलु यथा वयमस्यामेवमियमस्मान् प्रति स्यात्" ॥) स्थानम्। सादृश्यम्। करणम्। इति जटाधरः॥

किम्, व्य, (कु + बाहुलकात् डिम्।) कुत्सा। (यथा गोः रामायणे। १। २२। २१। "देवदानवगन्धर्व्वा यक्षाः पतगपन्नगाः। न शक्ता रावणं सोढुं किं पुनर्मानवा युधि" ॥) वितर्कः। (यथा, हितोपदेशे। "किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञा-स्यामि तावत्" ॥) निषेधः। प्रश्नः। इतिमेदिनी॥

किम्, चि, क्षेपः। वितर्कः। निन्दा। परिप्रश्नः। इति मेदिनी॥ (यथा, मनुः ११। १६५। "प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किम्"॥ किमपि अनिर्व्वचनीयम्। यथा, विष्णुपुराणे १। १६। ७५। "तस्माच्च सूक्ष्मादिविशेषाणां अगोचरे यत् परमात्मरूपम्। किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय"॥)

किमिच्छकः, पुं, (किमिच्छसीति प्रश्नेन दानार्थं का-यति शब्दायतेऽत्र। निपातनात् साधुः।) व्रत-विशेषः। तद्विवरणं यथा,— मार्कण्डेय उवाच। "अथ साऽवोचितो माता वीरा वीरप्रजावती। पुण्येऽहनि समाहूय प्राह पुत्रमवोचितम्॥ पुत्राहमभ्यनुज्ञाता तव पित्रा महात्मना। उपवासं करिष्यामि दुष्करोऽयं किमिच्छकः॥ स चायत्तस्तव पितुस्त्वया साधो मयापि वा। प्रतिज्ञाते त्वया पुत्र! ततस्तत्र यताम्यहम्॥ द्रव्यमाहृत्य महाकोषात् तव दास्याम्यहं पितुः। धनं ते पितुरायत्तमनुज्ञातासि तेन च॥ क्लेशसाध्यो ममायत्तः स हि श्रेयो भविष्यति। साध्यो भविष्यो यदि ते कश्चिद्बलपराक्रमैः॥ स ते साध्योऽन्यथा वापि दुःखसाध्यो भविष्यति। तत्त्वं प्रतिज्ञां कुरुषे यदि पुत्रात्र वै व्रते॥ तदेतदहमारप्ये कथयतां यन्मतं तव। अवोचिदुवाच। वित्तं मे पितुरायत्तं ममेशत्वं न तत्र वै। यन्मच्छरीरनिष्पाद्यं तत् करिष्ये त्वयोदितम्॥ किमिच्छकं व्रतं मातर्निश्चित्य भव निर्व्यथा। राज्ञा पित्राभ्यनुज्ञातं यदि वित्तेश्वरेण मे॥

मार्कण्डेय उवाच। ततः सा राजमहिषी तद्व्रतं समुपोषिता। यथोक्तं साऽकरोत् पूजां राजराजस्य संयता॥ निधीनामप्यशेषाणां निधिपालबलस्य च। लक्ष्म्याश्च परया भक्त्या यतवाक्कायमानसा॥ विविक्ते तु गृहान्तःस्थः सोऽथ राजा करन्धमः। आसीन उक्तः सचिवैर्नीतिशास्त्रविशारदैः॥ सचिवा ऊचुः। राजन् वयःपरिणतं तवैवं शासतो महीम्। एकस्ते तनयोऽवोचित् व्यक्तदारपरिग्रहः॥ अपुत्रः स वने निष्ठां यदा भूप! गमिष्यति। तदारिपक्षं पृथिवी निश्चितं तव यास्यति॥ वंशस्तवास्ते भविता पिण्डपिण्डोदकक्षयः। एतन्महत्ते विवरं क्रिया हान्या भविष्यति॥ तस्मात् कुरु तथा भूप! यथा ते तनयः पुनः। करोति सततं बुद्धिं पितॄणामुपकारिणीम्॥ श्रीमार्कण्डेय उवाच। एतस्मिन्नन्तरे शब्दं शुश्राव जगतीपतिः। पुरोहितस्य वीराया गदतोऽर्थिजनं प्रति॥ कः किमिच्छति दुःसाध्यं कस्य किं साध्यतामिति। करन्धमस्य महिषी किमिच्छकमुपोषिता। राजपुत्रोऽप्यवोचित्तु श्रुत्वा पौरोहितं वचः। प्रत्युवाचार्थिनः सर्व्वान् राजद्वारमुपागतान्॥ मया साध्यं शरीरेण यस्य किञ्चित् ब्रवीतु सः। मम माता महाभागा किमिच्छकमुपोषिता॥ गृह्णन्तु मेऽर्थिनः सर्व्वे प्रतिज्ञातं मयाच च। किमिच्छथ ददाम्येष क्रियमाणे किमिच्छके॥ मार्कण्डेय उवाच। ततो राजा निशम्यैतत् वाक्यं पुत्रमुखाच्युतम्। समुपेत्याब्रवीत् पुत्रमहमर्थी प्रयच्छ मे॥ अवोचिदुवाच। दातव्यं यन्मया तात! भवते तद्ब्रवीहि माम्। कर्त्तव्यं दुष्करं वा ते साध्यं दुःसाध्यमेव च॥ राजोवाच। यदि सत्यप्रतिज्ञत्वं ददासि च किमिच्छकम्। पौत्रस्य दर्शय मुखं ममोत्सङ्गगतस्य तत्॥ अवोचिदुवाच। अहं तवैव तनयो ब्रह्मचर्य्यञ्च मे नृप!। न मे पुत्रोऽस्ति पौत्रस्य दर्शयामि कथं मुखम्॥ राजोवाच। पापाय ब्रह्मचर्य्यं ते यदिदं धार्य्यते त्वया। तस्मात्त्वं मोचयात्मानं मम पौत्रं प्रदर्शय॥ अवोचिदुवाच। विरमास्मान्महाराज! यदन्यत्तत् समादिश। वैराग्येण मया त्यक्तः स्त्रीसम्भोगस्तथा रसः॥ राजोवाच। बहुभिर्युध्यमानस्य न दृष्टो वैरिभिर्जयः। तत्रापि यदि वैराग्यमुपैषि तदपण्डितः॥ किं वा नो बहुनोक्तेन ब्रह्मचर्य्यं परित्यज। मातुस्त्वमिच्छया वत्स! पौत्रस्य मम दर्शय॥ मार्कण्डेय उवाच। यदा स बहुशस्तेन प्रोक्तः पुत्रेण पार्थिवः।

कियत्

नान्यत् प्रार्थयते किञ्चित् तदा पुत्रोऽब्रीत् पुनः ॥
दत्त्वा किमिच्छकं तुभ्यं प्राप्तोऽहं तात! सङ्कटम् ।
तत् करिष्यामि निर्लज्जोभूयो दारपरिग्रहम् ॥
स्त्रिशः समस्तं विजितः पतितो धरणीतले ।
स्त्रीपतिर्भविता भूयस्तातैतदतिदुष्करम् ॥
तथापि किं करोम्येष सत्यपाशावशङ्कतः ।
करिष्यामि यथात्थ त्वं भुज्यतां निजशासनम्" ॥
इति श्रीमार्कण्डेयपुराणे अवीक्षिच्चरितनामाध्यायः ॥

किमु, अ, (किम् च उच इति द्वन्द्वसमासः ।) सम्भावना । विमर्षः । इति मेदिनी ॥ (यथा,—
"निर्व्वाणदीपे किमुतेलदानं" इति शिशुपालोक्तिः ॥)

किमुत, अ, (किम् च उत् च इति द्वन्द्वसमासः ।) प्रश्नः । वितर्कः । विकल्पः । अतिशयः । इति मेदिनी ॥

किम्पचः, त्रि, (किं कुत्सितं अतिथ्यादिभ्योऽप्रदाय केवलं स्वोदरमात्रपूरणायैव पचतीति । किम्+पच्+अच् ।) किम्पचानः । इत्यमरटीकायां रायमुकुटः ॥

किम्पचानः, त्रि, (किं कुत्सितं कस्मैचिदपि न दत्त्वा केवलं आत्मार्थं पचतीति । पच्+आनच् ।) कृपणः । इत्यमरः । ३ । १ । ८८ ॥

किम्पाकः, त्रि, (किं कथमपि पाकः शिक्षाप्रकारो यस्य ।) माढशासितः । इति जटाधरः ॥

किम्पाकः, पुं, (कुत्सितः पाकः परिणामो यस्य ।) महाकाललता । इति रत्नमाला । माकाच इति भाषा ॥ (यथा, हैः रामायणे २ । ६६ । ६ ।
"न लुब्धो बुध्यते दोषान् किम्पाकमिव भक्षयन्" ॥
महाकालशब्देऽस्य विवरणं बोद्धव्यम् ॥)

किम्पुरुषः, पुं, (कुत्सितः पुरुषः ।) किन्नरः । इत्यमरः । १ । १ । ७४ । (यथा, कुमारे ३ । ३८ ।
"पुण्यासवाघूर्णितनेत्रशोभि
प्रियासुखं किम्पुरुषश्चुचुम्बे" ॥)
लोकभेदः । इति मेदिनी ॥(अग्निध्रस्य नवपुत्राणामेकः । यथा, विष्णुपुराणे २ । १ । १६, १९ ।
"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम! ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषस्चैव हरिवर्षः इलावृतः" ।
"हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः" ।
किंपुरुष इति संज्ञा यस्य वर्षस्य ।) जम्बूद्वीपस्य नवखण्डान्तर्गतं हिमाचलहेमकूटयोर्मध्यवर्त्ति वर्षम् । इति श्रीभागवतम् ॥ कुत्सितपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥

किम्पुरुषेश्वरः, पुं, (किम्पुरुषाणां ईश्वरः शास्ता राजा वा ।) कुबेरः । इति हेमचन्द्रः ॥

किम्पुरुषं, क्ली, (किम्पुरुष इत्याख्या यस्य वर्षस्य ।) किम्पुरुषवर्षम् । इति त्रिकाण्डशेषः ॥

किम्भरा, स्त्री, (किञ्चित् बिभर्त्ति । किम्+भृ+अच् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कियत्, त्रि, किम्परिमाणमस्य ("किमिदंभ्यां वो घः" । ५ । २ । ४० । इति वतुप् । किमः क्यादेशः । वस्य घः ।) कियत् परिमाणम् ॥ कतो इति भाषा ॥

किरात

("गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा" ॥
इति साहित्यदर्पणम् ॥)

कियदेतिका, स्त्री, उत्साहः । उद्योगः । इति हेमचन्द्रः ॥

कियाहः, पुं, (कियान् रक्तवर्णः हयः । एषोदरादित्वात् निपातनात् साधुः ।) रक्तवर्णघोटकः । इति हेमचन्द्रः ॥

किरः, पुं, (किरति विक्षिपति मलोपलक्षितस्थलम् । कॄ+कः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरकः, पुं, (किरति लिखतीति । कॄ+ण्वुल् ।) लेखकः । इति त्रिकाण्डशेषः ॥

किरणः, पुं, (कीर्य्यन्ते विक्षिप्यन्ते रश्मयः अस्मात् "कॄपॄवृजिमन्दिनिधाञः क्युः" । उणां २ । ८१ । इति क्युः ।) सूर्य्यः । इति हेमचन्द्रः ॥ (कीर्य्यते परितः क्षिप्यतेऽसौ । कॄ+कर्मणि क्युः ।) सूर्य्यरश्मिरिति भगीरथमाधवौ ॥ चन्द्रसूर्य्ययोरश्मिरिति रायमुकुटः ॥ रत्नरश्मौ गभस्तिशब्दप्रयोगात् सामान्यरश्मिः । तथा च भट्टिः । १ । ६ ।
"ऊर्ज्जस्करत्नगभस्तिभिर्या" । इति मल्लरी ।
इत्यमरटीकासारसुन्दरी ॥ तत्पर्य्यायः । अंशुः २ मयूखः ३ अंशुः ४ गभस्तिः ५ हृणिः ६ हृणिः ७ भानुः ८ करः ९ मरीचिः १० दीधितिः ११ । इत्यमरः । १ । ४ । ३३ ॥ त्विट् १२ द्युतिः १३ आभा १४ प्रभा १५ विभा १६ रुक् १७ रुचिः १८ भाः १९ रुविः २० दीप्तिः २१ रश्मिः २२ अभीषुः २३ महः २४ ज्योतिः २५ सहः २६ रोचिः २७ शोचिः २८ त्विषा २९ दृष्टिः ३० प्रकाशः ३१ आतपः ३२ द्योतः ३३ । इति शब्दरत्नावली ॥ पादः ३४ आलोकः ३५ वसुः ३६ ऋषिः ३७ भामः ३८ घर्म्मः ३९ लोकः ४० अर्चिः ४१ भासः ४२ वीचिः ४३ हेतिः ४४ धाम ४५ वर्चः ४६ शुभ्र ४७ तेजः ४८ ओजः ४९ । इति जटाधरः ॥ (यथा, रघुवंशे ५ । ७४ ।
"भवति विरलभक्तिर्च्छानपुष्योपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदोषाः" ॥)

किरणमाली, [न्] पुं, (किरणानां माला अस्यास्य । किरणमाला+इनिः ।) सूर्य्यः । इति हारावली ॥

किरातः, पुं, (किरं शूकरादिकं अतति सततं अटतीति । अत+अण् । यद्वा किरं शूकरादिकं अतति हिनस्तीति । अच् ।) म्लेच्छभेदः ॥ (निषादः । यथा, किराते १२ । ५५ ।
"कच्छान्ते सुरसरितो निधाय सेना-
मन्वीतः स कतिपयैः किरातवर्य्यैः" ॥)
भूनिम्बः । (यथा, शार्ङ्गधरे मध्यखण्डे २ अः । १७ श्लोके ।
"पर्पटाब्दामृताविश्वकिरातैः साधितं जलम् ।
पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम्" ॥)
अल्पतनुः । इति मेदिनी ॥ घोटकरक्तकः । इति शारस्वतः ॥

किरातकः, पुं, (किरात एव । स्वार्थे कन् ।) भूनिम्बः इति राजनिर्घण्टः ॥

किराततिक्तः, पुं, (किरातः भूनिम्बस्तद्वत् तिक्तः ।)

किरिटी

कटुविशेषः । चिरात इति भाषा । तत्पर्य्यायः । भूनिम्बः २ अनार्य्यतिक्तः ३ । इत्यमरः । २ । ४ । १४३ ॥ कैरातम् ४ काण्डतिक्तकः ५ । इति रत्नमाला ॥ किरातकः ६ इति जटाधरः ॥ चिरतिक्तः ७ चिरातिक्तः ८ तिक्तकः ९ सुतिक्तकः १० । इति शब्दरत्नावली ॥ कटुतिक्तः ११ रामसेनकः १२ ॥ अस्य गुणाः । वायुवृद्धिकारित्वम् । रूक्षत्वम् । कफपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥
"किरातकोऽन्यो नैपालः सार्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
काश्यशोथव्रणाकुष्ठज्वरव्रणकृमिप्रणुत्" ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ भूनिम्बशब्दे द्रष्टव्यौ ॥
("किराततिक्तममृतां ब्राह्मामामलकीं शठीं ।
निष्काथ्य पित्तानिलजे क्वाथन्तं सगुडं पिबेत् ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ।)

किरातादी, [न्] पुं, (किरातान् निषादान् अत्तीति । अद भक्षणे+णिनिः ।) गरुडः । इति शब्दरत्नावली ॥ (अस्य विवरणं यथा महाभारते १ । २८ अध्याये ।
"इत्युक्तो गरुडः सर्व्वमातरमब्रवीत् ।
गच्छाम्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम् ॥
विनतोवाच ।
समुद्रकुक्ष्यावेकान्ते निषादालयमुत्तमम् ।
निषादानां सहस्राणि तान् भुक्त्वाऽमृतमानय ।
नच ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन" ॥)

किरातिः, स्त्री, (किरेण शूकरेण समन्तात् जलक्षेपेण अतति गच्छतीति । अत+इन् ।) गङ्गा । इति जटाधरः ॥

किरातिनी, स्त्री, (किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्याः । इनिः । ङीप् ।) जटामांसी । इति शब्दरत्नावली ॥ (जटामांसीशब्देऽस्या गुणादिविषयो ज्ञेयः ॥)

किराती, स्त्री, (किराति+वा ङीष् ।) दुर्गा । गङ्गा कुट्टिनी । इति मेदिनी ॥ स्वर्गगङ्गा । इति शब्दमाला ॥

किरिः, पुं, (किरति समस्तभूमिम् । "कॄगॄशॄपॄकुटिभिदिच्छिदिभ्यः" । उणां ४ । १४२ । इति इप्रत्ययः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरिटि, क्ली, (किरिणा शूकरेण टल्यते विक्षिप्यते । टल विक्षेपे+डिः ।) छिन्नालपलम् । इति त्रिकाण्डशेषः ॥

किरीटः, पुं क्ली, (किरति कीर्य्यतेऽनेन वा । "कॄगॄशॄभ्यः कीटन्" । उणां ४ । १८४ इति कीटन् ।) मुकुटः । इत्यमरः । २ । ६ । १०२ ॥

किरीटी, [न्] पुं, (किरीटोऽस्यास्य । किरीट+इनिः ।) अर्জ্জुनः । इति त्रिकाण्डशेषः । (यथा, महाभारते । ४ । ४२ । १७ ॥
"पुरा शक्रेण मे दत्तं युध्यतो दानवर्षभैः ।
किरीटं मूर्द्धि सूर्य्याभं तेनाऽहमपि किरीटिनम्" ॥)
किरीटयुक्ते त्रि । (यथा भगवद्गीतायां ११ । १७ ।
"किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं सर्व्वतो

दीप्तिमन्तम्। पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्" ॥)

किम्मी, स्त्री, (कुत्सितं मीयते परिच्छिद्यते अनेन इति कुत्सा + कि + निपातनात् मुट्। ततो ङीप्।) पलालः। गृहम्। स्वर्णपुत्तलिका। इति मेदिनी ॥ लोहपुत्तलिका। इति विश्वः ॥

किम्मीरः, पुं, (कुत्सितो मीरः हिंसा यस्मात् कुत्सा + गम्भीरादित्वात् ईरन् निपातनात् साधुः।) नागरङ्गवृक्षः। राक्षसविशेषः। (यथा महाभारते ३। ११। २२।

"प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्।
अहं वकस्य वै भ्राता किम्मीर इति विश्रुतः" ॥)
कर्व्वूरवर्णः। इति मेदिनी ॥ तद्वर्णयुक्ते त्रि। इत्यमरः। १। ५। १७ ॥

किम्मीरजित्, पुं, (किम्मीरं जितवान्। जि + भूते क्विप्।) भीमसेनः। इति त्रिकाण्डशेषः ॥ (किम्मीरवधकथा महाभारते ३। ११ अध्याये उक्ता। तद्यथा,—

"प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्।
अहं वकस्य वै भ्राता किम्मीर इति विश्रुतः ॥
वनेऽस्मिन् काम्यके शून्ये निवसामि गतज्वरः।
युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ॥
के यूयमभिसंप्राप्ता भक्ष्यभूता ममान्तिकम्।
युधि निर्जित्य वः सर्व्वान् भक्षयिष्ये गतज्वरः" ॥
वैशम्पायन उवाच।
"युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः।
आचचक्षे ततः सर्व्वं गोत्रनामादि भारत!" ॥
"किम्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम।
उपपादितमद्येह चिरकालान्मनोगतम् ॥
भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः।
चरामि पृथिवीं कृत्स्नां नैनञ्चासादयाम्यहम् ॥
सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितस्त्वित्।
अनेन हि मम भ्राता वको विनिहतः प्रियः ॥
वेत्रकीयगृहे राजन्! ब्राह्मणच्छद्मरूपिणा।
विद्याबलमुपाश्रित्य न ह्यस्यस्यौरसं बलम्" ॥
"यदितेन पुरा मुक्तो भीमसेनो वकेन वै।
अद्येनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर!" ॥
"एवमुक्तस्तु धर्म्मात्मा सत्यसन्धो युधिष्ठिरः।
नैतदस्तीति संक्रुद्धो भर्त्सयामास राक्षसम् ॥
ततो भीमो महाबाहुरारुह्य तरसा द्रुमम्।
दशव्यामसमोद्विद्धं निष्पत्रमकरोत्तदा" ॥
"किम्मीरस्यापि सहसा रक्षमुत्पाट्य पाण्डवम्।
दण्डपाणिरिव क्रुद्धः समये प्रत्यधावत" ॥
"तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम्।
उभावपि चकाशेते प्रवृद्धौ दृषभाविव ॥
तयोरासीत्सुतुमुलः संप्रहारः सुदारुणः।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दीप्तयोः" ॥
"तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा।
शब्दः समभवद्घोरो वेणुस्फोटसमो युधि ॥
अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ॥
स भीमेन परामृष्टो दुर्ब्बलो बलिना रणे।
व्यसृजत यथा प्राणं विचकर्ष च पाण्डवम् ॥
तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः।
योक्त्रयामास बाहुभ्यां पशुं रसनया यथा ॥
विनदन्तं महानादं भिन्नभेरीस्वनं बली।
भ्रामयामास सुचिरं विष्फुरन्तमचेतनम् ॥
तं विसीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ॥
अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्।
भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह ॥
हिडिम्बवकयोः पाप! न त्वमश्रुप्रमार्जनम्।
करिष्यसि गतस्यापि यमस्य सदनं प्रति ॥
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तं राक्षसं क्रोधपरीतचेताः।
विसृज्य वस्त्राभरणं स्फुरन्त-
मुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज" ॥ * ॥)

किम्मीरत्वक् [च्] स्त्री, (किम्मीरा चित्रा त्वक् यस्य।) नागरङ्गवृक्षः। इति त्रिकाण्डशेषः ॥ (नागरङ्गनागरङ्गशब्दयोरस्य गुणादयो बोध्याः ॥)

किम्मीरभित् [द्] पुं, (किम्मीरं राक्षसविशेषं भिन्नवान्। भिद् + क्विप् भूते।) भीमसेनः। इति भूरिप्रयोगः ॥ (अस्य विवरणं किम्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किम्मीरसूदनः, पुं, (किम्मीरं सूदयति हन्तीति। सूद + णिच् + ल्युः। कर्त्तृविवक्षावशात् क्वचिद् भूतार्थे वा।) भीमसेनः। इति हेमचन्द्रः ॥ (अस्य विवरणं किम्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किल क तुदौ। इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्।) क केलयति। तुदिरिति गुद क्रीड् प्रेरणे इत्यस्य क्रीडादिकक्विप्प्रत्यये रूपम्। इति दुर्गादासः ॥

किल प्र प्रौक्षो। क्रीडे। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) प्र किलति प्रासादः शिशुर्वा। केलिता। इति दुर्गादासः ॥

किल, व्य, (किल + कः।) वार्त्ता। सम्भाव्यम्। इत्यमरः। ३। ३। २५३ ॥ निश्चयः। इति तट्टीकासारसुन्दरी ॥ (यथा शाकुन्तले १ अङ्के दुष्मन्तोक्तिः।

"इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति" ॥)
अनुनयार्थम् इति मेदिनी ॥

किलकिञ्चितं, क्ली, (किल अलीकेन किं ईषत् चितं रचितम्।) भावः। पुष्पकारभावजा क्रिया। इति जटाधरः ॥ तस्य लक्षणम्।
यथा, अलङ्कारकौस्तुभे।
"गर्व्वाऽभिलाषरुदितस्मितासूयाभयक्रुधाम्।
सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितम्" ॥
(तथा च साहित्यदर्पणे ३। १०९।
"स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम्।
साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाड्यार्त्ता" ॥
उदाहरणं तत्रैव यथा,—

"पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः।
कामिनः स्म कुरुते करभोरु
हारिमुग्धरुदितञ्च सखेऽपि" ॥)

किलकिला, स्त्री, (किल + कः। प्रकारे वीप्सायां वा द्वित्वम्। स्त्रियां टाप्।) हर्षध्वनिः। किलकिलशब्द इति यावत्। तत्पर्य्यायः। हर्षस्वनः २। इति त्रिकाण्डशेषः ॥

("आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे"। इति महाभारते १। ६९। ६ ॥)

किलाटः, पुं, क्षीरविक्रृतिः। इति जटाधरः ॥ दधिकूर्चिकातक्रकूर्चिकयोः पिण्डः। अस्य गुणाः। शीतत्वम्। स्निग्धत्वम्। गुरुत्वम्। गौल्यत्वम्। हृद्यत्वम्। पित्तापहत्वञ्च। इति राजनिर्घण्टः ॥

("नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः"। इति भावप्रकाशः। तथा चरके सूत्रस्थाने। २७ अध्याये ॥

"पीयूषो मोरटश्चैव किलाटो विविधाश्च ये।
दीप्ताग्नीनामनिद्राणां सर्व्वे ते सुखप्रदाः ॥
गुरवस्तर्पणा हृद्या बृंहणाः पवनापहाः" ॥
अस्योत्पत्तिविवरणं यथा भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ किलाटकः गिजिरी इति लोके।
"अपक्वमेव यन्नष्टं क्षीरशाकं हि तत्पयः"।
क्षीरशाकं तुधिभरा इति लोके।
"दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सवाससा।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥
नष्टदुग्धं भवेन्नीरं मोरटश्लेष्मलोऽब्रवीत्।
पेयूषश्च किलाटश्च क्षीरशाकं तथैव च ॥
तक्रपिण्डे इमे हृद्या बृंहणा बलवर्द्धनाः।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ॥
दीप्ताग्नीनां विनिद्राणां विदधौ चाभिपूजिताः।
सुखशोषहरादाहरक्तपित्तज्वरप्रणुत्" ॥)

किलाटी, स्त्री, (किलाट + गौरादित्वात् ङीष्।) क्षीरविक्रृतिः। तत्पर्य्यायः। कूर्चिका २। इति हेमचन्द्रः ॥ (कूर्चिकाशब्देऽस्या गुणपर्य्याया ज्ञातव्याः ॥)

किलाटी, [न्] पुं, (किलतीति। किल + घञ्। अट + णिनिः। ततः। किलश्चासौ आटी चेति कर्म्मधारयः। यद्वा किलमटतीति।) वंशः। इति हारावली ॥ बाँश् इति भाषा ॥

किलासं, क्ली, (किलं वर्णं श्यसति क्षिपति विक्रृतिं करोति इति यावत्। किल + श्यस + "कर्म्मण्यण्" ३। २। १। इति अण्।) रोगविशेषः। कुष्ठी इति भाषा। तत्पर्य्यायः। सिध्मा २। इत्यमरः। २। ६। ५३ ॥ सिध्म ३। इति भरतः ॥ लक्ष्मपुष्पम् ४ लक्ष्मपुष्पी ५। इति हेमचन्द्रः ॥

("कुष्ठैकसम्भवं स्निग्धं किलासं दारुणञ्च तत्।
निर्दिष्टमपरिस्रावि चिधातूद्भवसंश्रयम् ॥
वातादुच्चारुणं पित्तात्ताम्रं कफसमुद्भवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डु च क्रमाद्रक्तमांसमेदः सुचादिशेत्।
वर्णे नैवेदृगुभयं तच्छ्वेतोत्तरोत्तरम् ॥
अशुक्लरोमावद्धलमसंस्रष्टं मिथो गवम्।
अनग्निदग्धजं साध्यं स्निग्धं वर्ज्यमतोऽन्यथा" ॥

इति वाभटे निदानस्थाने १४ अध्याये ॥
अस्यौषधं यथा ॥
"कुष्ठं तमालपत्रं मरिचं समनःशिलं सकाशीशम्।
तैलेन युक्तमुचितं सप्ताहं भाजने ताम्रे ॥
तेनालिप्तं सिध्मं सप्ताहाद्येति तिष्ठतो घर्म्मे।
मासान्नवं किलासं स्नानं मुक्ता विशुद्धतनोः" ॥
इति सिध्मलेपः ॥*॥
"किलासहन्ता मूलान्यावल्गुजानि लाक्षा च।
गोपित्तमञ्जने द्वे पिप्पल्यः काललोहरजः" ॥
इति श्वित्रे प्रलेपः ॥
"दारुणं वारुणं श्वित्रं किलासं नामभिस्त्रिभिः।
विज्ञेयं त्रिविधं तच्च त्रिदोषं प्रायशश्च तत् ॥
दोषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते।
श्वेतं मेदः श्रिते श्वित्रं गुरुता चोत्तरोत्तरम्" ॥
असाध्यलक्षणमस्य यथा,—
"यत्परस्परतो भिन्नं बऊ यद्रक्तलोमवत्।
यच्च वर्षगणोत्पन्नं तत्क्वित्रं नैव सिध्यति" ॥
अस्य निदानं यथा,—
"वचांस्यतथ्यानि हृतप्रभावो
निन्दा सुराणां गुरुधर्षणञ्च।
पापक्रिया पूर्व्वकृतञ्च कर्म्म
हेतुः किलासस्य विरोधिचान्नम्" ॥
इति चरके चिकित्सास्थाने ६ अध्याये ॥)

किलासघ्नः, पुं, (किलासं हन्तीति। हन्+टक्।) वृक्षविशेषः। काँकरोल इति भाषा। तत्पर्य्यायः। कर्कोटकः २ तिक्तपत्रः ३ सुगन्धकः ४। इति हेमचन्द्रः ॥ (कर्कोटकशब्देऽस्य गुणपर्य्याया ज्ञेयाः ॥)

किलासी, [न्] त्रि, (किलासं अस्यास्तीति इनिः।) किलासरोगयुक्तः। तत्पर्य्यायः। सिध्मलः २। इत्यमरः। २। ६। ६१ ॥

किलिञ्जं, क्ली, (किल्यतेऽनेन। किल्+इन्। किलिं चिनोतीति। चि+डः। एषोदरात् साधुः।) सूक्ष्मदारु। इति जटाधरः ॥ किलिञ्जमिति च पाठः ॥

किलिञ्जः, पुं, (किलितो जायते। जन+डः। एषोदरादित्वात् सुम् च।) सूक्ष्मदारु। इति त्रिकाण्डशेषः ॥ (क्वचित् नपुंसकत्वमपि दृश्यते ॥)

किलिञ्जकः, पुं, (किलिञ्ज+स्वार्थे कः।) काशादिरज्जुः। येन कुसूलं वेष्ट्यते कुसूलञ्च मरायिरिति टीकान्तरम्। दृषदरचितटाटी इति ख्यात इत्यन्ये। इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः। कटः २। इत्यमरः। २। ६। २६ ॥

किलिञ्जं, क्ली, (किल+इमन्।) देवदारु। इति शब्दरत्नावली राजनिर्घण्टश्च ॥
("मरिचं पिप्पलीमूलं मगधागजपिप्पली।
सरलः किलिमं हिङ्गु भार्गीतेजोवतीत्वचौ" ॥
इति चरके कल्पस्थाने ७ अध्याये ॥)

किल्बिषं, क्ली, ("किलेर्वुक् च"। उणां १। ५१ इति टिषच् वुकागमश्च।) पापम्। अपराधः। इत्यमरः। ३। ३। २२२ ॥ (यथा गीतायां ३। १३।
"यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः" ॥)
रोगः। इति मेदिनी ॥

किल्वी, [न्] पुं, (किल्+भावे क्विप् ततोऽस्यर्थे वाऊलकात् विनिः।) घोटकः। इति त्रिकाण्डशेषः ॥

किशलं, क्ली पुं, (किञ्चित् शलति। शल चलने गतौ वा+अच् एषोदरादित्वात् मलोपः।) पल्लवः। इति शब्दरत्नावली ॥

किशलयं, क्ली पुं, (किञ्चित् शलति। शल चलने+वाऊलकात् कयन् प्रत्ययः एषोदरात् मलोपे साधुः।) पल्लवः। इति शब्दरत्नावली ॥
("कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किशलयरुचामाच्यधूमोद्गमेन" ॥
इति शाकुन्तले १माङ्कः। अत्र केचित् दन्त्यसकारमपि पठन्ति ॥)

किशोरः, पुं, (किञ्चित् शृणाति। शृ हिंसायाम्। "किशोरादयश्च"। उणाम्। १। ६६। इति ओरन्। निपातनात् साधुः।) अश्वशिशुः। ("किशोरं वड़वा यथा"। इति महाभारतम् ॥) तैल पर्णौषधिः। सूर्य्यः। तरुणावस्थः। स तु एकादशवर्षावधिषञ्चदशवर्षपर्य्यन्तवयस्कः। इति मेदिनी ॥ कैशोरावस्थायुक्ते वाच्यलिङ्गोऽपि ॥
(यथा, श्रीभागवतटीकायां स्वामिपादधृतवचनम्।
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" ॥)

किष्क क ङ वधे। इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट्।) मूर्द्धन्योपधः। क ङ किष्कयते। इति दुर्गादासः ॥

किष्किन्धः, पुं, (किं किं दधाति। धा+कः। पारस्कारादित्वात् पूर्व्वस्य किमो मलोपः सुट् षत्वञ्च निपातनात्।) ओड्रदेशस्थपर्व्वतविशेषः। तत्पर्व्वतगुहा च। इति शब्दरत्नावली ॥

किष्किन्धी, स्त्री, (किष्किन्ध+गौरादित्वात् ङीष्।) किष्किन्धपर्व्वतगुहा। इति शब्दरत्नावली ॥

किष्किन्थः,पुं,(किं किं दधातीति धा पारस्कारादिसुटि पूर्व्वमलोपे च स्वार्थे यत् प्रत्ययेन निपातनात् साधुः।) स्वनामख्यातपर्व्वतः। इति शब्दरत्नावली ॥

किष्किन्था, स्त्री, (किष्किन्थ+टाप्।) किष्किन्थपर्व्वतगुहा। इति शब्दरत्नावली ॥ सा तु पुरा वालिनामवानरराजधान्यासीत् श्रीरामचन्द्रस्तं हत्वा सुग्रीवाय तद्राजधानीं दत्तवान्। इति रामायणम् ॥

किष्किन्थाधिपः, पुं, (किष्किन्थाया अधिपः।) वालिनामवानरराजः। इति जटाधरः ॥ (सुग्रीवः। इति रामायणम् ॥)

किष्कुः, पुं स्त्री, (कै+मृगय्वादित्वात् कुः। पारस्कारादित्वात् सुटि षत्वे च निपातनात् साधुः।) वितस्तिः। द्वादशाङ्गुलिपरिमाणम्। प्रकोष्ठः। कफोणेरधोमणिबन्धपर्य्यन्तः। हस्तः। इति मेदिनी ॥ (यथा महाभारते २। १। १६।
"सर्व्वर्त्तुगुणसम्पन्नां दिव्यरूपां मनोरमाम्।
दशकिष्कुसहस्रां तां मापयामास सर्व्वतः" ॥)
कुत्सिते त्रि। इति विश्वो हेमचन्द्रश्च ॥

किष्कुपर्व्वा, [न्] पुं, (किष्कुमितं वितस्तिमितं हस्तमितं वा पर्व्व यस्य।) इक्षुः। वेणुः। मोटगल्लः। इति मेदिनी। नल इति भाषा ॥

किसलं, क्ली पुं, (किमीषत् सलति। सल गतौ+अच्। एषोदरादित्वात् मलोपे निपातनात् साधुः।) किसलयम्। इति शब्दरत्नावली भरतश्च ॥

किसलयं, क्ली पुं, (किञ्चित् ईषत् वा सलति। सल+वाऊलकात् कयन्। एषोदरात् मलोपे साधुः।) पल्लवः। इत्यमरः। २। ४। १४ ॥ स तु नवपत्रादियुक्तशाखाग्रपर्व्वणि नवपत्रस्तवकः इति मधुः। इति भरतः ॥ (यथा गोः रामायणे। ४। ५०। २८।
"तरुणादित्यसङ्काशान् रक्तैः किसलयैर्वृतान्।
जातरूपमयैश्चापि चरद्भिर्मत्स्यकच्छपैः" ॥)

कीकटः,पुं, (की ग्लपनेनैतुं वा कटति गच्छति धावति। की+कट्+अच्।) घोटकः। देशभेदः। इति विश्वः ॥ (यथा शक्तिसङ्गमतन्त्रे।
"चरणादिं समारभ्य गृध्रकूटान्तकं शिवे!।
तावत् कीकटदेशः स्यात् तदन्तर्मगधो भवेत्" ॥
वेहार इति ख्यातः। अत्र बुद्धः समजनि।
इति भागवतम्। १। ३। २४ ॥ अस्य कीकट इति पुरातननाम आसीत् ततो जरासन्धेन मगध इत्याख्या प्रदत्ता ॥ स्वनामख्यातः सङ्कटपुत्रः। यथा, भागवते ६। ६। ६।
"ककुभः सङ्कटस्तस्य कीकटस्तनयो यतः" ॥)

कीकटः, त्रि, (की कुत्सितं धनाभावात् कटति प्रकाशते। की+कट्+अच्।) निर्धनः। (की कुत्सितं कटति वर्षति ददाति अर्थिने कार्पण्यात् इति।) छत्रधरः। इति मेदिनी ॥

कीकटाः, पुं, (की कुत्सितं ईषत् वा कटति वर्षति येषु इन्द्रः। ईषद्वर्षतया तद्देशानां तथात्वम्। की+कट्+अधिकरणे अप्।) देशविशेषः। बऊवचनान्तशब्दोऽयम्। इति मेदिनी ॥ वेहार इति ख्यातः। इति केचित् ॥ (यथा, भागवते १। ३। २४ ॥
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" ॥
देशोऽयं कुत्सिताचारपरिपूर्णः। यथा, भागवते। ७। १०। १८।
"साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः" ॥)

कीकसं, क्ली, (की कुत्सितेन रक्तादिना देहाभ्यन्तरे कसति उत्पद्यते। की+कस+अच्।) अस्थि। इत्यमरः। २। ६। ६८ ॥ (अस्थिशब्दे विवरणं ज्ञातव्यम् ॥)

कीकसः, पुं, (की कुत्सितं यथा स्यात् तथा कसति। कस गतौ+अच्।) क्षुभिजातिः। इति मेदिनी ॥ कर्कशे त्रि। इति शब्दरत्नावली ॥

कीकसास्यः, पुं, (कीकसं अस्थि आस्येऽस्य।) पक्षी। इति हारावली ॥

कीकिः, पुं, (कीति शब्दं कायति। कै+वाऊलकात् डिः।) किकिः। चाषपक्षी। इत्यमरटीका ॥

कीचकः, पुं, (चीकयति शब्दायते। चीक मर्षणे "चीकयतेरादन्तविपर्य्ययश्च"। उणां ५। १६ इति वुन् आदन्तविपर्य्ययश्च।) अनिलयोगात् शब्दायमानवंशः। इत्यमरः। २। ४। १६१ ॥ सर-

न्मुकवंशजः । (यथा,कुमारे १ । ८ ।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन" ॥)
राक्षसविशेषः । इति शब्दरत्नावली ॥ दैत्यभेदः ।
रुद्रविशेषः । इति विश्वः ॥ नलः । इति राजनिर्घण्टः ॥ केकयराजपुत्रः । स च विराटराजस्य श्यालः सेनापतिश्च ॥ (यथा महाभारते ४ । कीचकवधपर्व्वणि १३ । ५ ।
"सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीड़ितः" ॥
अयन्तु छद्मवेशधारिणा विराटभवनस्थेन भीमसेनेन हतः । अस्य विवरणं महाभारते ४ पर्व्वणि १३ अध्यायमारभ्य द्रष्टव्यम् । देशविशेषः । तत्र बहुवचनान्तोऽयम् ॥ यथा,महाभारते १।१५७।२।
"मत्स्यान् चिरर्त्तान् पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान् प्रेक्षमाणाः सरांसि च" ॥)
कीचकजित्, पुं, (कीचकं जितवान् । जि + भूते क्विप् तुक् च ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ (पुराकिल दुरात्मा कीचकः विराटभवनस्थां सैरिन्ध्रीरूपधारिणीं द्रौपदीमकामयत । द्रौपदी तु तस्य कामुकस्य दुरभिसन्धिं विज्ञाय तं बहुल कटूक्त्या निर्भर्त्सयामास । अथ कीचक एवमपमानितः क्रुधा तां पदा ताड़ितवान् । अथ साभिमानिनी द्रौपदी निजदुःखं भीमं निवेदयामास । भीमस्तु एतदाकर्ण्य संजातरोषः कीचकं हन्तुं मनो दधे । अथ सुबुद्धिर्भीमो द्रौपदीं उपदिदेश स्वो निशायां यथा स दुरात्मा राजशालकः मत्स्यराजशुद्धान्तकन्यानर्त्तनशालायां त्वद्बोधेन समुपस्थिते तथाऽऽश्वास्य समयो विधीयताम् । ततस्त्वदेशेन तत्र सङ्गतोऽहमेनं कामार्त्तं दुष्कार्य्यस्य फलं अनुभावयामि । एवं स्थिरीकृते द्रौपदी पूर्ब्बोक्तमन्त्रितं स्थानं कीचकं विज्ञापितवती । अथ निशायां मूढ़बुद्धिः कामुकवेशधारी तत्रैव गतः प्रच्छन्नोपविष्टेन बलीयसा भीमेन पशुमारं निपातितः ॥ एतद्विस्तृतिस्तु महाभारते ४ । २१ अध्याये द्रष्टव्या ॥)
कीचकनिसूदनः, पुं, (कीचकं निसूदयतीति । नि + सूद + णिच् ल्युः ।) भीमसेनः । इति हेमचन्द्रः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ॥)
कीचकभित्, पुं, (कीचकं भिन्नवान् । भिद् + क्विप् ।) भीमसेनः । इति भूरिप्रयोगः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ॥)
कीट, क बन्धे । वर्णे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क कीटयति कोटः । वर्णः कैश्चिन्मन्यते । इति दुर्गादासः ॥
कीटः, पुं, (कीट् + अच् ।) कृमिजातिः । इति शब्दरत्नावली ॥ (यथा मनुः १ । ४० ।
"कृमिकीटपतङ्गांश्च यूकामत्कुणमत्कुणम्" ॥
"सर्पाणामेव विण्मूत्रशुक्लाङ्गत्वकोद्यजाः ।
दोषैर्व्यस्तैः समस्तैश्च गुल्काः कीटाश्चतुर्विधाः ॥
दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्वणः ।
आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ॥
पक्वपीलुफलप्रख्यः खर्ज्जूरसदृशोऽथवा ।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ॥
सावाद्याः सर्व्वलिङ्गास्तु विवर्ज्याः सान्निपातिकैः ।
वेगाश्च सर्पवच्छोफो वर्द्धिष्णुर्विसरक्षता ॥
शिरोऽक्षि गौरवं मूर्च्छाभ्रमः श्वासोऽतिवेदना ।
सर्व्वेषां कर्णिकाशोफो ज्वरः कण्डूररोचकः" ॥
अस्य चिकित्सा यथा ।
"अर्कस्य दुग्धेन शिरीषबीजं
चिर्भावितं पिप्पलीचूर्णमिश्रम् ।
एषो गदो हन्ति विषाणि कीट-
भुजङ्गलूतोन्दुरलूषिकानाम्" ॥
इति च वाभटे उत्तरतन्त्रे ३७ अध्याये ॥
अस्यौषधं यथा ॥
"जतुसेव्यपञ्चगुग्गुलुभल्लातककुभपुष्पसर्ज्जरसाः ।
श्वेता एव धूम उरगाखुकीटवस्त्रकृमिनुदग्र्याः" ॥
"क्षीरिवृक्षत्वगालेपः शुद्धः कीटविषापहः" ॥
इति चरके चिकित्सास्थाने २५ अध्याये ॥
"सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः ।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥
सर्व्वदोषप्रकृतिभिर्युक्तास्वापरिणामतः ।
कोटलेऽपि सघोरास्ते सर्व्व एव चतुर्व्विधाः ॥
कुम्भीनसस्तुण्डिकेरी भृङ्गीग्रतकुलीरकः ।
उच्चिटिङ्गोऽग्निनामाच्च चिचिटिङ्गो मयूरिका ॥
आवर्त्तकस्तथोरभ्रसारिका मुखवैदलौ ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रग्रीवकः ॥
घृतवाऽच्च यद्यपि रक्तराजिः प्रकीर्त्तितः ।
अष्टादशेति वाय्व्याः कीटाः पवनकोपनाः ॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ॥ * ।
कौण्डिल्यकः कणभको वरटी पत्रवृश्चिकः ॥
विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा ।
वाह्मकी पिचिटः कुम्भी वर्च्चः कीटोऽरिमेदकः ॥
पद्मकीटो दुन्दुभिको मकरः घृतपादकः ।
पद्मालकः पाकमत्स्यः क्षणतुण्डोऽथ गर्द्दभी ॥
क्षीतःक्षमिसरारी च यद्यप्युत्केशकः स्मृतः ।
एते ह्यग्निप्रकृतयश्चतुर्व्विंशाः प्रकीर्त्तिताः ॥
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ * ॥
"विश्वम्भरः पद्मशुक्लः पद्मक्षणोऽथ कोकिलः ।
सैरेयकः प्रचलको वलभः किटिमस्तथा ॥
सूचीमुखा क्षणगोधा यश्च कावायवासिकः ।
कीटगर्द्दभकश्चैव तथाचोटक एव च ॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपजाः ।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥ * ॥
तुङ्गीनासो विचिलकस्तालको वाहकस्तथा ।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ॥
तुङ्गलाभः सर्षपिको वलगुली शम्बुकस्तथा ।
अग्निकीटश्च घोराः क्षुर्दादश्च प्राणनाशनाः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः" ॥
"क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः ।
ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः ॥
कृष्णतीसारदष्टा च दाहो मोहश्छिर्द्दिका ।
वेपथुश्वासहिक्काश्च दाहः शीतश्च दारुणम् ॥
पिड़कोपचयः शोफो ग्रन्थयो मण्डलानि च ।
दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च ॥
तैर्भवन्तीह दष्टानां यथास्वाप्युपद्रवाः ।
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत् ॥
एकजातीयतस्तूर्द्धं कीटान् वक्ष्यामि भेदतः ।
सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च ॥
चिकटकः कुणी चापि इल्लिकच्छोऽपराजितः ।
चत्वार एते कथिता व्याख्यातास्तीव्रवेदनाः ॥
तैर्दष्टस्य श्वयथुरङ्गमर्द्दोगुरुता गात्राणां दंशः क्षणाच्च भवति ॥
"प्रतिसूर्य्यः पिङ्गभासो बब्रुवर्णो महाशिराः ।
तथा निरुपमश्चापि पञ्चगौधेरकाः स्मृताः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
रुजश्च विविधाकारा ग्रन्थयश्च सदारुणाः ॥
गलगोली श्वेतक्षणा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्यं दाहश्लोफक्लेदा भवन्ति ॥ सर्षपिकया हृदय पीड़ातिसारश्च ॥
घृतपद्मस्तु परुषा क्षणा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे श्लोफो वेदना दाहश्च हृदये । श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छाचातिमात्रं श्वेतपिड़कोत्पत्तिश्च ॥
मण्डूकाः क्षणाः सारः कुहको हरितो रक्तो यववर्णाभो भ्रकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशःकण्डूर्भवति पीतफेणागमश्च वक्त्रात् । भ्रकुटी कोटिकाभ्यामेतदेव दाहश्छर्द्दिर्मूर्च्छातिमात्रम् ॥
विश्वम्भराभिदष्टे दंशः सर्षपाकाराभिः पिड़काभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति ॥
अहितुण्डकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च । कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारः ज्वरादिभिरभिहन्यते । शूकहताभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकक्षाच्च लक्ष्यते ॥
पिप्पीलिकाः स्थूलशीर्षा सम्बाहिका ब्रह्मणिकाकृष्णिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शंवद्दाहशोफौ भवतः ॥
मक्षिकाः कान्तारिका क्षणा पिङ्गलिका मधूलिका कावायी स्यालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः स्यालिकाकावायीभ्यामेतदेव पिड़काश्च सोपद्रवा भवन्ति ॥
मशकाः सामुद्रः परिमण्डलो हस्तिमशकः क्षणाः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशोपश्च पार्व्वतीयस्तु कीटैः प्रायहरैस्तुल्यलक्षणः ॥
नखावलूढेऽत्यर्थं पिड़काः सदाहपाका भवन्ति ।
जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च ॥
भवन्ति चात्र ॥
गोधेरकः स्यालिका च ये च श्वेताग्निसंप्रभे ।
भ्रकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु ॥
श्वमूत्रपुरीषैस्तु सविषैरवमर्षणात् ।
स्युः कण्डूदाहकोठाङ्गपिड़कातोदवेदनाः ॥
प्रलेदवांस्तथास्रावो भृशं सम्पाचयेत्त्वचम् ॥

दिग्धविद्धक्रियायाञ्च यथावदवचारयेत् ॥
नावसन्नं नचोत्सन्नमतिसंरम्भवेदनम् ।
दंशाहौ विपरीतार्त्ति कीटदष्टं सुबाधकम् ॥
कीटैर्दष्टानुपविधैः सर्पवत् समुपाचरेत्" ॥
इति सुश्रुते कल्पस्थाने ८ अध्यायः ॥)

कीटकः, पुं, (कीट + संज्ञायां अल्पार्थे स्वार्थे वा कन् ।) मागधजातिः । इति धरणी ॥ क्षत्रियजातिः । निष्ठुरे त्रि । इति मेदिनी ॥

कीटघ्नः, पुं, (कीटं हन्ति । हन् + टक् ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कीटजा, स्त्री, (कीटेभ्यो जायते । जन् + डः । टाप् ।) लाक्षा । इति रत्नमाला ॥ (लाक्षाशब्दे ऽस्या गुणादिकं ज्ञेयम् ॥ कीटसम्भवे, त्रि, । यथा महाभारते २ । ५ । २२ ।
"यौगञ्च राङ्गवञ्चैव पट्टजं कीटजन्तथा" ॥)

कीटपादिका, स्त्री, (कीटाः पादे मूलेऽस्याः । कीटपाद + कप् । अत इत्वं टापि ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीटमाता, स्त्री, (कीटानां माता इव । मूलदेशात् बहुलकीटोत्पन्नत्वात्तथात्वम् ।) हंसपदीवृक्षः । इति भावप्रकाशः ॥ (हंसपदीशब्दे ऽस्या गुणपर्य्याया बोध्याः ॥)

कीटमारी, स्त्री, (कीटं मारयति । मृ + णिच् + अण् । उपपदं मासः । गौरादित्वात् ङीष् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीडेरः, पुं, (कील + एरच् । लस्य डः ।) तरुजीयशाकः । इति भावप्रकाशः ॥

कीदृक्, [श्] त्रि, (कस्येव दर्शनमस्य क इव दृश्यते इत्यादि वा । किम् + दृश् + क्विन् । "इदं किमोरीशकी" ।६।३।९०। इति व्यादेशः ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा नैषधे १ । १३७ ।
"विलोकयन्त्या यदतोऽथ पत्तिणः
प्रिये स कीदृक् भविता तवेत्यसौ" ॥)

कीदृशः, त्रि, (कः इव दृश्यते ऽसौ कस्येव वा दर्शनमस्य । किम् + दृश् + कञ् ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा, महाभारतम् ॥)
"कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलम् ।
कीदृशानाञ्च भोक्तव्यं तन्मे ब्रूहि पितामह !" ॥)

कीनाशः, पुं, (क्ष्णाशातीति । क्ष्णाशृ विनाशने वधे वा । "क्ष्णाशेरीचोपधायाः लोपश्च लो नाम् च" । उणां ५ । ५६ । इति कन् उपधाया ईत्वं ललोपो नामागमश्च ।) यमः । इत्यमरः ३ । ३ । २१४ ॥ ("विधेर्हि कीनाशनिकेतनातिथिं ।" माघः । १ । ७३ ॥) वानरविशेषः । इति तट्टीकायां स्वामी ॥

कीनाशः, त्रि, (क्ष्णाशातीति । क्ष्णाशृ विनाशने वधे च । "क्ष्णाशेरीचोपधायाः लोपश्च लो नाम् च" । उणां ५ । ५६ । इति कन् उपधाया ईत्वं ललोपो नामागमश्च ।) कर्षकः । (यथा मनुः ९ । १५० ।
"कीनाशो गोरथो यानमलङ्कारश्च वेश्म च ।
विप्रस्योद्धारिकं देयमेकांशश्च प्रधानतः" ॥)

क्षुद्रः । पशुघाती । इति मेदिनीकरहेमचन्द्रौ ॥

कीरं, क्ली, (कीलति बध्नाति शरीरम् । कील + अच् । लस्य रः ।) मांसम् । इति राजनिर्घण्टः ॥

कीरः, पुं, (कीति अव्यक्तं ईरयतीति । ईर + णिच् + अच् ।) शुकपक्षी । इत्यमरः २ । ५ । २१ ॥ (यथा, नैषधे २ । १५ । "खगवागियं इत्यतोऽपि किं न मुदं धास्यति कीरगीरिव" ॥)

कीरकः, पुं, (कीर + संज्ञायां कन् ।) वृक्षभेदः । क्षपणकः । प्रापणम् । इति धरणी ॥ (शुकपक्षी । इति आचार्याः ॥)

कीरवर्णकं, क्ली, (कीरस्येव वर्णो यस्य । वर्ण + कप् ।) सौवीरयवनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥ (सौवीरयवशब्दे विवरणमस्य ज्ञातव्यम् ॥)

कीराः, पुं, (क + ईर + णिच् + अच् एषोदरात् साधुः ।) काश्मीरदेशः । तद्देशस्थजनः । बहुवचनान्तोऽयं शब्दः । इति मेदिनीचिकाण्डशेषौ ॥

कीरेष्टः, पुं, (कीरस्य शुकस्य इष्टः प्रियः ।) आम्रवृक्षः । आखोटवृक्षः । जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

कीर्य्यः, त्रि, (कीर्य्यतेऽसौ । कॄ + कर्म्मणि क्यः ।) आच्छन्नः । विक्षिप्तः । (यथा, शाकुन्तले १ माङ्के ॥
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्व्वकायम् । शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति" ॥) हिंसितः । इति मेदिनी ॥

कीर्त्तनं, क्ली, (कृत् + भावे ल्युट् ।) कथनम् । वचनम् । इति जटाधरः ॥ (यथा, मार्कण्डेये ९२ । २२ ।
"रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम" ॥)

कीर्त्तना, स्त्री (कृत् + कर्म्मणि युच् टाप् च ।) यशः । इति शब्दरत्नावली ॥

कीर्त्तिः, स्त्री, (कृत् + क्तिन् । यद्वा, कॄत् संशब्दने "हृषिशिरुहीति" उणां ४ । ११८ । इरादिः कार्य्ये इन् ।) सुख्यातिः । तत्पर्य्यायः । यशः । समज्ञा ३ । इत्यमरः १ । ६ । ११ ॥ समाज्ञा ४ समाख्या ५ समज्या ६ । इति तट्टीकायां भरतः ॥ अभिख्या ७ श्लोकः ८ वर्णः ९ । इति जटाधरः ॥ कीर्त्तना १० । इति शब्दरत्नावली ॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः" ॥
इति माधवी ॥ अत एव यशःकीर्त्त्योर्भेदस्यादि दर्शनात् "यशःकीर्त्तिप्रविभ्रष्टो जीवन्नपि न जीवति" इति कस्यचित् प्रयोगः । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्तन्न साधु "कीर्त्तिस्ते दुष्कृतिकेति" प्रयोगदर्शनात् । इति भरतः ॥ * ॥ प्रसादः । इति मेदिनी ॥ शब्दः । दीप्तिः । माढकाविशेषः । इति शब्दरत्नावली ॥ विस्तारः । कर्दमः । इति विश्वः ॥

कीर्त्तितः, त्रि, (कृत् + क्तः ।) कथितः । ख्यातः । यथा,—भावप्रकाशे ॥
"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता" ॥

कीर्त्तिभाक्, [ज्] पुं, (कीर्त्तिं भजते । भज + क्विप् ।) मेरुपर्व्वतः । इति शब्दरत्नावली ॥ कीर्त्तियुक्ते त्रि ॥ यथा,—महाभारते १ । ८३ । ४१ ।
"राज्यभाक् स भवेद्बह्मन् ! पुण्यभाक् कीर्त्तिभाक् तथा" ॥)

कीर्त्तिमान् [त्] पुं, (कीर्त्तिरस्यास्तीति मतुप् ।) वसुदेवस्य देवक्यां अष्टमपुत्रः । (यथा भागवते ९ । २४ । ५३ ।
"वसुदेवस्तु देवक्यां अष्टमपुत्रानजीजनत् ।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः ।
ऋजुं संमर्दनं भद्रं सङ्कर्षणमहीश्वरम्" ॥)
कीर्त्तिविशिष्टे त्रि ॥ (यथा, ह्रेः रामायणे १ । २ । ४२ ।
"उदारसत्त्वार्थपदैर्मनोरमै-
स्तदास्य रामस्य चकार कीर्त्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारदर्शनः" ॥)

कीर्त्तिशेषः, पुं, (कीर्त्तिः शेषो यस्य ।) मरणम् । इति जटाधरः ॥

कील, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चतुर्थस्वरी । कीलति । इति दुर्गादासः ॥

कीलः, पुं क्ली, (कील्यते बध्यतेऽसौ अनेनाच वा । कील बन्धे + कर्म्मणि करणेऽधिकरणे च यथायथं घञ् पुंसीति घोवा ।) अग्निशिखा । अङ्गुः । इत्यमरः ३ । ३ । १९९ ॥ (यथा, महाभारते । ३ । १५ । १५ ।
"परिखास्वापि कौरव्य! कीलैः सुनिचिताः क्षताः" ॥
तथा च आर्य्यासप्तशती ३७४ ।
"या लुप्तकीलभावं याता हृदि वह्निरद्यशाखिभिः" ॥)
स्तम्भः । लेष्टुः । कपोलिः । इति मेदिनी ॥ कपोलिनिर्घातः । इति विश्वः ॥ (मूढ़गर्भस्य प्रकारभेदः । यथा । "तत्र ऊर्द्धबाहुशिरः पादौ यो योनिमुखं निरुणद्धि कील इव स कीलः" ॥
इति सुश्रुते निदानस्थाने ८ अध्याये ॥)

कीलकः, पुं, (कीलति बध्नाति अनेन । करणे घञ् स्वार्थे कः ।) कीलः । खोंटा गोंज खिल इत्यादि भाषा । गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भः । इति भूमिः ॥ कण्डूयणार्थं काष्ठम् । इति केचित् । बन्धनखण्टः । इति केचित् । यत्र बद्धा गौर्दुह्यते सः । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । शिवकः २ । इत्यमरः २ । ९ । ८३ ॥

कीलसंस्पर्शः, पुं, (कीलं संस्पृशति । सम् + स्पृश् + अच् ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ गाव इति भाषा ॥

कीला, स्त्री पुं, (कील + टाप् ।) कीलः । इत्यमरमेदिनीकरौ ॥

कीलालं, क्ली, (कीलं वह्निज्वालां अलति वारयतीति । कील + अल् + कर्म्मण्यण् । यद्वा कीलात् वह्निशिखायाः शिखायाश्चषेणाच वह्नेरेव ग्रहणमिति ध्येयम्, अतएवाग्नेः सकाशात् अलति-पर्य्याप्नोति उत्पद्यते इति यावत् "अग्नेरापः" इति श्रुतेः । अल् + अच् ।) जलम् । (यथा, शङ्करकविकृते अम्बाष्टके २ ।
"कूलातिगामिभयतूलावलिज्वलनकीलानिजस्तुति-

कुकुटः

विधाकोलाहलच्छपितकालामरी कुञ्जलकीलाल-पोषणभाः" ॥) रक्तम्। इत्यमरः ३। ३। १९९॥ (और्व्वाग्नेः कीलं आलाति। आला + कः।) अमृतम्। मधु। इति शब्दरत्नावली॥ (पुं कीलाय वन्धाय अलति पर्य्याप्नोतीति। पशुः॥)

कीलालधिः, पुं, (कीलालं जलं धीयतेऽस्मिन्। धा + किः।) समुद्रः। इति शब्दरत्नावली॥

कीलालपः, पुं, (कीलालं रुधिरं पिबति। पा + "आतोऽनुपसर्गे कः"। ३। २। ३। इति कः।) राक्षसः। इति शब्दरत्नावली॥

कीलितः त्रि, (कील्यतेऽसौ। कील + कर्म्मणि क्तः।) बद्धः। इत्यमरः। ३। १। ४२॥ (यथा, राजेन्द्रकर्णपूरे ३०।

"किं वान्यत्तव देव! वेल्लति यदि भ्रूवल्लरीपल्लवः सोऽपि श्यामकपोलकीलितकरः संक्रन्दनः क्रन्दति"॥)

कीशः, पुं, (की इति शब्दं ईष्टे। ईश् + कः। यद्वा कस्य वायोरपत्यं अत इञ्। किः हनुमान् ईशो यस्य।) वानरः। इत्यमरः २। ५॥ ३॥ (यथा, काशीखण्डे ४२। ३१।

"रासभैः करभैः कीशैः श्वेनैरश्वतरैर्वकैः"॥

के आकाशे ईष्टे प्रभवतीति। क + ईश् + कः।) सूर्य्यः। पक्षी। इति शब्दरत्नावली॥ नभे त्रि। इति मेदिनी॥

कीशपर्णः, पुं, (कीशः वानरः तस्य लोमेव पर्णमस्य।) अपामार्गः। इति शब्दरत्नावली॥

कीशपर्णी, स्त्री, (कीशपर्ण + जातौ ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८९॥

कु ङ शब्दे। इति कविकल्पद्रुमः॥ (भां-आत्मं-अकं-सेट्।) ङ कवते इति दुर्गादासः॥

कु ल शब्दे। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) ल कौति। इति दुर्गादासः॥

कु शि ङ आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सेट्।) शि ङ कुवते अकुत। इति दुर्गादासः॥

कु, व्य, (कु + डुः।) पापम्। कुत्सा। ईषदर्थः। निवारणम्। इति मेदिनी॥

कुः, स्त्री, (कु + मितादित्वात् डुः।) पृथिवी। इत्यमरः। २। १। ७॥

कुक्, ङ आदाने। इति कविकल्पद्रुमः। (भां-आत्मं-सकं-सेट्।) ङ कोकते। इति दुर्गादासः॥

कुकभं, क्ली, (कुकेन आदानेन पानेनेत्यर्थः भातीति। भा + कः।) मद्यम्। इति शब्दचन्द्रिका॥

कुकरः, त्रिं, (कुत्सितः करोः यस्य।) कुत्सितहस्तयुक्तः रोगादिना कुञ्चितकरः। तत्पर्य्यायः। कुणिः २। इत्यमरः। २। ६। ४८॥ कूणिः ३ कोणिः ४। इति तट्टीका॥

कुकीलः, पुं, (कुः पृथिवी तस्याः कील इव।) पर्व्वतः। इति चिकाण्डशेषः॥

कुकुटः, पुं, (कु ईषत् कुत्सितं यथा स्यात् तथा वा कुटतीति। कुट् + कः।) सितावरः। इति राजनिर्घण्टः॥ सुबणि शाक इति भाषा॥ (अस्य पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे।

"शितिवार शितिवरः खस्तिकः सुनिषण्णकः। श्रीवारकः सूचिपत्रः पर्णकः कुकुटः शिखी"॥

गुणास्यास्य सुनिषण्णकशब्दे ज्ञेयाः॥)

कुकुदः, पुं, (कुकु इत्यव्ययं अलङ्कृता कन्या। तां सत्कृत्य याचाय ददाति यः।) कूकुदः। सत्कारपूर्व्वकालङ्कृतकन्यादानकर्त्ता। इत्यमरटीकायां रायमुकुटः॥

कुकुन्दरं, क्ली. (खुन्द्यते कामिनाऽत्र। खुदि आज्ञवने मद्गुरादयश्चेति निपातनात् साधुः।) नितम्बस्थकूपकद्वयम्। एष्ठवंशादधोगर्त्तद्वयम्। इत्यमरः। २। ६। ७६॥ कुकुन्दरे इति द्विवचनान्तोऽपि प्रयोगः॥ (यथा सुश्रुते शारीरस्थाने। ६ अ॥

"पार्श्वजघनवर्हिर्भागे एष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च"॥)

कुकुन्दरः, पुं, (कुं भूमिं दरयति दारयति वा अन्तर्भूतण्यन्तात् दृ अण् निपातनात् दृह्रस्वभावेन साधुः। कु ईषत् कुत्सितं वा कुन्दरमत्र।) कुक्कुरुः। कुकुरौदा इति हिन्दी भाषा। तत्पर्य्यायगुणाः। यथा भावप्रकाशे॥

"कुकुन्दरस्ताम्रचूड़ः सूक्ष्मपत्रो मृदुच्छदः। कुकुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः॥ तन्मूलमार्द्रं निःक्षिप्तं वदने मुखशोषहृत्"॥

(पुंलिङ्गोऽयं शब्दोऽपि नितम्बस्थकूपकद्वये वर्त्तते यथा॥

"एष्ठवंशं च्युभयतो यौ सन्धी कटिपार्श्वयोः। जघनस्य वहिर्भागे मर्म्मणी तौ कुकुन्दरौ"॥

इति वाभटे शारीरस्थाने। ४ अध्याये॥)

कुकुभा, स्त्री, (कु ईषत् कुः पृथ्व्यधिष्ठात्री देवता इव भा यस्याः।) रागिणीविशेषः। इति हलायुधः॥

कुकुरः, पुं, (कु कुत्सितं कुरति शब्दायते। कुर् + अच्।) कुक्कुरः। (कुं पृथिवीं कुरति स्वामित्वेन आदत्तवान्। कुर् + कः। यद्वा—कुक्धातोः "मदूरादयश्च"। उणां १। ४२। इति साधुः।) क्षत्रियविशेषः। इत्युणादिकोषः। स तु यदुवंशीयान्धकराजपुत्रः। इति श्रीभागवतम्॥ (यथा माघे १३। १६।

"परिफुल्लगण्डफलकाः परस्परम् परिरेभिरे कुकुरकौरवस्त्रियः"॥)

यश्चिपर्णीवृक्षः। इति त्रि काण्डशेषः॥

कुकुराः, पुं, (कुकुराः खनामख्याताः क्षत्रियाः तेषां जनपदः।) देशविशेषः। तद्देशस्थलोकश्च। तत्पर्य्यायः। यदवः २ दशार्हाः ३ सात्वताः ४। बहुवचनान्तोऽयं शब्दः। इति चिकाण्डशेषः॥

कुकूटी, पुं, (कोः पृथिव्याः कूटोऽस्यस्याः। अच् गौरादित्वात् ङीष्।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (शाल्मलिशब्देऽस्य विवरणं ज्ञेयम्॥)

कुकूलं, क्ली, (कोः भूमेः कूलं। कुत्सितं कूलं वा।) शङ्कुभिः सङ्कीर्णं श्वभ्रम्। इत्यमरः। ३। ३। २०२। तनुत्रम्। इति हारावली॥

कुकूलः, पुं, (कु + ऊलच् कुगागमश्च।) तुषानलः। इत्यमरः। ३। ३। २०२॥

कुकूलः

("शिरीषादपि मृदवो ज्ञेयमायतलोचना अयं च कुकूलाग्निकर्कशो मदनानिलः"। इति उद्भटः। केचित्तु "कुकूलाग्निः कर्कशो मदनानलः" इत्येवमाहुः॥)

कुकोलं, क्ली, (कुत्सितं कोलति। कुल + अच्।) कोलिबदरः। इति शब्दचन्द्रिका॥

कुक्कुटः, पुं स्त्री, (कुक् + सम्पदादित्वात् क्विप्। कुका आदानेन कुटतीति। कुट + कः।) पक्षिविशेषः। कुकुड़ा इति भाषा। तत्पर्य्यायः। ह्लकवाकुः २ ताम्रचूड़ः ३ चरणायुधः ४। इत्यमरः। २। ५। १७॥ कालज्ञः ५ नियोद्धा ६ विष्किरः ७ नखरायुधः ८ ताम्रशिखी ९। इति जटाधरः॥ रात्रिवेदः १० उषाकरः ११ हताच्छः १२ काक्षलः १३। इति शब्दरत्नावली॥ दत्तः १४ यामनादी १५ शिखण्डिकः १६। तन्मांसगुणाः। (यथा, भावप्रकाशे।

"कुक्कुटो वृंहणः स्निग्धो वीर्य्यौजोऽनिलक्रुरुः। चक्षुष्यः शुक्रकफकृद्बल्यो रूक्षः कषायकः॥ आरण्यकुक्कुटः स्निग्धो वृंहणः श्लेष्मलो गुरुः। वातपित्तक्षयव्यभिविषमज्वरनाशनः"॥

आरण्यकुक्कुटमांसगुणाः। बृंहत्वम्। श्लेष्महरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ रूक्षत्वम्। कषायत्वम्। स्वादुत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ ग्राम्यकुक्कुटमांसगुणाः। स्निग्धत्वम्। वातहरत्वम्। दीपनत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ बलकारित्वम्। उष्णत्वम्। मधुरत्वञ्च। इति राजवल्लभः॥ *॥ निषादपुत्रः। शूद्रपुत्रः। टङ्कोल्का। कुक्कुभपक्षी। इति मेदिनी॥ वक्रिकायः। इति हेमचन्द्रः॥ (आसनविशेषः। यथा हठयोगदीपिकायाम्। १। २३।

"पद्मासनन्तु संस्थाप्य जानूर्वोरन्तरे करौ। निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कटासनम्"॥)

कुक्कुटकः पुं, (कुक्कुट + संज्ञायां कन्।) कुक्कुभपक्षी। इति शब्दरत्नावली॥ स्वार्थे कन् प्रत्यये कुक्कुटशब्दार्थोऽप्यत्र॥)

कुक्कुटव्रतं, क्ली, (कुक्कुट इत्याख्यं व्रतम्।) सन्तानार्थं स्त्रीकर्त्तव्यव्रतम्। इति शब्दमाला॥ कुक्कुटीव्रतमपि पाठः। ललितासप्तमीव्रतमिदम्। यथा,—

"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या। स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्॥ पूजयेच्च तदा तस्या दुष्प्राप्यं नैव विद्यते"॥

इति तिथ्यादितत्त्वे भविष्यपुराणम्॥

कुक्कुटमण्डपः, पुं, मुक्तिमण्डपः। यथा, काशीखण्डे।

"ततो लोकान्तदारभ्य कथयिष्यन्ति सर्व्वतः। मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः"॥

कुक्कुटमस्तकं, क्ली, (कुक्कुटस्येव मस्तकं शिखा यस्य।) चक्षम्। इति राजनिर्घण्टः। चौँइ इति भाषा॥ (चक्षशब्देऽस्य गुणादयो बोद्धव्याः॥)

कुक्कुटशिखः, पुं, (कुक्कुटस्य शिखेव शिखा यस्य।) कुसुम्भवृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटाभः, पुं, (कुक्कुट इव आभाति। आ + भा + कः।) कुक्कुटतुल्यवर्णचरणसर्पविशेषः। तत्पर्य्यायः।

कुक्कुरः

कुक्कुटाहिः २। इति हेमचन्द्रः॥

कुक्कुटाहिः, पुं, (कुक्कुटः तच्चरण इव अहिः सर्पः।) कुक्कुटासर्पः। इति हेमचन्द्रः॥

कुक्कुटिः, स्त्री, (कुक्कुट इव आचरति। आचारे क्विपि इन्।) दम्भचर्य्या। इति हेमचन्द्रः॥

कुक्कुटी, स्त्री, (कुक्कुटि+वा ङीप्।) अन्नतचर्य्या। इति मेदिनी॥ ज्येष्ठी। इति शब्दरत्नावली॥ टिक् टिकि इति भाषा शाल्मलीवृक्षः। इति जटाधरः। (यथा, सुश्रुते उत्तरतन्त्रे। ६० अ०॥) "कुक्कुटी सर्पगन्धाच्च तथाकाण्यविषाणिके"॥ योषिद्विशेषः। इति चिन्तामणिः॥)

कुक्कुटीव्रतं, क्ली, (कुक्कुटी इति संज्ञकं व्रतं-नियमविशेषः।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः। तद्विवरणं भविष्यसप्तमीशब्दे द्रष्टव्यम्॥

कुक्कुभः, पुं, (कुक्कुशब्दं भाषते। भाष्+बाहुलकात् डः। यद्वा कुक् इत्यव्यक्तं कौति शब्दायते। कु+बाहुलकात् भक्।) पक्षिविशेषः। इत्यमरः। २।५।३५। पात्कुका इति भाषा॥

कुक्कुरं क्ली, ग्रन्थिपर्व्वम्। इत्यमरः। २। ४।१३२। गाँठियाका इति भाषा॥ (अस्य पर्य्याया यथा,—"स्यौणेयकं वह्निवेंह शुष्कवर्षञ्च कुक्कुरम्। ग्रोर्णरोभ शुकच्छापि शुकपुष्पं शुकच्छदम्"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥ गुणास्यास्य स्यौणेयकशब्दे द्रष्टव्याः॥)

कुक्कुरः, पुं, (कौकते आदत्ते इति। कुक्+क्विप्। कुक् यत्किञ्चिदपि भक्षन्तं जनं दृष्ट्वा कुरति शब्दायते। कुर+कः।) जन्तुविशेषः। कुकुर इति भाषा॥ तत्पर्य्यायः। कौलेयकः २ सारमेयः ३ भगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७। इत्यमरः। २।१०। २१॥ कुक्कुरः ८ शुनः ९ शुनिः १० श्वानः ११। इति तट्टीका॥ भषणः १२ भक्षूकः १३ वक्रनासूनः १४ दकारिः १५ रात्रिजागरः १६ कालेयकः १७ ग्राम्यमृगः १८ मृगारिः १९ शूरः २० शूयालुः २१। इति राजनिर्घण्टः॥

तस्य गुणाः।

"वक्राग्री खल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च षड्डे च शुनो गुणाः"॥ इति चाणक्यम्॥ तस्य परीक्षा यथा।

"मृगयार्थं शाकुनार्थं कौतुकार्थिमहीक्षिता। श्वानः पोष्यास्ततस्तेषामत्र वक्ष्यामि लक्षणम्॥ गुणजातिप्रभेदेन शुनो भेदो ह्यनेकधा"। तद्यथा। "सात्त्विका राजसाश्चैव तामसाश्च त्रिधा मताः॥ अश्रान्ता अपरित्रीणाः पवित्राः खल्पभोजिनः। श्वानस्ते सात्त्विकाः प्रोक्ता दृश्यन्ते च क्वचित् क्वचित्॥१ क्रुद्धा बद्धभुजो दीर्घा गुरुवक्त्रास्तनूदराः। जाङ्घलस्था जातिकाश्च श्वानस्ते राजसा मताः॥२ खल्पश्रमेण ये श्रान्ता बलच्छिन्ना गुरूदराः। श्वानस्ते तामसा ज्ञेयाः सन्ध्यावनसमाश्रयाः॥३ ब्रह्मादिजातिभेदेन चतुर्द्धा सर्व्व एव हि। शुभ्रा दीर्घा खल्पकर्णा लघुपुच्छास्तनूदराः॥ सुशुक्लखरदन्ताश्च श्वानस्ते ब्रह्मजातयः॥१ रक्ताक्षास्तनुलोमानो बलवर्णास्तनूदराः॥

कुङ्कुमं

दीर्घा दीर्घा नखरदाः श्वानस्ते क्षत्रजातयः। २ ये पीतवर्णा मृदवस्तनुलोमान एव च॥ क्रुद्धा क्रुद्धा ललज्जिह्वास्ते श्वानो वैश्यजातयः॥३ कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च॥ अक्रुद्धाः श्रमयुक्ताश्च ते श्वानः शूद्रजातयः॥४

लघुप्रमाणास्तु गुरूदरा ये
येऽमेध्यभक्षा बडुपुत्तकाश्च।
प्रदष्टपुच्छा लघुसूक्ष्मदन्ता
स्तेचान्त्यजाः कुक्कुरजातयः स्युः॥५॥

द्विजातिचिह्नसंसर्गात् द्विजातिः श्वा भयावहः। लक्षणचयसम्बन्धात् त्रिजातिर्धननाशनः॥

भोजोऽपि।

द्विजातिर्व्वा त्रिजातिर्व्वा विजातिः श्वा महीभृताम्। भयं धनक्षयं शोकं विदधाति यथाक्रमम्॥ इति भोजराजकृतयुक्तिकल्पतरुः॥ (मुनिविशेषः। यथा महाभारते। २। ४। १७।

"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च। मुनयो धर्म्मविदांसो धृतात्मानो जितेन्द्रियाः"॥)

कुक्कुरदुः, पुं, (कुक्कुरः कुक्कुरगन्धोपलक्षितः दुर्वृक्षः।) वृक्षविशेषः। कुकुरशोंका इति भाषा। तत्पर्य्यायः। ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। ज्वररक्तकफनाशित्वञ्च। इति मदनविनोदः॥ "तन्मूलमार्द्रं निश्चिप्तं वदने मुखशोषहृत्"॥ इति भावप्रकाशः॥

कुक्कुरी, स्त्री, (कुक्कुर+स्त्रियां जातित्वात् ङीष्।) कुक्कुरस्त्री। कुत्ती इति भाषा। तत्पर्य्यायः। सरमा २ श्वानी ३ सारमेयी ४ शुनी ५ भषी ६। इति शब्दरत्नावली॥

कुक्कुवाक्, पुं, (कुक्कुरस्य वाक् शब्द इव शब्दो यस्य।) सारङ्गमृगः। इति राजनिर्घण्टः॥

कुक्षः, पुं, (कुषनिष्कर्षे+"उन्दिगुधिकुषिभ्यश्च"। उणां ३। ६८। इति स, कित्च।) कुक्षिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुक्षिः, पुं, (कुषनिष्कर्षे+"क्षुधिकुषिशुषिभ्यःक्सिः"। उणां ३। १५५। इति क्सिः।) उदरम्। इत्यमरः। २। ६। ७७॥ (यथा, महाभारते १। ७७। १३। "याचोषितं विश्राणाचि! त्वया चन्द्रनिभाननेः। तत्राहमुषितो भद्रे कुक्षौ काव्यस्य भाविनि!"॥ दानवविशेषः। यथा महाभारते १। ६७। ५७। "कुक्षिस्तु राजन् विख्यातो दानवानां महाबलः"॥)

कुक्षिम्भरिः, त्रि, (कुक्षिं बिभर्त्तीति। भृ+खः+मुम् च।) आत्मम्भरिः। स्वोदरपूरकः। इत्यमरः। ३। १। २१॥

कुक्षिरन्ध्रः, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य।) नखः। इति निर्घण्टः।

कुङ्कुमं, क्ली, (कुम्कुम् इति शब्दोऽस्ति वाचकत्वेनास्य अर्श्व आद्यच्। यद्वा कुक्यते आदीयतेऽसौ। कुक् आदाने उमक् निपतनात् मुम्।) स्वनामख्यातगन्धद्रव्यम्। कुम्कुम् इति केशर इति भाषा। (यथा माघे ११।१४।

"क्षतधवलिमभेदैः कुङ्कुमेनेव किञ्चित्।

कुचः

मलयरुहरजोभिर्भूषयन् पक्षिमाशाम्"॥) तत्पर्य्यायः। काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ वाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहितचन्दनम् ११। इत्यमरः। २। ६। १२४। चारु १२ वाह्लिकम् १३ वरवाह्लीकम् १४ रक्तचन्दनम् १५। इति तट्टीका॥ अग्निशेखरम् १६ अग्र्यक् १७ काश्मीरजम् १८ पीतकम् १९ काश्मीरम् २० रुचिरम् २१ शुभ्रम् २२ शोणितम् २३ वृष्यम् २४ वरेण्यम् २५ अरुणम् २६ कालेयकम् २७ भागुडम् २८ कान्तम् २९ वह्निशिखम् ३० केशरवरम् ३१ गौरम् ३२ केसरम् ३३ हरिचन्दनम् ३४ खलम् ३५ रजम् ३६ दीपकम् ३७ लोहितम् ३८ सौरभम् ३९ चन्दनम् ४० इति शब्दरत्नावली॥ अस्य गुणाः। सुरभित्वम्। तिक्तत्वम्। कटुत्वम् उष्णत्वम्। कासवातकफकण्ठरोगमूर्द्धशूलविषदोषनाशित्वम्। रोचनत्वम्। तनुकान्तिकरत्वञ्च। इति राजनिर्घण्टः॥ रेचकत्वम् विवर्णताकण्डूनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। शिरोरुग्व्रणजन्तुवमिव्यङ्गदोषत्वयापहत्वम्। बल्यत्वञ्च। इति भावप्रकाशः॥ त्वग्दोषनाशित्वम्। इति रत्नावली तत्त्वचन्द्रिका च॥ देशभेदे तत् त्रिविधम्। यथा,—

"काश्मीरदेशजे क्षेत्रे कुङ्कुमम् यद्भवेद्धि तत्। सूक्ष्मकेशरसारञ्च पद्मगन्धि तदुत्तमम्॥ १॥ वाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरं भवेत्। केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम्॥ २॥ कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम्। ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्"॥ ३॥ इति भावप्रकाशः॥

कुङ्कुमी, स्त्री, (कुङ्कुमवर्णोऽस्त्यस्याः। अच् गौरादित्वात् ङीष्। ततः पृषोदरादित्वात् साधुः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ (कुङ्कुमीति केचित्॥)

कुच, ज रोधपर्कौटिल्यलेखने। इति कविकल्पद्रुमः॥ (भां-परं-सकं, अकं च-सेट्-ज्वलां।) ज कोचः कुचः। रोधः क्रियारोधः जड़ीभाव इत्यर्थः। अस्मिन्नर्थ एव प्रायो वर्त्तते। यस्मिन् प्रमुदिते राज्ञि तमः सङ्कोचति क्षितौ। पर्कः सम्पर्कः। इति दुर्गादासः॥

कुच, श्रि सङ्कोचे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं, सेट्।) प्रायः संपूर्व्वस्य प्रयोगः। श्रि-संकुचति अकुचीत् चुकोच। इति दुर्गादासः॥

कुच, तारशब्दे। उच्चैःशब्द इति यावत्। इति कविकल्पद्रुमः॥ (भां-परं-अकं-सेट्।) कोचति ढक्का। भट्टमल्लस्तु तारे शब्दे च कोचति इति नानार्थे पठति। तन्मते तारश्चिक्काणता। कोचति काष्ठौ वणिक् चिक्काणयतीत्यर्थः। इति दुर्गादासः॥

कुचः, पुं, (कुचति संकुचतीति। कुच् संकोचे। "इगुपधेति"। ३। १। १३५। कः।) स्तनः। इत्यमरः। २। ६। ७७। (यथा गोः रामायणे। ५। १३। ५७।

"अन्या वक्षसि चान्यस्यास्तस्याश्चाप्यपराः कुचे।
उरूपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिताः" ॥
स्त्रीणां यौवने कुचपरिवृद्धिर्भवति।
यथाह भावप्रकाशे।
"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते।
तेषां तदपि तारुण्ये पुष्टत्वात् व्यक्तिमेति हि॥
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा।
रोमराज्यादयः पुंसां नारीणामपि यौवने॥
जायते ऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च"॥
व्याख्यानं यथा,—
"पुंसां रोमराजिश्मश्रुप्रभृतयः
नारीणान्तु रोमराजी स्तनार्त्तवादयः" ॥)

कुचिण्डिका, स्त्री, (कुत्सिता चण्डिका कोपना इव। विकृतिकारितया तथात्वम्।) मूर्खास्त्रता। इति शब्दचन्द्रिका॥

कुचन्दनम्, क्ली, (कुत्सितं गन्धहीनतया चन्दनं यद्वा कौ पृथिव्यां चन्दनमिव।) रक्तचन्दनम्। इत्यमरः। २। ६। १३२॥ पत्राङ्गम्। वक्रम् काठ् इति भाषा। वृक्षभेदः। इति मेदिनी॥ कुङ्कुमम्। इति शब्दचन्द्रिका। (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम्।
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम्" ॥)

कुचफलः, पुं, (कुच इव फलं यस्य। कुचसदृश्यात्तथात्वम्।) दाड़िमवृक्षः। इति राजनिर्घण्टः॥ (गुणपर्य्यायो दाड़िमशब्दे ऽस्य ज्ञातव्यः॥)

कुचरः, त्रि, (कुत्सितं चरतीति। कु + चर् + अच्।) कुवादः। परदोषकथनशीलः। इत्यमरः। ३। १। ३७॥ (दुर्गमदेशगन्ता। यथा, ऋग्वेदे १।१५४।२।
"प्र तद्विष्णु स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः"॥ कुस्थाने चरतीति। कान्तारादिपर्य्यटकः। कौ पृथ्व्यां चरतीति। भूमिचरः। यथा महाभारते। १४। ३८। १३,१४।
"दृष्ट्वा त्वादित्यमुद्यन्तं कुचराणां भयं भवेत्।
अध्वगाः परितप्येयुरुष्णतो दुःखभागिनः॥
आदित्यः सत्वमुद्दिष्टं कुचरास्तु तथा तमः।
परितापोऽध्वगानाञ्च रजसो गुण उच्यते" ॥)

कुचाग्रं, क्ली, (कुचस्य कुचयोर्वा अग्रम्।) स्तनाग्रभागः। तत्पर्य्यायः। चूचुकम् २। इत्यमरः। २। ६। ७७॥ चुचुकम् ३। इति तट्टीका॥

कुचाङ्गेरी, स्त्री, (कुत्सिता चाङ्गेरी।) इति रत्नमाला॥ चुक्रिका। चुकापालं इति भाषा॥

कुचिकः, पुं स्त्री, (कुच + वाऽलकात् इकन्।) मत्स्यविशेषः। इति विकाण्डशेषः। कुँचिया इति भाषा॥

कुचेलः, त्रि, (कुत्सितं चेलं वस्त्रं यस्य।) कुवासाः। परिहितकुत्सितवस्त्रो जनः। इति मेदिनी॥ (कुत्सितं चेलमिति विग्रहे। क्ली, जीर्णवस्त्रम्। यथा, मनुः ६। ४४।
"कपालं वृक्षमूलानि कुचेलमसहायता।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)

कुचेला, स्त्री, (कुचा सङ्कुचा इला भूमिः निद्रा वा यस्याः।) विद्धकर्णी। इति मेदिनी (यथा, भैषज्यरत्नावल्याम्।
"कुचेला कुलका रात्रिर्मेघनामा च ग्रन्थिका"॥
अस्याः पर्य्याया यथा।
"अम्बष्ठाम्बष्ठकीपाटा कुचेला पाचचेलिका।
एकाष्ठीला वरा तिक्ता प्राचीनौकाग्निवावुका" ॥
इति वैद्यकरत्नमालायाम्॥)

कुचेली, स्त्री, (कुचेल + गौरादित्वात् ङीष्।) अम्बष्ठा। इति रत्नमाला॥ आकनादि इति भाषा॥

कुच्छं, क्ली, (कोः पृथिव्याः दुःखं च्यति दर्शनाघ्राणादिना लुनातीति। कु + छो + कः।) कुमुदम्। इति शब्दचन्द्रिका॥ (कुमुदशब्देऽस्य गुणपर्य्याया बोद्धव्याः॥)

कुज उ क्लेशे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उ कोजित्वा कुक्षा। क्लेशं चौर्य्यम्। इति दुर्गादासः॥

कुञ्च, इ अव्यक्तशब्दे। इति चन्द्रः। (भ्वां-परं-अकं-सेट्-इदित्।) कुञ्चति कुञ्चरः। इति दुर्गादासः॥

कुजः, पुं, (कोः पृथिव्याः जायते। कु + जन् + डः।) मङ्गलग्रहः। (यथा, मङ्गलग्रहस्तुतौ। "अङ्गारकः कुजो भौमः" इति।) नरकासुरः। (यथा,—
"तत्राहृतास्ता नरदेवकन्याः
कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" ॥
श्रीमद्भागवते ३।३।८॥) वृक्षः। इति हेमचन्द्रः॥

कुजम्भलः, त्रि, (कोः पृथिव्याः कौ वा जम्भलः मृत्तिकादिखननेन सन्धिचौरः।) चौरविशेषः। इति हारावली। सिँदेल चोर इति भाषा॥

कुजम्भिलः, त्रि, (कुजम्भोऽस्यास्तीति। इलच्।) कुजम्भलः। इति शब्दरत्नावली॥

कुजा, स्त्री, (कुजाः पृथिवीजाः वृक्षाः आश्रयत्वेन सन्ति अस्याः इति अच् ततष्टाप्। यथा,—
"कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः।
विल्वाग्रोकौ जयन्ती च विज्ञेया नवपत्रिका" ॥
इति मन्त्रोक्तनवपत्रिकासु "तव स्थानमिदं मर्त्ये" इत्यादि निर्देशेन चास्याः आश्रयत्वात् तथात्वम्।) कात्यायनी देवी। इति मेदिनी॥ (कोः पृथिव्याः जायते। जन + डः टाप् च। सीता देवी भूमेः तदुत्पत्तिकथा कालिका पुराणे ३७ अध्याये।
"ततः पुरोधसं राजा गोतमं मुनिसत्तमम्।
तत्पुत्रञ्च धृतानन्दं पुरोधायाकरोन्मखम्॥
द्वौ पुत्रौ तस्य सञ्जातौ यज्ञभूमौ परौ स्मृतौ।
एका च दुहिता साध्वी भूम्यन्तरगता शुभा" ॥)

कुज्झिशः, पुं, मत्स्यभेदः। अस्य गुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। दीपनत्वम्। बलकारित्वम्। स्निग्धत्वम्। गुरुत्वम्। ग्राहित्वम्। वाते हितत्वम्। रोचनत्वञ्च। इति राजनिर्घण्टः॥

कुज्झटिः, स्त्री, (कोजति अपहरति सूर्य्यप्रकाशम्। कुज् + क्विप् न कुत्वम्। झट् संघाते इन्। ततः कर्म्मधारयः।) कुज्झटिका। कुया। कुयासा इति च भाषा। तत्पर्य्यायः। धूममहिषी २ रजान्धी ३ कुहेलिका ४ धूमिका ५ नभोरेणुः ६। इति विकाण्डशेषः। अस्य गुणाः। रूक्षत्वम्। तमोगुणप्रायत्वम्। कफपित्तकारित्वञ्च। इति राजवल्लभः॥

कुज्झटिका, स्त्री, (कुज्झटि + स्वार्थे कन् टाप्।) कुज्झटिः। इति शब्दरत्नावली॥

कुज्झटी, स्त्री, (कुज्झटि + स्त्रियां वा ङीप्।) कुज्झटिः। इति शब्दरत्नावली॥

कुञ्चनं, क्ली, (कुञ्चति अनेन। कुञ्च + करणे ल्युट्।) नेत्ररोगविशेषः। तस्य लक्षणं यथा,—
"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" ॥
इति माधवकरः॥ (भावे ल्युट्। सङ्कोचः। यथा सुश्रुते।
"कुर्य्यात् शिरागतं मूलशिरा कुञ्चनपूरणम्" ॥)

कुञ्चफला, स्त्री, (कुत्सितं कुञ्चितं फलं अस्याः।) कुष्माण्डी। इति राजनिर्घण्टः॥

कुक्षिः, पुं, (कुन्च + इन्।) अष्टमुष्टिपरिमाणम्। यथा, स्मृतिः॥
"अष्टमुष्टिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम्"॥

कुक्षिका, स्त्री, (कुन्च + खुञ् + टाप् इत्वञ्च।) गुह्या। कुँख् इति भाषा। वंशशाखा। कचि इति भाषा। इति शब्दचन्द्रिका॥ क्षयाजीरकः। इति जटाधरः॥
(अस्या व्यवहारो यथा भरिचाद्यचूर्णे।
"मरिचः कुक्षिकाम्लष्ठा वृक्षाम्लाः कुक्षयः पृथक्"॥
इत्यादिषु द्रष्टव्यम्। इति चरके चिकित्सास्थाने। १९ अः॥) कूर्चिका। कुँजि चावि इति च भाषा। इति हेमचन्द्रः॥ मेषिका। इति राजनिर्घण्टः॥ मत्स्यभेदः। कुँचे इति भाषा। यथा। "कुक्षिकायैनं विस्राययति भाययति"। इति मुग्धबोधम्॥

कुक्षितं, त्रि, (कुन्च + क्तः।) वक्रम्। इत्यमरः। ३। १। ७१॥ (यथा, नैषधे ३। १।
"आकुक्षिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य्य" ॥)
तगरपुष्पे क्ली। इति राजनिर्घण्टः॥

कुक्षः, पुं क्ली, (कौ जायते जन + डः। पृषोदरादित्वात् मुमि साधुः।) पर्व्वतादेर्ध्वतापल्लवादिभिः समन्ताच्छादितगर्भो गह्वरादिदेशः। इति मधुप्रभृतयः॥ उपरि चतुर्दिक्षु च लतादिभिराच्छादितस्य स्थानस्य मध्ये शून्यदेशः। इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। निकुञ्जः। इत्यमरः। २। ३। ८॥ (यथा, पदाङ्कदूते १।
"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विषण्णम्।
अद्यैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुना मञ्जुकुञ्जं जगाम" ॥)
हनुः। हस्तिदन्तः। इति मेदिनी॥

कुञ्जरः, पुं, (प्रशस्तः कुत्सितः वा हनुर्दन्तो वा अस्यास्य। कुक्ष + "रश्मिकरणे खमुखकुक्षेभ्यः उपसंख्यानम्"। वार्त्तिकं इति रः।) हस्ती। (यथा, महाभारते ३। वैतवनपर्व्वणि २६। १५।
"कुञ्जरस्येव संग्रामे परिगृह्याङ्कुशग्रहम्" ॥)
उत्तरपदे श्रेष्ठवाचकः। यथा पुरुषकुञ्जर इत्यादि। इत्यमरः। २। ८। ३४॥ (सर्पविशेषः। यथा, महाभारते। ३५। १५।

कुटः

"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः" ॥) केशः । इति मेदिनी ॥ देशभेदः । इति शब्दरत्नावली ॥ (पर्व्वतविशेषः ॥ यथा गोः रामायणे ४ । ४१ । ५० ।

"ततः शक्रध्वजाकारः कुञ्जरो नाम पर्व्वतः ।
अगस्त्यभवनं तत्र निर्म्मितं विश्वकर्म्मणा" ॥)

कुञ्जरपिप्पली, स्त्री, (कुञ्जरनाम्नी पिप्पली ।) गजपिप्पली । इति शब्दमाला ॥ (गजपिप्पलीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

कुञ्जरवत्तारमूलं, क्ली, (कुञ्जरपिप्पल्या इव क्षारं उग्रं मूलमस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

कुञ्जरा, स्त्री, (कुञ्जः हस्तिदन्त इव पुष्पं अस्यास्याः । रप्रत्यये यच् तत आजादित्वात् टाप् ।) धातकी । धाइफुल इति भाषा । (अस्याः पर्य्याया यथा,—

"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बऊपुष्पी च वह्निज्वाला च सा स्मृता";

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे । गुणाश्चास्या धातकीशब्दे ज्ञातव्याः ॥) पाटलावृक्षः । इति मेदिनी ॥ (कुञ्जर + टाप् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जरारातिः, पुं, (कुञ्जरस्य अरातिः शत्रुः ।) शरभः इति हेमचन्द्रः ॥ (सिंहः । इति व्युत्पत्तिलभ्योऽर्थः ।)

कुञ्जरालुकं, क्ली, (कुञ्जरसंज्ञकं आलुकम् ।) आलुकविशेषः । हस्त्यालु । इति शब्दचन्द्रिका ॥

कुञ्जराशनः, पुं, (कुञ्जरेण अश्यते । अशू भोजने + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य विवरणं ज्ञेयम् ॥)

कुञ्जरी, स्त्री, (कुञ्जर + जातित्वात् ङीष् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जलं, क्ली, (कुत्सितं जलमिव जलं यत्र । एषोदरात् साधुः ।) काञ्जिकम् । इत्यमरः । २ । ९ । ९९ ॥

कुञ्जवल्लरी, स्त्री, (कुञ्जाकृतिरिव कुञ्जाकारा वा वल्लरी ।) निकुञ्जिकास्लाहवृक्षः । इति राजनिर्घण्टः ॥

कुञ्जिका, स्त्री, (कुन्ज + स्वुञ् + टाप् इत्वं च ।) क्षुद्रजीरकः । कुञ्चिका इति क्वचित् पाठः । इति जटाधरः ॥ निकुञ्जिकास्लाहवृक्षः । इति राजनिर्घण्टः ॥

कुट इ वैकल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) पञ्चमस्वरी । इ कुण्ठयते । वैकल्यमिह विकलीकरणम् । कुण्ठति जनं श्लोकः । इति दुर्गादासः ॥

कुट गि कौटिल्ये । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सकच्च-सेट् ।) गि कुटति अकुटीत् चुकोट कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इति दुर्गादासः ॥

कुट क ड प्रतापने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) पञ्चमस्वरी । क ड कोटयते । एषोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुटः, पुं क्ली, (कुट + कः ।) कलशः । इत्यमरः । २ । ९ । ३२ ॥

कुटः, पुं, (कुट् + कः ।) कोटः । इति मेदिनी । गड़

कुटन्न

इत्यादि भाषा ॥ शिलाकुट्टम् । पातरभाङ्गा हातुड़ी इति भाषा । वृक्षः । इति हेमचन्द्रः ॥ पर्व्वतः । इति हारावली ॥ (कुटिले त्रि, यथा, ऋग्वेदे १ । ४९ । ४ । "हविषाजारो अपां पिपर्त्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः" ॥)

कुटङ्गः, पुं, (कुर्त्तृहभूमिः टङ्कते आच्छाद्यतेऽनेन । कु + टकि आच्छादने । करणे घञ् ।) गृहाच्छादनम् । इति शब्दमाला ॥ चाल इति ख्यातः ॥

कुटङ्गकः, पुं, (कुटस्याङ्गमिव । शकन्ध्वादित्वात् साधुः ।) वृक्षत्वगादिनम् । छदिः । चाल इति भाषा । गृहभेदः । इत्यमरटीकायां सुकुटादयः ॥ कुँड़े इति भाषा ॥

कुटचः, पु, (कुटे गिरौ चीयते उत्पद्यते । चि + डः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥ (कुटजशब्दे गुणादयोऽस्य बोद्धव्याः ॥)

कुटजः, पुं, (कुटे पर्व्वते जायते । जन् + डः ।) पुष्पवृक्षविशेषः । यस्य फलं इन्द्रयवः । कुड़ची इति भाषा ॥ (यथा, माघे ६ । ३५ ।

"कुटजपुष्परागकषायाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम्" ॥)

तत्पर्य्यायः । शक्रः २ वत्सकः ३ गिरिमल्लिका ४ । इत्यमरः । २ । ४ । ९९ ॥ कौटजः ५ । इति तट्टीका ॥ वृक्षकः ६ शक्रपर्य्यायः ७ । इति रत्नमाला ॥ कुटजः ८ काही ९ कालिङ्गः १० मल्लिकापुष्पः ११ प्रावृष्यः १२ शक्रपादपः १३ वरतिक्तः १४ यवफलः १५ संग्राही १६ पाण्डुरद्रुमः १७ प्रावृषेण्यः १८ महागन्धः १९ पाण्डुरः २० । इति शब्दरत्नावली ॥ अपि च ।

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रभ्राखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ।
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । अतिसारनाशित्वञ्च । असितस्य तस्य गुणाः । रक्तपित्तत्वगदोषार्शोनाशित्वम् । इति राजनिर्घण्टः ॥ कफनाशकत्वम् । इति राजवल्लभः ॥

("कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः ।
लेहितोऽतिविषायुक्तः सर्व्वातीसारमुद्धरेत्" ॥

"कुटजस्य फलं ग्राह्यमष्टभागजले पृतम् ।
तथैव विपचेद्भूयो दाड़िमोदकसंयुतम् ॥
यावच्चैवलसीकाभं पृतं तमुपकल्पयेत् ।
तस्यार्द्धकर्षतक्रेण पिबेदक्षातिसारवान् ॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्" ।
इति वैद्यकचक्रपाणिसंग्रहेऽतिसाराधिकारे ॥)

अगस्त्यमुनिः । द्रोणाचार्य्यः । इति मेदिनी ॥

कुटन्नटं, क्ली, (कुटन् वक्रीभवन् सन् नटति । नट स्पन्दने + पचाद्यच् ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १३१ ॥ केउटिया मुता इति ख्यातम् । केशुर इति गौड़ोक्तिः । इति तट्टीका ॥

(अस्य व्यवहारो यत्र तद्यथा ।

"पद्मकं चन्दनोशीरं पाठां मूर्व्वां कुटन्नटम्" ॥

कुटिच

इति वाभटे चिकित्सास्थाने १० अध्याये ।

अस्य पर्य्यायाः यथा ।

"कुटन्नटं परं वल्क्यं मुस्ताभञ्च परीलवम्" ॥
इति वैद्यकरत्नमालायाम् ॥
कोसची मोथा । गुड़तजी इति च । इयन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥

पर्य्यायाश्च-यथा ।

"कुटन्नटं दासपुरं बालेयं परिपेलवम् ।
शवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च ।
मुस्तावत् पेलवपुटं शुक्लाभं स्यादितुन्नकम्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥ गुणा अस्य वितुन्नकशब्दे ज्ञातव्याः ॥)

कुटन्नटः, पुं, (कुटन् सन् नटति । नट् + अच् ।) श्योनाकवृक्षः । इत्यमरः । २ । ४ । ५७ ॥

(अस्य पर्य्याया यथा ।

"श्योनाकः शोणशाखः स्यान्नटः कट्वङ्गदुण्टुकः ।
मरुडूकपर्णपत्रोर्णं शुकनासकुटन्नटाः ।
दीर्घवृन्तो रक्तखापि पृथुशिम्बः कटम्भरः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ श्योनाकशब्देऽस्य गुणाश्च बोद्धव्याः ॥)

कुटपः, पुं, (कुटात् विपज्जालात् पाति रक्षति । कुट् + पा + कः ।) मुनिः । निष्कुटः । गृहसमीपोपवनम् । (कुट + "उषिकुटिदलीति" । उणां ३ । १४२ । इति कपन् ।) मानभेदः । स तु कुड़वपरिमाणम् । इति हेमचन्द्रः ॥ कमले क्ली । इति राजनिर्घण्टः ॥

कुटरं, क्ली, (कुट + बाहुलकात् करन् ।) कुठरः मशानदण्डबन्धनस्तम्भः । इत्यमरटीकायां नीलकण्ठः ॥

कुटरुः, पुं, (कुट + "कुटः किच्च" । उणां ४ । ८० । इत्यरुः किच्च ।) वस्त्रगृहम् । इत्युणादिकोषः । कानात् तांबु इति भाषा ॥

कुटरुषा, स्त्री, (कुटेषु वृक्षेषु अरुषा । शकन्ध्वादित्वात् साधुः ।) चिरता । इति रत्नमाला ॥ तेउड़ी इति भाषा ॥

कुटलं, क्ली, (कुटति आच्छादयत्यनेन । कुट् + करणे कलच् ।) पटलम् । इति हारावली ॥ चाल छाद इति भाषा ॥

कुटहारिका, स्त्री, (कुटं कलशं हरति जलाद्यानयनार्थं गच्छति या । कुट + हृ + स्वुञ् टाप् इत्वं च ।) दासी । इति हेमचन्द्रः ॥

कुटिः, स्त्री, (कुट्यते सङ्घीयते द्रव्यादिभिः असौ । कुट् + "कृ गृ पृ कुटीति" । उणां ४ । १४२ । इति इः स च कित् ।) गृहम् । इत्यमरटीकायां भरतः ॥

कुटिः, पुं, (कुट्यते छिद्यते ऽसौ । कुट छेदने + "कुटि कंप्योर्नलोपश्च" । उणां ४ । १४३ । इति इः । स च कित् । धातोर्नलोपश्च ।) वृक्षः । इति शब्दरत्नावली ॥ शरीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्व्वतः । इत्युज्ज्वलदत्तः । ४ । १४३ ॥)

कुटिचरः, पुं, (कुटिं कुटिलं जले चरतीति । कुटि +

चर + टः ।) जलशूकरः । इति शब्दरत्नावली ॥ शुशुक् इति भाषा ॥

कुटितं, त्रि, (कुटं कौटिल्यं जातमस्य । कुट् + इतच् किच्च ।) कुटिलम् । इत्युणादिकोषः ॥

कुटिरं, क्ली, (कुट्यते निर्म्मीयते यत् । कुट् + इरन् ।) कुटीरम् । लघुकुटी । इत्यमरटीकायां भरतः ॥

कुटिलं, त्रि, (कुट् वक्रीभावे + बाऽऊलकात् इलच् ।) अनृजु । बाँका इति भाषा । तत्पर्य्यायः । अराजम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ भुग्नम् ९ वेल्लितम् १० वक्रम् ११ । इत्यमरः । ३ । १ । ७१ ॥ भङ्गुरम् १२ । इति हेमचन्द्रः ॥ वेणु १३ विनतम् १४ उन्दुरम् १५ । इति शब्दरत्नावली ॥

(यथा, विष्णुपुराणे १ । ९ । २३ ।

"ज्वलज्जटाकलापस्य भृकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्मिन्भुवने मम यो न गतो भयम्" ॥)

तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"कालानुसारिवा वक्रं तगरं कुटिलं शठम् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम्" ॥

इति वैद्यकरत्नमालायाम् ॥ क्ली, छन्दोभेदः ॥)

कुटिला, स्त्री, (कुटति वक्रं व्रजतीति । कुट् + इलच् + स्त्रियां टाप् ।) नदीविशेषः । इति मेदिनी ॥ सरस्वती नदी । सुक्कानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (राधिकाभर्त्तृभगिनी ॥ त्रि, असरलम् ॥)

कुटी, स्त्री पुं, (कुटि + वा ङीप् ।) कुटः । गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा मनुः । ११ । ७२ ।

"ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्" ॥)

कुटी, स्त्री, कुम्भदासी । कुटिनी इति भाषा ॥ सुरानामगन्धद्रव्यम् । चित्रगुप्तः । इति मेदिनी ॥

कुटीचकः, पुं, (कुट्या स्वोपेन पुत्रान्नेन चकते दृप्यति । कुटी + चक् + अच् ।) पुत्रान्नजीवी । तत्पर्य्यायः । पुत्रान्नादः २ । इति चिकाण्डशेषः ॥ (कुट्यां पर्णकुटीरे चकते दृप्यति वसतीति । सन्न्यासिभेदः । स च कर्म्मनिष्ठः । यथा—महाभारते १३ । १४ अध्याये ।

"चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ ।
हंसः परमहंसश्च योऽत्र पश्चात् स उत्तमः" ॥)

कुटीचरकः, पुं, (कुट्यां चरति । कुटी + चर + टः स्वार्थे कन् ।) यतिविशेषः । इति यतिधर्म्मसंग्रहः ॥

कुटीरः, पुं, (कुटी + स्वल्पार्थे रः ।) क्षुद्रगृहम् । कुँड़े इति भाषा । तत्पर्य्यायः । स्वल्पवेश्म २ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १ । २८ ।

"ललित-लवङ्ग-लता-परिशीलन-कोमल-मलय-समीरे । मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्ज-कुटीरे" ॥)

कुटुङ्गकः, पुं, (कुटुङ्ग + स्वार्थे कन् ।) वृक्षलतागुह्यम् । पिटः । डोल इति भाषा । छदिः । चाल इति भाषा । इत्यमरटीकायां भरतः ॥ वृक्षलता । गृहभेदः । इत्यमरटीकासारसुन्दरी ॥ कुँड़े इति भाषा ॥

कुटुम्ब, क ङ धृत्याम् । इति कविकल्पद्रुमः । (चुरां-आत्मं-अकं-सेट् ।) ओष्ठवर्गशेषोपधः । क ङ कुटुम्बयते । अयं कैश्चिन्न मन्यते । इति दुर्गादासः ॥

कुटुम्बः, पुं, (कुटुम्बयते पालयति । कुटुम्ब + अच् । यद्वा कुटुम्ब्यते पाल्यते सम्बध्यते वा । कुटुम्ब + कर्म्मणि घञ् ।) नाम । ज्ञातिः । बान्धवः । सन्ततिः । इति शब्दरत्नावली ॥ पोष्यवर्गः । इत्यमरमाला ॥ (यथा, मनुः । ११ । २२ ॥

"तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः ।
श्रुतशीले च विज्ञाय वृत्तिं धर्म्म्यां प्रकल्पयेत्" ॥)

कुटुम्बव्याप्तः, त्रि, (कुटुम्बभरणाय व्याप्तः नियुक्तः ।) कुटुम्बपोषणासक्तः । तत्पर्य्यायः । अभ्यागारिकः २ उपाधिः ३ । इत्यमरः । ३ । १ । ११ ॥ (कुटुम्बेन पुत्रदारादिपोष्यवर्गेण व्याप्तः संयुक्तः । बद्ध-परिवारविशिष्टः पुरुषः ॥)

कुटुम्बिनी, स्त्री, (कुटुम्बः अतिप्रशस्येन अस्त्यस्याः । अस्त्यर्थे इनिः । ततो ङीप् ।) कुटुम्बविशिष्टा । पतिपुत्रदुहित्रादिमती प्रतिष्ठिता स्त्री । तत्पर्य्यायः । पुरन्ध्रीः २ । इत्यमरः । २ । ६ । ६ ॥ पुरन्ध्रिः ३ । इति भरतः ॥ पुरन्ध्रिका ४ । इति शब्दरत्नावली ॥ (यथा रघुवंशे । ८ । ८६ ।

"अपश्लोकभयात् कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः" ॥) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । मयस्या २ क्षीरिणी ३ जलकाम्बुका ४ वक्रशल्या ५ दुराधर्षा ६ क्रूरकर्म्मा ७ सिरिग्विटिका ८ प्रीता ९ प्रहरकुटवी १० प्रीतला ११ जलेवहा १२ । अस्या गुणाः । मधुरत्वम् । ग्राहित्वम् । कफपित्तव्रणरक्तदोषकण्डूनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

कुटुम्बी, [न्] पुं, (कुटुम्बः अस्त्यस्य । अस्त्यर्थे इनिः ।) गार्हस्थ्याश्रमविशिष्टः । तत्पर्य्यायः । गृही २ गृहमेधी ३ गृहस्थः ४ । इति जटाधरः ॥ (यथा, कुमारे । ६ । ८ । ५ ।

"ग्रैवेयः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" ॥)

कुटुम्बी [न्], त्रि, (कुटुम्बः पोष्यवर्गो ऽस्यास्य अस्त्यर्थे इनिः ।) क्षपकः । इति शब्दचन्द्रिका ॥ कुटुम्बविशिष्टश्च ।

कुटुम्बौकः, [स्] क्ली, (कुटुम्बानां ज्ञातिबान्धवानां दार-पुत्रादीनां ओकः वासस्थानम् ।) कुटुम्बवासस्थानम् । इति जटाधरः ॥

कुट्ट, क कुत्सायाम् । क्षिदि । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क कुट्टयति । इति दुर्गादासः ॥

कुट्ट, क ङ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) पञ्चमस्वरी । टवर्य्यान्तः । क ङ कुट्टयते । एषोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुट्टकः, पुं, (कुट्टकः भाज्यभाजकादिगणनं यत्र ।) अङ्कविशेषः । तस्य सूत्रं यथा,

"भाज्यो हारः क्षेपकश्चापवर्त्तः
केनाप्यादौ संभवेत् कुट्टकार्थम् ।
येन च्छिन्नौ भाज्यहारौ न तेन

क्षेपश्चैतद्दृश्यमुद्दिष्टमेव" ॥

उदाहरणं यथा ।

"एकविंशतियुतं शतद्वयं
यद्गुणं गुणकपञ्चषष्टियुक् ।
पञ्चवर्जितशतद्वयोद्धृतं
शुद्धिमेति गुणकं वदाशु तम्" ॥

इति लीलावती ॥ (कुट्टयति उपलदन्तादिभिर्भिनत्ति छिनत्ति चूर्णयति वा । कुट्ट छेदे + ण्वुल् । छेदके, त्रि । यथा, याज्ञवल्क्यः । १ । ४९ ।

"दन्तोलूखलिकः कालपक्वाशी वाग्भकुट्टकः" ॥)

कुट्टनं, क्ली, (कुट्टते इति । कुट्ट छेदने + भावे ल्युट् ।) छेदनम् । कोटा इति भाषा । कुत्सनम् । प्रलापश्च ॥

कुट्टनी, स्त्री, (कुट्टयति छिनत्ति नाशयति स्त्रीणां कुलमनया । कुट्ट + स्वार्थे णिच् ततः ल्युट् ङीप् । यद्वा कुट्ट्यते छिद्यते स्त्रीणां कुलं अनया । कुट्ट छेदने + करणे ल्युट् ङीप् च ।) पुरुषेण सह परस्त्रीयोगकर्त्री । कुट्नी इति भाषा । तत्पर्य्यायः । शम्भली २ । इत्यमरः । २ । ६ । १९ । कुट्नी ३ सम्भली ४ । इति तट्टीका ॥ माधवी ५ रङ्कमाता ६ अर्च्चुली ७ । इति जटाधरः ॥ कुम्भदासी ८ गणेरुका ९ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । २७३ ।

"तदालिङ्गनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत्" ॥)

कुट्टमितं, क्ली, स्त्रीणां दशधाश्रृङ्गारचेष्टान्तर्गतचेष्टाविशेषः । स्त्रीणां स्वाभाविकदशाश्रृङ्गारान्तर्गतमिदम् । इति हेमचन्द्रः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे । ३ । १११ ।

"केशस्रस्तनाधरादीनां यत्तु हर्षोऽपि सम्भ्रमात् ।
प्राज्ञैः कुट्टमितं नाम शिरःकरविधूननम्" ॥

कुट्टारं, क्ली, (कुट्ट + आरन् ।) केवलम् । इतिः । इति मेदिनी ॥ कम्बलम् । इति विश्वः ॥

कुट्टारः, पुं, (कुट्टते भिद्यते हन्यते वाऽस्मिन् पतनेनेति शेषः । कुट्ट + आरन् ।) पर्व्वतः । इति चिकाण्डशेषः ॥

कुट्टिमः, पुं क्ली, (कुट्ट + भावे घञ् । तेन निर्वृत्तः निष्पन्नः इत्यर्थे इमप् ।) मणिभूः । इत्यमरटीकायां भरतः ॥ (यथा रघुः ११ । ९ ।

"मरुत्तुर्न मणिकुट्टिमोचितौ
माटपार्श्वपरिवर्त्तिनाविव" ॥)

सुधाघटितभूतलम् । इति सुधूलिः ॥ कुटीरः । इति मधुरानाथः ॥ दाड़िमवृक्षः । इति राजनिर्घण्टः ॥

कुट्टिहारिका, स्त्री, (कुट्टते यत् । कुट्ट + इन् । कुट्टिं मत्स्यमांसादिकं हरति । कुट्टि + हृ + ण्वुल् टाप् अत इत्वं च ।) दासी । इति हलायुधः ॥

कुट्टीरः, पुं, (कुट्टते ऽस्मिन् । कुट्ट + ईरन् ।) पर्व्वतः । इति हारावली ॥

कुड्मलं, क्ली, (कुट्टते नारकिभ्यो बलवद्भ्यो दीयते यत्र । कुट + "कृषादिभ्यः"। उणां १ । १०८ । इति कलच् तस्य मुट् च ।) नरकभेदः । इति मेदिनी ॥ यत्र

कुठेरः

रज्जुभिः पोड़नम्। इति मनुः॥

कुड्मलः, पुं, क्ली, (कुटति ईषत् विकासोन्मुखीभवतीति। कुटि + "इषादिभ्यश्चित्" । उणां १। १०८। इति कमलच् ।) विकासोन्मुखप्रौढ़कलिका। ईषद्विकसिता कलिका। तत्पर्य्यायः। मुकुलः २। इत्यमरः॥ कोषः ३। इति जटाधरः॥ (यथा, माघे। २।७। "द्योतितान्तः सभैः कुन्दकुड्मलायदतः स्मितैः"॥)

कुठ छिदि। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुठेरः कुठारः कुठाकुः। इति दुर्गादासः॥

कुठ इ खोटने। वैकल्ये। आलस्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्-इदित्।) पञ्चमस्वरी। कर्म्मणि इ कुण्ठ्यते। वैकल्यं विकलीभावः। आलस्यं मन्दीभावः। कुण्ठति खड्गः शोकार्त्तो वृद्धो वा। इति दुर्गादासः॥

कुठः, पुं, (कुण्ठ्यते क्षिप्यतेऽसौ। कुठ छेदने + कर्म्मणि घञर्थे कः।) वृक्षः। इत्यमरः। २। ४। ५॥

कुठरः, पुं, (कुट + बाहुलकात् करन्।) मस्यान-दण्डबन्धनार्थलम्भः। तत्पर्य्यायः। दण्डविष्कम्भः २। इत्यमरः। २। ६। ७४॥ (नागविशेषः। (यथा, महाभारते १। ३५। १५।

"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः"॥

कुठाकुः, पुं, (कोठति आहन्ति भिनत्ति काष्ठम्। कुठ छेदने + आकुन् किच्च।) पक्षिविशेषः। इत्युणादिकोषः। काठ्ठोकरा इति भाषा॥

कुठाटङ्गः, पुं क्ली, (कुठारस्टङ्ग इव। एषोदरादित्वात् रूपे साधुः।) कुठारः। इति जटाधरः॥

कुठारः, पुं क्ली, (कोठतीत्यनेन। कुठ + करणे आरन्।) अस्त्रविशेषः। कुड़ाल इति भाषा। तत्पर्य्यायः। सधितिः २ परश्वः ३ परश्वधः ४। इत्यमरः। २। ८। ९२॥ कुठारी ५ पर्शुः ६ परश्वधः ७ पर्श्वधः ८। इति तट्टीका॥ कुठाटङ्गः ९ द्रुघणः १०। इति जटाधरः॥ (यथा, श्रीमद्भागवते ३। २५। १२।

"तं त्वागतार्हं प्रणतं प्रणम्यं
स्वमृत्यसंसारतरोः कुठारम्"॥)

कुठारः, पुं, (कुण्ठ्यते क्षिप्यतेऽसौ। कुठ + कर्म्मणि आरन्।) वृक्षः। इति शब्दरत्नावली॥

कुठाशः, पुं, (कुठ + आश।) वृक्षः। वागरः। इति मेदिनी॥ शस्त्रकारः। इति शब्दरत्नावली॥

कुठिः, पुं, (कुठ + "कुठिकंप्योर्नलोपश्च"। उणां ४। १४१। इति इन् किच्च।) पर्व्वतः। वृक्षः। इत्युणादिकोषः॥

कुठिकः, पुं, (कुठ + इकन् किच्च।) कुठम्। इति हारावली। कुड़ इति भाषा॥

कुठेरः, पुं, (कुण्ठति तापयति वैकल्यं करोति वा। कुठि खोटने वैकल्ये आलस्ये च + "पतिकठि-कुठीति"। उणां १। ५९। इति एरक् बाहुलकात् गुणोऽभावः।) अग्निः। इति शब्दमाला॥ तुलसी। इत्युणादिकोषः॥ अजशृङ्गः। इति राजनिर्घण्टः॥ बर्बरी इति ख्यातेः। (यथा, गीतः रामायणे १। १७। १०।

"दाड़िमान् करवीरांश्च अशोकांस्तिलकांस्तथा।
अङ्कोटांश्च कुठेरांश्च नीलाशोकांश्च सर्व्वशः"॥)

कुठेरकः, पुं, (कुठेर इव कायति प्रकाशते। कै + कः।) पर्णासः। इत्यमरः। २। ४। ७६॥ तुलसी इति ख्यातः। श्वेतच्छदः। इति शब्दचन्द्रिका॥ श्वेततुलसी वाबुइ तुलसी इति च ख्यातः। (अस्य पर्य्यायाः। "अर्ज्जकः श्वेतपर्णासो गन्धपुत्रः कुठेरकः"। इति वैद्यकरत्नमालायाम्। बर्बरी। एतदर्द्धेऽस्य पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

"बर्बरी तुवरीतुल्यौ खरपुष्पाजगन्धिका।
पर्णाश्वस्तत्र ज्ञेयौ तु कठिल्लककुठेरकौ"॥
गुणाश्चास्य बर्बरीशब्दे ज्ञेयाः॥) नन्दीवृक्षः। इति राजनिर्घण्टः॥

कुठेरजः, पुं, (कुठेर इव जायते। जन् + डः।) कुठेरकः। श्वेततुलसी। इति शब्दरत्नावली॥

कुठेरः, पुं, (कुठ + एरक्।) चामरवातः। चामरेर वातास इति भाषा। तत्पर्य्यायः। मरुयः २। इति त्रिकाण्डशेषः॥

कुड शि बाल्ये। अदने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकच्च-सेट्।) एतदाद्यास्चत्वारः पञ्चमस्वरिणः। बाल्यमिह शिशुव्यापारः। शि कुड़ति अकुड़ीत् सिताभिः शिशुः। इति दुर्गादासः॥

कुड़ इ वैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। कुण्डति जनं देवः विकलं करोतीत्यर्थः। इति दुर्गादासः॥

कुड इ ड दाहे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। ड कुण्डते इति दुर्गादासः॥

कुड इ क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) इ क कुण्डयति। इति दुर्गादासः॥

कुड़पः, पुं, (कुड़ + कपन्।) कुड़वपरिमाणम्। इत्यमरटीकायां स्वामी॥

कुड़वः, पुं, (कुण्डति परिमाति अनेनास्मिन् वा। कुड़ + कवन्।) परिमाणविशेषः। (यथा, आर्य्यासप्तशत्याम्। १३०। "उपनीय कमलकुड़वं कथयति समयश्चिकित्सके हलिकः"॥) स तु प्रस्थचतुर्थांशः। इति लीलावती॥ वैद्यकमते विप्रहतपरिमाणम्। द्राचिंशत्तोलकमिति यावत्। तत्पर्य्यायः। अञ्जलिः २ अष्टमारम् ३ शरावार्द्धम् ४। इति परिभाषा। (यदुक्तं वैद्यकपरिभाषायाम्॥

"रक्तिकादिषु मानेषु यावन्न कुड़वो भवेत्।
मुख्यद्रवार्द्रयोश्चापि तुल्यमानं प्रकीर्त्तितम्"॥
"प्रस्थतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः॥
अष्टमानश्च स ज्ञेयः"। इति शार्ङ्गधरस्य पूर्व्वखण्डे। १ अः॥)

कुड़ऊची, स्त्री, (कुड़ी क्षुद्रा ऊची कारवेल्ली।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कुड़िः, पुं, (कुण्ड्यते दह्यते इति। कुड़ि दाहे + इन्।) शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।

कुड़िशः, पुं, (कुण्ड्यते मस्यतेऽसौ। कुड़ अदने + बाहुलकात् शः तत इट्।) मत्स्यविशेषः। कुड़चि माच् इति भाषा। अस्य गुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। अग्निदीपनत्वम्। लघुत्वम्। स्निग्धत्वम्। वातरोगे पथ्यत्वम्। रोचनत्वम्। बलकफोष्णत्वकारित्वञ्च। इति राजवल्लभः॥

कुड्मलः, पुं, (कुड़ बाल्ये + "इषादिभ्यश्चित्"। उणां १। १०८। इति कमलच् कुड़ेरपि। मुट् च।) कुड्मलः। इत्यमरटीका सिद्धान्तकौमुदी च॥

कुड्यं, क्ली, (कुड़ि + तत्र साधुरिति यत्। कौतेरञ्जादित्वात् यक् डुगागमश्च इत्युज्ज्वलदत्तादयः।) भित्तिः। भित् देयाल इत्यादि भाषा। इत्यमरः। २। २। ४॥ (यथा, महाभारते १। १४५। १०।

"सर्पिस्तैलवसाभिश्च क्षात्तया चाप्यनल्पया।
मृत्तिकां मिश्रयित्वा त्वं लेपयं कुड्येषु दापय"॥)

विलेपनम्। इति मेदिनी॥ कौतूहलम्। इति शब्दरत्नावली॥

कुड्यकं, क्ली, (कुड्य + स्वार्थे कन्।) कुड्यम्। भित्तिः। इति शब्दरत्नावली॥

कुड्यच्छेदी, [न्] पुं, (कुड्यं भित्तिं छिनत्ति विदारयतीति। कुड्य + छिद् + णिनिः।) चौरविशेषः। इति शब्दरत्नावली॥ सिंदेल चोर इति भाषा॥

कुड्यच्छेद्यं, क्ली, (कुड्यस्थितं कुड्यस्य वा छेद्यम्।) खानिकम्। इति त्रिकाण्डशेषः। देयालेर गर्त्त इति भाषा॥

कुड्यमत्स्यी, स्त्री, (कुड्ये मत्स्यी इव। मत्स्य + जातित्वात् ङीष् यणोपः।) गृहगोधिका। इति शब्दरत्नावली॥

कुड्यमत्स्यः, पुं, (कुड्ये मत्स्य इव।) गृहगोधिका। इति हेमचन्द्रः॥

कुण त् क आभाषे। मन्त्रे। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) क्रखो मूर्द्धन्योपधः। कुणयति। मन्त्रोऽभिमुखीकरणम्। गुणोक्तिरित्येके। इति दुर्गादासः॥

कुण शु उपकरणे। शब्दे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) उपकरणं दानादिना पोषणम्। शु कुणति दीनं दयालुः। कोकिला। इति दुर्गादासः॥

कुणक्षरः, पुं, (कुणं सुक्ताम्रादिकं क्षरयति। कुण + क्षु + बाहुलकात् खच्।) वृक्षविशेषः। वनवेतुया इति भाषा। तत्पर्य्यायः। कुणक्षा २ क्षणक्षः ३ अरण्यवालूकः ४। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। पाचनत्वम्। हितत्वञ्च। एतच्छाकगुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। ईषत्कषायत्वम्। संग्राहित्वम्। पित्तश्लेष्महरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

कुणपः, पुं, (क्षणोः + कपन् सम्प्रसारणञ्च।) शवम्। मृतशरीरम्। इत्यमरः। २। ८। ११८॥ (यथा, महाभारते १। ६। २२-२३।

नारद उवाच।

"उन्मत्तवेषं बिभ्रत् स चंक्रमीति यथासुखम्
वाराणस्यां महाराज! दर्शनेसुर्मनोहरम्॥

तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्।
तं दृष्ट्वा यो निवर्त्तेत स सम्वर्त्तो महीपते !" ॥)
एतदर्थे नपुंसकलिङ्गोऽपीति नयनानन्दः॥ पूतिगन्धिः। इति मेदिनी॥ अस्रविशेषः। वड़्गा इति भाषा। इत्यमरटीकायां रायमुकुटः॥ पूतिगन्धौ त्रिलिङ्गोऽपि यथा,—
"कुणपं मस्तुलुङ्गाभं सुगन्धं क्षथितं बज्र"॥
इति माधवकरः॥ (रोगविशेषः। यथा॥"कुणपष्ठाष्ठिपित्ताभ्याम्"। इति शार्ङ्गधरे मध्यखण्डे। १ अध्यायः॥)

कुणपी, स्त्री, (कुणप+गौरादित्वात् ङीष्।) विट्। इति मेदिनी॥ गुयेशालिका इति भाषा॥

कुणालः, पुं, (क्रम+"पीयुक्षमिभ्यामिति" उणां ३। ७६। इति। कालन्। सम्प्रसारणञ्च।) देशभेदः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अशोकराजपुत्रभेदेऽपि। स च बौद्धः॥)

कुणिः पुं, (कुण+इन्।) तुम्बरुक्षः। इत्यमरमेदिनीकरौ॥ तुँद् इति भाषा। (शरीरस्य स्थानविशेषः। "कक्षात्तमध्ये कक्षाधक्कुणिलं तच्च जायते"॥ इति वामटे शारीरस्थाने ४ अध्याये॥)

कुणिः, त्रि, (कुण+इन्।) कुकरः। इति मेदिनी॥ कोपा इति भाषा। (यथा, सुश्रुते।
"गर्भघातप्रकोपेण दोषदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुः" इति॥)

कुण्डिन्दः, पुं, (कुण शब्दे+"कुणिपुल्योः किन्दच्"। उणां ४। ८५। इति किन्दच्।) शब्दः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुण्टकः, त्रि, (कुटि+ण्वुल्।) स्थूलः। इति शब्दमाला। मोटा इति भाषा॥

कुण्ठः, त्रि, (कुण्ठति क्रियासु मन्दीभूतो भवति। कुठि+अच्।) क्रियासु मन्दः। अकर्म्मण्यः। इत्यमरः। २। १। १७॥
(यथा, भट्टारकविरचिते विष्णुस्तोत्रे ३०।
"वैकुण्ठेये ऽथकण्ठे वसतु मम मतिः कुण्ठभावं विहाय"॥) मूर्खः। इति मेदिनी॥

कुण्ठकः, त्रि, (कुण्ठति कुण्ठयति वा आत्मानं जड़ीभूतं करोति। कुठि+ण्वुल्।) मूर्खः। इति शब्दमाला॥

कुण्ठितः, त्रि, (कुठि+कर्त्तरि क्तः।) सङ्कुचितः। यथा। "दग्धवदनसुज्ञानां कुण्ठिता यत्र शक्तिः"॥ इति महानाटकम्॥

कुण्डं, क्ली, (कुण्डतीति। "जमन्तात् डः"। उणां १। ११३। इति डः।) मानभेदः। (कुण्ड्यते रक्ष्यते जलं यत्र। कुडि+अधिकरणे अप्।) देवजलाधारः। इति मेदिनी॥ जलाधारविशेषः। चौबाचा इति भाषा॥
तज्जलगुणाः। अग्निकफकारित्वम्। रूक्षत्वम्। मधुरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ कफाजनकत्वम्। इति राजवल्लभः॥ *॥ (पात्रविशेषः। यथा, रघौ १। ८४।
"सुवं कोल्लेव कुण्डोघ्नी मेध्येनावभृतादपि"॥)
होमीयाज्यालयः। तत्तु प्राग्यत्नुर्हस्तमितं भवति तस्य विधिः। तत्र मत्स्यपुराणम्।
"प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः"॥
प्रागुदक्प्लवनां पूर्व्वनीचां उत्तरनीचां वा॥
तत्र वशिष्ठपञ्चरात्रे विज्ञानलक्षितायाञ्च।
"सर्व्वाधिकारिकं कुण्डं चतुरस्रन्तु सर्व्वदम्"।
चतुरस्रं चतुष्कोणम्। भविष्योत्तरम्।
"सहस्रे त्वथ होतव्ये कुर्य्याद् कुण्डं कराल्पकम्।
द्विहस्तमयुते तच्च लक्षहोमे चतुष्करम्"॥
द्विहस्तादिके यामलः।
"पूर्व्वपूर्व्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम्।
उत्तरोत्तरकुण्डानां मानं तत्परिकीर्त्तितम्"॥
पूर्व्वपूर्व्वस्य कुण्डस्य हस्तद्विहस्तादिमितस्य कोणसूत्रेण ईशानाग्निर्ऋतिकोणदत्तसूत्रेण परिमितं यन्मानं उत्तरोत्तरकुण्डानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्तद्वैगुण्यादिमितम्। तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिमाणापत्तेः। लक्षकस्य भूमेः परिमाणवत्॥
वशिष्ठपञ्चरात्रे।
"यावान् कुण्डस्य विस्तारः खननं तावदिष्यते।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः"॥
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता मृत्तिकाः। ताश्च खातदेशादाद्ये एकाङ्गुलरूपं खातं परित्यज्य उच्छ्रायेण विस्तारेण चैतावदिक्रमेण वेदाद्यङ्गुलाः। एतद्विपरीतास्तन्मध्यान्तरोत्था व्यवहारविदग्धाः। वेदाश्चत्वारः अयनञ्चयः नयने द्वे रसाः षट् गुणास्त्रयः वसुतर्कयुगानि यथाषट्चत्वारि॥ विष्णुयामले।
"खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्"॥
एककुण्डस्य पश्चिमदिक्कर्त्तव्यतामाह महादाननिर्णये वशिष्ठपञ्चरात्रम्।
"मुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे तथैव च।
सदा होमे सदा श्रान्तावेकं वारुणदिग्मतम्"॥
शारदातिलके।
"होतुरग्र्य योनिरासामुपर्य्यन्त्यत्यपद्मवत्।
मुञ्जरत्नेकहस्तानां कुण्डानां योनिरीरिता॥
षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी।
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम्॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयङ्गमेखैव योन्यग्रमपि वर्द्धयेत्॥
स्त्रुवादारभ्य नालं स्याद्योन्या मध्ये सरङ्गकम्"॥
आसां मेखलानां अश्वत्थपद्मवदित्यनेन चतुरङ्गुलविस्तृतमूलात् यथोक्तक्रमेण एकाङ्गुलान्तःसंकुचितविस्तारा॥ यामले।
"नाभिमेखलयोर्म्मध्ये परिधेः स्थापनाय च।
रन्ध्रं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि"॥
परिधौ स्तृणित्यासानाह छन्दोगपरिशिष्टे।
"बाह्यमार्गाः परिधय ऋजवः सत्वचोऽग्रगाः।
त्रयो भवन्त्यग्नीषोमीया एकेषान्तु चतुर्दिशम्॥
प्रागग्रावमितः पश्चादुदगग्रमथापरम्।
न्यसेत् परिधिमन्यञ्चेदुदग्रः स पूर्व्वतः"॥
अग्रगाः छिद्ररहिताः अभितोऽग्नेः पार्श्वद्वये दक्षिणतः उत्तरतः पश्चात् पश्चिमे उदग्रं उत्तराग्रम्॥ त्रैलोक्यसारेऽपि।
"कुम्भद्वयसमायुक्ता अश्वत्थदलवन्नता।
अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यस्थितिर्यथा"॥
कुम्भद्वयसमायुक्ता गजकुम्भाकारमूलदेशयुक्ता नता नम्रा अङ्गुष्ठमितमङ्गुलिमेखलावेष्टनयुक्ता तथात्वे हस्तगणिताज्यस्थित्या कुण्डे तत्पाता भवतीत्यर्थः॥ पञ्चरात्रे।
"कल्पयेदन्तरे नाभिं कुण्डस्याम्बुजसन्निभाम्।
मुञ्जरत्नेकहस्तानां नाभिरत्नेधविस्तृता॥
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयङ्गमेखैव नाभिं एधगुदारधीः॥
नाभिच्छेदं त्रिधा कृत्वा मध्ये कुर्व्वीत कर्णिकाम्।
वह्निरंशद्वये नाड़ी पद्माभि परिकल्पयेत्"॥
तत्र कुण्डस्य दोषमाह विश्वकर्म्मा।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः।
वक्रकुण्डे च सन्तापो मरणं छिन्नमेखले॥
मेखलारहिते शोको क्षधिके वित्तसंक्षयः।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम्॥
अपत्यध्वंसगं प्रोक्तं कुण्डं यत् कण्ठवर्जितम्"॥
अत एव वशिष्ठसंहितायाम्।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम्।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्म्मणि"॥
इति तिथ्यादितत्त्वम्॥

कुण्डं, क्ली स्त्री, (कुण्ड्यते रक्ष्यते मक्षादि अस्मिन् कुडि रक्षणे+अच्।) स्थाली। इत्यमरभरतौ

कुण्डः, पुं, (कुण्ड्यते दह्यते कुलं अनेन। कुंडि-दाहे+करणे घञ्।) अमर्षे भर्त्तरि जारजः। जीवति भर्त्तरि उपपतिजातः। इत्यमरः। २। ६। ३६॥ खामी वाँचिया थाकिते उपपतिजात विजन्म सन्तान इति भाषा॥ (यथा मनुः ३। १७४।
"पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः"॥
सर्पविशेषः। यथा महाभारते। १। १२३। ६८।
"कच्छपाश्च कुण्डश्च तक्षकश्च महोरगः"॥)

कुण्डकीटः, पुं, (कुण्डे नरककुण्डे स्थितः कीट इव चार्व्वाकसंसर्गत्वात्।) चार्व्वाकवचनाभिज्ञपुरुषः। पतितब्राह्मणीपुत्रः॥ (कुण्डे योनिकुण्डे कीट इव।) दासीकामुकः। इति मेदिनी॥

कुण्डगोलकं, क्ली, (कुण्डे पात्रविशेषे गोलं गोलाकारं कं जलं अत्र।) काञ्जिकम्। इति हेमचन्द्रः॥ (काञ्जी इति भाषा॥ *॥ कुण्डश्च गोलकश्च इति द्वन्द्वेऽते कुण्डगोलकौ। यथा मनुः। ३। १७४।
"परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डः स्याद् मृते भर्त्तरि गोलकः"॥)

कुण्डङ्गः, पुं, (कुण्डं तदाकारं गच्छति। गम+बाहुलकात् खः डिच्च।) कुलम्। इत्यमरभरतौ॥

कुण्डपाय्यः, पुं, (कुण्डैः चमसैः पीयतेऽत्र सोमः। कुण्ड+पा+अधिकरणे यत् युगागमश्च निपात्यते।) क्रतुः। इति मुग्धबोधम्॥

कुण्डलं, क्ली, (कुण्ड्यते रक्ष्यते इति कुडि रक्षायां + दृषादित्वात् कलच्। यद्वा कुण्डं तदाकारं लाति गृह्णातीति। ला + कः।) स्वनामख्यातकर्णभूषणम्। (यथा विष्णुधाने।

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः
केयूरवान् कनककुण्डलवान् किरीटी" ॥)

तत्पर्य्यायः। कर्णवेष्टनम् २। इत्यमरः।२।६।१०३। पाशः। वलयः। इति मेदिनी॥ (पुं, कौरव्यकुलजसर्पविशेषः। यथा महाभारते १। ५७। १३।

"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
बाहुकः पृष्ठकर्षश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्" ॥

पुंलिङ्गे ऽस्य रक्षकाक्षनवाचकता उक्ता। यथा, वैद्यकरत्नमालायाम्।

"रक्षपुष्पः कोविदारो युग्मपत्रस्तु कुण्डलः" ॥)

कुण्डलिनी, स्त्री, (कुण्डलिन् + स्त्रियां ङीप्।) कुलकुण्डलिनी शक्तिः। यथा,—

"ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्॥
कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्।
तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः॥
उद्यद्दिनकरोद्योतां यावच्छासं दृढ़ासनः।
अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम्।
तत्प्रभापटलज्यातं शरीरमपि चिन्तयेत्" ॥

इति तन्त्रसारः॥ * ॥

गुडूची। इति राजनिर्घण्टः॥ मिष्टान्नविशेषः। जिलिपी इति भाषा। तस्य पाकप्रकारो यथा।

"नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्यस्रेन प्रलेपयेत्॥
द्विप्रस्थां समितां तत्र दध्यस्रं प्रस्थसम्मितम्।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्॥
आतपे स्थापयेत्तावद्यावद्याति तदस्रताम्।
तां सुपक्वां घृताभीत्वा सितापाके तनुद्रवे॥
कर्पूरादिसुगन्धे च क्षपयित्वोद्धरेत्ततः" ॥

अस्या गुणाः।

"एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरी हृद्या रुच्या चेन्द्रियतर्पणी" ॥

इति भावप्रकाशः॥

कुण्डली, स्त्री, (कुण्डल + जातौ ङीष्।) मिष्टान्नविशेषः। जिलिपी इति भाषा। इति पाकराजेश्वरः॥ * ॥ कुलकुण्डलिनी शक्तिः। यथा,—

"चिकोणं तत्तु विज्ञेयं शक्तिपीठं मनोहरम्।
तद्गह्वरे कामवायुर्जीवरूपोऽतिचञ्चलः॥
अधोमुखस्तत्र लिङ्गः स्वयम्भुस्तेन वाल्यते॥
नीवारशूकवत्तन्वी कुण्डली परदेवता॥
शुक्लतुल्यनिभा देवी सार्द्धत्रिवलयान्विता।
मुखेनाच्छाद्य ब्रह्मास्यं तया संवेष्टितः प्रभुः॥
डाकिनी ह्यत्र वसति द्वारपाली सयक्षिका।
यः साधकोऽत्र रमते स दिव्यो नैव मानुषः" ॥

इति सम्मोहनतन्त्रम्॥ (अस्याः पर्य्याया यथा, हठयोगदीपिकायाम्। ३। १०४॥ कुटिलाङ्गी २ कुण्डलिनी ३ भुजङ्गी ४ शक्तिः ५ ईश्वरी ६ अरुन्धती ७॥) गुडूची। काञ्चनलताः। इति मेदिनी। (अस्याः पर्य्याया यथा,—

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डलीतामपुष्पश्च स्मन्तकः खल्पकेशरी" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥)

कपिकच्छुः। सर्पिणीलताः। इति राजनिर्घण्टः॥

कुण्डली, [न्] पुं, (कुण्डलं अस्त्यस्य इति इनिः। कुण्डलाकारेण स्थितेरस्य तथात्वम्।) सर्पः। इत्यमरः। १। ८। ७॥ वरुणः। (कुण्डलं कुण्डलवदाकारं शरीरे अस्त्यस्य।) मयूरः। इति मेदिनी॥ चित्तलमृगः। इत्यजयपालः। (विष्णुः। यथा, महाभारते १३। १४६। ११०।

"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः" ॥)

कुण्डलयुक्ते, त्रि। इति मेदिनी। (यथा गोः रामायणे। ३। ६। ११।

"इमे च पुरुषा दिव्या यान्त्यस्य रथमन्तिकात्।
परं शुभाः कुण्डलिनो युवानः खड्गपाणयः" ॥)

कुण्डाग्नी, [न्] त्रि, (कुण्डं योनिकुण्डं तदुपलक्षीकृत्य अग्निं जीवनयात्रां यापयतीति। कुण्ड + अग्नि + णिनिः।) भगभक्तकः। कोट्टना इति भाषा। इति महाभारते दानधर्म्मः। (कुण्डस्य जारजातस्य अन्नं अश्नातीति।) कुण्डान्नभोजी। तस्य नरको यथा,—

"रङ्गोपजीवी कैवर्त्तः कुण्डाग्नी गरदस्तथा।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः॥
आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये" ॥

इति विष्णुपुराणे। २। ६। २०, २१॥ "रङ्गोपजीवी नटमल्लादिवृत्तिः। कैवर्त्तः धीवरवृत्तिः पत्नीं जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाग्नी। सूची पिशुनः। माहिषो महिषोपजीवी। यद्वा।

'महिषीत्युच्यते भार्य्याभगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः'।

इति स्मृतिप्रोक्तः। पर्व्वकारी धनादिलोभेनापर्व्वसु अमावस्यादिक्रियाप्रवर्त्तकः। पर्व्वगामीति पाठे पर्व्वसु स्त्रीगामी। ग्रामयाजकः यामार्थे यज्वा"। इति तट्टीकायां श्रीधरस्वामी॥ (धृतराष्ट्रपुत्रः। यथा महाभारते।१।११७।१३।

"कुण्डाग्नी पिरजाश्चैव दुःशला च शुभाधिका"॥)

कुण्डिका, स्त्री, (कुण्ड + स्वार्थे कन् टाप् अत इत्वं च।) कमण्डलुः। इति हेमचन्द्रः॥ पिठरः। इति शब्दचन्द्रिका। कुँड़ि इति भाषा॥ (ताम्रकुण्डम्। स्थाली। सामवेदान्तर्गत उपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"अथक्लैकाक्षरं पूर्णा सूर्य्याख्यध्यात्मकुण्डिका" ॥)

कुण्डिनं, क्ली, विदर्भनगरम्। इति हेमचन्द्रः। (यथा, हरिवंशे।

"कुण्डिने पुण्डरीकाक्ष! भोजपुत्रस्य शासनात्"॥)

कुण्डिनः, पुं, (कुडि रक्षायां दाहे च "बाहुलमन्यत्रापि"। उणां। २। ४६। इति इनच्।) मुनिविशेषः। इत्युणादिकोषः। (यथा, आश्वलायने।

"कुण्डिनानां वाशिष्ठमैत्रावरुणकौण्डिन्येति"॥

कुरुवंशीयनृपभेदः। स च धृतराष्ट्रस्य पुत्रः। यथा महाभारते १। ६४। ५६।

"हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः"॥)

कुण्डी, स्त्री, (कुडि + इन्। ततो वा ङीप्। कुण्ड + संज्ञायां वा ङीष्।) कमण्डलुः। इत्यमरः। २। ७। ४६॥ स्थाली। इत्यमरटीकायां भरतः॥

कुण्डीरः, पुं, (कुण्ड्यते दह्यते संसारानलसन्तापेन। कुडि + ईरन्।) मनुष्यः। (कुण्ड्यते रक्ष्यते दुर्ब्बलो येन।) बलवति त्रि। इति धरणी॥

कुत् आस्तृतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुतपः। इति दुर्गादासः॥ कुत् अपस्यः कुतपः कालविशेषः। क्षत्तिरचितस्नेहपात्रञ्च। इति केचित्॥

कुतः, [स्] अ, प्रश्नः। पञ्चम्यर्थः। निश्चयः। इति विश्वः। (यथा, विष्णुपुराणे। १। १६। ३७।

"सर्व्वभूतात्मके तात! जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मिथ्यामिश्रकथा कुतः" ॥)

कुतनुः, पुं, (कुत्सिता तनुर्यस्य। पिङ्गलनेत्रत्वात् तथात्वम्।) कुबेरः। इति त्रिकाण्डशेषः॥ (त्रि, कुत्सितशरीरः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुतपः, पुं क्ली, अक्नोऽष्टमोऽंशः। दिवसस्याष्टमो मूहूर्त्तः। यथा,—

"अक्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः"॥

इति आद्धतत्त्वे मत्स्यपुराणवचनम्॥ * ॥ पारिभाषिककुतपा यथा,—

"मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः"॥

इति मिताक्षरायामाचाराध्यायः॥ स च त्रिंशद्दण्डदिनमाने द्वितीयप्रहरशेषदण्डावधि तृतीयप्रहरप्रथमदण्डपर्य्यन्तकालः। इत्यमरः।२।७।३१॥ स तु एकोद्दिष्टश्राद्धारम्भकालः। यथा,—

"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्"॥

इति आद्धतत्त्वम्॥

"दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितृणामक्षयप्रदः"॥

इति शातातपः॥ * ॥ दौहित्रः। वाद्यम्। छागलोमजकम्बलम्। कुशग्रन्थम्। इति मेदिनी॥

कुतपः, पुं, (कुत्सितं पापं तपति कुं भूमिं तपति वा। तप + अच्। कुत् + कपन् वा।) सूर्य्यः। वैश्वानरः। द्विजन्मा। अतिथिः। गौः। आग्नेयः। इति हेमचन्द्रः॥

कुतुकं, क्ली, (कुत् + बाहुलकात् उकञ्।) कौतुकम्। इत्यमरः। १। ७। ३१॥ (यथा, शुभाङ्कविद्वत्तोपदेशशतके। १०२।

"कुतुकाय कोविदानां मूढ़मतीनां महोपकाराय।

निरमात्कविर्गुमानिः शुतोपदेशप्रबन्धमसुम्" ॥)
कुतुपं, क्ली पुं, (कुतप + एषोदरादित्वात् साधुः ।) कुतपः। दिनस्याष्टममुहूर्त्तः। इति शब्दरत्नावली॥
कुतुपः, पुं, (कृषा कुतुः ततो डुप् च। ततः एषोदरात् अकारागमे साधुः।) चर्म्मनिर्म्मितालवखेहपात्रम्। इत्यमरः। २। ९। ३३॥ क्षोट कुपो इति भाषा॥
कुतूः, स्त्री, (कुत्सितं तन्यते। तन् बाहुलकात् कूः। टिलोपश्च।) चर्म्मनिर्म्मितखेहपात्रम्। इत्यमरः। २। ९। ३३॥ मसक इति कुपो इति च भाषा॥
कुतूणकः, पुं,(कु ईषत् तूणयति सङ्कोचयति चक्षुः यः। कु + तूण सङ्कोचे + ण्वुल्।) बालरोगविशेषः। स तु नेत्ररोगः। कतुया इति भाषा। तस्य लक्षणम्॥
"कुतूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि।
जायते तेन तन्नेत्रं कण्डूरञ्च खवेन्मुहुः॥
श्लिष्यः कुर्य्याल्ललाटात्तिकूटनासावधर्षणम्।
शुक्लो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः"॥
इति माधवकरः॥ कुकूणक इत्यपि पाठः॥
(यथा,—
"कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः॥
स्यात्तेन शिशुरक्ष्णोनाश्चात्तो वीक्षणाक्षमः।
स वर्त्मशूलपैच्छिल्यकण्डूनासात्तिमर्हति"॥
इत्युत्तरतन्त्रे ८ अध्याये वाभटेनोक्तम्॥ * ॥
चिकित्सा यथा॥
"शुण्ठी भृङ्गनिशाकल्कः पुटपाकः ससैन्धवः।
कुकूणकेऽक्षिरोगेषु भद्रमाश्योतनं हितम्॥
क्रिमिघ्नालक्ष्मिलादार्व्वी लाक्षाकाञ्जिकगैरिकैः।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां योधकीर्ण च।
सुदर्शनामूलचूर्णादञ्जनं स्यात् कुकूणके"॥
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे॥)
कुतूहलं, क्ली, (कुतूं चर्म्ममयतैलादिपात्रवत् अन्तर्हलति सोत्सुकं करोति। हल् + अच्।) अपूर्ब्बवस्तुदिदृक्षाद्यतिशयः। तत्पर्य्यायः।
कौतूहलम् २ कौतुकः ३ कुतुकम् ४। इत्यमरः। १। ७। ३१॥ चित्रम् ५। इति शब्दरत्नावली। (यथा, नैषधे। १। ११९।
"प्रियावियोगादिधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्"॥
नायिकालङ्कारविशेषः। तल्लक्षणं यथा साहित्यदर्पणे। ३। ११९।
"रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्"॥)
कुतूहलः, त्रि, प्रश्नकः। खट्टुतः। इति हेमचन्द्रः॥
कुत्तर्यं, क्ली, (कुत्सितं त्रयमिव।) कुम्भी। इति हारावली। पाना इति भाषा॥ (कुम्भिकाशब्दे ऽस्य विवृतिर्द्रष्टव्या॥)
कुत्र, अ, ("सप्तम्यास्त्रल्"। ५। ३। १०। इति त्रल्।) कस्मिन् इति व्याकरणम्। कोथाय इति भाषा॥ (यथा, माघकाव्ये।
"हा! सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा"॥)
कुत्रचित्, अ, (कुत्र च चित् च इति द्वन्द्वसमासः। सुग्धबोधमते "किमः क्वन्ताच्चिदनौ"। इतिचित्।) कोनखाने इति भाषा। इति व्याकरणम्। (यथा महाभारते। ३। १४२। ५३।
"असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित् क्वचित्"॥)
कुत्स ड क ञ अवक्षेपे। इति कविकल्पद्रुमः॥ चुरां-आत्मं-उभय-सकं-सेट्।) पञ्चमस्वरी। दन्त्यवर्गाद्योपधः। अवक्षेपो निन्दा। ड क, योन कुत्सयते कुत्स्यमिति हलायुधः॥ ञ, कुत्सयति कुत्सयते। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो ञकारः। इति दुर्गादासः॥
कुत्सनं, क्ली, (कुत्स् + भावे ल्युट्।) निन्दनम्। इति शब्दरत्नावली॥ (यथा मनौ ४। १६३।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्"॥
कुत्स्यते निन्द्यतेऽनेन। करणे ल्युट्। निन्दासाधनधर्म्मः। चि कुत्सायुक्तः॥)
कुत्सला, स्त्री (कुत्सं क्रयविक्रययोर्निषिद्धतया निन्दां लाति। ला + कः + टाप्।) नीलीवृक्षः। इति शब्दचन्द्रिका॥
कुत्सा, स्त्री, (कुत्स् निन्दने + भावे अप् टाप् च।) कुत्सनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ निन्दा ९ गर्हणम् १०। इत्यमरः। १। ६। १३॥ गर्हा ११ निन्दनम् १२ कुत्सनम् १३ परिवादः १४ जुगुप्सनम् १५ अपक्रोशः १६ भर्त्सनम् १७ अपवादः १८। इति शब्दरत्नावली॥ उपरागः १९ अवध्वंसः २० घृणा २१ धिक् २२ सामि २३। इति जटाधरः॥
कुत्सितं, क्ली, (कुत्स + कर्म्मणि क्तः।) कुष्ठनामौषधम्। इति राजनिर्घण्टः॥ (कुड् इति भाषा॥)
कुत्सितः, त्रि, (कुत्स् + क्तः।) निन्दितः। तत्पर्य्यायः। निक्षुष्टः २ प्रतिक्षुष्टः ३ अर्व्वा ४ रेषः ५ याप्यः ६। अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः। ३। १। ५४॥ रेषः १४ अरमः १५ आणकः १६ अनकः १७। इति तट्टीका॥ कुप्रियः १८। इति जटाधरः॥ आखेटः १९ रेषसः २० काण्डः २१ गर्हितः २२ अपक्षुष्टकः २३। इति शब्दरत्नावली॥
कुथ इ क्लेशे। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकञ्च-सेट् इदित्।) पञ्चमस्वरी। इ कर्म्मणि कुन्थ्यते। क्लेशः इह दुःखानुभवः। क्लीतार्त्तश्च न कुन्थतीति हलायुधः। इति दुर्गादासः॥
कुथ य पूतित्वे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) पूतित्वं दुर्गन्धीभावः। य, कुथ्यति नीलो दुर्गन्धः स्यादित्यर्थः। चुकोथ। इति दुर्गादासः॥
कुथः, पुं क्ली, (कुथ्यति अशोभां क्लेशं वा। कुथ इ हिंसायां अच्। आगमविधेरनित्यत्वात् न नुमागमः।) गजपृष्ठस्थितचित्रकम्बलम्। हातिर पिठेर झुल इति भाषा। तत्पर्य्यायः। प्रवेणी २ आस्तरणम् ३ वर्णः ४ परिस्तोमः ५। इत्यमरः। २। ८। ४२॥ प्रवेणिः ६ परिस्तोमः ७ कुथा ८ कुथम् ९। इति तट्टीका॥ वोढा १० आस्तरः ११। इति शब्दरत्नावली॥
(यथा शब्दार्थचिन्तामणौ।
"कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलम्।
कुथः कुशूः कुथः कीटः प्रातःस्थायी द्विजः कुथः"॥
यथा महाभारते २। ५१। ३६।
"शतशश्च कुथांस्तत्र सिंहलाः समुपाहरन्"॥)
कुथः, पुं, (कुथ + अच्।) कुशूलगम्। इत्यमरः। २। ४। १६६॥ (यथा हरेः रामायणे। २। ३०। १४।
"शार्दूलेषु यदा शिश्ये वनान्ते वनगोचरः।
कथास्तत्रशतल्पेषु किं स्यात् सुखतरं ततः"॥)
कुथोदरी, स्त्री, (कुथं हिंसात्मकमुदरं यस्याः सा।) निकुम्भदुहिता। कुम्भकर्णभौत्री। सा च कल्किदेवेन हता। यथा।
मुनय ऊचुः।
"ब्रूहि विष्वग्यशःपुत्र! कुम्भकर्णात्मजात्मजा।
कुथोदरीति विख्याता गगनार्द्रसमुत्थिता॥
कीलकस्यास्य महिषी विकङ्कजननी च सा।
हिमालये शिरः क्षिप्त्वा पादौ च निषधाचले॥
शेते स्तनं पाययन्ती विकङ्कं प्रसृतस्तनी।
तस्या निश्वासवातेन विवशा वयमागताः॥
दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम्।
मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम्"॥
इत्यादि॥
"सा क्रुधोत्थाय सहसा ननर्द परमाद्भुतम्।
तेन नादेन महता विचस्राम्भोभवन् जगाः।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले॥
सा रथांश्च गजांश्चापि विक्षताम्भा भयानका।
जघास प्रश्वासवातैः समानीय कुथोदरी॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह।
यथर्त्तुसुखवातेन प्रविशन्ति पिपीलिकाः॥
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे।
तत्रस्था मुनयः शेषुर्जेषुश्चान्ये महर्षयः॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः।
रुरुदुः पृथ्वयोधा ये जहसुस्तन्निशाचराः॥
जगतां कदनं दृष्ट्वा संसारात्मानमात्मना।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः॥
वाणाग्निं चेलचर्म्मभ्यां कम्बलैर्यानदारुभिः।
प्रज्वाल्योदरमध्येन करवालं समाददे॥
तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः।
बलिभिर्भ्राट्भिर्व्वाहैर्हतः शस्त्रास्त्रपाणिभिः॥
बहिर्ब्बभूव सर्व्वेशः कल्किः कल्किविनाशनः।
सहस्राक्षो यथा वज्रकुक्षिं दम्भोलिनेमिना॥
योनिरन्ध्राद्गजरथास्तुरगाश्चाभवन् बहिः।
नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः॥
ते निर्गतास्ततस्तस्याः सैनिकारुधिरोक्षिताः।
तां विध्वनिःक्षिपन्तौ तरसा चरणौ करौ॥
ममार सा भिन्नदेहा भिन्नकुक्षिर्शिरोधरा।
नादयन्ती दिशो द्यां खं चूर्णयन्ती च पर्व्वतान्"।
इति कल्किपुराणे १९ अध्यायः॥
कुदालः, पुं, (कुं भूमिं दारयति विदारयति। कु +

दल् विदारणे + णिच् + अण्।) कुद्दालः। इत्यमरटीकायां रमानाथः॥

कुद्दारः, पुं, (कुं पृथ्वीं दारयति विदारयति। कु + दृ + णिच् + कर्म्मण्यण्। पृषोदरात् साधुः।) कुद्दालः। इति जटाधरः॥ (काञ्चनवृक्षः। वृक्षमात्रम्। भूविदारणेन समुत्थितत्वात्॥)

कुद्दालः, पुं, (कुं भूमिं दालयति। कु + दल् + णिच् + अण्। पृषोदरात् द्वित्वे साधुः।) कोविदारवृक्षः। इत्यमरः। २।४।२२॥ (यथास्य पर्य्यायाः।

"कोविदारस्तमरिकः कुद्दालो युगपत्रकः।
कुण्डलीताम्रपुष्पश्च क्षुद्रकः स्वल्पकेशरी"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे। गुणाश्चास्य काञ्चनारशब्दे उक्ताः॥) भूमिदारणास्त्रम्। इति मेदिनी। कोदाल इति भाषा। (यथा महाभारते। ३। १०७। २१।

"समासाद्य विषं तच्चाप्यखनन् सगरात्मजाः।
कुद्दालैर्दृषदश्चैव समुद्रं यत्नमास्थिताः"॥)

कुद्यं, क्ली, (कुद् + क्यप्।) कुड्यम्। भित्तिः। इत्यमरटीका॥

कुद्र, इ क मिश्रीकौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) पञ्चमस्वरी। दन्त्यवर्गद्वितीयोपधः। इ क कुन्द्रयति नीचः। मिश्रां वदतीत्यर्थः। कुन्द्र इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

कुन्द्रुः, पुं, (कुद्रं मिश्रमेव कायते ध्वनित्यत्वात् छत्रभङ्गुरत्वाच्च। कै + कः। निपातनात् साधुः।) मत्स्यविशेषः। मस्योपरिमण्डपः। तत्पर्य्यायः। उद्वाटः २ पिठरः ३। इति त्रिकाण्डशेषः॥

कुन्द्रुः, पुं, (कुं ईषत् उद्गतो रुद्रः रुद्रनं यत्र अनित्यत्वात्। कु + उत् + रुद्र + अधिकरणे घञ्। पृषोदरादित्वात् साधुः।) मत्स्यमण्डपः। इति हारावली॥

कुन्द्रवः, पुं, (कुं भूमिं द्रावयति। कु + द्रु + अन्तर्णिच् अच्।) कोद्रवः। इत्यमरटीकायां भरतः॥ (कोदधान् इति भाषा॥)

कुन्ध्रः, पुं, (कुं पृथ्वीं भूमिं धारयति। कु + धृ + मूलविभुजादित्वात् कः।) पर्ब्बतः। इति हलायुधः॥ (यथा कालिदासोक्तौ।

"वाचारेऽध्वनधगधृतोर्व्वधिपतिः कुध्रेऽङ्गजानिर्गयेऽङ्गोराड़ारुड़ुरःसरेऽड़ुतरयैवेयकभाडडम्।
उड्डीड़ुडनरकाग्निभिस्त्रिदृगिभेड़ार्द्राजिनाक्ष्णच्छविः स स्तादम्बुमदम्बुदालिगलरुद्देवो मुदे वो मड़ः"॥)

कुनखः, पुं, (कुत्सितो नखो यत्र।) क्षुद्ररोगविशेषः। तस्य लक्षणं यथा।

"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
कुर्व्वाते दाहपाकौ च तं व्याधिं विद्यमादिशेत्॥
तदेवाल्पतरैर्दोषैः प्रथमं कुनखं वदेत्"॥

इति माधवकरः॥

(अस्य चिकित्सा यथा॥

"विल्वे सटङ्कणक्षौद्रो मूलालेपो नखप्रदः"।

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे॥ तथाच सुश्रुते।

"अभिघातात् प्रदुष्टो यो नखोरूक्षोऽसितःखरः।
भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्"॥

अयं हि रोगः जन्मान्तरीयसुवर्णापहरणाद्यनुष्ठितप्रायश्चित्तस्य शुक्लावशिष्टमहापातकस्य चिह्नरूपः। यथा विष्णुसंहितायाम्।

"नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति। कुष्ठतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा"॥) कुत्सितनखयुक्ते, त्रि॥

कुनखी [न्] त्रि, (कुनख इति स्वनामविश्रुतरोगोऽस्यास्तीति।) कुनखरोगयुक्तः। सङ्कुचितनखः। यथा। "सुवर्णहारी कुनखी। कुनखी श्यावदन्तश्च द्वादशरात्रं व्रतं चरित्वा तदन्तनखावुद्धरेयाताम्"॥ इति शुद्धितत्त्वम्॥

कुनटः, पुं, (कुत्सितं नटतीति। कु + नट् + अच्।) श्योनाकवृक्षभेदः। इति राजनिर्घण्टः॥ (कुत्सितो नटः इति विग्रहे नटाधमः॥

श्योनाकशब्दे ऽस्य विवरणं ज्ञातव्यम्॥)

कुनटी, स्त्री, (कुनट + गौरादित्वात् ङीष्।) मनःशिला। इत्यमरः। २। ९। १०८॥ (अस्याः पर्य्यायाः॥

"मनःशिला मनोह्वा च नेपाली कुनटी शिला"।

इति वैद्यकरत्नमालायाम्॥

अन्यद्विवरणमस्य मनःशिला शब्दे व्याख्येयम्॥)

धान्याकम्। इति राजनिर्घण्टः॥

(पर्य्याया यथा॥

"धान्यकं धानकं धान्यं धानाधानेयकन्तथा।
कुनटी धेनुकाच्छन्ना कुस्तुम्बुरवितुम्बकम्"॥

गुणास्यास्य धन्याकशब्दे ज्ञातव्याः॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

नेपालदेशजमनःशिला। इति केचित्। इति भरतः॥ (कुत्सिता नर्त्तकी। अनिपुणा नर्त्तकी॥)

कुनली, [न्] पुं, (कुत्सित ईषद् वा नलोऽस्यास्तीति इनिः।) वकवृक्षः। इति त्रिकाण्डशेषः॥

कुनाभिः, पुं, (ईषत् नाभिरिव आवर्त्तवत्त्वात्।) वातमण्डलः। इति त्रिकाण्डशेषः॥ घूर्ण्णेवातास इति भाषा॥ निधिः। इति हेमचन्द्रः॥

कुनाम्रकः, पुं, (ईषत् नाम्रयति स्वर्ग्गनेन। कु + नम्र + णिच् + ण्वुल्।) यवासः। इत्यमरः। २। ४। ९१॥ (दुरालभा। आल्कुशीति भाषा॥

अस्य पर्य्याया यथा॥

"यासोपवासो दुष्पर्शो धन्वयासः कुनाम्रकः।
दुरालभादुरालभा समुद्रान्ता च रोदिनी॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ म भागे॥)

कुनृच वक्रगे। तौच्छ्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं-सेट्।) पञ्चमस्वरी। वक्रगमिति वक्र इवाचरतीति क्यौ वक्रं करोतीति णौ च रूपम्। तेन कुटिलीभावः कुटिलीकरणञ्च। तौच्छ्यमल्पीभावः अल्पीकरणञ्च। कुच्यति खलः कुटिलोऽल्पो वा स्यादित्यर्थः। कुच्यति जनां वायुः कुटिलामल्पां वा करोतीत्यर्थः। इति दुर्गादासः॥

कुन्तः, पुं, (कुं भूमिं उनत्ति क्लेदयति। कुं शरीरं उनत्ति भेदयति दारयति वा धातूनामनेकार्थत्वात् उन्द + बाहुलकात् तः। पृषोदरादित्वात् साधुः।) गवेधुकः। प्रासास्त्रम्। इति मेदिनी॥ (भल्लास्त्रम्। भाला इति भाषा। यथा कथासरित् सागरे।

"कुन्तदन्ता कथं कुर्य्यात् राक्षसीव हि सा शिवम्"॥)

चञ्चुभावः। क्षुद्रजन्तुः। इति विश्वः॥ क्षुद्रकीटः। उलुनम्। (उकुन् इति भाषा॥)

कुन्तकः, पुं, (कुन्तं उत्कुनं लाति गृह्णाति। ला + कः।) केशः। (यथा साहित्यदर्पणे ३।१२४।

"कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्"॥)

क्रोवेरम्। इत्यमरः २। ६। ९५॥ चषकः। यवः। इति मेदिनी॥ (कुन्तस्य अग्राकारमिव क्षाति।) बाहुलः। इति विश्वः॥ ध्रुवकभेदः। यथा,—

"वर्णैः षोड़शभिः कार्य्यः कुन्तलो लघुशेखरे।
षट्कारे च रसे प्रोक्तमानन्दप्रजदायकः"॥

इति सङ्गीतदामोदरः॥ (दाक्षिणात्यजनपदविशेषः। तदधिष्ठाता राजा च यथा महाभारते २। राजसूयिकपर्ब्बणि ३४। ११।

"आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा।
द्राविड़ाः सिंहलाश्चैव राजा काश्मीरकस्तथा"॥)

कुन्तलवर्द्धनः, पुं, (कुन्तलान् केशान् खरत्वेन वर्द्धयति। वृध् + णिच् + ल्युः।) भृङ्गराजवृक्षः। इति राजनिर्घण्टः॥

कुन्तलाः, पुं, (कुन्ता अस्त्रविशेषा लीयन्ते गृह्यन्ते यत्र। ला + घञर्थे कः।) देशविशेषः। बहुवचनान्तशब्दोऽयम्। इति मेदिनी॥ (स च दाक्षिणात्यप्रदेश इत्युच्यते। यथा महाभारते ६।९।५९।

"भिल्लिकाः कुन्तलाश्चैव सौहृदा नलकाननाः।
कोकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः"॥)

कुन्तलिका, स्त्री, (कुन्तलस्य बाहुलस्यायाकार इव विद्यतेऽस्याः इति ठन्। टाप् अत इत्वं च।) दध्यादिच्छेदनी। दहकाटा छुरी इति भाषा। तत्पर्य्यायः। पालिका २। इति हारावली॥ (बालानामौषधम्। यथा सुश्रुते।

"कुन्तलिका कुरण्टिका प्रभ्रष्टीनीलुपक्रम्य॥
अस्याः गुणास्तत्रैवोक्ताः।
"स्वादुपाकरसाः शीताः कफघ्नाश्चातिपित्तजाः।
लवणाम्लरसा रूक्षाः सक्षारा वातजाः सराः"॥
स्वादुतिक्ता कुन्तलिका"॥)

कुन्तलीशीरं, क्ली, (कुन्तल इव उशीरम्।) बालकम्। इति राजनिर्घण्टः॥ बाला इति भाषा॥

कुन्ती, स्त्री, (राज्ञा कुन्तिभोजेन आबाल्यात् पालिता सती पृथा वसुदेवभगिनी कुन्तीति नाम्ना विख्याता। यथा, हरिवंशे ३४। २३-२४।

"पृथां दुहितरं वव्रे कुन्तिस्तु कुरुनन्दन!।
शूरः पूर्ब्बाय दत्ताय कुन्तिभोजाय तां ददौ॥
तस्मात्कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा"॥)

पाण्डुराजभार्य्या। सा च शूरसेनराजकन्या पृथा

नासा ख्याता। तत्पिता शूरसेनः तां राज्ञे कुन्तिभोजाय दत्तवान्। इयं हि कन्यावस्थायां मुनिदत्तविद्यापरीक्षार्थं मन्त्रबलाच्छतात् सूर्य्यात् कर्णं प्रासोष्ट। विवाहात् परञ्च सा मृगीभूतस्य मुनेः शापात् स्त्रीसङ्गमवञ्चितस्य स्वामिनो महाराजपाण्डोराज्ञया धर्म्मादयुधिष्ठिरं पवनाद्भीमं इन्द्रादर्জ্জুनं सुषुवे। इति महाभारते १।१११ अध्यायः॥ इयञ्च परमसाध्वीतया भगवद्वादरायणादिमहर्षिगणवरप्रभावेण प्रातःस्मरणीया रमणी।

यदुक्तम्,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्"॥)

गुग्गुलुश्चः। शल्लकी। इति विश्वमेदिन्यौ॥ ब्राह्मणी। इति जटाधरः॥

कुत्स गतौ क्षिपि। क्षिप्तौ। इति कविकल्पद्रुमः॥ (ऋषां-परं-सकं-अकं च-सेट्।) पञ्चमस्वरी। क्षिप्तौ दुःखानुभवे। ग कुत्सति बुभुक्षार्त्तः। इति हलायुधः। चुकुत्स। इति दुर्गादासः॥

कुत्सुः, पुं, (कुत्सति दुःखसङ्गत्यमो भवति। कुत्स+उन्।) बौद्धविशेषः। जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥

कुन्दः, पुं क्ली, (कु कुत्सितं दुर्गन्धादिजनितक्लेशं द्यति नाशयति। कु+दो छेदने+कः। एषोदरात् नुम्। यद्वा कौतीति। "अन्दादयश्च"। उणां ४। ९८। इति निपातनात् सिद्धम्।) पुष्पवृक्षविशेषः। कुँदफुलेर गाछ इति भाषा। तत्पर्य्यायः। माध्यम् २। इत्यमरः। २। ४। ७३॥ शुक्लपुष्पः ३। इति रत्नमाला॥ मकरन्दः ४ महामोदः ५ मनोहरः ६ मुक्तापुष्पः ७ सदापुष्पः ८ तारपुष्पः ९ अट्टहासकः १० दमनः ११ वनहासः १२ मनोज्ञः १३ वोरटम् १४ वरटम् १५। इति शब्दरत्नावली॥

(यथा, नवग्रहस्तोत्रे शुक्रस्तुतिः।

"ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्। सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्"॥)

अपि च। भावप्रकाशे॥

"कुन्दन्तु कथितं माध्यं सदापुष्पञ्च तत् स्मृतम्। कुन्दंशीतं गुरु श्लेष्मशिरोरुग्विषपित्तहृत्"॥

अस्य गुणाः। अतिमधुरत्वम्। शीतत्वम्। कषायत्वम्। कैशिष्यभावनत्वम्। कफपित्तहरत्वम्। सारकत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणौ। श्लेष्मकारित्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥

कुन्दः, पुं, कुन्दुरुनामगन्धद्रव्यम्। (अस्य पर्य्याया यथा॥

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि"।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भमियनम्। कुँद इति भाषा। कुबेरस्य निधिविशेषः। इति मेदिनी॥ करवीरवृक्षः। इति राजनिर्घण्टः॥ (कुन्दपुष्पवर्णं इव श्वेततया सत्ययुगे हंसावतारत्वाच्च। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्জ্জन्यः पवनोऽनिलः"॥

यदा कुं पृथ्वीं कश्यपाय दत्तवान्। दा+कः। हितोयाया अलुक्। परशुरामावतारे क्षत्रियहत्यापापशुद्ध्यर्थं मारीचाय अश्वमेधयज्ञे महादानस्य दक्षिणास्वरूपवसुन्धरादानादस्य तथात्वम्। तत्कथा यथा हरिवंशे।

"सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्।
तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः।
मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम्"॥)

कुन्दकः, पुं, (कुन्द+संज्ञायां कन्।) कुन्दुरुकः। इति राजनिर्घण्टः॥

कुन्दमः, पुं, (अनिष्टकारित्वात् कुत्सितं उन्दरादिकं दमयति नाशयतीति। दम+णिच्+अच् एषोदरात् मुमि साधुः। यद्वा कुन्देन मीयते प्रायेण शुभवर्णत्वात्। कुन्द+मा+घञर्थे कः।) विड़ालः। इति चिकाण्डशेषः॥

कुन्दरः, पुं, (कुं भूमिं दारयति। अन्तर्भूतणिजर्थो दृ+अच् एषोदरात् मुमि साधुः।) दन्तभेदः। कुन्दरा इति कलिङ्गे ख्यातः। तत्पर्य्यायः। कण्डुरः। २ भिण्टी ३ दीर्घपत्रः ४ खरच्छदः ५ रसालः ६ क्षेत्रसम्भूतः ७ सुदृढः ८ मृगवल्लभः ९। अस्य मूलगुणाः। गौल्यत्वम्। शीतत्वम्। पित्तातिसारनाशित्वम्। गोधनानां प्रशस्तत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (कुन्दवत् निर्म्मलानि धर्म्मानुबन्धीनि फलानि राति ददाति। कुन्द+रा+कः। यद्वा कुं पृथ्वीं, हिरण्याक्षदैत्यं हन्तुकामो भगवान् विष्णुः वराहरूपेण दारयति। दृ+णिच्+अच् एषोदरात् मुमि साधुः। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्জ্জन्यः पवनोऽनिलः"॥)

कुन्दिनी, स्त्री, (कुन्दानां पद्मानां समूहः। खनादित्वात् इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्मसमूहः। इति चिकाण्डशेषः॥

कुन्दुः, स्त्री, (कुं भूमिं दृणातीति। कु+दृ+बाहुलकात् डुः।) कुन्दुरुनामगन्धद्रव्यम्। इति शब्दमाला अमरटीका च॥ (कुन्दुरुशब्दे ऽस्या विवरणं ज्ञातव्यम्॥) मूषिके पुं। इतिशब्दरत्नावली॥

कुन्दुरुः, पुं, (कुं भूमिं दारयति। दृ विदारे+उरन्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः॥

कुन्दुरुः, पुं, स्त्री, (कुं भूमिं उनत्ति। उन्द्+बाहुलकात् निपातनात् साधुः।) खनामख्यातसुगन्धिद्रव्यम्। यस्य निर्य्यासे कुन्दुरुखोटि इति ख्यातिः। तत्पर्य्यायः। पालङ्गी २ मुकुन्दः ३ कुन्दः ४। इत्यमरः। २। ४। १२१॥ पालङ्गी ५ मुकुन्दुः ६ कुन्दुः ७ कुन्दुरः ८। इति तट्टीकायां भरतः॥ कुन्दुरुकः ९ सौराष्ट्रः १० शिखरी ११ कुन्दकः १२ तीक्ष्णः १३ गोपुरकः १४ वङ्गगन्धः १५ पालिन्दः १६ भीषणः १७ तीक्ष्णगन्धः १८ वली १९। इति जटाधरः॥ अपि च।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।
कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्वच्छः कटुर्हरेत्।

ज्वरस्वेदग्रहाणश्लीमुखरोगकफानिलान्"॥

इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कफपित्तार्त्तिदाहनाशित्वञ्च। अस्य पानलेपनयोर्गुणः। शिशिरत्वम्। प्रदरामयशान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥

(अस्य व्यवहारो यथा वैद्यकचक्रपाणि-संग्रहे ऽस्यादग्रगतिकप्रसारणी तैले॥

"कर्पूरं कुन्दुरुनिशाजवकृष्णधामचन्दनम्"॥*॥)

कुन्दुरुकः, पुं, स्त्री, (कुन्दुरु+स्वार्थे कन्।) कुन्दुरुनाम सुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

कुन्दुरुकी, स्त्री, (कुन्दुरुक+जातित्वात् ङीष्।) शल्लकीवृक्षः। इत्यमरः। २। ४। १२४॥

कुप इ कि स्तृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) षष्ठस्वरी। इ कुप्यते। कि कुप्यति कुप्यति। स्तृतिराच्छादनम्। इति दुर्गादासः॥

कुप, क वृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क कोपयति। इति दुर्गादासः॥

कुप य इर् कोपे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्-इरित्।) कोपो नेत्रजौहित्यादिहेतुश्चित्तविकारः। य, कुप्यति माता शिशवे। इर अकुपत् अकोपीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। "कदाचित् कुप्यते माता नोदरस्था हरीतकी"। इति तु कुप्यतीति कुप् ततः स इवाचरति इति ङेः साध्यम्। इति दुर्गादासः॥

कुपथः, पुं, कुत्सितः पन्थाः। (पाणिनिमते कापथ इति नित्यं स्यात्। वोपदेवमते तु "पथि पुरुषे वा"। इति सूत्रेण विभाषया कोः कादेशः।) कापथः। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते ५। ६। १०। "स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः प्रवर्त्तयिष्यति"॥

कुपथः सेव्यत्वेनास्यास्य। अर्श आदित्वात् अच्। कुपथगामिनि, त्रि। यथा महाभारते।१।६७।२६।

"कुपथस्तु महावीर्य्यः श्रीमान् राजन्! महासुरः।
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः"॥)

कुपाणिः, त्रि, (कुत्सितः पाणिर्यस्य।) वक्रहस्तः। इति जटाधरः। कोपा इति भाषा॥

कुपिनी, [नृ] पुं, (कुपिनी मत्स्यधानी अस्यास्तीति। व्रीह्यादित्वात् इनिः।) कैवर्त्तः॥ इति चिकाण्डशेषः। जालिया इति भाषा॥

कुपिनी, स्त्री, (कुप्यते रक्ष्यते मत्स्योऽत्र। कुप इ कि स्तृतौ अधिकरणे बाहुलकात् इनि। किच्च ङीप् एषोदरादित्वात् साधुः।) मत्स्यमत्स्यधानी। इति शब्दरत्नावली। खालुइ इति भाषा॥

कुपिन्दः, पुं, (कुप्यति विस्तारयति सूचयति। कुप इ कि स्तृतौ+"कुपेर्वा वच्च"। उणां ४। ८८। इति किन्दच्। तत्पर्य्यायः। इत्युणादिकोषः॥

कुपीलुः, पुं, (कुत्सितः पीलुः।) कारस्करवृक्षः तिन्दुकविशेषः। मधुरतेन्दु माकड़ार्केंदु इति च भाषा। तत्पर्य्यायः। जलजः २ दीर्घपत्रकः ३ कुपक्वः

४ कालतिन्दुकः ५ कालपीलुकः ६ काकेन्दुः ७ विषतिन्दुः ८ मर्कटतिन्दुकः ९। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। वातमदकारित्वम्। लघुत्वम्। ग्राहित्वम्। ग्राहित्वम्। कफपित्तास्रनाशित्वञ्च। इति भावप्रकाशः॥

कुपूयः, त्रि, (कुत्सितं पूयते। पूयोऽ विसरणे + पचाद्यच्।) कुत्सितः। जात्याचारादिनिन्दितः। इत्यमरभरतौ॥

कुप्यं, क्ली, (गुप्यते रक्ष्यते द्रव्यादिकमत्र। गुपू रक्षणे। "राजसूयसूर्य्यमरुद्वरुण्यकुप्यकृष्टपच्याध्याः"। ३। १। ११४। इति क्यवन्तो निपातितः। गुपेरादेः कत्वं च संज्ञायाम्।) स्वर्णरूप्यभिन्नधातुः। इत्यमरः। २। ९। ९९॥ (यथा, महाभारते। १५। ६। ११।

"भूमिरत्नपशून् देया विपरीतस्य भारत!।
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमथो बलम्"॥)

दस्ता इति ख्यातधातुः। इत्यष्टधातुमध्ये वैद्यकम्॥

कुप्यशाला, स्त्री, (कुप्यानां स्वर्णरूप्याभ्यामन्येषां भाजनादीनां शाला गृहम्।) स्वर्णरूप्यभिन्नधातुपात्रादिनिर्म्माणादिगृहम्। काँसारिर दोकान इति भाषा। तत्पर्य्यायः। सन्धानी २। इति हेमचन्द्रः॥

कुप्रियः, त्रि, (कुत्सितं प्रीणातीति। कु + प्री + "इगुपधज्ञेति"। ३। १। १३५। कः।) जघन्यः। इति हलायुधः॥ (बहुव्रीहौ तु कुत्सितप्रियः॥)

कुब इ कि स्तुतौ। इति कविकल्पद्रुमः। (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) पद्मसखरी। इ कुम्बते। कि कुम्बयति कुम्बति। स्तुतिराच्छादनम्। इति दुर्गादासः॥

कुबेर(वि)रः, पुं, (कुम्बतीति। कुब इ कि आच्छादने "कुम्बेर्नलोपश्च"। उणां १। ६०। इति एरक्। नलोपश्च। यद्वा कुत्सितं वेरं शरीरं यस्य। पिङ्गलनेत्रत्वात्तथात्वम्।) यक्षराजः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (स च विश्रवस ऋषेरिलविलायां जातः। स तु त्रिपात् अष्टदन्तः केकरात्तश्च। यथा, वायुपुराणे।

"कुत्सायां क्षितिशब्दोऽयं शरीरं वेरमुच्यते।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः"॥

तथा काशीखण्डे देवीदत्तशापोक्तौ च।

"कुवेरो भव नाम्ना त्वं मम रूपेर्य्यया सुत!"॥)

कुब्जः, त्रि, (कु ईषत् उब्ज आर्जवमस्य। उब्ज आर्जवे घञ्। अकर्णाद्यादिवदुलोपः।) वायुगोन्नतहृदयः। उन्नतपृष्ठश्च। कुजा इति भाषा। तत्पर्य्यायः। गडुः २ गडुलः ३ इत्यमरः॥ न्युब्जः ४ गडुरः ५ इति शब्दरत्नावली॥ तस्य लक्षणमाह।

"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सशक्।
कुब्जो वायुर्यदा कुर्य्यात्तदा तं कुब्जमादिशेत्"॥

इति माधवकरः॥ यदेत्युक्त्या यदिवेति विकल्पार्थस्तेन न पुनरुक्तिदोषः। मन्दन्तरायामः क्रोडनतो भवति बहिरायामः पृष्ठनतो भवति ताभ्यामस्य को भेदः। उच्यते। अन्तरायामबहिरायामयोः प्रकृतस्यैवान्तःशरीरस्य बहिःशरीरस्य चावनमनमत्र तु हृदयं पृष्ठं वा शरीराद्बहिर्भवतीति भेदः॥ *॥

अथ चिकित्सा।

"वाह्यायामेऽन्तरायामे धनुस्तल्ये च कुब्जके।
योज्यं प्रसारिणीतैलं तेन तेषां श्रमो भवेत्॥
वातव्याधिषु सामान्या याः क्रियाः कथिताः पुरा।
कर्त्तव्या एव ताः सर्व्वास्तैलमेतद्विशेषतः"॥

इति भावप्रकाशः॥ (यथा, हरिवंशे ८३। ३४।

"तान्तु कुब्जां स्फडोर्मध्ये शुक्लेनायसयोगिना।
अनैः सन्तोड़यामास क्षणो लीलाविधानवित्"॥

रोगविशेषस्यास्य चिकित्सार्थं वटिकौषधं यथा॥ *॥

"रसौ गन्धौ समौ शुद्धौ तालकक्षाभया तथा।
विषं व्योषञ्च कटुकीं वोलजैपालकौ समौ"॥
"भृङ्गराजरसैर्मर्द्द्यं खुर्ज्जकस्वरसैस्तथा।
गुञ्जाद्वयं प्रदातव्यं रसः कुब्जविनोदकः॥
आमवाताञ्जवातादीन् कटीशूलञ्च नाशयेत्।
अग्निञ्च कुरुते दीप्तं स्थौल्यानां नाशनं परम्"॥

कुब्जविनोदो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे वातरोगाधिकारे॥ *॥)

कुब्जः, पुं, (कु ईषदुब्जं आर्जवमस्य। अकर्णाद्यादित्वात् साधुः।) अपामार्गः। इति राजनिर्घण्टः॥ खड्गः। इति शब्दमाला॥

कुब्जकः, पुं, (कौ पृथिव्यां उब्जति। उब्ज + ण्वुल्। अकर्णाद्यादित्वात् उलोपे साधुः।) पुष्पवृक्षविशेषः। कूजा इति ख्यातः। (यथा, शब्दार्थचिन्तामणिधृतवह्निसिंहपुराणे।

"चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्।
सेवतीपुष्पसाहस्रात् कुब्जकः पुष्पमुत्तमम्"॥

तत्पर्य्यायः। भद्रतरुणी २ वृत्तपुष्पः ३ अतिकेशरः ४ महासहः ५ कण्टकाढ्यः ६ खर्व्वः ७ अलिकुलसङ्कुलः ८ वारिकण्टकः ९। इति त्रिकाण्डशेषः॥ अपि च।

"कुब्जको भद्रतरुणिर्वृत्तपुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला"॥

राजनिर्घण्टे महासहेत्यादिशब्दाः पुंलिङ्गाः।

अस्य गुणाः।

"कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः।
त्रिदोषशमनो दृश्यः शीतवीर्य्यो च स स्मृतः"॥

इति भावप्रकाशः॥ सुरभित्वम्। रक्तपित्तकफनाशित्वञ्च। तत्पुष्पगुणाः। शीतलत्वम्। वर्णकारित्वम्। दाहवातपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

कुब्जकण्टकः, पुं, (कुब्जः कण्टकोऽत्र।) श्वेतखदिरः। इति राजनिर्घण्टः॥

कुब्रं, (ब्रं)क्ली, (कुवि आच्छादने + "ऋज्रेन्द्राग्रवज्रेति"। उणां २। २८। इति निपातनात् रन्।) वनम्। इत्युणादिकोषः॥ कुञ्जम्। कुञ्जलम्। तन्तुः। शरणम्। शकटम्। इति सङ्क्षिप्तसारे उणादिवृत्तिः॥

कुमारः, त्रि, क केलौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) क्रीडी। अचुकुमारत्। इति दुर्गादासः॥

कुमारं, क्ली, (कुमारयति नन्दति यत्र यस्मिन् सतीत्यर्थः।) जात्यकाञ्चनम्। इति मेदिनी। खाँटि सोणा इति भाषा॥

कुमारः, पुं, (कुत्सितो मारः कन्दर्पो यस्मात्।) कार्त्तिकेयः तदुत्पत्तिविवरणन्तु कार्त्तिकेयशब्दे द्रष्टव्यम्॥

(तथा महाभारते। १। ६६। २१-२४।

"अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवणालयः।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कीर्त्तिकाभ्युपपत्तेश्च कार्त्तिकेय इति स्मृतः"॥

कौ पृथिव्यां मारयति दुष्टान्। कु + मृ + णिच् + अच्।) नाट्योक्तौ युवराजः। इत्यमरः॥ (राज. कुमारः। यथा, रघौ ७। ६३।

"ततः प्रियोपात्तरसेऽधरौष्ठे
निवेश्य दध्मौ जलजं कुमारः"॥)

शुकः। अश्ववारकः। (कुमारयति क्रीड़तीति। कुमार-तृ क क्रीड़ने + अच्।) पञ्चवर्षीयबालकः। (यथा मनौ ७। १७५।

"कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्"॥

"तस्यास्तु खल्वमरायाः प्रपतनार्थे खल्वेवमेवकर्म्माणि क्रियमाणे जातमात्रे ऽस्यैव कुमारस्य कार्य्याण्येतानि कर्म्माणि भवन्ति तद्यथा-अश्मनोः सङ्घट्टनं कर्णयोर्मूले शीतोदकेनोष्णोदकेन वा सुखपरिषेकः। तथा संक्लेशविहतान् प्राणान् पुनर्जनेत क्षणकपालिका सूर्पेण चैनमभिनिष्पुनीयाद् यद् यच्चेष्टं स्यात् यावत् प्राणानां प्रत्यागमं तत्तत् सर्व्वमेव कुर्य्युः। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्। अथास्य तालोष्ठकण्ठ-जिह्वा-प्रमार्জ্জनमारभेत अङ्गुल्या सुपरिलिखितनखयासुप्रक्षालितोपधानकार्पासपिचुमत्या प्रथमं प्रमार्জ্জितस्यास्यच शिरस्तालू कार्पासपिचुना स्नेहगर्भेण प्रतिच्छादयेत्। ततो ऽस्यानन्तरं कार्यं सैन्धवोपहितेन सर्पिषा प्रच्छर्दनम्"।

"दशम्यां निष्क्रमतीतायां सपुत्रास्त्री सर्व्वगन्धौषधैर्गैरिसर्षप-लोध्रैश्च स्नाता लघ्वहतवस्त्रं परिधाय पवित्रेशुचिसुविचित्रभूषणवती संस्पृश्य मङ्गल्यानुचितामर्चयित्वा च देवतां द्विजिनः शुक्लवाससो वृद्धांश्च ब्राह्मणान् स्वस्तिवाचयित्वा कुमारमहतेन शुचिवाससाच्छादयेत्। प्राक् शिरस उदक्शिरसं वा संवेश्य देवतापूर्व्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता दे नामनी कारयेत् नाक्षत्रिकं नामाभिप्रायिकञ्च"।

"क्षते च नामकर्म्मणि कुमारं परीप्सितुमुपक्रामेदायुषः प्रमाण ज्ञान-हेतोः! तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति तद्यथा—एकैकजा मृदवोऽल्पाः स्निग्धाः सुवद्धमूलाः कृष्णाः केशाः प्रश्लक्ष्णाः। स्थिरा बहला त्वक् प्रकृत्याकृतिसुसम्पन्नमीषत्प्रमाणातिरिक्तमनुरूपमात-

पत्रोपमं शिरः प्रशस्यते। चूढ़ं दृढ़ं समं सुश्लिष्टग्रन्थसन्धर्ब्यञ्जनमुपचितं बलिनमर्द्धचन्द्राकृतिललाटं बहली विपुलसमपिठौ समौ नीचौ दृढौ एकतोऽवनतौ सुश्लिष्टकर्णपुटकौ महाच्छिद्रौ कर्णौ ईषत् प्रलम्बिन्यावसक्थते समे संहते महत्यौ भ्रुवौ समे समाहितदर्शने यक्ष्माभागविभागे बलवती तेजसोपपन्ने स्वाङ्गोपाङ्गे चक्षुषी। ऋजवी महोच्छ्वासावंशसमन्नेभदवनताया नासिका। महदृजु-सुनिविष्टदन्तमांसम्। आयामविस्तरोपपन्ना श्लक्ष्णा तन्वी प्रशस्तियुक्ता पाटलवर्णा जिह्वा। श्लक्ष्णं युक्तोपचयमुष्णोपपन्नं रक्तं तालु। महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरस्वरः। नातिस्थूलौ नातिश्लक्ष्णौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ। महत्यौ हनुकौ। नातिमहती ग्रीवा। चूढ़मुपचितमुरो गूढ़ं जत्रु एकतंशच। विश्लक्षान्तरौ स्कन्धौ, अंसपातिनी स्थिरे पार्श्वे, उन्नतपरिपूर्णायतौ बाहू, सन्धिनौ अनुचयच। महदुपचितं पाणिपादम्। स्थिराङ्गुलाः स्निग्धाताम्राश्चानखाः कूर्माकाराः करजाः, प्रदक्षिणावर्ता सोत्सङ्गा च नाभिः। गाम्भीर्यस्थैर्यभागहीना समासमुपचितमांसा श्लक्ष्णोन्नता स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्निग्धावनुपूर्वमृत्तौ उपचययुक्तावुरू। नात्युपचिते नात्यपचिते एकीपदे प्रगूढ़सिरास्निसन्धी जङ्घे। नात्युपचितौ नात्यपचितौ गुल्फौ पूर्वोपदिष्टगुणौ पादौ कूर्माकारौ। प्रशस्तियुक्तानि वात-मूत्र-पुरीषगुणानि तथा स्वप्नजागरणायासक्षितरुदितस्मरणानि। यच्च किञ्चिदन्यदपि अनुक्तमस्ति तदपि सर्वं प्रशस्तिसम्पन्नमिष्टं विपरीतं पुनरनिष्टमिति दीर्घायुर्वर्ज्यलक्षणानि"। *।

अतोऽनन्तरं कुमारागारविधिमनुव्याख्यास्यामः।

"बालविद्याकुशलः प्रशस्तं रम्यतमस्थं निवातं प्रवातैकदेशं दृढ़मयगतस्थापदपञ्चदंष्ट्रिमूषिकाप्रवृत्तं सुसंविभक्तसन्निवेशोदूखलभूमिवर्चस्थानस्नानभूमिमहानससमनुसुखं यथर्तुगुणयुक्तासनशयनसम्पन्नं कुर्य्यात्। तथा सुविहितरक्षाविधानबलिमङ्गलहोमप्रायश्चित्तं सुचिरुद्धवैद्यानुरक्तजनसम्पूर्णमिति कुमारागारविधिः।

अयनशयनप्रावरणानि कुमारस्य मृदुलघुसुचिसुगन्धीनि स्युः। खेदमलजन्तुमन्ति मूत्रपुरीषोपहतानि च वर्ज्यानि स्युः।

अस्ति सम्भवेऽन्येषां तान्येव च सुप्रक्षालितोपधानानि सुधूपितानि सुमुक्तमुल्कान्युपयोगं गच्छेयुः।

धूपनानि पुनर्वाससां शयनासनप्रावरणानां च यवसर्षपातसी-हिङ्गु-गुग्गुलुवचारोशीरवयःस्थागोजोमोचटिलायवशुण्ठाशाकरोहिणीसर्पनिर्मोकानि घृतसंप्रयुक्तानि स्युः।

मद्यच्च धारणीयाः कुमारस्य खड्गशरगवयदमाजां जीवतामेव दक्षिणेभ्यो विषाणेभ्यो ग्राह्याणि गृहीतानि स्युः। मन्त्राद्याश्चौषधयो जीवकर्षभकौ यान्यप्यन्यानि ब्राह्मणाः प्रशंसेयुः।

क्रीड़नकानि खल्वस्य तु विचित्राणि घोषवन्त्यभिरामाणि अगुरूण्यतीक्ष्णायाणि अनास्रवप्रवेशीनि अप्राणहराणि अविश्वासनानि स्युः।

गन्धस्य विश्वासनं साधु तस्मात्तस्मिन् बलवत्सुज्ञाने वान्यच विधेयतामगच्छति राक्षसपिशाचभूतनागानां नामान्याङ्कयता कुमारस्य विश्वासनार्थं नामग्रहणं न कार्य्यं स्यात्।

यदि त्वातुर्यं किञ्चित् कुमारमागच्छेत् तत्प्रकृतिनिमित्तपूर्वरूपविशेषोपशयविशेषैस्तत्ततोऽनुबुध्यसर्व्वविशेषज्ञातुरौषध-देश-कालाश्रयागवेक्षमाणश्चिकित्सितुमारभेतैनं मधुरस्निग्धसुरभिगीतसुखं कर्म्मप्रवर्त्तयन्नेवं साध्याहि कुमारा भवन्ति तथा ते ग्रहर्म्म भजन्ते चिराय रोगैरुरोगैश्चोत्तमाभिरिष्टेव् देशकालात्मगुणविपर्य्ययेष वर्त्तमानः।

क्रमेणाशात्म्यानि परिवर्त्तयियुञ्जानः सर्व्वाण्यहितानि वर्जयेत्तावद्यावद्वर्षशतरीरायुषां सम्पदमवाप्नोतीति।

एवमेनं कुमारमायौवनप्राप्तेर्धर्म्मार्थकुशलागमनायानुपालयेदिति पुत्रग्रियां सम्प्रदिकरं कर्म्म व्याख्यातम्। तदाचरन् यथोक्तैर्विधिभिः पूजां यथेष्टं भजते जनस्यक इति"॥

इति शारीरस्थाने ऽष्टमेऽध्याये चरकेणोक्तम्॥*॥

"अथ कुमारं शीतामिरद्भिरभ्यक्ष्य जातकर्म्माणि कृते मधुसर्पिरंगन्ता ब्राह्मीस्वेन सुवर्णचूर्णमकुल्यनामिकया लेहयेत्ततो वचातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूक्षस्नेहप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादेशं यथा विभवच्च॥

क्षीराहाराय सर्पिः पाययेत् सिद्धार्थकवचामांसीपयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुलत्थसैन्धवसिद्धं क्षीरान्नमादाय मधुकवचा पिप्पली चित्रकत्रिफला सिद्धमन्नमादाय दिवसमूलीक्षीर-तगर-मञ्जराज-मरिच-मधु-विड़ङ्ग-ब्राह्मी-हिङ्ग्वाज्ञी सिद्धम्। तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति॥

बालं पुनर्गाढसुखं ग्रहीष्यात् नचैनं तर्जयेत् सहसा न प्रतिबोधयेत् विश्वासभयात् सहसा नापहरेदुद्वृत्तिर्येद्वा वातादिविघातभयात् नोपवेशयेत् कौड्यभयात् नित्यमेनमनुवर्त्तेत प्रियव्रतैरनिष्ठांसुः। एवमनभिहतमात्मबलिवर्द्धते नित्यमुदग्रसत्त्व-सम्पन्नो गीरोगः सुप्रसन्नमनाश्च भवति। वातातपविद्युत्प्रभावादभ्रतायूत्पातागारनिम्नस्थानग्रहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत्।

"नाशुचौ विक्षिप्तहारं नाकाले विवसे न च।
गोश्मशानतरुमूले रजोधूमोदकेषु च॥
क्षीरसाम्यतयाक्षीरमाजं गव्यमथापि वा।
दद्यादात्मन्यपर्याप्तेर्बालानां वीक्ष्य माचया॥

वयसासन्नेनमन्नं प्राशयेत्सुहृदश्च। नित्यमवरोधरक्षच्च स्यात् क्षतरक्ष उपसर्गभयात्। प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्षा बाला भवन्ति॥

अथ कुमार उद्विजते वसति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिक्षुदति दन्तान् खादति। कूजति स्तब्धते भ्रुवौ विक्षिपत्यूर्द्धं निरीक्षते फेनमुद्वमति सन्दष्टौष्ठः क्रूरो भिन्नाभवर्चा दीनार्त्तस्वरो निम्नि जागर्त्ति दुर्म्मनो म्लानाङ्गो मत्स्यकुक्कुन्दरिमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः"॥

इति सुश्रुतेनोत्तरतन्त्रे १० अध्याये उक्तम्॥)

वयसासन्नः। इति मेदिनी। अर्हदुपासकविशेषः। इति हेमचन्द्रः॥ सिन्धुनदः। इति शब्दरत्नावली॥ (सनकसनातनसनत्सनन्दा एते चत्वारोऽपि बाल्यत एव ब्रह्मचारित्वात् कुमारा इत्युच्यन्ते॥ त इव ये च कौमारतो ब्रह्मचारित्वेऽपि विज्ञेयाः। यथा, मनौ। ५। १५९।

"अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्"॥

मङ्गलग्रहः। यथा, नवग्रहस्तोत्रे।

"धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम्।
कुमारं शक्तिहस्तञ्च तं वन्दे प्रणतोऽस्म्यहम्"॥

शुक्तिमत्पर्व्वतोद्भूतऋक्षकुल्याविशेषः।
यथा, विष्णुपुराणे।

"ऋक्षकुल्याः कुमाराद्याः शुक्तिमत्पादसम्भवाः"॥

शाकद्वीपाधिपतेः सप्तपुत्राणामेकः। तन्नाम्ना तद्वर्षस्यापि तथा संज्ञा।
यथा, विष्णुपुराणे २। ४। ५९-६०।

"शाकद्वीपेश्वरस्यापि भवस्य सुमहात्मनः।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः॥
जलदश्च कुमारश्च सुकुमारो मणीवकः।
कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः॥
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्युक्तमात्"।

मन्त्रविशेषः। यथा, तन्त्रसारधृतविश्वसारवचनम्।

"हतवीर्य्यश्च भीमश्च प्रध्वस्तो बालकः पुनः।
कुमारश्च युवा प्रौढ़ो वृद्धो निष्क्रियकस्तथा"।

खरोदयोक्तबालचक्रस्यखरभेदः। बालोपद्रवग्रहभेदः। यथा, सुश्रुते उत्तरतन्त्रे ३० अः।

"स्कन्दः स्कन्दो भगवता देवेन त्रिपुरारिणा।
बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः"।

त्रि, सुन्दरः॥)

कुमारकः, पुं, (कुमार + संज्ञायां स्वार्थे वा कन्।)

वयसासन्नः। इत्यमरः। २। ४। २५॥ बालकः॥ इति हेमचन्द्रः॥ (यथा, महाभारते। १। १२८। २२।

"प्रहारवेगाभिहता द्रुमा यावूर्विलातलतः।
सञ्चचाल प्रपतन्ति स्म भुवं सञ्चाः कुमारकाः"॥

राजकुमारः। यथा महाभारते। १। १३१। ७।

"ते तं वृद्धा महात्मानमुपगम्य कुमारकाः।
अभ्युत्थायक्रियात्मानो ब्राह्मणं पर्य्यवारयन्"॥)

कुमारी

कौरव्यवंशोद्भवो नागविशेषः। यथा, महाभारते १। आस्तीकपर्व्वणि ५७। १२।
"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
वाङ्कः पट्टशवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हयवाहनम्" ॥)

कुमारजीवः, पुं, (कुमारं जीवयतीति। जीव + णिच् + अच्।) पुत्रक्षीवकवृक्षः। इति रत्नमाला। जीयापुता इति भाषा।

कुमारपालः, पुं, (कुमारं पालयति। पाल् + णिच् + अच्।) शालिवाहनराजः। इति हेमचन्द्रः॥ (शिशुपालके, त्रि॥)

कुमारभृत्या, स्त्री, (कुमारस्य गर्भस्य निर्विघ्नप्रसवार्थं गर्भचिकित्साकुशलैः भिषग्भिः धात्र्या वा भृत्या पालनम्।) गर्भिण्याः परिचर्य्या। इति हारावली॥ तत्पर्य्यायः। बालतन्त्रम् २ गर्भिण्युपचर्य्यम् ३। इति चिकित्साशब्दरत्नावलिः॥
(यथा, रघुः। ३। १२।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भमर्म्मणि।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव" ॥)

कुमारयुः, पुं, (कुमारं कौमारं याति। मित्र्यादित्वात् कुः निपातनात् साधुः।) युवराजः। इत्युणादिकोषः॥

कुमारवाही, [न्] पुं, (कुमारं कार्त्तिकेयं वहति। वह + णिनिः।) मयूरः। इति शब्दरत्नावली॥

कुमारसूः, स्त्री, (कुमारं कार्त्तिकेयं सूते। सू + क्विप्।) गङ्गा। इति हेमचन्द्रः॥ दुर्गा। इति व्युत्पत्तिलभ्योऽर्थः॥ (पुं वह्निः। यथा, महाभारते। २। सहदेवदिग्विजये ३१। ४३।
"वैश्वानरस्त्वं पितृभिः स्वधाकृतो भूरितेजसः।
कुमारसूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्" ॥)

कुमारिका, स्त्री, (कुमारयति आनन्देन क्रीड़ति। कुमार + णिच् + ण्वुल् + टाप् अत इत्वम्।) कुमारी। इति शब्दरत्नावली॥ नवमल्लिका। इति रत्नमाला॥ भारतवर्षस्य खण्डविशेषः। यथा,—
"वर्षाण्यत्रास्थितिरिहैव कुमारिकाख्ये
ग्रामेषु चान्त्यजनना निवसन्ति सर्व्वे" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥ स्थूलैला। इति राजनिर्घण्टः॥ (ओषधिविशेषः। घृतकुमारी इति ख्याता। अस्या व्यवहारो यथा वैद्यकचिन्तामणिग्रन्थे रक्तपित्ते।
"खल्वे द्रवैरेव कुमारिकायाः"।
इति रसेन्द्रसारसङ्ग्रहे वातव्याध्यधिकारे। नेत्रमण्डलस्यप्रतिविम्बविशेषः। यथा,—
"दृष्ट्वा यस्य विजानीयात् पद्मरूपां कुमारिकाम्।
प्रतिच्छायामयीमक्ष्णो नैनमिच्छेच्चिकित्सितुम्" ॥
इति चरके इन्द्रियस्थाने ७ अध्याये॥)

कुमारी, स्त्री, (कुमार + प्रथमवयोवचनत्वात् स्त्रियां ङीष्।) द्वादशवर्षीया कन्या। यथा,—
"अष्टवर्षा भवेद्गौरी दशवर्षा च कन्यका।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते" ॥
इति स्मृतौ भेदः। इह अभेदोपचारात् कन्या कुमारीत्यमरः॥ इति भरतः॥ आगमे तु कुमारीपूजने अजातपुष्पा चेत् तदा षोड़शवर्षपर्य्यन्तवयस्का। तस्या वयोभेदेन नामभेदाः। यथा,—
"एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती।
त्रिवर्षा तु त्रिधामूर्त्तिश्चतुर्व्वर्षा तु कालिका॥
सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत्।
सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका॥
नवभिः कालसङ्कर्षा दशभिश्चापराजिता।
एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी॥
त्रयोदशे महालक्ष्मीर्हिंसना पीठनायिका।
क्षेत्रज्ञा पञ्चदशभिः षोड़शे चाम्बिका मता॥
एवं क्रमेण सम्पूज्या यावत् पुष्पं न जायते।
पुष्पितापि च सम्पूज्या तत्पुष्पादानकर्म्मणि" ॥*॥
तत्पूजाविधिर्यथा।
"अथान्यत् साधनं वक्ष्ये महाचीनक्रमोद्भवम्।
येनानुष्ठितमात्रेण शीघ्रं देवी प्रसीदति॥
अष्टम्यां चतुर्द्दश्यां कुजां वा रविसंक्रमे।
कुमारीपूजनं कुर्य्यादयथा विभवमात्मनः॥
वस्त्राभरणगन्धाद्यैश्च भक्त्यैर्भोज्यैः सुविस्तरैः।
पञ्चतत्त्वादिभिः सम्यग्देवीबुद्ध्या सुसाधकः"।
इत्यन्नदाकल्पः। * ॥ (खनामख्याता परीक्षित्पुत्रस्य भीमसेनस्य पत्नी। यथा,—महाभारते १। पूरुवंशानुकीर्त्तने ९५। ४३।
"भीमसेनः खलु कैकेयीमुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम" ॥)
पार्व्वती। नवमल्लिका। नदीविशेषः। (इयं हि शाकद्वीपान्तर्गतसप्तनदीनामेका।
यथा, विष्णुपुराणे २। ४। ६५।
"नद्यश्चात्र महापुण्याः सर्व्वपापभयापहा।
सुकुमारी कुमारी च नलिनीधेनुका च या" ॥)
सहा। घृतकुमारी इति ख्याता। अपराजिता। जम्बुद्वीपः। इति मेदिनी॥ सीता। इति हेमचन्द्रः॥ बन्ध्याकर्कोटकी। स्थूलैला। मोदिनीपुष्पम्। तरुणीपुष्पम्। श्यामापट्टी। इति राजनिर्घण्टः॥

कुमाल त् क केलौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) क्लेदी। अचुकुमालत्। इति दुर्गादासः॥

कुमालकः, पुं, (कुमाल + संज्ञायां कन्। कुमाल त्क केलौ + ण्वुल् वा।) सौवीरदेशः। इति हेमचन्द्रः॥

कुमुत्, [द्] क्ली, (कौ पृथिव्यां मोदते इति। कु + मुद् + क्विप्।) कुमुदम्। इति मेदिनी। हेला इति भाषा। रक्तोत्पलम्। इति शिकाशब्दरत्नावलिः॥
(यथा, भागवते ३। २३। ३८।
"बभ्राज उत्कचकुमुद्गवानपीच्य
स्वाराभिराट्ट इवोडुपतिर्नभस्यः"॥
कुमुदस्य कन्दविशेषः। शालुक इति यस्य ख्यातिः। अस्य पर्य्याया यथा,—
"कैरवं चन्द्रकान्तञ्च गर्दभं कुमुदं कुमुत्"।

कुमुत्

कुमुदः

इति वैद्यकरत्नमालायाम्॥)

कुमुत् [द्] त्रि, (कुत्सिते विषये मुत् हर्षो यस्य कुत्सिता मुद् अस्य वा।) पापयुक्तः। इति मेदिनी। अप्रीतः। इति शब्दरत्नावली॥

कुमुदं, क्ली, (कौ मोदते। मुद् "इगुपधेति"। ३। १। १३५। कः।) श्वेतोत्पलम्। हेला सूँदि इत्यादि भाषा॥ (यथा, रामायणे ५। ५५। १।
"सचन्द्रकुमुदं रम्यं सार्कारुणवं शुभम्।
पुण्यश्रवणकादम्बमभ्रशैवलशाद्वलम्"॥)
तत्पर्य्यायः। कैरवम् २। इत्यमरः। १। १०। ३७। चन्द्रकान्तम् ३ गर्दभम् ४ कुमुत् ५। इति रत्नमाला॥ धवलोत्पलम् ६ कह्लारम् ७ शीतलकम् ८ शशिकान्तम् ९ इन्दुकमलम् १० चन्द्रिकाम्बुजम् ११ गन्धसोमम् १२। इति शब्दरत्नावली॥ अपि च।
"श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा।
कुमुदं पित्तच्छिल्लं स्निग्धं मधुरं ह्लादि शीतलम्"॥
इति भावप्रकाशः॥ अस्य गुणाः। शीतलत्वम्। स्वादुत्वम्। पाके तिक्तत्वम्। कफरक्तदोषदाहश्रमपित्तनाशित्वञ्च। इति राजनिर्घण्टः। रक्तपद्मम्। इति मेदिनी॥ रूप्यम्॥ इति हेमचन्द्रः॥

कुमुदः, पुं, (कुत्सिते नैर्ऋतकोणे मोदते इति। कु + मुद् + कः।) नैर्ऋतकोणस्थदिग्हस्ती। इत्यमरः। १। ३। ३॥ वानरविशेषः। (अयं खलु रामचन्द्रस्य सेनापतिवानराणां एकतमः।
यथा, रामायणे। ६। २। २८।
"नाम्ना संकोचनो नाम नानाद्विजयुतो गिरिः।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम वानरः।
योऽसौ शतसहस्राणि सहस्रं परिवर्त्तति"॥)
नागविशेषः। (यथा, महाभारते। १। ३५। १५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः।
कुमुदः कुमुदाक्षश्च तितिरिर्हरिणिक्षया"॥)
दैत्यभेदः। सितोत्पलम्। इति हेमचन्द्रः॥ कर्पूरः। इति राजनिर्घण्टः॥ ध्रुवकभेदः। यथा,—
"एकाविंशतिवर्षास्त्रिभवेत् षट्कारके रवे।
कुमुदोऽभोदरश्चैव ताले तुरगलोचने"॥
इति सङ्गीतदामोदरः॥ (कुं पृथ्वीं भूमिं वा मोदयति। अन्तर्भूतणिज्यन्तात् मुदः कः। विष्णुः। यथा, महाभारते। १३। १४९। ७६।
"शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः"।
विष्णुपार्श्वदः। यथा, भागवते। ८। २१। १०।
"कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्तिराट्"॥
मेरोरुपरिभागविशेषः। स चायुतयोजनविस्तृतः। यथा, भागवते ५। १६। १२।
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इति।
अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवलम्बगिरय उपकल्पाः"॥ शाल्मलद्वीपान्तर्गतप्रथमपर्व्वतः। यथा, विष्णुपुराणे २। ४। २६।
"कुमुदश्चात्रतश्चैव तृतीयश्च बलाहकः"॥
आनूपजन्तुविशेषः। यथा,—
"हंससारसचक्राह्वाः कुमुदाश्च कपिञ्जलाः।

कुमुद

आनूपास्वेषु विज्ञेयाः श्लेष्मला वातकोपनाः" ॥
इति हारीते प्रथमेस्थाने ११ अध्यायः ॥)

कुमुदबान्धवः, पुं, (कुमुदस्य बान्धवः ।) चन्द्रः । कर्पूरः । इत्यमरः । १ । ३ । १३ ॥

कुमुदवती, स्त्री, (कुमुदानि सन्त्यस्यां इति । मतुप् मस्य वः ङीप् ।) कुमुदती । कुमुदसमूहः । इत्यमरटीकायां भरतः ॥

कुमुदा, स्त्री, (कुत्सितं मोदते । कु + मुद् + कः । टाप् च ।) कुम्भिका । पाता इति भाषा । गम्भारीवृक्षः । इति मेदिनीकरहेमचन्द्रौ ॥
(अस्याः पर्य्याया यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका ।
कुमुदा च सदा भद्रा कट्फला क्षत्रवृक्षिका" ॥
इति वैद्यकरत्नमालायाम् ॥) श्रावणपर्णीवृक्षः । धातकीवृक्षः । कट्फलः । इति राजनिर्घण्टः ॥

कुमुदावासः, पुं, (कुमुदानां आवासः । कुमुदानि आवसन्त्यत्र वा । आ + वस् + अधिकरणे घञ् ।) कुमुदप्रायदेशः । इति हेमचन्द्रः ॥

कुमुदिका, स्त्री, (कौ भूमौ मोदते इति । मुद् + कर्त्तरि ण्वुल् टाप् अत इत्वञ्च ।) कट्फलः । इत्यमरः । २ । ४ । ४० ॥ (अस्याः पर्य्याया यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्राभद्रवतीति च" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे । गुणास्तास्य कट्फलशब्दे व्याख्याः ॥)

कुमुदिनी, स्त्री, (कुमुदानि सन्त्यस्याम् । कुमुद + इनिः ङीप् ।) कुमुदयुक्तपुष्करिण्यादिः । कुमुदसमूहः । कुमुदलता । इति भरतः ॥
(यथा भ्रमरशतके । ७ ।
"अलिरयं नलिनीवनवल्लभः
कुमुदिनी कुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बत मन्यते" ॥)
तत्पर्य्यायः । कुमुदती २ । इत्यमरः । १ । १० । ३९ । उत्पलिनी । इति राजनिर्घण्टः ॥ छोट सुँदि इति भाषा ॥

कुमुदिनीपतिः, पुं, (कुमुदिन्याः पतिः वल्लभः ।) चन्द्रः । इति हेमचन्द्रः ॥

कुमुदी, स्त्री, (कुमुद + स्त्रियां ङीष् ।) कट्फलः । इति शब्दरत्नावली ॥
(अस्या गुणादयः कट्फलशब्दे ज्ञातव्याः ॥)

कुमुदेशः, पुं, (कुमुदानां ईशः ।) चन्द्रः । इति शब्दरत्नावली ॥

कुमुद्वती, स्त्री, (कुमुद + "कुमुदनडवेतसेभ्यो मतुप्" । ४ । २ । ८७ । इति मतुप् "मादुपधायाश्च" । ८ । २ । ९ । इति मस्य वः । उगितश्चेति ङीप् ।) कुमुदिनी । इत्यमरः । १ । १० । ३८ ॥
(यथा, भट्टिकाव्ये । २ । ६ ।
"प्रभाववातादितकम्पिताक्षतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भर्त्तृं कुपितेव पद्मिनी

कुम्भः

न मानिनीभ्यं सहतेऽन्यसङ्गमम्" ॥
अस्याः पर्य्याया यथा,—
"कुमुद्वती कैरविका तथा कुमुदिनीति च" ।
गुणास्तास्या कुमुदिनीशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
कुमुदाख्यनागराजस्य यवीयसी स्वसा सा तु रामचन्द्रपुत्रस्य कुशस्य पत्नी ।
यथा, रघुः १७ । ६ ।
"तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी" ॥
क्षीरोदीयान्तर्गतानां सप्तनदीनामेका नदी ।
यथा, विष्णुपुराणे २ । ४ । ५५ ।
"गौरी कुमुद्वती चैव सन्ध्यारात्रिर्मनोजवा ।
क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः" ॥)

कुमुद्वान्, त्रि, (कुमुद् + "कुमुदनडवेतसेभ्यः" । ४ । २ । ८७ । इति मतुप् मस्य वः ।) कुमुदबहुलदेशः । इत्यमरः । २ । १ । ९ ॥
(यथा रघुवंशे ४ । १९ ।
"हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्य्यस्ता यशसामिव" ॥)

कुमोदकः, पुं, (कुं पृथ्वीं मोदयति । कु + मुद् + णिच् + ण्वुल् । पृथिव्याः भारावतारणादिनीलाकर्म्मभिः सर्व्वेषामानन्दकारकत्वात् तस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

कुम्भः, त्रि, (कुम्भति कुम्भयति वा । कुभि वेष्टने + अच् इदित्वात् नुम् ।) बाऊकुशुड़ः । इति जटाधरः । कोपा इति भाषा ॥

कुम्बा, स्त्री, (कुबि वेष्टने + अच् टाप् च ।) सुगन्धनाड़ीति । अस्पृश्यादिदर्शनवारणाय वेष्टनम् । इत्यमरः । २ । ७ । १८ ॥ (यथा तैत्तिरीयसंहितायाम् । "तस्मिन्नुदीचीनकुम्बां गृह्यां निदधाति" ॥ तथा शुक्लयजुर्व्वेदे अश्वालम्भे । ७ । "कुम्बावतीसमविड्भ्वा गलेन गवतुम्बाभवीवृसविधा शं बाऊलेयग्रन्थिबिम्बाभिरामसुखसम्बाधितस्तनभरा" ॥ इति ॥)

कुम्भं, क्ली, (कुं भूमिं उम्भति गन्धेन पूरयति । कु + उम्भ पूरणे + अच् ।। प्रकन्ध्वादित्वात् साधुः ।) गुग्गुलुः । इत्यमरः । २ । ३ । १३४ ॥ त्रिलिङ्गत्वं । इति हेमचन्द्रः ॥

कुम्भः, पुं, (कुं भूमिं उम्भति जलेन । उम्भ + अच् । प्रकन्ध्वादित्वात् साधुः ।) घटः । अस्य परिमाणं कलसशब्दे द्रष्टव्यम् ॥ गजकुम्भः । हस्तिशिरसः पिण्डद्वयम् । इत्यमरः । ३ । ३ । १३४ ॥
(यथा प्रसन्नराघवे,—"तैः किं मत्तकरीन्द्रकुम्भकुहरेणारोपयीयाः करान्" ॥) कुम्भकर्णपुत्रः ।
(यथा, गोः रामायणे । ५ । ७६ । १५ ।
"सुतोऽथ कुम्भकर्णस्य कुम्भः परमकोपनः ।
अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्" ॥)
वेश्यापतिः । इति विश्वमेदिन्यौ ॥ समाधिविशेषः । प्राणायामाङ्गकुम्भक इति यावत् । इति धरणी ॥
(प्रह्लादपुत्रः । यथा महाभारते १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत ! ॥

कुम्भकः

विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत !" ॥
विष्णुः । यथा महाभारते १३ । १४९ । ८२ ।
"अर्च्चिश्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः" ॥)
द्रोणद्वयपरिमाणम् । ६४ सेर इति भाषा ।
तत्पर्य्यायः । सूर्पः २ । इति वैद्यकपरिभाषा ॥ मेघादिदाशरथ्यन्तर्गतैकादशराशिः । तस्य पर्य्यायः । हृद्रोगः २ । इति दीपिका ॥ स च धनिष्ठार्द्धसम्पूर्णशतभिषायुक्तपूर्ब्बभाद्रपदा प्रथमपादत्रयेण भवति । अस्याधिष्ठात्री देवता कलसधारी पुरुषः । स तु श्रीमोदयः । चरणरहितः । मध्यसन्तानः । मध्यमस्त्रीसङ्गः । कर्ब्बुरवर्णः । वनचारी । वायुराशिः । खिन्नः । उष्णः । अर्द्धस्वरः । वातपित्तकफप्रकृतिः । शूद्रवर्णः । पश्चिमदिक्स्वामी । क्षुधातुः । तत्र जातफलम् ॥ "मेधावी हस्तिघोटकधनेश्वरो दन्तपीड़ायुक्तः स्नेहशून्यः" । इति ज्योतिषम् । जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"अलसतासहितोऽन्यसुतप्रियः
कुशलताकलितोऽतिविचक्षणः ।
कलसगामिनि प्रीतकरे नरः
सदसि सज्जनमानसुरोचनः" ॥
इति कोष्ठीप्रदीपः ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गतिप्राप्तपरिमाणं यथा । दशव्यङ्गुलाधिकः पञ्चाङ्गुलप्रभे देशे वर्त्तमानोनविंशायनांशे अष्टपञ्चाशत्पलाधिकचिदङ्गः । इति ज्योतिषम् । तत्र जातफलम् ।
"कुम्भलग्ने समुद्भूतस्वल्पचित्तोऽतिसौहृदः ।
परदाररतो नित्यं सत्त्वकायो महासुखी" ॥
इति कोष्ठीप्रदीपः ॥

कुम्भकः, पुं, (कुम्भ इव कायति प्रकाशते निश्चलत्वात् । कै + कः । यद्वा कुम्भ + स्वार्थे कः ।) दक्षिणहस्तेन नासापुटद्वयं धृत्वा प्राणायामाङ्गं वायुस्तम्भनम् । इति तन्त्रम् ॥ (पातञ्जलयाज्ञवल्क्यादौ तु ।
"कुम्भकः पूरको रेचः प्राणायामस्त्रिलक्षणः ।
पूरकं पूरणं वायोः कुम्भकः स्यादनं क्वचित् ॥
वह्निनिःसारणं तस्य रेचकः परिकीर्त्तितः ॥
दक्षिणे रेचयेद् वायुं वामेन पूरितोदरः ।
कुम्भेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः ॥
अङ्गुष्ठेन पुटं ग्राह्यं नासया दक्षिणं पुनः ।
कनिष्ठानामिकाभ्याञ्च वामं प्राग्वत् संग्रहे ॥
अङ्गुष्ठतर्जनीभ्यान्तु ऋग्वेदी सामगायनः ।
अङ्गुष्ठानामिकाभ्यान्तु ग्राह्यं सर्व्वैरथर्व्वभिः" ॥)
(तथा च, हठयोगदीपिकायाम् । २ । ४३ ।
"तस्मिञ्जये विधानज्ञाश्चित्रान् कुर्व्वन्ति कुम्भकान् ।
विचित्रकुम्भकाभ्यासादचिरात् सिद्धिमाप्नुयात्" ॥
"तस्मिञ्जये उज्जन्यवज्ञासिद्धये" । इति तट्टीका ॥ अस्य भेदाः यथा तत्रैव २ । ४४ ।
"सूर्य्यभेदनमुज्जायी सीत्कारी शीतली तथा ।
भस्त्रिकाभ्रामरीमूर्च्छा प्लाविनीत्यष्टकुम्भकाः" ॥
तथा पुनस्तत्रैव २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरकुम्भकः ।

कुम्भयो

सहितः केवलश्चेति कुम्भको द्विविधो मतः" ॥•॥)

कुम्भकारः, पुं, (कुम्भं करोति । कुम्भ + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) जातिविशेषः । कुमोर इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मोरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् । तत्पर्य्यायः । कुलालः २ । इत्यमरः । २ । १० । ६ । चक्री ३ । इति जटाधरः । (एतज्जातिविषये तु पुराणभेदेन मतभेदो दृश्यते । यथा ।

"वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते" ।

"मालाकाराच्चर्म्मकार्य्यां कुम्भकारो व्यजायत" ।

"पट्टीकाराच्च तैलिक्यां कुम्भकारो बभूव ह" ।

इत्यादि बह्वनमतमस्ति बाहुल्यभिया नास्माभिरुद्धियते ॥) कुक्कुभपक्षी । इति हेमचन्द्रः ॥

कुम्भकारिका, स्त्री, (कुम्भस्येव कार आकारो यस्याः । कुम्भकार + कप् + टाप् अत इत्वञ्च ।) कुलत्था । इति राजनिर्घण्टः ॥ (कुम्भं करोतीति । कुम्भ + कृ + ण्वुल् स्त्रियां टाप् अत इत्वम् । कुम्भकारस्त्री । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कुम्भकारी, स्त्री, (कुम्भस्येव कार आकारो यस्याः । गौरादित्वात् ङीष् ।) कुलत्थाङ्गनम् । कुलत्थिका । इति राजनिर्घण्टः ॥ मनःशीला । इति जटाधरः ॥ (कुम्भकारस्य पत्नीति ङीष् ।) कुम्भकारभार्य्या ॥

कुम्भतुम्बी, स्त्री, (कुम्भ इव तुम्बी ।) घण्टाकुम्भभेदः । गोल लाउ इति भाषा । तत्पर्य्यायः । कुम्भालाबुः २ गोरक्षतुम्बी ३ गोरक्षी ४ गाङ्गालाबुः ५ घण्टाभिधा ६ घण्टालाबुः ७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तश्वासकफाखुज्वरकाश्मर्य्यघ्नित्वम् । रम्यत्वञ्च । इति राजनिर्घण्टः ॥

कुम्भदासी, स्त्री, (कुम्भस्य वेश्यापतेर्दासी ।) कुट्टनी । इति शब्दरत्नावली ॥

कुम्भयोनिः, पुं, (कुम्भः योनिर्जन्मस्थानं यस्य ।) अगस्त्यमुनिः । (यथा रघुः ४ । २१ ।

"प्रसवादोदयादभ्रः कुम्भयोनेर्महौजसः" ॥)

वशिष्ठमुनिः । (एतयोर्मुनिसत्तमयोरुत्पत्तिविवरणं तु उर्व्वशीक्षते कन्दर्पपीडितयोर्मित्रावरुणयोः स्खलितैकबिन्दौ कुम्भे सङ्गतेन रेतसा यथा घटितं तथा तत् रामायणोत्तरकाण्डे ६६—६७ सर्गे विशेषतो द्रष्टव्यम् ॥) द्रोणाचार्य्यः । इति मेदिनी ॥ (अस्य उत्पत्तिकथा यथा महाभारते १ । १३१ । ६-१४ ।

"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं संशितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षाद् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मदहृद्यां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तद्दृष्ट्वैव आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥)

द्रोणपुष्पोवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, अश्वरोविशेषः । यथा महाभारते । ३ । ७३ । ३० ।

"गोपाली सङ्गजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्रलेखा संहा च मधुरस्वना" ॥)

कुम्भला, स्त्री, (कुम्भं कुम्भाकारं लाति आदत्ते । कुम्भ + ला आदाने + कः टाप् च ।) मुण्डितिका । इति रत्नमाला ॥ मुण्डिरी इति भाषा ॥ (मुण्डीशब्दे विवृतिरस्या ज्ञेया ॥)

कुम्भवीजकः, पुं, (कुम्भ इव वीजं यस्य । ततः स्वार्थे कः ।) रीठाकरञ्जः । इति राजनिर्घण्टः ॥

कुम्भशाला, स्त्री, (कुम्भाय कुम्भनिर्म्माणार्थं या शाला ।) कुम्भनिर्म्माणादिगृहम् । तत्पर्य्यायः । पाकपुटी २ । इति हेमचन्द्रः ॥

कुम्भसन्धिः, पुं, (कुम्भयोः सन्धिर्मिलनम् ।) हस्तिकुम्भद्वयमध्यस्थानम् । तत्पर्य्यायः । आरक्तः २ । इति त्रिकाण्डशेषः ॥

कुम्भसम्भवः, पुं, (कुम्भः सम्भव उत्पत्तिस्थानं यस्य ।) अगस्त्यमुनिः । इत्यमरः । १ । ३ । २० ॥ (यथा राजेन्द्रकर्णपुरे ७१ ।

"तदयुक्तं ननु कुम्भसम्भव ! भवत् प्रस्तारहस्तेन यत्
स्याच्च स्याच्च तिरोदधन्निरवधिर्विन्ध्योऽपि वन्ध्यः कृतः" ॥ वशिष्ठः । द्रोणः । एतयोरपि कुम्भोत्पत्तेस्तथात्वम् । एतद्विवरणन्तु कुम्भयोनिशब्दे द्रष्टव्यम् ॥)

कुम्भा, स्त्री, (कु कुत्सितया निन्दितवृत्त्या उम्भा पूर्त्तिर्देहादेर्भरणं यस्याः । अकन्ध्वादित्वात् साधुः ।) वेश्या । इति शब्दमाला ॥

कुम्भाण्डः, पुं, (कुम्भ इव अण्डं यस्य ।) बाणासुरस्यामात्यविशेषः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे १७५ । १६३ ।

"कुम्भाण्डवचनैरेवं दानवेन्द्रः प्रचोदितः ।
वाचं रूक्षामतिक्रुद्धः प्रोवाच वदतांवरः" ॥

अयञ्च बाणराजयान्ते श्रीकृष्णप्रसादात् तद्राज्ञ्यामी बभूव । यदुक्तं तत्रैव १८३ । २७—३८ ।

श्रीकृष्ण उवाच ।

"कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत !।
सुव्रतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सज्ञातिपक्षः सुसुखी निर्व्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाश्रयात्" ॥)

कुम्भाण्डम् । कुम्भाण्डीपर्य्याये कुम्भाण्डीदर्शनात् ॥

कुम्भाण्डी, स्त्री, (कुम्भाण्ड + स्त्रियां जातित्वात् ङीष्।) कुम्भाण्डी । इति राजनिर्घण्टः ॥

कुम्भिका, स्त्री, (कु कुत्सितरूपेण उम्भति पूरयति आच्छादयति वारि पुष्करिण्यादेः । अकनृध्वादित्वात् साधुः ।) जलजन्तुविशेषः । पाना इति भाषा । तत्पर्य्यायः । वारिपर्णी २ । इत्यमरः । १ । १० । ३८ ॥ श्वेतपर्णा ३ अम्बुकुम्भी ४ पानीयपुष्पजः ५ । इति रत्नमाला ॥ आकाशमूली ६ कुटजम् ७ जलवल्लभम् ८ । इति हारावली ॥ वारिमूली ९ खमूलिका १० पर्णी ११ पत्री १२ खमूली १३ खमूलिः १४ वारिकर्णिका १५ । इति शब्दरत्नावली ॥ कुमुदा १६ दलाढ्यकः १७ । इति जटाधरः ॥ अस्य

कुम्भिका

गुणाः वारिपर्णीशब्दे द्रष्टव्याः । पाटलावृक्षः । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ नेत्ररोगविशेषः । तस्य लक्षणं यथा,—

"वर्त्मान्ते पिडकाघाता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकबीजसदृशाः कुम्भिकाः सन्निपातजाः" ॥

इति माधवकरः ॥ (कुम्भा + स्वार्थे कन् टाप् इत्वञ्च । वेश्या । इति शब्दमाला । कट्फलम् । भावप्रकाशे अस्याः पर्य्यायाः यथा,—

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च" ॥

गुणाश्चास्याः कट्फलशब्दे द्रष्टव्याः ॥)

कुम्भिनीबीजं, क्ली, (कुम्भिन्या बीजम् ।) जयपालः । इति राजनिर्घण्टः ॥

कुम्भिपाकी, स्त्री, (कुम्भिना पाकोऽस्याः । गौरादित्वात् ङीष् ।) कट्फलः । इति भावप्रकाशः ॥

कुम्भिमदः, पुं, (कुम्भोऽस्यास्ति कुम्भी हस्ती तस्य मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (गन्धद्रव्यविशेषः ॥)

कुम्भिलः, पुं, (कुम्भ + इलच् ।) चोरः । ज्ञानशून्यः । श्लोकार्द्धचौरः । श्यालः । इति हेमचन्द्रः ॥

कुम्भी, [न्] पुं, (कुम्भोऽस्यास्तीति । इनिः ।) हस्ती । कुम्भीरः । इति हेमचन्द्रः ॥ गुग्गुलुः । इति जटाधरः ॥ (अग्निप्रकृतिविषकीटविशेषः । यथा, "वाह्यकी पिप्पिटः कुम्भी" । इति सुश्रुते कल्पस्थाने ८ अध्याये ॥)

कुम्भी, स्त्री, (कुम्भ + अल्पार्थे ङीष् । क्षुद्रकुम्भः ।) उखा पाटलावृक्षः । वारिपर्णी । कट्फलः । इति हेमचन्द्रः ॥ वृक्षविशेषः । कुम्भीपुष्प इति लोकेषु प्रसिद्धा । तत्पर्य्यायः । द्रोमालुविटपी २ रोमशः ३ पर्पटद्रुमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । ग्राहित्वम् । वातकफापहत्वञ्च । दन्तीवृक्षः । इति राजनिर्घण्टः ॥

कुम्भीकः, पुं, (कुम्भीव कायते प्रकाशते । कै + कः ।) पुन्नागवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते । "प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनचन्दनमोचरसरसाञ्जनकुम्भीकखोतोऽञ्जनपद्मकेसरयोजनवल्लयो दीर्घमूलाश्चेति" ॥) कुम्भिका । यथा,—

"दूर्व्वाकशेरुपूतीककुम्भीकस्नुवैलम्" ।

इति चक्रपाणिदत्तः ॥ (विश्वतगर्भविशेषः । यथा, "पुंस्त्वदोषात्तु पक्वैव प्रोक्तास्तत्रैर्व्यकः स्मृतः ।
आसेचनश्चैव कुम्भीकः सुगन्धिखरसंज्ञितः" ॥
इति शार्ङ्गधरेण पूर्व्वखण्डे सप्तमेऽध्याये उक्तम् ॥
"स्त्रे गुदेऽब्रह्मचर्य्याद्याः स्त्रीषु एवन्तु प्रवर्त्तते ।
कुम्भीकः स च विज्ञेयः" । इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कुम्भीनसः, पुं, (कुम्भीव नसा नासा यस्य ।) क्रूरसर्पः । इति मेदिनी ॥ (वायुप्रकृतिकविषकीटविशेषः । यथा । "कुम्भीनसस्तुण्डिकेरी" । इति सुश्रुते कल्पस्थाने ८ अध्याये उक्तम् ॥)

कुम्भीनसी, स्त्री, (कुम्भीनस + स्त्रियां ङीष् ।) लवणदानवमाता । इति मेदिनी ॥ (यथा, रामायणे । ७ । ६० । १६ ।

"ज्ञातींस्तान् धर्षयित्वेमास्त्वया नीता वराङ्गनाः ।

कुरङ्ग

स्वामतिक्रम्य मधुना राजन् कुम्भीनसी हृता" ॥)

कुम्भीपाकः, पुं, (कुम्भ्यां उखायां पाक इव पाको यत्र ।) नरकविशेषः । इति जटाधरः । तत्पर्य्यायः। सम्प्रतापनः २ । इति मनुः ॥ "य इह पशून् पक्षिणो वा प्राणतो रुन्धयति तं परत्र यमदूतास्तप्ततैले रुन्धयन्ति यत्र । इति श्रीभागवते । ६ । २६ । ७ ॥

कुम्भीरः, पुं, (कुम्भिनं हस्तिनमपि ईरयति । ईर +"कर्म्मण्यण्" । ३।२। १ ।) जलजन्तुविशेषः । कुमीर इति भाषा । तत्पर्य्यायः । नक्रः २। ह्रस्वमरः । १ । १०।२१ ॥ कुम्भीलः ३ । इति तट्टीका ॥ गिलयाहः ४ महाबलः ५ । इति राजनिर्घण्टः ॥ वार्भटः ६ अम्बुकिरातः ७ अम्बुकण्टकः ८। इति शब्दरत्नावली ॥

(यथा, महाभारते । १३ । १११ । ५८। "गर्दभत्वन्तु संप्राप्य दशवर्षाणि जीवति । संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः" ॥)

कुम्भीरमक्षिका, स्त्री, (कुम्भीर इत्याख्या मक्षिका । यद्वा कुम्भीरोपमदयुक्ता मक्षिका ।) मक्षिकाविशेषः । कुमीरा पोका इति भाषा । तत्पर्य्यायः। कथा २ । इति शब्दरत्नावली ॥

कुम्भीलः, पुं, (कुम्भीर + स्वार्थे अः ।) कुम्भीरः । इत्यमरटीका ॥

कुम्भीवीजं, क्ली, (कुम्भ्या वीजम् ।) जयपालः । इति राजनिर्घण्टः । (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

कुर शब्दे । इति कविकल्पद्रुमः । (तुदां-परं-अकं-सेट् ।) शब्दं करोति कोरिता । इति दुर्गादासः॥

कुरका, स्त्री, (कुर् + कः । कुरः शब्दः कायति प्रकाशतेऽस्मिन् । कै + कः ।) सङ्कीर्णत्वम् । इति राजनिर्घण्टः ॥

कुरङ्गरः, पुं, (कुरमित्यव्यक्तशब्दं करोति । कुरम् + ङ + टः ।) सारसपक्षी । इति हेमचन्द्रः ॥

कुरङ्गुरः, पुं, (कुरं इत्यस्फुटशब्दं कुरति । कुर् + कः ।) सारसपक्षी । इति शब्दरत्नावली ॥

कुरङ्गः पुं, (कौ पृथिव्यां भूमौ वा रङ्गति । रगि + अच् । यद्वा, "विड्वनिमिमनिजनां शुक् वा" । उणां १।१२० इति अङ्गच् वाहुलकात् उतं रपरत्वञ्च । कुरङ्गविहङ्गादयः सर्व्वे निपात्यन्ते । इति वा ।) हरिणः । इत्यमरः । २ । ५ । ८ ॥ कुत्सकोऽपि ।

(यथा, भागवतटीकायां स्वामिना प्रोक्तम् ।

"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च" ।

अस्य गुणाः यथा,—

"कुरङ्गो वंशको वल्यः शीतलः पित्तदाहजित् । मधुरो वातहृद्यश्च किञ्चित्पक्वकरः स्मृतः" ।

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ * ॥

अस्य लक्षणं यथा,—

"न ह्रस्वो न च ताम्रश्च कुरङ्गः सोऽभिधीयते" ॥

इति सूत्रस्थाने षट्चत्वारिंशेऽध्याये सुश्रुतेनोक्तम् ॥)

कुरङ्गनयना, स्त्री,(कुरङ्गस्य नयने इव नयने यस्याः ।) मृगनयना नारी । इति राजनिर्घण्टः ॥ (उक्तञ्च, "किन्त्वेकायमुना कुरङ्गनयना नेत्राम्बुभिर्वर्द्धते" ॥)

कुरङ्गनाभिः, पुं, (कुरङ्गस्य नाभिः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (कस्तूरीशब्दे ऽस्य गुणादयो बोद्धव्याः ॥)

कुरङ्गमः, पुं, (कौ भूमौ रङ्गं मिनोति । मा + डः ।) हरिणविशेषः । तत्पर्य्यायः । एणः २ ऋष्यः ३ रिष्यः ४ चारुलोचनः ५ । इति चिकाण्डशेषः ॥

कुरङ्गिका, स्त्री, (कौ रङ्गेऽस्या अस्तीति । ठन् टाप् च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥

कुरचिल्लः, पुं, (कुरे शब्दे चिल्लति । चिल्ल ग्रैथिल्ये + अच् ।) कर्कटः । इति हेमचन्द्रः ॥

कुरटः, पुं, (कुर् + अटन् किच्च । कु कुत्सितरूपा रटति जीवति देहयात्रां सम्पादयति वा । रट + अच् ।) चर्म्मकारः । इति चिकाण्डशेषः ॥

कुरण्टकः, पुं, (कुर्य्यते शब्द्यते इति । कुर् + कर्म्मणि वाहुलकात् अण्टक् स्वार्थे कन् ।) पीतासनगः । पीतझिण्टी । इति राजनिर्घण्टः॥ (अस्य पर्य्यायगुणा यथा,—

"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका । सहाचरः सहचरः स च भिन्न्यपि कथ्यते ॥ कुरण्टकोऽत्र पीते स्यादक्षे कुरवकः स्मृतः । नीले वाणादयोक्तो दासे आर्त्तगलश्च सः ॥ सैरेयः कुष्ठवातास्रकफकण्डूविषापहः । तिक्तोष्णो मधुरोऽनस्रः सुस्निग्धः केशरञ्जनः" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"किंशुकं कफपित्तघ्नं तद्वदेव कुरण्टकम्" ॥

इति सुश्रुते सूत्रस्थाने ४६ अः । अनास्य नपुंसकत्वं वक्तव्यम् ॥)

कुरण्डः, पुं, (कुर + अण्डच् ।) मुष्ककवृद्धिरोगः । कोरण्ड इति भाषा । तत्पर्य्यायः । वृद्धिः २ अण्डवर्द्धनः ३। इति हेमचन्द्रः ॥ तस्य सम्प्राप्तिपूर्व्वकं लक्षणं यथा,—

"क्रुद्धोऽपानगतिर्वायुः श्रोणिमूषणकरश्चरन् । मुष्कौ वङ्क्षगतः प्राप्य पक्वकोशाभिवाहिनीः ॥ प्रपीड्य धमनीर्वृद्धिं करोति पक्वकोषयोः । दोषास्रमेदोमूत्राम्बैः सवृद्धिः सप्तधा मतः ॥ मूत्राम्लजावप्यनिलाज्जेतुभेदश्च केवलम् । वातपूर्व्वैर्वृतिस्पर्शो रूक्षो वातादहेतुकः ॥ पक्वोऽम्लरसजाग्रः पित्ताद्दाहोष्मपाकवान् । कफान्मीतो गुरुः स्निग्धः कण्डूमान्कठिनोऽल्परुक् ॥ क्षयस्फोटावृतः पित्तवृद्धिविद्रधिरक्तजः । कफवन्मेदसा वृद्धिर्मेदुरस्तालफलोपमः ॥ मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः । अम्भोभिः पूर्व्ववृतिवत् क्षोभं याति सवस्तुदुः ॥ मूत्रकृच्छ्रमधः स्राव्य चालयन् पक्वकोषयोः । वातकोपिभिराहारैः शीततोयावगाहनैः ॥ धारणे रथमाराध्वविषमाक्षप्रवर्त्तनैः । क्षोभणैः क्षुभितस्यान्तः क्षुब्धान्त्रावयवं यदा । पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् । कुर्य्यादङ्गभ्रमसन्धिक्षो ग्रथ्याभं क्षयथुं तदा ।

उपेक्षमाणस्य च मुष्कवृद्धि-

कुरण्डः

माध्मानवत् स्तम्भवती स वायुः ।
प्रपीड़ितोऽन्तःस्रवनान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥

अन्यत्रवृद्धिरयाथोऽयं वातवृद्धिसमाकृतिः" ॥ इति वृद्धिनिदानम् ॥ इति माधवकरः ॥ * ॥

तस्यौषधं यथा,—

"द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा । गण्डमालां हरेत्क्षिप्रात् कुरण्डगलगण्डकम् । रसाञ्जनं हरीतक्याश्चूर्णं तेनैव गुग्गुलात् । नश्येद्वै पुरुषव्याधिं नात्र कार्य्या विचारणा" ॥

इति गारुडे १९० अध्यायः ॥ * ॥ अन्यच ।

"गव्यं घृतं सैन्धवसंप्रयुक्तं
शम्बूकभाण्डे निहितं तदेव ।
सप्ताहमादित्यकरैर्विपक्वं
हन्यात् कुरण्डं चिरजं प्रदुष्टम्" ॥

गव्यघृत कर्ष १ । सैन्धव मा ४ । शम्बूकभाण्डे क्षिप्त्वा सप्तदिनं यावत् रौद्रे भावयेत् तेन कुरण्डमुच्चयम् ॥

"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजन आतपे । प्रतप्तसूर्य्यया दृष्टं तन्मर्दञ्च समाहरेत् । कुरण्डं मर्दयेत्तेन स निर्व्विण्णं दिवानिशम् । कुरण्डं तेन संक्लिन्नं गात्रोत्थाह पुनर्व्वसुः ॥

ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुञ्छिकया घृत्वा मर्दयेत् ॥

वज्रवारस्य वीजञ्च पिष्ट्वा तथार्द्रकैः सह । कुरण्डं नाशयेद्भूरि लेपनान्नात्र संशयः ॥ घृतैर्नवोत्थं मूलं पिष्ट्वा लिम्पेत् कुरण्डकम् । अथवा लेपनं कुर्य्यात् सहमण्डूकशोणितैः" ॥

इति भैषज्यरत्नावली । * ॥ अपरञ्च ।

"गुग्गुलुं त्रवुतैलं वा गोमूत्रेण पिबेन्नरः । वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम् ॥ सक्षीरं वा पिबेत्तैलं मासमेरण्डसम्भवम् । पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ॥ पाने वस्तौ त्रवोस्तैलं पेयं वा दशकाम्बसा । चन्दनं मधुकं पद्मसुधीरं नीलमुत्पलम् ॥ क्षीरपिष्टैः प्रदेहः स्याद्दाहशोथज्वरापहः । प्रलेपवल्कलक्वाथैस्तेन सह तेन प्रलेपनम् ॥ सर्व्वं पित्तहरं कार्य्यं रक्तजे रक्तमोक्षणम् । श्लेष्मवृद्धिं तूत्थवोर्य्यैर्मूत्रपिष्टैः प्रलेपयेत् ॥ पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् । स्निग्धां मेदःसमुत्थान्तु लेपयेत् सुरसादिना ॥ शिरोविरेकश्चर्य्यैर्व्वा सुखोष्णैर्मूत्रसंयुतैः । संस्वेद्य मूत्रप्रभवां वस्त्रपट्टेन वेष्टयेत् ॥ सेवन्याः पार्श्वतोऽधस्ताद्विध्येदन्त्रवृद्धिनिवृत्तये । शस्त्रेणाशु त्वचं छित्त्वा सेवनिमादरात् ॥ त्यक्त्वासादा सिरां विध्येदन्त्रवृद्धिनिवृत्तये । अङ्गुष्ठमध्ये त्वक् छित्त्वा दहेदङ्गविपर्य्यये ॥ राजायश्चूर्णतैरण्डबलागोक्षुरसाधितः । क्वाथोऽन्त्रवृद्धिं हन्यात्तु त्रवुतैलेन मिश्रितः ॥ तैलमेरण्डजं पीत्वा बलासिद्धपयोऽन्वितम् । आध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः ॥

हरीतकीं मूत्रसिद्धां सतैललवणान्विताम् ।
प्रातःप्रातश्च सेवेत कफवातामयापहाम् ॥
गोमूत्रपिष्टां रवुतैलभृष्टां
हरीतकीं सैन्धवचूर्णयुक्ताम् ।
खादेन्नरः कोष्णजलानुपानां
निहन्ति वृद्धिं चिरजां प्रवृद्धाम् ॥
त्रिफलाक्षाधगोमूत्रं पिबेत् प्रातरतन्द्रितः ।
कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम् ॥
सरलागुरुकुष्ठानि देवदारुमहौषधम् ।
मूत्रारनालसंपिष्टं श्रोथघ्नं कफवातनुत् ॥
त्रिफलाक्षाधगोमूत्रं कक्षः पथ्यासमुद्भवः ।
क्षण्णासैन्धवसंयुक्तो वृद्धिरोगहरः परः ॥
गव्यं घृतं सैन्धवसंप्रयुक्तं
भृम्बूकभाण्डे निहितं प्रयत्नात् ।
सप्ताहमादित्यकरैर्विपक्वं
निहन्ति कुरण्डमतिप्रवृद्धम् ॥
ऐन्द्रीमूलभवं चूर्णं रवुतैलेन मर्दितम् ।
व्यहाद्वोपयसा पीतं सर्व्ववृद्धिनिवारणम् ॥
रुद्रजटामूलसिक्ता करटव्यङ्गचर्म्मणा ।
बद्धा वृद्धिः शमं याति चिरजापि न संशयः ॥
निम्बिष्टेनारनालेन रूपिकामूलवल्कलम् ।
लेपोवृद्धामयं हन्ति बद्धमूलमपि दृढम् ॥
वचासर्षपकल्केन लेपो वृद्धिविनाशनः ।
लब्धाम्भ्रमलाभ्यान्तु लेपो वृद्धिहरः परः" ॥ * ॥
"मूत्रं विल्वकपित्थयोरक्षकस्याम्रेरहस्योर्द्वयोः
श्यामायूषितरङ्गशिग्रुकतरोर्व्विश्वौषधारुष्करम् ।
क्षण्याग्रन्थिकचव्यपक्षवलवं क्षाराजमोदान्वितं
पीतश्चार्श्विककोष्णतोयमथितैश्चूर्णीकृतं भ्रंशनित् ॥
अवीच्चीरेण गोधूमकल्कं कुन्दुरुकस्य वा ।
प्रलेपनं सुखोष्णं स्यात् भ्रंशशूलहरं परम् ॥
मृत्पात्रे तु वै काकोदरे तक्रं प्रवेशयेत् ।
भ्रंशं मुञ्चति मेधावी तत्क्षणादरुजो भवेत् ॥
अजाजी हपुषा कुष्ठं गोधूमं वदराणि च ।
काञ्जिकेन समं पिष्ट्वा कुर्य्याद्भ्रंशप्रलेपनम् ॥
सैन्धवं मदनं कुष्ठं घृताक्तां निशुष्कं वचाम् ।
क्षौद्रेरं मधुकं भार्गीं देवदारु सनागरम् ॥
कट्फलं पौष्करं भेदां चविकां चित्रकं शटीम् ।
विड्वरातिविषे श्यामां रेणुकां नीलिनीं स्थिराम् ॥
विल्वाजमोदां क्षण्यां च दन्तीं राखां प्रपिष्य च ।
साध्यमेरण्डजं तैलं तैलं वा कफवातनुत् ॥
भ्रंशोदरार्त्तगुल्मार्शःश्रोणिमेढ्रामयानपि ।
आनाहमप्सरोद्यैव हन्यात्तदनुवासनात्" ॥
वृहत्सैन्धवाद्यं तैलम् ॥
"सौरेश्वरवृतं योज्यं भ्रंशवृद्धिनिवृत्तये" ॥
इतिभ्रंशवृद्ध्यधिकारः । इति चक्रपाणिदत्तः ॥ * ॥

(अस्य सनिदानं पूर्व्वरूपसहितं लक्षणं संप्राप्तिश्च यथा। "वातपित्तश्लेष्मश्रोणितमेदो मूत्रान्ननिमित्ताः सप्त वृद्धयः। तासां मूत्रान्ननिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यसमः। अधः प्रकुपितोऽन्यतमो हि दोषः फलकोशवाहिनीरभिप्रपद्यधमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते। तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशश्लोफक्षेति ॥

तत्रानिलपरिपूर्णो वस्तिमिवाततं पश्यामनिमित्तानिलजं वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चामुसमुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां श्लोतां कण्डूमतीं श्लेष्मवृद्धिं क्षण्याक्षोटाभतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् ॥ मूत्रसन्धारण-शीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा इतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोःश्वयथुं कोषयोरापादयति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणवलवद्विग्रहवृत्तप्रपतनादिभिरायासविशेषैर्बायुरतिप्रवृद्धः प्रकुपितश्च श्रोणान्तस्थेतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणो च कालान्तरेण फलकोशं प्रविश्य मुष्कश्लोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः श्लोफो भवति सश्रम्भवपीड़ितश्चोर्द्धमुपैति विमुक्तश्च पुनराधमति तामन्त्रवृद्धिमसाध्यामाचक्षते" ॥ * ॥ इति सुश्रुते निदानस्थाने । १२ अध्याये ॥

चिकित्सितशास्त्रं यथा,—
"अन्त्रवृद्धा विना बद्ध्वा वृद्धयस्तास्तु वर्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥
अत्यासनश्रमणमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ स्नैहतस्निग्धमातुरम् ॥
स्निग्धस्वेदं यथान्यायं पाययेत विरेचनम् ।
कोष्णाम्बुतिल्वकैरण्डफलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमैरण्डसम्भवम् ।
ततः कालेऽनिलघ्नानां क्षाद्यैः कर्म्मभिर्बुद्धिमान् ॥
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनम् ॥
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्नेहोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा स्नेहनीं परिवर्ज्जयेत् ।
भिन्द्यात्ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ।
पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ॥
पक्वां वा भेदयेद्भिन्नां श्रोधयेत् क्षौद्रसर्पिषा ।
व्रणायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ॥
रक्तजायां जलौकोभिः श्रोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम् ॥
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ।
वृद्धिं कफात्मिकामुष्णैर्मूत्रपिण्डैः प्रलेपयेत् ॥
पीतदारु कषायञ्च पिबेन्मूत्रेण संयुतम् ।
विस्रापनावृते वापि श्लेष्मग्रन्थिक्रमो हितः ।
पक्वायाञ्च विभिन्नायां तैलं श्रोधनमिष्यते ॥
सुमनाबल्कराशोठसप्तपर्व्वैः साधितम् ।
मेदःसमुत्थां संस्वेद्य लेपयेत् सुरसादिना ॥
शिरोविरेकैर्व्यधैर्व्वा सुखोष्णैर्मूत्रसंयुतैः ।
स्निग्धाक्तावेष्य पट्टेन समाश्वास्य तु मानवम् ॥
रक्षेत् पक्वे सेवनीञ्च वृद्धिपत्रेण दारयेत् ।
मेदस्ततः समुद्धृत्य दद्यात्कासीससैन्धवे ॥
नम्रीयाच्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।

मनःशिलालवणैः सिद्धमारुष्करेषु च ।
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्वीहिमुखेन तु ।
अथात्र विमुखां नाडीं दत्त्वा विस्रावयेद्भिषक् ।
मूत्रं नाडीमधोदृत्य स्वगिकावन्मनाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्ज्येदन्नहेतुकीम् ॥
अप्राप्तफलकोशायां वातवृद्धिक्रमो हितः ।
तत्र यां वङ्क्षणस्थां तां दहेदर्द्धेन्दुवक्त्रया ।
सम्यग्मार्गावरोधार्थं कोशप्राप्तान्तु वर्जयेत् ।
त्वचं भित्त्वाऽस्थिमध्ये दहेच्चाक्रविपर्य्ययात् ॥
अनेनैव विधानेन वृद्धौ वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ।
श्रृङ्गोपरि च कर्त्तव्यान्ते त्वक्षा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये" ॥
इति सुश्रुते चिकित्सितस्थाने १९ अः । * ॥)

भावप्रकाशोक्तचिकित्सादिः अन्त्रवृद्धिशब्दे दृश्यः ।
साकवण्डवृक्षः । इति राजनिर्घण्टः ।

कुरण्डकः, पुं, (कुर्य्यते भृज्यते इति । कुर् + बाहुलकात् अण्टक् । एषोदरात् साधुः । ततः स्वार्थे कन् ।) कुरण्टकवृक्षः । इत्यमरटीकायां रायमुकुटः । (कुरण्टकशब्देऽस्य विवरणं ज्ञातव्यम् ।)

कुररः, पुं, (कुङ्शब्दे + "कुवः क्रारच्" । उणां ३ । १३३ । इति क्रारच् प्रत्ययः ।) कुरलपक्षी । तत्पर्य्यायः । उत्क्रोशः २ । इत्यमरः । २ । ५ । २३ । खरशब्दः ३ क्रौञ्चः ४ पंक्तिचरः ५ खरः ६ । इति राजनिर्घण्टः । (यथा महाभारते ३ नलोपाख्यानपर्व्वणि । ६४ । ११० ।
"प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम्" ।
अयं जलचरान्तर्गतपक्षिविशेषः । यथा,—
"कुररवकमकराः कञ्जटकपिकम्बुसारसाः ।
आड़िदात्यूहहंसा जलकरटिकपिञ्जा टिट्टिभाद्याः ।
जलेचरा विहङ्गास्ते मासकाः खञ्जरीटकाः ।
इत्येते जलजा जीवाः" । इति हारीते प्रथमे स्थाने ११ अध्याये ।)

कुरराद्रिः, पुं, (कुररस्य अद्रिरिव ।) देवसर्षपः । इति राजनिर्घण्टः ।

कुररी, स्त्री, (कुरर + स्त्रियां जातित्वात् ङीष् ।) मेषी । इति हेमचन्द्रः । कुररपक्षिस्त्री । इत्यमरः । (यथा, महाभारते । १ । ६ । १२ ।
"ततो मामनयद्राजः क्रोशन्तीं कुररीमिव" ।)

कुरलः, पुं, (कुरर इति रस्य लः ।) कुररपक्षी । चूर्णकुन्तलः । इति धरणी ।

कुरवः, पुं, (कु ईषत् रवः शब्दनञ्यनिर्भुक्तराणां खल्पमधुतया यत्र ।) सितमन्दारः । इति राजनिर्घण्टः । कुरवकः । रक्तझिण्टी । इति शब्दरत्नावली । पीतझिण्टी । इति हेमचन्द्रः । (कुत्सितो रव इति कर्म्मधारयः ।) कुत्सितशब्दः । (कुत्सितो रवो यस्य ।) कुत्सितशब्दयुक्ते त्रि ।

कुरवकः, पुं, (कुरव + स्वार्थे कन् ।) रक्तास्थानः । रक्तझिण्टी । इति राजनिर्घण्टः । (यथा राजेन्द्रकर्णपूरे ६५ ।
"किंशिल्कुम्भलितैकलोचनपुटं कण्डूं मुहुर्गण्डयोः

भ्रम्माकम्मितकुम्भले कुरवके निर्वाप्य वन्यद्विषैः"॥ तस्य पुष्पादिरपि । यथा कुमारटीकायां मल्लिनाथः। "आलोकितः कुरवकः कुरुते विकाशम्" ॥ अस्य पर्य्यायो लक्षणञ्च यथा ॥ "सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका । सहाचरः सहचरः स च भिन्ध्यपि कथ्यते । कुरण्टकोऽत्र पीते स्याद्रक्ते कुरवकः स्मृतः" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) कुत्सितरवे त्रि ॥

कुरसः, पुं, (कुत्सितो रसो यत्र ।) मद्यभेदः । इति हारावली ॥ कर्म्मधारये कुत्सितरसः । बहुव्रीहौ कुत्सितरसयुक्ते त्रि ॥

कुरसा, स्त्री, (कुत्सितः ईषत् वा रसो यस्याः ।) गोजिह्वा लता । इति शब्दचन्द्रिका ॥

कुराडः, पुं, कुत्साडः । ईषत्साडुः क्षत्रियजन्यो घोटकः । इति हेमचन्द्रः ॥

कुरी, स्त्री, (कुं भूमिं राति ददाति । कु + रा + कः । ततो गौरादित्वात् ङीष् ।) दृग्धधान्यभेदः । इति राजनिर्घण्टः ॥

कुरीरं, क्ली, ("क्षुभ्र उच्च" । उणां ४ । १३ । इति ईरन् उकारादेशश्च ।) मैथुनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुरुः, पुं, (क्षु + "क्षुभ्रोरुच्च" । उणां १ । २५ । इति कुः उच्च ।) आग्नीध्रराजपुत्रः । स तु प्रियव्रतराजपौत्रः । (खायम्भुवमनोः प्रपौत्रः उत्तरकुरुराज्यं प्राप्तवांश्च । तत्पत्नी च भद्रेति नाम्ना विश्रुता । यथा विष्णुपुराणे । २ । १ । १६-२२ । "जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! । तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥ नाभिः किम्पुरुषश्चैव हरिवर्षं इलावृतः । रम्यो हिरण्वान् भद्राश्व कुरुर्भद्राश्व एव च ॥ केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् । जम्बुद्वीपविभागांश्च तेषां विप्र ! निबोधमे ॥ पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् । हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥ दतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् । इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥ नीलाचलान्वितं वर्षं रम्याय प्रददौ पिता । श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥ यदुत्तरं भद्राश्वतो वर्षं तत्कुरवे ददौ । मेरोः पूर्व्वेण यद्वर्षं भद्राश्वाय प्रदत्तवान्" ॥ वैवस्वतमनुवंश्यक्षत्रवंशीयराजविशेषः । स तु सम्वरराजभार्य्यायां सूर्य्यकन्यायां तपत्यां जातः । अयमेव कुरुक्षेत्रपतिः । धार्त्तराष्ट्रपाण्डवानां पूर्ब्बपुरुषः । यथा,—

"योऽजमीढस्तस्य पुत्रो ऋक्षः सम्वरणस्ततः । तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित् सधनुर्जह्नुर्निषधाश्च कुरोः सुताः" ॥ इति श्रीभागवते । ९ । २२ । ४ ॥) भल्लम् । देशविशेषः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति ज्योतिषम् ॥ तद्देशवासी । तत्र बहुवचनान्तः । (यथा गीतायाम् १ । २५ ।

"उवाच पार्थ ! पश्यैतान् समवेतान् कुरूनिति" ॥) कण्टकारिका । इति शब्दचन्द्रिका ॥

कुरुकन्दकं, क्ली, (कुरुः इव विस्तीर्णः कन्दो यस्य । कप् ।) मूलकम् । इति शब्दमाला ॥

कुरुक्षेत्रं, क्ली, (कुरुणा चन्द्रवंशोद्भवेन राजविशेषेण भूरितपसोपार्ज्जितं धर्म्मक्षेत्रनाम्ना प्रसिद्धं कुरुदेशान्तर्गतं क्षेत्रम् । शाकपार्थिवादित्वात् मध्यपदलोपः ।) देशविशेषः । तत्तु धर्म्मक्षेत्रम् । (किञ्चास्मिन्नेव क्षेत्रे क्षत्रियकुलारण्यकुठारेण भृगुवंशधुरन्धरेण भगवता जामदग्न्यरामेण क्षत्रियग्रोणितैः पञ्च ह्रदाः कृताः तदारभ्य च क्षेत्रमेतत् समन्तपञ्चकनाम्नोच्यते । नितरामेवाच युध्यतां क्षत्रियाणां शरीरविसर्ज्जनेन पुण्यप्राप्तुर्य्यात् वैकुण्ठप्राप्तिः । तत एवाच कुरुपाण्डवानां समरयुद्धं निर्वृत्तम् । एतद्विवरणं महाभारतीये १२ । ४८ अध्याये श्रीकृष्णयुधिष्ठिरसंवादे द्रष्टव्यम् ॥ यथा भगवद्गीतायाम् १ । १ ।

"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय !" ॥ एतत्क्षेत्रस्य सीमानिर्द्देशे बह्वनि मतानि लक्ष्यन्ते दिक्षात्रमुदाहृतमत्र । यथा, हेमचन्द्रः ।

"धर्म्मक्षेत्रं कुरुक्षेत्रं दादशयोजनावधि" ॥

तथा त्रिकाण्डशेषेऽपि ।

"कुरुक्षेत्रं प्रयागश्च हिमाद्रिं विन्ध्यमन्तरा" ॥ एष हि ब्रह्मर्षिदेशः । यथा, मनौ । २ । १९ ।

"कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः" ॥)

कुरुक्षेत्रीयोगः, पुं, एकस्मिन् सावनदिने तिथित्रयनक्षत्रत्रययोगत्रयाणाञ्च स्पर्शः । इति स्मृतिः ।

कुरुक्षेत्रे मृत्युयोगः । यथा,—

"पञ्चग्रहयुते मृत्यौ लग्नसंस्थे बृहस्पतौ । सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" ॥

इति ज्ञातकामृतसंग्रहे योगाध्यायः ॥

कुरुटः, पुं, (कुत्सितं रोटते दीप्यते प्रतिहन्ति वा । रुट दीप्तौ प्रतिघातादिषु च + "इगुपधेति" ३ । १ । १३५ । कः ।) सितावरणाकः । इति राजनिर्घण्टः ॥

कुरुरुटः, पुं, (कुत्सितं दुर्गन्धादिकं रुरुटति लुण्ठतीति । कु + रुटि स्तेये + अच् ।) पीतभिण्टी । पीतास्थानः । इति मेदिनी ॥ (कुरुरुटकशब्दोऽस्य विकृतिरूपः ॥)

कुरुरुटकः, पुं, (कुरुरुट + स्वार्थे कन् ।) पीतास्थानः । पीतभिण्टी । तत्पर्य्यायः । सहचरी २ सहचरः ३ । इत्यमरः । २ । ४ । ७५ ॥ सहाचरः ४ कुरंरुटकः । इति भरतः ॥

("वीरः सहचरः पीतपुष्पो दासीकुरुरुटकः" ॥ इति वैद्यकरत्नमालायाम् । यच्चास्य व्यवहारस्तद्यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये आरग्वधादिवर्गे ॥ "आरग्वधमदनगोपघोण्टा कुटजपाठा करटकीपाटलामूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुरुटकदासीत्यादिषु द्रष्टव्यः ॥)

कुरुरुटी, स्त्री, (कु कुत्सितं रुरुटति खभासा । कु + रुटि + अच् । गौरादित्वात् ङीष् ।) दासपुत्रिका । इति मेदिनी ॥ (कु कुत्सितं पापं रुरुटति नाशयति ब्रह्मणः पत्न्यर्चा परिचर्य्यया ।) ब्राह्मणी । इति जटाधरः ॥

कुरुम्बं, क्ली, (कुर् + बाहुलकात् उम्बच् ।) कूलपालकम् । इति शब्दचन्द्रिका ॥ कमलालेवु इति भाषा ॥

कुरुम्बा, स्त्री, (कुरुम्ब + स्त्रियां टाप् ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥ (द्रोणपुष्पीशब्देऽस्या गुणादयो ज्ञेयाः ॥)

कुरुम्बिका, स्त्री, (कुरुम्बा + स्वार्थे कः टाप् इत्वं च ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥

कुरुम्बी, स्त्री, (कुरुम्ब + स्त्रियां गौरादित्वात् ङीष् ।) सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

कुरुराट् [ज्] पुं, (कुरुषु राजते । राज् + क्विप् ।) दुर्य्योधनः । इति त्रिकाण्डशेषः ॥

कुरुलः, पुं, (कुर् + उलच् ।) भालस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ भ्रमरालकः ३ । इति हेमचन्द्रः ॥

कुरुवकः, पुं, (रौतीति रवो भ्रमरः । कुत्सितः स्वल्पमधुलाभात् विरक्तो रवो यत्र । स्वल्पमधुत्वादस्य तथात्वम् ।) रक्तझिण्टी । रक्तास्थानः । इत्यमरः । २ । ४ । ७४ ॥ पीतझिण्टी । इति हेमचन्द्रः ॥ (कुरुवकशब्दे पीतझिण्टीशब्दे च अस्य विवृतिर्द्रष्टव्या ॥)

कुरुविन्दं, क्ली, (कुरून् विन्दति + विदिलाभे "अनुपसर्गात् लिम्पविन्दधारिपारिवेद्युदेजिचेति साति साहिभ्यश्च" । ३ । १ । १३८ । इति ग्रः मुचादित्वात् नुम् च ।) काचलवणम् । माणिक्यम् । इति राजनिर्घण्टः ॥ कुरुविन्दरत्नम् । कुल्माषशस्यम् । इति मेदिनी ॥ (क्वचिदस्य पुंलिङ्गत्वमपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ३९ अध्यः ।

"कासीससैन्धवं किण्वं कुरुविन्दो मनःशिला" ॥)

कुरुविन्दः, पुं, (कुरु + विद् + ग्रः नुम् च ।) मुस्तकम् । इत्यमरः । २ । ४ । १५९ ॥ माषः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"मुस्तकं न स्त्रियां मुस्तं चिपु वारिदनामकम् । कुरुविन्दश्च सङ्घातेऽपरः क्रोडकसेरुकः । भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कुरुविल्वः, पुं, (कुरुषु विल्व इव ।) पद्मरागमणिः । इति त्रिकाण्डशेषः ॥

कुरुविल्वकः, पुं, (कुरुविल्व + संज्ञायां कन् ।) कुल्माषः । वनकुलत्थिका । इति रत्नमाला ॥ (गुणाश्चास्य कुल्माषशब्दे ज्ञेयाः ॥)

कुरुविल्वः, पुं, (कुरुषु विल्वात् विस्तः ।) खर्जूरफलम् । इत्यमरः । २ । ९ । ८९ ॥ चारि तोला सेरा । इति भाषा ॥

कुरूप्यं, क्ली, (कु ईषत् रूप्यमिव । रूप्यवत् शुभ्रत्वात्तथात्वम् ।) रङ्गम् । इति राजनिर्घण्टः ॥

कुर्कुरः, पुं स्त्री, (कुर् इत्यस्फुटं शब्दं कुरति शब्दायते । कुर् + कुर् + कः ।) कुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

कुर्णजः, पुं, कुलक्षनक्षत्रः । इति राजनिर्घण्टः ॥

कुलं

कुर्द ड क्रीडायाम्। इति कविकल्पद्रुमः॥ (भां–आत्मं–अकं–सेट्।) पचमसरौ। दीर्घेऽयं एथक् पाठसामर्थ्यात् पूर्वस्य वंशभूतयीति दीर्घो न स्यात्। ड कुर्दते। इति दुर्गादासः॥

कुर्दनं, क्ली, (कुर्द+भावे ल्युट्।) क्रीडा। इत्यमरटीकायां स्वामी॥

कुर्परः, पुं, (कुर्द्+क्विप् कुः। मिपर्त्ति। ए+अच् परः। ततः कर्म्मधारयः।) कफोणिः। जानु। इति मेदिनीकरहेमचन्द्रौ॥ (कुर्परशब्दोल्लेख विवरणं द्राक्षेयम्॥)

कुर्पासः, पुं, (कुर्परे अस्यते क्षिप्यते वा। अस्, आस् वा+घञ् ततः एषोदरात् साधुः।) अर्द्धोरुकः। इति हारावली॥

कुर्पासकः, पुं, (कुर्पास+स्वार्थे कन्।) कञ्चुलिका। इत्यमरः॥ काँचुलि इति भाषा। (यथा रत्नावलीनाटके। "मनोज्ञकुर्पासकपीडितस्तना"॥)

कुर्व्वत्, त्रि, (करोति इति। कृ+शतृ।) कर्म्मकारः। भृत्यः। इति विश्वः॥

कुल न बन्धौ। संहतौ। इति कविकल्पद्रुमः॥ (भां–परं–अकं–इथित् सकं सेट्। ध्वनादिः।) न कोलः कुलः। कोलति कुलीनः सर्व्वेषां बन्धुः स्यादित्यर्थः। संहतौ राशीकरणमिति चतुर्भुजः। केचित्तु संहतिस्थाने संख्यानं पठित्वा कोलति कुलायः गणयति इत्यर्थः इलाऽऊः। संख्यानं पठित्वा संख्यानं उपचयः। इति रामः॥ अन्ये तु बन्धुषु ज्ञातिषु वर्त्तमानोऽयं अन्यत्रास्य न प्रयोगः। गढि गढे इतिवदित्याऽऽः। इति दुर्गादासः॥

कुलं, क्ली, (कुल्+"इगुपधेति"। ३।१।१३५। कः।) वंशः। (यथा, रघौ। १६। ८६।

"इत्यूचिवानुपहृतामरदुः क्षितीशं
स्थाप्यो भवान् खलु इतानुभावितारम्।
संयोजयां विधिवदास समेतबन्धुः
कन्यामयेन कुमुदः कुजभूधरेण"।

तस्य लक्षणं यथा, त्रिलोचनौ।

"आधारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्"॥

तन्त्रग्रन्थकारकं यथा।

"गोभिश्च दैवतैर्विप्रख्या राजोपसेवया।
कुलान्यकुलतां यान्ति यानि हीनानि वृत्ततः॥
कुविवाहः क्रियालोपैर्वेदानध्ययनेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै॥
अन्नतात् पारदार्य्याच्च तथाऽभक्षस्य भक्षणात्।
अमौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अमोचिये वै वेदानां दमेषु तपेव च।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्"।

इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः॥ सजातीयसमूहः। इत्यमरः। २।७।१। (कुं भूमिं लाति गृह्णाति। ला+कः।) जनपदः। यथा, (कौ भूमौ लीयते। अन्येभ्योपीति डः।) शरीरम्। इति मेदिनी। अग्रम्। इति भरतः। (मध्यम-हस्तदयेन यावती भूमिः क्रम्यते तावती भूमिः। यथा, मनुः। ७। १२१।

"दश्री कुलन्तु सन्नीत विंशी पञ्चकुलानि च"॥)

कुलः, पुं, (कुल्+कः।) कुलिकः। श्रिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकं, क्ली, (कौ भूमौ लीयते। कु+ली+डः। संज्ञायां कन्।) पटोलवता। सम्बद्धश्लोकसमूहः। इति मेदिनी। (यथा, साहित्यदर्पणे ६। २८७।

"कथायकं चतुर्भिश्च तदूर्द्धं कुलकं मतम्"।

पटोलार्थे यथा,—"करीरं कुलकं नन्दी" इति वाभटे सूत्रस्थाने। ६ अः। कुलकं पटोलभेदः। तित्पल्ला इति ख्यातम्॥ इति तट्टीका॥)

कुलकः, पुं, (कुल्+संज्ञायां कन्।) कावेन्दुः। इत्यमरः। २। ४। ३९। वल्मीकः। कुलशैलः। इति मेदिनी॥ मद्यवल्लकः। इति रत्नमाला। हरितसर्पः। इति राजनिर्घण्टः॥ कुमीलुः। इति भावप्रकाशः। श्रिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकर्कटी, स्त्री, (कुला कर्कटी इति नित्यकर्म्मधारयः।) चीनाकर्कटी। इति राजनिर्घण्टः॥

कुलकुण्डिनी, स्त्री, (कुले कुलवन्ते पृथिवीतत्त्वकुलकुण्डी, स्त्री, रूपे मूलाधारे कुण्डलाकृत्या सार्द्धत्रिवलयाकारेण स्वयम्भुलिङ्गं वेष्टयित्वा तिष्ठतीति। कुल+कुण्डिन्+ङीप्। कुण्ड+ङीष्। यद्वा कौ पृथिवीतत्त्वाधारे मूलाधारे इत्यर्थः लीयते इति। कु+ली+अन्येभ्योपीति डः। ततः कर्म्मधारयः।) मूलाधारपद्मस्थितस्वयम्भुलिङ्गवेष्टनविशेषः। यथा। पूर्णानन्दकृतषट्चक्रप्रकाशः।

"कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं
वाचः कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः।
श्वासोच्छ्वासविवर्त्तनेन जगतां जीवो यया धार्य्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावली"॥

कूजन्तीति। सा मूलाम्बुजगह्वर इत्यादि व्याख्यातम्। कीदृशी कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः कोमला कमनीयत्वविशिष्टा या काव्यबन्धरचना तस्याः भेदातिभेदक्रमैः भेदातिशयभेदक्रमैर्विशिष्टा वाचः मत्तालिमालास्फुटं मत्ता या अलिमाला भ्रमरसमूहस्तद्वदस्फुटं यथा स्यात् एवं मधुरं यथा स्यात् तथा कूजन्ती अव्यक्तमधुरध्वनिं कुर्व्वन्तीत्यर्थः। सा का इत्याकाङ्क्षायामाह यथा कुलकुण्डलिन्या श्वासोच्छ्वासविवर्त्तनेन श्वासोच्छ्वासयोः परिवर्त्तनेन गमनागमनेन जगतां संसारिणां जीवः प्राणो धार्य्यते। पुनः कीदृशी प्रोद्दामदीप्तावली प्रकृष्टोत्तुङ्गदीप्तिमेणीस्वरूपा। तथा च मूलाधारपद्मे सार्द्धत्रिवलयाकारवेष्टनविशिष्टा विद्युत्समूहरूपा कुलकुण्डलिनी तिष्ठतीत्यर्थः। इति तट्टीका॥ *॥ अन्यत् चक्रग्रन्थे मूलाधारग्रन्थे षट्चक्रग्रन्थे च द्रष्टव्यम्॥

कुलङ्गः, पुं, (कु+लङ्ग+भावे घञ्।) चरतालो। तत्पर्य्यायः। ताण्डवः २। इति हारावली॥

कुलच्छया, स्त्री, (कुलस्य मूलस्य विस्तृतवल्लीजालस्य वा छाया यस्याः।) मूलश्रिम्बी। इति शब्दचन्द्रिका॥

कुलत्थः

कुलजः, पुं, (कुले सत्कुले जायते। जन्+डः।) कुलीनः। सत्कुलोद्भवः। इति शब्दरत्नावली॥ (यथा, मनुः ८। १७९।

"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः"॥)

कुलञ्जः, पुं, (कुं पृथिवीं लञ्जयति। लञ्ज+घिञ्+अच् रस्य लः।) कुलञ्जनदेशः। इति राजनिर्घण्टः॥

कुलञ्जनः, पुं, (कु+लञ्ज+घिञ्+ल्युः। रस्य लः।) खनामख्यातदेशः। तत्पर्य्यायः। कुर्जनः २ गन्धमूलः ३ कुलञ्जः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। मुखदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

कुलटा, स्त्री, (कुलात् व्यभिचारार्थं कुलान्तरं अटतीति। कुल+अट्+अच्। पृषोदरादित्वात् साधुः।) व्यभिचारिणी। भट्टा। (यथाह, आर्य्यासप्तशती ३९३।

"परपतिनिर्हृयकुलटाग्रोषितभट्ट! नेर्मया न कोपेन।
दग्धमनलोपतप्ता रोदिमि तव लाघवं वीक्ष्य"॥)

तत्पर्य्यायः। पुंश्चली २ धर्षिणी ३ बन्धकी ४ असती ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८। इत्यमरः। २। ६। १०॥ धर्षणी ९ पांसुला १०। इति तट्टीका॥ दृष्टा ११ दुष्टा १२ धर्षिता १३। इति शब्दरत्नावली॥ कुला १४ निशाचरी १५ भयारुहा १६। इति जटाधरः॥ ०॥ परकीयान्यगंतनायिकाविशेषः। यथा,—

"ऋते वारिकलात् किरन्ति पुरवान् वर्षन्ति नाम्भोधराः
श्रेयाः ग्राहणमुद्दहन्ति न कलत्रन्यते पुरुषायत्तान्।
शैलोद्भवे तरवः फलानि सृजते नैवारमन्ते जनान् धातः! कातरमानसापि कुलटाहेतोस्त्वया किं कृतम्"॥ इति रसमञ्जरी॥ *॥ अस्या अन्नभोजनप्रायश्चित्तं प्रायश्चित्तशब्दे अभोज्यान्नभक्षणप्रकरणे द्रष्टव्यम्॥

कुलटी, स्त्री, (कुत्सितं रटते। रट भाषणे+अच् वर्णे ङीः। गौरादित्वात् ङीष् रस्य लः।) मनःशिला। इति रत्नमाला अमरटीका च॥ (अस्या गुणादयो मनःशिलाशब्दे वोढव्याः॥)

कुलतिथिः, स्त्री पुं, (कुला तिथिः।) चतुर्थ्यष्टमीदशमीचतुर्दश्यः। यथा, तन्त्रसारे।

"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।
विषमाऽकुलाः सर्व्वे श्रेयाश्च तिथयः कुलाः"।

कुलत्थः, पुं, (कुलं भूमिलग्नं सत् तिष्ठति। कुल+स्था+कः। एषोदरात् साधुः।) शस्यभेदः। कुलत्थकड़ाइ इति भाषा॥ (यथा, मार्कण्डेये। १५। ७।

"धान्यं यवांश्चिनान्मायान्कुलत्थान्सर्षपांस्तथा"॥)

तत्पर्य्यायः। कालस्कन्धः २ ताम्रस्कन्धः ३ कुलत्थिका ४। इति रत्नमाला। ताम्रस्कन्धः ५। इति चिकायद्वयभेदः। ताम्रबीजः ६ सितेतरः ७। इति राजनिर्घण्टः॥ अस्य गुणाः। कफवातगुल्मशुक्राश्मरीभेदश्वासकासप्रमेहनाशित्वम्। दीपनत्वम्। उष्णत्वम्। कटुत्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥ कषायत्वम्। रूक्षत्वम्। रक्तपित्तकारित्वम्। वह्निनाशित्वञ्च। अस्य यूषगुणाः। वायु-

शर्कराश्मरीनाशित्वम्। इति राजनिर्घण्टः॥ (अस्य अपरे पर्य्यायगुणा यथा,—

"कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ।
कुलत्थः कटुकः पाके कषायः पित्तरक्तजित्।
लघुर्विदाही वोर्य्योष्णः श्वासकासकफापहान्॥
हन्ति हिक्काश्मरीशुक्रदोषानाहान् सपीनसान्।
खेदसंग्राहको मेदोव्रणकृमिहरः परः"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ * ॥

"उष्णाः कुलत्थो रसतः कषायः
कटुर्विपाके कफमारुतघ्नः।
शुक्राश्मरीगुल्म-विषूदनश्च
संग्राहकः पीनसकासहारी॥
आनाहमेदोगुदकीलहिक्का
श्वासापहः शोणितपित्तजिच्च।
कफस्य हन्ता नयनामयघ्नो
विशेषतो वन्यकुलत्थ उक्तः"॥

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥ * ॥)

कुलत्था, स्त्री, (कुलत्थ + स्त्रियां टाप्।) वनकुलत्थः। तत्पर्य्यायः। इक्ष्वसादा २ अरण्यकुलत्थिका ३ कुलाली ४ सौवर्चलिका ५ चक्षुष्या ६ कुम्भकारिका ७ कुलत्थिका ८। इति राजनिर्घण्टः॥ कुल्माषः ९ कुलविल्वकः १०। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। अर्शःशूलनाशित्वम्। विबन्धाध्मानशमनत्वम्। चक्षुर्हितत्वम्। व्रणरोपणत्वञ्च। कुलत्थाक्षनम्। अस्य पर्य्यायः पूर्ब्ववत्तदधिकन्तु। कुम्भकारी १ प्रजापहा २। अस्य गुणाः। चक्षुर्हितत्वम्। कषायत्वम्। कटुत्वम्। हिमत्वम्। विषविस्फोटकशूलव्रणदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

कुलत्थिका, स्त्री, (कुलत्था स्वार्थे संज्ञायां वा कन् अत इत्वम्।) कुलत्थाकाराङ्गनप्रस्तरविशेषः। इत्यमरः।२।६।१०२। अस्य गुणपर्य्यायौ कुलत्थाशब्दे द्रष्टव्यौ। वनकुलत्थः। इति राजनिर्घण्टः॥

कुलधर्म्मः, पुं, (कुलस्य कुले वा आचरितो धर्म्मः।) स्वजातीयधर्म्मः। कुलाचारः। यथा,—

"उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन!।
नरके नियतं वासो भवतीत्यनुशुश्रुम"॥

इति श्रीमद्भगवद्गीतायाम्। १। ४३॥

कुलधारकः, पुं, (कुलं धारयति रक्षति यः। कुल + धृ + णिच् + ण्वुल्।) पुत्रः। इति त्रिकाण्डशेषः॥

कुलनायिका, स्त्री, (कुले कुलाचारयजनकाले पूज्या या नायिका।) पञ्च-मकारयजने पूज्या स्त्री। यथा,—

"रक्तमाल्येन रम्येतो रक्तपुष्पविभूषितः।
पशीकरणसङ्केतैः पूजयेत् कुलनायिकाम्"॥

सा नवविधा यथा,—

"नटी कापालिनी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः"॥

इति तन्त्रसारः॥

कुलनक्षत्रं, क्ली, (तन्त्रसारोक्तपारिभाषिकनक्षत्रं कुलं तत्र तत्सम्बन्धि वा नक्षत्रम्।) भरण्यादित्रितयो-पुष्यमघोत्तरफल्गुनीचित्राविशाखाज्येष्ठापूर्ब्बाषाढाश्रवणोत्तरभाद्रपदः। यथा,—

"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्।
कुलानि समधिष्ठानि ग्रहेषानि चाकुलानि च"॥

इति तन्त्रसारः॥

कुलनाशः, पुं, (कुलं मूलिलग्नं न अश्नाति। न + अश् + अच्। सप्तम्युपेति समासः। उद्गस्य हि उन्नतकन्धरत्वात् मूलिलग्नस्याभक्षकतया तथात्वम्।) उद्गः। इति हेमचन्द्रः॥ (कुलस्य नाशः ध्वंसः।) कुलध्वंसः॥

कुलपतिः, पुं, (कुलस्य वंशस्य गोत्रस्य वा पतिः स्वामी।) कुलस्वामी। गोत्रप्रधानः। कुलनाथः। यथा। "अथ सिन्धुसौवीरपतेरङ्गस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिविकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः"। इति श्रीभागवते ५।१०।१॥ (कुलस्य छात्रवर्गस्य पतिः पालकः। अन्नदानपोषणपूर्ब्बकं अध्यापको मुनिविशेषः। उक्तञ्च।

"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः"॥)

कुलपत्रः, पुं, (कुलं भूलग्नं पत्रं पर्णमस्य।) दमनकवृक्षः। इति राजनिर्घण्टः॥

कुलपालकं, क्ली, (कुलं समूहं पालयतीति। पालि + ण्वुल्। वञ्चपलोत्पत्तेस्तत्वात्।) कुलम्बम्। कुलजानेषु इति भाषा। इति शब्दचन्द्रिका॥ (कुलं वंशं पालयति। पाल + णिच् + ण्वुल्।) वंशप्रतिपालके, त्रि॥

कुलपालिः, स्त्री, (कुलं पालयति या। पालि + इन्।) कुलवती। इति शब्दमाला॥

कुलपालिका, स्त्री, (कुलं पालयति। पालि + ण्वुल् टाप् इत्वम्। यद्वा कुलपालि + स्वार्थे कन् टाप्।) कुलस्त्री। इत्यमरः।२।६।७॥

कुलभट्या, स्त्री, (कुलैः वंशभवैः भट्या भरणम्। कुल + भृ + भावे क्यप्।) गर्भिणीपर्य्युपासना। इति जटाधरः॥ (कुलस्य भट्या। वंशभरणम्॥)

कुलभरः, पु, (कुलं सह भरति हन्ति सन्धिकर्त्तनादिना इति। कुल + भञ्ज + अच्। निपातनात् मुम् लस्य रः।) कुलभञ्जनः। चौरः। इति हारावली॥

कुलवर्ण्या, स्त्री, (कुलेषु भिषक्कुलेषु वर्ण्या वर्णनं गुणकथनं यस्याः।) रक्तचिटत्। इति राजनिर्घण्टः॥

कुलवारः, पुं, (कुलसदाख्यया प्रसिद्धो वारः।) मङ्गलशुक्रवारौ। यथा।

"रविचन्द्रो गुरुः सौरिस्तवारश्चाकुला इमे।
भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः"॥

इति तन्त्रसारः॥

कुलविप्रः, पुं, (कुलपरम्परागतः कुलचिताय नियुक्तो वा विप्रः।) कुलपुरोहितः। इत्यमरटीकायां स्वामी॥

कुलश्रेष्ठी, [न्] त्रि, (कुलेषु ग्रन्थिककुलेषु श्रेष्ठी।) ग्रन्थिककुलप्रधानः। तत्पर्य्यायः। कुलिकः २। इत्यमरः।२।९।५॥ कुलकः ३ कुलः ४ श्रेष्ठी ५।

इति तट्टीकायां भरतः॥

कुलसम्भवः, पुं, (कुले कस्यचित् वंशे सम्भवः उत्पत्तिरस्य।) यस्य कस्यचित् कुले जातः। तत्पर्य्यायः। वीज्यः २। इत्यमरः।२।७।२॥

कुलसौरभं, क्ली, (कुलं श्रेष्ठं सौरभं यस्य।) मरुवकवृक्षः। इति शब्दमाला॥

कुलस्त्री, स्त्री, (कुले कुलस्थिता स्त्री।) कुलपालिका। अनन्यगामिनी कुलस्थिका स्त्री। इत्यमरः।२।६।७॥ (तथा च चाणक्ये।

"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः"॥

कुले कुलचक्रे मूलाधारे विराजते या स्त्री। कुलकुण्डलिनीशक्तिः। यथा, कुलार्णवे।

"कुलस्त्रीज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः"॥)

कुलहृदयकः, पुं, (कुलाय संघाय ऊहते। ऊहि संघे + ण्वुल्। एषोदरात् उकारलोपः।) आरग्वधः। आवर्त्तकः। इति हारावली॥

कुलाकुलतिथिः, पुं स्त्री, (तन्त्रोक्तकुलाकुलनाम्ना प्रसिद्धा तिथिः।) द्वितीयाषष्ठीदशम्यः। यथा।

"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्"॥

इति तन्त्रसारः॥

कुलाकुलनक्षत्रं, क्ली, (तन्त्रोक्तकुलाकुलसंज्ञकं नक्षत्रम्।) आर्द्रामूलाभिजिच्छतभिषानक्षत्राणि। यथा, तन्त्रसारे॥

"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्"॥

कुलाकुलवारः, पुं, (तन्त्रोक्तकुलाकुलनामा वारः।) बुधवारः। यथा, तन्त्रसारे॥

"भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः"॥

कुलाचलः, पुं (कुलसंज्ञकः अचलः पर्व्वतः। प्राकपार्थिवादिवत् मध्यपदलोपः।) कुलपर्व्वतः। यथा।

"अष्टकुलाचलसप्तसमुद्रा
ब्रह्मपुरन्दरदिनकररुद्राः।
न त्वं नाहं नायं लोक-
स्तदपि किमर्थं क्रियते शोकः"॥

इति मोहमुद्गरे ७॥ सप्तकुलपर्व्वता यथा।

"सप्त येऽस्मिन् महापर्व्वाः विश्रुताः कुलपर्व्वताः।
माहेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षवानपि॥
विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्व्वताः"॥

इति मात्स्ये ६५ अध्यायः॥

कुलाचार्य्यः, पुं, (कुलस्य वंशस्य आख्यायां वर्णनादौ गुणकीर्त्तनविषये वा आचार्य्यः।) कुलज्ञः। कुलीनादीनां वंशांशव्याख्याकर्त्तृब्राह्मणः। अस्य विवरणं घटकशब्दे द्रष्टव्यम्॥

कुलाटः, पुं, (कुलेन संघेन घटतीति। घट् + अच्।) क्षुद्रमत्स्यभेदः। इति शब्दमाला॥

कुलाद्रिः, पुं, (कुलनाम्ना ख्यातोऽद्रिश्चलः।) कुलाचलः। इति सिद्धान्तशिरोमणिः॥

कुलाधारकः, पुं, (कुलस्य वंशस्य आधारकः प्रतिष्ठापकः।) पुत्रः। इति शब्दरत्नावली॥

कुलायं, क्ली, (कौ पृथिव्यां लायो लयो यस्य।) शरीरम्। इति पुराणम्॥

कुलायः, पुं, (कुलानां पक्षिसमूहानां लयः वास

स्थानम् ।) नीड़ः । (यथा, माघे ।
"खगकुलायकुथायनिजायिताम्" ॥)
स्थानमात्रम् । इति मेदिनी ॥

कुलायस्थः, पुं, (कुलाये नीड़े तिष्ठति । स्था + कः ।) पक्षी । इति शब्दचन्द्रिका ॥

कुलायिका, स्त्री, (कुलायः पक्षिवासस्थानं विद्यते ऽस्याम् । ठन् ।) पक्षिशाला । इति त्रिकाण्डशेषः ॥

कुलालः, पुं, (कुलं घटादिनिर्म्माणोपयोगिम्रदादुपादानं आलाति सम्यगादत्ते । आ + ला + कः । कुलं वंशं घटादिसमूहं वा अलति पर्य्याप्नोति वा अल् + कर्म्मण्यण् । कुल् + "तमिविशि विड़ौति" उणां १ । ११७ । इति कालन् वा ।) कुम्भकारः । इत्यमरः । २ । १० । ६ ॥ तस्योत्पत्तिर्यथा ।
"माणाकारात् कर्म्मकार्य्यां कुम्भकारो व्यजायत" ॥
इति पराशरसंहिता ॥
"पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह" ॥
इति पराशरपद्धतिः ॥ ब्रह्मवैवर्त्तोक्ता च कुम्भकारशब्दे द्रष्टव्या ॥ कुलभयष्टी । इति मेदिनी ॥

कुलाली, स्त्री, (कुलं पर्व्वतकुलं कलायकुलं वा अलति परिवर्द्धयति । अल् + अण् । ङीप् ।) कुलत्थाकाराञ्जनप्रसरविशेषः । कुलत्थाञ्जनमिति ख्याता । इत्यमरः । २ । ६ । १०२ ॥ अरण्यकुलत्थिका वनकुलत्थकड़ाइ इति भाषा । इति राजनिर्घण्टः ॥ (कुलाल + स्त्रियां ङीष् ।) कुलालभार्य्या ॥

कुलाहः, पुं, (कुलं पालककुलं खलकुलं वा आहन्ति । आ + हन् + डः ।) ईषत्पीतवर्णः क्षुद्रजानुर्घोटकः । इति हेमचन्द्रः ॥

कुलाहकः पुं, (कुलाह + संज्ञायां कन् ।) क्षुद्रजानुः । इति शब्दमाला ॥ वृक्षविशेषः । राङ्गा कुले खाड़ा इति भाषा । अस्य गुणः । आमवात-वातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥

कुलाहलः, पुं, (कुलं आहलति स्पृशति स्पर्द्धते वा । आ + हल विलेखने + अच् ।) क्षुद्रवृक्षविशेषः । कोकसीमा इति भाषा । तत्पर्य्यायः । अलम्बुषः २ गोच्छाणः ३ भूकदम्बः ४ । इति रत्नमाला ॥

कुलिः, पुं, (कुल् + इन् किच्च ।) हस्तः । इति त्रिकाण्डशेषः ॥

कुलिः, स्त्री, (कुल् इन् किच्च ।) कण्टकारी । इति शब्दरत्नावली ॥

कुलिकः, त्रि, (कुलं अधीनतया प्रशस्ततया वा अस्त्यस्य । इति ठन् ।) शिल्पिकुलप्रधानः । इत्यमरः । २ । १० । ५ ॥ कुलसत्तमः इति मेदिनी ॥

कुलिकः, पुं, अष्टमहानागान्तर्गतनागविशेषः । (यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पातालेनागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ॥
अस्य रूपमप्युक्तं हेमाद्रौ यथा ।
"कुलिकोऽर्द्धचन्द्रमौलिर्व्वालाधूमसमप्रभः" ॥)
वृक्षविशेषः । इति मेदिनी । केकेकड़ा इति भाषा ॥

कुलिकवेला, स्त्री, रव्यादिवारेषु शुभकर्म्मसु निषिद्धकालविशेषः । यथा । रवौ सप्तमयामार्द्धम् सोमे षष्ठयामार्द्धम् । मङ्गले पञ्चमयामार्द्धम् । बुधे चतुर्थयामार्द्धम् । गुरौ तृतीययामार्द्धम् शुक्रे द्वितीययामार्द्धम् । शनौ प्रथमयामार्द्धम् । राघवभट्टमते तु पूर्व्वोक्तयामार्द्धानां दिवाशेषभागः । रात्रौ प्रथमभागः । इति ज्योतिषतत्त्वम् ॥

कुलिङ्कः, पुं, (कौ पृथिव्यां लिङ्कति गच्छतीति । कु + लिगि + अच् + इदित्वात् नुम् । यद्वा कुत्सितं लिङ्गवर्णं लिङ्कं वर्णं यस्य ।) पक्षिविशेषः । पिङ्का इति भाषा । तत्पर्य्यायः । कलिङ्कः २ धुम्राटः ३ पिङ्गकः ४ । इति शब्दमाला ॥ भृङ्गः ५ । इत्यमरः ॥ अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुलिङ्ककः, पुं, (कुलिङ्क + अल्पार्थे कन् ।) चटकपक्षी । इति हेमचन्द्रः ॥

कुलिङ्काक्षी, स्त्री, (कुलिङ्कस्य अक्षिवत् फलं यस्य ।) पेटिकावृक्षः । इति रत्नमाला । पेटारी इति भाषा ॥

कुलिङ्गी, स्त्री, (कुलिङ्ग + स्त्रियां गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलिरः, पुं, (कुल् + बाहुलकात् इरन् किच्च ।) कर्कटः । इति शब्दरत्नावली ॥

कुलिशं, क्ली, पुं, (कुलौ हस्ते शेते अवतिष्ठते । कुल + शी + डः । यद्वा कुलिनः पर्व्वतान् श्यति दारयतीति । शो + डः । "आतोनुपसर्गे कः" । ३ । २ । ३ । इति को वा ।) वज्रम् । इत्यमरभरतौ ॥
(यथा, कुमारे । १ । २० ।
"क्रूरेऽपि पक्षच्छिदि दृष्टमुग्रा-
ववेदनाशं कुलिशक्षतानाम्" ॥
कु ईषत् कुत्सितं वा लिशति । कु + लिश अल्पीभावे गतौ च + कः ।) मत्स्यविशेषः । तत्पर्य्यायः । कण्टकाकीर्णः २ । इति त्रिकाण्डशेषः ॥
(यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"तिमिमिङ्गिलकुलिशापाकमत्स्यनिराकलकनन्दिवारलकमकरगरकचन्द्रकमहामीनराजीवप्रभृतयः सासृग्राः" ॥ कौ भूमौ लिशति अल्पीभवति कुंभूमिं लिशति गच्छति क्षतया प्राप्नोति वा ।) अस्थिसंहारवृक्षः । इति रत्नमाला ॥

कुलिशनायकः, पुं, (कुलिशवत् नायको यस्मिन् ।) शृङ्गारबन्धविशेषः । तस्य लक्षणम् ।
"स्त्रीपादद्वयमाक्षिप्य विमुञ्चेत्तिलकृकः ।
योनिञ्च पीड़येत् कामी बन्धः कुलिशनायकः" ॥
इति रतिमञ्जरी ॥

कुलिशाङ्गुला, स्त्री, (कुलिशेनाङ्गुलेन चैव निर्म्मीयते मनो यया । यद्वा कुलिशवत् दृढमङ्गुलं यस्याः ।) बौद्धानां विद्यादेवीतिभेदः । इति हेमचन्द्रः ॥

कुलिशासनः, पुं, (कुलिशं वज्रं तद्वत् दृढमासनमस्य ।) शाक्यमुनिः । इति त्रिकाण्डशेषः ॥

कुली, स्त्री, (कुलि + ऋदिकारान्तत्वात् वा ङीष् ।) कण्टकारी । इत्यमरः । २ । ४ । ६४ ॥ पत्नीज्येष्ठभगिनी । इति हेमचन्द्रः ॥ वहती । इति राजनिर्घण्टः ॥

कुलीनः, पुं, (कुले प्रशस्तवंशे जातः । "कुलात् खः" । ४ । १ । १३६ । इति खः ।) श्रेष्ठघोटकः । तत्पर्य्यायः । आजानेयः २ । इत्यमरः ॥ आजानेयः ३ । इति तट्टीका ॥ खजानेयः ४ जात्यः ५ वाजाश्विः ६ । इति शब्दरत्नावली ॥ (तन्त्रशास्त्रोक्तकुलाचारव्रते स्थितः शौवः ॥) उत्तमकुलोद्भवे, त्रि । तत्पर्य्यायः । महाकुलः २ आर्य्यः ३ सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ । ७ । ३ ॥ * ॥ अथाधुनिककुलीनलक्षणम् । कुलं उत्कर्षविशेषवंशः । इति सङ्केतम् । अथवा रूढ्यर्थम् तस्यापत्यमित्यर्थे कुलशब्दादीनप्रत्ययेन कुलीन इति पदसिद्धिरिति केचित् । अर्थात् कुलीनशब्देन उत्कर्षविशेषवंशजातकत्वव्यक्तिरिति । तथा च लक्षणम् । उत्कर्षविशेषधर्म्मावच्छिन्नवंशजातकत्वे सति तद्धर्म्मवत्त्वं कुलीनत्वमिति । उत्कर्षविशेषस्तु नवधा गुणाः । ते च यथा ।
"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठाऽऽवृत्तिस्तपो दानं नवधा कुललक्षणम्" ॥
अत एव उत्कर्षविशेषात्मकनवधागुणविशिष्टत्वं कुलीनत्वम् । एतेन इदानीं साधारणसामान्यजनानां यदि नवधा गुणा वर्त्तन्ते तदा तेऽपि कुलीनाः स्युस्तत्र । अनवच्छिन्नपर्य्यायत्वं कुलीनत्वम् । प्रमाणं यथा,—
"सपर्य्यायं समासाद्य दानग्रहणमुत्तमम् ।
कन्याऽभावे कुलस्त्यागः प्रतिष्ठा वा परस्परम्" ॥
तथा च ।
"कुलीनस्य सुतां लब्ध्वा कुलीनाय सुतां ददौ ।
पर्य्यायक्रमतश्चैव स एव कुलदीपकः" ॥
तथा च ।
"आदानञ्च प्रदानञ्च कुलस्यागस्तथैव च ।
प्रतिग्राहटकाग्रे च कुलकर्म्म चतुर्व्विधम्" ॥
इति कुलदीपिका ॥ * ॥ अथ वल्लालभूपालकृतः पञ्चगोत्रनराढ़ीयब्राह्मणस्य ग्रामविशिष्टस्य मुख्यगौणभेदेन द्वाविंशतिकुलीनाः यथा । शाण्डिल्यगोत्रे भट्टनारायणवंशज आदिवराहवन्द्यः स मुख्यः । रामगड़गड़ः निपकेश्वरकोली गुँयी कुलभी वटु दिर्घाटिः वैकुण्ठपारियाणः एते पञ्च गौणाः ॥ काश्यपगोत्रे दत्तवंशजः सुजोवनघट्टः स मुख्यः । जगद्दडः धीरगुड़ः काकपीतमखी एते त्रयो गौणाः ॥ भरद्वाजगोत्रे श्रीहर्षवंशजः धुरन्धर मुखयटी स च मुख्यः । विनायकदिखीसाँयी गन्धर्व्वरायी एतौ द्वौ गौणौ ॥ सावर्णगोत्रे वेदगर्भवंशजः वीरव्रतगाङ्गुली सुधीरकुन्दः एतौ द्वौ मुख्यौ । वीरसूदनघण्टेश्वरः एव गौणः ॥ वात्स्यगोत्रे छान्दड़वंशजः सुरभिघोषवाणः कविकाञ्जिलालः रविपूतितण्डः एते मुख्याः । भानुघोटखण्डो पनिकालुमहिन्त्या वनमालिपिप्पली एते गौणाः ॥ अधुना एषां मध्ये मुख्या अष्टौ कुलीना गौणाश्चतुर्द्दशश्रोत्रियाः । अन्येऽपि पञ्चगोत्राज्ञाताः सप्तत्रिंशच्छ्रोत्रियाः सन्ति । ततो लक्ष्मणसेनेन मुख्याष्टकुलीनो न विंशतिपुत्राणां समीकरणं कृतम् । तत एतेषां नागादोषदर्शनात् देवीवरेण

पुलिया खड़दहवल्लवीसर्व्वानन्दी इत्याद्याः षट्-त्रिंशन्मेलाः स्मृताः। ततो भागयूथयाक इति तिस्रः संज्ञा जाताः कुलाचार्य्यग्रन्थात् ज्ञेयाः ॥*॥

अथ वारेन्द्रब्राह्मणकुलीनाः।

"आदौ मैत्रस्ततो भीमो यज्ञः संग्रामनिस्तथा।
लाहिड़िर्भादुड़िः साधुर्भादड़ाः पञ्चिपूरकाः"॥

एवां नानादोषदर्शनात् कुलाचार्य्येण अष्टौ घटी इति संज्ञा कृता। तद्यथा। निराविला १ रोहिला २ भूष्या ३ आलेखाली ४ कुलखानी ५ वेखी ६ जोनाली ७ भवानीपुर ८। एतेषां कुलाघातात् काप इति संज्ञा जाता ॥*॥

अथ वैद्यस्यादिकुलीनाः।

धन्वन्तरिगोत्रे विनायकसेनः। मौद्गल्यगोत्रे वस्त्यदासः। काश्यपे कायगुप्तः। वल्लालेनैषां कुलं महामध्यमकनिष्ठकुलभेदेन त्रिधा कृतम्। तत्र महाकुलीनाः पञ्च। यथा। छत्रसेनखानः १ हरिहरसेनखानः २ षष्ठीवरदासः ३ गजपतिदासः ४ दुर्जयदासः ५। अधुनैषां कुलस्य ह्रासवृद्धिभङ्गा न सन्ति ॥*॥

अथ दक्षिणराढ़ीयकायस्थकुलीनाः।

तत्रादिशूरराजेन कान्यकुब्जदेशादानीतैर्ब्राह्मणपञ्चकैः सह घोषवसुमित्रदत्तगुहाः पञ्चागता आदिकुलीनाः यथा। सौकालीनगोत्रे मकरन्दघोषः १। गौतमे दशरथवसुः २। विश्वामित्रे कालिदासमित्रः ३। काश्यपगोत्रे दशरथगुहः खड्गप्रहारादवमानितो वङ्गे गतः ४। भरद्वाजगोत्रे पुरुषोत्तमदत्तः विनयहीनतो निष्कुलः ५। वङ्गजकुलाचार्य्यग्रन्थे स एव मौद्गल्यगोत्रः ॥*॥

अथ वल्लालसेनकृतसमाजादयः।

तत्राद्यस्य षष्ठपुरुषयोर्निग्रहपतिप्रभाकरघोषयोर्वासस्थाने क्रमेण वाणीधाकनाख्यौ ग्रामौ। द्वितीयस्य पञ्चमपुरुषयोः शुक्लिगङ्गिवसुर्वासस्थाने क्रमेण वागाछिभाछिनगराख्यौ ग्रामौ। तृतीय. स्याष्टमपुरुषयोः धूँड़ गुँड़ मित्रयोर्वासस्थाने क्रमेण वड़िशाटेकानामग्रामौ। अपरेऽप्यादशसमाजास्तत्स्थानां कुलाभावात् न लिखिताः ॥०॥ तेषां कुलन्तु नवविधम्। मुख्य१। कनिष्ठ २ छभाया ३ मध्यांश ४ तेओज ५ एतानि प्रधानानि। कनिष्ठद्वितीयपुत्र ६ छभायाद्वितीयपुत्र ७ मध्यांशद्वितीयपुत्र ८ तेओजद्वितीयपुत्र इति च ९। नवरङ्गानुरोधात् छभायाज्येष्ठपुत्रस्य मध्यश्रेष्ठ इति संज्ञा जाता ॥*॥

अथ कुलानां विवरणम्।

मुख्यकुलीनस्य प्रथमपुत्रः पितृतुल्यः द्वितीयः कनिष्ठनामकुलविशिष्टः तृतीयो मध्यांशनामकुलयुक्तः चतुर्थः तेओजनामकुलान्वितः पञ्चमादिद्यावत्पुत्राः मध्यांशद्वितीयपुत्रनामकुलयुक्ता भवन्ति। कनिष्ठकुलीनस्य ज्येष्ठपुत्रः छभायानामकुलयुक्तः तस्य ज्येष्ठपुत्रः मध्यश्रेष्ठनामकुलयुक्तः तस्य ज्येष्ठपुत्रः मध्यांशनामकुलविशिष्टः स एव अपरमध्यांशवारभायामध्यांश इति संज्ञाद्वययुक्तः ॥*॥ एवां कर्म्मणा इदंर्यथा। मुख्यकुलीनस्य द्वितीयतृतीययोः कुलस्य वाड़िमुख्य इति संज्ञा चतुर्थपञ्चममष्ठपुत्राणां कुलस्य वाड़िकनिष्ठ इति संज्ञा सप्तमाष्टमनवमपुत्राणां कुलस्य वाड़िमध्यांश इति संज्ञा दशमैकादशद्वादशपुत्राणां कुलस्य वाड़ितेओज इति संज्ञा भवति॥ कनिष्ठनामकुलीनस्य द्वितीयपुत्रस्य कुलस्य तेओज इति संज्ञा भवति। मुख्यकुलीनस्य तृतीयपुत्रस्य द्वितीयपुत्रस्य कुलस्य तेओज इति संज्ञा। मध्यांशद्वितीयपुत्र इति संज्ञं कुलं मुख्यकनिष्ठछभायामध्यश्रेष्ठमध्यांश इति कुलपञ्चकात् भवति ॥*॥ मुख्यकुलन्तु त्रिविधं यथा। प्रकृतम् १ सहजम् २ कोमलम् ३। आदौ षट्समाजे षट् प्रकृतामुख्या अभूवन्। ततस्तेषां द्वितीयतृतीयपुत्रयोः कुलस्य संज्ञा क्रमेण सहजकोमल इति संज्ञा जाता। प्रकृतमुख्यकुले दानग्रहणाभ्यां सहज इति संज्ञा कोमलमुख्यकुले दानग्रहणाभ्यां कोमल इति संज्ञा भवति। सहजः सहजेन कोमलः कोमलेनापि कुलं कृत्वा तत्तद्भावापन्नौ भवतः। पितृकुलानुसारेण ज्येष्ठपुत्राणां कुलस्य जन्ममुख्यजन्मकनिष्ठादिसंज्ञा ॥*॥ प्रकृतमुख्यकुलस्य ह्रासवृद्धी न भवतः। सहजमुख्यकुलस्य ह्रासवृद्धी भवतः। कोमलमुख्यकुलस्यापि ह्रासवृद्धी न भवतः। कनिष्ठकुलस्य मुख्यत्वं छभायाकुलस्य कनिष्ठत्वं भवति। मध्यांशकुलस्य स्थिरतरत्वम्। कनिष्ठद्वितीयपुत्रः वाड़िते ओज इति संज्ञां प्राप्नोति। मुख्यतृतीयपुत्रस्य द्वितीयपुत्रः तेओज इति संज्ञामपि प्राप्तुमर्हति। छभायाद्वितीयपुत्रमध्यांशद्वितीयपुत्रयोः कुले ह्रासवृद्धी न स्तः। सर्व्वे कुलीनाः कुलनाशात् वंशजभावायन्ना भवन्ति ॥*॥ आदौ यदि पितृपर्य्यायाय अथवा मौलिकाय कन्यां दद्यात् तदानं ग्रामाणिकसंज्ञं भवति। पश्चात् कुलकर्म्मकर्त्तव्यम्। तद्यथा। मुख्यस्य कन्यायाः प्रदाने तस्याः ज्येष्ठ संज्ञा षष्ठकन्यावधि गरज्येष्ठ इति संज्ञा भवति। अन्यकुलानां ज्येष्ठकन्यायाः प्रदाने तस्या आकृतिरिति संज्ञा तदनन्तरं यावत्कन्यानां प्रदाने तासां क्रमेण प्रतिसारणी जघन्या इति संज्ञाद्वयं भवति॥ आत्मसमकुलीनाय आकृतिनामकन्यादाने कुलस्य श्रेष्ठत्वम्। अनुजकन्याग्रहणे तु कुलह्रासो भवति। मुख्यस्य गरज्येष्ठ इति नाम्नीं कन्यां अन्यकुलीनस्य प्रतिसारणीञ्च कन्यां मौलिको वंशजश्च ग्रहीतुमर्हति। उत्तममध्यमाधमकर्म्मभिः शौर्य्यसमावेशनिन्दा इति त्रयं कुलस्यांशकर्म्म ॥*॥ पूर्व्वं विपर्य्याये विवाहो जातः। पुरन्दरवसूनेषां त्रयोदशपर्य्यायावधिश्रेणीपर्य्यायबन्धमकृतकुलोद्धरणे कृते। यथा।

"विपर्य्याये कुलं नास्ति न कुलं रणपिण्डयोः"॥*॥

अथ मुख्येतरकुलीनानां पाञ्जिदोषाः।

"देवी गङ्गा तथा गौरी भैरवी भास्करी तथा।
वशायी चण्डिदासी च सप्तैते कुलकण्टकाः"।

अपि च।

"श्रीनाथो श्रीकरी विष्णुदासी हृदय एव च।
कन्दर्पो च सदानन्दी षड़ेते कुलकण्टकाः"॥

इति कुलाचार्य्यकारिका ॥*॥

अथ मुख्यकुलीनस्य कार्य्यम्। स च आगच्छेद् अर्थादग्रिमां कन्यां आत्मतुल्याय द्वितीयां कनिष्ठकुलीनाय तृतीयां छभायानामकुलयुक्ताय चतुर्थीं मध्यश्रेष्ठनामकुलविशिष्टाय अथवा मुख्यतृतीयपुत्रमध्यांशकुलीनाय पञ्चमीं तेओजनामकुलयुक्ताय दद्यात्। तदनन्तरजातानां गरज्येष्ठ इति संज्ञा ताः मौलिकमध्यांशद्वितीयपुत्रमुख्यकुलीनेभ्यो दातुमर्हति। स एवादौ मुख्यकुलीनस्याग्रिमां कन्यां ततः कनिष्ठकुलीनस्य कन्यां ततो मध्यांश इति नामकुलयुक्तस्य कन्यां ततो जन्मतेओज इतिनामकुलविशिष्टस्य कन्यां गृह्णीयात् ॥*॥ अथ कनिष्ठकुलीनस्य कार्य्यम्। स प्रथमां कन्यां आत्मतुल्यकुलीनाय द्वितीयां तेओज इति नामकुलयुक्ताय दद्यात्। मुख्यतृतीयपुत्राय मध्यांशनामकुलयुक्ताय अथवा मुख्यद्वितीयपुत्राय कन्यां दातुमर्हति। मुख्यकुलीनस्य द्वितीयां कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात्। ततो मुख्यकुलीनस्य तृतीयपुत्रस्य मध्यांशनामकुलयुक्तस्य कन्यां गृह्णीयात् ॥*॥ अथ छभाया कुलीनस्य कार्य्यम्। स मध्यांशनामकुलविशिष्टाय प्रथमां कन्यां मध्यांश इतिकुलयुक्तायाय अर्थात् वाड़िते ओजनामकुलविशिष्टाय द्वितीयां दद्यात्। मुख्यकुलीनस्य तृतीयकन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥*॥ अथ मुख्यतृतीयपुत्रस्य मध्यांशनामकुलीनस्य कार्य्यम्। स प्रथमकन्यां जन्मतेओजनामकुलविशिष्टाय द्वितीयां मध्यांशकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्। कनिष्ठस्य प्रथमां कन्यां ततस्तेओजकुलयुक्तस्य प्रथमां कन्यां ततस्तेओजानुजकुलीनस्य प्रथमां कन्यां गृह्णीयात् मुख्यस्य तृतीयकन्याग्रहणं तस्य महत् कर्म्म ॥*॥ अथ जन्मतेओजनामकुलीनस्य कार्य्यम्। स प्रथमां कन्यां मुख्यकुलीनस्य चतुर्थपुत्राय अथवा मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्राय द्वितीयां तेओजनामकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्। मुख्यकुलीनस्य पञ्चमकन्यां अथवा मध्यांशनामकुलीनस्य प्रथमकन्यां गृह्णीयात् ॥*॥ अथ कनिष्ठकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेओजनामकुलविशिष्टद्वितीयपुत्राय प्रथमां कन्यां दद्यात्। मुख्यचतुर्थपुत्रजन्मतेओजनामकुलयुक्तस्य प्रथमां अथवा कनिष्ठनामकुलीनस्य द्वितीयां कन्यां गृह्णीयात् ॥*॥ अथ छभायानामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेओजनामकुलविशिष्टद्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेओजनामकुलविशिष्टस्य प्रथमां कन्यां अथवा छभायानामकुलयुक्तस्य द्वितीयां गृह्णीयात् ॥*॥ अथ मध्यांशनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेओजनामकुलविशिष्टस्य द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेओज-

नामकुलविशिष्टस्य प्रथमां अथवा अन्यकुलीनानां मध्यांग्रनामकुलविशिष्टस्य वा द्वितीयां कन्यां गृह्णीयात् ॥ * ॥ अथ तेओजनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम् । स आत्मतुल्याय अथवा वंशजाय प्रथमां कन्यां दद्यात् । मध्यांग्रनामकुलविशिष्टस्य द्वितीयपुत्रस्य प्रथमां कन्यां अथवा तेओजनामकुलविशिष्टस्य द्वितीयां गृह्णीयात् ॥*॥ अथ मध्यश्रेष्ठनामकुलीनस्य कार्य्यम् । स मध्यश्रेष्ठपुत्रवारभायामध्यांग्रनामकुलीनाय प्रथमां मध्यांग्रकुलविशिष्टस्य द्वितीयपुत्राय तेओजनामकुलीनाय द्वितीयां कन्यां दद्यात् । मुख्यकुलीनस्य चतुर्थीं कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् । ततः तेओजनामकुलविशिष्टस्य प्रथमां कन्यां गृह्णीयात् । ततः तेओजानुजकुलीनस्य अग्रिमां कन्यां गृह्णीयात् ॥ * ॥ अथ मध्यश्रेष्ठपुत्रवारभायामध्यांग्रनामकुलीनस्य कार्य्यम् । स तेओजनामकुलयुक्ताय प्रथमां कन्यां दद्यात् । कनिष्ठकुलविशिष्टस्य अथवा कुभायानामकुलयुक्तस्य किंवा मध्यश्रेष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥ * ॥ अथ चतुस्त्रिंशदधिकसप्तदशशतशकाब्दे मत्पित्रा तावत्कुलीनकुलाचार्य्यमतेन मुख्यकुलीनस्य द्वितीयतृतीययोः कन्ययोः क्रमेण ग्रहणेन तदलाभे शौर्य्यकुले दानेन समानकुले ग्रहणेन च कनिष्ठकुभायानामकुलयोः पुरुषानुक्रमेण स्थिरतरत्वं निर्णीतम् । तदयथा,—

"कनिष्ठकुलवेश्मनि क्वचन केऽपि केऽपीच्छया
परेऽपि पुरुषत्रयादगमनेव दोच्छेयिकाम् ।
निषेधमिह नेच्छते कमपि तत्र षड्भाट्टजः
सुतः पिट्टपदं कथं जननतो हि न प्राप्स्यति ॥
शाके पक्षपदत्रिसप्तवसुधागण्ये वरेण्ये तथा
पर्य्याये परिपूरिते हि विषमे धन्ये त्रयोविंशके ।
गोपीमोहनदेववंशतिलकेनापूर्व्वकं श्रीमता
निर्णीतं यदपीह तच्च घटकैः सर्व्वैः कुलीनैर्मतम् ॥
कनिष्ठषड्भाट्टकुलस्य तद्वत्
खच्छेयिकायामिदमेव मूलम् ।
आदानतः पित्र्यपदस्य लाभो
ज्येष्ठत्वभावः पुरुषक्रमेण ॥
छेयिकायामग्रहस्य दानञ्चेत् प्रबलं भवेत् ।
पर्य्यायस्य समानस्य ग्रहणादपि तिष्ठति ॥
शौर्य्यं निन्दा समावेशस्त्रिविधोऽंशः कुलस्य वै
तस्य ध्वंसो न हि भवेच्चलतो रक्षितः स हि ॥
अत्र यत्नन्यथाभावो भवेदपि यथाविधि ।
क्रमागतेषु वर्गेषु तदा हानिर्भविष्यति ॥
सर्व्वैः कुलज्ञैश्च कुलीनवर्गै-
र्गोष्ठीपतीनां पुरतः सहर्षैः ।
इदं हि पत्रं लिखितं प्रयत्नात्
निर्णीतं एवं प्रचलिष्यतीति" ॥ * ॥

अथ वङ्गजकुलीनाः ।

"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूर्णकौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाद्युती ॥
दशरथो गुहश्चैव मित्रसारापतिस्तथा"॥

एतेषामादिपुरुषनिर्णयो यथा । गौतमगोत्रे सर्व्वादौ दशरथवसुसुतौ लक्ष्मणवसुपरमवसुकौ लक्ष्मणवसुदक्षिणराढ़े ख्यातस्तस्य सुतः भववसुः तत्सुतः हंसवसुः तत्सुताः शुक्तिमुक्तयलङ्कारवसुकाः । अलङ्कारवसुः राढ़ात् वङ्गे गतः तस्य वङ्गे कुलहानिर्जाता तस्य सुतः मधुवसुः तत्सुतः गुणाकरवसुः तत्सुता अनन्तादयः । दशरथवसुतः परमवसुस्तत्सुतौ लक्ष्मणवसुपूर्णवसुकौ वङ्गे ख्यातौ । सौकालीनगोत्रे मकरन्दघोषसुतौ भवनाथघोषसुभाषितघोषौ भवनाथघोषो दक्षिणराढ़े ख्यातः सुभाषितघोषो वङ्गे ख्यातः तस्य सुतश्चतुर्भुजघोषः ॥ विश्वामित्रगोत्रे सर्व्वादौ कालिदासमित्रसुतौ अश्वपतिमित्रश्रीधरमित्रौ श्रीधरमित्रो दक्षिणराढ़े ख्यातः अश्वपतिमित्रो वङ्गे ख्यातस्तस्य सुतस्तारापतिमित्रः ॥ इति वङ्गकुलाचार्य्यग्रन्थः कुलदीपिका ॥

कुलीनकः, पुं, (कुलीन + संज्ञायां कन् ।) वनमुद्गः । इति हेमचन्द्रः ॥

कुलीनसं, क्ली, (कौ लीनं भूलग्नं द्रव्यादिकं स्यतीति । सो + कः ।) जलम् । इति हेमचन्द्रः ॥

कुलीरः, पुं, (कुल् संख्याने + ईरन् किच्च ।) कर्कटः । इत्यमरः । १ । १० । २१ ॥ काँकड़ा इति भाषा । ("अथ कुलीरप्रभृतयो जलजन्तवस्तमभ्युपेत्य प्रोचुः"। इति हितोपदेशः ॥) कर्कटराशिः इति ज्योतिषम् ॥

कुलीरशृङ्गी, स्त्री, (कुलीरावयव इव शृङ्गं यस्याः । कुलीरशृङ्ग + गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलीरात्, [द्] पुं, (कुलीरं अत्तीति । अद् + क्विप् । उत्पत्तिमात्रेणैवात्मप्रसूतिभक्षणादस्य तथात्वम् ।) कर्कटश्रिसुः । तत्पर्य्यायः । स्थेगविः २ । इति त्रिकाण्डशेषः ॥

कुलीशः, पुं क्ली, (कुलिश + पृषोदरात् दीर्घः ।) कुलिशम् । इत्यमरटीकासारसुन्दरी ॥

कुलुकं, क्ली, (कुल् + बाहुलकात् उलच् किच्च निपातनात् लस्य कः ।) जिह्मामलम् । इति हेमचन्द्रः ॥

कुलुकागुल्गा, स्त्री, (कौ भूमौ लुका गुल्मा गुल्गा इव ।) उल्काग्निः । इति हारावली ॥

कुलेश्वरः, पुं, (कुलस्य जगत्समूहस्य कुलचक्रस्य वा ईश्वरः ।) शिवः । (कुलस्य वंशस्य ईश्वरः नेता कर्त्ता वा ।) कुलपतिः । इति शब्दमाला ॥

कुलोत्कटः, पुं, (कुले कुलेन वा उत्कटः उद्रिक्त उग्रो वा ।) कुलीनाश्वः । इति शब्दचन्द्रिका ॥ उत्कटकुलोद्भवे त्रि ॥

कुल्फः, पुं क्ली, (कल संख्याने "कलिगलिभ्यां फगस्योच्च" । उणां ५ । २६ । इति फक् अस्य उत्वं ।) रोगः । गुल्फे पुं इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ७ । ५० । २ । "यद्विजामनृपर्यपि वन्दनं सुवदक्षीवन्तौ परिकुल्फौ च देहत्" ॥)

कुल्मलं, क्ली, (कुल् निष्कर्षे "कुषेर्लच्च" । उणां ४ । १८७ । इति कमलन् लच्चान्तादेशः ।) पापम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, अथर्ब्ववेदे २ । ३० । ३ ।

"तत्र मे गच्छताद्धवं ग्रस्य इव कुल्मलं यथा" ॥)

कुल्माषं, क्ली, (कोलतीति । कुल् + क्विप् । ततः कुलं भक्षमिश्रितजलं मस्यतीति । मसीर्य्ये परिणामे + अण् पृषोदरात् षत्वम् ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुल्माषः, पुं, (कोलति इति । कुल् + क्विप् । कुल् अर्द्धखिन्नो माषोऽस्मिन् ।) यावकः । इत्यमरः । २ । ९ । १८ ॥

(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

"कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चसः" ॥)

वोरवधान्यम् । कुलत्थ इत्यन्ये । माषाकृतिपत्रः । काश्मीरेषु तुलसी इति ख्यातः इति सुभूतिः । इति भरतः ॥ राजमाष इत्यन्ये । इति नयनानन्दः ॥ माषादिभिश्चमर्द्धखिन्नमन्नम् । खिचड़ी इति ख्यातम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ पाचितमाषादिरिति भीमः । इति सारसुन्दरी ॥ अर्द्धखिन्नगोधूमचणकादयः । (यथा, शब्दार्थचिन्तामणौ ।

"अर्द्धखिन्नास्तु गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः" ॥)

अस्य गुणाः । गुरुत्वम् । रूक्षत्वम् । वातकारित्वम् । मलभेदित्वञ्च । इति भावप्रकाशः ॥ रोगविशेषः । इति शब्दरत्नावली ॥ वनकुलत्थः । इति रत्नमाला ॥

कुल्माषाभिधुतं, क्ली, (कुल्माषैर्यवादिभिरर्द्धखिन्नैरभिधूयते स्म इति । अभि + धु + क्तः ।) काञ्जिकम् । इत्यमरटीकायां स्वामी ॥

कुल्मासं, क्ली, (कोलतीति कुल् भक्षमिश्रितजलम् । तत् मस्यति परिणमयतीति अण् ।) कुल्माषम् । इत्यमरटीकायां भरतः ॥

कुल्यं, क्ली, (कुल् बन्धे + क्यप् ।) अस्थि । इत्यमरः । २ । ६ । ४८ । अष्टद्रोणपरिमाणम् । सूपम् । आमिषम् । इति मेदिनी ॥

कुल्यः, त्रि, (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यामिति"। ४ । १ । १४० । इति यत् । यद्वा कुले भवः कुलाय हितः कुले साधुः वा दिगादित्वात् तत्र साधुरिति वा यत् ।) कुलोद्भवः । कुलहितः । (यथा, भागवते ७ । ६ । १३ ।

"यदहान् मनोश्चोरपरिच्छदांश्च
स्त्रीश्च कुल्याः पशुभृत्यवर्गान्" ॥)

मान्ये पुं इति । मेदिनी ।

कुल्या, स्त्री, (कुले प्राब्विगडे साधुः तत्र साधुरिति यत् ।) क्षुद्रा क्षत्रिमा नदी । इत्यमरः । १ । १० । ३४ ॥ (यथा, शाकुन्तले १ माङ्के ।

"कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः" ॥)

पयःप्रणाली । पयनाला इति भाषा । जीवन्तिकौषधिः । नदीमात्रम् । इति मेदिनी ॥

(यथा, महाभारते ३ पर्व्वणि ।

"सैन्यवारण्यमासाद्य कुल्यानां कुरु दर्शनम्" ॥)

कुलस्त्री । इति हलायुधः ॥ शूलवार्त्ताकुः । इति रत्नमाला ॥

कुवं, क्ली, (कौ पृथिव्यां वसते मण्डलाकारपुष्पावयवेन संलग्नोतीव । वल संवरणे अन्येभ्योऽपीति डः। यद्वा कुं भूमिं वाति । कु + वा + कः ।) उत्पलम् । जलजपुष्पमात्रम् । इति हेमचन्द्रः ॥

कुवकालुका, स्त्री, (कुवमिव कायते प्रकाशते । कुव + कै + कः । कुवका आलुका इव ।) घोणीशाकम् । इति राजनिर्घण्टः ॥

कुवङ्गं, क्ली, (कुत्सितं वङ्गमिव गुणैः ।) सीसकम् । इति राजनिर्घण्टः ॥

कुवचः, त्रि, (कुत्सितं वचः यस्य ।) कुवादः । परदोषकथनशीलः । इत्यमरः ॥

कुवच्चकं, क्ली, (कु ईषत् वच्चं हीरकमिव कायते । कै + कः ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

कुवरः, पुं, (कुत्सितं यथा स्यात् तथा व्रियते । व + अप् । यद्वा कुत्सितं रसं वृणोति गृह्णाति । कु + व + अच् ।) तुवरः । इत्यमरटीकायां रायमुकुटः॥

कुवलं, क्ली, (कौ वसते । वल् + पचाद्यच् ।) उत्पलम् । मुक्तापलम् । वदरीफलम् । इति मेदिनी ॥

कुवलयं, क्ली, (कोः पृथिव्या भूमेर्वा वलयमिव शोभाकारकत्वात् ।) उत्पलम् । इत्यमरः । ६ । १० । ३७॥ नीलोत्पलम् । इति राजनिर्घण्टः ॥

(यथा,—मेघदूते ४६ ।

"ज्योतिर्लेखा वलयिगलितं यस्य बर्हं भवानी ।
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति" ॥)

कुवलयापीड़ः, पुं, (कुवलयं उत्पलं आ सम्यक् पीड़यति । कुवलयं सर्व्वं भूवलयं आपीड़यति वा आ + पीड़् + अच् ।) कंसस्य हस्तिरूपो दैत्यविशेषः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे १०५ । २६-२७ ।

"शकुनिं केशिनञ्चैव यमलार्জ্জुनकावपि ।
नागं कुवलयापीड़ं चानूरं मुष्टिकं तथा ॥
कंसञ्च वाजिनं श्रेष्ठं सगणं देवकीसुतः ।
निहत्य गोपवेशेन क्रीड़यामास केशवः" ॥

कुवलयं नीलोत्पलं आपीड़ः भूषणं यस्य इति व्युत्पत्त्या नीलोत्पलालङ्कृतो जनः ॥)

कुवलयिनी, स्त्री, (कुवलयानां समूहः ततः खलादित्वात् इनिः । यद्वा कुवलयानि सन्त्यस्यां इति इनिः ङीष् ।) उत्पलिनी । इति राजनिर्घण्टः ॥

कुवलाश्वः, पुं, (कौ पृथिव्यां वसते विचरणसमर्थो भवति यद्वा कुं भूमिं पृथिवीं वा वसते व्याप्नोतीव । वस् + क्वच् । कुवलः वेगगमनेन भूवलयभ्रमणक्षमः अश्वो यस्य ।) धुन्धुमाराजः । इति हेमचन्द्रः ॥ (यथा, विष्णुपुराणे ४ । २ । १२ । "आवन्त्यस्य बृहदश्वस्यापि कुवलाश्वः योऽसावृतुध्वजस्य मर्षैरपकारिणं धुन्धुनामानमसुरं वैष्णवेन तेजसाऽऽप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुन्धुमारसंज्ञामवाप च" । अयमेव कुवलयाश्व इति नामापि विश्रुतः ॥)

कुवली, स्त्री, (कुवल + स्त्रियां गौरादित्वात् ङीष् ।) कोलिबृक्षः । इति रत्नमाला ॥

कुवादः, त्रि, (कुत्सितो वादः भाषणं यस्य ।) कुवचः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ३७ ॥

कुवाऊलः, पुं, (कुत्सितं वहतीति । कु + वह + उलच् ।) उष्ट्रः । इति शब्दचन्द्रिका ॥

कुविन्दः, पुं, (कुत्सितं भक्षादिमश्चितसूत्रादिकं कुत्सितत्वया वा जीविकां विन्दतीति ।) तन्तुवायः । स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कुवृत्तिकृत्, पुं, (कुवृत्तिं ईषदावरणरूपं चरणं करोति कुत्सितैः कण्टकादिभिर्वा वृत्तिं आवरणं करोति आत्मानमिति णेर्वः । कुवृत्ति + कृ + क्विप् तुगागमश्च ।) पूतिकः । इति शब्दचन्द्रिका ॥ काँटा करञ्জ इति भाषा ॥ (कुत्सितां वृत्तिं व्यवहारं करोतीति असद्व्यवहारकारी ॥)

कुवेगी, स्त्री (कु ईषत् वेगन्ते गच्छन्ति मत्स्या अस्याम् । कु + वेग् + इन् । ततः स्त्रियां कृदिकारादिति वा ङीप् ।) मत्स्यधानी इत्यमरः । १ । १० । १६ ॥ खाबइ इति भाषा । कुत्सिता वेगी यस्याः । निन्दितवेगी नारी च ॥

कुवेरः, पुं, (कुत्सितं वेरं शरीरमस्य ।) तथा च वायुमार्कण्डेयपुराणे ।

"कुत्सायां क्रिति शब्दोऽयं शरीरं वेरमुच्यते ।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः" ॥

इत्यमरटीकायां भरतः ॥ देवताविशेषः । स तु विश्रवोमुनेरिड़विड़ाभार्য্যायां जातः । धनयक्षोत्तरदिशां पतिश्च । इति श्रीभागवतम् ॥ त्रिचरणोऽष्टदंष्ट्रोऽयं जातः । तत्पर्য্যायः । त्र्यम्बकसखः २ यक्षराट् ३ गुह्यकेश्वरः ४ मनुष्यधर्म्मा ५ धनदः ६ राजराजः ७ धनाधिपः ८ किन्नरेशः ९ वैश्रवणः १० पौलस्त्यः ११ नरवाहनः १२ यक्षः १३ एकपिङ्गः १४ ऐलविलः १५ श्रीदः १६ पुण्यजनेश्वरः १७ । इत्यमरः । १ । १ । ७१—७३ । ईर्য্यक्षः १८ अलकाधिपः १९ । इति जटाधरः ॥ * ॥ नन्दीवृक्षः । इति मेदिनी ॥ अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

कुवेरः, त्रि, (कुत्सितं वेरं क्षेपणं दानादकं गतिर्वा यस्य ।) मन्दः । इति धरणी ॥ (कुत्सितं वेरं शरीरं यस्य ।) कुशरीरः । इति त्रिकाण्डशेषः ॥

कुवेरकः, पुं, (कुवेर + संज्ञायां कन् ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । १२७ ॥

कुवेराक्षी, स्त्री, (कुवेरस्य अक्षीव पिङ्गलं पुष्पमस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ ॥ लताकरञ्জः । सितपाटलिकावृक्षः । इति राजनिर्घण्टः ॥

कुवेराचलः, पुं, (कुवेरस्य अचलः ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ॥

कुवेराद्रिः, पुं, (कुवेरस्य अद्रिः पर्व्वतः ।) कैलासपर्व्वतः । इति जटाधरः ॥

कुवेलं, क्ली, (कुवेषु जलजपुष्पेषु मध्ये इंशोभां लाति गृह्णातीति । ला + कः ।) कुवलयम् । इति हेमचन्द्रः ॥

कुश्र इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (घुरां परे भां–परं-अकं-सेट्-इदित् ।) पञ्चमस्वरी । इ कुंश्रयते । कि कुंश्रयति कुंश्रति । इति दुर्गादासः ॥

कुश्र य इर् श्लिषि । आलिङ्गन इति यावत् । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य कुश्रयति वाला कान्तम् । इर् अकुश्रत् अकोश्रीत् । अस्मात् पृषादित्वान्नित्यं ड इत्यन्ये । इति दुर्गादासः ॥

कुश्रं, क्ली पुं, (कु पापं श्रयति नाशयति । कु + श्रो + ड । यद्वा कौ भूमौ श्रेते शरते शोभते इत्यर्थः ।) खनामख्यातदृणम् । तत्पर्য্यायः । कुथः २ दर्भः ३ पवित्रम् ४ । इत्यमरः । २ । ४ । १६६॥ याज्ञिकः ५ क्रतुगर्भः ६ बर्हिः ७ क्रतुपः ८ । इति शब्दरत्नावली ॥ अपि च ।

"कुश्रो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञ भूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् छत्रपत्रस्तथैव च" ॥

तस्योत्पत्तिर्यथा,—

"बर्हिष्मती नाम पुरी सर्व्वसम्पत्समन्विता ।
न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ॥
कुश्राकाश्चास्त एवासन् श्मश्रुद्रविततवर्চसः ।
ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे" ॥

इति श्रीभागवतम् । अस्य गुणाः ।

"दर्भस्तयं चिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीदाहपित्तरक्तप्रदरान्वितं" ॥

इति भावप्रकाशः ॥ * ॥ तस्य धारणविधिस्तत्प्रतिनिधिश्च यथा,—

"पूजाकाले सर्व्वदैव कुश्रहस्तो भवेच्छुचिः ।
तर्জ্জन्या रजतं धार्য्यं स्वर्णं धार्য্यमनामया ।
कुश्रकार्য্यकरं यस्मान्न तु वन्याः कुश्राः कुश्राः ।
कुशेन रहिता पूजा विफला कथिता मया ।
नान्यस्य रजतं स्वर्णं धार्য্यं हि निजमङ्गले" ॥

इति वरदातन्त्रे १ पटलः ॥ * ॥

सधवायास्तत्स्पर्शनिषेधो यथा,—

"न स्पृशेत्तिलदर्भांश्च सधवा तु कथञ्चन" ॥

इति हलायुधकृतब्राह्मणसर्व्वस्वम् ॥ अन्यत् दर्भशब्दे द्रष्टव्यम् ॥

कुश्रं, क्ली, (कौ पृथिव्यां भूमौ श्रेते । मूलत्वात् तथात्वम् ।) जलम् । इति मेदिनी ॥

कुश्रः, पुं, (कु पापं श्रयति नाशयति विहितराजधर्म्मानुष्ठानेन । कु + श्रो + ड । अपरा व्युत्पत्तिर्यथा यथा, रामायणे ।

"यस्तयोः पूर्व्वजो जातः स कुशेर्मन्त्रसत्कृतैः ।
निर्म्मार्জ্জनीयस्तु तदा कुश इत्यस्य नाम तत्" ॥)

रामसुतः । (यथा, रघुः १६ । ७२ ।

"यत् कुम्भयोनेरधिगम्य रामः
कुशाय राज्येन समं दिदेश ।
तदस्य जैत्राभरणं विहर्त्तु-
रज्ञातपातं सलिले ममज्ज" ॥)

योऽश्वम् । इति मेदिनी॥ पुराणोक्तसप्तद्वीपेषु द्वीपभेदः । स तु घृतसमुद्रेणावृतः । तत्र देवनिर्म्मितोऽग्नितुल्यः कुशस्तम्बोऽस्ति । (अतः कुशद्वीप इति संज्ञया विख्यातः ।) तदधिपः प्रियव्रतराजपुत्रो हिरण्यरेताः तद्द्वीपं विभज्य सप्त-

पुत्रेभ्यो दत्तवान्। तेषां नामानि यथा। वसुः १ वसुदानः २ दृढरुचिः ३ नाभिगुप्तः ४ स्तुत्यव्रतः ५ विप्रनामा ६ देवनामा ७। एषां वर्षेषु सप्त सीमागिरयः। यथा। बभ्रुः १ चतुःशृङ्गः २ कपिलः ३ चित्रकूटः ४ देवानीकः ५ ऊर्द्धरोमा ६ द्रविणः ७। सप्त नद्यश्च यथा। रसकुल्या १ मित्रविन्दा २ श्रुतविन्दा ३ देवगर्भा ४ घृतच्युता ५ मधुः ६ माला ७। तत्र स्थिताः कुशलकोविदाभिमुक्तकुलकसंज्ञाः क्रमेण ब्राह्मणक्षत्रियवैश्यशूद्राः भगवन्तमग्निरूपिणं आसां नदीनां पयोभिर्यजन्ते। इति श्रीभागवतम्॥ (विष्णुपुराणे तु एतद्द्वीपाधिपतेस्तत्पुत्राणां गिरीणां नदीनाञ्च नामान्तराणि दृश्यन्ते। यथा २। ४। ३६—४४।

"ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः प्रकीर्तिताः।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः॥
प्रभाकरोऽथ कपिलसंज्ञामा वर्षपञ्चमः।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः॥
तत्रैव देवगन्धर्व्वयक्षकिंपुरुषादयः।
वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः॥
दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने!।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः॥
यज्ञोक्तकर्म्मकर्त्तृत्वात् स्वाधिकारक्षयाय ते।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम्॥
यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम्।
विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः।
वर्षाचलास्तु तत्रैते सप्तद्वीपे महामुने!॥
नद्यस्तु सप्त तासान्तु शृणु नामान्यनुक्रमात्।
धृतपापा शिवा चैव पवित्रा सम्मतिस्तथा॥
विद्युदम्भा महीं चान्या सर्व्वपापहरास्त्विमाः।
अन्याः सहस्रशश्चैव क्षुद्रनद्यस्तथाचलाः॥
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतः।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः"॥)

कुशः, त्रि, (कु कुत्सिते कर्म्मणि शेते अवतिष्ठते। कु + शी + कः।) पापिष्ठः॥ (कुत्सिते मदशब्दार्थायां शेते इति।) मत्तः। इति मेदिनी॥

कुशण्डिका, स्त्री, (कुशैः कण्डिका इव। कुशकण्डिका पृषोदरात् कस्य लोपः।) सर्व्वहोमार्थाग्निसंस्थारकक्रिया। तत्र सर्व्वेषामाऊतियुक्तकर्म्मणां कुशण्डिकासंस्कृताग्निसाध्यत्वात् सैव प्रथममभिधीयते। तत्र हस्तप्रमाणं चतुरस्रं स्थण्डिलं शर्करोद्धारास्थिकेशतुषादिरहितं पूर्व्वोत्तरप्लवं समं वा छायामण्डपसहितं गोमयेनोपलिप्य स्नातः शुचिराचान्तः प्राङ्मुखः कुशसहितासनोपविष्टः कर्त्ता उत्तरस्यां दिशि भुक्त्वार्थं कुशकुसुमसहितजलपात्रं निधाय दक्षिणं जानु भूमौ पातयित्वा उत्तराग्रकुशोपरि सव्यहस्तप्रादेशमुत्तानं वह्निस्थापनपर्य्यन्तं भूमौ निधाय दक्षिणहस्तानामिकाकुशमूलेन स्थण्डिलदक्षिणप्रान्ते द्वादशाङ्गुलप्रमाणां प्राङ्मुखीं रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत्। तन्मूलतः प्रभृत्येकविंशत्यङ्गुलप्रमाणां उत्तराभिमुखीं रेखामुल्लिख्य रेखेयं अग्निदेवताका लोहितवर्णा इति ध्यायेत्। ततः प्रथमरेखायाः उत्तरतः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं प्रजापतिदेवताका कृष्णवर्णा इति ध्यायेत्। ततः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं इन्द्रदेवताका नीलवर्णा इति ध्यायेत्। ततोऽपि सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं सोमदेवताका शुक्लवर्णा इति ध्यायेत्। ततः क्रमेण दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां रेखासूत्करं गृहीत्वा प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता रेखासूत्करनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यैशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रक्षिपेत्। ततः पूर्व्वस्थापितजलेन रेखाभुक्षणं कृत्वा दक्षिणदिक्स्थकांस्यपात्रस्थामेर्नवशरावस्थाग्नेर्व्वा ज्वलदिन्धनं गृहीत्वा प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवताग्निसंस्कारे विनियोगः। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। अनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽपरमग्निं गृहीत्वा प्रजापतिर्ऋषिर्गृहतीच्छन्दः प्रजापतिर्देवता अग्निस्थापने विनियोगः। ॐ भूर्भुवः स्वरोम्। इत्यनेनाग्निमात्माभिमुखं तृतीयरेखोपरि स्थापयेत् ततो वामहस्तमुत्तोल्याञ्जलिं बद्धा पठेत्। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताग्निस्थापने विनियोगः। ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ ततोऽग्ने! त्वं विश्वरूपनामासि इति नाम कृत्वा ध्यात्वाऽऽवाह्य विश्वरूपनाम्ने अग्नये नमः इति पाद्यादिनाभ्यर्च्य। ॐ सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥ इति पठेत्॥ ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ ऊर्द्ध्वां कृत्वा ब्रह्मस्थापनं कुर्य्यात्। समाग्यपश्चाच्छुक्लपत्तरचितं द्विर्दक्षिणावर्त्तमूर्द्धमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा क्षौमोत्तरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्व्वाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविश्योत्तिष्ठेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशपत्रमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता ब्रह्मनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखोभूय आस्तीर्णकुशानुद्धृत्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः अग्निर्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सौदामीति ब्रूयात्। अनेन कुशोपरि पूर्व्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्युक्ष्य कुशकुसुमैरर्च्चयेत्। ततस्तेनैव पथा प्रत्यागत्यासने पूर्व्वाभिमुख उपविशो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्राह्मणः अयज्ञीयवाचं वदेत्तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले। इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्तुरेव कृताकृतावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवाग्वचननिमित्तं स एव जपेत्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा अस्मिन्नेव समये चरुं श्रपयित्वा तदुपरि घृतं दत्त्वा अग्नेरुत्तरतः कुशोपरि संस्थाप्य भूमिजपादिकं कुर्य्यात्। दक्षिणजानु भूमौ पातयित्वा दक्षिणहस्तोपरिभावेन अधोमुखौ हस्तौ भूमौ निधाय। परमेष्ठी ऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे विनियोगः। ॐ इदं भूमेर्भागमहं इदं भद्रं सुमङ्गलम्। परासपलान् बाधस्वान्येषां विन्दते धनम्। इति जप्त्वा रात्रौ चेत् कर्म्म तदा धनमितिस्थाने रक्षति प्रयोक्तव्यम्। ततो दक्षिणहस्तेन कुशान् गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन वृत्तादिक्रमेण मन्त्रेण परिशोधयेत्। त्रयाणां मन्त्राणामृष्यादयः साधारणाः। कौत्सऋषिर्जगतीच्छन्दोऽग्निर्देवता एकस्य षड्डस्य षष्ठेऽन्यग्निराप्ते गृह्ये परिसमूहने विनियोगः। ॐ इमं स्तोममर्हते जातवेदरथमिव सम्महे मा मनीषया भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव। ॐ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा पर्व्वणा वयम्। जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव। ॐ यत्रेक्ष त्वा समिधं साधया धियस्ते देवा हविरदन्त्याहुतं त्वमादित्यानावहतां ह्युग्रमस्यग्ने सख्ये मा रिषामा वयन्तव। ततस्तान् कुशान् ऐशान्यां दिशि प्रक्षिपेत्। ततोऽग्नेः पूर्व्वतः उत्तरान्ताद्दक्षिणान्तं यावत् उपमूललूनान् एकपत्रीकृतान् कुशान् अग्नेय मूलमाच्छादयन् वारत्रयमास्तरेत्। एवं दक्षिणस्यां पूर्व्वान्तात् पश्चिमान्तं यावत्। प्रतीच्यास्च दक्षिणादुत्तरान्तं यावत्। एवमुत्तरस्यां पश्चिमान्तात् पूर्व्वान्तं यावत् क्रमेणास्तरेत्। ततो घृताक्तस्रुक्स्रुवान् दक्षदिक्षु पूर्व्वादिक्रमेण दद्यात्। ॐ इन्द्राय लोकपालाय स्वाहा। एवं अग्नये इत्यादि। ततः प्रादेशहृदयप्रमाणां धवखदिरपलाशोडुम्बराणामन्यतमस्य विंशतिकाष्ठिकां मध्ये घृतप्लुवं दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात्। ततः स्रुक्स्रुवाभ्यां कुशादेव समाग्यकुशपत्रद्वयं गृहीत्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रच्छेदने विनियोगः। ॐ पवित्रे स्थो वैष्णव्यौ इति मन्त्रेण प्रादेशप्रमाणं कृत्वा कुशान्तरेण वेष्टयित्वा नखव्यतिरेकेण छित्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रमार्জ্জने विनियोगः। ॐ विष्णोर्म्मनसा पूते स्थः इत्यनेनाभ्युक्ष्य ताभ्यामादाय पवित्रमुत्तराग्रं

निधाय तत्र होमार्थं घृतं निःक्षिपेत्। ततस्तत्कुशपत्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले च वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेनाधोमुखव्यस्तपाणिः प्रजापतिर्ऋषिराज्यं देवता आज्योत्पवने विनियोगः। ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः स्वाहा। इत्यनेन कुशपत्रद्वयमध्येन घृतमग्नौ सङ्गृह्णीयात्। तूष्णीं वारद्वयम्। ततस्तत्कुशपत्रद्वयमङ्गिरभुक्ष्याग्नौ निःक्षिपेत्। ततस्तस्याज्यपात्रस्योदकेनानुमार्ज्जनमग्नेरुपरि निधानं उत्तरस्यां दिशवतारणं इत्यमेव वारत्रयं संस्कुर्य्यात् इत्याज्यसंस्कारः। ततो ध्रुवखदिरपलाशोडुम्बराण्यानयतमस्य अरत्निमात्रं भमिताङ्गुष्ठपर्व्वविणं गोसारन्ध्रवन्मध्यस्थितमर्य्यादं स्रुवं इत्यमेव वारत्रयं संस्कुर्य्यादिति। स्रुवसंस्कारः। एवं स्रुक्चेत्यादिकं संस्कुर्य्यात्। ततो दक्षिणं जानु भूमौ पातयित्वा उदकाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिरदितिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदिते अनुमन्यस्व इत्यनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमते अनुमन्यस्व इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यनुमन्यस्व इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सविता देवता अग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु इत्यनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। ततो दक्षिणं जानूत्थाप्य उपर्य्यधःस्थितदक्षिणवाममुष्टिभ्यां गृहीतकुशान् गृहीत्वा विरूपाक्षजपं कुर्य्यात्। परमेष्ठी ऋषी ब्रह्मरूपोऽग्निर्देवता विरूपाक्षजपे विनियोगः। ॐ भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसि दन्ताक्षिलस्य ते ग्रथ्या पर्णे महान्तरीक्षे विमितं हिरण्मयं तद्देवानां हृदयान्ययक्षये कुम्भोऽन्तः सन्निहितानि तानि बलञ्च बलसाच रक्षतोऽप्रमत्तो अग्निमिधत्तं सत्यं यत्ते दाद्यग्रपुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयिता पुनर्ब्रह्मवर्च्चसमुपयन्ति तं देवेषु ब्राह्मणोऽस्यग्रं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपधावामि जपन्तं मा मा प्रतिजापीर्जुह्वन्तं मा मा प्रतिहौषीः कुर्व्वन्तं मा मा प्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृद्ध्यतां तन्म उपपद्यतां समुद्रो मा विश्वव्यचा ब्रह्माऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु स्वाचो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताक्षये समुद्राय विश्वव्यचसे तुषाय विश्ववेदसे स्वाहाय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः। इति जपित्वा गृहीतकुशान् प्रागुदीच्यां दिशि क्षिपेत्। फलपुष्पे ब्रह्मणे निवेदयेत्॥*॥ अथ काम्यकर्म्मार्थं कुशण्डिका तदा प्राणान् संयम्य प्रथमं पुटाञ्जलिः। ॐ तपश्च तेजश्च श्रद्धा च क्षेत्र सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्यञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा पश्चात् विरूपाक्षजपं कुर्य्यात्। इति सामवेदिनां सर्व्वसाधारणी कुशण्डिका समाप्ता। इति भवदेवभट्टः॥*॥ अन्यत् रघुनन्दनभट्टाचार्य्यकृतसंस्कारतत्त्वे द्रष्टव्यम्॥ यजुर्व्वेदिनां कुशण्डिका पशुपतिकृतदशकर्म्मपद्धतौ ऋग्वेदिनां कुशण्डिका कालेशिकृतदशकर्म्मपद्धतौ च द्रष्टव्या॥*॥ अथ कुशण्डिकानन्तरं प्रकृतं कर्म्म कर्त्तव्यम्। तत्र प्रथमं प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरक्षिक्कृन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ॐ स्वः स्वाहा। इति स्रुवेणाज्याऽऽहुतित्रयन्दद्यात्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा आज्यतन्त्रोपक्रमविहितत्वात् महाव्याहृतिहोमस्य प्रथमं महाव्याहृतिहोमो न कर्त्तव्योऽन्ते तु कर्त्तव्य एव विहितत्वात्। ततः प्रकृतं कर्म्म समाप्य पुनर्महाव्याहृतिहोमं हुत्वा प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा ग्राह्यायनहोमादिवामदेव्यगानान्तं उदीच्यं साधारणं कर्म्म करणीयम्। तदभिधीयते। तत्र प्रथमं ॐ अद्येत्यादि अमुककर्म्मणि यत्किञ्चिद्दैगुण्यं जातं तद्दोषप्रशमनाय ग्राह्यायनहोममहं कुर्व्वीय इति सङ्कल्पं कृत्वा अग्ने त्वं विधुनामासि इति नाम कृत्वा संपूज्य पुनर्घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमञ्च पूर्व्ववत् कृत्वा प्रायश्चित्तहोमं कुर्य्यात्। प्रजापतिर्ऋषिरग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नोऽग्न एनसे स्वाहा। प्रजापतिर्ऋषिर्विश्वेदेवा देवताः प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो विश्ववेदसे स्वाहा। प्रजापतिर्ऋषिर्विभावसुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ यज्ञं पाहि विभावसो स्वाहा। प्रजापतिर्ऋषिः घृतक्रतुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सत्यं पाहि घृतक्रतो स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो अग्न एकया पाहूत द्वितीयया पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवत प्रायश्चित्तहोमे विनियोगः। ॐ सहर्ज्जा निवर्त्तस्वाग्ने पिनुष्व धारया विश्वप्स्याः विश्वतः परि स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ आज्ञायदनाज्ञातं यज्ञस्य क्रियते मिथः अग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहा। प्रजापतिर्ऋषिः पङ्क्तिच्छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽस्तु वयं स्याम पतयो रयीणां स्वाहा। ततः पूर्व्ववदेव महाव्याहृतिहोमः समित्पात्रे पञ्च। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरक्षिक्कृन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा॥*॥

ततोनवग्रहहोमः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवा वाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्द्धा दिवः ककुत् पतिः पृथिव्या अयं अपां रेतांसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधोऽमर्त्य आदास्ये जातवेदो वहा त्वमद्या देवाँ उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ अपबाधमानः प्रभञ्जत्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजन्तेऽन्यद्विषुरूपेऽहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवी रभीष्टये शन्नो भवन्तु पीतये। शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृन्वन्नकेतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा॥*॥ ततः इन्द्राद्यष्टलोकपालहोमं प्रत्यङ्गदेवताहोमञ्च कृत्वा घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा उदकाञ्जलिसेकं कुर्य्यात्। प्रजापतिर्ऋषिः सविता देवताग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु। अनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। प्रजापतिर्ऋषिरदितिर्देवता उदकाञ्जलिसेकेके विनियोगः। ॐ अदितेऽन्वमंस्थाः अनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमतेऽन्वमंस्थाः अनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेकेके विनियोगः। ॐ सरस्वत्यन्वमंस्थाः। अनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। तत उत्तानहस्तद्वयेन कतिपयाक्षरम्

कुशलं

कुशान् गृहीत्वा प्रजापतिर्ऋषिर्विष्णुर्देवता दर्भोत्पाटनाभ्युक्षने विनियोगः। ॐ अक्तां रिहा गाध्यन्तु वयः। अनेनाग्रमध्यमूलानि क्षतेनाभ्युक्षति वारत्रयं मन्त्रश्च वारत्रयमेव पठनीयः। ततस्तान् कुशानङ्गिरस्युक्त्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्ररूपोऽग्निर्देवता दर्भमुष्टिकाहोमे विनियोगः। ॐ यः पशूनामधिपती रुद्रस्तन्तिचरो दृषा। पशूनस्माकं मा हिंसीरेतदस्तु ऊतन्तव स्वाहा। अनेनाग्नौ क्षिपेत्। तत अग्ने त्वं मृडनामासीति नाम कृत्वा गन्धमाल्यवस्त्रताम्बूलैरग्निमभ्यर्च्य प्रजापतिर्ऋषिर्विराट्छन्द इन्द्रो देवता यज्ञस्थानस्य यजनीयप्रयोगे विनियोगः। ॐ पूर्णाहोमं यज्ञसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरं वृणे यज्ञसा भामि लोके स्वाहा। अनेन पूर्णाहुतिं दद्यात्। ततो ब्रह्मणे पूर्णपात्रादि दक्षिणां दत्त्वा होमदक्षिणां कुर्यात्। ततः प्रदक्षिणेन दक्षिणं देशं गत्वा ब्रह्मयज्ञिं मुक्त्वा प्रत्याहृत्यासने पुनरुपविश्य कुशकुसुमसहितजलपात्रे हस्तं निधाय महावामदेव्य ऋषिर्विराड्गायत्रीच्छन्द इन्द्रो देवता शान्तिकर्मणि जपे विनियोगः। ॐ कया न क्षित्र आभुवदूती सदा वृधः सखा कया शचीष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतमवास्यूतये। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। "एता ऋचो गीत्वा शान्तिं कुर्यात्। शान्त्यग्रौ एता एव ऋचस्त्रिरावृत्या पठेदिति। ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्यात्। इति सर्वकर्मसाधारणमुदीच्यं कर्म समाप्तम्॥

कुशपः, पुं, (कुश् य संश्लेषे + बाहुलकात् कपन्।) पानपात्रम्। इत्युणादिकोषः॥

कुशपुष्पं, क्ली, (कुशाकारं पुष्पमस्य।) ग्रन्थिपर्णम्। इति रत्नमाला। गाँठियाना इति भाषा॥

कुशलं, क्ली, (कुश् + इषादित्वात् कलन्। यद्वा कुं पापं तस्मात् शलति गच्छति दूरमिति प्राप्नोतीत्यर्थः। कु + शल् + अच्।) कल्याणम्। (यथा, रघुः १।५८। "प्रप्रच्छ कुशलं राज्ञे राज्याश्रममुनिं मुनिः"॥*॥

समागमे विहिते अभिवादकमवरवयस्कं समानवयस्कमनभिवादकमपि ब्राह्मणं कुशलमिति शब्दविशेषोच्चारणेनैव कल्याणप्रश्नं पृच्छेत्। यदुक्तं मनौ २।१२७।

"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च"॥)

पर्य्याप्तिः। पुण्यम्। (तद्वति, त्रि। यथा, गीतायाम् १८।१०।

"नद्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते"।

कौ पृथिव्यां शलति श्लाघां प्राप्नोतीति। शल + अच्।) श्लिष्टिते, त्रि। इत्यमरः। ३। ३। २०३॥ (यथा, मनुः ८। १५७।

"समुद्रयानकुशला देशकालार्थदर्शिनः।

कुशाग्री

स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति"॥

कुशं याति गच्छति। कुश + ला + कः। कुशग्राहकः। इति व्युत्पत्तिलभ्योऽर्थः॥)

कुशलवौ, पुं, (पुण्यवतोरिव एकशब्दया तयोरेव बोधकत्वम् द्वन्द्वसमासे तु कुशश्च लवश्च तौ कुशीलवौ मित्रावरुणाविवादिवज्ज्ञेयम्।) एकयोक्त्या रामपुत्रौ। इति हेमचन्द्रः॥ तयोर्नामकारणं यथा,—

"यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः।
निर्म्मार्ज्जनीयो नाम्ना हि भविता कुश इत्यसौ॥
यस्त्वावरज एवासील्लवणेन समाहितः।
निर्म्मार्ज्जनीयो रुद्राभिर्नाम्ना स भविता लवः॥
एवं कुशलवौ नाम्ना यमौ तौ सम्बभूवतुः।
भगवत्कृतनामानौ सुखिनावत्वयौ च तौ"॥
इति रामायणम्॥

कुशलप्रश्नः, पुं, (कुशलः शुभः प्रश्नः।) कुशलजिज्ञासा। तत्पर्य्यायः। कौशली २। इति चिकाण्डशेषः॥

कुशली, स्त्री, (कुश इव लीयते। ली + डः गौरादित्वात् ङीष्।) अश्मन्तकवृक्षः। क्षुद्राश्मिका। इति वैद्यकम्॥

कुशली, [न्] त्रि, (कुशलं अस्त्यस्य। कुशल + इनिः।) मङ्गलान्वितः। (यथा, रघौ ५। ४।

"अध्वरग्लानिमन्वस्यतामृषीणां
कुशाग्रबुद्धे! कुशली गुरुस्ते"॥)

कुशस्थलं, क्ली, (कुशप्रधानं स्थलम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे।

"कुशस्थलं सकुसुमं माकन्दं वाराणवतम्।
देहि मे चतुरो ग्रामान् कञ्चिदेकञ्च पञ्चमम्"॥)

कुशस्थली, स्त्री, (कुशस्थल + स्त्रियां ङीष्।) द्वारिका। इति जटाधरः॥ (यथा,—महाभारते २। मन्त्रणापर्व्वणि १४। ४९।

"इति सञ्चिन्त्य सर्व्वे स्म प्रतीचीं दिशमाश्रिताः।
कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्"॥

पुर्य्येषा तु पुरा रेवतनाम्ना केनचित् नरपतिना निर्म्मिता कानवशात् राक्षसैरुत्सादिता स्वापदाश्रयीभूताऽऽसीत् ततो देवप्रमुखैर्यादवैः संस्कृता सती तेषामेव वासभूमिरासीत्॥)

कुशा, स्त्री, (कुश् य संश्लेषे + कः टाप् च।) रज्जुः। इति मेदिनी। मधुकर्कटिका। इति शब्दचन्द्रिका॥ वरुणा। इति हेमचन्द्रः॥ (छन्दोगाः स्तोत्रीयागमनार्थानौदुम्बरान् यज्ञून् कुशा इति व्यवहरन्ति॥ इति चिन्तामणिः॥)

कुशाकरः, पुं, (कुशैराकीर्य्यते समन्तात् अत्रेण मूलाच्छादनेन वेष्ट्यतेऽत्र। आ + कृ + अधिकरणे अप्।) कुशच्छिदकालसमये कुशैर्वेष्टनात् तथात्वम्।) अग्निः। इति शब्दमाला॥ (कुशां रज्जुं करोतीति व्युत्पत्त्या रज्जुकारकः॥)

कुशाक्षः, पुं, (कुश इव सूक्ष्मं क्षुद्रमित्यर्थः अक्षि यस्य। समासे अच्।) वानरः। इति शब्दमाला॥

कुशाग्रीयमतिः, त्रि, (कुशाग्रीया कुशानां अग्रवत् सूक्ष्मा मतिर्यस्य।) तीक्ष्णबुद्धिः। (यदुक्तं अग्निः। "अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ।

कुशूलः

नैव शब्दाम्बुधेः पारं किमन्ये जडबुद्धयः"॥)

तत्पर्य्यायः। सूक्ष्मदर्शी २ तत्कालधीः ३ प्रत्युत्पन्नमतिः ४। इति हेमचन्द्रः॥ सूक्ष्मायां बुद्धौ कर्म्मधारयस्त्र स्त्री॥

कुशारणिः, पुं, (कुशं शापप्रदानार्थं जलं अरणिरिव यस्य।) दुर्व्वासाः। इति त्रिकाण्डशेषः॥

कुशाश्मनिः, पुं, (कुत्सितः आश्मनिः।) रोहितवृक्षः। इति राजनिर्घण्टः॥

कुश्रिंशपा, स्त्री, (कुत्सिता शिंशपा।) कपिलशिंशपा। इति राजनिर्घण्टः॥

कुश्रिकः, पुं, (कुशः कुशसंघको महीपालो जनकत्वेनास्त्यस्य। कुश + ठन्।) खनामख्यातन्नृपविशेषः। (स तु विश्वामित्रपितामहः गाधेः पिता। एतद्विवरणन्तु महाभारते १३। भीष्मयुधिष्ठिरसंवादे ५२ अध्यायमारभ्य द्रष्टव्यम्॥) पाशः। सर्जवृक्षः। विभीतकवृक्षः। इति हेमचन्द्रः॥ अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ तैलशेषः। इति विश्वः॥ केकरे त्रि। इति शब्दमाला॥

कुश्रितं, त्रि, (कुश् + इतच्। यद्वा कुशसंश्लेषे + क्त इट् च।) जलमिश्रितम्। इत्युणादिकोषः॥

कुश्री, स्त्री, (कुश + स्त्रयोविकारार्थे "जानपदेति" ४। १। ४२। इति ङीष्।) पाशः। इति मेदिनी॥

कुश्री, [न्] पुं, (कुशाः सन्त्यस्य। समाधियोगकाले पक्षेषु कुशोत्पत्तेस्तथात्वम्।) वाल्मीकिमुनिः। इति हेमचन्द्रः॥ (कुशनिश्रिते, त्रि। यथा, महाभारते १३। मेघवाहनोपाख्याने १४। १७४।

"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी क्षुतात्तो मेखलीकृतः"॥)

कुश्रीदं, क्ली, (कुत्सितं श्रीदं यस्मात् यस्य श्रीत्वम्।) दरिद्रजीविका। इत्यमरटीकायां भरतः॥ रक्तचन्दनम्। इति मुग्धबोधव्याकरणम्॥

कुश्रीलवः, पुं, (कुत्सितं श्रीलं यस्य इति कुश्रीलः। कुगतीतिसमासः अन्यत्रापि दृश्यते इति वः। यद्वा कुश्रीलं वाति गच्छति प्राप्नोतीति यावत्। वा + कः।) चारणः। इत्यमरः। २। १०। १२॥ नटविशेषः। कथकादिः। इत्यन्ये। देशान्तरे कीर्त्तिं प्रचारयति यो नटः। इत्यन्ये। इति भरतः॥ (एते हि अपाङ्क्तेया इत्यत्रत्ययोर्वर्ज्याः। यथा, मनुः ३। १५५।

"कुश्रीलवोऽवकीर्णी च क्षयजीपतिरेव च"॥

कुश्रीलवत्वार्थं नाट्यशास्त्रप्रचारकत्वात् वाल्मीकिमुनिः॥)

कुश्रीलवौ, पुं, (कुश्रश्च लवश्च तौ कुश्रीलवौ।) एकयोक्त्या रामपुत्रौ। इति हेमचन्द्रः॥ (यथा, रामायणे ७। १०७ सर्ग।

"अभिषिच्य महात्मानावुभौ रामः कुश्रीलवौ"॥)

कुश्रीवयः, पुं, (कुश्रीव कुश्रवान् सन् शेते समाधौ अवतिष्ठते इति। श्री + ड।) वाल्मीकिमुनिः। इति चिकाण्डशेषः॥

कुस्थूलः, पुं, (कुस्थूल + पृषोदरात् रूपम्।) तुषागलः। इति जटाधरः॥ धान्यागारम्। तत्पर्य्यायः। अन्नकोष्ठकः २। इति हेमचन्द्रः॥ व्रीह्यगारम् २।

कुष्ठं

इति त्रिकाण्डशेषः ॥ (यथा, मनुः ४ । ७ ।
"कुम्भधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
व्यैहिको वापि भवेदश्वस्तनिक एव वा" ॥)

कुम्भेशयं, क्ली, (कुम्भे जले शेते । कुम्भ + शी + अच् । अलुक् समासः ।) पद्मम् । (यथा, रघुः ६ । १८ ।
"कुम्भेशयातामतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन" ॥) सारसयष्टी । इत्यमरः । १ । १० । ४० ॥

कुम्भेशयः, पुं, (कुम्भेशयं पद्ममिव आकृतिर्विद्यतेऽस्य । अर्शं आद्यच् ।) कर्किकारवृक्षः । इति शब्दचन्द्रिका ॥ (कुम्भदीपस्थपर्व्वतविशेषः । इति विष्णुपुराणे । २ । ४ । ३६ ॥)

कुभ ग निष्कर्षे । इति कविकल्पद्रुमः । (क्र्यां-परं-सकं-सेट् ।) ग कुभ्नाति चुकोभ । निष्कर्षः इयत्तापरिच्छेदः । तूलैरवकुभ्नातीति वोपदेवः ॥ निष्कर्षोऽन्तःप्रकाशनमिति गोविन्दभट्टः ॥ "ततोऽकुभ्नाद्दशग्रीवः क्रुद्धः प्राणान् वनौकसाम्" । इति भट्टौ अनेकार्थत्वान्निष्कोषणार्थः । इति दुर्गादासः ॥

कुभ्रः, त्रि, (कुभ् + बाहुलकात् कलच् ।) कुत्सितः । इत्यमरटीकायां भरतः ॥

कुभाकुः, पुं, (कुभ + "कठिकुभिभ्यां काकुः" । उणां १ । ७७ । इति काकुः ।) कपिः । अग्निः । अर्कः । परोक्षायिनि, त्रि । इति मेदिनी ॥

कुभ्रितः, त्रि, (कुभ् निष्कर्षे + क्तः ।) जलमिश्रितः । इत्युणादिकोषः ॥

कुमीदं, क्ली, (कुसीद + एषोदरात् यत्वम् ।) कुसीदम् । इत्यमरटीकायां भरतः ॥

कुष्ठं, क्ली, (कुष्णाति रोगम् । कुष् + "इनि कुषीति" । उणां २ । २ । इति क्थन् ।) विषभेदः । इति हेमचन्द्रः ॥ औषधविशेषः । कुड् इति भाषा । तत्पर्य्यायः । व्याधिः २ पारिभव्यम् ३ वाप्यम् ४ पाण्डवम् ५ उत्पलम् ६ । इत्यमरः । २ । ४ । १२६ ॥ आप्यम् ७ । इति तट्टीका ॥ जरत्नम् ८ । इति रत्नमाला ॥ रजा ९ गदः १० आमयः ११ पारिभद्रकम् १२ रामम् १३ वाह्लीरजम् १४ पावनम् १५ कुत्सितम् १६ पद्मकम् १७ गदाङ्कम् १८ गदाङ्गयम् १९ कौवेरम् २० भासुरम् २१ । इति शब्दरत्नावली ॥ काकलम् २२ गौरवम् २३ । इति जटाधरः ॥
"कुष्ठं रोगाङ्गयं वाप्यं पारिभव्यं तथोत्पलम् ।
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमरत्नकपान्" ॥ * ॥

अथ कुष्ठभेदपुष्करमूलम् ।
"उक्तं पुष्करमूलन्तु पुष्करं पौष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिदं त्रयम् ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथावपिश्वासान् विशेषात् पार्श्वशूलनुत्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । कफवायुकुष्ठरोगविसर्पविषकण्डूखर्ज्जूदद्रुनाशित्वम् । कान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ श्वासकासज्वरहिक्कानाशित्वम् । इति राजवल्लभः ॥ * ॥
खगामख्यातरोगः । कुट् इति भाषा । तत्पर्य्यायः ।

कुष्ठं

श्वित्रम् २ । इत्यमरः । २ । ४ । ५४ ॥ श्वेतम् ३ श्वेत्रम् ४ । इति तट्टीका ।
तस्य निदानपूर्ब्बिका संप्राप्तिर्यथा ।
"विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्दिं वेगांश्चान्यान् प्रतिघ्नताम् ॥
व्यायाममतिसन्तापमतिमुक्ता निषेविणाम् ।
प्रीतोष्णाभ्यङ्गनाहारान् क्रमं मुक्ता निषेविणाम् ॥
घर्म्मश्रमभयार्त्तानां द्रुतं प्रीताम्बुसेविनाम् ।
अजीर्णाध्यशिनाञ्चैव पयसकर्म्मापचारिणाम् ॥
नवान्नदधिमत्स्यातिसवाम्लनिषेविणाम् ।
मांसमूलकपिण्याम्लतिलक्षीरगुड़ाग्निनाम् ॥
व्यायामस्याप्यजीर्णेऽन्ने निद्रां च भजतां दिवा ।
विप्रान् गुरून् धर्षयतां पापं कर्म्म च कुर्व्वताम् ॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव तु ।
कुष्ठानि सप्तधा दोषैः पृथगद्वन्द्वैः समागतैः ।
सर्व्वैश्चापि त्रिदोषेषु व्यपदेशोऽधिकत्वतः" ॥ * ॥
तस्य पूर्व्वरूपं यथा ।
"अतिस्निग्धः खरः स्पर्शः खेदासेदौ विवर्ण्यता ।
दाहः कण्डूस्त्वचि स्रावपरुतोदः कोठोन्नतिर्भ्रमः ॥
व्रणानामधिकं शूनं श्रीव्रोत्पत्तिश्चिरस्थितिः ।
रूढ़ानामतिरूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् ।
रोमहर्षोऽङ्गनः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्" ॥ * ॥
तच्च वातादिभेदेन अष्टादशप्रकारम् ।
तच्च सप्तमहाकुष्ठानि यथा ।
"ब्रह्मारक्षकपालाभं यत्कृष्णं पवनं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ॥ १ ॥
रक्तदाहरागकण्डूभिः परीतं रोमपिप्लरम् ।
उदुम्बरपलाशाभं कुष्ठमौदुम्बरं वदेत् ॥ २ ॥
श्वेतं रक्तं स्थिरं श्यामं स्निग्धमुत्सन्नमण्डलम् ।
ज्ञेयमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ॥ ३ ॥
कर्कशं रूक्षपर्य्यन्तमन्तःश्यावं सवेदनम् ।
यदृक्ष्यजिह्मसंस्थानमृष्यजिह्वं तदुच्यते ॥ ४ ॥
सश्वेतं रूक्षपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते ॥ ५ ॥
श्वेतं ताम्रं तनु च यद्गत्वा घृष्टं विमुञ्चति ।
प्रायशोरसि तत् सिध्मालावुकुसुमोपमम् ॥ ६ ॥
यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥ ७ ॥
एकादशक्षुद्रकुष्ठानि यथा ।
"अखेदनं महाकालु यन्मत्स्यसकलोपमम् ।
तदेव कुष्ठं चर्म्माख्यं बहलं हस्तिचर्म्मवत् ॥ १ ॥
श्यावं किणखरस्पर्शं पवनं किटिमं स्मृतम् ॥ २ ॥
वैपादिकं पाणिपादस्फुटितं तीव्रवेदनम् ॥ ३ ॥
कण्डुमद्भिः सरागैश्च गण्डैरजसकं चितम् ॥ ४ ॥
सकण्डुरागपिड़कं दद्रुमण्डलमुद्गतम् ॥ ५ ॥
रक्तं सस्रूषं कण्डूमत् सस्फोटं यद्गलत्यपि ।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते ॥ ६ ॥
सूक्ष्मा बह्व्यः पिड़काः स्रावयत्यः
पामेत्युक्ताः कण्डुमत्यः सदाहाः ॥ ७ ॥
सैव स्फोटैस्तीव्रदाहैश्चयेता

कुष्ठः

ज्ञेया पाण्वोः कच्छुरख्यास्फिचोश्च ॥ ८ ॥
स्फोटाः श्यावारुणा भासा विस्फोटाः सुप्ततुल्यरुजः ॥ ९ ॥
रक्तं श्यावं सदाहार्त्ति घृतारुः स्याद्बहुस्रवम् ॥ १० ॥
सकण्डुपिड़का श्यावा बहुस्रावा विचर्च्चिका" ॥ ११ ॥
इति माधवकरः ॥

कुष्ठः, पुं, (कुष्णाति शरीरस्यशोणितं विकुरुते इति । निष्कर्षार्थकस्य कुष् धातोरत्र विकारार्थत्वं बोध्यते धातूनामनेकार्थत्वात् । कुष् निष्कर्षे + "इनिकुषीति" । उणां २ । २ । इति क्थन् ।) खगामख्यातरोगः ।
तस्य निदानं पूर्व्वलिखितम् । औषधं यथा ।
"सर्व्वकुष्ठेषु वमनं रेचनं रक्तमोक्षणम् ।
वचावासापटोलानां निम्बस्य खदिरस्य च ॥
कषायो मधुना पीतो वातरक्तमदान्वितः ।
विरेचनं प्रयोक्तव्यं त्रिवृद्दन्तीसप्तलाभिः ॥
मनःशिला मरीचानि तैलपाकं पयो हरेत् ।
सर्व्वकुष्ठानुलेपोऽयं शिवा पक्षगुडोदनम् ॥
करञ्जैड़गजौ कुष्ठं गोमूत्रेण प्रलेपतः ।
करवीरोदुम्बरञ्च तैलाक्तस्य तु कुष्ठहृत् ॥
हरिद्रामलयं राला गुड़ूचेड़गजस्तथा ।
आरग्वधः करञ्जश्च लेपः कुष्ठहरः परः ॥
मनःशिला विड़ङ्गानि वाकुची सर्षपस्तथा ।
करञ्जो मूत्रपिष्टोऽयं लेपः कुष्ठहरोऽर्कवत् ॥
विड़ङ्गैड़गजाकुष्ठनिशोन्मत्तसर्षपैः ।
मूत्राम्बुपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः ॥
प्रपुन्नाटकबीजानि धात्री सर्ज्जरसः स्नुही ।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम् ॥
आरग्वधस्य पत्राणि आरगालेन पेषयेत् ।
दद्रुक्रिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥
उष्णा पीता वाकुची च कुष्ठजित् क्षीरभोजिनः ।
तिलाज्यक्षीराच्छौद्रगोमक्षातशर्करः ॥
दध्यः सप्तसमो मेध्यः कुष्ठहा कामचारिणः ।
विड़ङ्गत्रिफलाक्षाद्यां लौहं समाक्षिकम् ॥
हन्ति कुष्ठं क्रमान्मेहगण्डौदरव्रणगन्दरान् ।
यः खादेदमयारिष्टामलकानि तथा निशा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्धं न संशयः ।
दक्षमागाच्युतः कुम्भे मूलके खदिराङ्कुरः ॥
साक्षधात्रीरसक्षौद्रं हन्यात् कुष्ठं रसायनम् ।
धात्रीखदिरयोः क्वाथं पीत्वावश्यायसंयुतम् ॥
शुक्लेन्दुधवलं स्निग्धं हन्ति तूर्णं न संशयः ।
पीत्वा भल्लातकं तैलं मांसखादिं जयेन्नरः ॥
सेवितं खादिरं वारि पाणाद्यैः कुष्ठजिद्भवेत् ।
वासा गुड़ूची त्रिफला पटोलश्च करञ्जकम् ॥
निम्बासनं क्वाथयेत्तं क्वाथकल्केन यद्घृतम् ।
वक्त्रं तद्धरेत् कुष्ठं घृतं वर्षाणि जीवति ॥
खरसेन च दूर्व्वायाः पचेत्तैलं चतुर्गुणम् ।
कच्छुर्विचर्च्चिका पामा अभ्यङ्गादेव नश्यति ॥
द्रुमत्वगर्ककुष्ठानि जलजानि च मूत्रकम् ।
गवेधुकाया चित्रकैस्तैलं कुष्ठव्रणादिनुत्" ॥
इति गारुड़े १७५ अध्यायः ॥
"कुष्ठेन्द्रयवसिद्धार्थनिशा दूर्व्वा च कुष्ठजित्" ॥
इति तत्रैव १७६ अध्यायः ॥

कुष्ठः

"करवीरं भल्लराजं लवणं कुष्ठमर्कम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ।
पामां विचर्चिकां कुष्ठमभ्यङ्गाद्धि न्यानि वै" ॥
"सैन्धवच्च विड्ङ्गानि सोमराजी तु सर्षपाः ।
रजनी दे विषाच्चैव गोमूत्रेण च पेषयेत् ।
कुष्ठनाशच्च तत्तैलमाम्लपत्राद्नात्तथा" ॥
इति च गारुडे १८७ अध्यायः ॥
"सतक्रकाग्रमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै कुष्ठरोगनुत्" ॥
इति गारुडे १८८ अध्यायः ॥
"पीतं दन्तिकमूलन्तु पर्युषितजलेन वै ।
सार्द्धं विनाग्नयेद्दाहज्वरच्च परमेश्वर ! ॥
शिखायाच्चैव तद्भस्मं भवेदैकाहिकादिनुत् ।
एतत् सकाञ्जिकं पीतं वातकुष्ठज्वरादिनुत्" ॥
इति गारुडे १९३ अध्यायः ॥
"नित्यं निम्बदलानाच्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विड्ङ्गच्च हरिद्रा सितसर्षपाः ।
सोमराजस्य बीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च" ॥
बीजानि स्थाने मूलानि वा पाठः ।
इति तत्रैव १९४ अध्यायः ॥
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकङ्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुश्चीरकस्तूर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च वोलं मदनकं गवम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम्" ।
इति गारुडे १९८ अध्यायः । * ॥

अथ वैद्यकमते कुष्ठचिकित्सामाह ।
"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ।
पुराणधान्यानि च जाङ्गलानि
मांसानि मुद्गाश्च पटोलयुक्ताः ।
यवादयश्चात्र हिताः पुराणा
घृतानि शाकानि च तिक्तकानि" ॥
तन्त्रान्तरे ।
"पुराणाः शालिगोधूममुद्गाद्याः कुष्ठिनो हिताः ।
तिक्तशाकं जाङ्गलञ्च पानादौ खदिरोदकम् ॥
ये लेपाः कुष्ठानां यत्यन्ते निर्गताखदोषाणाम् ।
संशोधिताशयानां सद्यः सिद्धिर्भवेत्तेषाम् ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।
एभिः प्रलेपैरपि बद्धमूलां
कण्डूञ्च दद्रुञ्च निवारयन्ति ॥
तुल्यो रसः शालतरोस्तथैव
सचक्रमर्दोऽप्यभयाविमिश्रः ।
पानीयमुष्णेन तदक्तपिष्टो
लेपः कृतो दद्रुगजेन्द्रसिंहः ।
विड्ङ्गैर्दन्तिगजाकुष्ठनिम्बाग्निन्यूत्यसर्षपैः ।
धान्याम्लपिष्टैर्लेपोऽयं दद्रुकुष्ठविनाशनः ।

कुष्ठः

एड़गजकुष्ठसैन्धवसौवीरसर्षपैः क्रिमिघ्नैः ।
क्रिमिसिध्मदद्रुमण्डलकुष्ठानां नाशनो लेपः ॥
पर्णानि पिष्ट्वा चतुरङ्गुलस्य
तक्रेण पर्णान्यथ काकमाच्याः ।
तैलाक्तगात्रस्य नरस्य कुष्ठा-
न्युद्वर्त्तयेदम्बहनच्छदेन ॥ ५ ॥
विड्ङ्गसैन्धवशिवाग्न्यग्निरेखा-
सर्षपकरञ्जरजनीभिश्च ।
गोजलपिष्टो लेपः
कुष्ठहरो दिवसनाथसमः ॥ ६ ॥
कासमर्दकमूलञ्च काञ्जिकेन प्रपेषितम् ।
दद्रुकिट्टिमकुष्ठानि जयेदेतत्प्रलेपनात् ॥ ७ ॥
आरग्वधस्य पत्राणि चारनालेन पेषयेत् ।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥ ८ ॥
चक्राक्रयं खुहीक्षीरं भावितं मूत्रसंयुतम् ।
रवितप्तं हि किञ्चित्तु लेपनं किट्टिमापहम् ॥ ९ ॥
शिखरीरसेन सुपिष्टं मूलकबीजं प्रलेपतः सिध्म ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ॥१०॥
॥ ११ ॥
सक्षारं गन्धकं लेपात् कटुतैलेन सिध्मजित् ॥
कासमर्दकबीजानि मूलकानां तथैव च ॥१२॥१३॥
गन्धाश्मचूर्णमिश्राणि सिध्मानां परमौषधम् ॥
उपदेशात् काञ्जिकपिष्टैर्लेपः ॥ १४ ॥
गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं व्रजत्याशु कटुतैलयुतेन च ॥
द्वयं समं कटुतैलेन लेपः ॥ १५ ॥
कुष्ठं मूलकबीजं प्रियङ्गवः सर्षपास्तथा रजनी ।
एतत् केशरयुक् निहन्ति बद्धवार्षिकं सिध्म ॥१६॥
नीलकुसुमरसकल्पैरालिप्य गात्रमतिबद्धश्रमः ।
लिम्पेन्मूलकबीजैः पिष्टैस्तक्रेण सिध्मनाशाय ॥१७॥
एड़गजातिलसर्षपकुष्ठं मागधिकालवङ्गयवमधु ।
पूतिहृतं दिवसत्रयमेतद्धन्ति विचर्चिकदद्रुकुष्ठम्
॥ १८ ॥
सिन्दूरमरिचचूर्णं महिषीनवनीतसंयुतं बद्धश्रमः ।
लेपान्निहन्ति पामां तैलं करवीरसिद्धं वा ॥१९॥२०॥
पारदं शुल्वगन्धञ्च शिलाचोत्तरवाग्वी ।
प्रपुन्नाड़ञ्च सर्पाक्षिमेघनादाग्निलाङ्गली ॥
उत्तरवाग्वी, राखालशुण्ठा इति ख्याता ॥
भल्लातं सहधूमञ्च सुनिगुप्ता खुहीपयः ।
अरिष्टञ्च गुड़ः क्षौद्रं वागुजीबीजतुल्यकम् ॥
गोमूत्रैरारनालैर्व्वा पिष्ट्वा लेपञ्च कारयेत् ।
दद्रुमण्डलकण्डूञ्च विचर्चिञ्च विनाशयेत् ॥ २१ ॥
मनःशिलाले मरिचञ्च तैल-
माकं पयः कुष्ठहरः प्रलेपः ॥ २२ ॥
विमर्दबद्धहरिद्राचित्रकागारधूम-
मनशमरिचदूर्व्वाक्षीरमर्कखुहीभ्याम् ।
दहति पतितमात्रात् कुष्ठजातीरशेषाः ।
कुणिग्रमिव सरोमाच्छकहस्तादिमुक्तम् ॥
अत्र अनलं भल्लातकः ॥ २३ ॥
भल्लातका दीपि सुधार्कमूलं
गृञ्जाफलन्यूषणशुल्वचूर्णम् ।
तुल्यं सकुष्ठं लवणानि पञ्च

कुष्ठः

क्षारद्वयं लाङ्गलिकाश्च पक्वा ॥
खुह्यर्कदुग्धं घनमायसस्थं
श्लक्ष्णकृता तद्दिदधीत लेपम् ।
कुष्ठे किलासे तिलकालके च
अग्नेयदुर्नामसचर्म्मकीले ॥
भल्लातका दीपि चित्रकं तन्मूलम् ॥
एषां समभागचूर्णं सिजार्कयोः क्षीरे दत्त्वा किञ्चित् पाकं कुर्य्यात् । अथ वा क्षीरद्वयं चतुर्गुणं चूर्णं पादिकं लेपयोग्यं पाकं कुर्य्यात् । श्लक्ष्णकृता कुष्ठस्थाने दद्यात् ॥ २४ ॥
"सुक्काण्डशुण्ठीरे दग्ध्वा सहधूमं ससैन्धवम् ।
अन्तर्धूमं तैलयुक्तं लेपाद्धन्ति विचर्चिकाम्" ॥
सिजनलके सैन्धवसहधूमं समभागं प्रपूर्य्य स्थाल्यन्तरे क्षात्वा शरावेण पिधाय दग्ध्वा पिष्ट्वा कटुतैलेन लेपः ॥ २५ ॥
"सुक्काण्डे सर्षपात् कल्कः कुकूलानलपाचितः ।
लेपाद्विचर्चिकां हन्ति रागवेग इव त्रपाम्" ॥
सिजनलके राद्धकल्कं प्रपूर्य्य शुष्कगोमयाग्नौ दग्ध्वा कटुतैलेन लेपः ॥ २६ ॥
"नारिकेलोदरे न्यस्तस्तद्वत्तुलः पूतितां गतः ।
लेपाद्विपादिकां हन्ति चिरकालानुबन्धिनीम् ॥२७
तिलकुसुमलवङ्गगोजलकटुतैलं लौहभाजने क्षात्वा ।
ग्रोषितमर्कमयूखैः पादस्फुटनं निहन्ति लेपेन" ॥२८
"उन्मत्तकस्य बीजेन माक्षिकक्षारवारिणा ।
कटुतैलं विपक्वं शीघ्रं हन्ति विपादिकाम्" ॥
कटुतैल शुं ४ माक्षिकलपत्राणां क्षार पल ६४ जल शुं ६४ श्वेत शुं १६ कल्क धुस्तूरबीज पल ८ । उन्मत्ततैलम् ॥ २९ ॥
"अवशुष्कं कासमर्दं चक्रमर्दं निशायुगम् ।
माक्षिकञ्चैव तुल्यांशं भल्लकाक्षिकपेषितम् ॥
कण्डूं कच्छूं जयत्येषां सिद्ध एष प्रयोगराट् ॥३०॥
कोमलसिंहास्यदलं सनिशं सुरभीजलेन पिष्टम् ।
दिवसत्रयेण नियतं क्षपयति कच्छूं विलेपनतः ॥३१
"वायसेड़गजाकुष्ठलाक्षाभिर्गुड़िका कृता ।
वस्तमूत्रेण संपिष्टा लेपाच्छित्रविनाशिनी" ॥
समभागचूर्णं छागमूत्रेण पिष्ट्वा गुड़िका कार्य्या । तेनैव लेपः ॥ ३२ ॥
"पूतिकार्कखुकण्डरेन्द्रद्रुमाणां
मूत्रैः पिष्टा पल्लवाः सौमराज्याः ।
लेपाच्छित्रं हन्ति दद्रुव्रणांश्च
कुष्ठान्यर्शांस्यञ्जनागादीव्रणांश्च" ॥
सौमरा जातीपत्री । सर्व्वत्र पल्लवान् गोमूत्रेण पिष्ट्वा लेपो देयः ॥ ३३ ॥
"गजचिल्याग्रचर्म्मसीतैलविलेपनात् ।
श्वित्रं नाशं व्रजेत् किं वा पूतिकीटविलेपनात्" ॥
गजचर्म्म चित्रकोमल्याग्रचर्म्म अनयोर्मध्ये कटुतैलञ्च लेपः । अथवा पादुड़ियाकीटं पिष्ट्वा लेपः ॥ ३४ ॥ ३५ ॥ "कुड़वोऽवशुजवीजात् हरितालचतुर्थभागसंमिश्रः । गवां मूत्रेण पिष्टः खदिरकरञ्जः परं श्वित्रे" ॥ आयुर्व्वेदसारेऽपि ।
"कुड़वो वागुजीबीजात् हरितालपलान्वितः ।
गवां मूत्रेण संपिष्य लेपनात् श्वित्रनाशनम् ॥३६॥

कुष्ठः

धात्रीखदिरयोः क्वाथं पीत्वा च मधुसंयुतम् ।
शङ्खकुन्देन्दुधवलं जयेच्छित्रं न संशयः ॥ ३७ ॥
धात्रीखदिरयोः क्वाथमवल्गुजरजोऽन्वितम् ।
पीत्वा शङ्खेन्दुकुन्दाभं हन्ति श्वित्रं न संशयः॥३८॥

क्षारे सुदग्धे गजलण्डजे च
गजस्य मूत्रेण वरुऽश्रुते च ।
द्रोणप्रमाणं दशभागयुक्तं
दत्त्वा पचेत् बीजमवल्गुजस्य ॥
एतत्पुरा सिद्धजनैरुपैति
तदाशु सिद्धां गुटिकां प्रकुर्य्यात् ।
श्वित्रं प्रलिम्पेदथ तेन दृष्टं
तदा व्रजत्याशु खवर्णभावम् ॥ ३९ ॥

श्वेतजयन्तीमूलं पीतं पिष्ट्वा पयसैव ।
श्वित्रं विहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥४०॥
गुञ्जापत्रामिचूर्णन्तु लेपितं श्वेतकुष्ठनुत् ।
शिलापामार्गभस्मापि लिप्त्वा श्वित्रं विनाशयेत् ॥
४१ ॥ ४२ ॥

एरण्डतुलसीबीजं वाकुची चक्रमर्दकम् ।
तिक्तकोशातकीबीजं छाग्याश्चोष्ठस्य बीजकम् ॥
गोमूत्रदधिदुग्धैश्च पचेदभ्याजमूत्रकैः ।
कल्कं दत्त्वा शिला काशी पथ्या कुष्ठं विड्ङ्गकम्।
कटुतैलञ्च तल्लेपाद्धृत्वा दृष्ट्वा विलेपनैः ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलापहम्" ॥
कटुतैल प्रं ४ क्षाग्यरण्डबीजादीनां मिलित्वा प्रं २ कल्कशिलाकाशादीनां मिलित्वा प्रं १ ।
इति श्वित्रे पञ्चाननतैलम् ॥ ४३ ॥

"आरग्वधं धवं कुष्ठं हरितालं मनःशिला ।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित् ॥
एतेनाभ्यङ्गमादेव क्षिप्रं श्वित्रं विनश्यति" ॥
तिलतैल प्रं ४ पा प्रं १६ कल्कमिलित प्रं १ ।
इति आरग्वधाद्यं तैलम् ॥ ४४ ॥

"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवाकुची ।
भल्लातकं तिलाः क्षाग्यो निम्बबीजं समं समम् ।
मर्द्दयेद्भृङ्गजद्रावैः श्लोक्ष्णं पेष्यं पुनः पुनः ॥
इत्थं कुर्य्यात्क्षिसप्ताहं रसः श्वेतारिको भवेत् ।
मध्याह्नेनिंष्कमात्रन्तु खादेत् श्वेतं विनाशयेत्"॥
इति श्वेतारिः ॥ ४५ ॥

"पिबति सकटुतैलं गन्धपाषाणचूर्णं
रविकिरणसुतप्तं पामनो यः पलार्द्धम् ।
त्रिदिनतदनुक्षिप्तः क्षीरभोजी च श्लोक्षं
भवति कनकदीप्तिः कामरूपी मनुष्यः"॥ ४६॥

"तीव्रेण कुष्ठेन परीतदेहो
यः सोमराजीं नियमेन खादेत् ।
संवत्सरं क्षाग्यतिलद्वितीयां
स सोमराजीं वपुषाऽतिशेते ॥ ४७ ॥

धर्म्मसेवी कटुक्षेण वारिणा वाकुचीं पिबेत् ।
क्षीरभोजी च सप्ताहात् कुष्ठी कुष्ठं व्यपोहति ॥४८
अवल्गुजबीजकल्कं पीत्वा कोष्णेन वारिणा ।
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठविनाशनम् ॥ ४९ ॥
क्षिन्नायाः खरसो वापि सेव्यमानो यथाबलम् ।
जीर्णे घृतेन भुञ्जीत मुद्गयूषौदनेन च ।
व्यपि पूतिशरीरोऽपि दिव्यरूपी भवेन्नरः ॥ ५० ॥

कुष्टः

यः खादेदभयारिष्टमरिष्टामलकानि वा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्धं न संशयः ॥५१॥५२॥

निम्बस्य पत्रं मूलानि सत्वक्पुष्पफलानि च ।
चूर्णितानि घृतक्षौद्रसंयुतानि दिने दिने ॥
लिह्यात् पिबेद्वा मूत्रेण संयुक्तान्युदकेन वा ।
मदिरामलतोयेन पयसा वा यथाबलम् ॥
भुञ्जीत घृतयूषाद्यैः शाल्यन्नं पयसापि वा ।
सर्व्वकुष्ठविसर्पार्शोगाण्डीदुष्टव्रणानपि ॥
कामलाञ्च गदानन्यांस्तथा पित्तकफाखजान् ।
संवत्सरप्रयोगेण सर्व्ववर्ज्यंविवर्ज्जितैः ॥
जयत्येतत् पञ्चनिम्बं रसायनमनुत्तमम्" ॥
इति पञ्चनिम्बम् ॥ ५३ ॥

"पुष्पकाले च पुष्पाणि फलकाले फलानि च ।
संचूर्ण्य पिप्पलीसूक्ष्मचूर्णानि दलानि च ॥
दिरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफलायुग्मं ब्रह्मी खदंष्ट्राखकराग्निकाः॥
विड्ङ्गसारवाराहीलौहचूर्णामृताः समाः ।
हरिद्राद्वयावल्गुजाद्यधिधातुः सप्तकैराः ॥
कुष्ठेन्द्रयवपाठाश्च क्षत्वा चूर्णं सुसंयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बस्य मार्कवस्वरसेन च ।
स्निग्धशुद्धतनुर्धीमान् योजयेच्च शुभे दिने ॥
अधुना तिक्तदृविधा खदिरासनवारिणा ।
सेव्यमुष्णाम्बुना वापि कोलदृक्षा पलं पिबेत् ॥
तिक्तदृविधा वक्ष्यमाणपञ्चतिक्तघृतेन ॥
जीर्णे च भोजनं कार्य्यं स्निग्धं लघु हितञ्च यत् ॥

विचर्च्चिकोडुम्बरपुष्करीक-
कपालदद्रूकिटिमालसादि ।
घृतासविस्फोटविसर्पपामां
कुष्ठप्रकोपं विविधं किलासम् ॥
भगन्दरं क्षीपदवातरक्तं
जड़ान्ध्यगाड़ीव्रणशीर्षरोगान् ।
सर्व्वप्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
शूलोदरः सिंहकशोदरञ्च
सुस्निग्धसन्धिर्मधुनोपयोगात् ।
समीपयोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
सुखे रतस्त्रन्द्रसमानकान्तिः" ॥
इति पञ्चनिम्बः ॥ ५४ ॥

"अमृतायाः पलशतं दशमूल्याश्च तथा घृतम् ।
पाठामूर्व्वावलातिक्तादार्व्वीगन्धर्व्वहस्तकाः ॥
एषां दशपलान् भागान् विभीतक्याः घृतं हरेत् ।
द्वे घृते च हरीतक्या आमलक्याश्च तथा घृतम् ॥
जलद्रोणद्वये पक्वा अष्टभागावशेषितम् ।
प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत् ॥
पाकसिद्धौ प्रदातव्यं गुड़ूच्याः सत्त्वमेव च ।
पलद्वयं तथा मुण्ड्याः पिप्पल्याश्च पलद्वयम् ॥
ततो मात्रां प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ।
अष्टादशसु कुष्ठेषु वातरक्तगदेषु च ॥
कामलामामवातञ्च अग्निमान्द्यं भगन्दरम् ।

कुष्ठः

पीनसञ्च प्रतिश्यायं शीघ्रमुदरं तथा ॥
एतान् रोगान्निहन्त्याशु भास्करस्तिमिरं यथा" ॥
अमृतागुग्गुलुः । अयं वातरक्ते प्रशस्तः ॥ ५५ ॥

"निम्बामृतात्रपटोलनिदिग्धिकानां
भागान् पृथग्दशपलान् विपचेद्घटेऽपाम्।
अष्टांशशेषितरसेन सुनिश्चितेन
प्रस्थं घृतस्य विपचेत् पिप्पलीभागकल्कैः ॥
पाठाविड़ङ्गसुरदारुगजोपकुल्या-
दिच्छारनागरनिशामिशिवश्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥
मल्लिष्ठयातिविषया वरया यमान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः ।
तत् सेवितं विधमति प्रबलं समीरं
सन्धिस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥
नाड़ीव्रणार्ब्बुदभगन्दरगण्डमाला-
जत्रूर्द्धसर्व्वगदगुल्मगुदोत्थमेहान् ।
वक्षोरुचित्रसनपीनसकासशोष-
हृत् पाण्डुरोगगलविद्रधिवातरक्तम्" ॥
इति पञ्चतिक्तघृतगुग्गुलुः ॥ ५६ ॥ * ॥

"श्वेतकरवीरमूलं विषांशुकं साधितं गोमूत्रे।
धत्तूरदलसिध्मपामाविस्फोटक्रिमिकिटिभजित्तैलम्"॥
तिलतैल ४ शेर, गोमूत्र १६ शेर, श्वेतकरवीरमूल ४ पल, विष ४ पल । करवीरतैलम् ॥ ५७ ॥

"मृतस्य क्षाग्यसर्पस्य शिरःपुच्छान्ववर्ज्जितम् ।
अन्तर्धूमं घृतं भक्ष्य वागुजीतैलमिश्रितम् ।
एतेन मर्दनादेव गलत्कुष्ठं विनश्यति" ॥
इति क्षाग्यसर्पतैलम् ॥ ५८ ॥

"सूतकं गन्धकं कुष्ठं सप्तपर्णञ्च चित्रकम् ।
सिन्दूरञ्च रसोनञ्च हरितालमवल्गुजम् ॥
आरग्वधस्य बीजानि जीर्णतक्रं मनःशिला ।
प्रत्येकं कर्षमेतेषां कटुतैलं पलाष्टकम् ॥
साधयेत् सूर्य्यतापेना सर्व्वकुष्ठविनाशनम् ॥
श्वित्रमौड्रं खरं कच्छूं मांसदृद्धिं भगन्दरम् ।
विचर्च्चिकाञ्च धामानं वातरक्तं सदारुणम् ।
गम्भीरञ्च तथोत्तानं नाशयेत् यस्य स्पर्शनात् ॥
कुष्ठराक्षसनामेदं खवर्णकरणं परम् ।
अश्विभ्यां निर्म्मितं ह्येतत् लोकानुग्रहहेतवे" ॥
इति कुष्ठराक्षसतैलम् ॥ ५९ ॥

"सूतं गन्धं शिला तालं काङ्क्षिकैर्मर्दयेद्दिनम् ।
तल्लिप्तवस्त्रवर्त्तीं तां तैलाक्तां ज्वालयेदधः ।
स्थिते पात्रे पचेत्तैलं गृहीत्वा लेपयेत्ततः ।
कुष्ठस्थानं विशेषेण सर्व्वकुष्ठं हरत्वलम् ।
इदं कालानलं तैलं वातकुष्ठे महौषधम्" ॥

"एषां समं काङ्क्षिकं सर्व्वेषां द्विगुणं तिलतैलम् ।
कल्कं वस्त्रे संक्षिप्य संशोष्य वर्त्तीं कुर्य्यात् तां तैलाक्तां सन्दंशिकया ज्वालयित्वा उपरि तैलं दत्त्वा ततः पतितं तैलं अधःपात्रे गृह्णीयात् ततः कुष्ठस्थाने दद्यात्" ॥

इति कुष्ठकालानलतैलम् ॥ ६० ॥

"सिन्दूराभ्रतालगैरिकहलाजाजीगदध्यूषकै-
र्हृत्पाषाणरसोनवाणदहनक्षुद्रार्कदुग्धैर्विशा।

कुष्ठः

राजीगन्धकहिङ्गुभिः परिमितैः श्लक्ष्णा पचेत् सार्षपं
तैलं प्रस्थमितं घृतस्य कुडवं पात्रं तथार्कद्रवम्"।
हृत्वाबाद्यं मनःशिला।
"गोमूत्रञ्च तथा विनीय सकलं पूतं घृतं रोगिणे
दद्यात् कुष्ठविचर्चिकादिषु भिषक् नान्या तु षड्-
विन्दुकम्"। इति षड्विन्दुतैलम्॥ ६१॥
"सर्व्वकुष्ठे सर्व्वव्रणे सर्व्वत्र गलिते क्षते।
नक्तमालं हरिद्रे द्वे अर्कं तगरमेव च॥
करवीरवचाकुष्ठं आस्फोता रक्तचन्दनम्।
मालती सिन्धुवारञ्च मल्लिका सप्तपर्णकम्॥
एषामर्द्धपलान् भागान् विषस्य द्विपलं तथा।
चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत्॥
श्वित्रविस्फोटकिटिमकीटलूताविचर्चिकाः।
कण्डूकच्छुरिकायाञ्च ये व्रणा विषदूषिताः॥
ते सर्व्वे नाशमायान्ति तमः सूर्य्योदये यथा॥
विषतैलमिदं नाम्ना सर्व्वव्रणविशोधनम्"॥
इति विषतैलम्॥ ६२॥
"सोमराजी हरिद्रे द्वे सर्षपाः कुष्ठमेव च।
करञ्जैड़गजावीजं यवाक्षारवधस्य च।
विषचेत् सार्षपं तैलं गाढ़ीदुग्धप्रलायहम्।
अनेनाशु प्रशाम्यन्ति कुष्ठान्यष्टादशैव तु॥
नीलिका पिड़का व्यङ्गा गम्भीरं वातशोणितम्।
कण्डूकच्छुप्रशमनं दद्रुपामानिवारणम्"॥
इति सोमराजीतैलम्॥ ६३॥
"सोमराजीतुलार्द्धार्धे यथा दद्रुघ्नस्य च।
गोमूत्रस्य तथा पात्रे कल्कं दत्त्वा विचक्षणः॥
विपचेत् कार्षिकैर्भागैः कटुतैलाढ़कं भिषक्।
चित्रकं लाङ्गलाख्या च नागरं कुष्ठमेव च॥
हरिद्रा नक्तमालञ्च हरितालं मनःशिला।
आस्फोतार्ककरवीरं सप्तपर्णञ्च गोमयम्॥
खदिरो निम्बपत्रञ्च मरिचं कासमर्दकम्।
एतानि श्लक्ष्णपिष्टानि कल्कं दत्त्वा विचक्षणः॥
हन्ति सर्व्वाणि कुष्ठानि क्रिमिदुष्टव्रणानि च।'
किटिमं दद्रुजातञ्च गात्रवैवर्ण्यमेव च॥
विश्रीर्णचर्म्ममांसादिदृढ़ीकरणमुत्तमम्।
प्राह्युरोगं तथा कण्डूं विसर्पं हन्ति दारुणम्।
ये चान्ये त्वगता रोगास्तांस्तु शीघ्रं व्यपोहति"॥
इति बृहत्सोमराजीतैलम्॥ ६४॥
"मरिचाब्दग्निसाब्दार्कपयोऽम्बारिजटाक्षिरत्।
श्लक्ष्णसविश्राक्षारक्त निश्यायुक्तदारुचन्दनैः॥
कटुतैलात् पचेत् प्रस्थं क्षुद्रैर्विषपलान्वितैः।
सगोमूत्रैस्तदभ्यङ्गाद्दुश्चित्रविनाशनम्॥
सर्व्वेष्वपि च कुष्ठेषु तैलमेतत् प्रशस्यते"॥
इति मरिचाद्यं तैलम्॥ ६५॥
"मरिचं चित्रता दन्ती क्षीरमार्कं श्लक्ष्णसः।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम्॥
विश्राक्षा करवीरञ्च हरितालं मनःशिला।
चित्रको लाङ्गलाख्या च विड़ङ्गं चक्रमर्द्दकम्॥
श्रीरीषं कुटजो निम्बः सप्तपर्णः क्षुद्रामृता।
शम्याको नक्तमालोऽब्दं खदिरं पिप्पली वचा॥
ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत्।
चाढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम्॥

कुष्ठः

मृत्पात्रे लौहपात्रे वा अग्निमर्दमिना पचेत्।
यक्षा तैलवरं क्षीतन्मन्दयेत् कुष्ठकान् व्रणान्॥
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च।
वलयः पलितं छाया नली व्यङ्गं तथैव च॥
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्य्यञ्च जायते।
प्रथमे वयसि स्त्रीणां यासां नश्यन्तु दीयते॥
परामपि जरां प्राप्य न म्लाना यान्ति नम्रताम्।
वलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीड़ितः॥
त्रिभिरभ्यङ्गनैर्गाढ़ं भवेन्मारुतविक्रमः"॥
कटुतैल १६ शेर, गोमूत्र ६४ शेर, कल्कार्थं
मरिचादीनां प्रत्येकं १ पल, विष २ पल।
इति बृहन्मरिचाद्यं तैलम्॥ ६६॥
"सप्तपर्णत्वचा काली गुड़ूची पिचुमर्द्दकम्।
श्रीरीषञ्च महातिक्ता जया तुम्बी मृगादनी"॥
काली कालिया लता।
"निशाद्वयपलान् भागान् जलद्रोणे विपाचयेत्।
तैलप्रस्थं समादाय गोमूत्रञ्च चतुर्गुणम्॥
आरग्वधो भृङ्गराजो जयाधुस्तूररास्नयः।
इन्द्राग्निमिश्रवर्ब्बूरं गोमयार्कक्षुद्रीच्छदम्॥
तैलतुल्यं प्रदातव्यं खरसञ्च पृथक् पृथक्।
महाकालवचा ब्राह्मी तुम्बामिस्टङ्कणिका॥
कुचेला कुलका रात्रिमेघनामा च ग्रन्थिका।
सम्याकमर्कक्षीरञ्च कासुन्देश्वरमूलकम्"॥
कासुन्दमूलकं कालकासुन्दामूलम्। कासुन्दः
खरमर्द्दकमिति क्वचित्पाठः तन्मते ईश्वरमूलस्थाने
अपामार्गमूलम्॥
"आखु सिग्रु महातिक्ता विशाला कृपिपत्रकम्।
पूतिकास्फोत मूर्व्वा च सप्तपर्णं शिरीषकम्"॥
कृपिपत्रकं विष्कातिपत्रम्॥
"कुटजं पिचुमर्द्दञ्च महानिम्बं तथैव च।
गुड़ूची चक्ररेखा च सोमराट् चक्रमर्द्दकम्॥
तुम्बुरुभृङ्गवल्याढ्यकन्दकं कटुरोहिणी।
घटोदार्व्वी चिरत् पद्मग्रन्थिकागुरुपुष्करम्॥
कर्पूरं कट्फलं मांसी मुरेलाटरसामयम्।
एतेषां कार्षिकैः कल्कैर्नाम्ना कन्दर्प उच्यते॥
अष्टादशविधं कुष्ठं ग्रन्थिमज्जगतं तथा।
हस्तपादाङ्गुलीसन्धिगलितं सर्व्वसन्धिषु॥
अधिकानि च मांसानि यस्य गात्रे भविष्यति।
नासाकर्णास्यवैकल्यं भेकाकारवपुस्त्वचम्॥
श्वेतं रक्तं तथा कुष्ठं नानावर्णं विपादिकम्।
श्वित्रं बहुविधञ्चैव वातशोणितमेव च॥
कपालं क्रिमिजं कुष्ठं कण्डूदद्रुविचर्चिकाम्।
पामादिस्फोटकादीनि क्रिमिहृद्धिं तथैव च॥
कटीदर्द्रुं मसूरीञ्च किटिमं रक्तमण्डलम्।
कुष्ठमौड़म्बरं पद्मं महापद्मं तथैव च॥
गलगण्डार्ब्बुदं हन्याद्गण्डमालां भगन्दरम्।
वातजं पित्तजञ्चैव श्लेष्मजं सान्निपातिकम्॥
एकोल्बणं द्व्युल्बणञ्च कुष्ठं हन्यान्न संशयः"॥
इति कन्दर्पसारतैलम्॥ ६७॥ *॥
"महातिकानां पवनोद्धतानां
हन्तव्यदाने यदाढ़कं स्यात्।
तच्चेरकाचूर्णकजैर्विदध्य

कुष्ठः

प्रक्षालयित्वा विक्षेत् प्रवाते।
शुल्बं पुनस्तद्दिवसीद्धृतञ्च
ततः पचेदम्बु चतुर्गुणास्तु।
तत्पादशेषं परिपूतशीतम्
क्षीरेण तुल्येन पुनः पचेत्तु॥
तद्दर्द्धया शर्करया विकीर्णं
ततः खलेगोन्मथितं विधाय।
तत् सप्तरात्रादुपजातवीर्य्यं
सुधारसादप्यधिकत्वमेति॥
प्रातर्विबुद्धः कृतदेवकार्य्यो
मात्राञ्च खादेत् स्वशरीरयोग्याम्।
न चान्नपाने परिहार्य्यमस्ति
न चातपे चाध्वनि मैथुने च॥
यथेष्टचेष्टो विहितोपयोगा-
द्भवेन्नरः कान्तनराग्निगौरः।
अनन्यमेधा नरसिंहतेजा
हृषीन्द्रियोऽत्याहृतबुद्धिसत्त्वः॥
दन्ताश्च शीर्य्यन्ते पुनरुद्भवन्ति
केशाश्च शुक्लाः पुनरेव दिग्याः।
नीलाञ्जनाभिप्रतिमा भवन्ति
त्वचो विवर्णाः पुनरेव दिग्याः॥
विश्रीर्णकर्णाकुलिनासिकोऽपि
क्रिम्यर्दितो भिन्नगलोऽपि कुष्ठी।
सोऽपि क्रमादङ्गुरितायशाख-
स्तरुर्यथा भाति नभोऽम्बुसिक्तः॥
उद्वान् मयूरान् जयति स्वरेण
वर्णेन नागस्तुरगो जवेन।
रसायनस्यास्य नरः प्रसादा-
द्बृहस्पतेरप्यधिकोऽपि बुद्ध्या॥
यद्यान् विशालान् पुनरुक्तिदोषान्
मन्यति शीघ्रं न च नश्यते तु।
कुर्व्वन्निमं कल्पमनल्पबुद्धि-
र्जीवेन्नरो वर्षशतानि पञ्च॥
राजा ह्ययं सर्व्वरसायनानां
चकार योगं भगवानगस्त्यः"॥
इति अमृतभल्लातकम्॥ ६८॥
"निम्बं गोपाख्या कट्टी जायन्ती त्रिफला घनम्।
पथ्याटरूषजानन्तावचाखदिरचन्दनम्"॥
अरूषजं डाकुचबीजम्।
"पाठा शुण्ठी घटी भार्गी वासा भूनिम्बवत्सकम्।
श्यामेन्द्रवारुणी मूर्व्वा विड़ङ्गेन्द्रयवानलम्॥
हस्तिकर्णाम्लता द्वेका पटोलं रजनीद्वयम्।
कार्षारग्वधसप्ताङ्गक्वाथेनोद्धटापलम्"॥
द्वेका महानिम्बम्। कार्षारग्वधः शोणालिपत्र
मज्जा।
"भूकन्दं दलपर्णञ्च जिङ्गी पद्माटमूलजी।
विश्वक्सेना च कैटर्य्यं शरपुङ्खा क्षीरजतुकी॥
एषां द्विपलिकान् भागान् जलद्रोणे विपाचयेत्।
अष्टभागावशेषन्तु क्वाथमवतारयेत्॥
भल्लातकसहस्राणि त्रीणि छित्वार्द्धमेऽम्भसि।
चतुर्भागावशेषन्तु क्वाथमवतारयेत्॥
तौ कषायौ समादाय वस्त्रपूतौ च कारयेत्।

कुष्ठः

गुडस्य तु तुला ताभ्यां कषायं विपचेत् भिषक् ।
भल्लातकसहस्राणां मज्जानं तत्र दापयेत् ।
त्रिकटुत्रिफलासुस्तसैन्धवानां पलं पलम् ॥
दीपकस्य पलद्वैव धातुर्ज्ञातं पलांशिकम् ।
संचूर्ण्य प्रक्षिपेदत्र कन्दकल्कं चतुःपलम् ॥
स्निग्धभाण्डे विनिक्षिप्य स्थापयेत् कुशलो भिषक् ।
महाभल्लातको ह्येष महादेवेन निर्म्मितः ॥
जगतस्तु हितार्थाय जयेच्छीघ्रं न संशयः ।
स्निग्धमौद्गरं दद्रुघ्न्यक्षिकं सकाकजम् ॥
पुष्करीकल्कं चर्म्माख्यं विस्फोटं मण्डलं तथा ।
कण्डूं कपालं कण्डूश्च पामानं सविपादिकम् ॥
वातरक्तमुदावर्त्तं पाण्डुरोगं व्रणक्रिमीन् ।
अर्शांसि षट्प्रकाराणि कासं श्वासं भगन्दरम् ॥
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ।
अनुपाने प्रयोक्तव्यं क्षिप्राक्षयं पयोऽथवा ।
भोजने च सदा भोज्यमुष्णाम्भं विशेषतः" ॥

इति महाभल्लातकगुडः ॥ ६६ ॥

"ऊर्द्धाग्रमुखसंभूतं पलमेकं रसस्य वै ।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च ॥
गन्धकश्च पलैकमभ्रकस्य च गुग्गुलोः ।
हरीतकीविभीतक्योश्चूर्णं कार्षद्वयं द्वयोः ॥
अष्टमाभाधिकं तत्र धात्र्याः पाचितजानि षट् ।
घृतं द्वयङ्गुलं लोहात् दार्व्यिग्नित्रिफलाजलम् ॥
एवं ज्ञात्वा पचेत् पात्रे लौहे च विधिपूर्व्वकम् ।
पाकमेतस्य जानीयात् कुशलो लोहपाकविद् ।
विबुद्धः प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्द्दितम् ॥
लौहे लौहस्य दर्व्वेण कुर्य्यादेतन्नशायनम् ।
अनुपानञ्च कुर्व्वीत नारिकेलोदकं पयः ॥
सर्व्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम् ।
पाण्डुमेहामवातघ्नं वातरक्तक्षयापहम् ॥
क्रिमिग्रोथाग्निसादोरुशूलदुर्नामवातरोगनुत् ।
क्षयं हन्ति महाश्वासमत्यर्थं शुक्रवर्द्धनम् ।
अग्निसन्दीपनं हृद्यं कान्त्यायुर्बलवर्द्धिकृत् ॥
विवर्ज्य शाकाम्लमपि स्त्रियश्च
सेव्यो रसो जाङ्गलजाविकानाम् ।
शाल्योदनं यष्टिकमाद्यमुद्ग-
क्षौद्रं गुडः क्षीरमिह क्रियायाम् ।
शालिश्च गुर्व्वादिहितान्नरक्त-
स्निग्धाजतुल्यौद्रयुतं पयश्च ।
सर्पिर्युतं भक्षयतो विहङ्गान्
प्रपूर्य्यते दुर्ब्बलदेहधातुः ॥
शुक्लस्य पक्षस्य सिते तु पक्षे
त्रिपञ्चरात्रेण यथा शृणुष्व" ॥

पाकक्रमश्च यथा,—

"वह्नौ निष्पीड़ितं सूक्ष्मं सूत्रतन्त्रौ घने दृढ़े ।
समुद्गं जायते यत्नात् न निःसरति सन्धिभिः ।
न च शब्दायते वह्नौ तदा सिद्धं विनिर्द्दिशेत्" ॥

इति अमृताद्यूरजौघम् ॥ ७० ॥

"गन्धकेन हृतं ताम्रं दशभागं समुद्धरेत् ।
उभयं पञ्चभागं स्यादभ्रतश्च द्विभागिकम् ॥
दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः ।

कुष्ठः

गलिते स्फुटिते चैव विपुले मण्डले तथा ।
विपर्च्चिकादद्रुपामासर्व्वकुष्ठप्रशान्तये" ॥

इति उदयभास्करः ॥ ७१ ॥

"तालकं वंशपत्राख्यं कुम्भाग्रसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दग्धास्त्रेण तथैव च ।
शोधयित्वा पुनः शुल्वं चूर्णयेत् तद्रजोन्नतिः ।
ततः शरावके यत्ने स्थापयेत् कुशलो भिषक् ॥
वदरीपल्लवोत्थेन लेपनं कारयेत् ततः ।
अरत्नामधःपात्रं तावज्ज्वाला प्रदीयते ॥
खाङ्गशीतं समुद्धृत्य माक्षिकाभो भवेद्रसः ।
हृतचौद्रेण संमर्द्द खादयेन्नक्तिकाद्वयम् ।
संपूज्य देवदेवेशं कुष्ठरोगादिमुच्यते ।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम् ॥
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विपर्च्चिकाम् । [ज्ञान् ।
नाशयत्यसम्भवान् रोगान् ज्ञतान् हन्यात् सदारु-
पुष्करीकल्कं चर्म्माख्यं विस्फोटं मण्डलं तथा" ॥

इति रत्नमालिकम् ॥ ७२ ॥

"कुम्भाग्रचित्रफलातैलकन्याकाङ्क्षिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्दिनत्रयम् ।
प्रत्येकं भावयेच्छुल्वं चक्रिकाकारतां गतम् ॥
विपचेत् हस्तिकामध्ये पलाग्रक्षारमध्यगम् ।
यामान् द्वादश ग्रीतेऽस्मिन् प्रयोक्तव्यं रक्तिकाद्वयम् ।
हन्यस्त्रादश कुष्ठानि रोमविध्वंसनं तथा ।
द्विविधं वातरक्तञ्च नाड़ीदुष्टव्रणानि च" ॥

इति तालकेश्वरः ॥ ७३ ॥

"दद्रुघ्नवाक्षाङ्घ्रिरसं दत्त्वा तालं सचूर्णितम् ।
पुनः पुनश्च संमर्द्द शुल्वं ज्ञात्वा पुटे दहेत्" ॥
वाक्षाङ्घ्रिरसं शरपुङ्खपत्ररसम् ॥
दृढ़ख्यां हृतं क्षारं पाषाणक्षाण्यपर्य्यंधः ।
ततो ज्वाला प्रदातव्या दिनरात्रे मृतं भवेत् ॥
शुक्लवर्णो यदा च स्यादग्नौ दत्ते न धूमकम् ।
तदा ज्ञातं मृतं तालं सर्व्वकुष्ठविनाशनम् ॥
गलत् कुष्ठं वातरक्तं ताम्रवर्णञ्च मण्डलम् ।
शीतपित्तमहादद्रुकुच्छ्रन्दरविनाशनम् ।
पथ्यं मसूरचणकं मुद्गसूपं यथेच्छया" ॥

इति तालकेश्वरः ॥ ७४ ॥ अतिदृष्टफलोऽयम् ।

"संमर्द्द तालकं शुल्वं वंशपत्राख्यसूचकैः ।
कुम्भाग्रक्षीरे सम्भाव्य त्रिदिनं शोधयेत् पुनः ॥
हृतकन्याग्रवैर्भूयो भावयेच दिनत्रयम् ।
संमर्द्द काङ्क्षिकेनैव दग्धास्त्रेण विमर्द्दयेत् ॥
संमर्द्द चूर्णसलिले रसे पौनर्नवे पुनः ।
त्रिदिनं मर्द्दयित्वा तु कारयेत् खटिकाकृतिम् ॥
स्थाल्यां दृढ़तरायान्तु पलाग्रक्षारसञ्चयम् ।
उपर्य्यधस्तालकस्य क्षारं दत्त्वा शरावकैः ॥
पिधाय लेपयेत् यत्नात् पूरयेत् क्षारसञ्चयम् ।
पुनरर्द्धं शरावेण लेपयेत्तत् दृढ़ं ततः ॥
दातव्यं दग्धयामपर्य्यन्तं वह्निज्वाला प्रदीयते ।
एवं सिद्धेन तालेन गन्धतुल्येन मेलयेत् ॥
दयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रगं पचेत् ।
अयं तालेश्वरो नाम रसः परमदुर्लभः ॥
हन्यस्त्रादश कुष्ठानि वातग्रोथितनाशनः ।

कुष्ठारिः

रक्तमण्डलमत्युग्रं स्फुटितं गलितं तथा ॥
बहुरूपं सर्व्वजातं नाशयेदविकल्पतः ।
दुष्टव्रणञ्च वीसर्पं त्वग्दोषञ्च विनाशयेत् ॥
दृष्टो वारसहस्रञ्च रोगवारणकेशरी" ॥

इति महातालकेश्वरः ॥ ७५ ॥

"कुम्भाग्रचित्रफलातैलकन्याकाङ्क्षिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्दिनत्रयम् ।
प्रत्येकं भावयेच्छुल्वं चक्रिकाकारतां गतम् ॥
विपचेत् हस्तिकामध्ये पलाग्रक्षारमध्यगम् ।
यामान् द्वादशग्रीतेऽस्मिन् प्रयोक्तव्यं रक्तिकाद्वयम् ।
हन्यस्त्रादश कुष्ठानि रोमविध्वंसनादिकम्" ॥

इति तालकेश्वरः ॥ ७६ ॥

इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठचिकित्सा समाप्ता ॥

कुष्ठकेतुः, पुं, (कुष्ठस्यान्नाशकः केतुरिव ।) भूम्याऽऽमलकः । इति राजनिर्घण्टः ॥

कुष्ठगन्धि, क्ली, (कुष्ठस्येव गन्धोऽस्य । समासे इच् ।) एलवालुकम् । इति राजनिर्घण्टः ॥

कुष्ठघ्नः, पुं, (कुष्ठं हन्ति इति । हन् + टक् ।) हिताबली । इति राजनिर्घण्टः ॥

कुष्ठघ्नी, स्त्री, (कुष्ठघ्न + स्त्रियां टित्वात् ङीप् ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥
(वाकुची । अस्याः पर्य्याया यथा ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखा छत्रपत्रा सोमामृता फलीति च ।
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्या व्यवहारो यथा—
"कुटजाग्निनिम्बतरुखदिरासनसप्तपर्णनिर्यूहे ।
सिद्धा मधु-घृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः" ॥
इति वामटे चिकित्साख्याने १९ अध्याये ॥)

कुष्ठनाशनः, पुं, (कुष्ठं नाशयतीति । नश् + णिच् + ल्युः ।) वाराहीकन्दः । गौरसर्षपः । इति राजनिर्घण्टः । क्षीरीवृक्षः । इति रत्नमाला ॥

कुष्ठनाशिनी, स्त्री, (कुष्ठं नाशयतीति । नश् + णिच् + णिनिः । स्त्रियां नान्तत्वात् ङीप् ।) सोमराजिः । इति रत्नमाला ॥

कुष्ठलं, क्ली, (कु कुत्सितं स्थलम् । अम्बष्ठादित्वात् सत्वम् ।) कुत्सितस्थलम् । इति संक्षिप्तसारव्याकरणम् ॥

कुष्ठसूदनः, पुं, (कुष्ठं सूदयति नाशयतीति । सूदि + ल्युः ।) आरग्वधः । इति राजनिर्घण्टः ॥
(आरग्वधशब्दे गुणपर्य्याया अस्य ज्ञातव्याः ॥)

कुष्ठहन्ता, [ट्] पुं, (कुष्ठं हन्ति इति । कुष्ठ + हन् + टच् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

कुष्ठहन्त्री, स्त्री, (कुष्ठहन्तृ + स्त्रियां ऋदन्तात् ङीप् ।) वाकुची । इति राजनिर्घण्टः । हाकुच् इति भाषा ॥

कुष्ठहृत्, पुं, (कुष्ठं हरतीति । कुष्ठ + हृ + क्विप् तुगागमश्च ।) खदिरवृक्षः । इति चिकित्साशेषः ॥

कुष्ठारिः, पुं, (कुष्ठस्य अरिः शत्रुः नाशक इत्यर्थः ।)

विट्खदिरः। इति शब्दचन्द्रिका॥ पटोलः। आदित्यपत्रः। खदिरः। गन्धकः। इति राजनिर्घण्टः॥

कुष्ठी, [न्] त्रि, (कुष्ठः अस्यास्तीति। कुष्ठ+इनिः।) कुष्ठरोगयुक्तः। (यथा, मनुः। ३। ७। "क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च"॥)

कुष्मलं, क्ली, (कुष्+"कुटिकुषिभ्यां कमलन्"। उणां ४। १८६। इति कमलन्।) छेदनम्। विकशितम्। इत्युणादिकोषः॥

कुष्माण्डः, पुं क्ली, शिवस्य गणदेवताभेदः। (यथा, विष्णुपुराणे। १। १२। १३।

"कुष्माण्डा विविधै रूपैः सहेन्द्रेण महामुने!। समाधिभङ्गमत्यन्तं यारब्धाः कर्त्तुमातुराः"॥)

भूतविशेषः इति मेदिनी॥ (कुष्माण्डाकारत्वात् शिवगणभूतयोस्तथात्वम्॥ कु ईषत् उष्मा अण्डेषु बीजेषु यस्य।) वृहत्फलतताविशेषः। कुम्ड़ा इति कोहड़ा इति च भाषा। तत्पर्य्यायः। इक्षावासः २ तिमिषः ३ ग्राम्यकर्कटी ४। इति त्रिकाण्डशेषः॥ कुष्माण्डकः ५ कर्कारुः ६। इत्यमरः॥ पुष्पफलः ७। इति रत्नमाला॥ कुष्माण्डी ८ कर्कोटिका ९ कुभाण्डी १० वृहत्फला ११ सुफला १२ कुक्षफला १३ नागपुष्पफला १४ मुनी १५ कूष्माण्डः १६ शिखिवर्द्धकः १७। इति शब्दरत्नावली॥ कूष्माण्डकः १८। इत्यमरटीका॥

अपि च।

"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं वृहत्फलम्। कुष्माण्डं वृंहणं वृष्यं गुरुपित्तानिलापहम्॥ बालं पित्तापहं प्रोक्तं मध्यमं कफकारकम्। वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु॥ वस्तिशुद्धिकरं चेतोरोगहृत् सर्व्वदोषजित्"॥*॥

अथ कोहड़ी।

"कुष्माण्डी तु भवेत् स्वल्पा कर्कारुरपि कीर्त्तिता। कर्कारुर्ग्राहिणी प्रोक्ता रक्तपित्तहरा गुरुः। पक्वा तिक्तानिलजननी सक्षारा कफवातनुत्"॥

इति भावप्रकाशः॥ अस्य फलगुणाः। मूत्राघातप्रमेहहृल्लास्रशरीनाशित्वम्। विस्मूत्रश्लपनत्वम्। वृष्यार्त्तिश्रमनत्वम्। जीर्णाङ्गपुष्टिप्रदत्वम्। शुक्रवृद्धिकारित्वम्। स्वादुतरत्वम्। स्वरोचकहरत्वम्। बलकारित्वम्। पित्तापहत्वम्। वल्लीफलानां मध्ये प्रवरत्वञ्च। इति राजनिर्घण्टः॥ तस्य बालफलगुणाः। पित्तहरत्वम्। मध्यमफलगुणौ। कफकारित्वम्। अतिगुरुपाकित्वम्॥ पक्वफलगुणाः। लघुपाकित्वम्। उष्णत्वम्। क्षाररसत्वम्। अग्निदीपनत्वम्। वस्तिशोधनत्वम्। सर्व्वदोषनाशित्वम्। हृद्यत्वम्। चित्तविकारिणः पथ्यत्वञ्च॥ अस्य नाड़िकागुणाः। क्षाररसत्वम्। मधुरत्वम्। गुरुत्वम्। रूक्षत्वम्। रुचिकारित्वम्। वायुकफाग्निशुक्रकरोगनाशित्वञ्च॥ अस्य मज्जगुणाः। शुक्रकारित्वम्। पित्तनाशित्वम्। वस्तिशोधनत्वञ्च। इति राजवल्लभः॥

कुष्माण्डकः, पुं, (कुष्माण्ड+स्वार्थे कन्।) कुष्माण्डः। इत्यमरः। २। ४। १५५॥ (यथा, भावप्रकाशे।

"घृते तप्ते विनिःक्षिप्य खण्डान् कुष्माण्डसम्भवान्। वार्त्ताकुविधिना कुर्य्यात् प्रलेहकलनादिकम्॥ वेसवारास्तत्रैव घृते तलनपूर्ब्बकम्। कुष्माण्डकं फलं सिद्धं विदुः सुस्वादु सुन्दरम्"॥ नागविशेषः। यथा, महाभारते। १। २५। ११।

"नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः"॥)

कुष्माण्डी, स्त्री, (कुष्माण्ड+स्त्रियां जातित्वात् ङीष्।) उमा। (मसिना।) ओषधी। इति हेमचन्द्रः॥ कर्कारुः। इति राजनिर्घण्टः॥ यागक्रियाविशेषः। इति शब्दरत्नावली॥

कुस इ कि भासने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भां-परं-अकं-सेट्-इदित्।) पद्ममञ्जरी। इ कुंसयते। किं कुंसयति कुंसति। भासनं दीप्तिः। इति दुर्गादासः॥

कुस य इर् श्लिषि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) य, कुस्यति बाला कान्तम्। इर् अकुसत् अकोसीत्। अस्मात् पृषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

कुसलं, क्ली, (कुस्+कलच्।) कुशूलम्। इत्यमरटीका॥

कुसितः, पुं, (कुस+"कुसेरुभोभेदेताः"। उणां ४। १०६। इति इतः।) जनपदः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुसिदायी, स्त्री, (स्त्रीलिङ्गे "वृषाकप्यग्निकुसितकुसिदानामुदात्तः"। ४। १। १७। इति प्रकृतेरैकारादेशो ङीष् च।) कुसीदपत्नी। इति जटाधरः॥

कुसिम्बी, स्त्री, (कौ पृथिव्यां शिम्बीति ख्याता। पृषोदरात् सः।) शिम्बी। इति राजनिर्घण्टः॥ ("कुसिम्बिवल्लीप्रभवास्तु शिम्बाः"॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

कुसीदं, क्ली, (कुस्+"कुसेरुभोभेदेताः" उणां। ४ १०६। इति ईदप्रत्ययः। इह सूत्रे द्वितीयप्रत्ययो ऋक्षादिर्दीर्घादिश्चेति तन्त्रेणोपात्तः। वृषाकप्यग्नीति सूत्रे ऋक्ष एवेति वृत्तिकारहरदत्तादयः। यद्वा कुत्सितं निन्द्यरूपवृद्धिदानेनेत्यर्थः सीदति-अधोमर्यो यत्र। पृषोदरात् साधुः। यथा वृहस्पत्युक्तौ "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यमुदाहृतम्"॥) ऋणदानजीविका। वृद्धाजीवनम्। सुद् वाड़ि देओया इत्यादि भाषा। तत्पर्य्यायः। अर्थप्रयोगः २ वृद्धिजीविका ३। इत्यमरः। २। ९। ४॥ यथा,—

"कुसीदक्षत्रियाणिज्यं प्रकुर्व्वीताक्षयं क्षतम्। आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः॥ बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः। सर्व्वेषामपि चैवेषां कुसीदमधिकं विदुः॥ अनावृष्ट्या राजभयान्मूषिकाद्यैरुपद्रवैः। क्षत्रियादिके भवेद्बाधा सा कुसीदे न विद्यते॥ शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपि वा। उप्ते वर्षति शीते वा वर्द्धनं न निवर्त्तते॥ देशं गतानां या वृद्धिर्नानापण्योपजीविनाम्। कुसीदं सर्व्वतः सम्यक् संस्थितस्यैव जायते॥

कुसुमं, क्ली, ("कुसेरुभोभेदेताः"। उणां ४। १०६। इति उमः। निपातनात् गुणाभावः।) पुष्पम्। (यथा, ऋतुसंहारे वसन्तवर्णने ४।

कल्यलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते वृप्तास्तस्य तद्दोषं शमयन्ति न संशयः॥ वणिक् कुसीदो दद्यात्तु वस्त्रं गां काञ्चनादिकम्। क्षीरवृक्षोऽन्नपानानि यानशय्यासनानि च॥ पशुभ्यो विंशतिं दत्त्वा पशुस्वर्णादिकं शतम्। पादेनायस्य पादकं कुर्य्यात् सञ्चयमात्मवान्॥ अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम्। पादञ्च प्रार्थमायस्य मूलभूतं विवर्द्धयेत्॥ विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः। वृत्तिर्भैक्षं कुसीदञ्च दश जीवनहेतवः"॥

इति गारुड़े २१५ अध्यायः॥*॥ गोतमः।

"क्षत्रियोरक्षवाणिज्यशस्त्रयं कृतं कुसीदञ्चेति। कुसीदस्य पृथक् ग्रहणं स्वयंकृतस्याभ्युपायार्थम्"॥ कुसीदं वृद्धिकर्म्मेति प्रदेशान्तरेऽभिधानात् इति कल्पतरुः॥ वृहस्पतिः।

"कुसीदं क्षत्रियाणिज्यं प्रकुर्व्वीताक्षयं क्षतम्। आपत्काले स्वयं कुर्व्वन् नैनसा युज्यते द्विजः॥ लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव भोजयेत्। ते वृप्तास्तस्य तं दोषं शमयन्ति न संशयः॥ वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। क्षीरवृक्षोऽन्नपानानि यानशय्यासनानि च॥ पशुभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम्॥ वणिक् कुसीद्यदोषः स्यात् ब्राह्मणानाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्॥ विंशद्भागञ्च विप्राणां क्षपिं कृत्वा न दोषभाक्"॥

तथा, मनुः।

"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात्। द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्॥ द्विकं शतस्य गृह्णानो न भवत्यर्थकिल्बिषी। शतकार्षापणे ह्यशीतिभागं विंशतिं पणान्"॥

द्विकं पुराणोदयम्। एवंविधनियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा यः स्वाच्छन्द्येन व्यवहरति तस्यैव प्रायश्चित्तम्। आपदि तु स्वयंकरणनियमातिक्रमे च न दोषः। इति प्रायश्चित्तविवेकः। इत्याह्निकाचारतत्त्वम्। कुसीदिके त्रि। इति मेदिनी॥

कुसीदायी, स्त्री, (कुसीदः कुसीदजीवी तस्य पत्नी। मुग्धबोधमते ईप् ङीङ्च। पाणिन्यादिमते तु कुसितकुसिदशब्दाभ्यां ऋक्षमध्याभ्यामेव ङीप् ङीच इति विशेषः। तदा "वृषाकप्यग्निकुसितकुसिदानामुदात्तः"। ४। १। ३७। इति प्रकृतेरैकारादेशो ङीप् च।) कुसीदपत्नी। इति जटाधरः॥

कुसीदिकः, त्रि, (कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत् प्रयच्छति। "कुसीददशैकादशात् ठन्ठजौ"। ४। ४। २१। इति ठन्।) वृद्धिजीवी। तत्पर्य्यायः। वार्द्धुषिकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४। इत्यमरः। २। ९। ५॥ कुसीदः ५। इति शब्दरत्नावली॥ कुसीदी ६। यथा, आह्निकतत्त्वे॥

"वणिक् कुसीद्यदोषः स्यात् ब्राह्मणानाञ्च पूजनात्"॥

कुसुमा

"वापीजलानां मणिमेखलानां
मृगाङ्कभासां प्रमदाजनानां।
चूतद्रुमाणां कुसुमानतानां
ददाति सौरभ्यमयं वसन्तः" ॥

पलकुसुमविशेषाणां द्रव्यान्तरसंयोजनादिसूचकत्वं दर्शितं यथा वृहत्संहितायां २६ अध्याये।
"पलकुसुमसम्भवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्। सुलभत्वं द्रव्याणां निष्पत्तिस्त्वापि शस्यानाम्" ॥
केन कस्य वृद्धिर्ज्ञेया तदाह।
"शालेन कलमशालीरक्तशोकेन रक्तशालिञ्च।
पाण्डूकः क्षीरिकया नीलशोकेन मसूरकः ॥
न्यग्रोधेन तु यवकस्तिन्दुकवृद्धा च वल्लिको भवति।
अश्वत्थेन ज्ञेया निष्पत्तिः सर्व्वशस्यानाम् ॥
जम्बूभिस्तिलमाषाः शिरीषवृद्धा च कङ्गुनिष्पत्तिः।
गोधूमाश्च मधुकैर्यवबृद्धिः सप्तपर्णेन ॥
अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदसनैः।
बदरीभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान् ॥
अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेक्षुदेन शृणाः ॥
करिणश्च हस्तिकर्णैर्वादेश्या वाजिनोऽश्वकर्णेन।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥
चम्पककुसुमैः कनकं विद्रुमसम्भव बन्धजीवेन।
कुरवकवृद्धा वज्रं वैदूर्य्यं नन्दिकावर्त्तैः ॥
विद्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥
श्वेतो सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः।
सौगन्धिकेन वणपतिरर्केण हिरण्यपरिवृद्धिः ॥
आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम्।
खदिरशमीभ्यां दुर्भिक्षमर्জ্জुनैः शोभना वृष्टिः ॥
पिचुमर्दनागकुसुमैः सम्भिक्षमधमारतः कपित्थेन।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥
दूर्व्वाकुशकुसुमाभ्यां भिक्षुर्वक्रिश्च कोविदारेण।
श्यामालताभिवृद्धा बन्धक्यो वृद्धिमायान्ति" ॥)
पद्मम्। क्लीवजः। (यथा, ज्योतिषशास्त्रे।
"यदा नार्य्याः पितुर्गेहे कुसुमस्खलनसम्भवः" ॥)
नेत्ररोगविशेषः। इति मेदिनी ॥

कुसुमपुरं, क्ली, (कुसुमाख्यं पुरम्।) पुरविशेषः। पाटना इति ख्यातम्। तत्पर्य्यायः। पाटलिपुत्रम् २। इति हेमचन्द्रः ॥ (यथा, मुद्राराक्षसे २ अङ्के। "सखे! विराधगुप्त! वर्त्तयेदानीं कुसुमपुरवृत्तान्तशेषं अपि शृणन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः" ॥)

कुसुममध्यं, क्ली, (कुसुमं मध्ये अभ्यन्तरे यस्य।) वृत्तविशेषः। इति शब्दचन्द्रिका। घालिता गाछ इति भाषा ॥

कुसुमाञ्जनं, क्ली, (कुसुमाकारमञ्जनं शाकपार्थिवादिवत् समासः।) कुसुमाकाररीतिमलसम्भवमञ्जनम्। तत्पर्य्यायः। पौष्पकम् २ रीतिपुष्पम् ३ पुष्पकेतु ४। इत्यमरः। २। ६। १०१। राजनिर्घण्टोक्तगुणपर्य्यायौ पुष्पाञ्जनशब्दे द्रष्टव्यौ ॥

कुसुमात्मकं, क्ली, (कुसुममेवात्मा स्वरूपं यस्य। कप्।) कुङ्कुमम्। इति हारावली ॥

कुसुमाधिपः, पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिपः श्रेष्ठः।) चम्पकवृक्षः। इति शब्दरत्नावली ॥ (चम्पकशब्दे ऽस्य विवृतिर्व्याख्येया ॥)

कुसुमाधिराट्, [ज्] पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिराजते दूरव्यापिसुगन्धित्वात्। अधि + राज् + क्विप्।) चम्पकवृक्षः। इति त्रिकाण्डशेषः ॥

कुसुमायुधः, पुं, (कुसुमानि आयुधानि अस्त्राणि यस्य।) कामदेवः। इति शब्दरत्नावली ॥ (यथा, शाकुन्तले ३ अङ्के।
"भगवन् मन्मथ! कुतस्ते कुसुमायुधस्य सतस्तेजस्त्वमेतत्" ॥ तथा, कुमारे च। ४। ४०।
"कुसुमायुधपत्नि! दुर्लभस्तव भर्त्ता न चिराद्भविष्यति" ॥ इति ॥)

कुसुमालः, पुं, (कुसुमवत् शोभनीयं द्रव्यादिकं आलाति सम्यक् आगोचरेणैव रक्षति। आ + ला + कः।) चौरः। इति हारावली ॥

कुसुमासवं, क्ली, (कुसुमानां तत्रसानां आसवम् मद्यम्।) मधु। इति राजनिर्घण्टः ॥

कुसुमेषुः, पुं, (कुसुमानि इषवो बाणा यस्य।) कामदेवः। इत्यमरः। १। १। २७ ॥ (यथा, माघे। ८। ७०।
"स्वच्छाम्भः स्नपनविधौ तमङ्गमौञ्छ
स्ताम्बूलद्युतिविशदो विलासिनीनाम्।
वासश्च प्रतनु विविक्तमस्वतीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः" ॥)

कुसुम्भं, क्ली, (कौ पृथिव्यां सुम्भति शोभते दीप्तिं प्राप्नोतीत्यर्थः। कु + सुभि + अच् इदित्वात् नुम्।) स्वर्णम्। इति मेदिनी ॥ पुष्पविशेषः। कुसुमफुल इति भाषा ॥ (यथा, ऋतुसंहारे वसन्तवर्णने ६।
"कुसुम्भरागारुणितैर्दुकूलै
र्नितम्बबिम्बानि विलासिनीनाम्।
तन्वंशुकैः कुङ्कुमरागगौरैः
अलङ्क्रियन्ते स्तनमण्डलानि" ॥)
तत्पर्य्यायः। कमलोत्तमम् २ वह्निशिखम् ३ महारजनम् ४। इत्यमरः। २। ६। १०६ ॥ पावकम् ५ पीतम् ६ पद्मोत्तरम् ७ रक्तम् ८ लोहितम् ९ वस्त्ररञ्जनम् १० अग्निशिखम् ११। अस्य शाकगुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। विष्मूत्रदोषमदनाग्नित्वम्। दृष्टिप्रसादनत्वम्। रुचिप्रदत्वम्। अग्निदीप्तिकारित्वञ्च। इति राजनिर्घण्टः ॥ रूक्षत्वम्। कफवायुनाशित्वम्। पित्तकारित्वञ्च। तत्तैलगुणाः। कटुत्वम्। उष्णत्वम्। छिदोषकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः ॥ श्लेष्मविष्मलनाशित्वम्। तेजोबलकारित्वञ्च। घर्मरोगनाश्य गुणाः। छिदोषकारित्वम्। पुष्टिबलत्वयकण्डूकारित्वञ्च। इति राजनिर्घण्टः ॥ (कुसुम्भशाकभक्षणे निषेधमाह तिथितत्त्वधृतोशनोवचने यथा,—
"कुसुम्भं लवणशाकं डल्लाकं पूतिकां तथा।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ॥)

कुसुम्भः, पुं, ("कुसेरुम्भोमेदेताः"। उणा। ४। १०६। इति उम्भ प्रत्ययः।) कमण्डलुः। इत्यमरः। ३। ३। १२६ ॥ (यथा, मनौ। ६। ५२।

कुह

"क्षपणकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्" ॥)
महारजनवृक्षः। इति राजनिर्घण्टः ॥ (कुसुम फुल इति भाषा ॥ अस्य पर्य्याया यथा।
"पद्मोत्तमविकाशः स्यात् कुसुम्भः शरटस्तथा" ॥
इति वैद्यकरत्नमालायाम् ॥ अस्य गुणाश्च यथा।
"कटुर्विपाके कटुकः कफघ्नो
विदाहिभावादहितः कुसुम्भः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसुः, पुं, (कुस् + कूप्रत्ययः।) किंशुलुकः। इति हेमचन्द्रः ॥

कुसूलः, पुं, (कुस् + कूलच्। यद्वा कुत्सूलः निपातनात् सत्वम्।) कुत्सूलः। इति कटशब्दार्थे भरतः ॥

कुस्तिः, स्त्री, (कुत्सिता स्तिः उपायः व्यवहारो वा।) शाठ्यम्। इत्यमरः। १। ७। ३०। इन्द्रजालम्। इति हेमचन्द्रः। (कर्म्मधारये कुत्सितपथः। इति व्युत्पत्तिलभ्योऽर्थः ॥ कुत्सिता स्तिराचारो यस्येति विग्रहे, दुराचारे च।
यथा, भागवते ८। २३। ७।
"कस्मादयं कुस्तयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः" ॥)

कुस्तुमः, पुं, (कुं भुवं स्तुभ्नोति। स्तुभ् + मूलादित्वात् कः।) विष्णुः। इत्यमरटीकायां भरतादयः ॥ (समुद्रः। तस्येदं अण् कौस्तुभम् इति शब्दार्थचिन्तामणिः।

कुस्तुम्बरी, स्त्री, (कुत्सिता तुम्बरी। पृषोदरात् सुटि साधुः।) धन्याकम्। इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्यायः।
"आर्द्रां कुस्तुम्बरीं कुर्य्यात् स्वादुसौगन्ध्यहृद्यताम्।
सा शुष्का मधुरा पाके स्निग्धा हृद्दाहनाशनी" ॥)

कुस्तुम्बुरु, क्ली, (कुत्सितं तुम्बति अर्द्यति यत्। तुबि अर्दने + बाहुलकात् उरुप्रत्ययः। जातिनिर्देशात् सुट्।) धन्याकम्। इत्यमरः। २। ६। २८ ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥
"धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम्।
धन्या कुस्तुम्बुरी चान्या वेषजोग्या वितुन्नकम्" ॥)
(पुं, यज्ञविशेषः। यथा, महाभारते १३। १०। १५।
"कुस्तुम्बुरुः पिप्पलश्च गजकर्णो विशालकः।
एते चान्ये च बहवो यज्ञाः शतसहस्रशः" ॥)

कुस्म क ङ मतौक्षिते। इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट्।) कुस्मिति च। (अत्र अकं) क्वसौ दन्त्योपधः। मतौक्षितं बुद्धिपूर्ब्बकदर्शनम्। कुस्मित् कुत्सितमीषद्वास्यम्। क ङ, कुस्मयते जनः। बुद्ध्या पश्यति कुत्सितं स्मयते वेत्यर्थः। इति दुर्गादासः ॥

कुह त् क ङ विस्मापने। इति कविकल्पद्रुमः ॥ (अदन्तचुरां-आत्मं-सकं-सेट्।) क्वसौ। विस्मापनमन्यतो विस्मयोत्पादनम्। ङ कुहयते। कुहकेनेन्द्रजालिको लोकं विस्मापयति इत्यर्थः। स्यातां कुहयते विस्माप्यते हेतुतो भयमिति भट्टमल्लदर्शनादिस्मापने इति पाठ इत्येके। इति दुर्गादासः ॥

कुह, व्य, ("वा ह च छन्दसि"। ५। ३। १३।

इति ङः। "कु तिहोः"। ७।२।१०४।इति किमः कुः।) कुत्र। वैदिकप्रयोगोऽयम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे २। १२। ५। "यं स्मा एष्ठन्ति कुह सेतिघोरमुतेमाहुर्नैषो अस्तीत्येनम्" ॥)

कुहः, पुं, (कुहयति विस्मापयति ऐश्वर्य्यप्रभावेण यः। कुह + क्विप् + अच्।) कुबेरः। इति हेमचन्द्रः॥ (स्त्री, माया। कुहकम्। यथा, रामायणे २।१०९।२७। सन्तुष्टपक्षवर्गोऽहं लोकयात्रां प्रवाहये। "अकुहः श्रद्दधानः सन् कार्य्याकार्य्यविचक्षणः" ॥)

कुहकं, क्ली, (कुह + "वञ्चलमन्यचापि"। उणां २। ३७ इति क्नुन्।) माया।

(यथा, भागवते। १। १। १।

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः। तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" ॥) तत्पर्य्यायः। इन्द्रजालम् २ जालम् ३ कुहकितः ४। तद्युक्ते त्रि। तत्पर्य्यायः। धूर्त्तः २ वञ्चकः ३ ध्वंसकः ४ दाम्भिकनिकृतिः ५ मायी ६ व्यालिकः ७। इति हेमचन्द्रः॥ दाम्भिकः। इत्युणादिकोषः। (सर्पविशेषः। यथा, विष्णुपुराणे १। १७। ३८॥

"इत्युक्तास्तेन ते सर्पाः कुहकास्तक्षकान्वयाः। अदग्धन्त समस्तेषु गात्रेष्वतिविषोल्बणाः" ॥)

कुहकजीवी, [न्] त्रि, (कुहकेन इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयतीति। कुहक + जीव् + णिनिः।) मायाजीवी। इति महाभारतम्। बाजिकर इति भाषा॥ (सर्वजीवि। इति व्युत्पत्तिलभ्योऽर्थः। साप्ड़े इति भाषा॥)

कुहकस्वनः, पुं, (कुहकः विस्मापकः स्वनः शब्दोऽस्य।) कुक्कुटपक्षी। इति हेमचन्द्रः॥

कुहकस्वरः, पुं, (कुहकः विस्मापकः स्वरो यस्य।) कुक्कुटः। इति शब्दावली॥

कुहकः, पुं, तालभेदः। यथा, सङ्गीतदामोदरे। "द्रुतद्वन्द्वं लघुद्वन्द्वं तांत्रे कुहकसंज्ञके"।

कुहनं, क्ली, (कु ईषत् प्रयत्नेन हन्यते इति। हन् + कर्म्मणि अप्।) मृद्भाण्डविशेषः। काचभाजनम्। (कुत्सिताचारेण हन्तीति। हन् + अच्।) दुर्व्यापी त्रि। इति मेदिनी॥

कुहनः, पुं, (कुं एथ्वीं भूमिं वा हन्ति खनतीत्यर्थः। हन् + अच्।) मूषिकः। (कौ एथिव्यां कुत्सितं वा हन्ति दशतीति। हन् + अच्।) सर्पः। इति हेमचन्द्रः॥

कुहना, स्त्री, (कुह + "व्याधसभ्यो युच्"। ३। ३। १०७। इति युच्।) दम्भचर्य्या। इति मेदिनी॥ लोभान्मोहोत्पादनार्थं यथार्थकथनम्। इत्यमरः। २। ७। ५३॥ अर्थविप्सया मिथ्याचारभेदस्य सम्पादना। दम्भमाचक्षतेऽधीनमौनादिः। अर्थविप्सया धर्म्मावरणं इत्यन्ये। इति भरतः॥

कुहनिका, स्त्री, (कुह + युच् स्वार्थे कः टाप् अत इत्वम्।) कुहना। इति शब्दरत्नावली॥

कुहरं, क्ली, (कुं भूमिं हरतीति। कु + हृ + अच्।) गह्वरम्। छिद्रम्। इति मेदिनी॥ (यथा, प्रसन्नराघवे।

"तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीयाः करालाः"॥) कर्णः कण्ठशब्दः। गलः। अन्तिकम्। इत्यजयपालः॥

कुहरः, पुं, (कुह विस्मापने + कः। कुहं विस्मापनं भयमित्यर्थः राति ददाति भयं जनयतीति भावः। रा + कः।) नागविशेषः। इति मेदिनी॥

कुहरितं, क्ली, (कुहरयति कण्ठशब्दं करोति। कुहर + ज्ञतौ क्विप् + भावे क्तः।) पिकालापः। रतिध्वनिः। इति मेदिनी॥ रटितम्। इति विश्वः॥

कुहलिः, पुं, (कु + हलि + इन्।) पूगपुष्पिका। इति चिकाख्यश्रेषः। पान इति भाषा॥

कुहा, स्त्री, (कुह + कः टाप् च।) कटुकी। इति शब्दचन्द्रिका॥

(वदरी॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाद्याख्य वदरशब्दे ज्ञेयाः॥)

कुहूः, स्त्री, (कुह + सगव्यादित्वात् कुः।) कुहूः। इति हेमचन्द्रः॥ (यथा, महाभारते।

"कोकिलानां कुहूरवैः सुखैः श्रुतिमनोहरैः" ॥)

कुहूः, स्त्री, (कुह + बाहुलकात् कूप्रत्ययः।) नष्टेन्दुकलामावास्या। इत्यमरः। १। ४। ९॥ (यथा, श्रुतौ। "दे ह वा अमावास्या वा पूर्णमासी वा सिनीवाली योत्तरा सा कुहूरिति"। यज्ञमाह कालमाश्रवीये व्यासः।

"दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मता"।

मतान्तरे तु।

"तिथिद्वये सिनीवाली नष्टचन्द्रा कुहूर्मता। वाजसनेयिभिः कुहूर्नाम्ना वेदवेदान्तवेदिभिः"।

तत्र श्राद्धाधिकारिभेदमाह। यथा, नागोजिः।

"अपराह्णव्यापिनी यदि दर्शस्तिथिद्वये। आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता"।

आदिशब्दात् स्त्रीशूद्रयोरपि ग्रहणं यथाह लोगाक्षिः।

"सिनीवाली द्विजैः कार्य्या साग्निकैः पिण्डकर्म्मणि। स्त्रीभिः शूद्रैः कुहूः कार्य्या तथा चाग्निकैर्द्विजैः"।

तदधिष्ठात्री देवपत्नी। यथा, तिथितत्त्वे।

"सिनीवाली कुहूरिति देवपत्न्यावितिः"।

सा च अङ्गिरसः सुता। यथाह भागवते ४। १। २९।

"श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहूराका चतुर्थ्यनुमतिस्त्वथा"॥)

कोकिलालापः। इति मेदिनी॥ (यथा, आर्य्यासप्तशती ६२०।

"केनाम्बावि पिकानां कुहूं विहायेतरः शब्दः"॥)

कुहूकण्ठः, पुं, (कुहूरितिशब्दः कण्ठे यस्य।) कोकिलः। इति शब्दरत्नावली॥

कुहूमुखः, पुं, (कुहूरिति शब्दः मुखे यस्य।) कोकिलः इति चिकाख्यश्रेषः॥

कुहूरवः, पुं, (कुहूरिति रवो यस्य।) कोकिलः। इति राजनिर्घण्टः॥ (यदुक्तम्।

"पिक! विधुस्तव हन्ति समं तमस्त्वमपि चन्द्रविरोधिकुहूरवः"॥)

कुहूलं, क्ली, (कुह + ऊलच् प्रत्ययः।) सशल्यभूरन्धम्। इति जटाधरः॥

कुहेड़िका, स्त्री, (कु ईषत् हेड़ति वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ वेष्टने + इन् ततः स्वार्थे कन् ततः टाप्।) कुज्झटिका। इति भूरिप्रयोगः॥

कुहेड़ी, स्त्री, (कु ईषत् हेड़ति वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ वेष्टने + "सर्व्वधातुभ्यः इन्" उणां ४। ११७। इति इन्। ततः ङीदिकारान्तात् वा ङीष्।) कुहेड़िका। इति शब्दमाला॥

कुहेलिका, स्त्री, (कु ईषत् हेड़ति वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ वेष्टने + इन्। ततः स्वार्थे कन्। टाप्। ह्रस्य लत्वम्।) कुज्झटिः। इति चिकाख्यश्रेषः॥

कू शि ङ आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सेट्।) शि ङ कूयते अकूविष्ट। इति दुर्गादासः॥

कू ञ ग शब्दे। इति कविकल्पद्रुमः॥ (क्र्यां-उभं-अकं-सेट्।) ञ ग कूणाति कूणीते। क्रयान्तोऽयमिति जैमिनिः। दन्त्यनोपधोऽपि। नकाररहितो क्रयान्त इति रमानाथः। दीर्घान्त इति जौमराः। इति दुर्गादासः॥

कूः, स्त्री, (कूणाति शब्दायते इति। कू + क्विप्।) पिशाची। इति शब्दमाला॥

कूकुदः, त्रि, (कू शब्दे भावे क्विप्। कूवः शब्दस्य कीर्त्तेरित्यर्थः कुं भूमिं आस्पदस्वरूपामिति यावत् ददातीति। कूकु + दा + कः।) सत्कृत्याहृतां कन्यां यो ददाति सः। इत्यमरः। ३। १। १४॥

कूचः, पुं, (कु शब्दे "कुवचट् दीर्घश्च"। उणां ४। ९१। इति चट् दीर्घश्च।) स्तनः। इत्युणादिकोषः॥

कूचिका, स्त्री, (कूच + टित्वात् ङीप्। स्वार्थे कन्।) तूलिका। इति हेमचन्द्रः॥

कूज हिंसने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दीर्घी। हिंसनमव्यक्तशब्दः। कूजति कोकिलः। इति दुर्गादासः॥

कूजितं, क्ली (कूज् + भावे क्तः।) पक्षिध्वनिः। इति हेमचन्द्रः॥ (यथा, गीतगोविन्दे १। ४। २।

"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे। मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे"॥)

कूट क ङ अप्रसादाप्रदोः। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) अप्रदा दानाभावः। क ङ कूटयते खलः स्फुटमप्यर्थं प्रसन्नं न करोति। किञ्चिन्न ददाति वेत्यर्थः। इति दुर्गादासः॥

कूट वृ क दाहे। मन्त्रे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) दीर्घी। अचुकूटत्। इति दुर्गादासः॥

कूटः, पुं, (कूटयति दग्धीकरोति शापप्रभावेण सापराधान् इति। कूट दाहे + णिच् + अच्।) अगस्त्यमुनिः। इति शब्दरत्नावली॥

कूटपू

कूटः, पुं, स्त्री, (कूद्यते दातुं न शक्यते स्थावर त्वादिति। कूट अप्रदाने + कर्म्मणि घञ्।) गृहम्। इति शब्दरत्नावली॥

कूटः, पुं, क्ली, (कूट् + घञ्।) निश्चलः। राशिः। (यथा, हेः रामायणे। १। १४। १५।
"अग्रकूटाश्च दृश्यन्ते बहवः पर्व्वतोपमाः"॥) लौहमुद्गरः॥ (यथा, भागवते। ४। २५। ८।
"एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव।
संपरेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः"॥) माया। (यथा, महाभारते वनपर्व्वणि।
"नैव धर्म्मेण तद्राज्यं नार्জ্জवेन न चौजसा।
अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै"॥) पर्व्वतशृङ्गम्। (यथा, महाभारते आनुशासनिके।
"अश्रीणामिव कूटानि धातुरक्तानि शैलते"॥) तुच्छः। सीरावयवः। यन्त्रम्। फाँद इति भाषा। (यथा, रामायणे।
"वागुराभिश्च पाशैश्च कूटैश्च विविधैस्तथा"॥) अन्तरम्। इति मेदिनी॥ भग्नशृङ्गवृषभः। इति हेमचन्द्रः॥ कैतवम्। इत्यमरः। ३। ३। ३६॥ (यथा, भागवते। ६। ५। १०।
"वाचः कूटन्तु देवर्षेः स्वयं विमृशुधिया"॥ तद्धति चि। यथा, मनुः। ७। ९०।
"न कूटैरायुधैर्हन्याद् युध्यमानो रणे रिपून्"। मिथ्याभूते त्रि। यथा, याज्ञवल्क्यः।
"द्विगुणा वान्यथा ब्रूयुः कूटाःस्युः पूर्ব্বसाक्षिणः"। पुरद्वारम्। यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गृहने महती गृभी।
भीमशाखा दुरारोहा ब्रह्मणस्य समीपतः"॥ अत्र कूटशब्दस्तु टीकाकृन्मतभेदेन अर्थान्तरेऽपि वर्त्तते। अग्रभागमात्रम्। यथा, रामायणे।
"किरीटकूटैर्व्वलितं भुजाष्टकं दीप्तकुण्डलम्"। भागवते च। ३। १९। २९।
"सवज्रकूटाङ्गनियातवेग-
विशीर्णकुक्षिः क्षतयमुदस्यन्।
उत्पुच्छदीर्घोर्म्मिभुजैरिवार्त्त-
श्चुक्रोश यज्ञेश्वर! पाहि मेति"॥)

कूटकं, क्ली, (कूट् + संज्ञायां कन्।) पाशकम्। इत्यमरः। २। ९। १३॥

कूटकः, पुं, (कूट् + खुल्।) कबरी। इति त्रिकाण्डशेषः॥ सुरागमगन्धद्रव्यम्। इति शब्दमाला॥ (पर्व्वतविशेषः। यथा, भागवते। ५। १९। १७।
"भारते ऽस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः"।
"त्रिकूट ऋषभः कूटकः कौङ्कः सङ्घः" इति॥)

कूटकृत्, पुं, (कूटं करोतीति। कूट + कृ + क्विप् तुगागमश्च।) शिवः। कायस्थः। इति त्रिकाण्डशेषः। कितवे, त्रि। (तुलाकर्म्मणि कैतवकारी। यथा, याज्ञवल्क्यः। २। २४३।
"तुलाप्रायानमागानां कूटकृन्नायकस्य च"॥)

कूटजः, पुं, (कूटे पर्व्वते एव जायते। जन + डः।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (कूटजवृक्षे ऽस्य गुणादयो ज्ञेयाः।)

कूटमूर्ख, पुं, हस्तिनां चिह्नोक्तजन्तुरः। इति

कूटस्थः

त्रिकाण्डशेषः॥ कूटपर्व्वोऽपि क्वचित्पाठः॥

कूटपालकः, पुं, (कूटं मत्स्यलोमं पालयतीति। पालि + ण्वुल्।) कुक्कालस्य पवनम्। कुमारेर पोयान् इति भाषा। पित्तज्वरः। इति हारावली॥

कूटयन्त्रं, क्ली, (कूटं कैतववत् यन्त्रम्।) आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्। फाँद इति भाषा। तत्पर्य्यायः। उन्नाथः २। इत्यमरः। २। १०। २६॥

कूटशाल्मलिः, पुं, (कूटः शाल्मलिः।) शाल्मलिविशेषः। काश्मिमाला इति ख्यातः। कुत्सितशाल्मलिः अन्तःशाल्मलिर्वा। इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। रोचनः २। इत्यमरः। २। ४। ४७॥ (क्वचित् स्त्रीलिङ्गे ऽपि दृश्यते। कूटशाल्मलिरिव इति व्युत्पत्त्या यमस्य गदायाः गौणी संज्ञा। यथा, रघौ १२। ९५।
"अयःशङ्कुचितां रक्तः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्"॥
नरकस्थकण्टकाचितलोहशाल्मलिवृक्षविशेषः। स च दुरारोहः। यथा, महाभारते १८। ३। ४।
"नादृश्यन्त च तास्तत्र यातनाः पापकर्म्मिणाम्।
नदी वैतरणी चैव कूटशाल्मलिना सह"॥)
राजनिर्घण्टोक्तगुणपर्य्यायौ रोहितकशब्दे द्रष्टव्यौ॥

कूटसंक्रान्तिः, स्त्री, अर्द्धराशीतीते सूर्य्यस्य राश्यन्तरगमनम्। यथा,—
"संक्रान्तिर्द्विविधा यत्र पूर्ব্বं तत्र परित्यजेत्।
कर्त्तव्यं कूटसंक्रान्त्यां स्नानदानतपोव्रतम्॥
अर्द्धराशत्यतीते तु यदा संक्रमते रविः।
सा ज्ञेया कूटसंक्रान्तिर्मुनिभिः परिकीर्त्तिता"।
इति विद्यानिधिधृतज्योतिःसागरसारधृतं वचनम्॥*॥ अपि च।
"अर्द्धराशे व्यतीते तु संक्रान्तिर्यदहर्भवेत्।
पूर्ব্বेद्युः व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥
इति भीमपराक्रमीयम्॥ स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदाननिमित्तकं पूर्ব্বदिने उपवाससंयमरूपव्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥

कूटस्थः, त्रि, (कूटे मायायां तिष्ठतीति। यद्वा, कूटवत् निर्व्विकारेण निश्चलः सन् तिष्ठतीति। कूट् + स्था + कः।) एकरूपतया यः कालव्यापी सः। इत्यमरः॥ (परमात्मा। यथा, पद्मपुराणे ६। २२-२७।
"अधिष्ठानतया देहदयावच्छिन्नचेतनः।
कूटवन्निर्व्विकारेण स्थितः कूटस्थ उच्यते॥
कूटस्थे कल्पिता बुद्धिस्तच्च चित्प्रतिबिम्बकः।
प्राणानां धारणाज्जीवः संसारेण स युज्यते॥
जलस्थोष्णा घटाकाशो यथा सर्व्वत्तिरोहितः।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते॥
अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गण्यताम्॥
विक्षेपावृतिरूपाभ्यां द्विधा ऽविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यादावृतिरुच्यते॥
अज्ञानी विदुषा एवः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्धा वदत्यपि"॥

कूणिः

कूटस्थचैतन्यस्य अविद्याध्यस्ततयैव जीवत्वं नतु स्वरूपतः नितरां तस्मादपि निरध्यस्तत्वात् निर्म्मलः सच्चिदानन्दस्वरूपावस्थः पुरुषोत्तमः परमात्मेत्युच्यते। यथा, गीतायां १५। १६-१७।
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः"॥) एकेनैव स्वभावेन निरवधिकालस्य व्यापको य आकाशादिः। इति भरतः॥ (कूटे भयावहे तिष्ठति यः। स्था + कः।) व्याघ्रनखः। इति राजनिर्घण्टः॥ (व्याघ्रनख इति भाषा॥)

कूटस्थं, क्ली, (कूटस्य इव प्रकाशते यत्। अर्শआदेरच्।) व्याघ्रनखाख्यगन्धद्रव्यम्। इति जटाधरः॥

कूटसाक्षी, [न्] त्रि, (कूटः मायावी मिथ्यावादी कपटीत्यर्थः साक्षी।) मिथ्यासाक्षी इति व्यवहारतत्त्वम्॥ (याज्ञवल्क्ये कूटसाक्षिलक्षणम्। यथा,—
"द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्ব্वसाक्षिणः"॥
ते तु गुरुदण्डार्हाः। अकृतप्रायश्चित्ताः रौरवाख्यनरकं व्रजेयुः। यो हि जानन्नपि साक्ष्यं न ददाति स कूटसाक्षितुल्यः। तथा च तत्रैव।
"न ददाति तु यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि"॥)

कूटागारं, क्ली, (कूटं आगारं गृहम्।) वङ्गभी। तत्पर्य्यायः। चन्द्रशालिका २। इति त्रिकाण्डशेषः॥ स्त्रीणां क्रीड़ागारम्। इत्यादिकाण्डटीका।

कूटार्थभाषिता, स्त्री, (कूटार्थस्य दुर्ব্বোधार्थस्य कल्पितार्थस्य वा या भाषिता।) प्रबन्धकल्पनाकथा। इति शब्दरत्नावली॥ रूपकथा इति भाषा॥

कूड़, शि घात्ये। भक्षे। इति कविकल्पद्रुमः। (तुदां-परं-अकं-सकं-सेट्।) बकबरी। फलाभावे ऽप्यस्य कूटादौ पाठः प्राचामनुरोधात्। प्राच्योऽपि डान्तप्रस्तावादिमं कूटादौ पठितवन्तः। शि, कूड़ती कूड़न्ती। घात्यं घनीभावः। कूड़ति दुग्धं वह्नियोगात्। कूड़त्यन्नं लोकः। इति दुर्गादासः।

कूड्यं, क्ली, (कूड़ति घनीभवति मृदादिना। कूड़् + ण्यत्।) भित्तिः। इति शब्दरत्नावली॥ देयाल इति भाषा॥

कूण, त् क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्तसुरां-परं-अकं-सेट्।) दीर्घी मूर्द्धन्योपधः अनुकूणचक्षुः सङ्कुचितमभूदित्यर्थः। इति दुर्गादासः॥

कूण, क ऽ सङ्कुचि। इति कविकल्पद्रुमः॥ (सुरां-आत्मं-अकं-सेट्।) बकबरी। क ऽ, कूणयते चक्षुः सङ्कुचितं स्यादित्यर्थः। पञ्चमस्वरीत्वेके। इति दुर्गादासः॥

कूणिः, त्रि, (कूणति कुत्रितो भवति रोगादिभिरिति श्लेषः। कूण सङ्कोचे "सर्ব্वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) कूणिः। रोगादिना

कूपः

कुत्सितकरः। इत्यमरटीकायां भरतः॥

कूपिका, स्त्री, (कूप्+ण्वुल् टाप् अत इत्वञ्च।) यष्टिकम्। वीणामूलस्थवंशशलाका। तत्पर्य्यायः। कलिका २। इति हेमचन्द्रः॥

कूदरः, पुं, (कुत्सितं उदरं यस्य। ऋतुदोषतः पायोदरजातत्वात् तथात्वम्।) जातिविशेषः। यथा,—ब्रह्मवैवर्त्तपुराणे।

"ब्राह्मण्यास्त्विदवीर्य्येण ऋतोः प्रथमवासरे।
कुत्सिते चोदरे जातः कूदरस्तेन कीर्त्तितः॥
तदशौचं विप्रतुल्यं पतितो ह्यृतुदोषतः।
सद्यः कोटकसंसर्गादधमो जगतीतले"॥

कूद्दालः, पुं, (कुद्दाल+पृषोदरात् दीर्घत्वे साधुः।) कुद्दालवृक्षः। इत्यमरटीकायां रमानाथः॥

कूप, त् क दौर्ब्बल्ये। (अदन्तचुरां-परं-अकं-सेट्।) अयं षष्ठस्वरी। इति त्रिलोचनः॥ सप्तमस्वरी। इति कविकल्पद्रुमटीकायां दुर्गादासः॥

कूपः, पुं, (कु ईषत् आपो यत्र। "ऋकूपूरित्यः"। ५। ४। ७४। ऊदनोरित्यत्र दीर्घनिर्देशादन्यत्रापीति वा। यद्वा कुवन्ति मण्डूकाः अत्र। "कुपो भाच्च"। उणां ३। २७ इति पो दीर्घश्च।) खनामख्यातो जलाधारः॥ कूया इति पात्कूया इति च भाषा। तत्पर्य्यायः। अम्भुः २ प्रहिः ३ उदपानम् ४। इत्यमरः। १। १०। २६॥ अवटः ५ कोट्टारः ६। इति जटाधरः॥ कात्तः ७ कर्त्तः ८ वक्षः ९ काटः १० खातः ११ अवतः १२ क्रिविः १३ खदः १४ उत्सः १५ ऋष्यदाव् १६ कारोतरात् १७ कुम्भेषः १८ केवटः १९। इति वैद्यनिघण्टौ ३ अध्याये त्रयोदशकूपनामानि॥ तस्य लक्षणं यथा,—

"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः।
वज्रोऽवज्रः स कूपः स्यात्तदम्भः कौपमुच्यते"॥

इति भावप्रकाशः॥ तज्जलगुणाः। वातकफनाशित्वम्। अग्निदीपनत्वम्। लघुत्वम्। पित्तवर्द्धनत्वम्। क्षारत्वम्। शीतकाले उष्णत्वम्। उष्णकाले शीतत्वम्। वसन्तकाले प्रशस्तत्वञ्च। इति राजवल्लभः॥

("रूक्षं कफघ्नं लवणात्मकञ्च
सन्दीपनं पित्तकरं लघूष्णम्।
कूपोदकं वातहरं प्रदिष्टं
हितं न शस्तं शरदो वदन्ति"॥

इति हारीते प्रथमस्थाने ७ अध्याये॥

कूपादिकरणप्रणालादिकं जलाशयतत्त्वधृतादित्यपुराणवचनम्। यथा,—

"सेतुबन्धरता ये च तीर्थशौचरताश्च ये।
तडागकूपकर्त्तारो मुच्यन्ते ते दृषाभयात्"॥

विष्णौ च। "अथ कूपकर्त्तुस्तत्प्रदत्ते पानीये दुष्कृतार्द्धं विनश्यति"। तत्प्रदत्ते खातकूपादुत्थिते। विष्णुधर्म्मोत्तरे च।

"तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः।
क्षणोपानहदातारस्ते नराः स्वर्गगामिनः"॥

तथा, नन्दिकेश्वरपुराणे।

"यो वापीमथवा कूपं देवे तोयविवर्जिते।
खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः"॥

तत्संस्कारकर्त्तुरपि फलमुच्यते विष्णौ। यथा,—

"कूपारामतडागेषु देवतायतनेषु च।
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्"॥

परं जलशून्यदेशखनने एव प्रतिष्ठा न तु पङ्कोद्धारमात्रे। "अजले जलमुत्पाद्य" इति वचनात्॥) गर्त्तः। गुणवृक्षः। नदीमध्यस्थितो वृक्षः पर्व्वतो वा। इत्युणादिकोषः। कूपकः। कूपा इति भाषा। मन्मानम्। इति मेदिनी॥

कूपकः, पुं, (कूपे गर्त्ते कायते प्रकाशते इति। कै+कः।) नौकागुणबन्धनस्तम्भः। इत्यमरः। १। १०। १२। मास्तुल इति भाषा। तैलपात्रम्। कूपा इति भाषा। कुकुन्दरम्। उदपानम्। चिता। इति मेदिनी॥ (शुष्कनद्यादौ जलार्थं कृतो गर्त्तः। इत्यमरः। १। १०। १०॥)

कूपाङ्गः, पुं, (कूपाकारं अङ्गं अस्मिन्।) रोमाञ्चः। इति शब्दरत्नावली॥ कूपाङ्गोऽपि पाठः॥

कूपारः, पुं, (कुं पृथिवीं पिपर्त्ति पूरयति। पॄ+अण् पृषोदरात् उकारस्य दीर्घः।) अकूपारः। इत्यमरटीका॥ कूवारोऽपि पाठः॥

कूपिका, स्त्री, (कूप+संज्ञायां कन् ततष्टाप् अत इत्वञ्च।) अम्भोगतोपलम्। जलमध्यस्थितपर्व्वतादिः। इति मेदिनी॥

कूपी, स्त्री, (कूप्+इन् ततो ङीप्।) पात्रविशेषः। यथा, अजीर्णचिकित्सायां भावप्रकाशः॥

"भावयेत् सप्तकृत्वस्तच्चक्राक्षजलेन च।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत्"॥

कूमं, क्ली, (कौः पृथिव्याः भूमेर्वा उमा कान्तिर्यस्मात्।) सरोवरः। इति जटाधरः॥

कूरः, पुं, (वेञ स्यूतौ+भावे क्विप् ऊः। कौ भूमौ उवं वयनं लाति गृह्णातीति। ला+कः। वस्य रः।) भक्तम्। इति हलायुधः॥

कूर्चं, क्ली, (कुर्य्यते इति कुर् बाहुलकात् चट् निपातनात् दीर्घः।) मलापकर्षार्थकेशादिमुष्टिः। कूँचि इति भाषा। यथा,—नरसिंहपुराणे।

"ततः समर्पयेत् कूर्चमुशीरादिविनिर्म्मितम्।
मलापकर्षणार्थाय श्रीमन्मूर्त्तेः सन्निधौ"॥

विष्णुधर्म्मोत्तरे च।

"उशीरकूर्चकं दत्त्वा सर्व्वपापैः प्रमुच्यते।
दत्त्वा गोवाजजं कूर्चं सर्व्वान्तापान् व्यपोहति।
दत्त्वा चामरकं कूर्चं श्रियमाप्नोत्यनुत्तमाम्"॥

इति श्रीहरिभक्तिविलासस्य ६ विलासे ४८ श्लोकः॥

कूर्चः, पुं क्ली, (कुर्+चट् निपातनात् दीर्घः।) भ्रुवोर्मध्यम्। भ्रूदयमध्यस्थानम्। इत्यमरः। २। ६। ९२॥ मयूरपुच्छमुष्टिः। कुशमुष्टिः। इति हरिवंशे पुष्पकन्यटीकायां नीलकण्ठः॥ कठिनम्। श्मश्रु। कैतवम्। इति मेदिनी॥ विकत्थनम्। दम्भः। ज्ञिप्रोपरिभागः। स तु अङ्गुष्ठाङ्गुलिमध्यस्य उपरिभागः। इति हेमचन्द्रः॥ हूं बीजम्। इति तन्त्रम्॥ (यथा, कर्पूरस्तवे "वर्गार्द्धं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मम्"॥ तथा, भैरवतन्त्रे।

"कालीबीजद्वयं देवि! दीर्घं हूंकारमेव च।
अक्षरो सा महाविद्या श्यामुण्डा कालिका स्मृता"॥)

कूर्चः, पुं, (कुर्+बाहुलकात् चट् निपातनात् दीर्घः।) शीर्षम्। इति धरणी॥

कूर्चशिरः, [स्] क्ली, (कूर्चस्य शिरः इव शिरोऽस्य।) अङ्घ्रिस्कन्धः। इति हेमचन्द्रः। गुड़मुड़ा इति भाषा॥ ("गुल्फसन्धेरध उभयतः कूर्चशिरो नाम तत्र रुजा शोफौ"। "दंशे कूर्चशिरांसि च"॥ इति सुश्रुते शारीरस्थाने ६ अध्याये॥)

कूर्चशीर्षकः, पुं, (कूर्चं श्मश्रु तद्वत् शीर्षं यस्य।) जीवकवृक्षः। स तु ऋषभवर्गमध्यपठितौषधिः। इत्यमरः। २। ४। १४२॥ (जीवकशब्दे ऽस्य विवरणं द्रष्टव्यम्॥)

कूर्चशीर्षकः, पुं, (कूर्चं श्मश्रु तद्वत् शीर्षं यस्य। कप्।) जीवकः। इति राजनिर्घण्टः। (नारिकेलवृक्षः। इति चिन्तामणिः॥)

कूर्चशेखरः, पुं, (कूर्चमिव शेखरमस्य।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥

कूर्चिका, स्त्री, (कूर्चाकारोऽस्त्यस्याः। कूर्च+ठन्।) क्षीरविकृतिः। छीरसा इति भाषा। इत्यमरः। २। ९। ४४॥ सा द्विधा यथा,—

"दध्ना सह च यत् पक्वं क्षीरं सा दधिकूर्चिका।
तक्रेण पक्वं यत् क्षीरं सा भवेत्तक्रकूर्चिका"॥

इति भरतः॥

("कूर्चिका विदाहता भक्ष्या गुरवो नातिपित्तलाः"॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

सूचिका। सूँच इति भाषा। तूलिका। तुली इति भाषा। कुड्मलः। कुँड़ि इति भाषा। कुञ्जि इति भाषा। इति हेमचन्द्रो मेदिनी च॥

कूर्द्द उ क्रीड़ायाम्। इति कविकल्पद्रुमः। (भां-आत्मं-अकं-सेट्।) षष्ठस्वरी। ड, कूर्द्दते। इति दुर्गादासः॥

कूर्द्दनं, क्ली, (कूर्द्द+भावे ल्युट्।) क्रीड़ा। खेला। इत्यमरः। १। ७। ३३॥

कूर्द्दनी, स्त्री, (कूर्द्दतेऽस्याम्। कूर्द्द+अधिकरणे ल्युट् ततो ङीप्।) चैत्रीपूर्णिमा। सा तु कामदेवोत्सवतिथिः। इति चिकाण्डशेषः॥

कूर्पं, क्ली, (कुरं पाति। पा+कः।) भूदयमध्यस्थलम्। इति हेमचन्द्रः॥

कूर्पासः, पुं, (कुर्परे शरीरे अश्नुते आस्ते वा। अश्+वञ्। पृषोदरात् रलोपः पूर्व्वदीर्घश्च।) कञ्चुकः। वारवाणः। इति हेमचन्द्रः॥ (स्वार्थे कन् प्रत्ययेनास्योदाहरणं यथा, माघे। ५। २१।

"प्रस्वेदवारिसविशेषविषक्तमङ्गे
कूर्पासकं च्युतनखक्षतमुद्विभन्ती"॥)

कूर्म्मः, पुं, (कुत्सितः ईषद् वा ऊर्म्मिः वेगो यस्य। के जले ऊर्म्मिर्यस्येति वा पृषोदरात् साधुः।) जलजन्तुविशेषः। काछिम् इति भाषा। (यथा, भगवद्गीतायाम्। २। ५८।

"यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता"॥)

तत्पर्य्यायः। कच्छपः २ पञ्चनखः ३ गुह्यः ४ पूय-

कूर्च्चः

कूर्म्मः

गुल्मः ६ पीवरः ६ कमठः ७ जलगुल्मः ८। इति जटाधरः॥ अस्य मांसादिगुणपर्य्यायान्तरौ कच्छपशब्दे द्रष्टव्यौ॥ * ॥ (तल्लक्षणं यथा,— हठसंहितायाम् ६४ अध्याये।

"स्फटिकरजतवर्णो नीलराजीव चित्रः
कनकसदृशमूर्त्तिश्चारुवंशश्च कूर्म्मः।
अवयवसमवर्त्ती सर्व्वथाकारचित्रः
सकलसुपमहत्त्वं मन्दिरस्थः करोति॥

अङ्गसङ्कोचनावर्त्ती विन्दुविच्चिनोऽव्यङ्गशरीरः। सर्व्वशिरा वा स्थूलगलो यः सोपि सुपाणां राट्टविद्भैः॥

वैदूर्य्यत्विट् स्थूलकण्ठस्त्रिकोणो
गूढ़स्निग्धस्वारवंशश्च शस्तः।
क्रीड़ावाप्यां तोयपूर्णे मठे वा
कार्य्यः कूर्म्मो मङ्गलार्थं नरेन्द्रैः"॥

परमेश्वरः। यथाह ऋग्वेदभाष्योपक्रमणिकायां दयानन्दः।

"परमेश्वरेणेदं सकलं जगत्क्रियते तस्मात् तस्य कूर्म्म इति संज्ञा"॥ प्रजापतेरवतारविशेषः। यथा, शतपथब्राह्मणे। ७। ५। १। ५।

"स यत् कूर्म्मो नाम एतद्वा रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद् यदकरोत् तस्मात् कूर्म्मः काश्यपो वै कूर्म्मस्तस्मादाऽः सर्व्वाः प्रजाः काश्यप इति। स यः स कूर्म्मोऽस्य स आदित्यः"। इति॥ * ॥)

वायुवायुविशेषः। यथा,—

"उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः"॥

इति भारतादितिलकटीका॥ * ॥ मुद्राविशेषः। यथा,—

"वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठया।
तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योजयेत्॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च॥
वामस्य पिहितैर्घ्येन मध्यमानामिके तथा।
अधोमुखे च ते कुर्य्याद्दक्षिणस्य करस्य च॥
कूर्म्मपृष्ठसमं कुर्य्याद्दक्षपार्श्वे च सर्व्वतः।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि"॥

इति तन्त्रसारः॥ * ॥ (आसनविशेषः। यथा हठयोगदीपिकायाम्। १। २२।

"गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः।
कूर्म्मासनं भवेदेतदिति योगविदो विदुः"॥)

सत्ययुगे समुद्रमन्थनकाले मन्दरपर्व्वतधारणार्थं कच्छपरूपभगवदवतारविशेषः। यथा,—

"क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः"॥

इति पद्मपुराणम्॥ अपि च।

"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार"॥

इति श्रीभागवतम्॥ * ॥ ("काश्यपस्यापत्यानां कद्रोः पुत्रेषु एकः। स च नागविशेषः। यथा, महाभारते। १। ६५। ४१।

"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः।
कूर्म्मश्च कुलिकश्चैव कादवेयाः प्रकीर्त्तिताः"॥)

कूर्म्मचक्रं, क्ली (कूर्म्माकारं चक्रम्। मध्यपदलोपी कर्म्मधारयः।) क्षयिकर्म्मोक्तकच्छपाकारचक्रम्। तस्याकारो यथा,—

"प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः।
आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्"॥

तत्र नक्षत्रन्यासक्रमः।

"मध्यप्रागग्नियाम्यादिकृत्तिकादिचयत्रयैः।
क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः"॥

तत्र वेधो यथा,—

"पूर्ब्बापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे।
ईशाने राक्षसे वेधो वेध आग्नेयमारुते।
ताराक्षयान्वितं तत्र सौरिं यत्नेन चिन्तयेत्"॥

तत्र वेधादिजन्यदोषाः।

"अतिदुःखिरनाद्यृद्धिः शुभला मूषिकाः खगाः।
स्वचक्रं परचक्रञ्च सम्प्रैते सम्भवन्ति च॥
एवं देशग्रहग्रामनक्षत्रेक्षनामर्क्षतो वदेत्।
तथा च यत्र नक्षत्रे दिव्यपार्थिवनामभाः॥
दृश्यन्ते सुमहोत्पाताः खां दिशं तत्र पीड़येत्।
सौरिर्बलाधिपो दुष्टः खल्पवीर्य्यः शुभावहः॥
एकदा पीड़येद्यत्र भानुजः कूर्म्मपञ्चके।
तत्र स्थाने महाविघ्नो जायते नात्र संशयः॥
दुष्टस्थाने गते चन्द्रे कर्त्तव्यं भ्रान्तिपौष्टिकम्"॥

तच्चक्रमध्यस्था देशाः।

"मध्ये सारस्वता मत्स्याः शूरसेनाः समाधुराः।
पञ्चालशाल्वमाद्रेयकुरुक्षेत्रगजाह्वयाः॥
मरुनैमिषविन्ध्याद्रिपाण्ड्यान्ध्रोषाः सयामुनाः।
काश्ययोध्या प्रयागश्च गया वैदेहकादयः"॥

तत्र पूर्ब्बस्थदेशाः।

"प्राच्यां मागधशोणौ च वारेन्द्रोगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः"॥

तत्राग्निकोणस्थदेशाः।

"आग्नेय्यामङ्गवङ्गोपवङ्गचैपुरकोशलाः।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविदर्भाश्वरादयः"॥

तत्र दक्षिणस्थदेशाः।

"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः।
कावेरी ताम्रपर्णी च सह्याद्रिचित्रकूटकादयः"॥

तत्र नैर्ऋतकोणस्थदेशाः।

"नैर्ऋते द्रविड़ानर्त्तमहाराष्ट्राश्च रैवतः।
यवनः पह्नवः सिन्धुः पारसीकादयो मताः"॥

तत्र पश्चिमस्थदेशाः।

"पश्चिमे हैहयाऽऽद्रिश्लेच्छवासशकादयः"॥

तत्र वायुकोणस्थदेशाः।

"वायव्ये गुच्छराटश्च नाटजालन्धरादयः"॥

तत्र उत्तरस्थदेशाः।

"उत्तरे चीननेपालङ्कनकैकेयमन्दराः।
गान्धारहिमवत्कौच्चगन्धमादनमालवाः।
कैलासमङ्गकाश्मीरम्लेच्छदेशाः खसादयः"॥

तच्चेशानकोणस्थदेशाः।

"ऐशाने स्वर्णभौमश्च गङ्गाद्वारस्तु टङ्गणः।
वाह्लीकब्रह्मपुरकेकीराता दरदादयः"॥

इति ज्योतिस्तत्त्वम्॥ * ॥ अथ यन्त्रकूर्म्मोक्तकमठाकारचक्रम्। तस्य लिखनक्रमः।

"चतुरस्रं भुवं भित्त्वा कोष्ठानां नवकं लिखेत्।
पूर्ब्बकोष्ठादि विलिखेत् सप्तवर्गानुक्रमात्॥
लक्ष्मीग्रे मध्यकोष्ठे स्वरान् युग्मक्रमाल्लिखेत्।
दिक्षु पूर्ब्बादितो यत्र क्षेत्राद्यक्षरसंस्थितिः॥
मुखं तत्तस्य जानीयात् हस्तावुभयतः स्थितौ॥
कोष्ठे कुक्षी उभे पादौ द्वे ग्रिष्टं पुच्छमीरितम्॥
क्रमेणानेन विभजेन्मध्यस्थमपि भागतः"॥ * ॥

तस्याङ्गविशेषे स्थितस्य जपादौ शुभदोषाः यथा।

"मुखस्थो लभते सिद्धिं करस्थः खल्पजीवनः।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात्॥
पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः।
कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्"॥

तदज्ञाने दोषो यथा, मिश्रलायाम्।

"कूर्म्मचक्रमविज्ञाय यः कुर्य्यात् जपयज्ञकम्।
तस्य यज्ञफलं नास्ति सर्व्वानर्थाय कल्पते"॥

इति तन्त्रसारः॥ (तन्त्रोक्तयन्त्रधारणमन्त्रशुभादिसूचककूर्म्माकारचक्रविशेषः। तत्स्वरूपादि यन्त्रामले उक्तम्। यथा।

"कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम्।
यज्ज्ञात्वा सर्व्वशास्त्रार्थं जानाति पण्डितोत्तमः॥
अभेद्यं भेदकं चक्रं गृह्यमुद्धारपूर्ब्बकम्।
कूर्म्माकारं महाचक्रं चतुष्पादसमन्वितम्॥
तुण्डे स्वरान्, दक्षपादे कवर्गं, वामपादके।
चवर्गं, कीर्त्तितं पश्चात् अधःपादे टवर्गकम्॥
तदधस्तु तवर्गः स्यादुदरे च पवर्गकम्।
यवान्तं हृदये प्रोक्तं गृह्यान्तं पृष्ठमध्यके॥
लाङ्गूले शक्तिबीजञ्च क्षकारं लिङ्गमध्यके।
लिखित्वा गणयेन्मन्त्री चक्राकारं मनोहरम्॥
स्वरे लाभः कवर्गे श्रीश्चवर्गश्च विवेकदः।
टवर्गे राजपदवी तवर्गे धनवान् भवेत्॥
उदरे सर्व्वनाशः स्यात् हृदये बन्धदुःखभाक्।
पृष्ठे च सर्व्वसन्तापः लाङ्गूले मरणं ध्रुवम्॥
वैश्वावे पृष्ठदेशे तु दुःखञ्च वामपादके।
विरुद्धदेशजाभे तु न कुर्य्याच्चक्रचिन्तनम्॥
विरुद्धैके धर्म्मनाशो युग्मदोषे च मारणम्।
यत्र देवाक्षरप्राप्तिं तत्र चैन्निजवर्णकम्॥
विरुद्धञ्च त्यजेच्चक्रमन्यमन्त्रं विचारयेत्।
पृथक् होमे यदि भवेत् वर्णमाला महेश्वर!॥
यदि तत्सौख्यभावः स्यात् तत्सौख्यं नापि वर्ज्जयेत्।
विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च संत्यजेत्॥
इति ते कथितं देव! दृष्टादृष्टफलप्रदम्।
ये शोधयन्ति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम्"॥ * ॥

कूर्म्मरूपी विष्णुः केन रूपेण विराजते तत्संस्थानविवरणं मार्कण्डेयपुराणे ५८ अध्याये उक्तम्। तद्-यथा। क्रोष्टुकिरुवाच।

"भगवन्! कथितं सम्यक् भवता भारतं मम।
सरितः पर्व्वता देशा ये च तत्र वसन्ति वै॥
किन्तु कूर्म्मस्वया पूर्व्वं भारते भगवान् हरिः।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः॥
कथं स संस्थितो देवः कूर्म्मरूपी जनार्द्दनः॥

कूर्म्मच

शुभाशुभं मनुष्याणां भव्यते च ततः कथम् ।
यथामुखं यथापादस्तस्य तद्भूतभ्रेषतः ॥

मार्कण्डेय उवाच ।

प्राङ्मुखो भगवान् ! देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ! ॥
नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विधयाश्च द्विजश्रेष्ठ ! ये सम्यक् तान्निबोध मे ॥
येदमन्त्रा विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उच्चिहानास्तथा वत्स ! घोषसङ्घास्तथा खशाः ॥
मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥
विदेहकाः सपाञ्चालाः सङ्केताः कङ्कमारुताः ।
कालकोटिसपार्षण्डाः पारियात्रनिवासिनः ॥
कापिङ्कलाः कुरुर्वाह्यास्तथैवोडुम्बरा जनाः ।
गजाङ्ग्याश्च कूर्म्मस्य जलमध्यनिवासिनः ॥
कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनाम् ।
नक्षत्रचिंतयं विप्र ! शुभाशुभविपाटकम् ॥
दशध्वजोऽञ्जनश्चैव जम्बाख्यो मानवाचलः ।
सूर्यकर्णो व्याघ्रमुखः खर्मकः कर्व्वटाग्रनः ॥
तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥
प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
पूर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज ! ॥
कश्याया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः ॥
रौद्रः पुनर्व्वसुः पुष्यो नक्षत्रचिंतयं मुखे ।
पादे तु दक्षिणे देशाः क्रोष्टुके वदतः शृणु ॥
कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्द्धकर्णाश्च मत्स्याश्चा विन्ध्यवासिनः ॥
विदर्भा नारिकेलाश्च धर्म्मदीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥
कैरिन्धा हैमकूटाश्च निषधाः कंटकस्थलाः ।
दशार्णाहारिका नग्ना निषादाः काकुलालकाः ॥
तथैव पर्णशवराः पादे वै पूर्व्वदक्षिणे ।
अश्लेषर्क्षं तथा पैत्र्यं फाल्गुन्यः प्रथमास्तथा ॥
नक्षत्रचिंतयं पादमाश्रितं पूर्व्वदक्षिणम् ।
लङ्का कालाजिनाश्चैव शैलिका निकटास्तथा ॥
महेन्द्रमलयाद्रौ च दर्दुरे च वसन्ति ये ।
कर्कोटकवने ये च भृगुकच्छाः सकोङ्कणाः ॥
सर्व्वाश्चैव तथाऽऽभीरा वैणवास्तीरनिवासिनः ।
अवन्तयो दासपुरा स्तथैवाकणिनो जनाः ॥
महाराष्ट्राः सकार्णाटा गोनर्दाश्चित्रकूटकाः ।
चोलाःकोलगिराश्चैव क्रौञ्चदीपजटाधराः ॥
कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
पुष्कुस्तुत्यादिवैदूर्य्यशैलप्रान्तचराश्च ये ।
तथा वारिचराः कोलाः चर्म्मषट्टनिवासिनः ।
गणवाह्याः परा क्षुण्णादीपवासनिवासिनः ॥
सूर्य्याद्रौ कुमुदाद्रौ च ते वसन्ति तथा जनाः ।
कौशावनाः सपिण्डिका स्तथा ये कर्म्मनायकाः ॥
दक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ।
ऋषभाः सिंहलाश्चैव तथा काञ्चीनिवासिनः ।
तिलङ्गा कुञ्जरदरी कच्छवासाश्च ये जनाः ।

कूर्म्मच

ताम्रपर्णी तथा कुक्षिरिति कूर्म्मस्य दक्षिणाः ।
फाल्गुन्यश्चोत्तरा हस्ता चित्रा चर्त्तव्यं द्विज ! ।
कूर्म्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ॥
काम्बोजाः पल्लवाश्चैव तथैव बडवामुखाः ।
तथा च सिन्धुसौवीराः सागर्त्ता वनितामुखाः ॥
द्रावणाः सार्गिगाः शूद्राः कर्णप्रावेयवर्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥
धूर्त्तका हैमगिरिकाः सिन्धुकालकवैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महाशवाः ॥
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्यो विशाखा मैत्रश्च नक्षत्रचयमेव च ॥
मणिमेघः क्षुरादिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥
कोकङ्गणाः पद्मदकाः वमना ह्यवरास्तथा ।
तारक्षुरा ह्यश्वतकाः शर्करा शाल्मवेश्मकाः ॥
गुप्तसराः फल्गुनकाः वेणुमत्याश्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥
एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्म्मस्य संस्थिताः ॥
ऐन्द्रमूलन्तथाषाढा नक्षत्रचयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥
कुन्तलाडहाश्चैव स्त्रीवाह्या बालिकास्तथा ।
नृसिंहा वेणुमत्याश्च बलावस्थास्तथापरे ॥
धर्म्मबद्धास्तथालूका उरुकर्म्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्म्मस्य भागुरे ॥
आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥
क्रौञ्चाः कुरुवकाश्चैव क्षुद्रवीर्याश्च ये जनाः ।
रसालयाः सकैकेया भोगप्रस्थाः सयामुनाः ॥
अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्नीव्याः सार्दना जनाः ।
तथैवाश्वमुखाः प्राग्ज्योतिषविड़ाः केशधारिणः ॥
दासेरका वाटधानाः शूलधानास्तथैव च ।
पुल्कसाधमकैराता स्तथा तक्षशिलाश्रयाः ॥
अम्बाला मालवा मद्रा वेणुकाः सवदन्तिकाः ।
पिङ्गला मानकलहा हूणाः कोहलकास्तथा ॥
माण्डव्या भूतियुवकाः शातका हेमतारकाः ।
यज्ञोमत्याः सगान्धाराः खरसागररागयः ॥
यौधेया दासमेयाश्च राजन्याः श्यामकास्तथा ।
क्षेमधूर्त्ताश्च कूर्म्मस्य वामकुक्षिमुपाश्रिताः ॥
वारणश्चाश्च नक्षत्रं तत्र प्रौष्ठपदाद्वयम् ।
येन किन्नरराज्यश्च पशुपाशं सकोचकम् ॥
काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ।
दवदास्तङ्गणाश्चैव कुलटा वनराष्ट्रकाः ॥
सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यकाः ।
किरातकौशिकानन्दा जनाः पल्लवलोलनाः ॥
दार्वादा मरकाश्चैव कुरटाश्चाम्रदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥
तथा सयवना हिङ्गाश्चीरप्रावरणाश्च ये ।
त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ! ॥
पूर्व्वोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः ।
रेवत्याश्चाश्विदैवत्यं याम्यर्क्षमिति त्रयम् ॥
तत्र पादे समाख्यातं पाकाय मुनिसत्तम ! ।

कूर्म्मच

देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ! ॥
एतत्पीड़ा यमी देशाः पीड्यन्ते ये क्रमोदिताः ।
यान्ति चाभ्युदयं विप्र ! ग्रहैः सम्यगवस्थितैः ।
यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावितो भयम् ।
तद्देशस्य मुनिश्रेष्ठ ! तदुत्पर्त्ते शुभागमः ।
प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ॥
भयं लोकस्य भवति शोभनं वा द्विजोत्तम ! ।
स्वर्क्षैरशोभनैर्जन्तोः सामान्यमिति भीतिदम् ॥
ग्रहैर्भवति पीड़ोत्थमल्पायासमशोभनम् ।
तथैव शोभनः पाको दुःस्थितैश्च तथा ग्रहैः ॥
अल्पोपकाराय नृणां देशश्चैवात्मनो बुधैः ।
द्रव्ये गोष्ठेऽथ भृत्येषु सुहृत्सु तनयेषु वा ॥
भार्य्यायाश्च गृहे दुःस्थे भयं पुण्यवतां नृणाम् ॥
आत्मन्यल्पपुण्यानां सर्वत्रैवातिपापिनाम् ।
नैकत्रापि ह्यपापानां भयमस्ति कदाचन ॥
दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ॥
परस्पराभिरक्षा च ग्रहादौःस्थ्येन जायते ।
एतेभ्य एव विप्रेन्द्र ! शुभहानिस्तथाशुभैः ॥
यदेतत् कूर्मसंस्थानं नक्षत्रेषु मयोदितम् ।
एतत् तु देशसामान्यमशुभं शुभमेव च ।
तस्मात् विज्ञाय देशर्क्षं ग्रहपीड़ान्तथात्मनः ॥
कुर्व्वीत शान्तिं मेधावी लोकवादांश्च सत्तम ! ।
आकाशादेवतानाश्च दैत्यादीनाश्च दौर्हृदाः ॥
एष्यां पतन्ति ते लोके लोकवादा इति श्रुताः ।
तां तथैव बुधःकुर्य्यात् लोकवादान्न हापयेत् ॥
तेषान्तत्करणान्नृणां युक्तो दुष्टागमक्षयः ॥
शुभोदयं प्रहाणिश्च पापानां द्विजसत्तम ! ।
प्रज्ञाहानिं प्रकुर्य्युस्ते द्रव्यादीनाश्च कुर्वते ॥
तस्माच्छान्तिपरः प्राज्ञो लोकवादस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ॥
अद्रोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
जपं होमं तथा दानं स्नानं क्रोधादिवर्जनम् ॥
अद्रोहः सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ।
वर्जयेदसतीं वाचमविवादांस्तथैव च ॥
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीड़ासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ! ॥
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यशेषतः ।
एष कूर्मो मया ख्यातो भारते भगवान् विभुः ॥
नारायणो ह्यचिन्तात्मा यत्र सर्व्वं प्रतिष्ठितम् ।
तत्र देवाः स्थिताः सर्व्वे प्रतिनक्षत्रसंश्रयाः ॥
तथा मध्ये ऋतवः पृथ्वी सोमश्च वै द्विज ! ।
मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ॥
प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ।
सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्थितम् ।
तुलाथ वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ॥
पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ।
वायव्ये चास्य वै पादे धनुर्राशादिकं त्रयम् ॥
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ।
मीनमेषौ द्विजश्रेष्ठ ! पादे पूर्व्वोत्तरे स्थितौ ॥
कूर्मे देशास्तथर्क्षाणि देशेष्वेतेषु वै द्विज ! ॥
राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ।

कूर्म्मं

तस्मादयङ्कर्त्तपीड़ासु देशपीड़ां विनिर्दिशेत् ॥
तत्र स्नात्वा प्रकुर्वीत दानहोमादिकं विधिम् ।
स एष वैश्वदेवः पादो ब्रह्मा मध्ये यज्ञस्य यः" ॥*॥
विष्णुः । स एव काश्यपसंज्ञया परिकीर्त्यते तत्प्रमाणादिकं यथा,—शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत् तद् यदकरोत् तस्मात् कूर्म्मः काश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्य" इति ॥ अत्र सायणभाष्यम् । स यत् कूर्म्म इति । "परमेश्वरेणेदं सकलं जगत् क्रियते तस्मात्तस्य कूर्म्म इति संज्ञा । काश्यपो वै कूर्म्म इत्यनेन परमेश्वरस्यैव काश्यपनामास्ति । तेनैव इमाः सर्व्वाः प्रजा उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । काश्यपः कस्मात् पश्यको भवतीति निरुक्तया पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगत् विजानाति स पश्यः पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येव अतः पश्यक इति । आद्यान्ताक्षरविपर्य्ययासिद्धेः सिंहः क्षतेस्तर्कुरित्यादिवत् काश्यप इति द्रष्टव्यम् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति अतः सुष्ठु विज्ञायते काश्यप्यः प्रजा इति"॥•॥)

कूर्म्मएष्ठः, पुं, (कूर्म्मस्य एष्ठमिव । कठोरत्वात् तथात्वम् ।) अस्त्रानच्छः । इति शब्दचन्द्रिका ॥ कच्छपस्य एष्ठदेशः ॥ (यथा, महाभारते ३ । ४६ । ११ ।
"गूढ़गुल्फाङ्गिरौ पादौ ताम्रायततलाङ्गुली ।
कूर्म्मएष्ठोन्नतौ चापि भ्रोभेते किञ्चिदीकिञ्चौ"॥)

कूर्म्मएष्ठकं, क्ली, (कूर्म्मएष्ठमिव कायते प्रकाशते इति । कै + कः ।) शरावम् । इति शब्दचन्द्रिका । शरा इति भाषा ॥

कूर्म्मराजः, पुं, (कूर्म्मरूपेण कूर्म्मेषु वा राजते यः । राज् + अच् ।) कच्छपराजः । तत्पर्य्यायः । अकूपारः २ परीवर्त्तः ३ । इति जटाधरः । तथाहि ।
"एष्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्म्मराज ! तदिदं हितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तस्थितये दिशीर्षा-
मार्य्यैः करोतु हरकार्म्मुकमातनुध्वम्" ॥
इति महानाटकम् ॥ स एवादिकच्छपः । यथा ।
"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
हत्वा वपुः काञ्चनपर्व्वताभं महत्
प्रविश्य तोयं गिरिमुज्जहार ॥
सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्ग ! एष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥
इति श्रीभागवते । ८ । ७ । ८, १० ॥

कूल, आहतौ । इति कविकल्पद्रुमः ॥ (भां–परं–सकं–सेट् ।) षण्ढस्त्री । कूलति वाटी प्राचीरम् । इति दुर्गादासः ॥

कूलं, क्ली, (कूलति जलप्रवाहं आहृणोतीति । कूल् + अच् ।) नद्या जलसमीपस्थानम् । (यथा, रघुः । १६ । ६५ ।

कूष्माण्डी

"इत्यध्वगः कैश्चिदहोभिरन्ते
कूलं समासाद्य कृशः सरय्वाः" ॥)
तत्पर्य्यायः । रोधः २ तीरम् ३ प्रतीरम् ४ तटम् ५ तटः ६ तटी ७ । इत्यमरः । १ । १० । ७ ॥ रोधम् ८ । इति शब्दरत्नावली ॥ वेला ९ । इति जटाधरः ॥ (कूल्यते आश्रियतेऽसौ । कूल + घञर्थे कः ।) स्थूपः । सैन्यएष्ठम् । तड़ागः । इति विश्वः ॥

कूलकं, क्ली, पुं, (कूल + स्वार्थे संज्ञायां वा कन् ।) स्तूपः । इति मेदिनी । तीरम् । इति विश्वः ॥

कूलकः, पुं, (कूल + संज्ञायां कन् ।) क्षमिपर्व्वतः । इति मेदिनी । उत्तर ढिपि इति भाषा ॥

कूलङ्कषः, पुं, (कूलं तीरं कषति भिनत्तीति । कष् + खश् मुम् च ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कूलङ्कषा, स्त्री, (कूलङ्कष + टाप् ।) नदी । इति हलायुधः ॥ (यथा, शाकुन्तले ५ अङ्के ।
"अपदेशमाविलयितुं समीहसे माघ नाम पातयितुम् । कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च"॥)

कूलभूः, स्त्री, (कूलस्य तीरस्य भूः भूमिः ।) तीरभूमिः । इति हेमचन्द्रः ॥

कूलवती, स्त्री, (कूलं तटः अस्त्यस्याः । अस्त्यर्थे मतुप् मस्य वः । ततो ङीप् ।) नदी । इति राजनिर्घण्टः ॥

कूलङ्कषकः, पुं, (कूले तड़ागादौ ऊर्द्धते संधीभवतीति । ऊर्द्ध संघे + ण्वुल् इदित्वात् नुम् च । एषोदरात् उकारलोपः ।) जलावर्त्तः । इति त्रिकाण्डशेषः ॥

कूवरः, पुं, क्ली, (कू शब्दे + वरच् ।) युगन्धरः । यत्र रथस्य यूपकाष्ठमासज्यते तच्च । इत्यमरसेदिनीकरौ ॥ (यथा, रामायणे ३ । २८ । ३० ।
"हेमचन्द्रमसम्बाधं वैदूर्य्यमणिकूवरम्" ।
रथमित्यर्थः ॥)

कूवरः, पुं, क्ली, (कू + वरच् ।) कुङ्कुमः । कुँङ्गा इति भाषा । मनोज्ञे, त्रि । इति मेदिनी ॥

कूवरी, स्त्री, (कूवर + गौरादित्वात् ङीष् ।) कम्बलाच्छादितरथः । इति हलायुधः ॥

कूष्माण्डः, पुं, (कु ईषत् ऊष्मा अण्डेषु बीजेषु यस्य ।) कर्कारुः । गणदेवताविशेषः । इति हेमचन्द्रः ॥ (कूष्माण्डाकारत्वात् शिवगणोऽपि तन्नाम्नाऽऽख्यायते । यथा, भागवते २ । ६ । ३२ । "अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः" ॥ ऋषिविशेषः । यथा, याज्ञवल्क्ये ।
"कूष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" ॥
यजुर्वेदिकमन्त्रविशेषः । यथा, मनुः ८ । १०६ ।
"कूष्माण्डैर्वापि जुहुयाद् घृतमग्नौ यथाविधि" ॥
"कूष्माण्डमन्त्रा यजुर्वेदिकाः यद्देवा देवहेलनमित्येवमादयः । तैर्मन्त्रदेवतायै घृतमग्नौ जुहुयात्" । इति तट्टीकायां कुल्लूकभट्टः ॥)

कूष्माण्डकः, पुं, (कूष्माण्ड + स्वार्थे कन् ।) कूष्माण्डः । इत्यमरटीकायां स्वामी ॥

कूष्माण्डी, स्त्री, (कूष्माण्ड + गौरादित्वात् जातित्वात् वा ङीष् ।) ओषधिः अम्बिका । इति हेमचन्द्रः ॥ (अम्बिकायाश्च कूष्माण्डबलिप्रियत्वात् तथात्वम् ।

कृकवा

मन्त्रात्मकदेवतासु ऋत्विग् तु स्त्रियां ङीप् । यथा, याज्ञवल्क्ये ।
"चिराज्ञोषोषितो भूत्वा कूष्माण्डीभिर्घृतं शुचिः ।
सुरापः स्वर्णहारी च ब्रह्महापी जले स्थितः" ॥
"चिराज्ञमुषोषितः कूष्माण्डीभिर्यदेवा देवहेड़नमित्याद्याभिः कूष्माण्डदृष्टाभिरनुवृद्भिर्मन्त्रलिङ्गदेवताभिर्दृग्भिस्तावारिंशदृचताऽऽहुतीर्जुहुत्वा शुचिर्भवेत्" ॥ तथा, मिताक्षरायाम् । "अथ कूष्माण्डीभिर्जुहुयादृग्योऽपूतमिवात्मानं मन्येत यदर्व्वाचीनमेनोभ्यागच्छत्यायात्तस्मान्मुच्यते अथोनौ वा रेतः सिक्त्वा अन्यत्र स्नात्वादिति" । वशिष्ठस्मृतौ च ।
"सर्व्ववेदपवित्राणि वक्ष्यामहमतः परम् ।
येषां जपेन होमैश्च प्रयान्ते नात्रसंशयः ॥
अघमर्षणं देवव्रतः शुद्धवत्यस्तरत् समाः ।
कूष्माण्ड्यः पावमान्यश्च दुर्गासावित्र्यथैव च" ॥)

कूहना, स्त्री, (कुह + युच् । एषोदरात् पूर्व्वदीर्घः ।) कुहना । इति शब्दरत्नावली ॥

कूहा, स्त्री, (कु कुत्सितं ईषदा ऊह्यतेऽत्र । ऊह वितर्के + अधिकरणे घञर्थे कः । यद्वा कुहयति मोहयति लोकान् । कुह + कः एषोदरादित्वाद् दीर्घः ।) कुज्झटिका । इति शब्दरत्नावली । कुया इति भाषा ॥

कृ, च करोतौ । इति कविकल्पद्रुमः ॥ (भां–उभं–सकं–अनिट् ।) च, करति करते । अयं कैश्चित् न मन्यते । इति दुर्गादासः ॥

कृ, च ग वधे । इति कविकल्पद्रुमः ॥ (स्वां–उभं–सकं–अनिट् ।) अ ग, क्षणोति क्षणुते । इति दुर्गादासः ॥

कृ, अ द डु करोतौ । इति कविकल्पद्रुमः ॥ (तनां–उभं–सकं–अनिट् ।) अद, करोति कुरुते । ड, क्षत्रियम् । अस्माद्गुणी मकारोऽप्यगुणी वा वक्तव्य इति वररुचिः ॥ "तेन किं करोमि कथं कुर्मि क्वानु गच्छामि माधव ! । दुर्य्योधनविहीनन्तु शून्यं सर्व्वमिदं जगत्" ॥ इति दुर्गादासः ॥

कृकः, पुं, (कृ + कक् ।) गलः । इति हेमचन्द्रः ॥

कृकणः, पुं, (कृ इति कणति शब्दं करोतीति । कृ + कण शब्दे + अच् ।) झकरपक्षी । कयार इति भाषा । इत्यमरः । २ । ५ । १९ ॥ क्षमिः । इति शब्दावली ॥

कृकरः, पुं, (कृ करणं कृच्छ्रादिकार्य्यं करोतीति । कृ + ट ।) शिवः । इति त्रिकाण्डशेषः ॥ (कृ इति क्षुतादिशब्दं करोतीति ।) शरीरवाय्वपचवाय्वन्तर्गतवायुविशेषः । यथा,—
"कृकरस्तु क्षुते चैव जवाकुसुमसन्निभः" ।
इति शारदातिलकटीका ॥ कृकणपक्षी । इति शब्दरत्नावली ॥ चव्यकम् । करवीरवृक्षः । इति राजनिर्घण्टः ॥

कृकवा, स्त्री, (कृकाकारं गलदेशाकृतिं लातीति । ला + कः टाप् च ।) पिप्पली । इति राजनिर्घण्टः ॥ (कृकं श्लेष्मितगलं लातीति । कृकलासस्त्री । यथा, इन्द्रजालतन्त्रे ।
"सर्पदन्तं गृहीत्वा तु कृष्णवृश्चिककण्टकम् ।
कृकलासस्य संयुक्तं सूक्ष्मचूर्णन्तु कारयेत्" ॥)

छकलासः, पुं, (छकं कण्ठं लासयति श्लेष्मायुक्तं करोति। छक + लस + णिच् + अच्। एषोदरात् तालव्यशकारः।) छकलासः। इति चिकाण्डशेषः॥

छकलासः, पुं, (छकं कण्ठं लासयति श्लेष्मान्वितं करोतीति। छक + लस + णिच् अच्।) जन्तुविशेषः। काँकलास् इति भाषा॥ (यथा, भागवते। ८। १०। ११।
"शिवाभिराखुभिः केचित् छकलासैः श्वगैर्नरैः"।) तत्पर्य्यायः। सरटः २। इत्यमरः। २। ५। १२॥ वेदारः ३ छकचपात् ४ दशाङ्गनः ५ प्रतिसूर्य्यः ६। इति चिकाण्डशेषः॥ प्रतिसूर्य्यकथायामकः ७ दक्षिस्थः ८ कण्टकागारः ९ दुरारोहः १० द्रुमाश्रयः ११। इति राजनिर्घण्टः॥ (सूर्य्यवंशोद्भवो नृगनामको राजा ब्रह्मगोहरणेन कृकलासत्वं गतस्तद्विवरणं महाभारते १३। ७० अध्याये। उक्तं यथा,—
"अत्रैव कीर्त्यते सद्भिर्ब्राह्मणस्वाभिमर्षणे।
नृगेण सुमहत्कृच्छ्रं यदवाप्तं कुरूद्वह!॥
अदृश्यत महाकूपस्तृणवीरुत्समावृतः।
प्रयत्नं तत्र कुर्व्वाणास्तस्मात् कूपाज्जलार्थिनः॥
अमेया महता युक्तास्तस्मिंस्तोये सुसंवृते।
ददृशुस्ते महाकायं छकलासमवस्थितम्।
तस्य चोद्धरणे यत्नमकुर्व्वंस्ते सहस्रशः।
प्रग्रहैश्चर्म्मपट्टैश्च तं बद्ध्वा पर्व्वतोपमम्।
नाशक्नुवन् समुद्धर्त्तुं ततो जग्मुर्जनार्द्दनम्।
स्वमाहात्म्योदपानस्य छकलासः स्थितो महान्।
तस्य नास्ति समुद्धर्त्तेत्येतत् कृष्णो न्यवेदयत्"॥)

छकवाकुः, पुं, (छकेन गलेन वक्ति। "छके वचः कच्च" उणां १। ६। इति छकशब्द उपपदे ऊक् कच्चान्तादेशः।) कुक्कुटः। इत्यमरः। २। ५। १७। (यथा, माघे ११। ६। "अनुनयमयष्टीत्वा आजसुप्ता पराची रतमथ छकवाकोत्कारमाकर्ण्य कल्पे" ॥) मयूरः। सरटः। इति मेदिनी॥

छकवाकुध्वजः, पुं, (छकवाकुः मयूरः ध्वजे रथध्वजे यस्य।) कार्त्तिकेयः। इति चिकाण्डशेषः॥

छकाटिका, स्त्री, (छकं कण्ठं अटति आप्नोति कण्ठं व्याप्नोतीति भावः। अट् + ण्वुल् टाप् अत इत्वं च।) घाटा। इत्यमरः। २। ६। ८८॥ घाड़ इति भाषा॥ (यथा, सुश्रुते "अधूर्द्ध मर्म्माणि चतस्रो धमन्योऽधो मांसका द्वे छकाटिके"। "जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तछकाक्षेति सन्धिमर्म्माणि"॥)

छकूलासः, पुं, (छकलास + एषोदरात् दीर्घऊकारः।) छकलासः। इत्यमरटीका॥

छक्कं, क्ली, (छन्नति सुखम्। छदि छदने "छतेरुच्च"। उणां। २। २१ इति रक् छकान्तादेशः।) कफम्। (यथा, मनुः ६। ७८।
"नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा।
तथा व्रजन्निमन्देहं छक्काद्याश्चादिमुच्यते"॥
"सितोपला वा समयावशूका
छक्केन सर्व्वेष्वपि मेयत्वं स्यात्"॥
"रेतोविघातप्रभवे तु छक्के
समीक्ष्य दोषं प्रतिकर्म कुर्य्यात्"॥
इति चरके चिकित्सास्थाने २६ अध्याये॥)
तद्वति त्रि॥ छक्कत्वेनेव पापमिति। सान्तपनादिव्रतम्। इत्यमरः। २। ७। ४२॥ (यथा, याज्ञवल्क्ये।
"गोमूत्रं गोमयं क्षीरं दधिसर्पिःकुशोदकम्।
अभ्यधा परेऽह्युपवसेत् छक्कं सान्तपनं चरन्"॥)
स्तुतौ व्रते पुंलिङ्गोऽप्ययम्॥
पापम्। इति मेदिनी॥ मूत्रछक्करोगः। इति राजनिर्घण्टः॥
("हरीतकीगोक्षुरराजवृक्ष-
पाषाणभिद्वन्नयवासकानाम्।
क्वाथं पिबेन्मात्रिकसंप्रयुक्तम्॥"
इति वैद्यकचक्रपाणिसङ्ग्रहे मूत्रछक्काधिकारे॥
व्यसनम्। यथा, रामायणे ४। १४। १४।
"अक्षतं गोक्षपूर्व्वं मे चिरं छक्केऽपि तिष्ठता।
धर्म्मलोभपरीतेन न च वध्ये कथञ्चन"॥)

छक्काछक्कः, पुं, (छक्कात् कफादपि अतिछक्कः।) व्रतविशेषः। यथा, वशिष्ठः। "अभक्षस्तृतीयः छक्काछक्को यावत् सकृदाददीत। यावदेकवारमुदकं हस्तेन गृहीतुं शक्नोति तावन्नवसु दिवसेषु भक्षयित्वा नवमुपवासः छक्काछक्कः"। सुमन्तुर्यथा। "द्वादशरात्रं निराहारः स छक्काछक्कः। एतत् छक्काछक्कद्वयं द्वादशाहसाध्यमशक्तविषयम्"। ब्रह्मपुराणम्।
"चरेत् छक्काछक्कञ्च पिबेत्तोयञ्च शीतलम्।
एकविंशतिरात्रन्तु कालेष्वेतेषु संयतः"॥
कालेष्विति प्रातःसायंमध्याह्नेष्वित्यर्थः। इति प्रायश्चित्तविवेकः॥ (यथा, मनुः ११। २०८।
"अवगूर्य्य चरेत् छक्कमतिछक्कं निपातने।
छक्काछक्कौ कुर्व्वीत विप्रस्योत्पाद्य शोणितम्"॥)

छक्कारिः, पुं, (छक्कस्य मूत्रछक्करोगस्य कफस्य वा अरिर्नाशकः।) विल्वान्तरवृक्षः। इति राजनिर्घण्टः॥

छक्कार्द्धः, पुं, (छक्कस्य अतीवश्लेष्मप्रशस्तव्रतविशेषस्य अर्द्धः अंशविशेषः। दिनषट्कसाध्यत्वात्तथात्वम्।) दिनषट्कसाध्यव्रतविशेषः। यथा, आपस्तम्बः।
"सायं प्रातस्तथैकैकं दिनद्वयमयाचितम्।
दिनद्वयञ्च नाश्नीयात् छक्कार्द्धः सोऽभिधीयते"।
इति प्रायश्चित्तविवेकः॥

छगुः, पुं, (करोति प्रतिमूर्त्त्यादिकम्। कृ + बाहुलकात् गु णत्वञ्च।) चित्रकरजातिः। इति त्रिकाण्डशेषः॥

छत्, ई ग्र प क्षिदि। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ई, छत्तः। ग्र प, छन्तति। (यथा, हितोपदेशे,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति"॥)
छत्, छृत्, छृदित्यादिरूपञ्चेयं वेमत्वादेव निष्ठायां अनिमित्ते सिद्धे यस्य पूर्व्वस्य च ईदनुबन्धो नेमड्डीत्यस्य अभिचारसूचनार्थः। तेन धावुज् जवे भ्वादीनां धाविताः पाठ्यसार्था इत्यादि सिद्धमिति रमानाथः। मनितः यतितं इत्यादि सिद्धमिति क्रमदीश्वरः। ईदित्करणमाभाष्यां यङ्लुकि निष्ठायां इम्निषेधार्थं इति केचित्। चरीछत्त इति। किञ्चैतन्मते धाविनादीनां धावनं भावः धावोऽस्य जातः धावितः इत्यादि समाधानम्। "विरविणिछन्तनछुत्तमुखाछुतिकेतकिदन्तुरिताग्रे" इत्यत्र निछन्तन इति जयदेवोक्तं निछन्तं करोति इति ग्रन्थात् औ नन्ध्यादित्यादने साध्यम्। इति दुर्गादासः॥

छत्, ई ध वेष्टे। इति कविकल्पद्रुमः॥ (सधां-परं-सकं-सेट्। ईर्निष्ठायामनिट्।) ई, छत्तः। ध, छद्धि चकर्त्त। इति दुर्गादासः॥

छतं, क्ली, (क्रियते सत्यनेवानुष्ठीयतेऽस्मिन् यद्वा क्रियते सत्यं ख्याप्यते लोको यत्र। कृ + क्तः।) सत्ययुगम्। (यथा, विष्णुपुराणे। २। १। ४१।
"छतत्रेतादिसर्गेण युगाख्यां लोकसन्ततिः"॥)
पर्य्याप्तम्। इत्यमरः। ३। ३। ७६॥ बलम्। इति हेमचन्द्रः॥ अलमर्थः। इति मेदिनी॥ (यथा,—
शाकुन्तले १ अङ्के। "अथवा छतं सन्देहेन"॥)
पुं, वसुदेवस्य रोहिण्यां पत्न्यां जातः पुत्रविशेषः। यथा, भागवते ९। २४। ४६।
"बलं गदं सारणञ्च दुर्म्मदं विमलं ध्रुवम्।
वसुदेवस्तु रोहिण्यां छतादीनुदपादयत्"॥)

छतं, त्रि, (क्रियते विधीयते हन्यते निष्पाद्यते वा। कृ + कर्म्मणि क्तः।) विहितम्। (यथा, वेणीसंहारे।
"छतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्"॥)
छिंसितम्। इति मेदिनी॥ निष्पादितम्। इत्यमरटीकायां मथुरानाथः॥

छतकं, क्ली, (छत + संज्ञायां कन्।) विड्लवणम्। इत्यमरः॥ (अस्य पर्य्याया यथा,
"विड्म्लेच्छञ्च छतकं तथा द्राविड्मा सुरम्"॥
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥
छन्तीति छती छेदने + "बऊलमन्यत्रापि"। उणां २। ३७। इति कुन्। मिथा। इत्युज्ज्वलदत्तः॥ पुं, वसुदेवस्य मदिरायां पत्न्यां जातः पुत्रविशेषः। यथा, भागवते ९। २४। ४८।
"नन्दोपनन्दछतकशूराद्या मदिरात्मजाः"॥)
त्रैलोक्यमेतत् कृतकमित्युच्यते कार्य्यत्वात्। यथा, विष्णुपुराणे। २। ७। १६-२०।
"प्रादग्भ्यन्तु यत्किञ्चित् वस्तुस्ति पृथिवीमयम्।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः॥
भूमिसूर्य्यान्तरं यत्तु सिद्धादिमुनिसेवितम्।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम!॥
ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्दश।
स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः॥
त्रैलोक्यमेतत् कृतकं मैत्रेय! परिपठ्यते।
जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम्॥
कृताकृतकयोर्मध्ये महर्लोक इति स्मृतः।
शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति"॥
अत्र व्याख्यायां श्रीमत्स्वामिपादैरुक्तम्।
यथा,—
"त्रैलोक्यं कृतकं प्रतिकल्पं कार्य्यत्वात्।

जगर्जोकादित्रयं अक्षतकं प्रतिकल्पमकार्य्यत्वात् ॥ महालाकस्य क्षताक्षतत्वे हेतुमाह शून्य इति" ॥)

क्षतकः, त्रि, (क्षन्तति स्वरूपम् । क्षत् + क्कुन् । करणाद्यात इत्यर्थः । क्षत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम् ।) क्षत्रिमः । इत्युणादिकोषः ॥ (यथा, महाभारते । ४ । २ । २९ ।

"एतेन विधिना क्षत्रः क्षतकेन यथानलः" ॥)

क्षतकर्म्मा, [न्] त्रि, (क्षतं कर्म्म येन सः ।) कार्य्यक्षमः । तत्पर्य्यायः । प्रवीणः २ शिक्षितः ३ निष्णातः ४ निपुणः ५ दक्षः ६ क्षतहस्तः ७ क्षतमुखः ८ कुशलः ९ चतुरः १० अभिज्ञः ११ विज्ञः १२ वैज्ञानिकः १३ पटुः १४ क्लेकः १५ विदग्धः १६ । इति हेमचन्द्रः ॥ (यथा, महाभारते १।१५५।२९।

"अथवाप्यहमेवैनं हनिष्यामि वृकोदर ! ।
क्षतकर्म्मा परिश्रान्तः साधु तावदुपारम" ॥

पुं, विष्णुः । यथा, महाभारते १३ । १४९ । ९७ ।

"इन्द्रकर्म्मा महाकर्म्मा क्षतकर्म्मा क्षतागमः" ॥)

क्षतकृत्यः, त्रि, (क्षतं निष्पादितं कृत्यं कार्य्यं येन सः ।) निष्पन्नकर्म्मा । समाप्तकार्य्यः । यथा, माघे । २ । ३२ ।

"क्षतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्" ॥

क्षतकोटिः, पुं, (क्षता विहिता कोटिः शास्त्राणां अन्तरर्थादिभेदने पूर्व्वपक्षविशेषो येन । यद्वा, क्षता लब्धा कोटिः श्रेष्ठता येन । धातूनामनेकार्थत्वात् लब्धातुरत्र प्राप्त्यर्थे युज्यते ।) काश्यपमुनिः । उपवर्षमुनिः । इति त्रिकाण्डशेषः ॥

क्षतक्रियः, त्रि, (क्षता क्रिया कार्य्यं येन सः ।) क्षतकार्य्यः । यथा, मनुः । ५ । ९९ ।

"विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् ।
वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः क्षतक्रियः" ॥

क्षतघ्नः, त्रि, (क्षतं येन केनचिज्जनेन उपक्षतं हन्ति नाशयति यः । अहङ्कारादिप्रयुक्तया दुर्बुद्ध्या उपक्षतस्यानङ्गीकारकत्वात् तथात्वम् ।) क्षतहन्ता । अर्थात् येन केनचित्कृतस्य उपकारादेर्घातकः अस्वीकर्त्ता । नेमकहाराम इति भाषा ॥ (यथा, मनुः । ४ । २१४ ।

"पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा ।
ग्रैलूषतुन्नवायान्नं क्षतघ्नस्यान्नमेव च" ॥)

तस्य प्रायश्चित्ताभावो यथा,—

"ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे ।
निष्कृतिर्विहिता सद्भिः क्षतघ्ने नास्ति निष्कृतिः" ॥

स तु बहुविधो यथा,—

"भर्त्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः ।
यस्तादृग्गृहीत्वा विद्यां दक्षिणां न प्रयच्छति ॥
पुत्रान् स्त्रियश्च यो हन्ति यश्च तान् घातयेन्नरः ।
क्षतस्य दोषं वदति सकामान् न करोति यः ॥
न स्मरेच्च क्षतं यस्तु आश्रमान् यस्तु दूषयेत् ।
सर्व्वान्तान्तविभिः सार्द्धं क्षतघ्नानाह मनुः" ॥

इति प्रायश्चित्ततत्त्वे स्कन्दपुराणवचनम् ॥

क्षतच्छिद्रा, स्त्री, (क्षतं छिद्रं यस्याम् ।) कोशातकी लता । इति राजनिर्घण्टः ॥

क्षतज्ञः, त्रि, (क्षतं उपक्षतं जानाति स्वीकरोति यः । ज्ञा + कः ।) मर्य्यादी ।

(यथा, मनुः । ७ । २०९–२१० ।

"धर्म्मज्ञश्च क्षतज्ञश्च तुष्टिप्रकृतिमेव च ।
अनुरक्तः स्थिरारम्भो लघुमित्रः प्रशस्यते ॥
प्राज्ञः कुलीनः शूरश्च दक्षो दातारमेव च ।
क्षतज्ञं धृतिमन्तञ्च कस्तमाऽऽरहितं बुधाः" ॥)

कुक्कुरे, पुं । इति मेदिनी ॥

(पुं, विष्णुः । यथा, महाभारते १३ । १४९ । २२ ।

"अनुत्तमो दुराधर्षः क्षतज्ञः क्षतिरात्मवान्" ॥)

क्षतजा, स्त्री, (क्षतं जायते । क्षत + जै + कः ।) जायमाना लता । इति राजनिर्घण्टः ॥

क्षतदासः, पुं, (क्षतः विहितः क्षतनियमो वा दासः ।) नारदोक्तपञ्चदशदासान्तर्गतदासविशेषः । स तु केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति क्षतसमयः । इति क्रमसंग्रहः ॥

क्षतपुङ्खः, त्रि, (क्षतः अभ्यस्तः पुङ्खः पुङ्खयुक्तो वाणो येन ।) वाणशिक्षाविचक्षणः । भाल तिरन्दाज इति भाषा । तत्पर्य्यायः । क्षतहस्तः २ सुप्रयोगविशिखः ३ । इत्यमरः । २ । ८ । ६८ ॥

क्षतपूर्व्वी, [न्] त्रि, (क्षतं निष्पादितं पूर्व्वमनेन । कृतपूर्व्व + "सपूर्व्वाच्च" । ५ । २ । ८७ । इति इनिः ।) पूर्व्वनिष्पन्नकर्म्मा । यथा । क्षतपूर्व्वी कटम् । इति संक्षिप्तसारव्याकरणम् ॥

क्षतफलं, क्ली, (क्षतं फलं अस्य ।) कक्कोलम् । इति राजनिर्घण्टः ॥

क्षतफला, स्त्री, (क्षतं फलं अस्याः ।) कोलशिम्बी इति राजनिर्घण्टः ॥

क्षतमालः, पुं, (क्षता माला अस्य । मालावदुत्पन्नप्रसूनत्वादस्य तथात्वम् ।) आरग्वधवृक्षः । सोंदालि इति भाषा । इत्यमरः । २ । ४ । २४ ॥ कर्णिकारवृक्षः । स तु लघ्वारग्वधः । इति राजनिर्घण्टः । छोट शोणालु इति भाषा ॥ (अस्य पर्य्याया यथा ।

"आरेवतो राजवृक्षः प्रग्रहश्च तुरङ्गमः ।
आरग्वधोऽथ शम्याकः क्षतमालः सुवर्णकः" ॥

इति वैद्यकरत्नमालायाम् ॥

चरके कल्पस्थाने ऽष्टमेऽध्याये ऽस्य पर्य्याया यथा ।

"आरग्वधो राजवृक्षः सम्याकश्च तुरङ्गमः ।
प्रग्रहः क्षतमालश्च कर्णिकारोऽवघातकः" ॥)

क्षतमुखः, त्रि, (क्षतं संस्कृतं मुखं यस्य ।) क्षतकर्म्मा । क्षती । इत्यमरः । ३ । १ । ४ ॥

क्षतलक्षणः, त्रि, (क्षतानि लक्षणानि अस्य ।) गुणैः प्रतीतः । शौर्य्यादिगुणैः ख्यातः । इत्यमरः । ३ । १ । १० ॥ (पुं, सर्व्वलक्षणवत्त्वात् विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।

"अविज्ञाता सहस्रांशुर्विधाता क्षतलक्षणः" ॥)

क्षतवेतनः, त्रि, (क्षतं विहितं वेतनं यस्य ।) वेतनेन नियुक्तदासादिः । इति स्मृतिः ॥

क्षतवेधकः, पुं, (क्षतः वेधोऽस्य । ततः कप् ।) घोषातकी । इति रत्नमाला । श्वेतधोवा इति भाषा ॥

क्षतवेधना, स्त्री, (क्षतं वेधनं अस्याः ।) कोषातकी लता । इति राजनिर्घण्टः ॥

क्षतश्रमः, त्रि, (क्षतः श्रमो यत्र ।) महोत्साहः । येन श्रमः क्षतः सः । इति शब्दमाला ॥

क्षतसापत्निका, स्त्री, (क्षतं सापत्नं यस्याः । कप् टाप् ततः अत इत्वे य लोपः ।) क्षतसपत्नीभावा । प्रथमविवाहिता स्त्री । तत्पर्य्यायः । अग्र्यूढा २ अधिविन्ना ३ । इत्यमरः । २ । ६ । ७ ॥ क्षतसापत्नका ४ क्षतसापत्नी ५ क्षतसापत्नीका ६ । इति तट्टीकायां रमानाथः ॥

क्षतहस्तः, त्रि, (क्षतः अभ्यस्तः हस्तः वाणादिनिक्षेपलाघवरूपा शिक्षा येन सः ।) क्षतपुङ्खः । सुशिक्षितशरमोक्षयोधादिः । इत्यमरः २ । ८ । ६८ ॥ (यथा, महाभारते । ४ । ५६ । २० ।

"अप्राप्तांश्चैव तान्पार्थश्छिन्द क्षतहस्तवत्" ॥)

क्षताञ्जलिः, त्रि, (क्षतः अञ्जलिः येन सः । बद्धाञ्जलिः । यथा, छन्दोगपरिशिष्टे ।

"तदसंयुक्तपार्ष्णिर्व्वा एकपादर्द्धपादपि ।
कुर्य्यात्कृताञ्जलिर्व्वापि ऊर्द्धबाहुरथापि वा" ॥

इति सूर्य्योपस्थाने आङ्गिकाचारतत्त्वम् ॥ (क्षतः अञ्जलिरिव पत्रसङ्घातो येन ।) ओषधिभेदे, पुं । इति धरणी ॥

क्षतान्तः, पुं, (क्षतः अन्तः नाशः, शास्त्रनिर्णयः, विपर्य्ययो वा येन । यथायथं व्युत्पत्तिर्द्रष्टव्या ।) यमः । (यथा, गोः रामायणे । ५ । ३५ । ३ ।

"ऐश्वर्य्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
रज्ज्वेव पुरुषो बद्धः क्षतान्तेनोपनीयते" ॥)

सिद्धान्तः । (यथा, भगवद्गीतायाम् । १४ । १३ ।

"पक्षेमानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये क्षतान्ते प्रोक्तानि सिद्धये सर्व्वकर्म्मणाम्" ॥)

दैवम् । पूर्व्वदेहकृतं पक्वोन्मुखीभूतं शुभाशुभकर्म्म । अकुशलकर्म्म । इत्यमरः । १ । ४ । ६४ ॥ अनिवारः । इति शब्दचन्द्रिका ॥ (यथा, तिथितत्त्वधृतज्योतिर्वचने ।

"क्षतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्" ॥

यमदैवत्यभरणीनक्षत्रम् । तेन द्वित्वसङ्ख्या ॥ अग्नियमदहनेति वचनात् ॥)

क्षतान्तजनकः, पुं, (क्षतान्तस्य यमस्य जनकः जन्मदाता ।) सूर्य्यः । इति हेमचन्द्रः ॥

क्षतान्ता, स्त्री, (क्षतान्त + टाप् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

क्षतार्थः, त्रि, (क्षतः निष्पादितः प्राप्तो वा अर्थः प्रयोजनं येन ।) क्षतप्रयोजनः । क्षतकार्य्यः । यथा, माघे । १ । ६ । "विलोकनेनैव तवासुना मुने क्षतः क्षताधाऽस्मि निवर्हितांहसा" ॥

क्षतालयः, पुं, (क्षते अन्यक्षतगर्त्ते जलाश्रयादौ आलयः आश्रयो यस्य ।) भेकः । इति त्रिकाण्डशेषः ॥ (क्षतः आलयः येन । क्षतवासे, त्रि । यथा, रामायणे ।

"यत्र ते दयिता भार्य्या तनयाश्च क्षतालयाः" ॥)

क्षतावग्रन्थिकः, त्रि, (क्षता आवग्रन्थिका येन ।) वस्त्रादिना क्षतस्कन्धानुजङ्घादिबन्धः । इति कात्यायनः ॥ (यथा, आङ्गिकतत्त्वधृतकात्यायनवचने ।

"प्रौढ़पादो न कुर्व्वीत स्वाध्यायपितृतर्पणम् ।
आसनाद्रूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।

क्षतावशक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥)
क्षतिः, स्त्री, (क्षद + भावे क्तिन् ।) करणम् । हिंसा । इति मेदिनी ॥ (पुरुषप्रयत्नः । कर्त्तृव्यापारः । क्रिया । यथा, सुग्धबोधे ।
"जगतां कारकः क्षत्रा क्षतिर्मुररिपोरियम्" ॥
पुं, ऋषिविशेषः । यथा, विष्णुपुराणे । ३ । ६ । ७ ।
"हिरण्यनाभश्चित्रस्य चतुर्विंशतिसंहिताः ।
प्रोवाच क्षतिनामासौ शिष्येभ्यः स महामतिः" ॥
नृपभेदः । यथा, मार्कण्डेयपुराणे । ८ । २१ ।
"सप्ताश्वमेधानाहृत्य राजसूयञ्च पार्थिवः ।
क्षतिर्नाम श्रुतः स्वर्गात् असत्यवचनात् क्षतात्" ॥
स तु जनकवंशजातः । यथा, भागवते । ६ । १३ । २६ ।
"बऊलाश्वो धृतेस्तस्य क्षतिरस्य महाबलः" ॥
विंशत्यक्षरपादकछन्दोभेदः ॥ यथा, "क्षतिः प्रकृतिराकृतिः" ॥ विंशतिसङ्ख्या । कर्त्तनी । यथा, ऋग्वेदे । १ । १६६ । ३ ।
"ऐषामंसेषु रम्भिणीव रारभे
हस्तेषु खादिश्च क्षतिश्च सन्दधे" ॥
विष्णुः । यथा, महाभारते । १३ । १४६ । २२ ।
"अनुत्तमो दुराधर्षः क्षतज्ञः क्षतिरात्मवान्" ॥)
क्षतिकरः, पुं, (क्षतिसङ्ख्याः विंशतिसङ्ख्या करा यस्य ।) रावणः । इति शब्दमाला ॥
क्षती, [न्] त्रि, (क्षतं कर्म्म प्रशस्तमस्यास्तीति । अत इनिः ।) निपुणः । पण्डितः । इत्यमरः । ३ । १ । ८ ॥ साधुः । पुण्यवान् । इति शब्दरत्नावली ॥ (क्षतक्रियः । यथा, रघौ ३ । ५१ ।
"यद्याय शक्रं यदि स्वर्ग एव ते
नखव्यनिर्जित्य रघुं क्षती भवान्" ॥)
क्षत्तं, त्रि, (क्षती प्र पृ छिदि + क्तः ।) छिन्नम् । चेष्टितम् । इति हेमचन्द्रः ॥
क्षत्तिः, स्त्री, (क्षत्रते इति । क्षद् + कर्म्मणि क्तिन् ।) क्षत्रसारादिधर्म्मः । इत्यमरः । २ । ७ । ३७ ॥ (यथा, महादेवध्याने ।
"समन्तात् क्षुतमारब्धैर्व्याघ्रक्षत्तिं वसानम्" ॥)
त्वक् । भूजः । छत्रिकानखत्वम् । इति मेदिनी ॥
क्षत्तिका, स्त्री, (क्षन्तति उद्यतत्वात् । क्षद् + "क्षत्तिमिदिलिभ्यः क्विप्" । उञां ३ । १७७ । इति तिकन् क्विप् च ।) अश्विन्यादिसप्तविंशत्यन्तर्गतनक्षत्रतृतीयनक्षत्रम् । तत्पर्य्यायः । बऊला २ अग्निदेवा ३ । इति हेमचन्द्रः ॥ तस्या रूपम् । अग्निशिखाक्षतिघटतारकामयम् । इति कात्यायनः । क्षुरनिभघटतारामयम् । इति केचित् । तस्या अधिष्ठात्री देवता अग्निः । सा तु मिश्रगणान्तर्गता । इति दीपिका ॥ तत्र जातस्य फलम् ।
"क्षुधाधिकः सत्यधनैर्विहीनो
वृथाटनोत्पन्नमतिः क्षतघ्नः ।
कठोरवाक् चाहितकर्म्मकृत् स्यात्
क्षत्तिकायां मनुजः प्रसूतः" ॥
इति कोष्ठीप्रदीपः ॥
क्षत्तिकाभवः, पुं, (क्षत्तिकायाः भवोऽस्य ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (क्षत्तिकाधवः । इति केचित् ॥)
क्षत्तिकासुतः, पुं, (क्षत्तिकायाः सुतः तया प्रार्थितत्वात् ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥
क्षत्तिवासः, पुं, (क्षत्त्या गजासुरचर्म्मणा वस्ते स्वकटिदेशं आच्छादयति यः । वस् आच्छादने + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शिवः । इति द्विरूपकोषः ॥
क्षत्तिवासः, [स्] पुं, (क्षत्तिर्गजासुरस्य चर्म्म वासोऽस्य ।) शिवः । इत्यमरः । १ । १ । ३३ ॥
(यथा च महादेवस्य चर्म्मवसनत्वं जातं तथा काशीखण्डे ६७ अध्याये वर्णितं यथा,—
"कोलाहलो महानासीत् त्रात त्रातेति सर्व्वतः ।
महिषासुरपुत्रोऽसौ समायाति गजासुरः ॥
प्रमथान् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः ।
यत्र यत्र धरायां स चरत्यं प्रमिमीति हि ॥
बाहुदण्डान् दोलयाञ्चक्रे तत्र तत्रास्य भारतः ।
उत्पेतेरेव तरवः पतन्ति शिखरैः सह ॥
तस्य दोर्दण्डवातेन चूर्णाः स्युश्च शिलोच्चयाः ।
यस्य मौर्व्विज्यसंघर्षाद् घना व्योम त्वजन्त्यघम् ॥
गौरिमाणं न चाद्यापि जऊलत्वेऽप्यसङ्गजम् ।
यस्य निःश्वाससम्भारैरुत्तरङ्गा महाब्धयः ॥
नाद्याप्यमन्दकल्लोला भवन्ति तिमिभिः सह ।
योजनानां सहस्राणि नव यस्य समुच्छ्रयः ॥
तावानेव हि विस्तारस्तनोर्मायाविनोऽस्य हि ।
यन्नेत्रयोः पिङ्गिमा तथा तरङ्गिमा पुनः ॥
विद्युता गोऽन्वते ऽद्यापि सोऽयमायाति सत्वरः ।
यां यां दिशं समभ्येति सोयं दुःसहदानवः ॥
नाद्य समीभवेदस्य साध्वसादिव दिग्भयम् ।
ब्रह्मण्यवरदायं हृष्टौद्धतजगत्त्रयः ॥
अवध्योऽहं भवामीति स्त्रीपुंभिः कामनिर्जितैः ।
ततस्त्रिशूलहेतिस्तमायान्तं दैत्यपुङ्गवम् ।
विज्ञायावध्यमन्येन शूलेनाभिजघान तम् ।
प्रोतस्तेन त्रिशूलेन स च दैत्यो गजासुरः ॥
हृषीकृतमिवात्मानं मन्यमानो जगौ हरम् ॥

गजासुर उवाच ।

त्रिशूलपाणे ! देवेश ! जाने त्वां स्मरहारिणम् ।
तव हस्ते मम वधः श्रेयानेव पुरान्तक ! ॥
किन्विदिच्छामि किन्त्वां अवधेहि ममेरितम् ॥
सत्यं ब्रवीमि नासत्यं शम्भुशय ! विचारय ।
त्वमेको जगतीवन्द्यो ! विश्वस्योपरि संस्थितः ॥
अहं त्वदुपरिष्टाच्च स्थितोस्मीति जितं मया ।
धन्योस्मानुग्रहीतोस्मि त्वत्तिशूलाग्रसंस्थितः ॥
कालेन सर्व्वैर्मर्त्तव्यं श्रेयसे मरणं वरम् ॥
इति तस्य वचः श्रुत्वा देवदेवः कृपानिधिः ।
प्रोवाच प्रहसन् प्रभुर्घटोद्भवगजासुरम् ॥

ईश्वर उवाच ।

गजासुर ! प्रसन्नोस्मि मत्तोपौरुषसेवधे ! ।
वाञ्छितं वरं ब्रूहि ददामि सुमते ऽधुना ! ॥
इत्याकर्ण्य स दैत्येन्द्रः प्रत्युवाच महेश्वरम् ॥

गजासुर उवाच ।

यदि प्रसन्नो देववासस्तदा नित्यं वसान मे ।
इमां क्षत्तिं विरूपाक्ष ! त्वत्तिशूलाभिपावितां ।
सुप्रभावां सुखस्पर्शां रक्षाकृत्यपवीक्षताम् ।

इष्टगन्धिः सदैवास्तु सदैवास्त्वतिकोमला ।
सदैव निर्म्मला चास्तु सदैवास्त्वतिमङ्गलम् ॥
महातपानलज्वालां प्राप्यापि सुचिरं विभो ! ।
न दग्धा क्षत्तिरेषा मे पुण्यगन्धनिधिस्ततः ॥
यदि पुण्यवती नैषा मम क्षत्तिर्दिगम्बर ! ।
तदा त्वदङ्गसङ्गोऽस्याः कथं जातो रथाङ्गने ॥
अन्यच्च मे वरं देहि यदि तुष्टोऽसि शङ्कर ! ।
नामास्तु क्षत्तिवासास्ते प्रारभ्याद्यतनं दिनम् ॥
इति तस्य वचः श्रुत्वा तथेत्युक्त्वा च शङ्करः ।
पुनः प्रोवाच तं दैत्यं भक्तिनिर्म्मलमानसम् ॥

ईश्वर उवाच ।

शृणु पुण्यनिधे ! दैत्य ! वरमन्यं सुदुर्ल्लभम् ।
अविमुक्ते महाक्षेत्रे स्यात्वत्कृत्तिवेर ! ॥
इदं पुण्यशरीरं ते क्षेत्रेऽस्मिन् मुक्तिसाधने ।
मम लिङ्गं भवत्वत्र सर्व्वेषां मुक्तिदायकम् ॥
क्षत्तिवासेश्वरं नाम महापातकनाशनम् ।
सर्व्वेषामेव लिङ्गानां शिरोभूतमिदं वरम् ॥
यावन्ति सन्ति लिङ्गानि वाराणस्यां महान्त्यपि ।
उत्तमं तावतामेतदुत्तमाङ्गवदुत्तमम्" ॥ * ॥
यदि चात्र गजासुरचर्म्मणाच्छादकत्वं वर्णितं तथापि कार्य्यावस्थाविशेषेण व्याघ्रचर्म्मणाप्यस्य परिधेयकत्वं दृश्यते यथा व्याघ्रकृत्तिं वसानमिति ध्यानादौ स्फुटमेव वस्तुतस्तु नचैतत् बाह्यचर्म्मादिविषय एव ग्रन्थकारेण भगवता महर्षिणा वर्णितः त्रिगुणात्मिका प्रकृतिरेव तस्याच्छादिका इति आध्यात्मिकी स्वरूपोक्तिः । यथा, "गुणमयी मायैषा वावह तस्य परमस्य आच्छादनी" । व्याघ्रहस्त्यादेस्तिसृषु मायायां वैचित्र्यप्रदर्शनायैव । अपि च कटिदेशपर्य्यन्तोक्तिरेवंपाद एव मायाच्छादितत्वात् । यथा, श्रुतिः ।
"पादोऽस्य विश्वाभूतानि त्रिपादोऽस्य स्वयंप्रभः" ॥)
क्षत्नुः, त्रि, (क्षद + "क्षदिनिभ्यां क्त्नुः" । उञां ३ । १० । इति क्त्नुः ।) शिखी । इत्युणादिकोषः ॥ (यथा, — ऋग्वेदे १ । ६२ । १० । "अग्नीव क्षत्नुर्विश आविवासन् मर्त्तस्य देवी जरयन्त्यायुः" ॥)
क्षत्यं, क्ली, (क्षद + "विभाषा क्षविधोः" । ३ । १ । १२० । इति क्यप् तुगागमश्च ।) कार्य्यम् । (यथा, गोः रामायणे ३ । ६० । २७ ।
"तथा स राक्षसीरुक्त्वा राक्षसेन्द्रः प्रतापवान् ।
निश्चक्रमान्तःपुरात्तस्मात् किं क्षत्यमिति चिन्तयन्" ॥)
प्रयोजनम् । इति हेमचन्द्रः ॥
क्षत्यः, त्रि, (क्षद + क्यप् तुगागमश्च ।) विदितः । इति मेदिनी ॥ धनादिभिर्म्येयः । इति जटाधरः ॥ प्रत्ययविशेषः । यथा,—
"क्षत्याः षट्ते समाख्याताः क्यप्खलौ भावकर्म्मणोः ।
तव्यानीयावनत्याद्यत्केलिमः कर्म्मकर्त्तरि" ॥
इति सुपद्मव्याकरणसम्मता कारिका । कर्त्तरि कर्म्मणि चार्थे विहिताः क्षत्या वाथलिङ्गाः स्युः । क्षत्याख्यादयः वोपदेवमते "ते क्त्याः" "क्रुञोः कर्मणि" इत्यूक्तेः क्वचित् क्षत्याः कर्त्तर्य्यपि स्युः । कर्त्तरि यथा भक्ष्यस्तरुः भक्ष्या जता भक्ष्यं वनम् । कर्म्मणि यथा, ग्रामो गन्तव्यः नगरी गन्तव्या पुरं गन्तव्यम् ।

कर्त्तरि कर्म्मणि किं स्नातव्यं श्रेयं ब्रह्मभूयम् ॥ ब्रह्महत्या इह भावे कृत्याः । असंज्ञायामित्येव सूर्य्योऽर्कः भित्योद्यौ नदौ । इत्यमरटीकायां भरतः ॥

कृत्या, स्त्री, (कृ + भावे क्यप् ।) क्रिया । यथा वां कृत्यामकार्षीः । देवता । यज्ञदेवताविशेषः । इत्यमरभरतौ ॥ यथा, प्रक्रादचरिते ।

"कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम्" ॥
तस्या ध्यानं यथा,—

"क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं
दृष्टिं दहन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां
रोरूयमाणां क्षुधयोग्रकालीम्" ॥ * ॥

आभिचारिकी क्रिया । यथा,—

"रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता ।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम्" ॥
इति षट्कर्म्मदीपिका ॥

कृत्रिमं, क्ली, (कृ + क्त्रिः मप् च ।) विड्लवणम् । इति मेदिनी । काचलवणम् । जवादिनामगन्धद्रव्यम् । रसाञ्जनम् । इति राजनिर्घण्टः ॥

कृत्रिमः, पुं, सिक्थकः । (तुरुष्कनामगन्धद्रव्यविशेषः ।) इति मेदिनी । (कृ + "वृतः क्त्रिः" । कृत्या क्रियया निर्वृत्त इति "चेर्मप् नित्यम्" इति मप् ।) दादशविधपुत्रान्तर्गतपुत्रविशेषः । इति जटाधरः । (एतद्विषयकविवरणन्तु पुत्रशब्दे द्रष्टव्यम् ॥)

कृत्रिमः, त्रि, ("वृतः क्त्रिः" । ३ । ३ । ८८ । इति क्त्रिः । ततः कृत्या निर्वृत्तः । "चेर्मप् नित्यम्" ४ । ४ । २० । इति मप् ।) करणाज्जातः । रचितः । इति मेदिनी ॥ (यथा, रघौ १६ । ३७ ।

"प्रावर्षि प्रमदवर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः" ॥)

कृत्रिमकः, पुं, (कृत्रिम + स्वार्थे संज्ञायां वा कन् ।) तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कृत्रिमधूपकः, पुं, (कृत्रिमः विविधसुगन्धिद्रव्यादिकल्पितो धूपः । ततः स्वार्थे कन् ।) नागासुगन्धिद्रव्यकृतदशाङ्गादिधूपः । तत्पर्य्यायः दशकधूपः २ । इत्यमरः । २ । ६ । १२८ ॥

कृत्रिमपुत्रः, पुं, (कृत्रिमश्चासौ पुत्रश्चेति ।) द्वादशपुत्रमध्ये पुत्रविशेषः । तथा च मनुः ।

"सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः" ॥
अस्यार्थः । "यः पुनः समानजातीयं पित्रोः पारलौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत इत्येवमादिज्ञं पुत्रगुणैश्च मातापित्रोराराधनादिभिर्युक्तं पुत्रं कुर्य्यात् स कृत्रिमाख्यः पुत्रो बोध्यः" । इति कुल्लूकभट्टः ॥ पुत्रलिका । यथा । कुमारे । १ । २६ ।

"सा कन्दुकैः कृत्रिमपुत्रकैश्च
रेमे मुहुर्मध्यगता सखीनाम्" ॥

कृत्रिममित्रः, पुं, (कृत्रिमं मित्रं इति । पुं स्त्रं नियामकात् ।) रचितबन्धुः । इति स्मृतिः ॥

कृत्सं, क्ली, (कृन्तति कृणत्ति वा । कृत् छेदे वेष्टने च । "स्त्रुवश्चिकृत्यृषिभ्यः कित्" । उणां ३ । ६६ । इति सः कित्च ।) जलम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ समुदायः । इत्युणादिकोषः ॥

कृत्स्नं, क्ली, (कृत् + क्त्स्न प्रत्ययः ।) जलम् । सर्व्वम् । (यथा, गीतायाम् । ११ । १३ ।

"तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा" ॥)
कुत्सितः । इति मेदिनी ॥

कृत्स्नः, त्रि, (कृत् + "कृत्यसूभ्यां क्त्स्नः" । उणां ३ । १७ । इति क्त्स्नः ।) अशेषः । समस्तः । इत्यमरः । ३ । १ । ६५ ॥ (यथा, मनुः २ । १६५ ।

"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना" ॥)

कृदरः, पुं, (कृ + अच् । "कृदरादयश्च" । उणां ५ । ४१ । इति साधुः ।) धान्यादिगृहम् । गोला इति भाषा ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तत्रं, क्ली, (कृन्तति इति । "कृतेर्नुम् चेति" । उणां ३ । १०६ । इति कत्रन् नुम् च ।) लाङ्गलम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तनं, क्ली, (कृत्यते इति । कृत् + भावे ल्युट् ।) छेदनम् । यथा, कर्म्मलोचने नारदवचनम् ॥

"कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः ।
श्रावणौचे न कर्त्तव्यं पाठनं पठनन्तथा" ॥
(तथा च गीतगोविन्दे, १ । ३२ ।

"विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे । विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे" ॥)

कृप, ऊ ङ व लृ कल्पने । इति कविकल्पद्रुमः ॥ (भां-आत्मं-अकं-सेट् ।) सप्तमस्वरी । कल्पनं सामर्थ्यम् । ऊ, अकल्पिष्ट अक्लृप्त । ङ, कल्पते कल्पश्चवदिति हलायुधः ॥ व, कल्प्स्यति चिक्लृप्सति । लृ, अक्लृपत् । हते तस्मिन् प्रियं श्रुत्वा कल्पता प्रीतिं परां प्रभुरिति अनेकार्थत्वेऽन्तर्भूतण्यर्थत्वात् जनयितेत्यर्थः । इति दुर्गादासः ॥

कृप, क्त दौर्ब्बल्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-अकं-सेट् ।) सप्तमस्वरी । कृपयति । षष्ठस्वरीति चिलोचनः । इति दुर्गादासः ॥

कृप, कि युतौ । चित्रे । कल्पने । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भां-परं-अकं सकर्म्म-सेट् ।) सप्तमस्वरी । कि कल्पयति कल्पति । कृपः कृपोऽकृपादाविति कृपादेशः । इति दुर्गादासः ॥

कृपः, पुं, (कृपा अस्त्यस्य पालनसाधनत्वेन । अर्शआदित्वात् अच् ।) कृपाचार्य्यः । स तु द्रोणाचार्य्यश्यालकः । इति मेदिनी ॥ तथा चोक्तम् ।

"गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ।
अश्वत्थामश्च जननी कृपस्यैव महात्मनः" ॥
इति महाभारतम् ॥ (स तु गोतमवंश्यस्य शरद्वतः पुत्रः राज्ञा शान्तनुना कृपया पालितः अतः कृप इति नाम्ना प्रसिद्धः । सोऽसौ यावज्जीवं कौमारब्रह्मचर्य्यमालम्ब्य कुरुबालकानामाचार्य्यत्वे भीष्मादिभिर्नियोजितः । कुरुक्षेत्रयुद्धे दुर्य्योधनपक्षमाश्रित्य पाण्डवैः सह संग्रामं कृत्वा लोकक्षयकरे तस्मिन् समरे अमरत्वात् न निहतः ॥ अस्य उत्पत्तिविवरणन्तु महाभारते १ । १३० अध्याये द्रष्टव्यम् ॥) व्यासः । इति धरणी । (राजर्षिविशेषः । यथा, ऋग्वेदे । ८ । ३ । १२ ।

"शृणुधि यथा रशमं श्यावकं कृपमिन्द्र ! प्रावः स्वर्णरम्" । "रशमं श्यावकं कृपं च एतन्नामकांस्त्रीन् राजर्षीन् यथा प्रावः" । इति भाष्यम् ॥)

कृपणः, त्रि, (कल्पते स्वल्पमपि दातुम् । कृप् + बाहुलकात् क्युन् अत एव न लत्वम् ।) अदाता । (यथा, व्यासोक्तौ ।

"दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति" ॥)
तत्पर्य्यायः । कदर्य्यः २ किम्पचानः ३ मितम्पचः ४ क्षुद्रः ५ । इत्यमरः । ३ । १ । ४८ ॥ किम्पचः ६ अनमितम्पचः ७ । इति तट्टीका ॥ मन्दः ८ कीकटः ९ कुसुत् १० कोणाशः ११ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । २ । ७५ ।

"दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृद्धा । कूपोऽन्तः खादुजलः प्रीत्यै लोकस्य न समुद्रः" ॥ दीनः । यथा, हैः रामायणे २ । ३२ । २८ ।
"ततः स पुरुषव्याघ्रस्तद्धनं सहलक्ष्मणः ।
द्विजेभ्यो बालवृद्धेभ्यः कृपणेभ्यो ह्यदापयत्" ॥
पारिभाषिककृपणानाह ॥ महाव्यसनप्राप्तो दीनः । यथा, रामायणे ४ । २१ । १९ ।
"आदित्यः कृपणस्यैष कृपणो न स राघव ! ।
महात्मा व्यसनं प्राप्तो दीनः कृपण उच्यते" ॥
यो हि अक्षरं ब्रह्म अविज्ञाय लोकान्तरगामी भवति सः । यदुक्तं बृहदारण्यके याज्ञवल्क्यप्रकरणे । "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपणः" इति ॥ दुहिता हि कृपापात्रत्वात् कृपणम् । यदुक्तं मनौ ४ । १८५ ।
"भ्राता ज्येष्ठः समः पित्रा भार्य्या पुत्रः स्वका तनुः ।
छाया स्वोदासवर्गश्च दुहिता कृपणं परम्" ॥)
कुत्सितः । इति मेदिनी ॥

कृपणः, पुं, कृमिः । इति मेदिनी ॥

कृपा, स्त्री, (क्रपेः सम्भारणञ्चेति भिदादिपाठादङ् टाप् च ।) करुणा । इत्यमरः । १ । ७ । १८ ॥ (यथा, महाभारते ।

"उवाच भीमं कल्याणी कृपान्वितमिदं वचः" ॥)

कृपाणः, पुं, (कृपां नुदति प्रेरयति दूरीकरोतीत्यर्थः । नुद प्रेरणे + अन्येभ्योऽपीति डः । पूर्व्वपदादिति णत्वम् ।) खड्गः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, कालिकापुराणे ।

"जघान दैत्यमतिरक्तलोचना
कृपाणपाशाङ्कुशशूलपट्टिशैः" ॥)

कृपाणकः, पुं, (कृपाण + स्वार्थे कन् ।) खड्गः । इति हारावली ॥

कृपाणिका, स्त्री, (कृपाणक + स्त्रियां टाप् अत इत्वं च ।) क्षुरिका । इति हेमचन्द्रः ॥

कृपाणी, स्त्री, (कृपाण + गौरादित्वात् ङीष् ।) कर्त्तरी । इत्यमरः । २ । १० । ३४ ॥ क्षुरिका । इति मेदिनी ॥

कृपादैतः, पुं, (कृपायां कृपावितरणे वा अद्वैतः अद्वितीयः ।) युद्धभेदः । इति त्रिकाण्डशेषः ॥

कृपालुः, त्रि, (कृपां लाति आदत्ते। ला + डुः। यद्वा कृपाविद्यते ऽस्यास्मिन् वा। कृपा + आलुच्।) दयालुः। इत्यमरः। ३। १। १५॥ (यथा भागवते। ४। १२। ५१। कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते"॥)

कृपी, स्त्री, (कृप + ङीष्।) द्रोणाचार्य्यपत्नी। इति मेदिनी॥ (यथा, महाभारते। १। १३१। २२। "शारद्वतीं ततो भार्य्यां कृपीं द्रोणोऽन्यविन्दत"॥ अस्या जन्मविवरणं यथा,—

पुरा किल महर्षेर्गौतमस्य पुत्रः शरद्वान् नाम ऋषिः धनुर्व्वेदपरत्वात् विपुलेन तपसा च इन्द्रं सन्तापयामास। इन्द्रस्तु अस्य तपोविघ्नं चिकीर्षुर्जानपदीं नाम खर्व्वेयां प्राहिणोत्। अथ रूपयौवनाढ्यां तामवलोकयतस्तस्य सहसा रेतश्चस्कन्द तत्तु शरस्तम्बे स्थापितं सत् द्विधाऽभवत्। ततश्चस्रात् मिथुनं समजायत। तदैव राजा शान्तनुर्मृगयामागतः अपत्यमिथुनं समवलोक्य राजधानीमानीय संस्कारादिभिः संवर्द्धयामास। कृपया संवर्द्धनाच्च कृपः कृपीति तयोर्नाम चक्रे। सेयं कृपाचार्य्यस्य भगिनी। एवैव अश्वत्थाम्नो जननीत्यवगन्तव्या॥)

कृपीटं, क्ली, (कृप + "कृतृकृपिभ्यः कीटन्"। उणां। ४। १८४। इति कीटन्। वाऊलकात् लत्वाभावः।) उदरम्। जलम्। इति मेदिनी॥ विपिनम्। इन्धनम्। इति शब्दरत्नावली॥

कृपीटयोनिः, पुं, (कृपीटं जलं पालयतीति। पालि + अच्।) केनिपातः। समुद्रः। इति मेदिनी। पवनः। इति शब्दरत्नावली॥

कृपीटयोनिः, पुं, (कृपीटस्य जलस्य योनिः कारणं। "वायोरग्निरम्भेरापः" इति श्रुतेस्तथात्वम्। यद्वा कृपीटं काष्ठं योनिरुत्पत्तिस्थानं यस्य।) अग्निः। इत्यमरः। १। १। ५८॥

कृपीपतिः, पुं, (कृप्याः कृपमगिन्द्राः पतिर्भर्त्ता।) द्रोणाचार्य्यः। इति शब्दमाला॥

कृपीसुतः, पुं, (कृप्याः सुतः।) अश्वत्थामा। इति भूरिप्रयोगः॥

कृमिः पुं, (क्रामतीति। क्रमु पादविक्षेपे + "क्रमितमिग्रतिस्तम्भामत इच्च"। उणां। ४। १२१। इति इन् "भ्रमेः सम्भसारश्च" इति अनुवृत्तेः सम्भसारश्च।) कीटः। पोका इति भाषा। तत्पर्य्यायः। नीलाङ्गः २। इत्यमरः। २। ५। १३। निलाङ्गुः ३ क्रिमिः ४। इति तट्टीका॥ पुरुषः ५। इति जटाधरः॥ लाक्षा। कृमिजः। खरः। इति विश्वमेदिन्यौ॥ उदरजातकीटरोगः। तस्यौषधं यथा,—

"वदरीकारवीमूलं गुडाज्येन समन्वितम्। धूमिना साधितं जग्ध्वा कृमीन्सर्व्वान् हरेच्छिवः!"॥ इति गारुडे १९४ अध्यायः॥

("कृमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः। बाह्या यूकाः प्रसिद्धाः स्युः किंचुलूकास्त्वभ्यन्तराः॥ सप्तधा हि भवेदाद्याः षड्धाश्चान्तः समुद्भवाः। तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे कृताम्॥ रूक्षादतिबलात् क्षेदात् चिन्तया शोचनादपि। कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि॥ यूकाः कृष्णाः पराः श्वेतास्तृतीयास्तर्म्मणि स्थिताः। सूक्ष्मातिविकटा रूक्षास्त्वग्भाभास्त्वग्भयूकिकाः। चतुर्थी विन्दुकी नाम वर्तुला मूत्रसम्भवा॥ मत्कुणाद्याश्च पञ्चम्यो बाह्योपद्रवकारियः। यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी॥ चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि लिक्षिका। उष्णद्रव्यनिषेवाच्च अजीर्णे मधुरद्रवात्॥

रूक्षान्नगोधूमयवान्नपिण्ड-
गुँड़ेन वा क्षीरविपर्य्ययेण।
दिवाशयाने च सपिच्छलेन
घर्म्मेण पापोदकसेवनेन॥
सञ्जायते तेन मलाशयेषु
कृमिव्रजः कोष्ठविकारकारि॥

षड्विधास्ते समुद्दिष्टास्तेषां वक्ष्यामि लक्षणम्। कफकोष्ठे मलाधारे कोष्ठे सर्पन्ति सर्पवत्॥ एष्वमङ्गा भवन्त्येके केचित् किंशुकसन्निभाः। धान्याङ्कुरनिभाः केचित् केचित् सूक्ष्मास्तथाणवः॥ सूचीमुखाः परिज्ञेयास्तान्त्वाग्नि खादयन्ति ते। वक्ष्यामि लक्षणं तेषां चिकित्साञ्च शृणुष्व मे॥ ज्वरोद्गारोगशूलं वा वमिर्वृत्तं क्लेदनं भ्रमः। अरुचिर्बन्धवैवर्ण्यमतीसारं सफेनिलम्॥ गर्ज्जनं जठरे चैव मन्दाग्नित्वञ्च जायते। पिपासा पीतता नेत्रे किंशुकैः पीड़ितस्य च॥

इति गण्डूपदलक्षणम्॥ *॥

सूचीवत्तुदतेऽत्यर्थं रक्तञ्चैवातिसार्य्यते। यद्यदा भक्षयत्यन्नं रक्तं वा वमते भृशम्॥ क्लेदो मुखेऽरुचिर्जाड्यं मन्दाग्नित्वञ्च वेपथुः। क्षुत्तृष्णा च ज्वरो ज्ञेयाः सूचीमुखकृमीरजाम्॥

इति सूचीमुखलक्षणम्॥ *॥

ये च धान्याङ्कुरास्तेषां वक्ष्याम्यथ च लक्षणम्। मलाशयस्थाः कृमयो मलं जग्धन्ति ते भृशम्॥ तैस्तु संपीड्यते देहे विड्विभेदं परुषता। कृमयश्चापि कुर्व्वन्ति कृमयो जनयन्ति ते॥ हारीतः संशयापन्नः पादौ संगृह्य रुक्षति। कथं देहे मनुष्यस्य मलमूत्रवसाशये॥ सम्भवन्ति कथञ्चादौ वर्द्धयन्ति कथं पुनः। कथं वा शीर्य्यते शरीरे नानाहारावभक्षणे॥ जायन्ते केन कृमयः सूक्ष्माधोगामिनोऽथवा। नानाऽऽमपक्वमध्यान्नं दहते वा ऊताग्नयः॥ कथन्ते कृमयश्चान्ते न दह्यन्तेऽन्तराग्निना। एवं एको महाचार्य्यः प्रोवाच मुनिपुङ्गवः॥

आत्रेय उवाच!

शृणुष्व पुत्र! महाबाहो! कृमिसम्भवकारणम्। विरुद्धान्नरसैः पुत्र! रक्तञ्चैवास्य कुप्यति॥ कफेनैकादिनं याति शुक्रेणाकारतां व्रजेत्। पञ्चभूतात्मके वायौ ते तु जाताः सचेतनाः॥ कोष्ठाग्निना न दह्यन्ते न शीर्य्यन्ते रसानिति। विषे जातो यथा कीटो न विषेण मृतिं व्रजेत्॥ तथा ऊताग्नयोद्भूतं न ऊताग्नेन जीर्य्यति। भेषजं संप्रवक्ष्यामि येन तेऽपि तरन्ति वै॥ पतन्ति वा शमं यान्ति भेषजानि शृणुष्व मे।

वचाऽजमोदा कृमिनित्यलाशु
बीजं शठी रामठकं चित्रञ्च।
उष्णोदके तत्परिपिष्य पेयं
पतन्ति शीघ्रं शृतधातुकीटाः॥
शठी यवानी पिचुमर्द्दपत्रान्
विड़ङ्गकृष्णातिविषा रसोनम्।
सम्पिष्य मूत्रेण चिरत्नयुक्तम्
विनाशनं सर्व्वकृमीरजानाम्॥

मरिचं पिप्पलीमूलं विड़ङ्गशिग्रुयवानिकाचित्रकः। गोमूत्रेण तु पेयं पानं शीघ्रं कृमीन् हन्ति॥

मुस्ता विशाला चित्रफला सुपर्णी
शिग्रुः सुवाक्यं सलिलेन कल्कः।
पानं सशर्क्करा कृमिशूलचूर्णं
विनाशनं सर्व्वकृमीरजाञ्च"॥

"मातुलुङ्गस्य मूलानि रसोनं कृमिजित्तिलम्। अजमोदा निम्बपत्रं गोमूत्रेण तु पेषयेत्॥ पानमेतत् प्रशंसन्ति कृमिदोषनिवारणम्। ज्वरप्रोक्तानि पथ्यानि कृमिदोषे प्रदापयेत्॥

इति कृमिचिकित्सा"॥ *॥

इति महर्ष्याश्रेयभाषिते हारीतोत्तरे कृमिचिकित्सा नाम पञ्चमोऽध्यायः॥ *॥

अस्य निदानपूर्व्वकसमग्रचिकित्सितं यथा। "अजीर्णाध्यशनात्याद्यैर्विरुद्धमलिनाशनैः। व्यायामदिवास्वप्नगुर्व्वतिस्निग्धशीतलैः। माषपिण्याकविदलविसशालूकशेरुकैः॥ पर्णशाकसुवाशुक्तदधिक्षीरगुड़ेक्षुभिः। पलालानूपपिशितपिण्याकएधुकादिभिः॥ खाद्यखाद्यपानैश्च श्लेष्मा पित्तञ्च कुप्यति। कृमीन् बहुविधाकारान् करोति विविधाश्रयान्॥ आमपक्वाशयस्तेषां प्रसवः प्रायशः स्मृतः। विंशतेः कृमिजातीनां त्रिविधः सम्भवः स्मृतः॥ पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम्। अथवा वियवाः किण्वाभिन्ना गण्डूपदास्तथा। चूरवो दिमुखाश्चैव सप्तैवैते पुरीषजाः॥ श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिसरन्ति च। तेषामेवापरे पृथ्वीः एथवश्च भवन्ति हि॥ यूकाग्निमान्द्यपाण्डुत्वविड्भेदबलसंक्षयाः। प्रसेकारुचिहृल्लासविड्भेदास्तु पुरीषजैः॥ रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः। सूक्ष्माटोपशूलक्लेदपक्किनाग्निकराश्च ते॥ दर्भपुष्पा महापुष्पाः प्रलूनाग्निपिटास्तथा। पिपीलिका दारुणाश्च कफकोपसमुद्भवाः॥ रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः। मूढधान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा॥ मज्जादा नेत्रलेढ़ारस्तालुश्रोचभुजस्तथा। शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते॥ केशरोमनखादाश्च दन्तादाः किक्किशास्तथा। कुष्ठजाश्च परीसर्प्पाः ज्ञेयाः शोणितसम्भवाः॥ ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च एथवस्तथा।

रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥
माषपिण्डान्नवसागुड़शाकैः पुरीषजाः ।
मांसमाषगुड़क्षीरदधिसुक्तैः कफोद्भवाः ॥
विरुद्धा जीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥
ज्वरो विवर्णतास्फोटं हृद्रोगः सदनं भ्रमः ॥
भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणम् ।
दृष्ट्वास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः ॥
केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्ज्जयेत् ।
एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम् ॥
सुरसादिविपक्वेन सर्पिषा वान्तमादितः ।
विरेचयेत्तीक्ष्णतरैर्योगैरास्थापयेच्च तम् ॥
यवकोलकुलत्थानां सुरसादेर्गवाक्षस्य च ।
विड़ङ्गखेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युञ्जीत कृमिघ्नैरन्नैस्ततः शीघ्रं भिषग्वरः ॥
स्नेहेनोक्तेन चैनन्तु योजयेत् स्नेहवस्तिना ।
ततः शिरीषकिणिही-रसं क्षौद्रयुतं पिबेत् ।
केचूकस्वरसं वापि पूर्ब्बवत्तीक्ष्णभोजनः ॥
पलाशबीजस्वरसं कल्कं वा तण्डुलाम्बुना ।
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ।
निम्बादन्यग्रहत्वचूर्णं विड़ङ्गं वा समाक्षिकम् ॥
पत्रैर्मूषिकपर्ण्या वा सर्पिष्टैः पिण्डमिश्रितैः ।
खादेत् पूपालिकान् पक्वान् धान्याम्लञ्च पिबेदनु ॥
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ।
विड़ङ्गचूर्ण-पिण्याभ्यां तस्मिन् भक्ष्यन्तु कारयेत् ॥
तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ।
स्नाविधः ग्रहणत्वचूर्णं सप्तरात्रं समावितम् ॥
विड़ङ्गानां कषायेण त्रैफलेन तथैव च ।
क्षौद्रेण लिह्यानुपिबेदसमालकोद्भवम् ।
अद्याभया रसक्षापि विधिरेषोऽयसामपि ॥
पूतीकस्वरसं वापि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥
सप्तरात्रं पिबेद्दध्नस्तुवा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेव कृमीन् भिषक् ॥
शिरोहृद्ग्राणवक्त्राणि संस्पृशंश्च पृथग्विधान् ।
विशेषेणाक्षिनैर्नस्यैरवपीड़ैश्च साधयेत् ॥
ग्रहणस्तन्तुरूपस्य सुश्रुतं भावयेदति । ।
निम्बाद्येन विड़ङ्गानां चूर्णं प्रथमनन्तु तत् ॥
अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक् ।
सकांस्यगोलं तैलञ्च नस्यं स्यात् सुरसादिके ॥
इक्ष्वलुप्तविधिश्चापि विधेयो रोमभोजिषु ।
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥
रक्तजानां समुद्दिष्टं कुर्य्यात् कुष्ठचिकित्सिते ।
सुरसादिन्तु सर्ब्बेषु सर्ब्बथैवोपयोजयेत् ॥
प्रथक्तिक्तकटुकं भोजनञ्च हितं भवेत् ।
कुष्ठघ्नक्वाथसंसृष्टं क्षीरपानञ्च पूजितम् ॥ * ॥

क्षीराणि मांसानि घृतानि चैव
दध्नीनि शाकानि च पर्ब्बवन्ति ।
समासतोऽम्लान् मधुरान् हिमांश्च
कृमीन् जिघांसुः परिवर्ज्जयेत्तु" ॥

इति सुश्रुत उत्तरतन्त्रे चतुःषष्ठ्यध्यायः ॥)

कृमिकण्टकं, क्ली, (कृमेः कृमिरोगस्य रोगे वा कण्टकमिव । तन्नाम्नकतया तथात्वम् ।) विड़ङ्गम् । चित्राङ्गः । उड़म्बरः । इति मेदिनी ॥

कृमिकोषोत्थं, त्रि, (कृमेः कृमिभिर्निर्म्मितो वा कोषः । शाकपार्थिववत् मध्यपदलोपः । तस्मात् उत्तिष्ठति उत्पद्यते । उत् + स्था + कः ।) कौषेयम् । इत्यमरः । २ । ६ । ११९ । रेसमिकापड़ इति भाषा ।

कृमिघ्नः, पुं, (कृमिं हन्ति इति । हन् + टक् । "हन्तेरत् पूर्ब्बस्य" । ८ । ४ । २२ । इति नियमात् न णत्वम् ।) विड़ङ्गः । इत्यमरः । २ । ४ । १०६ ॥ पलाशवृक्षः । कोविदारः । पारिभद्रः । भल्लातकः । इति राजनिर्घण्टः ॥ (विड़ङ्गहरिद्रा च । इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

कृमिघ्नी, स्त्री, (कृमिघ्न + अजादित्वात् टाप् ।) हरिद्रा । इति भावप्रकाशः ॥

कृमिघ्नी, स्त्री, (कृमिघ्न + टित्वात् ङीप् ।) धूमपत्रा । विड़ङ्गः । इति राजनिर्घण्टः ॥

कृमिज, क्ली, (कृमिभ्यो जायते इति । अन्येभ्योपीति डः ।) अगुरु ॥ इत्यमरः । २ । ६ । १२६ ॥ (कृमिजातमात्रे, त्रि । यथा, पञ्चतन्त्रे । १ । १०३ । "कौषेयं कृमिजं सुवर्णमुपलाद्दूर्ब्बापि गोरोमतः पङ्गोस्तामरसं शृङ्गादुदधेरिन्दीवरं गोमयात्" । अस्य पर्य्याया यथा ।
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं कृमिजं वापि कृमिजग्धमनार्य्यकम्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुणाद्यास्यागुरुशब्दे ज्ञातव्याः ।)

कृमिजग्धं, क्ली, (कृमिभिर्जग्धं भुक्तम् । उपचारात् तज्जनिततया तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥ ("कृमिजग्धमनार्य्यकम्" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृमिजा, स्त्री, (कृमिभ्यो जायते या । जन + डः टाप् च । लाक्षा ।) इति राजनिर्घण्टः ॥
(अस्य पर्य्याया यथा,—
"कीटजा कृमिजा लाक्षा जतुका च गवाधिका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृमिरिपुः, पुं, (कृमीणां रिपुर्नाशकः । तन्नाशकत्वात् तथात्वम् ।) विड़ङ्गः । इति शब्दरत्नावली ॥
(विड़ङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)

कृमिला, स्त्री, (कृमीन् कृमिवत् सन्तानान् लाति आदत्ते । ला + कः टाप् च ।) बड़प्रसूः । बड़सन्तानप्रसवा । इति हेमचन्द्रः । कृमियुक्ते त्रि ॥

कृमिवृक्षः, पुं, (कृमिप्रधानः कृमिमयो वा वृक्षः ।) कोषाम्रः । इति भावप्रकाशः ॥
(कोषाम्रशब्दे ऽस्य विवृतिर्ज्ञातव्या ॥)

कृमिशत्रुः, पुं, (कृमिरिव जीवन् शत्रुः ।) जीवशत्रुः । तत्पर्य्यायः । कृमिजलजः २ कृमिवारिरुहः ३ जन्तुकम्बुः ४ । अस्य गुणः । रसवीर्य्यादौ शत्रुसदृशत्वम् । इति राजनिर्घण्टः ॥

कृमिशुक्तिः, स्त्री, (कृमिरिव शुक्तिः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

कृमिश्लेष्मकः, पुं, (कृमिनिर्म्मितः श्लेष्म इव । ततः स्वार्थे कन् ।) वल्मीकः । इति शब्दरत्नावली ॥

कृमीलकः, पुं, (कृमीन् ईरयति जनयतीति । ईर् + ण्वुल् । रस्य लत्वम् ।) वनमुद्गः । इति राजनिर्घण्टः ॥

कृव, इ न कृतौ । हिंसे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् । इदित् ।) क्रवी । न, कृणोति । इ, कर्म्मणि कृण्वते । इति दुर्गादासः ॥

कृविः, पुं, (क्रियते वल्मीकमनेन । डु कृञ् करणे "कृविदृम्बिच्छविस्विकिकीदिवि" । उणां ४ । ५६ । इति क्विन् निपातनात् ।) वाप्यश्वत्थम् । इति उणादिवृत्तिः । ताँत इति भाषा ॥

कृश, इर् य कार्श्ये । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् । इरित् ।) कार्श्यं कृशकरणम् । इरः, अकृशत् अकर्शीत् । अकृशात् पुषादित्वाद्विभाषेङ इत्यत्र । य, कृश्यति चन्द्रं कलापक्षः । इति दुर्गादासः ॥

कृशः, त्रि, (कृशधातोः क्तप्रत्यये "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । निपातनात् साधुः ।) अल्पः । (यथा, मनौ । ४ । १८४ ।
"आकाशेशाश्च विज्ञेया बालवृद्धकृशातुराः" ॥)
सूक्ष्मः । इत्यमरः । ३ । १ । ६१ ॥
(यथा, आर्य्यासप्तशती । ४९५ ।
"राजसि कृशाङ्गि ! मङ्गलकलसी सद्दकारपल्लवेनेव । तेनैव चूम्बितमुखी प्रथमाविर्भूतरागेण" ॥
" यायाममतिसौहित्यं क्षुत्पिपासामधोवधम् ।
कृशो न सहते तद्वदतिग्रीतोष्णमैथुनम् ॥
ग्रीहा कासः क्षयः श्वासो गुल्मार्शांस्युदराणि च ।
कृशं प्रायोऽभिधावन्ति, रोगाश्च ग्रहणीमताः" ॥
"सततं व्याधितावेतावतिस्थूलकृशौ नरौ ।
सततञ्चोपचर्य्यौ हि कर्षणैर्हणैरपि" ॥
"स्थौल्यकार्श्ये वरं कार्श्यं समोपक्रमणौ हितौ ।
यद्युभौ व्याधिरागच्छेत् स्थूलमेवाति पीड़येत्" ॥
इति चरके सूत्रस्थाने २१ अध्याये ॥
"कश्चिदन्यः कृशोऽतीव बलवान् दृश्यते तदा" ॥
तत्र हेतुमाह ।
"व्याधानसमये यस्य सुक्तभागोऽधिको भवेत् ।
मेदोभागस्तु हीनः स्यात् स कृशोऽपि महाबलः" ॥
यस्याधानसमये जनयितुः सुक्तस्याधिक्यं भवति ।
मेदसोऽल्पता तस्य कृशस्यापि बहु बलमित्यर्थः ॥
अथ कार्श्यस्य चिकित्सा ।
"रूक्षान्नादि निमित्ते तु कृशे युञ्जीत भेषजम् ।
वृंहणं बलवृद्ध्यर्थं तथा वाजीकरञ्च यत् ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य शुष्कस्य यथाम्बुवृष्टी ॥
अश्वगन्धस्य कल्केन क्षीरे तस्मिन् पयस्यपि ।
सिद्धं तैलं कृशाङ्गानामभ्यङ्गादङ्गपुष्टिदम्" ॥
इति अश्वगन्धातैलम् । * ॥
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे कार्श्याधिकारे ॥) (अल्पमः । यथा, मनौ । ७ । २१५ ।

कृशानुः

"क्षत्रियश्चैव सर्पश्च ब्राह्मणं वा बहुश्रुतम्।
नावमन्येत वै भूष्णुः कृशानपि कदाचन" ॥
पुं, सर्व्वाकारवत्त्वात् विष्णुः। यथा, महाभारते।
१३।१४९।१०३।
"अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्" ॥
खनामख्यातो मुनिपुत्रः। स तु परीक्षिच्छाप-
प्रदातुः शृङ्गिणः सखा।
यथा, महाभारते।१।४१।२।
"स तं कृशमभिप्रेक्ष्य क्षुत्तां वाचमुदाहरत्।
अपृच्छत्तं कथं तातः स मेऽद्य मृतधारकः" ॥
ऐरावतकुलोत्पन्नो नागविशेषः। यथा, तत्रैव।
१।आस्तीकपर्व्वणि।५७।११।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्" ॥)

कृशरः, पुं, (कृशं अल्पमाचां राति। रा+कः। कृशयोऽपि बलं राति वा।) तुल्यतिलान्नम्। तत्पर्य्यायः। चिसरः२। इति हेमचन्द्रः ॥
(यथा, मत्स्यपुराणे,—
"गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम्।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे।
दध्योदनञ्च जीवाय शुक्राय तु घृतोदनम्।
शनैश्चराय कृशरमाजमांसञ्च राहवे।
चित्रौदनञ्च केतुभ्यः सर्व्वभक्षैः समर्च्चयेत्" ॥)

कृशरा, स्त्री, (कृशर+टाप्।) तिलौदनम्। इति हारावली ॥ द्विदलमिश्रितान्नम्। खिचड़ी इति भाषा। यथा,—
"तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः।
संयुक्ताः सलिलैः सिद्धाः कृशराः कथिता बुधैः" ॥
अस्या गुणाः। शुक्रबलकारित्वम्। गुरुत्वम्। पित्तकफप्रदत्वम्। दुर्जरत्वम्। विष्टम्भमलमूत्रकारित्वञ्च। इति भावप्रकाशः ॥
("मांसेक्षुपिष्टकृशरा तिलशष्कुलीभिः"।
इति माधवकरीयरोगविनिश्चयस्य कफशूलव्याख्यानेविजयेनोक्तं यथा,—
"कृशरा तिलतण्डुलमाषयवागूः" ॥)

कृशला, स्त्री, (कृशं काश्यं लातीति। ला+कः। टाप्।) केशः। इति शब्दचन्द्रिका ॥

कृशशाखः, पुं, (कृशा क्षीणा शाखा यस्य।) पर्पटः। इति राजनिर्घण्टः ॥

कृशाङ्गी, स्त्री, (कृशानि सूक्ष्माणि अङ्गानि यस्याः। स्वाङ्गवाचित्वात् ङीष्।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका ॥ सूक्ष्माङ्गविशिष्टे, त्रि। (यथा,—
आर्य्यासप्तशती। ४९५।
"राजसि कृशाङ्गि! मङ्गलकलशी सहकारपल्लवेनेव। तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण"॥)

कृशानुः, पुं, (कृशयति तनूकरोति हव्यकाष्ठादिवस्तुजातमिति। "कृतन्यञ्जीति"। उणां।४।२। इति आनुक्।) अग्निः। इत्यमरः। १।१।५७॥
(यथा,रघुः। ७।२४।
"प्रदक्षिणप्रक्रमणात् कृशानो-
रदर्चिषस्तन्मिथुनं चकाशे" ॥)
चित्रकवृक्षः। इति राजनिर्घण्टः ॥

कृष्करः

कृशानुरेताः, [स्] पुं, (कृशानौ अग्नौ रेतः निःक्षिप्तं तेजो यस्य।) शिवः। इत्यमरः। १।१ ३५॥
(अस्य कृशानुरेतोनाम्नः कारणं कालिकापुराणे ४७ अध्याये दृश्यम्॥)

कृशाश्वी, [न्] पुं, (कृशाश्वेन धुन्धुमारवंशस्थर्षिणेदेन प्रोक्तं गाथसूत्रादिकं अधीते वेत्ति वा "कर्म्मन्दकृशाश्वादिनिः"। ४।३।१११। इति इनिः।) नटः। इत्यमरः। २।१०।१२॥

कृशिका, स्त्री, (कृश इव कायतीति। कै+कः। टाप् इत्वञ्च।) आखुकर्णीलता। इति राजनिर्घण्टः ॥

कृष, औ आकर्षणे। विलेखने। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-अनिट्।) औ, अकार्क्षीत् अकृक्षत् अकार्क्षीत्। आकृषि आकर्षणे। कर्षन्ति तुरगा रथम्। इति दुर्गादासः ॥
(यथा, मनुः। ३।६६।
"मन्त्रवत्तस्तु समृद्धानि कुलान्यल्पधनान्यपि।
कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः"॥
आखुकर्णीशब्दे ऽस्या विशेषो ज्ञेयः॥)

कृष, औ अ ग्र आकर्षणे। विलेखने। इति कविकल्पद्रुमः। (तुदां-उभं-सकं-अनिट्।) ग्र अ, कृषति कृष्यते भूमिं कृषकः। औ, अकार्क्षीत्। अकार्क्षीत् अकृक्षत्। इति दुर्गादासः।

कृषकः, त्रि, (कृषति भूमिं यः। "कृषेर्ऋदिरुचीदीचाम्"। उणां।२।३८। इति कुन्।) कर्षकः। इति मेदिनी ॥

कृषकः, पुं, (कृषति भूमिमनेन इति करणे कुन्।) फालः। इति मेदिनी ॥ कृषः। इति शब्दचन्द्रिका ॥

कृषाणुः, पुं, (कृष्+आनुक्। एषोदरात् षत्वम्।) कृशानुः। इत्यमरटीका ॥

कृषिः, स्त्री, (कृष् विलेखने। "सर्व्वधातुभ्य इन्"। उणां ४।११७। इति इन्। "इगुपधात् कित्"। उणां। ४।१।१९। इति कित्।) वैश्यवृत्तिविशेषः। कर्षणम्। चास इति भाषा। तत्पर्य्यायः। अन्नतम् २। इत्यमरः।२।९।२। प्रन्नतम् ३। इति जटाधरः ॥
(यथा, मेघदूते।१६।
"त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः" ॥)

कृषिकः, पुं, (कृषत्यनेन "वृक्षिकृष्योः किकन्"। उणां।२।४०। इति किकन्।) फालः। इत्यमरः।२।९।६॥ कर्षकः। इति केचित् ॥

कृषीवलः, त्रि, (कृषिरस्यास्ति वृत्तित्वेन इति "रजःकृष्यासुतिपरिषदो वलच्" ५।२।११२। इति वलच्। "वले"। ६।३।११८। इति दीर्घः।) कर्षकः। कृषिजीवी। इत्यमरः।२।९।६॥
(यथा, महाभारते।२।५।७७।
"कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा।
त्वया वा पीड्यते राष्ट्रं कच्चित् तुष्टाः कृषीवलाः"॥)
काकजङ्घावृक्षः। इति रत्नमाला ॥

कृष्कारः, पुं, (कृषं करोति कृषिस्त्रियादिकं शक्तियोगात् सम्पादयतीति। कृष+कृ+टक्।) शिवः। इति त्रिकाण्डशेषः ॥

कृष्णः

कृष्टं, त्रि, (कृष्यते यत् तत्। कृष्+कर्म्मणि क्तः।) कृष्टक्षेत्रम्। चसा क्षेत इति भाषा। तत्पर्य्यायः। सीत्यम् २ हल्यम् ३। इत्यमरः।२।९।८॥
(यथा, मनौ।११।१४५।
"कृष्टजानामोषधीनां जातानाञ्च स्वयं वने"॥
भावे क्तः। कर्षणम्॥)

कृष्टपच्यः, त्रि, (कृष्टे क्षेत्रे स्वयमेव पच्यते इति कर्म्मकर्त्तरि कृष्ट+पच्+"राजसूयसूर्य्यमघोद्यरुच्य कूप्य कृष्टपच्याद्यण्"। ३।१।११४। इति क्यवन्तो निपातितः।) व्रीहिः। धान्यम्। इति व्याकरणम्॥ (यथा, भागवते।७।१२।१८।
"न कृष्टपच्यमश्नीयादकृष्टाप्यकालतः"॥)

कृष्टपाक्यं, त्रि, (कृष्टे पच्यते इति। कृष्ट+पच्+कर्म्मणि ण्यत्। "चजोः कु घिण्यतोः"। ७।३।५२। इति चस्य कुत्वम्।) कृष्टपच्यम्। इति व्याकरणम्॥

कृष्टिः, पुं, (कृषत्यन्तर्भुवं विद्यालोचनाभ्यासादिभिरसौ। कृष्+कर्त्तरि क्तिच् बाहुलकात् तिर्वा।) पण्डितः। इत्यमरः।२।७।६॥
(यथा, ऋग्वेदे।६।१८।२। "बृहद्देणुश्चावनो मानुषीणामेकः कृष्टीनामभवत् सहावा"॥)
कर्षणे, स्त्री। इति मेदिनी॥ (कृष्+भावे क्तिन्। आकर्षणम्॥ जनमात्रम्। इति निरुक्तम्। यथा ऋग्वेदे।८।६।४। "विश्वा नमन्त कृष्टयः"। "कृष्टयः प्रजाः"। इति भाष्यम्॥)

कृष्णं, क्ली, ("कृषेर्व्वर्णे"। उणां ३।४। इति नक् ततो णत्वम्।) मरिचम्। इत्यमरः।२।९।३६॥
(अस्य पर्य्याया यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्"।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
गुणाश्चास्य मरिचशब्दे ज्ञातव्याः॥)
लोहम्। इति जटाधरः॥ नीलाञ्जनम्। इति राजनिर्घण्टः॥ कालागुरु। इति रत्नमाला॥

कृष्णः, पुं, (कर्षत्यरीन् महाप्रभावशक्त्या। यद्वा, कर्षति आत्मसात् करोति आनन्दत्वेन परिणामयतीति मनो भक्तानां इति यावत् "कृषेर्व्वर्णे"। उणां।३।४। इति नाङ्बलकात् वर्णं विनापि। नक् णत्वञ्च। यद्वा, कर्षति सर्व्वान् स्वकुक्षौ प्रलयकाले। "कर्षणात् कृष्णो रमणात् रामो व्यापनात् विष्णुः"। इति श्रुते स्तथात्वम्॥ अपरा व्युत्पत्तिर्यथा,—
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यात् परं ब्रह्म कृष्ण इत्यभिधीयते"॥
इति श्रीधरस्वामी॥ तथा च, महाभारते।५ यानसन्धिपर्व्वणि ७०।५।
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
कृष्णस्तद्भावयोगाच्च कृष्णो भवति सात्वतः"॥)
भगवदवतारविशेषः। स च भूभारहरणार्थं द्वापरयुगशेषे भाद्रकृष्णाष्टम्यां रोहिणीनक्षत्रे निशीथे देवकीगर्भे आविर्भूतः। तस्य जन्मसमयो यथा,
"उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं हृषीलाभगो जीवः सिंहतुलालिषु क्रमवशात् पूषो-

ग्नोराहवः। नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्रक्षणे श्रीकृष्णाभिधमम्बुनेत्रखगमभूदाविः परं ब्रह्म तत्" ॥ इति खमाग्निक्यनाम-ज्योतिर्ग्रन्थः ॥ (यदि च भगवतो विष्णोः कृष्णावतारकालः क्वचित् द्वापरयुगपर्य्ये इत्ययं पाठो लक्ष्यते तथापि कलावेव कृष्णावतार इत्येव भूरि-सम्मतमिति बोध्यम्। तत्र भूरि भूरिप्रमाणानि च सन्ति तेषां कानिचिदुद्धृतानि।

तद्यथा, ब्रह्मपुराणे,—

"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ॥

परं कस्मिन्नेव कलौ प्रादुर्बभूव भगवानिति जिज्ञासायां वैवस्वतमन्वन्तरीयाष्टाविंशतिमे युगे इत्युक्त्या वर्त्तमानकलेः प्रथम एव निर्णीयते। तथा च उक्तस्याः शशिभौमचान्द्रिशनय इति। खमाग्निक्यनाम्ज्योतिर्ग्रन्थोक्तेः कलियुगस्य ६४७ वर्षेषु गतेषु एतत्समयस्य सम्भवः ततः पूर्व्वं कलौ तादृशसमयासम्भवात्। किञ्च राजतरङ्गि-ण्याम्। १। ५१।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः" ॥

इत्यनेन कलियुगस्य ६५३ वर्षेषु गतेषु तत्सम-कालीनयोः कुरुपाण्डवयोरुत्पत्तिः कथिता अतो भगवतः कृष्णस्यापि तत्कालोत्पत्तिकत्वं सूचितम्। अपि च कृष्णस्य नामकरणे यच्च गर्गर्षिराह ततोऽपि कलेरादावेव भगवदाविर्भावः सूच्यते। यथा, भागवते। १०। ८। ६।

"आसन् वर्णास्त्रयोह्यस्य गृह्णतोऽनुयुगं तनूः।
शुक्लो रक्तस्तथाऽपीत इदानीं कृष्णतां गतः" ॥

इदानीं कलावित्यर्थः। तथा, पुराणान्तरे,—

"कृते शुक्लं हरिं विद्याद् त्रेतायां रक्तवर्णकम्।
द्वापरे पीतवर्णञ्च कलौ कृष्णत्वमागतः" ॥

तथा तत्रैव ११ अध्याये युगावतारकथने।

"कृते शुक्लश्चतुर्बाऽजटिलो वल्कलाम्बरः।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलुम् ॥
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः।
त्रेतायां रक्तवर्णोऽसौ चतुर्बाऽस्त्रिमेखलः।
द्वापरे भगवान् श्यामः पीतवासा निजायुधः।
श्रीवत्सादिभिरङ्गैश्च लक्षणैरुपलक्षितः ॥
नानातन्त्रविधानेन कलावपि यथा शृणु।
कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम्।
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" ॥

अपि च कृते शुक्ल इत्यादयो ये ये वर्णा निर्णीताः नतु केवलं तेषां वाह्यवर्णत्वेन पर्य्यवसीतत्वं किन्तु युगभेदानुसारेण लोकानां गुणधर्म्मत्वमेव निश्चीयते। यथा, कृते शुक्लं इति कथनात् सत्वगुणः प्रदर्शितः सत्वस्य हि शुक्लत्वं प्रसिद्धं यथा,—

"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ!" ॥

त्रेतायां रक्तवर्णकं इत्युक्त्या रजस एव निर्देशः कृतः यथा,—

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय! कर्म्मसङ्गेन देहिनम्" ॥

द्वापरे पीतवर्णं इत्युक्त्या रजोमिश्रिततमसो निर्देशः। यथा,—

"वायवः रजो वै यदा अन्धकारात्मकेन तमसा संगच्छते तदा ऽस्य घोरमौष्ण्यादिबहवो दोषा प्रकाशन्ते" ॥ तथा, हरिवंशे वर्णभेदकथने वैश्य-त्वप्राप्तिहेतुमाह।

"गोभ्योवृत्तिं समास्थाय पीताः कृष्यनुजीविनः।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः" ॥

पीताः रजस्तमःप्रधाना इति तट्टीका ॥

कलौ कृष्णतामागत इत्युक्त्या तु केवलं तमः प्राधान्यनिर्देशः यथा,—

"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम्।
निद्रा तन्द्रा तथालस्यं प्रमादो दीर्घसूत्रिता" ॥

इत्यतः दुरात्माक्रान्तायाः पृथिव्या भारहरणाय तमःप्रधानां मायामधिष्ठायैव कलावेव भगवतः प्रादुर्भावः सम्भवति ॥

यदा तु शालिवाहनस्य शकाब्दाख्याः प्रचलितु-मारब्धास्तदा वै पाण्डुकुलनन्दनमहाराजयुधि-ष्ठिरप्रवर्त्तिताब्दानां षड्विंशाधिकसार्द्धद्विस-हस्राण्येवातीतानि। महाभारतभागवतादिशा-स्त्रोक्त्या भगवतः कृष्णस्य तृतीयपाण्डवेनार्জ্জুनेन तुल्यवयस्कत्वात् उपर्य्युक्तराजतरङ्गिणीमतानुसा-रेण च कलेः त्रिपञ्चाशदधिकषट्शतेषु वर्षेषु गतेषु युधिष्ठिराविर्भावकालः। तद्गणनया हि कलेः सप्तपञ्चाशदधिकेषु षट्शतेषु वर्षेषु गतेष्वेव कथञ्चित् कृष्णावतारसमयो निश्चीयते। किञ्च, एतावदपि निर्द्धारितं यत् विक्रमादित्याब्दा यिषु-खीष्टाविर्भावादेकोनाशीतिवर्षोत्तरकाल एव प्रव-र्त्तितुमारब्धाः। अतः षड्विंशाधिकचतुर्व्विंशति-शतवर्षेभ्य एकोनाशीतिवर्षेषु वियुक्तेषु यिष-खीष्टाविर्भावात् सप्तचत्वारिंशदधिकशतवर्षपूर्व्व-मेव युधिष्ठिराविर्भावकालः। ततो नितरामेव यिषुखीष्टात् सप्तचत्वारिंशदधिकषड्विंशतिशत-वर्षेभ्यः प्राग्भगवतः कृष्णस्य प्रादुर्भावः कथमपि निरूप्यते ॥)

अधुना अस्य ध्यानम् कथ्यते यथा,—

"स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम्।
गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः ॥
आत्मनो वदनाम्भोजे प्रेषिताक्षिमधुव्रताः।
पीड़िताः कामबाणेन चिरमाश्लेषणोत्सुकाः ॥
मुक्ताहारलसत्पीनतुङ्गस्तनभरानताः।
स्खलद्धम्मिल्लवसना मदस्खलितभाषिणः ॥
दन्तपङ्क्तिप्रभोद्भासिस्यन्दमानाधराश्चिताः।
विलोभयन्ती विविधैर्विभ्रमैर्भावगर्व्वितैः ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे" ॥

इति तन्त्रसारः ॥ * ॥ अस्य पादचिह्नानि यथा,

"चन्द्रार्द्धं कलसं त्रिकोणधनुषी खं गोष्पदं प्रोक्षितां
शङ्खं सव्यपदेऽथ दक्षिणपदे कोणाष्टकं खस्तिकम्।
चक्रं कूर्म्मयवाङ्कुशं ध्वजपवीजम्बूर्द्ध्वरेखाम्बुजं
विभ्राणं हरिमूनविंशतिमहालक्ष्मार्चिताङ्घ्रिं भजे" ॥

इति रूपचिन्तामणिः ॥ * ॥ अस्यावतारा ह्यसं-ख्येयाः। तत्र युगावताराश्चत्वारः। यथा,—

"कृते शुक्लश्चतुर्बाऽजटिलो वल्कलाम्बरः।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलुम् ॥
त्रेतायां रक्तवर्णोऽसौ चतुर्बाऽस्त्रिमेखलः।
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥
द्वापरे भगवान् श्यामः पीतवासा निजायुधः।
श्रीवत्सादिभिरङ्गैश्च लक्षणैरुपलक्षितः ॥
नानातन्त्रविधानेन कलावपि यथा शृणु।
कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ॥
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" ॥ * ॥

अस्य कल्पावतारा दश यथा। मत्स्यः १ कूर्म्मः २ वराहः ३ नृसिंहः ४ वामनः ५ परशुरामः ६ रामः ७ कृष्णः ८ बुद्धः ९ कल्की १०। इति श्रीभागवतम् ॥ * ॥ अस्य गुणाश्चतुःषष्टिर्यथा।

"अयं नेता सुरम्याङ्गः १ सर्व्वसल्लक्षणान्वितः २।
रुचिर-३ स्तेजसा युक्तो ४ बलीयान् ५ वयसान्वितः ६ ॥ विविधाद्भुतभाषावित् ७ सत्यवाक्यः ८
प्रियम्वदः ९। वावदूकः १० सुपाण्डित्यो ११ बुद्धि-मान् १२ प्रतिभान्वितः १३॥ विदग्ध-१४ श्च-तुरो १५ दक्षः १६ कृतज्ञः १७ सुदृढ़व्रतः १८।
देशकालसुपात्रज्ञः १९ शास्त्रचक्षुः २० शुचि-२१ र्व्वशी २२॥ स्थिरो २३ दान्तः २४ क्षमाशीलो २५
गम्भीरो २६ धृतिमान् २७ समः २८। वदान्यो २९ धार्म्मिकः ३० शूरः ३१ करुणो ३२ मान्य-मानकृत् ३३॥ दक्षिणो ३४ विनयी ३५ ह्रीमान् ३६ शरणागतपालकः ३७। सुखी ३८ भक्तसुहृत् ३९ प्रेमवश्यः ४० सर्व्वशुभङ्करः ४१॥ प्रतापी ४२ कीर्त्तिमान् ४३ रक्तलोकः ४४ साधुसमाश्रयः ४५।
नारीगणमनोहारी ४६ सर्व्वाराध्यः ४७ समृद्धि-मान् ४८॥ वरीया-४९ नीश्वरः-५० स्वेति गुणा-स्तस्यानुकीर्त्तिताः। सदास्वरूपसम्प्राप्तः ५१ सर्व्वज्ञो ५२ नित्यनूतनः ५३॥ सच्चिदानन्दसान्द्राङ्गः ५४ सर्व्वसिद्धिनिषेवितः ५५। अविचिन्यमहाशक्तिः ५६ कोटिब्रह्माण्डविग्रहः ५७॥ अवतारावलीबीजं ५८ हतारिगतिदायकः ५९। आत्माराम-गणाकर्षी-६० त्वमी कृष्णे किलाद्भुताः॥ सर्व्वा-द्भुतचमत्कारलीलाकल्लोलवारिधिः ६१। अतुल्य-मधुरप्रेममण्डितप्रियमण्डलः ६२॥ त्रिजगन्मान सार्कर्षी मुरलीकलकूजितः ६३। असमानोर्द्ध-रूपश्रीविस्मापितचराचरः ६४॥
लीलाप्रेम्नाप्रियाधिक्यं माधुर्य्ये वेणुरूपयोः।
इत्यसाधारणं प्रोक्तं गोविन्दस्य चतुष्टयम्।
एवं गुणाश्चतुर्भेदास्चतुःषष्टिरुदाहृताः'। * ॥

अस्य गदा कौमोदकी। खड्गः नन्दकः। धनुः शार्ङ्गम्। शङ्खः पाञ्चजन्यः। चक्रं सुदर्शनः। मणिः कौस्तुभः। वाहनं गरुड़ः। रथः गरुड़ध्वजः। रथस्याश्वाः शैव्यसुग्रीवमेघवाहनपुष्करोः। इति श्रीभागवतम् ॥ * ॥ अस्य पत्न्यः गोलोके वृन्दा-वने च श्रीराधा। वैकुण्ठे लक्ष्मीः। इति ब्रह्म-वैवर्त्तम् ॥ द्वारकायां रुक्मिणी १ जाम्बवती २

सत्यभामा ३ कालिन्दी ४ मित्रविन्दा ५ नाग्नजिती ६ भद्रा ७ लक्ष्मणा ८ एताः प्रधानाः। अन्या अपि शतादिकषोड़शसहस्राणि स्त्रियः। इति श्रीभागवतम् ॥ * ॥ व्रजस्थितस्यास्य सखायस्तुर्व्विधाः। तत्र किञ्चिदयसाधिकाः सुहृदो यथा। सुभद्रः १ मण्डलीभद्रः २ भद्रवर्द्धनः ३ गोभटः ४ यक्षेन्द्रभटः ५ भद्राङ्गः ६ वीरभद्रः ७ महागुणः ८ विजयः ९ बलभद्रः १० इत्याद्याः ॥ वयसा न्यूनाः सखायो यथा। विशालः १ वृषभः २ ओजस्वी ३ देवप्रस्थः ४ वरूथपः ५ मणिबन्धः ६ करन्धमः ७ इत्याद्याः ॥ वयसा तुल्याः प्रियसखायो यथा। श्रीदामा १ सुदामा २ वसुदामकः ३ किङ्किणी ४ स्तोककृष्णः ५ अंशुः ६ भद्रसेनः ७ विलासी ८ पुण्डरीकविटङ्काक्षः ९ कलविङ्कः १० इत्याद्याः ॥ पूर्व्वतः श्रेष्ठा आत्यन्तिकरहस्येषु युक्ताः भावविशेषविशिष्टाः प्रियनर्म्मसखायो यथा। सुबलः १ अर्জ্জुनः २ गन्धर्व्वः ३ वसन्तः ४ उज्ज्वलः ५ इत्याद्याः ॥ इति भक्तिरसामृतसिन्धुः ॥ * ॥ वृन्दावनस्थितस्य अस्य सख्यः शतकोटयः। तत्र वेदमुनिदेवस्त्रियोऽपि कृष्णाराधनार्थं गोपाङ्गनारूपेण जाताः। व्रजे अस्य नित्यप्रिया यथा। राधा १ चन्द्रावली २ विशाखा ३ ललिता ४ श्यामा ५ पद्मा ६ शैव्या ७ भद्रिका ८ तारा ९ विचित्रा १० गोपाली ११ धनिष्ठा १२ पालिका १३ खञ्जनाक्षी १४ मनोरमा १५ मङ्गला १६ विमला १७ लीला १८ कृष्णा १९ शारी २० विशारदा २१ तारावली २२ चकोराक्षी २३ शङ्करी २४ कुङ्कुमादयः २५। एतासां मध्ये विशाखा ललिता पद्मा शैव्या एतास्तत्सखः सख्यः। अन्या यूथाधिपाः। तासां मध्ये राधादयोऽष्टौ सुभगाः। आसां राधाचन्द्रावल्यौ श्रेष्ठे। अनयोरपि राधाधिका। इत्युज्ज्वलनीलमणिः ॥ * ॥ अपि च। चन्द्रावली १ सुशीला २ तस्याः सहचर्य्यः चतुर्दशसहस्राणि। शशिकला ३ अस्याः सहचर्य्यः षोड़शसहस्राणि। चन्द्रमुखी ४ अस्याः सहचर्य्यः षोड़शसहस्राणि। माधवी ५ अस्याः सहचर्य्यः एकादशसहस्राणि। कदम्बमाला ६ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कुन्ती ७ अस्याः सहचर्य्यः दशसहस्राणि। यमुना ८ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। जाह्नवी ९ अस्याः सहचर्य्यः नवसहस्राणि। पद्ममुखी १० अस्याः सहचर्य्यः नवसहस्राणि। सावित्री ११ अस्याः सहचर्य्यः पञ्चदशसहस्राणि। सुधामुखी १२ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। शुभा १३ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। पद्मा १४ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। गौरी १५ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। सर्व्वमङ्गला १६ अस्याः सहचर्य्यः षोड़शसहस्राणि। सरस्वती १७ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। भारती १८ अस्याः सहचर्य्यः दशसहस्राणि। अपर्णा १९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। रतिः २० अस्याः सहचर्य्यः दशसहस्राणि। गङ्गा २१ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। अम्बिका २२ अस्याः सहचर्य्यः षोड़शसहस्राणि। सती २३ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। नन्दिनी २४ अस्याः सहचर्य्यः दशसहस्राणि। सुन्दरी २५ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कृष्णप्रिया २६ अस्याः सहचर्य्यः षोड़शसहस्राणि। मधुमती २७ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। चम्पा २८ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। चन्दना २९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ (महादेवः। यथा, महाभारते १३। १७। ४४। "दीर्घञ्च हरिकेशञ्च सुतीर्थः कृष्ण एव च" ॥) व्यासः। (अयन्तु द्वैपायनः वासव्यां सत्यवत्यां महर्षेः पराशरेणाजातः कृष्णवर्णत्वात् कृष्णकलावतीर्णत्वाद् वा कृष्ण इत्यभिधीयते। यथा, महाभारते १। १०५। १४। "यो अस्य वेदांश्चतुरस्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च" ॥) अर्জ্জुनः। (अयन्तु तृतीयपाण्डवः। अस्य दशनामस्वन्यतमं नाम। यथा, महाभारते ३। ४२। २२। "कृष्ण इत्येव दशमं नाम चक्रे पिता मम। कृष्णावदातस्य सदा प्रियत्वाद् बालकस्य वै" ॥ कृष्णो वर्णोऽस्यास्तीति। नगन्तात् गुणवचनेभ्यो मतुपो लुगिति लुक् ॥) कोकिलः। इति विश्वः ॥ काकः। इति मेदिनी ॥ करमर्दकः। इति शब्दरत्नावली ॥ वर्णविशेषः। कालवर्णः। तत्पर्य्यायः। नीलः १ असितः २ श्यामः ३ कालः ४ श्यामलः ५ मेचकः ६ बङ्गलः ७ रामः ८ शितिः ९। इति जटाधरः ॥ तद्वति, त्रि। इत्यमरः ॥ (कर्षति पापानि स्मरणागतानां बाङ्गलकात् कृषेर्नक् वर्णं विनापि दीर्घत्वञ्च। परब्रह्म। यथा, पौराणिकीगाथायाम्।

"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते। भस्मीभवन्ति राजेन्द्र! महापातककोटयः" ॥

चन्द्रकलासकरप्रथमादिपञ्चदशकलाक्रियारूपः प्रतिपदादिदर्शान्तात्मकपञ्चदशतिथ्यात्मकः कालभेदोऽर्द्धमासः। यथा, तिथितत्त्वे ३६।

"चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" ॥

कृष्णपक्षाभिमानिदेवताविशेषः। यथा, गीतायाम्।

"धूमो रात्रिस्तथाकृष्णः षण्मासा दक्षिणायनम्"।

कृष्णसारमृगः। यथा, महाभारते १। १३०। १५।

"धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च" ॥

असुरकर्म्म। वेदोक्तासुरविशेषः। अयन्तु इन्द्रेण सगणो निहतः। ऋषिविशेषः। अयन्तु ऋग्वेदस्य अष्टममण्डलस्य ८५—८७ सूक्तानि, तथा दशम मण्डलस्य ४२—४४ सूक्तानि च प्रणिनाय। अथर्व्ववेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि। "गोपालतापनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्व्ववेदगतानामेकविंशत्युपनिषदां मध्ये कतिभिरिति भ्रान्तिः" ॥)

कृष्णकन्दः, क्ली, (कृष्णः कृष्णवर्णः कन्दो यस्य।) रक्तोत्पलम्। इति त्रिकाण्डशेषः ॥

कृष्णकर्म्मा, [न्] त्रि, (कृष्णं अशुभं कर्म्म यस्य।) पापाचारयुक्तः। तत्पर्य्यायः। शिग्विदानः २। इत्यमरः। ३। १। ४६ ॥ (श्वेतितुमिच्छति श्वितावर्णे इत्यस्य श्वितेर्दश्चेत्यानच् दत्वं सनो लुक् च इति शिग्विदानः। केचित्तु अकृष्णकर्म्मा इति पठन्ति। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः। इति व्याचक्षते। इति भरतः ॥

"शिग्विदानः कृष्णकर्म्मा शुक्लकर्म्मेति कस्यचित्"॥ इति जटाधरः ॥ क्ली, व्रणानां कृष्णत्वसम्पादकक्रियाविशेषः। यथा, सुश्रुतोक्तौ "अथ व्रणस्योपक्रमा भवन्तीत्युपक्रम्य दारुणकर्म्मेत्याहारकर्म्माग्निकर्म्म कृष्णकर्म्मेपाशुकर्म्म"। इति ॥)

कृष्णकलिः, स्त्री, (कृष्णस्य चूड़ा इव कलिः कलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। तस्य शाखा रक्ततण्डुलीयनालवदग्रश्रियुक्ता पत्रं क्षुद्रताम्बूलदलवद्भवति। तस्य पुष्पं श्वेतरक्तपीतपाटलवर्णमिलितपञ्चदलं षट्केशरमध्यं खल्पसदृन्धयुक्तं अपराह्णे प्रस्फुटति। तस्य बीजं कृष्णमरिचतुल्यं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो बीजतश्च। इति लोकप्रसिद्धम् ॥ अस्याः पित्तपत्रमूलादिना व्रणस्फोटनं भवति इति वैद्यकम् ॥

कृष्णकाष्ठं, क्ली, (कृष्णं काष्ठं यस्य।) कालागुरु। इति राजनिर्घण्टः ॥ (अगुरुशब्दे ऽस्य विषयो ज्ञातव्यः ॥)

कृष्णकेलिः, स्त्री, (कृष्णस्य केलिः क्रीड़ा द्रव्यं चूड़ा इव पुष्पकलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। (अस्याः अन्यद्विवरणं कृष्णकलिशब्दे द्रष्टव्यम् ॥)

कृष्णकोहलः, पुं, (कृष्णकस्य कुत्सितकर्म्मण ऊहं वितर्कं लाति गृह्णातीति। ला + कः।) धूतकृत्। इति त्रिकाण्डशेषः ॥

कृष्णगन्धा, स्त्री, (कृष्णः उग्रो गन्धो यस्याः।) शोभाञ्जनः। इति राजनिर्घण्टः ॥

("इमांस्त्रीनपरान् वृक्षानाऊर्य्येषां स्थितांस्त्वचः।
पूतिकः कृष्णगन्धा च तिलकश्च तथापरः ॥
विरेचने प्रयोक्तव्याः पूतिकस्तिलकस्तथा।
कृष्णगन्धा परीसर्पे ग्रीवेष्वर्शःसु चोच्यते" ॥
इति चरके सूत्रस्थाने १ अध्याये ॥

कृष्णगर्भः, पुं, (कृष्णः कृष्णवर्णो गर्भः अभ्यन्तरदेशो यस्य।) कटफलः। इति राजनिर्घण्टः ॥

कृष्णचक्षुकः, पुं, (कृष्णा चक्षुरस्य। ततः कप्।) चणकः। इति राजनिर्घण्टः ॥ (चणकशब्दे विवरणमस्य व्याख्येयम् ॥)

कृष्णचतुर्द्दशी, स्त्री, (कृष्णा कृष्णपक्षसम्बन्धिनी चतुर्द्दशी।) कृष्णपक्षीयचतुर्द्दशी। तत्पर्य्यायः। भूतः २। इति त्रिकाण्डशेषः ॥

कृष्णचरः, त्रि, (कृष्णस्य भूतपूर्व्वो गौः चरट्।) कृष्णस्य भूतपूर्व्वो गवादिः। इति मुग्धबोधम् ॥

कृष्णचूड़ा, स्त्री, (कृष्णस्य चूड़ेव पुष्पचूड़ा यस्याः।) स्वनामख्यातसकण्टकपुष्पवृक्षः। तस्य पत्रं वृक्ष-

वृक्षदलवद्भवति । तस्य पुष्पं पीतरक्तवर्णं उपर्य्यधः स्थूलसूक्ष्मदशदलं दीर्घवृन्तं दशदीर्घकेशरमध्यं ईषत्सङ्गन्धयुक्तञ्च जायते । तत्फलं शिम्बीसदृशं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति । तदुत्पत्तिस्तस्य मूलतो बीजाच्च भवति इति लोकप्रसिद्धम् ॥

कृष्णचूड़िका, स्त्री, (कृष्णा चूड़ा अग्रं यस्याः । ततः कप् ततष्टाप् अत इत्वञ्च ।) गुञ्जा । इति राजनिर्घण्टः ॥ (कुँचफल इति भाषा ॥)

कृष्णचूर्ण, क्ली, (कृष्णस्य लोहस्य चूर्णम् । दग्धाल्लोहाग्निःसृतकीट्टमित्यर्थः ।) लौहमलम् । इति राजनिर्घण्टः ॥

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः ।) जटामांसी । इति रत्नमाला ॥

कृष्णजीरकः, पुं, (कृष्णः कृष्णवर्णो जीरकः ।) कृष्णवर्णस्थूलजीरकः । केलेजीरा इति भाषा । तत्पर्य्यायः । सुषवी २ कारवी ३ एथ्वी ४ एथुः ५ काला ६ उपकुञ्चिका ७ । इत्यमरः ॥ सुश्रवी ८ कुञ्चिका ९ । इति तट्टीकायां नयनानन्दः ॥ उपकुञ्चिः १० । इति रत्नमाला ॥ कृष्णा ११ जरणा १२ शाली १३ वङ्गगन्धा १४ । एथुका १५ एथिवी १६ भेषजम् १७ । इति शब्दरत्नावली ॥ अपि च ।

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कणाजाजी तु सुषवी कालिका चोपकालिका ॥
एथ्वीका कारवी एथ्वी एथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च कृष्णजीरक इत्यपि ॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥
ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफश्लेष्मजीर्णज्वरनाशित्वम् । रुचिचक्षुर्हितकारित्वम् । ग्राहित्वञ्च । इति राजनिर्घण्टः ॥ स तु स्थूलसूक्ष्मभेदेन द्विधा ॥

कृष्णतण्डुला, स्त्री, (कृष्णः तण्डुलो बीजं यस्याः ।) कर्णस्फोटालता । इति राजनिर्घण्टः ॥

कृष्णताम्र, क्ली, (कृष्णं ताम्रम् । "वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) गोशीर्षचन्दनम् । इति शब्दमाला ॥

कृष्णतारः, पुं, (कृष्णा तारा यस्य ।) हरिणः । इति राजनिर्घण्टः ॥

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता ।) कृष्णवर्णा त्रिवृत् । काल तेउड़ी इति भाषा ॥ तत्पर्य्यायः । श्यामा २ पालिन्दी ३ कालभेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८ । इति जटाधरः ॥ (अस्या गुणा यथा,

कषायत्वम् । मधुरत्वम् । रूक्षत्वम् । विपाकेकटुकत्वम् । कफपित्तप्रशमकारित्वम् । रूक्षत्वात् वातकोपनत्वञ्च ॥ इति चरके कल्पस्थाने ७ अध्याये ॥)

कृष्णदन्ता, स्त्री, (कृष्णः कृष्णवर्णो दन्तः शिखरदेशो यस्याः ।) काश्मरीवृक्षः । इति राजनिर्घण्टः ॥ (कृष्णदन्तविशिष्टे, त्रि । दन्तस्तु मद्यपानादिना कृष्णत्वं प्राप्नोति ॥)

कृष्णदेहः, पुं, (कृष्णः कृष्णवर्णो देहो यस्य ।) भ्रमरः । इति भारतः । कृष्णवर्णशरीरे, त्रि ॥

कृष्णद्वैपायनः, पुं, (द्वीपे भव इत्यण् । यद्वा द्वीपः अयनं उत्पत्तिस्थानं यस्य । प्रज्ञाद्यण् । कृष्णश्चासौ द्वैपायनश्चेति ।) वेदव्यासः । इति चिकाण्डशेषः ॥ (यथा, महाभारते १ । १०५ । १३ ।

"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन ! ।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्" ॥

अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १ । १०५ । ७—१४ ।

"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरो मम ।
सा कदाचिदहं तत्र गता प्रथमयौवने ॥
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम् ॥
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा ।
सान्त्वपूर्व्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः ॥
तमहं शापभीता च पितुर्भीता च भारत ! ।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे ॥
अभिभूय स मां बालां तेजसा वशमानयत् ।
तमसा लोकमावृत्य नौगतामेव भारत ! ॥
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः ।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः ॥
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥
पाराशर्य्यो महायोगी स बभूव महातपाः ।
कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः" ॥

अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम् ॥)

कृष्णधत्तूरकः, पुं, (कृष्णवर्णो धत्तूरकः ।) कृष्णवर्णधुस्तूरः । कालधुतुरा इति भाषा । तत्पर्य्यायः । सिद्धः २ कनकः ३ शिवः ४ कृष्णपुष्पः ५ विषारातिः ६ क्रूरधूर्त्तः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कान्तिकारित्वम् । व्रणाक्तित्वदोषखर्जुकण्डूतिज्वरभ्रमनाशित्वञ्च ॥ "सितनीलकृष्णलोहितपीतप्रसवाश्च सन्ति धत्तूराः । सामान्यगुणोपेतास्तेषु गुणाद्यस्तु कृष्णकुसुमः स्यात्" ॥ इति राजनिर्घण्टः ॥

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः ।) कालतुलसी । इति रत्नमाला ॥

कृष्णपक्षः, पुं, (कृष्णस्तमसावृतश्चन्द्रक्षयात्मकः पक्षः ।) असितपक्षः । स तु प्रतिपदाद्यमावास्यान्तानि पञ्चदश दिनानि । यथा, तिथ्यादितत्त्वम् ।

"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः ।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके" ॥

कृष्णपाकः, पुं, (पच्यतेऽसौ । पच + घञ् । पाक फलम् । कृष्णः कृष्णवर्णः पाकः फलं यस्य ।) करमर्दकः । इति शब्दरत्नावली ॥

कृष्णपाकफलः, पुं, (कृष्णपाकरूपं फलं यस्य ।) करमर्दकः । इत्यमरः । २ । ४ । ९७ ॥

कृष्णपिङ्गला, स्त्री, ("वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) दुर्गा । इति चिकाण्डशेषः ॥ (कृष्णपिङ्गलवर्णयुक्ते, त्रि ।

ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्द्धलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः" ॥)

कृष्णपिण्डीतकः, पुं, (कृष्णः पिण्डीतकः । नित्यकर्म्मधारयः ।) वृक्षविशेषः । तत्पर्य्यायः । वराहः २ कृष्णपिण्डीरः ३ । इति रत्नमाला ॥

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः ।) कृष्णपिण्डीतकवृक्षः । इति रत्नमाला ॥

कृष्णपिपीलो, स्त्री, (कृष्णा पिपीलो ।) कृष्णवर्णपिपीलिका । कालपिपीड़ा इति भाषा । तत्पर्य्यायः । स्थूला २ वृक्षरुहा ३ । इति राजनिर्घण्टः ॥

कृष्णपुष्पः, पुं, (कृष्णं पुष्पं यस्य ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरशब्दे ऽस्य पर्य्याया ज्ञेयाः ॥)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प + जातित्वात् ङीष ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

कृष्णफलः, पुं, (कृष्णं उग्रं कुत्सितं वा फलं अस्य ।) करमर्दकः । इत्यमरटीकायां भरतः ॥

कृष्णफलपाकः, पुं, (कृष्णं फलरूपेण पाको यस्य ।) करमर्दकः । इति द्विरूपकोषः ॥

कृष्णफला, स्त्री, (कृष्णं फलं यस्याः ।) सोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (कोलशिम्बी । आल्कुशी इति भाषा । छोट जाम इति भाषा । अस्याः पर्य्याया यथा ।

"सूक्ष्मकृष्णफला जम्बू दीर्घपत्रा च मध्यमा" ॥

इति वैद्यकरत्नमालायाम् ॥ कोलशिम्बिः ॥ सुवरा शेंडि इति भाषा ॥ अस्याः पर्य्याया ।

यथा,—

"कोलशिम्बिः कृष्णफला तथा पर्य्यङ्गपट्टिका" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभूमः, पुं, (कृष्णा कृष्णवर्णा भूमिर्मृत्तिका यत्र देशे । समासे अच् ।) कृष्णवर्णमृत्तिकायुक्तो देशः । इति हेमचन्द्रः ॥

कृष्णभूमिजा, स्त्री, (कृष्णाया भूमेर्जायते इति । जन + डः । ततष्टाप् ।) गोभूचिकाटङ्गम् । इति राजनिर्घण्टः ॥

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदश्छेदोऽस्याः ।) कटुका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा ॥

"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभेदी, स्त्री, (कृष्णेन वर्णेन भेदोऽस्याः । गौरादित्वात् ङीष् ।) कटुकी । इत्यमरः । २ । ४ । ८६ ॥ (कटुकीशब्दे ऽस्या गुणपर्य्याया बोद्धव्याः ।)

कृष्णमुद्गः, पुं, (कृष्णः कृष्णवर्णः निकृष्टो वा मुद्गः वनजातत्वात् ।) मुद्गविशेषः । कालमुग् इति भाषा । तत्पर्य्यायः । वासन्तः २ माधवः ३ सुराष्ट्रजः ४ । अस्य गुणाः । त्रिदोषदाहनाशित्वम् । मधुरत्वम् । लघुत्वम् । दीपनत्वम् । पथ्यत्वम् । बल-

वीर्य्याङ्गपुष्टिदात्वञ्च । इति राजनिर्घण्टः ॥ (यथाह भावप्रकाशः ।
"मुद्गो रूक्षो लघुर्ग्राही कफपित्तरसो हि सः । स्वादुरम्लानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥ मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा । श्वेतो रक्तश्च तेषान्तु पूर्ब्बः पूर्ब्बो लघुः स्मृतः ॥ शुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः । चरकादिभिरप्युक्त एष एव गुणाधिकः" ॥)

कृष्णमूली, स्त्री, (कृष्णं मूलमस्याः । स्त्रियां ङीप् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

कृष्णमृत्, स्त्री, (कृष्णा मृत् मृत्तिका ।) कालमृत्तिका । तत्पर्य्यायः । श्लक्ष्णभूमिः २ । अस्या गुणः । छर्दिदाहास्रप्रदरश्लेष्मपित्तहरत्वम् । इति राजनिर्घण्टः ॥

कृष्णमृत्तिकः, पुं, (कृष्णा मृत्तिका भूमिर्यत्र ।) कृष्णभूमः । इति हेमचन्द्रः ॥

कृष्णरुहा, स्त्री, (कृष्णा सती रोहतीति । रुह + कः ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णरूप्यः, त्रि, (कृष्णस्य भूतपूर्ब्बा गौः भूतपूर्ब्बो रूप्यः । कृष्णचरः । कृष्णस्य भूतपूर्ब्बो गवादिः । इति मुग्धबोधव्याकरणम् ॥

कृष्णलकः, पुं, (कृष्णो वर्णोऽस्यस्यार्द्धफलेसिध्मादित्वात् लच् । ततः स्वार्थे कन् ।) गुञ्जा । परिमाणविशेषः । यथा, मनुः । ८ । १७ ।
"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥

कृष्णलवणं, क्ली, (कृष्णं लवणम् ।) सौवर्चललवणम् । काचलवणम् । इति राजनिर्घण्टः ॥ (यथा, गारुडे १८४ अध्याये ।
"सैन्धवं कृष्णलवणं सौवीरं मत्स्यपित्तकम्" ॥ अस्य पर्य्याया यथा । वैद्यकरत्नमालायाम् ।
"रुचकं कृष्णलवणमच्छं सौवर्चलञ्च तत्" ॥)

कृष्णला, स्त्री, (कृष्णल + टाप् ।) गुञ्जा । इत्यमरः । २ । ४ । ९८ ॥ (स्त्री, परिमाणविशेषः । यथा, मनुः । ८ । १३४ ।
"सर्षपाः षट् यवो मध्यस्त्रियवान्वेककृष्णलम् । पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥ अस्य टीकायां कुल्लूकभट्टेन यद्व्याख्यातं तद्यथा । "गौरसर्षपाः षट् मध्यो न स्थूलो नापि सूक्ष्मो यवो भवति । त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धं पञ्चभिः कृष्णलैर्माषाः षोडशमाषायाः सुवर्णः स्यात्" ॥ अस्याः पर्य्याया यथा ।
"साङ्कुष्ठा कृष्णला गुञ्जा रक्तिका काकणन्तिका । काकादनी काकतिक्ता काकजङ्घा शिखण्डनी" ॥ इति वैद्यकरत्नमालायाम् ॥)

कृष्णलोहं, क्ली, (कृष्णं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
("त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलञ्चेति" ॥ इति सुश्रुते सूत्रस्थाने ६ अध्याये ॥)

कृष्णलोहितः, पुं, (कृष्णः लोहितश्च । "वर्णो वर्णेन २ । १ । ६९ । इति समासः ।) कृष्णरक्तमिश्रवर्णः । धूम्रवर्णः । तद्वति त्रि । इत्यमरः २ । ५ । १६ ॥

कृष्णवक्त्रः, पुं, (कृष्णं कृष्णवर्णं वक्त्रं मुखं यस्य ।) वानरः । इति हलायुधः ॥

कृष्णवर्त्मा, [न्] पुं, (कृष्णं कृष्णवर्णं वर्त्म यस्य । वायुप्रसारितधूमपथाभ्यन्तर एव गतिरस्येति भावः ।) अग्निः । (यथा, महाभारते १ । ८५ । १२ ।
"हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥) चित्रक वृक्षः । इत्यमरः ॥ (कृष्णं अपवित्रं कर्म्म आचरणं यस्य ।) दुराचारः । राजः । इति मेदिनी ॥ (कृष्णः वासुदेवः परब्रह्म इत्यर्थः वर्त्म गतिर्यस्य । ब्रह्मनिष्ठपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कृष्णवल्ली, स्त्री, (कृष्णा वल्ली ।) कृष्णार्जकः । इति शब्दचन्द्रिका ॥ सारिवाविशेषः । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा ।
"कृष्णार्जकः कृष्णवल्ली कालमालः करालकः" ॥ इति वैद्यकरत्नमालायाम् ॥)

कृष्णवल्लिका, स्त्री, (कृष्णा वल्लिका ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णवर्व्वरकः, पुं, (कृष्णः वर्व्वरकः ।) वर्व्वरवृक्षः । इति राजनिर्घण्टः ॥
(वर्व्वरशब्दे ऽस्य विवृतिर्ज्ञेया ॥)

कृष्णवानरः, पुं, (कृष्णः वानरः ।) कालवानरः । तत्पर्य्यायः । गोलाङ्गूलः २ गौरास्यः ३ कपिः ४ कृष्णमुखः ५ । इति राजनिर्घण्टः ॥

कृष्णवीजं, क्ली, (कृष्णं वीजं यस्य ।) कालिङ्गम् । इति राजनिर्घण्टः ॥ (कालिन्दं तरबूज इति लोके । अस्य पर्य्याया गुणाश्च यथा ।
"कालिन्दकृष्णवीजं स्यात् कालिङ्गञ्च सुवर्त्तुलम् । कालिन्दं ग्राहिदृक्पित्तश्रमरुक्छर्दितृड्गुरु । पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित्" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृष्णवीजः, पुं, (कृष्णं उग्रं वीजं यस्य ।) रक्तशिग्रुवृक्षः । इति जटाधरः ॥

कृष्णवृन्ता, स्त्री, (कृष्णं वृन्तं अस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ ॥ (अस्याः पर्य्याया यथा ।
"पाटलिः पाटला मोघा मधुदूती फलेरुहा । कृष्णवृन्ता कुबेराक्षी कालस्कन्धस्त्रिलिङ्गभा ॥ ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता" ॥ इति च तस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
माषपर्णी । इति मेदिनी (अस्याः पर्य्याया यथा ।
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णा महासहा । कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिनी" ॥ इति वैद्यकरत्नमालायाम् ॥ * ॥ गम्भारीवृक्षः । अस्य पर्य्याया यथा ।
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्विका ॥ काश्मीरी काश्मरीहीरा काश्मर्य्यः पीतरोहिणी । कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुणाश्चास्याः पाटलामाषपर्णीगम्भारीशब्देषु व्याख्येयाः ॥)

कृष्णवृन्तिका, स्त्री, (कृष्णं वृन्तं अस्याः ततः संज्ञायां कन् ततष्टाप् अत इत्वञ्च ।) गम्भारीवृक्षः । पेटिकावृक्षः । इति रत्नमाला ॥

कृष्णशारः, पुं, (कृष्णः शारः शबलश्च ।) कृष्णसारमृगः । इत्यमरटीकायां रमानाथः ॥

कृष्णशालिः, पुं, (कृष्णः शालिर्धान्यविशेषः ।) काल धान इति भाषा । तत्पर्य्यायः । कालशालिः २ श्यामशालिः ३ सितेतरः ४ । अस्य गुणाः । चिरदोषदाहनाशित्वम् । मधुरत्वम् । पुष्टिवीर्य्यवर्द्धनत्वम् । वर्णकान्तिबलकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णशिग्रुः, पुं, (कृष्णः रूक्षगुणयुक्तः शिग्रुः ।) शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥

कृष्णशिम्बिका, स्त्री, (कृष्णा कृष्णवर्णा शिम्बिका कुत्सिता शिम्बिका वा ।) कृष्णवर्णशिम्बी । काल शिम इति भाषा । तत्पर्य्यायः । काकाण्डी २ । इति रत्नमाला ।
(अस्या गुणा गाम्भारीशब्दे ज्ञातव्याः ॥
"सितासिताः पीतकरक्तवर्णा भवन्ति येऽनेकविधास्तु शिम्बाः । यथोदितास्ते गुणतः प्रधाना ज्ञेया कटूष्णा रसपाकयोश्च" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कृष्णशृङ्गः, पुं, (कृष्णं शृङ्गं विषाणो यस्य ।) महिषः । इति हेमचन्द्रः ॥

कृष्णसखः, पुं, कृष्णस्य सखा । ("राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) अर्জ্জুनः । इति सुग्धबोधव्याकरणम् ॥ (अर्জ্জुनवृक्षः ॥)

कृष्णसखी, स्त्री, (कृष्णस्य सखी । द्रौपदी । सा तु पञ्चपाण्डवमहिषी पञ्चालराजदुहिता । कृष्णस्य सखी सहचरी इव कृष्णवर्णत्वात् ।) जीरकः । इति शब्दचन्द्रिका ॥

कृष्णसर्षपः, पुं, (कृष्णः कृष्णवर्णः सर्षपः ।) राजसर्षपः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।
"त्रिवः त्रितामिजनकः क्षमिक्षत् कृष्णसर्षपः" ॥
अस्य गुणाश्च ।
"अति तीक्ष्णा विशेषेण तद्वत्कृष्णापि राजिका" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृष्णसारः, पुं, (कृष्णश्चासौ सारःशबलश्चेति ।) हरिण भेदः । इत्यमरः । २ । ४ । १० । कालसार इति भाषा ॥ (यथा, मनौ २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः" ॥)
अस्य मांसगुणाः । संग्राहित्वम् । रूचिबलकारित्वम् । ज्वरनाशित्वञ्च । इति राजवल्लभः ॥ खदीवृक्षः । शिंशपावृक्षः । इति मेदिनी ॥ खदिरवृक्षः । इति शब्दरत्नावली ॥

कृष्णसारङ्गः पुं, कृष्णवर्णः सारङ्गो मृगः । कृष्णसारः । (यथा, कात्यायनश्रौतवचने । ७ । ९ । २१ ।
"कृष्णसारङ्गं मेध्यमभावे लोहितसारङ्गम्" ॥ तथा, शतपथब्राह्मणे । ३ । ३ । ४ । १३ । "कृष्णसारङ्गः स्यादित्याह यदि कृष्णसारङ्गं न विन्देत अथो अपि लोहितसारङ्गम्" । "कृष्णसारङ्गः श्यामशबलः" । इति भाष्यम् । यच्चे परब्रह्म । यथा, "कृष्णः नित्यनिर्व्वाणरूपः तदङ्गं तत्स्वरूपं

यदि चेत् न विन्देत लभेत अथो अपि तर्हि लोहितसारङ्गं सगुणभावं उपासीत इत्यर्थः ॥)

कृष्णसारथिः, पुं, अर्ज्जुनवृक्षः । इति राजनिघण्टः ॥ (कृष्णः सारथिः युद्धे सहायोऽस्य इति विग्रहे ।) पार्थः । (स तु द्वतीयपाण्डवः । भारतीयमहायुद्धे पार्थप्रार्थनया श्रीकृष्णस्य तत्सारथ्यस्वीकारः । यथा, महाभारते । ५ । ७ । ३५-३८ ।

अर्ज्जुन उवाच ।

"भवान् समर्थस्तान् सर्व्वान् निहन्तुं नात्र संशयः ।
निहन्तुमक्षमेऽकेः समर्थः पुरुषर्षभ ! ॥
भवांस्तु कीर्त्तिमान् लोके तद्यशस्त्वां गमिष्यति ।
यशसा चाहमप्यर्थी तस्मादसि मया द्वतः ॥
सारथ्यन्तु त्वया कार्य्यं इति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद्भवान् कर्तुमर्हति ॥

वासुदेव उवाच ।

उपपन्नमिदं पार्थ! यत् स्पर्द्धेथा मया सह ।
सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव" ॥)

कृष्णसारा, स्त्री, (कृष्णसार + अजादित्वात् टाप् ।) स्निग्धपाटला । इति रत्नमाला ॥ (अस्याः पर्य्यायाः यथा,

"स्निग्धपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः ।
कपिला सैव मुनिभिर्भृगर्भैति कीर्त्तिता" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णस्कन्धः, पुं, (कृष्णः कृष्णवर्णः स्कन्धो यस्य ।) कालस्कन्धः । तमालवृक्षः । इत्यमरटीकायां भरतः ॥

कृष्णा, स्त्री, (कृषे र्नक् च्वं ततः टाप् ।) द्रौपदी । (सा तु पञ्चपाण्डवमहिषी । कृष्णवर्णत्वादेव अस्याः नाम तथा जातम् । यथा, महाभारते १ । १९८ । ४४ ।

"कृष्णेत्येवाब्रुवन् कृष्णां कृष्णाऽभूत् सा हि वर्णतः ।
तथा तन्मिथुनं यज्ञे द्रुपदस्य महामखे" ॥)

नीलीवृक्षः । पिप्पली । (अस्याः पर्य्याया यथा ।

"पिप्पली चपला शौण्डी वैदेही मागधी कणा ।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला" ॥

इति वैद्यकरत्नमालायाम् ॥) द्राक्षा । इति मेदिनी ॥ नीलपुनर्नवा । कृष्णजीरकः । गम्भारी । कटुका । सारिवाविशेषः । राजसर्षपः । इति राजनिघण्टः ॥ पर्पटी । इति भावप्रकाशः ॥ काकोली । सोमराजी । इति जटाधरः ॥ (द्वादशप्रकाराणां जलौकसां मध्ये सविषप्रकारीयजलौकोविशेषः । तस्य लक्षणं यथा ।

"ताम्रश्मश्रुवर्णवर्णा पृथुशिराः कृष्णा" ॥

इति सुश्रुते सूत्रस्थाने १३ अध्याये ॥)

कृष्णागुरु, क्ली, (कृष्णं कृष्णवर्णं अगुरु ।) कृष्णवर्णसुगन्धिकाष्ठविशेषः । तत्पर्य्यायः । अगुरु २ भद्रकारम् ३ विश्वरूपकम् ४ श्रीवर्षम् ५ कालागुरु ६ केशम् ७ वसुकम् ८ कृष्णकाष्ठम् ९ धूपार्हम् १० वह्निरम् ११ मिश्रवर्णम् १२ गन्धम् १३ । (यथा, भविष्यपुराणे आत्मतत्त्वोपदेशे ।

"विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत्" ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । लेपे शीतलत्वम् । पाने पित्तहरत्वम् । केषाञ्चित् मते त्रिदोषघ्नत्वम् । इति राजनिघण्टः ॥ तत्पर्य्यायगुणाः । अथ अगुरु कृष्णागुरु ।

"अगुरुप्रवरं लोहं राजार्हं जोङ्गजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ।
अगुरूष्णं कटु त्वर्थं तिक्तं तीक्ष्णञ्च पित्तलम् ॥
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ।
कृष्णं गुणाधिकं तत्तु लौहवद्धारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः" ॥

इति भावप्रकाशः ॥

कृष्णाचलः, पुं, (कृष्णस्य प्रियः अचलः पर्व्वतः । तद्वसतेस्तथात्वम् ।) रैवतपर्व्वतः । इति जटाधरः ॥ (अस्मिन्नेव गिरौ भगवतः कृष्णस्य द्वारकाधाम । इति पुराणप्रसिद्धम् ॥)

कृष्णाञ्जनी, स्त्री, (अञ्ज्यतेऽनया इति । अनज् + करणे ल्युट् ततो ङीप् । कृष्णा कृष्णवर्णा अञ्जनी ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

कृष्णानदी, स्त्री, (कृष्णा इत्याख्याता नदी ।) नदीभेदः । तत्पर्य्यायः । कृष्णसमुद्भवा २ कृष्णवेण्या ३ कृष्णगङ्गा ४ । (यथा, महाभारते ६ । ९ । ३३ ।

"सदा निरामयां कृष्णां मन्दगां मन्दवाहिनीम्" ॥

अस्य जलगुणाः । स्वच्छत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥

कृष्णाभा, स्त्री, (कृष्णा सती आभाति । आ + भा + कः । ततष्टाप् ।) कालाञ्जनी । इति राजनिर्घण्टः ॥

कृष्णायसं, क्ली, (कृष्णं कृष्णेन इत्यर्थः आयसति स्पर्द्धते वर्णेन । आ + यस् + कः ।) कृष्णायसम् । इति हेमचन्द्रः ॥

कृष्णायसं, क्ली, (कृष्णं कालं आयसम् ।) स्वार्थे अण् ।) कृष्णवर्णलौहम् । इति रत्नमाला ॥

कृष्णार्चिः, [स्] पुं, (कृष्णं कृष्णवर्णं अर्चिर्यस्य कृष्णवर्णधूमेन सह अर्चिर्यस्येति वा ।) अग्निः । इति भूरिप्रयोगः ॥

कृष्णार्जकः, पुं, (कृष्णः अर्जकः वनवर्ब्बरः ।) कालतुलसी । तत्पर्य्यायः । कालमालः २ मालूकः ३ कृष्णमालुकः ४ कृष्णमल्लिका ५ गरघ्नः ६ वनवर्ब्बरः ७ वर्ब्बरी ८ जातिः ९ ।

(अन्ये पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥

"कृष्णार्ज्जकः कृष्णवल्ली कालमालः करालकः" ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयनेत्ररोगनाशित्वम् । रुचिसुखप्रसवकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णालुः, पुं, (कृष्णः कृष्णवर्णः आलुः ।) नीलालुः । इति राजनिर्घण्टः ॥

कृष्णावासः, पुं, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । कृष्णस्य आवासः आलयः ।) अश्वत्थवृक्षः । इति हेमचन्द्रः ॥ (रैवतपर्व्वतः । इति भारतम् ॥ अश्वत्थशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कृष्णाश्रितः, त्रि, (कृष्णं आश्रितः प्राप्ताश्रयः ।) यस्य आश्रयः कृष्णः सः । इति मुग्धबोधम् ॥

कृष्णिका, स्त्री, (कृष्णैव इति । कृष्ण + सञ्ज्ञायां कन् टाप् अत इत्वम् । यद्वा, कृष्णवर्णो भूम्नाऽस्त्यस्य इति ठन् टाप् च ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ राइ सर्षा इति भाषा ॥ ("कृष्णिका राजिकासुरी कुरुण्टो राजसर्षपः" ॥ इति वैद्यकरत्नमालायाम् ॥)

श्यामापक्षिणी । तस्या नामानि यथा,

"श्यामा वराही शकुनी कुमारी
दुर्गा च देवी चटिका तथोमा ।
त्वं पोतकी पाण्डविका त्वमेव
त्वं कृष्णिका त्वं सितपक्षिणी च ॥
त्वं ब्रह्मपुत्री शकुनैकदेवी
धनुर्द्धरी पाशसमूहमाता ।
प्रत्यक्षरूपा भगवत्यहोमा
नमोऽस्तु तुभ्यं कुरु मेऽर्थसिद्धिम्" ॥

इति वसन्तराजशाकुनम् ॥

कृष्णेक्षुः, पुं, (कृष्णः कृष्णवर्णः इक्षुः ।) इक्षुभेदः । काजली आक् इति भाषा । तत्पर्य्यायः । श्यामेक्षुः २ कोकिलेक्षुकः ३ कोकिलाक्षः ४ कान्तारकः ५ । इत्यमरः ॥ अस्य गुणाः । तिक्तत्वम् । पाके मधुरत्वम् । स्वादुत्वम् । सुहृद्यत्वम् । कटुत्वम् । रसाढ्यत्वम् । त्रिदोषहारित्वम् । समवीर्य्यं बहुवीर्य्यसवर्णदाढत्वञ्च । इति राजनिर्घण्टः ॥ अस्य भावप्रकाशोक्तगुणाः कान्तारशब्दे द्रष्टव्याः ॥

कृष्णोदुम्बरिका, स्त्री, (कृष्णस्य काकस्य प्रिया उदुम्बरिका । यद्वा कृष्णा कृष्णवर्णा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

कृसरः, पुं, (कृ ङ कृञ् करणे + "कृधूमादिभ्यः कित्" । उणां ३ । ७३ । इति सरन् कित्व । वाऽजलकात् न धत्वम् ।) क्षीरः । इति जटाधरः ॥ (यथा, छन्दोगपरिशिष्टे—

"तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते" ॥

खिचुड़ी इति भाषा । यथा, च मनौ ५ । ७ ।

"तथा कृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च" ॥)

कॄ, श्र विक्षेपे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श्र, किरति । अस्यापि निष्ठायां कीर्ण इति । सूत्राद्योदिदित्यत्र मूर्द्धन्यवर्जनसामर्थ्यात् येन केनापि प्रकारेण रेफान्तान्निष्ठातस्य न इति व्याख्यानात् ऋदिरदाविति इरि उरि च कृते रान्तत्वात् निष्ठा तस्य न स्यात् । एवं गॄ श्र निगरणे इत्यादेरपि गीर्ण इत्यादि बोध्यम् । इति दुर्गादासः ॥

कॄ, ञ गि हिंसे । इति कविकल्पद्रुमः ॥ (ऋया-उभं-सकं-सेट् ।) ञ गि, क्षयति क्षयीते । कीर्णः किर्णिः । इति दुर्गादासः ॥

कॄ, क ड विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ड, कारयते । इति दुर्गादासः ॥

कॄत्, क संशब्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) दीर्घी । क, कीर्त्तयन्ति च

गोष्ठीषु यद्गुणानस्मरोगणाः। कीर्त्तादेशस्य नित्यत्वेऽपि कृतपाठः कीर्त्तादेशस्य व्यभिचारसूचनार्थः तेन अचीक्लृतदिति सिद्धम्। इति दुर्गादासः॥

क्लृप्तः, त्रि, कल्पनार्थक्लृपधातोः कर्म्मणि क्ते क्लृपादेशः। नियतः। कृतकल्पनः। कल्पनं सामर्थ्यं तद्विशिष्टः। यथा, "अवग्रहक्लृप्ताभिः पर्व्वतत्वचलत्वादितत्तद्धर्म्मावच्छिन्नाधिकरणतावच्छिन्नैरेवोपपत्तौ"। इति जगदीशः॥ (यथा, मनौ। ११। २७।

"इष्टिं वैश्वानरीं नित्यं निर्व्वपेदब्दपर्य्यये।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे"॥)

क्लृप्तकीला, स्त्री, (क्लृप्तं कीलयति। कील्+"कर्म्मण्यण्"। ३। २। १। इति अण्।) व्यवस्थापत्रम्। तत्पर्य्यायः। षट्टोलिका ३। इति त्रिकाण्डशेषः॥

क्लृप्तधूपः, पुं, (क्लृप्तः कृतः धूपो येन गन्धद्रव्यविशेषेण।) सिक्थकः। इति जटाधरः॥ (क्लृप्तश्चासौ धूपश्चेति विग्रहे क्षत्रियो धूपः॥)

क्लृप्तिकः, त्रि, (क्लृप्तं मूल्यदानेन सत्त्वं देयत्वेनास्त्यस्य। क्लृप्त+ठन्।) क्रीतः। इति हलायुधः॥

केकयः, पुं, (केकयस्तदाख्यया प्रसिद्धः प्रदेशो राज्यत्वेनास्त्यस्य।) सूर्य्यवंशीयराजविशेषः। इति श्रीभागवतम्। (स तु केकयदेशाधीश्वरः दशरथश्वशुरश्च। यथा, रामायणे १। १३। २३।

"तथा केकयराजानं वृद्धं परमधार्म्मिकम्।
श्वशुरं राजसिंहस्य सपुत्रन्तमिहानय"॥

जनपदवाचे तु बहुवचनान्तः। यथा, महाभारते। ६। जम्बूखण्डविनिर्म्माणपर्व्वणि ९। ४८।

"उपावृत्तानुपावृत्ताः सुराष्ट्राः केकयास्तथा"॥)

केकयी, स्त्री, (केकयस्यापत्यं स्त्री। सङ्घोचे मानाभावात् केकयाज्जन्यजनकभावेऽपि पुंयोग इति पुंयोगादाख्यायां ङीष्।) दशरथराजपत्नी। सा तु केकयराजपुत्री भरतमाता च। इति शब्दरत्नावली॥ (यथा, रामायणे।

"सत्कृत्य केकयीपुत्रं केकयो धनमादिशत्"॥)

केकरः, त्रि, (के शिरसि मूर्द्धि इत्यर्थः कर्तुं नेत्रतारां क्षीणमस्य। "छाद्यो हेतुताच्छील्यानुलोम्येषु"। ३।२।२०। इति टः। "हलदन्तात् सप्तम्याः संज्ञायाम्" ।४।२।४। इत्यलुक्॥) वलीरः। इत्यमरः। २। ६। ४९॥ टेरा इति भाषा। (यथा, मनौ।

"भिन्ना विवदमानश्च केकरो मद्यपस्तथा"॥

चतुर्वर्णात्मकमन्त्रः। यथा, विश्वसारतन्त्रे। "चतुर्वर्णस्तु केकरः"॥)

केका, स्त्री, (के मूर्द्धि कायति। कै+कः टाप्। अलुक् समासः। यद्वा, अन्येभ्योऽपीति कर्म्मणि डः। "हलदन्तात् सप्तम्याः संज्ञायाम्"। ६। ३। ९। इत्यलुक्।) मयूरवाणी। इत्यमरः। २। ५। ३१॥ (यथा, रघौ १। ३९।

"षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः"॥)

केकावलः, पुं, (केकां ध्वनिविशेषं वलते लृणातीति। केका+वल्+अच्। यद्वा, केका+अस्त्यर्थे बाहुलकात् वलच् प्रत्ययः।) मयूरः। इति शब्दचन्द्रिका॥

केकी, [न्] पुं, (केका ध्वनिभेदः अस्यास्तीति। व्रीह्यादित्वेति इनिः।) मयूरः। इत्यमरः २। ५। ३०॥ (यथा, काशीखण्डे। ३। ७१।

"केकी केकां परित्यज्य मौनं तिष्ठति तद्भयात्।
चकोरचन्द्रिकाभोक्ता नक्तव्रतमिवास्थितः"॥)

केकेयी, स्त्री, (कैकेयी एषोदरात् एकारत्वम्।) केकयी। इति शब्दरत्नावली॥

केचन, अ, (पाणिनिमते पदद्वयम्। मुग्धबोधमते "किमः क्षेपात्तिङ्चनौ"। इति चनप्रत्ययः।) केचित्। इति व्याकरणम्॥ (यथा, पञ्चदशी। ६। ५६।

"पूर्व्वापररात्रार्थविकलास्तत्र केचन"॥)

केचित्, अ, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः क्षेपात्तिङ्चनौ"। इति चित् प्रत्ययः।) केचन। इति व्याकरणम्। कोन व्यक्तिरा इति भाषा॥ (यथा, रामगीतायाम्। १४। "केचिद्वदन्तीति वितर्कवादिनः"। केचित्लालापकोविदाः इति रामतर्कवागीशः॥)

केचुकं, क्ली, (कचु+स्वार्थे कन्। एषोदरात् एत्वे साधुः।) कचुः। इति त्रिकाण्डशेषः॥

केशिका, स्त्री, (के शिरसि कुत्सितो वा अयं कः ततः टाप् अत इत्वम्। स्त्रीत्वं लौकिकम्।) पटकुटी। इति हेमचन्द्रः॥ कानात् इति भाषा॥

केत, तृ क मन्त्रणे। निःश्रावणे। इति कविकल्पद्रुमः॥ (अदन्तधुरां—परं-सकं-सेट्। मन्त्रणे निमन्त्रणे। अचिकेतत्। निःश्रावणं समवोद्भावनम्। इति दुर्गादासः॥

केतकः, पुं, (कितनिवासे+ण्वुल्।) केतकीवृक्षः। इति त्रिकाण्डशेषः॥ (यथा, रघुः ६। १७।

"विलासिनीविभ्रमदन्तपत्र-
मापाण्डुरं केतकवर्हमन्यः"॥

अस्य पर्य्याया गुणाश्च यथा,—

"केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः"॥

"केतकः कटुकः स्वादुर्लघुन्तिक्तः कषायकः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

केतकी, स्त्री, (केतक+गौरादित्वात् ङीष्।) पुष्पवृक्षविशेषः। केया इति भाषा॥ (यथा, भ्रमराष्टके। १।

"गन्धाढ्यासौ भुवनविदिता केतकी सर्व्ववर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात"॥)

तत्पर्य्यायः। सूचीपुष्पः २ हृल्लीनः ३ जम्बुलः ४। इति रत्नमाला॥ केतकः ५ सूचिकापुष्पः ६ जम्बुकः ७ क्रकचच्छदः ८। इति भावप्रकाशः॥ तीक्ष्णपुष्पा ९ विपत्रा १० धूलिपुष्पिका ११ मेध्या १२ कण्टदला १३ शिवद्विष्टा १४ नृपप्रिया १५ क्रकचा १६ दीर्घपत्रा १७ स्थिरगन्धा १८ गन्धपुष्पा १९ इन्दुकलिका २० दलपुष्पा २१ पांसुला २२। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। कफनाशित्वम्। कटुत्वम्। लघुत्वञ्च॥ तत्पुष्पगुणाः। वर्णत्वम्। केशदौर्गन्ध्यनाशित्वञ्च॥ हेमाभायास्तस्या गुणाः। मदनोन्मादकत्वम्। वृंहणत्वम्। सौरभकारित्वञ्च॥ तस्याः स्तनगुणाः। अतिशिशिरत्वम्। कटुत्वम्। पित्तकफापहत्वम्। रसायनत्वम्। वर्णदेहदार्ढ्यकारित्वञ्च। इति राजनिर्घण्टः॥

केतनं, क्ली, (कित् निवासार्थेषु+कर्म्मभावकरणाधिकरणादिषु यथायथं ल्युट्।) ध्वजः। (यथा, रघुवंशे ६। ३६।

"अपतुषारतया विशदप्रभैः
सुरतसङ्गपरिश्रमनोदिभिः।
कुसुमचापभृतेऽयदंशुभि-
र्हिमकरो मकरोर्ज्जितकेतनम्"॥)

कार्य्यम्। निमन्त्रणम्। इत्यमरः। ३। ३। ११३॥ (यथा, मनुः। ४। ११०।

"प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम्।
यद्दं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके"॥)

चिह्नम्। गृहम्। इति हेमचन्द्रः। (यथा, रामायणे १। ७४। ८।

"स त्वं धर्म्मपरो भूत्वा काश्यपाय वसुन्धराम्।
दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः"॥)

स्थानम्। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे १। ११। ९।

"एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम्"॥)

केतुः, पुं, नवग्रहान्तर्गतग्रहविशेषः। स तु राहोः शरीरम्। तत्पर्य्यायः। शिखी २। इति दीपिका॥ अयं पापग्रहः। यथा,—

"अर्क्षो नेन्द्वर्कसौराराः पापाः सौम्यास्तथापरे।
पापयुक्तो बुधः पापो राहुकेतू च पापदौ"॥ इति॥

अथन्तु जन्मराशेरपेक्षया षष्ठचिदशमैकादशस्थानस्थितश्चेत् शुभः। यथा,—

"केतूपचयभौमसन्दगतयः षष्ठत्रिसंस्थाः शुभा
श्चन्द्रार्कावपि तेच तौ च दशमौ चन्द्रः पुनः सप्तमः।
जीवः सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मजः
शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्त्ये शुभाः"॥
इति॥ * ॥ अस्य त्रिकोण उच्चस्थद्वादशचतुर्मित्रसमनीचा यथा,—

"सिंहस्त्रिकोणं धनुरुच्चसंज्ञं
मीनो गृहं शुक्रगुनी विपत्तौ।
सूर्य्यारचन्द्राः सुहृदः समानौ
जीवेन्दुजौ षट् शिखिनः परांशाः"॥ इति॥

"खोच्चं सप्तमं नीचं प्राग्वद्भावैर्विनिर्दिशेत्"॥ इति॥ * ॥ अस्य रिष्टिर्यथा,—

"केतुर्यस्मिन्मुहूर्त्तेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः।
रौद्रे सर्पमुहूर्त्ते वा प्राणैः संत्यज्यते चाशु"॥
इति च ज्योतिस्तत्त्वम्॥ * ॥ अस्य दशाफलं केरलीनामग्रन्थे द्रष्टव्यम्॥ * ॥ अथातः केतुचाराध्यायो व्याख्यायते। तत्रादावेवागमप्रदर्शनार्थमाह।

"गार्गीयं शिखिचारं पराशरमसितदेवलकृतञ्च।
अन्यांश्च बहून्दृष्ट्वा क्रियतेऽयमनाकुलस्सारः"॥

गार्गीयं गर्गप्रोक्तं केतूनां चारं तत् पराशरेण कृतं असितनामाचार्य्येण कृतं देवलविरचितं एतान् केतुचारान् अवलोक्य तथान्यानपि कश्यपपुलहविपुत्रनारदवसिष्ठादिरचितान् बहून् दृष्ट्वा मया अयं

अनाकुलो निःसन्देहः केतुचारः क्रियते ॥ * ॥

अथोदयास्तमयलक्षणं आह ।

"दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरीक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्"॥

अस्य केतोर्दर्शनं उदयः अस्तमयोऽदर्शनं गणितविधानेन ज्ञातुं न शक्यते । यस्मात् केतवस्त्रिविधास्त्रिप्रकाराः । दिवि आकाशे भवा दिव्याः । अन्तरीक्षे भवा आन्तरीक्षाः । ग्रहनक्षत्रस्थानं विहायान्यत्र आकाशे ये दृश्यन्ते ते आन्तरीक्षाः । भूमौ भवाः भौमाः । इति हेतोरुत्पातरूपत्वात् एषामुदयास्तमयौ न ज्ञायेते इति ॥*॥

अथ केतूनां दिव्यवर्ज्जितानां अन्येषां स्वरूपमाह ।

"अऊताग्नेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम् । खद्योतपिशाचालयमग्निरत्नादीन् परित्यज्य" ॥

अऊताग्नेः अनलवर्ज्जिते यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते यत् तदेव केतुरूपमुक्तम् । किन्तु खद्योत इन्द्रगोपकाग्निविशेषः । पिशाचालयं यत्स्थानम् । मणयश्चन्द्रकान्तप्रभृतयः । रत्नानि मरकतप्रभृतीनि । आदिग्रहणादन्यान्यपि काञ्चप्रभृतीनि तेजोरूपाणि एतान् त्यक्त्वा । यत एषां स्वभावादेवानलरूपमऊताग्नेः दृश्यते अतो न तत् केतुरूपमिति ॥ * ॥

अथ दिव्यान्तरीक्षभौमानां केतूनां लक्षणमाह ।

"ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वान्तरीक्षास्ते । दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः"॥

ध्वजश्छिन्नम् । शस्त्रमायुधादि । भवनं गृहम् । तरवश्चूताः तुरगोऽश्वः । कुञ्जरो हस्ती । आदिग्रहणादन्येषु चतुष्पदेषु ये दृश्यन्ते ते आन्तरीक्षाः । दिव्या नक्षत्रस्थाः । अतोऽस्मादुक्तादन्यथा भूमौ ये दृश्यन्ते ते भौमाः । शिखिनः केतवः इति ॥*॥

अथ केतूनां संख्यानं मतान्तरेणाह ।

"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्" ॥

एके पराशरादयः एकाधिकं शतं केतूनां कथयन्ति । तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोड़श मत्युनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविलयने रुद्रक्रोधजाः । सप्त पैतामहाः । पञ्चदश ऋषेरौद्दालिकस्य पुत्राः । सप्तदश मरीचिकश्यपलक्षाटजाः । पञ्च च प्रजापतिसङ्भवाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्दश मथ्यमानेऽम्भसि सोमेन सह समुत्थिताः । एकस्तु ब्रह्मकोपजः" इति । * ॥ अपरे गर्गादयः सहस्रं केतूनां वदन्ति ।

तथा च गर्गः ।

"अभिलोदयचाराख्यामनुभागाच्च दर्शनम् । आगन्तूनां सहस्रं स्याद् ग्रहाणां सन्निबोध मे" ॥

बहुरूपमेकमेवेति नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । तस्मते एक एव केतुस्तस्य बहूनि रूपाणि स एव दिव्यान्तरीक्षभौम इत्यर्थः ।

तथा च नारदः ।

"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः । शुभाशुभफलं लोके ददात्यस्तमयोदयैः" इति ॥*॥

एवं मतान्तराण्युक्ता स्वसिद्धान्तमाह ।

"यद्येको यदि बहवः किमनेन फलन्तु सर्व्वथा वाच्यम् । उदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैः"

यद्येक एव केतुः यदि वा बहवः केतवः किमनेन । सर्व्वथा तेषामुदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैश्च शुभाशुभं फलं पुनर्वक्तव्यम् । उदयः कस्यां दिशुदितः । अस्तमयः कस्यामेवास्तमितः । स्थानं यथा कस्मिन्नाकाशभागे कस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च । स्पर्शनं कस्येन ग्रहो नक्षत्रं वा स्पृष्टम् । आधूपनं कोऽपि शिखयाभिधूपितः । वर्णाः सितरक्तपीतकृष्णादिकाः । एवमादिभिस्तस्य फलं वाच्यं तस्मादेको बहवो वा भवन्तु का नः क्षतिरिति ॥ * ॥

अथ केतुचारे येषां केतूनामभिदृष्टानां कियन्तं कालं यावत् फलपाको भवति तेषां फलपाकनियमार्थमाह ।

"यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः । मासैरब्दांश्च वदेत् प्रथमात् पञ्चत्रयात् परतः"॥

दृश्यः केतुरिति सम्बध्यते । फलस्य पाकः फलपाकः । यः केतुर्यावन्त्यहानि दृश्यो भवति तस्य तावन्तो मासास्तस्य केतोस्तावतो मासान् फलपाको ब्रूयात् । यावत्सङ्ख्यकानि दिनानि दृष्टो भवति तत्तुल्यान् मासान् तस्य फलपाको वदेत् । मासैस्तु पुनरब्दान् संवत्सरान् ब्रूयात् । माससङ्ख्यादर्शने मासतुल्यानि वर्षाणि च वदेत् । यावत् सङ्ख्यान्मासान् दृश्यो भवति तावत्सङ्ख्यानि वर्षाणि तस्य फलपाको वदेत् । कस्मात् कालात् प्रभृतिरित्यत आह प्रथमात् पञ्चत्रयात् परतः । सर्व्वेषां केतूनां दिनसाम्यत्वम् । यावन्ति दिनानि दृश्यः केतुस्तस्मादर्शनादूर्द्धं प्रथमं पञ्चत्रयं पञ्चत्वारिंशद्दिनानि यावत् निष्फलानि तस्मात् पञ्चत्रयात् परतः तावतो मासान् फलपाकः । अथ मासान् वृक्षते तदा तस्मादेव दर्शनात् परतः पञ्चत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत् । प्रथमात् पञ्चत्रयात् परतः तत्र पञ्चत्रयं यावद्दिनसङ्ख्या स्पृश्यते । पञ्चत्रयादूर्द्धं यदा दृश्यते केतुस्तदा मासतुल्यानि वर्षाणि वदेत् । अत्र सन्देहच्छेदासार्थं गर्गोक्तं नियमकमभिलिख्यते ।

तथा च गर्गः ।

"यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत् । मासांस्तु यावद्दृश्येत तावतोऽब्दांस्तु वैक्षतान् ॥ त्रिपञ्चात् परतश्चापि कर्म्म केतोः प्रपच्यते । तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम् । यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

तथा रुद्रगर्गः ।

"यावतो दिवसांल्लिङ्गेत्तावन्मासान् विनिर्दिशेत् । त्रिपञ्चात् परतश्चापि कर्म्म केतोः प्रपच्यते ॥ तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम् । यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

यद्येवं तदा द्वितीयव्याख्यानमत्र न घटते प्रथमव्याख्यानमेव न्याय्य इति । यथा प्रथमात् पञ्चत्रयात् परतः दर्शनादूर्द्धं पञ्चत्रयं यावन्निष्फलं पञ्चत्रयात् परतः फलपाकस्य कालसङ्ख्या प्रवर्त्तते तस्मादुक्तं यद्दिष्टमुदिये केतौ फलं नेहादिशेद्बुधः इति । यदुक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि प्रतिमासमेकदिनदर्शनेन माससङ्ख्या लभ्यत एवेत्यर्थः । सर्व्वथा किमनेनास्माकमसद्विकल्पेन । दिवसैः पञ्चत्रयात् परतो मासान् वदेत् । मासैस्तस्मादेव पञ्चत्रयात् परतोऽब्दान् वदेत् । मासात् परतो दिनाधिक्यं दृष्ट्यनुपातवशात् वाच्यम् । यथा यदि दिनत्रिंशता वर्षं लभ्यते तदृष्ट्या दिनैकेन मासैकमिति ।

तथा च समासंहितायाम् ।

"केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके । नारदमतमेकोऽयं त्रिस्थानसमुद्भवो विविधरूपः ॥ दिव्या ग्रहर्क्षजातास्त्रीव्रफलकरा भौमाः । प्राग्दिग्ध्वजादितुल्येषु चान्तरीक्षा न चाप्यशुभाः ॥ उदयास्तमयाधूपनसंयोगाकारमार्गदिक्पातैः । फलानि दिवसैर्म्मासान् मासैस्तु वर्षाणि सन्दिशेत् केतोः" ॥ * ॥

अथ शुभस्य केतोर्लक्षणमाह ।

"स्निग्धतनुः प्रसन्नः स्निग्धऋजुरचिरसंस्थितः शुक्लः । उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः" ॥

ऋजुरकुटिलः । अचिरसंस्थितः शीघ्रमेवादर्शनं याति । शुक्लः श्वेतः । उदितो वाप्यभिदृष्टः अथवोदित एवाभिदृष्टस्त्रिस्थितु उदितमात्रे यदि दृष्टिर्भवति तदा शुभः । अन्यथा अशुभः ।

अशुभस्य केतोर्लक्षणमाह ।

"उल्काविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः । इन्द्रायुधानुकारी विशेषतो द्विस्त्रिचूलो वा" ॥

रूक्षतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुःसदृशो न शुभकर एव । तथा द्विस्त्रिस्निग्धश्च विशेषतः पापफलदः । तथा च समासंहितायाम् ।

"अचिरस्थितोऽभिदृष्टस्त्वनुः सितः स्निग्धमूर्त्तिरुदगुदितः । रूक्षतनुः प्रसन्नः केतुर्लोकस्य भवाय ॥ न शुभो विपरीतो विशेषतः शक्रचापसंकाशः । द्विस्त्रिधतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः" ॥*॥

अधुना केतुसहस्रलक्षणं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति । तेषां लक्षणमाह ।

"हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सशिखाः । प्रागपरदिग्धोर्दृश्या ऋषतिविरोधावहा रविजाः" ॥ हारो मुक्ताहारः । मणयश्चन्द्रकान्तप्रभृतयः । हेम सुवर्णम् । तत्समानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः । सशिखाः सचूलाः । ते च पञ्चविंशतयो रविजाः सूर्य्यसुताः प्रागपरयोश्च दिशोर्दृश्याः । प्राक् पूर्व्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते । एतेषां मध्यादेक एव दृश्यते न सर्व्वे युगपदिति । सर्व्वत्रेय परिभाषा । ते च ऋषते राज्ञो विरोधप्रदाः अनिष्टा इत्यर्थः ।

तथा च गर्गः ।

"शुद्धस्फटिकसंकाशा मृणालरजतप्रभाः ।

मुक्ताहारसवर्णाभाः सशिखाः पञ्चविंशतिः ॥
किरणाख्या रवेः पुत्रा दृश्यन्ते प्राग्दिशि स्थिताः ।
तथा च परभागस्था नृपतेर्भयदाश्च ते" ॥ * ॥

अथाग्निपुत्रास्तावन्त आह ।

"शुकदहनबन्धुजीवकलाक्षातजोपमा ऊताग्नसुताः ।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिनो भयदाः" ॥

शुकपर्क्षो नीलपीतवर्णः । दहनोऽग्निः । बन्धुजीवकः पुष्पविशेषोऽतिलोहितः । लाक्षा दृक्षनिर्यासः । क्षतजं रक्तम् । तदुपमास्तत्तुल्यवर्णाः । ते च तावन्तः पञ्चविंशतिः आग्नेय्यां दिशि दृश्यन्ते । ते च ऊताग्नसुताः अग्निपुत्राः अग्निभयदाः ।

तथा च गर्गः ।

"नानावर्णाग्निसङ्काशा दीप्तिमन्तोऽपि चूलिनः ।
स्रजन्त्यग्निमिवाकाशात् सर्व्वज्योतिषनाशनाः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
आग्नेय्यां दिशि दृश्यन्ते पञ्चविंशाः प्रकीर्त्तिताः" ॥

अथ मृत्युसुतास्तावन्त एवाह ।

"वक्राग्निखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः ।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च" ॥

वक्राग्निखाः अस्पष्टचूड़ाः । ते च रूक्षा अस्निग्धास्तेऽपि पञ्चविंशतिरेव । ते च मृत्योः पुत्रा दक्षिणस्यां दिशि दृश्यन्ते । ते च जनानां मरकं आवेदयन्ति ।

तथा च गर्गः ॥

"कृष्णा रूक्षा वक्राग्निखा दृश्यन्ते याम्यदिक्स्थिताः ।
पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः" ॥

अथ भूपुत्रा द्वाविंशतिरेवाह ।

"दर्पणवृत्ताकारा विग्निखाः किरणान्विता धरातनयाः । क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः" ॥ दर्पणवत् वृत्तं वर्त्तुलं आकारो येषां ते विग्निखा विचूलाः रश्मिसंयुक्ताः भूमेः पुत्राः । ते च द्वाविंशतिरैशान्यां दृश्यन्ते । जलस्य तैलस्य च सदृशकान्तयः । एते दृष्टा दुर्भिक्षं ददति ॥

तथा च गर्गः ।

"समन्तवृत्ता विग्निखा रश्मिभिः परिवारिताः ।
अम्बुतैलप्रतीकाशा द्वाविंशा भूसुताः स्मृताः ।
ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदाश्च ते" ॥ * ॥

अथ चन्द्रसुतास्त्रय आह । "ग्रन्थिकिरणहिमरजतकुमुदकुन्दकुसुमोपमाः सुताः ग्रन्थिनः । उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः" ॥ एते सौम्यायां दिशि दृश्यन्ते । ते च सुभिक्षं कुर्व्वन्ति ।

तथा च गर्गः ।

"चन्द्ररश्मिसुवर्णाभा हिमकुन्देन्दुसुप्रभाः ।
त्रयस्ते ग्रन्थिनः पुत्राः सौम्याशास्थाः शुभावहाः" ॥

अथ ब्रह्मदण्डाख्यस्य लक्षणमाह ।

"ब्रह्मसुत एक एव चित्रशिखो वर्णैस्त्रिभिर्युगान्तकरः ।
अनियतदिक्संप्रभवो विज्ञेयो ब्रह्मदण्डाख्यः" ॥

ब्रह्मपुत्र एक एव । स च चित्रचूड़ः । वर्णैः सितादिभिश्चोपलक्षितः । स तु ब्रह्मदण्डसंज्ञो ज्ञेयः । अनियतायां अनिश्चितायां दिशि संप्रभवः उत्पद्यते सर्व्वासु दिक्षु दृश्यत इत्यर्थः । स तु युगस्यान्तं करोति सर्व्वक्षयकरः इत्यर्थः ।

तथा च गर्गः ।

"एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशिखान्वितः ।
सर्व्वाशाशास्तु दृश्यः स्यात् ब्रह्मदण्डः क्षयावहः" ॥

एकाधिकं शतं कथितं अन्यानि नवशतान्येकोनानि कथनीयानि इत्यत आह ।

"शतमभिहितमेकसमेतमेकाधिकाच्छतात्परतः ।
एकोनानि नवशतानि केतूनां स्पष्टैर्लक्षणैः कथयिष्ये" ॥

शतमभिहितमेकसमेतं एकेनाधिकं केतूनां शतमभिहितमुक्तम् । तस्मादेकाधिकाच्छतात् परतः एकोनानि एकेन विरहितानि नवशतानि केतूनां स्पष्टैर्यैर्लक्षणैस्तैः कथयिष्ये ॥

अथ शुक्रपुत्राश्चतुरशीतिसंज्ञाश्चाह ।

"शुक्रसुता विसर्पकाः सौम्येशान्योरुदयं यान्ति चतुरशीत्याख्याः । विपुलसितताराक्षास्ते स्निग्धाश्च भवन्ति तीव्रफलाः" ॥ सौम्या उत्तरा । ऐशानी ईशानदिक् । तयोरुदयं दर्शनं गच्छन्ति । ते च विपुला विस्तीर्णाः सिताः शुक्लाः तारका येषाम् । स्निग्धा निर्म्मलदेहाः ते च तीव्रफला अनिष्टफला इति ।

तथा च गर्गः ।

"स्थूलैकतारकाः श्वेताः स्नेहवन्तश्च सुप्रभाः ।
अर्चिष्मन्तः प्रसन्नाश्च तीव्रेण च सुखान्विताः ॥
एते विसर्पका नाम शुक्रपुत्राः पुरोदयाः ।
अशीतिश्चतुरश्चैव लोकक्षयकराः स्मृताः" ॥ *॥

अथ षष्टिशनैश्चरपुत्रानाह ।

"स्निग्धाः प्रभासमेता दिग्शिखाः षष्टिः शनैश्चराङ्करुहाः । अतिकृष्णफला दृश्याः सर्व्वत्रैते कनकसंज्ञाः" ॥ ईदृशाः षष्टिः शनैश्चरपुत्राः कनककेतवः सर्व्वत्र सर्व्वासु दिक्षु दृश्याः अत्यशुभफलाश्च ते ।

तथा च गर्गः ।

"सुस्निग्धा रश्मिसंयुक्ता दिग्शिखाः सिततारकाः ।
षष्टिस्ते कनका घोराः शनैश्चरसुता ग्रहाः" ॥ * ॥

अथ गुरुसुताः पञ्चषष्टिराह ।

"विकचा नाम गुरुसुताः सितैकतारा ग्रिखाप्रित्यक्ताः । षष्टिपञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः" ॥

पञ्चषष्टिः केतवो विकचा नाम बृहस्पतिपुत्राः । ते च सितः श्वेतः एकस्तारको येषां चूड़ारहिताः । ते च दक्षिणस्यां दृश्यन्ते पापा अनिष्टफलदा इत्यर्थः ।

तथा च गर्गः ।

"स्निग्धाः शुक्लाः प्रसन्नाश्च महारूपाः प्रभान्विताः ।
एकतारा वपुष्मन्तो विग्निखा रश्मिभिर्वृताः ॥
एते बृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः ।
नामतो विकचा घोराः पञ्चषष्टिर्भयावहाः" ॥

अथैकपञ्चाशदुधपुत्रानाह ।

"नातिव्यक्ताः कृष्णा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः ।
बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत्" ॥

तस्करनामान एकपञ्चाशत् केतवो बुधस्य पुत्राः । नातिस्फुटाः अल्पदेहाः यथेष्टायां दिशि प्रभव उत्पत्तिर्येषां सर्व्वासु दिक्षु दृश्यन्त इत्यर्थः । ते चानिष्टफलाः ।

तथा च गर्गः ।

"अरुन्धतिसमा व्यक्ताः केचिदव्यक्ततारकाः ।
पाण्डुवर्णाः सुदीर्घाश्च सूक्ष्मा रश्मिभिरावृताः ॥
एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः ।
एकाधिकास्ते पञ्चाग्रदधोऽत्यर्थचरा ग्रहाः" ॥ *॥

अथ षष्टिभौमपुत्रानाह ।

"क्षतजानलानुरूपास्त्रिचूलतारा कुजात्मजाः षष्टिः । नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः" ॥ कौङ्कुमनामानः षष्टिकेतवो मङ्गलपुत्राः रक्तवह्निसदृशाः लोहिता इत्यर्थः । त्रिचूलास्त्रिशिखास्तारा येषां ते च उत्तरस्यां दृश्यन्ते पापफलाश्च ।

तथा च गर्गः ।

"त्रिशिखाश्च सिताराश्च रक्तलोहितरश्मयः ।
प्रायशस्तूत्तरामाशां सेवन्ते नित्यमेव ते ॥
लोहिताङ्गात्मजा ज्ञेया ग्रहाः षष्टिः समासतः ।
नामतः कौङ्कुमा ज्ञेया राज्ञां संग्रामकारकाः" ॥ *॥

अथ त्रयस्त्रिंशद्राङ्पुत्रानाह ।

"त्रिंशत्तु त्र्यधिका राहोस्ते तामसकीलका इति ख्याताः । रविग्रहिणा दृश्यन्ते तेषां फलमर्कचारोक्तम्" ॥

त्रयस्त्रिंशत् स्वर्भानुपुत्रास्ते च नामतः तामसकीलका इति प्रसिद्धाः । ते च अर्कचन्द्रमण्डलस्था दृश्यन्ते तेषाञ्च फलं सूर्य्यचारे कथितं तामस कीलकसंज्ञा राङ्सुता इति ।

तथा च गर्गः ।

"कृष्णाभाः कृष्णपर्य्यन्ताः संकुलाः कृष्णरश्मयः ।
राङ्पुत्रास्त्रयस्त्रिंशत् कीलकाख्यातिदारुणाः ॥
रविमण्डलगास्त्वेते दृश्यन्ते चन्द्रगास्तथा" ॥

तथा च पराशरः ।

"अपर्व्वण्येव दृश्यन्ते ह्यङ्गिराः काककीलकाः ।
रवेरित्यङ्गिरामध्ये ह्युभयोः काककीलकौ ॥
अङ्गिराः सरथो वापि दृश्यते पुरुषाकृतिः ।
काकः काकाकृतिर्घोरस्त्रिकोणो वाथ लक्ष्यते ॥
मण्डलं कीलको मध्ये मण्डलस्थासितो ग्रहः ।
महाभूतविरोधाय यस्यैतं तस्य मृत्यवे" इति ॥*॥

अथ विंशत्यधिकं शतमग्निपुत्रानाह ।

"विंशत्यधिकमनन्तोक्तमग्नेर्विश्वरूपसंज्ञानाम् ।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्" ॥

अन्यत् अपरं शतं विंशत्यधिकं केतूनामग्नेः सुतानां विश्वरूपनाम्नां कीदृशानां ज्वालामालाभिराकुला व्याप्तास्तनवो मूर्त्तयो येषाम् । तथा तीव्रं घोरमग्निभयं ददति ।

तथा च गर्गः ।

"नानावर्णा ऊताग्नाभा दीप्तिमन्तो विचूलिनः ।
स्रजन्त्यग्निमिवाकाशे सर्व्वज्योतिर्विनाशनाः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
विंशं शतं शतं घोरं विश्वरूपेति विश्रुतम्" ॥ * ॥

अथ सप्तसप्ततिवायुपुत्रानाह ।

"श्यावारुणा वितारास्त्रामरूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः" ॥

अरुणसंज्ञा वायोः पुत्राः श्यावलोहित वर्णाः तारकवर्जिताश्चामरूपा बालव्यजनाकृतयः

व्याच्छिन्नरश्मयः रूक्षाः दुष्टफलप्रदाः। अत्र येषां दिङ्नियमो नास्ति तेऽनियतदर्शनाः सर्व्वास्वपि दिक्षु दृश्यन्ते।

तथा च गर्गः।

"अतारारूपप्रतिमाः श्यावरक्तसुवर्णिनः।
वालरूपा इवाभान्ति शुक्लविस्फोर्जरश्मयः॥
सप्तसप्तति चैवान्ये वायोःपुत्राः प्रचक्षते।
लोकविध्वंसना रूक्षा नामतस्त्वरुणा ग्रहाः"॥*॥

अथाष्टौ प्रजापतिसुता दे च शते चतुरधिके ब्रह्मणः पुत्रास्तानाह।

"तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ।
दे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः॥
अष्टौ केतवो गणका नाम प्रजापतेः पुत्राः"।

ते च ताराणां नक्षत्राणां पुञ्जाः समूहस्तदाकाराः। ते च अशुभदायिनः। तथा च। दे शते चतुरधिके केतूनां ते च चतुरस्रसंज्ञाः चतुराकृतयस्ते च ब्रह्मणः पुत्राः पापफला एव ज्ञेयाः ते चाग्नेयदिग्भवाः। तथा च गर्गः।

"तारापुञ्जप्रतीकाशा थोमभञ्जनसंस्थिताः।
प्राजापत्या ग्रहास्त्वष्टौ गणका भयवेदिनः॥
त्र्यस्राश्च चतुरस्रा वा सशिखाः श्वेतरश्मयः।
दे शते चतुरस्रैव ब्रह्मजा भयदाश्च ते"॥*॥

अथ दार्चिःशब्दरूपपुत्रानाह।

"कङ्का नाम वरुणजा दार्चिःशत् गुल्मसंस्थानाः।
ग्रन्थिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः"॥

ते वरुणपुत्राः वंशगुल्मवत् संस्थानमाकृतिर्येषां। गुल्म एकमूलजो जतासमूहः। ग्रन्थिवत् चन्द्रवत् प्रभया कान्त्या समेतास्ते च तीव्रफलाः कष्टफलाः प्रोक्ताः कथितास्ते चानियतदिक्प्रभवाः। तथा च गर्गः।

"वंशगुल्मप्रतीकाशा महान्तः पूर्वरश्मयः।
काकतुण्डनिभैश्चाभि रश्मिभिः केचिदाहताः॥
मयूखानुन्मृजन्तीव स्निग्धत्वात् सौम्यदर्शनाः।
एते कष्टफलाः कङ्का दार्चिःशद्वरुणा ग्रहाः"॥*॥

अथ वसुवतिकालपुत्रानाह।

"वसुवतिः कालसूताः कबन्धसंज्ञाः कबन्धसंस्थानाः।
पुष्ट्याऽभयप्रदाः स्युर्व्विरूपतारास्ते शिखिनः"॥

कालपुत्राः कबन्धसंज्ञानाः वसुवतिः। कबन्धश्छिन्नशिरःपुरुषवत्तदत् संस्थानमाकृतिर्येषां ते च विरूपा अस्फुटाकारका येषां ते शिखिनः केतवः पुष्ट्या नाम जनपदास्तेषां श्रेयस्कराः स्युः। अन्यत्र पुनर्भयदास्ते चानियतदिक्प्रभवाः।

तथा च गर्गः।

"तारापुञ्जविरूपाश्च कबन्धाकृतिसंस्थिताः।
पीतारुणाः सवर्णाश्च मस्तकपूररश्मयः॥
कालपुत्राः कबन्धाश्च नवतिः षट् प्रकीर्त्तिताः।
लोमशरोगकरा घोराः पुष्ट्याख्यामभयप्रदाः"॥*॥

अथ नवविदिक्पुत्राः सर्व्वेषाञ्च संस्थानमन्येषाञ्च वक्ष्यामीत्येतदाह।

"शुक्लविपुलैकतारा नवविदिशां केतवः समुत्पन्नाः।
एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये"।

विदिशां दिगन्तराणाञ्च नव केतवः समुत्पन्नाः

विदिक्पुत्रा इत्यर्थः। किम्भूताः शुक्लाः श्वेतवर्णा विपुलो विस्तीर्णः एकतारो येषां ते विदिक्केतवो दृश्यन्ते दृष्टाश्च पापफलाः।

तथा च गर्गः।

"शुक्लैकतारा विपुला विदिक्पुत्रा नवग्रहाः।
विदिक्षु संस्थिता एव दृश्यन्ते भयदायकाः"॥

एवं केतुसहस्रमिति। एवं केतूनां सहस्रं उक्तं एषामेव विशेषलक्षणं वक्ष्ये। एषां मध्यात् केचित् दृश्यन्ते न सर्व्व एव। तत्र ये दृश्यन्ते तेषां लक्षणं वक्तुकामस्तत्रादावेव केतोर्लक्षणमाह॥*॥

"उद्गायतो महान् स्निग्धमूर्त्तिरपरोदयी वसा केतुः। सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते"॥ उद्गायत उत्तरस्यां दिशायतो दीर्घः महागतिस्थूलः निर्म्मलतनुः अपरोदयी पश्चिमायां दिशुदयं याति। स च नाम्ना वसाकेतुर्दृष्टः सद्य एव तस्मिन्नहनि मरणं करोति। उत्तममपि प्रधानं सुभिक्षञ्च करुते॥*॥

अथास्थिकेतोः ग्रस्ताख्यस्य च लक्षणमाह।

"तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः स्निग्धस्ताट्क् प्राचां ग्रस्ताख्यो डमरमरकाय"॥

तदित्यनेन वसाकेतोः परामर्शः। अस्थिकेतुस्तु तल्लक्षणैर्वसाकेतुसदृशैर्युक्तः। उद्गायत इत्यादि किन्त्वयं विशेषः स तु रूक्षः स्नेहरहितः दृष्ट्या क्षुद्भयावहः कथितः। स्निग्धस्ताट्गिति ताट्गवसाकेतुसदृशोऽन्यः स्निग्धो निर्म्मलदेहः प्राचां दृश्यते। स तु ग्रस्तनामा केतुर्दृष्टः डमरं ग्रस्तकलहं मरकञ्च करोति। तथा च पराशरः।

"एभिः षड्विंशतिरुदयैः फलमावेदयन्ति।
तन्नामतो रूपतः फलतः कालतोऽभिधास्यामः"॥

तत्र मार्त्तिवास्त्रय उदयं यान्ति। एकैकशो वसास्थिग्रस्तकेतुर्व्वा। तत्र वसाकेतुः स्निग्धो महानुदगायतग्रन्थिस्निग्धवर्णश्चतं प्रोह्य संज्ञवे युगे पश्चिमोदितः सद्यो मरकफलः सौभिक्षकरः रूक्षोऽस्थिकेतुः सौभिक्षकरस्तुल्यप्रवासकालफलः पूर्व्वेण स्निग्ध एव ग्रस्तकेतूराजविरोधमरकफलः समोदयः॥*॥

अथ कपालकेतोर्लक्षणमाह।

"दृष्टोऽमावास्यायां कपालकेतुः सधूमरश्मिशिखः। प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकाहिरोगकरः"॥

कपालकेतुर्नाम अमावस्यायां दृश्यते पूर्व्वदिशि उदयं याति। कीदृशः सधूमा रश्मिशिखा यस्य शिरश्छाया धूम्रवर्णैत्यर्थः। नभस आकाशस्य अर्द्धं यावद्विचरति। स च दुर्भिक्षमरकावर्षणरोगप्रदः।

तथा च पराशरः।

"अथादित्यजानां कपालकेतुरुदयते अमावास्यायां पूर्व्वस्यां दिशि सधूमार्चिश्शिखो नभसो विषयार्द्धचरो दृश्यते। पञ्चविंशवर्षशतं प्रोह्य चौत्र पश्चात् ऋतिर्यस्य कुमुदकेतोश्चारान्ते स दृष्ट एव। दुर्भिक्षानाहतिव्याधिभयं प्रत्युपन्नवान् भजति। यावतो दिवसान् दृश्यते तावन्मासान्मासैः संव-

त्सरान् पञ्चप्रस्थं वर्षाधान्यस्यार्घ्यं कृत्वा प्रजानामेकमुपयुङ्क्ते"॥

अथ रौद्रकेतोर्लक्षणमाह।

"प्रागवैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्चिः। नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः"॥

रौद्रनामा केतुः पूर्व्वस्यां दिशि वैश्वानरमार्गे दहनतीथ्यां दृश्यते। पूर्व्वाषाढोत्तराषाढ्योः समीप इत्यर्थः। कीदृशः शूलाग्रः शूलाकृतिरग्रं यस्य केतोः स शूलाग्रः त्रिशिख इत्यर्थः। तस्यैव विशेषणं श्यावरूक्षताम्रार्चिः श्यावरूक्षं ताम्रं चार्चिस्तेजो यस्य स श्यावरूक्षताम्रार्चिः। नभस आकाशस्य त्रिभागगमनशीलः। स च कपालकेतोः समफलः। एतदुक्तं भवति क्षुन्मरकाहिरोगकृत्। आचार्य्येण शुक्राचारे वैश्वानरमार्गः प्रदर्शित एव आषाढाद्वयं दहन इति।

तथा च पराशरः।

"अथ दक्षयज्ञे रुद्रक्रोधोद्भवः कालकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोह्य उदयते। पूर्व्वेण वैश्वानरमार्गे इत्यमृतमयस्य मणिकेतोश्चारान्ते श्यावरूक्षताम्रारुणां शूलाकारसदृशीं शिखां कृत्वा नभसस्त्रिभागचारी स ग्रस्तभयरोगदुर्भिक्षाहिमरकैर्यावन्मासान् दृश्यते तावदर्याणि त्रिभागशेषां प्रजां कृत्वा"॥ द्वादशधान्यस्याढकमर्घं कृत्वा चास्तं व्रजति।

तथा च रुद्रगर्गः।

"व्यष्ठमूलमनुराधा या वीथी संप्रकीर्त्तिता।
तास्र वीथीं समारुह्य केतुश्चेत् क्रीडते भृशम्॥
दक्षिणाभिमतां कृत्वा शिखां घोरां भयङ्कराम्।
शूलाग्रसदृशीं तीक्ष्णां श्यावताम्रारुणप्रभाम्॥
पूर्व्वेण उदितश्चैव नक्षत्राण्युपधूपयेत्।
घोरं प्रजासृत्वृच्छति फलं मासे चयोदशे॥
त्रिभागं नभसो गत्वा ततो गच्छत्यदर्शनम्।
यावतो दिवसांस्तिष्ठेत् तावदर्याणि तद्भयम्॥
ग्रस्ताग्निभयरोगैश्च दुर्भिक्षमरकैर्हताः।
घूर्णमानाः प्रजाः सर्व्वा विद्रवन्ति दिशो दश"॥*॥

अथ चलकेतोर्लक्षणमाह।

"अपरस्यां चलकेतुः शिखया याम्यायया कूलोच्छ्रितया। गच्छेत् यथोदक् तथा तया दैर्घ्यमायाति॥
सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव प्रतिनिवृत्तः स्यात्। नभसोऽर्द्धभागमित्वा याम्येनास्तं समुपयाति॥ हन्यात् प्रयागकूलात् यावदवन्तीञ्च पुष्कारारण्यम्। उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम्॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः। दश मासान् फलपाकोऽस्य कैश्चिदहादश प्रोक्तः"॥

अपरस्यामिति पश्चिमायां दिशि चलकेतुनामा केतुर्दृश्यते। स च कीदृशः याम्यायां दिशि अयं यस्याः तया अकूलप्रमाणोच्छ्रितया यथा येन प्रकारेण उदक् उत्तरस्यां दिशि याति तथा तेनैव प्रकारेण दैर्घ्यं दीर्घतां प्राप्नोति। सप्तमुनीन् वशिष्ठादीन् संस्पृश्य तथा ध्रुवं ध्रुवतारकं अभिजितञ्च नक्षत्रं संस्पृश्य ततः प्रतिनिवृत्तः प्रत्या-

गतः नभस आकाशस्य अर्द्धभागमित्वा गत्वा प्राच्य याम्येन दक्षिणस्यां दिशि अदर्शनं याति। स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं पुष्करारण्यनामस्थानं तावत् नाश्येत्। उदगपि चोत्तरस्यां दिश्यपि च यावत् देविकां नदीं तावद्धन्यात्। मध्यदेशाख्यं मध्यदेशं भूयिष्ठमतिशयेन हन्यात्। अन्यानपि च स देशानिति। स चलकेतुः अन्यान् अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित् नाशयति न सर्व्वत्र। अस्य केतोर्दर्शमासान् यावत् फलपाकः। अदर्शनात् त्रिपक्षात् परतो यावद्दश मासांस्तावदशुभं फलं ददाति। कैश्चिदन्यैर्गर्गादिभिरप्यादश मासान् यावत् फलपाकः प्रोक्तः। तथा च पराशरः।

"अथ पैतामहश्चलकेतु. पञ्चदशवर्षशतं प्रोथ्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा चलकेतुस्थाराने नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपस्त्य मनाक् ध्रुवं व्रजराशिं सप्तर्षीन् संस्पृश्य नभसोऽर्द्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति। स स्वर्गे दारुणकर्म्मा स्वर्गप्राप्तित्वादेव वक्रास्तमभिनिहन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवश्यं कुरुते। तेष्वपि च क्वचित् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्षिप्रात्यन्तादशमासानिति॥

तथा च गर्गः।

"क्षुच्छस्त्रमरकव्याधिभयैः संपीड़येत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"॥*॥

ततः श्वेतकेतोर्लक्षणमाह।

"प्रागर्द्धरात्रदृश्यो याम्यायः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥
स्निग्धौ सुमिक्षशिवदौ अथाधिकं दृश्यते कनामा यः।
दशवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतं॥
प्रागर्द्धरात्रदृश्य इति। श्वेतकेतुनामा केतुः प्राक् पूर्व्वस्यां दिशि अर्द्धरात्रकाले दृश्यते याम्यायो दक्षिणशिखः अन्यश्च द्वितीयः क इति कनामा केतुरपरे पश्चिमायां दिशि दृश्यते। युगाकृतिः युगसंस्थानाकारः तौ द्वावपि युगपत्तुल्यकालं सप्त दिवसान् दृश्येते। तौ च द्वावपि स्निग्धवर्णौ निर्म्मलौ दृश्यौ च सुमिक्षशिवदौ। अथ यः कनामा स यदि सप्तभ्योऽधिकं दृश्यते तदा शस्त्रप्रकोपजं संग्रामजमुपतापं जनयति।

तथा च पराशरः।

"अधोदालकः श्वेतकेतुर्दक्षोत्तरं वर्षशतं प्रोथ्य भटकेतोस्थाराने पूर्व्वस्यां दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यस्तेनैव सह द्वितीयः कः प्रजापतिपुत्रः। पश्चिमकेन ग्रहकेतुर्यूपसंस्थायीयुगपद्दृश्येत। ततस्तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीड़येते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्य्यात्। तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः"॥

अथ श्वेतस्य लक्षणमाह।

"श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतिः। विनिवर्त्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते"॥

श्वेतनामा केतुः जटाकारो जटासदृशः श्यावः कृष्णवर्णः वियत्त्रिभागं यावद्गच्छति ततोऽपसव्यं प्रदक्षिणं वामभागे निवर्त्तते तृतीयांशावशेषाः प्रजाः कुरुते।

तथा च पराशरः।

"अथ काश्यपः श्वेतकेतु पञ्चदशवर्षशतं प्रोथ्योग्रः सोमसहजस्य वपत्रकेतोस्थारान्ते श्यावरूक्षो नभसस्त्रिभागमाक्रम्यापसव्यं निवर्त्तयेद्धिं प्रदक्षिणजटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे आर्य्यगया नामदो नामोदीच्यैर्भूमिस्त्रिभागशेषां प्रजामवशेषयति"॥*॥

अथ रश्मिकेतोर्लक्षणमाह।

"आधूम्रयातिशिखया दर्शनमायाति कृत्तिकासंस्थः। ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते"॥

यः केतुराधूम्रवर्णया शिखयोपलक्षितस्तथा कृत्तिकासंस्थः कविकानां समीपे दर्शनं गच्छति स रश्मिकेतुः श्वेतकेतोः सदृशं फलं धत्ते।

तथा च पराशरः।

"अथ रश्मिकेतुर्व्विभावसुजः प्रोथ्यवर्षशतमावर्त्तकेतोः। उदितस्थारान्ते कृत्तिकासु धूम्रकेतुः"॥*॥

ध्रुवकेतोर्लक्षणमाह।

"ध्रुवकेतुरनियतगतिः प्रमाणाकृतिर्भवति। विश्वक् दिव्यान्तरीक्षभौमो भवत्ययं स्निग्ध इष्टफलः॥
सेनाकूलेषु नृपाणां ग्रहतरुशैलेषु चापि देशानाम्।
ग्रहिणामुपस्करेषु च विनाशिनां दर्शनं याति"॥

ध्रुवेति। अनियता अनिश्चिता गतिर्गमनं प्रमाणं स्थूलसूक्ष्ममध्यभावमाकृतिः आकारो यस्य स तथाभूतः। स च विश्वक् समन्ततो भवति सर्व्वासु दिक्षित्यर्थः। स च दिव्यान्तरीक्षभौमस्त्रिविधो भवति। क्वचिद्विविधो नानाकारो भवति। स च स्निग्धो निर्म्मलशरीर इष्टफलः। एष च एवं विधानां विनाशिनां मुमूर्षूणां दर्शनमुदयं याति। नृपाणां विनाशिनां सेनाकूलेषु सोपकरणेषु खलीनतोरणादिषु दर्शनं याति। देशानां विनाशिनां ग्रहदृक्षपर्व्वतेषु च दृश्यते। तथा ग्रहिणामुपस्करेषु उपस्करभाण्डेषु दर्व्वीस्रुपर्माद्यन्नादिषु ग्रहतरुशैलेषु विनाशिनामेव दर्शनं याति।

तथा च पराशरः।

"अथानियतदिक्काकरूपवर्णप्रमाणसंस्थानो धूमकेतुः परा भविष्यता देशानां राज्ञां जनपदानाञ्च कृच्छ्रपुरपर्व्वतवेश्मध्वजपताकाशस्त्रवर्म्मायुधावरणरथनागोष्ट्रपुरुषशयनासनभाण्डेषु च दृश्यते। स एव दिवि स्निग्धो विमलः प्रदक्षिणशिखो गजनागवीथीनामुत्तरेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दक्षेकविंशतिदिवसैष्ठिशत्तथा वा दर्शनमिच्छन्ति मुनयो धूमकेतोस्तस्य च प्रागुदयान्निमित्तान्यर्व्वाचीनचलनमग्नेः प्रभामत्स्यप्रधूपनं दिशां शीतोष्णविपर्य्यय इतिर्व्याहिबाऽसमवस्त्र"॥*॥

अथ कुमुदकेतोर्लक्षणमाह।

"कुमुद इति कुमुदकान्तिर्व्वारुण्यां प्राक्शिखो निशामेकाम्। दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति"॥ कुमुद इति श्वेतवर्ण इत्यर्थः। पश्चिमायां प्राक्शिखः पूर्व्वायो निशामेकां दृश्यते। किलेत्यागमसूचने। स च दृष्टो दश वर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः। "अथामृतजः कुमुदो मणिर्जलो भवः पद्मः आवर्त्तः सम्वर्त्तः शङ्खो हिमो रूक्षः कुक्षिः पलो विसर्पणः शीतश्चेति। तत्र कुमुदकेतुर्व्वसाकेतोस्चार्द्धसमानौ वारुण्यां दर्शनमुपैति। गोक्षीरविमलस्निग्धप्रभां पूर्व्वेणाभिगतां शिखां धृत्वैकरात्रिचरः स दृष्ट एव सुभिक्षमुत्पादयति दश वर्षाणि प्रजानामविरोधच्च। प्रतीच्यानाच्च मुखरोगारोचकप्रतिश्यायपाण्डुरोगज्वरैः प्रजानां बाधत इति"॥*॥

अथ मणिकेतोर्लक्षणमाह।

"सङ्घदेकयामदृश्यो सूक्ष्मतारः परिभ्रमति मणिकेतुः। ऋज्वी शिखास्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्। प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्"॥ सङ्घदिति। मणिकेतुः स च पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारकः सङ्घदेकवारमेकयामदृश्यः। यामशब्देन रात्रिचतुर्भागः। अस्य केतोर्ऋज्वी स्पष्टा शिखा चूड़ा श्वेतवर्णा दृश्यते। कीदृशी स्तनोत्था क्षीरधारेव स्तनात् निःसृता क्षीरधारा यथा दृश्यते तद्वत्तच्छिखा। उदयन्नेवेति। असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धानर्द्धानपञ्चमासान् सुभिक्षं क्षेममुत्पादयति। प्रायो बाहुल्येन क्षुद्रजन्तूनां मकुलादीनां प्रादुर्भावमुत्पत्तिं करोति।

तथा च पराशरः।

मणिकेतुरपि कपालकेतोरवसाने प्रतीच्यामुदयं याति। स तु सूक्ष्मतारकः श्वेतवर्णया क्षीरप्रसेकया पूर्व्वाभिनतया शिखया शूर्व्वर्य्यामेकयामदृश्यः। स उदयात् प्रभृति पञ्च मासान् क्षेमं सुभिक्षमुत्पादयति॥ क्षुद्रजन्तूनां प्रादुर्भावं करोत्यतिभात्रकालदृश्यः"॥*॥

अथ जलकेतोर्लक्षणमाह।

"जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया। नव मासान् सुभिक्षं करोति लोकशान्तिञ्च लोकस्य"॥ पश्चात् पश्चिमायां दिशि दृश्यते अपरेण पश्चिमेन चोन्नतया उच्चया शिखया युक्तः। स च दृष्टः नवमासपर्य्यन्तं सुभिक्षं करोति लोकमङ्गलकरश्च। तथा च पराशरः। "अथ जलकेतुः पैतामहः यस्य चलकेतोर्नवमासावशिष्टे कर्म्मणि कृते प्रवर्त्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतः। स च शिखी नवमासान्तात् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते।

अन्यग्रहक्षतानां चाशुभानां व्याघातायेति" ॥*॥

अथ भवकेतोर्लक्षणमाह।

"भवकेतुरेकरात्रं दृश्यः प्राक् सुसूक्ष्मतारकः स्निग्धः। हरिताङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया॥ यावदेव मुहूर्त्तान् दर्शनमायाति निर्दिशेन्मासान्। तावदतुलं सुभिक्षं रूक्षे प्राणान्तिकान् रोगान्" ॥ भवकेतुः पूर्व्वस्यां दिशि एकां निशां दृश्यः सूक्ष्मोऽल्पः तारको यस्य स्निग्धो निर्म्मलदेहः शिखयोपलक्षितः। कीटशया हरिः सिंहलाङ्गूलं पुच्छं तदुपमया तदाकारया प्रदक्षिणेनावर्त्तो यस्याः तथाभूतया स च यावत्संख्यान् क्षणान् दृश्यते तावन्मासान् समं सुभिक्षं निर्दिशेत् यदि स्निग्धः। रूक्षे तु पुनः प्राणान्तिकान् रोगान् वदेत्। तथा च पराशरः। "अथ जलकेतोः कर्म्मसमाप्तेः धूमादयः प्रीतार्त्ता अर्थो प्रादुर्भवन्ति। तत्र त्रयोदशचतुर्दशाष्टादशवर्षान्तात् दृश्यते। सुभिक्षा क्षेम्या विपर्य्यया विपरीताः क्षुद्रजन्तूनाञ्च वधाय तेषामष्टानां कर्म्मणस्तीते भवकेतुर्दृश्यते। पूर्व्वेणैकरात्रं यावत् कृत्तिकानामन्तरतो वा तत्प्रभागया स्निग्धपारुष्याभया सिंहलाङ्गूलसंस्थानया प्रदक्षिणतास्या शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय। रूक्षः प्राणहराणाञ्च रोगाणां प्रादुर्भावायेति" ॥ * ॥

अथ पद्मकेतोर्लक्षणमाह।

"अपरेण पद्मकेतुर्नागवीथौ भवेद्विशामेकाम्। सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि"॥

पद्मकेतुः पश्चिमायां दिशि रात्रिमेकां दृश्यते कीदृशः मध्याह्नात् गौरः श्वेत इत्यर्थः। दृष्टः सप्तवर्षाणि अतिहर्षयुक्तानि सुभिक्षं करोति। तथा च पराशरः।

"सप्तवर्षाण्यतुलितं हर्षमावहति जगतः" ॥*॥

अथावर्त्तकेतोर्लक्षणमाह।

"आवर्त्त इति निशार्द्धेऽसव्यशिखोऽग्निभोऽपरे स्निग्धः। यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः"। निशार्द्धे पश्चिमायां दिशि दक्षिणदिगाश्रितशिखः स्निग्धो निर्म्मलमूर्त्तिर्दृश्यते स तु यावत्संख्यान् मुहूर्त्तान् दृश्यते तावदेव मासान् सुभिक्षं करोति।

तथा च पराशरः।

"अथावर्त्तकेतुः श्वेतकेतोः कर्म्मणस्तीतेऽपरेऽर्द्धरात्रेऽसव्योदितादक्षाभया प्रदक्षिणेन ताम्रया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् अतीव सुभिक्षं नित्यमुत्सवं जगत्" ॥*॥

अथ सम्वर्त्तकेतोर्लक्षणमाह।

"यस्यात् सन्ध्याकाले सन्ध्यो नाम धूम्रताम्रशिखः। नभस्थिभागमाक्रम्य समूलायस्थितो रौद्रः"॥

यावत एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति तावन्ति। भूपांश्च शस्त्रनिपातैरदयं चापि पीड्यति" ॥ पश्चादिति। पश्चिमायां दिशि यावतो मुहूर्त्तान् दृश्यस्तावन्ति तत्संख्यानि वर्षाणि नाशयति तथा नृपान् संग्रामैर्हन्ति। तथोदयं यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीड्यति। तथा च पराशरः। अथ सम्वर्त्तको वर्षसहस्रमष्टोत्तरं प्रोह्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररूपां शूलाभां धूमं विमुञ्चन्तीं दारुणां शिखां कृत्वा नभस्थिभागमाक्रम्य यावन्मुहूर्त्तान् निशि तिष्ठति तावदर्थानि हन्ति परस्परं शस्त्रौघमपि पार्थिवाः। यानि नक्षत्राणि समाश्रयति यत्र वोदेति तानि दाहमतरं पीड्यति तदाश्रितांश्च देशानिति"।

तथा च गर्गः।

"येषां नक्षत्रविषये रूक्षः स ज्वालोहितः। दृश्यते वज्रमूर्त्तिश्च तेषां विद्यात् महाभयम्॥ अवर्षशस्त्रपारुष्यकोपं दुर्भिक्षमेव च। कुर्य्यान्नृपतिपीड़ाञ्च सचक्रपरचक्रतः॥ यत्र तिष्ठति नक्षत्रे प्रवासं यत्र गच्छति। धूमपेदा स्पृशेदापि हन्याद्देशांस्तथाश्रयान्॥ यस्याभिषेकनक्षत्रं जन्मभं कर्म्मभं तथा। देशर्क्षं पीड़येदापि स शान्तिपरमो भवेत्॥ स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा। दृश्यते येषु देशेषु शिवं तेषु विनिर्दिशेत्॥ अथ शुभान् केतून् वर्ज्यित्वाशुभानां नक्षत्रस्पर्शनाधूपनादुत्फलं वक्ष्यामीत्याह।

"ये शस्त्रास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे। नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्"।

ये केतवः शस्त्राः प्रशस्तफलाख्यान् त्वक्षान्यैः केतुभिः नक्षत्रे धूपिते अथवा स्पृष्टे येषां नृपाणां वधो मरणं भवति तान् नृपान् कथयिष्ये तांश्चाधुनाह। "अश्विन्यामभकर्षं भरणीषु किरातमार्थिवं हन्यात्। बज्रलासु कलिङ्गेशं रोहिण्यां शूरसेनापतिम्"॥ अश्विन्यामभिधूपितायां स्पृष्टायां वा केतुना अभकानां जनानामधिपतिं नाशयेत् एवं सर्व्वत्र। अन्येभ्याह। "उशीनरमपि भाग्ये उज्जयनीपमार्थमेत्रे। सावित्रे दण्डकाधिपतिं भौजङ्गे असिकेशम्। मघायां अङ्गाधिपं पूर्व्वफल्गुन्यां पाण्डुनाथम्" ॥ भाग्ये पूर्व्वफल्गुन्यां उशीनरम्। आर्य्यमे उत्तरफल्गुन्यां उज्जयनीपतिम्। सावित्रे हस्तायां दण्डकारण्यनाथम्। भौजङ्गे अश्लेषायां असिका जनास्तेषामीशम्।

अन्येभ्याह।

"चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्। वाचा काश्मीरकाम्बोजौ नृपती ग्रामक्षने नस्तः"॥

चित्रासु केतुनाभिधूपितासु स्पृष्टासु च कुरुक्षेत्राधिपस्य मरणं वधं केतूपघातजः समादिशेत्। ग्रामक्षने स्वात्यां काश्मीरकाम्बोजाधिपौ न स्तः न भवतः। अन्येभ्याह। "इक्ष्वाकुजनकनाथश्च हन्यते यदि भवेद्विशाखासु। मैत्रे पुरुषाधिपतिं ज्येष्ठासु च सार्व्वभौमकान्यकुब्जाधिपवधः" ॥ विशाखासु यदि केतूपघातो भवेत् तदा इक्ष्वाकुनाथोऽयोध्याधिपश्च हन्यते। इक्ष्वाकवो जनाः। अलका नगरी। अनुराधायां पुरुषाधिपतिं हन्यात्। ज्येष्ठासु च सार्व्वभौमस्य राज्ञो वधः कान्यकुब्जाधिपस्य च वधः। अन्येभ्याह। "मूले नृपमदकपती जलदेवे काग्निपो मरणमेति। यौधेयकार्ज्जुनायनाग्निविवैश्यान् वैश्वदेवे च" ॥ मूले केतुनाभिधूपिते स्पृष्टे वा नृपतिं मद्रकपतिं च हन्ति। जलदेवे पूर्व्वाषाढायां काग्निपतिर्म्मरणमेति। वैश्वदेवे उत्तराषाढायां यौधेयकः आर्ज्जुनायनः अग्निविः वैश्यः एतान्नृपतीन् हन्ति। अथान्येभ्याह। "हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वङ्गपम्। नैमिषदयं किरातपं श्रवणादिषु षट्सु षड्भिमान् क्रमशः"। षट्सु श्रवणादिषु हतेषु षड्भिमान्नृपान् क्रमशः क्रमेण हन्यात्। तद्यथा।

श्रवणे हते कैकयनाथम्। धनिष्ठायां पाञ्चनदाधिपतिम्। शतभिषायां सिंहलाधिपतिम्। प्राग्भाद्रपदायां वङ्गाधिपतिम्। उत्तरासु नैमिषदयम्। रेवत्यां किराताधिपं हन्यात्॥ * ॥

अथ केतोर्विशेषमाह।

"उल्काभिताडितशिखः शिखी शिवः शिवतरोऽभिदृष्टः। अशुभः स एव चोलवङ्गसिंहलद्रुहीनानाम्"॥ यः शिखी केतुः उल्काभिधुस्तेन ताड़िता हता शिखा चूड़ा यस्य स शिवः श्रेयस्करः योऽभिदृष्ट उदितमात्र एव दृष्टः स शिवतरः अतिशयेन शुभप्रदः केतुरेवं विधश्चोलानां वङ्गानां सिंहलानां द्रुहानां चाशुभः। चोलाद्याः सर्व्व एव जनाः ॥ * ॥

अन्यद्विशेषमाह।

"नम्रा यतः शिखिशिखाभिहता यतो वा-
यर्क्षं च संस्पृशति तत्कथितांश्च देशान्।
दिव्यप्रभावनिहतान् स यथा गरुत्मान्
भुङ्क्ते गतो नरपतिः परभोगिभोगान्"॥

यतो यस्यां दिशि शिखिनः शिखा केतुशिखा नम्रा वक्रा तत्र ये देशा यस्यां वा गन्तुं प्रवृत्ता अथ यदि ऋक्षं नक्षत्रं संस्पृशति तत्कथितांश्च देशान् यस्यां दिशि शिखा नम्रा तत्र च ये देशा वक्ष्यमाणास्तांस्तत्कथितान् नरपतौ राजा गतो भुङ्क्ते स्वीकरोति। कीदृशान् दिव्येनाप्रतिहतेन प्रभावेण पराक्रमेण निहतान् निर्जितान् कीदृशान् परैरन्यैर्भोगिभिर्भुज्यन्ते भोगा यानास्तान् कथं स राजा भुङ्क्ते यथा गरुत्मान् गरुड़ः दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते परा उत्कृष्टा ये भोगिनः सर्पास्तेषां भोगाः शरीराण्यङ्गानि च तान् यथा येन प्रकारेण तथा।

तथा च पराशरः।

"यस्यां दिशि समुत्तिष्ठेत् तां दिशं नाभियोजयेत्।
यतः शिखा यतो धूमस्ततो यायान्नराधिपः॥
प्रतिलोमो यतः केतुर्यया ध्यायति पार्थिवः।
सामान्यवाहनबलस्तन्नाशमधिगच्छति"॥

इति भट्टोत्पलविरचितायां संहिताकृतौ केतुचाराध्यायः॥ * ॥

अन्यच्च।

"अनभ्रावग्निरूपं वा ध्वजशस्त्रदृहोपमम्।
तुरङ्गगजवृक्षादिनारूपाणि केतवः॥
शतमेकोत्तरं ज्ञेयं सहस्रमपरे विदुः।

नानारूपमनेकस्थाप्येकमेवाह नारदः ।
दिव्या नक्षत्रगा भौमाः केतवस्त्रिविधा मताः ।
शुक्लो रूक्षतनुः स्निग्ध ऋजुस्थाचिरसंस्थितः ।
उदितोऽप्यतिदृष्टिः स्यात् सुभिक्षसुखदृष्टिखी ।
विपरीतस्वरूपस्तु धूमकेतुर्न शोभनः ।
इन्द्रायुधानुकारी च द्विचूडो वा त्रिचूडकः ।
श्वेतः शस्याकुलं कुर्य्यात्लोहितस्त्वग्निजं भयम्॥
त्रुट्यं पीतकः कुर्य्यात् क्षयो रोगमथोल्वणम् ।
शस्त्राकारो विनाशाय सुखाय मुखलाङ्गुलिः ॥
दीर्घः सूक्ष्मः सुखायैव रूक्षः स्थूलो विनाशयेत् ।
मञ्जिवर्णसवर्णाभ्यां किरणाभ्यां शिखान्वितः ॥
प्राक् पश्चिमदिशोदृश्या नृपयुद्धाय तेऽर्कजाः ।
वह्निजाः शुक्लवर्णास्त्र लाक्षाबन्धूकसन्निभाः॥
आग्नेय्यां दिशि दृश्यन्ते ते च वह्निभयप्रदाः ।
क्षणा वह्निशिखा रूक्षा भृगुजाः पञ्चविंशतिः ॥
याम्यायां ते च दृश्यन्ते नृणां मरकसूचकाः ।
आदर्शकृत्ताकृतयो विग्निखाः क्षितिसम्भवाः ॥
सांग्रवस्तैलतोयाभा ऐशान्यां त्रुट्यप्रदाः ।
चन्द्रजा हिमकुन्देन्दुकुमुदाभास्त्र तैलवत् ।
जलाभास्त्रोत्तरे दृश्याः केतवस्ते सुभिक्षदाः ।
त्रिवर्णस्त्रिशिखश्चैको ब्रह्मणोऽसौ युगान्तकृत् ।
स चानियतदिक्संस्थो ब्रह्मदण्डः स उच्यते ।
अर्कजा वह्निजा याम्यास्तस्त्वसङ्ख्या (२५)।
क्षितिजा जातिसङ्ख्यास्त्र(२२) त्रयोऽन्ये ब्रह्मणोऽप्ययं।
एकोत्तरशतं ह्येते सहस्रस्यैव नक्षत्रैः ।
शुक्लाश्चतुरशीत्याख्या विपुलाः सिततारकाः ।
स्निग्धास्तीव्रप्रभा ज्ञेयाः सप्रभा दिग्शिखाः परे ॥
षष्टिः ग्रनितनूद्भूतास्तेऽतिनक्षत्रजप्रदाः ।
सर्व्वत्र कनकोद्भासा विकचा नाम जीवजाः ॥
शितैकतारा विग्निखाः पापा याम्याश्रितास्तु ते ।
नातिस्थूलाः सूक्ष्मदीर्घाः शुक्ला बुधसमुद्भवाः ॥
पापदास्तस्कराख्यास्ते यथेष्टदिक्प्रभान्विताः ।
त्रिचूडतारा क्षतजा नानारूपाः कुजात्मजाः ॥
कौङ्कुमाख्या हि ते सौम्य दिक्ख्याः पापफलप्रदाः।
त्रिशिखास्त्र सितारास्त्र रक्तलोहितरश्मयः ॥
लोहिताङ्गात्मजाः षष्टिः संग्रामभयकारकाः ।
तामसाः कीलकाख्यास्त्र राज्ञाः सूर्य्यविमर्गजाः ।
दृष्टाः शुभफलास्ते च चन्द्रस्थाः पापदायिनः ।
कबन्धधूम्रसङ्काशास्त्रन्द्रकेऽप्यशुभप्रदाः ॥
कृष्णाभाः कृष्णपर्य्यन्ताः संकुलाः कृष्णरश्मयः ।
राहुपुत्रास्त्रयस्त्रिंशत् केतवस्त्वादिदारुणाः ॥
यत्रार्कबिम्बे दृश्यन्ते व्यसनन्तन्महीपतेः ।
सचक्रं परचक्रेण पीड्यते क्षुद्भयान्वितम् ।
अनोधनुःक्षेत्ररूपा नृपविप्लवदायकाः ।
धूम्रो वा कृष्णधूम्र्वा कबन्धो वार्कमण्डले ।
दृश्यते यत्र तत्रापि भूमिपालो विनश्यति ।
दण्डकीलकपीठास्त्र दृश्यते सूर्य्यमण्डले ।
दुर्भिक्षेतिभयव्याधिवह्निचौरादिपीड़नम् ।
भृत्यालान् गर्दभानश्वान् यांस्यान्यान् मृगपक्षिणः॥
आदित्यमण्डले दृष्ट्वा देशभङ्गं विनिर्दिशेत् ।
मण्डलाभ्यन्तरस्थैश्च क्रव्यादैर्मृगपक्षिभिः॥
परचक्रागमो वाऽपि प्रजानाशस्तथैव च ।

यत्रार्कबिम्बस्य स्यादाकाशन्यच्च प्रजाक्षयः ।
एको दुर्भिक्षदात्यन्तपनाशभयप्रदः ॥
सितरक्तहरित्कृष्णैर्व्विद्धो दिनन्दपादिहा ।
वह्निजा विश्वरूपाख्या ज्वालामालाकुलाः शतम् ॥
श्यामारुणा वितारास्त्र विकीर्य्यामरसन्निभाः ।
तारापुञ्जनिभा रूक्षा वायुजाः सप्तसप्ततिः ॥
ब्रह्मजाश्चतुरस्रास्ते वेदाधिकशतद्वयम् ।
अत्रिंशद्वंशगुल्माभाः कङ्काख्या वरुणोद्भवाः।
प्रभाख्याः शशिवत्ते च ज्ञेयास्त्रीण्युडफलप्रदाः ।
विरूपतारास्त्रिन्ना वा शिखिनस्तेऽशुभप्रदाः ॥
सर्व्वदिक्प्रभवाः शुक्लाः केतवो भयदायिनः ।
एवं केतुसहस्रस्य तद्विशेषस्य वक्ष्यते" ॥ * ॥
"उत्तरायतसुस्निग्धो महान् यस्यापरोदयी ।
करोति मरकं सद्यः सुभिक्षस्य तथोत्तमम् ॥
रूक्षोऽस्निकेतुः क्षुद्भीत्यै प्राच्यां स्निग्धोऽप्युपप्लवः ।
कपालकेतुर्य्यो दर्शे सधूमांशुशिखो भवेत् ।
प्रागर्द्धचारी नभसः क्षुन्मारदृष्टिकारकः ।
प्रागग्निमार्गाच्छ्वेताद्यो रूक्षः श्यामलताम्रवक् ।
त्रिभागचारी नभसो रौद्राख्यः पूर्व्ववत् फलम् ।
अपरस्यां चलकेतुः शिखया दक्षिणायया ॥
अङ्गुलोच्छ्रयया गच्छेदुत्तरायां यथा यथा ।
तथा दैर्घ्यं समायाति मुनीन् संस्पृश्य सप्त च ।
ध्रुवं प्रतिनिवृत्तोऽभिमितश्च नभसोऽर्द्धकम् ।
गत्वाऽस्तं याति याम्येन स प्रयागकुलावधि ।
अवन्तीं पुष्करारण्यं यावद्गन्यात्तथापरान् ।
देशान् क्वचित् क्वचिद्रोगदुर्भिक्षैः परिपीड़ितान् ॥
श्वेताख्यस्तु जटाकारो श्यामो व्योमत्रिभागगः ।
निवर्त्ततेऽपसव्येन त्रिभागी कुरुते प्रजाः ।
आधूम्रशिखया दृश्यः क्षत्तिकासंस्थितोऽपरः ।
रश्मिकेतुरिति ख्यातस्त्रिभागी कुरुते प्रजाः ॥
पश्चात् सन्ध्यासु सम्वर्त्तो धूमताम्रशिखो वियत् ।
त्र्यंशमाक्रम्य सूनाग्रावस्थितो रौद्रदर्शनः ।
मुहूर्त्तान् यावतो दृश्यस्तावद्वर्षाणि हन्ति सः ।
भूमग्रस्तनिपाताद्यैरुदयर्क्षं निपीड़येत्" ॥ * ॥
"चैत्रवैशाखयोर्म्मध्ये कौबेरांस्तु विनिर्दिशेत् ।
उच्छ्रितैर्यूपवेदीभिरुच्छ्रितैर्ध्वजतोरणैः ॥
हविर्धूमाकुला तत्र दृश्यते च वसुन्धरा ।
ज्यैष्ठे चैव तथाषाढे वायुपुत्रांस्त्र निर्दिशेत् ॥
वान्ति चैव तथा वाता महाभयं महाभयम् ।
श्रावणप्रौष्ठपदयोर्व्वारुणांस्तु विनिर्दिशेत् ॥
आरोहयन्ति ते मेघान् पूर्णां कुर्य्युर्व्वसुन्धराम् ।
धान्यं समार्घ्यतां याति ईतयो न भवन्ति च ॥
आश्विने कार्त्तिके चैव सूर्य्यपुत्रान् विनिर्दिशेत् ।
ततो दहति तीव्रांशुः सर्व्वाङ्गानि दिवाकरः ॥
म्रियन्ते च तदा गावः श्वापदाश्च विशेषतः ।
मार्गशीर्षे च पौषे च वह्निपुत्रान् विनिर्दिशेत् ॥
क्षीत्रं भवति दुर्भिक्षं हाहाभूतमचेतनम् ।
माघे च फाल्गुने चैव यमपुत्रान् विनिर्दिशेत् ।
कृर्द्दिर्ज्वरातिसारस्त्र ग्लानिश्वेवाक्षिवेदना ॥ * ॥
कृत्तिका रोहिणी सौम्यं पृथिव्या मध्यमुच्यते ।
केतवो ह्यत्र दृश्यन्ते आग्नेया दश पञ्च च ।
आग्नेयेषु च दृष्टेषु लोकानां संक्षयो भवेत् ॥

नित्योद्विग्नाः प्रजाः सर्व्वा भवन्ति हि न संशयः ।
पुनर्व्वसुस्तथा पुष्यः पृथिव्याः पूर्व्वमुच्यते ।
केतवो ह्यत्र दृश्यन्ते रौद्रास्तेऽप्येकविंशतिः ।
यदा रौद्राः प्रदृश्यन्ते दुर्भिक्षं निर्दिशेत्तदा ।
घूर्णन्ते च प्रजाः सर्व्वा मृत्युक्षुद्रोगपीड़िताः ।
आश्लेषापित्र्यभाग्यानि विद्याद्वह्निभयपूर्व्वतः ॥
केतवो ह्यत्र दृश्यन्ते चौद्दालकिसुता दश ।
सुभिक्षं क्षेममारोग्यं सुवृष्टिः शस्यसम्पदः ॥
आर्य्यम्णादीनि च त्रीणि विद्याद्वह्निभयागतः ।
केतवो ह्यत्र दृश्यन्ते काश्यपेयास्त्रयोदश ।
अनावृष्टिमयं घोरं प्रजानामतिदारुणम् ।
स्वाती विशाखा मित्रश्च भागो दक्षिणपश्चिमः ।
केतवो ह्यत्र दृश्यन्ते चत्वारो मृत्युसम्भवाः ।
दुर्भिक्षं मरकं घोरमनावृष्टिस्तथैव च ।
उपद्रवश्च भूतानां तदा भवति दारुणः ।
ज्येष्ठा मूलमषाढा भाग उत्तरपश्चिमः ।
केतवो ह्यत्र दृश्यन्ते चयस्ते सोमसम्भवाः ।
सुभिक्षश्च सुवृष्टिश्च मही यज्ञोत्सवाकुला ।
उत्तरा श्रवणा चैव नक्षत्रं वसुदैवतम् ।
केतवो ह्यत्र दृश्यन्ते माहेयाः पञ्चविंशतिः ।
माहेयेषु च दृष्टेषु लोकानां संक्षयो ध्रुवम् ।
तदा राजसहस्राणां मही पिबति शोणितम् ।
वारुणश्चैव नक्षत्रं तथा भाद्रपदद्वयम् ।
केतवो ह्यत्र दृश्यन्ते वारुणास्त्रय एव ते" ॥ * ॥
"ऊर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः ।
ऊर्म्मिकेतुर्यदा दृश्येत्तदाप्युदकजं भयम् ॥
श्वेतकेतुर्यदा दृश्येत् श्वेतास्थि कुरुते महीम् ।
तदा मानुषमांसानि भक्षयन्तीह मानुषाः ।
क्षुद्भयार्त्तं जगत् कृत्स्नं चक्रवद्भ्रमते तदा ।
धूमकेतुर्यदा दृश्येत्तस्य वक्ष्यामि लक्षणम् ।
स हन्ति शिखया योधान् राजानं मन्त्रिणं जनान् ।
रेवत्याश्वयुजश्चैव नक्षत्रं यमदैवतम् ॥
केतवो ह्यत्र दृश्यन्ते यमपुत्रास्त्रयोदश ।
यमपुत्रेषु दृष्टेषु लोकानां संक्षयो ध्रुवम् ।
चतुर्व्विधानां भूतानां संग्रयो जायते महान्" ॥*॥
"अपरे विविधाः यन्ति दृश्यस्तत्रादिकेतवः ॥
नृपदेशविनाशाय दुर्भिक्षभयदायकाः ।
कुमुदाभस्तु कुमुदो वारुण्यां प्राक्शिखो निशाम् ॥
एकां दृष्टः सुभिक्षाय दशवर्षाणि सौख्यदः ।
पश्चिमाभ्युदितास्त्रान्ये कुर्व्वन्ति प्रबलान् ज्वरान् ।
पाण्डुरोगं प्रतिश्यायं मुखरोगमरोचकम् ।
क्षीरधारेव शुक्लाभा ऋज्वी सूक्ष्मतरा शिखा ॥
सप्तदश्यामेकदृश्याश्चे चतुर्म्मासं सुभिक्षदाः ।
जलकेतुस्तु यः पश्चात् शिखया नतया परे ।
सुभिक्षं कुरुते शान्तिं प्रजानां नवमासतः ।
भवकेतुस्त्वेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः ।
दक्षिणावर्त्तशिखया हरिताभूतुल्यया ।
मुहूर्त्तान् यावतो दृश्यस्तावन्मासान् सुभिक्षदः ॥
स एव रूक्षो दृश्यश्चेद्रोगप्राणान्तकारणम् ।
यज्ञकेतुर्म्मणालाभो निशामेकां प्रदृश्यते ।
सप्त मासान् सुभिक्षं स हर्षवर्षभदायकः ।
आवर्त्तः सव्यशिखयारुणाभश्च निशार्द्धगः ।

स्निग्धो यावत्तृणान् दृश्यस्तावन्मासान् सुभिक्षदः।
ध्रुवकेतुस्त्वनियतगतिवर्णाकृतिर्भ्रंशः ॥
दिव्यान्तरीक्षभौमोऽयं स्निग्ध इष्टः स नान्यथा।
सेनाक्षेषु महीन्द्राणां देशस्य गिरिशाखिषु ॥
उपस्करेषु गृहिणां दृश्यते च विनाग्रहात्।
हन्यादुल्का यदाग्रस्यं केतुर्व्याप्युपधूपयेत् ॥
दुर्भिक्षं मरकञ्चैव तदा जगति जायते।
यदा तु मार्गवं प्राप्य धूमकेतुः प्रधूपयेत् ॥
तदा सैन्यानि वध्यन्ते यत्नोद्युक्ता नराधिपाः।
यात्रागतास्च ये सार्था असमन्तश्च ये जनाः ॥
तथा चारग्रहाः सर्व्वे भयमृच्छन्ति दारुणम्।
यदा प्रधूपयेत् केतुः सप्तर्षीन् ध्रुवमेव च ॥
तदा लोकाः क्षयं यान्ति सलिलाश्चापि शुष्यति।
धूमकेतुर्यदा राज्ञो दृश्यते विषये क्वचित् ॥
सराष्ट्रः सपुरो राजा क्षिप्रमेव प्रणश्यति।
यावन्त्यहानि दृश्यन्ते तावन्मासान् फलप्रदाः ॥
मासैरब्दान् विजानीयात् प्रथमे तु त्रिपक्षतः"॥*॥
"केतूत्पाते तु सर्व्वस्मिन् सभये समुपस्थिते ॥
महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम्।
धनं वा सर्व्वमुत्सृज्य मृत्योर्मुच्येत बन्धनात् ॥
दद्याद्वा पृथिवीं सर्व्वां राजा शान्तिं लिप्सति।
अकस्माद्दृश्यते केतुरुदयेऽस्तमयेऽपि वा ॥
निहन्त्यन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत्।
दधिमधुघृताक्तानां पुण्याहामयुतं ततः ॥
शुक्लयादिन्द्रनीलस्य केतुं दद्याद्विशान्तये।
भूमिसूनं हेमरत्नाद्यैस्ततः सम्पूज्यते शुभम्" ॥
इति मथुरानाथविद्याभूषणभट्टाचार्य्यसङ्कलिते केतूत्पातोः समाप्तः॥ केतुगणः कुशद्वीपगतः जैमिनिमुनेः सन्तानः षड्भुजः धूम्रवर्णः मेषवाहनः सूक्ष्मवर्णः विकृताननः सूर्य्याभिमुखः रुद्रः धूम्रवसनः वरदः गदाधरश्च। तस्याधिदेवता चित्रगुप्तः प्रत्यधिदेवता ब्रह्मा। इति ग्रहयागतत्त्वम्॥ अस्य स्वरूपं ग्रन्थिराजवत्। स च शिखावान् अनेकरूपः। इति जातकम् ॥ * ॥
रोगः। पताका। (यथा, रघौ ७। ६५।
"सप्तोत्तिलैस्तेन शिखीमुखाग्नै-
र्निश्चेपिताः केतुषु पार्थिवानाम्" ॥)
उत्पातः। (यथा, मनुः १। ३८।
"उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च" ॥)
चिह्नम्। इति मेदिनी। (यथा, रघुः २। ३३।
"तमार्य्यस्त्रं निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन् विस्मितमात्मतन्त्रो
सिंहोरुसत्त्वं निजगाद सिंहः" ॥)
दीप्तिः। इति हेमचन्द्रः॥ (सूर्य्यः। यथा, ऋग्वेदे १०। ८। १। "प्रकेतुना बृहता यात्यग्निः"। तत्रैव। ३। ३४। ४ "प्रारोचयन् मनवे केतुमह्नाम्"। रश्मिः। यथा, ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्" ॥)
केतुमः, पुं, (केतुरिव भातीति। भा + कः।) मेघः। इति शब्दमाला॥
केतुमालं, क्ली, जम्बुद्वीपस्य नवखण्डान्तर्गतखण्डविशेषः। इति त्रिकाण्डशेषः॥ (क्वचित् पुंलिङ्गोऽपि दृश्यते। यथा, महाभारते ६। ६। ३२।
"मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीयते!।
जम्बुखण्डे च तत्रैव महाजनपदो नृप"॥
आग्नीध्रराजपुत्रः स्वायम्भुवमनोः प्रपौत्रश्च। यथा, भागवते ५। २। २०।
"तस्यामुह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्"॥
स्त्री, नदी। यथा, महाभारते। ३। ८६। १४।
"ततः पुण्यतमा राजन्! सततं तापसैर्युता।
केतुमाला च मेध्या च गङ्गाद्वारञ्च भूमिप!"॥)
केतुरत्नं, क्ली, (केतोः रत्नं केतुभिः रश्मिभिः युक्तं वा रत्नम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥
केदरः, पुं, (के मस्तके दृणाति। दृ + अच्। केन दीर्य्यते वा। दृ + अप् कर्म्मणि।) वृत्तविशेषः। इति लिङ्गादिसंग्रहे अमरः। टेरके त्रि। इति शब्दरत्नावली॥
केदारः, पुं, (के जले दारः आदरो यस्य। यद्वा केन जलेन क्रियते आह्रियते इति। निपातनात् रत्वम्।) क्षेत्रम्। क्षेत् इति भाषा। इत्यमरः। २। ९। ११॥ (यथा, मनौ ९। ३८।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः"॥
क्षेत्रस्यक्षुद्रजलाधारविशेषः। यथा, रामायणे ३। २२। १८।
"हंसः पिबति केदारे विश्वासाकुलितं पयः"॥)
केदारजलगुल्माः। मधुरत्वम्। विपाके गुरुत्वम्। दोषघ्नत्वम्। "तदेव बद्धमुक्तन्तु विशेषाद्दोषदं भवेत्"। इति राजनिर्घण्टः॥ (के मस्तके गिरिवर देशे दारः प्रश्रवणादिकारणरूपविदीर्णस्थानं अस्य।) पर्व्वतविशेषः। (के मस्तके गिरःस्थितजटाभ्यन्तरे गङ्गारूपिणी दाराः पत्नी यस्य सर्व्वत्र निपातनात् रत्वम्।) शिवः। भूमिभेदः। आलवालम्। इति मेदिनी॥ (भूमध्यस्थानविशेषः। यथा, हठयोगदीपिकायाम्। ३। २४।
"कालपाशमहाबन्धविमोचनविचक्षणाः।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः"॥
"केदारभ्रुवोर्मध्ये शिवस्थानं केदारशब्दवाच्यं तं मनः खान्तं प्रापयेत्"। इति तट्टीका॥ तीर्थविशेषः। यथा, महाभारते। ३। ८३। ६६।
"केदारे चैव राजेन्द्र! कपिलस्य महात्मनः।
ब्रह्मलोकमधिगत्य च सुचिः प्रयतमानसः।
सर्व्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते" ॥ * ॥
केदारपर्व्वतस्थलिङ्गभेदः। स तु लिङ्गमूर्त्या काश्यामाविर्भावात् तन्नाम्ना एवाख्यातः तद्विवरणं यथा, काशीखण्डे। ७७ अध्याये।
श्रीपार्व्वत्युवाच।
"नमस्ते देवदेवेश! प्रणतार्त्तिनिधे!।
वद केदारमाहात्म्यं भक्तानामनुकम्पया॥
तस्मिन् लिङ्गे सदा प्रीतिस्तव काश्यामनुत्तमा।
तद्भक्ताश्च जगा नित्यं देवदेव! महाधियः॥

केदारः
श्रीदेवदेव उवाच।
शृणुष्वपर्णेऽभिधास्यामि केदारेश्वरसंकथाम्।
समाकर्णयितां यां पापोऽप्यपापो जायते क्षणात्॥
केदारं यातुकामस्य पुंसो निश्चितचेतसः।
आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति॥
मृद्दादिनिर्म्मिते पुंसि केदारगतिनिश्चिते।
जन्मद्वयार्ज्जितं पापं शरीरादपि निर्व्रजेत्॥
मध्येमार्गं प्रपन्नस्य त्रिजन्मार्जितं त्वघम्।
देहगेहादिनिःसृत्य निराशं याति निश्चितम्॥
सायं केदार केदार केदारेति त्रिरुच्चरन्।
गेहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात्॥
दृष्ट्वा केदारशिखरं पीत्वा तत्पयसस्तु च।
जन्मजन्मकृतात्पापात् मुच्यते नात्र संशयः॥
हरपापक्षदे स्नात्वा केदारेशं प्रपूज्य च।
कोटिजन्मार्ज्जितैर्नोभिर्मुच्यते नात्र संशयः॥
सङ्कल्पयन्य केदारं हरपापक्षतोदकः।
स्थाप्य लिङ्गं हृदम्भोजे प्रान्ते मोक्षं गमिष्यति॥
हरपापक्षदे श्राद्धं श्रद्धया यः करिष्यति।
उद्धृत्य सप्त पुरुषान् स मे लोकं गमिष्यति॥
पुरा रथन्तरे कल्पे यदभूत्तच्च तत् शृणु।
अपर्णे दत्तकर्त्रा तं वर्णयामि तवाग्रतः॥
एको ब्राह्मणदायाद उज्जयिन्या इहागतः।
कृतोपनयनः पित्रा ब्रह्मचर्य्यव्रते स्थितः॥
स्थण्डिलं पाशुपतीं काशीं स विलोक्य समन्ततः।
द्विजैः पाशुपतैः कीर्णां जटामुकुटमण्डितैः॥
कृतलिङ्गसमर्च्चैश्च भूतिभूषितवर्ष्मभिः।
भिक्षाहृतान्नसन्तुष्टैः पुण्यैर्गङ्गोदकाप्लुतैः॥
बभूवानन्दितमना व्रतं जग्राह चोत्तमम्।
हिरण्यगर्भादाचार्य्यान्महत्पाशुपताभिधम्॥
स च शिष्यो वशिष्ठोऽभूत् सर्व्वपाशुपतोत्तमः
स्नात्वा ह्रदे हरपापे नित्यं प्रातः समुत्थितः॥
विभूत्याहरहः स्नाति त्रिकालं लिङ्गमर्चयन्।
नान्तरं स विजानाति शिवलिङ्गे गुरौ तथा॥
स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह।
ययौ केदारयात्रार्थं गिरिं गौरीगुरोर्गुरुम्।
यत्र गत्वा न शोचन्ति किञ्चित् संसारिणः क्वचित्
प्राश्योदकं लिङ्गरूपं लिङ्गरूपत्वमागताः।
असिधारं गिरिं प्राप्य वशिष्ठस्य तपस्विनः।
गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत् तदा।
पश्यतां तापसानाञ्च विमाने सार्व्वकामिके॥
आरोप्य तं पारिषदाः कैलासमनयन् मुदा।
यस्तु केदारमुद्दिश्य गेहाद्दण्डेऽप्युदञ्चति॥
अकातरस्त्यजेत् प्राणान् कैलासे स चिरं वसेत्।
तदाख्यं समालोक्य स वशिष्ठस्तपोधनः॥
केदारमेव लिङ्गेषु बद्धमंसं सुनिश्चितम्।
अथ स्नात्वा स केदारीं यात्रां वाराणसीमगात्॥
अग्रहीन्नियमं चापि यथार्थं चाकरोत् पुनः।
प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम्॥
विलोकयिष्ये केदारं वसन् वाराणसीं पुरीम्।
तेन यात्राः कृताः सम्यक् बहिरेकाधिका मुदा॥
आनन्दकानने नित्यं वसता ब्रह्मचारिणा।
पुनर्यात्रां स वै चक्रे मधौ निकटवर्त्मनि॥

परमोत्साहसन्तुष्टः पलिताकलितोऽप्यजम् ।
तपोधनैस्तन्निधनं शङ्कमानैर्निवारितः ॥
कारुण्यपूर्णहृदयैरन्यैरपि च सङ्गिभिः ।
ततोऽपि न तदुत्साहभङ्गोऽभूद्दृढचेतसः ॥
मध्ये मार्गं मृतस्यापि गुरोरिव गतिर्मम ।
इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ ॥
अभूद्मान्नपरीपुष्टे तुष्टोऽहं चण्डिकेऽभवम् ।
स्वप्ने मया स संप्रोक्तो वशिष्ठस्तापसोत्तमः ।
दृढव्रत ! प्रसन्नोऽस्मि केदारं विद्धि मामिह ॥
अभीष्टञ्च वरं मत्तः प्रार्थयस्वाविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्ने मिथ्येति सोऽब्रवीत् ॥
ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्यासुचिन्मताम् ।
भवादृशामभिप्रेत एव स्वाध्यायवशवर्त्तिनाम् ॥
वरं ब्रूहि प्रसन्नोऽस्मि स्वप्नशङ्कां त्यज द्विज ! ।
तव सत्यवतः किञ्चित् मयाऽदेयं न किञ्चन ॥
इत्युक्तं मे समाकर्ण्य वरयामास मामिति ।
ग्रिष्यो हिरण्यगर्भस्य तपस्विजनसत्तमः ॥
यदि प्रसन्नो देवेश ! तदा मे सानुगा इमे ।
सर्व्वे मूलिन्नुयाच्या एव एव वरो मम ॥
देवि ! तस्येदमाकर्ण्य परोपकृतिशालिनः ।
वचनं नितरां प्रीतस्तथेति तमुवाच ह ॥
पुनः परोपकरणात् तत्तपोऽद्विगुणीकृतम् ।
तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु ॥
स वशिष्ठो महाप्राज्ञो दृढपातुपतव्रतः ।
देवि ! मे प्रार्थयामास हिमशैलादिहस्थितिम् ॥
ततस्तत्तपसा तुष्टः कलामात्रेण तत्र हि ।
हिमशैले स्थितस्तत्र सर्व्वभावेन संस्थितः ॥
ततः प्रभाते संजाते सर्व्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ॥
वशिष्ठं पुरतः कृत्वा सर्व्वसार्थसमायुतम् ।
हरपापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् ॥
मत्परिग्रहतः सर्व्वे हरपापे कृतोदकाः ।
आराध्य मामनेनैव वपुषा सिद्धिमागताः ॥
तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
अविमुक्ते परे क्षेत्रे कलिकाले विशेषतः ॥
तुषाराद्रिं समारुह्य केदारं वीक्ष्य यत् फलम् ।
तत् फलं सप्तगुणितं काश्यां केदारदर्शने ॥
गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् ।
यथा मधुस्रवा गङ्गा काश्यां तद्वत्किलं तथा ॥
इदं तीर्थ हरपापं सप्तजन्माघनाशनम् ।
गङ्गायां मिलितं पश्चाज्जन्मकोटिकृताघहृत्" ॥
केदाराख्यः पर्व्वतश्च तीर्थयात्रिभिः प्रायेण वदर्य्याश्रमात् सप्तदिनैः समागमनीयः ॥ * ॥)

केदारकटुका, स्त्री, (केदारस्य क्षेत्रस्य कटुका इव ।) कटुका । इति राजनिर्घण्टः । कटकी इति भाषा ॥ (कटुकाशब्दस्य विवरणं ज्ञातव्यम् ॥)

केदारजं, क्ली, (केदारात् जायते इति । जन् + डः ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

केदारेशः, पुं, (केदार एतन्नामा पर्व्वतः तत्र य ईशः लिङ्गरूपी महादेवः । यद्वा, केदाराख्यः ईशः ।) काश्मीरस्थशिवविशेषः । यथा,—
"हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैर्नोभिर्मुच्यते श्रद्धयान्वितः" ॥
इति स्कान्दे काश्मीरखण्डे ७७ अध्यायः ॥

केदारेश्वरः, पुं, (केदाराख्य ईश्वरः । केदारपर्व्वतस्य ईश्वरो वा ।) काश्मीरस्थशिवविशेषः । यथा,—
"भृङ्गपर्णेऽभिधास्यामि केदारेश्वरसंकथाम् ।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात्" ॥
इति स्कान्दे काश्मीरखण्डे ७७ अध्यायः ॥

केनारः, पुं, (के मूर्द्धि नारः । अलुक्समासः ।) कुम्भिनरकः । इति हेमचन्द्रः । शिरः । कपोलः । सन्धिः । इति मेदिनी ॥

केनिपातः, पुं, (के जले निपात्यतेऽसौ । नि + पत् + णिच् + अप् ।) अरित्रम् । इति शब्दरत्नावली । हालि इति भाषा ॥

केनिपातकः, पुं, (केनिपात + स्वार्थे कन् ।) केनिपातः । इत्यमरः । १ । १० । १२ ॥

केन्दुः, पुं, (कु ईषत् इन्दुरिव । कोः कादेशः ।) तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

केन्दुकः, पुं, (केन्दु + संज्ञायां कन् ।) गालवृक्षः । इति शब्दचन्द्रिका ॥ गाव् इति भाषा ॥ तालविशेषः । यथा । "लघुद्वयं विरामान्ततालेे केन्दुकसंज्ञके" । लघुद्वयं स्थाने द्रुतद्वयमिति च पाठः । अपरं नियमं विना । इति सङ्गीतदामोदरः ॥

केन्द्रं, क्ली, लग्नम् । लग्नात् चतुर्थसप्तमदशमस्थानानि । तत्पर्य्यायः । कण्टकम् २ । यथा,—
"लग्नाम्बुधूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम् ।
चतुष्टयञ्चात्र खेटो बली लग्ने विशेषतः" ॥
इति नीलकण्ठकृततर्षतन्त्राख्यजातकम् ॥ स्पष्टग्रहानयनार्थं शीघ्रमन्दसंज्ञकाङ्कद्वयम् । यथा,—
"मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं
चलोच्चं ग्रहाणां भवेच्छीघ्रकेन्द्रम्" ॥
इति भास्करीयसिद्धान्तशिरोमणौ स्पष्टाधिकारः ॥ ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्रात् विशोध्य च शिष्टं केन्द्रम् । इति सूर्य्यसिद्धान्तः ॥ गोलस्य मध्यस्थानम् । यथा,—
"वृत्तस्य मध्यं किल केन्द्रमुक्तम्
केन्द्रं ग्रहोच्चान्तरसंज्ञितेऽतः ।
यतोऽन्तरे तावति तुङ्गदेशा-
न्नीचोच्चवृत्तस्य सदैव केन्द्रम्" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ (यात्रायोगविशेषः । यथा, शब्दार्थचिन्तामणिधृतवचने ।
"आपोक्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः" ॥
प्रान्तसीमा । यथा, योगशास्त्रे ।
"एषिका उभयोः केन्द्रयोः स्थितौ द्वावेव योगिनौ ।
एकत्र सान्निध्यस्थितिवत् सन्निकर्षस्थिताविव वा
अन्योन्यमालपति" ॥)

केप, ऋ उ गत्याम् । चाले । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) ऽऽ, केपते । ऋ, अचिकेपत् । इति दुर्गादासः ॥

केमद्रुमः, पुं, जन्मकालीनग्रहयोगविशेषः । यथा ।
"रविवर्ज्जं द्वादशगैरनफा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थितैर्दुरुधरा केमद्रुमसंज्ञितो ऽन्यैः" ॥
अनफादियोगः । सच्छीलं विषयसुखान्वितं प्रभुख्यातियुक्तमनफायाम् । सुनफायां धीधनकीर्त्तियुक्तमात्मार्ज्जितैश्वर्य्यञ्च ॥ बद्धभृत्यकुटुम्बारम्भमुद्विग्नचित्तमपि दौरधुरे । भृतकं दुःखिनमधनं जातं केमद्रुमे विद्यात् ॥ अनफादिफलम् । इति ज्योतिस्तत्त्वम् ॥ (केमद्रुमयोगे जातस्य फलं यथा, जातकपद्धतौ ।
"नृपतेर्वंशजातोऽपि केमद्रुमभवो नरः ।
मलिनो दुःखितो नीचो निःस्वो दासो भवेत्खलः" ॥
तद्भङ्गस्तु तत्रैव । "चन्द्रे केन्द्रगतेऽथवा ग्रहयुते सर्व्वेषु दृष्टे विधौ सर्व्वैः कण्टकसंज्ञितैर्ग्रहयुतैः केमद्रुमो नेष्यते । लग्नाद् विधौ वा वृद्धिस्थैः शुभैः सर्व्वं शुभं फलं । द्वाभ्यां मध्यं तयैकेनाल्पं चेन्नास्ति दरिद्रता" ॥)

केमुकः, पुं, (के शिरोवच्छेदे अमयतीति । अम् रोगे + उक प्रत्ययः ।) वृत्तविशेषः । कैउ इति भाषा । तत्पर्य्यायः । पेचुकः २ पेचुनी ३ पेचुः ४ पेचिका ५ दलसारिणी ६ केचुकः ७ । इति रत्नमाला ॥ तस्य मूलगुणाः । कफपित्तनाशित्वम् । रोचनत्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । पाके तिक्तत्वम् । ग्राहित्वम् । हिमत्वम् । लघुत्वम् । पाचनत्वम् । हृद्यत्वम् । ज्वरकुष्ठकासप्रमेहाखनाशित्वम् । वातलत्वम् । पटुत्वञ्च । इति भावप्रकाशः ॥ (एतत् फलं हविष्ये वर्ज्जनीयम् । क्ली, कन्दशाकविशेषः ॥)

केयूरं, क्ली, (के बाऽऽशिरसि भूषणतां याति । या गत्यां + ऊरः । अलुक् समासः ।) अलङ्कारविशेषः । ताड় इति भाषा । तत्पर्य्यायः । अङ्गदम् २ । इत्यमरः । २ । ६ । १०७ ॥ (यथा, महाभारते । ६ । ६७ । २१ ।
"पादानां भूषणानाञ्च केयूराणाञ्च सर्व्वशः ।
राज्ञश्चाभरणानाञ्च दृश्यन्ते भीष्मभीमसमागमे" ॥)

केयूरः, पुं, रतिबन्धविशेषः । यथा,—
"स्त्रीजङ्घे चैव संपीड्य दोर्भ्यामालिङ्ग्य सुन्दरीम् ।
कारयेत् स्थापनं कामी बन्धः केयूरसंज्ञकः" ॥
इति स्मरदीपिका ॥ अपि च ।
"स्त्रीणां जङ्घान्तरावियो गाढमालिङ्ग्य सुन्दरीम् ।
कामयेद्विपुलं कामी बन्धः केयूरसंज्ञकः" ॥
इति रतिमञ्जरी ॥

केरलः, पुं, देशभेदः । मालेओयार इति भाषा । यथा । उग्राः केरलपर्य्यायाः । इति हेमचन्द्रः ॥ वेदयागानधिकारित्रसप्तधारित्वेक्ष्वविशेषः । पुरैते क्षत्रिया आसन् सगरेणैषां धर्म्मो नाशितः वेषान्यत्वञ्च कृतम् । यथा,—
"निःस्वाध्यायवषट्कारैः कृतास्तेन महात्मना ।
शूका यवनकाम्बोजाः पारदाः पह्लवास्तथा ॥
कोलिसर्पा माहिषका दर्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात ! धर्म्मस्तेषां निराकृतः" ॥
इति हरिवंशः । (तथा च रघुवंशे । ४ । ५४ ।
"भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः" ॥)

केरली, स्त्री, (केरल + गौरादित्वात् ङीष् ।)

ज्योतिर्ग्रन्थविशेषः। होरा। इति शब्दरत्नावली॥ (केरलज्योतिर्विद्यायां सङ्केतविशेषो दिङ्मात्रं प्रदर्श्यते गर्गसंहितायां यथा,—

"वर्गवर्गप्रमाणञ्च सस्वरं ताड़ितं मिथः।
पिण्डसङ्ख्या भवेत्तस्य यथाभागैस्तु कल्पना"॥

अस्यार्थः क ख च ट त प य श्रा इत्यष्टौ वर्गा एतैरेव प्रश्नादयो यथायथं साङ्केतिकक्रममाश्रित्य निरूप्यन्ते॥ केरलदेशोद्भवा स्त्री। यथा, राजेन्द्रकर्णपूरे। ६।

"चौड़ी चूड़ाभरणहरणः कीर्णकर्णावतंसः
कर्णाटीनां मुषितमुरली केरलीहारलीलः"॥)

केल, ऋ दाहे। गतौ। इति कविकल्पद्रुमः॥ (भां-परं-अकं-गत्यर्थे सकं-सेट्-ऋदित्।) ऋ, अचिकेलत्। चालः कम्पः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

केलकः, पुं, (केल्+कर्त्तरि ण्वुल्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। श्वलकः २। इति त्रिकाण्डशेषः॥

केलिः, पुं स्त्री, (केल्+इन्।) परीहासः। तत्पर्य्यायः। श्रवः २ क्रीड़ा ३ लीला ४ नर्म्म ५। इत्यमरः। २। ७। ३२॥ (नायिकालङ्कारविशेषः। यथा, एतल्लक्षणं साहित्यदर्पणे। ३। १२२।

"विहारे सह कान्तेन क्रीड़ितं केलिरुच्यते"॥

यथा, भमरशतके। ४।

"मालत्याः कुसुमेषु येन सततं केलिः कृता हेलया"॥)

केलिः, स्त्री, (केलति सदा गच्छतीति। "सर्व्वधातुभ्य इन्"। इते इन्।) पृथिवी। इति शब्दमाला॥

केलिकः, पुं, (केलिर्विलासः प्रयोजनमस्य इति ठन्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्याशोकशब्दे ज्ञेया॥)

केलिकला, स्त्री, (केलिरूपा कला। शाकपार्थिवादिवत् मध्यपदलोपिसमासः।) सरस्वतीवीणा। इति शब्दरत्नावली॥ (केलिः क्रीड़ा तस्याः कला अंशविशेषः। यथा, भमरशतके। ७।

"अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः"॥)

केलिकिलः, पुं, (केलिना लीलया किलतीति। किल क्रीड़ायां+कः।) कुष्माण्डकः। स तु शिवस्यानुचरः। नाट्ये नायकवयस्यः। तत्पर्य्यायः। विदूषकः २ वासन्तिकः ३ वैहासिकः ४ प्रहासी ५ प्रीतिदः ६। इति हेमचन्द्रः॥ (केलिना परीहासेन किलतीति विग्रहे वाच्यलिङ्गः। यथा, हरिवंशे।

"स तु केलिकिलो विप्रो भेदशीलश्च नारदः"॥)

केलिकिला, स्त्री, (केलिना विहारेण किलतीति किल्+कः। ततः टाप्।) रतिः। सा तु कामदेवपत्नी। इति त्रिकाण्डशेषः॥

केलिकीर्णः, पुं, (केलिनिमित्तकैः पांशुभिः कीर्णः।) उष्ट्रः। इति हेमचन्द्रः॥

केलिकुक्षिका, स्त्री, (केलीनां कुक्षिका इव। ह्रस्वत्वात्।) इति त्रिकाण्डशेषः। (यथा, भमरशतके। ७।

"केलिकोषः, पुं, (केलीनां रहस्यानां क्रीड़ापरीहासादीनां वा कोष आधार इव।) नटः। इति शब्दरत्नावली॥

केलिनागरः, पुं, (केलिनिपुणः प्रधानको वा नागरः।) सम्भोगवान्। इति जटाधरः॥

केलिमुखः, पुं, (केलिः मुखं प्रधानमत्र।) परीहासः। इति त्रिकाण्डशेषः॥

केलिवृक्षः, पुं, (केलिनिमित्तको वृक्षः।) कदम्बविशेषः। इति शब्दरत्नावली॥ केलिकदम्ब इति ख्यातः॥

केलिसचिवः, पुं, (केलौ क्रीड़ाविषये सचिवः सहायः।) गर्म्मदः। क्रीड़ाविषयकमन्त्री। इति शब्दमाला॥

केव, ऋ ड सेवने। इति कविकल्पद्रुमः॥ (भां-आत्मं-सकं-सेट्-ऋदित्।) ड, केवते। ऋ, अचिकेवत्। इति दुर्गादासः॥

केवर्त्तः, पुं, (के जले वर्त्तते। वृत्+घञ्। अलुक्समासः।) कैवर्त्तजातिः। इति द्विरूपकोषः॥ (एषोऽन्त्यजशूद्रः। यथा, ब्रह्मवैवर्त्तपुराणे।

"रजकश्चर्म्मकारश्च नटो वरुड एव च।
कैवर्त्तो मेदभिल्लश्च षड़ेते अन्त्यजाः स्मृताः"॥)

केवलं, क्ली, (के शिरसि मूर्द्धावच्छेदे वलयति। वल्+अच्। अलुक्समासः।) निर्जीतम्। इत्यमरमेदिनीकरौ॥ ज्ञानभेदः। इति विश्वो हेमचन्द्रश्च॥ (साङ्ख्यकारिकायां यथा,—"अविपर्य्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानम्"॥)

शुद्धम्। (यथा, रघौ २। ६३।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम्"॥)

ज्ञात्वम्। (यथा, रघुवंशे १०। २६।

"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन हेतवः श्लोका निवेदितफलास्त्वयि"॥)

असहायः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अद्वितीयः। यथा, कुमारे ५। ८३।

"न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्"॥)

केवलः, पुं, कुहनः। इति मेदिनी। (कुम्भकविशेषः। यथा, हठयोगदीपिकायाम्। २। ७१।

"प्राणायामस्त्रिधा प्रोक्तो रेचपूरकुम्भकैः।
सहितः केवलेति कुम्भको द्विविधो मतः"॥)

केवलः, त्रि, एकः। (यथा, रघुवंशे। ११। २६।

"वाणभिन्नहृदया निपेतुषी
सा खगानमुवं न केवलाम्।
विद्रुमच्छदपरायशोरुचं
रावमश्रियमपि व्यकम्पयत्"॥)

ज्ञात्वः। इत्यमरमेदिनीकरौ। (यथा, रघुः। १०। २६।

"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन हेतवः श्लोका निवेदितफलास्त्वयि"॥)

केवलज्ञानी, [न्] पुं, (केवलं शुद्धं ज्ञानं अस्यास्तीति। इनिः।) भूतार्हद्विशेषः। इति हेमचन्द्रः॥

केवलद्रव्यं, क्ली, (केवलं द्रव्यम्।) मरिचम्। इति शब्दचन्द्रिका॥

केवली, स्त्री, (केवल+ङीष्।) ज्ञानभेदः। इति मेदिनी। ग्रन्थविशेषः। इति हेमचन्द्रः॥

केवली, [न्] पुं, (केवलं शुद्धं ज्ञानमस्यास्तीति। इनिः।) जैनविशेषः। इति हलायुधः॥

केविका, स्त्री, (केव गतिचालनयोः+ण्वुल्+टाप् अत इत्वम्।) पुष्पविशेषः। केवेर इति भाषा लोकेषु प्रसिद्धा। तत्पर्य्यायः। कविका २ केवी ३ भृङ्गारिः ४ नृपवल्लभा ५ भृङ्गमारी ६ महागन्धा ७ राजकन्या ८ ऋजिवाहिनी ९। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। दाहपित्तश्रमवातश्लेष्मरोगपित्तच्छर्द्दिविनाशित्वञ्च। इति राजनिर्घण्टः॥

केशः, पुं, (के मस्तके शेते। शी+अच्। अलुक्समासः।) मज्जातोपधातुविशेषः। चुल् इति भाषा। स तु गर्भस्थबालकस्य अष्टाभिर्मासैर्जायते। इति सुखबोधः। (केशादयस्तु पित्तो जायन्ते। यथा, सुश्रुते शारीरस्थाने तृतीयेऽध्याये। "गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पित्तजानि"॥ भावप्रकाशे च।

"केशाः श्मश्रु च लोमानि नखा दन्ताः सिरास्तथा।
धमन्यः स्नायवः शुक्रमेतानि पित्तजानि हि"॥)

तत्पर्य्यायः। चिकुरः २ कुन्तलः ३ वालः ४ कचः ५ शिरोरुहः ६। इत्यमरः। २। ६। ९५॥ शिरसिजः ७ मूर्द्धजः ८ अस्रः ९ दृजिनः १०। इति जटाधरः॥ (रोगविशेषेभ्यस्तेषामुत्पाटनानन्तरमुद्भवोपायाश्च। यथा,—

"वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम्।
गुड़ूचीस्वरसैस्तैलमभ्यङ्गात्केशरोहणम्"॥

इति आदित्यपाकगुड़ूचीतैलम्॥ *॥

"मधुकेन्दीवरमूर्व्वा तिलाज्यगोक्षीरभृङ्गसेवेन।
अचिराद्भवन्ति घनकेशा दृढ़मूलायतान्तवः"॥

"चन्दनं मधुकं मूर्व्वा त्रिफला नीलमुत्पलम्।
कान्तावटप्ररोहश्च गुड़ूचीविल्वमेव च॥
लौहचूर्णं तथाकेशी भारिवे हे तथैव च।
मार्कवस्वरसेनैव तैलं मृदग्निना पचेत्॥
शिरस्युत्पतिताः केशा जायन्ते घनकुञ्चिताः।
दृढ़मूलाश्च स्निग्धाश्च तथा भ्रमरसन्निभाः॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम्"॥

इति चन्दनाद्यं तैलम्॥ *॥

"तैलं सयष्टीमधुकैः क्षीरे धात्रीफलैः शृतम्।
नस्ये दत्तं जनयति केशान् श्मश्रूणि चाप्यथ"॥

पक्वावस्थापन्नस्यास्य छण्णीकरणोपाया यथा,—

"त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिक्षिपेत्।
दृषत्पात्रे नारिकेले भृङ्गराजरसान्विते॥
मासमेकन्तु निःक्षिप्य सम्यग्गर्भात् समुद्धरेत्।
ततः शिरो मुण्डयित्वा लेपं दद्याद्विभग्वरः॥
सम्वेष्ट्य कदलीपत्रैर्मोचयेत्सप्तमे दिने।
क्षालयेत्त्रिफलाक्वाथैः क्षीरमांसवसाशिनः॥
कपालरञ्जनञ्चैव छण्णीकरणमुत्तमम्"॥

"उत्पलं पयसा सार्द्धं मांसं भूनौ निधापयेत्।
केशानां छण्णकरणं लेहनञ्च विधीयते"॥

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)
तत्समूहार्थवाचकाः शब्दाः यथा, —
"बालाः स्युस्तत्पराः पाशो रचनाभार उच्चयः ।
हस्तः पद्मः कलापश्च केशभूयस्त्ववाचकाः" ॥
इति हेमचन्द्रः ॥ * ॥ (कस्य जलस्य ईशः ।) वरुणः । क्लीवेरम् । इति मेदिनी ॥ (अस्य पर्य्यायो यथा,—
"वालं क्लीवेरवर्हिष्ठोदीच्यं केशोऽम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कस्य ब्रह्मणोऽपि ईशः । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोके लोकं काशयति वा । काश + अच् एषोदरात् एत्वे साधुः । सूर्य्याग्निप्रभृतिरश्मिः ।
"ब्रह्म-विष्णु-रुद्र संज्ञाः शक्तयः केशसंज्ञिताः" ॥
इति भागवतोक्तेः परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे ह्यवलावण्ययोरपि ।
जम्भटे पुरुषे चैव प्रमदायां विशेषतः" ॥
"प्रजापतौ कचे चैव केशशब्दः प्रकीर्त्तितः" ॥
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः।) केशपाशः। केशसमूहः। इति हेमचन्द्रः ॥

केशकारः, पुं, (केशं केशवत् केशाकृतिं वा करोति आत्मानं केशाकारेण वर्द्धयति इति भावः । केश + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इन्द्रभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतत्वम् । रक्तपित्तत्रयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भकः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कवरी । इति चिकाण्डशेषः ॥

केशघ्नं, क्ली, (केशं हन्ति नाशयतीति । हन् + टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छित्, [द्] पुं, केशं छिनत्ति । छिद् + क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (को ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यं । महाप्रलये मूर्त्तिविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति यः सः । त्रयाणामेकात्मत्वात् ।) विष्णुः । (केशेषु काशादिवृक्षजातेषु अटति चरतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट् + अच् शकन्ध्वादित्वात् अलोपे साधुः ।) ओकश्यः । इति मेदिनी । भ्राता । इति शब्दरत्नावली ॥ (केशेषु कामार्त्तपुरुषनारीषु अटति । अट् + अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु नटनृत्यादिषु च अटति त्वगात्मनेति यावत् ।) शोणकवृक्षः । इति चिकाण्डशेषः ॥

केशदृत्, पुं, (केशमिव धरति । धृ + क्विप् ।) भूतकेशनामकवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली, (केशनामेव नाम यस्य ।) वालम् । इत्यमरः ॥ वाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । बाहुलकात् पक्षादेशो वा ।) केशपाशः इत्यमरः । २ । ६ । ८८ ॥

(यथा, महाभारते । ४ । ३६ । ४१ ।
"उत्तरन्तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्य । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः, पुं, (केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ॥
इत्यमरः । २ । ६ । ८८ ॥ (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश + स्वार्थात् ङीप् ।) शिरो मध्यस्थशिखा । चूड़ा । इत्यमरः । २ । ६ । ८७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्तेऽनया । मथ विलोड़ने + करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपं गन्तुः केशोत्पाटनात् तथात्वम् ।) शूकशिम्बी । इति राजनिर्घण्टः ॥

केशमार्জकं, क्ली, (केशं मार्ष्टि । मृज् शोधने + कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्জनं, क्ली, (केशो मृज्यतेऽनेन, । मृज् + करणे ल्युट् वृद्धिश्च ।) कङ्कतिका । इति हेमचन्द्रः । केशशुद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ॥)

केशमुष्टिः, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरः, पुं क्ली, (के जले पद्मञ्जिरसि वा । सरतीति । कृ + अच् । एषोदरात् शत्वम् । यद्वा केश इव केशाकारः अस्यास्तीति । केश + रः ।) किञ्जल्कः । इत्यमरः । १ । १० । ४३ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्यास्तीति मत्वर्थीयो रः ।) नागकेशरवृक्षः । (यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ॥ वकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"वस्त्रां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । १ । १२५ । ३ ।
"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्याम्
"मृगपतिरिव स्कन्धावलम्बितकेशरभारः" ॥)
हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । केशिकदम्ब इति भाषा । यथा, मेघदूते । २२ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" ॥)

केशरञ्जनः, पुं, (केशान् रञ्जयति । रञ्ज् + णिच् + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराजः, पुं, (केशो राजतेऽनेन । राज + करणे घञ् ।) शाकभेदः । केशुरे इति भाषा । तत्पर्य्यायः । भृङ्गराजः २ भृङ्गः ३ पतङ्गः ४ मार्कवः ५ । इति रत्नमाला ॥ मार्कवः ६ । इत्यमरः ॥ नागमारः ७ पवनः ८ भृङ्गसोदरः ९ । इति चिकाण्डशेषः ॥ केशरञ्जनः १० केशयः ११ । कुन्तलवर्द्धनः १२ । इति वैद्यकम् ॥ अङ्गारकः १३ एकरजः १४ करञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः ॥ अगारः १८ भृङ्गरजाः १९ मकरः २० । इति शब्दरत्नावली ॥ अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केशरक्षयः कृमिश्वासकासशोथामयापहृत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । अग्निकारित्वम् । केशवर्त्तुर्हितत्वम् । पाण्डुकफामयहत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥

केशराङ्गः, पुं, (केशरे तदवच्छेदे अङ्गरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः

केशरी, [न्] पुं, (केशराः सन्त्यस्य इति इनिः ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ (यथा, रघुवंशे २ । २६ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी ॥ बीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री, (केश इव रोहति अत्र । केशरुह + "इगुपधेति" । ३ । १ । १३५ । इति कः ।) भद्रदन्तिकावृक्षः । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री, (केशवद्रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ॥)

केशवः, पुं, (को ब्रह्मा ईशः रुद्रः तौ आत्मनि स्वरूपे वयति प्रलये उपाधिरूपमूर्त्तित्रयं मुक्त्वा एकमात्रपरमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोक्याम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि
तद्विद्यादात्मनो मायां यथाभासो यथातमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश + वा + कः । यथा, हरिवंशे । ८० । ६६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शववत् भातीति । प्रलयकाले क्षीरोदशायितया तथात्वम् । कश्च अश्च ईशश्च ते केशा ब्रह्मविष्णुरुद्राः नियम्यतया सन्त्यस्य । यद्वा, कश्च ईशश्च तौ केशौ पुन्नपौंस्नत्वेन भवतोऽस्य । "केशादोऽन्यतरस्याम्" । ५ । २ । १०६ ।

इति वप्रत्ययः। अथवा वाति गच्छति तदत्तया। वा + कः। स्वरूपतस्त्वेषां भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुसंहितायाम्।

"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः"॥

किञ्च।

"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः"॥ पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्थितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कस्य अस्य ईशस्य केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य सः। केशिदानवहननाद्वा केशवः।

"यस्मात् त्वयैव दुरात्मा हतः केशी जनार्दन! तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसीति"॥ भागवतादिषु। द्वितीये। केशसंज्ञिताः सूर्य्यादिसंक्रान्ता अंशवः तदात्मत्वेन केशवो वा।

"अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्व्वज्ञाः केशवं तस्मात् प्राहुर्म्मां द्विजसत्तमाः"॥ इति महाभारतम्। "त्रयः केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि प्रकृतयः केशसंज्ञिताः। "मत्केशा वसुधातले" इति भागवते च। यथा, हरिवंशोक्तौ,—

"को ब्रह्मेति समाख्यातः ईशोऽहं सर्व्वदेहिनाम्। आवां तवांशसम्भूतौ तस्मात् केशवनामवान्"॥ तेनास्य बहुधा निरुक्तिः।) विष्णुः। इत्यमरः। १। १। १८॥ पुन्नागवृक्षः॥ (केशाः प्रशस्ताः सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"। ५। २। १०९। वः।) केशवति त्रि। इति मेदिनी॥ (जलस्यांशवदेहः। यथा, विदग्धमुखमण्डनम्।

"केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः। ववन्दि पाण्डवाः सर्व्वे हा! हा! केशव! केशव!"॥

के जले शवं पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् पाण्डवाः प्रहृष्टाः रुदन्ति चीत्कारं कुर्व्वन्तीत्यर्थः॥)

केशवर्द्धिनी, स्त्री, (केशाः वर्द्धन्तेऽनया। केश + वृध + करणे ल्युट् टित्वात् ङीष्।) सहदेवीलता। इति राजनिर्घण्टः॥

केशवायुधः, (केशवस्य विष्णोरायुधाकारं मुकुलाग्रस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं अस्त्रम्। इति विग्रहे पुं, विष्णोरस्त्रे, क्ली॥)

केशवालयः, पुं, (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥

केशवावासः, पुं, (आवसत्यस्मिन् इति। आ + वस् + अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः॥

केशवेष्टः, पुं, (केशस्य कुन्तलस्य वेष्टः बन्धनरूपवेष्ट्यादिभिर्विन्यास इति यावत्।) कवरी। इत्यमरः॥ चुलेरखोँपा इति भाषा। (यथा, आश्वलायनगृह्ये। १। १७। १७। "कुलधर्म्मं केशवेष्टान् कारयेत्"। "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायनः। "पूर्व्वशिखः परशिखः" इति कुलधर्म्माः। "तेषु यो यस्य कुलधर्म्मः तेन तस्य केशसन्निवेशान् कारयेत्" इति नारायणीवृत्तिः॥)

केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश + हन् + टच् ततो ङीष्।) शमीवृक्षः॥ इति राजनिर्घण्टः॥

केशहस्तः, पुं, (केशानां केशस्य वा हस्तः समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूहः। इत्यमरः॥

केशाकेशि, क्ली, केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। ("तत्र तेनेदमिति सरूपे"। २। २। २७। इति कर्म्मव्यतिहारे इच् समासे पूर्व्वदीर्घः।) अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्॥ चुलाचुलि इति भाषा।

(यथा, महाभारते। ३। २८३। ३७।

"केशाकेशिभवद्युद्धं रक्षसां वानरैः सह"॥)

केशारुहा, स्त्री, (केशा आरोहन्त्यनया। आ + रुह + करणे घञर्थे कः।) सहदेवीलता। इति राजनिर्घण्टः॥

केशार्हा, स्त्री, (केशं केशवर्णं अर्हति इति। केश + अर्ह + "कर्म्मण्यण्"। ३। २। १। इति अण्।) महानीली। इति राजनिर्घण्टः॥

केशिकः, त्रि, (प्रशस्ताः केशाः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः। २। ६। ४५॥

केशिका, स्त्री, (केशीव कायति प्रकाशते। केशिन् + कै + कः।) शुतावरी। इति राजनिर्घण्टः॥

केशिनिसूदनः, पुं, (केशीत्याख्यः दानवः कंसासुरचरस्तं निसूदयति हन्ति। नि + सूद + कर्त्तरि ल्युः।) श्रीकृष्णः। (यथा, गीतायां १८। १।

"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!"॥

केशिदानववधविवरणं हरिवंशे ८० अध्याये दृश्यम्।)

केशिनी, स्त्री, (केशाकाराः सन्त्यस्याः।) जटामांसी। इति राजनिर्घण्टः॥ घोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः। २। ६। ४५॥

केशिसूदनः, पुं, (केशिनं तदाख्यया प्रसिद्धं दैत्यं सूदयतीति। केशिन् + सूद + कर्त्तरि ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (केशिदानव वधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्॥)

केशिहा, [न्] पुं, (केशिनं हतवान्। हन् + क्विप्) श्रीकृष्णः। इति हेमचन्द्रः॥

केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः। २। ६। ४५॥

केशी, [न्] पुं, (केशः सर्व्वज्ञा प्रकृतिरस्यास्तीति।) विष्णुः। इति त्रिकाण्डशेषः॥ दैत्यभेदः। इति मेदिनी॥ (यथा, हरिवंशे। ८०। ६५।

"यस्मात्त्वया हतः केशी तस्मात् मच्छासनं शृणु। केशवो नाम नाम्ना वै ख्यातो लोके भविष्यसि"॥

केशाः केसरा सन्त्यस्य।) सिंहः। इति शब्दरत्नावली॥

केशी, स्त्री, (केश + स्त्रियां गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥ भूतकेशीवृक्षः॥ अजशोणितवृक्षः। इति रत्नमाला॥

केशोच्चयः, पुं, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः॥

कैंश्यं, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पुं। इति राजनिर्घण्टः॥ (केशहितकारके, त्रि॥)

केसरं, क्ली, (के जले सरतीति। सृ + अच्।) हिङ्गुः इति हेमचन्द्रः॥ नागकेसरपुष्पम्। कासीसम्। स्वर्णम्। इति राजनिर्घण्टः॥

केसरः, पुं, (के वृक्षशिरोऽवच्छेदे उच्छ्रितदेशे इत्यर्थः सरति। सृ + अच्।) नागकेसरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे। ४। ६७।

"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः। दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"॥)

सिंहस्कन्धकेशः। (यथा, पञ्चतन्त्रे। १। २०४।

"व्याकीर्णकेसरकरालमुखा मृगेन्द्रा नागाश्च भूरि मदराजि विराजमानाः"॥)

वकुलवृक्षः। (यथा, रघुवंशे। ९। ३६।

"ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम्"॥)

पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः॥

केसरः, पुं क्ली, (के जले सरतीति। सृ + पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। हिङ्गुनि, पुं स्त्री। इति रभसः॥

केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठं गुणाधिक्यात्। यद्वा, केसरेण किञ्जल्केन वरातीति। वृ + अच्।) कुङ्कुमम्। इति राजनिर्घण्टः॥

केसरासः, पुं, (के जलनिमित्तकः सरः अस्यः तद्रसो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

केसरिका, स्त्री, (के जले सरति स्वाद्वतया साधुकारितया वा। वुन् अलुक्समासः। ततष्टाप् अत इत्वम्।) सहदेवीलता। इति राजनिर्घण्टः॥

केसरिसुतः, पुं, (केसरी खगामख्यातो वानरभेदः तस्य सुतः पुत्रः।) हनूमान्। इति हेमचन्द्रः॥ (यथा, महाभारते ३। १४७। २७।

"अहं केसरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष! हनूमान् नाम वानरः"॥)

केसरी, [न्] पुं, (केसराः जटाः सन्त्यस्य। केसर + इनिः।) सिंहः। घोटकः। पुन्नागः। नागकेशरः। इति मेदिनी॥ रक्तशिग्रुः। इति राजनिर्घण्टः॥ वानरविशेषः। स तु हनूमत्पिता। (यथा, रामायणे। ७। ४०। १९।

"सूर्य्यदत्तवरः स्वर्गं सुमेरुर्नाम पर्व्वतः। यत्र राज्यं प्रशास्यस्य केसरी नाम वै पिता"॥)

कै, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) कायति। एषामादन्तत्वेन दिवादौ पाठेऽपीष्टसिद्धौ भ्वादावेकारान्तत्वेन पाठो गणक्षतमनित्यमिति ज्ञापयति। तेन अयधातोरात्मनेपदानित्यत्व गुणो लुकि च ण्योर्णाव इति यलोपे अयधातौ परे उपसर्गरेफो न इति वक्तव्यात् पराशब्दस्य रेफस्य लकारे "एष काकः समूत्पन्नो यः पलाति स जीवति" इति सिद्धम्। देवेशचारण-

भेदार्थो भ्वादौ पाठ इति केचित्। इति दुर्गादासः॥

कैकयी, स्त्री, (जनपदात् क्षत्रियात् अञ्। यद्वा, केकय + स्वार्थे अण्। कैकय + वाऽजबलात् न यादेरियादेशः। तस्यापत्यं स्त्री ङीप्।) केकयी। इति शब्दरत्नावली॥

कैकेयी, स्त्री, (कैकेयः केकयराजः तस्यापत्यं स्त्री ङीप्।) केकयी। सा तु केकयराजकन्या दशरथराजपत्नी च। इति शब्दरत्नावली॥
(यथा, रघौ १२। २।
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीग्रङ्क्ष्येवाह पलितच्छद्मना जरा"॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्य कर्म्म वा। किङ्कर + यञ्।) किङ्करत्वम्। दासत्वम्॥ (यथा, भागवते। ३। २। २२।
"तत् तस्य कैङ्कर्य्यमलं भृतान् नो
विम्लापयत्यङ्ग! यदुग्रसेनम्"॥)

कैटजः, पुं, (कुटज एव स्वार्थे अण् वृद्धिः। एषोदरात् औकारस्य ऐकारत्वम्।) कुटजवृक्षः। इति भावप्रकाशः॥

कैटभः, पुं, स्वनामख्यातो दैत्यविशेषः॥ (अयन्तु विष्णोः कर्णमलोद्भूतयोरसुरयोरन्यतरः। माङ्कल्पे जातः सन् एकार्णवे योगनिद्रायां स्थितस्य भगवतो नाभिपद्मादाविर्भूतं अजयोनिं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्दान्तोऽसुरः॥) यथा,— मार्कण्डेयपुराणम्।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ"॥
(एतत्पौराणिकं सविस्तरं हरिवंशे ५२ अध्याये दर्शनीयम्॥)

कैटभजित्, पुं, (कैटभं स्वनामख्यातमसुरं जितवान्। जि + भूते क्विप्। तुगागमश्च।) विष्णुः। इत्यमरः॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभहा, [न्] पुं, (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा। हन् + क्विप् भूते।) विष्णुः। इति हेमचन्द्रः॥ (स च सर्व्वप्रकृतिर्भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनार्थं गुणाधिष्ठातृत्वमभ्युपेति, तच्च तु यदा जीवादृष्टवशात् यद्यद्गुणोद्रेकात्मिका क्रियाशक्तिरुपतिष्ठते तितरां गुणाधिष्ठातृतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति। परं देहाभिमानवतां जीवानामिव तस्य प्रकृतेरद्रिक्तगुणे मनो न ह्यासज्यते हृषीकेशत्वात् गुणनियन्तृत्वादित्यर्थः देहाभिमानराहित्याच्च। अतएव स कैटभभिन्मधुजिदित्यादयुपाधिकतयोच्यते वस्तुतस्तु जीवैर्यत् किञ्चित् क्रियते तत् सर्व्वमेव गुणप्रवृत्तत्वेनैवगत एव। ईश्वरस्य तु भक्ता इव गुणा एवाधीनाः सन्तः तदाज्ञयैव क्रिया उत्पादयन्ति सम्पादयन्ति च॥)

कैटभा, स्त्री, (कूटा गुणास्तत्कार्य्यं सृष्ट्यादिकं कैटं। कूट + अण् वृद्धिः एषोदरात् औकारस्य ऐकारत्वं। तेन तैर्वा भाति प्रकाशते या। भा + क्विप्।) दुर्गा। इति त्रिकाण्डशेषः॥

कैटभारिः, पुं, (कैटभस्य स्वनामख्यातस्यासुरभेदस्य अरिः शत्रुः। पक्षे कैटभस्य तमसः अरिर्दमयिता। सगुणावस्थायामपि ईश्वरस्य विष्णोः सत्त्वगुणप्राधान्यात् तथात्वम्।) विष्णुः। इति हलायुधः॥

कैटभी, स्त्री, (कैटभं तदाख्यया प्रसिद्धं असुरं प्रति इः हननक्रियारूपतेजःप्रकाशोऽस्याः।) यद्वा, कूटं तमःप्रधानभावमधिष्ठाय तामसी प्रकृतिरिति विश्रुता देवकार्य्यसाधनानुरोधात् तद्वत्तया भातीति। कूट + अण् वृद्धौ कौटं एषोदरात् औकारस्य ऐकारत्वं कैटं भा + कः। ततो ङीप् कैटभी तामसीत्यर्थः॥) दुर्गा। इति त्रिकाण्डशेषः। (मधुकैटभभीतब्रह्मणस्तुत्या प्रसादिततया तामस्या विमोहितौ तौ दुर्दान्तावसुरौ विष्णुना निहतौ। यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः"॥
इत्युपक्रम्य।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणोविभुः॥
तावप्यति बलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्"॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपुर्य्या ईश्वरी कर्त्री। पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री।) दुर्गा। यथा।
"कैटभन्तु वधं श्रुत्वा गृहीता तत्पुरी यथा।
तेन सा गीयते देवी पुराणे कैटभेश्वरी"॥
इति देवीपुराणे ४५ अध्यायः॥

कैटर्य्यः, पुं, (किट् भाषे + भावे घञ्। केटं भाषं राति ददाति निक्षादीनामातिशय्यात्। रा दाने + कः। ततः स्वार्थे ष्यञ्।) कटफलः। इत्यमरः। २। ४। ४०॥ निम्बः। महानिम्बः। इति रत्नमाला॥ मदनवृक्षः। इति राजनिर्घण्टः॥

कैडर्य्यः, पुं, (कैटर्य्य + एषोदरात् डत्वे साधुः।) कटफलः। मूर्तिकरञ्जः। कटभीवृक्षः। इति राजनिर्घण्टः॥

कैतकं, क्ली, (केतक्या इदं "तस्येदम्"। ४। ३। १२०। इत्यण्) केतकीपुष्पम्। यथा। कैतकं तिक्तकटुकमिति राजवल्लभः॥

कैतवं, क्ली, (कितव + स्वार्थे अण्।) कपटः। (कितवस्य भावः कर्म्म वा। युवादित्वादण्।) द्यूतः। इत्यमरः। २। १०। ४५॥ वैदूर्य्यमणिः। इति राजनिर्घण्टः॥ (कितवस्य भावः। कपटता। यथा, भागवते १। १। २। "धर्म्मः प्रोज्झितकैतवोऽत्रपरमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्"॥)

कैदारं, क्ली, (केदाराणां क्षेत्राणां समूहः। इति अण्।) क्षेत्रसमूहः। इत्यमरटीकायां भरतः॥ (केदारे क्षेत्रे प्रयत्नेनानीतं यज्जलं तत्कैदारम्। तदुणादिकमुक्तं भावप्रकाशे यथा—
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम्।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत्"॥)

कैदारः, पुं, (केदारे क्षेत्रे भवः इत्यण्।) धान्यविशेषः। इति राजनिर्घण्टः॥ (केदारसम्बन्धिनो ये ते कैदारा इत्यर्थः। यथा, भावप्रकाशे।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः।
कषाया अल्पवर्च्चस्का मेधास्त्रैव बलावहाः"॥)

कैदारकं, क्ली, (केदाराणां समूहः केदारस्य इदं वा। केदार + वुञ्।) केदारसमूहः। क्षेत्रगणः। इत्यमरः। २। ९। ११॥

कैदारिकं, क्ली, (केदाराणां समूहः केदारे भवं तस्येदं वा। केदार + ठञ्।) कैदारकम्। इत्यमरः। २। ९। ११॥

कैदार्य्यं, क्ली, (केदाराणां समूहः। केदार + ष्यञ्।) क्षेत्रम्। क्षेत्रसमूहः। इत्यमरः। २। ९। ११॥

कैमुतिकः, पुं, (किमुत इत्यव्ययं तस्मात् आगतः। ठक्।) न्यायविशेषः। तथा च छन्दोगपरिशिष्टम्।
"वेदाश्छन्दांसि सर्व्वाणि ब्रह्मणाश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
यियासूनुनगच्छन्ति संहृष्टा ह्यप्सरोगणैः॥
समवायश्च यत्रैषां तत्रान्ये बहवो मताः।
नूनं सर्व्वे त्वयं यान्ति किमुतैकं नदीरजः"॥
इति प्रायश्चित्ततत्त्वम्॥

कैरवं, क्ली, (के जले रौति कलनादं करोतीति। र + अच् केरवः हंसः तत्सम्बन्धे क्षतीत्यणुक्। तस्य प्रियमित्यण्।) कुमुदम्। श्वेतोत्पलम्। इत्यमरः। १। १०। ३७॥ (यथा, महाभारते १। १। ८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्"॥)

कैरवः, पुं, (कुत्सितो रवो यस्य स एव स्वार्थे अण्। एषोदरात् औकारस्य ऐकारत्वम्।) शत्रुः। कितवः। इति मेदिनी॥

कैरविणी, स्त्री, (कैरव पुष्करादित्वात् इनिः। ततो ङीप्।) कुमुदिनी। इति शब्दरत्नावली॥ (कैरवाणि सन्त्यस्यां इति इनि ङीप् च। कुमुदयुक्ता पुष्करिणी॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् च।) चन्द्रिका। इति मेदिनी॥ मेथिका। इति राजनिर्घण्टः॥

कैरवी, [न्] पुं, (कैरवं प्रियत्वेन प्रकाशत्वेन वा अस्त्यस्य इति इनिः।) चन्द्रः। इति शब्दमाला॥

कैराटकः, पुं, (किरं पर्य्यन्तभुमिं चरमावस्थां मृत्युदशामित्यर्थः अटति प्राप्नोति यस्मात्। किर + अट् + अच्। ततः स्वार्थे कन् अण् च।) स्थावरविषभेदः। इति हेमचन्द्रः॥

कैरातं, क्ली, (किराते पर्य्यन्तभुमौ भवं इत्यण् ।) भूनिम्बः। इति शब्दचन्द्रिका ॥ शम्बरचन्दनम्। इति राजनिर्घण्टः ॥

कैरातः, पुं, (किराते पर्य्यन्तभूमौ भवः। इत्यण् ।) भूनिम्बः। इति राजनिर्घण्टः ॥ (किरात इव शूरः इवार्थे अण् ।) बलवान् पुरुषः। तत्पर्य्यायः। दोर्ग्रहः २ क्षामः ३। इति हारावली ॥ (किरातस्य वेश इव वेशो यस्य। अर्श आद्यच् ततः स्वार्थे अण्। किरातवेशधारिणि, त्रि। यथा, महाभारते १ । २ । ५० ।

"ईश्वरार्ज्जुनयोर्युद्धं पर्व्वकैरातसंज्ञितम्" ॥

तथा, मनसाख्याने। "कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे" ॥)

कैरालं, क्ली, (किरं पर्य्यन्तभूमिं बलति पर्य्याप्नोतीति। बल् + "कर्म्मण्यण्" इत्यण्। ततः स्वार्थे अण् ।) विड्वरम् इति वैद्यकम् ॥

करालो, स्त्री, (कैराल + स्त्रियां गौरादित्वात् ङीष्।) विड्वरा। इति राजनिर्घण्टः ॥

कैलासः, पुं, (के जले लासो लसनं दीप्तिरस्य। "हृदन्तात् सप्तम्याः" । ६ । ३ । ६। इति अलुक् केलसः स्फटिकमणिः तद्वत् शुभ्रः इत्यण्। यद्वा, केलीनां समूहः। कैलं। "तस्य समूहः"। ४ । २ । ३७। इत्यण् वृद्धिश्च। कैलेनास्यतेऽत्र। आस् + अधिकरणे घञ्।) खनामख्यातपर्व्वतः। इत्यमरः। १ । २ । ७४ ॥ स च शिवकुबेरयोः स्थानम्। तस्य परिमाणं यथा। "जठरदेवकूटौ मेरोः पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः। एवमपरेण पवनपारिपात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ"। इति श्रीभागवतम् ॥ (अयं हि बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः ॥)

कैलासनिकेतनः, पुं, (कैलासः निकेतनं यस्य ।) शिवः। इति कविकल्पलता ॥

कैलासौकाः, [स्] पुं, (कैलासः ओकः स्थानं आलयोऽस्य ।) कुबेरः। इति हेमचन्द्रः ॥

कैवर्त्तः, पुं, (के जले वर्त्तते। वृत् + अच् अलुक् समासः। ततः स्वार्थे अण् ।) खनामख्यातवर्णसङ्करजातिः। स तु वेश्यागर्भे क्षत्रियशौरसजातः। इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः। दासः २ धीवरः ३। इत्यमरः। १।१०।१५॥ दाशेरकः ४ जालिकः ५। इति जटाधरः ॥ (यथा, मनुः। १० । ३४ ।

"निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः" ॥

अस्य टीकायां कुल्लूकभट्टेन यदुक्तं तदयथा। "ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रकृतायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति। यमार्य्यावर्त्तदेशवासिनः कैवर्त्तशब्देन कीर्त्तयन्ति" ॥)

कैवर्त्तमुस्तं, क्ली, (के जले जलयुक्तभूमौ वर्त्तते जायते इति केवर्त्तं ततः स्वार्थे अण्। कैवर्त्तं च तत् मुस्तञ्चेति कर्म्मधारयः।) कैवर्त्तमुस्तकम्। इति शब्दरत्नावली ॥

कैवर्त्तमुस्तकं, क्ली, (कैवर्त्तमुस्त + स्वार्थे कन्। यद्वा कैवर्त्तस्य प्रियं मुस्तकम्।) कैवर्त्तीमुस्तकम्। इत्यमरटीकायां भरतः ॥

कैवर्त्तिका, स्त्री, (कैवर्त्ती जलस्था इव। इवार्थे कन् ततो ङीष्।) मालवे प्रसिद्धो लताविशेषः। तत्पर्य्यायः। सुरङ्गा २ लता ३ वल्ली ४ दशाराख्या ५ रङ्गिणी ६ वल्लरङ्गा ७ सुभगा ८। अस्या गुणाः। लघुत्वम्। रुच्यत्वम्। कषायत्वम्। कफकासश्वासमन्दाग्निदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥

कैवर्त्तिमुस्तकं, क्ली, (कैवर्त्ताः कैवर्त्तपत्न्याः प्रियं मुस्तकम्। संज्ञायां "ङ्याप्नोः"। ६ । ३ । ६३। इति वा ह्रस्वः।) कैवर्त्तीमुस्तकम्। इत्यमरटीका ॥

कैवर्त्ती, स्त्री, (के जले वर्त्तते इति। वृत् + अच्। केवर्त्ता जलस्था सा एव इति स्वार्थे अण् ततो ङीष्।) परिपेलम्। इति वैद्यकम् ॥ कैवर्त्तपत्नी च ॥

कैवर्त्तीमुस्तकं, क्ली, (केवर्त्ता कैवर्त्तपत्न्याः प्रियं मुस्तकम्। संज्ञायां "ङ्याप्नोः"। ६ । ३ । ६३। इति विकल्पे ह्रस्वविधेरत्र ह्रस्वाभावः।) मुस्ताप्रभेदः। इति भरतः ॥ केओटमुता इति भाषा। केशुर इति नीचोक्तिः। केशुरिया मुथा। इति सारसुन्दरी ॥ तत्पर्य्यायः। कुटन्नटम् २ दशपुरम् ३ वानेयम् ४ परिपेलवम् ५ भवम् ६ गोपुरम् ७ गोनर्दम् ८ इत्यमरः। २। ४। १३१ ॥ दाशपुरम् ९ दाशपूरम् १० दशपुरम् ११ दशपूरम् १२ परिपेलम् १३ पारिपेलम् १४ कैवर्त्तमुस्तकम् १५ कैवर्त्तिमुस्तकम् १६। इति तट्टीका ॥ वनसम्भवम् १७। इति रत्नकोषः ॥ धान्यम् १८ शीतपुष्पम् १९ जीर्णबुध्नकम् २० वन्यम् २१ सितपुष्पम् २२। इति जटाधरः ॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवायुव्रणदाहामशूलरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ हिमत्वम्। तिक्तत्वम्। कषायत्वम्। कान्तिदत्वम्। पित्तविसर्पकुष्ठकण्डूविषनाशित्वञ्च। इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताक्षति ॥ इति भावप्रकाशः ॥

कैवलं, क्ली, (के शिरोऽवच्छेदे वलते संवृणोति केशादेरतिसौरभ्यकरणात् के जले वलते गुणाधिक्यात् वर्द्धते वा। वल + अच् ततः स्वार्थे अण्।) विड्वरम्। इति रत्नमाला ॥ (केवलस्य भावः इति केवलब्दव्दात् ब्राह्मणादित्वात् ष्यञ्।)

कैवल्यं, क्ली, (केवलस्य सर्व्वोपाधिवर्জ্জितस्य भावः इति। केवल + ष्यञ्।) मुक्तिः। इत्यमरः। १।५।६॥ (तथा च पातञ्जले कैवल्यपादे ३ सूत्रं यथा,

"निमित्तमप्रयोजकं प्रकृतीनां
वरणभेदस्तु ततः क्षेत्रिकवत्" ॥

निमित्तं धर्म्मादि तत्प्रकृतीनामर्थान्तरपरिणामेन प्रयोजकं न हि कार्य्येण कारणं प्रवर्त्तते। वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मादनुष्ठीयमानाद् धर्म्मात् वरणमावरणकं अधर्म्मादि तस्यैव विरोधित्वात् भेदः क्षयः क्रियते तस्मिन् प्रतिबन्धे क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति। क्षेत्रिकवत्। यथा, क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलं निनीषुर्ज्जलप्रतिबन्धकवरणभेदमात्रं करोति। तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं यद्धाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः। यतः यावत् योगादिप्रभावेण अधर्म्मावरणभेदो न भवेत् तावत् कुतस्तत्त्वज्ञानं किञ्च यावत्तत्त्वज्ञानप्रभावात् सर्व्वा वासना न क्षयं यान्ति तावत् कृतश्चैव कैवल्याप्तिरिति ध्येयम्। तथा च तत्रैव । ११ ।

"हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः" ॥

वासनानामनन्तरानुभवो हेतुरस्यानुभवस्य रागादयस्तेषामविद्येति साक्षात् पारम्पर्य्येण च हेतुः। फलं शरीरादि सुखादि च। आश्रयो बुद्धिरालम्बनं यदेवानुभवस्य तदेव वासनानामतस्तैर्हेतुफलाश्रयालम्बनैरनन्तानामपि वासनानां संगृहीतत्वात्तेषां हेतूनामभावे ज्ञानयोगाभ्यां दग्धक्लेशबीजकल्पत्वे विहिते निर्म्मूलत्वाच्च वासनाः प्ररोहं न यान्ति न वा कार्य्यमारभन्त इति तासामभावः॥ अत्र भगवद्गीतायाम्। ४। ३७।

"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জुन!।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा"॥

अतएव सत्त्वादिषु गुणेषु कृतार्थेषु भोगापवर्गादिलक्षणेषु पुरुषार्थेषु समाप्तेषु कैवल्यमित्येव सारसिद्धान्तवाक्यम्। यथा, पातञ्जले। ३३।

"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"।

समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भवे क्षणेषु यदि वा चिच्छक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेऽवस्थानं तत् कैवल्यमुच्यते। इत्थं सर्व्वेष्वेव दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनोरूपमुपपद्यते। अधिष्ठातृत्वञ्च चिद्रूपत्वं तच्च जड़ात् वैलक्षण्यमेव चिद्रूपतया यदधितिष्ठति तदेव भोग्यतां नयति यच्च चेतनाधिष्ठितं तदेव सकलव्यापारयोग्यं भवति। एवञ्च सति नित्यत्वात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तद्विहाय दर्शनान्तराणां नान्या गतिः तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरिहारेण स्वरूपे प्रतिष्ठा चितिशक्तेः कैवल्यम्। यथा,

"पुरुषस्य दर्शनार्थमुक्ता चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्य पुरुषसत्त्वे प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोर्थानभिधाय ग्राह्यान्तेऽप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतम्"। परं जन्मौषधिमन्त्रसमाधिजन्यासु सिद्धिषु सतीष्वपि ज्ञानभक्त्यादियोगेन येन केनचिदुपायेन भगवदनुकम्पालाभ एव कैवल्योपायः। पातञ्जलदर्शनटीकाकृत् महाराजभोजाधीश्वरोऽप्येतदङ्गीकृत्य कैवल्यपादस्य टीकायां मङ्गलाचरणं कृतवान्। यथा,—

"यदाद्यैव कैवल्यं विनोपायैः प्रजायते।
तमेकमजमीशानं चिदानन्दमयं स्तुमः" ॥

कोकाग्रः

कृष्णयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "कठवल्लीतैत्तिरीयक-ब्रह्मकैवल्यश्वेताश्वतरेत्युपक्रम्य कृष्णयजुर्व्वेदगतानां दात्रिंशदुत्तरशतोपनिषदां सङ्ग्रहावतरणिका शान्तिः" ॥)

कैशिकं, क्ली, (केशानां समूहः । "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" । ४ । २ । ४८ । इति पक्षे ठक् ।) केशसमूहः । इत्यमरः । २ । ६ । ९९ ॥

कैशिकः, पुं, (केशेषु केशविन्यासादौ साधुः । केश + ठक् ।) शृङ्गाररसः । इति शब्दरत्नावली जटाधरश्च ॥

कैशिकी, स्त्री, (कैशिक + स्त्रियां ङीप् ।) नाटक-वृत्तिविशेषः । यथा । "भारती सात्वती कैशिक्या-रभट्यौ च वृत्तयः" ॥ इति हेमचन्द्रः ॥

कैशोरं, क्ली, (किशोरस्य भावः । किशोर + अण् ।) किशोरावस्था । इति शब्दरत्नावली ॥ सा तु दशमवर्षोत्तरयच्छद्दशवर्षावधिः । इति स्मृतिः ॥

कैशं, क्ली, (केशानां समूहः । इति व्यञ् ।) केश-समूहः । इत्यमरः । २ । ६ । ९९ ॥

कोकः, पुं, (कोकते आदत्ते चक्रसुधामिति । कुक् आदाने + घञ्यच् ।) चक्रवाकः । (यथा, गीतगोविन्दे ५ । १७ ।

"कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना" ॥) वृकः । (यथा, रामायणे । ५ । २६ । ९ ।

"वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता" ॥) ज्येष्ठी । खर्ज्जूरीवृक्षः । भेकः । इति मेदिनी ॥ विष्णुः । इति चिकाण्डशेषः ॥

कोकड़ः, पुं, (कोकं कोकरवं डकध्वनिवत् ध्वनिमित्यर्थः खाति गृह्णातीति । खा + कः । तस्य डत्वम् ।) विलेशयमृगविशेषः । तत्पर्य्यायः । अविनः २ कोकवाचः ३ विलेशयः ४ चमरपुच्छः ५ लोमशः ६ धूम्रवर्णकः ७ । तन्मांसगुणाः । श्वासानिल-कासहरत्वम् । पित्तदाहकरत्वञ्च । इति राज-निर्घण्टः ॥

कोकदेवः, पुं, (कोकश्चक्रवाकः स इव दीव्यति क्रीड़-तीति । दिव् + अच् ।) कपोतः । इति राज-निर्घण्टः ॥

कोकनदं, क्ली, (कोकान् चक्रवाकान् नदति नादयति वातविकासेन । कोक + नद् + अन्तर्णिच् ततोऽच् मूलविभुजादित्वात् को वा ।) रक्तकुमुदम् । रक्त-पद्मम् । इति मेदिनी । (यथा, गीतगोविन्दे । १०।५। "लीलानलीनाभमपि तन्वि ! तव लोचनं धारयति कोकनदरूपम्" । अस्य पर्य्याया यथा,— "रक्तं कोकनदं पद्मलक्ष्यमन्यदलोहितम्" । इति वैद्यकरत्नमालायाम् ॥)

कोकनदच्छविः, पुं, (कोकनदस्य रक्तोत्पलस्य छविरिव छविर्दीप्तिर्यस्य ।) रक्तवर्णः । तद्वति त्रि । इत्यमरः ।

कोकबन्धुः, पुं, (कोकयोः चक्रवाकयुगलयोर्दिवस-प्रभया संयोगकारितया बन्धुरिव ।) सूर्य्यः । इति शब्दचन्द्रिका ।

कोकायः, पुं, (कोकः खर्ज्जूरीवृक्षस्तदयमागोऽस्य ।) समष्ठिलवृक्षः । इति राजनिर्घण्टः ॥

कोकाहः, पुं, (कोक इव आहन्ति वेगेन गच्छतीति । आ + हन् + डः ।) श्वेतघोटकः । तत्पर्य्यायः । कर्कः २ । इति हेमचन्द्रः ॥ क्वचित् पुस्तके काकाह इति पाठः ॥

कोकिलः, पुं, (कुक् आदाने + "सलिकल्यनिमहि भडि-मडिशडिपिण्डितुण्डिकुकिभूभ्य इलच्" । उणां १ । ५५ । इति इलच् ।) खगामख्यातकृष्णवर्णमधु-रस्वरपक्षी । (यथा, रामायणे । २ । ५२ । २ ।

"भास्करोदयकालोऽयं गता भगवती निशा । असौ सुकृष्णविहगः कोकिलस्तात ! कूजति" ॥) तत्पर्य्यायः । वनप्रियः २ परभृतः ३ पिकः ४ । इत्यमरः । २ । ५ । १९ ॥ परपुष्टः ५ कालः ६ वसन्तदूतः ७ ताम्रास्यः ८ गन्धर्व्वः ९ मधुगायनः १० वासन्तः ११ कलकण्ठः १२ कामान्धः १३ काकलीरवः १४ कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७ मदनपाठकः १८ । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—हारीते १ स्थाने ११ अध्याये । "कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनस्तथा" ॥ मूषिककल्पान्तर्गतसुक्र-विम-जातीयविशेषः । तद्भक्षणजनितलक्षणानि यथा,— "यस्यास्यः कोकिलेनेव ज्वरो दाहश्च दारुणः" ॥ इति सुश्रुतेन कल्पस्थाने षष्ठाध्याय उक्तम् ॥) सुस्वरः । इति चिकाण्डशेषः । (छन्दोविशेषः । इति वृत्तरत्नाकरः ॥)

कोकिलनयनः, पुं, (कोकिलस्य नयनमिव रक्तवर्णं पुष्पमस्य ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां रमानाथः ॥ (कोकिलाक्षशब्देऽस्य विवृतिर्द्रष्टव्या ॥)

कोकिलाक्षः, पुं, (कोकिलस्याक्षीव रक्तं पुष्पमस्य । "अक्ष्णोऽदर्शनात्" । ५ । ४ । ३९ । इति अच् ।) वृक्षविशेषः । कुलियाखाड़ा इति भाषा । तालम खाना इति हिन्दी भाषा ॥ तत्पर्य्यायः । इक्षुगन्धा २ काण्डेक्षुः ३ इक्षुरः ४ क्षुरः ५ । इत्यमरः । २ । ४ । १०४ ॥ शृगाली ६ शृङ्खली ७ शुरकः ८ शृगालघण्टी ९ वज्रास्थिः १० शृङ्खला ११ वज्र-कण्टकः १२ इक्षुः १३ इक्षुरकः १४ वज्रः १५ शृङ्खलीका १६ पिकेक्षणा १७ पिच्छिला १८ । इति राजनिर्घण्टः ॥ श्वेतस्य तस्य पर्य्यायः । वीर-तरुः २ चित्तुरः ३ क्षुरकः ४ शुक्लपुष्पः ५ । रक्तस्य तस्य पर्य्यायः ॥ क्षुरकः २ अतिच्छत्रः ३ । इति रत्नमाला ॥ सामान्यस्य तस्य गुणाः । आमवात-वातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥ मधुरत्वम् । शीतत्वम् । पित्तातिसारनाशित्वम् । शुक्रकफबलरुचिकारित्वम् । सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥ (श्वेतकोकिलाक्षमूलं छागीदुग्धेन पिष्टं सत् भक्षितं क्षयरोगं नाशयेत् । यदुक्तं गारुड़े १९३ अध्याये ।

"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् । त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्" ॥)

कोकिलाक्षकः, पुं, (कोकिलाक्ष + स्वार्थे कन् ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां स्वामी ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—

कोकिला

"कोकिलाक्षकनिर्य्यूहः पीतस्तच्छाकभोजिना । क्षयाभ्यास इव क्षोणं वातरक्तं नियच्छति" ॥ इति वाभटे चिकित्सास्थाने २२ अध्याये ॥)

कोकिलावासः, पुं, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । कोकिलानां आवासः ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

कोकिलेक्षुः, पुं, (कोकिल इव कृष्णवर्णः इक्षुः ।) कृष्णेक्षुः । इति राजनिर्घण्टः ॥

कोकिलेष्टा, स्त्री, (कोकिलस्य इष्टा प्रिया ।) महा-जम्बूः । इति राजनिर्घण्टः ॥

कोकिलोत्सवः, पुं, (कोकिलानां उत्सवोऽत्र ।) आम्र-वृक्षः । इति राजनिर्घण्टः ॥

कोङ्कणं, क्ली, (कोङ्कणे भवं कोङ्कणदेशस्थैः कर्म्म-कारैः निर्म्मितमिति भावः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् तस्य लुक् ।) शस्त्रभेदः । इति हेमचन्द्रः ॥

कोङ्कणः, पुं, देशविशेषः । इति निघण्टः । कोकण इति भाषा ॥ (यथा, आगमे ।

"अथाभ्यङ्गं समारभ्य कटिदेशस्य मध्यगे । समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः" ॥ देशोऽयं कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते । यथा, महाभारते । ६ । ९ । ५९ ।

"अथापरे जनपदा दक्षिणा भरतर्षभ" ! । "कौकुट्टकास्तथा चोलाः कोङ्कणा मलवा नराः" ॥ क्वचिदेकवचनत्वमपि दृश्यते । यथा, स्मृतिसंग्रहे ।

"मालवे गौड़देशे च सिन्धुदेशे च कोङ्कणे । व्रतं चूड़ां विवाहञ्च वर्ज्जयेत् मकरे गुरौ" ॥)

कोङ्कणासुतः, पुं, (कोङ्कणे तदाख्यप्रदेशे भवा । अण् तस्य लुक् च । कोङ्कणा रेणुका तस्याः सुतः पुत्रः ।) परशुरामः । इति शब्दमाला ॥

कोचः, पुं, (कुच् + ज्वलादित्वात् कर्त्तरि घः ।) जातिविशेषः । स तु मांसच्छेदिगर्भ तीवरस्यौरस-जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कोजागरः, पुं, (को जागर्त्ति अस्यां पौर्णमासी-निशायां इति लक्ष्मीं देव्या उक्तिर्यत्र समये । पृषोदरादि साधुः ।) आश्विनी पूर्णिमा । तत्पर्य्यायः । शारदी २ द्यूतपूर्णिमा ३ शरत्पर्व्व ४ कौमुदी ५ । इति चिकाण्डशेषः ॥ अथ कोजागरव्रतादीनि । तत्र ब्रह्मपुराणम् ।

"आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकाव्रजात् । आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम् ॥ तस्मात् तत्र नरैर्मार्गाः खगेन्द्रस्य समीपतः । शोधितव्याः प्रयत्नेन भूषितव्याश्च सर्व्वतः ॥ पुष्पार्घ्यफलमूलौघसर्व्वपक्वरसैस्तथा । वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥ सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सगन्धवैः । दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥ स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजितैः सुरैः । पूज्याश्च सर्व्वतैस्तत्र तथा द्वारोर्द्ध्वभित्तयः ॥ द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः । यवाऽक्षतघृतोपेतैस्तण्डुलैश्च सुतर्पितः ॥

संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ।
रुद्रः सभार्य्यः स्कन्दश्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्ऋतावृतः ।
उरभ्रवद्भिर्वरणो गजवद्भिर्विनायकः ॥
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ।
ततः पूज्यो निकुम्भोऽपि समाधेस्तिलतण्डुलैः ॥
सुगन्धिभिर्हृतोपेतैः क्षुरराख्यैश्च भूरिभिः ।
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ॥
वह्निपार्श्वगतैर्नैया दृष्ट्वा क्रीड़ाः प्रयत्नविधाः" ॥*॥
लिङ्गपुराणे यथा.—
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतं स्थिरम् ।
सुगन्धिर्निशि सद्वेश्मश्वाद्यैर्जागरणञ्चरेत् ॥
निशीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी ।
तस्यै वित्तं प्रयच्छामि यश्चैः क्रीड़ां करोति यः ॥
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत्" ॥
इति तिथ्यादितत्त्वम् ॥ (अत्र निशायां बन्धुभिस्तैः क्रीड़यित्वा लक्ष्मीप्रसादात् धनभाग्भवेत् । अत्र-क्रीड़ानियमश्च चतुरङ्कशब्दे द्रष्टव्यः ॥)

कोटः, पुं, (कुट्यते प्रताप्यते शत्रुरत्र अनेन वा । दुर्ग-माश्रित्य प्रबलविपक्षमपि प्रतापयितुं शक्यते इत्यर्थः । कुट प्रतापने + अधिकरणे करणे वा घञ् ।) दुर्गम् । इति कुटशब्दार्थे मेदिनी । गड़ कोल्লা इति च भाषा । (कुट् + भावे घञ् । कौटिल्यम् प्रतापनम् ॥)

कोटकः, पुं, (कुट् + कर्त्तरि ण्वुल् ।) गृहकारकः । घरामि इति भाषा । स तु कुम्भकार्य्यां गर्भे अट्टालिकाकारस्त्रौरसजातः । इति ब्रह्मवैवर्त्ते पुराणम् ॥

कोटरं, क्ली पु, (कोटं कौटिल्याकारं स्थानं गच्छ-मिति यावत् । रातीति । रा + कः ।) वृक्ष-स्थितगह्वरम् । गाछेर खोड़ोल इति भाषा । तत्पर्य्यायः । निष्कुहः २ । इत्यमरः । २ । ४ । १३ ॥ निर्गूढः ३ कोटरः ४ । इति शब्दरत्नावली ॥ प्रान्तरम् ५ । तरुविवरम् ६ । इति जटाधरः ॥ (कोटशब्दात् घतुरर्थ्यां अश्वरादित्वात् रः । घां, ४ । २ । ८० ॥ दुर्गसन्निहितदेशादौ, त्रि ॥)

कोटरावत्, क्ली, (कोटरान्वितानां तरूणां वनम् । पूर्ब्बदीर्घत्वं मतुप्च ।) सकोटरवृक्षयुक्तवनम् । इति मुग्धबोधटीकायां दुर्गादासः ॥

कोटरी, स्त्री, (कोटं कौटिल्यं रीणाति गच्छतीति । रीगतौ + क्विप् ।) नमा स्त्री । इत्यमरः । २ । ६ । १७ ॥ (कोटं कुटिलस्वभावं रात्तसासुरा-दिकं रीणाति हन्ति । री + क्विप् ।) चण्डिका ॥ इत्यमरटीका ॥

कोटवी, स्त्री, (कोटं कौटिल्यं निर्गच्छन्तां वाति गच्छतीति । कोट + वा गमनहिंसयोः "आतो-ऽनुपसर्गे कः" । ३ । २ । ३ । इति कः । ततो गौ-रादित्वात् ङीष् ।) चिबुका स्त्री । इत्यमरटीका । (कोटं दुर्गं दुर्गनामानमसुरं वाति गाश्रयतीति ।) दुर्गा । इति धरणी ॥

कोटिः, स्त्री, (कोट्यते क्रियतेऽनया । कुट छेदे । "सर्व्वधातुभ्य इन्" । उणां । ४ । ११७ । इति इन् । वाऽऽलकात् गुणः ।) अस्त्रादेः कोणः । (यथा, रघुवंशे । ७ । ४६ ।
"हतान्यपि श्येननखायकोटि
श्चासक्तकेशानि चिरेण पेतुः" ॥)
उत्कर्षः । शतलक्षसङ्ख्या । क्रोर इति भाषा ॥ (यदुक्तं अङ्कशास्त्रे ।
"एकं दशं शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्ब्बुदमेव च" ॥)
धनुरग्रम् । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । १ । ४० । २२ ।
"तस्य स्कन्धे स्थितं सर्पं क्रुद्धो राजा समाहरत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत" ॥)
(रेखा । यथा, कुमारे । २ । २६ ।
"आवर्ज्जितजटामौलिविलम्बिग्रन्थिकोटयः ।
रुद्राणामपि मूर्द्धानः स्पृशद्भिरुपसर्पिभिः" ॥
वादविचारः । संशयनिर्णयाय पूर्ब्बपक्षः । यथा, गादाधरीसंग्रहहेतुक्तिः ।
"विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः" ।
जीवावयवशुक्लचिकोवादिक्षेत्रावयवरेखाभेदः । यथा,
"इष्टाद्बाहोर्यः स्यात् तत्सर्द्धिन्यां दिशीतरोबाऽऽः ।
स्पृशे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः" ॥
सिद्धान्तशिरोमण्युक्तराशिचक्रस्य क्षतीयांशः । यथा,
"त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्याद-युग्मयुग्मसंज्ञा च तेषां । अयुग्मे पदे यातमेष्यन्तु युग्मे भुजबाऽऽहीनं त्रिभं कोटिरक्षा" ॥ छाया-निरूपणार्थं कल्प्यमानक्षेत्रावयवरेखाविशेषः । यथा, सिद्धान्तशिरोमणौ ।
"दिक्सूत्रसम्पातगतस्य शङ्को-
श्छायाग्रपूर्ब्बापरसूत्रमध्यम् ।
दोर्दोः प्रभा वर्गवियोगमूलं
कोटिर्नरात् प्रागपरा ततः स्यात्" ॥*॥
"दिक्सम्पातस्थस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्ब्बापरसूत्रस्य च यदन्तरं स दोरित्युच्यते । दो-श्छाययोर्वर्गान्तरपदं पूर्ब्बपरा कोटिः" । इति ॥ चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं क्षेत्रावयवविशेषः । यथा, तत्रैव "योऽधो नरो दिनशतः स विधो-रुदयशृङ्गान्वितो मस मता खलु सैव कोटिः" ॥ अपि च अर्कस्य योऽसौ अधः शृङ्गोयस्य ऊर्द्धशृङ्गा युक्तश्चेत् तर्ह्येव कोटिर्भवतीति । यथा, तत्रैव ।
"यो रवेरधः शृङ्गोरसौ विधोरूर्द्धशृङ्गया युतः ।
सैव कोटिर्मम मता । अत्रोपपत्तिः । इष्टार्कचन्द्रो-र्याम्योत्तरभावेन यदन्तरं स भुजः । ऊर्द्धाधो-भावेन यदन्तरं सा कोटिः । सा चैव भवति । उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदारविशृङ्गोर-भावात् प्राग्विशृङ्गोरेव कोटिः । यदा निशि रवेरधः शृङ्गः तदा स शृङ्गोर्विधोरुदयशृङ्गया युतो यावां-स्तावत् तयोर्यत्सख्ययोः ऊर्द्धाधरमन्तरं सैव कोटि-रुचिता । यतो ग्रहा पूर्ब्बवेलात्मनोऽवस्थानवशेन

शृङ्गिणः शृङ्गमुन्नतमवलोक्यम् । अतः खाव स्थानसमसूत्राद्दूर्द्धरूपिण्या कोट्या भवितव्यम् । भुजकोटिकर्णक्षेत्रं त्र्यस्रं दृक्तुल्यत आदर्शवत् सम्मुखं यथा भवति तथा कल्प्यम् । किञ्च, उदया-स्तसूत्रकल्पितक्षेत्रावयवविशेषः । तत्रैव यथा,—
"सूत्राद्दिवा शृङ्गुतलं यमग्रं
याम्यां गतं हि द्युनिशं कुजोर्द्धे ।
अधश्च सौम्यां निशि सौम्यमस्मात्
सदृग्युक्तियुक्तं ऋतलं निरुक्तम् ॥
सौम्याग्रकाग्राद्भृतलं हि याम्यं
याम्याग्रकाग्रात् पुनरेव याम्यम् ।
तदन्तरैक्यं समहृत्तखेट-
मध्यांशजीवां भुवि बाऽऽभाऽऽः ।
दृग्ज्यां श्रुतिं चाथ तयोस्तु कोटिं
पूर्ब्बापरां वर्गवियोगमूलम्" ॥
"क्षितिजस्याहोरात्रवृत्तसम्मातयोर्यद्धं सूत्रमुद-यास्तसूत्रम् । यच्छङ्कागात् तस्याः शृङ्गुः तस्य तलं उदयास्तसूत्रात् दक्षिणतो भवति । यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम् । अधस्तु उत्तरतो गतम् । अतो निशि उत्तरं ऋतलम् । अथ भुज उच्यते । उत्तरगोलेऽग्रोत्तरं ऋतलं याम्यम् । अतस्तेनोनाग्रा बाऽऽर्भवति । बाऽऽर्नामशृङ्गुः प्राचि अपरसूत्रयोरन्तरम् । य-दाऽग्रा शृङ्गुतलादूना तदा तयोरन्तरं दक्षिणं शृङ्गुतलं बाऽऽः स्यात् । एवं समहृत्तप्रवेशादुपरि दक्षिणगोले तु अग्रा याम्या शृङ्गुतलं च याम्यं तयोर्योगे ऋते बाऽऽः स्यात् रविसममण्डलयो-रन्तरांशानां ज्या बाऽऽः । तत्र या दृग्ज्या स कर्णः । तयोर्वर्गान्तरपदं पूर्ब्बापरा कोटिः" ॥)
एका । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥

कोटिकः, पुं, (कोट्या बाऽऽसङ्ख्यया कायति प्रका-शते । कै + कः ।) इन्द्रगोपनामकीटः । इति जटाधरः ॥

कोटिजित्, पुं, (कोटिं पण्डितानां समूहं विचारयत्वे कोटिपरिमितं ग्रन्थं वा जितवान् । कोटि + जि + क्विप् तुगागमश्च ।) कालिदासः । इति त्रिकाण्डशेषः ॥ (भेषाश्रमः । इति शब्दार्थचिन्ता-मणिः ॥)

कोटिपात्रः, पुं, (कोटिरग्रभागः पात्रं यत्राकारमस्य । यद्वा, कोटिरग्रं पात्रे जलांशेऽस्य जलक्षेपणा-दिति भावः ।) केनिपातकः । इति हेमचन्द्रः ॥ केरोयाल इति भाषा ॥

कोटिरः, पुं, (कोटिं असङ्ख्यं राति ददातीति । रा + कः ।) इन्द्रः । गरुडः । इन्द्रगोपकनामकीटः । इति मेदिनी ॥

कोटिवर्षं, क्ली, (कोटिसङ्ख्यानि वर्षाणि उप-स्थितान् शत्रून् प्रति वर्षमत्र । कोट + इच् + वप् ।) वाणपुरम् । इति शब्दरत्ना-वली ॥

कोटिवर्षा, स्त्री, (कोटिभिरग्रभागैर्वर्षति मधु कोटि + इच् + वप् । स्त्रियां टाप् ।) एका । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥

कोट्टवी

(अस्याः पर्य्यायाः यथा।
"स्पृक्काद्वक् ब्राह्मणी देवी मरुन्माला लता लघुः।
रुमुद्वान्ता वधूः कोटिवर्षा लङ्घोपिकेत्यपि" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुणाश्चास्याः स्पृक्काशब्दे ज्ञेयाः॥)

कोटिघ्नः, पुं, (कोट्या अग्रेण घ्नति नाशयति चूर्णीकरोतीत्यर्थः। कोटि + घ्नो + कः।) लोष्टभङ्गसाधनमुद्गरः ॥ इति भरतः॥ मइ इति ख्यात इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २। इत्यमरः। २। ६। १२ ॥ लेष्टुघ्नः ३ कोटीघ्नः ४। इति रत्नकोषः॥ लेष्टुभेदी ५ चूर्णदण्डः ६ लोष्टभङ्गार्थमुद्गरः ७। इति शब्दरत्नावली ॥ लोष्टघ्नः ८। इति जटाधरः ॥ (कोटिरस्त्यस्मीति लोमादित्वात् घ्नः। कोटियुक्ते, त्रि ॥ वासुकीवंशीयनागविशेषः। यथा, महाभारते। १। ५७। ५।
"कोटिघ्नो मानसः पूर्णः घ्नलः पालो हलीमकः" ॥)

कोटिघ्नः, [स्] व्य, (कोटि + वारार्थे चघ्नस्।) कोटिः कोटिः। इति व्याकरणम्।
(यथा, रघौ। २। ४६।
"गाः कोटिघ्नः स्वर्गयता घटोघ्नीः" ॥)

कोटी, स्त्री, (कुट् + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इतीन् ततो वा ङीप्।) खड्गादेरग्रभागः। इत्यमरटीका ॥ एकाघ्नाकम्। इति शब्दरत्नावली। कोटिसङ्ख्या। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, महाभारते। ७। जयद्रथवधपर्व्वणि। ८७। ३०।
"प्रतोदेच्छापकोटीभिर्हुङ्कारैः साधु वाहितैः।
कशापार्ष्णाभिघातैश्च वाग्भिरश्वाभिरेव च" ॥)

कोटीरः, पुं, (कोटीभिः ईरयति प्रेरयति। कोटी + ईर् + णिच् अच्।) जटा। इति चिकाण्डशेषः ॥ (यथा, आनन्दलहर्य्याम्। ३०।
"किरीटं वैरञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्" ॥)
किरीटम्। इति हेमचन्द्रः ॥

कोटीवर्षं, क्ली, (कोटीसङ्ख्यकानि वाणाद्यस्त्राणि विपक्षान् प्रति वर्षन्ति अत्र। कोटी + वृष् + अप्।) वाणपुरम्। इति चिकाण्डशेषः ॥ (इदानीं देवीकोट इत्याख्ययाख्यायते ॥)

कोटीवर्षा, स्त्री, (कोटीं कोटीर्वा वर्षति माधुर्य्यादिस्वादम्। वृष् + अच् + टाप्।) कोटिवर्षा। इति शब्दरत्नावली। पिड़िङ्ग शाक इति भाषा ॥

कोटीघ्नः, पुं, (कोटीं लोष्ट्रादीनां कोटीसंख्यां घ्नति चूर्णयतीति। कोटी + घ्नो + कः।) कोटिघ्नः। इत्यमरटीकायां भरतः ॥

कोट्टं, क्ली, (कुट्टयते विपक्षोऽस्मिन् अत्र वा। कुट्ट + अधिकरणे घञ्। निपातनात् गुणाभावः।) दुर्गम्। इति हेमचन्द्रः। केल्লা गड़ इत्यादि भाषा ॥

कोट्टः, पुं, (कुट्टान्ते घ्नत्यवोऽत्र। कुट्ट छेदे + घञ्। निपातनात् गुणः।) दुर्गपुरम्। इति लिङ्गादिसंग्रहे अमरः ॥

कोट्टवी, स्त्री, दुर्गा। इति चिकाण्डशेषः ॥ नम्रा स्त्री। इति शब्दरत्नावली ॥ नम्रमुक्तकेशी नारी।
"या त्ववासा मुक्तकेशी कोट्टवी नम्रिका च सा" ॥
इति जटाधरः ॥ (कोट्टं कुट्टनं छेदनं खण्डनमस्येति यावत् वाति हिनस्ति निवारयतीत्यर्थः। यद्वा, कोट्टे कुट्टने संग्रामे खण्डतस्य रक्षार्थं वाति गच्छतीति। कोट्ट + वा गमनहिंसयोः + कः गौरादित्वात् ङीष्॥) नम्रा स्त्रीरूपिणीदुर्गा।
"तन्माता कोट्टवी नाम नम्रा मुक्तशिरोरुहा।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया" ॥
इति भागवते। १०। ६३। २० ॥
(नहीयं स्वयमाद्याशक्तिरूपिणी दुर्गा किन्त्वस्याः लम्बाख्योऽष्टमो भागः। यथा, हरिवंशे वाणकृष्णयुद्धे १८२ अध्याये २२-२३।
"व्यादिश्यमाने चक्रे तु कृष्णेनाप्रतिभौजसा।
कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा॥
दिगम्बरा देववचनात् प्रातिष्ठच्च कोट्टवी॥
लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः।
चित्राकनकशृङ्खलासु सा च नम्रा स्थितान्तरे" ॥)

कोट्टवीपुरं, क्ली, (कोट्टवाः पुरम्।) वाणपुरम्। इति शब्दरत्नावली ॥

कोट्टारः, पुं, (कुट्ट + व्यारक्प्रत्ययः। पृषोदरात् साधुः। कोट्टं कोटं दुर्गमित्यर्थः ऋच्छति प्राप्नोति। कोट्ट + ऋ + "कर्म्मण्यण्"। इति अण्।) नागरः। कूपः। पुष्करिणीः पाटकः। इति मेदिनी ॥ दुर्गपुरम्। इति लिङ्गादिसंग्रहटीकायां भरतः ॥

कोठः, पुं, (कुठि + अच् निपातनात् नलोपे साधुः।) चक्राकारकुष्ठरोगः। तत्पर्य्यायः। मण्डलकम् २। इत्यमरः। २। ६। ५४ ॥ दुश्चर्म्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५। इति राजनिर्घण्टः ॥ तस्य लक्षणं यथाह माधवकरः।
"असम्यग्वमनो दीर्णपित्तश्लेष्मान्नविग्रहैः।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते" ॥
अन्यच्च। "वरटीदष्टनिकाग्निः कण्डूमान् लोहितोऽसृक्कफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः" ॥ इति रत्नितः ॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसंग्रहे पीतपित्तोदर्द्दाद्यधिकारे।
"अग्निमन्थभवं मूलं पिष्टं पीतञ्च सर्षपा।
पीतपित्तोदर्द्दकोठान् सद्यो हादेव नाशयेत्॥
उदर्द्दोक्ता क्रियाश्चापि कोठरोगे समासतः।
सर्पिः पीत्वा महातिक्तं कार्य्यं शोणितमोक्षणम्" ॥)

कोठरः, पुं, (कुठ्यते छिद्यतेऽसौ। कुठ + अरप्रत्ययः।) अङ्गोठवृक्षः। इति राजनिर्घण्टः ॥ आँकोड़ इति भाषा ॥

कोठरपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः। कोठरपुष्प + ङीप्।) वृद्धदारकः। इति राजनिर्घण्टः ॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कोणः, पुं, (कुणति वादयत्यनेन कुणति वादयतीति वा। कुण शब्दे + करणे घञ्। कर्त्तरि + अच् वा।) वीणादिवादनम्। भेरीप्रभृति यन्त्र वाजाइवार काठी इति भाषा ॥ (यथा, रामायणे २। ३१। २६।
"भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः" ॥)
अस्त्रादेरग्रभागः। तत्पर्य्यायः। पालिः २ अस्रिः ३ कोटिः ४। इत्यमरः। २। ८। ९३ ॥ (यथा, कादम्बर्य्याम्। "कनक कोणैरभिहन्यमानः" ॥)
वाद्यप्रभेदः। रक्षादेरेकदेशः। (यथा, कथासरित्सागरे। १९। ३३।
"खण्डस्याङ्कने तेन चत्वारः खर्णपूरिताः।
कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि" ॥)
लगुड़ः। इति मेदिनी। मङ्गलग्रहः। इति हेमचन्द्रः ॥ शनिः। इति विश्वः ॥ द्वयोर्दिशोर्म्मध्यभागः। इति राजनिर्घण्टः ॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम् ॥ (कोणमात्रम्। यथा, तन्त्रसारे।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्" ॥)

कोणकुणः, पुं, (कोणे मस्तकैकदेशभागे कुणति विचरतीति। कुण् + अच्।) उल्कुणः। इति हेमचन्द्रः। उकुण इति भाषा। (मत्कुणम्। छारपोका इति भाषा। खद्मल इति हिन्दीभाषा ॥)

कोणिः, त्रि, (कुण + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन् बाहुलकात् गुणः।) कुणिः। इत्यमरटीका ॥ कोपा इति भाषा ॥

कोथः, पुं, (कुथ्यते पूतित्वं गम्यते अनेन। कुथ् पूतित्वे + करणे घञ्।) नेत्ररोगभेदः। कथो इति भाषा। (कुथ्यति गुदं क्लिणोति। कुथ् कर्त्तरि अच्। गुह्यक्षयकारकभगन्दर रोगविशेषः। यथा, सुश्रुते।
"मूढ़ेन मांसलुब्धेन यदस्थिग्रस्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्निश्रमपानेनाधः प्रेरितं असम्यगागतं गुदं क्लिणोति तत्र क्षतनिमित्तः कोथ उपजायते"। भावे घञ्। गलनम्। यथा, तत्रैव।
"तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां क्षमयो जायन्ते" ॥)
पूटिते मथिते च त्रि। इति मेदिनीकरहेमचन्द्रौ ॥

कोदण्डं, क्ली, (कु शब्दे + विच्। कौः शब्दायमानो दण्डोऽस्य।) धनुः। इत्यमरः। २। ८। ८३ ॥ (यथा, भागवते ३। २१। ५२।
"विस्फूर्ज्जच्चण्डकोदण्डो रथेनाशयन्नघान्" ॥)

कोदण्डः, पुं, (कोदण्डं धनुः तत्सदृशमाकारो विद्यते अस्य। अर्श आदित्वादच्।) भूः। जनपदविशेषः। इति मेदिनी ॥

कोद्रवः, पुं, (कु + विच्। कौः सन् द्रवतीति। द्रु + अच्। द्रवः। कौ द्रव इति कर्म्मधारयः। केन वायुना द्रवति वा पृषोदरात् पूर्ब्बस्य ओकारादेशे साधुः।) धान्यविशेषः। कोदो इति भाषा। तत्पर्य्यायः। कोरदूषः २। इत्यमरः। २। ९। १३ ॥ कुद्रवः ३। इति तट्टीका ॥ कुद्दालः ४ मदनायकः ५ कोद्रवः ६ कोरद्रूषः ७। इति शब्दरत्नावली ॥

(यथा श्रुतौ। "अयज्ञिया वै कोद्रवाः"॥) अपि च।
"कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्" ॥
इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। व्रणिनां पथ्यकारकत्वम्। कफपित्तहरत्वम्। रूक्षत्वम्। मोहकारित्वम् नूतनस्य तु गुरुत्वञ्च। इति राजनिर्घण्टः॥ परमग्राहित्वम्। वातलत्वम्। इति राजवल्लभः॥

कोपः, पुं,- (कुप्यते इति। कुप् + भावे घञ्।) क्रोधः। इत्यमरः। १। ७। २६॥
(यथा, विष्णुपुराणे १। ११। १३।
"वत्स! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति"॥)

कोपक्रमं, क्ली, (उपक्रम्यते आरभ्यते यत् तत् उपक्रमं क्षत्रादिकम्। उप + क्रम् + कर्म्मणि घञ्। कस्य ब्रह्मणः उपक्रमं सृष्टिः।) ब्रह्मणः सृष्टिः। इत्यमरटीकायां रायमुकुटः॥ (कोपेन क्रम्यते इति। यद्वा, कोपस्य क्रमः उद्योगोऽस्य।) कोपयुक्ते, त्रि॥

कोपनः, त्रि, (कुप् + युच्।) कोपविशिष्टः। इति जटाधरः॥ (यथा, महाभारते १। २९। १६।
"आसीद् विभावसुर्नाम महर्षिः कोपनो भृशम्"॥
पुं, बलिवंशीयः कोपनो नामासुरः।
यथा, हरिवंशे। ४१। ८४।
"शूरभः शूलभस्त्वेव कुपनः कोपनः क्रथः"॥
क्ली, कुप् + णिच् भावे ल्युट्। दोषविकारकारकव्यापारविशेषकोपनिष्पादनम्। यथा, महाभारते अनुगीतायाम्। १४। १७। १३।
"स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्।
अपि वोद्बन्धनादीनि परीतानि व्यवस्यति"॥)

कोपनकः, पुं, (कोपनः कोपशील इव कायति प्रकाशते। कै + कः।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कोपना, स्त्री, (कुप्यतीति। कुप् + ताच्छील्ये युच् + टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २। इत्यमरः। २। ६। ४॥ चण्डी ३। इति जटाधरः॥ भीमा ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। ८।
"कथासि कामिन् सुरतापराधात्
पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढ़ानुतापं
प्रवालशय्याशरणं शरीरम्"॥)

कोपलता, स्त्री, (कोपहेतुर्लता।) कर्णस्फोटालता। इति राजनिर्घण्टः॥

कोपी, [न्] त्रि, 'अवश्यं कुप्यति इति आवश्यके णिनिः।) क्रोधनः। इत्यमरः। ३। १। ३२॥ (यथा, मार्कण्डेये २८। २९।
"सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यमकोपिता।
यतेन्द्रियत्वमावासे नैकस्मिन् वसतिस्थिरम्"॥)
जलपारावते, पुं,। इति राजनिर्घण्टः॥

कोमलं, क्ली,(कौति शब्दायते वाय्वादियोगेन स्रोतोवेगेन वा। कु शब्दे डुमादित्वात् कलच् तस्य मुट् च। वाऽलकात् गुणाः।) जलम्॥ इति मेदिनी॥

कोमलः, त्रि, (कमु कान्तौ + वाऽलकात् कलच् अत उत्वं गुणश्च॥) अकठिनः। नरम इति भाषा। तत्पर्य्यायः। सुकुमारः २ मृदुलः ३ मृदुः ४। इत्यमरः। ३। १। ७८। पेलवः ५। इति जटाधरः॥ मनोज्ञः। इति शब्दरत्नावली॥
(यथा, रघुः। ९। ३५।
"श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो वभुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः"॥)

कोमलकं, क्ली, (कोमल + संज्ञायां कन्।) मृणालम्। इति शब्दचन्द्रिका॥ (स्वार्थे कन्। जलम्॥)

कोमला, स्त्री, (कोमल + स्त्रियां टाप्।) क्षीरिका। इति शब्दचन्द्रिका॥ (वृत्त्यनुप्रासघटकवृत्तिभेदः। क्षीरिकाशब्देऽस्य विवरणं ज्ञेयम्॥)

कोमासिका, स्त्री, (कु ईषत् उमा अतसीवृक्षः स इव आस्ते। आस् + ण्वुल् + टाप् अत इत्वम्। कोः कादेशः।) जालिका। इति हारावली॥ फलेर जालि इति भाषा॥

कोयष्टिः, पुं, (कं जलं यष्टिरिवास्य एषोदरात् अत उत्वे गुणत्वे च साधुः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ५। १३।
"प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्"॥)

कोयष्टिकः, पुं, (कोयष्टि + संज्ञायां कन्।) पक्षिभेदः। कोँड़ापक्षी इति भाषा। इत्यमरः। २। ५। ३५॥

कोरकः, पुं, (कुड्ग संस्त्याने + कर्त्तरि ण्वुल्। लस्य रत्वम्।) कलिका। इत्यमरः। २। ४। १६॥ ("कलिका कोरकः पुमान्" इत्यमरवाक्यं प्रायिकाभिप्रायेण इति बोध्यम्। यतः "कोरकं कुड्मले ऽपि स्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री कुड्मले स्यादिति" च विश्वमेदिनीकाराभ्यामुक्तम्॥)

कोरकः, पुं क्ली, (कुड्ग + ण्वुल्। लस्य रः।) मुकुलम्। (यथा, माघे। ७। २६।
"मरुदवनिरुहां रजोवधूभ्यः
समुपहरन् विधकार कोरकाणि"॥)
कक्कोलकम्। मृणालम्। इति मेदिनी॥ चोरनामगन्धद्रव्यम्। इति जटाधरः॥

कोरङ्गी, स्त्री, (कुरति कोरङ्गीत्याख्यां गच्छतीति कुर् + अङ्गच् गौरादित्वात् ङीष्।) सूक्ष्मैला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायाः यथा, "सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ीगटिः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पिप्पली। इति राजनिर्घण्टः॥

कोरदूषः, पुं, (कोलं संस्त्यानं दूषयति। दूष् + णिच् "कर्म्मण्यण्"। ३। २। १। इत्यण्। लस्य रत्वम्।) कोद्रवः। इत्यमरः। २। ९। १६॥ (यथा, महाभारते। ३। १९०। १८—१९।
"ईदृशो भविता लोको युगान्ते पर्य्युपस्थिते।
वस्त्राणां प्रवरा श्रेष्ठी धान्यानां कोरदूषकः।
भार्य्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये"॥

अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः।
वातलः कफपित्तघ्नः शीतसंग्राहि शोषणः"॥
इति सूत्रस्थाने सन्निविंशेऽध्याये चरकेणोक्तम्॥)

कोलं, क्ली, (कुल् अच् गौरादित्वात् ङीष्। कोली तस्याः फलमित्यण् तस्य लुक् "लुक्तद्धितलुकि"। १। २। ४९। इति ङीषो लुक्।) बदरीफलम्। तत्पर्य्यायः। कुवलम् २ फेनिलम् ३ सौवीरम् ४ बदरम् ५ घोण्टा ६। इत्यमरः। १। ४। ३६॥ पिच्छिलम् ७ स्वादुफलम् ८ बदरीफलम् ९। इति शब्दरत्नावली॥ कोकिलम् १०। इति जटाधरः॥ अपि च।
"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरीकोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं बदरञ्च तत्॥
अम्लाप्रिया कुहा कोलिविषमौ भयकण्टकः"॥
अथ बदरविशेषाणां लक्षणानि गुणाश्च।
"पक्वमानं सुमधुरं सौवीरं बदरं महत्।
सौवीरं बदरं प्रोक्तं भेदनं गुरु शुक्रलम्॥
वृंहणं पित्तदाहास्रक्षयक्षतानिवारणम्।
सौवीराल्लघु संपक्वं मधुरं कोलमुच्यते॥
कोलन्तु बदरं दाहि रुच्यमुष्णञ्च वातहृत्।
कफपित्तकरं चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु दृष्ट्याक्षमास्वजित्"॥
इति भावप्रकाशः॥ बदरादिद्वयं वृक्षगोलकोलौ। बदरीसदृशा घोण्टा वृक्षगोलकोलिः। यदुक्तम्।
"बदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्।
अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते"॥
इति सुभूतिः॥
"हस्तिकोलिर्गोपघोण्टा घोण्टा च बदरीच्छदा।
वृक्षगोलकोलिः कर्कन्धुः" इति। रत्नकोषः॥ केचित्तु कोलादिद्वयं बदरीफले सौवीरादिद्वयं वृक्षगोलकोलाविच्छन्ति॥ स्वामी तु "कर्कन्धुर्बदरी कोलिर्घोण्टा कुवलफेनिलौ। सौवीरं बदरं कोलम्"॥ इति पठति। तत्राद्याश्चत्वारो वृक्षार्थाः अन्ये फलार्था घोण्टा तूभयसृगिति व्याचष्टे। "सौवीरं बदरं कोलं बदरीणां फलं मतम्"। इति कोषान्तरञ्च। इति भरतः॥ * ॥ अस्य गुणाः। अम्लत्वम्। वायुकफनाशित्वञ्च॥ पक्वस्यास्य गुणाः। वायुपित्तनाशित्वम्। स्निग्धत्वम्। सुमधुरत्वम्। सारकत्वञ्च॥ शुष्कस्यास्य गुणाः। कफवायुनाशित्वम्। पित्तविरोधित्वञ्च॥ पुरातनस्यास्य गुणाः। श्रमदृष्ट्यनाशित्वम्। स्निग्धत्वम्। लघुत्वञ्च॥ अस्य मज्जगुणाः। मधुरत्वम्। पित्तच्छर्द्यतिदृष्ट्यनाशित्वञ्च। इति राजवल्लभः॥ * ॥ तोलकपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, चरके कल्पस्थाने १२ अः।
"प्रायो द्वौ द्रंक्षणं विद्यात् कोलं बदरमेव च"॥)
भल्लिचम्। इति राजनिर्घण्टः॥ चव्यम्। इति वैद्यकम्॥

कोलः, पुं, (कोलति कामपि बाधां न सहते इव शूकुं प्रतिधावतीति। कुल + अच्।) शूकरः। (कोलति शब्दते

कोलव

जले इति।) ज्वरः। इत्यमरः। १। १०। २१॥ भेला माड़ इत्यादि भाषा। अङ्गपालिः। घृनिः। चिक्कम्। चिता इति भाषा। (कोलन्ति आकिञ्चन्यङ्कान्यच। कुल + अधिकरणे इलच्चेति घञ्।) क्रोड़म्। इति मेदिनी। देशविशेषः। इति शब्दरत्नावली॥ वस्त्रभेदः। इति धरणी॥ वर्णसङ्करजातिविशेषः। (यथा, हरिवंशे। ३२। १२३।

"पाण्ड्राश्च चोलाश्चैव कोलसर्पाश्च पार्थिव!।
तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः"॥)

स तु क्षेत्रात् तौवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ शस्त्रधारिक्षेच्छजातिविशेषः। स च पूर्ब्बं क्षत्रिय आसीत् सगररोषेणासौ वेदयागादावनधिकारी कृतः। एतद्विवरणं हरिवंशे १४ अध्याये द्रष्टव्यम्॥

(अयन्तु कोलः यजातिवंशीयस्य राज्ञो दुष्मन्तस्य पौत्रेष्वन्यतमः॥ इदानीं पार्ब्बत्यः असभ्यजातिविशेषः। उत्कलदेशादुत्तरभागे ह्यस्य वसतिः। इयन्तु कोलजातिः सत्यप्रिया सरलप्रकृतिः आतिथ्यसत्कारप्रिया चेति उच्यते॥)

कोलकं, क्ली, (कोल् + संज्ञायां कन्। कुल् + कृञादित्वात् वुन् वा।) गन्धद्रव्यविशेषः। काँकला इति भाषा। मरिचम्। इत्यमरः। २। ९। ३६॥

कोलकः, पुं, (कुल् + कर्त्तरि ण्वुल् कृञादित्वात् वुन् वा।) अङ्गोठवृक्षः। इति राजनिर्घण्टः॥ वड़वारवृक्षः। इति जटाधरः॥

कोलकन्दः, पुं, (कोल इव कन्दोऽस्य।) महाकन्दविशेषः। तत्पर्य्यायः। क्रमिघ्नः २ पद्मनः ३ वस्त्रपद्मनः ४ पुटालुः ५ सुपुटः ६ पुटकन्दः ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। क्रमिदोषनाशित्वम्। वान्तिविच्छर्द्दिशमनत्वम्। विस्रदोषनिवारणत्वञ्च। इति राजनिर्घण्टः॥

कोलकर्कटिका, स्त्री, (कोल इव कर्कटिका।) मधुखर्ज्जूरिका। इति राजनिर्घण्टः॥

कोलदलं, क्ली, (कोलं वदरीफलं तद्वद्दलमस्य।) नखीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १३०॥ (नखीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कोलनासिका, स्त्री, (कोलस्य सूकरस्य नासिकेव नासिका।) नग्न् + ण्वुल् टाप् अत इत्वम्।) वह्निशिखावृक्षः। इति हारावली॥

कोलपुच्छः, पुं, (कोलस्य सूकरस्य पुच्छ इव पुच्छोऽस्य।) कङ्कपक्षी। इति हारावली॥

कोलमूलं, क्ली, (कोलस्य वदरीफलस्य मूलवत् मूलमस्य। यद्वा, कोलं वदरीफलमिव मूलमस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

कोलम्बकः, पुं, (कुल् + वाऽलकात् अम्बच्। ततः संज्ञायां कन्।) वीणायाः कायः। इत्यमरः। १। ७। ७॥ स तु तन्त्रीदण्डादिसमुदायः शरीरम्। अलाबुदण्डकुम्भसमुदायस्तन्त्रीहीन इत्यन्ये। इति भरतः॥

कोलवल्ली, स्त्री, (कोलो वराहः तल्लोमवत् वल्ली। वराहलोमतुल्यशूकावत्त्वात् तथात्वम्।) गजपिप्पली। इत्यमरः। २। ४। ९७॥ चव्यम्। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसीवह्निरस्य सा"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

कोलशिम्बी, स्त्री, (कोलस्य सूकरस्य पादाकारा शिम्बिरस्याः। ततो वा ङीष्।) लताविशेषः। आलुकुसी इति भाषा। तत्पर्य्यायः। क्षुद्रफला २ खड्गा ३ सूकरपादिका ४ काकाण्डोला ५ दधिपुष्पा ६ काकाण्डा ७ पर्य्यङ्गपादिका ८। अस्या गुणाः। वायुनाशित्वम्। गुरुत्वम्। उष्णत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ (तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"कोलशिम्बी क्षुद्रफला तथा पर्य्यङ्गपादिका।
कोलशिम्बी समीरघ्नी गुरूष्णा कफवातहृत्।
शुक्राग्निबलदाक्षुद्रक्षया रुचिकृत् बृंहणी गुरुः"॥)

कोला, स्त्री, (कुल् + ज्वलादित्वात् णः ततष्टाप्।) कोलिवृक्षः। इति शब्दरत्नावली॥ पिप्पली। (अस्याः पर्य्याया यथा,—

"पिप्पली चपला ग्रौढ्री वैदेही मागधी कणा।
क्षुण्णोपकुल्या मगधी कोला स्यात्तिक्षतण्डुला"॥)

चव्यम्। इति मेदिनी॥ (अस्याः पर्य्याया यथा,—

"चव्यं तेजोवती कोला नाकुली च विकोषणा"॥

इति वैद्यकरत्नमालायाम्॥)

कोलाहलः, पुं, देशविशेषः। इति शब्दरत्नावली॥ तत्र पुरं कान्यकुब्जम्॥

कोलाहलः, पुं, (कोल एकीभूताव्यक्तशब्दविशेषः तं आहलति आलिखतीति। हल विलेखने + अच्।) वड़विधदूरगाव्यक्तध्वनिः। तत्पर्य्यायः। कलकलः २। इत्यमरः। १। ६। २५॥ कालकीलः ३। इति शब्दरत्नावली॥ (यथा, रामायणे। ३। ३१। ४१।

"ततो हलहलाशब्दः पुनः कोलाहलो महान्।
महान् राक्षसनादस्तु पुनस्तूर्य्यरवो महान्"॥)

कोलिः पुं स्त्री, (कुल् + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इतीन्।) वृक्षविशेषः। कुलगाछ इति भाषा। तत्पर्य्यायः। कर्कन्धुः २ बदरी ३। इत्यमरः। २। ४। ३६॥ कर्कन्धुः ४ बदरः ५ कोली ६ कोला ७ कुवली ८। इति तट्टीकायां भरतः॥ कोलः ९। इति तट्टीका सारसुन्दरी॥ (यथा, गारुड़े १९४ अध्याये।

"जातीपत्रं कोलिपत्रं तथाचैव मनःशिला।
एभिश्चैव कृता वर्त्तिर्वदराभा महेश्वर!।
धूमपानं कासहरं नात्र कार्य्या विचारणा"॥)

कोली, स्त्री, (कोलति पीनत्वेन जायते वर्द्धते वा। कुल् + अच् + गौरादित्वात् ङीष्। यद्वा, कोलि + वा ङीष्।) कोलिवृक्षः इत्यमरटीकायां भरतः॥ (अस्याः पर्य्याया यथा,—

"पुंसि स्त्रियान्तु कर्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोंटा सौवीरं बदरं महत्।
अजप्रिया कुशा कोली विषमोभयकण्टका"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥

कोली

कोशः

न्यग्रोधादिगणे अवहारोऽस्य यथा,—

"कोली कदम्बविल्वा मधुकं मधूकम्"॥

इति सूत्रस्थाने पञ्चदशेऽध्याये वाग्भटेनोक्तम्॥)

कोल्या, स्त्री, (कोलमर्हतीति यत्।) पिप्पली। इति रत्नमाला॥

कोविदः, त्रि, (कुड् शब्दे विच् कौः वेदः तं वेत्ति जानातीति। विद् + "इगुपधेति"। ३। १। १३५। इति कः।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा, भागवते। १। १२। २९।

"इति राज्ञ उपादिश्य विप्रा जातककोविदाः।
लब्धोपचितयः सर्व्वे प्रतिजग्मुः स्वकान् गृहान्"॥)

कोविदारः, पुं, (कुं भुवं विदृणाति विदारयति भूमिं विदार्य्योद्भवतीत्यर्थः। दृ + "कर्म्मण्यण्"। ३। २। १। इति अण्। ततः पृषोदरादि साधुः।) रक्तकाञ्चनवृक्षः। तत्पर्य्यायः। चमरिकः २ कुद्दालः ३ युगपत्रकः ४। इत्यमरः। ३। ४। २२॥ काञ्चनारः ५ कण्डकारकः ६ कान्तपुष्पः ७ करकः ८ कान्तारः ९ यमलच्छदः १० काञ्चनालः ११ ताम्रपुष्पः १२ कुदारः १३ रक्तकाञ्चनः १४। इति जटाधरः॥ विदलः १५। इति शब्दरत्नावली॥ अपि च।

"काञ्चनालः काञ्चनको गण्डारिः श्वेतपुष्पकः"॥

अथ कचनारभेदः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्चाम्रान्तकः स्वल्पकेशरी॥
काञ्चनालो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।
क्रिमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः॥
कोविदारोऽपि तद्वत्स्यात् तयोः पुष्पं लघु स्मृतम्।
रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत्"॥

इति भावप्रकाशः। अस्य गुणाः। कषायत्वम्। संग्राहित्वम्। व्रणरोपणत्वम्॥ दीपनत्वम्। कफवातमूत्रकृच्छ्रनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणाः। धारकत्वम्। रुचिकारित्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च। इति राजवल्लभः॥ (यथा, पाकशास्त्रे।

"कोविदारकलिकातिकोमला
तक्रसिद्धविलतैलभाविता।
हिङ्गुवासकसुवासवासिता
वेसवारसुलितातिशोभदा"॥

पारिजातः। हरिवंशे कोविदारस्य उत्पत्तिकथने एतद्विवृतिर्यथा। १२४। ७०-७१।

"कोऽप्ययं दारुरित्याऽऽरवजानन्तो यतो जनाः।
कोविदार इति ख्यातस्ततः स सुमहातरुः॥
मन्दारः कोविदारश्च पारिजातश्च नामभिः।
स वृक्षो जायते दिव्यो यस्यैतत् कुसुमोत्तमम्"॥)

कोशः, पुं, (कुश्यते संश्लिष्यते। कुश संश्लेषणे + घञ्कर्त्तरि चेति अधिकरणादौ घञ्।) अण्डम्। इति शब्दरत्नावली॥ कुश्यते आच्छाद्यते आयस्थानेभ्यः कोशः। कुष ग निष्कर्षे घञ् कोषो मूर्द्धन्यान्तः तालव्यान्त इत्यन्ये। इति भरतः। क्षताक्षतं हेमरूप्यम्। तत्पर्य्यायः। हिरण्यम् २। इत्यमरः। २। ९। ९१॥ क्षताक्षतं हेम-

रूप्यञ्च मिलितं प्रत्येकञ्च कोशादिद्वयवाच्यम्। क्षतमावर्त्तितं अक्षतमाकरोत्यं चूर्णं घटिताघटितमिति स्वामी॥ क्षतमाभरणीकृतं अक्षतं चूर्णादिरूपमाकरोत्यमिति केचित्। (आवरणविशेषः। यथा, भागवते। २। १। ३४।

"अव्यक्तमाऽऽहृदयं मनश्च
स चन्द्रमाः सर्व्वविकारकोशः"॥

मुकुलम्। यथा, रघौ। ३। ८।

"तिरस्कार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम्"॥)

कोशकारः, पुं, (कोशं करोति त्वक्पत्रादिभिरात्मानमाच्छादयति। कोश + कृ + अण्।) इक्षुः। इति शब्दरत्नावली॥ मूर्द्धन्यमध्योऽप्ययम्॥ (कोशं करोति स्वमुखलालारूपतन्तुभिरात्मानमाच्छादयतीति। कीटविशेषः। गुटिपोका इति भाषा। यथा, भागवते। ६। १। ५२।

"कोशकार इवात्मानं कर्म्मणाच्छाद्य मुह्यति"॥)

कोशफलं, क्ली, (कोशे फलं बीजं अस्य।) कक्कोलकम्। इत्यमरः। २। ६। १४०। (कक्कोलकशब्देऽस्य विवरणं ज्ञेयम्॥)

कोशफला, स्त्री, (कोशे फलं यस्याः।) महाकोशातकी। त्रपुषी। इति राजनिर्घण्टः॥

कोशलः, पुं स्त्री, (कुश् + "इषादित्वात्" उणां। १। १०८। कषः वाऽलकात् गुणः।) अयोध्यानगरी। इति शब्दमाला उणादिकोषश्च। मूर्द्धन्यमध्योऽप्ययम्। (यथा, रामायणे। १। ५। ५।

"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्"॥)

कोशलात्मजा, स्त्री, (कोशलस्य कोशलेन्द्रपतेरात्मजा दुहिता।) कौशल्या। सा तु श्रीरामजननी दशरथराजपत्नी च। इति शब्दरत्नावली॥

कोशलिकं, क्ली, (कुशलाय कर्म्मणे हितमनककार्य्यसिद्ध्यर्थमिति भावः दीयते यत्। कुशल + ठक् निपातनात् पूर्ब्बस्य ओकारत्वम्।) उत्कोचः। इति हेमचन्द्रः। घुस इति भाषा। मूर्द्धन्यमध्योऽप्ययम्॥

कोशाङ्कं, क्ली, (कोश इव अङ्कमस्य।) हत्कटः। इति हारावली॥ ओकड़ा इति भाषा॥ मूर्द्धन्यमध्योऽप्ययम्॥

कोशातकः, पुं, (कोशं शिरःकोशं अतति गच्छति सातत्येन प्राप्नोतीति। अत + क्तुन्।) कचः। इति विश्वमेदिन्यौ। (कोशं वेदात्मकमाकरमतति प्राप्नोतीति वाक्ये। यजुर्व्वेदीयशाखाविशेषः। कठवल्ली उपनिषद्॥)

कोशातकी, स्त्री, (कोशं अततीति। अत + क्तुन्। ततः कोशातक + गौरादित्वात् ङीष्।) पटोली। घोषकः। इति मेदिनी॥ फलशाकविशेषः। झिङ्गा इति भाषा। तत्पर्य्यायः। क्षतच्छिद्रा २ जालिनी ३ क्षतवेधना ४ क्ष्वेड़ा ५ सुतिक्ता ६ घण्टाली ७ मदङ्गफलिनी ८ कर्कशच्छदा ९। अस्या गुणाः। स्निग्धिरत्वम्। कटुत्वम्॥ कषायत्वम्। पित्तवातकफनाशित्वम्। मलाध्मानविशोधनत्वञ्च। इति राजनिर्घण्टः॥ मूर्द्धन्यमध्योऽप्ययम्। महाकोशातकी। राजकोशातकी। यथा।

अथ नेनुआ।

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥
महाकोशातकी स्निग्धा सरा पित्तानिलापहा"॥

अथ तोरइ।

"धामार्गवो पीतपुष्पो जालिनी क्षतवेधना।
राजकोशातकी चेति तथोक्ता राजिमत्फला॥
राजकोशातकी शीता मधुरा कफवातला।
पित्तघ्नी दीपनी श्वासज्वरकासक्षमिप्रणुत्"॥

इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"कोशातकी फलं स्वादु मधुरं वातपित्तनुत्।
विपाके च कफं हन्ति ज्वरे शस्तं प्रदिश्यते"॥

इति हारीते प्रथमस्थाने १० अध्याये॥)

कोशातकी, [न्] पुं, (कोशातकोऽस्यास्तीति। इनिः।) वाणिज्यम्। वणिक्। वाड़वाग्निः। इति विश्वः॥

कोशाम्रः, पुं, (कोशे + आम्र इव फलमस्य।) फलवृक्षविशेषः। कोशाम इति भाषा। तत्पर्य्यायः। क्षमिवृक्षः २ सुकेशकः ३। इति भावप्रकाशः॥ घनस्कन्धः ४ वनाम्रः ५ जन्तुपादपः ६ क्षुद्राम्रः ७ रक्ताम्रः ८ लाक्षावृक्षः ९ सुरक्तकः १०। अस्य गुणः। कुलशोथास्रपित्तव्रणकफापहत्वम्। तत्फलगुणाः। ग्राहित्वम्। वातघ्नत्वम्। अम्लत्वम्। उष्णत्वम्। गुरुत्वम्। पित्तदत्वञ्च। इति भावप्रकाशः॥ कफार्त्तिप्रदत्वम्। विदाहित्वम् विशोफकारित्वञ्च॥ पक्वस्य तस्य गुणाः। मधुरत्वम्। अम्लत्वञ्च॥ पक्वादियुक्तस्य तस्य गुणाः। दीपनत्वम्। रुचिपुष्टिबलकारित्वञ्च। तत्तैलस्य गुणाः। सारकत्वम्। क्षमिकुलव्रणापहत्वम्। अम्लमधुरत्वम्। बल्यत्वम्। पथ्यत्वम्। रोचनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ (रोगविशेषेऽस्य व्यवहारो यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये।

"कारञ्जं वा सार्षपं वा क्षतेषु
क्षेप्यं तैलं श्रियुकोशाम्रयोर्वा"॥)

कोशिका, स्त्री, (कोशः कोश इव पदार्थो वा अस्याः अस्तीति। कोश + पिच्छादित्वात् इलच्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

कोशी, स्त्री, (कुश् संश्लेषे + अच् गौरादित्वात् ङीष्।) उपानत्। जुता मोजा इति च भाषा। तत्पर्य्यायः। पन्नध्री २ पादविरजाः ३ पादरक्षी ४। इति हारावली॥ शुक्ला। इति हेमचन्द्रः। धान्यादिर् मुँया इति भाषा॥

कोषः, पुं क्ली, (कुष्यन्ते आकृष्यन्ते फलपुष्पोत्पादकमधुमयपरागादयो यस्मिन्। कुष् ग निष्कर्षे + घञ्कर्त्तरि चेति अधिकरणे घञ्।) कुड्मलः। कुँड़ि इति भाषा। खड्गपिधानम्। खाप इति भाषा। (यथा, महाभारते। ४। ४०। १३-१५।

"कस्यायं विपुलः खड्गो रत्नवे कोषे समर्पितः।
हेमसूत्ररनाकृष्यो नैवध्यो भारसाधनः॥
कस्य पाण्डुनखे कोषे ग्रायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः॥
कस्य हेममये कोषे सुतीक्ष्णे पावकप्रभे।
निस्त्रिंशोऽयं गुरुः पीतः शैक्ष्यः परमनिर्व्रणः"॥)

अर्थसमूहः। (यथा, रघौ। ५। १।

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम्"॥)

दिव्यम्। (यथा, राजतरङ्गिण्यां। ५। ३३५।

"ततो निक्षिप्य चरणं रत्नाक्ते मेषचर्मणि।
कोषं चक्रतुरन्योऽन्यं सखड्गौ नृपडामरौ"॥)

अण्डम्। क्षताक्षतं हेमरूप्यम्। इत्यमरः। २। ९। ९१। अस्य विवरणं ताम्रशब्दान्ते द्रष्टव्यम्। पात्रम्। जातीकोषः। जायफल इति भाषा। (जातीपत्री। अस्याः गर्भचिन्तामणिग्रन्थे।

"रसं तालं तथा लौहं प्रत्येकं कर्षमात्रकम्।
कर्षद्वयन्तथाभ्रं कर्पूरं वङ्गतान्त्रकम्॥
जातीफलं तथा कोषं गोक्षुरञ्च शतावरीम्।
बलातिबलयोर्मूलं प्रत्येकं तोलकं शुभम्॥
वारिणा वटिका कार्य्या द्विगुञ्जा फलमानतः।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः॥
गर्भिण्या ज्वरदाहघ्नं प्रदरं क्षुतिकामयम्"॥

इति वैद्यकभैषज्यरत्नावल्यां स्त्रीरोगाधिकारे॥) शब्दादिसंग्रहः। इति मेदिनी। (यथा, अमरकोषः॥) भाण्डागारम्। पानपात्रभवकः। योनिः। शिम्बा। इति हेमचन्द्रः॥ धनसादिफलस्यान्तः। इति धरणी॥ शब्दान्तरसंयोगे गोलकवाचकः। यथा सूत्रकोषः नेत्रकोष इत्यादि। इत्यमरटीकायां स्वामी॥ धनसंहतिः। इति जटाधरः॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये।

"कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः"॥)

तत्क्षयगुणाः।

"कोषो महीप्रतेर्जीवो न तु प्राणाः कथञ्चन।
इत्यं हि राजा भूपस्य न शरीरमिति स्थितिः॥
धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च।
आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा॥
धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते।
साधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन॥
अधर्म्माच्च धनं कुर्य्यात्तद्धनं गच्छते परैः।
स्वयं पापस्य पात्रं स्यात् सिंहो हस्तिवधादिव॥
तादात्मिको मूलहरः कदर्य्यस्त्रिविधोऽर्जकः।
उत्पन्नार्थव्ययकरो यो भविष्यद्धनाशया॥
स तादात्मिक आख्यातः कल्याणी तस्य नावतिः।
यः पित्र्यमर्जितं वित्तमन्यायेन तु भक्षयेत्॥
स मूलहर आख्यातस्तदुर्कोऽपि चासुभृत्।
स कदर्य्यस्तु भृत्यात्मपीड़नैरर्थसञ्चयी॥
तद्धनं राजदायादतस्करारणां निधिर्भवेत्।
भिक्षा च राजकोषश्च श्लोकश्लोकेन वर्द्धते॥
व्ययनञ्च धनस्यैव श्लोकश्लोकेन क्षीयते।
कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम्।
भूगुर्व्वर्द्धते राष्ट्रं तद्दृद्धिर्द्धर्म्मवृत्तता।
राज्ञोपायेन संरक्ष्या ग्रामे ग्रामे सधीवराः॥
तेभ्यः क्षविस्तत्सार्था अर्थेभ्यः सर्व्वसम्पदः।
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा
तथा वर्षेषु वर्षेषु कर्षणात् भूगुसञ्चयः।

मुग्धबोधमतम् ॥ (यथा, श्रीमद्भागवते । ५ । १३ । ८ ।
"पदे पदेऽभ्यन्तरवह्निनार्दितः
कौटुम्बिकः क्षुध्यति वै जनाय" ॥)

कौड़विकं, त्रि, (कुड़वस्य वापः । "तस्य वापः" । ५ । १ । ४५ । इति ठञ् ।) कुड़वपरिमितबीजवपनयोग्यक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौणपः, पुं, (कुणपस्त्रिधातुकं शरीरं शवो वा तं भक्षयितुं शीलमस्य । इत्यण् ।) राक्षसः । इत्यमरः । १ । १ । ६२ ॥ (यथा, महाभारते । १ । १७१ । १४ ।
"न कौणपाः प्रक्रियो वा न च देवाश्चनखजः" ॥
वासुकिर्वंशोद्भवः सर्पविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः ।
हिरण्यबाहुः शरदः कक्षकः कालदन्तकः ।
एते वासुकिजा नागाः प्रविष्टा हव्यवाहने" ॥)

कौणपदन्तः, पुं, (कौणपस्य दन्ता इव दन्ता अस्य ।) भीष्मः । इति त्रिकाण्डशेषः ॥

कौण्डिन्यः, पुं, (कुण्डिनस्य स्वनामख्यातमुनिविशेषस्य गोत्रापत्यं इति । गर्गादित्वात् यञ् ।) कुण्डिनमुनिपुत्रः । तत्पर्य्यायः । विष्णुगुप्तः २ । इति त्रिकाण्डशेषः ॥

कौतुकं, क्ली, (कुतुक + प्रज्ञादित्वात् स्वार्थे अण् । कुतुकस्य भावः इति युवादित्वात् अण् वा ।) कुतूहलम् इत्यमरः । १ । ७ । २१ ॥ (यथा, राजतरङ्गिण्यां । ५ । ३६४ ।
"चक्रतुः कौतुकोद्गीवां सभां चित्रार्पितामिव ॥)
अभिलाषः । (यथा, कथासरित्सागरे ।
"पश्यन्त्यास्तं नृपं तस्या जज्ञे कौतुकयोर्द्वयोः ।
अभूदन्योन्यसंमर्दो रचयन्त्या गतागतम्" ॥)
उत्सवः । (यथा, भागवते । ४ । ३ । १३ ।
"कथं सुतायाः पितृगेहकौतुकं
निशम्य देहः सुरवर्य्य ! ईङ्गते" ॥)
धर्म्मे । हर्षः । (यथा, भागवते । १ । १७ । २५ ।
"इत्थं भूमेर्भगवता न्यासितोऽभरा सती ।
श्रीमद्भिरुत्पदन्यासैः सर्व्वतः कृतकौतुका" ॥)
परस्परायातमङ्गलम् । विवाहसूत्रम् । (यथा, कुमारे । ७ । २ ।
"वैवाहिकैः कौतुकसंविधानै-
र्यूने मुहे श्वशुरस्त्रीवर्गम्" ॥)
गीतादिभोगः । इति मेदिनी ॥ गीतादिः । भोगकालः । इति हेमचन्द्रः ॥

कौतूहलं, क्ली, (कुतूहलस्य भावः कर्म्म वा युवादित्वात् अण् । यद्वा, कुतूहलमेव इति प्रज्ञाद्यण् ।) कुतूहलम् । अपूर्ब्ववस्तुदिदृक्षाद्यतिग्रहः । इत्यमरः । १ । ८ । २१ । (यथा, मार्कण्डेये । ८ । १ ।
"भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्रमात् ।
महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" ॥)

कौदालीकः, पुं, (कुं भूमिं दारयतीति । कुदारः । तेन आचरतीति ईकन् रजयो रैक्यात् रस्य लत्वम् ।) कुदालीकः ततः स्वार्थे अण् ।) वर्णसङ्करजातिविशेषः । स तु रजक्यां तीवराज्जातः ।

इति ब्रह्मवैवर्त्तपुराणम् ॥

कौद्रविकं, क्ली, (कोद्रवं तत् निमित्तमस्य इति ठञ् ।) सौवर्चलक्षवणम् । इति राजनिर्घण्टः ॥

कौद्रवीर्यं, त्रि, (कुत्सितं यथा तथा द्रवति इति । एषोदरादित्वात् सिद्धे कोद्रवं कुत्सितधान्यभेदः तस्य भवनं उत्पत्तिस्थानं । "धान्यानां भवने क्षेत्रे खञ्" । ५ । २ । १ । इति खञ् ।) कोद्रवधान्योद्भवयोग्यक्षेत्रम् । इत्यमरः । २ । ९ । ८ । कोदोर क्षेत इति भाषा ॥

कौन्तिकः, पुं, (कुन्तास्त्रेण प्रासेन युध्यते । कुन्तः प्रासः प्रहरणमस्येति वा । ठञ् ।) प्रासिकः । प्रासास्त्रधारी योद्धा । इत्यमरः । २ । ८ । ७० ॥

कौन्ती, स्त्री, (कुन्तिषु देशविशेषेषु भवा । "तत्रभवः" । ४ । ३ । ५३ । इति अण् । ततो ङीष् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥
(अस्याः पर्य्यायाः यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥
पर्य्यायान्तरञ्च यथा,—
"हरेणु रेणुका कौन्ती ब्राह्मणी हेमगन्धिनी" ॥
इति वैद्यकरत्नमालायाम् । गुणाश्चास्या रेणुकाशब्दे बोद्धव्याः ॥)

कौन्तेयः, पुं, (कुन्त्या अपत्यं इति ढक् ।) कुन्तीपुत्रः । स तु युधिष्ठिरादिः । इति महाभारतम् ।
(यथा, भगवद्गीतायाम् । २ । ३ ।
"मा क्लैब्यं गच्छ कौन्तेय ! नैतत्त्वय्युपपद्यते" ॥)
अर्ज्जुनश्च । इति राजनिर्घण्टः ॥

कौपं, क्ली, (कूपे भवं कूपस्येदं वा इत्यण् ।) कूपोदकम् । अस्य गुणाः यथा,—
"कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु ।
तत्क्षारं कफवातघ्नं दीपनं स्निग्धतृत् परम्" ।
इति भावप्रकाशः ॥ (सुश्रुतोक्ता गुणा यथा,—
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु" ॥
कौपसलिलसेवने कालनिर्द्देशः । यथा, तत्रैव ।
"वसन्ते कौपं प्राग्वर्षं वा ग्रीष्मेष्वेवम्" ॥)

कौपीनं, क्ली, (कूपमतनमर्हतीति । "प्राचीनकौपीने अहता कार्य्यतोः" । ५ । २ । २० । इति साधुः ।) पापम् । तत्साधनत्वात् तद्दगोप्यत्वात् गुप्तयञ्जिकमपि । तत्सम्बन्धात् तदाच्छादनमपि । इति सिद्धान्तकौमुदी ॥ अकार्य्यम् । गुह्यदेशः । इत्यमरः ॥ चीरम् । इति मेदिनी ॥ तत्तु मेखलावद्ध्रपरिधेयवस्त्रखण्डम् । कपिनी इति भाषा । तत्पर्य्यायः । कच्छा २ कच्छटिका ३ कक्षा ४ धटी ५ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ७ । ११ । २ ।
"विभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम्" ॥)

कौपोदकी, स्त्री, (कौमोदकी इति एषोदरादित्वात् मस्य पत्वम् ।) कौमोदकी । इति भरतो द्विरूपकोषश्च ॥

कौमारं, क्ली, (कुमारस्य कर्म्म भावो वा । वयोवचनत्वादञ् ।) कुमारावस्था ।
("जातः कुं पृथिवीं पद्भ्यां मारयेत् तत्कुमारकः ।
इति प्रमाणतो विद्धि कौमारं प्राग्वयोऽब्दतः" ॥
इत्युक्तावधिके "कौमारं पञ्चमावधि" । इत्यन्ते वयोवस्थाभेदे । सा तु जन्मावधिपञ्चमवर्षपर्य्यन्ता । इत्यर्थः ॥) तत्समये षोड़शवर्षपर्य्यन्ता । (यथा, भगवद्गीतायाम् । २ । १३ ।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति" ॥
पुं, कुमारस्य सनत्कुमारस्य इदं अण् सृष्टिभेदः । यथा, "कौमार आर्भवः प्राजापत्यो मानव इत्यादि सर्गनामानि" । इति श्रीधरः । तथा च भागवते । १ । ३ । ६ ।
"स एव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्" ॥)
तद्वति पुं, स्त्री । इति शब्दमाला ॥ अपूर्ब्बपतिं कुमारीं पतिरूपपन्नः "कौमारापूर्ब्बवचने । ४ । २ । १३ । इति द्वितीयान्तादुपसर्गसंज्ञकात्तार्य्यण्प्रत्ययेन साधुः । अपूर्ब्बपतिकुमारीपतिः । इति सिद्धान्तकौमुदी ॥)

कौमारी, स्त्री, मातृकाविशेषः । सा तु कार्त्तिकेयशक्तिः । इति शब्दमाला ॥ यथा,—
"कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ८२ । १६ ॥
(अपूर्ब्बपतिः कुमारी पतिमुपपन्ना । "कौमारापूर्ब्बवचने" । ४ । २ । १३ । इति स्वार्थे अण् प्रत्ययेन साधुः ततो ङीष् । अपूर्ब्बभार्य्यकुमारपत्नी । यथा, भट्टौ । ७ । ९० ।
"उपनम्रमाम्रयष्टन्तः कौमारीं पततामरः" ॥)
पञ्चमवर्षीया बालिका । कौमारी अवस्था । यथा, भागवते । ३ । २ । २८ ।
"कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयो व्रजौकसाम्" ॥)
वाराहीकन्दः । इति राजनिर्घण्टः ॥

कौमुदः, पुं, (कौ पृथिव्यां मोदन्ते जना यस्मिन् । मुद् + कः । सप्तम्या अलुक् ।) कार्त्तिकमासः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।
"एतैरन्यैश्च राजेन्द्रैः पुरा मांसं न भक्षितम् ।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः ॥
कौमुदन्तु विशेषेण शुक्लपक्षं नराधिपः ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥)

कौमुदिका, स्त्री, (कौमुदी + संज्ञायां कन् ततः ऋक्षः टाप् च ।) उमासखीविशेषः । इति शब्दमाला ॥ (स्वार्थे कन् ऋक्षः टाप् च । ज्योत्स्ना । त्रि, चतुर्थ्यां कुमुदादित्वात् ठक् । कौमुदिकः । कुमुदाख्यपर्व्वतसन्निहितदेशविशेषः ॥)

कौमुदी, स्त्री, (कुमुदस्य इयं प्रकाशकत्वात् "तस्येदं" । ४ । ३ । १२० । इत्यण् ततो ङीप् ।) ज्योत्स्ना । इत्यमरः । १ । ३ । १६ । (यथा, कुमारे । ४ ३३ ।
"अग्निना सह याति कौमुदी ॥
सह मेघेन तड़ित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि" ॥)
उत्सवः । इति धरणी । (यथा, महाभारते १३ पर्व्वणि ।

कौरव्यः

"अकालकौमुदीञ्चैव चक्रतुः सार्व्वकालिकीम्" ॥ कौमुदस्य कार्त्तिकमासस्य इयं "तस्येदम्" । ४ । ३ । १२० । इति अण् । ततो ङीप् । यदुक्तम् । "कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम् । धातुसंज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता" ॥ कार्त्तिकोत्सवः । स तु कार्त्तिकीपूर्णिमायां कर्त्तव्यः । इति त्रिकाण्डशेषः । कार्त्तिकीपूर्णिमा ॥ आश्विनीपूर्णिमा । इति शब्दरत्नावली । (यथा,— "आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि । कौमुदी सा समाख्याता कार्य्या लोकविभूतये" ॥ दीपोत्सवतिथिः । यथा, रघुभ्रष्टटीकाकृन्मल्लिनाथधृतभविष्योत्तरवचनम् । "कौ मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता" ॥ कुमुदान्येव कौमुदी । सुदी वा सालुक इति भाषा ॥)

कौमुदीचारः, पुं क्ली, (कौमुद्याः ज्योत्स्नायाः चारः प्राशस्त्यमत्र समये ।) कोजागरपूर्णिमा । इति त्रिकाण्डशेषः ॥

कौमुदीपतिः, पुं, (कौमुद्याः ज्योत्स्नायाः पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

कौमुदीवृक्षः, पुं, (कौमुद्याः इव प्रकाशिकायाः दीपशिखायाः वृक्ष इवाधारः ।) दीपवृक्षः । इति हारावली ॥ दीपगाछा पिलसुज इत्यादि भाषा ॥

कौमोदकी, स्त्री, (कोः पृथिव्याः पालकत्वात् मोदकः । कुमोदको विष्णुः । तस्येयं इत्यण् ततो ङीप् ।) विष्णुगदा । इत्यमरः । १ । १ । ३० ॥ (यथा, भागवते । ८ । ४ । १९ । "श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम" ॥)

कौमोदी, स्त्री, (कुं पृथ्वीं मोदयति नन्दयतीति । कुमोदः विष्णुः तस्येयं इति अण् ततो ङीप् ।) विष्णुगदा । इति शब्दरत्नावली ॥

कौरवः, पुं स्त्री, (कुरोरपत्यमिति अण् । कुरोरयं इति कच्छादित्वादण् वा । कुरुराजसन्ततिः । इति महाभारतम् ॥ (यथा, महाभारते । १ । द्रुपदज्ञासने १३९ । १६ । "तमुद्यतं रथेनैकमाशुकारिणमाहवे । अनेकमिव सन्त्रासान्निरे तत्र कौरवाः" ॥ कुरुसम्बन्धिदेशः । यथा, मेघदूते । ५० । "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" ॥ स्त्रियां ङीप् कौरवी कुरुसम्बन्धिनीत्यर्थः । यथा, महाभारते । १ । १३०१ । १५ । "द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः । शरजालेन महता मोहयन् कौरवीं चमूम्" ॥)

कौरव्यः, पुं, (कुरोरपत्यम् । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १५१ । इति ण्यः ।) कौरवः । (यथा, महाभारते । ३ । २३२ । ५५ । "अनिष्टायां निष्टायाञ्च सहायाः क्षुत्पिपासयोः । आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे" ॥ कौरव्याः ब्राह्मणाः कुरुसम्बन्धिनो ब्राह्मणा इत्यर्थः । क्षत्रिये तु । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १७२ । इति ण्ये कृते तद्राजस्य बहुषु तेनैवास्त्रियामिति बहुत्वे लुकि कुरव इति बोध्यम् ॥

कौलवः

नागविशेषः । यथा, महाभारते । १ । ३५ । १३-१४ । "कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान् । विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्" ॥)

कौर्य्यः, पुं, (कुत्सिकराग्निः । यथा, दीपिकायाम् । "क्रियतावरिचित्तमकुलीरलेयपाथेयकौर्पास्याः । तौत्तिक आकोकेरो हृद्रोगस्यान्यभं चेत्यम्" ॥)

कौलः, त्रि, (कुले सत्कुले भव इत्यण् ।) सत्कुलोद्भवः । तत्पर्य्यायः । आन्वयिकः २ । इति त्रिकाण्डशेषः ॥ (कुले कुलाचारे रतः कुलं कुलतत्त्वं वेत्ति वा इत्यण् ।) दिव्यवीरपशुभावत्रयान्तर्गतदिव्यभावरतः । स तु ब्रह्मज्ञानी । तद्यथा,— "दिव्यभावरतः कौलः सर्व्वत्र समदर्शनः" ॥ इति कुलार्णवतन्त्रम् ॥ "पशोर्वज्ञाज्ञमन्त्रः पशुरेव न संशयः । वीराज्ञमनुर्व्वीरः कौलाच्च ब्रह्मविद्भवेत्" ॥ इति महानीलतन्त्रम् ॥ (कुलमधिकृत्य कृतो ग्रन्थः । कुलाचारतत्त्वविधिप्रतिषेधोपदेशसाध्यसाधनव्यापारविशिष्टकुलोपनिषदादिग्रन्थविशेषः ॥)

कौलकेयः, त्रि, (कुले सत्कुले भव इति ढक् कुक् च ।) सत्कुलोद्भवः । (कुलटायाः अपत्यं इति ढक् । एषोदरादित्वात् ततः कच्च ।) असतीपुत्रे, पुं । इति शब्दरत्नावली ॥

कौलटिनेयः, पुं स्त्री, (कुलटाया अपत्यं । "कुलटायावा" । ४ । १ । १२७ । इति । इनङ् । स्त्रीभ्यो ढक् ।) असतीपुत्रः । तत्पर्य्यायः । कौलटेयः २ । इत्यमरः ॥ कौलटेरः ३ । इति तट्टीकासारसुन्दरी । २ । ६ । २७ ॥ सती या भिक्षार्थं कुलानि गृहाणि अटति न तु जारार्थं सापि कुलटा तत्पुत्रोऽपि ॥

कौलटेयः, पुं, स्त्री, (कुलटायाः असत्याः अपत्यं इति ढक् ।) कौलटिनेयः । असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ (कुलानि गृहाणि भिक्षार्थं अटति या सती सापि कुलटा । तस्या अपत्येऽपि इति कश्चित् ॥ स्त्रियां ङीप् कौलटेयी ॥)

कौलटेरः, पुं स्त्री, (कुलानि गृहाणि व्यभिचारार्थं अटति सा कुलटा । तस्याः असत्याः अपत्यम् । "तुन्ड्राभ्यो वा" । ४ । १ । १२१ । इति ढक् ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ कौलटिनेयः । इति सारसुन्दरी । (कुलानि गृहाणि भिक्षार्थमटति या सती सापि कुलटा तस्या अपत्येऽपि । इति कश्चित् । स्त्रियां ङीप् कौलटेरी ॥)

कौलत्यीनं त्रि, (कुलत्यस्य कुलत्याख्यकलायविशेषस्य भवनं क्षेत्रं वा इति । "धान्यानां भवने क्षेत्रे खञ्" । ५ । २ । १ । इति । खञ् ।) कुलत्यकलायोद्भवक्षेत्रम् । इत्यमरटीकायां भरतः ॥

कौलवः, पुं, ववाद्येकादशान्तर्गतद्वितीयकरणम् । तच्च जातस्य फलं यथा,— "वाग्मी विनीतो नितरां खलज्ञः प्रागल्भ्ययुक्तो मनुजो महौजाः । सुसम्मतः स्याद्विदुषां कृतघ्नः क्षेत्रं कौलवाख्यं करणं प्रसूतौ" ॥ इति कोष्ठीप्रदीपः ॥

कौवेरं

कौलिकः, पुं, (कुलं खट्वादिकं वयति वस्त्रलेनावरणादिकं आपादयतीति । ठक् ।) तन्तुवायः । इति शब्दमाला ॥ (कु कुत्सितं जघन्याचारं लातीति । कुलः दुःशीलः ततः स्वार्थे ठक् ।) पाषण्डः । इति त्रिकाण्डशेषः । (कुलादागतमिति ठक् ।) कुलपरम्परायाते, त्रि ॥ (यथा, पञ्चतन्त्रे । "वर्जयेत् कौलिकाचारं मित्रं प्राज्ञतरो नरः" ॥ कुले कुलागमे कुलतन्त्रे शिवोक्तशास्त्रे इति यावत् सिद्धः इति ठक् । कुलतन्त्रज्ञः ॥ कौलं कुलधर्म्मं प्रवर्त्तयति तत्त्वज्ञानं शिष्यपरम्परोपदेशेन विस्तारयति इति ठक् । कुलधर्म्मप्रवर्त्तकः शिवः ॥ कुलं कुलाचारः प्रयोजनमस्य इति ठक् । ब्रह्मतत्त्वज्ञः । यथा, श्रुतौ । "शून्यः कौलिकः" ॥)

कौलीनं, क्ली, (कौ पृथिव्यां लीनम् । भूलीनपदार्थानामिव एतेषामप्रकाशतया तथात्वम् ॥) गुह्यम् । जघन्यम् । कुकर्म्म । (कुलीनस्य भावः । युवादित्वादण् ।) कुलीनत्वम् । (यथा, रामायणे । "सदृश्य इव मर्य्यादां कौलीनां नाभ्यवर्त्तत" ॥) पश्वहिपक्षिणां युद्धम् । इति मेदिनी ॥ कौलेयकः । इति विश्वः ॥ (ली भावे क्तः तस्य नत्वम् । लीनं लयः । कौ पृथिव्यां लीनं लयो यस्मात् । कुलीनं भूमिलयमर्हतीति अण् वा ।) लोकवादः । इत्यमरः । ३ । ३ । ११६ । (यथा, रघौ । १४ । ८४ । "कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः" ॥ निन्दा । यथा, तत्रैव । १४ । ३६ । "कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनर्वेदमुवाच वाक्यम्" ॥)

कौलीरः, स्त्री, (कुलीरः कर्कटः तच्छृङ्गाकारोऽस्त्यस्या इत्यण् । ततष्टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (कर्कटशृङ्गीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

कौलेयः, त्रि, (कुले सत्कुले भवः इति बाहुलकात् ढक् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौलेयकः, पुं, (कुले भवः । "कुलकुक्षियोवाभ्यः श्यञ्" । ४ । २ । ९६ । इति ढकञ् ।) कुक्कुरः । इत्यमरः । २ । १० । २१ ॥ (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यां यड्ढकञौ" । ४ । १ । १४० । इति ढकञ् ।) कुलीने त्रि । इति मेदिनी ॥

कौल्माषीयं, त्रि, (कुल्माषाणां धान्यकुलत्थादीनां भवनं क्षेत्रं इति खञ् ।) कुल्माषधान्योद्भवक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौल्यः, त्रि, (कुले सत्कुले भवः बाहुलकात् ष्यञ् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौवलं, क्ली, (कुवलमेव इति । प्रज्ञादित्वात् स्वार्थे णः ।) कुवलम् । कोलिफलम् । इति भरतो द्विरूपकोषश्च ॥

कौवेरं, क्ली, (कुवेरो अधिष्ठात्री देवताऽस्य इत्यण् ।) कुष्ठम् । कुड् इति भाषा । इति शब्दरत्नावली ॥ (कुवेरस्य इदं इत्यण् ।) कुवेरसम्बन्धिनि तत्कार्य्ये च त्रि । यथा, मार्कण्डेये । ५५ । २ ।

कौशल्या

"कौवेरमथ याम्यञ्च वक्राते वरुणस्य च" ॥
कौवेरी, स्त्री, (कुवेरः अधिष्ठात्री देवता अस्या इत्यण् । ततो ङीप् ।) उत्तरा दिक् । यथा,—
"द्विग्विभागे तु कौवेरी दिक् शिवा प्रीतिदायिनी" ॥
इति तिथ्यादितत्त्वम् । कुवेरशक्तिश्च ॥
कौशं, क्ली, (कुशाः प्राचुर्य्येण भूसा वा सन्त्यत्र इत्यण् ।) कान्यकुब्जदेशः । इति हेमचन्द्रः ॥ (कुश + स्वार्थे अण् । कुशद्वीपः । यथा, सिद्धान्तशिरोमणौ ।
"प्राक्कं ततः प्राक्प्लक्षमतश्च कौशम्" ॥
कोशे भवम् । क्षमिकोशोद्भवं पट्टवस्त्रम् । यथा, भागवते । ३ । ४ । ७ ।
"दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च" ॥
एतदुपलक्षितं क्षणं अदात्तमित्यन्वयः ॥
कुशस्येदं तद्विकारो वा अण् । कुशमयम् । कुशसम्बन्धि वा । यथा, महाभारते । १३ । १६ । २६ ।
"तत्र वासाय शयने कौशे सुखमुवास ह" ॥
स्त्रियां ङीप् । कौशी । तत्रैव । १३ । ५४ । २१ ।
"कौश्यां दृष्यां समासीनं जपमानं महाव्रतम्" ॥)
कौशलं, क्ली, (कुशलस्य भावः कर्म्म वा इति । युवादित्वात् अण् ।) कुशलता । यथा,—
"ज्ञ चातिकर्कशः प्राज्ञः ज्ञ चातिललितः शुचिः।
एकत्र काव्ये व्याख्यातुस्तावद्दो कौशलं कवेः" ॥
इति अमरशतकटीका ॥ (नैपुण्यम् । यथा, भागवते । १ । १६ । २७ ।
"स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं मार्दवमेव च" ॥
कुशलमेव इति । स्वार्थे अण् । मङ्गलम् । यथा, तत्रैव । ३ । १ । १३ ।
"स एष दोषः पुरुषद्विड़ास्ते
यद्दान् प्रविष्टोऽयमपत्यमत्या ।
पृष्णासि क्षणाद् विमुखो गतश्री-
स्त्यजाश्वशैवं कुलकौशलाय" ॥
चातुर्य्यम् । यथा, भगवद्गीतायाम् । २ । ५० ।
"तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलम्" ॥)
कौशलिका, स्त्री, (कुशलाय मङ्गलाय हिता । इति ठक् टाप् च ।) प्राभृतकम् । इति हारावली । नजर इति भाषा ॥ (कुशलस्य एच्छा इति ठक् टाप् च । कुशलप्रश्नः ॥)
कौशली, स्त्री, (कुशलस्य एच्छा कुशलाय दीयते वा । अण् ततो ङीप् ।) कुशलप्रश्नः । प्राभृतम् । इति त्रिकाण्डशेषः ॥
कौशलेयः, पुं, (कौशल्यायाः अपत्यं पुमान् इति ढक् । यलोपश्च ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, रामायणे ।
उज्जहार प्रियां देवो हत्वा तु निकषात्मजम् ।
श्रीमान् दाशरथिर्वीरः कौशलेयः प्रतापवान्" ॥)
कौशल्या, स्त्री, (कोशलस्य राज्ञोऽपत्यं स्त्री । कोशल + ष्यञ् । यद्वा, कुशलैव स्वार्थे ष्यञ् ।) श्रीराममाता । सा तु कोशलराजकन्या दशरथपत्नी च । इति शब्दरत्नावली । (यथा, रामायणे १ । १६ । २६ ।
"सोऽन्तःपुरं प्रविश्यैव कौशल्यामिदमब्रवीत्" ॥
कोशले भवाः । तद्देशवासिन्यर्थे ञ्य । कोशलदेशीयाः । अत्र बहुवचनम् ।

कौशिकः

यथा, महाभारते । ६ । ६ । ४० ।
"मत्स्याः कुशट्टाः कौशल्याः कुन्तयः काशिकोशलाः" ॥
कुशलस्य भावः कर्म्म वा कुशलमेव वा इति ब्राह्मणादित्वात् ष्यञ् । कुशलत्वे, क्ली । यथा, महाभारते । ३ । ४४ । ३० ।
"दृष्ट्वा कौशल्यमन्योन्यं रथेष्वेवावतस्थिरे" ॥)
कौशल्यानन्दनः, पुं, (कौशल्यायाः दशरथपत्न्याः नन्दनः पुत्रः ।) श्रीरामः । इति शब्दरत्नावली ॥
कौशल्यायनिः, पुं, (कौशल्याया अपत्यं । "कौशल्यकार्मार्य्याभ्याञ्च" । ४ । १ । १५५ । इति फिञ् । फस्यायनादेशः ।) श्रीरामः । इति त्रिकाण्डशेषः ॥ (यथा, भट्टौ । ७ । ६० ।
"नियामहे न गच्छामः कौशल्यायनिवल्लभाम् ।
उपलम्भामपश्यन्तः कौमारीं पततां वर !" ॥)
कौशाम्बी, स्त्री, (राज्ञः कुशस्य पुत्त्रेण स्वनामप्रसिद्धेन कुशाम्बेन निर्वृत्ता सा । "तेन निर्वृत्तम्" । ४ । २ । ६८ । इति अण् ततो ङीप् ।) देशविशेषः । तत्पर्य्यायः । वत्सपत्तनम् २ । इति हेमचन्द्रः ॥ (यथा, रामायणे । १ । ३२ । ५ ।
("कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीम्" ॥
सा तु गौड़देशान्तर्गतमत्स्यराजभूमिगता नगरी ततः चागक्येन चन्द्रगुप्तादिसमये कुसुमपुरीत्याख्या प्रदत्ता इदानीं सैव पुरी पाटलीपुत्त्रनगरी पाटना इति भाषायां प्रसिद्धा जाता । यथा, कथासरित्सागरे ।"अस्ति वत्स इति ख्यातोदेशः । इत्युपक्रम्य कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी" इत्युक्तम् ॥)
कौशिकः, पुं, (कुशिकस्यापत्यम् ऋष्यण् । कुशिके तदंशे भवो वा इत्यण् ।) इन्द्रः । (अयं हि तपस्विनः कुशिकराजस्तपःप्रभावं विचार्य्य त्रासात् तत्पुत्त्रतामङ्गीचकार ।
यथा, हरिवंशे । २७ । १३-१६ ।
"कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमं विभुः ।
जनयेयमिति तं शक्रस्त्रासादभेत्य जग्धिवान् ॥
पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत ।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ॥
समर्थं पुत्त्रजनने स्वमेवांशमवासयत् ।
पुत्त्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः ॥
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम्" ॥
पक्षे तु देवेन्द्रस्य जन्मकाले कुशाहृतत्वात् कौशिकत्वमिति । कुशेन कृत इति ठञ् ।
यथा, हरिवंशे । २१६ । २—३ ।
"स वज्री कवची जिष्णुरदित्यामभिजज्ञिवान् ।
स्मृतेः सहायो द्युतिमान् यथा सोऽध्वर्युभिः स्तुतः ।
जातमात्रस्तु भगवान् अदित्यां स कुशैर्वृतः ।
तदाप्रभृति देवेशः कौशिकत्वमुपागतः" ॥)
गुग्गुलुः । उलूकः । व्यालग्राही । इत्यमरः । २ । ४ । ३४ ॥ नकुलः । कोशकृत् । (मगधराजजरासन्धस्य सेनापतिर्हंसनामा नरपतिरपि कौशिकनाम्ना विश्रुत आसीत् । यथा, महाभारते । २ । जरासन्धवधपर्व्वणि । २२ । ३१-३२ ।
"स तु सेनापतिं राजा सस्मार भरतर्षभ ! ।

कौशिकी

कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्तु नामनी राजन् ! हंसेति डिभकेति च ।
पूर्व्वं संकथिते पुंभिस्त्रिलोके लोकसत्कृते" ॥
कुशिकस्य गोत्रापत्यं इति विदाद्यञ् । कुशिकस्य पुत्त्रो गाधिस्तत्पुत्त्रो विश्वामित्रोऽपि कुशिकवंशजातत्वात् कौशिकः । (विश्वामित्रमुनिः । इति मेदिनी । (यथा, रामायणे । १ । २१ । १ ।
"तच्छ्रुत्वा वचनं तस्य खेदपर्य्याकुलाक्षरम् ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम्" ॥
पुरुवंशीयनृपविशेषः । यथा, हरिवंशे ।
"प्रतिष्ठायाश्च द्वौ पुत्त्रौ पैप्पलादिश्च कौशिकः" ॥
कोशं करोतीति । कोश + ठक् ठञ् वा बाहुलकात् ।) कोषकारः । इति शब्दरत्नावली ॥ शृङ्गारसः । इति त्रिकाण्डशेषः ॥ मञ्जा । इति हेमचन्द्रः ॥ अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥ (कोशात् क्षमिकोशाज्जातम् । क्षमिकोशोद्भवे, त्रि । यथा, महाभारते । ३ । २७ । १४ ।
"या त्वाहं कौशिकैर्वस्त्रैः शुभैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र! सा त्वां पश्यामि चीरिणम्" ॥)
कौशिकप्रियः, पुं, (कौशिकस्य कुशिकपौत्त्रस्य राजर्षेः विश्वामित्रस्य प्रियः ।) श्रीरामः । इति शब्दरत्नावली ॥
कौशिकफलः, पुं, (कौशिकं कोशगतं फलमस्य ।) नारिकेलवृक्षः । इति शब्दरत्नावली ॥
कौशिका, स्त्री, (कोश एव स्वार्थे कः ततोऽण् ततः टाप् अत इत्वञ्च ।) चषकम् । पानभाजनम् । इति हेमचन्द्रः ॥
कौशिकात्मजः, पुं, (कौशिकस्य इन्द्रस्य आत्मजः । जयन्तः ॥ पाण्डुराजपत्न्यां कुन्त्यां इन्द्रौरसजातत्वात् अर्জ্জুনस्यापि तथात्वम् ।) अर्জ্জুनः । इति शब्दमाला ॥ (अस्य जन्मविवरणं यथा, महाभारते । १ । १२३ । ३२ ।
"एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्জ্জुनम्" ॥
कौशिकस्य विश्वामित्रस्य आत्मजः । इति विग्रहे विश्वामित्रपुत्त्रः सुनःशेफादिः ॥)
कौशिकायुधं, क्ली, (कौशिकस्य इन्द्रस्य आयुधम् ।) इन्द्रधनुः । इति शब्दरत्नावली ॥
कौशिकारातिः, पुं, (कौशिकस्य पेचकस्य अरातिः शत्रुः ।) काकः । इति राजनिर्घण्टः ॥
कौशिकारिः, पुं, (कौशिकस्य उलूकस्य अरिः शत्रुः ।) काकः । इति राजनिर्घण्टः ॥
कौशिकी, स्त्री, (कौशिकस्य गोत्रापत्यम् । कुशिक + अण् + ङीप् । सुरराजस्य इन्द्रस्य कुशिकनृपतेः सकाशात् पुत्त्रत्वेनोत्पद्यमानत्वात् कौशिकाभिधानप्राप्तेस्तेनैवेन्द्रेणास्या योगमायाया भगिनीतयाङ्गीकृतत्वात्तथात्वम् ।) चण्डिका । (यथा, हरिवंशे । ५७ । ४८ ।
"तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः ।
कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि" ॥
तत्रैवास्याः स्तुतौ । ५८ । ३ ।
"आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ।

जननी सिद्धसेनस्य उग्रचारी महातपाः" ॥
कुशिकस्य गोत्रापत्यं इति विदाद्यञ्। कुशिकाख्यनरपतेः पौत्री गाधिराजस्य कन्या विश्वामित्रस्य भगिनी ऋचीकमुनिपत्नी। कुशिकवंशजातत्वात् तस्यास्तथात्वम् ॥) नदीविशेषः। इति मेदिनी ॥ (यथा, रामायणे। १। ३४। ६–११।
"सपिता मम काकुत्स्थ! गाधिः परमधार्मिकः।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन! ॥
पूर्व्वजा भगिनी चापि मम राघव! सुव्रता।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥
सशरीरागता स्वर्गं भर्त्तारमनुवर्त्तिनी।
कौशिकी परमोदारा प्रवृत्ता च महा नदी ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम्।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन! ॥
सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता।
पतिव्रता महाभागा कौशिकी सरितां वरा" ॥
"कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव" ॥२१
असावेवेदानीं कुशी नदीति ख्याता। इयन्तु नेपालराज्यान्तर्गताया हिमवच्छाखाया निःसृता सती १६६ क्रोशान्तं गता गङ्गया सङ्गता ॥)
कौशिकोजः, पुं, (कौशिका इव तीव्रं ओजो यस्य। एषोदरात् सलोपः।) शाखोटवृक्षः। इति राजनिर्घण्टः। (श्याओड़ा इति भाषा ॥
कौशीतकी, स्त्री, (कुशीतकस्यापत्यम्। ऋष्यण् ततो ङीप्।) अगस्त्यपत्नी। इति चिकाण्डशेषः ॥ (कुशीतकेनाधीता प्रणीता वा या शाखा सा कौशीतकी। खनामख्यातवेदान्तर्गतशाखाविशेषः ॥ (ऋग्वेदान्तर्गत उपनिषद्विशेषः। यदुक्तं मुक्तिकोपनिषदि।
'मैत्रायणी कौशी(षी)तकी बृहज्जाबालतापनी'॥)
कौशेयं, त्रि, (कोशे भवम्। इति ढक्।) क्षमिकोषोत्थवस्त्रादि। इत्यमरः। २। ६। १११ ॥ मूर्द्धन्यमध्यश्च ॥ (यथा, माघे। ८। ६।
"कौशेयं व्रजदपि गाढ़तामजस्रम्।
सस्रंसे विगलितनीविनीरजाक्ष्याः" ॥)
कौषिकः, पुं, (कौशिक + एषोदरात् षकारादेशः।) कौशिकः। इति मेदिनी ॥
कौषिकी, स्त्री, (कौशिकी + एषोदरात् षकारादेशः।) कौशिकी। इति मेदिनी ॥ कालिकाकायकोषनिःसृतदेवीविशेषः। यथा,—
"कायकोषान्निःसृता या कालिकायास्तु भैरव!।
सा कौषिकीति विख्याता चारुरूपा मनोहरा ॥
निःसृता हृदयाद्देव्या रसनायेण चण्डिका।
नैतस्याः सदृशी मूर्त्या चारुरूपेण विद्यते ॥
त्रिषु लोकेषु कान्त्या वा नास्यास्तुल्या भविष्यति।
योगनिद्रा महामाया या मूलप्रकृतिः स्मृता ॥
तस्याः प्राणस्वरूपेयं देवी सा कौषिकी स्मृता।
नेत्रबीजं तथैतस्या बीजन्तु परिकीर्त्तितम् ॥
तन्त्रमस्याः प्रवक्ष्यामि सर्व्वकामप्रदं नृणाम्।
समाप्ति नान्यदन्यस्तु षड्वर्गादिविन्दुना ॥
षड्स्वरेण संरुद्धो विन्दुना समलङ्कृतः।
कौषिकीतन्त्रमन्त्रोऽयं धर्म्मकामार्थदायकः ॥
एतस्याः सम्प्रवक्ष्यामि मूर्त्तिरूपञ्च भैरव!।
शृणुष्वैकमना भूत्वा जगदाह्लादकारकम् ॥
धम्मिल्लसंयतकचा विधोश्चाधोमुखीं कलाम्।
केशान्ते तिलकस्योर्द्धे दधती सुमनोहरा ॥
मणिकुण्डलसंदृष्टगण्डा मुकुटमण्डिता।
सन्ध्योतिःकर्णपूराभ्यां कर्णमापूर्य्य संस्थिता ॥
सुवर्णमणिमाणिक्यनागहारविराजिता।
सदा सुगन्धिभिः पुष्पैरलङ्कारैरतिसुन्दरी ॥
मालां बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी।
मृणालायतदोर्दण्डैस्तु बाहुभिः कोमलैः शुभैः ॥
राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा।
क्षीणमध्या पीतवस्त्रा चिबुकीपरिभूषिता ॥
शूलं वज्रञ्च वाणञ्च खड्गं शक्तिं तथैव च।
दक्षिणैः पाणिभिर्देवी गृहीत्वातिविराजिता ॥
गदां घण्टाञ्च चापञ्च चर्म्म शङ्खं तथैव च।
ऊर्द्धादिक्रमतो देवी दधती वामपाणिभिः ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्मणि कौषिकी।
बिभ्रती रूपमतुलं सुरासुरमनोहरम् ॥
एतस्याः शृणु वत्स त्वं याः पूज्या अष्टयोगिनीः।
ताः पूजिताश्च कुर्व्वन्ति चतुर्व्वर्गं नृणां सदा ॥
ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा ॥
नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महाभागा योगिनीः कामदायिनीः"॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ॥*॥

अन्यच्च।

"शरीरकोषतश्चास्याः समुद्भूतास्त्रयीक्ष्विव।
श्लोकं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समेतैः समरे निशुम्भेन पराजितैः।
शरीरकोषादुत्तस्याः पार्व्वत्या निःसृताम्बिका ॥
कौषिकीति समस्तेषु ततो लोकेषु गीयते" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः ॥
अपरा व्युत्पत्तिर्यथा,—
"अल्पेनैवोपकारेण यस्माल्लोके सुखप्रदा।
कौषेयधारणाद्वापि सप्रसादाय कौषिकी" ॥
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥
कोषेयं, त्रि, (कौशेय + एषोदरात् षकारादेशः।) क्षमिकोषोत्थवस्त्रादि। रेसमी कापड़ इति भाषा। इत्यमरटीकायां भरतः ॥ (यथा, मार्कण्डेयपुराणे। १५। २७।
"कोषकारस्य कौषेये हृते वस्त्रेऽभिजायते" ॥)
कौसीद्यं, क्ली, (कुत्सितं सीदति अस्मिन् इति। सीद् + ग्यः। ततः स्वार्थे ष्यञ्।) आलस्यम्। तन्द्रा। इति हेमचन्द्रः। (कुसीदस्य कर्म्म भावो वा। इति ष्यञ्।) कुसीदत्वम् ॥
कौसुमं, क्ली, (कुसुमेन निर्वृत्तम्। इत्यण्।) कुसुमाञ्जनम्। पुष्पाञ्जनम्। इति राजनिर्घण्टः ॥ (कुसुमस्येदम्। तस्येदमित्यण्। कुसुमसम्बन्धि वस्तुजातम्। कुसुमेषु भवम्। यथा) माघे। ७। ५७।
"विनयति सुदृशो दृशः परागं
प्रणयिनि! कौसुममाननानिलेन" ॥)
कौसुम्भः, पुं, (कुसुम्भ + स्वार्थे अण्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः ॥ (शाकविशेषः। यथा,—
"कौसुम्भं कोमलं शाकं कासमर्द्दविमर्द्दितम्।
पाचितं तप्तसर्पिषे माक्षिकमधुविमिश्रितम्" ॥
इति शब्दार्थचिन्तामणिः ॥ कुसुम्भेन रक्तम्। "तेन रक्तं रागात्"। ४। २। १। इत्यण्।) कुसुम्भपुष्परागयुक्ते त्रि। इत्यमरटीकायां रायमुकुटः। (यथा, माघे।
"कौसुम्भं पृथुकुचकुम्भसङ्गिवासः" ॥
कुसुम्भस्येदं तस्येदमित्यण्। कुसुम्भसम्बन्धिवस्तुमात्रम्। यथा, माघे। ११। ५२।
"दिनकरकरसङ्गश्लक्ष्णकौसुम्भकान्ति" ॥)
कौहटिकः, त्रि, (कुहट्या कुत्सितगत्या चरति इति ठक्।) मायाकारः। इति जटाधरः ॥
कौस्तुभः, पुं, (कुं भुवं स्तुभ्नाति व्याप्नोति इति। कुस्तुभः सागरः तत्र भव इत्यण्। यद्वा, कुं भूमिं जगदित्यर्थं स्तुभते व्याप्नोति सर्व्वमाक्रम्य तिष्ठतीति भावः। कुस्तुभो विष्णुः तस्यायं मणिरित्यण्।) खनामख्यातो विष्णुवक्षःस्थो मणिः। इत्यमरः। १। १। ३०॥ (यथा, भागवते। ८। ८। ५।
"कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः।
तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ" ॥
"कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः।
इदं किमुत वक्तव्यं प्रदीप्तोद्दीप्तिमानिति" ॥
इति भागवतामृतम् ॥ मुद्राविशेषः। यथा,—
"अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका।
कनिष्ठयान्वया बद्धा तर्जन्या दक्षया तथा ॥
वामानामाञ्च वध्नीयात् दक्षिणाङ्गुष्ठमूलके।
अङ्गुष्ठमध्यमे भूयः संयोज्य सरलाः पराः।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका" ॥
इति तन्त्रसारः ॥
कौस्तुभवक्षाः, [स्] पुं, (कौस्तुभः वक्षसि उरःस्थले यस्य।) विष्णुः। इति हारावली ॥
क्नथ, कि म वधे। इति कविकल्पद्रुमः। (चुरां पक्षे भां–परं–सकं–सेट्।) कि म, क्नथयति। इति दुर्गादासः ॥
क्नस, उ म य कृतौ। भासने। इति कविकल्पद्रुमः ॥ (दिवां–परं–अकं–सेट्।) एष दन्त्यनकारयुक्तः। उ, क्नसित्वा क्नस्वा। म, क्नसयति कान्त्या जगत्प्राज्यः। य, क्नस्यति खलः कुटिलः स्यादित्यर्थः। कृतिरिह कौटिल्यम्। इति दुर्गादासः ॥
क्नस, इ कि भासने। इति कविकल्पद्रुमः ॥ (चुरां पक्षे भां–परं–अकं–सेट्।) इ, क्नंसयते। कि, क्नंसयति क्नंसति। भासनं दीप्तिः। इति दुर्गादासः ॥
क्नूय, ईं ङ दुर्गन्धे। आर्द्रत्वे। शब्दे। इति कविकल्पद्रुमः ॥ दन्त्यनकारयुक्तो दीर्घी। (भां–आत्मां–अकं–सेट्–ईर्निष्ठायामनिट्।) तथा च। क्नूयो स्कायति ते विदेव य इमे सेविषु मेविरुत्ता। इति शार्दूलविक्रीड़िते चण्डेश्वरः ॥ ई, क्नूतः। ङ,

क्रूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः। क्रूयते वस्त्रमम्भसा। इति दुर्गादासः॥

क्रम, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ओष्ठवर्गशेषयुक्तः। क्रमति खलः कुटिलः स्यादित्यर्थः। इति दुर्गादासः॥

क्रकचः, पुं क्ली, यश्चिलवृक्षः। इति मेदिनी॥ (ज्योतिषोक्तयोगभेदः। तस्य लक्षणं यथा,—

"षष्ठादितिथयो मन्दाद् विलोमं क्रकचः स्मृतः"॥

अस्य विवृतिर्यथा।

"अनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगाः क्रकचाख्या विज्ञेयाः"। यथा, नारदोक्तिः।

"त्रयोदशस्तुर्मिलने संख्ययोस्तिथिवारयोः।
क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः"॥*॥

क्र इति छित्वा कचति शब्दायते। कच शब्दे + पचाद्यच्।) करपत्रम्। काष्ठविदारणास्त्रविशेषः। करात् इति भाषा। इत्यमरः। १। १०। ३५॥ (यथा, महाभारते ३। २२। ३४।

"मध्येन पाटयामास क्रकचो दार्व्विवोच्छ्रितम्"॥)

"अथ क्रकचव्यवहारे करणसूत्रं वृत्तम्। पिण्डयोगदलमग्रमूलयोर्दैर्घसंगुणितमङ्गुलात्मकम्। दारुदारणपथैः समाहतं षट्स्वरेषु विहृतं करात्मकम्॥ उदाहरणम्।

मूले नखाङ्गुलमितोऽथ नृपाङ्गुलोऽग्रे
पिण्डः शताङ्गुलमितं किल यस्य दैर्घ्यम्।
तद्दारुदारणपथेषु चतुर्षु किं स्या-
द्वल्लात्मकं वद सखे गणितं द्रुतं मे॥

न्यासः



पिण्डयोगदलम्। १८। दैर्घ्येण। १००। संगुणितम्। १८००। दारुदारणपथैः। ४। गुणितम्। ७२००। षट्स्वरेषु। ५७६। विहृतं जातं करात्मकं गणितम्। २५/६॥ क्रकचान्तरे करणसूत्रं सार्द्धवृत्तम्। क्रियते तु यदि तिर्य्यग्गुक्तवत् पिण्डविस्तृतिहृते फलं तदा। इष्टिकाचितिदृषच्चितिखातक्रकचव्यवहृतौ खलु मूल्यम्। कर्म्मकारजनसम्मतिपथा तन्मृदुत्वकठिनत्वयोगेन॥ उदाहरणम्।

यद्विस्तृतिर्द्वन्तमिताङ्गुलानि
पिण्डस्तथा षोडश यत्र कोष्ठे।
छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व
किं स्यात् फलं तत्र करात्मकं मे॥



विस्तृतिहृतिः। ५१२। दारुदारणमार्गं। ६। घ्ना। १६०८। षट्स्वरेषु। ५७६। विहृतं जातं फलं हस्ताः। ८। इति लीलावत्यां क्रकचव्यवहारः॥ *॥

क्रकचच्छदः, पुं, (क्रकचः करपत्रमिव च्छदाः पत्राणि यस्य।) केतकीवृक्षः। इति चिकाण्डशेषः॥

क्रकचपत्रः, पुं, (क्रकचवत् पत्रं यस्य।) शाकवृक्षः। इति राजनिर्घण्टः॥ (केतकीवृक्षः॥)

क्रकचपात्, [द्] पुं, (क्रकच इव पादो यस्य। अन्त्यलोपः।) ढकलासः। इति चिकाण्डशेषः॥

क्रकचपादः, पुं, (क्रकचमिव पादो यस्य।) ढकलासः। इति हारावली॥

क्रकचपृष्ठी, स्त्री, (क्रकचवत् पृष्ठं पृष्ठदेशो यस्याः। इति ङीष्।) कवयी मत्स्यः। इति शब्दरत्नावली॥

क्रकचा, स्त्री, (क्रकचस्तदाकारोऽस्त्यस्याः। अर्शआदिभ्यः अच् ततष्टाप्।) केतकी इति रत्नमाला॥

क्रकणः, पुं, (क्र इति कणति शब्दायते। कण शब्दे + अच्। जातित्वात् स्त्रियां ङीष्।) पक्षिविशेषः। इत्यमरः॥ कयार इति भाषा॥

क्रकरः, पुं, (क्र इति शब्दं कर्त्तुं शीलमस्य इति। क्र + ताच्छील्ये टः।) करीरवृक्षः। उटकाटार इति भाषा। क्रकणपक्षी। इत्यमरः। २। ५। १६॥ कयार इति करकरा इति च भाषा॥ (यथा,—महाभारते १३। १११। १०३।

"पत्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति"॥)

अस्य मांसस्य गुणाः। लघुत्वम्। हृद्यत्वम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते।

"चकोरकलविङ्गमयूरक्रकर इत्याद्युपक्रम्य लघवः क्रकरा हृद्यास्तया चैवोपचक्रकाः"॥

इत्यन्तेनोपसंहृताः॥) दीनः। क्रकचः। इति मेदिनी॥

क्रतुः, पुं, (क्रियतेऽसौ इति। कृ + "कृञः कतुः"। उणां १। ७८। इति कर्म्मणि कतु प्रत्ययः।) यज्ञः इत्यमरः॥ सप्तर्ष्यन्तर्गतब्रह्ममानसपुत्रमुनिविशेषः। इति मेदिनी। व्ययन्तु ब्रह्मणः कराज्जातः। (यथा, महाभारते। १। ६५। १०।

"ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः"॥)

एतस्य भार्य्या प्रजापतेः कर्दमस्य कन्या क्रिया। पुत्राः षष्टिसहस्रबालखिल्याख्याङ्गुष्ठमात्रा ऋषयः।

(यथा,—भागवते। ४। १। ३८।

"क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत।

ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा"॥

विश्वेदेवविशेषः। यथा, हरिवंशे।

आत्मार्थे चाहृजत्पुत्रान् लोककर्त्तॄन् पितामहः॥
विश्वे प्रजानां प्रतयो येभ्यो लोका विनिःसृताः"॥

तत उक्तं "दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं। वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्"। इत्याद्युपक्रम्य।

"अथर्व्वभूता इत्येते ख्यातास्त्वेव महर्षयः।
त्रयोदशसुता येषां वंशा वै संप्रतिष्ठिताः"॥

जटाधरेण तु "विश्वेदेवा दशसुताः"। इत्युक्तं तत्कल्पभेदादविरुद्धम्॥

यथा, शतपथब्राह्मणे १०। ६। ३। १।

"यावत् क्रतुरयमसाल्लोकात् प्रेत्यैतं क्रतुरमुं लोकं प्रेत्य सम्भवति"॥

यूपसहितः सोमसाध्यो यज्ञः। विष्णुः। यथा, विष्णुसंहितायाम्।

"यच्च ईज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः"॥

अस्य भाष्यं यथा,—

"अस्य सर्व्वयज्ञस्वरूपत्वात् यज्ञः यूपसहितो यज्ञः क्रतुरिति"। अतएव विष्णोः सर्व्वयज्ञमयत्वात् यज्ञत्वं क्रतुशब्दस्यापि यूपसहितयज्ञबोधकत्वं प्रसिद्धम्॥ तद्यागे शतपथब्राह्मणादावुल्लिखिता यूपविशेषाः। यथा, तत्र सोमसाध्ययागाश्च त्रयः क्रतवः। तथाहि श्रुतौ "त्रीन् क्रतूनन्वाहाग्नेयमुषस्यमाश्विनम्"। सङ्कल्पः। स सङ्कल्पस्तु कामनाधीनश्चित्तवृत्तिविशेषः। उक्तञ्च

"कामः क्रतुः कर्म्म जन्मेत्येवमेषां क्रमो भवेत्"।
पुंसो या विषयापेक्षा स काम इति भण्यते।
स एव वर्द्धमानस्तेत् क्रतुत्वं प्रतिपद्यते"॥

रुचेरतिशयम्। यथा,—

"रुचेरतिशयः काम्ये विषये क्रतुरीर्य्यते"॥

स्तुत्यादिकर्म्म। यथा, ऋग्वेदे। ४। २१। १०।

"पुरुष्टुत! क्रत्वा नः स्वस्ति"। "क्रत्वा कर्म्मणा स्तुत्यादिहेतुना"। इति भाष्यम्॥

प्रज्ञा। यथा, छान्दोग्योपनिषदि। "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति। तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत"॥

अस्य भाष्यं यथा,—

"कथमुपासीत। स क्रतुं कुर्व्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचलः प्रत्ययस्तं क्रतुं कुर्व्वीतोपासीत इत्यनेन व्यवहितेन सम्बन्धः। किं पुनः क्रतुकरणेन कर्त्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्त्तव्यः? क्रतुकरणं वाभिप्रेतार्थसाधनं कथम्? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः। अथ खल्विति हेत्वर्थः। यस्मात् क्रतुमयः क्रतूपायोऽध्यवसायात्मकः पुरुषो जीवः। यथा क्रतुर्यादृग्यः क्रतुरस्य सोऽयं यथा क्रतुर्यथाऽध्यवसायो यादृङ्निश्चयोऽस्मिंल्लोके जीवन्निह पुरुषो भवति। तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति। क्रत्वनुरूपफलात्मको भवतीत्यर्थः। एव ह्येतच्छास्त्रतो दृष्टम्। 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि'। यत एवं व्यवस्था शास्त्र-

दृष्ट्याऽतः स एवं जानन् क्रतुं कुर्व्वीत यादृशं क्रतुं वच्यामस्तम्। यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूपं फलमतः स कर्त्तव्यः क्रतुः"। आषाढ़-मासः। अस्मिन्नेव मासे चातुर्मास्यादियागप्रा-चुर्य्यात् तस्य तथात्वम्। यथा, यजुर्व्वेदे। १८। २८।

"वाजाय स्वाहा, प्रसवाय स्वाहा, अपिजाय स्वाहा, क्रतवे स्वाहा, वसवे स्वाहा"। इति।"क्रतवे याग-रूपाय चातुर्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ़ः"॥ इति वेददीधितिः॥ अश्वमेधयज्ञः। यथा, मनौ। ७। ७९।

"यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च"॥)

क्रतुद्विट्, [ष्] पुं, (क्रतुं यज्ञं द्वेष्टीति। द्विष्+ "सत्सूद्विषेति"। ३। २। ६१। क्विप्।) असुरः। इति त्रिकाण्डशेषः॥

क्रतुभुक्, [ज्] पुं, (क्रतवे यज्ञाय हुह्वति होमा-चरतीति। हुह्+क्विप्।) असुरः। इति जटा-धरः॥ अस्य रूपान्तराणि। क्रतुभुग्। क्रतुभुट्। क्रतुभुड्॥

क्रतुध्वंसी, [न्] पुं, (क्रतुं दक्षयज्ञं ध्वंसयतीति। ध्वन्स्+णिनिः। खजटोत्पादितवीरभद्रेण क्रतु-ध्वंसकारितत्वादस्य तथात्वम्।) शिवः। इत्यमरः॥ (यथाहि अनेन दक्षयज्ञध्वंसः कृतस्तथा तद्विवरण-मुच्यते। पुरा किल कोपपरवशो दक्षः वैरनिर्या-तनाय शिवरहितयज्ञं चिकीर्षुस्तच्च सर्व्वान् देवेयदेवब्रह्मर्षिप्रभृतीन् आहूतवान्। अथ पत्यु-र्भवस्यावमाननामसहमाना भवानी सती दाक्षा-यणी पितुर्दक्षस्य यज्ञं दिदृक्षुरनाहूताऽपि दक्ष-यज्ञं समाययौ। दक्षस्तु तां शिवां दृष्ट्वा मोहान्धः कालप्रेरितः शिवनिन्द्या सतीं तिरस्कार। सा तु शिवनिन्दामाकर्ण्य समाधियोगाग्निना स्वशरीरं परित्याज। एतच्छ्रुत्वा रुद्ररूपी देव-देवः स्वजटातः वीरभद्रमुत्पादयन् दक्षयज्ञक्षय-मनैषीत्। एतद्विवरणन्तु काशीखण्डे ८६ अ-ध्याये तथा श्रीमद्भागवतप्रभृतिग्रन्थे च विस्त-रशो द्रष्टव्यम्॥)

क्रतुपशुः, पुं, (क्रतोरश्वमेधादेर्यज्ञस्य अङ्गविशेषः पशुः।) अश्वः। इति हारावली॥

क्रतुपुरुषः, पुं, (क्रतुः यज्ञः तन्मयः तदधिष्ठाता वा पुरुषः।) विष्णुः। इति त्रिकाण्डशेषः॥ (अयं हि वराहरूपियज्ञपुरुषः। यदुक्तं भाग-वते। २। १३। २१—२४।

"किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितम्।
अहोबतास्वर्य्यमिदं नासाया मे विनिःसृतम्॥
दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद् गण्डशिलासमः।
अपिसिद्धभगवानेष यज्ञो मे खेदयन् मनः॥
इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः।
भगवान् यज्ञपुरुषो जगर्जाऽऽक्षेन्द्रसन्निभः॥
ब्रह्मायं हर्षयामास हरिस्तांश्च द्विजोत्तमान्।
स्वगर्जितेन ककुभः प्रतिस्वनतया विभुः"॥
अस्य रूपवर्णनं यथा, तत्रैव। ३५—३८।

"रूपं तवैतन्ननु दुष्कृतात्मनां
दुर्दर्शनं देव! यदध्वरात्मकम्।
छन्दांसि यस्य त्वचि बर्हिरोम
स्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम्॥
स्रुक् तुण्ड आसीत् स्रुव ईश! नासयो-
रिड़ोदरे चमसाः कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते
यच्चर्वणन्ते भगवन्नग्निहोत्रम्॥
दीक्षानुजन्मोपसदः शिरोधरं
ते प्रायणीयोदयनीयदंष्ट्रः।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः
सभ्यावसथ्यं चितयोऽसवो हि ते॥
सोमस्तु रेतः सवनान्यवस्थितिः
संस्थाविभेदास्तव देव! धातवः।
सत्राणि सर्व्वाणि शरीरसन्धय-
स्त्वं सर्व्वयज्ञक्रतुरिष्विबन्धनः"॥

अत्र श्रीधरस्वामिना यद्याख्यातं तदयथा,

"यज्ञात्मतां प्रपद्यन्तः स्तुवन्ति रूपमित्यादि चतुर्भिः। छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्द-आद्यनुवादेन भगवदवयवता विधीयते वर्हिः शब्दे दीर्घाभावः आर्षः। दृशि चक्षुषि चातु-र्होत्रं होत्रादिचतुष्टयं कर्म्म। स्रुक् जुह्वः। तुण्डे मुखाग्रे। स्रुवो नासिकयोः। इड़ा भक्षण-पात्रं चमसा ग्रहाश्च सोमपात्राणि। प्राशित्रं ब्रह्मभागपात्रम्। ग्रसतेऽनेनेति ग्रसनं मुखान्त-र्वर्त्तिच्छिद्रं चर्व्वणं भक्षणम्। दीक्षा दीक्षणीयेष्टिः अनुजन्म वारंवारं अभिव्याप्तिः। उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा। प्रायणीया दीक्षानन्त-रेष्टिः। उदयनीया समाप्तीष्टिः ते एव दंष्ट्रे यस्य। प्रवर्ग्यो महावीरः प्रत्युपसदः पूर्व्वं क्रियते। सभ्यो होमरहितोऽग्निः। आवसथ्य औपासनाग्निः ततो द्वन्द्वैकं क्रतुजघनस्य शीर्षकं शिरः। चितयः इष्ट-कावचयनानि पञ्च असवः प्राणाः। प्रातः सवना-दीनि अवस्थितिरासनं बाल्याद्यवस्था वा। अग्नि-ष्टोमो ह्यग्निष्टोमः उक्थ्यः षोड़शी वाजपेयो-ऽतिरात्रः आप्तोर्यामः इति सप्तसंस्थाविभेदाः सप्तत्वङ्मांसादिधातवः। सत्राणि द्वादशाहा-दीनि बहुयागसङ्घातरूपाणि असोमा यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वं इष्टियजनं अनुष्ठानञ्च तदेवबन्धनं यस्य सः"॥)

क्रतुभुक्, [ज्] पुं, (क्रतौ यज्ञे देयं आज्यादिकं भुङ्क्ते। क्रतु+भुज्+क्विप्।) देवता। इत्यमरः १।१।६॥

क्रतुराजः, पुं, (क्रतुषु यज्ञेषु राजते इति। राज्+ अच्। यद्वा, क्रतूनां राजा। राजन्+टच्।) राजसूययज्ञः। इति शब्दरत्नावली॥ (क्रतुराट्। अश्वमेधयज्ञः। यथा, मनौ ११। २६०।

"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
यथाघमर्षणं सूक्तं सर्व्वपापापनोदनम्"॥)

क्रतूत्तमः, पुं, (क्रतुषु यज्ञेषु उत्तमः।) राजसूययज्ञः। इति त्रिकाण्डशेषः॥

क्रथ, म वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। घटां। क्रथति। म, क्रथयति।)

क्रथ, क प्रतिहर्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) रेफयुक्तः। प्रतिहर्षः पुनः पुनर्हर्षीकरणम्। क, क्रथयति शिष्यं लोकः पुनःपुनर्हर्षयति इत्यर्थः। इति दुर्गादासः॥

क्रथ, कि वधे। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-सेट्।) रेफयुक्तः। कि, क्राथयति क्रथति। इति दुर्गादासः॥

क्रथ, कि म वधे। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-सेट्।) रेफयुक्तः। पुनः पाठात् पूर्व्वो न मित्। कि म, क्रथयति। इति दुर्गादासः॥

क्रथनं, क्ली, (क्रथ्यते इति। क्रथ् वधे+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८॥ ११५॥ (शुक्रागुण। इति शब्दार्थचिन्तामणिः॥ पुं, देवयोनिविशेषः। यथा, महाभारते। १। ३२। १८।

"अश्वक्रन्देन वीरेण रेंगुकेन च पक्षिराट्।
क्रथनेन च शूरेण तपनेन च खेचरः॥
प्रसजेन च संग्रामं चकार पुलिनेन च"॥
दानवविशेषः। यथा, महाभारते। १। ६७। ५८।
"क्रथनस्तु महावीर्य्यः श्रीमान् राजन् महासुरः"॥)

क्रथनकं, क्ली, (क्रथन+स्वार्थे कन्।) सितागुरु। इति शब्दचन्द्रिका॥ (पुं, क्रथने दन्तकरञ्जक-कण्टकच्छेदने प्रहृतः कन्। उष्ट्रः। इति पक्ष-तन्त्रम्॥)

क्रद, इ रोदने। आह्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-आह्वाने सकं-सेट्। इदित्।) इ, क्रन्दते। ततोऽक्रन्दीद्दशग्रीव इति। क्रन्दति भर्त्तारमिवाभिपन्नम्। दुर्गादासमते तु यमडानु बन्धी। यथा, घ, क्रन्दा। म, क्रन्दयति। ङ, क्रन्दते। इति॥

क्रद, घ म ङ वैक्लव्यविकलत्वयोः। इति कविकल्प-द्रुमः॥ (भ्वां-आत्मं-अकं-सेट्-घटां।) घ, क्रदा। म, क्रदयति। ङ, क्रदते। इति दुर्गादासः॥

क्रन्द, क शब्दसातत्ये। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) रेफयुक्तः। आ उपसर्गपूर्व्वकः। क, आक्रन्दयति। शब्दसातत्यं निरन्तरशब्दक्रिया। इति दुर्गादासः॥

क्रन्दनं, क्ली, (क्रदि+भावे ल्युट्।) शोकादिनाऽस्रु-पतनम्। काँदन इति भाषा। तत्पर्य्यायः। क्रन्दि-तम् २ रुदितम् ३ क्रुष्टम् ४ रोदनम् ५। इति. शब्दरत्नावली॥ (यथा, पद्मतन्त्रे ४। ३१।

"तं भक्षितं मत्वा गङ्गदत्तस्तारस्वरेण धिग्धिक् प्रलापपरः कथञ्चिदपि न क्रन्दनात् विरराम"॥)

योधसंरावः। आह्वानम्। इत्यमरः। २। ८। १०७॥

क्रन्दनः, पुं, (क्रन्दनं रोदनमिव शब्दविशेषः अस्या-स्तीति अच्।) विड़ालः। इति शब्दमाला॥

क्रन्दितं, क्ली, (क्रदि+भावे क्तः।) रोदनम्। इत्य-मरः। १। ७। ३५॥ आह्वानम्। इति मेदिनी॥ योधचीत्करणम्। इति शब्दरत्नावली॥

क्रप, घ म ङ छपायाम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) छपा दया। घ, छपा। भीधि चिन्तीति ङे मनीषाद्या इति निपात-

नात् रेफस्य ऋकारः। म, क्रपयति। ड, क्रपते दयालुर्दीनम्। इति दुर्गादासः॥

क्रम, उ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उ, क्रमित्वा क्रान्त्वा क्रन्त्वा। क्रामति। वारिपूर्णां महीं कृत्वा पश्चात् संक्रमते गुरुरिति संशब्दस्योपसर्गप्रतिरूपकत्वे वागेरित्यात्मनेपदम्। दृच्युत्साहतायनेषूपसर्गान्तरमूर्ध्वादयात्मनेपदमिति शरणदेवः। संक्रामयतीत्यादि तु संक्रामन्तं करोतीति शब्दान्तात् औ साध्यम्। अन्यथा अमन्तत्वाऽसम्भवः स्यात्। हरेर्यदक्रामि पदैकेन खमिति तु धातुपारायणमते घुरादिविवक्षया सिद्धम्। तन्मतन्तु परिभाषायां लिखितम्। अथवा आत्मेति कर्म्मणोऽध्याहारे प्रेरणे औ साध्यम्। हरेः पदं आत्मानं यत् खं क्रामयामास। इत्यर्थः। इति दुर्गादासः॥

क्रम, य गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) य, क्रम्यति। गोविन्दभट्टक्रमदीश्वरौ तु दीर्घं विधाय। क्राम्यतीत्याहतुः। तथा च। "इष्यते श्यनि दीर्घत्वं दाक्षिलक्षणवेदिभिः। तेन क्राम्यति कौमारे श्यनीत्यस्योपलक्षणात्"॥ इति दुर्गादासः॥

क्रमः, पुं, (क्रम्यते प्राप्यते पाठभेदो ऽनेन। क्रम+घञ्। "नोदात्तोपदेशस्येति"। ७। ३। ३४। इति न वृद्धिः।) वैदिकविधानम्। तत्पर्य्यायः। कल्पः २ विधिः ३। इत्यमरः। २। ७। ४०॥ (क्रम+भावे घञ्।) अनुक्रमः। (यथा, रघुः। ११। २४।

"लोकमन्धतमसात् क्रमोदितौ
रश्मिभिः शशिदिवाकराविव"॥)

शुक्तिः। आक्रमणम्। इति मेदिनी॥ (क्रामत्यनेन घञ् न वृद्धिः।) चरणः। इति हेमचन्द्रः॥ (खनामख्यातो वत्सप्रीपुत्रः। यथा, मार्कण्डेये ११८। १।

"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः"॥

सर्व्वक्रमणात् रुद्रः।
यथा, महाभारते। १३। १७। १२९।
"कृतं सुकृतो विख्यातो लोकः सर्व्वाश्रयः क्रमः"॥
त्रिपादेन सर्व्वक्रमणात् विष्णुः।
यथा, तत्रैव १३। १४९। २२।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः"॥)

क्रमकः, पुं, (क्रमं वेदपाठभेदं अधीते वेत्ति वा। "क्रमादिभ्यो वुन्"। ४। २। ६१। इति वुन्।) क्रमज्ञः। इति मुग्धबोधम्॥

क्रमणः, पुं, (क्रामत्यनेन करणे ल्युट्।) चरणः। इति हेमचन्द्रः॥ (यदुवंशीयनृपविशेषः। यथा हरिवंशे।

"क्षमिश्च क्रमणश्चैव धृष्टः शूरः पुरञ्जयः"॥

क्लीं। भावे ल्युट्। पादविक्षेपः। यथा, भागवते ८। १०। २१।

"एष त्वधर्म्मः क्रमणेषु दृष्टम्"॥)

क्रमपूरकः, पुं, (क्रमेण पूरयति वीजम्। पूर+णिच् ण्वुल्। पुष्पवृन्ते क्रमेणास्य वीजपूरकत्वात् तथात्वम्।) वकवृक्षः। इति राजनिर्घण्टः॥

क्रमशः, [स्] व्य, (कारकार्थवृत्तेः क्रमात्+वीप्सायां शस्।) क्रमेण क्रमेण। क्रमेक्रमे इति भाषा। यथा। "भवति विज्ञतमःक्रमशो जनः"। इति प्राचीनाः॥ (तथा च मनौ। ३। १२।

"सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः"॥)

क्रमागतं, त्रि, (क्रमेणागतं आयातम्।) क्रमायातम्। पितृपितामहादिक्रमेण प्राप्तम्। यथा,—

"अखण्डन्यायः स्त्रियः सर्व्वाः पुत्रदासपरिग्रहाः।
अखण्डन्यायत्वञ्च यद्यत् स्यात् क्रमागतम्"॥
इति व्यवहारतत्त्वे नारदः॥ (तथा च मनुः। २। १९८।

"तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते"॥)

क्रमायातः, त्रि, (क्रमेणायातः आगतः।) क्रमागतः। इति मिताक्षरा॥

क्रमिः, पुं, (क्रम्+इन्।) कृमिः। इति भरतो द्विरूपकोषश्च। रोगविशेषः। तच्चिकित्सा यथा,

"विड्भक्तयोषसंयुक्तमन्नमश्नं पिबेन्नरः।
दीपनं क्रिमिनाशाय जठराग्निविवृद्धये॥
प्रत्यहं कटुकं तिक्तं भोजनं कफनाशनम्।
क्रिमीणां नाशनं रुच्यमग्निसन्दीपनं परम्॥
विड्भक्तपूतपानीयं विड्भक्तेनावधूलितम्।
पीतं क्रिमिहरं दृष्टं क्रिमिजांश्च गदान् जयेत्॥
लिह्याद्विड्भक्तचूर्णं वा मधुना क्रिमिनाशनम्।
पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम्॥
पिबेत्तद्बीजकल्कं वा तक्रेण क्रिमिनाशनम्।
काम्पिल्यचूर्णकर्षार्द्धं गुडेन सह भक्षितम्॥
पातयेत क्रिमीन् सर्व्वानुदरस्थान्न संशयः।
विड्भक्तं कौटजं बीजं तथा बीजं पलाशजम्॥
संचूर्ण्य खादेत् खण्डेन क्रिमीन्नाशयितुं नरः।
निम्बपत्रसमुद्भूतं रसं क्षौद्रयुतं पिबेत्॥
धूस्तूरपत्रजं वापि क्रिमिनाशमनुत्तमम्।
रसेनेक्ष्वा समायुक्तो रसो धुस्तूरपत्रजः॥
ताम्बूलपत्रजो वापि लेपाद्यूकाविनाशनः।
धत्तूरपत्रकल्केन तद्रसेनैव पाचितम्॥
तैलमभ्यङ्गमात्रेण यूकान्नाशयति क्षणात्।

क्रिमीणां विट्कफोत्थानामेतदुक्तं चिकित्सितम्।
रक्तजानान्तु संहारं कुर्य्यात् कुष्ठचिकित्सया॥

क्षीराणि मांसानि घृतानि चापि
दधीनि शाकानि च पर्णवन्ति।
अन्नञ्च मिष्टञ्च रसं विशेषात्
क्रिमीन् जिघांसुः परिवर्ज्जयेद्धि"॥

इति क्रिम्यधिकारः। इति भावप्रकाशः॥

क्रमिकण्टकं, क्ली, (क्रमौ क्रमिनाशे कण्टकमिव। तस्य नाशकत्वात्तथात्वम्।) चित्राङ्गः। विड्भङ्गम्। उडुम्बरः। इति मेदिनी॥

क्रमिघ्नं, क्ली, (क्रमिं हन्ति। हन्+टः।) विड्भङ्गम्। इति रत्नमाला॥

क्रमिजं, क्ली, (क्रमेः क्रमिभ्यो वा जायते इति। जन्+डः।) अगुरु। इत्यमरः॥

क्रमिजा, स्त्री, (क्रमिज+टाप्।) लाक्षा। इति इति रत्नमाला॥

क्रमिशत्रुः, पुं, (क्रमेः क्रमीणां वा शत्रुरिव नाशकत्वात्।) विड्भङ्गः। इति रत्नमाला॥

क्रमुः, पुं, (क्रमु+बाहुलकादुः।) गुवाकः। इति भरतो द्विरूपकोषश्च॥

क्रमुकः, पुं, (क्रमु+संज्ञायां कन्।) पट्टिकालोध्रः। गुवाकवृक्षः। ब्रह्मदारुवृक्षः। इत्यमरः। २। ४। ४१॥ भद्रमुस्तकम्। कार्पासिकाफलम्। इति मेदिनी।

क्रमुकफलं, क्ली, (क्रमुक एव फलम्। क्रमुकस्य गुवाकादिवृक्षस्य फलं वा।) गुवाकम्। इति राजनिर्घण्टः॥ (यथा, माघे।

"आस्वादितार्द्रक्रमुकाः समुद्गात्"॥

क्रमुकाः क्रमुकफलानीत्यर्थः॥) अस्य गुणपर्य्यायौ गुवाकशब्दे द्रष्टव्यौ॥

क्रमुकी, स्त्री, (क्रमुक+स्त्रियां गौरादित्वात् ङीष्।) गुवाकः। इति शब्दरत्नावली॥

क्रमेलः, पुं, (क्रममालम्ब्य एलति गच्छतीति। एल्+अच्।) उष्ट्रः। इत्युणादिकोषः॥

क्रमेलकः, पुं, (क्रममालम्ब्य एलति गच्छति। एल्-गतौ+ण्वुल्। यद्वा, क्रमेल+स्वार्थे कन्।) उष्ट्रः। इत्यमरः २। ९। ७५॥ (यथा पञ्चतन्त्रे। १। ४१४।

"भो ममाग्रेऽपि क्रमेलकहृदयं भक्षयित्वा अधुना मम मुखमवलोकयसि"॥)

क्रमोद्वेगः, पुं, (क्रमेण उद्गतः उत्कृष्टो वा वेगो यस्य।) वृषः। इति भूरिप्रयोगः॥

क्रयः, पुं, (क्री+भावे अच्।) पण्यपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारविशेषः। मूल्येन द्रव्यग्रहणम्। केना इति भाषा। यथा,—

"प्रकाशं वा क्रयं कुर्य्यात् मूल्यं वापि समर्पयेत्"॥
इति प्रायश्चित्ततत्त्वे बृहस्पतिः॥

क्रयलेख्यं, क्ली, (क्रयस्य क्रये क्रयमधिकृत्य वा लेख्यम्।) भूम्यादिक्रयलिपिः। कबाला इति पारस्य भाषा। यथा,

"गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्।
पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते"॥
इति प्रायश्चित्ततत्त्वे बृहस्पतिः॥

क्रयविक्रयः, पुं, (क्रयेण सह विक्रयः।) वाणिज्यम्। केना वेचा इति भाषा। यथा,—

"ऋणादानं तथादानं वस्तूनां क्रयविक्रयम्।
न कुर्य्यात् गुरुणा सार्द्धं शिष्यो भूत्वा कदाचन"॥
इति तन्त्रसारः॥
(केचित्तु एतौ द्विवचनान्ताविच्छन्ति। तत्र द्वन्द्वः। यथा, क्रयश्च विक्रयश्च तौ क्रयविक्रयौ। यदुक्तं मनुसंहितायाम्।

"आगमं निर्गमस्थानं तथा वृद्धिक्षयावुभौ।
विचार्य्य सर्व्वपण्यानां कारयेत् क्रयविक्रयौ॥
पञ्चरात्रे पञ्चरात्रे पक्षे पक्षे ऽथवा गते।

कुर्व्वीत चैषां प्रत्यक्षमर्थसंस्थापनं नृपः" ॥

क्रयविक्रयानुशयः, पुं, (क्रये विक्रये च क्रयविक्रयौ वा अनुशयः पश्चात्तापः।) अष्टादशविवादान्तर्गतविवादविशेषः। यथा।

"वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः" ॥

अस्य विवरणम्। यथा, मनौ।

"क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्।
योऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वा" ॥

क्रयविक्रयिकः, पुं, (क्रयविक्रयाभ्यां जीवतीति। "वस्नक्रयविक्रयात् ठन्" ।४।४।१३। इति ठन्।) वणिक्। इत्यमरः। २। ९। ७८ ॥

क्रयशीर्षं, क्ली, (कपिशीर्षं + एषोदरात् साधुः।) कपिशीर्षम्। इति चिकाण्डशेषः ॥

क्रयारोहः, पुं, (आ + रुह + अधिकरणे घञ्। क्रयार्थं आरोहः समारोहोऽत्र।) हट्टः। इति चिकाण्डशेषः ॥

क्रयिकः, पुं, (क्रयः प्रयोजनमस्यास्य इति ठन्।) क्रेता। तत्पर्य्यायः। क्रायकः २। इत्यमरः ॥ क्रयी ३। इति हेमचन्द्रः ॥ (यथा, महाभारते। १३। "धनेन क्रयिको हन्ति खादकश्चोपभोगतः" ॥

क्रयेण जीवतीति। "वस्नक्रयविक्रयात् ठन्"। ४। ४। १३। इति व्यत्तादपि ठन्) क्रयजीवी। वणिक्। इत्यमरटीकायां भरतः ॥ (यथा, माघे। "पर्य्यापतत क्रयिकलोकमगण्यपण्या" ॥)

क्रयी, [न्] त्रि, (क्रयोऽस्यास्य इति। क्रय + इनिः।) क्रयकर्त्ता। इति हेमचन्द्रः ॥

क्रय्यं, त्रि, (क्रुञ्चोन् द्रव्यपर्य्यये + "अतो यत्"। ३। १। ९७। "क्रय्यस्तदर्थे" ६। १। ८२। इति साधुः।) क्रये प्रसारितम्। क्रयनिमित्तं हट्टादौ न्यस्तं यत् द्रव्यम्। इत्यमरः ॥ (यथा, शतपथब्राह्मणे। ३। ३। ३। १। "क्रय्यस्ते सोमो राजा इति क्रय इत्याह सोमविक्रयी" ॥)

क्रव्यं, क्ली, (क्रव + यत्। क्रवस्य रत्वम्।) मांसम्। इत्यमरः ॥ (यथा, भागवते। ४। १८। २४।

"क्रव्यादाः प्राणिनः क्रव्यं दुदुक्षन्ति क्वे कलेवरे।
सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च" ॥)

क्रव्यघातनः, पुं, (क्रव्यस्य क्रव्यार्थं वा घात्यतेऽसौ। हन् + स्वार्थे णिच् + कर्म्मणि ल्युट्।) मृगः। इति शब्दचन्द्रिका ॥

क्रव्यात्, [द्] पुं, (क्रव्यं मांसं अत्तीति। "क्रव्ये च विट्"। ३।२।६९। इति।) राक्षसः। इत्यमरः ॥ मांसाग्नि त्रि। इति मेदिनी। (यद्यादिमांसभुक् पक्षिविशेषश्चापि। यथा, रघौ। १५। १६।

"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥
क्रव्याद्गणपरीवारश्चितामिरिव जङ्गमः" ॥

"क्षुधानुपक्षे क्रव्यादो गृध्रादयः"। इति मल्लिनाथः। व्याघ्रादिहिंसपशुभेदः।

यथा, मनुः ५। १३१।

"अभिहंतस्य यन्मांसं शुचि तन्मनुरब्रवीत्।
क्रव्याद्भिश्च हतस्यान्यैर्यद्वालाद्यैश्च दस्युभिः" ॥

"क्रव्याद्भिः व्याघ्रश्येनादिभिरिति"। कुल्लूकभट्टः ॥

ग्राम्यक्रव्यादो मार्ज्जारादयः।
यथा, मनौ। ११। १९९।

"स्वदृग्गालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च"।

"ग्राम्यैः क्रव्याद्भिरामांसादैर्मार्ज्जारादिभिः"।

इति कुल्लूकभट्टः ॥ गुरुपत्नीगामिनां नरकभोगावसाने क्रव्यादां आममांसाशिनां योनिप्राप्तिर्भवति।
यथा, तत्रैव। १२। ५८।

"दृढगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि।
क्रूरकर्म्मकृतान्चैव घृतघ्नो गुरुतल्पगः" ॥

शवदाहकाग्निभेदः। यथा, शतपथब्राह्मणे। १। २। १। ४।

"अपाग्ने! अग्निमामादं जहि निष्क्व्यादं सेध इत्यं वा आमाद् येनेदं मनुष्याः पक्वाऽन्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति"। "हे अग्ने! गार्हपत्य! आमादमग्निमपजहि परित्यज तथा,—

"क्रव्यादमग्निं निःसेधनिःशेषं दूरे गमय"।

इति भाष्यम्। ऋग्वेदे च। १०। १६। १०।

"योऽग्निं क्रव्यात् प्रविवेश यो गृहम्" ॥)

क्रव्यादः, पुं, (क्रव्यं मांसमत्ति। अद् उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्। क्षत्तं छिन्नं तदेव पुनर्व्विशेषतः क्षत्तं पक्वञ्च भुङ्क्ते इति क्षत्तविक्षत्तपक्वशब्दस्य एषोदरात् क्रव्यादेशः। इति काशिका।) राक्षसः। इत्यमरः ॥ सिंहः। श्येनः। इति राजनिर्घण्टः ॥ शवभक्षकाग्निः। यथा,

"क्रव्यादो मृतभक्षणे"। इति तिथ्यादितत्त्वम् ॥ मांसाग्निनि त्रि। इति धरणी ॥ (पुरा किल केनचिद्रक्षसाग्निमुखादियमेव सा भृगुभार्य्या पुलोमेति विदितेनैवापहृतायान्तस्यां पुलोमायां महर्षिर्भृगुरत्यन्ताऽमर्षमाहरन् त्वं सर्व्वभक्षो भविष्यसीति तस्मै वह्नये शापं प्रददौ तेन हि तस्य क्रव्यादत्वं प्रसिद्धम्। ततः शप्तेनापि तेनाग्निदेवेनात्मनः सर्व्वभक्षकत्वरूपशापं परिहर्त्तुकामेन सर्व्वभक्षः सन्कथं देवादीनां मुखं भविष्यामीति चिन्तयता अग्निहोत्रेषु यज्ञसत्रक्रियासु च आत्मनः संहारस्वके। पितामहस्तु देवादिभिरनुरुद्धो वह्नेः स्वप्रभावमनुस्मारयन् कौशलेन हुतभागग्रहणस्वीकारमकारयत्। एतद्विवरणन्तु महाभारते। १। ९–७ अध्याययोर्द्रष्टव्यम्। तद्यथा,

भृगुरुवाच।

"केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते।
न हि त्वां वेद तद्रक्षो मद्भार्य्यां चारुहासिनीम् ॥
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा।
विभेति को न शापान्मे कस्य चायं व्यतिक्रमः ॥

पुलोमोवाच।

अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥
साहं तव सुतस्यास्य तेजसा परिमोक्षिता।
भस्मीभूतन्तु तद्रक्षो मामुत्सृज्य पपात वै ॥

सूत उवाच।

इति श्रुत्वा पुलोमाया भृगुः परममन्युमान्।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि" ॥

"शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत्।
किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति" ॥
"अमावास्याञ्च पितरः पौर्णमास्याञ्च देवताः।
मन्मुखेनैव भुञ्जन्ते भुञ्जते च हुतं हविः ॥
सर्व्वभक्षः कथं तेषां भविष्यामि मुखं तदहम्" ॥
"चिन्तयित्वा ततो वह्निश्चक्रे संहारमात्मनः।
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ॥
निरोङ्कारवषट्कारः स्वधास्वाहाविवर्ज्जितः।
विनाग्निना प्रजाः सर्व्वास्तत आसन् सुदुःखिताः ॥
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन् वचः।
अग्निशापात्क्रियाभ्रंशात् भ्रान्ता लोकास्त्रयोऽनघाः।
विदध्वमत्र यत्कार्य्यं न स्यात् कालात्ययो यथा।
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ॥
अमेरावेदयच्छापं क्रियासंहारमेव च।
भृगुणा वै महाभाग! शप्तोऽग्निः कारणान्तरे ॥
कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा।
हुतभुक् सर्व्वभूतेषु सर्व्वभक्षत्वमेष्यति ॥
श्रुत्वा तु तद्वचस्तेषामग्निमाहूय विश्वकृत्।
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥
लोकानामिह सर्व्वेषां त्वं कर्त्ता चान्त एव च।
त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥
स तथा कुरु लोकेश! नोच्छिद्येरन् क्रिया यथा।
कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन! ॥
त्वं पवित्रः सदा लोके सर्व्वलोकगतिश्च ह।
न त्वं सर्व्वशरीरेण सर्व्वभक्षत्वमेष्यसि ॥
अपाने ह्यर्चिषो यास्ते सर्व्वं भोक्ष्यन्ति तास्त्रिखिन्!
क्रव्यादा च तनुर्य्या ते सा सर्व्वं भक्षयिष्यति ॥
यथा सूर्य्यांशुभिः स्पृष्टं सर्व्वं शुचि विभाव्यते।
तथा त्वदर्चिर्निर्दग्धं सर्व्वं शुचि भविष्यति ॥
त्वमग्ने! परमं तेजः स्वप्रभावादिनिर्गतम्।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो! ॥
देवानाप्यायनो भागं गृहाण त्वं मुखे हुतम्"।
"एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ॥
जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः" ॥ * ॥
अतएव ऋङ्मन्त्रेण क्रव्यादाख्याग्नेः शान्तिकर्म्मादिव्यपसारणं जातवेदोऽग्नेरादानं प्रोक्तम्।
यथा, ऋग्वेदे। १०। १६। ९।

"क्रव्यादमग्निं प्रहिणोमि दूरं
यमराज्ञो गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन्" ॥

"क्रव्यं आमिषं अत्ति क्रव्यादः तं तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि। रिप्रं पापं तस्य वाहः वोढा यद्वा रिप्रं पापं वहति उपपदे "कर्म्मण्यण्" इति वह + अण्। सोऽग्निः यमराज्ञः यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु। अथ शान्तिकर्म्मार्थं उपासने इतरः क्रव्यादादन्यः जातवेदा अग्निः इहैव देशे देवेभ्यः देवार्थं हव्यं वहतु" ॥ इति भाष्यम् ॥
क्रव्यं मांसं अत्ति। अद् + उपपदे "कर्म्मण्यण्"। ३। २। १। इत्यण्। रुरुनामामांसाग्निभेदः।
यथा, भागवते। ५। २६। ११।

"एवमेव महाशौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः" ॥)

क्रान्तः, पुं, (क्रम्यते आक्रम्यते इति । क्रम + क्तः ।) घोटकः । इति त्रिकाण्डशेषः ॥ (पादेन्द्रियम् । यथा, मनौ । १२ । १२१ ।

"मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् । वाचमग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्" ॥

"क्रान्ते पादेन्द्रिये विष्णुमिति"। कुल्लूकभट्टः ॥ भावे + क्तः । क्ली, आरूढम् । क्रमणम् । यथा माघे ।

"क्रान्तं यदा वामनवप्रभाजा" ॥

यथा च शतपथब्राह्मणे ५ । ४ । २ । ६ ।

"विष्णोः क्रान्तमसीतीमे लोकाः विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्" ॥) आक्रान्ते त्रि ॥

क्रान्ता, स्त्री, (क्रम + कर्त्तरि क्त । स्त्रियां जातित्वेपि संयोगोपधत्वात् टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥

क्रान्तिः, स्त्री, (क्रम + भावे क्तिन् ।) खगोलमध्यवर्त्तिसूर्य्यगमनार्थतिर्य्यग्लेखा । यथा,—

"अयनादयनं यावत् कक्षा तिर्य्यक् तथापरा । क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्" ॥ इति सूर्य्यसिद्धान्ते गोलाध्यायः ॥ "नाड़ीमण्डलात् दक्षिणोत्तरं क्रान्तिमण्डलावधिर्यदन्तरं तत्" । इति तट्टीकायां रङ्गनाथविद्वान्वरः ॥ तत्पर्य्यायः । अपमण्डलम् २ अपवृत्तम् ३ अपक्रमः ४ अपक्रान्तिः ५ । इति सूर्य्यसिद्धान्तः ॥ अपमः ६ । इति सिद्धान्तशिरोमणिः ॥ इष्टक्रान्त्यानयनक्रमो यथा,—

"परमापक्रमज्या च सप्तरन्ध्रगुणेन्दवः । तद्गुणाज्या त्रिजीवाप्ता तच्चापक्रान्तिरुच्यते" ॥ इति सूर्य्यसिद्धान्तः ॥ * ॥ आक्रमः । इति हेमचन्द्रः ॥ गतिः । गत्यर्थात् क्रमधातोर्भावे क्तिन्प्रत्ययात् तथात्वम् ॥

क्रान्तिवलयः, पुं, (सूर्य्यसिद्धान्तोक्ता क्रान्तिरेव वलयः वृत्तम् ।) क्रान्तिमण्डलम् । विषुवद्वृत्तात् चतुर्विंशतिभागैर्दक्षिणे चोत्तरे यद्वृत्तं तत् । इति सिद्धान्तशिरोमणिः ॥

क्रान्तुः, पुं, (क्रामतीति । "क्रमिगमिक्षमिभ्यस्तुन् दृद्भिश्चेति" । उणां ५ । ४३ । इति तुन् दृद्भिश्च ।) पक्षी । इत्युणादिकोषः ॥

क्रायकः, पुं, (क्रीणाति इति । कर्त्तरि ण्वुल् ।) क्रेता । इत्यमरः ॥ क्रयजीवी । इत्यमरटीकायां भरतः ॥

क्रिमिः, पुं, (क्रमु पादविक्षेपे । "क्रमितमिग्रतिस्तंभामत इच्च" । उणां ४ । १२१ । इति इन् कित् अत इच्च ।) कीटः । द्रुमामयः । इत्यमरटीकायां भरतः ॥ रोगविशेषः । तस्य प्रकारो यथा,—

"क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः । बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥ नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः । तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥ बभ्रुपादास्च सूक्ष्माश्च यूका लिक्षास्च नामतः । द्विधा ते कोठपिड़का कण्डूगण्डान् प्रकुर्व्वते ॥*॥

निदानम् यथा ।

"अजीर्णभोजी मधुरास्लनित्यो द्रवप्रियः पिष्टगुड़ोपभोक्ता । व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते क्रमींश्च" ॥

पुरीषजनिदानं यथा,—

"मांसपिष्टान्नलवणगुड़शाकैः पुरीषजाः" ॥ * ॥

कफजनिदानं यथा,—

"मांसमाषगुड़क्षीरदधिशुक्तैः कफोद्भवाः" ॥

रक्तजनिदानं यथा,—

"विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि" ॥

अभ्यन्तरक्रिमिलक्षणं यथा,—

"ज्वरो विवर्णता शूलं हृद्रोगश्छर्द्दनं भ्रमः । भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्" ॥

कफजरूपं यथा,—

"कफादामाशये जाता वृद्धाः सर्पन्ति सर्व्वतः ॥ पृथुवृत्तनिभाः केचित् केचिद्दूर्व्वादूपदोपमाः । रूढ़धान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ॥ श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते । अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ॥ चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते । हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥ मूर्च्छाच्छर्द्दिज्वरानाहकार्श्यक्लवथुपीनसान्" ॥ * ॥

रक्तजरूपं यथा,—

"रक्तवाहिशिराश्रिता रक्तजा जन्तवोऽणवः ॥ अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः । केशादा रोमविध्वंसा रोमद्वीपा उड़म्बराः ॥ षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः" ॥

विड्जरूपं यथा,—

"पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः । वृद्धास्ते स्यूर्भवेयुश्च ते यदामाशयोन्मुखाः । तदास्योद्गारनिश्वासविड्गन्धानुविधायिनः ॥ पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः । ते यत्र नाम्ना क्रिमयः ककेरुकमकेरुकाः ॥ सौखरादाः सप्रलास्या लेलिहा जनयन्ति हि" ॥

विमार्गगक्रिमिलक्षणं यथा,—

"विड्भेदशूलविष्मकार्श्यपारुष्यपायुतः । रोमहर्षाग्निसदनगुदकण्डूर्विमार्गगाः" ॥

इति माधवकरः ॥

(अस्य सहेतुकलक्षणचिकित्सितानि यथा,—

"इह खल्वभिवेश्यविंशतिविधाः क्रिमयः पूर्व्वमुक्ता नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः । ते पुनः प्रकृतिभिर्भिद्यमानास्चतुर्व्विधास्तद्यथा । पुरीषजाः श्लेष्मजाः शोणितजाः मलजाश्चेति । तत्र मलो बाह्यश्चाभ्यन्तरश्च । तत्र बाह्ये मले जातान् मलजान् सञ्चक्षते, तेषां समुत्थानं मूलावर्ज्जनं, स्थानकेशश्मश्रुलोमपक्ष्मवासांसि, संस्थानमणुवस्तिलाक्षततयो बभ्रुपादा वर्णः कृष्णः शुक्लश्च, नामानि यूकाः पिपीलिकाश्चेति, प्रभावः कण्डूजननं कोठपिड़काभिनिर्व्वर्त्तनञ्च, चिकित्सितं त्वेषामपकर्षणं मलोपघातो मलकराणाञ्च भावानामुपसेवनमिति । शोणितजानान्तु कुष्ठैः समानं समुत्थानं, स्थानं रक्तवाहिन्यो धमन्यः, संस्थानमणवो वृत्ताश्चापादाश्च सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः, वर्णास्ताम्राः, नामानि केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातर इति । प्रभावः केशश्मश्रुनखलोमापध्वंसो व्रणगतानाञ्च हर्षकण्डूतोदसंसर्पणान्यरुजानाञ्च त्वक्सिरास्नायुमांसतरुणास्थिभक्षणमिति, चिकित्सितमप्येषां कुष्ठैः समानं तदुत्तरकालमुपदेक्ष्यते ।

श्लेष्मजाः क्षीरगुड़तिलमत्स्यानूप-मांस-पिष्टान्नपरमान्नकुसुम्भस्नेहाजीर्ण-पूतिक्लिन्नसङ्कीर्ण-विरुद्धासात्म्यभोजनसमुत्थानाः । तेषामाशयः स्थानं प्रवर्द्धमानास्चूर्द्धमधो वा विसर्पन्ति, उभयतो वा । संस्थानवर्णविशेषास्तु श्वेताः पृथुब्रध्नसंस्थानाः केचित्, केचिद्वृत्तपरिणाहाः गण्डूपदाकृतयश्च श्वेतास्ताम्रावभासाः, केचिदणवो दीर्घास्तन्वाकृतयः श्वेताः । तेषां त्रिविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि, अन्त्रादा, उदरादा, हृदयादाश्चुरवो दर्भकुसुमाः, सौगन्धिकाः, महागुदाश्च इति । प्रभावो हृल्लासास्यस्रवणमरोचका विपाको ज्वरो मूर्च्छाजृम्भाश्वथुरानाहोऽङ्गमर्द्दः छर्द्दिः कार्श्यं पारुष्यमिति ।

पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैस्तेषां स्थानं पक्वाशयः । प्रवर्द्धमानास्चाधो विसर्पन्ति । यस्य पुनरामाशयाभिमुखाः स्युस्तदनन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः । संस्थानवर्णविशेषास्तु सूक्ष्मवृत्तपरीणाहाः श्वेता दीर्घाणुसंस्थानाः केचित् केचित् पुनः स्थूलवृत्तपरीणाहाः श्यावनीलहरित पीताः । तेषां नामानि ककेरुकमकेरुकाः लेलिहाः जालूवकाः सौसुरादाश्चेति । प्रभावः पुरीषभेदः कार्श्यं पारुष्यं रोमहर्षाभिनिर्व्वर्त्तनञ्च । तत्र वास्य गुदमुखं परितुदन्तः कण्डूस्रोपजनयन्तो गुदमुखं पर्य्यासते । स जातहर्षो गुदान्निष्क्रमणमतिवेलं करोति ।

इत्येषश्लेष्मजानां पुरीषजानाञ्च क्रिमीणां समुत्थानादिविशेषः । चिकित्सितन्तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यते । तत्र सर्व्वक्रिमीणामपकर्षणमेवादितः कार्य्यम् । ततः प्रकृतिविघातोऽनन्तरं निदानोक्तानां भावानामनुपसेवनमिति ।

तत्रापकर्षणं हस्तेनाभिमृश्यानयनमुपधूपनावतानुपकरणेन वा । स्थानगतानान्तु क्रिमीणां भेषजेनापकर्षणं न्यायतश्चतुर्विधमिति । तद्यथा,—शिरोविरेचनं वमनं विरेचनमास्थापनमित्यपकर्षणविधिः ।

प्रकृतिविघातस्त्वेषां कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगो यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति प्रकृतिविघातः ।

अनन्तरं निदानोक्तानां भावानामनुपसेवनम् । यदुक्तं निदानविधौ, तस्य वर्ज्जनं तथाविध-

प्रायाणां चापरेषां द्रव्याणामिति सज्ञायतश्चिकित्सितमुपव्याख्यातमेतदेव पुनर्विस्तरेणोपदेक्ष्यते।

अथैनं क्रिमिकोष्ठमातुरमग्रे घड्राचं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य स्थोभूते एनं संशोधनं पाययितास्त्रीभि, क्षीरदधिगुडतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुम्भस्नेहरसभयुक्तैर्भोज्यैः सायमातरुपपादयेत् समुदीरणार्थञ्चैव क्रिमीणाश्लेष्माभिसरणार्थञ्च। भिषग्घ युष्टायां रजन्यां सुखोषितं सुप्रजीर्णभुक्तवत्याया स्थापनवमनविरेचनैस्तदहरेवोपपादयेत्। उपपादनीयश्चेत्स्यात् सर्व्वान् परीक्ष्य विशेषान् समीक्ष्य सम्यक्। अथाहरेति ब्रूयात्। मूलक-सर्षपलशुनकरञ्ज-शिग्रु-खरपुष्पभूस्तृण-सुमुख-सुरस-कुठेरक-कण्डीर-कासमार्दपर्णासल्लवकपलिञ्जकानि सर्व्वाण्यथवा यथालाभम्। तान्याहृतान्यभिसमीक्ष्य खण्डशश्छेदयित्वा प्रक्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समावाप्य गोमूत्रेणार्द्रोदकेनाभ्यासिच्य साधयेत्। सततमवघट्टयन् दर्व्या तमुपयुक्तं भूयिष्ठेऽम्भसि। गतरसेष्वौषधेषु स्थालीमवतार्य्य सुपरिपूतं कषायं सुखोष्णं मदनफलविड्ङकल्कतैलोपहितं सन्ध्यिकालवमनमभ्यासिक्य वत्सौ विधिवदास्थापयेदेनम्"।

"मदनफलपिप्पलीकषायेण्वन्यतमेन चिरत्नं कल्क्यात्मात्रामादाय पातुमस्मै प्रयच्छेत्। तदस्य दोषमुभयतो निर्हरति साधु। एवमेव कल्पोक्तानि वमनविरेचनानि संश्रुत्य पाययेदेनं बुद्धा सर्व्वविशेषानवेक्षमाणः।

अथैनं सम्यग्विरिक्तं विज्ञायापराह्णे श्लेष्मरिकषायेण सुखोष्णेन परिषेचयेत्। तेनैव च कषायेण वाह्याभ्यन्तरान् सर्व्वादकार्थान् कारयेत् पश्चात्। तदभावे वा कटुकतिक्तकषायाणामौषधानां क्वाथैर्मूत्रक्षारैर्वा परिषेचयेत्। परिषिक्तञ्च एवं त्रिवातमागारमनुप्रवेश्य पिप्पलीपिप्पलीमूलचव्यचित्रकपटुपञ्चकैरसिद्धेन यवागूवादिना क्रमेणोपक्रामयेत्। विशेषाक्रमागतश्चैनमनुवासयेत् विड्ङतैलेनैकान्तरं द्विरित्र्वा। यदि पुनरस्यातिप्रवृद्धान् शीर्षादीन् क्रिमीन् मन्येत, शिरस्येवाभिसर्पतः कदाचित्। ततः स्नेहस्वेदाभ्यामस्य शिर उपपाद्य, विरेचयेदपामार्गतण्डुलादिना शिरोविरेचनेन।

यच्चभ्याहार्य्यविधिः प्रकृतिविघातोक्तः क्रिमीणां सोऽनुव्याख्यास्यते। मूषिकपर्णीं समूलाग्रपत्तानामपहृत्य खण्डशश्छेदयित्वा उदूखले क्षोदयित्वा पाणिभ्यां पीड़यित्वा च रसं संग्रहीयात्। तेन रसेन क्षोद्रितण्डुलपिष्टं समालोड्य पूपलिकां कृत्वा विधूमेष्वङ्गारेषूपपक्व्य विड्ङतैलसंयुक्तोपहिता क्रिमिकोष्ठाय भक्षयितुमुपपादयेत्। तदनन्तरमल्पकाङ्किकमुदश्विद्वा पिप्पल्यादि पञ्चवर्गसंस्कृतं सलवणमनुपाययेत्"।

"अथास्यशुद्धदाहृत्य महति किलिञ्जे प्रतीर्य्यातपे शोषयित्वोदूखले क्षोदयित्वा दृषदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा विड्ङकषायेण चिल्लाकषायेण वा अष्टकृत्वो दशकृत्वो वा भावितपे सुपरिभावितानि भावयित्वा दृषदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा नवे कलसे समवाप्यानुगुप्तं निधापयेत्। तेषान्तु खलु चूर्णानां पाणितलं पूर्णं यावदा साधु मन्येत क्षौद्रेण संसृज्य क्रिमिकोष्ठाय लेढ्यमुपक्लृप्तेत्॥

तथा भल्लातकास्थीन्याहार्य्य कलसप्रमाणेन सम्शोष्य स्नेहभाविते दृढ़े कलसे सूक्ष्मानेकच्छिद्रब्रध्ने मृदाविलिप्ते समवाप्योडुपेन पिधाय भूमावाकण्ठं निखातस्य स्नेहभावितस्यैव दृढ़स्योपरि कुम्भस्यारोप्य समन्तात् गोमयैरुपचित्य दाहयेत्। स यदा जानीयात् साधु दग्धानि गोमयानि विगतस्नेहानि भल्लातकास्थीनीति ततस्तं कुम्भमुद्धारयेत्। अथ तस्मात् द्वितीयात् कुम्भात्तं स्नेहमादाय विड्ङतण्डुलचूर्णैः स्नेहार्द्रमाक्षैः प्रतिसंसृज्यातपे सर्व्वमहः स्थापयित्वा ततोऽस्मै मात्रां प्रयच्छेत् पानाय। तेन साधु विरिक्तस्य धानुपूर्व्वी यथोक्ता"।

"अथाहरेति ब्रूयात् शारदान्नवांस्तिलान् सम्यदुपेतानाहृत्य सुनिष्पूतान्निष्पूय सुशुद्धान् शोधयित्वा विड्ङकषाये स्नुखोष्णे प्रक्षिप्य सुनिर्व्वापितान् निर्व्वापयेत् आदोषशमनात्। गतदोषानभिसमीक्ष्य सप्रक्षालनान् प्रलुप्य पुनरेव सुनिष्पूतान्निष्पूय सशुद्धान् शोधयित्वा विड्ङकषायेण चिःसप्तकृत्वः सुपरिभावितान् भावयित्वातपे शोधयित्वोदूखले संक्षुद्य दृषदि पुनः श्लक्ष्णपिष्टान् कारयित्वा द्रोण्यामभ्यवधाय विड्ङकषायेण मुहुर्मुहुरवसिच्य पाणिमर्द्दं मर्द्दयेत्। तस्मिन् खलु प्रपीड्यमाने यत्तैलमुपदियात् तत्पाणिभ्यां पर्य्यादाय शुचौ दृढ़े कलसे समासिच्यानुगुप्तन्निधापयेत्। अथाहरेति ब्रूयात् तिल्वकोद्दालकयोर्द्वौ विल्वमात्रौ पिण्डौ श्लक्ष्णपिष्टौ विड्ङकषायेण, ततोऽर्द्धमात्रौ श्यामाचित्रतयोरर्द्धमात्रौ दन्तीद्रवन्त्योरतो अर्द्धमात्रौ चव्यचित्रकयोरित्येतत् सम्भारं विड्ङ-कषायस्यार्द्धाढ़कमात्रेण प्रतिसंसृज्य ततस्तैलप्रस्थमावाप्य सर्व्वमालोड्य मथति पर्य्योगे समासिच्यावधिश्रित्य मथ्यासने सुखोपविष्टः सर्व्वतः स्नेहमवलोकयन्नसकृं मन्थमिना साधयेद्दर्व्या सततमवघट्टयन्। स यदा जानीयादिरमति शब्दः, प्रशाम्यति च फेनः, प्रसादमापद्यते स्नेहो यथास्वन्नवर्णरसोत्पत्तिः संवर्त्तते, भेषजमङ्गुलिभ्यां मथ्यमाननमतिमृदुमनतिदारुणमनङ्गुलिग्राह्यि चेति। एतावन्नस्यावतारणाय। ततस्तमवतीर्य्य घृतं शीतीभूतं महता वाससा परिपूय शुचौ दृढ़े कलसे समासिच्य पिधानेन पिधाय मुखेन वस्त्रपट्टेनाच्छाद्य सूत्रेण सुबद्धं अनुगुप्तन्निधापयेत्। ततोऽस्मै मात्रामाहरेत् पानाय। तेन साधु विरिच्यते। सम्यगपहृतदोषस्य चास्यानुपूर्व्वी यथोक्ता। ततश्चैनमनुवासयेदनुवासनकाले"॥

"इत्येतत् द्रव्याणां श्लेष्म-पुरीष-सम्भवानां क्रिमीणां समुत्थानस्थानसंस्थानवर्ण-नाम-प्रभावचिकित्सितविशेषा व्याख्याताः सामान्यतः। विशेषतस्त्वल्पमात्रमाख्यापनानुवासनानुलोमहरणं भूयिष्ठं तेष्वौषधेषु पुरीषजानां क्रिमीणां चिकित्सितं कार्य्यं मात्राधिकं पुनः शिरोविरेचनवमनोपशमनभूयिष्ठं तेष्वौषधेषु श्लेष्मजानां क्रिमीणां चिकित्सितं कार्य्यम्। इत्येष क्रिमिघ्नो भेषजविधिरनुव्याख्यातो भवति"॥ इति चरके विमानस्थाने सप्तमोऽध्यायः॥ * ॥

"सूतं गन्धमृतं लौहं मरिचं विषमेव च।
मुस्तकं त्रिफला शुण्ठी धातकी रूक्ष्माञ्जनम्॥
चूर्णयां मुस्तकं पाठा बालकं विल्वमेव च।
एतानि समभागानि खरसैर्भङ्गजैस्त्रया॥
वराटिका प्रमाणेन भक्षणाय विशेषतः।
क्रिमिरोगविनाशाय क्रिमिरोगविनाशनः"॥

इति क्रिमिरोगारिरसः॥ * ॥

"क्रमेण दृङ्गं रसगन्धकाजमोदा विड्ङं विषमुष्टिका च।
पलाग्रवीजञ्च विचूर्ण्यमस्य
निष्कप्रमाणं मधुनावलीढ़म्।
पिबेत् कषाय घनजं तदूर्द्धं
रसोऽयमुक्तः क्रिमिमुद्गराख्यः।
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्
सन्दीपयत्यग्निमयं चिराच्च"॥

इति क्रिमिमुद्गरो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिमिरोगाधिकारे॥*॥

अथास्य पथ्यापथ्यविधिः। पथ्यानि यथा,—

"आस्थापनं कायशिरोविरेचनं
धूमः कवलाग्नि शरीरमार्ज्जना।
चिरन्तना वैद्यवरक्षणालयः
पटोलवेत्राग्ररसोनवास्तुकम्॥
ऊताशमन्दारदलानि सर्षपा
नवीनमोचं दृढ़तीफलान्यपि।
तिक्तानि नाली च दलानि मौषिकं
मांसं विड्ङं पिचुमर्द्दपल्लवम्॥
पथ्या च तैलन्तिलसर्षपोद्भवं
सौवीरशुक्तञ्च तुषोदकं मधु।
पचेलिमं तालमरुष्करं गवां
मूत्रञ्च ताम्बूलसुरामगारुजम्॥
क्षौद्राणि मूत्राव्यपयांसि रामठं
क्षाराजमोदा खदिरश्च वत्सकम्।
जलीरकीरं सवरी यमानिका
क्षाराः सरास्ना गुरुशिग्रुपोऽर्जवाः॥
तिक्ताः कषायः कटुको रसोऽप्ययं
वर्गो नराणां क्रिमिरोगिणां सुखः"॥ * ॥

अपथ्यानि यथा,—

"छर्द्दिञ्च तद्वेगविधारणञ्च
विरुद्धपानाशनवह्निनिद्राम्।
प्रवञ्च पिष्टान्नमजीर्णताञ्च
घृतानि माषान् दधिपञ्चशाकम्॥
मांसं पयोऽम्लं मधुरं रसञ्च
क्रिमीन् जिघांसुः परिवर्जयेच्च"॥

इति वैद्यकक्रिमिरोगप्रथ्यापथ्यविधिग्रन्थे ॥)

क्रिमिकण्टकं, क्ली, (क्रिमौ कण्टकमिव ।) क्षुद्रक्रिमिकण्टकम् । इति मेदिनी ॥

क्रिमिघ्नः, पुं, (क्रिमिं हन्ति नाशयतीति । "क्रमनुक्रमिक्षि च" । ३ । २ । ५३ । इति टक् । मूलविभुजादित्वात् सिद्धः । यत् पूर्व्वस्येति नियमान्न णत्वम् ।) क्षुद्रक्रिमिघ्नः । विड्गः । इत्यमरटीकायां रायमुकुटः ॥ (क्रिमिरोगनाशकौषधविशेषः ।

"क्रिमिघ्नं किंशुकारिष्टबीजं सरसभस्मकम् ।
यन्त्रद्वयस्थाखपर्णैरसैः क्रिमिविनाशनः" ॥

इति क्रिमिघ्नो रसः ॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिम्यधिकारे ॥)

क्रिमिघ्नी, स्त्री, (क्रिमिघ्न + टित्वात् स्त्रियां ङीप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

क्रिमिजं, क्ली, (क्रिमिभ्यः जायते इति । "अन्येष्वपि दृश्यते" ।३।२।१०१। इति डः ।) अगुरु । इत्यमरः ॥

क्रिमिजा, स्त्री, (क्रिमिज + स्त्रियां टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रिमिनेत्रचुः, पुं, (क्रिमेः नेत्रमिव नाशकत्वात् ।) रक्तपुष्पकः । इति शब्दचन्द्रिका । पालिताभादार इति भाषा ॥

क्रिमिशत्रवः, पुं, (शत्रु + स्वार्थे अण् शात्रवः । क्रिमेः शात्रव इव तन्नाशकत्वात् ।) विट्खदिरः । इति रत्नमालिका ॥

क्रिमिश्लेष्मः, पुं, (क्रिमिभिर्निर्म्मितः श्लैष्म इव ।) वल्मीकः । इति चिकित्साश्लेषः ॥

क्रियः, पुं, (क्रिया ग्रहणमाद्यगतिक्रिया विद्यतेऽत्र अर्शआदेरच् ।) मेघराशिः । इति दीपिका ॥

क्रिया, स्त्री, (क्रियते अनया असौ अस्मिन् इति वा । डु कृ ञ् करणे करणकर्म्माधिकरणादौ च यथायथं श प्रत्ययः । "रिङ् शयग्लिङ्क्षु" । ७ । ४ । २८ । इति रिङादेशः । "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" । ६ । ४ । ७७ । इति इयङ् ।) आरम्भः । निष्कृतिः । शिक्षा । पूजनम् । सम्यधारणम् । उपायः । कर्म्म । तन्त्रविधम् । यथा,—

"आरम्भो निष्कृतिः शिक्षा पूजनं सम्यधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः" ॥

इति भावप्रकाशः ॥ चेष्टा । चिकित्सा । इत्यमरः । ३ । १ । १५६ ॥ कारणम् । इति हेमचन्द्रः ॥ आद्यम् । इत्यमरटीकायां स्वामी ॥ शौचम् । इति शब्दरत्नावली ॥ धात्वर्थः करोत्यर्थो वा । इति वैयाकरणाः ॥ क्रियाः साध्यरूपाः वस्तुधर्म्माः पाकादयः यथु हि अधिश्रयणाद्यवयवान्नादिः पूर्व्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । इति साहित्यदर्पणम् ॥ चतुःप्रकारव्यवहारपादान्तर्गतव्यवहारपादविशेषः । सा द्विधा मानुषी दैविकी च । तत्राद्या साध्यलेख्यानुमानभेदेन त्रिधा । द्वितीया घटाद्यादकविषकोषतण्डुलतप्तमाषकपालधर्म्मभेदेन नवधा दिव्यानि । यथा,—

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी । तथा साध्यलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता ।
घटाद्या धर्म्मजान्ताश्च दैविकी नवधा स्मृता" ॥

इति व्यवहारतत्त्वे बृहस्पतिः ॥ (चिकित्साकार्य्यं यथा,—चरके सूत्रस्थाने १७ अध्याये ॥

"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्मतद्विघ्नां मतम् ॥
कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानाङ्गानुबन्धः स्यादत्यर्थं क्रियते क्रियाः" ॥
"यात्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं कुरुतेऽन्यमुदीरयेत्" ॥
"प्रीते प्रीतप्रतीकार उपेक्षोपेक्षनिवारणम् ।
ज्ञात्वा कुर्य्यात् क्रियां प्राज्ञो क्रियाकालं न हापयेत्" ॥

इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

क्रियाकारः, पुं, (क्रियां शिल्पारम्भं करोतीति । कृ + उपपदे "कर्म्मण्यण्" ३ । २ । १ । इत्यण् ।) नवच्छाचः । नूतन पड़ुया इति भाषा । इति चिकित्साशब्देशः ॥ कर्म्मकर्त्तरि च ॥

क्रियादेवी, [न्] पुं, (क्रियां व्यवहाराङ्गसाधनं साक्षिलेख्यादिकं देष्टि । दिव् + णिनिः ।) साक्ष्यलिखितभुक्तियुक्तिशपथदेष्टा । स च व्यवहारविषये षड्विधः । हीनान्तर्गतहीनविशेषः । यथाह,—व्यवहारतत्त्वे नारदः ।

"अन्यवादी क्रियादेष्टी नोपस्थायी निरुत्तरः ।
आहूतप्रथमायी च हीनः षड्विधः स्मृतः" ॥

(तल्लक्षणं यथा । वीरमित्रकृतकात्यायनवचने ।

"लेख्यञ्च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां देष्टि यो मोहात् क्रियादेष्टी स उच्यते" ॥)

कर्म्मदेष्टरि त्रि ॥

क्रियापादः, पुं, (क्रिया विवादसाधनं पाद इव ।) चतुष्पादव्यवहारान्तर्गततृतीयपादः । यथा,—

"पूर्व्वपक्षः स्मृतः पादो द्वितीयस्तूत्तरः स्मृतः ।
क्रियापादस्तथा चान्यस्तुर्य्यो निर्णयः स्मृतः" ॥

इति बृहस्पतिः ॥ स च साक्ष्यलिखितभुक्तियुक्तिशपथरूपः । इति व्यवहारतत्त्वम् ॥

क्रियाभ्युपगमः, पुं, (क्रियायाः कार्य्यादिक्रियार्थं अभ्युपगमः स्वीकारः ।) परस्परक्रियास्वीकारः । द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्परस्वीकारेण अनुमतिः । यथा,—

"क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च" ॥

इति मनुः ॥ अस्यार्थः । "यदत्रापत्यं भविष्यति तदावयोरुभयोरेवेति नियमैतत् क्षेत्रस्वामिना बीजवपनार्थं यद्बीजिनो दीयते तस्यापत्यस्य लोके बीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ" । इति कुल्लूकभट्टः ॥ उपलक्षणमेतत् ॥

क्रियायोगः, पुं, (क्रियैव योगः योग उपायः ।) देवाराधनतदालयादिकरणरूपपुण्यक्रिया । यथा,—

नारद उवाच ।

"क्रियायोगः कथं प्रोक्तस्त्वया मे ब्रह्मणः पितः ! ।
तदहं श्रोतुमिच्छामि फलं चास्य यथातथम् ॥

ब्रह्मोवाच ।

ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मनः ।
यस्तु वाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥
प्रधानं कारणं योगो मुक्तेर्मुनिवरोत्तम ! ।
क्रियायोगस्तु योगस्य परमं तात ! साधनम् ॥
यदेतद्भवता पृष्टं तदिहैकमनाः शृणु ।
यैस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ॥
कारयेन्मृण्मयं वापि शृणु तस्य फलं सुने ! ।
अहन्यहनि योगेन यजतो यन्महाफलम् ॥
प्राप्नोति तत् फलं विष्णोर्थः कारयति मन्दिरम् ।
कुलानां शतमागामि समतीतं तथा शतम् ॥
कारयेद्भगवद्धाम नयत्यच्युतमन्दिरम् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ।
पतितं पतमानन्तु तथार्द्धपतितं तथा ॥
समुद्धृत्य हरेर्द्धाम द्विगुणं फलमाप्नुयात् ॥
"प्रतिमां लक्षणवतीं यः कुर्य्याच्चैव मानवः ॥
केशवस्य परं लोकमक्षयं प्रतिपद्यते ।
अनुज्ञातो मया राज्ये यमो राजाथ किङ्करान् ॥
केवलं ये जगद्धाममनन्तं समुपाश्रिताः ।
भवद्भिः परिहार्य्यास्ते नेषां नास्तीह संस्थितिः ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्दूतास्ते च त्याज्याः सुदूरतः ॥
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ।
श्रद्धापुरःसरैर्नित्यं ते च त्याज्याः सुदूरतः" ॥

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासननामाध्यायः ॥ तथा च पातञ्जले ।

"तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः" ॥)

क्रियावसन्नः, त्रि, (क्रियया अवसन्नः ।) साक्ष्यादिना प्राप्तपराजयः । यथा,—

"स्वयमभ्युपपन्नो हि स्वपर्य्यवसितोऽपि सन् ।
क्रियावसन्नो वादे तु परं सभ्यावधारणम्" ॥

इति व्यवहारतत्त्वम् ॥

क्रियावान्, [त्] त्रि, (क्रिया अस्यास्तीति मतुम् । मस्य वः ।) कर्म्मकृद्यतः । क्रियासु नियुक्तः । इत्यमरः । ३ । १ । १८ ॥ (यथा, भट्टिः । १ । १० ।

"पुत्रीयता तेन वराङ्गनाभि-
रानाथि विद्वान् क्रतुषु क्रियावान्" ॥)

क्रियावादी, [न्] पुं, (क्रियां क्रियासाध्यं वदति । वद + णिनिः ।) प्रमाणवादी । कार्य्यवादी । इति मिताक्षरा ॥ परिव्राजादी इति पारस्यभाषा ॥

क्रियेन्द्रियं, क्ली, (क्रियायाः कर्म्मणः साधनं इन्द्रियम् ।) कर्म्मेन्द्रियम् । इति हेमचन्द्रः ॥ (तानि च पञ्चसंख्यकानि ज्ञानकर्म्मभेदेन दशसंख्यकानि च प्रसिद्धानि मनस्तु उभयात्मकं सर्व्वेषां प्रवर्त्तकम् । यथा मनौ ।

"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं पाणिपादं वाक् चैव दशमी स्मृता" ॥)

क्री, द्रु ञ ग द्रव्यपर्य्याये । इति क्रविकल्पद्रुमः ॥ (क्र्यां–उभं-सृकं-व्यनिट् ।) पर्य्यायः परीवर्त्तः । द्रु, क्रीचिमम् । ञ ग, क्रीणाति क्रीणीते धान्यं धनेन लोकः । इति दुर्गादासः ॥

क्रीड, ऋ खेले । इति क्रविकल्पद्रुमः ॥ (श्यां-परं-अकं-सेट् ।) ऋ, अचिक्रीडत् । क्रीडति

क्रुञ्चः

वालः शिखिभिः । इति दुर्गादासः ॥
क्रीड़ः, पुं, (क्रीड़ + भावे घञ् ।) परीहासः । इति शब्दरत्नावली ॥
क्रीड़नं, क्ली, (क्रीड़ + भावे ल्युट् ।) खेला । यथा ।
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रक्रता
ताते काननसेवनावधि छपा सुग्रीवसख्यावधि" ।
इति महानाटकम् ॥
क्रीड़ा, स्त्री, (क्रीड़ + भावे अप् ततष्टाप् ।) परीहासः । खेला । इत्यमरः । १ । ७ । ३३ ॥
(यथा, भागवते । २ । ३ । १५ ।
"स वै भागवतो राजा पाण्डवेयो महारथः ।
बालक्रीड़नकैः क्रीड़न् कृष्णक्रीड़ां य आददे" ॥)
अवज्ञानम् । इति मेदिनी ॥
क्रीड़ातालः, पुं, (क्रीड़ानामकस्तालः ।) तालप्रभेदः । यथा,—
"एक एव प्लुतो यत्र क्रीड़ातालः स कथ्यते ।
अपरं नियमं विना" । इति सङ्गीतदामोदरः ॥
क्रीड़ारत्नं, क्ली, (क्रीड़ायां क्रीड़ायाः वा रत्नमिव ।) रतिः । इति चिकाण्डशेषः ॥ [हलायुधः ॥
क्रीड़ारथः, पुं, (क्रीड़ायै रथः ।) क्रीड़ार्थरथः । इति
क्रीतः, पुं, (क्री + कर्म्मणि क्तः ।) क्रीतकपुत्रः । स तु द्वादशविधपुत्रान्तर्गतपुत्रभेदः । इति जटाधरः ॥ (यथाह, याज्ञवल्क्यः ।
"दद्यात् माता पिता वा यं स पुत्रो दत्तको भवेत् ।
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः" ॥)
कृतक्रये चि । केना इति भाषा । यथा,—
"दीयमानं न गृह्णाति क्रीतं पश्यन्तु यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" ॥
इति प्रायश्चित्ततत्त्वे नारदः ॥
क्रीतकः, पुं, (क्रीत + स्वार्थे कन् ।) क्रीतपुत्रः । यथा, मनुः । ९ । १७४ ।
"क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा" ॥
क्रीतानुशयः, पुं, (क्रीते क्रये अनुशयः पश्चात्तापः ।) द्रव्यं क्रीत्वा पश्चादनुतापः । यथा,—
"क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतत् विवादपदमुच्यते" ॥
इति याज्ञवल्क्यः ॥
क्रुङ्, [ङ्], पुं स्त्री, (क्रुञ्चति वक्रं यथा स्यात् तथा गच्छति । "ऋत्विग् दृक् स्रगिति" । ३ । २ । ५९ । इति निपातनात् साधुः ।) क्रौञ्च । इत्यमरः । २ । ५ । २२ ॥ कोँच् वक इति भाषा । (यथा, यजुर्वेदे १६ । ७३ ।
"अश्मः क्षीरं व्यापिबत् क्रुङ्डाक्रिरसो धिया ।
ऋतेन सत्यमिन्द्रियम्" ।
"व्याक्रिरसः अङ्गानां रसः प्राणो यथा, क्रुङ् हंसो भूत्वा धिया प्रज्ञया अश्मः सकाशात् क्षीरं दुग्धं व्यापिबत् पिबति संसृष्टाभ्यां क्षीरोदकाभ्यां क्षीरमेव हंसः पिबतीति जातिस्वभावः" । इति भाष्यम् ॥)
क्रुञ्चः, पुं, (क्रुञ्च + अच् ।) क्रौञ्चपर्व्वतः । इति हेमचन्द्रः ॥ (वकविशेषः । यथा, यजुर्वेदे २४ । २२ ।
"वायवे वलाका इन्द्राग्निभ्यां क्रुञ्चान्" ॥)

क्रूरः

क्रुञ्चा, स्त्री, (क्रुञ्च + स्त्रियां संयोगोपधत्वात् टाप् ।) अजादित्वात् टाबित्येके । वीणाभेदः । इति शब्दरत्नावली ॥
क्रुत्, [द्] स्त्री, (क्रुध् + सम्पदादित्वात् क्विप् भावे ।) क्रोधः । इत्यमरहेमचन्द्रौ ॥ अस्या रूपान्तराणि । क्रुद् । क्रुत्त क्रुद् । इति संक्षिप्तसारव्याकरणम् ॥
क्रुद्धः, त्रि, (क्रुध् + कर्त्तरि क्तः ।) क्रोधयुक्तः । यथा ।
"योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः" ॥
इति देवीमाहात्म्यम् ॥ (भावे क्तः ।) क्रोधे क्ली ॥
क्रुध, ल्ट य औ कोपे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-अनिट् ।) ल्ट, अक्रुधत् । य, क्रुध्यति लोकः शिष्यवे । औ, क्रोद्धा । इति दुर्गादासः ॥ * ॥ रेलते १ हेलते २ भ्रामते ३ भ्रमीयते ४ भीजाति ५ भ्रेषति ६ दोधति ७ वनयति ८ कम्पते ९ भोजते १० । इति दश क्रुध्यतिकम्भीमाणः । इति वेदनिघण्टौ २ अध्यायः ॥
क्रुधा, स्त्री, (क्रुध् + क्विप् स्त्रियां हलन्तत्वात् वा टाप् ।) क्रोधः । इत्यमरटीकायां भरतः ॥
क्रुनृच, गत्याम् । वक्रणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं च-सेट् ।) रेफयुक्तादिः पञ्चमस्वरी । क्रुञ्चति । इति दुर्गादासः ॥
क्रुश्च, ग क्लिषि । क्लिशि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी रेफयुक्तः । क्लिशि दुःखानुभवे । ग, क्रुश्नाति बुभुक्षार्त्तः । इति हलायुधः । चुक्रुश्च । इति दुर्गादासः ॥
क्रुश, ज औ रोदे । क्षतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-रोदने अकं-आक्षाने सकं-अनिट् ।) ज, क्रोशः क्रुशः । औ, अक्रुचत् । रोदोऽश्रुविमोचनम् । क्षतिराक्षानम् । इति दुर्गादासः ॥
क्रुश्वा, [न्] पुं स्त्री, (क्रोशति रौतीति । क्रुश + "लीड् क्रुशिरुहीति" । उणां ४ । ११३ । इति क्वनिप् ।) गृहगोधा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
क्रुष्टं, क्ली, (क्रुश् + भावे क्तः ।) रोदनम् । इत्यमरः । १ । ७ । ३५ ॥ रावः । इति मेदिनी ॥
क्रूरः, त्रि, (क्षत् छेदने + "क्षतेष्टक्रूच" । उणां २ । २१ । इति रक्प्रत्ययः धातोः क्रादेशश्च ।) परद्रोहकारी । (यथा, मेघदूते । १०७ ।
"क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" ॥)
निर्दयः । तत्पर्य्यायः । दृढ़संसः २ घातुकः ३ पापः ४ । (यथा, भागवते । ९ । १४ । ३७ ।
"स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः" ॥
यथा, च कुमारे । २ । ४८ ।
"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः" ।
"क्रूरे घातुके" इति मल्लिनाथः ॥)
कठिनः । इत्यमरः । ३ । ३ । १९० ॥
(यथा, रघुवंशे । १२ । ४ ।
"तस्याभिषेकसम्भारं कल्पितं क्रूरनिष्यया" ॥)
घोरः । इति मेदिनी ॥ (यथा, पञ्चतन्त्रे २ । २५ ।
"क्रूरो लुब्धोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः" ॥)
उग्रः । इति हेमचन्द्रः ॥ प्रथमदृतीयपञ्चमसप्तमनवमैकादशराशयः । यथा,—
"ओजोऽथ युग्मं विषमः समश्च
क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः" ॥
इति दीपिका ॥
क्रूरः, पुं, (क्षतेतीति । "क्षतेष्टक्रूच" । उणां २ । २१ । इति रक् धातोः क्रादेशश्च ।) भूताङ्कुशवृक्षः । रक्तकरवीरवृक्षः । श्येनपक्षी । कङ्कपक्षी । इति राजनिर्घण्टः ॥
क्रूरकर्म्मा, [न्] पुं, (क्रूरं कर्म्म यस्य ।) भयानककर्म्मकर्त्तरि त्रि ॥ (यथा, पञ्चतन्त्रे । १ । १० ।
"द्विजिह्वा क्रूरकर्म्माणो निष्ठाच्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव" ॥)
कटुतुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (अकपुष्पी । अस्याः पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका" ॥)
क्रूरगन्धः, पुं, (क्रूरः उग्रो गन्धोऽस्य ।) गन्धकः । इति राजनिर्घण्टः ॥
क्रूरगन्धा, स्त्री, (क्रूरः उग्रो गन्ध एकदेशे ऽस्याः । स्त्रियां टाप् ।) कस्तूरीवृक्षः । इति राजनिर्घण्टः ॥
क्रूरदृक्, [श्] त्रि, (क्रूरा दृक् दृष्टिर्यस्य । क्रूरं यथा स्यात् तथा पश्यति वा । दृश् + क्विन् ।) पिशुनः । श्येनेश्वरे पुं । इति मेदिनी ॥ (यथा,—ज्योतिषतत्त्वे । "आरोवक्रः क्रूरदृक् चावनेयः" ॥)
क्रूरधूर्त्तः पुं, (क्रूरः क्रूरत्वयुक्ततया धूर्त्त इव ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरकशब्दे ऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
क्रूररावी, [न्] पुं, (क्रूरं कर्कशं उग्रं वा रौतीति । रु + णिनिः ।) द्रोणकाकः । इति राजनिर्घण्टः ॥
क्रूरलोचनः, पुं, (क्रूरे लोचने क्रूरं लोचनं वा अस्य ।) श्येनिः । इति हारावली ॥
क्रूरस्वरः, त्रि, (क्रूरः कर्कशः स्वरोऽस्य ।) कर्कशध्वनियुक्तः । यथा,—
"क्रूरस्वरा काकोलूकधरट्टोष्ट्राश्वगर्दभाः" ॥
इति कविकल्पलतायां द्वितीयप्रसवके तृतीयकुसुमम् ॥
क्रूरा, स्त्री, (क्रूर + स्त्रियां जातित्वेपि न ङीष् अतः टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
क्रूराकृतिः, पुं, (क्रूरा आकृतिर्यस्य ।) रावणः । इति शब्दमाला ॥ (कठोरमूर्त्तौ, त्रि ॥)
क्रेणिः, पुं, (क्री + निः ।) क्रयधनम् । इत्युणादिकोषः ।
क्रेतव्यं, त्रि, (क्री + कर्म्मणि तव्यत् ।) क्रेयवस्तु । यथा,
"क्रेयं क्रेतव्यमाचके" । इत्यमरः । २ । ९ । ८२ ॥
क्रेता, [तृ] त्रि, (क्री + तृच् ।) क्रयकर्त्ता । यथा ।
"विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं व्ययो दमम् ।
क्रेता मूल्यमवाप्नोति तस्माद्यत्नस्य विक्रयी" ॥
इति प्रायश्चित्ततत्त्वे याज्ञवल्क्यः ॥
क्रेयं, त्रि, (क्री + कर्म्मणि यत् ।) क्रेतव्यमात्रकम् । इत्यमरः । १ । ९ । ८२ ॥ किनिवार उपधातु इव इति भाषा ॥

क्रोधः

क्रोधदारणः, पुं, (क्रुध + अच् बाहुलकादगुणः। क्रोधः पर्व्वतविशेषः। तस्य दारणः दारक इत्यर्थः। क्रोधं दारयति वा। दृ + णिच् + ल्युः।) कार्त्तिकेयः। इत्यमरटीकायां रायमुकुटः॥

क्रोड़, क्ली, स्त्री, (क्रूड़ + घञ्।) वाक्कोर्मध्यम्। क्रोल इति भाषा। तत्पर्य्यायः। भूजान्तरम् २ उरः ३ वत्सम् ४ वक्षः ५। इत्यमरः।२।६।७७॥ उत्सङ्गः६ भोगः ७ वपुषःप्राक् ८। इति राजनिर्घण्टः॥ (यथा, यजुर्व्वेदे। २५।८। "इन्द्रस्य क्रोड़ोऽदित्यै-ऽजस्यम्"। कात्यायनश्रौतसूत्रे च। ६। ८। १३। "श्लेषमिड़ा पात्न्यामासिच्य क्रोड़मनस्थीनि च पास्यति"॥ हितोपदेशे च। "तत्र तरोर्निम्नितनीड़क्रोड़े पक्षिणः सुखं वर्षास निवसन्ति"॥)

क्रोड़ः, पुं, (कूड़ + घञ्। क्रोड़ोऽस्यास्तीति अर्श आदिभ्यः अच् वा।) शूकरः। इत्यमरः।२।५।२॥ धरणिः। इति मेदिनी॥ वाराहीकन्दः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ५०। २०। "नदी शैवालदिग्धाङ्गं हरिश्मश्रुजटाधरम्। नग्नैः शङ्कनखैर्गात्रैः क्रोड़ैश्चित्रैरिवार्पितम्"॥)

क्रोड़कन्या, स्त्री, (क्रोड़स्य शूकरस्य कन्या इव।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़चूड़ा, स्त्री, (क्रोड़े चूड़ा यस्याः।) महाश्रावणिकावृक्षः। इति राजनिर्घण्टः॥ वड़ थुलकुड़ि इति भाषा।

क्रोड़पर्णी, स्त्री, (क्रोड़े करटकमध्ये पर्णं यस्याः।) करटकारिका। इति शब्दचन्द्रिका॥ (करटकारीशब्दे विवरणमस्य ज्ञेयम्॥)

क्रोड़पादः, पुं, (क्रोड़े शरीराभ्यन्तरे पादोऽस्य।) कच्छपः। इति हेमचन्द्रः॥

क्रोड़ाङ्गः, पुं, (क्रोड़े अङ्गानि अस्य।) कच्छपः। इति शब्दरत्नावली॥

क्रोड़ाङ्घ्रिः, पुं, (क्रोड़े अङ्घ्रिरस्य।) कच्छपः। इति त्रिकाण्डशेषः॥

क्रोड़ी, स्त्री, (क्रोड़ + जातिवाचकत्वात् गौरादित्वात् ङीष्।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़ीकरणं, क्ली, (क्रोड़ + च्वि + भावे ल्युट्। अभूततद्भावे चिः।) आलिङ्गनम्। इति हलायुधः॥

क्रोड़ीकृतिः, स्त्री, (क्रोड़ + च्वि + भावे + क्तिन्। अभूततद्भावे चिः।) आलिङ्गनम्। इति हेमचन्द्रः॥

क्रोड़ीमुखः, पुं, (क्रोड्याः शूकर्य्याः मुखमिव मुखं अस्य।) गण्डकः। गण्डारः। इति राजनिर्घण्टः॥ गण्डार इति भाषा।

क्रोड़ेष्टा, स्त्री, (क्रोड़स्य शूकरस्य इष्टा प्रिया।) मुक्ता इति राजनिर्घण्टः॥

क्रोधः, पुं, (क्रुध् हिंसने + भावे घञ्।) हननम्। इति हेमचन्द्रः॥

क्रोधः, पुं, (क्रुध् + भावे घञ्।) प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः। (यथा, भगवद्गीतायाम्। ३. अ० "काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्"॥) तत्पर्य्यायः। कोपः २ अमर्षः ३ रोषः ४ प्रतिघः ५ रट् ६ क्रुत् ७ क्रुद् ८। इत्यमरः।१।७।२६॥ अमर्षः ९ इति तट्टीकासारसुन्दरी॥ भीमः १० क्रुधा ११ रुषा १२। इति शब्दार्णवः॥ स तु ब्रह्मणो भ्रुवो जातः शरीरस्यषड्रिपोरन्तर्गतश्च। इति पुराणम्॥ हेतिः १ हरः २ हृणिः ३ त्यजः ४ भामः ५ ग्रहः ६ क्रूरः ७ तपुषी ८ जूर्णिः ९ मन्युः १० व्यथिः ११। इत्येकादश क्रोधनामानि। इति वेदनिघण्टौ २ अध्यायः॥ (वत्सरभेदः। यथा, "विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम्। जनानां जायते भद्रे! क्रोधे क्रोधः परस्परम्"॥ इति शब्दार्थचिन्तामणिः। स्त्रियां टाप्। दक्षकन्याविशेषः। यथा, महाभारते १। ६५। १२। "क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥)

क्रोधजः, पुं, (क्रोधात् जायते। जन् + डः।) मोहः। यथा, भगवद्गीतायाम्। २। ६२।

"सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते। क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः"॥

द्विधाव्यसनगणान्तर्गतव्यसनगणः। यथा, मनुः।

"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"॥

क्रोधनः, त्रि, (क्रुध् + "क्रुधमण्डार्थेभ्यश्च"। ३। २। १५१। इति युच्।) क्रोधविशिष्टः। तत्पर्य्यायः। अमर्षणः २ कोपी ३। इत्यमरः।३। १। ३२॥ क्रोधी ४ रोषणः ५। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे तृतीयाङ्के।

"यद्यामेण कृतं तदेव कुरुते सौभाग्यगर्व्वः क्रोधनः"॥

कुरुवंशीयनृपविशेषः। यथा, भागवते। ९। २२। ११।

"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च"॥

षष्टिवर्षान्तर्गतोनषष्टितमवर्षभेदः। यथा तत्रैव।

"रोगो मरणदुर्भिक्षं विरोधोत्तरसङ्कुलम्। क्रोधने विषमं सर्व्वं समाख्यातं हरप्रिये!"॥

भैरवभेदः। यदुक्तं तत्रैव।

"असिताङ्गो रुरुश्चण्ड उन्मत्तः क्रोधनस्तथा"॥)

क्रोधना, स्त्री, (क्रुध् + युच् + स्त्रियां टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २ चण्डी ३। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। ७०। १०।

"आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी"॥)

क्रोधमूर्च्छितः, पुं, (क्रोधः क्रोधमय इव मूर्च्छितः।) चोरनामगन्धद्रव्यम्। इति शब्दरत्नावली॥ (क्रोधेन मूर्च्छितः।) अतिकोपने त्रि॥ (यथा, रामायणे। १। १। ४९।

"रक्षसां निहतान्यासन् सहस्राणि चतुर्दश। ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः"॥)

क्रोधी, [न्] त्रि, (क्रोधोऽस्यास्तीति इनिः। यद्वा, क्रुध्यति इति। क्रुध् + णिनिः।) क्रोधयुक्तः इति हेमचन्द्रः॥ महिषः। इति राजनिर्घण्टः॥ (यथा सुश्रुते। "तत्र जागरूकः प्रीतदेवी दुर्भगस्त्रैणो मत्सर्य्यनार्य्यो गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च"॥)

क्रोशः, पुं, (क्रोशति यतः। क्रुश् + अपादाने घञ्।) सहस्रधनुः। चतुःसहस्रहस्तपरिमाणम्। कोश इति भाषा। तत्पर्य्यायः। गव्यूतम् २। इति हेमचन्द्रः॥ (यथा, रघुवंशे। १३। ७९।

"क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण"॥)

द्विसहस्रदण्डः। अष्टसहस्रपरिमाणम्। इति लीलावती॥ मुहूर्त्तः। यथा,—

"दण्डदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत्। षष्टक्रोशे महेशानि तत्! सर्व्वमक्षतोपमम्॥ सप्तमक्रोशके देवि! सर्व्वं क्षीरोपमं भवेत्। अष्टमक्रोशके देवि! ब्रह्मतुल्यं न संशयः॥ अतः परं महेशानि! विष्णुतुल्यं न संशयः"। इति गुप्तसाधनतन्त्रे षष्ठः पटलः॥ क्रुश् + भावे घञ्। रोदनम्। आह्वानम्॥)

क्रोशतालः, पुं, (क्रोशं व्याप्य तालः शब्दभेदः यस्य।) ढक्का। इति हारावली॥

क्रोशध्वनिः, पुं, (क्रोशं व्याप्य ध्वनिरस्य।) ढक्का। इति हारावली॥

क्रोशयुगं, क्ली, (क्रोशस्य क्रोशपरिमिताध्वनो युगं युग्मम्।) क्रोशद्वयम्। तत्पर्य्यायः। गव्यूतिः २। इत्यमरः॥ गोरुतम् ३ गव्या ४ गव्यूतम् ५। इति हेमचन्द्रः॥

क्रोष्टा, [ष्टृ] पुं, स्त्री, (क्रोशति रौतीति। क्रुश् + "सितनिगमिमसीति"। उणां १। ७०। इति तुन्। "ष्ट्यच् क्रोष्टुः"। ७। १। ९५। इति ष्ट्यच्।) शृगालः। इत्यमरः।२।१।१८॥ (यथा, महाभारते। १। २१४। ८।

"ब्राह्मणस्य प्रशान्तस्य हविर्धाङ्क्षैः प्लुष्यते। शार्द्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्दति"॥

यदुवंशीयो राजविशेषः। यथा, हरिवंशे ३३। ९१

"क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तमपौरुषम्। यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः॥ क्रोष्टोर्हि वंशं श्रुत्वेमं सर्व्वपापैः प्रमुच्यते"॥)

क्रोष्टुकपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप्।) एन्द्रिपर्णी। चाकुलिया इति भाषा। रामवासक इति ख्याता। इति केचित्। इत्यमरटीकायां स्वामी॥ गोजोमिका। इति राजनिर्घण्टः॥

क्रोष्टुकमेखला, स्त्री, (क्रोष्टुकस्येव मेखला कक्षधःपश्चाद् भागो वा अस्त्यस्याः "अर्शआदिभ्यः"। ५। २। १२७। इति अच् टाप्।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टोः शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप्। अत इत्वं च।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छी, स्त्री, (क्रोष्टोः पुच्छमिव अस्त्यस्याः इति "अर्शआदिभ्यः"। ५। २। १२७। इति अच् ङीष्।) एन्द्रिपर्णी। इति शब्दरत्नावली॥

क्रोष्टुफलः, पुं, (क्रोष्टोः प्रियं फलं अस्य अस्मिन् वा।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥

क्रोष्टुविज्ञा, स्त्री, (क्रोष्टुभिः विज्ञा ज्ञाता वा सञ्ज्ञा इव।) एन्द्रिपर्णी। इत्यमरः। २। ४। ९३॥ विरालक्षाञ्जि इति ख्याता इति केचित्। इति भरतः॥ (अस्याः पर्य्यायः। यथा,—

इति भाषा। तत्पर्य्यायः। गव्यूतम् २। इति हेमचन्द्रः॥ (यथा, रघुवंशे। १३। ७९।

"क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण"॥)

द्विसहस्रदण्डः। अष्टसहस्रपरिमाणम्। इति लीलावती॥ मुहूर्त्तः। यथा,—

"दण्डदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत्। षष्टक्रोशे महेशानि तत्! सर्व्वमक्षतोपमम्॥ सप्तमक्रोशके देवि! सर्व्वं क्षीरोपमं भवेत्। अष्टमक्रोशके देवि! ब्रह्मतुल्यं न संशयः॥ अतः परं महेशानि! विष्णुतुल्यं न संशयः"। इति गुप्तसाधनतन्त्रे षष्ठः पटलः॥ क्रुश् + भावे घञ्। रोदनम्। आह्वानम्॥)

क्रोशतालः, पुं, (क्रोशं व्याप्य तालः शब्दभेदः यस्य।) ढक्का। इति हारावली॥

क्रोशध्वनिः, पुं, (क्रोशं व्याप्य ध्वनिरस्य।) ढक्का। इति हारावली॥

क्रोशयुगं, क्ली, (क्रोशस्य क्रोशपरिमिताध्वनो युगं युग्मम्।) क्रोशद्वयम्। तत्पर्य्यायः। गव्यूतिः २। इत्यमरः॥ गोरुतम् ३ गव्या ४ गव्यूतम् ५। इति हेमचन्द्रः॥

क्रोष्टा, [ष्टृ] पुं, स्त्री, (क्रोशति रौतीति। क्रुश् + "सितनिगमिमसीति"। उणां १। ७०। इति तुन्। "ष्ट्यच् क्रोष्टुः"। ७। १। ९५। इति ष्ट्यच्।) शृगालः। इत्यमरः।२।१।१८॥ (यथा, महाभारते। १। २१४। ८।

"ब्राह्मणस्य प्रशान्तस्य हविर्धाङ्क्षैः प्लुष्यते। शार्द्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्दति"॥

यदुवंशीयो राजविशेषः। यथा, हरिवंशे ३३। ९१

"क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तमपौरुषम्। यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः॥ क्रोष्टोर्हि वंशं श्रुत्वेमं सर्व्वपापैः प्रमुच्यते"॥)

क्रोष्टुकपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप्।) एन्द्रिपर्णी। चाकुलिया इति भाषा। रामवासक इति ख्याता। इति केचित्। इत्यमरटीकायां स्वामी॥ गोजोमिका। इति राजनिर्घण्टः॥

क्रोष्टुकमेखला, स्त्री, (क्रोष्टुकस्येव मेखला कक्षधःपश्चाद् भागो वा अस्त्यस्याः "अर्शआदिभ्यः"। ५। २। १२७। इति अच् टाप्।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टोः शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप्। अत इत्वं च।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छी, स्त्री, (क्रोष्टोः पुच्छमिव अस्त्यस्याः इति "अर्शआदिभ्यः"। ५। २। १२७। इति अच् ङीष्।) एन्द्रिपर्णी। इति शब्दरत्नावली॥

क्रोष्टुफलः, पुं, (क्रोष्टोः प्रियं फलं अस्य अस्मिन् वा।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥

क्रोष्टुविज्ञा, स्त्री, (क्रोष्टुभिः विज्ञा ज्ञाता वा सञ्ज्ञा इव।) एन्द्रिपर्णी। इत्यमरः। २। ४। ९३॥ विरालक्षाञ्जि इति ख्याता इति केचित्। इति भरतः॥ (अस्याः पर्य्यायः। यथा,—

"एकपर्णी एकपर्णी चित्रपर्णद्विपर्णपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशीद्भावनिर्गुंडा" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्रोष्टुः, पुं, (क्रोष्टोः प्रियः इक्षुः । एषोदरात् उकारस्य अत्वे सन्धिः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

क्रोष्ट्री, स्त्री, (क्रोष्टु + "ह्रस्वात् क्रोष्टुः" । इति ऋदन्तात् स्त्रियां ङीप् ।) शुक्लभूमिकुष्माण्डः । इत्यमरः । २ । ४ । १९० ॥
('विदारी स्वादुगन्धा च सा तु क्रोष्ट्री सिता स्मृता' ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वृद्धगालिका । क्षणविदारी । लाङ्गली । इति मेदिनी ॥

क्रौञ्चः, पुं, (क्रुञ्च + प्रज्ञाद्यण् स्वार्थे ।) पक्षिभेदः । कौंच वक इति भाषा । (यथा, रामायणे । १ । १ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥)
तत्पर्य्यायः । क्रुङ् २ क्रुञ्चः ३ क्रुञ्चा ४ क्रौञ्चा ५ । इत्यमरभरतौ ॥ कालिकः ६ कालीकः ७ कलिकः ८ । इति शब्दरत्नावली ॥ (अस्य गुणा यथा,—
"क्रौञ्चो हृद्योऽतिरुचिकृद्भ्रमीं हन्ति नित्यशः ।
श्लेष्ममूर्च्छाहरो दीप्तो हन्ति कासमरोचकम्" ॥
इति हारीते प्रथमस्थाने ११ अध्याये ॥)
पर्व्वतविशेषः । इति मेदिनी ॥ (अयन्तु हिमवतः पौत्रः मैनाकस्य पुत्रः ।
यथा, हरिवंशे १८ । १३-१४ ।
"एतेषां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ॥
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्व्वतप्रवरः शुभ्रो नानारत्नसमन्वितः" ॥)
कुररपक्षी । इति राजनिर्घण्टः ॥ द्वीपभेदः । स च दधिमण्डोदसमुद्रेणावृतः षोड़शलक्षयोजनपरिमितः । (यथा, विष्णुपुराणे । २ । ४ । ५७-५८ ।
"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्व्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥
दधिमण्डोदकस्यापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्तारादिगुणेन महामुने !" ॥
तस्याधिपतिः प्रियव्रतराजपुत्रो घृतपृष्ठः । यथा, भागवते । ५ । २० । १८-२० ।
"तथा च बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परीत उपक्लृप्तो यथा, कुशद्वीपो घृतोदेन । यस्मिन् क्रौञ्चो नाम पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते ॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेरवरारविन्दमुपजगाम" । दैत्यविशेषः । स च मयदानवपुत्रः । यथा, हरिवंशे । ७६ । २१—२४ ।
"तान्याशहस्तत्रयथितांश्चादितान् प्रीतरश्मिना ।
मयो ददर्श मायां वै दानवानां महात्मनाम् ॥
स शिलाजालवितता गण्डशैलाट्टहासिनीम् ।
पादपोत्कटकूटाग्रां कन्दराकीर्णकाननाम् ॥
सिंहव्याघ्रगजाकीर्णां नदन्तीमिव यूथपैः ।
ईहामृगगणाकीर्णां पवनाधूर्णितद्रुमाम् ॥
निर्म्मितां स्वेन पुत्रेण क्रौञ्चेन दिविकामगाम्
प्रहृतां पार्व्वतीं मायां सहजे दानवोत्तमः" ॥
अयमेवासुरः क्रौञ्चद्वीपे क्रौञ्चपर्व्वते हेमकन्दरे भगवता स्कन्देन निहतः । यथा,—मरीन्द्रसंहितायाम् ।
"क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ।
स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना ।
स शैलस्तस्य दैत्यस्य ख्यातश्चैव कर्म्मणा ।
केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" ॥)
अर्हतां ध्वजः । राक्षसविशेषः । इति हेमचन्द्रः ॥

क्रौञ्चदारणः, पुं, (क्रौञ्चं स्वनामख्यातपर्व्वतविशेषं दारयतीति । दृ + णिच् + ल्युः । क्रौञ्चस्य दारण इति केचित् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४३ ॥ अस्य क्रौञ्चदारणकथा महाभारते ३ । मार्कण्डेयसमस्यापर्व्वणि २२४ । ३१-३६ ।
"स तूत्थाय महाबाहुरुपसान्त्व्य च तान् जनान् ।
धनुर्विद्ध्य व्यसृजदाशान् श्वेते महागिरौ ॥
बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम् ।
तेन हंसाश्च गृध्राश्च मेरुं गच्छन्ति पर्व्वतम् ॥
स विशीर्णोऽपतच्छैलो भग्नमार्त्तस्वरान् रुवन् ।
तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा ॥
स तं नादं भृशार्त्तानां श्रुत्वापि बलिनाम्बरः ।
न प्रायुध्यदमेयात्मा शक्तिमुद्यम्य चानदत् ॥
सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना ।
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ॥
स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।
उत्पपात महीं त्यक्त्वा भीतः स सुमहात्मनः" ॥
क्रौञ्चं असुरविशेषं दारयति नाशयतीति च । क्रौञ्चासुरवधकथा क्रौञ्चशब्दे द्रष्टव्या ॥)

क्रौञ्चा, स्त्री, (क्रौञ्च + टाप् ।) क्रौञ्चभार्य्या । कौंचवकी इति भाषा । इति जटाधरः ॥ (केचित्तु टावन्तं न मन्यन्ते जीवन्तमेवेच्छन्ति । तथा च रामायणे १ । २ । १४ ।
"निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्" ॥)

क्रौञ्चादनं, क्ली, (अद्यते इति । अद् + कर्म्मणि ल्युट् । क्रौञ्चस्य अदनं भक्ष्यम् ।) मृणालम् । घेंचुली । घेंचु इति भाषा । चिञ्चोटकः । इति मेदिनी ॥ चेँचको इति भाषा । श्लेष्मस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ ("क्रौञ्चादनं घेंचुलिका" । इति वैद्यकरत्नमालायाम् ।) पिप्पली । इति शब्दरत्नावली ॥

क्रौञ्चादनी, स्त्री, (क्रौञ्चादन + ङीप् ।) पद्मबीजम् । इति राजनिर्घण्टः ॥

क्रौञ्चारातिः, पुं, (क्रौञ्चस्य स्वनामख्यातस्य पर्व्वतस्य दैत्यस्य वा अरातिः शत्रुः ।) कार्त्तिकेयः । इति हलायुधः ॥

क्रौञ्चारिः, पुं, (क्रौञ्चस्य अरिः ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥ परशुरामः । इति शब्दमाला ॥

क्रौञ्चशतिकः, पुं, (क्रौञ्चशतं गच्छति । "क्रौञ्चशतयोजनशतयोरुपसंख्यानम्" । वार्त्तिं ५ । १ । ७४ । इति ठन् ।) शतक्रौञ्चगमनकर्त्ता । इति व्याकरणम् ॥ (क्रौञ्चशतादभिगमनमर्हतीति । "ततोऽभिगमनमर्हति" । इति ठञ् क्रौञ्चशतादागन्ता भिक्षुः ॥)

क्लथ् किं म वधे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सकं-सेट् ।) अन्तःस्थद्वितीययुक्तः । कि, क्लथयति क्लथति । म, क्लथयति । इति दुर्गादासः ॥

क्लद, इ ञ ड रुदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थद्वितीययुक्तः । इ, कर्म्मणि क्लन्द्यते । ञ, क्लन्दति क्लन्दते । ड, क्लन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लद, इ ष म ड रोदने । आह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-आह्वाने सकं-सेट् ।) इ, कर्म्मणि क्लन्द्यते । ष, क्लन्दा । म, क्लन्दयति । ड, क्लन्दते । इति दुर्गादासः ॥

क्लद, ष म ड वैक्लव्यविकलत्वयोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) वैक्लव्यं विह्वलीभावः । ष, क्लदा । म, क्लदयति । ड, क्लदते शोकार्त्तः । इति दुर्गादासः ॥

क्लम, उ भ इर् ग्लानौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । उदित्वात् क्लावेट् ।) अन्तःस्थद्वितीययुक्तः । उ, क्लमित्वा क्लान्त्वा । भ, क्लाम्यति । आदिपक्षेऽपि श्रमादित्वं "श्विदुक्लमाचम" इति दीर्घोपधार्थम् । इर्, अक्लमत् अक्लमीत् । इवि दुर्गादासः ॥

क्लम, ञि य भ ग्लानौ । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) अन्तःस्थद्वितीययुक्तः । ञि, क्लान्तोऽस्ति । य भ, क्लाम्यति । इति दुर्गादासः ॥

क्लमः, पुं, (क्लम + भावे घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) आयासः । इत्यमरः । ३ । २ । १० ॥ (यथा, मनौ । ७ । २२५ ।
"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्थिश्चैव गतक्लमः ॥ अस्य लक्षणं यथा,—
"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्द्धितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः" ॥
इति सुश्रुतेन शारीरस्थाने चतुर्थाध्याये उक्तम् ॥)

क्लमथः, पुं, (क्लम् + "श्रमादिभ्योऽथच् इति" अथच् ।) आयासः । इत्यमरः । ३ । २ । १० ॥

क्लव, ष म ड भये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ष, क्लवा । म, क्लवयति । ड, क्लवते । विक्लवन्ति दिवि ग्रहाः । इति यजादिवादनि विक्लवा इवाचरन्तीति क्वौ साध्यम् । इति दुर्गादासः ॥

क्लान्तः, त्रि, (क्लम + कर्त्तरि क्तः ।) क्लान्तियुक्तः । श्रान्तः । यथाह, जयदेवः ।
"मदनकदनक्लान्तः कान्ते ! प्रियस्तव वर्त्तते" ॥
(महाभारते च । ३ । ७३ । २७ ।
"विश्राम्यतामित्युवाच क्लान्तोऽसीति पुनःपुनः" ॥)

क्लिद, इ ञ ड रुदि । इति कविकल्पद्रुमः ॥ (भ्वां उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थद्वितीययुक्तः ।

इ, कर्म्मणि क्लिन्द्यते । अ, क्लिन्दति क्लिन्दते । ङ, क्लिन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लिद, य ऊ इर् क्लेदे । इति कविकल्पद्रुमः । (दिवां-परं-अकं-वेट् ।) अन्तःस्थदशतीययुक्तः । क्लेद आर्द्रीभावः । य, क्लिद्यति वस्त्रं पयसा । ऊ, क्लेदिष्यति क्लेत्स्यति । इर्, अक्लिदत् अक्लेदीत् । अस्मात् पुषादित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥ (यथा, नारदपञ्चरात्रे ।

"सुवेषं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद !" ॥)

क्लिन्न, त्रि, (क्लिद् + कर्त्तरि क्तः ।) आर्द्रम् । इत्यमरः । ३।१।९०५॥ भिज्ञा इति भाषा । (यथा, रामायणे १ । ४२ । १९ ।

"गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गच्छेयुरत्यन्तं सर्व्वे च प्रपितामहाः" ॥)

क्लिन्नाक्षः त्रि, (श्लेष्मादिक्लेदेन क्लिन्ने क्लेदयुक्ते अक्षिणी यस्य ।) श्लेष्मादिना क्लिन्नचक्षुः । कफादिजनितक्लेदयुक्तं चक्षुर्यस्य सः । तत्पर्य्यायः । चुल्लः २ चिल्लः ३ पिल्लः ४ । कर्म्मधारयेण क्लिन्ने चक्षुषि क्ली । इत्यमरः । २ । ६ । ६० ॥

क्लिश, य उ अ उपतापे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-सकं च-सेट् । उदित्वात् क्त्वा वेट् ।) य अ, क्लिश्यति क्लिश्यते । उ, क्लिशित्वा क्लिष्ट्वा । उपताप इह उपतापीभावः । तत्करणञ्च । क्लिश्यते न च निष्पद्यमिति हलायुधः । क्लिश्यते क्षपयः स्वर्गमपीति चतुर्भुजः । अन्ये त्वस्मात् परस्मैपदममन्यमानाः क्लिश्नन्नपि हि मेधावीति । प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमो वल्लवीत्यादि च क्लिशं करोतीति कयङादित्वात् क्ये अचन्तनाङः । ण्यात्मजौ चिक्लिशतुः सचीताविति भट्टिप्रयोगश्च क्रैयादिकात् समादधते तद्धेयम् । क्रैयादिकस्य सकर्म्मकत्वात् । इति दुर्गादासः ॥

क्लिश, ऊ ग विश्लेषे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-वेट् ।) ऊ, अक्लेशीत् अक्लिशत् । ग, "इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्" । इति दुर्गादासः ॥

क्लिशितः, त्रि, (क्लिश् + कर्त्तरि क्तः इट् वा ।) क्लिष्टः । इत्यमरः । ३ । १ । ९८ ॥

क्लिष्टः, त्रि, (क्लिश् + क्तः पक्षे नेट् ।) क्लेशयुक्तः । (यथा, मेघदूते ८४ ।

"इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति" ॥)

तत्पर्य्यायः । क्लिशितः २ । पूर्व्वापरविरुद्धवाक्ये, क्ली । तत्पर्य्यायः । संकुलम् २ परस्परपराहतम् ३ । इत्यमरः । ३ । १ । ९८ ॥ (यथा,-भागवते । १ । ९ । १२ ।

"जीवितुं नार्हथ क्लिष्टं विप्रधर्म्माच्युताश्रयाः" ॥)

क्लिष्टिः, स्त्री, (क्लिश् + भावे क्तिन् ।) क्लेशः । सेवा । इति धरणी ॥

क्लीतकं, क्ली, (क्लीव + कः । निपातनात् वकोपः । क्लीतमधार्ष्ट्यं कथतीति । कल क्षेपे + अन्येभ्योऽपीति डः ।) यष्टिमधुका । इत्यमरः । २।४।२०९ ॥ (अस्य पर्य्यायाः यथा ।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका" ॥
इति वैद्यकरत्नमालायाम् ॥
"आनूपं स्थलजञ्चैव क्लीतकं द्विविधं स्मृतम्" ॥
इति चरके सूत्रस्थाने प्रथमेऽध्याये ।
"श्यामा गिरिक्षाञ्जनकी रसेषु
द्राक्षारसे सप्तलिकारसे च ।
घृतं पिबेत् क्लीतकसंप्रसिद्धम्
पित्तार्व्वुदी तज्जठरी च जन्तुः" ॥
इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)

क्लीतकिका, स्त्री, (क्लीतकं क्रयेऽस्त्यस्याः । "अत इनिठनौ" । ५ । २ । ११५ । इति ठन् रस्य लत्वम् ॥) नीलीवृक्षः । इत्यमरः । २ । ४ । ९४ ॥ (क्लीतक + स्वार्थे कन् टाप् च्यत इत्वं च । यष्टिमधुका ॥)

क्लीव, ऋ ङ अधार्ष्ट्ये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थदशतीययुक्तः । अधार्ष्ट्यमप्रगल्भीभावः । ङ, प्रोक्तेन क्लीवते सर्व्वः । इति हलायुधः । ऋ, अचिक्लीवत् । इति दुर्गादासः ॥

क्लीव, ऋ ङ वान्तवत् । (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अचिक्लीवत् । ङ, क्लीवते । वान्तवदिति क्लीङ्ङ अधार्ष्ट्ये इत्यर्थः । इति दुर्गादासः ॥

क्लीवः, पुं स्त्री, (क्लीङ्ङ अधार्ष्ट्ये "इगुपधेति" । ३ । १ । १३५ । इति कः ।) क्लोपुरुषभिन्नः ।
तत्पर्य्यायः । षण्ढः २ नपुंसकम् ३ क्लतीयाप्रकृतिः ४ शण्ढः ५ । इत्यमरः । २।६।३९॥ क्लतीयप्रकृतिः ६ षण्ढः ७ सण्ढः ८ शण्ढः ९ । इति तट्टीका ॥ पुरुषत्वहीनः । तस्य लक्षणम् । यथा, उद्वाहतत्त्वे ।
"न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति ।
मेढ्रश्चोन्मादशुक्राभ्यां हीनः क्लीवः स उच्यते" ॥
(यथा, पराशरसंहितायाम् ।
"नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥
क्लीवस्तु चतुर्दशप्रकारः । यथाह नारदः ।
"चतुर्दशविधः प्राक्ते षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गषण्ढोऽनड्वश्च पक्षषण्ढस्तथैव च ।
अभिशापादगुरो रोगाद् देवक्रोधात् तथैव च ॥
ईर्ष्याषण्ढस्तथाऽसेक्यो वातरेता मुखेभगः ।
आक्षेप्ता मोघबीजश्च शाली नोऽन्यापतिस्तथा ॥
तत्राद्यावप्रतीकार्य्यौ षट्त्र्यब्दं मासमाचरेत् ।
अनुक्रमात् त्रयस्याथ कालः संवत्सरः स्मृतः ॥
ईर्ष्याषण्ढादयो येऽन्ये चत्वारः समुदाहृताः ।
त्यक्त्वास्ते पतितवत् क्षतयोन्या अपि स्त्रियः ॥
आक्षेप्तृमोघबीजाभ्यां क्षतेऽपि पतिकर्म्मणि ।
पतिरन्यः स्मृतो नार्य्या वत्सरार्द्धं प्रतीक्ष्य तु ॥
शालीनस्यापि दृष्टस्त्री संयोगादुक्थ्येदध्वजः ।
तं हीनवेगमन्यस्त्रीबालाद्याभिरुपाचरेत् ॥
अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति ।
लभेत स्वाम्यं भर्त्ता नो एतत्कार्य्यं प्रजाक्षते ॥
अप्रत्यर्थं स्त्रियः सृष्टाः क्लीवेचं वीजिनो नराः ।
तत्तं बीजवते देयं सवीजो क्षेत्रमर्हति" ॥)

क्लेविः, त्रि, विक्रमहीनः । इत्यमरः । ३ । ३ । २१२ ।

(यथा, महाभारते ३ । अर्জ্জুনাभिगमने ।३३।१२ ।
"कच्चिदाजन् न निर्व्वेदादापन्नः क्लीवजीविकाम्" ॥
धर्म्मकार्य्यादौ निरुत्साहः । यथा, मनौ ३ । १६५ ।
"आचारहीनः क्लीवश्च नित्यं याचनकस्तथा" ॥)

क्लेदः, पुं, (क्लिद् + भावे घञ् ।) आर्द्रम् । यथा,—
"यदस्थितस्य पद्मस्य बन्धू वरुणभास्करौ ।
पदच्युतस्य तस्यैव क्लेदक्लेशकरावुभौ" ॥
इत्युद्भटः ॥ (यथा च याज्ञवल्क्यसंहितायाम् ।
"रसात्तु रसनं स्नैत्यं स्नेहं क्लेदं समार्द्दवम्" ॥
अत्र मिताक्षरा । "रसादुदकात् रसनेन्द्रियं स्नैत्यमङ्गानां स्नेहं स्निग्धतां मृदुतासहितं क्लेदमार्द्रताम्" ॥)

क्लेदनः, पुं, (क्लेदयति श्लेष्मादिभिरिति । क्लिद् + णिच् + कर्त्तरि ल्युः ।) कफः । इति शब्दचन्द्रिका ॥ पञ्चप्रकारश्लेष्मान्तर्गतश्लेष्मविशेषः । इति सुश्रुतबोधः ॥ (भावे + ल्युट् । आर्द्रीकरणम् । यथा, भागवते ३ । २६ । ४३ ।
"क्लेदनं पिण्डनं तृप्तिः प्राणानाप्यायनोदनम्" ॥)

क्लेदा [न्] पुं, (क्लेदयति शीतरश्मिर्भिर्जनम् । क्लिद + णिच् + "श्वन् उक्षन् पूषन् शीर्षन्निति" । उणां १ । १५८ । इति कनिन् । न लोपे पूर्व्वदीर्घः ।) चन्द्रः । इत्युणादिकोषः ॥

क्लेदुः, पुं, (क्लेदयति इति । क्लिद + "पृषृ स्फुरि क्लिदीति" । उणां १ । ११ । इति उन् ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ सन्निपातः । इति संक्षिप्तसार उणादिवृत्तिः ॥

क्लेश, ङ वधे । उपतापे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं उपतापार्थे अकं-सेट् ।) ङ, क्लेशते चिक्लेशे । धातुप्रदीपे तु क्लेष व्यक्तायां वाचीति मूर्द्धन्यान्तो दृश्यते । क्लेषते न दयावाक्यमिति । हलायुधोऽपि । इति दुर्गादासः ॥

क्लेशः, पुं, (क्लिश् + भावे घञ् ।) दुःखम् । तत्पर्य्यायः । आदीनवः २ आसवः ३ । इत्यमरः ॥ (यथा, भगवद्गीतायाम् । १२ । ५ ।
"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" ॥)
स तु पञ्चविधः । अविद्या १ विद्याविरोधिनी । अस्मिता २ अहमस्मीत्यहङ्कारः । रागः ३ इच्छाविशेषः । द्वेषः ४ वैरिता । अभिनिवेशः ५ मरणभयम् । इति कुसुमाञ्जलिः ॥ (तथाच पातञ्जले साधनपादे २ । २—३ ।
"समाधिभावनार्थः क्लेशतनूकरणार्थश्च । अविद्याऽस्मितारागद्वेषाभिनिवेशाः" ॥
"क्लेशतनूकरणार्थं इत्युक्तं तत्र के क्लेशा इत्याह । अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च ते बाधनालक्षणं परितापमुपजनयन्तः क्लेशशब्दवाच्याः भवन्ति । ते हि चेतसि प्रवर्त्तमानाः संस्कारलक्षणं गुणपरिणामं दृढ़यन्ति" । इति तट्टीकाकृद्भाजमार्त्तण्डः ॥) कोपः । व्यवसायः । इति मेदिनी ॥

क्लेशितः, त्रि, (क्लेशोऽस्य जातः । क्लेश + इतच् ।) क्लेशयुक्तः । यथा,—हरकारतिलके ।
"निद्रा यातो मम पतिरसौ क्लेशितः कर्म्मदुःखी" ॥

क्षागः

क्षौत्तिकिकं, क्ली, (क्षौत्तिकेन यष्टिमधुकया निर्व्वृत्तं इति ठञ्।) मद्यम्। इति शब्दचन्द्रिका॥ (विवरणमस्य मद्यशब्दे ज्ञातव्यम्॥)

क्षोम, [न्] क्ली, (क्षुड् गतौ + मनिन्।) फुप्फुसम्। फाँफड़ा इति फुसधरा इति च ख्यातम्। इति भरतः॥ तत्पर्य्यायः। तिलकम् २। इत्यमरः॥ २। ६। ६५॥ क्षोमम् ३ क्षोमम् ४। इति तट्टीका॥

"वाङ्मोर्द्वयोर्मध्ये वक्षः तन्मध्ये हृदयं तत्पार्श्वे क्षोम पिपासास्थानम्"। इति वैद्यकम्॥

("उदकवहे द्वे तयोर्मूलं तालु क्षोम च"॥

इति सुश्रुते शारीरस्थाने नवमाध्यायः॥)

क्षं, व्य, (कस्मिन्निति "किमोऽत्"। ५। ३। १२। इति यत् ततः "क्षाति"। ७। २। १०५। इति "आदेर्ग्रः।) कुत्र। कोथा इति भाषा। इति व्याकरणम्॥ अत्यन्तासम्भावनायां पण्डितैः क्षयं प्रयुज्यते। यथा, रघुः। १। २।

"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः"॥

क्षङ्गुः, पुं, (कु + अगि + उन्।) कङ्गुः। इति हेमचन्द्रः॥

क्षचन, व्य, (पाणिनिमते पदद्वयमेतत्। मुग्धबोधमते तु "किमः क्वयन्ताच्चिनौ"। इति चनः।) क्वचित्। इति व्याकरणम्॥

क्वचित्, व्य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः क्वयन्ताच्चिनौ"। इति चित्।) कस्मिंश्चित्। कुत्रचित्। कोनस्थाने इत्यादि भाषा। इति व्याकरणम्॥

(यथा, विष्णुपुराणे १। २२। ३८।

"हन्ति वा यत् क्वचित् किञ्चित् भूतं स्थावरजङ्गमम्"॥)

क्षण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। क्वणति वीणा। इति दुर्गादासः॥

क्वणः, पुं, (क्वण् + भावे घञ्।) क्वणकर्णेति शब्दविशेषः। इत्यमरटीकायां भारतसुन्दरी॥ वीणायाः शब्दः अन्यस्य च शब्दः। इति भरतः॥ तत्पर्य्यायः। झिङ्कारः २ निक्वणः ३ क्वाणः ४ क्वणनम् ५। इत्यमरः। १। ७। २४॥

क्वणनं, क्ली, (क्वण् + भावे ल्युट्।) क्वणः। इत्यमरः। १। ७। २४॥

क्वणनः, पुं, (क्वणति इति। क्वण् + ल्युः।) घण्टिकासुतः। इति त्रिकाण्डशेषः॥ छोटहाँड़ी इति भाषा॥

क्वथ, ए ञ निष्पचने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) वकारयुक्तः। य, अक्वथीत्। ज, क्वाथः क्वथः। क्वथति वैद्य औषधं निष्पचतीत्यर्थः। इति दुर्गादासः॥

क्वथितः, त्रि, (क्वथ्यते स्म इति। क्वथ + कर्म्मणि क्तः।) अतिपक्वद्रव्यञ्जनदशमूलादिः। तत्पर्य्यायः। निष्पक्वः २। इत्यमरः। ३। २। ६५॥ क्वाथ्यः ३ निर्य्यूहः ४ क्वाथः ५ फ्रुतः ६। इति वैद्यकपरिभाषा॥

क्वाथः, पुं, (क्वथ् + भावे कर्म्मणि वाच्ये च यथायथं घञ्।) क्वथः। इत्यमरः। १। ७। २४॥

क्ष

(यथा, राजेन्द्रकर्णपूरे १७॥

"सञ्जाते त्वयि हारिहारवलयक्वाणं क्वणत्कङ्कणं
चञ्चत्काञ्चनकाञ्चि सा भगवती नर्नर्त्ति वाग्देवता"॥)

क्वाथः, पुं, (क्वथ् + भावे घञ्।) दुःखम्। व्यसनम्। द्रव्यनिष्पाकः। इति हेमचन्द्रः॥ क्वाथ्यमानं तोयं त्रिविधम्। पादावशेषम् १ अर्द्धावशेषम् २ त्रिपादावशेषञ्च ३। अथ नाम पारिभाषिकोष्णोदकम्। तच्च त्रिपादावशेषं वातनाशकम्। अर्द्धावशेषं पित्तनाशकम्। पादावशेषं कफनाशकम्। लघु अग्निवर्द्धकञ्च। तेषां मध्ये त्रिपादावशेषजलं हेमन्ते शिशिरे च प्रशस्तम्। वसन्ते पादावशेषजलं प्रशस्तम्। ग्रीष्मे च अर्द्धावशेषजलं प्रशस्तम्। वर्षायां अष्टभागावशेषजलं प्रशस्तम्। तत्काले बहुदोषत्वात्। दिनपक्वजलं रात्रौ गुरु रात्रिपक्वजलं दिवा गुरु। इति राजवल्लभः॥ यथास्य करणप्रणाली॥

"पानीयं षोड़शगुणं क्षुण्णे द्रव्यतले क्षिपेत्।
स्रुत्वाचे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम्॥
तच्चलं पाययेद्धीमान् कोष्ठं मृद्वग्निसाधितम्।
फ्रुतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते"॥

इति शार्ङ्गधरेण मध्यखण्डे द्वितीयाध्याये उक्तम्॥)

क्वाथोद्भवं, क्ली, (क्वाथादुद्भवो यस्य। क्वाथाद् उद्भवतीति वा।) तुत्थाञ्जनम्। इत्यमरः। २। ६। १०२॥

क्षेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-गतौ सकं-सेट्।) वकारयुक्तः। ऋ, अचिक्वलत्। चालः कम्पः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

क्ष, क्षकारः। (अयन्तु ककारसकारयोगेन जातः। अतोऽस्य पृथक् वर्णत्वशङ्का नास्त्येव।) तन्त्रमते तु अञ्जनचतुस्त्रिंशद्वर्णाः। अष्टमवर्गीयपञ्चमवर्णः। एकयञ्चाशन्मातृकावर्णानां चरमवर्णश्च। यथा,—

"पञ्चाशल्लिपिभिर्भिन्ना विहिता सर्व्वकर्म्मसु।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता॥
ध्यायेन्मेरु मुखं तत्र कल्पयेन्मुनिसत्तमः।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति गौतमीयतन्त्रम्॥ *॥

करटदेशोद्भवोऽयम्। यथा,—

श्रीशिव उवाच।

"विशेषं कथयाम्यद्य प्रोच्चार्य्याः करटतः स्वराः।
कण्ठ्यं जिह्वया मूर्द्धा तालव्यं जिह्वदन्तजम्।
मुखस्थानाज्जनो वाच्यः क्षकारः करटोद्भवः"॥

इति वरदातन्त्रे १० पटलः॥ *॥

अस्य स्वरूपं यथा,—

"क्षकारं वृषभं चार्व्वङ्गि कुण्डलीत्रयसंयुतम्।
चतुर्व्वर्गमयं वर्णं पञ्चदेवमयं सदा।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा॥
त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्।
शरच्चन्द्रप्रतीकाशं हृदि भ ३ सुन्दरि!"॥

इति कामधेनुतन्त्रम्॥ *॥

अस्याभिधानानि यथा,—

"क्षः कोपस्तुम्बुरुः काली रूक्षः सम्वर्त्तकः शरः।
नृसिंहो विद्युता माया महातेजा युगान्तकः॥

क्षण

परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यस्त्रिपूरकः॥
क्षेत्रपालो महाक्षोभो मातृकान्तानलः क्षयः।
मुखं कथ्यवधानान्ता कालजिह्वा गणेश्वरः।
क्षायाएतस्य संघातो भजयश्रीर्ललाटकः"॥

इति तन्त्रशास्त्रे वर्णाभिधानम्॥ *॥ अपि च।

"क्षकारो नरसिंहश्च मेरुः सम्वर्त्तकोऽपि च।
तव स्नेहान्मया देवि! कथितं मातृकोत्तरम्।
पर्य्यायैरपि विज्ञेयं न प्रकाश्यं कदाचन"॥

इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥*॥

अस्य ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां मुक्ताम्बरविभूषिताम्।
रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनाम्॥
ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्चिताम्।
शूलादीक्ष चतुर्व्वर्गप्रदां सौम्यां मनोहराम्॥
गन्धर्व्वसिद्धदेवाद्यैर्ध्यातामाद्यां सुरेश्वरीम्।
एवं ध्यात्वा क्षकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥ क्षकारस्य ककारषकारयोगजत्वेन केचित् पृथग्वर्णत्वेन न मन्यन्ते। तेषां मते तन्त्रोल्लिखितपञ्चाशद्वर्णानुपपत्तिः तन्त्रशास्त्रे तस्य मेरुत्वेन गणनानुपपत्तिश्च भवति। अतः पृथङ्निर्दिश्यते इति केचित्। तथा च।

"यान्ताः स्युर्यद्यपि क्षान्ता वर्णानामनुरोधतः।
पृथक्क्रमेण कथ्यन्ते तथाप्येते समन्वयात्"॥

इति विश्वप्रकाशः॥ अपि च।

"अकारादिसकारान्ता वर्णाः पञ्चाशदीरिताः।
संयोगात् कथयोरेषः क्षकारो मेरुरीरितः"॥

इति क्षेमानन्दृष्टततन्त्रशास्त्रम्॥

क्षः, पुं, (क्षयति लोकान् युगान्तकाले प्रलये सर्व्वाणि भूतानि महाकालोदरं प्रेरयतीति। क्षि क्षये + ड प्रत्ययः।) सम्वर्त्तः। (क्षिणोति हन्ति मनुष्यादिजीवानिति। राक्षसः। (क्षिणोति हन्ति हिरण्यकशिपुवधाद्यसुरानिति।) नरसिंहः। (क्षयति क्षिणोति वा भूतानि स्वकीयाग्निना इति।) विद्युत्। (क्षयति ग्रस्यादुत्पत्या क्रमशः इति। क्षि + डः।) क्षेत्रम्। क्षेत्रपालः। (क्षि क्षये + भावे डः।) नाशः। इति मुग्धावबोधिनी॥

क्षज, इ क तङ्के। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) तङ्को दुःखेन जीवनम्। इ क, क्षञ्जयति दीनः। इति दुर्गादासः॥

क्षज, इ घ म ड } दाहतोः। इति कविकल्पद्रुमः॥
क्षज, घ म ड } (भ्वां-आत्मं-सकं-सेट्।) इ, क्षञ्जते। घ, क्षज्झा। सेमक्षात् सरोरित्यनेनैवसिद्धौ अस्य धातुबन्धस्वरपर्य्यन्तघटादिभ्यो ड इति प्राचीनमतानुरोधात्। म, अक्षञ्जि अक्षाञ्जि क्षञ्जं क्षञ्जं क्षाञ्जं क्षाञ्जम्। मानुबन्धबलात् अनुपधाया अपि दीर्घः। समते तु अत्र दीर्घविधिरुपधां नापेक्षते। ड, क्षञ्जते। घ, क्षज्झा। म, क्षञ्जयति। ड, क्षञ्जयते। दा दानम्। इति दुर्गादासः॥

क्षण, द ञ उ वधे। इति कविकल्पद्रुमः। (तनां-उभं-सकं-सेट्।) द ञ, क्षणोति क्षणुते। उ

क्षणित्वा क्षत्वा। इति दुर्गादासः॥
क्षयः, पुं, (क्षणोति हन्ति नाशयति वा सर्व्वं यथाकालं आयुरवसाने वा। काल एव युगान्ते सर्व्वमात्मसात् करोतीत्यर्थः। स एवांशभेदेन नानारूपो भवतीत्यर्थः।) निमेषक्रियावच्छिन्नः कालः। स च दशपलपरिमितः। (निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थभागः। यथा,—
"आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः॥ सचेत्तु विफलो याति का नो हानिस्ततोऽधिका"॥ इति शब्दार्थचिन्तामणिः। अपि च।
"क्षणिकुपूः क्षणित्वुष्टो रुष्टस्तूः क्षणे क्षणे। अव्यवस्थितचित्तस्य प्रसादोऽपि भयावहः"॥ इति शिष्टोपदेशः॥ क्षणोति दुःखं नाशयति उत्सवकाले। क्षण-वधे-+अच्।) उत्सवः। (यथा, माघे १। ४।
"नवानधोऽधो वहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्। क्षयं क्षणोत्क्षिप्तगजेन्द्रवृत्तिना स्फुटोपमं भूतिसितेन शम्भुना"॥)
निर्व्यापारस्थितिः। इत्यमरः। ३।३।४७॥ पर्व्व। अवसरः। परतत्त्वम्। मथम्। इति हेमचन्द्रः॥ (प्रशस्तमुहूर्त्तः। यथा, मनोपाख्याने। ५। १।
"अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा"॥)
क्षणतुः, पुं, (क्षण भावे+बाहुलकात् अतुप्रत्ययः।) क्षतः। इति हेमचन्द्रः। क्षणनुरिति च पाठः॥
क्षणदं, क्ली, (क्षणं उत्सवं ददातीति। दा+कः।) जलम्। इति मेदिनी॥
क्षणदः, पुं, (क्षणं याचादिशुभमुहूर्त्तं ददातीति। दा+कः।) गणकः। इति मेदिनी॥
क्षणदा, स्त्री, (क्षणद+स्त्रियां टाप्।) रात्रिः। (यथा, भागवते। ३। ३। २१।
"इमं लोकममुं चैव रमयन् सुतरां यदून्। रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः"॥)
हरिद्रा। इत्यमरः। १। ७। ४॥
(हरिद्राशब्देऽस्या विवृतिर्द्रष्टव्या॥)
क्षणनं, क्ली, (क्षण+भावे ल्युट्।) वधः। इत्यमरः॥
क्षणनिश्वासः, पुं, (क्षणात् क्षणकालात् परं निःश्वासोऽस्य।) शिशुमारः। इति शब्दरत्नावली॥
क्षणप्रभा, स्त्री, (क्षणं क्षाप्य प्रभाऽस्याः।) विद्युत्। इत्यमरः। २। ८। ११४॥
क्षणभङ्गुरः, त्रि, (क्षणमात्रं भङ्गुरः।) क्षणैकनाश्यः। यथा। "यदि पुनरसौ किमपि नाहमास्वदमन्ति किञ्चिदपि वस्तु स्थिरं विश्वमेव क्षणभङ्गुरं क्षणिकं वेत्यवधारयेरन् न किञ्चिदपि कामयेरन् न कामयमानाः केचिदपि प्रवर्त्तन्ते"। इति बौद्धाधिकारेऽग्निरोमणिः॥
क्षणरामी, [न्] पुं, (क्षणात् परं क्षणे क्षणे वा रमते इति। रम+णिनिः।) पारावतः। इति शब्दमाला॥ (षटकः। इति केचित्॥)
क्षणिकः, त्रि, (क्षणः स्वसत्तायाप्यतयाऽस्यास्य। ठन्।) क्षणमात्रस्थायी। यथा। "क्षणभङ्गे विप्रतिपत्तिः शब्दादिः क्षणिको न वा। क्षणिकत्वञ्च स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वं उत्पत्तिमत्त्वं वा। उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्धः। क्षणश्च स्वाधेयपदार्थप्रागभावानाधारः समयः। प्रसिद्धिस्तु विधेर्नैयायिकानां प्रागभावे चरमध्वंसे च निषेधस्य बौद्धानामलीके। स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्वं क्षणिकत्वमिति तु व्यायः"। इति बौद्धाधिकारे रघुनाथशिरोमणिः॥ अन्यच।
"ब्रह्मारम्भस्तनुर्नु स्यादयाकाशशरीरिणाम्। अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते"॥ इति भाषापरिच्छेदे २७॥ "क्षणिकत्वञ्च द्वितीयक्षणावृत्तिध्वंसप्रतियोगित्वम्"। इति सिद्धान्तमुक्तावली॥
क्षणिका, स्त्री, (क्षणिक+स्त्रियां टाप्।) विद्युत्। इति हेमचन्द्रः॥ (क्षणकालमात्रस्थायिनी। यथा, हितोपदेशे। १। १५४।
"योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्। एकस्य क्षणिका प्रीतिरन्यः प्राणैर्वियुज्यते"॥)
क्षणिनी, स्त्री, (क्षणः उत्सवोऽस्त्यस्याम्। क्षण+इनि। ङीप्।) रात्रिः। इति शब्दरत्नावली॥ (उत्सववति, त्रि। यथा, महाभारते। २। मन्त्रणापर्व्वणि १३। ४४।
"तं विश्रान्तं शुभे देशे क्षणिनं कल्यमच्युतम्। धर्म्मराजः समागम्याचापयत् खं प्रयोजनम्"॥)
क्षतं, क्ली, (क्षण्यते वध्यतेऽनेन। क्षण+करणे क्तः।) खवक्षतपूयादि। घा इति भाषा। तत्पर्य्यायः। व्रणः २ अरुः ३ हर्म्मम् ४ क्षतजुः ५। इति हेमचन्द्रः॥ तद्वति त्रि॥ *॥
क्षतेन मृतस्याशौचं यथा, व्याघ्रः।
"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्दिधा। आसप्ताहात् त्रिरात्रं स्यादहश्चाचमतः परम्॥ शस्त्रघाते व्यहादूर्द्धं यदि कश्चित् प्रमीयते। अशौचं प्राक्तनं तत्र सर्व्ववर्णेषु नित्यशः॥ अत्र शस्त्रघातपदं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्राघातपरमपि। अन्यथा क्षतं विना पतनादिभिर्विक्षतमृतानां दिनत्रयेऽनध्यवसायः स्यात्"। इति शुद्धितत्त्वम्॥ *॥ चन्द्रग्रहणादौ क्षतदोषाभावो यथा,—पुलस्त्यः।
"चन्द्रसूर्य्यग्रहे चैव मृतानां पिण्डकर्म्मसु। महातीर्थे च संप्राप्ते क्षतदोषो न विद्यते"।
अन्यच्च देवलः।
"सद्यः सूतकी सूची मलोन्मत्तरजस्वलाः। मृतवन्धुरवन्धुश्च वर्ज्यान्यहौ स्वकाशतः"॥
इत्यनेन वर्ज्यतामाह। अशुचित्वमप्याह।
"दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत्। न तत्र बाह्यः कुर्य्यात् यत्नमुद्धरणे पुनः॥ भवेदशौचमत्यर्थं व्रणवेधात् व्रणे क्षते"।
इति प्रायश्चित्ततत्त्वम्॥ (विदारणम्। यथा, कुमारे। ३। २९।
"नखक्षतानीव वनस्थलीनाम्"॥
विनाशः। यथा, रघुः। २। ५३।
"क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः"॥
त्रि, ताडितः। विद्धः। यथा, रघुः। ३। ५३।
"रघोरवष्टम्भमयेन पत्रिणा हृदि क्षतो गोत्रभिदोऽप्यमर्षणः"॥
क्षतियुक्तः। यथा, कुमारे। २। २९।
"रुद्राणामपि मूर्द्धानः क्षतह्लादारशंसिनः"॥
(रोगविशेषः। तस्य सकारणसम्भाविलक्षणानि चिकित्सितञ्च यथा,—
"धनुर्व्यायस्यतोऽत्यर्थं भारमुद्वहतो गुरुम्। पततो विषमोच्चेभ्यो युध्यमानस्य चाधिकैः॥ धावं धावं वा धावन्तं दम्यं वान्यं नियच्छतः। शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान्॥ अधीयानस्य वात्युच्चैर्दूरं वा व्रजतो द्रुतम्। महानदीं वा तरतो गजैर्वा सह धावतः॥ सहसोत्पतितो दूरं तूर्णवातिप्रवृद्धतः। तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा॥ विक्षते वक्षसि व्याधिर्बलवान् समुदीर्य्यते। स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताग्निनः॥ उरो विरुज्यते तस्य क्षिप्यतेऽथ विदह्यते। प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते॥ क्रमादीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते। ज्वरो यथा मनोदैन्यं विड्भेदाग्निवधावपि॥ दुष्टः श्यावः सदुर्गन्धः पीतो विग्रथितो बहुः। कासमानस्य च श्लेष्मा सरक्तः संप्रवर्त्तते॥ सक्षतः क्षीयतेऽत्यर्थं तथाशुक्रौजसोः क्षयात्"॥
पूर्व्वरूपं यथा,—
"अथाङ्गं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम्। उरोवक्त्रोगिणश्छर्दिः कासो वैशेषिकः क्षते"॥
अस्यासाध्यलक्षणादिकं यथा,—
"अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः। गते संवत्सरे याप्यः सर्व्वलिङ्गन्तु वर्ज्जयेत्"॥
चिकित्सास्य यथा।
"उरोमलाक्षतं लाक्षां पयसा मधुसंयुताम्। सद्य एव पिबेज्जीर्णे पयसाद्यात् सशर्करम्॥ पार्श्ववस्तिरुजास्वल्पपित्ताग्निक्षां सुरायुताम्। भिन्नविट्कः समुस्तातिविषां पाठां सवत्सकाम्॥ लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयगणं सिताम्। त्वक्क्षीरी सम्मितं क्षीरे पक्वा दीप्तानलः पिबेत्॥ इक्ष्वालिकविसग्रन्थिपद्मकेशरचन्दनैः। घृतं पयो मधुयुतं सन्धानार्थं पिबेत् क्षती॥ यवानां चूर्णमादाय क्षीरसिद्धं घृतप्लुतम्। ज्वरदाहे सिताक्षौद्रशक्तून् वा पयसा पिबेत्॥ कासी पर्व्वास्थिशूली च जिघ्रात्क्षतजमाक्षिकाः। मधुकमधुकद्राक्षा त्वक्क्षीरापिप्पलीबलाः"॥
"रक्तेऽतिवृत्ते दष्टान्नं यूषैर्लोध्रेण वा पिबेत्। षटकाम्बरसं वापि रक्तं वा छागजाङ्गलम्॥ चूर्णं पौनर्नवं रक्तशालितण्डुलजार्करम्। रक्तस्रोवी पिबेत् सिद्धं द्राक्षारसपयोघृतैः॥ मधूकमधुकक्षीरसिद्धं वा तण्डुलीयकम्॥ यष्ट्याह्वानागबलयोः क्वाथे क्षीरसमं घृतम्। पयसा पिप्पलीवांशीकल्कसिद्धं क्षते शुभम्॥

कोलबाल्वारसे तद्वत् क्षीरार्द्धगुणसाधितम् ।
कल्कैः कट्फलदार्व्वीत्वग्वत्सकत्वक्फलैर्हृतम् ॥
जीवकर्षभकौ वीरां जीवन्तीं नागरं यष्टीम् ।
चतसः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिके ॥
पुनर्नवे द्वे मधुकं आत्मगुप्तां घृतावरीम् ।
ऋद्धिं वरूथलं भार्गीं मदीकां वृहतीन्तथा ॥
वृक्षाटकीं तामलकीं पयस्यां पिप्पलीं बलाम् ।
वदराक्षोटखर्जूरवातामाभिषुकाण्यपि ॥
पलानि चैवमाद्यानि कल्कान् कुर्व्वीत कार्षिकान् ।
धात्रीरसविदारीक्षु क्वागमांसरसं पयः ॥
कुर्य्यात्प्रस्थोन्मितं तेन घृतप्रस्थं विपाचयेत् ।
प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्तथा ॥
द्विकार्षिकाणि पचैला हेमत्वक्पत्रिचानि च ।
चूर्णितानि विनीयास्माद्विह्वान्मात्रां सदा नरः ॥
अमृतप्राशमित्येतन्नराणामामृतं घृतम् ।
सुधामृतरसं प्राप्य क्षीरमांसरसाग्निना ॥
नष्टशुक्रक्षतक्षीणदुर्ब्बलत्वाधिकर्षितान् ।
क्षीप्रबलक्षान् क्षुद्वान् वर्णस्वरहीनांश्च वर्द्धयेत् ॥
कासहिक्काश्वरश्वासदाहतृष्णाक्षपित्ननुत् ।
पुंस्त्वं वमिमूर्च्छाक्षयोन्मिमूत्रामयापहम्" ॥
इत्यमृतप्राशघृतम् ॥
"मधुकाष्टपलं द्राक्षा प्रस्थार्द्धे घृतं पचेत् ।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले ॥
एषगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समं शुक्लुक्षतक्षीणे रक्तगुल्मेषु तद्धितम्" ॥
इति शुक्लुप्रयोगः ॥
"शुक्लूनां वस्तपूतानां मध्यं क्षौद्रघृतान्वितम् ।
यावान्नसाक्ष्यो दीप्ताग्निः क्षतः क्षीणः पिबेन्नरः" ॥
"एका वोड्रश्रिका धान्याद्वि द्वेऽजाज्यजमोदयोः ।
ताभ्यां दाड़िमवृक्षाम्लद्विर्दिः सौवर्चलात्पलम् ॥
युष्टाः कर्षं दधित्थस्य मेथात्वच पलानि च ।
तच्चूर्णं षोड्शपले शर्करायां विमिश्रयेत् ॥
षाड़वोऽयं प्रदेयः स्यादन्नपानेषु पूर्ब्बवत्" ॥
इति षाड़वः ॥
"यक्ष्मोक्तं यच्छिराणां पथ्यं कासिनां रक्तपित्तिनाम् ।
तच्च कुर्य्यादपेक्ष्याग्निं व्याधिं साम्यबलांस्तथा" ॥
इति चरके चिकित्सास्थाने १६ अध्याये ॥)

क्षतकासः, पुं, (क्षतजः कासः । मध्यपदलोपी समासः ।) पञ्चविधकासरोगान्तर्गतकासरोगविशेषः । यथा,—
"पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ॥
एषां पूर्ब्बरूपमाह ।
"पूर्ब्बरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठेकण्डूश्च भोज्यानामवरोधश्च जायते" ॥
भोज्यानामवरोधः कवलगिलने कण्ठस्थश्च ।
अस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह ।
"अतिव्यायामाराध्वयुद्धाश्वगजनियन्त्रैः ।
रूक्षस्योरश्चतं वायुर्हीत्वा कासमावहेत्" ॥
अश्वगजयोर्नियन्त्रो दमनम् । अस्यैव माह ।
"संपूर्ब्बं कासते शुष्कं ततः क्षीवेत् सशोणितम् ।
कण्ठेन वहतात्यर्थं विरुद्धेनेव घोरवा ॥

सूचीभिरिव तीक्ष्णाभिः तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्ब्बभेदज्वरश्वासः तृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजेत् कासवेगात् क्षतो ध्रुवात्" ॥
कण्ठेनेत्युपलक्षणे तृतीया एवमुरसाऽपि ॥
तस्य चिकित्सा यथा,—
"इक्षिक्षुवालिकापद्मभृष्टालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा वृष्टी घृतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकासनिवृत्तये" ॥
इक्षुवालिका इक्षुभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विसम् । उत्पलं कमलम् । चन्दनमत्र धवलं चूर्णत्वात् । वृष्टी कर्कटवृष्टी । तुगाक्षीरी वंशरोचना । सा चेक्षोर्द्विगुणा । इति भावप्रकाशः ॥
("युद्धादौः साहसैस्तैस्तैः सेवितैरत्यबलम् ॥
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च प्रथितं कुथितं बहु ।
क्षीवेत् कण्ठेन रुजता विभिन्नेनेव घोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकर्म्यवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्दीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते" ॥
अस्य चिकित्सा यथा—
"उरस्यन्तः क्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत् ॥
क्षीरेण शालीन् जीर्णेऽद्यात् क्षीरेणैव सशर्करान् ।
पार्श्ववस्ति सरक्तास्यपित्तामिश्रां सुरायुताम् ।
भिन्नविट्कः समुस्क्लातिविषा पाठां सवत्सकाम् ॥
लाक्षा सर्पिर्मधूच्छिष्टं जीवनीयं गणं सितम् ।
त्वक्क्षीरी सक्षितं क्षीरे पक्वा दीप्तानलः पिबेत् ॥
इक्षाविकाविषग्रन्थिपद्मकेक्षुरचन्दनैः ।
घृतं पयो मधुयुतं सन्धानार्थं क्षती पिबेत् ॥
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः" ।
इति वामटे निदानस्थाने चिकित्सास्थाने च चतुर्थाध्याये ॥)

क्षतघ्नः, पुं, (क्षतं हन्ति नाशयतीति । हन् + "अमनुष्यकर्त्तृके च" । ३ । २ । ५३ । इति टक् ।) क्षुद्रविशेषः । इति शब्दचन्द्रिका ॥ कुकुरशोंखा इति भाषा ॥

क्षतघ्नी, स्त्री, (क्षतं हन्ति । हन् + "अमनुष्यकर्त्तृके च" । ३ । २ । ५३ । इति टक् स्त्रियां ङीष् ।) लाक्षा । यथा,—
"लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ।
जतु क्षतघ्नी कृमिजा यावालक्तौ तु तत्सतः" ॥
इति हेमचन्द्रः । क्षतघ्न्यामि पाठः ॥

क्षतजं, क्ली, (क्षतात् व्रणात् जायते उत्पद्यते इति । जन् डः ।) रक्तम् । इत्यमरः । २ । ६ । ६ ॥
(यथा, रघौ । ७ । ४२ ।
"स छिन्नमूलः क्षतजेन देवी-
रक्षोपरिष्टात् पवनावधूतः" ॥)
पूयम् । इति शब्दचन्द्रिका ।

क्षतजक्षया, स्त्री, (क्षतजा रक्तादिभिः क्षताज्जाता या क्षया पिपासा ।) रक्तादिक्षतयुक्तस्य पिपासा । तस्या निदानपूर्ब्बिकां सम्प्राप्तिमाह ।
"भयश्रमाभ्यां बलसंक्षयाद्वा
ऊर्द्धं क्षितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां
तालुप्रपर्व्वं जनयेत् पिपासाम् ॥
स्रोतःस्वपीवाहिषु दूषितेषु
दोषैश्च दुष्टसम्भवतीह जन्तोः ।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यासमुद्भवा च ॥
भक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्ब्बशस्तु" ॥
नराणां क्षितं स्वस्थान एव सञ्चितं पित्तं सवातं कट्वम्लोष्णापित्तविवर्द्धनैः । कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयाद् प्रवासादेश्च वातः कुपितः । तद्भयं ऊर्द्धं प्रसरत् तालुप्रपर्व्वं सत्पिपासां जनयेत् । न केवलं तालुन्येव दूषिते क्षतीया भवति । किन्तु जलवाहिस्रोतःस्वपि । अत आह स्रोतःस्वित्यादि नन्वत्र बहुवचनं न युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेकप्रतानयोगान्न दोषः । अथां वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् । यत आह चरकः । रसवाहिनीश्च धमनीर्जिह्वाहृदयशतालुरोम च । संशोष्य तृष्णां देहेषु कुरुतः क्षयामतिप्रबलौ पित्तानिलाविति ॥ संख्यामाह तिस्र इत्यादि । क्षयायाः सामान्यलक्षणमाह ।
"क्षतस्य यः पिबेत्तोयं न क्षतिमधिगच्छति ।
मुञ्चः काङ्क्षति तोयन्तु तं क्षयार्हितमादिशेत्" ॥
क्षतजामाह ।
"क्षतस्य रक्तशोणितनिर्गमाभ्यां
क्षया चतुर्थी क्षतजा मता तु" ।
क्षतस्य रक्तादिक्षतयुक्तस्य । यक्ष्मीड़ा ।
अथ क्षयायाश्चिकित्सा ॥
"वातघ्नमन्नपानं मृदु लघु शीतञ्च वातक्षयार्त्तानाम् ।
क्षयायां पवनोत्थायां सगुड़ं दधि प्रशस्यते ।
स्वादु स्निग्धं द्रवं शीतं पित्तक्षयहरं परम् ।
मुक्तपर्पटकोदीच्यवालोशीरचन्दनैः ।
घृतं शीतं जलं दद्याद् दाहतृष्णरक्षान्तये" ॥
क्षुद्रा धान्याम्लम् । क्वचित् धात्रीञ्च दद्यात् चन्दनमत्र धवलं दद्यात् । तस्यातिक्षयाहरत्वात् । घृतं अर्द्धपलमत्र कर्त्तव्यम् । बड़ङ्गमानम् ।
"क्षीरोदकं मधुयुतं शीतं गुड़विमर्दितम् ।
काश्मरीशर्करायुक्तं पिबेत् क्षयार्दितो नरः ॥
क्षीरस्य मार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥
गोक्षनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ।
वैद्यश्च मयलाक्षे सन्दधाति मुखे जलम् ।
क्षयादाहप्रशमनं मधुमद्भूधारणम् ।

क्षतिः

जिह्वातालुगलस्रोमशोषे मूर्द्धनि दापयेत्।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम्॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम्।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम्।
पाययेदामयेचापि तेन तृष्णा प्रशाम्यति॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशोधनम्।
अमलं कमलं कुष्ठं वाजाञ्च वटरोहकम्।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे॥
तृष्णां प्रबलां हन्त्येषा मुखशोषञ्च दारुणम्।
क्षतोद्भवां रविनिवारणेन
जयेत् क्षतानामसृजञ्च पातैः।
क्षयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुकोदकं वा॥
आमोद्भवां बिल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम्।
गुर्व्वन्नजामुल्लिखनैर्जयेच्च
क्षयं विना सर्व्वक्षताश्च तृष्णाम्"॥

उल्लिखनैः लेखनद्रव्यैः। स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्तान्तु गुडाम्बुना शमयेत्। अतिरोगदुर्ब्बलानां तृष्णां शमयेन्नृणामिहास्तु पयः॥ पयोऽत्र दुग्धम्।

"मूर्च्छाच्छर्द्दितृषादाहस्त्रीमद्यभ्रमशर्कषिताः।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये॥
साम्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम्॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
तस्मात् सर्व्वास्ववस्थासु स क्वचिदारि वारयेत्॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते"॥
इति तृष्णाधिकारः। इति भावप्रकाशः॥

क्षतविध्वंसी, [न्] पुं, (क्षतं व्रणं क्षवद्रक्तपूयादिकं विध्वंसयतीति। वि+ध्वंस+णिच्+णिनि।) वज्रदारुवृक्षः। इति शब्दचन्द्रिका॥

क्षतव्रणः, पुं, (क्षतजन्यः व्रणः क्षतजो व्रणो वा।) षट्प्रकारव्रणरोगान्तर्गतव्रणरोगविशेषः। इति भावप्रकाशः॥ तद्विवरणं व्रणशब्दे द्रष्टव्यम्॥

क्षतव्रतः, त्रि, (क्षतं भ्रष्टं व्रतमस्य।) भ्रष्टनियमः। तत्पर्य्यायः। अवकीर्णी २। इत्यमरः।२।७।५६॥ तथा च याज्ञवल्क्यः।

"अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्।
गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुद्धति"॥
इति प्रायश्चित्ततत्त्वम्॥

क्षतहरं, क्ली, (क्षतं हरतीति। हृ+टः।) अगुरु। इति शब्दचन्द्रिका॥

क्षतिः, स्त्री, (क्षद+क्तिन्।) अपचयः। क्षयः। (यथा, महाभारते। ३। १७२। १९।

"हयानां न क्षतिः काचित् न रथस्य न मातलेः"॥)

"जलमुचि वितरत्यविमुञ्चि

क्षत्ता

का क्षतिरस्यखिलाम्बुपातुणाम्।
केवलघनरसभक्षी
चातकपक्षी क्षमाश्रयति"॥
इत्युद्भटश्च।

क्षतोदरः, पुं, (क्षतं शर्करादिभिन्नं उदरमत्र रोगे। अथवा क्षतात् क्षुतात् जातं उदरं उदररोगविशेषो यत्र।) उदररोगविशेषः। तस्य सामान्यरूपमाह।

"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता।
श्रोथः सदनमङ्गानां सङ्गो वातपुरीषयोः।
दाहस्तृष्णा च सर्व्वेषु जठरेषु भवन्ति हि"॥
सन्निपातनिदानपूर्ब्बिकां संख्यामाह।
"पृथक्दोषैः समस्तैश्च क्षीहवद्भक्षतोदकैः।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु"।
क्षतोदरमाह।
"शूल्यं तथान्नोपहितं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा।
तस्मात् क्षुतोऽन्नात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः॥
नाभेरधस्तोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम्।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध"॥

शूल्यं कण्टककर्क्करादि अन्नोपहितं अन्ननिहितं भुक्तं यत् अन्नं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं शरादि तदपि यदन्नं भिनत्ति एतदुपक्षुण्णम्। क्षुण्णमन्नमत्यशनञ्च अत्र भिनत्ति। यत उक्तं चरके।

"शर्कराट्यकाष्ठास्थिकण्टकैरन्नसंयुतैः।
भिद्येतान्नं यदा भुक्तं क्षुण्णमात्यशनेन च"॥ इति तस्मात् भिन्नादन्नात्। गुदतस्तु भूयः अन्यात् संक्षुत्य पुनर्गुदतः स्रवेदित्यर्थः। दाल्यति विदीर्य्यत इव। पदसिद्धिरार्षत्वात्। एतत् क्षतोदरं तन्त्रान्तरे परिस्राव्युदरं प्रदिष्टम्॥

तस्य चिकित्सा।

"शालिषष्टिकगोधूमयवनीवारभोजनम्।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च॥
आनूपमौदकं मांसं शाकं पिण्डक्षतं तिलाः।
व्यायामाध्वदिवास्वप्नयानपानानि वर्ज्जयेत्॥
तथाम्लवल्गुशाकानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरे तोयपानञ्च वर्ज्जयेत्॥
उदराणां मलाढ्यत्वात् गुल्मघ्नः शोधनं हितम्।
क्षीरेणैरण्डजं तैलं पिबेन्मूत्रेण वा सकृत्"॥
इति भावप्रकाशः। (उदररोगशब्दे विशेषविवृतिरस्य ज्ञेया॥)

क्षत्ता, [क्षत्तृ] पुं, (क्षद् संवृतौ। सौत्रधातुरयम्।
"दृक्षदृक्षौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ"। उणां। २। ९४। इति संज्ञायां दृक्ष स चानिट्।) सारथिः। दासस्यः। इत्यमरः। ३। ३। ६२॥ दासीपुत्रः। (यथा, महाभारते। १। विदुरागमनपर्व्वणि। २०१। १७।
"ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशाम्पते!।

क्षत्रियः

उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः"॥)
नियुक्तः। ब्रह्मा। इति मेदिनी॥ क्षत्रियायां शूद्राज्जातः। (यथा, मनुः। १०। १२।
"शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः"॥)
मत्स्यः। इति संक्षिप्तसारोणादिवृत्तिः।

क्षत्रं, क्ली, (क्षतः त्रायते इति। क्षत्+त्रै+कः।) शरीरम्। इत्युणादिकोषः। तगरम्। इति राजनिर्घण्टः। (क्षत्रियकुलम्। यथा, ऋग्वेदे। ५। ६२। ६।

"अक्रविहस्ता सुकृते परस्या
यं त्रासाथे वरुणेलासुतंः।
राजाना क्षत्रमहृणीयमाना
सहस्यूणं विभृथः सह द्वौ"॥)

क्षत्रः, पुं, (क्षद्+"गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः"। उणां ४। १६६। इति त्रः।) क्षत्रियः। इत्यणादिकोषः॥ (यद्वा, क्षतः क्षतात् त्रायते इति। त्रै+कः। यथा, रघुः। २। ५३।

"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः"।

"नाश्वकर्णादिवत् केवलरूढः किन्तु पङ्कजादिवत् योगरूढः" इत्यर्थः। इति मल्लिनाथः॥)

क्षत्रबन्धुः, पुं, (क्षत्रियस्य बन्धुरिव।) निन्दितक्षत्रियः। इत्यमरटीका। (यथा, मार्कण्डेये। ८। ७४।
"क्षत्रबन्धो! ममेतां त्वं सप्तर्षीं यज्ञदक्षिणाम्।
मन्यसे यदि तत् क्षिप्रं पश्य त्वं मे बलं परम्"॥
क्षत्रं राज्यं देहो वा बन्धुरिवास्य।) क्षत्रमात्रम्। (यथा, मनुः। २। ३८।
"आषोडशात् ब्राह्मणस्य सावित्री नातिवर्त्तते"।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः॥)

क्षत्रकृत्तः, पुं, (क्षत्रसंज्ञकः कृत्तः।) मुचुकुन्दः। इति राजनिर्घण्टः। (पर्य्यायोऽस्य यथा,—
"मुचुकुन्दः क्षत्रकृत्तश्चिरकः प्रतिविष्णुकः"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे। गुणाश्चास्य मुचुकुन्दशब्दे ज्ञातव्याः॥)

क्षत्रियः, पुं, (क्षत्रे राष्ट्रे साधुः। क्षत्रस्यापत्यं वा।
"क्षत्राद् घः"। ४। १। १३८। इति जातौ घः।)
क्षदति रक्षति जनान् क्षत्रः। क्षद संवृतौ औणः तत्रस्त्रुसिति त्रः। क्षतात् त्रायते इति डे मनीषादित्वात् क्षत्रन्यायकारलोपे वा क्षत्रः। क्षत्रो हितकारः। पुंनपुंसकयोः क्षत्रः। पतिर्मम क्षत्रमग्रेषभूषत् प्रभाभिरामो भरतश्च जिष्णुरिति राघवपाण्डवीये। क्षत्र एव क्षत्रियः स्वार्थे इयः। अपत्यार्थे इय इत्यन्ये। इति भरतः॥*।
ब्रह्मबाहुजवर्णविशेषः। क्षत्री इति भाषा। (यथा, मनुः। १। ३१।
"लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्"॥)
तत्पर्य्यायः। मूर्द्धाभिषिक्तः २ राजन्यः ३ बाहुजः ४ विराट् ५। इत्यमरः।२।८।१॥ क्षत्रः ६ द्विजलिङ्गी ७ राजा ८ नाभिः ९। इति जटाधरः॥ क्षयः १०

मूर्द्धकः ११। इति शब्दरत्नावली॥ पार्थिवः १२ सार्व्वभौमः १३। इति राजनिर्घण्टः। ते च सूर्य्यचन्द्रवंशीयराजानः कलेः सहस्रवर्षपर्य्यन्तं आसन् ततः महानन्दिसुतो नन्दः शूद्रायां समुत्पन्नः शतवर्षं राज्यं चकार तदन्ते चाणक्यनामा ब्राह्मणो नन्दं तत्पुत्रांश्च हत्वा मुरवंशजं चन्द्रगुप्तं राजानं कृतवान् कलौ नन्दान्तक्षत्रियवंशः। इति श्रीभागवते १२ स्कन्धे १ अध्यायात् संगृहीतम्॥ * ॥ शाल्मलद्वीपे क्षत्रियस्य नाम पतङ्गः। शाल्मलद्वीपे वीर्य्यधरः। कुशद्वीपे कोविदः। क्रौञ्चद्वीपे ऋषभः। शाकद्वीपे सत्यव्रतः पुष्करद्वीपे सर्व्वे एकवर्णाः॥ अस्य शास्त्रनिरूपितधर्म्मास्तयः। अध्ययनं यजनं दानञ्च। प्रजारक्षणं जीविका। अस्याश्रमास्तयः। गार्हस्थ्यं ब्रह्मचर्य्यं वानप्रस्थञ्च। इति तत्रैव २० अध्यायादितः संगृहीतम्॥ * ॥ तल्लक्षणं यथा,—

"क्षतात्रं सेवते कर्म्म वेदाध्ययनसंयुतः।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते"॥

तस्य धर्म्मो यथा,—

नारद उवाच।

"क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव!।
दद्याद्राजा न याचेत यजेत न च याजयेत्॥
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम्॥
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः॥
अविक्षतशरीरो हि संगरादपो निवर्त्तते।
क्षत्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम्॥
क्षत्रियाणामयं धर्म्मो निर्द्दोषो मुनिभिः परः।
नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात्॥
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते।
तस्माद्राजा महाराज! योद्धव्यं धर्म्मगोप्तृभिः॥
प्रजाः क्षेमे च धर्म्मे च स्थापयेत महीपतिः।
धर्म्माख्येव हि कर्म्माणि कारयेत् सततं प्रजाः॥
परमां सिद्धिमाप्नोति नृपतिः परिपालनात्।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते"॥
इति पाद्मे स्वर्गखण्डे २६ अध्यायः॥*॥ अपि च।
"राजन्यानां करादानं विना वैवाहिकञ्च यः।
प्रतिग्रहः स निन्द्योऽत्र परत्र च सुखप्रदः॥
युद्धे पलायनञ्चैव तथा कातरतार्थिषु।
अयाजनं प्रजानाञ्च दाने धर्म्मे विरक्तता॥
अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः।
अमात्यानामसम्मानं तेषां कर्म्मानवेक्षणम्।
भृत्यानाञ्च परीक्षायो निषिद्धः क्षत्रजन्मनाम्"॥
"राजन्यस्तु महाराज! यथाश्रममवाप्नुयात्।
तत् ब्रूहि च तवाख्यास्ये धर्म्मसंग्रहतत्परः॥
वेदानधीत्य धर्म्मेण राजशास्त्राणि चानघ!।
सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च॥
पालयित्वा प्रजाः सर्व्वा धर्म्मेण जयताम्बर!।
राजसूयाश्वमेधादीन् मखानन्यांस्तथैव च॥
आहरित्वा यथापाठं विप्रेभ्यो दक्षदक्षिणाः।
संग्रामे विजयं प्राप्य तथाऽन्तं यदि वा नृप॥

स्थापयित्वा प्रजापालं पुत्रं राज्ये च पार्थिव!।
अन्यगोत्रं प्रशस्तं वा क्षत्रियं क्षत्रियधर्म्म!॥
अर्चयित्वा पितॄन् सम्यक् पितृयज्ञे यथाविधि।
देवान् यज्ञैर्ऋषीन् वेदैरर्चयित्वा प्रयत्नतः॥
अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम्।
सोऽनुपूर्व्याश्रमान्राजन् गत्वा सिद्धिमवाप्नुयात्॥
राजर्षित्वेन राजेन्द्र! भैक्षचर्य्याध्वसेवया।
अपेतदृष्टधर्म्मोऽपि चरेज्जीवितकाम्यया॥
न चैतन्नैष्ठिकं कर्म्म क्षयाद्यां भूरिदक्षिणम्।
चतुर्णां राजशार्दूल! प्राऽऽश्रमवासिनाम्॥
बाह्यायत्तं क्षत्रियैर्मानवानां
लोकश्रेष्ठं धर्म्ममासेवमानैः।
सर्व्वे धर्म्माः सोपधर्म्मास्तयाद्यां
राज्ञो धर्म्मादिति वेदात् ब्रवीमि॥
एवं धर्म्मान्राजधर्म्मेषु सर्व्वान्
सर्व्वावस्थं सम्मतीनान्निबोध।
अल्पश्रमानल्पफलान् वदन्ति
धर्म्मानिन्यान् वेदविदो मनुष्याः॥
महाश्रमं बहुकल्याणरूपं
क्षात्रं धर्म्मं नेतरं प्राऽऽर्याः।
सर्व्वे धर्म्मा राजधर्म्मप्रधानाः
सर्व्वे धर्म्माः पाल्यमानास्तरन्ति॥
सर्व्वत्यागो राजधर्म्मेषु राजं-
स्त्यागं धर्म्मज्ञाऽऽरण्यं प्रशस्तम्।
मज्जेत्रयी दण्डनीतौ हतायां
सर्व्वे धर्म्माः प्रक्षयेयुर्विबद्धाः॥
सर्व्वे धर्म्माश्चाश्रमाणां हताः स्युः
क्षात्रे त्यक्ते राजधर्म्मे पुराणे।
सर्व्वे त्यागा राजधर्म्मेषु चोक्ताः
सर्व्वा विद्या राजधर्म्मेषु युक्ताः॥
सर्व्वे लोका राजधर्म्मे प्रविष्टा
यथा जीवाः प्राक्ततैर्व्यध्यमानाः।
धर्म्मश्रुतानामुपपीड़नाय
एवं धर्म्मा राजधर्म्मैर्विमुक्ताः॥
सन्धिन्यन्ते नाम्रियन्ते सधर्म्मम्॥
चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव!।
लोकवेदोत्तरास्तेव क्षात्रे धर्म्मे समाहिताः॥
सर्व्वाण्येतानि धर्म्माणि क्षात्रे राजन्यसत्तम!।
अप्रवृत्तं बहुदारं धर्म्माश्रमवासिनाम्।
क्षात्रेणैव हि धर्म्मेण प्रवृत्तं क्रियते नृप!"॥
इति पाद्मे स्वर्गखण्डे २८ अध्यायः॥*॥ अपि च।
"द्विजार्चनं क्षत्रियाणां तथा नारायणार्चनम्।
राज्यानां पालनञ्चैव रणे निर्भयता तथा॥
नित्यं दानं ब्राह्मणेभ्यः प्रत्यागतरक्षणम्।
पुत्रतुल्यं प्रजानाञ्च दुःखिनां परिपालनम्॥
शस्त्रास्त्राणाञ्च नैपुण्यं रणे चौन्दर्य्यमेव च।
तपश्च धर्म्मवृद्धयर्थं यत्नतः कुरुते मुदा॥
पठितं नीतिशास्त्रञ्च नित्यञ्च परिपालयेत्।
नियोजयेत् सभामध्ये नित्यं सद्भिस्तु संयुतः॥
हस्त्यश्वरथपादातं सेनाङ्गञ्च चतुष्टयम्।
पालयेत् यत्नतो नित्यं यशस्वी च प्रतापवान्॥
रणे निमन्त्रितश्चैव दाने न विमुखो भवेत्।

रणे यो वा त्यजेत् प्राणान् तस्य स्वर्गो यशस्करः"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः॥*॥

अथ सूर्य्यवंशीय क्षत्रियविवरणम्।

परमेश्वरात् ब्रह्मा जातः तस्य पुत्रो मरीचिस्तस्य काश्यपस्तस्य सूर्य्यस्तस्य वैवस्वतो मनुः। सत्ययुगे मनुरेव राजासीत्। त्रेतायुगे तस्य पुत्र इक्ष्वाकुः अयोध्यायां राजा आसीत्। त्रेतायुगे त्रयोदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः। द्वापरे ततः किञ्चित्-न्यूनायुषः। युगस्य प्रथमापेक्षया उत्तरोत्तरं आयुषो ह्रासः। कलियुगे अल्पमेवायुः शेषे अत्यल्पं भविष्यति। तस्य पुत्रो विकुक्षिस्तस्य ककुत्स्थः तस्य अनेनाः तस्य पृथुः तस्य विश्वगन्धिः तस्य चन्द्रः तस्य युवनाश्वः तस्य श्रावः तस्य बृहदश्वः तस्य धुन्धुमारः तस्य दृढाश्वः तस्य हर्य्यश्वः तस्य निकुम्भः तस्य बृह्याश्वः तस्य सेनजित् तस्य युवनाश्वस्तस्य मान्धाता चक्रवर्त्यभूत्। तस्य पुरुकुत्सः तस्य त्रसदस्युः तस्य अनरण्यः तस्य हर्य्यश्वः तस्य प्रारुणः तस्य त्रिबन्धनः तस्य सत्यव्रतः तस्य त्रिशङ्कुः तस्य हरिश्चन्द्रः यः राजसूयं कृतवान्। तस्य रोहितः तस्य हरितः तस्य चम्पः तस्य सुदेवः तस्य विजयः तस्य भरुकः तस्य वृकः तस्य बाहुकः तस्य सगरश्चक्रवर्त्ती। तस्य असमञ्जाः तस्य अंशुमान् तस्य भगीरथः। यत्तपः कृत्वा पृथिव्यां गङ्गामानीतवान्। तस्य श्रुतः तस्य नाभः तस्य सिन्धुद्वीपः तस्य अयुतायुः तस्य ऋतुपर्णः तस्य सौदासः तस्य अश्मकः तस्य मूलकः तस्य दशरथः तस्य ऐड़विड़िः तस्य विश्वसहः तस्य खट्वाङ्गश्चक्रवर्त्ती। तस्य दीर्घबाहुः तस्य रघुः तस्य अजः तस्य दशरथः। विष्णुः श्रीरामरूपेण तस्य पुत्रत्वं प्राप्तवान्। तस्यानुजा भरतलक्ष्मणशत्रुघ्नाः। श्रीरामचरितं बहुविस्तीर्णं वाल्मीकिव्यासादिमुनिभिर्वर्णितम्। असौ त्रेतादापरयोः सन्धौ अवतीर्णः। एते खट्वाङ्गमारभ्य श्रीरामपर्य्यन्ताश्चक्रवर्त्तिनः। द्वापरस्य प्रथमे तस्य पुत्रः कुशो जातः। तस्य अतिथिः तस्य निषधः तस्य नभः तस्य पुण्डरीकः तस्य क्षेमधन्वा तस्य देवानीकः तस्य हीनः तस्य पारियात्रः तस्य बलस्थलः तस्य वज्रनाभः तस्य अर्कः तस्य सगणः तस्य विधृतिः तस्य हिरण्यनाभः तस्य पुष्यः तस्य ध्रुवसन्धिः तस्य सुदर्शनः तस्य अग्निवर्णः तस्य शीघ्रः तस्य मरुः यो योगसिद्धः सन् सुमेरुनिकटे कलापग्रामे आस्ते कलेरन्ते नष्टं सूर्य्यवंशं पुनर्भावयिष्यति। मरोः पुत्रः प्रसुश्रुतः तस्य सन्धिः तस्य अमर्षणः तस्य महस्वान् तस्य विश्वबाहुः तस्य प्रसेनजित् तस्य तक्षकः तस्य बृहद्बलः। असौ युधिष्ठिरस्य समकालीनः भारतयुद्धे अभिमन्युना हतः। तस्य बृहद्रणः तस्य उरुक्रियः तस्य वत्सबृद्धः तस्य प्रतिव्योमः तस्य भानुः तस्य दिवाकः तस्य सहदेवः तस्य वीरः तस्य बृहदश्वः तस्य भानुमान् तस्य प्रतीकाश्वः तस्य सुप्रतीकः तस्य मरुदेवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अन्तरीक्षः तस्य सुतपाः तस्य अमित्रजित्

तस्य दृढहनुः तस्य वर्हिः तस्य क्रतञ्जयः तस्य रणञ्जयः तस्य सञ्जयः तस्य शाक्यः तस्य शुद्धोदः तस्य लाङ्गलः तस्य प्रसेनजित् तस्य क्षुद्रकः तस्य सुमित्रः। एते राजानः कल्पेः सहस्रवत्सरपर्य्यन्तं राज्यं क्षतवन्तः। एतत्पर्य्यन्तं सूर्य्यवंशविश्रान्तिः पुनः सत्ययुगे सूर्य्यवंशोत्पत्तिर्भविष्यति। इति श्रीभागवतनवमस्कन्धमतम्॥ चन्द्रवंशविवरणं चन्द्रवंशशब्दे द्रष्टव्यम्*॥

---

* क्षत्रियाचामन्यतराख्याः कायस्थाः।
यदा प्रथमतः—वेदानाम् आपस्तम्बशाखायाम्।
"बाह्वोश्च क्षत्रिया जाताः कायस्था जगतीतले।
चित्रगुप्तः स्थितः स्वर्गे विचित्रो भूमिमण्डले॥
चैत्ररथः सुतस्तस्य यशस्वी कुलदीपकः।
ऋषिवंशे समुद्भूतो गौतमो नाम सत्तमः।
तस्य शिष्यो महाप्राज्ञश्चित्रकूटाचलाधिपः"॥
द्वितीयतः,—
माण्डव्यशापात् चित्रगुप्तस्य पुत्रश्चैत्ररथस्य क्षत्रियजाते पुनरुपनयनसंस्कारे क्रते तेन क्षत्रियत्वं प्राप्तं यथा,—वेदान्ते प्रथमाध्याये क्रतीयपादे ३५। ३० क्रचे क्षत्रियत्वगते चोत्तरत्र चैत्ररथेन लिङ्गात् तदभावे निर्देशरथे च प्रवृत्तेः॥
क्रतीयतः,—
"त्वया त्वं चित्रगुप्तोऽसि मम कायादभूर्धृतः।
तस्मात् कायस्थविख्यातिर्लोके तव भविष्यति॥
कायस्थः क्षत्रियो वर्णो न तु शूद्रः कदाचन।
क्षतो भवेयुः संस्कारा गर्भाधानादिका दश॥
गर्भाधानक्रतौ कार्य्यं क्रतीये मासि पुंस्त्रिया।
मासाष्टमे स्यात् सीमन्त उत्पत्तौ जातकर्म्म च॥
क्रताहे नामकरणं पञ्चमे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम्॥
तथोपनयने भिक्षाचर्य्यव्रतादिकम्।
वासो मुञ्जकुलेषु स्यात् स्वाध्यायाध्ययनं तथा॥
क्षत्वा तु माष्टकापूजां वसोर्धारां विधाय च।
वायुवादि च शान्त्यर्थं जपेदज समाहितः॥
कुर्य्यान्नान्दीमुखं श्राद्धं दधिमध्याज्यसंयुतम्।
ततः प्रधानसंस्कारः कार्य्यो एष विधिः क्रतः"॥
इत्यादि विज्ञानतन्त्रे॥
चतुर्थतः,—
कायप्रकाशो नाम्ना विज्ञानगर्य्येधिपतिः क्षत्रवंशजः कायस्थ आसीत्। यथा,—
"विराडकायजो ब्रह्मः कायस्थ इति विश्रुतः।
आर्य्योच्छन्दःप्रकाशात् तु आर्य्योवर्णः प्रमुच्यते॥
अयं तु नवमस्तेषां द्वीपसागरसंक्रतः।
योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात्"॥
इति मेदतन्त्रे १९९ पटले।
पञ्चमतः,—
"राजन्! ब्रह्मकायसमुद्भूतः कायस्थो वर्म्मसंज्ञकः कलौ हि क्षत्रियः स चाक्ष्यधिकारी जपपञ्चेत्"॥
इति श्रीमत्संहितायाम् साधवाचार्य्यधृतम्॥
षष्ठतः,—
यदा पृथिवीनिक्षत्रियकाले परशुरामस्य भयात् चन्द्रसेनस्य क्षपतेर्भार्य्या मुनेर्दाल्भ्यस्याश्रयं गता तदा परशुराम उवाच।
"तवाश्रमे महाभाग! सगर्भा स्त्री समागता
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः॥
तन्मे क्षं प्रार्थितं देहि द्विजेयं तां महामुने!।

क्षत्रिया, } स्त्री, (क्षत्रियाणां स्त्रीजातिः। "अ-
क्षत्रियाणी, } र्य्यक्षत्रियाभ्यां वा"। वार्त्तिं इति स्वार्थे आनुगागमभावे टाप् ङीपभावात् न ङीष्। पक्षे आनुगागमः ङीष् च।) क्षत्रियस्त्रीजातिः। इत्यमरः॥ (यथा, मनुः। ३। ४४।
"शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया"॥
दुर्गा। यथा, हरिवंशे विष्णुपर्व्वणि। ५८। २३।
"निद्रा च सर्व्वभूतानां मोहनी क्षत्रिया तथा"॥)
क्षत्रियी, स्त्री, (क्षत्रियस्य पत्नी इति। "पुंयोगादाख्यायाम्"। ४।१। ४८। इति ङीष्।) क्षत्रियपत्नी। इत्यमरः। २। ६। १५॥
क्षद, संहर्षे। इति कविकल्पद्रुमः॥ (सौचं-आत्मं-सकं-सेट्।) क्षत्ता। इति दुर्गादासः॥ (यथा, ऐतरेयब्राह्मणे। १। १५। "तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हतुद्यायं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्"॥)
क्षन्ता, [क्षन्तृ] त्रि, (क्षम्+कर्त्तरि क्षच्।) क्षमाशीलः। इत्यमरः। ३।१।३१॥ अस्य पर्य्यायः सहिष्णुशब्दे द्रष्टव्यः॥ (यथा, महाभारते। १३।१०२।३१।
"ये क्षन्तारो नाभिजल्पन्ति चान्यान्
सचीभूताः सततं पुण्यशीलाः।
तथाविधानामेव लोको महर्षे!
परं गन्ता धृतराष्ट्रो न तत्र"॥)
क्षप, इ क प्रक्षेपे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) अक्षिरिह क्षमा; इ क, क्षम्यति दुःखं मुनिः। सहत इत्यर्थः। इति दुर्गादासः॥
क्षप, त् क म क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्-इदित्।) म, अक्षपि अक्षापि क्षपं क्षापं क्षापम्। मानुबन्धसामर्थ्यात् स्थानिवत्त्वाभावे दीर्घः। क्षमते तु अत्र दीर्घविधिरुपधां नापेक्षते। इति दुर्गादासः॥
क्षपणः, त्रि, (क्षपयति क्षिपति दूरीकरोति लज्जां इति। क्षप क्षेपे+कर्त्तरि ल्युः।) निर्लज्जः। इति त्रिकाण्डशेषः॥ (क्षपयति विषयरागं इति। बौद्धसन्न्यासी॥ (भावे ल्युट् क्षपणम्। यथा, मनुः। ४। २२२।
"भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं व्रहम्"॥)
क्षपणकः, पुं, (क्षप्+ल्युः। स्वार्थे कन्।) बुद्धभेदः।

ततो दाल्भ्यः प्रत्युवाच ददामि वरमीप्सितम्॥
क्षिप्रं गर्भमयं बालं तन्मे त्वं दातुमर्हसि।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः॥
क्षत्रियाणाकरस्थानं तन्त्रं याचितवानसि।
प्रार्थितश्च त्वया विप्र! कायस्थो गर्भ उत्तमः॥
तस्मात् कायस्थ इत्याख्यो भविष्यति शिशूत्तमः।
एवं रामो महाबाहुर्दत्वा तं गर्भमुत्तमम्॥
निर्जगामाश्रमात्तस्मात् क्षत्रियाणाकरः प्रभुः।
कायस्थ एष उत्पन्नः क्षत्रियां क्षत्रियाततः॥
तद्गर्भजाश्च कायस्था धर्म्मिष्ठाः सत्यवादिनः।
सदाचारपरा नित्यं रता हरिहरार्चने॥
देवद्विजपितृभक्ताश्च क्षतिथीनाञ्च पूजकाः"॥
इति स्कन्दपुराणे रेणुकामाहात्म्ये परशुरामदाल्भ्यसंवादे॥

क्षमः
इति जटाधरः॥ सन्न्यासी। यथा। "एक क्षपणक आकाशर्क्षौ तत्र क्षपणक दशशाकाशा। यत्र क्षपणक दशशाकाशा तत्र क्षपणक का शाकाशा"॥ इत्युद्भटः॥ (यथा च महाभारते। १। ३। १२४।
"सोऽपश्यद्दथ पथि नग्नं क्षपणकमागच्छन्तम्"॥
विक्रमादित्यसभास्थनवरत्नानामेकः। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः"॥)
क्षपण्डः, पुं, (क्षप्+षाडलकात् व्युः ततो णत्वम्।) अपराधः। इति शब्दमाला॥
क्षपा, स्त्री, (क्षपयति वारयति चेष्टामिन्द्रियाणाम्। क्षप्+अच्।) रात्रिः। (यथा, महाभारते। ३। अरण्यपर्व्वणि। १। ४३।
"राजानन्तु कुरुश्रेष्ठं ते हंसमधुरस्वराः।
आश्वासयन्तो विप्राग्र्याः क्षपां सर्व्वां व्यनोदयन्"॥)
हरिद्रा। इत्यमरः॥
क्षपाकरः, पुं, (क्षपां रात्रिं करोतीति। कृ+टः।) चन्द्रः। कर्पूरः। इत्यमरः। ४। ५३। ७॥
क्षपाचरः, पुं, (क्षपायां रजन्यां चरतीति। चर+टः।) राक्षसः। (यथा, महाभारते। ३। इन्द्रजिद्वधपर्व्वणि। २८८। ३३।
"निर्याणे स मतिं क्षत्वा निधायासिं क्षपाचरः।
आज्ञापयामास तदा रथो मे कल्प्यतामिति"॥)
क्षपाटः, पुं, (क्षपायां अटतीति। अट् गतौ+अच्।) राक्षसः। इति त्रिकाण्डशेषः। (यथा, भट्टिः २। ३०।
"ततः क्षपाटैः पृथुपिङ्गलाक्षैः
खं प्राक्षषेऽरिव चानशेऽब्दैः"॥)
क्षपापतिः, पुं, (क्षपायाः रजन्याः पतिः।) चन्द्रः। कर्पूरः। इति निशापतिशब्ददर्शनात्॥
क्षम, उ इर् भ य मर्षे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) मर्षः सहनम्। उ, क्षमित्वा क्षान्त्वा। षष्ठस्वरानुबन्ध इत्येके। इ र, अक्षमत् अक्षमीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। भ य, क्षाम्यति दोषं साधुः। इति दुर्गादासः॥
क्षम, ऊ ङ ञि ष मर्षे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सक-सेट्।) ऊ, अक्षमिष्ट अक्षंस्त। ङ क्षमते। ञि, क्षन्तोऽस्ति। ष, क्षमा। इति दुर्गादासः॥
क्षमं, क्ली, (क्षम्+घञर्थे क।) युक्तम्। इत्यमरः। ३। ३। १२२॥ (यथा, शाकुन्तले ५ अङ्के।
"यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पुनरत्कुलया त्वया।
अथ तु वेत्सि शुचिव्रतमात्मनः
पतिगृहे तव दासमपि क्षमम्"॥)
क्षमः, त्रि, (क्षमते इति। क्षम्+अच्।) शक्तः। हितः। इत्यमरः। ३। ३। १२२॥ आद्यस्य पर्य्यायः। सहः २ प्रभुष्णुः ३। इति हेमचन्द्रः॥ (यथा, शाकुन्तले १ अङ्के।
"इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति"॥

रघौ च । ११ । ६ ।
"आग्नेयं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा" ॥)
क्षमता, स्त्री, (क्षमस्य भावः इति । क्षम + तल् ।) योग्यता । सामर्थ्यम् । यथा,—
"श्रुतिर्द्वितीया क्षमता च लिङ्गं
वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या करणस्य कार्य्या
स्थानं क्रमो योगबलं समाख्या" ॥
इति भट्टवार्त्तिकम् ॥ क्षमता अर्थप्रकाशनसामर्थ्यम् । यथा । बर्हिर्देवसदनं दासीत्यत्र दासीति पदस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य आस्तृतदर्भप्रकाशनसामर्थ्यात् आस्तृतदर्भच्छेदने समुदायमन्त्रस्य नियोगोऽवगम्यते । इति धर्म्मदीपिका ॥
क्षमा, स्त्री, (क्षमते आत्मोपरिस्थितानां जीवानामपराधं या । क्षम् अच् षित्वादङ् वा ततष्टाप् ।) क्षितिः । (यथा, भट्टिः । ३ । २२ ।
"विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव" ॥)
क्षान्तिः । इत्यमरः ।३।३।१२२॥ क्षमालक्षणम् । यथाह, बृहस्पतिः ।
"वाच्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता" ॥
इत्येकादशीतत्त्वम् । अपि च ।
"आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि ।
अदुष्टैर्वाङ्मनःकायैस्तितिक्षुस्च क्षमा स्मृता" ॥
इति मात्स्ये १२० अध्यायः ॥ अन्यच्च ।
"विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
गृहस्थस्तु क्षमायुक्तो न गृहेण गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनित्यताज्ञानमेतद्ब्राह्मणलक्षणम् ॥
विगर्हातिक्रमत्यागहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्জ্জনं क्षमा" ॥
इति कौर्म्मे १४ अध्यायः ॥ (अपरञ्च यथा, महाभारते ३ । ३ । द्रौपदी-युधिष्ठिरसंवादे । २६ । ३५—।
"अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावता कृष्णे! काश्यपेन महात्मना ॥
क्षमा धर्म्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेव जानाति स सर्व्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतञ्च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥
अतियज्ञविदां लोकान् क्षमिणः प्राप्नुवन्ति च ।
अतिब्रह्मविदां लोकानति चापि तपस्विनाम् ॥
अन्ये वै यजुषां लोकाः कर्म्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥
तां क्षमामीदृशीं कृष्णे! कथमसद्विधस्त्यजेत् ।
यस्यां ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्व्वं ब्रह्म सम्पद्यते तदा ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
इह सम्मानमर्हन्ति परत्र च शुभां गतिम् ॥
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ।
तेषां परतरे लोकास्तस्मात् क्षान्तिः परा मता"॥)
रात्रिः । इति शब्दरत्नावली ॥*॥ दुर्गा । इत्यमरटीकायां मथुरानाथः ॥ तथा हि ।
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तुते"॥
इति दुर्गाचातत्त्वम् ॥ अपि च ।
"क्षमा तु श्रीमुखे कार्य्या योगपट्टोत्तरीयका ।
पद्मासनकृताधारा वरदोद्यतपाणिनी ॥
शूलमेखलसंयुक्ता प्रशान्ता योगसंस्थिता ।
सितपुष्पोपहारेण सितहोमेन सिद्धिदा" ॥
इति देवीपुराणे संवत्सरदेवताविंशतिविधिः प्रथमः ॥ खदिरः । इति राजनिर्घण्टः ॥ गोपीविशेषः । यथा । राधिकोवाच ।
"मया पूर्ब्बञ्च त्वं दृष्टो गोप्या च क्षमया सह ।
सुवेशयुक्तो मालावान् गन्धचन्दनसंयुतः ॥
रत्नभूषितया गन्धचन्दनोक्षितया तया ।
सुखेन मूर्च्छितस्तल्पे पुष्पचन्दनसंयुते ॥
श्लिष्टो निद्रितया सद्यः सुखेन नवसङ्गमात् ।
मया प्रबोधिता सा च भवांश्च स्मरणं कुरु ॥
गृहीतं पीतवस्त्रन्ते मुरली च मनोहरा ।
वनमाला कौस्तुभश्चाप्यमूल्यं रत्नकुण्डलम् ॥
पश्चात् प्रदत्तं प्रेम्णा च सखीनां वचनादहो ।
लज्जया क्षणवर्णञ्च तेनाप्यद्यापि पश्यतः ॥
क्षमा देहं परित्यज्य लज्जया पृथिवीं गता ।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्रणुदता पुरा ।
किञ्चिद्दत्तं विष्णवे च वैष्णवेभ्यश्च किञ्चन ।
धर्म्मिष्ठेभ्यश्च धर्म्माय दुर्ब्बलेभ्यश्च किञ्चन ।
तपस्विभ्योऽपि देवेभ्यः पण्डितेभ्यश्च किञ्चन ॥
एतत्ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥ * ॥
क्षमादंशः, पुं, (क्षमां पृथिवीं दंशतीति । दन्श + अच् । तीक्ष्णमूलत्वात् तथात्वम् ।) शिग्रुः । इति राजनिर्घण्टः ॥
क्षमावान्, [त्] त्रि, (क्षमा विद्यते अस्य अस्मिन् वा इति मतुप् मस्य वत्वम् ।) क्षान्तियुक्तः । यथा,
"एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः" ॥
इति गारुडे ११४ अध्यायः ॥
क्षमिता, [ऋ] त्रि, (क्षम् + ढच् ।) क्षमाशीलः । इत्यमरः । ३ । १ । ३१ ॥
क्षमी, [न्] त्रि, (क्षम् + "शमीत्यादिभ्यो घिनुण्"। ३।२।१४१। इति घिनुण् ।) क्षमाशीलः । तत्पर्य्यायः । सहिष्णुः २ सहनः ३ क्षन्ता ४ तितिक्षुः ५ क्षमिता ६ । इत्यमरः ।३।१।३१॥ क्षमः ७ शक्तः ८ सहः ९ प्रभूष्णुः १० । इति हेमचन्द्रः ॥ (यथा, भागवते । ६ । १५ । ४० ।
"क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः" ॥)
क्षयः, पुं, (क्षि क्षये। "नन्दिग्रहिपचादिभ्यः"।३।१।१३४। इति अच् ।) नीतिवेदिनां त्रिवर्गान्तर्गतप्रथमवर्गः । स तु राज्ञामष्टवर्गस्यापचयः । यथा,—
"क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" ॥
इत्यमरः ३।१।१३४ ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः अन्येषान्तु धर्म्मकामार्थः पूर्ब्बमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोपचयो वृद्धिः । तस्य नोपचयो नाप्यपचयः स्थानम् । अष्टवर्गो यथा,—
"ऋषिर्व्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम् ।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम् ।
अष्टवर्गः स्मृतो राज्ञां" । इति तट्टीकायां भरतः ॥
क्षयः । तत्पर्य्यायः । सम्वर्त्तः २ प्रलयः ३ कल्पः ४ कल्पान्तः ५ ॥ अपचयः । तत्पर्य्यायः । क्षिया २ ॥ निलयः । तत्पर्य्यायः गृहशब्दे द्रष्टव्यः ॥ कासरोगविशेषः । तत्पर्य्यायः । यक्ष्मा २ शोषः ३ । इत्यमरः ॥ राजयक्ष्मा ४ रोगराजः ५ गदाग्रणीः ६ उष्मा ७ अतिरोगः ८ रोगाधीशः ९ रुपामयः १० । इति राजनिर्घण्टः ॥
(लक्षणादि चिकित्सितञ्च यथा,—
"शृणुत गुणगरिष्ठा व्याधिघोरं नराणां
भवति रहितचेष्टो वातुलः प्राणिनां वै ।
चिरनिरयकरोऽयं प्राक्तनैः कर्म्मपाकै-
रिह परिभवकारी मानुषस्य क्षयोऽयम् ॥
देवानां प्रकरोति भङ्गमथवा भूयस्य सम्पातनं
गोपृथ्वीधरविप्रबालहननस्त्रावासविध्वंसनम् ।
योऽयं स्थानविनाशनञ्च कुरुते स्त्रीणां वधो यो नरस्तस्यैतैर्गुरुकर्म्मभिः क्षयगदो देहार्थहारी महान् ॥
देवानां दमतो धनञ्च दहतो भूमप्रपातेऽपि च
देवत्वं हरतो विषञ्च ददत आरामकं निघ्नतः ।
तेनासौ नियमेन सम्भवति वै नृणाञ्च तीव्रा रुजा
धातूनां क्षयकारिणी च मनुजस्यात्मापहा दारुणा
क्षयो दशविधश्चैव विज्ञातव्यो भिषग्वरैः ॥
आन्त्या भारादिषमशयनैर्दीर्घमार्गाक्रमैर्व्वा
भुक्तेर्दोषादतिशयरतेः सेवनाद्वै नरस्य ।
ज्वरेणातिक्रान्तो विषमशयनात् कूटनपरैः
जाता रोगा मनुजवपुषः क्षीणतां संनयन्ति ।
रोगाक्रान्तो विषमशयनात्तस्य मन्दज्वराद्या ।
श्लेष्मा पित्तं मरुदथ शयनैर्यातिदेहक्षयं वा ।
रसरक्तमांसमेदोऽस्थिमज्जानि शुक्रतः ॥
एवं दशविधा ज्ञेयाः क्षया नृणां वपुःषु च ।
पुनश्च लक्षणान्येषां वक्ष्यते शृणु साम्प्रतम् ।
अतिस्वेदातिघर्म्मेण चिन्ताशोकभयादिना ॥
वाताद्यैः सेवितैरापि जायते मारुतक्षयः ।
तेन तन्द्राक्लमश्चैव पिपासारुचिवैपथुः ॥
तमः भ्रमो भ्रमश्चैव भवेच्च मारुतक्षये ।
तस्मादिमानि सेव्यानि रसानि बलवानि च ।
रसोनादिककल्कञ्च सेवयेद्घृतवर्द्धनम् ।
पित्तक्षयेऽग्निमान्द्यञ्च जायतेऽरुचिजाड्यता ॥
कासश्लेष्मप्रसेकश्च जायते मन्दचेष्टता ।
स्वेदाभ्यङ्गाग्नि पानानि दीपनानि प्रयोजयेत् ॥
जाङ्गलानि रसान्नानि सेवयेत् पित्तक्षये क्षये ।
व्यायामे च व्यवाये च रूक्षान्नाहारसेवनैः ॥

सन्तापक्रोधनैश्चापि जायते कफसंक्षयः।
तेनदाहोऽथवा पाण्डुः शोषो निःश्वसनं भ्रमः॥
विनिद्रता क्षुत् दृष्ट्वा च स्त्रीसङ्गे नाभिनन्दति।
तस्य प्रीताम्लपानानि कन्दशाकादिकैरसैः॥
आनूपैर्देधिदुग्धैर्वा सेवनं न समीहितम्।
त्रिभिर्दोषैः क्षयं प्राप्तैस्तदा हि मरणं ध्रुवम्॥
तस्य क्रिया प्रयोक्तव्या साधारण्या महामते!॥
अथ धातुः क्षयं वक्ष्ये हारीत! शृणु साम्प्रतम्।
रसरक्तमांसमेदः प्रत्येकं क्षयलक्षणम्॥
रसक्षयेऽतिशोषश्च मन्दाग्नित्वञ्च वेपथुः।
शिरांसक्ष मन्दचेष्टत्वं जायते च क्लमो भ्रमः॥
रक्तक्षये क्षयः पाण्डुर्मन्दचेष्टो भवेन्नरः।
श्वासनिष्ठीवनं शोषो मन्दाग्नित्वञ्च जायते॥
मांसक्षयेऽतिक्षयता चेष्टनञ्चाङ्गभङ्गता।
निद्रागाढोऽतिनिद्रास्य विसंज्ञो बधविक्रमः॥
मेदः क्षये मन्दबलो विसंज्ञता
श्वासस्य भङ्गो वमनं परूषता।
श्वासाभिकासोऽरुचिताग्निमन्दता
विश्लेषकम्पो वपुषश्च शुष्कता॥
अस्थिक्षये स्यात् अतिमन्दचेष्टता
मन्दश्च वीर्यं खलु मेदसः क्षये।
विसंज्ञता स्यात् क्षयता च कम्पनं
श्वासस्य भङ्गो वमनं परूषता॥
शोषश्च देहे सदनञ्च शोषिता
विकम्पनं शोषरुजा च जायते।
भिषग्वरस्तत् परिवेदयज्ज्ञः
मज्जक्षये कम्पनमेव जायते॥
भ्रमः क्लमः स्यादतिमन्दचेष्टः
शोषो निशाजागरणञ्च तन्द्रा॥
मन्दज्वरः शोषसमो मनुष्ये
शुक्रक्षये चाह्य विचेष्टितानि।
रुग्णं भ्रमः कम्पनशोषरोधः
स्त्रीदेषितादीनि विरूपता च॥
इदानीं संप्रवक्ष्यामि भेषजानि यथाक्रमम्।
स्नेहनं रूक्षणञ्चैव तथा विस्रावणं हितम्।
जाङ्गलानि च मांसानि भोजनानि च सेवयेत्॥
गुडूची शृङ्गवेरञ्च यवागी क्षपितं जलम्।
मरिचैः क्षपितं दुग्धं पाने रात्रौ प्रशस्यते॥
रसानां तेन वृद्धिः स्यात् शीघ्रं तस्मादिमुच्यते॥
रसाना वृद्धिकरणं गोधूमयवशालिभिः।
क्षपितानि भिषक् श्रेष्ठैर्जाङ्गलानि विशेषतः॥
घृतदुग्धसिताक्षौद्रमरिचानि च पिप्पली।
पानं शस्तं मनुष्याणां रक्तवृद्धिकरं सतम्"॥

इति रसरक्तवृद्धिकरम्॥ * ॥

"आनूपानि च धान्यानि बधुनामानि भक्षयेत्।
भक्ष्यांश्च घृतदुग्धादीन् सेवयेन्मधुराणि च॥
रसाश्च जाङ्गलाः स्युः सेवनार्थे भिषग्वर!।
सितोपलादिकं चूर्णं अजाक्षीरं सकोलकम्॥
घृतं पानं क्षये चैव कल्पमप्राशनेन"॥

इति मांसमेदोवृद्धिकरम्॥ * ॥

"घृतानि च सुपक्वानि क्षीराणि विविधानि च।
चन्दनानि च द्राक्षादि-चूर्णानि च भिषग्वर!॥

जाङ्गलानि च सर्व्वाणि सेवनीयानि पुत्रक!।
अन्नानि मधुराणीह सर्व्वाणि च प्रयोजयेत्"॥

इत्यस्थिवृद्धिकरणम्॥ * ॥

"शुक्रक्षये प्रपाकानि रसानि च विशेषतः।
नवनीतं तथा क्षीरं मधुराणि च सेवयेत्॥
कर्कटी मूलपयसा विदारी कन्दशाल्मली।
सिताक्षञ्च हितं पानं शस्यन्ते मधुराणि च"॥

इति शुक्रक्षयवृद्धिकरणम्॥ * ॥

"बला विदारी लघुपञ्चमूली
क्षीरद्रुमत्वक् च ततः प्रयोज्या।
पुनर्नवा मेघतुगारजन्यः
सञ्जीवनीयैर्मधुकैः समांशैः॥
अक्षप्रमाणानि समानि तानि
सर्व्वाणि चैतान्यपि चूर्णयित्वा।
विमिश्रयेत् तत्र कषायतानि
यवान्नगोधूमयवांश्च पिष्ट्वा॥
तुगासमांशा सितशर्कराणां
पेयं तु षट्पाटकमिश्रितञ्च।
प्रकीर्णकार्द्धेन वियोजनीयं
सर्व्वांशकेनापि सिता प्रयोज्या॥
विभावयेच्चामलकीरसेन
वारत्रयं गोपयसा विभाव्य।
ततोऽस्य सर्व्वैः सह शर्करामि
र्हृतेन चैवं पुनरेव भाव्यम्।
तं भक्षयेत् क्षौद्रयुतं पलार्द्धं
जीर्णे च भोज्यं कटुकास्लवर्ज्यम्॥
क्षीरं घृतं वा सितशर्करां वा
यवान्नगोधूमकशालिभक्षान्।
क्षात्वाग्निमाकं जठरे नरस्य
देयो विधिज्ञैः क्षयरोगशान्त्यै।
पथ्यक्षये आन्तचिराभितापः
संपीड़िताना तथाग्निरोऽत्तौ॥
"पित्तातुराणां रुधिरक्षयाणां
श्रमाभ्वसंपीड़ितकामलानाम्।
श्वासातुराणां मधुमेहिनाञ्च
क्षीणेन्द्रियाणां बलकारिश्रेष्ठम्"॥

इति बलादिचूर्णम्॥ * ॥

"पिप्पली वर्द्धमानन्तु ज्वरे जीर्णे प्रशस्यते।
मन्दाग्नौ पीतमेवाथ गुदजे वा तथा पुनः"॥

इति पिप्पलीवर्द्धमानम्॥ * ॥

"दे पले मार्कवं धातु साज्यक्षञ्च पुनर्नवा।
तुगा एका शालिपर्णी बासकञ्च दुरालभा।
चूर्णार्द्धेन समं योज्यं त्रिगन्धं मरिचानि च।
ताक्षीरं मगधा चैव तदर्द्धेन त्रिकोद्भवम्॥
त्रिफाभेदन्तदर्द्धेन सर्व्वैकत्र मिश्रयेत्।
समेन तिलचूर्णन्तु शर्कराभिः समायुतम्॥
तेन क्षयो राजयक्ष्मा कासश्च विनश्यति।
अपस्मारं क्षयञ्चाशु बलवीर्य्याधिको भवेत्॥
शाम्यन्ति च महारोगाः सुक्राच्यो जायते नरः"॥

इति त्रिफाजतुचूर्णम्॥ * ॥

"बलाक्वाथं हृदतीदयञ्च
पर्णीद्वयं गोक्षुरकं स्थिरा च।

पटोलनिम्बस्य दलानि मुस्तम्
सञ्चायमाणा सदुरालभा च॥
क्षत्वा कषायञ्च पदावशेषं
पूते ततस्तूर्णमिदं प्रयुञ्जात्।
द्राक्षा शठी पुष्करमूलधात्री
दुग्धं समं तामलकीकषायम्॥
सर्पिः प्रयक्तं नवनीतकञ्च
सर्पिस्तदर्द्धेन वियोजनीयम्।
सिद्धं घृतं पानमथैव वस्तौ
नस्ये तथाभ्यञ्जनभोजने च॥
स पाण्डुकाग्निक्षयकासनानाम्
राजक्षये क्षीणबलेन्द्रियाणाम्।
क्षतेषु शोफेषु व्रणेषु शस्तं
शिरोऽर्त्तिपार्श्वार्त्तिगुदामयघ्नम्"॥

इति बलाद्यं घृतम्॥ * ॥

"चन्दनं सरलं दारु पत्रैला बालकं शठी।
नखश्चैलेयकं एका पद्मकं नागकेशरम्॥
कक्कोलकं सुरामांसी श्रैलेयं द्वे हरीतकी।
रेणुकात्वक् कुङ्कुमञ्च शारिवे द्वे निशागुरु॥
बला द्राक्षा च नलिका कषायं सुपरिस्रुतम्।
तैलमस्तु तथा क्षात्वा रसेन समभागिकम्॥
मन्दाग्निना पचेत्तैलं सिद्धं पाने च वस्तिषु।
नस्ये चाभ्यञ्जने चैव योजयेत्तद्भिषग्वरः॥
हन्ति पाण्डुक्षयं कासं ग्रहणं बलवर्णकृत्।
मन्दज्वरमपस्मारकुष्ठपामं हरेत् पुनः॥
करोति बलपुष्ट्योजःप्रज्ञायुर्बलवर्द्धनम्॥
रूपसौभाग्यदं पुंसां सर्व्वभूतग्रहारम्"॥

इति चन्दनाद्यं तैलम्॥

इति क्षयरोगचिकित्सा॥ इति हारीते चिकित्सितस्थाने दशमेऽध्याये॥ * ॥

"चिकटु त्रिफलैलाभिर्जातीफललवङ्गकैः।
नवभागोन्मितं तुल्यं लौहं पारदसिन्दुरम्।
मधुना क्षयरोगाणां हन्तायं क्षयकेशरी"॥

इति क्षयकेशरी रसः॥

इति वैद्यकरत्नेन्द्रसारसंग्रहे यक्ष्माधिकारे॥ * ॥)

अस्य अन्यत् निदानादि यक्ष्मग्रन्थे द्रष्टव्यम्।
तस्यौषधान्तरं यथा,—

"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम्।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्"॥

इति गारुडे १९३ अध्यायः॥ (क्षयत्यक्षादनेन वा क्षि + क्षये + अप्। क्षयति विनाशयति इति। अन्तर्भूतणिच् ततोऽच्।) रोगमात्रम्। इति राजनिर्घण्टः॥

क्षयतरुः, पुं, (क्षयस्य क्षयार्थं वा तरुः।) खदिरवृक्षः। इति राजनिर्घण्टः। (यथास्य पर्य्यायाः।

"नन्दीवृक्षोऽक्षत्वभेदः प्ररोहो गजपादपः।
खादी वृक्षः क्षयतरुः क्षीरी च स्यादनन्तिः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

क्षयथुः, पुं, (क्षि + अथुच्।) कासः। इति हेमचन्द्रः॥

क्षयनाशिनी, स्त्री, (क्षयं क्षयाख्यरोगं नाशयतीति। क्षय + नश् + णिच् + णिनि + ङीप्।) जीवन्ती-वृक्षः। इति शब्दमाला॥

(गुणादयोऽस्य जीवन्तीशब्दे ज्ञेया ॥)

क्षय्यं, त्रि, (क्षेतुं शक्यम्। क्षि + "ऋहलोर्ण्यत्" शक्यार्थे"। ३। १। ८१। इति यत्।) क्षयशीयम्। क्षयितव्यम्। क्षययोग्यम्। इति व्याकरणम् ॥ "क्षेतुं नेतुं योग्यं क्षेयं पापं जेयं मनः"। इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते।

"अपवर्गे तु वैश्यस्य श्राद्धकर्म्मणि भारत!। अक्षय्यमभिधातव्यम्" इति ॥)

क्षर, ण सञ्चलने। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्। क्वचित् सकच्च।) ज, क्षारः क्षरः। सञ्चलनमिह मोचनं स्रवणञ्च। आदौ सकर्म्मकः। "स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः"। इति किराते ७। ८॥ स्रवणे तु। क्षरत् क्षतजक्षत्तयः। इति दुर्गादासः ॥

क्षरं, क्ली, (क्षरति स्रवति वर्षति च। क्षर् + अच्।) जलम्। तथा च सत्यसाविद्योपनिषदि। १। ८। १०। "क्षरन्त्यविद्या ह्यमृतं तु विद्या" ॥) मेघे पुं। इति मेदिनी ॥

क्षरः, पुं, (क्षर् + अच्।) नश्वरवस्तु। यथा,—

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥ इति श्रीभगवद्गीतायाम्। १५। १७।

"क्षरश्चाक्षरश्चेति द्वाविमौ लोके प्रसिद्धौ। तावेवाह तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः स्त्रिया राशिः। पर्व्वत इव एकदेशेषु नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स त्वक्षरः पुरुष उच्यते विवेकिभिः"। इति तट्टीकायां श्रीधरस्वामी ॥ (तथा, महाभारते। १४। अनुगीतापर्व्वाध्याये। १७। १७।

"ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरात्" ॥)

क्षरणं, क्ली, (क्षर् + भावे ल्युट्।) मोचनम्। स्रवणम्। (यथा, रघुः। १६। १६।

"लौल्यमेत्य महिषीपरिग्रहात् नर्त्तकीष्वसुलभासु तद्गुरुः। वर्त्तते स्म सकथश्चिदाखिल- भ्रूकुलीक्षरणसन्नवर्त्तिका" ॥)

क्षरी, (नृ) (क्षरः क्षरणं वर्षणं अस्त्यस्मिन् काले क्षरोऽस्यस्य वा। क्षर् + इनिः।) वर्षाकालः इति हेमचन्द्रः। क्षरणविशिष्टे त्रि॥

क्षल, क शौचे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) शौचमिह शुद्धीकरणम्। क, क्षालयति पात्रं पयसा लोकः। इति दुर्गादासः ॥

क्षल, ज चाले। चये। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) ज, क्षालः क्षलः। चालः कम्पः। चयश्चयनम्। इति दुर्गादासः ॥

क्षवः, पुं, (क्षु शब्दे क्षुते च + भावे अप्।) क्षुतम्। राजिका। इत्यमरः ॥ कासः ॥ इति शब्दरत्नावली। राजिकाभेदः। तत्पर्य्यायः। क्षुधाभिजननः २ चपलः ३ दीर्घग्रन्थिकः ४ सुकुमारः ५ उग्रबीजः ६ मधुरः ७ क्षवकः ८। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। कफपित्तश्रमहरत्वम्। दृष्यत्वम्। पवनाध्मानपुष्टिदत्वञ्च। इति राजनिर्घण्टः ॥

क्षवकः, पुं, (क्षु + अप् + स्वार्थे कन्।) अपामार्गः। राजिका। भूताङ्कुशः। इति राजनिर्घण्टः। (व्यवहारोऽस्य यथा सुरसादिगणपाठे।

"क्षवकसरसिभार्गी कामुका काकमाची कुलहलविषमुष्टी भूस्तृणो भूतकेशी" ॥

इति वामटे सूत्रस्थाने १५ अध्याये ॥)

क्षवथ्, क्ली, (क्षवं करोतीति। क्षु + क्विप्।) क्षिक्कणी। इति भावप्रकाशः ॥

क्षवथुः, पुं, (क्षु + अथुच्।) क्षुतम्। कासः। इति मेदिनी। कण्डूकण्डूयनम्। इति शब्दरत्नावली ॥ (क्षवथुर्नाम रोगविशेषः। तस्य सकारणसम्प्राप्तिलक्षणानि यथा,—

"तीक्ष्णाघ्राणोपयोगार्करश्मिसूक्ष्मरजादिभिः। वातकोपिभिरन्यैर्वा नासिका तरुणास्थनि ॥ विघट्टितेऽनिलः क्रुद्धो रुद्धः श्लेष्माटकं व्रजेत्। निष्टप्तः कुरुतेऽत्यर्थं क्षवथुं स भृशं क्षवः" ॥

इति वामटे उत्तरस्थाने १९ अध्याये ॥

"घ्राणाश्रिते मर्म्मणि संप्रदुष्टे यस्यानिलो नासिकया निरेति। कफानुयातो बहुशः सशब्द- स्तं रोगमाहुः क्षवथुं विधिज्ञाः ॥ तीक्ष्णोपयोगादतिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा। सूक्ष्मादिभिर्वा तरुणास्थिमर्म्म- ण्युद्घाटिते यः क्षवथुर्निरेति" ॥

इत्युत्तरतन्त्रे द्वाविंशेऽध्याये सुश्रुतेनोक्तम् ॥

चिकित्सा यथा।

"क्षेप्यं नस्यं मूर्द्धविरेचनीयै- र्नाड्याचूर्णं क्षवथौ भंग्रथौ च" ॥

इति चाचैव २३ अध्याये तेनोक्तम् ॥ अस्य विधारणाज्ज्ञातो यः स यथा,—

"भवन्ति गाढं क्षवयोर्विघाता- च्छिरोऽक्षिनासास्रवणेषु रोगाः। कण्ठास्यपूर्णत्वमतीवतोदः कूजश्च वायोरथवा प्रवृत्तिः" ॥

इति चोत्तरतन्त्रे पञ्चपञ्चाशत्तमेऽध्याये च तेनोक्तम् ॥)

क्षवपत्रा, स्त्री, (क्षवः क्षुतहेतुः पत्रं यस्याः। एतत् पत्राघ्राणेन हि क्षुतं जायते। अतस्तथात्वम्।) द्रोणपुष्पी। इति राजनिर्घण्टः ॥

क्षविका, स्त्री, (क्षवः क्षुतं साधयत्यस्यस्य इति ठन् + टाप् च।) वृहतीभेदः। तत्पर्य्यायः। सर्पतनुः २ पीतपर्णा ३ पुष्पप्रदा ४ बहुफला ५ गोधिनी ६। अस्या गुणाः। "क्षविका वृहती तिक्ता कटुरुष्णा च तत्समा"। इति राजनिर्घण्टः ॥

क्षान्तः, त्रि, (क्षम् + कर्त्तरि क्तः।) सहनशीलः। तत्पर्य्यायः। सोढ़ः २। इत्यमरः ॥ क्षमान्वितः ३। इति शब्दरत्नावली ॥ तितिक्षितः ४। इति जटाधरः ॥ (यथा, हरिवंशे। २१। २१।

"निर्व्वैरो निर्व्वृतः क्षान्तो निर्म्मन्युः क्षतिरेव च" ॥)

क्षान्तिः, स्त्री, (क्षम + भावे क्तिन्।) सत्यपि सामर्थ्ये अपकारिणि अपकाराचिकीर्षा। इति देवीमाहात्म्यटीकायां नागभट्टः ॥ तत्पर्य्यायः। तितिक्षा २। इत्यमरः ॥ सहिष्णुता ३ क्षमा ४। इति जटाधरः ॥ (यथा, भगवद्गीतायाम् १८। ४२।

"शमो दमस्तपः शौचं क्षान्तिरार्জ্জবमेव च" ॥)

क्षान्तुः, त्रि, (क्षम् + "क्षमिरमिक्षमिभ्यस्तुन् दृद्भिश्च"। उणां। १। ४१। इति तुन् दृद्भिश्च।) क्षमाशीलः। तत्पर्य्यायः। मर्षकः २। इत्युणादिकोषः ॥

क्षान्तुः, पुं, (क्षम् + तुन् दृद्भिश्च।) पिता। इति संक्षिप्तसारोणादिवृत्तिः ॥

क्षामः, त्रि, (क्षै + कर्त्तरि क्तः। "क्षायो मः"। ८। २। ५३। इति निष्ठा तस्य मत्वम्।) क्षीणः। अवसः। इति शब्दरत्नावली ॥ (यथा, भागवते ३। २१। ४६।

"विद्योतमानं वपुषा तपस्युग्रयुजा चिरम्। नातिश्यामं भगवतः स्निग्धापाङ्गावलोकनात्" ॥

स्त्रियां टाप्। यथा, मेघदूते। ८६।

"आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वाम्" ॥

सर्व्वरूपवत्त्वात् विष्णुः। यथा, महाभारते। १३ विष्णुसहस्रनामकीर्त्तने। १४६। १०४।

"आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः" ॥)

क्षामवती, क्षामवतीष्टिः } स्त्री, (क्षामं दोषक्षयः साध्यतयास्त्यस्या मतुप् मस्य वत्वम्। स्त्रियां ङीप्। पक्षे कर्म्मधारयः।) यागविशेषः। यथा, भविष्ये।

"क्षामवत्यादिना यद्यत् कर्म्मणा एतनापते!। दैवदोषादकरणे जाते दोषकदम्बके। होमेनैकेन दोषाणां सर्व्वेषां क्षयमादिशेत् ॥ एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्व्वत्र दृष्टान्तः"। इति प्रायश्चित्ततत्त्वम् ॥

क्षामस्यं, क्ली, (क्षामस्य क्षयस्य आस्यं स्थानम्।) कुपथ्यम्। यथा, शब्दचन्द्रिकायाम्।

"अपथ्यमहितं रोग्यं क्षामास्यं परिकीर्त्तितम्" ॥

पुष्पदन्तरे क्षमस्यमिति च पाठः ॥

क्षारं, क्ली, (क्षरतीति। क्षर् सञ्चलने + "ज्वलितिकसन्तेभ्यो णः"। ३। १। १४०। इति ज्वलादित्वात् णः।) विड्लवणम्। इति राजनिर्घण्टः ॥ यवक्षारः। इति चिकित्सितशेषः ॥

क्षारः, पुं, (क्षर् सञ्चलने + ज्वलादित्वात् णः ॥) रसविशेषः। (यथा, पञ्चतन्त्रे। १। ११५।

"तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति" ॥

अस्य गुणा यथा।

"क्षारः क्षोदं जनयति मुखे स्वादुरुष्णो विदाही श्लेष्मश्लेष्मा रुचिभ्रंशहृषामूत्रकृच्छ्रोषणश्च। आनाहं सञ्जनयति पुनर्वह्निसंस्तूक्षणः स्या- देवं प्रोक्तं विदितगुणकैः कोविदैः क्षारवीर्य्यम्" ॥

इति हारीते प्रथमस्थाने ६ अध्याये ॥) धूर्त्तः । लवणम् । (यथा, रामायणे । २ । ७३ । ३ ।
"दुःखे मे दुःखमकरोद्राज्ये क्षारमिवाददात् ।
राजानं प्रेतभावस्थं ज्ञात्वा रामञ्च तापसम्" ॥)
काचः । भस्म । इति मेदिनी । गुड़ः इति हेमचन्द्रः ॥ टङ्कणः । (अस्य पर्य्याया यथा,—
"सौभाग्यं टङ्कणं क्षारो धातुद्रावकमुच्यते" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सर्জিক্ষারः । इति राजनिर्घण्टः ॥ *॥

क्षारविशेषगुणाः ।

"पलाशधवपूतीकक्षारपाटलादिजाः ।
क्षारास्तु पाचनाः सर्ब्वे रक्तपित्तकराः सराः ।
गुल्मार्शःकृमिमुष्णघ्नाः शूकरास्थारिनाशनाः" ॥
इति राजवल्लभः ॥ (क्षारसामान्यगुणा यथा,—
"क्षारः सर्ब्वत्र परमं तीक्ष्णोष्णः कृमिजिच्छुचिः ।
पित्तास्रगदूषणः पाकी श्लेष्महृद्धो विदारणः ।
अपथ्यः कटुनावत्वाच्चक्षुष्यः केशघ्नचक्षुषाम्" ॥
इति सूत्रस्थाने षष्ठेऽध्याये वामटेनोक्तम् ॥)

क्षारकः, पुं, (क्षरतीति । क्षर् + ण्वुल् ।) अचिरजातपलम् । तत्पर्य्यायः । जालकम् २ । इत्यमरः ॥ जालि इति भाषा । पच्चिमत्यादिपिटकम् । खाँचा इति भाषा । इति मेदिनी ॥ रजकः । इति शब्दमाला ॥ (स्वार्थे कन् । क्षारः । यथा, सुश्रुते ।
"तन्मात्रतो क्षारकसैन्धवायुतं
सदाञ्जनं स्यात्तिमिरेऽथ रागिणि" ॥)

क्षारतैलं, क्ली, (क्षारयुतं क्षाराख्यं वा तैलम् ।) पक्वतैलविशेषः । यथा,—
"मुष्ककमूलकमुण्डीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पा वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्चलं यवक्षारं सामुद्रं सैन्धवन्तथा ।
सुरसञ्चिञ्चि विड्ं मुस्तं मधु मुस्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः ।
पूरकादस्य तैलस्य क्षयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति ग्रन्थाङ्गुलतलेश्वर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्नामयापहम्" ॥
इति गरुड़े १९८ अध्यायः ॥

क्षारत्रयं, क्ली, (क्षाराणां त्रयम् ।) त्रिविधक्षारः । तद्यथा, राजनिर्घण्टे ।
"सर्জিকञ्च यवक्षारं टङ्कणक्षारमेव च ।
क्षारत्रयञ्च विज्ञेयं क्षारत्रितयमेव च" ॥
("सर्জিকा यावशूकञ्च क्षारद्वयमुदाहृतम् ।
टङ्कणेन यतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितन्तूल्लगुल्मादिश्लेष्मादृ गुल्महृत् परम्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्षारदला, स्त्री, (क्षारो दलेषु पत्रेषु अस्याः । क्षुद्रवास्तूकशाकविशेषः ।) चिल्ली । इति राजनिर्घण्टः ॥ (चिल्लीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

क्षारदशकं, क्ली, (दशविधाः क्षाराः अत्र । कप् क्षाराणां दशकमित्येके ।) दशविधक्षारः । यथा,—
"शिग्रुमूलकपलाशशुक्तिका-
चित्रकार्कसनिम्बसम्भवैः ।
इक्षुशैखरिकमोचिकोद्भवैः
क्षारपूर्ब्बदशकं प्रकीर्त्तितम्" ॥
इति राजनिर्घण्टः ॥

क्षारदुः, पुं, (क्षारप्रधानको द्रुमः ।) घण्टापाटलिवृक्षः । इति रत्नमाला ॥ (घण्टापाटलिशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञातव्याः ॥)

क्षारपत्रः, पुं, (क्षारः पत्रेषु यस्य ।) वास्तूकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ गुणाश्चास्य वास्तूकशब्दे ज्ञातव्याः ॥)

क्षारपत्रकः, पुं, (क्षारपत्र + स्वार्थे कन् कप् वा ।) वास्तूकः । इति हेमचन्द्रः ॥

क्षारभूमिः, पुं, (क्षारोत्पादनक्षमा भूमिः ।) लवणमृत्तिकादेशः । यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः ।
किमाश्चर्य्यं क्षारभूमौ प्राणदा यमदूतिका" ॥
इत्युद्भटः ॥ (क्षारस्य भूमिः स्थानम् ।) लवणभूम्यां स्त्री ॥

क्षारमध्यः, पुं, (क्षारो मध्येऽस्य ।) अपामार्गः । इति रत्नमाला ॥ (अपामार्गशब्दे ऽस्य गुणादयो व्याख्याताः ॥)

क्षारमृत्तिका, स्त्री, (क्षारयुक्ता मृत्तिका ।) लवणमृत्तिका । तत्पर्य्यायः । ऊषः २ । इत्यमरः ॥ उषः ३ । इति शब्दरत्नावली ॥

क्षारवृक्षः, पुं, (क्षारप्रधानो वृक्षः ।) मुष्ककः । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठं, क्ली, (क्षारेषु श्रेष्ठम् ।) यवक्षारम् । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठः, पुं, (क्षारःश्रेष्ठोऽत्र ।) पलाशः । मुष्ककः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्षारषट्कं, क्ली, (क्षाराणां षट्कम् ।) षड्विधक्षारः । यथा,—
"धारापामार्गकुटजजाङ्गलीतिलमुष्ककैः ।
क्षारैरेतैस्तु मिलितैः क्षारषट्कादयो गणाः" ॥
इति राजनिर्घण्टः ॥

क्षारसिन्धुः, पुं, (क्षारैर्युक्तः क्षारप्रधानः सिन्धुर्वा ।) लवणसमुद्रः । स तु जम्बुद्वीपस्य दक्षिणे शाकद्वीपस्य उत्तरे वर्त्तते । यथा,—
"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलञ्च कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षारसैलकः, पुं, (क्षाराणां सैलः संघः । ततः स्वार्थे कन् ।) सर्জ্জक्षारः । इति राजनिर्घण्टः ॥

क्षाराक्षं, क्ली, (क्षारेषु अक्षं निर्म्मलम् । समुद्रजातलवणस्य स्वच्छतया तथोक्तम् ।) सामुद्रलवणम् । इति हारावली ॥ (सामुद्रलवणशब्दे ऽस्य गुणादिकं ज्ञेयम् ॥)

क्षाराष्टकं, क्ली, (क्षाराणां अष्टकम् ।) अष्टप्रकारक्षारः । तद्यथा, —
"पलाशवह्निशिखरिचित्रकार्कतिलनालजाः ।
यवजः सर्জিका चेति क्षाराष्टकमुदाहृतम् ॥
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम्" ॥
इति भावप्रकाशः ॥

क्षारिका, स्त्री, (क्षर् + ण्वुल् + टाप् च । अत इत्वम् ।) क्षुधा । इति हारावली ॥

क्षारितः, त्रि, (क्षर् + णिच् + कर्म्मणि क्तः ।) अभिशुष्कः । अपवादयुक्तः । इत्यमरः ॥ (यथा, महाभारते २ । युधिष्ठिरनारदसंवादे । ५ । १०५ ।
"क्षत्रियार्थो विशुद्धात्मा क्षारितस्वैरकर्म्मणि ।
अदुष्टशास्त्रकुशलैर्न लोभाद्ध्यते शुचिः" ॥)
स्रावितः । क्षारः । इति मेदिनी ॥

क्षारोदः, पुं, (क्षारं उदकं यस्मिन् । क्षार उदके यस्य वा । उत्तरपदस्य चेयुदकस्य उदादेशः ।) लवणसमुद्रः । यथा, "क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्तजलधयः। सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकशेन यथानुपूर्व्वं सप्तापि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः"। इति श्रीभागवते ६ स्कन्धे १ अः॥

क्षालनं, क्ली, (क्षल् + णिच् + भावे ल्युट् ।) प्रक्षालनम् । धौतकरणं यथा,—
"स्त्रीशूद्रौ याग नित्याभ्यःक्षालनाच्च करौ ऽशयोः" ॥
इति ब्रह्मपुराणम् । इत्याह्निकाचारतत्त्वम् ॥
(यथा च, मार्कण्डेयपुराणे । १६ । १६ ।
"श्लेष्ममूत्रपुरीषास्रक्प्रवाहच्छालनेन च ।
रङ्गस्यैवोपचारेण प्रियसम्भाषणेन च" ॥)

क्षालितं, त्रि, (क्षल् + णिच् + क्तः ।) कृतप्रक्षालनम् । तत्पर्य्यायः निर्णिक्तम् २ शोधितम् ३ शुद्धम् ४ धौतम् ५ । इति हेमचन्द्रः ॥ (यथा, माघे । १० । १४ ।
"अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितम्रु श्रमितम्रु बधूना-
न्द्राविताम्रु हृदयम्मधुधारैः" ॥)

क्षि, क्षये ऐश्वर्य्ययोः । इति कविकल्पद्रुमः । (भां-परं-सकं, ऐश्वर्य्ये—अकं-अनिट् ।) क्षयति पापम् । इति दुर्गादासः ॥

क्षि, ग ग व हिंसायाम् । इति कविकल्पद्रुमः । (खां-श्वां च-परं-सकं-अनिट् ।) ग, क्षिणोति । ग, क्षिणाति । व, क्षिया । (यथा, श्रुतिः ५ ।
"धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्के

स्थिताः। अस्माकन्तु मनोरथोपरचितप्रासाद-वापीतटक्रीड़ाकाननकेलिमण्डपयुवामायुः परं क्षीयते"। इति कर्म्मकर्त्तरि साध्यम्। इति दुर्गादासः॥

क्षि, ग्र वासगत्योः। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकंच-अनिट्।) ग्र, क्षियति। इति दुर्गादासः॥

क्षि, क्षि, (क्षि+बाऽलकात् डिः।) निवासः। गतिः। क्षयः। इति मेदिनी॥

क्षिण, दु ञ वधे। इति कविकल्पद्रुमः॥ (तनां-उभ-सकं-सेट्-उदित्त्वात् क्त्वा वेट्।) द ञ, क्षिणोति क्षिणुते। उ, क्षिणित्वा क्षित्वा। इति दुर्गादासः॥

क्षितः, त्रि, (क्षि+कर्म्मणि क्तः।) हिंसितः। क्षितः कामो मया हिंसित इत्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षितिः, स्त्री, (क्षियति वसत्यस्याम्। क्षि+अधिकरणे क्तिन्।) अस्या अपरा व्युत्पत्तिर्यथा,—
"महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता।
काश्यपी कश्यपस्येयमचला स्थिररूपतः"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः॥
पृथिवी। (यथा, मनौ ४। २४१।
"मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति"॥)
वासः। क्षयः। इत्यमरः। ३। ३। ७०॥ कालभेदः। स तु प्रलयः। इति मेदिनी॥ रोचनानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥*॥

क्षितिकणः, पुं, (क्षितेः पृथिव्याः कणः।) धूलिः। इति त्रिकाण्डशेषः॥

क्षितिक्षमः, पुं, (क्षितिरिव क्षमते क्षितावित्र क्षमाकारणीभूता शक्तिरस्मिन् वा।) खदिरवृक्षः। इति राजनिर्घण्टः॥

क्षितिज, क्ली, (क्षिति+जन्+डः।) खगोले आकाशमध्यान्नवत्यंशान्तरे तिर्य्यग्वृत्तम्। यथा,—
"पर्व्वापरं विरचयेत् सममण्डलाख्यं
याम्योत्तरञ्च विदिशोर्व्वलयद्वयञ्च।
ऊर्द्धाध एवमिह वृत्तचतुष्कमेत-
दावेष्ठ्य तिर्य्यगपरं क्षितिजं तदर्द्धे"॥
इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः॥

क्षितिजः, पुं, (क्षितेर्जायते इति। जन्+डः।) भूनागः। इति राजनिर्घण्टः। मङ्गलग्रहः। यथा,—
"परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम्।
करोति सोमपुत्रस्तु क्षितिजान्तर्दशागतः"॥
इति ज्योतिस्तत्त्वम्॥ भूजाते त्रि॥

क्षितिजन्तुः, पुं, (क्षितौ क्षितेर्वा जन्तुरिव।) भूनागः। इति राजनिर्घण्टः॥

क्षितिधरः, पुं, (क्षितिं पृथ्वीं धरति धारयति वा। धृ धारि+वा अच् णिच्लुप्तश्चे पूर्ब्वह्रस्वः।) पर्व्वतः। इति हलायुधः॥ (यथा, कुमारे। ७। ६४।
"अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण"॥)

कूर्म्मवासुकिदिग्गजाश्च॥

क्षितिनागः, पुं, (क्षितिजातो नागः। मध्यपदलोपी समासः।) भूनागः। इति राजनिर्घण्टः॥

क्षितिनाथः, पुं, (क्षितेः पृथिव्याः नाथः सहायः भर्त्ता इत्यर्थः।) राजा। (क्षितिपतिदर्शनात्॥)

क्षितिपः, पुं, (क्षितिं पातीति। पा+डः।) राजा। यथा,—"अहंयुनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण"॥
इति भट्टौ। १। २०॥ (यथा च पञ्चतन्त्रे। २। २४।
"यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम्।
वित्तामावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्"॥)

क्षितिपतिः, पुं, (क्षितेः पतिः पालकः।) राजा। यथा,—
"मूर्खोऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरी धर्म्मशीलो दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः"। इति नवरत्ने। ६। (तथा च रघुः। ६। ८६।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतोवितानम्"॥)

क्षितिपालः, पुं, (क्षितिं पालयतीति। पालि+"कर्म्मण्यण्"। ३। २। १। इत्यण्।) राजा। यथा, प्रबोधचन्द्रोदयनाटके १ अङ्के।
"नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत् प्रथितैरमात्यैः।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्च्चितं भुवि पयोनिधिमेखलायाम्"॥
(तथा, रघुश्च। २। ५१।
"इतावदुक्ता विरते मृगेन्द्रे
प्रतिस्वनेनास्यगुहागतेन।
श्लिष्टोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव"॥)

क्षितिपालभाक्, [ज्] पुं, (क्षितिपालं भजते इति। भज्+क्विप्।) राजा। यथा, भट्टौ ३। २१।
"आसिञ्च नैकत्र शुचा शरंसीत्
क्षताक्षतेभ्यः क्षितिपालभाग्भ्यः।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागादुनिवासभूयम्"॥

क्षितिपुत्रः, पुं, (क्षितेः पृथिव्याः पुत्रः।) नरकराजः। (पुरा किल सिद्धेश्वरकपिलदेवकोपेन रसातलगतां भगवतीं क्षितिमुद्धर्त्तुं भगवान् विष्णुर्वराहरूपेणावतीर्णः सन् तत्र दुर्द्धान्तं दितिनन्दनं हिरण्याक्षं निपात्य रसातलात्तामुद्धृत्य तस्यामेव धरायां नरकनामानं पुत्रमुत्पादयामास। यथा,—
"स तीरे नदराजस्य लौहित्यस्य महात्मनः।
ब्रह्मार्च्चनं समारभ्य तपस्तप्तुमुपस्थितः॥
स मानुषेण मानेन क्षितिपुत्रः शतं सभाः।
जलाहारव्रतेनैव समानर्च पितामहम्॥
स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः।
प्रत्यक्षीभूय नरकस्याग्रतः समुपस्थितः"॥
इति कालिकापुराणे ३८ अध्यायः॥ अन्यत् नरकशब्दे द्रष्टव्यम्॥ (मङ्गलग्रहः। इति ज्योतिस्तत्त्वम्॥)

क्षितिबदरी, स्त्री, (क्षितौ स्थिता सत्ता वा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

क्षितिरुहः, पुं, (क्षितौ रोहतीति। रुह+कः। वृक्षः। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे १। १५। ६।
"सन्धानं वः करिष्यामि सह क्षितिरुहैरहम्"॥)

क्षितिवर्द्धनः, पुं, (क्षितिं वर्द्धयति। वृध्+णिच् ल्युः।) शूवः। इति त्रिकाण्डशेषः॥ भूमिवर्द्धके त्रि॥

क्षितिव्युदासः, पुं, (क्षितिं व्युदस्यति। वि+उत्+अस्+अण्।) गर्त्तः। भाँड़सी इति तद्भाषा। इति केचित्॥

क्षित्यदितिः, स्त्री, (क्षितौ अदितिः। देवमातुरदित्याः पृथिव्यां देवकीरूपेणाविर्भावात्तथात्वम्।) देवकी। इति त्रिकाण्डशेषः॥ (एतद्विवरणं यथा,—हरिवंशे ५५ अध्याये।
वैशम्पायन उवाच।
"नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः।
प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः॥
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद!।
तस्य सम्यक् प्रवृत्तस्य श्रूयतामुत्तरं वचः॥
विदिता देहिनो जाता मयैते भुवि दानवाः।
याश्च यस्तनुमास्थाय दैत्यः पुष्यति विग्रहम्॥
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि।
केशिनञ्चैव जानामि दैत्यं तुरगरूपिणम्॥
नागं कुवलयापीड़ं मल्लौ चानूरमुष्टिकौ।
अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणम्॥
विदितो मे खरश्चैव प्रलम्बश्च महासुरः।
सा च मे विदिता विप्र! पूतना दुहिता बलेः॥
कालियञ्चैव जानामि यमुनाह्रदगोचरम्।
वैनतेयभयाद् यस्तु यमुनाह्रदमाविशत्॥
विदितो मे जरासन्धः स्थितो मूर्ध्नि महीक्षिताम्।
प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये॥
मानुषे पार्थिवे लोके मानुषत्वमुपागतम्।
बाणञ्च शोणितपुरे गुहप्रतिमतेजसम्॥
दृप्तं बाऽसहस्रेण देवैरपि सुदुर्ज्जयम्।
मय्यासक्ताञ्च जानामि भारतीं महतीं धुरम्॥
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः।
क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया॥
तेषां पुरुषदेहानामपरावृत्तिवर्त्तिनाम्।
सम्यवेक्ष्याम्यहं योगमात्मनश्च परस्य च॥
सम्प्राप्य मानुषं लोकं मानुषत्वमुपागतः।
कंसादींस्तांस्च सर्व्वांश्च वधिष्यामि महासुरान्॥
तेन तेन विधानेन येन यः शान्तिमेष्यति।
अनुप्रविश्य योगेन तांस्तान् हि गतयो मया॥
अमीषां हि सुरेन्द्राणां हन्तव्या रिपवो युधि।
जगत्यर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः॥
सुरदेवर्षिगन्धर्व्वैरितश्चानुमते मम।
विनिश्चयो हि प्रागेव नारदाय कृतो मया॥
निवासं तत्र मे ब्रह्मा विदधातु पितामहः॥
यत्र देशे यथा जातो येन वेषेण वा वसन्॥
तानहं समरे हन्यां तन्मे ब्रूहि पितामह!॥
ब्रह्मोवाच।
नारायणेमं सिद्धार्थमुपायं शृणु मे विभो!।
भुवि यस्ते जनयिता जननी च भविष्यति॥

क्षिप

यच्च त्वं च महाबाहो जातः कुलकरो भुवि।
यादवानां महद्वंशमखिलं धारयिष्यसि॥
तांश्चासुरान् समुत्पाद्य वंशं ज्ञात्वात्मनो महत्।
स्थापयिष्यसि मर्य्यादां नृणां तन्मे निशामय॥
पुरा हि कश्यपो विप्रो! वरुणस्य महात्मनः।
जहार यज्ञिया गा वै पयोदाश्च महामखे॥
अदितिः सुरभिश्चैव द्वे भार्य्ये कश्यपस्य तु।
प्रदीयमाना गास्ताभ्यां नेच्छेतां वरुणस्य च॥
ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा नतः॥
उवाच भगवन्! गावो गुरुणा मे हृता इति॥
हृतकार्य्यो हि गास्तात! नानुजानाति मे गुरुः।
अन्ववर्त्तत भार्य्ये द्वे अदितिं सुरभिन्तथा॥
मम ता ह्यक्षया गावो दिव्याः कामदुघाः प्रभो!।
चरन्ति सागरान् सर्व्वान् रक्षिताः स्वेन तेजसा॥
कस्ता धर्षयितुं शक्तो मम गाः कश्यपादृते।
अक्षयं याः क्षरन्त्यग्र्यं पयो देवामृतोपमम्॥
प्रभुर्व्वा द्युतितो ब्रह्मन् गुरुर्व्वा यदि वेतरः।
त्वया नियम्याः सर्व्वे वै त्वं हि नः परमा गतिः॥
यदि प्रभवतां दण्डो लोके कार्य्यमजानताम्।
न विद्यते लोकगुरो! नासते लोकसेतवः॥
यथा वास्तु तथा वास्तु कर्त्तव्यो भगवान् प्रभुः।
मम गावः प्रदीयन्तां ततो गन्तासि सागरम्॥
आत्मा मम हि ता गावो या गावः सत्त्वमव्ययम्।
लोकानां त्वत्प्रसूतानामेकं गोब्राह्मणं स्मृतम्॥
त्रातव्याः प्रथमं गावस्त्रातास्त्रायन्ति या द्विजान्।
गोब्राह्मणपरित्राणात् परित्रातं जगत् भवेत्॥
इत्यभ्युपतिना प्रोक्तो वरुणेनाहमच्युत!।
गवां कारणतत्त्वज्ञः कश्यपे शापमुत्सृजम्॥
येनांशेन हृता गावः कश्यपेन महात्मना।
स तेनांशेन तु महीं गत्वा गोपत्वमेष्यति॥
या च सा सुरभिर्नाम अदितिश्च सुरारणी।
ते पुत्रे तस्य भार्य्ये वै तेनैव सह यास्यतः।
स ताभ्यां सह गोपत्वे कश्यपो भुवि रंस्यते॥
तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले॥
गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः।
तत्रासौ गोष्वभिरतः कंसस्य करदायकः॥
तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा।
देवकी रोहिणी चैव वसुदेवस्य धीमतः॥
तत्रावतर लोकानां भवाय मधुसूदन!।
जयाशीर्व्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः॥
आत्मानमात्मना हि त्वमवतार्य्य महीतले।
देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय"॥)

क्षित्वा, [न्] पुं, (क्षि निवासगत्योः+"शीङ् क्रुशिरुहिजिक्षिरुधभ्यः क्वनिप्"। उणां ४।११३। इति क्वनिप् तुक् च।) वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

क्षिदः, पुं, (क्षिद्+रक्।) रोगः। सूर्य्यः। विषाणम्। इति संक्षिप्तसारोणादिवृत्तिः॥

क्षिप, य औ नुदि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) य, क्षिप्यति। औ, क्षेप्ता। इति दुर्गादासः॥

क्षिप, प्र ञ औ नुदि। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) नुदि प्रेरणे। प्र ञ, क्षिपति क्षिपते शरं योधः। औ, क्षेप्ता। इति दुर्गादासः॥

क्षिपः, पुं, (क्षिप्+"इगुपधज्ञाप्रीकिरः कः"। ३। १।१३५। इति कः।) क्षेप्ता। क्षेपणम्। इति व्याकरणम्॥

क्षिपकः, पुं, (क्षिप्+कः ततः संज्ञायां कन्।) योद्धा। इत्युणादिकोषः॥

क्षिपका, स्त्री, (क्षिप्+कन्+टाप् अतो नेत्वम्। "न यासयोः"। ७।३।४५। इत्यस्य वार्त्तिके "क्षिपकादीनाञ्च न"। इति कथनात्।) क्षेपणम्। इति व्याकरणम्॥

क्षिपणं, क्ली,(क्षिप्+ल्युट् भावे किच्च।) क्षेपणम्। तत्पर्य्यायः। क्षिपा २। इति जटाधरः॥

क्षिपणिः, पुं, (क्षिप्यते इति। क्षिप्+कर्म्मणि अनिः।) अस्त्रम्। इत्युणादिकोषः॥

क्षिपणिः, स्त्री, (क्षिप्यते असौ अनया वा। क्षिप्+कर्म्मणि करणे वा अनिः।) क्षेपणी। नौकादण्डः। इत्यमरटीकायां भरतः॥ जालविशेषः। मन्तः। अध्वर्य्युः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४।४१।४।
"उतस्य वाजी क्षिपणिं तुरण्यति
ग्रीवायां बद्धो अपिकक्ष आसनि"॥)

क्षिपणी, स्त्री, (क्षिप्+अनिः ङीष्।) क्षिपणिः। इत्यमरटीकायां भरतः॥

क्षिपणुः, पुं, (क्षिप्यति इति। क्षिप्+"अनुङ् नदेश्च"। उणां ३।५२। इति अनुङ्।) वायुः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। ४।५८।६।
"सम्यक् स्रवन्ति सरितो न धेना
अन्तर्हृदा मनसा पूयमानाः।
एते अर्षन्त्यूर्म्मयो घृतस्य
मृगा इव क्षिपणोरीषमाणाः"॥)

क्षिपण्युः, पुं, (क्षिप्+"कन्युच् क्षिपेश्च"। उणां ३।५१। इति कन्युच् प्रत्ययः।) वसन्तकालः। इत्युणादिकोषः॥ देहः। सुरभौ त्रि। इति मेदिनी॥

क्षिपा, स्त्री, (क्षिप्+"घिद्विदादिभ्योऽङ्"। ३।३।१०४। इत्यङ्। ततष्टाप्।) क्षेपणम्। इत्यमरः। ३।२।११॥ रात्रिः। इति तट्टीकायां भरतः॥

क्षिप्तः, त्रि, (क्षिप्+कर्म्मणि क्तः।) निक्षेपकृतवान्। त्यक्तः। तत्पर्य्यायः। उत्तः २ नुन्नः ३ अस्तः ४ निर्णुतः ५ विद्धः ६ ईरितः ७। इत्यमरः। ३। १। ८७॥
(उद्गीर्णः। यथा, माघे। ३। ७१।
"क्षिप्ता इवेन्दोः स रुचोधिवेलं
मुक्तावलीराकलयाञ्चकार"॥
कर्त्तरि क्तः। पतितः। यथा, माघे १०। ७७।
"क्षिप्तमायतमदर्शयदुर्व्वी
काश्चिदाभजघनस्य महत्वम्"॥
"रतेषु उर्व्यां क्षिप्तं पतितम्"। इति मल्लिनाथः॥ हतः। यथा, माघे २। ५३।
"केशरी निहतरक्षिप्तमृगयूथो मृगाधिपः"॥
अवज्ञातः। यथा, भागवते। २। १८। ४८।
"तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि"॥
विक्षिप्तः। यथा, मार्कण्डेये। ८८। १९।
"नारसिंही तनुस्तस्य विभ्रती सटमुग्रं वपुः।
प्राणा तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः"॥)
वायुग्रस्तः। क्षेपा इति भाषा। इति लोकप्रसिद्धः॥

क्षिप्रा, स्त्री, (क्षिप्र+टाप्।) रात्रिः। इति हेमायुधः॥

क्षिप्रुः, त्रि, (क्षिप्+"वसगटिधटिक्षिपेः क्रुः"। ३। २। १४०। इति क्रुप्रत्ययः।) निराकरिष्णुः। निराकरणशीलः। इत्यमरः। ३। १। ३०॥

क्षिप्रं, क्ली, (क्षिप्+"क्षायितञ्यञ्यतीति"। उणां २। १३। इति रक्।) शीघ्रम्। तद्युक्ते त्रि। इत्यमरः। १। २। ६८॥ (यथा, मनुः। ३। १७६। "विनाग्निं व्रजति क्षिप्रमामपात्रमिवाम्भसि"॥ मर्म्मविशेषः। यथा,—"तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणम्"॥ इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये॥)

क्षिप्रपाकी, [न्] पुं, (क्षिप्रं पच्यतेऽनेन। क्षिप्रं पचति पाचयति वा। पच्+वाऽलकात् घिनुण्।) गर्दभाण्डवृक्षः। इति रत्नमाला॥ (ज्ञातव्या गर्दभाण्डशब्दे ऽस्य गुणपर्य्यायाः॥) शीघ्रपाकविशिष्टे त्रि॥

क्षिया, स्त्री, (क्षि क्षये+"घिद्विदादिभ्यो ऽङ्"। ३। ३। १०४। इत्यङ्। टाप् च।) अपचयः। इत्यमरः। ३। २। ७॥

क्षिव, उ निरासे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट् उदित्वात् क्त्वावेट्।) क्ष्वेडी। निरास इह फुत्कारः इति भट्टमल्लः। मुखेन क्ष्वेडादेर्वमनमिति केचित्। एषक् पाठात् पूर्व्वौ भ्वादिः। क्ष्वेवति। उ, क्ष्वेवित्वा क्ष्वूत्वा। इति दुर्गादासः॥

क्षिव, य उ निरासे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्) क्ष्वेडी। य, क्ष्वीव्यति। उ, क्ष्वेवित्वा क्ष्वूत्वा। इति दुर्गादासः॥

क्षी, ञ हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-अनिट्।) ञ, क्षयति क्षयते। इति दुर्गादासः॥

क्षीज, ह्रिक्काने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दीर्घौ। ह्रिक्कानमव्यक्तशब्दः। सखेदस्वेवाव्यक्तशब्दे क्षीजेः प्रयोगः। इति रक्षितः। क्षीजति सखेदो जनः। इति दुर्गादासः॥

क्षीजनं, क्ली, (क्षीज्+भावे ल्युट्।) कीचकानां नादः। इति हेमचन्द्रः॥

क्षीजः, त्रि, (क्षि+क्तः। "निष्ठायामण्यदर्थे"। ६। ४। ६०। इति दीर्घः। "क्षियोदीर्घात्"। ८। २। ४६। इति निष्ठातस्य नः।) क्षयः। अबलः। तत्पर्य्यायः। दुर्ब्बलः २ क्षुण्णः ३ क्षामः ४ तनुः ५ क्षातः ६ तलिनः ७ अमांसः ८ पेलवः ९। इति हेमचन्द्रः॥ (यथा, गीतायाम् ९। २१।

"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति" ॥
राजयक्ष्मान्तर्गतरोगविशेषे, पुं ।
"क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः" ॥
अस्य चिकित्सा यथा,—
"क्षामः क्षीणः क्षतोरस्कक्षतनिद्रः सबलेऽनले ।
घृतक्षीररसेनाद्यात् सक्षौद्रघृतशर्करम् ॥
शर्कराद्य यवक्षौद्रजीवकर्षभकौ मधु ।
घृतक्षीरानुपानं वा लिह्यात् क्षीणः क्षतः क्षयः ॥
क्रव्यादमांसनिर्यूहं घृतभृष्टं पिबेच्च सः" ॥
"क्षामक्षीणक्षयाक्षाणां एतान्येव घृतानि च ।
त्वक्क्षीरीशर्करालाजचूर्णैः पानानि योजयेत् ।
सर्पिर्गुड़ान् समध्वंशान् जग्ध्वा दद्यात्पयोऽनु च ॥
रेतो वीर्यं बलं पुष्टिं तैरानुतरमाप्नुयात्" ॥
"पलाशं सर्पिषा भृष्टं विदारीक्षुरसे घृतम् ।
स्त्रीषु क्षीणः पिबेद्यूषं जीवनं हृद्यं परम् ॥
जीवनीयोपसिद्धं वा घृतभृष्टन्तु जाङ्गलम् ।
रसं प्रयोजयेत् क्षीणो व्यञ्जनार्थे सशर्करम्" ॥
"यद्यत् सन्तर्पणं प्रोक्तमविदाहि हितं लघु ।
अन्नपानं निषेव्यन्तत् क्षतक्षीणैः सुखार्थिभिः" ॥
इति चिकित्साख्याने घोड़शेऽध्याये चरकेणोक्तम्॥)
क्षीणवान्, [त्] त्रि, (क्षि + क्तवतु "क्षियोदीर्घात् । ८ । २ । ४६ । इति निष्ठातस्य नः ।) क्षयविशिष्टः । इति व्याकरणम् ॥
क्षीणाष्टकर्म्मा, [न्] पुं, (क्षीणानि अष्टकर्म्माणि अस्य ।) जिनः । इति हेमचन्द्रः ॥
क्षीव, (व) ऋ ङ मदे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) मदे मत्तीभावे । ऋ, अचिक्षीवत् । ङ, क्षीवते मद्यपः ! इति दुर्गादासः ॥
क्षीवः, त्रि, (क्षिव + "अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः" । ८ । २ । ५५ । इति तलोपे साधुः ।) मत्तः । इत्यमरः ॥ (यथा, रामायणे । ५ । १० । १३ ।
"अथारोहणमासाद्य वेदिकान्तरमाश्रितः ।
क्षीवं राक्षसशार्दूलं प्रेक्षते स महाकपिः" ॥)
क्षीरं, क्ली, (क्षरते अद्यते इति । "क्षरे किच्च" । उणां ४ । ३४ । इति ईरन् उपधालोपे कत्वं धत्वञ्च ।) जलम् । यथा, ऋग्वेदे । १ । १०४ । ३ ।
"अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् । क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे गिरायाः" । दुग्धम् । इत्यमरः । २ । ९ । ५१ ॥ (यथा, मनुः । ५ । ९ ।
"स्त्रीक्षीरञ्चैव वर्জ্যानि सर्व्वमुक्तानि चैव हि" ॥)
"आसप्तरात्रं प्रसवात् क्षीरं पेयूषमुच्यते ।
परतो मोरटं विद्यादप्रसन्नं कफात्मकम्" ॥
इति रत्नमाला ॥
(क्षीरस्य लक्षणं गुणाश्च यथा,—
"अथातः संप्रवक्ष्यामि क्षीरवर्गन्तु वत्सक ! ।
दधिसर्पिर्वसातक्रं तेषां सर्व्वगुणागुणम् ॥
यद्यदाहारजातन्तु रसं क्षीरग्विरानुगम् ।
सरं जलञ्च भुक्तञ्च तथा पित्तेन संयुतम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम् ।
पच्यमानं शिरापाप्तं क्षीरं तद्विद्धि पुत्रक ! ॥
तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः ।
अमृतं सर्व्वभूतानां जीवनं बलवर्द्धनम् ॥
हारीतः संशयापन्नः पप्रच्छ पितरं पुनः ।
कथं रसस्य सम्पत्तिः कथं सञ्जीयते विभो ! ॥
कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते ।
कथं तच्च कुमारीणां बन्ध्यानां न कथं भवेत् ॥
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः ।
शृतिहर्षप्रदं पुत्र ! परिपृष्टं भिषग्वर ! ॥
सिताखिग्धं तथारक्तं पित्तेन पाकतां गतम् ।
रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् ॥
अपधातुबलं यस्मात् तस्मात् क्षीरं न जायते ।
बन्ध्यानां क्षीरनाशस्तु वातेन परिपूरिताः ॥
क्षीरञ्च न भवेत्तस्माच्चार्त्तवं चाधिकं यतः ।
प्रसूतासु च नारीषु बलेन सह सूयते ॥
तेन स्रोतोविशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते ।
तस्मात् सद्यः प्रसूतायां जायते श्लैष्मिकं पयः ॥
तेन काठिन्यमायाति तस्माच्चत् परिवर्জयेत् ।
श्रेयस्कामिक्षतं नार्य्या बलक्षयोषनाशनम् ॥
पयस्विदोषशमनं दृष्यञ्चाग्निप्रवर्द्धनम्" ॥
अथ प्राभातिकक्षीरगुणाः ।
"निशा शीतांशुसंशीतं निद्रालस्याश्रमावहम् ।
कफलत्सघनं शीतं क्षीरं प्राभातिकं भवेत्" ॥
अथ दिनक्षीरगुणाः ।
"वासरे सूर्य्यसन्तापात् सदोष्णं कफवातजित् ।
हितं तत्पित्तशमनं सुशीतं भोजने निशि" ॥
अथ क्षीरपानविधिः ।
"क्षीणानां दुर्ब्बलानाञ्च तथाजीर्णज्वरार्दिते ।
दीप्ताग्नीनामतन्द्राणां श्रमशोषविकारिणाम् ॥
राजयक्ष्मयुतानाञ्च क्षीरपानं विधीयते ॥
न शृतं लवणैर्युक्तं क्षीरञ्चाम्लेन वा पुनः ।
करोति कुष्ठं त्वग्दोषं तस्मात्तैव हितं मतम्" ॥
इति प्रथमे स्थाने ऽष्टमे ऽध्याये हारीतेनोक्तम् ॥
"अथ क्षीराणि वक्ष्यन्ते कर्म्म चैषां गुणाश्च ये ॥
अविक्षीरमजाक्षीरं गोक्षीरं माहिषञ्च यत् ।
उष्ट्रीणामथ नागीनां वड़वायाः स्त्रियास्तथा ॥
प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो मतम् ।
प्रीणनं हृंहणं हृद्यं मेध्यं बल्यं मनस्करम् ॥
जीवनीयं श्रमहरं श्वासकासनिबर्हणम् ।
हन्ति शोणितपित्तञ्च सन्धानं विहतस्य च ॥
सर्व्वप्राणभृतां साम्यं श्रमनं शोधनन्तथा ।
हृद्यान्नं दीपनीयञ्च श्रेष्ठं क्षीणक्षतेषु च ॥
पाण्डुरोगेऽस्रपित्ते च शोथे गुल्मे तथोदरे ।
अतीसारे ज्वरे दाहे क्षयथौ च विधीयते ॥
योनिशुक्रप्रदोषे च मूत्रेषु प्रदरेषु च ।
पुरीषे ग्रथिते पथ्यं वातपित्तविकारिणाम् ॥
नस्याक्तेपावगाहेषु वमनास्थापनेषु च ।
विरेचने स्नेहने च पयः सर्व्वत्र युज्यते" ॥
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
प्राणिभेदेनास्य गुणविशेषा यथा,—
"स्वादु शीतं मृदु स्निग्धं बहलं श्लक्ष्णपिच्छिलम् ।
गुरु मन्दं प्रसन्नञ्च गव्यं दशगुणं पयः ॥
तदेव गुणमेवौजः सामान्यादभिवर्द्धयेत् ।
प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥
महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहानूनमनिन्द्याय हितमत्यग्नये च तत् ॥
रूक्षोष्णं क्षीरमुष्ट्रीणामीषत्सलवणं लघु ।
शूलं वातकफानाह क्रिमिशोफोदरार्शसाम् ॥
बल्यं स्थैर्य्यकरं सर्व्वमुष्णक्षैकशफं पयः ।
साम्लं सलवणं रूक्षं शाखावातहरं लघु ॥
छागं कषायमधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकाशज्वरापहम् ॥
हिक्काश्वासकरन्तूष्णं पित्तश्लेष्मलमाविकम् ।
हस्तिनीनां पयो बल्यं गुरु स्थैर्य्यकरं परम् ॥
जीवनं हृंहणं साङ्ग्यं स्नेहनं मानुषं पयः ।
लावणं रक्तपित्ते च तर्पणत्वाच्छिशूलिनाम्" ॥
इति च तत्र सूत्रस्थाने २७ अध्याये ॥
"सर्व्वप्राणभृतां तस्मात् साम्यं क्षीरमिहोच्यते" ॥
तच्च सर्व्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात् । वातपित्तश्लेष्मशोणितमांसविकारेष्वविरुद्धम् । जीर्णज्वर-कास-श्वास-श्लेष्म-क्षय-गुल्मोन्मादोदर-मूर्च्छा-भ्रम-मद-दाह-पिपासा-हृद्रोग-पाण्डुरोग-ग्रहणीदोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोग-गर्भस्राव-रक्तपित्तश्रमक्लमहरं पाप्मापहम् बल्यं हृद्यं वाजीकरणं रसायनं मेध्यं सन्धानं स्थापनं वयःस्थापनमायुष्यं जीवनं हृंहणं वमनं विरेचनञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धक्षतक्षीणानां क्षुधावयव्यायामकर्शितानाञ्च पथ्यतमम् ।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
रक्तपित्तहरं शीतं मधुरं रसपाकयोः ॥
जीवनीयं यथावातपित्तघ्नं परमं स्मृतम् ।
गव्यतुल्यगुणत्वाच्च विशेषाच्छोषिणां हितम् ॥
दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् ।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ॥
नात्यम्बुपानाद्व्यायामात् सर्व्वव्याधिहरं पयः ।
रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु ॥
शोषगुल्मोदरार्शोघ्नं क्रिमिकुष्ठविषापहम् ।
आविकं मधुरं स्निग्धं गुरु पित्तकफावहम् ॥
पथ्यं केवलवातेषु कासे चानिलसम्भवे ।
महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम् ॥
निद्राकरं शीतकरं गव्यात्स्निग्धतरं गुरु ।
उष्णक्षैकशफं बल्यं शाखावातहरं पयः ॥
मधुराम्लरसं रूक्षं लवणानुरसं लघु ।
नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् ॥
नस्याक्षितनयोः पथ्यं जीवनं लघु दीपनम् ।
हस्तिन्या मधुरं हृद्यं कषायानुरसं गुरु ॥
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम् ।
प्रायः प्राभातिकं क्षीरं गुरु विद्यात् शीतलम् ॥
रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा ।
दिवाकराभितप्तानां व्यायामानिलसेवनात् ॥
वातानुलोमिश्रान्तिघ्नं चक्षुष्यञ्चापराह्णिकम् ।
पयोऽभिष्यन्दिगुर्व्वाम प्रायशः परिकीर्त्तितम् ॥
तदेवोक्तं लघुतरमभिष्यन्दि वैशसम् ।

वर्ज्जयित्वा स्त्रियः स्तन्यमाममेव हि तद्धितम् ॥
धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा ।
तदवातिगृहीतं सर्व्वं गुरु दंहणमुच्यते ॥
अनिष्टगन्धमस्वच्छं विवर्णं विरसञ्च यत् ।
वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥
इति क्षीरवर्गः ॥
इति सूत्रस्थाने पञ्चचत्वारिंशत्तमे ऽध्याये सुश्रुतेनोक्तम् ॥ * ॥)

दुग्धधारास्नानफलम् । यथा, वराहपुराणे ।
"धेनुस्तनादिनिष्क्रान्तां धारां क्षीरस्य यो नरः ।
शिरसा प्रति गृह्णाति स पापेभ्यः प्रमुच्यते" ॥
क्षीरेण विष्णोः स्नाने फलम् । यथा,—
"येषु क्षीरवहा नद्यो ह्रदाः पायसकर्दमाः ।
तान् लोकान् पुरुषा यान्ति क्षीरस्नापनका हरेः ॥
आह्लादं निर्वृतिं स्वास्थ्यं आरोग्यं चानुरूपताम् ।
सप्तजन्मसवाप्नोति क्षीरस्नानपरो हरेः ॥
दध्यादीनां विकाराणां क्षीरतः सम्भवो यथा ।
तथैवाग्नेयकामानां क्षीरस्नपनमुत्तमम् ॥
यथा च विमलं क्षीरं यथा निर्वृतिकारकम् ।
तथास्य विमलं ज्ञानं भविष्यति फलप्रदम् ॥
ग्रहानुकूलतां पुष्टिं प्रियत्वञ्चाखिले जने ।
करोति भगवान् विष्णुः क्षीरस्नपनतोषितः ॥
सर्व्वोऽस्य खिन्नतामेति दृष्टमात्रे प्रसीदति ।
गृहतक्षीरेण देवेशे स्नापिते मधुसूदने" ॥
इत्याद्ये वह्निपुराणे क्रियायोगनामाध्यायः ॥ * ॥

क्षीरपाकविधिर्यथा,—
"क्षीरमष्टगुणं दद्यात् क्षीराल्पीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं सूक्ष्ममामोद्भवं जयेत्" ॥
इति भावप्रकाशः ॥ सरलद्रवः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ५२ । ६६ ।
"जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय ।
तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत्" ॥)

क्षीरकः, पुं, (क्षीरमिव कायति प्रकाशते । कै + कः ।) क्षीरमोरटलता । इति रत्नमाला ॥

क्षीरकञ्चुकी, स्त्री, (क्षीरं क्षीरप्रधानं कञ्चुकं आवरणं तदिव त्वगस्याः ।) क्षीरीवृक्षः । इति रत्नमाला ॥

क्षीरकण्ठः, पुं, (क्षीरं कण्ठेऽस्य ।) बालकः । यथा,—
"बालः पाकः शिशुर्डिम्भः पोतः शावः स्तनन्धयः ।
पृथुकोऽर्भोत्तानशयः क्षीरकण्ठः कुमारकः" ॥
इति हेमचन्द्रः ॥

क्षीरकण्टकः, पुं, (क्षीरकण्ट + स्वार्थे कन् ।) शिग्रुः । इति चिकित्साशब्देषः ॥

क्षीरकन्दः, पुं, (क्षीरं कन्दे यस्य । क्षीरः क्षीरप्रधानः कन्दोऽस्य वा ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

क्षीरकन्दा, स्त्री, (क्षीरकन्द + टाप् ।) क्षीरवल्ली । काल भूमि कुष्माण्ड इति ख्यातः । यथा,—
"क्षीरवल्ली क्षीरकन्दा महाश्वेतर्क्षगन्धिका" ॥
इति जटाधरः ॥

क्षीरकाकोलिका, स्त्री, (क्षीरवत् शुभ्रा काकोली । ततः स्वार्थे संज्ञायां खल्पार्थे वा कन् टाप् पूर्व्वह्रस्वश्च ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥

क्षीरकाकोली, स्त्री, (क्षीरमिव शुभ्रा काकोली ।) अष्टवर्गे प्रसिद्धौषधिविशेषः । तत्पर्य्यायः । महावीरा २ सुकोली ३ पयस्विनी ४ । इति रत्नमाला ॥ क्षीरशुक्ला ५ पयस्या ६ क्षीरविषाणिका ७ जीववल्ली ८ जीवशुक्ला ९ । यथा, राजनिर्घण्टे ।
"रसवीर्य्यविपाकेषु काकोल्याः सदृशी च सा" ॥
अथ काकोल्योरुत्पत्तिलक्षणनामगुणाः ।
"जायते क्षीरकाकोली महामेदोद्भवस्थले ।
यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते ॥
पीवरी सदृशः कन्दः सक्षीरः प्रियगन्धवान् ।
सा प्रोक्ता क्षीरकाकोली काकोली लिङ्गमुच्यते ॥
यथा स्यात्क्षीरकाकोली काकोल्यपि तथा भवेत् ।
एषा किञ्चित् भवेत् कृष्णा भेदोऽयमुभयोरपि ।
काकोली वायसोली च वीरा कायस्थिका तथा ।
सा शुक्ला क्षीरकाकोली वयस्था क्षीरवल्लिका ॥
कथिता क्षीरिणी धीरा शुक्लक्षीरा पयस्विनी ।
काकोलीयुगलं शीतं शुक्लं मधुरं गुरु ।
दंहणं वातदाहाश्रपित्तश्लेष्मज्वरापहम्" ॥
काकोली क्षीरकाकोलीस्थाने अश्वगन्धामूलम् । इति भावप्रकाशः ॥ (शुक्रजननान्तर्गतौषधविशेषः । यथा । "जीवकर्षभककाकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी मेदा वृद्धिदा जटिला कुलिङ्गा इति दशेमानि शुक्रजननानि भवन्ति ॥ इति चरके सूत्रस्थाने ४ अध्याये ॥)

क्षीरकाण्डकः, पुं, (क्षीरयुक्तं काण्डं यस्य । ततः कप् ।) खड्गी । अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकाष्ठा, स्त्री, (क्षीरमयं क्षीरप्रधानं वा काष्ठं यस्याः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकीटः, पुं, (क्षीरजातः कीटः क्षीरस्य कीटो वा ।) दुग्धजातकीटः । तत्पर्य्यायः । कालिका २ । इति हारावली ॥

क्षीरज, क्ली, (क्षीराज्जायते । जन् + डः ।) दधि । इति राजनिर्घण्टो हेमचन्द्रश्च ॥ क्षीरजातद्रव्ये त्रि ॥ (दधिशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

क्षीरदलः, पुं, (क्षीरयुक्तं दलं यस्य क्षीरं दले यस्य वा ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरद्रुमः, पुं, (क्षीरप्रधानो द्रुमः ।) अश्वत्थः । इति राजनिर्घण्टः ॥

क्षीरधेनुः, स्त्री, (क्षीरेण निर्म्मिता धेनुः ।) दानार्थक्षीरनिर्म्मितधेनुः । यथा,—
होतोवाच ।
"क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ! ।
अनुलिप्ते महीपृष्ठे गोमयेन नृपोत्तम ! ॥
गोचर्म्ममात्रमानेन कुशानास्तीर्य्य सर्व्वतः ।
तत्रोपरि महाराज ! न्यसेत् कृष्णाजिनं बुधः ॥
तत्रोपरि कुशस्त्रिकां गोमयेन कृतामपि ।
क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥
सुवर्णमुखपृष्ठाङ्गि चन्दनागुरुकाणि च ।
प्रक्षिप्तपत्रश्रवणं तिलपात्रोपरि न्यसेत् ॥
मुखं गुडमयं तस्या जिह्वा शर्करया तथा ।
फलप्रक्षिप्तदशनां मुक्ताफलमयेक्षणाम् ॥
इक्षुपादां दर्भरोमां सितकम्बलकम्बलाम् ।
ताम्रपृष्ठीं कांस्यदोहां षट्सूत्रमयीं तथा ॥
पुच्छञ्च नृपशार्दूल ! नवनीतमयस्तनीम् ।
स्वर्णशृङ्गां रौप्यखुरां पद्मरत्नसमन्विताम् ॥
चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि स्थापयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्च्चयेत् ॥
धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
आच्छाद्यालङ्कृतां कृत्वा मुद्रिकाकर्णकुण्डलैः ।
षट्कोपानद्द्वयं छत्रं दत्त्वा दानं समर्पयेत् ॥
अनेनैव तु मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
या धेनुः सर्व्वभूतानामित्यादि नरपुङ्गव ! ।
आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
यो गृह्णाति पठेन्मन्त्रं ग्राहको राजसत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
एतां हेमसहस्रेण शतेनाथ स्वशक्तितः ।
शतार्द्धमथवाप्यर्द्धं तथार्द्धञ्च यथेच्छया ॥
दत्त्वा धेनुं महाराज ! शृणु तस्यापि यत् फलम् ।
षष्टिवर्षसहस्रन्तु रुद्रलोके महीयते ॥
पितृपितामहैः सार्द्धं ब्रह्मणो भवनं व्रजेत् ।
दिव्यं विमानमारूढो दिव्यस्रगनुलेपनः ॥
क्रीड़ित्वा सुचिरं कालं विष्णुलोकं स गच्छति ।
द्वादशादित्यसङ्काशे विमाने वरमण्डिते ॥
गीतवादित्रनिर्घोषैरप्सरोगणसेविते ।
तत्रोष्य विष्णोः सौराज्यं विष्णासायुज्यतां व्रजेत् ॥
य इदं श्रावयेद्राजन् पठेद्वा भक्तिभावितः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति" ॥
इति वाराहे श्वेतोपाख्याने क्षीरधेनुमाहात्म्यनामाध्यायः ॥

क्षीरनाशः, पुं, (क्षीरं नाशयतीति । नश् + णिच् "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् ।) शाखोटवृक्षः । इति राजनिर्घण्टः ॥ (क्षीरस्य नाशः इति दुग्धत्वयञ्च ॥)

क्षीरनीर, क्ली, (क्षीरमिश्रं नीरमिव एकीभूतप्रायत्वात् तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ (क्षीरञ्च नीरञ्च द्वयोः समाहारः ।) दुग्धजलञ्च ॥
(यथा, वेतालपञ्चविंशतौ । १२ । १८ ।
"क्षीरनीरसमं मित्रं प्रशंसन्ति विचक्षणाः ।
नीरं क्षीरायते तत्र वह्नौ तप्यति तत्पयः" ॥)

क्षीरपर्णी, [न्] पुं, (क्षीरयुक्तं पर्णं अस्यास्तीति । इनिः ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥
(विस्तरोऽस्यार्कशब्दे बोद्धव्यः ॥)

क्षीरपाणं,) क्ली, (पीयते इति । पा + भावे ल्युट
क्षीरपानं,) क्षीरस्य पानम् । "वा भावकरणयोः" । ८ । ४ । १० । षात्त्विको णत्वम् ।) दुग्धपानम् । दुग्धपानयुक्तदेशे तत्कर्त्तरि च त्रि । यथा । देशे पानस्य । पूर्व्वपदस्थितषकारेफऋवर्णेभ्यः परस्य पानस्य नस्य णः स्यात् देशे वाच्ये । पीयते यत्तत् पानं कर्म्मण्यनट् । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सौवीरपाणा वाह्लीकाः । कषायपाणा गान्धाराः । उशीनरादि-

शब्दानां देशवादिचत्वेऽपि तन्निवाससम्बन्धेन मनुष्येषु प्रवृत्तिः। अथवा क्षीरं पानं यत्र इति व्युत्पत्त्या देशो वाच्यः। भावकरणयोरनटो वा। क्षीरपाणं क्षीरपानम्। क्षीरं पीयतेऽनयेति क्षीरपात्री क्षीरपानी पात्री। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षीरपायी, [न्] त्रि, (क्षीरं पिबति इति। "बहुलमाभीक्ष्ण्ये"। ३। २। ८२। सुप्युपदे णिनिः।) दुग्धपानकर्त्ता। यथा। "क्षीरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नकृदन्तार्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात्"। इति शब्दशक्तिप्रकाशिका॥

क्षीरमोरटः, पुं, (क्षीरवत् स्वाद्यः स्वादुर्वा मोरटः।) लताभेदः। तत्पर्य्यायः। सितद्रुः २ सुदलः ३ क्षीरकः ४। इति रत्नमाला। अन्यत् मोरटशब्दे द्रष्टव्यम्॥

क्षीरवल्ली, स्त्री, (क्षीरयुक्ता क्षीरप्रधाना वा वल्ली।) क्षीरविदारी। इति राजनिर्घण्टः॥
(यथास्याः पर्य्यायः।
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना यष्टिर्वदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

क्षीरविक्रतिः, स्त्री, (क्षीरं विक्रतिर्विकारोऽस्याः क्षीरवत् विक्रतिर्निर्य्यासोऽस्याः वा।) कूर्चिका। इत्यमरः। २। ९। ४४॥ क्षीरसा इति भाषा॥

क्षीरविदारिका, स्त्री, (क्षीरयुक्ता क्षीरवत् शुभ्रा वा विदारिका।) क्षीरविदारी। इति शब्दरत्नावली॥

क्षीरावदारी, स्त्री, (क्षीरवत् शुभ्रा क्षीरप्रचुरा वा विदारी।) कृष्णभूमिकुष्माण्डः। तत्पर्य्यायः। महाश्वेता २ ऋक्षगन्धिका ३। इत्यमरः। इक्षुवल्लरी ५ इक्षुवल्ली ६ क्षीरकन्दः ७ क्षीरवल्ली ८ पयस्विनी ९ क्षीरशुक्ला १० क्षीरलता ११ पयःकन्दा १२ पयोलता १३ पयोविदारिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। कषायत्वम्। तिक्तत्वम्। पित्तशूल मूत्रमेहाभयनाशित्वञ्च। (विदारीशब्देऽस्या अपर गुणा ज्ञेयाः॥)
"क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः।
विनालो रोगहर्त्ता स्यादयःस्तम्भी सनालकः"॥
इति राजनिर्घण्टः॥

क्षीरविषाणिका, स्त्री, (क्षीरमिव शुभ्रं क्षीरयुक्तं वा विषाणं अग्रभागो यस्याः ततः कन् टाप् च।) अस्थिकाली। क्षीरकाकोली। इति राजनिर्घण्टः॥

क्षीरवृक्षः, पुं, (क्षीरमयः क्षीरप्रधानो वा वृक्षः।) उडुम्बरवृक्षः। इति जटाधरः॥ क्षीरिका। इति भरतः॥ राजादनी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते २७ अध्याये चिकित्सास्थाने।
"क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः"॥
राजादन्यर्थे पर्य्याया यथा,—
"राजादनः क्षीरवृक्षः पालाशी वानरप्रियः"॥
इति वैद्यकरत्नमालायाम्॥)

क्षीरश्रुः, पुं, (क्षीरं दुग्धं स्रीयतेऽस्मात् अत्र वा। स्रु + अपादानेऽधिकरणे वा क्विप्। क्षीरं स्रुणाति विकृतीकरोतीति। स्रु + कर्त्तरि क्विप्।) दधियोगात् प्रक्षोभ्यदुग्धजातः। छाना इति भाषा। तत्पर्य्यायः। आमिक्षा २ पयस्या ३। इति हेमचन्द्रः॥

क्षीरश्रीर्षः, पुं, (क्षीरं श्रीर्षेऽस्य।) श्रीवासः। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरवत् शुभ्रा शुक्ला।) क्षीरविदारी। क्षीरकाकोली। इति राजनिर्घण्टः॥ (क्षीरविदारीशब्दे विवरणमस्या ज्ञेयम्॥)

क्षीरशुक्लः, पुं, (क्षीरवत् शुक्लः।) जलकुम्भटकः। पानिफल इति भाषा। इति शब्दचन्द्रिका॥ राजादनी। क्षीरशी इति भाषा। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरमिव शुक्ला।) शुक्लभूमिकुष्माण्डः। इत्यमरः। २। ४। ११०॥
(यथास्याः पर्य्यायाः।
"क्षीरशुक्ला विदारीक्षुविदारी च पलाशिका।
प्रसिद्धो भूमिकुष्माण्डो विदारीकन्द इत्यपि"॥
इति वैद्यकरत्नमालायाम्॥
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना यष्टिर्वदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"जीवकर्षभकौ मेदां श्रावणी कर्कटाङ्घ्रयम्।
मुद्गमाषाख्यपर्णौ च महतीं श्रावणीन्तथा"॥
काकोलीं क्षीरकाकोलीं क्षुद्रां क्षिप्तरुहान्तथा।
क्षीरशुक्लांपयस्याञ्च यष्ट्याह्वं विधिना पिबेत्।
वातपित्तहितान्येतान्यादौनि तु कफापहे"॥
इति चरके कल्पस्थाने ७ अध्यायः॥)

क्षीरसः, पुं, (क्षीरं स्यतीति। सो + कः।) क्षीरसारः। इति राजनिर्घण्टः॥

क्षीरसन्तानिका, स्त्री, (क्षीरस्य दुग्धस्य सन्तानिका इव।) दुग्धविकारविशेषः। छाना इति नट्क्षीर इति च भाषा। अस्या गुणाः। "क्षीरसन्तानिका कृष्या स्निग्धा पित्तानिलापहा"। इति राजवल्लभः॥

क्षीरसमुद्रः, पुं, (क्षीरतुल्यः स्वादुरसः क्षीरमयो वा समुद्रः।) दुग्धसागरः। स तु श्वेतद्वीपे वर्त्तते। यथा। क्षीरसमुद्राय नमः श्वेतद्वीपाय नमः इत्यादि पीठन्यासप्रकरणे तन्त्रसारः॥

क्षीरसागरसुता, स्त्री, (क्षीरसागरस्य क्षीरोदसमुद्रस्य सुता।) लक्ष्मीः। इति कविकल्पलता॥

क्षीरसारः, पुं, (क्षीरस्य दुग्धस्य सारः। यद्वा क्षीरं सरति प्राप्नोति कारणत्वेन इति। क्षीर + सृ + "कर्म्मण्यण्"। ३। २। १। इति अण्।) क्षीरविशेषः। पालजिनु इति हिन्दी भाषा। तत्पर्य्यायः। क्षीरसः २। यथा,—
"ईषच्छ्लेष्मकरं गौल्यं पित्तघ्नं तर्पणं गुरु।
पुष्टि चैवाभिधा तस्य क्षीरसारस्य क्षीरसः"।
इति राजनिर्घण्टः॥

क्षीरस्फटिकः, पुं, (क्षीरवत् शुभ्रः स्फटिकः।) क्षीरवर्णस्फटिकविशेषः। यथा,—
"सूर्य्यकान्तः सूर्य्यमणिः सूर्य्याश्मा दहनोपलः।
चन्द्रकान्तश्चन्द्रमणिश्चान्द्रश्चन्द्रोपलश्च सः॥
क्षीरतैलस्फटिकाभ्यामन्यौ स्फटिकाविमौ"॥
इति हेमचन्द्रः॥

क्षीरस्रवः पुं, (क्षीरस्य स्रवः कासोत्थश्लेष्मा इव। घनीभूतत्वात्तथात्वम्।) दुग्धपाषाणः। इति राजनिर्घण्टः॥

क्षीरा, स्त्री, (क्षीरवर्णोऽस्त्यस्याः इति "अर्शआदिभ्योऽच्"। ५। २। १२७। इत्यच्। ततष्टाप्।) काकोली। इति राजनिर्घण्टः॥ (काकोलीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

क्षीराब्धिः, पुं, (क्षीरमयोऽब्धिः क्षीरस्याब्धिर्वा।) क्षीरसमुद्रः। इति शब्दरत्नावली॥

क्षीराब्धिज, क्ली, (क्षीराब्धेः क्षीरोदसागरात् जायते इति। जन् + डः।) सामुद्रलवणम्। मौक्तिकम्। इति मेदिनी॥

क्षीराब्धिजः, पुं, (क्षीराब्धेर्जायते इति। जन् + डः।) चन्द्रः। इति मेदिनी॥

क्षीराब्धिजा, स्त्री, (क्षीराब्धिज + टाप्।) लक्ष्मीः। इति मेदिनी॥ (यथा, भागवते ८। ८। ८।
"ततश्चाविरभूत्साक्षात् श्रीरमा भगवत्परा।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा"॥)

क्षीराब्धितनया, स्त्री, (क्षीराब्धेः तनया कन्या।) लक्ष्मीः। इत्यमरः। १। १। २९॥

क्षीराविका, स्त्री, (क्षीरं अवतीति। "कर्म्मण्यण्"। ततो ङीप् ततः स्वार्थे कन् टापि पूर्ब्बह्रस्वः।) क्षीरावी। इति शब्दरत्नावली॥

क्षीरावी, स्त्री, (क्षीरं अवतीति "कर्म्मण्यण्"। ३। २। १। इत्यण्। ङीप् च।) दुग्धिका। इत्यमरः। २। ४। १००॥ तत्पर्य्यायः। ग्राहिणी २ कच्छुरा ३ तामूला ४ मरुद्भवा ५। इति रत्नमाला॥ हे क्षीराग्नि इति ख्यातायाम्। इयञ्च वकुलपत्रतुल्यपत्रा लताछेदे क्षीरं स्रवतीति सुभूतिः। तन्मते दुद्दिया क्षीरा इति ख्यातायामित्यनुमीयते। हे क्षीरकाकोल्यामिति स्वामी। क्षीरमवति रक्षति क्षीरावी अव रक्षे भण् ईप्। दुग्धमस्त्यस्याः दुग्धिका विकारसंज्ञेति णिजन्तः। इति भरतः॥ अन्यद्दुग्धिकाशब्दे द्रष्टव्यम्॥

क्षीराङ्कः, पुं, (क्षीरं आङ्क्यते स्पर्द्धते इति। कृ + कः।) सरलवृक्षः। इति चिकाण्डशेषः॥

क्षीरिका, स्त्री, (क्षीरवत् स्वादोऽस्त्यस्य इति ठन्।) क्षीरीवृक्षः। क्षीरखर्জ্জूर इति पिण্ডखर্জ্জूर इति च केचित्। तत्पर्य्यायः। राजादनः २ पलाशवृक्षः ३। इत्यमरः। २। ४। ४५॥ राजातनः ४ राजादनफलम् ५ अध्यक्षम् ६ मधुका ७ क्षीरवृक्षः ८ पलाशी ९ मर्कटप्रियः १० गुरुस्कन्धः ११ श्लेष्मला १२ व्रातपत्री १३ लघा १४ मौलिकाभासी १५। इति भरतधृतवाचस्पतिः॥ क्षीरिवृक्षः १६ वानरप्रियः १७। इति रत्नमाला॥ राजन्यः १८ प्रियदर्शनः १९ दृढ़स्कन्धः २० कपीठः २१। इति जटा-

धरः ॥ वरादनम् २२ क्षीरी २३ क्षीरी [न्] २४ ।
इति शब्दरत्नावली ॥ अस्याः फलगुणाः ।
"क्षीरिकायाः फलं पक्कं गुरु विष्टम्भि शीतलम् ।
कषायं मधुरं साम्लं नातिवातप्रकोपणम्" ॥
इति राजवल्लभः ॥ अपि च ।
"क्षीरिकायाः फलं दृष्यं बल्यं स्निग्धं हिमं गुरु ।
दृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयापहम्" ॥
इति भावप्रकाशः ॥ अन्यत् राजादनीशब्दे द्रष्टव्यम् ॥ * ॥ परमान्नम् । इति राजनिर्घण्टः ॥
("क्षीरिका मधुरा चैते फलवर्गे प्रकीर्त्तिताः" ॥
इति हारीते प्रथमस्थाने १० अध्याये ॥
परमान्नार्थे पर्य्यायः पाकप्रकारस्यास्या यथा,—
"पायसं परमान्नं स्यात् क्षीरिकापि तदुच्यते ।
शुद्धेऽर्द्धपक्के दुग्धे तु घृतात्तांस्तण्डुलान् पचेत् ॥
ते सिद्धाः क्षीरिका ख्याता सशिताज्ययुतोत्तमा" ॥
गुणाश्च यथा,—
"क्षीरिका दुर्ज्जरा प्रोक्ता वृंहणो बलवर्द्धिनी" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

क्षीरिणी, स्त्री, (क्षीरं क्षीरसदृशो निर्य्यासोऽस्यस्य इति इनिः । ततः ङीप् ।) वृक्षविशेषः । तत्पर्य्यायः । काञ्चनक्षीरी २ कर्षणी ३ षट्कर्णिका ४ तिक्तदुग्धा ५ हैमवती ६ हिमदुग्धा ७ हिमावती ८ हिमाद्रिजा ९ पीतदुग्धा १० यवचिको ११ हिमोद्भवा १२ हैमी १३ हिमजा । १४ । अस्या गुणाः ।
"क्षीरिणी तिक्तशीता च रेचनी श्लेष्मतापनुत् ।
कृमिदोषकफघ्नी च पित्तज्वरहरा परा" ॥
इति राजनिर्घण्टः ॥ * ॥ वराहक्रान्ता । इति शब्दचन्द्रिका ॥ कुटुम्बिनी । काश्मरी । दुग्धिका । इति च राजनिर्घण्टः ॥
(व्यवहारोऽस्या यत्र तत्र यथा ।
"तथादन्तीद्रवन्त्योः स्यादत्यन्तं जगन्ध्ययोः ।
क्षीरिण्या नीलिकायाश्च तथैव च करञ्जयोः ॥
मसूरविदलायाश्च प्रत्यक् श्रेण्यास्तथैव च ।
विड्भार्द्रा शुष्कशुष्केन तदत् साध्यं घृतं पुनः ।
शुष्किणी सप्तलाधात्री कषाये साधयेद्घृतम्" ॥
इति कल्पस्थाने ११ अध्याये चरकेणोक्तम् ॥)

क्षीरिवृक्षः, पुं, (क्षीरी क्षीरयुक्तः वृक्षः ।) क्षीरयुक्तपञ्चप्रकारवृक्षः । यथा,—
"न्यग्रोधोदुम्बराश्वत्थपारिभद्रप्लक्षपादपाः ।
पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पल्लवफलम्" ।
केचित्तु पारिभद्रस्थाने "शिरीषं वेतसं परे" ।
वदन्तीति श्लेषः । अस्य गुणाः ।
"क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः ।
रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः ।
श्लेष्मपित्तकफास्रघ्नाः स्तन्या मन्दाग्नियोजकाः" ॥
एषां त्वग्गुणाः ।
"त्वक्पक्वं हिमं याहि व्रणश्लेष्मविसर्पजित्" ॥
तेषां पत्रगुणाः ।
"तेषां पत्रं हिमं याहि कफवातास्रनुच्छ्रघ ।
विस्फोटाध्मानजित्तिक्तं कषायं लघु लेखनम्" ।
इति राजनिर्घण्टः ॥

क्षीरी, [न्] पुं, (क्षीरं क्षीरवन्निर्य्यासोऽस्यस्य, इनिः ।)
क्षीरिकावृक्षः । इति शब्दरत्नावली ॥
(अस्य व्यवहारो यथा, कनकतैले ।
"कनकक्षीरी शैला भार्गी दन्तीफलानि मूलञ्च ।
जातिफलानि प्रवालसर्षपलशुनविड्ङकरञ्जत्वक् ॥
सप्तच्छदार्कपल्लवमूलत्वङ्निम्बचित्रकास्फोताः ।
गुञ्जैरण्डहतीमूलकसुरसार्ज्जकफलानि ॥
कुष्ठं पाठामुस्तं तुम्बुरुमूर्व्वा वचा सषड्ग्रन्थाः ।
एड्गजकुटजशिग्रुव्यूषभल्लातकत्र्यवकाः ॥
हरितालमवाक्पुष्पी तुत्थं कम्पिल्लकोऽमृतासङ्गः ।
सौराष्ट्रिकासरोस दार्व्वीत्वक्सर्ज्जिकालवणम् ॥
कल्कैरेतैस्तैलं करवीरकमूलकल्पवकषाये ।
सार्षपमथवा तैलं गोमूत्रचतुर्गुणं साध्यम् ॥
स्याद्यं कटुकालाबूनि तत्सिद्धं तेनास्य मण्डलान्यास्त ।
भिन्द्याद्विषगभ्यङ्गात् क्रिमींश्च कण्डूं विनिहन्यात्" ॥
इति कनकतैलम् ॥ इति चरके चिकित्सास्थाने सप्तमेऽध्याये ॥
यथा, मनुः । ८ । २४६ ।
"सीमालक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्" ॥)
दुग्धिका । इति शब्दचन्द्रिका ॥ खुही । अर्कवृक्षः । राजादनी । दुग्धपाषाणः । वटः । शुक्लः ।
(अस्य पर्य्याया यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सोमलता । स्थालीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरी, स्त्री, (क्षीर + अस्त्यर्थे अच् गौरादित्वात् ङीष् ।) क्षीरीवृक्षः । इति शब्दरत्नावली ॥
(पक्वान्नविशेषः । तस्य पाकप्रणाली यथा,—
"नारिकेलन्तनूकृत्य च्छिन्नं पयसि गोः क्षिपेत् ।
सिता गव्याज्यसंयुक्ते तत्पचेन्मृदुनाग्निना" ॥
अस्या गुणाश्च ।
"नारीकेलोद्भवा क्षीरी स्निग्धाग्नीतातिपुष्टिदा ।
गुर्व्वी सुमधुरा दृष्या रक्तपित्तानिलापहा" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

क्षीरीशः, पुं, (क्षीरिणां क्षीरप्रधानानां वृक्षाणां ईशः श्रेष्ठः ।) क्षीरकाकोली । तत्पर्य्यायः । वरपर्णः २ क्षुक्कुटः ३ कुष्ठनाशनः ४ बल्यः ५ मूलकमूला ६ खसकन्धः ७ कक्षुकी ८ । इति रत्नमाला ॥

क्षीरेयी, स्त्री, (क्षीर + बाह्वलकात् ढक् ततो ङीप् । यद्वा, क्षीरेण इं शोभां यातीति । या + कः गौरादित्वात् ङीष् ।) पायसम् । यथा,—
"क्षीरेयी पायसं प्रोक्तं परमान्नञ्च सूरिभिः" ॥
इति हलायुधः ॥

क्षीरोदः, पुं, (क्षीर + "उदकस्योदः संज्ञायाम्" । ६ । ३ । ५७ । "उत्तरपदस्य चेति वक्तव्यम्" । इति वार्त्तिकम् ।) दुग्धसमुद्रः । इत्यमरः । १ । १० । २ ॥
(यथा, महाभारते । १३ । १४ । २५३ ।
"अक्षयं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदसागरश्चैव यत्र यच्छसि प्रियम्" ॥)
तस्य मन्थनं यथा,—
"मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।
दानवैः सहिता भूत्वा मथ्यध्वं क्षीरसागरम् ॥
अहञ्च तत्र साहाय्यं करिष्यामि दिवौकसः ।
भविष्यत्यमृतं तत्र तत्पानाद्बलवत्तराः ॥
भविष्यन्ति च्युतादेव अमृतस्य प्रभावतः ।
यूयं सर्व्वे महावीर्य्या भुञ्जिष्ठा दृप्तविक्रमाः ॥
इन्द्राद्यास्तु महोत्साहाः स्थानलब्धा महानरीन् ।
ततो हि दानवान् जेतुं समर्था नात्र संशयः ॥
इत्युक्ता देवदेवेन देवाः सर्व्वे जगत्पतिम् ।
प्रणम्यागत्य निलयं सन्धिं कृत्वाथ दानवैः ॥
क्षीराब्धिमथने सर्व्वे चक्रुर्यत्नमुत्तमम् ।
बलिना चोद्धतो राजन् मन्दराख्यो महागिरिः ॥
क्षीराब्धौ क्षिप्तश्चैव तेनैकेन नृपोत्तम ! ।
सर्व्वौषधिश्च प्रक्षिप्ता देवैर्दैत्यैः पयोदधौ ॥
वासुकिश्च ततस्तत्र राजन् ! नारायणाज्ञया ।
सर्व्वदेवहितार्थाय विष्णुश्च स्वयमागतः ॥
ततो विष्णुसमादेशात्तत्र सर्व्वे सुरासुराः ।
समेत्य मित्रभावेन क्षीराब्धेस्तटमाश्रिताः ॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वाथ वासुकिम् ।
ततो मथितुमारब्धा नृपते ! तरसाऽमृतम् ॥
विष्णुना मुखभागे तु वासुकेर्दानवाः कृताः ।
देवास्य पुच्छभागे तु मन्थनार्थं नियोजिताः ॥
एवन्तु मन्थनात्तत्र मन्दरोऽथ प्रविश्य वै ।
आधारेण विना राजंस्तं दृष्ट्वा सहसा हरिः ॥
सर्व्वलोकहितार्थाय कूर्म्मरूपमधारयत् ।
आत्मानं संप्रवेश्याथ मन्दरस्य गिरेरधः ॥
प्रविश्य कृतवान् शैलं पृथगरूपेण केशवः ।
उपर्य्याक्रान्तवान् शैलं पृथगरूपेण केशवः ॥
चकर्ष नागराजानं देवैः साद्ध जनार्द्दनः ।
असुरैरदृश्यरूपेण दैत्यमध्ये च केशवः ॥
ततस्ते तु त्वरायुक्ता ममुः क्षीरसागरम् ॥
यावच्छक्त्या नृपश्रेष्ठ ! बलवन्तः सुरासुराः ॥
मथ्यमानात् ततस्तस्मात् क्षीराब्धेरभवन्नृप ।
कालकूटमिति ख्यातं विषमत्यन्तदुःसहम् ॥
तन्नागा जगृहुः सर्व्वे तच्छेषं ग्रहणेऽग्रहीत् ।
नारायणाज्ञया तेन नीलकण्ठत्वमाप्नुयात् ॥
ऐरावतश्च नागेन्द्रो हयश्चोच्चैःश्रवाः पुनः ।
द्वितीयावर्त्तनादाजन्नुत्पन्नाविति नः श्रुतम् ॥
तृतीयावर्त्तनादग्रे रोगाणां जातः सुशोभनः ।
चतुर्थात् पारिजातश्च उत्पन्नः स महातरुः ॥
पञ्चमात् हिमगुस्तस्मात् उत्थितः क्षीरसागरात् ।
तं भवः शिरसा धत्ते नारी च स्वस्तिको नृप ! ॥
नानाविधानि रत्नानि दिव्यान्याभरणानि च ।
क्षीरोदधेस्तूत्थितानि गन्धर्व्वाश्च सहस्रशः ॥
एतान् दृष्ट्वा तदोत्पन्नान् नित्यार्च्चर्य्यसमन्विताः ।
अभवन् जातहर्षास्ते तत्र सर्व्वे सुरासुराः ॥
दैवपक्षे ततो मेघाः सद्यं वर्षन्ति संस्थिताः ।
कृष्णाज्ञया तु वायुस्तु सुखं वाति सुरान् प्रति ॥
विषनिश्वासवातेन वासुकेश्चार्कतापनात् ।
निस्तेजसोऽभवन् दैत्या निर्व्वीर्य्याश्च महामते ॥
ततः श्रीरुत्थिता तस्मात् क्षीरोदोद्भवपङ्कजा ।
विभ्राजमाना राजेन्द्र ! दिशः सर्व्वाः स्वतेजसा ॥

ततस्तीर्थोदकैः स्नाता दिव्यवस्त्रैरलङ्कृता ।
दिव्यगन्धानुलेपैस्तु सुमनोभिः सुपूजिता ॥
देवपक्षं समासाद्य स्थिता क्षणमरिन्दम ! ।
हरिवक्षःस्थलं प्राप्ता ततः सा कमलालया ॥
ततोऽमृतघटं पूर्णं गृहीत्वा पयसोनिधेः ।
धन्वन्तरिः समुत्तस्थौ ततः प्रीताः सुरा नृप ॥
दैत्याः श्रिया परित्यक्ता दुःखितास्तत्र ते पुनः ।
आदायामृतघटं शीघ्रं ते च जग्मुर्यथेच्छया ॥
ततः स्त्रीरूपमकरोद्विष्णुदेवहिताय वै ।
आत्मानं नृपशार्दूल ! नार्या लक्षणसंयुतम् ॥
ततो जगाम भगवान् स्त्रीरूपेण सुरान् प्रति ।
दिव्यरूपान्तु तां दृष्ट्वा मोहितास्ते सुरद्विषः ॥
अमृतपूर्णं घटं भूमौ हैमं संस्थाप्य सत्तम ।
कामेन पीड़िता क्षणसन्नसुरास्तत्र तत्क्षणात् ॥
मोहयित्वा तु तानेवमसुरानवनीपते ! ।
अमृतभाजनमादाय देवेभ्यः प्रददौ हरिः ॥
तत् पीत्वा तु ततो देवा देवदेवप्रसादतः ।
बलवन्तो महावीर्या रणे जग्मुर्महासुरान्" ॥
इति नृसिंहपुराणे ३६ अध्यायः ॥

क्षीरोदतनया, स्त्री, (क्षीरोदस्य क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति हेमचन्द्रः ॥ (अस्या उत्पत्तिकथा क्षीरोदशब्दे द्रष्टव्या ॥)

क्षीरोदतनयापतिः, पुं, (क्षीरोदतनयाया लक्ष्म्याः पतिः ।) विष्णुः । इति कविकल्पलता ॥

क्षीरोदनन्दनः, पुं, (क्षीरोदस्य दुग्धसमुद्रस्य नन्दनः ।) चन्द्रः । इति शब्दरत्नावली ॥

क्षीव, क्ष्वे ङ दर्षे ॥ इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) क्ष्वे, अचिक्षीवत् । ङ, क्षीवते । इति दुर्गादासः ॥

क्षीव, निरासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) निरास इह फुत्कारः । इति भट्टमल्लः ॥ सुखेन श्लेष्मादेर्वमनमिति केचित् । क्षीवत्यन्नं लोकः । इति दुर्गादासः ॥

क्षीवः, त्रि, (क्षीव ङ मदे + क्तः । "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । तलोपो निपातनात् ।) सुरामत्तः । यथा । "मत्ते शौण्डोत्कटक्षीवाः" । इत्यमरः । २ । २ । २३ ॥ दन्त्योष्ठवकारान्तोऽयम् ॥
(यथा, रामायणे । ५ । ६० । १२ ।
"उन्मत्तभूताः प्लवगा मधुपानप्रहर्षिताः ।
क्षीवाः कुर्व्वन्ति हास्यं च कलहांश्च तथाऽपरे" ॥)

क्षु, टु ष्व क्षुते । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) क्षुतं छाँची इति ख्यातम् । टु, क्षवथुः । ष्व, क्षौति कपी । क्षुतकं कामिनि शुक्षुवे मृगाक्ष्या । इति माघे । इति दुर्गादासः ॥

क्षुः, पुं, (क्षणोति हिनस्ति जीवान् इति । क्षण हिंसायां + डुः ।) सिंहः । इत्येकाक्षरकोषः ॥

क्षुणः, पुं, (क्षु + नक् ।) अरिष्टवृक्षः । यथा,—
"अरिष्टो वस्तिकर्म्माढ्यो वेणीवः फेनिलः क्षुणः" ।
इति शब्दचन्द्रिका ॥ (अरिष्टशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

क्षुण्ण, त्रि, (क्षुद संपेषणे + कर्म्मणि क्तः ।) प्रहतम् । (अभ्यक्तम् । यथा, रघौ । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्व्वर्त्मनः परम्" ॥
माघे च । १ । ३२ ।
"उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन-
स्वमग्नभूमिर्निरपायसंश्रया" ॥)
चूर्णीकृतम् । इति जटाधरः ॥
(यथा, मार्कण्डेयपुराणे । ८३ । २४-२५ ।
"सोऽपि कोपान्महावीर्य्यः क्षुरक्षुण्णमहीतलः ।
पृष्ठक्षाभ्यां पर्व्वतानुच्चांश्चिक्षेप च ननाद च ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत" ॥)

क्षुत्, स्त्री, (क्षु शब्दे क्षुते च + सम्पदादित्वात् भावे क्विप् तुगागमश्च ।) क्षुतम् । इत्यमरः । २ । ६ । ५२ ॥ (धान्यविशेषः । देधान इति लोके । अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"क्षुत्क्षुल्लश्चो गोजिक्का च गुन्द्राशुल्मा गवेधुका" ॥)

क्षुत्, [ध्] स्त्री, (क्षुध् + सम्पदादित्वात् भावे क्विप् ।) क्षुधा । इत्यमरः । २ । ६ । ५४ ॥ (यथा, मार्कण्डेयपुराणे । ८ । ३५ ।
"तात ! तात ! ददस्वान्नमम्बाम्ब ! भोजनं दद ।
क्षुन्मे बलवती जाता जिह्वाग्रं शुष्यते तथा" ॥)

क्षुतं, क्ली, (क्षु शब्दे क्षुते च + भावे क्तः ।) नासिकाभिघातजन्यसशब्दवायुनिःसरणम् । हाँची इति भाषा । तत्पर्य्यायः । क्षुत् २ क्षवः ३ । इत्यमरः । २ । ६ । ५२ ॥ क्षुता ४ क्षिक्का ५ क्षवथुः ६ क्षुतः ७ । इति शब्दरत्नावली ॥ हिक्किः ८ । इति जटाधरः ॥*॥ तस्य शकुनानि यथा,—
"अथ क्षुताख्यं शकुनं क्रमेण
महाप्रभावं प्रतिभावयामः ।
नश्यन्ति यस्माच्छकुनाः समस्ता
मृगाधिनाथादिव वन्यसत्त्वाः ॥
सर्व्वस्य सर्व्वत्र च सर्व्वकालं
क्षुतं न कार्य्यं क्वचिदेव शस्तम् ।
यातुः क्षुते तेन न किञ्चिदेव
कुर्य्यात् क्षुतं प्राणहरञ्च गन्तुः ॥
निषेधमग्रेऽप्यधिगे दक्षिणे च
धनक्षयं दक्षिणकर्णदेशे ।
तत् पृष्ठभागे कुरुतेऽर्थवृद्धिं
क्षुतं कदाचित् शुभमादधाति ॥
भोगाय वामश्रवणस्य पृष्ठे
कर्णे च वामे कथितं जयाय ।
सर्व्वार्थलाभाय च वामनेत्रे
जातं क्षुतं स्यात् क्रमशोऽप्यधैव ॥
क्रमान्निषेधं गमनस्य विघ्नं
कलिं समृद्धिं क्षुतमुग्ररोगम् ।
करोति रोगक्षयमर्थलाभं
दीप्तादिनाशञ्च क्षुतं करोति ॥
प्रागास्य पुंसः परतोऽपरा स्यात्
पुनः पुनर्व्वा तत एव जातः ।
वृद्धाक्षिशोर्व्वा कफतो हठाद्वा
जातं क्षुतं केऽपि वदन्ति सत्यम् ॥
आद्यन्तयोर्न खलु प्रशस्त
क्षुतं प्रशंसन्ति न भोजनादौ
भवेत् कथञ्चिद्यदि भोजनान्ते
भवेत्तदाग्रे न हि भोज्यलाभः ॥
आदौ क्षुतञ्चेत् शकुनैस्ततः किं
जातानजातान् शकुनान्निहन्ति ।
क्षुतं क्षणेनाच न संशयोऽस्मिन्
प्रयोजने यत्नकृतेऽपि जातम् ॥
क्षुतं क्षणात्तद्विनिहन्त्यवश्यं
कार्य्यात्मकेनापि मनागपीदम् ॥
तस्मादुपेक्ष्यं न विचक्षणेन
क्षुतं यतश्चान्तु फलं विधत्ते" ॥
इति वसन्तराजशाकुने क्षुत्प्रकरणं तृतीयम् ॥

अपि च ।
"क्षिक्काया लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैर्ऋते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं क्षिक्कापफलाफलम्" ॥
इति गारुड़े ज्योतिश्चक्रे ६० अध्यायः ॥ * ॥
अन्यच्च । वर्षकृत्ये ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे ऽतताग्ने भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरते क्षुतेऽप्येवमूहुः केचिच्च कोविदाः" ॥
इति ॥*॥ क्षुते जीवेति प्रयोगः कर्त्तव्यः । यथा, मदनपारिजातधृतम् ।
"जीवेति क्षुवतो ब्रूयात् जीवेत्युक्त्वस्वया सह" ॥
इति ॥ * ॥
"क्षुतोत्पतनजृम्भासु जीवोत्क्षिप्ताङ्गविध्वनिः ।
शुचोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ॥
इति च तिथ्यादितत्त्वम् ॥ * ॥ तस्य शुभजनकत्वम् । यथा, दाक्षिणात्यास्तु ।
"आसने शयने दाने भोजने वस्त्रसंग्रहे ।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्" ॥
अन्यच्च विष्णोरित्यधिकृत्य विष्णुधर्म्मोत्तरम् ।
"नामसंकीर्त्तनं नित्यं क्षुतप्रस्खलितादिषु ।
वियोगं शीघ्रमाप्नोति सर्व्वानर्थो न संशयः" ॥
इति ॥ * ॥ असंस्कृतमुखस्य क्षुन्निषेधो यथा,—
विष्णुधर्म्मोत्तरे ।
"नासंस्कृतमुखः कुर्य्याद्धास्यं जृम्भां तथा क्षुतम्" ॥
इति ॥ * ॥ क्षुते आचमनं कर्त्तव्यं यथा । याज्ञवल्क्यः ।
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् वासोविपरिधाय च" ॥
इति ॥ * ॥ अशुद्धौ स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेदन्यत्र स्पृशेत्" ॥
इति च उदाहृतत्त्वम् ॥ * ॥ बलिनां सकृत् क्षुतं भवति यथा,—
"क्रूरे वक्त्रिणवक्रा स्याद्बलिनाञ्च क्षुतं सकृत्" ।

क्षुद्रक

दन्तिभवक्रेति नासाविशेषणम्। इति च गारुडे ६६ अध्यायः॥

क्षुतः, पुं, (क्षु+क्तः। आभिधानात् पुंस्त्वम्।) क्षुतम्। इति शब्दरत्नावली॥

क्षुतकः, पुं, (क्षुताय साधुरिति कन् स्वार्थे वा।) राजिका। इति राजनिर्घण्टः॥

क्षुता, स्त्री, (क्षुत+टाप्।) क्षुतम्। इति शब्दरत्नावली॥

क्षुताभिजननः, पुं, (क्षुतं अभिजनयति। अभि+जन्+णिच्+ल्युः।) क्षुत्सर्षपः। इत्यमरटीकायां स्वामी॥

क्षुत्करी, स्त्री, (क्षुतं करोतीति। कृ+टः+ङीष् च।) कङ्गालिका। यथा, शब्दचन्द्रिकायाम्।

"भुजङ्गघातिनी सूचिः सर्पाच्ची क्षुत्करी स्पृहा"॥

क्षुद्, अ ध क्षौ इर् क्षुदि। इति कविकल्पद्रुमः॥ (स्वधां-उमं-सकं-अनिट्।) अ ध, क्षुणत्ति क्षुन्ते। औ, क्षोत्ता। इर्, अक्षुदत् अक्षौत्सीत्। क्षुदि चूर्णीकरणे। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ३३।

"मित्रघ्नस्य प्रभुक्षोद गदयाङ्गं विभोषणः।
सुग्रीवः प्रघसं नेभे वङ्कग्रामस्तनर्ई च"॥)

क्षुद्, [ध्] स्त्री, (क्षुध्+सम्यदादित्वात् भावे क्विप्।) क्षुधा। इत्यमरः।२।९।५४॥(विष्णुपुराणे १।५।३९।

"रजोमात्रात्मिकामेव ततोऽन्यां जग्रहे तनुम्।
ततः क्षुद् ब्रह्मणो जाता यस्यां कोपस्तया ततः"॥)

क्षुदः, पुं, (क्षुद्+-'इगुपधज्ञाप्रीकिरः कः"। ३। १।१३५। इति कः।) तण्डुलादिचूर्णम्। क्षुद इति भाषा॥

क्षुद्रः, पुं, (क्षुदि+"स्फायितञ्चिवञ्चिप्रुञ्छिखिदिक्षिपिक्षुदीति"। उणां।२।१३। इति रक्।) तण्डुलावयवः। इति संक्षिप्तसारोणादिवृत्तिः॥ डऊः। इति शब्दरत्नावली॥ (मक्षिकाविशेषः। यदुक्तम्।

"मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु।
मुनिभिः क्षौद्रमित्युक्तं तद्भक्षात् कपिलं भवेत्"॥)

क्षुद्रः, त्रि, (क्षुद्+"स्फायितञ्चीति"। उणां। २। १३। इति रक्।) क्षपणः। अधमः। (यथा, कुमारे। १। १९।

"क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव"॥

तुच्छः। यथा, गीतायाम्। २। १।

"क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप!"॥)

क्रूरः। अल्पः। इत्यमरभेदिनीकरौ॥(यथा, महाभारते। ३। आरण्यकयात्रापर्व्वणि। १०। २४।

"तं भीमः समरश्लाघी बलेन बलिनाम्बरः।
जघान पशुमारेण व्याघ्रः क्षुद्रमृगं यथा"॥)

दरिद्रः। इति हेमचन्द्रः॥

क्षुद्रकण्टकारी, स्त्री, (क्षुद्रः कण्टकारी।) अग्निदमनी। इति राजनिर्घण्टः॥

क्षुद्रकण्टकी, स्त्री, (क्षुद्रं कण्टकं यस्याः। गौरादित्वात् ङीष्।) दहती। इति भावप्रकाशः। क्षुद्रभण्टाकोति च पाठः॥

क्षुद्रकु

क्षुद्रकम्बुः, पुं, (क्षुद्रश्चासौ कम्बुश्चेति।) क्षुद्रशङ्खः। तत्पर्य्यायः। शङ्खनखः २ क्षुल्लकः ३। इति हेमचन्द्रः॥

क्षुद्रकारवेल्ली, स्त्री, (क्षुद्रा कारवेल्ली।) कारवेल्लविशेषः। छोट करला इति भाषा। तत्पर्य्यायः। कुड़ऊची २ श्रीफलिका ३ प्रतिपत्रफला ४ सुषवी ५ कारवी ६ वज्रफला ७ क्षुद्रकारलिका ८ कन्दफला ९। कन्दफलाख्याने कन्दलता इति च पाठः। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। रुचिकारित्वम्। दीपनदत्वम्। रक्तानिलदोषकारित्वम्। पथ्यत्वञ्च। तत्फलस्याप्येते गुणाः॥ तत्कन्दगुणाः। अर्शोनाशित्वम्। मलरोधविशोधनत्वम्। योनिनिर्गतदोषगर्भस्रावविषापहत्वञ्च। इति राजनिर्घण्टः॥

क्षुद्रकारलिका, स्त्री, (क्षुद्रा कारलिका।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

क्षुद्रकुलिशः, पुं, (क्षुद्रः कुलिशः वज्रमणिविशेषः। नित्यकर्म्मधारयः।) वैक्रान्तमणिः। इति राजनिघण्टः॥

क्षुद्रकुष्ठं, क्ली, (क्षुद्रं अल्पं कुष्ठम्।) स्वल्पकुष्ठरोगः। तत्तु एकादशविधम्। यथा। क्षुद्रकुष्ठान्याह।

"एककुष्ठं १ स्मृतं पूर्व्वं गजचर्म्म २ ततः परम्।
ततश्चर्म्मदलं ३ प्रोक्तं ततश्चापि विचर्च्चिका ४॥
विपादिकाभिधा ५ स्त्रैव पामाकच्छू–६ स्ततः परा।
ततो दद्रुश्च७ विस्फोटः८ किटिभश्च ९ ततः परम्॥
ततश्चालसकं १० प्रोक्तं शतारुश्च ११ ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः"॥

ननु दद्रोः कथं क्षुद्रकुष्ठेषु गणना सुश्रुतेन महाकुष्ठेषूक्तत्वात्। उच्यते। असिता च गाढ़मूला दद्रुः सुश्रुते महाकुष्ठेषूक्ता असितेतरा नवगाढ़मूला दद्रुः क्षुद्रकुष्ठमेव। एवं विधाया दद्रोश्चरकेण क्षुद्रकुष्ठेषु दर्शितत्वात्॥ *॥

कुष्ठानां त्रिदोषजत्वेनैकत्वे त्रिदोषस्योल्बणतया सप्तधात्वमाह।

"सर्व्वेष्वपि त्रिदोषेषु व्यपदेशाधिकत्वतः।
कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वं समागतैः"॥

सर्व्वेष्वपि कुष्ठेषु त्रिदोषजेषु सत्सु व्यपदेशाधिकत्वतः व्यपदेशः कापालादिसंज्ञास्तेषामष्टादशत्वरूपं यदधिकत्वं ततः कुष्ठानि सप्तधा। कैर्दोषैः कथम्भूतैः पृथग्द्वन्द्वं समागतैः। समागतैः सङ्गतैर्मिलितैरिति यावत्। अस्यायमर्थः।

किमपि कुष्ठं वातोल्बणं किमपि पित्तोल्बणं किमपि कफोल्बणं किमपि वातपित्तोल्बणं किमपि वातश्लेष्मोल्बणं किमपि पित्तश्लेष्मोल्बणं किमपि त्रिदोषोल्बणमिति॥ *॥ पूर्व्वरूपमाह।

"अतिसूक्ष्मः खरस्पर्शः खेदाखेदौ विवर्जता।
दाहःकण्डूस्त्वचि स्रावस्तोदः कोठोन्नतिः क्रमः॥
त्रयाणामधिकं स्पष्टं श्लीपोत्पत्तिश्चिरस्थितिः।
रूढ़ानामपि रूढ़त्वं निमित्तेऽल्पेऽपि केवलम्।
रोमहर्षोऽतिदुःखः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्"॥

अतिसूक्ष्मः अतिसूक्ष्मदुः। अथवा खरः रूक्षः कर्कशो वा स्पर्शः। खेदाखेदौ धर्म्मादि सप्तसङ्काभावेऽपि खेदः। अथवा धर्म्मादिप्रसङ्गेऽपि खेदाभावः। त्वचि स्रावः स्पर्शज्ञता। श्लीपोत्पत्तिः श्लीपा उत्पत्तिर्व्रणानामित्यन्वयः॥ *॥ सम्प्राप्तिपूर्व्वकं सामान्यं लक्षणमाह।

"शिराः प्रपद्य तिर्य्यक् च त्वग्लसीकास्रगामिषम्।
दूषयन्ति श्लथीकृत्य निश्चरन्तो बहिस्ततः॥
त्वचः कुर्व्वन्ति वैवर्ण्यं दोषाः कुष्ठमुषन्ति तत्"॥

तिर्य्यक् तिर्य्यगताः शिराः प्रपद्येत्यन्वयः॥*॥ येनोल्बणेन दोषेण यत् कुष्ठं समुत्पद्यते तदाह।

"वातेन कुष्ठं कापालं पित्तेनौडुम्बरं कफात्।
मण्डलाख्यं विचर्च्ची च ऋष्यजिह्वं वातपित्ततः॥
चर्म्मैककुष्ठकिटिभसिध्मासविपादिकाः॥
वातश्लेष्मोद्भवाः पित्तकफात् दद्रुशतारुषी॥
पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा।
सर्व्वैरेवोल्बणैर्दोषैराढ्यः काकणकं बुधाः"॥

विचर्च्ची च कफादित्यन्वयः॥

"पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा"॥

पित्तकफादित्यन्वयः॥ *॥ अथ क्षुद्रकुष्ठानां मध्ये एककुष्ठस्य लक्षणमाह।

"अखेदनं महावास्तु यन्मत्स्यशकलोपमम्।
तदेव कुष्ठं चर्म्माख्यं बड्डलं हस्तिचर्म्मवत्"॥

महावास्तु महास्थानम्। मत्स्यशकलोपमं अत्र शकलशब्देन लक्षणया त्वगुच्यते। तेन चक्राकारमत्स्यकपत्रसदृशं भवति। एककुष्ठमितिक्षुद्रकुष्ठेषु मुख्यत्वात्। *।गजचर्म्माह।

"चर्म्माख्यं बड्डलं हस्तिचर्म्मवत् रूक्षं कृष्णं च"। गजचर्म्माख्यं बड्डलं स्थूलं हस्तिचर्म्मवत् रूक्षं कृष्णञ्च॥२॥ चर्म्मदलमाह।

"रूक्षं सस्थूलं कण्डूमत् सस्फोटं दलयत्यपि।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते"॥

दलयत्यपि विदारयत्यपि चर्म्मेति शेषः॥ *॥

विचर्च्चिकामाह।

"सकण्डूः पिड़का श्यावा बड्डस्रावा विचर्च्चिका"

पिड़का क्षुद्रपिड़का॥ *॥ ननु क्षुद्रकुष्ठानां कथमेकादशत्वम्। विपादिकया द्वादशत्वसम्भवात् उच्यते। विचर्च्चिकैव पादयोर्भवति विदारणयोगात् विपादिका तेन न सङ्ख्यातिरेकः। अतएव भोजः।

"दाल्यते त्वक्खरा रूक्षा पाण्योर्ज्ञेया विचर्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका"॥

दाल्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपादिकां भिन्नमाहुः।

"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्"॥

पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्॥ ४॥ पामामाह।

"क्षुद्रा बह्व्यः स्रावयत्यः प्रदाहाः
पामेत्युक्ता पिड़काः कण्डुमत्यः"।

पिड़काः पीड़यन्ति इति पिड़का इति क्विपकादित्वान्निपात्यते॥५॥

कच्छूमाह।

"सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छ्वया स्फिचोश्च"॥

सैव पामा। स्फोटैर्भृशदुःखैः। स्फिचौ प्रोथौ॥६॥ दद्रूमाह।

"सकण्डूरागपिड़कं दद्रूमण्डलमुद्गतम्"॥

दद्रूमण्डलं मण्डलरूपेणोत्पद्यते। उद्गतमुच्छ्रितम्॥७॥ विस्फोटमाह। "स्फोटाः श्यावारुणा भासा विस्फोटाः स्युस्तमुत्वचः॥८॥ किटिभमाह। "श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम्"। किणखरस्पर्शं किणः शुष्कव्रणस्थानं तद्वत् कर्कशस्पर्शम्॥ परुषं रूक्षम्॥९॥ अलसकमाह।

"कण्डूसंस्पर्शैः सरागैश्च गण्डैरलसकाङ्कितम्"।

गण्डैर्भृशपिड़काभिः। चितं विचेष्टितम्॥१०॥

शतारुषमाह।

"रक्तं श्यावं सदाहार्त्तिशतारुः स्याद्बहुव्रणम्"॥११॥

अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह। तत्र रसगतस्य लक्षणमाह।

"त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते। त्वक्स्रावो रोमहर्षश्च स्वेदस्रातिप्रवर्त्तनम्"॥

त्वक्शब्देनात्र रस उच्यते। धातुप्रसादात् त्वक्स्रावाच्च। त्वक्स्रावः स्पर्शाज्ञत्वम्। त्वक्स्राव इत्यादिकं केचिदत्र रक्तगतस्य लिङ्गं मन्यन्ते॥१॥

रुधिरगतमाह।

"कण्डूर्विपूयकस्यैव कुष्ठे शोणितसम्भवे"।

विपूयः विस्फोटेषु पूयः॥२॥ मांसगतमाह।

"बाऽल्यं रक्तशोथश्च कार्कश्यं पिड़कोद्गमः। तोदः स्फोटाः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते"॥

बाऽल्यं कुष्ठस्य पुष्टिः। पिड़कोद्गमः क्षुद्रपिड़कोद्गमः। स्फोटाः दृष्टपिड़काः। स्थिरत्वं संग्रहचारित्वम्॥३॥ मेदोगतमाह।

"कौण्ठ्यं गतिच्युतोऽङ्गानां सम्भेदः क्षतसर्पणम्। मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च"॥

कौण्ठ्यं स्तब्धनाशः। अङ्गानां सम्भेदः अङ्गभङ्गः। क्षतसर्पणं क्षतप्रसरणम्। प्रागुक्तानि रक्तमांसगतलिङ्गानि॥४॥ अस्थिमज्जगतमाह।

"नासाभङ्गोऽक्षिरोगश्च क्षतेषु क्रमिसम्भवः। स्वरोपघातः पिड़का भवेत् कुष्ठेऽस्थिमज्जगे"॥५॥६॥

शुक्रगतमाह।

"दम्पत्योः कुष्ठबाऽल्याद्दुष्टशोणितशुक्रयोः। यदपत्यं तयोर्जातं क्लेयं तदपि कुष्ठितम्"॥

दम्पत्योः स्त्रीपुरुषयोर्दुष्टशोणितशुक्रयोर्यदपत्यं तयोर्जातमिति॥८॥ *॥ ननु शुद्धशोणितशुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयोः कथमपत्योत्पत्तिः। यत आह सुश्रुतः।

"वामाग्निमुखसंयोगे शुद्धशोणितशुक्रजः। गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते"॥

इति। अन्यच्च। वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः। इति। उच्यते। गर्भोऽपि शुद्धो बोद्धव्यः॥ अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति पङ्गुखञ्जान्धबधिरादीनां सम्भवात्। शोणितमत्रार्त्तवम्। कुष्ठितं कुष्ठं संजातमस्येति तारकादित्वादितच्। शुक्रार्त्तवगतं कुष्ठमपत्येन व्यज्यते इति तात्पर्यम्॥ *॥ कुष्ठेषूच्यन्ते वातादि दोषविशेषमाह।

"खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम्। पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम्॥ कफात् क्लेदि घनं स्निग्धं सकण्डू श्वैत्यगौरवम्। द्विलिङ्गद्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्"॥

खरं कर्कशम्। श्यावारुणं श्यावं चारुणञ्च। प्रकुपितं क्लेदपूतिबुद्बुदम्। क्लेदि आर्द्रतायुक्तम्। घनं पुष्टम्॥ *॥ साध्यत्वादिकमाह।

"साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्। मेदोगं द्वन्द्वजं जाप्यं वर्ज्यं मज्जास्थिसंश्रितम्॥ क्षमिक्षुद्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम्"।

वातश्लेष्माधिकञ्च यत् एतेन सिद्धैककुष्ठगजचर्म्मविपादिकाकिटिभालसकानि साध्यानि। मज्जप्रत्यासन्ना शुक्रगतमप्यसाध्यम्। क्षमिक्षुदाद्यपि वर्ज्यमित्यन्वयः॥ *॥ अरिष्टमाह।

"प्रभिन्नं प्रस्रुताक्ष्णञ्च रक्तनेत्रं हतस्वरम्। पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्"॥

प्रभिन्नं विदीर्णम्। हतस्वरं घर्घरस्वरम्। पञ्चकर्म्मगुणातीतं असंजाताचमनादिपञ्चकर्म्मगुणम्॥ अथ त्वग्दूषिसाम्यात् कुष्ठभेदत्वाच्चैव श्वित्रमाह।

"कुष्ठैकसम्भवं श्वित्रं किलासस्मारुणं भवेत्। निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्"॥

कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत्॥ *॥ श्वित्रस्य भेदानाह। किलासस्मारुणं भवेत्। श्वित्रमेव रक्तमांसाश्रयात् किलासमरुणञ्च भवेदित्यर्थः॥ *॥ ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह। निर्दिष्टमपरिस्रावीति। श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफाख्येभ्यः एषणभूतेभ्य उद्भवो यस्य तत्। अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्। कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवतीति भेदः॥ *॥

दोषभेदेन लक्षणभेदमाह।

"वातादूरुस्फारुणं पित्तात्ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि कफात्क्लेदि घनं गुरु॥ सकण्डूकं क्रमाद्रक्तं मांसमेदःसु चादिशेत्। वर्णौ नैवेदृशुभयं कुष्ठं तच्चोत्तरोत्तरम्"॥

उरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं पुष्टम्। क्रमाद्रक्तं मांसमेदःसु चादिशेत्। तथा च चरकः।

"अरुणं रक्तगे वाते ताम्रं पित्ते पयं गते। श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्"॥

उभयं द्विविधमपि श्वित्रं वर्णेन दृष्टगेव अरुणं ताम्रं श्वेतञ्च। दोषभेदात् द्विविधं दोषजं प्रधानञ्च। तथा च भोजः॥ श्वित्रन्तु द्विविधं विद्याद्दोषजं प्रधानं तथा"। इति॥ *॥

श्वित्रं साध्यमसाध्यञ्चाह।

"अशुक्लरोमावहुलमसंस्रष्टमथो नवम्। अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"॥

अवहुलं तनु। अन्यच्च।

"गुह्यपायितकौष्ठेषु जातमप्यचिरन्तनम्। वर्ज्यनीयं विशेषेण किलासं सिद्धिमिच्छता"॥

गुह्यं मेहनं भगञ्च। तलमत्र पादतलम्। सुश्रुतेनान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात्। अचिरन्तनं नवमपि॥ *॥ कुष्ठस्य संसर्गजत्वे प्रसङ्गेनान्यानपि संसर्गजान् रोगानाह।

"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्। एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥ कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्"॥

प्रसङ्गात् प्रकर्षेण सङ्गः प्रसङ्गो मैथुनं तस्मात्। गात्रसंस्पर्शात् तर्हि मैथुनादिति विशेषार्थम्। वस्त्रमाल्यानुलेपनात् एकस्मादेव। शोषो यक्ष्मा। औपसर्गिकरोगाः प्रीतलादयः॥ *॥ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह।

"म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत्। नातो निष्ठुरतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्"॥

एतावता कुष्ठिनां कुष्ठं सर्व्वथा प्रतिकरणीयं न तदुपेक्षणीयम्॥

अथ कुष्ठस्य चिकित्सा।

"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु। पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनश्चेष्टम्"॥

"पथ्याकरञ्जसिद्धार्थनिम्बावल्गुजसैन्धवैः। विड़ङ्गसहितैः पिण्डैर्लेपो मूत्रेण कुष्ठजुत्"॥

अवल्गुजः वकुचीति लोके। पथ्यादिर्लेपः॥ *॥

"सोमराजीभवं चूर्णं पट्टङ्गवेरसमन्वितम्। उद्वर्त्तनमिदं हन्ति कुष्ठे रागक्लतासदम्"॥

सोमराजी वकुचीति लोके। सोमराज्युद्वर्त्तनम्॥

"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्। मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः॥*॥ पुण्यकाले तु पुष्यायां पलकाले पलानि च। संस्कृ्त्य पिष्टमर्द्धस्थं त्वक्पत्राणि दलानि च॥ स्थिरत्वाणि समाहृत्य भागिकानि प्रकल्पयेत्। त्रिफला घृतयुक्ता ब्राह्मी खदिरङ्गाबकरञ्जयः॥ विड़ङ्गसारवाराहीशोहचूर्णान्विताः समाः। निम्बादयावल्गुजकव्याधिघाताः सप्तकृत्वाः॥ कुष्ठमिश्रयवाः पाठा चूर्णमेषान्तु संहृतम्। खदिरासननिम्बानां घनक्वाथेन भावयेत्॥ सप्तधा पयसिम्बन्तु भार्कवस्य दलेन च। स्निग्धः शुद्धतनुर्जीमान् योजयेत्तच्छ्रमोदनः॥ मधुना तिलतैलेन खदिरासनवारिणा। लेढ्यानुखाम्लसा वापि कोलदृढा यवं भवेत्॥ जीर्णे तस्मिन् समश्नीयाद् स्निग्धं लघुहितञ्च यत्॥

विचर्चिकोदुम्बरपुण्डरीक-
कपालदद्रूक्रिटिभालसादि।
घृतारुषिस्फोटविसर्पभाजाः
कफप्रकोपं त्रिविधं किलासम्॥
भवन्दरक्षीपदवातरक्त-
जङ्घान्यखञ्जीव्रणगण्डीर्षरोगान्।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविष मूलविषं निहन्ति॥
शूनोदरः सिंहकशोदरः स्यात्
सुस्निग्धसन्धिर्मधुनोपयोगात्।
सदोषरोगादपि ये दशन्ति

सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः" ॥

अयमर्थः। निम्बस्य फल-पुष्प-त्वक्-पत्र-मूलानि सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि भृङ्गराजस्य रसेन सप्तवारान् भावयेत्। त्रिफलादीनि पाठान्तानि समुदितान्येकभागानि चूर्णितानि खदिरासननिम्बानां निर्विड्ढाथेन भावयेत्। ततः सर्व्वमेकीकृत्य मध्वादिनावलिह्यात्। पथ्यनिम्बावलेहः। * ।

"अग्निलेखाभवल्लं तावद्विरिञ्चस्य गुग्गुलोर्द्वयं च।
ताप्यस्य पलत्रितयं द्वे लोहस्याक्षयीकायाः ॥
त्रिफलाकरञ्जपल्लवखदिरगुडूचीत्रिवृद्दन्त्यः।
मुक्ताविड्वरजनीकुटजत्वक्निम्बवह्निसम्भाकाः ॥
एते रचिताः वटिकां मधुघृतमिश्रां गिलेत् प्रातः।
गोमूत्रेण च कुष्ठं नुदत्यशेषवातमचिरेण ॥
श्वित्राणि पाण्डुरोगं विषमानुदरप्रमेहगुल्मांश्च।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना"।

अग्निलेखा सोमराजी। गिरिजस्य शिलाजतुनः। ताप्यस्य सवर्णमाक्षिकस्य। आवल्लिका मुण्डी इति लोके। स्वायम्भुवो गुग्गुलुः। * ।

"चित्रकं त्रिफला व्योषमजाजी कारवी वचा।
सैन्धवातिविषे कुष्ठं चव्यैलायवशूकजम् ॥
विड्वराव्यजमोदा च मुस्ता चामरदारु च।
यावन्त्येतानि सर्व्वाणि तावन्मात्रान्तु गुग्गुलुम् ॥
सङ्गृह्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक्।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ॥
हन्त्यष्टादश कुष्ठानि क्षमीन् दुष्टव्रणानि च।
यक्ष्मार्शोविकारांश्च मुखानयगलग्रहान्।
स्रग्रसीमक्षिभग्नञ्च गुल्मञ्चापि वियच्छति।
व्याधीन् कोष्ठगतांश्चापि जयेदिष्णुरिवासुरान्" ॥

एकविंशतिको गुग्गुलुः। * ।

"वातरक्ताधिकारोक्तः पुरः कैशोरकाविधः।
कुष्ठानां वातरक्तानां नाशाय परमौषधम्" ॥

कैशोरको गुग्गुलुः। * ।

"भल्लातकं प्रस्थयुगं क्षित्त्वा द्रोणजले क्षिपेत्।
प्रस्थद्वयं गुडूच्याश्च क्वाथं तत्राम्भसि क्षिपेत्।
चतुर्थांशावशेषन्तु कषायमवतारयेत्।
वस्त्रपूते कषाये च वक्ष्यमाणानि निःक्षिपेत्।
सरावमात्रं गोसर्पिर्गोदुग्धस्याढकं तथा।
सितां प्रस्थमितां दद्यात् प्रस्थार्द्धं माक्षिकं क्षिपेत्॥
सर्व्वाण्येकत्र भाण्डे तु पचेदृक्षदग्निना घनैः।
सर्व्वद्रव्ये घनीभूते पावकादवतारयेत् ॥
तत्र क्षेप्याणि चूर्णानि ब्रूमो विल्वमितांशतः।
वाकुची चाथ दन्त्याः पिप्पलीर्द्वे हरीतकी ॥
धात्री रात्रिश्च मञ्जिष्ठा मरिचं नागरं कणा।
यवानी सैन्धवं मुस्तं त्वगेला नागकेशरम्।
पर्पटः पत्रकं बालमुशीरं चन्दनं तथा।
गोक्षुरस्य च बीजानि कर्च्चूरो रक्तचन्दनम्।
एषां पलार्द्धमानानां चूर्णमेषामिह क्षिपेत्।
पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि।
जयेदवश्यं रोगोऽयं कुष्ठानि निखिलान्यपि।
वातरक्तानि सर्व्वाणि सर्व्वाण्यर्शांसि मेवितः ॥
व्यायाममातपं वह्निमस्रं मांसं दधि स्त्रियम्।
तैलाभ्यङ्गं तथाध्वानं नरो भल्लातके त्यजेत्" ॥

इति अमृतभल्लातकावलेहः। * ॥

"निम्बं गोपारुणा कट्वी व्याघ्री त्रिफला घनम्।
पर्पटावल्गुजानन्ता वचा खदिरचन्दनम् ॥
पाठा मुरुष्टी यष्टी भार्गी वासा भूनिम्बवत्सकम्।
श्यामेन्द्रवारुणी मूर्व्वा विड्वङ्गेन्द्रयवानलम् ॥
हस्तिकर्णोऽमृता द्रेका पटोलं रजनीद्वयम्।
कषायरञ्जवसनाङ्कल्क्यावेचोऽटापलम् ॥
मञ्जिष्ठा-लाङ्गली रास्ना गन्धमालाः पुनर्नवा।
दन्ती विजयसारश्च भृङ्गराजः कुरण्टकम् ॥
अर्कोठकं च प्राखोटं द्विपलांशं पृथक् पृथक्।
यष्टीयासानि सर्व्वाणि जलद्रोणे पचेच्छनैः ॥
अष्टमांशावशेषन्तु कषायमवतारयेत्।
विधाय वाससा पूतं स्थापयेद्भाजने दृढ़े ॥
भल्लातकसहस्राणि क्षिप्त्वा चीर्णमृणेऽभ्रसि।
पचेदष्टावशेषन्तु कषायमवतारयेत्।
तत्र वल्लेण संशोध्य दौ कषायौ विमिश्रयेत्।
गुड़स्य तु तुलां दत्त्वा लेहवत् साधु साधयेत् ॥
भल्लातकसहस्राणि तत्र बीजानि विक्षिपेत्।
त्रिकटु त्रिफला मुस्तं विड्ङ्गं चित्रकं तथा।
सैन्धवं चन्दनं कुष्ठं दीप्यकञ्च पलं पृथक्।
सौगन्ध्यर्थं क्षिपेत्पश्चात् चातुर्जातं पलं पलम् ॥
महाभल्लातको ह्येष महादेवेन भाषितः।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोगतः।
श्वित्रमौडुम्बरं दद्रूमष्टह्नज्जिह्मं सकाकणम्।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ॥
कण्डूं कापालकं कुष्ठं पामानञ्च विपादिकाम्।
वातरक्तं षड़र्शांसि पाण्डुरोगं व्रणं क्षमीन् ॥
रक्तपित्तमुदावर्त्तं कासं श्वासं भगन्दरम्।
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ॥
नियन्त्रणन्तु कथितो विहाराहारमैथुनैः।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ॥
अनुपानं प्रयोक्तव्यं क्षिप्तातोयं पयोऽथवा।
भोजने तु सदा त्याज्यमुष्णमम्लं विशेषतः"।

गोपां गां पातीति गोपा गोपकन्या श्वेत साउ इति लोके। यत आह निघण्टुः "शारिवाशारदास्फोटा गोपकन्या प्रतानिका" इति। तद्वाचको गोपीशब्दश्च। यत आह। गोपी श्यामा शारीवा स्यादनन्तोत्पलशारिवेत्यमरः॥ गोपाङ्गना गोपवल्ली लताङ्गा काण्डशारिवेति मदनपालः। अथवा अतीस। अवल्गुजः सोमराजी। अनन्ता दुरालभा। चन्दनं श्वेतम्। भार्ग्या अलाभे कण्टकारीमूलं ग्राह्यात्। श्यामा कृष्णा साउ। हस्तिकर्णः हस्तिकर्ण। द्रेका वकाइनि। सप्ताङ्गः कृतिवन। कल्क्यावेचः जलवेतस। उच्चटापलं शारक्तगुडूचीपलम्। कुरण्टकः पीतपुष्पकटसरैया। दीप्यकः यवानी। महाभल्लातकः॥ *।

"मञ्जिष्ठा निम्बा तिक्ता वचा दारु निशामृता।
निम्बत्वचां क्षतः क्वाथः सर्व्वकुष्ठानि बाधते" ॥

इति बृहन्मञ्जिष्ठादिक्वाथः॥ * ।

"मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिचुमर्द्दकः।
हरीतकी हरिद्रा च धात्री वासा गृतावरी॥
बला नागबला यष्टीमधुकं त्वक्षीरकोऽपि च।
पटोलस्य लतोशीरं गुडूची रक्तचन्दनम्॥
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः।
वातरक्तस्य संहर्त्ता कण्डू मण्डलखण्डनः"॥

इति मध्यममञ्जिष्ठादिक्वाथः। * ।

"मञ्जिष्ठा कुटजामृता घनवचायुरुष्टीहरिद्राद्वयं
त्वग्दारुद्वयपटोलकुण्डकटुकाभार्गीविड़ङ्गाग्निकम्।
मूर्व्वादारुकलिङ्गभृङ्गमगधाव्यायन्तिपाठावरी।
गायत्रीत्रिफलाकिरातकमहानिम्बासनारग्वधम्॥
श्यामावल्गुजचन्दनं वरणकं दन्ती च प्राखोटकं
वासा पर्पटसारिवा प्रतिविषानन्ता विशाला जलम्॥
मञ्जिष्ठादिरयं कषायमिति यः संसेवते तस्य तु
त्वग्दोषा ह्यचिरेण यान्ति विलयं कुष्ठानि चाष्टादश।
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्तामया
वीसर्पश्वयथि शून्यता नयनजा रोगाः प्रशाम्यन्ति च"॥

अरिष्टः निम्बः। कलिङ्गमिन्द्रयवम्। भृङ्गं भङ्गरा। वरी गृतावरी। गायत्री खदिरः। असनः विजयसारः। श्यामा प्रियङ्गुः। चन्दनञ्च रक्तग्राह्यम्। सारिवा साउ। अनन्ता दुरालभा। विशाला इन्द्रवारुणी। जलं नेचवाला।

इति बृहन्मञ्जिष्ठादिक्वाथः। * ।

"मरिचं त्रिवृता मुस्ता हरितालं मनःशिला।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम्॥
विशालां करवीरञ्च क्षीरमर्कसमुद्भवम्।
गोमयस्य रसं कुर्य्यात् प्रत्येकं कर्षसंमितम्॥
विषस्यार्द्धपलं देयं तैलं प्रस्थमितं कटु।
पचेच्चतुर्गुणे क्षीरे गोमूत्रे द्विगुणे तथा॥
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम्।
एतस्याभ्यङ्गतः श्वित्रं विवर्णं तत्क्षणात् भवेत्।
तैलमेतत् जयेत् कण्डूं श्यामां सिध्मं विचर्चिकाम्।
पुण्डरीकं तथा दद्रुं शून्यतां नित्यमेविनाम्॥

इति लघुमरिचाद्यं तैलम्॥ * ।

"मरिचं त्रिवृता दन्ती क्षीरमार्कगृहद्वसः।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम्॥
विशाला करवीरश्च हरितालं मनःशिला।
श्वित्रकं जाङ्गली मुस्ता विड़ङ्गं चक्रमर्द्दकः॥
क्षीरीवः कुटजो निम्बः सप्तपर्णोऽमृता बुधी।
सम्याको नक्तमालश्च खदिरो वाकुची वचा।
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत्।
आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम्।
श्लक्ष्णपाचे लोहपात्रे वा श्लक्ष्णैर्मृद्भिश्च पचेत्।
मरिचाद्यमिदं तैलं महर्षिभिरुदीरितम्॥
अभ्यङ्गेतेन तैलेन श्वित्रयेत् लोहितान् व्रणान्।
श्यामाविचर्चिकादद्रुकण्डूविस्फोटकानि च॥
वली च पलितं छाया नीलं व्यङ्गं तथैव च।
अभ्यङ्गेन प्रशाम्यन्ति सौकुमार्यञ्च जायते॥
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते।
तासामपि जरां प्राप्य न स्यातां स्खलितौ स्तनौ॥
वज्रीवर्षेणुरुक्षो वा गजो वा वायुपीडितः।
भिषिरभ्यङ्गनस्यस्य भवेन्मारुतविक्रमः"॥

क्षुद्रकु

ज्योतिष्मतो मालकङ्गनी इति लोके ।

इति महामरिचादितैलम् ॥ * ॥

"तालकस्य तु पत्राणि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्यैव तद्ग्राह्यं हरितालं चिकित्सकैः ॥
पुनर्नवायाः सरसे तालकं तद्विमर्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ॥
कुर्वीत चक्रिकां तां तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्तारक्षारे स्थाल्यां गलावधि ॥
पूरयेच्च ततः क्षारं दृढयेत् पीड़नेन हि ।
क्षारस्योपरि तां दद्यात् तालकस्य तु चक्रिकाम् ॥
तत आच्छादनं दत्त्वा मुद्रां कृत्वा विशोषयेत् ।
स्थाल्यां शुल्लां निधायाग्निममन्दं ज्वालयेत् भिषक् ॥
निरन्तरमहोरात्रपञ्चकं तेन सिध्यति ।
खाङ्गशीतं समुत्तार्य्य गृह्णीयाद्रसमुत्तमम् ॥
तालकेश्वरनामायं सुक्तो गुल्मामिनो रसः ।
गुड़ूच्यादिकषायेण गदानेतान् विनाशयेत् ॥
अष्टादशापि कुष्ठानि वातरक्तं तथोद्धतम् ।
फिरङ्गदेशजं रोगं दुस्तरञ्च व्यपोहति ॥
एतद्भेषजसेवी तु लवणाम्लौ विवर्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः" ॥

इति तालकेश्वरो रसः ॥ * ॥

"तालताप्यशिलासूतटङ्गं सिन्धुसंयुतम् ।
गन्धार्कौ दिगुणौ सूताज्जम्बीराद्भिः प्रमर्दयेत् ॥
वड़ङ्गं पुटितं मोढ़ा भूधरे सकलं त्विदम् ।
षट्पलं त्रिपलं ताम्रं लोहभस्म चतुष्पलम् ।
जम्बीराद्भिर्दिनं पृष्टं त्रिशृदंशं विषं क्षिपेत् ।
अस्य मात्रद्वयं खादेन्मधुघृतसंयुतम् ।
मध्व्यैर्व्वाकुचीबीजैः कर्षं जिह्यात्ततः परम् ।
तालकेश्वरनामायं सर्व्वकुष्ठहरो रसः" ।
अर्कौ मारितं ताम्रम् । द्वितीयतालकेश्वरो रसः ॥ * ॥

"रसो वलिस्ताम्रमयः पुरोऽग्निः
शिलाजतु स्यादिषतिन्दुकञ्च ।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयञ्च ॥
संमर्द्य सर्व्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात् ।
कर्षं भजेत् प्रत्यहमस्य पथ्यं
शाल्योदनं दुग्धमधुव्रतञ्च ॥
विशीर्णकर्णाङ्गुलिनासिकोऽपि
भवेदनेन स्मरतुल्यमूर्त्तिः ।
दारापरित्याग इह प्रदिष्टो
जलौदनं तत्र निबद्धमूले" ॥

ताम्रमयञ्च मारितम् । पुरो गुग्गुलुः । अग्निश्चित्रकम् । विषतिन्दुकः कुचिला । वरा त्रिफला । रसादि त्रिफलान्तं सर्व्वं तुल्यम् । गगनमभ्रकम् । करञ्जबीजञ्च पृथक् चतुर्गुणं रसात् । तत्र कुष्ठे वड़मूले सति जलौदनमेव पथ्यम् ।

इति गलत्कुष्ठारिरसः ॥ * ॥

"अथ नागवधाख्यस्य रसस्य विधिरुच्यते ॥
यः पुरा मुनिवरैरुदाहृतो
यत्किञ्चित्कजनैः समाहृतः ।
यस्तु कुष्ठपरमोषकारको
नागमारणविधिः स लिख्यते ॥
सुपक्वां स्थालिकामेकामाढ़काम्बुघृतिच्छमाम् ।
गुड़चूर्णकृतैः पङ्क्तैरागलं लेपयेद्बहिः ॥
गन्धकं भिषगानीय शरावमितमुत्तमम् ।
चूर्णयित्वा तदर्द्धन्तु तस्यां स्थाल्यां प्रसारयेत् ॥
शरावार्द्धस्य ताम्रस्य पत्राण्यतितनूनि च ।
स्थाल्यां यद्गन्धकं तस्मिन्नुपर्य्युपरि धारयेत् ॥
शरावार्द्धस्य सीसस्य पत्राणि च तनूनि च ।
धारयेत्ताम्रपत्राणामुपर्य्येव तथैव च ॥
गन्धकस्य शरावार्द्धं पत्राणामन्तरान्तरा ।
दत्त्वा तस्यावशेषन्तु सर्व्वेषामुपरि क्षिपेत् ॥
ततः पिधानं दत्त्वा तु विदध्यात् सन्धिमुद्रणम् ।
गुड़ं चूर्णञ्च खदिरं मिश्रयेत्तेन मुद्रयेत् ॥
मुद्रां संशोष्य तां स्थालीं शुल्लग्रामुपरि धारयेत् ।
तदधो ज्वालयेदग्निं द्वादशप्रहरावधि ॥
खाङ्गशीतं समुत्तार्य्य ततो निष्काश्य चौषधम् ।
श्लिलायां चूर्णयित्वा तु वस्त्रपूतञ्च कारयेत् ॥
त्रिद्रोणजलयोग्यन्तु विशालास्यं महाघटम् ।
गुड़चूर्णकृतैः पङ्क्तैरागलं लेपयेद्बहिः ॥
सर्पः षड्यङ्गुलायामः सार्द्धषड्यङ्गुलोऽथवा ।
स्फोटिकः कृष्णवर्णः स्यात् किं वा गोधूमवर्णवान् ॥
वधस्तस्य विधातव्यो यथा देहो न भिद्यते ।
तालकं सदलं यत्तच्चूर्णयेत् कुड़वद्वयम् ।
विषं पलमितं क्षुण्णं दत्त्वा दत्त्वान्तरान्तरम् ।
हरितालस्य चूर्णेन पूरयेद्भृङ्गगोदरम् ॥
विषं पलमितं क्षुण्णं वाकुचीं पलसंमिताम् ।
भल्लातकं सुपक्वं यत् प्रस्थमैन्द्रयवं तथा ॥
सर्व्वाणि सम्यगास्तीर्य्य धारयेत महाघटे ।
तेषामुपरि सर्पञ्च धारयेत् कुण्डलीकृतम् ॥
सर्पस्योपरि संक्षिप्य धार्य्याण्येतानि पीड़नैः ।
सनालमर्कपत्रं तु शरावयुगलं क्षिपेत् ॥
खुहीदलं सनालञ्च क्षिपेत् प्रस्थमितं तथा ।
वटप्ररोहं प्रस्थं च कुमारीं प्रस्थसंमिताम् ॥
दत्त्वा पिधानं चूर्णेन गुड़ेन खदिरेण च ।
मुद्रयेत् सह वस्त्रेण मृदा कुटितयापि च ॥
मुद्रां संशोष्य शुल्लाग्रान्तु धारयेत्तं महाघटे ।
तदधो ज्वालयेदग्निं याममेकं यथौदने ॥
ततो हठाग्निर्दातव्यो यावत् स्युः प्रहरा दश ।
पुनः प्रहरमेकञ्च वह्निं दद्याद्यथौदने ॥
ततो लौहे कटाहे तु शरावत्रितयोन्मिते ।
गोघृतं प्रक्षिपेत् सर्व्वमौषधं यट्टङ्कितं स्मितम् ॥
दत्त्वाग्निं चालयेत्तावद्यावदुत्क्लिष्टतेऽनलः ।
भेषजं च भवेच्चेतं ततस्तस्मिन् परिक्षिपेत् ॥
भल्लाया: स्फाटिकाख्याया द्वे पले तत्र निःक्षिपेत् ।
भल्लस्य टङ्कणस्यापि पलयुग्मञ्च निःक्षिपेत् ॥
ततः प्रहरमेकं तच्चालयेच्छिक्कोपरि ।
ततस्ताम्रञ्च सीसञ्च मिश्रयित्वावतारयेत् ॥
रसो नागवधाख्योऽयं विधिनानेन सिध्यति ।
आदौ गुल्मामिनं खादेत्तावन्मरिचसंयुतम् ॥
क्रमेण वर्द्धयेत्तावद्यावद्गुल्माचतुष्टयम् ।

क्षुद्रकु

वर्द्धयेन्मरिचञ्चापि तथैव हि यथारसम् ॥
यवस्य पर्पटीं भोक्तुं दद्याद्वा षष्टिकौदनम् ।
लवणं वर्जयेत् सप्त दिनानि गुल्मलोलुपः ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
सैन्धवं खादयेत्तेन तच्च सप्तदिनोपरि ॥
रसेनानेन नश्यन्ति कुष्ठानि सकलान्यपि ।
सन्निपाताश्च नश्यन्ति राजयक्ष्मादयस्तथा ॥
इति नागवधाख्यो रसः ॥ * ॥ अथ विस्फोटानां कुष्ठानां चिकित्सा । तत्र सिध्मस्य चिकित्सा ।
"कुष्ठं मूलकबीजं प्रियङ्गवः सर्षपा रजनी ।
एतत् कोशरयुक्तं निहन्ति च बहुवार्षिकं सिध्मम् ॥
शिरीषरसेन पिष्टं मूलकबीजं प्रलेपतः सिध्मम् ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ॥
दार्वी मूलकबीजानि तालकः सुरदारु च ।
ताम्बूलपत्रं सर्व्वाणि कार्षिकाणि पृथक् पृथक् ॥
श्लक्ष्णचूर्णन्तु श्राणाः स्यात् सर्व्वाण्येकत्र वारिणा ।
लेपयेत प्रलेपोऽयं सिध्मानां नाशनः परः" ॥ * ॥

अथ चर्म्मदलस्य चिकित्सा ।

"सलिले चाम्रपेशी तु किञ्चित्सैन्धवसंयुता ।
ताम्रपात्रे विनिर्घृष्टा लेपाच्चर्म्मदलापहा" ॥

आम्रपेशी आमचूर ।

"सलिलेन तु शुष्काणि दृष्ट्वा धात्रीफलानि च ।
कराभ्यां सुखमाप्नोति नरश्चर्म्मदलान्वितः" ॥ * ॥

अथ पामाचिकित्सा ।

"जीरकस्य पलं पिष्टं सिन्दूरार्द्धपलं तथा ।
कटुतैलं पचेदार्द्धां सद्यः पामाहरं परम्" ॥
कटुतैलं षट्पलमितम् । जीरकादितैलम् ॥ * ॥
"मञ्जिष्ठात्रिफलालाक्षाकुलीराचित्रगन्धकैः ।
चूर्णितैस्तैलमादित्यपाकं पामाहरं परम्" ॥

इति आदित्यपाकतैलम् ॥

"सैन्धवं चक्रमर्द्धञ्च सर्षपाः पिप्पली तथा ।
आरनालेन संपिष्टाः पामाकण्डूहराः स्मृताः" ॥ * ॥

अथ कच्छूचिकित्सा ।

"अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम् ।
नाशयेत् सार्षपं तैलं पामां कच्छूं विचर्चिकाम्" ॥

अर्कतैलम् ।

"मनःशिलाकं कासीसं गन्धाश्मा सिन्धुजन्म च ।
खर्जूरीरो शिलाभेदी सुरठी कुष्ठञ्च मागधी ॥
लाङ्गलीकरवीरञ्च द्रुमः क्षमिहानलः ।
दन्तीनिम्बदलैश्चैभिः पृथक्सर्षपमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम् ।
अर्कसीऽरुगुदुग्धेन पृथक्पलमितेन च ॥
गोमूत्रस्याढ़केनापि प्रनैर्मर्दनेन च ।
अभ्यङ्गेन हरेदेतत् कच्छूदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं लग्व्याधिरधिरामयान् ।
कच्छूराक्षसनामेदं तैलं हारीतभाषितम् ॥

इति कच्छूराक्षसनामतैलम् ॥ * ॥

अथ दद्रुचिकित्सा ।

"कुष्ठं क्षमिघ्नो दद्रुघ्नो निम्बासैन्धवसर्षपाः ।
कल्कपिष्टाः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।

क्षुद्रकु

त्रिभिः प्रलेपैरपि बद्धमूलं
दद्रुञ्च कुष्ठञ्च विनाशयन्ति ॥
कुठेरकः ममरी इति लोके।
लोके गन्धिलकाख्या सिद्धार्थश्च क्षुद्रीक्षीरम् ।
त्रयमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः ॥
अष्टगुणे गोतक्रे तानि प्रक्षेतानि सन्दध्यात् ।
दिवसचितयादूर्द्धं सम्यङ्निष्पेषयेत्तानि ॥
वन्योपलेन घृष्ट्वा दद्रुमालेपयेत्तेन ॥
सप्ताहाल्लेपोऽयं दद्रुमवश्यं विनाशयति" । * ॥

अथ श्वित्रस्य चिकित्सा ।

"विभीतकत्वक्फलपूजटागां
क्वाथेन क्षात्वा गुडसंयुतेन।
अवश्यगुजं बीजमपाकरोति
श्वित्राणि कृष्णान्यपि पुण्डरीकम्" ॥
मलपूः काकोदुम्बरिका । अवल्गुजः सोमराजी ।
"गुडवावल्गुजबीजं हरितालं तक्रतुर्यांशम् ।
मनःशिला तालकार्द्धा गुञ्जाफलमग्निमूलञ्च ॥
मूत्रेण गवां पिष्टं सुवर्णताकारकं श्वित्रस्य ।
श्वित्रकुष्ठ व्रजत्यस्तं पक्षार्द्धेनाधिकेन वा ॥
गिरिकर्ण्या सितायाश्च मूलेन परिलेपितम्" ॥
गिरिकर्णी नीलापराजिता ॥
"क्षारः सवाकुचीचूर्णो धात्रीखदिरसारयोः ।
शुक्लेन्दुकुन्दधवलं श्वित्रं संसेवितो हन्ति ॥
मथितेन पिबेत् चूर्णं काकोदुम्बर्यवश्यजम् ।
तैलाक्तो घर्म्मसेवी स्यात्क्षारी श्वित्रहृत् भवेत्" ॥
मथितं निर्ज्जलं विलोड़ितं दधि।
तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि।
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला पिप्पलमर्द्धञ्च दार्व्या पर्पटी ॥
पृथक् पलांशमुद्धृत्य सिंहिकायाः पलद्वयम् ।
जलाढ़कद्वये साध्यं यावत् पादावशेषितम् ॥
क्षाद्यमानञ्च मृद्वग्नौ घृतप्रस्थं विपाचयेत् ।
चतुष्पलं सोमराज्याः खदिरस्य पलं तथा ॥
पटोलमूलं त्रिफलां त्रायमाणां दुरालभाम् ।
कर्षार्द्धं कटुकं चापि कार्षिकं सूक्ष्मपेषितम् ॥
पलद्वयं कौशिकस्य शुद्धस्याक्ष प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादग्निरिवानलम् ॥
अष्टादशानां कुष्ठानां परमश्चैतदौषधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ॥
लोकानामुपकाराय श्वित्रकुष्ठादिरोगिणाम्" ॥

इति सोमराजीघृतम् ॥

"महौषधं महामेदा निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मचारिण्यवल्गुजम् ॥
हरिद्रे हरितालञ्च त्रिफला पीतगन्धकः ।
एतानि समभागानि विषार्द्धांशानि योजयेत् ॥
सर्पिश्च पलान्यष्टौ देवदारुरसं शुभम् ।
द्विगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ॥
ताम्रपात्रे तु संस्थाप्य शनैर्म्मृदग्निना पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ॥
अग्नौ त्विन्नन्तु निःशब्दं जलमुक्तं विचक्षणः ।
अभ्यङ्गपानयोर्योगादाशु सर्व्वान् गदान् जयेत् ॥
अष्टादशानां कुष्ठानां दद्रूणां श्वित्रिणां तथा ।

क्षुद्रचि

दुष्टनाड़ीषु मर्म्मणां स्नायिणां कीटिनां तथा ॥
अष्टक्षतावपरीता ये ये च व्यङ्गभिषङ्क्रियाः ।
सर्व्वग्रहविमुक्तानां ग्रीर्णाङ्गानां विशेषतः ॥
सर्व्वधातुगते कुष्ठे पतितं भूम्निरोरुहम् ।
घर्घराव्यङ्गघोषाणां तथा सर्व्वाङ्गवातिनाम् ॥
पानेऽभ्यङ्गे तथा नस्ये वस्तिकर्म्मणि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ॥
द्विसप्ताहप्रयोगेण पूर्णचन्द्रनिभाननः ।
जातकेशनखश्मश्रुर्भवति षोड़शवर्षवत् ।
अनङ्गसदृशः साक्षात् सर्व्वामयविनाशनः ।
एतत् घृतं महाश्रेष्ठं भार्गवेणावतारितम् ॥
मनुष्याणां हितार्थाय सर्व्वव्याधिहरं परम् ।
महामार्त्तण्डकमिदं घृतं सर्व्वामरार्चितम्" ॥
इति महामार्त्तण्डघृतम् ॥ * ॥ इति कुष्ठाधिकारः ॥ इति भावप्रकाशः ॥

क्षुद्रगोक्षुरकः, पुं, (क्षुद्रः गोक्षुरः । ततः स्वल्पार्थे कन् क्षुद्रगोक्षुर इव कायति इत्येके ।) गोक्षुरक्षुपभेदः। छोटा गोक्षुर इति हरचिकार इति च हिन्दी भाषा। तत्पर्य्यायः। त्रिकण्टकः २ करटी ३ षड्ङ्गः ४ बक्रकण्टकः ५ क्षुरः ६ गोकण्टकः ७ कण्टफलः ८ पलङ्कषा ९ क्षुद्रक्षुरः १० भल्लटकः ११ स्थलशृङ्गाटकः १२ वनशृङ्गाटकः १३ इक्षुगन्धः १४ स्वादुकण्टः १५। अस्य गुणाः। सुशीतलत्वम्। बलप्रदत्वम्। मधुरत्वम्। दृंहणत्वम्। क्षुधाग्निरोमेहविदाहनाशित्वम्। रसायनत्वम्। तत्र वृहतो गुणोत्तरत्वञ्च। इति राजनिर्घण्टः ॥

क्षुद्रघण्टिका, स्त्री, (घण्टा अल्पार्थे कन् टाप् इत्वञ्च ततः क्षुद्रा घण्टिका इति कर्म्मधारयः।) कण्ठलङ्कारविशेषः। घाघर इति घुङ्गुर इति च भाषा ॥ तत्पर्य्यायः। किङ्किणी २। इत्यमरः। २। ६। ११०॥ क्षुद्रघण्टी ३ प्रतिसरा ४ किङ्किणीका ५ कङ्किणी ६ कङ्किणिका ७ क्षुद्रिका ८। इति शब्दरत्नावली॥ घर्घरी ९। इति जटाधरः ॥ [इति राजनिर्घण्टः ॥

क्षुद्रघोणी, स्त्री, (क्षुद्रा घोणी ।) चिविल्लिकाक्षुपः ।

क्षुद्रचक्षुः, स्त्री, (क्षुद्रा चक्षुः सा इवाकृतिरस्याः ।) क्षुपविशेषः। तत्पर्य्यायः। चक्षुः २ चक्षूः ३ शुनकचक्षुका ४ तक्षसारभेदिनी ५ क्षुद्रा ६ कटुका ७ कटुपत्रिका ८। अस्या गुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। कषायत्वम्। दीपनत्वम्। शूलगुल्मार्शोविबन्धनाशित्वञ्च। इति राजनिर्घण्टः ॥ स्वल्पोऽत्र ॥

क्षुद्रचन्दनं, क्लो, (क्षुद्रं चन्दनमिति नित्यकर्म्मधारयः।) रक्तचन्दनम्। इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

क्षुद्रचिर्भिटा, स्त्री, (क्षुद्रा चिर्भिटा ।) गोपालकर्कटी। इति राजनिर्घण्टः ॥ (क्षुद्रचिर्भिटीति च क्वचित् दृश्यते ॥)

क्षुद्रच

क्षुद्रचूड़ः, पुं, (क्षुद्रा चूड़ा यस्य ।) पक्षिविशेषः । गोसालिक इति भाषा । यथा,—
"ध्रुवमल्लः क्षुद्रचूड़ो गूथलक्षश्च साल्किकः" ॥
इति शब्दचन्द्रिका ॥

क्षुद्रजन्तुः, पुं, (क्षुद्रः जन्तुर्जीवभेदः ।) घृतपदी । इति शब्दमाला ॥ स्वल्पप्राणिमात्रञ्च ॥ (आमलकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

क्षुद्रजातीफलं, क्लो, (क्षुद्रं जातीफलम् ।) आमलकम् । इति राजनिर्घण्टः ॥

क्षुद्रजीरः, पुं, (क्षुद्रः जीरः ।) स्वल्पजीरकः । इति शब्दचन्द्रिका । चुदिया जीरा इति भाषा ॥

क्षुद्रजीवा, स्त्री, (क्षुद्रा जीवा कर्म्मधारयः ।) जीवन्ती । इति राजनिर्घण्टः ॥

क्षुद्रता, स्त्री, (क्षुद्रस्य भावः । क्षुद्र + तल् टाप् च ।) क्षुद्रत्वम् । इति व्याकरणम् ॥

क्षुद्रत्वं, क्लो, (क्षुद्रस्य भावः । क्षुद्र + त्वप्रत्ययः ।) अल्पता क्रूरता । अधमत्वम् । दरिद्रत्वम् ॥

क्षुद्रतुलसी, स्त्री, (क्षुद्रा तुलसीति नित्यकर्म्मधारयः ।) अर्जकः । स तु वर्व्वरीभेदः । इति राजनिर्घण्टः ॥

क्षुद्रदंशिका, स्त्री, (क्षुद्रा दंशिका ।) स्वल्पदंशकः । छोट डाँश इति भाषा । यथा,—
"पतङ्गिका पुत्तिका स्यात् दंशस्तु वनमक्षिका ।
प्राचिका चाल्पतन्त्रातिदंशी स्यात् क्षुद्रदंशिका" ॥
इति जटाधरः ॥

क्षुद्रदंशी, स्त्री, (दंश + ङीष् । क्षुद्रा दंशी ।) क्षुद्रदंशिका । इति जटाधरदर्पणतः ॥

क्षुद्रदुरालभा, स्त्री, (क्षुद्रा दुरालभा लतादिविशेषः ।) स्वल्पदुरालभाभेदः । तत्पर्य्यायः । मरुस्था २ मरुसम्भवा ३ विशारदा ४ अजभक्ष्या ५ अजादनी ६ उष्ट्रभक्षिका ७ कषाया ८ फलिहृत् ९ ग्राहिणी १० करभप्रिया ११ करभादनिका १२। अस्या गुणाः। गौल्यत्वम्। अम्लत्वम्। ज्वरकुष्ठश्वासकासश्रमनाशित्वम्। पारदशुद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥

क्षुद्रदुस्पर्शा, स्त्री, (दुःसहः स्पर्शो यस्याः दुस्पर्शा । क्षुद्रा दुस्पर्शा इति कर्म्मधारयः ।) अग्निदमनी । इति राजनिर्घण्टः ॥ (ज्ञेयास्या अग्निदमनीशब्दे विवृतिः ॥)

क्षुद्रधात्री, स्त्री, (क्षुद्रा धात्री ।) कर्कटवृक्षः । इति राजनिर्घण्टः ॥

क्षुद्रनासिकः, त्री, (क्षुद्रा नासिका नासा अस्य ।) स्वल्पनासायुक्तः । तत्पर्य्यायः । नः क्षुद्रः २ । इति हेमचन्द्रः ॥

क्षुद्रपत्रा, स्त्री, (क्षुद्रं पत्रं पर्ण यस्याः । ततष्टाप् ।) वाड़ेरी । इति हारावली ॥

क्षुद्रपत्री, स्त्री, (क्षुद्रं पत्रं अस्याः । ततो गौरादित्वात् ङीष् ।) वचा । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपनसः पुं, (क्षुद्रश्चासौ पनसश्चेति कर्म्मधारयः ।)

नकुचः । इति राजनिर्घण्टः ॥ खल्पकण्टाफलश्च ॥ (पर्य्यायोऽस्य यथा,—

"लकुचः क्षुद्रपनसो लकुचो डङ्ग इत्यपि" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपर्णः पुं, (क्षुद्रं पर्णं पत्रं यस्य ।) अर्जकः । इति राजनिर्घण्टः ॥ सूक्ष्मपत्रे त्रि ॥ (विवरणमस्यार्জ্জकशब्दे ज्ञातव्यम् ॥)

क्षुद्रपाषाणभेदा, स्त्री, (क्षुद्रा पाषाणभेदा इति नित्यकर्म्मधारयः ।) क्षुपविशेषः । क्षुद्रपाषाणभेदी इति ख्याता । तत्पर्य्यायः । चतुःपत्री २ पार्व्वती ३ नगभूः ४ अग्निकेतुः ५ गिरिभूः ६ कन्दरोद्भवा ७ शैलोद्भवा ८ गिरिजा ९ नगजा १० । अस्या गुणाः । व्रणकृच्छ्राश्मरीहरत्वम् । इति राजनिर्घण्टः ॥

क्षुद्रपिप्पली, स्त्री, (क्षुद्रा पिप्पली ।) वनपिप्पली । इति राजनिर्घण्टः ॥

क्षुद्रपोतिका, स्त्री, (क्षुद्रा पोतिका । नित्यकर्म्मधारयः ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रफलकः, पुं, (क्षुद्रं फलमस्य इति कप् ।) जीवनवृक्षः । इति शब्दचन्द्रिका ॥

क्षुद्रफला, स्त्री, (क्षुद्रं फलं अस्या इति टाप् ।) भूमिजम्बुः । इति शब्दमाला । इन्द्रवारुणी । गोपालकर्कटी । कण्टकारी । अग्निदमनी । इति राजनिर्घण्टः ॥

क्षुद्रबुद्धिः, त्रि, (क्षुद्रा अल्पा अधमा क्रूरा वा बुद्धिर्मतिर्यस्य ।) अल्पमतिः । क्रूरधीः । अधमचेतनः ॥

क्षुद्रमुस्ता, स्त्री, (क्षुद्रा मुस्ता इति कर्म्मधारयः ।) कसेरुः । इति राजनिर्घण्टः ॥ (कसेरुशब्दे ऽस्या गुणपर्य्याया ज्ञेयाः ॥)

क्षुद्ररोगः, पुं, (क्षुद्रः रोगः ।) खल्पव्याधिः । तस्य गणना यथा । पलितः १ इन्द्रलुप्तः २ दारुणकः ३ अरंषिका ४ हरिवेल्लिका ५ पनसिका ६ पाषाणगर्द्दभः ७ मुखदूषिका ८ व्यङ्गः ९ नीलिका १० वल्मीकः ११ कच्छा १२ गन्धिनाम १३ अग्निरोहिणी १४ विदारिका १५ चिप्पः १६ परिवर्त्तिका १७ अवपाटिका १८ गिरुद्धप्रकाशः १९ सन्निरुद्धगुदः २० दृष्टजकच्छः २१ अङ्घिपूतनः २२ गुदभ्रंशः २३ शूकरदंष्ट्रः २४ अलजी २५ अलसः २६ दारी २७ कदरः २८ तिलकालकः २९ मसकः ३० जतुमणिः ३१ न्यच्छः ३२ पद्मिनीकण्टकम् ३३ अजगल्लिका ३४ यवप्रख्या ३५ अन्त्रालजी ३६ विद्रधी ३७ इन्द्रवृद्धा ३८ गर्द्दभिका ३९ जालगर्द्दभः ४० कच्छपी ४१ अर्ब्बुदः ४२ । एषां मध्ये येषां लक्षणचिकित्सा पूर्व्वं न लिखिता ते चात्र लिख्यन्ते ॥ * ॥

अथ अरंषिकालक्षणमाह ।

"अरंषि बज्रवल्लाणि बज्रक्लोदीनि मूर्द्धनि ।
कफासृक्कृमिकोपेन तानि विद्यादरंषिकाम्" ॥

अरंषि व्रणानि । अथारंषिकायाश्चिकित्सा ।

"नीलोत्पलस्य किञ्जल्को धात्रीफलसमन्वितः ॥
यष्टीमधुकयुक्तश्च लेपाद्धन्यादरंषिकाम् ।
निम्बपाया रजो यष्टी मार्क्कवोत्पलसारिवा ।
सैन्धवं पक्षमेतैस्तु तैलं हन्यादरंषिकाम्" ॥

इति चिफलाद्यं तैलम् ॥ * ॥

अथाग्निरोहिणीलक्षणमाह ।

"कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहात् द्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सान्निपातिकाम्" ॥

सप्ताहादित्यादि वातपित्तकफाधिक्यापेक्षया बोद्धव्यम् । घ्नन्तीत्यनुपक्रान्ताः । उपक्रान्तास्तु साध्या एव । चरकेणाग्निरोहिण्याश्चिकित्साया उक्तत्वात् ।

तस्याश्चिकित्सा ।

"पित्तं वीसर्पविधिना साधयेदग्निरोहिणीम् ।
रोहिण्यां लङ्घनं कुर्य्याद्रक्तमोक्षणरूपताम् ॥
शरीरस्य च संशुद्धिं तान्तु रुद्धां परित्यजेत्" ॥ * ॥

अथ विदारिकालक्षणमाह ।

"विदारिकन्दवद्वृत्तो कक्षावङ्क्षणसन्धिषु ।
रक्तो विदारिकां विद्यात् सर्व्वजां सर्व्वलक्षणाम्" ॥

अत्र पिड़कामिति विशेष्यपदमध्याहरणीयम् ॥

अथ तच्चिकित्सा ।

"विदारिकायां प्रथमं जलौकायोजनं हितम् ।
पाटनञ्च विपक्वायां ततो व्रणविधिः स्मृतः" ॥ * ॥

अथावपाटिकालक्षणमाह ।

"अल्पीयसी यदा हर्षात् बलादूक्षेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्म्मेणुद्वर्त्तते बलात् ॥
मर्द्दनात् पीड़नाद्वापि शुक्रवेगविघाततः ।
यत्रावपाद्यते चर्म्म तां विद्यादवपाटिकाम् ॥
वातेन कर्कशा रूक्षा सूक्ष्मा क्षीणा रुगन्विता ।
पित्तेन पीता रक्ता वा दाहक्लथ्यासमन्विता ॥
श्लेष्मणा कठिना स्निग्धा कण्डुमत्यल्पवेदना" ॥

अल्पीयः अल्पतरं योनिच्छिद्रं यस्यास्ताम् । अवपाद्यते विदार्य्यते ।

अथ तस्याश्चिकित्सा ।

"श्लेष्मरोगेरिमां वैद्यश्चिकित्सेदवपाटिकाम्" ॥

अथ सन्निरुद्धगुदस्य लक्षणमाह ।

"वेगसन्धारणाद्वायुर्विकृतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मं द्वारं करोति हि ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदुस्तरम्" ॥

अथ तस्य चिकित्सा ।

"सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः ।
तथा निरुद्धप्रकाशक्रियापि कथिता हिता" ॥

अथाजगल्लिकालक्षणमाह ।

"स्निग्धा सवर्णा ग्रथिता निरुजा मृद्वसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका" ॥

ग्रथिता गुम्फितेव । मृद्वसन्निभा मृद्वाकृतिः ॥

अथ तस्याश्चिकित्सा ।

"तत्राजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिशौराष्ट्रिकाक्षारकल्कैस्त्वालेपयेन्मुहुः ॥
कठिना क्षारयोगैश्च द्रावयेदजगल्लिकाम् ।
श्यामालाङ्गलिकामूर्व्याकल्कैरपि विलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

अथान्त्रालजीलक्षणमाह ।

"घनामवक्त्रां पिड़कामुन्नतां परिमण्डलाम् ।
अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम्" ॥

घनां कठिनाम् । परिमण्डलां वर्त्तुलाम् । अल्पपूयां स्वल्पस्रावाम् ॥

अथ तस्याश्चिकित्सा ।

"अन्त्रालजीं यवप्रख्यां पूर्व्वं खेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

इति भावप्रकाशे क्षुद्ररोगाधिकारः ॥

(अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,—

"स्निग्धा सवर्णा ग्रथिता नीरुजा मृद्वसन्निभा ।
पिटिका कफवाताभ्यां बालानामजगल्लिका ॥
यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।
अवक्त्रान्त्रालजीत्यान्त्रोकपूया घनोन्नता ॥
ग्रथ्यथः पञ्च वा षड् वा कच्छपी कच्छपोन्नता ।
कर्णशष्कुल्यां समन्ताद्वा पिटिका कठिनोग्ररुक् ॥
शालूकाभा पनसिका शोफस्त्वल्परुजः स्थिरः ।
हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्द्दभः ॥
श्लाक्ष्णश्लीकण्टकाकाराः पिटिकाः सरुजो घनाः ।
मेदोगर्भा मुखे यूनां ताभ्यां च मुखदूषिकाः ॥
ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।
चीयते नीरुजैस्तैस्तैः शरीरं कफवातजैः ॥
पित्तेन पिटिकोत्तप्ता पक्वोदुम्बरसन्निभा ।
महादाहज्वरकरी विहता विहतानना ॥
गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।
मसूरमात्रास्तदर्य्यास्तत्संज्ञाः पिटिका घनाः ॥
ततः कफतराः स्फोटा विस्फोटाख्या महारुजाः ।
या पद्मकर्णिकाकारा पिटिका पिटिकान्विता ॥
सा विद्रधी वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥
कक्षेति कक्षासन्नेषु प्रायोदोषेषु सानिलात् ।
पित्तादूर्ध्वन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः ;
तादृशी महती ज्ञेया गन्धनामेति कीर्त्तिता ।
घर्म्मक्लेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः ॥
राजिकादर्शसंस्थानप्रमाणा राजिकाह्वया ।
दोषैः पित्तोल्बणैर्मन्दैर्विसर्पति विसर्पवत् ॥
शोफोऽपाकस्तनुस्ताम्रो ज्वरश्छर्द्ध्यालगर्द्दभः ।
मलैः पित्तोल्बणैः स्फोटा ज्वरिणो मांसदारुणाः ॥
कक्षाभागेषु जायन्ते येऽग्नाभाः सान्निरोहिणी ।
पक्षाद्वात्सप्तरात्राद्वा पञ्चाद्वा घ्नन्ति जीवितम् ॥
चिलिका पिटिका वृत्ता जचूर्द्धमिरिवेल्लिका ।
विदारी कन्दकठिना विदारी कक्षवङ्क्षणे ॥
भेदोऽनिलकफैर्ग्रन्थिः स्नायुमांसशिराश्रयैः ।
भिन्नो वसाद्यमध्याभं स्रवेत्स्रोत्यखोऽनिलः ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ॥
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥
तां स्रावयन्ति निचितां विन्द्यात्तच्छर्करार्ब्बुदम् ।
पाणिपादतले सन्धौ जचूर्द्धे वोपचीयते ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वद्वर्णरुजाभिमुखैः ।
रुग्दाहकण्डूक्लेदाढ्यो वल्मीकोऽसौ समस्तजः ॥
शर्करोन्मथिते मांसे क्षते वा कण्टकादिभिः ।

यस्मिः कोलवदुत्सन्नो जायते कदरन्तु तत् ॥
वेगसन्धारणाद्वायुरपानोऽपानसंश्रयम्।
अणूकरोति वाह्यान्तर्मार्गमस्य ततः शूकृत् ॥
क्षुक्षान्निर्गच्छति व्याधिरयं रुद्धगुदस्ततः।
कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम् ॥
पिप्पमत्ततरोगञ्च विद्यादुपनखञ्च तम्।
क्षण्णोऽभिघाताद्रूक्षस्य खरस्य कुनखो नखः॥
दुष्टकर्दमसंस्पर्शात् कण्टकोदान्वितान्तराः।
अङ्गुल्योऽलसमित्याऽऽख्यास्तिलाभास्तिलकालकान् ॥
क्षुद्राननेदनांस्त्वक्स्थान् मांसांस्तानेव चोन्नतान्।
मांसेभ्यस्तून्नततरांस्चर्म्मकीलान् सितासितान् ॥
तथाविधो जतुमणिः सहजो लोहितस्तु सः।
क्षुद्रां सितं वा सहजं मण्डलं लाञ्छनं समम् ॥
शोककोधादिकुपितादातपित्तान्मुखे तनु।
श्यामलं मण्डलं व्यङ्गं वक्त्रादन्यच्च नीलिका ॥
परुषं परुषस्पर्शं व्यङ्गं श्यानच्च मारुतात्।
पित्तात्ताम्रान्तमानीलं श्वेतान्तं कण्डुमत्कफात् ॥
रक्ताद्रक्तान्तमाताम्रं श्लोषं चिमचिमायते।
वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विदूष्यति।
ततस्त्वग् जायते पाण्डुः क्रमेण च विचेतना।
अल्पकण्डूरविक्लेदा सा प्रसन्निः प्रसन्नितः ॥
असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥
उत्कोठः सोऽनुबन्धस्तु कोठ इत्यभिधीयते।
प्रोक्ताः षट् त्रिंशदित्येते क्षुद्ररोगा विभागशः" ॥
इति वाभटे उत्तरस्थाने एकत्रिंशोऽध्यायः ॥

अतोऽस्य प्रतिषेधो यथा,—
"विस्रावयेज्जलौकोभिरपक्वामजगल्लिकाम्।
खेदयित्वा यवप्रख्यां विलयाय विलेपयेत्।
दाहकुष्ठमनोज्ञाख्यैरित्यापाषाणगर्दभात्।
विधिस्तांस्त्वाचरेत् पक्वान् व्रणवत्साजगल्लिकान् ॥
रौद्रकुक्कुन्दरुवचाप्रलेपो मुखदूषिके।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः ॥
अशान्तौ वमनं नस्यं ललाटे च शिरात्यधः।
निम्बाम्बु वान्तो निम्बाम्बु साधितं पद्मकादके ॥
पिबेत् क्षौद्रान्वितं सर्पिर्निम्बारग्वधलेपनम्।
विद्रधादींस्तु जानाम्यांचिकित्सेन्निरिवेल्लिकान् ॥
पित्तवीसर्पवत्तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥
विलङ्घनं रक्तविमोक्षणञ्च
विरूक्षणं कायविशोधनञ्च।
धात्रीप्रयोगान् शिशिरप्रदेहान्
कुर्य्यात् सदा जालकगर्दभस्य॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत्।
मेदोऽर्बुदक्रियां कुर्य्यात् सृतरां शर्कराऽर्बुदे ॥
प्रहृतं सुबद्धच्छिन्नं सशोफं मर्म्मणि स्थितम्।
वल्मीकं हस्तपादे च वर्ज्ययेदितरत् पुनः ॥
शुद्धस्रावे हृते लिम्पेत् सपद्मारैवतामृतैः।
श्यामाकुलत्थिकामूलदन्तीपलाशसक्तुभिः ॥
पक्वे तु दुष्टमांसानि गतीः सर्व्वाश्च शोधयेत्।
शस्त्रेण सम्यगनु च क्षारेण क्वथनेन वा ॥
शस्त्रेणोत्कृत्य निःशेषं स्नेहेन कदरं दहेत्।
निरुद्धमधिवर्त्माख्यं रुद्धपाथोक्तिकित्सितम् ॥

पिप्पं शुद्धा जितोष्णार्त्तो साधयेच्छस्त्रकर्म्मणा।
दुष्टं कुनखमप्येवं चरणावलम्बे पुनः ॥
धान्याम्लसिक्तौकासीसपटोलीरोचनातिलैः।
सनिम्बपत्रैरालिम्पेद्हेत्तु तिलकालकान् ॥
माषांश्च सूर्य्यकान्तेन क्षारेण यदि वाग्निना।
तदुद्धृत्य शस्त्रेण चर्म्मकीलजतुमणी ॥
लाङ्गलादिव्यधे कुर्य्याद् यथासन्नं सिराव्यधम्।
लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षत्वगङ्कुरैः ॥
व्यङ्गेषु चार्ज्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका।
लेपः सनवनीतावा श्वेताश्वखुरजामषी ॥
रक्तचन्दनमञ्जिष्ठा कुष्ठरोध्रप्रियङ्गवः।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥
द्वे जीरके क्षणातिक्षाः सर्षपाः पयसा सह।
पिष्टाः कुर्व्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा श्लक्ष्णनिस्तुषाः।
मसूराः क्षीरपिष्टा वा तोयक्षाराः श्लाक्ष्णिकाश्चकाः॥
स गुडः कोलमज्जा वा शृङ्गाटक क्षौद्रकल्कितः।
सप्ताहं मातुलुङ्गस्य कुष्ठं वा मधुनान्वितम् ॥
पिष्टा वाच्छागपयसा सक्षौद्रा मौक्षलीजटा।
गौरसर्षपमूलीमूल-युक्तं वा साज्यमाक्षिकम् ॥
जम्ब्वाम्रपल्लवाभस्तु हरिद्रे द्वे नवो गुडः।
लेपः सवर्णकृत् पिष्टं खरस्येन च तिन्दुकम् ॥
उत्पलपत्रं तगरं प्रियङ्गुकालीयकदम्बदरमज्जा।
इदमुद्वर्त्तनमास्यं करोति शतपत्रसङ्काशम् ॥
एभिरेवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत्।
यथादोषर्तुकान् लेपान् मधुकक्षीरसंयुतैः ॥
यवान् सर्व्वरसं रोध्रमुशीरं चन्दनं मधु।
घृतं गुडश्च गोमूत्रे पचेदादर्व्विलेपनात् ॥
तदभ्यङ्गान्निहन्त्याशु नीलिकाव्यङ्गदूषिकान्।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याह्वचन्दनम्।
न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेशरम् ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सतिलाढ़के।
पक्षा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥
लाक्षापत्तङ्गमञ्जिष्ठा यष्टीमधुककुङ्कुमैः।
अजाक्षीरदिगुणितं तैलस्य कुडवं पचेत् ॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान्।
हन्ति तन्नस्यमभ्यङ्गं मुखोपचयवर्णकृत् ॥
मञ्जिष्ठा प्रवरोद्भवन्तु वरिकालाक्षा हरिद्राद्वयं
नेपाली हरितालकुङ्कुमगदागोरोचनागैरिकम्।
पत्रं पाण्डुरटस्य चन्दनयुगं कालीयकं पारदं
पद्मं कनकत्वचं कमलजं बीजं तथा केसरम् ॥
सिक्थं तुत्थं पद्मकाद्योवसाज्यं
मज्जाक्षीरं क्षीरिवृक्षाम्बुचाम्भौ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशे
वक्त्रेच्छायामैन्दवीष्वासु धत्ते ॥
मार्कवस्वरसक्षीरतोयपिष्टानि नावने।
प्रसन्नौ वातकुपितौ कुर्य्याद्दाहञ्च वह्निना।
उत्कोठे कफपित्तोक्तं कोठे सर्व्वञ्च कौष्ठिकम्" ॥
इति वाभट उत्तरतन्त्रे द्वात्रिंशोऽध्यायः ॥
"समासेन चतुस्त्वारिंशत् क्षुद्ररोगा भवन्ति।
तद्यथा,—अजगल्लिका यवप्रख्याऽन्यालजी विद्रधी

कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका मांसाङ्कुरगर्दभो जालगर्दभः कक्षा विस्फोटकोऽग्निरोहिणी पिप्पं कुनखोऽनुशयी विदारिका शर्करार्बुदं मांसा विचर्चिका एकसा पाददारिकाकदरमलसेन्द्रलुप्तौ दारुणकोऽवंधिका पलितं मसूरिका यौवनपिड़का पद्मिनीकण्टको जतुमणिर्व्यङ्गकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकाशः निरुद्धगुदोऽहिपूतनं दृष्टिकर्कुगुदभंशश्चेति" ॥ इति सुश्रुते निदानस्थाने त्रयोदशेऽध्याये ॥ अत्रोक्तचिकित्सादिकं यथारोगं ज्ञेयम् ॥ * ॥

अस्य पथ्यापथ्यानि यथा,—
"क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु।
दोषान् दूष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक्॥
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः।
यथादोषं यथादुष्टं यथावस्थञ्च कल्पयेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ क्षुद्ररोगाधिकारः ॥

क्षुद्रवंशा, स्त्री, (क्षुद्रा वंशा।) वराहक्रान्ता। इति केचित्॥

क्षुद्रवर्व्वणा, स्त्री, (क्षुद्रा वर्व्वणा।) वरटा। इति राजनिर्घण्टः॥

क्षुद्रवल्ली, स्त्री, (क्षुद्रा वल्ली।) मूलपोती। इति राजनिर्घण्टः

क्षुद्रवार्त्ताकी, स्त्री, (क्षुद्रा वार्त्ताकी।) कण्टकी। इत्यमरः॥

क्षुद्रवार्त्ताकिनी, स्त्री, (क्षुद्रा वार्त्ताकिनीति।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

क्षुद्रशङ्खः, पुं, (क्षुद्रः शङ्खः खल्पशङ्खजातिः। जोड़ा इति भाषा। तत्पर्य्यायः। शङ्खनखः २। इत्यमरः। १। १०। २३॥ शङ्खनकः ३ इति तट्टीका॥ क्षुल्लकः ४ शम्बूकः ५ भवशङ्खकः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मूत्रहरत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

क्षुद्रशर्करा, स्त्री, (क्षुद्रा शर्करा नित्यकर्म्मधारयः।) यावनालशर्करा। इति राजनिर्घण्टः॥

क्षुद्रशार्दूलः, पुं. (क्षुद्रः शार्दूलः। नित्यकर्म्मधारयः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

क्षुद्रशीर्षः, पुं, (क्षुद्रं शीर्षं यस्य।) मयूरशिखाहृक्षः। इति शब्दचन्द्रिका॥

क्षुद्रशुक्तिः, स्त्री, (क्षुद्रा शुक्तिः। नित्यकर्म्मधारयः।) जलशुक्तिः। इति राजनिर्घण्टः॥

क्षुद्रश्यामा, स्त्री, (क्षुद्रा श्यामा।) कटभी। इति राजनिर्घण्टः॥ (कटभीशब्देऽस्या विवृतिर्ज्ञातव्या॥)

क्षुद्रश्लेष्मान्तकः, पुं, (श्लेष्माणं अन्तकः श्लेष्मान्तकः। क्षुद्रः श्लेष्मान्तकः।) भूकर्ब्बुदारकः। इति राजनिर्घण्टः॥

क्षुद्रश्वासः, पुं, (क्षुद्रः अल्पः श्वासः।) अल्पश्वासरोगः। यथा,—
"रसनिमित्तमेव खौल्यं कार्श्यञ्च तत्र श्लेष्मलाहारसेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्नरतस्य धाम एवान्नरसो मधुरतरश्च शरीरमनुप्रामम्नतिस्नेहान्मेदो जनयति तदतिस्थौल्यमापा-

दयति तं अतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्क्षयप्रस्वेदगात्रदौर्गन्ध्यक्षयनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति"। इत्यादि सुश्रुते १६ अध्यायः॥ तस्य निदानादि यथा,—

"यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम्॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः।
श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते।
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा।
भिद्यते स महाव्याधिः श्वास एको विशेषतः॥
प्रायूपं तस्य हृत्पीड़ा भक्तद्वेषोऽरतिः परा।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते।
निघ्नन्नस्तेति ग्लानिश्च स क्षुद्र इति संज्ञितः"॥
इति च सुश्रुते उत्तरतन्त्रे ५१ अध्यायः॥
("रूक्षाथाः सोद्भवः कोष्ठे क्षुद्रवात उदीरयन्।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाक्षप्रबाधकः॥
छिनत्ति न स गात्राणि न च दुःखा यथेतरे।
न च भोजनपानानां निरुणद्धुचितां गतिम्॥
नेन्द्रियाणां यथां नापि कांक्षिदुत्पादयेद्भ्रमम्।
स साध्य उक्तो बलिनः सर्व्वे चाव्यक्तलक्षणाः"॥
इति चरके चिकित्सास्थाने २१ अध्याये॥)

क्षुद्रश्वेता, स्त्री, (क्षुद्रा श्वेता।) अर्कादिगणान्तर्गतक्षुद्रविशेषः। यथा,—"अर्कालर्कवरङ्गदयनागदन्तीमयूरकभार्गीराजेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेताहस्तिकाल्यलवणास्तापसवृक्षेति॥ अर्कादिको गणो ह्येष कफमेदोविषापहः।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः"॥
इति सुश्रुते ३६ अध्यायः॥

क्षुद्रसहा, स्त्री, (सह + अच् टाप् च। क्षुद्रा सहा कर्म्मधारयः क्षुद्रस्य सहेत्येके।) सुद्गपर्णी। (अस्याः पर्य्याया यथा,—

"मुद्गपर्णी क्षुद्रसहा कामुद्गा सिंहपर्णिका।
वन्या माष्पर्णिरन्येति रूपपर्य्यायुभे च ते"॥
इति वैद्यकरत्नमालायाम्॥ अस्या व्यवहारो यथा, वमनभेषजान्तर्गतकषायविशेषे। "सुमनाः सौमनसायिनी हरिद्रा दारुहरिद्रा क्षीरपुनर्नवा महासहा क्षुद्रसहा कषायेषु"। इति चरके विमानस्थाने ८ अध्याये॥) इक्ष्वाकुणी। इति राजनिर्घण्टः॥

क्षुद्रसुवर्च्चा, स्त्री, (क्षुद्रं सुवर्च्चम्। नित्यकर्म्मधारयः।) रीतिः। इति राजनिर्घण्टः। (पित्तलम्॥)

क्षुद्रहा, [न्] पुं, (क्षुद्रान् नीचान् क्रूरस्वभावान् हन्तीति। हन् + क्विप्।) महादेवः। इति शिवसहस्रनामस्तोत्रम्। इति कश्चित्। महाभारतीयानुशासनपर्व्वणि शिवसहस्रनामसु एतन्नाम नास्ति। लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे तत्सहा इति नाम वर्त्तते। यथा,—

"प्रशान्तबुद्धिरक्षुद्रः क्षत्रसहा नित्यसुन्दरः।
धैर्य्याग्रधूर्य्यो धात्रीशः साकल्यः शर्करीपतिः"॥
इति वृहत्तन्त्रसारः॥

क्षुद्रहिङ्गुलिका, स्त्री, (क्षुद्रा हिङ्गुलिका नित्यकर्म्मधारयः।) कण्टकारी। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कण्टकारीशब्दे बोद्धव्याः॥)

क्षुद्रहिङ्गुली, स्त्री, (क्षुद्रा हिङ्गुली। नित्यकर्म्मधारयः।) कण्टकारी। इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात्॥

क्षुद्रा, स्त्री, (क्षुद् + "क्षायितक्षिवक्षिश्रुकिच्छिपि क्षुदीति"। उणां। २। १३। इति रक् ततष्टाप्।) व्यङ्गा। नटी। वेश्या। सरघा। कण्टकारिका। इत्यमरः। २। ४। ६४॥ (अस्याः पर्य्याया यथा,—

"अनाक्रान्ता स्पृही व्याघ्री भण्डाकी च निदिग्धिका।
सिंही धामनिका क्षुद्रा दहती कण्टकारिका"॥
इति वैद्यकरत्नमालायाम्॥

"कण्टकारी तु दुष्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्ठालिका कण्टिकिनी धावनी दहती तथा"॥
उभे च दहत्यौ। यत आह सुश्रुतः।

"क्षुद्रा या क्षुद्रभद्राख्या दहतीति निगद्यते"।
गुणाद्याख्याः कण्टकारीशब्दे ज्ञातव्याः॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्या व्यवहारो यथा, पञ्चतिक्तकषाये।

"क्षुद्रामृताभ्यां सहनागरेण
सपौष्करश्चैव किरातितिक्तम्।
पिबेत्कषायन्विह पञ्च तिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम्"॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)
चाङ्गेरिका। हिंसा। मक्षिकामाक्षम्। इति हेमचन्द्रः॥ वादरता। इति शब्दरत्नावली॥ गवेधुका। इति रत्नमाला॥

क्षुद्राग्निमन्थः, पुं, (क्षुद्रः अग्निमन्थः।) दशमूले प्रसिद्धवृक्षविशेषः। छोटा गणियारि इति हिन्दीभाषा। तत्पर्य्यायः। तपनः २ विजया ३ गणिकारिका ४ अरणिः ५ लघुमन्थः ६ तेजोवृक्षः ७ तपुतरुः ८। अस्य गुणाः।

"अग्निमन्थद्वयस्यैव तुल्यं वीर्य्यरसादिषु।
तत्प्रयोगानुसारेण योजयेत् स्वमनोधया"॥
इति राजनिर्घण्टः॥

क्षुद्राञ्जनं, क्ली, (क्षुद्रं अञ्जनम्।) चक्षूरोगौषधविशेषः। यथा,—

"गोमूत्रपित्तमदिराश्लक्ष्णक्षीरे पचेत्।
क्षुद्राञ्जनं रसे चान्यत् यत्तत्क्षौद्रेऽपि वा॥
सैन्धवोपहितं युञ्जान्निहितं वेणुगह्वरे॥
मेदो यत्तद्घृतक्षौद्रं पिण्यं सैन्धवं मधु।
रसमांसक्षयेष्वपि पक्वं सम्यङ्निधापयेत्॥
कोष्ठे खदिरनिर्य्यासो तद्वत् क्षुद्राञ्जनं हितम्"॥
इति सुश्रुते १८ अध्यायः॥

क्षुद्राण्डमत्स्यसंघातः, पुं, (क्षुद्राणां अण्डमत्स्यानां अण्डात् अभिनवजातानां मत्स्यानामित्यर्थः सङ्घातः समूहः।) पोताधानम्। इत्यमरः। १। १०। १६॥ पोना इति भाषा॥

क्षुद्रादिकषायः, पुं, (क्षुद्रः आदिर्यस्य स कषायः।) कण्टकार्य्यादिकषायः। यथा,—

"क्षुद्रामृतानागरपुष्करास्नैः
कृतः कषायः कफमारुतोत्थे।

सश्वासकासारुचिपार्श्वरुग्ज्वरे
ज्वरे चिरोत्थप्रभवेऽपि शस्यते"॥
इति भैषज्यरत्नावली॥

क्षुद्रान्नं, क्ली, (क्षुद्रं अन्नं उदरस्थनाड़ीभेदः।) हृदयस्थितसूक्ष्मान्नम्। यथा,—समाननामकः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषावाप्तौ युक्तिप्राचुर्य्याभिप्रायेण प्राणायतनानि प्रपञ्चयितुमाह।

"वपा वसावहननं नाभिः क्लोम यकृत् प्लिहा।
क्षुद्रान्नं यकृत्कौ वस्तिः पुरीषाधानमेव च।
प्राणाग्नयोऽथ हृदयं शूलान्नं गुद एव च।
उदरञ्च गुदौ कौण्यौ विस्तारोऽयमुदाहृतः"॥
वपा प्रसिद्धा। वसा मांसस्नेहः। नाभिः प्रसिद्धा। अवहननं पुष्पुसः। प्लीहा आयुर्व्वेदप्रसिद्धः। ते च मांसपिण्डाकारे सव्यकुक्षिगते। यकृत् कालिका। क्लोम मांसपिण्डः। ते च दक्षिणकुक्षिगते। क्षुद्रान्नं हृत्स्थान्नम्। यकृत्कौ हृदयसमीपस्थौ मांसपिण्डौ। वस्तिर्मूत्राशयः। पुरीषाधानं पुरीषाशयः। आमाशयोऽपक्वान्नस्थानम्। हृदयं हृत्पुण्डरीकम्। शूलान्तगुदोदराणि प्रसिद्धानि। वाह्याङ्गदवलयादन्तर्गुदवलये द्वे। तौ च गुदौ कौण्यौ कोष्ठे नाभेरधः प्रदेशे भवौ। अथच प्राणायतनस्य विस्तारउक्तः। पूर्व्वश्लोके तु सङ्क्षेपः। अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः। इति मिताक्षरायां प्रायश्चित्ताध्यायः॥("पञ्चदशकोष्ठाङ्गानि तद्यथा,—"नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारस्त्वामाशयश्चेति पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहनञ्चेति"। इति चरके शारीरस्थाने ७ अध्याये॥)

क्षुद्रापामार्गः, पुं, (क्षुद्रः अपामार्गः। कर्म्मधारयः।) रक्तापामार्गः। इति राजनिर्घण्टः॥ (रक्तापामार्गशब्देऽस्य विवरणं ज्ञेयम्॥)

क्षुद्रामलकं, क्ली, (क्षुद्रं आमलकम्। नित्यकर्म्मधारयः।) आमलकम्। इति राजनिर्घण्टः॥ काठ आमला इति भाषा॥

क्षुद्रामलकसंज्ञः, पुं, (क्षुद्रामलकस्य संज्ञा यस्य।) कर्कटवृक्षः। इति राजनिर्घण्टः॥

क्षुद्राम्लः, पुं, (क्षुद्रः आम्लः। नित्यकर्म्मधारयः।) कोशाम्लः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायाः।

"कोशाम्ल उक्तः क्षुद्राम्लः क्रमिरुक्तः सकोशकः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाश्चास्य कोशाम्लशब्दे ज्ञेयाः॥)

क्षुद्रास्फपनसः, पुं, (क्षुद्रः अस्फपनसः।) लकुचः। इति चिकाण्डशेषः॥ (लकुचशब्दे विवृतिरस्य व्याख्येया॥)

क्षुद्रास्फा, स्त्री, (क्षुद्रा अस्फा।) अस्फलोणिका। यथा,—

"क्षुद्रपत्रा च चाङ्गेरी क्षुद्रास्फा चास्फलोणिका"॥
इति शब्दरत्नावली। शब्दचण्डी। इति राजनिर्घण्टः॥

क्षुधा

क्षुद्राम्बिका, स्त्री, (क्षुद्रा अम्बिका ।) वृक्षविशेषः । आवलति इति आवला इति च हिन्दी भाषा ॥ तत्पर्य्यायः । चाङ्गेरी २ चुक्राम्ला ३ चुक्रिका ४ लोमाम्ला ५ चतुःपत्री ६ लोमा ७ वोढ़ा ८ अम्लपत्रिका ९ अम्बष्ठा १० कम्लवती ११ अम्ला १२ दन्तशठा १३ शाकाम्ला १४ अम्लपत्री १५ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । वह्नि-वर्द्धनत्वम् । रुचिकारित्वम् । ग्राहित्वम् । दोष-दुर्नामकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रिका, स्त्री, (क्षुद्र + संज्ञायां कन् ततः टाप् पूर्व्वातः इत्वञ्च ।) दंशः । इति राजनिर्घण्टः ॥ (हिक्का-रोगप्रकारभेदः । यथा,—

"विक्षुण्णकांस्यैर्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जन्तुमूलात् प्रधाविता" ॥

इत्युत्तरतन्त्रे पञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥)

क्षुद्रेक्षुदी, स्त्री, (क्षुद्रा इक्षुदी कर्म्मधारयः ।) यवासः इति राजनिर्घण्टः ॥ (यवासशब्दे ज्ञातव्यमस्या विवरणम् ॥)

क्षुद्रेर्व्वारुः, पुं, (क्षुद्रा इर्व्वारुः कर्म्मधारयः ।) गोपाल कर्कटी । इति राजनिर्घण्टः ॥

क्षुद्रोदुम्बरिका, स्त्री, (क्षुद्रा उदुम्बरिका ।) काको-दुम्बरिका । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकनाम्नी, स्त्री, (क्षुद्रा उपोदकनाम्नी ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकी, स्त्री, (क्षुद्रा उपोदकी ।) खल्पपूतिका-शाकः । तत्पर्य्यायः । क्षुद्रपत्रा २ मत्स्यपी ३ । अस्या गुणाः । "रसवीर्य्यविपाकेषु सदृशी पूर्व्वया खयम्" । पूर्व्वया उपोदक्या । इति राजनिर्घण्टः ॥

क्षुद्रोलूकः, पुं, (क्षुद्र उलूकः नित्यकर्म्मधारयः ।) कुङ्कुमः । इति राजनिर्घण्टः ॥

क्षुध, क्ष्ट य यौ क्षुदि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-अनिट् ।) क्षुद्भक्षणेच्छा । क्ष्ट, अक्षुधत् । य, क्षुध्यत्यन्नं बुभुक्षितः । यौ, क्षोद्धा । इति दुर्गादासः ॥

क्षुधा, स्त्री, (क्षुध् बुभुक्षायां सम्यदादिलाद् क्विप् हलन्तत्वाद् वा टाप् ।) भोजनेच्छा । इति दुर्गादासः ॥ अस्यव्यवहारजिज्ञीर्षा इति ॥ "या देवी सर्व्वभूतेषु क्षुधारूपेण संस्थिता" । इति देवी-माहात्म्यटीकायां नागोजीभट्टः ॥ तत्पर्य्यायः । अशनाया २ बुभुक्षा ३ क्षुत् ४ । इत्यमरः शब्द-रत्नावली च ॥ जिघत्सा ५ । इति जटाधरः ॥१॥ तत्पर्य्यायाणि यथा,—

"व्याधयो निर्जिताः सर्व्वे क्षुधया नृपसत्तम ! ।
कुण्डली मुकुटी खड्गी तथैवालङ्कृतो नरः ।
क्षुधार्त्तो न विराजेत प्रेतवत्तृषितो यथा ॥
स्त्रीरत्नविविधान् भोगान् वस्त्राण्याभरणानि च ।
न चेच्छति नरः किञ्चित् क्षुधया कलुषीकृतः ॥
यथा भूमिगतं तोयं रविरश्मिभिः शुष्यति ।
शरीरस्थस्तथा धातुः शुष्यते जाठराग्निना ॥
न शृणोति न पश्यति न जिघ्रति न च स्पृशति ।
दह्यते वेपते मूढः शुष्यते च क्षुधार्दितः ॥
अकाल वधिरत्वञ्च जरान्धत्वन्तु पक्षताम् ।

क्षुधाव

रौद्रं मर्य्यादहीनत्वं क्षुधा सर्व्वं प्रवर्त्तते ॥
भगिनीं जननीं पुत्रं भार्य्यां दुहितरं तथा ।
भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति" ॥

इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥

क्षुधाकुशूलः, पुं, (क्षुधायां क्षुधोद्रेकविषये कुशूलः निपुणः विशेषेण क्षुधोत्पादकः ।) विल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

क्षुधातुरः, त्रि, (क्षुधा क्षुधया आतुरः ।) क्षुधा-पीड़ितः । यथा,—

"अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः" ॥

इति गारुड़े ११६ अध्यायः ॥

क्षुधार्त्तः, त्रि, (क्षुधया आर्त्तः ऋतो वा ऋतीयातत्पु-रुषे ऋतस्य दृद्धिः ।) क्षुत्पीड़ितः । यथा,—

"ग्रीतार्त्तश्च क्षुधार्त्तश्च कम्यान्वितकलेवरः ।
जजागार तदा रात्रौ क्षुतो नीहारवारिणा" ॥

इति शिवरहस्ये शिवरात्रिव्रतकथा ॥ (यथा, च मनुः । १० । १०७ ।

"भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह दयोमल्लक्षणो महातपाः" ॥)

क्षुधाभिजननः, पुं, (क्षुधां अभिजनयतीति । अभि + जन् + ल्युः ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ क्षुधाजनकद्रव्यमात्रे त्रि ॥

क्षुधावती, स्त्री, (क्षुधाऽस्यामस्तीति । मतुप् मस्य वत्वम् ।) क्षुधाजनकौषधवटी । अजीर्णादि-रोगनाशकगुड़िका । यथा,—

"रसायो गन्धकाभ्राणि शुण्ठ्यं चिफला वचा ।
यमानी घृतपुष्पा च चविका जीरकद्वयम् ॥
प्रत्येकं पलमेघान्तु घण्टकर्णपुनर्नवा ।
भार्गकं यत्रिकश्चेन्द्रकेशराजसदर्शनाः ॥
दण्डोत्पला त्रिवृद्दन्ती श्यामाहरक्तचन्दनम् ।
भृङ्गापामार्गकुलका मण्डूकश्च पलार्द्धकम् ॥
आर्द्रकस्वरसेनाथ गुड़िकां संप्रकल्पयेत् ।
वदराग्निसमाश्चैषां भक्षयित्वा पिबेदनु ॥
वारिभक्तं जलञ्चैव प्रातरुत्थाय मानवः ।
वटी क्षुधावती नाम सर्व्वाजीर्णविनाशिनी ।
अग्निञ्च कुरुते दीप्तं भस्मकञ्च नियच्छति ।
अम्लपित्तञ्च शूलञ्च परिणामक्लमञ्च यत् ।
तत्सर्व्वं शमयत्याशु भास्करस्तिमिरं यथा ।
मधुरं तर्व्वयेदन्न विशेषात् क्षीरशर्करैः" ॥

इति भैषज्यरत्नावल्यामम्लपित्तचिकित्सा । तस्याः खल्पदृद्धेदौ तत्रैव दृश्यौ ॥०॥ क्षुधायुक्ते त्रि । (क्षुधाजनकापरौषधम् । यथा,—

"सप्त पञ्चचतुर्भागाश्चूर्णचारकदये ।
त्रयस्त्रयः षट्पलांश्च द्वौ द्वौ मरिचचित्रयोः ॥
मुण्डीलवङ्गयोर्द्वौद्वावक्षयोगेन भावयेत् ।
वटीङ्गोलप्रमाणेन कारयेद्भिषजां वरः ॥
आमशूलमम्लपित्तं पित्तशूलं विशेषतः ।
दुर्नामग्रहणीमुग्रा मजीर्णानि विनाशयेत् ॥
नाम्ना क्षुधावती ह्येषा वह्निदेवेन निर्म्मिता ।

क्षुपडो

अस्याः प्रसादान्मन्दाग्निर्भवेद्वावानलो नरः" ॥

इति चिकित्सारत्ननिधौ मन्दाग्न्यधिकारे ॥)

क्षुधासागररसः, पुं, (क्षुधायां क्षुधाया वा सागररस इव क्षुधोद्रेकात् तथात्वम् ।) औषधविशेषः । यथा,—

"चिकटु चिफला चैव तथा जवणपञ्चकम् ।
क्षारत्रयं रसं गन्धं भागैकं पूर्व्ववद्विषम् ॥
गुञ्जामात्रां वटीं कुर्य्यात्तवक्षैः पञ्चभिः सह ।
क्षुधासागरनामायं रसः सूर्य्येण निर्म्मितः" ॥

पूर्व्ववद्विधमित्यस्तवक्षुक्तभागवत् । तेनाच्च विषस्य भागद्वयम् । इति भैषज्यरत्नावली ॥

क्षुधितः, त्रि, (क्षुध् + कर्त्तरि क्तः । यद्वा क्षुधा जाता-ऽस्य इति तारकादित्वादितच् प्रत्ययः ।) क्षुधा-न्वितः । तत्पर्य्यायः । बुभुक्षितः २ जिघत्सुः ३ अशनायितः ४ । इत्यमरः । ३ । १ । २० ॥

क्षुधुनः, पुं, (क्षुध बुभुक्षायां + "क्षुधिपिसिमिथः कित्" । उणां । ३ । ४४ । इति उनन् स च कित् ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

क्षुप, सादे । इति कविकल्पद्रुमः ॥ (सौं-परं-सकं-सेट् ।) सौचधातुरयम् । क्षुपः । इति दुर्गा-दासः ॥

क्षुपः, पुं, (क्षुप् + "इगुपधेति कः" । ३ । १ । १३५ ।) क्षुद्रशाखाशिफः । क्षुद्रवृक्षः । इत्यमरः । २ । ४ । ८ ॥ (यथा, महाभारते । १ । १७२ । २८ ।

"तस्या रूपेण स गिरिर्वपुषेण च विश्रुतः ।
स सत्त्वक्षुपलतो हिरण्मय इवाभवत्" ॥)

श्रीकृष्णात् सत्यभामायां जातपुत्रविशेषः । यथा,

"जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः ।
रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलन्धमा ।
भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा ।
चतस्रो जज्ञिरे तेषां स्वसारो गरुड़ध्वजात्" ॥

इति महाभारते हरिवंशे १६१ अध्यायः ॥ * ॥

इक्ष्वाकुराजपिता । यथा,—

"आसीत् कृतयुगे तात ! मनुर्दण्डधरः प्रभुः ।
तस्य पुत्रो महाबाहुः प्रसन्धिरिति विश्रुतः ॥
प्रसन्धेरभवत् पुत्रः क्षुप इत्यभिसंज्ञितः ।
क्षुपस्य पुत्रस्त्विक्ष्वाकुर्महीपालोऽभवत् प्रभुः" ॥

इति महाभारते । १४ । ४ । २-४ ॥ द्वारकापश्चिम-दिक्स्थपर्व्वतः । यथा,—

"दक्षिणस्यां लतावेष्टः पद्मवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः" ॥

इति महाभारते हरिवंशे द्वारवतीविशेष-निर्म्माणे १५७ अध्यायः ॥

क्षुपकः, पुं, (क्षुप + स्वार्थे कन् ।) क्षुपः । क्षुद्रवृक्षः । यथा,—

"क्षतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते ।
अवृक्षमूलः क्षुपको यद्वदुत्पाटने सुखः" ॥

इति सुश्रुते प्रथमभागे २४ अध्यायः ॥

क्षुपाक्षुः, पुं, (क्षुप + आक्षुप्रत्ययः ।) पाणीयाक्षुः । इति राजनिर्घण्टः ॥

क्षुपड्डोड्डुमुष्टिः, पुं, (दुल् उत्क्षेपे + अप् ततो गुणः डकारस्य लत्वम् । दलापि लत्वं दृषोदरात्

क्षुरः

साधुः । तादृक मुष्टिर्यस्य ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः ॥ (विषमुष्टिशब्देऽस्या गुणादयो ज्ञेयाः ॥)

क्षुब्धः, पुं, (क्षुभ् + "क्षुब्धस्यान्तध्वान्तलग्नेति" । ७ । २ । १९ । इति निपातनात् साधुः ।) मज्ञानदण्डः । इति हेमचन्द्रः ॥ षोड़शरतिबन्धान्तर्गतैकादशबन्धः । यथा,—

"पार्श्वोपरि पदौ क्षिप्त्वा योनौ लिङ्गेन ताड़येत् । बाह्वोर्धारणं गाढ़ं बन्धो वै क्षुब्धसंज्ञकः" ॥ इति रतिमञ्जरी ॥ क्षोभविशिष्टे त्रि ॥

क्षुभ, ल्ट ड सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । ल्टदित् ।) ल, क्षुब्धते । ड, क्षोभते नानुनीविधु । इति हलायुधः । इति दुर्गादासः ॥

क्षुभ, य ग सञ्चलने । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-अकं-सेट् ।) य, क्षुभ्यति रिपुध्वेवेति हलायुधः । ग, क्षुभ्नाति क्षुब्धो भ । इति दुर्गादासः ॥

क्षुभः, पुं, (क्षुभ् + "इगुपधज्ञाप्रीकिरः" । ३ । १ । १३५ । इति कः ।) प्रवर्त्तकः । यथा,—

"ये च तेऽनुचराः सर्व्वे पादोपान्तं समाश्रिताः । माठरारुणदण्डाद्यास्तांस्तान् वन्देऽग्निक्षुभान्" ॥ इति महाभारते । ३ । ३ । ६८ ॥ "अग्निक्षुभान् विद्युदग्न्यादिप्रवर्त्तकान्" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभा, स्त्री, (क्षुभ + स्त्रियां टाप् ।) नियहानुग्रहकर्त्री देवता । यथा, महाभारते ३ । ३ । ६६ ।

"क्षुभया सहिता मैत्री याश्चान्या भूतमातरः । ताश्च सर्व्वा नमस्यामि पान्तु मां शरणागतम्" ॥

"क्षुभा मैत्री नियहानुग्रहकर्त्र्यौ देवते । भूतमातरः गौरीपद्मादयः । ब्राह्मीमाहेश्वर्य्यादयश्च" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभितः, त्रि, (क्षुभ + कर्त्तरि क्तः ।) भीतः । इति हलायुधः ॥ सञ्चलितः । इति क्षुभधात्वर्थदर्शनात् ॥

क्षुमा, स्त्री, (क्षु + मक टाप् ।) अतसी । इत्यमरः २ । ६ । २० ॥ शणः । इति तट्टीकासारसुन्दरी ॥ नीलिका । इति मेदिनी ॥ लताभेदः । इति शब्दरत्नावली ॥

क्षुर, भ्र विलेखने । खनने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) भ्र, क्षुरति भूमिं लोकः । क्षोरिता । क्षुरो लोमच्छेदनः । इति दुर्गादासः ॥

क्षुरः, पुं, (क्षुर + "इगुपधेति" । ३ । १ । १३५ । कः । यद्वा, "ऋच्छेन्द्रायवज्रविप्रकुम्रक्षुम्रक्षुरक्षुरेति" । उणां । २ । २८ । इति निपातनात् सिद्धम् ।) कोकिलाक्षः । इत्यमरः । २ । ८ । ४९ ॥ (अस्य पर्य्याया यथा,—

"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुबालिका" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) शणम् । इति तट्टीका । छेदनद्रव्यम् । तच्च नापितस्य लोमच्छेदकास्त्रम् । (यथा, मनुः । ८ । २९२ ।

क्षुरधा

"सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्त्तमानमन्याये छेदयेत्क्षुरवज्रः क्षुरैः" ॥) गोक्षुरः । इति मेदिनी ॥ (अस्य पर्य्याया यथा,— वैद्यकरत्नमालायाम् ।

"त्रिकण्टः स्थलपट्टाटो गोकण्टोऽथ त्रिकण्टकः । त्रिपुटः कण्टकफलः स्वदंष्ट्रा गोक्षुरः क्षुरः" ॥ महापिण्डीतकः । शरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १ । १३४ । ६० ।

"ततस्तस्य नगस्यस्य क्षुरेण निशितेन च । शिर उत्कृत्य तरसा पातयामास पाण्डवः" ॥ खड्गादिपादुका । इति धरणिः । छुरा इति भाषा ॥

क्षुरकः, पुं, (क्षुर + स्वार्थे कन् ।) तिलकण्टकः । इत्यमरः । २ । ४ । ४० ॥ कोकिलाक्षः । (अस्य पर्य्याया यथा,—

"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुबालिका" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्य व्यवहारो यथा,—

"यवानी जीरके द्वे च वानरीगजपिप्पली । जातीफलं सपत्रञ्च लवङ्गागुरुचन्दनम् ॥ तालीशं तिलमाश्रञ्च क्षुरकं गोक्षुरन्तथा । घृतावरी घृताक्षा च वचा दार्व्वी पुनर्नवा ॥ निकुम्भकुम्भौ मार्ज्जारी कन्दो नागबला तथा । वासामांसी मुरामुस्तं पिप्पलीमूलमेव च ॥ मूर्व्वली वानरी ब्राह्मी शाल्मली मूलमेव च । मेथिकागजकर्णौ च शर्करा चाब्धिशोधनम् । माजुफलञ्चाश्वगन्धा द्राक्षा च चोचकं समम्" ॥ इत्यादिषु द्रष्टव्यम् । इति वैद्यककषायसंग्रहे कृष्णानेश्वरमोदकान्तर्गते ॥) गोक्षुरः । इति मेदिनी ॥ भूताङ्कुशः । इति राजनिर्घण्टः ॥

क्षुरकर्म्म, [न्] क्ली, (क्षुरेणोचितं क्षुरसाध्यं वा कर्म्म ।) क्षौरम् । क्षुरद्वारा केशादिकर्त्तनम् ॥ यथा,—

"यो जन्ममासे क्षुरकर्म्म याचां कार्य्यस्य वेधं कुरुते च मोहात् । नूनं स रोगं धनपुत्रनाशं प्राप्नोति मूढो वधबन्धनानि ॥ जातं दिनं दूषयते वशिष्ठ- स्त्रयोदशीं च गर्गो यवनो दशाहम् । जन्माख्यमासं किल भागुरिश्च चूड़े विवाहे क्षुरकर्म्मवेधे ॥

देवकार्य्ये पितृश्राद्धे स्वरेरंशपरिक्षये । क्षुरिकर्म्म न कुर्व्वीत जन्ममासेऽथ जन्मभे" ॥ इति तिथ्यादितत्त्वम् ॥ क्षौरानन्तरं स्नानं कर्त्तव्यम् । यथा,—

"दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्म्मणि । चिति पूयश्मशानास्थ्नां स्पर्शने स्नानमाचरेत्" ॥ इति मिताक्षरायां प्रायश्चित्ताध्याये पराशरवचनम् ॥ अन्यत् क्षौरशब्दे द्रष्टव्यम् ॥

क्षुरधारः, पुं, (क्षुरस्य धारा इव धारा अस्य ।) अस्त्रविशेषः । यथा, महाभारते । ४ । ६ । २८ ।

"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान् ।

क्षुरिका

विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह" ॥ "विपाठान् बाणविशेषान् तादृशान् क्षुरधारांश्च" । इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुरस्य शाणितमुखम् । तद्युक्ते त्रि । (यथा, महाभारते । ४ । ६२ । २७ ।

"अथ जिष्णुरुपाहृत्य क्षुरधारेण कार्मुकम् । चकर्त्त भीष्मस्य तदा जातरूपपरिष्कृतम्" ॥)

क्षुरधारा, स्त्री, (क्षुरस्य धारा ।) क्षुरधारः । यथा "अन्तकः पवनो मृत्युः पातालं वड़वामुखम् । क्षुरधारा विषं सर्पा वह्निरित्येकतः स्त्रियः" ॥ इति महाभारते । १२ । पञ्चचूड़ानारदसंवादे ३८ । २९ ॥ "अन्तकादिवत् सद्यो नाशका इत्यर्थः" । इति तट्टीकायां नीलकण्ठः ॥

क्षुरपत्रः, पुं, (क्षुरस्य पत्रमिव पत्रमस्य क्षुरवत् पत्रमस्य वा ।) शरः । इति राजनिर्घण्टः ॥ (दर्भविशेषः । यथा,—

"ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) क्षुरतुल्यपर्य्युक्ते त्रि ॥

क्षुरपत्रिका, स्त्री, (क्षुर इव पत्रमस्या स्वार्थे कन् स्त्रियां टापि अत इत्वम् ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

क्षुरप्रः, पुं, (क्षुर इव एषति क्षिपति । छेदनक्रियां पूरयति वा इष + कः । कित्वान्न गुणः ।) बाणविशेषः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ५३ । ४६ ।

"स तु द्रोणं त्रिसप्तत्या क्षुरप्राणां समार्पयत्" ॥) क्षुरपानामकघासच्छेदनास्त्रञ्च ॥

क्षुरप्रगं, क्ली, (क्षुरप्रं क्षुरप्रतां गच्छतीति । गम + डः ।) क्षुरप्रास्त्रम् । इति केचित् ॥ (क्षुरप्र इव गच्छतीति । क्षुरप्रसदृशास्त्रविशेषः ॥)

क्षुरभाण्डं, क्ली, (क्षुरस्य भाण्डं आधारः ।) क्षुरधारः । भाँड़ि इति भाषा । यथा,—"भद्रे ! शीघ्रमानीयतां क्षुरभाण्डं येन क्षौरकर्म्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्थितैव कार्य्यकरणायेत्तया क्षुरभाण्डात् क्षुरमेकं समादाय तस्याभिमुखं प्रेषयामास" । इति विष्णुधर्म्मविरचितपञ्चतन्त्रे १ तन्त्रम् ॥

क्षुरमर्दी, [न्] पुं, (क्षुरं मर्द्नातीति । क्षुर + मृद् + णिनिः ।) नापितः । यथा,—

"पुत्रं लोष्टादिकर्म्मे स्यात् नापितश्चखिलः क्षुरी । क्षुरमर्दी दिवाकीर्त्तिर्मुण्डकोऽन्तावसाय्यपि" ॥ इति हेमचन्द्रः ॥

क्षुराङ्गः, पुं, (क्षुर इवाङ्गमस्य ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

क्षुरिका, स्त्री, (क्षुर + ङीप् स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥ (पालङ्क्यशब्देऽस्या विवृतिर्ज्ञातव्या ॥) शस्त्रास्त्रविशेषः । छुरी इति भाषा । (अध्यायशब्दैर्व्याख्यातान्तर्गत उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि । "अथ तनादकालाग्निरुद्रक्षुरिका सर्व्वसारेत्युपक्रम्य सरस्वतीरहस्यानां ध्यानयज्ञवैद-

गतानां द्वाविंशत् सङ्ख्याकानां उपनिषदां सङ्ग्रहनाव वस्थिति शान्तिरिति" ॥)

क्षुरिकाप्रहः, पुं, (क्षुरिका इव क्षुरवदित्यर्थः पञ्चमस्य ।) ग्रहः । इति राजनिर्घण्टः ॥

क्षुरिणी, स्त्री, (क्षुरः अस्या अस्तीति । इनिः ङीप् च ।) वराहक्रान्ता । इति शब्दचन्द्रिका ॥ नापितभार्य्या च ॥

क्षुरी, [न्] पुं, (क्षुरोऽस्यास्तीति । क्षुर + इनिः ।) नापितः । इत्यमरः । २ । १० । १० ॥

क्षुरी, स्त्री, (क्षुद्रः क्षुरः क्षुर इव वा । क्षुर + स्वल्पार्थे ङीप् ।) कुरिका । इति हेमचन्द्रः ॥ क्षुरीति च पाठः ॥

क्षुल्लः, त्रि, (क्षुद् सम्पेषणे + सम्पदादित्वात् क्विप् । क्षुदं लाति गृह्णातीति । क्षुद् + ला + कः ।) लघुः । इति हेमचन्द्रः ॥ (यथा, भागवते । ३ । ५ । १० ।

"अष्टमूः क्षुल्लसुखावहानां
तेषामृते कृष्णकथामृतौघात्" ॥)

क्षुल्लकः, त्रि, (क्षुल्ल + स्वार्थे कन् ।) क्षुद्रः । इत्यमरः । ३ । ३ । १० ॥ खल्वः । नीचकः । कनिष्ठः । दरिद्रः । इति भरतः ॥ पामरः । दुःखितः । (यथा, भागवते । ४ । ३० । २९ ।

"येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः" ॥)

खलः । इति हेमचन्द्रः । शब्दरत्नावल्यां खुल्लक इति च पाठः ॥

क्षुल्लकः, पुं, (क्षुल्ल + संज्ञायां स्वार्थे वा कन् ।) क्षुद्रवृक्षः । इति हेमचन्द्रः राजनिर्घण्टश्च ॥ (औषधादिप्रकरणेऽस्य विषयो यथा,—

"कट्वङ्गं गैरिकं शृङ्गं कासीसं टङ्गणन्तथा ।
नीलाञ्जनं मुक्तिभेदाः क्षुल्लकाः सवराटकाः ॥
जम्बीरवारिणा स्निग्धाः क्षालिताः कोष्णवारिणा ।
मुद्रिमायान्यमी योज्या भिषग्भिर्योगसिद्धये" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

क्षुल्लतातः, पुं, (क्षुल्लः पितुः कनिष्ठः स चासौ तातश्चेति नित्यकर्म्मधारयः ।) पितृकनिष्ठभ्राता । इति क्षुल्लतातकशब्ददर्शनात् ॥ शब्दरत्नावल्यां खुल्लतात इति पाठः ॥

क्षुल्लतातकः, पुं, (क्षुल्लतात + स्वार्थे कन् ।) पितृव्यः । इति जटाधरः । खुड़ा इति भाषा ॥

क्षेत्रं, क्ली, (क्षि + ष्ट्रन् ।) भूमिः । क्षेत इति भाषा ॥ तत्पर्य्यायः । वप्रम् २ केदारः ३ । इत्यमरः । २ । ९ । ११ ॥ वलजम् ४ निष्कुटः ५ । राजिका ६ पाटीरः ७ । इति जटाधरः ॥ * ॥ तत्समूहवाचकानि यथा,—

"केदारकन्तु केदार्य्यं क्षेत्रं केदारकं तथा ।
वारटक्षेति पर्य्यायः क्षेत्रस्यन्दे निगद्यते" ॥
इति शब्दरत्नावली ॥ * ॥ तद्भेदा यथा,—

"व्रीहिभवोचितं क्षेत्रं व्रैहेयं तत् समीरितम् ।
शाल्युद्भवोचितं यत्तु शालेयमभिधीयते ॥
यवं यवोचितं क्षेत्रं यवकं यवकोचितम् ।
षष्टिकोद्भवनं यत्तु षष्टिक्यं तत् प्रकीर्त्तितम् ।
तिलोद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि ।

एवं माष्यन्तु माषीणं कौद्रव्यं कौद्रवीणवत् ॥
तथा भङ्ग्यञ्च भाङ्गीनमुग्म्यमौमीनमित्यपि ।
अथ मौद्गाच्च मौद्गीनमणव्यमाणवीनवत् ॥
माषकोद्रवभङ्गोमामुद्गाणुप्रभवोचितम् ।
बीजाक्षतमुमक्षतमुत नीतिसमाक्षये ॥
सीत्यं क्षतञ्च हल्यञ्च हतीयाक्षतमित्यपि ।
त्रिगुणाक्षतमित्येवं त्रिवारक्षणाभूमिषु ॥
द्विगुणाक्षतं द्विहल्यञ्च द्विसीत्यं द्विगुणाक्षतम् ।
द्वितीयाक्षतमप्यत्र द्विवारक्षणभूमिषु ॥
द्रोणाढ़कखार्य्यादेर्व्वापादौ द्रौणिकस्तथा ।
स्यादाढ़किकखारोकौ उत्तमर्णादयस्त्रिषु ।
आदिभ्यां प्रास्थिकादिश्च पाकादौ द्रौणिकोऽपि च" ॥
इति च शब्दरत्नावली ॥

परक्षेत्रे गोचारणकथननिषेधो यथा,—

"न कुर्य्यात् सख्यवैराणि विवादं न च पैशुनम् ।
परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्" ॥
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः ॥ * ॥
अपि च । मनुः ।

"आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत् पिबन्तञ्चैव वत्सकम्" ॥
इति प्रायश्चित्ततत्त्वम् ॥ * ॥ तत्रस्थजलगुणाः ।
"केदारं मधुरं प्रोक्तं विपाके गुरु दोषलम्" ॥
इति राजवल्लभः ॥ * ॥

अथ सिद्धक्षेत्राणि ।

तत्र वाराणसीक्षेत्रं यथा,—

"आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्तते नरसत्तमौ" ॥ * ॥
कामरूपक्षेत्रं यथा,—

"नाचिरात् कामदं पुण्यं क्षेत्रं पीठं निगद्यते ।
चिरात्तु कामदो देवो न चिरादुच्यते ज्ञानदः ॥
तत् क्षेत्रमिति लोके यद्गद्यते पूर्व्वसूरिभिः ।
कामरूपं महापीठं गुह्याद्गुह्यतमं परम्" ॥
इति च कालिकापुराणे ५० अध्यायः ॥*॥
गङ्गाक्षेत्रं यथा, स्कान्दे ।

"तीराद्योजनमाचन्तु परितः क्षेत्रमुच्यते" ॥
नारायणक्षेत्रं यथा,—

"प्रवाहमवधिं कृत्वा यावद्वक्त्रचतुष्टयम् ।
तत्र नारायणः स्वामी गङ्गागर्भान्तरे वरे ॥
तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥ * ॥
भास्करक्षेत्रं यथा, स्मृतिसमुच्चयलिखितवचने ।

"गङ्गायां भास्करक्षेत्रे मातापित्रोर्म्मृते गुरौ ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम्" ॥
भास्करक्षेत्रं प्रयागः । इति प्रायश्चित्ततत्त्वम् ॥*॥
गयाक्षेत्रं यथा,—

"पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः" ॥
इति वायुपुराणम् ॥*॥ पुरुषोत्तमक्षेत्रं यथा,—

मुनय ऊचुः ।

"पुरुषोत्तमाख्यं समहत् क्षेत्रं परमपावनम्" ॥
इत्यादि ।

जैमिनिरुवाच ।

"एतत् क्षेत्रवरस्याम्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्ना ख्यापितं हि तत्" ॥
इत्युत्कलखण्डम् ॥ * ॥ विष्णुक्षेत्राणि यथा,—

श्रीभगवानुवाच ।

"पृथग्व्यवस्थितो ब्रह्मन् ! गुह्यनामानि मेऽधुना ।
क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि यत्नतः ॥
कोकामुखे वराहश्च मन्दरे मधुसूदनम् ।
अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम् ॥
माल्योदये तु वैकुण्ठं मक्षेन्द्रे तु नृपान्तकम् ।
ऋषभे तु महाविष्णुं द्वारकायान्तु भूपतिम् ॥
पाण्डुसङ्घे तु देवेशं वसुकुण्डे जगत्पतिम् ।
वन्दीवने महायोगं चित्रकूटे नराधिपम् ॥
नैमिशे पीतवासञ्च गवां निष्क्रमणे हरिम् ।
शालग्रामे तपोवासमचिन्त्यं गन्धमादने ॥
कुशाम्रके हृषीकेशं गङ्गाद्वारे गदाधरम् ।
गरुड़ध्वजं तोषके च गोविन्दं नागसाह्वये ॥
वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम् ।
केदारे माधवं विद्यात् वाराहस्यान्तु केशवम् ॥
पुष्करे पुष्कराक्षन्तु दृषद्वत्यां जयध्वजम् ।
कृष्णबिन्दुवने वीरमशोकं सिन्धुसागरे ॥
केशे वटे महाबाहुमम्बुते तेजसो वने ।
विशाखसूर्य्ये विश्वेशं नारसिंहे वने वने ॥
लोहाकुले रिपुहरं देवशाले त्रिविक्रमम् ।
पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः ॥
विद्याधरं वितस्तायां वारणे धरणीधरम् ।
देवदारुवने गुह्यं कावेर्य्यां नागशायिनम् ॥
प्रयागे योगमूर्त्तिञ्च पयोष्ण्यां सुन्दरं विदुः ।
कुमारतीर्थे कौमारं लौहित्ये हयशीर्षकम् ॥
उज्जयन्यां त्रिविक्रमं लिङ्गकोटे चतुर्भुजम् ।
हरिहरं तुङ्गभद्रायां दृष्ट्वा पापात् प्रमुच्यते ॥
विश्वरूपं कुरुक्षेत्रे मणिकुण्डे हलायुधम् ।
लोकतीरमयोध्यायां कुण्डिने रुक्मिणीपतिम् ॥
भक्षोरे वासुदेवञ्च चक्रतीर्थे सुदर्शनम् ।
आद्यं विष्णुपदे विद्यात् शूकरे शूकरं विदुः ॥
कुशेशयं मानसे तीर्थे दण्डके श्यामलं विदुः ।
त्रिकूटे नागमोक्षञ्च मेरुपृष्ठे च भास्करम् ॥
विरजं पुण्यमत्यायां बालचामीकरे विदुः ।
यज्ञस्करं विपाशायां माहिष्मत्यां ऋताशनम् ॥
क्षीराब्धौ पद्मनाभञ्च विमले तु सनातनम् ।
शिवनद्यां शिवकरं गयायाञ्च गदाधरम् ॥
सर्व्वत्र परमात्मानं यः पश्यति स मुच्यते ॥
अष्टषष्टिस्तु नामानि कीर्त्तितानि मया तव ।
क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः ॥
दृश्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः ।
वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम्" ॥
इति नारसिंहे ६२ अध्यायः ॥ * ॥ मेषादिद्वादशराशिः । यथा,—

"राशिनामानि च क्षेत्रं भस्तत्त्वं गृहनाम च ।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत्" ॥*॥
ग्रहाणां क्षेत्राणि यथा,—

"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुवाम् ।

जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः" ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ अपि च,
"मेषमङ्गारकक्षेत्रं दृषं शुक्रस्य कीर्त्तितम् ।
मिथुनस्य बुधो ज्ञेयः सोमः कर्कटकस्य तु ॥
सूर्य्यक्षेत्रं भवेत् सिंहः कन्या क्षेत्रं बुधस्य च ।
धनुः सुरगुरोश्चैव झषेर्मकरकुम्भकौ ॥
मीनः सुरगुरोश्चैव ग्रहक्षेत्रं प्रकीर्त्तितम्" ॥
इति गारुडे ६० अध्यायः ॥ * ॥ शरीरम् । (यथा, भगवद्गीतायाम् । १३ । १ ।
"इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते" ॥
कुतः शरीरस्य क्षेत्रत्वमित्यत्र शाङ्करभाष्यम् । यथा,—"इदमिति सर्व्वनाम्नोक्तं विशिनष्टि शरीरमिति । हे कौन्तेय ! क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवदास्मिन् कर्म्मफलनिर्हेतेः क्षेत्रमितीतिशब्दः एवं शब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते" ॥ इच्छा । द्वेषः । सुखम् । दुःखम् । चेतना । धृतिः । यथा, भगवद्गीतायाम् । १३ । ६ ।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्" ॥
इत्यत्र शाङ्करभाष्यं यथा,—"अथेदानीं आत्मगुणा इति यानाचष्टे वैशेषिकास्तेऽपि क्षेत्रधर्म्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् इच्छा द्वेष इति । इच्छा यज्जातीयं सुखहेतुमर्थमुपलब्धवान् पूर्व्वं पुनस्तज्जातीयमुपलभ्यमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छान्तःकरणधर्म्मो ज्ञेयत्वात् क्षेत्रं तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पूर्व्वं पुनस्तज्जातीयमुपलभ्यमानस्तं द्वेष्टि सोऽयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्मकं ज्ञेयत्वात् तदपि क्षेत्रं संघातो देहेन्द्रियाणां संहतिस्तस्यामभिव्यक्तान्तःकरणवृत्तिः तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरूपविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात् धृतिर्यया वसादं प्राप्तानि देहेन्द्रियाणि धियन्ते सा च ज्ञेयत्वात् क्षेत्रं सर्व्वान्तःकरणधर्म्मोपलक्षणार्थमिच्छादिग्रहणं यत उक्तं तदुपसंहरति एतत् क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्तं यस्य क्षेत्रभेदजातस्य संहतिरिदं शरीरं क्षेत्रं इत्युक्तं तत् क्षेत्रं व्याख्यातं महाभूतादिभेदादभिन्नं धृत्यन्तम्" ॥ इत्यत्र श्रीधरस्वामिनापि यदुक्तं तदुच्यते । "एते चेच्छादयो दृश्यत्वान्नात्मधर्म्मा अपि तु मनोधर्म्मा अतः क्षेत्रान्तःपातिन एवोपलक्षणञ्चैतत् सङ्कल्पादीनाम् । तथा च श्रुतिः । कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" ॥ * ॥ समुद्दीपा पृथिवी । यथा, भागवते ६ । ६ । ३७ ।
"यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते" ॥)
सिद्धस्थानम् । (यथा, कथासरित्सागरे । ३ । ७८ ।
"पाटलिपुत्रं क्षेत्रं लक्ष्मीस्वरूपौ" ।) कलत्रम् ।
इति मेदिनी ॥ (यथा मनुः । ६ । ३३ ।
"क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्व्वदेहिनाम्" ॥)
गृहम् । नगरम् । इति वैजयन्तीकोषः ॥ * ॥

अथ क्षेत्रव्यवहारो लिख्यते ।

तत्र भुजकोटिकर्णानामन्यतमे ज्ञातेऽन्यतमयोर्ज्ञानाय करणसूत्रं वृत्तद्वयम् ।
इष्टाद्दोर्यः स्यात्तत्स्वर्द्धिन्यां दिशीतरो बाहुः ।
यस्मे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णो दोःकर्णवर्गयोर्विवरात् ।
मूलं कोटिः कोटिश्रुतिज्ञात्योरन्तरात् पदं बाहुः ॥

उदाहरणम् ।

कोटिश्चतुरयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोःकर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥

न्यासः



कोटिः ४ । भुजः ३ । भुजवर्गः ९ । कोटिवर्गः १६ । एतयोर्योगात् २५ । मूलं ५ कर्णो जातः ॥

अथ कर्णभुजाभ्यां कोट्यानयनम् ।

न्यासः



कर्णः ५ । भुजः ३ । अनयोर्वर्गान्तरम् १६ । एतन्मूलं कोटिः ४ ॥

अथ कोटिकर्णाभ्यां भुजानयनम् ।

न्यासः



कोटिः ४ । कर्णः ५ । अनयोर्वर्गान्तरम् ९ । एतन्मूलं भुजः ३ ॥

प्रकारान्तरेण तज्ज्ञानाय करणसूत्रं सार्द्धवृत्तम् ।

राश्योरन्तरवर्गेण हिन्ने घाते युते तयोः ।
वर्गयोगो भवेदेवं तयोर्योगान्तरार्हतिः ।
वर्गान्तरं भवेदेवं ज्ञेयं सर्व्वत्र धीमता ॥
कोटिश्चतुरयमिति पूर्व्वोक्तोदाहरणे ।

न्यासः



कोटिः ४ । भुजः । ३ । अनयोर्घातः १२ । द्विघ्ने २४ । अन्तरवर्गेण १ । युते वर्गयोगः २५ । अस्य मूलं कर्णः ५ ॥

अथ कर्णभुजाभ्यां कोट्यानयनम् ।

न्यासः



कर्णः ५ । भुजः ३ । अनयोर्योगः ८ । पुनरेतयोरन्तरेणा-(२) हतो वा १६ । वर्गान्तरमस्य मूलं कोटिः ४ ॥

अथ भुजज्ञानम् ।

न्यासः



कोटिः ४ । कर्णः ५ । एवं जातो भुजः ३ ॥

उदाहरणम् ।

साङ्कित्रयमितो बाहुर्यत्र कोटिश्च तादृशी ।
तत्र कर्णप्रमाणं किं गणक ! ब्रूहि मे, द्रुतम् ॥

न्यासः



भुजः १२/४ । कोटिः १/४ । अनयोर्वर्गयोर्योगः १४४/१६ । अस्य मूलाभावात् करणीगत एवायं कर्णः ॥ अस्यासन्नमूलज्ञानार्थमुपायः ।

वर्गेण महतेष्टेन हताच्छेदांशयोर्वधात् ।
पदं गुणपदक्षुण्णच्छेदघ्नं निकटं भवेत् ॥
इयं कर्णकरणी १४४/१६ । अस्याः छेदांशघातः १६५२ । अयुतघ्नः १३,५२०,००० । अस्यासन्नमूलं ३६७७ । इदं गुणमूलं १०० । गुणितच्छेदेन ८०० । भक्तं लब्धमासन्नपदम् ४ । भागाः ५७७/८०० । अयं कर्णः । एवं सर्व्वत्र ॥

क्षेत्रजात्ये करणसूत्रं वृत्तद्वयम् ।

इष्टो भुजोऽस्मादिगुणेष्टनिघ्ना-
दिष्टस्य वर्गेक्यवियुक्तयायुक्तम् ।
कोटिः पृथक् सेष्टगुणा भुजोना
कर्णो भवेत्क्षेत्रमिदन्तु जात्यम् ॥
इष्टो भुजस्तत्कृतिरिष्टभक्ता
द्विःस्थापितस्वोनयुतार्द्धिता वा ।
तौ कोटिकर्णाविति कोटितो वा
बाहुश्रुती वाकरणीगते स्तः ॥

उदाहरणम् ।

भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा ।
प्रकाराभ्यां वद क्षिप्रं तौ तावकरणीगतौ ॥

न्यासः



इष्टो भुजः १२ । इष्टं २ । अनेन द्विगुणेन ४ । गुणितो भुजः ४८ । इष्टः २ । ज्ञात्वा ४ । इष्टो नया ३ । भक्तो जाता कोटिः १६ । इयमष्टगुणा ३२ । भुजोना १२ । जातः कर्णः २० ॥

त्रिकेणेष्टेन वा ।

क्षेत्रं

कोटिः ९ ।
कर्णः १५ ।

पक्षकेन वा



कोटिः ५ ।
कर्णः १३ ।
इत्यादि ॥

१२

अथ द्वितीयप्रकारेण ।



इष्टो भुजः १२ । अस्य कृतिः १४४ । इष्टेन २ । भक्तालब्धं ७२ । इष्टेन २ । ऊनं ७० । युता ७४ । वर्द्धितौ जातौ कोटिकर्णौ ३५ । ३७ ।

१२

चतुष्टयेन वा ।



कोटिः १६ ।
कर्णः २० ।

१२

षट्केन वा ।



कोटिः ।
कर्णः १५ ।

१२

अथेष्टकर्णात् कोटिभुजानयने करणसूत्रं वृत्तम् ।

इष्टेन निघ्नात् द्विगुणाच्च कर्णा-
दिष्टस्य कृत्यैक्ययुजा यदाप्तः ।
कोटिर्भवेत् सा एषां यदि मिश्री
तत्कर्णयोरन्तरमत्र बाहुः ॥

उदाहरणम् ।

पञ्चाशीतिनिते कर्णे यौ यावकरणीगतौ ।
स्यातां कोटिभुजौ तौ तौ वद कोविद ! सत्वरम् ॥

क्षेत्रं



कर्णः ८५ । अयं द्विगुणः १७० । द्विकेनेष्टेन हतः ३४० । इष्ट २ । क्षुण्णा ४ । सैकया ५ । भक्तौ जाता कोटिः ६८ । इयमिष्टगुणा १३६ । कर्णौ ८५ ।

५१

नितौ जातौ भुजः ५१ ।

चतुष्कोणेष्टेन वा ।



कोटिः ४० ।
भुजः ७५ ।

७५

पुनः प्रकारान्तरेण तत्करणसूत्रं वृत्तम् ।

इष्टवर्गेण सैकेन द्विघ्नः कर्णोऽथवा हृतः ।
फलोनः अवशः कोटिः फलांशयुगं भुजः ॥

पूर्व्वोदाहरणे ।



कर्णः ८५ । अत्र द्विकेन इष्टेन जातौ कोटिभुजौ ५१ । ६८ ।

६८

चतुष्केण वा ।



कोटिः ७५ । भुजः ४० । अत्र दोःकोट्योर्नामभेद एव केवलं न स्वरूपभेदः ॥

४०

अथेष्टाभ्यां भुजकोटिकर्णानयने करणसूत्रं वृत्तम् ।

इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः ।
कृतियोगस्तयोरेवं कर्णश्चाकरणीगतः ॥

उदाहरणम् ।

येषां स्वाक्षं भवेत् जात्यं कोटिदोःअवर्णैः सखे ! ।
तेषां विदितानेतान् क्षिप्रं ब्रूहि विचक्षण ! ॥



अत्रेष्टे २ । १ । आभ्यां कोटिभुजकर्णाः ४ । ३ । ५ ।

३

क्षेत्रं



अथवेष्टे २ । ३ । आभ्यां कोटिभुजकर्णाः १२ । ५ । १३ ।

५



अथवा २ । ४ । आभ्यां कोटिभुजकर्णाः १६ । १२ । २० । एवमन्यत्रानेकधा ।

१२

कर्णकोटियुतौ भुजे च जाते पृथक्करणसूत्रं वृत्तम् ।

वंशाग्रमूलान्तरभूमिवर्गो
वंशोर्द्धवक्त्रेण पृथक्युतोनौ ।
वंशौ तदर्द्धे भवतः क्रमेण
वंशस्य खण्डे श्रुतिकोटिरूपे ॥

उदाहरणम् ।

यदि समभुवि वेणुर्द्वित्रिपाणिप्रमाणो
गणक ! पवनवेगादेकदेशे सभग्नः ।
भुवि नृपमितहस्तेष्वन्तरं तदग्रं
कथय कति भुवादेष भग्नः क्षतेषु ॥



वंशाग्रमूलान्तरभूमिः १६ । वंशः ३२ । कोटिकर्णयुतिः ३२ । भुजः १६ । जाते ऊर्द्धाधःखण्डे २० । १२ ।

१६

बाहुकर्णयोगे दृष्टे कोट्याश्च ज्ञातायां पृथक्करणसूत्रं वृत्तम् ।

स्तम्भस्य वर्गोऽभिविलान्तरेण
भक्तः फलं व्यासविलान्तरार्धात् ।
प्रोह्यं तदर्द्धप्रमितैः करैः स्यात्
विलाग्रतो व्यासकलापियोगः ॥

उदाहरणम् ।

अस्ति स्तम्भतले बिलं तदुपरि क्रीड़ाग्निखण्डी स्थितः स्तम्भे हस्तनवोच्छ्रिते त्रिगुणिते स्तम्भप्रमाणान्तरे । दृष्ट्वाहिं बिलमात्रजन्तमपतत् तिर्य्यक् स तस्योपरि क्षिप्रं ब्रूहि तयोर्बिलात् कतिमितौ साम्येन गत्वोर्युतिः ॥

क्षेत्रं

न्यासः



स्तम्भः ९ अहिविलान्तरम् २७। जाता विलयुत्योर्मध्यहस्ताः १२ ॥

कोटिकर्णान्तरे भुजे च दृष्टे पृथक्करणसूत्रं वृत्तम्।

भुजाहतिर्गतात् कोटिकर्णान्तराप्तं
द्विधा कोटिकर्णान्तरेणोनयुक्तम्।
तदर्द्धे क्रमात् कोटिकर्णौ भवेता-
मिदं धीमता वेद्य सर्व्वत्र योज्यम् ॥
सखे! पञ्च तन्मज्जनस्थानमध्यं
भुजः कोटिकर्णान्तरं पञ्चदश्यम्।
नलः कोटिरेतन्मितं स्यादयदम्भो
वदैवं समानीय पानीयमानम् ॥

उदाहरणम्।

चक्राकौञ्चाकुलितसलिले क्वापि दृष्टं तड़ाग्रे
तोयादूर्द्धं कमलकलिकाग्रं वितस्तिप्रमाणम्।
मन्दं मन्दं चलितमनिलेनाहतं हस्तयुग्मे
तस्मिन्नाग्रं गणक! कथय क्षिप्रमम्भःप्रमाणम् ॥

न्यासः



कोटिकर्णान्तरं $\frac{१}{४}$। भुजः २। लब्धं जलगाम्भीर्यं $\frac{१५}{४}$। इयं कोटिः $\frac{१५}{४}$। इयमेव कोटिः कल्पिकामानयुता जातः कर्णः $\frac{१७}{४}$ ॥

कोट्येकदेशेन युते कर्णे भुजे च दृष्टे कोटिकर्णज्ञानाय करणसूत्रं वृत्तम्।

द्विनिघ्नतालोच्छ्रितिसंयुतं यत्
सरोऽन्तरं तेन विभाजितायाः।
ताखोच्छ्रितेस्ताजसरोऽन्तरघ्ना
उड्डीयमानं खलु लभ्यते तत् ॥

उदाहरणम्।

वृक्षाद्वृक्षग्रतोच्छ्रयाच्छतयुगे वापीं कपिः कोऽप्यगादुत्तीर्य्याथ परो द्रुतं श्रुतिपथेनोड्डीय किञ्चिद्द्रुमात्।
जातैवं समता तयोर्यदि गतावुड्डीयमानं कियद्दिदन्! चेन्नुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाचक्ष्व नः।

न्यासः



वृक्षव्याप्यन्तरं २००। वृक्षोच्छ्रायः १०० लब्धमुड्डीयमानं ५०। कोटिः १५०। कर्णः २५०। भुजः २०० ॥

क्षेत्रं

भुजकोट्योर्योगे कर्णे च ज्ञाते पृथक् करणसूत्रं वृत्तम्।

कर्णस्य वर्गाद्द्विगुणाद्द्विनिघ्नो
दोःकोटियोगः स्वगुणोऽस्य मूलम्।
योगो द्विधा मूलविहीनयुक्तः
स्यातां तदर्द्धे भुजकोटिमाने ॥

उदाहरणम्।

दशसप्ताधिकः कर्णस्त्र्यधिका विंशतिः सखे!।
भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद ॥

न्यासः



कर्णः १७। दोःकोटियोगः २३। जाते भुजकोटी ८। १५।

उदाहरणम्।

दोःकोट्योरन्तरं त्रैराशिकः कर्णो यत्र त्रयोदश्र।
भुजकोटी पृथक् तत्र वदाशु गणकोत्तम! ॥

न्यासः



कर्णः १३। भुजकोट्यन्तरम् ७। लब्धे भुजकोटी ५। १२ ॥

लम्बावबाधाज्ञानाय करणसूत्रं वृत्तम्।

अन्योन्यमूलाग्रगसूत्रयोगात्
वेधोर्वधे योगहृते च लम्बः।
वंशौ स्वयोगेन हृतावभीष्ट-
भूघ्नौ च लम्बोभयतः कुखण्डे ॥

उदाहरणम्।

पञ्चदशदशकरोच्छ्रायवेधोरज्ञातमध्यभूमिकयोः।
इतरेतरमूलाग्रगसूत्रयुतेर्लम्बमानमाचक्ष्व ॥

न्यासः



वंशौ १५। १०। जातो लम्बः ६। वंशान्तरभूः ५। अत्र जाते भूखण्डे ३। २। अथवा भूः १०। खण्डे ६। ४। वा भूः १५। खण्डे ९। ६। वा भूः २०। खण्डे १२। ८। एवं सर्व्वत्र लम्बः। स एव यत्रत्र भूमितुल्ये भुजे वंशः कोटिस्तदा मूलखण्डेन किमिति त्रैराशिकेन सर्व्वत्र प्रतीतिः

क्षेत्रं

अथ क्षेत्रलक्षणे सूत्रम्।

दृष्टोदितभुजं क्षेत्रं यत्रैकबाहुतः स्वल्पा।
तदितरभुजयुतिरथवा तुल्या क्षेयं तदक्षेत्रम् ॥

उदाहरणम्।

चतुरस्रे त्रिषड्ह्यर्का भुजास्त्र्यस्रे त्रिसप्तवाः।
उद्दिष्टा यत्र दृष्टेन तदक्षेत्रं विनिर्दिशेत् ॥

ते अनुपपन्ने क्षेत्रे।





भुजप्रमाणा ऋजुशलाकाः भुजस्थानेषु विन्यस्यानुपपत्तिर्दर्शनीया ॥

आबाधादिज्ञानाय करणसूत्रमार्य्याद्वयम्।
त्रिभुजे भुजयोर्योगस्तद्दन्तरगुणो भुवा हृतो लब्ध्या।
द्विःस्था भूरूनयुता दलिताबाधे तयोः स्याताम् ॥
स्वाबाधा भुजकृत्योरन्तरमूलं प्रजायते लम्बः।
लम्बगुणं भूमर्द्धं स्फुटं त्रिभुजे फलं भवति ॥

उदाहरणम्।

क्षेत्रे महीमनुमिता त्रिभुजे भुजौ तु यत्र
त्रयोदशप्रतिथिभ्रमितौ च यस्य।
तत्रावलम्बकमथो कथयावबाधे
क्षिप्रं तथा च रमकोष्ठमितिं फलाख्याम् ॥

न्यासः



भूः १४। भुजौ १३। १५। लब्धे आबाधे ५। ९। लम्बश्च १२। क्षेत्रफलञ्च ८४ ॥

ऋणाबाधोदाहरणम्।

दशसप्तदशप्रमौ भुजौ
त्रिभुजे यत्र नवप्रमा मही।
अवधे वद लम्बकं तथा
गणितं गाणितिकासु तत्र मे ॥

न्यासः



भुजौ १०। १७। भूमिः ९। अत्र त्रिभुजेभुजयोर्योग इत्या-

क्षेत्रं

दिना लब्धम् २१। अनेन भूरूना न स्यात्। अस्मादेव भूरपनीता। शेषार्द्धमग्रगता बाधा दिग्वैपरीत्येनेत्यर्थः। तथा जाते बाधे ६। १५। अत उभयत्रापि जातो लम्बः ८। फलम् ३६॥

चतुर्भुजत्रिभुजयोरस्पृष्टस्पृष्टफलानयने करणसूत्रं वृत्तम्।

सर्व्वदोर्युतिदलं चतुःस्थितं
बाहुभिर्विरहितञ्च तद्धात्
मूलमस्फुटफलं चतुर्भुजे
स्पृष्टमेव मुदितं त्रिबाहुके॥

उदाहरणम्।

भूमिश्चतुर्दशमिता मुखमष्टसङ्ख्यं
बाहू त्रयोदशदिवाकरसम्मितौ च।
लम्बोऽपि यत्र रविसंज्ञक एव तत्र
क्षेत्रे फलं कथय तत् कथितं यदाद्यैः॥



भूमिः १४। मुखम् ८ बाहू १३। १२। लम्बः १२। उक्तवत् करणेन जातं क्षेत्रफलं करणी २९८ ०।

अस्याः पदं किञ्चिन्नूनमेकचत्वारिंशच्छतम् १४१। इदमत्र क्षेत्रे न वास्तवं फलं किन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमिति वक्ष्यमाणकरणेन वास्तवं फलं १३८।

अत्र त्रिभुजस्य पूर्व्वोदाहृतस्य।



भूमिः १४। भुजौ १३। १५। अनेनापि प्रकारेण त्रिबाहुके तदेव वास्तवं फलं ८४। अत्र चतुर्भुजस्यास्पृष्टभुदितम्॥

अथ स्थूलत्वनिरूपणार्थं सूत्रं सार्द्धवृत्तम्।

चतुर्भुजस्यानियतौ हि कर्णौ
कथं ततोऽस्मिन्नियतं फलं स्यात्।
प्रसाधितौ तत्त्रवणौ यदाद्यैः
सकल्पितौ तावितरत्र न स्तः॥
तेष्वेव बाहुष्वपरौ च कर्णा-
वनेकधा क्षेत्रफलं ततश्च॥

चतुर्भुजे हि एकान्तरकोणावाक्रम्यान्तः प्रवेश्यमानौ तत्संज्ञकौ स्वकर्णौ सङ्कोचयतः। इतरौ तु बहिः प्रसरन्तौ स्वकर्णौ वर्द्धयतः अत उक्तं तेष्वेव बाहुष्वपरौ च कर्णाविति।
लम्बयोः कर्णयोर्व्वैकमनिर्द्दिश्यापरः कथम्।
पृच्छत्यनियतत्वेऽपि नियतत्वापि तत्फलम्॥
स पृच्छकः पिशाचो वा वक्ता वा इतरो ततः।
यो न वेत्ति चतुर्बाहुक्षेत्रस्यानियतां स्थितिम्॥

क्षेत्रं

समचतुर्भुजायतयोः फलानयने करणसूत्रं सार्द्धश्लोकद्वयम्।

इष्टा श्रुतिस्तुल्यचतुर्भुजस्य
कल्पा च तद्वर्गविवर्जिता या।
चतुर्गुणा बाहुकृतिस्तदोयं
मूलं द्वितीयश्रवणप्रमाणम्॥
श्रुतुल्यकर्णाभिहतिर्द्विभक्ता
फलं स्फुटं तुल्यचतुर्भुजे स्यात्।
समश्रुतौ तुल्यचतुर्भुजे च
तथायते तद्भुजकोटिघातः॥
चतुर्भुजेऽन्यत्र समानलम्बे
लम्बेन निघ्नं कुमुखैक्यखण्डम्॥

अत्रोद्देशकः।

क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य
कर्णौ ततश्च गणितं गणक! प्रचक्ष्व।
तुल्यश्रुतेश्च खलु तस्य तथायतस्य
यद्विस्तृती रसमिताष्टमितश्च दैर्घ्यम्॥

प्रथमोदाहरणे।



भुजाः २५। २५। २५। २५। अत्र त्रिंशन्मितामेकां ३० श्रुतिं प्रकल्प्य यथोक्तकरणेन जातान्या श्रुतिः ४० फलञ्च ६००॥

अथवा।



चतुर्दशमितामेकां १४। श्रुतिं प्रकल्प्योक्तवत् करणेन जाता अन्या श्रुतिः ८४। फलञ्च ३३६॥

द्वितीयोदाहरणे।



क्षेत्रं

तत्कृत्योर्योगपदं करण इति जाता करणीगता श्रुतिरुभयत्र तुल्यैव १,२५०। गणितञ्च ६२५।

अथायतस्य।



विस्तृतिः ६। दैर्घ्यम् ८। अस्य गणितम् ४८।

उदाहरणम्।

क्षेत्रस्य यस्य वदनं मदनारितुल्यं
विश्वम्भरा द्विगुणितेन मुखेन तुल्या।
बाहू त्रयोदशनखप्रमितौ च लम्बः
सूर्य्योन्मितश्च गणितं वद तत्र किं स्यात्॥



वदनम् ११। विश्वम्भरा २२। बाहू १३। २० लम्बः १२।

अत्र सर्व्वदोर्युतिदलमित्यादिना स्थूलफलं २५०। वास्तवन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमिति जातं फलम् १९८। क्षेत्रस्य खण्डत्रयं कृत्वा फलानि पृथगानीय ऐक्यं कृत्वास्य फलोपपत्तिर्दर्शनीया खण्डत्रयदर्शनम्।



प्रथमस्य भुजकोटिकर्णाः ५। १२। १३। द्वितीयस्यायतस्य विस्तृतिः ६। दैर्घ्यम् १२। तृतीयस्य भुजकोटिकर्णाः १६। १२। २०।

अत्र त्रिभुजयोः क्षेत्रयोर्भुजकोटिघातार्द्धं फलं आयते चतुरस्रे क्षेत्रे तद्भुजकोटिघातः फलं यथा। प्रथमक्षेत्रे फलम् ३०। द्वितीये ७२। तृतीये ९६। एषामैक्यं सर्व्वक्षेत्रफलम् १९८।

क्षेत्रं

अथान्यदुदाहरणम् ।

पञ्चाग्रदेकसहिता वदनं यदीयं
भूः पञ्चसप्ततिमिता प्रमितोऽष्टषष्ट्या ।
सव्यो भुजो द्विगुणविंशतिसन्मितोऽन्य-
स्तस्मिन् फलं श्रवणलम्बमिती प्रचक्ष्व ॥



वदनम् ५१ । भूमिः ७५ । भुजौ ६८ । ४० ।

अत्र फलावलम्बश्रुतीनां सूत्रं वृत्तार्द्धम् ।

ज्ञातेऽवलम्बे श्रवणः श्रुतौ तु
लम्बः फलं स्यान्नियतन्तु तत्र ।
कर्णस्यानियतत्वात् लम्बोऽप्यनियत इत्यर्थः ॥

लम्बज्ञानाय करणसूत्रं वृत्तार्द्धम् ।

चतुर्भुजान्तस्त्रिभुजेऽवलम्बः
प्राग्वत् भुजौ कर्णभुजौ मही भूः ॥

अत्र लम्बज्ञानार्थं सव्यभुजाग्रादक्षिणभुजमूलगामी इष्टः कर्णः सप्तसप्ततिमितः ७७ कल्पितस्तेन चतुर्भुजान्तस्त्रिभुजं कल्पितं तत्रासौ कर्ण एको भुजः ७७ । द्वितीयस्तु सव्यभुजः ६८ । भूः सैव ७५ । अत्र प्राग्वल्लम्बो लम्बः ३०८/५ ।

लम्बे ज्ञाते कर्णज्ञानार्थं सूत्रं वृत्तम् ।

यल्लम्बलम्बाश्रितबाहुवर्ग-
विश्लेषमूलं कथितावधा सा ।
तदूनभूवर्गसमन्वितस्य
यल्लम्बवर्गस्य पदं स कर्णः ॥

अत्र सव्यभुजाग्रालम्बः किल कल्पितः ३०८/५ । अतो ज्ञातावधा १५४/५ । तदूनभूवर्गसमन्वितेत्यादिना ज्ञातः कर्णः ७७ ॥

द्वितीयकरणज्ञानार्थं सूत्रं वृत्तद्वयम् ।

इष्टोऽत्र कर्णः प्रथमं प्रकल्प्य
स्वाग्रे तु कर्णोभयतः स्थिते ये ।
कर्णौ तयोः स्वामितगौ च बाहू
प्रकल्प्य लम्बावधे च साध्ये ॥
आबाधयोरेककुपस्थयोर्यत्
स्यादन्तरं तत् क्षतिसंयुतस्य ।
लम्बैक्यवर्गस्य पदं द्वितीयः
कर्णो भवेत् सर्व्यचतुर्भुजेषु ॥





तत्र चतुर्भुजे सव्यभुजाग्रात् दक्षिणभुजमूलगामिनः कर्णस्य मानं कल्पितम् ७७ । तत्कर्णरेखावच्छिन्नस्य क्षेत्रस्य मध्ये कर्णरेखोभयतो ये त्र्यस्रे उत्पन्ने तयोः कर्णः भूमी तदितरौ च भुजौ प्रकल्प्य प्राग्वल्लम्बः आबाधा च साधिता तद्ऊनं लम्बः ६० । द्वितीयलम्बः २४ । आबाधयो १५ । ३२ । रेककुपस्थयोरन्तरस्य १३ । क्षते १६९ लम्बैक्य ८४ । क्षतेश्च ७०५६ । योगः ७२२५ । तस्य पदं द्वितीयकर्णप्रमाणम् ८५ ।

अत्रेष्टकर्णकल्पने विशेषोक्तिसूत्रं सार्द्धवृत्तम् ।

कर्णाश्रितं स्वल्पभुजैक्यमुर्व्वीं
प्रकल्प्य तच्छेषमितौ च बाहू ।
साध्योऽवलम्बोऽथ तथान्यकर्णः
सोर्व्याः कथञ्चिच्चवणो न दीर्घः ॥
तदन्यलम्बान्न लघुस्तयेदं
ज्ञात्वेष्टकर्णः सुधिया प्रकल्प्यः ॥

चतुर्भुजं हि एकान्तरकोणावाकृष्य सङ्कोच्यमानं त्रिभुजत्वं याति तत्रैककोणे लम्बलघुभुजयोरैक्यं भूमिरितरौ भुजौ प्रकल्प्य साधितं स च लम्बादूनः सङ्कोच्यमानः कर्णः कथञ्चिदपि न स्यात् तदितरौ भुजौ भूमेरधिकौ न स्यातामेवमुभयथापि एतदनुक्तमपि बुद्धिमता ज्ञायते ॥

विषमचतुर्भुजफलानयनाय करणसूत्रं वृत्तार्द्धम् ।

त्र्यस्रे तु कर्णोभयतः स्थिते ये
तयोः फलैक्यं फलमत्र नूनम् ॥

अनन्तरोक्तक्षेत्रान्तस्त्र्यस्रयोः फले । ९२४ । २३१० । अनयोरैक्यम् ३२३४ । तस्य फलम् ॥

समानलम्बस्यावधादिज्ञानाय करणसूत्रं वृत्तद्वयम् ।

समानलम्बस्य चतुर्भुजस्य
मुखोनभूमिं परिकल्प्य भूमिम् ।
भुजौ भुजौ त्र्यस्रवदेव साध्ये
तस्यावधे लम्बमितिस्ततस्य ॥
अबाधयोना चतुरस्रभूमि-
स्तल्लम्बवर्गैक्यपदं श्रुतिः स्यात् ।
समानलम्बे लघुदोःकुयोगा-
न्मुखान्यदोःसंयुतिरल्पिका स्यात् ॥

उदाहरणम् ।

द्विपञ्चाग्रन्मितयेकचत्वारिंशन्मितौ भुजौ ।
मुखन्तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल ॥
अतुल्यलम्बकं क्षेत्रमिदं पूर्व्वैरुदाहृतम् ।

क्षेत्रं

षट्पञ्चाशत् त्रिषष्टिश्च नियते कर्णयोर्मिती ॥
कर्णौ तत्रापरौ ब्रूहि समलम्बश्च तत्कृती ॥



अत्र दृहत् कर्णौ त्रिषष्टिमितं प्रकल्प्य च ज्ञातः प्राग्वदन्यः कर्णः ५६ ॥

अथ षट्पञ्चाशत्स्थाने द्वाविंशन्मितं कर्णं ३२ प्रकल्प्य प्राग्वत् साध्यमाने कर्णौ ।



जातं करणीखण्डद्वयम् ६२१ । २७०० अनयोर्मूलयोः २४ २२/२५ । ५१ २४/२५ । ऐक्यं द्वितीयः कर्णः ७६ २२/२५ ।

अथ तदेव क्षेत्रक्षेत्रं समलम्बम् ।



तदा मुखोनभूमिं परिकल्प्य भूमिमितिज्ञानार्थं त्र्यस्रकल्पितम् । अत्र क्षेत्रे लम्बांशहारयोः षट्पञ्चाशते पतिते ।



अबाधे ज्ञाते १७/२५ लम्बस्य करणीगतो ज्ञातः २८०१४/२५ आसन्नमूलकरणेन ज्ञातः ३८ ६२२/२५ । अयं तत्र चतुर्भुजे समलम्बः लम्बाबाधोनितभूमेः समलम्बस्य च वर्गयोगः ५०४९ । अयं कर्णवर्गः । एवं दृहदावाधातो द्वितीयकर्णवर्गः २१७६ । अनयोरासन्नमूलकरणेन ज्ञातौ कर्णौ ७१ १/२५ । ४६ १३/२५ एवं चतुरस्रे तेष्वेव बाहुलम्बयोः कर्णौ बहुधा भवत एवमनियतत्वेऽपि नियतावेव कर्णावानीतौ ब्रह्मगुप्तादीस्तदानयनं यथा ।

कर्णाश्रितभुजघातैक्यमुभयथान्योन्यभाजितं गुणयेत् । योगेन भुजप्रतिभुजहत्योः कर्णौ पदे विषमे ॥

क्षेत्रं

न्यासः



कर्णाश्रितभुजघातेति एकवारमनयोः २५। ३९। घातः ९७५। तथा ५२। ६०। अनयोर्घातः ३१२०। घातयोर्द्वयोरैक्यम् ४०९५। तथा द्वितीयवारम् २५। ५२। अनयोर्घाते जातम् १३००। तथा द्वितीयवारम् ३९। ६०। अनयोर्घाते २३४०। घातयोर्द्वयोरैक्यम् ३६४०। एतदैक्यं भुजप्रतिभुजयोः५२। ३९। घातः २०२८। यस्मात् २५। ६०। अनयोर्वधः १५००। तयोरैक्यम् ३५२८। अनेनैक्येन ३६४० गुणितं जातं पूर्व्वैक्यं १९,८४१,९२०। प्रथमकर्णाश्रितभुजघातैक्येन ४०९५। भक्तं लब्धं ३१३६। अस्य मूलं ५६। एककर्णोक्तया द्वितीयकर्णार्थं प्रथमकर्णाश्रितभुजघातैक्यम् ४०९५। भुजप्रतिभुज-३५२८। वधयोगगुणितं जातं १४,४४७,१६०। अन्यकर्णाश्रितघातैक्येन ३६४० भक्तं लब्धं ३९६९। अस्य मूलम् ६३। द्वितीयः कर्णः। अस्मिन् विषमे क्षेत्रे कर्णौ साधनं अस्य कर्णानयनस्य प्रक्रिया गौरवम्॥

लघुप्रक्रियादर्शनद्वारेणाह।

अभीष्टजात्यद्वयबाऽकोटयः
परस्परं कर्णहता भुजा इति।
चतुर्भुजं यद्विषमं प्रकल्पितं
श्रुतौ तु तत्र त्रिभुजद्वयात्ततः॥
बाऽकोर्वधः कोटिवधेन यक् स्या-
देका श्रुतिः कोटिभुजा वधैक्यम्।
अन्या लघौ सत्यपि साधनेऽस्मिन्
पूर्व्वैः कृतं यद्गुरु तन्न विद्मः॥

जात्यक्षेत्रद्वयम्।

न्यासः



एतयोः इतरेतरकर्णहता भुजाः कोटय इतरेतरकर्णहताः कोटयो भुजा इति कृते जातम् २५। ६०। ५२। ३९। तेषां महती मूलघुमुखमितौ बाहू इति प्रकल्प्य क्षेत्रदर्शनं इमौ कर्णौ महत्यायासेनानीतौ ६३। ५६। अस्यैव जात्यद्वयस्योत्तरोत्तरभुजकोट्योर्घातौ जातौ ३६। २०। अनयोरैक्यमेकः कर्णः ५६। बाऽकोः ३। ५। कोट्योश्च ४। १२। घातौ १५। ४८। अनयोरैक्यमन्यः कर्णः ६३। एवं श्रुती स्यातां एवं सुखेन जाते॥

अथ यदि पार्श्वभुजयोर्व्यत्ययं कृत्वा न्यस्तं क्षेत्रम्।

न्यासः



क्षेत्रं

तदा जात्यद्वयकर्णयोर्व्वधः ६५। द्वितीयकर्णः॥

अथ सूचीक्षेत्रोदाहरणम्।

क्षेत्रे यत्र शतत्रयं ३०० त्रिंशत्रिंशत्तथेन्दु १२५ तुल्यं मुखं बाहू खोत्रिंशभिः २६० शरगति-वृतिभिः १९५ तुल्यौ च तत्र श्रुती। एका खाष्टयमैः २८० समा तिथियुगैः ३१५ अन्याथ तल्लम्बकौ तुल्यौ गोवृतिभिः १८९ तथा त्रिनयमै २२४ र्योगाक्ष्वौ लम्बयोः॥

तत् खखेऽष्ट कथयाधरे अवणयोर्योगाच्च लम्बावधे तत्सूची निजमार्गवृद्धभुजयोर्योगाद्यथा स्यात्ततः। सावाधं वद लम्बकञ्च भुजयोः सूच्याः प्रमाणे च के सर्व्वं गाणितिक। प्रवक्ष्व नितरां क्षेत्रेऽत्र दक्षोऽसि चेत्॥

न्यासः।



सूच्यावाधा $\frac{१५३६}{१७}$ सूच्यावाधा $\frac{३५६४}{१७}$।

भूमानम् ३००। मुखम् १२५। बाहू २६०। १९५। कर्णौ २८०। ३१५। लम्बौ १८९। २२४॥

अथ सन्ध्याद्यानयनाय करणसूत्रं वृत्तद्वयम्।

लम्बतदाश्रितबाऽकोर्मध्यं सन्ध्याख्यमस्य लम्बस्य।
सन्ध्योना भूः पीठं साध्यं यस्याधरं खगडम्॥
सन्धिर्द्विस्थः परलम्बश्रवणाहतः परस्य पीठेन।
भक्तो लम्बश्रुत्योर्योगात् स्यातामधःखगडे॥

लम्बः १८९। तदाश्रितभुजः १९५। अनयो र्मध्ये यल्लम्बलम्बाश्रितबाऽकवर्गेत्यादिना गता बाधा सन्धिसंज्ञा ४८। तदूनितभूरिति द्वितीया बाधा सा पीठसंज्ञा २५२।

एवं द्वितीयलम्बः २२४। तदाश्रितभुजः २६०। पूर्व्ववत् सन्धिः १३२। पीठम् १९८।

अथाद्यलम्बस्याधः १८९। खगडं साध्यम्।

अस्य सन्धिः ४८। द्विस्थः ४८। परलम्बेन २२४। श्रवणेन च २८०। एषगुणितः १०७५२। १३४४०। परस्य पीठेन १९८। भक्तो लब्धं लम्बाधःखगडम् ६४। अवणाधःखगडञ्च ८०।

एवं द्वितीयलम्बस्य २२४। सन्धिः १३२। परलम्बेन १८९। कर्णेन च ३१५। एषगुणितः परस्य पीठेन २५२। भक्तो लब्धं लम्बाधःखगडम्। ९९। अवणाधःखगडञ्च १९५।

अथ कर्णयोर्योगादधोलम्बज्ञानार्थं सूत्रं वृत्तम्।

लम्बौ भूघ्नौ निजनिजपीठविभक्तौ च वंशौ स्तः।
ताभ्यां प्राग्वत् श्रुत्योर्योगाल्लम्बः कुखगडे च॥

लम्बौ १८९। २२४। भू ३००। घ्नौ जातौ ५६७००। ६७२००। स्वस्वपीठाभ्यां २५२। १९८। भक्तौ एवमत्र लब्धौ वंशौ २२५। ४००। आभ्यामन्योन्यमूलाग्रसूत्रयोगादित्यादिकरणेन लब्धः कर्णयोगादधोलम्बः। १४४। भूखगडे च १०८। १९२॥

अथ सूच्यावाधालम्बभुजज्ञानार्थं सूत्रं वृत्तत्रयम्।

लम्बहतौ निजसन्धिःपरलम्बगुणः समाक्षयो ज्ञेयः।
समपरसन्थोरैक्यं हारस्तेनोद्धृतौ तौ च॥
समपरसन्धी भूघ्नौ सूच्यावाधे पृथक् स्याताम्।
हारहृतः परलम्बः सूचीलम्बो भवेद्भूघ्नः॥
सूचीलम्बघ्नभुजौ निजनिजलम्बोद्धृतौ सूच्याः।
एवं क्षेत्रक्षोदः प्राज्ञैस्त्रैराशिकात् ज्ञेयः॥

क्षेत्रं

अत्र किलायं लम्बः २२४। अस्य सन्धिः १३२। अयं परलम्बेन १८६। गुणितो २२४। अनेन भक्तो जातः समाक्षयः $\frac{८६१}{८}$। अस्य परसन्धिश्च ४८। योगो हारः $\frac{१२७५}{८}$। अनेन भूम्नः ३००। समः $\frac{२६७३००}{८}$। परसन्धिश्च। $\frac{१४४००}{१}$ भक्तो जाते सूच्यावाधे $\frac{३५६६४}{१७}$। $\frac{१५३६}{१७}$। एवं द्वितीयः समाक्षयः $\frac{५१२}{६}$।

द्वितीयो हारः $\frac{१७००}{६}$। अनेन भूम्नः क्षेपः समः $\frac{१५३६००}{६}$। परसन्धिश्च $\frac{३६६००}{१}$। भक्तो जाते सूच्यावाधे $\frac{१५३६}{१७}$ $\frac{३५६४}{१७}$। परलम्बः २२४। भूमि ३००। गुणो हारेण $\frac{१७००}{६}$। भक्तो जातः सूचीलम्बः $\frac{६०४८}{१७}$। सूचीलम्बेन भुजौ १६५। २६०। गुणितौ स्वस्वलम्बाभ्याम् १८६।२२४। यथाक्रमं भक्तौ जातौ स्वमार्गवृद्धौ सूचीभुजौ $\frac{६२४०}{१७}$ $\frac{७०२०}{१७}$।

एवमत्र सर्वत्र भागहारराशिं प्रमाणं गुण्यगुणकौ तु यथायोग्यं फलेच्छे प्रकल्प्य सुधिया त्रैराशिकमूह्यम् ॥

अथ वृत्तक्षेत्रे करणसूत्रं वृत्तम्।

व्यासे भनन्दाभि ३६२७ हते विभक्ते
खवाणसूर्यैः १२५० परिधिः स सूक्ष्मः।
द्वाविंशतिघ्ने विहृते ऽथ शैलैः ७
स्थूलोऽथवा स्याद्व्यवहारयोग्यः॥

उदाहरणम्।

विष्कम्भमानं किल सप्त यत्र
तत्र प्रमाणं परिधेः प्रचक्षु।
द्वाविंशतिर्यत् परिधिप्रमाणं
तद्व्यासखंखाब्ध सखे विचिन्त्य॥



व्यासमानम् ७। लब्धं परिधिमानम् २१$\frac{१२३६}{१२५०}$।

स्थूलो वा परिधिर्लब्धः २२।

अथवा परिधितो व्यासानयनाय।



गुणहारविपर्ययेण व्यासमानं सूक्ष्मम् ७$\frac{११}{३६२७}$।

स्थूलं वा ७।

वृत्तगोलयोः फलानयने करणसूत्रं वृत्तम्।
वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं यत्
चुक्षं वेदैरुपरि परितः कन्दुकस्येव जालम्।
गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं
षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम्॥

उदाहरणम्।

यद्व्यासस्तुरगैर्मितः किल फलं क्षेत्रे समे तत्र किं व्यासः सप्तमितश्च यस्य सुमते गोलस्य तस्यापि किम्।
पृष्ठे कन्दुकजालसन्निभफलं गोलस्य तस्यापि किं मध्ये ब्रूहि घनं फलञ्च विमलां क्षेत्रेतृसि लीलावतीम्॥

वृत्तक्षेत्रफलदर्शनाय।



व्यासः ७। परिधिः २१$\frac{१२३६}{१२५०}$। क्षेत्रफलम् ३८$\frac{२४२३}{५०००}$।

गोलपृष्ठफलदर्शनाय।



व्यासः ७। गोलपृष्ठफलम् १५३$\frac{११७३}{१२५०}$।

क्षेत्रं

गोलान्तर्गतघनफलदर्शनाय।



व्यासः ७। गोलस्यान्तर्गतं घनफलम् १७६$\frac{२४८७}{२५००}$।

अथ प्रकारान्तरेण ततफलानयने करणसूत्रं सार्धवृत्तम्।

व्यासस्य वर्गे भनवाग्निनिघ्ने
सूक्ष्मं फलं पञ्चसहस्रभक्ते।
खदाहृते शुक्रहृते ऽथवा स्यात्
स्थूलं फलं तद्व्यवहारयोग्यम्॥
घनीकृतव्यासदलं निजैक-
विंशांशयुग्गोलघनं फलं स्यात्॥

व्यासः ७। अस्य वर्गे ४६। भनवाग्निनिघ्ने पञ्चसहस्रभक्ते तदेव सूक्ष्मं फलम् ३८$\frac{२२३४}{५०००}$। अथवा व्यासस्य वर्गे ४६। खदाहृते ५३६। शुक्रहृते लब्धं स्थूलं फलम् ३८$\frac{१}{२}$। घनीकृतव्यासदलम् $\frac{३४३}{२}$। निजैकविंशांशयुग्गोलस्य घनफलं स्थूलम् १७६$\frac{२}{३}$।

भ्ररजीवानयनाय करणसूत्रं सार्धवृत्तम्।

व्यासोनयोगान्तरघातमूलं
व्यासस्तदूनो दलितः भ्ररः स्यात्॥
व्यासाक्षरोनाक्षरसंगुणाच्च
मूलं द्विनिघ्नं भवतीह जीवा।
जीवार्धवर्गे भ्ररभक्तयुक्ते
व्यासप्रमाणं प्रवदन्ति वृत्ते॥

उदाहरणम्।

दृग्विस्तृतिर्वृत्तसमर्पयत्र ज्या षष्टिसंज्ञा सखे!।
तत्रेषुं वद वाणाब्ध्यां ज्यावाणाभ्याञ्च विस्तृतिम्॥



व्यासः १०। ज्या ६। योगः १६। अन्तरम् ४। घातः ६४। मूलम् ८। एतदूनो व्यासः २।

दलितः १। जातः शरः १। व्यासात् १०। शरोनात् ६। शर १। सङ्गुणात् ६। मूलम् ३। द्विनिघ्नं ज्ञाता जीवा ६। एवं ज्ञाताभ्यां ज्यावाभ्यां व्यासानयनं यथा जीवा- ६। ह्रे ३। वर्गे ६। शर १। भक्ते ६। शर १। युक्ते जातो व्यासः १०।

अथ वृत्तान्तरव्यासादिनवव्यासान्तक्षेत्राणां भुजमानानयनाय करणसूत्रं वृत्तत्रयम्।

त्रिद्व्यङ्कवह्निनभश्चन्द्रैः १०३६२३
क्ष्मिवाणाष्टयुगाष्टभिः ८४८५३।
वेदाग्निबाणखाश्वैश्च ७०५३४
खखाभ्राभ्ररसैः ६०००० क्रमात्॥
बाणेषुनखबाणैश्च ५२०५५
द्विद्विनन्देषुसागरैः ४५६२२।
कुरामदग्नवेदैश्च ४१०३१ वृत्तव्यासे समाहते॥
खखखाम्बार्क- १२०००० संभक्ते
लभ्यन्ते क्रमशो भुजाः।
वृत्तान्तव्यासपूर्व्वेषां
नवव्यासान्तं पृथक् पृथक्॥

उदाहरणम्।

सहस्रद्वितयव्यासं यदृत्तं तस्य मध्यतः।
समत्र्यादिकानां मे भुजान् वद पृथक् पृथक्॥

अथ वृत्तान्तत्रिभुजे भुजमानानयनाय।



व्यासः २०००। त्रिद्व्यङ्कवह्निनभश्चन्द्रैः १०३६२३। गुणितः २०७८४६०००। खखखाभ्रार्कैः १२०००० भक्ते लब्धं त्र्यस्रे भुजमानं १७३२ १/२०।

वृत्तान्तचतुर्भुजे भुजमानानयनाय।



व्यासः २०००। त्रिबाणाष्टयुगाष्टभिः ८४८५३ गुणितः १६६७०६,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं चतुरस्रे भुजमानं १४१४ १३/६०।

वृत्तान्तःपञ्चभुजे भुजमानानयनाय।



व्यासः २०००। वेदाग्निबाणखाश्वैः ७०५३४। गुणितः १४१०६८००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं पञ्चास्रे भुजमानं ११७५ १७/३०।

वृत्तान्तःषड्भुजे भुजमानानयनाय।



व्यासः२००० खखाभ्राभ्ररसैः ६०००० । गुणितः १२०,०००,००० । खखखाभ्रार्कैः१२०००० । भक्ते लब्धं षड्स्रे भुजमानं १००० ।

वृत्तान्तःसप्तभुजे भुजमानानयनाय।



व्यासः २००० बाणेषुनखबाणैः ५२०५५। गुणितः १०४,११०,००० । खखखाभ्रार्कैः१२०००० । भक्ते लब्धं सप्तास्रे भुजमानं ८६७ ७ १२।

वृत्तान्तरष्टभुजे भुजमानानयनाय।



व्यासः २०००। द्विद्विनन्देषुसागरैः ४५६२२। गुणितः ६१,८४४,००० । खखखाभ्रार्कैः१२०००० भक्ते लब्धमष्टास्रे भुजमानं ७६५ ११/३०।

वृत्तान्तनवभुजे भुजमानानयनाय।

व्यासः २०००। कुरामदग्नवेदैः ४१०३१ गुणितः ८२,०६२,००० । खखखाभ्रार्कैः१२०००० । भक्ते लब्धं नवास्रे भुजमानं ६८३ १७/२०।

एवमिष्टव्यासादेभ्योऽन्यापि जीवाः सिध्यन्तीति तासु गोले व्योत्पत्तौ वक्ष्ये।

अथ स्थूलजीवाज्ञानार्थं लघुक्रियया करणसूत्रं वृत्तम्।

चापोननिघ्नपरिधिः प्रथमाङ्घ्रयः स्यात्
पश्चाहतः परिधिवर्गचतुर्थभागः।
आद्योनितेन खलु तेन भजेच्चतुर्घ्नः
व्यासाहतं प्रथममानमिह व्यधा स्यात्॥

उदाहरणम्।

अष्टादशांशेन वृतेः समान-
मेकादिनिघ्नेन च यत्र चापम्।
पृथक् पृथक् तत्र वदाशु जीवां
खार्कैर्मितं व्यासदलञ्च यत्र॥

७५४



४२

व्यासः २४०। अत्र किणाङ्कलाघवाय विंशतेः सार्द्धार्कांशतांशमिलितः स्थूलपरिधिः ७५४। अस्यास्टादशांशः ४२। अत्रापि व्यङ्कलाघवाय द्वयोरष्टादशांशयुतो गृहीतः अनेन पृथक् पृथगेकादिगुणितेन तुल्ये धनुषि कल्पिते ज्याः साध्याः।

अथवात्र सुखार्थं परिधेरष्टादशांशेन परिधिं धनूंषि चापवर्त्ता ज्याः साध्यास्तथापि ता एव भवन्ति।

अपवर्त्तिते न्यासः। परिधिः १८। चापानि च १। २। ३। ४। ५। ६। ७। ८। ९। यथोक्तकरणेन लब्धा जीवाः ४१। ८२। १२०। १५४। १८४। २०८। २२६। २३६। २४०।

अथ चापानयनाय करणसूत्रं वृत्तम्।
व्यासाब्धिघातयुतमौर्व्विकया विभक्तो
जीवाङ्घ्रिपञ्चगुणितः परिधेस्तु वर्गः।
लब्धोनितात् परिधिवर्गचतुर्थभागा-
दाप्ते पदे वृतिदलात् पतिते धनुः स्यात्॥

उदाहरणम्।

विहिता इह ये गुणास्ततो
वद तेषामधुना धनुर्मितिम्।
यदि तेऽस्ति धनुर्गुणक्रिया
गणिते गाणितिकातिनैपुणम्॥

व्यासः ४२। ८२। १२०। १५४। १८४। २०८। २२६। २३६। २४०। स एवापवर्त्तितपरिधिः १८। जीवाङ्घ्रिणा। $\frac{21}{12}$ पञ्चभिश्च ५। परिधेः १८। वर्गो ३२४ गुणितः १७०१०। व्यासा-२४०। ब्धि ४। घात ६६०। युतमौर्व्विकयानया १००२ भक्तो लब्धः १७। अत्राङ्कलाघवाय चतुर्विंशतेर्द्वयधिकसहस्रांशयुतो गृहीतोऽनेनोनितात् परिधिः १८। वर्ग ३२४। चतुर्थभागात् ६४। पदे प्राप्ते ८। इति १८। दलात् ६। पतिते १। जातं धनुः एवं जातानि धनूंषि। १। २। ३। ४। ५। ६। ७। ८। ९। एतानि परिधिव्यासादशांशेन गुणितानि स्युः। इति श्रीभास्कराचार्य्यविरचितायां लीलावत्यां क्षेत्रव्यवहारः समाप्तः॥

क्षेत्रकर्कटी, स्त्री, (क्षेत्रजाता कर्कटी। मध्यपदलोपिकर्म्मधारयः।) वालुकी। इति राजनिर्घण्टः॥

क्षेत्रचिर्भिटा, स्त्री, (क्षेत्रजाता चिर्भिटी। प्राक्पार्थिववत् मध्यपदलोपिसमासः।) चिर्भिटाकर्कटी। इति राजनिर्घण्टः॥

क्षेत्रज, पुं, (क्षेत्रे स्त्रीरूपक्षेत्रे गुर्व्वाद्यनुज्ञातदेवरादिसुक्रात् जायते इति। क्षेत्र+जन्+डः।) खस्त्रियामन्यद्वारा जनितः पुत्रः। द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। (यथाह मनुः। ९। १६७।

"यस्त्वजः प्रमीतस्य क्लीवस्य व्याधितस्य वा।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥"

द्वादशविधपुत्रा यथा तत्रैव। ९।१५८—१६०।

"पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः।
तेषां षड् बन्धुदायादाः षड्दायादबान्धवाः॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥
क्रीतानीतश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा।
स्वयन्दत्तश्च शौद्रश्च षड्दायादबान्धवाः॥")

स च देवरादिना भ्रात्रादिभार्य्यायां यथोक्तविधानोत्पन्नः। यथा,—

"अपुत्रां गुर्व्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्॥
आगर्भसम्भवाद्रक्षेत् पतितस्त्वन्यथा भवेत्।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत् सुतः॥"

इति मिताक्षरायामाचाराध्यायः॥

तत्पर्य्यायः। देवरादिजः २। इति हेमचन्द्रः॥*॥

तस्य पित्रिरिक्थभागित्वं यथा, मनुः। ९।१६५।

"औरसश्चैव पुत्रो पित्रिरिक्थस्य भागिनौ।
दशापरे च क्रमशो गोत्ररिक्थांशभागिनः॥"*

अनियोगोत्पन्नक्षेत्रजस्य औरसेन सह विभागमाह मनुः। ९। १६२।

"यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यद्यस्य पैत्रिकं रिक्थं स तद्गृह्णीत नेतरः॥"

(अत्र कुल्लूकभट्टः। "यदीति। अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्म्मत इति याज्ञवल्क्योक्तविषये यदा क्षेत्रिकस्य पितुः क्षेत्रजानन्तरमौरसः पुत्रो भवति तदा तौ औरसक्षेत्रजौ एकरिक्थिनौ एकस्य पितुर्यद्यपि रिक्थार्हौ भवतस्तथापि यद्यस्य जनकसम्बन्धि धनं तदेव स गृह्णीयात् न क्षेत्रजः क्षेत्रिकपितुः। यत्तु वक्ष्यति षष्ठन्तु क्षेत्रजस्यांशं प्रदद्यात् पैतृकाद्धनात्। औरसो विभजन् दायमिति तत्पुत्रवत् बीजिविषयम्। यत्तु याज्ञवल्क्येन उभयसम्बन्धिरिक्थहरत्वमुक्तं तत् क्षेत्रिकपितुरौरसपुत्राभावे बोद्धव्यम्। मेधातिथिगोविन्दराजौ तु औरसमनियुक्तापुत्रस्य विषयीकृत्य इमं श्लोकं व्याचक्षाते। तन्न। अनियुक्तापुत्रस्याक्षेत्रजत्वात् अनियुक्तासुतश्चेत्यनेन तस्य रिक्थग्रहणनिषेधात् यद्येकरिक्थिनौ इत्यनन्वयाच्च॥") एकरिक्थिनौ एकस्यां जातौ रिक्थिनौ यस्य बीजाद्यो जातः स तस्य रिक्थं गृह्णीयात्। इतरोऽन्यबीजजो न गृह्णीयादित्यर्थः। स्त्रीधने यत्पित्रादत्तं यद्धनं स्त्रिये तद्बीजजस्तद्धनं गृह्णीयात् नान्य इत्याह नारदः।

"द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने।
तयोर्यद्यस्य पित्र्यं स्यात् स तद्गृह्णीत नेतरः॥"

इति दायतत्त्वम्॥*॥

कलौ क्षेत्रजपुत्रकरणनिषेधो यथा, आदित्यपुराणे।

"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः।
देवरेण सुतोत्पत्तिर्हृतकन्या प्रदीयते॥"

इत्यादि।

"दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः।"

इत्यादि।

"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः॥"

इत्यादि च उद्वाहतत्त्वम्॥*॥

क्षेत्रजाते त्रि॥

क्षेत्रजा, स्त्री, (क्षेत्रज+स्त्रियां टाप्।) श्वेतकण्टकारी। गृध्राण्डुली। गोलुञ्चिका। गुञ्जिका। वणिका। इति राजनिर्घण्टः॥ खस्त्रियामन्यद्वारा जाता कन्या च॥

क्षेत्रज्ञः, पुं, (क्षेत्रं शरीरं एतच्छरीरं ममेति ज्ञात्वा यो जानाति आपादतलमस्तकं ज्ञानेन विषयीकरोति स्वाभाविकेन औपदेशिकेन वेदनेन विषयीकरोति वा अधीवलवत् तत्फल-

भोक्तृत्वादित्यर्थः। ज्ञा+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) शरीराधिदेवतम। तत्पर्य्यायः। आत्मा २ पुरुषः ३। इत्यमरः। १।४।२६॥ त्रीणि शरीराधिदेवतेऽन्तर्भोक्तरि। (क्षेत्रेषु सर्व्वदेहेषु सर्व्वान्तर्य्यामितया विराजमानः सन् "सर्व्वज्ञः सर्व्वशक्तिमान् सर्व्वक्षेत्रपालयिता" इत्यात्मस्वरूपं जानाति अनुभवति यः प्रज्ञानघनः परमपुरुषः स सर्व्वान्तरात्मा असंसारी परमेश्वरः।) क्षेत्रं शरीरं जानातीति क्षेत्रे शरीरे जानाति ज्ञानवान् भवतीति वा क्षेत्रज्ञः। ज्ञानजनादिति डः। इति भरतः॥ तस्य पर्य्यायान्तरम्। सुबीजः ४ पुरुषः ५ अन्तर्य्यामी ६ ईश्वरः ७ पुङ्गलः ८ परसंज्ञकः ९। इति शब्दरत्नावली॥ प्रधानम् १०। इति जटाधरः॥*॥ (उभयतः प्रमाणं यथा, भगवद्गीतायाम्। १३। १—२।

"इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।
क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥"

ईश्वरपक्षे भाष्यकृदर्थो यथा,—"क्षेत्रक्षेत्रज्ञावुक्तौ किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते क्षेत्रज्ञमिति। क्षेत्रज्ञं यथोक्तलक्षणञ्चापि मां परमेश्वरमसंसारिणं विद्धि जानीहि योऽसौ सर्व्वक्षेत्रेष्वेकः क्षेत्रज्ञो ब्रह्मादिस्तम्बपर्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्व्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः। हे भारत! यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात् क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तज्ज्ञानं सम्यक्ज्ञानमिति मतं अभिप्रेतमित्यभिप्रायो मम ईश्वरस्य विष्णोः।" अपि च तत्रैव। १३। २२।

"उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः॥"

विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने। १४६। १५।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥")

वटुकभैरवः। यथा,—"क्षेत्रज्ञः क्षत्रियो विराट्।" इति तस्य स्तोत्रम्॥ क्षेकः। इति मेदिनी॥ विदग्धः। क्षायकः। इति शब्दरत्नावली॥ क्षेघट्टयार्थे त्रि॥

क्षेत्रदः, पुं, (क्षेत्रं शरीरं ददाति रोगादिभ्यो मोचयति स्तुतिपाठिनो भक्तस्येति भावः। क्षेत्र+दा+कः।) वटुकभैरवः। यथा,—

"क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्॥"

इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुकभैरवस्तोत्रम्॥*॥ (क्षेत्रं शस्याद्युत्पादनक्षमां भूमिं ददातीति।) क्षेत्रदातरि त्रि॥

क्षेत्रदूती, स्त्री, (क्षेत्रस्य क्षेत्रे वा दूतीव। यद्वा, क्षेत्रे शरीरे दूतीव। औषधान्तरेर्युक्तस्यास्य आरोग्यसंघटकतया तथात्वम्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

क्षेत्रदेवता, स्त्री, (क्षेत्राधिष्ठात्री देवता।) केदाराधिष्ठात्री। सा च सर्पादिरूपा। यथा, "रक्षाचः कथयति। अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतस्तदैव निष्फलः कालोऽतिवर्त्तते। अथैकस्मिन् दिवसे स ब्राह्मणः उष्णकालावसाने घर्म्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तः। अनतिदूरे वल्मीकोपरि प्रसारितं बृहत्फुटाटीयं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदापि न पूजिता। तेनेदं मे कृषिकर्म्म विफलीभवति।" इति पञ्चतन्त्रे काकोलूकीयं नाम ३ तन्त्रम्॥

क्षेत्रपः, पुं, (क्षेत्रं शरीरं पाति रक्षति स्तोत्रकारिणो भक्तस्येति यावत्। क्षेत्र+पा रक्षणे "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) वटुकभैरवः। यथा,—
"अक्षोभ्यूं ताम्रयं न्यस्य वदने तीक्ष्णदंष्ट्रिणम्। क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्॥" इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुकभैरवस्तोत्रम्॥ *॥ (क्षेत्रं क्षरत्येतत्पादनक्षमां भूमिं पातीति। क्षेत्र+पा+कः।) क्षेत्ररक्षके त्रि॥ (क्षेत्रं शरीरं विश्वं जगद् वा पाति अपरिमेयात्मैश्वर्य्यप्रभावेन चैतन्यदानेन वा इति क्षेत्रपात्रा परमात्मा परमेश्वरः॥)

क्षेत्रपतिः, पुं, (क्षेत्रस्य क्षरत्यूमेः पतिः।) केदाराधिपः। वप्रस्वामी। यथा,—"अथ प्रभाते स क्षेत्रपतिर्गुरुहस्तं प्रदेशमागच्छन् काकेनावलोकितः।" इति हितोपदेशे मित्रलाभप्रकरणम्॥ (क्षेत्रस्य शरीरस्य विश्वस्य वा पतिः। जीवः। अग्निः। परमात्मा। यथा, तन्त्रसारे।
"जीवं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे। स्वतन्त्र एव स कश्चित् क्षेत्रस्य पतिरिष्यते॥")

क्षेत्रपर्पटी, स्त्री, (क्षेत्रे पर्पटीव। यद्वा, क्षेत्रे जाता पर्पटी।) क्षुपविशेषः। इति वैद्यकम्॥ क्षेतपापड़ा इति भाषा॥

क्षेत्रपालः, पुं, (क्षेत्रं पालयति रक्षतीति। क्षेत्र+पाल्+णिच्+अण् अच् वा।) देवताविशेषः। तद्भेदा यथा,—
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः। मालकाबीजभेदेन सन्निधा नामभेदतः॥ अवरश्चापकुम्भश्च इन्द्रसुतिस्ततः परः। ईड़ाचारस्त्रोत्तसंज्ञ ऊर्द्धाद् ऋषिस्ततः॥ ऋक्षसुतो रुद्रकेशश्च रुद्रकश्चैकदृक्कः। ऐरावतश्चौषवन्तुरौषधीशस्तथैव च॥ अञ्जनश्चाञ्जवारश्च कवलः खरखानलः। गासुरश्चैव घण्टादोहमनाश्च चण्डवारणः॥ छटाटोपो जटालाक्षो भङ्गीवश्च जटेश्वरः। टङ्कपाणिस्तथा चान्यस्थानवन्युश्च डामरः॥ ढक्कारवो णवार्णश्च तड़ित्तेहस्थिरस्तथा। दन्तुरो धनदश्चान्यो नक्तिकान्तः प्रचण्डकः॥ फट्कारो वीरसंघश्च भृङ्गाख्यो मेघभासुरः। युगान्तो रौद्रवक्त्राश्च लम्बोष्ठो वसवस्तथा॥ भूकनन्दः षड़ालाक्षः सुनामाहंबुकस्तथा। एते भेदाः समाख्याता मालकाक्षरयोनिकाः॥"**॥
क्षेत्रपालकथनप्रयोजनं यथा,—
"नामपद्यस्य वर्णानां यो वर्णो मालकान्तरे। दृश्यते प्रथमं तत्र तत्रायं क्षेत्रपालकः॥ तत्र तत्र विघ्नरूपात्मा भैरवैरेव संस्थितः। ततो विघ्नेशो यक्षश्च क्षेत्रपालस्तु सर्व्वतः॥ क्षेत्रपालमसंपूज्य यः कर्म्म कुरुते क्वचित्। तस्य कर्म्मफलं हन्ति क्षेत्रपालो न संशयः॥"
इति एकोनपञ्चाशत्क्षेत्रपालकथनम्।
इति क्षेत्रपालप्रकरणं प्रयोगसारः॥ *॥
अथ क्षेत्रपालमन्त्राः। मन्त्रदेवप्रकाशिन्याम्। क्षौमितिबीजादि क्षेत्रपालाय इति नमोऽन्तः। अयं प्रणवादिर्व्वा मन्त्रः। तथा,—
"वर्णान्त्यमौ बिन्दुयुक्तं क्षेत्रपालाय हृन्मनुः। तारादौ वसुवर्णोऽयं क्षेत्रपालस्य ईरितः॥"
प्रातःस्नात्वाह्निकान्तरं प्राणायामान्तमस्य पूजां विधाय धर्म्मादिपीठं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। अस्य ब्रह्मा ऋषिर्गायत्री छन्दः क्षेत्रपालो देवता क्षौं बीजं आयेतिशक्तिः षड़्दीर्घभाजा बीजेनाङ्गन्यासः। ततो ध्यानम्।
"भालचन्द्रजटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दोर्दण्डाक्तगदाकपालमरुणसंगत्यक्तोज्ज्वलम्। घण्टामेखलघर्घरध्वनिमिलद्भृङ्कारभीमं विभुं वन्दे संहितसर्पकुण्डलधरं श्रीक्षेत्रपालं सदा॥"
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा धर्म्मादिकल्पितपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अङ्गैः प्रथममावरणम्। अनलाशामिकेशकरालघण्टारवमहाक्रोधपिङ्गिलाचोर्द्धकेशैरष्टभिर्दिशतीयम्। इन्द्रादिभिस्तृतीयम्। वज्रादिभिश्चतुर्थम्। ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। साज्येन चरुणा दशांशहोमः। तथा च निबन्धे।
"लक्षमेकं जपेन्मन्त्रं जुहुयात्तद्दशांशतः। चरुणा घृतसिक्तेन ततः क्षेत्रेशमर्च्चयेत्॥"
मन्त्रदेवप्रकाशिकायान्तु प्रणवरहितोऽयं मन्त्रः। अस्य पुरश्चरणमयुतसंख्यजपः॥ *॥
अथास्य बलिविधानम्। रात्रौ श्मशानेऽस्थिखण्डं कृत्वा तत्र देवं सपरिवारं संपूज्य देवस्य हस्ते बलिमन्त्रेण चिवारं बलिं दत्त्वा सपरिवारगणेभ्यः स्वस्वनामभिर्बलिं दद्यात्। बलिमन्त्रस्तु। एह्येहि विदुधि सुर सुर भुञ्जय भुञ्जय तर्ज्जय तर्ज्जय विघ्नपद विघ्नपद महाभैरव क्षेत्रपाल बलिं गृह्ण गृह्ण स्वाहा। तथा च निबन्धे।
"पूर्व्वमेच्छिद्वयं पश्चात् विदधि स्यात् सुरद्वयम् भुञ्जयद्वितयं भूयस्तर्ज्जयद्वितयं पुनः॥ ततो विघ्नपदद्वन्द्वं महाभैरव तत्परम्। क्षेत्रपाल बलिं गृह्ण द्वयं पावकसुन्दरी॥"
यद्वा, एह्येहि तुर तुर सुर सुर जभ जभ हन हन विघ्नं विनाशय विनाशय महाबलिं क्षेत्रपाल गृह्ण गृह्ण स्वाहा। इति मन्त्रः। एष बलिविधिः सर्व्वग्रहनिवारको विजयश्रीकरश्च भवति। बलिमपि सोपदंशं गृहीत्वा दद्यात्॥
फलम्।
"बलिदानेन सन्तुष्टः क्षेत्रपालः प्रयच्छति। कान्तिमेधाबलारोग्यतेजःपुष्टियशःश्रियः॥"
इति तन्त्रसारः॥
(द्वारपालो भैरवविशेषः। यथा, तन्त्रशास्त्रे।
"गणेशं वटुकञ्चैव क्षेत्रपालञ्च योगिनीः। पूर्व्वादिक्रमयोगेन द्वारपालान् प्रपूजयेत्॥"
क्षेत्ररक्षके त्रि। यथा,—
"स एव ग्रामपालोऽभूत् पशुपालः स एव च। क्षेत्रपालः स एवासीद् द्विजातीनाञ्च रक्षिता॥"
इति मार्कण्डेयपुराणे। १६। २४॥)

क्षेत्रपालरसः, पुं, (क्षेत्रपाल इति संज्ञा विद्यते यस्य। स एव रसः औषधविशेषः।) ग्रहणीयुक्तश्चोथस्यौषधम्। दुरधवटीति ख्यातम्। यथा,—
"हिङ्गुलञ्च विषं ताम्रं लौहं तालकटङ्गणम्। जीरमाहूरफेनञ्च समभागं विमर्द्दयेत्॥ यवार्द्रा वटिका कार्य्या पथ्यं दुग्धौदनं हितम्। अलवणं वारिहीनञ्च दातव्यं भिषजां वरैः॥ गुरुश्चोथमग्निमान्द्यं ग्रहणीमतिदुस्तराम्। ज्वरञ्च विषमं जीर्णं नाशयेन्नात्र संशयः॥"
इति भैषज्यरत्नावली॥
आहूरफेनं अहिफेनम्॥

क्षेत्रयमानिका, स्त्री, (क्षेत्रे जाता यमानिका।) क्षेत्रजातयमानी। यथा,—
"उपाधिरुग्रगन्धे तु वचाक्षेत्रयमानिके।"
इति नानार्थे त्रिकाण्डशेषः॥

क्षेत्ररुहा, स्त्री, (क्षेत्रे रोहति उत्पद्यते इति। क्षेत्र+रुह+कः।) वालुकीकर्कटी। इति राजनिर्घण्टः॥ क्षेत्रजाते त्रि॥

क्षेत्रलिप्ता, स्त्री, भूमण्डलस्य कला। यथा। अथ यदि दृग्ग्रहोदयासुभिरशदृग्गतानि क्षेत्रलिप्ता लभ्यन्ते तदा तदन्तरकलासुभिः किमिति फलं क्षेत्रलिप्ताः ता ग्रहार्कभुक्त्यन्तरेण भाज्याः। भुक्त्यन्तरं हि क्षेत्रलिप्तान्तरात्कमतः सजातीयकरणाय क्षेत्रलिप्तीकरणं भुक्त्यन्तरेणैको दिवसो लभ्यत इति युक्तमुक्तम्। इति सिद्धान्तशिरोमणौ गणिताध्याये ग्रहोदयास्ताधिकारः॥ *॥
असुभिः दृग्विपलैः। यथा,—
"गुर्व्वक्षरैः खेन्दुमितैरसृक्लैः षड़्भिः पलं तैर्घटिका खषड़्भिः॥"
इति तत्रैव कालमानाध्यायः॥

क्षेत्रवित् [द्] पुं, (क्षेत्रं शरीरं अहमित्यात्मत्वेन वेत्ति जानाति इदं सर्व्वशरीरमेवाहमिति

आत्मनेन भजन्ते इत्यर्थः। क्षेत्र+विद्+क्विप्।) क्षेत्रज्ञः। जीवात्मा। यथा,—
"तत्त्वं नरेन्द्र! जगतामथ तस्थुषाञ्च
देहेन्द्रियासुधिषणात्मभिराहृतानाम्।
यः क्षेत्रवित्तपतया हृदि विश्वगावि:
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि॥"
इति श्रीभागवते। ४। २२। ३५॥
"यस्मादनात्मरतिरन्धतमोहेतुः तत् तस्माज्जगतां जङ्गमानां तस्थुषां स्थावराणाञ्च देहादिभिः आत्मना अहङ्कारेण चाहृतानां हृदि यच्चकास्ति प्रकाशते तमवेहि। कथं सोऽस्मीति। सोऽस्मीति पाठे स एवैकोऽस्मि ततोऽन्यदसत् इत्यर्थः। ननु जीवो हृदि चकास्ति नान्यस्तत्राह। क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपः; तस्य भावस्तत्ता तया अन्तर्यामिरूपेण। यद्वा क्षेत्रवित्ते अहं ममतास्पदे पातीति क्षेत्रवित्तपः; तेन रूपेण। जीवस्तु पारतन्त्र्यान्न याति। ननु कर्म्म जीवं नियच्छति न आविः प्रत्यक्षः। तर्हि बुद्धिर्न प्रत्यक् प्रतिलोमं चकास्ति बुद्धिस्तु पराक् विषयाकारेण। तर्ह्यहङ्कारः न विश्वक् व्यापकत्वेन स तु परिच्छिन्नः। एवम्भूतो यो भगवान् तमवेहीति।" इति तट्टीकायां श्रीधरस्वामी॥
क्षेत्रसम्भवः, पुं, (क्षेत्रे सम्भवति उत्पद्यते इति। क्षेत्र+सम्+भू+अच्।) चक्षुष्यः। भिखडाचुप:। इति राजनिर्घण्टः॥ भूमिजे त्रि॥
क्षेत्रसम्भूतः, पुं, (क्षेत्रे सम्भूतः जातः।) कुन्दरः। इति राजनिर्घण्टः॥ क्षेत्रोद्भवे त्रि॥
क्षेत्रसीमा, स्त्री, (क्षेत्रस्य भूमेः सीमा मर्य्यादा।) अङ्गारतुषवृक्षादिद्वाराचिह्नितभूमिमर्य्यादा। यथा "सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा। जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति।" इति मिताक्षरायां व्यवहाराध्याये सीमाविवादशब्दे द्रष्टव्यः॥
क्षेत्रजीवः, त्रि, (क्षेत्रेण क्षेत्रोद्भवशस्यादिना आजीवतीति। आ+जीव्+कर्त्तरि अच्।) कर्षकः। इत्यमरः। २। ९। ६॥
क्षेत्राधिदेवता, स्त्री, (क्षेत्रस्य अधिदेवता अधिष्ठात्री देवता।) तीर्थाधिपदेवता। यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत्॥"
इति संस्कारतत्त्वे प्रयोगसारः॥
क्षेत्राधिपः, पुं, (क्षेत्रस्य अधिपः स्वामी अधिष्ठाता वा।) मेषादिद्वादशराशीनामधिपतिग्रहगणः। यथा,—
"कुजशुक्रबुधेन्दर्कसौम्यशुक्रावनीसुवाम्।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरनादयः॥"
इति ज्योतिस्तत्त्वम्॥
क्षेत्राधिष्ठात्री देवता च॥
क्षेत्रामलकी, स्त्री, (क्षेत्रे भूमौ जाता आमलकी। ग्राकपार्थिववत् मध्यपदलोपी समासः।) भूम्यामलकी। इति शब्दमाला॥

क्षेत्रेक्षुः, पुं, (क्षेत्रं अस्यास्तीति। उन्।) क्षेत्रस्वामी। यथाः मनुः। ९। ५४—५५।
"ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता फलमर्हति॥
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषाणाञ्च विज्ञेयः प्रसवं प्रति॥
"तत्र दासीपदं परोढ़ापरं तस्यामन्येन जातो दासीभर्त्तुर्न बीजिभर्त्तुः।" इत्युद्वाहतत्त्वम्॥
कलत्रस्वामी। यथा, मनुः। ९। १४५।
"हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्म्मतः प्रसवश्च सः॥"
"हरेदिति। तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्र औरस इव धनं हरेत् यस्मात् यत्तस्य कारणभूतं बीजं तत् क्षेत्रस्वामिन एव तत्कार्य्यकरणत्वात्।" इति तट्टीकायां कुल्लूकभट्टः॥
क्षेत्रियं, क्ली, क्षेत्रजलशम्। परदेहचिकित्सा। इति मेदिनी॥
क्षेत्रियः, पुं, (परक्षेत्रे चिकित्स्यः। "क्षेत्रियच् परक्षेत्रे चिकित्स्यः।" ५। २। ९२। इति परक्षेत्रस्य क्षेत्रियजादेशः।) असाध्यरोगः। परदाररतः। इति मेदिनी॥ (त्रि, परदेहचिकित्स्यो रोगादिः। यथा, भट्टिः। ४। ३२।
"अहं सूर्पनखा नाम्ना नूनं नाम्नायिधि त्वया।
दग्धोऽयं क्षेत्रियो येन मय्यपातीति साम्प्रवीत्॥")
क्षेत्री, [न्] त्रि, (क्षेत्रमस्यास्तीति इनिः।) क्षेत्रविशिष्टः। कृषीवलः। यथा, हेमचन्द्रः।
"कुटुम्बी कर्षकः क्षेत्री हली कृषिककार्षिकौ॥"
(यथा च मानवे। ९। ५१।
"तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम्॥")
परगवादिना शस्यविनाशे तत्प्राप्तिर्यथा,—
"यावत् शस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत्।
पालस्ताद्योऽथ गोस्वामी पूर्व्वोक्तं दण्डमर्हति॥
इति याज्ञवल्क्यवचने गवादिदोषेण यावत् शस्यं विनश्यति तावदेव पालकात् प्राप्यं पालकाभावे पालकस्ताद्यः गोस्वामी पूर्व्वोक्तं दण्डादिकं अर्हति।" इति प्रायश्चित्ततत्त्वम्॥
क्षेत्री, [न्] पुं, (क्षेत्रं स्त्री अस्यास्य। क्षेत्र+इनिः।) स्वामी। भर्त्ता। यथा, मनुः। ९। ३२॥
"भर्त्तुः पुत्रं विजानन्ति श्रुतिद्वैधन्तु भर्त्तरि।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः॥"
"भर्त्तुरिति। भर्त्तुः पुत्रो भवतीति सुनयो मन्यन्ते। भर्त्तरि द्विप्रकारा श्रुतिर्वर्त्तते। केचिदुत्पादकमवोढ़ारमपि भर्त्तारं तेन पुत्रेण पुत्रिणमाहुः। अन्ये तु वोढ़ारं भर्त्तारमनुत्पादकमपि अन्यजनितेन पुत्रेण पुत्रिणमाहुः।" इति तट्टीकायां कुल्लूकभट्टः॥ (परमात्मा। यथा, गीतायाम्। १३। ३३।
"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत!॥")
क्षेत्रेक्षुः, पुं, (क्षेत्रे इक्षुरिव।) यावनालः। इति राजनिर्घण्टः॥

क्षेपोपेक्षः, पुं स्वफल्कपुत्रः। इति केचित्॥ यथा,—
"युगत्वरोऽगमित्रस्य वृष्णिः पुत्रोऽपरस्ततः।
स्वफल्कश्चित्ररथस्त्वेव गान्दिन्याञ्च स्वफल्कतः॥
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः।
आसङ्गः सारमेयश्च मृदुरो मृदुरिर्गिरिः॥
धर्म्मवृद्धिः सुकर्म्मा च क्षेपोपेक्षोऽरिमर्दनः।
शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश॥"
इति श्रीभागवते। ९। २४। १४—१६॥
क्षेपोपेक्ष इति साधुपाठः। (तत्र क्षत्रेषु क्षत्रियकुलेषु उपेक्षा यस्य॥)
क्षेपः, पुं, (क्षिप+घञ्।) निन्दा। (यथा, याज्ञवल्क्यः। २। २०७।
"क्षेपं करोति चेद्दण्ड्यः प्रणार्द्धशतोदश॥")
विक्षेपः। (यथा, गोः रामायणे। ४। ६२। १२।
"पक्षक्षेपपरिक्षिप्ताः सुपार्श्वेऽभ्यपयास्यति॥")
क्षेपनम्। गर्ब्बः। प्रेरणम्। इति मेदिनी॥ विलम्बः। हेला। लङ्घनम्। इति हेमचन्द्रः॥ गुच्छः। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। ४६।
"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बम्॥")
क्षेपकः, त्रि, (क्षिपतीति। क्षिप्+ण्वुल्।) क्षेपकर्त्ता। इति व्याकरणम्॥
क्षेपणं, क्ली, (क्षिप+भावकर्म्मादिषु ल्युट्।) प्रेरणम्। तत्पर्य्यायः। क्षिपा २। इत्यमरः। ३। २। ११॥ यापनम्। यथा,—
"विधवा यौवनस्था च नारी भवति कर्कशा।
आयुषः क्षेपणार्थन्तु दातव्यं स्त्रीधनं सदा॥"
इति विवादचिन्तामणिधृतहारीतवचनम्॥
प्रस्तरादीनां दूरप्रेरणार्थरज्जुनिर्म्मितयन्त्रविशेषः। फिङ्गा इति भाषा। यथा, श्रीभागवते। ३। १९।
"प्रवयुर्व्वायवश्चण्डाश्चमः पांशुवमेरयन्।
दिग्भ्यो निपेतुर्व्याघाताः क्षेपणैः प्रहिता इव॥"
"पांशुवर्षततमश्च प्रेरितवन्तः। क्षेपणैर्यन्त्रैः।" इति तट्टीकायां श्रीधरस्वामी॥ (परित्यागः। यथाह मनुः। ४। ११९।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्॥"
"उपाकर्म्मणि उत्सर्गे त्रिरात्रमध्ययनक्षेपणम्।"
इति कुल्लूकभट्टः॥ मल्लयोर्द्वन्द्वं सहसा भूपातनरूपनिगृह्यकौशलविशेषः। यथा, महाभारते। ४। १२। २८।
"क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः।
तलैर्वज्रनिपातैश्च प्रस्फोटाभिस्तथैव च॥"
"क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यवनं हटात्॥"
इति तट्टीकाधृतमौलकखण्डधृतमल्लशास्त्रम्॥
क्षेपणिः, स्त्री, (क्षिप+बाहुलकात् अनिः। ङीप् वा।) नौकादण्डः। इत्यमरः। १। १०। १३॥ डाँड़ इति भाषा। जालभेदः। इति मेदिनी॥ (अस्त्रविशेषः। यथा, रामायणे। ६। ७। २४।
"क्षेपणयस्तोमरास्त्रोग्राश्च क्रान्ति सबलानि च॥")
क्षेपणीयं, क्ली, (क्षिप+अनीयर्।) पाषाणप्रक्षेपणास्त्रम्। यथा, रघुवंशे ४। ७७।

"तत्र घोरं रघोर्युद्धं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥"
"तत्रेति। तत्र हिमाद्रौ गणैः सह रघोर्युद्धं अभूत्। किंगणैः पर्व्वते उत्पन्नैः। किं युद्धं भयङ्करम्। पुनः किं नाराचानां बाणविशेषाणां क्षेपणीयानां पाषाणप्रक्षेपणशस्त्राणां ये अश्मानस्तेषाञ्च घर्षणेन उत्पतिता अग्नयो यस्मिन्।" इति तट्टीका॥ क्षेपणयोग्ये त्रि॥

क्षेपदिनं, क्ली, अहर्गणानयनार्थं खीयविंशांशयुतक्षयनाड़ी। यथा। "इदानीमहर्गणार्थं क्षेपदिनान्याह। खीयनखांशयुताः क्षयनाड्यः क्षेपदिनानि दिवागणसिद्ध्यै। पूर्व्वमानीता ये क्षयाहास्तेषामधो यन्नाड़िकादयं तत् खीयविंशांशयुतं सद्दिनाद्यं कल्प्यम्। या घटिकास्तानि दिनानि। या विघटिकास्ता घटिकासामधो ये षष्ट्यंशास्तानि पानीयपलानि कल्प्यानीति।" इति सिद्धान्तशिरोमणौ गणिताध्याये प्रत्यब्दशुद्धिः॥

क्षेपपातः, पुं, यहकक्षाक्रान्तिमण्डलयोर्योगः। यथा। इदानीं क्रान्तिसूत्रमाह। "क्रान्तिसूत्रं विधेयं ग्रहाङ्कं भमत्यत्र भानुश्च भार्द्धे कुभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपातास्च बलनबोधकृत्॥" इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

क्षेपिमा, [न्] पुं, (क्षिप्रस्य भावः "पृथ्वादिभ्य इमनिच् वा।" ५। १। १२२। इति इमनिच्। "स्थूलदूरयुवह्रस्वक्षिप्रक्षेत्राणां यणादिपरं पूर्व्वस्य च गुणः।" ६। ४। १५६। इति साधुः।) अतिशयक्षेपः। इति सिद्धान्तकौमुदी॥

क्षेपिष्ठः, त्रि, (अतिशयेन क्षिप्रः। क्षिप्र+इष्ठन्। "स्थूलदूरेति।" ६।४।१५६। इति साधुः।) अतिशीघ्रः। क्षिप्रतरः। इत्यमरः। ३। २। १११॥

क्षेपीयान्, [स्] त्रि, (अतिशयेन क्षिप्रः। इयसुन्। "स्थूलदूरेति।" ६।४।१५६। इति साधुः।) अतिशयक्षिप्रः। इति सिद्धान्तकौमुदी॥

क्षेप्ता, [ऋ] त्रि, (क्षिपति इति। क्षिप्+तृच्।) क्षेपणकर्त्ता। इति सिद्धान्तकौमुदी॥ (यथा, रामायणे। ४। ६। ८४।
"उपास्तृश्च ददौ ग्राम्यं क्षेप्तारं वालिनं प्रति॥")

क्षेमं, क्ली, प्लक्षद्वीपस्य वर्षविशेषः। यथा। "प्लक्षो लक्षप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेममभयमिति वर्षाणि।" इति श्रीभागवते। ५। २०। २-३॥ * ॥ मठविशेषः। यथा,—
"मर्त्तुं ययौ च वाराहक्षेत्रं यत्राविधायकः।
श्रीकण्ठक्षेममठयोरासीद्युष्कपुरान्तिके॥"
इति राजतरङ्गिण्यां ६ तरङ्गः॥

क्षेमः, पुं, क्ली, (क्षि क्षये+"अर्त्तिसुसुहृदृधक्षीति।" उणा। १। १३६। इति मन्। (कुशलम्। (यथा, मनुः। २।१२७।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च॥")
तद्वति त्रि। इत्यमरः २।४।२६॥ (यथा, गोः रामायणे। ५। ८। १७।
"क्षताः क्षेमाश्च पन्थानः सुखं गच्छन्ति खेचराः॥")
लब्धरक्षणम्। इति मेदिनी॥ मोक्षः इति हेमचन्द्रः॥

क्षेमः, पुं, (क्षेमं मङ्गलमस्त्यस्मिन्नस्तीति। अर्श आद्यच्।) चोरनामगन्धद्रव्यम्। चण्डालामौषधम्। इति शब्दरत्नावली मेदिनी च॥ धर्म्मेण म्लान्यासुत्पादितः पुत्रः। यथा, विष्णुपुराणे। १।७।२८।
"व्यवसायं प्रजज्ञे वै क्षेमं म्लानिरजायत।
सुखन्द्विर्यशः कीर्त्तिरित्येते धर्म्मसूनवः॥"
कलिङ्गदेशस्य राजा। यथा,—
"क्षेमोऽयतीर्थः कुहरः कलिङ्गेषु नराधिपः।
मतिमांश्च मनुष्येन्द्र! ईश्वरक्षेति विश्रुतः॥"
इति महाभारते। १। ६७। ६५॥ * ॥
चन्द्रवंशीयशुचिराजपुत्रः। यथा,—
"ततः सुतञ्जयाद्विप्रः शुचिस्तस्य भविष्यति।
क्षेमोऽथ सुव्रतस्तस्माद्धर्म्मसूत्रः सनस्रतः॥"
इति श्रीभागवते। ६। २२। ४७॥ * ॥
लब्धपरिपालनम्। यथा,—
"उपेयादीश्वरक्षेत्र योगक्षेमार्थसिद्धये।
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा॥"
इति याज्ञवल्क्यसंहितायामाचाराध्यायः॥
"तदनन्तरमीश्वरमभिषेकादिगुणयुक्तमन्त्रं वा श्रीमन्तमकुत्सितं योगक्षेमार्थम्। अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः तदर्थमुपेयात्। उपासीत उपेयादित्यनेन सेवां प्रतिषेधति। वेतनग्रहणेन आज्ञाकरणं सेवा तस्याः स्वतन्त्रत्वेन निषेधात्।" इति तट्टीका मिताक्षरा॥ (यथाच मनुः। ८। २३०।
"योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥")

क्षेमकः, पुं, (क्षेम+स्वार्थे संज्ञायां वा कन्।) चोरनामगन्धद्रव्यम्। इति जटाधरः॥ * ॥ नागविशेषः। यथा,—
"नागः शङ्खसुखश्चैव तथा कुशाग्रकोपरः।
क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा॥"
इति महाभारते। १। ३५। ११॥
जनमेजयवंशोत्पन्नराजविशेषः। यथा,—
"घृतानीकाद्दृढमनस्तस्मात्क्षेमको भविता यतः॥"
इति श्रीभागवते। ६। २२। ४३॥
एतत्पर्य्यन्तं अस्य वंशस्य विश्रान्तिः। परीक्षिदादयः क्षेमकान्ताः कलेः सहस्रवत्सरपर्य्यन्तं राजान आसन्। ततः सोमवंशशाखान्तरे मगधवंश्या राजानः कलौ बहुकालं स्थिताः। इति श्रीभागवतमतम्॥ राक्षसविशेषः। यथा,—
"एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप!।
शून्यां निवेशयामास क्षेमको नाम राक्षसः॥"
इति हरिवंशे। २६। ७६॥

क्षेमकरः, त्रि, (करोतीति। कृ+अच्।) मङ्गलकारकः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १४। ३५। ३७।
"पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः॥")

क्षेमकारः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"कर्म्मणि अण्।" ३। २। १। इति अण्।) शुभङ्करः। इति भूरिप्रयोगः॥ क्षेमङ्करः। मङ्गलकर्त्ता। यथा, "क्षेमप्रियमद्रात् कुर्व्वा" इति सूत्रेण क्षेमशब्दात् परस्य कृधातोः खप्रत्ययाभावपक्षे छात्रयसिति षण्प्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥ (यथा, भट्टिः। ५।७७।
"पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्॥")

क्षेमकृत्, त्रि, (क्षेमं करोतीति। क्षेम+कृ+क्विप्।) मङ्गलकारकः। यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः॥"
इति चाणक्ये। ५४॥

क्षेमगुप्तः, पुं, (क्षेमेण मङ्गलमयेन परमेश्वरेण गुप्तः रक्षितः यद्वा क्षेमः लब्धरक्षणं तेन गुप्तः।) काश्मीरदेशस्य राजविशेषः। यथा,—
"क्षेमगुप्ताभिधानोऽभूदथ राजा तदात्मजः।
आसवासेवनोत्सिक्तवित्ततारुण्यसंज्वरः॥"
इति राजतरङ्गिण्यां ६ तरङ्गः॥
(क्षेमगुप्ते त्रि॥)

क्षेमङ्करः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"क्षेमप्रियमद्रेऽण् च।" ३।२।४४। इति अण्। चात् खच् मुम् च।) मङ्गलकारकः। तत्पर्य्यायः। अरिष्टतातिः २ शिवतातिः ३ शिवङ्करः ४। इति हेमचन्द्रः॥ क्षेमकारः ५ मद्रङ्करः ६ शुभङ्करः ७। इति भूरिप्रयोगः॥

क्षेमङ्करी, स्त्री, (क्षेमङ्कर+स्त्रियां ङीप्।) देवीविशेषः। यथा,—
"क्षेमान् देवेषु सा देवी लब्धा दैत्यपतेः क्षयम्।
क्षेमङ्करी शिवेनोक्ता पूज्या लोके भविष्यसि॥
अनेनैव तु रूपेण विद्याष्टकसमन्विता।
एका वा नगरान्तस्था पूजिता स्थापिता शुभा॥
प्रासादे पटकुम्भे वा पुस्तके जलवह्निगा।
निश्चिन्ते पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्॥
दमनी पदमाला च श्रीघोषा वज्रशासना।
अस्त्रं प्रत्यङ्गिरादेव्याः पूजयेत् ससुदाहृता।
एताभिः स्थापनं कार्य्यं शिवशासनसम्मुखम्॥"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावः ४७ अध्यायः॥
शुद्धचित्तो। सा च भगवत्या मूर्त्तिः। तस्या नमस्कारमन्त्रः। यथा,—
"कुङ्कुमारुणसर्व्वाङ्गि! कुन्देन्दुधवलानने!।
मत्स्यमांसप्रिये देवि! क्षेमङ्करि! नमोऽस्तु ते॥"
अपि च।
"क्षीरोदतरि महाचण्डे! सुक्तकेशि! बलिप्रिये!।
कुलाचारप्रसन्नास्ये नमस्ते शुद्धरूपिणे!॥"
इति तन्त्रम्॥

क्षेमजित्, पुं, (क्षेमं मङ्गलं जयति जितवान् वा सर्व्वदा पुण्यात्मककर्म्मणा। यद्वा क्षेमं प्राप्तस्य रक्षणं जितवान् स्वायत्तीकृतवान् दैवपुरुषकारादिप्रभावेणेति यावत्।) राजविशेषः। स तु मगधदेशे षट्त्रिंशद्वर्षपर्य्यन्तं राजा भविष्यति। तस्य नामान्तरं क्षेमार्चिः। इति मत्स्यपुराणमिति केचित्॥

क्षेमदर्शी, [न्] पुं, (क्षेमं द्रष्टुं शीलमस्य यद्वा क्षेमं मङ्गलं प्राप्तस्य रक्षणं वा पश्यतीति। क्षेम+दृश्+णिनिः।) चन्द्रवंशीयराजविशेषः। यथा, महाभारते। १२।८२।६।
"कोशलानामाधिपत्यं संप्राप्तं क्षेमदर्शिनम्।
मुनिः कालकृतज्ञीय आजगामेति नः श्रुतम्॥"

क्षेमधन्वा, [न्] पुं, (क्षेमं लब्धरक्षणपटु धनुर्यस्य यद्वा क्षेमं प्रजानां मङ्गलसाधनं जगद्धितकरमित्यर्थः धनुर्यस्य।) सूर्य्यवंशीयराजविशेषः। स तु पुष्करीकपुत्रः। यथा,—
"नभस्य पुष्करीकस्तु क्षेमधन्वा ततः स्मृतः।
क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान्॥"
इति हरिवंशे। १५।२७॥
सावर्णनामकस्तृतीयमनुपुत्रविशेषः। यथा,—
"सर्व्वत्रगः सुधर्म्मा च देवानीकः पुरुद्वहः।
क्षेमधन्वा दृढायुश्च आदर्शः षण्डको मनुः।
सावर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः॥"
इति च तत्रैव। ७।७४॥

क्षेमधर्म्मा [न्,] पुं, (क्षेमं मङ्गलरूपं क्षेमे वा धर्म्मो यस्य। यद्वा क्षेमरक्षणे धर्म्मो यस्य।) राजविशेषः। यथा, "ततश्च प्रियुनागस्तस्य पुत्रश्च काकवर्णो भविता तस्य पुत्रः क्षेमधर्म्मा तस्यापि क्षत्रौजाः।" इति विष्णुपुराणे। ४।२४।३॥

क्षेमधूर्त्तिः, पुं, (क्षेमे मङ्गले लब्धरक्षणे वा धूर्त्तिर्धारणा यस्य।) राजविशेषः। यथा,—
"बृहत्क्षत्रमथायान्तं कैकयं दृढविक्रमम्।
क्षेमधूर्त्तिर्महाराज! विद्याधीरसि मार्गणैः॥"
इति महाभारते। ७।१०६।१॥

क्षेममूर्त्तिः, पुं, (क्षेमा मङ्गलमयी प्रियदर्शना मूर्त्तिरस्य।) कारूषदेशीयराजविशेषः। इति केचित्॥ क्षेमधूर्त्तिरिति साधुपाठः। यथा,—
"कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च।
श्रुतायुरुद्वहश्चैव बृहत्सेनस्तथैव च॥"
इति महाभारते आदिपर्व्वणि ६७ अध्यायः॥

क्षेमवान् [त्] त्रि, (क्षेमं मङ्गलं अस्त्यस्येति। अस्त्यर्थे मतुप् मस्य वत्वम्।) मङ्गलयुक्तः। इति सिद्धान्तकौमुदी॥

क्षेमशूरः, पुं, (क्षेमे मङ्गलस्थाने निर्विघ्नस्थाने वा शूरः।) निर्भयस्थाने बलप्रकाशकः। यथा,—
"किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः।
रहोनुषा वा हरिणा शम्भुना वा वनौकसा॥"
इति श्रीभागवते। १०।४। ३६॥
"क्षेमे निर्भयदेशे शूरैः। संयुगादन्यत्र विकत्थनं प्रौढ़वादो येषां तैः। ननु हरेर्विभेमि शम्भोः क्षेमे चेत्तत्राह रहोनुषेति। सर्व्वस्मात्प्रविष्टेन न क्वचिदपि बहिर्दृष्टेन इत्यर्थः। पुरुषप्रवेशरहितमिलातृतवनं ओको यस्य तेन शम्भुना।" इति तट्टीकायां श्रीधरस्वामी॥

क्षेमा, स्त्री, (क्षेम+टाप्।) कात्यायनी। इति मेदिनी॥ क्षेमङ्करी। यथा,—
"निस्त्रिंशे पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्।"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावनामाध्यायः॥
(अक्षरभेदः। यथा, महाभारते।१।१२३।५६।
"अम्बिका लक्षणा क्षेमा देवीरम्भामनोरमा॥")

क्षेमाधिः, पुं, (क्षेमा मङ्गलमयी क्षेमे मङ्गलविषये धीर्यस्य पृषोदरात् ह्रस्वः।) मिथिलादेशस्थसूर्य्यवंशीयराजविशेषः। यथा,—
"अरिष्टनेमिस्तस्यापि श्रुतायुस्तत् सुपार्श्वकः।
ततश्चित्ररथो यस्य क्षेमाधिर्म्मिथिलाधिपः॥"
इति श्रीभागवते। ६।१३। २३॥

क्षेमाफला, स्त्री, (क्षेमं मङ्गलजनकं हितकरं फलं यस्याः। पृषोदरादाकारत्वे साधुः।) क्षेमफला इति वा पाठः॥ उड़म्बरवृक्षः। इति शब्दचन्द्रिका॥

क्षेम्यं, त्रि, (क्षेमाय साधुः "प्राग्वितादयत्।" ४।४। ७५। इति यत्। यद्वा, क्षेममर्हति "दण्डादिभ्यो यत्।" ५।१।६६। इति यत्।) क्षेमीयम्। कुशलयोग्यम्। इति सिद्धान्तकौमुदी॥ (यथा, मनुः। ७।२१२।
"क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजत् नृपो भूमिमात्मार्थमविचारयन्॥")

क्षेम्यः, पुं, (क्षेममर्हत्यसौ। क्षेम+यत्।) राजविशेषः। यथा, हरिवंशे। २०।४६।
"उग्रायुधस्य दायादः क्षेम्यो नाम महाबलः॥
क्षेम्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः।
नृपञ्जयाद् बहुरथ इत्येते पौरवाः स्मृताः॥"

क्षै, क्षये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) क्षादिः। क्षायति। इति दुर्गादासः॥

क्षैण्यं, क्ली, (क्षीणस्य भावः। क्षीण+ष्यञ्।) क्षीणता। यथा, "क्षैण्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादादिकम्॥" इति प्रायश्चिततत्त्वम्॥ अपि च।
"अस्मिन् धनजनक्षैण्यनिमित्तं मण्डलोत्तमे।
सर्व्वतो दिक्कसुत्तस्यावधानर्थपरम्परा॥"
इति राजतरङ्गिण्याम् ५ तरङ्गः॥

क्षैत्रं, क्ली, (क्षेत्राणां समूहः। "भिक्षादिभ्योऽण्।" ४।२।३८। इति अण्।) क्षेत्रसमूहः। तत्पर्य्यायः। कैदारिकम् २ कैदर्य्यम् ३ कैदारकम् ४। इत्यमरः। २।६।११॥ वारटम् ५। इति शब्दरत्नावली॥

क्षैत्रज्ञं, क्षैत्रज्ञ्य, } क्ली, (क्षेत्रज्ञ+"हायनान्तयुवादिभ्योऽण्।" ५।१।१३०। इति अण्।
"क्रकुचलचपलनिपुणपिशुनकृतूहलक्षैत्रज्ञाः कुशादिषु ब्राह्मणादिषु च पठ्यन्ते।" क्षैत्रज्ञ्य पदे+"गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) क्षेत्रज्ञस्य भावः। इति सिद्धान्तकौमुदी॥

क्षैरेयी, स्त्री, (क्षीरे संस्कृतं यदन्नम्। ततः स्त्रियां ङीप्।) परमान्नम्। इति हेमचन्द्रः॥ क्षीरसम्बन्धिनि त्रि। क्षैरेयी इति च पाठः॥

क्षोड़ः, पुं, (क्षोड्यते बध्यते अस्मिन्। क्षोड़+अधिकरणे+अप्। घञ् इति केचित् तद्विप्रं वैदिकधातुस्सायम्।) आलानम्। गजबन्धनी। इति भूरिप्रयोगः॥

क्षोणिः, } स्त्री, (क्षै+बाहुलकात् डोनिः वा
क्षोणी, } ङीप्।) पृथिवी। इति शब्दरत्नावली॥ अमरटीका च॥ (यथा, ऋग्वेदे १।५४।१।
"अक्रन्दयो नद्योरोरुवद्वना कथा न क्षोणीभियसा समारत॥")

क्षोदः, पुं, (क्षुद्यते इति। क्षुद् पेषणे+कर्म्मणि भावे च घञ्।) चूर्णः। इत्यमरः। २।८।६६॥ (यथा, काशीखण्डे। ३३।६३।
"सापि प्राग्वासना योगाच्छिङ्काक्षैनरता सती।
हित्वा मलयजक्षोदं विभूतीं वक्रमंस्त वै॥")
रजः। पेषणम्। इति मेदिनी॥ (यथा, रत्नावलीनाटिकायाम् १ अङ्के।
"कीर्णैः पिष्टातकौघैः क्षतदिवसमुखैः कुङ्कुमक्षोदगौरैर्-
हैमालङ्कारभाभिर्भरनमितशिरःशेखराङ्कैः किरातैः॥")

क्षोदितं, क्ली, (क्षुद्+भावे क्तः। वाच्यलिङ्गे तु कर्म्मणि+क्तः।) चूर्णम्। इति शब्दचन्द्रिका॥ पेषिते त्रि॥

क्षोदिमा, [न्] पुं, (क्षुद्+"पृथ्वादिभ्य इमनिज् वा।" ५।१।१२२। इति इमनिच्।) अतिशयक्षुद्रता। इति व्याकरणम्॥

क्षोदिष्ठः, त्रि, (अतिशयेन क्षुद्र इति। इष्ठन् प्रत्ययः।) अतिशयक्षुद्रः। इत्यमरः। ३।२।१११॥

क्षोदीयान्, [स्] त्रि, (क्षुद्+इयसुन्।) अतिक्षुद्रः। इति सिद्धान्तकौमुदी॥ (यथा, माघे। २।१००।
"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥")

क्षोद्यः, त्रि, (क्षोदनयोग्यः क्षोदितुमर्हति। क्षुद्+"अचो यत्।" ३।१।९७। इति यत्।) क्षोदनीयः। चूर्णीकरणीयः। यथा,—
"बबन्धुर्बन्धनीयांश्च क्षोद्यान् भक्षयितुं
विभिदुर्भेदनीयांश्च तांस्तान् देशान्नरः
इति रामायणे। ज्ञातवान्
"बन्धनीयान् सेतून्। क्षोद्यान्। इति शूर्करामूयिष्ठप्रदेशान्। क्षभ्नुमासुः। भेदनीयान् जलनिर्गं) भूतलम्। इति तट्टीका॥

क्षोभः, पुं, (क्षुभ+भावे घञ्। वा लनम्। चित्तचाञ्चल्यम्।")
"पूरोत्पीड़े तड़ागस्य प
क्षोभस्तोभे तु हृदयं प्रवृत्तिर्धारणा पालनी-
इति यराजविशेषः। यथा,
परीवाहः सेतुभेदः।८८२।
चित्तचाञ्चल्ये। प्र

अपि च प्राक्तानन्तरङ्गिणीधृततन्त्रे ।
"भुक्त्वा पीत्वा चरेत् पूजां जपं दत्त्वा समाहितः ।
साधके चोभमापन्ने मम चोभं प्रजायते ।
तस्माद्भुक्त्वा च पीत्वा च अचयुत्वो यजनं चरेत् ॥"

चोभकः, पुं, (चोभ + संज्ञायां कन् ।) कामाख्यास्थ-पर्व्वतविशेषः । यथा,—
"दुर्ज्जराख्यस्य पूर्व्वस्यां पुरं नाम वरासनम् ।
तद्दक्षिणे महाशैलः चोभको नाम नामतः ॥
तस्मिन् गिरौ शिलापृष्ठे वक्षे देवी व्यवस्थिता ।
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ॥
एकत्र पञ्चभिर्दुर्गा योनिभिः पञ्चवक्त्रकम् ।
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ (चुभ् + कर्त्तरि + ण्वुल् ।) चोभजनके च ॥

चोभकं, त्रि, (चुभ् + णिच् + ण्वुः ।) चोभजनकम् । सञ्चलनकारकम् । यथा,—
"आहताङ्गैः ससस्त्रैस्तं देवप्रहरणैरुदा ।
अचोभ्यां ससुद्राणां चोभणं त्रिप्रकारिणम् ॥"
इति रामायणे । ३ । ३६ । १० ॥
"चोभणं चोभकर्त्तारम् ।" इति तट्टीका ॥ (स्त्री भावे ल्युट् । चोभः ॥)

चोभणः, पुं, (चुभ् + णिच् + ल्युः ।) वटुकभैरवः । यथा, विश्वसारोद्धारतन्त्रे तस्य स्तोत्रम् ।
"कङ्कालधारी मुण्डी च व्यालयज्ञोपवीतवान् ।
जृम्भणो मोहनस्तम्भी मारणः चोभणस्तथा ॥"

चोभितः, त्रि, (चुभ् + णिच् + कर्म्मणि क्तः ।) चोभयुक्तः । सञ्चालितः । यथा,—
"पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
चोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ८२ । ३७ ॥

चोमं, क्ली, (चुम + मन् । पृषोदरात् वृद्धिर्वा ।) दुकूलम् । इत्यमरः । २ । २ । १२ । चौमं इति च पाठः ॥

चोमः, पुं क्ली, (चुम + मन् ।) अट्टः । इत्यमर-टीकायां भरतः ॥ चौमोऽपि पाठः ॥

चोमकः, पुं, (चोम + संज्ञायां कन् ।) गण-द्राबकः । इति जटाधरः ॥

चौणिः, चौणी, } स्त्री, (चुण् + बाहुलकात् निः णत्वं वृद्धिः वा ङीप् च ।) पृथिवी । इत्य-मरः । २ । १ । २ ॥ अस्या व्युत्पत्तिर्यथा,—
"इष्ट्वा च यागाधाराच्च चौणी चौणालये च या ।
महालये व्रजं याति चिन्तितेन प्रकीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
(यथा, भागवते । ३ । १ । ४ । ३ ।
"तस्य चोद्धरतः चौणीं स्वदंष्ट्राग्रेण लीलया ॥")

चौणीप्राचीरः, पुं, (चौण्याः प्राचीर इव ।) समुद्रः । इति जटाधरः ॥

चौणीभुक् [ज्,] पुं, (चौणीं पृथ्वीं भुनक्तीति । भुज् + क्विप् ।) राजा । यथा,—
"कृत्वा शुल्कविभीषिकां कतिपयग्रामेषु दीनाः प्रजा मथ्नन्तो विटजल्पितैरुपहताः चौणीभुजस्ते किल ।
विद्वांसोऽपि वयं किल त्रिजगतां सर्गस्थितिव्यापदा-मीशस्तत्परिचर्य्यया न गणितो वैरेण नारायणः ॥"
इति शान्तिशतके । १ । ११ ॥

चौणीमयः, पुं, (चौणी + मयट् ।) स्वरूपः । पृथिव्याश्रयः । यथा,—
"मत्स्यो युगान्तसमये मनुनोपलब्धः
चौणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्म
आदाय तत्र विजहार ह वेदमार्गान् ॥"
इति श्रीभागवते । २ । ७ । १२ ॥
"मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । चौणीमयः पृथ्वीमयः पृथिवी-प्रधानस्तदाश्रय इत्यर्थः । अत एव निखिल-जीवनिकायानामाश्रयः । मे सुखाद्विसंस्रितान् गलितान् वेदस्य मार्गान् वेदानादाय तत्र युगान्तसलिले विजहार । ह हर्षे ।" इति तट्टी-कायां श्रीधरस्वामी ॥ * ॥ चौणीमयोऽपि पाठः ॥

चौद्रं, क्ली, (क्षुद्राभिः पिङ्गलवर्णमक्षिकाभिः सरघाभिर्निर्म्मितम् । क्षुद्र + "क्षुद्राभ्रमरवटर-पादपादञ् ।" ४ । ३ । ११६ । इति अञ् ।) मधु । इत्यमरः । २ । ६ । १०७ ॥ जलम् । इति मेदिनी ॥ पिङ्गलवर्णक्षुद्रमक्षिकाकृततकपिलवर्ण-मधु । अस्य गुणाः । अतिशीतलत्वम् । लघुत्वम् । क्लेदनाशित्वम् । घृतयुक्तचौद्रचेद्विषतुल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"माक्षिकाः कपिलाः क्षुद्राः क्षुद्राख्यास्तत् कृतं मधु ।
मुनिभिः चौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् चौद्रं विशेषान्नेहनाशनम् ॥"
इति भावप्रकाशः ॥

चौद्रः, पुं, (क्षुद्र + अण् ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ वर्णसङ्करविशेषः । स तु सजा-तीयात् मागध्यां जातः । यथा,—
"चतुरो मागधी सूते क्रूरान् मायोपजीविनः ।
मांसं खादुकरं चौद्रं सौगन्ध्यमिति विश्रुतम् ॥"
इति महाभारते । १३ । ४८ । २२ ॥
"एते मागध्यामायोगवादिभ्यश्चतुर्भ्यः क्रमाज्जा-यन्ते । इत्युपसंहरति चतुर इति । एते चत्वारो वागुरादिना जीवन्तीति मायोपजीविनः । अम्बष्ठेऽपि चत्वारो मागध्यां विश्रुताः सजाती-यादुत्पद्यन्ते । तेषां नामानि मांसमित्यादि । मांसं मांसविक्रेतारम् । खादुकरं मांसस्यैव संस्कारकम् । चौद्रं क्षुद्रं शूद्रमिति पाठान्तरेऽपि प्राकाद्यमपाककरम् । सौगन्ध्यम् उत्कलत्वं सैरन्ध्रम् । एकस्यैव मागधस्य एतदृत्तित्रितयस-त्त्वमिति ज्ञेयम् ।" इति तट्टीकायां नील-कण्ठः ॥ * ॥ क्षुद्रता । इति फाणिनियाक-रणम् ॥

चौद्रक्यं, त्रि, (क्षुद्रकः आयुधजीविसंघः । "आयुध-जीविसंघाञ्ञाटीति ।" ५ । ३ । ११४ । इति ञाट् ।) क्षुद्रम् । इति सिद्धान्तकौमुदी ॥

चौद्रजं, क्ली, (चौद्रात् जायते इति । जन + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥ मधुजात-मात्रे त्रि ॥

चौद्रधातुः, पुं, (चौद्रजातो धातुः चौद्रं धातु-रिव वा ।) माक्षिकम् । इति राजनिर्घण्टः ॥

चौद्रप्रियः, पुं, (चौद्राणां सरघाणां प्रियः चौद्र-वत् मधुवत् प्रियो वा ।) जलमधुकवृक्षः । इति राजनिर्घण्टः ॥ मधुप्रिये त्रि ॥

चौद्रमेहः, पुं, (चौद्रसंज्ञको मेहः ।) प्रमेह-रोगविशेषः । मधुमेह इति वैद्यकम् ।) तल्लक्षणं यथा,—
"कषायं मधुरं रूक्षं चौद्रमेहं वदेद्बुधः ।
कषायं कषायवर्णम् ।" इतिभावप्रकाशः ॥ अस्य चिकित्सा प्रमेहशब्दे द्रष्टव्या ॥

चौद्रेयं, क्ली, (चौद्रे भवं इति । ढक् ।) शिक्थ-कम् । इति राजनिर्घण्टः ॥ चौद्रसम्बन्धिनि त्रि ॥

चौमं, त्रि, (चुम + "अर्त्तिसुसुहुदृधृचिचुति ।" उणा । १ । १३६ । इति मन् । ततः प्रज्ञा-दित्वात् अण् । वृद्धिः ।) चुमाया विकारः । स्त्रियां चौमी कन्येत्यादि । इत्यमरटीकायां भरतः ॥

चौमं, पुं,क्ली, (चुम + मन् । ततोऽण् वृद्धिश्च ।) अट्टा-लकः । तत्पर्य्यायः । अट्टः२ । इत्यमरः ।२ । २ । १२ ॥
"हे हर्म्म्यादिशृङ्गे । प्राकारस्थस्थिरगृहविशेषइति कौटिल्यः । अट्टेति ख्याते गृहविशेषे इति कोङ्कटः । प्राकारमञ्चपर्य्योपरिशालायामिति केचित् । हर्म्म्यादिवातकुटिकायामिति केचित् । मञ्चोपरि हर्म्म्यादृष्टे इति केचित् । प्राकार-धारणार्थोऽभ्यन्तरे चौमाख्योऽट्टः । इति भट्टः । अट्टतेऽसौ अट्टः । अट्ट ड विक्रमे वधे अल् । चुवन्ति शब्दायन्तेऽत्र चौमं । टु चुल चुते गात्रे इति मः गुणः स्वार्थे ण्णे चौमञ्च । पट्ट-दुकूलयोः चौमं गुणवत् । वस्त्रभेदे चौमं वृद्धि-मदिति बहवः । चौममट्टे दुकूले स्यादतसी-वसनेऽपि चेति विश्वप्रकाशे अतसीवनेन सह पाठादट्टेऽपि चौममन्त्यस्वरवच्च । तत्र हि परेषां वृद्धिविधानात् ।" इति पुरुषोत्तमे भरतः ॥ * ॥ अतसीवस्त्रम् । इति हेमचन्द्रः ॥ (यथाह याज्ञवल्क्यः । १ । १८७ ।
"स गौरसर्षपैः चौमं पुनः प्राकाम्यचौमयम् ।
कारुहस्तः शुचिः पण्यं भेक्षं योगिन्द्रवन्तथा ॥")
"चुमायाः विकारः चौमं वृद्ध्यादि वाच्यलिङ्गत्वं स्त्रियां चौमी कन्येत्यादि ।" इति वृत्तौ भरतः ॥ * ॥ पट्टवस्त्रम् । तत्पर्य्यायः । दुकूलम् २ । इत्यमरः । २ । ६ । ११३ । "हे पट्टवस्त्रे । सौत्रवस्त्रादधिकं चौति चौमं टु चु शब्दे नान्त्रीति मः गुणः । यत् पुनरतसीविकारवाचि प्रकृत्यन्तरं तद्वृद्धिमत् दुकूलार्थात् चौमात् स्वार्थे प्रज्ञादित्वादणि चौमकमिति केचित् । दुनोति उपतापयति अधिकशीतजननादिति नान्त्रीति कूलकि दुकूलम् ।" इति च वृत्तौ भरतः ॥ * ॥ शणजवस्त्रम् । यथा, शब्दरत्नावल्याम् ।

"चौमं दुकूले स्यादट्टे पुंनपुंसकयोरिह ।
चौमन्तु गुणजेऽपि स्यादतसीजे नपुंसकम् ॥"
(यथा, महाभारते । १।२००।३ ।
"कृष्णा च चौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्वास्तस्थौ प्रह्वा कृताञ्जली ॥")
चौमकः, पुं, (चुमा एव चौमः प्रज्ञादित्वात् अण् । ततः संज्ञायां कन् ।) चोरनामगन्धद्रव्यम् । इति केचित् ॥
चौमी, स्त्री, (चुमा एव इति स्वार्थे अणि वृद्धिः ततो गौरादित्वात् ङीष् ।) अतसी । इति रत्नमाला ॥ (विकारार्थे अणि) चुमानिर्म्मितकन्था । इति चौमशब्दटीकायां भरतः ॥
चौरं, क्ली, (चुरस्य कार्य्यं कर्म्म चुरकृतं कर्म्मेति भावः चुरस्येदं वा ।) चुरकर्म्म । कामान इति भाषा । तत्पर्य्यायः । मुण्डनम् २ भद्रकरणम् ३ वपनम् ४ परिवापनम् ५ । इति हेमचन्द्रः ॥ अस्य गुणः ।
"केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ।"
संप्रसाधनं पवित्रीकरणमिति यावत् । इति राजवल्लभः ॥ * ॥ व्रतादिसंयमे चौरकर्म्माकरणे दोषो यथा,—
"व्रतानामुपवासानां श्राद्धादीनाञ्च संयमे ।
न करोति चौरकर्म्म अशुचिः सर्व्वकर्म्मसु ॥
स च तिष्ठति कुण्डेषु नखादीनाञ्च सुन्दरि ! ।
तदेव दिनमानान्दं तद्भोजी दण्डताड़ितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
नित्यचौरविहितनिषिद्धदिनादि यथाह राजमार्त्तण्डः ।
" न स्नानमात्रगमनोत्सुकभूषितानामभ्यक्तभुक्तरणकालनिरासनानाम् ।
सन्ध्यानिशाग्निकुजार्कदिनेषु रिक्ते
चौरं हितं प्रतिपदद्वि न चापि विद्याम् ॥"*॥
"प्राचीसुखः सौम्यसुखोऽपि भूत्वा
कुर्य्यान्नरः चौरमनुत्कटस्थः ॥
उत्तराचितयथान्यरोहिणी-
रौद्रसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान्नरः ॥"
प्रेतकार्य्यं प्रतिप्रेतसंप्रदानकदाहौघटदानविषयकम् । अन्यथा वक्ष्यमाणवचनविरोधः स्यात् ॥
"चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः ।
अचौरिमेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने ॥
मानं हन्ति गुरुः चौरे शुक्रं शुक्रो धनं रविः ।
आयुरङ्गारको हन्ति सर्व्वं हन्ति शनैश्चरः ॥"*॥
श्रीपतिरत्नमालायाम् ।
"आज्ञया नरपतेर्द्विजन्मनां
दारकर्म्मण्डतस्कृतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि
चौरमिष्टमखिलेषु चोडुषु ॥
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
चुरिकर्म्म न कुर्व्वीत जन्ममासे च जन्मभे ॥"*॥
ब्रह्मगार्ग्यः ।
"केशश्मश्रुनखं पुरं पाटलिपुत्रं पुरीमहिच्छत्रम् ।
दितिमदितिञ्च स्मरतां चौरविधौ भवति कल्याणम् ॥ * ॥"
अत्र क्रमो वराहपुराणे ।
"श्मश्रुकर्म्म कारयित्वा नखच्छेदमनन्तरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च । गोभिलः । "केशश्मश्रुलोमनखानि वापयीत ग्रिखावर्ज्जम् ।" इति शुद्धितत्त्वम् ॥*॥ अन्यच्च ।
"रोहिण्याञ्च विशाखायां मैत्रे चैवोत्तरासु च ।
मघायां कृत्तिकायाञ्च द्विजैः चौरं विवर्ज्जितम् ॥
कृत्वा तु मैथुनं चौरं यो देवांस्तर्पयेत् पितॄन् ।
रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
नापितगृहे चौरनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्ट्वा चन्दनम् ।
नापितस्य गृहे चौरं गच्छन्नपि हरेत् श्रियम् ॥
रवौ दुःखं सुखं चन्द्रे कुजे मृत्युर्बुधे धनम् ।
मानं हन्ति गुरोर्व्वारे शुक्रे शुक्रक्षयो भवेत् ॥
शनौ च सर्व्वदोषाः स्युः चौरमत्र विवर्ज्जयेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥ * ॥
अथ प्रथमचौरस्य चूड़ाकरणस्य विहितदिनादि । ज्योतिषे ।
"अयुग्माब्दे तथा मासि चूड़ा भौमशनीतरे ।
अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभेतरे ।
रिक्तादर्य्याष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते ॥"
दर्शेऽपि सामान्यतो दोषमाह ।
"षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्दशी ।
अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे ॥
मेषसिंहतुलाकर्किहृश्चिकेतरलग्नके ।
श्रवणादित्रयस्वातीचित्रापुष्याश्विचन्द्रभे ॥
आदित्यरेवतीहस्ता ज्येष्ठामूले च चौड़कम् ॥
पौष्णाश्विपुष्यवसुरामकवासुदेव-
ब्रह्मार्कचन्द्रवरुणादितिचित्रभेषु ।
वारेषु सोमबुधवाक्पतिभार्गवानां
चौरं करोति कुशलं खलु मानवानाम् ॥"
इति वचनात् रोहिण्यामपि चूड़ाकरणम् ।
अत्रापि तिथ्यङ्गादिविहितत्वं विवर्ज्जयेत् ॥
"सूर्य्ये दक्षिणमार्गगामिनि हरौ सुप्ते निरंशे रवौ
चौर्ये शीतरुचौ महीतनयमेर्व्वारे निशान्तत्रयोः ।
भुक्तेऽभक्ततनौ निषिद्धसमये लग्नेऽरयुक्ते शिशौ
चौराद्योगभयं वदन्ति यवना मृत्युं तथान्ये जगुः ॥"
राजमार्त्तण्डे ।
"मानं हरेत् चौरमिहायुषोऽर्कः
शनैश्चरः पञ्च कुजस्त्रयाष्टौ ।
आचार्य्यभृग्विन्दुबुधाः क्रमेण
दद्युर्दशैकादश सप्त पञ्च ॥"
जीवादिवारे चौरं प्रशस्तम् ॥*॥ भोजराजः ।
"ग्रिखिसन्निधाने च चूड़ाकरणं जगुः शुभं यवनाः ।
चैत्रे मासि दिवाकरवारे उत्तरवर्त्मनि सवितरि ॥"
दिवाकरवारविनिर्मोके तु गर्गः ।
"जन्मर्क्षे जन्ममासे च युग्ममासे च वत्सरे ।
न कुर्य्यात् प्रथमं चौरं विशेषाच्चैत्रपौषयोः ॥"
ज्येष्ठपुत्रकन्ययोस्तु ज्येष्ठदर्शाद्याभ्यन्तरे चूड़ानिषेधो विवाहप्रकरणे उक्तः । इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च । भोजराजः ।
"यो जन्ममासे क्षुरकर्म्म याचां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्रनाशं
प्राप्नोति मूढो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चूड़े विवाहे क्षुरकर्णवेधे ॥"
एतद्विषयभेदस्तु राजमार्त्तण्डे ।
"उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च ।
सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः ॥
सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि ।
क्षुरेति क्षुरकर्म्म ।" इति तिथ्यादितत्त्वम् ॥
चौरपथं, क्ली, (क्षुरैः पविभिर्वज्रैर्निर्म्मितं निर्वृत्तमिव वा गृहम् ।) क्षुरवत्तुल्यतीक्ष्णदृढ़गृहम् । यथा, श्रीभागवते । ६ । ५ । ८ ।
"नदीसुभयतो वाहां पञ्चपञ्चाङ्गुतं गृहम् ।
क्वचिद्धंसं क्वचित्कर्कं चौरपथं स्वयं भ्रमि ॥"
"पञ्चपञ्चाशां पञ्चविंशतेः । अङ्गुतं गृहम् । चौरपथं क्षुरैः पविभिर्वज्रैश्च निर्म्मितमिव तीक्ष्णं दृढ़चेतोर्थः । स्वयं स्वतन्त्रम् । भ्रमि भ्रमणस्वभावम् ।" इति तट्टीकायां श्रीधरस्वामी ॥
चौरिकः, पुं, (चुरकर्म्म चुरेण वा कर्म्म करोति । यद्वा चुरिकर्म्म कार्य्यत्वेनास्यास्य । इति ठक् । चौरं शिल्पत्वेनास्यास्य इति तु ठन् ।) नापितः । इति शब्दमाला ॥
क्ष्णु, ल तेजने । इति कविकल्पद्रुमः ॥ (अर्दा-पर्सकः-सेट् ।) मूर्द्धन्यणकारोपधः । चादिः । क्ष्णौति खड्गं कर्म्मकारः । इति दुर्गादासः ॥
क्ष्णुतः, त्रि, (क्ष्णु + कर्म्मणि क्तः ।) शाणितः । तीक्ष्णीकृतः । इत्यमरः । ३ । १ । ६१ ॥
क्ष्मा, स्त्री, (क्षमते सहते भारं अपराधजनितं वात्मस्थानां जीवानां चतुर्विधानां इति । क्षम् + अच् उपधायाः लोपश्च ।) पृथ्वी । इत्यमरः । २ । ६ । ३ ॥ (यथा, भागवते । ७ । ८ । ३३ ।
"दौस्तत् सटोत्क्षिप्तविमानसङ्कुला
प्रोत्सर्पता क्ष्मा च पदातिपीड़िता ॥")
क्ष्माजः, पुं, (क्ष्मा पृथ्वी तस्यां तस्याः वा जातवान् इति । क्ष्मा + जन् + डः ।) मङ्गलग्रहः । इति ज्योतिषम् ॥
क्ष्मातलं, क्ली, (क्ष्मायाः तलम् ।) भूतलम् । (यथा, मार्कण्डेये । २३ । ४७ ।
"यदिदास्ति क्ष्मातले खेऽम्बतो वा
तत्सस्यं तत्खरैर्यैर्जनैश्च ॥")
पृथिवीमध्यम् । इति केचित् ॥
क्ष्माभृतिः, पुं, (क्ष्मां पृथ्वीं धृतिर्धारणा पालनी-शक्तिर्यस्य ।) काश्मीरदेशीयराजविशेषः । यथा, राजतरङ्गिण्याम् । ५ । ४८२ ।

"अथाभ्यधिष्यत क्षिप्रं विप्रेरेत्य यशस्करः।
प्राधृतिः प्रौढ़सामर्थ्यः सानुमानिव तोयदः॥"

ह्याप:, पुं, (ह्यां पाति रक्षतीति। ह्या+पा+कः।) राजा। यथा,—

"ह्यामयानिरियुचासचुदादौ ह्रस्वेक्षितान्।
लब्धोदया ह्रीभयेन ह्यापा ग्रन्थमुवाचिन:॥"

इति राजतरङ्गिण्याम्। ५। ३१६॥

ह्यापाल:, पुं, (ह्यां पालयतीति। ह्या+पाल्+णिच्+अण्। ह्याया: पालो वा।) राजा। यथा, राजतरङ्गिण्याम्। ५। ३२४।

"न के लोभं ससृत्पाद्य जिह्मया स्निग्धदीर्घया।
पिपीलिका इव यस्ता: ह्यापाले: शल्यकैरिव॥"

ह्याभृत्, पुं, (ह्यां पृथ्वीं बिभर्त्ति। ह्या+भृ+क्विप् तुगागमश्च।) राजा। (यथा, पञ्चतन्त्रे। १। १६६।

"देशानासुपरि ह्याभृदातुरार्त्ता चिकित्सका:।
वणिजो ग्राहकाणाच्च मूर्खाणामपि पण्डिता:॥")

पर्व्वत:। इत्यमर:। २। ८। १॥ (यथा, राजेन्द्रकर्णपूरे। ६०।

"कान्तारेषु च काननेषु च सरित्तीरेषु च
ह्याभृता-
सृत्सङ्गेषु च पत्तनेषु च सरिद्भर्त्तुस्तटान्तेषु च॥")

ह्याय, ईं ङ विधूनने। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-अकं-सेट्।) पवर्गद्वितीययुक्त:। आदि:। विधूननमिति विधूयतेऽसाविति कर्म्मणि घञि विधून: सकर्मक: ततो विधून इवाचरतीति क्विप् ततो अनटि रूपम्। कम्पनमित्यर्थ:। ईं, ह्यात:। ङ, ह्यायते दृक्ष:। (तथाच, भट्टि:। १४। २१।

"उल्का दहशिरे दीप्ता रुरुवुश्चाशिवं शिवा:।
चच्छाये च मही राम: शशङ्के चानुभागमम्॥")

ह्यायते कम्पते त्वङ्नेत्रतीर्त्ते च वेपते इति कम्पार्थे भट्टमल्लोऽपि। रमानाथस्तु विधूननशब्दस्येगन्तादयुत्पत्ते: सकर्म्मकोऽयं इति प्रतीम:। प्रयोगस्त्वन्यथा दृश्यते इत्याह। इति दुर्गादास:॥

ह्यायित:, त्रि, (ह्याय+इतच्।) कम्पित:। इति व्याकरणम्॥

ह्यायिता, [ऋ] त्रि, (ह्याय+तृच्प्रत्यय:।) कम्पक:। इति व्याकरणम्॥

ह्रील, निमेषे। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) निमेष: पद्माभिश्चक्षुष आवरणम्। ह्रीलति चक्षु: पद्माभिराहृतं स्यादित्यर्थ:। इति दुर्गादास:॥

ह्रुड़, ल आ ङ ञि स्नेहे। मोचे। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-अकं-मोचे सकं-सेट्।) वकारयुक्त:। ल, अह्रुड़त्। आ, ह्रुड़ितं ह्रुड़ं तेन। ङ, ह्रुड़ते। ञि, ह्रुड़ोऽस्ति। स्नेह: स्निग्धीभाव:। मोचे ह्रुड़ते तिल: तैलं सृजतीत्यर्थ:। इति दुर्गादास:॥

ह्रुण:, त्रि, (ह्रुद्+क्त:।) मुक्त:। स्निग्ध:। इति व्याकरणम्॥

ह्रुद्, आ ञि क्रूजने। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) आ, ह्रुदितं ह्रुतं तेन। ञि, ह्रुतोऽस्ति। मूर्द्धन्यवर्गलतीयान्तोऽयमित्येके। इति दुर्गादास:॥

ह्रुद्, इर् य आ मोचे। स्नेहे। इति कविकल्पद्रुम:॥ (दिवां-परं-अकं-मोचे तु सकं-सेट्।) इर्, अह्रुदत् अह्रौदीत्। अस्मात् पुषादिलान्नित्यं ङ इत्यन्ये। य, ह्रुद्यति। आ, ह्रुदितं ह्रुतं तेन। इति दुर्गादास:॥

ह्रुद्, ल आ ङ ञि मोचे। स्नेहे। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-सकं-स्नेहे तु अकं-सेट्।) एतदाद्यास्त्रयो वकारयुक्ता: चाद्या:। ल, अह्रुदत्। आ, ह्रुदितं ह्रुतं तेन। ङ, ह्रुदते तिल: तैलं सृजतीत्यर्थ:। ञि, ह्रुतोऽस्ति। स्नेह: स्निग्धीभाव:। इति दुर्गादास:॥

ह्रुड़, क्ली, (ह्रुड़+घञ्।) लोहितार्कपर्णफलम्। घोषापुष्पम्। इति मेदिनी। ड़े। ६॥

ह्रुड़:, पुं, (ह्रुड़+भावादौ घञ्। ह्रुड़ते इति अच् वा।) ध्वनि:। कर्णामय:। विघ्न:। इति मेदिनी। ड़े। ५॥ (यथा, आनन्दलहर्य्याम्। २६।

"करालं यत् ह्रुड़ं कवलितवत: कालकलना
न शम्भोस्तन्मूलं जननि तव ताड़ाङ्कमहिमा॥")

पीतघोषावृक्ष:। इति रत्नमाला॥ *॥ ह्रुड़रोगस्य निदानादि कर्णरोगशब्दे द्रष्टव्यम्॥

ह्रुड़:, त्रि, (ह्रुड़+कर्म्मणि घञ्।) दुरासद:। कुटिल:। इति मेदिनी। ड़े। ६॥

ह्रुड़नं, क्ली, (ह्रुड़+भावे ल्युट्।) मोचनम्। त्याग:। यथा, महाभारते। ३। १७८। २६।

"त्रासनं सर्व्वभूतानां कालान्तकयमोपमम्।
निश्वासह्रुड़नादेव भर्त्तुर्भयन्तमिव स्थितम्॥"

ह्रुड़ा, स्त्री, (ह्रुड़+घञ्+टाप् च।) वंशशलाका। सिंहनाद:। इति मेदिनी। ड़े। ५॥ (स तु लोकस्य शब्दविशेष:। यथा, वक्रोक्तिपञ्चाशिकायाम्। ३६।

"एषा सागरसङ्गताभिमतता याता न मे कर्हिचित्
सुग्धे कण्ठशुवं ब्रवीषि मम किं सह्रुड़तामौशुवीम्।
ह्रुड़ारावं इहोचितस्तव गणव्रातैः सह क्रीड़तो
युष्मान्नीलगलोऽवतादिति गिरा गौर्य्या कृतो-
ऽनुत्तरः॥")

"सागरसङ्गतेति। सागरेण समुद्रेण सङ्गता। अर्थाद्गङ्गा। उत्तरे तु सेति सर्व्वनामपदम्। गरो विषम्। तदाह सह्रुड़तेति। ह्रुड़ेन विषेण ह्रुड़या शब्दविशेषेण च सह्रुड़म्। ह्रुड़ं विषम्। ह्रुड़ा जनस्य शब्दविशेषः॥" इति तट्टीका॥) कोवातकी। इति राजनिर्घण्टः॥

ह्रुड़ितं, क्ली, (ह्रुड़+भावे क्त:।) सिंहनादः। इत्यमरः। ३। ५। ३४॥ (यथा, महाभारते। १। ६६। ६।

"नानायुधधरैश्चापि नानावेशधरैस्तथा।
ईषितखनमिश्रैश्च ह्रुड़ितास्फोटितखनैः।
आसीत् किलकिलाशब्दस्तस्मिन् गच्छति
पार्थिवे॥")

ह्रुल, ऋ चालगत्योः। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट्।) वकारयुक्तः। चादिः। ऋ, अचिह्रुलत्। चालः कम्यः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥ (क्रीड़ायामिति कैश्चित्। यथा, रामायणे। ५। १०। १३।

"आस्फोटननिनादांश्च बालानां ह्रुलतां तथा॥")

ह्रुलिका, स्त्री, (ह्रुला+स्वार्थे कन् अत इत्वञ्च।) क्रीड़ा। यथा, श्रीभागवते। ५। ८। १८।

"ह्रुलिकायां मां दृष्ट्वा समाधिना आमीलितदृग्भ्यां प्रेमसंरम्भेण चकितचकितं आगत्य पृषदरुषविषाणाग्रेण लुठति।" "सम्भवति चैतदित्याह। ह्रुलिकायां क्रीड़ायां दृष्ट्वा यः समाधिस्तेनामीलिते दृग्भ्यौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषत्चलबिन्दुस्नुद्दृदयस्थेन विषाणाग्रेण लुठति संघट्टयति।" इति तट्टीकायां श्रीधरस्वामी॥

ह्रुली, स्त्री, (ह्रुल+गौरादित्वात् ङीष्।) क्रीड़ा। यथा, श्रीभागवते। १०। २६। ४६।

"बाहुप्रसारपरिरम्भकरालकोरु-
नीविस्तनालभननर्म्मनखाग्रपातैः।
ह्रुल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार॥"

"बाहुप्रसारश्च परिरम्भश्च करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः। ह्रुल्या क्रीड़या च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् ता रमयामास।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ अत्र ह्रुल्यमिति प्रमादात् केनचिल्लिखितम्॥

ख

ख, खकारः। स तु यङ्गनद्वितीयवर्णः। अस्योच्चारणस्थानं कण्ठः। (यथा, सिद्धान्तकौमुद्याम्। "अ-कु-ह-विसर्ज्जनीयानां कण्ठः।" इति। शिक्षाग्रन्थे तु अस्य जिह्वामूलीयत्वमुक्तम्। यथा,—"जिह्वामूले तु कुः प्रोक्तः।" इति। परं जिह्वामूलीयस्यापि कण्ठमूलोच्चारणपरत्वात् न दोषाय एव॥) यथा, कामधेनुतन्त्रे।

"खकारं परमाश्चर्य्यं शङ्खकुन्दसमप्रभम्।
कोणत्रययुतं शून्यं बिन्दुत्रयसमन्वितम्॥
गुणत्रययुतं देवि! पञ्चदेवमयं सदा।
शिवशक्तिसंयुतं वर्णं खकारं प्रणमाम्यहम्॥"

तस्योत्पत्तिर्यथा, प्रपञ्चसारे।

"ध सर्गः स्थेषितः कण्ठे वायुना कादिमीरयेत्।
वर्गांस्पर्शेनमात्रेण कं खरस्पर्शेनात्तु खम्॥"

(वङ्गाक्षरैः) तस्य लेखनप्रकारादिर्यथा,—

"शिवरूपा वामरेखा ब्रह्मरेखा प्रजापतिः।
अधोरेखा विष्णुरूपा साक्षाद्ब्रह्मस्वरूपिणी॥
वामाङ्कामगता रेखा वह्निरूपा च सा स्मृता।
मात्रा कुण्डलिनी साक्षात् खकारः पञ्चदेवतः॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने!।
बन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम्॥
वराभयकरीं नित्यामीषद्धास्यसुखीं पराम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ *॥

तस्य नामानि यथा, नानातन्त्रेषु,—

"खः प्रचण्डः कामरूपी ऋद्धिर्वह्निः सरस्वती।
आकाशमिन्द्रियं दुर्गा चण्डीशक्तापिनी गुरुः॥
शिखण्डी दन्तजातीशः कपोत्थिर्गगनो यदि।
शून्यं कपाली कल्याणी सूर्यकर्णोऽजरामरः।
सुधायेषा चण्डलिङ्गो जना यङ्कारखड्गकौ॥"

खं, क्ली, (खर्व्वति मनोऽक्षिन् खन्यते क्षुभ्यते मनोऽनेन वा। खर्व्व गतौ, खन दारणे वा अन्येभ्योपीति डः।) इन्द्रियम्। (यथा, मनौ। २। ६०।

"चिराचामेदपः पूर्व्वं हिः प्रन्द्यात् ततो मुखम्।
खानि चैव स्पृशेद्दक्षिणमात्मानं शिर एव च॥")

पुरम्। क्षेत्रम्। शून्यम्। (यथा, महाभारते। १। ८८। ७।

"पतत्सुपर्णाम्बुधरान्धकारात्
खात् खेचराणां प्रवरो यथार्कः॥")

बिन्दुः। (यथा, लीलावत्यां क्षेत्रव्यवहारे।

"वेदाग्निबाणखाश्चेन्द्र खखाभ्रभरसैः क्रमात्॥")

आकाशम्। (यथा, मनौ। १२। १२०।

"खं सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम्॥"

"खं वाय्वाकाशं खेषु उदराद्यवच्छिन्नशरीराकाशेषु।" इति कुल्लूकभट्टः॥) संवेदनम्। देवलोकः। स्वर्गः। इति मेदिनी। खे। १॥ लयात् दशमराशिः। इति दीपिका॥ (यथा, जातकप्रकरणे। "तनुनिधनखभेषाः केन्द्रकोणे

खगपतिः, पुं, (खगान् पातीति। खग+पा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) गरुड़ः। इति शब्दरत्नावली॥

खगवक्त्रः, पुं, (खगस्य वक्त्रमिव वक्त्रं अग्रभागः आकृतिर्वा यस्य।) लक्कुचवृक्षः। इति शब्दचन्द्रिका॥

खगवती, स्त्री, (पृथिव्याः खकक्षायामाकाशगतिमत्त्वात् खगतुल्यगतित्वेन सादृश्यमस्त्यस्या इति आर्य्यभटः। सूर्य्यसिद्धान्तमते तु खगसादृश्यं आकाशस्थितित्वेनास्त्यस्याः। मतुप्। मस्य वः।) पृथ्वी। इति जटाधरः॥

खगशत्रुः, पुं, (खगानां शत्रुरिव।) पृश्निपर्णी चाकुलिया इति भाषा। इति शब्दचन्द्रिका॥

खगान्तकः, पुं, (खगानां अन्तकः यम इव। यद्वा, अन्तयति अन्तं करोति इति। अन्तर्णिच् ततो ण्वुल्।) श्येनपक्षी। इति राजनिर्घण्टः॥

खगासनः, पुं, (खगस्य सूर्य्यस्य आसनमिव उदयस्थानं यत्र। आसनत्वेन कल्पितत्वात्तथात्वम्।) उदयपर्व्वतः। इति शब्दमाला॥ (खगो गरुड़ आसनं यस्येति विग्रहे।) विष्णुः। (एतद्विवरणं यथा, महाभारते। १। सौपर्णे। ३३। १२—१८।

"तमुवाचाथयो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्च स्यामहन्तेन विनाप्यहम्॥
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्।
प्रतिगृह्य वरौ तौ च गरुड़ो विष्णुमब्रवीत्॥
भवतोऽपि वरं दद्यां वृणोतु भगवानपि।
तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम्।
ध्वजश्च चक्रे भगवानुपरि स्यास्यतीति तम्॥
एवमस्त्विति तं देवस्तदा नारायणं खगः।
वव्राज तरसा वेगाद् वायुं सङ्क्रन्द मद्दाजवः॥")

खगेन्द्रः, पुं, (खगानां पक्षिणां इन्द्रः।) गरुड़ः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १। सौपर्णे। ३१। ३५।

"पतत्रीणाञ्च गरुड़ इन्द्रत्वेनाभ्यषिच्यत॥"

अस्य खगेन्द्रत्वकथा यथा तत्रैव। १६—२०।

"तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः।
बालखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत॥
एवमस्त्विति तत्रापि प्रत्यूचुः सत्यवादिनः।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः॥
अयमिन्द्रस्त्रिभुवने नियोगाद् ब्रह्मणः कृतः।
इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधनाः॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः!।
भवतां हि न मिथ्यायं सङ्कल्पो वै चिकीर्षितः॥
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान्।
प्रसादः क्रियतामस्य देवराजस्य याचतः॥")

खगेन्द्रध्वजः, पुं, (खगेन्द्रो गरुड़ो ध्वजः केतुर्यस्य च यस्य।) विष्णुः। (यथा, भागवते। १। १८। १६।

"कृतेन वैयासकिशब्दितेन
भेजे खगेन्द्रध्वजपादमूलम्॥")

खगेश्वरः, पुं, (खगानां ईश्वरः।) गरुड़ः। इत्यमरः। १। १। ६१॥

खगोलः, पुं, आकाशमण्डलम्। तस्य विवरणं यथा। एतद्ब्रह्माण्डं सच्छिद्रं कटाहद्वयस्य गोलाकारसम्पुटतुल्यम्। यत्र भूर्भुवःस्वर्महर्जनतपःसत्यसंज्ञकानि सप्तभुवनानि सन्ति। ब्रह्माण्डमध्ये यः परिधिः स आकाशकक्ष्या। तन्मध्ये परावह-परिवह-सुवह-सम्वहोद्वहाख्यानां पञ्चानां वायूनां स्थानानि अधोऽधःक्रमेण सन्ति। तदधस्तात्तथाधोऽधःस्थितपूर्व्वाभिमुखग्रनिद्वहसंतिराहुकेतुमङ्गलसूर्य्यशुक्रबुधचन्द्रयहयुक्तं दक्षिणोत्तरस्थितध्रुवाक्षतारादयेन वहं नक्षत्रचक्रं सदापश्चिमगतिना प्रवहवायुना भ्रमति। ततः अधोऽधःक्रमेण सिद्धविद्याधरमेघविद्युदादियुक्तः सदोत्तरगतिरावहवायुर्भ्रमति एतद्ब्रह्माण्डस्य मध्ये समन्तात् ईश्वरस्य धारणात्मिकां शक्तिं बिभ्राणो भूगोलः सूत्रे तिष्ठति। पृथ्वन्तर्गता नागासुरसमाश्रया दिव्यौषधिरलोपेता रम्याः पाताल-रसातल-महातल-तलातल-सुतल-वितलातल-संज्ञका ऊर्द्धोऽधक्रमेण सप्तपातालभूमयश्च सन्ति। सुमेरुपर्व्वतोपरि सूत्रे एका ध्रुवतारा भ्रमति। एवं वडवानलोपरि सूत्रे अन्या ध्रुवतारा भ्रमति।

	अथ कक्षायोजनानि	भासयोजनानि	पृथ्वीव्यासयोजनानि
	आकाशस्य ब्रह्माण्डस्य वा		
	१८७१२०८०८६४००००००	५६५३८१३६११२७२७२७	२६७६६२१६५५६३६३६२
नक्षत्रस्य	२५६८६००००	८२६६२२७३	४१३४५३३६
शनेः	१२७६६८२५५	४०६२०२१७	२१३१००५८
राहुकेतोः	८०५७२८६३२	२५६३६८२०१	१२८१८८३३००
गुरोः	५१३७५७६४	१६३४६८३४	८१७२६१७
चन्द्रोच्चस्य	३८३२८४८४	१२७४२८२८	६३७०६१४
मङ्गलस्य	८१४६८०६	२५६२१६८	१२६५२६६
सूर्य्यस्य	४३३१५००	१३७८२०४	६८८३०२
शुक्रशीघ्रस्य	२६६४६३७	८४७८३६	४२३११६
बुधशीघ्रस्य	१०४३२०६	३३१६३०	१६५१६५
बुधशुक्रयोः	४३६१५०	१३८७७५	६८५८८
चन्द्रस्य	३२४०००	१०३०६१	५७४५
आवहवायोः	५१०४	१६२४	१२
भूगोलस्य	४६६७	१५८१	०

अथ ग्रहाणां मध्यभुक्तयः।

	रवेः	चन्द्रस्य	मङ्गलस्य
दिने— कलाद्याः	५६।८।१०।०	७६०।३४।५२	३१।२६।२८
वर्षे— राश्याद्याः	१२।०।०।२	४।१२।३६।४०।४८	६।११।२४।६।३६
युगे— भगणाद्याः	४३२००००	५७७५३३३६	२२६५८३२
कल्पे— भगणाद्याः	४३२००००००	५७७५३३३६०००	२२६५८३२०००

	बुधशीघ्रस्य	बृहस्पतेः	शुक्रशीघ्रस्य
दिने— कलाद्याः	२४५।१२।२१	४।५६।६	६६।७।४३
वर्षे— राश्याद्याः	१।२४।४५।२२।४८	१।०।२१।३।३६	७।५।११।४६।१२
युगे— भगणाद्याः	७१६३७०६०	३६४२२०	३०१२३७६
कल्पे— भगणाद्याः	७१६३७०६००००	३६४२२००००	३०१२३७६०००

अथ ग्रहाणां मध्यसूत्रयः।

	सूर्यः	राहोः	चन्द्रोच्चस्य
दिने—कलाद्याः	२।०।२३	३।१०।४४	६।४१।०
वर्षे—राश्याद्याः	०।१२।१२।५४	०।१६।२१।१२।३६	१।१०।४०।५६।४२
युगे—भगणाद्याः	२४६५६८	२३१२३८	४८८१०३
कल्पे—भगणाद्याः	२४६५६८०००	२३१२३८०००	४८८१०३०००

अथ राशिषु नक्षत्राणां स्थितिः।

	अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसुः	पुष्या	आश्लेषा
राशिः	०	०	१	१	२	२	२	३	३
अंशः	१	२०	१	२६	३	१	२०	१६	२६
कला	०	०	३	३०	०	१०	४०	२०	२०
अपक्रम-भागाः	१० उत्तरः	१२ उत्तरः	५ उत्तरः	५ दक्षिणः	१० दक्षिणः	६ दक्षिणः	६ उत्तरः	० उत्तरः	७ दक्षिणः

	मघा	पूर्वफल्गुनी	उत्तरफल्गुनी	हस्ता	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
राशिः	४	४	५	५	५	६	६	७	७
अंशः	२	२२	५	१०	२४	१६	२६	२४	२६
कला	२०	२०	४०	०	१०	४	४०	०	०
अपक्रम-भागाः	उ	१२ उ	१२ उ	११ द	२ द	२७ उ	२४ द	१ द	४ द

	मूला	पूर्वाषाढा	उत्तराषाढा	अभिजित्	श्रवणा	धनिष्ठा	शतभिषा	पूर्वभाद्रपद्	उत्तरभाद्रपद्	रेवती
राशिः	८	८	८	८	९	९	१०	१०	११	११
अंशः	१	१४	२०	२४	१०	२०	२०	२६	१	२६
कला	१०	०	०	४०	०	०	०	०	०	५०
अपक्रम-भागाः	९ द	५ ३० द	५ द	३० उ	३० उ	३३ उ	३० द	२४ उ	२६ उ	० उ

अथ राशिषु नक्षत्राणां स्थितिः।

	अगस्त्यः	मृगव्याधः। कालपुरुषः	मृगशिरः	आर्द्रा	पुनर्वसुः
राशिः	१	२	१	१	१
भागः	०	२०	२२	२२	१
कला	०	०	०	०	१
अपक्रम-भागाः	६० ८	६४० ८	३८ ८	३३० ८	५ ७
	पुनर्वसौ	आर्द्रायाम्	रोहिण्याम्	रोहिण्याम्	कृत्तिकायाम्

अथ खगोलरचना।

खवाञ्छितं काष्ठनिर्म्मितं भूगोलं तन्मध्यगं सुमेरोरुभयत्र निर्गतं दण्डञ्च कृत्वा बहुत्तरशतत्रय-परिमितं समविभक्तं आधारकक्षाद्वयं विषुवत्कक्ष्यैका च कार्य्या॥

अथ मेषादिराशिस्थितिः।

खाहोरात्रार्द्धकर्णैः तत्प्रमाणानुमानेन च क्रान्तिस्थानात् दक्षिणोत्तरविभक्तैर्विक्षेपभागै-र्निजनिजापक्रमैश्च मेषादीनां राशीनां तिस्रः कक्ष्याः कुर्य्यात्। ता एव कक्ष्याः कर्कादीनां वैपरीत्येन कुर्य्यात्। तादृश्यस्विस्वातीनां तथा-विपर्य्ययात् मकरादीनाञ्च कुर्य्यात्॥

अहोरात्रार्द्धकर्णज्ञानं यथा।

खक्रान्तेरुत्क्रमक्रमध्ये हे कुर्य्यात्। तत्र उत्क्रमध्यया हीना चिह्ना दक्षिणोत्तरं दिग-ब्यासदलं स्यात्॥

विक्षेपज्ञानं यथा।

चन्द्रः स्वक्रान्त्यंशात् निजपातेन राशिचक्र-कलाग्रीतिभागैः परमं दक्षिणोत्तरं विक्षिप्यते। तस्य नवभागं द्विगुणितं बृहस्पतिः मङ्गल-स्त्रिगुणितं अन्ये चतुर्गुणं विक्षिप्यन्ते। तत्र क्रमः चन्द्रस्य मध्यविक्षेपकलाः २७०मङ्गलस्य६० बुधस्य १२० बृहस्पतेः ६० शुक्रस्य १२० शनेः १२० रवेर्विक्षेपकला नास्ति॥

अथ नक्षत्रादिकक्ष्यास्थानम्।

आधारकक्ष्याद्वयोपरिस्थाभ्यां दृग्गोलसंस्थितानां नक्षत्रादीनां कक्ष्याः कुर्य्यात्। सर्व्वासां कक्ष्यानां मध्यस्थाने विषुवत्कक्ष्या स्थिता। तदाधार-कक्ष्ययोर्युतेरूर्द्धे हे अयने विषुवद्वयञ्च कुर्य्यात्। विषुवस्थानात् भगणसञ्चारपर्य्यन्तं स्फुटभागै-र्मङ्गलादीनां क्षेत्राण्येव कुर्य्यात् अर्थात् मेषादि-राशीन् तिर्य्यक्कक्ष्याभी रचयेत्। तथा अयन-स्थानात् अन्ययनपर्य्यन्तं तिर्य्यक् अपरा कक्ष्या-क्रान्तिसंज्ञा कार्य्या। तया कक्ष्यया सूर्य्यः प्रकाशयन् सदा भ्रमति॥ चन्द्रादयो ग्रहाः अपमण्डलमाश्रिताः स्वस्वपातोग्रैरपक्रमात् विक्षे-पान्तेषु अपक्रमेणाक्रान्ताः सन्तो खेचरैर्दृश्यन्ते। क्षितिजे उदयन् राशिः लग्नं स्यात् तद्ग्रात् अस्तं गच्छंश्च अस्ताख्यं स्यात्। लग्नोदयैर्यथा सिद्धं दृग्गतुर्थस्थानञ्च कुर्य्यात्। मध्यक्षिति-जयोर्म्मध्ये या व्या सा अन्या कथ्यते। विषु-वत्क्षितिजयोरन्तरव्या चरदलव्या। उपरि स्वकं स्थानं मध्ये क्षितिजमण्डलं कृत्वा वृत्त-वेष्टितं लोकालोकवेष्टितञ्च कृत्वा जलपतनयोगेन भारदस्ययोगेन वा कालभ्रमणं साधयेत्। इति सूर्य्यसिद्धान्तसम्मतम्॥

खगड़ः, पुं, (खे आकाशे गलतीति। गल+अच् पृषोदरात् साधु।) दृग्विशेषः। खागड़ा इति भाषा॥ तत्पर्य्यायः पोटगलः २ बृहत्-काशः ३ काकेषुः ४। इति रत्नमाला॥

खड्डरः, पुं, (खन्यते कङ्कतिकया इति। खन् दारुणे+ क्विप्। कीर्य्यते विकीर्य्यते इति। कॄ विक्षेपे+ अप्। ततः कर्म्मधारयः।) चूर्णकुन्तलः। इति हेमचन्द्रः॥

खच, ग भूतिपूत्योरुत्पत्तौ। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः। भूत्युत्पत्तौ पूत्युत्पत्तौ चेत्यर्थः। ग, खच्यति राजा सम्पन्नः स्यादित्यर्थः। ग्रेवार्थः कातन्त्रादसम्मतः। इति दुर्गादासः॥

खच, तृ क बन्धने। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) खचयति। इति दुर्गादासः॥

खचमसः, पुं, (खे आकाशे चम्यते भक्ष्यतेऽसौ पिप्पलोकस्थैः पुण्यात्मभिरित्यर्थः। चमु भक्षणे+ असच्। खे चमसः यज्ञीयपात्रमिव अन्तमय-त्वात्तथात्वम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

खचरः, पुं, (खे आकाशे चरतीति। चर+ "चरेटः।" ३।२।१६। इति टः।) मेघः। इति शब्दचन्द्रिका॥ वायुः। राक्षसः। सूर्य्यः। एतेषां प्रमाणं यथा। महाभारते द्रोणपर्व्वणि।

"खचरस्य सुतस्य सुतः खचरः
खचरस्य पिता न पुनः खचरः।
खचरस्य सुतेन हतः खचरः
खचरी परिरोदिति हा खचर!॥"

आकाशगामिनि त्रि। यथा। स्मृतिः।
"पवनो दिक्पतिर्भूमि-राकाशं खचरामराः॥"
रूपकभेदः। यथा। सङ्गीतदामोदरः।
"खचरो रङ्गतालः स्यात् गुरुरादौ लघुस्तथा।
ग्रान्तेऽथवा ह्रास्वरसे भवेदेष दृग्गाचरः॥"

खचितं, त्रि, (खच्+क्तः।) संयुक्तम्। तत्पर्य्यायः करम्बितम् २ रूषितम् ३ गुरुगुम्फितम् ४। इति त्रिकाण्डशेषः॥ करम्बम् ५ कवरम् ६ मिश्रम् ७ संपृक्तम् ८। इति हेमचन्द्रः॥ व्याप्तम् ९। इति शब्दरत्नावली॥ गुम्फितम् १० छुरितम् ११। इति जटाधरः॥

खज, मन्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) मन्थो विलोड़नम्। खजति जलं मत्स्यः। इति दुर्गादासः॥

खज, ट पाङ्गुल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। इदित्।) ट, खञ्जते। पङ्गुः खोड़ः भावप्रधाननिर्द्देशात् पङ्गुत्वमिति यावत्। सो-ऽस्यास्तीति चूड़ादित्वात्ल। पङ्गुलस्य भावः पाङ्गुल्यं खोटनमित्यर्थः। खञ्जति खोड़ः। भावप्रधाननिर्द्देशो यथा। वृद्धसवर्णे इति का-तन्त्रसूत्रम्। अत्र असवर्णे परे उवर्णो वकारत्वं प्राप्नोतीत्येवार्थः। इति दुर्गादासः॥

खञ्जः, पुं, (खञ्जते निर्म्मथ्यतेऽनेन। खञ्+करणे अप्। यद्वा, खञ्जति मथ्नातीति। खञ्+अच्।) दर्व्विः। इत्यमरटीकायां भरतः॥ ह्राता इति भाषा॥ (यथा, महाभारते। १२।२१४।२१।
"पयस्यन्तर्हितं सर्पिर्यद्वद् निर्म्मथ्यते खञ्जैः।
शुक्रं निर्म्मथ्यते तद्वद्देहसङ्कल्पजैः खञ्जैः॥"
"खञ्जेनाम्भश्च स्राप्यं तन्निहन्त्युपयोजितम्॥"
इति वाभट्टे चिकित्सास्थाने तृतीयेऽध्याये॥

खञ्जकः, पुं, (खञ्जति मथ्नातीति। खञ्+ण्वुल्।) मन्थानदण्डः। इति हेमचन्द्रः॥

खञ्जर्प, क्ली, (खञ्यते मथ्यते इति। "उषिकुटि-दलिकत्रिखञ्जिभ्यः कपन्।" उणां ३। १४२। इति कपन्।) घृतम्। इत्युणादिवृत्तिः॥

खजलं, क्ली, (खे आकाशे निहितं यज्जलम्।)

नीशारः। इति त्रिकाण्डशेषः॥ आकाशचारि, यथाह राजवल्लभः। [लुताश्च।
"वर्षासु चरन्ति घने: सहोरगा वियति कीट-तड्डिमनुरूपमेयं खञ्जनमगस्त्योदयात् पूर्व्वम्॥"
खञ्जा, स्त्री, (खञ्ज्+भावे अप् टाप् च।) मद्यः। मद्योया इति भाषा॥ प्रहस्तः। इति मेदिनी॥ (खञ्ज्+करणे अप् स्त्रियां टाप्।) दर्व्वी। इति हेमचन्द्रः॥ (यथा, त्रिकित्सितस्थाने षड्-विंशेऽध्याये सुश्रुतेनोक्तम्।
"गुग्गुलं गोशकृत्काच्च बीजं
तथोच्चटां गोपयसा विपाच्य।
खञ्जाहृतं शर्करया च युक्तं
पीत्वा नरो हन्यति सर्व्वरोगम्॥")
पाकसाधनद्रव्यविशेषः। यथा, महाभारते। ४। ७। १।
"खञ्जाञ्च दर्व्वीञ्च करेण धारय-न्नसिञ्च कालाङ्गमकोपमप्रभम्।")
मारणम्। इति शब्दरत्नावली॥
खञ्जाकः, पुं, (खञ्ज् मद्ये+"खञ्जेराकः।" उणा ४।१३। इति आकः।) पक्षी। इत्युणादिवृत्तिः॥
खञ्जाका, स्त्री, पुं, (खञ्जति मद्यति पाकम्। खञ्ज् मद्ये+"खञ्जेराकः।" उणा ४।१३। इति आकः ततष्टाप्।) दर्व्वी। इत्यमरः। २।८।३४। हाता चमस इत्यादि भाषा॥
("खञ्जाकः पक्षिणि ख्यातः खञ्जाका दर्व्विरुच्यते॥" इत्युणादिवृत्तिटीका।)
खञ्जित्, पुं, (खेन आकाशध्यानेन शून्यभावनयेति भावः जयति संसारभावं यः। जि+क्विप्। शून्य-वादिनां बौद्धानां शून्यं सर्व्वमेव इत्याकार-भावनया संसारभावजयनात् तथात्वम्।) बुद्ध-विशेषः। इति हेमचन्द्रः।२। १४६॥
खद्योतिः, [स्] पुं, (खे आकाशे द्योतिर्यस्य।) खद्योतः। इति राजनिर्घण्टः॥
खञ्जः, त्रि, (खञ्ज गतिवैकल्ये+अच्।) विकल-गतिः। खोंड़ा इति भाषा॥ यथा, मनुः।३।२४२।
"खञ्जो वा यदि वा काणो दासः प्रेष्योऽपि वा भवेत्॥")
तत्पर्य्यायः। खोड़ः २। इत्यमरः।२। ६। ४६। खोलः ३। इति शब्दरत्नावली॥ खोरः ४ खञ्जकः ५। इति हेमचन्द्रः॥ खोटः ६। इति खोड़धात्वर्थदर्शनात्॥ तस्य लक्षणं यथाह माधवकरः।
"वायुः कफान्वितः सक्थ्नः कक्षरामाश्रितेऽतदा। खञ्जत्वदा भवेच्छ्वासः पङ्गुसक्थ्नोर्हयोर्वधात्॥"
खञ्जकः, त्रि, (खञ्जतीति। खञ्ज+कर्त्तरि ण्वुल्। स्वार्थे कन् वा।) खञ्जः। इति हेमचन्द्रः।३।११६॥
खञ्जकारिः, पुं, (खञ्जकस्य अरिः नाशकः।) सुश्रा। इति राजनिर्घण्टः॥ खेंसारि इति भाषा॥
खञ्जखेटः, पुं, (खञ्ज इव खेटति गच्छति वृत्तश्चिव भूमौ चरतीत्यर्थः। खिट्+अच्।) खञ्जन-पक्षी। इति शब्दमाला॥
खञ्जखेलः, पुं, (खञ्ज इव खेलति तद्वच्चलनादि-त्वर्थः। खेल्+अच्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥
खञ्जनं, क्ली, (खञ्ज विकलगतौ+भावे ल्युट्।) गमनम्। इति मेदिनी। ने। ५५॥
खञ्जनः, पुं, (खञ्जि+कर्त्तरि ल्युः।) खनामख्यात-पक्षी। तत्पर्य्यायः। खञ्जरीटः २। इत्यमरः। २।५।१५॥ कणाटीनः३ काकच्छर्दिः४ खञ्जखेलः५ तातनः ६ सुनिपुत्रकः ७ भद्रनामा ८ रत्न-निधिः ९। इति त्रिकाण्डशेषः॥ खञ्जखेटः १० गूढनीड़ः ११ तक्कः १२ चरः १३। इति शब्दमाला॥ काकच्छदः १४ नीलकण्ठः १५ कणाटीरः १६ कणाटारकः १७। इति शब्द-रत्नावली॥ (अस्य दर्शनेन यत् शुभाशुभं फलं भवति तदुक्तं बृहत्संहितायां ४५ अध्याये। तद्यथा,—
"खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे। प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि॥"
तत्र चत्वारः खञ्जना भवन्ति। तेषां नामान्याह।
"खूलोऽभ्युन्नतकण्ठः क्षणगलो भद्रकारको भद्रः। खसुखात् क्षणः सम्पूर्णः पूरयत्याशाम्॥ गलेऽस्य विन्दुः सितकरटान्तः स रिक्त-स्त्रिरिक्तः।
पीतो गोपीत इति क्षीणकरः खञ्जनो दृष्टः॥"
अथ कस्मिन् काले दृष्टः कीदृक्फलं करोति इत्याह।
"अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु।
करितुरगशुभगर्द्धिप्रासादोद्यानहर्म्येषु॥
गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।
हस्तितुरङ्गमशालाच्छत्रध्वजचामरादीषु॥
हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।
दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते॥
पद्मे खड्गाग्निगोरससम्पच्च गोमयोपगते।
शाद्वलगे वस्त्राग्निः शकटस्थे देशविभ्रंशः॥
शष्पप्रटलेऽर्थभंशो वप्रे बन्धोऽशुचौ भवति रोगः।
दृष्टे खञ्जनिकानां प्रियसङ्गमभावहत्यासु॥
महिषोष्ट्रगर्द्दभास्थिश्मशानशङ्कोलूखरकैरा-द्रिस्थः।
प्राकारभस्मकेशेषु चासुभो मरणरुग्भयदः॥
पक्षौ घृतवसशुभः शुभः पिबन् वारि निम्बगासंस्थः।
सूर्य्योदयेऽथ शुक्लो नेत्रफलः खञ्जनोऽस्तसमये॥
नीराजने निहते यथा दिशा खञ्जनं नृपो यान्तम्।
पश्चेत्तया गतस्य च्युतिप्रमरातिर्वशमुपैति॥
तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिंस्तु [illegible] तत्र तलेऽस्ति काचः।
अङ्गारमप्युपदिशन्ति पुरीषशेषस्य
तत्कौतुकापनयनाय खनेदुरिचीम्॥
नष्टविकलविभिन्नरोगितः
खतनुसमानफलप्रदः खगः।
घनरुदभिनिलीयमानको
वियति च वस्त्रसमागमप्रदः॥
नृपतिरपि शुभं शुभप्रदेशे
खगमवलोक्य मही तले विदध्यात्।
सुरभिकुसुमधूपयुक्तमर्घे
शुभमभिनन्दितमेवमेति दृद्धिम्॥
अशुभमपि विलोक्य खञ्जनं
द्विजगुरुसाधुसुरार्चने रतः।
न नृपतिरशुभं समाप्नुया-
न्न यदि दिनानि च सप्त मांसभुक्॥"
ततः कालफलप्रदर्शनार्थमाह। [दिनशेषे।
"आ वर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु दिक्स्थानमूर्त्तिलक्षणैश्चान्तदीप्तादिभिर्वक्ष्यम्॥"
प्राकृते दिग्विशेषेऽस्य शुभफलं यथा,—
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुले प्रक्रे हुताग्नौ भयं याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये। वायव्यां वरवस्त्रगन्धसलिलं दिग्याङ्गना चोत्तरे-ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने॥")
खञ्जनरतं, क्ली, (खञ्जनस्य रतमिव गोपनीयं अयक्तं रतं रतिः।) यमिनां गोप्यं रतम्। यतिनां गोपनीयमैथुनम्। इति हारावली॥
खञ्जना, स्त्री, (खञ्जन इवाचरति। खञ्जन+क्यच्+क्विप् टाप् च। यद्वा, खञ्जि+युच्+टाप्।) सर्षपी। क्षुद्रखञ्जनजातिः। इति मेदिनी॥
खञ्जनाकृतिः, स्त्री, (खञ्जनस्याकृतिरिवाकृतिरस्य।) खञ्जनविशेषः। इति शब्दचन्द्रिका॥ तत्-पर्य्यायः। क्षुद्रिका २ खञ्जनिका ३ सर्षपी ४। इति शब्दरत्नावली॥
खञ्जनिका, स्त्री,(खञ्जनस्येदमाकारोऽस्यस्याः इति। खञ्जन+ठन् टाप् च।) खञ्जनाकारपक्षि-विशेषः। तत्पर्य्यायः। क्षुद्रिका २ तुलिका३ क्षोटिका ४ सर्षपी ५। इति त्रिकाण्डशेषः॥ खञ्जनाकृतिः ६। इति शब्दचन्द्रिका॥
खञ्जरीटः, पुं. (खञ्ज इव ऋच्छतीति। ऋ गतौ+बाहुलकात् कीटन्।) खञ्जनपक्षी। इत्यमरः। २। ५। १५॥ (यथा, अमरुशतके। ६६।
"तन्वी शरत्तुचिपथगापुलिने कपोलौ लोले दृशौ रुचिरचञ्चलखञ्जरीटौ॥")
खट, काङ्क्षि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) खटति। काङ्क्षि आकाङ्क्षायाम्। इति दुर्गादासः॥
खटः, पुं, (खट्+अच्।) अन्धकूपः। कक्षः। प्रहारान्तरम्। टङ्कः। इति मेदिनी॥ लवम्। इति हेमचन्द्रः॥ लाङ्गलम्। कर्त्तृकम्। इत्य-जयपालः॥
खटकः, पुं, (खट्+बाहुलकात् वुन्।) घटकः। तत्पर्य्यायः। नागवीटः २ टाङ्करः ३ चाचरः ४। इति त्रिकाण्डशेषः॥ कुत्सितपाखिः। इति शब्द-माला॥
खटिकः, पुं, (खटः अस्त्यस्य इति ठन्।) कुत्सित-पाखिः। इति हेमचन्द्रः॥
खटिका स्त्री, (खट्+अच्। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) लेखनद्रव्यम्। खड़ी इति भाषा। (यथा, कलाविलासे। २। २१।

"विविधनवांशुकस्रगमदचन्दनकर्पूरमरिच पूगफलैः।
खटिकाहस्तः स सदा गच्छति कोटीर्मुहूर्तेन॥")
कर्णरत्नम्। वीरणम्। इति विश्वः॥
खटिनी, स्त्री,(खट्+बाहुलकात् इनिः। ङीप् च।) खटी। इति राजनिर्घण्टः॥ (यथा, हितोपदेशे।
"न पतति खटिनी ससम्भ्रमा यस्य महद्गणनायाम्॥")
खटी, स्त्री, (खट्+अच्। गौरादित्वात् ङीष्।) लेखनद्रव्यम्। खड़ी इति भाषा। तत्पर्य्यायः। खटिनी२ खटिका३ धवलमृत्तिका४ सितधातुः५ पाण्डुमृत्६ पाण्डुमृत्तिका७। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शीतलत्वम्। पित्तदाहरक्तदोषकफासनेत्ररोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्याः पर्य्यायान्तराणि कठिनीशब्दे द्रष्टव्यानि॥ (यथास्याः पर्य्यायाः गुणाश्च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"खटिका कठिनी चापि लेखनी च निगद्यते।
खटिका दाहजिच्छीता मधुरा विषशोथजित्॥
लेपादेतद्गुणाः प्रोक्ता भक्षिता रक्तिका समा।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते॥")
खट्ट, क वृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) टट्टयान्तः। क, खट्टयति। इतिः संवरणम्। इति दुर्गादासः॥
खट्टनः, त्रि, (खट्टयते त्रियते मृग्यादिभिः इति। खट्ट वृतौ+कर्म्मणि ल्युट्।) खर्व्वः। इति हेमचन्द्रः। छोट इति भाषा॥ खटत इति पाठोऽपि दृष्टः॥
खट्टा, स्त्री, (खट्+टाप्।) खट्वा। इति शब्दचन्द्रिका॥
खट्वाङ्गः, पुं स्त्री, (खट्वः आत्मा वृतः सन् अश्नाति इति। अश्+अच्। अशुते व्याप्नोति गात्रगन्धेन वा। अशूङ् व्याप्तौ+अच्।) वनजन्तुविशेषः। खटाङ्ग इति गन्धगोकुला इति च भाषा। तत्पर्य्यायः। गन्धौतुः२ वनवासनः३। इति त्रिकाण्डशेषः॥ खट्वाशी४ वनाशुः५। इति शब्दरत्नावली॥ खट्वासः६ गन्धमार्जारः७ वनश्वा८ शालिः९। इति जटाधरः॥ पुण्यलकः१०। इति दुर्गादासधृतवचनम्॥
खट्वासः, पुं,(खट्वाङ्ग+एषोदरादि प्रकारस्य सत्वम्। यद्वा, खट्ट वासति दीप्यते प्रकाशते। अस दीप्तौ+अच्।) खट्वाङ्गः। इति जटाधरः॥ (लक्षणमस्य यथा भैषज्यरत्नावल्यां वातव्याध्यधिकारे।
"खट्वाशोऽनूपजः श्रेष्ठो वर्त्तुलो मांसलश्च यः।
तन्मतो मध्यदेशीयो मध्यमो मरुजोऽधमः॥")
खट्टिः, पुं, (खट्ट+इन्।) शयनम्। तत्पर्य्यायः। अञ्जसा२ दाशठः३। इति त्रिकाण्डशेषः॥
खट्टिकः, त्रि, (खट्टनं आवरणं खट्टः स श्लिष्यत्वेनास्यास्तीति। ठन्।) शाकुनिकः। इति शब्दमाला। पाखिमारा इति भाषा॥
खट्टिका, स्त्री, (खट्ट+स्वार्थे खल्पार्थे वा कन्+टाप् अत इत्वञ्च।) क्षुद्रखट्वा। तत्पर्य्यायः। निषद्वा२ सन्दी३। इति त्रिकाण्डशेषः॥ आसन्दी४। इति जटाधरः। शयनम्। इति शब्दमाला॥
खट्टेरकः, त्रि, (खट्ट+बाहुलकात् कर्म्मणि एरक्।) खर्व्वः। इति शब्दमाला॥
खट्वा, स्त्री, (खट्यते काङ्क्ष्यते शयनार्थिभिरिति। खट काङ्क्षायां+"अशूप्रुषिलटीति।" उणां १।१५१। इति क्वन्।) काष्ठादिरचितशय्याधारः। खाट् इति भाषा। तत्पर्य्यायः। शयनम्२ मञ्चः३ पर्य्यङ्कः४ पल्यङ्कः५। इत्यमरः। २।६।१३८॥ तल्पम्६ शयः७। इति शब्दरत्नावली॥*॥ तद्युक्तिर्यथा,—
"अष्टाभिः काष्ठखण्डैश्च खट्टेति प्रतिपद्यते॥"
अथैषां नामानि।
"तिष्ठेत् यदालम्ब्य खट्वा तच्छ्रेयं चरणाष्टयम्।
शिरःस्थं शुषधानं स्यात् अधःस्थं स्यात् निरूपकम्॥
आलिङ्गने उभे पार्श्वे प्राह भोजमहीपतिः।
आलिङ्गने चतुर्हस्ते शुषधाननिरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वषोढ़शिका खट्वा सर्व्वत्राभयदायि॥
आलिङ्गने सार्द्धवेदे शुषधाननिरूपके।
सार्द्धहस्ते च चरणा हस्तैकपरिसम्मिताः॥
सर्व्वाष्टादशका खट्वा सर्व्वकामफलप्रदा।
आलिङ्गने पञ्चहस्ते शुषधाने निरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वविंशतिका खट्वा धनधान्यजयप्रदा॥
आलिङ्गने षड्हस्ते शुषधाने निरूपके।
त्रिहस्तसम्मिते पादा हस्तैकपरिसम्मिताः॥
सर्व्वविंशतिका खट्वा एवमप्युपजायते।
आलिङ्गने सार्द्धषड्हे शुषधाने निरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वद्वाविंशिका खट्वा सर्व्वसम्पत्प्रदायिनी॥
आलिङ्गने च षड्हस्ते शुषधाने निरूपके।
त्रिहस्तसम्मिते पादाश्चत्वारश्चरणा इति॥
चतुर्विंशतिका खट्वा सर्व्वरोगक्षयङ्करी।
आलिङ्गने सप्तहस्ते शुषधाने निरूपके॥
त्रिहस्ते सार्द्धहस्ताश्च चत्वारश्चरणा इति।
सर्व्वषड्विंशिका खट्वा सर्व्वसौभाग्यकारिका॥
आलिङ्गने सार्द्धसप्ते शुषधाने निरूपके।
सार्द्धत्रिहस्ते सार्द्धाश्च चत्वारश्चरणा इति॥
सर्व्वाष्टाविंशिका खट्वा सर्व्वभोगप्रदायिका।
आलिङ्गने चाष्टहस्ते शुषधाने निरूपके॥
चतुर्हस्ते सार्द्धहस्ताश्चत्वारश्चरणा इति।
सर्व्वत्रिंशतिका खट्वा सर्व्वकामार्थदायिनी॥
एवमष्टविधाः खट्वाः समासेनोपदर्शिताः।
आदित्यादिदशाजानां वृद्धा सम्पत्तिदायिकाः॥
कार्य्याः शिल्पिभिरेतासु विविधाकृतिकल्पनाः।
सर्व्वशोढ़शिका खट्वा सर्व्वेषामेव युज्यते॥
अष्टौ खण्डानि यस्याः स्युश्चतुर्हस्तयुतानि च।
श्रीसर्व्वमङ्गला नाम खट्वेयं पृथिवीपतेः॥
इयं यदा सच्छदना तदा सर्व्वजयाभिधा।
यात्रासिद्धिः सर्व्वसिद्धिर्विजया चाष्टमङ्गला॥*॥
एकैकहस्तवृद्ध्या तु भवेन्नवमतः परम्।
जयोऽथ मङ्गलः प्रेयान् चित्रकान्तः परो महान्॥
एकैकहस्तवृद्ध्या तु मञ्चानामिति लक्षणम्।
सा तुङ्गा श्रुतितुङ्गा च शिखरी विषयेचरा॥
एकैकहस्तवृद्ध्या तु टङ्क इत्यभिधीयते।
यात्रासिद्धिं समारभ्य येऽमी षोड़श कीर्त्तिताः॥
आदित्यादिदशाजानामाद्यन्तैकद्वयं क्रमात्।
दूरदर्शी दीर्घदर्शी दुर्लक्ष्योऽथ दुरासदः॥
यथोत्तरं दशगुणाः पादैकपरिणाहिनः।
प्रासादसंज्ञकाः कार्य्या राज्ञा सुखमभीप्सता॥
चत्वार एते सर्व्वेषां भूपतीनां सुखावहाः॥"*॥
भोजमते च।
"सर्व्वविंशतिकां यावत् आरभ्याभयषोड़शीम्।
खट्वानामिति नामानि अष्टौ हस्तद्वयाधिकाम्॥"
तद्यथा,—
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्।
प्रचण्डा सर्व्वतोभद्रा खट्वानामाष्टकं विदुः॥"
आसां विभागः पूर्व्ववत्॥*॥
पराशरसंहितायान्तु।
"अष्टाभिः काष्ठखण्डैस्तु योऽत्रपिण्डो विजायते।
स चेत् समो भवेत् खट्वा प्रशस्या स्यादतोऽन्यथा॥
समे सर्व्वायसम्पत्तिर्विषमे विषमास्यदम्।
तस्मात् खट्वाङ्गपिण्डो यः समः कार्य्यः स सूरिभिः॥"
इदन्तु सामान्यं सर्व्वसम्मतञ्च। काष्ठनियमस्तु पूर्व्ववदेव। इत्यासनयुक्तौ खट्वोद्देशः॥*॥
तस्या दोषगुणा यथा,—
"खट्वायां यो गुणो दोषो मानञ्च परिकीर्त्तितम्।
तेनैव खट्वा काष्ठोत्था तथैव गुणमावहेत्॥
अनेनैव विधानेन कार्य्यं बहुविधासनम्।
विना नौकां समं कार्य्यं सर्व्वत्रैवासनं गुरु॥"
इति तत्रैव युक्तिकल्पतरुः॥
अस्या गुणाः। वातलत्वम्। इति राजवल्लभः॥ प्रेक्षा। इत्यमरटीका॥ कोलश्निष्ठी। इति राजनिर्घण्टः॥
खट्वाङ्ग, क्ली, (खट्वाया अङ्गम्। तदिवाकृतिर्यस्य इति।) शिवस्याखविशेषः। तत्पर्य्यायः। सुखंसुप्तः२॥ इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ८७। ६।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥")
खट्वाङ्गः, पुं, (खट्वाङ्ग इत्याख्यास्य। शिवस्य खट्वाङ्गास्त्रवत् सर्व्वत्र दुर्लक्ष्यप्रासनत्वात् अमोघवीर्य्यवत्त्वाच्चास्य तथात्वम्।) सूर्य्यवंशीयराजविशेषः। स तु विश्वसहराजपुत्रः। यथा,—
श्रीमद्भागवते। ९। ९। ४१।
"ततो दशरथस्तस्मात् पुत्र ऐड़विड़स्ततः।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्त्यभूत्॥"
खट्वाङ्गभृत्, पुं, (खट्वाङ्गं बिभर्त्ति इति। भृ+क्विप्।) शिवः। इति हेमचन्द्रः॥
खट्वाङ्गी, [न्] पुं, (खट्वाङ्गं अस्त्रविशेषः सोऽस्यास्तीति इनिः।) शिवः। इति हारावली॥ (प्रायश्चित्तार्थं धारणीयं खट्वाङ्गाकृतिकाष्ठखण्डविशेषः। यथा, मनुः। ११। १०५।

"खट्वाङ्गी चीरवासा वा ग्रस्थुलो विजने वने।
प्राजापत्यं चरेत् कृच्छ्रमब्दमेकं समाहितः॥")

खट्वारूढः, त्रि, (खट्वामारूढः। "खट्वा क्षेपे।" २।१।२६। इति निन्दायां द्वितीयान्तस्य क्तान्तेन नित्यसमासः।) अविनीतः। प्रमादवान्। इति चिकाण्डशेषभूरिप्रयोगौ॥ (यथा, भट्टौ। ५।१०।
"वृतखं पाचेसमितेः खट्वारूढः प्रमादवान्।
पानग्रौण्डः स्त्रियं नेता नात्यन्तीनत्वमुच्चना॥"
"खट्वारूढः उत्पथस्थितः। खट्वा क्षेपे इति द्वितीया।" इति जयमङ्गलटीका॥) खट्वारूढो नरो ज्ञात्वः। इति कालापव्याकरणम्॥ (वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वा रोढ्या ब्रह्मचर्यं एव भूमिग्रयनार्होऽपि यः खट्वामारोहति स ज्ञात्वः। रूढ्यायं तेन खट्वामारोहतु मा वा निघिद्धानुष्ठानपरः सर्व्वोऽपि खट्वारूढ उच्यते। इति ग्रन्थार्थचिन्तामणिः॥) खट्वोपरिस्थितश्च॥

खट्विका, स्त्री, (अल्पा खट्वा। अल्पार्थे कन्। अत इत्वच्।) क्षुद्रखट्वा। इति जटाधरः॥ खट्वाविशेषः। तद्युक्तिर्यथा,—
"ब्रह्मक्षत्रियवैश्यानां चतुःषड्रकोणिकाः।
खट्विकाः सुखसम्भूताः शुक्लरक्तासिताम्बराः॥"
इति युक्तिकल्पतरौ खट्विकोद्देशः॥

खड, इ ड मथि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्। इदित्।) मथि मन्थने मन्थनञ्चेह भञ्जनम्। इ, खण्डयते। ड, खण्डते दण्डेन भाण्डं लोकः। इति दुर्गादासः॥

खड, क भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, खाड़यति। इति दुर्गादासः॥

खड़, क्ली, पुं, (खण्ड्यते छिद्यते धान्ये पक्वे सति इति। खड + कर्म्मणि अप्।) लघुलशुनम्। इति ग्रन्थरत्नावली। खड़ इति भाषा॥

खड़ः, पुं, (खड + भावकर्म्मादौ यथायथं अप्।) पानान्तरम्। भेदः। इति मेदिनी। ड़े। ८॥
खड़यूषो यथा, चक्रदत्ते।
"तक्रं कपित्थाङ्गरीमरिचाजाजिचित्रकैः।
सुपक्वं खड़यूषोऽयमयं काम्बलिकोऽपरः॥"

खड़क्किका, स्त्री, (खड़क् इत्ययक्तशब्दं करोतीति। क + बाहुलकात् ङः ततो गौरादित्वात् ङीष्। ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) पक्षद्वारम्। इति हारावली॥ खड़क्किद्वार इति भाषा॥

खड़तृः, पुं, (खड + अतृप्रत्ययः।) बाहुल्लङ्कार-भरणम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

खड़िका, स्त्री, (खड़् + अप् + गौरादित्वात् ङीष्। ततः स्वार्थे कन् पूर्व्वह्रस्वः।) कठिनी। इति जटाधरः॥

खड़ी, स्त्री, (खड़् + अप् + ततो ङीष्।) कठिनी। खनामख्यातश्वेतवर्णमृत्तिकाविशेषः। इति ग्रन्थचन्द्रिका॥ अस्या गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ॥

खड़ूः, स्त्री, (खड़् + "खडेर्डुडुः।" उणा। १।८४। इति ऊः।) क्षतग्रथ्या। (बाहुल्लङ्कारभरणम्। इत्युज्ज्वलदत्तः॥)

खड्गं, क्ली, (खड़ भेदे + "छापूखड़िभ्यः कित्।" उणा। १।१२३। इति गन् प्रत्ययः।) लोहम्। इति राजनिर्घण्टः॥

खड्गः, पुं, (खड़ति भिनत्तीति। खड़् + "छापू-खड़िभ्यः कित्।" उणा। १।१२३। इति गन्।) गण्डकः। गण्डार इति भाषा॥ (यथा, मनुः। ३। २७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वशः॥"
"खड्गो गण्डकः लोहो लोहितवर्णश्छाग एव।" इति कुल्लूकभट्टः॥) गण्डकशृङ्गम्। खाग इति भाषा। युद्धभेदः। इति मेदिनी॥ चोरकनाम-गन्धद्रव्यम्। इति राजनिर्घण्टः॥ अस्त्रविशेषः। खाँड़ा तरवाल इत्यादि भाषा॥ (यथा, महाभारते। ४। ४१। २५।
"यस्यैयं विपुलः खड्गो गये कोषे समर्पितः।
सहदेवस्य विक्षेप्तुं सर्व्वभारसहं दृढम्॥")
तत्पर्य्यायः। निस्त्रिंशः २ चन्द्रहासः ३ असिः ४ रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करवालः ८ क्षुराग्रः ९। इत्यमरः। २।८।८९॥ ऋष्टिः १० करपालः ११। इति तट्टीका॥ विघ्नसनः १२ तीक्ष्णधारः १३ दुरासदः १४ श्रीगर्भः १५ विजयः १६ धर्म्मपालः १७ कौक्षेयः १८ तरवारिः १९ तवराजः २० क्षुराग्रकः २१ क्षुराग्री २२ ग्रस्तः २३। इति ग्रन्थरत्नावली॥ * ॥ तस्योत्-पत्तिर्ब्रह्मणो यज्ञाग्नौ यथा,—
"विकीर्य्याग्निं तथाभूतमुत्थितं ग्रयते तदा।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं क्षुरोदरम्॥
प्रांशुं सुदुर्द्धर्षतरं तथैव भ्रमितौजसम्।
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः।
ततः स ग्रिनिकक्षाय रुद्रायर्षभकेतवे॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम्।
ततः स भगवान् रुद्रो दानवक्षतजोक्षितम्॥
असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे।
विष्णुर्मरीचये स महर्षिभ्यः ते इन्द्राय स लोक-पालेभ्यः ते मनवे सूर्य्यपुत्राय स क्षुपाय स इक्ष्वाकवे स पुरूरवसे स आयवे स नहुषाय स ययातये स पूरवे स अमूर्त्तरयसे स भूमिग्रयाय स भरताय स ऐड़विड़ाय स धुन्धुमाराय स काम्बोजाय स सुचुकुन्दाय स मरुत्ताय स रैव-ताय स यौवनाश्वाय स रघवे स हरिताश्वाय स सुनकाय स उशीनराय स भोजाय स शिबये स प्रतर्द्दनाय स अष्टकाय स ऋतध्वजाय स भर-द्वाजाय स द्रोणाय स कृपाय स पाण्डवेभ्यो दत्तवान्॥ * ॥ अथ खड्गविषयकत्रयोदश-विधसत्करणं यथा, महाभारते।
"मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते।
तदेव बाहुसुदग्न्य क्षतमुद्भ्रान्तमीरितम्॥
भ्रामणं खस्य परितः खड्गस्यावहमुच्यते।
परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम्॥
ग्रभोरात्मसमाधानं गमनन्त्वाहुतं मतम्।
खड्गस्यायेण तद्देहस्पर्शनं प्रहृतं मतम्॥
वञ्चयित्वा रिपौ ग्रस्त्रपातनं गदितं बुधैः।
परिहृत्यं भवेत् ग्रत्रोर्वामदक्षिणतो गतिः॥
पश्चात् पदापसरणं निहत्यं संप्रचक्षते।
अन्योऽन्यताड़नं प्राहुः सम्पातमुभयोरपि॥
आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम्।
अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम्॥
विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम्।
निलीय चर्म्मणि क्षेपो यदसेः सात्वतं हि तत्॥"
तस्य परीक्षा तरवारिशब्दे द्रष्टव्या॥ (अस्य लक्षणादिकं यथा, वृहत्संहितायां ५०अध्याये।
"अङ्गुलग्रतार्धमुत्तमजनः स्यात्पञ्चविंशत्यङ्गं खड्गः।
अङ्गुलमानाज्ज्ञेयो ब्रह्मोऽशुभो विषमपर्वस्थः॥
श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्।
सदृशा ब्रह्मः प्रशस्ता भवायुधस्वस्तिकानाञ्च॥
शकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाक्षतयः।
खड्गे ब्रह्मा न शुभदा वंशानुगाः प्रभूताश्च॥
स्फुटितो दृश्यः कुण्ठो वंशच्छिन्नो न दक्षिणो-ऽनुगतः।
अखण्ड इति चानिष्टः प्रोक्तविपर्य्यस्त इष्टफलः॥
क्षत्रियं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात्।
क्षयसङ्गरौर्णे युद्धं ज्वलिते विजयो भवति खड्गे॥
नाकारणं विहन्याद्यान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम्।
देयं न चास्य कथयेत् प्रतिमानयेच्च
नैवं क्षिपेन्नृपतिरप्रयतोऽसियष्टिम्॥
गोलिङ्गासंस्थानो नीलोत्पलवर्णपत्रसदृशश्च।
करवीरपत्रमूलाग्रमण्डलाग्राः प्रशस्ताः स्युः॥
निष्पन्नो न क्षेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः।
मूले ग्रियते स्वामी जननी तस्यायतश्चिह्ने॥
यस्मिन् त्वरुप्रदेशे ब्रह्मो भवेत्तदेव खड्गस्य।
वनितानामिव तिलको गुह्ये वाच्यो सुखे दृष्टः॥
अथवा स्वग्रति यदङ्गं प्रहृत्य निस्त्रिंशभृत्यद-वधार्य्यं।
कोशस्यस्यादेशो ब्रह्मोऽस्ति ग्राह्यं विदित्वेदम्॥
ग्रिरसि सृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे।
भ्रूमध्ये च तृतीये नेत्रे सृष्टे चतुर्थे॥
नासोष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः।
उरसि हृदग्रसंस्थस्त्रयोदशे कक्ष्यौर्ज्ञेयः॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो ज्ञेयाः।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः॥
ऊर्वोर्द्वाविंशे स्याद् ऊर्वोर्मध्ये त्रयस्त्रयोविंशे।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥
जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च।
षड्विंशतिकाद्यावच्चिह्नं ग्रहिति मतेन गर्गस्य॥
पुत्रमरणं धनाग्निर्घनहानिः सम्पदश्च वन्ध्यत्वं।
एकाद्यङ्गुलसंस्थैर्ज्ञेयैः फलं निर्दिशेत् क्रमशः॥
सुतलाभः कलहो हस्तिलब्धयः पुत्रमरण-धनलाभौ।
क्रमशो विनाशवनितानिश्चितदुःखानि षट्प्रभृति॥
लक्ष्मिहानिस्फीतलब्धयो वधो दृष्टिमरणपरितोषाः।
ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥

वित्ताग्निरनिर्वाणं धनागमो मृत्युसम्पदोऽखिलम्।
ऐश्वर्यमतुराद्यानि च क्रमात्तिंशदिति यावत्॥
परतो न विशेषफलं विषमसमेष्वासु पाप-
शुभफलदाः।
केचिदफलाः प्रदिष्टास्तिंशत्परतोऽयमितियावत्॥
करवीरोत्पलनागमदघृतकुङ्कुमकुन्दचम्पकसगन्धः।
शुभदोऽनिष्टो गोगन्धपङ्कभेदःसदृशगन्धः॥
कूर्मेवसाद्यकुचारोपमश्च भयदुःखदो भवति गन्धः।
वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः॥
इदमौशनसं च शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।
हविषा गुणवत्सुताभिलिप्सोः
सलिलेनाक्षयमिच्छतश्च वित्तम्॥
वडवोष्ट्रकरेणुदुग्धपानं
यदि पापेन समीहतेऽर्थसिद्धिम्।
भवपित्तमृगाश्वखड्गदुग्धैः
करिहस्तच्छिदये सतालगर्भैः॥
आर्कं पयो हुडुविषाणमहीसमेतं
पारावताखुशकृता च युतं प्रलेपः।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः॥
चारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत्।
सम्यक् छितं चाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम्॥")

खड्गकोषः, पुं, खड्गलता। तत्पर्य्यायः। खड्गपत्रः २ खड्गिमारः ३ अश्वपुच्छकः ४। इति शब्दचन्द्रिका॥ (खड्गस्य कोषः।) खड्गाधारः। खाप इति भाषा। अयं युत्पत्तिलभ्योऽर्थः॥

खड्गटः, पुं, (खड्ग इव अटतीति। अट्+अच्। शकन्ध्वादित्वात् साधुः।) बृहत्कोशः। इति ली॥

खड्गधेनुः, स्त्री, खड्गपुत्रिका। छुरि इति भाषा। (खड्गस्य गण्डकस्य धेनुः प्रकृतिः।) गण्डकस्त्री। इति मेदिनी॥ मादी गण्डार इति भाषा॥

खड्गपत्रः, पुं, (खड्गाकारोऽग्रे पत्राणि अस्य।) खड्गलता। इति शब्दचन्द्रिका॥

खड्गपिधानं, क्ली, (खड्गस्य पिधानमाच्छादनम्।) खड्गकोषः। खाप इति भाषा। इलायुधः॥
पर्य्यायकं क्ली (खड्गस्य पिधानकम्।) खड्गापधानम्। खाप इति भाषा। तत्पर्य्यायः। प्रत्याकारः २ परीवारः ३ कोशः ४। इति हेमचन्द्रः॥

खड्गारीटः, त्रि, (खड्गं ऋच्छतीति। ऋ+कीटन्। निपातनात् पूर्ब्बवृद्धिः। यद्वा खड्गारिरिवाचरति इति। किः ततः कीटन्।) फलकः। असिधाराव्रतधारी। इति मेदिनी॥

खड्गिक, पुं, महिषीक्षीरकेनः। गौनिकः। इति मेदिनी॥

खड्गिमारः, पुं, (खड्गिनं गण्डकं मारयतीति। मृ+णिच् "कर्म्मण्यण्।" ३। २। १। इत्यण्। अश्वविशेषः।) खड्गकोषलता॥ इति शब्दचन्द्रिका॥

खड्गी, [न्] पुं, (खड्गस्तदाकारं शृङ्गमस्यास्तीति। इनिः।) वनजन्तुविशेषः। गण्डार इति भाषा। तत्पर्य्यायः। गण्डकः २ खड्गः ३। इत्यमरः।२।५।४॥ खड्गशृङ्गः ४ क्रोडीमुखः ५ तुङ्गमुखः ६ बली ७ वज्रचर्म्मा ८ वाङ्मीनसः ९। इति राजनिर्घण्टः॥ एकचरः १० गण्डोत्साहः ११। इति त्रिकाण्डशेषः॥ गण्डः १२ खनोत्साहः १३। इति शब्दरत्नावली॥ अस्य मांसगुणाः। बलकारित्वम्। हृंहणत्वम्। गुरुत्वम्। इति राजनिर्घण्टः॥ कफवायुनाशित्वम्। कषायत्वम्। पित्तलोकफनाशकारित्वम्। पवित्रत्वम्। आयुर्हितत्वम्। मूत्रबन्धकारित्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥
("कफघ्नं खड्गिमिश्रितं कषायमनिलापहम्। पित्तं पवित्रमायुष्यं बलमूत्रं विरूक्षणम्॥" इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये॥ महादेवः। यथा, महाभारते।१३।१७।४२।
"अग्नी घृतघ्नी खड्गी पट्टिशी चायुधी महान्॥"
खड्गो विद्यतेऽस्य इति युत्पत्त्या तु वाच्यलिङ्गः। यथा, भागवते। ८।२५।८।
"सुसत्वधरोऽथ गृहीत्वा धन्वी खड्गी धृतेषुधिः॥")

खड्गीकं, क्ली, (खड्गस्तत् कर्म्मणि कुशलम्। बाहुलकात् ईकक्।) दात्रम्। इति शब्दरत्नावली॥

खण्डं, क्ली, (खडि+घञ्। इदित्वात् नुम्।) विड्लवणम्। इति राजनिर्घण्टः॥ इक्षुविकारः। अस्य गुणाः। वृष्यतमत्वम्। चक्षुष्यत्वम्॥ वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ (अस्य गुणाः यथा,—
"खण्डन्तु मधुरं वृष्यं चक्षुष्यं हृंहणं हिमम्। वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम्॥"
मधुखण्डगुणाः यथा,—
"मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः। क्षुद्रगुडीसारलड्डाहरक्तदुष्टवरा हिमा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)

खण्डः, पुं, क्ली, (खडि+घञ् इदित्वात् नुम्।) एकदेशः। तत्पर्य्यायः। भित्तम्२ शकलम्३। इत्यमरः।१।३।१६॥ (यथा, मार्कण्डेये।८३।२६।
"धुतश्मश्रुविभिन्नास्य खण्डखण्डं ययुर्घनाः॥"
व्रजादिसमूहः। इत्यमरः।१।१०।४२॥)

खण्डः, पुं, (खडि+घञ्।) इक्षुविकारः। खाँड़ इति भाषा। मणिदोषः। इति मेदिनी॥ (योगिविशेषः। यथा, हठयोगदीपिकायाम्।१।८।
"भानुकीनारदेवश्च खण्डः कापालिकस्तथा॥")

खण्डकः, पुं, (खण्डेन निर्वृत्तः इति संज्ञायां कः।) निर्नखः। इति शब्दचन्द्रिका॥ सितखण्डः। इति राजनिर्घण्टः॥ (खण्डयतीति। खडि+ण्वुल्। छेदकारी॥)

खण्डकथा, स्त्री, (खण्डा खण्डिता कथा।) वाङ्मयभेदः। इति त्रिकाण्डशेषः॥

खण्डकर्णः, पुं, (खण्ड इव कर्णः कन्दो यस्य।) आलुविशेषः। शकरकन्द आलु इति भाषा॥ तत्पर्य्यायः। वक्रकन्दः २। इति रत्नमाला॥ अस्य गुणाः। कफपित्तनाशित्वम्। कटुपाकित्वम्। इति राजवल्लभः॥

खण्डकालुः, क्ली, (खण्ड इव कायतीति। कै+कः। ततः खण्डकं आलु इति कर्म्मधारयः।) आलुविशेषः। इति शब्दचन्द्रिका॥

खण्डजः, पुं, (खण्ड इव जायते खण्डाकारेण जायते वा। जन्+डः।) गुडः। यवासशर्करा। इति राजनिर्घण्टः॥

खण्डजोद्भवः, पुं, (खण्डज उद्भवोऽस्य इति खण्डजोद्भवः तस्माज्जायते इति। जन्+डः।) तवराजोद्भवखण्डः। इति राजनिर्घण्टः॥

खण्डतालः, पुं, (खण्डेन वाद्यांशभेदेन निर्वृत्तस्तालः।) तालविशेषः। यथा,—
"इतमेकं भवेद्यत्र खण्डताल; स उच्यते।
अपरं नियमं विना।"
इति सङ्गीतदामोदरः॥

खण्डधारा, स्त्री, (खण्डे एकदेशे धारो यस्याः।) कर्त्तरी। इति शब्दमाला॥ काँचि इति भाषा॥

खण्डनं, क्ली, (खडि भावे+ल्युट्।) भञ्जनम्। भेदनम्। निराकरणम्। छेदनम्। यथा,—
"घटय भुजबन्धनं जनय रदखण्डनं देहि पदपल्लवमुदारम्॥" इति जयदेवः॥

खण्डपरशुः, पुं, (खण्डयति शत्रून् इति खण्डस्तादृशः परशुरस्य।) शिवः। इत्यमरः।१।१।३३॥ (यथा, महाभारते ७। रुद्रमाहात्म्ये।२००।४१।
"पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम्॥"
विष्णुः। यथा, महाभारते।१३।१४८।७४।
"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः॥")

खण्डपर्णुः, पुं, (शत्रून् खण्डयति विदारयति इति खण्डस्तथाविधः पर्णुरस्य।) परशुरामः। शिवः। चूर्णलेपी। खण्डामलकभेषज्यम्। राहुः। इति मेदिनी॥ भग्नदन्तहस्ती। इति शब्दरत्नावली॥

खण्डपालः, पुं, (खण्डं पालयतीति। पालि+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) मोदकः। मयरा इति भाषा। तत्पर्य्यायः। खाण्डिकः २। इति हारावली॥

खण्डमोदकः, पुं, (खण्डेन खण्डोत्पादितलड्डुकादिना वा मोदयतीति। खण्ड+मुद्+णिच्+ण्वुल्।) यवासशर्करा। इति राजनिर्घण्टः॥

खण्डलवणं, क्ली, (खण्ड्यते इति खण्डम्। खडि+कर्म्मणि घञ्। तच्च तत् लवणञ्चेति।) विड्लवणम्। इति राजनिर्घण्टः॥ (विड्शब्देऽस्य विवरणं ज्ञातव्यम्॥)

खण्डशाखा, स्त्री, (खण्डा खण्डिता शाखा यस्याः।) महिषवल्ली। इति राजनिर्घण्टः॥

खण्डसरः, पुं, (खण्ड इव सरतीति। सृ+अच्।) यवासशर्करा। इति राजनिर्घण्टः॥

खण्डाभं, क्ली, (खण्डं अभ्रं मेघः।) अभ्रलेशः। छेँड़ा मेघ इति भाषा। दन्तक्षतविशेषः। इति मेदिनी॥

खण्डिकः, पुं, (खण्डोऽस्यास्तीति। ठन्।) कलायः। कड़ाइ इति भाषा। इत्यमरः॥ (अस्य पर्य्याया यथा,— [अथ॥"

"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तदगुणा इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणाश्चास्य त्रिपुटशब्दे वक्ष्याः॥) कक्षः। इति हेमचन्द्रः॥ वगल इति भाषा॥

खण्डितं, त्रि, (खडि+क्तः।) खण्डीकृतम्। तत्पर्य्यायः। छिन्नम् २ लूनम् ३ छित्तम् ४ दितम् ५ छेदितम् ६ वृक्तम् ७ वृत्तम् ८। इति हेमचन्द्रः॥ (यथाह ग्रन्थार्थचिन्तामणिः।

"चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला।
सुखेऽप्रसादः सधनेषु सर्ब्बदा
यत्नो विधातुः कथयन्ति खण्डितम्॥"

खण्डिताङ्गः। खण्डिताङ्गत्वं दुष्टवचनकर्म्मविपाकः। यथाह ग्रातातपः। ३ अध्याये।

"दुष्टवादी खण्डितः स्यात् स वै दद्यात् द्विजातये।
रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम्॥")

खण्डिता, स्त्री, (खण्डित+टाप्।) स्त्रीयादिनायिकायाः भेदः। अस्या लक्षणम्। अन्योपभोगचिह्नितः पतिः प्रातरागच्छति यस्याः सा। अस्याश्चेष्टा। "अस्फुटालापचिन्तासन्तापनिश्वासतूष्णीम्भावाश्रुपातादयः।" इति रसमञ्जरी॥ (साहित्यदर्पणोक्तलक्षणं यथा, तत्रैव। ३। ८३।

"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्षाकषायिता॥
उदाहरणं यथा, तत्रैव।

"तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन॥")

खण्डिनी, स्त्री, (खण्डोऽस्यास्तीति। खण्ड+इनिः। स्त्रियां ङीप्। यद्वा, खण्डयति आत्मानं द्वीपपर्व्वतसमुद्रादिवच्छेदेनेति ग्रेषः। खडि+णिनिः।) पृथ्वी। इति ग्रब्दरत्नावली॥

खण्डी, [न्] पुं, (खण्डयति आत्मानं द्विदलरूपेण इति। खडि+णिनिः।) वनमुद्गः। इति हेमचन्द्रः॥

खण्डीरः, पुं, (खण्डी+सुखादित्वात् रः।) पीतसुद्गः। इति हेमचन्द्रः॥

खतमालः, पुं, (खे आकाशे अन्तरीक्षे तमाल इव। तत्वर्णसादृश्यात्तथात्वम्।) धूमः। मेघः। इति मेदिनी॥

खद, स्तैर्य्ये। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-वधे तु सकं-सेट्।) खदति। इति दुर्गादासः॥

खदिका, स्त्री, (खे भर्ज्जनपात्रादूर्द्धाकाशे दीयते खण्ड्यते इति। ख+दो अवखण्डने+घञर्थे क। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) लाजाः। इति त्रिकाण्डशेषः॥ खइ इति भाषा॥

खदिरः, पुं, (खद स्थैर्य्यहिंसयोः+"अजिरशिशिरशिथिलेति।" उणां। १। ५४। इति किरच्।) वृक्षविशेषः। खयेरगाछ इति भाषा। तत्पर्य्यायः। गायत्री २ बालतनयः ३ दन्तधावनः ४। इत्यमरः। २। ४। ४६॥ तिक्तसारः ५ कण्टकीद्रुमः ६। इति रत्नमाला॥ बालपत्रः ७ खदपत्नी ८ क्षितिच्छदः ९ सुशल्यः १० वक्रकण्टः ११ यज्ञाङ्गः १२ जिह्मशल्यः १३ कण्टी १४ सारद्रुमः १५ कुण्ठारिः १६ बहुसारः १७ मेध्यः १८ बालपुत्रः १९ रक्तसारः २० कर्कटी २१ जिह्मशल्यः २२। इति जटाधरः॥ कुष्ठघ्नः २३ बालपत्रकम् २४ यूपद्रुमः २५। इति ग्रब्दरत्नावली॥ अपि च भावप्रकाशे।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च पाण्डिकः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान्।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"

अस्य गुणाः। तिक्तरसत्वम्। शीतत्वम्। पित्तकफकुष्ठकासरक्तशोफकण्डूव्रणनाशित्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ विसर्पवेदनामेहमेदोनाशित्वम्। इति राजवल्लभः॥*॥ (अथ श्वेतखदिरः। पपरी खयेर इति भाषा॥

"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः।
कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे च॥ खदति हन्ति ग्रत्रून् इति। खद+किरच्।) इन्द्रः। इति त्रिकाण्डशेषः॥ (खे आकाशे दीर्य्यते यस्माच्चन्द्रलोकादिष्टापूर्त्तादिकर्म्मभिः। दृ+बाहुलकात् अपादाने किरच्च। इष्टापूर्त्तादिकर्म्मिणां हि आरब्धाभ्यर्दहविदारेण चन्द्रमण्डलात् आकाशे पतनात् तथात्वम्।) चन्द्रः। इति मेदिनी॥ (तथा च साङ्ख्यदर्शनभाष्ये।

"येन कर्म्मविशेषेण चन्द्रमसमारूढाः फलोपभोगाय तस्मिन् उपभोगेन क्षपिते तेषां यदम्मयं ग्रारीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनाद्योकाग्निसम्पर्कात् प्रलीयते सविद्युत्सम्पर्कात् हिमकरका इव हुतभुगर्च्चिःसम्पर्कादिव च घृतकाठिन्यम्। ततः कृतात्यये कृतस्य इष्टादेः कर्म्मणः फलोपभोगेनोपचये सति सानुग्रया एवेममवरोहन्ति॥")

खदिरपञ्चिका, स्त्री, (खदिरस्य पञ्चमिव पत्रमस्याः। कप् कापि अत इत्वम्।) अरिखदिरः। लज्जालुलता। इति राजनिर्घण्टः॥

खदिरपत्री, स्त्री, (खदिरस्य पत्रमिव पत्रमस्याः।) लज्जालुलता। इति वैद्यकम्॥

खदिरा, स्त्री, (खदिरस्तत्पचाकारोऽस्त्यस्याः। अच् टाप् च।) लज्जालुलता। इति राजनिर्घण्टः॥

खदिरिका, स्त्री, (खदिरेण खदिररसेन समो रसोऽस्यस्याः। अस्त्यर्थे+ठन् ततः टाप्।) लाजाः। इति राजनिर्घण्टः॥

खदिरी, स्त्री, (खद्+किरच्। गौरादित्वात् ङीष्।) खदिरीग्राकम्। लाजालु इति ख्याता। इति केचित्। किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायां सङ्कोचपत्री लज्जालुरिति लज्जालुकायां पठितम्। इति भरतः॥ तत्पर्य्यायः। नमस्कारी २ गण्डकाली ३ समङ्गा ४। इत्यमरः। २। ४। १४१॥ (क्वचित् खदिरेति पाठो दृश्यते॥) गण्डकारी ५। इति भरतः॥ ग्रमी पत्री ६ रक्तपत्री ७ अञ्जलिकारिका ८ राखा ९। इति जटाधरः॥

("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित्।"
इति वैद्यरत्नमालायाम्॥)

खदिरोपमं, क्ली, (खदिरेण उपमीयते इति। खदिर उपमा अस्य वा।) कदरः। इति रत्नमाला। काँटा वावला इति भाषा॥

खदूरवासिनी, स्त्री, (खे शून्ये दूरे च वसतीति। वस्+णिनिः। ततो ङीप्।) वृद्धग्रक्तिविशेषः। इति त्रिकाण्डशेषः॥

खद्योतः, पुं, (खं आकाशं द्योतयतीति। द्युत् दीप्तौ+णिच्+"कर्म्मण्यण्।" ३। २। १। इति अण्।) सूर्य्यः। इति जटाधरः॥ (यथा, भागवते। ४। २६। १०।

"खद्योताविर्म्मुखौ चाच नेत्रे एकत्र निर्म्मिते।
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः॥"

नेत्रस्य हि सूर्य्याधिष्ठातया रूपादिदर्शनग्रक्तिरिति प्रसिद्धेस्तथात्वम्॥ खे आकाशे द्योतते इति। द्युत्+अच्।) कीटविशेषः। जोनाक पोका इति भाषा। तत्पर्य्यायः। ज्योतिरिङ्गणः २। इत्यमरः। २। ५। २८॥ खद्योतिः ३ प्रभाकीटः ४ उपसूर्य्यकः ५। इति राजनिर्घण्टः॥ ध्वान्तोन्मेषः ६ तमोमणिः ७ दृष्टिवन्धुः ८ तमोज्योतिः ९ ज्योतिरिङ्गः १० निमेषकः ११। इति ग्रब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ६। १६। ४६।

"विदितमनन्तसमस्तं
तव जगदात्मनो जनैरिहाचरितम्।
विज्ञाप्यं परमगुरोः
कियदिव सवितुरिव खद्योतैः॥")

खद्योतनः, पुं, (द्योतयतीति। द्युत्+णिच्+कर्म्मरि ल्युः। ततः खस्य आकाशस्य द्योतनः प्रकाशकः।) सूर्य्यः। इति जटाधरः॥

खधूपः, पुं, (खं आकाशं धूपयति। खे धूपः व्यवच्छिन्नखवद्भिरिव वा। धूप्+"कर्म्मण्यण्।" ३। २। १। इति अण्।) अग्निक्रीड़ाविशेषः। हाउइ इति भाषा। यथा, भट्टौ। ३। ५।

"उद्धाम्यच्चक्रनगरस्य मार्गान्
ध्वजान् वनस्पुंसुचुः खधूपान्॥"

खन, उ म विदारे। इति कविकल्पद्रुमः॥ (भ्वां-उभं सकं-सेट्।) उ, खनित्वा खात्वा। म

लांछितो जाह्नवीतीरे कूपं खनति दुर्म्मतिः। खनते। इति दुर्गादासः॥

खनकः, पुं, (खन्+"ग्रिल्यिनि ष्वुन्।" ३।१।१४५। इति ष्वुन् स च णित्।) उन्दुरुः। सन्धितस्करः। सिंदेल चोर इति भाषा। भूमिवित्तज्ञः। स्वर्णाद्युत्पत्तिस्थानज्ञः। इति हेमचन्द्रः॥ (स्वनामप्रसिद्धो विदूरस्थ बन्धुविशेषः। यथा, महाभारते अनुशासने। १। १४८। १।

"विदूरस्य सुतं कञ्चित् खनकः कुशलो नरः॥")

खनकः, त्रि, (खन्+ण्वुल्।) अवदारकः। खननकर्त्ता। इति मेदिनी॥ (यथा, गोः रामायणे। १। १२। ६।

"स्थापत्यं चेह स्थाप्यन्तां दृढाः परमधार्म्मिकाः। कर्म्मान्तिका लिपिकरा वर्द्धकाः खनका अपि॥")

खननं, क्लीं, (खन्+भावे ल्युट्।) विदारणम्। खोँड़न खोदन इति च भाषा। यथाह कश्चित्।

"पश्य त्वं खननं नखेन तदभूदालोक्य भूकः शुठः॥"

खनयित्नी, स्त्री, (खन्+णिच् न वृद्धिर्निपातनात्। ततस्तृच् ङीप् च।) अस्त्रभेदः। खन्नीति भाषा। यथा, नारदपञ्चरात्रे पाद्मसंहितायाम्।

"खनयित्नी शुभा यात्रा जयार्थं जयकाङ्क्षिणाम्।
पञ्चवर्णोच्छ्रयोपेता चालनीया पुरः सताम्॥"

खनिः, स्त्री, (खन विदारे+"खनिकष्यञ्जीति।" उणा।४।१२६। इति इन्।) रत्नाद्युत्पत्तिस्थानम्। खानि इति भाषा॥ (यथा, रघुः। १८।२२।

"उत्खातप्रचुरं वसुधोपस्थे
रत्नोपहारैरुदितैः खनिभ्यः॥")

तत्पर्य्यायः। आकरः २। इत्यमरः। २। ३। ७॥ खानी ३ खनी ४ खानिः ५। इति शब्दरत्नावली॥ गङ्गा ६। इति हेमचन्द्रः॥

खनित्रं, क्लीं, (खन्+"अर्त्तिलूधूसूखनेति।" ।३।२।१८४। इत्र।) अस्त्रविशेषः। खन्ता इति भाषा। तत्पर्य्यायः। अवदारणम्। इत्यमरः। २।८।१२॥ ("तथाहि भागवते। ७।२। १५।

"केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान्॥")

खनी, स्त्री, (खनि+वा ङीष्।) रत्नाद्युत्पत्तिस्थानम्। इति शब्दरत्नावली॥

खपुरं, क्लीं, (खं आकाशं पिपर्त्ति। पॄ+कः।) घटः। इति हेमचन्द्रः॥ (खे आकाशे चरं पुरम्।) ऊर्द्धगं पुरम्। (स तु दैत्यपुरविशेषः। तत्पतत्तिकथा यथा, महाभारते। ३। १७३। निवातकवचवधे। ७-११।

"पुलोमा नाम दैतेयी कालका च महासुरी।
दिव्यवर्षसहस्रं ते चेरतुः परमं तपः॥
तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम्॥
अयाचीतां वरं ते तु सुतानामपदुःखिताम्।
अवध्यताञ्च राजेन्द्र! सुरराक्षसपन्नगैः॥
पुरं सुरमणीयञ्च खेचरञ्च महाप्रभम्।
सर्व्वरत्नैः समुदितं दुर्द्धर्षममरैरपि॥
महर्षियक्षगन्धर्व्वपन्नगासुरराक्षसैः।
सर्व्वकामगुणोपेतं वीतशोकमनामयम्॥
ब्रह्मणा भरतश्रेष्ठ! कालकेयकृते कृतम्।
तदेतत् खपुरं दिव्यं चरत्यमरवर्जितम्॥")

खे आकाशे उत्पितं पुरम्। शुभाशुभादिसूचनार्थं प्रकाशितं गन्धर्व्वनगरम्। अस्योत्पातादिदिग्भेदेनोदये फलभेदो यथा, बृहत्संहितायाम् ३६ अध्याये।

"उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम्।
सितरक्तपीतकृष्णं विप्रादीनामभावाय॥
नागरनृपतिनयावहसुदगविदिक्स्थं विवर्णनाशाय।
म्लानाशायां दृष्टं सतोरणं विजयाय॥
सर्व्वदिगुत्थं सततोत्पितञ्च भयदं नरेन्द्रराष्ट्राणाम्।
चौराटविकान् हन्याद्धूमानलशस्त्रकोपाभम्॥
गन्धर्व्वनगरमुत्पितमापाण्डुरमशनिनिपातदातकरम्।
दीप्ते नरेन्द्रभ्रातृवांमेऽरिभयं जयः सर्व्वे॥
अनेकवर्णाकृति खे प्रकाशते
पुरं पताकाध्वजतोरणान्वितम्।
यदा तदा नागमनुष्यवाजिनां
पिबत्यरक्तभूरि रणे वसुन्धरा॥")

हरिश्चन्द्रपुरम्। इति त्रिकाण्डशेषः॥

खपुरः, पुं, (खं पिपर्त्ति उच्छ्रयत्वेन। पॄ+कः।) गुवाकः। (अस्य पर्य्यायो यथा।

"खपुरो दृढकः पूगः।" इति वैद्यकरत्नमालायाम्॥ खेन आकाशागतेन हिमकरादिना पूर्य्यते इति। पॄ+कर्म्मणि घञर्थे कः।) भद्रमुस्तकम्। (खमिन्द्रियं पिपर्त्ति। पॄ+कः।) अलसके त्रि। इति मेदिनी॥ आलनखः। इति राजनिर्घण्टः॥

खभ्रान्तिः, पुं, (खे आकाशे अन्तरिक्षे भ्रान्तिर्भ्रमणं आभिधार्थं यस्य।) चिल्लः। इति शब्दरत्नावली॥ चिल् इति भाषा॥

खेमणिः, पुं, (खे आकाशे मणिरिव ज्योतिर्मयत्वात् प्रकाशकत्वाद्वा।) सूर्य्यः। इति त्रिकाण्डशेषः॥

खमीलनं, क्लीं, (खानां इन्द्रियाणां मीलनम्।) तन्द्रा। इति शब्दरत्नावली॥

खमूलिः, स्त्री, (खं शून्यभूतं मूलमस्याः पृषोदरात् साधुः। मूलराहित्यादस्यास्तथात्वम्।) कुम्भिका। इति शब्दरत्नावली॥ पाना इति भाषा॥

खमूलिका, स्त्री, (खमूलि+स्वार्थे कन् ततष्टाप्।) खमूली। कुम्भिका। इति शब्दरत्नावली॥

खम्ब, गतौ, इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ओष्ठवर्गशेषोपधः। खम्बति। इति दुर्गादासः॥

खरं, क्लीं, (खाय अन्तरिन्द्रियाय खस्य वा तीव्रतारूपगुणं राति ददातीति। ख+रा+कः।) तीव्रम्। तत्पर्य्यायः। तिग्मम् २ तीक्ष्णम् ३॥ इत्यमरः।१।३।३५॥ (यथा, भागवते।७।८।२८।

"हत्वाट्टहासं खरमुत्स्वनोल्बणं
निमीलिताक्षं जगृहे महाजवः॥"

तद्वति त्रि। यथा, रघुवंशे। ८। ६।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव॥")

खरः, पुं, (खं सुखकरं छिद्रमतिशयेनास्यास्तीति। रः।) गर्द्दभः। इत्यमरः।२।८। ९७ (यथा, मनुः। २। २०१।

"परीवादात् खरो भवति श्वा वै भवति निन्दकः॥"

अश्वतरः। यथा, तत्रैव।११। २०।

"उष्ट्रयानं समारुह्य खरयानन्तु कामतः॥")

धर्म्मः। इति मेदिनी॥ निर्धुरः। राक्षसविशेषः। स तु रावणभ्राता। इति हेमचन्द्रः॥ (यथा, रामायणे। १। ३। २०।

"वधं खरत्रिशिरसोरुत्यानं रावणस्य च॥")

दैत्यः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। २। ७। ३४।

"ये च प्रलम्बखरदर्दुरकेशरिष्टमल्लेभकंसयवनाः कुजपौरुषाद्याः॥")

कण्टकिवृक्षविशेषः। इत्यमरः॥ कङ्कः। काकः। कुररपक्षी। इति राजनिर्घण्टः॥ (वत्सरविशेषः। यथा, ज्योतिषतत्त्वे।

"उपद्रुतं जगत् सर्व्वं तस्करैर्म्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये!॥"

कठिनम्। रविपार्श्वगः। पश्चिमद्वारगृहम्। इति शब्दार्थचिन्तामणिः॥)

खरकाष्ठिका, स्त्री, (खरं उग्रं काष्ठं यस्याः। ततः कप् टाप् च। कापि अत इत्वम्।) बला। इति राजनिर्घण्टः॥

खरकुटी, स्त्री, (खरा क्षुरवत्तया तीव्रा कुटी।) नापितशालिका। नापितस्य गृहम्। इति त्रिकाण्डशेषः॥

खरकोणः, पुं, (खरवत् कोणयति शब्दायते। अत्र सङ्कोचार्थकुणधातोः शब्दार्थ इति बोध्यं धातूनामनेकार्थत्वात्। यद्वा कोणयति आत्मानं सङ्कोचयति वा। कुण+अच्। "कर्म्मण्यण्।" ३। २। १। इति अण् वा।) तित्तिरिपक्षी। इति हेमचन्द्रः॥

खरगन्धनिभा, स्त्री, (खरगन्धेन तीव्रगन्धेन नितरां अतिशयेन भातीति। नि+भा+कः।) नागबला। इति जटाधरः॥

खरगन्धा, स्त्री, (खरो गन्धो यस्याः।) नागबला। इति राजनिर्घण्टः॥

खरगृहं, क्लीं, (खरस्य गर्द्दभस्य गृहम्।) गर्द्दभशाला। गादार घर इति भाषा। तत्पर्य्यायः। खरगृहः २। इति त्रिकाण्डशेषः॥

खरगेहं, क्लीं, (खरस्य गेहम्।) खरगृहम्। इति शब्दरत्नावली॥

खरगृहः, पुं, (खरस्य गृहः गृहम्।) खरगृहम्। इति त्रिकाण्डशेषः। (खरो गृह्यते नियोज्यते ऽनेन। ग्रह+अप्। गर्द्दभगृहभेदः॥)

खरघातनः, पुं, (खरं उग्रं रोगविशेषं घातयतीति। हन्+स्वार्थे णिच्+कर्त्तरि ल्युः।) नागकेशरः। इति शब्दचन्द्रिका॥(खरं एतन्नाम्ना प्रसिद्धं राक्षसं घातयतीति। श्रीरामचन्द्रः। इति व्युत्पत्तिलभ्योऽर्थः॥)

खरच्छदः, पुं, (खरस्तीव्रश्छदः पत्रमस्य।) उलूकम्। उलुखड़ इति भाषा॥ इत्कटः। ओकड़ा इति भाषा। इति रत्नमाला॥ कुन्दरलक्षणम्। इति राजनिर्घण्टः॥

खरणसः, त्रि, (खरा तीक्ष्णा नासिका अस्य। "खुरखराभ्यां वा नस्।" इति वार्त्तिं पचे "अच् नासिकायाः।" ५।४।११८। इत्यच् नसादेशश्च। ततः "पूर्ब्बपदात् संज्ञायामगः।"८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। तत्पर्य्यायः। खरणाः २। इत्यमरः। २।६।४६॥

खरणाः, [स्] त्रि, (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" वार्त्तिं इति नसादेशः। "पूर्ब्बपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। इत्यमरः। २।६।४६॥

खरत्वक्, स्त्री, (खरा तीक्ष्णा त्वक् यस्याः।) अलम्बुषा। लज्जालुप्रभेदः। इति भावप्रकाशः॥

खरदण्डं, क्ली, (खरः कर्कशः दण्डो दृढालं यस्य काण्डकाण्डतयेति भावः।) पद्मम्। इति धरणी॥

खरदला, स्त्री, (खरं कर्कशं दलं पत्रमस्याः।) क्षेमाफला। इति शब्दचन्द्रिका॥ डुमुर इति भाषा॥

खरदूषणः, पुं, (खरं उग्रं दूषणं मादकतानजनकदोषो यत्र।) धुस्तूरः। इति शब्दचन्द्रिका॥ खरेण राक्षसेन सह दूषणश्च॥ (त्रि, बहुदोषः॥)

खरध्वंसी [न्], पुं, (खरं खनामविश्रुतं राक्षसं ध्वंसयतीति। ध्वंस्+णिच्+णिनिः।) श्रीरामः। इति शब्दरत्नावली॥ (खरं कंसचरं दैत्यं ध्वंसयतीति। कृष्णः। इति व्युत्पत्तिलभ्योऽर्थः॥)

खरनादिनी, स्त्री, (खरं कर्कशं नदतीति। नद्+णिनिः। ततः स्त्रियां ङीप्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

खरपत्रः, पुं, (खरं पत्रमस्य।) क्षुद्रपत्रतुलसी। शाकाख्यवृक्षः। इति रत्नमाला॥ यावनालशरः। हरिद्रभः। मरुवकः। इति राजनिर्घण्टः॥

खरपत्रकः, पुं, (खरपत्र+कप् संज्ञायां कन् वा।) तिलकवृक्षः। इति शब्दचन्द्रिका॥

खरपत्री, स्त्री, (खरपत्र+गौरादित्वात् ङीष्।) गोजिह्वावृक्षः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

खरपात्रं, क्ली, (खरं कठोरं कठिनं वा पात्रम्।) लौहपात्रम्। इति त्रिकाण्डशेषः॥

खरपादाढ्यः, पुं, (खरैः दृढैः पादैर्मूलैराढ्यः।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

खरपुष्पः, पुं, (खरं पुष्पमस्य।) मरुवकवृक्षः। इति रत्नमाला॥

खरपुष्पा, स्त्री, (खरं पुष्पं खराणि पुष्पाणि वा अस्याः।) वर्ब्बरा। इत्यमरः। २।४।१३६॥ वाबुइ तुलसी इति भाषा॥ (यथास्याः पर्य्यायाः। "वर्ब्बरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ व्यवहारोऽस्या यथा चरके विमानस्थानेऽष्टमेऽध्याये कटुकस्कन्धे। "एला-कुष्ठ-भल्लातकास्थि-हिङ्गु-किलिम-मूलक-सर्षप-लशुन-करञ्ज-शिग्रुक-मधुरशिग्रुक-खरपुष्पा" इत्यादिषु॥)

खरप्रियः, पुं, (खलः धान्यकलायादिशस्यमर्द्दनस्थानं प्रियोऽस्य। लस्य रत्वम्।) पारावतः। इति शब्दमाला॥

खरमञ्जरी, स्त्री, (खरा मञ्जरी यस्याः।) अपामार्गः। इत्यमरः। २।४।८६॥ (खर्ब्बिकाद्यतैलेऽस्या व्यवहारो यथा,—

"खर्ब्बिकासिन्धुदन्त्यर्कमिरूपिकामलनीलिका। खरमञ्जरीबीजेषु तैलं गोमूत्रपाचितम्। दुष्टव्रणप्रशमनं कफनाड़ीव्रणापहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारे॥)

खररोमा [न्], पुं, (खरं रोम अस्य।) नागभेदः। इति जटाधरः॥

खरवल्लिका, स्त्री, (खरा वल्लरी ततः स्वार्थे कन् टाप् च ईकारस्य इस्वत्वं रस्य लत्वञ्च।) नागबला। इति रत्नमाला॥ गोरचचाउलिया इति भाषा॥

खरशब्दः, पुं, (खर उग्रः शब्दोऽस्य।) कुररपक्षी। इति राजनिर्घण्टः॥

खरशाकः, पुं, (खरं शाकमस्य।) भार्गी। इति भावप्रकाशः॥ वामणहाटी इति भाषा॥

खरस्कन्धः, पुं, (खरः स्कन्धोऽस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥

खरस्कन्धा, स्त्री, (खरः स्कन्धोऽस्याः।) खर्ज्जूरी। इति राजनिर्घण्टः॥

खरस्वरा, स्त्री, (खरं रौद्रं स्वरणाति नाशयतीति। स्वृ+अच्।) वनमल्लिका। इति रत्नमाला॥

खरा, स्त्री, (खं आकाशं लाति गच्छतीति। ला+कः। लस्य रत्वम्।) देवताड़वृक्षः। इत्यमरः। २।४।६६॥

खरांशुः, पुं, (खरा अंशवो रश्मयो यस्य।) सूर्य्यः। इति त्रिकाण्डशेषः॥

खरागरी, स्त्री, (खरं आगिरतीति। आ+गॄ+अच्। ततो गौरादित्वात् ङीष्।) देवताड़वृक्षः। इत्यमरटीकायां रायमुकुटः॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।

"देवी जीमूतकक्षाखुविषाणिलोमशच्छदः। खरागरी कदम्बश्च खुड्डाको देवताड़कः॥")

खराब्दाङ्कुरकं, क्ली, (खराब्दात् तीव्रगर्ज्जनमेघात् व्यङ्कुरयतीति। अङ्कुर+खुल्। अस्य हि नूतनजलदध्वनेरङ्कुरोत्पत्तेश्चायातम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

खरार्श्वा, स्त्री, (खरैरश्यते भुज्यतेऽसौ। अशू भोजने+"उल्लादयश्च।" उणां। ४।६५। इति वः।) मयूरशिखा। रक्तजटा इति ख्याता। चेत्रयमानिका इति केचित्। इत्यमरभरतौ॥ (यथास्या गुणाः।

"खरार्श्वा कफवातघ्नी वस्तिरोगरुजापहा॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

खराङ्का, स्त्री, (खरं तीव्रगन्धं आक्रयतीति। कै+कः। स्त्रियां टाप्।) अजमोदा। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"अजगन्धाजमोदाख्या खराङ्का कारवी च सा॥"

इति वैद्यकरत्नमालायाम्॥)

खरिका, स्त्री, (खात् शून्यात् गन्धविशेषं राति ददातीति। रा+कः ततः संज्ञायां कन् टाप् अत इत्वञ्च।) कस्तूरीभेदः। सा तु चूर्णाकृतिः। इति राजनिर्घण्टः॥

खरः, पुं, (खन्+"खरशकुभ्रीयुनीलङ्कुलिगु।" उणां १।३७। इति कुः रश्चान्तादेशः।) शिवः। हयः। दर्पः। दम्भः। इति मेदिनी। रे। २१॥ कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शुक्लवर्णः। इति हेमचन्द्रः॥

खरः, त्रि, (खन्+"खरशकुभ्रीयुनीलङ्कुलिगु।" उणां १।३७। इति कुः रश्चान्तादेशः।) श्वेतः। इति मेदिनी। रे।२२॥ निर्विवेकशक्तिः। इति हेमचन्द्रः॥ निर्बोधः। क्रूरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ तीक्ष्णः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खर्ब्ब, यथाश्रुतोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) खर्ब्बति। खट् मार्ज्जनम्। इति दुर्गादासः॥

खर्ब्बिका, स्त्री, (खर्ब्ब+खुल्+स्त्रियां टाप् अत इत्वञ्च।) अवदंशः। इति शब्दचन्द्रिका॥

खर्ज्जुः, पुं, (खर्ज्ज+उन्।) खर्ज्जूरी। कण्डुः। कीटः। इति हेमचन्द्रः॥

खर्ज्जुरं, क्ली, (खर्ज्ज+उरच्।) रौप्यम्। इत्यमरटीकायां रमानाथः॥

खर्ज्जूः, स्त्री, (खर्ज्ज वधने+"ऋधिचमितमीति।" उणां १।८२। इति ऊः।) कण्डुः। कीटः। इत्युणादिकोषः॥

खर्ज्जूरः, पुं, (खर्ज्जूं कण्डूयनं हन्तीति। हन्+टक्।) चक्रमर्दः। धत्तूरः। अर्कवृक्षः। इति राजनिर्घण्टः॥

खर्ज्जूरं, क्ली, (खर्ज्जूरस्य फलम्। फले विहितस्याणो लुप्।) खर्ज्जूरफलम्। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। गुरुत्वम्। वायाभिघातदाहवातपित्तरोगे हितत्वम्। वृंहणत्वम्। शुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः॥ ("अपक्वखर्ज्जूरफलं त्रिदोषघ्नमनं मतम्। पक्वमेव हितं मेहे त्रिदोषघ्नमनं परम्॥" इति प्रथमे स्थाने दन्तनेऽध्याये हारीतेनोक्तम्॥ यथा च चरके सूत्रस्थाने चतुर्विंशेऽध्याये।

"मधुरं वृंहणं वृष्यं खर्ज्जूरं गुरु शीतलम्।

खर्परी

चयेऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥") रौप्यम्। हरितालम्। इति हेमचन्द्रः ॥ खलः। इति मेदिनी ॥

खर्जूरः, पुं स्त्री, (खर्ज्ज मार्ज्जने + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ।" उणा ४। ६०। इति ऊरः।) खर्जूरीवृक्षः। खेजुर गाछ इति भाषा ॥ अस्य मस्तिष्कगुणाः। स्वादुत्वम्। तिक्तत्वम्। कषायत्वम्। मूत्रातङ्करोगनाशित्वम्। बलप्राणशुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः ॥

("खर्जूरश्च विषं हन्ति तदा वै नात्र संशयः।" इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे॥) वृश्चिकः। इति मेदिनी ॥

खर्जूरिका, स्त्री, (खर्जूर + स्त्रियां गौरादित्वात् ङीष् ततः संज्ञायां कन् टाप् च ततो ह्रस्वः।) मिष्टान्नविशेषः। इति पाकराजेश्वरः। मिटा गजा इति भाषा ॥

खर्जूरी, स्त्री, (खर्जूर + गौरादित्वात् ङीष्।) वनखर्जूरः। इत्यमरः। २। ४। १७० ॥ खर्जूरवृक्षः। खेजरगाछ इति भाषा। तत्पर्य्यायः। खरस्कन्धा २ दुरारुहा ३ दुरारोहा ४ निःस्नेही ५ कषायी ६ यवनेष्टा ७ हरप्रिया ८। अस्या गुणाः। कषायत्वम्। पक्के गौल्यत्वम्। कषायिकत्वम्। पित्तरक्तनाशित्वम्। दंहणत्वम्। कफशुक्रवृद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः।

"भूमिखर्जूरिका स्वाही दुरारोहा स्वदुच्छदा। तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ * ॥ पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्। खर्जूरी गोस्तनाकारा पराह्वीपादिहागता ॥ जायन्ते पश्चिमे देशे सा क्षोहारेति कीर्त्यते। खर्जूरीत्रितयं प्रीतं मधुरं रसपाकयोः ॥ स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु। तर्पणं रक्तपित्तघ्नं पुष्टिविष्मशुक्रदम् ॥ कोष्ठमारुतकृद्वल्यं वात्यवातकफापहम्। ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥ मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत्। महतीभ्यां गुणैरल्पा क्षुद्रा खर्जूरिका स्मृता॥*॥ खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत्। वातघ्नं श्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥ * ॥ सुनेपाली तु वृदला बलिहीनफला च सा। सुनेपाली श्रमभ्रान्तिदाहमूर्च्छासपित्तहृत् ॥"

इति भावप्रकाशः ॥

खर्द्द, दशने। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) दशनं दन्तकरणकक्रिया। खर्द्दति मूलकं लोकः। केचित्तु दन्दशूके इति पठित्वा ददशूकः दन्दशूककर्त्तृकक्रियेत्याहुः। इति दुर्गादासः ॥

खर्परः, पुं, (कर्परः। पृषोदरात् खत्वम्।) तस्करः। धूर्त्तः। भिक्षापात्रम्। कपालम्। इति मेदिनी ॥ क्षेत्रम्। इति त्रिकाण्डशेषः ॥

खर्परी, स्त्री क्ली, (खर्परं उपधातुभेदकारकत्वेनास्त्यस्या इति अच् ततो गौरादित्वात् ङीष्।) कर्परीतुत्थम्। इत्यमरटीका ॥

खर्परीतुत्थं, क्ली, (खर्पर्य्येव तुत्थं खर्परीरूपं तदाख्यं तुत्थं वा।) तुत्थविशेषः। तत्पर्य्यायः। खर्परीरसकम् २ पत्युष्यम् ३ अम्लतोत्पन्नम् ४ तुत्थम् ५ खर्परिका ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। चक्षुर्हितत्वम्। रसायनत्वम्। त्वग्दोषशमनत्वम्। दीप्तत्वम्। बलपुष्टिप्रदत्वञ्च। इति राजनिर्घण्टः ॥

खर्ब्ब, गतौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) खर्ब्बति। इति दुर्गादासः ॥

खर्ब्ब, क्ली, (खर्ब्ब + अच्।) संख्याविशेषः। इति मेदिनी ॥ तत्तु दशानसंख्या। इति लीलावती ॥ दशवृन्दसंख्या। १०,०००,०००,००० । इति स्मृतिः ॥ (सहस्रमहापद्मसंख्या। इति गोः रामायणम्। यथा, तत्रैव। ६। ४। ५६-५६। "शतं शतसहस्राणां कोटिमाहुर्मनीषिणः। शतं कोटिसहस्राणां शङ्क इत्यभिधीयते ॥ शतं शङ्कसहस्राणां वृन्दमाहुर्मनीषिणः। शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् ॥ महावृन्दसहस्राणां शतं पद्मं परिश्रुतम्। शतं पद्मसहस्राणां महापद्मं विभाव्यते ॥ महापद्मसहस्राणां तथा खर्ब्बमिहोच्यते ॥")

खर्ब्बः, पुं, (खर्ब्ब + अच्।) कुबेरस्य निधिविशेषः। इति शब्दरत्नावली ॥ दशवृन्दसंख्या। इति स्मृतिः ॥ कुब्जकवृक्षः। इति राजनिर्घण्टः। (वामनः। इत्यमरः। २। ६। ४६ ॥ स्त्री। गायत्रीस्वरूपा भगवती। यथा, देवीभागवते। १२। ६। ३८।

"खड्गखेटकरा खर्ब्बा खेचरी खगवाहना ॥")

ख(र्ब्ब)र्ब्बः, त्रि, (खर्ब्ब + अच्।) क्षुद्रः। खाटो छोट इत्यादि भाषा। तत्पर्य्यायः। न्यङ् २ नीचः ३ वामनः ४ ह्रस्वः ५। इत्यमरः। ३। १। ७० ॥ निखर्ब्बः ६ खडतः ७ खर्ब्बशाखः ८। इति हेमचन्द्रः ॥ अनुष्णः ९ अनायतः १०। इति जटाधरः ॥

खर्ब्बशाखः, त्रि, (खर्ब्बा शाखा हस्तपदाद्यवयवाः यस्य।) वामनः। खर्ब्बः। इति हेमचन्द्रः ॥

खर्ब्मः, पुं, (खुर + बाहुलकात् मक् एषोदरात् उकारस्य लोपः।) पौरुषम्। कोषजांशुकम्। पट्टवस्त्रम्। इति मेदिनी ॥

खर्ब्ब, गर्ब्बे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) अन्तःस्थवकारान्तोऽयम् ॥ खर्ब्बति। इति दुर्गादासः ॥

खर्ब्वः, त्रि, (खर्ब्व + अच्।) ह्रस्वः। वर्ग्यबकारान्तखर्ब्बशब्दार्थोऽप्यत्र ॥

खर्ब्वटः, पुं क्ली, (खर्ब्व + अटन्) चतुःशतग्राममध्यस्थलम्। इति भूरिप्रयोगः ॥ पर्व्वतप्रान्तग्रामः। इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

खर्ब्वुरा, स्त्री, (खर्ब्व + उरच् टाप् च।) तरदीवृक्षः। इति राजनिर्घण्टः ॥

खर्ब्वुरा

खलमू

खर्ब्बूजं, क्ली, (खर्ब्बू + जन् + डः।) वहुसुजा। इति भावप्रकाशः ॥ खरवुजा इति भाषा ॥ (अस्य लक्षणं गुणाश्च यथा,—

"दशाङ्गुलन्तु खर्ब्बूजं कथ्यते तद्गुणा अथ। खर्ब्बूजं मूत्रलं वल्यं कोष्ठशुद्धिकरं गुरु ॥ स्निग्धं स्वादुतरं प्रीतं वृष्यमुत्तानिलापहम्। तेषु यच्चाम्लमधुरं सक्षारञ्च रसाङ्गवेत् ॥ रक्तपित्तकरन्तत्तु मूत्रक्षकृकरम्परम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खल, चलनार्थे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) चलनार्थश्चालचर्यौ। चालश्चेह खलनम्। खलति खलो धर्म्मात्। इति दुर्गादासः ॥

खलं, क्ली, (खल् + अच्।) भूः। स्थानम्। कल्कः। इति मेदिनी। खलाधानम्। इति हेमचन्द्रः ॥ धान्यमाड़िवार खामार इति भाषा ॥ (यथा, मनुः। ११। १७।

"खलात् क्षेत्रादगाराद्वा यतो वाऽप्युपलभ्यते॥")

खलः, पुं, (खल् + अच्) सूर्य्यः। इति भूरिप्रयोगः ॥ तमालवृक्षः। इति शब्दचन्द्रिका ॥ धत्तूरवृक्षः। इति राजनिर्घण्टः ॥ (प्रवाहिकारोगे भैषजादिविहितपथ्यविशेषः। यथा, चिकित्सास्थाने नवमेऽध्याये वाभटेनोक्तम्।

"कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः। दधः सरोऽम्लः सक्षौद्रः खलो हन्ति प्रवाहिकाम्॥")

खलः, त्रि, नीचः। अधमः। इति मेदिनी ॥ क्रूरः। (यथा, स्कन्दपुराणे काश्यां १ मे अङ्के।

"खलस्वभावं भवितव्यतां तथा चकार सर्व्वं किल शूद्रको नृपः॥")

तत्पर्य्यायः। दुर्जनः २ पिशुनः ३। इत्यमरः। ३। १। ४७ ॥ दुर्व्विधः ४ विश्वकटुः ५ वृश्चंसः ६ घातुकः ७ क्रूरः ८ पापः ९। इति जटाधरः ॥

खलतिः, पुं, (खलन्ति केशा अस्मात्। खल सञ्चलने + "खलतिः।" उणा ३। ११२। इति निपातनात् साधुः।) इन्द्रलुप्तरोगशुक्तः। टाकपड़ा माथा इति भाषा। तत्पर्य्यायः। खल्वाटः २ ऐन्द्रलुप्तिकः ३ शिपिविष्टः ४ वभ्रुरथः ५। इति हेमचन्द्रः ॥ खल्लोटः ६। इति त्रिकाण्डशेषः। खल्लिटः ७। इति शब्दरत्नावली ॥ ("रोमकूपाग्रगं पित्तं वातेन सह मूर्च्छितम् ॥ प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः। रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ॥ तदिन्द्रलुप्तं रूढ्याञ्च प्राहुश्चाचेति चापरे। खलतेरपि जन्मैवं सदनं तत्र तु क्रमात् ॥"

इति वाभटे उत्तरस्थाने चत्वारिंशेऽध्याये ॥)

खलपूः, त्रि, (खलं भूमिं पुणाति परिष्कृतं करोतीति। खल + पू + क्विप्।) माठनकारी। झाड़ुकष फरास इत्यादि भाषा। तत्पर्य्यायः। बहुकरः २। इत्यमरः। ३। १। १७ ॥

खलमूर्च्छिः, पुं, (खल इव अनिष्टकारकत्वात् उग्रा मूर्च्छिरस्य।) पारदः। इति शब्दचन्द्रिका ॥ पारा इति भाषा ॥

खलाधारा, स्त्री, (खल आधारो यस्याः।) तैलपायिका। इति जटाधरः॥ आरसुला इति भाषा॥

खलिः, पुं, (खल+इन्।) तैलकिट्टम्। इति राजनिर्घण्टः॥ (यथा, भारतरत्नाकरे। २।६८।
"स्थाल्यां वैदूर्यमय्यां पचति तिलखलिं चन्दनेरिन्धनौघैः॥")

खलिनः, पुं क्ली, (खे अश्वसुखच्छिद्रे लीनः एषोदरादित्वात् वा हस्वः।) इत्यमरटीकायां रायमुकुटः॥ (यथा, कादम्बर्याम्
"उभयतः खलिनकनककटकावलम्बाभ्यां पदे पदे लताकुचनप्रयत्नाभ्यां पुरुषाभ्यामवलम्ब्यमानम्।" अश्वमित्यर्थः॥)

खलिनी, स्त्री, (खलानां समूहः। "इनिठनौ।" ४।२।५१। इति इनिः। ततो ङीष्।) खलसमूहः। धानेर अनेक खामार इति भाषा॥ तत्पर्य्यायः। खला २। इत्यमरः। ३।२।४२॥ तालमूली। इति रत्नमाला॥

खलिग्नः, पुं, (खे जलादूर्द्धाकाशे लिग्नति ईषदुद्गच्छतीति। यद्वा, खे जलाभ्यन्तरे क्षिप्तादौ लिग्नति खल्वीभावेन तिष्ठतीति। लिग्+कः।) खनामख्यातमत्स्यः। खलिग्नामाछ् इति भाषा॥ तत्पर्य्यायः। कङ्कचोटः २ खलेशयः ३। इति शब्दरत्नावली॥ अस्य गुणाः। याहित्वम्। कषायत्वम्। वायुकोपनत्वम्। रूक्षत्वम्। लघुत्वम्। शूलहरत्वम्। किञ्चिदामविनाशित्वञ्च। इति राजवल्लभः॥ खलिग्नोऽपि पाठः॥

खलीकारः, पुं, (खल+ल+घञ्। अभूततद्भावे च्विः।) अपकारः। इति जटाधरः॥ (निर्भर्त्सनम्। इति चिन्तामणिः॥)

खलीनः, पुंक्ली, (खे अश्वसुखच्छिद्रे लीनः।) कविका। इत्यमरः। २।८।४६॥ कड़ियाली इति भाषा॥ (यथा, महाभारते। १।१६६।१५।
"घृतं रथानां वरहेममालिनां
चतुर्युजां हेमखलीनशालिनाम्॥")

खलु, व्य, (खल्+बाहुलकात् उन्।) निश्चयः। वाक्यालङ्कारः। (यथा, माघे। २।७०।
"सम्यक्त्वसाम्यं वक्तुमुक्तं सुयलपाणिना।
निह्नारितेऽर्थे लेखेन खलूक्ता खलु वाचिकम्॥"
"अत्राद्यात्खलुशब्दः प्रतिषेधार्थे द्वितीयः वाक्यालङ्कारे॥" इति तट्टीकायां मल्लिनाथः॥) जिज्ञासा। (यथा, गङ्गारत्ने। "स खल्वधीते वेदम्?") अनुनयः। इत्यमरः। ३।४।१८॥ (यथा, गङ्गारत्ने।
"न खलु न खलु सुग्धे! साहसं कार्य्यमेतत्॥")
निश्चितम्। (यथा, कुमारे। ४।२८।
"दयिताखनवस्थितं वृथा
न खलु प्रेम चलं सुहृज्जने॥")
पदवाक्यादिपूरणम्। (यथा, रामायणे। ३।४१।६।
"दध्नः खलु न वध्यन्ते सचिवास्तव रावण!।
ये त्वामत्यर्थमारूढं न नियच्छन्ति सर्व्वशः॥")
वीप्सा। इति शब्दरत्नावली॥ (यथा,—

ग्राकुन्तले १ मे अङ्के।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः॥")

खलुक्, [ञ्] पुं, (खं इन्द्रियं दर्शनेन्द्रियं लुञ्चयति हन्तीति। ख+लुञ्च+क्विप्।) अन्धकारः। इति चिकाण्डशेषः॥

खलूरेषः, पुं, (खलूरिष्यते वध्यतेऽसौ। खलु+रिष+कर्म्मणि घञ्।) मृगभेदः। इति शब्दचन्द्रिका॥

खलूरिका, स्त्री, (खलु+रिष्+निपातनात् साधुः।) ग्रस्त्राभ्यासभूमिः। इति हेमचन्द्रः॥

खलेधानी, स्त्री, (खले धीयन्ते वृषभा अस्मिन्। धा+अधिकरणे लुट् ततो ङीप्।) मेधिः। खलेपशुबन्धनदारु। इति जटाधरः॥

खलेवाली, स्त्री, (खले वाल्यन्ते वाल्यन्तेऽत्र वृषभा इति। वल्+अधिकरणे घञ् गौरादित्वात् ङीष्।) खले गोबन्धनदारु। इति हेमचन्द्रः॥ मेड़ काठ इति भाषा॥ (यथा, कात्यायनश्रौतसूत्रे। २२।३।४८।
"खलेवालीयूपो लाङ्गलेषा॥")

खलेशयः, पुं, (खे जलादूर्द्धाकाशे गमनकाले लिग्नति संश्रियतीति। लिग्+अच्।) खलिग्नमत्स्यः। इति हारावली॥

खलेशयः, पुं, (खलेशं जलादूर्द्ध्वमाकाशसंसर्गं यातीति। या+कः।) खलिग्नमत्स्यः। इति शब्दरत्नावली॥

खल्ला, स्त्री, (खलानां समूहः। यत्।) खलिनी। इत्यमरः। ३।३।४२॥ धानमाड़ार अनेक खामार इति भाषा॥

खल्लः, पुं, (खलतीति क्विप् खल् तं लातीति। ला आदाने+कः।) वस्त्रप्रभेदः। गर्म्मः। चर्म्म। चातकपक्षी। इति मेदिनी॥ इतिः। इति हेमचन्द्रः॥ मशक इति भाषा। औषधमर्द्दनपात्रम्। खल इति भाषा। इति वैद्यकम्॥ ("अजाशृङ्गतुषामिश्रं भूगर्भे हितयं क्षिपेत्। तस्योपरिस्थितं खल्लं तप्तखल्लमिति स्मृतम्॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

खल्लिका, स्त्री, (खल्ल+संज्ञायां कन् तलश्चाप्। कापि अत इत्वम्।) ऋजीषम्। पिष्टकादिभर्জ্জনपात्रम्। इति शब्दचन्द्रिका॥

खल्लिटः, त्रि, (खल्ल+इन्। खल्लि इव टलतीति। टल्+डः।) खलतिः। इति शब्दरत्नावली॥

खल्ली, स्त्री, (खल्ल+गौरादित्वात् ङीष्।) हस्तपादावमर्द्दनाख्यरोगः। इति मेदिनी॥ तस्य लक्षणं यथा, माधवकरः।
"खल्ली तु पादजङ्घोरुकरमूलावमोटनी॥"
तच्चिकित्सा यथा, भावप्रकाशे।
"कुष्ठसैन्धवयोः कल्कचुक्रतैलसमन्वितः।
सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणः॥"
अपि च भैषज्यरत्नावल्याम्।
"खल्लां स्निग्धान्नलवणैः स्वेदोष्णादोपनाहनम्॥"

खल्लीटः, त्रि, (खल्लीव टलतीति। टल्+बाहुलकात् डः।) खलतिः। इति चिकाण्डशेषः॥ (तच्चिकित्सा यथा, गारुड़े। १८०।१।
"सप्तरात्रात्प्रजायन्ते खल्लीटस्य कृमाः शुभाः।
दग्धहस्तिदन्तलेपात् सामाक्षीररसाञ्जनात्॥")

खव, ग भूतिपूर्व्वोरुत्पत्तौ। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः॥

खवल्ली, स्त्री, (खे आकाशे स्थिता वल्ली।) आकाशवल्ली। इति राजनिर्घण्टः॥ (यथास्याः पर्य्याया गुणाश्च। अथ आकाशवल्ली। अमरवेलि इति च भाषा।
"आकाशवल्ली तु बुधैः कथितामरवल्लरी।
खवल्ली ग्राहिणी तिक्ता पित्तश्लेष्मामयापहा।
तुवरास्निकरी हृद्या पित्तश्लेष्मामनाग्निनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

खवारि, क्ली, (खे आकाशे स्थितं वारि उदकम्। खादागतं वारि वा।) दिव्योदकम्। इति राजनिर्घण्टः॥

खवासः, पुं, (खे आकाशे शून्ये स्थितो वासः।) हिमम्। इति हारावली॥

खश्वः, पुं, देशविशेषः। इति चिकाण्डशेषः॥ (तद्देशवासिनि तद्देशनृपे च बहुषु अण्लुक्।) तथा हि मनुः। १०।४४।
"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥")

खशा, स्त्री, सुरानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ (कखयोस्तल्यार्थत्वात् खः प्रजापतिर्दक्षः आदौ तद्गर्भे कन्यात्मकबीजभावेन शेते इति। ख+शी+डः ततष्टाप्।) दक्षकन्या। सा च कश्यपपत्नी। यथा,—
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम्।
अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः॥
क्रुधः प्राधा धरा क्रोधा विनता सुरभिः खशा॥"
"धरा धृतव्रतावल्लीः लताजातीश्च सर्व्वशः।
खशा च यत्परर्क्षांसि मुनिरप्सरसस्तथा॥"
इति गारुड़े ६ अध्यायः॥

खशेटः, पुं, (खं शेटति इति। शिट् अनादरे अण्। अस्य गमनसमये खस्यानादरत्वेन गतियोग्यत्वाभावेऽपि तद्दत्तानादरेण गमनात्तथात्वम्।) खलिग्नमत्स्यः। इति चिकाण्डशेषः॥

खश्वासः, पुं, (खस्य आकाशस्य श्वास इव।) वायुः। इति चिकाण्डशेषः॥

खष, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) खषति। इति दुर्गादासः॥

खष्यं, क्ली, (खनु+"खष्यशिल्पवाष्येति।" उणा। ३।२८। इति षप्रत्ययात् निपातनात् सिद्धम्।) क्रोधः। बलात्कारः। इत्युणादिकोषः॥

खसः, पुं, (खं हस्तादीन्द्रियं स्यति निष्फलीकरोतीति। सो+कः।) पामा। खोस इति भाषा॥ तत्पर्य्यायः। पाम २ कच्छूः ३ विचर्च्चिका ४। इति हेमचन्द्रः॥ (पामन् शब्देऽस्य विवरणं द्रष्टव्यम्॥)

खाखसः

खसकन्दः, पुं, (खस इव कन्दोऽस्य।) क्षीरकचुकीवृक्षः। इति रत्नमाला॥ खसगन्धोऽपि क्वचित् पाठः॥

खसतिलः, पुं, (खसपूय इव तिलति स्निह्यतीति। तिल स्नेहे+कः।) अस्य शुक्लस्नेहनिःसरणात् तथात्वम्।) खखसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य यथा,—

"तिलभेदः खसतिलः कासघ्नोऽसहरः स्मृतः।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु॥
ग्राहि तिक्तं कषायञ्च वातलञ्च कफापहृत्।
धातूनां शोषणं रूक्षं मदहृद्वह्निवर्द्धनम्॥
सुदुर्मोहिकरं रुच्यं सेवनात् पुंस्त्वनाशनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

खसमः, पुं, (खेनाकाशेन समः।) वृक्षः। इति त्रिकाण्डशेषः॥

खसम्भवा, स्त्री, (खे सम्भवतीति। सम्+भू+अच्।) आकाशमांसी। इति राजनिर्घण्टः॥

खसर्षपः, पुं, (खे शून्ये सर्षपमस्य योगप्रभावात्।) वृद्धविशेषः। इति त्रिकाण्डशेषः॥

खसात्मजः, पुं, (खसायाः कक्षपपत्न्या आत्मजः।) राक्षसः। इति त्रिकाण्डशेषः॥

खस्रमः, पुं, विप्रचित्तिदैत्यपुत्रः। यथा,—

"सिंहिकायां समुत्पन्ना विप्रचित्तिसुतास्तथा।
व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः॥
वातापिर्नमुचिश्चैव इल्वलः खस्रमस्तथा।
व्यन्तको नरकश्चैव कालनाभस्तथैव च॥
निवातकवचा दैत्याः प्रह्लादस्य कुलेऽभवन्॥"

इति गारुड़े ६ अध्यायः॥

खस्रमः, पुं, (खस+पृषोदरात् ह्रस्वम्।) वृक्षविशेषः। पोस्ता इति भाषा॥ तत्पर्य्यायः। क्षुद्रबीजः २ क्षुद्रतण्डुलः ३ सुबीजः ४। अस्य गुणः। पाके मधुरत्वम्। कान्तिवीर्य्यबलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (खसतिलशब्दे-ऽस्य गुणादयो ज्ञातव्याः॥)

खस्रसरसः, पुं, (खस्रसस्य क्षुद्रबीजवृक्षविशेषस्य रसः।) अहिफेनः। इति राजनिर्घण्टः॥ आफिं इति भाषा॥

खस्रनी, स्त्री, (खं आकाशं स्रवद्यस्याः मेघवारिपतनेन शस्याद्युत्पत्तेः पुत्रस्थानीयानां पृथिवीस्थजीवानां जीवनधारणात् तथात्वम्।) पृथिवी। इति त्रिकाण्डशेषः॥

खस्फाटिकः, पुं, (खवत् निर्म्मलः स्फाटिकः। यद्वा खस्फाटिकः सूर्य्यः स अधिष्ठाताऽस्य।) सूर्य्यकान्तमणिः। चन्द्रकान्तमणिः। इति हेमचन्द्रः॥

खाखसः, पुं, (खस प्रकारे द्वित्वं ततः पृषोदरात् साधुः।) बीजविशेषः। पोस्तादाना इति भाषा। तत्पर्य्यायगुणाः।

"तिलभेदः खसतिलः खाखसश्चापि स स्मृतः।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु॥
ग्राहि तिक्तं कषायञ्च वातलञ्च कफापहृत्।
धातूनां शोषकं रूक्षं मदहृद्वह्निवर्द्धनम्॥
सुदुर्मोहिकरं रुच्यं सेवनात् पुंस्त्वनाशनम्॥

खाण्डवं

अथ अफेनम्।

उक्तं खसफलक्षीरमाफुकमहिफेनकम्।
आफुकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम्॥
तथा खसफलोद्भूतं वल्कलप्रायमित्यपि।

अथ खसबीजम्।

उच्यन्ते खसबीजानि ते खाखसतिला अपि॥
खसबीजानि बल्यानि तृष्णाघ्नि सुगुरूणि च।
जनयन्ति कफं तानि श्रमयन्ति समीरणम्॥"

इति भावप्रकाशः॥

खाञ्चिकः, पुं, (खे ऊर्द्धदेशे याजः क्षेपः तत्र साधुः ठन्।) लाजाः। इति हारावली॥ खै इति भाषा॥

खाटः, पुं, स्त्री, (खे ऊर्द्धमार्गे अटत्यनेन। अट्+करणे घञ्।) शयनरथः। इति शब्दरत्नावली॥ मरार खाट् इति भाषा॥

खाटिः, स्त्री, (खट् काङ्क्षायां बाहुलकात् इन्।) असङ्गतिः। किण्वः। शयनरथः। इति मेदिनी॥

खाटिका, स्त्री, (खाटि+स्वार्थे संज्ञायां वा कन् ततष्टाप्।) खाटः। शयनरथः। इति शब्दरत्नावली॥

खाण्डवं, क्ली, (खाण्डवाख्यदाख्यया प्रसिद्धाया नगर्य्या जातम्। खाण्डवी+अण्। यदुक्तं कालिकापुराणे ६० अध्याये।

"पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम्।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम्॥")

वनविशेषः। तद्विवरणं यथा,—

"विरूपस्याभवद्राधिर्गार्ग्यधर्म्मित्रोऽभवत् सुतः।
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत्।
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा।
शक्रस्यानुमते चक्रे खाण्डवं व्रतयोजनम्॥
यत् सव्यसाची स्वदहत् पाण्डुपुत्रः प्रतापवान्।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः॥

ऋषय ऊचुः।

कथं स खाण्डवं चक्रे विजयः व्रतयोजनम्।
तद्वयं श्रोतुमिच्छामः कथयस्व तपोधन!॥

मार्कण्डेय उवाच।

सोमवंशेऽभवद्राजा महात्मा स महाबलः॥
धीरः सुदर्शनो नाम शास्त्ररूपः प्रतापवान्।
स वै हिमवतो नातिदूरे भङ्क्त्वा महावनम्॥
सिंहान् व्याघ्रान् समुत्सार्य्य क्वचिच्चापि तपोधनान्।
खाण्डवीं नाम नगरीमकरोत्तत्र शोभनाम्॥
त्रिंशद्योजनविस्तीर्णामायतां व्रतयोजनम्।
उच्चप्राकारसंयुक्तां साट्टालामुदतोरणाम्॥
निम्नाभिरतिदीर्घाभिः परिखाभिः समावृताम्।
दीर्घिकाभिश्चोपवनैर्बहुभिश्चाम्बुरोगणैः॥
आकीर्णाञ्च तथावासैरुत्तमैरपि मानवैः।
सोत्सवाः सततं यत्र जना देवान् दिवि स्थितान्॥
सार्च्चन्ते सा सदा युक्ता आढ्या भोगसमन्विता।
स वै सुदर्शनो राजा श्रुत्वा भूमिं विदार्य्य च॥
गङ्गां कनखलां देवीं वाहयामास खाण्डवीम्।

खाण्डवं

आम्नाय खाण्डवीमध्यं तेन खातेन वर्त्मभिः॥
वक्रासु वक्रगा भूत्वा याति सीतां नदीं प्रति।
स जित्वा सकलान् भूपान् वित्तान्याच्छद्य भूरिशः॥
राशीचकार खाण्डव्या मध्ये रत्नैरनेकशः।
अन्येषां नगरेभ्यस्तु जनानानीय भूपतिः॥
खाण्डव्यां वासयामास हठादपि सुदर्शनः।
देवदानवगन्धर्व्वान् जित्वा जित्वा पृथा कृती॥
देवदत्तं देवरत्नं देवीञ्चापि तथौषधीम्।
खाण्डव्यां रोपयामास सङ्ग्रामाद्यः सुदर्शनः॥
असहिष्णुस्ततोजिष्णुर्भूपतिन्तं सुदर्शनम्।
कृतापचारं बहुधा देवानाञ्च तथा नृणाम्॥
वाराणसीपतिं वीरं विजयं जयशालिनम्।
सन्धाय कृत्वा साचिव्यं तत्रैवासौ न्ययोजयत्॥
विजयो विवरं प्राप्य महाबलपराक्रमः।
सुदर्शनस्य नृपतेरवस्कन्दमथाकरोत्॥
नासहत् सोऽप्यवस्कन्दं विजयस्य सुदर्शनः।
चतुरङ्गबलेनाशु युद्धायाभिमुखोऽभवत्॥
विजयो रथमारुह्य नियुज्य चतुरङ्गिणीम्।
सेनां सुदर्शनं योद्धुं सम्मुखोऽभवदक्षसा॥
तदा महद्युद्धमासीद्विजयेन महात्मना।
सुदर्शनस्य नृपतेर्व्वृत्रवासवयोरिव॥
ततः सुदर्शनो राजा दारितो गदयाऽपतत्।
तस्मिन्निपतिते वीरे सेनाभिस्तस्य सैनिकाः॥
भयात् संप्राद्रवन्नसादिग्नः प्रदिग्न एव च।
नष्टेषु तस्य सैन्येषु विजयः खाण्डवीं पुरीम्॥
प्रविश्य ददृशे तत्र राशीभूतान् गिरीनिव।
सुवर्णानाञ्च रत्नानां सञ्चयान् बहुशः पुरः॥
दृष्ट्वा सरांसि तत्राथ प्रफुल्लकमलानि तु।
हंसकारण्डवादनादादितानि समन्ततः॥
राशीन् सुवर्णरत्नानां पर्व्वतानिव विस्तृतान्।
पुष्पितान् देवदत्तांश्च भ्रमद्भ्रमरभूषितान्॥
प्रासादान् विपुलान् शुभ्रान् कैलाससदृशान् गजान्।
विस्फुटांश्च सुगन्धाढ्यान् प्रतिगेहे व्यवस्थितान्॥
उत्फुल्लनयनो राजा विजयः परवीरहा।
मेने ऽमरावतीं तान्तु पुरीं क्षितिगतामिव॥
तं वीक्ष्यन्तं नरपतिं नगरीं तां सुरेश्वरः।
समेत्य विजयं प्राह सान्त्वयन् श्लक्ष्णया गिरा॥

इन्द्र उवाच।

राजन्महद्वनमिदमासीद्देवगणाश्रितम्।
नरगन्धर्व्वयक्षाणां मुनीनाञ्च मनोहरम्॥
सर्व्वानुत्सार्य्य देवादीन्मम चाप्रिये रतः।
भङ्क्त्वा वनमिदं गुह्यं समुत्साद्य तपोधनम्॥
खाण्डवीं नगरीं चक्रे हठाद्राजा सुदर्शनः।
तदिदं पुनरेव त्वं वनं कुरु नृपोत्तम!॥
तत्राहं विहरिष्यामि तवकेन समं रहः।
मुनीनाञ्च तपः स्थानं मङ्गलं ते प्रसादतः॥
भविष्यति च यक्षाणां किन्नराणाञ्च पार्थिव!॥

मार्कण्डेय उवाच।

एतत् श्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा।
वनमेवाकरोत्तन्तु खाण्डवीं शक्रगौरवात्॥
गच्छन्तु भो यथास्थानं प्रजाः सर्व्वा यथेच्छया।

येषां वाञ्छास्ति लोकानां मद्राज्यगमने पुनः ॥
वाराणसीं ते गच्छन्तु मयैव प्रतिपालिताम् ।
ततस्तस्य वचः श्रुत्वा जनाः केचिन्निजं पदम् ॥
जग्मुर्वाराणसीं केचिद्विजयेनाभिपालिताम् ।
ततो धनानां तान्राशीन्नानाश्च पृथक् पृथक् ॥
अश्वानां कनकानाञ्च कूप्यानां विजयस्तदा ।
धीवरैर्व्वाहयामास पुरीं वाराणसीं प्रति ॥
गन्धर्व्वाणाञ्च देवानां यदानीतं हठात् पुरा ।
रत्नदार्व्वादिकं यत्तु विजयं तत् प्रसाद्य च ॥
तैस्तैर्नीतन्तु खाण्डव्याः स्वस्थानं प्रति हर्षितैः ।
त्रिंशद्योजनविस्तीर्णां शतयोजनमायताम् ।
तां पुरीं विजयश्चक्रे न चिरादेव वै वनम् ।
तस्मिन् शक्रस्य सम्मत्या तक्षकः सहितो गणैः ॥
उवास सुचिरं तत्र ततोऽभून्निर्ज्जनं वनम् ।
तत्र देवाः सगन्धर्व्वाः क्रीड़न्तोऽप्सरसां गणाः ॥
आशंसयंश्च विजयं रणेषु विजयावहम् ॥"*॥
"अष्टाविंशतिमे प्राप्ते युगे द्वापरसंज्ञिते ॥
वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत ।
दातुमङ्गीकृते भिक्षां तदा पाण्डुसुतेन वै ॥
वह्निः स्वरूपमास्थाय जिष्णुं वचनमब्रवीत् ।
अहमग्निः पाण्डुपुत्र ! यज्ञभागातिभोजनात् ॥
बाधितोऽहं ततो बाधिं मम त्वं नाशयाधुना ।
खाण्डवं नाम विपिनं सपक्षिन्नगराक्षसम् ॥
यदि त्वं मां भोजयितुं शक्तोषि श्वेतवाहन ! ।
तदा ममाल्पसौ बाधिरपयास्यति नोचिरात् ॥
पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम् ॥
तदर्थं देवविहितं वनं तच्छ्वेतवाहन ! ।
विरोधात्तत् शक्रस्य न स्वयं भोक्तुमुत्सहे ॥
तस्मां चाहि महाभाग ! वने तस्मिन्नियोजय ।
यथाऽहं सकलं भोक्तुं प्राप्नोमि त्वत्प्रसादतः ॥
तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः ।
दाहयामास विपिनं तत् सर्व्वं प्राणिसंयुतम् ।
देवकीतनयेनासौ वासुदेवेन पालितः ।
खाण्डवं दाहयामास ज्वलनस्य हिते रतः ॥"
"सुप्रीतः प्रददौ तस्मादर्ज्जुनाय महात्मने ।
वह्निर्धनुश्च गाण्डीवं वारणं देवनिर्म्मितम् ॥
अक्षयाविषुधी द्वौ च रूप्याभांश्चतुरो हयान् ।
हनूमताधिष्ठितन्तु महान्तं वानरध्वजम् ॥
खड्गश्च त्रिशिखं तीक्ष्णं दहनः सव्यसाचिने ।
नीरोगश्चाभवद्वह्निस्तदा जिष्णुप्रसादतः ॥
तैर्व्वाणैस्तेन धनुषा तेन खड्गेन केतुना ।
तदश्वस्यन्दनेनापि विजिग्ये फाल्गुनो रणे ॥
एवं भैरववर्गेषु संजातो विजयो नृपः ।
खाण्डवं नाम विपिनं चकार समहाक्रतौ ॥"
इति श्रीकालिकापुराणे ८० अध्यायः ॥

(खण्डस्य इक्षुखण्डादेर्विकार इत्यण् । गुड़ादि-विकारमिश्रान्नद्वयम् । यथा, महाभारते । १३। ५३ । १८। [वान् ॥")

"रसानापूपकांश्चित्रान् मोदकानथ खाण्ड-

खाण्डवी, स्त्री, (हिमवतः सन्निहितं दक्षहनं खण्डयित्वा चन्द्रवंशीयेन राज्ञा सुदर्शनेन निर्म्मिता या पुरी सा ।) चन्द्रवंशीयसुदर्शनराजकृतहिमवत्पर्व्वतनिकटस्थपुरीविशेषः । तद्विरणं खाण्डवशब्दे द्रष्टव्यम् ॥

खाण्डिकः, पुं, (खण्डं मोदकादिकं शिल्पमस्य । इति ठक् ।) खण्डपालः । मोदकः । इति हारावली ॥ मयरा इति भाषा ॥ (स्त्रीत्वे तु खण्डिकानां समूहः "खण्डिकादिभ्यश्च" । ४ । २ । ४५ । इत्यण् । खण्डिकसमूहः ॥)

खातं, क्ली, (खन्यते इति । खन् + कर्म्मणि क्तः ।) पुष्करिणी । इत्यमरः । १ । १० । २७ ॥ तस्य परिमाणं यथा,—शतेन धनुर्भिः पुष्करिणी त्रिभिः शतैर्दीर्घिकाचतुर्भिर्द्रोणः पञ्चभिः खड़ागः द्रोणदशगुणा वापीति ॥

"चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरञ्चैव तावत् पुष्करिणी शुभा ।
एतत्पञ्चगुणः प्रोक्तखड़ाग इति निर्णयः ॥"
इति नयवर्द्धमानधृतो वशिष्ठः ॥

खातकं, क्ली, (खात + संज्ञायां कन् ।) परिखा । इति हेमचन्द्रः ॥ खाना पगार इत्यादि भाषा ॥

खातकः, पुं, अधमर्णः । धारी । ऋणी । यथा,—
"उत्तमर्णो धनस्वामी अधमर्णस्तु खातकः ॥"
इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥

(परसैन्यविदारकः । यथा, महाभारते । १२ । ११८ । ११ ।
"खातकं व्यूहतत्त्वज्ञं बलहर्षणकोविदम् ॥"
"खातकः परसैन्यविदारकः ।" इति तट्टीकायां नीलकण्ठः ॥)

खातभूः, स्त्री, (खातयुक्ता भूर्भूमिः ।) प्रतिकूपः । परिखा । इति हारावली ॥

खातव्यवहारः, पुं, (खातस्य पुष्करिण्यादेर्व्यवहारः परिमाणम् ।) पुष्करिण्यादिपरिमाणम् । पुकुरे कालीति भाषा ॥

"अथ खातव्यवहारे करणसूत्रं सार्द्धार्य्या ।
गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या ।
स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ॥

उदाहरणम् ।

भुजवक्त्रतया दैर्घ्यं दशैकार्कैरमितम् ।
त्रिषु स्थानेषु षट्पञ्चसप्तहस्ता च विस्तृतिः ॥
यस्य खातस्य वेधोऽपि द्विचतुष्करः सखे ! ।
तत्र खाते कियन्तः सुघनहस्ताः प्रचक्ष्व मे ॥"

१२



१२

यत्र सममितिकरणेन विस्तारे हस्ताः । ६ । दैर्घ्ये । ११ । वेधे । ३ । तत्क्षेत्रदर्शनं यथा,—

११



११

यथोक्तकरणेन लब्धा घनहस्तसंख्या ॥ १९८ ॥

खातान्तरे करणसूत्रं सार्द्धवृत्तम् ।

सुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड़्भिः ।
क्षेत्रफलं समभेतत् वेधहतं फलं घनफलं स्यात् ।
समखातफलज्ञेयं सूचीखाते फलं भवति ॥

उदाहरणम् ।

सुखे दशद्वादशहस्ततुल्यं
विस्तारदैर्घ्यन्तु तले तदर्द्धम् ।
यस्याः सखे सप्तकरश्च वेधः
का खातसंख्या वद तत्र वाप्याम् ॥

१२

१२

सुखजं क्षेत्रफलम् । १२० । तलजम् । ३० । तद्युतिजम् । २७० । एषामैक्यम् । ४२० । षड़्भिः । ६ । हृतं जातं समफलम् । ७० । वेध-७ हृतं जातं खातफलं घनहस्ताः । ४९० ।

द्वितीयोदाहरणम् ।

खातेऽथ तिग्मकरतुल्यचतुर्भुजे च
किं स्यात् फलं नवमितः किल यत्र वेधः ।
वृत्ते तथैव दशविस्तृतिपञ्चवेधे
सूचीफलं वद तयोश्च पृथक् पृथङ्मे ॥

१२



१२

भुजः । १२ । वेधः । ९ । जातं यथोक्तकरणेन खातफलं घनहस्ताः । १२९९ । सूचीफलम् । ४३२ ।

वृत्तखातदर्शनाय।



व्यासः। १०। वेधः। ५। अत्र सूक्ष्मपरिधिः $\frac{३१२०}{१२५}$। सूक्ष्मक्षेत्रफलम् $\frac{३१२०}{५०}$। वेधगुणं जातं सूक्ष्मखातफलम् $\frac{३१२०}{१०}$। सूक्ष्मसूची-फलम् $\frac{१३०६}{१०}$। यद्वा स्थूलखातफलम् $\frac{२७५०}{७}$। सूचीफलं स्थूलम् $\frac{२७५०}{२१}$।

इति लीलावत्यां खातव्यवहारः समाप्तः॥

खात्रं, क्ली, (खनु विदारे+"उषिखनिभ्यां कित्।" उणा। ४। १६१। इति ष्ट्रन् कित्च।) खातम्। खनित्रम्। इत्युणादिकोषः॥ दारुणम्। वनम्। क्षत्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥ (जलाधारविशेषश्च। इति उज्ज्वलदत्तः॥)

खाद, ऋ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। ऋदित्।) ऋ, अचखादत्। इति दुर्गादासः॥

खादकः, त्रि, (खाद् भक्षणे+ण्वुल्।) ऋण-ग्रहीता। खातक इति ख्यातः। इति मिताक्षरा॥ भक्षकः। यथा,—

"विक्रयेणोविनिमयेदत्त्वा गोमांसखादके।
व्रतं चान्द्रायणं कुर्य्याद्वधे साक्षाद्वधो भवेत्॥"

इति प्रायश्चित्ततत्त्वे गोभिलः॥

खादनं, क्ली, (खाद्+भावे ल्युट्।) भक्षणम्। आहारः। (खादति चर्व्वयत्यनेन इति।) दन्ते पुं। इति हेमचन्द्रः॥

खादितं, त्रि, (खाद+क्तः।) भक्षितम्। इत्यमरः। ३। १। ११०॥ खाओया इति भाषा॥ ("अग्निर्तं खादितं पीतं लीढं कोष्ठगतं तृणाम्। तच्छीर्य्यति यथाकालं शोषितं पित्ततेजसा॥" इति शारीरस्थाने चतुर्थेऽध्याये सुश्रुतेनोक्तम्॥)

दिरसारः, पुं, (खदिर+स्वार्थे अण् ततः षष्ठी-तत्पुरुषः।) खदिरवृक्षनिर्य्यासः। खएर इति भाषा॥ तत्पर्य्यायः। खादिरः २ अक्षतसारः ३ सत्सारः ४ रङ्गदः ५ रङ्गः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातव्रण-कण्डूामयनाशित्वम्। रुचिकारित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ खदिरसारोऽपि पाठः॥ (यथा,—

"विना खदिरसारेण हारेण हरिणीदृशाम्।
साधरे जायते रागो नानुरागः पयोधरे॥"

इति उद्भटः॥)

खादुकः, त्रि, (खादति हिनस्ति इति। खाद्+उन् संज्ञायां कन्।) हिंसालुकः। इति हारावली॥

खाद्यं, त्रि, (खाद्यते इति। खाद्+कर्म्मणि ण्यत्।) भक्षणीयद्रव्यम्। यथा,—

"कस्त्वं भद्रखलेश्वरोऽहमिह किं घोरे वने स्थीयते
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया।" इत्युद्भटः॥

खानपानं, क्ली, (धातूनामनेकार्थत्वात् खे भक्षणे+भावे ल्युट् खानम्। पा पाने+भावे ल्युट् पानम्। खानेन सह पानं यद्वा खानञ्च पानञ्च तयोः समाहारः।) कठिनद्रवद्रव्ययोर्गलाधः-करणम्। खाना पिना इति हिन्दी भाषा॥ यथा, गारुड़े नीतिसारे १०६ अध्यायः।

"सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः।
इतरे खानपानेन वाक्प्रदानेन पण्डिताः॥"

खानिः, स्त्री, (खन+इन्। पृषोदरात् दृद्धिः।) खनिः। इति हेमचन्द्रः॥

खानिकं, क्ली, (खानेन खननेन निर्वृत्तं इति ठञ्।) कुधच्छेद्यम्। इति त्रिकाण्डशेषः॥ देयालेर गर्त्त इति भाषा॥

खानिलः, त्रि, (खानं खननं शिल्पत्वेनास्त्यस्य। इति बाहुलकात् इलच्।) भित्तिचौरः। इति शब्दरत्नावली॥ सिंदेल चोर इति भाषा॥

खानी, स्त्री, (खानि+वा ङीष्।) खनिः। इति शब्दरत्नावली॥

खानोदकः, पुं, (खानाय पानार्थं उदकमत्र।) नारिकेलः। इति त्रिकाण्डशेषः॥

खापगा, स्त्री, (खे आकाशे स्थिता खात् आगता वा आपगा नदी।) गङ्गा। इति हेमचन्द्रः॥

खारः, पुं, (खं अवकाशमाधिक्येन ऋच्छतीति। ऋ+अण्।) खारीपरिमाणम्। इति हलायुधः॥

खारिः, स्त्री, (खं मध्यावकाशं आरातीति। आ+रा+इन्।) खारीपरिमाणम्। इति भरत-धृतहलायुधः॥

खारिकं, क्ली, (खारि+संज्ञायां कन्।) महा-पारेवतम्। इति राजनिर्घण्टः॥

खारिम्पचः, त्रि, (खारिं खारीपरिमितधान्य-मित्यर्थः पचतीति। पच्+"परिमाणे पचः।" ३। २। ३१। इति खश्+ततो सुम्।) खारि-परिमितान्नादिपाककर्त्ता। इति व्याकरणम्॥

खारी, स्त्री, (खं मध्यावकाशं आरातीति। आ+रा+इन्। "कृदिकारादक्तिनः।" ४।१।४५। इत्यस्य वार्त्तिके इति पक्षे ङीष्।) परिमाण-विशेषः। इत्यमरः। २। ६। ८८॥ यदाह तट्टी-कायां भरतः।

"पलं प्रकुञ्चकं मुष्टिः कुड़वस्चतुष्टयम्।
चत्वारः कुड़वाः प्रस्थश्चतुःप्रस्थमथाढ़कम्॥
चतुराढ़को भवेद्द्रोणो द्रोणः स्यात् उपरि स्मृतः।
सार्द्धसूर्पो भवेत् खारी दे खार्य्यौ गोण्युदाहृता॥
तामेव भारं जानीयात् वाहो भारश्चतुष्टयम्॥"

"षोड़शद्रोणपरिमाणम्।" इत्यमरटीकायां स्वामी लीलावती च॥ गोणीचतुष्टयम्। तत्तु यस्मवत्यधिकचतुःसहस्रपलानि। पाँचशत वार-शेर इति भाषा। इति वैद्यकपरिभाषा॥ द्रोण-चतुष्टयम्। यथा,—

"चतुराढ़को भवेद्द्रोणः खारी द्रोणचतुष्टयम्॥"

इति स्मृतिः॥

खारीकं, त्रि, (खारीं खारीवापमर्हतीति। "खार्या ईकन्।" ५। १। ३३। "केवलायाश्चेति वक्त-व्यम्।" इति वार्त्तिके इति ईकन्।) खारी-क्षेत्रम्। खारीपरिमितबीजवपनोपयुक्तक्षेत्रम्। तत्पर्य्यायः। खारीवापः २। इत्यमरः। २।४।१०॥

खारीवापः, त्रि, (खारी तत्परिमितधान्यं उप्यते ऽत्र। वप्+अधिकरणे घञ्।) खारीकः। इत्य-मरः। २। ६। १०॥ (खारीं वपतीति। वप्+कर्त्तरि अण्। धान्यादिवपनकारी॥)

खिखिः, स्त्री, (खिरित्यव्यक्तशब्देन खेटति भीरूणां भयमुत्पादयतीति। खि+खिट्+डः। पृषो-दरात् साधुः।) किखिः। इति क्वचित् त्रिकाण्ड-शेषे पाठः॥ खाँक्‌शेयाली इति भाषा॥

खिखिरः, पुं, (खं व्यक्तध्वनिविशेषं किरति विक्षतिभावेन शब्दं करोतीत्यर्थः। कृ+कः। पृषोदरात् सत्वेन साधुः।) ग्रिवाभेदः। खाँक्‌-शेयाली इति भाषा। खड्गाङ्गम्। तत्तु ग्रिव-स्त्राणम्। वारिवालकम्। तत्तु गन्धद्रव्यम्। इति विश्वः हेमचन्द्रश्च॥

खिट, भयभीषयोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-भये अकं-भयोत्पादने सकं-सेट्।) भीषा खतो भयोत्पादना। खेटति जनो व्याघ्राद्भिभे-तीत्यर्थः। खेटति व्याघ्रो जनं भीषयते इत्यर्थः। इति दुर्गादासः॥

खिद, ग्लै प औ परिघाते। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) ग्लै प, खिन्दति दुष्टं राजा। औ, खेत्त्वा। इति दुर्गादासः॥

खिद, ड ध य औ दैन्यके। इति कविकल्पद्रुमः॥ (दिवां-रुधां च-आत्मं-अकं-अनिट्।) दैन्यक-सुपतप्तीभावः। ड ध, खिन्ते तेष्वेव ये द्रव्यम् दीयमानं न गृह्णते। इति हलायुधः॥ ड य, खसुखनिरभिलाषः खिद्यते लोकहेतोरिति ग्राकुन्तले। औ, खेत्त्वा। इति दुर्गादासः॥

खिदिरः, पुं, (खिद्यते क्षयमपक्षेण दुःखेन तपसा वा। यथायथं युत्पत्तिर्ज्ञातव्या। खिद्+"इषि-मदि-मुदि-खिदीति।" उणा। १। ५२। इति किरच्।) चन्द्रः। इत्युणादिकोषः॥ दीनः। तापसः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खिद्यमानः, त्रि, (खिद्+ताच्छील्ये चानश्।) खेदयुक्तः। दैन्ययुक्तः। उपतप्तः। यथा,—

"खिद्यमानन्तु तं दृष्ट्वा सूर्य्यः क्षणात्मजं तदा।"

इति शाम्बपुराणे सूर्य्यस्तवः॥

खिन्नः, पुं, (खिद् दैन्ये+"स्फायि तञ्चिवञ्चीति।" उणा। २। १३। इति रक्।) रोगः। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

खिन्नः, त्रि, (खिद्+क्तः।) दैन्ययुक्तः। खेद-युक्तः। यथा, श्रीभागवते।

"गौर्भूत्वासुसखी खिन्ना रुदन्ती करुणं विभोः॥"
खिरहिट्टी, स्त्री, महासमङ्गा। इति राजनिर्घण्टः॥
खिलं, त्रि, (खिल्+कः।) हलादिना कृष्टभूमिः। खिल भूँइ इति भाषा॥ तत्पर्य्यायः। अप्रहतम् २। इत्यमरः। २। १। ५॥ सारसंचिप्ते देशे च पुं। इति मेदिनी॥
"खिलो नारायणः प्रोक्त इषवस्तद्गुणाः स्मृताः।" इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका॥
खु, ड ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) ड, खवते। इति दुर्गादासः॥
खुङ्गाहः, पुं, (खुं इत्यव्यक्तशब्दं कुर्वन् गाहते रणस्थलं विलोड़यतीति। गाह्+अच्।) क्षत्रियवर्णघोटकः। इति हेमचन्द्रः॥
खुज, उ स्तेये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वा वेट्।) उ, खोजित्वा खुक्त्वा। स्तेयं चौर्य्यम्। इति दुर्गादासः॥
खुज्जाकः, पुं, (खुज्+आकः निपातनात् जस्य द्वित्वम्।) देवताड़कवृक्षः। इति रत्नमाला॥ खुज्जाक इति क्वचित् पाठः॥
खुड, इ ड खण्डे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्-इदित्।) पञ्चमस्वरी। खञ्जः खोटनम्। इ, कर्म्मणि खुड्यते। ड, खुड्यते खोड़ः। इति दुर्गादासः॥
खुड, क } भेदे। इति कविकल्पद्रुमः॥
खुड, इ क } (चुरां-परं-सकं-सेट्। पाक्षिक इदित्।) द्वौ पञ्चमस्वरिणौ। क, खोड़यति। द्वितीय आद्यस्वरीति कातन्त्राद्याः। खमते तु द्वितीयस्याद्यस्वरित्वे पूर्व्वोपपदानुबन्धः स्यात्। पञ्चमस्वरित्वे तु स्वजातीयस्य पुनःपाठात् पूर्व्वो नेदनुबन्धः। खुड्यति। खड्यतीति प्रयोगस्तु खडि ङ् मथोत्यस्मात् घञि खड्डं करोतीति णौ साध्यम्। तस्य भेदवाचित्वन्तु धातूनामनेकार्थत्वात्। इति दुर्गादासः॥
खुर, ग्र विलेखने। छेदने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं सेट्।) ग्र, खुरति भूमिं लग्नं वा लोकः। खोरिता। खुरः ग्रफम्। इति दुर्गादासः॥
खुरः, पुं, (खुर छेदने+कः। यद्वा "ऋज्रेन्द्राग्रवज्रेति।" उणां। २। २८। इति रन् गुणाभावोऽन्तलोपश्च।) ग्रफम्। गवादीनां पादाग्रम्। (यथा, मनुः। ४। ६७।
"न भिन्नशृङ्गान्विखुरैर्न बालधिविरूपितैः॥") कोलदलम्। नखीनामगन्धद्रव्यम्। इति मेदिनी॥ छेदनवस्तु। नापितस्य खुरः। इति शब्दरत्नावली॥ खड्गादीनां पादुकम्। इति धरणी॥ खुरा इति भाषा॥
खुरकः, पुं, (खुर+संज्ञायां कन्। खुरो गन्धद्रव्यविशेषः स इव कायति वा। कै+कः।) तिलवृक्षः। इति शब्दचन्द्रिका॥ (तिलशब्दे ऽस्य गुणादयो बोद्धव्याः॥)
खुरणसः, त्रि, (खुर इव नासिका अस्य "अश्वनासिकाया इति।" ५। ४। ११८। इति अच् नसादेशश्च "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) चिपिटनासिकः। इत्यमरः। २। ६। ४७॥ चेपटानाकयुक्त इति भाषा॥
खुरणाः, त्रि, (खुर इव नासिका अस्य "खुरखराभ्यां वा नस्।" इति नसादेशः "पूर्व्वपदादीति।" ८। ४। ३। इति णत्वं च।) खुरणसः। इत्यमरः। २। ६। ४७॥ छेपड़ानासिकायुक्त इति भाषा॥
खुरप्रः, पुं, (खुर इव प्राति खुराकारवत् कार्य्यं पूरयतीत्यर्थः। खुर+प्रा+कः।) बाणविशेषः। इत्यमरटीकायां स्वामी॥ खुरपा इति भाषा॥
खुरली, स्त्री, (खुरैः सह विविधानि अलङ्कारादीनि लाति पौनःपुन्येन गृह्णात्यर्थमत्र। ला ग्रहणे+इन्+वा ङीष्।) ग्रहाभ्यासः। इति हेमचन्द्रः॥
खुराकः, पुं, (खुर+आकन्।) पशुः। इत्युणादिकोषः॥
खुरालकः, पुं, (खुर इव अलति पर्य्याप्नोतीति। अल+खुल्।) लौहमयवाणः। इति शब्दमाला॥
खुरालिकः, पुं, (खुराणां आलिभिः कायति प्रकाशते। कै+कः।) ग्रामजीभिण्डः। नापितेर भाँड़ि इति भाषा। नाराचः। उपधानम्। इति मेदिनी॥ खरालिकोऽपि पाठः॥
खुर्द, ड क्रीड़ायाम्। इति कविकल्पद्रुमः (भ्वां-आत्मं-अकं-सेट्।) षष्ठस्वरी। दीर्घोयं पृथक्पाठात् पूर्व्वस्य न दीर्घः। ड, खुर्द्दते। इति दुर्गादासः॥
खुल्लं, क्ली, (क्षुद्+सम्पदादित्वात् क्विप्। क्षुद्रं लातीति। ला+कः। पृषोदरात् साधुः।) नखीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ क्षुद्रे नीचे च त्रि॥
खुल्लकः, त्रि, (खुल्ल+स्वार्थे कन्।) क्षुद्रः। नीचः॥ कनिष्ठः। दरिद्रः। निष्ठुरः खलः। इत्यमरटीका॥
खुल्लतातः, पुं, (खुल्लः कनिष्ठः तातस्य पितुरिति पूर्व्वनिपातः।) पितृकनिष्ठभ्राता। इति शब्दरत्नावली॥ खुड़ा इति भाषा॥
खुल्लमः, पुं, (खुल्लेन मीयते इति। मा+घञर्थे कः।) पन्थाः। इति त्रिकाण्डशेषः॥
खूर्द्द, ड क्रीड़ायाम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षष्ठस्वरी। ड, खूर्द्दते। इति दुर्गादासः॥
खेखीरकः, पुं, (खे आकाशे खीलक इव लक्ष्यत्वम्।) शब्दवती यष्टिः। इति हारावली॥
खेगमनः, पुं, (खे आकाशे गमनं अस्य।) कालकण्ठपक्षी। इति शब्दमाला॥
खेचरः, पुं, (खे चरतीति। चर+"चरेष्टः।" ३। २। १६। इति टः। अलुक् समासः।) शिवः। इति शब्दरत्नावली॥ विद्याधरः। इति जटाधरः॥ पारदः। इति राजनिर्घण्टः॥ आकाशचारिणि त्रि॥
("हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः। बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणाधिकारः॥
मेघादिराशिः। यथा ज्योतिषतत्त्वे—"खेचराश्च सर्व्वे॥")
खेचरान्नं, क्ली, (खेचरं द्विदलादिमिश्रितं अन्नम्।) द्विदलादिसहितपक्वतण्डुलम्। खिचड़ी इति भाषा॥ इति पाकराजेश्वरः॥
खेट, त् क भक्षणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) अभिखेटत्। इति दुर्गादासः॥
खेटं, क्ली, (खे+अट्+अच्।) ह्लयम्। इति शब्दरत्नावली॥ खेड़मपि पाठः॥
खेटः, पुं, (खे आकाशे अटति। अट्+अच्।) ग्रहः। यथा, भावविवेके।
"यस्मिन् राशौ स्थितः खेटस्तेन तं परिपूरयेत्॥"
खेटः, त्रि, (खिट्+अच्। खेट्+कः वा।) अधमः। इत्यमरः। ३। १। ५४॥ घोटकः। इति शब्दरत्नावली॥ सुनिन्दकः। इति विश्वः॥ सुनन्दक इति पाठे बलरामस्य गदा इति कश्चित्॥
खेटः, पुं, क्ली, (खिद्यते भयसुतप्यते अस्मात्। खिट्+अपादाने करणे वा घञ्।) मृगया। इत्यमरहेमचन्द्रौ॥ कपः। (खेट्यते भक्ष्योपयोगिमृगस्यादिना उपजीव्यते अस्मात्।) ग्रामभेदः। स तु कर्षकग्रामः। (तथा च भागवते। १। ६। ११।
"खेटखर्व्वटवाटीश्च वनान्युपवनानि च॥"
"खेटाः कर्षकग्रामाः।" इति श्रीधरस्वामी॥) चर्म्म। इति मेदिनीशब्दरत्नावल्यौ॥
खेटकः, पुं, (खेट+स्वार्थे कः।) ग्रामभेदः। चासार गाँ इति भाषा॥ इति जटाधरः॥ फलकम्। इति हेमचन्द्रः॥ "खेटकं वसुनन्दके।" इति हारावली॥ वसुनन्दको धनदृद्धिजीवकः। इति तत्सूची॥ बलदेवस्य गदा इति कश्चित्॥
खेटः } पुं, (खेटति भयसुतप्यतेऽनेन। खिट्
खेटकः } +करणे घञ्। खेट+स्वार्थे कः।) यष्टिः। यथा,—
"यष्टिरूपेण खेट! त्वमरिसंहारकारकः।
देवीहस्तस्थितो नित्यं मम रक्षां कुरुष्व च॥"
इति शारदीयदुर्गापूजाप्रकरणे अस्त्रपूजाप्रकरणम्॥
"खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥"
इति च तत्र दशभुजाया दुर्गाया ध्यानम्॥
खेटितालः, पुं, (खे अटतीति अट इन्। खिट्+इन् वा। खेटिः तालोऽस्य।) वैतालिकः। इति शब्दमाला॥
खेटी, [न्] पुं, (खेट्+णिनिः।) नागरः। कामी। इति शब्दमाला॥
खेड, त् क भक्षणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) अभिखेड़त्। इति दुर्गादासः॥

खेदः, पुं, (खिद्+भावे घञ्।) शोकः। इति हेमचन्द्रः॥ अवसन्नता। इति जटाधरः॥ (यथा, रघौ। ४। ४६। ७।
"अद्यापीदं वनं दुर्गं विचिन्वन्तु वनौकसः।
खेदं त्यक्त्वा पुनः सर्व्वं वनमेव विचिन्वताम्॥")

खेदिनी, स्त्री, (खिद्+णिच्+णिनिः। स्त्रियां ङीप्।) अग्निपर्णीवृक्षः। लता। इति शब्दचन्द्रिका॥ (दैन्यकारिणी। शोककारिणी॥ इति व्युत्पत्तिलभ्योऽर्थः॥)

खेयं, क्ली, (खन्यते इति। खनु विदारे+"ईद्यखनः।"३। १। १११ इति कर्म्मणि क्यप् ईकारान्तादेशश्च।) परिखा। गड़खाइ इति भाषा। इत्यमरः॥ खननीयम्। इति व्याकरणम्॥ (सेतुभेदः। यथा मिताक्षरायां नारदवचनम्।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयः।" इति॥)

खेल, ऋ चाले। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-चलने अकं गत्यां सकं-सेट्।) कवर्गद्वितीयादिः। अचिखेलत्। चालः कम्यः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

खेलनं, क्ली, (खेल्+भावे ल्युट्।) क्रीड़नम्। इति हलायुधः॥ (यथा, गीतगोविन्दे। १। ४१।
"कापि विलासविलोलविलोचन-
खेलनजनितमनोजम्॥")

खेलनी, स्त्री, (खेलति अस्मिन् इति। खेल+अधिकरणे ल्युट्+स्त्रियां ङीप्।) प्रारिफलम्। इति हेमचन्द्रः॥

खेला, स्त्री, (खेल+भावे+अप् टाप्।) खेलनम्। तत्पर्य्यायः। क्रीड़ा २ कूर्दनम् ३। इत्यमरः। १। ७०। ३३॥

खेलिः, स्त्री, (खे आकाशे अलति पर्य्याप्नोति। अल्+इन्।) गीतम्। बाणः। सूर्य्यः। पक्षी। जन्तुः। इत्यजयपालः॥

खेव, ऋ ङ सेवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट् ऋदित्।) ऋ, अचिखेवत्। ङ, खेवते। इति दुर्गादासः॥

खेसरः, पुं, (खे आकाशे इव द्रुतगामित्वात् सरतीति। खे+टः।) जन्तुविशेषः। खचर इति भाषा। तत्पर्य्यायः। अश्वखरजः २ सक्तद्गर्भः ३ अध्वगः ४ शमी ५ सन्तुरः ६ मिश्रजः ७ मिश्रशब्दः ८ अतिभारगः ९। इति राजनिर्घण्टः॥

खे, सौत्रे। खनने। हिंसायाम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सौत्रे अकं-खननादौ सकं-अनिट्।) खायति। इति दुर्गादासः॥

खोड्डाहः, पुं, (खे आकाशे उड् इत्यव्यक्तशब्दं कुर्व्वन् गाहते इव प्रधावतीत्यर्थः। गाह+अच्। पृषोदरात् साधुः।) श्वेतपिङ्गलाश्वः। इति हेमचन्द्रः॥ खाड्डाहोऽपि पाठः॥

खोट, ऋ गत्याघाते। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोटत्। गत्याघातः खोटनम्। खोटति खञ्जः। इति दुर्गादासः॥

खोट, त् क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-पुरां-परं-सकं-सेट्।) अचुखोटत्। इति दुर्गादासः॥

खोटिः, स्त्री, (खोट्+इन्।) चतुरा स्त्री। इति शब्दमाला॥ खोरिरित्यपि पाठः॥

खोटी, स्त्री, (खोटि+वा ङीष्।) पालङ्कीवृक्षः। इति शब्दचन्द्रिका॥ चतुरापि॥

खोड़, ऋ खोटने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोड़त्। खोड़ति खञ्जः। रमानाथस्तु खोड़ति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादासः॥

खोड़, त् क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-पुरां-परं-सकं-सेट्।) अचुखोड़त्। इति दुर्गादासः॥

खोड़ः, त्रि, (खोड़ति इति। खोड़+अच्।) खञ्जः। खोंड़ा इति भाषा॥ इत्यमरः २।६।४६॥

खोड़कशीर्षकं, क्ली, (खोड़ क्षेपे+ण्वुल्। खोड़कं शीर्षं अस्य इति कप्।) कपिशीर्षम्। क्रयशीर्षम्। इति त्रिकाण्डशेषः॥

खोर, ऋ खोटने। गतिवैकल्ये इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोरत्। खोरति खञ्जः। इति दुर्गादासः॥

खोरः, त्रि, (खोरति इति। खोर्+अच्।) खञ्जः। इति हेमचन्द्रः॥

खोल, ऋ खोटने। गतिवैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोलत्। खोलति खञ्जः। रमानाथस्तु खोलति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादासः॥

खोलः, त्रि, (खोलति इति। खोल+अच्।) खञ्जः। इति शब्दमाला॥

खोलकः, पुं, (खोल+संज्ञायां कन्।) पाकः। खोला इति भाषा॥ शिरस्त्रः। खोपड़ा इति भाषा॥ वल्मीकः। उयेर ढिपि इति भाषा॥ पूगकोषः। इति मेदिनी॥ गुयार छोवड़ा इति भाषा॥

खोलिः, स्त्री, (खोल+इन्।) तृणम्। इति शब्दमाला॥

खोल्लुकः, पुं, (खे आकाशे उल्लुक इव लोहितवर्णतयेति बोध्यम्।) मङ्गलग्रहः। इति त्रिकाण्डशेषः॥

ख्या, ल ख्यातौ। कथने। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-कथनादौ तु सकं-अनिट्।) ख्यातिः प्रसिद्धिः। ल, ख्याति गुणी प्रसिद्धः स्यादित्यर्थः। ख्याति साधुः कथां हरेः। तथा च। ख्या प्रकथने। प्रकथनं प्रसिद्धिरिति गोविन्दभट्टः। ख्या प्रकथने इति चतुर्भुजजुमरौ। इति दुर्गादासः॥

ख्यातः, त्रि, (ख्या+क्तः।) ख्यातियुक्तः। तत्पर्य्यायः। प्रतीतः २ प्रथितः ३ वित्तः ४ विज्ञातः ५ विश्रुतः ६। इत्यमरः।३। १। ६॥ (यथा, भट्टिः। ६। ८७।
"अमितमप्यचमीशानं सर्व्वभोगीणसुत्तमम्।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि॥")

ख्यातगर्हणः, त्रि, (ख्याता विश्रुता गर्हणा निन्दा अस्य।) प्रसिद्धकुत्सनः। तत्पर्य्यायः। अवगीतः २। इत्यमरः। ३। १। ६३॥

ख्यातगर्हितः, त्रि, (ख्यातं गर्हितं गर्हणमस्य।) ख्यातगर्हणः। इति जटाधरः॥

ख्यातिः, स्त्री, (ख्या+क्तिन्।) प्रसिद्धिः। तत्पर्य्यायः। प्रथा २। इत्यमरः। ३। २। ६॥ (यथा, पञ्चतन्त्रे। १। ४०२। [यतः।"
"लोके ख्यातिमुपागताश्च सकले लोकोत्तिरेषा मनुश्च। १२। ३६। [पुष्कलाम्।
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति न च शोचत्यसम्पत्तौ तद्विद्येयन्तु राजसम्॥"
प्रकाशः। ज्ञानम्। यथा, माघे। ४। ५५।
"मैत्र्यादिचित्तपरिकर्म्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्॥"
"मैत्रीति। इहाद्यौ समाधिभृतो योगिनः। मैत्री करुणा मुदिता उपेक्षेति चतसश्चित्तवृत्तयः। तत्र पुण्यकृत्सु मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा। मैत्री आदिर्येषां तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थः तानि विन्दन्ति लभन्ते इति तद्विदः तद्भावस्तैः। क्षीणान्तःकरणमलाः इत्यर्थः। अतएव क्लेशप्रहाणं विधाय। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। तत्रानित्येषु नित्यत्वाभिमानः अनात्मनि च देहेन्द्रियादौ आत्मधीरित्यादि विभ्रमोऽविद्या। अस्मिता अहङ्कारः। रागोऽभिमतविषयाभिलाषः। द्वेषोऽनभिमतविषयेषु रोषः। अभिनिवेशः। कार्य्याकार्य्येष्वाग्रहः। ते हि पुरुषं क्लिश्नन्ति इति क्लेशाः क्लेशहेतवः तेषां प्रहाणं क्षयः तद्विधाय क्लेशान् हित्वा इत्यर्थः। अतो लब्धः सबीजः सावलम्बयोगो यैस्ते लब्धसबीजयोगाः सन्तः आलम्बनमेव अनक्ति। सत्त्वपुरुषयोरन्यतया अन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं अधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वा प्रकृति पुरुषयोर्विवेकाग्रहणात् संसारः। विवेकग्रहणात् मुक्तिरिति साङ्ख्याः। अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपां तां निवर्त्त्य स्वयम्प्रकाशतयैवावस्थातुमिच्छन्तीत्यर्थः। प्रकृतावुपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिरिति सांख्यसिद्धान्तः॥" इति तट्टीकायां मल्लिनाथः॥)

ग

ग, गकारः। स तु यञ्जनवर्णतीयवर्णः। अस्योच्चारणस्थानं कण्ठः। (यथा, "अ-कु-ह-विसर्ज्जनीयानां कण्ठः।") इति व्याकरणम् ॥ * ॥

"गकारं परमेशानि! पञ्चदेवात्मकं सदा।
निर्गुणं त्रिगुणोपेतं निरीहं निर्म्मलं सदा॥
पञ्चप्राणमयं वर्णं सर्व्वशक्त्यात्मकं प्रिये!।
अरुणादित्यसङ्काशां कुण्डलीं प्रणमाम्यहम्॥"

इति कामधेनुतन्त्रम् ॥ * ॥

"सर्गः श्वेतः कण्ठे वायुना कादिमीरयेत्।
वर्गस्पर्शनमाचेण कं खरस्पर्शनात्तु खम्।
श्लोकगम्भीरसंस्पर्शान्नदौ ङश्च बहिर्गतम्॥"

इति प्रपञ्चसारः ॥ * ॥

(वङ्गाक्षरैस्तस्य लेखनप्रकारादिर्यथा,—
"अधः कुञ्चितरेखा या गणेशी सा प्रकीर्त्तिता।
ततो दक्षगता या तु कमला तत्र संस्थिता।
अधोगता ततो या तु तस्यामीशः सदा वसेत्॥"
अधोमुखेन गता पुनरूर्द्धमुखेनापि तेत्यर्थः ॥ * ॥
तस्य ध्यानं यथा,—
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व वरवर्णिनि!।
हाड़िमीपुष्पसङ्काशां चतुर्बाहुसमन्विताम्॥
रक्ताम्बरधरां नित्यां रत्नालङ्कारभूषिताम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

तस्य नामानि यथा,—
"गोगौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः।
शार्ङ्गी पञ्चात्मको गाथा गन्धर्व्वः सर्व्वगः स्मृतिः॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः।
विश्वात्मा गौः पृथग्रूपा वालबह्वस्त्रिलोचनः॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा।
भोगवती च हृदयं ज्ञानं जालन्धरो लवः॥"

इति नानातन्त्राहृतनामानि ॥

गं, क्ली, (गीयते इति। गै गाने + भावे बाहुलकात् डः।) गीतम्। इत्येकाक्षरकोषः ॥

गः, पुं, (गच्छति सर्व्वं जानाति इच्छामात्रेण अभिलषितं सर्व्वं प्राप्नोति वा सर्व्वज्ञत्वात् प्राप्तसर्व्वैश्वर्य्यत्वाच्च। गम् + डः।) गणेशः। (गायति इति। गै + डः।) गन्धर्व्वः। इत्येकाक्षरकोषः ॥ (गुरुसंज्ञकवर्णः स तु छन्दसो गणविशेषः। यथा, छन्दोमञ्जर्य्यां १ मे स्तवके।
"म्यरस्तत्रभमुगैर्लान्तैरभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥"
"गुरुरेको गकारस्तु लकारो लघुरेकक॥"
वाचलिङ्गे तु उपसर्गरहितः कर्म्मोपपदश्च स्यात्। तत्र "गापोष्टक्।" ३। २। ८। इति टक्। यथा, साम गायतीति सामगः। तथा च मनुः। २। ६२।
"ह्रस्वाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽङ्गिः प्राप्तिताभिस्तु शूद्रः स्पृशाभिरन्ततः॥")

गगनं, क्ली, (गं गानं शब्दात्मकं गुणं गच्छति यद्वा गकारं भूतेषु प्रथमभूतत्वात् प्राधान्यं गच्छति। यद्वा गच्छन्त्यस्मिन् देवादय इति। "गमेर्गश्च।" उणां। २। ७७। इति युच् गश्चान्तादेशः।) आकाशम्। इत्यमरः। १।२।१॥ (यथा मेघदूते। ४८।
"प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥")
तत्पर्य्यायः। अमरोक्तपर्य्यायाः आकाशशब्दे द्रष्टव्याः॥ (तेभ्यः परम्।) वह्निः १६ धन्व २० आपः २१ पृथिवी २२ भूः २३ स्वयम्भूः २४ अध्वा २५ सगरः २६ समुद्रः २७ अम्बरः २८। इति वैद्यनिघण्टौ १ अध्यायः ॥ * ॥
"आकाशं प्रथमं भूतं श्रोत्रमथात्मसुच्यते।
अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतम्॥"

इत्याश्वमेधिकपर्व्व ॥

तस्य गुणाः। शब्दः १ व्याप्तत्वम् २ छिद्रता ३ अनाश्रयम् ४ अनालम्बम् ५ व्याश्रयान्तरशून्यम्। अयक्तम् ६ रूपस्पर्शशून्यत्वात्। अधिकारिता ७ द्रव्यान्तरानारम्भकत्वम्। अप्रतीघातिता ८ भूतत्वम् ९ श्रोत्रेन्द्रियोपादानत्वात्। विक्षतानि १० देहान्तर्गतच्छिद्राणि। तद्यथा,—
"आकाशस्य गुणः शब्दो व्याप्तत्वं छिद्रमेव च।
अनाश्रयमनालम्बमयक्तमविकारिता॥
अप्रतीघातिता चैव भूतत्वं विक्षतानि च।
गुणाः पञ्चाग्रतः प्रोक्ताः पञ्चभूतात्मभूतता॥"
पञ्चानां भूतानां व्याप्तिः स्वकं स्वरूपं तत्र लक्षिता। इति मोक्षधर्म्मः॥ (गगनात् पतितास्वगुणविशेषो यथा,—
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने।
बल्यं रसायनं मेध्यं पाचनंपेत्ति ततः परम्॥
रक्तोष्णं शीतलं क्षारादि ज्वरदाहविषापहम्॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)

गगनध्वजः, पुं, (गगने गगनस्य वा ध्वज इव।) मेघः। इति हारावली ॥ सूर्य्यः। इति हेमचन्द्रः ॥

गगनाध्वगः, पुं, (गगनरूपाध्वना आकाशपथेन गच्छतीति यद्वा गगनाध्वानं व्याप्य गच्छति। अनन्तगगनरूपमध्वानं व्याप्य सर्व्वतः स्थित इत्येव प्रकृततात्पर्य्यार्थः। गम + डः।) सूर्य्यः। इति हेमचन्द्रः ॥

गगनेचरः, पुं, (गगने चरतीति। "चरेष्टः।" ३। २। १६। इति टः। अलुक् समासः।) ग्रहः। नक्षत्रम्। इति सिद्धान्तशिरोमणिः ॥ (गगनचारिणि त्रि। यथा, महाभारते। १। २७। १५।
"तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः॥")

गगनोल्मुकः, पुं, (गगने गगनस्य वा उल्मुक इव। मङ्गलग्रहस्य रक्तवर्णत्वात् तथात्वम्।) मङ्गलग्रहः। इति हारावली ॥

गग्घ, हसने। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) कण्ठ्यवर्गैकतीयोपधः। गगघति। इति दुर्गादासः ॥

गङ्गका, स्त्री, (गङ्गा + अज्ञातार्थे कः। ततो ह्रस्वः। "अभाधितपुंस्काच्च।" ७। ३। ४८। इति पक्षे इत्वाभावः।) गङ्गा। इति मुग्धबोधम् ॥

गङ्गा, स्त्री, (गमयति प्रापयति ज्ञापयति वा भगवत्पदं या मुक्तिः। यद्वा गम्यते प्राप्यते ज्ञाप्यते मोक्षार्थिभिर्या। गम गतौ + "गन् गम्यद्योः।" उणां। १। १२२। इति गन् ततष्टाप्।) स्वनामख्यातनदी। तदधिष्ठात्री देवता च। तत्पर्य्यायः। विष्णुपदी २ जह्नुतनया ३ सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा ६ त्रिस्रोताः ७ भीष्मसूः ८। इत्यमरः। १।१०।३१॥ अर्घ्यतीर्थम् ९ तीर्थराजः १०। इति पद्मपुराणम्॥ त्रिदशदीर्घिका ११ कुमारसूः १२ सरिद्वरा १३ सिद्धापगा १४ सरापगा १५ स्वर्य्यापगा १६ खापगा १७ ऋषिकुल्या १८ हैमवती १९ स्वर्वापी २० हरशेखरा २१। इति हेमचन्द्रः॥ सुरापगा २२ धर्म्मद्रवी २३ सुधा २४ जह्नुकन्या २५ गान्दिनी २६ रुद्रशेखरा २७ नन्दिनी २८ अलकनन्दा २९ सितसिन्धुः ३०। इति जटाधरः॥ अध्वगा ३१ उग्रशेखरा ३२ सिद्धसिन्धुः ३३ इति त्रिकाण्डशेषः॥ स्वर्गसरिद्वरा ३४ मन्दाकिनी ३५ जाह्नवी ३६ पुण्या ३७ समुद्रसुभगा ३८ स्वर्नदी ३९ सुरदीर्घिका ४० सुरनदी ४१ स्वर्धुनी ४२ त्र्येष्ठा ४३ जह्नुसुता ४४ भीष्मजननी ४५ सुधा ४६ शैलेन्द्रजा ४७ भवायना ४८। इति शब्दरत्नावली॥ अस्या जलस्य गुणाः। शीतत्वम्। स्वादुत्वम्। स्वच्छत्वम्। अत्यन्तरुच्यत्वम्। पथ्यत्वम्। पावनत्वम्। पापहारित्वम्। दृष्णामोहध्वंसनत्वम्। दीपनत्वम्। प्रज्ञाधारित्वञ्च। इति राजनिर्घण्टः॥ * ॥
("गङ्गा सरस्वती कोनं यमुना सरयूः सची।
वेणा इरावती नीला उत्तरात् पूर्ब्ववाहिनी॥
हिमवत्-प्रभवा श्वेता हिमसम्भवशीतलाः।
समाः सर्व्वगुणैर्नद्यो वातश्लेष्महरा नृणाम्॥
आसां नवशतैर्युक्ता गङ्गा पूर्ब्वसमुद्रगा॥"

इति हारीते प्रथमस्थाने सप्तमेऽध्याये॥)

अस्या उत्पत्तिस्तु हिमालयात् सुमेरुदुहितरि मनोरमायाम्। हिमालयः प्रार्थितः सन् देवेभ्य इमां दत्तवान्। तां नीत्वा देवाः स्वर्गं गतवन्तः॥ * ॥ पृथिव्यामस्या अवतरणकारणम्। सगरराजस्य सुतान् कपिलशापेन भस्मीभूतानुद्धर्त्तुं भगीरथराजः पृथिव्यां गङ्गानयनाय तपस्तेपे। ततो ब्रह्मा तुष्टस्तस्मै तं वरं दत्त्वा गङ्गाधारणार्थं शिवाराधनं कर्त्तुमुक्तवान्। स शिवं पर्य्यतोषयत्। शिवोऽपि हिमालयपर्व्वतं गत्वा जटा विकीर्य्य पतेति गङ्गामब्रवीत्। सा तज्जटासु पतित्वा संवत्सरपर्य्यन्तं बभ्राम। ततः शिवो भगीरथप्रार्थनया जटामेकासुत्क्षिप्य तासुत्ससर्ज्ज। साऽतिवेगेन पृथिवीतलमागत्य भगीरथस्य पश्चात् पश्चादागच्छाम। स सगरपुत्रकृतखातेन तां रसातल-

मानीय तज्जलेन सगरसुतान् तांस्तर्पयामास। ते पूताः स्वर्गं गतवन्तः। इति वाल्मीकिरामायणमतम् ॥ * ॥ प्रकारान्तरम्। वामनदेवस्य बलेः सकाशात्त्रिलोकहरणकाले ब्रह्माण्डोपरिगतवामपादाङ्गुष्ठनखजनितविवरेण ब्रह्माण्डोर्ध्वस्थिता या जलधारा तच्चरणस्पर्शेन समधिकपूता सती ध्रुवलोके पपात। ततो देवमार्गेण सुमेरुपर्वतोपरि ब्रह्मसदने पतित्वा सीतालकनन्दा चक्षुर्भद्रेति चतुर्धा भूत्वा चतुर्दिग्मात्रिल्य लवणसमुद्रं प्रविष्टा। तत्र सीता ब्रह्मसदनात् केशराचलशृङ्गेभ्योऽधोऽधः स्रवन्ती गन्धमादनमूर्द्धसु पतित्वा भद्राश्ववर्षमध्येन प्राच्यां दिशि एवं चक्षुर्माल्यवच्छिखरान्निपत्य केतुमालवर्षमध्येन प्रतीच्यामपरं भद्रा गिरिशृङ्गाण्यतिक्रम्य शृङ्गवतः शिखरान्निपत्य उत्तरकुरुवर्षमध्येनोदीच्यामतोऽलकनन्दा बहुपर्वतशृङ्गाण्यतिक्रम्य हिमकूटान्निपत्य भारतवर्षमध्येन दक्षिणस्यां दिशि त्रिधैवक्रमेण लवणसमुद्रं सर्व्वाः प्रविष्टाः। इति भागवतमतम् ॥ * ॥ अस्याः पृथिव्यामवतरणकालस्तु आदित्यपुराणे।

"वैशाखशुक्लपक्षे तु तृतीयायां युधिष्ठिर!।
यवाशुत्पादयामास युगस्यारम्भवान् कृतम्॥
ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयत्।
तस्यां कार्य्यं यवैर्होमो यवैर्विष्णुं समर्चयेत्॥"* ॥

अस्या हिमालयान्निर्गतायाः दशहरा संज्ञा। तथा च स्मृतिः।

"ज्येष्ठे मासि सितेतरदिने शुक्लपक्षे दशम्यां
हस्ते चैलान्निरगमदियं जाह्नवी मर्त्यलोकम्।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुराद्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य॥"* ॥

अथ गङ्गाध्यानम्। भविष्ये।

"चतुर्भुजां त्रिनेत्राञ्च सर्व्वावयवभूषिताम्।
रत्नकुम्भां सिताम्भोजां वरदाममयप्रदाम्॥
श्वेतवस्त्रपरीधानां मुक्तामणिविभूषिताम्।
ततो ध्यायेत् सुरूपाञ्च चन्द्रायुतसमप्रभाम्॥
चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम्।
सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम्॥
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्।
त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम्॥
दिव्यरूपविभूषाञ्च दिव्यमाल्यानुलेपनाम्॥"

अपि च।

"सितमकरनिषण्णां शुक्लवर्णां त्रिनेत्रां
करधृतकमलोद्यत्सत्पलाभीत्यभीष्टाम्।
विधिहरहरिरूपां सेन्दुकोटीरचूडां
कलितसितदुकूलां जाह्नवीं तां नमामि॥" * ॥

अथ गङ्गामाहात्म्यश्रवणपठनफलम्। यथा,—भविष्ये।

"माहात्म्यं ये च गङ्गायाः शृण्वन्ति च पठन्ति च।
तेऽपि सर्व्वैर्महापापैर्मुच्यन्ते नात्र संशयः॥"

अस्याः स्मरणफलम्। [वदन्।

"गच्छंस्तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन्
यः स्मरेत् सततं गङ्गां स च मुच्येत बन्धनात्॥
भवनानि विचित्राणि विचित्राभरणाः स्त्रियः।
आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम्॥"

अस्या दर्शनादिफलम्। ब्रह्माण्डमध्ययोः।

"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत्।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता॥"

तथा. भविष्ये।

"यत् फलं जायते पुंसां दर्शनात् परमात्मनः।
तद्भवेदेव गङ्गाया दर्शने भक्तिभावतः॥"

अस्याः स्नानफलम्। ब्रह्माण्डपुराणे।

"यैः पुण्यवाहिनी गङ्गा सकृदङ्गावगाहिता।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा॥
अनेकजन्मसम्भूतं पापं पुंसां प्रणश्यति।
स्नानमात्रेण गङ्गायां सद्यः पुण्यस्य भाजनम्॥"

दानधर्म्मे। [उन्यजाः।

"अन्धाः क्लीवा जड़ा यङ्गाः पतिता रोगिणोगङ्गां संसेव्य पुरुषा देवैर्गच्छन्ति तुल्यताम्॥
स्नानन्तु भक्त्या गङ्गायां कर्त्तुकामस्य गच्छतः।
पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते॥"

तथा, ब्रह्माण्डे।

"ये गच्छन्ति स्वतो गङ्गां परांश्च प्रेरयन्ति ये।
इह ते सर्व्वभोगानामन्ते स्नानस्य भाजनम्॥"

अस्याः पूजायाः फलम्। आदित्ये।

"गङ्गायां पूजितायान्तु पूजिताः सर्व्वदेवताः।
तस्मात् सर्व्वप्रयत्नेन पूजयेदमरापगाम्॥" * ॥

तस्यां यज्ञादिकरणफलम्। स्कान्दे।

"यज्ञो दानं तपो जप्यं श्राद्धञ्च सुरपूजनम्।
गङ्गायां यत् कृतं सर्व्वं कोटिकोटिगुणं भवेत्॥"

तथा भविष्ये।

"सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्।
गङ्गातोयेश्च सतिलैर्दुर्लभं पिण्डतर्पणम्॥
गयाश्राद्धं कृतं तेन उत्तरैस्तु दृष्टस्तथा।
येन तद्वीचिसंसिक्ते तीरे श्राद्धमकारि च॥"*॥

तज्जलपानफलम्। भविष्ये।

"गण्डूषमात्रपानेन अश्वमेधफलं लभेत्।
स्वच्छन्दं यः पिबेदापस्तस्य मुक्तिः करे स्थिता॥
त्रिभिः सारस्वतं तोयं सप्तभिस्तथ यामुनम्।
नार्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति॥
नाभ्यन्तर्गततोयानां स्नातानां क्वापि देहिनाम्।
तत्ततीर्थफलप्राप्तिर्नाच कार्य्या विचारणा॥"

यमोक्तौ।

"क्षेत्रस्थसृतं वापि प्रीतसृष्टमथापि वा।
गाङ्गेयं हरते पापमाजन्ममरणान्तिकम्॥"*॥

अस्याः मरणफलम्। कूर्म्मपुराणे।

"गङ्गायां स्नानतो मृत्वा मुक्तिमाप्नोति मानवः।
अश्वमेधसहस्रस्य याति नाऽत्यत्र संशयः॥
गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले।
अन्तरीक्षे च गङ्गायां गङ्गासागरसङ्गमे॥"

तथा च, स्मृतौ।

"शुक्लपक्षे दिवा भूमौ गङ्गायामुत्तरायणे।
यान्ति देहं विसृजन्ति हृदयस्थे जनार्द्दने॥"*॥

तत्रास्थिनिक्षेपफलम्।

"दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति।
गङ्गायां मरणे याद्दक् स ताद्दक् फलमाप्नुयात्॥"*

तत्र त्रयोदशक्रियावर्जनं यथा, ब्रह्माण्डे।

"गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्ज्जयेत्।
प्रौचमाचमनं सेकं निर्माल्यं मलघर्षणम्॥
गात्रसम्वाहनं क्रीड़ां प्रतिग्रहमथो रतिम्।
अन्यतीर्थरतिञ्चैव अन्यतीर्थप्रशंसनम्।
वस्त्रत्यागमथाघातं सन्तारञ्च विशेषतः॥"* ॥

अथ नारायणक्षेत्रलक्षणम्। ब्रह्मपुराणे।

"प्रवाहमवधिं कृत्वा यावद्ब्रह्मसरश्चतुष्टयम्।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन॥"

अथ गर्भतीरयोर्लक्षणम्।

"भाद्रकृष्णाचतुर्दश्यां यावदाक्रमते जलम्।
तावद्गर्भं विजानीयात् तदूर्द्धं तीरमुच्यते।
सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते॥" * ॥

तीरे प्रतिग्रहादिनिषेधो यथा,—

"तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः॥"

अथ गङ्गास्नेचफलम्। स्कान्दे।

"तीरात्रयूतिमात्रन्तु परितः स्नेचमुच्यते।
अत्र यद्यत् कृतं कर्म्म गङ्गायां नात्र संशयः।
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥"

इति प्रायश्चित्ततत्त्वम् ॥ * ॥

(अस्या माहात्म्यं यथा, महाभारते।३।८५।६४।

"न गङ्गा सदृशं तीर्थं न देवः केशवात् परः।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः॥"

अस्याश्च माहात्म्यवर्णने सहस्रनामकथनं यथा, काशीखण्डे २६ अध्याये।

अगस्त्य उवाच।

"विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम्।
उपायान्तरमस्त्यन्यद् येन स्नानफलं लभेत्॥
अशक्तानां च पङ्गूनामालस्योपहतात्मनाम्।
दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत्॥
दानं वाथ व्रतं वाथ मन्त्रः स्तोत्रं जपोऽथवा।
तीर्थान्तराभिषेको वा देवतोपासनन्तु वा॥
यदस्ति किञ्चित् षड्वक्त्र! गङ्गास्नानफलप्रदम्।
विधानान्तरमात्रेण तद्वद प्रणताय मे॥
त्वत्तो न वेद स्कन्दान्यो गङ्गागर्भसमुद्भव!।
परं स्वर्गतरङ्गिण्या महिमानं महामते!॥

स्कन्द उवाच।

सन्ति पुण्यजलानीह सरांसि सरितो मुने!।
स्थाने स्थाने च तीर्थानि जितात्माश्रुषितानि च॥
दृष्टप्रत्ययकारीणि महामहिमभाञ्जपि।
परं स्वर्गतरङ्गिण्याः कोऽंशांशोऽपि न तत्र वै॥
अनेनैवानुमानेन बुध्यस्व कलशोद्भव!।
दधे गङ्गोत्तमाङ्गेन देवदेवेन शम्भुना॥
स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः।
विना विष्णुपदीं क्वान्यत् समर्थमघमोचने॥
गङ्गास्नानफलं ब्रह्मन्! गङ्गायामेव लभ्यते।
यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः॥
अस्त्युपायः इह लोकः स्यादेनाविकलं फलम्।
स्नानस्य देवसरितो महागुह्यतमो मुने!॥
शिवभक्ताय शान्ताय विष्णुभक्तिपराय च।
अद्वैतवे त्वास्तिकाय गर्भवाससमुच्चवे॥

कथनीयं न चान्यस्य कस्यचित् केनचित् क्वचित्।
इदं रहस्यं परमं महापातकनाशनम् ॥
महाश्रेयस्करं पुण्यं मनोरथकरं परम्।
द्युनदीप्रीतिजनकं शिवसन्तोषसन्ततिं ॥
नाम्नां सहस्रं गङ्गाया: स्तवराजेषु शोभनम्।
जप्यानां परमं जप्यं वेदोपनिषदां समम् ॥
जपनीयं प्रयत्नेन मौनिना वाचकं विना।
शुचिस्थानेषु शुचिना सुस्थदाचरमेव च ॥

स्कन्द उवाच। ओं नमो गङ्गादेव्यै ॥

ओंकाररूपिण्यजराऽतुलाऽनन्ताऽच्युतसवा।
अद्भुदाराऽभयाऽशोकाऽलकनन्दाऽच्युताऽमला ॥
अनाथवत्सलाऽमोघाऽपां योनिरच्युतप्रदा।
अयत्नलभ्याऽचोभ्याऽनवच्छिन्नाऽपराजिता ॥
अनाधनाथाऽभीष्टार्थसिद्धिदानङ्गवर्द्धिनी।
अणिमादिगुणाधाराऽगण्याऽलोकहारिणी ॥
अचिन्त्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी।
अत्रिराजसुताऽष्टाङ्गयोगसिद्धिप्रदाऽच्युता ॥२०॥
अचुम्बशक्तिरसदाऽनन्ततीर्थाऽच्युतोदका।
अनन्तमहिमाऽपाराऽनन्तसौख्यप्रदाऽनदा ॥
अशेषदेवतामूर्तिरघोराऽच्युतरूपिणी।
अविद्याजालशमनी ह्यप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहर्त्री त्वशेषगुणगुम्फिता।
अज्ञानतिमिरज्योतिरतुल्यहपरायणा ॥
अभिरामानवद्याङ्गनन्तसाराऽकलङ्किनी।
आरोग्यदानन्दवल्ली त्वापन्नार्तिविनाशिनी ॥
आश्चर्यमूर्तिरायुष्या ह्याद्याद्यापार्य्यसेविता।
आप्यायिन्यात्मविद्याख्या त्वानन्दाश्वासदायिनी ॥
आलस्यघ्नाऽपदां हन्त्री ह्यानन्दाम्भस्तवर्षिणी।
इरावतीष्टदात्रीष्टा त्विष्टापूर्त्तफलप्रदा ॥
इतिहासश्रुतीड्याऽर्या त्विहासत्र शुभप्रदा।
इज्या ग्रीलसमिज्येष्टा त्विन्द्रादिपरिवन्दिता ॥
इलालङ्कारमालेड्या त्विन्दिरा रम्यमन्दिरा।
इदिन्दिरादिसंसेव्या लोश्वरीश्वरवल्लभा ॥
ईतिभीतिहरेड्या च त्वीड्यनीयचरित्रभृत्।
उत्कृष्टशक्तिरुत्कृष्टयोडुपमण्डलचारिणी ॥
उदिताम्बरमार्गोल्लोरगलोकविहारिणी।
उच्चोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥३०॥
उदन्वत्पूर्त्तिहेतुल्लोदारोत्साहप्रवर्द्धिनी।
उड्डिगन्नुण्णशमनी उच्चारश्मिसुता प्रिया ॥
उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी।
ऊर्ज्जे वहन्त्यूर्ज्जधरोर्ज्जावती चोर्म्मिमालिनी ॥
उर्व्वरेत:प्रियोर्द्ध्वा ह्यूर्म्मिलोर्द्धगतिप्रदा।
ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी ॥
ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया।
ऋक्षमार्गवहर्क्षार्च्चिर्ऋजुमार्गप्रदर्शिनी ॥
एधिताखिलधर्म्मार्था लेकैकान्ततदायिनी।
एधनीयस्वभावेड्या त्वेजिताशेषपातका ॥
ऐश्वर्यदेश्वर्यरूपा ह्यैतिह्यं ह्यैन्दवद्युति:।
ओजस्विन्योषधीचैत्रमोजोदौदनदायिनी ॥
ओष्ठाम्बुतौत्रत्यदात्री त्वौषधं भवरोगिणाम्।
औदार्य्यचञ्चुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी ॥
अमराम्बवहाम्भष्ठामरमालाम्बुजेक्षणा।

अम्बिकाम्बुमहायोनिरम्बोदाम्बुकहारिणी ॥
अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना।
अन्धतामिस्रहन्त्र्यम्बुरङ्गना ह्यङ्गनावती ॥
कल्याणकारिणी काम्या कमलोत्पलगन्धिनी।
कुमुद्वती कमलिनी कान्ति: कल्पितदायिनी ॥
काञ्चनाची कामधेनु: कीर्त्तिकृत् क्लेशनाशिनी।
क्रतुश्रेष्ठा क्रतुफला कर्म्मबन्धविभेदिनी ॥४१॥
कमलाची क्षमहरा क्षुधातुतपद्युति:।
करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ॥
कामरूपा क्रियाशक्ति: कमलोत्पलमालिनी।
कूटस्था करुणा कान्ता कूर्म्मयाना कलावती ॥
कमला कल्पलतिका काली कलुषवैरिणी।
कमनीयजला कन्या कपर्दिसुकपर्दगा ॥
कालकूटप्रशमनी कदम्बकुसुमप्रिया।
कालिन्दी केलिललिता कलकल्लोलमालिका ॥
कान्तलोकत्रया कङ्कू: कङ्कूतनयवत्सला।
खड्गिनी खड्गधाराभा खगा खड्गेन्दुधारिणी ॥
खे खेलगामिनी खस्था खड्गेन्दुतिलकप्रिया।
खेचरी खेचरीवन्द्या ख्याति: ख्यातिप्रदायिनी ॥
खण्डितप्रणताघौघा खलबुद्धिविनाशिनी।
खातेन:कन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ॥
खरसन्तापशमनी खनि: पीयूषपाथसाम्।
गङ्गा गन्धवती गौरी गन्धर्व्वनगराप्रिया ॥
गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया।
गणनाथाम्बिका गीता गद्यपद्यपरिष्कृता ॥५०॥
गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा।
गोमती गुह्यविद्या गौर्गोघ्नी गगनगामिनी ॥
गोत्रप्रवर्द्धिनी गुण्या गुणातीता गुणाग्रणी:।
गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा ॥
गुणनीयचरित्रा च गायत्री गिरिशप्रिया।
गूढरूपा गुणवती गुर्व्वी गौरववर्द्धिनी ॥
गर्हपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला।
घर्म्महन्त्री घृतवती घृततुष्टिप्रदायिनी ॥
घण्टारवप्रिया घोरा घौघविध्वंसकारिणी।
घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥
घातुका घूर्णितजला घृष्टपातकसन्तति:।
घटकोटिप्रपौताघा घटिताशेषमङ्गला ॥
घृणावती घृणानिधिर्घस्मरा घूकनादिनी।
घुरुघ्णापिङ्गरतनुर्घर्घरा घर्घरस्वना ॥
चन्द्रिका चन्द्रकान्ताम्बुश्चन्द्रापा चलद्युति:।
चिन्मयी चितिरूपा च चन्द्रायुतशताननना ॥
चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी।
चार्या चारित्रनिलया चिन्तनश्चिन्तरूपिणी ॥
चम्पूश्चन्दनगुच्चम्बुश्चर्चनीया चिरस्थिरा।
चारुचम्पकमालाढ्या चमिताशेषदुष्कृता ॥६०॥
चिदाकाशवहाऽचिन्त्या चञ्चच्चामरवीजिता।
चोरिता शेषदृजिना चरिताशेषमङ्गला ॥
छेदिताऽखिलपापौघा छद्मघ्नी छलहारिणी।
छन्नविविधपतला छोटिताशेषबन्धना ॥
छुरिताम्बुतधारौघा छिन्नेनाश्छन्दगामिनी।
छत्रीकृतमरालौघा छटीकृतनिजाम्बुता ॥
जाह्नवीड्या जगन्माता जया जङ्गालवीचिका।

जया जनार्द्दनप्रीता जुषणीया जगद्धिता ॥
जीवनं जीवणप्राणा जगज्ज्येष्ठा जगन्मयी।
जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी ॥
जाड्यविध्वंसनकरी जगद्योनिर्जलाविला।
जगदानन्दजननी जलजा जलजेक्षणा ॥
जनलोचनपीयूषा जटातटविहारिणी।
जयन्ती जन्तुपापघ्नी जनितज्ञानविग्रहा ॥
झल्लरीवाद्यकुशला झलज्झालजलावृता।
ञिण्टीशवन्द्या झाङ्कारकारिणी झर्झरावती ॥
टीकिताऽशेषपाताला टङ्किनीयाऽद्रिपाटने।
टङ्कारध्वत्यत्कल्लोला टीकनीयमहातटा ॥
डमरप्रवहा डीनराजहंसकुलाकुला।
डमड्डमरुहस्ता च डामरोक्तमहाख्यका ॥७०॥
ढौकिताऽशेषनिर्व्वाणा ढक्कानादचलज्जला।
ढुण्ढिविघ्नेशजननी ढलद्ढुण्ढितपातका ॥
तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी।
त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ॥
तापत्रितयसंहर्त्री तेजोवलविवर्द्धिनी।
त्रिलक्षा तारणी तारा तारापतिकरार्चिता ॥
त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी।
त्वष्णाक्षेत्री तीर्थमाता त्रिविक्रमपदोद्भवा ॥
तपोमयी तपोरूपा तपस्तोमफलप्रदा।
त्रैलोक्यव्यापिनी त्रह्मिस्तृप्तिदत्तस्वरूपिणी ॥
त्रैलोक्यसुन्दरी तुर्य्या तुर्य्यातीतपदप्रदा।
त्रैलोक्यलक्ष्मीस्त्रिपदी तथा तिमिरचन्द्रिका ॥
तेजोगर्भा तप:सारा त्रिपुरारिशिरोगृहा।
त्रयीस्वरूपिणी तन्वी तपनाङ्गजभीतिभुत् ॥
तरिस्तरणिजामित्रं तर्पिताशेषपूर्व्वजा।
तुलाविरहिता तीव्रपापतूलतनूनपात् ॥
दारिद्र्यदमनी दक्षा दुःखघ्ना दिव्यमङ्गना।
दीर्घावती दुरावाप्या द्राक्षामधुरवारिभृत् ॥
दर्शिताऽनेकक्रतुका दुष्टदुर्ज्जयदुःखहृत्।
दैत्यहृद्दुरितघ्नी च दानवारिपदाब्जजा ॥८०॥
दन्दशूकविघ्नघ्नी च दारिताऽघौघसन्तति:।
हुता देवहृन्मन्ना दुर्व्वाराघविघातिनी ॥
दमयात्मा देवमाता देवलोकप्रदर्शिनी।
देवदेवप्रिया देवी दिक्पालपददायिनी ॥
दीर्घायु:कारिणी दीर्घा दोग्ध्री दूषणवर्ज्जिता।
दुग्धाम्बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ॥
द्युनदी दीनशरणं देहिदेहनिवारिणी।
द्राघीयसी दाघहन्त्री दितपातकसन्ततिं ॥
दूरदेशान्तरचरी दुर्गमा देववल्लभा।
दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा दयावती ॥
दुरासदा दानशीला द्राविणी द्रुहिणसुता।
दैत्यदानवसंशुष्किकर्त्री दुर्बुद्धिहारिणी ॥
दानसारा दयासारा द्यावाभूमिविगाहिनी।
दृष्टादृष्टफलप्राप्तिर्देवताद्यन्दवन्दिता ॥
दीर्घव्रता दीर्घदृष्टिर्दीर्घतोया दुरालभा।
दक्षयित्री दक्षनीतिर्दुष्टदक्षधरार्चिता ॥
दुरोदरघ्नी दावार्चिर्द्रवद्रव्यैकशेवधि:।
दीनसन्तापशमनी दात्री दवधुवैरिणी ॥
दरीविदारणपरा दान्ता दान्तजनप्रिया।

दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी ॥९०॥
धर्म्मद्रवा धर्म्मधुरा धेनुर्धीरा धृतिर्ध्रुवा ।
धेनुदानफलस्पर्शा धर्म्मकामार्थमोक्षदा ॥
धर्म्मार्म्मिवाहिनीधुर्य्या धात्री धात्रीविभूषणम् ।
धर्म्मिणी धर्म्मशीला च धन्विकोटिकृतावना ॥
ध्वाङ्क्षापहरा ध्येया धावनी धूतकल्मषा ।
धर्म्मधारा धर्म्मसारा धनदा धनवर्द्धिनी ॥
धर्म्माधर्म्मगुणच्छेत्री धत्तूरकुसुमप्रिया ।
धर्म्मेशी धर्म्मशास्त्रज्ञा धनधान्यसमृद्धिकृत् ॥
धर्म्मलभ्या धर्म्मजला धर्म्मप्रसवधर्म्मिणी ।
ध्यानगम्यस्वरूपा च धरणी धात्रपूजिता ॥
धूर्ध्वनटिजटासंस्था धन्या धौर्धारणावती ।
नन्दा निर्व्वाणजननी नन्दिनी नुन्नपातका ॥
निखिलविघ्ननिचया निजानन्दप्रकाशिनी ।
नभोऽङ्गनचरी नूतिर्नन्द्या नारायणी नुता ॥
निर्म्मला निर्म्मलाख्याना नाग्निनी तापसम्पदाम् ।
नियता नित्यसुखदा नानाचर्य्यमहानिधिः ॥
नदीनदसरोमाता नायिका नाकदीर्घिका ।
नष्टोद्धारणधीरा च नन्दनानन्ददायिनी ॥
निर्णिक्तार्घैधसुवना निःसङ्गा निरुपद्रवा ।
निरालम्बा निष्प्रपञ्चा निर्म्माग्निमहामला ॥१००॥
निर्म्मलज्ञानजननी निःश्रेयप्राप्तितापहृत् ।
निर्व्योत्सवा नित्यतृप्ता नमस्कार्य्या निरञ्जना ॥
निष्ठावती निरातङ्का निर्लेपा निश्चयात्मिका ।
निरवद्या निरीहा च नीललोहितमूर्द्धगा ॥
नन्दिभृङ्गिगणस्तुत्या नागानन्दा नगात्मजा ।
निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥
पुण्यप्रदा पुण्यगर्भा पुण्यापुण्यतरङ्गिणी ।
पृथुः पृथुफला पूर्णा प्रणतार्त्तिप्रभञ्जिनी ॥
प्राणदा प्राणिजननी प्राणेशी प्राणरूपिणी ।
पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥
परापरफलप्राप्तिः पावनी च पयस्विनी ।
परानन्दा प्रकाशार्था प्रतिष्ठा पालनी परा ॥
पुराणपठिता प्रीता प्रणवाक्षररूपिणी ।
पार्व्वती प्रेमसम्पन्ना पशुपाशविमोचनी ॥
परमात्मस्वरूपा च परब्रह्मप्रकाशिनी ।
परमानन्दनिष्यन्दा प्रायश्चित्तस्वरूपिणी ॥
पानीयरूपनिर्व्वाणा परित्राणपरायणा ।
पापेन्धनदवज्वाला पापारिः पापनामनुत् ॥
परमैश्वर्य्यजननी प्रज्ञा प्राज्ञा परापरा ।
प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमाम्बुसम्भवा ॥११०॥
प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता ।
पितामहपरमप्रीता परमेष्ठिकमण्डलुः ॥
पद्मनाभपदार्घेय प्रस्तुता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्णेः प्रभावती ॥
पुनाना पीतगर्भेशी पापपर्व्वतनाशिनी ।
फलिनी फलहस्ता च फुल्लाम्बुजविलोचना ॥
फालितेनोमहाक्षेत्रा फणिलोकविभूषणम् ।
फेनच्छलप्रणुन्नेनाः फुल्लकैरवगन्धिनी ॥
फेनिलाच्छाम्बुधाराभा फुल्लचाटितपातका ।
फाणितस्वादुसलिला फाल्गुपथ्यजलाविला ॥
विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ।

ब्रह्मण्या ब्रह्मकृद् ब्राह्मी ब्रह्मिष्ठा विमलोदका ॥
विभावरी च विरजा विक्रान्तानेकविष्टपा ।
विश्वमित्रं विष्णुपदी वैष्णवी वैष्णवप्रिया ॥
विरूपाक्षप्रियकरी विभूतिर्विश्वतोमुखी ।
विपाप्मा वैबुधी वेद्या वेदाचाररसस्रवा ॥
विद्या वेगवती वन्द्या वृंहणी ब्रह्मवादिनी ।
वरदा विप्रकृष्टा च वरिष्ठा च विशोधनी ॥
विद्याधरी विशोका च वयोद्वन्द्वनिषेविता ।
बहूदका बलवती बोधस्था विबुधप्रिया ॥१२०॥
वाणी वेदवती वित्ता ब्रह्मविद्यातरङ्गिणी ।
ब्रह्माण्डकोटिव्याप्ताम्बुर्ब्रह्महत्यापहारिणी ॥
ब्रह्मेशविष्णुरूपा च बुद्धिर्विभववर्द्धिनी ।
विलासिसुखदा वैश्या व्यापिनी च वृषारणिः ॥
वृषाङ्कमौलिनिलया विपन्नार्त्तिप्रभञ्जिनी ।
विनीता विनता ब्रध्नतनया विनयान्विता ॥
विपश्चो वाद्यकुशला वेणुस्रुतिविचक्षणा ।
वर्चस्करी बलकरी बलोन्मूलितकल्मषा ॥
विपाप्मा विगतातङ्का विकल्पपरिवर्ज्जिता ।
वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबन्धना ॥
व्रतरूपा वित्तरूपा बहुविघ्नविनाशकृत् ।
वसुधारा वसुमती विचित्राङ्गी विभावसुः ॥
विजया विश्वबीजं च वामदेवी वरप्रदा ।
वृषाश्रिता विषघ्नी च विज्ञानोर्म्मिशुमालिनी ॥
भव्या भोगवती भद्रा भवानी भूतभाविनी ।
भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥
भुक्तिमुक्तिप्रदा भैक्षी भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥
भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा ।
भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥१३०॥
भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा ।
भूरिदा भक्तिसुलभा भाग्यवद्दृष्टिगोचरी ॥
भङ्गितोपज्ञवकुला भव्यभोग्यसुखप्रदा ।
भिक्षणीया भिक्षुमाता भावाभावस्वरूपिणी ॥
मन्दाकिनी महानन्दा माता मुक्तितरङ्गिणी ।
महोदया मधुमती महापुण्या सदाकरी ॥
सुनिस्रुता मोहहन्त्री महातीर्था मधुस्रवा ।
माधवी मानिनी मान्या मनोरथपथातिगा ॥
मोक्षदा मतिदा सुख्या महाभाग्यजनाश्रिता ।
महावेगवती मेध्या महामहिमभूषणा ॥
महाप्रभावा महती मीनचञ्चललोचना ।
महाकारुण्यसंपूर्णा महर्द्धिश्च महोत्पला ॥
मूर्त्तिमन्मुक्तिरमणी मणिमाणिक्यभूषणा ।
मुक्ताकलापनेपथ्या मनोनयननन्दिनी ॥
महापातकरात्रिघ्नी महादेवार्द्धहारिणी ।
महोर्म्मिमालिनी मुक्ता महादेवी मनोज्ञनी ॥
महापुण्योदयप्राप्या मायातिमिरचन्द्रिका ।
महाविद्या महामाया महामेधा महौषधम् ॥
मालाधरी महोपाया महोरगविभूषणा ।
महामोहप्रशमनी महामङ्गलमङ्गलम् ॥१४०॥
मार्त्तण्डमण्डलचरी महालक्ष्मीर्मदोज्झिता ।
यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥
योगसिद्धिप्रदा याम्या यज्ञेशपरिपूरिता ।

यज्ञेशी यज्ञफलदा यजनीया यशस्करी ॥
यमिसेव्या योगयोनिर्योगिनी युक्तबुद्धिदा ।
योगज्ञानप्रदा युक्ता यमाद्यष्टाङ्गयोगयुक् ॥
यन्त्रिताघौघसञ्चारा यमलोकनिवारिणी ।
यातायातप्रशमनी यातनानामकृन्तनी ॥
यामिनीग्रहिमाच्छोदा युगधर्म्मविवर्ज्जिता ।
रेवतीरतिकन्या रत्नगर्भा रमा रतिः ॥
रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ।
रत्नप्रासादगर्भा च रमणीयतरङ्गिणी ॥
रत्नार्घौ रुद्ररमणी रागद्वेषविनाशिनी ।
रमा रामा रम्यरूपा रोगिजीवातुरूपिणी ॥
रुचिरद्रोचनी रम्या रुचिरा रोगहारिणी ।
राजहंसा रत्नवती राजतुकूलरोलिका ॥
रामणीयकरेखा च रजारी रोगरोधिनी ।
राका रङ्गार्त्तिशमनी रम्या रोलम्बराविणी ॥
रागिणी रञ्जितग्रिवा रूपलावण्यगर्भधिः ।
लोकप्रस्तुतलोकवन्द्या लोलतुकल्लोलमालिनी ॥
लीलावती लोकभूमिर्लोकलोचनचन्द्रिका ।
लेखस्रवन्ती लघभा लघुवेगा लघुत्वकृत् ॥१५१॥
लास्यतरङ्गहस्ता च ललितालयभङ्गिगा ।
लोकबन्धुर्लोकधात्री लोकोत्तरगुणोर्ज्जिता ॥
लोकत्रयहिता लोका लक्ष्मीर्लक्षणलक्षिता ।
लीलालक्षितनिर्व्वाणा लावण्यान्ततवर्द्धिनी ॥
वैश्वानरी वासवेद्या वन्ध्यत्वपरिहारिणी ।
वासुदेवाङ्घ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ॥
शुभावती शुभफला शान्तिः शान्तशुक्लभा ।
शूलिनी शैलशुक्लवया शीतलाम्बुतवाहिनी ॥
शोभावती शीलवती शोधिताघौघकिल्बिषा ।
शरण्या शिवदा शिष्टा शरजन्मप्रभुः शिवा ॥
शुक्तिः शशाङ्कविमला शमशखण्डसम्मता ।
शमा शमनमार्गघ्नी शितिकण्ठमहाप्रिया ॥
शुचिः शुचिकरी शैवा शैवशायिपदोद्भवा ।
श्रीनिवासस्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥
शुद्धविद्या शुभावर्त्ता शुतानन्दा श्रुतिस्तुतिः ।
श्वित्रेतरघ्नी श्वचरी श्वासरीरूपधारिणी ॥
श्मशानशोधनी श्रान्ता श्रमच्छत्तृषितुष्टता ।
श्यालिनी श्यालिशोभाढ्या श्रिखिवाहनगर्भभृत् ॥
श्वसनीयचरित्रा च श्वातिताशैवपातका ।
षड्गुणैश्वर्य्यसम्पन्ना षड्ङ्गश्रुतिरूपिणी ॥१६१॥
षण्ढताहारिसलिला षोडायन्नदनदीश्रुता ।
सरिद्वरा च सरसा सुप्रभा सुरदीर्घिका ॥
सर्व्वसिन्धुः सर्व्वदुःखघ्नी सर्व्वव्याधिमहौषधम् ।
सेव्या सिद्धिः सती सूक्तिः स्कन्दस्तुत्या सरस्वती ॥
सम्यक्तरङ्गिणी स्तुत्या स्थाणुमौलिकृतालया ।
स्थैर्य्यदा सुभगा सौख्या स्त्रीषु सौभाग्यदायिनी ॥
स्वर्गनिःश्रेणिका स्वप्ना स्वधा स्वाहा सुधाजला ।
समुद्ररूपिणी स्वर्ग्या सर्व्वपातकवैरिणी ॥
स्तुताघहारिणी सीता संसाराब्धितरङ्गिका ।
सौभाग्यसुन्दरी सन्ध्या सर्व्वसारसमन्विता ॥
हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी ।
हृताघसङ्घा हितकृत् हेला हेलाघगर्व्वहृत् ॥
क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा ।

इति नामसहस्रं हि गङ्गायाः कलशोद्भव ! ।
कीर्त्तयित्वा नरः सम्यग् गङ्गास्नानफलं लभेत् ॥
सर्व्वपापप्रशमनं सर्व्वविघ्नविनाशनम् ।
सर्व्वस्तोत्रजपाच्छ्रेष्ठं सर्व्वपावनपावनम् ॥
श्रद्धयाभीष्टफलदं चतुर्व्वर्गसमृद्धिकृत् ।
सकृच्छ्रवणादवाप्नोति श्लोकैकस्तुफलं मुने ! ॥१७०॥
सर्व्वतीर्थेषु यः स्नातः सर्व्वयज्ञेषु दीक्षितः ।
तस्य यत् फलमुद्दिष्टं त्रिकालपठनाच्च तत् ॥
सर्व्वव्रतेषु यत् पुण्यं सम्यक् तीर्थेषु वाऽथ वै ।
तत् फलं समवाप्नोति त्रिसन्ध्यं नियतः पठन् ॥
स्नानकाले पठेद्यस्तु यत्र कुत्र जलाशये ।
तत्र सन्निहिता नूनं गङ्गा त्रिपथगा मुने ! ॥
श्रेयोऽर्थी लभते श्रेयो धनार्थी लभते धनम् ।
कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥
वर्षं त्रिकालपठनात् श्रद्धया शुचिमानसः ।
ऋतुकालाभिगमनादपुत्रः पुत्रवान् भवेत् ॥
नाकालमरणं तस्य नाग्निचौराहिसाध्वसम् ।
नाम्नां सहस्रं गङ्गायाः यो जपेच्छ्रद्धया मुने ! ॥
गङ्गानामसहस्रन्तु जग्ध्वा ग्रामान्तरं व्रजेत् ।
कार्य्यसिद्धिमवाप्नोति निर्व्विघ्नो गेहमाविशेत् ॥
तिथिवारर्क्षयोगानां न दोषः प्रभवेत् तदा ।
यदा जग्ध्वा व्रजेदेतत् स्तोत्रं ग्रामान्तरं नरः ॥
आयुरारोग्यजननं सर्व्वोपद्रवनाशनम् ।
सर्व्वसिद्धिकरं पुंसां गङ्गानामसहस्रकम् ॥१७६॥
जन्मान्तरसहस्रेषु यत् पापं सम्यगर्জ্জितम् ।
गङ्गानामसहस्रस्य जपनात् तत् क्षयं व्रजेत् ॥
ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ।
तत्संयोगी भ्रूणहन्ता मातृहा पितृहा मुने ! ॥
विश्वासघाती गरदः कृतघ्नो मित्रघातकः ।
अग्निदो गोवधकरो गुरुव्यापहारकः ॥
महापातकयुक्तोऽपि संयुक्तोऽप्युपपातकैः ।
मुच्यते श्रद्धया जग्ध्वा गङ्गानामसहस्रकम् ॥
आधिव्याधिपरिक्षिप्तो घोरतापपरिप्लुतः ।
मुच्यते सर्व्वदुःखेभ्यः स्तवस्यास्यानुकीर्त्तनात् ॥
संवत्सरेण युक्तात्मा पठन् भक्तिपरायणः ।
अभीप्सितां लभेत् सिद्धिं सर्व्वैः पापैः प्रमुच्यते ॥
संग्रयाविष्टचित्तस्य धर्म्मविघ्नियोऽपि च ।
दाम्भिकस्यापि हिंसस्य चैतो धर्म्मपरं भवेत् ॥
वर्णाश्रमपथीनस्तु कामक्रोधविवर्জ্জितः ।
यत् फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्त्तनात् ॥
गायत्र्ययुतजप्येन यत् फलं समुपार्জ্जितम् ।
सकृत् पठनतः सम्यक् तदग्रेयमवाप्नुयात् ॥१८८॥
गां दत्त्वा वेदविदुषे यत् फलं लभते क्रतौ ।
तत् पुण्यं सम्यगाख्यातं स्तवराजसकृज्जपात् ॥
गुरुशुश्रूषणं कुर्व्वन् यावज्जीवं नरोत्तमः ।
यत् पुण्यमर्জ्जयेत् तद्वाग् वर्षं त्रिपथगं जपन् ॥
वेदपारायणात् पुण्यं यदत्र परिपठ्यते ।
तत् षण्मासेन लभते त्रिसन्ध्यं परिकीर्त्तनात् ॥
गङ्गायाः स्तवराजस्य प्रत्यहं परिशीलनात् ।
शिवभक्तिमवाप्नोति विष्णुभक्तोऽथवा भवेत् ॥
यः कीर्त्तयेदनुदिनं गङ्गानामसहस्रकम् ।
ततसमीपे सहचरी गङ्गादेवी सदा भवेत् ॥
सर्व्वत्र पूज्यो भवति सर्व्वत्र विजयी भवेत् ।
सर्व्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः ॥
सदाचारी स विज्ञेयः स शुचिस्तु सदैव हि ।
कृतसर्व्वसुरार्चः स कीर्त्तयेद् य इमां स्तुतिम् ॥
तस्मिंस्तुष्टे भवेत् तृप्ता जाह्नवी नात्र संशयः ।
तस्मात् सर्व्वप्रयत्नेन गङ्गाभक्तं समर्चयेत् ॥
स्तवराजमिमं गाङ्गं शृणुयाद्यश्च वै पठेत् ।
श्रावयेद्य तज्जनान् दृष्ट्वा लोभविवर्জ্जितः ॥
मुच्यते त्रिविधैः पापैर्मनोवाक्कायसम्भवैः ।
क्षणान्निष्पापतामेति पितृणाञ्च प्रियो भवेत् ॥
सर्व्वदेवप्रियश्चापि सर्व्वधर्म्मगणसम्मतः ।
अन्ते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥
दिव्याभरणसम्पन्नो दिव्यभोगसमन्वितः ।
नन्दनादिवने खेरं देववत् स प्रमोदते ॥२००॥
भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः ।
जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारकम् ॥
यावन्ति तत्र सिक्थानि यावन्तोऽम्बुकणाः स्थिताः ।
तावन्त्येव हि वर्षाणि मोदन्ते खः पितामहाः ॥
यथा प्रीणन्ति पितरो गङ्गायां पिण्डदानतः ।
तथैव तृप्नुयुः श्राद्धे स्तवस्यास्यानुसंश्रवात् ॥
एतत् स्तोत्रं गृहे यस्य लिखितं परिपूज्यते ।
तत्र पापभयं नास्ति शुचि तद्भवनं सदा ॥
अगस्ते ! किं बहूक्तेन शृणु मे निश्चितं वचः ।
संशयो नात्र कर्त्तव्यः सन्देहधरि फलं न हि ॥
यावन्ति मर्त्ये स्तोत्राणि मन्त्रजालान्यनेकशः ।
तावन्ति स्तवराजस्य गाङ्गेयस्य समानि न ॥
यावज्जन्म जपेद्यस्तु नाम्नामेतत् सहस्रकम् ।
स कीकटेष्वपि मृतो न पुनर्गर्भमाविशेत् ॥
नित्यं नियममानेतद्यो जपेत् स्तोत्रसत्तमम् ।
अन्यत्रापि विपन्नः स गङ्गातीरे मृतो भवेत् ॥
एतत् स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरात्मदम् ॥
गङ्गास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितम् ।
सिक्तासुर्जाह्नवीं तस्मादेतत् स्तोत्रं जपेत् सुधीः ॥"
इति श्रीस्कन्दपुराणे काशीखण्डे गङ्गासहस्र-नामकथनं नामैकोनत्रिंशत्तमोऽध्यायः ॥*॥*॥
इयमेव शिवस्य तोयरूपा परा मूर्त्तिः । यथा, काशीखण्डे । २७ । २—७ ।

ईश्वर उवाच ।

"निशामय महाबाहो ! विष्णो ! त्रैलोक्यसुन्दर ! ॥
प्राग्नं वाराणसीत्याख्यामविमुक्तं यथा तथा ॥
निर्दग्धान् सागरान् श्रुत्वा कपिलक्रोधवह्निना ।
अश्वमेधाश्वसंयुक्तान् पूर्व्वजान् स्वान् भगीरथः ॥
सूर्य्यवंशे महातेजा राजा परमधार्मिकः ।
आरिराधयिषुर्गङ्गां तपसे कृतनिश्चयः ॥
हिमवन्तं नगश्रेष्ठममात्यस्तराज्यधूः ।
जगाम यशसा राशिरुद्दिधीर्षुः पितामहान् ॥
ब्रह्मशापाग्निनिर्दग्धान् महादुर्गतिगानपि ।
विना त्रिमार्गगां विष्णो ! को नयेत्त्रिदिवं नरान् ॥
ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका ।
ब्रह्माकारामनेकानामाधारः प्रकृतिः परा ॥
शरीरस्था दृढा नाड़ी । यथा, हटयोगदीपिकायाम् । ३ । ११० ।
"इड़ा भगवती गङ्गा पिङ्गला यमुनानदी ।
इड़ापिङ्गलयोर्मध्ये बालरण्डा च कुण्डली ॥")
दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"क्रियाकारगरूपत्वात् सरणाच्च सरिन्मता ।
सङ्गमाङ्गमनाङ्गा लोके देवी विभाव्यते ॥"

गङ्गाका, स्त्री, (गङ्गा एव । स्वार्थे कन् ततः "अजाद्यतष्टाप् ।"४।१।४८ । इति पाणिनिमतेन गङ्गका गङ्गिका इत्येव पदद्वयं सिद्धं परं मुग्धबोधमतेन "वाचापोऽनुक्तपुंस्कस्य ।" इति स्त्रीत्वेन । गङ्गिका गङ्गाका गङ्गका इति पदत्रयं सिद्धम् । "वाग्रहणमकारस्यापि स्त्रित्वार्थम् । " इति मुग्धबोधटीकाकृद् दुर्गादासः ।) गङ्गा । इति मुग्धबोधम् ॥

गङ्गाचिल्ली, स्त्री, (गङ्गास्थिता चिल्ली ।) चिल्लविशेषः । गाङ्गचिल इति भाषा । तत्पर्य्यायः । देवट्टी २ विश्वका ३ जलकुक्कुटी ४ । इति हारावली ॥

गङ्गाजः, पुं, (गङ्गायाः गङ्गागर्भात् जायते इति । जन्+ड ।) भीष्मः । इति शब्दरत्नावली ॥ कार्त्तिकेयः । इति भारतम् ॥

गङ्गाटेयः, पुं, (गङ्गायां गङ्गादिनद्यामित्यर्थः अटतीति । अट्+अच् । ततो ढक् । यद्वा गङ्गातटे यातीति । या+कः । पृषोदरात् तकारलोपे साधुः ।) मत्स्यभेदः । चिङ्गिड़ि इति भाषा । तत्पर्य्यायः । गलानिलः २ । इति त्रिकाण्डशेषः ॥

गङ्गाधरः, पुं, (धरतीति धरः । धृ+अच् । गङ्गाया धरः । खण्डितोजटाभिरिति शेषः ।) शिवः । इत्यमरः । १ । १ । ३६ ॥ (अस्य गङ्गाधारणविवरणं यथा, रामायणे । १ । ४३ । १-११ ।
"देवदेवे गते तस्मिन् सोऽनुष्ठायनिपीड़िताम् ।
ज्ञात्वा वसुमतीं राम ! वत्सरं समुपासत ॥
अथ संवत्सरे पूर्णे सर्व्वलोकनमस्कृतः ।
उमापतिः पशुपतीं राजानमिदमब्रवीत् ॥
प्रीतस्तेऽहं नरश्रेष्ठ ! करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥
ततो हैमवती श्रेष्ठा सर्व्वलोकनमस्कृता ।
तदा सातिमहद्रूपं ज्ञात्वा वेगञ्च दुःसहम् ॥
आकाशादपतद्राम ! शिवे शिवशिरस्युत ।
अचिन्तयच्च सा देवी गङ्गा परमदुर्हरा ॥
विगाह्याहं हि पातालं स्रोतसा तस्य शङ्करम् ।
तस्यावलेपनं ज्ञात्वा क्षुब्धस्तु भगवान् हरः ॥
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा ।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि ॥
हिमवत्प्रतिमे राम ! जटामण्डलगह्वरे ।
सा कथञ्चित् महीं गन्तुं नाशक्नोत् यत्नमास्थिता ॥
नैव सा निर्गमं लोभे जटामण्डलमन्ततः ।
तत्रैवाभ्रमद्देवी संवत्सरगणान् बहून् ॥
तामपश्यत् पुनस्तत्र तपः परममास्थितः ।
स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ! ॥

पिसञ्जं ततो गङ्गां हरो विन्दुसरः प्रति ।") समुद्रः । इति त्रिकाण्डशेषः ॥ * ॥ (जीर्णातिसाररोगनाशकवर्णौषधविशेषः । यथा,— "धातक्यामलकीपयोधरटकीकट्वङ्गयष्टीमधु- श्रीजम्बाम्रफलास्थिनागरविषाक्षीवेरलोध्रैन्द्रवैः । तुल्यांशं विहितं सतण्डुलजलं गङ्गाधराख्यं महच्- चूर्णं तूर्णमपाकरोति सकलं जीर्णातिसारं परम्॥" इति शब्दार्थचिन्तामणिः ॥)

गङ्गापत्री, स्त्री, (गङ्गावत् पवित्रं शुभ्रं वा पत्रमस्या इति ङीष् ।) वृक्षविशेषः । तत्पर्य्यायः । पत्री२ सुगन्धा ३ गन्धपत्रिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातनाशित्वम् । व्रण- रोपणत्वञ्च । इति राजनिर्घण्टः ॥

गङ्गापुत्रः, पुं, (गङ्गायाः पुत्रः ।) भीष्मः । इति पुराणम् ॥ वर्णसङ्करजातिविशेषः । सुरदा- फराश इति पारस्य भाषा । स तु वेटात् तीवर कन्यायां जातः । इति ब्रह्मवैवर्तपुराणम् ॥ (कार्त्तिकेय ॥)

गङ्गासुतः, पुं, (गङ्गायाः सुतः पुत्रः ।) कार्त्ति- केयः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २३१ । १५ ।

"सहस्रशीर्षस्त्वमनन्तरूपः
सहस्रपात्त्वं गुरुशक्तिधारी ।
गङ्गासुतस्त्वं खमतेव देव !
खाहामहोक्तिकानां तथैव ॥")

भीष्मश्च । इति पुराणम् ॥

गङ्गिका, स्त्री, (गङ्गा एव । स्वार्थे कन् तत: "अभाषितपुंस्काच्च ।"७।३।४८। इति पक्षे ङीष् ।) गङ्गा । इति मुग्धबोधम् ॥

गच्छः, पुं, (गम् + सम्पदादित्वात् क्विप् तुक् च गतं गमनं ब्रूते नाशयतीति । गत् + छो + कः ।) वृक्षः । इति हेमचन्द्रः ॥ गाछ इति भाषा ॥ निर्विसर्गे गमनक्रियानुमतिः । (तदा गमधातो- र्लोटि मध्यमपुरुषस्यैकवचनस्य रूपम् ।) इति व्याकरणम् ॥ याओ इति भाषा ॥

गज, स्वने । इति कविकल्पद्रुमः ॥ (भ्वां-परं- अकं-सेट् ।) गजति । इति दुर्गादासः ॥

गज, ए मदे स्वने । इति कविकल्पद्रुमः ॥ (भ्वां-परं- अकं-सेट् इदित् ।) ए, कर्म्मणि गज्यते । इति दुर्गादासः ॥

गज, क स्वने । (चुरां-परं-अकं-सेट् ।) क, गाज- यति । इति दुर्गादासः ॥

गजः, पुं, (गजति मदेन मत्तो भवतीति । गज् + अच् ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (स तु त्रिविधः । यथाह शब्दार्थचिन्तामणिः ।

"भद्रो मन्द्रो मृगश्चैव विज्ञेयास्त्रिविधा गजाः ॥"

अस्य लक्षणादिकं यथा, बृहत्संहितायां ६७ अध्याये ।

"मध्याभद्राः सुविभक्तदेहा
न चोपदिग्धाश्च लघ्वः क्षमाश्च ।
गात्रैः समैश्चापसमानवंग्या
वराहतुल्यैर्जघनैश्च भद्राः ॥
वक्षोऽथ कक्षावलयः क्षयाश्च
लम्बोदरस्थूलगुदश्च मन्दः ।
स्थूला च कुक्षिः सह पेचकेन
सैंही च दृग्मन्दमतङ्गजस्य ॥
मृगास्तु दृक्खाधरवालमेढ्रा-
स्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः ।
स्थूलेक्षणाश्चेति यथोक्तचिह्नैः
सङ्कीर्णनागा यतिमिश्रचिह्नाः ॥
पद्मोन्नतिः सप्त मृगस्य दैर्घ्य-
मष्टौ च हस्ताः परिणाहमानम् ।
एकद्विवृद्ध्यावथ मन्दभद्रौ
सङ्कीर्णनागोऽनियतप्रमाणः ॥
भद्रस्य वर्णो हरितो मदस्य
मन्दस्य हारिद्रकसन्निकाशः ।
कृष्णो मृगस्याभिहितो मृगस्य
सङ्कीर्णनागस्य मदो विमिश्रः ॥
ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः
स्निग्धोन्नतायतशुभाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंक्षा-
स्तन्वेकरोमचितकूर्म्मसमानकुम्भाः ॥
विस्तीर्णकर्णहनुनाभिललाटगुह्याः
कूर्म्मोन्नतद्विनववक्षणतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवाला
धन्याः सुगन्धिमदपुष्करमारुताश्च ॥
दीर्घाङ्गुलिरक्तपुष्कराः
सजलाम्बोदनिनादहृंहिणः ।
हृदयातवृत्तकन्धरा
धन्या भूमिपतेर्मतङ्गजाः ॥
निर्मदाभ्यधिकहीननखाङ्गान्
कुब्जवामनकमेयविषाणान् ।
दृश्यकोग्रफलपुष्करहीनान्
श्यावनीलशबलासिततालून् ॥
स्वल्पवक्त्रबहुमत्कुणषण्ढान्
हस्तिनीं च गजलक्षणयुक्ताम् ।
गर्भिणीं च नृपतिः परदेशं
प्रापयेदतिविरूपफलास्ते ॥ * ॥

यथा, भट्टिः । १४ । ५ ।

"इत्या जिहेषिरे हर्षान्नभीरं जगर्जुर्गजाः ॥")

परिमाणविशेषः । स तु हस्तहयं पादोनहस्त- द्वयञ्च । (यथा, शब्दार्थचिन्तामणौ ।

"अरत्नीनां शतान्यष्टौ षष्ट्यधिकानि च ।
गजप्रमाणमाख्यातं मुनिभिर्वास्तुवादिभिः ॥")

वास्तुनः स्थानभेदः । इति मेदिनी ॥

"प्रस्तारे दैर्घ्यमानन्तु खड्गस्तेन तथा नरैः ।
कृत्वा चिह्नं गजैर्दत्त्वा वास्तुस्थाननिरूपणम् ॥
ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च ।
गजः काकपदश्चैव स्थानान्यष्टौ च वास्तुनः ॥
ध्वजे विभूतिर्मरणञ्च धूमे
सिंहे जयः श्वा च करोत्यनर्थम् ।
वृषे च भोगी क्षयणं खरे च
पृष्ठिर्गजे काकपदे विनाशः ॥"

इति ज्योतिषम् ॥ * ॥

औषधपाकार्थगर्त्तविशेषः । यथा,—

"हस्तप्रमाणगर्त्तो यः पुटः स तु गजाह्वयः ।
इत्थं चातस्त्रिके कुण्डे पुटो वाराह उच्यते ॥"

इति वैद्यकप्रयोगान्तम् ॥

(असुरविशेषः । स तु महिषासुरपुत्रः । यथा, काशीखण्डे । ६८ । ३ ।

"महिषासुरपुत्रोऽसौ समायाति गजासुरः ।
प्रमथान् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः ।")

गजकन्दः, पुं, (गज इव स्थूलः गजस्य दन्त इव वा कन्दो यस्य ।) हस्तिकन्दः । इति राज- निर्घण्टः ॥

गजकूर्म्माण्डी, [न्] पुं, (गजश्च कूर्म्मश्च तौ गज- कूर्म्मौ । तौ अश्नातीति । अश्नु ग भोजने + णिनि ।) गरुड़ः । इति शब्दरत्नावली ॥ (पुरा हि कदाचित् विभावसुसुप्रतीकनामानौ द्वौ भ्रातरौ ब्राह्मणकुमारौ पित्र्यधनार्थमन्योन्य- मभिभूतौ गजत्वं कूर्म्मत्वं च गतावपि पूर्ब्ववैर- मनुस्मरन्तौ सुचिरं युध्यमानौ प्रजापतिकश्यपा- दिष्टेन पतगेश्वरेण गरुड़ेन भक्षितौ । एतद्वि- वरणन्तु महाभारतीयादिपर्ब्बणि सौपर्णे २६ अध्याये सविस्तरं दर्शनीयम् ॥)

गजचिर्भटा, स्त्री, (गजस्येव हरणीया चिर्भटा ।) इन्द्रवारुणी । इति रत्नमाला ॥ गोरचनाड़ राखालशशा इति च भाषा ॥

गजचिर्भिटः, पुं, (गजप्रियश्चिर्भिटः ।) गोडुम्बा । इति त्रिकाण्डशेषः ॥

गजचिर्भिटा, स्त्री, (गजभक्ष्या चिर्भिटा ।) महेन्द्रवारुणी । इति राजनिर्घण्टः ॥

गजच्छाया, स्त्री, (गजस्य कुञ्जरस्य छाया प्रति- बिम्बः । हस्तिच्छाया ।) योगविशेषः । यथा,—

"यदिन्दुः पितृदैवत्ये हंसस्थेव करे स्थितः ।
यात्या तिथिर्भवेत् सा हि गजच्छाया प्रकी-
र्त्तिता ॥"

इति मिताक्षरापरिभाषा ॥

अपि च । कृत्यचिन्तामणौ ।

"कृष्णपक्षे त्रयोदश्यां मघासिन्दुः करे रविः ।
यदा तदा गजच्छाया श्राद्धे पुंसां प्रवाप्यते ॥"

अन्यच्च ।

"योगो मघात्रयोदश्यां कुञ्जरच्छायसंज्ञितः ।
भवेन्मघायां संस्थे च अग्निन्यर्के करे स्थिते ॥"* ॥

चन्द्रसूर्य्ययोर्ग्रहणकालः । यथा, वराहः ।

"सैंहिकेयो यदा भानुं ग्रसते पर्ब्बसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥"

अमावास्याश्राद्धकालः । यथा,—

"अमावास्यां गते सोमे छाया या श्राद्धखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥"

इति च मलमासतत्त्वम् ॥

गजटङ्का, स्त्री, (गजस्य उपरिभागे स्थिता या वृहट्टङ्का ।) गजोपरिस्थवृहट्टङ्का । तत्- पर्य्यायः । मदाम्बाता २ । इति हारावली ॥

गजता, स्त्री, (गजानां समूहः । "ग्रामजनबन्धु- भ्यस्तल् ।" ४ । २ । ४२ । एतस्य सूत्रस्य

"गजसहायाभ्यामिति वक्तव्यम्।" वार्त्तिं इति तल्।) गजसमूहः। तत्पर्य्यायः। हास्तिकम् २। इत्यमरः। २। ८। ३६॥

गजदन्नः, पुं, (गजेन परिमाणमस्य इति परिमाणार्थे दन्नच्।) गजपरिमाणम्। इति मुग्धबोधम्॥

गजदन्तः, पुं, (गजस्य दन्तौ इव दन्तोऽस्य।) गणेशः। इति शब्दरत्नावली॥ (गजस्य दन्तः।) गजसम्बन्धिदन्तः। नागदन्तः। हातिर दांत इति भाषा। स तु द्रव्यस्थापनार्थं भित्तिस्थदरुद्वयम्। दाखा इति भाषा॥

गजदन्तफला, स्त्री, (गजदन्ताकृति गजदन्त इव शुभं वा फलमस्याः।) इङ्गरीनता। इति राजनिर्घण्टः॥

गजदानं, क्ली, (गजस्य दानं मदः गजकटादिभ्यः स्रवितो मद इत्यर्थः।) हस्तिमदः। इति राजनिर्घण्टः॥ (तस्य प्रस्रवणस्थानानि। यथा,—

"करात् कटाभ्यां मेढ्राच्च नेत्राभ्याच्च मदच्युतिः।"
इति पालकाव्यम्॥

तथा च रघुः। ४। ४५।

"स सैन्यपरिभोगेण गजदानसुगन्धिना।
कावेरीं सरितां पत्युः शुक्तनीयामिवाऽकरोत्॥"

गजस्य हस्तिनो दानं प्रदानम्। गजसम्प्रदानम्। इति युत्पत्तिलभ्योऽर्थः॥)

गजद्वयसः, त्रि, (गजेन परिमाणमस्य इति। गज+"दन्नमात्रद्वयसट्मात्रे।" इति परिमाणार्थे द्वयसट्।) परिमितः। इति मुग्धबोधम्॥

गजपादपः, पुं, (गजस्य नाम्ना ख्यातः पादपः गजप्रियः पादपो वा।) स्थालीवृक्षः। इति भावप्रकाशः॥

गजपिप्पली, स्त्री, (गजोपपदेन युक्ता पिप्पली। गजनाम्ना ख्याता पिप्पली वा।) पिप्पलीभेदः। गजपिंपुल इति भाषा। तत्पर्य्यायः। करिपिप्पली २ इभकणा ३ कपिवल्ली ४ कपिल्लिका ५ श्रेयसी ६ वह्निः ७ गजाङ्का ८। इति रत्नमाला॥ कोलवल्ली ९। इत्यमरः॥ वसिरः १०। इति तट्टीका॥ गजौषणा ११ चपफलम् १२ चपला १३ छिद्रवैदेही १४ दीर्घग्रन्थिः १५ तेजसी १६ वर्षाली १७ स्थूलवैदेही १८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रुचामलवणौषणत्वम्। बलासवातहरत्वम्। स्तनकर्णविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ भेदाग्निकारित्वम्। इति राजवल्लभः॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशः।

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसी वह्निरप्यसौ॥
गजकृष्णा कटुवातश्लेष्मगुल्मक्षिवर्द्धिनी।
उष्णा निहन्त्यतीसारश्वासकण्डूमयक्रिमीन्॥"

गजपुटः, पुं, (गजाङ्कयः पुटः हस्तप्रमाणो गर्त्तः।) औषधपाकार्थं हस्तपरिमितगर्त्तः। इति वैद्यकम्॥ अस्य प्रमाणं गजशब्दे द्रष्टव्यम्॥ (लौहमारणादावस्य प्रयोजनं यथा,—

"दग्धादिशुतपर्य्यन्तो गजपुटविधिर्मतः॥"
इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे जारणविधिरधिकारे॥ क्वचित् क्लीवलिङ्गत्वमपि दृश्यते। यथा, भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।

"सपादहस्तमानेन कुण्डे निम्ने यथायते।
वनोपलसहस्रेण पूर्णो मध्ये विधारयेत्॥
पुटनद्वयसंयुक्तां कोष्ठिकां सुदितां सुखे।
अधार्द्धानि करीषाणि अर्द्धान्युपरि निःक्षिपेत्॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम्॥
हस्तचतुर्विंशत्यङ्गुलप्रमाणः सपादहस्तेन त्रिंशदङ्गुलप्रमाणोनेत्यर्थः। अतएवोक्तम्।
साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः॥"
इति गजपुटम्॥)

गजप्रिया, स्त्री, (गजस्य प्रिया।) शुक्लकोरण्टः। इति हेमचन्द्रः॥

गजबन्धनी, स्त्री, (गजः हस्ती बध्यते लौहशृङ्खलादिभिः रुध्यतेऽस्याम्। बन्ध+ल्युट् ङीप् च।) गजबन्धनस्थानम्। हातिशाला इति भाषा। तत्पर्य्यायः। वारी २। इत्यमरः। २। ८। ४३॥ वारिः ३। इति भरतः॥ प्रारब्धिः ४। इति जटाधरशब्दरत्नावल्यौ॥

गजभक्षकः, पुं, (गजेन हस्तिना भक्ष्यते इति। भक्ष+कर्म्मणि ण्वुल् ततः कप् स्वार्थे कन् वा। यद्वा गजः हस्ती भक्षकोऽस्य।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

गजभक्षा, स्त्री, (गजेन भक्ष्यतेऽसौ। भक्ष्+अप्+टाप्।) शुक्लकोरण्टः। इति शब्दरत्नावली॥

गजभक्ष्या, स्त्री, (गजेन भक्ष्या भक्षणीया।) शुक्लकोरण्टः। इत्यमरः। २। ४। १२३॥

गजमाचलः, पुं, स्त्री, (मच्+भावे घञ् माचः। गजस्य हस्तिनः माचं दर्पं लाति आदत्ते लुनाति वा बाहुलकात् डः।) सिंहः। इति हारावली॥

गजमात्रः, त्रि, (गजेन परिमाणमस्य इति। "दन्नमात्रद्वयसट् माने।" इति परिमाणार्थे मात्र।) गजपरिमितः। इति मुग्धबोधम्॥

गजमोटनः, पुं, क्ली, (गजं हस्तिनं मोटयति मर्द्दयतीति। सट् मर्द्दने+कर्त्तरि ल्युः।) सिंहः। इति शब्दमाला॥

गजवदनः, पुं, (गजस्य वदनमेव वदनं यस्य।) गणेशः। इति हेमायुधः॥

गजवल्लभा, स्त्री, (गजस्य वल्लभा प्रिया।) गिरिकदली। शुक्लकी। इति राजनिर्घण्टः॥

गजसाह्वयं, क्ली, (गजनाम्ना नरपतिना सह आह्वयो नाम यस्य।) हस्तिनापुरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ३।१।८।

"ततो द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः।
धार्त्तराष्ट्रैः सहामात्यैर्निर्ययुर्गजसाह्वयात्॥")

गजाख्यः, पुं, (गजाख्यया आख्यातः गजेन सह आख्या यस्येति वा गजकर्णवदस्य पत्राकारत्वात्तथात्वमिति केचित्।) चक्रमर्द्दवृक्षः। इति राजनिर्घण्टः॥

गजाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः। गजानां अग्रणीः श्रेष्ठः।) ऐरावतहस्ती। इति शब्दरत्नावली॥

गजाजीवः, पुं, (आजीयतेऽस्मादनेन वा आजीवः आ+जीव्+कर्म्मणि घञ्। गजः आजीवः जीवनोपायोऽस्य। गजपरिचालनपालनादिकार्य्यमालम्ब्य आजीवतीति। जीव्+कर्त्तरि अच् वा।) हस्तिपालकः। तत्पर्य्यायः। आधोरणः २ हस्तिपकः ३ इभपालकः ४। इति हेमचन्द्रः॥

गजाह्वं, क्ली, (गजस्याह्ववत् मूलमस्य।) पिण्डमूलम्। इति राजनिर्घण्टः॥

गजाननः, पुं, (गजस्य हस्तिन आननं मुखमेव आननं यस्य।) गणेशः। इत्यमरः। १। १। ४१॥ (यथा, ब्रह्मवैवर्त्ते गणेशखण्डे ६ अध्याये।

"घृतिश्रद्धा शिरश्छेदात् गजवक्त्रेण योजितः।
गजाननः शिशुत्वेन नियतिः केन बाध्यते॥"

पुराणान्तरे मतभेदोऽपि दृश्यते यथा, स्कान्दे गणेशखण्डे ११ अध्याये।

गुरुरुवाच।

"अवतारो यदि धृतः साधुचाराय भो विभो!
प्रकाशयाशु वदनं सर्व्वेषां शोकनाशनम्॥
नयस्व सर्व्वदेवानामानन्दं हृदये प्रभो!।

शिव उवाच।

प्रत्युवाच गुरुं पुत्रः पार्व्वत्या हीनमस्तकः॥

शिशुरुवाच।

मद्देहाखेन राज्ञा ते प्रणतौ चरणौ यदा।
तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो मुदा॥
गजयोनौ जनिर्मुक्तिः शिवहस्तादुदीरिता।
तत् सर्व्वमभवत् तस्य विद्यते चारुमस्तकः॥
पूज्यमानः शिवेनास्ते शुण्डादण्डः सुशोभनः।
अवतारकरोऽसौ मे गुरोऽस्ति भविता मुखम्॥

शिव उवाच।

आश्चर्य्यपूर्णहृदयो गुरुरूचे पुनः शिशुम्॥

गुरुरुवाच।

भगवन्! विश्वरूपोऽसि चिकालज्ञोऽखिलेश्वरः।
मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो!॥
अहमीशस्वरूपं ते परिच्छेत्तुं न च क्षमः।
श्रुत्वेव ब्रह्मजः पुत्रो नारदस्तत्र चाब्रवीत्॥

नारद उवाच।

एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो!।
अथवा बालरूपस्य छिन्नं ते केन तच्छिरः॥
एतन्मे संशयं छिन्धि कृपया परमेश्वर!।

शिव उवाच।

निपीय नारदीं वाणीमुवाच शिशुरुच्चकैः॥

शिशुरुवाच।

सिन्दूरः कोऽपि दैत्यो मे वायुरूपधरोऽच्छिनत्।
अस्मे मासि सम्पूर्णे प्रविशोमोदरं शिरः।
तमिदानीं हनिष्येऽहं गजास्यं दास्यतं द्विज!।

शिव उवाच।

श्रुत्वेव नारदः प्राह शिशुरूपिणमीश्वरम्॥

नारद उवाच।

अकिञ्चिज्ञा वयं देव! योजनेऽस्य मुखस्य ते
त्वमेव च स्वभावेन मस्तमेतन्नियोजय॥

गञ्जिका

शिव उवाच ।
वदतीत्थं मुनिर्यावत् तावत् स दन्तोऽखिलैः ।
सर्व्वावयवसम्पूर्णो गजानन उमासुतः ॥
किरीटकुण्डलधरो युगबाहुः सुलोचनः ।
वामदक्षिणभागे च सिद्धिबुद्धिविराजितः ॥
दृष्ट्वा विनायकं स्कन्द ! तथाभूतं निजेच्छया ।
हर्षोत्फुल्लनयना देवाः सर्व्वे तदाब्रुवन् ॥
गजानन इति ख्यातो भविताऽयं जगत्त्रये ।
एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः ॥")

गजारिः, पुं, (गजस्य अरिः शत्रुः । तत्राग्रत्वात् तथात्वम् ।) वृक्षविशेषः । सिंहः । यथा, "गजारिस्तरुसिंहयोः ।" इति हेमचन्द्रः ॥

गजाशनः, पुं, (गजेन हस्तिना अश्यते अत्यते इति । गज + अश् + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इति रत्नमाला ॥ गजादनोऽपि ॥

गजाशना, स्त्री, (अश्नातीति । अश् ग भोजने + कर्त्तरि ल्युः । गजः अश्नो भक्षको यस्याः ।) भङ्गा । इति शब्दचन्द्रिका ॥ (यस्मिन्नियं व्यवह्रियते तद्यथा,—

"गजाशना-कुम्भिक-दाड़िमानां
रसैः कृते तैलघृते सदधि ॥"

इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥)
शूलकीवृक्षः । पद्ममूलम् । इति रत्नमाला ॥

गजास्यः, पुं, (गजस्य आस्यं मुखमेव आस्यं यस्य ।) गणेशः । इति हेमचन्द्रः ॥ (गजस्य आस्यम् ।) हस्तिमुखे क्ली ॥

गजाह्वं, क्ली, (गजेन गजनाम्ना आह्वयते इति गजेन सह आह्वा संज्ञा यस्य इति वा ।) हस्तिनापुरम् । इति मेदिनी ॥

गजाह्वयं, क्ली, (गजेन गजनाम्ना आह्वयोऽस्य ।) हस्तिनापुरम् । इति शब्दरत्नावली ॥

गजाह्वा, स्त्री, (गजस्य आह्वया संज्ञया आह्वा संज्ञा यस्याः ।) गजपिप्पली । इति मेदिनी ॥ (पर्य्यायोऽस्या यथा,—

"करिपिप्पलीभकणा कपिवल्ली कपिर्वालिका ।
श्रेयसी वह्निरप्यापि गजाह्वा गजपिप्पली ॥"

इति वैद्यकरत्नमालायाम् ॥)

गजेष्टा, स्त्री, (गजस्य इष्टा प्रिया ।) विदारी । इति राजनिर्घण्टः ॥ भुँइकुमड़ा इति भाषा ॥

गजोषणा, स्त्री, (गजोषप्रदेन युता उषणा पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

गञ्जः, पुं, (गञ्जि भावे + घञ् ।) अवज्ञा । भाण्डागारम् । खनिः । इति हेमचन्द्रः ॥ गोदामघर इति भाषा ॥

गञ्जः, पुं क्ली, (गञ्जि भावे + घञ् ।) भाण्डागारम् । इति मेदिनी ॥

गञ्जा, स्त्री, (गञ्ज + टाप् ।) मदिरायहम् । इत्यमरः । २ । ९ । ८ ॥ खनिः । इति मेदिनी ॥ गामरसञ्च । मद्यभाण्डम् । इति शब्दरत्नावली ॥

गञ्जिका, स्त्री, (गञ्जा + स्वार्थे कन् अत इत्वम् ।) मदिरायहम् । इति शब्दरत्नावली ॥

गड, इ गत्यै । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्-इदित् ।) इ, कर्म्मणि गण्डते । गण्डे कपोलविषयक्रियायाम् । तथा च । यत्र द्रव्यनिर्द्देशस्तत्र तन्निष्ठक्रियाविशेषो लक्ष्यते । इति मैत्रेयरक्षितः ॥ रमानाथस्तु कडु कार्कश्य इत्यस्मात् कार्कश्य इत्यनुवृत्त्या कपोलकर्त्तृककार्कश्यमिति व्याख्याय गण्डति कपोलः पांशुना इत्युदाहृतवान् । केचित्तु गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्तव्यो न त्वस्यान्यत्र प्रयोगः इत्याहुः । इति दुर्गादासः ॥

गड, म सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । घटादिः ।) म, गड़यति । सेकः क्षरणम् । गड़यति घटात् पानीयम् । डलयोरेकत्वात् लस्यैव प्रायः प्रयोगः । इति रमानाथः ॥ तन्मते तु लान्तपक्षेऽपि मातुबन्धः । खमते तु लान्तो वक्ष्यमाणः स त्वनुबन्धशून्यः इति विरोधः । इति दुर्गादासः ॥

गड़ः, पुं, (गड़ति गलति हस्ताद्यालादिभ्यो वा क्षरतीत्यर्थः । गड़् + अच् ।) मत्स्यभेदः । गड़ुइ माछ् इति भाषा ॥ अन्तरायः । इति मेदिनी ॥ परिखा । व्यवधानम् । इति शब्दरत्नावली ॥ देशविशेषः । राजनिर्घण्टे गड़लवणपर्य्याये गड़देशजमिति दर्शनात् ॥

गड़कः, पुं, (गड़ + स्वार्थे कन् ।) मत्स्यविशेषः । गड़ुइ माछ् इति भाषा । तत्पर्य्यायः । शुक्लाभीकः २ । इत्यमरः । १ । १० । १७ ॥ गड़ः ३ गलः ४ गलकः ५ । इति शब्दरत्नावली ॥ अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । शीतलत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

गड़यन्तः, पुं, (गड़यति जलमिति । गड़ क्षरणे + णिच् । "तभूवहिवसिभाविसाधिगड़ीति ।" उणां ।३।१२८ । इति झच् । घटादित्वात् मित्त्वे मितां ह्रस्वः अयामन्तेति णेरयादेशः ।) मेघः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गड़लवणं, क्ली, (गड़देशाज्जातं लवणम् । प्राक्पार्थिववादिवत् मध्यपदलोपिसमासः ।) संवरदेशोद्भवलवणम् । सामरलुण इति भाषा ॥ तत्पर्य्यायः । शुभ्रम् २ पृथ्वीजम् ३ गड़देशजम् ४ गड़ोत्थम् ५ महारम्भम् ६ सांवरम् ७ संवरोद्भवम् ८ । अस्य गुणाः । उष्णत्वम् । लवणत्वम् । ईषदम्लत्वम् । मलापहत्वम् । दीपनत्वम् । कफवातार्शोनाशित्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥

गड़देशजं, क्ली, (गड़देशात् जायते इति । जन् + डः ।) सांवरलवणम् । इति राजनिर्घण्टः ॥

गड़ि, पुं, (गड़ + इन् ।) वत्सतरः । इति राजनिर्घण्टः ॥ अलसो गवादिः । गड़िया इति भाषा ॥ यथा, काव्यप्रकाशे ।
"गुणानामेव दौरात्म्याद्दुरि धूर्य्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गड़िः ॥"

गड़ुः, पुं, (गड़ + बाहुलकात् उन् ।) गलगण्डः । पृष्ठगुड़ः । स तु घाटामस्तकयोर्मध्ये मांसपिण्डः । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ कुजः । इति मेदिनी ॥ शुल्याख्यम् । इति शब्दरत्नावली ॥ किचुलुकः । इति त्रिकाण्डशेषः ॥ विषमग्रन्थिः । यथा काव्यप्रकाशे तदेतत् काव्यान्तर्गड़ुभूतमिति नास्य भेदलक्षणं कृतमित्यत्र तट्टीकाकारः ॥ ("न च अजागलस्तनवदन्तर्गड़ुना तेन किं वेति वाच्यम् ।" इति वेदान्तभाष्यम् ॥)

गड़ुरः, त्रि, (गड़ुल + रस्य लत्वम् ।) कुजः । इति शब्दरत्नावली ॥

गड़ुलः, त्रि, (गड़ुः शूलमांसपिण्डविशेषः अस्यास्तीति । गड़ु + "सिध्मादिभ्यश्चेति ।" ५ । २ । ९७ । इति लच् ।) कुजः । इत्यमरः । २ । ६ । ४८ ॥

गड़ेरः, पुं, (गड़ + "पतिकटिकुटिगड़िगुड़िदृङ्गिभ्य एरक् ।" उणां । १ । ५६ । इति एरक् ।) मेघः । इति त्रिकाण्डशेषः ॥

गड़ोत्थं क्ली, (गड़देशात् उत्तिष्ठति संजायते इति । गड़ + उत् + स्था + कः ।) गड़लवणम् । इति राजनिर्घण्टः ॥

गड़ोलः, पुं, (गड़ + "कपिगड़िगण्डिकटिपटिभ्य ओलच् ।" उणां । १ । ६७ । इति ओलच् ।) गुड़ः । इत्युणादिकोषः ॥ ग्रासः । इति हेमचन्द्रः ॥

गड़ुरिका, स्त्री, (गड़ुरः जलप्रवाहः सोऽस्यास्तीति । यद्वा गड़ुरः मेघपालः तमनुगच्छतीति । ठन् टाप् च ।) अज्ञातप्रवाहागमन्मूलो धारावाही नदीविशेषः । इति केचित् । मेघयूथेरनुगम्यमाना मेघी । इत्यन्ये । इति काव्यप्रकाशटीकायां महेश्वरः ॥

गड़ुकः, पुं, (गड़ुक इति निपातनात् ह्रित्वम् ।) जलपात्रविशेषः । इति शब्दरत्नावली ॥ गाड़ू इति भाषा ॥

गड्डुकः, पुं, (गड्डुक इति पृषोदरात् उकारस्य दीर्घत्वम् ।) गड्डुकः । इति शब्दरत्नावली ॥

गण, त् क संख्याने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) मूर्द्धन्योपधः । गणयति । इति दुर्गादासः ॥

गणः, पुं, (गण्यते गणयति वा कर्म्मण्यप् । कर्त्तरि अच् वा ।) समूहः । (यथा, हितोपदेशे १ । ६३ । [फलम् ।")
"न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये समं प्रभुः । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ।")
रुद्रानुचरः । (यथा, गोः रामायणे । ५ । ८६ । ७ ।
"धनाध्यक्षसभां देवः प्राप्तो हि वृषभध्वजः ।
उमासहायो देवेशो गणैश्च बहुभिर्वृतः ॥")
सेनासंख्याविशेषः । तद्यथा । गजाः २७ रथाः २७ अश्वाः ८१ पदातिकाः १३५ समुदायेन २७० । इत्यमरः । २ । ८ । ८१ ॥ (यथा, महाभारते ।
"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ॥")

संख्या । चोरनामगन्धद्रव्यम् । इति मेदिनी ॥*॥
गणेशः । यथा, महानिर्व्वाणतन्त्रे ।
"गाणपस्तु महेशानि ! गणदीक्षाप्रवर्त्तकः ॥"
अश्विन्यादिजन्मनक्षत्रानुसारेण देवमानुषराक्षसगण इति तु पारिभाषिकम् । यथा,—
"देमरामदेमादेदेरारामममदरादरा॥
देरारामममदेरारामममदेति गणत्रयम् ॥"
इति ज्योतिषरत्नमाला ॥
"पूर्व्वोत्तरात्रयञ्चैव भरण्यार्द्रा च रोहिणी ।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥
श्रविष्ठाशतभिषामूलधनिष्ठाश्चैवराक्षसाः ।
चित्रामघाविशाखाः स्युस्वारा राक्षसदेवताः ॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः ।
अनुराधा मृगशिरः अवर्णं देवतारकाः ॥"
इति निबन्धः ॥
(तस्य मिलनकथनं यथा, ज्योतिषे ।
"सप्तमी परमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च न्यूनमानुषराक्षसे ॥")
धातुसमूहः । यथा, मनोरमा ।
"भ्वाद्यदादिर्जुहोत्यादिर्दिवादिः स्वादिरेव च ।
तुदादयो धातुगणाः क्र्यादिश्चुरादिश्च गणा दश ॥"
(छन्दःशास्त्रोक्तपारिभाषिकाक्षरविशेषः । स तु म-न-भ-य-ज-र-स-त-ग-लसंज्ञः । इति छन्दोमञ्जरी ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । ४० ।
"विश्वरूपः स्वयं श्रेष्ठो बलवीरो बली गणः ॥"
दैत्यविशेषः । स तु अभिजिदिति नामान्तरस्य दैत्यस्य गुणवतो भार्य्यायां गुणवत्यां सम्भूतः । यथा, स्कन्दपुराणे गणेशखण्डे ३ अध्याये ।
"अथ सोऽप्यभिजित् पत्न्या सप्तद्वस्नानमाययौ ।
पर्व्वणि श्रद्धया युक्तश्चक्रे स्नानं तया सह ॥
लुप्तिता सा गुणवती पपौ चाञ्जलिना जलम् ।
यद्वीर्य्यं ब्रह्मणा त्यक्तं देवान्तदुरे गतम् ॥"
"भार्य्यागुणवती तस्य नवमासादनन्तरम् ।
पुत्रं प्रसूताद्रि शुभे दिव्यरूपं गुणाद्भुतम् ॥
ज्योतिर्विद्भिरनुज्ञातो गण इत्यभिधां पिता ।
कृत्वाभ्युदयिकं चक्रे यत्पौर्वे दग्धमेऽहनि ॥"
स च महादेवमाराध्य वरं लब्ध्वा त्रैलोक्यं निर्जित्य च कपिलमुनेश्चिन्तामणिमपहृतवान् । कपिलमुनिस्तु अस्मादपराधात् जातमन्युर्गणेशमाराधयामास । अथ प्रसन्नेन गणपतिना तद्गृहे अवतीर्य्य तं गणदैत्यं विनाशितवान् इत्येषा कथा तत्रैवाध्याये विस्तरशो द्रष्टव्या ॥)
गणकः, पुं, (गण्यति शुभाशुभमनुष्यभोगजनितफलं निरूपयतीति । गण तु क सङ्ख्याने + कर्त्तरि ण्वुल् ।) दैवज्ञः । ज्योतिर्वित् । तत्पर्य्यायः । सांवत्सरः २ ज्योतिषिकः ३ दैवज्ञः ४ मौहूर्त्तिकः ५ मौहूर्त्तः ६ ज्ञानी ७ कार्त्तान्तिकः ८ इत्यमरः । २।८।१४ ॥ ज्योतिषिकः ९ । इति तट्टीका ॥ स तु वर्णसङ्करजातिविशेषः । देवलादेरश्वागर्भजातः । तस्य कर्म्म तिथिवारादिज्ञापनम् । इति पराशरपद्धतिः ॥ स तु अम्बष्ठः । यथा,—
"कलिकाले महाघोरे ! पाषण्डा बहवो जनाः ।
सङ्गदोषान्महेशानि ! तत्त्वज्ञानहानितां व्रजेत् ॥
तस्मात् प्रयत्नतो देवि ! संसर्गं वर्ज्जयेत् सुधीः ।
वरं चाण्डालसंसर्गं कुर्य्यात्तु साधकोत्तमः ॥
तथाप्यसाध्यगणकं सर्व्वदा तं परित्यजेत् ॥"
इति शाक्तानन्दतरङ्गिण्यां षोड़शोल्लासे महिषमर्द्दिनीतन्त्रवचनम् ॥ तस्य लक्षणं यथा,—
"ज्योतिःशास्त्रविशेषज्ञः सुन्दराङ्गः सभापटुः ।
कुलक्रमागतः शुद्धो गणकः स्यान्महीपतेः ॥"
इति युक्तिकल्पतरुः ॥
(यदि च शास्त्रविशेषे गणकस्य निन्दादिकं श्रूयते तत्तु केवलं नक्षत्रजीविन एवेति बोध्यम् । प्रकृतज्योतिःशास्त्रन्तु द्विजातिभिरेववश्यमध्ययनीयं वेदाङ्गत्वात् । यथा,—
"संयुतोऽपीतरैः कर्णनासादिभि-
श्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।
तस्माद्द्विजैरध्ययनीयमेतत्
पुण्यं रहस्यं परमञ्च तत्त्वम् ॥"
इति सिद्धान्तशिरोमणिः ॥*॥
प्रजापतिपुत्रास्तारकाविशेषकेतवः । यथा,—
"तारकः पुञ्जनिकाख्या गणका नाम प्रजापतेरभवन्
पुत्राः ॥"
इति बृहत्संहिता । ११ । २५ ॥
संकीर्णजातिविशेषः । यथोक्तम् ।
"चर्म्मकारस्य द्वौ पुत्रौ गणको वाद्यपूरकः ॥")
गणकर्णिका, स्त्री, (गणस्य गणाधिपस्य कर्णवत् पत्रमस्याः ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥
गणकारः, पुं, (गणानां सैन्यानां कारः कर्त्ता सेनापरिचालनदक्षः ।) भीमसेनः । इति शब्दरत्नावली ॥ (गणं धात्वर्थप्रकाशकग्रन्थविशेषं करोतीति । कृ + अण् ।) धातुसंग्रहकर्त्ता । यथा, "गणकारवचनप्रमाणार्थमिदम् ।" इति कातन्त्रवृत्तिः ॥
गणकी, स्त्री, (गणकस्य पत्नी इति । तत्पत्न्यामिति ङीष् ।) गणकपत्नी । इति जटाधरः ॥
गणचक्रकं, क्ली, (गणाः धार्म्मिकगणास्तेषां चक्रं सम्भूय भोजनमत्र इति कप् ।) धार्म्मिकाणां सम्भूय भोजनम् । इति त्रिकाण्डशेषः ॥
गणता, स्त्री, (गणस्य धर्म्मः भावो वा इति तल् ।) गणस्य भावः । समूहत्वम् । पक्षपातित्वम् । इति लोकप्रसिद्धिः ॥
गणदीक्षी, [न्] पुं, (गणान् बहुशिष्यान् दीक्षयति दीक्षां कारयतीति ।) बहुशिष्यकः । इति मिताक्षरा ॥ (वाच्यलिङ्गे तु गणस्य शिवस्य गणेशस्य वा दीक्षा विद्यते अस्मिन् अस्य वा । दीक्षा + इनिः । शिवदीक्षितः ।) गणेशदीक्षिते त्रि । गणस्य गणेशस्य दीक्षा गणदीक्षा । इति महानिर्व्वाणतन्त्रम् ॥
गणदेवता, स्त्री, (गणः सङ्घः तद्रूपा देवता सम्भूय स्थिता देवता इत्यर्थः ।) संहतदेवताविशेषः । यथा,—
"आदित्या विश्ववसवस्तुषिता भास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥
आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः ।
वसवश्चाष्टसंख्याताः षट्त्रिंशत् तुषिता मताः ॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः ।
महाराजिकनामानो ह्येते चापि विंशतिः ॥
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः ।
एते च संहता देवास्तत्रादित्याः खनामतः ॥"
इति जटाधरः ॥
गणद्रव्यं, क्ली, (गणानां साधारणानां द्रव्यम् । यद्वा द्रव्याणां गण इति परनिपातः ।) साधारणद्रव्यम् । मिलितानेकस्वामिकासम्बन्धिद्रव्यम् । द्रव्यसमूहः । तत्र द्रव्याणां गण इति युत्पत्तिः ॥
गणनं, क्ली, (गण्यते इति । गण + भावे ल्युट् ।) संख्यानम् । गणा ठिक् देया इति च भाषा ॥ यथा, विश्वसारतन्त्रे ।
"येनैव लिखनं कुर्य्यात्तेनैव गणनं स्मृतम् ॥"
गणना, स्त्री, (गण + युच् टाप् च ।) गणनम् । संख्या । (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकी गणनापरा स्या-
त्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")
गणनाथः, पुं, (गणानां विघ्नकर्त्तृदेवविशेषाणां नाथः ।) गणेशः । इति शब्दरत्नावली ॥ (गणानां प्रमथानां नाथः स्वामी इति युत्पत्त्या शिवः ॥)
गणनायकः, पुं, (गणानां नायकः ।) गणेशः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १ । ७७ ।
"लेखको भारतस्यास्य भव त्वं गणनायक ! ॥"
गणानां देवसङ्घानां नायकः । यथा, भागवते । ५।१७।१३ । "यत्र ह देवपतयः खेः खेर्गणनायकैर्विहितमहार्हणाः ॥" इति ॥*॥ गणानां प्रमथानां नायकः । शिवः ॥)
गणनायिका, स्त्री, (गणानां नायकः शिवः तस्य शक्तिरिति टाप् अत इत्वं च गणनेत्री इत्यर्थः ।) दुर्गा । इति त्रिकाण्डशेषः ॥
गणनीयं, त्रि, (गण + अनीयर् ।) गणनार्हम् । संख्येयम् । तत्पर्य्यायः । गण्येयम् २ । इत्यमरः । ३ । १ । ६४ ॥ गणितव्यम् ३ गण्यम् ४ । इति व्याकरणम् ॥ संख्येयम् ५ । इति जटाधरः ॥
गणपतिः, पुं, (गणानां गणसंज्ञकानां देवानां पतिः अधीश्वरः स्वामी वा ।) गणेशः । इति हलायुधः ॥ (यथा, पद्मतन्त्रे । १ । १७० ।
"अन्तुं वाञ्छति शम्भवो गणपतेराद्यं क्षुधार्त्तः फणी
तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाग्रजम् ॥"
अग्रपूजनीयप्रधानदेवताविशेषः । यथा, यजुर्व्वेदीयवाजसनेयसंहितायाम् । १६ । २५ । "नमो गणेभ्यो गणपतिभ्यश्च वो नमो नम इति ॥"

बृहस्पतिः । यथा, ऋग्वेदे । २ । २३ । १ ।
"गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम् ॥"
शिवः । यथा, महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित् परमो मन्त्रः सर्व्वभावकरो हरः ॥"
आघर्ष्यणोपनिषद्विशेषः । यथा, मौक्तिकोपनिषदि प्रथमाध्याये ।
"त्रिपुरातपनदेवीभावनाभक्षजाबालगणपतिमहावाक्यगोपालतपनलक्ष्मीहयग्रीवेति ॥")

गणपर्व्वतः, पुं, (गणानां प्रमथगणानां गणपत्यादिदेवानां वा आवासरूपः पर्व्वतः । गणभूयिष्ठः पर्व्वतो वा ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ॥

गणपीठकं, क्ली, (गणस्य शिवस्य परमेश्वरस्येति यावत् पीठः, आसनमिव कायति प्रकाशते इति । कै + कः ।) वृत्तः । इति शब्दचन्द्रिका ॥

गणराज्यं, पुं, (गणानां बहूनां राज्ञीनां समाहारः गणशब्दस्य सङ्घावचनत्वात् तद्धितार्थेति द्विगुसमासः । "अहः सर्व्वैकदेशसङ्खातपुण्याच्च रात्रेः ।" ५ । ४ । ७८ । इत्यच् । सङ्घापूर्व्वं राज्यं क्लीवमिति लिङ्गानुशासने क्लीवत्वविधानात् "राज्ञाङ्घाहाः पुंसि ।" २ । ४ । २६ । इति क्लीवत्वम् ।) राज्ञिसमूहः । इत्यमरः ।१।४।६ ॥

गणरूपः, पुं, (गणाः बहुप्रकाराणि रूपाणि अस्य ।) अर्कवृक्षः । इत्यमरः ।२।४।८० ॥

गणरूपकः, पुं, (गणरूप + संज्ञायां कन् । गणरूप इव कायति प्रकाशते इति वा । कै + कः ।) राजार्कः । इति राजनिर्घण्टः ॥

गणरूपी, [न्] पुं, (गणाः बहुविधानि रूपाणि वर्त्तन्तेऽत्यादयः सन्त्यस्य इति अस्त्यर्थे इनिः ।) श्वेतार्कः । इति रत्नमाला ॥

गणवतीसुतः, पुं, (गणवत्याः सुतः ।) दिवोदासः । यथा, त्रिकाण्डशेषे ।
"धन्वन्तरिर्दिवोदासः काशिराजः सुधोद्भवः ।
पालकाप्यागणवतीकरेणुरुचिरासुतः ॥"

गणहासः, पुं, (गणान् गन्धद्रव्यगणान् हासयतीति । गण + हस् + णिच् + अच् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गणहासकः, पुं, (गणहास + स्वार्थे कः ।) चोरकनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२८ ॥

गणाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः । गणानां गणाख्यदेवविशेषाणां अग्रणीः ।) गणेशः । इति त्रिकाण्डशेषः ॥

गणाचलः, पुं, (गणानां वासाय अचलः गणभूयिष्ठोऽचलो वा ।) कैलासपर्व्वतः । इति जटाधरः ॥

गणाधिपः, पुं, (गणानां अधिपः अधीश्वरः ।) गणेशः । इत्यमरः । १ । १ । ४० ॥ शिवः । इति हलायुधः ॥

गणिः, क्ली, (गण + "सर्व्वधातुभ्य इन् ।" उणां । ४।११७। इति इन् ।) गणनम् । इति आकरणम् ॥

गणिका, स्त्री, (गणः लम्पटगणः उपपतित्वेनास्त्यस्याः इति ठन् ।) वेश्या । (यथा, हरिवंशे । ८५ । ६ ।
"गणिकानां पृथङ्नाम्ना शुभैरास्तरणाम्बरैः ॥")
यूथिका । इत्यमरः । २ । ६ । १६ ॥ गणिकारिकाकृत्तः । इति शब्दरत्नावली ॥ हस्तिनी । इति जटाधरः ॥

गणिकारिका, स्त्री, (गणिः गणनं करोतीति । कृ + ण्वुल् + टाप् + अत इत्वञ्च । यद्वा गणिकेत्याख्यां ऋच्छतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । स्वार्थे कन् अत इत्वञ्च ।) वृत्तविशेषः । वड़ गणियारी इति भाषा ॥ तत्पर्य्यायः । श्रीपर्णम् २ अग्निमन्थः ३ कणिका ४ जया ५ । इत्यमरः ।२। ४।६६ ॥ तेजोमन्थः ६ हविर्मन्थः ७ ज्योतिष्कः ८ पावकः ९ अरणिः १० वह्निमन्थः ११ मथनः १२। इति रत्नमाला ॥ अग्निमथनः १३ तर्कारी १४ वैजयन्तिका १५ अरणीकेतुः १६ श्रीपर्णी १७ कर्णिका १८ नादेयी १९ विजया २० अनन्ता २१ नदीजा २२ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । अनिलकफश्लेष्मामिमान्द्याग्निमलबन्धश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ क्षुद्रगणिकारिकागुणपर्य्यायौ क्षुद्राग्निमन्थशब्दौ द्रष्टव्यौ ॥

गणिकारी, स्त्री, (गणिर्गणनं करोति पूजादिषु आत्मानं गणनं कारयतीत्यर्थः । कृ + कर्म्मण्यण् ततो ङीष् ।) पुष्पवृक्षविशेषः । गणियारी इति भाषा । तत्पर्य्यायः । काञ्चनिका २ काञ्चनपुष्पी ३ वसन्तदूती ४ गन्धकुसुमा ५ अलिमोदा ६ वासन्ती ७ मदनमादिनी ८ । अस्या गुणाः । सुरभितरत्वम् । चिरदोषशमनत्वम् । दाहश्लेष्मकामक्रीड़ाडम्बरसम्भरहरत्वम् । चापलप्रसरत्वञ्च । इति राजनिर्घण्टः ॥ (विशेषश्चास्या गणिकारिकाग्निमन्थशब्दयोर्बोद्धव्यः ॥)

गणितं, त्रि, (गण + कर्म्मणि क्तः ।) ज्ञातगणनम् । तत्पर्य्यायः । संख्यातम् २ । इत्यमरः । ३ । १ । ६४ ॥ (चिन्तितम् । यथा, शिवपुराणे ज्ञानसंहितायाम् । १२ । २७ ।
"दुःखं च विविधं तच्च गणितं न तया तथा ॥")

गणितं, क्ली, (गण्यते इति । गण + क्तः ।) अङ्कशास्त्रम् । तत् द्विविधं व्यक्तं पाटीगणितम् । अव्यक्तं बीजगणितम् । इति लीलावती ॥ गणनम् । यथा, नैषधे । ३ । ४० ।
"पारे परार्द्धं गणितं यदि स्यात् ॥"

गणिपिटका, स्त्री, द्वादशाङ्गी । सा तु जिनानां विद्याविभागः । इति हेमचन्द्रः । २ । १५६ ॥

गणेयः, त्रि, (गण + एय ।) संख्येयः । गणनीयः । इत्यमरः । ३ । १ । ६४ ॥ (यथा, नैषधे ।३।४० ।
"गणेयनिःशेष गुणोऽपि स स्यात् ॥")

गणेरुः, पुं, (गण + बाहुलकात् एरुः ।) कर्म्मकारवृक्षः । इति मेदिनी । रे । १४८ ॥

गणेरुः, स्त्री, (गण + बाहुलकात् एरुः ।) वेश्या । हस्तिनी । इति मेदिनी । रे । १४८ ॥

गणेरुका, स्त्री, (गणेरूणां गणिकानां गणिकासु वा मध्ये कायति प्रकाशते इति । कै + कः ।) कुट्टिनी । इति त्रिकाण्डशेषः ॥

गणेशः, पुं, (गणानां प्रमथसमूहानां यद्वा गणानां जीवजातानां ईशः ईश्वरः ।) शिवः । इति हारावली । ८ ॥ (यथा, महाभारते । ३ । कैराते । ३६ । ७८ ।
"प्रसादये त्वां भगवन् ! सर्व्वभूतमहेश्वर ! ।
गणेशं जगतः शम्भुं लोककारणकारणम् ॥")
गणानां गणाख्यदेवविशेषाणां विघ्नाख्यदेवानां वा ईशः नियन्ता ।) शिवपुत्रः । (यथा, महाभारते । १ । १ । ७३ ।
"कार्य्यस्य लेखनार्थाय गणेशः स्मर्य्यतां मुने ! ॥")
तत्पर्य्यायः । विनायकः २ विघ्नराजः ३ द्वैमातुरः ४ गणाधिपः ५ एकदन्तः ६ हेरम्बः ७ लम्बोदरः ८ गजाननः ९ । इत्यमरः ।१।१। ४० ॥ विघ्नेशः १० पर्शुपाणिः ११ गजास्यः १२ आखुगः १३ । इति हेमचन्द्रः । २ । १२१ ॥ शूर्पकर्णः १४ । इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ तस्योत्पत्तिः । तत्र पार्व्वतीं प्रति बृहन्नारदरूपश्रीकृष्णवाक्यम् । यथा,—
"न भवेद्विष्णुभक्तिश्च विष्णुमाये ! त्वया विना ।
त्वद्व्रतं लोकशिक्षार्थं त्वत्तपस्तव पूजनम् ॥
सर्व्वेभ्यश्चफलदात्री त्वं नित्यरूपा सनातनी ।
गणेशरूपः श्रीकृष्णः कल्पे कल्पे तवात्मजः ॥
त्वत्क्रोड़मागतः शिप्रमित्युक्त्वान्तरधीयत ।
कृत्वान्तर्द्धानमीशश्च बालरूपं विधाय सः ॥
जगाम पार्व्वतीतल्पं मन्दिराभ्यन्तरस्थितम् ।
तल्पस्थे शिववीर्य्ये च मिश्रितः स बभूव ह ॥
ददर्श गेहशिखरं प्रसृतबालको यथा ।
शुद्धचम्पकवर्णाभः कोटिचन्द्रसमप्रभः ॥
सुखदृश्यः सर्व्वजनैश्चतुरश्रिविवर्द्धकः ।
अतीवसुन्दरतनुः कामदेवविमोहनः ॥
सुखं निरुपमं बिभ्रत् शारदेन्दुविनिन्दकम् ।
सुन्दरे लोचने बिभ्रत् चारुपद्मविनिन्दके ॥
ओष्ठाधरपुटं बिभ्रत् पक्वबिम्बविनिन्दकम् ।
कपालञ्च कपोलन्तदतीव सुमनोहरम् ॥
नासाग्रं रुचिरं बिभ्रत् खगेन्द्रचञ्चुनिन्दकम् ।
त्रैलोक्येषु निरुपमं सर्व्वाङ्गं बिभ्रदुत्तमम् ॥
ययाच शयने रम्ये प्रेरयन् हस्तपादकम् ॥"
तस्य शूलेश्वरदर्शनात् मस्तकविनाशः विष्णुकर्त्तृकगजमस्तकसंयोगश्च यथा,—
"सा च देववधूभूता शूलिनं प्रोवाच कौतुकात् ।
पश्य मां मत्पतिसुतमिति नियतिः केन वार्य्यते ॥
पार्व्वतीवचनं श्रुत्वा सोऽगमेने हृदा स्वयम् ।
पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो ॥
बालं द्रष्टुं मनश्चक्रे न बालमातरं शूलिः ।
विषसमानसः पूर्व्वं शुष्ककण्ठौष्ठतालुकः ॥
सबलोचनकोणेन ददर्श च शिशोर्मुखम् ।
शूलिश्च दृष्टिमात्रेण चिच्छेद मस्तकं सुने ! ॥
विस्मितास्ते सुराः सर्व्वे चित्रपुत्तलिका यथा ।
देवाश्च शैलाः गन्धर्व्वाः शिवः कैलासवासिनः ॥

तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुडं हरिः।
जगाम पुण्यभद्रां स उत्तरस्यां दिशि स्थिताम् ॥
पुण्यभद्रानदीतीरे ददर्श्श काननस्थितम्।
गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम् ॥
शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा।
स्थापयामास गरुडे रुधिराक्तं मनोहरम् ॥
आगत्य पार्व्वतीस्थानं बालं दृष्ट्वा खवक्षसि।
रुचिरं तच्छिरः कृत्वा योजयामास बालके ॥
ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन लीलया।
जीवनं जीवयामास हुंकारोच्चारणेन च ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥

अस्य ध्यानम्।

"खर्व्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥"

इति पुराणम् ॥ * ॥

ध्यानान्तरं यथा,—

"सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामम्।
बालेन्दुद्योतमौलिं करिपतिवदनं दानपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम् ॥"

इति तन्त्रसारः ॥

(तस्य नमस्कारमन्त्रो यथा,—

"देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥"

इति पूजापद्धतिः ॥)

एकपञ्चाशद्गणेशाः। यथा,—

"विघ्नेशो विघ्नराजश्च विनायकश्चिरोत्तमौ।
विघ्नकृत् विघ्नहर्त्ता च गणेशद्विसुदन्तकाः ॥
गजवक्त्रनिरञ्जनौ कपर्द्दी दीर्घजिह्वकः।
शूङ्कर्णश्च वृषभध्वजश्च गणनायकः ॥
गजेन्द्रः सूर्पकर्णश्च स्थाणुलोचनसंज्ञकः।
लम्बोदरमहानन्दौ चतुर्मूर्त्तिसदाशिवौ ॥
आमोददुर्म्मुखौ चैव सुमुखश्च प्रमोदकः।
एकपादो द्विजिह्वश्च सुरवीरः सदामुखः ॥
वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः।
सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः ॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः।
भक्तप्रियो गणेशश्च मेघनादकसंज्ञकः ॥
त्र्यापी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे।
तरुणारुणसङ्काशा गजवक्त्राखिलोचनाः ॥
पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः॥" * ॥

तेषामेकपञ्चाशच्छक्तयश्च यथा,—

"ह्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती।
स्वाहामेधाकान्तिकामिन्यो मोहिन्यपि वेनटी ॥
पार्व्वती ज्वलिनी नन्दा सुयशाः कामरूपिणी।
उमा तेजोवती सत्या विघ्नेशानी सुरूपिणी ॥
कामदा मदजिह्वा च भूतिः स्याद्भौतिका सिता।
रमा च महिषी प्रोक्ता मदङ्गिनी च विकर्णपा ॥
भृकुटिः स्यात्तथा लज्जा दीर्घघोणा धनुर्द्धरा।
यामिनी रात्रिसंज्ञा च कामान्धा च शुचिप्रभा ॥
लोलाक्षी चपला दीप्तिः सुभगा दुर्भगा शिवा।
भर्गा च भगिनी चैव भोगिनी सुभगा मता ॥
कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः।
सर्व्वालङ्कारशोभाढ्याः प्रियाङ्क्स्थाः सुशोभनाः ॥
रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरावृताः ॥"

इति शारदातिलकटीकायां राघवभट्टः ॥

गणेशकुसुमं, क्ली, (गणेश इव कुसुमम्। रक्तवर्णसादृश्यात्तथात्वम्।) रक्तकरवीरः। इति राजनिर्घण्टः ॥

गणेशभूषणं, क्ली, (गणेशस्य भूषणमिव।) सिन्दूरम्। इति राजनिर्घण्टः ॥

गणोत्साहः, पुं, (गणाय गणार्थं वा यूथीकरणायेत्यर्थः उत्साहोऽस्य। यद्वा गणान् यूथान् उत्साहयतीति। उत्+साह+अण्।) गण्डकः। इति त्रिकाण्डशेषः ॥ गण्डार इति भाषा ॥

गण्डः, पुं, (गडि आस्रवेदयोः+अच्। यद्वा गम गतौ+"नमन्ताडुः।" उणा। १।११३। इति डः।) हस्तिकपोलः। (यथा, पञ्चतन्त्रे १।३५६।

"प्रमाणाभ्यधिकस्यापि गण्डश्यामदद्युतेः।
पदं मूर्द्ध्नि समाधत्ते केशरी मत्तदन्तिनः ॥")

तत्पर्य्यायः। कटः २। इत्यमरः। २। ८। ३७ ॥ करटः ३। इति तट्टीका ॥ कटकः ४ हस्तिगण्डकः ५। इति शब्दरत्नावली ॥ कपोलः। इत्यमरः। २। ६। ६० ॥ गाल इति भाषा ॥ (यथा, कुमारे। ७। ८२।

"तदीयदार्द्रारुणगण्डलेखं
उच्छ्वासिकालाञ्जनरागमच्छ्रोः ॥")

खड्गी। वीर्य्यङ्गम्। पिटकः। चिह्नम्। वीरः। हयभूषणम्। बुद्बुदः। इति मेदिनी ॥ स्फोटकः। ग्रन्थिः। इत्यमरटीकायां रमानाथः ॥ विष्कुम्भादिसप्तविंशतियोगान्तर्गतदशमयोगः। (यथा, ज्योतिषवचने।

"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")

तत्र जातफलम्।

"स्वकार्य्यकर्त्ता परकार्य्यहर्त्ता
गण्डोद्भवः स्यादतिगण्डवाक्यः।
अत्यन्तधूर्त्तः पुरुषः कुरूपः
सुहृन्नृणामतितापदाता ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

दोषजनकोऽश्विन्यादिनक्षत्राणां भागविशेषः। यथा,—

"अश्विनीमघमूलानां तिस्रो गण्डाद्यनाडिकाः।
अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः ॥
मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः।
सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः ॥" * ॥

तत्र जातस्य दोषो यथा,—

"सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः।
आत्मानं मातरं तातं विनिहन्ति यथाक्रमम् ॥"

तस्य शान्तिर्यथा,—

"सर्व्वेषां गण्डजातानां परित्यागो विधीयते।
तातेनादर्शनं वापि यावत् वाग्दानिको भवेत् ॥
कुङ्कुमं चन्दनं कुष्ठं गोरोचनमथापि वा।
घृतैरेवान्वितं स्नात्वा चतुर्भिः कलसैर्बुधः ॥
सहस्राक्षेण मन्त्रेण बालकं स्नापयेत्ततः।
पिप्पलयुक्तं दिवाजातं माद्रयुक्तञ्च रात्रिजम् ॥
स्नापयेत् पिप्पलाद्भ्यां सन्ध्ययोरुभयोरपि।
कांस्यपात्रं घृतैः पूर्णं गण्डदोषोपशान्तये ॥
दद्याद्धेनुं हिरण्यञ्च ग्रहांश्चापि प्रपूजयेत्।
मूलायाः प्रथमे पादे पितुर्व्वै पूर्व्विनश्यति ॥
द्वितीये नियतां पीड़ां मातुः कुर्य्यात् पितुस्तथा।
तृतीये धननाशाय चतुर्थे सर्व्वसम्पदः ॥
अत्यल्पेन फलं ज्ञेयमश्लेषास्वपि पूर्व्ववत्।
वल्मीकमृत्तिकां नद्यास्तूभयतटमृत्तिकाम् ॥
गोविषाणमृदश्चापि दन्तिमृदश्च निःक्षिपेत्।
तीर्थाम्भःपञ्चगव्येन स्नानं मातुः पितुः शिशोः ॥
दिवा जाता तु या कन्या निशि जातस्तु यः पुमान्।
नोभयोर्गण्डदोषः स्यात् नाचलो हन्ति पर्व्वतम् ॥"

इति ज्योतिषतत्त्वम् ॥

गण्डकः, पुं, (गण्ड+स्वार्थे कन्।) खड्गी। इत्यमरः। १। १०। १७ ॥ गण्डार इति भाषा ॥ खड्गः। संख्याप्रभेदः। गण्डा इति भाषा। विघ्नविशेषः। अवच्छेदः। अन्तरायः। इति मेदिनी। के ८२ ॥ (देशविशेषः। यथा, महाभारते। २। २६। ४।

"ततः स गण्डकान् शूरो विदेहान् भरतर्षभः ॥")

भूषणम्। यथा, कादम्बर्य्याम्। "बाहुनखपङ्क्तिमण्डिता गण्डकाभरणा च ॥" ग्रन्थिः। यथा, तत्रैव। "गोरोचनालिखितभूर्ज्जपत्रगर्भान् मन्त्रगण्डकान्॥" स्फोटकरोगविशेषः। यथा, तत्रैव। "अनेकवेत्राघातनिर्म्मितबहुगात्रगण्डकम् ॥")

गण्डकारी, स्त्री, (गण्डं भग्नास्थिग्रन्थिमित्यर्थं करोति संयोजयतीति।) खदिरवृक्षः। इति शब्दचन्द्रिका ॥ वराहक्रान्ता। इति रत्नमाला ॥

गण्डकाली, स्त्री, (गण्ड+ङ+"कर्म्मण्यण्।" ३। २। १। इत्यण् ततो ङीप्। ह्रस्य लत्वं यद्वा गण्डेषु ग्रन्थिषु काली यस्याः।) खदिरवृक्षः। इत्यमरः। २। ४। १४१ ॥

("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित्॥"

इति वैद्यकरत्नमालायाम् ॥)

गण्डकी, स्त्री, (गण्डक+स्त्रियां जातौ ङीष्।) स्वनामख्याता नदी। इति मेदिनी। ८२ ॥ यथा, स्मृतिः।

"गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम्।
पाषाणं तद्भवं यत्तत् शालग्राममिति स्मृतम् ॥"

तत्र शालग्रामोत्पत्तिकारणं यथा,—

"गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधेः।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः।
गण्डकि! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे! ॥
अनवच्छिन्नया भक्त्या वरं वरय सुव्रते! ॥
किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि! ॥

गरुडस्यापि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे ॥
अहो देव ! मया दृष्टो दुर्दृशो योगिनामपि ।
त्वया सर्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
तदनु त्वं प्रविष्टोऽसि पुरुषरूपेण चोच्यते ।
त्वल्लीलोन्मीलिते विश्वे कः खलोऽस्ति वै पुमान्॥
अनाद्यन्तमपर्यन्तं यद्ब्रह्म श्रुतिबोधितम् ।
तदेव त्वं महाविष्णो ! यस्यां वेद स वेदवित् ॥
त्वमेवाद्या जगन्माता या शक्तिः परमा स्मृता ।
तां योगमायां प्रकृतिप्रधानमिति वक्ष्यते ॥
निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपी निरञ्जनः ।
आनन्दरूपः शुद्धात्मा त्वकर्मा निर्विकारकः ॥
त्वां योगमायामाविश्य कर्तृत्वं प्राप्नवानसि ।
प्रकृत्या दृश्यमानेऽस्मिन् ब्रह्मा साक्षी निगद्यते ॥
प्रकृतेस्त्रिगुणैरस्मिन् दृश्यमानेऽपि नान्यथा ।
सान्निध्यमात्रतो देव ! त्वयि स्फुरति कारणे ॥
स्फटिके हि यथा स्वच्छे जवाकुसुमरागतः ।
प्रकाशते त्वत्प्रकाशात् ज्योतीरूप ! नतास्मि ते॥
ब्रह्मादयोऽपि कवयो न विन्दन्ति यथार्थतः ।
तत् कथं वेद्म्यहं मूढा तव रूपं निरञ्जनम् ॥
मूढस्य जगतो मध्ये स्थिता किञ्चिदजानती ।
त्वया दृष्टा ज्ञता चास्मि योग्ययोग्यमविन्दती ॥
तेन लोके महत्त्वञ्च त्वत्प्रसादेन चेच्छती ।
यदयाचे तत्तपोदार ! तस्मै दातुं त्वमर्हसि ॥
दयालुरसि दीनेषु नेति मां न वद प्रभो ! ।
ततः प्रोवाच भगवान् देवि ! यद्यत्त्वमिच्छसि ।
तद्याचय वरारोहे ! अदेयमपि सर्वथा ।
यद्दुर्लभं मनुष्याणां शीघ्रं याचय मां प्रति ॥
महद्दर्शनमप्राप्य कोवाऽपूर्णमनोरथः ।
ततो हिमांशोः सा देवी गरुडस्थो लोकतारिणी ॥
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ।
यदि देव ! प्रसन्नोऽसि देयो मे वाञ्छितो वरः॥
मम गर्भगतो भूत्वा विष्णो ! मत्पुत्रतां व्रज ।
ततः प्रसन्नो भगवान् चिन्तयामास गोपतेः ॥
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ।
दास्यामि याचितं येन लोकानां भवमोचनम् ॥
इत्येवं तपया देवो निश्चित्य मनसा स्वयम् ।
गरुडोमवदत् प्रीतः शृणु देवि ! वचो मम ॥
शालग्रामशिलारूपी तव गर्भगतः सदा ।
तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥
मत्सान्निध्यात् नदीनां त्वमतिश्रेष्ठा भविष्यसि ।
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात्
हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ।
यः स्नास्यति विधानेन देवर्षिपितृतर्पकः ॥
तर्पयेत् स्वपितॄंस्तापि तारयित्वा दिवं नयेत् ।
स्वयं मम प्रियो भूत्वा ब्रह्मलोकं गमिष्यति ॥
यदि त्वयुत्सृजेत् प्राणान् मम कर्मपरायणः ।
सोऽपि याति परं स्थानं यत्र गत्वा न शोचति ॥
एवं दत्त्वा वरान् देवे तत्रैवान्तरधीयत ।
ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिन् शुभलोचने !॥"
इति वराहपुराणे सोमेश्वरादिलिङ्गमहिमा-
ऽभिमुक्तक्षेत्रवर्णनादिमहिमनामाध्यायः ॥

गरुडकुसुमं, क्ली, (गरुडेषु गजानां कपोलदेशेषु कुसुममिव । हस्तिनां हि कटदेशात् कपोलयोरेव मदवारि क्षरति ।) हस्तिमदः । तत्पर्य्यायः । उत्कटः २ । इति हारावली ।१६१॥
गरुडकूपः, पुं, (गरुडे गिरेरूर्द्धदेशे कूप इव ।) पर्व्वतस्योच्चस्थानम् । (यथा,—
"उद्देशो गरुडकूपस्तु पर्व्वतस्याभिधीयते ॥"
इति हारावली । ५१ ॥)
गरुडगात्रं, क्ली, (गरुडः स्फोटक इव वन्धुरत्वं उच्चनीचत्वं गात्रेऽस्य ।) फलविशेषः । इति शब्दचन्द्रिका ॥ आताः इति भाषा ॥
गरुडदूर्व्वा, स्त्री, (गरुडा ग्रन्थिला दूर्व्वेति कर्म्मधारयः ।) दूर्व्वाविशेषः । गाँटिया दूर्व्वा इति भाषा ॥ तत्पर्य्यायः । गरुडाली २ अतितीव्रा ३ मत्स्याक्षी ४ वारुणी ५ मीनपर्णी ६ सूचीनेत्रा ७ श्यामग्रन्थिः ८ ग्रन्थिला ९ ग्रन्थिपर्णी १० सूचीपत्रा ११ श्यामकाण्डा १२ जलस्था १३ शुक्लाक्षी १४ कलाया १५ । अस्या गुणाः । मधुरत्वम् । वातपित्तज्वरभ्रमक्षयाश्रमहृद्दोषनाशित्वम् । शिशिरत्वञ्च । इति राजनिर्घण्टः ॥ यथा, भावप्रकाशे ।
"गरुडदूर्व्वा तु गरुडाली मत्स्याक्षी शुक्लाह्वयः ।
गरुडदूर्व्वा हिमा लोहदाहविषी ग्राहिणी लघुः ।
तिक्ता कषाया मधुरा वातक्षत् कटुपाकिनी ।
दाहक्षयावलाश्वासकुष्ठपित्तज्वरापहा ॥"
गरुडमाला, स्त्री, (गरुडानां ग्रीवाजातस्फोटविशेषाणां माला समूहोऽस्याम् ।) गलरोगविशेषः । तत्पर्य्यायः । गलगरुडः २ । इति हेमचन्द्रः । ३ । १३१ ॥ तस्यौषधं यथा,—
"अजमोदः ससिन्दूरो हरितालनिशाद्वयम् ।
क्षारद्वयं फेनयुतमार्द्रकं शूरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः ।
एभिः सर्व्वसमं तैलमजामूत्रेण योजितम् ॥
मृद्वग्निना पचेदेतदर्कक्षीरेण संयुतम् ।
अजमोदादिकं तैलं गरुडमालां व्यपोहति ॥
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ।
रोपणं मृदुभावञ्च तैलेनानेन कारयेत् ॥
अजमोदादिकं तैलं महावीर्य्यञ्च रोगनुत् ॥"
इति गारुडे १७८ अध्यायः ॥
अपि च । तत्रैव १६० अध्याये ।
"द्विजयष्ट्याञ्च वै मूलं पिष्ट्वं तण्डुलवारिणा ।
गरुडमालां हरेत्क्षिप्रात् कुरङ्गगलगरुडकम् ॥"
अपि च । तत्रैव १६१ अध्याये ।
"अपराजितायाः मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गरुडमालां न संशयः ॥"
अपि च ।
"विक्ष्यामिमन्यद्योगकपाटलापारिभद्रकम् ।
प्रसारणञ्चगन्धा च दृढती कण्टकारिका ॥
बला चातिबला राजा प्रदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दशपलिकान् भागान् क्वाथयेत् सलिलेऽमले ।

तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
घृतावशेषसञ्चैव तैलतुल्यं प्रदापयेत् ॥
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तत् शृणु ।
घृतपुष्पा देवदारु शालपर्णी वचाशुण्ठ ॥
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
कृच्छ्रलं पार्श्वशूलञ्च गरुडमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुश्चांश्च पुमान् भवेत् ॥
गर्भमन्धतरी विन्द्यात् किं पुनर्मानुषी स्त्रियः ।
अश्वानां वातभग्नानां कुञ्जराणां वृषां तथा ।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ॥"
इति गारुडे १६८ अध्यायः ॥ * ॥
अन्यच्च ।
अथ गरुडमालाया लक्षणमाह ।
"कर्कन्धुकोलामलकप्रमाणैः
कक्षासमन्या गलवंक्षणेषु ।
मेदःकफाभ्यां चिरमन्दपाकैः
स्याद्गरुडमाला बहुभिस्तु गण्डैः ॥"
कर्कन्धुः क्षुद्रबदरी । कोलं दृढबदरम् । चिरमन्दपाकैः चिरेण मन्दोऽल्पः पाको येषां तैः॥*॥
अथ गरुडमालाया एवावस्थाविशेषमपचीमाह ।
"ते ग्रन्थयः केचिदवाप्तपाकाः
स्रवन्ति नश्यन्ति भवन्ति चान्ये ।
कालानुबन्धं चिरमादधाति
सैवापचीति प्रवदन्ति केचित् ॥"
ते ग्रन्थयः गरुडमालाया एवं गरुडाः केचिदवाप्तपाकाः सन्तः स्रवन्ति केचित् नश्यन्ति अन्ये भवन्ति च । कालानुबन्धाच्चिरमादधाति या गरुडमाला चिरं तिष्ठति सैवापची इति केचिद्वदन्ति ॥ * ॥
अपचीनां साध्यत्वादिकमाह ।
"साध्या स्मृता पीनसपार्श्वशूल-
काशज्वरच्छर्द्दियुता त्वसाध्या ।" * ॥
अथ ग्रन्थिः । ग्रन्थेर्लक्षणमाह ।
"वातादयो मांसमसृक् च दुष्टा
संदूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
विग्रथितं ग्रन्थिरूपम् । अतो ग्रन्थिः ॥ * ॥
अस्य निदानादिपूर्व्वलिखितम् । अथ गरुडमालाचिकित्सा ।
"काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन संयुतः ।
माक्षिकाढ्यः सक्षौद्रः क्वाथो वरुणमूलजः ॥
गरुडमालां हरत्याशु चिरकालानुबन्धिनीम् ।
पलमङ्कपलं वापि पिष्ट्वा तण्डुलवारिणा ॥
काञ्चनारत्वचं पीत्वा गरुडमालां व्यपोहति ।
काञ्चनारस्य शुङ्गीयात् त्वचं पञ्चपलोन्मिताम्॥
नागरस्य कषायाच्च मरीचस्य पलं पलम् ।
पथ्याविभीतधात्रीणां पलमर्द्धं पृथक् पृथक् ॥
वरुणस्याष्टमेकञ्च पत्रकैलात्वचं पुनः ।
टङ्कं टङ्कं समादाय सर्व्वाण्येकत्र चूर्णयेत् ॥

यावच्चूर्णमिदं सर्व्वं तावानेवात्र गुग्गुलुः ॥
सङ्कल्प्य सर्व्वमेकत्र पिण्डं कृत्वा विधारयेत् ।
गुटिकाः प्राणिकाः कृत्वा प्रभाते भक्षयेन्नरः ॥
गण्डमालां जयत्युग्रामपचीमर्ब्बुदानि च ।
ग्रन्थ्यर्ब्बुदानि गुल्मांश्च कुष्ठानि च भगन्दरम् ॥
प्रदेयश्चानुपानार्थं क्वाथो खदिरसम्भवः ।
क्वाथः खदिरसारस्य क्वाथः कोष्णोऽभयाभवः ॥"

इति काञ्चनारगुग्गुलुः ॥ * ॥

"चक्रमर्दकमूलस्य कल्कं दत्त्वा विपाचयेत् ।
कैशोराजरसे तैलं कटुकं त्रुटनाग्निना ॥
पादशेषे विनिःक्षिप्य सिन्दूरमवतारयेत् ।
एतत्तैलं निहन्त्याशु गण्डमालां सुदारुणाम् ॥"

इति चक्रमर्दतैलम् ॥ * ॥

"गुञ्जामूलकलैस्तैलं विपक्वं द्विगुणाम्भसा ।
हरेदभ्यङ्गनस्याभ्यां गण्डमालां सुदारुणाम् ॥"

इति गुञ्जातैलम् ॥*॥ अथापच्यश्चिकित्सा ।

"चन्दनं सारिवा लाक्षा वचा कटुकरोहिणी ।
एभिस्तैलं घृतं पीतं समूलामपचीं हरेत् ॥"

इति चन्दनाद्यतैलम् ॥ * ॥

"योषं विड्ङ्गं मधुकं सैन्धवं देवदारु च ।
तैलमेभिः घृतं नस्यात् सकृत्क्षामपचीं हरेत् ॥"

योषादितैलम् ॥ * ॥ अथ ग्रन्थिचिकित्सा ।

"सर्ज्जिकामूलकक्षारगृञ्जचूर्णसमन्वितम् ।
एतेन सहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च संचिकित्सेत् ॥
ग्रन्थिमुत्कृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुज्यते ॥"

इति भावप्रकाशः ॥

(यथास्याः सकारणलक्षणचिकित्सितानि ।

"दुष्टाम्बुपानसकदन्ननिषेवणाच्च
सञ्जायते च क्रिमिसम्भवगण्डमाला ।
सा मारुतेन कफपित्तभवे विकारे
संसर्पते क्रिमिजदोषगणाच्च गण्डात् ॥
वातेन वातसदृशानि च लक्षणानि
पित्तेन दाहसरुजव्रणशोषतापाः ।
सा श्लेष्मणा च घनशीतलसम्प्रयोगात्
स्यात् सन्निपातविहिता च समस्तलिङ्गैः ॥
तस्य चेमं प्रतीकारं वक्ष्यामि शृणु पुत्रक ! ।
रोहिणी विशदा चैव विजया च विभेदिनी ॥
कान्तारी वज्रपुष्पा च तथा चैन्द्रायुधा परा ।
इति सप्तविधा लूताः शृणु पश्चात् पृथक् पृथक् ॥
रक्तसुखा भवेद्रक्ता रक्तस्थाने च रोहिणी ।
विशदा मांसलस्थाने श्वेतवर्णा च दीर्घिका ॥
विजया च शिरो मध्ये पीतवर्णा यवप्रभा ।
भेदिनी मेदसः स्थाने श्वेता च नीलरेखिका ॥
कान्तारी च वसिमध्ये श्वेताङ्गा रक्तसुखिका ।
वज्रपुष्पा चास्थिमध्ये श्वेताक्षणा शिरा मता ॥
वज्रायुधा शिरान्ते च धूम्रा कृष्णा शिरा मता ।
रोहिण्यङ्गुलिमात्रेण स्नेहेन विशदा समा ॥
विजया च यवाकारा वर्त्तुला विजया तथा ।
अन्या नखाच्च विज्ञेया तण्डुली कण्टकानिभा ॥
रोहिणी विजया विशदा मांसस्थानसमाश्रिता ।
गुल्फे वा चास्थिसन्धौ च दृश्यते भेदिनी नरे ॥
कुक्षौ कर्णान्तरेऽपाङ्गे कान्तारी विद्धि पुत्रक ! ।
वज्रपुष्पा शिरसि च शिरान्तार्त्तिप्रदा मता ॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र ! प्रयत्नतः ।
सान्द्रपूयविसावञ्च गण्डीरञ्च व्रणं विदुः ॥
अत्यञ्च सरुजञ्चैव पक्वजम्बूसमप्रभम् ।
लूताव्रणानाञ्चैतानि अपक्वं यदि दृश्यते ॥
त्यक्त्वा सन्धिस्थमर्म्मस्थां लूताञ्चैव हि तद्व्रणम् ।
तदा तप्तेन तैलेन दाहयेत्तु विधीयते ॥
अङ्कोलञ्चैवमद्यानि पारिभद्रदलानि च ।
गृध्रधूमं कृष्णाजीरं गोमूत्रेण तु पेषितम् ॥
लेपनञ्च प्रशस्तञ्च लूतानां मारणे परम् ।
पिण्डीतकं विड्ङ्गानि तथा चैन्द्रीमूलकम् ॥
बीजपूरकमूलानि पेषितानि विलेपयेत् ।
गण्डमालां तथा घोरां हन्ति शीघ्रं प्रकण्टकाम् ।
स्नुहीक्षीरत्वार्कक्षीरं लूतास्थ्नि नियोजयेत् ॥
तेन कीटस्तु तन्मध्ये म्रियते नात्र संशयः ।
आस्यतो गिरिकर्णीञ्च चन्दनञ्च समांशकम् ॥
पिष्ट्वा लेपः प्रयोक्तव्यो लूतां हन्ति सुदारुणाम् ।
करवीरत्वार्कदुग्धं तथा च कटुतुम्बिकाम् ॥
निशाद्वयं जाङ्गलिकां तिलतैले विपाचयेत् ।
लूतामभ्यङ्गने हन्ति गण्डमालाञ्च दारुणाम् ॥
घृतं जात्यादिकं नाम तथा चात्र प्रयोजयेत् ।
अन्यान्यपि व्रणे यानि प्रोक्तानि च यथाविधि ॥"

इति महर्ष्याचेयभाषिते हारीतोत्तरे तृतीयस्थाने लूतागण्डमालाचिकित्सा नाम सप्तविंशोऽध्यायः ॥

"गलस्य पार्श्वे गलगण्ड एकः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ।
साध्याः स्मृताः पीनसपार्श्वशूल-
कासज्वरच्छर्द्युपयुक्तसाध्याः ॥
तेषां सिरा-काय-शिरो-विरेको
धूमः पुराणस्य घृतस्य पानम् ॥"

इति चरके चिकित्सास्थाने सप्तदशोऽध्याये ॥)

गण्डमालिका, स्त्री, (गण्डानां ग्रन्थीनां मालाऽस्या अस्यां वा इति कप् । ततष्टाप् अत इत्वञ्च ।) लक्ष्मालुवृक्षः । इति रत्नमाला ॥

गण्डशैलः, पुं, (गण्ड इव शैलः स्खलितस्थूलोपलः । शैलशब्दोऽत्र शैलावयवे वर्त्तते । "विशेषणं विशेष्येण बहुलम् ।" २ । १ । ५७ । इति समासः । यद्वा शैलस्य पर्व्वतस्य गण्ड इव । राजदन्तादित्वात् पूर्व्वनिपातः ।) गिरेश्च्युतः स्थूलोपलः । भूकम्पादिना पर्व्वतात् गलितो महान् प्रस्तरः । इत्यमरः । २ । ३ । ६ ॥ (यथा, आर्य्यासप्तशत्याम् । १९६ ।

"किं पुत्रि ! गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलसितगर्ज्जितदेष्णान्तर-
भ्रान्तीः ॥")

ललाटम् । इति हेमचन्द्रः । ४ । १०२ ॥

गण्डाङ्गः, पुं, (गण्ड इव उत्कृष्टमङ्गमस्य ।) खड्गी । इति शब्दचन्द्रिका ॥

गण्डारिः, पुं, (गण्डस्य रोगविशेषस्य अरिः । तन्नाशकत्वात्तथात्वम् ।) कोविदारवृक्षः । (यथा,—

"काञ्चनाल! काञ्चनकी गण्डारिः शोणपुष्पकः ॥"

इति भावप्रकाशः ॥)

गण्डाली, स्त्री, (गण्डं चलतीति । अल् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । गण्डेन ग्रन्थिना आल्यते भूष्यते वा । अल् + घञ् स्त्रियां ङीष् ।) श्वेतदूर्व्वा । इत्यमरः । २ । ४ । १५६ ॥ सर्पाक्षी । इति भावप्रकाशः ॥ गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

गण्डिः, पुं, (गडि + इन् ।) वृक्षस्य मूलाच्छाखावधिभागः । इति हेमचन्द्रः । ४ । १८६ ॥ गुँड़ि इति भाषा ॥

गण्डीरः, पुं, (गण्ड + ईरन् ।) समङ्गिला । घना इति ख्यातः । समठ इति ख्यातः । अनूपदेशजं शाकम् । इति केचित् । गुच्छिया इति ख्यातशाकम् । इति सर्व्वानन्दः । इत्यमरटीकायां भरतः ॥ ("गण्डीरः शाकविशेषो गण्डीनीति लोके गण्डारी मञ्जिष्ठा च ।" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य गुणा यथा, चरके सूत्रस्थाने २७ अध्याये ।

"वातुं वत्सादनी हन्यात् कफपित्तकरौ चिरकौ ॥")

वीरः । इति जटाधरः ॥

गण्डीरी, स्त्री, (गण्डीर + गौरादित्वात् ङीष् । यद्वा गण्डं रोगविशेषं ईरयति दूरीकरोति खनिर्जासादिभिरिति ईरः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ सिज इति भाषा ॥

गण्डुः, पुं स्त्री, (गण्ड्यते शिरोभागः स्राप्यतेऽत्र । गडि + अधिकरणे उनि ।) उपधानम् । इति जटाधरः ॥

गण्डूपदः, पुं, (गण्डूः गण्डयः ताभिरन्वितानि पदानि यस्य । शाकपार्थिवादित्वात् समासः ।) किञ्चुलुकः । इत्यमरः । १ । १० । २२ ॥ ("गण्डूपदस्य रूपाणि पिच्छिलानि स्थूलानि च ॥" इति वैद्यकमाधवकररोगविनिश्चये अर्शोऽधिकारे ॥)

गण्डूपदभवं, क्ली, (गण्डूपद इव भवति उत्पद्यते इति । भू + अच् ।) सीसकम् । इति हेमचन्द्रः । ३ । १०७ ॥

गण्डूपदी, स्त्री, (गण्डूपद + स्त्रियां अस्यार्थे ङीप् ।) किञ्चुलुकपत्नी । तत्पर्य्यायः । शिलीन्ध्री २ । इत्यमरः । १ । १० । २४ ॥ सिली ३ क्षुद्रकिञ्चुलुकजातिः । इत्यमरटीकायां भरतः ॥ छोटजाति ऊँचुया इति भाषा ॥

गण्डूषः, पुं, (गडि + "गण्डेश्च ।" उणां । ४ । ७८ । इति ऊषन् ।) मुखपूरणम् । (यथा, भागवते । ६ । १५ । ३ ।

"भीमस्तु विजयस्याथ काञ्चनो होचकस्ततः ।
तस्य जङ्घः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥")

हस्तिमुखाग्रभागः । प्रकृतिपरिमितम् । इति मेदिनी । षे ३५ ॥ (यदाह कश्चित् ।

"अगाधजलसञ्चारी विकारी न च रोहितः।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥")

गण्डूषा, पुं, (गण्डूष+टाप्।) गण्डूषः। इति लिङ्गादिसंग्रहे अमरः॥ "सुखपूर्णतोयमिति भरतः॥ रायमुकुटस्तु गण्डूषशब्दो सुखपूरणे स्त्रीलिङ्गः। पुंलिङ्गस्तु गण्डूषशब्दस्थुलुकपरिमाण इति। यथा,—

अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

इति तट्टीकासारसुन्दरी॥

गण्डोलः, पुं, (गडि+"कपिगडिगण्डिकटीति।" उणा० १।६७। इति ओलच्।) गुडः। घासः। इति हेमचन्द्रः। ३। ६०॥

गण्यं, त्रि, (गणं लब्धा इति। "धनगणं लब्धा।" ४।४।८४। इति यत्। यद्वा गण्यते इति। कर्म्मणि यत्। गणे भवः। "दिगादिभ्यो यत्।" ४। इति यदित्येके।) गणनीयम्। गणितयम्। तत्पर्य्यायः। गणेयम् २ संख्येयम् ३। इति हेमचन्द्रः।३।३३६॥ (यथा, ऋग्वेदे।३।७।५।

"दिवो रुचः सुरुचो रोचमाना इला येषां गण्या माहिना गीः॥")

गतं, त्रि, (गच्छति जानाति यातीति वा। "गत्यर्थाकर्म्मकेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) विज्ञातम्। यातम्। इति मेदिनी। ते १५॥ (यथा, किरातार्জ্জুनीये। ४। ५।

"सुनोद तस्य स्थलपद्मिनीगतं
वितर्कमाविष्कृतफेनसन्तति॥"

गम्यते इति। भावे क्ते तु गमने क्ली॥ यथा, माघे। १। २।

"गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः॥")

गतनासिकः, त्रि, (गता विरहिता नासिका अस्य।) नासिकारहितः। तत्पर्य्यायः। विग्रः २। इत्यमरः।२। ३। ४६॥ विखः ३। छिन्ननासिकः ४। इति शब्दरत्नावली॥ विनासिकः ५ विनसः ६। इति जटाधरः॥

गतसङ्गकः, पुं, (गतं सङ्गं सादरहेतुको मदो यस्मात् यस्य वा इति कप्।) निर्म्मदहस्ती। इति शब्दचन्द्रिका॥

गतागतं, क्ली, (गतं ऊर्द्धगमनं आगतं अधोगमनं यत्र।) पक्षिगतिविशेषः। इति जटाधरः॥ (गतञ्च आगतञ्च द्वयोः समाहारः।) यातायातम्। यथा, रसमञ्जर्य्याम्।

"गतागतकुतूहलं नयनयोरपाङ्गावधि॥"

(तथा च भगवद्गीतायाम्। ६। २१।

"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते॥"

गतं विनष्टं आगतं पुनः संसारागमनं यस्मात्। यं प्राप्य जीवो न पुनर्निवर्त्तते इति वाक्यात् तथात्वम्। पुं, महादेवः। यथा, महाभारते। १३। १७। ७८।

"नीतिर्ज्ञनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः॥")

गतार्त्तवा, स्त्री, (गतं निवृत्तं आर्त्तवं रजोऽस्याः।) वृद्धा। (गतं दुष्टं आर्त्तवमस्या इति।) वन्ध्या। इति राजनिर्घण्टः॥

गतिः, स्त्री, (गम्+भावे क्तिन्।) गमनकर्म्म। (यथा, रघुवंशे। १। ४।

"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्ब्बसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥")

तत्पर्य्यायः। वर्त्मते १ अयते २ लोटते ३ लोठते ४ स्यन्दते ५ कसति ६ सर्पति ७ स्रमति ८ स्रवति ९ संसृते १० अवति ११ द्योतति १२ ध्वंसति १३ वेनति १४ मार्ष्टि १५ गुरण्यति १६ ग्रवति १७ कालयति १८ पेलयति १९ कण्टति २० पिस्यति २१ विस्यति २२ मिस्यति २३ प्रवते २४ द्रवते २५ च्यवते २६ कवते २७ गवते २८ नवते २९ द्योदति ३० नक्षति ३१ सक्षति ३२ स्यक्षति ३३ सक्षति ३४ ऋक्षति ३५ तुरीयति ३६ चतति ३७ अतति ३८ गाति ३९ दयक्षति ४० सक्षति ४१ सरति ४२ रंहति ४३ यतते ४३ श्रमति ४५ धजति ४६ रजति ४७ लजति ४८ क्षियति ४९ धमति ५० मिनाति ५१ ऋक्षति ५२ ऋणोति ५३ स्वरति ५४ सिसर्त्ति ५५ वेधिषि: ५६ योधिषि: ५७ ऋच्छति ५८ ऋयते ५९ तेजति ६० दध्यति ६१ दध्नोति ६२ युध्यति ६३ धन्वति ६४ अरुषति ६५ आर्य्यन्ति ६६ डीयते ६७ तकति ६८ टीयते ६९ इषति ७० फणति ७१ हनति ७२ अर्हति ७३ मर्हति ७४ सहते ७५ नसते ७६ हर्यति ७७ इयर्त्ति ७८ ईर्त्ते ७९ ईक्षते ८० अयति ८१ खादति ८२ गन्ति ८३ आगनीगन्ति ८४ अंगन्ति ८५ जिन्वति ८६ जसति ८७ गमति ८८ प्रति ८९ भ्राति ९० ध्रयति ९१ वहते ९२ रथर्यति ९३ जेहते ९४ स्वःकति ९५ चुम्पति ९६ ष्वाति ९७ वाति ९८ याति ९९ द्रयति १०० द्राति १०१ डूलति १०२ एजति १०३ जमति १०४ जवति १०५ वष्टि १०६ अनिति १०७ पवते १०८ हन्ति १०९ सेधति ११० अगन् १११ अजगन् ११२ जिगाति ११३ पतति ११४ इन्वति ११५ क्रमति ११६ द्रवति ११७ वेति ११८ हयन्तात् ११९ एति १२० जगायात् १२१ अयुयुः १२२। इति द्वाविंशं शतं गतिकर्म्म। इति वेदनिघण्टौ २ अध्यायः॥ (गम्यतेऽस्यामिति। गम्+अधिकरणे क्तिन्।) मार्गः। (यथा, भगवद्गीतायाम्। ८। २६।

"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः॥")

दशा। (यथा, तत्रैव। ६। ३७।

"अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण! गच्छति॥"

गम्यते ज्ञायतेऽनया। करणे क्तिन्।) ज्ञानम्। (यथा, श्रीमद्भागवते। ७।५।३१।

"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः।

अन्धा यथान्धैरुपनीयमाना
स्तेऽपीशतन्त्र्यामुरुदाम्नि बद्धाः॥"

"स्वस्मिन्नेव आत्मन्येव अर्थः प्रयोजनं येषां ते स्वार्थास्तत्त्वविदस्तेषां गतिर्ज्ञानस्वरूपं विष्णुं दुराशया बहिरर्थमानिनो न विदुः जानन्ति।" इति तट्टीकायां स्वामी॥) याचा। (गम्यते प्राप्यतेऽनया इति। गम्+करणे क्तिन्।) अभ्युपायः। (यथा, महाभारते।१३।१४६।६१।

"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः॥")

गाङ्गीप्रगमः। सरणी। इति मेदिनी। १४॥ (गम्+भावे क्तिन्। प्रत्यवमर्षः। यथा, किरातार्জ্জुनीये। १०। ४०।

"मदनमुपदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम्॥"

"गतिः परिच्छदः।" इति तट्टीकायां मल्लिनाथः॥ प्रमाणम्। यथा, तत्रैव। १३। १५।

"क्षपेति चेदस्तु दृगः क्षतः क्षणा-
दनेन पूर्व्वं न मयेति का गतिः॥"

"मया नेत्यत्र का गतिः किं प्रमाणम्।" इति तट्टीकायां मल्लिनाथः॥ गम्यते इति। गम्+कर्म्मणि क्तिन्। स्वरूपम्। यथा, तत्रैव। ६।३६।

"चरतस्तपस्तव वनेषु सदा
न वयं निरूपयितुमस्य गतिम्।"

"तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुम्।" इति मल्लिनाथः॥ विषयः। यथा, कुमारे। ५। ६४।

"तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते।"

"मनोरथानां कामानां अगतिः अविषयः।" इति मल्लिनाथः॥ कर्म्मफलम्। यथा, भगवद्गीतायाम्।।६। १८।

"गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्॥"

"गतिः कर्म्मफलम्।" इति श्रीधरभाष्यम्॥ ग्रहभेदेन गतिभेदो यथा,—

"अष्टग्रस्वरूपा कालस्य सूनवो भगणाश्रिताः।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः॥"

इति सूर्य्यसिद्धान्तः॥

तच्च तु नक्षत्रभेदेन बुधग्रहस्य गतिभेदो यथा, बृहत्संहितायाम्। ७ अध्याये।

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्।
जलदहनपवनभयकृत् धान्यार्घक्षयविरोधी वा॥
विचरत्क्रूरवणधनिष्ठा प्राजापत्येन्दुविश्वदैवानि।
श्वदृन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम्॥
रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा।
ग्रस्तनिपातक्षुद्भयरोगानावृष्टिसन्तापैः॥
हस्तादीनि विचरन् षड्भक्षाणुपपीड़यन् गवामशुभः।
स्नेहरसार्घविवृद्धिं करोति चोर्व्वीं प्रभूतान्नाम्॥
आर्य्यमृगं द्यौतसुखं भद्रपदासूत्तरां यमेशं च।
चन्द्रस्य सुतो निशन प्राप्नुयात् धातुसङ्क्षयकृत्॥
याश्विनवारुणमूलान्युपश्वदृन् रेवतीश्च चन्द्रसुतः।

परयभिषंगौजौविकसलिलजतुरगोपघातकरः ॥
पूर्वाद्यृक्षचितयादेकमपीन्दोः सुतोऽभिन्दूद्दी-
यात् ॥
क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ॥
प्राक्षतविमिश्रसङ्क्षिप्तदीक्षायोगान्तघोर-
पापाख्याः ।
सप्तपराशरतन्त्रे नक्षत्रैः कीर्त्तिता गतयः ॥
प्राकृतसंज्ञा वायव्यान्यपेतामहानि बहुलाश्च ।
मिश्रा गतिः प्रदिष्टा अग्निश्विवपिलभुजगदैवानि॥
सङ्क्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति ।
तीक्ष्णायां भद्रपदाद्वयं सप्ताक्काश्वयुक् पौष्णम् ॥
योगान्तिकेति मूलं द्वे चाषाढे गतिः सुतस्येन्दोः ।
घोराश्रवणश्चाद्रं वसुदेवं वारुणं चैव ॥
पापाख्या सावित्रं मैत्रं भक्राग्निदैवतं चेति ।
उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह ॥
चत्वारिंशद्भिरहोभिरेका विंशतिर्दिनवकञ्च ।
नव मासार्द्धं दश चैकसंयुताः प्राकृताह्वानाम् ॥
प्राकृतगत्यामारोग्यवृद्धिरस्य प्रवृद्धयः क्षेमम् ।
सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम् ॥
ऋज्वतिवक्रा वक्रा विकला च मतेन देवल-
स्यैताः ।
पञ्च चतुर्हीकाहा ऋज्वादीनां षड्भ्यस्ताः ॥
ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्वि-
नाशयति ।
शूलभयदा च वक्रा विकला भयरोगसङ्जननी ॥
पौषाषाढश्रावणवैशाखेष्विन्दजः समाधेषु ।
दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्त्रीषु ॥
कार्त्तिकेऽयुजि वा यदि मासे
दृश्यते तनुभवः शिखिरांशोः ।
शूलचौरहुतभुग्गदतोय-
क्षुद्भयानि च तदा विदधाति ॥
रुद्राणि सौम्येऽस्तमिते पुराणि
यान्युक्षते तान्युपयान्ति मोक्षम् ।
अन्ये तु पञ्चादुदिते वदन्ति
लाभः पुराणां भवतीति तज्ज्ञाः ॥
हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा ।
स्निग्धमूर्द्धिरलघुश्च हिताय
व्यत्यये न शुभकृच्छशिपुत्रः ॥"
अन्येषामपि ग्रहाणां गतिस्तत्रैव क्रमशो विशे-
षतो द्रष्टव्या ॥)

गतिला, स्त्री, (गम्+"मिथिलादयश्च ।" उणां । १ । ५८ । इति इलच् मलोपे तुक् च ।) नदी-विशेषः । परम्परा भेदः । इत्युणादिकोषः ॥ (वेत्र-लता । इत्युज्ज्वलदत्तः ॥)

गत्वरः, त्रि, (गच्छतीति । गम्+"इत्नघञजि-सर्त्तिभ्यः करप् ।" ३ । २ । १६३ । इति करप् ।) गमनशीलः । इति व्याकरणम् ॥ (यथा, शान्ति-शतके । १ । २० ।
"वीभत्सया विषया जुगुप्सिततमः कायो वयो गत्वरं
सर्व्वैर्बन्धुभिरध्वनीव पथिकैर्योगे वियोगावहः॥")

गद, व्यक्तायां वाचि । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-अकं-सेट् ।) अव्यक्तायां मेघकर्त्तृक-शब्दे । गदयति मेघः । इति दुर्गादासः ॥
गद, भाषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गदति । सारङ्गं कतिचिच्च संजगदिरे इति गणक्लतानित्यत्वात् । इति दुर्गादासः ॥
गदं, क्ली, (गद्यते पीड्यतेऽनेन वा । गद+अपादाने करणे वा अप् ।) विषम् । इति राज-निर्घण्टः ॥
गदः, पुं, (गद्यते रुध्यतेऽनेन गदयति वा । गद+करणे अप् । कर्त्तरि घिच् अच् वा ।) रोगः । (यथा, हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
"यत्नः स्थानबलं प्राप्य विक्रमं कुरुते बली ।
तथा धात्वन्तरं प्राप्य विक्रमं कुरुते गदः ॥
"यावत् स्थानं समाश्रित्य विकारं कुरुते गदः ।
तावत्तस्य प्रतीकारः स्थानत्यागाद्बलीयसः ॥")
श्रीकृष्णभ्राता । इति हेमचन्द्रः । ३ । १२७ ॥
(यथा, भागवते । १ । १४ । २८ ।
"हृदीकः सप्तपोऽक्रूरो जयन्तगदसारणाः ॥")
भाषणञ्च । (औषधम् । यथा, महाभारते । १ । ४३ । २१ ।
"अथ शुश्राव गच्छन् स तक्षको जगतीपतिम् ।
मन्त्रैर्गदैर्विषहरे रक्ष्यमाणं प्रयत्नतः ॥"
असुरविशेषः । यथा, वायुपुराणे ५ अध्याये
"गदो नामासुरो ह्यासीत् वचाद्वचतरो दृढः ॥")
गदयित्नुः, पुं, (गदयति कामयुक्तं करोतीति । "स्तनिन्धिषिपृधिगदिमदिभ्यो णेरित्नुच् ।" उणां । ३ । २६ । इति इत्नुच् णेरयादेशश्च ।) कन्दर्पः । इति मेदिनी । १८२ ॥
गदयित्नुः, त्रि, (गदयति वाग्जालं वावदूकं काम-युक्तं वा करोतीति । "स्तनिन्धीति ।" उणां । ३ । २६० । इति इत्नुच् णेरयादेशश्च ।) जल्पाकः । कामुकः । इति मेदिनी । १८२ ॥
गदा, स्त्री, (गदयति पीड्यतनया विपक्षमितिगदः । गद्+घिच्+करणे अप्+टाप् च । गदयतीति घिच् अच् वा ।) स्वनामख्यातलौहमयास्त्रम् । इति मेदिनी । दे । ४ ॥ (यथा महाभारते । ६ । ५६ । ४५ ।
"तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्त्तराष्ट्रं वृकोदरः ॥"
गदायुद्धस्य गतिप्रहारादिभेदो यथा तत्रैव । ६ । ५७ । १७—२० ।
"अचरद्भीमसेनस्तु मार्गान् बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥
अक्षयन्तानि चित्राणि स्थानानि विविधानि च ।
परिमोक्षं प्रहाराणां वर्ज्जनं परिवारणम् ॥
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परिवर्त्तनसंवर्त्तमवप्लुतमुपप्लुतम् ॥
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु व्यक्तं वै परस्परम् ॥"
भगवतो विष्णोर्गदा तु गदसंज्ञकस्यासुरविशेष-स्यासृग्भ्यो देवशिल्पिना विश्वकर्म्मणा निर्म्मिता ।
अतएवासौ गदेति नाम्ना प्रसिद्धा अपरा गदा तु एतदुपलक्षणेनैव सिद्धेति बोध्यम् । यथा, वायु-पुराणे गयामाहात्म्ये ५ अध्याये ।
"गदो नामासुरो ह्यासीत् वचाद्वचतरो दृढः ।
प्रार्थितो ब्रह्मणो प्रादात् स्वशरीरास्थि दुस्सहम् ।
ब्रह्मोक्तो विश्वकर्म्मापि गदां चक्रेऽद्भुतां तदा ॥"
योगविशेषः । यथा, लघुजातकप्रकरणे ।१०।३।
"अनन्तरयोः केन्द्रयोर्यदा सर्व्वे ग्रहा भवन्ति ।
तदा गदानाम योगो भवति ॥")
पाटलाद्वृक्षः । इति शब्दचन्द्रिका ॥
गदाख्यं, क्ली, (गदलेन रोगनाशकतया व्याख्या-यते विभूयते इति गद इत्याख्याऽस्येति वा ।) कुष्ठम् । इति रत्नमाला ॥ कुड् इति भाषा ॥
गदागदौ, पुं, (गदं रोगं आगदयतः नाशयतः इति । आ+गद+णिच्+अच् । यद्वा गदं रोगं आगच्छति प्राप्नोतीति गदागं स्वं दायतः विशोधयतः इति । दैप् शोधने+कः ।) अश्विनी-कुमारौ । इति त्रिकाण्डशेषः ॥ द्विवचनान्तोऽयं शब्दः ॥
गदाग्रजः, पुं, (गदस्य वसुदेवपुत्रभेदस्य अग्रजः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ४ । २३ । १२ ।
"तावन्न योगगतिभिर्यतिरप्रमत्तो
यावन्न गदाग्रजकथासु रतिं न कुर्य्यात् ॥")
गदाग्र्यः, पुं, (अग्रे नीयते । अग्र+नी+क्विप् गदानां रोगाणां गदेषु वा अग्र्यः श्रेष्ठान् । अचिरात् संहारकत्वात् तथात्वम् ।) क्षय-रोगः । इति राजनिर्घण्टः ॥
गदाधरः, पुं, (गदां धरति धारयति वा । धृ+अच् । यद्वा धरति इति धरः गदायाः धरः । धृ+अन्तर्णिजन्तात् अजित्येके ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । १ । ८ । ३६ ।
"नेयं शोभिष्यते तत्र यथेदानीं गदाधर ! ।
त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥"
अस्य गदाधारणकथा यथा, वायुपुराणे गया-माहात्म्ये ५ अध्याये ।
"अथ कालेन महता मनौ स्वायम्भुवेऽन्तरे ।
हेतिरुचौ ब्रह्मपुत्रस्तप्तस्तेपे सुदारुणम् ॥
दिव्यवर्षसहस्राणां शतं वायुमभक्षयत् ।
उन्मुखोर्द्ध्वबाहुश्च पादाङ्गुष्ठभरेण हि ॥
एकेनातिष्ठदव्यग्रः ग्रीष्मपञ्चानिलाग्नयः ।
ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वरप्रदान् ॥
देवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्मुनिभिस्तथा ।
क्षयोऽग्नस्य चक्राद्यैरवध्यः स्यां महाबलः ॥
तथेत्युक्तान्तर्हितास्ते हेतिर्दैत्यानयाजयत् ।
इन्द्रत्वमकरोद्धेतिर्भीता ब्रह्मसुतादयः ।
हरिन्तं शरणं जग्मुरूचुर्हेतिं जहीति तान् ।
ऊचे हरिरवध्योऽयं हेतिर्दैवासुरैः सुराः ॥
महास्त्रं मे प्रयच्छध्वं हेतिं हन्मि हि येन तम् ।
इत्युक्तास्ते ततो देवा गदाख्यं हरये ददुः ॥
दधार तां गदामादौ देवैरुक्तो गदाधरः ।
गदया हेतिमाहत्य देवेभ्यश्चादिवं ददौ ॥"

बुद्धितत्त्वात्मकैव भगवतो विष्णोः कौमुदीनाम गदेति अध्यात्मशास्त्रेषु परिदृश्यते। तथाच विष्णुसहस्रनामभाष्ये।
"मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्।
धारयन् लोकरक्षार्थमुक्तश्चक्रगदाधरः॥"
महादेवः। स तु गयातीर्थे वर्त्तते। यथा, महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे।
"भोजपुरे भोजनाथो गयायाञ्च गदाधरः॥"
गदाधारिणि त्रि॥)
गदाभृत्, पुं, (गदां बिभर्त्ति इति। गदा+भृ+क्विप्। तुक् च।) विष्णुः। इति हेमचन्द्रः। २। १३३॥ (यथा, भागवते। १। १३। १०।
"भवद्विधा भागवतास्तीर्थभूता स्वयं विभो!।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता॥")
गदाम्बरः, पुं, (गदं सशब्दं अम्बरं यस्मात्।) मेघः। इति त्रिकाण्डशेषः॥
गदारातिः, पुं, (गदस्य रोगस्य अरातिः शत्रुः तन्नाशकत्वात्।) औषधम्। इति राजनिर्घण्टः॥
गदाङ्क, क्ली, (गद एव आङ्का आख्या यस्य।) कुष्ठम्। इति शब्दरत्नावली॥ कुड़ इति भाषा॥
गदी, [न्] पुं, (गदा विद्यते अस्मिन् वास्य। गदा+इनिः।) विष्णुः। इति हारावली। ६॥ (यथा, भगवद्गीतायाम्। ११। १७।
"किरीटिनं गदिनं चक्रिणञ्च
तेजोराशिं सर्व्वतो दीप्तिमन्तम्॥")
गदाविशिष्टे रोगयुक्ते च त्रि॥
गद्गदः, पुं, (गद्गदपदशब्दनाभिधायी। अत्यक्षरवक्ता।
तस्य वन्यामिपूर्ब्बकलक्षणं यथा,—
"आहृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्द्रियगद्गदान्॥"
इति माधवकरः॥
(अस्य शोके त्रि। यथा, अमरुशतके। ५३।
"खेदोऽस्मासु न मेऽपराध्यति भवान् सर्व्वेऽप-
राधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो
रुद्यते॥")
गद्गदध्वनिः, पुं, (गद्गदेन वायुपरिचालितश्लेष्मादिना योऽस्पष्टीकृतो ध्वनिः। गद्गदरूपो ध्वनिः वा।) हर्षशोकादिना अस्पष्टध्वनिः। तत्पर्य्यायः। मन्मन २। इति त्रिकाण्डशेषः॥
गद्य, क्ली, (गद्यते छन्दसा विना केवलं कथाप्रबन्धेरेव विरच्यते इति। गद+"गदमदचरयमश्चानुपसर्गे।" ३। १। १००। इति यत्।) पद्यभिन्नम्। कविकृतम्। अपादः पदसन्तानः। इत्यमरः। ३। ५। ३१॥ कविकृतभिन्ने त्रि। यथा गद्यो व्यवहारः गद्या वाक् गद्यं वचः। इति तट्टीकायां भरतः॥ (यथा, महाभारते। ३। २६। ३।
"यजुषाञ्चर्च्चां साम्नाञ्च गद्यानाञ्चैव सर्व्वशः।
आसीदुच्चार्य्यमाणानां निस्वनो हृदयङ्गमः॥")
"अपादः पदसन्तानो गद्यमाख्यायिका कथा॥
इति दण्डी॥
आख्यायिका तु आचष्टे प्रतिपादयति अत्यर्थं आख्यायते इत्येके। ज्ञातायां सत्यार्थायां कथायामाख्यायिका। सा च माधविका-वासवदत्ता-हर्षचरितादिः। कथा तु। प्रबन्धस्य कल्पना रचना वक्रकृता श्लोकसत्या कथा।
प्रबन्धकल्पनां श्लोकसत्यां प्राज्ञाः कथां विदुः।
परम्पराश्रया यस्मात् सा मताख्यायिका क्वचित्॥
इति कोलाहलाचार्य्यः॥
कथा कादम्बर्य्यादिः।" इत्यमरटीकायां भरतः॥
(गद्यन्तु त्रिधा विभक्तं यथा छन्दोमञ्जर्य्याम्।
"अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम्।
वृत्तकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥"
एतेषामपि लक्षणं यथा तत्रैव।
"अकठोराक्षरं स्वल्पसमासं वृत्तकं श्रुतम्।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्॥"
मतभेदेनैतत् क्वचित् चतुर्द्धापि दृश्यते। यथा, साहित्यदर्पणे। ६। २६५।
"वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्व्विधम्॥
आद्यं समासरहितं वृत्तभागद्वयं परम्।
अन्यदीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम्॥")
गद्यानकं, क्ली, (गद्येन औषधादिपरिमाणभेदेन आनीयते इति। आ+नी+डः। ततः स्वार्थे कन्।) अष्टचत्वारिंशत्रक्तिकापरिमाणम्।
("तुल्या यवाभ्यां कथिताश्च गुञ्जा
वल्लस्तिगुञ्जो धरणं गतेऽष्टौ।
गद्यानकन्तद्द्वयमिन्द्रतुल्यै-
र्वल्लैरुधैको घटकः प्रदिष्टः॥"
इति लीलावती॥)
चतुःषष्टिगुञ्जापरिमाणम्। इति वैद्यकम्॥ गद्याणकमिति कुत्रचित् पाठः॥
गन्तृ, [ऋ] त्रि, (गच्छतीति। गम्+कर्त्तरि तृच्।) गमनकर्त्ता। इति शाकरणम्। (यथा, नलोपाख्याने। २४। ३३।
"नश्येत्काङ्क्षा घृतं गन्तात्वाष्टतोऽन्यः पुमानिह॥"
गच्छति प्राप्नोतीति शीलार्थे भाविकाले तृच्। यथा, भगवद्गीतायाम्। २। ५२।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥"
अत्र शीलार्थे तृचन्तत्वात् न कर्म्मणि षष्ठीति बोध्यम्॥)
गन्तुः, पुं, (गच्छतीति। गम्+"सितनिगमीति।" उणां १। ७०। इति तुन्।) पथिकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ३। ५४। १८।
"युयोत नो अनपत्यानि गन्तोः प्रजावान्नः
पशुमाँ अस्तुगातुः॥")
गन्त्री, स्त्री, (गम्यतेऽनया इति। गम्+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति करणे ष्ट्रन्। ततो ङीष्।) शकटवहनीयगोरुकटम्। गरुर गाड़ि इति भाषा। इत्यमरः। २। ८। ५२॥
(गच्छतीति। गम्+कर्त्तरि ल्युट्+स्त्रियां ङीप्। गमनशीला गमनकारिणी वा। यथा, याज्ञवल्क्यः। ३। १०।
"गन्त्री वसुमतीनाथ सुदधिर्देवतानि च।
फेनप्रस्थः कथं नाथं मर्त्यलोको न याचते॥")
गन्त्रीरथः, पुं, (गन्त्रीणां गच्छन्तीनां स्त्रीणां गमनाय यो रथः।) शकटम्। तत्पर्य्यायः। मठः २। इति हारावली। १६६॥
गन्ध, क ड दृब्धि। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) क ड, गन्धयते। दृब्धि हिंसायाम्। गतिर्हिंसायाचनेष्विति रमानाथः। इति दुर्गादासः॥
गन्ध, क्ली, (गन्ध्यो विद्यतेऽस्य। अर्श आदित्वादच्। छणागुरु। इति राजनिर्घण्टः॥
गन्धः, पुं, (गन्ध+घञ्वा।) आमोदः। इति विश्वः। स तु घ्राणग्राह्यपृथिवीगुणः। यथा,—
"घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः।
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः॥"
इति भाषापरिच्छेदे। १०३॥
(अस्य लक्षणान्तरं यथा, घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं यद्वा पृथिवीवृत्तिमाद्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमिति॥) स तु दशविधः। (यथा, महाभारते। १३। १५०। ४०-४२।
"शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः॥
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान्॥
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च।
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत॥"
एतेषामपि केषु को गन्ध इत्येतद्विवृतिमाह।) इष्टः १ कस्तूरिकादौ। अनिष्टः २ शवादौ। मधुरः ३ मधुपुष्पादौ। अम्लः ४ आम्रातकादौ। कटुः ५ मरिचादौ। निर्हारी ६ हिङ्ग्वादौ। संहतः ७ चित्रगन्धः अनेकवस्त्वगतः। स्निग्धः ८ सद्यस्कप्रहृतादौ। रूक्षः ९ सार्षपतैलादौ। विशदः १० प्राक्तनगन्धादौ॥*॥
सौरभम्। तत्तु पञ्चविधम्। यथा,—
"गन्धश्च सम्यक् शृणुतं पुत्र वेतालभैरव!।
चूर्णीकृतो वा पृष्टो वा दाहाकर्षित एव वा॥
रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव वा।
गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः॥
गन्धचूर्णं गन्धपत्रं चूर्णं सुमनसां तथा।
प्रसूतगन्धयुक्तानां पञ्चचूर्णानि यानि च॥
तानि गन्धाङ्गयानि स्युः स गन्धः प्रथमः स्मृतः।१
पृष्टो मलयजो गन्धः शृरलश्च नमेरुजः॥
अगुरुप्रभृतिश्चापि दग्धः पङ्कः प्रदीयते।
दृष्ट्वा स दग्धो गन्धोऽयं द्वितीयः परिकीर्त्तितः॥२॥
देवदार्व्वगुरुत्वक्षशैलसारान्तचन्दनाः।
प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः॥
स दाहाकर्षितो गन्धस्तृतीयः परिकीर्त्तितः।३।
सगन्धकरवीरोत्थगन्धिनीतिलकं तथा॥

प्रभृतीनां रसो योऽसौ निष्पीड्य परिगृह्यते ।
स संमर्दोद्भवो गन्धः संमर्दज इतीष्यते ॥ ४ ॥
दृगनाभिसमुद्भूतस्तत्कोषोद्भव एव वा ।
गन्धः प्राग्यङ्गजः प्रोक्तो मोददः स्वर्गवासिनाम् ॥ ५ ॥
कर्पूरगन्धसाराढ्याः क्षोदे दृष्टे च संस्थिताः ।
चन्द्रभागादयश्चापि रसे पक्वे च सङ्गताः ॥
गन्धसारस्तु सर्व्वत्र संसर्गादौ प्रयुज्यते ।
दृगनाभिर्भवेद्दृष्टश्चूर्णोऽप्यन्यस्य योगतः ॥
एवं सर्व्वेषु सर्व्वत्र गन्धो भवति पञ्चधा ।
दृष्टादिभावादन्योन्यं गन्धः प्रीतिकरः परः ॥
गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः ।
सर्व्वैः पञ्चविधैश्चैव प्रविष्टो भवति क्षणात् ॥"*॥
"गन्धो मलयजो यस्तु देवे पैत्ते च सम्मतः ।
तत्पङ्को वा रसो वापि चूर्णो वा विष्णुतुष्टिदः ॥
सर्व्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः ।
तस्मात् सर्व्वप्रयत्नेन दद्यान्मलयजं सदा ॥
क्षणागुरुः सकर्पूरः सहितो मलयोद्भवैः ।
वैष्णवीप्रीतिदो गन्धः कामाख्यायाश्च भैरव ! ॥
कुङ्कमागुरुकस्तूरीचन्द्रभागैः समीकृतैः ।
त्रिपुराप्रीतिदो गन्धस्तथा चण्डाश्च शम्भुना ॥
देवतोद्देशपूर्व्वेण गन्धान् सम्पूज्य साधकः ।
देवायेज्याय वितरेत् सर्व्वसाध्येषु पूजकः ॥
गन्धेन लभते कामं गन्धो धर्म्मप्रदः सदा ।
अर्थानां साधको गन्धो गन्धे मोक्षः प्रतिष्ठितः ॥
अयं वां कथितो गन्धः पुत्रौ वेतालभैरवौ ! ॥
इति कालिकापुराणे ६८ अध्यायः ॥

प्रतिवेशी । लेशः । सम्बन्धः । गन्धकः । इति मेदिनी ॥ (यथा, प्रयोगाङ्गते ।
"शोधितो यस्तु गन्धः स्यात् जराव्याधुरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थिक्षत् ॥")
गर्व्वः । इति हेमचन्द्रः ॥ शोभाञ्जनः । इति शब्दरत्नावली ॥ दृष्टचन्दनम् । यथा, "दृष्टो मलयजो गन्धः ।" इति शुद्धितत्त्वम् ॥

गन्धकः, पुं, (उग्रो गन्धोऽस्यास्तीति । "अर्श आदिभ्योऽच् ।" ५।२।१२७। इत्यच् ततः स्वार्थे कन् ।) शोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥ उपधातुविशेषः । तत्पर्य्यायः । गन्धाश्मा २ सौगन्धिकः ३ । इत्यमरः । २।६।१०२ ॥ गन्धिकः ४ सुगन्धिकः ५ । इति तट्टीका ॥ गन्धपाषाणः ६ गन्धाश्मा ७ । इति रत्नमाला ॥ गन्धमोदनः ८ पूतिगन्धः ९ अतिगन्धः १० वरः ११ सुगन्धः १२ दिव्यगन्धः १३ गन्धः १४ रसगन्धकः १५ कुष्ठारिः १६ क्रूरगन्धः १७ कीटघ्नः १८ शूरभूमिजः १९ गन्धी २० । इति शब्दरत्नावली ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तीव्रगन्धत्वम् । अतिवह्निकारित्वम् । विषकुष्ठकण्डूतिखजुत्वगदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कृमिश्लीपदनेत्ररोगनाशित्वम् । इति राजवल्लभः ॥ तस्य भेदाः ।
"श्वेतो रक्तश्च पीतश्च नीलश्चेति चतुर्व्विधः ।
गन्धको वर्णतो ज्ञेयो भिन्नभिन्नगुणाश्रयः ॥
श्वेतः कुष्ठापहारी स्याद्रक्तो लोहप्रयोगकृत् ।
पीतो रसे प्रयोगार्हो नीलो वर्णान्तरोचितः ॥"
इति राजनिर्घण्टः ॥ * ॥

अथ गन्धकस्योत्पत्तिनामलक्षणगुणाः ।
"श्वेतद्वीपे पुरा देव्याः क्रीड़न्त्या रजसाद्भुतम् ।
दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ।
प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत ॥
गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो वलिर्वैलवसापि च ॥
चतुर्द्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ।
रक्तो हेमक्रियासक्तः पीतश्चैव रसायने ।
व्रणविलेपने श्वेतः क्षयाः श्रेष्ठः सुदुर्ल्लभः ॥"
श्रेष्ठो हेमक्रियादिषु सर्व्वत्र प्रशस्ततरः ॥ * ॥
"गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ॥
हन्ति कुष्ठत्रयश्लीहकफवातान् रसायनः ।
अशोधितो गन्धक एष कुष्ठं
करोति तापं विषमं शरीरे ।
सौख्यञ्च रूपञ्च बलं तथौजः
शुक्रं निहन्त्येव करोति चासम् ॥"*॥
तस्य शोधनविधिर्यथा,—
"लोहपात्रे विनिःक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते ततः समानं क्षिपेन्नवकं रजः ॥
विद्रुतं गन्धकं दृष्ट्वा तदुवस्त्रे विनिःक्षिपेत् ।
यथा वस्त्रादिनिःसृत्य दुग्धमध्येऽखिलं क्षिपेत् ॥
एवं स गन्धकः शुद्धेत् सर्व्वकर्म्मोचितो भवेत् ॥"
इति भावप्रकाशः ॥
"शोधितो यस्तु गन्धः स्यात् जराव्याधुरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थिक्षत् ॥"
इति प्रयोगाङ्गतम् ॥

गन्धकन्दकः, पुं, (गन्धमूलः गन्धप्रधानो वा कन्दोऽस्य ततः कप् स्वार्थे कन् वा ।) कशेरु । इति वैद्यकम् ॥

गन्धकारिका, स्त्री, (गन्धं सुरभिप्रधानं मण्डनं करोतीति । गन्ध + कृ + ण्वुल् ततष्टाप् कापि अत इत्वञ्च ।) वेरिन्दी । सा तु परवेश्मस्था स्ववशा स्निग्धकारिका । इति हलायुधः ॥

गन्धकालिका, स्त्री, (गन्धं प्रशस्तगन्धं पराशरसुनेर्ब्बरप्रभावेन दूरवाहिगात्रसौरभं कलयति धारयतीति । कल + णिच् + अच् ङीष्च । ततः स्वार्थे कन् टाप् च पूर्व्वह्रस्वः ।) व्यासमाता । इति हेमचन्द्रः ॥

गन्धकाली, स्त्री, (गन्धं प्रशस्तदूरवाहिगात्रसौरभं कलयतीति । कल + णिच् अच् ङीष्च । यद्वा, गन्धवती काली । मध्यपदलोपिसमासः ।) व्यासमाता । इति शब्दरत्नावली ॥ (इयं हि दाशराजकन्या पुरा बाल्यसमये मत्स्यगन्धा कालीत्येतन्नाम्ना ख्याताऽसीत् । ततः कदाचित् नदीपरपारं जिगमिषुणा मुनिप्रवरपराशरेण सङ्गता तस्यै ऋषेर्वरप्रभावेन निजगात्रे पद्मपुष्पवत् सौरभमवाप्य ततः प्रभृति पद्मगन्धा गन्धकालीति नाम्ना च विश्रुताऽभवत् । परं तस्यामिव कन्यायां तदा पराशरौरसात् कानीनपुत्रो महर्षिर्व्यासः सञ्जातः । ततो गच्छति काले महात्मना भीष्मेण राज्यं दारपरिग्रहञ्च न करिष्यामीति निदारुणं प्रतिश्रुत्य दाशराजसकाशात् समानीता भुवनविश्रुता सा पद्मगन्धाढ्या गन्धकाली तत्कामुकाय पित्रे शान्तवे समर्पिता । एतद्विवरणं महाभारते १। सम्भवे । ६६-१०० । अध्याययोर्विशेषतो दर्शनीयम् ॥ अस्या हेतोरेव नरपतिरुग्रायुधः समरे भीष्मेण निहतः । यथा, हरिवंशे १२०।४७-५० ।
"स चापुत्र्यायुधस्तात ! दुर्ब्बुद्धिरभवत्तदा ।
प्रदीप्तचक्रो बलवान् नीपान्तकरणोऽभवत् ॥
स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् ।
पितर्य्युपरते मह्यं आवयामास किल्बिषम् ॥
मामभाष्यैः परिवृतं शूरयानं धरणीतले ।
उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् ॥
अद्यत्वं जननीं भीष्म ! गन्धकालीं यशस्विनीम् ।
स्त्रीरत्नं मम भार्य्यार्थे प्रयच्छ कुरुनन्दन ! ॥"
ईदृशं जुगुप्सितवाक्यं दूतमुखादाकर्ण्यामितप्रतापो महात्मा भीष्मः अशौचान्ते तं दुरात्मानं समराङ्गणे समाहूय निपात्य च राज्ञे काम्पिल्याय तत् पैतृकं राज्यं समर्पयत् । अस्मिन्नेवाध्याये एतत् सर्व्वं वृत्तं सविशेषं द्रष्टव्यम् ॥)

गन्धकाष्ठं, क्ली, (गन्धप्रधानं सुगन्धसमन्वितं काष्ठमस्य । कर्म्मधारयो वा ।) अगुरुकाष्ठम् । इति त्रिकाण्डशेषः ॥ शुभ्रचन्दनम् । इति राजनिर्घण्टः ॥

गन्धकुटी, स्त्री, (गन्धस्य सुगन्धस्य कुटी आलय इव गन्धबाहुल्यात् तथात्वम् ।) सुराणामगन्धद्रव्यम् । इत्यमरः । २।४।१२३ ॥

गन्धकुसुमा, स्त्री, (गन्धं सुरभियुक्तं कुसुमं यस्याः ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥

गन्धकेलिका, स्त्री, (गन्धं केलयति गमयति प्रापयति सन्निकर्षस्थानिति । गन्ध + केल + णिच् + अच् ततः स्वार्थे कन् अत इत्वञ्च । गन्धं केलतीति खुल् वा ।) कस्तूरी । इति राजनिर्घण्टः ॥

गन्धकोकिला, स्त्री, (गन्धमूलिका गन्धप्रधाना वा कोकिला ।) गन्धद्रव्यविशेषः । अस्या गुणाः । स्निग्धत्वम् । उष्णत्वम् । कफनाशित्वम् । तिक्तत्वम् । सुगन्धित्वम् । इति भावप्रकाशः ।

गन्धखेड़ं, क्ली, (गन्धस्य खेड़ः खेलोऽत्र । डलयोरैक्यात्तथात्वम् ।) गन्धवीरणम् । गन्धबेणा इति भाषा । तत्पर्य्यायः । भूतृणम् २ रौहिषम् ३ गोमयप्रियम् ४ । इति रत्नमाला ॥

गन्धखेड़कं, क्ली, (गन्धेन खेड़ति खेलतीति । खेल् + खुल् । गन्धस्य खेड़ः खेलोऽत्र इति कप् वा ।) गन्धतृणम् । इति शब्दरत्नावली ॥

गन्धचेलिका, स्त्री, (गन्धं चेलति गच्छतीति । चेल् + खुल् + टाप् अत इत्वञ्च ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्या विवृतिर्वर्णिता ॥)

गन्धजातं, क्ली, (गन्धेन सह जातं उत्पन्नम्।) तेजपत्रम्। इति शब्दरत्नावली॥

गन्धज्ञा, स्त्री, (गन्धः इष्टानिष्टगन्धः ज्ञायते ऽनया इति। ज्ञा+करणे कः ततष्टाप्।) नासिका। इति हेमचन्द्रः।३।२४४॥

गन्धतूर्य्यं, क्ली, (गन्धे विनष्टयोर्द्वयोर्गां ग्रीवितवसादिगन्धयुक्तहिंसाप्रधानस्थाने रक्षत्येते इत्यर्थः। आहन्यमानं स्थितं वा यत् तूर्य्यम्।) वाद्यविशेषः। तत्पर्य्यायः। रणतूर्य्यम्२ महास्वनः३। इति शब्दरत्नावली॥

गन्धलशं, क्ली, (गन्धं सुगन्धान्वितं लशम्।) सुगन्धलशम्। तत्पर्य्यायः। सुगन्धभूलशम्२ सुरसः सुरभिः सुगन्धिः५ सुखवासः६। अस्य गुणाः। सुगन्धित्वम्। ईषत्तिक्तत्वम्। रसायनत्वम्। स्निग्धत्वम्। मधुरत्वम्। शीतलत्वम्। कफपित्तश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

गन्धत्वक्, क्ली, (गन्धयुक्ता गन्धप्रधाना वा त्वगस्य।) एलवालुकम्। इति राजनिर्घण्टः॥

गन्धदला, स्त्री, (गन्धयुक्तं दलं पत्रमस्याः।) अजमोदा। इति राजनिर्घण्टः॥

गन्धधूमजः, पुं, (गन्धाढ्यात् धूमात् जायते उत्पद्यते इति। जन्+डः।) खादुनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धधूलिः, स्त्री, (गन्धप्रकाशकः धूलिः अणुचूर्णं वा अस्याः।) कस्तूरी। इति हेमचन्द्रः।

गन्धनं, क्ली, (गन्ध गतिहिंसायाचनेषु+भावे ल्युट्।) उत्साहः। प्रकाशनम्। सूचनम्। हिंसा। इति मेदिनी॥ ने। ५७॥

गन्धनकुलः, पुं, (गन्धः दुर्गन्धप्रधानो नकुल इव।) छुछुन्दरी। इति हारावली॥ ८३॥ छुंछा इति भाषा॥

गन्धनाकुली, स्त्री, (गन्धयुक्ता नाकुली राज्ञा।) राज्ञा। इत्यमरः।२।४।११४॥ कन्दविशेषः। तत्पर्य्यायः। महासुगन्धा २ सुवहा ३ सर्पाक्षी ४ फणिहन्त्री ५ नकुलाढ्या ६ अहिशुक् ७ विषमर्दनिका ८ अहिमर्दनी ९ विषमर्दनी १० महाहिगन्धा ११ अहिलता १२। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। त्रिदोषानेकविषनाशित्वम्। नाकुल्याः किञ्चित् श्रेष्ठत्वम्। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"नाकुली सुरसा राज्ञा सुगन्धा गन्धनाकुली।
नकुलेष्टा सुगन्धाक्षी सर्पाक्षी विषनाशिनी॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्।
भोगिलूतादष्टिकासुविषव्यक्रिमिव्रणान्॥"

इति भावप्रकाशः॥

("राज्ञा सुरसा सुगन्धा श्रेयसी सुवहा सहा।
सुगन्धा सर्पगन्धाख्या नाकुली गन्धनाकुली॥"

इति वैद्यकरत्नमालायाम्॥)

गन्धनामा, [न्] पुं, (गन्धेति पदपूर्व्वं नामास्य।) रक्ततुलसी। इति रत्नमाला॥

गन्धनासी, स्त्री, (गन्धनासन्+संज्ञायां ङीष् जातौ नासन्तात् ङीष् वा।) क्षुद्ररोगविशेषः। तल्लक्षणम्। यथा,—

"बाहुकक्षांसपार्श्वेषु क्षणास्फोटा सवेदनाः।
पित्तप्रकोपसम्भूता कक्षामिति विनिर्द्दिशेत्॥
एकान्तु ताडयीं दृष्ट्वा पिड़कां स्फोटसन्निभाम्।
त्वग्जातां पित्तकोपेन गन्धनाम्नीं प्रचक्षते॥"
ताडयीं बाहादिषु क्षुण्णां सवेदनाञ्च॥ * ॥

तच्चिकित्सा यथा,—

"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सति चिकित्सकः।
पैत्तिकस्य विसर्पस्य क्रियया पूर्व्वसूक्तया॥"

इति भावप्रकाशः॥

गन्धनाली, स्त्री, (गन्धाय गन्धज्ञानार्थं नाली प्रणालीव। गन्धग्रहणार्थं नालीव वा।) नासिका। इति त्रिकाण्डशेषः॥

गन्धनिलया, स्त्री, (गन्धस्य इष्टानिष्टगन्धस्य निलया आश्रयीभूता। गन्धस्य निलयोऽत्र वा स्त्रियां टाप्।) नवमल्लिका। इति शब्दचन्द्रिका॥

गन्धनिशा, स्त्री, (गन्धात् गन्धहेतोर्गन्धेन वा निशा हरिद्रेव।) गन्धपत्रा। इति राजनिर्घण्टः॥

गन्धपत्रः, पुं, (गन्धवत् पत्रमस्य।) श्वेततुलसी। इति रत्नमाला॥ मरुवः। वर्व्वरः। नारङ्गः। बिल्वः। इति राजनिर्घण्टः॥

गन्धपत्रा, स्त्री, (गन्धाढ्यं पत्रमस्याः।) शटीभेदः। पलाश इति मालवे प्रसिद्धा। तत्पर्य्यायः। शूला २ तिक्तकन्दिका ३ वनजा ४ शटिका ५ वन्या ६ तवचीरी ७ एकपत्रिका ८ गन्धपीताह्वा ९ गन्धाढ्या १० गन्धाढ्या ११ गन्धपत्रिका १२ दीर्घपत्रा १३ गन्धनिशा १४ वेदसुखा १५ सुपाकिनी १६। अस्या गुणाः। कटुत्वम्। स्वादुत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। कफवातकासच्छर्द्दिज्वरनाशित्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः॥

गन्धपत्रिका, स्त्री, (गन्धपत्रा+संज्ञायां कन् अत इत्वञ्च।) गन्धपत्रा। अजमोदा। इति राजनिर्घण्टः॥ (विवरणमस्या गन्धपत्राशब्दे ज्ञातव्यम्॥)

गन्धपत्री, स्त्री, (गन्धपत्र+गौरादित्वात् ङीष्।) अम्बष्ठा। अम्बगन्धा। अजमोदा। इति राजनिर्घण्टः॥

गन्धपलाशिका, स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः ङीष्। संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च। कप् टाप् अत इत्वञ्च इत्येके।) हरिद्रा। इति हारावली॥ ६३॥

गन्धपलाशी, स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः। गौरादित्वात् ङीष्।) शटी। इति भावप्रकाशः॥ (यथाह शब्दार्थचिन्तामणिः।

"भवेद् गन्धपलाशी तु कषाया याहिनी लघुः।
तिक्ता तीक्ष्णा च कटुका कृमिश्वासस्य मलनाशिनी।
दोषकासव्रणश्वासशूलहिक्काग्रहापहा॥")

गन्धपाषाणः, पुं, (गन्धयुक्तः पाषाणः। पाषाणस्येव काठिन्यात् तथात्वम्।) गन्धकः। इति जटाधरः॥ (यथास्य पर्य्यायाः।

"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि।
सौगन्धिकश्च कथितो बलिर्बलरसापि च॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ यत्रास्य व्यवहारस्तद्यथा,—

"गन्धपाषाणचूर्णेन यवक्षारेण लेपितम्।
सिध्मानाशं व्रजत्याशु कटुतैलयुतेन तु॥"

इति वैद्यकचक्रपाणिसंग्रहे कुष्ठरोगाधिकारे॥)

गन्धपिशाचिका, स्त्री, (गन्धेन पिशाचिका इव। पिशाचिका तामसप्रकृतिरूपदेवभेदः तस्या इव गन्धत्वात् तथात्वम्। नैवास्या सर्व्वाङ्गीनत्वोपमानम्। किन्तु गन्धमाघ्रयग्रहणादेकदेशेनैव साहश्यमिति बोध्यम्।) धूपः। इति हेमचन्द्रः। ३। ३१३॥

गन्धपीता, स्त्री, (गन्धाढ्यं पीतं पीतवर्णञ्च पत्रमस्याः।) गन्धपत्रा। इति राजनिर्घण्टः॥

गन्धपुष्पः, पुं, (गन्धसमन्वितं पुष्पमस्य।) वेतसवृक्षः। इति शब्दरत्नावली॥ अङ्कोटवृक्षः। इति जटाधरः॥ बकुलवृक्षः। इति राजनिर्घण्टः॥

गन्धपुष्पा, स्त्री, (गन्धाढ्यं पुष्पमस्याः।) नीली। केतकी। गणिकारी। इति राजनिर्घण्टः॥

गन्धफणिज्झकः, पुं, (गन्धसारः गन्धप्रधानो वा फणिज्झकः।) रक्ततुलसी। इति रत्नमाला॥

गन्धफलः, पुं, (गन्धाढ्यं फलमस्य।) कपित्थः। बिल्वः। तेजःफलवृक्षः। इति राजनिर्घण्टः॥

गन्धफला, स्त्री, (गन्धेन युक्तं फलमस्याः।) प्रियङ्गुवृक्षः। इति शब्दरत्नावली॥ मेथिका। विदारी। शल्लकी। इति राजनिर्घण्टः॥

गन्धफली, स्त्री, (गन्धेन फलते विदीर्य्यते आत्मनेति शेषः। गन्ध+फल विदारे+कर्म्मण्यण् ततो गौरादित्वात् ङीष्।) चम्पककलिका। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः।
एतस्य कलिका गन्धफलीति कथिता बुधैः॥")

प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ५६॥

गन्धबधूः, स्त्री, (गन्धेन बध्नाति सन्निहृष्टजनानाकर्षतीति। बन्ध+उः न लोपे वा ङीप्। गन्धस्य बधूरिव वा।) शटी। चौड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धबन्धुः, पुं, (गन्धेन बध्यते इति गन्धं बध्नाति इति वा। बन्ध+उन्। यद्वा, गन्धस्य बन्धुरिव। बन्धोरिव चित्तमुद्धरत्वादस्य तथात्वम्।) आम्रवृक्षः। इति शब्दरत्नावली॥

गन्धबहलः, पुं (गन्धः बहलः बहुलोऽस्य।) सितार्जकः। इति राजनिर्घण्टः॥

गन्धबहुला, स्त्री, (गन्धबहुल+टाप्।) गोरक्षीवृक्षः। इति राजनिर्घण्टः॥

गन्धबीजा, स्त्री, (गन्धः बीजेऽस्याः।) मेथिका। इति राजनिर्घण्टः॥ (मेथिकाशब्देऽस्या गुणा ज्ञेयाः॥)

गन्धभद्रा, स्त्री, (गन्धः भद्रोऽस्याः गन्धेन भद्रा वा। एतया युक्तस्य यज्ञनयूषस्य गन्धमाघ्रयग्रहणे-

नेव रूपस्य मङ्गलं भवतीति भावः।) लताविशेषः। गन्धभादालिया इति भाषा॥ इति शब्दचन्द्रिका॥ (गुण-पर्य्यायावस्थाः प्रसारणीशब्दे ज्ञातव्याः॥)

गन्धभाण्डः, पुं, (गन्धस्य भाण्डमिव।) गर्हभाण्डवृक्षः। इति शब्दरत्नावली॥ (पर्य्यायोऽस्य यथा, "नन्दिवृक्षस्ताम्रपाकी फलपाकी च पीतकः। गन्धभाण्डो गन्धसुण्डो द्वितीयः क्षिप्रपाक्यसौ॥" इति वैद्यकरत्नमाला॥)

गन्धमांसी, स्त्री (गन्धसारा मांसी।) जटामांसीभेदः। तत्पर्य्यायः। केशी २ भूतजटा ३ पिशाची ४ पूतना ५ भूतकेशी ६ लोमशा ७ जटाला ८ लघुमांसी ९। अस्या गुणाः। तिक्तत्वम्। शीतत्वम्। कफकण्ठामयरक्तपित्तविषभूतज्वरनाशित्वम्। वर्ण्यत्वञ्च। इति राजनिर्घण्टः॥ (जटामांसीशब्देऽस्या विवृतिर्वोद्धव्या॥)

गन्धमाता, स्त्री, (गन्धस्य मातेव। गन्धगुणप्राधान्यात् तथात्वम्। यथा, मनौ। १। ७८।

"ज्योतिषञ्च विकुर्व्वाणादापो रसगुणाः स्मृताः। अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः॥") पृथिवी। इति हेमचन्द्रः। ४। २॥

गन्धमादनं, क्ली पुं, (गन्धैः आत्मोपरिसञ्जातौषधीविशेषसौरभैः मादयति सन्निहितस्थानिति। मद्+णिच्+कर्म्मणि ल्युः। माद्यतेऽनेन इति णिच् ल्युट् वा।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३॥ अयं इलावृतभद्राश्ववर्षयोः सीमापर्व्वतः। अस्य विस्तारः नीलनिषधपर्व्वतपर्य्यन्तः। इति श्रीभागवतम्॥ (तथा च महाभारते। २। १०। ३०।

"मलयो दर्द्दुरश्चैव महेन्द्रो गन्धमादनः। इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ॥" अस्य गिरेरधिष्ठातृदेवोऽपि एतन्नाम्ना विश्रुतः। यथा, तत्रैवाध्याये। २८ श्लोके।

"द्रुमः किम्पुरुषश्चैव उपास्ते धनदेश्वरम्। राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः॥" अयमेव पर्व्वतो भगवत्याः पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ५६।

"प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने॥") गन्धमादनः, पुं, (गन्धेन पुष्पसौरभेण मादयत्यात्मानमिति। गन्ध+मद्+णिच्+ल्युः। यद्वा गन्धेन माद्यति इति। मद्+स्वार्थे णिच्+ल्युः।) भ्रमरः। वानरविशेषः। (यथा, रामायणे ४। २५। ३३।

"गयो गवाक्षो गवयः शरभो गन्धमादनः। मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवांस्तथा॥") गन्धकः। इति मेदिनी॥ ने। २३४॥

गन्धमादनी, स्त्री, (गन्धेन माद्यतेऽनया। मद्+णिच्+करणे ल्युट् ततो ङीप्।) मदिरा। इति त्रिकाण्डशेषः॥ बन्दाकः। क्रीड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमादनी, स्त्री, (गन्धेन माद्यतीति। मद्+णिच्+णिनिः।) लाक्षा। पुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमार्ज्जारः, पुं, (गन्धेन गात्रगन्धेन युक्तः गन्धप्रधानो वा मार्ज्जारः।) खट्टासः। इति जटाधरः॥

गन्धमालती, स्त्री, (गन्धेन मालती इव।) गन्धद्रव्यविशेषः। सा तु गुणैर्गन्धकोकिलातुल्या। (यथा, भावप्रकाशे।

"गन्धकोकिलया तुल्या विज्ञेया गन्धमालती॥")

गन्धमालिनी, स्त्री, (गन्धानां गन्धस्य वा माला समूहः अस्त्यस्यामस्या वा इति। अस्त्यर्थे इनिः ततो ङीप्।) सुरानामगन्धद्रव्यम्। इति जटाधरः॥

गन्धसुण्डः, पुं, (गन्धं अपरगन्धं सुण्डयति मर्द्दयति खगन्धेनेति शेषः। सुण्ड मर्द्दने+णिच्+अण्। यद्वा गन्धेन खगन्धेन अन्यं दुष्टगन्धं मार्ष्टि शोधयतीति। सुण्ड शोधने+णिच्+अच्।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। नन्दीवृक्षः १ ताम्रपाकी २ फलपाकी ३ पीतकः ४ गर्हभाण्डः ५ क्षिप्रपाकी ६। इति वैद्यकम्॥

गन्धमूलः, पुं, (गन्धसारं मूलमस्य।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

गन्धमूलकः, पुं, (गन्धमूल+संज्ञायां कन्।) शटी। इति शब्दरत्नावली॥

गन्धमूला, स्त्री, (गन्धसारं गन्धप्रधानं वा मूलमस्याः।) शुक्लकोलः। शटी। इति राजनिर्घण्टः॥

गन्धमूलिका, स्त्री, (गन्धमूली+संज्ञायां कन्। पूर्व्ववद्वृक्षः। यद्वा गन्धप्रधानं मूलमस्य इति कप् ततष्टाप् कापि अत इत्वम्।) माकन्दी। शटी। इति राजनिर्घण्टः॥

गन्धमूली, स्त्री, (गन्धमूल+स्त्रियां ङीष्।) शटी। इत्यमरः। २। ४। १४५॥

गन्धमूषिकः, पुं स्त्री, (गन्धप्रधानो मूषिकः।) छुछुन्दरी। इति त्रिकाण्डशेषः॥

गन्धमूषी, स्त्री, (गन्धा दुर्गन्धप्रधाना मूषी।) छुछुन्दरी। इति हेमचन्द्रः। ४। ३६८॥

गन्धरङ्गः, पुं, (गन्धाढ्यः गन्धेन युक्तो वा रङ्गः।) खट्टासः। इति शब्दमाला॥ (खट्टाशब्देऽस्य गुणादयो व्याख्याताः॥)

गन्धमैथुनः, पुं, (गन्धेन वासितायां ऋतुमत्यां गोर्योनिघ्राणेन मैथुनोद्योगः सृष्टा वा यस्य।) वृषः। इति जटाधरः॥

गन्धमोदनः, पुं, (गन्धेन आत्मोद्भवगन्धेन मोदयतीति। मुद्+णिच्+ल्युः।) गन्धकः। इति राजनिर्घण्टः॥

गन्धमोहिनी, स्त्री, (गन्धेन स्वावयवस्थगन्धेनेत्यर्थः मोहयति सन्निकर्षस्थानिति। मुह्+णिच्+णिनिः ङीप् च।) चम्पककलिका। इति राजनिर्घण्टः॥

गन्धरसः, पुं, (गन्धाढ्यः गन्धान्वितो वा रसोऽस्य।) उपधातुविशेषः। गुलसत्व इति ख्यातः। तत्पर्य्यायः। बोलः २ प्राणः ३ पिण्डः ४ गोपः ५ रसः ६। इत्यमरः। २। ९। १०४॥ रसगन्धः ७ गोसः ८ पिण्डगोसः ९ गुग्गुः १० गोसगुग्गुः ११। इति तट्टीका॥ गान्धारम् १२ मसिवर्द्धनम् १३। इति त्रिकाण्डशेषः॥ गोपरसः १४ वोलजः १५ गोपकः १६। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। २७। ११।

"न्यायोपेतं ब्राह्मणेभ्यो यदन्नं श्रद्धापूतं गन्धरसोपपन्नम्॥")

गन्धरसाङ्गकः, पुं (गन्धरसो अङ्गे यस्य इति कप्।) श्रीवेरनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

गन्धराजं, क्ली, (गन्धेन राजते इति। राज्+अच्।) चन्दनम्। जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ खगामख्यातशुक्लवर्णपुष्पञ्च॥

गन्धराजः, पुं, (गन्धानां गन्धसाराणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सुगन्धतृणः। कणगुग्गुलुः। इति राजनिर्घण्टः॥ खनामख्यातपुष्पवृक्षः। तस्य पत्रं पनसवृक्षस्य क्षुद्रदलवत्। पुष्पञ्च सुगन्धिश्वेतवर्णं उपर्य्यधोद्वादशदलं षट्केशरमध्यं भवति वसन्तवर्षाकाले प्रस्फुटति च। तस्य शाखारोपणे वृक्षो जायते। इति लोकप्रसिद्धम्॥ गन्धश्चेलञ्च॥

गन्धराजी, स्त्री, (गन्धराज+स्त्रियां ङीष्।) गन्धीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

गन्धर्व्वः, पुं, (गन्धं सङ्गीतवाद्यादिजनितप्रमोदं अर्व्वति प्राप्नोतीति। अर्व्व गतौ+अण्। पृषोदरादित्वात् अलोपे साधुः।) स्वर्गगायकः। स तु देवयोनिः। तत्पर्य्यायः। गातुः २ दिव्यगायनः ३। तद्भेदा यथा,—

"हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा। गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः॥" इति जटाधरः॥ *॥

तस्य एकादश गणा यथा,—

"अभ्राणोऽङ्गारिवभ्रारी सूर्य्यवर्च्चास्तथा लघुः। हंसः सुहंसः स्वाङ्गैव मूर्द्धन्यश्च महामनाः। विश्वावसुः क्षुद्राद्यश्च गन्धर्व्वैकादशा गणाः॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

(असौ देवमर्त्यभेदेन गानधर्म्मिगन्धर्व्वोऽपि द्विविधः। यथाह शब्दार्थचिन्तामणिः।

"अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः। गन्धर्व्वत्वं समापन्नो मर्त्यगन्धर्व्व उच्यते॥ पूर्व्वकल्पकृतात् पुण्यात् कल्पादावेव चेद् भवेत्। गन्धर्व्वत्वं ताडृशोऽत्र देवगन्धर्व्व उच्यते॥"

तत्र दिव्यगन्धर्व्वो यथा, ऋग्वेदे। १०।१३९।५।

"विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्व्वो रजसो विमानः॥"

तथाच महाभारते। ३। १६१। २६।

"स तमास्थाय भगवान् राजराजो महारथम्। प्रययौ देवगन्धर्व्वैः स्तूयमानो महाद्युतिः॥"

मर्त्यगन्धर्व्वः। यथा, रामायणे। १। ४। ११।

"भ्रातरौ स्वरसम्पन्नौ गन्धर्व्वाविव रूपिणौ॥") गुह्यकलोकोपरि विद्याधरलोकस्याधो गन्धर्व्वलोकः। यथा,—

"ततो विलोकयामास लोकं लोचनगर्भ्मदम् ।
शिवशर्म्मा ततः प्राह तुष्टस्तौ विष्णुपार्षदौ ॥
कोऽसौ जनाक्षसौ लोकः किन्नाम वदताङ्गणौ ॥
गणावूचतुः ।
गान्धर्व्वक्षेष लोकोऽसौ गन्धर्व्वाश्च शुभव्रताः ।
देवानां गायना ह्येते चारणाः स्तुतिपाठकाः ॥
गीतज्ञा अतिगीतेन तोषयन्ति नराधिपान् ।
स्तुवन्ति च धनाढ्यांश्च धनलोभेन मोहिताः ॥
राज्ञां प्रसादलब्धानि सुवासांसि धनानि च ।
द्रव्याण्यपि सुगन्धीनि कर्पूरादीन्यनेकशः ॥
ब्राह्मणेभ्यः प्रयच्छन्ति गीतं गायन्त्यहर्निशम् ।
स्तुतावेव मनस्तेषां नान्यशास्त्रकृतश्रमाः ॥
तेन पुण्येन गान्धर्व्वो लोकस्तेषां विधीयते ।
ब्राह्मणास्तोषिता यद्वै गीतविद्यार्जितैर्धनैः ॥
गीतविद्याप्रभावेण देवर्षिर्नारदो महान् ।
मान्यो वेणावलोके वै श्रीशम्भोश्चातिवल्लभः ॥
तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्ल्लभौ ।
नादरूपी शिवः साक्षात् नादतत्त्वविदौ हि तौ ॥
यदि गीतं क्वचिद्गीतं श्रीमद्धरिहरात्मकम् ।
मोक्षन्तु तत्फलं प्राहुः सान्निध्यमथवा तयोः ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
अस्मिंल्लोके सदा कालं स्तुतिरेषा प्रगीयते ।
तद्गीतमालया पूज्यौ देवौ हरिहरौ सदा ॥
इति स्कन्दात् क्षणात् प्राप पुनरन्यं मनोहरम् ।
शिवशर्म्माथ पप्रच्छ किंसंज्ञं नगरन्त्विदम् ॥"
इति काशीखण्डम् ॥ * ॥
घोटकः । (यथा, महाभारते । ३ । १६१ । २३ ।
"रथं संयोजयामासुर्गन्धर्व्वैर्हेममालिभिः ॥")
पशुजातिविशेषः । स तु कस्तूरीमृगः । अन्तराभवसत्त्वः । इत्यमरः । ३ । ३ । १३२ ॥ "अन्तराभवसत्त्वस्तु जन्ममरणयोर्मध्यभवः प्राणी यो मृतो नैव कायान्तरं प्राप्तः नापि जन्म स मरणजन्मनोरन्तरा भवत्वादन्तराभवसत्त्वः स च यातनाशरीरः इत्येके इति मुकुटः । गुप्तप्राणीति केचित् गन्धर्व्वाः पतयो मम इति विराटे इति रमानाथः ।" इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ४ । ८ । ३४ ।
"न चाप्यहं चालयितुं शक्या केनचिदङ्गने ! ।
दुःखशीला हि गन्धर्व्वास्ते च मे बलवत् प्रियाः ।
प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं सुचिस्मिते ॥")
पुंस्कोकिलः । गायनमात्रम् । इति मेदिनी । वे । ११ ॥ (शिवः । यथा, महाभारते । १३ । १७ । ६७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥"
ग्रहविशेषः । यथा, सुश्रुते ।
"देवास्तथा ऋतुगणाश्च तथा
गन्धर्व्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजाति-
रेषोऽष्टधा देवगणो ग्रहाख्यः ॥"
एतैर्ग्रहैर्ग्रस्तस्य मनुष्यस्य लक्षणं यथा तत्रैव ।
"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वा प्रहसति चारुचाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्यः ॥"
अस्योदाहरणं श्रुतावपि यथा, बृहदारण्यके ७म ब्राह्मणे जनकगोदानप्रकरणे ।
"मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्जलस्य काप्यस्य गृहानेम तस्यासीद्दुहिता गन्धर्व्वगृहीता ॥"
"मद्रेषु मद्रानाम जनपदास्तेषु चरकाः अध्ययनार्थं व्रतचरणात् चरका अध्वर्य्यवो वा पर्य्यव्रजाम पर्य्यटितवन्तः । ते वयं पर्य्यटन्तः पतञ्जलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानेम गतवन्तः । तस्यासीद्दुहिता गन्धर्व्वगृहीता । गन्धर्व्वेण अमानुषेण सत्त्वेन केनचिदाविष्टा ॥"* ॥
गाः रश्मीन् वृषणोपयोगीनि वारीणि वा धारयति इति । गो + धृ + वः गोर्गमादेशश्च भाष्यकृद्भिर्भगवन्नाधवाचार्य्यपादैरित्येवं व्युत्पत्तिरुक्ते सोमः । रश्मिमात्रधारकः । उदकधारकसूर्य्यांशादित्यविशेषः सूर्य्यश्च उते सर्व्वे एव बोधिता इत्यर्थः । एतेषां क्रमान्वयेनोदाहरणम् । यथा, ऋग्वेदे । १ । १६३ । २ ।
"गन्धर्व्वो अस्य रशना मृजन्ति सूरादश्वं वसवो निरतष्ट ॥" "गन्धर्व्वः सोमः ।" इति भाष्यम् । तत्रैव । ६ । ५८६ । १२ । "ऊर्द्धो गन्धर्व्वो अधिनाके अस्थात् विश्वारूपा प्रतिचक्षाणो अस्य ॥" "गन्धर्व्वो रश्मीनां धारकः ।" इति भाष्यम् । तत्रैव वेदे । ६ । ८३ । ४ । "गन्धर्व्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।" "गन्धर्व्वः उदकानां स्तुतीनां वा धारक आदित्यः ।" इति भाष्यम् । तत्रैव । ८ । ११ । ११ । "बृहत् कृतुसमार्ज्जुनेयं शुतक्रतुः तुसरद्गन्धर्व्वमस्तृतम् ।" "गन्धर्व्वः गवां रश्मीनां धर्त्तारं सूर्य्यम् । इति भाष्यम् ॥" अहः दिवसमूह इत्यर्थः । यथा, भागवते । ४ । २६ । २१ ।
"तस्याहानीह गन्धर्व्वा गन्धर्व्व्यो रात्रयः स्मृताः ।"
राज्ञां स्तुतिपाठकः । यथा, भागवते । १ । ११ । २० ।
"नटनर्त्तकगन्धर्व्वाः सूतमागधवन्दिनः ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥"
अनूढ़ानां बालस्त्रीणां भर्त्तृभोगात् प्रागेव प्रथमयद्भद्यौवनोपभोक्तृरूपशरीराधिष्ठातृदेवविशेषः । यथा, ऋग्वेदे । १० । ८५ । ४० ।
"सोमः प्रथमो विविदे गन्धर्व्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥"
तथाच पञ्चतन्त्रे । ३ । २१०-२१३ ।
"स्त्रियः पूर्व्वं सुरैर्भुक्ताः सोमगन्धर्व्ववह्निभिः ।
भुञ्जते मानुषाः पश्चात् तस्माद्दोषो न विद्यते ॥
सोमस्तासां ददौ शौचं गन्धर्व्वाः शिक्षितं गिरम् ।
पावकः सर्व्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः ॥
असम्स्कारजा गौरी प्राप्ते रजसि रोहिणी ।
अयोनिजा भवेत् कन्या कुबद्दीना च नग्निका ॥
यज्ञेनैतु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकाम् ।
पयोधराभ्यां गन्धर्व्वा रजस्यग्निः प्रतिष्ठितः ॥")
गन्धर्व्वतैलं, क्ली, (गन्धर्व्वनामकं तैलम् । शाकपार्थिववत् मध्यपदलोपिकर्म्मधारयः ।) एरण्डतैलम् ।
"गन्धर्व्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबेत् ।
क्षीपदविबन्धमुक्तो भवत्यसौ सप्तरात्रेण ॥
गन्धर्व्वतैलं एरण्डतैलम् । गोऽम्बुना गोमूत्रेण ॥"
इति भावप्रकाशः ॥
गन्धर्व्ववेदः, पुं, (वेत्त्यस्मादनेन वा । विद् + अपादाने करणे वा घञ् वेदः । गन्धर्व्वाणां सङ्गीतविद्योपजीविनां यो वेदः सामवेदस्योपवेदविशेषः । यद्वा गन्धर्व्वः "गन्धर्व्वसम्बन्धिनी गन्धर्व्वकलेत्यर्थः सङ्गीतरूपा विद्या विद्यतेऽनेनास्माद् वा । विद् ज्ञाने + करणे अपादाने वा घञ् ।) संगीतविद्या । यथा, "ऋग्वेदस्यायुर्व्वेदोपवेदो यजुर्व्वेदस्य धनुर्व्वेदोपवेदः । सामवेदस्य गन्धर्व्ववेदोपवेदोऽथर्व्ववेदस्य शस्त्रशास्त्राणीति ।" इति शौनकोक्तचरणव्यूहः ॥
गन्धर्व्वहस्तः, पुं, (गन्धर्व्वस्य नगविशेषस्य हस्तः अग्रपाद इव शाखादलञ्चास्य ।) एरण्डवृक्षः । इति हारावली । १०८ ॥ एतस्य पत्त्राद्यवयवोत्पत्तिमाश्रित्य कप् प्रत्ययेन सह यथाह सुश्रुतः ।
"गन्धर्व्वहस्तकसुष्ककनक्तमालाटरूषकपूतिकारग्वधचित्रकपत्रीनां पत्त्राण्यादाय लवणेन सहोदूखले ऽनुवट्य स्नेहघटे प्रक्षिप्यावलिप्य गोमूत्रक्षिप्तं दर्हयेत् एतत् पत्त्रलवणमुपदिशन्ति वातरोगेषु ॥")
गन्धर्व्वहस्तकः, पुं, (गन्धर्व्वहस्त + स्वार्थे कन् ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५० ॥ (यथास्य पर्य्यायाः । वैद्यकरत्नमालायाम् ।
"आमण्डो वर्द्धमानः स्यादेरण्डो रुवुको वकः ।
गन्धर्व्वहस्तकश्चित्रो वातारिस्तरुणो रुचुः ॥")
गन्धलोलुपा, स्त्री, (गन्धे गन्धात्मकद्रव्ये लोलुपा लोभनप्रकृतिः ।) मक्षिका । इति शब्दरत्नावली ॥
गन्ध(ब)वणिक्, [ज्] पुं, (गन्धस्य अगरुचन्दनादिगन्धद्रव्यजातस्य वणिक् आजीवः । यद्वा गन्धं गन्धद्रव्यजातं पणायते व्यवहरति गन्धद्रव्यस्य क्रयविक्रयादिना आजीवति इत्यर्थः । पण् + इजि कृते पस्य (ब)त्वे च पृषोदरात् साधुः ।) गान्धिकः । स च वर्णसङ्करजातिविशेषः । गन्धवेणिया इति भाषा । स तु अम्बष्ठात् राजपुत्र्यां जातः । तस्य कर्म्म लिखनं गन्धदानञ्च । इति पराशरभाष्यम् ॥
गन्धवती, स्त्री, (गन्धो विद्यतेऽस्याः । गन्ध + मतुप् । मस्य वत्वे स्त्रियां ङीप् ।) पृथिवी । ("गन्धवती पृथ्वीरूपा ।" इति काशीखण्डे । २६ । ४६ श्लोकस्य टीकायाम् ॥) वायुपुरी । (यथा, काशीखण्डे । १३ । १ ।
"इमां गन्धवतीं पुण्यां पुरीं वायोर्विलोकय ।
वारुण्या उत्तरे भागे महाभाग्यनिधे द्विज ! ॥")
व्यासमाता । (इयं हि पूर्व्वं मत्स्यगन्धा आसीत् पश्चात् प्रसन्नात् पराशरात् लब्धवरा सद्गन्धविशिष्टा गन्धवतीति प्रसिद्धा जाता । यथा, महाभारते । १ । ६३ । ७६—८० ।
"एवमुक्ता वरं वव्रे गात्रसौगन्धमुत्तमम् ।

स चास्मै भगवान् प्रादान्मनसः काङ्क्षितं प्रभुः।
ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता ॥
जगाम सह संसर्गं शिवाङ्गतकर्म्मणा।
तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि ॥")
सुरा। इति मेदिनी। ते। १६४ ॥ वनमल्लिका।
इति रत्नमाला ॥ सुरानामगन्धद्रव्यम्। इति
जटाधरः ॥ (गङ्गा। यथा, काशीखण्डे।२६।४६।
"गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ॥")

गन्धवल्कलं, क्ली, (गन्धाढ्यं वल्कलं अस्य।)
लवङ्गम्। इति राजनिर्घण्टः ॥ दारचिनी इति
भाषा ॥

गन्धवल्लरी, स्त्री, (गन्धाढ्या वल्लरी लताविशेषः।)
सहदेवी। इति राजनिर्घण्टः ॥

गन्धवल्ली, स्त्री, (गन्धान्विता वल्ली लता।) पीत-
पुष्पदन्तोत्पलः। डानिमोला इति भाषा। तत्-
पर्य्यायः। गोवन्दनी २ सहदेवी ३ सृहा ४।
इति रत्नमाला ॥

गन्धवहः, पुं, (गन्धं वहतीति। वह्+अच्। गन्धस्य
वहो वा।) वायुः। इत्यमरः।१।१।६५ ॥
(यथा, महाभारते। २।१०।७।
"मन्दाराणामुदाराणां वनानि परिलोड़यन्।
सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन् ॥")
गन्धयुक्ते त्रि ॥

गन्धवहा, स्त्री, (गन्धमिश्रानिष्टघ्राणं वहतीति। गन्ध
+वह+अच्+टाप्। यद्वा, गन्धस्य वहा।)
नासिका। इत्यमरः।२।६।८६ ॥

गन्धवाहः, पुं, (गन्धं वहतीति। वह्+"कर्म्मण्य-
ण्।" ३।२।१। इति अण्।) वायुः।
इत्यमरः।१।१।६५ ॥ (यथा, गीतगोविन्दे।१।३६।
"इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद् गन्धवाहः ॥")
मृगविशेषः। स तु कस्तूरीमृगः। इति हेमचन्द्रः ॥

गन्धवाहा, स्त्री, (गन्ध+वह्+घञ्+टाप्।)
नासिका। इति हेमचन्द्रः ॥

गन्धविडालः, पुं, (गन्धेन आत्मोत्थसुरभिणा विड-
लयतीति। वि+डल्+णिच्+अच्।) गोधूमः।
इति शब्दचन्द्रिका ॥

गन्धवृक्षकः, पुं, (गन्धः खनिर्य्यासजन्यसुरभियुक्तः
गन्धप्रधानो वा वृक्षः। ततः स्वार्थे संज्ञायां वा
कन्।) सालवृक्षः। इति राजनिर्घण्टः ॥

गन्धव्याकुलं, क्ली, (गन्धेन व्याकुलयतीति। वि+
आ+कुल+णिच्+अच्।) कक्कोलम्। इति
शब्दचन्द्रिका ॥

गन्धशुटी, स्त्री, (गन्धान्विता शुटी।) शुटी।
इति शब्दरत्नावली ॥

गन्धशाकं, क्ली, (गन्धाढ्यं शाकम्।) गौरसुवर्ण-
शाकम्। इति राजनिर्घण्टः ॥

गन्धशालिः, पुं, (गन्धाढ्यः शालिः।) शालि-
धान्यविशेषः। तत्पर्य्यायः। कल्माषः २ गन्धालुः
३ कलमोत्तमः ४ सुगन्धिः ५ गन्धबहुलः ६
सुरभिः ७ गन्धतण्डुलः ८ सुगन्धिशालिः ९।
अस्य गुणाः। मधुरत्वम्। अतिवृष्यत्वम्। पित्त-
श्रमक्षयविदाहशान्तिकारित्वम्। स्तन्यगर्भ-
स्थिरताख्यवायुपुष्ट्याख्यकफबलप्रदत्वञ्च। इति
राजनिर्घण्टः ॥

गन्धशुण्डिनी, स्त्री, (गन्धाढ्यः शुण्डः सुखमस्यस्याः।
इति इनिः।) कुक्कुन्दरी। इति राजनिर्घण्टः ॥
क्वचित् पुस्तके गन्धा शुण्डिनी इति नामद्वयम् ॥

गन्धशेखरः, पुं, (गन्धः शेखरे शिरोदेशेऽस्य।)
कस्तूरी। इति हारावली। १०३ ॥

गन्धसारः, पुं, (गन्धाढ्यः सारः स्थिरांशो यस्य।)
चन्दनवृक्षः। इत्यमरः। २। ६। १३१ ॥
(अस्य पर्य्यायाः यथा,—
"श्रीखण्डं चन्दनं न स्त्री भद्रः श्रीतरुपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्रुतिश्च सः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सङ्घरवृक्षः। इति राजनिर्घण्टः ॥

गन्धसारणः, पुं, (गन्धं सारयतीति। सृ+णिच्+
ल्युः।) वृहद्वृक्षी। इति रत्नमाला ॥

गन्धसोमं, क्ली, (गन्धाय गन्धार्थं प्रमोदायेत्यर्थः
सोमश्चन्द्रो यस्य।) कुमुदम्। इति त्रिकाण्डशेषः ॥

गन्धहारिका, स्त्री, (गन्धं हरतीति। हृ+ण्वुल्
ततष्टाप् कापि अत इत्वञ्च।) परगृहं गत्वा
कर्म्मकारिणी स्त्रिलिङ्गिनी। इति शब्दमाला ॥
गन्धहरणकर्त्री च ॥

गन्धा, स्त्री, (गन्धयति गन्धं वितरतीति। गन्ध+णिच्
+अच्+टाप् च।) चम्पककलिका। इति शब्द-
रत्नावली ॥ शुटी। इति राजनिर्घण्टः ॥ शाल-
पर्णी। इत्यमरटीकायां भरतः ॥

गन्धाखुः, पुं, (गन्धप्रधानः गन्धाढ्यो वा आखुः।)
कुच्छुन्दरी। इति हारावली ॥ ८३ ॥

गन्धाजीवः, पुं, (गन्धेन गन्धात्मकद्रव्येण आजी-
वतीति। गन्ध+आ+जीव्+अच्।) गन्ध-
वणिक्। इति जटाधरः ॥

गन्धाढ्यं, क्ली, (गन्धेन आढ्यम्।) जवादिनाम-
गन्धद्रव्यम्। चन्दनम्। इति राजनिर्घण्टः ॥ गन्ध-
युक्ते त्रि ॥

गन्धाढ्यः, पुं, (गन्धेनाढ्यः।) नारङ्गवृक्षः। इति
राजनिर्घण्टः ॥

गन्धाढ्या, स्त्री, (गन्धेनाढ्या।) गन्धपत्रा। स्वर्ण-
यूथी। तरुणी। आरामशीतला। इति राज-
निर्घण्टः ॥ गान्धाली। इति शब्दचन्द्रिका ॥
(गन्धान्वितत्रये त्रि। यथा, भ्रमरदूते।१।
"गन्धाढ्याऽसौ भुवनविदिता केतकी स्वर्णवर्णा ॥")

गन्धाधिकं, क्ली, (गन्धः अधिकः अस्मिन्। गन्धस्य
अधिकोऽत्रेति वा।) लवङ्गकुङ्कुमम्। इति राज-
निर्घण्टः ॥

गन्धाम्बा, स्त्री, (गन्धयुक्तो अम्बः अम्बरसोऽस्या
वा।) वनजीवपूरकः। इति राजनिर्घण्टः ॥

गन्धाला, स्त्री, (गन्धेन अलति पर्य्याप्नोतीति। अल्
+अच् टाप् च।) वृक्षविशेषः। इति शब्द-
चन्द्रिका ॥ त्रियतीति ख्याता ॥

गन्धाली, स्त्री, (गन्धस्य आली श्रेणी अस्याम्।
यद्वा गन्धेन अलति पर्य्याप्नोतीति। अल्+अच्
टाप्।) लताविशेषः। गाँधाली गन्धभादाली
इति च भाषा। तत्पर्य्यायः। प्रसारणी २
भद्रपर्णी ३ कटम्भरा ४। इति रत्नमाला ॥
गन्धाढ्या ५। इति शब्दचन्द्रिका ॥ सरणा ६
राजबला ७ भद्रबला ८। इत्यमरः।२।५।२७ ॥
गन्धोली ९ सारणी १०। इति जटाधरः ॥
अपि च।
"प्रसारणी राजबला भद्रपर्णी प्रतानिनी।
सरणिः सारणी भद्रबला चापि कटम्भरा ॥
प्रसारणी गुरुर्हृद्या बलसन्धानकृत्सरा।
वीर्य्योष्णा वातकृत्तिक्ता वातरक्तकफापहा ॥"
इति भावप्रकाशः ॥
राजनिर्घण्टोक्तगुणपर्य्यायौ प्रसारिणीशब्दे
द्रष्टव्यौ ॥

गन्धालीगर्भः, पुं, (गन्धाली गन्धश्रेणी गर्भ यस्य।)
सल्लकी। इति राजनिर्घण्टः ॥

गन्धाश्मा [न्] पुं, (गन्धयुक्तः अश्मा प्रस्तर इव।)
गन्धकः। इत्यमरः।२।६।१०२ ॥

गन्धाष्टकं, क्ली, (गन्धानां गन्धात्मकागुरुचन्दना-
दीनां अष्टकम्।) पञ्चदेवतादेयाष्टप्रकारगन्ध-
द्रव्यम्। यथा,—
"चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः।
जटामांसी कपियुता गन्धाष्टकं विदुः ॥*॥
चन्दनागुरुह्रीवेरकुष्ठकुङ्कुमसेव्यकाः।
जटामांसी सुरमिति विष्णोर्गन्धाष्टकं विदुः ॥*॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम्।
कुशीदं कुष्ठसंयुक्तं ह्रीवं गन्धाष्टकं शुभम् ॥ * ॥
स्वरूपं चन्दनं चोरं रोचनागुरुमेव च।
मदं मृगद्वयोद्भूतं कस्तूरीचन्द्रसंयुतम्।
गन्धाष्टकं विनिर्द्दिष्टं गणेशस्य महेशितुः ॥"
इति शारदातिलकम् ॥ * ॥
अपि च।
"चन्दनागुरुकर्पूररोचनाकुङ्कुमं मदम्।
रक्तचन्दनह्रीवेरं गान्धपत्यसुदाहृतम् ॥ * ॥
जलकाश्मीरकुष्ठेषु रक्तचन्दनचन्दनैः।
उशीरागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः ॥"
इति मेरुतन्त्रम् ॥

गन्धि, क्ली, (गन्ध+"सर्व्वधातुभ्य इन्।"४।११७।
इति इन्।) लवङ्गकुङ्कुमम्। इति राजनिर्घण्टः ॥

गन्धिकः, पुं, (गन्धो विद्यतेऽस्मिन्। गन्ध+"अत
इनिठनौ।" ५।२।११५। इति ठन्।) गन्धकः।
इति हेमचन्द्रः।३।१२३ ॥

गन्धिनी, स्त्री, (गन्धोऽस्यस्या इति।"अत इनिठनौ।"
५।२।११५। इति इनिः। स्त्रियां ङीप्।) सुरा।
इत्यमरः।२।४।१२३ ॥

गन्धिपर्णः, पुं, (गन्धि गन्धप्रधानं पर्णं पत्रमस्य।)
सप्तच्छदवृक्षः। इति राजनिर्घण्टः ॥

गन्धोतुः, पुं, (गन्धः गन्धयुक्तः ओतुः।"ओत्वोष्यो:
समासे वा।" इति वार्त्तिं इति अकारलोपः।)
खट्वाङ्गः। इति त्रिकाण्डशेषः ॥ गन्धौतुश्च ॥

गन्धोत्कटा, स्त्री, (गन्धेन उत्कटा उद्रिक्ता
उग्रा वा।) दमनकवृक्षः। इति राजनिर्घण्टः ॥

गन्धोत्तमा, स्त्री, (गन्धेन उत्तमा गन्धप्रधानेत्यर्थः।) मदिरा। इत्यमरः। २।१०।४० ॥

गन्धोलिः, स्त्री, (गन्धयति गन्धयुक्तं करोति संमिलितद्रव्यान्तराणीत्यर्थः। गन्ध + ओलच् ततो जातौ ङीष् निपातनात् ह्रस्वः।) भ्रटी। इति शब्दरत्नावली ॥

गन्धोली, स्त्री, (गन्धमर्हतीति। गन्ध अर्हने + बाहुलकात् ओलच् ततो जातौ संज्ञायां वा ङीष्।) भटटा। इत्यमरः। २। ५। २७ ॥ भद्रा। भ्रष्टा। इति मेदिनी ॥ ले। ८५ ॥

गभस्तिः, पुं, (गच्छते ज्ञायते इति गः विषयः। गम् + डः। तं बभस्ति दीपयति प्रकाशयतीति। भस् + "क्तिचक्तौचेति।" ३।३।१७४। इति क्तिच्।) किरणः। (यथा, भागवते ।५।८।२२। "मासुपश्चतत्गतनयं शिशिरशान्तानुरागगुञ्जितनिजवदनसलिलाप्लुतमयगभस्तिभिः स्वधयतीति च ॥" गम्यते ज्ञायते इति। गम् + डः। गं इदं सर्व्वं जगत् बभस्ति भासयति निजकिरणजालैरिति श्लेषः। भस् + क्तिच्।) सूर्य्यः। इति मेदिनी ॥ ते ।१०७ ॥ (यथा, सूर्य्यस्तोत्रे। "गभस्तिमान् गभस्तिश्च विश्वात्मा भासकस्तथा। त्वं योनिर्वेदविद्यानां वेदवेद्यस्तथैव च ॥" शिवः। यथा, महाभारते ।१३।१७।१३३। "गभस्तिर्ब्रह्मकृद् ब्रह्मा ब्रह्मवित् ब्राह्मणो-गतिः ॥")

गभस्तिः, स्त्री, (गच्छति प्राप्नोति हव्यादिकमिति गः अग्निस्तं बभस्त्यनया इति। भस् + करणे क्तिच्।) स्वाहा। इति मेदिनी ॥ ते। १०७ ॥

गभस्तिमत्, क्ली, (गभस्तयो रश्मयः नित्यं वर्त्तन्तेऽस्मिन् लोके मर्त्यादिभ्योतिःप्रभावात्। इति नित्ययोगे मतुप्।) सप्तपातालान्तर्गतपातालविशेषः। तत्तु तलातलम्। इति शब्दरत्नावली ॥

गभस्तिमान्, [त्] पुं, (गभस्तयः रश्मयः विद्यन्ते भूम्न्यस्मिन्। इति भूम्नार्थे मतुप्।) सूर्य्यः। इति शब्दरत्नावली ॥ (यथा, महाभारते। ३।३।१६।

"ओं सूर्य्योऽर्य्यमाभगस्त्वष्टा पूषार्कः सविता रविः। गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥")

गभस्तिहस्तः, पुं, (गभस्तयो रश्मयो हस्ता इव जलाद्याकर्षणविसर्ज्जनाय यस्य।) सूर्य्यः। इति चिकाण्डशेषः ॥

गभीरं, त्रि, (गच्छति जलमत्र। गम् + "गभीरगम्भीरौ"। उणा। ४।३५। इति ईरन् भश्चान्तादेशः।) नीचस्थानम्। तत्पर्य्यायः। निम्नम् २ गम्भीरम् ३। इत्यमरः। १।१०।१५॥ गभीरकम् ४। इति शब्दरत्नावली ॥ अगाधम्। (यथा, प्रबोधचन्द्रोदये ।४।१५।

"निष्कम्पविम्मलपयोधिगभीरवीरा धीराः परस्य परिवादगिरः सहन्ते ॥")

गहनम्। इत्यमरादिकोषः ॥ (प्रचण्डम्। यथा, भागवते ।१।५।१८।

"कालेन सर्व्वत्र गभीररंहसा ॥")

गभीरिका, स्त्री, (गभीरो ध्वनिर्विद्यतेऽस्याः। "अत इनिठनौ।" इति ठन्। स्त्रियां टाप्।) इक्षुदण्डिका। इति शब्दरत्नावली ॥

गभोलिकः, पुं, मत्स्यः। इति हारावली। १३४ ॥

गम, औ ल गत्याम्। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट्।) औ, गन्ता। ल, अगमत्। गतिरुत्तरदेशसंयोगफलकव्यापारः। इति दुर्गादासः।

गमः, पुं, (गम्यते इति यथायथं भावकर्म्मादौ अप्।) जिगीषोर्गमनम्। इत्यमरः। २।८।८५ ॥ अक्षविवर्त्तः। स तु द्यूतप्रभेदः। अपर्य्यालोचितम्। अध्वा। इति मेदिनी। मे १० ॥ सदृक्पाठः। इति हेमचन्द्रः ॥ गमनञ्च ॥ (उपभोगः। मैथुनम्। यथा, मनौ ।२।१५४।

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ॥")

गमकः पुं, (गमयति प्रापयति बोधयति वा मूर्च्छनादिलक्षणैर्यं आत्मानमिति। गम् + णिच् + ण्वुल्।) स्वरविशेषः। यथा, सङ्गीतदामोदरे।

"गमकः स्वश्रुतिस्थानच्छायां श्रुत्यन्तराश्रयाम्। स्वरो यो मूर्च्छनामेति गमकः स इहोच्यते ॥ कम्पितः स्फुरितो नीलो भिन्नः स्थविर एव च। आहतान्दोलितो चेति गमकाः सप्त कीर्त्तिताः ॥ माघपौषनिशायान्तु प्रेषप्रहरमात्रके। साधकः सलिले स्थित्वा गमकान् सप्त साधयेत् ॥ दाक्षिण्यात्या हरिप्रीत्यै गायन्ति गमकानिमान् ॥" (गमयति बोधयतीति। गम् + णिच् + ण्वुल्। बोधकमात्रे त्रि। यथा, मालतीमाधवे। ३।

"यत् प्रौढ़त्वमुदारता च वचसां यच्चार्थतो गौरवं तच्चेदस्ति ततस्तदेव गमकं पाण्डित्य वैदग्ध्ययोः ॥")

गमकारित्वं, क्ली, (गम्यते इति। गम् + भावे अप्। गमं करोतीति। कृ + णिनि। तस्य भावः इति।) रभसः। इति चिकाण्डशेषः ॥

गमथः, पुं, (गच्छत्यस्मिन् इति। गम् + "ग्रीङ्-ग्रपिरुगमिवञ्चिजीविप्राणिभ्योऽथः।" उणा ३। ११३। इति अधिकरणे अथः।) पन्थाः। (गम् + कर्त्तरि अथः।) पथिके त्रि। इत्युणादिकोषः ॥

गमनं, क्ली, (गम्यते जिगीषुणा इति। गम् + भावे ल्युट्।) जिगीषोः प्रयाणम्। कुच् इति पारस्य भाषा। तत्पर्य्यायः। यात्रा २ व्रज्या ३ अभिनिर्य्याणम् ४ प्रस्थानम् ५। गमः ६। इत्यमरः। २। ८। १५ ॥ प्रयाणम् ७ प्रस्थितिः ८ यानम् ९ प्रायणम् १०। इति शब्दरत्नावली ॥ पादविहरणम्। (यथा, रामायणे। ३।१३।११। "न च मे रोचते वीर! गमनं दण्डकं प्रति ॥") तत्तु पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः। (यथा, भाषापरिच्छेदे। ६।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥") तस्य भेदाः। यथा, भ्रमणम् १ रेचनम् २ स्यन्दनम् ३ ऊर्द्ध्वज्वलनम् ४ तिर्य्यग्गमनम् ५। इति च भाषापरिच्छेदे ७। (उपभोगः। यदुक्तं तिथितत्त्वे।

"अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्। मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥")

गमी, [न्] त्रि, (गमिष्यतीति। गम् + "भविष्यति गम्यादयः।" ३।३।३। "गमेरिनिः।" उणा। ४।६। इति भविष्यति इनिः।) गमनकर्त्ता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गम्ल, गतौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) गम्लति। इति दुर्गादासः ॥

गम्भारिका, स्त्री, (गच्छति दार्ढ्यं सौन्दर्य्यभारञ्च इति। निम्नगतिमिलके। गम् + विच्। गमं बिभर्त्ति इति। भृ + खुल् ततष्टाप् कापि अत इत्वञ्च।) गम्भारीवृक्षः। इति राजवल्लभः ॥

गम्भारी, स्त्री, (कं जलं बिभर्त्ति इति। भृ + "कर्म्मण्यण्।" ३। २। १। इति अण् पृषोदरात् कस्य गत्वे साधुः। यद्वा गच्छति प्राप्नोति सौन्दर्य्यमिति। गम् + विच्। गमं बिभर्त्तीति।) वृक्षविशेषः। गामारी इति भाषा ॥ तत्पर्य्यायः। सर्व्वतोभद्रा २ काश्मरी ३ मधुपर्णिका ४ श्रीपर्णी ५ भद्रपर्णी ६ काश्मर्य्यः ७। इत्यमरः। २। ४। ३५ ॥ काश्मरी ८। इति तट्टीका ॥ भद्रा ९ गोपभद्रिका १० कुसुदा ११ सदाभद्रा १२ कट्फला १३ क्षुण्णवल्लिका १४। इति रत्नमाला ॥ क्षुण्णपर्णी १५ क्षीरा १६ सर्व्वतोभद्रिका १७ स्निग्धपर्णी १८ सुभद्रा १९ कश्मारी २० गोपभद्रा २१ विदारिणी २२ क्षीरिणी २३ महाभद्रा २४ मधुपर्णी २५ स्वरभद्रा २६ क्षुण्णा २७ अर्श्वता २८ रोहिणी २९ यष्टिः ३० स्थूलत्वचा ३१ मधुमती ३२ सुफला ३३ मेदिनी ३४ महाकुसुदा ३५ सुदृढ़त्वचा ३६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। गुरुत्वम्। उष्णत्वम्। श्रमश्लेष्मत्रिदोषविषदाहार्शोज्वरक्षयासदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ एतत्फलगुणाः। तिक्तत्वम्। गुरुत्वम्। ग्राहित्वम्। मधुरत्वम्। केश्यहितत्वम्। रसायनत्वम्। मेध्यत्वम्। शीतलत्वम्। दाहपित्तनाशित्वञ्च। एतन्मूलगुणौ। अतुष्यत्वम्। मानसव्याधौ अहितकारित्वञ्च। इति राजवल्लभः ॥ तत्पर्य्यायगुणाः।

"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका। काश्मरी काश्मरी क्षीरा काश्मर्य्यः पीत-रोहिणी ॥
क्षुण्णपर्णी मधुरसा महाकुसुदिकापि च। काश्मरी तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः ॥ दीपनी पाचनी मेध्या मेदिनी श्रमशोथजित्। दोषक्षुण्णामशूलार्शोविषदाहज्वरापहा ॥ तत्फलं दृंहणं वृष्यं गुरु केश्यं रसायनम्। वातपित्तक्षयारक्तक्षयमूत्रविबन्धकृत् ॥ स्वादु पाके हिमं स्निग्धं तुवरान्नं विदुह्लिकृत्। हन्याद्दाहक्लमान्वातरक्तपित्तक्षतक्षयान् ॥"

इति भावप्रकाशः ॥

गम्भीरं, त्रि, (गच्छति जलमत्र । "गभीर-गम्भीरौ ।" उणा० । ४ । ३५ । इति गच्छतेरीरन् भश्चान्तादेशः नुमागमश्च ।) गभीरम् । इत्यमरः । १।१०।१५ ॥ (यथा, गोः रामायणे । ५ । १ । ५० ।

"ततः सागरगम्भीरो वानरः पवनो जवे ॥")

गम्भीरः, पुं (गम्+" गभीरगम्भीरौ" उणा० । ४ । ३५ । इति ईरन् भश्चान्तादेशः नुमागमश्च ।) जम्बीरः । षड्जम् । कङ्कालः । इत्यादिकोषः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ५२ ।

"गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥"

स्त्रियां, हिक्कारोगभेदः । यथा, सुश्रुते उत्तरतन्त्रे ५० अध्याये ।

"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
शुष्कोष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी ।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता ॥")

गम्भीरवेदी, [न्] पुं, (गम्भीरं मन्दं यथा स्यात् तथा चिरकालात् इत्यर्थः यङ्लुग्-वेधनं निषादिदत्तग्रिष्यामादेशं वा वेत्तीति विद् + णिनि ।) दुर्ज्ञरज्ञः । तत्पर्य्यायः । अङ्कगूढः २ चालकः ३ चालकः ४ । इति त्रिकाण्डशेषः ॥ अवमताङ्कुशः ५ । इति हेमचन्द्रः ॥ (यथा, रघौ । ४ । ३६ ।

"स प्रतापं महेन्द्रस्य मूर्द्धि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥"

अस्य लक्षणम् ।

"चिरकालेन यो वेत्ति ग्रिष्यां परिचितामपि ।
गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः ॥"

इति ग्रब्दार्थचिन्तामणिधृतराजपुत्रीयवचनम् ॥ मतभेदेन लक्षणान्तरमपि दृश्यते ।

"त्वग्भेदाच्छोणितस्रावात् मांसस्य क्वथनादपि ।
आत्मानं यो न जानाति स स्यात् गम्भीरवेदिता ॥"

इति रघुटीकायां मल्लिनाथः ॥)

गम्यं, त्रि, (गम्यते इति । गम्+कर्म्मणि यत् ।) प्राप्यम् । इत्यमरः । ३ । २ । ४२ ॥ (यथा, भगवद्गीतायाम् । १३ । १७ ।

"ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम् ॥")

गमनयोग्यञ्च ॥ (यथा, महाभारते ।३।८५।१०२।

"गम्यान्यपि च तीर्थानि दुर्गाण्यायतनानि च ॥"

स्त्रियां, सम्भोगार्हा स्त्री । यथा, महाभारते । १ । ८३ । ३५ ।

"अभिकामां स्त्रियं यश्च गम्यां रहसि याचितः ॥")

गम्यमानः, त्रि, (गम्यते इति । गम्+कर्म्मणि शानच् ।) वर्त्तमानगमनाश्रयग्रामादिः ॥

गयः, पुं, (गीयते वीर्य्यादिप्रभावेनासौ । गै+ बाहुलकात् डः । एषोदरादित्वात् साधुः ।) वानरभेदः । (यथा, गोः रामायणे ।४।२५।३३।

"गयो गवाक्षो गवयः शरभो गन्धमादनः ॥")

स तु वैवस्वतपुत्रः । इति रामायणम् ॥ राजर्षिभेदः । स च अमूर्त्तरयःपुत्रः । (यथा, श्रीभागवते । ५ । १५ । ७ ।

"गयं नृपः कः प्रति याति कर्म्मभिः ॥")

असुरभेदः । इति वायुपुराणम् ॥ गयाप्रदेशः । यथा, हेः रामायणे । २ । १०७ । ११ ।

"गयेन यजमानेन गयेष्वेव पितॄन् प्रति ।"

"गयेषु गयाप्रदेशेषु ।" इति तट्टीकायाम् ॥)

गया, स्त्री, (गयेन गयनाम्ना लोकप्रिसिद्धेनासुरेण पुराणान्तरमतभेदेन तन्नाम्ना राजर्षिणा वा निर्म्मिता ।) गयराजर्षिपुरी । इति हेमचन्द्रः । ४ । ३६ ॥ सा तु तीर्थभेदः । तस्य नामकरणं यथा,—

"यज्ञं चक्रे गयो राजा बहुन्नं बहुदक्षिणम् ।
यत्र द्रव्यसमूहानां संख्या कर्त्तुं न शक्यते ॥
गयं विष्णुादयस्तुष्टा वरं ब्रूहीति चाब्रुवन् ।
गयस्तान् प्रार्थयामास अभिग्रस्तास्तु ये पुरा ॥
ब्रह्मणा ते द्विजाः पूता भवन्तु क्रतुपूजिताः ।
गयापुरी तु मन्नाम्ना ख्यातु ब्रह्मपुरी तथा ॥
एवमस्तु वरं दत्त्वा ततश्चान्तर्दधुः सुराः ॥"* ॥

तस्योत्पत्तिकारणं यथा,—

"गयासुरोऽसुराणाञ्च महाबलपराक्रमः ।
योजनानां शतादञ्च शतञ्चोच्चयः स्मृतः ॥
स्थूलः यद्दियोजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः ।
कोलाहले गिरिवरे तपस्तेपे सुदारुणम् ॥
बहुवर्षसहस्राणि निरुच्छ्वासः स्थिरोऽभवत् ।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः ॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहम् ।
गयासुरात्तप देव ! ब्रह्मा देवांस्तथाब्रवीत् ॥
व्रजामः शङ्करं देवा ब्रह्माद्याश्च गताः शिवम् ।
कैलासे चाब्रुवन्नत्वा रक्ष रक्ष महाऽसुरात् ॥
ब्रह्माद्यांस्तानवीच्छम्भुर्व्रजाम शरणं हरिम् ।
क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति ॥
ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः ।
किमर्थमागता देवा विष्णुनोक्तास्तमब्रुवन् ॥
गयासुरभयाद्देव ! रक्षास्मानब्रवीद्धरिः ।
ब्रह्माद्या यान्तु तं दैत्यश्चागमिष्यामहं ततः ॥"*
"तमुक्तं वासुदेवाद्याः किमर्थं तप्यते त्वया ।
सन्तुष्टाश्चागताः सर्व्वे वरं ब्रूहि गयासुर ! ॥"
"यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः ।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात् ॥
मत्तेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्व्वशः ।
शुचिभ्योऽतिपवित्रोऽहं पवित्रः स्यांस्दा सुराः ॥
परित्रो भव तं देवा दैत्यसङ्घा ययुर्दिवम् ।
दृष्ट्वा दैत्यं ततः स्पृष्ट्वा सर्व्वे हरिपुरं ययुः ॥
शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत् ।
यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत् ॥
ब्रह्माणमूचिरे देवा गयासुरविलोपिताः ।
त्वया दत्तो योऽधिकारस्तं गृहाण पितामह ! ॥
ब्रह्माब्रवीत्ततो देवा व्रजामो विष्णुमव्ययम् ।
ब्रह्माद्योऽब्रुवन् विष्णुं त्वया दत्तवरोऽसुरे ॥
तद्गर्ज्जनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत् ।
देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत् ॥
गत्वासुरं प्रार्थयस्व यज्ञार्थं देहि देहकम् ।
विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यन्महासुरम् ॥

ब्रह्मोवाच ।

पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया ।
यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः ॥
अतः पवित्रं देहं स्वं यज्ञार्थं देहि मेऽसुर ! ॥

गयासुर उवाच ।

धन्योऽहं देवदेवेश ! यद्देहः प्रार्थ्यते त्वया ।
त्वयैवोत्पादितो देहः पवित्रश्च त्वया कृतः ।
सर्व्वेषामुपकाराय यागोऽवश्यं भवत्विति ॥
इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः ।
नैर्ऋतीं दिशमाश्रित्य तदा कोलाहले गिरौ ॥
शिरः कृत्वोत्तरे देवाः पादौ कृत्वा तु दक्षिणे ।
ब्रह्मा सम्भृतसम्भारो मानसादुत्थितोऽजनत् ॥
चलितश्चकितो ब्रह्मा धर्म्मराजमभाषत ।
यास्ते गृहे तव शिला तामानीयाच धारय ॥
देवस्य शीघ्रं शिरसि तां धारय समाहया ।
निश्चलार्थं यमः श्रुत्वा धारयन्मस्तके शिलाम् ॥
शिलायां धारितायान्तु सशिलश्चासुरोऽचलत् ।
देवानूचेऽथ रुद्रादीन् शिलायां निश्चलाः किल ॥
तिष्ठन्तु देवाः सकलास्तथेत्युक्त्वा च ते स्थिताः ।
देवाः पादैर्न्यधित्वा तथापि चलितोऽसुरः ॥
ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनम् ।
अजमूचे हरिः कस्मादागतोऽसि वदस्व तत् ॥

ब्रह्मोवाच ।

देवदेव ! कृते यागे प्रचचाल गयासुरः ।
इदानीं निश्चलार्थं हि प्रसादं कुरु माधव ॥
ब्रह्मणो वचनं श्रुत्वा ह्यालक्ष्य स्वशरीरतः ।
मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः ॥
आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत् ।
तथापि चलितं वीक्ष्य पुनर्देवमिहाक्रयत् ॥
आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत् ।
आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः ॥
स्थित इत्येव हरिणा तस्मादादिगदाधरः ॥"* ॥
"ऊचे गयासुरो देवान् किमर्थं वञ्चितो ह्यहम् ।
यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया ।
पीडायै यद्यहं देवाः प्रसन्नाः सन्तु सर्व्वदा ॥"
"वरं ब्रूहि प्रसन्नाः स्मो देवैरूचे गयासुरः ॥"
"यावत् पृथ्वी पर्व्वताश्च यावच्चन्द्रार्कतारकाः ।
तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः ॥
गदाधरः स्वयं लोकान् पूयात् सर्व्वाधनाशनः ।
आढ्यं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते ॥"
"किं बहूक्त्या सुरेशानां युष्माकमपि देवताः ।
नेत्र, तिष्ठाम्यहं नापि सत्यः प्रतिपाल्यताम् ॥"
"त्वया यत् प्रार्थितं वीर ! तद्भविष्यत्यसंशयम् ।
असुतृपादानर्च्चयित्वा यास्यन्ति परमां गतिम् ।
देवैर्देत्यवरो देत्यो हर्षितो निश्चलोऽभवत् ॥"

अथ गयाशिरआदिपरिमाणम् ।

"नागाष्टनाडीनाडूक्षयूपाश्चोत्तरमानसात् ।
एतन्नयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥
पितामहं समासाद्य यावदुत्तरमानसम् ।
फल्गुतीर्थन्तु विज्ञेयं देवानामपि दुर्लभम् ॥
क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः ।

सुखं गयासुरस्येतत्तस्मात् आद्धमथाक्षयम् ॥
सुखपृष्ठाच्च पूर्व्वस्मिन् पश्चिमे दक्षिणोत्तरे ।
आद्धे क्रोशद्वयं मानं गयायां ब्रह्मणेरितम् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ॥"

अथ गयामाहात्म्यादि ।

"गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।
सान्निध्यं सर्व्वतीर्थानां गयातीर्थे ततो वरम् ॥
ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् ।
वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥
आद्धकृद्यो गयाक्षेत्रे पितृणामनृणोऽपि सः ।
शिरसि आद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥
गयाशिरसि यः पिण्डान् येषां नाम्ना तु निर्व्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
गत्वा वणिग्गयाशीर्षे प्रेतराजस्य पिण्डकम् ।
प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ ॥
प्रेताः प्रेतत्वनिर्म्मुक्ता वणिक् च गृहमागतः ।
प्रेतराजः सह प्रेतैर्गयाश्राद्धाद्दिवं गतः ॥"*॥
"गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि दृहस्पतौ ।
तथा दैवप्रमादेन प्रवहत्सु व्रणेषु च ॥
पूतः कर्म्माधिकारी च आद्धकृद्ब्रह्मलोकभाक् ॥
मौने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ।
नारद! चिन्तु लोकेषु गयाश्राद्धं सुदुर्लभम् ॥"*॥
"सुखनद्योपवासश्च सर्व्वतीर्थैर्व्ययं विधिः ।
वर्ज्जयित्वा कुरुक्षेत्रं विष्णोर्नाभिं विरजां गयाम् ॥
दत्तं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ।
दत्तं तस्य विष्णुपदे पितृभिः सह मुच्यते ॥
गयागयो गयादित्यो गायत्री च गदाधरः ।
गया गयासुरश्चैव षड्गया मुक्तिदायिकाः ॥"

अथ पिण्डदानद्रव्याणि ।

"पायसेनाथ चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् ॥
तिलकल्केन खण्डेन गुड़ेन सघृतेन वा ।
केवलेनैव दध्ना वा अन्नेन मधुनाथवा ॥
पिण्याकं सघृतं खण्डं पिण्डस्योच्चयमिच्छतः ॥"

अथ गयास्थब्राह्मणपूजाविधिः ।

तत्रस्था ब्राह्मणा ब्रह्मात्मजाः ।
"त्वया यद्दत्तमखिलं तत् सर्व्वं ज्ञापितो गतम् ।
जीवनार्थं प्रसादं नो भगवन् ! कर्त्तुमर्हसि ॥
तत् श्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः ।
तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥
लोकाः पुण्यगयायां ये आद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा ॥"

अथ गयायां आद्धादिकरणार्थं तीर्थानि ।

प्रथमदिने गयाप्रवेशे फल्गुतीर्थे स्नानतर्पणश्राद्धानि १ प्रेतशिलायां ब्रह्मकुण्डे स्नानं आद्धं षोड़शपिण्डदानं प्रेतपर्व्वते तिलमिश्रितसक्तुनिक्षेपश्च २ पञ्चतीर्थमध्ये उत्तरमानसे स्नानं सपिण्डकं आद्धं सूर्य्यार्चनञ्च ३ दक्षिणमानसे उदीच्यां उदीचीतीर्थे स्नानम् ४ तस्य मध्ये कनखलतीर्थे स्नानम् ५ तस्य दक्षिणे दक्षिणमानसे तीर्थत्रये स्नानं आद्धं सूर्य्यार्चनञ्च ६ फल्गुतीर्थे स्नानं तर्पणं सपिण्डकं आद्धं ततो गदाधरस्य दर्शनं पूजनञ्च ७ ॥ द्वितीयदिने धर्म्मारण्ये गमनं धर्म्मेश्वरनमनं बोधितरुनमनञ्च ८ मतङ्गवाप्यां स्नानं तर्पणं आद्धं मतङ्गेशनमनं यूपकूपयोर्मध्ये आद्धञ्च ९ ॥ तृतीयदिने ब्रह्मसरसि स्नानं सपिण्डकं आद्धं यूपप्रदक्षिणं ब्रह्मनमनञ्च १० गोप्रचारसमीपे आम्रवृक्षसेचनम् ११ ततो यमकुक्कुरकाकबलिदानं पुनः स्नानञ्च १२ ॥ चतुर्थदिने फल्गुतीर्थे स्नानादिकं ततो गयाशिरसि विष्णुपदस्य दर्शनं स्पर्शनं पूजनं तत्र सपिण्डकं आद्धञ्च १३ रुद्रः १४ ब्रह्मा १५ दक्षिणाग्निः १६ गार्हपत्यः १७ आहवनीयः १८ सत्यः १९ आवसथ्यः २० शक्रः २१ अगस्त्यः २२ क्रौञ्चः २३ मातङ्गः २४ कार्त्तिकेयः २५ गणेशः २६ कश्यपः एषां पदेषु आद्धम् २७ गजकर्णिकायां तर्पणम् २८ कनकेशकेदारनरसिंहवामनरथमार्गाणां पूजनम् २९ ॥ पञ्चमदिने गदालोले स्नानं सपिण्डकं आद्धञ्च ३३ अक्षयवटे आद्धं ब्रह्मकल्पितविप्राणां पूजनं पुरोधसे षोड़शदानञ्च ३४ गायत्र्यग्रे प्रातःसन्ध्याचरणं सपिण्डकं आद्धञ्च ३५ समुद्यततीर्थे स्नात्वा सावित्र्यग्रे मध्याह्नसन्ध्याचरणं पिण्डदानञ्च ३६ प्राचीसरस्वत्यां स्नात्वा सायाह्नसन्ध्याचरणं ३७ विप्राला ३८ वेलिदानम् ३९ भरताश्रमनामकरामतीर्थम् ४० पदाङ्कितम् ४१ सुखपृष्ठस्यगदाधरसमीपम् ४२ आकाशगङ्गा ४३ गिरिकर्णसुखं एषु स्नानं पिण्डदानञ्च ४४ वैतरण्यां स्नानं पिण्डदानं आद्धं गोदानञ्च ४५ घृतकुल्या ४६ मधुकुल्या ४७ देविकानदी ४८ शिलासङ्गम ४९ मधुस्रवासु स्नानं सपिण्डकं आद्धं पिण्डदानञ्च ५० दशाश्वमेधिकम् ५१ हंसतीर्थम् ५२ अमरकण्टकम् ५३ कोटितीर्थम् ५४ रुक्मिणीकुण्डं एषु पिण्डदानम् ५५ मार्कण्डेश्वर- ५६ कोटीश्वरयोर्दर्शनं नमनञ्च ५७ दिवौकसां पुष्करिण्यां पिण्डश्चो दानम् ५८ पङ्कजवने पाण्डुशिलायां आद्धम् ५९ सुखतीर्थे स्नानं तर्पणं पिण्डदानञ्च ६० गयाकूपे पिण्डदानं ६१ भस्मकूटे भस्मना स्नानम् ६२ सङ्गमतीर्थे स्नानम् ६३ धेनुकारण्ये पिण्डदानम् ६४ कामधेनुपदे स्नात्वा कामदुघानमनम् ६५ ॥ * ॥
"कर्हमाले गयानाभौ सुखपृष्ठसमीपतः ।
स्नात्वा आद्धादिकं कृत्वा पितृणामनृणो भवेत् ॥
फल्गुचक्रीशप्रयागाक्षीमङ्गलाद्याः समर्चयेत् ।
गयायाश्च दृषोत्सर्गस्त्रिसप्तकुलमुद्धरेत् ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥ * ॥

तत्र मरणे मुक्तिर्यथा, तत्रैव ३ अध्याये ।
"गदाधरोद्भ्यतीर्थे सर्व्वतीर्थोत्तमोत्तमम् ।
मुक्तिर्भवेत् पितृणाञ्च कर्त्तॄणां आहृतः सदा ॥
जरायुजा अण्डजा वा स्वेदजा वापि योद्भिदः ।
ब्रह्मा देहं शिलायां ते यान्ति विष्णुस्वरूपताम् ॥"
तत्रस्थजनार्द्दनहस्ते जीवितस्य पिण्डदानविधि र्यथा,—
"जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यथवान्येषां सर्व्वनैव तिलैर्विना ॥
जीवतां दधिसंमिश्रं सर्व्वं ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो नते प्रभो ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गया शिरे ।"
इति च वायुपुराणे गयामाहात्म्ये ४ अध्यायः ॥

गरं, क्ली, (गिरति दोषबहुलं नाशयति खलिन् जातस्य बालकस्येति भावः । ग + पचाद्यच् ।) वनदेवीकादशकरकरान्तर्गतपञ्चमकरणम् । इति मेदिनी । रे । २२ ॥ (यथा, बृहत्संहितायाम् । ६६ । ४ ।
"वबबालवकौलवतैतिलाख्य
गरवणिजविष्टिसंज्ञानाम् ।"
एतेषामधीशाः । यथा, तत्रैव । ६६ । ४-५ ।
" पतयः सुरेन्द्रकमलज-
मित्रार्य्यमभूश्रियः सयमाः ॥
क्षणाच्चतुर्द्दश्यर्धाद् ध्रुवाणि
ध्रुवकृत्तिश्चतुष्पदं नागम् ।
किन्तुघ्नमिति च तेषां
कलिदृषदक्षिणमारुताः पतयः ॥")
तत्र जातस्य फलम् ।
"विचारदक्षो विजितारिपक्षः
शूरोऽतिधीरो दृढहास्ययुक्तः ।
दाता दयालुर्गुणवान्नरः स्याद्
गरे परेषामुपकारकर्त्ता ॥"
इति कोष्ठीप्रदीपः ॥
(गरादेः फलं यथा, बृहत्संहितायाम् । ६६ । ७ ।
"क्षतिबीजगृहाश्रयजानि गरे
वणिजि ध्रुवकार्य्यवणिग्युतयः ॥"
गीर्य्यते भक्ष्यते इति । गॄ + कर्म्मण्यप् ।) विषम् । (यथा, भागवते । ८ । ७ । ३१ ।
"तस्मादिदं गरं मुञ्च प्रजानां स्वस्तिरस्तु मे ॥")
वत्सनाभाख्यविषम् । इति राजनिर्घण्टः ॥ (सम्मोहजं विषम् । इति माधवकरकृततदनिश्चयटीकाकृता श्रीकण्ठदत्तेनोदररोगव्याख्याने उक्तम् ॥)

गरः, पुं, (गीर्य्यते इति । गॄ + कर्म्मणि अप् ।) विषम् । (यथा, भागवते । ६ । १४ । ४३ ।
"विद्वेषनरमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय दुर्मर्षा वृषतिं प्रति ॥")
उपविषम् । रोगः । इति हेमचन्द्रः । ४ । ३८० ॥

गरत्नः, पुं, (गरं विषं हन्तीति । हन् + टक् ।) क्षणाजकः । वर्व्वरः । इति राजनिर्घण्टः ॥

गरत्नी, स्त्री, (गरत्न + टित्वात् ङीप् ।) मतस्यविशेषः । गरइ इति भाषा । अस्या गुणाः । मधुरत्वम् । कषायत्वम् । वातपित्तकफनाशित्वम् । रुचिबलवीर्य्यकारित्वम् । दीपनत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥

("गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत्। कफघ्नी रुचिलघ्वी दीपनी बलवीर्यकृत्॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥
गरं संसारयातनारूपं विषं हन्तीति। हन्+टक् ङीप् च। गङ्गा। यथा, काशीखण्डे। २६।५४।
"ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला॥")
गरणं, क्ली, (ग सेचने गॄ निगरणे+भावे ल्युट्।) सेचनम्। निगरणम्। इति व्याकरणम्॥
गरदं, क्ली, (गॄ+भावे अप्। गरो भक्षणम्। गरेण भक्षणेन दीयते खण्ड्यते म्रियतेऽस्मादनेन वा। दो+अपादाने करणे वा घञर्थे कः।) विषम्। इति राजनिर्घण्टः॥
गरदः, त्रि, (गरं विषं ददातीति। दा+कः।) विषदानकर्त्ता। (अयं हि आततायिनामन्यतमः। अस्य हनने दण्डादिकं नास्ति।) यथा, स्मृतिः।
"अग्निदो गरदश्चैव ग्रस्तपाणिर्धनापहः।"
(अयं हि आद्धभोजने परिहर्त्तव्यः। तथा च मनौ। ३। १५८।
"आगारदाही गरदः कुण्डाशी सोमविक्रयी। समुद्रयायी वन्दी च तैलिकः कूटकारकः॥")
गरव्रतः, पुं, (गरो गरणं सर्पादिग्रसनरूपं व्रतं नैसर्गिको नियमो यस्य।) मयूरः। इति शब्दरत्नावली॥
गरभः, पुं, (गॄ+बाहुलकात् अभच्।) गर्भः। इति हेमचन्द्रः। ३।२०४॥
गरलं, क्ली, (गिरति ग्रसति नाशयतीत्यर्थः। गॄ+अलच्। गरात् भक्षणात् लाति आदत्ते जीवनं वा। ला+कः।) विषम्। इत्यमरः। २।८।६॥ (यथा, गीतगोविन्दे ४। २।
"आखण्डलगरलमिलनेन गरलमिव कलयति मलयसमीरम्॥")
पन्नगविषम्। परिमाणम्। लवणपूलकम्। इति हेमचन्द्रः॥ घासेर गल्ला पुला आटि इत्यादि भाषा॥
गरलारिः, पुं, (गरलस्य विषस्य अरिः तन्नाशकत्वात्तथात्वम्।) मरकतमणिः। इति राजनिर्घण्टः॥
गरा, स्त्री, (गीर्य्यते भक्ष्यते औषधार्थं रोगिभिरिति योगः। गॄ+कर्म्मण्यप्। ततोऽजादित्वात् टाप्।) देवदालीलता। इति राजनिर्घण्टः॥ निगरणम्। इति धरणी॥
गरागरी, स्त्री, (गरं विषं आगिरति नाशयतीति। गरं मूषिकविषमिलके। आ+गॄ अच्। संज्ञायां जातौ वा ङीष्।) देवताड़वृक्षः। इत्यमरटीकायां स्वामी॥ (यथास्याः पर्य्यायाः।
"गरागरी च वेणी च तथा स्याद्देवताड़कः।"
इति कल्पस्थाने द्वितीयेऽध्याये चरकेणोक्तम्॥ गुणाश्चास्या जीमूतकशब्दे ज्ञातव्याः॥)
गरात्मकं, क्ली, (गरः विषं आत्मा जीवभूतं यस्य इति कप्।) श्वेताञ्जनबीजम्। इति रत्नचन्द्रिका॥
गराधिका, स्त्री, (गरेषु गरप्रतीकारादिषु अधिका प्रधाना।) लाक्षा। इति रत्नमाला। गराधिका गवाधिकापि पाठः॥ (गरादधिका। विषप्रधाना॥)
गरिमा, [न्] त्रि, ("प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धेति।" ६। ४। १५७। इति गरादेशः। पृथ्वादिभ्य इमनिज्वा।" ५। १। १२२। इति इमनिच्।) गुरुता। इति व्याकरणम्॥ (यथा, भागवते। ८। २। २२।
"गिरिं गरिम्णा परितः प्रकम्पयन्॥
निषेव्यमाणोऽलिकुलैर्मदाशनैः॥")
गरिष्ठः, त्रि, (अतिशयेन गुरुः। "प्रियस्थिरेति।" ६।४।१५७। इति इष्ठन् गरादेशश्च।) अतिगुरुः। इति जटाधरः॥ (पुं, दानवविशेषः। यथा, महाभारते। १। ६५। ३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः॥"
नृपविशेषः। यथा, तत्रैव। २।७।१२।
"हविर्म्मांश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः॥")
गरी, स्त्री, (गर+जातौ संज्ञायां वा ङीष्।) देवताड़वृक्षः। इत्यमरः। २।४।६६॥ खरा। इति मेदिनी। रे। २२॥ (देवताड़शब्देऽस्या विवरणं द्रष्टव्यम्॥)
गरीयान्, [स्] त्रि, (अतिशयेन गुरुः। गुरु+इयसुन् गरादेशश्च।) अतिगुरुः। इति व्याकरणम्॥
गरुड़ः, पुं, (गरुद्भ्यां पक्षाभ्यां डयते उड्डयते। इति गरुत्+डी+डः। पृषोदरात् तलोपे साधुः। यद्वा, "गिर उड़च्।" उणां ४।१५५। इति उड़च्।) खगनामख्यातपक्षी। तत्पर्य्यायः। गरुत्मान् २ तार्क्ष्यः ३ वैनतेयः ४ खगेश्वरः ५ नागान्तकः ६ विष्णुरथः ७ सुपर्णः ८ पन्नगाशनः ९। इत्यमरः। २। २। ३२॥ महावीरः १० पक्षिसिंहः ११ उरगाशनः १२। इति जटाधरः॥ शालशली १३ हरिवाहनः १४ अन्तताहरणः १५ नागाशनः १६। इति हारावली॥ शालशलिश्च १७ खगेन्द्रः १८ भुजगान्तकः १९ तरक्षी २० तार्क्ष्यनायकः २१। इति राजनिर्घण्टः॥*॥ तस्योत्पत्तिकारणं यथा,—
"यजतः पुत्रकामस्य कश्यपस्य प्रजापतेः।
साहाय्यमृषयो देवा गन्धर्व्वाश्च ददुः किल॥
तत्रैधाग्रयणे शुक्रो नियुक्तः कश्यपेन ह।
मुनयो वालिखिल्याश्च ये चान्ये देवतागणाः॥
शुक्रस्तु वीर्य्यसद्भूमिघृभारं गिरिप्रभम्।
समुत्क्षिप्यानयामास नातिहृष्टादिव प्रभुः॥
अथापश्यद्बलौ दृप्तानङ्गुष्ठोदरवर्ष्मणः।
बलाग्रहणिकामेकां सहिताग् वहतः पथि॥
तान् सर्व्वान् विस्मयाविष्टो वीर्य्योन्नद्धः पुरन्दरः।
अवहस्याभ्ययाच्छीघ्रं लङ्घयित्वावमन्य च॥
तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः।
आरेभिरे महत् कर्म्म तदा शत्रुभयङ्करम्॥
कामवीर्य्यः कामगमो देवराजभयप्रदः।
इन्द्रोऽन्यो सर्व्वदेवानां भवेदिति यतव्रताः॥
तद्बुद्ध्वा भृशसन्तप्तो देवराजः शुतक्रतुः।
जगाम शरणं तत्र कश्यपं शंसितव्रतम्॥
तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत॥
अथ ते तं महात्मानं प्रत्यूचुः सत्यवादिनः।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः॥"
तस्य पक्षीन्द्रत्वकारणं यथा,—
"अयमिन्द्रक्षिसुवने नियोगात् ब्रह्मणः कृतः।
इन्द्रार्थञ्च भवन्तोऽपि यत्नवन्तस्तपोधनाः॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः।
भवतां हि न मिथ्यायं संकल्पो वै चिकीर्षितः॥
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान्।
प्रसादः क्रियतामस्य देवराजस्य याचतः॥
वालिखिल्या ऊचुः।
अपत्यार्थे समारम्भो भवतश्चायमीप्सितः।
तथा चैवं विधत्स्वात्र यथाग्रेयोऽनुपश्यसि॥
एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा।
विनता नाम कल्याणी पुत्रकामा यशस्विनी॥
तपस्विनी व्रतपरा स्नाता पुंसवने शुचिः।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः॥
आरम्भः सफलो देवि! भवितायं तवेप्सितः।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ॥
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा।
एतौ सर्व्वपतत्रीणामिन्द्रत्वं कारयिष्यतः॥
विनता चापि सिद्धार्था बभूव मुदिता तथा।
जनयामास पुत्रौ द्वावण्डं गरुड़ं तथा॥
विकताङ्गोरुबलश्च भास्करस्य पुरःसरः।
पतत्रीणान्तु गरुड़ इन्द्रत्वेनाभ्यषिच्यत॥"*॥
तस्य जन्मकालीनरूपं यथा,—
"एतस्मिन्नन्तरे चापि गरुड़ः काल आगते।
विना मात्रा महातेजा विदार्य्याण्डमजायत।
महाबलबलोपेतः सर्व्वा विद्योतयन्दिशः।
कामरूपी कामगमः कामवीर्य्यो विहङ्गमः॥
अग्निराशिरिवोद्भासन् समिद्धोऽतिभयङ्करः।
विद्युद्विस्फूर्जितप्रख्यो युगान्तायसिसमप्रभः॥
प्रवृद्धः सहसा पक्षी महाकायो नभो गतः।
घोरो घोरस्वनो रौद्रो वह्निरौर्व इवापरः॥"*॥
तस्य विष्णुवाहनत्वे कारणं यथा,—
"अपीत्वा चान्दतं पक्षी परिश्रान्तो निःसृतः।
अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां खगः॥
विष्णुना तु तदाकाशे वैनतेयः समेयिवान्।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा॥
तमुवाचाथयो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्चास्मन्ततेन विनाप्यहम्॥
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्॥
प्रतियुद्ध्य वरौ तौ तु गरुड़ो विष्णुमब्रवीत्।
भवतोऽपि वरं दद्मि वृणोतु भगवानपि॥
तं वव्रे वाहनं कृष्णो गरुत्मन्तं महाबलम्।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम्॥"
इति महाभारते। १। २१-३५। अश्वाश्वेषु॥

(यूहविशेषः। यथा, मनुः। ७। १८७।
"वराहमकराभ्यां वा छत्रेण वा गरुडेन वा॥"
"छत्रमसखपक्षाङ्गः पृथुमध्यो वराहयूहः। एष एव पृथुतरमध्यो गरुडयूहः।" इति कुल्लूकभट्टः॥)
गरुड़ध्वजः, पुं, (गरुड़ः ध्वजचिह्नं यस्य। यद्वा, गरुड़ो ध्वजे रथध्वजे यस्य।) विष्णुः। इत्यमरः। १।१।१६॥ (यथा, विष्णुपुराणे। ५।१।३३।
"इत्युक्ता प्रययौ विप्र! सहदेवैः पितामहः।
समाहितमतिश्चैवं स्तुतवान् गरुड़ध्वजम्॥"
अस्य एतन्नामकारणकथा यथा, महाभारते। १। ३३। १२-१७।
"विष्णुना तु तदाकाशे वैनतेयः समेयिवान्।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्च स्यामन्तेन विनाप्यहम्।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्॥"
"ध्वजश्च चक्रे भगवानुपरि स्थास्यतीति तम्॥")
गरुड़ाग्रजः, पुं, (गरुड़स्य अग्रजो ज्येष्ठः।) अरुणः। इत्यमरः। १।३।३२॥ (अस्य गरुड़ाग्रजत्वकथा यथा, महाभारते। १।३१।२४-३४।
"विनता नाम कल्याणी पुत्रकामा यशस्विनी।
तपस्तप्ता व्रतपरा स्नाता पुंसवने शुचिः॥
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः।
आरभ्यः सफलो देवि! भवितायं तवेप्सितः॥
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ।
तपसा बालिखिल्यानां मम सङ्कल्पजौ तथा॥
भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ।
उवाच चैनं भगवान् कश्यपः पुनरेव ह॥
धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः।
एतौ सर्व्वपतत्रीणामिन्द्रत्वं कारयिष्यतः॥"
"विनता चापि सिद्धार्था बभूव मुदिता तथा।
जनयामास पुत्रौ द्वावरुणं गरुड़ं तथा॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः।
पतत्रीणाञ्च गरुड़ इन्द्रत्वेनाभ्यषिच्यत॥")
गरुड़ाङ्कितं, क्ली, (गरुड़ इव अङ्कितम्। गरुड़सादृश्यादस्य तथात्वम्।) मरकतमणिः। इति शब्दरत्नावली॥
गरुड़ाश्मा, [न्] पुं, (गरुड़वर्णवत् अश्मा प्रस्तरः। गरुड़वर्णसादृश्यात् तथात्वम्।) मरकतमणिः। इति जटाधरः॥
गरुड़ोत्तीर्णं, क्ली, (गरुड़ादुत्तीर्णं वर्णेनेति शेषः। यद्वा, गरुड़ उत्तीर्णो वर्णेनातिक्रान्तो येन।) मरकतमणिः। इति राजनिर्घण्टः॥
गरुत्, पुं, (गृणाति शब्दायते वायुवेगवशादिति। गृ गि शब्दे + "ग्रहिगरतिः।" उणा। १। ६६। इति उतिः।) पक्षः। इत्यमरः। २। ५। ३६॥ पाखा इति भाषा॥ (गिरतीति। गृ निगरणे + उतिः। निगरणम्। भक्षणम्। यथा, यजुर्व्वेदे। १७।७२। "सुपर्णोऽसि गरुत्मान् पृष्टे।"
"अये! त्वं सुपर्णोऽसि सुपर्णपक्षाकारो गरुड़ोऽसि गरुत्मान् गरुत् गरणं गिलनं भक्ष अस्यास्तीति गरुत्मान् अग्रनायत्वान्नित्यर्थः।" इति वेददीपितिः॥)
गरुत्मान्, [त्] पुं, (गरुत् पक्षाः सन्त्यस्य। गरुत् + मतुप्।) गरुड़ः। इत्यमरः। १।१।३१। (यथा, भागवते। ३। १६। ११।
"जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम्॥")
पक्षिमात्रम्। इति मेदिनी। ते। १६६॥
गरुद्योधी, [न्] पुं, (गरुता पक्षेण युध्यतीति। युध् + णिनिः।) भारतीपक्षी। इति चिकाण्डशेषः॥ भारइ इति भाषा॥
गर्गः, पुं, (गृणाति वेदध्वनिना शब्दायते स्तौति इत्यर्थः। गृ गि शब्दे + "सृदिगोर्गगौ।" उणा। १।१२७। इति गः।) मुनिविशेषः। स तु गयाक्षेत्रे यज्ञार्थं स्रष्टो ब्रह्मणः पुत्रः। इति वायुपुराणे गयामाहात्म्ये २ अध्यायः॥ (हृहस्पतिवंशसम्भवोऽन्यो मुनिभेदः। स तु वितथस्य पुत्रः। यथा, हरिवंशे। ३२। १५—२०।
"हृहस्पतेरङ्गिरसः पुत्रो राजन्महामुनिः।
संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः॥
अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसंक्रमणञ्चापि मरुद्भिर्भरताय वै॥
अयाजयद्भरद्वाजो मरुद्भिः क्रतुभिर्हि तम्।
पूर्व्वन्तु वितथे तस्य क्षते वै पुत्रजन्मनि॥
ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ।
स चापि वितथः पुत्रान् जनयामास पञ्च वै॥
सुहोत्रञ्च सुहोतारं गयं गर्गन्तथैव च॥"
अयं हि शिवमाराध्य चतुःषष्ट्यङ्गज्योतिषादिज्ञानमलभत। यथा, महाभारते। १३।१८।३८।
गर्ग उवाच।
"चतुःषष्ट्यङ्गमददत् कलाज्ञानं ममाद्भुतम्।
सरस्वत्यास्तटे तुष्टो (शिवः) मनोयज्ञेन पाण्डव॥"
तथा, बृहत्संहितायाम्। २१। ५।
"न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये॥"*॥)
तालविशेषः। यथा, सङ्गीतदामोदरे।
"चतुर्द्वैतं विरामान्तं तालोऽयं गर्गसंज्ञितः॥"
गर्गरः, पुं, (ग गि शब्दे + भावे गः। गर्गं शब्दं रातीति। रा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) मत्स्यभेदः। इति जटाधरः॥ गागरा इति भाषा॥ अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ अस्याकारगुणौ यथा, राजनिर्घण्टे।
"यः पीतवर्णोऽपि च पिच्छिलाङ्गः
पृष्ठेषु रेखा बहुलः सगुल्कः।
स गर्गरो वर्व्वरनादवश्यो
जड़श्च शीतः कफवातकारी॥"
"गर्गरः पित्तलः किञ्चित् वातजित् कफकोपनः।"
इति भावप्रकाशः॥
गर्गरी, स्त्री, (गर्गं शब्दं रातीति। रा + कः। गौरादित्वात् ङीष्।) मन्थनी। दधिमन्थनपात्रम्। इत्यमरः। २। ६। ७४॥ कलसी। गागरी इति भाषा॥ यथा, तिथ्यादितत्त्वे।
"मेघादौ सक्तवो देया वारिपूर्णा च गर्गरी॥"
गर्गाटः, पुं, (गर्गेति शब्दं कृत्वा अटतीति। गर्ग + अट् + पचाद्यच्। मकन्धादिवदकारलोपः।) मत्स्यविशेषः। तत्पर्य्यायः। योगनाविकः २। इति हारावली। १८६॥
गर्ज्ज, ऊर्ज्जाशब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऊर्ज्जा बलम्। सेमक्तात् सरोरिति यः तत्करणकशब्दः। गर्ज्जति सिंहः। इति दुर्गादासः॥
गर्ज्ज, क खने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गर्ज्जयति। इति दुर्गादासः॥
गर्ज्जं, क्ली, (गर्ज्जनमिति। गर्ज्ज + भावे घञ्।) हस्तिशब्दः। इति हेमचन्द्रः। ६। ४१॥ मेघादिशब्दश्च॥
गर्ज्जकः, पुं, (गर्ज्जतीति। गर्ज्ज + ण्वुल्।) मत्स्यविशेषः। गजाड़ इति भाषा॥ तत्पर्य्यायः। ग्राल्लः। ग्रालजः ३। इति शब्दरत्नावली॥ (ग्रालशब्दोऽस्य विवृतिर्ज्ञातव्या॥)
गर्ज्जनं, क्ली, (गर्ज्ज + भावे ल्युट्।) शब्दः। (गर्ज्जयतेऽनेनेति। गर्ज्ज + करणे ल्युट्।) कोपः। इति मेदिनी। ने। ५६॥
गर्ज्जरं, क्ली, मूलविशेषः। गाजर इति भाषा॥ तत्पर्य्यायः। पिण्डमूलम् २ पीतकन्दम् ३ सुमूलकम् ४ खादुमूलम् ५ सुपीतम् ६ नारङ्गम् ७ पीतमूलकम् ८। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। किञ्चित् कटुत्वम्। कफाध्मानक्रिमिमूलदाहपित्तलक्षणानाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"गाजरं गञ्जनं प्रोक्तं तथा नारङ्गवर्णकम्।
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु॥
संनाहि रक्तपित्तार्शोग्रहणीकफवातजित्॥"
इति भावप्रकाशः॥
गर्ज्जाफलः, पुं, (गर्ज्जा मर्म्मरध्वनिः फले यस्य। शुष्कपक्वफले शब्दबाहुल्यादस्य तथात्वम्।) विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥ (गर्ज्जा गर्ज्जनमेव फलं यस्य।) युद्धम्। इति हेमचन्द्रः॥ भर्त्सनम्। उत्तेजनम्। इति शब्दरत्नावली॥
गर्ज्जिः, पुं, (गर्ज्ज ऊर्ज्जाशब्दे + "सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) मेघशब्दः। इति हेमचन्द्रः। ६। ४२॥
गर्ज्जितं, क्ली, (गर्ज्ज + भावे क्तः।) मेघशब्दः। इत्यमरः। १। ३। ८॥ (रणादौ आस्फालनम्। यथा, हरिवंशे। १८२। ४६।
"बाण! किं गर्ज्जसे मोहात् शूराणां नास्ति गर्ज्जितम्।
एह्येहि युध्यस्व रणे किं वृथा गर्ज्जितेन ते॥")
कृतशब्दे च॥ (यदुक्तं स्मृतौ।
"सत्यायां गर्ज्जिते मेघे ग्राम्यचिन्तां करोति यः।
पतन्ति तस्य नश्यन्ति आयुर्विद्या यशो बलम्॥")

गर्जितः, पुं, (गर्ज्जो गर्ज्जनं जातोऽस्य। जातार्थे इतच्।) मत्तहस्ती। इत्यमरः। २। ८। ३६॥

गर्त्तः, पुं, (गिरति ग्रसति खलिनं पतितं जीवजातादिकमित्यर्थः। गॄ निगरणे+"हसिमृगृभ्यिण्वामिदमीति।" उणा। ३। ८६। इति तन्।) भुवि स्वभ्रम्। गाड़ा इति भाषा॥ तत्पर्य्यायः। अवटः २। इत्यमरः। १। ८। २॥ भूरन्ध्रम् ३ दरः ४ स्वभ्रम् ५। इति जटाधरः॥ आवटिः ६ आवटुः ७ पृथिवीरन्ध्रम् ८। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। २१। ६।

"धरण्यां विद्यते गर्त्ते निपपात लघुक्रमः॥")

त्रिगर्त्तदेशः। कुकुन्दरः। इति मेदिनी। ते। १३॥ रोगभेदः। इति शब्दरत्नावली॥ (मालगर्भरूपगह्वरम्। यथा, भागवते। ३। ३१। ५।

"ग्रैवे विण्मूत्रयोर्गर्त्ते स जन्तुर्जन्तुसम्भवे॥"

कूपः। यथा, तत्रैव। ३। १३। ३४।

"यद्रोमगर्त्तेषु निलिल्युरध्वरास्रस्ते नमः कारणशूकराय ते॥"

नरकविशेषः। यथा, मार्कण्डेये। २१। १०।

"निपपात महागर्त्ते तिमिरौघसमावृते॥"

अल्पधनुःसहस्रेभ्यो न्यूनगतिदेवखातभेदः। एतल्लक्षणं यथा, छन्दोगपरिशिष्टे।

"धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः॥"

अस्योदाहरणं यथा, मनौ। ४। २०३।

"नदीषु देवखातेषु तडागेषु सरःसु च। स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥"

गीर्य्यते स्तूयते वेदस्तुतिं कुर्व्वता जनेनेति। ग+तनु गुणश्च। देवरथः। यथा, ऋग्वेदे। ५।६२।८।

"आरोहथो वरुण! मित्र! गर्त्तमतश्चाथो अदितिं दितिं च॥" "गर्त्तं रथम॥" इति भाष्यम्॥)

गर्त्तिका, स्त्री, (गर्त्तोऽस्त्यस्याः इति ठन्।) तन्तुशाला। इति हेमचन्द्रः। ३। ६५॥ तांतघर इति भाषा॥

गर्द्, कि रवे। इति कविकल्पद्रुमः॥ (चुरां-पक्षे-भ्वां-परं-अकं-सेट्।) कि, गर्द्दयति गर्द्दति। रवः शब्दः। इति दुर्गादासः॥

गर्द्दभं, क्ली, (गर्द्दते शब्द्यते विश्रूयते गन्धादिभिरिति यावत्। गर्द् रवे। "कॄगृशॄदृभ्यो भः।" उणा। ३।१२२। इति अभच्।) श्वेतकुसुदम्। इति हेमचन्द्रः॥ (यथा, वैद्यकरत्नमालायाम्।

"कैरवं चन्द्रकान्तञ्च गर्द्दभं कुसुदं कुसुत्॥")

विड्लवणम्। इति रत्नमाला॥

गर्द्दभः, पुं, (गर्द्दते गर्द्दयति वा कर्कशशब्दं करोतीत्यर्थः। गर्द् कि रवे+"कॄगृशॄदृभ्यो भः।" उणा। ३। १२२। इति अभच्।) पशुविशेषः। गाधा इति भाषा। (यथा, मनौ। ८। २६८।

"गर्द्दभाजाविकानान्तु दण्डः स्यात् पञ्च माषिकः॥")

तत्पर्य्यायः। चक्रीवान् २ वालेयः ३ रासभः ४ खरः ५। इत्यमरः। २। ६। ७७॥ राशभः ६। इति तट्टीका॥ शङ्कुकर्णः ७ भारगः ८ भूरिगमः ९ धूसराक्षयः १० वेशवः ११ धूसरः १२। इति जटाधरः॥ खरस्वरः १३ चिरमेही १४ पशुचरिः १५ चारपुष्पः १६ चारटः १७ ग्राम्याश्वः १८। इति शब्दरत्नावली॥ *॥ अस्य मांसस्य गुणाः। किञ्चित् गुरुत्वं बलप्रदत्वञ्च। मूत्रस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। क्षारत्वम्। कफमहावातभूतकृम्योन्मादहरत्वञ्च। इति राजनिर्घण्टः॥ (तथा च।

"गार्द्दभं वा घनं मूत्रं तैलयोग्यं क्वचिद्भवेत्। सक्षारं तिक्तकटुकमुन्मादकुष्ठरोगजित्॥"

इति हारीते प्रथमे स्थाने नवमेऽध्याये॥

"गरचैतोविकारघ्नं तीक्ष्णं यकृन्निरोगनुत्। दीपनं गार्द्दभं मूत्रं कृमिवातकफापहम्॥"

इति सुश्रुते सूत्रस्थाने ५४ अध्याये॥)

तस्मात् गुणग्रिच्छा यथा,—

"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति। ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्॥"

इति चाणक्यम्। ७०॥

गर्द्दभगदः, पुं, (गद्यते पीड्यतेऽनेनागद+करणे अच्। गदो रोगः। गर्द्दभनामको गदः शाकपार्थिववत् समासः।) व्वालागर्द्दभकरोगः। इति राजनिर्घण्टः॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम्॥

गर्द्दभशाकः, पुं, (गर्द्दभाख्यः शाकः। यद्वा, गर्द्दभप्रियः शाको यस्य।) ब्रह्मयष्टिवृक्षः। इति जटाधरः॥

गर्द्दभशाका, स्त्री, (गर्द्दभशाक+टाप्।) ब्रह्मयष्टिः। वामनहाटी इति भाषा॥ इति रत्नमाला॥

गर्द्दभशाखी, स्त्री, (गर्द्दभाख्या शाखा यस्याः। यद्वा गर्द्दभप्रिया शाखा यस्याः जातौ संज्ञायां वा ङीष्।) भार्गी। इति राजनिर्घण्टः॥

गर्द्दभाण्डः, पुं, (गर्द्दभं गन्धविशेषं अमति गच्छति प्राप्नोतीत्यर्थः। अम गत्याम्+"अमन्ताड्डः।" उणा। १।११३। इति डप्रत्ययः।) वृक्षविशेषः। गान्धिभाट इति ख्यातः। अयं पत्रकाण्डफलादिभिरश्वत्थाकारः। गन्धपिप्पलः। इति केचित्। इति भरतः॥ गर्द्दपिप्पली। इति ख्यातः। इति सारसुन्दरी॥ तत्पर्य्यायः। कन्दरालः २ कपीतनः ३ सुपार्श्वकः ४ ब्रह्मः ५। इत्यमरः। २। ४। ४२॥ शुक्षी ६ ध्रुवः ७ कमण्डलुः ८। इति जटाधरः॥ गर्द्दभाण्डः ९ ब्रह्मश्रेष्ठः १० कन्दरालकः ११। इति शब्दरत्नावली॥ ब्रह्मवृक्षः। इति राजनिर्घण्टः॥ पाकुड़ इति भाषा॥ (कपीतनाश्वत्थशब्दयोरस्य विवृतिर्द्रष्टव्या॥)

गर्द्दभाक्षयः, पुं, (गर्द्दभेन गन्धेन आक्षयति सर्द्दते इति। आ+क्षै+अच्। यद्वा गर्द्दभः आक्षयः आख्या अस्य।) कुसुदम्। इति हेमचन्द्रः। ४। २३०॥

गर्द्दभिका, स्त्री, (गर्द्दभः दुर्गन्धमयपिड़कामेदो विद्यतेऽस्यामिति ठन् टाप् च।) क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—

"मण्डलं वृत्तसुत्सन्नं सरक्तं पिड़कान्वितम्। रजाकरीं गर्द्दभिकां तां विद्यात् वातपित्तजाम्॥"

तच्चिकित्सा यथा,—

"विदग्धामिन्द्रवृद्धाच्च गर्द्दभीं जालगर्द्दभम्। पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्॥ पाके तु शोधयेदाद्यैः पक्वैर्मधुरभेषजैः॥"

इति भावप्रकाशः॥

गर्द्दभी, स्त्री, (गर्द्दभस्य पत्नीति स्त्रियां जातौ गौरादित्वाद्वा ङीष्।) गर्द्दभपत्नी। ("सह्येव दृष्ट्या पुत्त्रैर्भारं वहति गर्द्दभी॥")

तस्याः क्षीरस्य गुणाः। बलकारित्वम्। वातश्वासहरत्वम्। मधुराम्लरसत्वम्। रूक्षत्वम्। दीपनत्वम्। पथ्यत्वञ्च। तद्धिगुणाः। रूक्षत्वम्। उष्णत्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। मधुराम्लरसत्वम्। रुच्यत्वम्। वातदोषनाशित्वञ्च। तन्नवनीतगुणाः। कषायत्वम्। कफवातनाशित्वम्। बल्यत्वम्। दीपनत्वम्। पाके लघुत्वम्। उष्णत्वम्। मूत्रदोषकारित्वञ्च। इति राजनिर्घण्टः॥ क्षुद्रजन्तुविशेषः। गर्द्दभिकारोगः। इति मेदिनी। ने। १६॥ (अस्य लक्षणं यथा,—

"सा विद्वा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी। मण्डला विपुलोत्सन्ना सरागपिटिकाचिता॥"

इति वाभटे उत्तरस्थाने एकत्रिंशेऽध्याये॥)

अपराजिता। श्वेतकण्टकारी। कटभी। इति राजनिर्घण्टः॥ (क्षुद्रकीटभेदः। यथाह सुश्रुतः।

"पञ्चकीटो दुन्दुभिको मकरः शतपादकः। पञ्चालकः पाकमत्स्यः क्षय्यानुण्डोऽथ गर्द्दभी॥")

गर्द्ह्, क लिप्से। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, गर्द्ह्यति। इति दुर्गादासः॥

गर्द्ह्यः, पुं, (गर्द्ह्यते इति। गर्द्ह+भावे घञ्।) स्पृहा। इति हेमचन्द्रः। ३। ६४॥ गर्द्भाण्डवृक्षः। इति शब्दचन्द्रिका॥

गर्द्ध्नः, त्रि, (गृध्यति स्पृहयतीति। गृध्+"जुचङ्क्रम्यदन्द्रम्यकृधिकथीति।" ३। २। १५०। इति युच्।) लुब्धः। इत्यमरः। ३। ६। २२॥

ग(र्ब्व)र्ब्व, तृ क ङ दर्पे। इति कविकल्पद्रुमः॥ (अदन्त चुरां-आत्मं-अकं-सेट्।) दर्पोऽहङ्कारः। ङ, गर्ब्वयते गर्ब्वायते धनैर्नीचः। इति दुर्गादासः॥

ग(र्ब्व)र्ब्व, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) गर्ब्वति। इति दुर्गादासः॥

ग(र्ब्व)र्ब्वः, पुं, (गर्ब्व+भावे अप्। यद्वा, गिरति मदमिति। गॄ निगरणे+"कॄगृशॄदृभ्यो वः।" उणा। १। १५५। इति वः।) अहङ्कारः। दर्पार्थादन्तगर्ब्वधातोर्भावेऽल्प्रत्ययः॥ इति सुग्धबोधम्॥ (यथा, रामायणे। २। ३१। २०।

"यदि दुःखो न रक्षेत भरतो राज्यमुत्तमम्। प्राप्य दुर्मनसा वीर! गर्ब्वं(र्ब्व)ञ्च विशेष्यतः॥")

गर्भः, पुं, (गीर्यते जीवसञ्चितकर्म्मफलदात्रा ईश्वरेण प्रकृतिबलात् जठरगह्वरे स्थाप्यते पुरुषशुक्रयोगेऽवासौ । गॄ + "अर्त्तिगृभ्यां भन् ।" उणा० । ३ । १५२ । इति कर्म्मणि भन् ।) भ्रूणः । तद्विवरणं यथा,—

"स्वर्गाच्च नरकान्मुक्तः स्त्रीणां गर्भो भवत्यपि ।
नाभिभूतश्च तस्यैव याति बीजत्वं हि तत् ॥
कलनं बुद्बुदत्वञ्च ततः पेश्यौतमेव च ।
पेश्याफलसमोऽङ्कः स्यादङ्कुरस्तत उच्यते ॥
अङ्गानामथ चोत्पत्तिः पञ्चानामतुलाङ्गकात् ।
उपाङ्गान्यङ्गुलीनेत्रनासास्रवणानि च ॥
प्ररोहं यान्ति चाङ्गेभ्यस्तद्वत्तेभ्यो नखादिकम् ।
त्वचो रोमाणि जायन्ते केशाश्चैव ततः परम् ॥
नरत्वाधोमुखः स्थित्वा दशमे च स जायते ।
ततस्तु वैष्णवी माया समाश्रयति मोहिनी ॥
बालत्वन्तु कुमारत्वं यौवनं वृद्धतामपि ।
ततश्च मरणं तत्तद्धर्म्ममाप्नोति मानवः ॥
एवं संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत् ।"

इति गारुड़े २२६ अध्यायः ॥

तस्य लक्षणं यथा,—

"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकम् ।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसंज्ञकम् ॥
कालेन वर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः ।
भवेत्तदा स सुनिभिः शरीरीति निगद्यते ॥"*॥

तदन्यप्रकृतिर्यथा,—

"यदा नार्य्याव्रजेतायां दृष्वस्त्यौ कथञ्चन ।
सृज्यन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते ॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः ।
कारणं जायते तस्या वर्णितं पैलकैर्गुणैः ॥"

इति भावप्रकाशः ॥ * ॥

अस्य द्वादशधा गतिर्यथा,—

"मुखोऽनिलेन विगुणेन ततः स गर्भः
संस्थामतीत्य बहुधा सप्तपेति योनिम् ।
द्वारं निरुध्य शिरसा जठरेण कश्चित्
कश्चिच्छरीरपरिवर्त्तितकुक्षिदेहः ॥
एकेन कश्चिदपरन्तु भुजद्वयेन
तिर्य्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः ।
"पार्श्वापवृत्तगतिरेति तथैव कश्चि-
दिच्छाकृता गतिरियं त्वपरा चतुर्द्धा ॥
सक्थीलकः प्रतिसुरः परिघोऽथ बीज-
स्तेषूर्द्ध्वबाहुचरणैः शिरसा च योनौ ।
सक्थी च यो भवति कीलकवत् सकीलो
द्वाभ्यां खुरैः प्रतिसुरः स हि कायसक्थी ॥
गच्छेद्भुजद्वयशिराः स च बीजकाख्यो
योनौ स्थितः सपरिघः परिघेण तुल्यः ॥"*॥

गर्भनाशलक्षणादि ।

"अपविद्धशिरा या तु शीताङ्गी निरपत्रपा ।
नीलोद्गतशिरा हन्ति सा गर्भं स च तां तथा ॥
मानसागन्तुभिर्मातुरुपतापैः प्रपीड़ितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीड़ितः ॥"*॥

अन्तर्दृतगर्भलक्षणं यथा,—

"गर्भास्यन्दनमाधीनां प्रणाशः श्यावधर्षता ।
भवेदुच्छ्वासपूतित्वं श्रोथश्चान्तर्दृते शिशौ ॥"

इति माधवकरः ॥ * ॥

("कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्याः सञ्जातो बाल उच्यते ॥
आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत् ।
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥"
इति पूर्व्वखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम् ॥
"शुद्धे शुक्रार्त्तवे सत्वः स्वकर्म्मक्लेशचोदितः ।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ॥
बीजात्मकैर्महाभूतैः क्षेत्र्यैः सत्त्वानुगैश्च सः ।
मातुराहाररसजैः क्रमात् कुक्षौ विवर्द्धते ॥
तेजो यथार्कैरग्नीनां स्फटिकेन तिरस्कृतम् ।
नेत्रनं दृश्यते गच्छत् सत्वो गर्भाशयं तथा ॥
कारणानुविधायित्वात् कार्य्याणां तत्स्वभावता ।
नानायोन्याकृतीः सत्वो धत्तेऽतो हुतलोहवत् ॥
अतएव च शुक्रस्य बाहुल्याज्जायते पुमान् ।
रक्तस्य स्त्री तयोः साम्ये क्लीवः शुक्रार्त्तवे पुनः ॥
वायुना बहुधा भिन्ने यथास्वं वक्त्रपक्वता ।
वियोनिविहिताकारा जायन्ते विहितैर्मलैः ॥"
"पूर्णषोड़शवर्षा स्त्री पूर्णविंशेन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥
वीर्य्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्वी वा गर्भो भवति नैव वा ॥"
"शुद्धशुक्रार्त्तवं स्वच्छं सरक्तं मिथुनं मिथः ।
क्षेत्रैः पुंसवनैः स्निग्धं शुद्धशोणितवस्तिकम् ॥
नरं विशेषात् क्षीराद्यैर्मधुरौषधसंस्कृतः ।
नारीं तैलेन माषैश्च पित्तलैः ससुपाचरेत् ॥"
"मासेनोपचितं रक्तं घमनीभ्यान्तरौ पुनः ।
ईषत् क्षरणं विगन्तुश्च वायुर्योनिमुखान्नुदेत् ॥
ततः पुष्ये शुभादेव कल्याणध्यायिनीग्रहम् ।
स्रजालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षीरेयथावकं स्तोकं कोष्णशोधनकर्षणम् ।
मद्यं शरावे हस्ते वा शुक्लीतब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत् पुरः पतिम् ।
ऋतुस्तु द्वादशनिशाः पूर्व्वास्तिस्रश्च निन्दिताः ॥
एकादशी च युग्मासु स्यात् पुत्रोऽन्यासु कन्यका ।
उपाध्यायोऽथ पुत्रीयं कुर्व्वीत विधिवद्विधिम् ॥
नमस्कारपरायासु शूद्राया मन्त्रवर्ज्जितम् ।
अवन्ध्य एवं संयोगः स्यादपत्यञ्च कामतः ॥
सन्तोऽप्यापुरपत्यार्थं दम्पत्योः सङ्गतं रहः ।
दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि ॥
इच्छेतां यादृशं पुत्रं तद्रूपचरितांश्च तौ ।
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ॥
कर्म्मान्ते च पुमान् सर्पिः क्षीरशाल्योदनाशितः ।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत् ॥
अहिरसि आयुरसि सर्व्वतः प्रतिष्ठासि धाता
त्वाम् ।
दधातु विधाता त्वां दधातु ब्रह्मवर्चसा भवेति ॥
ब्रह्मा बृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाग्निभौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां सुदान्वितौ ।
उत्तानां तन्मना योषित् तिष्ठेदङ्गैः सुसंस्थितैः ॥
तथाहि बीजं गृह्णाति दोषैः स्वस्थानमास्थितैः ।
लिङ्गन्तु सद्यो गर्भाया योन्यां बीजस्य संग्रहः ॥
लघ्निर्गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम् ।
हृदयस्पन्दनं तन्द्रा लड्खानिर्लोमहर्षणम् ॥
अव्यक्तः प्रथमे मासि सप्ताहात् कललो भवेत् ।
गर्भः पुंसवनान्यत्र पूर्व्वं यक्तैः प्रयोजयेत् ॥
बली पुरुषकारो हि दैवमप्यतिवर्त्तते ।
पुष्ये पुरुषकं हैमं राजतं वाथ वायसम् ॥
क्षत्रामिवर्णं निर्व्याध्य क्षीरे तस्याञ्जलिं पिबेत् ।
गोरदक्षमपामार्गं जीवकर्षभसैर्यकान् ॥
पिबेत् पुष्ये जले पिष्टान् एकद्वित्रिसमस्तशः ।
क्षीरेण श्वेतदूतीमूलं नासापुटे स्वयम् ॥
पुत्रार्थी दक्षिणे सिञ्चेत् वामे दुहितृवाञ्छया ।
पयसा लक्षणमूलं पुत्रोत्पादस्थितिप्रदम् ॥
नासयास्येन वा पीतं वटशृङ्गाग्रकल्कतः ।
ओषधीर्जीवनीयाश्च वाज्यान्नरुपयोजयेत् ॥
उपचारः प्रियहितैर्भर्त्तुश्चैव गर्भधृक् ।
नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ॥
अतिव्यवायमायासं भारं प्रावरणं गुरु ।
अकालजागरस्वप्नकठिनोत्कटकासनम् ॥
शोकक्रोधभयोद्वेगवेगशस्त्रक्षविधारणम् ।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम् ॥
रक्तं निरसनं स्रंसकूपेचां मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत् ॥
तथा रक्तसुतिं शुद्धिं वस्तिमामासतोऽहतात् ।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येत् म्रियेत वा ॥
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ।
पित्तलैः स्खलतिः पिङ्गः स्निग्धैः पाण्डुः कफात्मभिः ॥
व्याधींस्तस्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत् ।
द्वितीये मासि कललाद्घनः पेश्यथवार्ब्बुदम् ॥
पुंस्त्रीक्लीवाः क्रमात्तेभ्यस्तस्य यक्तस्य लक्षणम् ।
यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम् ॥
मूर्द्धा द्वे सकथिनी बाहू सर्व्वसूक्ष्माङ्गजन्म च ।
समभेव हि मूर्द्धाद्यैर्ज्ञानञ्च सुखदुःखयोः ॥
गर्भस्य नाभौ मातुश्च हृदि नाड़ी निबध्यते ।
यया स पुष्टिमाप्नोति केदार इव कुल्यया ॥
चतुर्थे यक्तताङ्गानाक्षेतनायाञ्च पञ्चमे ।
षष्ठे त्वायुश्शिरारोम-बल-वर्ण-नख-त्वचाम् ॥
सर्व्वैः सर्व्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे ।
गर्भेणोत्पीड़िता दोषास्तस्मिन् हृदयमाश्रिताः ॥
कर्त्तुं विदाहं कुर्व्वन्ति गर्भिण्याः किञ्चिदासि च ।
नवनीतं हितन्तत्र कोलाम्बुमधुरौषधैः ॥
सिद्धमल्पपटुस्नेहं लघुस्वादु च भोजनम् ।
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम् ।
ओजोऽष्टमे सञ्चरति माता पुत्रौ सहः क्रमात् ।
तेन तौ स्वास्थसहितौ तत्र जातो न जीवति ।
शिशुरोजोऽनवस्थानात् नारीसंशूयिता भवेत्

क्षीरपेया च पेयान्न बहुताम्बावनं हितम्।
मधुरैः साधितं सर्पिः पुराणगुडतक्रयोः॥
गुल्मप्लीहकफोन्माद्यकासघ्नेषु प्रशस्यते।
घृताक्तलक्षितो वस्तिः स तैलहृतसैन्धवः॥
तस्मिंस्त्रैकाहयतेऽपि कालः क्षीरेऽतः परम्।
वर्षादिकारकारी स्यात् कुक्षौ वातेन धारितः॥
गुप्तश्च नवमे मासि स्निग्धो मांसरसौदनः।
बहुस्नेहा यवागूर्वा पूर्वोक्तश्चानुवासनम्॥
तत एव पिचुश्चास्या योनौ नित्यं निधापयेत्।
वातघ्नपत्रभङ्गाम्भः घृतं स्नानेऽन्वहं हितम्॥
निःस्नेहाङ्गी न नवमान्मासात् प्रभृति वासयेत्।
प्राग्दक्षिणभगस्थान्या पूर्वं तत् पार्श्वचेदिनी॥
पुंस्कामदोहदप्रवरता पुंस्कप्रदर्शिनी।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमुह्यते॥
पुत्रं सूते ऽन्यथा कन्यां या चेच्छति दृषद्गतिम्।
वृक्षवादित्यगान्धर्व-गन्धमाल्यप्रिया च या॥
क्षीरं तत्र सरे तत्र मध्यं कुक्षेः सुसन्नतम्।
यमौ पार्श्वद्वयोन्नामात् कुक्षौ द्रोण्यामिव स्थिते॥
प्राक् चैव नवमान्मासात् सूतिका ऽहमाश्रयेत्।
देये प्रशस्ते सम्भारैः सम्पन्ने साधकेऽहनि॥
तच्चोदीक्षेत सा सूतिं सूतिका परिवारिता।
अद्य श्वः प्रसवे स्नानैः कुक्षिश्चिथतालसः॥
अधो गुरुतमरुचिः प्रसेको बहुमूत्रता।
वेदनोरूदरकटीपृष्ठबस्तिवंक्षणे॥
योनिभेदस्रुतोदस्फुरणसदनानि च।
आवीनामनुषङ्गातस्ततो गर्भोदकस्रुतिः॥
अथोपस्थितगर्भां तां सूतकौतुकमङ्गलाम्।
हस्तस्पृष्टप्राक्शयनां सम्यक्तोयानुवेचिताम्॥
पाययेत् सहृतां पेयां तनौ भूम्यथने स्थिताम्।
आसुप्तसकथिसुप्तानामभक्तार्द्रौ पुनः पुनः॥
अधोनाभेर्विमृद्नीयात् कारयेच्चाभ्यङ्गमनम्।
गर्भः प्रयात्यवागेवमन्तस्थिं वृद्धिमोचतः॥
आविध्य जठरं गर्भो वस्तेरुपरि तिष्ठति।
आमो हि स्तरयत्नेन सङ्कामारोपयेत्ततः॥
अथ सन्नोदिते गर्भे योनिमुखाः प्रसारयेत्।
सदुपूर्वं प्रवाहेत वाढमाप्रसवाच्च वा॥
हर्षयेत्तां सुहृद् पुत्रजन्मशब्दजनादिभिः॥
प्रजायान्ति तथाप्राप्ताः सूतिकोपद्रवादिताः॥
प्रसवेऽप्यसङ्गे तु योनिं शस्त्राहिकच्युकैः।
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत्॥
सुवर्चलां विशल्यां वा जरायुपतनेऽपि च।
कार्यमेतत् तथोत्क्षिप्य वाजोरेणां विकल्पयेत्॥
कटीमाकोटयेत् पार्श्वा स्त्रियौ गाढं निपीडयेत्।
ताम्रकल्कं सशैवेयां मूर्ध्नि दद्यात् सुशीतयः॥
मूर्ध्नाङ्गुलिकीतुम्बी सर्षपक्लुडवर्षपैः।
पृथग् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम्॥
कुडतालीशुक्लकल्कं वा सुरामण्डेन पाययेत्।
यवैर्वा कुलत्थानां विल्वलेगाद्यवेन वा॥
घृताक्तसर्षपाजाजीशिग्रुतीक्ष्णकचिक्कैः।
सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च साधयेत्॥
तैलं सिद्धं हितं पायौ योन्यां वाप्यनुवासनम्।
घृतपुष्पा वचाकुष्ठबलासर्षपकल्कितः॥
निरूहः पातयत्याशु सङ्गेऽपत्यमृतोऽपराम्।
तत्सङ्गे ऽनिलो हेतुः सा निर्व्याप्यात् तच्चयात्।
कुम्भ्या पाणिनाऽक्लेन हरेत्कृष्णखेन वा।
सूक्ष्मगर्भा परां योनिं तैलेनाङ्क्त्वा महंयेत्॥
मकलाक्षे शिरोवस्तिं कोलमूले तु पाययेत्।
सचूर्णितं यवक्षारं घृतेनोद्यच्छनेन वा॥
धान्याम्लं वा गुडक्षोद्यविक्षातकरञ्जोन्वितम्॥"

इति वाभटे शारीरस्थाने प्रथमोऽध्यायः॥*॥

अथ गर्भोपचारः।

आत्रेय उवाच।

"प्रथमे मासि मधुकं मधुपुष्पाञ्जि चैवहि।
नवनीतेन पयसा मधुरं पाययेच्च सा॥
द्वितीये मासि काकोली-मधुरं पाययेत्तथा।
तृतीये क्षीरं श्रेष्ठं चतुर्थे च घृतौदनम्॥
पञ्चमे पायसं दद्यात् षष्ठे च मधुरं दधि।
सप्तमे घृतसक्तेन चाष्टमे घृतपूरकम्॥
नवमे विविधान्नानि दशमे दोहदस्तथा।
मासे तृतीये सम्प्राप्ते दोहदं भवति स्त्रियाः॥
यद्यत् कामयते सा च तत्तद्दद्याद्भिषग्वरः।
वर्ज्ययेद्द्विदलान्नानि विदाहीनि गुरूणि च॥
अम्लानि सोष्णतीक्ष्णानि गुर्विणीनां विवर्ज्ययेत्।
सूतिका भक्षयीया न न च मूरणकन्दकाः॥
रसोनञ्च पलाण्डुञ्च सन्धक्तो गुर्विणीक्षिया।
मूरणानि प्रदेयानि गौल्यानि सरसानि च॥
पथ्ये हितानि चैतानि गुर्विणीनां सदा भिषक्।
व्यायामं मैथुनं रोषं ग्रीष्मचक्रमणञ्चथा॥
वर्ज्ययेद्गुर्विणीनाञ्च जाग्रते सुखवन्यदः॥

अथोपपन्नं विदितमपि स्वकौशाचारेण प्रथमाषिकमष्टमाषिकं वा। ब्राह्मणमङ्गलादिभिर्गीतभोजनमपि कर्तव्यम्। दोहदादिह परिपूर्णेन्द्र रूपवान् शूरः पण्डितः श्रीमान् पुत्रो जायते॥" इति महर्षिभेलविरचिते हारीतोत्तरे तृतीयस्थाने गर्भोपचारो नाम अष्टचत्वारिंशोऽध्यायः॥*॥

अथ चलितगर्भचिकित्सा।

आत्रेय उवाच।

"प्रथमे मासि गर्भस्य चलनं दृश्यते यदि।
तदा मधुकयष्ट्याह्वा चन्दनं रक्तचन्दनम्॥
पयसा लोहितं शीतं तेन गर्भः स्थिरो भवेत्।
द्वितीये मासि चलिते स्यात्ते नागकेशरम्॥
तृतीये मासि गर्भस्य चलनं दृश्यते यदा।
तदा मधुकयष्टीञ्च शर्करां पयसा पिबेत्॥
चतुर्थे मासि दाहश्च पिपासा मूलमेव च।
ज्वरेच्च स्त्रीया यदि गर्भश्चलते तदोशीरचन्दन-नागकेशरघातकीकुसुमशर्करोक्षतमब्धदधि पाययेत्। पञ्चमे मासे चलिते गर्भे दाडिमीपञ्चाम्बि चन्दनं दधि मधु च पाययेत्। षष्ठे-मासि गैरिकं शस्त्रक्तिकां गोमयभस्म उदकं परिस्रुतं घृतकं चन्दनं शर्करया सह पिबेत्। सप्तमे मासि गोक्षुरसमङ्गापद्मकचन्दनशीरं मधुरं पाययेत्। अष्टमे मासि रौद्रं मधुमागधिकाच्च सह दुग्धेन पौतवतीनाञ्चलिते गर्भे स्त्रीणां सुखं सम्पद्यते।" इति महर्षिभेलविरचिते हारीतोत्तरे तृतीये स्थाने चलितगर्भचिकित्सा नामैकोनपञ्चाशत्तमोऽध्यायः॥*॥

"नरो धातुबलेनापि जीवितञ्चाप्नुयाच्चिरम्।
तस्माच्च मैथुनात् सम्यग्जायते गर्भसम्भवः॥

हारीत उवाच।

संयोगेन विना प्राज्ञ! कथं गर्भो न जायते।
संयोगेन विना पुष्पं फलं वा न कथं भवेत्॥
दृष्टमेव कथं स्त्रीणां फलोत्पत्तिः प्रदृश्यते।
एतत् पृष्टो महाभाग्यः प्रोवाच ऋषिपुङ्गवः॥

आत्रेय उवाच।

विरङ्गानाञ्च वल्लीनां स्थावराणाञ्च पुत्रक!।
तत्र धातुसमं बीजं सह योगेन वर्त्तते॥
न भिन्नदृष्टिसम्बन्धं दृश्यते फलं पुत्रक!।
स्थावराणाञ्च सर्वेषां शिवशक्तिमयं विदुः॥
निश्चलोऽपि शिवो ज्ञेयो वामिशक्तिर्मनोहरा॥
तत्र स्त्रीपूरुषगुणा वर्त्तन्ते समयोगतः॥
आर्त्तवपुष्पं फलं तद्वत् बीजं शुक्रमयं विदुः।
स्त्रीणां रजोमयं रेतो बीजाद्यमिन्द्रियं नरे॥
तस्मात् संयोगतः पुत्रो जायते गर्भसम्भवः।
प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत्॥
जायते बुद्बुदाकारं शोणितञ्च दशाहनि।
घनं पञ्चदशाहे स्यात् विंशाहे मांसपिण्डकम्॥
मासेकेन च पिण्डस्य पञ्च तत्त्वं प्रजायते।
पञ्चाशद्दिवसे प्राप्ते अङ्गशाखाश्च सम्भवः॥
मासद्वये तु सम्प्राप्ते हस्तपादौ प्रवर्त्तितौ।
सार्द्धमासत्रये प्राप्ते शिरश्च सारवद्भवेत्॥
चतुर्थके च मासानां सकलत्वाच्च हृश्यते।
पञ्चमे च सुतौषः स्यात् षष्ठे प्रस्फुरणं भवेत्॥
अष्टमे मासि याते च व्यत्ययोगः प्रवर्त्तते।
मासे तु नवमे प्राप्ते जायते तस्य चेष्टितम्॥
जायते तस्य वैराग्यं गर्भवासस्य सारतः।
दशमे च प्रसूयेत तथैकादशमासि वा॥
अथ दोषबलेनापि गर्भो वापि प्रसूयते।
वातसंप्रेरिते गर्भे अपूर्वे दिवसे यदि॥
प्रसूतये वाप्यथ तद्गर्भे बालः प्रदह्यते॥"

इति हारीते शारीरस्थाने प्रथमोऽध्यायः॥*॥)

शिग्रुः। (शीर्य्यते निशीर्य्यते निःक्षिप्यते वीर्य्ये योनिरर्थ्यनेन। गिरति सिञ्चति निषेकं करोति रेतोऽत्र वा। गॄ य वा+भन्।) कुक्षिः। (यथा, महाभारते। १४। १८। ६।
"यथा जोहस्य निस्यन्दो निक्षिप्तो विल्वियफलम्।
उपैति तद्विजानीहि गर्भे जीवप्रवेशनम्॥")
सन्धिः। घनसकलकम्। इति मेदिनी॥ मे। १
मध्यम्। (यथा, आर्य्यासप्तशत्याम्। १०६।
"क्षेत्रकगर्भे गन्धादरेव दूरादमी हृतसुपेताः॥")
अपवरकः। इति हेमचन्द्रः॥ गङ्गादिसन्निहितदेशः। यथा,—
"भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलम्।
तावन्नर्भे विजानीयात् तदूर्द्धं तीरमुच्यते॥"

(आभ्यन्तरिकवस्तुमात्रम्। यथा, गोः रामायणे। ४।२७।३।
"अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः।
रसं सर्वसमुद्राणां द्यौः प्रस्रवते रसायनम्॥")

गर्भकं, क्ली, (गर्भ+संज्ञायां कन्। यद्वा चन्द्रस्य गर्भइयमिव कायतीति। कै+कः।) रजनीइन्दम्। इति हेमचन्द्रः।२।५८॥ दुइ रात्रि इति भाषा॥

गर्भकः, पुं, (गर्भे केशगर्भे केशमध्ये इति यावत् कायते प्रकाशते शोभते इत्यर्थः। यद्वा गर्भ इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) केशमध्यस्थितमाल्यम्। इत्यमरः। २।७।१३५। खोपार माला इति भाषा॥

गर्भकरः, पुं, (गर्भं करोति गर्भदोषं निवारयति व्यवहारयोगेन इति। कृ+टः।) पुत्रजीववृक्षः। इति भावप्रकाशः॥

गर्भघातिनी, स्त्री, (गर्भं घातयति स्रावयतीति। हन्+णिच्+णिनिः ङीप् च।) लाङ्गलिकावृक्षः। इति रत्नमाला॥

गर्भङः, पुं, (गर्भस्य अङ इव। शकन्धादित्वात् अकारलोपे साधुः।) नाभिगुड़कः। इति त्रिकाण्डशेषः॥ नाभिर गोंड़ इति भाषा॥

गर्भदः, पुं, (गर्भं ददाति उत्पादयति व्यवहारेणेति। दा+कः।) पुत्रजीववृक्षः। इति राजनिर्घण्टः॥

गर्भदात्री, स्त्री, (गर्भं ददातीति। दा+तृच् ङीप्।) स्तुपविशेषः। गर्भदा इति ख्याता। तत्पर्य्यायः। पुत्रदा २ प्रजादा ३ अपत्यदा ४ दृष्टिप्रदा ५ प्राब्भिमाता६ तापसद्रुमसन्निभा७। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। नारीपुष्पादिदोषपित्तदाहश्रमनाशित्वम्। गर्भसम्भूतिदात्रीत्वञ्च। इति राजनिर्घण्टः॥

गर्भद्रुत्, [द्] पुं, (गर्भं द्रुदति प्रेरयति नाशयतीत्यर्थः। द्रुद्+क्विप्।) कलिकारीवृक्षः। इति भावप्रकाशः॥ विषलाङ्गलिया इति भाषा॥

गर्भपाकी, [न्] पुं, (गर्भस्य पाकः परिपाकः परिणतिरित्यर्थः साध्यतयास्त्यस्य इति इनिः।) वटिकाशोहिः। इति हेमचन्द्रः। ४।२३४॥ बेटे धान इति भाषा॥

गर्भपातः, पुं, (गर्भस्य पातः पतनं विच्युतिरित्यर्थः।) पञ्चमषष्ठमासीयस्य कठिनशरीरस्य गर्भस्य पतनम्। (यथा, माधवकरोक्तवैद्यके।
"आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविच्युतिः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥"
तथाच सुश्रुते निदानस्थाने १ अध्याये।
"गर्भपातनिमित्तञ्च शोणितातिस्रवाच्च यः।
अभिघातनिमित्तञ्च न सिध्यत्यपतानकः॥")
अस्य प्रमाणादि विशेषतो गर्भस्रावशब्दे द्रष्टव्यम्॥

गर्भपातकः, पुं, (गर्भं पातयति नाशयतीति। पत्+णिच्+ण्वुल्।) रक्तशोभाञ्जनवृक्षः। इति शब्दचन्द्रिका॥

गर्भपातनः, पुं, (गर्भं पातयतीति। पत्+णिच्+कर्त्तरि ल्युः।) रोहितकवृक्षः। इति भावप्रकाशः॥

गर्भपातनी, स्त्री, (गर्भपातन+संज्ञायां ङीप्। गौरादित्वादित्येके।) कलिकारीवृक्षः। इति राजनिर्घण्टः॥

गर्भपातिनी, स्त्री, (गर्भं पातयतीति। पत्+णिच्+णिनिः। स्त्रियां ङीप्।) विशल्यावृक्षः। इति शब्दाधरः॥

गर्भरूपः, त्रि, (गर्भे देहकोषे रूपं लावण्यादिकं यस्य। यद्वा गीर्य्यते निगीर्य्यते प्रकाश्यते रूपं यस्मात्। तारुण्यप्रभावादिति यावत्।) तरुणः। इति भूरिप्रयोगः॥

गर्भवती, स्त्री, (गर्भो विद्यतेऽस्याः अस्यां वा। अस्त्यर्थे मतुप्। मस्य वत्वम्।) अन्तरापत्या। (यथा, भट्टाभारते। ३।१३४।१७।
"दशैव मासान् बिभर्ति गर्भवत्यः।
दशैरका दशदाशा दशार्हाः॥")
तत्पर्य्यायः। अन्तर्वत्नी २ गुर्विणी ३ गर्भिणी४ सत्त्वा ५ आपन्नसत्त्वा ६ दोहदवती ७। इति शब्दरत्नावली॥ उदरिणी ८ गुर्वी ९। इति हेमचन्द्रः। ३।२०२॥ अथ सद्योगृहीतगर्भाया लक्षणम्। यथा,—
"शुक्रशोणितयोर्योनिरस्रावोऽथ अमोद्भवः॥
सावसादः पिपासा च ग्लानिः स्फुर्त्तिर्भंगे भवेत्॥"
तस्या उत्तरोत्तरकालीनलक्षणम्। यथा,—
"स्तनयोर्मुखकार्ष्ण्यं स्यात् रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
हृदयेत् पक्षसृक्कापि गन्धादुद्विजतेऽशुभात्।
असेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते॥" *॥
पुत्रगर्भवत्या लक्षणम्। यथा,—
"पुत्रगर्भयुतायास्तु नार्य्या मासि द्वितीयके।
गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरं शृणु॥
दक्षिणाक्षिभुजस्तनं स्यात् प्राक्चीरं दक्षिणस्तने।
दक्षिणोरुः सुपुष्टः स्यात् प्रसन्नमुखवर्णता॥
पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः।
आम्रादि फलमाप्नोति स्वप्नेषु कमलादि च॥" *॥
कन्यागर्भवतीलक्षणम्। यथा,—
"कन्यागर्भवतीगर्भे पेशी मासि द्वितीयके।
पुत्रगर्भस्य लिङ्गानि विपरीतमवेक्षते॥" *॥
नपुंसकगर्भवतीलक्षणम्। यथा,—
"नपुंसकं यदा गर्भो भवेन्नार्भोऽल्पदाकृतिः।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत्॥"
इति भावप्रकाशः॥

गर्भशय्या, स्त्री, (गर्भे गर्भगता वा शय्येव। गर्भगतस्यापत्यस्य वासस्थानमित्यर्थः।) गर्भोत्पत्तिस्थानम्। तत्तु पित्ताशयपक्वाशययोर्मध्यवर्त्ति। तस्या रूपं यथा, भावप्रकाशे।
"शुक्रनाभ्याकृतियोनिरावर्त्ता सा च कीर्त्तिता।
तस्यास्तृतीये स्त्रावर्त्ते गर्भशय्या प्रकीर्त्तिता॥
यथा रोहितमत्स्यस्य सुखं भवति रूपतः।
तत् संस्थाच्च तथारूपा गर्भशय्या विदुर्बुधाः॥"
(यथा, वेणीसंहारे। ३ ये अङ्के।
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां

यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा॥")

गर्भस्रावः, पुं, (गर्भस्य स्रावश्च्युतिः पात इत्यर्थः।) गर्भपातः। चतुर्थमासपर्य्यन्तं शोणितरूपगर्भस्य स्रवणम्। पेटखसा इति भाषा॥ तस्याशौचं यथा,—
"यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम्॥"
इति गारुड़े १०७ अध्यायः॥
"रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति।"
इति मनुः।५।६६॥ * ॥
"अर्व्वाक् षण्मासतः स्त्रीणां यदि स्यात् गर्भसंस्रवः।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम्॥
अत ऊर्द्ध्वन्तु पतने स्त्रीणां स्याद्दशराचकम्।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः॥"
इति कूर्म्मपुराणम्॥ * ॥
("अन्तराजन्ममरणे शेषाहोभिर्विशुध्यति।
गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्॥"
इति याज्ञवल्क्यः। ३।२०॥)
अन्यत् अशौचशब्दे द्रष्टव्यम्॥ * ॥ * ॥
अथ गर्भस्रावनिदानलक्षणे।
"भयाभिघाततीक्ष्णोष्णपानाशननिषेवणात्।
गर्भे पतति रक्तस्य सञ्चूलं दर्शनं भवेत्॥
आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥
गर्भोऽभिघातविषमाशनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति स्वयेन।
म्लानः करोति पवनः खलु म्लानगर्भं
शूलञ्च योनिजठरादिषु सूत्रसङ्गम्॥"
इति माधवकरः॥
अथ गर्भस्रावपातयोर्निदानमाह।
"गान्धर्व्वधर्म्माध्वगमनयानस्खलनपीड़नैः।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः॥
वमनाच्च विरेकाच्च कुत्सनाद्गर्भपातनात्।
तीक्ष्णधारोष्णकटुकतिक्तरूक्षनिषेवणात्॥
वेगाभिघाताद्विषमादासनाच्चयनाद्भयात्।
गर्भे पतति रक्तस्य सञ्चूलं दर्शनं भवेत्॥"
गर्भपातनात् नियमेन गर्भपातनशीलं द्रव्यं तस्मात्॥ गर्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भेपततीत्यादि। पततीति स्रावेण पातेन वा पतिष्यति॥ * ॥
स्रावपातयोरवधिमाह।
आ चतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥
आ चतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः शोणितरूपः। गर्भः स्रवति शोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।
गर्भोऽभिघातविषमाशनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति स्वयेन।

यथा वृन्तलग्नं पक्वं फलं अभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिनाऽकालेऽपि पतति ॥ * ॥

अथ गर्भस्रावस्य चिकित्सा ।

गुर्विण्या गर्भतो रक्तं स्रवेद्यदि सुदुर्मुहुः । तन्निरोधाय सुस्निग्धसुतपलादि घृतं पिबेत् ॥

उत्पलादिगणमाह ।

उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा । श्वेताम्भोजञ्च मधुकसुतपलादिरयं गणः ॥

संग्रीलितो हरत्येव दाहं तृष्णां हृदामयम् । रक्तपित्तञ्च मूर्च्छाञ्च तथा हृद्दिमरोचकम् ॥*॥

अथ गर्भपातस्योपद्रवानाह ।

प्रसंसमाने गर्भे स्याद्दाहं शूलञ्च पार्श्वयोः । पृष्ठरुक् प्रदरागौ मूत्रसङ्गश्च जायते ॥

प्रसंसमाने पतति ॥ * ॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह ।

स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते । आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः ॥

पूर्व्वेऽप्युपद्रवाः पार्श्वे शूलादयः ॥ * ॥

तच्चिकित्सामाह । [चरेत् ।

स्निग्धाः प्रीताः क्रियास्तेषु दाहादिषु समाः कुशकाशोशीरदूर्व्वाणां मूलैर्गोक्षुरकस्य च ॥

घृतं दुग्धं सितायुक्तं गर्भिण्याः शूलनुत् परम् । स्वदंष्ट्रामधुकक्षुद्राम्बानैः सिद्धं पयः पिबेत् ॥

शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम् । अम्बानः पुष्यजातिः । अयं वाणपुष्पं इति गौड़ादौ प्रसिद्धः ।" इति भावप्रकाशः ॥

गर्भस्रावी, [न्] पुं, (गर्भं उदरस्थमिश्रुं स्रावयति विद्योतयति सेवनेनेति । गर्भ + सु + णिच् + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ।) छिन्नालर्त्तुः । इति राजनिर्घण्टः ॥

गर्भागारं, क्ली, (गर्भ इव आगारं गृहम् । गृहाभ्यन्तरवर्त्तित्वात् तथात्वम् ।) गृहमध्यभागः । शूयनगृहम् । गृहान्तर्यं हं इत्येके । इति भरतः ॥ तत्पर्य्यायः । वासगृहम् २ । इत्यमरः । २ । २ । २८ ॥ (यथा, कथासरित्सागरे । ७ । ७१ ।

"साप्यष्टमीं समुद्दिश्य तत्र राजसुता ययौ । एकैव देवं द्रष्टुञ्च गर्भागारादधाविशत् ।" * ॥

गर्भः कुक्षिः आगारं गृहमिव । अग्नेरागारमग्निभूमेस्तथात्वम् । यद्वा, गर्भस्य उदरस्थाग्नेरागारम् ।) गर्भाशयः । इति राजनिर्घण्टः ॥

गर्भाधानं, क्ली, (गर्भं आधीयतेऽनेनेति । आ + धा + करणे ल्युट् ।) दशसंस्कारान्तर्गतप्रथमसंस्कारः । यथा,—

"गर्भाधानञ्चतौ पुंसः सवनं स्यन्दनात् पुरा । ऋतौ ऋतुकाले । स च कालो याज्ञवल्क्येनोक्तः । षोड़शोत्तरनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।" इति मलमासतत्त्वम् ॥ तत्र क्रमः । "ऋतुस्नानादूर्द्धं निषेकदिवसे सायं सन्ध्यायामतीतायां पतिः शुचिः सुगन्धिः सुवेषः मन्त्रेण सूर्य्यार्घं दत्त्वा पूर्व्वाभिमुखोपविष्टायाञ्च भार्य्यायां दक्षिणहस्तेनोपस्पृश्य स्पृशन् मन्त्रं जपेत् ततः पुनरपि उपस्पृश्य स्पृशन् मन्त्रं जपेत् । ततो भार्य्यामुपेयात् ।" इति भवदेवभट्टः ॥ तद्विहितनिषिद्धनक्षत्रादि यथा,—

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी । उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्जं व्रजेत्तदा ॥"

पर्व्वाण्याह विष्णुपुराणम् ।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥"

गौतमः ।

"पुनर्वसुः । अभिजित् पौष्णपत्र्यानुराधाषाढ़ाश्वयुक् ॥"

अन्यच्च । [पुष्यश्च ।

"हस्तो मूलं श्रवणः पुनर्व्वसुर्मृगशिरस्तथा गर्भाधानादिकार्य्येषु पुंनामायं गणः शुभदः ॥

रोहिण्यन्तकचित्राहिविशाखघृतवर्ज्जिते । मे पुंग्रहे स्त्रीशुक्रा फलवन्धनमिष्यते ॥

पुष्यार्कचन्द्राग्निवसूलपुनर्व्वसुः स्वादाषाढ़युग्महरिभाद्रपदद्वयञ्च ।

एतानि पुंसि कथितानि शुभानि भानि पाण्येषु गर्भपतनादिभयञ्च मेषु ॥

नन्दा भद्रा भवेत् पुंसि स्त्रीषु पूर्णा जया स्मृता । रिक्ता नपुंसके ज्ञात्वा तिथीस्तासां परिवर्ज्जयेत् ॥

स्त्रीणामृतुर्भवति षोड़शवासराणि तत्रादितः परिहरेच्च निशाश्चतस्रः । युग्मासु रात्रिषु नरा विषमासु कार्य्याः कुर्य्यान्निषेकमथ तासपि पर्व्ववर्ज्यम् ॥

मूलर्क्षं स्मृतिदुष्टत्वान्नार्भाधानेषु नेष्यते । तस्य पुंसवनादौ तु पुंसंज्ञत्वे प्रयोजनम् ॥

(मतान्तरे तु चतुर्थेऽहनि स्नानानन्तरं नार्य्यः शुध्यन्ति । यथाह भरद्वाजः ।

"प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥"

एवं धर्म्मशास्त्रेऽपि । यथा,—

"भर्त्तुः स्मृत्वा चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला । पञ्चमेऽहनि योग्या स्याद्दैवे पित्र्ये च कर्म्मणि ॥")

यथा, याज्ञवल्क्यः ।

"एवं गच्छन् स्त्रियं श्यामां मघां मूलाञ्च वर्ज्जयेत् ।

पुत्रं लक्षणसंयुक्तं जनयेत् पुमान् ॥"

श्यामां आहारलाघवादिना क्षीणाम् । फलञ्च ।

"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । तस्मादयुग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । (समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः ॥"

इति मनुः । ३ । ४८—४९ ॥).

एवञ्च ।

"युग्मायामपि रात्रौ चेत् श्रोणितं प्रचुरं यदा । कन्या च पुंवद्भवति शुक्राधिक्ये पुमान् भवेत् ॥

कन्यैवायुग्मरात्रौ च प्राधान्यं समवायिनोः । निमित्तकारणात् कालात् शुक्रशोणितयोर्यतः ॥

पौड़ा रात्रौ भौमदृष्टे ग्रहाङ्के मासं मासं योषितामार्त्तवं स्यात् ।

चंद्रे ग्राह्यं यच्च रक्तं जवाभं तद्गर्भार्थं वेदनागन्धहीनम् ॥"

गर्भयोग्यर्त्तुनिरूपणम् ॥

"पापासंयुतमध्यगेषु दिनकृत्लग्नेषु पापान्तिमे तद्भूनेषु शुभोज्झितेषु विलुजे क्षिप्ते विपापे सुखे । सद्युक्तेषु त्रिकोणकण्टकविधुष्वायत्रिषष्ठान्विते पापे युग्मनिशाखगक्षसमये पुंशुद्धितः सङ्गमः ॥

मूलमघाश्विनीनामाद्यं ज्येष्ठान्त्यसर्पाणामन्त्यम् । चतुर्थांशं गत्वपदं त्यक्त्वा षोड़शाहे ऋतौ व्रजेत् ॥"

अशुद्धौ तु भृगुबलभीमे ।

"अन्त्यं पौष्णेन्द्रसर्पाणामाद्यं पित्र्यभमूलगम् । गण्डं दक्षत्रयं ज्ञातं सर्व्वकार्य्येषु कल्पितम् ॥

पुमान् विंशतिवर्षेषु पूर्णषोड़शवर्षया । स्त्रिया सङ्गच्छते गर्भाशये शुद्धे रजस्यपि ॥

अपत्यं जायते भद्रं तयोर्न्यूनेऽधमं स्मृतम् । मासैर्गैः सितकुजगुरुरविर्शनिसौम्यलग्नपश्यगैः । कलुषैः पीड़ा गर्भस्य पीड़ितैः पतनमन्यथा पुष्टिः ॥

कालुष्यं मासेशेन पापग्रहयोगगश्चुग्रहस्थितिनीचग्रहयोगोपग्रहयोगादि । मासेशजन्मनक्षत्रे पापग्रहयोगः पीड़ा येषां जन्मर्क्षाणि । १६ । ३ । २० । २२ । ११ । ८ । २७ । २ । ६ । मासेशगृहान्त्यादौ क्षते न गर्भपीड़ा ॥

अथ प्रसूतात् पुत्रादिज्ञानम् ।

"विवाहलग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्मकरो विलग्नात् । स्त्रादिग्रहाणामवलोक्य वीर्य्यं वाच्यः प्रसूतौ पुरुषोऽङ्गना वा ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

अपि च । गोभिलः ।

"यदा ऋतुमतीं भवति उपस्तशोणितां तदा सम्भवकालः । ऋतुः प्रजाजननयोग्यकालः । तन्निमित्तेन नैमित्तिकं गमनं कार्य्यं अकुर्व्वतः प्रत्यवायान्नियमः । यदुक्तं स्मृतेः ॥

"ऋतुमतीन्तु यो भार्य्यां संनिधौ नोपसर्पति । अवाप्नोति स मन्दात्मा भ्रूणहत्यान्ततारतौ ॥"

ज्योतिषे ।

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी । उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्जं व्रजेत्तदा ॥"

विष्णुपुराणम् ।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥"

याज्ञवल्क्यः ।

"षोड़शर्त्तुर्निशा स्त्रीणां तासु युग्मासु संविशेत् । यत्र षोड़शाहो रात्र्यात्मककालस्य सावनत्वात् पुंसवननामकरणयोरपि सावनगणनाया युक्तत्वाच्च संस्कारमात्रे सावनगणनया व्यवहारः ॥

तथा च याज्ञवल्क्यः ।

"गर्भाधानञ्चतौ पुंसः सवनं स्यन्दनात् पुरा । षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥

अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम् ॥

एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥"

चतुर्थे स्रस्ते ततः इति वचनात् स्रस्नात् पूर्वं द्वतीयमासः पुंसवनकालः। अत्र चतुर्थमासस्य सौरत्वे चान्द्रत्वे वा निषेकमासस्यापि तथात्वे तदाद्यन्तदिननिषेके सति अधिकन्यूनकालयोर्गर्भस्रस्नमनियतमापद्येत सावने तु नियतम्। तेनात्र सावनगणना युक्ता बोधिद्व्यवहारविद्वांश्च। अहन्येकादशे नाम द्वत्रापि अशौचापगमे नामधेयमिति विष्णुस्मरणात् स्रुतकोत्तरदिनपरमेकादश्यपदम्।

"स्रुतकादिपरिच्छेदो दिनमासाब्दपात्मकः।
मध्यमग्रहसुस्थिते सावनेन प्रकीर्तितः॥"

इति सूर्यसिद्धान्तवचनेन स्रुतकस्य सावनदिनघटितत्वात् तदुत्तरदिनस्यापि तथात्वम्। अतो दिनमासवर्षगणना सावनेनेति। शुभाशुभविवेचनन्तु सौरेण ज्योतिःशास्त्रात्। अतएव पितामहः।

"विवाहादौ स्रुतः सौरो यज्ञादौ सावनो मतः।"

अत्र द्वितीयादिशब्दात् संस्कारपरिग्रहः।

"गर्भाधाने सदा ग्राह्या वारा भौमरवीज्यकाः।"

गोभिलः। दक्षिणेन पाणिना उपस्थमभिसृशेत् विष्णुर्योनिं कल्पयत्वेतया ऋचा। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ हिरण्ययी अरणी यं निर्मन्थतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे॥ यथाग्निः पृथिवी अनु यथा द्यौरनु मारुतम्। एवा त्वं दशमासिक्या गर्भं धेहि सहावरी॥ यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा धारय मे गर्भं अनु सूतवा उ सूतवे॥ यथा द्यौर्यथा पृथिवी यथा विश्वं जगत्स्थितम्। एवा मे गर्भ एहि जरायुणा सह वीर्यावति॥ इति मन्त्रेण प्रथमं ततो गर्भं धेहि सिनीवालीत्यादिमन्त्रेण च। मन्त्रान्ते कर्मादिसन्निपात इति न्यायात् पाठानन्तरं स्पर्शः। न तु भवदेवभट्टोक्तं स्पृशन् जपतीति। ऋचौ समाप्यैव संयोगं कुरुतः न मध्ये वासदेवजपः। देवलः। 'यत्र च संस्कृता नारी सर्वगर्भेषु संस्कृता।' तेन गर्भाधानपुंसवनसीमन्तोन्नयनानि सकृदेव कर्तव्यानि। छन्दोगपरिशिष्टम्।

"विवाहादिः कर्मभेदो य उक्तो
गर्भाधानं मुख्यमस्य चाग्नेः।
विवाहादावेकमेवाज्य कुर्यात्
आद्यं नादौ कर्मभेदः कर्मभेदः स्यात्॥"

विवाहादिगर्भाधानान्तकर्मसु एकमेव आद्यं न तु प्रतिकर्मादौ एकैकेन आद्येन सर्वाणि आद्यवन्नीति। अन्तशब्दोऽवयवार्थः दृष्टान्तः पट इतिवत्। समीपार्थत्वे उपलक्षणं स्यात्। ततश्च विशेषणोपलक्षणसन्देहे विशेषणत्वेन ग्रहणं कार्यान्वितत्वात्। यत्तु।

"निषेककाले सीमे च सौमन्तोन्नयने तथा।
ज्ञेयं पुंसवने चैव आद्यं कर्माङ्गमेव च॥"

इत्यनेन भविष्यपुराणेन आद्यं कर्माङ्गत्वेन विहितं तच्छन्दोगेतरपरं अतएव भवदेवभट्टेनापि न लिखितम्। अत्र आद्योत्तरगमनेऽपि न दोषः। उक्तभविष्यपुराणात्। किञ्च नान्दीमुखश्राद्धे कृते दाराद्यवर्ज्यनम्। इति वचनान्तराच्च।" इति संस्कारतत्त्वम्॥*॥(निषेकादनन्तरं यद्यप्यादि मिश्रितशुक्रशोणितस्य यद्यद्यङ्गं भवति तदुक्तं यथा, दक्षस्मृतौ निषेकाध्याये।

"कलनं कठिनं दृष्टादस्थित्वग्रोमचेतनाः।
अङ्गोद्भेदोऽङ्गुलिस्त्रीत्व मासेष्वीशाः क्रमादमी॥
भृग्वारेज्यार्कचन्द्रार्किज्ञाङ्गिराजदिवाकराः।
मासेशे पीड़िते गर्भरोगः पुष्टिश्च सद्वधे॥"

अस्यार्थः। प्रथमे मासि कलनं शुक्रशोणितमिश्रणरूपं तत्र अधिपः शुक्रः। द्वितीये कठिनं मिश्रितशुक्रशोणितयोः काठिन्यं तत्राधिपतिः कुजः। तृतीये दृष्टादुत्पत्तिस्तत्राधिपो गुरुः। चतुर्थे अस्थ्युत्पत्तिस्तत्राधिपः सूर्यः। पञ्चमे त्वक उत्पत्तिस्तत्रेशश्चन्द्रः। षष्ठे रोमोत्पत्तिस्तत्राधिपः शनिः। सप्तमे चैतन्यं तत्राधिपो बुधः। अष्टमे भोजनग्रहणेच्छा च गर्भाधानलग्नपतिः स्वामी। नवमे उद्वेगस्तत्राधीशश्चन्द्रः। दशमे प्रसवस्तत्राधीशो दिवाकरः। आधानकाले उक्तग्रहे पीड़िते तत्तुल्यमासे गर्भपातादि। बलवति च तत्तन्मासे गर्भपुष्टिः॥

"ऊनषोड़शवर्षायामप्राप्तः पञ्चविंशतिम्।
यत्राधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रियः।
तस्मादत्यल्पबालायां गर्भाधानं न कारयेत्॥
अतिवृद्धायां दीर्घरोगिण्यां अन्धेन वा विकारेणोपद्रुतायां गर्भाधानं नैव कुर्वीत। पुरुषस्यापेवंविधस्य त एव दोषाः सम्भवन्ति॥"

इति सुश्रुते शारीरस्थाने दशमेऽध्याये।)

गर्भाशयः, पुं, (आशेतेऽस्मिन्निति। आ+शी+अधिकरणे अप्। गर्भस्य भ्रूणस्य आशयः शय्यावदाश्रयस्थानम्।) जरायुः। येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः। इत्यमरः।२।६।३८॥ गर्भशय्या। इति भावप्रकाशः॥ (यथा, मार्कण्डेयपुराणे। १४। १८। ५।

"शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतम्।
क्षेत्रं कर्मवशमाप्नोति शुभं वा यदि वाऽशुभम्॥"

"पूर्वबोड़शवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि॥
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः।
रोगस्त्यायुरघ्नो वा गर्भो भवति नैव वा॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये॥)

गर्भाष्टमः, पुं, (गर्भात् गर्भकालात् अष्टमः।) गर्भजननमासादष्टममासः। तत्पर्य्यायः। देवमासः २। इति त्रिकाण्डशेषः॥ (यथा, मनुः। २। ३६।

"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥")

गर्भिणी, स्त्री, (गर्भोऽस्त्यस्याम्। गर्भ+"अत इनिठनौ।" ५। २। ११५। इति इनि ततो ङीप्।) गर्भवती। इत्यमरः। २। ६। २२॥ पौयाति इति भाषा॥ (यथा, मनुः। ३। ११४।

"सुवासिनीः कुमारीश्च रोगिणो गर्भिणीस्तथा।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्॥"

अस्याः कर्मणतामाह काश्यपः। यथा,—

"गर्भिणी कुञ्जरान्दोलिप्रेतधर्म्यादिरोहणम्।
वाहनं शीघ्रगमनं शकटारोहणं त्यजेत्॥
शोकं रक्तविमोक्षञ्च साध्वसं कुक्कुटाशनम्।
अवायञ्च दिवास्वप्नं रात्रौ जागरणं त्यजेत्॥"

तथा, मदनरत्ने स्कान्दे।

"हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्॥
केशसंस्कारकवरीकरकर्णविभूषणम्।
भर्तुरायुष्यमिच्छन्ती वर्जयेद्गर्भिणी न हि॥"

दक्षस्मृतिरप्याह।

"चतुर्थे मासि षष्ठे वाष्टमे गर्भिणी यदा।
यात्रा तया विवर्ज्या स्यादाषाढ़े तु विशेषतः॥"

गर्भिणीपतिकरणीयतामाह याज्ञवल्क्यः।

"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥"

आश्वलायनः।

"वपनं मैथुनं तीर्थं वर्ज्ययेद्गर्भिणीपतिः।
आद्यञ्च सप्तमाद्मासादूर्द्धं चान्यत्र वेदवित्॥"

कालविधाने सुकृत्तदीपिकायाम्।

"चौरं प्रवासुगमनं नखकृन्तनञ्च
युद्धादिवास्तुकरणं क्षतिदूरयानम्।
उद्वाहमौपनयनं जलधेश्च गाह-
मायुः क्षयार्थमिति गर्भिणिकापतीनाम्॥"

रत्नसंग्रहे गालवोऽपि।

"दहनं वपनञ्चैव चौलं वै गिरिरोहणम्।
नाव आरोहणञ्चैव वर्ज्ययेद्गर्भिणीपतिः॥"

गर्भिण्या यद्यत् जन्यं जायते तदाह,—

"श्यामता गरिमा कुक्षौ मूर्च्छाच्छर्दिररोचकः।
तृष्णा प्रसेकः सदनं रोमराज्याः प्रकाशनम्॥
अक्षिश्रोता स्तनौ पीनौ सक्थ्यौ शोफाच्युतौ।
पादशोफो विदाहोऽन्ने अङ्गाश्च विविधात्मिकाः॥
माल्यं श्लथं हृदयं मातुश्च हृदयेन तत्।
सम्बद्धं तेन गर्भिण्या नेयं श्रद्धाविधारणम्॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये॥

"समानयोगक्षेमा हि माता तदा गर्भेण केनचिदर्थेषु तस्मात् प्रियहिताभ्यां गर्भिणीं विशेषेणोपचरन्ति कुशलाः।

तस्या गर्भापत्तेर्हृदयस्य च विज्ञानार्थं लिङ्गानि समासेनोपदेक्ष्यामः। उपचारासम्बाधनं श्लथस्थाने दोषज्ञानञ्च लिङ्गतस्तत्रादिष्टो लिङ्गोपदेशस्तद्यथा,—वादग्रहमास्यसंस्रवमनन्नाभिलाषः छर्द्दिररोचकोऽन्नकामता विशेषेण। अङ्गाप्रश्रयणशोथश्चेह भावेषु गुरुगात्रत्वं चक्षुषोर्ज्ञानिनः स्तनयोः स्तन्यमोक्षणे स्तनमण्डलयोश्च कार्ष्ण्यमर्थं व्यथतुः। वादशोथरोमराज्या योन्याश्च जालत्वमिति गर्भे पर्य्यागते रूपाणि भवन्ति। वा यद्यदिहोक्तलक्षणं दद्यादन्यत्र गर्भोपघातकरेभ्यो भावेभ्यः। गर्भोपघातकरास्त्रिमे भावास्तद्यथा,—सर्वमति गुरुश्चातीक्ष्णदारुश्च पैष्टा इमांश्चान्यानुपदिशन्ति वृद्धाः। देवतारक्षोऽनुचरपरिग्रहश्चार्थं न रक्तानि वासांसि बिभृयात् मद्यकरांश्च पाटान्यभ्यवहरेन्न यानमधिरोहेन्न मांसमश्नीयात् सर्वेन्द्रियप्रतिकूलांश्च भावान् दूरतः परिवर्जयेत्।"

चतुर्थे मासि स्थिरत्वमापद्यते गर्भस्तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण।

पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण।

षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण।

सप्तमे मासि गर्भः सर्व्वभावैरापद्यते सहसा तस्मात्तदा गर्भिणी सर्व्वाकारैः क्लान्ततमा भवति।

अष्टमे मासि गर्भश्च मातृतो गर्भतश्च माता रसमुपगृह्णीभिः संवाहिनीभिर्मुहुर्मुहुरोजः परस्परत आददाते गर्भस्य सम्पूर्णत्वात् तस्मात्तदा गर्भिणी सुदुर्मुदा युक्ता भवति सुदुर्मुहुश्च म्लाना तस्मात्तदा गर्भस्य जन्मयाप्यबलत्वोजसोऽनवस्थितत्वात् तस्मिंस्तमभिसमीक्ष्याष्टमं मासमगर्भिण्यमित्याचक्षते कुशलाः।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥

"स्तनयोः क्लोमसुखता रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माक्षि चाप्यस्याः संमील्यन्ते विशेषतः॥
अक्रामतश्चहर्यति गत्वादुद्विजतेऽसुभात्।
प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥

तदा प्रभृत्येव चायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयसुत्कटकासनं चैकान्ततः क्षेत्रादिक्रियां शोणितमोक्षणञ्चाकाले वेगविधारणञ्च न सेवेत।

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥"

"इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्॥
सा प्राग्दौहृदा पुत्रं जनयेत गुणान्वितम्।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥
येषु येष्विन्द्रियार्थेषु दौहृदं वै विमानना।
प्रजायेत सुतस्तस्मिंस्तस्मिंस्तस्येन्द्रिये॥
राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दृक्कूलपङ्कजौपेयभृङ्गवादिषु दौहृदात्।
अलङ्कृतं वर्णवन्तं पुत्रं ललितं सा प्रसूयते॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते।
देवताप्रतिमायाञ्च प्रसूते पार्थदोपमम्॥
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते।
गोधामांसाशने पुत्रं सुसूक्षुं धारयात्मकम्॥
गवां मांसे च बलिनं सर्व्वक्लेशसहन्तथा।
माहिषे दौहृदाच्छूरं रक्ताक्षं लोमसंयुतम्।
वराहमांसात् खड्गासुं शूरं सञ्जनयेत् सुतम्॥
मार्गाद्विक्रान्तजङ्घाकं सदा वनचरं सुतम्।
क्षमाद्वियमनसं नित्यभीतञ्च तैत्तिरात्॥
अतोऽशुक्लेषु वा वारी समभिधाति दौहृदम्।
अरौद्राचारशीलैः सा समानं जनयिष्यति॥

कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा यथा दैवयोगादौहृदं जनयेद्धृदि॥"

इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये॥)

क्षीरावीवृत्थः। इति शब्दचन्द्रिका॥ क्षीराद इति भाषा॥

गर्भिण्यवेक्ष्यं, क्ली, (गर्भिण्या गर्भवत्या अवेक्ष्यं यत्नेन परिचर्य्या।) कुमारभृत्या। गर्भिणीपरिचर्य्या। इति त्रिकाण्डशेषः॥

गर्भोपघातिनी, स्त्री, (गर्भं उपहन्तीति। उप+हन्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३।२।७८। इति णिनिः। गर्भे उपघातयतीति। हन्+णिच्+णिनिः। इति केचित्।) अवृतौ वृषोपगमनादिवशात् यस्या गर्भपातो भवति सा गौः। गावड़ाफेला गाइ इति भाषा॥ तत्पर्य्यायः। वेहत २। इत्यमरः। २। ९। ६९॥

गर्म्भुत्, क्ली, (गौर्य्यते भक्ष्यते प्राक्षतैरिति। गृ निगरणे+"ग्रो सुट् च।" उणा। १। ६७। इति उति सुड़ागमश्च।) लवणान्यविशेषः। इत्यमरो भरतश्च॥ मयना इति ख्यातः। गड़ गड़ इति केचित्॥ (गौर्य्यते भक्ष्यते यद्वा गौर्य्यते विज्ञाप्यते विख्याप्यतेऽनेनेति। गृ+उति सुट् च।) स्वर्णम्। गड़ः। इति मेदिनी। ते। १०७॥

गर्म्भूटिका, स्त्री, (गर्म्भुत इव उटं पत्रमस्याः। कप्+टाप्+अत इत्वञ्च। दृषोदरात् तकारलोपः।) व्रीहिभेदः। माड़ुया इति भाषा॥ तत्पर्य्यायः। गर्म्भूच्छदः २। इति रत्नमाला॥

गर्म्भोटिका, स्त्री, (गर्म्भूटिका+निपातनात् ऋकारस्योकारः।) जरड़ीलवणम्। इति राजनिर्घण्टः॥

गर्व्व, मदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) मद इह अहङ्कारः। नीचो गर्व्वति सम्पदा। इति दुर्गादासः॥

गर्व्वः, पुं, (गर्व्व मदे+भावे घञ्। यद्वा, गिरति मदमत्तस्यात्मानमुद्गिरतीव इति। गृ निगरणे+"कृगृदृभ्यो वः।" उणा। १। १५५। इति वः।) अहङ्कारः। इत्यमरः। १।७।२२॥ (यथा, रामायणे। २। ३१। २०।

"यदि दुःखो न रचेत भरतो राज्यमुत्तमम्।
प्राप्य दुर्म्मनसा वीर! गर्व्वेण च विशेषतः॥")

अहङ्कारस्तथाध्यात्मं सर्व्वसंसारकारणम्।
अभिमानोऽधिभूतञ्च दक्षश्चाधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥

(अयं हि वधिभ्यारिभावविशेषः। तच्चायं यथा, साहित्यदर्पणे। ३। १५०।

"गर्व्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।
अवज्ञासविलासाक्षदर्शनाविनयादिकृत्॥")

गर्व्वाटः, पुं, (गर्व्वेण मदेन अटतीति। अट्+अच्। प्रकरणादित्वात् अलोपः।) द्वाःस्थितः। द्वारपालः। इति त्रिकाण्डशेषः॥

गर्व्वितः, त्रि, (गर्व्वः सञ्जातोऽस्य। गर्व्व+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्। यद्वा, गर्व्व+कर्त्तरि क्तः।) गर्व्वयुक्तः। अहङ्कृतः। इति जटाधरः॥ (यथा, रघुः। ६। ५५।

"आविर्बभूव कुशगर्भसुखं न्यगाणां
यूथं तदम्बरगर्व्वितलक्ष्यसारम्॥")

गर्ह, ङ कुत्सने। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) रेफोपधः। ङ, गर्हते। कुत्सनं निन्दा। इति दुर्गादासः॥ (यथा, रामायणे। २। ८२। १०।

"स वाष्पकलया वाचा कलहंसस्वरो युवा।
विललाप सभामध्ये जगर्हे च पुरोहितम्॥")

गर्ह, कि कुत्सने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, गर्हयति गर्हेति। इति दुर्गादासः॥ (यथा, भागवते। ६।७।१०।

"गर्हयामास सदसि स्वयमात्मानमात्मना॥"

तथा, तत्रैव। ४। ४। १०।

"जगर्ह साऽमर्षविपन्नया गिरा
ध्रुवद्विषं धूमपथश्रमस्मयम्॥")

गर्हणं, क्ली, (गर्ह कुत्सने+भावे ल्युट्।) निन्दा। इत्यमरः। १। ६। १३॥

गर्हा, स्त्री, (गर्ह्यते निन्द्यते इति। गर्ह कुत्सने+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः ततष्टाप्।) निन्दा। इति शब्दरत्नावली॥ (यथा, पद्मपुराणे। १। १८७।

"कुलपतनं जनगर्हां
बन्धनमपि जीवितव्यसन्देहम्।
अङ्गीकरोति कुलटा
सततं परपुरुषसंसक्ता॥")

गर्हितं, त्रि, (गर्ह्यते स इति। गर्ह+क्त। यद्वा, गर्हा सञ्जाताऽस्य। गर्हा+इतच्।) निन्दितम्। यथा, चाणक्ये। ५०।

"अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने बलिर्बद्धः सर्व्वमत्यन्तगर्हितम्॥"

गर्ह्यः, त्रि, (गर्ह्यते निन्द्यते इति। गर्ह ङ निन्दायाम्+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्।) अधमः। निन्द्यः। इत्यमरः। ३। १। ५४॥ (यथा, मनुः। ५। १४६।

"पिता भर्त्ता सुतैर्नापि नेच्छेद्विरहमात्मनः।
एषां हि विरहे स्त्री गर्ह्ये कुर्य्यादुभे कुले॥")

गर्ह्यवादी, [न्] त्रि, (गर्ह्यं वदतीति। गर्ह्य+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः।) कड़वः। इत्यमरः। ३। १। ३७॥

गल, भक्षे। स्रावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-स्रावे अकं-सेट्।) गलति। इति दुर्गादासः॥ (स्रावार्थे यथा, कथासरित्सागरे। ११। ५७।

"इति मे तव कल्याङ्गमपश्यन्त्या गलन्त्यमी।
सन्तापक्षयिताः प्राणा इव बाष्पाम्बुबिन्दवः॥")

गल, क ङ स्रावे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) स्रावः। क्षरणम्। क ङ, गालयते रक्तं यतस्त्र। इति दुर्गादासः॥

गलः, पुं, (गलति भक्षयत्यनेन। गल् + करणे अप्। यद्वा गीर्य्यतेऽनेन। ग + करणे अप्।) कण्ठः। इत्यमरः। २। ३। ८८॥ गला इति भाषा॥ (यथा, पञ्चतन्त्रे। ३। १६४।
"प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः। अजागलस्तनस्येव तस्य राज्यं निरर्थकम्॥"*॥
गलति क्षरति श्लाघतेऽनेनेति। गल् + घञ्। यद्वा गल् + क्विप्।) सर्व्वरसः। इति मेदिनी। ले। १३॥ धुना इति भाषा॥ वाद्यभेदः। (गलति निःसरति ज्वालादिरिति।) गड़कमत्स्यः। इति शब्दरत्नावली॥

गलकः, पुं, (गलति निःसरति ज्वालादिभ्य इति। गल क्षरणे + ण्वुल्।) गड़कमत्स्यः॥ इति शब्दरत्नावली॥

गलकम्बलः, पुं, (गले कम्बल इव।) गवां गलस्थित-कम्बलाकृतिर्मांसम्। तत्पर्य्यायः। सास्ना २। इत्यमरः। २। ६। ६२॥ ("सास्ना गोगलकम्बलः।" इत्युज्ज्वलदत्तः॥)

गलगण्डः, पुं, (गले गण्डः स्फोटक इव।) गल-रोगविशेषः। गरगण्ड इति भाषा॥ अथ गल-गण्डाधिकारः। तत्र गलगण्डस्य सामान्यं लिङ्गमाह।
"निबद्धः क्वथ्युर्यस्य शुष्कवल्लभते गले। महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत्॥"
निबद्धो दृढ़ः अचलो वा। शुष्कवत् अखड्वत्। गल इति हनुमन्ययोरुपलक्षणम्। तथा च भोजः।
"महान्तं श्लोथमल्पं वा हनुमन्या गलाश्रयम्। शुष्कवल्लभमानं तु गलगण्डं विनिर्द्दिशेत्॥"*॥

संप्राप्तिमाह।
"वातः कफश्चापि गले प्रदुष्टौ मांसं तु संदूष्य तथैव मेदः। कुर्व्वन्ति गण्डं क्रमशः खलिङ्गैः समन्वितं तं गलगण्डमाहुः॥"
क्रमशः शनैः शनैः। खलिङ्गैः वातकफमेदो-लक्षणैः॥*॥

वातिकमाह।
"तोदान्वितः श्यावशिरावनद्धः श्यावारुणो वा पवनात्मकस्तु। पानव्ययुक्तश्चिरवृद्धपाको यदृच्छया पाकमियात् कदाचित्॥ वैरस्यमास्यस्य च तस्य जन्तो-र्भवेत्तथा तालुगलप्रशोषः।"
चिरवृद्धपाकः चिरेण वृद्धिरपाकश्च यस्य सः॥

श्लैष्मिकमाह।
"स्थिरः सवर्णो गुरुरल्पकण्डूः श्वयुः श्लथो महांश्चापि कफात्मकस्तु। चिराच्च वृद्धिं भजतेऽचिराद्वा प्रपच्यते मन्दरुजः कदाचित्॥ माधुर्य्यमास्यस्य च तस्य जन्तो-र्भवेत्तथा तालुगलप्रलेपः।"
कदाचित् प्रपच्यते वा पाकोऽपि चिराद्भवति॥ प्रलेपः श्लेष्मणा॥*॥

मेदोजमाह।
"स्निग्धो मृदुः पाण्डुरनिष्टगन्धो मेदोऽन्वितः कण्डुयुतो रुजश्च। प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपश्चयवृद्धियुक्तः॥ स्निग्धास्यता तस्य भवेच्च जन्तो-र्गलेन शब्दं कुरुते च नित्यम्।"
देहक्षये कार्श्ये क्षयं देहवृद्धौ वृद्धिं यातीत्यर्थः॥*॥

असाध्यमाह।
"क्षाक्षाक्षसन्नं मृदुसर्व्वगात्रं संवत्सरातीतमरोचकार्त्तम्। क्षीणञ्च वेदो गलगण्डयुक्तं भिन्नस्वरं नैव नरं चिकित्सेत्॥"*॥

अथ गलगण्डचिकित्सा।
"सर्षपान् शिग्रुबीजानि शृङ्गबीजातसीयवान्। मूलकस्य च बीजानि तक्रेणाक्षेन पेषयेत्॥ गलगण्डो गण्डमाला ग्रन्थयश्चैव दारुणाः। प्रलेपादस्य नश्यन्ति विलयं यान्ति सत्वरम्॥१॥ रक्षोघ्नतैलयुक्तेन जलकुम्भीकभस्मना। लेपनं गलगण्डस्य चिरोत्थस्यापि नाशनम्॥ रक्षोघ्नः सर्षपः॥२॥ श्वेतापराजितामूलं प्रातः पिष्ट्वा पिबेन्नरः। सर्पिषा नियताहारो गलगण्डप्रशान्तये॥३॥ तिक्तालाबुफले पक्के सप्ताहसुषितं जलम्। सद्यः स्याद्गलगण्डघ्नं पानात् पथ्यानुसेविनाम्॥४॥ तैलं पिबेच्चान्तवल्लिविल्वा हिंस्राक्षयादृक्षकपिप्पलीभिः। सिद्धं बलाभ्यां सह देवदारु क्षितये नित्यं गलगण्डरोगी॥ वृक्षकोऽत्र तुलसिः। उक्तञ्च निघण्टौ धन्वन्तरिणा। 'तुलसिस्तुण्डी कपीतस्तु नन्दिवृक्षोऽथ वृक्षकः।' बलाभ्यां बलातिबलाभ्याम्। अभ्रतादितैलम्॥५॥ यवसूक्ष्मपटोलादिकटुरूक्षान्नभोजनम्। वमनं रक्तमोक्षश्च गलगण्डे प्रयोजयेत्॥६॥ दारयेद्गलगण्डे तु प्रच्छन्नानि बहूनि च। गण्डगोपालिकां पिष्ट्वा तत्र लेपं प्रकल्पयेत्॥ अवश्यं नश्यति क्षिप्रं गलगण्डो गदोऽसुना। प्रलेपस्यानुभूतोऽयं बहुधा बहुभिर्जनैः॥ प्रच्छन्नानि पक्वना इति लोके। गण्डगोपालिका गण्डगुया इति लोके प्रसिद्धा आम्रवाटिकायां सुलभः कीटविशेषः॥७॥
लवणं जलकुम्भ्यास्तु कणापूर्णेन संयुतम्। प्रभाते नित्यमश्नीयात् गलगण्डप्रशान्तये॥"८॥

इति भावप्रकाशः॥

गलग्रहः, पुं, (गलं कण्ठं गृह्णाति मत्स्यास्थ्या इति। गल + ग्रह् + अच्। यद्वा गलः मत्स्य-कण्ठो गृह्यतेऽस्मिन्। गल + अधिकरणे अप्।) व्यञ्जनविशेषः। तत्पर्य्यायः। मत्स्यकण्टः २। इति शब्दचन्द्रिका॥ तिथिविशेषः। यथा,—
"क्षयापक्षे चतुर्थी च सप्तम्यादिदिनत्रयम्। त्रयोदशीचतुष्कञ्च अष्टावेते गलग्रहाः॥"
इति मदनरत्ने नारदः॥

अपि च।
"आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते। गर्गादिमुनयः सर्व्वे तमेवाहुर्गलग्रहम्॥"
इति राजमार्त्तण्डः॥
(रोगविशेषः। यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे॥"
"यस्य श्लेष्मा प्रकुपितस्तिष्ठत्यन्तर्गले शिरः। आशु सञ्जनयेच्छोथं जायतेऽस्य गलग्रहः॥"
इति चरके सूत्रस्थानेऽष्टादशोऽध्याये॥
गलग्रहरोगवत् परित्यागाग्रह्यत्वात् पीड़ा-दायकत्वाच्च लक्षणाग्रहा पोष्यात्मीयजनोऽपि बोध्यते। यथा, स एव मे गलग्रहः। इति लोकप्रसिद्धिः॥)

गलन्तिका, स्त्री, (गलतीति। गल् + शृट। उगि-त्वात् ङीप्। "ग्रपृभ्रमोर्नित्यम्।" ७। १। ८१। इति तुम् स्वार्थे कन् ह्रस्वश्च।) कर्करी। स्वल्पवारिधानिका। इत्यमरः। २। ६। ३१॥ (यथा, काश्मीरखण्डे।
"एषा कार्य्या च वैशाखे देवे देया गलन्तिका॥")

गलमेखला, स्त्री, (गलस्य कण्ठस्य मेखलेव।) गलसूत्रम्। कण्ठाभरणविशेषः। तत्पर्य्यायः। सूत्रावली २। इति हारावली। १७४॥

गलव्रतः, पुं, (गलो गिलनमेव व्रतं नियमो यस्य।) मयूरः। इति त्रिकाण्डशेषः॥

गलशुण्डिका, स्त्री, (अल्पा शुण्डा शुण्डिका। गलस्य शुण्डिकेव।) तालूर्द्ध्वस्थमांसिका। आल् जिव् इति भाषा॥ (यथा, याज्ञवल्क्यः। ३। ९८।
"तालूदरं वस्ति शीर्षं चिबुके गलशुण्डिके॥")
तत्पर्य्यायः। सुधास्रवा २ घण्टिका ३ लम्बिका ४। इति हेमचन्द्रः। ३। २४६॥ रसाङ्गा ५ प्रतिजिह्विका ६ माध्वी ७ अलिजिह्विका ८। इति शब्दरत्नावली॥ (तालुगतरोगविशेषः। यथा, सुश्रुते सूत्रस्थाने २५ अध्याये।
"शुण्ड्यं जतुमणिर्म्मांससङ्घातो गलशुण्डिका॥"
"यस्य श्लेष्मा प्रकुपितः काकले ह्यवतिष्ठते। आशु सञ्जनयेच्छोथं करोति गलशुण्डिकाम्॥"
इति चरके सूत्रस्थानेऽष्टादशोऽध्याये॥
तच्चिकित्सादिकं यथा,—
"गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा। लम्बिका वर्द्धते नृणां विज्ञेया गलशुण्डिका॥ रुणद्धि चास्य मार्गञ्च नेत्रस्रावः प्रदृश्यते। शिरोऽग्निः श्वासकासश्च स्वरश्चैव प्रपद्यते॥ आशुकारी महाप्राज्ञः शीघ्रं कुर्य्यात् प्रति-क्रियाम्। शस्त्रेण शुण्डिकां छित्त्वा कुर्य्याद्विस्रावणं हितम्॥ मागधी मरिचं पथ्या वचा धान्ययवानिकाः। क्वाथः सोष्णः स्वेदनश्च गलशुण्डीप्रशान्तये॥ दिवारात्रौ यवान्यास्तु सुखे सन्धारणं हितम्। मर्द्दनं कण्ठदेशे तु तेन सम्पद्यते सुखम्॥ सिद्धार्थकं वचा कुष्ठं रजनी पारिभद्रकम्। गृहधूमं स लवणं कण्ठे वा लेपनं हितम्॥

ज्वरे प्रोक्तानि पथ्यानि यानि तानि महामते!। न गौल्यं पिच्छिलं सेव्यं तैलं नैव गलामये ॥" इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशेऽध्याये ॥)

गलस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः।) छागी। इति हेमचन्द्रः। ४। ३४१ ॥

गला, स्त्री, (गलतीति। गल्+अच्। स्त्रियां टाप्।) अलम्बुषा। इति भावप्रकाशः॥

गलाङ्कुरः, पुं, (गलरोधकोऽङ्कुरो यत्र।) गलरोगविशेषः। तत्पर्य्यायः। रोहिणी २। इति हेमचन्द्रः। ३। १३१ ॥ तस्य सम्प्राप्तिपूर्ब्बकलक्षणमाह माधवकरः।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरयञ्च रोहिणी ॥"

गलानिलः, पुं, (गले कण्ठदेशे अनिलः प्राणवायुर्यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। गङ्गाटेयः २। इति त्रिकाण्डशेषः॥ गलानिकः गलाविल इति च क्वचित् पाठः॥

गलिः, पुं, (गिरति ग्रसेन विना केवलं भक्षयतीति। गॄ+"सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्। गुणः रस्यलत्वञ्च।) शुक्लोऽप्यूर्ध्ववृन्तो वृषः। गड़िया गरु इति भाषा। तत्पर्य्यायः। दुष्टवृषः २। इति हेमचन्द्रः। ४। ३२६ ॥

गलितः, त्रि, (गल्+क्तः।) पतितः। तत्पर्य्यायः। स्रस्तः २ ध्वस्तः ३ भ्रष्टः ४ स्खलः ५ पन्नः ६ च्युतः ७। इत्यमरः। ३। १। १०४ ॥ (यथा, भागवते। १। १। ३।

"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ॥")

गलुः, पुं, (गलतीति। गल्+उन्।) मत्स्यविशेषः। इति महाभारतम् ॥

गलेगण्डः, पुं, (गले गण्ड इव यस्य। अलुक् समासः।) पक्षिविशेषः। तत्पर्य्यायः। मर्कटः २। इति त्रिकाण्डशेषः॥ (हाड़गिला इति भाषा॥)

गलेस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः। अलुक् समासः।) छागी। इति राजनिर्घण्टः॥

गल्भ, ड धृष्टत्वे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) अन्तःस्थतृतीयोपधः। ङ, गल्भते लोकः प्रगल्भः स्यादित्यर्थः। इति दुर्गादासः॥

गल्ला, स्त्री, (गलानां कण्ठानां समूहः। "प्राग्वतीयो यः।" ४। २। ४६। इति यः।) गलसमूहः। कण्ठानां समूहः। इत्यमरः। ३। ३। ४३॥

गल्लः, पुं, गण्डः। इति हेमचन्द्रः॥ गाल इति भाषा॥

गल्लचातुरी, स्त्री, (गल्ले गण्डे गण्डमधिकृत्य चातुरी यस्याः यस्यां वा। संज्ञात्वान्न कप्।) उपधानविशेषः। इति जटाधरः॥ गालवालिश इति भाषा॥

गल्वर्कः, पुं, (गलुर्मत्स्यविशेषः स इव अर्को दीप्तिर्यस्य।) बकः। मद्यपानपात्रम्। इति हेमचन्द्रः। ३। ५७०॥ मसारवर्णभेदः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ७। १५। ५३।

"मसारगल्वर्कसुवर्णरूप्य-
वंशप्रवालस्फटिकैश्च मुख्यैः॥")

गल्ह, ड कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सर्कं-सेट्।) अन्तःस्थतृतीयोपधः। ङ, गल्हते। इति दुर्गादासः॥

गवयः, पुं, (गु ड गृब्दे+भावे अप्। गवं गृब्दं याति प्रयोति गव इति गृब्दं यातीति वा। गव+या+कः।) गलकम्बलशून्यगोसदृशपशुः। (यथा, रामायणे। २। १०३। ४२।

"व्याघ्रगोकर्णगवया विचेरुः पृषतैः सह॥")

तत्पर्य्यायः। गवालूकः २। इति त्रिकाण्डशेषः॥ वनगौः ३ बलभद्रः ४ महागन्धः ५। तन्मांसगुणौ। परुषत्वम्। बृंहणत्वञ्च। इति राजनिर्घण्टः॥ वानरविशेषः। स तु वैवस्वतपुत्रः। यथा,—

"पुत्रा वैवस्वतस्याच पञ्च कालान्तकोपमाः।
गयो गवाची गवयः शरभो गन्धमादनः॥"

इति रामायणम्॥

गवयी, स्त्री, (गवय+जातौ गौरादित्वात् वा ङीष्।) गवयस्त्री। तत्पर्य्यायः। वनधेनुः २ भिल्लगवी ३। इति राजनिर्घण्टः॥

गवराजः, पुं, (गवेन गृब्देन राजते इति। राज्+अच्।) वृषः। इति शब्दचन्द्रिका॥

गवलं, क्ली, महिषशृङ्गम्। इत्यमरः। २। ६। १००॥

गवलः, पुं, (गवं गृब्दं लातीति। ला+कः।) वनमहिषः। इति हेमचन्द्रः। ४। ३४६॥ (यथा, बृहत्संहितायाम्। ३२। १७।

"गवलालिकुलाहिनिभा विहञ्जन्ति पयः पयोवाहाः॥")

गवाचः, पुं, (गवामक्षीव। "अक्ष्णोऽदर्शनात्।" ५। ४। ७६। इत्यच्। यद्वा, गावः रश्मयः अक्ष्णुवन्ति व्याप्नुवन्ति अनेन इति। अक्षू व्याप्तौ+अकर्म्मण्यर्थे घञ्।) गवामक्षीव यः। जानालार जाली इति भाषा॥ (यथा, रघुः। ७। ७।

"उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान॥")

तत्पर्य्यायः। वातायनम् २। इत्यमरः। २। २। ६॥ बधूदृगयनम् ३ जालम् ४ जालकम् ५। इति कोषान्तरम्। इति भरतः॥ वानरविशेषः। इति मेदिनी। चे। ३५॥ स तु वैवस्वतपुत्रः। यथा, रामायणे।

"पुत्रा वैवस्वतस्याच पञ्च कालान्तकोपमाः।
गयो गवाची गवयः शरभो गन्धमादनः॥"

गवाची, स्त्री, (गां भूमिमक्ष्णोति व्याप्नोतीति। अक्षू व्याप्तौ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। स्त्रियां ङीप्।) गोडुम्बा। इत्यमरः। २। ४। १५६॥ गोसुक् इति भाषा॥ इन्द्रवारुणी। राखाल शशा इति भाषा॥ (अस्याः पर्य्याया यथा,—

"ऐन्द्रीन्द्रवारुणी चित्रा गवाची गजचिर्भटा।
सृगेर्व्वारुः पिटक्कोटी विशाला च शृगादनी॥"

इति वैद्यकरत्नमालायाम्॥

व्यवहारोऽस्य यथा,—

"चित्रकं ग्रहङ्गवेरञ्च तथादन्ती गवाक्ष्यपि॥"

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे॥ मामालाडु इति क्वचित् भाषा॥) ग्राखोट। शेओड़ा इति भाषा॥ इति राजनिर्घण्टः॥ अपराजिता। (यथा, वैद्यकरत्नमालायाम्।

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥")

गवाची, स्त्री, (गवि भूमौ अश्नुते गच्छतीति। अश्नु+क्विप्। ङीष्। "अवड् स्फोटायनस्य।" ६। १। १२३। इत्यवड्।) मत्स्यविशेषः। पांकाल माछ इति भाषा॥ अस्य गुणाः। अजीर्णकारित्वम्। गुरुत्वम्। श्लेष्मप्रकोपनत्वञ्च। इति राजवल्लभः॥

गवादनं, क्ली, (अद्यते भक्ष्यते इति। अद्+कर्म्मणि ल्युट्। ततः षष्ठीतत्पुरुषः।) घासः। इति शब्दचन्द्रिका॥

गवादनी, स्त्री, (गवादन+गौरादित्वात् ङीष्।) इन्द्रवारुणी। (अद्यतेऽस्यामिति। अद्+अधिकरणे ल्युट्। ततः षष्ठीतत्पुरुषस्ततः स्त्रियां ङीष्।) गवां घासभक्षणाधारः। इति मेदिनी। ने। १७६॥ गरुर घास खाइवार गड़ा इति भाषा॥ नीलापराजिता। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायाः,—

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"

इति वैद्यकरत्नमालायाम्॥)

गवालूकः, पुं, (गवेन गृब्देन चलति पर्य्याप्नोतीति। अल्+बाहुलकात् ऊकञ्।) गवयः। इति त्रिकाण्डशेषः॥

गवाशनः, पुं, (गामश्नातीति। अशृ भोजने+ल्युः।) गोभक्षकः। सुचि इति भाषा॥ यथाह कश्चित्।

"माताप्येका पिताप्येको मम तस्य च पक्षिणः।
अहं सुनिभिरानीतः स चानीतो गवाशनैः॥"

गवाधिका, स्त्री, लाक्षा। इति रत्नमाला॥ गराधिकापि पाठः॥ (गवायिका इति क्वचित् पाठः॥)

गवीश्वरः, पुं, (गवामीश्वरः। पक्षे अवङादेशाभावः।) गवां स्वामी। तत्पर्य्यायः। गोमान् २ गोमी ३। इत्यमरः। २। ६। ५८॥ गवेश्वरोऽपि॥

गवेधुः, स्त्री, (गवे गवार्थं धीयते इति। धा+रगय्वादित्वात् कुः। एधोदरादृकारस्य डत्वम्। तत्पुरुषे क्ङितीत्यलुक्।) धान्यविशेषः। इत्यमरः। २। ६। २५॥ गड़गड़ इति भाषा॥

गवेधुः, पुं, (गवे गवार्थं धीयते इति। धा+कुः। तत्पुरुषे क्ङितीत्यलुक्। यद्वा, गवि भूमौ एधते इति। गो+एध वृद्धौ+कुः।) गवेडुः। इति भरतः॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते। यथा,—

"गवेधुका तु विड्वद्भिर्गवेधुः कथिता स्त्रियाम् ।
गवेधुः कटुका स्वादी कार्श्यकृत् कफनाशिनी ॥"
इति भावप्रकाशः ॥)

गवेधुकं, क्ली, (गवेधुरिव कायतीति । कै + कः । गैरिकम् । इति राजनिर्घण्टः ॥ (तृणधान्यविशेषः । गड़्गड़ि इति भाषा ॥ यथा,—
"चिल्लीलट्वाकलोबीका कुरण्टकगवेधुकम् ।
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
सर्पविशेषे पुं । यथा, सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ।
"महासर्पः शुक्लपाली लोहिताक्षो गवेधुकः परिसर्पः" इत्यादयः ॥)

गवेधुका, स्त्री, (गवेधु + स्वार्थे संज्ञायां वा कन् ।) तृणधान्यविशेषः । गड़्गड़् देधान इति च भाषा । (यथा, विष्णुपुराणे । १ । ६ । २५ ।
"श्यामाकाक्षत यौवारा जर्त्तिलाः सगवेधुकाः ।")
तत्पर्य्यायः । गवेदुः २ । इत्यमरः । २ । ६ । ५२ ॥
गवेधुः ३ गवेड़का ४ । इति तट्टीका ॥ क्षुद्रा ५ गोजिङ्गा ६ गुन्द्रा ७ गुल्यः ८ । इति रत्नमाला ॥ नागबला । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"गाङ्गेरुकी नागबला भद्रा दृक्खगवेधुका ।
खरवल्लरिका विश्वदेवा गोरक्षतण्डुली ॥"
इति च वैद्यकरत्नमालायाम् ॥)

गवेरुकं, क्ली, (गां भूमिमीर्ण्ते उत्पत्तिकारणत्वेन प्राप्नोतीति । गो + ईर् + बाहुलकादुक । ततोऽवडादेशः ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

गवेल्लका, स्त्री, (ईर्ष्ते इति । ईश् + अच । ततो गवामीशः । स इव कायतीति । कै + कः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ गोरक्ष चाउलिया । इति भाषा ॥ (गुणादयोऽस्या गोरक्षतण्डुलाशब्दे ज्ञातव्याः ॥)

गवेष, त् क मार्गणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) मूर्द्धन्योपधः । अजगवेषत् गुरुं गुरौ । इति दुर्गादासः ॥

गवेषणा, स्त्री, क्ली, (गवेष + भावे युच् ।) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥

गवेषितं, त्रि, (गवेष्यते स्म इति । गवेष + क्त ।) अन्वेषितम् । इत्यमरः । ३ । १ । १०५ ॥

गवोद्भवः, पुं, उत्तमगवः । गोवृषः प्रग्रहः । इति व्युत्पत्तिः ॥

गव्यं, त्रि, (गोरिदं गोर्विकारो वा । "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् । "वाग्गो यि प्रत्यये ।" ६ । १ । ७६ । इति अव् ।) गवां सर्व्वम् । गोसम्बन्धि । तत्तु दुग्धगोमयादि । इत्यमरः । २ । ६ । ५० ॥ (यथा, मनुः । ३ । २७१ ।
"संवत्सरन्तु गव्येन पयसा पायसेन च ॥")
गोहितम् । इति मेदिनी । ये । १७ ॥

गव्यं, क्ली, (गवि वाचि साधु । गो + यत् । ततोऽव् ।) न्याः । (गवि नेत्रे साधु इति ।) रागद्रव्यम् । इति मेदिनी । ये । १७ ॥

गव्या, स्त्री, (गवां समूहः । "खलगोरथात् ।" ४ । २ । ४७ । इति यत् । "वाग्गो यि प्रत्यये ।" ६ । १ । ७६ । इति अव् ।) गोसमूहः । तत्पर्य्यायः । गोत्रा २ । इत्यमरः । २ । ६ । ६० ॥
गव्यूतिः । (गवि इवौ साधुः । गो + यत् । ततष्टाप् ।) न्याः । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥

गव्यूतं, क्ली, (गोर्व्यूतिः । "गोर्व्यूतौ क्रन्दस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७६ । इत्यस्य वार्त्तिं इति अव् ।) द्विसहस्रधनुः । इति शब्दार्णवः ॥ क्रोशद्वयम् । (यथा, राजतरङ्गिण्याम् । ३ । ४०६ ।
"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् ।
धुन्वन् करांभ्यां मधुपान् धावति स्म स धीरधीः ॥")
तत्पर्य्यायः । क्रोशयुगम् २ । इत्यमरः । २ । १ । १८ ॥ गव्यूतम् ३ गोरुतम् ४ गोतमम् ५ । इति भरतधृतवाचस्पतिः ॥ गव्या ६ । इति हेमचन्द्रः । ३ । ५५२ ॥

गह, त् क गहने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) गहनं दुर्ब्बोधः । गहयति ग्राह्यं जड़धीः । दुःखेन जानातीत्यर्थः । इति दुर्गादासः ॥

गहनं, क्ली, (गाह्यते दुर्गम्यतेऽस्मिन्निति । गाह् + बहुलमन्यत्रापि इति युच् । ल्युट्योरिति निर्द्देशात् वा ह्रस्वः । यद्वा, गह त् क गहने + ल्युट् ।) वनम् । इत्यमरः । २ । ४ । १ ॥ (यथा, गोः रामायणे । ६ । ६ । ६ ।
"सखीनां हेम तद्दीव्य मया वर्ष्म प्रतिश्रुतम् ।
निर्जीय गहने सूर्ये भयसुत्सृज्य रावणात् ॥")
गह्वरम् । दुःखम् । इति मेदिनी । ने । ५७ ॥ (पुं, विष्णुः । दुर्ज्ञेयत्वादस्य तथात्वम् । यथा, महाभारते । १३ । १४६ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ।"
"सर्व्वरूपं सामर्थ्यं चेष्टितं तस्य ज्ञातुं न शक्यते इति गहनः ।" इति भाष्यम् ॥)

गहनः, त्रि, (गाह्यते दुःखेन गम्यते इति । गाह् + युच् । ल्युट्योरिति निर्द्देशात् वा ह्रस्वः ।) दुर्गमः । दुष्प्रवेशः । तत्पर्य्यायः । कलिलः २ । इत्यमरः । २ । ४ । १ ॥ (यथा, रामायणे । ३ । १ । २३ ।
"गहनेष्वाश्रमस्थेषु क्षीणजीविततर्षिणाः ।
रमन्ते तापसाश्चत्र श्वापदैः सहिताश्चराः ॥")

गहना, स्त्री, अलङ्कारः । इति देवीपुराणम् ॥

गह्वरं, क्ली, (गाह्यते इति । गाह् + "ह्लिबरच्छत्वरेति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) गुहा । (यथा, रघुः । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥" * ॥
गाह्यते विलुड्यते आत्मात्मनेन इति ।) इत्यमरः । २ । ३ । ६ ॥ वनम् । इति मेदिनी । रे । १४६ ॥ रोदनम् । इति हेमचन्द्रः । ६ । ३८ ॥ (गहने त्रि । यथा, भागवते । १ । ६ । १३ ।
"नलवेणुशरस्तम्बकुशकीचकगह्वरम् ।
एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥")

गह्वरः, पुं, (गाह्यते विलुड्यते इति । गाह् विलोड़ने + "ह्लिबरच्छत्वरेति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) निकुञ्जः । इति मेदिनी । रे । १४६ ॥

गह्वरी, स्त्री, (गह्वर + स्त्रियां ङीप् ।) गुहा । इति शब्दरत्नावली ॥

गा, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, गाते । इति दुर्गादासः ॥

गा, र लि स्तुतौ । अध्वनि । इति कविकल्पद्रुमः ॥ (ङां-परं-सकं-सेट् ।) र, वैदिकः । लि, जगाति । इति दुर्गादासः ॥

गा, स्त्री, (जगाति स्तौति अनया । गा स्तुतौ + क्विप् ।) गाथा । इति पुरुषोत्तमः ॥

गाङ्गं, त्रि, (गङ्गाया इदमिति अण् ।) गङ्गासम्भूतम् । इति मेदिनी ॥ गे । ५ ॥ (यथा, कुमारे । ५ । ३७ ।
"विकीर्णसप्तर्षिबलिप्रहासिभि-
स्त्वया न गाङ्गैः सलिलैर्दिवच्युतैः ॥"
मेघधारासिनि:सृते जलविशेषे, क्ली । तल्लक्षणादिकं यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"तत्रान्तरीक्षं चतुर्विधम् । तद्यथा, धारं कारं तौषारं हैममिति । तेषां धारं प्रधानं लघुत्वात् । तत्पुनर्द्विविधं गाङ्गं सामुद्रञ्चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षकं कुर्म्मोत ग्राह्योदनपिञ्जमकृत्रिमविदग्धं रजतभाजनोपहितं वर्षति देवे वर्षत्यनुर्वीतं स यदि सुकृष्णं स्थितस्थाडग्र एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्षाष्वते सिकतासेदे च सामुद्रमिति विद्यात्तत्रोपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद् भवतीति ॥"
अस्य परीक्षा यथा,—
"गाङ्गं सामुद्रविज्ञानं कथयिष्यामि साम्प्रतम् ।
धारितं येन पात्रेण लक्ष्यते येन तद्विधम् ॥
धौतं शुद्धं सितं वस्त्रं चतुर्हस्तप्रमाणकम् ।
दक्षांघ्रिहस्तांश्च चतुश्चतुष्कोणेषु बन्धयेत् ।
तस्मात् परीक्षते तोयं शुद्धे रौप्यमयेऽथवा ॥
कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः ।
शुक्लकृष्णो स तस्मिन्नु श्वेतग्राह्योदनस्य वा ॥
पिञ्जिका तत्र संच्छिन्ना नान्यथा भाति सा पुनः ।
श्वेता च निर्म्मला पिञ्जी शुद्धञ्च विमलं पयः ॥
तद्गाङ्गं सर्व्वदोषघ्नं ग्रहीतव्यं हि सुभाजने ।
तद्धारयेच्च मतिमान् वस्त्रं मेघं रसायनम् ॥
श्रमक्लमपिपासार्त्तं कफदोषनिवारणम् ।
लघु सुस्पष्टलेखा-[illegible]
गाङ्गोदकस्य वृष्टेः स्वादिवसे [illegible]

इति हारीते प्रथमे स्थाने [illegible]

गङ्गागर्भजातत्वात् सुवर्णमपि। इति महाभारतम्॥)

गाङ्गः, पुं, (गङ्गाया अपत्यं पुमानिति। "शिवादिभ्योऽण्।" ४।१।११२। इत्यण्।) भीष्मः। (यथा, हरिवंशे। ३२।१११।

"गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत् प्रभुः।
स तु भीष्म इति ख्यातः कौरवाणां पितामहः॥"

अस्य जन्मवृत्तान्तादिकं भीष्मशब्दे द्रष्टव्यम्॥) कार्त्तिकेयः। इति मेदिनी। गे। ५॥

गाङ्गटः, पुं, (गाङ्गे गङ्गातीरादौ अटति भ्रमतीति। अट्+अच्। णकन्धादित्वात् साधुः।) मत्स्यभेदः। इति शब्दरत्नावली॥ चिङ्गिड़ि माछ इति भाषा॥ (चिङ्गिटशब्दे विवरणमस्य ज्ञेयम्॥)

गाङ्गटकः, पुं, (गाङ्गे गङ्गातीरादौ अटतीति। अट्+खुल्।) गाङ्गटमत्स्यः। इति शब्दरत्नावली॥

गाङ्गटेयः, पुं, (गाङ्गे अटतीति। अट गतौ+बाहुलकात् ढ्यः।) गाङ्गटमत्स्यः। इति शब्दरत्नावली॥

गाङ्गायनिः, पुं (गङ्गाया अपत्यं पुमान्। "तिकादिभ्यः फिञ्।" ४।१।१५४। इति फिञ्।) भीष्मः। इति त्रिकाण्डशेषः॥ कार्त्तिकेयश्च॥

गाङ्गेयं, क्ली, (गङ्गाया अपत्यम्। "शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्। गङ्गाजातत्वादस्य तथात्वम्।) स्वर्णम्। (यदुक्तं महाभारते वनपर्व्वणि।

"यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्।
तदुल्बं पर्व्वते न्यस्तं हिरण्यं समपद्यत॥")

धुस्तूरः। कपोतः। इत्यमरः। २।६।६४॥ सुस्तम्। इति हेमचन्द्रः॥ (अस्य पर्य्यायाः यथा, वैद्यकरत्नमालायाम्।

"मेघाख्यं सुस्तकं सुस्ता गाङ्गेयं भद्रसुस्तकम्॥"

गङ्गाजातजलादौ त्रि। यथा, महाभारते। ३।३।३४।

"योगमास्थाय धर्म्मात्मा वायुभक्षो जितेन्द्रियः।
गाङ्गेयं वार्य्युपस्पृश्य प्राणायामेन तस्थिवान्॥")

गाङ्गेयः, पुं, (गङ्गाया अपत्यं पुमान्। "शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) भीष्मः। (यथा, देवीभागवते। २।४।३७।

"वसुदेव विदित्वेवं सुखं शुङ्क सुतोद्भवम्।
गाङ्गेयोऽयं महाभाग! भविष्यति बलाधिकः॥"

अस्य जन्मविवरणं तत्रैव २ अध्याये तथा भीष्मशब्दे विस्तरशो द्रष्टव्यम्॥) कार्त्तिकेयः। इति हेमचन्द्रः॥ (यथा, महाभारते।१।१३८।१३।

"आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः॥")

इक्षौ गुडमत्स्यः। इति त्रिकाण्डशेषः॥ भद्रसुस्ता। इति राजनिर्घण्टः॥

गाङ्गेरुकी, स्त्री, (गाङ्गं जलविशेषमीरयतीति। ईर गतौ क्षेपणे च+"सृगयादयश्च।" उणां। १।३८। इति कुः। ततः स्वार्थे कन् गौरादित्वात् ङीष्।) गोरक्षतण्डुला। इत्यमरः। २।४।११७॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकवकुलधन्वनाम्रान्तकाम्बकर्कफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिविल्वविल्वीप्रभृतीनि॥"

यथास्याः पर्य्यायाः।

"गाङ्गेरुकी नागबला भद्रा ह्रस्वगवेधुका।
खरवल्लरिका विश्व-वेदा गोरक्षतण्डुली॥"

इति वैद्यकरत्नमालायाम्॥

यथास्या गुणाः।

"गाङ्गेरुकी करीरश्च विम्बीतोदनधन्वनम्।
मधुरं सकषायञ्च शीतं पित्तकफापहम्॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

गाङ्गेरी, स्त्री, (गाङ्गे गङ्गादिनदीतटे तिष्ठतीति। स्था+कः। अलुक्। गौरादित्वात् ङीष्।) कठगर्करालता। इति हारावली। २१०॥ नटा इति भाषा॥

गाङ्गिकायः, पुं, वर्त्तिकपक्षी। इति राजनिर्घण्टः॥

गाढं, क्ली, (गाहते स्म इति। गाह विलोड़ने+क्तः।) अतिशयः। दृढम्। (यथा, आर्य्यासप्तशत्याम्। ६१०।

"आलिङ्गति सा गाढं पुनः पुनर्यामिनीप्रथमे॥")

तद्युक्ते त्रि। इत्यमरः। १।१।७०॥ (यथा, रघुः। ६।७२।

"श्रमफेनसुचा तपस्विगाढां
तमसां प्राप नदीं तुरङ्गमेण॥")

गाढसुष्टिः, पुं, (गाढा दृढा सुष्टिर्यत्र। दृढसृष्या धारणादस्य तथात्वम्।) खड्गः। इति मेदिनी। टे। ६१॥ (दार्ढ्याभावादेवास्य तथात्वम्॥)

गाढावटी, स्त्री, (गाढा दृढा वटी वटिका यत्र। णिजन्तात् पुंवद्भावाभावः।) चतुरङ्गक्रीड़ामध्ये क्रीड़ाविशेषः। यथा, तिथ्यादितत्त्वे।

"नौकैका वटिका यस्य विद्यते खेलने यदि।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति॥"

गाणपत्यः, त्रि, (गणपतिर्देवोऽस्य उपास्यदेवो यस्य। गणपति+ष्यञ्। केचिदिच्छन्ति अश्वपत्यादिभ्यश्चेति ष्यञ्प्रत्ययादोऽण्। तत्र गाणपत इति साधुः।) गणेशोपासकः। इत्यागमः॥ (गणपतेर्भावः कर्म्म वा "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) गणपतिसम्बन्धी। गणपतिभावे क्ली॥ (यथा, महाभारते। ३।८५।६७।

"प्रदक्षिणमुपावृत्य गाणपत्यमवाप्नुयात्॥")

गाणिक्यं, क्ली, (गणिकानां वेश्यानां समूहः।

"गणिकाया यञ्जिति वक्तव्यम्।" ४।२।४०। इत्यस्य वार्त्तिं इति यञ्।) गणिकासमूहः। बहुवेश्याः। इत्यमरः। २।६।२२॥

गाण्डिवः, पुं, क्ली, (गण्डिर्यन्त्रिरस्यास्तीति। गण्डि+"गाण्डाजगात् संज्ञायाम्।" ५।२।११०। इति वः।) अर्জ্জুनधनुः। (यथा, महाभारते। ३।२३५।३०।

"धनुर्यांहश्चार्জ্জुनः सव्यसाची
धनुश्च तन्नाण्डिवं भीमवेगम्॥")

धनुर्मात्रम्। इति मेदिनी॥ वे। ३६॥

गाण्डीवः, पुं,क्ली, (गाण्डिर्यन्त्रिः। "कृदिकारादिति।" ङीषि कृते गाण्डी। सा विद्यतेऽस्य। "गाण्डाजगात् संज्ञायाम्।" ५।२।११०। इति वः।) अर्জ্জुनधनुः। इत्यमरः। २।८।८४॥ (यथा, महाभारते। ४।४१।१।

"यस्मां पूर्व्वमिहाहृच्छः शत्रुसेनानिवर्हणम्।
गाण्डीवमेतत् पार्थस्य लोकेषु विदितं धनुः॥"

एतद्वृत्तञ्हि ब्रह्मादयोऽपि आदौ श्रुतवन्तः यदुक्तं तत्रैव। ४।४१।५—८।

"एतद्वर्षसहस्रन्तु ब्रह्मा पूर्व्वमधारयत्।
ततोऽनन्तरमेवाथ प्रजापतिरधारयत्॥
त्रीणि पञ्चशतञ्चैव शक्रोऽशीतिञ्च पञ्च वै।
सोमः पञ्चशतं राजा तथैव वरुणः शतम्॥
पार्थः पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहनः।
महावीर्य्यं महद्दीप्तमेतद्धनुरनुत्तमम्॥
एतच्च मानुषं प्राप्तं वरुणाच्चारुदर्शनम्।
पूजितं सुरमर्त्यैषु बिभर्त्ति परमं वपुः॥"

खाण्डवदाहनार्थं हि वह्निना वरुणञ्शकासादानीयधनुरेतदर्জ্জुनाय प्रदत्तम्। तत्कथा यथा, महाभारते। १।२२६।१—६।

"एवमुक्तः स भगवान् धूमकेतुर्हुताशनः।
चिन्तयामास वरुणं लोकपालं दिदृक्षया॥
आदित्यसदृशे देवं निवसन्तं जलेश्वरम्।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम्॥
तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम्।
चतुर्थं लोकपालानां देवदेवं सनातनम्॥
सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते।
तत् प्रयच्छोभयं शीघ्रं रथञ्च कपिलक्षणम्॥
कार्य्यञ्च समहत् पार्थो गाण्डीवेन करिष्यति।
चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयताम्॥
ददानीत्येव वरुणः पावकं प्रत्यभाषत।
तदद्भुतं महावीर्य्यं यशःकीर्त्तिविवर्द्धनम्॥
सर्व्वशस्त्रैरनाधृष्यं सर्व्वशस्त्रप्रमाथि च।
सर्व्वायुधमहामात्रं परसैन्यप्रधर्षणम्॥
एकं शतसहस्रेण सम्मितं राष्ट्रवर्द्धनम्।
चित्रसुग्रावचैर्व्वर्णैः शोभितं श्रक्ष्णमव्रणम्॥
देवदानवगन्धर्व्वैः पूजितं शाश्वतीः समाः।
प्रादाच्चैव धनूरत्नमक्षय्ये च महेषुधी॥"

"तच्च दिव्यं धनुःश्रेष्ठं ब्रह्मणा निर्म्मितं पुरा।
गाण्डीवमुपसंगृह्य बभूव मुदितोऽर्জ্जुनः॥")

कार्म्मुकम्। इति मेदिनी। वे। ३६॥

गाण्डीवी, [न्] पुं, (गाण्डीवोऽस्त्यस्य। गाण्डीव+"अत इनिठनौ।" ५।२।११५। इति इनिः।) अर्জ্জुनः। इति त्रिकाण्डशेषः॥ अर्জ্জुनवृक्षः। इति राजनिर्घण्टः॥

गाता, [तृ] त्रि, (गायतीति। गै गाने+तृच्।) गायकः। इति सङ्गीतदामोदरः॥ (यथा, हरिवंशे। ५४।११।

"गाता चतुर्णां वेदानामङ्गाता प्रथमस्त्रिणाम्॥")

गातुः, पुं, (गायतीति। गै गाने + "कमिमनि-जनिगाभायाहिभ्यश्च।" उणा। १। ७३। इति तुः।) कोकिलः। भ्रमरः। गन्धर्वः। इति मेदिनी। ते। १५॥ (गाते गच्छतीति। गा ड गतौ + कमिमनीतिसूत्रे गानिर्दृश्यात् तुः। पथिकः। इति उज्ज्वलदत्तः॥ गै गाने + भावे तु। गानम्। यथा, ऋग्वेदे। ४। ५१। १।
"गातुं ऋतस्य नृषसो जनाय।" "गातुं गानम्।" इति भाष्यम्॥ गाते गच्छत्यत्र इति। गा ड गतौ + अधिकरणे तु। गमनीयः पन्थाः। यथा, ऋग्वेदे। ६। ८५। ४। "उरुं नो गातुं कृणु सोममीड्य।" "गातुं गन्तव्यमार्गम्।" इति भाष्यम्॥ पृथिवी। यथा, तत्रैव। ३। ३१। १५।
"इन्द्रो दृभिरजनद्दीद्यानः साकं सूर्यस्य सप्तसं गातुमग्निम्।" "गातुं पृथिवीम्।" इति भाष्यम्॥ गा र लि स्तुतौ + भावे तुः। स्तवः। यथा, तत्रैव। ४। ४। ६। "स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्।" "गातुं स्तवम्।" इति भाष्यम्॥ उपायः। यथा, तत्रैव। ५। ६५। ४। "मित्रो अंहोश्चिदुरुचयाय गातुं वनते।" "गातुमुपायम्।" इति भाष्यम्॥)

गातुः, त्रि, (गाते कोपं गच्छतीति। गा ड गतौ + "कमिमनीति।" उणा। १। ७३। इति गानिर्दृश्यात् तुः।) रोषणः। इति मेदिनी। ते। १५॥ (गायतीति। गै गाने + तुः।) गायनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

गात्र, त्र क ड ग्रैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तुरां-आत्मं-अर्कं-सेट्।) दन्त्यवर्गमध्यः। ड, गात्रयते गात्रायते। इति दुर्गादासः॥

गात्रं, क्ली, (गच्छत्यनेन। गम् + "गमेरा च।" उणा। ४। १६८। इति ष्ट्रन् आकारादेश्च।) इन्द्रियपूर्णशब्दादिदेशः। इन्द्रियग्रहणादिसम्मुखभागः। (यथा, माघे। १८। ४६।
"व्यापस्कारालूनगात्रस्य भूमि-
र्निःसाधारङ्गच्छतोऽवाङ्मुखस्य॥"
"लूनगात्रस्य छिन्नजङ्घस्य॥" इति तट्टीकायां मल्लिनाथः॥ *॥ गच्छति मरणात् परं स्वकारणभूतपञ्चत्वं प्राप्नोति यद्वा गम्यते स्थानात् स्थानान्तरं प्राप्यते सञ्चाल्यते वाऽनेन इति।) अङ्गम्। इति मेदिनी। रे। २३। हस्तपादाद्यवयवसमुदयः। गा इति भाषा॥ (यथा, महाभारते। १। १५४। ३०।
"अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा।
कर्षन्तु भवि संक्षुण्णा विक्षतस्य मया रणे॥")
तत्पर्य्यायः। कलेवरम् २ वपुः ३ संहननम् ४ शरीरम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२। इत्यमरः। २। ६। ७०॥ इन्द्रियायतनम् १३ अङ्गम् १४ चेत्रम् १५ भूषणः १६ मत्कुणम् १७ वैरम् १८ सचरः १९ घनः २० वन्यः २१ परम् २२ पिण्डः २३ पुद्गलम् २४। इति हेमचन्द्रः॥ भूतात्मा २५ स्वर्गलोकेशः २६ स्कन्धः २७ पञ्जरः २८ कुलम् २९ बलम् ३०। इति जटाधरः॥
(गात्रवादनादि निषेधो यथा,—
'गात्रवक्त्रनखैर्वादं हस्तकेशावधूननम्।
तोयाग्निपूज्यमध्येन यानं धूर्म्मं प्लवाश्रयम्॥
मद्यातिसक्तिं विश्रम्भस्खातन्त्र्यं स्त्रीषु च त्यजेत्॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥)

गात्रभङ्गः, स्त्री (गात्रस्य भङ्गोऽवसादो यस्याः।) भ्रूकुञ्चिभेदी। इति शब्दचन्द्रिका॥

गात्रमार्ज्जनी, स्त्री, (गात्रं मृज्यतेऽनयेति। मृज् + ल्युट् + स्त्रियां ङीप्।) शरीरमार्ज्जनार्थं वस्त्रम्। इति लोकप्रसिद्धिः॥ गामोछा इति भाषा॥

गात्रसङ्कोची, [न्] पुं, (गात्रं सङ्कोचयतीति। सम् + कुच् + णिच् + णिनिः। यद्वा, गात्रस्य सङ्कोची।) जाहकजन्तुः। इति राजनिर्घण्टः॥

गात्रसंप्लवः, पुं, (गात्रेण संप्लवते भासते सन्तरति जले इत्यर्थः। सम् + प्लु + अच्।) प्लवपक्षी। इति हेमचन्द्रः। ४। ४०६॥

गात्रसम्मितः, पुं. (गात्रं सम्मितं उत्पन्नावयवमात्रं यत्र।) गात्रावयवोत्पत्तिः। यथा,—
"पादे उत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते।
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम्॥
अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते।
द्विगुणं गोव्रतं कुर्य्यात् प्रायश्चित्तं विशुद्धये॥
मध्यमवचनं भवदेवेन व्याख्यातम्। यदा लगुड़ाद्यभिघातेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्रपाते यथोक्तप्रायश्चित्तपादाचरणम्। गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयम्। सकलगात्रसम्पत्तौ प्रायश्चित्तपादत्रयम्। अर्थाच्चेतन्ययुक्तगर्भपाते द्वितयमेव प्रायश्चित्तमवहनीयम्।" इति प्रायश्चित्ततत्त्वम्॥

गात्रानुलेपनी, स्त्री, (गात्रमनुलिप्यतेऽनया इति। अनु + लिप् + ल्युट् + स्त्रियां ङीप्।) गात्रानुलेपनयोग्यं दृष्टं पिष्टं वा सुगन्धिद्रव्यम्। तत्पर्य्यायः। वर्णिः २ वर्णकम् ३ विलेपनम् ४। इत्यमरः। २। ७। १३३॥

गायकः, त्रि, (गायतीति। गै गाने + "गास्थकन्।" ३। १। १४६। इति थकन्।) गायकः। इति त्रिकाण्डशेषः॥

गाथा, स्त्री, (गीयते इति। गै गाने + "उधिकुधिगर्गिभ्यश्थन्।" उणा। २। ४। इति थन् स्त्रियां टाप्।) श्लोकः। (यथा, महाभारते। ३। ८५। ३०।
"गाथा च गीतिका चापि तस्य सम्यद्यते नृप!॥")
संस्कृतान्यभाषा। सा तु प्राकृतभाषा। गेयम्। तच्च गीतम्। (यथा, मनुः। ६। ४२।
"अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥")
इत्तम्। तत्तु अक्षरसंख्यातं पद्यम्। इति मेदिनी। थे। ६॥

गाध, ऋ ड प्रतिष्ठायाम्। ग्रन्थे। लिप्सायाम्। इति कविकल्पद्रुमः। (भ्वां-आत्मं-प्रतिष्ठायां सकं-अन्यत्र अकं-सेट्।) ऋ, अजगाधत्। ड, गाधितासे नभो भूय इति भट्टिः। गाधते मालिकः स्नजः। इति दुर्गादासः॥

गाधः, पुं, (गाध प्रतिष्ठायां लिप्सायाञ्च + भावे घञ्।) स्थानम्। (यथा, महाभारते। १। २१। १३।
"अनासादितमाधञ्च पातालतलमक्षयम्॥")
लिप्सा। इति हेमचन्द्रः॥ (कूलम्। परपारम्। यथा, महाभारते। ७। ११३। २।
"द्वीपो य आसीत् पाण्डूनामगाधे गाधमिच्छताम्॥")
सुखोत्तरणीये, त्रि। यथा, रघुः। ४। २४।
"सरितः कुर्व्वती गाधाः पथश्चाज्ञानकर्दमान्।
याचायै चोदयामास तं शक्तेः प्रथमं प्ररत॥"
स्त्रियां टाप्। गायत्रीरूपिणी महादेवी। यथा, देवीभागवते। १२। ६। ४०।
"गौतमी गामिनी गाधा गन्धर्व्वाप्सरसेविता॥"
"गाधा प्रतिष्ठारूपिणी।" इति तट्टीका॥)

गाधिः, पुं, (गाधते उत्तरपदं लिप्सतीति। गाध ड लिप्सायाम् + "सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) चन्द्रवंशीयकुशिकराजपुत्रः। स तु विश्वामित्रमुनिपिता कान्यकुब्जदेशस्य राजा च। (यथा, महाभारते। ३। ११५। १६।
"कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः।
गाधीति विश्रुतो लोके वनवासं जगाम ह॥"
अस्य उत्पत्तिकथा यथा, हरिवंशे। २७। १३—१६।
"कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमं विभुः।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान्॥
पूर्णे वर्षसहस्रे वै ततः शक्रो वृषप्रभत।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः॥
समर्थं पुत्रजनने स्वमेवांशमवासयत्।
पुत्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः॥
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम्।
पौरुकुत्स्यभवद्भार्य्या गाधिस्तस्यामजायत॥"
अस्य कन्या सत्यवती भृगुवंशीय-ऋचीकपत्नी। सा च श्वशुरमिच्छन्ती प्रस्तुतवती। यथा, हरिवंशे। २७। १८।
"गाधेः कन्या महाभागा भार्य्या सत्यवती शुभा।
तां गाधिः कान्यकुब्जाय ऋचीकाय ददौ प्रभुः॥"
ऋग्वेदमते तु अयमेव गाधीत्याख्यया प्रसिद्धः इति तु तत्रैव ३ मण्डले द्रष्टव्यः॥ एतदनुसारेणैव रामायणे 'गाधिन्' इति शब्दप्रयोगो भगवता वाल्मीकिना विहितः। यथा, तत्रैव १। १८। ४०। [सुतम्॥")
"ग्रीष्ममास्थाय मां प्राप्तं कौशिकं गाधिनः

गाधिजः, पुं, (गाधेः राज्ञः कौशिकात् जायते इति। जन् + डः।) विश्वामित्रमुनिः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ७। ४२।
"एषुष्टु विनयाद्राज्यं प्राप्तवान् ऋषिरेव च।

कुबेरश्च धनैश्वर्यं ब्राह्मण्यश्चैव गाधिजः ॥"
एतद्जन्मकथा विश्वामित्रशब्दे द्रष्टव्या ॥)
गाधिपुरं, क्ली, (गाधेः कौशिकस्य राज्ञः पुरम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः। ३। ४०॥
(यथा राजतरङ्गिण्याम्। ४। १३४।
"कन्यानां यत्र कुब्जत्वं बधात् गाधिपुरे मरुत्।
तत्रैव शंभनीयः स पुमांश्चक्रे भयस्ग्रामम् ॥")
गाधिभूः, पुं, (गाधेर्भूरुत्पत्तिर्यस्य गाधिर्भूरुत्पत्तिस्थानं यस्येति वा। यद्वा गाधेर्भवति उत्पद्यते स्म। भू+भूतवर्त्तमानयोरिति क्विप्।) विश्वामित्रमुनिः। इति शब्दरत्नावली॥
गाधेयः, पुं, (गाधेरपत्यं पुमान्। गाधि+"इतश्चानिञः।" ४। १। १२२। इति ढक्।) विश्वामित्रमुनिः। इति हेमचन्द्रः। ३। ५१४॥ (यथा, हरिवंशे। २७। १७।
"विश्वामित्रस्तु गाधेयो राजा विश्वरथश्च ह॥")
गानं, क्ली, (गीयते इति। गै+भावे ल्युट्।) गीतम्। इत्यमरः। १। ७। २५॥ (यदुक्तम्,—
"जपकोटिगुणं ध्यानं ध्यानकोटिगुणो लयः।
लयकोटिगुणं गानं गानात् परतरं न हि॥")
तत्पर्य्यायः। गेयम् २ गीतिः ३ गान्धर्व्वम् ४। इति हेमचन्द्रः। २। १६४॥ (गानं हि वैदिकलौकिकभेदात् द्विविधम्। तत्र वैदिकगानन्तु सुक्तिप्रदं अन्यत् लोकरञ्जनकरम्। वैदिकलौकिकयोर्मार्गदेशौति नामान्तरमपि श्रूयते। गानन्तु सामवेदादेव उत्पन्नं यदुक्तं सङ्गीतदर्पणटीकायाम्।
"ऋग्भिः पाद्यमसद्गीतं सामभ्यः समपद्यत।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वणः स्मृताः॥"
द्विविधसङ्गीतयोर्लक्षणमाह सङ्गीतदर्पणे। २-६।
"मार्गदेशीविभागेन सङ्गीतं द्विविधं मतम्।
दुह्रिणेन यदन्विष्टं प्रयुक्तं भरतेन च।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम्॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम्।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते॥
गीतवादित्रनृत्यानां रक्तिः साधारणो गुणः।
अतो रक्तिविहीनं यत् न तत् सङ्गीतमुच्यते॥"
गानन्तु नादात्मकमेव नादस्तु यदा स्वयं राजते तदा स्वर इति प्रसिद्धः स्यात्। स्वरस्तु षड्जऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादभेदात् सप्तविधः। एतेषां विज्ञापनार्थं एतदाश्रयीभूतद्वाविंशतिश्रुतीनां नामानि स्वरस्थितिश्च कथ्यन्ते। यथा, सङ्गीतदर्पणे। ५३—५६।
"तीव्राकुसुद्वतीमन्दाछन्दोवत्यस्तु षड्जगाः।
दयावती रञ्जनी च रतिका चर्यभे स्थिता॥
रौद्री क्रोधा च गान्धारे वज्रिकाथ प्रसारिणी।
प्रीतिश्च मार्ज्जनीत्येताः श्रुतयो मध्यमाश्रिताः॥
क्षितौ रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः॥
उग्रा च क्षोभिणीति हे निषादे वसतः श्रुती॥"
अन्यत् विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम्॥*॥
गाने तु रागा रागिण्यश्च प्रयोक्तृणां अतस्तेषां नामानि कथ्यन्ते। यथा, सङ्गीतदर्पणे स्वराध्याये। १२—१६।
पार्व्वत्युवाच।
"के रागाः काश्च रागिण्यः का वेला ऋतवश्च के।
किं रूपं कथमुद्धारो वद देव! प्रसादतः॥"
ईश्वर उवाच।
"श्रीरागोऽथ वसन्तश्च भैरवः पञ्चमस्तथा।
मेघरागो हृदुन्नादः षड्रागे पुरुषाकृयाः॥"
इति षट् रागाः॥
अथ रागिण्यः।
"मालश्री त्रिवणी गौरी केदारी मधुमाधवी।
ततः पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गनाः॥
देशी देवगिरी चैव वराटी तोड़िका तथा।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः॥
भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः॥
विभाषा चाथ भूपाली कर्णाटी वड़हंसिका।
मालवी पटमञ्जर्य्या सहैताः पञ्चमाङ्गनाः॥
मल्लारी सौरटी चैव सावेरी कौशिकी तथा।
गान्धारी हरशृङ्गारा मेघरागस्य योषितः॥
कामोदी चैव कल्याणी आभिरी नाटिका तथा।
सारङ्गी नट्टहम्मीरा नट्टनारायणाङ्गनाः॥"
इति षट्त्रिंशत् रागिण्यः॥
रागरागिणीनां विशेषविवरणन्तु तत्तच्छब्दे गानस्य अन्यद्विवरणं गीतशब्दे च दर्शनीयम्॥)
ध्वनिः। इति धरणी॥
गानिनी, स्त्री, (गानं रोगादिनाशकतया प्रशस्तमौतिर्विद्यतेऽस्याः। गान+इनिः।) वचा। इति शब्दचन्द्रिका॥ (गानं सङ्गीतविद्या गतिः स्तुतिश्चास्त्यस्या इति युत्पत्त्या यथाक्रमं गानज्ञा गतिमती स्तवयुक्ता च स्त्री। इति युत्पत्तिलब्धोऽर्थः॥)
गान्तुः, त्रि, (गच्छतीति। गम गतौ+"क्रमिगमिभ्यतौ।" उणा। ५। ४३। इति तुन् दृढ्च।) गन्ता। इत्युणादिकोषः॥ गाथकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
गान्त्री, स्त्री, (गन्त्री एव। स्वार्थे अण्। ततो ङीष्।) गन्त्री। वृषवाह्यशकटः। गरुर गाड़ि इति भाषा। इत्यमरटीकायां रायमुकुटः॥ (क्वचित् क्लीवलिङ्गत्वमपि दृश्यते॥)
गान्दिनी, स्त्री, (गां पशुं जीवजातमित्यर्थः दायति प्रोधयतीति। दै पै शोधने+णिनिः+ङीप्। पृषोदरात् साधुः।) गङ्गा। इति त्रिकाण्डशेषः शब्दरत्नावली च॥ (गां धेनुं ददाति प्रतिदिनमित्यर्थः। दा दाने+णिनि+ङीप्। पृषोदरात् साधुः।) अक्रूरमाता। इति श्रीभागवतम्॥ (अस्या नामनिरुक्तिर्यथा, हरिवंशे। ३४। ७—११।
"स्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत।
गान्दिनीं नाम सा गास्तु ददौ विप्रेषु नित्यशः॥
सा मातुरुदरस्था वै बहून् वर्षगणान् किल।
निवसन्ती न वै जज्ञे गर्भस्था तां पिताब्रवीत्॥
जायस्व शीघ्रं भद्रन्ते किमर्थञ्चैव तिष्ठसि।
प्रोवाचैनन्तु गर्भस्था सा कन्या गान्दिने दिने॥
यदि दद्यां ततो जाये पितरं प्रत्यवाच ह।
तथेत्युक्ता च तां चास्याः पिता काममपूरयत्॥
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः।
अक्रूरः सुषुवे तस्यां स्वफल्काद्गिरिदक्षिणः॥"*॥
गान्दिनीति पाठोऽपि क्वचित् दृश्यते॥)
गान्दिनीसुतः, पुं, (गान्दिन्या गङ्गायाः सुतः।) भीष्मः। इति त्रिकाण्डशेषः॥ (कार्त्तिकेयः। इति युत्पत्तिलब्धोऽर्थः॥ गान्दिन्यास्तदाख्यया प्रसिद्धाया स्वफल्कभार्य्यायाः सुतः।) अक्रूरः। इति श्रीभागवतम्॥ (यथा, माघे। १०। १२।
"विलङ्घितस्थितिमभिवीक्ष्य रूक्षया
गिरोर्गिरा गुरुमपि गान्दिनीसुतम्॥")
गान्धर्व्वं, क्ली, (गन्धर्व्वस्य इदं गन्धर्व्वेण गीतं वा। गन्धर्व्व+अण्। यद्वा, गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण्।) गानम्। इति हेमचन्द्रः॥ (यथाह दन्तिलः।
"पदस्वरसङ्घातस्तालेन सङ्गतस्तथा।
प्रयुक्तश्चावधानेन गान्धर्व्वमभिधीयते॥"
यथा च महाभारते। १३। १६। ४६।
"अवादयंश्च गन्धर्व्वा वाद्यानि विधिवानि च।
अथ प्रवृत्ते गान्धर्व्वे दिवि ऋषिरुपाविशत्॥"
गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण्। गन्धर्व्वदेवताकमन्त्रम्। यथा, रघुः। ५। ५७।
"गान्धर्व्वमादत्त यतः प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते॥")
गान्धर्व्वः, पुं, (गन्धर्व्व एव। "प्रज्ञादिभ्यश्च।" ५। ४। ३८। इत्यण्।) गन्धर्व्वः। इति हेमचन्द्रः। २। १६४॥ (भारतवर्षोयोपद्वीपविशेषः। यथा, विष्णुपुराणे।
"भारतस्यास्य वर्षस्य नवभेदान्निबोधत।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान्॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः॥")
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः सः। (तल्लक्षणं यथा, मनौ। ३। ३२।
"इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्व्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥"
स च क्षत्रियाणामेव धर्म्म्यः। यथा, तत्रैव। ३। २६।
"गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ॥")
तत्सम्बन्धिनि त्रि॥ (यथा, काशीखण्डे।
"गान्धर्व्वस्त्वेष लोकोऽयं गान्धर्व्वाश्च शुभव्रताः॥"
गान्धर्व्वदेशोद्भवे च। यथा, महाभारते। १२२६। १०।
"उपेतं राजतैरश्वैर्गान्धर्व्वैर्हेममालिभिः।
पारावतप्रतीकाशैर्मनोवायुसमैर्जवे॥")
गान्धारं, क्ली, (गन्ध एव गान्धं सुगन्धं अर्हतीति। ऋ गतौ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। यद्वा, गान्धाराणामन्दहृद्यवासिनां प्रियम्। अण्।) गन्धरसः। इति त्रिकाण्डशेषः॥

गान्धारः, पुं, (गन्ध एव गान्धो गन्धकस्तं ऋच्छति उत्पत्तिकारणत्वेन गच्छतीति। ऋ गतौ+अण्।) सिन्दूरम्। जम्बुद्वीपस्योत्तरदेशः। कान्धार इति भाषा। इति मेदिनी। रे। १४६॥ (देशोऽयं बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः। यथा, तत्रैव। १४। २८। "उत्तरतः कैलासः।" इत्युपक्रम्य,—

"गान्धारयशोवतिहेमतालराजन्यखचरगणाश्च॥" इत्युक्तवान्। दुर्य्योधनमातुलः शकुनिस्तु एतद्देशस्य राजासीत्। यथा, महाभारते। ३। २३७। २१।

"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव॥"*॥ गन्ध एव गान्धः। स्वार्थे अण्। तं ऋच्छतीति। "कर्म्मणण्।" ३। २। १। इत्यण्।) सप्तस्वरान्तर्गतद्वितीयस्वरः। स तु छागस्वरतुल्यः। (यदुक्तं सङ्गीतशास्त्रे।

"षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम्। गान्धारन्तु अजो रौति क्रौञ्चः क्रणति मध्यमम्॥") तस्योत्पत्त्यादिः।

"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना॥"

इति भरतः॥

अपि च।

"नाभेः समुद्गतो वायुर्गन्धं श्रोत्रे च चालयन्। स शब्दस्तेन निर्याति गान्धारस्तेन कथ्यते॥ चतसः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो हे गान्धारनिषादके॥" (अयन्तु देवकुलसम्भूतो वैश्यजातिः, स्वर्णवदुज्ज्वलपीतवर्णः। अस्य जन्म कुशद्वीपे, ऋषिः शृङ्गाङ्कः, सरस्वती देवता, त्रिष्टुप् छन्दः। करुणरसे एतस्य उपयोगित्वम्॥ इति सङ्गीतदर्पणे। ८३—६१॥ *॥ स्वरग्रामविशेषः। तल्लक्षणम्। यथा, तत्रैव ७६—८०।

"रि-श्रुतेर्मयोः श्रुतिमेकैकां गान्धारक्षेत्र समाश्रयेत्। प-श्रुतिं धो निषादस्तु ध-श्रुतिं स-श्रुतिं श्रितः॥ गान्धारग्राममाचष्ट तदा तं नारदो मुनिः। प्रवर्त्तते स्वर्गलोके ग्रामोऽसौ न महीतले॥"*॥) रागविशेषः। तस्य रूपं यथा, सङ्गीतदामोदरे।

"जटां दधानः स्फुतभूतिभूषणः कषायवासास्त्रगनुद्वहन्यहिः। सयोगपट्टः स्फुतनेत्रसुन्दरो गान्धारराग कथितस्तपस्वी॥"

स तु भैरवरागपुत्रः। प्रभाते तस्य गानसमयः॥

गान्धारराजः, पुं, (गान्धारस्य देशविशेषस्य राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ६१। इति टच्।) शकुनिः। (यथा, महाभारते। ३। २३७। २१।

"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव॥" अस्य पित्रादयोपि। यथा, तत्रैव। १। ११०। १४।

"ततो गान्धारराजस्य पुत्रः शकुनिरभ्ययात्॥")

गान्धारी, स्त्री, (गान्धारस्य गान्धारराजस्य अपत्यं स्त्री। इञ् ततो ङीष्।) धृतराष्ट्रराजपत्नी। सा तु दुर्य्योधनमाता। इति महाभारतम्॥ (इयं हि हरमाराध्य धृतपुत्रवरं लब्धवती। यथा, महाभारते। १। ११०। ६।

"अथ शुश्राव विप्रेभ्यः स्त्रीणां सुबलात्मजाम्। आराध्य वरदं देवं भगनेत्रहरं हरम्॥ गान्धारी किल पुत्राणां शतं लेभे वरं शुभा॥" पार्व्वतीसहचरीभेदः। यथा, तत्रैव। ३। २३०। ४८।

"गौरी विद्याथ गान्धारी कैशिनी मित्रसाह्वया॥" गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४०।

"गायत्री गोमती गीता गान्धारी गानलोलुपा॥" गङ्गा। यथा, काशीखण्डे। २६। ५१।

"गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा॥"

"गां धारयतीति गान्धारी।" इति तट्टीका॥ नाड़ीविशेषः। यथा, सङ्गीतदर्पणे। २६।

"सुषुम्नेड़ा पिङ्गला च कुहूरथ पयस्विनी। गान्धारी हस्तिजिह्वा च वारुणाथ यशस्विनी॥") जिनानां शासनदेवताविशेषः। इति हेमचन्द्रः॥ यवासः। इति राजनिर्घण्टः॥ दुरालभा। इति भावप्रकाशः॥ मादकद्रव्यविशेषः। गाँजा इति भाषा॥ इति विश्वप्रकाशसारावलीवैद्यकग्रन्थः॥

गान्धारेयः, पुं, (गान्धार्य्या अपत्यं पुमान्। "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) दुर्य्योधनराजः। इति त्रिकाण्डशेषः॥ (दुःशासनादयोऽपि॥)

गान्धिकः, पुं, (गन्धयते परप्रार्थनां गच्छतीति। गन्ध क ड गतौ+णिनिः। ततः स्वार्थे कन्। यद्वा, गन्धो गर्व्वोऽस्यास्तीति। गन्ध+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) वेश्यकः। सुगन्धिद्रव्यव्यवहारी। गन्धवणिक् इति ख्यातः। इति मेदिनी। के। ८३॥ स तु अम्बष्ठात् राजपुत्र्यां जातः। इति पराशरपद्धतिः॥ (अयं हि नायकस्य शृङ्गारसहायेषु अन्यतमः। यथा, साहित्यदर्पणे। ३। ४६।

"शृङ्गारस्य सहाया विटवेटविदूषकाद्याः स्युः। भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः॥

आदिशब्दात् मालाकाररजकताम्बूलिकगान्धिककादयः॥") कीटविशेषः। इति शब्दरत्नावली॥ गाँधिपोका इति भाषा॥ (गान्धं गन्धप्रधानं द्रव्यमस्यास्ति। ठन्। गन्धप्रधानद्रव्यविशिष्टे त्रि। यथा, पक्षतन्त्रे। १। १३। [दिभिः।

"पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनार्य्यत्रैकेन च यत् क्रीतं तच्छतेन प्रदीयते॥") गासुकः, त्रि, (गच्छतीति। गम गतौ+"लषपतपदेति।" ३। ३। १५४। इति उकञ्।) गन्ता। इति व्याकरणम्॥

गाम्भीर्य्यं, क्ली, (गम्भीरस्य भावो गम्भीरे भवं वा। "गम्भीराञ्ञ्यः।" ४। ३। ५८। इति ञ्यः।) गभीरता। यथा,—

"मेघनिर्घोषगाम्भीर्य्यं प्रतिनादविधायिता।"

इति जिनवाल्गुणे हेमचन्द्रः॥ (इदं हि नायकस्य सात्त्विकगुणविशेषः। यथा, साहित्यदर्पणे। ३। ५८।

"शोभा विलासो माधुर्य्यञ्चाभीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥" तस्य लक्षणम्। यथा, तत्रैव। ३। ६२।

"भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्व्विकारता॥" उदाहरणम्। यथा,—

"आहूतस्याभिषेकाय विसृष्टस्य वनाय च। न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः॥")

गायकः, त्रि, (गायतीति। गै गाने+ण्वुल्।) गानकर्त्ता। इति शब्दरत्नावली॥ (यथा, माघे। ११। १०।

"कलमविकलताल गायकैर्बोधहेतोः॥") तत्पर्य्यायः। गायनः २ गाथकः ३। इति त्रिकाण्डशेषः॥ गाता ४। तस्य दोषा यथा,—

"लज्जितं भीतसुत्तेषु व्यक्तमनुनासिकम्। काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम्॥ विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्। व्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश॥"

इति सङ्गीतदामोदरः॥

गायत्री, [न्] पुं, (गायन्तं त्रायते इति। गायत्+त्रै+क्विनिः। आलोपात् साधुः।) खदिरवृक्षः। इति भरतः॥ (खदिरशब्दे गुणादिकं ज्ञेयम्॥ गायन्तं स्तोत्रमस्यास्तीति गायत्र+"अत इनिठनौ।" ५। २। ११५। इति इनिः। उद्गातरि सामगायके त्रि। यथा, ऋग्वेदे। १। १०। १।

"गायन्ति त्वा गायत्रिणोऽर्च्चन्त्यर्कमर्किणः॥") गायत्री, स्त्री, (गायन्तं त्रायते इति। त्रै ड पालने+"आतोऽनुपसर्गे कः।" ३। २। ३ इति कः। ततो गौरादित्वात् ङीष्।) खदिरवृक्षः। इत्यमरः। २। ४। ४६॥ (यथा, वैद्यके दृष्टस्फिङ्निष्ठादिक्वाथे।

"मूर्व्वादारुकनिम्बभृङ्गमधुका त्रायन्ति पाठावरी गायत्री त्रिफलाकिरातकभल्लातनिम्बासनारग्वधम्॥") बृहच्छन्दोविशेषः। तस्यास्त्रिष्ठिविधा यथा। तनुमध्या १ ग्रथिवदना २ सोमराजी ३। आद्यायाः आद्यन्तयोर्गुरुद्वये मध्ये लघुत्रयम्॥ द्वितीयायाः आदिमध्ययोर्लघुद्वये अन्ते गुरुत्रयम्॥ तृतीयायाः आदिमध्ययोर्लघुगुरू गुरुलघू अन्ते गुरुत्रयम्॥ क्रमेणोदाहरणानि यथा। आस्तां मम चित्ते नित्यं तनुमध्या॥ १॥ ग्रथिवदनानां व्रजतरुणीनाम्॥ २॥ हरे सोमराजी समा ते यशःश्रीः॥ ३॥ इति छन्दोमञ्जरी॥*॥ दुर्गा। यथा,—

"गायनाङ्गमनाद्वापि गायत्री त्वं दिवाग्रिता। साधनात् सिद्धिरित्युक्ता साधका वाग्धरेश्वरी॥" इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥ (सा च गायत्रीरूपेण ब्रह्मणैव वर्णते। यथा, देवीभागवते। ७। ३०। ८१।

"गायत्री वेदवदने सावित्री शिवसन्निधौ॥"*॥

गङ्गा। यथा, काशीखण्डे। २६। ५३।
"गुणनीयचरित्रा च गायत्री गिरिशप्रिया॥")
त्रिपदा देवी। इति मेदिनी। रे। १५०॥ सा तु त्रिपादक्षरच्छन्दोयुक्तमन्त्रात्मिका वेदमाता द्विजैरुपास्या। (यथाह मनुः। २। ७७—७८।
"त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥
एतदक्षरमेकाञ्च जपन् व्याहृतिपूर्ब्बिकाम्।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥"
इयमेव सव्याहृतिका ब्रह्मपदप्राप्तेर्द्वाररूपं तस्मात् प्रत्यहं ब्राह्मणैर्व्याहृतिपूर्ब्बिकेयं अध्ययनीया। यदुक्तं तत्रैव। २। ८१—८३।
"ओङ्कारपूर्ब्बिकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥
योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान्॥
एकाक्षरं परं ब्रह्म प्राणायामाः परन्तपः।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते॥")
तस्या नामयुत्पत्तिर्यथा, स्कन्दे।
"गायन्तं त्रायते यस्मात् गायत्री त्वं ततः स्मृता॥"
सापि ब्रह्मणः पत्नी। यथा,—
"अध्वर्य्युणा समाहूता ह्यहि देवि! त्वरान्विता।
उद्गातृभिर्मयः सर्व्वे दीक्षाकालमुपागताः॥
सावित्र्युवाच।
लक्ष्मीर्नायाति चायाति सती नैवेह दृश्यते।
हृदयाद्गायत्री भूता प्रक्रान्ती गच्छती त्विह।
नाहमेकाकिनी यास्ये यावन्नायान्ति ताः स्त्रियः॥
ब्रूहि गत्वा विरिञ्चिन्तं तिष्ठत्विह मुहूर्त्तकम्॥
वदमानां तथाध्वर्य्युस्त्यक्त्वा देवमुपागमत्।
सावित्री व्याकुला देवी प्रसक्ता गृहकर्म्मणि॥
सख्यो नाभ्यागता यावत् तावन्नागमनं मम।
एवमुक्तोऽस्मि वै देव! कालश्चाप्यतिवर्त्तते॥
यच्च योग्यं भवेदत्र तत् कुरुष्व पितामह!।
एवमुक्ते तदा वाक्यं किञ्चित्कोपसमन्वितः॥
पत्नीशाल्यां मदर्थन्तु शीघ्रं त्वञ्च समानय।
प्रवर्त्तते यथा यज्ञः कालहीनो न जायते॥
तथा शीघ्रं विधेहि त्वं नारीं काञ्चिदुपानय।
एवमुक्तस्तथा शक्रो गत्वा सर्व्वं धरातलम्॥
स्त्रियो दृष्ट्वास्तु यास्तेन सर्व्वास्तास्तु परित्यजाः।
आभीरकन्या सुरूपा सुभाषा चारुलोचना॥
ददर्श्व तां सुचार्व्वङ्गीं कमलायतलोचनाम्।
कासि कस्य कुतश्च त्वमागता शुभे! कथ्यताम्॥
एकाकिनी किमर्थञ्च वीथिमध्येऽवतिष्ठसे।
रूपान्विता च सा कन्या शक्रं प्रोवाच वेपती॥
गोपकन्याऽहं वीर! विक्रेतुमिह गोरसम्।
समागता घृतादीनां प्रयत्नोऽत्र यथेप्सितम्॥
एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढम्।
आनीय तां विशालाक्षीं यत्र ब्रह्मा व्यवस्थितः॥
कमलाक्षीं स्फुरद्वर्णां पुष्करीकनिभेक्षणाम्।
गान्धर्व्वेण तदा तस्या ग्रहीतुं मन आदधे॥

प्रभुत्वमात्मनो दाने गोपकन्याप्यमन्यत।
यदेवं मां सुरूपत्वादिच्छत्यादातुमाग्रहात्॥
नास्ति सीमन्तिनी काचिन्मत्तो धन्यतरा यतः।
अनेनाहं समानीता यस्य दृग्गोचरं गता॥
एवं चिन्तापरा दीना यावत् सा गोपकन्यका।
भवत्येषा महाभागा गायत्री नामतः प्रभो!॥
तावदेव महाविष्णुः प्रोक्तवानिदमुत्तमम्।
अनुग्रहेण देवेश! अस्याः पाणिग्रहं कुरु॥
गान्धर्व्वेण विवाहेन उपयेमे पितामहः॥"*॥
अस्या ध्यानं यथा,—
"श्वेता त्वं श्वेतरूपासि शुभ्राङ्गेन समा मता।
बिभ्रती विपुलावूरू कदलीगर्भकोमलौ॥
एणशृङ्गं करे यस्य पङ्कजञ्च सुनिर्म्मलम्।
वसाना वसने चौमे रक्ते चाम्बुतदर्शने॥
शुभ्रैरभ्रप्रकाशैन हारेणोरसि राजसे।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता॥
चन्द्रमोगणयुक्तेन सुकुटेन विराजसे।
सुकुटेन त्रिशस्येन केशबन्धेन शोभिना॥
भुजगाभोगसदृशौ भुजौ भ्राजयतो दिशः।
स्तनौ ते कठिनौ देवि! वर्त्तुलौ समचूचुकौ॥
जघनेनातिशुभ्रेण त्रिवलीभिश्च संयुता।
विस्तीर्णश्रोणिजघना सुश्रोणी च वरानना॥
चारुरूपोरुयुगला अम्बुजाभरणा तथा।
त्रैलोक्यचारिणी सा त्वं जगतामेव पावनी॥"
अस्या वैदिकतान्त्रिकध्यानद्वयं गुरुत्वादत्र न लिखितम्॥*॥ तस्या जपफलं तत्र ब्राह्मणान् प्रति गायत्रीवाक्यम्।
"विशेषात् पुष्करे स्नात्वा मां जप्त्वा वेदमातरम्।
प्रतिग्रहकृतान् दोषान् प्राप्स्यथ द्विजोत्तमाः!॥
मदीयैः किलजप्यैस्तु तारणाय त्रिभिः कृतैः।
ब्रह्महत्यासमं पापं तत्क्षणादेव नश्यति॥
दशभिर्जन्मजनितं शतेन तु पुरा कृतम्।
त्रियुगन्तु सहस्रेण नात्र कार्य्या विचारणा॥
अहञ्चरा स्थिता चाहं जगद्ग्राह्यं मया त्विदम्।
माताहं सर्व्ववेदानां पदैः सर्व्वैरलङ्कृता॥
जप्त्वा मां परमां सिद्धिं यास्यन्ति द्विजसत्तमाः!।
प्राधान्यं मम जाप्येन सर्व्वेषां वो भविष्यति॥"*॥
तस्या माहात्म्यादि यथा,—
"उपलभ्य च सावित्रीं नोपतिष्ठेत यो द्विजः।
काले चिकालं सम्प्राप्तः स पतेन्नात्र संशयः॥
गायत्रीमन्त्रतोयाद्यं दत्तं येनाञ्जलित्रयम्।
काले सावित्रिकेणैव स्नातेन दत्तं जगत्त्रयम्॥
अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी।
ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च॥
ततोऽपि धर्म्मशास्त्राणि तेभ्यो गुर्व्वी श्रुतिर्नृप।
ततो ह्युपनिषत् श्रेष्ठा गायत्री च ततोऽधिका॥
वाच्यवाचकसम्बन्धो गायत्र्याः सवितुर्हयोः।
वाच्योऽसौ सविता साक्षात् गायत्री वाचिका परा॥
तां देवीमुपतिष्ठन्ते ब्राह्मणा ये जितेन्द्रियाः।
सूर्य्यलोकं ते प्रयान्ति क्रमान्मुक्तिञ्च पार्थिव।"
इति पद्मपुराणम्॥*॥

अथ गायत्रीकल्पः।
"जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्।
तपसा भावितो देवा ब्राह्मणः पूतकिल्बिषः॥
न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्।
हे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यस्तस्य दुष्कृतं नास्ति पूर्ब्बतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हति षोडशीम्।
एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम्॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः।
छन्दस्तस्यास्तु गायत्रं गायत्र्युच्यते ततः॥
गायन्तं त्रायते यस्मात् गायत्री तु ततः स्मृता।
मरीचे! कारणात्तस्मात् गायत्री कीर्त्तिता मया॥
तव बुद्धिमतां श्रेष्ठ! नित्यं सर्व्वेषु कर्म्मसु।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥
जपन्ति ये सदा तेषां न भयं विद्यते क्वचित्।
दशकृत्वः प्रजप्ता सा रात्राह्नोर्यत् कृतं लघु॥
तत् पापं प्रणुदत्याशु नात्र कार्य्या विचारणा।
शतं जप्ता तु सा देवी पापौघशमनी स्मृता॥
सहस्रं जप्ता सा देवी महापातकनाशिनी।
लक्षजाप्येन साध्यैव सप्त जन्मानि पातकम्॥
कोटिजाप्येन विप्रर्षे! यदिच्छति तदाप्नुयात्।
यक्षविद्याधरत्वे वा गान्धर्व्वे देवतेऽपि वा॥
यत्र यत्र भवेद्वाञ्छा तत्तदाप्नोत्यसंशयम्।
दशसाहस्रजाप्येन निष्कामः पुरुषो यदि॥
विधिना नियतं ध्यायेत् प्राप्नोति परमं पदम्।
यथाकथञ्चिज्जपिता गायत्री पापहारिणी॥
सर्व्वकामप्रदा प्रोक्ता पृथक्कर्म्मसु निश्चिता॥"*॥
मरीचिरुवाच।
"विधिना केन कर्त्तव्या गायत्री पापनाशिनी।
पवित्रा परमा ह्येषा सर्व्वकल्याणसाधिनी॥
वह्निरुवाच।
सव्याहृतिं सप्रणवां जप्त्वा मासांश्च षोडश।
अपि भ्रूणहनः पापात् मुच्यन्तेऽहरहःकृतात्॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः।
अहोरात्रकृतात् पापात् मुच्यते नात्र संशयः॥
अन्तर्जले चिरावर्त्ता गायत्रीं प्रयतस्त्रिधा।
मुच्यते पातकैः सर्व्वैर्यदि न ब्रह्महा भवेत्॥
नास्ति सत्यात् परो धर्म्मो नास्ति क्षमात् समा गतिः।
गायत्र्याश्च समं नास्ति दिवि चेह च पावनम्॥
हुता च वरदा देवी सर्व्वकामफलप्रदा।
गायत्र्याश्च तिलैर्होमः सर्व्वपातकनाशनः॥
शान्तिकामो यवैः कुर्य्यादायुष्कामो घृतेन तु।
कर्म्मान्तसिद्धिकामस्तु कुर्य्यात् सिद्धार्थकैर्नरः॥
ब्रह्मवर्चसकामस्तु पयसा च समाचरेत्।
पुत्रकामः सदा दध्ना धान्यकामस्तु शालिभिः॥
क्षीरवृक्षसमिद्भिस्तु यक्ष्मपीडोपशान्तये।
धनकामस्तथा विल्वैः श्रीकामः कमलैस्तथा॥
आरोग्यकामः क्षीरान्नैः कुर्य्यात् दूर्व्वाङ्कुरैस्तथा।

देशापसर्गे संप्राप्ते तदेव च विधीयते ॥
गुग्गुलेर्गुटिकाभिस्तु कृत्वा होममतन्द्रितः ।
सौभाग्यं महदाप्नोति नात्र कार्य्या विचारणा ॥
पायसेन तथा हुत्वा विद्यां समधिगच्छति ॥"*॥
"येन येन तु कामेन लक्षहोमं समाचरेत् ॥
तं तं काममवाप्नोति नात्र कार्य्या विचारणा ।
कृच्छ्रेण शुद्धिमुत्पाद्य प्राणायामशतेन च ॥
अन्तर्जले च तां जप्त्वा स्नातो नित्यमतन्द्रितः ।
प्राणायामांस्ततः कृत्वा विधानेनैव षोडश ॥
पूर्व्याह्णे जुहुयादग्नौ समिद्धे यथाविधि ।
भैक्षया च कणाग्नौ वा फलमूलाशनोऽपि वा ॥
क्षीरभक्तभुक्ताहारो भवेत्तत्र विचक्षणः ।
आहाराद्यां यथोक्तानामेकाहारं समाश्रयेत् ॥
समाप्तिर्लक्षहोमस्य यावद्भवति नित्यशः ।
लक्षहोमावसाने तु ब्राह्मणेभ्यस्तु दक्षिणा ॥
देया भवति शक्त्या तु गावो वस्त्राणि काञ्चनम् ।
सर्व्वोत्पातसमुत्पत्तौ सर्व्वं भवति शोभनम् ॥
पञ्चभिर्दशभिर्वाथ लक्षहोमं समाचरेत् ।
अयङ्कीर्त्तिं तथा दीप्तिं नृपतिस्तत्प्रशान्तये ॥
नास्ति लोके स उत्पातो यो न्यूतो नोपशाम्यति ।
मङ्गल्यं परं नास्ति यदस्मादतिरिच्यते ॥
ग्रहशान्तिं पुरा कृत्वा मन्त्रैः खैः खैः शमुच्च तान् ।
इन्द्रायाग्नये सोमाय यमः प्रजापतेस्तथा ॥
ब्राह्मणेभ्यस्ततः पश्चात् पूर्णाहुतिमथाददेत् ।
गच्छानान्त्विति वा कृत्वा इमं देवेति चेन्दवे ॥
अग्निर्मूर्द्धेत्युदुध्यस्व दृष्टस्मतेति प्रयोजयेत् ।
अन्नात् परिस्रुतेनैव सन्नो देवीस्ततः पुनः ॥
कया न इति राहोर्वै केतुं कृण्वंति केतवे ।
त्र्यम्बकेन तु रौद्रन्तु होमयेच्छातवेदसि ॥
सर्व्वं गायत्रीहोमन्तु लक्षहोमे प्रकल्प्यते ।
दिक्पालेभ्यश्च होतव्यं भूतेभ्यश्च ततः क्रमात् ॥
मरुत्वमिं दूतं वे यस्मिन् वृत्रे नमामि तम् ।
वरुणं वो रिशा दश वयमुक्त्वा पथस्य ते ॥
सोमं राजानमवसे ब्रह्मरुद्राय वै तथा ।
क्षेत्रस्य पतिना चैव भूतानां पतये तथा ॥
रक्षोघ्नैर्मन्त्रकैर्होमः होतव्यं विधिपूर्व्वकम् ।
घृताक्ताभिः समिद्भिश्च तिलहोमं ततः परम् ॥
दद्यैकं प्रति वा कुर्य्यादशविंशतिमेव च ।
एकैकं प्रति पूर्णा स्यात्तदन्तं ऋषिसत्तमाः ॥
ब्रह्मवृक्षोद्भवाश्चैव स्तथा दूर्व्वाङ्कुरोद्भवाः ।
होतव्या लक्षहोमे तु गायत्र्याः कामिकं परम् ॥
श्रीसूक्तं पावमानञ्च पौरुषं ग्रामवं तथा ।
रौद्रमैन्द्रञ्च रामञ्च ज्येष्ठसाम दृढव्रथम् ॥
महाजप्तु होमान्ते कुर्य्यात् वै सर्व्वसिद्धिदम् ।
सम्यक् पूर्णा ततो दद्यात् सम्प्राप्ते अभिमन्त्रितम् ॥
नमो ब्रह्मेति चामन्त्र्य सन्धिञ्च भवं घटम् ।
रत्नैर्बीजैः शुभैर्मन्त्रैर्दिव्या चैव तु संयुतम् ॥
तज्जलेनाभिषिञ्चेत देवस्य त्वेति वै तदा ।
धन्वनागादिभिर्मन्त्रैरभिषिञ्चेत्ततः क्रमात् ॥
एवं यः कुरुते राजा लक्षहोमं यतव्रतः ।
न तस्य शत्रवः सङ्ख्ये अग्रे तिष्ठन्ति कर्हिचित् ॥
न चैव मरको देशे व्याधिर्व्वा जायते तथा ।
अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ॥
राजसाद्या विनश्यन्ति सर्व्वास्तत्र तथेतयः ।
रसवन्ति च तोयानि शस्यञ्च निरुपद्रवम् ॥
जायते यस्य या चेष्टा धर्म्मिष्ठा सा न किं भवेत्॥*॥
कोटिहोमन्तु यो राजा कारयेद्विधिपूर्व्वकम् ॥
न तस्य मानसो दाह इह लोके परत्र च ।
कोटिहोमे तु वरयेत् ब्राह्मणान् विंशतिं नृप ! ॥
घृतं वाथ सहस्रं वा य इच्छेन्नतिमात्मनः ।
कोटिहोमं स्वयं यस्तु कुरुते श्रद्धया द्विजः ॥
क्षत्रियो वाथ वैश्यो वा तस्य पुण्यफलं महत् ।
यद्यदिच्छति कामानां तत्तदाप्नोत्यसंशयम् ॥
सशरीरोऽपि चेद्गन्तुं दिवमिच्छेत्तदाप्नुयात् ।
सावित्री परमा देवी सावित्री पावनं परम् ॥
सर्व्वकामप्रदा चैव सावित्री कथिता तव ।
अभिचारेषु तां देवीं विपरीतां विचिन्तयेत् ॥
कार्य्या चाक्षतयश्चात्र विपरीताश्चरास्तथा ।
विपरीताक्षरं कार्य्यं शिरश्च ऋषिसत्तम ! ॥
आदौ शिरः प्रयोक्तव्यं प्रणवोऽन्तेन वै ऋषे ! ।
मतिस्थेनैव फट्कारं मध्ये नाम प्रकीर्त्तितम् ॥
गायत्रीं चिन्तयेत्तत्र दीप्तानलसमप्रभाम् ।
घातयन्तीं त्रिशूलेन कैशेष्वाच्छिद्य वैरिणम् ॥
निहन्तां त्रिशूलेन भृकुटीभूषितानगाम् ।
उच्चाटने तु तां देवीं वायुभूतां विचिन्तयेत् ॥
धावमानं तथा साध्यं तस्माद्देशात्तु दूरतः ।
अभिचारेषु होतव्या राजिका विषमिश्रिताः ॥
सरक्तमिश्रं होतव्यं कटुतैलमथापि वा ।
तत्रापि च विषं देयं होमकाले प्रयत्नतः ॥
क्रोधेन महताविष्टः परान्नाभिचरेद्बुधः ।
न जह्यात् यदि क्रोधेन ध्रुवं नश्येत् स एव तु ॥
अनागसि न कर्त्तव्यमभिचारमतो बुधैः ।
स्वल्पागसि न कर्त्तव्यो ह्यभिचारो महामुने ! ॥
महापराधं बलिनं देवब्राह्मणकण्टकम् ।
अभिचारेण यो हन्यान्न स दोषेण लिप्यते ॥
धर्म्मप्रदाने तु तथा स्वल्पागसि तथैव च ।
अभिचारं न कुर्व्वीत बहुपापं विचक्षणः ॥
बहूनां कण्टकं यस्तु पापात्मानं सुदुर्म्मतिम् ।
हन्यात् प्राणापराधन्तु तस्य पुण्यफलं महत् ॥
ये भक्ताः पुष्करीकाक्षे वेदयज्ञे द्विजे जने ।
न ज्ञानमिच्चरेत् ज्ञातुं तत्र तद्विफलं भवेत् ॥
न हि केशवभक्तानामभिचारेण कर्हिचित् ।
विनाशमभिपद्येत तस्मात्तन्न समाचरेत् ॥
सेयं धात्री विधात्री च सावित्र्यघविनाशिनी ।
प्राणायामेन जप्येन तथा चान्तर्ज्जलेन च ॥
यथाङ्गतीकप्रणवा जप्तव्या शिरसा सह ।
प्रणवेन तथा न्यस्ता वाच्या व्याहृतयः पृथक् ॥
देवतं सविताप्यस्या गायत्रं छन्द एव च ।
विश्वामित्र ऋषिश्चैव प्रोच्यते ऋषिसत्तम ! ॥
कर्म्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च ।
पञ्चेन्द्रियार्थाः सुमहत् भूतानां पञ्चपञ्चकम् ॥
मनो बुद्धिस्तथैवात्मा अव्यक्तञ्चैव सप्तम ! ।
चतुर्विंशत्यवेतानि गायत्र्याक्षराणि तु ॥
प्रागेवं पुरुषं विद्धि सङ्गतं पञ्चविंशकम् ।
सप्तलोकाश्च ये चेह महाव्याहृतयस्तथा ॥
शिरश्च तत्तथा वाच्यः पुरुषः परमेश्वरः ।
एवंविधा च गायत्री जप्तव्या राजसत्तम ! ॥
होतव्या च यथाशक्त्या सर्व्वकामसमृद्धिदा ।
सावित्रीसारमाचोऽपि वरं विप्रः सुयन्त्रितः ॥
नायन्त्रितश्चतुर्व्वेदी सर्व्वाशी सर्व्वविक्रयी ।
गायत्रीं जपते यस्तु त्रिकालं ब्राह्मणः सदा ॥
अर्थी प्रतिग्रही वापि स गच्छेत् परमां गतिम् ।
गायत्रीं जपते यस्तु कल्यमुत्थाय यो द्विजः ॥
स लिप्यते न पापेन पद्मपत्रमिवाम्भसा ।
कामकामी लभेत् कामान् गतिकामश्च सद्गतिम् ॥
अकामः समवाप्नोति तद्विष्णोः परमं पदम् ॥"
इत्याद्ये वह्निपुराणे गायत्रीकल्पनामाध्यायः ॥

गायनः, त्रि, (गायति सङ्गीतविद्यया उपजीवतीति । गै + "गुट् च ।" ३ । १ । १४७ । इति गुट् ।) गायकः । (यथा, काव्यीखण्डे ।
"देवानां गायना ह्येते चारणाः स्तुतिपाठकाः ॥")
गानोपजीवी । इति त्रिकाण्डशेषः ॥ (एतेषामन्नं विशुद्धब्राह्मणादिभिरग्राह्यं पतितत्वात् । यथाह मनुः । ४ । २१० ।
"क्लीबगायनयोश्चान्नं तल्पोर्वाहुर्विकस्य च ॥")
जल्पाकः । इति धरणी ॥ (स्तुतिपाठकः । यथा, महाभारते । १ । ७८ । ३२ ।
"सत्यं किलैतत् सा प्राह देवानामसि गायनः ॥")

गारित्रं, क्ली, (गीर्य्यते भक्ष्यते इति । गॄ निगरणे + "भूवादिगॄभ्यो णित्रन् ।" उणा ४ । १७० । इति कर्म्मणि णित्रन् ।) ओदनम् । इत्युणादिकोषः ॥

गारुडं, क्ली, (गरुडस्य इदमिति । गरुड + अण् दृद्धिश्च । यद्वा, गरुडं श्रोतारमालम्ब्य भगवता यदुपदिष्टम् । यद्वा, गरुडेन प्रोक्तमिति । तन्निरुक्तिरुक्ता शिवपुराणे यथा,—
"गरुडस्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ।")
गरुडपुराणम् । इति पुराणम् ॥ यथा,—

गरुड उवाच ।

"मम माता च विनता नागैर्दासीकृता हरे ! ।
यथाहं देवतान् जित्वा चाण्डतं स्नानयामि तत् ॥
दास्याद्धि मोक्षयिष्यामि यथाहं वाहनं तव ।
महाबलो महावीर्यः सर्व्वज्ञो नागदारणः ।
पुराणसंहिताकर्त्ता यथाहं स्यां तथा कुरु ॥

विष्णुरुवाच ।

यथा त्वयोक्तं गरुड ! तथा सर्व्वम्भविष्यति ।
देवादीन् सकलान् जित्वा चाण्डतं स्नानयिष्यसि ॥
नागदास्यान्मातरं स्वां विनतां मोक्षयिष्यसि ।
महाबलो वाहनत्वं भविष्यसि विहङ्गमः ॥
पुराणं मत्प्रसादाच्च मम माहात्म्यवाचकम् ।
यदुक्तं मत्स्वरूपस्य तव चाविर्भविष्यति ॥
गारुडं तव नाम्ना तल्लोके ख्यातिं गमिष्यति ।
यथाहं देवदेवानां श्रीः ख्याता विनतासुत ! ॥
तथा ख्यातिं पुराणेषु गारुडं गरुडेष्यति ।
यथाहं कीर्त्तनीयोऽथ तथा त्वं गरुडात्मना ॥
मां ध्यात्वा पक्षिसुश्रेष्ठं पुराणं वद गारुडम् ।
इत्युक्तो गरुडो राज ! कश्यपायाह पृच्छते ॥

काश्यपो गरुडं स्तुत्वा दृष्ट्वा दग्धमजीवयत् ।
स्वयञ्चाप्यमलो भूत्वा विद्ययान्यानजीवयत ॥
पक्षी ओम् तं स्वाहा जापी विद्येयं गारुडी परा ।
गरुडोऽहं गारुडं हि ग्रहाण रुद्र ! महात्मकम् ॥"
इत्यादौ महापुराणे गारुडे प्रथमाध्यायो नाम द्वितीयः ॥ * ॥ (अस्मिन् पुराणे एकोनविंशत्-सहस्रसंख्यकश्लोका वर्त्तन्ते । यथा, देवीभागवते । १ । ३ । ११ ।
"एकोनविंशत् साहस्रं गारुडं हरिभाषितम् ॥"
अस्य विशेषविवरणन्तु पुराणशब्दे द्रष्टव्यम् ॥*॥)
गारुडी विद्या गरुडपुराणे २०२ अध्यायादौ द्रष्टव्या ॥ स्वर्णम् । इति हेमचन्द्रः ॥ विषमन्त्रः । इति जटाधरः ॥ (गरुडः गरुडवर्णोऽस्त्यस्येदम् । गरुड + अण् । गरुडवर्ण इव वर्णोऽस्येति भावः ।) मरकतमणिः । इति राजनिर्घण्टः ॥ (यथा-रघौ । १३ । ५३ ।
"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्भवानीनामिव गारुडानां
सप्तच्छदः फलितो विभाति ॥"
गरुडाकारेण सेनारचनयाधिष्ठितत्वात् महाव्यूहभेदः । यथा, महाभारते । ६ । ५३ । २ ।
"गारुडञ्च महाव्यूहं चक्रे प्राज्ञनवत्सदा ॥"
एतस्य रचनायां गरुडाकृतित्वविवृतिरर्थवा, तत्रैवाध्याये । ३—८ ।
"गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव ।
चक्षुषी च भरद्वाजः शतवर्म्मा च सात्वतः ॥
अश्वत्थामा शिरस्येव ग्रीवायां सञ्जयेषितः ।
चिरन्तैर्मेतृभिः केकैर्येवाटधानैश्च संयुतैः ॥
भूरिश्रवा ग्रसः ग्राव्णो भगदत्तश्च मारिष !।
मद्रकाः सिन्धुसौवीराश्चथा पक्षनदाश्च ये ॥
जयद्रथेन सहिता ग्रीवायां सन्निवेशिताः ।
पृष्ठे दुर्य्योधनो राजा सोदर्य्यैः सानुगैर्वृतः ॥
विन्दानुविन्दावावन्त्यौ काम्बोजाश्च शकैः सह ।
पुच्छमासन् महाराज ! शूरसेनाश्च मारिष ! ॥
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिताः ।
कारूषाश्च विकुञ्जाश्च सुदाः कुण्डीदधास्तथा ॥
दृढक्षत्रेण सहिता वामपार्श्वे समाश्रिताः ॥"
यदा त्वस्य व्यूहस्य प्रवोधनं तदाह मनुः ।
७ । १८६—१८७ ।
"शत्रुसैन्यविनिर्घाते च गूढे युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कर्त्तरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥"
"क्षुद्रसुखपक्षाद्याः पृथुमध्यो वराहव्यूहः ।
एष एव पृथुतरमध्यो गरुडव्यूहः ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)
गारुडिकः, पुं, (गरुडः अधिष्ठात्रास्य इति गारुड: विषनिवारणमन्त्रविद्यः । तेन चिकित्सति स एव व्याजीवो दष्टेति वा । इति ठक् ।) विषवैद्यः । इति शब्दरत्नावली ॥
गारुडी, स्त्री, (गरुडनाम्नाख्यायते इति । अण् ङीप् च ।) पातालगरुडीलता । इति राजनिर्घण्टः ॥ (गरुडः अधिष्ठात्री देवता अस्या इति अण् ङीप् च । गरुडविद्या । सा च गरुडपुराणे २०२ अध्यायादौ द्रष्टव्या ॥)
गारुत्मतं, क्ली, (गरुत्मान् गरुडस्तस्य वर्णोऽस्यस्य गरुत्मान् अधिष्ठातृदेवताऽस्य वा इति अण् ।) मरकतमणिः । इत्यमरः । २ । ६ । ६२ ॥ (यथा, माघे । ३ । ५ ।
"तस्योत्तप्तकाञ्चनकुण्डलाग्र-
प्रत्युप्तगारुत्मतरत्नभासा ।"
पुत्रा इति लोके । तस्य नामानि ।
"गारुत्मतं मरकतमग्निगर्भो हरिन्मणिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गारुत्मतपत्रिका, स्त्री, (गारुत्मतं मरकतमणिस्तद्वर्णसदृशं पत्रमस्याः इति कप् कापि अत इत्वञ्च ।) पाचीलता । इति राजनिर्घण्टः ॥
गार्गकः, पुं, (गर्गस्य अपत्यं पुमान् इति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति गार्ग्यः ततः कन् । "आपत्यस्य च तद्धितेऽनाति ।" ६ । ४ । १५१ । इति यकारलोपः ।) गर्गस्यापत्यम् । इत्यमरटीकायां रायमुकुटः ॥
गार्गी, स्त्री, (गर्गस्यापत्यं स्त्री । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् । "यञञोश्च ।" ४ । १ । १६ । इति ङीप् "ततो हलादेर्लघोः ।" ६ । ४ । १५० । इति यलोपः ।) गर्गस्य स्त्र्यपत्यम् । इति मुग्धबोधम् ॥ (यथा, बृहदारण्यके षष्ठब्राह्मणे ६ ब्राह्मणे ।
"अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च कस्मिन् नु खल्वाप ओताश्च प्रोताश्चेति ॥" दुर्गा । यथा, हरिवंशे । १७६ । १४ ।
"ह्रीं श्रीं गार्गीञ्च गान्धारीं योगिनीं योगदां सदा ॥")
गार्गीपुत्रकायणिः, पुं, (गार्ग्याः पुत्रस्तस्मादागतो वंशः इति । "पुत्रान्तादन्यतरस्याम् ।" ४ । १ । १५६ । इति वा फिञ् वा कुक् च ।) गार्गीपुत्रवंशः । अस्य रूपान्तरम् । गार्गीपुत्रायणिः । गार्गीपुत्रिः । इति पाणिनिव्याकरणम् ॥
गार्ग्यः, पुं, (गर्गस्यापत्यं पुमान् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) गर्गस्य पुमपत्यम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, बृहदारण्यके । ४ । १ । "इमबालाकिर्ह्यनूचानो गार्ग्य आस सङ्होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रुवाणीति ॥")
गार्हपत्यः, पुं, (गृहस्य गृहस्य वायमिति अण् गार्हो गार्ह्यो वा पचः पक्त्रं यत्र यस्य वा ।) गार्ह्यपक्त्रवाहः । इति हेमचन्द्रः । ३ । ४४२ ॥ गार्ह्यपक्त्रोऽपि ॥
गार्ह्य, क्ली, (गर्ह्य एव इति । चतुर्व्वर्णादित्वात् स्वार्थे ष्यञ् ।) लिम्बा । यथा, माघे । ३ । ७३ ।
"पीत्वा जलानां निधिनातिगार्ह्यतां ॥"
गार्ह्यपत्यः, पुं, (गार्ह्यं गृहसम्बन्धिनं पक्त्रं पचः यस्य यत्र वा ।) गृहपक्त्रयुक्तवाहः । (यथा, महाभारते । ४ । ४८ । २५ ।
"न हि गार्ह्यपतिर्मुक्ता गार्ह्यपत्राः सुतेजनाः ।
अन्तरेणैव तिष्ठन्ते गिरीणामपि दारुणाः ॥")
गार्भिणं, क्ली, (गर्भिणीनां समूहः इति । "भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इति अण् ।) गर्भिणीसमूहः । इत्यमरः । २ । ६ । २२ ॥
गार्हपत्यः, पुं, (गृहपतिर्यजमानस्तेन संयुक्तः इति । "गृहपतिना संयुक्ते ण्यः ।" ४ । ४ । ९० । इति ण्यः ।) गृहपतिर्गृहस्वामी तेन नित्यसम्बन्धः । इत्यमरभरतौ ॥ यज्ञीयाग्निविशेषः । (यथा, ऋग्वेदे । १० । ८५ । २० ।
"इहेमं प्रजया ते समेधता-
मस्मिन् गृहे गार्हपत्याय जागृहि ॥"
भक्तिवर्द्धनाय पितापि गार्हपत्याग्नित्वेन पुत्रादिना वेदितव्यः इत्युपदिदेश भगवान् मनुः । यथा । २ । २३१ ।
"पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः ॥")
गालनं, क्ली, (गाल्यते इति । गल् + णिच् + भावे ल्युट् ।) चारणम् । छाँकन गड़ान इत्यादि भाषा ॥ यथा । "तथा पचेत् यथा दारुकाष्ठिन्यातिशैथिल्यमखण्डगालनरहितोऽन्तरुष्मपक्वश्चरुर्भवति ।" इति भवदेवभट्टः ॥
गालवः, पुं, (गाल्यते नाश्यतेऽज्ञानमनेन इति । गल् + णिच् + घञ् । गालः वेदान्तादिज्ञानप्रतिपादकग्रन्थं तं वाति गच्छति जानाति वा । वा + कः ।) मुनिविशेषः । (यथा, भागवते । ८ । १३ । १५ ।
"गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ॥")
लोध्रवृक्षः । इति मेदिनी । वे । ३७ ॥ श्वेतलोध्रः । इत्यमरटीकायां स्वामी ॥ कैन्दुकवृक्षः । इति शब्दचन्द्रिका ॥
गालिः, पुं, (गाल्यते विक्रियते अवगमात्रेण मनो यस्मात् येन वा । गल् + इच् ।) शापः । इति त्रिकाण्डशेषः ॥ (यदुक्तं चिन्तामणौ ।
"ददति ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ॥")
गालितः, त्रि, (गल् + णिच् + कर्म्मणि क्तः ।) द्रवीकृतः । गलान इति भाषा ॥ यथा,—
"गालितस्य सुवर्णस्य षोड़शांशेन सीसकम् ॥"
इति रत्नावली ॥
कृतगालनः । यथा । "तथा पचेत् यथा अगालितमखण्डरुर्भवति ।" इति कालेञ्जिः ॥
गालिनी, स्त्री, (गालयति द्रवीकरोत्यधियामिति ।) गल् + णिच् + णिनि + ङीप् ।) सुरादिविशेषः । यथा,—
"कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्ज्जनी मध्यमानामा संहता सुप्रवर्त्तिता ॥
सुद्वेधा गालिनी प्रोक्ता ग्रन्थस्योपरिचालिता ॥"
इति तन्त्रसारः ॥

गालोड़नं, क्ली, (गाः इन्द्रियाणि आलोडयन्ते प्रकाशयन्त्यनेन। गो+आ+लोड़ि+करणे ल्युट्। निपातनात् साधुः।) उन्मादः। रोगः। मूर्खत्वम्। इति वक्ष्यमाणशब्ददर्शनात्॥

गालोड़ितः, त्रि, (गालोड़ः उन्मादरोगः सञ्जातोऽस्य। इतच्।) उन्मत्तः। रुग्णः। मूर्खः। यथा, "उन्मादग्रीवे रोगार्त्ते मूर्खे गालोड़ितः स्मृतः॥" इति दुर्गसिंहकृतकलापवृत्तिटीकायां त्रिलोचनदासः॥ गोलोहितोऽपि पाठः॥

गालोद्यं, क्ली, (गोभिः पशुविशेषैरालोड्यते भक्षणाय इति। गो+आ+लोड़ि+कर्म्मणि यत्। प्रत्ययेन निपातनात् साधुः।) पद्मबीजम्। इति राजनिर्घण्टः॥

गावौ, पुं, (गोशब्दस्य द्विवचनेन निष्पन्निरिति बोध्यम्।) ग्रामः। यथा,—
"एकैकेन तथा द्वाभ्यां वचनेस्त्रिभिरेव च।
साकाङ्क्षत्वप्रयुक्तन्तु नाम पञ्चविधं स्मृतम्॥
एकवचनसाकाङ्क्षत्वमुक्तं एकविंशत्यादिशब्दे। उभपदं द्विपदं पुष्पवन्तपदं सर्व्वैद्यं अश्विनादिपदं भूस्वर्गयो रोदस्यादिपदं ग्रामे गोपदस्य द्विवचनमाचेष्याकाङ्क्षम्। इति। तदा गावौ ग्राम इत्यादाविव साधुत्वार्थकमेव तत्र द्विवचनमिति वदन्ति।" इति च शब्दशक्तिप्रकाशिका॥

गाह, ऊ ड विलोड़ने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सर्क-सेट्।) ड, गाहन्तां महिषा निपानसलिलमिति ग्राकुन्तले। ऊ, अगाहिष्ट अगाढ़। इति दुर्गादासः॥

गिरा, स्त्री, (ग+भावे क्विप् स्त्रियां टाप्।) वचनम्। इति त्रिकाण्डशेषः॥ ("तां गिरां करुणां श्रुत्वा।" इति दशरथविलापनाटकम्॥)

गिरिः, पुं (गिरति धारयति पृथ्वीं गिर्यते स्तूयते गुरुत्वाद्वा। "कृगृशृपकृटिभिदिछिदिभ्यश्च।" उणा। ४। १४२। इति इः किच्च।) पर्व्वतः। इत्यमरः। २। ३। १॥ (पर्व्वतानां अष्टावेव पूजनीयाः कुलाचलत्वात्। यदुक्तम्,—
"मेरुमन्दरकैलासमलया गन्धमादनः।
महेन्द्रः श्रीपर्व्वतश्च हेमकूटस्तथैव च।
अष्टावेते तु सम्पूज्या गिरयः पूर्व्वदिक् क्रमात्॥"
इति शब्दार्थचिन्तामणिः॥)
गेरुकः। इति हेमचन्द्रः। ३। ३५२॥ चक्षूरोगविशेषः। इति मेदिनी। रे। २३॥ पारदस्य दोषविशेषः। यथा, रत्नावल्याम्।
"नागो वङ्गो मलौ वह्निश्चाष्टल्यश्च विषं गिरिः।
असंस्कारैर्मलादोषा निसर्गात् पारदे स्थिताः॥"
सह्याद्रिनां पद्धतिविशेषश्च॥ (तत्र प्रथमतस्तान्त्रिकगिरिसंज्ञासिलक्षणञ्च यथा,—
"सदोर्द्धबाहुर्यो वीरो सुक्तकेशो दिगम्बरः।
सर्व्वत्र समभावेन भावयेद्यो नरोत्तमः।
इष्टदेवीधिया नारीं स गिरिः परिकीर्त्तितः॥"
इति तन्त्रग्रन्थम्॥
शङ्कराचार्य्यकृतदशनामब्रह्मचारिपरिव्राजकानामन्यतमः। तेषां दशनामानि यथा,—
"तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः।
पुरिः सरस्वती चैव भारती च तथा दश॥"
तत्र गिरेर्लक्षणम्। यथा, प्राणतोषिण्यां अवधूतप्रकरणे।
"वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः।
गम्भीराचलबुद्धिश्च गिरिनामा स उच्यते॥"
यदुवंशीयश्वफल्कस्य द्वादशपुत्राणामन्यतमः। यथा, भागवते। ९। २४। १५—१६।
"अक्रूरप्रमुखा आसन् पुत्रा द्वादशविश्रुताः।
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः॥")
गिरिः, स्त्री, (गॄ+भावे इः किच्च।) निगरणम्। इत्यमरः। ३। २। ११॥ गेला इति भाषा॥ बालमूषिका। इत्यमरटीकायां रमानाथः॥ पूर्त्तौ च। इति मेदिनी। रे। २४।

गिरिकण्टकः, पुं, (गिरेः पर्व्वतस्य कण्टक इव तन्नामकत्वात्तथात्वम्।) वकः। इति त्रिकाण्डशेषः॥

गिरिकदम्बः, पुं, (गिरिसम्भूतः कदम्बः।) नीपः। धाराकदम्बः। इति राजनिर्घण्टः॥

गिरिकदली, स्त्री, (गिरिसञ्जाता कदली।) पर्व्वतीयकदली। तत्पर्य्यायः। गिरिरम्भा २ पर्व्वतमोचा ३ अरण्यकदली ४ वन्यबीजा ५ वनरम्भा ६ गिरिजा ७ गजवल्लभा ८। अस्या गुणाः। मधुरत्वम्। हिमत्वम्। बलवीर्य्यवृद्धिकारित्वम्। लघुत्वम्। दाहपित्तदाहश्लेष्मप्रशमनत्वम्। दुर्जरत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

गिरिकर्णिका, स्त्री, (गिरौ गिरिसम्बन्धि कर्णिकेव प्रतिभातीत्यर्थः। यद्वा, गिरिः सुमेरुपर्व्वतः कर्ण इव यस्याः इति कप् टाप् च कापि अत इत्वम्।) पृथिवी। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। अपराजिता। इति राजनिर्घण्टः॥ (अस्या अवयवो यथा,—
"गुड़ूचीसारगिरिकर्णिकाहरिद्राभिः।
अञ्जनगुड़िका भ्रमयति विच्छर्दिकां त्रिकटुसनाथा॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे॥)

गिरिकर्णी, स्त्री, (गिरेर्बालमूषिकायाः कर्ण इव पत्रमस्याः।) अपराजिता। इत्यमरः। २। ४। १०४॥ (अस्याः पर्य्यायो यथा,—
"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"
इति वैद्यकरत्नमालायाम्॥
पार्व्वतीयापराजितार्थे पर्य्यायो यथा तत्रैव,—
'गिरिकर्णी महाश्वेता स्थूलपुष्पा सिता क्वचित्॥")
यवासः। इति शब्दचन्द्रिका॥

गिरिका, स्त्री, (गिरिरेव स्वार्थे कन् टाप् च।) बालमूषिका। इत्यमरः। २। ५। १२॥ (स्वनामख्याता उपरिचरवसुराजपत्नी। सा हि गिरेः कोलाहलाख्यपर्व्वतात् शुक्तिमत्यां नद्यां जातत्वात् गिरिकेति नाम्ना विश्रुता। यथा, महाभारते। १। ६३। ३३—३६।
"राजोपरिचरश्चैवं नाम तस्याथ विश्रुतम्।
पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः॥
अरौत्सीत् चेतनायुक्तः कामात् कोलाहलः किल।
गिरिं कोलाहलं तन्तु पदा वसुरताड़यत्॥
निश्चक्राम ततस्तेन प्रहारविवरेण सा।
तस्यां नद्यामजनयन्मिथुनं पर्व्वतः स्वयम्॥
तस्माद्विमोचणात् प्रीता नदी राज्ञे न्यवेदयत्।
यः पुमानभवत्तत्र तं स राजर्षिसत्तमः॥
वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः।
चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः॥
वसोः पत्नी तु गिरिका कामकालं न्यवेदयत्।
ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः॥")

गिरिकाक्षः, पुं, (गिरिजा अक्षिरोगविशेषेण काणः एकचक्षुर्हीनः।) गिरिरोगेणैकचक्षुर्हीनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

गिरिगुड़ः, पुं, (गिरेः गिरौ वा जातः गुड़ः गुड्डितवर्त्तुल इव।) गेरुकः। इति हेमचन्द्रः। ३। ३५३॥

गिरिजं, क्ली, (गिरौ जायते इति। जन्+डः।) अभ्रकम्। शिलाजतु। शैलजम्। लोहम्। इति मेदिनी। जे २३॥ गैरिकम्। इति राजनिर्घण्टः॥

गिरिजः, पुं, (गिरौ जायते इति। जन्+डः।) मधूकवृक्षविशेषः। तत्पर्य्यायः। गौरशाकः २ मधूलः ३ स्वल्पपत्रकः ४। इति रत्नमाला॥

गिरिजा, स्त्री, (गिरेर्हिमालयपर्व्वतात् हिमगिरेरधिष्ठातृदेवादिति तात्पर्य्यार्थः जायते। जन्+डः स्त्रियां टाप् च। हिमालयस्य अधिष्ठातृत्वे प्रमाणं यथा, कुमारे। १। १।
"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।"
"देवतां आत्मा यस्य सः। एतेनास्य वक्ष्यमाणमेनकापरिणयपार्व्वतीजननादिचेतनव्यवहारयोग्यत्वसिद्धिः।" इति टीकायां मल्लिनाथः।) पार्व्वती। (यथा अनर्घ्यराघवे। ४ अङ्के ३३।
"स्त्रीणां प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजाऽपि यस्याः॥"
गायत्रीरूपा देवी। यथा, देवीभागवते। १२। ६। ४३।
"गिरिजा गुह्यमातङ्गी गरुड़ध्वजवल्लभा॥"
गङ्गा। इति युतपत्तिलभ्योऽर्थः॥ गिरौ पर्व्वते जायते इति। जन्+डः।) मातुलुङ्गी। इति मेदिनी। जे। २४। (अस्याः पर्य्याया यथा,—
"मातुलुङ्गी सुगन्धाख्या गिरिजा पूतिपुष्पिका।
अत्यम्बा देवदूती च सा क्वचिन्मधुकुक्कुटी॥"
इति वैद्यकरत्नमालायाम्॥)
श्वेतदूर्व्वा। इति रत्नमाला॥ क्षुद्रपाषाणभेदः। चायमाणा लता। कारवेल्लः। मल्लिका। गिरिकदली। इति राजनिर्घण्टः॥

गिरिजागमं, क्ली, (गिरौ पर्व्वते अभ्रे अभ्रकवादिद्रव्ये जायते इति। जन्+डः। गिरिजम्। तदमति गच्छति। अम्+कलच्। यद्वा, गिरिजेषु

अमलं।)अभ्रकम्। इत्यमरटीकायां रायमुकुटः॥ (अभ्रवणातले प्रमाणं यथा, भावप्रकाशे।
"पुरा वधाय विप्रस्य वज्रिणा वज्रमुद्धृतम्।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम्।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम्॥
तद्वर्णं वज्रजातत्वादभ्रमभ्रवोद्भवात्॥"
अभ्रकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

गिरिज्वरः, पुं, (गिरेः पर्व्वतस्य ज्वर इव तद्भेदकत्वात्। गिरिं ज्वरयतीति वा। ज्वर+णिच्+अच्।) वचः। इति शब्दरत्नावली॥

गिरितः, त्रि, (गिल्+कर्म्मणि क्तः लस्य रत्वञ्च।) गिलितः। भक्षितः। इत्यमरटीकायां रायमुकुटः॥

गिरिधातुः, पुं, (गिरौ जातो धातुः। प्राकपार्थिववल्मध्यपदलोपिसमासः।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिनिम्बः, पुं, (गिरिसम्भूतोनिम्ब इव।) महारिष्टवृक्षः। इति राजनिर्घण्टः॥

गिरिपीलुः, पुं, (गिरिसम्भूतः पिलुर्वृक्षविशेषः।) परूषकवृक्षः। इति राजनिर्घण्टः॥

गिरिपुष्पकं, क्ली, (गिरिजातं पुष्पकम्।) शैलेयम्। इति राजनिर्घण्टः॥

गिरिप्रिया, स्त्री, (गिरिः पर्व्वतः प्रियो यस्याः यद्वाहृतविचरणायेति भावः।) चमरीगवी। इति राजनिर्घण्टः॥

गिरिभित्, [द्] पुं, (गिरिं भिनत्ति भित्त्वा उत्पद्यते इति। भिद्+क्विप्।) पाषाणभेदकवृक्षः। इति भावप्रकाशः॥

गिरिभूः, स्त्री, (गिरौ भवति उत्पद्यते इति। भू+क्विप्।) क्षुद्रपाषाणभेदाः। इति राजनिर्घण्टः॥ गिरेर्भूः। पर्व्वतभूमिः। (यथा, आर्य्यासप्तशत्याम्। ६१५।
"सकलकटकैकमण्डनि!
कठिनीभूताश्रये शिखरदन्ति।
गिरिसुत इव तव मन्ये
मनः शिला समभवच्चण्डि!॥" *॥
गिरेर्हिमालयात् हिमालयाधिष्ठातृदेवात्पित्यर्थः भवतीति। भू+क्विप्।) पार्व्वती॥

गिरिमल्लिका, स्त्री, (गिरौ जाता मल्लिकेव मध्यपदलोपिसमासः।) कुटजवृक्षः। इत्यमरः। २। ४। ६६॥ (यथास्याः पर्य्यायाः।
"वृक्षकः शक्रपर्य्यायो वत्सको गिरिमल्लिका।
कुटजस्तत्फलश्चेन्द्रयवश्चापि कलिङ्गकः॥"
इति वैद्यकरत्नमालायाम्॥)

गिरिमाणः, पुं, (गिरिरिव मानं परिमाणमस्य उच्छ्रयत्वेनेति शेषः।) हस्ती। इति शब्दरत्नावली॥

गिरिरुट्, [द्] स्त्री, (गिरेः पर्व्वतस्य रुट् रुत्तिका।) गैरिकम्। इति चिकाण्डशेषः। (अवहारोऽस्याः यथा,—
"गिरिरुट्चन्दननागरखटिकाश्रयोजितो वह्निर्लेपः।
कुरुते वचया मिश्रो लोचनमगदं न सन्देहः॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

गिरिरुहवं, क्ली, (गिरेर्रुहो रुत्तिकाया भवतीति। भू+अच्।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिरेभः, पुं, (गिरेर्रेभ इव।) विट्खदिरः। इति रत्नमाला॥ इरिमेद इति वा पाठः॥

गिरियकः, पुं, (गिरिं पर्व्वतमाश्रित्य आत्मनिर्म्माणतां याति प्राप्नोतीति। या+कः ततः संज्ञायां कन्।) गेरुकः। इति हेमचन्द्रः। ३। ३५३॥

गिरियाकः, पुं, (गिरिं गिरिमधिकृत्यात्मसत्तां यातीति। या+क्विप्। ततः संज्ञायां कन्।) गेरुकः। इति शब्दरत्नावली॥

गिरिवासी, [न्] पुं, (गिरौ गिरिमाश्रित्य वसतीति। वस्+णिनिः। गिरिं वासयति सुरभीकरोतीत्यर्थे। वस्+करोतेरर्थे णिच् णिनिः।) हस्तिकन्दः। इति राजनिर्घण्टः॥

गिरिशः, पुं, (गिरिराश्रयत्वेन वसतित्वेनास्त्यस्य इति। "लोमादिपामादिपिच्छादिभ्यः शनेलचः।" ५। २। १००। इति शः। यद्वा, गिरौ कैलासाख्यपर्व्वते आध्यात्मिकार्थे तु नित्यशुद्धमनसीत्यर्थः शेते विराजते इति। यद्वा, गिरिं त्रिगुणवृत्तात्मकं मनः श्यति तनूकरोति विशुद्धं करोति शरणागतभक्तसाधकानाम्। शॄ डल श्यने शॄ यच्छदे वा गिरौ कृन्दसि डः। लोके तु छान्दसानां क्वचिद्भाषायामपि प्रयोग इति आशुशुक्षणिवदित्याह स्वामी।) शिवः। इत्यमरः। १। १। ३३॥ (यथा, रघुः। २। ४१।
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य।
प्रत्याहृताक्षो गिरिशप्रभावात्
आत्मन्यवज्ञां शिथिलीचकार॥")

गिरिशालिनी, स्त्री, (गिरिं पर्व्वतस्यसुवं शालयते शोभयते इति। शल्+णिच्+णिनिः नान्तत्वात् ङीप् च। गिरिं बालमधिकाकारं शलते श्राघते निजपत्रावयवेनेत्यर्थे। शल श्राघार्थः+णिनिः ङीप् च।) अपराजिता। यथा,—
"पारिभद्रं पाटला च वकुलं गिरिशालिनी।"
इति वामनपुराणम्॥

गिरिशृङ्गः, पुं, (गिरेः शृङ्गमिवात्युच्चत्वाच्छ्रयस्येति अच्। मुष्कादष्ठोत्तलनसमये शृङ्गसादृश्यादस्य तथात्वम्।) गजेशः। इति शब्दरत्नावली॥ (गिरेः शृङ्गमिति विग्रहे क्ली। पर्व्वतश्रेष्ठम्। यथा, महाभारते। ६। ५६। १५।
"गजैर्निपतितैर्नीलैर्गिरिशृङ्गैरिवाहतैः॥")

गिरिसारः, पुं, (गिरेः सार इव।) लौहम्। (यथा, गोः रामायणे। ६। ७८। १६।
"तत्तेलधौतं विमलं गिरिसारमयं महत्।
शूलं परमसंक्रुद्धो बालिपुत्रे न्यपातयत्॥")
वज्रम्। मलयपर्व्वतः। मेदिनी। रे। २६१॥

गिरिसुता, स्त्री, (गिरेर्हिमालयपर्व्वताधिष्ठातुः सुता पुत्री।) पार्व्वती। यथा,—
"अवतु वो गिरिसुता शशिशेखरः प्रियतमा
वसतु मे हृदि सदा भगवतः पदद्वयम्॥"
इति छन्दोमञ्जरी॥
(तथाच पद्मतन्त्रे। १। १७५।
"अस्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः फणी
तच्च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाशनम्॥"
गङ्गा। यथा, काशीखण्डे। २६। ५२।
"गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा॥")

गिरीशः, पुं, (गिरेः कैलासस्य ईशः।) शिवः। (यथा, वक्रोक्तिपञ्चाशिकायाम्। ३३।
"चिन्तामेऽत्र न वेश्मनि प्रियतमे किं चिन्तय स्थान्नव-
यावज्जीवमिदं सुतां जयन्नवतु वः शक्त्या गिरीशोऽनिशम्॥")
गिरीणां पर्व्वतानामीशः श्रेष्ठः।) हिमालयपर्व्वतः। (गिरां वाचां शास्त्राणां वा ईशः।) बृहस्पतिः। इति मेदिनी। शे। १६॥

गिलः, पुं, (गिल्+"इगुपधेति।" ३। १। १३५। इति कः।) जम्बीरः। इति शब्दचन्द्रिका॥

गिलग्राहः, पुं, (गिलं ग्रहाति गिलं यथा स्यात् तथा गिलेन गिलनेन वा ग्रहाति धारयति इति तात्पर्य्यार्थः। ग्रह+अण्।) नक्रः। इति राजनिर्घण्टः॥

गिलनं, क्ली, (गिल्+भावे ल्युट्।) गिरणम्। भक्षणम्। इत्यमरटीका॥ (यथा, हारीते प्रथमे स्थाने प्रथमेऽध्याये।
"चर्व्वणं गिलनञ्चापि कासितं श्वासितन्तथा।
नीचोच्चञ्चैव गम्भीरं वर्ज्जयेत् पाठकं सुधीः॥")

गिलिः, स्त्री, (गिल्+भावे इन्।) गिलनम्। इत्यमरटीका॥

गिलितं, त्रि, (गिल्+कर्म्मणि क्तः। गिलिर्जातास्येति तारकादित्वादितच्प्रत्यये।) भक्षितम्। इत्यमरः। ३। २। ११०॥

गिल्लः, पुं, (गायति सामवेदं गायतीति वा। गै गाने+"इल्लो गादाभ्यां किच्च।" इति उणादिकोषटीकाधृतसूत्रेण इल्लः। किदभावपक्षे तु "गादाभ्यां इल्लुच्।" उणा। ३। १६। इति इल्लुच् प्रत्ययनिष्पन्नत्वात् गेल्लुरित्येवपदं स्यात्।) सामवेदवेत्ता। गायकः। इत्युणादिकोषः॥

गीः, [र्] स्त्री, (गृ+सम्पदादित्वात् क्विप्।) वाक्यम्। सरस्वती। इत्यमरः। १। ६। १॥

गीतं, क्ली, (गीयते इति। गै गाने+भावे क्तः।) गानम्। इत्यमरः। १। ६। २५॥ तस्य लक्षणं यथा,
"धातुमातुसमायुक्तं गीतमित्युच्यते बुधैः।
तच्च नादात्मको धातुर्मातुस्वरसमुच्चयः॥ *॥
तद्द्विविधं यथा,—
"गीतञ्च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः।
यन्त्रं स्यादेणवीणादि गात्रन्तु सुखजं मतम्॥"
अपि च।
"निबद्धमनिबद्धञ्च गीतं द्विविधमुच्यते।

अनिबद्धं भवेद्गीतं वर्णादिनियमं विना ॥
यद्वा गमकधातुज्ञैरनिबद्धं विना कृतम् ।
निबद्धञ्च भवेद्गीतं तालमानरसान्वितम् ॥
छन्दो गमकधातुज्ञैर्वर्णादिनियमैः कृतम् ॥
ऋग्भिः पाद्यमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चार्थर्ववेदतः स्मृताः॥"

अथ संगीतलक्षणम् ।

"तालवाद्यानुगं गीतं नटौर्भिर्यच्च गीयते ।
नृत्यस्यानुगतं रङ्गे तत् सङ्गीतकमुच्यते ॥" * ॥

अथ गीतप्रशंसा ।

"सङ्गीतकेन रम्येण सुखं यस्य न चेतसि ।
मनुष्यरूपधृग्लोके विधिनैव स वञ्चितः ॥
संसारदुःखदग्धानामुत्तमानामनुग्रहात् ।
प्रभुणा शृङ्गरेणाद्य गीतवाद्यं प्रकाशितम् ॥
गीतं वाद्यं तथा नृत्यं तौर्य्यत्रिकमिदं मतम् ।
तूर्य्यशब्दो घटङ्गे स्यात् मुरजेऽपि च दृश्यते ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः ।
वनादायान्ति फणिनः शिशवो न रुदन्ति च ॥
श्रुतिचमत्कृतये किमतः परं
फणिवरोऽच्युतरो वत पञ्चमः ।
अपि मृतां यदवाप मदालसां
मधुरगीतवशीकृतशङ्करः ॥
परमानन्दविवर्द्धनमभिमतफलं वशीकरणम् ।
सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम् ॥
गीतं पीनपयोधरा समदना नारी विचित्रा कथा
रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी।
चित्तज्ञाः सुहृदः सुताः सुमनसो भक्ताः पुनः
सेवकाः
शुद्धं गीतफलं कवित्वमतुलं संसारसारा मताः॥"
"शुद्धशालगसङ्कीर्णभेदाद्गीतं त्रिधा मतम् ॥"
शुद्धलक्षणं विंशतिर्यथा,—
"एला सोऽद्यभवा सपाटकरणं तत्पञ्चतालेश्वरः
केरातस्मरचक्रपालविजया गद्यं त्रिभङ्गिस्तथा ।
ढेङ्कीवर्णसरः पुटौ द्विपदिका सुव्रावली माहका
अम्बो दण्डकवर्णनीति कथिताः शुद्धास्तु ते
विंशतिः॥"
एलादीनामेतेषां विंशतिसंख्यकानां प्रबन्धगीता
नामङ्गानि षट् भवन्ति । तथा च ।
"पदं तानो विरूदञ्च तालः पाढ़ः स्वरस्तथा ।
एलादीनां षड़ङ्गानि कथितानि विरिञ्चिना ॥
पौनरुक्त्यं न देशीये गीते दोषोऽभिजायते ।
ग्रीष्मोच्चारेण वर्णानां तथा चैव प्रसारणे ॥
लिङ्गान्यत्वे विसर्गो च संयुक्ताक्षरमोचणे ।
परिवर्त्तेऽक्षराणाञ्च दूषदीर्घयतिक्रमे ॥" * ॥

अथ शालगलक्षणम् ।

"ध्रुवको मण्डकश्चैव प्रतिमण्डो निसारुकः ।
वासकः प्रतिलाभश्च तथान्या चैकतालिका ॥
यतिश्च भ्रुमरश्चेति शालगं लक्षमीरितम् ॥"*॥

अथ सङ्कीर्णलक्षणम् ।

"चेचो मञ्जलकस्तथा न गणिका चर्च्चातिनाटोन्नवी
दोहा स्याद्दुलस्तथा गुरुबलो गीता च
गोविन्दया ।
हेम्नोकोऽथ कारिका त्रिपदिकेत्येतानि काम-
द्विया
संक्षेपेण चतुर्दशः प्रकटितान्यत्राधमानि क्रमात्॥
इति सङ्गीतदामोदरः ॥
(सङ्गीतस्यान्यद्विवरणं गानशब्दे द्रष्टव्यम् ॥*॥
गीयते स्म इति । गै शब्दे + कर्म्मणि क्तः ।)
शब्दिते त्रि । इति मेदिनी । ते । १६ ॥
गीतमोदी, [न्] पुं, (गीतेन सङ्गीतेन मोदते
इति । सुट् + "नन्दिग्रहीति।" ३ । २ । १३४ ।
इति णिनिः ।) किन्नरः । इति शब्दरत्नावली ॥
(सङ्गीतानुरागिणि त्रि ॥)
गीता, स्त्री, (गीयते स्म आत्मविद्योपदेशात्मिका
ब्रह्मतत्त्वोपदेशमयी कथा यत्र । गै + क्तः ।)
ग्रन्थविशेषः । भगवद्गीतेति ख्याता । सा तु
अर्জ্জुनस्य मोहनिवृत्त्यर्थं महाभारतीयभीष्म-
पर्व्वान्तर्गता कर्म्मोपासनाज्ञानकाण्डत्रयात्मिका-
ऽष्टादशाध्यायी श्रीकृष्णोक्ता । यथा,—
"भारतं सर्व्ववेदार्थो भारतार्थञ्च कृत्स्नशः ।
गीतायामस्ति तेनेयं सर्व्वशास्त्रमयी मता ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रयेण हि ।
कर्म्मोपासिज्ञानकाण्डचितयात्मा निगद्यते ॥"
इति नीलकण्ठः ॥
"गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता ॥"
इति स्वामी ॥
(अस्याः प्रयोजनादिकं श्रीमद्भिर्मधुसूदनसरस्वती-
पादैर्विस्तरशो गीतागूढ़ार्थदीपिकायां दर्शितम् ।
तदृयथा,—
"सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् ।
परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥
सच्चिदानन्दरूपं तत् पूर्णं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥
कर्म्मोपासिस्तथाज्ञानमिति काण्डत्रयं क्रमात् ।
तदूषाष्टादशाध्यायीगीताकाण्डत्रयात्मिका ॥
एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् ।
कर्म्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः ॥
यतः समुच्चयो नास्ति तयोरतिविरोधतः ।
भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्त्तिता ॥
उभयानुगता सा हि सर्व्वविघ्नापनोदिनी ।
कर्म्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥
तत्र तु प्रथमे काण्डे कर्म्म तत्त्यागयोर्वचः
त्वंपदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते ॥
द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ।
भगवान् परमानन्दस्तत्पदार्थोऽवधार्य्यते ॥
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् ।
एवमष्टत्र काण्डानां सम्बन्धोऽस्ति परस्परम् ॥
प्रत्यध्यायं विशेषस्तु तत्र तत्रैव वक्ष्यते ।
मुक्तिसाधनपर्व्वेदं शास्त्रार्थत्वेन कथ्यते ॥
निष्कामकर्म्मनिष्ठालं त्यागात् काम्यनिषिद्धयोः ।
तत्रापि परमो धर्म्मो जपस्तुत्यादिकं हरेः ॥
क्षीणपापस्य चित्तस्य विवेके योग्यता यदा ।
नित्यानित्यविवेकस्तु जायते सुदृढ़स्तदा ॥
इहामुत्रार्थवैराग्यं वशीकाराभिधं क्रमात् ।
ततः शमादिसम्पत्त्या सन्न्यासो निश्चितो भवेत् ॥
एवं सर्व्वपरित्यागान्मुक्तिः जायते दृढ़ा ।
ततो गुरूपसदनमुपदेशग्रहस्ततः ॥
ततः सन्देहहानाय वेदान्तश्रवणादिकम् ।
सर्व्वमुत्तरमीमांसाशास्त्रमत्रोपयुज्यते ॥
ततस्तत्परिपाकेन निदिध्यासननिष्ठता ।
योगशास्त्रन्तु सम्पूर्णमुपयोगं भवेदिह ॥
क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत् ।
साक्षात्कारो निर्व्विकल्पः शब्दादेवोपजायते ॥
अविद्याविनिवृत्तिस्तु तत्त्वमभ्यसतो भवेत् ।
तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ ॥
अनारब्धानि कर्म्माणि नश्यन्त्येव समन्ततः ।
न चागामीनि जायन्ते तत्त्वज्ञानप्रभावतः ॥
प्रारब्धकर्म्मविक्षेपाद्वासना तु न नश्यति ।
सा सर्व्वतो बलवता संयमेनोपशाम्यति ॥
संयमो धारणा ध्यानं समाधिरिति यत्त्रिकम् ।
यमादिपञ्चकं पूर्व्वं तदर्थमुपयुज्यते ॥
ईश्वरप्रणिधानात्तु समाधिः सिध्यति द्रुतम् ।
ततो भवेन्मनोनाशो वासनाक्षय एव च ॥
तत्त्वज्ञानं मनोनाशो वासनाक्षय इत्यपि ।
युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढ़ा भवेत् ॥
विद्वत्सन्न्यासकथनमेतदर्थं श्रुतौ श्रुतम् ।
प्रागविद्वान् य एवाशो यतः स्यात्तस्य साधने ॥
निरुद्धे चेतसि पुरा सविकल्पसमाधिना ।
निर्व्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥
युत्थिते खतखाद्ये द्वितीये परबोधितः ।
अन्ते युत्थिते नैव सदा भवति तन्मयः ॥
एवम्भूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनाम्
गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च कथ्यते ॥
अतिवर्णाश्रमी जीवन्मुक्त आत्मरतिस्तथा ।
एतस्य कृतकृत्यत्वात् शास्त्रमस्मान्निवर्त्तते ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इत्यादिश्रुतिमानेन कायेन मनसा गिरा ।
सर्व्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते ॥
पूर्व्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत् ।
अन्यथा विघ्नबाहुल्यात् फलसिद्धिः सुदुर्लभा ॥
पूर्व्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः ॥
यदि प्राग्भवसंस्कारस्यान्यत्वात्तु कस्यचित् ।
प्रागेव कृतकृत्यः स्यादाकाशफलपातवत् ॥
न तं प्रति कृतार्थत्वाच्छास्त्रमारब्धुमिष्यते ।
प्राक्सिद्धसाधनाभ्यासाद्दुर्ज्ञेया भगवत्कृपा ॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये ।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति ॥
जीवन्मुक्तिदशायान्तु न भक्तेः फलकल्पना ।
अदृष्टादिवत्तेषां स्वभावो भजनं हरेः ॥
आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्व्वन्त्यहैतुकीं भक्तिमित्यंभूतगुणो हरिः ॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
इत्यादिवचनात् प्रेमभक्तोऽयं मुख्य उच्यते ॥
एतत् सर्वं भगवता गीताशास्त्रे प्रकाशितम् ।
अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम् ॥
निष्कामकर्मानुष्ठानं मूलं मोक्षस्य कीर्तितम् ।
शोकादिरासुरः पाप्मा तस्य च प्रतिबन्धकः ॥
यतः स्वधर्मविभ्रंशः प्रतिषिद्धस्य सेवनम् ।
फलाभिसन्धिपूर्वा वा साहङ्कारा क्रिया भवेत् ॥
आविष्टः पुरुषो नित्यमेवमासुरपाप्मभिः ।
पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम् ॥
दुःखं स्वभावतो हेयं सर्वेषां प्राणिनामिह ।
अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥
अनादिभवसन्तानजनि(गू)रूढं दुःखकारणम् ।
दुस्त्यजं शोकमोहादि कैनोपायेन हीयताम् ॥
एवमाकाङ्क्षयाविष्टं पुरुषार्थोन्मुखं नरम् ।
बुबोधयिषुराहेदं भगवान् शास्त्रमुत्तमम् ॥")
एतदन्याः श्रीभागवतोक्तगोपीगीताध्यात्मरामायणोक्तरामगीताऽष्टमेधिकपर्व्वोक्ते ब्राह्मणगीतानुगीते देवीभागवतोक्तभगवतीगीता शिवगीता इत्याद्याः सन्ति ॥

गीतासारः, पुं, (गीतासु सारः गीतानां वेदान्तादिशास्त्राणां वा सारो यत्र इति वा. सुकृर्थं संचेपेण समस्तयोगज्ञानादिप्रतिपादकशास्त्राणां सारार्थो गीतो यत्र इति तात्पर्य्यार्थः.) अर्जुनं प्रति श्रीकृष्णोक्तसुकृर्याष्टाङ्गादियोगः. । यथा,—

श्रीभगवानुवाच ।
"गीतासारं प्रवक्ष्यामि अर्जुनायोदितं पुरा ।
अष्टाङ्गयोगं सुकृर्थं सर्ववेदान्तसारगम् ॥
आत्मलाभः परो नान्य आत्मा देहादिवर्जितः ।
रूपादिमान् हि देहोऽतः करणत्वादि लोचनम् ॥
करणत्वान्मनोऽधीनो न प्राणोऽचेतनो यतः ।
विज्ञानरहितः प्राणः सुषुप्ते हि प्रतीयते ॥
नाहमात्मा च दुःखादिसंसाराभिसमन्वयात् ।
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् ॥
वैद्युतोऽग्निरिवाकाशे हृत्स्थो ज्ञेयात्मनात्मनि ।
श्रोत्रादीनि न पश्यन्ति खं स्वमात्मानमात्मना ॥
सर्वज्ञः सर्वदर्शी च चेत्रज्ञस्तानि पश्यति ।
खानानु मनसा रश्मीन् यदा सम्यङ्नियच्छति ॥
तदा प्रकाशते ह्यात्मा घटे दीपो ज्वलन्निव ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ।
इन्द्रियाण्येन्द्रियार्थांश्च महाभूतानि पञ्च च ॥
मनो बुद्धिमहङ्कारमव्यक्तं पुरुषं तथा ।
प्रसंख्याय परावाप्तो विमुक्तो बन्धनैर्भवेत् ॥
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च ।
मनश्चैवाप्यहङ्कारे प्रतिष्ठाप्य च पाण्डव ! ॥
अहङ्कारं तथा बुद्धौ बुद्धिञ्च प्रकृतावपि ।
प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ॥
अहं ब्रह्मपरं ज्योतिः प्रसंख्याय विमुच्यते ।
द्विजादिभ्येभ्यः ख्यातो यः पुरुषः पञ्चविंशकः ॥
विवेकात् केवलीभूतः षड्विंशमनुपश्यति ।
नवद्वारमिदं गेहं त्रिगुणं पञ्चसाक्षिकम् ॥
चेत्रज्ञाधिष्ठितं विद्वान् यो वेद स वरः कविः ॥
ज्ञानयज्ञस्य सर्व्वाणि फलं नार्हन्ति षोड़शीम् ॥"
अश्वमेधसहस्राणि वाजपेयशतानि च ।

इति गारुड़े २३३ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"यमाश्च नियमाः पार्थ ! आसनं प्राणसंयमः ।
प्रत्याहारस्तथा ध्यानं धारणार्ज्जुन ! सप्तमी ॥
समाधिरयमष्टाङ्गो योग उक्तो विमुक्तये ।
कर्म्मणा मनसा वाचा सर्व्वभूतेषु सर्व्वदा ॥
अक्लेशजननं प्रोक्तं भूतानां यदहिंसनम् ।
अहिंसा परमो धर्म्मो ह्यहिंसा परमं सुखम् ॥
विधिना या भवेद्धिंसा ह्यहिंसा सा प्रकीर्त्तिता ।
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ॥
सर्व्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं सर्व्वं हि हिंसायां धर्म्मार्थमपिधीयते ॥
यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणम् ।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ॥
प्रियञ्च नानृतं ब्रूयात् एष धर्म्मः सनातनः ।
यच्च द्रव्यापहरणं चौर्य्यादाथ बलेन वा ॥
स्तेयं तस्यानाचरणमस्तेयं धर्म्मसाधनम् ।
कर्म्मणा मनसा वाचा सर्व्वावस्थासु सर्व्वदा ॥
सर्व्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ।
द्रव्याणामप्यनादानमापत्स्वपि यथेच्छया ॥
अपरिग्रहमित्याहुस्तं प्रयत्नेन वर्ज्जयेत् ।
द्विधा शौचं बाह्यमाभ्यां बाह्यं भावादथान्तरम् ॥
यदृच्छालाभतस्तुष्टिः सन्तोषः सुखलक्षणम् ।
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः ॥
शरीरशोषणं वापि कृच्छ्रचान्द्रायणादिभिः ।
वेदान्तश्रुतरुद्रीयप्रणवादिजपं बुधाः ॥
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ।
स्तुतिस्मरणपूजादिवाङ्मनःकायकर्म्मभिः ॥
सुनिश्चला हरौ भक्तिरेतदीश्वरचिन्तनम् ।
आसनं स्वस्तिकं प्रोक्तं पद्मसंज्ञमथ तथा ॥
प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम् ।
प्राणापाननिरोधस्तु प्राणायाम उपस्थितः ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
नियमः प्रोच्यते सद्भिः प्रत्याहारस्तु पाण्डव ! ॥
मूर्त्तामूर्त्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत् ॥
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायुतम् ।
नाले चाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥
सकर्णिके केशरालं सूर्य्यसोमाग्निमण्डलम् ।
अग्निमण्डलमध्यस्थो वासुदेवश्चतुर्भुजः ॥
शङ्खचक्रगदापद्मयुक्तः कौस्तुभसंयुतः ।
वनमाली कौस्तुभेन युतोऽहं ब्रह्ममुक्त ओम् ॥
धारणेत्युच्यते चेयं धार्य्यते यन्मनोऽत्रये ।
प्राङ्मुखां हृदये चाथ तृतीया च तथोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणादेशकीर्त्तिता ॥
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
एकाकारः समाधिः स्याद्देशलक्षणवर्ज्जितः ॥"

इति गारुड़े २३४ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"ब्रह्मगीतां प्रवक्ष्यामि यां ज्ञात्वा मुच्यते भवान् ।
अहं ब्रह्मासीति वाक्याज्ज्ञानान्मोक्षो भवेन्नृणाम् ॥
वाक्यज्ञानं भवेज्ज्ञानाद्दृश्यब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ॥
वाच्यौ दृश्यबलौ ज्ञेयौ लक्ष्यौ शुद्धौ प्रकीर्त्तितौ ।
प्राणपिण्डात्मकार्य्येण चेतनं शरणन्तु यत् ॥
तथा वै देवपर्य्यन्तमहं शब्देन नोच्यते ।
प्रत्ययोपमहितीयमहं शब्देन भण्यते ॥
अद्वयानन्दचैतन्यं परोक्षसहितं परम् ।
प्राणपिण्डात्मकापार्थसहितीयविभागकम् ॥
त्यागेन प्रत्यक्चैतन्यभागो लक्ष्यते चाहमा ।
तथा ब्रह्मपदेनैव प्राणपिण्डात्मकारणा ॥
विद्यापरोक्षभागे च परित्यागे च लक्ष्यते ।
अद्वयानन्दचैतन्यभाग एवं विचिन्तयेत् ॥
अहंपदेन चैतन्यप्रत्यग्ब्रह्मपदेन तु ।
अद्वयानन्दचैतन्यं लक्षयित्वा स्थितस्य च ॥
ब्रह्माहमस्म्यहं ब्रह्म अहंब्रह्मपदार्थयोः ।
अहं ब्रह्मासि वाक्याच्च आत्मभूतिफलात्मकम् ॥
एकत्वज्ञानच भवेद्वेदान्ताद्गुरुतो ध्रुवम् ।
ज्ञानादज्ञानताकार्य्यनिवृत्तेर्भुक्त एकतः ॥"

इति गारुड़े २३५ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"सम्भवियब्रह्मतः खं स्यात् खाभ्रस्तांस्ततोऽनलः ।
अग्नेरापस्ततः पृथ्वी प्रपञ्चीकृतभूतकम् ॥
ततः सम्भवं लिङ्गं पञ्च कर्म्मेन्द्रियाणि च ।
वाक्पाणिपादं पायुश्च उपस्थमथ धीन्द्रियम् ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं स्यात् पञ्च वायवः ।
प्राणोऽपानः समानश्च व्यानश्चूदान एव च ॥
मनो धीरन्तःकरणं स्यान्मनः संशयात्मकम् ।
बुद्धिर्निश्चयरूपा तु एतत्सूक्ष्मशरीरकम् ॥
हिरण्यगर्भमात्मीयं भूततत्कार्य्यलिङ्गकम् ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूतकः ॥
पञ्चीकृतेभ्यो भूतेभ्यो ब्रह्माण्डं समजायत ।
लोकप्रसिद्धं स्थूलाख्यं शरीरचरणादिमत् ॥
पञ्चीकृतानि भूतानि तत्कार्य्यञ्चाहमेव च ।
सर्वं शरीरजातञ्च प्राणिनां स्थूलमीरितम् ॥
तीराड्डपरतात्मानः शरीरं प्रोच्यते बुधैः ।
देहद्वयाभिमानी च त्वमर्थो जीव एकतः ॥
सच्छब्दवाच्यं ब्रह्मैव प्रविष्टं देहयोर्द्वयोः ।
जलार्कवद्घटखवज्जीवैः प्राणादिधारणात् ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षी जीवः स च स्मृतः ।
जाग्रत्स्वप्नसुषुप्ताख्यैर्यतिरिक्तश्च निर्गुणः ॥
निर्गतावयवोत्सर्गो नित्यशुद्धस्वभावकः ।
परमात्मैव सञ्जायत्स्वप्नादौ सन्निधानतः ॥
अन्तःकरणरागेण अन्तःकरणसंस्थितः ।
जाग्रत्स्वप्नसुषुप्तीश्च पश्यतोऽचिन्तः सदा ॥
फलं क्रियाकारकयोर्व्याप्यादीन् वदाम्यहम् ।
इन्द्रियैरनुविज्ञानं जाग्रत्स्थानमुदीरितम् ॥
जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः ।
स्वप्नं प्रसूतिश्चरणोपसंहारोऽधिपः स्थितः ॥

ब्रह्मकारणरूपेण वटस्य कणिकात्मना ।
क्रमते क्रमतो जीवो जाग्रदादीन् स पश्यति ॥
समाधारम्भकाले तु पूर्व्वमेवावधारयेत् ।
सुसुप्तः पश्चात् संजाते अन्तःकरणनिश्चले ॥
विलापयेत् क्षेत्रजातं क्षेत्रज्ञं परिशोषयेत् ।
पञ्चीकृतेभ्यो भूतेभ्यः अण्डादियतिरिक्तकम् ॥
यथा घटो घटो भिन्नो नास्ति तत्कार्य्यतस्तथा ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
समष्टियतिरेकेण शिष्टं सूक्ष्मशरीरकम् ।
अपञ्चीकृतभूतेभ्यो न लिङ्गं यतिरिक्तकम् ॥
पृथ्वी वारि विना नास्ति वारि नास्ति च तेजसा ।
तेजश्च वायुना नास्ति वायुः खेन विना न हि ॥
सदब्रह्मणा च खं नास्ति शुद्धब्रह्म विना च सत् ।
शुद्धभावात्तथा जाग्रत्स्वप्नादीनामसम्भवे ॥
जीवत्ववर्जितः प्रत्यगात्मा वै तनुरूपकः ।
नित्यशुद्धबुद्धमुक्तं सत्यं ब्रह्माद्वितीयकम् ॥
तत्त्वंपदार्थौ शिष्टौ तच्चाकारो ब्रह्मकारकः ।
उकारश्च अकारश्च मकारोऽहं त्रयात्मकः ॥
अस्माहमस्माद्ब्रह्म ज्ञानमज्ञानमर्द्दनम् ।
अयमात्मा ब्रह्मज्योतिर्विज्ञानानन्दरूपकम् ॥
सत्यज्ञानमनन्तं स तत्त्वमसि श्रुतीरितम् ।
अहं ब्रह्मास्मि ब्रह्माहं सर्व्वप्राणिषु सर्व्वगम् ॥
योऽसावादित्यपुरुषः सोऽसावहमनादिमत् ।
गीतासारोऽर्जुनायोक्तो येन ब्रह्मणि वै लयः ॥"
इत्यादिमहापुराणे गारुड़े गीतासारे २३६ अध्यायः ॥

गीतिः, स्त्री, (गै गाने + क्तिन् ।) गानम् । (यथा, कुमारे । ३ । ४० ।
"श्रुताक्षरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसंख्यानपरो बभूव ॥")
आर्य्याच्छन्दोविशेषः । इति मेदिनी । ते १६ ॥ (अस्या लक्षणं यथा छन्दोमञ्जर्य्यां मात्रावृत्ते । ७ । [गीतिः ॥")
"आर्य्याप्रथमार्द्धसमं यस्याः परार्द्धमीरिता

गीरथः, पुं, (गीर्वाणी वाङ्मयं ग्राह्यमित्यर्थः रथ इव यस्य ।) ब्रह्मणः । इति त्रिकाण्डशेषः ॥

गीर्णः, त्रि, (गीर्य्यते स्म इति । गॄ गि स्तुतौ + क्तः ।) स्तुतः । इत्यमरटीकायां भरतः ॥

गीर्त्तिः, स्त्री, (गॄ + क्तिन् । ऋत्व्यादिभ्यः क्तिन्निष्ठावत् तेन नत्वम् ततो रेफात् णत्वञ्च ।) गिलनम् । इत्यमरः । ३ । ३११ ॥ स्तुतिश्च । गीर्वाणशब्ददर्शनात् ॥

गीर्देवी, स्त्री, (गीर्वाणी तस्या देवी । वागधिष्ठातृतत्त्वास्तथात्वम् ।) सरस्वती । इति शब्दरत्नावली ॥

गीर्लता, स्त्री, (गीरिव तमोनाशिनी विस्तृता च लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

गीर्(र्व्वा)र्व्वाणः, पुं. (गीर्वाणेव वाणोऽस्त्रं यस्य । अयथार्थवाक्यतयास्य तथात्वम् । अन्तःस्थवकारमध्यपाठे तु गिरं वदति याचते काङ्क्षतीत्यर्थः स्तुतिप्रियत्वादिति । वन याच्ञायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) देवता । इत्यमरः । १ । १ । ६ ॥ (यथा, भागवते । ८ । १५ । ३२ ।
"एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गीर्(र्व्वा)र्व्वाणाः कामरूपिणः ॥")

गीर्(र्व्वा)र्व्वाणकुसुमं, क्ली,(गीर्(र्व्वा)र्व्वाणप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

गीष्पतिः, पुं, (गिरां पतिः । अक्षरादीनामिति रेफाभावपक्षे "इडुडुपधस्येति ।" ८ । ३ । ४१ । इति षः । सुग्धबोधमते "खपि वा ।" इति सूत्रस्य प्राच्यिको विधिः ।) बृहस्पतिः । इत्यमरः । १ । १ । २४ ॥ पण्डितः । इति शब्दरत्नावली ॥ अस्य रूपान्तरे गीष्पतिः गीःपतिः । इति सुग्धबोधम् ॥

गु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, गवते । इति दुर्गादासः ॥

गु, शि ओ विष्ठोत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-अनिट् ।) शि, गुवति अगुवीत् । ओ, गुणः । इति दुर्गादासः ॥

गुग्गुलः, पुं, (गोजति ग्रन्थायतेऽनेनेति । गुज् + क्विप् । गुक् रोगस्तस्मात् गुडति रक्षतीति । गुड + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । डलयोरैक्यात् डस्य लत्वम् ।) गुग्गुलुः । इत्यमरटीकायां भरतः ॥

गुग्गुलुः, पुं, (गुज्यतेऽनेनेति । गुज ग्रन्थे + क्विप् । गुक् रोगस्तस्मात् गुडतीति । गुड रक्षणे + बाहुलकात् कुः । डलयोरैक्यात् डस्य लत्वम् ।) रक्तगोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ स्वनामख्यातवृक्षः । स तु गोमूत्रोद्भवः । यथा,—
"गोरोचनाया मञ्जल्याः संजाताः सर्व्वकामिकाः ।
गुग्गुलुस्तु ततो जातो गोमूत्राच्छुभदर्शनः ॥"
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिव्रतनामाध्यायः ॥ अस्य निर्य्यासः सुगन्धिद्रव्यम् । तत्पर्य्यायः । कुम्भम् २ उलूखलकम् ३ कौशिकः ४ पुरः ५ ॥ इत्यमरः । २ । ४ । ३४ ॥ कुम्भोलुः ६ खलकम् ७ कुम्भोलूखलकम् ८ गुग्गुलः ९ । इति भरतः ॥ जटायुः १० कालनिर्य्यासः ११ देवधूपः १२ सर्व्वसहः १३ महिषाक्षः १४ पलङ्कषा १५ । इति रत्नमाला ॥ यवनेष्टः १६ भवाभीष्टः १७ निशाटकः १८ जटालः १९ पुटः २० भूतहरः २१ शिवः २२ शाम्भवः २३ दुर्गः २४ यातुघ्नः २५ महिषाक्षकः २६ देवेष्टः २७ मरुद्दिष्टः २८ रक्षोघ्नः २९ रूक्षगन्धकः ३० दिव्यम् ३१ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुतकासक्रमिवातोदरक्लेदग्रहोपाग्नीनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ दीपनत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मेदःकुष्ठनाशित्वम् । पित्तदाहित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ विशदत्वम् । सारकत्वम् । रूक्षत्वम् । पाके कटुत्वम् । भग्नसन्धानकारित्वम् । दृष्यत्वम् । सूक्ष्मत्वम् । सर्य्यत्वम् । पिच्छिलत्वम् । वलकारित्वम् । व्रणमेहाश्मवातामवातपिड़कागन्थिगण्डमालानाशित्वञ्च ॥ * ॥
"माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्व्वदोषहा ॥"
स तु पञ्चधा यथा,—
"महिषाक्षो महानीलः कुसुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्चजातयः ॥"
तेषां रूपाणि यथा,—
"भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुसुदः कुसुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याख्यस्तु हैमाभः पञ्चानां लिङ्गमीरितम् ॥"
एषां प्राणिविशेषे प्रयोगो यथा,—
"महिषाक्षमहानीलौ गजेन्द्राणां हितावुभौ ।
हयानां कुसुदः पद्मः स्वस्यारोग्यकरौ परौ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥"
नूतनगुग्गुलो रूपं यथा,—
"स्निग्धकाञ्चनसङ्काशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥"
पुरातनस्य रूपं यथा ।
"शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्व्वीर्य्यवर्जितः ॥"
इति भावप्रकाशः ॥ * ॥
अस्य स्थानविशेषे जन्मादिकथनम् । यथा,—
"जायन्ते पुरपादपा मरुभुवि श्रीशैर्कसन्तापिताः
शीतार्त्ताः शिशिरेऽपि गुग्गुलुरसं सुस्रन्ति ते पञ्चधा ।
हैमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं
भृङ्गाभं कुसुदद्युतिञ्च विधिना ग्राह्या परीक्षा ततः ॥
वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्लिद्यन्ति कोष्णसलिले पयसः समानाः ।
ग्राह्याः शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्णसमपूयविगन्धवर्णान् ॥"
इति प्रयोगरत्नम् ॥
पक्वस्यास्य पूर्व्ववीर्य्यत्वं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥

गुच्छः, पुं, (गुध्यति परिवेष्टते इति । गुध् + "गुधृवीप्रकम्पने ।" इति क्सः इति भोजराजः । यद्वा, गुछ ग्रन्थे + क्विप् । गुतं ग्रन्थं छति नाशयतीति । गुत् + छो + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) स्तबकः । पुष्पादिर्बहुधा इति भाषा । (यथा, गीतगोविन्दे । १ । ११ । [बलीम् ॥")
"अक्षणोर्निक्षिपदञ्जनं श्रवणयोस्तापिञ्छगुच्छावतंसः । इत्यादि गोछा इति भाषा ॥ (उद्भिद्विशेषः । स तु मल्लिकादिः । यथा, मनुः । १ । ४८ ।
"गुच्छगुल्मं तु विविधं तथैव तृणजातयः ।"
"मूलत एव यत्र लतासन्दोहो भवति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) हारविशेषः । यष्टिग्र-

नर हार इति भाषा ॥ कलापः । इति मेदिनी । छे । ३ ॥ मयूरेर पाखा इति भाषा । मुक्ताहारः । इति रन्तिदेवः ॥

गुच्छकं, क्ली, (गुच्छ + संज्ञायां कन् ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥

गुच्छकः, पुं, (गुच्छ + स्वार्थे कन् ।) स्तवकः । इत्यमरः । २ । ४ । ३४ ॥ तत्पर्य्यायः । गुलच्छः २ स्तम्बः ३ कुसुमोच्चयः ४ गुच्छः ५ । इति राजनिर्घण्टः ॥ गुत्सः ६ गुत्सकः ७ । इत्यमरटीकायां भरतः ॥ राठाकरञ्जः । इति राजनिर्घण्टः ॥ स्वार्थे कप्रत्ययात् गुच्छग्रन्थ्यर्थोऽप्यत्र ॥

गुच्छकणिशः, पुं, (गुच्छवत् कणिशानि मञ्जर्यो यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

गुच्छकरञ्जः, पुं, (गुच्छः स्तवकः करञ्जफले यस्य ।) करञ्जविशेषः । तत्पर्य्यायः । स्निग्धदलः २ गुच्छपुष्पकः ३ नन्दी ४ गुच्छी ५ सागन्दः ६ दन्तधावनः ७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्शिकण्डूविचर्चिकाकुष्ठसर्पत्वग्दोषनाशित्वञ्च ॥" इति राजनिर्घण्टः ॥

गुच्छदन्तिका, स्त्री, (गुच्छाः स्तवकीभूता दन्ता इव फलानि यस्याः । कप् टाप् अत इत्वञ्च ।) कदली । इति राजनिर्घण्टः ॥

गुच्छपत्रः, पुं, (गुच्छीभूतानि पत्राणि यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

गुच्छपुष्पः, पुं, (गुच्छीभूतानि पुष्पाणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (अशोकवृक्षः । अस्य पर्य्याया यथा,—

"हेमपुष्पस्वशोकश्च गुच्छपुष्पोऽङ्गनाप्रियः ॥"

इति वैद्यकरत्नमालायाम् ॥)

गुच्छपुष्पकः, पुं, (गुच्छपुष्प + संज्ञायां कन् ।) रीठाकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुच्छपुष्पी, स्त्री, (गुच्छपुष्प + जातौ ङीष् ।) धातकी । ग्रन्थिपर्णवृक्षः । इति राजनिर्घण्टः ॥

गुच्छफलः, पुं, (गुच्छीभूतानि फलानि यस्य ।) रीठाकरञ्जः । राजादनी । कतकः । इति राजनिर्घण्टः ॥ (राजादनशब्दोऽस्य गुणादयो ज्ञातव्याः ॥

गुच्छफला, स्त्री, (गुच्छीभूतानि फलानि यस्याः । स्त्रियां टाप् ।) अग्निदमनी । काकमाची । निष्पावी । द्राक्षा । कदली । इति राजनिर्घण्टः ॥

गुच्छबध्रा, स्त्री, (गुच्छेन बध्यते इति । बन्ध + बाहुलकात् रक् । ततष्टाप् ।) गुच्छालावृक्षः । इति राजनिर्घण्टः ॥

गुच्छमूलिका, स्त्री, (गुच्छाकृति मूलमस्याः । कप् स्त्रियां टाप् अत इत्वञ्च ।) गुच्छासिनीलक्षणम् । इति राजनिर्घण्टः ॥

गुच्छार्द्धः, पुं, (गुच्छस्य इवार्द्धं यष्टिकाहारस्य अर्द्धः । श्यामार्द्धवत् समासः ।) चतुर्विंशतियष्टिको हारः । इत्यमरः । २ । ६ । १०५ ॥

(पुंलिङ्गनिर्देशादेवास्य तथात्वम् । क्लीवलिङ्गे तु "पुंस्यर्द्धोऽर्द्धं समेऽग्रके ।" इत्यमरोक्तेः षोड़शयष्टिकहारो बोद्धव्य इतितु सुधीभिर्विभाव्यम् ॥)

गुच्छालः, पुं, (गुच्छेन अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) भूलक्षम् । इति राजनिर्घण्टः ॥

गुच्छाङ्कन्दः, पुं, (गुच्छाङ्को गुच्छसंज्ञकः कन्दः ।) गुलच्चकन्दः । इति राजनिर्घण्टः ॥

गुच्छी, स्त्री, (गुच्छ + जातौ ङीष् ।) गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुज, कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट ।) पञ्चमस्वरी । गौजति । कूजनमव्यक्तशब्दः । इति दुर्गादासः ॥

गुज, इ कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी । इ, कर्म्मणि गुज्यते । कूजनमव्यक्तशब्दः । गुञ्जति भ्रमरः कुञ्जे । इति दुर्गादासः ॥

गुज, शि ध्वनौ । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-सेट् ।) शि, गुजति अगुजीत् जुगोज । इति दुर्गादासः ॥

गुज्जरी, स्त्री, (गुर्ज्जरदेशवासिनां प्रिया । गुर्ज्जर + अण् + स्त्रियां ङीप् । एषोदरादिरलोपे वृद्ध्याभावे च साधुः ।) रागिणीविशेषः । अस्य ध्यानं यथा, सङ्गीतदर्पणे ।

"श्यामा सुकेशी मलयद्रुमाणां
मूलप्रसूनपल्लवतल्पयाता ।
श्रुतेः स्वरांशां दधती विभागं
तन्त्रीसुखाद्यन्त्रिणगुज्जरीयम् ॥"

अस्याः कालनियमो यथा,—

"नाटो गौड़ो वड़ारी च गुज्जरी देशिरव च ।
पूर्व्वाह्णे गानमेतेषां निशिद्धमिति तद्विदः ॥"

इति सङ्गीतदामोदरः ॥

मतभेदेन पूर्व्वाह्णेऽपि गीयते ॥ (इयंपुनर्भैरवरागस्य वराङ्गना । हनुमन्मते तु मेघरागस्य । अस्याः स्वरूपं यथा, सङ्गीतदर्पणे ।

"ग्रहांशन्यास-षभा सम्पूर्णा गुर्ज्जरी मता ।
पौरवी मूर्च्छना यस्यां वङ्गाल्या सह मिश्रिता ॥"

"पौरवीमूर्च्छना यस्याम् ।" इत्यत्र "सप्तमी मूर्च्छनेतस्याम् ।" इति क्वचित् पाठः । सोमेश्वरमते इयं पञ्चमहीना षाड़वा । इयञ्च केनापि कारणेन रागविकारे जाते तत्पापप्रायश्चित्तार्थं प्रायेण गीयते तथाचोक्तम्,—

"लोभान्मोहाच्च ये केचिद् गायन्ति च विरागतः ।
सुरसा गुर्ज्जरी तस्य दोषं हन्तीति कथ्यते ॥")

गुञ्जः, पुं, गुञ्जन्ति भ्रमरादयो यत्र गुञ्ज + अधिकरणे घञ् ।) गुच्छः । पुष्पस्तवकः । इति शब्दरत्नावली ॥

गुञ्जकृत्, पुं, (गुञ्जं गुञ्जनं करोतीति । कृ + क्विप् तुक् च ।) भ्रमरः । इति शब्दचन्द्रिका ॥

गुञ्जनं, क्ली, (गुञ्जि कूजने + भावे ल्युट् ।) गुञ्जु-गुञ्जध्वनिः । भ्रमरादिशब्दः ।

(किमिदं गुञ्जनं सख्यः षट्पदानां मनोहरम् ।)

गुञ्जा, स्त्री, (गुञ्जतीति । गुञ्जि + अच् । अस्याः पक्वफलगुच्छे शब्दवाहुल्यात्तथात्वम् ।) लताविशेषः ॥ कुँच इति भाषा ॥ तत्पर्य्यायः । काकचिञ्ची २ कृष्णला ३ । इत्यमरः । २ । ४ । ६८ ॥ साङ्कुष्ठा ४ रक्तिका ५ काकणन्तिका ६ काकादनी ७ काकतिक्ता ८ काकजङ्घा ९ ग्रिखण्डिनी १० । इति रत्नमाला ॥ चूड़ामणिः ११ सौम्या १२ ग्रिखण्डी १३ अरुणा १४ ताम्रिका १५ ग्रीतपाकी १६ उच्चटा १७ कृष्णचूड़िका १८ रक्ता १९ कामोजी २० भिल्लभूषणा २१ वन्या २२ श्यामलचूड़ा २३ काकचिञ्चिका २४ । अस्या बीजगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । इति राजनिर्घण्टः ॥ कुष्ठव्रणनाशित्वम् । इति राजवल्लभः ॥ अस्याः ग्रिफागुणः । वान्तिकारित्वम् । मूलविषनाशित्वञ्च । वश्यकर्म्मणि श्वेता प्रशस्ता । इति राजनिर्घण्टः ॥ * ॥ (इयन्तु श्वेतरक्तभेदेन द्विविधम् । यदुक्तं भावप्रकाशे ।

"श्वेतरक्तप्रभेदेन ग्रेयं गुञ्जाद्वयं बुधैः ।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम् ॥
मुखशोषश्रमश्वासतृष्णामदविनाशनम् ।
नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् ॥
क्षमोन्मत्तप्रकुष्ठानि रक्ता च धवलापि च ॥"

श्वेतगुञ्जा तु अभिचारकर्म्मणि प्रशस्ता । यथा, नवदुर्गामन्त्राभिचारे ।

"जपित्वा सितगुञ्जानां कुडवं कुलिकोदये ॥"

इत्यादि ॥

गुञ्जाफलन्तु विषप्रायत्वात् कदापि स्वयंनैव भोक्तव्यम् । अस्या विषमयत्वसूक्तं यथा, पद्मतन्त्रे । ४ । ५८ ।

"अन्तर्विषमया श्वेता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥")

चतुर्यवपरिमाणम् । इति इति भाषा । (यथा,—

"यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥"

इति ग्राद्धरेपूर्व्वखण्डे प्रथमेऽध्याये ॥)

चतुर्धान्यपरिमाणम् । इति शब्दरत्नावली ॥ गोधूमद्वयमाषम् । इति राजनिर्घण्टः ॥ (गुञ्जति शब्दायते इति । कर्त्तरि अच् ।) पटहः । (गुञ्जनमिति । गुञ्जि + भावे अप् ।) कलध्वनिः । इति मेदिनी ॥ (गुञ्जते भ्रमरादिभिर्मद्यपायिभिर्वा यत्र + अधिकरणे अप् घञ् वा ।) मदिरागृहम् । इति शब्दरत्नावली ॥ चर्चा । इति त्रिकाण्डशेषः ॥

गुञ्जिका, स्त्री, (गुञ्जा एव । स्वार्थे कन् । अत इत्वम् ।) गुञ्जा । त्रियवपरिमाणम् । इति शब्दचन्द्रिका ॥ (गुञ्जाशब्दे विवरणमस्या ज्ञातव्यम् ॥)

गुञ्जितं, क्ली, (गुञ्ज + भावे क्तः ।) गुञ्जनम् । यथा,

"न गुञ्जितं तन्न जहार यन्मनः ॥"

इति भट्टिः । २ । १६ ॥

गुटिका, स्त्री, (गुटिरेव । गुटि + स्वार्थे कन् ।) वटिका । गुलि इति वड़ि इति च भाषा ॥ यथा, "गुटिकापातादिना शब्दनम् ।" इति दायभागः ॥

गुठ, इ क वेष्टे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इस्त्री। इ क, गुण्ठयति अगु गुठत्। इति दुर्गादासः॥

गुड़, इ क वेष्टे। रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, गुण्डयति। अनेकार्थत्वाच्चूर्णीकरणेऽपि। गुण्डयति हिङ्गुलं लोकः। इति दुर्गादासः॥

गुड़, गि रक्षे। आघाते। इति कविकल्पद्रुमः॥ (तुदां-(कुटां)-परं-सकं-सेट्।) गि, गुड़ति अगुड़ीत्। इति दुर्गादासः॥

गुड़ः, पुं. (गवते अव्यक्तशब्दं करोतीति। गु ड शब्दे+"कादिभ्यः कित्।" उणां। १। ११४। इति डः स च कित्।) गोलः। हस्तिसन्नाहः। इति मेदिनी। डे। १०॥ आसः। इति हेमचन्द्रः॥ कार्पासी। इति राजनिर्घण्टः॥ इक्षुपाकः। इत्यमरः। २। ३। ४१। तस्य पर्य्यायः। इक्षुसारः २ मधुरः ३ रसपाकजः ४ खण्डजः ५ द्रवजः ६ सिद्धः ७ मोदकः ८ अग्रतसारजः ९ शिशुप्रियः १० सितादिः ११ अरुणः १२ रसजः १३। इति राजनिर्घण्टः॥ इक्षुरसकाथः १४ गण्डोलः १५ मधुवीजकः १६। इति वैद्यकम्॥ गण्डोलम् १७ गुलः १८ स्वादुखण्डः १९। इति शब्दरत्नावली॥ स्वादुः २०। इति त्रिकाण्डशेषः॥ अस्य गुणाः। हृद्यत्वम्। स्निग्धत्वम्। गुरुत्वम्। वातनाशित्वम्। मूत्रशोधनत्वम्। नातिपित्तहरत्वम्। मेदःकफकृमिबलप्रदत्वञ्च। इति राजवल्लभः॥ मधुरत्वम्। क्षारत्वम्। उष्णत्वम्। कफनाशित्वम्। पित्तरक्ते अहितत्वम्। जीर्णे चैव रसायनः॥ पुरातनस्य तस्य गुणाः। पित्तपवनार्शःक्रिदोषपाण्डुप्रमेहश्रमनाशित्वम्। द्रव्यान्तरसंयोगेन विशेषतो ज्वरनाशित्वम्। रुचिकारित्वम्। हृद्यत्वम्। सन्तापशान्तिप्रदत्वम्। विण्मूत्रामयशोधनत्वम्। अग्निजननत्वम्। स्निग्धत्वम्। स्वादुतरत्वम्। लघुत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ अधिकगुणत्वम्। रक्तप्रसन्नबलकारित्वम्। मधुरत्वञ्च। इति राजवल्लभः॥ यावनालरसपाकभवगुड़गुणाः। क्षारत्वम्। कटुत्वम्। मधुरत्वम्। कफवातनाशित्वम्। पित्तप्रदत्वम्। सततनिषेवणेन कण्डूतिकुष्ठजननत्वम्। जनन इत्यत्र ग्रसन इति क्वचित् पाठः। अस्रविदाहदायित्वञ्च। इति राजनिर्घण्टः॥*॥

"इक्षो रसो यः संपक्को जायते लोहवद्दृढः।
स गुड़ो गौड़देशे तु मत्स्यण्डोऽत्र गुड़ो मतः॥
श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च सदैव हरीतकीभिः।
शुण्ठ्या समं हरति वातमशेषमित्थं
दोषत्रयघ्नकराय नमो गुड़ाय॥
इति भावप्रकाशः॥

("वल्यो बल्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः।
नातिपित्तहरो मेध्यः कफकृन्मिकरो गुड़ः॥
पित्तघ्नो मधुरः शुद्धो वातघ्ना मूत्रशोधनः।
स पुराणोऽधिकगुणो गुल्माग्नीरोचकापहः॥
क्षये कासे क्षतक्षीणे पाण्डुरोगेऽरुचौ क्षये।
हितो योगेन संयुक्तो गुड़ः पथ्यतमो मतः॥
गुदामये कामलप्लीहमेहे
गुल्लामये पाण्डुहलीमके च।
वाते सपित्तास्रजि राजरोगे
रुचिप्रदो रोगहरो गुड़ः स्यात्॥
कासे श्लीपे गुड़ो नेष्टः अन्यत्रापि हितो मतः।
योगयुक्तोऽपि सर्व्वत्र हितो गुणगणो नयः॥
श्यामक्षीणे पवनकुपिते श्वासमूर्च्छातुराणां
अध्वश्रान्तश्रमदविषि क्षतक्षीणाश्मरीणाम्।
जीर्णः श्यामज्वरविषमगे रक्तपित्तप्रकोपे
क्षणादाहक्षयरुधिरगे सर्व्वरोगान्निहन्ति॥"
इति गुड़गुणाः॥

इति हारीते प्रथमस्थानेऽष्टमेऽध्याये॥*॥

गुड़कः, पुं, (गुड़ेन पक्वः। गुड़+बाहुलकात् कः। यद्वा, गुड़ेन कायतीति। के+कः।) गुड़द्वारा पक्वौषधविशेषः। अस्य पूर्णतेजः षण्मास पर्य्यन्तं तिष्ठति। इति परिभाषा॥ (गुड़ एव। स्वार्थे कन्। गोलाकृतिः। यथा, महाभारते। ३। १५। ८।
"सक्तुशुष्कान्नगुड़का सायुधा सपरश्वधा॥"
"अन्नगुड़का वर्त्तुलीकृताः प्राधान्याः।" इति तट्टीकायां नीलकण्ठः॥)

गुड़करी, स्त्री, (गुड़ं गुड़वत्सुमिष्टं श्रुतिसुखकरमित्यर्थं करोतीति। गुड़+कृ+"कृञो हेतुताच्छील्यानुलोम्येषु।" ३। २। २०। इति टः स्त्रियां ङीप्।) रागिणीविशेषः। इति हलायुधः॥

गुड़ची, स्त्री, (चि+क्विप् निपातनाद्दीर्घत्वे साधुः। गुड़वत् ची चयनं चरितोरसो यस्या इत्यर्थः। अण्डोड्डवलादेवास्यास्तथात्वम्।) गुड़ूची। इत्यमरटीकायां भरतः॥ (अस्या उत्पत्तिकथा अन्यद्विरवत्थ गुड़ूचीशब्दे द्रष्टव्यम्॥)

गुड़त्वक्, क्ली, (गुड़प्रधानं गुड़कारणं वा त्वगम्।) इक्षुः। इति राजनिर्घण्टः॥

गुड़त्विगं, क्ली, (गड़प्रधानं त्वगम्। निपातनात् साधु।) गुड़त्वगम्। इक्षुः। इति शब्दरत्नावली॥

गुड़त्वक्, [च्] क्ली, (गुड़इव मधुरा त्वगस्य।) खनामख्यातगन्धद्रव्यम्। तत्पर्य्यायः। त्वक्टम् २ भङ्गम् ३ त्वक्पत्रम् ४ वराङ्गकम् ५ त्वचम् ६ चोलम् ७ त्वक्पत्रम् ८ हृद्यम् ९ सुरभिवल्कलम् १०। इति शब्दरत्नावली॥ उत्कटम् ११ चोचम् १२। इत्यमरः। २। ४। १३४॥ त्वक् १३ पत्रम् १४ इति तट्टीका॥ अस्य गुणाः। कफशुक्रामवातनाशित्वम्। मधुरत्वम्। कटुत्वञ्च। इति राजवल्लभः॥ लघुत्वम्। उष्णत्वम्। स्वादुत्वम्। तिक्तत्वम्। रूक्षत्वम्। पित्तदृष्टिकारित्वम्। अरुचिकण्डुकृद्वस्तिधातार्शःकृमिपीनसरोगनाशित्वञ्च। इति भावप्रकाशः॥

गुड़त्वचं, क्ली, (गुड़वत् मधुरं त्वचम्।) गुड़त्वक्। राजभोग्यम्। इति शब्दचन्द्रिका॥ जयिनी इति भाषा॥

गुड़दारु, क्ली, गुड़प्रधानं गुड़कारणं वा दारु-त्वगादिः।) इक्षुः। इति त्रिकाण्डशेषः॥

गुड़धेनुः, स्त्री, (गुड़निर्म्मिता गुड़भारादिभिः कृता धेनुः।) गुड़ादिनिर्म्मिता धेनुः। यथा,—
"गुड़धेनुविधानस्य यदत्रमिह यत् फलम्।
तदिदानीं प्रवक्ष्यामि सर्व्वपापविनाशनम्॥
कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि।
गोमयेनानुलिप्तायां दर्भमास्तीर्य्य सर्व्वतः॥
लवणेनाजिनं तद्वत् वत्सस्य परिकल्पयेत्।
उदङ्मुखीं कल्पयेद्धेनुमुदीच्यान्च सवत्सकाम्॥
उत्तमा गुड़धेनुः स्यात् सदा भारचतुष्टयैः।
वहुभारेण वा कार्य्या भाराभ्यां मध्यमा स्मृता॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु।
चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः॥
धेनुवत्सौ तदा तौ तु सितसूक्ष्माम्बराहृतौ।
शुक्तिकर्णाविक्षुपादौ शुङ्गसूक्ताक्षिचेचयौ॥
सितसूत्रशिराली तु सितकम्बलकम्बलौ।
ताम्रगुड़कपृष्ठौ तु सितचामररोमकौ॥
विद्रुमभ्रूयुगस्थौ नवनीतस्तनान्वितौ॥
रौप्यपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ।
इत्येवं रचयित्वा तु धूपदीपैः समर्चयेत्॥
सर्व्वासां धेनूनामेवं विधानं ज्ञेयम्। इति भाग्ने हरिवंशखण्डम्॥

गुड़पुष्पः, पुं, (गुड़ इव मधुरं पुष्पमस्य।) मधूकवृक्षः। इत्यमरः। २। ४। २७॥

गुड़फलः, पुं, (गुड़ इव मधुरं फलमस्य।) पीलुवृक्षः। इत्यमरः। २। ४। २८॥

गुड़बीजः, पुं, (गुड़वत् मधुरं यद्वा, गुड़ं वर्त्तुलाकृति बीजं यस्य।) मस्करः। इति राजनिर्घण्टः॥

गुड़भा, स्त्री, (गुड़वत् भाति शोभते इति। भा+कः। स्त्रियां टाप्।) यावनालशर्करा। इति राजनिर्घण्टः॥

गुड़मूलः, पुं, (गुड़वत् सुमिष्टं मूलं यस्य।) अश्वमारिमशाकम्। इति शब्दचन्द्रिका॥

गुड़लं, क्ली, (गुड़ं उत्पत्तिकारणत्वेन लातीति। ला+कः।) गौड़ी मदिरा। इति शब्दचन्द्रिका॥

गुड़शर्करा, स्त्री, (गुड़जाता शर्करा।) शर्करा। तत्पर्य्यायः। पिण्टा २। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये।
"विदारी त्रिफला भीरु यष्ट्याह्वा गुड़शर्करा॥")

गुड़शिग्रुः, पुं, (गुड़ इव रक्तवर्णः शिग्रुवृक्षविशेषः।) रक्तशोभाञ्जनः। इति शब्दचन्द्रिका॥

गुड़ा, स्त्री, (गुड़+स्त्रियां टाप्।) खुड़ीवृक्षः। गुड़िका। इति मेदिनी॥ उम्बरी। इति राजनिर्घण्टः॥

गुड़ाका, स्त्री, (गुड़यति सङ्कोचयति जड़ीकरोति देहेन्द्रियादीनि योऽवस्थाविशेषः स गुड़ः तं आकायति प्रकाशयतीति। गुड़ं आलस्यं जाड्यावस्थां कायति वा। गुड़+आ+कै+कः स्त्रियां टाप्।) निद्रा। इति गुड़ाकेशशब्दव्युत्पत्तौ श्रीधर

स्वामी ॥ (आलस्यम् । इति मधुसूदनसरस्वति: ॥)

गुड़ाकेशः, पुं, (गुड़ाका निद्रा माया इत्यर्थस्तस्या ईशः ।) शिवः । (गुड़ा निद्रा आलस्यं इन्द्रियाणि वा तस्या ईशः ग्राह्या जितनिद्रो जितेन्द्रियो वा ।) अर्ज्जुनः । इति जटाधरः ॥ (यथा, गीतायाम् । १ । २४ ।

"एवमुक्तो हृषीकेशो गुड़ाकेशेन भारत ! ॥")

गुड़ाश्रयः, पुं, (आश्रयतेऽस्मिन्निति । आश्रयो वासस्थानम् । ततो गुड़स्येव मधुररसस्य आश्रयः ।) आखोटवृक्षः । इति राजनिर्घण्टः ॥

गुड़िका, स्त्री, (गुड़ा वर्त्तुलाकृतिः । स्वार्थे कन् टापि अत इत्वम् ।) गुटिका । वृहद्वटिका । यथा, वैद्यकपरिभाषा ॥

"वटिका गुटिका चेति संज्ञाभेदान्तरं मतः ।"

("चूर्णावलेहगुड़िका कल्कानामनुपानकम् ।
वातपित्तकफोद्रेके त्रिद्वैकफलमाहरेत् ॥

इति भाग्भटधरे मध्यखण्डे षष्ठेऽध्याये ॥)

गुडुची, स्त्री, (गुड़ची + निपातनादुत्वागमः ।) गुड़ूची । इति द्विरूपकोषः ॥

गुडूची, स्त्री, लताविशेषः । गुलञ्च इति भाषा ॥ तत्पर्य्यायः । वत्सादनी २ छिन्नरुहा ३ तन्त्रिका ४ अमृता ५ जीवन्तिका ६ सोमवल्ली ७ विशल्या ८ मधुपर्णी ९ । इत्यमरः ॥ गुड़ची १० । इति भरतः ॥ कुण्डली ११ चक्रलक्षणा १२ । इति रत्नमाला ॥ अमृतवल्ली १३ ज्वरारिः १४ श्यामा १५ वरा १६ सुरलता १७ मधुपर्णिका १८ छिन्नोद्भवा १९ अमृतलता २० रसायनी २१ छिन्ना २२ सोमलतिका २३ भिषक्प्रिया २४ कुण्डलिनी २५ वयःस्था २६ नागकुमारिका २७ कुण्डिका २८ चन्द्रहासा २९ । इति राजनिर्घण्टः ॥ अमृतवल्लरी ३० सुधा ३१ जीवन्ती ३२ सोमा ३३ चक्रलक्षणिका ३४ वयस्था ३५ मण्डली ३६ देवनिर्म्मिता ३७ । अस्या गुणाः । कटुत्वम् । खादुपाकित्वम् । रसायनत्वम् । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । वल्यत्वम् । अग्निदीपनत्वम् । दोषत्रयामलवृद्राहमेहकासपाण्डुकामलाकुष्ठवातासृक्वरक्तमिवमिनाशित्वञ्च । इति भावप्रकाशः ॥ गुरुत्वम् । वीर्य्यदार्ढ्यत्वम् । भ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ रक्तपित्तनाशित्वम् । इति राजवल्लभः ॥ अस्याः पत्रस्य गुणाः । आग्नेयत्वम् । सर्व्वज्वरहरत्वम् । लघुत्वम् । कषायत्वम् । कटुत्वम् । खादुपाकित्वम् । रसायनत्वम् । बलकारित्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषवृद्धाद्राहप्रमेहवातासृक्कामलाकुष्ठपाण्डुतानाशित्वञ्च । इति भावप्रकाशः ॥ घृतयुक्तायाः वातनाशित्वम् । गुड़युक्तायाः पित्तनाशित्वम् । मधुयुक्तायाः कफनाशित्वम् । एरण्डतैलयुक्तायाः उग्रवातासृनाशित्वम् । शुण्ठीयुक्तायाः आमवातनाशित्वम् । इति राजवल्लभः ॥ * ॥

अस्या उत्पत्तिर्यथा,—

"अथ लङ्केश्वरो नाम्ना रावणो राक्षसाधिपः ।
रामपत्नीं बलात् सीतां जहार मदनातुरः ॥
ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
बलं वानरसैन्येन जघान रणमूर्द्धनि ॥
हते तस्मिन् सुरारातौ रावणे बलगर्व्विते ।
देवराजः सहस्राक्षः परितुष्टोऽपि राघवे ॥
तत्र ये वानराः केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संस्मित्वाऽमृतदृष्टिभिः ॥
ततो येषु च देशेषु कपिगात्रात् परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥"

इति भावप्रकाशः ॥

(गुडूचीघृतम् । यथा,—

"गुडूचीकाथकल्काभ्यां सपयस्कं घृतं शृतम् ।
हन्ति वातं तथारक्तकुष्ठं जयति दुस्तरम् ॥

इति वैद्यकचक्रपाणिसंग्रहे वातरक्ताधिकारे ॥)

गुड़ेरः, पुं, (गुड़ति रक्षतीति गुड़ रक्षायाम् + "पतिकठिकुठिगड़ि गुड़िदंशिभ्य एरक् ।" उणां । १ । ५८ । इति एरक् । रक्षकः । इति व्युत्पत्तिलभ्योऽर्थः ।) ग्रासः । इत्युणादिकोषः ॥ गुड़कः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गुड़ेरकः, पुं, (गुड़ेर + स्वार्थे कन् ।) ग्रासः । इति हेमचन्द्रः । ३ । ८६ ॥

गुड़ोद्भवा, स्त्री, (गुड़ादुद्भवो यस्याः । यद्वा, उद्भवत्यस्मादिति उद्भवः । गुड़ उद्भवो उत्पत्तिर्यस्याः ।) शर्करा । इति राजनिर्घण्टः ॥

गुण, तृ क मन्त्रणे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) दृश्यौ । मूर्द्धन्योपधः । गुणयति । इति दुर्गादासः ॥

गुणः, पुं, (गुण्यते मन्त्र्यते मन्त्रणादिभिर्निश्चीयते राजभिरितिशेषः । गुण मन्त्रणे + घञ् ।) षट्प्रकारराजनीतिविशेषः । तद्यथा । सन्धिः १ विग्रहः २ यानम् ३ आसनम् ४ द्वैधम् ५ आश्रयः ६ ॥ (यथा, मनुः । ७ । १६० ।

"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"

एते षड्गुणास्तु नीतिविदा राज्ञा कदा केनोपायेन च प्रयोक्तव्यास्तद्विवरणादिकन्तत्रैव । ७ । १६१ । श्लोकमारभ्य द्रष्टव्यम् ॥) धनुराकर्षणरज्जुः । छिला इति भाषा । (यथा, रघुवंशे । ६ । ५४ ।

"अथ नभस इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोधितकेशरी ॥")

तत्पर्य्यायः । मौर्व्वी २ ज्या ३ शिञ्जिनी ४ शिञ्जा ५ ज्यावा ६ पतञ्चिका ७ । इति शब्दरत्नावली ॥ जीवा ८ । इति जटाधरः ॥ रज्जुः । (यथाह कश्चित् ।

"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति ॥"

सूत्रम् । यथा, आर्य्यासप्तशत्याम् । ३६६ ।

"काञ्चीगुण इव पतितः स्थितैकरत्नः फणी स्फुरति ॥")

सत्त्वरजस्तमांसि । (यथा, भागवते । १ । २ । २३ ।

"सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥")

शुक्लकृष्णरक्तपीतादिः । द्रव्याश्रितः । स तु शौर्य्यादिः रसगन्धादिश्च । इत्यमरः । ३ । ३ । ४६ ॥ तस्य लक्षणं यथा,—

"सत्त्वे निविशते ऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥"

इति सुग्धबोधम् ॥

(अस्यार्थमाह दुर्गादासः ।

"यः सत्त्वे द्रव्ये निविशते तदेवाश्रयतीत्यर्थः । अपैति तस्मात् सत्त्वादपगच्छतीत्यर्थः ॥ यथा श्यामता पूर्व्वमाम्रादिफलमुपगच्छति पश्चात् पक्वदशायां ततोऽपैति । पृथक् जातिषु दृश्यते भिन्नेषु पदार्थेषु दृश्यते । यथा आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुणः स्यादित्यर्थः । ननु तर्हि उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणीति उक्तकर्म्मस्वपि गुणत्वापत्तिः यदा द्रव्यं सक्रियं भवति तदा कर्म्म सत्त्वे निविशते यदा द्रव्यं निष्क्रियं भवति तदा कर्म्म सत्त्वादपैति पृथग्जातिषु च दृश्यते यथा मनुष्येषु गमनादिक्रिया दृश्यते तथा पश्वादिषु च दृश्यते अतः कर्म्मणो गुणत्वमपाकर्त्तुमाह आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्यः यथा पक्वस्याम्रपात्रेषु रक्ततागुणः सहि वह्निसंयोगादिना निष्पाद्यते । अक्रियाज इति । क्रियाया जायते । इति क्रियाजः । न क्रियाजोऽक्रियाजः नित्य इत्यर्थः । आकाशादिषु महत्त्वादिर्गुणः । ततश्च गुणस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्च इति प्रकारद्वयदर्शनतया कर्म्मणो गुणत्वं न स्यादिति शङ्कापि तम् कर्म्मत्वं सर्व्वमेव उत्पाद्यमिति । एवञ्चेत्तर्हि द्रव्यमपि गुणोऽस्तु तत्रापि क्षिते धर्म्मा वर्त्तन्ते । यथा तदपि द्रव्यमारम्भके अवयवद्रव्ये निविशते ततोऽपैति च यथा शरीरमवयवि तन्हि मस्तकादिष्ववयवेषु समवेतं भवतीति तन्हिनाशात् ततोऽपैति । पृथग्जातिषु पश्वादिषु च दृश्यते एवं द्रव्यस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्चास्ति अवयवि द्रव्यस्य उत्पाद्यत्वात् आकाशादेस्तु अनुत्पाद्यत्वादिति । अत आह असत्त्वप्रकृतिरिति । सत्त्वं द्रव्यं प्रकृतिःस्वभावः । सत्त्वं प्रकृतिर्यस्य स सत्त्वप्रकृतिः । न सत्त्वप्रकृतिरसत्त्वप्रकृतिः ॥")

विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः । शुक्लादयो हि गवादिकं स्वजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्तीति साहित्यदर्पणम् ॥

अपि च ।

द्रव्यत्वव्यापकतावच्छेदकसत्त्वान्यजातिमत्त्वं तदर्थः तद्यथा । रूपम् १ रसः २ गन्धः ३ स्पर्शः ४

संख्या ५ परिमाणम् ६ पृथक्त्वम् ७ संयोगः ८ विभागः ९ परत्वम् १० अपरत्वम् ११ बुद्धिः १२ सुखम् १३ दुःखम् १४ इच्छा १५ द्वेषः १६ यत्नः १७ गुरुत्वम् १८ द्रवत्वम् १९ स्नेहः २० संस्कारः २१ धर्म्मः २२ अधर्म्मः २३ शब्दः २४। इति भाषापरिच्छेदः॥ (सात्त्विकनायकगुणा यथा, साहित्यदर्पणे। ३। ५८।

"शोभाविलासोमाधुर्य्यमाभीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषागुणाः॥ एतेषां विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम्॥)

अग्रधानम्। ऋदः। इन्द्रियम्। त्यागः। वटी। इति मेदिनी॥ गे। १०॥ भीमसेनः। तनुः। दोषान्यविशेषगम्। इति हेमचन्द्रः॥ विद्यादि। इति विश्वः॥ (शब्दनम्। यथा, मनुः। ३।२२६।

"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु। विन्यसेत् प्रयतःसम्यक् भूमावेव समाहितः॥"

"गुणान् व्यञ्जनानि अन्नापेक्षयाऽप्राधान्यात् गुणयुक्तान् वा।" इति तट्टीकायां कुल्लूकभट्टः॥ आवृत्तिः। यथा, महाभारते।

"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥")

व्याकरणोक्तसंज्ञाविशेषः। यथा। इदोऽरलेऽणुः। अस्यार्थः। इ उ ऋ ऌ एषां स्थाने ए ओ अर् अल् एते गुणसंज्ञा भवन्ति। इति सुग्धबोधम्। काव्यगुणस्य लक्षणं यथा,—

ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥

इति काव्यप्रकाशः॥

तस्य भेदाः।

श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः॥ इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः॥

इति दण्डी॥

माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश॥ तस्य दशसंख्याभावे हेतुर्यथा,—

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे स्थिताः। अन्ये भजन्ति दोषत्वं कुत्रचित्र ततो दश॥

इति भरतमुनिः। स्तुत्युक्तगुणविशेषा उपवासग्रन्थे द्रष्टव्याः॥

गुणकः, पुं, (गुणयति आवर्त्तयतीति। गुण+ण्वुल्।) पूरकाङ्गविशेषः। यथा, गुणयान्त्यमङ्गं गुणकेन हन्यात्। इति लीलावती॥

गुणकारः, पुं, (गुणं व्यञ्जनादिकं पाकजनितगुणं वा करोतीति। कृ+अण्। विराटनगरे छद्मवेशेन सूपकारित्वग्रहणात् पाकशास्त्रज्ञत्वाच्च भीमस्य तथात्वम्।) भीमसेनः। इति त्रिकाण्डशेषः॥ (विराटनगरेऽस्य सूपकारित्वस्वीकारकथा यथा, महाभारते। ४।२।१—४।

भीम उवाच।

"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामतः। उपस्थास्यामि राजानं विराटमिति मे मतिः॥ सूपानस्य कारिष्यामि कुशलोऽस्मि महानसे। कृतपूर्व्वाणि येरस्य व्यञ्जनानि सुचिन्तिते॥ तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्महम्। आहरिष्यामि दारूणां निचयान्महतोऽपि च॥ ततः प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति। अमानुषाणि कुर्व्वाणं तानि कर्म्माणि भारत!॥ राज्ञस्तस्य परिप्रेक्ष्य मंस्यन्ते मां यथा नृपम्। भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः॥")

पाचके गुणकारके च त्रि।

गुणज्ञः, त्रि, (गुणं जानातीति। गुण+ज्ञा+कः।) गुणवेत्ता। यथा,—

गुणिनि गुणज्ञो रमते नागुण-शीलस्य गुणिनि परितोषः। अलिरेति वनात् कमलं न हि मेकस्त्वेकवासोऽपि॥

इत्युद्भटः॥

गुणनिका, स्त्री, (गुणयति पुनःपुनरावर्त्तयतीति। गुणत् क आवर्त्तने+"ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। संज्ञायां कन् कापि अत इत्वञ्च।) वृत्तम्। श्लोकाङ्कम्। पाठनिश्चयः। इति मेदिनी॥ के १८५। (आवृत्तादीनां पुनः पुनरनुशीलनम्। यथा, माघे। २। ७५।

"हेतुःपरिचयस्तेषां वस्तुगुणनिकैव सा॥"

माला। इत्यानन्दलहरीटीका॥ (यथा, आनन्दलहर्य्यां। ३।

"दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा सुरिपुवराहस्य भवती॥")

गुणनी, स्त्री, (गण्यते पुनःपुनरनुशील्यतेऽनया। गुण+ल्युट्+ङीप्।) पाठनिश्चयः। तत्पर्य्यायः। भवितृ २ शीलनम् ३। इति त्रिकाण्डशेषः॥

गुणनीयः, पुं. (गुण्यते पुनःपुनरनुशील्यतेऽनेन इति। गुण आवर्त्तने+करणे अनीयर्।) आवृत्ताद्यभ्यासः। इति हारावली। १५०। (कर्म्मणि अनीयर्। गुणितव्ये त्रि॥)

गुणभङ्गः, पुं, (गुणस्य भङ्गोविनाशः।) गुणनाशः। तत्पर्य्यायः पर्य्यन्तिका २। इति हारावली॥ २१०॥

गुणलयनिका, स्त्री, (गुणा गुणनिर्म्मिताः पटाः लीयन्तेऽस्याम्। गुण+ली+अधिकरणे+ल्युट्। स्त्रियां ङीप् कन् टापि पूर्व्वह्रस्वश्च।) वस्त्रनिर्म्मितगृहम्। तत्पर्य्यायः कैलिका २ पटकुटी ३। इति हेमचन्द्रः। ३। ३४६॥

गुणलयनी, स्त्री, (गुणा गुणमयपटाः लीयन्ते यत्र। ली+ल्युट्+ङीप्।) गुणलयनिका। इति हलायुधः॥

गुणवान्, [त्] पुं, त्रि, (गुणोविद्यतेऽस्य। गुण+मतुप् मस्य वत्वम्।) सम्बन्धी। इति त्रिकाण्डशेषः॥ गुणविशिष्टः। यथा, "दाता दयालुर्गुणवान्नरः स्यात् गरे परेषामुपकारकर्त्ता। इति कोष्ठीप्रदीपः॥ (पुं, यदुवंशीय सुनाभस्य दौहित्रः। यथा, हरिवंशे। १५५।

"गुणवत्यपि पुत्रे च गुणवन्तमजीजनत्॥"

स्त्रियां ङीप्। तस्य सुनाभस्य दुहिता। यथा, तत्रैव। १५३।

"वक्त्रनाभस्य तनयः सुनाभो नाम विश्रुतः। दुहितृद्वयञ्च नृपते! तस्य रूपगुणान्वितम्। एकचन्द्रावती नाम्ना गुणवत्यथ चापरा॥"

गायत्रीरूपा महादेवी। यथा, देवीभागवते। १२। ६। १२।

"गुहावासा गुणवती गुरुपापप्रणाशिनी॥"

गङ्गा। यथा, काशीखण्डे। २६। ५३।

"गुरुरूपा गुणवती गुर्व्वी गौरववर्द्धिनी॥"

अप्सरोविशेषः। यथा, तत्रैव ६ अध्याये।

"अलम्बुषा गुणवती स्थूलकेशी कलावती॥"

गुणवृक्षकः, पुं, (गुणानां तरणीस्थरज्जूनां वृक्ष इव। ततः स्वार्थे कन्।) नौकागुणबन्धनस्तम्भः। मास्तुल इति भाषा। तत्पर्य्यायः। यूपकः २। इत्यमरः। १। १०। १२।

गुणसागरः, पुं, (गुणानां सागर इव आधारस्थानम्।) ब्रह्मा। इति शब्दरत्नावली॥ बुद्धिविशेषः। इति त्रिकाण्डशेषः॥ सकलगुणाधारश्च॥

गुणा, स्त्री, (गुणाः सूच्यतन्तवः सन्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। स्त्रियां टाप्।) दूर्व्वा। मांसरोहिणी। इति राजनिर्घण्टः॥

गुणाकरः, पुं, (गुणानामाकर इव। गुणबाहुल्यात्तथात्वम्।) बुधः। इति शब्दरत्नावली॥ (महादेवः। यथा, महाभारते। १३। १७। ४७।

"गजहा देवहा कालो लोकधाता गुणाकरः॥")

गुणयुक्ते त्रि। यथा,—

"तपस्विभिरतस्त्याज्य तस्य पुत्रो गुणाकरः। सत्यवान् नाम देवर्षे! मनसा समृतो मया॥"

इति वनपर्व्वणि सावित्रीव्रतकथा॥

गुणितः, त्रि, (गुण्यते स्म। गुण आवर्त्तने+क्तः।) पूरितः। तत्पर्य्यायः। आवृत्तः २। इत्यमरः। ३। १। ८८॥ यथा। पञ्चधा गुणिता द्वादशसंख्या षष्टिर्भवतीत्यादि इति भरतः॥ (गुणोऽस्य जातः। तारकादिभ्य इतच्।) पिञ्जितः। इति शब्दरत्नावली॥

गुणी, [न्] पुं, (गुणो व्या विद्यतेऽस्य। गुण+इनिः।) धनुः। इति त्रिकाण्डशेषः॥ (गुणास्ति दाक्षिण्यादयो विद्यन्तेऽस्येति।) गुणविशिष्टे त्रि। यथा। गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य। तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम॥ इति श्लिष्टोद्वेगः॥

गुणीभूतः, त्रि, (अगुणो गुणोभूतः। गुण+भू+क्तः। अभूत तद्भावे च्वि।) अप्रधानीभूतः। यथा। कृतपूर्व्वीकटमित्यत्र समासनिविशत्वाद्गुणीभूतादिशेषबोधिका द्वितीया नोक्ता। इति सुसेनकविराजः॥ (तथाच महाभारते। २। १५। ११।

"सर्व्वैरपि गुणैर्युक्तो निर्व्वीर्य्यः किं करिष्यति। गुणीभूता गुणाः सर्व्वे तिष्ठन्ति हि पराक्रमे॥"

गुणीभूतव्यङ्ग्यः. पुं, (गुणीभूतमप्रधानीभूतं व्यङ्ग्यं व्यञ्जना प्रक्रियेव ।) काव्यविशेषः । यथा,—
"अतादृशि गुणीभूतव्यङ्ग्यं वाच्ये तु मध्यमम् ॥*
तस्याष्टौ भेदाः यथा ।
"अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काङ्क्षाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ॥*॥
अगूढं यथा ।
स्फुटतया वाच्यायमानमिति अपराङ्गम् । यथा अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ॥ * ॥
वाच्यसिद्ध्यङ्गं यथा ।
आपाततः प्रतीतस्य वाच्यार्थस्य प्रतिसन्धीयमानानुपपत्तिनिरासकं व्यङ्ग्यम् ॥ * ॥
अस्फुटं यथा ।
विदग्धैरपि क्लेशगम्यं सन्दिग्धप्राधान्यं यथा प्राधान्यमत्र रसादिव्यङ्गकत्वेन तथा च प्रतीतस्य रसादेर्व्यङ्गकं किं वाच्यं किंवा व्यङ्ग्यमितौत्तरकालिकसन्देहविषयत्वं तत्त्वम् ॥ * ॥
तुल्यप्राधान्यं यथा ।
अत्रापि रसादिव्यङ्गकत्वेनैव प्राधान्यं व्यङ्ग्यस्य निश्चितत्वेन तेन तेन वाच्येन तुल्यार्थो बोध्यः ॥*
काङ्क्षाक्षिप्तं यथा ।
आक्षिप्तमत्र प्रागेव पदार्थविधया उपस्थानम् ॥*
असुन्दरं यथा ।
"रसादिव्यञ्जने वाच्यसुखनिरीक्षकं व्यङ्ग्यम् ।"
इति काव्यप्रकाशः ॥
(इत्यत्र साहित्यदर्पणकारेण काव्यभेदमाश्रित्य यदुक्तं तदुयथा । ४ । १ ।
"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यश्चेति द्विधा मतम् ।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ॥"
तत्रैव च । ४ । १६ ।
"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।
"अपरं काव्यम् । व्यङ्ग्यस्यालं न्यूनतया वाच्येन च सम्भवति ॥" ततस्तत्र स्यादितराङ्गं काङ्क्षाक्षिप्तत्वेत्यादौ भेदानुक्त्वा इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यं यथेत्यभिधाय क्रमशः इतराङ्गादेरुदाहरणानि प्रदर्शितानि । यथा,—
"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥
अत्र शृङ्गारः करुणस्याङ्गम् ।
"भानोर्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोन्नतकर्णतालः ।
हा ! हा ! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः ॥
अत्रौत्सुक्यचाससन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः ।
जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
लता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम् । तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम् । काङ्क्षाक्षिप्तं यथा,—
मधूनामि कौरवप्रतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥
अत्र 'मधून्यपेक्षेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम् ।
दीपयन् रोदसीरन्धूमेघ ज्वलति सर्वतः ।
प्रतापस्तव राजेन्द्र ! वैरिवंशद्रवानलः ॥
अत्रान्वयस्य वैशुद्ध्यारोपणरूपो व्यङ्ग्यः । प्रतापस्य द्रवानलत्वारोपसिद्ध्यङ्गम् । 'हरस्तु किञ्चित् परिवृत्तैर्यत्यादौ' विलोचनव्यापारसुखनाभिलाषयोः प्राधान्ये सन्देहः ।
ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥
अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।
सन्धौ सर्वंसहत्वं विग्रहे प्राणनिग्रहः ।
अज्ञातदीनृपतौ न सन्धिर्न च विग्रहः ॥
अत्र अज्ञातदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं श्रुत्पन्नानामपि भटित्यस्फुटम् ।
अनेन लोकगुरुणा सतां धर्मोपदेशिना ।
अहं व्रतवती खेरमुक्तेन किमतः परम् ॥
अत्र प्रतीयमानोऽपि प्राक्यसुनेस्तिर्यक् योधिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।
वाणीरकुड्मलमुखीयसउक्षिकोलाहलं
सुगन्तीव ।
घरकम्मबाव्वाडाए बहूए सीअन्ति अङ्गाइं ॥"
अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्टः इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरं किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिसुखेनैव चमत्कारविधायित्वात् । तदुक्तं ध्वनिकृता ।
अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥
यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्ययः । यथा,—
दृष्टा केशवगोपरागकृतया किञ्चिन्न दृष्टं मया
तेनाद्य स्खलितासि नाथ ! पतितां किं नाम
नालम्बसे ?
एकस्यं विषमेषु खिन्नमनसां सर्व्वावलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥"
अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव । किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः । तदुक्तं तैरेव ।
प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य्यालोचनया पुनरिति ॥
यत्र च ।
यत्रोन्मादानां प्रमदाजनानाम-
भ्रंलिहः श्लोणमणीमयूखैः ।
सन्ध्याम्रमं प्राप्नुवता मकाण्डे-
ऽप्यनङ्गनैपथ्यविधिं बधत्ते ॥
इत्यादौ रसादीनां नगरीवृत्तादि वस्तुमात्रेऽङ्गत्वम् । तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरे गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्रकविपण्डितसुखश्रीचण्डिदासपादैः । काव्यार्थस्यास्वण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वादद्दशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेश्यं बाहुल्यमीश्वरस्यास्वादमात्रावसायित्वादिति ॥")
गुणेश्वरः, पुं (गुणैर्हेतुभिरीश्वरःश्रेष्ठः पूज्य इत्यर्थः । विविधगुणग्रालिद्रव्यजातोत्पादकतयास्य तथात्वम् ।) चित्रकूटपर्व्वतः । इति शब्दरत्नावली ॥ गुणपतौ त्रि ॥ (गुणानां नानाविधपुरुषोपयोगिगुणानां ईश्वरः प्रभुः स्वामी वा शान्तदान्तादि गुणग्रालो पुरुष इत्यर्थः। गुणानां सत्त्वरजस्तमसां त्रयाणां मायागुणानामिति यावत् ईश्वरः नियन्ता । परमेश्वरः ॥)
गुणोत्कर्षः, पुं, (गुणानां उत्कर्षः उत्कर्षणं प्राधान्यमित्यर्थः ।) गुणप्राधान्यम् । (यथा, गोः रामायणे । १ । २५ । १६ ।
"स्वभावजैर्गुणैर्दिव्यैः कामजैर्बहुलैर्वृतः ।
भूयस्त्वं गुणोत्कर्षमेते विद्धि करिष्यतः ॥")
अतिशयः । तत्पर्य्यायः । परभागः २ । इति हेमचन्द्रः । ६ । ११ ॥
गुणोत्कीर्त्तनं, क्ली, (गुणानां उत्कीर्त्तनं कथनम् ।) यद्वा गुणैर्गुणवचकवाक्यैरुत्कीर्त्तनम् । गुणकथनम् । विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनम् । इति रसमञ्जरी ॥ कान्तापदमत्रोपलक्षणम् ॥
गुण्ठितः, त्रि, (गुठि वेष्टने + कर्म्मणि क्तः ।) गुण्ठितः । इत्यमरटीकायां रमानाथः ॥ आवृतः । रुद्धितः । धूल्यादिभिर्धूसरित इत्यर्थः । यथा, गोः रामायणे । ६ । ८२ । ८ ।
"तन्न युद्धेन मे कार्य्यं न प्राणैरपि सीतया ।
लक्ष्मणं निहतं दृष्ट्वा भ्रातरं पांशुगुण्ठितम् ॥")
गुण्डः, पुं, (गुडि वेष्टने + अच् ।) व्रणभेदः । यस्य कन्दः कण्डूरः । तत्पर्य्यायः । काण्डगुण्डः २ दीर्घकाण्डः ३ त्रिकोशकः ४ क्षुद्रगुच्छः ५ असिपत्रः ६ नीलपत्रः ७ त्रिधारकः ८ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तातिसारदाहरक्तनाशित्वम् । अस्य मध्ये स्थलतरोऽधिकगुणः । इति राजनिर्घण्टः ॥

गुण्डकः, पुं, (गुण्ड + संज्ञायां कन् । गुडि + खुल् वा ।) मलिनः । धूली । कलौक्तिः । स्नेहपात्रम् । इति मेदिनी । के । ८३ ॥

गुण्डकन्दः, पुं, (गुण्ड इत्याख्यया प्रसिद्धः कन्दः । गुण्डानां कन्द इति केचित् ।) कण्डेरु । इति राजनिर्घण्टः ॥

गुण्डारोचनिका, स्त्री, (गुण्डाऽपि रोचना हरिद्रा इव । तत इवार्थे कन् टाप् कापि अत इत्वञ्च ।) तृणविशेषः । कमलागुँड़ि इति भाषा । तत्पर्य्यायः । काम्पिल्लकः २ रक्ताङ्गा ३ । इति रत्नमाला ॥

गुण्डाला, स्त्री, (गुण्डाल + टाप् । यद्वा गुण्डां चूर्णं आलाति आदत्ते इति । आ + ला + कः । स्त्रियां टाप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जलोद्भूता २ गुच्छवप्रा ३ जलाग्र्या ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । श्लेष्मव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुण्डासिनी, स्त्री, (गुण्ड इत्याख्यया आस्ते वर्त्तते इति । आस् + णिनिः । गुण्डा सती आस्ते इत्येके ।) क्षुपभेदः । तत्पर्य्यायः । गुण्डाला २ गुड़ाला ३ गुच्छमूलिका ४ चिपिटा ५ क्षुद्रपत्री ६ यवासां ७ पृथुला ८ विस्तरा ९ । अस्या गुणाः । कटुत्वम् । पित्तदाहश्रमश्वयथुव्रणदोषनाशित्वम् । तिक्तत्वम् । उष्णत्वञ्च । इति राजनिर्घण्टः ॥

गुण्ड्किकः, पुं, स्त्री, (गुण्डोऽस्यास्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) गुण्डकः । तण्डुलादिचूर्णम् । गुँड़ा इति भाषा । यदुक्तं अनन्तव्रतकथायाम् ।

"गुण्ड्किकैः सितपीतैश्च मण्डयन्ती गृहाङ्गनम् ॥"

गुण्ड्किचा, स्त्री, (गुण्ड्किभिर्गुण्ड्किकैः सितपीतादिरङ्गैः प्रस्तरेष्वादिचूर्णैर्वा चीयते उपचीयते इति । चि + घञर्थे कः ततष्टाप् । गुण्ड्किचा इत्याख्यया प्रसिद्धा वा । यद्वा गुण्ड्यते अवगुण्ड्यते ब्रह्मतेजोभिरस्या दर्शक इति ग्रेषः । गुडि वेष्टने इति धातोर्निपातनात् चकारागमे साधुः । इयं युत्पत्तिस्तु गुण्डिचाविवरणदर्शनेरेवबोध्या ।) श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरवासार्थमण्डपविशेषः । यथा,—

"मण्डपे वासयेद्देवान् गुण्डिचाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
रत्नस्तम्भमये स्वर्णवेदिकोपस्तृतान्तरे ।
क्षीरवलयावीते सुधालेपससुज्ज्वले ॥
माधुसोपानघटिते चतुर्द्वारोपशोभिते ।
त्रैलोक्याडम्बरयुते महावेद्यां महाक्रतोः ॥
प्रादुर्भावो मदेशस्य याचाभूद्दारुवर्ष्मणः ॥ *॥
तस्यां श्रीजगन्नाथदेवस्य दर्शनफलं यथा,—
"बिन्दुतीर्थतटे तस्मिन् सप्ताहानि जनार्दनः ।
तिष्ठेत् पुरा स्वयं राज्ञे वरमेतत् समादिशत् ॥
तत्तीर्थतीरे राजेन्द्र ! स्थास्यामि प्रतिवासरम् ।
सर्व्वतीर्थानि तस्मिंश्च स्थास्यन्ति मयि तिष्ठति ॥
तत्र स्नात्वा विधानेन तीर्थे तीर्थोपपावने ।
सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम् ॥
माघ रामं सुभद्राञ्च मम सायुज्यमाप्नुयुः ॥"*॥
तस्या नामकरणं यथा, उत्कलखण्डम् ।
"अत ऊर्द्धं प्रवक्ष्यामि महावेदीमहोत्सवम् ।
अज्ञानतिमिरान्धोऽपि येन भास्वत्पदं भजेत् ॥
सर्व्वपापहरःस्नात्वा पूज्यत्वात् सर्व्वदेवतैः ।
गुण्डिचाख्यापि सा यात्रा ब्रह्मतेजोऽवगुण्ठनात् ॥"

गुण्डितः, त्रि, (गुण्ड् वेष्टने + कर्म्मणि क्तः ।) धूलिगुण्डकेनेव खचितः । तत्पर्य्यायः । रूषितः २ । इत्यमरः । ३ । १ । ८६ ॥ चूर्णीकृतञ्च ॥

गुत्यः, पुं, (गुत्स + पृषोदरादित्वात् साधुः ।) गवेधुका । इति रत्नमाला ॥

गुत्यकं, क्ली, (गुत्य + संज्ञायां कन् । यद्वा गुच्छ इव गुच्छेन वा कायतीति । कै + कः । पृषोदरात् साधुः ।) ग्रन्थिपर्णम् । इति रत्नमाला ॥

गुत्सः, पुं, (गुध्यते क्षणपचपुष्पादिभिः परिवेष्यतेऽसौ इति । गुध् परिवेष्टने + "उन्दिगुधिकुषिभ्यश्च ।" उणां । ३ । ६८ । इति कर्म्मणि सः किच्च ।) स्तवकः । स्तम्बः । (हारादौ तु गुध्यते परिवेष्यते कण्ठवक्षःस्थलादिकमनेन ।) द्वात्रिंशद्यष्टिकहारः । ग्रन्थिपर्णवृक्षः । इति मेदिनी । से । २ ॥

गुत्सकः, पुं, (गुत्स + स्वार्थे कन् ।) स्तवकः । इति शब्दरत्नावली ॥ ग्रन्थपरिच्छेदः । इति त्रिकाण्डशेषः ॥

गुत्सकपुष्पः, पुं, (गुत्सकानि स्तवकीभूतानि पुष्पाणि यस्य यत्र वा ।) सप्तच्छदवृक्षः । इति जटाधरः ॥

गुत्सार्द्धः, पुं, (गुत्सं गुच्छं प्राप्य आश्रित्य वा ऋध्नोतीति । ऋध् + अच् । गुत्सं आर्द्धयति वर्द्धयति इति । ऋध् + णिच् अच् वा । यद्वा गुत्सस्य अर्द्धः असमांशकः ।) गुच्छार्द्धः । चतुर्विंशतियष्टिकहारः । इत्यमरटीकायां भरतः ॥

गुद, ङ खेलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, गोदते । इति दुर्गादासः ॥

गुदं, क्ली, (गोदते खेलति चलतीत्यर्थः अपानसंज्ञकवायुः अनेन । गुद + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) मलत्यागद्वारम् । तत्पर्य्यायः । अपानम् २ पायुः ३ । इत्यमरः । २ । ६ । ७३ ॥ गुह्यम् ४ गुदवर्त्म ५ । इति जटाधरः ॥ (यथा, मनौ । ८ । २८२ ।

"अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशृन्दयतो गुदम् ॥")

गुदकीलः, पुं, (गुदस्य अपानस्य मलद्वारस्येत्यर्थः यद्वा गुदे कील इव ।) अर्शोरोगः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"व्यानाहमेदो गुदकीलहिक्का-
श्वासापहः श्लेष्मितपित्तहृच्च ॥")

गुदकीलकः, पुं, (गुदकील + स्वार्थे कन् ।) गुदकीलः । इति हलायुधः ॥

गुदग्रहः, पुं, (गुदस्य ग्रह इव गुदमाश्रित्य ग्रहवत् प्रवर्त्तते इत्यर्थः । यद्वा गुदं मलद्वारमधिकृत्य आभ्यन्तरिकस्थानं गृह्णाति धारयतीति ग्रह + अच् ।) उदावर्त्तरोगः । इति हेमचन्द्रः । ३ । १३३ ॥

गुदभ्रंशः, पुं, (गुदस्य भ्रंशोऽस्मात् । गुदं भगं भ्रश्यतेऽस्मादिति वा ।) मलद्वारनिर्गमरोगः । तस्य लक्षणम् ।

"प्रवाहनातिसाराभ्यां निर्गच्छति गुदं बहिः ।
रूक्षदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥"

इति माधवकरः ॥

तच्चिकित्सा यथा,—

"गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत् ।
प्रविष्टं रोधयेदृजुनाद्गतसक्थिद्रचर्म्मणा ॥
पक्वान्याः कोमलं पत्रं यः खादेच्छर्करान्वितम् ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
मूषकाणां वसाभिर्वा गुदभ्रंशे प्रलेपनम् ।
सुस्निग्धमूषिकामांसैनाथवा खेदयेदुदम् ॥
वृक्षाम्लानलचाङ्गेरीविल्वपाठायवाग्रजम् ।
तक्रेण श्रीलयेत् पायुं भ्रंशार्त्तोऽनलदीपनम् ॥
मूषकान् दग्धमूलानि गृह्णीयादुभयं समम् ।
तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितम् ॥
अभ्यङ्गात्तस्य तैलस्य गुदभ्रंशो विनश्यति ।
विनश्यति तथा तेन गुदमूलं भगन्दरः ॥"

इति मूषकतैलम् । इति भावप्रकाशः ॥

(यदा गुह्यं निरस्येत तदा कुर्य्यात् क्रियामिमाम् ।
सहचर्य्याबलानाच्च रसो ग्राह्यो घृतं पयः ॥
पक्वा घृतेन लेपः स्यात् तस्य चैवं प्रशस्यते ।
अरणीपल्लवक्वाथो वाप्यं लोध्रं सचन्दनम् ॥
प्रोत्पप्य वह्निसदृशं सहसा नरस्य
निर्व्वाप्य काञ्जिकमथो विदधीत तद्वत् ।
सौख्यञ्च साध्यगुदसेचनकं प्रशस्तं
संवेशमध्यगुदतो दृढबन्धनं स्यात् ॥"

इति गुदभ्रंशः ॥

इति हारीते चिकित्सितस्थाने त्रयोदशोऽध्याये ॥*॥

अथास्य चिकित्सा ।

"गुदनिःसरणे मूले पानमस्य सर्पिषः ।
प्रशस्यते निरामाणां मधुवाप्यनुवासनम् ॥
चाङ्गेरी कोलदध्यम्लनागरक्षारसंयुतम् ।
घृतसुक्तकथितं पेयं गुदभ्रंशरुजापहम् ॥"

इति चाङ्गेरीघृतम् ॥ * ॥

"सप्तपर्णपिप्पलीमूलं सर्षपविड्दाडिमम् ।
पेयमस्मं घृतं युक्त्या सधान्याजाजिचित्रकम् ॥
दग्धमूलोपसिद्धं वा सविल्वमनुवासनम् ।
घृताक्ता गुटी विल्वैर्व्वा वचया चित्रकेण वा ॥
सद्यश्चरुगुदे पूर्व्वं स्नेहस्वेदौ प्रयोजयेत् ॥"

इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

गुदाङ्कुरः, पुं, (गुदे अङ्कुरः प्ररोह इव गुदमधिकृत्य प्ररोहवदुत्पद्यते वलिरित्यर्थः ।) अर्शोरोगः । इति हेमचन्द्रः ॥ ३ । १३२ ।
("गुदाङ्कुरा बहुनिलाः ।" इति वाभटे निदानस्थाने सप्तमेऽध्याये ॥)

गुद्र, इ क कुत्रे । इति कविकल्पद्रुम: ॥ (चुरां-परं-सकं-सेट्-इदित् ।) पञ्चमस्वरी। दन्त्यवर्गं ऌतीयोपध: । कुन्द्रो मिथ्योक्ति: । इ क, गुन्द्रयति नीच: मिथ्या वदतीत्यर्थ: । गुन्द्र इत्यनेनैवेऽसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थ: । इति दुर्गादास: ॥

गुध, ग रुधि । इति कविकल्पद्रुम: ॥ (क्र्यां-परं-अकं-सेट् ।) ग, गुध्नाति । जुगोध । इति दुर्गादास: ॥

गुध, ड क्रीड़े । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-अकं-सेट् ।) ड, गोधते । इति दुर्गादास: ॥

गुध, य वेष्टे । इति कविकल्पद्रुम: ॥ (दिवां-परं-सकं-सेट् ।) य, गुध्यति । जुगोध । इति दुर्गादास: ॥

गुधेर:, त्रि, (गुध्यति सर्व्वतो वेष्टयति वेष्टनेन रक्षतीत्यर्थ: इति । गुधय वेष्टने "सृजेरादय: ।" उणा । १ । ६१ । इति एरक् ।) रक्षक: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

गुन्दल:, पुं, (गुम्भिति मधुरमस्फुटशब्दं कारयन् दल्यते मर्द्यतेऽसौ । दल् + णिच् + कर्म्मणि अच् ।) मर्द्दलशब्द: । इति हेमचन्द्र: । ६ । ४४ ॥

गुन्द्र:, पुं, (गुद्रि + अच् ।) शरटलक्षम् । इत्यमर: । २ । ४ । १६२ ॥ वृक्षविशेष: । गोदपठेर इति देशान्तरीयभाषा । तत्पर्य्याय: । पटरक: २ अच्छ: ३ शल्लकेराकृमूलक: ४ । अस्य गुणा: । कषायत्वम् । मधुरत्वम् । हिमत्वम् । पित्तरक्तमूत्रकृच्छ्रनाशित्वम् । स्तन्यशुक्रकरजोमूत्रशोधनत्वञ्च । इति भावप्रकाश: ॥

("गुन्द्रान् दग्ध्वा क्षतं भस्म हरितालं मन:शिला। उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥"

इति सुश्रुते चिकित्सितस्थाने १६ अध्याये ॥)

गुन्द्रमूला, स्त्री, (गुन्द्रस्य मूलमिव मूलमस्य ।) शरकालक्षम् । इति भावप्रकाश: ॥

गुन्द्रा, स्त्री, (गुन्द्र + टाप् ।) भद्रमुस्तक: । प्रियङ्गुवृक्ष: । इत्यमर: । २ । ४ । १६० ॥ गवेधुका । इति रत्नमाला ॥ शरका । इति भावप्रकाश: ॥

("वेल्लन्तरारणिकबूकवृषाश्मभेद-
गोकण्ठकेतुकटसह्याचरवाणकाश्मा: ।
वृक्षादनीनलकुशद्वयगुच्छगुन्द्रा
भल्लूकमोरटकुरण्टकरम्भपार्था: ॥"

इति वाभटे सूत्रस्थाने १५ अध्याये ॥

पित्तसंशमनीयवर्गान्तर्गतौषधिविशेष: । यथा । "चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठा पयस्याविदारीशृतावरीगुन्द्राशैवालकट्टारकुसदोत्पलकदलीकन्दलीदूर्व्वाम्बष्ठाप्रभृतीनि काकोल्यादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्ग: ॥" इति सुश्रुते सूत्रस्थाने ३६ अध्याये ॥)

(गङ्गा । यथा काशीखण्डे । २६ । ५४ ।

"ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला ॥")

गुन्द्राल:, पुं, (गुन्द्रं नीड़निर्म्माणार्थं लगादिकं आलाति आदत्ते इति । आ + ला + क: ।) जीवञ्जीवपक्षी । इति हेमचन्द्र: । ४ । ४०६ ॥ गुन्द्रालोऽपि पाठ: ॥

गुनृप, ञ्र गत्यै । इति कविकल्पद्रुम: ॥ (तुदां-परं-सकं-सेट् ।) पञ्चमस्वरी। ञ्र, गुम्फति मालां मालिक: । जुगुम्फ । इति दुर्गादास: ॥

गुप, ऊ रक्षे । इति कविकल्पद्रुम: । (भ्वां-परं-सकं-वेट् ।) आयन्तत्वादुभयपदमिति बोपदेव: । गोपायति गोपायते । अरे तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अगोपीत् । जुगोप गोरूपधरामिवोर्व्वीमिति रघु: ॥ ऊ, गोपिष्यति गोष्यति । इति दुर्गादास: ॥

गुप, क भासि । इति कविकल्पद्रुम: ॥ (चुरां-परं-अकं-सेट् ।) क, गोपयति । भासि दीप्तौ । इति दुर्गादास: ॥

गुप, ड गोपनकुत्सयो: । इति कविकल्पद्रुम: ॥ (भ्वां आत्मं-सकं-सेट् ।) गोपनमपह्नव: । ड, कङ्कणभ्रमनत्कारञ्च किं गोपसे । अत्र त्वादयो न स्युरिति रमानाथ: । कुत्सा निन्दा । सा जुगुप्सा प्रचक्रेऽस्रुन् । इति भट्टि: । इति दुर्गादास: ॥

गुप, य इर् व्याकुलत्वे । इति कविकल्पद्रुम: ॥ (दिवां-परं-अकं सकच्च-सेट् ।) व्याकुलत्वं व्याकुलीभावस्तत्करणञ्च । य, धीरो न गुप्यति महत्यपि कार्य्यजाते । इति हलायुध: । गुप्यति गा दृष्टि: । आकुलीकरोतीत्यर्थ: । इति चतुर्भुज: । इर्, अगुपत् अगोपीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादास: ॥

गुपिल:, पुं, (गोपायति प्रजाजनानिति । गुप् रक्षणे + "गुपादिभ्य: कित् ।" उणा । १ । ५६ । इति इलच् कित्च ।) राजा । इत्युणादिकोष: ॥

गुप्त, त्रि, (गुप्यते स्म । गुप् + कर्म्मणि क्त: ।) क्षतरक्षणम् । तत्पर्य्याय: । त्रातम् २ त्राणम् ३ रक्षितम् ४ अवितम् ५ गोपायितम् ६ । (यथा, महाभारते । १ । १ । १८८ ।

"यदाश्रौषं बृहन्मेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् ॥")

क्षतगोपनम् । तत्पर्य्याय: । गूढम् २ । इत्यमर: । ३ । १ । १०६ । (यथाह वशिष्ठ: ।

"आहारनिर्हारविहारयोगा:
सुसंवृता धर्म्मविदा तु कार्य्या: ।
वाग्गुप्तिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"

"हेम्नो भस्मकमभ्रकं द्विगुणितं लौहास्रय: पारदाश्चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्द्दयेत् । सूक्ता विद्रुमयो रसेन समता गोचुरवासेक्षुणा सर्व्वं वन्यकरीषकेण सुदृढं गुप्तं पचेत् सम्पुटे ॥" इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाधिकारे ॥) सङ्गतम् । इति शब्दरत्नावली ॥ वैश्यशूद्रयोर्नाम्नां पद्धतिविशेषे पुं । यथा, इत्युद्वाहतत्त्वम् ॥

"गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयो: ।"

गुप्तगति:, पुं, (गुप्ता संवृता अन्यैरलक्षिता गतिर्गमनं चेष्टादिर्वा यस्य ।) चर: । इति शब्दरत्नावली ॥

गुप्तचर:, पुं, (गुप्त: योगेनात्मसंवृत: सन् स्वयं विष्णुरपि सर्व्वैश्वर्य्यमाच्छाद्य नररूपेण चरतीत्यर्थ: ।) बलदेव: । इति चिकाण्डशेष: ॥ (कर्म्मधारयसमासे तु राज्ञां गूढचर: । गुप्तश्चरो यस्य इति विग्रहे राजानमेव बोधयति ॥)

गुप्तस्नेह:, पुं, (गुप्त: गूढभावेन स्थित: स्नेह: तैलादिरसो यत्र ।) अक्कोटवृक्ष: । इति राजनिर्घण्ट: ॥

गुप्ता, स्त्री, (गुप्त + टाप् ।) कपिकच्छु: । इति राजनिर्घण्ट: ॥ परकीयान्तर्गतनायिकाभेद: । तस्या लक्षणम् । मैथुनगोपनम् । सा च त्रिधा। वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वृत्तवर्त्तिष्यमाणसुरतगोपना ३ । इति रसमञ्जरी ॥

गुप्ति:, स्त्री, (गुप् + अधिकरणभावकरणादिषु यथायथं क्तिन् ।) अवकरस्थानम् । कारागारम् । (यथा, माघे । ११ । ६० ।

"चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाट: षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्क: करोति ॥")

रक्षणम् । इति मेदिनी । ते । १६ ॥ (यथा, मनु: । १ । ६४ ।

"तं हि स्वयम्भू: स्वादास्यात्तपस्तप्त्वादितोऽसृजत् ।
हव्यकव्यवाहाय सर्व्वस्यास्य च गुप्तये ॥")

भूगर्भ: । यम: । इति हेमचन्द्र: ॥ गर्त्तार्थं क्षितेरुत्खननम् । नौकाच्छिद्रम् । इत्यमरटीकायां भरत: । गोपनम् । इति तट्टीकासारसुन्दरी ॥ (यथा, साहित्यदर्पणे । ३ । १५५ ।

"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था॥"

संवरणम् । यथा, कुमारे । ६ । ३८ ।

"दृषन्मणिशिलासालं गुप्तावपि मनोहरम् ॥"

ग्रहणीयमन्त्रसंस्कारविशेष: । यथा, तन्त्रसारधृतगौतमीये ।

"यजनं जीवनं पश्चात् ताड़नं बोधनं तथा ।
तथाभिषेको विमलीकरणाप्यायने पुन: ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रिया: ॥")

गुफ, प ग्रन्थे । इति कविकल्पद्रुम: ॥ (तुदां-परं-सकं-सेट् ।) पञ्चमस्वरी । प ग्र, गुम्फति मालां मालिक: । जुगोफ । इति दुर्गादास: ॥

गुफित:, त्रि, (गुफ् + कर्म्मणि क्त: ।) गुम्फित: । ग्रथित: । इत्यमरटीका ॥

गुम्फ:, पुं, (गुम्फ + घञ् ।) ग्रन्थनम् । (यथा, रावणकृतशिवतांडवे । १३ ।

"निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम् ॥"

तथाच आर्य्यासप्तशत्याम् । ६०६ ।

"सततमरुणितमुखे सखि ! निगिरन्ती गिरां
गुम्फम् ॥")

बाहोरलङ्कार: । इति मेदिनी । फे । २ । श्मश्रु । इति शब्दरत्नावली ॥ गोँफ इति भाषा ॥

गुम्फित:, त्रि, (गुम्फ + कर्म्मणि क्त: ।) ग्रन्थित: । इत्यमरटीकायां रायमुकुट: ॥ (यदुक्तम् ।

"प्रयत्नगुम्फितामाला यतस्तेन निराकृता ॥")

गुर, ईं य ङ वधे । गल्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ॥)

गुर, ङ ईं शि उद्यमे । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-अकं-सेट् ।) इत्वी । ङ शि, गुरते अगुरिष्ट । ईं, गूर्णः । इति दुर्गादासः ॥

गुरणं, क्ली, (गुर्+भावे ल्युट् ।) उद्यमः । इत्यमरः । ३ । २ । ११ ॥ अस्य रूपान्तरे गूरणं गोरणं इति भरतः ॥

गुरुः, पुं. (गृणाति उपदिशति वेदादिशास्त्राणि इन्द्रादिदेवेभ्य इति । यद्वा गीर्यते स्तूयते देवगन्धर्वमनुष्यादिभिः । गॄ+"क्रुग्रोरुच ।" उणां । १ । २४ । इति उत् ।) बृहस्पतिः । (यथा, देवीभागवते । १ । ११ । ४४ ।

"इत्याश्वास्य गुरुं शक्रो दूतं वक्तुं विचक्रमे ॥")

निषेकादिकृत् । इत्यमरः । ३ । ३ । १६१ ॥ (यथा, मनुः । २ । १४२ ।

"निषेकादीनि कर्म्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥")

निषेको गर्भाधानं आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इति भरतः ॥ मन्त्रदाता । तस्य वर्ज्जनीयत्वं यथा, कालिकापुराणे ५४ अध्याये ।

"अभिशप्तमपुत्रञ्च सन्नद्धं कितवन्तथा ।
क्रियाहीनमकल्पाङ्गं वामनं गुरुनिन्दकम् ॥
सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत् ।
गुरुर्म्मन्त्रस्य मूलं स्यान्मूलशुद्धौ सदा शुभम् ॥"

अपि च । क्रियासारसमुच्चये ।

"श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः ।
कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः ॥
हीनाङ्गः कपटी रोगी वह्वाशी बहुजल्पकः ।
एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसम्मतः ॥"

इति तन्त्रसारः ॥ * ॥

गुरुवर्गो यथा,—

"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः ।
मातुलः श्वशुरश्चाता मातामहपितामहौ ॥
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
मातामही मातुलानी तथा मातुश्च सोदराः ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियः ।
इत्युक्तो गुरुवर्गोऽयं मान्यतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥
नैनैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात् ।
जीविताद्यं पि हेयादृगुरुभिन्नेव भाषणम् ॥
उदितोऽपि गुणैरन्यैर्गुरुर्हेयो मतल्यधः ।
गुरुणाञ्चैव सर्व्वेषां पूज्याः पञ्च विशेषतः ॥
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ।
यो भावयति या स्तौति येन विद्योपदिश्यते ॥
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ।
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ॥
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ।
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ॥
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ।
पिता माता च संप्रीतौ स्यातां पुत्रगुणैर्यदि ॥
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ।
नास्ति पितृसमो देवो नास्ति मातृसमो गुरुः ॥
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ।
तयोर्न्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ।
वर्ज्जयित्वा सुकृतफलं नित्यं नैमित्तिकं तथा ॥
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्दफलप्रदः ।
सम्यगाराध्य वक्तारं विधिरुद्दिष्टदक्षिणैः ।
गुरुर्यो विद्याफलं मुक्ते प्रेत्य चाप्याप्नुते दिवि ॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
पुंसा वर्त्मनिविष्टेन पूज्यो भर्त्ता तु सर्व्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्त्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामाद्यर्यांश्लोकान् प्रोवाच भगवान् मनुः ॥
मातुलांश्च पितृव्यांश्च श्वशुरान्ऋत्विजो गुरून् ।
असावहमिति ब्रूयुः प्रत्युत्थाय यवीयसः ॥"

इति कूर्म्मपुराणे उपविभागे ११ अध्यायः ॥*॥

तस्य परीक्षा यथा ।

"सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः ।
नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः ॥
अपर्व्वमैथुनपरः पितृदेवार्च्चने रतः ।
गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥
दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः ।
परदारेषु विमुखो दृढसङ्कल्पको द्विजः ॥
अन्यैश्च वैदिकगुणैर्युक्तः कार्य्यो गुरुर्नृपैः ।
एतैरेव गुणैर्युक्तः पुरोधाः स्याम्महीभुजाम् ॥"

इति युक्तिकल्पतरुः ॥ * ॥

शिष्यकृतपापं गुरुं स्पृशति यथा ।

"मन्त्रिपापञ्च राजानं पतिं जायाकृतं तथा ।
तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत् ॥
प्राय इति गुरुणा शिष्यः सम्यग्बोधितोऽपि तदाचरणमनादृत्य पापच्छेदाचरति तदा तत् पापं गुरौ न आप्नोतीत्यर्थः ॥

वर्णाश्रमाणां सर्व्वेषामाचारः सद्गतिप्रदः ।
गुरुस्त्विवारमाचारं बोधयेत् कुलनायिके ! ॥
न गृह्णाति हि शिष्यश्चेत्तदा पापं गुरोर्न हि ।
इति कुलार्णववचनात् । इति शिवार्च्चनचन्द्रिका ॥

मन्त्रदगुरोर्लक्षणं यथा ।

"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ।
उकारो विष्णुरव्यक्तस्तितयात्मा गुरुः परः ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
उद्धर्त्तुं चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः ।
तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" * ॥

देशभेदेन तस्य विशेषो यथा ।

"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः ।
अन्तर्व्वेदिप्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः ॥
गौड़ाः प्राग्जोद्भवाः सौरा मगधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा ।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥
वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षाखामी न संशयः ॥"

इति तन्त्रसारः ॥ * ॥

"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः ॥"

इति चाणक्यम् ॥

कपिकच्छुः । इति राजनिर्घण्टः ॥ द्विमात्रः । दीर्घः । इति शब्दरत्नावली ॥ (गृणाति उपदिशति वेदान् । गॄ+"क्रुग्रोरुच ।" उणां । १ । २४ । इति उत् ।) वेदाध्यापयिताचार्य्यः । यथा, मनुः । ३ । १ ।

"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥"

गृणाति उपदिशति किञ्चिदपि यः । उपाध्याय इत्यर्थः । यथा, मनुः । २ । १४६ ।

"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमप्यिह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥"

गीर्य्यते स्तूयतेऽसौ ज्ञानतपोवृद्धत्वात् । ज्ञानप्रभावान्वितत्वात् तपोबलप्राधान्याद् वा पूज्यतमोमहात्मा । यथा, मनुः । २ । १३० ।

"मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।"

"भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयोश्च कनिष्ठयोरपि सम्भवात् तद्विषयोऽयं गुरुशब्दः ।"

इति टीकाकृत् कुल्लूकभट्टः । गृणाति उपनीय सन्ध्योपासनाचारादीनि कर्म्माणि उपदिशति । उपनेता सन्ध्योपासनादुपदेष्टा च । यथा, मनुः । २ । ६६ ।

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च ॥"

पिता । यथा, रामायणे । २ । ७६ । २ ।

"गतो दशरथः स्वर्गं यो नो गुरुतरोगुरुः ।"

राजचक्रवर्त्ती सम्राट् । यथा, रघुः २ । ६८ ।

"गुरुर्नृपाणां गुरवे निवेद्य ।"

गिरति अज्ञानमन्तर्यामिरूपेणाविद्यां नाशयतीत्यर्थः । गीर्य्यते स्तूयते जीवनिकरैरिति वा । गॄ वा उत् । विष्णुः । यथा, महाभारते । १३ । १४६ । ६५ ।

"आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥"

शिवः । तत्रैव । १७ । १३० ।

"सहस्रमूर्द्धा देवेन्द्रः सर्व्वदेवमयो गुरुः ।"

ब्रह्मा । माननीयः । एकेनैव श्लोकेनैतयोरुदाहरणं यथा, काशीखण्डे । ६६ । ७१ ।

"विभ्रत् सहजकाठिन्यं जातो गौरीगुरुर्गुरुः ।
शम्भुं प्रपूज्य सुतया सजा विश्वगुरोरपि ॥"

विश्वगुरोर्ब्रह्मणोऽपिगुरुर्मान्यनीयः पूज्यो वा इति तट्टीका ।

उपदेष्टृ अर्थे यथा सुश्रुतसूत्रस्थाने तृतीयाध्याये

"अथ वत्स ! तदेतदध्येयं यथा तथोपधारय

मया प्रोच्यमानम्। अथ शुचये कृतोत्तरासङ्गाया-व्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथा-शक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा ते च पद-पाद-श्लोका भूयः क्रमेणागुसर्ज्जेया एव-मेकैकशो घटयेदात्मनाचानुपठेत्।" तत्रैव चतुर्थे "शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत्। यः कर्म्म कुरुते वेद्यः स वेद्योऽन्ये तु तस्कराः॥")

गुरुः, त्रि, (गीर्य्यते स्तूयते महत्त्वात्। गॄ+क्वयो-रुच" उणां।१।२४। इति उत्) महान्। (यथा, ऋग्वेदे।४।५।६। "इदं मे अग्ने! कियते पावका-मिनते गुरुं भारं न मन्म।") दुर्जरः। अलघुः। इति मेदिनी॥ रे।२५॥ (यथा, पञ्चतन्त्रे।२।१६६ "प्राप्तो बन्धनमप्यहं गुरुत्वगस्तावत् त्वया मे हृतः।" पराक्रान्तः। यथा, पञ्चतन्त्रे।३।२८। "सोत्साहशक्तिसम्पन्नो हन्याच्छत्रुं लघुर्गुरुम्।" भारायमाणः। यथा, रघुः। १२। १०२। "अथ मदगुरुपक्षैर्लोकपालावलिप्तानाम्।" अथ मदेन गजगण्डसञ्चारसंक्रान्तेन गुरुपक्षैः भारायमाणपक्षैः अवलिप्तैः।" इति टीका-कृन्मल्लिनाथः। अतिशयः। यथा, मेघदूते।१।१। "कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः॥")

गुरुक्रमः, पुं, (गुरोरेव क्रमः पारम्पर्य्यं यत्र।) इतिह। पारम्पर्य्योपदेशः। इति हलायुधः॥

गुरुघ्नः, पुं, (गुरून् पराक्रान्तानपि यज्ञज्ञान राज्ञसादीन् हन्ति निराकरोतीत्यर्थः। हन्+ टक्।) गौरसर्षपः। इति राजनिर्घण्टः। गुरुहन्तरि त्रि॥

गुरुण्टकः, पुं, (गुरुं दुर्जरत्वस्वादिकं रुणद्धि चोरयति हरतीति यावत्। गुरुं गुरुतां दुर्ज्जरतां रुणद्धीत्येके रुटद्रुन्धे+खुल् ततः पृषोदरात् रुलोपे साधुः।) तिलमयूरः। इति त्रिकाण्ड-शेषः॥

गुरुतल्पगः, पुं, (गुरोः पितुराचार्य्योपाध्याया-देर्वा तल्पं शय्यां पत्नीमितियावत्; गच्छति इति गम्+डः।) विमात्रगन्ता। यथा,—

"गुरुतल्पगः सुरापश्च स्तेयी च गुरुतल्पगः। एते सर्व्वे पृथग्ज्ञेया महापातकिनो नराः॥" एतस्य नरकभोगावसाने पुनर्गृहीतमनुष्यदेहस्य फलं यथा, तत्रैव।११।४६।

"ब्रह्महा क्षयरोगित्वं दौश्चर्म्म्यं गुरुतल्पगः।")

गुरुतालः, पुं, (गुरुः अपेक्षाकृतदीर्घकालव्यापी-तालः।) तालविशेषः। यथा,—

"एक एव गुरुर्यत्र गुरुतालः स कथ्यते। अपरं नियमं विना॥" इति सङ्गीतदामोदरः;

गुरुत्वं, क्ली, (गुरोर्भावः। "त्वतलौ" इति त्वप्रत्ययसतः त्वान्तं क्लीवमिति क्लीवत्वम्।) महत्त्वम्। गुरुता। (यथा, भाषापरिच्छेदे।३१) "स्पर्शादयोऽष्टौ वैगुण्य गुरुत्वञ्च द्रवत्वकम्।") अलघुता। यथा,—

"अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादित्रये तु तत्। अनित्ये तदनित्यं स्यात् नित्ये नित्यमुदाहृतम्॥ तदेवासमवायि स्यात् पतनाख्ये तु कर्म्मणि।"

इति भाषापरिच्छेदः॥

(आधिक्यम्। यथा, रघुः। २। १८।

"गरिष्ठैर्गुरुत्वाद्वपुषो नरेन्द्रः।" वपुषो गुरु-त्वात् आधिक्यात् इति मल्लिनाथस्तट्टीकायाम्। पूज्यत्वम्। यथा, तत्रैव। १०। ६४।

"मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः।")

गुरुदेवतः, पुं, (गुरुर्हस्पतिर्देवतमस्येति।) पुष्य-नक्षत्रम्। इति हेमचन्द्रः। २। २५॥

गुरुपत्रं, क्ली, (गुरुपाके दुर्ज्जरं पत्रं पत्राकार-फलकमस्य।) वङ्गम्। इति हेमचन्द्रः॥ ४। १०८॥

गुरुपत्रा, स्त्री, (गुरु सेवने दुर्ज्जरं पत्रं पर्ण-मस्याः।) तिन्तिड़ीवृक्षः। इति शब्दरत्ना-वली॥

गुरुमर्द्दलः, पुं, (गुरुः मर्द्दल इति नित्यकर्म्म-धारयः।) डिण्डिमवाद्यम्। इति शब्दरत्ना-वली॥

गुररत्नं, क्ली, (गुरु गौरवान्वितं मूल्यवदित्यर्थः गुरुत्वाद् गुरु वा रत्नम् गुरोः प्रियं रत्नमित्येके।) पुष्परागमणिः। इति राजनिर्घण्टः॥ (पर-मित्यत्र नवग्रहदोषशान्तये गुरौ सुक्तेवेत्युक्ता) यथा, अस्मिन्नेव शब्दकल्पद्रुमे नवरत्नशब्दे।

"नवग्रहदोषशान्त्यै धार्य्याणि नवरत्नानि। वदूर्य्यं धारयेत् सूर्य्ये नीलञ्च शनलाञ्छने॥ आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्के। गुरौ मुक्ता भवौ वज्रं शनौ नीलं विदुर्बुधाः॥"

इति॥

मणेरुत्पत्तिप्रभेदाश्चैव रत्नशब्दे द्रष्टव्यं यथा,—

"वज्रमुक्ताश्मसमयः सपद्मरागाः समरकताः प्रोक्ताः। अपिचेन्द्रनीलवरवैदूर्य्याश्च पुष्यरागाश्च॥")

गुरुवर्च्चोघ्नः, पुं, (गुरुवर्च्चः वातपित्तादिप्रकोप-जनिताग्निमान्द्यकोष्ठरोधनादिदोषसं हन्ति इति हन्+टक्।) लिम्बाकः। इति शब्दचन्द्रिका॥ पातिलेबु। इति भाषा॥

गुरुहा, [न्] पुं, (गुरुं हन्ति इति। हन्+क्विप्।) गुरुघ्नः। तत्पर्य्यायः। नरकौलकः २। इति हेमचन्द्रः। ३। ५२२॥ गुरुहन्तरि त्रि।

गुर्ज्जरः, पुं, (गुर् शुचुकृततादनं बधोद्यमादिकं वा उज्जरयति यो देशः। कलिङ्गाः साह-सिका इतिवद्देशशब्देन लक्षणेति ज्ञेयम्।) गुज्जराटदेशः। इति शब्दरत्नावली॥

गुर्ज्जरी, स्त्री, (गॄ+क्विच्+अच। गुरिति शुचु-कृततादनादिकं तज्जीर्य्यत्यत्र इति अधिकरणे अप्। गुर्ज्जरः देशः तस्य प्रियेति ङीष्। यद्वा गुर्ज्जरदेशः प्रियोऽस्या इति अण ङीप् च। गुर्ज्जरदेशवासिनी अतो गुर्ज्जरीति केचित्।) रागिणीविशेषः। इति हलायुधः॥ इयन्तु भैरव-रागस्य रागिणीति बोध्यम्। यथा, सङ्गीतदर्पणे रागविवेकाध्याये।१६।

"भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा। वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः॥"

अस्या गानवेलानिर्णयो यथा, तत्रैव।२०।

"वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरी।" इयं हि ग्रीष्मऋतौ स्वस्वामिना भैरवरागेण सह गीयते। यथा, तत्रैव।२७।

"भैरवः ससहायस्तु ऋतौ ग्रीष्मे प्रगीयते।" इति सोमेश्वरमतम्। हनूमन्मते तु। इयमेव मेघरागस्य स्त्री। यथा, तत्रैव।३०।

"मल्लारी देशकारी च भूपाली गुर्ज्जरी तथा। टङ्का च पञ्चमी भार्य्या मेघरागस्य योषितः॥"

इयं पुना रागार्णवमते पञ्चमरागाश्रया रागिणी-त्यवधेयम्। यथा, तत्रैव।४०।

"ललिता गुर्ज्जरी देशी वराड़ी रामकृत्तथा। मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः॥")

गुर्द्द क निकेतने। कूर्द्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) दीर्घिणो वक्ष्यमाणत्वाद-स्यान दीर्घः। क गुर्दयति। निकेतनं निवासः। इति दुर्गादासः॥

गुर्द्द ड कूर्द्दे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) दीर्घिणो वक्ष्यमाणत्वादस्यापि न दीर्घः। ड गुर्दते। कूर्दः क्रीड़ा। इति दुर्गादासः॥

गुर्व्व ई उद्यमे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट् ईरित्।) अकर्मकेऽपि। खड्गादेरुत्तो-लनार्थकस्य गुर्व्वधातोः सकर्मकत्वमकर्मकत्वम् चैतत् प्रज्ञावद्भिरेव चिन्तनीयम्।) इत्वी। गूः गुरौ गुरः। ई गूर्णः। गुर्व्वति पत्तिः खड्गम्। इति दुर्गादासः॥

गुर्व्विणी, स्त्री, (गर्व्वति कुक्षौ सन्तानमपत्यमित्यर्थः प्राप्नोति धारयतीति यावत्। गर्व्व गतौ। "गर्व्वे-रत उच्च।" उणां। २। ५४। इति उत् इनन् च गौरादित्वात् ङीष्। गर्व्वयति सुचयतीत्येके। यद्वा गुरुर्गुरुभारयुक्तो गर्भोऽस्यस्याः अपत्य-धारणात्तथात्वम्। गुरु+"ब्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) गर्भिणी। इत्यमरः। २। ६। २२॥ (यथा, मार्कण्डेये। २७। २०।

"बन्धकीपद्मशरभशूलिकागुर्व्विणीरुनात्। प्रज्ञा नृपेण चादेया तथा गोपालयोषितः॥"

यथास्याः पथ्यापथ्यनियमः।

यदृयत् कामयते सा च तत्तद्दद्याद्विषग्वरः। वर्ज्जयेद्विदलान्नानि विदाहीनि गुरूणि च॥ अम्लानि सोष्णक्षीराणि गुर्व्विणीनां विवर्ज्जयेत्। न्तिका भक्षणीया न न च शूरणकन्दकाः॥ रसोनश्च पलाण्डुश्च सन्त्याज्यो गुर्व्विणीस्त्रिया। शूरणानि प्रदेयानि गौल्लानि सरसानि च॥ पथ्ये हितानि चैतानि गुर्व्विणीनां सदा भिषक्। यायामं मैथुनं रोषं शौर्य्यञ्चक्रमणञ्तथा॥ वर्ज्जयेद्गुर्व्विणीनाञ्च जायन्ते सुखसम्पदः॥"

इति हारीते ततीयस्थानेऽष्टचत्वारिंशेऽध्याये॥)

गुर्व्वी, स्त्री, (गुरुर्भारयुक्तो गर्भोऽस्याः । गुरु + ङीष् ।) गर्भवती । इति हेमचन्द्रः । ३ । २०३ ॥ ("नहि वन्ध्या विजानाति गुर्व्वीप्रसववेदनाम् ॥" इति हितोपदेशः ॥)

गुरुपत्नी । (गुरोः पत्नीति गुरु + ङीष् ।) गौरवयुक्ता । (गुरु + वोतोगुणवचनात् ।" ४ । १ । ४४ । इति विभाषायां ङीष् ।) यथा । अनन्यगुर्व्वाश्रयकेन केवलः पुराणमूर्त्तेर्महिमावगम्यते । इति माघः ॥ (गुरुभारविशिष्टा । यथा, महाभारते । ३ । २२ । ३७ ।

"ततः शाल्वं गदां गुर्व्वीमाविध्यन्तं महाहवे ।
द्विधाचकार सहसा प्रजज्वाल च तेजसा ॥"

गायत्री । यथा,—

देवीभागवते । १२ । ६ । ४२ ।

"गुह्यवासा गुणवती गुरुपापप्रणाशिनी ।
गुर्व्वी गुणवती गुह्या गोप्तव्या गुणरूपिणी ॥")

गुलः, पुं, (गुड् + डलयोरैक्याडुकारस्य लत्वम् ।) ऐक्षवः । गुडः । इति मेदिनी । वे । १३ ॥

गुलञ्चकन्दः, पुं, (गुलञ्चस्य लताविशेषस्य कन्द इव कन्दोऽस्य गुलं गुडवद्रसं अञ्चति अञ्च + अण् । ततः शाकपार्थिवादित्वादलोपे गुलञ्चः ताडशः कन्दः । इति केचित् ।) कन्दविशेषः । कुली इति भाषा । तत्पर्य्यायः । गुच्छाङ्गकन्दः २ बलाङ्गकन्दः ३ निषण्टिका ४ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । वृष्यप्रदत्वम् । तर्पणत्वम् । दाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुला, स्त्री, (गुलं गुडइव रसोऽस्यस्या इति अर्शआदिभ्योऽच् ततष्टाप् ।) क्षुद्रौषधिः । इति मेदिनी । ले । १३ ॥

गुली, स्त्री, (गुडः क्षुद्रवर्त्तुलाकृतिर्विषमयस्फोटाकृतिरित्यर्थः विद्यतेऽस्याः इति अर्शआदिभ्योऽच् ततो ङीष् ।) गुटिका । रोगभेदः । वसन्त इति ख्यातः । इति मेदिनी । ले । १४ ॥

गुलुञ्छः, पुं, (गुञ्छ + एषोदरात् साधुः ।) गुच्छः । स्तबकः । इति त्रिकाण्डशेषः ॥

गुलुञ्छः, पुं, (गुञ्छति गोलाकारेण वेष्टयतीति गुञ्छ + क्विप् गुञ् तं तदाकारं उञ्छति आदत्ते उपार्ज्जयति वा । उञ्छि "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततो ऊङ्यलत्वे साधुः ।) गुच्छः । इति हेमचन्द्रः । ४ । १६२ ॥

गुलुञ्छकः, पुं, (गुलुञ्छ + स्वार्थे कन् ।) गुच्छः । इति शब्दरत्नावली ॥

गुल्फः, पुं, (गल + "कल्यगलिभ्यां फगस्योच ।" उणा । ५ । २६ । इति फक् अकारस्योत्वं च ।) पादग्रन्थिः । तत्पर्य्यायः । घुटिका २ । इत्यमरः । २ । ६ । ७२ ॥ चरणग्रन्थिः ३ घुटिकः ४ घुण्टकः ५ घुण्टः ६ । इति हेमचन्द्रः । ३ । २७६ ॥ (यथा, गीः रामायणे । ६ । २३ । १२ ।

"समावेतौ करौ पादौ गुल्फौ चावनतौ मम ॥")

गुल्मः, पुं, (गुडति वेष्टयति गुण्यते वेष्टते वा, गुड + करणे बाहुलकात् मक् डलयोरैक्यात् ऊङ्यलत्वे साधुः ।) उदरजरोगविशेषः । तस्य निदानादि।

"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः ।
कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥*
तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः ।
हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ॥
वृत्तत्वयापचयवान् स गुल्म इति कीर्त्तितः ।
स यस्त्रैर्जायते दोषैः समस्तैरपि चोच्यते ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥*
तस्य पूर्व्वरूपं यथा,—

"उद्गारबाहुल्यपुरीषबन्ध-
लघ्वन्नचमलान्नविकूजनानि ।
आटोपआध्मानमपक्तिशक्ति-
रासन्नगुल्मस्य वदन्ति लिङ्गम् ॥" * ॥

तस्य सामान्यरूपम् ।

"अरुचिः क्षुच्छ्विमूर्च्छवाततान्त्रविकूजनम् ।
आनाहश्चोर्द्ध्ववातश्च सर्व्वगुल्मेषु लक्षयेत् ॥*॥

वातिकस्य निदानं यथा,—

"रूक्षान्नपानं विषमातिमात्रं
विचेष्टनं वेगविनिग्रहश्च ।
प्लीकोऽभिघातोऽतिमलक्षयश्च
निरन्नता चानिलगुल्महेतुः ॥" * ॥

वातिकस्य रूपम् । यथा,—

"यः स्थानसंस्थानरुजा विकल्पं
विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरश्च
हृत्कुक्षिपार्श्वां सशिरोरुजश्च ॥
करोति जीर्णेऽभ्यधिकं प्रकोपं
सुप्ते रुदुद्धं समुपैति यश्च ।
वातात् स गुल्मो न च तत्र रूपं
कषायतिक्तं कटु चोपशेते ॥" * ॥

पैत्तिकस्य निदानं यथा,—

"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताग्निसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥" * ॥

पैत्तिकस्य रूपं यथा,—

"ज्वरः पिपासा वदनाङ्गरागः
शूलं महच्जीर्य्यति भोजने च ।
स्वेदो विदाहो ग्रथनञ्च गुल्मः
सप्तार्त्तिसङ्घः पैत्तिकगुल्मरूपम् ॥" * ॥

श्लैष्मिकस्य निदानम् ।

"प्रीतं गुरु स्निग्धमचेष्टनञ्च
संपूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसम्भवस्य
सर्व्वस्तु दुष्टो निचयात्मकस्य ॥" * ॥

श्लैष्मिकस्य रूपम् ।

"श्लेष्मित्यशीतज्वरगात्रसाद-
हृल्लासकासारुचिगौरवाणि ।
श्लैष्मं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य ॥" * ॥

द्वन्द्वजस्य रूपं यथा,—

"निमित्तलिङ्गान्युपलभ्य गुल्मे
द्विदोषजे दोषबलाबलज्ञः ।
यामिश्रलिङ्गानपरांश्च गुल्मां-
स्त्रीणादिशेद्दोषकृतप्रकल्पनार्थम् ॥" * ॥

त्रिदोषजस्य रूपं यथा,—

"महारुजं दाहपरीतमग्नवद्
घनोन्नतं शीघ्रविदाहिदारुणम् ।
मनःशरीराग्निबलापहारिणं
त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥" * ॥

अथ स्त्रीणां रक्तजगुल्मनिदानं यथा,—

"नवप्रसूताहितभोजना या
या चामगर्भं विसृजेद्वृतौ वा ।
वायुर्हि तस्याः परिगृह्य रक्तं
करोति गुल्मं सरुजं सदाहम् ॥" * ॥

स्त्रीणां रक्तजगुल्मलक्षणं यथा,—

"पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषमस्याध्यपरं निबोध ।
यः स्रन्दते पिच्छित एव नाड्ये-
श्चिरात् सशूलः समगर्भलिङ्गः ॥
सरौधिरः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः ।

स्त्रीणामार्त्तवजो गुल्मो न पुंसासूपजायते ।
अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसाञ्च जायते ॥
अथासाध्यलक्षणं यथा,—

सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः ।
छिन्नमूलः शिरागन्धो यदा कूर्म्म इवोन्नतः ॥
दौर्ब्बल्यारुचिहृल्लासकासच्छर्दरतिज्वरैः ।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥
गृहीत्वा सज्वरं श्वासच्छर्दतीसारपीडितम् ।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥
श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिसम्भवः ।
जायते दुर्ब्बलत्वञ्च गुल्मिनो मरणाय वै ॥"
इति माधवकरः ॥ * ॥

तच्चिकित्सा यथा,—

"वातारितैलेन प्रयोजयेत्तं
पथ्यासमेतेन विरेचनं हि ।
संस्वेदनं स्निग्धमतिप्रशस्तं
प्रभञ्जनक्रोधकृते तु गुल्मे ॥
स्वल्पैकाकुक्षसहितः क्षारः केतकसम्भवः ।
पीतस्तैलेन शमयेद्गुल्मं पवनसम्भवम् ॥
तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौञ्चबर्हकान् ।
सर्पिः घ्राणं प्रसन्नाञ्च वातगुल्मे प्रयोजयेत् ॥*॥
पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाम्बुना ।
विरेकाय सितायुक्तं कम्पिल्लं वा समाक्षिकम् ॥"

त्रिफलाम्बुना त्रिफलाक्वाथेन । कम्पिल्लं कम्पिला इति लोके ।

"अभयां द्राक्षया खादेत् पित्तगुल्मी गुडेन वा ॥*
योगेऽथ वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ॥
अपरेऽथ बलासघ्नैर्युक्तियुक्तैः शमं नयेत् ॥"* ॥
हिङ्गुग्रन्थिकधान्यजीरकवचाचव्यामिपाठाग्नटी-
वृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाडिमम् ।
पथ्यापौष्करवेतसाम्लहृदुषाजाज्यस्तदेभिः कृतं
चूर्णं भावितमेतदार्द्रकरसैः स्यादृबीजपूरद्रवैः ॥
गुल्माध्मानगुदाङ्कुरान् ग्रहणिकोदावर्त्तसंज्ञौ गद

प्रत्याभानगरोदराक्षरियुतांस्तूनीद्वयारोच-
कान् ।
ऊरुस्तम्भमतिभ्रमञ्च मनसो बाधिर्य्यमष्ठीलिकां
प्रत्यष्ठीलिकया सहापहरते प्राक्पीतसुध्या-
म्बुना ॥

हृत्कुक्षिवंक्षणकटीजठरान्तरेषु
वस्तिस्तनांशफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातबलासजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥"

हिङ्ग्वादिचूर्णम् ॥ * ॥

"धीमानुपचरेद्गुल्मं प्रत्येकञ्च त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥
शूरपुङ्खस्य लवणं पथ्याचूर्णं समं द्वयम् ।
घ्राणप्रमाणमग्नीयाचूर्णं गुल्मगदापहम् ॥
खर्ज्जिका घ्राणमाना स्यात्तावदेव गुड़ं भवेत् ।
उभयोर्वटिकां खादेद्गुल्मामयविनाशिनीम् ॥*
पलाशवज्रीशिखरित्रिक्षारकतिलनालजाः ।
यवजः खर्ज्जिका चेति क्षारा अष्टौ प्रकीर्त्तिताः ॥
गुल्मशूलहराः क्षारा अजीर्णस्य च पाचनाः ।"

क्षाराष्टकम् ॥ * ॥

"सासुद्रं सैन्धवं काचं यवक्षारः सुवर्चलम् ।
टङ्कणं खर्ज्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥
वज्रीक्षीरेरविक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण रुद्ध्वा भाण्डपुटे पचेत् ॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलां
तथा ।
यवानी जीरको वह्निचूर्णमेषाञ्च कारयेत् ॥
सर्व्वचूर्णसमं क्षारं सर्व्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥
गुल्मे शूले तथाजीर्णे प्लीहे सर्व्वोदरेषु च ।
मन्दे वह्नावुदावर्त्ते प्लीहि चापि परं हितम् ॥
वातेऽधिके जलैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥
वज्रक्षार इति ख्यातः प्रोक्तः पूर्व्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाजीर्णभवान् गदान् ॥"

वज्रक्षारः ॥ * ॥

"सुवर्चिका टङ्कमिता घ्राणमानार्द्रिकापि च ।
उभे भक्षीत युगपद्गुल्मामयनिवृत्तये ॥"

सुवर्चिका सोरा इति लोके ।

"शुक्तिकाचूर्णगुटिकां टङ्कमात्रां सुवेष्टयेत् ।
गुड़ेन घ्राणमानेन ताड़ितेत् गुल्मरोगवान् ॥
गुल्मी कुमारिकामांसं कर्षार्द्धं गोघृतान्वितम् ।
गिलेत् घोषाभयासिन्धुसूक्ष्मचूर्णावधूलितम् ॥
कुमारिका घिउकुँयारी इति लोके ॥ * ॥

"वल्लूरं मूलकं मत्स्यं शुष्कशाकानि वेदलम् ।
न खादेदानुकं गुल्मी मधुराणि फलानि च ॥
वेदलानां निषेधेऽपि माषकुलत्थयोर्न्नास्तिनिषेधः ।
इति सुश्रुतटीका । इति गुल्माधिकारः ॥ इति
भावप्रकाशः ॥

अथ गुल्मचिकित्सा ।

आत्रेय उवाच ।

"भयधूत्योपचारेण दोषैः संकुप्यतेऽनिलः ।
मन्दाग्निना हि जठरे जायते गुल्मरुङ् नृणाम् ॥
उदरं गर्জ্জते यस्य विषमाग्निश्च दह्यते ।
तोदो वपुषि शूलञ्च वातगुल्मं विनिर्द्दिशेत् ॥
शोथोऽरतिः सपीतत्वं मन्दज्वरनिपीड़ितम् ।
तमोभ्रमपिपासार्त्तं गुल्मं तत् पित्तसम्भवम् ॥
शीतो जाड्यञ्च श्लेष्मासं तन्द्रालस्यं सशीतकम् ।
मन्दाग्निर्विड्विबन्धश्च गुल्मं तत् श्लेष्मसम्भवम् ॥
मोहो विभ्रमता जाड्यमरतिश्छर्दितृषापिपासकम् ।
आलस्यं निद्रया चैवं गुल्मं तत् कफपैत्तिकम् ॥
निद्रालस्यञ्च दाहश्च शोथात् शूलञ्च सञ्चरम् ।
वैवश्यमरतिर्जाड्यं विड्बन्धो विकलाङ्गता ॥
तथातीसारमूर्च्छा च क्षयाच्छ्वासवेपथु ।
श्वासोऽरुचिरजीर्णत्वं गुल्मं तत्सान्निपातिकम् ॥
साध्यं केवलदोषोत्थं द्वन्द्वं कष्टेन सिध्यति ।
असाध्यं सन्निपातोत्थं वक्ष्यामस्तत्प्रतिक्रियाम् ॥
यच्चतुश्चिकित्सितञ्चैव कथितञ्चोपचारजम् ।
तच्चतुःशीघ्रा समाख्यातो न चात्र कथितं पुनः ॥
चिकित्सोदरगुल्मस्य वक्ष्यते शृणु साम्प्रतम् ।
स्नेहनं रूक्षणञ्चैव पाचनं शोधनानि च ॥
संशमनं विरेकञ्च वस्ति-स्नेह-निरूहणम् ।
क्षये पानञ्च चूर्णानि गुल्मोपचरणक्रिया ॥
शुण्ठीमूर्व्वा पद्ममूलं लघुराम्ना च दारु च ।
क्वाथोऽस्य क्षावशेषः स्यात् तत्समं क्षीरमेव च ॥
दधितत्समभागन्तु पाचयेत्तत्समाग्निना ।
घृतं यावत् प्रपक्वञ्च सिद्धमुत्तार्य्यते ततः ॥
तत्कृतं पानकेऽभ्यङ्गे भोजने च प्रदापयेत् ।
स्नेहं सप्तदिनं यावत् तस्माच्च रूक्षयं हितम् ॥
दिनत्रयञ्च कर्त्तव्यं कथयाम्यत्र कोविद ! ।
शुण्ठी सौवर्चलं जीरे द्वे वा हिङ्गुसमन्वितम् ॥
काञ्जिकं पानमेतेषां रूक्षणं गुल्मशान्तये ।
गुल्मचिकित्सिते क्षारपाकोऽत्र प्रतियुज्यते ॥

क्षारं पलाशार्ज्जुनसूरणस्य
क्षारं तथा वै सहयावशूकम् ।
सौवर्चलं सिन्धुभवोद्भिदञ्च
सासुद्रजं वापि विमिश्रयेच्च ॥
तोयं परिस्राव्य विधानतोऽपि
युक्तं तथैतानि सदौषधानि ।
पथ्यामिशुण्ठी रजनीसुराङ्कं
कुष्ठं विशाला च यवानिका च ॥
तथाजमोदा सहजीरकेद्वे
षड्ग्रन्थिका हिङ्गुयुतञ्च चूर्णम् ।
क्षारोदकौ पानविमिश्रपानं
निहन्ति सर्व्वाण्यपि कोष्ठजानि ॥
गुल्मानि सर्व्वाणि विसूचिकानां
मन्दाग्निशूलानि भगन्दराणाम् ।
प्लीहोदरानाहमथो विबन्धं
विनाशनो रोगचयं नराणाम् ॥"

इति विरुच्यम् ॥ * ॥

अथ विरेचनानि वक्ष्यामः ॥ * ॥

"नागरं क्रिमिजित् पथ्या त्रिवृता त्रिगुणायुतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्ती च भागमेकञ्च द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ॥
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरिजलं पिबेत् ॥
कथितञ्च विरेकञ्च वातगुल्मोपशान्तये ।"

इति वातगुल्मविरेचनम् ॥ * ॥

"पिबेदेरण्डतैलञ्च सर्करां क्षीरसंयुतम् ।
पित्तगुल्मविरेकाय श्रेष्ठमेतत् सुखावहम् ॥
क्षारगर्भं प्रवालानि तथैवारग्वधानि च ।
विभाव्यैरण्डतैलेन ततपचेच्चैव वेष्टयेत् ॥
कट्टेन प्रलिप्याथ अङ्गारेषु निधापयेत् ।
सुस्विन्नभर्ज्जितां ताञ्च भक्षयेत् शर्करान्विताम् ॥
विरेकं पैत्तिके गुल्मे हितं शुद्धविरेचनम् ।"

इति पित्तगुल्मविरेचनम् ॥ * ॥

"त्रिफला सुरसा शुण्ठी चूर्णं क्षौद्रा विभावयेत् ।
स्नुहीक्षीरेण वारेकं गुड़ेन सह मिश्रितम् ॥
विरेकः श्लेष्मगुल्मे च सर्व्वोदरविनाशनम् ।
शुण्ठी सौवर्चलं पथ्या विड़ङ्गञ्च पुनर्नवा ॥
चूर्णोऽपामार्गबीजानां स्नुहीक्षीरेण भावितः ।
गुड़ेन संयुतं खादेत् पश्चात् सोष्णं जलं पिबेत् ॥
विरेकः सर्व्वगुल्मेषु प्रशस्तो हितकारकः ॥

इति विरेचनम् । [कोकिला

शुक्तिक्षारनिशाविशालकदली स्यात् सूरणं
पालाशं दहनार्জ্জुनं ग्रथितयाऽपामार्गकुष्मा-
ण्डकम् ।
दग्ध्वाक्षारविपाचितं परिप्लुतं हिङ्गुत्रिकट्वन्वितं
गुल्मानाहविबन्धशूलहरणं सर्व्वोदराणां हितम् ॥

इति क्षारपानम् ॥ * ॥

"अजमोदा ग्रन्थी दन्ती विड़ङ्गं शुण्ठितुम्बुरु ।
त्रिफला चित्रकश्चैव शुण्ठी कर्कटशृङ्गिका ॥
त्रिवृता च सुराङ्का च पुष्करं वृक्षदारकम् ।
तथाश्वेतसहचैव तिन्तिड़ीकश्च चिल्लिः ॥
समन्तु मातुलुङ्गेन विभाव्यैकतः कृतम् ।
त्रिभागहिङ्गुसंयुक्तं घृतेन चूर्णितं हितम् ॥
निहन्ति वातगुल्मञ्च सशूलमुदरन्तथा ।"

इत्यजमोदादि ॥ * ॥

हिङ्गुपलत्रिकजीरकयुग्मं
चित्रकभागिककुष्ठविड़ङ्गम् ।
तुम्बुरुपुष्कर-विश्वसुराङ्गं
क्षारयुतं लवणानि च पञ्च ॥
वातिकगुल्मविनाशनहेतुः
शूलरुजञ्च नरस्य निहन्ति ॥"

इति वातगुल्मचिकित्सा ॥ * ॥

"विदारी क्षीरशुक्ला च पथ्या विश्वौषधं मधु ।
लेहः पित्तात्मके गुल्मे हितः श्लेष्मनिवारणः ॥
यष्टिकं निम्बपत्राणि तथा धात्रीफलं सिता ।
चूर्णं मध्वावलीढञ्च पित्तगुल्मनिवारणम् ॥"

इति पित्तगुल्मचिकित्सा ॥ * ॥

"त्रिकटुत्रिफलाचित्रवटकट्फलसंयुतम् ।
चूर्णं मद्येन वा पीतं फलक्वाथेन वा पीतम् ॥
श्लेष्मगुल्मविनाशाय हितश्चैतत् सुखावहम् ।
लोध्रञ्च कट्फलं विश्वा कुष्ठं चित्रकमेव च ॥
नागरं हिङ्गुसंयुक्तं चूर्णं मूत्रेण संयुतम् ।

श्लेष्मगुल्मविनाशाय शूलोदरविनाशनम् ॥
उद्धृत्य च मरिचं चारचूर्णसमन्वितम् ।
पिबेन्मूत्रेण संयुक्तं श्लेष्मगुल्मविनाशनम् ॥"
इति श्लेष्मगुल्मचिकित्सा ॥ * ॥
"यष्टी सौवर्चलं भार्गी वृषकं यावशूकजम् ।
जीरे द्वे चाटरूषश्च यवानी हिङ्गुसैन्धवम् ॥
आरग्वधेन संयुक्तं चूर्णं सघृतमेव च ।
वातश्लेष्मोद्भवे गुल्मे सुखमाशुप्रपद्यते ।
उद्धृत्य फलत्रिकं देवदारुपुनर्नवा ॥
चित्रकसौवर्चलोपेतं चारोदकसमन्वितम् ।
पीतं वातकफे गुल्मे शुभकारि परं मतम् ॥"
इति वातश्लेष्मगुल्मचिकित्सा ॥ * ॥
इति हारीते चिकित्सितस्थाने चतुर्थोऽध्याये ॥
"रूक्षकषायारुणशिरा तनुजालगवाक्षितः ।
गुल्मोऽपि पृथक् दोषैः संसृष्टैर्निश्चयं गतः ॥
आर्तवस्य च दोषेण नारीणां जायतेऽथमः ।
ज्वरच्छर्दीतिसाराद्यैर्वमनाद्यैश्च कर्मभिः ॥
कर्शितो वातलान्यत्ति शीतं वाम्बुसुचितः ।
यः पिबत्यनुचान्नानि लङ्घनं प्लवनादिकम् ॥
सेवते देहसंशोभिच्छर्दिं वा समुदीरयेत् ।
अनुदीर्णानुदीर्णान् वा वातादीन्न विमुञ्चति ॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते ।
शुद्धो वाप्यविदाहीनि भजते स्नन्दनानि वा ॥
वातोल्बणास्त्वमलाः पृथक् कुद्वाद्विशोऽथवा ।
सर्वे वा रक्तयुक्ता वा महास्रोतोऽनुधायिनः ॥
ऊर्ध्वाधोमार्गमाश्रित्य कुर्वते शूलपूर्वकम् ।
स्पर्शोपलभ्यं गुल्माख्यमुत्पन्नं ग्रन्थिरूपिणम् ॥
कर्शनात् कफविट्पित्तैर्मार्गस्यावरणेन वा ।
वायुः कृताश्रयः कोष्ठे रौक्ष्यात् काठिन्यमागतः ।
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये ॥
चिक्षितत्वादमूर्तोऽपि मूर्तत्वमिवमंश्रितः ।
गुल्म इत्युच्यते वस्तिनाभिहृत्पार्श्व-संश्रयः ॥
वातात्मन्याधिरःशूलं ज्वरश्छर्दिरान्त्रकूजनम् ।
यथा स्वेव विट्सङ्गः क्षुच्छ्वासनं सुष्ठु ॥
स्तम्भो गात्रे मुखे शोषः कार्श्यं विषमवह्नितः ।
रूक्षकषायलघादित्यं चलत्वादनिलस्य च ॥
अनिरूपित-संस्थान-स्थानवृद्धित्वयत्वयः ।
पिपीलिकाया इव गुल्मः स्फुरति तुद्यते ॥
पित्तादाहोऽम्लको मूर्छा विड्भेदस्वेदक्लेद-
ज्वराः ।
हारिद्रत्वं त्वगादीनां गुल्मश्च स्पर्शनासहः ॥
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ।
कफात् स्तैमित्यमरुचिः सदनं शिशिरज्वरः ॥
पीनसालस्य-श्वासः कासश्लेष्मादितः ।
गुल्मोऽवगाढः कठिनो गुरुः सुप्तः स्थिरोऽल्प-
रुक् ॥
स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः ।
प्रायस्तयस्तु हृन्नाभ्या गुल्माः संसृष्टलक्षणाः ॥
सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः ।
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते ॥
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि स्त्री कुद्वस्तस्थाः समीरणः ॥
निरुणद्धार्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भ-लिङ्गमाविष्करोति च ॥
हृल्लास-दौहृदस्तन्य-दर्शनं श्यामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रक्तस्तम्भादाहातिसारवडूज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलंदुष्टासृगाश्रये ।
जन्याच्च सावदौर्गन्ध्यतोदस्रन्दनवेदनाः ॥
न चाङ्गैर्गर्भवद् गुल्मः स्फुरत्यपि तु शूलवान् ।
पिण्डीभूतः स एवास्याः कदाचित् स्रन्दते चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स दोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः ॥"
इति वाभटे निदानस्थाने पञ्चमेऽध्याये ॥
"रूक्षान्नपानैरतिसेवनैर्वा
शोकेन मिथ्या प्रतिकर्म्मणा वा ।
विचेष्टितैर्वा विषमात्रिभावैः
कोष्ठे प्रकोपं समुपैति वायुः ॥
कफञ्च पित्तञ्च स दूषयित्वा
प्रोह्य मार्गान् विनिबध्य ताभ्याम् ।
कृत्वोपपार्श्वोदरवस्तिशूलं
करोत्यधो याति न बद्धमार्गः ॥
पक्वाशये पित्तकफाशये वा
स्थितः स्वतन्त्रः परसंश्रयो वा ।
स्पर्शोपलभ्यः परिणिक्षितत्वात्
गुल्मो यथा दोषमुपैति नाम ॥
वस्तौ हि नाभ्यां हृदिपार्श्वयोर्वा
स्थानानि गुल्मस्य भवन्ति पञ्च ।
पञ्चात्मकस्य प्रभवन्तु तस्य
वक्ष्यामि लिङ्गानि चिकित्सितञ्च ॥
क्रियाक्रममतः सिद्धं गुल्मिनां गुल्मनाशनम् ।
प्रवक्ष्याम्यत ऊर्द्धञ्च योगान् गुल्मनिबर्हणान् ॥
रूक्षच्छायामलं गुल्मं वातिकं तीव्रवेदनम् ।
बद्धविट्-मारुतं स्नेहैरादितः समुपाचरेत् ॥
भोजनाभ्यञ्जनैः पानैर्निरूहैः सानुवासनैः ।
स्निग्धस्य भिषजा स्वेदः कर्त्तव्यो गुल्मशान्तये ॥
स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम् ।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ॥
स्नेहपानं मतं गुल्मे विशेषेणोर्द्धनाभिजे ॥

हबुषाद्यं घृतम् ।

हबुषा योष पृथ्वीका चव्यचित्रकसैन्धवः ।
साजाजीपिप्पलीमूलैर्दीप्यकैर्विपचेद्घृतम् ॥
मातुलुङ्गदधिक्षीर-कोलमूलकदाडिमैः ।
रसेस्तद्घृतगुल्मघ्नं शूलानाहविमोचनम् ॥
योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान् ।
वस्तिहृत्पार्श्वशूलञ्च घृतमेतदपोहति ॥"
इति हबुषाद्यं घृतम् ॥ * ॥
"तैलं प्रसन्ना गोमूत्रमारनालं यवाग्रजः ।
गुल्मजठरमानाहं पीतमेकत्र साधयेत् ॥"
इति तैलपञ्चकम् ॥ * ॥
"यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥
पञ्च गुल्माश्रया नृणां पार्श्वहृन्नाभिवस्तयः ।
कुपितानिलमूलत्वाद्गूढमूलोदयादपि ॥
गुल्मवद्वा विशालत्वाद् गुल्म इत्यभिधीयते ।
स यस्मादात्मनिचयं गच्छत्यम्बु बुदबुदः ॥
अन्तः सरति यस्माच्च न पाकमुपयात्यतः ।
सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजनम् ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
दोषोऽन्ने वायुरूर्द्धञ्च पूर्वरूपेषु गुल्मिनाम् ॥
हृत्कुक्षिशूलं सुखकण्ठशोषो
वायोर्निरोधो विषमाग्नता च ।
ते ते विकाराः पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसम्भवे तु ॥
खेदज्वराहारविदाहदाहा-
स्तृष्णाङ्गरागः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेरुचिरङ्गसाद
श्छर्दिः प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मकः सर्व्वविकारयुक्तः
सोऽसाध्य उक्तः क्षतजश्च वर्ज्ये ।
"न स्रन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम् ॥
तं गर्भकालातिगमे चिकित्स्य
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ॥"
चिकित्सा यथा ॥
"वातगुल्मार्दितं स्निग्धं युक्तं स्नेहविरेचनैः ।
उपाचरेत् यथाकालं निरूहैः सानुवासनैः ॥
पित्तगुल्मार्दितं स्निग्धं काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ॥
श्लेष्मगुल्मार्दितं स्निग्धं पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्योगैर्निरूहैः समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ।
पित्तवद्रक्तगुल्मिन्या नार्याः कार्यः क्रियाविधिः ॥
विशेषमपरञ्चास्याः शृणु रक्तविमोक्षणम् ।
पलाश-भस्मतोयेन सिद्धं सर्पिः प्रयोजयेत् ॥
दद्यादुत्तरवस्तिञ्च पिप्पल्यादिघृतेन तु ।
उन्नतेर्वा भेदयेद्विद्ध्वा विधिरास्रग्दरोदितः ॥
आनूपौदकमज्जानो वसातैलं घृतं दधि ।
विपक्वमेकतः शूलं वातगुल्मेऽनुवासनम् ॥
जाङ्गलैकशफानान्तु वसा सर्पिश्च पैत्तिके ।
तैलं जाङ्गलमज्ञान एवं गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षड्ङ्गं विपचेद्घृतम् ।
शर्करा सैन्धवोपेतं तद्धितं वातगुल्मिने ॥
चित्रकव्योषसिन्धूत्थ पृथ्वीका चव्यदाडिमौ ।
दीप्यकग्रन्थिकाजाजी हबुषा धान्यकैः समैः ॥
क्षारनालवदर-मूलकक्षारसैर्घृतम् ।
तत् पिबेद्वातगुल्माग्निदौर्बल्यार्शोमशूलनुत् ॥
विड्दाडिमसिन्धूत्थ-हृतसुगन्धोषणैः ।
हिङ्गुसौवर्चलक्षार-रुग्घृतक्षाम्लवेतसैः ॥
बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥

रसोनखरसे सर्पिः पक्वमूलरसान्वितम् ।
सुरारनालदध्यम्ल-मूलकखरसैः सह ॥
योष-दाडिमवृक्षाम्लयवानीचयसैन्धवैः ।
हिङ्गुव्वेतसाजाजीदीप्यकैश्च समाशिकैः ॥
सिद्धङ्गुल्मग्रहण्यर्शः-श्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्नि-प्लीहशूलानिलान् जयेत् ॥
ह्रस्वमूलकपाये तु जीवनीये: पचेद्घृतम् ।
न्यग्रोधादिगणे वापि.गणे वाप्युत्पलादिके ॥
रक्तपित्तोत्थितं ह्रन्ति घृतान्येतान्यसंशयम् ।
आरग्वधादौ विपचेद्दीपनीययुतं घृतम् ॥
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम् ।
ह्रन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम् ॥
यथा दोषोच्छ्रयश्चापि चिकित्सेत् सान्निपातिकम् ।

चूर्णं क्षिप्तादिकं वापि घृतं वा प्लीहनाशनम् ॥
पिबेद्गुल्मापहं काले सर्पिस्तैलकमेव वा ।
तिलेक्षुरकपालाशसार्जर्प-यवनालजम् ॥
भस्म मूलकजक्षारापि गोजाविखरहस्तिनाम् ।
मूत्रेण महिषीणाञ्च पालिकेक्षावचूर्णितैः ॥
कुष्ठ-सैन्धवयष्ट्याह्व-नागरक्रिमिघातिभिः ।
साजमोदैश्च दग्धैभिः सासुद्राच्च पलैर्युतम् ॥
अयःपात्रेऽग्निनाल्पेन पक्वा क्षेम्यमथोद्धरेत् ।
तस्य मात्रां पिबेद्धीमा सुरया सर्पिषापि वा ॥
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ।
गुल्मं वातविकारांश्च चारोऽयं ह्रन्त्यसंशयम् ॥"
"पीतं सुखाम्बुना वापि खर्जिका कुष्ठसैन्धवम् ।
वृक्षौकसस्तूकञ्च वर्षाभूश्चेति चूर्णितम् ।
चित्रकञ्च जलद्रोणे पक्वा पादावशेषितम् ॥
मागधी चित्रकक्षौद्रसर्पिर्भ्यां निधापयेत् ।
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम् ॥
तुषोदितं दशाहन्तु जीर्णभक्तः पिबन्नरः ।
अरिष्टोऽयं जयेद्गुल्ममविपाकमरोचकम् ॥
सञ्जाते सोष्णतस्यन्दे दाहपाकरुगन्विते ।
गुल्मे रक्तं जलौकोभिः शिरामोक्षेण वा हरेत् ॥
सुस्निग्धा जाङ्गलरसाः सुस्निग्धा यक्तसैन्धवाः ।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनाम् ॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः ।
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः ॥
बहुवर्चोऽनिलानान्तु सार्द्रकं क्षीरमिश्रते ।
कुम्भीपिक्केष्टकाखेटान् कारयेत् कुशलो भिषक् ॥
गुल्मिनः सर्म रक्तोत्था दुर्विरेच्यतमा भृशम् ।
अतस्तेषांस्तु सुस्निग्धान् स्वेदनेनोपपादयेत् ॥
विरेचनाभ्यञ्जनानि तथा सन्दहनानि च ।
उपनाहाश्च कर्तव्याः सुखोष्णाः वातलादयः ।
उदरोक्तानि सर्पींषि चूर्णवर्त्तिक्रियास्तथा ॥
लवणानि च योज्यानि यान्युक्तान्युदरामये ।
वातवर्चोनिरोधे तु सासुद्रार्द्रकसर्जपैः ॥
ज्ञात्वा पायौ विधातव्या वर्तयो मरिचोत्तराः ।
दग्धी चित्रकमूलेषु तथा वातहरेषु च ॥
कुर्यादरिष्टान् सर्वांश्च स्वस्थाने यथेरितान् ।
खादेद्वाप्युषरान् भृष्टान् पूतिकक्षपटच्चरान् ॥
ऊर्द्ध्ववातमुखश्च गुल्मिनं न विरूक्षयेत्॥

पिबेच्चित्रकमागरं वा सगुडां वा हरीतकीम् ॥
गुग्गुलुं चित्रतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मूत्रमद्य-पयोद्राक्षा-रसैर्वीक्ष्य बलाबलम् ॥
एवं पीलूनि पिण्डानि पिबेत् सलवणानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥
युक्ता हन्ति सुरागुल्मं प्लीहं काले प्रयोजिता ।
बहुविण्मारुतो गुल्मी सक्षीत पयसा यवान् ॥
कुल्माषान् वा बहुक्षीरान् भक्षयेत्तत्त्वयोत्तरान् ॥"
इत्युत्तरतन्त्रे द्वाचत्वारिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) सेनासंख्याविशेषः । (यथा, महाभारते । १।२।१६-२० ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेनामाहुः सेनामुखं बुधाः ।
तीन्निसेनामुखान्येको गुल्म इत्यभिधीयते ॥")
अस्यार्थविवृतिर्यथा,—
अत्र गजा नव, रथा नव, अश्वाः सप्तविंशतिः, पदातयः पञ्चचत्वारिंशत्, समुदायेन नवतिः ॥
प्लीहा । अप्रकाशश्चः । तत्पर्य्यायः । स्तम्भः२। इत्यमरः । २ । ४ । ६ ॥ "अविद्यमानप्रकाशस्तत्प्रकाशो वा बहुपचवान् मज्जौभिरुटीनलः कमलवंग्यवीरणादिः मूलादारभ्य पूर्व्वभागः प्रकाशः।" इति भरतः ॥ (यथा, मनुः । १।४८।
"गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।"
"यत्र सतासमूहा भवन्ति न च प्रकाशानि ते गुच्छा मल्लिकादयः, गुल्मा एकमूलाः सङ्घातजाताः ।" इति टीकायान्तु कुल्लूकभट्टः ॥) वृक्षभेदः । सैन्धवलवणम् । इति मेदिनी । मे । ११ ॥ (रुचिष्टपुरुषसम्मर्दः । यथा, मनुः । ७ । ११४ ।
"द्वयोस्त्रयाणां पक्षाणां मध्ये गुल्ममधिष्ठितम् ।"
गुल्मं रुचिष्टपुरुषसम्मर्दमित्यस्य टीकायां कुल्लूकभट्टः ॥ सैन्यैकदेशः । यथा, तत्रैव । ७ । १६० ।
"गुल्मांश्च स्थापयेदन्यान् कृतसंज्ञान् समन्ततः ।"
गुल्मान् सैन्यैकदेशानिति टीकायान्तु कुल्लूकभट्टः ॥)

गुल्मकेतुः, पुं, (गुल्मानां केतुर्ध्वज इव । गुल्मः केतुर्यस्येति वा । अत्र तु केतुर्लिङ्गं ज्ञापनमित्यर्थः ।) अम्बष्ठवैद्यः । इति राजनिर्घण्टः ॥

गुल्ममूलं, क्ली, (गुल्मवन्मूलमस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

गुल्मवल्ली, स्त्री, (गुल्माढ्या वल्ली यस्याः ।) सोमलता । इति राजनिर्घण्टः ॥ (सोमलताग्रन्थेऽस्या गुणादयो ज्ञातव्याः ॥)

गुल्मशूलः, पुं, (गुल्माख्यं गुल्ममूलकं वा शूलमत्र ।) रोगविशेषः । तस्यौषधं यथा,—
"नारी पुष्पदिने पीत्वा गोक्षीरेणोपवासतः ।
श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलमुत् ॥"
इति गारुडे १६३ अध्यायः ॥

गुल्मिनी, स्त्री, (गुल्मोऽस्यस्या इति । "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः । ततः ङीप् ।) विस्तृता लता । तत्पर्य्यायः । वीरुत् २ उलुपः ३ । इत्यमरः । २ । ४ । ६ ॥ वीरुधा ४ अवरुत् ५ । इति शब्दरत्नावली ॥

गुल्मी, स्त्री, (गुल्माकारो विद्यतेऽस्या इति । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीष् ।) आमलकी । एला । वनी । वल्लरेणुः । इति मेदिनीशब्दरत्नावल्यौ हेमचन्द्रश्च ॥ शब्दनखीवृक्षः । इति शब्दचन्द्रिका ॥ गुड़काँओली इति भाषा ॥ (गुल्माः गुल्मनामको रोगोऽस्यस्य इति । गुल्म + इनिः ।) गुल्मरोगयुक्ते त्रि ॥ (यथा, तत्रैव घृतपनसशब्दगुणव्याख्याने भावप्रकाशः ।
"विशेषात् पनसं वर्च्चो गुल्मिभिर्मन्दवह्निभिः ॥")

गुल्यः, पुं, (गुड़मिव माधुर्य्यमर्हतीति । गुड़ + यत् । ततो ह्रस्वस्य लत्वम् ।) मधुरः । खाड़ः । इति हेमचन्द्रः । ६ । २४ ॥

गुवाकः, पुं, (गुवति मलवत् क्वाथसुतृड्जनतीति । गु + "पिणाकादयश्च ।" उणा । ४ । १५ । इति आकः, तुदादित्वाद्गुणाभावः । निपातनात् दीर्घोऽपि दृश्यते ।) वृक्षविशेषः । गुवा सुपारि इति च भाषा ॥ तत्पर्य्यायः । घोण्टा २ पूगः ३ क्रमुकः ४ खपुरः ५ । इत्यमरः । २।४।१३६ ॥ गूवाकः ६ । इति तट्टीका ॥ पूगवृक्षः ७ दीर्घपादपः ८ वल्कतरुः ९ ह्रस्ववल्कः १० चिक्कणः ११ । इति राजनिर्घण्टः ॥ पूगी १२ । इति भावप्रकाशः ॥ सुरञ्जनः १३ गोपदलः १४ राजताल: १५ छटाफलः १६ । इति चिकाख्यश्चः ॥* अस्य फलस्य पर्य्यायः । क्रमुकफलम् १ पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ ह्रस्वकम् ६ उर्द्धगम् ७ पूगफलम् ८ । इति राजनिर्घण्टः ॥ पूगीफलम् ९ । इति भावप्रकाशः ॥* अस्य मस्तिष्कस्य गुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । बलप्रदत्वमुष्णत्वं हृद्विभेदमदकारित्वम् । मूत्ररोगनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ अस्य निर्य्यासस्य गुणाः । हिमत्वम् । मोहनत्वम् । गुरुत्वम् । विपाके उष्णत्वम् । चारत्वम् । वाजित्वम् । वातघ्नत्वम् । पित्तलत्वञ्च ॥* अस्य फलगुणाः सम्मोहकारित्वम् । कषायत्वम् । स्वादुत्वम् । रेचनत्वम् । त्रिदोषघ्नमग्नित्वम् । रुच्यत्वम् । वह्निभेदमलापहत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । रूक्षत्वम् । कफपित्तकारित्वम् । दीपनत्वञ्च ॥ * । आर्द्रस्य तस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । अग्निदुर्द्धरत्वञ्च ॥ * । शिक्षस्य तस्य गुणः । दोषत्रयश्छेदित्वम् । ह्रद्यमध्यं तदुत्तमम् । इति भावप्रकाशः ॥* आमपूगस्य गुणाः । कषायत्वम् । सुखमलरक्तामश्लेष्मपित्तोदरानाहनाशित्वम् । कण्ठशुद्धिकारित्वम् । वारकत्वञ्च ॥ * ॥ शुष्कस्य तस्य गुणाः । कण्ठामयघ्नत्वम् । रुचिकरत्वम् । पाचनत्वम् । रेचनत्वञ्च ॥* । तस्य ताम्बूलेनोनमयुतस्य चेत् त्रुटिति पाण्डुवातश्लेष्मकारित्वञ्च । इति राजनिर्घण्टः ॥* तत्पीलुगुणाः । तस्यादिपीलुं विषतुल्यम् । द्वितीयपीलुं मेदकं दुर्जरञ्च । तृतीयपीलुं पानोपयुक्तं सुधातुल्यं रसायनञ्च । इति राजवल्लभः ॥ (ताम्बूलेन विना केवलं गुवाकभक्षणाद्वाङ्कु-

लत्वावाप्तिस्मोचनार्थं गङ्गादर्शनरूपप्रायश्चित्तमप्युक्तम्। यथा,—
"ताम्बूलं न मुखे दत्त्वा गुवाकं भक्षयेद् यदि।
तावच्चाण्डालतां याति यावद् गङ्गानदर्शनम्॥")

गुह, ऊ च संवृतौ। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-वेट्।) इत्वी। ऊ, अगूहीत् अघुक्षत्। ञ, गूहति गूहते। गुहो गोरूरिति दीर्घः। इति दुर्गादासः॥

गुहः, पुं, (गूहति रक्षति पालयतीत्यर्थः देवसेनाम्। गुह+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। नामनिरुक्तौ तु गुहा आवासत्वेनास्त्यस्येति अच्। एतयोर्व्युत्पत्तिद्वययोरेव क्रमान्वयेनोदाहरणे द्रष्टव्ये। यथा, महाभारते। ३। २२८ अध्याये।
"स्कन्दस्तु ततः प्रादुर्गुहं गुरुवतामरम्।"
इत्युपक्रम्य।
"अथैनमभ्ययुः सर्वा देवसेनासहस्रशः।
अस्माकं त्वं पतिरिति ब्रुवाणाः सर्वतो दिशः॥"
इत्यन्तेन महात्मा कार्त्तिकेयः सेनापत्यार्थं देवैः प्रार्थितः। ततो नामनिरुक्तिः। यथा, महाभारते। १३। ८५। ८०—८३।
"दिव्यं शरवणं प्राप्य वर्द्धितोऽद्भुतदर्शनः।
दृष्ट्वा कृत्तिकास्तन्तु बालार्कसदृशद्युतिम्॥
स्कन्नत्वात् स्कन्दनाच्चापि गुहावासाद्गुहोऽभवत्॥")
कार्त्तिकेयः। इत्यमरः। १। १। ४२॥ घोटकः। इति शब्दरत्नावली॥ श्रीरामसखः। स तु शृङ्गवेरपुरवासी निषादाधिपतिः। (यथा, रामायणे। २। ५०। ३३।
"तत्र राजा गुहो नाम रामस्यात्मसमः सखा।
निषादजात्यो बलवान् स्थपतिश्चेति विश्रुतः॥"
गूहते संवृणोति स्वरूपादीनि मायया इति। गुह+कः।) विष्णुः। (यथा, महाभारते। १३। १४६। ५४।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः॥"
महादेवः। यथा, महाभारते। १३।१७।६०।
"बालरूपो गुहावासी गुहो माली तरङ्गवित्॥")
कायस्थानां पद्धतिविशेषः॥ (यथा, कायस्थकुलदीपिकायाम्।
"अथ गुहकुलोद्भवो दशरथाभिधानो महान् कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वितः॥")

गुहषष्ठी, स्त्री, (गुहस्य कार्त्तिकेयस्य प्रिया या षष्ठी तस्य जन्मतिथित्वात्तथात्वम्।) मार्गशीर्षमासीयशुक्लषष्ठी। यथा, भविष्ये।
"येयं मार्गशिरे मासि षष्ठी भरतसत्तम!।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"
शुक्लेयं गुहषष्ठी। इति तिथ्यादितत्त्वम्॥

गुहा, स्त्री (गुह्+कः टाप् च।) सिंहपुच्छीलता। गर्त्तः। पर्व्वतादेर्गह्वरम्। इति मेदिनी। हे। ४। (यथा, रामायणे। २। १। ७०।
"किष्किन्धां रामसुग्रीवौ जग्मतुस्तौ गुहां तदा॥")
गृध्रस्य पर्य्यायः। विलम् २ गिलासन्निः ३ देवखातम् ४ गह्वरम् ५। शृगालपर्णीदृश्यः ६। इति राजनिर्घण्टः॥ (हृदयम्। यथा, शतपथब्राह्मणे। ११। २। ६। ५।
"तस्मादिदं गुहाहृदयम्॥" गूढ़ा ज्ञाटज्ञानज्ञेयपदार्थाः अस्यां गूहतेऽस्यामात्मा इति वा। गुह+भिदादित्वादधिकरणे अङ् टाप् च। बुद्धिः। यथा, श्वेताश्वतरोपनिषदि।
"अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः॥")

गुहाशयः, पुं, (गुहासु गिरिगह्वरादिषु शेते अवतिष्ठते इति। शीङ् ल शयने+"अधिकरणे शेतेः।" ३। २। १५। इति अच्।) व्याघ्रः। इति राजनिर्घण्टः॥ (गुहाशायित्वादेवास्य तथात्वम्। यथा, भावप्रकाशे।
"सिंहव्याघ्रर्क्षका ऋक्षतरक्षुद्विपिनस्तथा।
बभ्रुजम्बुकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः॥"
गुहायां हृदये बुद्धौ वा शेते विराजते इत्यर्थः।) विष्णुः। (यथा, श्वेताश्वतरोपनिषदि। "सर्व्वभूतगुहाशयः।" यथा च। [शयः।
"तावत् स भगवान् साक्षात् योगाधीशो गुहाशयः।
अन्तर्दधे ऋषेः सद्यो यथेहानीश्वरो निर्म्मिता॥"
इति श्रीभागवतम्॥
(प्राणाः। यथा, सुश्रुतोपनिषदि। २। १। ८।
"सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त।"
गुहाशायिनि त्रि॥)

गुहिनं, क्ली, (गूहते दृष्टादिभिराच्छन्नं भवतीति। गूहतेऽस्मिन्निति वा। गुह+बाहुलकात् इनन्।) वनम्। इति शब्दरत्नावली॥

गुहिलं, क्ली, (गूहते पादपादिभिराच्छन्नं भवतीति। गुह+"गुहादिभ्यः कित्।" उणां। १। ५६। इति इलच्। गुणनिषेधार्थं किच्च।) वनम्। इत्युणादिकोषः॥

गुहेरः, पुं, (गूहते लौहादेर्मलादिकं विलोपयन् खड्गाद्यस्त्रेणापादयतीति। धातूनामनेकार्थत्वात्तथात्वमित्यवधेयम्। गुह+"मूलेरादयः।" उणां। १। ६१। इति निपातनादेरक्प्रत्ययः।) लौहकारः। इत्युणादिकोषः॥ (गूहते रक्षतीति।) गोप्ता। इति संक्षिप्तसारे उणादिवृत्तिः॥

गुह्यं, क्ली, (गुह्यां गोपनं अर्हति वस्त्राद्यभ्यन्तरस्थानं लब्धुमर्हतीति यावत्। गुह्या+"तदर्हति।" ५। १। ६३। इति यत्। गुह+कर्म्मणि ण्यत्वित्वे।) उपस्थः। स तु भगं लिङ्गञ्च। (भगार्थे यदुक्तम्।
"कामार्त्तः पुरुषो स्त्रीव पुंवयेद् गुह्यमादृतः॥")
रहस्ये त्रि। इत्यमरः। ३। ३। १५३॥ गोप्यम्। तत्पर्य्यायः। विविक्तः २ विजनः ३ छन्नः ४ निःशलाकः ५ रहः ६ उपांशु ७ गूढ़म् ८ उपकरम् ९। इति जटाधरः॥ (यथा, भगवद्गीतायाम्। ९। २।
"राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्॥"
तथा च, देवीभागवते। १। ३। ३७।
"पुराणगुह्यं सकलं समेतं
गुरोः प्रसादात् करुणानिधेश्च॥")

गुह्यः, पुं, (गुह्यां सरस्वादेर्गर्त्तमर्हतीति। गुह्या+"दन्तादिभ्यो यत्।" ५। १। ६६। इति यत्।) कमठः। दम्भः। इति मेदिनी॥ ये। १६॥ (गूहितुमर्हति योग्यो भवति उपनिषद् वेदत्वात् यद्वा गुह्यायां बुद्धौ हृदयाकाशे वस्तुमर्हति ध्यानायार्हतीति यावत्।) विष्णुः। इति तस्य सहस्रनामसमधे पठितः॥ (यथा, महाभारते। १३। १४६। ७१।
"गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥"
महादेवः। यथा, महाभारते। १३। १७। ६१।
"यजुः पादभुजो गुह्यः प्रकाशो जङ्गमस्तथा॥"
गुह्यानि गूहति गुणान् प्रकटीकरोतीति। गुणशालिप्रभावान्वितजीवविशेषः। यथा, ऋग्वेदे। ७। १०३। ८।
"अध्वर्यवो घर्म्मिणः सिष्विदाना
आविर्भवन्ति गुह्या न केचित्॥"
उपदेवताविशेषः। यथा, महाभारते। ६। ३। ४३।
"गुह्याः पिशाचगणाः सप्त ये दिवा ये च मानुषाः॥"
स्त्रियां टाप्। गायत्रीस्वरूपा देवी। यथा, देवीभागवते। १२। ६। ४२।
"गुर्व्वी गुरुवती गुह्या गोप्त्री गुरुदायिनी॥"
गोपनीये त्रि। यथा, मनुः। ११। २६५।
"सगुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्॥"
"प्रणवाख्यो गुह्यो गोपनीयः।" इति कुल्लूकभट्टः॥)

गुह्यकः, पुं, (गूहति निधिं धनविशेषं रक्षतीति। गुह्+ण्वुल्। एषोदरादित्वादृगागमे साधुः।) देवयोनिविशेषः। स तु कुबेरानुचरः निधिरक्षको माणिभद्रादियक्षभेदः। इत्यमरभरतौ॥ (कार्य्योत्पत्त्यादिभेदेनैव तु बहुधोदाहियते तथाच याज्ञिनोक्तम्।
"निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः॥"
गुह्यं कुत्सितं कायति शब्दायते प्रकाशयति वा। कै+कः। यद्वा गुह्यं गोप्यं कं सुखं यस्य। "गुंसिदृहिगुहिभ्योवेति" काप्रिकोक्तेः। अप् वा। यद्वा गुह्यात् दृष्टिं चिकीर्षैः परब्रह्मणः लक्षस्य गुह्यदेशात् कायति आविर्भवतीति। यदुक्तं ब्रह्मवैवर्त्ते ब्रह्मखण्डे। ५। ६०।
"आविर्ब्बभूव लक्षस्य गुह्यदेशात्ततः परम्।
पिङ्गलश्च पुमानेकः पिङ्गलैश्च गणैः सह।
आविर्भूता यतो गुह्यात् तेन ते गुह्यकाः स्मृताः॥"
यथा, महाभारते। ३।३।१०।
"तत्र दिव्यं रथं यान्तमद्भुतान्ति वरार्थिनः।
सिद्धचारणगन्धर्व्वा यक्षगुह्यकपन्नगाः॥")
तस्य लोकः पिशाचलोकादूर्द्धं गन्धर्व्वलोकादधः। येन येन कर्म्मणा एतल्लोकप्राप्तिरुच्यते।
"ततो गन्धर्व्वदर्शार्थं हृष्टपुष्टजनैर्वृतम्।
किङ्किणीजालसंकीर्णैर्मेघगम्भीरनिस्वनैः॥

लोकैरध्युषितं लोकं श्यामलाङ्गैश्च लोमशैः ।
गणौ कथयतं कैऽमी को लोकः पुण्यतः क्षतः ॥
गणावूचतुः ।
गुह्यकानामयं लोकस्त्वदे वै गुह्यकाः स्मृताः ।
न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये सुधि ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्राया: कुटुम्बिनः ।
संविभज्य च भोक्तारः क्रोधास्यावित्तिताः ॥
न तिथिं नैव वारञ्च संक्रान्त्यादि न पर्व्व च ।
नाधर्म्मञ्च न धर्म्मञ्च विदन्त्येते सदासुखाः ॥
एकमेव हि जानन्ति कुलपूज्यो हि यो द्विजः ।
तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम् ॥
सन्दह्यिभाजो ह्यत्रापि तेन पुण्येन गुह्यकाः ।
भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः ॥"
इति काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादः ॥ (पक्वान्नविशेषः । तस्य पाकप्रकारो यथा, शब्दार्थचिन्तामणिधृतपाकशास्त्रे ।
"समितां सर्पिषा भृष्टां सितादाढ्यादिसम्भृताम् ।
एलां लवङ्गकर्पूरमरीचपरिवासिताम् ॥
त्रिभागान्यसमितालम्बपुटे वेष्ट्य घृते पचेत् ।
ततः खण्डे न्यसेत् पक्वे गुह्यकोऽवसदाहृतः ॥"
अस्य गुणास्तत्रैव । यथा,—
"गुह्यको दृंहणो वृष्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित् सन्धानकृत् सरः ॥")
गुह्यकेश्वरः, पुं. (गुह्यकानामीश्वरः प्रभुरधिपतिरित्यर्थः ।) कुबेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, ब्रह्मवैवर्ते ब्रह्मखण्डे । ५ । ६१ ।
"यः पुमान् स कुबेरश्च धनेशो गुह्यकेश्वरः ॥")
गुह्यगुरुः, पुं. (गुह्यः गोप्यः हृदयाभ्यन्तर्वर्त्ती अन्तर्यामिस्वरूपो गुरुः ।) शिवः । इति त्रिकाण्डशेषः ॥
गुह्यदीपकः, पुं, (गुह्येन गुह्यस्थ्योतिषा दीपयति प्रकाशयतीति । स्वयं गुह्यः सन् दीपयतीत्वेके । दीप् + ण्वुल् ।) खद्योतः । इति शब्दचन्द्रिका ॥
गुह्यनिष्यन्दः, पुं, (गुह्यात् गुह्यदेशात् उपस्थछिद्रादित्यर्थः निष्यन्दते निर्गच्छति इति ।) सूत्रम् । इति राजनिर्घण्टः ॥
गुह्यपुष्पः, पुं, (गुह्यानि अदृश्यानि पुष्पाणि अस्य इति ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥
गुह्यबीजः, पुं, (गुह्यमदृश्यं बीजमस्य ।) भूतलम् । इति राजनिर्घण्टः ॥
गुह्यभाषितं, क्ली, (गुह्यं रहस्यं भाषितम् ।) मन्त्रः । इति जटाधरः ॥ गुप्तभाष्यञ्च ॥
गू, ओ शि विट्शब्दौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ओ, गूनः । शि, गुवति अगुवीत् । विट्शब्दनिर्देशनम् । इति दुर्गादासः ॥
गूः, पुं, गुः । विष्ठा । गूधातोः कर्म्मणि क्विप्प्रत्ययेन निष्पन्नः ॥ (गच्छत्यपानेन देहात् । गम् + कूः । मलोप इत्येके ॥)
गूढं, क्ली, (गुह + भावे क्तः ।) रहः । गुह्यम् । इति मेदिनी । ढे । १ ॥
गूढः, त्रि, (गुह + कर्म्मणि क्तः ।) संवृतः । गुप्तः । इत्यमरमेदिनीकरौ ॥ (यथा, पञ्चदश्याम् । २ । ३८ ।
"शक्तिरस्येश्वरी काचित् सर्व्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्व्वेषु वस्तुषु ॥")
गूढजः, पुं, (गूढात् गुप्तभावादिहेतोः गूढे गुप्तस्थाने वा जायते इति । गूढः सन् जायते इत्येके । गूढ + जन् + डः ।) गूढोत्पन्नपुत्रः । इति मिताक्षरा ॥ (यथा, याज्ञवल्क्यः । २ । १३२ ।
"गूढे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ।
कानीन: कन्यकाजातो मातामहसुतो मतः ॥")
गूढनीड़ः, पुं, (गूढः गोपनस्थलस्थः गूढे गुप्तस्थाने वा नीड़: कुलायोऽस्य ।) खञ्जनपक्षी । इति शब्दमाला ॥
गूढपत्रः, पुं, (गूढः समाच्छन्नः पत्त्रेण योऽसौ । गूढं पत्त्रमस्येति केचित् ।) करीरवृक्षः । अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
गूढपथः, पुं, (गूढः पन्था गतिर्यस्य समासनिष्पन्नत्वाच्च ।) अन्तःकरणम् । इति हेमचन्द्रः । ६ । ५ ॥ गुप्तपथश्च ॥
गूढपात्, [द्] पुं, (गूढं पादयति । पद गतौ + णिजन्तात् क्विप् । यद्वा गूढाः पादा अस्य पृषोदरादित्वादलोपे साधुः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥
गूढपादः, पुं, (गूढाः संवृताः पादा अस्य ।) सर्पः । इति शब्दरत्नावली ॥
("पादानामपि विज्ञेये द्वे घृते द्वे च विंशतौ ।" इत्यागमः ।
आच्छादितपादे त्रि । यथा, महाभारते ।
"सन्तोषाज्जतलस्य विश्वैश्वर्य्यं करस्थितम् ।
उपानद्गूढपादस्य सर्व्वा चर्म्मावृतेव भूः ॥")
गूढपुरुषः, पुं (गूढः गुप्तः पुरुषः कृत्यवेष्टी राजप्रेरितो जनः इत्यर्थः ।) चरः । इत्यमरः । २ । ८ । १३ ॥
गूढपुष्पकः, पुं, (गूढः समावृत इव पुष्पैर्योऽसौ इवार्थे कन् । गूढानि संवृतानि पुष्पाण्यस्य इत्येके ।) वञ्जुलवृक्षः । इति राजनिर्घण्टः ॥
गूढफलः, पुं, (गूढः संवृतप्रायः फलेनासौ । गूढं यथा स्यात् तथा फलतीत्वेके ।) वदरः । इति राजनिर्घण्टः ॥
गूढमार्गः, पुं, (गूढः प्रच्छन्नः मार्गः ।) सुवोऽन्तरमार्गः । सुड़ङ्ग इति भाषा ॥ तत्पर्य्यायः । सुरङ्गा २ सन्धिला ३ । इति हेमचन्द्रः । ४ । ५१ ॥
गूढमैथुनः, पुं, (गूढं अन्यैरदृश्यं मैथुनं यस्य ।) काकः । इति त्रिकाण्डशेषः ॥
गूढवर्च्चाः, [स्] पुं, (गूढं वर्च्चोऽस्य ।) भेकः । इति त्रिकाण्डशेषः ॥
गूढवल्लिका, स्त्री, (गूढा वल्लिका वल्ली यस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
गूढसाक्षी, [न्] त्रि, (गूढः प्रच्छन्नः सन् यः अर्थिना प्रत्यर्थिवाक्यं श्रावितः तादृशः साक्षी ।) योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः । फरियादी गोपने राखिया आसामीर कथा याहार्के शुनाइयाछे सेइ साक्षी इति भाषा ॥
तथा च नारदः ।
"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्रावयते तदा गूढो गूढसाक्षी स उच्यते ॥"
इति व्यवहारतत्त्वम् ॥
गूढाङ्गः, पुं, (गूढानि अङ्गानि यस्य इच्छामात्रेणैवाङ्गानि अन्तःप्रवेशयति इति तात्पर्य्यार्थः ।) कच्छपः । इति राजनिर्घण्टः ॥
गूढाङ्घ्रिः, पुं, (गूढः संवृतः गुल्फेनादृतोऽङ्घ्रिश्चरणोऽस्य ।) सर्पः । इति राजनिर्घण्टः ॥
गूढोत्पन्नः, पुं, (गूढं अन्येरविज्ञातं यथा स्यात् तथा उत्पन्नो जातः ।) द्वादशविधपुत्रमध्ये पुत्रविशेषः । यथा, मनुः । ६ । १७० ।
"उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥"
अस्यार्थः । "यस्य गृहेऽवस्थितायां भार्य्यायां पुत्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशसुतोत्पन्नस्तस्य पुत्रः स्यात् यदीयायां भार्य्यायां जातः ।" इति कुल्लूकभट्टः ॥ (अयं हि वस्तुदायहारी । यथाह मनुः । ६ । १५६ ।
"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥")
गूथं, क्ली पुं, (गवते शब्दायते गुवति पुरीषमुत्सृजतीति वा । गुङ शब्दे गुधि विष्ठोत्सर्गे वा + "तिथपृष्ठ गूथ यूथ प्रोथाः ।" उणां । २ । १२ । इति थक् दीर्घश्च ।) विष्ठा । इत्यमरः । २ । ६ । ६८ ॥ गु इति भाषा । (अरीरादिमलेऽपि कर्णगूथादिशब्ददर्शनात् ॥)
गूथलक्तः, पुं, (गूथे विष्ठायां रक्तः अनुरक्त आसक्त इत्यर्थः । ततो रस्य लत्वम् ।) पक्षिविशेषः । गुये शालिक् इति भाषा । तत्पर्य्यायः । शरमल्लः २ क्षुद्रचूडः ३ साल्किकः ४ । इति शब्दचन्द्रिका ॥
गूनः, त्रि, (गूयते पुरीषमुत्सृज्यते स इति । गु शि विष्ठोत्सर्गे + क्तः । "दृग्वोदीर्घश्चेति ।" नत्वं दीर्घश्च ।) कृतपुरीषोत्सर्गः । तत्पर्य्यायः । हृनः २ । इत्यमरः । ३ । १ । ६६ ॥
गूर, ड क उद्यमे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं सेट् ।) दीर्घौ । ड क, भस्मेषु नो गूरयते महोरगः । इति दुर्गादासः ॥ (तथा च कविरहस्ये । ५१ ।
"भस्मेषु नोदृगूरयतेऽक्षमोहवे-
ऽयुक्तोऽपि यो नोदृगुरते स्वधर्म्मवित् ॥")
गूर, ई य ड वधे । गल्याम् । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-सेट् ।) दीर्घौ । तथा च ।
"दीपिपूरिजनिगरिधूरयः
काशिवाशिपदिशूरितूरयः ।
घूरिजूरिखिदिविद्यतिः क्षिप्रि-
घूरिरुध्यतिमनो दिवादिषु ॥
इति रधोद्धतायां चक्रेश्वरः ।" इति दुर्गादासः ॥
गूरणं, क्ली, (गूर क ड उद्यमे + भावे ल्युट् ।) उद्यमः । इत्यमरटीकायां रायमुकुटः । ३ । २ । १११ ॥

गर्ह्, क निकेतने। कूर्हे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गूर्हयति। इति दुर्गादासः॥

गर्ह्, ड कूर्हे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, गूर्हते। इति दुर्गादासः॥

गूवाकः, पुं, (गुवति पुरीषमुत्सृजत्यनेन यद्वा गुवति बहुलभक्षणेन सुखविवरात् पुरीषवदुत्सृजतीति। गुप्रि. विस्रोत्सर्गे+"पिनाकादयश्च।" उणां। ४। १५। इति आकः। कुटादित्वाद्गुणाभावः। निपातनात् दीर्घत्वम्।) गुवाकः। इति शब्दरत्नावली॥

गूषया, स्त्री, (भूषयतीति। निपातनात् भकारस्य गत्वम्।) मयूरचन्द्रकः। मयूरपिच्छचक्रम्। इति शब्दचन्द्रिका॥

गृ, सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) गरति तरं मेघः। इति दुर्गादासः॥

गृज, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी गर्ज्जति। इति दुर्गादासः॥ (यथा, पूर्ब्बचातकाष्टके। ४।

"गर्ज्जसि मेघ! न यच्छसि तोयं
चातकपक्षी याकुलितोऽहम्।
दैवादिह यदि दत्तिगवातः
क्व त्वं काहं क्व च जलपातः॥")

गृज, द ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी। द, गृज्जते। इति दुर्गादासः॥ (ध्वनिरिह कथनमिति मत्वा केचित् सकर्म्मकमपि वदन्ति॥)

गृज्जनं, क्ली, (गृज्जते अभक्ष्यत्वेन कथ्यते प्राणनाशकत्वादिति। गृज ध्वनौ+कर्म्मणि ल्युट्।) विषदिग्धपशोर्म्मांसम्। इति मेदिनी। ने। ५८॥ (गृज्जते रोगनाशकतया भक्ष्यत्वेन कथ्यते इति।) मूलविशेषः। सलगम इति ख्यातः। तत्पर्य्यायः। शिखिमूलम् २ यवनेष्टम् ३ वर्त्तुलम् ४ ग्रन्थिमूलम् ५ शिखाकन्दम् ६ कन्दम् ७ डिम्भीरमोदकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातरोगगुल्मनाशित्वम्। रुच्यत्वम्। दीपनत्वम्। हृद्यत्वम्। दुर्गन्धत्वञ्च। इति राजनिर्घण्टः॥

गृज्जनः, पुं, (गृज्जते अभक्ष्यत्वेन कथ्यते इति। गृज+ल्युट्।) रसोनकः। रसुन इति भाषा। इति मेदिनी। ने। ५८॥ रक्तलशुनः। इति राजनिर्घण्टः॥ (अस्य अभक्ष्यीयत्वमुक्तं यथा, मनौ। ५। १९—२०।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृज्जनञ्चैव मत्वा जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सान्तपनञ्चरेत्।
यतिचान्द्रायणं वापि प्राजापत्यवसेद्व्रतम्॥")

गृञ्जीवः, पुं, एषुग्रगालः। बड़ शृगाल इति भाषा। तत्पर्य्यायः। लोपाकः २। इति हेमचन्द्रः। ४। ३५७॥ (गृञ्जिवोऽपि पाठः॥)

गृत्सः, पुं, (गृध्यति लिप्सत्यनेनेति। गृध् अभिकाङ्क्षायाम्+"गृधिवृक्षिपॄधिभ्यः क्सुः।" उणां। ३। ६६। इति सः स च कित्। इकारान्तादेशश्च।) कन्दर्पः। इत्युणादिकोषः॥ (चि, स्तुत्यः। यथा, ऋग्वेदे। ७। ८७। ५।

"गृत्सो राजा वरुणश्चक्र एतं दिविक्षेमम्।"

"गृत्सः स्तुत्यः।" इति भाष्यम्॥)

गृध, इर् य उ लिप्सौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट् क्रावेट्।) इर्, अगृधत् अगर्धीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, गृध्यति धनं लुब्धः। उ, गर्द्धित्वा गर्द्धा। इति दुर्गादासः॥

गृधुः, पुं, (गृध्यत्यनेनासादयति वा इति। गृध्य इर लिप्सायाम्+"पृभिदिव्यधिगृधिधृषिक्षिपिभ्यः।" उणां। १। २३। इति कुः।) कामदेवः। इत्युणादिकोषः॥ (गृध्यति अभिलषतीति विग्रहे वाच्यलिङ्गत्वात्।) अभिलाषुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधूः, पुं, (गृध्+बाहुलकात् कूः।) वृद्धिः। अपानम्। कुत्सितम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधुः, त्रि, (गृध्यति कामयते लिप्सति वा धनमिति शेषः। गृध्+त्रसिगृधिधृषिक्षिपेः कुः।) ३। २। १४०॥ इति कुः।) लुब्धः। इत्यमरः। ३। १। २१॥ (यथा, भागवते। ३। १४। २०।

"न वयं प्रभवस्त्वामनुकर्त्तुं जगदीश्वरि!।
अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः॥"

क्वचित् गृध्नोऽपि पाठः॥)

गृधुता, स्त्री, (गृधोर्भावः इति तल्।) लुब्धता। तत्पर्य्यायः। रागः २ सङ्गः ३। इति त्रिकाण्डशेषः॥

गृध्रः, पुं, (गृध्यति अभिकाङ्क्षति मांसानीति। "सृगृधाज् गृधिभ्यः क्रन्।" उणां। २। २४। इति क्रन्।) पक्षिविशेषः। गृधिनी गृध्रुनी इति च भाषा। तत्पर्य्यायः। दाक्षायः २ वज्रतुण्डः ३ दूरदर्शनः ४। इति राजनिर्घण्टः॥ (यथा, महाभारते। ६। ३। ३१।

"गृध्रः संपतते क्षीर्णं जनयन् भयमुत्तमम्॥"

इह लोके लोभवशात् यस्तु देवब्राह्मणस्वं हरति स पापात्मा परत्र गृध्रोच्छिष्टेनोपजीवति। यथाह मनुः। ११। २६।

"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥")

गृध्रनखी, स्त्री, (गृध्रस्य नख इवाकारोऽस्यस्याः इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) कुलिकवृक्षः। इति रत्नमाला॥ कालियाकड़ा इति भाषा। (यथा, सुश्रुते। सूत्रस्थाने। ३८ अध्याये।

"करमर्द्दचिकण्टकसैरीयकशुतावरीगृध्रनख इति कण्टकसंज्ञः॥") कोलिवृक्षः। इति त्रिकाण्डशेषः॥

गृध्रपत्रा, स्त्री, (गृध्रस्य पत्रमिव पत्रवदित्यर्थः। पत्रमस्याः। गृध्र इव धूम्रवर्णं पत्रमस्या इत्येके।) धूम्रपत्रावृक्षः। इति राजनिर्घण्टः॥

गृध्रराजः, पुं, (गृध्रः राजा इवेत्युपमितसमासः। गृध्राणां राजेति वा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) जटायुपक्षी। यथा,—

"भूयः कनकपुङ्खाग्रै रचौ वाणैरजिह्मगैः।
निर्बिभेद सुतीक्ष्णाग्रैर्गृध्रराजं घिलाशिते॥"

इति रामायणम्॥

गृध्रसी, स्त्री, (गृध्यति मांसमभिकाङ्क्षति सततं इति गृध्+क्रन्। गृध्रो मांसलोलुपो मनुष्यः तं स्यति पीडयति नाशयति वा। सो+कः ङीष्।) वातरोगविशेषः। तल्लक्षणं यथा,—

"स्फिक्पूर्व्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात्।
गृध्रसी स्तम्भरुक् तोदैर्गृह्णाति स्पन्दते मुहुः॥
वाताङ्घातकफाभ्यां सा विज्ञेया द्विविधा पुनः।
वातजायां भवेत्तोदो देहस्यातीववक्रता॥
जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशम्।
वातशैत्योद्भवायान्तु गौरवं वह्निमार्द्दवम्॥
तन्द्रा सुखप्रसेकश्च भक्तद्वेषस्तथैव च॥"

गृध्रसीवातात् केवलात् स्फिगादिपर्य्यन्तं स्तम्भरुक् तोदैर्गृह्णाति। क्रमात् वृद्धिक्रमात्। तेन यथा यथा वर्द्धते तथा तथा स्फिगादीन्याक्रामति नात्र गृध्रसी निर्द्देशक्रमनियमः। तथा मुहुः स्पन्दते स्फिगादिषु शिराकर्म्म करोतीत्यर्थः॥*॥

अथ तस्याश्चिकित्सा।

"गृध्रस्यान्तु नरं सम्यक् रेकेण वमनेन वा।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत्॥
नादौ वस्तिविधिं कुर्य्यादायवद्धं न शुध्यति।
स्नेहो निरर्थकः स स्याद्वह्निस्त्वेव हुतो यथा॥*॥
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यान्तु गदापहः॥ १॥

तैलं घृतं सार्द्रकमातुलुङ्ग-
रसं सचुक्रं सगुडं पिबेद्वा।
कटूरुशूलत्रिकमूलगुल्म-
गृध्रस्युदावर्त्तहरः प्रयोगः॥ २॥

निष्कुथैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
ततुपायसं कटीशूले गृध्रस्यां परमौषधम्॥ ३॥
एरण्डमूलं विल्वञ्च दहती कण्टकारिका।
कषायो रुचकोपेतः पीतो वृषणवस्तिजम्॥
गृध्रसीञ्च हरेच्छूलं चिरकालानुबन्धि च॥"

रुचकं सौवर्चलम्॥ ४॥

"गोमूत्रैरण्डतैलाभ्यां क्षाराचूर्णं पिबेन्नरः।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम्॥५॥

सिंहास्यदन्तीकृतमालकानां
पिबेत् कषायं रवु-तैलमिश्रम्।
यो गृध्रसीनष्टगतिः प्रसुप्तः
स प्रौढ़गः स्याद्धि किमत्र चित्रम्॥ ६॥

दृढन्निम्बतरोः सारो वारिणा परिपेषितः।
स पीतो नाशयेत् क्षिप्रमसाध्यामपि गृध्रसीम्॥७॥
श्लेष्मालिकादले क्षारो रुद्धस्विपरिपाचितः।
दुर्वारं गृध्रसीरोगं पीतमात्रः प्रणाशयेत्॥"

श्लेष्मालिकानिर्गुण्डौ॥ ८॥

"राज्ञायास्तु पलञ्चैकं पञ्च कर्षाणि गुग्गुलोः।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम्॥"

इति राजागुग्गुलुः ॥ ६ ॥
"राजार्कतारगवधदेवदारु-
चिकणटकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठचिकपार्श्वशूली ॥"
इति राजसप्तकक्वाथः ॥ १० ॥
"पथ्याविभीतामलकीफलानां
घृतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलद्वयानां
द्रोणे जले संस्थितमेकराज्ञम् ॥
अर्द्धावशेषं कथितं कषायं
भाण्डे पचेच्चत पुनरेव लौहे ।
अम्लानि वह्नेरवतार्य दद्यात्
द्रव्याणि संचूर्ण्य पलार्द्धकानि ॥
विड्ङ्गदन्तीचिफलागुडूची-
कृष्णात्रिवृन्नागरकोषणानि ।
यथेष्टचेष्टस्य वरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
स गृध्रसीं नूतनखञ्जताञ्च ।
प्रीहानमुग्रं जठराणि गुल्मं
पाण्डुत्वकण्डूवमिवातरक्तम् ॥
पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विषघ्नः ।
क्षतस्य सन्धानकरो विशेषा-
द्रोगेषु ग्रस्तः सकलेषु तज्ज्ञैः ॥"
इति पथ्यादिगुग्गुलुः ॥ ११ ॥
इति भावप्रकाशः ॥

(तथा च ।
"रक्तवातसमुद्भूतान् दोषान् ग्रसति महामते ! ।
कव्यूरुजानुमध्ये तु जायते बहुवेदना ।
गृध्रसीति विजानीयात् तेन नोक्तञ्च लक्षणम् ॥"
"घृतावरी बले द्वे च पिप्पली पुष्करास्थयम् ।
चूर्णमेरण्डतैलेन गृध्रसीमपकर्षति ॥
अजमीदादिकं चूर्णमाम्बातं प्रकीर्त्तितम् ।
तदत्र योजनीयञ्च गृध्रसीनां निवारणम् ॥"
इति हारीते चिकित्सितस्थाने त्रयोविंशोऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्दिता ।
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते ॥"
इति वाभटे निदानस्थाने पञ्चदशोऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनान्तु कण्डरा यानिलार्दिता ।
सक्थ्नोः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा स्मृता ॥"
इति सुश्रुते निदानस्थाने प्रथमेऽध्याये ॥
चिकित्सास्था यथा,—
"गृध्रसीविश्वाचीकोष्टुकशिरःखञ्जपङ्गुलवातकण्टक
पाददाहपादहर्षावबाहुकवाधिर्य्यधमनीगतवात-
रोगेषु यथोक्तं यथोद्दिष्टञ्च शिरावधं कुर्य्या-
दस्यावबाहुकाद्वातव्याधिचिकित्सितस्थाने
क्षेत ॥" इति च सुश्रुते चिकित्सितस्थाने ५मे
अध्याये ॥)
गृध्राणी, स्त्री, (गृध्र इव धूम्रवर्णेन अनति प्राणितीति । अन् + पचाद्यच् । गौरादित्वात् ङीष् । संज्ञायां गलम् ।) धूम्रपत्राढ्यः । इति राजनिर्घण्टः ॥
गृष्टिः, स्त्री, (गृह्णाति सद्यःप्रसमिति । ग्रह + उपादाने + कर्त्तरि क्तिच् पृषोदरादित्वात् साधुः ।) एकवारप्रसूता गौः । तत्पर्य्यायः । सद्यःप्रसूतिका २ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । ६३ । ३३ ।
"प्रष्ठौहीनां गवां राजन्नाहुर्गृष्टीः पयस्विनीः ।
सुव्रताश्च ॥"
यथा च ।
"एभ्य एव स्थिरादीनि जले पक्वेकविंशतिम् ।
रसे तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीराद्विमाषकाकोली स्वयं गुप्तर्षभर्द्धिभिः ॥
मेदया च समैः कल्कैस्तत् स्यात् कल्याणकं महत् ।
दंष्ट्रिणीयं विशेषेण सन्निपातहरं परम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे ॥
सद्यःप्रसूतस्त्रीमात्रम् । इति शब्दार्थचिन्तामणिः ॥) वराहकान्ता । इत्यमरः ।२।४।१३५ ॥ वदरवृक्षः । इति मेदिनी । टे । १२ ॥ काश्मरी । इति राजनिर्घण्टः ॥
गृह, तृ क ङ ग्रहे । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-आत्मं-सर्क-सेट् ।) सप्तमस्वरी । क ङ, गृह्यते । ग्रहो ग्रहणम् । इति दुर्गादासः ॥
गृहं, क्ली, (गृह्णाति धान्यादिकं जीवनार्थं यस्मिन्निति । ग्रह + "गेहे कः ।" ३।१।१४४ । इति कः ।) इष्टकादिरचितवासस्थानम् । घर इति भाषा ॥ (यथा, मनुः । २ । ३४ ।
"चतुर्थे मासि कर्त्तव्यं शिवोर्निष्क्रमणं गृहात् ॥"
अर्द्धर्चादिगणादयं शब्दो विभाषया पुंसि च वर्त्तते । तत्र बहुवचनान्त एव । यथा,—
"गृहाः पुंसि च भूम्नेव ।" इत्यमरः ॥ अतएव मनौ । ४ । २५० ।
"गृह्यां गृहान् कृशान् गत्वानड्वः पुष्पं मणीन् दधि ॥")
तत्पर्य्यायः । गेहम् २ उदवसितम् ३ वेश्म ४ सद्म ५ निकेतनम् ६ निशान्तम् ७ वस्त्यम् ८ सदनम् ९ भवनम् १० अगारम् ११ मन्दिरम् १२ गृहा: १३ निकाय्यः १४ निलयः १५ आलयः १६ वासः १७ कुटः १८ शाला १९ सभा २० । इत्यमरः । २ । २ । ४-५ ॥ पस्त्यम् २१ सादनम् २२ आगारम् २३ कुटिः २४ कुटी २५ गेहः २६ निकेतः २७ साला २८ मन्दिरा २९ ओकः ३० । इति भरतः ॥ निवासः ३१ संवासः ३२ आवासः ३३ अधिवासः ३४ निवसतिः ३५ वसतिः ३६ केतनम् ३७ । इति शब्दरत्नावली ॥ गयः ३८ छदरः ३९ गर्तः ४० हर्म्यम् ४१ अक्षम् ४२ दुरोणे ४३ नीलम् ४४ दुर्या: ४५ खसराणि ४६ अमा ४७ दमे ४८ क्षत्तिः ४९ योनिः ५० शरणम् ५१ वरूथम् ५२ छर्दिः ५३ छदिः ५४ छाया ५५ शर्म्म ५६ व्रजम् ५७ । इति वैद्यनिघण्टौ ३ अध्यायः ॥ * ॥

अथ गृहारम्भकालः ।
"वैशाखश्रावणाषाढ़मार्गकालगुनकार्त्तिकाः ।
शुभप्रश्ना गृहारम्भे पत्नीपुत्रसम्वर्द्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णपक्षे भवेद्भयम् ।
आदित्यभौमवर्जन्तु सर्व्वे वाराः शुभावहाः ॥
पूर्णिमान्यर्क्षमौ यावत् पूर्व्वास्यं वर्जयेद् गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्दशीम् ॥
अमावस्यार्कमौ यावत् पश्चिमास्यं विवर्जयेत् ।
नवम्यादि तथा याम्यां यावच्छुक्लचतुर्दशीम् ॥
वज्रव्याघातशूले च शतीपातातिगण्डयोः ।
विष्कुम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यत्रयरोहिणी मृगशिरो ज्येष्ठा धनिष्ठोत्तरा
रेवत्याश्च मघानुराधहरिभिः शुद्धैः स्वभावादिभिः ।
सौम्यानां दिवसेऽथ गण्डरहिते योगे विरिक्ते तिथौ
विश्वत्यक्षदिने वदन्ति मुनयो वेश्मादिकार्य्यं शुभम् ॥
त्रिभिस्त्रिभिर्वेश्मनि कृत्तिकाद्यै-
रुक्षेषपुत्राग्निधनानि शोकाः ।
शत्रोर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कार्म्मसुदीर्घशत्रम् ।
कन्याभसे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्विदः कलसिंहवृषेषु वृद्धिम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥

तत्र प्रवेशकालः ।
"ज्येष्ठापुनर्व्वसुवर्जं गृहारम्भोदितश्च यत् ।
तत् सर्व्वं चिन्तयेद्वेश्मप्रवेशे दैवचिन्तकः ॥
हस्तापुष्यपुनर्व्वसुश्रुतिभाज्येष्ठास्वथो रोहिणी-
रेवत्युत्तरविष्णुवातशशिभज्मूलाधनिष्ठासु च ।
कन्याकुम्भवृषालिसिंहमिथुनस्वर्क्षोदये चार्कें शुभे-
शुक्रेज्येन्दुजशीतरश्मिदिवसे वेश्मप्रवेशः शुभः ॥
ज्ञात्वायतो द्विजवरान्य पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनञ्च तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं निलयं विशेत्तु ॥"
इति समयप्रदीपः ॥ * ॥

(गृहकरणे समयशुद्धिरुक्ता विश्वकर्म्मप्रकाशे द्वितीयाध्याये यथा,—
"चैत्रे चाधिमवाप्नोति यो नवं कारयेद्गृहम् ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्य्यमवाप्नुयात् ।
श्रावणे मिश्रलाभन्तु हानिं भाद्रपदे तथा ॥
युद्धमेवाश्विने मासि कार्त्तिके धनधान्यकम् ।
धनवृद्धिं मार्गशीर्षे पौषे तस्करतो भयम् ॥

माघे चाग्निभयं विद्यात्लक्ष्मीवृद्धिश्च फाल्गुने ॥"
गृहसंस्थापने मेषादिराशिगतशुभाशुभं यथा तत्रैव, द्वितीयाध्याये।
"गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत्।
वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं भवेत् ॥
कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनम्।
कन्या रोगं तुला सौख्यं वृश्चिके धनधान्यकम् ॥
कार्म्मुके च महाहानिर्मकरे स्याद्धनागमः।
कुम्भे तु रत्नलाभः स्यात् मीने स्वप्नभयावहम् ॥
चाण्डालनृपयुक्कन्यामासा दोषवहाः स्मृताः।
ज्येष्ठोर्ज्जमाघसिंहाख्याः सौरमाने तु शोभनाः ॥
मासे तपस्ये तपसि माधवे नभसि त्विषे।
ऊर्ज्जे च गृहनिर्म्माणं पुत्रपौत्रधनप्रदम् ॥
निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने।
दृढदारुगृहारम्भे मासदोषो न विद्यते ॥
पाषाणेष्टादिगेहानि निन्द्यमासे न कारयेत्।
निन्द्यमासेऽपि चन्द्रस्य मासेन शुभदं गृहम् ॥
गोचराष्टकवर्गाभ्यां वास्तवेधं विचिन्तयेत्।
दशा चान्तर्दशादीनां विचारश्चात्र कर्म्मणि ॥
गुरुशुक्रबले विप्रान् सूर्य्यभूमिजयोस्तथा।
राशिसौम्यबले सौर-वर्षानुक्रमपूर्व्वशः ॥
गृहारम्भं प्रकुर्व्वीत वर्षेनाथबले सति।
सर्व्वेषामपि वर्णानां सूर्य्यचन्द्रबलं स्मृतम् ॥"
गृहयोग्यभूमिपरीक्षा यथा तत्रैव, १मे अध्याये।
"अथातः संप्रवक्ष्यामि लोकानां हितकाम्यया।
श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥
सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रिया।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिणी ॥
मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता।
अम्ला वैश्या भवेद्भूमिस्तिक्ता शूद्रा प्रकीर्त्तिता॥"
अथ भूमिभेदे फलानि यथा तत्रैव।
"सुवर्णगन्धा सुरसा धनधान्यसुखावहा।
व्यये व्ययफला ज्ञेयः कार्य्या परीक्षणम् ॥
चतुरस्रा महाधन्या द्विपाभा धनदायिनी।
सिंहाभा सद्गुणान् पुत्रान् वृषाभा पशुवृद्धिदा॥
वृत्ता सद्वृत्तदा भूमिर्भद्रपीठनिभा तथा।
त्रिशूलरूपा वीराणामुत्पत्तिधनसौख्यदा ॥
लिङ्गाभा लिङ्गिनां श्रेष्ठा प्रासादध्वजसन्निभा।
पदोन्नतिं प्रकुरुते कुम्भाभा धनवर्द्धिनी ॥
त्रिकोणशकटाकारा सूर्पयष्टनसन्निभा।
क्रमेण सुखसौख्यार्थधर्म्महानिकरी स्मृता ॥
सुरक्षा वंशदा सर्पमण्डूकाभा भयावहा।
नेःस्वा खरानुकारा च ज्ञेयदारुणगरान्विता ॥
चिपिटा पौरुषेहीना सुरक्षाभा तथैव च।
काकोलूकनिभास्तज्ज्ञैः दुःखशोकभयप्रदा ॥
सर्पाभा पुत्रपौत्रघ्नी वंध्याभा वंशहानिदा।
शूकरोष्ट्राश्वसदृशी धनुःपरशुरूपिणी।
कृच्छ्रिणान् मलिनान् रुक्षान् क्षयज्ञान् जनयेत् सुतान् ॥
लक्षलाक्षगवाकारा ज्ञेयपुत्रधनार्थिनाम्।
दुर्गन्धा व्याधिनी दुष्टप्रजा भूमिं परिवर्जयेत् ॥
मनोरमा सुतप्रदा दृढा धनप्रदा मता।
सुतार्थदा तथाप्युदक् सुरेग्रदिक्प्लवा मही ॥"
अन्यद्विवरणन्तु तत्रैव विस्तरशो द्रष्टव्यम् ॥*॥
गृहकर्म्मणि वर्ज्यकालान्याह यथा, ज्योतिषतत्त्वे।
"क्षीरिवृक्षोद्भवं दारु गृहेषु न निवेशयेत्।
कृताधिवासं विहगैरनिलानलपीड़ितम् ॥
गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीड़ितम्।
चैत्यदेवालयोत्पन्नं वल्मीकभयं श्मशानजम् ॥
देवाद्यधिष्ठितं दारुनीपनिम्बविभीतकान्।
कण्टकिनोऽसारतरून् वर्ज्जयेद् गृहकर्म्मणि ॥
वटाश्वत्थौ च निर्गुण्डी कोविदारास्तथैव च।
भल्लातकं भ्राल्मलीञ्च पलाशञ्च विवर्जयेत् ॥"*॥
गृह्यते निर्दिश्यतेऽनेन इति।) नाम। (गृह्यते स्वीक्रियते धर्म्माचरणायासौ इति।) कलत्रम्।
इति शब्दरत्नावली ॥ तथा च स्मृतिः।
"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते ॥"
गृहकच्छपः, पुं, (गृहस्थितः कच्छप इव। हस्तपादादिरहितत्वादेवान्तर्निहितकरचरणकच्छपवत् प्रतीयमानत्वादस्य तथात्वम्।) पेषणशिला। तत्पर्य्यायः। पेषणिः२ पेषणीपट्टः३ गृहाश्मा४। इति शब्दरत्नावली ॥
गृहकन्या, स्त्री, (गृहस्थिता कन्येव। गृहपालितत्या कन्याया इव रोगादिषु हितकारितया तास्तासुतथात्वम्।) घृतकुमारी। इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"कुमारी गृहकन्या च कन्या घृतकुमारिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गृहकपोतकः, पुं, (गृहस्थितः गृहपालितो वा कपोतः। ततः स्वार्थे संज्ञायां वा कन्।) पक्षिविशेषः। पायरा इति भाषा ॥ तत्पर्य्यायः। प्रासादकुक्कुटः २ भिक्षीकण्टः ३ पारावतः ४। इति त्रिकाण्डशेषः ॥ (पारावतशब्दे विवृतिरस्य ज्ञातव्या ॥)
गृहकर्त्ता, पुं, (गृहं वासार्थं दृढादिरचितवेश्म करोतीति। गृह+कृ+तृच्।) धूसरोऽतिरुक्षश्चटकः। तत्पर्य्यायः। धान्यभक्षः २ क्षमः ३ भीरुः ४ कृषिप्रियः ५ कणप्रियः ६। इति राजनिर्घण्टः ॥ (गृहकारके, त्रि ॥)
गृहकारकः, पुं, (गृहं करोतीति। गृह+कृ+ण्वुल्।) वर्णसङ्करजातिविशेषः। घरामी इति भाषा ॥ यथा, पराशरपद्धतौ।
"प्रतिमाघटकादेव कन्यायां नापितस्य च।
सूत्रकारस्य सम्भूतिः सोपानगृहकारकः ॥"
गृहकारी, [न्] (गृहं करोतीति। गृह+कृ+णिनिः।) कीटविशेषः। कुमिरपोका इति भाषा ॥ इति केचित् ॥ (यथा, मनुः।१२।६६।
"वको भवति कृत्वाऽमिं गृहकारी ह्युपस्करम् ॥")
गृहगोधा, स्त्री, (गृहे गृहस्थिता गोधेव।) ज्येष्ठी। चेठी टिकटिकी इति च भाषा॥ तत्पर्य्यायः। पल्ली२ सुवली३ विश्वम्भरा४ ज्येष्ठा५ कुचमत्स्यः६ पल्लिका७ गृहगोधिका८। इति राजनिर्घण्टः ॥ गृहगोलिका९ मालिका१० भित्तिका११ गृहालिका१२। इति हेमचन्द्रः। ४। ३६३ ॥
गृहगोधिका, स्त्री, (क्षुद्रा गोधा अस्यार्थे कः। कापि अत इत्वं टाप् च। गृहस्य गोधिका गोधिरेव।) ज्येष्ठी। इत्यमरः। २। ५। १२ ॥ (यथा, वृहत्संहितायाम्। ८६। ३०।
"शिवा श्यामा रला कुक्कुः पिङ्गला गृहगोधिका।
शूकरी परपुष्टा च पुन्नामानश्च वामतः ॥"
यथा च सुश्रुते कल्पस्थाने तृतीयेऽध्याये।
"मार्ज्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशुम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रा नखविषाः ॥")
गृहगोलिका, स्त्री, (गृहे गृहस्था वा गोधिकेव। निपातनात् साधुः।) ज्येष्ठी। इति हेमचन्द्रः। ४। ३५३ ॥
गृहगौ, स्त्री, (गृहे नीयते क्रियते इति। नी+क्विप्, संज्ञायां गलम्।) काङ्किकम्। इति त्रिकाण्डशेषः ॥ (विवरणमस्याः काङ्किकशब्दे ज्ञेयम् ॥)
गृहतटी, स्त्री, (गृहस्य गृहे वा गृहमाश्रित्येत्यर्थः तटीव।) वीथी। इति हारावली। १५२ ॥ पिंड़ा दाओया इति च भाषा ॥
गृहद्रुमः, पुं, (गृहमिव द्रुमः।) मेढ़शृङ्गीवृक्षः। इति रत्नमाला ॥
गृहनाशनः, पुं, (गृहं नाशयति प्रवेशेन इति। नश्+णिच्+ल्युः।) कपोतः। इति राजनिर्घण्टः ॥ (कपोतोऽत्र वनकपोतः वनकपोतस्य प्रवेशेनैव गृहनाशित्वात्। घुघु इति यस्य भाषा ॥)
गृहनीड़ः, पुं, (गृहे नीड़ं कुलायोऽस्य।) चटकः। इति हारावली। ८६ ॥
गृहपतिः, पुं, (गृहस्य पतिः।) गृहस्थः। (यथा, ऋग्वेदे। १४। १। ५१।
"भगस्त्वा हस्तमग्रहीत् सविता हस्तमग्रहीत्।
पत्नीत्वमसि धर्म्मणाहं गृहपतिस्तव ॥")
सचौ। इति मेदिनी। ते। १६५ ॥ धर्म्मः। इति शब्दरत्नावली ॥ (अग्निः। यथा, ऋग्वेदे। १। १२। ६।
"अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥")
स्त्री, गृहस्य पतिः "विभाषा सपूर्व्वस्य।" ४।१ ३४। इति वा नान्तादेशे गृहपत्नी गृहपतिरिति रूपद्वयम्। गृहस्वामिनी ॥)
गृहपोतकः, पुं, (गृहं पोतः शिशुरिव यस्य इति कप्।) वास्तुः। वाटी। इति शब्दरत्नावली ॥
गृहबलिप्रियः, पुं, (गृहबलिः प्रियोऽस्य। गृहबलीनां प्रिय इत्येके।) वकपक्षी। इति शब्दरत्नावली ॥ (काकादयोऽपि ॥)
गृहबलिभुक्, [ज्] पुं, (गृहे दत्तं बलिं अन्नादिभक्षद्रव्यं भुङ्क्ते इति। भुज्+क्विप्।) चटकः। इति हेमचन्द्रः। ४। ३६३ ॥ वकः। काकः। इति केचित् ॥
गृहभूमिः, स्त्री, (गृहयोग्या भूमिः।) वास्तुः। वेश्मभूः। इति हलायुधः ॥ (अस्याः लक्षणादिकं गृहशब्दे द्रष्टव्यम् ॥)

गृहमणिः, पुं, (गृहे मणिरिव ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥

गृहमाक्षिका, स्त्री, (गृहे मक्षते गृह्णति गुप्तभावेन तिष्ठतीति । मक्ष् + "खुल् तृचौ" ।३।१।१३३ । इति खुल् । ततष्टाप् । कापि अत इत्वञ्च ।) चर्म्मचटी । इति चिकाख्यशेषः ॥ चामचिका इति भाषा ॥

गृहस्थगः, पुं, (गृहे स्थग इव । यद्वा, गृहस्थितो स्थगः पशुः ।) कुक्कुरः । इति हेमचन्द्रः ।४।३४५॥

गृहमेधी, [न्] पुं, (गृहैर्दारैर्मेधते सङ्गच्छते इति । गृह + मेध सङ्गमे + "सुप्यजातौ" इति । ३ । २ । ७८ । इति णिनिः ।) गृहस्थः । इति हेमचन्द्रः । ३ । ४७२ ॥ (यथा, मनुः । ४ । ३१ ।

"वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः । पूजयेद्धव्यकव्येन विपरीतांश्च वर्ज्जयेत् ॥")

गृहमेधिनी, स्त्री (गृहं मेधते पुनाति ग्राह्योक्तदानदयादाक्षिण्यादिना सङ्गच्छते इत्यर्थः। गृह + मेध + णिनिः । ततो ङीप् ।) सात्त्विकी बुद्धिः । इति महाभारतम् ॥ (गृहमेधिन् + स्त्रियां ङीप् ।) गृहस्थपत्नीच ॥

गृह्याग्यः, पुं, (गृह्य गृह्ये । गृह्यते इति। गृह + "मृदस्तिकृहिगृहिभ्य आग्यः।" उणा । ३ । ६६ । इति आग्यः । ततः "अयामन्ताल्वाय्न्यक्षत्नुविणवः ।" ६।४। ५५ । इति णेरयादेशः ।) गृहस्थः । इत्युणादिकोषः ॥

गृह्यालुः, पुं, (गृह्यते गृह्णातीति। गृह + "सृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्।" ३ । २ । १५८ । इति आलुच् । "अयामन्ताल्वाय्न्यक्षत्नुविणवः ।" ६ । ४ । ५५ । इति णेरयादेशः ।) गृहीता । गृह्णग्रहीलः । इत्यमरः । ३ । १ । २७ ॥

गृहवाटिका, स्त्री, (गृहसमीपस्था वाटिका आरामः ।) गृहसमीपवनम् । इति हारावली । १६८ ॥

गृहस्थः, पुं, ("न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।" अतएव गृहेषु दारेषु तिष्ठति अभिरमते इति । गृह + स्था + "सुपि स्थः ।"३।२।४। इति कः ।) गृही । द्वितीयाश्रमी । तत्पर्य्यायः । ग्रहेष्ठाश्रमी २ गृहमेधी ३ स्नातकः ४ गृही ५ । इति हेमचन्द्रः । ३ । ४७१ ॥ गृहपतिः ६ सत्री ७ । इत्यमरः । २ । ८ । १५ ॥ गृहयाग्यः८। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ गृहाधिपः ९ । इति हलायुधः ॥ कुटुम्बी १० । इति जटाधरः ॥ गृहायनिकः ११ । इति शब्दरत्नावली ॥ * ॥ तस्य धर्म्मो यथा,—

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः॥ यः कश्चिदिह लोकेऽस्मिन्नागमः संप्रकीर्त्तितः । तस्याच्च गमनं श्रेयः कीर्त्तिरेषा सनातनी ॥ संस्कारैः संस्कृतः पूर्व्वं यथावच्चरितव्रतः । स्नातो गुरुविशिष्टायां समावर्त्तेत वेदवित् ॥ स्वदारनिरतो नित्यं गृह्याचारो जितेन्द्रियः । पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेद्गृहे ॥ देवतातिथिभृत्याग्नौ निरतो वेदकर्म्मसु । इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥ न पाणिपादचपलो न नेत्रचपलो मुनिः । न च वाग्भ्रूचपल इति शिष्टस्य गोचरः ॥ नित्यं यज्ञोपवीती स्यात् शुक्लवासाः शुचिव्रतः । नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥ मितशिष्टोदरो मैत्रः शिष्टाचारसमन्वितः । वेणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥ अधीत्याध्यापनं कुर्य्यात् तथा यजनयाजने । दानं प्रतिग्रहञ्चापि षड्गुणां वृत्तिमाचरेत् ॥ त्रीणि कर्म्माणि यानीह ब्राह्मणानान्तु जीविका । याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥ अथ शेषाणि चान्यानि त्रीणि कर्म्माणि यानि तु । दानमध्ययनं यज्ञो धर्म्मयुक्तानि तानि तु ॥ तेष्वप्रमादं कुर्व्वीत त्रिषु कर्म्मसु धर्म्मवित् । दान्तो मैत्रः क्षमायुक्तः सर्व्वभूतसमो मुनिः ॥ सर्व्वमेतद् यथाशक्ति विप्रो निर्व्वर्त्तयन् शुचिः । एवं युक्तो जयेत् स्वर्गं गृहस्थः संशितव्रतः ॥"

इत्याश्वमेधिकपर्व्व ॥

"सर्व्वेषामाश्रमाणान्तु वैविध्यन्तु चतुर्व्विधम् । ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥ योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् । उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥ अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् । गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥ उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् । कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥ ऋणानि त्रीण्युपाकृत्य त्यक्त्वा भार्य्याधनादिकम् । एकाकी विचरेद् यस्तु उदासीनः स मौक्षिकः ॥"

इति गारुडे ४६ अध्यायः ॥

बाहुल्यन्तु तत्रैव।५०।५१। अध्याययोर्द्रष्टव्यम्॥*॥

गृहस्थब्राह्मणधर्म्मो यथा,—

"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ अग्नीन्देवांश्च भूतानामृषीन्पितॄंश्च यान् पुनः । या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ याचामात्रप्रसिद्ध्यर्थं खेः कर्म्मभिरगर्हितैः । अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ॥ ऋताभ्यां जीवेत्तु नित्यं न्यूनेन प्रमृतेन वा । सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"

इत्यादि मानवे ४ अध्यायः ॥

गृहसूणं, क्ली, (गृहस्य गृहावलम्बनार्था सूना । अभिधानात् क्लीवत्वम् ।) गृहस्तम्भः । इत्यमरः । ३ । ५ । ३० ॥

गृह्यः, पुं, (गृह्णन्ति ध्यानादिकं इति । गृह् + "गेहे कः ।" ३।१।१४४। इति कः ।) गृहम् । (यथा, मनुः । ४ । २५० ।

"गृह्यां गृहान् कृशान् गत्वागपः पुण्यं मुनीन् हधि । धानामतृस्थान् पयो मांसं शाकञ्चैव न निर्दृशेत्॥"

गृह्यन्ते धर्म्माचरणाय इति । ग्रह + कः ।) दाराः । इत्यमरः । २ । २ । ५ ॥ नित्यबहुवचनान्तोऽयं शब्दः ॥

गृहागतः, पुं, (गृहमागतः । आ + गम् + कर्त्तरि क्तः ।) अतिथिः । इत्यमरः । २ । ७ । ३४ ॥ (गृहमागते, त्रि । यथा, हितोपदेशे ।

"नाहं गृहागतं हन्मि ॥")

गृहाधिपः, पुं, (गृहस्य अधिपः ।) गृहस्थः । इति हलायुधः ॥

गृहाङ्गं, क्ली, (गृहे पर्य्युषितान्नादिना प्रस्तुतौषधमङ्गम् ।) काञ्जिकम् । इति चिकाख्यशेषः ॥

गृहायनिकः, पुं, (गृहरूपमयनं विद्यतेऽस्य इति ठन् ।) गृहस्थः । इति शब्दरत्नावली ॥

गृहारामः, पुं, (गृहस्य गृहे गृहसमीपस्थो वा आरामः ।) गृहसमीपे कृत्रिमवनम् । तत्पर्य्यायः । निष्कुटः २ । इत्यमरः । २ । ४ । १ ॥

गृहालिका, स्त्री, (गृहे आलिरिव कायते प्रकाशते इति । गृहालि + के + कः । ततष्टाप् ।) श्येली । इति हारावली । १८४ ॥

गृहावग्रहणी, स्त्री, (गृहमवगृह्णातेऽनया इति । अव + ग्रह् + करणे ल्युट् । ततो ङीप् ।) देहली । इत्यमरः । २ । २ । १३ । द्वातिना दाक्षीया इति च भाषा ॥

गृहाश्रया, स्त्री, (गृहे इव छायायुक्तस्थाने आश्रयति इति । आ + श्रि + अच् । ततः स्त्रियां टाप् ।) ताम्बूली । इति शब्दचन्द्रिका ॥ पानेर गाछ इति भाषा ॥

गृहाश्मा, [न्] पुं, (गृहरचितोऽश्मा अश्मनिर्म्मितपेषणशिलाविशेषः ।) पेषणशिला । इति शब्दरत्नावली । शिल इति भाषा ॥

गृहिणी, स्त्री, (गृहस्वामित्वमस्त्यस्याः । इति इनिः ङीप् च ।) भार्य्या । इति हेमचन्द्रः । ३ । १७६ । (यथा, रघौ । ८ । ६७ ।

"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना-
हरता त्वां वद किं न मे हृतम् ॥"

गृहं गृहकार्य्यं साधयतीत्यस्यस्या इति इनिः ङीप् च । गृहकर्म्मैकशीला स्त्री । यथा, शकुन्तलायां चतुर्थाङ्के ।

"सुमुखस्य गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥)

गृही, [न्] पुं, (गृहा दारा विद्यन्तेऽस्य इति इनिः।) गृहस्थः । इत्यमरः । २ । ७ । ३ ॥ भर्त्ता । इति राजनिर्घण्टः ॥ (यथा भागवते । ३ । ३० । ६ ।

"गृहेषु कूटधर्म्मेषु दुःखतन्त्रेष्वतन्द्रितः ।
कुर्व्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥")

गृहीतं, त्रि, (ग्रह + कर्म्मणि क्तः ।) स्वीकृतम् । प्राप्तम् । ज्ञातम् । धृतम् । यथा, हितोपदेशे । १ । ३ ।
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ॥"

गृहीतदिक्, [ग्] त्रि, (गृहीता आश्रिता दिक् हन्तुः प्रहर्त्तुर्वा भयादृयेन ।) पलायितः । तिरोहितः । इति हेमचन्द्रः । ३ । ४६६ ॥

गृहोलिका, स्त्री, (गृहे वलते चलतीति । ग्रह + वल + कुन् । वाहुलकात् सम्प्रसारणम् । तेन वस्य उत्वम् ।) ग्येली । इति हेमचन्द्रः । ४ । ६८ ॥

गृह्यं, क्ली, (गृह्यते आक्रम्यते अर्थ-आदिभी रोगैरिति । ग्रह + "पदास्खेरिवाह्यापश्येषु च ।" ३ । १ । ११६ । इति क्यप् ।) गुदम् । (गृह्यन्ते संगृह्यन्ते सामवेदादुद्धृतानि कर्म्मविधानान्यत्र इति । ग्रह + क्यप् ।) कात्यायनगृह्यभिन्नादिद्धृत-सूत्रग्रन्थभेदः । इति मेदिनी । रे । १६ ॥ तत्र तु गोभिलादिद्धृतसामवेदादाद्धृतकर्म्मकाण्डनिर्णयः ॥

गृह्यः, पुं, (गृह्यते मानवेनेति । ग्रह + "पदास्खेरिवाह्यापश्येषु च" । ३ । १ । ११६ । इति क्यप् । पञ्चरादित्वनेन परस्वीकृतत्वादस्य तथात्वम् ।) गृहासक्तच्छगादिः । इति मेदिनी । ये । १८ ॥ (ऋषिः । यथा, मनौ । ३ । ८४ ।
"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम् ।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥")

गृह्यः, त्रि, (गृह्यते स्वाम्यादिभिरिति । ग्रह + क्यप् ।) अस्वैरी । अस्वतन्त्रः । पराधः । इति विश्वमेदिन्यौ ॥ (यथा, भारविः । २ । ५ ।
"नन्वक्तविशेषनिस्पृहा
गुणगृह्या वचने विपश्चितः ॥"
गृहे भव इति यत् । गृहोत्पन्नवस्तु ॥)

गृह्यकः, त्रि, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) अस्वतन्त्रः । पराधीनः । इत्यमरः । ३ । १ । १६ ॥

गृह्यकः, पुं, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) गृहासक्तपक्षिच्छगादिः । तत्पर्य्यायः । छेकः २ । इत्यमरः । २ । ६ । ४३ ॥

गृह्या, स्त्री, (गृह्यते नृपैरिति । ग्रह + क्यप् + टाप् ।) ग्रामाद्यपुरम् । नगरनिकटक्षुद्रग्रामः । इत्यमरः ॥

गृ, क उ विज्ञापे । विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) विज्ञापो विज्ञापनम् । क उ, गारयते ज्ञापयति सुधीः । इति दुर्गादासः ॥

गृ, गि शब्दे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् ।) शब्दः इह वक्तव्यत्वम् । गि, गृणाति वाचं लोकः । गीर्भिः । गीर्भिः । इति दुर्गादासः ॥

गृ, गृ निगरणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) निगरणं भक्षणम् । गृ, गिरत्यन्नं लोकः । देवात्ततो विगलितो निखितो यकेन इति तु अन्नात् लाघोः कर्म्मणि इति भावे कप्रत्यये ऋदिरञ्चाविति इरि वस्तवादुरेषञ्च लकारे गिल इति स्थिते वेः क्ङित्यनिटीति क्ङौ कर्म्मणि क्ते सिद्धम् । इति दुर्गादासः ॥

गेडुः, पुं, (गच्छतीति । गम् + डुः । गो गन्ता । ग इन्दुरिवेति गेन्दुः पृषोदरादित्वात् दस्य डत्वे साधुः ।) गेन्दुकः । इति भरतो द्विरूपकोषश्च ॥ (गेन्दुरपि च डश्चते ॥)

गेडुकः, पुं, (ग इन्दुरिवेक्षतः इवे प्रतिकृताविति कन् । अत्र गेन्दुकोऽपि पाठः ।) कन्दुकः । इत्यमरः । २ । ७ । १३८ ॥ गेँडु इति गेँद इति च भाषा ॥

गेडूकः, पुं, (गेडुक; ततः पृषोदरादित्वात् दीर्घः । अत्र गेन्दूकोपि पाठः ।) गेडुकः । इति जटाधरः ॥

गेद, ऋ ड उ गतौ । चाले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ॥)

गेप, ड ऋ गतिचालयोः । (भ्वां-आत्मं-सकं-सेट् ।) ड, गेपते । ऋ, अजिगेपत् । इति दुर्गादासः ॥

गेयं, क्ली, (गै + "अचो यत् ।" ३ । १ । ६७ । इति यत् । "ईदूयति ।" ६ । ४ । ६५ । इति आत ईत्वम् । ततो गुणश्च । गीतम् । इति मेदिनी । गे । २० ॥ (यथा, माघे । २ । ७२ ।
"वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयाद्धो गेयस्येव विचित्रता ॥")

गेयः, त्रि, (गै + यत् । तत आत ईत्वम् ।) गातव्यः । गायनः । इति मेदिनी । गे । २० ॥ (यथा हरिवंशे हरिवंशपर्व्वणि । ५० । ४१ ।
"इमे त्वां सुनयः सप्त सहिता सुनिमङ्गलैः ।
स्तुवन्ति देवविद्याभिर्गेयाभिर्गीर्भिरञ्जसा ॥")

गेव, ऋ ड सेवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेवत् । ड, गेवते । इति दुर्गादासः ॥

गेष, ऋ ड अन्वेषे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेषत् । ड, गेषते । जिगेषे । अन्वेषोऽनुसन्धानम् । इति दुर्गादासः ॥

गेष्णुः, पुं, (गायतीति । गै + "इष्णो गादाभ्यां किद्वा ।" इत्युणादिकोषटीकाकारस्वरितात् इष्णुः ।) रङ्गोपजीवी । सामगानकर्त्ता । इत्युणादिकोषः ॥

गेष्णुः, पुं, (गायतीति । गै गाने + "गादाभ्यामिष्णुच् ।" उणा । ३ । १६ । इति इष्णुच् ।) गायनः । नटः । इति मेदिनी । गे । ११ ॥ सामगानकर्त्ता च ॥

गेहं, क्ली, (गो गन्धर्व्वो गणेशश्च । गेन गन्धर्व्वेण गणेशेन वा ईह्यते काम्यते इति । ग + ईह + कर्म्मणि घञ् । यद्वा, गो गन्धर्व्वो गणेशो वा ईहः ईप्सितो यस्मिन् ।) गृहम् । इत्यमरः । २ । २ । ४ ॥ (यथा, हितोपदेशे ।
"छत्रवानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥")

गेहकी, [न्] त्रि, (गेहमस्यस्तीति । गेह + इनिः ।) गृही ॥ (स्त्रियां ङीप् । गेहिनी । यथा, आर्य्यासप्तशती । १६६ । [मानम् ॥")
"गेहिन्यया; प्रदत्तानी गोत्रस्खलितापराधतो

गेहेनर्दी, [न्] पुं, (गेहे नर्दति गर्ज्जतीति । गेह + नर्द + णिनिः अलुक् समासः । अस्य गृह एव गर्ज्जनं नान्यत्र अतस्तथात्वम् ।) कापुरुषः । तत्पर्य्यायः । गेहेशूरः २ भिक्षीशूरः ३ । इति हेमचन्द्रः । ३ । १४१ ॥

गेहेशूरः, पुं, (गेहे एव शूरः । अलुक् समासः । अन्यत्र शूरत्वाभावादस्य तथात्वम् ।) गृहेनर्दी । इति हेमचन्द्रः । ३ । १४१ ॥

गै, गाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) गीतं गायति गायनः । इति दुर्गादासः ॥

गैरिकं, क्ली, (गिरौ भवमिति अश्मादित्वात् ठक् ।) स्वर्णम् । रक्तवर्णधातुविशेषः । गिरिमाटी इति भाषा ॥ तत्पर्य्यायः । रक्तधातुः २ गिरिधातुः ३ गवेधुकम् ४ धातुः ५ सुरङ्गधातुः ६ गिरिसम्भवम् ७ । इति राजनिर्घण्टः ॥ वर्णकम् ८ गवेरुकम् ९ प्रत्यक्षा १० गिरिजम् ११ । इति त्रिकाण्डशेषः ॥ लोहितमृत्तिका १२ गिरिजम् १३ ॥ पीतगैरिकस्य पर्य्यायः । सुवर्णगैरिकम् १ सुवर्णम् २ स्वर्णगैरिकम् ३ । इति रत्नमाला ॥ स्वर्णधातुः ४ सुरक्तकः ५ सन्ध्याभम् ६ वधुधातुः ७ शिलाधातुः ८ । अनयोर्गुणाः । मधुरत्वम् । शीतत्वम् । कषायत्वम् । व्रणरोपणत्वम् । विस्फोटाग्नीभिदाहनाशित्वम् । स्वर्णवर्णादिकं शुभम् । इति राजनिर्घण्टः ॥ निर्म्मलत्वम् । स्निग्धत्वम् । सुवर्णगैरिकं तद्वत् विशेषतश्चक्षुष्यत्वकारित्वम् । इति राजवल्लभः ॥
"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्मथा ।
सुवर्णगैरिकस्त्वन्यत्ततो रक्ततरं हि तत् ॥
गैरिकाह्वितयं स्निग्धं मधुरत्वुवरं हिमम् ।
चक्षुष्यं दाहमित्तासक्कफहिक्काविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गैरिकाक्षः, पुं, (गैरिकमिव रक्तवर्णमक्षि पुष्परूपमयनं यस्य ॥) जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

गौरी, स्त्री, (गिरौ भवः । गिरि + अण् । गौरादित्वात् ङीष् ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ (लाङ्गलिकीशब्देऽस्या गुणादयो ज्ञातव्याः ।) विषलाङ्गला इति भाषा ॥

गैरेयं, क्ली, (गिरौ भवमिति । गिरि + ठक् ।) शिलाजतु । इत्यमरः । २ । ६ । १०४ ॥ (यथास्य पर्य्यायाः ।
"शिलाजत्वद्रिजतु च शैलनिर्य्यास इत्यपि ।
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणास्तु शिलाजतुशब्दे ज्ञेयाः ॥) गिरिजाते त्रि ॥

गोकण्टकः, पुं, (गोः पृथिव्याः कण्टक इव ।) गोक्षुरकवृक्षः । (अस्य पर्य्याया यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥
पलङ्षा चदंष्ट्रा च तथा स्यादिक्षुगन्धिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्पुटः। गवां खुरम्। इति विश्वमेदिन्यौ॥ गोखुरैः स्पुटीकृतः। इति हेमचन्द्रः॥ विकण्टकवृक्षः। इति राजनिर्घण्टः॥

गोकर्णः, पुं. (गोः कर्ण इव। तत्तुल्यपरिमाणत्वादस्य तथात्वम्।) परिमाणविशेषः। स तु अनामिकायुक्तविस्तृताङ्गुष्ठम्। (गोः कर्णाविव कर्णौ यस्य।) मृगभेदः। इत्यमरः। २।५।१०॥ (यथा च अनर्घराघवे। २। २३।

"मुनिविनियोगविलूनप्ररूढ़दुग्धाङ्गलानि बर्हीणि।
गोकर्णतर्णकोऽयं तर्णोत्युपकण्टकच्छेदु॥"

अस्य मांसगुणा यथा,—

"गोकर्णमांसं मधुरं स्निग्धं लघु कफापहम्।
विपाके मधुरत्वापि रक्तपित्तविनाशनम्॥"

इति सुश्रुते सूत्रस्थाने ६४ अध्यायः॥) अश्वतरः। (गौरश्वतुरेव कर्णौ यस्य।) सर्पभेदः। (गोरिव कर्णौ यस्य।) गणदेवताविशेषः। इति मेदिनी। णे। ४६॥ तीर्थविशेषः। यथा, भागवते।

"ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान्।
गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः॥"

(पीठस्थानम्। यथा, देवीभागवते।७।३०।६०।

"केदारपीठे सम्प्रोक्ता देवीसन्मार्गदायिनी।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥")

गोकर्णी, स्त्री, (गोः कर्ण इव पत्रमस्याः। "पाकर्कर्कपर्णपुष्पफलमूलवालोत्तरपदाच्च।" ४।१। ६४। इति ङीष्।) मूर्वालता। इत्यमरः। २।४।८४॥ (विष्टतिरस्या मूर्वाशब्दे ज्ञातव्या॥)

गोकिराटिका, स्त्री, (गां वाचं किरति रटतीत्यर्थः। कृ+"इगुपधज्ञाप्रीकिरः कः।" ३।१। १३५। इति कः। ततष्टाप् गोकिरा। तथा सती अटतीति। अट्+ण्वुल्। ततष्टाप् अत इत्वच।) सारिकापक्षी। इति हेमचन्द्रः॥

गोकिराटी, स्त्री, (गोकिरा वाचं रटन्ती सती अटतीति। अट गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। गौरादित्वात् ङीष्।) सारिकापक्षी। इति राजनिर्घण्टः॥

गोकिलः, पुं. (गोः पृथिव्याः कील इव। निपातनात् ह्रस्वः।) सुवर्णम्। हलम्। इति हेमचन्द्रः॥

गोकीलः, पुं, (गोः पृथिव्याः कील इव।) सुवर्णम्। हलम्। इति हारावली॥ २५५॥

गोकुलं, क्ली, (गोः कुलम्।) गोसमूहः। तत्पर्य्यायः। गोधनम् २ गवांव्रजः ३। इत्यमरः। २। ६। ५८॥ (यथा, रामायणे। २। ६। १७।

"गोकुलाकुलतीरायाः तमसायाः विदूरतः।
अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह॥")

गोस्थानम्। यथा, तिथ्यादितत्त्वे।

"भोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांसानि शौचानि स्त्रीषु बालातुरेषु च॥"

मथुरैकदेशे श्रीनन्दस्य वासस्थानम्। यथा,—

"कालेन व्रजता तात! गोकुले रामकेशवौ।
जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः॥"

इति श्रीभागवतम्॥

(अत्र प्रदेशे महादेवो गोपीश्वर इत्याख्यया प्रसिद्धो विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे,—

"गोकुले गोपिनीपूज्यो गोपीश्वर इतीरितः॥")

पुं, स्वनामख्यातः पण्डितविशेषः। अयन्तु सप्तदशशतपरिमितशकाब्दसम्वत्सरप्रारम्भे एव मिथिलादेशान्तर्वर्त्तिनि 'मगरौणी' संज्ञकग्रामे विद्यानिधिपौताम्बरपण्डितात् जातः इति मैथिलाः। अद्यावधि ज्ञाता अनेन विरचिता ग्रन्थास्सन्ति। १ दीधितिविद्योतः (शिरोमणिटीका।) २ न्यायसिद्धान्ततत्त्वम्। ३ पदवाक्यरत्नाकरः। ४ मासमीमांसा। ५ मिथ्यात्वनिरुक्तिः। ६ रश्मिचक्रम् (चिन्तामणिटीका। ७ रसमञ्जर्यर्थः। ८ लाघवगौरवरहस्यम्। ९ शिवशतकम्॥)

गोकुलिकः, त्रि, (गोर्नेत्रस्य कुलं चञ्चलभावः प्रखरदृष्टिपातुर्य्यमित्यर्थः। तदस्यास्तीति। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) कैकरः। (पङ्क्तपतिते गवि कुलिकः उपेक्षकत्वात् जड़ इव।) पङ्क्तस्यगवुपेक्षकः। इति मेदिनी। के। १८६॥

गोक्षतं, क्ली, (गोभिः क्षतम् उच्चरितम्। क्ष+भावे क्तः। क्षद्विहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् गोपुरोधमित्यर्थः।) गोमयम्। इति शब्दचन्द्रिका॥

गोक्षुरः, पुं, (क्षुरति विलिखतीति। क्षुर विलेखने+"इगुपधज्ञेति।" ३। १। १३५। इति कः। ततो गोः पृथिव्याः क्षुरः अस्त्रविशेष इव। बहुकण्टकाकीर्णत्वात् तथात्वम्।) क्षुद्रक्षुपविशेषः। स तु क्षुद्रदृक्षभेदेन द्विविधः। गोखुरि इति गोखुद इति च भाषा॥ तत्पर्य्यायः। त्रिकण्टः २ स्थलशृङ्गाटः ३ गोकण्टः ४ त्रिकण्टकः ५ त्रिपुटः ६ कण्टकफलः ७ क्षुरः ८। इति रत्नमाला॥ गोक्षुरकः ९ पलङ्कषा १० इक्षुगन्धा ११ शृङ्गी १२ खादुकण्टकः १३ गोकण्टकः १४ वनशृङ्गाटः १५। इत्यमरः। २।४।८—९९॥ क्षुरकः १६ भक्ष्यकण्टः १७ इक्षुगन्धिका १८। इति भावप्रकाशः॥ क्षुरशृङ्गः १९ शृङ्गी २० कण्टकी २१ भद्रकण्टः २२ बालदंष्ट्रः २३ षड्ङ्गः २४ गोखुरः २५ त्रिकटः २६ त्रिकः २७ इक्षुरः २८। इति शब्दरत्नावली॥ अस्य गुणाः सुशीतलत्वम्। बलप्रदत्वम्। मधुरत्वम्। दृंहणत्वम्। तच्छ्वाश्मरीभेदविदाहनाशित्वम्। रसायनत्वम्। तत्र दृहतो गुणोत्तरत्वच्च। इति राजनिर्घण्टः॥ खादुत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पुष्टिदत्वम्। श्वासकासाशर्श्रोव्रणनाशित्वच्च। इति भावप्रकाशः॥ वायुनाशित्वम्। दृष्यत्वच्च॥ तच्छाकगुणाः। तिक्तत्वम्। दृष्यत्वम्। स्रोतोविशोधनत्वच्च। इति राजवल्लभः॥

गोक्षुरकः, पुं, (गोक्षुर+स्वार्थे कन्।) गोक्षुरः। इत्यमरः। २।४।८८॥ (अस्य पर्य्याया यथा,—

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः खादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।
पलङ्कषा शृङ्गी च तथा स्यादिक्षुगन्धिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ यथा, च सुश्रुते चिकित्सितस्थाने षड्विंशेऽध्याये॥

"गुप्ताफलं गोक्षुरकाच्च बीजं
तथोत्कटां गोपयसा विपाच्य।
खजाहतं शर्करया च युक्तं
पीत्वा नरो क्षुध्यति सर्व्वरात्रम्॥")

गोखुरः, पुं, (खुरति विलिखतीति। खुरः अस्त्रविशेषः। गोः पृथिव्याः खुर इव।) गोक्षुरवृक्षः। इति शब्दरत्नावली॥ (गवां खुरम्।) गवां शब्दे क्ली॥

गोखुरिः, पुं, (गवां खुरिरिव।) गोक्षुरः। इति शब्दचन्द्रिका॥

गोगृष्टिः, स्त्री, (गौर्गृष्टिः गौरेव गृष्टिरित्यर्थः। जाता समासे परनिपातः।) सद्यःप्रसूता गौः। इति केचित्॥

गोगोयुगं, क्ली, (गोर्द्वित्वम्। गो+द्विस्वे गोयुगच्।) गोद्वयम्। ("पशुभ्यः स्यात्तद्विघट्के गोष्ठगोयुगवष्ठगवम्।" इति सुग्धबोधसूत्रम्॥)

गोगोष्ठं, क्ली, (गोः स्थानम्। गो+स्थाने गोष्ठच्।) गोस्थानम्। इति सुग्धबोधव्याकरणम्॥

गोग्रन्थिः, पुं, (गोभिःक्षतो ग्रन्थिरिव।) करीषः। (गोर्ग्रन्थिर्वाहुल्यात् एकत्र ग्रथनं यत्र।) गोष्ठम्। (गोर्ग्रन्थिरिव।) गोजिङ्किकौषधिः। इति मेदिनी। थे। १६॥

गोघ्नः, पुं, (गौर्हन्यतेऽस्मै। गो+हन्+सम्प्रदाने मूलविभुजादित्वात् कः।) अतिथिः। इति पाणिनिः॥ (गां हन्ति। हन्+कः।) गोघातके त्रि। यथा, प्रायश्चित्ततत्त्वे।

"गोघ्नवद्विहितः कल्पश्चान्द्रायणमथापि वा॥"

गोघृतं, क्ली, (गोः पृथिव्या घृतमिव ग्रस्नादिपोषकत्वात्।) दृष्टिः। इति त्रिकाण्डशेषः॥ (गोर्जातं घृतम्।) गव्यघृतञ्च॥

गोचरः, पुं, (गावः इन्द्रियाणि चरन्त्यस्मिन्। गो+चर+"गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च।" ३। ३। ११९। इति निपातनात् साधुः।) इन्द्रियार्थः। स तु रूपशब्दगन्धरसस्पर्शस्वरूपः। इत्यमरः। १। ५। ८॥ (यथा भाषापरिच्छेदे "ब्राह्मस्य गोचरो गन्धः॥"* गावश्चरन्त्यस्मिन्निति। गोचरस्थानम्। इति सिद्धान्तकौमुदी। यथा च भारविः। ४। १०।

"उपारताः पश्चिमरात्रिगोचरा-
दपारयन्तः पतितुञ्जवेन गाम्॥"

गोषु इन्द्रियेषु चरतीति। गो+चर्+पचाद्यच्। इन्द्रियप्रत्यक्षीभूतविषयः। यथा, वेदान्तसारे।

"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्॥"

देशः । यथा, रामायणे । २ । ८५ । ५ ।
"अब्रवीत् प्राञ्जलिर्भूत्वा गुहो गहनगोचरः ॥"
"गहनं वनं गोचरो देशो यस्य सः ।" इति तट्टीकायां रामानुजः ॥) ऋक्षराक्षसाधिष्ठिताक्रान्तराक्षीणां संज्ञा । यथा,—
"गोचरे वा विलग्ने वा ये ग्रहारिदृक्चक्राः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
अपि च ।
"अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभश्चरैः ।
गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ तु वेधगैः ॥"
गोचरशुद्धिर्यथा,—
"केतूपग्रवभौमसन्दगतयः षष्ठत्रिसंस्थाः शुभा-
श्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्रः पुनः सप्तमः ।
जीवः सप्तनवद्वितीयपञ्चमगतो युग्मेषु सोमात्मजः
शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्ते शुभाः ॥"
इति दीपिका ॥
(अथ ग्रहाणां गोचरगतफलम् । यथा,—
बुधस्य गोचरफलम् ।
"स्थानं जन्मनि नाशयेद्दिनकरः कुर्य्याद्द्वितीये भयम् ।
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति ॥
दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थहा सप्तमे ।
पीड़ामष्टमगः करोति नितरां कान्तिक्षयं धर्म्मगः ॥
कर्म्मेदृद्धिजनस्तु कर्म्मगो
वित्तदृद्धिहृदयार्थसंस्थितः ।
व्ययनाशजनितां महापदं
यच्छति व्ययगतो दिवाकरः ॥"
चन्द्रस्य गोचरफलम् ।
"जन्मन्यर्थं दिशति हिमगुर्व्वित्तनाशं द्वितीये
दद्याद्दुःखं सहजभवने नेत्ररोगं चतुर्थे ।
कार्य्यभ्रंशं तनयगृहगो वित्तलाभञ्च षष्ठे
दूने द्रव्यं युवतिसहितं ऋत्युसंस्थोऽथ ऋत्युम् ॥
नृपभयं कुरुते नवमः शशी
दशमधामगतस्तु महत् सुखम् ।
विविधमायगतः कुरुते धनं
व्ययगतस्तु रुजं सधनक्षयम् ॥"
मङ्गलस्य गोचरफलम् ।
"प्रथमगृहगः क्षौणीसुतः करोत्यरिभं भयं
क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः ।
अरिभयकरः पातालेऽस्तृ स्त्रियोगति च पञ्चमः
रिपुगृहगतो धत्ते वित्तं सुखं मदनस्थितः ॥
जनयति मरणस्थः शत्रुबाधां धराजो
दिशति च नवमस्थो कार्य्यपीड़ामतीव ।
शुभमपि दशमस्थो लाभगो भूरिलाभं
व्ययभवनगतोऽसौ बाधनर्थार्थनाशान् ॥"
बुधस्य गोचरफलम् ।
"बुधः प्रथमधामगो दिशति वन्धमर्थे धनं
वधं रिपुभवान्वितं सहजगश्चतुर्थोऽर्थदः ।
अनिर्वृतिकरो भवेत्तनयगोऽरिगः स्यादृदः
करोति मदनस्थितो बहुविधां शरीरापदम् ॥
अरमे शशिसुते धनलब्धि-
र्धर्म्मगोऽतिमहतीं तनुपीड़ाम् ।
कर्म्मगः शुभमथायगतोऽर्थं
द्वादशे भवति वित्तविनाशः ॥"
गुरोर्गोचरफलम् ।
"भयं जन्मन्यार्य्यो जनयति धनस्थोऽर्थमतुलं
तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम् ।
सुखं पुत्रस्थानेऽशुभमपि च कुर्य्यादरिगृहे
गुरुर्द्यूने पूजां धननिचयनाशञ्च निधने ॥
धर्म्मगतो धनवृद्धिकरः स्यात्
प्रीतिहरो दशमेऽमरपूज्यः ।
स्थानधनानि ददाति स चाये
द्वादशगस्तनुमानसपीड़ाम् ॥"
शुक्रस्य गोचरफलम् ।
"जन्मन्यतिभयकरो भृगुजोऽर्थदोऽर्थे
दुश्चिक्यगः शुभकरो धनदश्चतुर्थे ।
स्यात् पुत्रदस्तनयगोऽरिगतोऽरिवृद्धिं
शोकप्रदो मदनगो निधनेऽर्थदाता ॥
जनयति विविधाम्बराणि धर्म्मे
न शुभकरो दशमस्थितस्तु शुक्रः ।
धननिचयकरस्तु लाभसंस्थो
व्ययभवनेऽपि धनागमं करोति ॥"
शनेर्गोचरफलम् ।
"वित्तभंशं सदार्हं दिनकरतनयो जन्मराशिं प्रपन्न-
श्चित्तक्लेशं द्वितीये रिपुहननकृतं वित्तलाभं तृतीये ।
पाताले शत्रुवृद्धिं सुतभवनगतः पुत्रभृत्यादि-नाशं
षष्ठस्थानेऽर्थलाभं जनयति मदने देहसङ्गा-तमार्त्तिः ॥
शरीरपीड़ां निधनेऽथ धर्म्मे
धनक्षयं कर्म्मणि दौर्म्मनस्यम् ।
उपान्त्यगो वित्तमनर्थमन्ते
शनिर्ददातीत्यवदत् सुतत्तः ॥"
राहोर्गोचरफलम् ।
"जन्मान्त्यपञ्चवसुरन्ध्रनवद्विसप्त-
राशौ स्थिते यदि भवेदसुरः कदापि ।
अर्थक्षयं रिपुभयं बहुकार्य्यहानिं
रोगप्रवासमरणाधिभयं करोति ॥"
केतोर्गोचरफलम् ।
"एकादशत्रिदशषष्ठगते नराणां
सम्मानभोगनृपमानसुखार्थदाता ।
आज्ञाकराश्च पुरुषाः प्रमदाश्च नित्यं
सौख्योदयं दिशति पुण्यचयश्च केतुः ॥"
अन्यत्सर्व्वं ग्रहशब्दे द्रष्टव्यम् ॥)
गोचर्म्म, [न्] क्ली, (गोश्चर्म्म ।) गवां त्वक ।
कर्म्मविशेषे तदासनविधिर्यथा,—
"मेषासनन्तु वस्त्रार्थमाजश्चौ वाघचर्म्म च ।
व्याघ्रौ व्याघ्राजिनं मोक्षं मोक्षार्थं वाघचर्म्म च ॥
गोचर्म्मसम्भवे देवि ! सम्भवे वाजिचर्म्म च ॥"
इति समयाचारतन्त्रे २ पटलः ॥ * ॥
परिमाणविशेषः । यथा,—
"यत् किञ्चित् कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा ।
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति ॥"
गोचर्म्मलक्षणञ्च दक्षसंहितायां दर्शितम् । यथा,—
"सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम् ।
दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते ॥"
इति मिताचरायां आचाराध्यायः ॥
गोच्छालः, पुं, (गां भूमिं छादयतीति । छद + णिच् + अण् । पृषोदरादित्वात् साधुः ।) कुलाहलवृक्षः । इति रत्नमाला ॥ कोकणिमा इति भाषा ॥
गोजलं, क्ली, (गवि जातं जलम् ।) गोमूत्रम् । इति राजनिर्घण्टः ॥ (यथा, गारुड़े १८० अध्याये ।
"गोजलेनैव पूरेण कर्णस्रावो विनश्यति ॥")
गोजा, स्त्री, (गवि पृथिव्यां जायते इति । गो + जन् + "जनसनखनक्रमगमो विट् ।" ३ । २ । ६७ । इति विट् । "विड्वनोरिति ।" ६ । ४ । ४१ । इति आत्वच्च ।) गोलोमिकावृक्षः । इति राजनिर्घण्टः ॥
गोजागरिकं, क्ली, (गोषु इन्द्रियेषु जागरः अप्रमादोऽस्यस्य ठन् ।) मङ्गलम् । इति मेदिनी । के । २२७ ॥
गोजागरिकः, पुं, (गवि पृथिव्यां जागरिकः प्रहरीव । अस्त्रवत्कण्टकान्वितत्वादस्य तथात्वम् ।) कण्टकारिका । इति मेदिनी । के । २२७ ॥
गोजापर्णी, स्त्री, (गोजं दुग्धं तद्वत् आपर्णयति सुखवर्णी भवतीति । आ + पर्ण + अच् ।) गौरादित्वात् ङीष् ।) दुग्धफेनीवृक्षः । इति राजनिर्घण्टः ॥
गोजिह्वा, स्त्री, (गोर्जिह्वेव ।) क्षुपविशेषः । गोजियाशता इति हारियाणाक इति च भाषा । तत्पर्य्यायः । दार्व्विका २ । इत्यमरः । २ । ४ । ११६ ॥ दर्व्विका ३ । इति भरतः ॥ दार्व्विपत्रिका ४ । इति रत्नमाला ॥ खरपत्री ५ वातोगा ६ अधोमुखा ७ अनड्वाह्निका ८ अधःपुष्पी ९ दर्व्वी १० गोजिह्विका ११ । इति शब्दरत्नावली ॥ अपि च भावप्रकाशे ।
"गोजिह्वा गोजिका गोभी दार्व्विका खरपर्णिनी ।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् ॥
छर्द्दा प्रमेहकासास्रव्रणव्वरहरी लघुः ।
कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता ॥"
अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । शीतलत्वम् । पित्तसर्व्वदन्तिविषार्शिनाग्निजम् । व्रणसंरोपणत्वञ्च । इति राजनिर्घण्टः ॥ (अस्या व्यवहारो यत्र तदृथा,—
"सोमवल्क्योऽर्कवर्च्चश्च गोजिह्वा हंसपद्यपि ।
रक्तपौ गैरिकं क्षेपो नखदन्तविषापहः ॥"
इति वैद्यकचक्रपाणिसंग्रहे विषाधिकारे ॥)
गवेधुका । इति रत्नमाला ॥ गड़गड़ इति भाषा ॥
गोजिह्विका, स्त्री, (गोर्जिह्वेव गोजिह्वा स्वार्थे कन् । अत इत्वच्च ।) गोजिह्वा लता । इति शब्दरत्नावली ॥

गोड़ः, पुं, (गोरङ्ग इव। पृषोदरादित्वात् साधुः।) गोरङ्गः। स तु नाभौ प्रवृद्धमांसगुड़कः। इति लिङ्गादिसंग्रहटीकायां भरतः॥

गोड़ुम्बः, पुं, (गां भुवं तुम्बति व्यर्थतीति। गो+तुम्ब+कः। पृषोदरादित्वात् साधुः।) ग्रीवेर्ष्वतुम्बः। इति मेदिनी। बे। १२॥ तरमूज् इति ख्यातः॥

गोड़ुम्बा, स्त्री, (गोड़ुम्ब+स्त्रियां टाप्।) गवादनी। इति मेदिनी। बे। १२॥ गोसुक इति ख्याता गोमा इति राजगोसुक् इति च ख्याता इलेके। इति भरतः॥ तत्पर्य्यायः। चित्रा २ गवाक्षी ३। इत्यमरः। २। ४। १५६॥ गोड़ुम्बिका ४। इति रत्नमाला॥

गोड़ुम्बिका, स्त्री, (गोड़ुम्ब+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) गोड़ुम्बा। इति रत्नमाला॥

गोणी, स्त्री, (गुणादिगुणाद् जातः गोणः। निपातनादुकारस्य गुणः। गोणगुणात् आवपनेऽर्थे "जानपदकुण्डगोणीति।" ४। १। ४२। इति ङीष्।) धान्यादिवहनार्थाधारविशेषः। इति शब्दबोधम्। गुण इति भाषा॥ द्रोणीपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने चतुर्थाध्याये।

"विड़ालनकुलोड़ायां चर्म्मगोण्यां नृगस्य वा।
प्रवेश्यैवेष्ठा स्वभ्यक्तं शास्त्रमेनोपनाहितम्॥"

"सूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च वा स्मृता।
मागधद्वाभ्यविस्तीर्णा कुड़वः प्रस्थमाढ़कम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥"

इति श्रीधरेण पूर्व्वखण्डे प्रथमेऽध्याय उक्तम्॥

"गोणी सूर्पद्वयं विद्यात् खारी भारीत्यथैव च।
द्वात्रिंशतं विजानीयात् वाहं सूर्पाणि बुद्धिमान्॥"

इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम्॥) छिद्रवस्त्रम्। तत्पर्य्यायः। घ्राणी २। इति हेमचन्द्रः। ३। ३४३॥

गोण्डः, पुं, (गोः अण्ड इव।) नाभौ वृद्धमांसगुड़कः। इति लिङ्गादिसंग्रहे अमरः। ३। ५। १८॥ गेंड़ इति भाषा। पामरजातिः। वृद्धनाभियुक्ते त्रि। इति मेदिनी। डे। ११॥ अस्य रूपान्तरं गोड़ः, गौड़ः। इत्यमरटीका॥

गोतमः, पुं, (गोभिर्धर्त्तुं तमो यस्य। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, महाभारते। १३। ६३। ६५।

"गोदमोऽहमतोऽधूमोऽदमस्ते समदर्शनात्।
गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहतः।
विद्धि मां गोतमं तस्मे यातुधानि! निबोध माम्॥")

गौतमसुनिः। स तु ब्रह्मपुत्रः। इति गयामाहात्म्ये वायुपुराणम्॥

गोतमान्वयः, पुं, (गोतमोऽन्वयो वंशप्रवर्त्तको यस्य।) शाक्यमुनिः। इति हेमचन्द्रः॥

गोतल्लजः, पुं, (प्रशस्तो गौः "प्रशंसावचनैश्च।" २। १। ६६। इति कर्म्मधारयः।) उत्तमगौः। गोषु मध्ये तल्लजः प्रशस्तः इति वा व्युत्पत्तिः॥

गोत्रं, क्ली, गवते शब्दयति पूर्व्वपुरुषान् यत्। इति भरतः॥ (गु+"गुधृवीपतीति।" उणां। ४। १६६। इति त्रः।) तत्पर्य्यायः। सन्ततिः २ जननम् ३ कुलम् ४ अभिजनः ५ अन्वयः ६ वंशः ७ अन्ववायः ८ सन्तानः ९। इत्यमरः। २। ७। १॥ आख्या। (यथा, कुमारे। ४। ८।

"स्मरसि स्मरमेखलागुणै-
रुत गोत्रस्खलितेषु बन्धनम्॥")

सम्भावनीयबोधः। कानगनम्। चेचम्। वर्त्म। इति मेदिनी। रे। २६॥ क्षेत्रम्। इति हेमचन्द्रः॥ संघः। दृष्टिः। इति शब्दचन्द्रिका॥ वित्तम्। इति विश्वः॥ *॥ "वंशप्रवरसम्बन्धप्रसिद्धं आदिपुरुषं ब्राह्मणरूपम्।

क्षत्रियवैश्ययोरुपदिशतिदिष्टगोत्रं शूद्रस्यातिदिशतिदिष्टगोत्रम्।" इत्युद्वाहतत्त्वम्॥ क्षत्रियवैश्यशूद्राणामतिदिशतिदिष्टगोत्रप्रवरमतएवैतेषां पुरोहितगोत्रप्रवरमित्यर्थः। तथा चाग्निपुराणे वर्णसङ्करोपाख्याने।

"क्षत्रियवैश्यशूद्राणां गोत्रञ्च प्रवरादिकम्।
तथान्यवर्णसङ्कराणां येषां विप्राश्च याजकाः॥"

गोत्राणि तु चतुर्व्विंशतिः तथा च मनुः।

"भृगवङ्गिरसोऽत्रिश्च पुलस्त्यः पुलहः क्रतुः।
वसिष्ठः कश्यपश्चैव दक्षश्चेत्येव सप्तमौ॥
एतेषां यानि गोत्राणि तानि लोकेषु सप्तसु।
तपोयोगसमाधिस्थान् तानेवाध्यगमन् ऋषीन्॥"

तथा च मनुः।

"जमदग्निर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
वशिष्ठकाश्यपावत्रेरित्येते सप्तमर्षयः॥"

एतदुपलक्षणमन्येषामपि दर्शनात्। तथा च।

"सौकालीनकमौद्गल्यौ पराशरदृषस्तथा।
काश्यपो विष्णुकौण्डिल्यौ कात्यायनबाभ्रवेय-
काश्यकाः॥
लक्षायनेयः साङ्कृतिश्च कौण्डिल्यो गर्गसंज्ञकः।
आङ्गिरस इति ख्यातः अनावृकाश्यसङ्गतः॥
अथर्वनैमिनिवृद्धाख्याः शाण्डिल्यो वात्स्य
एव च।
सावर्ण्यालम्बायनवैयाघ्रपद्यश्च घृतकौशिकः॥
शक्तिः काक्षायणश्चैव वासुकी गौतमस्तथा।
शुनकः सौपायनश्चैव शुनयो गोत्रकारिणः॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते॥"

सर्व्वे चत्वारिंशदृगोत्राः। इति कुलदीपिकाधृतधनञ्जयशतधर्म्मप्रदीपः॥ (मेघः। इति निघण्टुः। १। १०। यथा, ऋग्वेदे। १। ५१। ३।

"त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोताव्ये शतदुरेषु गातुवित्॥")

गोत्रः, पुं, (गां पृथिवीं त्रायते रक्षतीति। गो+त्रै+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पर्व्वतः। इत्यमरः। २। ३। १३॥ (यथा, भागवते। २। ६। ६।

"गात्रो नदनदीनान्तु गोत्राणामस्थिसंहतिः॥")

गोत्रजः, त्रि, (गोत्रे जायते इति। गोत्र+जन्+डः।) गोत्रोत्पन्नः। स तु जन्मनामस्तुतिपर्य्यन्तसमानोदकभावात् पञ्चाब्दवति। इति शुद्धितत्त्वम्॥ (यथा, याज्ञवल्क्ये। २। १३८।

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥")

गोत्रभित्, [द्] पुं, (गोत्रं पर्व्वतं भिनत्तीति। "सप्तम्युपपदे भिदादि।" ३। २। ६१। इति क्विप्। ततस्तुगागमः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, ऋग्वेदे। ६। १७। २।

"यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः
स इन्द्र चित्रो अभिष्टिंधि वाजान्॥"

यथा च भट्टौ। १। ३।

"सहासनं गोत्रभिदाध्यवात्सीत्॥")

गोत्रवृत्तः, पुं, (गोत्रजातः पर्व्वतजातो वृत्तः।) धन्वनवृत्तः। इति भावप्रकाशः॥

"धन्वजस्तु धनुर्वृक्षो गोत्रवृत्तः सुतेजनः।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

गोत्रा, स्त्री, (गाः पशून् सर्व्वान् जीवागित्यर्थः त्रायते इति। त्रै+कः। स्त्रियां टाप् च।) पृथिवी। (गवां समूहः। "इनित्रकट्यचच्।" ४। २। ५१। इति त्रः। टाप् च।) गोसमूहः। इति मेदिनी। रे। २६॥ (गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४१।

"गन्धर्व्वी गह्वरी गोत्रा गिरिज्ञा गहना गमी॥")

गोदः, पुं, (गां इन्द्रियाणि दायति शोधयतीति। गो+दै+कः।) मस्तकस्नेहः। मस्तिष्कम्। इति हेमचन्द्रः॥ (गाः ददातीति। गो+दा+कः।) गोदातरि त्रि। इति शब्दबोधम्॥ (यथा, मनुः। ४। २३१।

"वासोदध्नश्चसालोक्यमग्निसालोक्यमश्वदः।
अनड्वाहः श्रियं पुष्टां गोदो ब्रह्मस्य पिप्पलम्॥")

गोदन्तं, क्ली, (गोदन्त इव अवयवो विद्यते यस्य।) हरितालम्। इति राजनिर्घण्टः॥ (हरितालशब्दोऽस्य गुणादयो बोध्याः॥)

गोदा, स्त्री, (गां जलं स्वर्गं वा ददाति ज्ञानेनेति। गो+दा+कः। स्त्रियां टाप्।) गोदावरी नदी। इति हेमचन्द्रः। ४। १५०॥ (गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४३।

"गन्धर्व्वप्रहारिणी गोदा गोकुलस्था गदाधरा॥"

गाः ददातीति। दा+क्विप्। गोदातरि त्रि। यथा, ऋग्वेदे। १। ४। २।

"गोदा इद्रेवतो मदः।"

"गोदावस्तुरिन्द्रियव्यवहारप्रदः।" इति दयानन्दभाष्यम्॥)

गोदारणं, क्ली, (गौर्भूमिर्दार्य्यतेऽनेनेति। गो+दृ+णिच्+करणे ल्युट्।) लाङ्गलम्। इत्यमरः। २। ८। १४॥ कुदालः। इति हेमचन्द्रः। ८। ५५६॥

गोदावरी, स्त्री, (गां जलं स्वर्गं वा ददातीति गोदा । तासु वरी श्रेष्ठा । वर+ङीष् संज्ञायाम् । यद्वा गां स्वर्गं ददाति । गो+दा+क्विप्+ङीप् रान्तादेशश्च ।) नदीविशेषः । (अस्या उत्पत्तिकथा यथा, ब्रह्मवैवर्त्ते । १० । १२६—१३० ।

"गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः । ददर्श कामुकः श्रान्तः पुष्पोद्याने च निर्जने ॥ तया निवारितो यत्नात् कालेन बलवान् सुरः । अतीवसुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ॥ हृतं तत्याज गर्भं सा पुष्पोद्याने मनोहरे । सद्यो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः ॥ सपुत्रा स्वामिनो गेहं जगाम व्रीडिता तदा । स्वामिनं कथयामास यन्मार्गे देवसङ्कटम् ॥ विप्रो रोषेण तत्याज तच्च पुत्रं स्वकामिनीम् । सरिद् बभूव योगेन सा च गोदावरी स्मृता ॥")

तत्पर्य्यायः । गोदा २ । इति हेमचन्द्रः ॥ गौतमसम्भवा ३ ब्राह्मणिजाता ४ गौतमी ५ । (यथा, हितोपदेशे ।

"अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः ॥")

इयमेव पीठस्थानविशेषः । अत्र देवी त्रिसन्ध्यासूर्य्याविराजते । यथा, देवीभागवते । ७ । ३० । ६८ ।

"गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥")

अस्या जलस्य गुणाः । पित्तार्शिरक्तार्शिवायुपापकुष्ठादिदुष्टामयदोषत्रयाणाग्नित्वम् । परमपथ्यत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

गोदुग्धदा, स्त्री, (गवां दुग्धं ददाति आधिक्येन सम्पादयतीति । गो+दा+कः । तद्गुणेन गवां दुग्धवर्द्धनादस्यास्तथात्वम् ।) चणिकालक्षणम् । इति राजनिर्घण्टः ॥

गोदोहनी, स्त्री, (गावो दुह्यन्तेऽस्यामिति । गो+दुह्+अधिकरणे ल्युट् ।) गोदोहनपात्रम् । तत्पर्य्यायः । पारी २ । इति जटाधरः ॥

गोद्रवः, पुं, (द्रवति स्रवतीति । द्रु+अच् द्रवः । गवां द्रवः ।) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोधनं, क्ली, (गवां धनं समूहः ।) गोसमूहः । इत्यमरः । २ । ९ । ५८ ॥ (यथा, रामायणे । २ । ३२ । ४२ ।

"स आत्मनो दृढां कर्त्तां बद्धा सम्भ्रान्तमानसः । दण्डमुद्यम्य सहसा प्रतस्थे गोधनं प्रति ॥")

गोधनः, पुं, (धन ग्रन्थे भावे ल्युट् धनं ग्रन्थः । गोर्वचस्येव धनं ग्रन्थो यस्य ।) स्थूलाग्रवाणः । इति हरिवंशः ॥ तुक्का इति भाषा ॥

गोधा, स्त्री, (गृध्यते परिवेष्ट्यते बाहुर्यया । गृध+"हलश्चेति ।" करणे घञ् ।) धनुर्गुणाघातवारणाय प्रकोष्ठवल्गा चर्म्मकृतपट्टिका । तत्पर्य्यायः । तला २ व्याघातवारणा ३ । इत्यमरः । २ । ८ । ८४ ॥ तलम् ४ । इति तट्टीका ॥ (यथा, महाभारते । ३ । १७ । ३ ।

"विचित्रपत्रादर्यश्चापि धनुः श्रेष्ठं महाबलैः । तूणश्चबद्धगधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥")

जन्तुविशेषः । गोसाप् इति भाषा ॥ सा तु स्थलजलजभेदात् द्विविधा । तत्पर्य्यायः । निहाका २ गोधिका ३ । इत्यमरः । १ । १० । २२ ॥ दारुसुरुवाङ्गा ४ । (यथा, दृहत्संहितायाम् । ५४ । १३ ।

"श्वेता गोधार्द्धनरे पुरुषे मृदुसरा ततः कृष्णा । पीता सिता ससिकता ततो जलं विनिर्दिशेदमितम् ॥"

पक्वनखतया गोधाया मांसं भक्ष्यत्वेन ग्राह्यमित्यभिहितं मन्वादिभिर्धर्म्मशास्त्रप्रयोक्तृभिः । यथा, मनुः । ५ । १८ ।

"श्वाविधं शल्लकं गोधां खड्गकूर्म्मशशांस्तथा । भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्राश्चैकतोदतः ॥")

अस्या मांसगुणाः । वातश्वासकासनाशित्वम् । इति राजनिर्घण्टः ॥ पाके मधुरत्वम् । कषायत्वम् । कटुरसत्वम् । पित्तनाशित्वम् । रक्तशुक्रबलकारित्वम् । इति राजवल्लभः ॥

("गोधा विपाके मधुरा कषायकटुका रसे । वातपित्तप्रशमनी हृंहणी बलवर्द्धनी ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥)

गोधापदिका, स्त्री, (गोधाया इव पादो मूलमस्याः । स्वाङ्गत्वात् ङीष् । ततः "कुम्भपदीषु च ।" ५ । ४ । १३६ । इति पद्भावः । गोधापदी । ततः स्वार्थे कन् टाप् पूर्ब्बह्रस्वश्च ।) गोधापदीलता । इति शब्दरत्नावली ॥

गोधापदी, स्त्री, (गोधाया इव पादो मूलं यस्याः । स्वाङ्गत्वात् ङीष् । "कुम्भपदीषु च" ५ । ४ । १३६ । इति पद्भावः ।) लताविशेषः । गोयालिया इति भाषा ॥ तत्पर्य्यायः । सुवहा २ । इत्यमरः । २ । ४ । ११६ ॥ हंसपदी ३ गोधाङ्घ्री ४ त्रिफला ५ । इति भरतः ॥ त्रिपदी ६ मधुस्रवा ७ हंसपादी ८ । इति रत्नमाला ॥ हंसपादिका ९ हंसाङ्घ्रिः १० रक्तपादी ११ त्रिपदा १२ घृतमण्डलिका १३ विश्वग्रन्थिः १४ त्रिपादिका १५ त्रिपादी १६ कीटमारी १७ कर्णाटी १८ ताम्रपादी १९ विक्रान्ता २० ब्रह्मदनी २१ पदाङ्गी २२ गृध्राङ्गी २३ सुतपादिका २४ सञ्चारिणी २५ पदिका २६ प्रक्रादी २७ कीटपादिका २८ धार्त्तराष्ट्रपदी २९ गोधापदिका ३० । इति शब्दरत्नावली ॥ द्विदला ३१ हंसवती ३२ । इति जटाधरः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । विषभूतभ्रान्त्यपस्मारदोषनाशित्वम् । रसायनत्वञ्च । सुबली । तालमूली इति ख्याता । इति राजनिर्घण्टः ॥

गोधास्कन्धः, पुं, (गोधेव स्कन्धोऽस्य ।) विट्खदिरः । इति राजनिर्घण्टः ॥

गोधिः, पुं, (गावौ नेत्रे धीयेते अस्मिन् । "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) ललाटम् । इत्यमरः । २ । ६ । ९२ ॥ (गृध्राति कृष्यतीति । गृध्+"सर्व्वधातुभ्य इन्" उणां । ४ । ११८ । इति इन् ।) गोधिका । इति शब्दरत्नावली ॥

गोधिका, स्त्री, (गृध्नातीति । गृध्+ण्वुल् । टाप् च्यत इत्वञ्च ।) गोधा । इत्यमरः । १ । १० । २२ ॥ गोसाप इति भाषा ॥

गोधिकात्मजः, पुं, (गोधिकाया आत्मजः ।) स्थूलगोधिका । गोधाग्निशुतुल्याकारकोटरस्थजन्तुविशेषः तोके इति ख्यात इति भगी । इति सारसुन्दरी ॥ तत्पर्य्यायः । गौधेरः २ । गौधारः ३ गौधेयः ४ । इत्यमरः । २ । ५ । ६ ॥ (सर्पाद्गोधायासुतपन्ने जन्तुविशेषे इति गोधिकापुत्रशब्दार्थे शब्दार्थचिन्तामणिः ॥)

गोधिनी, स्त्री, (गोधः क्रीड़ाभेदः सोऽस्त्यस्याः इति इनिः ङीप् च ।) चर्विका । सा तु दृहतीभेदः । इति राजनिर्घण्टः ॥

गोधुक्, [ह्] त्रि, (गां दोग्धीति । गो+दुह+"सत्सुद्विषद्रुहदुहयुजविदादि ।" ३ । २ । ६१ । इति क्विप् ।) गोदोग्धा । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । २६ ।

"उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ॥")

गोधूमः, पुं, (गुध+"गुधेरूमः ।" उणां । ५ । २ । इति ऊमः । निपातनात् ह्रस्वः ।) गोधूमः । इति शब्दचन्द्रिका ॥

गोधूमः, पुं, (गुध्यते वेष्टते त्वगादिभिः । गुध+"गुधेरूमः ।" उणां । ५ । २ । इति ऊमः ।) नागरङ्गः । ओषधीविशेषः । गोहिभेदः । इति मेदिनी ॥ मे । ४३ । गम गोम् इति च भाषा ॥ गोधूमस्य पर्य्यायः । बहुदुग्धः २ अपूपः ३ स्वेच्छभोजनः ४ यवनः ५ निस्तुषवीरः ६ रसालः ७ सुमनाः ८ । (यथा, मनुः । ५ । २५ ।

"यवगोधूमजं सर्व्वं पयसश्चैव विक्रियाः ॥")

अस्य गुणाः । स्निग्धत्वम् । मधुरत्वम् । वातपित्तदाहनाशित्वम् । गुरुत्वम् । श्लेष्ममदबलरुचिवीर्य्यकारित्वञ्च । इति राजनिर्घण्टः ॥ हृंहणत्वम् । जीवनहितत्वम् । शीतत्वम् । भग्नसन्धानशैथिल्यकारित्वम् । सारकत्वञ्च । इति राजवल्लभः ॥ (अथ गोधूमस्य नामानि लक्षणं गुणाश्च ।

"गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः ।
महागोधूम इत्याख्यः पञ्चाङ्गुल्यात् समागतः ॥
महागोधूमः वड़ गोधूमा इति लोके ।
मधुली तु ततः किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः ॥
जीवनो हृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत् ।
कफप्रदो नवीनो न तु पुराणः ।
पुराणयवगोधूमः क्षौद्रजाङ्गलशूलभागिति ।
वाग्भटेन वसन्ते ग्रहीतत्वात् ।
मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ।
शुक्रला हृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

गोधूमचूर्णं, क्ली, (गोधूमस्य चूर्णम् ।) चूर्णीकृत-गोधूमः । मयदा इति भाषा ॥ यथा,—
"शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च रोटिकाम् ॥"
इति भावप्रकाशः ॥

गोधूमसम्भवं, क्ली, (सम्भवत्यस्मादिति सम्भव उत्पत्तिस्थानम् । गोधूमः सम्भवोऽस्य ।) सौवीरम् । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

गोधूमसारः, पुं, गोधूमस्य सारभागः । पालो इति भाषा ॥ तत्करणविधिर्यथा । "निस्तुष-गोधूमं उदूखले कण्डयित्वा सन्ध्याकाले स्फटिकादिपात्रे जले मग्नं कारयित्वा परदिने प्रभाते उपरिस्थजलं क्रमेण दूरीकृत्य नीचस्थसारं रौद्रे शुष्कं कृत्वा पात्रान्तरे स्थापयेत् ।" इति पाकराजेश्वरः ॥

गोधूमी, स्त्री, (गां धूमयतीति । धूमि+अण् । गौरादित्वाद् ङीष् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (गोलोमिकाशब्देऽस्या विवरणं ज्ञेयम् ॥)

गोधूलिः, स्त्री, (गवां खुरोत्थिता धूलिर्यत्र-काले ।) कालविशेषः । गोधूलिकालस्तु त्रिविधः । यथा,—"ग्रीष्मे ग्रहास्तमिते वसन्तसमये भानौ गतेऽदृश्यतां
हेमन्ते ग्रिग्रिरे प्रयाति स्फुटतां पिण्डीकृते भास्करे ।
ग्रीष्मेऽर्कास्तमिते वसन्तसमये भानौ गतेऽदृश्यतां
सूर्ये चास्तमुपागते च नियतं वर्षाग्ररत्-कालयोः ॥"
इति दीपिका ॥

गोधेनुः, स्त्री, (गौरेव धेनुः ।) दुग्धवती गवी । इति संक्षिप्तसारव्याकरणम् ॥

गोधेरः, पुं. (गोधति धातूनामनेकार्थत्वात् रक्षतीति । गुध्+बाहुलकादेरक् ।) गोघ्ना । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोनन्दी, स्त्री, (गवि जले नन्दतीति । नन्द+अच् । गौरादित्वात् ङीष् ।) सारसपक्षिणी । इति हारावली ॥

गोनर्दं, क्ली,(गवि पृथिव्यां नर्दते स्वनान्वा आख्यायते इत्यर्थः । नर्द+अप् ।) सुस्तकम् । इति मेदिनी । दे । २८ ॥

गोनर्दः, पुं. (गवि जले नर्दति क्रूजतीति । गो+नर्द+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।"३ । १ । १३४। इति पचादित्वादच् ।) सारसपक्षी । इति मेदिनी । दे । २८॥ (गोभिर्वागृभिर्नर्दतीति । अच् ।) देशविशेषः । यथा, बृहत्-संहितायाम् । १४ । १२ ।
"कङ्कटटङ्गणवनवासि-
ग्रिविकपञ्चिकारकोङ्कणाभीराः ।
आकरवेणावन्तक-
दशपुरगोनर्दकेरलकाः ॥"

गोनर्दस्य देशस्य राजा । "तदाजेऽपि ।" २ । ४ । ६२ । इत्यण् । गोनर्दराजः । यथा, राज-तरङ्गिण्याम् । १ । ५७ ।
"काश्मीरेन्द्रः स गोनर्दो वेल्लद्वङ्गादकूलया ।
दिशा कैलासहासिन्या प्रतापी पर्य्युपास्यत ॥")

गोनर्दीयः, पुं, (गोनर्दे देशे भवः । गोनर्द+"वृद्-प्राचां देशे ।" १ । १ । ७५ । इति वृद्धसंज्ञ-त्वात् छः ।) पतञ्जलिमुनिः । इति हेमचन्द्रः । ३ । ५१५ ॥ (अस्य गोनर्ददेशोद्भूतत्वात् तथात्वम् । तद्देशभवे, त्रि ॥)

गोनसः, पुं, (गोरिव नासिका यस्य । "अन् नासि-कायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् नसादेशश्च ।) सर्पविशेषः । बोड़ा इति ख्यात इत्यन्ये । इति भरतः ॥ तत्-पर्य्यायः । तिलित्सः २ । इत्यमरः । १ । ८ । ४ ॥ गोनासः३ घोनसः४ । इति हेमचन्द्रः ॥ मण्डली-बोड्रः ५ । इति विक्रमादित्यः ॥ बोड्रः ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"सिलिन्दको गोनसो वृद्धगोनसः पनसी ॥")
वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनाथः. पुं, (गवां नाथः ।) अनड्वान् । इति राजनिर्घण्टः ॥

गोनासं, क्ली, (गोर्नासा इव आकृतिर्यस्य । गोनसाकारत्वादस्य तथात्वम् ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनासः, पुं, (गोर्नासा इव नासा यस्य ।) गोनस-सर्पः । इति हेमचन्द्रः । ४ । ३७२ ॥

गोनिष्यन्दः, पुं, (गोर्निष्यन्दते चरतीति । नि+स्यन्द+घञ्वाच् । यद्वा गवां निष्यन्दः।"कृद्-विहितो भावो द्रव्यवत् प्रकाशते ।" इति न्यायात् ।) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोपः, पुं, (गोर्जलात् कफपित्तादिदूषितरसात् पाति रक्षतीति । गो+पा+"आतोऽनुपसर्गे क:।" ३ । २ । ३ । इति कः ।) बोलः । (गां गोजातिं पाति रक्षतीति । गो+पा+कः ।) जातिविशेषः । गोयाला इति भाषा ॥ तत्-पर्य्यायः । गोसंख्यः २ गोधुक् ३ आभीरः ४ वल्लवः ५ गोपालः ६ । इत्यमरः । २ । ९ ।५७॥ तस्योत्पत्तिर्यथा,—
"मणिबन्ध्यां तन्तुवायात् गोपजातेश्च सम्भवः ।"
इति पराशरपद्धतिः ॥
(यथा, मनुः । ८ । २६० ।
"व्याधाञ्छाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥")
गोष्ठाध्यक्षः । (गां पृथिवीं पाति रक्षतीति । पा+कः ।) पृथ्वीपतिः । बहुग्रामस्याधिपतिः । इति मेदिनी । पे । ५ ॥ (गाः पाति रक्षतीति । पा+कः । गोरक्षकः । यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दधतो वराम् ।
गोखाभ्यनुमते भृत्यः सा स्यात् पाणे भृतिः ॥"

गन्धर्वविशेषः । यथा, रामायणे । ६ । ६१ । ४६ ।
"नारदस्तुम्बुरुर्गोपः प्रभया सूर्य्यवर्चसः ।
एते गन्धर्वराजानो भरतस्यानुगा जगुः ॥")

गोपः, त्रि, (गोपायति रक्षतीति । गुपू क् रक्षणे गुप+घञ्+"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति अच् ।) रक्षकः । उप-कारकः । इति शब्दरत्नावली ॥ (यथा, ऋग्-वेदे । १० । ६१ । १० । "द्विबर्हसो य उप गोप-मागुरदक्षिणासो अच्युता दुदुक्षन् ॥")

गोपकः, पुं, (गोप+स्वार्थे कन् ।) बोलः । बहु-ग्रामाधिपतिः । इति शब्दरत्नावली ॥

गोपकन्या, स्त्री, (इन्द्रियाद्युपलक्षितशरीररक्षकस्य गोपस्य वैद्यस्य कन्येव हितकारित्वात् ।) शारिवौ-षधिः । इति राजनिर्घण्टः ॥ (गोपस्य कन्या ।) आभीरसुता ॥ (यथा,—
"युवतीर्गोपकन्याश्च राज्ञो संकाल्य कालवित् ।
केशोरकं मानयन् वै सह ताभिर्मुमोद ह ॥"
इति हरिवंशे । ७६ । १८ ॥)

गोपघोण्टा, स्त्री, (गोपप्रिया घोण्टा वदरीविशेषः ।) हस्तिकोलिः । इति रत्नमाला ॥ वदरीसदृश-क्षुद्रफलवृक्षः । शेयाकुल इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
("वदरीसदृशाकारो वृक्षः क्षुद्रफलो भवेत् ।
अटयामेव सा घोण्टा गोपघोण्टेति घोष्यते ॥")
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

गोपतिः, पुं (गोर्वृषभस्य पतिः । यद्वा गवां पशूनां जीवानां पतिः ।) शिवः । (यथा, महा-भारते । १३ । १७ । १३ ।
"गोपालिर्गोपतिर्गोभो गोचर्म्मवसनो हरिः ॥"
गां पृथ्वीं जगदित्यर्थः पाति पालयतीति । गो+पा+डतिः । विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"उत्तरो गोपतिर्गोष्ठो ज्ञानगम्यः पुरातनः ॥"
गोपेन्द्रनन्दनकृष्णः । यथा, हरिवंशे । ७६ । ४ ।
"अमानुषाणि कर्म्माणि पश्यामस्तव गोपते ! ॥"
असुरभेदः । यथा, महाभारते । ३ । १२ । ३५ ।
"गोपतिस्तालकेतुश्च त्वया विनिहतावुभौ ॥"
गवां रश्मीनां पतिः ।) सूर्य्यः । (यथा, भागवते । १ । १२ । १० ।
"परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अक्षतेजः खगदया नीहारमिव गोपतिः ॥"
गोः पृथिव्याः पतिः ।) राजा । (गवां सौर-भेयानां पतिः ।) वृषः । इति मेदिनी ॥ ते । १०७ ॥ (यथा, बृहत्संहितायाम् । ६८ । ११५ ।
"भ्राद्धूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।
येषाञ्च शब्दरहितं स्खलितं च यातं
तेऽपीश्वरा हतपरिश्रुतगा दरिद्राः ॥")
ऋषभनामौषधिः । इति राजनिर्घण्टः ॥

गोपदलः, पुं, (गोपदं गोचरभूम्यासयोग्यं स्थानं लाति गृह्णातीति । गोपद+ला+कः ।) गुवाकः । इति त्रिकाण्डशेषः ॥

गोपनं, क्ली, (गुप्+भावे ल्युट्।) अपह्नवः। (यथा, महानिर्व्वाणतन्त्रे। ४। ७६।
"गोपनाद्गोपयेत् सत्यं न गुप्तिरनृतं विना।
तस्मात् प्रकाशतः कुर्य्यात् कौलिकः कुलसाधनम्॥")
कृत्सनम्। रक्षा। (यथा, राजेन्द्रकर्णपूरे।३४।
"अधिकं समाप्तसमरः प्रथितो भुवनेषु गोपनरसोत्कः॥")
आकुलत्वम्। दीप्तिः। इति कविकल्पद्रुमे गुपधात्वर्थदर्शनात्॥ तमालपत्रम्। इति राजनिर्घण्टः॥ तेजपात इति भाषा॥

गोपनीयं, क्ली, (गुप्+अनीयर्।) गोप्यम्। गोपितव्यम्। यथा,—
"स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः।"
इति नाड़ीप्रकाशः॥

गोपवधूः, स्त्री, (गोपस्य वधूरिव प्रियत्वात्। गोपान् बध्नाति स्वगुणेन इति वा। बन्ध+बाहुलकात् ऊन्।) शारिवा। इति भावप्रकाशः॥ गोपस्य पत्नी च॥ (यथा, गीतगोविन्दे। १। ४१।
"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम्॥")

गोपभद्रं, क्ली, (गोपे भद्रमिव।) शालूकम्। इति शब्दचन्द्रिका॥

गोपभद्रा, स्त्री, (गोपानां भद्रं मङ्गलं यस्याः यस्यां वा गोपाद्यारण्यकजातिभिः पूज्यत्वादस्यास्तथात्वम्।) काश्मरीवृक्षः। इति राजनिर्घण्टः॥

गोपभद्रिका, स्त्री, (गोपभद्रा संज्ञायां कन्। टापि अत इत्वञ्च।) गम्भारीवृक्षः। इति रत्नमाला॥

गोपरसः, पुं, (गोपः गन्धद्रव्यविशेषः। गोपः रसोऽस्य। गोपः अभ्यन्तरगुप्तो रसो यस्मिन् वा।) बोलः। इति शब्दरत्नावली॥

गोपवल्ली, स्त्री, (गां पाति रक्षतीति। पा+कः। टाप्। गोपा चासौ वल्ली चेति कर्म्मधारयः।) मूर्व्वा। शारिवा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायाः यथा,—
"गोपवल्ली कराला च सुगन्धा भद्रवल्लिका।
गोपीभद्रा तथागन्धा नागजिह्वातिशारिवा॥"
इति वैद्यकरत्नमालायाम्॥
यथा च सुश्रुत उत्तरतन्त्रे ५१ अध्याये।
"गोपवल्ल्युदके सिद्धं स्यादन्यद्दधिगुणे हृतम्॥")
श्यामालता। इति शब्दरत्नावली॥

गोपा, स्त्री, (गां पाति रक्षतीति। पा+"आतोऽनुपसर्गे कः।"३।२।३। इति कः। स्त्रियां टाप्।) श्यामालता। इत्यमरटीका शब्दरत्नावली च॥ (गाः पाति रक्षतीति। पा रक्षणे+कप्रापिविषये वासरूपन्यायेन "आतो मनिन्क्वनिप्वनिपश्च।" ३। २। ७४। इति वेन विचि अदन्तत्वाभावादाप् विधेरभावे गोपा गोरक्षाकर्त्री। गोपा विश्वपावदिति सुग्धबोधव्याकरणम्॥)

गोपानसी, स्त्री, (गोपायति रक्षति गृहमिति। गुपू रक्षणे+बाहुलकात् असट् यलोपश्चतो ङीप् च।) वड़भी। गृहाणामग्रभागे दत्तवक्रकाष्ठम्। सुदनी इति भाषा॥ इत्यमरटीकासारसुन्दरी॥ गृहचूड़ा वड़भी तच्छादनार्थं वक्रीकृत्य यत् काष्ठं दीयते सा वड़भी चतुष्किकादिचूड़ा तच्छादनाय वक्रीकृत्य यत् काष्ठं दीयते सा। इति मधुः॥ पटलाधोवंशपञ्जरम्। इति भट्टः॥ कर्णिकाविष्कम्भिदारु इत्यन्ये। वक्रीभूतं धरणकाष्ठम्। इत्येके। इत्यमरटीकायां भरतः॥ (यथा, माघे। ३। ४६।
"गोपानसीषु चणमाश्रितानामालम्बिभिश्चन्द्रकिणां कलापैः।
हरिन्मणिश्यामलणालिकाभिरामैर्गृहाणि नीडैरिव यत्र रेजुः॥")

गोपायितं, त्रि, (गुपू रक्षणे। गोपाय्यते स्म इति। गोपाय+कर्म्मणि क्तः।"आयादय आर्द्धधातुके वा।" ३। १। ३१। इति आयागमश्च।) रक्षितम्। इत्यमरः। ३। १। १०६॥ (भावे क्तः रक्षणम्॥)

गोपालः, पुं, (गाः पालयतीति। गो+पाल+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) गवां पालकः। वृन्दावनस्थगोपालानां स्वरूपं यथा,
"गोपाला सुनयः सर्व्वे वैकुण्ठानन्दमूर्त्तयः॥"
इति पद्मपुराणे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम्॥ * ॥ (गां पृथिवीं पालयतीति। गो+पाल+अण्।) राजा। (गां पृथिवीं वेदं वा पालयतीति।) नन्दनन्दनः कृष्णः। इति मेदिनी। ले। ८६॥ * ॥ श्रीगोपालस्य ध्यानं यथा,
"अथादृश्याकोषनीलाम्बुजरुचिरुरुणाम्भोज-
नेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको
सकुन्दः।
दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विम्बवन्धो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषः
चिरं वः॥"
इति तन्त्रसारः॥ * ॥
तस्य स्वरूपं यथा,—
श्रीव्यास उवाच।
"ततोऽहमब्रुवं कृष्णः पुलकोत्पुल्लविग्रहः।
त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन!॥
यत्तत् सत्यं परं ब्रह्म जगद्योनिर्जगत्पतिः।
वसन्तं वेद शिरसि चाक्षुषं नाथ! मेऽस्तु तत्॥
श्रीभगवानुवाच।
ब्रह्मञ्चैवं पुरा दृष्टः प्रार्थितश्च यथा पुरा।
यदवोचमहं तस्मै तत्तुभ्यमपि कथ्यते॥
मामेके प्रकृतिं प्राहुः पुरुषञ्च तथेश्वरम्।
धर्म्ममेके धनञ्चैके मोक्षमेकेऽकुतोभयम्॥
शून्यमेके भावमेके परमार्थमथापरे।
दैवमेके दैवमेके ग्रहमेके मनः परे॥
बुद्धिमेके कालमेके शिवमेके सदाशिवम्।
अपरे वेदशिरसि स्थितमेकं सनातनम्॥
सच्चावं विक्रियाहीनं सच्चिदानन्दविग्रहम्।
मच्चायामोहितधियः सर्व्वकालेषु वञ्चिताः॥
कोऽपि वेद पुमान् लोके मदनुग्रहभाजनः।
पश्चाद्य दर्शयिष्यामि स्वं रूपं वेदगोपितम्॥
ततोऽपश्यमहं भूप! बालं बालार्कसुप्रभम्।
गोपकन्याहृतं गोपं हसन्तं गोपबालकैः॥
कदम्बमूलमासीनं पीतवाससमच्युतम्।
वनं वृन्दावनं नाम नवपल्लवमण्डितम्॥
कोकिलभ्रमरारावमनोभवमनोहरम्।
नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम्॥
गोवर्द्धनं तथापश्यं कृत्वावामकरोद्धृतम्।
महेन्द्रदर्पनाशाय गोगोपालसुखावहम्॥
दृष्ट्वा विहस्तो ह्यभवं सर्व्वभूतवशङ्गमः।
गोपालबालासङ्गसुदितं वेणुनादितम्॥
ततो मामाह भगवान् वृन्दावनचरः स्वयम्।
यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम्॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम्।
पूर्णं पद्मपलाशाक्षं नातः परतरं मम॥
इदमेव वदन्त्येते वेदाः कारणकारणम्।
सत्यं व्यापि परानन्दचिद्घनं शाश्वतं शिवम्॥
नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा।
यमुनां गोपकन्याश्च तथा गोपालबालकान्॥
ममावतारो नित्योऽयमत्र मा संशयं कृथाः।
ममेष्टा हि सदा राधा सर्व्वशोऽहं परात्परः॥
मयि सर्व्वमिदं विश्वं भाति मायाविजृम्भितम्॥"
इति पद्मपुराणे पातालखण्डम्॥ * ॥
द्वादशगोपालाश्चैतन्यग्रन्थे दृश्याः॥

गोपालकः, पुं, (गां पशुं जीवजातमित्यर्थः पालयति रक्षतीति। गो+पालि+ण्वुल्।) शिवः। इति त्रिकाण्डशेषः॥ श्रीकृष्णः। यथा,—
"दाता फलानामभिवाञ्छितानां
प्रागेव गोपालकमन्त्र एषः।
क्रमदीपिका॥
गोपालशब्दात् स्वार्थे कः गोरक्षकश्च॥ (यद्वा, गवां पालकः रक्षकः। पालि+ण्वुल्। यथा, महाभारते। ३। २३६। ६।
"अथ संसारणं कृत्वा लक्षयित्वा त्रिहायणान्।
ततो गोपालके प्रीतो बभूवतुः कुरुनन्दन॥"
चक्रमहासेननृपतेः पुत्रयोरन्यतरः। यथा, कथासरित्सागरे। ११। ७४।
"जातौ द्वौ तनयौ चक्रमहासेनस्य भूपतेः।
एको गोपालको नाम द्वितीयः पालकस्तथा॥")

गोपालकर्कटी, स्त्री, (गोपालप्रिया कर्कटी फलविशेषः।) कर्कटीभेदः। गोयालकाँकरी गुरुभा इति च हिन्दी भाषा॥ तत्पर्य्यायः। वन्या २ गोपकर्कटिका ३ क्षुद्रेर्व्वारुः ४ क्षुद्रफला ५ गोपाली ६ क्षुद्रचिर्भिटा ७। अस्या गुणाः। शीतत्वम्। मधुरत्वम्। पित्तरक्तश्लेष्मश्वासकासमेहदाहशोषनाशित्वञ्च। इति राजनिर्घण्टः॥

गोपालिका, स्त्री, (गोपालकस्य गोरक्षकस्य पत्नी। "पालकात्तात्।" ४। १। ४८। इत्यस्य

वार्त्ति इति न ङीष् अतश्चापि अत इत्वम् ।) गोपालपत्नी । इति मुग्धबोधम् ॥ कीटविशेषः । तत्पर्य्यायः । महाभीरुः २ । इति हेमचन्द्रः । ४ । २७४ ॥

गोपाली, स्त्री, (गोपालानां प्रिया । गोपाल + जातौ ङीष् ।) गोपालकर्कटी । गोरक्षी । इति राजनिर्घण्टः ॥ (गोपालस्य पत्नी । गोपाल + स्त्रियां ङीष् । गोपपत्नी ॥ स्कन्दानुचरमातृविशेषः । यथा, महाभारते । ९ । ४६ । ४ ।

"अम्बु जाता च गोपाली वृहदम्बालिका तथा॥")

गोपाष्टमी, स्त्री, (गोपप्रिया अष्टमी । प्राक्पार्थिवादिवत् समासः ।) कार्त्तिकशुक्लाष्टमी । यथा,—

"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥ तत्र कुर्य्यात् गवां पूजां गोग्रासं गोप्रदक्षिणम् । गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"

इति कूर्म्मपुराणम् ॥

गोपिका, स्त्री, (गोप्येव स्वार्थे कन् इत्वञ्च ।) गोपी । यथा,—

"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।"

इति श्रीभागवते । १० । ३१ । ४ ॥

(गोपायति रक्षति या । गुपू + रक्षणे + ण्वुल् । स्त्रियां टापि अत इत्वम् ।) रक्षित्री ॥

गोपिनी, स्त्री, (गोपायति रक्षतीति । गुप् + णिनिः ङीप् च ।) श्यामालता । इति शब्दचन्द्रिका ॥ (वीराचारि-पञ्चाचारिणां पूजनीयनायिकाविशेषः । यदुक्तं गुप्तसाधनतन्त्रे १ म पटले ।

"नटी कापालिकी देश्या रजकी नापिताङ्गना । ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥"

अस्याः निरुक्तिर्यथा, कुलार्णवतन्त्रे ।

"आत्मानं गोपयेत् या च सर्व्वदा पशुसङ्कटे । सर्व्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता ॥")

गोपिलः, त्रि, (गोपायति रक्षतीति । गुपू रक्षणे + "मिथिलादयश्च ।" उणां । १ । ५८ । इति इलच् निपातनात् किदभावः ।) गोप्ता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोपी, स्त्री, (गोपस्य स्त्री । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीष्) गोपपत्नी । वृन्दावनस्थगोपीनां स्वरूपं यथा,—

"गोप्यस्तु श्रुतयो ज्ञेयाः खाधिजा गोपकन्यकाः । देवकन्याश्च राजेन्द्र ! न मानुष्यः कथञ्चन ॥"

तत्र व्रजबाला यथा,—

पूर्णैरसा रसमन्थरा रसालया रससुन्दरी रसपीयूषधामा रसतरङ्गिणी रसकल्लोलिनी रसवापिका अनङ्गमञ्जरी अनङ्गमानिनी मदयन्ती रङ्गविह्वला ललिता ललितयौवना अनङ्गकुसुमा मदनमञ्जरी कलावती रतिकला कलकण्ठी अलाक्षा रतोत्सुका रतिसर्व्वस्वा रतिचिन्तामणिः इत्याद्याः ॥ * ॥

श्रुतिगणा यथा,—

उद्गीता रसगीता कलगीता कलस्वरा कलकण्ठिता विपञ्ची कलपदा बहुमता बहुकर्म्मसुनिष्ठा बहुहरिः बहुशाखा विशाखा सुप्रयोगतमा विप्रयोगा बहुप्रयोगा बहुकला कलावती क्रियावती इत्याद्याः ॥ * ॥

मुनिगणा यथा,—

उग्रतपाः सुतपाः प्रियव्रता सुरता सुरेखा सुपर्व्वा बहुप्रदा रत्नरेखा मणिग्रीवा अपर्णा सुपर्णा मत्ता सुलक्षणा सुदती गुणवती सौकालिनी सुलोचना सुमनाः सुभद्रा सुशीला सुरभिः सुखदायिका इत्याद्याः ॥ * ॥

गोपबाला यथा —

चन्द्रावली चन्द्रिका काञ्चनमाला रुक्ममालावती चन्द्रानना चन्द्ररेखा चान्द्रवापी चन्द्रमालाचन्द्रप्रभा चन्द्रकला सौवर्णमाला मल्लिमालिका वर्णप्रभा शुद्धकाञ्चनसन्निभा मालती यूथी वासन्ती नवमल्लिका मल्ली नवमल्ली शेफालिका सौगन्धिका कस्तूरी पद्मिनी कुसुद्वती रसाला सुरसा मधुमञ्जरी रम्भा उर्व्वशी सुरेखा स्वर्णरेखिका वसन्ततिलका इत्याद्याः । इति पाद्मे पातालखण्डम् ॥ अस्या विवरणं ललाशब्दे द्रष्टव्यम् ॥ * ॥ (गोपायति रक्षतीति । गुप् + अच् + गौरादित्वात् ङीष् ।) शारिवा । रक्षिका । इति विश्वः ॥ (रक्षित्री यथा, रघुः । ४ । २० ।

"इक्षुच्छाया निषादिन्यस्तस्य गोप्तुर्गुणोदयम् । आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥")

प्रकृतिः । यथा, गोपायति सकलमिदं गोपायति परं पुमांसं गोपीप्रकृतिरिति क्रमदीपिका ॥

गोपीथं, क्ली, (गोपायति रक्षति भवबन्धनादिति । यद्वा गाः प्रभून् पाति रक्षतीति । गुप् अथवा गो + पा + "निष्प्रीषगोपीथावगाथाः ।" उणां । २ । ६ । इति भावे थक्प्रत्ययेन निपातनात् साधुः ।) तीर्थस्नानम् । इति सिद्धान्तकौमुद्यामरटीकायां भरतः ॥ (गावः पिबन्त्यस्यामिति व्युत्पत्त्या जलाशयादि । इति चिन्तामणिः ॥)

गोपीथः, पुं, (गुप्यते रक्षते इति । गुप् + "निष्प्रीषगोपीथावगाथाः ।" उणां । २ । ६ । इति भावे थक्प्रत्ययेन निपातनात् साधुः ।) रक्षणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । १६ । १ ।

"प्रति त्वं चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आ गहि ॥"

"गोपीथाय पृथिवीन्द्रियादीनां रक्षणाय ॥"

इति दयानन्दभाष्यम् ॥ गां वाणीं पृथिवीं वा पातीति व्युत्पत्त्या । गो + पा + थक् । निपातनात् इत्वम् । पण्डितः । राजा । इति कश्चित् ॥)

गोपुच्छः, पुं, (गोः पुच्छ इव आकृतिर्यस्य गोपुच्छाकारत्वादस्य तथात्वम् ।) हारभेदः । इति हेमचन्द्रः । ३ । ३२५ ॥ (वाद्यविशेषः । इति तट्टीका ॥) गोलाङ्गूलवानरः । यथा,—

"गार्दूलऋगसंघुष्टं सिंहैर्भीमबलैर्वृतम् । ऋक्षवानरगोपुच्छैर्मार्ज्जारैश्च निषेवितम् ॥"

इति रामायणे किष्किन्धाकाण्डम् ॥

गवां लाङ्गूलच्च ॥ (यथा, बृहत्संहितायाम् । ६५ । ३५ ।

"गोपुच्छस्थे वल्मीकगेऽथवा दर्शनं भुजङ्गस्य ॥")

गोपुटा, स्त्री, (गौर्वेत्ति तद्वदतिकठिनमिति भावः पुटं आच्छादनं यस्याः ।) स्थूलैला । इति राजनिर्घण्टः ॥

गोपुटिकं, क्ली, (गोः शिववृषभस्य पुटिकं आच्छादनयुक्तं गृहम् ।) शिववृषस्य मन्दिरम् । इति त्रिकाण्डशेषः ॥

गोपुरं, क्ली, (गोपायति नगरं रक्षतीति । गुप् + बाहुलकात् उरच् । यद्वा गाः पिपर्त्तीति । पॄ पालनपूरणयोः + "मूलविभुजादिभ्य उपसंख्यानम् ।" इति कः ।) नगरद्वारम् । सहरेर फटक् इति भाषा ॥ तत्पर्य्यायः । पुरद्वारम् २ । इत्यमरः । २ । ३ । १६ ॥ दुर्गपुरद्वारम् । इत्यजयः ॥ द्वारमात्रम् । इति भरतः ॥ (यथा, महाभारते । १ । २०८ । ३१ ।

"द्विपत्तगरुड़प्रख्यैर्द्वारैः सौधैश्च शोभितम् । गुप्तमभ्रचयप्रख्यैर्गोपुरैश्चन्द्ररोपमैः ॥" * ॥

गौर्वेत्ति पूरयति अस्य यद्वा गवा जलेन पिपर्त्ति पूरयति आत्मानमिति । पॄ + कः ।) कैवर्त्तीसुस्तकम् । इति मेदिनी । रे । १५० ॥ (वैद्यकग्रन्थप्रणेता ऋषिभेदः । यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "अथ खलु भगवन्तममरवरवन्द्यमृषिगणपरिवृतं आश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतं करवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः ॥")

गोपुरकः, पुं, (गां भूमिं पिपर्त्तीति । पॄ पूर्त्तौ + "मूलविभुजादिभ्य उपसंख्यानम् ।" इति कः ॥ ततः संज्ञायां कन् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥

गोपुरीषं, क्ली, (गोः पुरीषम् विष्ठा ।) गोमयम् । इति राजनिर्घण्टः ॥

गोपेन्द्रः, पुं, (गोपेषु गोकुलस्थगोपालेषु मध्ये इन्द्रः श्रेष्ठः । गोप इन्द्र इव वा । यद्वा गां वाचं याति रक्षतीति गोपो वेदस्तत्र इन्द्रति सर्व्वैश्वर्य्यवत्तया विराजते । इदि परमैश्वर्ये + "ऋजेन्द्रेति ।" उणां । २ । २८ । इति रनुप्रत्ययेन निपातनात् साधुः ।) विष्णुः । इति हेमचन्द्रः । २ । १३२ ॥ (श्रीकृष्णः । इति भागवतम् । गोपानामिन्द्र ईश्वरः । गोपपतिः । स तु नन्दः । यथा, महाभारते । ६ । २२ । २३ ।

"गोपेन्द्रस्यात्मजे ज्येष्ठे नन्दगोपकुलोद्भवे ॥")

गोपेशः, पुं, (गां पृथिवीं पान्ति रक्षन्तीति गोपा राजानस्तेषामीशः सर्व्वहिंसानिवारणादिति भावः । प्राप्तराज्योऽपि अयं विषयभोगं तुच्छीकृत्य सख्यासेन निर्व्वाणमलभतातोऽस्य राजसु श्रेष्ठत्वमायातमिति तात्पर्य्यार्थः ।) श्राद्धमुनिः । इति त्रिकाण्डशेषः ॥ (गोपानां गोकुलस्थ-

गोपालानामीशः।) नन्दघोषः। यथा,—
"रामकृष्णाद्भयतो गोपेशं परितः परे॥"
इति मुग्धबोधम्॥
श्रीकृष्णश्च॥

गोप्ता, [तृ] त्रि, (गोपायति रक्षतीति। गुपू + रक्षणे + "ग्वुल्तृचौ।" ३।१। १३३। इति तृच्।) रक्षकः। यथा,
"विप्राणामभयार्थमध्वरविधेर्गोप्ता गुरो-
राज्ञया।"
इति राघवपाण्डवीये कविराजः॥
(तथा च मनुः। ११। ७६।
"ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्।
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च॥"
गोपायति सर्व्वाणि यद्वा आत्मानं गोपायति स्वमायया संवृणोतीति युतृपत्या विष्णौ पुं। यथा, महाभारते। १३। १४६। ७६।
"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥"
स्त्री, गङ्गा। यथा, काशीखण्डे। २६। ५१।
"गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी॥")

गोप्यः, पुं, (गोप्यते रक्ष्यतेऽसौ इति। गुपू रक्षणे + "ऋहलोर्ण्यत्।" ३।१। १२४। इति ण्यत्।) दासः। इत्यमरटीकायां भरतः॥ दासीपुत्रः। रक्षणीये त्रि। इति मेदिनी। ये। २०॥ (यथा, महाभारते। १२। ४१। १५।
"सहदेवं समीपस्थं नित्यमेव समादिशत्।
तेन गोप्यो हि नृपतिः सर्व्वावस्थो विशाम्पते!॥"
गोप्यतेऽसाविति। गुपू + कर्म्मणि ण्यत्।) गोपनीयः। यथा,—
"आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्।
अपमानमपो दानं नव गोप्यानि यत्नतः॥"
इति पुराणम्॥
गोपीसम्बोधने॥ (तत्र गोपीशब्दात् प्रथमाविभक्तेर्बहुवचनप्रयोगः॥)

गोप्यकः, पुं, (गोप्य एव। स्वार्थे कन्।) दासः। इत्यमरः। २। १०। १७॥

गोप्याधिः, पुं, (गोप्यो रक्षणीय आधिर्बन्धकः।) बन्धकविशेषः। (यथा, याज्ञवल्क्ये। २। ६०।
"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ तापिते॥")
"तथा च नारदः।
अधिक्रियत इत्याधिः स द्विज्ञेयो द्विलक्षणः।
क्षतकालोपनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।
गोप्यो रक्षणीयः।" इति मिताक्षरा॥

गोप्रकाण्डं, क्ली, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २। १। ६६। इति परनिपातः। प्रकाण्डशब्दस्य नियतलिङ्गतया क्लीवत्वम्।) श्रेष्ठगौः॥ इति सिद्धान्तकौमुदी॥

गोभण्डीरः, पुं, (गवि जले भण्डीरः अतिवाचालः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥

गोम, न् क लेपने। इति कविकल्पद्रुमः॥ (अदन्त-परां-परं-सकं-सेट्।) अनुगोमन्नोमयेन स्थानं चेष्टी। इति दुर्गादासः॥

गोमक्षिका, स्त्री, (गोसन्निकटस्था गोप्रिया वा मक्षिका।) दंशः। इति शब्दरत्नावली॥ डांश इति भाषा॥

गोमत्प्रिका, स्त्री, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २। १। ६६। इति नित्यसमासेन परनिपातः।) सुशीला गौः। इति हलायुधः॥

गोमती, स्त्री, (बहवो गावो जलानि सन्त्यस्यामिति। भूम्नि "तदस्यास्तीति।" ५। २। ६४। मतुप्। "उगितश्च।" ४। १। ६। इति ङीप्।) खनामख्याता नदी। तत्पर्य्यायः। वाशिष्ठी २। इति हेमचन्द्रः॥ (यथा, महाभारते। ६।८।१७।
"गोमतीं धूतपापाञ्च चन्दनाञ्च महानदीम्॥"
अस्यास्तीरे महादेवस्त्र्यम्बकमुत्तमं विदुः। यतते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे।
"त्र्यम्बको गोमतीतीरे गोकर्णे च त्रिलोचनः॥"
गङ्गा। यथा, काशीखण्डे। २६। ५१।
"गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी॥"
पीठस्थानस्था भगवती। सा तु गोमन्तपर्व्वते वर्त्तते। यथा, देवीभागवते। ७। ३०। ५७।
"गोमन्ते गोमती देवी मन्दरे कामचारिणी॥"
वैदिकमन्त्रभेदः। यथा,—
"पञ्चगवेन गोघाती मासेकेन विशुध्यति।
गोमतीञ्च जपेद् विद्यां गवां गोष्ठे च संवसेत्॥"
इति प्रायश्चित्ततत्त्वे शातातपः॥
(गोविशिष्टायाम्॥)

गोमन्तः, पुं, पर्व्वतविशेषः। इति जटाधरः॥ (अयं हि सह्यपर्व्वतविवरस्थितो गिरिः यदुक्तं हरिवंशे। ६५। ६३।
"ततश्चुता गमिष्यामः सह्यस्य विवरे गिरिम्।
गोमन्त इति विख्यातं नैकशृङ्गविभूषितम्॥"
अत्र पर्व्वते भगवती गोमतीरूपेण विराजते। यदुक्तं देवीभागवते। ७। ३०। ५७।
"गोमन्ते गोमती देवी मन्दरे कामचारिणी॥"
अयं हि द्वितीयमेरुरिव महान् पर्व्वतः। अस्य वर्णनं यथा, हरिवंशे। ६६। ४—२७।
"ते चाध्वविधिना सर्व्वे ततो वै दिवसक्रमात्।
गोमन्तमचलं प्राप्ता मन्दरं त्रिदशा इव॥
लताचारुविचित्रञ्च नानाद्रुमविभूषितम्।
गन्धागुरुपिनद्धाङ्गं चित्रं चित्रैर्मनोरमैः॥
द्विरेफगणसङ्कीर्णं शिलासङ्कटपादपम्।
मत्तवर्हिणनिर्घोषनादितं मेघनादिभिः॥
गगनालग्नशिखरं जलदासक्तपादपम्।
मत्तद्विपविषाणाग्रपरिघट्टोपलाङ्कितम्॥
कूजद्विहगसङ्घुष्टं समन्तात् प्रतिनादितम्।
दरीप्रपाताम्बुरवैश्च प्राद्रुलपल्लवैः॥
नीलाश्मचयसङ्काशैर्बहुवर्णं यथा घनम्।
धातुविस्रावदिग्धाङ्गं सानुप्रस्रवभूषितम्॥
कौञ्चं सुरगणैः कान्तैर्मैनाकमिव कामगम्।
उच्छ्रितं सुविशालाग्रं सम्मूलाम्बुपरिस्रवम्॥
सकाननदरीप्रस्थं श्वेताभ्रगणभूषितम्।
प्रनष्टसान्द्रतोयौघैर्व्वेत्रस्कन्दनचन्दनैः॥
तमालेलावनयुतं मरिच्चुप्रसङ्कुलम्।
पिप्पलीवल्लिकलिलं चित्रमिङ्गुदपादपैः॥
द्रुमैः सर्व्वरसानाञ्च सर्व्वतः प्रतिशोभितम्।
प्रांशुशालवनैर्गुप्तं बहुचित्रवनैर्युतम्॥
सर्ज्जनिम्बार्জ্জুनवनं पाटलीकुलसङ्कुलम्।
छिन्नालेञ्च तमालेञ्च पुन्नागैश्चोपशोभितम्॥
जलेषु जलजैश्छन्नं स्थलेषु स्थलजैरपि।
पङ्कजैरुद्गमयुक्तैश्च सर्व्वतः प्रतिभूषितम्॥
जम्बूजम्बूलवृक्षाढ्यं कन्दकन्दलभूषितम्।
चम्पकाशोकबकुलं विल्वतिन्दुकशोभितम्॥
कुटजैर्नागपुष्पैश्च समन्ताद्रुपशोभितम्।
नागयूथसमाकीर्णं ऋक्षसङ्घातशोभितम्॥
सिद्धचारणरक्षोभिः सेवितप्रस्तरान्तरम्।
विद्याधरगणैर्नित्यमनुकीर्णशिलातलम्।
सिंहशार्দ্দूलसन्नादैः सततं प्रतिनादितम्।
सेवितं वारिधाराभिश्चन्द्रपादैश्च शोभितम्॥
स्रुतं त्रिदशगन्धर्व्वैरप्सरोभिरलङ्कृतम्।
वनस्पतीनां दिव्यानां पुष्पैरुच्चावचैश्चितम्॥
शुक्लवज्रप्रहाराणामनभिघ्नं कदाचन।
दावाग्निभयनिर्मुक्तं महावातभयोज्झितम्॥
प्रपातप्रभवाभिश्च सरिद्भिरुपशोभितम्।
जलशीकरशुक्लाग्रैरुन्निषन्तमिव श्रिया॥
स्थलीभिर्दन्तशुष्काभिः कान्ताभिरुपशोभितम्।
पार्श्वैरुपलकन्याभिर्मेघैरिव विभूषितम्॥
पादपोच्छ्रितसौम्याभिः सपुष्पाभिः समन्ततः।
मण्डितं वनराजीभिः प्रमदाभिः पतिं यथा॥
सुन्दरीभिर्दरीभिश्च कन्दरीभिस्तथैव च।
तेषु तेष्ववकाशेषु सदारमिव शोभितम्॥
ओषधीदीप्तशिखरं वानप्रस्थनिषेवितम्।
जातरूपैर्वनोद्देशैः शुचिभिरिव भूषितम्॥
मूलेन सुविशालेन शिरसात्युच्छ्रितेन च।
पृथिवीमन्तरीक्षञ्च गाहयन्तमिव स्थितम्॥"
श्रीकृष्णो बलरामेण सह जरासन्धभयात् अत्र पर्व्वते पलायमानः स्थितः। ततो मदमत्तैर्बहुसंख्यकराजभिरतिगर्व्वितो जरासन्धः कृष्णेन सार्द्धं युयुत्सुरत्रागत्यैमं गोमन्तपर्व्वतं द्रष्टुं प्रवृत्तः एतत्कथा हरिवंशे ८८ अध्याये विस्तरशो द्रष्टव्या॥*॥) गवां स्वामिसम्बोधने॥ (तत्र गोमच्छब्दे प्रथमाविभक्तेर्बहुवचनप्रयोगः॥)

गोमयं, क्ली पुं, (गोः पुरीषम्। "गोश्च पुरीषे।" ४। ३। १३५। इति मयट्।) गवां गूथम्। गोवर इति भाषा॥ तत्पर्य्यायः। गोविट् २ इत्यमरः। २। ६। ५०॥ जगलम् ३ गोशकृत् ४ गोशकृत् ५। इति रत्नमाला॥ गोपुरीषम् ६ गोविष्ठा ७ गोमलम् ८। इति राजनिर्घण्टः॥
तस्य माहात्म्यं यथा,—
"शतं वर्षसहस्राणां तपस्तप्तं सुदुष्करम्।
गोभिः पूर्व्वविसृष्टाभिर्गव्यैक्यं श्रेष्ठतामिति॥
असत्पुरीषस्नानेन जनः पूयेत सर्व्वदा।
शुद्धता च पवित्रार्थं कुर्व्वीरन् देवमानुषाः॥
ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः।
एवं भवत्विति विभुर्लोकांस्तारयतेति च॥"*॥

तत्र लक्ष्म्या वासो यथा, लक्ष्मीं प्रति गवां वाक्यम्।
"अवश्यं मानना कार्या तवास्माभिर्यशस्विनि!।
शृङ्गमूले निवस त्वं पुण्यमेतद्धि नः शुभे!॥"
श्रीरुवाच।
"दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः।
एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदाः॥"
इति महाभारते दानधर्म्मः॥
(कृच्छ्रसान्तपने अस्य भक्षणविधिर्यथा, मनुः। ११। २१२।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥"
"अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः।
रोगार्त्तायाः प्रसूतायाः न गोर्गोमयमाहरेत्॥"
इति चिन्तामणिधृतस्मृतिवचनम्॥
गां सर्व्वतीर्थमयीं परिकल्प्य एतस्या गोमयं यमुनानदीतयां परिकल्पयन्ति वृद्धाः। यदुक्तम्,—
"गोमयं यमुना साक्षात् गोमूत्रं नर्म्मदा शुभा।
गङ्गा क्षीरन्तु यासां वै किं पवित्रमतःपरम्॥"*॥)
गवात्मके क्ली॥

गोमयकृच्छ्रं, क्ली, (गोमयात् जातं कृच्छ्रं कृच्छ्राकारं श्लिलीन्ध्रमित्यर्थः।) करकम्। इति चिकाण्डशेषः॥ कोँड़कछाता इति भाषा॥

गोमयकृच्छ्रिका, स्त्री, (गोमये गोमयप्रचुरे स्थाने जाता कृच्छ्रिका श्लिलीन्ध्रमित्यर्थः।) गोमयकृच्छ्रम्। तत्पर्य्यायः। दिलीरम् २ श्लिलीन्ध्रकम् ३। इति हारावली॥ उच्छिलीन्ध्रम् ४। यथा, "उच्छिलीन्ध्रमिवार्भकाः॥" इति श्रीभागवतम्॥

गोमयप्रियं, क्ली, (गोमयं प्रियं उत्पत्तिकारणत्वेन यस्य।) भूतृणम्। इति रत्नमाला॥ गन्धखड़ इति भाषा॥

गोमयोत्था, स्त्री, (गोमयादुत्तिष्ठतीति। उत्+स्था+"आतोऽनुपसर्गे कः।" ३। १। ३। इति कः। ततः स्त्रियां टाप्।) गोमयजातकीटविशेषः। तत्पर्य्यायः। गर्दभी २। इति हेमचन्द्रः। ४। २७४॥

गोमयोद्भवः, पुं, (उद्भवत्यस्मादिति उद्भवः गोमय उद्भवः कारणं यस्य। यद्वा गोमयादुद्भव उत्पत्तिर्यस्य।) व्रारगुबधः। इति शब्दचन्द्रिका॥ शोनालु इति भाषा॥

गोमांसं, क्ली, (गवां मांसम्।) गवां पिशितम्। तद्भक्षणप्रायश्चित्तं यथा। "सुमन्तुः। गोमांसभक्षणे प्राजापत्यचरेत्। इदमज्ञानतः सकृद्भक्षणविषयम्। यथाह पराशरः।
अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्धौ चान्द्रायणं कुर्य्यात्तदौ गत्वा यमुनागाम्॥
चान्द्रायणे ततश्चार्द्धं कुर्य्यादुद्वाह्यभोजनम्।
अनड्वुत्सहितां गाञ्च दद्यादृत्विग्भ्य दक्षिणाम्॥
इदं ज्ञानतोऽभ्यासे। शुद्धः।
गामश्वं कुञ्जरोष्ट्रौ च सर्व्वं पञ्चनखं तथा।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् संवत्सरं व्रतम्॥
एतच्चिरकालाभ्यासे। संवत्सरकृच्छ्रव्रते पञ्चदशधेनवः। पुनरुपनयनञ्च। यथा, विष्णुः। विड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्व्वेष्वेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात्।" इति प्रायश्चित्तविवेकः॥ (अस्य गुणा यथा,—
"गव्यं केवलवातेषु पीनसे विषमज्वरे।
शुष्ककासश्रमात्यग्निमांसक्षयहितञ्च यत्॥"
इति चरके सूत्रस्थाने २७ अध्याये॥
"श्वासकासप्रतिश्यायविषमज्वरनाशनम्।
श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
अन्यत् गोशब्दे (गौः इत्यत्र द्रष्टव्यम्॥*॥
हठयोगमतेनास्य पारिभाषिकोऽर्थो यथा, हठयोगप्रदीपिकायाम्। १। ४७—४८।
"गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम्।
कुलीनं तमहं मन्ये इतरे कुलघातकाः॥
गोशब्देनोच्यते जिह्वा तत्प्रवेशो हि तालुनि।
गोमांसभक्षणं तत्तु महापातकनाशनम्॥")
गोमान्, [न्] त्रि, (बहवो गावोऽस्यास्मिन् वा सन्तीति। "तदस्यास्तीति।" ५। २। ९४। मतुप्।) बहूनां गवां स्वामी। तत्पर्य्यायः। गवीश्वरः २ गोमी ३। इत्यमरः। २। ९। ५८॥ (यथा, अथर्ब्ववेदे। ६। ६८। ३।
"येनावपत् सविता क्षुरेण
सोमस्य राज्ञो वरुणस्य विद्वान्।
तेन ब्रह्मणो वपते एनस्य
गोमानश्वावानयमस्तु प्रजावान्॥")
गोमायुः, पुं, (गां विन्दतां वाचं मिनोतीति। कुमि च+णवापेलुक्।) शृगालः। इत्यमरः। २। ५। ५॥ (यथा, महाभारते। २। ६७। २३।
"ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरद्विप्रोच्चैः॥"
अस्य ध्वनौ शुभाशुभत्वं शृगालशब्दे द्रष्टव्यम्॥) गन्धर्व्वविशेषः। इति जटाधरः॥
गोपित्ते सान्तकृच्छ्रोक्तोऽयम्॥

गोमी, [न्] त्रि, (गौरस्यास्य। "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विनि।" ५। २। ११४। इति मिनिः।) गोमान्+इत्यमरः। २। ९। ५८॥ (यथा, मनुः। ९। ५०।
"यद्यप्यर्थाद्दु एषभो वत्सानां जनयेच्छतम्।
गोमिनामेव ते वत्सा नोक्षां स्कन्दितमार्षभम्॥"
गौर्वीजमस्त्रवार्थं अस्यास्तीति।) उपासकः। इति मेदिनी। ने। ६०॥

गोमी, [न्] पुं, (गौः कठोरध्वनिरस्यास्येति। "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति मिनिः।) शृगालः। इति मेदिनी। ने। ६०॥ बुद्धभिक्षुशिष्यः। इति चिकाण्डशेषः॥

गोमीनः, पुं, (गौरिव स्थूलो मीनः।) मत्स्यविशेषः। यथा, मत्स्यसूक्ते।
"शृणु देवि! प्रवक्ष्यामि मांसभेदान् निबोध मे।
न दद्यात् तिलकमठं पशुश्वङ्गिमेव च॥
गोमीनं चक्रशूकुलं वड़ालं राघवन्नथा॥"

गोसुखं, क्ली, (गोर्मुखमिव सुखं प्रवेशद्वारमस्य।) कुटिलागारम्। (गोर्मुखमिव आकृतिरस्य।) वाद्यभाण्डम्। (एतदर्थे पुंलिङ्गोऽपि दृश्यते। यथा, गीतायाम्। १। १३।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥"
तथा च महाभारते। ६। ४६। ५७।
"आड़म्बरान् गोमुखांश्च डिण्डिमांश्च महास्वनान्॥")
लेपनम्। इति मेदिनी। खे। ८॥ (यथा, माघे। ३। ४८।
"शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा यहदेहलीनाम्।
यस्यामलिन्देषु न चक्रुरेव
सुप्ताङ्गना गोमयगोसुखानि॥")
चौरक्रियमाणसुरङ्गाभेदः। सिंधविशेष इति भाषा॥ इति चिकाण्डशेषः॥ (आसनविशेषः। तल्लक्षणं यथा, हठयोगप्रदीपिकायाम्। १। २०।
"सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत्।
दक्षिणेऽपि तथा सव्यं गोसुखं गोसुखाकृति॥")
जपमालागोपनार्थं वस्त्रनिर्म्मितयन्त्रं यथा,—
"चतुर्व्विंशाङ्गुलमितं षड्वस्त्रादिसमावृतम्।
निर्म्माय षडङ्गुलिसुखं ग्रीवां तत् षड्दशाङ्गुलम्॥
क्षेयं गोसुखयन्त्रञ्च सर्व्वतन्त्रेषु गोपितम्।
तन्मुखे स्थापयेन्मालां यावामध्यगतः करः॥
प्रजपेद्विधिना गुह्यं वर्णमालाधिकं प्रिये॥"
इति सुरूपमालातन्त्रम्॥
अपि च मायातन्त्रे।
"गोसुखादौ ततो मालां गोपयेन्माढ्यवारवत्॥"

गोसुखः, पुं, (गोर्मुखमिव सुखं यस्य।) नक्रः। यक्षविशेषः। इति हेमचन्द्रः। ४। ४१५॥ (मातलिपुत्रः। यथा, महाभारते। ५। १००। ८।
"बहुशो मातले! त्वञ्च तव पुत्रञ्च गोसुखः॥"
वत्सराजमन्त्रिपुत्रविशेषः। स पुनः वत्सराजसुतस्य मन्त्रिणामन्यतमः। यथा, कथासरित्सागरे। २३। ५७।
"ततो निखोदिताख्यस्य प्रतीहाराधिकारिणः।
इत्यपरसंज्ञस्य पुत्रोऽजायत गोसुखः॥")

गोसुखी, स्त्री, (गोर्मुखमिव आकृतिरस्याः। स्त्रियां ङीष्।) हिमालयाद्रिप्रपतने गोसुखाकारगुहा। इति लोकप्रसिद्धिः॥ राढ़देशस्थनदीविशेषः। गोमुख इति ख्याता॥

गोमूत्रं, क्ली, (गोर्मूत्रम्।) गोप्रस्रावः। गोमा इति भाषा॥ तत्पर्य्यायः। गोजलम् २ गोऽम्भः ३ गोनिष्यन्दः ४ गोद्रवः ५। (कृच्छ्रसान्तपने गोमूत्रभक्षणविधिर्यथा, मनुः। ११। २१९।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥")
अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्।

लघुत्वम्। कफवातत्वग्दोषनाशित्वम्। पित्तकारित्वम्। दीपनत्वम्। मेध्यत्वम्। मतिप्रदत्वञ्च। इति राजनिर्घण्टः॥ तीक्ष्णत्वम्। क्षारत्वम्। कषायत्वम्। शूलगुल्मोदरानाहकण्डूविसुखरोगकिलासवातामवस्तिरुक्कुष्ठकासश्वासशोथकामलापाण्डुतिसारमूत्ररोधव्रणमिश्रीतप्रीहवर्चोग्रहनाशित्वम्। पूरणात् कर्मशूलनाशित्वम्। सर्वमन्त्रेषु गुणाधिकत्वञ्च। इति भावप्रकाशः॥

("तीक्ष्णक्षोणं क्षारमेवं कषायं
मेध्यं हृद्यं दीपनाश्यस्निग्धञ्च।
तस्माद्गव्यं रक्तपित्तप्रभेदि
भूशूलकण्डूहरुरोगहञ्च॥
कण्डूकिलासगदशूलसुखाक्षिरोगान्
गुल्मातिसार-मरुदामय-मूत्ररोधान्।
काश्यं सकुष्ठजठरक्रिमिरोगवातं
गोमूत्रमेकमपि पीतमहो निहन्ति॥")

इति प्रथमस्थाने नवमेऽध्याये क्षारपाणौतेनोक्तम्॥
"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्नवातलम्।
लघुर्विदीपनं मेध्यं पित्तलं कफवातजित्॥
शूलगुल्मोदरानाह विरेकास्यापनादिषु।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत्॥"

इति सुश्रुते कल्पस्थाने पञ्चचत्वारिंशत्तमेऽध्याये॥ गां वर्षतीर्थवर्षीं कपिलां कृत्वा एतस्या मूत्रं नर्मदानदीतोयेन परिकल्पयन्ति दक्षाः। यदुक्तम्।
"गोमयं यमुना साक्षात् गोमूत्रं नर्मदा शुभा।
गङ्गा क्षीरेषु वासो वै किं पवित्रमतः परम्॥")

गोमूत्रिका, स्त्री, (गोमूत्रवत् वक्रसरजात्तिरस्या अस्तीति। गोमूत्र+"अत इनिठनौ।" ५।२।११५। इति ठन् टाप् च।) लतविशेषः। तामड़ु इति भाषा। तत्पर्य्यायः। रक्तपत्रा २ चेत्रजा ३ क्षुद्रभूमिजा ४। अस्या गुणाः। मधुरत्वम्। दृष्यत्वम्। गोदुग्धदायित्वञ्च। इति राजनिर्घण्टः॥ (गोमूत्रस्येव उद्भवचा गतिरस्या अस्तीति ठन्।) पित्तकाषविशेषः। यथा,—
"गतिर्वक्राचया यच्च मार्गे मूत्रस्य गोरिव।
गोमूत्रिकेति तत् प्राहुर्दुष्करक्रियावेदिनः॥"

तस्या भेदाः। पादगोमूत्रिका। अर्द्धगोमूत्रिका। सोपगोमूत्रिका। सिपरीतगोमूत्रिका। इति वरवतीकण्ठाभरणम्॥ (उदाहरणं यथा, किरातार्जुनीये। १५। १२।

"नाहरोयं नवाभोगो धरसंस्थो हि राजसः।
नाहलीयं नवाभोगो धरसंस्थो हि राजसः॥"
"वर्णानामेकरूपत्वं यद्येकाकारमर्द्धयोः
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुः॥

इति वक्रोक्तात्।

गोमूत्रीछन्दसि अर्द्धयोः क्रमेण विलिखेत्काकारविषमेण वाचने श्लोकानव्यत्तिरिवुद्धारः॥"

इति तट्टीकायां मल्लिनाथः॥)

गोमेदः, पुं, (गौरिव मेदयति क्षेदयतीति। मिद+घञ्यादयः।) गोमेदकमणिः। इति राजनिर्घण्टः॥ (यथ तु नवरत्नान्तर्गतरत्न-विशेषः। यथा,—

"रत्नं गोमेदकं पुण्यं रागो माणिक्यमेव च।
इन्द्रनीलञ्च गोमेदस्तथा वैदूर्य्यमित्यपि॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्य परीक्षागुणादिकञ्च गोमेदकशब्दे द्रष्टव्यम्॥ कक्षोलः। इति हारावली। २६१॥ द्वीपविशेषः। तन्नामनिरुक्तिर्यथा,—
"गोमेदे गोपतिर्नाम राजाभूद्गोसवोद्यतः।
याज्ञोऽभूद्ब्रह्मिकल्पानामौतथ्यानां मनोः कुले॥
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून्।
वव्रे तं गौतमः कोपादशपत् सोऽगमत् क्षयम्॥
यज्ञवाटेस्थ ता गावो दग्धाः कोपाग्निना मुनेः।
तन्मेदसा मही छन्ना गोमेदः स ततोऽभवत्॥"

इति चित्रामश्विस्तवचनानि॥

ग्रन्थहारोपस्थवर्षाचलभेदः। यथा, विष्णुपुराणे। २। ४। ६—७।
"मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्व्वताः।
सप्तैव तेषां नामानि शृणुष्व मुनिसत्तमाः॥
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः॥")

गोमेदकं, क्ली, (गोमेद+स्वार्थे कन्।) पीतमणिः। काकोलम्। पद्मकम् इति मेदिनी। के। १८६॥

गोमेदकः, पुं, (गोमेद+स्वार्थे कन्।) खनामख्यातमणिः। तत्पर्य्यायः। गोमेदः २ राहुरत्नम् ३ तमोमणिः ४ खर्भानवः ५ पिङ्गस्फटिकः ६। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातकोपविकारनाशित्वम्। दीपनत्वम्। पाचनत्वम्। धारणे पापनाशित्वञ्च। इति राजनिर्घण्टः॥ तस्य परीक्षा यथा,—
"हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः।
स्वच्छकान्तिर्गुरुः स्निग्धो वर्त्माष्टौ दीप्तिमानपि॥
बलवान् पिङ्गरो धन्यो गोमेद इति कीर्त्तितः।
चतुर्द्धा जातिभेदेषु गोमेदोऽपि प्रकाशते॥
ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते।
वैश्यो पीतो वैश्यजातिषु शूद्रास्तु नील उच्यते॥
छाया चतुर्विधा श्वेता रक्ता पीतासिता तथा॥
गुरुप्रभाढ्याः सितवर्णरूपः
स्निग्धो बृहद्वर्त्मतिमहापुराज्ञः।
स्वच्छस्तु गोमेदमणिर्धृतोऽयं
करोति लक्ष्मीं धनधान्यवृद्धिम्॥
लघुर्विरूपोऽतिखरोऽल्पमानः
खेदोपलिप्तो मलिनः खरोऽपि।
न रीतिं गोमेदमणिर्विनाशं
सम्प्राप्तभोगावलयीश्वराणाम्॥
ये दोषा हीरके प्रोक्तास्ते गोमेदमणावपि।
परीक्ष्य वर्जितः कार्य्यो धार्य्ये वा रत्नकोविदैः॥
स्फटिकेनैव कुर्व्वन्ति गोमेदप्रतिरूपिकम्॥
गुरुत्वं गोमेदमणिषु मूल्यं
हृद्यत्वतो देवगुरुमाहुरेके।
अन्ये तथा विद्रुमतुल्यमूल्यं
तथापरे चामरतुल्यमाहुः॥

चतुर्विधानामेषान्तु धारणं परिसम्मतम्॥"

इति भोजराजकृतयुक्तिकल्पतरुः॥ (कतक-गोमेदक-विषपन्थि-श्वेतबालमूल-वल्कानि सुक्तामणिश्चेति।" इति सुश्रुते कल्पस्थाने ४५ अध्याये॥)

गोमेदसन्निभः, पुं, (गोमेदस्य सन्निभस्तुल्यः।) दुग्धपाषाणः। इति राजनिर्घण्टः॥

गोमेधः, पुं, (मेधहिंसायम्+भावे घञ्। गवां मेधो हिंसा यत्र।) यज्ञविशेषः। तत्र स्त्रीगोपशुः मन्त्रेषु स्त्रीलिङ्गपाठात्। तस्य लक्षणं यज्ञशब्दे वक्ष्यते। तस्य प्रयोगः सर्व्वोऽपि छागपशुवत्। यजमानस्य स्वर्गः फलं गोत्र गोलोकप्राप्तिः। तस्य च कलौ निषेधो यथा,—
"अश्वालम्भो गवालम्भः सन्यासः पलपैतृकम्।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्॥"

इत्याश्वलायनादिकल्पसूत्रपुराणम्॥

गोरक्षः, पुं, (गां रक्षतीति। रक्ष+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) ऋषभनामौषधम्। इति हेमचन्द्रः॥ नागरङ्गः। गोरक्षकेऽपि त्रि। इति मेदिनी। के। ३६॥ (यथा, मनुः। ८। १०२। (गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान्॥" खनामख्यातो योगिविशेषः। अयं हठविद्यया प्राप्तैश्वर्य्यः सिद्धपुरुषः। यथा हठयोगप्रदीपिकायाम्। १। ५।
"श्री-आदिनाथमत्स्येन्द्रशाबरानन्दभैरवाः।
चौरङ्गीमीनगोरक्षविरूपाक्षबिलेशयाः॥"

एतद्ग्रन्थोक्तयोगप्रकरणानि गोरक्षसंहितायां वर्णनीये। तत्र आसनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधयः षट् योगाङ्गानि उक्तान्येवेति॥ शिवोपासकानां 'कच्च षट्' इत्याख्ययोगिनां गुरुर्गोरक्षनाथ एव धर्म्मप्रयोजकः। अमी श्रेष्ठयोगिनः एनं शिवावतारं गुरुं मन्यमानास्तत्प्रवर्त्तितहठयोगमभ्यस्यन्ति। गोरक्षनाथो आदिनाथस्य शैवस्य मच्छेन्द्रनाथस्य पुत्र आसीदिति तच्छिष्यैर्गोरक्षार्य्या भण्यते॥)

गोरक्षकर्कटी, स्त्री, (गोरक्षा गोरक्षाकर्त्री कर्कटी।) चिर्भिटा। इति भावप्रकाशः॥

गोरक्षजम्बूः, स्त्री, (गोरक्षा जम्बूः।) गोधूमः। गोरक्षतण्डुला। इति विश्वः॥ घोण्टाफलः। इति जटाधरः॥

गोरक्षतण्डुला, स्त्री, (गोरक्षा तण्डुला।) क्षुद्रलताविशेषः। गोरक्षचाउलिया इति भाषा। तत्पर्य्यायः। गाङ्गेरुकी २ नागबला ३ ऋषभा ४ खड्गवेषुका ५ खरवल्लरिका ६ विश्वदेवा ७। इति रत्नमाला॥

गोरक्षतुण्डी, स्त्री, (गां जलं रक्षतीति अम्। गोरक्षः कुम्भः। तद्वत् कुम्भाकारा तुण्डी। गोरक्षेति नामिका तुण्डी वा।) कुम्भातुण्डी। इति राजनिर्घण्टः॥

गोरक्षदुग्धा, स्त्री, (गोरक्षं गोपालकं दुग्धं रक्षी यस्याः।) क्षुद्रक्षुपविशेषः। तत्पर्य्यायः।

गोरक्षी २ ताम्रदुग्धा ३ रसायनी ४ बहुपत्री५ अन्नदा ६ जीवा ७ अन्नतसञ्जीवनी ८। अस्या गुणाः। मधुरत्वम्। दृष्यत्वम्। संग्राहित्वम्। हिमत्वम्। सर्व्ववश्यकारित्वम्। रसस्निग्धगुणप्रदत्वञ्च। इति राजनिर्घण्टः॥

गोरक्षी, स्त्री, (गां रक्षति पालयति इति। "कर्म्मण्यण्।" ३। २। १। इति अण्। ततो ङीप्।) क्षुद्रक्षुपविशेषः। सा तु मालवे प्रसिद्धा। तत्पर्य्यायः। सर्पदण्डी २ दीर्घदण्डी ३ सुदण्डिका४ चित्रला ५ गन्धबहुला ६ गोपाली ७ पक्षपर्णिका ८। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहपित्तविस्फोटवान्तितीसारज्वरदोषनाशित्वञ्च। गोरक्षदुग्धा। कुम्भतुल्सी। इति राजनिर्घण्टः॥

गोरङ्गुः, पुं, (गत्रा वाचा रङ्गुमृगविशेष इव।) पक्षिभेदः। लमकः। वन्दी। इति मेदिनी। के। ८५॥ क्वचित् पुस्तके लमकस्थाने नमकोऽपि पाठः॥

गोरटः, पुं, (गवि इन्द्रिये रटतीति। रट्+अच्।) दुरालभदिरः। इति राजनिर्घण्टः॥

गोरत्वं, क्ली, (गुरु+भावे ष्यञ्।) गुरुत्वम्। (गुर्य्यते गण्यते बलमनेनेति। गुरु+करणे ष्ट्रन्।) उत्तमः। इत्यमरटीका॥

गोरसः, पुं. (गवां रसः।) दुग्धम्। दधि। तक्रम्। इति हेमचन्द्रः। ३। ७२॥ (यथा, गोः रामायणे। ३। २२। ७।

"ग्रामक्षेमा जनपदाः सस्यनवगोरसाः।
विचरन्ति महीपाला यात्रार्थे विजिगीषवः॥"
"विवदा गुरवो रूक्षा याहिशस्तक्रपिण्डकाः।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

गोरसजं, क्ली,(गोरसात् जायते इति। गोरस+जन्+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) तक्रम्। इति राजनिर्घण्टः॥

गोराटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति। रट्+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ततो ङीप्।) प्रारिकापर्णी। इति हेमचन्द्रः। ४। ४०२॥

गोराटिका, स्त्री, (गोराटी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च। ततो निपातनात् साधुः। गोराटिका इत्यपि दृश्यते।) प्रारिकापर्णी। इति राजनिर्घण्टः॥

गोरिका, स्त्री, (गोराटिका+पृषोदरात् साधुः।) प्रारिकापर्णी। इति राजनिर्घण्टः॥

गोरुतं, क्ली, (गो रुतं रवः श्रूयते यावता पथेति शेषः। गोशब्दः श्रुतिगोचरत्वेन अस्यस्य इत्यच् इत्यके वस्तुतस्तु पारिभाषिकोऽयं शब्दः।) क्रोशद्वयम्। इति हेमचन्द्रः। ३। ५५१॥

(गवां रुतं रवः इति ततपुरुषसमासे तु गवां शब्दमात्रे। तच्च कालादिभेदेन स्वामिनरपतिप्रभृतीनां शुभाशुभकरं स्यात्। यथा, वृहत्संहितायाम्। ८२। १—३।

"गावो दीप्ताः प्रार्थिवस्याग्नियाय
प्रादैर्भूमिं कुट्टयन्त्यश्च रोगान्।
रुदन्तं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पशुर्भीताश्चस्करानायवन्त्यः॥
अकारस्थे क्रोशति वैदनार्त्तो
भयाय राज्ञो रुषभः शिवाय।
भृशं निरुद्धा यदि मक्षिकाभिः
स्तब्धा दृष्टिं सरमालम्बेर्वा॥
आगच्छन्त्यो वेश्म वभारवेण
संसेवन्त्यो गोष्ठमुद्वे गवां गाः।
आर्द्राङ्गो वा कुररोमण्यः प्रकुष्टा
धन्या गावः स्युर्मह्यिष्योऽपि चैवम्॥")

गोरोचं, क्ली, (गोभिः तेजोभिरुच्यते दीप्यते इति। रुच्+अप्। गा इन्द्रियाणि इन्द्रियोपलक्षितानि शरीरादीनि रोचयति दीपयति औषधादियोगेनेत्यर्थः रुच्+क्विप्+अच्।) हरितालम्। इति राजनिर्घण्टः॥

गोरोचना, स्त्री, (गौर्जाता रोचना हरिद्रा इव।) स्वनामख्यातपीतवर्णद्रव्यम्। तत्तु गोमस्तकस्थशुष्कपित्तम्। यथा, माधवकरे।

विधोर्वयेद्वक्षिगतं सशुक्रं
मूत्रं सपित्तं पवनः कर्षं वा।
यदा तदाश्मर्य्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः॥"

तत्पर्य्यायः। रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गया १५ चन्दनीया१६ काञ्चनी१७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१। इति राजनिर्घण्टः॥ वन्द्या २२ रोचना २३। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। वश्यमङ्गलकान्तिकारित्वम्। विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रनाशित्वञ्च। इति भावप्रकाशः॥ रूक्षत्वम्। पवित्रताश्रृङ्गारहितकारित्वम्। कृमिकुष्ठनाशित्वम्। भूतोपशमनत्वम्। जनमोहनत्वञ्च। इति राजनिर्घण्टः॥ (यथा, कुमारे। ७। १५।

"विल्वस्तनोन्नागुरुचक्रुरङ्गं
गोरोचनापत्रविभक्तमस्याः।"
"क्रमेण पित्तेष्विव रोचना गोः।"

इति माधवकृतरुग्विनिश्चयस्याश्मर्य्यधिकारे॥)

गोर्द्दं, क्ली, (गुर्+"अन्दादयश्च।" उणां। ४।६८। इति ददनप्रत्ययेन निपातनात् साधुः।) मस्तिष्कम्। मस्तकस्थघृतम्। इत्यमरः। २।६।९५॥ (मस्तिष्कशब्दोऽस्य विवरणं ज्ञातव्यम्॥)

गोलं, क्ली, (गुड़+भावे घञ् डस्य लत्वं च।) मण्डलम्। इति मेदिनी। ले। २५॥ (यथा, भागवते। ३। २३। ४३। [स्त्रया॥")

"प्रेक्षयित्वा सुवो गोलं पद्मेन यावान् खर्गः

गोलः, पुं, (गुड़+भावे घञ् अजित्वेके। डस्य लत्वम्।) सर्व्वतुल्यः। इति हेमचन्द्रः॥ मदनवृक्षः। इति रत्नमाला॥ जारात् विधवायाः सुतः। इति धरणी॥ (यथा, याज्ञवल्क्यः। १। २२२।

"अवकीर्णी कुण्डगोली कुनखी श्यावदन्तकः॥")

गोलः। इति जटाधरः॥ भूगोलः खगोलश्च। (यथा, भागवते। ५। २०। ४३।

"सूर्य्यास्तगोलयोर्मध्ये कोष्ठः स्यु पञ्च विंशतिः॥")

यथा, शिद्धान्तशिरोमणौ। [त्वम्॥"

"गोलं श्रोतुं यदि तव मतिर्भास्करीयं ग्रहणु
एकराशौ बहूयहयोगः। यथा. प्रश्नकौतुकाम्।
"यद्राशामेकस्मिन् यदि भवति यस्मिं निवसतिस्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते।
भवेल्लोको रक्षः परिहरति पुत्रञ्च जननी कृपार्द्रा नाग्नः स्यात् ज्वलति वसुधा शुष्यति नदी॥"

एकराशौ सप्तग्रहयोगश्च। यथा, मयूरचित्रके।

"सप्तग्रहा यदैकस्यां गोलयोगस्तदा भवेत्।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपक्षयः॥"

अपि च। [संख्याख्या,।

"एकादियोगेतैरुक्तान् योगान् विहाय गोलयुक्मूलकेदारपाशदामाख्यकीनाः स्युः॥
दुःखितदरिद्रघातुकक्षधिकरदुःशीलपशुपतिपुत्रागाम्॥
जन्मक्रमेण दुःखिनः परमार्थैः सर्व्व एवैते॥"

इति दैवज्ञिका॥

गोलकं, क्ली, (गुड़+घञ्। स्वार्थे कन् च। ह्रस्वलत्वे के।) गोलोकम्। यथा, तन्त्रे।

"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके॥"

गोलकः, पुं, (गुड़+घञ्। ततः स्वार्थे कन्। ह्रस्वलत्वं च। खुल् इत्यके।) जते भर्त्तरि जारजः। इत्यमरः॥ राड़ेर छेले इति भाषा॥ (यथा, मनुः। ३। १५६।

"भ्रूणघ्न्यो गुरुतल्पश्च वार्षुषः कुण्डगोलकौ॥")

अलिङ्गरः। गुड़ः। पिण्डः। इति हेमचन्द्रः॥ गन्धरसः। इति रत्नमाला॥ कषायः। इति शब्दचन्द्रिका॥ मठर इति ख्यातः॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः खञ्जतिव्याप्नोतीति खलति प्रलयकाले खलिन् लाति यच्छति इति वा।) दुर्गा। (गां पृथ्वीं लाति प्रलयपर्य्यं जलरूपशरीरव्यापकतया लाति।) गोदावरी। (गां वाचं लाति। ला+क्विप्।) सखी। कुनटी। पत्राञ्जनम्। मण्डलम्। अलिङ्गरः। बालक्रीड़नकाष्ठम्। इति मेदिनी। ले। २५॥

गोलाङ्गूलः, पुं, (गोर्लाङ्गूलवल्लाङ्गूलमस्य।) वानरः। (यथा, रामायणे। ६। १०५। ८।

"निरुजो निर्व्रणश्चैव सम्यग्बलमवाप्नुयात्।
गोलाङ्गूलं त्वयैवर्क्षान् द्रष्टुमिच्छामि वानर!॥"

तत्पर्य्यायः। कपिलाक्षः २ दधिग्रीवः ३ नगाटनः ४। इति त्रिकाण्डशेषः॥ लाङ्गलवानरः। इति राजनिर्घण्टः॥

गोलासः, पुं, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत्।) गोमयच्छत्रिका। शिलीन्ध्रम्। इति शब्दरत्नावली। ९५॥

गोलिहः, पुं, (गाः लेढ्येव इति। लिह + कः। गोभिर्लिह्यते इति चलर्थे क इति केचित्।) घण्टा पाटलिः। इति जटाधरः॥

गोलीढः, पुं, (गोभिर्लिह्यते स्म इति क्तः।) घण्टापाटलिः। इत्यमरः। २। ४। ३६॥

गोलोकं, क्ली, (गौर्ज्योतीरूपं ज्योतिर्मयः पुरुष इत्यर्थस्तस्य लोकः स्थानम्। अभिधानात् क्लीवत्वम्। यद्वा गोभिः किरणैः ब्रह्मज्ञानतेजोभिरित्यर्थः लोक्यते इति। लुक् + घञ्।) श्रीकृष्णस्य स्थानम्। यथा, तत्रैव।

"वैकुण्ठस्य दक्षभागे गोलोकं सर्व्वमोहनम्।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः॥
यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके।
ज्ञाने वा चक्षुषोः किंवा ध्यानयोगे न विद्यते॥
शुद्धसत्त्वमयं देवि! नानादेवेन शोभितम्।
मध्यदेशे गोलोकाख्यं श्रीविष्णोर्लोभमन्दिरम्॥
श्रीविष्णोः सत्त्वरूपस्य यत् स्थलं चित्तमोहनम्।
तस्य स्थानस्य माहात्म्यं किंमया कथ्यतेऽधुना॥
तत्रैव सततं भाति द्विभुजो मुरलीधरः।
तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम्॥
वैष्णवस्य महामोक्षो यत्रैव परमेश्वरि!।
इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितम्॥
विस्तारेण न शक्नोमि जन्मान्तरशतेन च।
वीजकोषस्य वाह्ये तु वेष्टितं तोयमण्डलम्॥
प्रमाणं सुन्दरं तोयं यथा क्षीरोदसागरम्।
घृतस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम्॥
जलाकाररूपेण सुशुभं तोयमण्डलम्।
गङ्गादिसरितः सर्व्वास्तथैव भान्ति सुन्दरि!॥
इन्द्रादिदेवताः सर्व्वा स्तूयमाना निरन्तरम्।
गन्धर्व्वयक्षनागादिकुष्माण्डा भैरवास्तथा॥
नानासुखविलासेन सदा चैकाग्रचेतसः।
विष्णुगानं प्रकुर्व्वन्ति स्तुतिभक्तिपरायणाः॥
देवा गानं प्रकुर्व्वन्ति चतुर्व्वक्त्रेण वेधसा।
मालवाद्याश्च षड्रागा षट्त्रिंशद्रागिणी तथा॥
वेदरागेण भासन्तो मूर्त्तिमन्तः सदैव हि।
मालवेनैव रागेण सामगानं सदा प्रिये॥
मल्लारेण सदाथर्व्वं वसन्तेन तथा पुनः॥
छिन्दोगेन यजुःपाठं सदा कुर्व्वन्ति चेतसा॥
कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा ग्रिवे।
निर्दिष्टपाठभेतत्तु ह्यनिर्दिष्टमतः परम्॥
तत्रैव सन्ति ते रागाः सहस्राणि च षोड़श।
मुरारेर्मुररीगानात् सर्व्वस्तालः प्रजायते॥
तेन तालेन रागेण सदा गायन्ति वेधसः।
तदागस्य विभागं हि कुर्व्वन्ति मुनयो जनाः॥
वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम्।
नानाऋतुप्रसूनेन भूषितं मुररीधरम्॥
तत्रैव राधिका देवी नानासुखविलासिनी।
वदन्ती मुररीगानं कुरु कान्त! प्रमोहनम्॥
येन शब्देन कामस्य उत्पत्तिर्जायते सदा।
तदागञ्चैव तत्तालं कुरु गानं प्रयत्नतः॥
एवमानन्दसंयुक्ता महावेश्यविलासिनी।
वामभागे सदा भाति राधिका भक्तवत्सला॥"

(एतस्य धाम्नो नित्यादिकमाहात्म्यं लक्षणादिकञ्च ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २८ अध्याये विस्तरशो विवृतं यथा,—

"नित्यं स्थूलञ्च प्रच्छन्नं गोलोकाभिधमेव च।
लक्षकोटियोजनञ्च चतुरस्रं मनोहरम्॥
रत्नेन्द्रसारनिर्म्माणैर्गोपीनामावृतं सदा।
सुदृश्यं वर्त्तुलाकारं यथैव चन्द्रमण्डलम्॥
रत्नेन्द्रसारनिर्म्माणं निराधारञ्च स्वेच्छया।
ऊर्द्धञ्च नित्यं वैकुण्ठात् पञ्चाशत्कोटियोजनम्॥
गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितम्।
कामधेनुभिराकीर्णं रासमण्डलमण्डितम्॥
वृन्दावनवनाच्छन्नं विरजावेष्टितं मुने!।
शतशृङ्गं शतशृङ्गैः सुदीप्तं दीप्तमौषधितम्॥
लक्षकोटिपरिमितै राश्रमैः सुमनोहरैः।
शतमन्दिरसंयुक्तमाश्रमं सुमनोहरम्॥
प्राकारपरिखायुक्तं पारिजातवनान्वितम्।
कौस्तुभेन्द्रेण मणिना निर्म्माणकलसोज्ज्वलैः॥
हीरासारविनिर्म्माणसोपानसंघसुन्दरैः।
मणीन्द्रसारनिर्म्माणैः कपाटदर्पणान्वितैः॥
नानाचित्रविचित्राढ्यैराश्रमञ्च सुसंस्कृतम्।
षोड़शद्वारसंयुक्तं सुदीप्तं रत्नदीपकैः॥
रत्नसिंहासने रम्ये चामूल्यरत्ननिर्म्मिते।
नानाचित्रविचित्राढ्ये वसन्तमीश्वरं वरम्॥")

गोलोकः, पुं, (लोक्यतेऽसौ इति लोकः गोभिस्तेजोभिरुपलक्षितो लोकः। ब्रह्मस्वरूपज्योतिर्म्मयलोक इत्यर्थः।) श्रीकृष्णस्य नित्यधाम। यथा, ब्रह्मवैवर्त्तपुराणे॥

"निराधारञ्च वैकुण्ठो ब्रह्माण्डानां परो वरः।
ततःपरञ्चापि गोलोकः पञ्चाशत्कोटियोजनात्॥
ऊर्द्धं निराश्रयञ्चापि रत्नसारविनिर्म्मितः।
सप्तद्वारः सप्तसारः परिखासप्तसंयुतः॥
लक्षप्राकारयुक्तश्च नद्या विरजया युतः।
वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा॥
योजनायुतमानञ्च यस्यैकं शृङ्गमुज्ज्वलम्।
शतकोटीयोजनञ्च शैल उच्छ्रित एव च॥
दैर्घ्ये तस्य शतगुणं प्रस्थे च लक्षयोजनम्।
योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः॥
अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रविम्बवत्।
पारिजातवनेनैव पुष्पितेन च वेष्टितः॥
कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च।
नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा॥
त्रिकोटिरत्नाभरणैर्गोपीलक्षैश्च रक्षितः।
रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः॥
नानाभोगसमायुक्तो मधुवापीशतैर्वृतः।
पीयूषवापीयुक्तश्च कामभोगसमन्वितः॥
गोलोकस्यसंख्यानं वर्णनं वा विशारदः।
न कोऽपि वेद विद्वान् वा वेद विद्वान् ब्रह्मेश्वरः॥"

गोलोमिका, स्त्री, (गवां लोमेव लोमानि सन्त्यस्याः इति ठन् टाप् च। यद्वा गोलोमी स्वार्थे कः पृषोदरादिः। इत्येके।) क्षुद्रक्षुपविशेषः। गोधूमा इति पाथरी इति च भाषा। तत्पर्य्यायः। गोधूमी २ गोजा ३ क्रोष्टुकपुच्छिका ४ गोसम्भवा ५ प्रस्तरिणी ६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। चिरदोषशमनत्वम्। हिमत्वम्। शूलरोगास्रदोषनाशित्वम्। ग्राहित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

गोलोमी, स्त्री, (गोर्लोमवत् लोमाकारं पत्रमस्याः।) श्वेतदूर्व्वा। (व्यवहारो यथा,—

"पुराणसर्पिर्लवणं हिङ्गु-सिद्धार्थकं वचा।
गोलोमी चाजलोमी च भूतकेशी जटा तथा॥"

इत्यादिषु इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये॥) वचा। भूतकेशः। इति मेदिनी॥ (व्यवहारोऽस्य यथा, संज्ञास्थापनगणे।

"छिङ्गुकेटर्य्यारिमेदा-वचा-चोरक-वयःस्था गोलोमी-जटिला-पलङ्कषाशोकरोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति॥" इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥) वेश्या। इति हेमचन्द्रः॥ गोलोमिका। इति राजनिर्घण्टः॥

गोवत्सादी, [न्] पुं, (गोवत्सं अत्ति भक्षयति। अद् + णिनिः।) वृकः। इति राजनिर्घण्टः॥

गोवधः, पुं, (गोर्वधो हननम्।) गोहत्या। सा च उपपातकविशेषः। यथा, मनुः ११ अः।

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयः॥"

तत्प्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम्॥

गोवन्दनी, स्त्री, (गवि पृथिव्यां वन्द्यते प्रशस्यते इति कर्म्मणि ल्युट् ततो ङीप्।) प्रियङ्गुवृक्षः। इत्यमरः॥ पीतदण्डोत्पलः। इति रत्नमाला॥ (प्रियङ्गु पीतदण्डोत्पलयोरस्या विशेषो ज्ञातव्यः॥)

गोवरं, क्ली, (गोभ्यो निःसृतत्वाद् वरं श्रेष्ठं माननीयमित्यर्थः। गोषु ब्रियते। वृ + बाहुलकात् अः इत्येके।) गोखुरचूर्णसगोष्ठस्थशुष्कगोमयचूर्णम्। यथा,—

"गोष्ठान्तर्गोखुरचूर्णं शुष्कं गोमयचूर्णितम्।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने॥"

इति भावप्रकाशः॥

गोवर्द्धनः, पुं, (गाः वर्द्धयन्ति कोमलतृणपत्रादिदानेन इति। वृध् + णिच् + ल्युः। यद्वा गावो वर्द्धन्तेऽत्र इति। णिच् + ल्युट् अधिकरणे। पर्व्वतबोधकत्वात् पुंस्त्वम्। यद्वा गां पृथ्वीं भूमिं वा वर्द्धयति। वृध् + णिच् कर्त्तरि ल्युः। स्वनामख्यातश्रीवृन्दावनस्थपर्व्वतः। इति जटाधरः॥ तस्य स्वरूपं यथा,—

"अनादिर्हरिदासोऽयं भूधरो नात्र संशयः।"

इति पाद्मे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम्॥ तस्य पूजाकालादिर्यथा,—

"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत्।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः।
शुक्लप्रतिपदि प्रातः कार्त्तिके चार्य्यो वैष्णवैः॥"

"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्।"

इति क्वचित् पाठः

तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव श्रेयम्। तत्र दिन निर्णयः। तदाह देवलः।

"प्रतिपद्दर्शसंयोगे क्रीड़नन्तु गवां सतम्।
परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः॥"
निर्णयान्ततधृतं पुराणान्तरवचनम्।
"या कुहूः प्रतिपल्लिप्ता तत्र गाः पूजयेन्नृप!।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपतेः॥"
ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वोक्ततात्पर्य्यकम्। द्वितीयासमये तु सर्व्वथा निषिद्धम्। तद्यथा,—
"नन्दायां दर्शने रक्षा बलिदानदृशासु च।
भद्रायां गोकुलक्रीड़ा देशनाशाय जायते॥"
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयासंयोग एव निषिध्यते।
"गवां क्रीड़ादिने यत्र रात्रौ दृश्यते चन्द्रमाः।
सोमो राजा पशून् हन्ति सुरभी पूजकांस्तथा॥"
तदुदयसम्भावनया निर्णयान्ते निर्णीतम्। प्रतिपदापराह्णिकत्रिमुहूर्त्तव्याप्त्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते। तदुक्तमाराधनविषये बृहन्नारदीये।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपदापराह्णिकी।
अमावाधानचतुर्दश्यां परतः सोमदर्शनादिति॥"
अपराह्णश्च पञ्चधा विभक्तस्याह्नश्चतुर्थोभागः। ततश्च यत्र प्रतिपदि यन्मुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति। अन्यदा तूत्तरैव प्रतिपत्तत्र ग्रहीता। तदेव पुराणसमुच्चये।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते॥"
किञ्च। यदा पूर्णप्रतिपत् परत्र निष्क्रामति तदाप्युत्तरैव कार्य्या। यथोक्तं भविष्योत्तरे।
"यथा द्वादशभिर्मासैर्मासो दृष्टो मलिम्लुचः।
तथैवाहोरात्रिदृष्ट्या तिथिः प्रोक्तो मलिम्लुचः॥
यथा मलिम्लुचः पूर्व्वो मासो देवस्तथा परः।
आह्या तिथिस्तथा पूर्व्वा आह्या चैव तथोत्तरेति निर्णयान्ततमतम्॥ किन्तु। अङ्गलीन्यायेन पूर्व्वैव ग्राह्यं ग्रन्थते। तद्दत्रापि देवलादिवचनप्रामाण्यमस्तीति॥ *॥
अथ गोवर्द्धनपूजाविधिः। पाद्मे तत्रैव।
"मथुरायाञ्चयाग्यत्र स्नात्वा गोवर्द्धनं गिरिम्।
गोमयेन महास्थूलं तत्र पूज्यो गिरिर्यथा॥
मथुरायां तथा यात्वा स्नात्वा चैव प्रदक्षिणम्।
वैष्णवं धाम सम्प्राप्य मोदते हरिसन्निधौ॥"
पूजामन्त्रः।
"गोवर्द्धन! धराधार! गोकुलत्राणकारकः।
विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भव॥"
गोपूजामन्त्रः। स्कान्दे तत्रैव।
"लक्ष्म्यौर्या लोकपालानां धेनुरूपेण संस्थिता।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्॥"
अथ गोक्रीड़ा। तत्रैव।
"क्रोधापयेद्धावयेच्च गोमहिष्यादिकं ततः।
इदान् वर्षापयेन्नरैरुक्तिप्रत्युक्तिवादनात्॥"
पाद्मे च तत्रैव।
"महिष्यादेस्तथा भूषा क्रीड़नं वारणन्तथा॥"
तन्माहात्म्यञ्च तत्रैव।
"एवं गोवर्द्धनं गाञ्च पूजनीया विधानतः।
गोवर्द्धनमखो रम्यः सर्व्वसन्तोषकारकः॥"
इति श्रीहरिभक्तिविलासे कार्त्तिककृत्ये १६ विलासः॥ (पुरुषोत्तमक्षेत्रे भगवता शङ्कराचार्य्येण प्रतिष्ठापितो मठविशेषः। इति शङ्करविजयः॥ आर्य्यासप्तशतीप्रभृतिग्रन्थकारः आचार्य्यविशेषः। अयमेव कविवरः वङ्गाधिपस्य लक्ष्मणसेनस्य सभापण्डित आसीत्। एतन्मतसमर्थनोदाहरणानि क्रमान्वयेन वेदितव्यानि यथा, आर्य्यासप्तशतीम्। ७०२।
"हरिचरणाञ्जलिमसलं कविवरहर्षाय बुद्धिमान् सततम्।
व्यक्तार्य्यासप्तशतीमेतां गोवर्द्धनाचार्य्यः॥"
तत्रैव टीकासुखबन्धान्यन्तरे। यथा,—
"गोवर्द्धनोक्तिसुखदानदिनमेतद्-
व्यक्तार्थदीपनमनल्पचमत्कृतीनाम्।"
"गोवर्द्धनाचार्य्यसमयस्यापि सम्यङ् न ज्ञायते परन्त्वयं गीतगोविन्दकर्त्तुर्जयदेवात् प्राचीनस्ततसमकालीनो वेति वक्तुं शक्यते। यतो जयदेवेन गीतगोविन्दप्रारम्भे 'श्रद्धारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुतः' इत्युक्तमस्ति। जयदेवकविश्च वङ्गदेशाधिपस्य वल्लालसेनस्य लक्ष्मणसेनस्य सभायामासीदिति श्रीसनातनगोस्वामिनां मतम्। 'गोवर्द्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥'
इत्ययं श्लोको लक्ष्मणसेनसभायश्रद्धारोपरि श्लिलायासुत्कीर्ण आसीत्। तस्माद् गोवर्द्धनजयदेवादयः सर्व्वेऽपि लक्ष्मणसेनसभायामासन्निति केचित्॥")
गोवर्द्धनधरः, पुं, (धरति धारयति वा। धृ+अच्। गोवर्द्धनस्य धरः।) श्रीकृष्णः। इति शब्दचन्द्रिका॥ (यथा, हरिवंशे। ७६। १।
"गते शक्रे ततः कृष्णः पूज्यमानो व्रजालये।
गोवर्द्धनधरः श्रीमान् विवेश व्रजमेव ह॥")
गोवन्ध्या, स्त्री (वन्ध्या वन्ध्या गौरिति प्रत्ययघातनात् तथात्वम्।) वन्ध्या गौः। इति कलापव्याकरणम्॥
गोविट्, [ष्ठ्] पुं, (गवां विट् विष्ठा।) गोमयम्। इत्यमरः। २। ६। ५०॥
गोविन्दः, पुं, (गां पृथ्वीं धेनुं वा विन्दतीति। विन्द+"अनुपसर्गाल्लिम्पेति।" ३। १। १३८। इत्यस्य "गवादिषु विन्देः संज्ञायाम्।" इति वार्त्तिकोक्त्या घञ्।) श्रीकृष्णः। (यथा, भगवद्गीतायाम्। १। ३२।
"किं नो राज्येन गोविन्द! किं भोगैर्जीवितेन वा॥")
एतस्य शब्दान्तरीयव्युत्पत्तिर्यथा, हरिवंशे—विष्णुपर्व्वणि। ७५। ४२—४५।
"अद्य प्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो!।
तस्मात्त्वं काञ्चने: पूर्व्वैर्दिग्यस्य पयसो घटैः॥
एभिरद्याभिषिञ्चस्व मया शक्रावमानितैः।
अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः॥
गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्॥"
गोभिर्वाणीभिर्वेदान्तवाक्यैर्विन्दते योऽसौ पुरुषः विदन्ति यं पुरुषं तत्त्वज्ञा इति वा। यथा, विष्णुतिलके।
"गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः॥"
गां वेदलक्षणां वाणीं गोभूम्यादिकं वा वेत्तीति। यथा, गोपालतापन्यां पूर्व्वविभागे ध्यानप्रकरणे। ७—८।
"तद्वै होचुः कः स्विद्यो गोविन्दश्च कोऽसाविति गोपीजनवल्लभः कः का स्वाहेति॥ तासुवाच ब्राह्मणः पापकर्षणो गोभूमिवेदविदितो विदिता गोपीजनाविद्याकलाप्रेरकस्तन्माया चेति।"
एतन्नाम्नो भारतादिमतेन व्युत्पत्तिर्यथा, महाभारते। १। २१। १२।
"गां विन्दता भगवता गोविन्देनामितौजसा।
वराहरूपिणा शान्तिर्लोकोभितजगत्त्रितम्॥"
तत्रैव। ५। ७०। १३।
"विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते।
शाश्वतत्वादनन्तत्व गोविन्दो वेदनाद्गवाम्॥"
यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्याये।
"युगेयुगे प्रवरां गां विन्दो! विन्दसि तत्त्वतः।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा॥"
विन्दतीति विन्दः पालकः स्वामी वा। विन्द+घञ्। गवां गोसम्बन्धिनां विन्दः।) गवाधीशः। (गवां ज्ञानमयीनां वाचीनां विन्दः पतिः।) वेदवेत्तेः। इति मेदिनी॥ (गौड़पादाचार्य्यशिष्यः योगिविशेषः। अयं हि परमहंसपरिव्राजकाचार्य्यस्य भगवतः शङ्करस्य गुरुः। यथा, माधवीये शङ्करदिग्विजये। ५। १०१।
"तस्योपदर्शितवतश्चरणौ गुहायां
द्वारे व्यपूजयदुपेत्य स शङ्कराख्यः।
आचार इत्युपदिदेश स तत्र तस्मै
गोविन्दपादगुरवे स गुरुर्यतीनाम्॥"
अनेन च योगिप्रवरेण गोविन्देन बौधायनधर्म्मविवरणं बौधायनधर्म्मसूत्रभाष्यञ्च प्रणीतमिति श्रूयते ततो बौद्धमतमालोच्य रससाराख्यग्रन्थोऽपि विरचित इति श्रूयते। यथा, रससारे ५म पटले।
"बौद्धानाञ्च मतं ज्ञात्वा रससारः कृतो मया॥"
पञ्चावस्थाग्निरसजातीनां गुरुभेदः। योऽसौ गुरुगोविन्द इति नाम्नोदाहृतः। गाः मनःप्रधानानीन्द्रियाणि तेषां विन्दः प्रवर्त्तयिता चेतयिता वा। अन्तर्यामी आत्मेश्वरः।) परमब्रह्म। यथा,—
"तत्र यद्यसमर्थस्त्वं ज्ञानयोगे महामते!।
क्रियायोगे दिवा रात्रौ तत्परः सततं भव॥
करोषि यानि कर्म्माणि तानि देवे जगत्पतौ।

समर्पयस्व भद्रं ते ततः कर्म्म प्रहास्यसि ।
शुभाशुभपरित्यागी चौवे निःवैषकर्म्मणि ।
लयमाप्स्यसि गोविन्दं चट्टनञ्च परमं महत् ।"
तन्नाममाहात्म्यं यथा,—
"ये तिष्ठन्तः स्वपन्तश्च गच्छन्तश्चलिते सुते ।
संकीर्त्तयन्ति गोविन्दं ते वस्त्याश्याः सुदूरतः ॥"
इति च वह्निपुराणे यमानुशासननामाध्यायः ॥
(अस्य ध्यानं यथा,—
"फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कसुदारकौस्तुभधरं पीतांबरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥")
गोविन्दद्वादशी, स्त्री, (गोविन्दप्रीतये या द्वादशी गोविन्दाख्या द्वादशी वा । गोविन्दप्रिया द्वादशीत्येके ।) फाल्गुनशुक्लद्वादशी । यथा,—
"फाल्गुने द्वादशी शुक्ला या पुण्यैश्च संयुता ।
गोविन्दद्वादशी नाम सा स्याद् गोविन्दभक्तिदा ॥
तस्यामुपोष्य विधिना भगवन्तं प्रपूजयेत् ।
लिखितः पापनाशिन्यां विधिर्योऽत्रापि स स्मृतः ॥"
तस्माद्वाराहाच्च ब्रह्मपुराणे श्रीवशिष्ठमान्धातृसंवादे ।
"फाल्गुनाऽमलपक्षे तु पुण्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥
तस्यामुपोष्य विधिवन्नरः संयोजकत्रतः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति ॥
आमर्दकी द्वादशीति लोके ख्यातेयमेव हि ।
यत्र आमर्दकीपूजा व्रतमस्यां विशेषतः ॥"
तदुक्तं ब्राह्मे तत्रैव पापनाशिनीमाहात्म्यप्रसङ्गे ।
"फाल्गुने तु विशेषेण विष्णोः कथितो नृप ! ।
आमर्दकस्य व्रतं पुण्यं विष्णुलोकप्रदं नृणाम् ॥"
प्रभासखण्डे च । श्रीदेवीमहेश्वरसंवादे ।
"फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा नद्यां तडागे वा वाप्यां कूपे ह्रदेऽपि वा ॥
गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा ।
क्षीरोदे मथ्यमाने तु यदा दृष्टः वसुत्थितः ॥
आमर्दाद्देवदेवानां तेन सामर्दकी स्मृता ।
शिवा लक्ष्मीः स्मृतो दृष्टः सेव्यते सुरसत्तमैः ॥
देवैर्ब्रह्मादिभिः सर्व्वैर्वृतोऽसौ वैष्णवः स्मृतः ।
तत्र गत्वा हरिः पूज्यो दृष्टस्तेऽथवा शिवा ॥
पूज्या पूज्यैः शुभे रात्रौ कार्य्यं जागरणं हरेः ।
कैरवं जलपूर्णेषु कर्णेषं प्राज्यसंयुतम् ॥
हविष्यान्नन्तु कर्त्तव्यं दीपः कार्य्यो विधानतः ।
एवं जागरणं कार्य्यं कथाश्रवणतत्परैः ॥
सुप्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः ।
देहान्ते च नराः सर्व्वे पूज्यन्ते हरिमन्दिरे ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
गोविष्ठा, स्त्री, (गवां विष्ठा शकृत् ।) गोमयम् ।
इति राजनिर्घण्टः ॥
गोवृन्दं, क्ली, (गवां वृन्दं यत्रः ।) गोसमूहः ।
इति हलायुधः ॥

गोवृन्दारकः, पुं, (गौर्वृन्दारक इव पूज्य इति श्लेषः । "वृन्दारकनागकुञ्जरैः पूज्यमानम् ।" २।१।६२ । इत्यनेन लक्षणोपमितसमासे आद्यादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनमिति वार्त्तिकम् ।) श्रेष्ठगौः । इति कलापव्याकरणम् ।
गोवृषः, पुं, (गोषु स्त्रीगोव्यिर्थः वर्षति सिञ्चति रेतः । वृष् + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) वृषः । इति शब्दरत्नावली ॥ (यथा, मनुः । ६ । १५० ।
"कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ।"
"कीनाशः कर्षकः गवां सेक्ता वृषो यानमश्वादि ।"
इति कुल्लूकभट्टः ॥)
गोशकृत्, क्ली, (गवां शकृत् विष्ठा ।) गोमयम् । इति जटाधरः । (यथा, मनुः । २ । १८२ ।
"उदक्कुम्भं सुमनसो गोशकृत् स्थण्डिलं कुशान् ॥"
पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"गोमयं जगलं गोविट् गोष्ठजं तच्च गोशकृत् ।")
गोशालं, क्ली स्त्री, (गवां शाला "विभाषा सेनेति ।" २ । ४ । २५ । इति विभाषया क्लीवत्वम् ।) गोगृहम् । इति लिङ्गादिसंग्रहे अमरः ॥ गोयालि इति भाषा ॥ (गोशालायां जातः । "स्थानान्तगोशालखरशालाजाच ।" ४ । ३ । ३५ । जातार्थप्रत्ययस्य लुक् । ततो विभाषासेनेति नपुंसकत्वे ङीषभावः । गोशालजाते त्रि ॥)
गोशीर्षं, क्ली, (गोः शीर्षं शीर्षदेशाकारो विद्यतेऽस्य ऋषभपर्व्वतेकदेशजातानां चन्दनभेदानां शीर्षभागस्य तद्वत्तया तथात्वम् ।) चन्दनम् । इति राजनिर्घण्टः ॥ हरिचन्दनम् । इत्यमरः ॥
"गोः शीर्षं गोशीर्षं तदाकारे मलयैकदेशे जातं कालतास्त्रयाभिश्रवर्णसुतप्रलम्बि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितम् ।" इति भरतः ॥ (यथा, गोः रामायणे । ४ । ४१ । ५६ ।
"गोशीर्षचन्दनं यत्र पद्मकञ्चाभिसन्निभम् ॥"
अवहियते यस्मिंस्तदृथा,—
"सोत्सर्गो वदनादृश्यं खेदः प्रथयते भृशम् ।
लेपव्यरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥"
इति चरके इन्द्रियस्थानेऽष्टमेऽध्याये ।)
गवां मस्तकञ्च ॥
गोशीर्षकः, पुं. (गोशीर्षमिव कायति प्रकाशते इति । कै + कः ।) द्रोणपुष्पीवृक्षः । इति रत्नमाला ॥ (स्वार्थे कन् । चन्दनविशेषः ।)
गोशृङ्गः, पुं, (गोः शृङ्गमिव शृङ्गं शीर्षभागोऽस्य । खनामप्रसिद्धः पर्व्वतविशेषः । यथा, महाभारते । २ । २१ । ५ ।
"निषादभूमिं गोशृङ्गं पर्व्वतप्रवरन्तथा ।"
अत्रैव पर्व्वते अरत्निमात्रा मन्देहा नाम राक्षसा निवसन्ति । ते हि देवराजमहेन्द्रेणाभिप्रभाः सन्तः सूर्य्योदये जले पतन्ति रजन्यां पुनरुत्पतन्ति । एतद्विवरणं यथा, रामायणे । ४ । ४० । ४२—४४ ।
"दक्षयामुत्तरं दिशं गोशृङ्गं नाम पर्व्वतम् ।
तस्य शृङ्गसहस्रेषु मन्देहा नाम राक्षसाः ॥
अरत्निमात्रा लक्ष्यन्ते नानारूपा भयावहाः ।
ते पतन्ति जले घोराः सूर्य्यस्योदयनं प्रति ॥
अभिप्रभा महेन्द्रेण निशायासुत्पतन्ति च ॥")
वर्व्वूरश्च । इति राजनिर्घण्टः ॥ गोविषाणे क्ली ॥
गोशब्दगर्द, क्ली, (गवां शब्दकम् । "प्रसुप्तः स्यात्तिष्ठके गोशब्दगोशब्दवम् ।" इति सुग्धबोधसञ्चात् ।) गोशब्दकम् । इति सुग्धबोधव्याकरणम् ॥
गोष्ट, ङ संघाते । इति कविकल्पद्रुमः (भ्वां-आत्मं- सर्क-सेट् ।) सङ्घातो राद्धीकरणम् ।
ङ, गोष्टते धान्यं लोकः । इति दुर्गादासः ॥
गोष्ठं, क्ली, (गावस्तिष्ठन्त्यत्र इति । स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । घञर्थे कः । इत्येके ।) गोस्थानम् । गोठ । इति भाषा ॥ इत्यमरः ॥ (यथा, रामायणे । ४ । २२ । ३१ ।
"सिंहेन निहतं गोष्ठे गौः सवत्सेव गोपतिम् ।
दृष्ट्वा संग्रामयज्ञेन रामबाणमहाभसा ॥")
प्रत्ययविशेषः । स तु स्थानार्थे पशुवाचकशब्देभ्यो भवति । यथा, गोगोष्ठं महिषगोष्ठं इत्यादि । इति भरतः ॥ (गोष्ठीश्राद्धे । यथा, मनुः । ३ । २५४ ।
"पित्र्ये खदितमित्येव वाच्यं गोष्ठे तु सूनृतम् ।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥"
"गोष्ठे गोष्ठीश्राद्धे ।" इति कुल्लूकभट्टः ॥)
गोष्ठजः, त्रि, (गोष्ठे जा । "अचतुरविचतुरेति ।" ५ । ४ । ३० । समासे अच् । षष्ठीतत्पुरुषसमासे तु गोष्ठजा इत्येव स्यात् ।) खरशृङ्गे स्थितो यः परान् हेठि सः । इति जटाधरः ॥
गोष्ठाष्टमी, स्त्री, (गोष्ठोपपदान्विता अष्टमी । गोष्ठे विहिता अष्टमी वा । एतस्यां तिथौ भगवतो बालरूपिणो नन्दनन्दनस्य गोष्ठगमनपुरःसरं वत्सपत्वं विधाय गोपत्वस्वीकरणात् तथात्वम् ।) गोपाष्टमी । सा च कार्त्तिकशुक्लाष्टमी । यथा, पाद्मे कूर्म्मपुराणे च ।
"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥
तत्र कुर्य्याद्गवां पूजां गोप्यार्च्चं गोः प्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वान् कामानभीप्सता ॥",
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
"भौमपराक्रमे कार्त्तिकशुक्लपक्षमधिकृत्य ।
गोष्ठाष्टम्यां गवां पूजां गोप्यार्च्चं गोः प्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वपापविमुक्तये ॥"
इति तिथ्यादितत्त्वम् ॥
गोष्ठी, स्त्री (गावः बहुविधा वाचस्तिष्ठन्त्यत्र । गो + स्था + कः । स्त्रियां ङीष् ।) सभा । तस्या लक्षणविशेषः ।
"एकाङ्का कथिता गोष्ठी कैशिकीवृत्तिसंयुता ।
सम्भोगरसघट् पञ्च सप्त वा योषिदन्विता ॥
प्राकृतैर्नवभिः पुंभिर्नृभिर्वाप्यजनैः कृता ।
गर्व्वावमर्षसन्धिभ्यां हीना प्राकृतसम्मता ॥

वाद्याद्यैरन्विता नैव कर्त्तव्येयं विचक्षणैः ।"
इति सङ्गीतदामोदरः ।
(गावोऽनेका वाचस्तिष्ठन्ति यत्र । गो + स्था + घञर्थे कः । ततः "अस्मात्गोभूमीति ।" ८ । ३ । ६७ । इति षत्वम् ।) संघातः । इति मेदिनी । ठे । ४ । (यथा, पद्मतन्त्रे । १ । ४०० ।
"एवमुद्विग्ने चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति ।") गोष्यवर्गः । । यथा, चाणक्ये ।
"विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ।"
(यथा च राजेन्द्रकर्णपूरे । ४० ।
"त्यक्त्वा वेलापुलिनजवलीपल्लवव्यासगोष्ठीं
दिङ्मातङ्गाः समममथ सरिन्नाथपाथः पिबन्ति ।")
गोष्ठीपतिः. पुं, (पातीति पतिः । गोष्ठाः गोष्यवर्गस्य सभाया वा पतिः ।) गोष्यवर्गपालकः । सभापतिः ।
अथ ब्राह्मणगोष्ठीपतिलक्षणं यथा — [दिता
"नानाशास्त्रविचारदे रसिकता सत्काव्यसम्मोदिभिः कुलभूषणैः परिमिता पूर्वा कुलैरैरपि ।
श्रीमद्भागवतादिकारणकथास्वभ्यासयानन्दिता
गत्वाभीरसुपैति यद्गुणिजनो गोष्ठी हि सा गोच्यते ।"
एवम्भूता गोष्ठी तस्याः पतिः । अपि च ।
"कुलीनाः श्रोत्रियाः सर्व्वे यस्यान्नं सुभुजते सुहृदः ।
कुलीनाय सुतां दत्त्वा स गोष्ठीपतिरुच्यते ।"
तद्यथा । गाङ्गवंशे लक्ष्मीकान्तमजमुमादारः १ सुखवंशे मदनभट्टाचार्यः २ तदंशे गन्धर्व्वराय: ३ वन्द्यवंशे शुभराजखानवंशः ४ प्रहृवंशे अनन्तभट्टाचार्यः ५ एते प्राचीनाः आधुनिका बहवः सन्ति । ॥ ॥
कायस्थगोष्ठीपतिलक्षणं यथा,—
"नीतिज्ञः कुलकर्म्मठः स्मृतिमतां मान्योऽपि धर्म्मान्वितः
कार्य्याकार्य्यविलोकनैः कुलभृतां सम्मानदानोद्यतः ।
गोष्ठ्याः यः कुलसंविदां कुलसुधीः सम्मौलिकानां तथा
सदंशप्रभवः क्षितौ सुविदितो दाता स गोष्ठीपतिः ।"
अथ कायस्थगोष्ठीपतिगणना ।
"आदौ द्वादशपर्य्याये समभवद्दामेन गोष्ठीपतिः
सत्कीर्त्तिश्च सुबुद्धिखानतनयः श्रीमन्तराव; स्मृतौ । १ ।
संघातस्तदनन्तरं गुणधरो गर्गे च पर्य्यायके
खेचाताे हि पुरन्दरः कुलभवः खानः सदा दानतः । २ ।
पर्य्याये च चतुर्दशे समभवत् पौरन्दरः केशवः
खानः सन्ततदानतो हि विलसत्कीर्त्तिर्धरामण्डले । ३ ।
नानावित्तविसर्जनेन जनितप्रोत्पुल्लकीर्त्तिः क्षितावासीत् पञ्चदशे तदात्मजभुवि श्रीलक्ष्मविश्वासखान् । ४ ।
ततः षोड़शे पर्य्याये दानखानः
कुलीनालिमाली दयारामपालः । ५ ।
ततस्तत्सुतः पर्य्याये सूर्य्यवाजि-
चपानाथगर्गेऽभवत् पुण्यराजिः । ६ ।
ततः पर्य्यायेऽष्टादशे तत्तनूजः
समाहूय भूयोर्चितार्थव्रजो यः ।
सदा सत्कथालापसंलापतोषः
कुलीनोचपूजापरोऽयं सुभाषः । ७ ।
आसीत् किङ्करसेननामसुकृती यो मौलिकैकाग्रणीः
पर्य्याये परिपूजितार्थनिचये पैकोनविंशे हि सः ।
सद्गोष्ठीपतिपालवंशतनयापाणिग्रहैश्चालनो
दानेनापि च मेलिकाटिरपरो गोष्ठीपतिः प्राथमः । ८ ।
दानेनातिवदान्यतादिगुणतो निःसीमपुण्येश्च यो
गोपौसिंहचतुर्धुरौणसुकृती विंशे हि पर्य्यायके ।
यत्नात् किङ्करसेनवंशतनयापाणिग्रहाद्रागतः
सोऽभ्यासीद् भुवि मेलिकाटिरपरो गोष्ठीपतिः सत्तमः । ९ ।
पर्य्याये पुनरेकविंशक इह ख्यातः क्षमामण्डले
गोपौसिंहचतुर्धुरीणकुलजो यो रामकान्तः सुधी ।
धन्यो गण्यसुपुण्यजन्यनयसा गोष्ठीपतेरग्रणीः
दानैः कर्णं इवातिधैर्य्यपयसा रत्नाकरश्चापरः । १० ।
द्वाविंशे किल पर्य्यायेऽतिविधतेरुत्खातजात्यंशजात्
खस्थैवाखसुपुण्यदत्तकतनूभूतस्य च श्रीमतः ।
गोपौमौद्गलसंभवस्य तनयद्वारा च गोष्ठीपतिः
सम्भूतो नवलक्षभूपतिवरः सर्व्वैलिकाटिः क्षितौ । ११ ।
तावच्चुल्लकगिल्लमध्यमकुलोद्भूतां सुतीर्थोद्भवान्
बहूद्वाहनपि तावतोऽच मबना बहूक्रमागादरात् ।
सद्गोष्ठीपतिकारकागतिनताधीनान् कुलीनान् समाहूयात्र प्रहतांस्तथात्र सहजान् पूर्व्यांस्तथा कोमलान् ।
विंशेर्वागदतेर्भुतिप्रकृतिभिश्चार्य्येश्चयोविंशके पर्य्याये ऽतितरां प्रपूज्य परमाद्रादान्वितः श्रीयुतः।
गोपौमौद्गलदेववंशतिलको गोष्ठीपतिः क्ष्मापतिर्जातः संप्रति भूमिदेवघटकानाश्वाश्वगान् दत्युतः ।" १२ ।
इति दक्षिणराढ़ीयकायस्थकुलाचार्य्यकारिका ।
अथ वैद्यानां गोष्ठीपतिर्यथा,—
"विप्रेभ्यः प्रियभोज्यवस्तुवसनं छत्राचनं भूषणं
यानं भूमितुरङ्गमा गजगवां खर्व्वाणि रत्नानि च ।
गावो गाव उदारमन्दिरवरो वाद्यञ्च दत्ता: सदा
साधुज्ञातिकुटुम्बसङ्गसगणाः संप्रीणिता येन च ॥
गौड़ेश्वापतिना य एव भिषजां श्रेष्ठोऽभिषिक्तः क्षतौ
नानाशास्त्रविशारदः सुभमतिर्वाग्मी चिकित्सासुधीः ।
तस्मात् प्राप गजं तुरङ्गकनकच्छत्रञ्च रत्नं धनं
सोऽभूत् सेनविनायको बहुगुणैरम्बष्ठगोष्ठीपतिः ॥
वैनायकेषु सर्व्वेषु भास्करः श्रेष्ठ ईरितः ।
गोष्ठीपतितया ख्यातः स वैद्यैः पूजितोऽमतः ॥"
इति भरतमल्लिककृतकुलपद्धिका ।
गोष्यदं, क्ली, (गोः पदम् । यद्वा, गावः यत्रस्थे गच्छन्ति यस्मिन् देशे । "गोष्यदं खेचितासेवितप्रमाणेषु ।" ६ । १ । १४५ । इति षुट् सस्य षत्वञ्च ।) गोसेवितस्थानम् । गोखुरप्रमाणम् । इत्यमरः । ३ । ३ । ८१ ॥ (यथा, महाभारते । ८ । ८ । ३० ।
"भौमद्रोणार्च्चयं तीर्त्वा कर्णपातालसम्भवम् ।
मा निमज्जत्व सगणः शल्यमासाद्य गोष्यदम् ।")
तथा विश्वो मेदिनी च ।
"गोष्यदं गोपदञ्चैव गवाञ्च गोतगोचरे ॥"
(गवासेवितारण्यादि । इति सिद्धान्तकौमुदी ॥)
गोसः, पुं, (गां जलं स्रवति गच्छतीति । सो ड गत्यर्थे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) गोजलः । उशनःकाव्यः । इति मेदिनी । से । ३ ॥
गोसङ्ख्यः, पुं, (गाः सङ्ख्ये इति । सप्तम्यां इत्यस्य उक्तौ + "सप्तम्याः स्थाने ।" २ । ४ । ५४ । इति स्थाने ततः "समिक्ष्यः ।" ३ । २ । ७ । इति कः । यद्वा, गवां संख्या बहवो गाव एवार्थः विद्यते यस्य । समासे पुंवद्भावः ।) गोपः । इत्यमरः । २ । ८ । ५० ॥
गोसङ्घः, पुं, (गोभिः सङ्घो मिलनं यस्मिन् काले । प्रभूवर्त्तमाने हि गावो गोष्ठगमनाय निर्गच्छन्तीति प्रसिद्धिः । यद्वा गौः सूर्य्यकिरणं तेन सङ्घो यस्मिन् ।) प्रभातः । इति भूरिप्रयोगः ॥
गोसदृक्षः, पुं, (गोः सदृक्षस्तुल्यः । गोसदृशाकारत्वादस्य तथात्वम् ।) गवयः । इति हेमचन्द्रः ॥
गोसन्दायः पुं, (गां सम्प्रदातीति । सम् + दा + घञ् ।) गोदानकर्त्ता । इति व्याकरणम् ॥
गोसम्भवा, स्त्री, (गोरिव सम्भवो लोमादिरूपा कृतिर्यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ (सम्भवत्यस्याः इति सम्भवा उत्पत्तिकारणम् । गौः सम्भवो यस्याः ।) गोजाते त्रि ॥
गोसर्गः, पुं, (गवां सर्गो वनगमनाय मोचनं यद्वा गवां सूर्य्यकिरणानां सर्गो विसर्गः यस्मिन् ।) प्रभातम् । इति शब्दरत्नावली । १६१ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये ।
"गोसर्गे चार्द्धरात्रे च तथा मध्यन्दिनेषु च ।")
गोसवः, पुं, (गौः सूयते पीयते हिंस्यते यत्र । सू धू पीड़ायाम् + "ऋदोरप् ।" ३ । ३ । ५७ ।) इति अप् ।) गोमेधयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ११ । ७४ ।

"यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा॥")

गोसप्तप्रः, पुं, (गोस एव प्रप्रः प्रप्रतुल्यः इति गोवलीवर्द्दन्यायेन सिद्धः।) बोलः। इत्यमरटीकायां रायमुकुटः॥

गोसहस्री, स्त्री, (गवां सहस्रं तद्दानफलं विद्यते यत्र। अर्श आदित्वादच् गौरादित्वात् ङीष्।) मङ्गलवारयुक्तामावास्या। तत्र गङ्गास्नाने सहस्रगोदानफलम्। यथा, व्यासः।

"अमावास्यां भवेद्वारो यदि भूमिसुतस्य च।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी॥"

इति तिथ्यादितत्त्वम्॥ *॥

सोमवारयुक्तामावास्या। तत्र अरुणोदयकालमारभ्य स्नानकालपर्य्यन्तं मौनीभूत्वा स्नानात् गोसहस्रदानफलम्। यथा व्यासः।

"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत्।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम्॥"

इति च तिथ्यादितत्त्वम्॥

गोस्तनः, पुं, (गोः स्तन इव गुच्छो यस्य।) हारभेदः। इत्यमरः। २। ६। १०५॥ स तु चतुर्यष्टिकः। चतुस्त्रिंशद्यष्टिक इति केचित्। इति भरतः॥ (गवां स्तनः।) गवां कुचश्च॥ (यथा, सुश्रुते उत्तरतन्त्रे १ मे अध्याये।

"सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम्॥")

गोस्तना, स्त्री, (गोः स्तन इव फलमस्याः। ङीषभावपक्षे टाप्।) गोस्तनी। इत्यमरटीका॥

गोस्तनी, स्त्री, (गोः स्तन इव फलमस्याः।

"स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात्।" ४। १। ५४। इति ङीष्।) द्राक्षा। इत्यमरः। २। ४। १०७॥ कपिलद्राक्षा। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायाः।

"द्राक्षा खाडूफला प्रोक्ता तथा मधुरसापि च।
वृष्या गोस्तनी द्राक्षा गुर्व्वी च कफपित्तनुत्॥
गोस्तनी सुरसा इति।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गोः स्तना इव स्तना यस्याः। कुमारानुचारिण्यो मातृगणानामन्यतमा। यथा, महाभारते। ६। ४६। ३।

"प्रभावती विशालाक्षी पलिता गोस्तनी तथा॥"

गोनसीति पाठोऽपि दृश्यते॥)

गोस्थानं, क्ली, (गवां स्थानम्।) गोष्ठम्। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ६०। २७।

"शार्ङ्गलहारगोवाटं मध्ये गोस्थानमङ्गलम्॥")

गोस्थानकं, क्ली, (गोस्थान+स्वार्थे कन्।) गोष्ठम्। इत्यमरः। २। १। १३॥

गोस्वामी, [न्] त्रि, (गवां स्वामी।) गोपतिः। इति हलायुधः॥ (यथा, मनुः। ८। २३१।

"गोपः क्षीरभृतो यस्तु स दुग्धाद्यग्रतो वराम्।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः॥")

स्वामिनः भुवो वा प्रभुः। (यद्वा, गवां इन्द्रियाणां स्वामी। जितेन्द्रियतया एव तथात्वम्।) यथा। "श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी।" इत्यनन्तसंहिता॥

गोहत्या, स्त्री, (गवां हत्या हननम्।) गोवधः। तत्प्रायश्चित्तादि प्रायश्चित्तग्रन्थे द्रष्टव्यम्॥ *॥

पारिभाषिकगोहत्या यथा,—

सावित्र्युवाच।

"विप्रहत्याच गोहत्यां किंविधामादिदेशिकीम्।
का वा कृशामगम्या वा को वा सन्ध्याविहीनकः॥
एतेषां लक्षणं सर्व्वं वद वेदविदां वर!॥

यम उवाच।

गामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत्।
याति गोविप्रयोर्मध्ये गोहत्याच लभेत्तु सः॥
दक्षैर्गान्ताड़यन् मूढ़ो यो विप्रो वृषवाहकः।
दिने दिने गवां हत्यां लभते नात्र संशयः॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम्।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद् ध्रुवम्॥
वृषलीपतिं याजयेद् यो भुङ्क्ते ऽन्नं तस्य यो नरः।
गोहत्याशतकं सोऽपि लभते नात्र संशयः॥
पादं ददाति वह्नौ यो गाञ्च पादेन ताड़येत्।
यदि विप्रोदधौताङ्घ्रिः स्नात्वा गोवधमालभेत्॥
यो भुङ्क्ते ऽस्निग्धपादेन धौते स्निग्धाङ्घ्रिरेव च।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद् ध्रुवम्॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद् ध्रुवम्॥
पितुं च पर्व्वकाले च तिथिकाले च देवताः।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद् ध्रुवम्॥
स्वभर्त्तरि च सक्ते वा भेदबुद्धिं करोति या।
कटाक्षा ताड़येत् कान्तं सा गोहत्यां लभेद् ध्रुवम्॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च।
तड़ागे च तनूर्द्दं वा स गोहत्यां लभेद् ध्रुवम्॥
प्रायश्चित्तं गोवधस्य यः करोति अतिक्रमम्।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेद् ध्रुवम्॥
राजके दैवके यत्नात् गोस्वामी गां न पालयेत्।
दुःखं ददाति यो मूढ़ो गोहत्यां लभते ध्रुवम्॥
प्राणिनं लङ्घयेद्यो हि देवार्थेभ्यमनलं जलम्।
नैवेद्यं पुण्यमन्नञ्च स गोहत्यां लभेद् ध्रुवम्॥
शास्त्रमाक्षीति वादी यो मिथ्यावादी प्रतारकः।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद् ध्रुवम्॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं प्रति।
न सम्भ्रमान्नमेत् यो हि स गोहत्यां लभेद् ध्रुवम्॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः।
विद्यार्थिने च विद्यान्च स गोहत्यां लभेद् ध्रुवम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

गोहत्रं, क्ली, (हद विष्ठात्यागे+क्तः। हत्रम्। गोर्हत्रं विष्ठा।) गोमयम्। इति रत्नमाला॥

गोहरीतकी, स्त्री, (गवां हरीतकीव हितकारित्वात्।) विश्वतरुः। इति शब्दरत्नावली॥

गोहालिया, स्त्री, लताविशेषः। गोयालिया इति भाषा॥ यथा, गारुड़े १६० अध्याये।

"पोतं गोहालियामूलं तिलदध्यन्नसंयुतम्।
निवहन्मूत्रं क्रथितं प्रवर्त्तयति शूकर!॥"

गोहितः, पुं, (गोषु हितः।) वीरलता। विश्वः। इति शब्दचन्द्रिका॥ गवां हितकारके त्रि॥ (गोर्भूमेर्भारावतरणे स्वेच्छया शरीरग्रहणं कुर्व्वन् गोहितः, यद्वा गवां रक्षार्थं गोवर्द्धनं धृतवानिति गोहितः। विष्णुः। यथा, महाभारते। १३। १४६। ७६।

"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥")

गोहिरं, क्ली, (गुह+बाहुलकादिरच्।) पादमूलम्। इति हेमचन्द्रः। ३। २८०॥

गोह्यं, त्रि, (गुह्+संवरणे+"ग्रंसिदुहिगुहिभ्यो वा।" इति काशिकोक्तेः ण्यवभावपक्षे यत्।) गुह्यम्। गोपनीयम्। इति पाणिनिप्रकरणम्॥

गौः, [गो] पुं स्त्री, (गच्छतीति। गम्+"गमेर्डोः।" उणा। २। ६७। इति डोः। यद्वा, गच्छत्यनेनेति करणे डोः। वृषस्य यानसाधनत्वात् स्त्रीगवा दानेन स्वर्गगमनसाधनत्वाच्च उभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम्। वस्तुतस्त्वयं रूढ एव शब्दः। यदुक्तम्।

"रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः॥")

खगामखासपशुः। गरु इति भाषा॥ पुंगोः पर्य्यायः अनड्वान् इति पदे द्रष्टव्यः॥ स्त्रीगोः पर्य्यायः। माहेयी २ सौरभेयी ३ उक्षा ४ माता ५ इड्डिकी ६ अर्ज्जुनी ७ अघ्न्या ८ रोहिणी ९। इत्यमरः॥ माहेन्द्री १० दुग्धा ११ धेनुः १२ अघ्न्या १३ दोग्ध्री १४ भद्रा १५ भूरिमही १६ अनड्वही १७ कल्याणी १८ पावनी १९ गौरी २० सुरभिः २१ महा २२ निलिम्पाचिः २३ सुरभी २४ अनड्वाही २५ इड़ा २६ अघ्मा २७। इति शब्दरत्नावली॥ बहुला २८ मही २९ सरस्वती ३०। इति जटाधरः॥ उक्षिया ३१ अही ३२ अदितिः ३३ इला ३४ जगती ३५ शर्करी ३६। इति वैद्यनिघण्टौ २ अध्यायः॥ *॥ (गवां लक्षणादिकं यथा, बृहत्संहितायां ६१ अध्याये।

"पराशरः प्राह बृहद्रथाय
गोलक्षणं यत् क्रियते ततोऽयम्।
मया समासः शुभलक्षणाढ्याः
सर्व्वास्वपाप्यागमतोऽभिधास्ये॥
सास्राविलरूक्षाक्षो ह्रस्वकनयनाश्च न शुभदा गावः।
प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः॥
दृश्यत्रणचतुर्दन्ताः प्रलम्बसक्थानना विगतपृष्ठाः।
ह्रस्वस्थूलग्रीवा यवभध्या दारितखुराश्च॥
ध्यावातिदीर्घजिह्वागुल्फैरतितनुभिरतिबहुरिर्वा।
अतिककुदाः कृशदेहा नेरा हीनाधिकाङ्गाश्च॥
वृषभोऽपि स्थूलातिलम्बवृषणः शिरातताक्रोड़ः।
स्थूलशिराचितगण्डश्चिरात् मेहते यश्च॥
मार्জ্জाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः।

कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः ॥
स्थूलशृङ्गखुरशिरोङ्गः सितोदरः कृष्णसारवर्णश्च ।
गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः ॥
श्यामकपृथ्यचिताङ्गो भस्मारुणसन्निभो विड्रालाक्षः ।
विप्राणामपि न शुभ करोति वृषभः परिग्रहीतः ।
ये चोद्धरन्ति पादान् पङ्क्तादिव योजिताः कृष्णग्रीवाः ।
कातरनयना हीनाः पृथुतरुच ते न भारसहाः ॥
मृदुसंहतताम्रोष्ठास्तनुस्निग्धस्ताम्रताल्वजिह्वाश्च ।
तनुदृक्षोचश्रवणाः सुकुक्षयः सप्तजङ्घाश्च ॥
आताम्रसंहतखुरा थूणेरस्का दृढतृककुदयुक्ताः ।
स्निग्धश्लक्ष्णतनुतरुणरोमाणस्ताम्रतनुवृङ्गाः ॥
तप्तभूषृग्बालधयो रक्तान्तविलोचना महोच्छ्वासाः ।
सिंहस्कन्धास्तान्वक्ष्यकक्षवलाः पूजिताः सुगताः ॥
वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः ।
शुभदा भवन्त्यनङ्वाहो लक्षणाभिश्चैवमनिभाभिः ॥
वैदूर्य्यमक्षिका वृद्धवृद्धेक्षणाः स्थूलनेत्रचर्म्माणः ।
पार्श्वैरिस्फुटिताभिः ग्रस्ताः सर्व्वेऽपि भारवहाः ॥
प्राणोद्वेगे सवलिमार्ज्जारमुखः सितश्च दक्षिणतः ।
कमलोत्पललाक्षाभः सुबालधिर्वाचितुल्यरवः ॥
लम्बैर्वृषणैर्मेषोदरश्च सङ्क्षिप्तवङ्क्षणाक्रोडः ।
श्रेयो भाराध्वसहो जवेऽश्वतुल्यश्च गुरुफलः ॥
सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः ।
हृष्टो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥
भूयृग्बालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च ।
कल्माषश्च स्वामिनमचिरात्कुरुते पतिं लक्ष्म्याः ॥
यो वासितेक्षणरुचो यथेष्टवर्णश्च सोऽपि ग्रस्तफलः ।
मिश्रफलोऽपि त्याज्यो यदि नैकान्तप्रगुणोऽस्ति ॥" * ॥

गोरीक्षितभेदेन शुभाशुभमुक्तं यथा, तत्रैव ६२ अध्याये,—

"गावो दीनाः पार्थिवस्याग्रियाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
कर्त्तुं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः ॥
अकारणे क्रोशति वेदनार्त्तो
भयाय रात्रौ वृषभः शिवाय ।
वृद्धं निरुद्धा यदि मक्षिकाभिः
सदासु दृष्टिं सरमालनैर्वा ॥
आगच्छन्त्यो वेश्म कस्मारवेश्म
संसेवन्त्यो गोष्ठदुष्टेव गवां गाः ।
आर्द्राङ्घ्री वा कृष्टरोमण्यः प्रकृष्टा
धन्या गावः सुमङ्गिल्योऽपि चैवम् ॥"* ॥)

गोमङ्गलत्वादि यथा, दैवले ।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्चयेच्च यः ।
प्रदक्षिणञ्च कुर्व्वीत तथा चायुर्न हीयते ॥"
अभिप्रेतार्थसिद्ध्यर्थमङ्गलं तद्धेतुतया ब्राह्मणादपि ॥ * ॥ गोग्रहणे ब्रह्मपुराणम् ।
"सदा गावः प्रयच्छासु मल्लोकानेन पार्थिव ! ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात् ॥"
भविष्ये ।
"गामालभ्य नमस्कृत्य हत्वा चैव प्रदक्षिणम् ।
प्रदक्षिणीकृतां तेन सप्तद्वीपा वसुन्धरा ॥
गवामग्निं न लङ्घेत न्यूते गन्धेन वर्ज्जयेत् ।
यावद्व्रजति तद्गन्धं तावद्गन्धेन युज्यते ॥"
विष्णुः ।
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षड्ङ्गमेतन्मङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥"
षड्ङ्गं षटप्रकारम् । इति शुद्धितत्त्वम् ॥ * ॥
तस्यांसगुणाः । स्निग्धत्वम् । पित्तश्लेष्मविवर्द्धनत्वम् । इंद्रियत्वम् । बलकारित्वम् । पौनसप्रदरनाशित्वञ्च । इति भावप्रकाशः ॥ अमूलत्वम् । गुरुत्वम् । वातकफापहत्वञ्च ॥* ॥ तद्गन्धगुणाः । पथ्यत्वम् । अत्यन्तरुच्यत्वम् । स्वादुत्वम् । स्निग्धत्वम् । पित्तवातामयनाशित्वम् । मेध्यत्वम् । कान्तिप्रज्ञाङ्गपुष्टिवीर्य्यवृद्धिकारित्वञ्च ॥ (यथा च हारीते प्रथमस्थाने २८मेऽध्याये ।

"गव्यं पवित्रञ्च रसायनञ्च
पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् ।
आयुःप्रदं रक्तविकारपित्त-
त्रिदोषकुष्ठोगविषापहं स्यात् ॥" * ॥)

तद्दधिगुणाः । अतिपवित्रत्वम् । शीतत्वम् । स्निग्धत्वम् । दीपनत्वम् । बलकारित्वम् । मधुरत्वम् । अरोचकवातामयनाशित्वम् । ग्राहित्वञ्च ॥ (यथा च हारीते प्रथमस्थाने २८मेऽध्याये ।

"अम्लखादुरसं ग्राहि गुरूष्णं वातरोगजित् ।
मेदः-शुक्र-बल-श्लेष्म-रक्तपित्तास्रि-शोफहृत् ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं गुणप्रदम् ॥"* ॥

तद्दधफेनगुणाः ।

"गवाञ्च क्षीरफेनं वा तक्रेण संहितन्तथा ।
पक्वान्नं भक्षयेद्यापि ग्रहणी तस्य नश्यति ॥")

तन्नवनीतगुणाः । शीतत्वम् । वर्ण्यबलशुक्रकफरुचिसुखकान्तिपुष्टिकारित्वम् । सुमधुरत्वम् । संग्राहकत्वम् । चक्षुर्हितत्वम् । वातसर्व्वाङ्गशूलकासश्रमसर्व्वदोषनाशित्वञ्च ॥ * ॥

तद्घृतगुणाः । वृष्यत्वम् । धीकान्तिस्मृतिबलमेधापुष्ट्यग्निवृद्धिशुक्रवपुःस्थैर्य्यकारित्वम् । वातश्लेष्माश्रमपित्तनाशित्वम् । विपाके मधुरत्वम् । हृद्यतमत्वम् । बहुगुणत्वञ्च ॥ (तथा च ।

"विपाके मधुरं हृद्यं वातपित्तकफापहम् ।
चक्षुष्यं बलमेध्यं गव्यं सर्पिर्गुणोत्तमम् ॥"
इति हारीते प्रथमस्थाने अष्टमेऽध्याये ॥* ॥)

"गवां प्रसूषु क्षीरं गुरु विद्यात् दुर्ज्जरम् ।
तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा ॥
सुस्तार्य्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु ।
विवत्सावालवत्सानां पयो दोषसमीरितम् ॥
घृष्टं वत्सैकवर्णाया धवलीकृष्णयोरपि ।
दुग्धादा मासपर्य्यादा कर्द्धघृष्टी च या भवेत् ॥
तासां गवां सितं क्षीरं घृष्टं वाघृष्टमेव वा ।
गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
श्वेतानां रक्तवर्णानां त्रीन् हन्ति कपिलापयः ॥"
इति राजनिर्घण्टः ॥

गौः, [गो] पुं, (गम्यते कर्म्मभिः यज्ञदानपरोपकारादिधर्म्ममूलककर्म्मफलैर्यस्मिन् । गम् + "गमेर्डोः ।" उणा० । २ । ६३ । इति अधिकरणे डोः ।) स्वर्गः । (गच्छन्ति गायन्ति विषया येन यद्वा गच्छति शीघ्रमिति करणे कर्त्तरि वा डोः । किरणसम्पर्केण विना चाक्षुषज्ञानाभावात् किरणस्य ज्ञानप्रकाशशीघ्रधर्म्मवत्त्वात् शीघ्रगामित्वाच्च तथात्वम् ।) रश्मिः । (यथा, महाभारते । ३ । ३ । ५२ ।

"चयोदशद्वीपवतीं गोभिर्भासयसे महीम् ।
चयाणामपि लोकानां हिताये[1]क: प्रवर्त्तसे ॥"* ॥)

वज्रः । इति मेदिनी । गे । १ । (गम्यते पुरुषवह्नि यैस्मिन् । अधिकरणे डोः । इष्टापूर्त्तादिकाम कर्म्मभिः पुण्यवताञ्चलोकगमनात् तथात्वम् ।) चन्द्रः । इति विश्वः ॥ (गच्छति प्राप्नोति विश्वं प्रकाशकालकेन खतेजसेति जगति सर्व्वमिति वा । कर्त्तरि डोः ।) सूर्य्यः । गौरेयश्चः । इत्यमरटीकायां भानुदीक्षितः ॥ अश्वनामौषधम् । इति राजनिर्घण्टः ॥

गौः, [गो] स्त्री, (गम्यते विषयज्ञानं यया । गम् + "गमेर्डोः ।" उणा० । २ + ६३ । इति करणे डोः ।) चक्षुः । (गच्छति शीघ्रमिति कर्त्तरि डोः ।) वाक् । दिक् । (गम्यते ज्ञायते चित्ताभिप्रायो यया । करणे डोः ।) वाक् । (यथा, रघुः । ५ । १२ ।

"इत्यध्वपात्रामुमितवयस्य
रघोरुदारामपि गां निशम्य ॥" * ॥

गम्यते प्राप्यतेऽस्मादिति । अधिकरणे डोः ।) भूः । (यथा, रघुः । १ । २६ ।

"इदोहं गां च यज्ञाय ग्रहाय मघवा दिवम् ।
सम्यग्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥" * ॥

अत्र बहुवचनान्तोऽयम् । इति मेदिनी । गे । १ ॥ अत्र एकवचनान्तोऽपि इति केचित् । इति भरतः ॥ (यथा, वृन्दावनयमके । २ ।

"खमिव सुखं गवि शैवं
युवधाय खपिति यो सुजङ्गविशेषम् ।
नव पुष्करसमकरया
श्रीयोन्मिषंपक्ष्मा च सेवितः समकरया ॥")

माता । इत्येकाक्षरकोषः ॥ (खनामख्याता शुकदौहित्रस्य ब्रह्मदत्तस्य भार्य्या । यथा, भागवते । ६ । २१ । २५ ।

"स कीर्त्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।

सयोगो गवि भार्य्यायां विश्वक्सेनमधात् सुतम्॥"
"गवि सरस्वत्यां भार्य्यायाम्॥" इति कश्चित् व्याचष्टे॥)

गौः, [गो] पुं, स्त्री, (गम्यते ज्ञायते सार्थसुखमनेन। गम्+"गमेर्डोः।" उणा०। २। ६३। इति करणे डोः। स्वरे आतत्वादेवास्य तथात्वम्।) लोम। (गच्छति निम्नदेशमिति। कर्त्तरि डोः। निम्नप्रवणादेवास्य तथात्वम्।) जलम्। इत्यमरटीकायां भानुदीक्षितः॥

गौल्मिकः, पुं, (गुल्मा परिमाणविशेषस्तद्ग्रहीतुं शीलमस्य। यद्वा, गुल्मा गुल्माफलं तस्य परिमाणार्थं ग्रहणं विद्यते अस्य। गुल्मा+ठक्।) स्वर्णकारः। इति त्रिकाण्डशेषः॥

गौडः, पुं, (खनामख्यातदेशः। (यथा, प्रबोधचन्द्रोदये। २। ७।
"गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता॥")
तद्देशस्थे पुं भूम्नि। इति जटाधरः॥ तद्देशसीमा यथा, भक्तिरत्नाकरे सप्तमपटले।
"वङ्गदेशं समारभ्य सुवनेशान्तगं शिवे!।
गौड़देशः समाख्यातः सर्व्वविद्याविशारदः॥"
(देशोऽयं हृतसंहितायां कूर्म्मविभागे पूर्व्वखण्डस्थः। यथा, तत्रैव। १४। ५, ७।
"अथ पूर्व्वस्याम्।" इत्युक्त्वा
"उदयगिरि भद्रगौड़क-
पौण्ड्रोत्कलकाम्रमेकलाम्बष्ठाः॥"
इत्युक्तवान्॥)
पक्व गौड़ा यथा, स्कन्दपुराणे।
"सारस्वताः कान्यकुब्जा गौड़मैथिलिकौत्कलाः।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः॥"
(गुड़स्य विकारः। गुड़+अण्। गुड़जाते आसवे क्लीबे च। अस्य गुणा यथा,—
"स्वरुच्यग्निकृद्वातो गौड़स्तर्पण-दीपनः॥"
इति भावप्रकाशस्य पञ्चमेऽध्याये वाभटेनोक्तम्॥
"श्यामादन्तीरसे गौड़ः पिप्पलीफलचित्रके।
लिप्तेऽविशोऽनिल-कफ-ग्रहिपाण्डूदरापहः॥"
इति च चरके कल्पस्थाने द्वादशेऽध्याये॥)

गौड़वासूकः, पुं, (गौड़े गौड़देशे जातः गौड़देशवासिप्रियो वा वासूकः शाकविशेषः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥ (चिल्लीशब्दे ऽस्य विषया ज्ञेया॥)

गौड़िकं, क्ली, (गौड़ं गुड़विकारस्तत् कारणत्वेनास्त्यस्य। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) मद्यविशेषः। यथा,"पैष्टिकगौड़िकमाध्वीकानां पानं सुरापाने कल्पतमम्॥" इति प्रायश्चित्तविवेके देवलः॥ गुड़निष्पन्नद्रव्ये च॥ (पुं, गुड़े साधुः। "गुड़ादिभ्यष्ठञ्।" ४। ४। १०२। इति ठञ्। इक्षुः। इति सिद्धान्तकौमुदी॥)

गौड़ी, स्त्री, (गुड़स्य विकारः गुड़विकारेण सम्पादिता इत्यर्थः। गुड़+अण्। स्त्रियां ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति भाषा॥ (यथा, मनुः। ११। ९४।
"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा॥")
तत्पर्य्यायः। वारुणी २। इति त्रिकाण्डशेषः॥ अम्ला गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। मधुरत्वम्। वातनाशित्वम्। पित्तबलकाम्लिह्मिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ (यथा च हारीते प्रथमे स्थाने ११ अध्याये।
"गौड़ी कषाया मधुराम्लशीता
सन्दीपनी मूलरुजापहन्त्री।
हृद्या त्रिदोषं श्रमयत्यजीर्णं
पाण्डामयार्शःश्वसनं निहन्ति॥")
रागिणीविशेषः। सा तु मेघरागस्य पत्नी। इति सङ्गीतदामोदरः॥ (गौड़ानां गौड़देशवासिनां प्रिया।) काव्यरीतिविशेषः। यथा,—
"ओजःप्रसादमाधुर्य्यं गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥"
इति काव्यचन्द्रिका॥
(यथा च साहित्यदर्पणे। ९। ४।
"ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौड़ी————————॥"
उदाहरणं यथा, तत्रैव धृतो वेणीसंहारश्लोकः।
"चण्डद्गजभ्रमितचक्रगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्याह।
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रासमहिमपरतन्त्रास्तोभवाक्या च॥")

गौणः, पुं, (गुणादागता गौणी। तस्या आगतः प्रतिबोधितः। गौणी+अण्।) गौणीवृत्तिबोधितः। यथा,"शक्तेस्य साहश्यात्मकः सम्बन्धो गुणः तदधीना या लक्षणा सा गौणी तद्योगात् गौणः।" इति दायभागटीकायां श्रीजगन्नाथतर्कालङ्कारः॥ (असुखे त्रि। यथा, महाभारते। १२। ६४१। ६।
"बहूनि मम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानिचित्॥")

गौणकालः, पुं, (गौणोऽसत्यः कालः।) सत्यकालकर्त्तव्यकर्म्मकरणयोग्यकालान्तरः। यथा,—
"यद्वागामिक्रियासुख्यकालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि॥
यद्वेति पक्षान्तरं प्राक्तनकर्म्मणि मध्यकालवत् आगामिक्रियाया सुख्यकालस्यापि गौणकालत्वम्। तेन सायं सन्ध्याया रात्रेः प्राक् सन्ध्याकालश्च गौणकाल इत्यर्थः।" इति मलमासतत्त्वम्॥

गौणचान्द्रः, पुं, (गौणोऽप्रधानश्चान्द्रश्चन्द्रसम्बन्धिमासः।) शुक्लप्रतिपदादिपौर्णमास्यन्तमासः। यथा चन्द्रार्कसौप्रकरणे तिथ्यादितत्त्वे।
"गौणचान्द्रेण भाद्रस्य सुक्लचान्द्रेण आश्वयुजः॥"
अपि च शब्दरत्नावल्याम्।
"चान्द्रोऽपि द्विविधः प्रोक्तो सुख्यगौणविभेदतः।
गौणः शुक्लप्रतिपदादिपौर्णमास्यन्त ईरितः॥"

गौणी, स्त्री, (गुणं साहश्यमधिकृत्य प्रवृत्ता। गुण+अण्+स्त्रियां ङीप्।) अप्रसिद्धिप्रकारलक्षणान्तरगतलक्षणाविशेषः। यथा,—
"साहश्येतरसम्बन्धाः गुणाश्चाः सकला अपि।
साहश्यात्तु मता गौण्यस्तेन षोड़श भेदिताः॥"
("ताः पूर्व्वोक्ता अष्टादशभेदा लक्षणाः। साहश्येतरसम्बन्धाः कार्य्यकारणभावादयः। अत्र गुणानां 'श्वेतो धावति' इत्यादीन्युदाहरणानि ज्ञेयानि। रूढ्यनुपादानलक्षणा सारोपा गौणी यथा. 'एतानि तैलानि हेमन्ते सुखानि' अत्र तैलशब्दस्तिलभवस्नेहरूपं सुख्यार्थमनुपादायैव सार्थपादिस्नेहेषु वर्त्तते। प्रयोजने यथा, राजकुमारेषु तत्सदृशेषु गच्छत्सु 'एते राजकुमारा गच्छन्ति।' रूढ्यनुपादानलक्षणा साध्यवसाना गौणी यथा, 'तैलानि हेमन्ते सुखानि।' प्रयोजने यथा, 'राजकुमारा गच्छन्ति।' रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा, 'राजा गौड़ेन्द्रः कण्टकं शोधयति।' प्रयोजने यथा, 'गौर्वाहीकः।' रूढ़ौ लक्षणा साध्यवसाना गौणी यथा, 'राजा कण्टकं शोधयति।' प्रयोजने यथा, 'गौर्जल्पति।'

अत्र कैश्चिदाहुः गोसदृशत्वादिगो गुणा आद्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाह्लीकार्थाभिधाने निमित्तीभवन्ति। यदुक्तं, गोशब्दस्यागृहीतसङ्केतः वाह्लीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानाभावात्। अन्ये पुनर्गोशब्देन वाह्लीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजात्येन वाह्लीकार्थगता गुणा एव लक्ष्यन्ते। तदप्यन्ये न मन्यन्ते। तथात्वञ्च गोशब्दाद्वाह्लीकार्थः प्रतीयते न वा। आद्येऽपि गोशब्दादेव वा लक्षितात्तद्गुणात्। अविनाभावद्वारा तत्र न प्रथमः। वाह्लीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्दे ऽन्वये प्रवेशासम्भवात्। शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते। न तृतीयः। यदि हि गोशब्दाद्वाह्लीकार्थो न प्रतीयते तदास्य वाह्लीकस्य सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाह्लीकशब्देन सहान्वयमलभमानो ऽत्यन्तादिसाधर्म्यसम्बन्धाद्वाह्लीकार्थं लक्षयति। वाह्लीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयञ्च गुणयोगात् गौणी इत्युच्यते। पूर्व्वा तु उपचारामिश्रत्वात् शुद्धा। उपचारो हि नामात्यन्तं विसदृशयोः साहश्यातिशयमहिम्ना भेदप्रतीतिस्थगणमात्रम्। यथा व्यधिमानवकयोः शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा॥"

इति साहित्यदर्पणे । २ । १३ ॥) अन्यत् सर्व्वं लक्षणाशब्दे द्रष्टव्यम् ॥

गौतमः, पुं, (गोतमस्य ऋषेर्गोत्रापत्यमिति । "ऋष्यन्धकेति ।" ४ । १ । ११४ । इत्यण् ।) मुनिविशेषः । स तु प्रतानन्दः । इति हेमचन्द्रः ॥ श्राक्षवंशश्रावतीर्गर्भमुद्दमुनिविशेषः । तत्पर्य्यायः । श्राक्षमुनिः २ श्राक्षसिंहः ३ सर्व्वार्थसिद्धः ४ श्रौद्दोदनिः ५ अर्कबन्धुः ६ मायादेवीसुतः ७ । इत्यमरः । १ । १ । १५ ॥ खजितः ८ श्वेतकेतुः ९ धर्म्मकेतुः १० महामुनिः ११ पद्मज्ञानः १२ सर्व्वदर्शी १३ महाबोधिः १४ महाबलः १५ बहुज्ञानः १६ चित्रमूर्त्तिः १७ सिद्धार्थः १८ शुक्लः १९ । इति शब्दरत्नावली ॥ (अस्य हि गौतमीपुत्रत्वे प्रमाणं यथा, ललितविस्तरे १५ अध्याये । "ते सान्तर्वेहिर्मृगयन्ते । सान्तर्वेहिर्मृगयमाणा न पश्यन्ति स्म । महाप्रजावत्यपि गौतमी परिदेवमाना महीतले परिवर्त्तते स्म राजानं शुद्धोदनमेवाह । क्षिप्रं मां महाराज ! पुत्रेण सङ्गिनीं कुरुष्वेति ।" वैवस्वतमन्वन्तरे सप्तर्षीणामन्यतमः । यदुक्तं हरिवंशे ७ । ३४—३५ । "अत्रिर्वशिष्ठो भगवान् कश्यपश्च महानृषिः । गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च ॥ तथैव पुत्रो भगवान् ऋचीकस्य महात्मनः । सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि ॥" अयमेव तु विंशतिमे द्वापरयुगे वेदव्यासोऽभूत् । यथा, देवीभागवते । १ । ३ । ३१ "अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परम् ॥" कुरुकुलवृद्धतराद्रपाकुसुतानामाचार्य्यः कृपः । गोतमवंशोत्पन्नत्वादेवास्य तथात्वम् । यथा, हरिवंशे ३२ । ७५—७६ ।

"अवस्कन्दं शरस्तम्बे मिथुनं समपद्यत ।
कृपया तत्र जग्राह शान्तनुर्मृगयाङ्गतः ॥
कृपः स्मृतः स वै तस्मात् गौतमी च कृपी तथा ।
एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः ॥"

मुनिभेदः । स तु एकतश्चिलादिमुनीनां पिता । यथा, महाभारते । ६ । ३६ । ७—६ ।

"आसन् पूर्व्वयुगे राजन् । मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ।
सर्व्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ॥
ब्रह्मलोकजितः सर्व्वे तपसा ब्रह्मवादिनः ।
तेषान्तु तपसा प्रीतो नियमेन दमेन च ॥
अभवद्गौतमो नित्यं पिता धर्म्मरतः सदा ॥"

स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६५ ॥)

गौतमसम्भवा, स्त्री, (गौतमः सम्भवो यस्याः । यद्वा, गौतमात् सम्भवतीति । ष्टुम्+भू+अच् ।) गोदावरी नदी । इति राजनिर्घण्टः ॥

गौतमी, स्त्री, (गोतमस्य इयम् । तस्येदमित्यण् ततः स्त्रियां ङीप् ।) दुर्गा । इति मेदिनी ॥ मे । ४३ ॥ (यथा, हरिवंशे । १०६ । ७ । "गौतमीं कंसघातार्थं यशोदानन्दवर्द्धिनीम् ॥") राक्षसीविशेषः । इति शब्दरत्नावली ॥ गोदावरी नदी । (यथा, रामायणे । ४ । २ । २७ । "यो नदीं गौतमीं रम्यां गिरिं पर्य्येति चार्च्चिमान् ॥" तथा च हारीते प्रथमस्थाने सप्तमेऽध्याये । "पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना । अस्याः प्रीतं जलं वापि कफवातविकारहृत् ॥ पित्तप्रशमनं बल्यं व्रणदोषविकारहृत् । पुण्या पयस्विनी वेणा प्रणीता च वरानना ॥ द्रोणा गोवर्द्धनी चान्या गौतम्यानुगता इमाः । आसां जलं घनं नातिवातश्लेष्मविकारहृत् ॥") गोरोचना । इति राजनिर्घण्टः ॥ (गोतमस्यापत्यं स्त्री । गोतमवंश्यीयशरद्वतः कन्यात्वादस्यास्तथात्वम् । कृपी । सा तु द्रोणस्य भार्य्या अश्वत्थाम्नो माता च । यथा, महाभारते । १ । १३१ । २३ ।

"जनयत् गौतमी पुत्रमश्वत्थामानमेव च ॥"

गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४० ।

"गौतमी गामिनी गाधा गन्धर्व्वाधर, सेविता ॥")

गौधारः, पुं, (गोधाया अपत्यम् । "शारद्वतीचाम् ।" ४ । १ । १३० । इति अारक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥ गोधा इति ख्यातः ॥

गौधेयः, पुं, (गोधाया अपत्यम् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौधेरः, पुं, (गोधाया अपत्यम् । "गोधाया ढ्रक् ।" ४ । १ । १२६ । इति ढ्रक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौरं, क्ली, (गुरते चित्तं यत्र । गुर ग्रै ड उद्यमने + इलचेति घञ् । ततः स्वार्थे अण् । यद्वा, गवते इति । गुड शब्दे + "ऋज्वेन्द्रेति ।" उणां । २ । २८ । इति रन्प्रत्ययेन निपातनात् साधुः ।) पद्मकेशरः । इति मेदिनी । रे २८ ॥ (पद्मकेशरशब्देऽस्य विवृतिर्द्रष्टव्या ॥) कुङ्कुमम् । स्वर्णम् । इति राजनिर्घण्टः ॥

गौरः, पुं, (गवते अवश्यं शब्द्यतीति । गुड शब्दे + "ऋज्वेन्द्रेति ।" उणां । २ । २८ । रन्प्रत्ययेन निपातनात् सिद्धम् ।) श्वेतसर्षपः । ("गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते । सर्षपस्तु रसे पाके कटुस्निग्धः सतिक्तकः ॥ तीक्ष्णोष्णः कफवातघ्नो रक्तपित्तामिवर्द्धनः । रक्तोहरो जयेत् कण्डूं कुष्ठ-कोठकमिश्रहान् ॥ यथा रक्तसखा गौरः किन्तु गौरो वरो मतः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) चन्द्रः । इति मेदिनी । रे । २८ ॥ धवस्तुच्छः । इति राजनिर्घण्टः ॥ पीतवर्णः । गोरो इति भाषा । तद्वर्णकरगौषधं यथा,—

"कुष्माण्डनालचारस्तु सगोमूत्रश्च तत्त्वतः ।
अलक्तिका हरिद्रा च सिद्धा मन्दानलेन हि ॥
माहिषेण पुरीषेण लेपिता दृषभध्वज ! ।
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ॥"

इति गारुड़े १६४ अध्यायः ॥

श्वेतवर्णः । अरुणवर्णः । तद्वति त्रि । इत्यमरः । (यथा, रामायणे । ४ । ३६ । १४ ।

"तरुणादित्यगौरेण शरगौरेण वानरैः ॥"

यथा च रघुः । २ । ३५ ।

"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥")

श्रीचैतन्यदेवः । इत्यनन्तसंहिता ॥ (रङ्गविशेषः । यथा, भागवते । ३ । १० । २२ ।

"खरोष्ट्रोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः ! शृणु पञ्चनखान् पशून् ॥")

गौरः, त्रि, विशुद्धः । इति मेदिनी । रे । २७ ॥

गौरचन्द्रः, पुं, (गौरेण सप्रकर्षेमवर्णेन चन्द्रयति आह्लादयतीति । चदि आह्लादे + णिच् + रन् ।) श्रीचैतन्यदेवः । यथा,—

"कृष्णश्चैतन्यगौराङ्गो गौरचन्द्रः शचीसुतः ।
प्रभुर्गौरो गौरहरिर्नामानि भक्तिदानि मे ॥"

इत्यनन्तसंहिता ॥

गौरजीरकः, पुं, (गौरः शुक्लवर्णो जीरकः ।) शुक्लजीरकः । भाषा जीरा इति भाषा ॥ तत्पर्य्यायः । अजाजी २ श्वेतजीरकः ३ कणाढ्या ४ कणजीरः ५ कणा ६ सितदीप्यः ७ दीर्घकणा ८ सिताजाजी ९ गौराजाजी १० । अस्य गुणाः । हिमत्वम् । रुचिकारित्वम् । कटुत्वम् । मधुरत्वम् । दीपनत्वम् । क्षमिविषाध्माननाशित्वम् । चक्षुर्हितत्वञ्च । इति राजनिर्घण्टः ॥

गौरत्वक्, पुं (गौरी शुक्लवर्णा त्वग् यस्य ।) इक्षुदीक्षः । इति राजनिर्घण्टः ॥

गौरवं, क्ली, (गौरवं साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ।) अभ्युत्थानम् । इति हेमचन्द्रः । ३ । १६४ ॥ (गुरोर्भावः । गुरु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गुरुत्वम् । इति सुग्धबोधम् ॥ (यथा, महाभारते । १ । १६३ । १८ ।

"शरीरगौरवादस्य शिला गात्रैर्विचूर्णिता ॥"

उत्कर्षः । यथा, रघुः । १४ । १८ ।

"शुश्राव तेभ्यः प्रभवादिहेतुं
खधिक्रमे गौरवमाददानम् ॥"

आदरः । यथा, कुमारे । ३ । १ ।

"प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥")

गौरवितः, त्रि, (गौरवं सञ्जातमस्येति तारकादित्वादितच् ।) आर्य्यः । तत्पर्य्यायः । आर्य्यमिश्रः २ । इति चिकाण्डशेषः ॥

गौरशाकः, पुं, (गौरः गौरवर्णः शाकोऽस्येति ।) मधूकवृक्षविशेषः । इति जटाधरः ॥

गौरसर्षपः पुं, (गौरश्चासौ सर्षपश्चेति कर्म्मधारयः ।) श्वेतसर्षपः । (यथा

"रक्तोष्णः सर्षपः श्वेतः सिद्धार्थो गौरसर्षपः ।"

इति वैद्यकरत्नमालायाम् ॥)

तत्पर्य्यायः । अनन्यः २ सिद्धार्थः ३ भूतनाशनः ४

कटुस्वेष्टः ५ यज्ञघ्नः ६ कण्डघ्नः ७ राजिकाफलः ८ तीक्ष्णकः ९ दुराधर्षः १० रक्तोष्णः ११ कुष्ठनाशनः १२ सिद्धप्रयोजनः १३ सिद्धसाधनः १४ सितसर्षपः १५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातरक्तयकृत्प्लीहगुल्मदोषविषभूतव्रणनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥ कृमित्वम्। तीक्ष्णत्वम्। कफरक्तः कण्डूकुष्ठकोठक्षमिनाशित्वम्। रक्तपित्तास्रवर्द्धनत्वञ्च। इति भावप्रकाशः॥ (परिमाणविशेषः। यथा, मनुः। ८। १३६।

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः। ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपाः॥")

गौरसुवर्ण, क्ली, (गौरः शुभ्रः अतएव सुशोभनो वर्णो यस्य।) पत्रशाकविशेषः। तत्तु चित्रकूटदेशे प्रसिद्धम्। तत्पर्य्यायः। स्वर्णम् २ सुगन्धिकम् ३ भूमिजम् ४ वारिजम् ५ हृद्यम् ६ गन्धशाकम् ७ कटुशङ्खालम् ८ चूर्णशाकाङ्कः ९। अस्य गुणाः। शिशिरत्वम्। कफपित्तज्वरदाहरुचिभ्रान्तिरक्तश्रमनाशित्वम्। पथ्यत्वञ्च। इति राजनिघण्टः॥

गौरा, स्त्री, (गौरादिगणे वर्णवाचिन एव गौरशब्दस्य ग्रहणात् अत्र विशुद्धार्थपरत्वे टाप्।) गौरी। इति त्रिरूपकोषः॥

गौराङ्गः, पुं, (गौरं तप्तकाञ्चनवर्णं अङ्गं कलेवरं यस्य।) श्रीचैतन्यदेवः। यथा,—

"गौराङ्गं गौरदीप्राङ्गं पठेत् स्तोत्रं कृताञ्जलिः। नन्दगोपसुतत्वेव नमस्यामि गदाग्रजम्॥"

इति ब्रह्मयामले चैतन्यकल्पे चैतन्यस्तवः॥

अपि च कृष्णयामले।

"गौराङ्गो नादगम्भीरः खनामाङ्कतलालसः॥"

गौरार्द्धकः, पुं, (गौरवर्णं आर्द्धकं इव।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २४४॥

गौराश्वः, पुं, (गौरं शुक्लवर्णं आश्वं सप्तं यस्य।) कृष्णवानरः। इति राजनिर्घण्टः॥

गौरिका, स्त्री, (गौर्य्येव। गौरी+स्वार्थे कन्। ह्रस्वश्च।) अष्टवर्षीया कन्या। इति शब्दरत्नावली॥

गौरिलः, पुं, (गौरवर्णोऽस्यास्तीति। गौर+बाहुलकादिलच्।) श्वेतसर्षपः। लोहचूम्बम्। इति मेदिनी। ८०॥

गौरी, स्त्री, (गौर+"षिद्गौरादिभ्यश्च।" ४। १। ४१। इति ङीष्।) पार्व्वती। (यथा, रघुः। २। २६।

"गौरीगुरोर्गह्वरमाविवेश॥"

पार्व्वती किल गौरीशृङ्गाख्ये पीठस्थाने कान्यकुब्जे विराजते। यथा, देवीभागवते। ७।३०।५८।

"गौरी प्रोक्ता कान्यकुब्जे रम्या तु मलयाचले॥")

अष्टवर्षतरुकन्या। (सा तु अष्टवर्षवयस्ककन्यका। यदुक्तं स्मृतौ।

"अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी॥"

तथा च महाभारते। १। २२२। ४०।

"स्त्रीणां यद्रूपं गौरीणां सर्वेषामनां सर्वार्थदाम्॥")

हरिद्रा। दारुहरिद्रा। गोरोचना। प्रियङ्गुवृक्षः। वसुधा। नदीविशेषः। (यथा, महाभारते। ६। ६। २५।

"वस्तुं सुवर्णां गौरीञ्च किम्पुनां सह्यिरण्वतीम्॥"

गङ्गा। यथा, कालीखण्डे। २६। ४६।

"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया॥")

वरुणभार्य्या। इति मेदिनी। रे। २८—२६॥ सूर्य्यवंशीयप्रसेनजिद्राजभार्य्या। यथा,—

"जेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम्। अभिग्रक्षा तु सा भर्त्रा नदी वै बाहुदाऽभवत्॥"

इति हरिवंशः॥

वृद्धशुक्तिविशेषः। इति हेमचन्द्रः॥ मञ्जिष्ठा। श्वेतदूर्व्वा। मल्लिका। तुलसी। सुवर्णकदली। व्याघ्रनखांशी। इति राजनिर्घण्टः॥ रागिणीविशेषः। सा तु मालवरागपत्नी। तस्या रूपं यथा, सङ्गीतदामोदरे।

"आरामध्यगता कुमारिका शारदेन्दुसुखलक्ष्मीः। राढ़ी दाड़िमबीजं दधती कीरानने गौरी॥"

(केषाञ्चित् मते तु इयं कौशिकरागस्य पत्नी। यदुक्तं सङ्गीतदर्पणे रागाध्याये। ३३।

"तोड़ी खाम्बावती गौरी गुणक्री ककुभा तथा। रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः॥"

केषाञ्चित् मते इयं श्रीरागस्य पत्नी। यदुक्तं तत्रैव रागाध्याये। १४।

"मालश्री त्रिवणी गौरी केदारी मधुमाधवी। सतः पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गनाः॥"

अस्या रागवेला तृतीयप्रहरात् परं अर्द्धरात्रावधिः॥)

गौरीजं, क्ली, (गौर्य्या जायते इति। जन्+डः।) अभ्रकम्। इति राजनिर्घण्टः॥

गौरीपुत्रः, पुं, (गौर्य्याः पुत्रः।) कार्त्तिकेयः। इति हलायुधः॥

गौरीपुष्पः, पुं, (गौरीप्रियं पुष्पमस्य।) प्रियङ्गुवृक्षः। इति राजनिर्घण्टः॥

गौरीललितं, क्ली, (गौरीव हरिद्रेव ललितम्। पीतवर्णत्वादस्य तथात्वम्।) हरितालम्। इति राजनिर्घण्टः॥

गौरुतल्पिकः, पुं, (गुरुतल्पं गुरुपत्न्यां गुरुपत्नी मित्यर्थः गच्छतीति। "गच्छतौ परदारादिभ्यः।" ४। ४। १। इत्यस्य वार्त्तिं इति ठक्।) गुरुपत्नीगामी। इति प्रायश्चित्तप्रकरणे धर्म्मशास्त्रम॥

गौलिकः, पुं, (गुड़ं साधुः। गुड़+ठक्। डस्य लत्वम्।) शुष्ककटुकः। इति राजनिर्घण्टः॥

गौल्यं, क्ली, (गुड़स्य भावः। गुड़+ष्यञ्। डस्य लत्वम्।) मधुरम्। इति राजनिर्घण्टः॥

गौश्रुतिकः, त्रि, (गोश्रुतमस्यास्तीति। गोश्रुत+"एकगोपूर्व्वाट्ठञ् नित्यम्।" ५। २। ११८। इति ठञ्।) गोश्रुतस्वामी। इति व्याकरणम्॥ याहार एक श्रुतगरु आहे इति भाषा॥

गौष्ठीनं, क्ली, (पूर्व्वं भूतं गोष्ठम्। गोष्ठ+"गोष्ठात् खञ् भूतपूर्व्वे।" ५। २। १८। इति खञ्।) भूतपूर्व्वकगोस्थानम्। इत्यमरः। ३। १। १३॥ पूर्व्वेर गोठ इति भाषा॥ (यथा, भट्टिः। ४। २१।

"तासुवाच स गोष्ठीने वने स्त्रीपुंसभीषणे॥")

ग्रथ, इ ङ ज्ञैप्सायां। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सकं च-सेट्।) रेफयुक्तः। ज्ञैप्सायामिह कुटिलीभावः कुटिलीकरणञ्च। इ, कर्म्मणि ग्रन्थ्यते। ङ, ग्रन्थते काष्ठं कुटिलं स्यादित्यर्थः। ग्रन्थते लतां वायुः कुटिलां करोतीत्यर्थः। इति दुर्गादासः॥

ग्रथितं, त्रि, (ग्रथ्यते स्म इति। ग्रन्थ ग दर्भे+क्तः। ततो न लोपः।) कृतग्रन्थनम्। गाँथा इति भाषा। तत्पर्य्यायः। ग्रन्थितम् २ हृब्धम् ३। इत्यमरः। ३। १। ८६॥ गुम्फितम् ४। (यथा, रघुः। ८। ३४।

"कुसुमैर्ग्रथितामपार्थिवैः सजमातोद्य शिरोनिवेशिताम्॥")

आक्रान्तम्। छिंशितम्। इति मेदिनी। ते। १०६॥

ग्रन्थ, कि ग दर्भे। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-क्रां च-परं-सकं-सेट्।) रेफयुक्तः। दर्भो ग्रन्थनम्। कि, ग्रन्थयति ग्रन्थति। ग, ग्रथ्नाति मालां मालिकः। ग्रन्थिसृग्रथियुं छुरग्रेथ्नः। इति माघे चिन्त्यम्। इति दुर्गादासः॥

ग्रन्थः, पुं, (ग्रन्थ ग दर्भे+भावे घञ्।) गुम्फः। ग्रन्थना। धनम्। (ग्रथ्यते विरच्यते इति। ग्रन्थ+कर्म्मणि घञ्।) शास्त्रम्। (यथा, महाभारते। १। १। ८०।

"ग्रन्थग्रन्थिं तदा चक्रे सुनिर्गूढं कुतूहलात्॥")

द्वाविंशद्वर्णनिर्म्मितिः। अनुष्टुप्छन्दःश्लोकः। इति हेमचन्द्रः॥

ग्रन्थकर्त्ता, [ऋ] त्रि, ग्रन्थं करोतीति। ग्रन्थ+ष्वुल्-प्रत्ययः। ग्रन्थकारः। पुस्तककारकः। शास्त्रकृत्॥

ग्रन्थकुटी, स्त्री, (ग्रन्थस्य कुटी गृहादिस्थानम्।) लेखस्थानम्। इति त्रिकाण्डशेषः॥

ग्रन्थनं, क्ली, (ग्रन्थ+भावे ल्युट्।) गुम्फनम्। ग्रन्थना। तत्पर्य्यायः। सन्दर्भः २ रचना ३ गुम्फः ४ ग्रन्थनम् ५। इति हेमचन्द्रः। ३। ३१७॥

ग्रन्थना, स्त्री, (ग्रन्थ+भावे युच्। स्त्रियां टाप्।) ग्रन्थनम्। इति मुग्धबोधम्॥

ग्रन्थिः, पुं, (ग्रन्थ ग सन्दर्भे+"खनिकष्यञ्जिभ्रसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च।" उणा०। ४। १३६। इति भावकरणादौ यथायथं इः।) वंशादिसन्धिः। गाँठि इति भाषा। तत्पर्य्यायः। पर्व्व २ परु ३। इत्यमरः। २। ४। १६२॥ काण्डसन्धिः ४। (यथा, आर्य्यासप्तशत्याम्। १६८।

"इक्षोरिव सुन्दरि! मानस ग्रन्थिरपि काव्यः॥")

भद्रमुस्ता। हिंतालवृक्षः। पिण्डालुः। इति राजनिर्घण्टः॥ (अन्योन्याध्यासः। मायापाशः। यथा, भागवते। १। ६। २१।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ॥")
कौटिल्यम्। ग्रन्थिपर्व्वतुल्यः। (यथा, चरके
सूत्रस्थाने त्रितीयेऽध्याये।
"मनःशिला वत्सकुटजात् सकुष्ठः
सलोमशः सैड्गजः करञ्जः।
ग्रन्थिश्च भौर्ज्जः करवीरमूलं
चूर्णानि साध्यानि तुषोदकेन ॥")
बन्धनम्। रोगभेदः। इति मेदिनी। धे। ६ ॥
तस्य निदानसंप्राप्ती यथाह माधवकरः।
"वातादयो मांसमसृक्प्रदुष्टाः
सन्दूष्य मेदाश्च तथा शिराश्च।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
तस्य वातिकरूपं यथा,—
"आयम्यते वृश्चति तुद्यते च
प्रभज्यते मथ्यति भिद्यते च।
क्षामो रुदुर्व्वस्तिरिवातत्रश्च
भिन्नः स्रवेच्चानिलजेऽसमक्षम् ॥"
पैत्तिकरूपं यथा,—
"दंदह्यते धूप्यति चुप्यते च
पाप्यते प्रज्वलतीव चापि।
रक्तः सपीतोऽथवापि पित्तात्
भिन्नः स्रवेदुष्णमतीव चासम् ॥"
श्लैष्मिकरूपं यथा,—
"श्वेतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत्संहननोपपन्नः।
चिराभिवृद्धिश्च कफप्रकोपा-
च्छ्लिग्नः स्रवेच्छुक्लघनञ्च पूयम् ॥"
(अथास्य ससम्प्राप्तिकलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगामलाः।
वृत्तोन्नतं यं श्वयथुं सग्रन्थिर्ग्रथनात् स्मृतः ॥
दोषासृमांसमेदोऽस्थि शिराव्रणभवा नव।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ॥
स्थानात् स्थानान्तरगतिरकस्माद्वानिवृद्धिमान्।
रुदुर्व्वस्तिरिवानद्धो विभिन्नोऽच्छस्रवत्यरुक् ॥
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम्।
भिन्नोऽसृग्यं स्रवति श्लेष्मणा नीरुजो घनः ॥
श्वेतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम्।
दोषैर्दुष्टेऽस्थि ग्रन्थिर्भवेन्मूर्च्छतुसु जन्तुषु ॥
शिरामांसञ्च संश्रित्य सस्रावः पित्तलक्षणः।
मांसलैर्दूषितं मांसाहारैश्च ग्रन्थिमावहेत् ॥
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम्।
प्रवृद्धं मेदुरैर्मेदोनीतं मांसेऽथवा त्वचि ॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं रुदु चलम्।
श्लेष्मतुल्याकृतिं देहच्यवदृद्धिश्चयोदयम् ॥
स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत्।
अस्थिभङ्गाभिघाताभ्यासुप्ततावनतन्तु यत् ॥
सोऽस्थिग्रन्थिः पदान्ते च सहसाभोऽवगाहनात्।
आयामाङ्गा प्रतान्तस्य शिराजालं सशोणितम् ॥
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च।
निष्पुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ॥
अरूढे रूढमात्रे वा व्रणे सर्व्वरसाग्निः।
सार्द्रे वा वत्मरहिते गात्रेऽन्याभिहतेऽथवा ॥
वातासमसुतं दुष्टं संशोष्य ग्रथितं व्रणम्।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥
साध्या दोषासमेदोजा न तु स्नूलखरास्थलाः।
मर्म्मकण्ठोदरस्थाश्च————————॥"
इति वाभटेनोत्तरस्थाने २६ अध्याये उक्तम् ॥)
तस्य चिकित्सा यथा,—
"स्वर्ज्जिकामूलकक्षारः गृध्रचूर्णसमन्वितः।
एतेन विहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्कास्य तं ग्रन्थिचिकित्सकेन।
ज्ञात्वादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च सन्धिकित्सेत् ॥
ग्रन्थीनुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत्।
शिराग्रन्थिं विहायान्ये शेषे ग्रन्थं प्रयुञ्जते ॥
अन्ये आचार्य्याः।" इति भावप्रकाशः ॥
("ग्रन्थिष्वाभेषु कर्त्तव्या यथास्वं क्रोफवत् क्रिया।
दहतीचिचकवाह्रीकणासिद्धेन सर्पिषा ॥
स्नेहयेच्छुद्धिकामश्च तीक्ष्णैः शुद्धस्य लेपनम्।
संस्वेद्य बहुशो ग्रन्थिं विस्रंसीयात् पुनः पुनः ॥
एष वाते विशेषेण क्रमः पित्तासृजे पुनः।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ॥
तथाप्यपक्वं क्षित्त्वैनं स्थितं रक्तेऽग्निना दहेत्।
साध्यग्रेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥
मांसव्रणोक्तवौ ग्रन्थौ पाटयेदेवमेव च।
कार्य्यं मेदोभवेऽप्येतत्तैः फालादिभिश्च तम् ॥
प्रन्थ्याक्तिलदिग्धेन क्षुण्णं द्विगुणवाससा।
ग्रन्थेश्च पाटयित्वा वा दहेन्मेदसि दृढ़ृते ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरन्तथा।
उपनाहोऽनिलहरैर्वस्तिकर्म्मशिराव्यधः ॥
अङ्गैकदेशेष्वनिलादिभिः स्यात्
स्वरूपधारी स्फुरणः शिराभिः।
ग्रन्थिर्महान्मांसभवस्त्वनर्त्ति-
र्मेदोभवः स्निग्धतमश्चलश्च ॥
तं शोधितं स्वेदितमग्निकाष्ठैः
साङ्गुष्ठदर्व्विर्विनयेदपक्वम्।
विपाच्य चोद्धृत्य भिषक् सकोषं
ग्रन्थेश्च दग्ध्वा व्रणवच्चिकित्सेत् ॥
अदग्ध ईषत् परिशोधितश्च
प्रयाति भूयोऽपि घनैर्विवृद्धिम्।
तस्मादशेषः कुशलैः समन्ता-
च्छेद्यो भवेद्ग्रीव्य शरीरदेशान् ॥
शोषे क्षते पाकवशेन शीर्य्येत्
ततः क्षतोत्थः प्रसरेद्विसर्पः।
उपद्रवं तं प्रतिवारयेज्ज्ञः
स्नेहैर्भयजैः पूर्व्वतरैर्यथोक्तैः ॥
ततः क्रमेणास्य यथाविधानं
व्रणं व्रणज्ञस्त्वरया चिकित्सेत् ॥"
इति चरके चिकित्सास्थाने १७ अध्यायः ॥
अपरा चिकित्सा च यथा,—
"ग्रन्थिष्वथामेषु भिषग्विदध्या-
च्छोफक्रियाया विहितं विधिज्ञः।
रक्तेऽलक्तापि वरस्य गिल्यं
तद्रक्षितं व्याधिबलं निहन्ति ॥
तैलं पिबेत् सर्पिरथो घृतं वा
दत्त्वा वसां वा क्षितं विदध्यात्।
अपेहि वातादग्रमूलसिद्धं
वैद्यश्चतुःस्नेहमथो घृतं वा ॥
हिंस्राश्च रोहिण्यन्तस्थ भार्गी
श्योनाकविल्वागुरुबल्वजगन्धाः।
गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्या-
त्तथा प्रसिद्धागपरांश्च लेपान्।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य विस्रावकनरेन्द्रतोयैः ॥
तिलैः सपद्माङ्कुरपञ्चमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः।
सुखं व्रणं वाप्युपरोपयेयु-
स्तैलेन राज्ञा सवलान्वितेन ॥
विड्ङ्गयष्टीमधुकाम्रताभिः
सिद्धेन वाक्षीरसमन्वितेन।
जलौकसः पित्तकृते हितासु
क्षीरोदकाद्यां परिवेचनञ्च ॥
काकोलिवर्गस्य च घृतानि
पिबेत् कषायाणि सशर्करादि।
दार्व्वारसेनेक्षुरसेन वापि
चूर्णं पिबेच्चापि हरीतकीनाम् ॥
मधूकजम्बूर्ज्जुनवेतसानां
त्वग्भिः प्रदाहानवचारयेत।
सशर्करैर्वा त्वगमूत्यकन्दै-
र्दिग्धादभीक्ष्णं मुचुकुन्दजैर्व्वा ॥
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायेण वनस्पतीनाम्।
तिलैः सयष्टीमधुकैर्विशोध्य
सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥
कृतेषु दोषेषु यथानुपूर्व्वया
ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु।
स्निग्धस्य विस्रावणमेव कुर्य्या-
दक्षुण्णलोष्ठोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकजङ्घा
काकादनी तापसवृक्षमूलैः।
आलेपयेत् पिच्छिलार्कभार्गी
करञ्जकाजामदनैश्च विद्वान् ॥
अमर्म्मजातं व्रणमप्रयात-
मपक्वमेवापहरेद्विदार्य्य।
दहेत् स्थिते वास्रजि सिद्धकर्म्मा
सद्यः क्षतोक्तञ्च दिधिं विदध्यात् ॥
या मांसकन्दः कठिना दृढ़ाख्या
साध्येव योज्यश्च विधिर्विधिज्ञैः।
ग्रन्थेश्च यापाद्य सुपक्वमाशु
प्रक्षालयेत् पथ्यतमैः कषायैः ॥
संशोधनैश्चैव विशोधयेयुः
क्षारोत्तरैः क्षौद्रघृतप्रगाढ़ैः।

मुद्गे च तैलं लवणारजीयं
विड़ङ्गपाठारजनीविपक्वम् ॥
मेदः ससुत्थे तिलकल्कदिग्धं
दत्त्वोपरिष्टाद्दिगुणं पटान्तम्।
हुताशतप्तेन सुहृः प्रलेप्या-
लोहेन धीमान् दहनं हिताय ॥
प्रलिप्य दार्व्वीमथ लाक्षया वा
प्रतप्तया खेदनमस्य कार्य्यम्।
निपात्य वा शुष्कमपोह्य मेदो-
दहेत् सुपक्वन्त्वथवा विदार्य्यम् ॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः
सुवर्षिकाद्यैर्हरितालमिश्रैः।
सक्षौद्रघृतैः क्षौद्रघृतप्रगाढ़ैः
क्षारोत्तरैरेनमभिप्रलोथ्य ॥"

इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

ग्रन्थिकं, क्ली, (ग्रन्थिभिः कायति प्रकाशते इति। कै+कः।) पिप्पलीमूलम्। (अस्य पर्य्यायो यथा,
"ग्रन्थिकं पिप्पलीमूलसुषवं चटकाग्निरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ग्रन्थिपर्णम्। गुग्गुलुः। इति मेदिनी। रे। ६॥

ग्रन्थिकः, पुं, (ग्रन्थिभिः पर्व्वभिः कायतीति। ग्रन्थि+कै+कः।) करीरः। (ग्रन्थिना कौटिल्येन कायतीति। कै+कः। यद्वा ग्रन्थः पक्षिकाख्यासक्तोति उन्।) देवनः। (यथा, महाभारते। १४। ७०। ७।
"तत्र मल्ला नटाश्चैव ग्रन्थिकाः सौखशायिकाः।
स्तुतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्द्दनम् ॥")
सङ्घदेवाख्यपाखण्डः। इति मेदिनी। के। ८१॥
(नकुलश्च। इयमाख्या तु यदानेन छद्मरूपिणा विराटगृहे वासः कृतस्तदैव जाता। यथा, महाभारते। ४। ३। २।
नकुल उवाच।
"ग्रन्थवन्धो भविष्यामि विराटनृपतेरहम्।
सर्व्वथा ज्ञायतां राज्ञः कुशलः परिरक्षणे।
ग्रन्थिको नाम नाम्नाहं कर्म्मैतत् सुप्रियं मम॥")

ग्रन्थितं, त्रि, (ग्रन्थ्यते स्म इति। ग्रथि+क्तः।) ग्रथितम्। इत्यमरः। ३। १। ८६॥

ग्रन्थिदला, स्त्री, (ग्रन्थिर्दलेषु पर्व्वसु यस्याः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिदूर्व्वा, स्त्री, (ग्रन्थिबहुला दूर्व्वा। शाकपार्थिवादित्वात् समासः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिपर्ण, क्ली, (ग्रन्थिषु पर्णानि यस्य। ग्रन्थि प्रचुराणि पर्णानि यस्येति वा।) वृक्षविशेषः। गोंदियाला इति भाषा॥ तत्पर्य्यायः। शुक्लम् २ दर्भपुष्पम् ३ स्रौणेयम् ४ कुक्कुरम् ५। इत्यमरः। २। ४। १३२॥ बर्हिःपुष्पम् ६ बर्हिः ७ पुष्पम् ८ बर्हम् ९ शुकबर्हम् १०। इति तट्टीका॥ स्रौणेयकम् ११ कुशपुष्पम् १२ गुत्यकम् १३। इति रत्नमाला॥ विशीर्षाख्यम् १४ खारामगुल्फकम् १५ बर्हिः १६ शुकपुच्छम् १७ शुकच्छदम् १८। इति शब्दार्णवः॥ शाल्यकम् १९ काकपुष्पम् २० नीलपुष्पम् २१ सुगन्धम् २२ तैलपर्णकम् २३। अस्य गुणाः। तिक्तत्वम्। तीक्ष्णत्वम्। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। लघुत्वम्। कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च। इति भावप्रकाशः॥ अस्य क्षेपनगुणः। रूक्षतालक्ष्मीराक्षसज्वरनाशित्वम्। इति राजवल्लभः॥

ग्रन्थिपर्णः, पुं, (ग्रन्थिः पर्व्व तत्प्रचुराणि पर्णान्यस्य।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (चोरकशब्दे अस्य गुणादयो ज्ञेयाः॥)

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण+टाप्।) जतुकालता। इति राजनिर्घण्टः॥

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण+गौरादित्वात् ङीष्।) गण्डदूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिफलः, पुं, (ग्रन्थियुक्तं फलमस्य।) आकुलवृक्षः। कपित्थवृक्षः। मदनवृक्षः। इति राजनिर्घण्टः॥

ग्रन्थिमत्फलः, पुं, (ग्रन्थिरस्यास्तीति मतुप्। ग्रन्थिमत् पर्व्वविशिष्टं फलं यस्य।) लकुचः। इति राजनिर्घण्टः॥

ग्रन्थिमान्, [त्] पुं, (ग्रन्थिरस्यस्यास्मिन् वा। ग्रन्थि+मतुप्।) अस्थिसंहारकवृक्षः। हाड़भाङ्गा इति हाड़जोड़ा इति च भाषा। तत्पर्य्यायः। अस्थिसंहारी २ वज्रवल्ली ३ अस्थिशृङ्खला ४। अस्य गुणाः। वातश्लेष्मरक्तमिदुर्नामनाशित्वम्। अस्थियोजकृत्वम्। उष्णत्वम्। सारकत्वम्। अम्लरोगपित्तकारित्वम्। रूक्षत्वम्। स्वादुत्वम्। लघुत्वम्। वृष्यत्वम्। प्राचनत्वञ्च। इति भावप्रकाशः॥ रत्नमालोक्तपर्य्यायाः राजवल्लभोक्तगुणाश्चास्थिसंहारशब्दे द्रष्टव्याः॥
(ग्रन्थियुक्ते, त्रि। यथा, कुमारे। ३। ४६।
"कण्डप्रभासङ्गविशेषनीलां
कृष्णत्वचं ग्रन्थिमतीं दधानम्॥")

ग्रन्थिमूलं, क्ली, (ग्रन्थिर्मूले यस्य।) शृङ्गवेरम्। इति राजनिर्घण्टः॥

ग्रन्थिमूला, स्त्री, (ग्रन्थिबहुलं मूलं यस्याः। शाकपार्थिवादित्वात् समासः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिलं, क्ली, (ग्रन्थिर्विद्यतेऽस्य। ग्रन्थि+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥ आर्द्रकम्। इति शब्दचन्द्रिका॥

ग्रन्थिलः, पुं, (ग्रन्थिरस्यास्तीति। "सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) विकङ्कतवृक्षः। वँइचि इति भाषा॥ (पर्य्यायोऽस्य यथा,—
"विकङ्कतः सुवाहुचो ग्रन्थिलः खादुकण्टकः।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
करीरवृक्षः। इत्यमरः। २। ४। ३०, ७७॥ तण्डुलीयशाकम्। हितावली। पिण्डालुः। चोरकनामगन्धद्रव्यम्। विकङ्कटवृक्षः। इति राजनिर्घण्टः॥ ग्रन्थियुक्ते त्रि। इति मेदिनी। ले। ८५॥

ग्रहः
(यथा, आर्य्यासप्तशत्याम्। ५००।
"रोषेणैव मया सखि! वक्रोऽपि ग्रन्थिलोऽपि कठिनोऽपि।
ऋजुतामनीयतायं सदः स्वेदेन वंशः इव॥")

ग्रन्थिला, स्त्री, (ग्रन्थिल+टाप्।) भद्रमुस्ता। (भद्रमुस्तशब्देऽस्या गुणादिकं ज्ञातव्यम्॥) मालादूर्व्वा। गण्डदूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिवर्द्धी, [न्] पुं, (ग्रन्थिर्भिर्वर्द्धते इति। वृह वृद्धौ+णिनिः।) ग्रन्थिपर्णवृक्षः। इति शब्दचन्द्रिका॥

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति परस्तत्कुटिलतां कार्य्यजटिलतां वा विभेदयतीत्यर्थः। ग्रन्थि+हृ+अच्।) अमात्यः। मन्त्री। इति त्रिकाण्डशेषः॥

ग्रन्थीकं, क्ली, (ग्रन्थिभिः कायतीति। ग्रन्थि+कै+कः। निपातनात् दीर्घत्वम्।) ग्रन्थिकम्। पिप्पलीमूलम्। इति द्विरूपकोषः॥

ग्रस, उ ङ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। उ, ग्रसित्वा ग्रस्त्वा। ङ, ग्रसते। हिंसायामपि ग्रसते। इति माधवः। इति दुर्गादासः॥

ग्रस, कि ग्रासे। इति कविकल्पद्रुमः॥ (चुरां—पक्षे भ्वां-परं सकं सेट्।) रेफयुक्तः। कि, ग्रासयति फलं लोकः। ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय। इमं ग्रहणे पठन्ति केचित्। इति दुर्गादासः॥

ग्रस्तं, त्रि, (ग्रस्यते स्म इति। ग्रस+क्तः। "ग्रस्य विभाषा।" ७। २। १५। इति इड्भावः।) सुप्तवर्णपदम्। असम्पूर्णवाक्यम्। सुक्तम्। (यथा, रामायणे। २। ४२। १२।
"राज्ञो नातिबभौ रूपं ग्रस्तस्येवांशुमतो यथा॥")
खादितम्। इत्यमरः। १। ६। २०॥ (आक्रान्तम्। यथा, याज्ञवल्क्ये। ३। २४४।
"दीर्घतीव्रामयग्रस्तं ग्राम्यधर्म्मैरपीडितम्॥")

ग्रह, म च ग्रहणे। इति कविकल्पद्रुमः॥ (क्र्यां-उभं-सकं-सेट्।) ग च, गृह्णाति गृह्णीते। इति दुर्गादासः॥

ग्रह, ऊ कि च आदाने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) ऊ, अग्रहीत् अग्राहीत्। कि, ग्राहयति ग्रहति। एष कादिरेव मन्यते तत्राप्यात्मनेपदी एव। इति दुर्गादासः॥

ग्रहः, पुं, (गृह्णाति गतिविशेषानिति। यद्वा, गृह्णाति फलदानत्वेन जीवानिति। ग्रह+"विभाषा गृहः।" ३। १। १४३। इति पक्षे क्यप्।) सूर्य्यादिनव। यथा। रविसोममङ्गलबुधबृहस्पतिशुक्रशनिराहुकेतवः। (उक्तञ्च,—
"सूर्य्यचन्द्रौ मङ्गलश्च बुधश्चापि बृहस्पतिः।
शुक्रः शनैश्चरौ राहुः केतुश्चेति नव ग्रहाः॥"
"लोकानग्नीन् स्वरान् धातून् सुरान् ऋषीन् ऋतूंस्तथा।
ग्रहानपि।
समिधः सप्त सङ्ख्याताः सप्तजिह्वा हविर्भुजः॥"

इत्यनेन ग्रहाणां यत् सप्तत्वमुक्तं तत् वराहमतानुसारेणोक्तत्वमवधेयम्। एतेन राहुकेत्वोर्ग्रहत्वं सर्व्वे नाद्रियन्ते इति सूचितम्॥) तेषामूर्ध्वा गतिर्यथा। वक्रा १ अतिवक्रा २ कुटिला ३ मन्दा ४ मन्दतरा ५ समा ६ शीघ्रा ७ शीघ्रतरा ८। इति ज्योतिषम्॥ तेषां ध्यानानि यथा। तत्र सूर्य्यस्य ध्यानम्।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्। पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम्॥ शिवाधिदेवतं सूर्य्यं वह्निप्रत्यधिदेवतम्॥" *॥

सोमस्य ध्यानम्।

"सासृजं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम्। श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्॥ दशाश्वं श्वेतपद्मस्थं विश्वेदेवाधिदेवतम्। जलप्रत्यधिदेवञ्च सूर्य्यास्यमाकृतेस्तथा॥" *॥

मङ्गलस्य ध्यानम्।

"आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्। आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम्॥ दक्षिणोर्द्ध्वक्रमाच्छक्तिवराभयगदाकरम्। आदित्याभिमुखं देवं तद्वदेव समाकृतेत्॥ स्कन्दाधिदेवतं भौमं क्षितिप्रत्यधिदेवतम्॥"*॥

बुधस्य ध्यानम्।

"मागधं द्व्यङ्गुलाकृतेयं वैश्यं पीतं चतुर्भुजम्। वामोर्द्ध्वक्रमतश्चर्म्मगदावरदखड्गिनम्॥ सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाकृतेत्। नारायणाधिदेवञ्च विष्णुप्रत्यधिदेवतम्॥" *॥

बृहस्पतेः ध्यानम्।

"द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम्। ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम्॥ दक्षोर्द्ध्वदक्षवरदकरकादक्षमाकृतेत्। ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदेवतम्॥" *॥

शुक्रस्य ध्यानम्।

"शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्। पद्मस्थमाकृतेत् सूर्य्यसुखं श्वेतं चतुर्भुजम्॥ सदाक्षवरकरकादक्षहस्तं सिताम्बरम्। शुक्राधिदेवतं ध्यायेत् शुचीप्रत्यधिदेवतम्॥"*॥

शनेर्ध्यानम्।

"सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्। कृष्णं कृष्णाम्बरं शूलमृगस्थं सौरिं चतुर्भुजम्॥ तदद्वामवरं शूलमधोहस्तं समाकृतेत्। यमाधिदेवतं प्राजापतिप्रत्यधिदेवतम्॥" *॥

राहोर्ध्यानम्।

"राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्। कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाकृतेत्॥ चतुर्भ्यां खड्गवरशूलचर्म्मकरन्तथा। कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदेवतम्॥" *॥

केतूनां ध्यानम्।

"कौशद्वीपं केतुगयं जैमिनीयं षडङ्गुलम्। धूम्रं ध्वजगतं शूद्रमाकृतेदिङ्मुखाननम्॥ सूर्य्यास्यं ध्वजवसनं वरदं गदिनं तथा। चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदेवतम्॥"

इति यज्ञयागतत्त्वम्।

तेषां कामरूपे स्थानानि ध्यानमन्त्रादिञ्च यथा,

"पूर्व्वं सुमदनायास्तु ब्रह्मक्षेत्रस्य पश्चिमे। महापीठं यत्र देव आदित्यः सततं स्थितः॥ भैरवस्य हितार्थाय यदा सर्व्वे सुराः स्थिताः। कामरूपे महापीठे ब्रह्मेन्द्रवरुणादयः॥ तदा तत्त्वाकृये शैले श्रीसूर्य्योऽपि व्यवस्थितः। चित्रोता नाम तस्यास्ति नदी पूर्व्वदिग्नि स्थिता॥ कापोतं करणं पश्चादृश्यं कुण्डद्वयं स्थितम्। कापोतकुण्डे विधिवत् स्नात्वा करणकुण्डके॥ तत्त्वाचलं समारुह्य संपूज्य च दिवाकरम्। सकृदेव नरो याति भास्करस्य गृहं प्रति॥ सूर्य्यरश्मिसमुद्भूत! कापोत! करणाग्नत!। पुण्यतोय! महाघोरं पापं कापोत! मे हर!॥ इत्यनेन तु मन्त्रेण स्नात्वा कापोतपुष्करे। करणं समुपस्पृश्य तत्त्वशैले रविं यजेत्॥ त्रिविधं ब्रह्मबीजन्तु सहस्रपदमन्ततः। रश्मयेति चतुर्थ्यन्तं देवतायाः शुचेस्ततः॥ अङ्गबीजमिदं प्रोक्तमादित्यस्यातिकामदम्॥" ध्यानं यथा,—

"पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वः सप्तरज्जुश्च द्विभुजो भास्करः सदा॥ वर्त्तुलं मण्डलं चास्य अष्टपत्रसमन्वितम्। अङ्गष्ठाद्यङ्गुलीनान्तु हृदादीनां तथा च षट्॥ अङ्गमन्त्रेण संयुक्त उपान्त्यो वह्निसंयुतः। सर्व्वाशासे समुद्दिष्टो मन्त्रः सर्व्वफलप्रदः॥ कृष्णिरस्तु शिखावर्म्मनेत्रास्त्रोदरपृष्ठतः। वाह्वोः प्राण्योर्ज्जङ्घयोस्तु पादयोर्व्यापि विन्यसेत्॥ जघने तु समस्तानि क्रमान्मन्त्राक्षराणि तु। क्रमश्चोत्तरतन्त्रोक्तः पूजनेऽस्य प्रकीर्त्तितः॥ विसर्ज्जनं तथैषाञ्च विद्याद्या दलगह्वयः। निर्म्माल्यधृग्युगच्छो माठरादास्तु पार्श्वयोः॥ बीजमुत्तरतन्त्रस्य पूर्व्वतः प्रतिपादितम्। अनेन विधिना तत्र पूजयित्वा सुरोत्तमम्॥ स कामानखिलान् प्राप्य इह लोके स उत्तमः। सुखी शेषे ततो गच्छेदादित्यस्यालयं प्रति॥१॥"

इति कालिकापुराणे ८० अध्यायः॥

"पूर्व्वे वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः। त्रिकोणस्ताम्रसंकाशस्तदूर्द्ध्वे चन्द्रमण्डलम्॥ द्वितीयवर्णस्याद्यन्तु विन्दिन्दुभ्यामलङ्कृतम्। चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत्॥ अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः। प्रदक्षिणीकरोत्येव दशभिश्चाश्वभिर्युतः॥ तस्यैव पूर्व्वभागे तु सोमकुण्डाकृयं सरः। तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते॥ स्वर्गादवश्च्युतश्चन्द्रः कामाख्यासेवने यदा। तदा तद्रश्मिसङ्घातनिःसृतास्तोयराशयः॥ तैस्तोयैर्व्वार्त्तसवः कुण्डमकरोदिन्दुचन्द्रयोः। मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि॥ चन्द्ररश्मिसमुद्भूतचन्द्रकुण्ड महोदधे। सुधास्रवश्च साक्षाद त्वं चन्द्र कलुषं हर॥ इत्यनेन तु मन्त्रेण यः स्नात्वा चन्द्रभाग्यसि। चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः॥ अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते। परञ्च चन्द्रभवनं भित्त्वा याति परं पदम्॥"

ध्यानं यथा,—

"श्वेतः श्वेताम्बरधरो दण्डाब्जौ हेममूषितः। गदापाशाङ्किबाहुश्च सर्व्वतो वरदः शुभ्रो॥२॥ पूर्व्वस्यां कर्पटाख्यातु शैलाच्चित्र इति स्मृतः। यः पूर्व्वभागयान्तोऽभूद्दिग्यामेयां व्यवस्थितः॥ पीठस्य ब्राह्मणावस्तु अर्व्वाक् पर्व्वत उच्यते। तस्मिन् वसन्ति सततं ग्रहा राजन्! यथेच्छया॥ तत्र तान् पूजयेद्यस्तु स नाप्नोत्यापदं क्वचित्। रूपं मन्त्रश्च सूर्य्यस्य चन्द्रस्य प्रतिपादितम्। सप्तानामितरेषान्तु मन्त्रं रूपं शृणुष्व मे॥ रक्ताम्बरधरः शूली शक्तिमांश्च गदाधरः। चतुर्भुजो मेषरथो वरदो मङ्गलो मतः॥३॥ पीताम्बरधरः शूली पीतमाल्यानुलेपनः। खड्गचर्म्मगदापाणिः सिंहस्थो वरदो बुधः॥४॥ स्वर्णगौरः पीतवासाः स्वर्णपङ्कजसंस्थितः। मालां कमण्डलुं दण्डं वामेन वरदायकम्॥ चतुर्भुजं सुसम्पन्नं चिन्तयेद्देवतीर्थकम्। सर्व्वैर्देवगणैर्नित्यं नम्यमानं मनोहरम्॥५॥ शुक्लवस्त्रं शुक्लवर्णं शुक्लनागोपरिस्थितम्। चतुर्भुजं पाद्ममालां पुस्तकञ्च वराभये॥ क्रमाद्दक्षिणवामाभ्यां धत्ते दैत्यगुरुः सदा॥६॥ इन्द्रनीलनिभः शूली वरदो गृध्रवाहनः। पाशचाससनधरो ध्यातव्योऽर्कसुतः सदा॥७॥ कामदेवस्य बीजन्तु मन्त्रं भौमस्य कीर्त्तितम्। मं। दुर्गाया नेत्रबीजस्य यत्तु मध्याक्षरं शुभम्। तन्मन्त्रं शृणुपुत्रस्य सर्व्वकामफलप्रदम्॥ बु॥ भकारपञ्चमो यस्तु चतुर्थस्वरसंयुतः। गणेशबीजं तदिदं गुरोर्म्मन्त्रं प्रकीर्त्तितम्॥ ह॥ बिन्दिन्दुसंयुतश्चापि पूर्व्ववर्णद्वयं पुनः। सप्तमस्वरसंयुक्तो भकारस्त्वादिरन्तरम्॥ प्रान्तवर्णाद्यस्वरन्तु बिन्दिन्दुभ्यां समन्वितम्। भवेच्छुक्रस्य बीजन्तु सर्व्वकामसमृद्धिदम्॥ शु॥ प्रान्तवर्णाद्यस्वरन्तु चन्द्रबिन्दुसमन्वितम्। आद्यमन्त्यस्वरोपेतं तदेवेन्द्वादिसंयुतम्। शनैश्चरस्य मन्त्रोऽयं सर्व्वदोषविनाशनः॥ श॥ बिन्दुचन्द्रसमायुक्तं नामाद्यक्षर एव वा। तेषां सर्व्वग्रहाणां वै मन्त्रसङ्घः प्रकीर्त्तितः॥ शान्तिके पौष्टिके क्षत्रे एभिर्मन्त्रैर्ग्रहानिमान्। पूजयेत् सर्व्वदा धीरो भूतिकामो महामतिः॥ वरदाभयहस्तश्च खड्गचर्म्मधरस्तथा। सिंहासनगतः क्षत्रो राहुर्धीरैः प्रपूज्यते॥८॥ धूम्रवर्णो विशालाक्षः पुच्छरूपी चतुर्भुजः। खड्गचर्म्मगदाबाणपाणिः केतुः शुभासनः॥९॥ उपान्तादिद्वादशेन स्वरेण सहितः पुनः। उपान्तपञ्चमेनेन्दुबिन्दुभ्यां सहितावुभौ॥ मन्त्रोऽयमनुलोमेन राहोः केतोर्विलोमतः। आद्याक्षरं बिन्दुभद्वा मन्त्रमुक्तं तथैतयोः॥१०॥ के

एवं चित्रे शैलवरे पूजयित्वा ग्रहान्। अभीष्टान् लभते कामान्नरः शान्तिं तथोत्तमाम्॥"

इति कालिकापुराणे ८१ अध्यायः॥ *॥

(अथ ग्रहयुत्यधिकारो यथा,—
"तारायग्रहाणामन्योन्यं स्यातां युद्धसमागमौ ।
समागमः शशाङ्केन सूर्य्येणास्तमनं सह ॥
शीघ्रे मन्दाधिकेऽतीतः संयोगो भवितान्यथा ।
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्य्ययात् ॥
प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः ॥
ग्रहान्तरकलाः स्वस्वशुक्तिलिप्तासमाहताः ।
भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः ॥
द्वयोर्वैक्रिययोरेकस्मिन् भुक्तियोगेन भाजयेत् ॥
लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति ।
विपर्य्ययादेकगत्योरेकस्मिंस्तु धनत्ययौ ॥
समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ ।
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते ॥
कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः ।
ततोऽन्तरं साधयित्वा स्वकाक्षयवशात्तयोः ॥
विषुवच्छाययाभ्यस्ताद्विक्षेपाद् द्वादशोद्धृतात् ।
फलं खनतनाड्यैन्दं खदिनार्द्धविभाजितम् ॥
लब्धं प्राच्यामृणं सौम्याद्विक्षेपात् पश्चिमे धनम् ।
दक्षिणे पाक्कपाले खं पश्चिमे तु तथा क्षयः ॥
सक्षिभग्रहजक्रान्तिभागघ्ना विक्षेपलिप्तिकाः ।
विकलाः खन्नखं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः ॥
नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ।
द्वङ्नोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम् ॥
तात्कालिकौ पुनः कार्य्यौ विक्षेपौ च तयोस्ततः ।
दिक् तुल्ये ऽन्तरं भेदे योगः क्षिप्तं ग्रहान्तरम् ॥
कुजार्किक्षामरेष्याणां त्रिंशद्दर्शार्द्धवर्द्धिताः ।
विष्कम्भार्द्धचन्द्रकर्त्तायां भृगोः षष्टिरुदाहृता ॥
त्रिघ्नतुःकर्णयुक्त्याप्तास्ते क्षिप्तास्त्रिष्वथ हताः ।
स्फुटाः स्वकर्णास्त्रिघ्नाप्ता भवेयुर्मानलिप्तिकाः ॥
छायाभूमौ विपर्य्यस्ते स्वच्छायायेतु दर्शयेत् ।
ग्रहः स्वदर्शनान्तस्थः ग्रहयुद्धे सम्प्रदृश्यते ।
पश्च दक्षोच्छ्रितौ ग्रहौ यथादिग्भ्रमसंस्थितौ ।
ग्रहान्तरेण विच्छिन्नावधो दक्षनिखातगौ ॥
छायाकर्णौ ततो दद्याच्छायाग्राच्छङ्कुमर्द्धगौ ।
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् ॥
स्वशङ्कुमर्द्धगौ योज्यि ग्रहौ दृक्तुल्यतामितौ ।
उल्लेखं तारकाग्रार्द्धदेवे भेदः प्रकीर्त्यते ॥
युद्धग्रंसविमर्द्दाख्यमंशयोगे परस्परम् ।
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदृशः ॥
समागमोऽंशादधिके भवतश्चेद्बलान्वितौ ।
अपसव्ये जितो युद्धे पिहितोऽरुणदीप्तिमान् ॥
रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः ।
उदक्स्थो दीप्तिमान् स्थूलो जयी याम्यपि यो
बली ॥
आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः ।
स्वल्पौ ह्यपि विध्वस्तौ भवेतां कूटविग्रहौ ।
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ।
शशाङ्केनैवमेतेषां कुर्य्यात् संयोगसाधनम् ॥
भावाभावायलोकानां कल्पनेयं प्रदर्शिता ।
समार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः ॥"
इति सूर्य्यसिद्धान्ते ग्रहयुत्यधिकारः ॥
अथ ग्रहाणां राशिविपत्त्यकथनं ग्रहभावप्रकर्षं
यथा,—
"मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाश्रितः ।
बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चन्द्रमाः ॥
स्वाम्नीनधन्विनोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्य्यः कथितो गणकोत्तमैः ॥"
अथ ग्रहाणामुच्चनीचत्वकथनं तत्रैव यथा,—
"रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य तु ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मन्दस्य उच्चनीचावुदाहृतौ ॥"
अथ ग्रहाणामन्योन्यं मित्रशत्रुत्वमाह तत्रैव ।
"रवीन्दुभौमगुरवो मित्रशुक्रशनिराहवः ।
स्वस्मिन् मित्राणि चत्वारि परस्मिन् शत्रवः
स्मृताः ॥
राहुरवोः परं वैरं गुरुभार्गवयोरपि ।
हिमांशुबुधयोर्वैरं विवस्वन्मन्दयोरपि ॥"
अथ ग्रहाणां प्रभातादिकालज्ञानमाह तत्रैव,
"प्रभातमिन्दुजगुरू मध्याह्नं रविभूमिजौ ।
अपराह्णं भार्गवेन्दू सन्ध्या मन्दशनैश्चरौ ॥"
अथ ग्रहाणां दृष्टिकथनं तत्रैव यथा,—
"तिर्य्यग्दृष्टी बुधसितौ भौमार्कौ योमदर्शिनौ ।
जीवेन्दू समदृष्टी च शनिराहू अधोदृशौ ॥"
अथ ग्रहाणां विचरणस्थानानि तत्रैव यथा,—
"भार्गवेन्दू जलचरौ शनीवौ ग्रामचारिणौ ।
राहुचित्तिजमन्दार्कान् शृणुतेऽरण्यचारिणः ॥"
अथ ग्रहाणां प्रित्तादिधातुज्ञानमाह तत्रैव,
"पित्तं प्रभाकरश्चन्द्रौ श्लेष्मा भार्गवशीतगू ।
शनिगुरू समधातू च पवनौ राहुमन्दगौ ॥"
अथ ग्रहाणां रसज्ञानमाह तत्रैव ।
"कुजार्की कटुकौ जीवो मधुरस्तुवरो बुधः ।
चारज्ञौ चन्द्रशुक्रौ तीक्ष्णौ सर्पार्कनन्दनौ ॥"
अथ ग्रहाणां धातुमूलादिचिन्ताज्ञानमाह ।
"मन्देन्दूरगभौमाः क्षुधर्तुः सवित्तभार्गवौ ।
मूलं जीवश्च सौम्यश्च जीवं प्राहुर्महाधियः ॥"
अथ ग्रहाणां पदज्ञानमाह तत्रैव ।
"त्रिपदौ भार्गवगुरू भूपुत्रार्कौ चतुष्पदौ ।
पक्षिणौ बुधशौरी च चन्द्रराहू सरीसृपौ ॥"
अथ ग्रहाणां जातिविशेषमाह ।
"विप्रौ शुक्रगुरू क्षत्रौ कुजार्कौ शूद्र इन्दुजः ।
इन्दुर्वैश्यः स्मृतौ म्लेच्छौ सैंहिकेयशनेश्चरौ ॥"
अथ ग्रहाणां देहादीनां स्वरूपमाह ।
"स्थूल इन्दुः सितः पद्मः चतुरस्रौ कुजो भृगुः ।
वर्त्तुलौ सोमधिषणौ दीर्घौ शनिसुतज्ञमौ ॥"
अथ ग्रहाणां वर्णस्वरूपमाह तत्रैव ।
"रक्तवर्णः कुजः प्रोक्तो धिषणः कनकद्युतिः ।
शुक्लपिङ्गसमः सौम्यो गौरकान्तिरथोऽगुरुः ॥
मन्दारस्यार्कपुष्पस्य समद्युतिरुशन्नुरुः ।
कविरत्यन्तधवलः फणी कृष्णः शनिस्तथा ॥"
ग्रहाणां धातुचिन्तामाह तत्रैव ।
"शुक्रे चन्द्रे भवद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमुच्यते ॥
भौमे ताम्रः शनौ लौहं राहावभ्राणि कीर्त्तयेत् ।
धातोर्विनिश्चये ज्ञाते विशेषः स्यादुदाहृतः ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदाश्मानमिष्टकानिचयो बुधे ॥
भृगौ स्थानं कुजे प्रोक्तं शनिराहू च वाह्यभूः ।
अमीभिर्हि वुकस्थाने नरभूमिं विलोकयेत् ॥"
अथ ग्रहाणां लिङ्गज्ञानमाह तत्रैव ।
"जीवमङ्गलमार्त्तण्डाशुशुक्रा पुरुषान् बुधाः ।
सोमसोमजमन्दा हि भृगुपुत्रास्तु योषितः ॥"
अथ ग्रहाणां वयोज्ञानमाह तत्रैव ।
"युवा कुजः शिशुः सौम्यः शशिशुक्रौ च मध्यमौ ।
मन्दभार्गण्डदेवेज्यफणिनः स्थविरा ग्रहाः ॥"
अथ ग्रहाणां प्रकृतिस्वरूपमाह तत्रैव ।
"भौमभन्दार्कभोगीन्द्राः प्रकृत्या दुःखदायकाः ।
शशिगुरुश्वेतकिरणशुक्राः सुखकराः सदा ॥"
अथ ग्रहाणां राशिभोगकालनिरूपणं यदुक्तं ज्योतिषे ।
"रविर्मासं निशानाथः सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चत्वारिंशद्दिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं सभांशुः सार्द्धवत्सरम् ॥"
ग्रहाणां स्तुत्यादिकन्तु नवग्रहशब्दे द्रष्टव्यम् ॥)
तेषां दशा तत्फलादि च दशाशब्दे गरुड़-
पुराणे ६० अध्याये च द्रष्टव्यम् । * ॥
अथ नवग्रहयागविधानादि यथा,—
याज्ञवल्क्य उवाच ।
"श्रीकामः शान्तिकामो वा ग्रहयागपरोभिचार-
वान् ।
ग्रहयज्ञं समं कुर्य्यात् ग्रहाश्चैते बुधैः स्मृताः ॥
सूर्य्यः सोमो मङ्गलश्च बुधश्चैव बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुः कुर्य्यात् ग्रहांस्तथा ॥
ताम्रकात् स्फटिकाद्रक्तचन्दनात् खर्जकादुभौ ।
रजतादयसः सीसात् कांस्यात् वर्णान् निबोधत ॥
रक्तः शुक्लस्तथा रक्तः पीतः पीतः सितोऽसितः ।
कृष्णः कृष्णः क्रमाद्वर्णा द्रव्याणि सुनयेत्ततः ॥
स्थापयेद्ग्रहवर्णानि होमार्थं प्रलिखेत् पटे ।
सवर्णानि प्रदेयानि वासांसि कुसुमानि च ॥
गन्धाश्च वलयश्चैव धूपो देयश्च गुग्गुलुः ।
कर्त्तव्यास्तत्र मन्त्रेश्च चरवः प्रतिदेवतम् ॥
आज्यभागेन हुत्वा अभिर्म्हा दिवः ककुत् ।
उदुत्यश्चेति जुहुयाद्गुरिव यथाक्रमम् ॥
दृष्टस्तेऽतियदर्य्येति सर्व्वेऽन्नात् परिसुतः ।
अग्नो देवीस्ततः काण्डात् केतुं कृन्वन्निति क्रमात् ॥
अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः ।
औदुम्बरः शमी दूर्वा कुशश्च समिधः क्रमात् ॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ।
गुड़ौदनं पायसञ्च हविष्यं क्षीरयष्टिकम् ॥
दध्योदनं हविः पूपाश्चांसं चित्रान्नमेव च ।
दद्यादृग्यजुषामादेतान् ग्रहेभ्यो भोजनं ततः ॥
धेनुः शङ्खस्तथावस्त्रं हेम वासो वृषस्तथा ।
छत्रं गौरायसश्चाग्न एता वै दक्षिणाः क्रमात् ॥
ग्रहाः पूज्याः सदा यस्माद्राज्यादि प्राप्यतेफलम् ॥"
इति गारुड़े १०१ अध्यायः ॥

अथ वेदभेदे ग्रहादीनां मन्त्रभेदाः क्रमशः प्रदर्श्यन्ते ।

	ऋग्वेदिनाम्	यजुर्वेदिनाम्	सामवेदिनाम्	अथर्ववेदिनाम्
सूर्यस्य	आ कृष्णेन रजसा ।१।३५।२	आ कृष्णेन रजसा। वा: ३३।४३	उदु त्यं जातवेदसम् १।१।१।३।११*	विषासहिं सहमानम् १७।१।१
सोमस्य	आ प्यायस्व समेतु ते १।९१।१६	इमं देवा असपत्नम्। वा: ९।४०	सन्ते पयांसि । वा: १२।११३†	ग्रक्रधूमं नक्षत्राणि ६।१२८।१
मङ्गलस्य	अग्निर्मूर्द्धा दिव: ८।४४।१६	अग्निर्मूर्द्धा दिव: । वा: १५।२०	अग्निर्मूर्द्धा दिव: १।१।१।३।७	त्वया मन्यो सरथम् ४।३१।१
बुधस्य	अग्ने विवस्वत् १।४४।१	उद्बुध्यस्वाग्ने। वा: १५।५४	अग्ने विवस्वत् १।१।१।४।६	यदाचानो विमनस्त: ३।२९।१
बृहस्पते:	बृहस्पते परि दीया १०।१०३।४	बृहस्पते अतियदर्य्य:। वा: २९।३	बृहस्पते परि दीया २।९।३।२।१‡	बृहस्पतिर्न: परियातु ७।५२।१
शुक्रस्य	शुक्रं ते अन्यत् ९।५८।१	अन्नात् परिस्रुत:। वा: १९।७५	शुक्रं ते अन्यत् १।१।२।३।३	हिरण्यवर्णा: शुचय: १।३३।१
शनैश्चरस्य	अग्नेर्वोदेवीरभीष्टये १०।९।४	अग्नो देवीरभीष्टये । वा: ३९।१२	अग्नो देवीरभीष्टये १।१।१।३।१३	सहस्रबाहु: पुरुष: १९।९।१
राहो:	कया नश्चित्र: ४।३१।१	काण्डात् काण्डात्। वा: १३।२०	कया नश्चित्र: १।२।२।३।५	दिवं चित्रन्तुषा:
केतो:	केतुं कृण्वन्नकेतवे १।६।३	केतुं कृण्वन्नकेतवे। वा: २९।३७	केतुं कृण्वन्नकेतवे २।९।३।१२।३	यस्ते पृथु: स्तनयित्नु: ७।११।१
सूर्यादिदेवेश्वरस्य	आ वो राजानम् ४।३।१	आमन्त्रं यजामहे। वा: ३।६०	आ वो राजानम् १।१।२।२।७	मानो विदन् विधाधिन:।१।९।१
सोमाधिदेवो-माया:	गौरीर्मिमाय १।१६४।४१	श्रीणते अप्शीच । वा: ३१।२२	आपो हि ष्ठा २।९।२।१०।१	आपो हि ष्ठा १।५।१
कुजाधिदेव-स्कन्दस्य	कुमारं माता ५।२।१	यदक्रन्द: प्रथमम् । वा: २९।२२	स्योना पृथिवि । वा: ३५।२१	अग्निरिव मन्यो त्विषित:४।३१।२
बुधाधिदेवहरे:	इदं विष्णुर्विचक्रमे १।२२।१७	विष्णोरराटमसि। वा: ५।२१	इदं विष्णुर्विचक्रमे १।३।१।३।९	प्र तद्विष्णु: स्तवते ७।२९।२
जीवाधिदेव-ब्रह्मण:	त्वमित् सप्रथा: ८।९०।५	आ ब्रह्मन् ब्राह्मण:। वा: २२।२२	त्वमित् सप्रथा: १।१।१।४।८	ब्रह्म जज्ञानम् ४।१।१
शुक्राधिदेवेन्द्रस्य	इन्द्रं वो विश्वत: १।७।१०	सजोषा इन्द्र: । वा: ७।३७	इन्द्रमित् देवतातये १।३।२।१।७	इन्द्रेमं प्रतरम् ६।५।२
शन्यधिदेवयमस्य	यमाय सोमं सुनुत १०।१४।१३	यमाय त्वाङ्गिरस्वते। वा: ३८।९	आयं गौ: पृश्नि: २।९।१।१।१	य: प्रथमं व्यतनोदाशसाद१।२८।३
राहुधिदेव-कालस्य	ब्रह्म जज्ञानम् । वा: ।१३।३	कार्ष्णिरसि समुद्रस्य। वा: ९।२८	ब्रह्म जज्ञानम्। १।३।१।३।९	रोहित: काल: १३।२।३९
केत्वधिदेव-चित्रगुप्तस्य	उपो षाजं हि १।४८।११	चित्रावसो स्वस्ति । वा: ३।१८	चित्र इच्छिशो: १।१।२।२।२।	आज्ञातं यदनाज्ञातम्
सूर्यप्रत्यधि-देवाग्ने:	अग्निं दूतं वृणीमहे १।१२।१	अग्निं दूतं पुरोदधे । वा: २२।१७	अग्निं दूतं वृणीमहे १।१।१।१।३	समाव्याग्ने ऋतव: २।९।१
सोमप्रत्यधि-देवजलस्य	अप्सु मे सोम: १।२३।२०	आपो हि ष्ठा। वा: १२।५०	उदुत्तमं वरुण पाशम्। वा:१२।१२	ग्रग्नो देवीरभीष्टये । वा: ३९।१२
कुजप्रत्यधि-देवक्षिते:	स्योना पृथिवि १।२२।१५	स्योना पृथिवि। वा: ३५।२१	पृथिव्यन्तरीक्षम्। ते: आ:७।७।३	भूमे मातर्निधेहि १२।१।६३
बुधप्रत्यधि-देवविष्णो:	सहस्रशृर्षा पुरुष: १०।९०।१	इदं विष्णुर्विचक्रमे । वा: ५।१५	सहस्रशृर्षा पुरुष:। वा: ३१।१	इदं विष्णुर्विचक्रमे ७।२९।४
जीवप्रत्यधि-देवेन्द्रस्य	इन्द्रायेन्दो मरुत्वते ९।६४।२२	इन्द्र आशां नेता । वा: १७।४०	इन्द्रायेन्दो १।५।२।४।६	इन्द्र क्षुधस्व प्र वहा २।५।१
शुक्रप्रत्यधि-देवशच्या:	उत्तानपर्णे सुभगे १०।१४५।२	अदित्ये रास्नासि। वा: १।३०	एकाष्टका तपसो। ऋ: ३।१०।१२	प्रेतं पादौ १।३७।४
शनिप्रत्यधि-देवप्रजापते:	प्रजापते न त्वदृ १०।१२१।१०	प्रजापते न त्वदृ। वा: १०।२०	प्रजापते न त्वदृ। वा: १०।२०	नक्तं जातास्योषधे १।२३।१
राहुप्रत्यधि-देवसर्पाणाम्	अयं गौ: पृश्नि: १०।१८९।१	नमोऽस्तु सर्पेभ्य: । वा: १३।६	तवेन्द्रियावमम् १।३।२।३।८	शेरभक शेरभ २।२४।१
केतुप्रत्यधि-देवब्रह्मण:	ब्रह्म जज्ञानम् । वा: १३।३	ब्रह्म जज्ञानम् । वा: १३।३	एष ब्रह्मा य ऋत्विज: १।५।२।१।२	ये दिशामन्तर्देशेभ्य: ४।४०।८

पाठान्तराणि प्रदर्श्यन्ते.—

* वयमग्नेऽसि १ । ३ । २ । ४ । ४ † सोमं राजानम १ । १ । २ । ५ । १ ‡ बृहद्वयो हि । १ । १ । २ । ३ । ८

(गृह्यते अनुगृह्यते अभ्युपपद्यते इति। ग्रह + "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) अनुग्रहः। निर्बन्धः। (यथा, आर्य्यासप्तशत्याम्। ४४५।

"महति स्नेहे निहितः कुसुमं बहु दत्तमर्चितो बहुशः।
वक्त्रस्तदपि शूनैश्चर इव सखि! दुष्टग्रहो दयितः॥"

"दुष्टो ग्रह आग्रहो यस्य पत्ये दुश्चासौ ग्रहश्चेति विग्रहः।" इति तट्टीका॥) ग्रहणम्। (यथा, भागवते। ३। १५। ३५।

"सद्योहरेरनुचरावुरु विभ्यतुस्तत्-
पादग्रहावपतितामतिकातरेण॥")

रक्षोग्रहः। पूतनादयः। ते तु बालग्रहाः। (एतेषां नामानि विवरणञ्च बालग्रहशब्दे द्रष्टव्यानि॥*॥) सैंहिकेयः। (यथा, रघुः।१२।२८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः॥")

उपरागः। स तु चन्द्रसूर्य्ययोर्ग्रहणम्। इति मेदिनी। हे। ३॥ (यदुक्तं तिथितत्त्वे।

"भक्तिपादान्तरे राहोः केतोर्वा संस्थितो रविः।
चतुर्थ्यादान्तरे चन्द्रस्तदा सम्भवते ग्रहः॥"

ग्रहाणां नवसंख्यात्वेन ग्रहशब्देनापि नवमसंख्या उच्यते। यथा, देवीभागवते। १। ३। ३।

"चतुर्दशसहस्राच्च मातस्तमाद्यं प्रकीर्त्तितम्।
तथा ग्रहसहस्रन्तु मार्कण्डेयं महाद्भुतम्॥"

महादेवः। यथा, महाभारते। १३। १७। ३७।

"चन्द्रः सूर्य्यः शनिः केतुर्बुधो ग्रहपतिर्ब्बरः॥")

ग्रहकल्लोलः, पुं, (ग्रहस्य चन्द्रसूर्य्यादेः कल्लोलः विमर्दक इव।) राहुः। इति त्रिकाण्डशेषः॥

ग्रहणं, क्ली, (गृह्यते इति। ग्रह + भावे ल्युट्।) स्वीकारः। (यथा, हे रामायणे।१।६६।१६।

"नष्टेकुण्डे हरेर्गेहे तस्य धनुष्कोलनेऽपि वा॥"

आदरः। करः। उपलब्धिः। (यथा, रघुः। ३। २८।

"स वृत्तचूलस्य कलाकपक्षकैः
अमात्यपुत्रैः सह शैशवोचितैः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत्॥")

बन्दी। उपरागः। इति मेदिनी। णे ४५॥ (गृह्यन्ते विषया येन। ग्रह + करणे ल्युट्।) इन्द्रियम्। इति राजनिर्घण्टः॥ शब्दः। इति जटाधरः॥ अथ सूर्य्यचन्द्रग्रहणकारणं यथा,—

"भक्तिपादान्तरे राहोः केतोर्वा संस्थितो रविः।
चतुर्थ्यादान्तरे चन्द्रस्तदा सम्भवते ग्रहः॥
यस्मिन्नृक्षे रविस्तस्माच्चतुर्दशगतः शशी।
पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी॥
कृष्णपक्षे तृतीयायां मासार्द्धं यदि जायते।
तदन्त्ययोदशे सूर्य्यो राहुणा ग्रस्यते रविः॥"*॥

ग्रहणकालीनरविचन्द्रयोर्मेघेनाच्छादनाच्छादनकारणं यथा,—

"रविभौमनवांशे तु निरभ्रं ग्रासमादिशेत्।
बुधसौरिनवांशे तु मलिनं क्षुद्रवर्षणम्॥
गुरोरंशकमासाद्य ह्रस्यते सबलाहकः।
शुक्रिशुक्रनवांशे तु प्रावृट्काले महज्जलम्।
अन्यच्चायत्तभूतौ तौ ह्रस्येते ह्रादितामरौ॥"*॥

राहोर्वर्णविशेषे शुभाशुभं यथा, (बृहत् संहितायाम्। ५। ५३-५८।)

"श्वेते क्षेमसुभिक्षं ब्राह्मणपीड़ाच्च
निर्द्दिशेद्राहौ।
अग्निभयमनलवर्णे पीड़ा च हुताशवृत्तीनाम्॥
हरिते रोगोत्पत्तिर्गृध्रानाभीतितश्च विध्वंसः।
कपिले ग्रीष्मगसत्सस्नेहविध्वंसोऽथ दुर्भिक्षम्॥
अरुणकिरणानुरूपे दुर्भिक्षं वृष्टयो विहगपीड़ा।
धूम्राभे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिञ्च॥
कापोतारुणकपिले श्यामाभे क्षुद्भयं विनिर्द्दिशेत्।
कापोतः शूद्राणां याधिकरः क्षत्रवर्णश्च॥
विमलकमलपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय।
सार्च्चिश्चित्रभिभयं गैरिकरूपे च युद्धानि॥
दूर्व्वाकाण्डश्यामे हारिद्रे वापि निर्द्दिशेन्मरकम्।
अग्निभयसम्प्रदायी पाटलकुसुमोपमो राहुः॥"

तद्ग्रहणनिषेधो यथा,—

"सप्तार्णजन्मशेषेषु चतुर्थे दशमे तथा।
नवमे च तथा चन्द्रे न कुर्य्याद्राहुदर्शनम्॥
जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः।
चतुर्थे द्वादशे चन्द्रे न कुर्य्याद्राहुदर्शनम्॥
ग्रासदर्शनमात्रेण चार्थहानिर्भवेद्ध्रुवम्।
जायते नात्र सन्देहस्तस्मात्तत्परिवर्जयेत्॥
विपत्करप्रत्यरिसंज्ञितेषु
वैनाशिकर्क्षेषु कृतं हि कर्म्म।
सर्व्वं वृथा निष्फलमेव यस्मात्
कृतेऽपि तत्रास्ति शुभं न किञ्चित्॥"

तत्र कर्त्तव्यं कर्म्म यथा,—

"एकरात्रमुपोष्यैव राहुं दृष्ट्वा त्यजेन्नरः।
पुण्यमाप्नोति कृत्वा च स्नानं श्राद्धं विधानतः॥
आदित्यकिरणैः पूतं पुनः पूतञ्च वह्निना।
जलं याध्यातरः स्नायात् ग्रहणेऽप्युष्णवारिणा॥
सर्व्वं भूमिसमं दानं सर्व्वे वासमा ह्रदाः।
सर्व्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः॥
सर्व्वेषामपि कर्त्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्व्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति॥
आपद्यनशौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि॥
चन्द्रसूर्य्यग्रहे स्नानं श्राद्धदानजपादिकम्।
कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा॥
सप्तीर्थेऽकविधुग्रासे तन्नदामनपर्व्वणोः।
मन्त्रदीक्षां प्रकुर्व्वाणो मासार्द्धादीन् न शोधयेत्॥
चन्द्रग्रहश्चन्द्रवारे सूर्य्ये सूर्य्यग्रहस्तथा।
रूढ़ामणिरयं योगस्तत्रानन्तफलं स्मृतम्॥
अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत्।
अथवान्यप्रकारेण पुरश्चरणमिष्यते॥
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्व्वमुपोषितः॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः।
यद्वा पुण्योदके स्नात्वा शुचिः पूर्व्वमुपोषितः॥
ग्रहणादिविशोधान्तं जपेन्मन्त्रं समाहितः।
अनन्तरं दर्शनेन क्रमाद्दानादिकं चरेत्॥
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणतर्पणम्।
ततो मन्त्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत्॥
एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति।
सूतके मृतके चैव न दोषो राहुदर्शने।
स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्जितम्॥"*॥

नक्षत्रविशेषे ग्रहणे नराणां दोषस्तत्शान्तिश्च यथा,—

"यस्मिंस्तिष्यजनक्षत्रे ग्रस्येते शशिभास्करौ।
तज्जातानां भवेत् पीड़ा ये नराः शान्तिवर्জ্জिताः॥
ग्रहयज्ञग्रहपरिपीड़ितनाड़ीनक्षत्रदोषशमनाय।
सह शतपुष्पैः स्नायात् फलिनीपलचन्दनोशीरैः॥"

नाड़ीनक्षत्राणि च। आद्यदशघोड़शाद्यदशत्रयोविंशपञ्चविंशतयः॥

"ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा।
भास्करग्रहणे दद्यान्नाड़ीदोषोपपीड़ितः॥
घृतकुम्भोपरि निहितं शृङ्गं नवनीतपूरितं दद्यात्।
गर्भादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे॥"

तत्र भोजनादिनिषेधो यथा,—

"चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव!।
ग्रहणन्तु भवेत्तत्र ततपूर्व्वां भोजनक्रियाम्॥
नाचरेत् सग्रहे चैव तथैवास्तमुपागते।
यावत् स्यान्नोदयस्तस्य नाशौचात्तावदेव तु॥
मुक्तिं दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा परेऽहनि॥
सूर्य्यग्रहे तु नाशौचात् पूर्व्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना॥
व्याहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके॥"

तत्राशौचं यथा,—

"सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने।
स्नात्वा कर्म्माणि कुर्व्वीत शूतमन्नं विवर्জ্জयेत्॥
ग्रहणे ग्रावमात्रौचं विमुक्तौ सौतिकं स्मृतम्।
तयोः सम्यक्तिमात्रेण उपस्पृश्य क्रियाक्रमः॥"

इति तिथ्यादितत्त्वम्॥*॥

अथ ज्योतिर्म्मते ग्रहणस्वरूपं यथा। राहुः पृथिवीच्छायां समाश्रित्य चन्द्रं चन्द्रमाश्रित्य रविं यदाच्छादयति तत् ग्रासाख्यम्। किन्तु रविचन्द्रयोर्न गतिरोधकस्वरूपो ग्रासः॥*॥

अथ ग्रहणसम्भवना। अमावस्यावसानसमये यदि रविस्फुटराश्यादिः राहुकेत्वोः स्फुटराश्यादिभिस्तुल्यः किंवा दशभागान्तरितो भवति तदा सूर्य्यग्रहणम्। पूर्णिमावसानकाले यदि चन्द्रस्फुटराश्यादिः राहुकेत्वोः स्फुटराश्यादिभिस्तुल्यः किंवा त्रयोदशभागान्तरितो भवति तदा चन्द्रग्रहणं स्यात्॥*॥ तस्य गणनाप्रकारो यथा। अमान्त्या शेषचक्रे पूर्णिमावसाने च सूर्य्यसिद्धान्तोक्तगतिागतौ यथा-

सम्भवराश्यादिस्थौ रविचन्द्रौ कर्त्तव्यौ। मध्यराहुराश्यादिभिर्युक्तः स्फुटराश्यादिस्थो रविश्च कार्यः। अस्मिन् राहुयुक्तरवौ षड्राश्यधिके सति षड्राशीन् त्यक्त्वा त्रिंशता पूरितः सन् यदि नवतिभागाधिको भवति तदाशीत्युत्तरशतांशेभ्यो हीनः कार्यः। अवशिष्टार्द्धो द्विःस्थाप्य एकस्मात् द्वाभ्यां हृताङ्केनापरो युक्तः सन् ग्रहो भवति। राहुरर्कयोर्योगे कृते मेषादिराशिषट्के सति स ग्रहः सौम्यसंज्ञकः तुलादिषट्के सति याम्यसंज्ञकः स्यात्॥*॥ चन्द्रराहुमानज्ञानम्। पञ्चत्रिंशद्घटिकलाधिकनवत्युत्तरसप्तशतकलामितमध्यचन्द्रभुक्तिः ७९०। ३५। सा च स्फुटकर्म्मणा किञ्चित् कलादिभिर्न्यूनाधिका वा भवति। तस्याः स्फुटेन्दुभुक्ताः सकाशात् द्वाचत्वारिंशद्घटिकशतेन १४२ हरणालब्धं चन्द्रस्य मानं स्यात्। पञ्चगुणितचन्द्रमानात् द्वाभ्यां हरणालब्धं राहुमानं भवति॥*॥

अथ चन्द्रग्रहणम्।

राहुचन्द्रयोर्म्मानं मिलितं ग्रहेण हीनकरणात् यदवशिष्टं तत् ग्रासो भवेत् ग्रहे ऊने सति राहुचन्द्रयोर्म्मिलितं मानद्वयं ग्रासो भवेत्। ग्रहेऽधिके ग्रासो न स्यात्॥*॥

चन्द्रग्रहणारम्भादिकालज्ञानं यथा। षड्गुणितग्रासाङ्कात् चतुर्म्मिश्रितग्रासाङ्केन लब्धं दण्डादिकं स्थितिरर्द्धदण्डादेरर्द्धं भवति। तत् पौर्णमासीयदण्डादिषु हीनं सत् स्पर्शकालः। युक्तं सत् मुक्तिकालः द्विगुणितं तत् स्थितिदण्डादिकालः स्यात्॥*॥

चन्द्रमण्डलस्य स्पर्शादिदिग्ज्ञानम्।

पूर्व्वोक्तग्रहे याम्ये सति आकाशे चन्द्रमण्डलस्य अग्निकोणे स्पर्शो नैर्ऋतकोणे मुक्तिश्च स्यात्। ग्रहे सौम्ये सति ईशानकोणे स्पर्शः वायुकोणे मोक्षः। इति चन्द्रग्रहणम्॥*॥

सूर्य्यग्रहणे अक्षो यथा। स्वदेशविषुवच्छाया द्विः स्थाप्या। एकस्याः षड्भूतैनान्या युक्ता सती भागादिर्याम्याच्चः स्यात्॥*॥ सूर्य्यग्रहणोपयोगिनतमाह। दिनार्द्धभावस्वयोर्दण्डादीनां यदन्तरं तत् अंशादिकं नतनामकं स्यात्॥*॥ सूर्य्यग्रहणोपयोगि लम्बनं यथा। द्विगुणनतसमसङ्ख्यकखण्डो ग्राह्यः खण्डान्तरगुणितशेषात् षष्टिलब्धयुक्तः सन् स्फुटलम्बनं अंशादिकं भवति॥*॥ सूर्य्यग्रहणे फलं यथा। दिनपूर्व्वपरार्द्धक्रमेण षड्गुणितनतयुक्तलम्बनसहितस्फुटरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा त्रिंशता गुणितो यदि नवत्या अधिको भवति तदा अशीत्युत्तरशतात् हीनः कार्यः। त्रिगुणितदृग्लब्धेः खण्डो ग्राह्यः खण्डान्तरगुणितशेषात् दृग्लब्धयुक्तः सन् फलं भवति॥*॥

सूर्य्यग्रहणे नतिर्यथा। अक्षफलयोर्योगो नतिः स्यात् षड्राशिन्यूने अक्षफलान्तरनतिः सा फले अधिके सति सौम्या अक्षे अधिके सति याम्या भवति॥*॥ सूर्य्यग्रहणे ग्रहो यथा। मध्यराहुसहितः स्फुटरविर्द्विगुणितलम्बनखण्डात् नवचतुर्थांशादिभिर्दिनपूर्व्वार्द्धे रहितः दिनपरार्द्धे सहितः कार्यः एतादृग्संस्कृतरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा इत्यादि चन्द्रग्रहणोक्तवत् ग्रहः कार्यः। एष स्फुटग्रहः उभयोः ग्रहनतोर्दिक्तुल्यतायां नत्या सह युक्तो दिग्विभेदे रहितः कार्यः अन्तरे कार्ये सति यदधिकं तस्य दिशा ग्रहस्य दिक् वक्तव्या॥*॥ सूर्य्यमानं यथा। दृग्ज्ञानोपलब्धविपलाधिकोनषष्टिकलामितरविमध्यभुक्तिः। ५६। ८। १० सा च स्फुटकर्म्मणि किञ्चित् कलादिभिर्न्यूनाधिका वा भवति। तस्माल्लिप्तागुणितस्फुटरविभुक्तेर्द्वाभ्यां लब्धं रविमानं स्यात्॥*॥

अथ सूर्य्यग्रहणम्।

पूर्व्वोक्तचन्द्रमानं रविमानं मिलितं ग्रहेण हीनं सत् ग्रासो भवेत्॥*॥ सूर्य्यग्रहणस्यारम्भादिकालज्ञानम्। चतुर्गुणितग्रासाङ्कात् द्वियुतग्रासाङ्केन लब्धं दण्डादिकं स्थितिनाड्यर्द्धं भवति। तदभावस्याया दण्डादिषु हीनं स्पर्शकालः युक्तं मुक्तिकालः स्यात्॥*॥ स्पर्शादिदिग्ज्ञानम्। ग्रहे याम्ये सति अर्कमण्डलस्य नैर्ऋतकोणे स्पर्शोऽग्निकोणे मोक्षः स्यात्। सौम्ये ग्रहे सति वायुकोणे स्पर्शः ईशानकोणे मुक्तिर्भवेत् द्विगुणितं तत् स्थितिदण्डादि स्यात्॥*॥ दिवारात्रोः परार्द्धे यदि ग्रहणं भवति तदा अमावास्यापौर्णमास्योर्दण्डादिः स्फुटलम्बनयुक्तः कार्य्यः॥ गणिताग्रकालात् हीनातिरिक्ते काले यदि ग्रहणं स्यात् तत् औत्पातिकं भवेत्॥*॥ ग्रहणे मण्डलस्य सामान्यवर्णो यथा। बिम्बस्य वैवर्ण्यं अंशुहानिस्तमोवृतिः खण्डनमल्पता वा शुक्लारुणश्च। मलपीतचित्रैः पटाद्यैः रोध इव वेष्टनं वा भवति॥*॥ अपर्व्वणं ग्रहणं इतियसनार्त्तिकारि स्यात् तदा दिग्भ्रम विरूपाः स्युः॥*॥ ग्रासाङ्गुलिमानज्ञानम्। दृग्गुणितग्रासाङ्कात् मानद्वयार्द्धेन लब्धं चन्द्रसूर्य्ययोर्ग्रासस्य गम्याङ्गुलाद्यं भवति। सूर्य्यस्य चाङ्गुलमपि ग्रासोऽक्षो भवति। चन्द्रस्य सार्द्धाङ्गुलः सुदर्शः यदि षोडशाङ्गुलाधिको भवति तदा सर्व्वग्रासः॥*॥ ग्रहणे मण्डलवर्णो यथा। अर्के ग्रहणे धूम्राभं समग्रे कपिलं अर्द्धे कृष्णाभम्। इति सूर्य्यग्रहणम्॥ इति सिद्धान्तमञ्जरीसम्मतम्॥

(अधुना सूर्य्यसिद्धान्तमतमुच्यते तत्र चन्द्रग्रहणाधिकारो यथा,—

"सार्द्धानि षट्सहस्राणि योजनानि विवस्वतः। विष्कम्भो मण्डलस्यैन्दोः सहस्राणीह चतुःशतम्॥ स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ। रवेः स्वभगणाभ्यस्ताः ग्रहाद्भगणोद्धृताः॥ ग्रहाङ्कघ्नागुणितो भाजितो वार्ककघ्नया। विष्कम्भचन्द्रकघ्न्यां तिथ्याप्ता मानुलिप्तिका॥ स्फुटेन्दुभुक्तिभुक्त्यागुणिता मध्ययोद्धृता। लब्धं स्फुटौ महीव्यासस्फुटार्कव्यवधान्तरम्॥

मध्येन्द्व्यासगुणितं मध्यार्कव्यासभाजितम्। विशोध्य लब्धं स्फुट्या तु तमो लिप्तास्तु पूर्ववत्॥ भानोर्भार्द्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा। ग्रहाङ्कपाते ग्रहणं कियङ्गागाधिकोनके॥ तुल्यौ राश्यादिभिः स्यातामभावास्यान्तकालिकौ। सूर्य्येन्दुपौर्णमास्यन्ते भार्द्धे भागादिकौ समौ॥ गतस्य पर्वनाड्यर्द्धनां खफलेनोनसंयुतौ। समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा॥ छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ॥ तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः। योगार्द्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते॥ यदग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः॥ ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्। विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यासुभे पदे॥ षष्ट्या संगुण्य सूर्य्येन्दोर्भुक्त्यन्तरविभाजिते। स्यातां स्थितिविमर्दार्द्धे नाड्यादिफलके तयोः॥ स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टि भाजिताः। लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः॥ तद्विक्षेपैः स्थितिदलं विमर्दार्द्धं तथासकृत्। संसाध्यमन्यथा याते तल्लिप्तादिफलं स्वकम्॥ स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्। स्थित्यर्द्धनाड्यूनाहीने ग्रासो मोक्षस्तु संयुते॥ तद्वदेव विमर्दार्द्धनाड्यूनाहीनसंयुते। निमीलनोन्मीलनाख्ये भवेतां सकलग्रहौ॥ इष्टनाड्यूविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः। भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः॥ भानोर्यद्रे कोटिलिप्ता मध्यस्थित्यर्द्धषड्गुणाः। स्फुटस्थित्यर्द्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः॥ क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्। मानयोगार्द्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत्॥ मध्यग्रहणतश्चोर्द्धमिष्टनाड्यूर्विशोधयेत्। स्थित्यर्द्धान्मौलिकाक्षेपं प्राग्वच्छेषं तु मौलिके॥ ग्राह्यग्राहकयोगार्द्धाच्छोध्याः खच्छन्नलिप्तिकाः। तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिम्यदम्॥ कोटिलिप्ता रवेः षष्टस्थित्यर्द्धेनाहता हृताः। मध्येन लिप्तास्ताभ्यः स्थितिवद् ग्रासनाड्किाः॥ नतच्यावच्ययाभ्यस्ता त्रिघ्न्याप्ता तस्य कार्मुकम्। बलनांशाः सौम्ययाम्याः पूर्व्वापरकपालयोः॥ राशित्रययुतादृग्ज्ञात् क्रान्त्यग्रेर्दिक्समैर्युताः। भेदेऽन्तराज्याः बलना सप्तत्यङ्गुलभाजिताः॥ सोन्नतं दिनमर्धार्द्धं दिनार्द्धात्र फलेन तु। छिन्याद्विक्षेपमानानि तान्येषामङ्गुलानि तु॥

इति सूर्य्यसिद्धान्ते चन्द्रग्रहणाधिकारः॥

अथ सूर्य्यग्रहणाधिकारः।

"मध्यलम्बसमे भानौ हरिजस्य न सम्भवः। अक्षोद्भवाधभक्रान्तिसाम्ये नावनतेरपि॥ देशकालविशेषेण यथावनतिसम्भवः। लम्बनस्यापि पूर्व्वान्यदिग्लम्बाच्च तथोच्यते॥ लम्बं पर्व्वान्तनाड्यूनां कुर्य्यात् खेटोदयासुभिः। तज्ज्ञानार्थापक्रमज्यात्रौ लम्बज्याप्तोदयाभिधा॥

तदा लङ्कोदयैर्लब्धं मध्यसंज्ञं यथोदितम् ।
तत्क्रान्त्यन्त्यांशसंयोगो दिक्साम्येऽन्तरमन्यथा ॥
येषं नतांशास्तन्मौर्व्वी मध्यज्या साभिधीयते ।
मध्योदयज्यया भक्ता त्रिज्याप्ता वर्गितं फलम् ॥
मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः श्रेषतः पदम् ।
तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ॥
नतांशवाहुकोटिघ्ने स्फुटे दृक्क्षेपहृद्गती ।
एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ॥
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ।
रवीन्दोर्लम्बनं ज्ञेयं प्राक्पश्चाद्घटिकादिकम् ॥
मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनस्त्रनेऽसकृत् कर्म यावत् सर्व्वं स्थिरीभवेत् ॥
दृक्क्षेपः प्रोतविग्मांशोर्म्ध्यसूत्रान्तराहतः ।
तिथिघ्नत्रिज्यया भक्तो लब्धं सावनतिर्भवेत् ॥
दृक्क्षेपात् सप्रतिहृताद्भवेद्वावनतिः फलम् ।
अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ॥
मध्यज्या दिग्विभागात् सा च विज्ञेया दक्षिणोत्तरा ।
सैन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥
तथा स्थितिर्विमर्द्दार्द्धमासाद्यं तु यथोदितम् ।
प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत् ॥
स्थित्यर्द्धोनाधिकात् प्राग्वत् तिथ्यन्तालम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तत्मध्यहरिजान्तरम् ॥
प्राक्कपालेऽधिकत्वाद्भवेत् प्राग् ग्रहणं यदि ।
मौर्व्विकं लम्बनं हीनं पश्चार्द्धे तु विपर्य्ययः ॥
तदा मोक्षस्थि..दले देयं प्रग्रहणे तथा ।
हरिर्व्वान्तरकं शोध्यं यत्रैतत् स्याद्विपर्य्ययः ॥
एतदुक्तं कपालैक्ये तद्भेदे लम्बनैक्यता ।
स्वे स्वे स्थितिदले योज्या विमर्द्दार्द्धेऽपि चोक्तवत्॥"

इति सूर्य्यसिद्धान्ते सूर्य्यग्रहणाधिकारः ॥)

ग्रहणिः, स्त्री, (ग्रह्णाति आक्रमते उदरमङ्गादिरूपेण नाड़ीविशेषावच्छिन्नं शरीरमिति। ग्रह ञ उपादाने + "ग्रहेरनिः।" उणा०। ५। ६७। इति अनिः णत्वं च।) ग्रहणीरोगः। इत्यमरटीकायां रायमुकुटः ॥

ग्रहणी, स्त्री, (ग्रहणि + "ऋदिकारान्तादक्तिनः।" इति ङीष्।) अग्न्यधिष्ठाननाड़ी। स्वनामख्यातरोगः। तस्य निदानसम्प्राप्ती यथा,—
"अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥
एकैकशः सर्व्वशश्च दोषैरत्यर्थमूच्छितैः।
सा दुष्टा बहुशो सुक्तमाममेव विमुञ्चति ॥
पक्वं वा सरुजं पूति सुहुर्व्वद्धं सुहुर्द्रवम्।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥"*॥
तस्य पूर्व्वरूपं यथा,—
"पूर्व्वरूपन्तु तस्येदं लवणास्यं बलक्षयः।
विदाहोऽन्नस्य पाकस्य चिरात् कायस्य गौरवम् ॥"
तस्य वातिकस्य निदानरूपे।
"कटुतिक्तकषायातिरूक्षसन्दुष्टभोजनैः।
प्रमिताग्न्यशनात्यध्ववेगनिग्रहमैथुनैः ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान्।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥
कण्ठास्यशोषः क्षुत् तृष्णा तिमिरं कर्णयोः स्वनः।
पार्श्वोरुवङ्क्षणयोवारुगभीक्ष्णं विसूचिका ॥
हृत्पीड़ाकार्श्यदौर्ब्बल्यं वैरस्यं परिकर्त्तिका।
मुष्टिः सर्व्वरसानाञ्च मनसः सदनं तथा ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः ॥
चिरादुष्णं द्रवं शुष्कं तन्वामं फेनवत्।
पुनः पुनः स्रजेद्वर्च्चः श्वासकासार्दितोऽनिलात् ॥"
पैत्तिकस्य तस्य निदानरूपे।
"कटूष्णजीर्णविदाह्याम्लचारादेः पित्तमुल्बणम्।
आप्लावयद्भक्तमलं जलं तप्तमिवानलम् ॥
सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवम्।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचिलृदर्त्तिमान् ॥"
श्लैष्मिकस्य तस्य निदानरूपे।
"गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात्।
भुक्तमात्रस्य च स्वप्नाद्भक्तमग्निं कुपितः कफः ॥
तस्यान्नं पच्यते दुःखं क्षुन्नासच्छर्द्दिरोचकाः।
आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु।
दुष्टो मधुर उद्गारः सदनं स्रोध्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम्।
अल्पग्रस्यापि दौर्ब्बल्यमालस्यञ्च कफात्मके ॥
पृथग्वातादिनिर्दिष्टं हेतुलिङ्गसमागमे।
त्रिदोषं निर्दिशेद्देवं तेषां वक्ष्यामि भेषजम् ॥"
तस्यासाध्यस्य लक्षणं यथा,—
"लिङ्गैरसाध्यग्रहणीविकारो
यैस्तैरतीसारगदो न सिध्येत्।
दृढस्य नूनं ग्रहणीविकारो
हत्वा तनुं नो विनिवर्त्तते च ॥

इति माधवकरः ॥

तस्य चिकित्सा यथा, गारुड़े १७४ अध्याये।
"चिकित्साथ ग्रहण्यास्तु ग्रहणी चाग्निनाग्निनी।
चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं घृतं हविः॥"*॥

हरिरुवाच।

"मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च।
पानाच्च ग्रहणी नश्येत् शृणाङ्कशतशेखर!॥"

इति तत्रैव १८७ अध्यायः ॥

"अङ्कोटमूलकर्षार्द्धं पिष्टं तण्डुलवारिणा।
सर्व्वातीसारग्रहणीं पीतं हरति भूतप!॥
मरीचशुण्ठीकुटजत्वक्चूर्णन्तु गुड़ान्वितम्।
क्रमात्तत् द्विगुणं पीतं ग्रहणीशाधिनाशनम्॥"

इति तत्रैव १८६ अध्यायः ॥*॥

अथ सामान्यग्रहणीरोगस्य चिकित्सा।
"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च सदातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतिसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादिपटुलघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वचाङ्गेरीतक्रदाड़िमसाधितः।
यवागूः पाचयत्यामं घृतन्तं संवर्त्तयत्यपि॥"
संवर्त्तयति घनीकरोति॥*॥

अथ तक्रम्। तस्य गोदधिगुणाः।

"गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम्।
पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम्॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्॥"
अथ महिषीदधिगुणाः।
"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तजुत्।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वमदूषणम्॥"
अथ छागीदधिगुणाः।
"आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम्।
श्वासकासार्शः-क्षयकार्श्येषु दीपनम्॥"
उत्तमं ग्राहिणां मध्ये श्रेष्ठं इत्यर्थः॥
अथ तक्रस्य भेदाः।
"तक्रन्तु घोलमथितोदश्वित्तक्रप्रभेदतः।
सुश्रुतादौर्मुनिश्रेष्ठैश्चतुर्द्धा परिकीर्त्तितम्॥
ससरं निर्ज्जलं घोलं मथितन्त्वसरोदकम्।
तक्रं पादजलं प्रोक्तमुदश्विच्चार्द्धवारिकम्॥
वातपित्तहरं घोलं मथितं कफपित्तजुत्।
उदश्वित् कफदं बल्यं श्रमघ्नं परमं मतम्॥"
अथ तक्रस्य गुणाः।
"तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु।
वीर्य्योष्णं बलदं वृष्यं प्रीणनं वातनाशनम्॥
यान्युक्तानि दधीन्यद्यौ तद्गुणं तक्रमादिशेत्।
ग्रहण्यादिमतां तक्रं पथ्यं संग्राहि लाघवात्॥
वातघ्नमम्लसान्द्रत्वात् सद्यस्कं त्वविदाहि च।
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम्॥
कषायोष्णविकारित्वाद्दोष्यायाञ्चैव कफे हितम्॥"
अथोद्धृतस्तोकोद्धृतानुद्धृतघृतस्य तक्रस्य गुणाः
"समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम्॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥"
अथ दोषविशेषे तक्रविशेषाः।
"वातेऽम्लसैन्धवोपेतं पित्ते स्वादु सशर्करम्।
पिबेत्तक्रं कफे चापि शास्त्रिकटुसंयुतम्॥
हिङ्गुजीरयुतं घोलं सैन्धवेनावधूलितम्।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम्॥
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम्॥"
अथामपक्वतक्रगुणाः।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च।
पीनसश्वासकासादौ पक्वमेव विशिष्यते॥"*॥
अथ तक्रस्य निषेधः।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके॥"*॥
अथ तक्रस्य गुणोत्कर्षः।
"न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः॥"*॥
"सुहृद्यं रसं तक्रं धान्यजीरकसंयुतम्।
सैन्धवेनान्वितं दद्यात् वह्न्यूषमिति कीर्त्तितम्॥"
रसं लघु ग्राहि मांसभवरसम्। इति वह्न्यूषम्॥
"कर्षं गन्धमर्द्धपारदसमे कुर्य्याच्छुभां कज्जलीं
तार्क्ष्यं चूर्णयतश्च पञ्चलवणं तार्क्षेण कर्षं पृथक्।
शुण्ठीं हिङ्गु च जीरकद्वययुतं वल्गार्द्धभङ्गान्वितं

खादेद्दृङ्मितं प्रवृत्तिगदवांस्तक्रस्य विस्वेन च ॥"
इति लघुलाईचूर्णम् ॥ * ॥
"त्रिकटु त्रिफला चैव विड्वङ्गं जीरकद्वयम् ।
भल्लातकं यमानी च हिङ्गु लवणपञ्चकम् ॥
गृहधूमवचाकुष्ठं रसगन्धकमभ्रकम् ।
क्षारत्रयाजमोदा च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतस्वेषां चूर्णं श्लक्ष्णं विनिर्मितम् ॥
ग्रक्राग्नस्य चूर्णस्तु चूर्णतुल्यं प्रदापयेत् ।
मन्दाग्निकासदुर्नामग्रीहपाण्डरुचिज्वरान् ।
विरुग्णं संग्रहं शूलं हन्यान्नानातिसारजित् ॥
आमवातापहं बल्यं कृतिकादोषनाशनम् ।
वर्ण्यनीयं माषमद्यं स्नानं पिष्टिप्तभोजनम् ॥
पथ्यं काञ्जिकमत्रापि दधि तक्रमथापि वा ।
दहलाईचूर्णमिदं लाईभाषितमुत्तमम् ॥"
इति दहलाईचूर्णम् ॥ * ॥
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविड्वङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याच्छर्करां च तावतीम् ।
सर्व्वचूर्णसमानांशा प्रदेया शुभशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः ।
नाशयेत् ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥ * ॥
"चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
योषं हिङ्ग्वजमोदाच क्षयं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥"
क्षारौ खर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति सैन्धवं रुचकं चैव विड्ं सासुद्रिकं गड्मिति । योषं शुण्ठीपिप्पलीमरिचानि । अजमोदात्र यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ * ॥ [सगुड़ः ।
"श्रीफलग्लाटुः कल्को नागरचूर्णेन मिश्रितः
ग्रहणीगदमद्भुतं तक्रभुजा ग्रीलितो जयति ॥"
श्रीफलग्लाटुः विल्वस्यामं फलम् । गुड़स्याच भागद्वयम् । इति विल्वकल्कः ॥ * ॥
"चतुष्पलं सुधाकाक्षं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुड़वक्षार्कमूलाद्विल्वे तथानलात् ॥
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्त्वा भुक्तं पचत्याशु गाढ्यवेद्ग्रहणीगदम् ॥
कास श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥"
इति वार्त्ताकुगुटिका ॥ * ॥
"मुस्तकातिविषाविल्वकौटजं लक्ष्मचूर्णितम् ।
मधुना च समालोढं ग्रहणीं सर्व्वजां जयेत् ॥"
कौटजं इन्द्रयवः । इति मुस्तकादिचूर्णम् ॥ * ॥
"श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः ।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥"
सर्ज्जः राल इति लोके । इति सर्ज्जरसचूर्णम् ॥*॥
"विल्वाब्दग्रक्रयवजाजकमोचसिन्धु-
मार्जं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥"
मोचो मोचरसः । क्षिणोति हन्ति ।
"प्रस्थत्रये त्वामलकीरसस्य
गुड़स्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्यन्त्रिकजीरचव्य-
योषिभल्लाह्वयुवाजमोदैः ॥
विड्वङ्गसिन्धूत्रिफलायवानी-
पाटामिधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
ग्राम्यन्ति चायं चिरमन्तरग्नेः
प्रीतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणगुड़ः ॥ * ॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकद्वया ।
सैन्धवं रौमकञ्चापि सासुद्रं रुचकं विड्म् ॥
धारागन्धश्च त्वक्पत्रं क्षुद्रैला चोपकुञ्चिका ।
शुण्ठीशुक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
वृद्धीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृदग्निना पचेत् ॥
औड़म्बरं चामलकं बादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्दृक्षयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम् ।
पित्तपाठान्वयाह्वन्ति रक्तपित्तञ्च विंशतिम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्याये महाकल्याणको गुड़ः ॥"
इति महाकल्याणगुड़ः ॥ * ॥
"कृष्माण्डानां सुपक्वानां खिन्नानां निष्कुल-
त्वचाम् ।
सर्पिः प्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विड्वङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु ।
आमलक्याः रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात्तदैनमवतारयेत् ॥
औड़म्बरं चामलकं बादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्दृक्षयेद् वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातश्लेष्मितपित्तार्त्तदद्रुरश्मिहलीमकान् ।
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत् ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ।
तेभ्यो हितो गुड़ोऽयं स्यात् वन्ध्यानामपि पुत्रदः ॥
दृष्टो बलो दृढ़श्च वयसः स्थापनः परः ॥"
इति कृष्माण्डकल्याणकगुड़ः ॥ * ॥
अतीसाराधिकारलिखितं विल्वतैलं चात्र हितम् । इति ग्रहणीरोगाधिकारः । इति भावप्रकाशः ॥ (सनिदानलक्षणादिकं चिकित्सितञ्चास्य यथा,—
"सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वन्तु नैव वा ।
अकस्माद्वा सुदुर्बद्धमकस्माच्छिथिलं सुहुः ॥
चिरवृद्ग्रहणीदोषः सञ्चयाद्योपवेग्यते ।
स चतुर्धा पृथग् दोषैः सन्निपाताच्च जायते ॥
प्रागूपं तस्य सदनं चिरात् पचनमग्नकः ।
प्रसेको वक्त्रवैरस्य मरुचिस्तृट्क्लमो भ्रमः ॥
आनद्धोदरता च्छर्द्दिः कर्णक्ष्वेड़ोल्लूलनम् ।
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः ॥
मूर्च्छा शिरोरुग्विरुमाः श्वयथुः करपादयोः ।
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाभीष्णं विसूचिका ।
रसेषु रुद्धिः सर्व्वेषु क्षुत्तृष्णा परिकर्त्तिका ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते ।
वातरुग्गुल्मार्शःश्रीहपाण्डुत्वग्रङ्कितः ॥
चिरादृष्टःखं द्रवं शुष्कं तन्वामं ग्रथ्नफेनवत् ।
पुनः पुनः क्षणेद्वर्च्चः पायुरुक् श्वासकासवान् ॥
पित्तेन नीलं पीताभं पीताभः क्षणति द्रवम् ।
पूयाम्बोद्गारहृत्कण्ठदाहारुचिल्लर्द्दितः ॥
श्लेष्मणा पच्यते दुःखमन्नं छर्द्दिररोचकः ।
आस्योपदेहनिष्ठीवकासच्छ्वासप्रसेकवान् ॥
हृदयं मन्यते स्थानसदनं स्तिमितं गुरु ।
उद्गारो दुरभुरः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लथसंहतगुरुवर्च्चःप्रवर्त्तनम् ।
अग्निग्रस्यापि दौर्ब्बल्यं सर्व्वजे सर्व्वसङ्करः ॥
विभागेऽस्य ये प्रोक्ता विधमाद्याख्ययोरुभयः ।
तेऽपि स्युर्ग्रहणीदोषाः समस्तु खास्थ्यकारणम् ॥
वातव्याधिग्रहीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥"
इति वाभटे निदानस्थानेऽष्टमेऽध्याये ॥
चिकित्सास्था यथा,—
"ग्रहणीमाश्रितं दोषमजीर्णेवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामग्रे विपाचयेत् ॥
अग्रकाले यवागवादिपक्वकोलादिभिर्युतम् ।
पिबेत्तु षट्पलघृतं पुनर्योगांश्च दीपनान् ॥

दद्यात् सातिविषां पेयामामे साम्यां सनागराम्।
पानेऽतिसारविहितं वारितक्रं सुरादि च॥
ग्रहणीदोषिणां तक्रं दीपनग्राहि लाघवात्।
पथ्यं मधुरपाकित्वान्न च पित्तप्रदूषणम्॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्।
वातेस्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत्॥"
"क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।
दीपनं बहुपित्तस्य तिक्तैर्मधुरकैर्युतम्॥
स्नेहोऽम्लवर्गैर्युक्तो बहुवातस्य शस्यते।
स्नेहमेव परं विद्याद्दुर्बलानलदीपनम्॥
नालं स्नेहसमिद्धस्य ग्रामायान्नं सुगुर्वपि।
योऽस्यामिवात् कफे क्षीणे वर्चः पक्वमपि श्लथम्॥
सुस्नेद्यस्वौषधयुतं स पिबेदल्पशो घृतम्।
तेन स्वमार्गमानीतः स्वकर्म्मणि नियोजितः॥
समानो दीपयत्यग्निमग्नेः सन्तुष्टको हि सः।
पुरीषं यच्च रूक्षत्वेन कठिनत्वाद्विसृष्यति॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत्।
रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत्॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः।
उदावर्त्तात् प्रयोक्तव्या निरूहस्नेहवस्तयः॥
दोषातिवृद्ध्या मन्देऽग्नौ संशुद्धोऽन्नविधिक्षरेत्।
व्याधिसात्म्यस्य मन्देऽग्नौ सर्पिरेव तु दीपनम्॥
अध्वोपवासशामत्वे यवागूं पाययेद्घृतम्।
अन्नावपीडितं बल्यं दीपनं हृद्यमेव तत्॥
दीर्घकालप्रसङ्गात्तु क्षामक्षीणक्षुधान्नरान्।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशितान्वितैः॥
लघूष्णकटुशोधित्वाद्दीपयन्त्याशु तेऽनलम्।
मांसोपचितमांसत्वात् परञ्च बलवर्द्धनम्॥
स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्द्धते॥
दीप्तो यथैव स्थाणुश्च वाह्योऽग्निः सारदारुभिः।
सर्व्वैर्नीयते तद्वदाहारैः कोष्ठकोऽनलः॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात्।
यथा निरिन्धनो वह्निरल्पो वातेन्धनान्वितः॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम्।
प्रवृद्धं वर्द्धयत्यग्निं तदासौ सानिलोऽनलः॥"
इति वाभटे चिकित्सास्थाने दशमेऽध्याये॥
अपरं सकारणलक्षणचिकित्सितं यथा,—
"दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः।
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः॥
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्।
तस्मात् कार्य्यः परीहारस्त्वतीसारे विरक्तिवत्॥
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राग्यतस्तथा।
षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता॥
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः॥
तस्मात् सन्दूषिते वह्नौ ग्रहणी सम्प्रदुष्यति।
तस्योत्पत्तौ विदाहान्न सदनालस्यमूर्द्धरुजाः॥
बलक्षयोऽरुचिः कासः कर्णक्ष्वेडाम्लकूजनम्।
अथ जात भवेज्जन्तुः शूलपादकरः क्षयः॥
पर्व्वरुग्गौरवं हृद्रुक्छर्द्दिज्वरारोचकदाहवान्।
उद्गारैरुद्गतिक्ताम्लो हृद्धूमसमगन्धिकम्॥
प्रसेकसुखवैरस्य तमकारुचिपीड़ितः।
वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः॥
पित्तात् सदाहैर्गुरुभिः कफात्तिमिस्निग्धसकैः।
दोषवर्णरसैरुद्रिक्तमूत्रनयननाननैः॥
हृत्पाण्डूदररुग्गुल्मार्शःक्लीहाग्निसादी च मानवः।
यथा दोषोत्क्रियन्तस्य विशुद्धस्य यथाक्रमम्॥
पेयादिं वितरेत् सम्यग् दीपनीयोपसंभृतम्।
ततः पाचनसंग्राहि दीपनीयगणद्वयम्॥
पिबेत् प्रातः सुरारिष्टस्नेहमद्यसुखाम्बुभिः।
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते॥
क्षमिगुल्मोदरार्शोघ्नीः क्रियाश्चाचारवारयेत्।
चूर्णं हिङ्ग्वादिकञ्चात्र घृतं वा क्षीद्रनागरम्॥
कल्कं वा मगधादेश्च चाङ्गेरीस्वरसेन वा।
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत्॥
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितम्।
ज्वरादीनविरोधाच्च साधयेत्स्नेचिकित्सितैः॥"
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये॥)

ग्रहणीरुक्, [क्] स्त्री, (ग्रहण्येव रुक्।) ग्रहणीरोगः। तत्पर्य्यायः। प्रवाहिका २। इत्यमरः। २।६।५५॥ ग्रहिणी ३। इति तट्टीका॥

ग्रहणीहरं, क्ली, (ग्रहणीं हरतीति। हृ+अच्।) लवङ्गम्। इति शब्दचन्द्रिका॥ (ग्रहणीहारके च॥)

ग्रहद्रुमः, पुं, (ग्रहाख्यो द्रुमः वृक्षविशेषः।) शाकवृक्षः। इति राजनिर्घण्टः॥

ग्रहनायकः, पुं, (नयतीति। नी+ण्वुल्। ततो ग्रहाणां नायकः।) सूर्य्यः। इति शब्दरत्नावली॥ सूर्य्यश्च॥

ग्रहनाशः, पुं, (ग्रहं रोगविशेषं नाशयतीति। नश्+णिच्+अण्।) वृक्षविशेषः। इति शब्दरत्नावली॥ छातियान इति भाषा॥

ग्रहनाशनः, पुं, (ग्रहं रोगविशेषं नाशयतीति। नश्+णिच्+ल्युः।) ग्रहनाशवृक्षः। इति शब्दरत्नावली रत्नमाला च॥

ग्रहनेमिः, पुं, (ग्रहाणां ग्रहकक्षाणां ग्रहेषु वा नेमिरिव। ग्रहकक्षाधःस्थितत्वाद्यस्य नेमिसादृश्यमिति बोध्यम।) चन्द्रः। इति शब्दरत्नावली॥

ग्रहपतिः, पु, (ग्रहाणां पतिः।) सूर्य्यः। (यथा, महाभारते। १२।१६८।२५। [रिव॥")
"तस्य विस्फूर्ज्यते राज्यं ज्योत्स्ना ग्रहपतेरिव।
अर्कश्चः। इत्यमरः। १। ३। ३०॥ (शिवः। यथा, महाभारते। १३। १७। ३७।
"चन्द्रः सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः॥"
ग्रहस्वामी। यथा, महाभारते।१३।८५।११७।
"मम सद्मनिदं दिव्यं अहं ग्रहपतिस्त्विह।
चौणि पूर्व्वाण्यपत्यानि मम तानि न संशयः॥")

ग्रहपुषः, पुं, (ग्रहान् अन्यान् सर्व्वान् पुष्णाति स्वतेजसेत्यर्थः।) सूर्य्यः। इति हेमचन्द्रः॥

ग्रहभीतिजित्, [द्] पुं, (ग्रहभीतिं जयतीति। जि+क्विप्।) चौड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

ग्रहयागः, पुं, (ग्रहाणां ग्रहानुद्दिश्य वा यो यागः।) ग्रहाणां यज्ञः। तस्य शान्तिकत्वे मलमासादावपि कर्त्तव्यत्वं पौष्टिकत्वे तु शुक्लकाले। तस्य प्रयोगो यथा। यजमानः स्नातस्नानादिः गोमयोपलिप्ते देशे कुशासने उपविष्ट उदङ्मुखो ब्राह्मणान् स्वस्तिवाच्य संकल्प्य मन्त्रमुच्चार्य्य श्वेतसर्षपेण विघ्नकरानुत्सार्य्य सगणाधिपषोड़शमातृकापूजावसोर्द्धारादृद्धिश्राद्धानि कृत्वा स्वयं कर्त्तुमसामर्थ्ये ब्राह्मणान् वृणुयात्। ततो मण्डपोत्तरपूर्व्वभागे वितस्तिद्वयविस्तृतायां वितस्त्युच्छ्रितायां उदक्प्लवायां वेद्यां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यं आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमं दक्षिणस्यां त्रिकोणं रक्तं मङ्गलं ऐशान्यां पीतं धनुराकारं बुधं उत्तरस्यां पीतं पद्माकारं गुरुं प्राच्यां श्वेतं चतुष्कोणं शुक्रं प्रतीच्यां श्यामं सर्पाकारं शनिं नैर्ऋत्यां श्यामं मकराकारं राहुं वायव्यां धूम्रवर्णान् खड्गाकारान् केतून् विलिख्य स्वगृह्योक्तविधिनाऽग्निस्थापनादिब्रह्मस्थापनपर्य्यन्तं कर्म्म कृत्वा ग्रहशब्दे लिखिततत्तद्ग्रहानेन मण्डले ग्रहानावाह्य तेषां स्वस्ववर्णवस्त्रगन्धपुष्पादिना पूजयेत्। गन्धे विशेषः। सूर्य्याय रक्तचन्दनं सोमाय श्वेतचन्दनं मङ्गलाय कुङ्कुमं बुधाय सरलं गुरवे समभागेन मिश्रितानि रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलानि शुक्राय श्वेतचन्दनं शनैश्चराय कस्तूरीं राहवे पद्मकाष्ठं केतुभ्यश्च पद्मकाष्ठं दद्यात्। धूपे विशेषः। रवये गुग्गुलुं सोमाय सरलं मङ्गलाय देवदारु बुधाय घृतमिश्रितदेवदारु बृहस्पतये दशाङ्गं शुक्रायागुरुं शनैश्चराय कालागुरुं राहवे गुड़त्वचं केतुभ्यो मधुमिश्रितगुड़त्वचं दद्यात्। ततोऽधिदेवताप्रत्यधिदेवताः पूजयेत्। ततो बलिं दद्यात्। सूर्य्याय गुड़ौदनं सोमाय घृतपायसं मङ्गलाय पक्वयवचूर्णात्मकं यावकं बुधाय क्षीरान्नं गुरवे दध्योदनं शुक्राय घृतौदनं शनैश्चराय यवतिलतण्डुलात्मकं क्षसरं राहवे छागमांसं केतुभ्यः अजाक्षीरसाधिताज्यकर्करक्तमिश्रितयवतिलतण्डुलरूपं चित्रौदनम्। ततश्चरुं श्रपयेत्। ततः कुशण्डिकां समाप्य ग्रहादीनां चरुहोमं कुर्य्यात्। ततो यथाशक्ति एकैकस्याहुतिंशतिमष्टोत्तरशतमष्टोत्तरसहस्रं वा मधुसर्पिर्म्मिश्रिताभिः सूर्य्यादीनां तत्तत्समिद्धोमं कुर्य्यात्। समिधस्तु।
"अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः।
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥"
तत उदीच्यं कर्म्म समाप्य दक्षिणां दद्यात्। दक्षिणास्तु।
"धेनुः शङ्खस्तथाऽश्वश्च हेम वासो हयस्तथा।
कृष्णागौरायसश्चाग एता वै दक्षिणाः स्मृताः॥"
(अस्य यागस्य प्रयोजनं यथा, महानिर्व्वाणतन्त्रे।
"शान्तौ पुष्टौ महेशानि! तथा क्रूरेऽपि कर्म्मणि।
ग्रहयागं प्रकुर्व्वाणो वाञ्छितार्थमवाप्नुयात्॥"

दीपिकायाच्च । यथा,—
"शुभग्रहार्कवारेषु शुद्धचित्रप्रभुवेषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
मृदुगणः चित्रानुराधाश्वगुरिरेवत्यः । चिप्रगणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः रोहिण्युत्तरात्रयम् ॥)
"गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
इति ग्रहयागतत्त्वम् ॥

(मात्स्योक्तम् । यथा,—
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
दृढायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥
येन ब्रह्मन् ! विधानेन तन्मे निगदतः शृणु ।
सर्व्वशास्त्राण्यनुक्रम्य सङ्क्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्यात्तच्चहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥"
ग्रहवेदिनियमः । यथा,—
"गर्त्तस्योत्तरपूर्ब्बेण वितस्तिद्वयविस्तृताम् ।
चतुरश्रां वेदिं वितस्तुच्छ्रयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रासदङ्मुखाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विग्रहादग्रधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥"
मण्डले स्थानम् । यथा,—
"मध्ये तु भास्करं विद्यात्सोमादित्यं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद् बुधं पूर्ब्बोत्तरेण तु ॥
पूर्ब्बेण भार्गवं विद्यात् सोमं दक्षिणपूर्ब्बके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्चक्रतण्डुलैः ॥"
अधिदेवताः । यथा,—
"भास्करस्येश्वरं विद्यात् उमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ।
ब्रह्माणञ्च गुरोर्विद्याच्छक्रस्यापि शचीपतिम् ।
शनेश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥"
प्रत्यधिदेवताः । यथा,—
"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥"
पञ्च लोकपालाः । यथा,—
"विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्यागहृतिभिस्तथैवाश्विकुमारकौ ॥"
ग्रहवर्णः । यथा,—
"संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥"
"ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽथ सुरभिरुपरिष्टादविनाशकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥"
अन्यद्विवरणन्तु ग्रहयागतत्त्वे द्रष्टव्यम् ॥)
ग्रहराजः, पुं, (ग्रहाणां राजा इति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ बृहस्पतिः । इति शब्दरत्नावली ॥
ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीवदेतन्नक्षत्रमाश्रित्य स्वस्वगत्यनुसारेण ग्रहाणां परिभ्रमणात्तथात्वम् ।) भुवनक्षत्रम् । इति शब्दरत्नावली ॥
ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जातरोगः । इति राजनिर्घण्टः ॥
ग्रहार्घी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अर्घति । अर्घ् + णिनिः । स्कन्दग्रहदोषभ्रान्तीत्येके ।) ग्रहनाशकृत्तः । इति शब्दरत्नावली ॥
ग्रहाह्वयः, पुं, (ग्रहाणामुपदेवानामाह्वयः आह्वा संज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषनाशायेति भावः । आ + ह्वे + अच् । इत्येके ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥
ग्रहीता, [तृ] त्रि, (गृह्णातीति । ग्रह + तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । गृहयालुः २ । इत्यमरः । ३ । १ । २७ ॥ (यथा, श्वेताश्वतरोपनिषदि ।
"अपाणिपादो यवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"
तथा च मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्घे कृतो व्ययः ॥")
ग्रामः, पुं, (ग्रस् + "ग्रसेरात् ।" उणां । १ । १४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादिवर्णप्राया प्राकारपरिखादिरहिता बहुजनवसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । ३ । १६ ॥ वृक्षादिशून्यवसतिः । इति श्रीधरस्वामी ॥ यथा, मार्कण्डेयपुराणे ।
"तथा शूद्रजनप्राया सुसम्वृद्धकुटीवला ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
(तथा च मनुः । १० । ५४ ।
"अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥")
शब्दादिपूर्ब्बकश्चेत् समूहार्थः । इति विश्वः ॥ यथा शब्दग्रामः भूतग्रामः गुणग्रामः । इत्यादि ॥ (यथा, मनुः । २ । २१५ ।
"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥"
शिवः । यथा, महाभारते । १३ । १७ । ११३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥")
स्वरभेदः । यथा,—
"षड्जमध्यमगान्धारास्त्रयो ग्रामा मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
मर्त्यलोके च गान्धारो ग्रामः प्रचरति स्वयम् ॥"
इदानीं षड्जग्रामस्य मूर्च्छनाः [illegible] ।
मूर्च्छना प्रस्तार इत्यर्थः । ष ऋ ग म प ध नि स । इति षड्जस्य । म-पौ ध-नी ष ऋ स गः । इति मध्यमस्य । ऋ गौ म-पौ ध नी षोऽन्ते । इति गान्धारस्य मूर्च्छनाः । ष ऋ ग म प ध नि स । नि-धौ ऋ-ग-म-पाश्च षः । ध नि ष ऋ ग म पोऽन्ते । प-धौ नि-धौ ऋ-गौ च सः । म-पौ ध-नी च ष ऋ ग । ग म प ध नि ष ऋ । ऋ-गौ म-पौ ध-नी गोऽन्ते । मूर्च्छनाः सप्त षड्जाः ॥
"आदि द्विचित्वतुःपञ्चषट्सप्तस्वपि समे मता ।
मध्यमो मो यदा तेषु मध्यमग्रामसूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्रामसूर्च्छना ॥"
तच्च षड्जग्रामप्रस्तारस्यायं क्रमः ।
"षड्जान्नियधान्तं नेर्धान्तं धात् पान्तमिष्यते ।
पान्तान्तं मध्यमान्तान्तं गादृषभान्तमिष्यते ॥
ऋषभात् धान्तमित्याहुः षड्जग्रामस्य मूर्च्छनाः ।
मध्यमग्रामजास्त्वेवं मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आवश्च इति ग्रामनिरूपणाः ॥
षड्जग्रामसूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्ण्वग्निवैरुक्तास्त्रयो ग्रामा मनोहराः ॥"
इति सङ्गीतदामोदरः ॥
ग्रामकूटः, पुं, (ग्रामे ग्रामस्यो ग्रामस्य वा कूट इव तमःप्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥
ग्रामजनिप्यावी, स्त्री, (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन + डः । ग्रामजा निप्यावीति कर्म्मधारयः ।) नखनिप्यावी । इति राजनिर्घण्टः ॥
ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयते चलन्यदानेन परिचाल्यतेऽनेन । यद्वा ग्रामान् जीवसमूहान् नयति प्रापयति चेतयतीत्यर्थः । नी + क्विप् ततो णत्वम् ।) विष्णुः । यथा, महाभारते । १३ । १४६ । ३७ ।
"अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥"
यज्ञः । यथा, विष्णुपुराणे २ । १० । २ ।
"स रथाधिष्ठितो देवैरादित्यैरृभिरङ्गिरैः ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥"
"देवैरादित्यैः आदित्या एव देवास्तैः । ग्रामणीर्यज्ञः ।" इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४६ ॥
ग्रामणीः, त्रि, (ग्रामं संवसथं तत्रत्यान् जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । ने । ४५ ॥ (यथा, ऋग्वेदे । १० । १०७ । ५ ।
"दक्षिणावान् प्रथमो हूत एति
दक्षिणावान् ग्रामणीरग्रमेति ॥"
तथा च महाभारते ८ ।
"दानामोदविनोदलज्जमधुपोत्तमारणाविभ्रमा
कर्णादोलनखेलनाविजयते देवीगणग्रामणीः ॥

ग्रामेण गाम्येण भोग्यद्रव्येण आयुर्नयति उपयतीति। ग्रामान् भोग्यवस्तूनि नयति आत्मानं प्रापयतीति वा।) भोगिकः। इति हेमचन्द्रः॥

ग्रामणी:, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गम्यते यद्वा ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति। नी+क्विप्।) वेश्या। ग्रामेया। नीलिका। इति हेमचन्द्रः॥

ग्रामतक्षः, पुं, (ग्रामस्य ग्रामपरतक्षो वा तक्षा। "ग्रामकौटाभ्यां च तक्षः।" ५।४।९५। इति टच्।) ग्रामाधीनः काष्ठतट्। ग्रामायत्तस्तक्षा। इत्यमरः। २।१०।६॥ गाँयेकुतार इति भाषा॥

ग्रामता, स्त्री, (ग्रामाणां समूहः। "ग्रामजनबन्धुसहायात्।" ४।२।४२। इति तल्।) ग्रामसमूहः। इत्यमरः। ३।२।४३॥ (ग्रामस्य भावः। "तस्य भावस्त्वतलौ।" ५।१।११९। इति तल्।) ग्रामत्वञ्च॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीयः ग्रामावस्थितजनैरिति शेषः।) ग्रामप्रेष्यः। स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः। इत्याह्निकतत्त्वम्॥ (यथाह शातातपः।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥ तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः। पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥ अनादिष्टानु यः पूर्व्वां सादित्वाश्चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥")

ग्राममक्षिका, स्त्री, (ग्रामस्य मत्स्यस्य मेषु वा मक्षिकेव। क्षुद्रमक्षिर इवेत्यर्थः।) क्षुद्रझीमत्स्यः। ग्रामयुद्धम्। इति मेदिनी। के।२३४॥

ग्रामसुखः, पुं, (ग्रामस्य सुखमिव यो स्थितः। यद्वा, ग्रामो ग्रामवासिजनो सुखत्वेन प्रधानकारणत्वेन यस्य। ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम्।) वृद्धः। इति शब्दरत्नावली॥

ग्रामशृगः, पुं, (ग्रामस्य शृग इव। यद्वा, ग्रामेस्थितो शृगः पशुः।) कुक्कुरः। इति शब्दरत्नावली॥

ग्रामयाजकः, पुं, (ग्रामस्य याजको यागकर्त्ता।) ग्रामश्चनानावर्णानां पुरोहितः। स तु चतुर्थोऽब्राह्मणः। यथाह, शातातपः।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥ तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः। पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥ अनादिष्टानु यः पूर्व्वां सादित्वाश्चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥" (शूतस्ते प्रदत्तं दानादिकं निष्फलं भवति। यथोक्तं महाभारते। ३।१९९।७।

"यत्किञ्चित् पतिते दानं ब्राह्मणे तस्करे तथा। गुर्वी चानृतिके पापे शूद्रयाजके॥")

ग्रामस्थः, त्रि, ग्रामवासी। ग्रामे तिष्ठति य इत्यर्थे उपचयः॥

ग्रामहासकः, पुं, (ग्रामान् ग्रामवासिनः श्वशुरालयसमूहान् वा हासयतीति। हस्+णिच्+ण्वुल्।) भगिनीपतिः। इति शब्दरत्नावली॥

ग्रामाधानं, क्ली, (आधीयते उपजीविका यत्र तत्। आ+धा+ल्युट्। ततो ग्रामस्य शृगायुसमूहस्याधानं पोषणकम्।) शृगया। इति हलायुधः॥

ग्रामान्तं, क्ली, (ग्रामस्य अन्तं समीपम्।) ग्रामसमीपम्। तत्पर्य्यायः। उपग्रन्थम् २। इत्यमरः। २।३।२०॥ ग्रामान्तिकम् ३। इति शब्दरत्नावली॥

ग्रामिणी, स्त्री, (ग्राम उत्पत्तिस्थानत्वेन अस्ति अस्याः। अत इनिः स्त्रियां ङीप्।) नीलीवृक्षः। इति शब्दरत्नावली॥

ग्रामी, [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य। अत इनिः।) ग्रामविशिष्टः। गाँइ इति भाषा॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम्।

"रामो गड्गड्यामी निपः केशरकोलितः। केशरकोलीति ख्यातो ग्रामी ग्रामवतामरः॥" (ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति। ग्राम्यधर्म्मविशिष्टः। यथा, भागवते। ४।२६।१४।

"आसुरी मेढ्रमर्वाग्दार्थवायो ग्रामिणां रतिः। उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुदं उच्यते॥")

ग्रामीणः, पुं, (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति खञ्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥ कुक्कुरः। काकः। ग्रामोत्पन्ने त्रि। इति मेदिनी। णे। ४६॥ (यथा, भाषापरिच्छेदे। ७६।

"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्। सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥")

ग्रामीणा, स्त्री, (ग्रामीण+स्त्रियां टाप्।) नीलीवृक्षः। इति मेदिनी॥ (अस्याः पर्य्याया यथा,

"नीली तु नीलिनी तूली कालदोला च नीलिका। रञ्जनी श्रीफली तुङ्गा ग्रामीणा मधुपर्णिका॥ क्षीतका कालकेशी च नीलपुष्पा च सा स्मृता॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणास्त्वस्या नीलिनीशब्दे ज्ञातव्याः॥) पालङ्कशाकम्। इति राजनिर्घण्टः॥

ग्रामेयकः, त्रि, (ग्रामे भवः। ग्राम+"कन्यादिभ्यो ढकञ्।" ४।२।९५। इति ढकञ्।) ग्राम्यः। इति हेमचन्द्रः। ३।१६५॥

ग्रामेया, स्त्री, (ग्रामे भवा। ग्राम+ढक्।) ग्राम्यनारी। इति ग्रामणीशब्दार्थे हेमचन्द्रः॥

ग्रामेशः, त्रि (ग्रामस्य ईशः।) ग्रामेश्वरः। ग्रामाधिपतिः। यथा, ज्ञानसङ्कलने। ११।

"यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं। सेवायै मृगयामहे नरमहो मूढा वराकावयम्॥"

ग्राम्यः, त्रि, (ग्रामे भवः। ग्राम+"ग्रामात् यखञौ।" ४।२।९४। इति यः।) ग्रामोत्पन्नः। तत्पर्य्यायः। ग्रामेयकः २ ग्रामीणः ३। इति हेमचन्द्रः। ३।१६५॥ (यथा, मनुः। ११।१९९।

"अश्वगोखरदैष्टो ग्राम्यैः क्रव्याद्भिरेव च॥"

तथा, माघे। १२।३८।

"ग्राम्यानपश्यत् कपिशं पिपासतः॥"

रूढः। प्राकृतः। यथा, तत्रैव। १४।६४।

"ग्राम्यभावमपहातुमिच्छवा योगमार्गपतितेन चेतसा॥")

भक्ष्यादिवचनम्। "हालिकशाकटिकप्रधानत्वात् ग्रामे भवं ग्राम्यम्।" इति भरतः॥ तत्पर्य्यायः। अश्लीलम् २। इत्यमरः। १।६।१६॥ (कायस्य दोषविशेषः। स च शब्दगतः अर्थगतश्च। तत्र शब्दगतो यथा, साहित्यदर्पणे। ७।३।

"दुःश्रवविविधाश्लीलानुचितार्थाप्रयुक्तताः। ग्राम्याश्चप्रतीतसन्दिग्धनेयार्थनिहतार्थताः॥" अस्य उदाहरणं यथा तत्रैव। "कटिस्ते हरते मनः। अत्र कटिशब्दो ग्राम्यः॥" अर्थगतो यथा, तत्रैव। ७।५।

"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः॥" उदाहरणं यथा तत्रैव। "स्वपिहि त्वं समीपे मे स्वपित्र्येवाधुना प्रिय!॥ अत्रार्थो ग्राम्यः॥")

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्दः।) ग्राम्यौलः। वनओल इति भाषा। तत्पर्य्यायः। स्थलकन्दः २। इति रत्नमाला॥ स तु दोषलः। इति राजवल्लभः॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजाता कर्कटी।) कृष्माण्डः। इति चिकाण्डशेषः॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं कुङ्कुमम्।) कुसुम्भम्। इति चिकाण्डशेषः॥

ग्राम्यधर्म्मः, पुं, (ग्राम्यस्य इतरादेर्धर्म्मः।) मैथुनम्। इत्यमरः। २।७।५७॥ (यथा, महाभारते। ३।४८।४।

"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा पापनिश्चयः। मम पुत्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति॥")

ग्राम्यपशुः, पुं, (ग्राम्यो ग्रामजातः पशुः।) ग्रामजातजन्तुः। (यथा, भागवते। ६।१५।१६।

"तस्माद् युवां ग्राम्यपशोर्मम मूढधियः प्रभू। अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्य्यताम्॥") स तु सप्तावधो यथा। गौः १ अजः २ मेषः ३ मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्द्दभः ७। इति तिथ्यादितत्त्वम्॥ (यथाह पैठीनसिः।

"ग्राम्यारण्याश्चतुर्दश। गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशवः। महिषवाराहरुरुसरीसृपपक्षिपुरुषहस्तिनश्चेति यमारण्याः॥" सुश्रुतमते उष्ट्रादयोऽपिग्राम्याः। यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये।

"अश्वाश्वतरगोखरीवृषभोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥")

ग्राम्यमक्षिका, स्त्री, (ग्राम्या ग्रामोद्भवा मक्षिका) क्षुद्रझीमत्स्यः। इति हारावली॥

ग्राम्यशृगः, पुं, (ग्राम्यो ग्रामभवो शृगो हरिणइव। शृगः पशुर्वा इत्येके।) कुक्कुरः। इति शब्दरत्नावली॥

ग्राम्यराशिः, पुं, (ग्राम्यो राशिः।) मिथुनम्। कन्या। तुला। वृश्चिकः। धनुः। कुम्भः। राशी मेषः। इति ज्योतिषम्॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया। पक्षेग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम्।) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥ (ग्राम्यं अश्लीलं वल्लभं प्रियं यस्याः इति विग्रहे वेश्या। इति युत्पत्तिलब्धोऽर्थः॥)

ग्राम्यशूकरः, पुं. स्त्री, (ग्राम्यः शूकरः।) ग्रामोत्पन्नवराहः। तत्पर्य्यायः। विड्वराहः २ ग्रामीणः ३ ग्रामक्रोडः ४ ग्रामकोलः ५ विष्वलः ६ दारकः ७। तस्य मांसस्य गुणाः। वनवराहमांसाद्गुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ग्राम्या, स्त्री, (ग्रामे भवा। ग्राम+"ग्रामात् यखौ।" ४।२।६४। इति यः। स्त्रियां टाप्।) नीली। निष्पावी। इति राजनिर्घण्टः॥ (तुलसी। इति चिन्तामणिः॥)

ग्राम्याश्वः, पुं, (ग्राम्यः ग्रामजातोऽश्वः।) गर्दभः। इति त्रिकाण्डशेषः॥

ग्रावा, [न्] पुं, (गरुते इति गः। गॄ+अन्येभ्योऽपीति डः। आवनति शब्दायते इति। आ+वन शब्दे+विच्। ततो गरुश्चासौ आवा चेति।) प्रस्तरः। (यथा, भागवते। ४।५।१८।
"सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः।
तैरर्द्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन्॥")
पर्व्वतः। इत्यमरः। २।३।१। (यथा,—
"पृथ्वी तावत् त्रिकोणा विपिनतरुतरुदीग्रावखण्डं तदङ्गम्॥"
इत्युद्भटः॥)
मेघः। इति विश्वः॥ दृढे त्रि। इति शब्दरत्नावली॥

ग्रासः, पुं. (गस्यते अद्यते इति। गस्+कर्म्मणि घञ्।) सुखपूरणान्नादि। यथा,—
"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्।
एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्॥"
इति प्रायश्चित्तप्रकरणे पराशरः॥
(तथा च मनुः। ११।२।३।
"एकैकं ग्रासमश्नीयात् त्रयाणि त्रीणि पूर्ववत्॥")
तत्पर्य्यायः। कवलः २। इत्यमरः। २।६।५४॥ गुडेरकः ३ पिण्डः ४ गण्डोलः ५ कवकः ६ गुरुः ७। इति हेमचन्द्रः।३। ८६॥ (दग्धौषधकालान्तर्गतकालविशेषः। "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सासुकं सदुर्मुहुः ग्रासं ग्रासान्तरेणेति दग्धौषधकालाः॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ग्राहः, पुं, (गृह्यते इति। ग्रह+भावे घञ्।) ग्रहणम्। (गृह्णातीति। ग्रह+"विभाषा ग्रहः।" ३।१।१४३। इति व्यवस्थापितविभाषया घञ्।) जलजन्तुविशेषः। हाङ्गर इति भाषा॥ जलहस्ती इति कोचित्॥ तत्पर्य्यायः। अवहारः २। इत्यमरभरतौ॥ (यथा, महाभारते। १।२१।५।
"भीमवेगैर्विकृतैरन्यैर्घोरैश्चलचरैरपि।
उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम्॥")
ग्रिशुकः। इति राजनिर्घण्टः॥ (ग्राहः। यथा, गीतायाम्। १७।१६।
"मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः॥"
"मूढग्राहेणाविवेककृतेन दुराग्रहेण।" इति श्रीधरस्वामी॥)

ग्राहकः, पुं, (गृह्णातीति। ग्रह+ण्वुल्।) सितावरशाकम्। इति राजनिर्घण्टः॥ हिंसपक्षी। बालग्राही। गृहीतरि त्रि। इति शब्दरत्नावली॥ (ग्रह+णिच्+ण्वुल्। ग्रापकः। यथा, महाभारते। ३।२१०।१३।
"यथासं ग्राहकाण्येषां शब्दादीनामिमानि तु॥")

ग्राहिणी, स्त्री, (गृह्णाति अन्नेषगुणानिति। ग्रह उपादाने+"नन्दिग्रहीति।" ३।१।१३४। इति णिनिः ङीप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ ताम्रमूलाद्वृक्षः। इति रत्नमाला॥ चिरट इति भाषा॥

ग्राहिफलः, पुं. (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

ग्राही, [न्] पुं, (गृह्णातीति। ग्रह+णिनिः।) कपित्थः। इति शब्दचन्द्रिका॥

ग्राही, [न्] त्रि, (गृह्णातीति। ग्रह+णिनिः।) मलबन्धकः। धारकः। इति वैद्यकम्॥ (यथा, भावप्रकाशे।
"काश्मनारो हिमा ग्राही तुवरः श्लेष्मपित्तजुत्।")
ग्रहणकर्म्मा। इति व्याकरणम्॥ (यथा, कथासरित्सागरे। २५।४६।
"तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः।
ग्रहरग्राहिभिर्भीमैः प्राप्य दैवादयज्यत॥"
प्रतिकूलः। यथा, भट्टिः। ५।६३।
"मास्म भूर्ग्राहिणी भीरु! गन्तुसुतुसाहिनी भव॥"
"हे भीरु! मास्म भूर्ग्राहिणी प्रतिकूला मा भूः।"
इति जयमङ्गलः॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया। गॄ विज्ञरणे+"ग्रीवाग्रुक्षिकाग्रीवापार्श्वाग्रीवाः।" उणा। १।१५४। इति वनृप्रत्ययेन निपातनात् साधुः।) गलघाटादिसमुदिता। इति भरतः॥ (यथा, शकुन्तलायां १ अङ्के। [दृष्टिः॥")
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥")
ग्रीवा, स्त्री, (गौर्य्यतेऽनया। गॄ विज्ञरणे+"ग्रीवाग्रुक्षिकाग्रीवापार्श्वाग्रीवाः।" उणा। १।१५४। इति वनृप्रत्ययेन निपातनात् साधुः।) गलघाटादिसमुदिता। इति भरतः॥ (यथा, शकुन्तलायां १ अङ्के। [दृष्टिः॥")
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥")
ग्रीवी, [न्] पुं स्त्री, (ग्रीवा विद्यते यस्य। ग्रीवा+इनिः। दीर्घग्रीवावत्त्वया एव अस्य तथात्वम्।) उष्ट्रः। इति जटाधरः॥ ग्रीवायुक्ते त्रि॥

ग्रीष्मः, पुं, (गृह्णते रसान् इति। ग्रस अदने+"ग्रीष्मः।" उणा। १।१४६। इति भक् ग्रीभावश्च धातोः। युगागमश्च निपात्यते।) ऋतुविशेषः। (यथा, मनुः। ६।२१।
"ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः॥")
स तु ज्येष्ठाषाढौ। तत्पर्य्यायः। उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ उष्णागमः ६ तपः ७। इत्यमरः।१।४। १६॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११।
"ग्रैष्मिकस्त्वनभिस्यन्दि जलमल्पेन सिध्यति॥"
इति राजनिर्घण्टः॥
("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत्।
दिग्धि ग्रीष्मे न्यगद्यन्त खिन्नाः खुर्द्दगवाजिनः॥
नैर्ऋतो मारुतो रूक्षः ग्रीष्मपर्णा महीरुहाः।
दग्धं लताकुलारण्यं दावाग्निभ दिशो दश॥
एवं लक्षणके ग्रीष्मे पित्तरक्तप्रदीर्य्यते।
तस्मात् क्रिया प्रतीकारं कुर्य्यात् संग्रमनं भिषक्॥
जलक्रीड़ा दिवानिद्रा सेवनं सुखसाधनम्।
श्यामारामारतं ग्रस्तं कुङ्कुमकिञ्जल्कशीतलम्॥
शीतलालदलोपेतः श्रमघ्नो व्यजनानिलः।
कैतक्या मोदकुसुमचन्दनोशीरशीतलैः॥
लेपनं शीतलं सम्यक् धारागारालयः पुनः।
एवं क्रिया समापन्ने ग्रीष्मे च सुखसङ्गमः॥"
इति ग्रीष्मोपचारः॥
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥
"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते॥
अतोऽस्मिन् पटुकट्वम्लव्यायामार्कांस्त्यजेत्।
भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम्॥
सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान्॥
मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा॥
अन्यथा श्लोपशूथिल्यदाहमोहान् करोति तत्।
कुन्देन्दुधवलं शालिमश्नीयाच्छालेयैः पलैः॥
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ।
पानकं पञ्चसारं वा नवनीतभाजनस्थितम्॥
मोचचोचदलैर्युक्तं साज्यं शक्त्यनुशक्तिभिः।
पटलावासितक्षीरः सकर्पूरं सुशीतलम्॥
शशाङ्कशिरवान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्
ससितं माहिषं क्षीरं चन्दनोचितशीतलम्॥
अवगाहमहाशालतालखण्डोच्चरश्मिषु।
वनेषु माधवीश्लिष्टद्राक्षालवकशालिषु॥
सुगन्धिहिमपानीयसिच्यमानपटालिके।
कायमाने क्षिते चूतप्रवालशललम्बिभिः॥
कदलीदलकक्षार-व्यजनकमलोत्पलैः।
कल्प्यिते कोमलैस्तल्पे हसत्कुसुमपल्लवे॥
मध्यदिनेऽर्कतापार्त्तः खण्याद्वारागृहेऽथवा।
पुंस्त्रीक्षीरनवक्षास्यप्रवृत्तोशीरवारिणि॥
निशाकरकराकीर्णे सौधपृष्ठे निशासु च।
आसनाक्षस्थचित्तस्य चन्दनार्द्रस्य मालिनः॥
निवृत्तकामतल्पस्य सुसूक्ष्मतनुवाससः।
जलार्द्रशालवृन्तानि विस्तृताः पद्मिनीपुटाः॥
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः।
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः॥
मनोहरकलालापाः स्निग्धवः शारिकाः शुकाः।
मृणालवलयाः कान्ताः प्रोतपुङ्कजकमलोत्पलाः॥
अङ्गना इव पद्मिन्यो हरन्ति हृदयं क्षमम्॥"
इति वाभटे शरीरस्थाने तृतीयेऽध्याये।

"ग्रीष्मे पुनर्भृशौष्ण्योपहतत्वात् शरीरमसुखोपपन्नं भवति। उष्णवातावभ्रातमतिशिथिलमत्यन्तप्रविलीनदोषं भेषजं पुनः संशोधनार्थसुखसुखभावसुखानुगमनायात्यन्ततरत्वमापद्यते। तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरं पिपासोपद्रवाय।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥

"मयूखैर्जगतः सारं ग्रीष्मे पेपीयते रविः।
स्वादुशीतं द्रवं स्निग्धमन्नपानं तदा हितम्॥
शीतं सशर्करं मद्यं जाङ्गलामृगपक्षिणः।
घृतं पयः स शाल्यन्नं भजन् ग्रीष्मे न सीदति॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्।
लवणाम्लकटूष्णानि व्यायामञ्चात्र वर्जयेत्॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतलम्।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः।
सेव्यमानो भजेदास्यां सुक्तामणिविभूषितः॥
कानानि च शीतानि जलानि कुसुमानि च।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः॥"
इति च सुश्रुतस्थाने षष्ठेऽध्याये चरकेणोक्तम्॥)

तत्र जातफलं यथा, कोष्ठीप्रदीपे।

"ग्रीष्मोद्भवो भोगभवातुरक्तो
वक्ता सुशीलो जलकेलिशीलः।
विद्याधनैश्वर्ययशोमनोज्ञो
धन्यो सुवेशः परदारचित्तः॥"

उष्णः। इति मेदिनी। मे। १०॥ गर्म्मि इति तात् इति च भाषा॥ तद्वति त्रि॥

ग्रैष्मजा, स्त्री, (ग्रैष्मात् ग्रीष्मप्रभावात् ग्रीष्मे ग्रीष्मकाले वा जायते या इति। जन्+डः। ततष्टाप् च।) लवणी। इति शब्दचन्द्रिका॥ लोणा इति भाषा॥ (ग्रीष्मजातमात्रे, त्रि॥)

ग्रैष्मपुष्पी, स्त्री, (ग्रीष्मे ग्रीष्मकाले पुष्पं यस्याः। जातौ संज्ञायां वा ङीप्।) करञ्जीपुष्पवृक्षः। इति राजनिर्घण्टः॥

ग्रैष्मभवा, स्त्री, (ग्रीष्मे ग्रैष्मसमये ग्रैष्मागमे इत्वर्कः भवति उत्पद्यते या। भू+अच्। टाप्।) नवमल्लिका। इति रत्नमाला॥

("कुमारिका ग्रैष्मभवा सुगन्धा।"
इति वैद्यकरत्नमालायाम्)

ग्रैष्मसुन्दरकः, पुं, (ग्रीष्मे सुन्दर इव कायति शोभते इति। कै+कः। ग्रैष्मसुन्दर+स्वार्थे कन् वा।) शाकविशेषः। गिमा इति भाषा॥ तस्य गुणाः। तिक्तत्वम्। लघुत्वम्। कफपित्तदोषनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥

ग्रैष्महासं, क्ली, (ग्रीष्मे ग्रैष्मसमये हासः प्रकाशः उत्पत्तिर्जन्यशोभेत्वर्थैः यस्य।) इन्द्रतूलकम्। इति त्रिकाण्डशेषः॥ कुड़ीर खता। इति भाषा॥

ग्रैष्मी, स्त्री, (ग्रैष्मः ग्रैष्मसमयः उत्पत्तिकारणत्वेनाऽस्त्यस्याः।"अर्श आदिभ्योऽच्।"५।२।१२७। इत्यच् ततो ङीप्।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रैष्मोद्भवा, स्त्री, (उद्भवतीति। उद्+भू+अच्। ग्रैष्मे उद्भवो यस्याः ग्रैष्मे उद्भवतीति वा।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्लुच, इर् उ चौर्य्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) रेफयुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लौ, क्ली, (ग्लायतीति। ग्लै+कः।) रोगः। इति राजनिर्घण्टः॥

ग्लौव्यं, क्ली, (ग्लौवायां भवम्। "ग्लौवाभ्योऽण् च।" ४।३।५७। इति अण्।) ग्लौवाभूषणम्। इति शब्दरत्नावली॥ (यथा, रघुः। ४।४८॥
"भोगिविष्टनमार्गेषु चन्दनानां समर्पितम्।
नासासत करिणां ग्लौव्यं त्रिपदीच्छेदिनामपि॥")

ग्लौव्येयं, क्ली, (ग्लौवायां भवम्। "घात् ठञ्।" "ग्लौवाभ्योऽण् च।" ४।३।५७। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या चकारात् ठञ्।) कण्ठभूषणम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ७।३५।३४।
"पुनर्दिपान् द्विपारोहान् वैजयन्त्यकुशध्वजान्।
तूणवर्म्माण्यथो कक्षान् ग्लौव्येयाण्यथ कम्बलान्॥")

ग्लौव्येयकं, क्ली, (ग्लौवायां भवमिति। "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु।" ४।२।८६। इति ठक्ञ्।) कण्ठभूषा। इत्यमरः।२।६।१०४॥ (यथा, मार्कण्डेयपुराणे। ८२। २५।
"नूपुरौ विमलौ तद्वद् ग्लौव्येयकमनुत्तमम्॥")

ग्लौ, स्त्री, (ग्रीष्मे भवेति। "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।"४।३।१६। इति अण् ततो ङीप्। "पक्षे ऋतव्यङीप्।" इति अणित्वे के।) नवमल्लिका। इति त्रिकाण्डशेषः॥ ग्रीष्मसम्बन्धिनि त्रि नान्तश्च॥

ग्लस, उ ङ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) अन्तःस्थलतीययुक्तः। उ, ग्लसित्वा ग्लस्त्वा। ङ, ग्लसते। इति दुर्गादासः॥

ग्लस्तः, त्रि, (ग्लस्+कर्म्मणि क्तः।) भक्षितः। इत्यमरः। ३। २। ११२॥

ग्लह, छ कि आदाने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-वेट्।) अन्तःस्थलतीययुक्तः। छ, अग्लहीत् अग्लाक्षीत्। कि, ग्लाहयति ग्लहति। एषः केचिन्न मन्यते इति दुर्गादासः॥ (यथा, महाभारते। २।६०।१६।
"इमां चेत् पूर्वं कितवोऽग्लहीष्य-
दृणोऽभविष्यदपराजितात्मा॥")

ग्लहः, पुं, (ग्लह+"अन्येषु ग्लहः।" ३।३।७०। अक्षशब्देन देवनं लक्ष्यते तत्र यत् पञ्चरूपेण याह्यं तत्र ग्लह इति निपात्यते। इति वार्त्तिकोक्त्या च निपातनात् तथात्वम्।) अक्षक्रीड़ासु पणः। इत्यमरः। २। १०। ४५॥ आड़ इति वाजि इति च भाषा॥ (यथा, महाभारते। २। ६०। ६।
"प्राचालस्य इपदस्यात्मजामिमां
सभामध्ये यो यदेवीद् ग्लहेद्य॥")

ग्लाता, [ऋ] त्रि, (ग्लायति ग्लानियुक्तो भवतीति। ग्लै+तृच्।) ग्लानियुक्तः। इति व्याकरणम्।

ग्लानः, त्रि, (ग्लै+कर्त्तरि क्तः।) रोगात् क्षीणदेहः। तत्पर्य्यायः। ग्लास्नुः २। इत्यमरः। २। ६। ५८॥ रोगी। इति राजनिर्घण्टः॥

ग्लानिः, स्त्री, (ग्लायति अनेनासिन् वा। ग्लै+"वहिश्रिश्रुयुद्रुस्रुह्वाह्यलरिभ्यो नित्।" उणां। ४। ५१। नि:।) बलदीनता। इति हेमचन्द्रः।२।२३३॥ (यथा, गीतायाम्। ४। ७।
"यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत!॥")
रोगः। इति राजनिर्घण्टः॥ (यथा, भागवते। ५। २४। १३। "देहेवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति॥")

ग्लास्नुः, त्रि, (ग्लायतीति। ग्लै+"ग्लाजिस्थश्च गस्नुः।"३। २। १३६। इति स्नुः।) ग्लानः॥ इत्यमरः। २। ६। ५८॥ (यथा, भट्टिः। ७।४।
"वसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत्॥")

ग्लुच, इर् उ चौर्य्ये गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्। उदित्वात् क्त्वावेट्।) अन्तःस्थलतीययुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लुच, उ इर् गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उदित्वात् क्त्वावेट्। अन्तःस्थलतीययुक्तादिः। पञ्चमस्वरी। उ, ग्लुचित्वा ग्लुक्त्वा। इर्, अग्लुचत् अग्लोचीत्। इति दुर्गादासः॥

ग्लेप, ऋ ङ दैन्ये। गतौ। घाते। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सकं-च-सेट्।) अन्तःस्थलतीययुक्तः। ङ, ग्लेपते निर्धनः सदा। ऋ, अजिग्लेपत्। इति दुर्गादासः॥

ग्लेयः, त्रि, (ग्लानिमर्हतीति। ग्लै+यः।) ग्लानियोग्यः। इति व्याकरणम्॥

ग्लेव, ऋ ङ सेवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थलतीययुक्तः। ऋ, अजिग्लेवत्। ङ, ग्लेवते। इति दुर्गादासः॥

ग्लेष, ऋ ङ अन्वेषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थलतीययुक्तः। ऋ, अजिग्लेषत्। ङ, ग्लेषते जिग्लेषे। अन्वेषोऽनुसन्धानम्। ग्लेषते यः सतां मार्गमिति हलायुधः। इति दुर्गादासः॥

ग्लै, क्लमे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) अन्तःस्थलतीययुक्तः। क्लमो हर्षक्षयः। ग्लायति लोकः शोकात्। अनुपसर्गस्य तौ ण्यन्ते क्वल क्वल इत्यादिना वा क्वलः। ग्लपयति ग्लापयति। सोपसर्गस्य तु प्रग्लापयति। इति दुर्गादासः॥ (यथा, मनुः।२।६८।
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥")

ग्लौः, पुं, (ग्लायति ग्लानिं प्राप्नोति क्वप्यये इति भावः। ग्लै+"ग्लाजिस्थिभ्यां क्वौः।" उणां।

२ । ६४ । इति डौः ।) चन्द्रः । (यथा, अथर्ववेदसंहितायाम् । ६ । ८३ । ३ ।
"ग्लौरितः प्रपतिष्यति स गलुन्तो नप्रियति ॥") कर्परः । इत्यमरः । १ । ३ । १४ ॥

घ

घ, घकारः । स तु यञ्जनचतुर्थवर्णः । अस्योच्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ (एतत्तु मुग्धबोधमतम् । यथा, "अ आ ह क ख ग घ ङाः कण्ठ्याः ।" पाणिनीये तु एष कण्ठ्यो जिह्वामूलीयश्च । यथा, "अकुहविसर्ज्जनीयानां कण्ठः ॥" इत्युक्त्वा पुनः शिक्षायाम् ।
"जिह्वामूले तु कुः प्रोक्तो दन्तोष्ठौ वः स्मृतौ बुधैः ॥")
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"घकारं चञ्चलापाङ्गि ! चतुष्कोणात्मकं सदा ।
पञ्चदेवमयं वर्णमरुणादित्यसन्निभम् ॥
निर्गुणं त्रिगुणोपेतं सदा त्रिगुणसंयुतम् ।
सर्व्वगं सर्व्वदं ग्राह्यं घकारं प्रणमाम्यहम् ॥"
अस्योत्पत्तिर्गर्व्वे द्रष्टव्या ॥ वङ्गाक्षरैरस्य लेखनप्रकारादिर्यथा,—
"दक्षिरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षतः ॥
अत ऊर्द्धं गता रेखा ब्रह्मविष्णुनारायणस्तयोः ।
ब्रह्मस्वरूपिणी देवि ! मात्राशक्तिः प्रकीर्त्तिता ॥"
अस्य ध्यानं यथा,—
"मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम् ।
शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम् ॥
सदा क्षीरसुखीं रम्यां लोचनत्रयराजिताम् ।
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रयोगमन्त्रो यथा, वर्णोद्धारतन्त्रे ।
"निर्गुणं त्रिगुणोपेतं सदा त्रिगोलसंयुतम् ।
सर्व्वगं सर्व्वदा ग्राह्यं घकारं प्रणमाम्यहम् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"घः खड्गी घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
वायुः शिवोत्तमः सत्या किङ्किणी घोरनायकः ॥
मरीचिर्व्वरुणो मेधा कालरूपी च दाम्भिकः ।
लम्बोदरा ज्वालमूलं नन्देशो हनने ध्वनिः ॥
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामयः ॥"

घः, पुं, (घण्टयति शब्देन क्षोभते घटयति घर्घरादिशब्दं वा । घटि द्युतौ घट चेष्टायां च + बाहुलकात् डः ।) घण्टा । घर्घरशब्दः । इति मेदिनी । घे । १ ॥

घगघ, हसने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कण्ठ्यवर्गद्वितीयोपधः । घगघति । इति दुर्गादासः ॥

घट, क चिंसे । संघाते । द्युतौ । इति कविकल्पद्रुमः ॥ (पुरां-परं-सकं-अकंच-सेट् ।) क, घाटयति कवाटं द्वारि जनः संयोजयतीत्यर्थः । इति दुर्गादासः ॥

घट, इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (पुरां-पक्षे भ्वां-परं-अकं-सेट् ।) इ, भावे घण्टते । कि, घण्टयति घण्टति । द्युतिर्दीप्तिः । द्युत्यर्थत्वेन प्राप्तिकपुरादित्वे सिद्धे कि करणमर्थान्तरेऽपि प्राप्तिकपुरादित्वार्थम् । तथाच,—
"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"
इति बोपदेवः ॥
प्रसिद्धार्थं कथयितुं धातूनां प्रसिद्धोऽर्थः प्रदर्शितः । किन्तु महाकविप्रयोगं दृष्ट्वान्योऽर्थो मन्तव्यः हि यस्मात् धातवोऽनेकार्था भवन्तीत्यर्थः । तेन हिंसास्तुत्योः पठितस्यापि ग्रंसते: कथनार्थत्वे न मे क्रिया ग्रंसते किञ्चिदीप्सितमिति रघौ कथयतीत्यवार्थः । एवं दीप्तिपठितस्यापि तर्कधातोर्वितर्कणार्थत्वे तर्कयत्यन्यगुणं सुधीरित्यादिः । इति दुर्गादासः ॥

घट, ष ड म चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) घ, घटा । ड, घटते पठितुं शिष्यः । म, घटयति । घटतीति घटो क्वेयो नाघटन् घटतामियादिति तु धटते घटः पचाद्यच् । ततो घट इवाचरतीति क्यौ साधयम् । इति दुर्गादासः ॥ (यथा, भट्टिः । १२ । २६ ।
"घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं सुप्यति चञ्चलापि ॥")

घटः, पुं, (घटते स्वदादिसङ्घातैः जलादिग्रहणाय इत्यर्थः । घट् + पचाद्यच् ।) कलसः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, मनुः । ८ । ३१६ ।
"यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥")
तस्य परिमाणं कलशशब्दे द्रष्टव्यम् ॥ समाधिभेदः । (घटस्थवारिवत् निश्चलत्वात्तथात्वम् ।)
स तु कुम्भकम् । इभशिरः । (आकृतिसादृश्यात्तथात्वम् ।) कूटकुटः । इति मेदिनी । टे । ७ ॥
कुम्भराशिः । यथा,— [लभेत् ।"
"सिंहे वा यदि गोघटे गतनरः सर्व्वार्थसिद्धिं
इति समयप्रदीपः ॥ द्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥ (अस्य पर्य्याया यथा,—
"चतुर्भिराढकैर्द्रोणः कलशोनल्वणोम्मलः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥"
इति श्राद्धधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥
"कंसस्तुगुणो द्रोणः कर्म्मणोनल्वणश्च तत् ।
स एव कलशः ख्यातो घट उन्मान मेवच ॥"
इति परके कल्पस्थाने द्वादशेऽध्याये ॥)
कुम्भपरिमाणम् । यथा,—
"दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः ।"
इति प्रायश्चित्ततत्त्वे कात्यायनः ॥
(योगावस्थाभेदः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६६ ।
"आरम्भश्च घटश्चैव यथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याचतुष्टयम् ॥"
एतदवस्थायां किं स्यात्तदाह तत्रैव । ४ । ७२ । ७३ ।
"द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्द्दश्च भेरीशब्दस्तथा भवेत् ॥")

घटकः, पुं, (घटयति परस्परसम्बन्धादिकमिति । घट + णिच् + ण्वुल् ।) कुलाचार्य्यः । तस्यासृश्यत्वम् । यथा,—
"वरं चाण्डालसंसर्गं कुर्य्यात्तु साधकोत्तमः ।
तथाप्यसृश्यगणकं सर्व्वदा तं परित्यजेत् ॥
दूषिताः कलिकालेषु भारते विविधाः प्रजाः ।
अतएव महेशानि ! सर्व्वे संसर्गदूषिताः ॥
घटकं ब्राह्मणं देवि ! संसर्गे यत्नतस्त्यजेत् ॥"
इति श्राद्धानन्दतरङ्गिण्यां षोढ़ाप्रोक्षासे महिषमर्द्दिनीतन्त्रवचनम् ॥* ॥ योजकः । तत्पर्य्यायः । चाटरः २ । इति त्रिकाण्डशेषः ॥ तस्य रूपञ्च यथा, कुलदीपिकायाम् ।
"धावको भावकश्चैव योजकश्चाग्रजस्तथा ।
दूषकस्तावकश्चैव षड्ते घटकाः स्मृताः ॥"
अन्यच्च ।
"के नो विदन्ति पुरुषा पुरुषाणुपूर्व्वीं-
सुर्व्वीतले कुलभृतां परिवर्त्तनं वा ।
अत्यन्तसूक्ष्ममपि ये कुलतारतम्यं
जानन्ति ते हि घटका न तु योजकाद्याः ॥"
वनस्पतिः । पुष्पेण विना यः फलति सः । इति भूरिप्रयोगः ॥ (घटयति योजयति परार्थेहितादिकं साधयतीत्यर्थः । योजके, त्रि । यथाह भर्त्तृहरिः । २ । ६६ ।
"ते ने सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
ते वै मानुषराक्षसाः परहितं ये: स्वार्थतो घ्नन्ति ये
ये घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥")

घटदासी, स्त्री, (घटार्थं घटनार्थं नियोजिता दासीव या । घटयति योजयति नायकनायिके इति घटा योजिका सा दासीव इति वा ।) कुट्टनी । तत्पर्य्यायः । कुट्टिनी २ दूत्या ३ दूतताली ४ गणेश्वरा ५ । इति त्रिकाण्डशेषः ॥

घटना, स्त्री, (घट + णिच् + युच् टाप् च ।) संघातीकरणम् । सम्पादीकरणम् । यथा, "करिणां घटना घटा ।" इत्यमरः । २ । ८ । १०७ ॥ योजना । मेलनम् । यथा, "अघटनघटनापटीयसी माया ।" इति मायाशब्दस्य । (यथा, राघवतराङ्गिण्याम् । ४ । ३६५ ।
"शक्तिः काऽप्यपरीक्षितास्ति महतां स्वैरं
विलासान्यहो
यन्नाहालावशेन यान्ति घटनां कार्य्याणि
निर्यन्त्रणम् ॥")

घटयोनिः, पुं, (घटः कुम्भः योनिः कारणं उत्पत्तिस्थानम् यस्य ।) अगस्त्यमुनिः । इति हलायुधः ॥

घटराजः, पुं, (घटेषु राजते इति। यद्वा घटेन मृदादिसङ्घटनेन राजते शोभते इत्यर्थः।) कुम्भः। इति हारावली॥

घटा, स्त्री, (घट+भावे विवादङ् ततष्टाप् च।) करिणां घटना। हस्तिनां युद्धादावेकत्र संघातीकरणम्। इत्यमरः। २। ८। १०७॥ (यथा, कथासरित्सागरे। १६। १०६।

"तुरङ्गतुरगव्राताः सुभटास्तैरिवोन्मथ्यः।
तद्गजेन्द्रघटा वेलावनेषु दलघो ययुः॥")

घटनम्। गोष्ठी। सभा। इति मेदिनी। टे। १३॥ समूहः। यथाह श्रीहर्षः।

"यद्गारघटाङ्कुशिमसवदिन्दूपलतुन्दिलापया॥"

घटालाबुः, स्त्री, (घटाकारा अलाबुः।) कुम्भतुम्बी। इति राजनिर्घण्टः॥

घटिकं, क्ली, (घटेन सादृश्यं विद्यतेऽस्य इति ठन्।) नितम्बः। इति शब्दचन्द्रिका॥ (घटेन तरतीति। "नौद्यौघाच्छन्।" ४। ४। ७। इति ठन्। घटेन तरत्यौघे चि। पुंसि तु। घटिं कायति वादयति घटीवादनेन समयं ज्ञापयतीति। के+कः पूर्वहस्वश्च। घटीवादकः॥)

घटिका, स्त्री, (पादस्थास्थि ग्रन्थिघटः घटना विद्यतेऽत्र इति। घट+ठन्।) पादग्रन्थिः। इति शब्दरत्नावली॥ (घटयति निर्दिशति निरूपयति वा कालांशविशेषं लोकयात्रासम्पादनाय। घट+णिच्+ण्वुल्+टापि अत इत्वञ्च।) मुहूर्तः। इति जटाधरः॥ यथा, ज्योतिर्विदाभरणे।

"गुर्वक्षराणामुदितं च यस्यां
पलं पलानां घटिका त्रिलेका॥"

यथा, तिथितत्त्वे रघुनन्दनः। "अत्र घटिका मुहूर्त्तः ग्राह्ययोग्यकालानुरोधात्॥") दण्डः। घड़ी इति भाषा। यथा,—

"चतस्रो घटिकाः प्रातरुदयोदय उच्यते॥"

इति तिथ्यादितत्त्वम्॥

(घट+स्वल्पार्थे कन् टापि अत इत्वञ्च। क्षुद्रघटः। यथा, पञ्चतन्त्रे। १। २०३।

"एता हसन्ति च रुदन्ति च कार्य्यहेतो-
र्विश्वासयन्ति च परं न च विश्वसन्ति।
तस्मान्नरेण कुलशीलवता सदैव
नार्य्याः प्रमाणघटिका इव वर्जनीयाः॥")

घटी, स्त्री, (घटते इति घटः। घट+अच्। ततः संज्ञायां जातौ वा ङीष्। यद्वा, घटः कालमानज्ञापकः सच्छिद्रः कुम्भः ज्ञापकतयाऽस्त्यस्यामित्यच् ततो गौरादित्वात् ङीष्।) दण्डः। इति भूरिप्रयोगः॥ घड़ी इति भाषा॥ (यथा, सिद्धान्तशिरोमणौ।

"गुर्वक्षरैः खेन्दुमितैरसृक्सैः
षड्भिः पलं तैर्घटिका खषड्भिः
स्याद् वा घटी षष्टिरहः सरामैः॥"

स्वल्पार्थे ङीष्।) क्षुद्रघटः। इति मुग्धबोधम्॥ (यथा, मार्कण्डेये। १२। २२।

"घटीयन्त्रेषु चैवान्यो बहुस्रोतो यथा घटी॥")

घटीकारः, पुं, (घटीं करोतीति। क+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) यद्वा, अघटं घटं करोति यः। कुलालः। इति मुग्धबोधम्॥

घटीयन्त्रं, क्ली, (घट्याः यन्त्रम्।) कूपाज्जलोत्तोलनार्थैरज्जुसहितघटः। जलतोला कल इति भाषा। तत्पर्य्यायः। उद्घाटनम् २। इत्यमरः। २। १०। २७॥ (यथा, मार्कण्डेयपुराणे। १२। २०।

"तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यतः॥"

घटी क्षुद्रघटस्तदधस्तनार्द्धाकारं यन्त्रम्। यद्वा घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम्। कालपरिमाणज्ञापको यन्त्रविशेषः। घड़ी इति ख्यातः॥ सूर्य्यसिद्धान्ते कालमानज्ञापकयन्त्राणि बहुविधान्युक्तानि। तत्र शङ्कुयष्ट्यादिकं दिवाकालमानज्ञापकमुक्तवान्। घटीयन्त्रादिकन्तु अहर्निशं कालज्ञानसाधनमिति घटीयन्त्रादिकं सूर्य्यसिद्धान्ते रङ्गनाथेन विस्तीर्य्य प्रदर्शितम्। यथा,—

"अथ घटीयन्त्रादिभिश्चमत्कारियन्त्रैर्वा सर्व्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति॥"

"तोययन्त्रकपालाद्यैर्मयूरनरवानरैः।
सशुक्षरेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्॥"

इति सूर्य्यसिद्धान्तः॥

अत्र रङ्गनाथकृतटीका यथा,—

"जलयन्त्रञ्च तत् कपालञ्च कपालाख्यं जलयन्त्रं वक्ष्यमाणं तदाद्यं प्रथमं तेषां तैर्यन्त्रैर्वालुकायन्त्रप्रभृतिभिः सापेक्षघटीयन्त्रैर्मयूरनरवानरैः। मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्काख्यं छायायन्त्रं पूर्व्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमैतैः सशुक्षरेणुगर्भैः सूक्ष्मसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूक्ष्मप्रोताः षष्टिसंख्यका यष्टिका मयूरोदरस्था सुखात् घटिकान्तरेण खत एव निःसरन्तीति लोकप्रसिद्धा तादृग्यैर्यन्त्रैरित्यर्थः। यद्वा सूक्ष्माकारेण रेणवः सिकतांशा गर्भे उदरे यस्येतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सहितैर्मयूरादियन्त्रैर्मयूरादयुक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चकारस्तोययन्त्रकपालाद्यैरित्यनेन समुच्चयार्थकः। कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत्। प्रकर्षेण सूक्ष्मत्वेनातिरूक्ष्मत्वेनेत्यर्थः। जानीयादित्यर्थः॥ * ॥ ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च उक्तीत्याह॥"

"पारदाराम्बुसूत्राणि शुक्लतैलजलानि च।
बीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः॥"

अत्र रङ्गनाथकृतटीका यथा,—

"तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योग्याः। प्रकर्षस्तु यावदभिमतसिद्धेः। एते के इत्यत आह। पारदाराम्बुसूत्राणीति पारदयुक्ता आराः। यथा सिद्धान्तशिरोमणौ।

लघु काष्ठजसमचक्रे समसुषिरारा: समान्तरा नेम्याम्।
किञ्चिद्वक्रा योज्याः सुषिरस्यार्द्धे पृथक् तासाम्॥
रसपूर्णे तच्चक्रं द्वाधाराच्छस्थितं स्वयं भ्रमति॥
अम्बु जलस्य प्रयोगः। सूत्राणि सूत्रसाधनप्रयोगः। शुल्वं शिल्पनैपुण्यम्। तैलजलानि तैलयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयोगोऽपि। यथा च सिद्धान्तशिरोमणौ।

उत्कीर्य्यनेमिमथवा परितो मदनेन संलग्नम्।
तदुपरि तालदलादं कृत्वा सुषिरे रसं क्षिपेत्
तावत्॥
यावद्भसैकपार्श्वे क्षिप्तजलं नान्यतो याति।
पिहितच्छिद्रं तदतश्चक्रं भ्रमतिस्वयं जलाक्षिप्तम्॥
ताम्रादिमयस्याङ्गुष्ठपरुषनलस्याम्बुपूर्णस्य।
एकं कुम्भजलान्तर्द्वितीयमग्नं लघोस्सुखं च वहिः॥
युगपन्मुक्तं चेत् कं नलेन कुम्भाद्बहिः पतति।
नेम्यां बद्धा घटिकाचक्रं जलयन्त्रवत् तथा
धार्य्यम्॥
नलकप्रच्युतसलिलं पतति यथा तद्घटीमध्ये।
भ्रमति ततस्तत् सततं पूर्णंघटीभिः समाक्षिप्तम्॥
चक्रच्युतं तदुदकं कुम्भे याति प्रणालिकया॥
बीजानि केवलं तुङ्गबीजप्रयोगः। पांसवो धूलिप्रयोगास्तैर्युक्ताः प्रयोगाः। अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः। दुर्लभा असाधारणत्वेन मनुष्यैः कर्त्तुमशक्या इत्यर्थः। अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्य्यापत्तेः। इयं स्वयंवहविद्या ससुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेति। कुहकविद्यात्वादत्र विस्तारानुद्योग इति संक्षेपः॥*॥ अथ कपालाख्यजलयन्त्रमाह।

"ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि।
षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्॥"

अत्र रङ्गनाथकृतटीका यथा,—

"यत् ताम्रघटितं पात्रमधश्छिद्रं अधोभागे छिद्रं यस्य तत्। अमलाम्भसि निर्म्मलं जलं विद्यते यस्मिन् तादृशे कुण्डे हृदृभाण्डे न्यस्तं धारितं सत् अहोरात्रे नाड्यहोरात्रे षष्टिः षष्टिवारमेव न न्यूनाधिकं मज्जति। अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति तत्कपालकं कपालमेव कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाधस्तनार्द्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम्। तद्घटनन्तु।

गुलवस्य दिग्भिर्विहितं पलैर्यत्
षडङ्गुलोच्चं द्विगुणाथतास्यम्।
तदम्भसा षष्टिपलैः प्रपूर्य्यं
प्राच्यं घंटार्द्धप्रातमं घटी स्यात्॥
सत्तंग्रमाधवचयनिर्म्मिता या
हैम्नः शलाका चतुरङ्गुला स्यात्।
विद्धं तया प्राक्तनमत्रपात्रं
प्रपूर्य्यते नाड़िकयाम्बुभिस्तत्॥

तथाच सिद्धान्तशिरोमणौ,—

"घटदलरूपा घटिता घटिका ताम्री तले
पृथुच्छिद्रा।
द्युनिशं निमज्जनमित्या भक्तं द्युनिशं घटीमानम्॥"

"अत्र दशभिः शुल्वस्य पलैरित्यादि यद्घटी-

लक्षणं केचित् कृतं तदयुक्तिशून्यं दुर्घटं चेत्येतदुपेक्षितम्। इष्टप्रमाणाकारसुषिरं पात्रं घटौसंज्ञमङ्गीकृतम्। द्युनिशूनिमज्जनसङ्ख्या यदि घटचिंशच्छतानि पानीयपलानि लभ्यन्ते तदेकेन निमज्जनेन किमिति चेराधिक्यम्।" इति घटीयन्त्रम् ॥ अन्यानि कालमानयन्त्राणि तु यन्त्रशब्दे द्रष्टव्यानि ॥)

घटोत्कचः, पुं. (घट इव उन्नतःकचोऽस्य।) राक्षसविशेषः। स तु हिडिम्याराक्षसीगर्भे भीमसेनाज्जातः॥ इति नहाभारतम्॥ (अस्य नामनिरुक्त्या सह जन्मादिविवरणं यथा, महाभारते। १। १५६। २१—६३।

"तथेति तत् प्रतिश्रुत्य हिडिम्बा राक्षसी तदा।
भीमसेनमुपादाय सोर्द्धमाचक्रमे ततः॥
शैलशृङ्गेषु रम्येषु देवतायतनेषु च।
नगपत्तिविघुष्टेषु रमणीयेषु सर्व्वदा॥
कृत्वा च रूपं परमं सर्व्वाभरणभूषिता।
सञ्जल्पन्ती सुमधुरं रमयामास पाण्डवम्॥
तथैव नदुर्गेषु पुष्पितद्रुमसानुषु।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च॥
नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च।
सुतीर्थवनतोयासु तथा गिरिनदीषु च॥
काननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु।
हिमवद्गिरिकुञ्जेषु गुहासु विविधासु च॥
प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु।
सागरस्य प्रदेशेषु मणिहैमचितेषु च॥
मत्तनेषु च रम्येषु तथैवोपवनेषु च।
देवारण्येषु पुण्येषु तथा पर्व्वतसानुषु॥
गुह्यकानां निवासेषु तापसायतनेषु च।
सर्व्वेष्वृतुफलपुष्पेषु मानसेषु सरःसु च॥
बिभ्रती परमं रूपं रमयामास पाण्डवम्।
रमयन्ती तथा भीमं तत्र तत्र मनोजवा॥
प्रजज्ञे राक्षसीपुत्रं भीमसेनात् महाबलम्।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम्॥
भीमनादं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महारवम्।
महेष्वासं महावीर्य्यं महासत्त्वं महाभुजम्॥
महाजवं महाकायं महामायमरिन्दमम्।
दीर्घघोणं महोरस्कं विकटोद्वद्धपिण्डिकम्॥
अमानुषं मानुषजं भीमवेगं महाबलम्।
यः पिशाचानतीवान्यान् बभूवाबीव राक्षसान्॥
बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते!।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद् बली॥
सद्यो हि गर्भान् राक्षस्यो लभन्ते प्रसवन्ति च।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः॥
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा।
मातुश्च परमेष्वासौ च नामास्य चक्रतुः॥
घटो ह्यासोत्कचश्चेति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह॥"

असौ हि कुरुक्षेत्रयुद्धे कर्णनिक्षिप्तैकपुरुषघातिन्या वासवदत्तया शक्त्या आहतो मृतश्च। यथा, महाभारते। ७। १७७। ४८—६३।

"ततोऽब्रुवन् कुरवः सर्व्व एव
कर्णं दृष्ट्वा घोररूपाञ्च मायाम्।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्त्तराष्ट्राः॥
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे।
यो नः संग्रामाद्घोररूपाद्विमुच्येत्
स नः पार्थान् सबलान् योधयेत॥
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या वै दत्तया वासवेन।
मा कौरवाः सर्व्व एवेन्द्रकल्पा
राक्षियुद्धे कर्ण! नेशुः सयोधाः॥
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजंस्वास्यमानं बलञ्च।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दधे शक्तिमोक्षाय कर्णः॥
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत् प्रतिघातं रणे तम्।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन्॥
याऽसौ राजन्! निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य।
यां वै प्रादात् सूतपुत्राय शक्रः
शक्तिं श्रेष्ठां कुरुलाभ्यां निनाय॥
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम्।
रक्षो रक्षसां ज्वलितामिवोल्कां
वैकर्त्तनः प्राहिणोद्राक्षसाय॥
तामुत्तमां परकायावहन्तीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम्।
भीतं रक्षो विप्रदुद्राव राजन्!
कृत्वात्मानं विस्मयतुल्यप्रमाणम्॥
दृष्ट्वा शक्तिं कर्णबाहूत्तरस्थां
नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!।
ववुर्वाताश्चुक्षुभाचापि राजन्!
सनिर्घाता चाग्निर्गां जगाम॥
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य।
ऊर्द्धं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती॥
युद्धा चित्रैर्विविधैः शस्त्रपूगैर्-
दिव्यैर्वीरो मानुषे राक्षसेच्च।
नदन्नादान् विविधान् भैरवांश्च
प्राणानिष्ट्वाजितः शक्रशक्त्या॥
इदञ्चान्यच्चित्रमाश्चर्य्यरूपं
चकारासौ कर्म्म शत्रुक्षयाय।
तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा
बभौ राजन्! शैलमेघप्रकाशः॥
ततोऽन्तरीक्षादपतन्नदासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः।
अवाक् शिरास्तब्धगात्रो विनिष्क्रो
घटोत्कचो महदास्याय रूपम्॥
स तद्रूपं भैरवं भीमकर्म्मा
भीमं कृत्वा भैमसेनिः पपात।
हतोऽप्येवं तव सैन्येकदेशमपोथयत् स्वेन देहेन राजन्!॥
ततो भिन्नाः प्राणदन् सिंहनादैर्-
भैर्य्यश्च शङ्खा सुरजाश्चानकाश्च।
दग्धां मायां निहतं राक्षसञ्च
दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः॥
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः।
अन्वारूढस्तव पुत्रं रथस्थं
हृष्टश्चापि प्राविशत् स्वं स्वसैन्यम्॥")

घटोत्कचान्तकः, पुं. (घटोत्कचस्य अन्तकः संहारकः।) कर्णराजः। इति त्रिकाण्डशेषः॥

घटोद्भवः, पुं. (उद्भवतीति उद्भवः घटः कलसः उद्भवः उत्पत्तिस्थानं यस्य। यद्वा घटात् उद्भवतीति। उत्+भू+अच्।) अगस्त्यमुनिः। इति हेमचन्द्रः। २। ३६॥

घट्ट, क चाले। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं क्वचित् सकञ्च-सेट्।) टवर्य्यान्तः। चालश्चलनम्। क, घट्टयति मेघो वायुना। इति दुर्गादासः॥

घट्ट, ङ चाले। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं क्वचित् सकञ्च-सेट्।) टवर्य्यान्तः। ङ, घट्टते। इति दुर्गादासः॥

घट्टः, पुं, (घट्टतेऽस्मिन् इति। घट्ट+"हलश्च।" ३। ३। १२१। इति घञ्।) नद्यादौ जानाद्यर्थं प्रवेशस्थानम्। इति लिङ्गादिसंग्रहे अमरभरतौ॥ घाट् इति यस्य प्रसिद्धिः। जगत इति ख्यातो वा। तत्पर्य्यायः। तीर्थः २। अवतारः ३। इति हेमचन्द्रः। ४। १५३॥

घट्टगा, स्त्री, (घट्टेति नाम्ना गीयते उदाहियते इति। घट्टा+गै+कः टाप् च।) नदीभेदः। यथा,—

"मलापहा भीमरथी च घट्टगा
यथा च कृष्णा जलसान्यतागुणैः।
मलापहा घट्टपयस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम्॥"

इति राजनिर्घण्टः॥

घट्टजीवी, [न्] पुं, (घट्टेन घट्टे देयतरपण्येन शुल्कादिनेत्यर्थः। जीवतीति। जीव+णिनिः।) वर्णसङ्करजातिविशेषः। पाटनि इति भाषा। स तु वैश्यायां शूद्रकाज्जातः। इति विवादार्णवसेतुः॥

घट्टना, स्त्री, (घट्ट+"न्यासश्रन्थोयुच्।" ३। ३। १०७। इत्यस्य सूत्रस्य "घट्टिवन्दिविदिभ्यश्चेति वाच्यम्।" इति वार्त्तिकोक्त्या युच् टाप् च।) चलना। (आङ् पूर्व्वकघट्टनाशब्दस्य प्रयोगो यथा, माघे। १। १०।

"रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः॥")

वृत्तिः। इति हेमचन्द्रः॥

घण, दन उ दीप्तौ । इति कविकल्पद्रुमः ॥ (तनां-उभं-अकं-सेट् । उदित्वात् क्त्वेट् ।) द न, घणोति घणुते । उ, घणित्वा घत्वा । इति दुर्गादासः ॥

घण्टः, पुं, (घण+क्तः ।) स्वनामख्यातवाद्यभेदविशेषः । मत्स्यघण्टगुणः । बलरुचिकारित्वम् । वातनाशित्वञ्च । इति राजवल्लभः ॥

घण्टकः, पुं, (घण्ट+संज्ञायां कन् ।) क्षुपविशेषः । घेंटकोल इति भाषा । अस्य मूलगुणाः । कफनाशित्वम् । कटुपाकित्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥ घण्टकर्णोऽपि पाठः ॥

घण्टा, स्त्री, (घण्टयति दीप्यते पूजादिकाले वाद्येन शोभते, घण्टयति शब्दायते वा । घटि दीप्तौ + अच् ततष्टाप् ।) कांस्यनिर्म्मितवाद्यविशेषः । यथा, स्मृतिः ।

"सर्व्ववाद्यमयी घण्टा वाद्याभावे नियोजयेत् ॥"
"शब्दो यस्य गृहे नास्ति घण्टा वा गरुडान्विता ।
पुरतो वासुदेवस्य न स भागवतः कलौ ॥"

इति पद्मपुराणे पातालखण्डम् ॥

अथ घण्टामाहात्म्यमुक्तञ्च स्कान्दे श्रीब्रह्मनारदसंवादे यथा,—

"स्नानार्चनक्रियाकाले घण्टानादं करोति यः ।
पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।
वसते देवलोके तु अप्सरोगणसेवितः ॥
सर्व्ववाद्यमयी घण्टा केशवस्य सदा प्रिया ।
वादनाच्छ्रुते पुण्यं यज्ञकोटिसमुद्भवम् ॥
वादित्रनिनदे स्तूर्य्यगीतमङ्गलनिःस्वने ।
यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः ॥
वादित्राणामभावे तु पूजाकाले हि सर्व्वदा ।
घण्टाशब्दो नरैः कार्य्यः सर्व्ववाद्यमयी यतः ॥
सर्व्ववाद्यमयी घण्टा देवदेवस्य वल्लभा ।
तस्मात् सर्व्वप्रयत्नेन घण्टानादन्तु कारयेत् ॥
मन्वन्तरसहस्राणि मन्वन्तरशतानि च ।
घण्टानादेन देवेशः प्रीतो भवति केशवः ॥"*॥

तथा, विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे ।

"शृणु दैत्येन्द्र ! वक्ष्यामि घण्टामाहात्म्यमुत्तमम् ।
प्रह्लाद ! त्वत्समो नास्ति मद्भक्तो भुवनत्रये ॥
मम नामाङ्किता घण्टा पुरतो मम तिष्ठति ।
अर्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यप ! ॥
वैनतेयाङ्कितां घण्टां सदर्शनयुतां यदि ।
ममाग्रे स्थापयेद्दृश्यस्तु देहे तस्य वसाम्यहम् ॥
यस्तु वादयते घण्टां वैनतेयेन चिह्नितां ।
धूपे दीपे च नैवेद्ये स्नाने पूजाकाले विशेषतः ॥
मामाग्रे प्रत्यहं वत्स ! प्रत्येकं लभते फलम् ।
मत्सायुज्यं गोयुतञ्च चान्द्रायणशतोद्भवम् ॥
विष्णिवाङ्गवता पूजा सफला जायते नृणाम् ।
घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम् ॥
नागारिचिह्निता घण्टा रथाङ्गेन समन्विता ।
वादनात् कुरुते नाशं जन्मन्तुभयस्य च ॥
गरुडेनाङ्किता घण्टा दृष्टाहं प्रत्यहं सदा ।
प्रीतिं करोमि देवेन्द्र ! लक्ष्मीं प्राप्य यथाधनः ॥
दृष्ट्वान्तं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम् ।
सुपर्णे च तथा प्रीतिं घण्टाग्रिखरमास्थिते ॥
स्वकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः ।
मदीयार्चनकाले तु फलं कोट्येन्द्रवं कलौ ॥"

अन्यच्च ।

"घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः ।
गरुडं वै प्रियं विष्णोः स्थापितं भुवनत्रयम् ॥
सचक्रघण्टानादन्तु म्लेच्छकाले शृणोति यः ।
पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः ॥
सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरौ ।
देवतानां मुनीन्द्राणां पितॄणामुत्सवो भवेत् ॥
अभावे वैनतेयस्य चक्रस्यापि न संशयः ।
घण्टानादेन भक्तानां प्रसादं कुरुते हरिः ॥
गृहे यस्य भवेन्नित्यं घण्टा नागारिसंयुता ।
न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम् ॥
यस्य घण्टा गृहे नास्ति शृणुते पुरतो हरेः ।
कथं भागवतं नाम गीयते तस्य देहिनः ॥"
"अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता ।
संग्राह्या वैष्णवैर्यत्नाच्चक्रेणोपरि मण्डिता ॥
गीतं वृत्तं पुराणादिपठनञ्च प्रशस्यते ॥"

इति श्रीहरिभक्तिविलासे ६ विलासः ॥

(घण्टयति दीप्यते कुसुमादिभिरिति । घटि + अच् । स्त्रियां टाप् ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥ अतिबला । नागबला । इति राजनिर्घण्टः ॥ (अतिबलानागबलाघण्टापाटलिशब्देष्वासां विवृतिः यथास्थानं ज्ञातव्या ॥)

घण्टाकः, पुं, (घण्टयति दीप्यते स्वकुसुमैरिति । घटि + अच् टाप् । घण्टा तया घण्टेति आख्यायेत्यर्थः कायतीति । घण्टा + के + कः ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥

घण्टाकर्णः, पुं, (घण्टावत् कर्णौ यस्य ।) शिवगणविशेषः । घेंटु इति ख्यातः । यथा,—

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः ॥"

इति शिवपुराणम् ॥

तस्य पूजाविधिर्यथा,—

"चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः ।
आरोग्यार्थं क्षुद्दोषमूलं संक्रान्त्यां तत्र कारयेत्॥"

पूजामन्त्रो यथा,—

"घण्टाकर्ण ! महावीर ! सर्व्वव्याधिविनाशन !।
विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल ! ॥"

इति तिथ्यादितत्त्वे रविसंक्रान्तिप्रकरणम् ॥ (वनौषध्यादिविशेषः । यथा, काशीखण्डे । ३३ । १७५ ।

"इयं हि चित्रघण्टेशी घण्टाकर्णस्वयं वृतः ॥")

घण्टापथः, पुं, (घण्टानां उपलक्षणात् घण्टादिवादिनां पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) घण्टोपलक्षितानां हस्त्यादीनां पन्थाः । इति भरतः ॥ ग्रामादौ प्रधानमार्गः । यथा,—

"दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः ॥"

इति चामरव्यम् ।

तत्पर्य्यायः । संसरणम् २ । तत् संसरणं यदि पुरसम्बन्धि स्यात्तदा उपनिष्करमिति स्यातम् । इत्यमरः । २ । १ । १८ ॥

घण्टापाटलिः, पुं, (घण्टा चासौ पाटलिश्चेति कर्म्मधारयः ।) वृक्षविशेषः । घण्टापारुल इति भाषा ॥ तत्पर्य्यायः । गोलीढः २ भाटलः ३ मोचः ४ सुष्कः ५ । इत्यमरः । २ । ४ । ३६ ॥ गोलिहः ६ घण्टा ७ पाटलिः ८ । इति तट्टीका ॥ चारटुः ९ कासघुष्कः १० । इति रत्नमाला ॥ पाटली ११ घण्टाकः १२ भाटः १३ । इति शब्दरत्नावली ॥ तीक्ष्णः १४ घण्टकः १५ । इति रत्नकोषः ॥ मोचकः १६ काष्ठपाटली १७ कालाश्यामली १८ काष्ठस्थली १९ । इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ मुष्ककशब्दे द्रष्टव्यौ ॥

घण्टाबीजं, क्ली, (घण्टेव बीजमस्य ।) जयपालः । इति राजनिर्घण्टः ॥

घण्टारवा, स्त्री, (घण्टारववत् रवः पक्वफलेषु यस्याः । यद्वा, पक्वेषु फलेषु घण्टेव रौतीति । रु ल ध्वनौ + अच् ।) वृक्षविशेषः । भुनभुनिया इति वनशब्द इति च भाषा ॥ तत्पर्य्यायः । शृणपुष्पिका २ । इत्यमरः । २ । ४ । १०७ ॥ शृणपुष्पी ३ । इति भरतः ॥

घण्टाली, स्त्री, (घण्टां अलति पर्य्याप्नोति शब्देनेत्यर्थः । अल पर्य्याप्तौ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् स्त्रियां ङीप् च । यद्वा घण्टा आली सदृशरी यस्याः शब्दसाद्दश्यात् तथात्वम् ।) कोशातकी । इति राजनिर्घण्टः ॥ झिङा इति भाषा ॥ (घण्टानां आली श्रेणी ।) घण्टाश्रेणी च ॥

घण्टाशब्दं, क्ली, (घण्टायाः शब्द इव शब्दो यस्य ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

घण्टिका, स्त्री, (घण्टा + अल्पार्थे कन् ततष्टाप् अत इत्वञ्च । घण्टिका क्षुद्रघण्टा तद्वत् आकृतिरस्त्यस्याः । अर्श आदित्वादच् ।) लम्बिका । तालूद्देशस्थमांसिका । इति राजनिर्घण्टो हेमचन्द्रश्च ॥ (गलरोगविशेषः । अस्य स लक्षणचिकित्सितं यथा,—

"तिलपिच्छिलगौल्यादिसेवनात्तद्वादपि ।
नवोद्भेदेन कफजो जायते घण्टिकागदः ॥
जिह्वामूले कण्ठसन्धौ शोथस्तत्समुद्भवः ।
तेनास्यस्रोतो जड़ता ज्वरो मन्दश्च जायते ॥
शिरोव्यथा रुचिस्तृष्णा तथास्यजड़ता भवेत् ।
तज्जन्या कण्ठमध्ये तु संपीड्य रक्तग्रन्थिका ॥
परिस्रुतं तथा रक्तं सदा विस्रावणं हितम् ।
वचाञ्च मरिचं क्षाराचूर्णं तत्र निधापयेत् ॥
मर्द्दनं स्यात् कण्ठदेशे तेन ग्रन्थिर्विलीयते ।
धान्यनागरजीरूतवचाव्योषसुङ्कटाः ॥
क्वाथः खेदो घण्टिकाया सुखे गण्डूषधारणम् ।
गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा ॥"

इति घण्टिकारोगः ॥

इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशत्तमेऽध्याये ॥)

घण्टिनीबीजं, क्ली, (घण्टिनीव बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥

घण्टुः, पुं, (घण्टयति दीप्यते इति। घटि दीप्तौ + "तन्वादेरुः।" इति उणादिकोषटीकाधृतसूत्रेण उः।) गजघण्टा। प्रतापः। इत्युणादिकोषः॥

घण्टेश्वरः, पुं, (घण्टानां घण्टाकर्णादिगणविघ्नेषाणां ईश्वरः प्रभुः।) देवताविघ्नेषः। स तु मङ्गलपुत्रः। ब्रह्मदाता च। घेंटु इति भाषा॥ यथा,

"मङ्गलस्य प्रिया मेधा तस्यां घण्टेश्वरो महान्।
ब्रह्मदाता च तेजस्वी विष्णुतुल्यो बभूव ह॥"

इति ब्रह्मवैवर्त्तपुराणम्॥

घण्डः, पुं, (घण्डिति शब्दं कुर्व्वन् डयते उड्डीयते इति। डी नभोगतौ + बाहुलकात् डः।) भ्रमरः। इति संक्षिप्तसारे उणादिवृत्तिः॥

घनं, क्ली, (हन्यते ताड्यते यत् इति। हन् + "मूर्त्तौ घनः।" ३। ३। ७७। इति अप् घनादेशश्च।) कांस्यतालादिकं वाद्यम्। इत्यमरः। २। ७। ३॥ कांस्यताल; करताल इति ख्यातः आदिना काहलादयः। इति सारसुन्दरी॥ मधुमधृत्यम्। इति मेदिनी। ने। ३॥ लौहः। इति हेमचन्द्रः॥ लवणम्। इति राजनिर्घण्टः॥

घनः, पुं, (घनति दीप्यते इति। घन दीप्तौ + अच्।) मेघः। (यथा, महाभारते। १। १३७। २४।

"ततः खेऽहार्द्दरिहयं दृष्ट्वा रङ्गावलोकिनम्।
भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान्॥")

मुस्ता। ओषः। दार्ढ्यं। विस्तारः। (हन्यते वध्यतेऽनेन। हन् + "मूर्त्तौ घनः।" ३। ३। ७७। इति अप् घनादेशश्च।) लौहमुद्गरः। इति मेदिनी। ने। ३॥ (यथा, भारविः। १८।१।

"धनुरास्य सकार्मुकधिग्गुरुः
प्रतिजघान घनैरिव सुस्थिरैः॥")

शरीरम्। कफः। अभ्रकम्। इति राजनिर्घण्टः॥ सजातीयाङ्कचयस्य पूरणम्। यथा,

"समस्त्रिघातश्च घनः प्रदिष्टः
स्याप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदिश्चिनिघ्नस्तत आदिवर्ग-
स्त्यान्त्यादतोऽथादिघनश्च सर्व्वे॥"

इति लीलावती॥

(वेदपाठविशेषः। यथा,—

"जटासुस्ता विपर्य्यस्य घनमाहुर्मनीषिणः॥")

घनः, त्रि, (हन्यते इति। हन् + अप् घनादेशश्च।) निविड़ः। तत्पर्य्यायः। निरन्तरः २ सान्द्रः ३। इत्यमरः। ३। १। ६६॥ (यथा, रघुः। ८। ६१।

"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम्।
तदलङ्घ्यपदं हृदि भूमिकृते
प्रतियातमिवान्तिकमस्य गुरोः॥")

दृढ़ः। इति मेदिनी। ने। ४॥ (यथा, रघुः। ११। ११८।

"यच्चकार विवरं शिलाघने
ताड़कोरसि स रामसायकः॥")

पूर्णः। (यथा, महाभारते। १। १३६। २८।

"किंखिदापूर्य्यते व्योम जलधारावनैर्घनैः॥")

सम्पुटः। इति शब्दरत्नावली॥ (निरवकाशः। यथा, पञ्चतन्त्रे। ३। २३६।

"किं गाण्डीवस्फुरगुरुघनास्फालनक्रूरपाणिर्नासील्लीलानटनविलसन् मेखली सव्यसाची॥")

घनकफः, पुं, (घनस्य मेघस्य कफ इव।) करका। इति चिकाण्डशेषः॥

घनकालः, पुं, (घनस्य मेघस्य घनप्रधानो वा कालः।) वर्षा ऋतुः। इति शब्दरत्नावली॥

घनगोलकः, पुं, (घनस्य नानावर्णमेघस्य गोलः। स इव कायति प्रकाशते इति। घन + कै + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। शुक्लरक्तमेघसादृश्यादस्य तथात्वम्।) संश्लिष्टरजतसुवर्णम्। इति हेमचन्द्रः। ४। ११३॥ मिश्रान सोआ रूपा इति भाषा॥

घनजम्बालः, पुं, (घनः सान्द्रो जम्बालः इति कर्म्मधारयः।) चुलुकः। इति चिकाण्डशेषः॥

घनज्वाला, स्त्री, (घनस्य मेघस्य ज्वाला दीप्तिः प्रस्फुरणमित्यर्थः।) मेघदीप्तिः। वज्राग्निः। इति शब्दरत्नावली॥

घनतालः, पुं, (घनतायां निविड़तायां अलति पर्य्याप्नोतीति। अल पर्य्याप्तौ + अच्।) सारङ्गपक्षी। इति जटाधरः॥

घनतोलः, पुं, (घनं मेघं अभिलक्षीकृत्य खसुखं तोलयति ऊर्द्धसुखीभवतीत्यर्थः। तुल उन्माने + अच्।) चातकपक्षी। इति चिकाण्डशेषः॥

घनद्रुमः, पुं, (घनः कण्टकाकीर्णत्वान्निविड़ो द्रुमो वृक्षः।) विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥

घननाभिः, पुं, (घनस्य मेघस्य नाभिर्गर्भाशयस्थानमिव। मेघस्य धूमयोनित्वादेव तथात्वम्।) धूमः। इति शब्दरत्नावली॥

घनपत्रः, पुं, (घनानि निविड़ानि पत्राणि यस्य।) पुनर्नवा। इति राजनिर्घण्टः॥

घनपावकः, पुं, (घनेन मेघेन मेघध्वनिनेत्यर्थः। पावक इव। मेघध्वनिश्रवणेन उन्मत्ततयास्य तथात्वम्।) मयूरः। इति शब्दमाला॥

घनफलः, पुं, (घनानि बहूत्पन्नत्वात् निविड़ानि फलानि यस्य।) विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥

घनमूलं, क्ली, (घनस्य सजातीयाङ्कचयपूरणस्य मूलम् आद्यम्।) पूरितसजातीयाङ्कचयस्याद्याङ्कः। यथा। नवघनस्य मूलं चयं इत्यादि॥ करणसूत्रं यथा,—

"आद्यं घनस्थानमधोघने द्वे
पुनस्तथान्त्यात् घनतो विशोध्य।
घनं पृथक्स्थं पदमस्य कृत्वा
त्रिघ्ना तदाद्यं विभजेत् फलन्तु॥
प्रन्यस्य तत्तत्कृतिमन्त्यनिघ्नौ
त्रिघ्नीं न्यसेत्तत्प्रथमात् फलस्य।
घनं तदाद्यात् घनमूलमेवं
पंक्त्या भवेदेवमतः पुनश्च॥"

इति लीलावती॥

घनमूलः, पुं, (घनं दृढं मूलमस्य।) मोरटः। इति राजनिर्घण्टः॥

घनरसः, पुं, (घनः सान्द्रो रसः।) सान्द्रनिर्य्यासः। (घनो रसो यस्य।) मोरटः। (घनस्य मेघस्य रसः।) जलम्। कर्पूरम्। पीलुपर्णी। सम्यक्सिद्धरसः। इति मेदिनी। से। ५१॥ अत्र क्लीवलिङ्गोऽपि। यथा, रत्नकोषे।

"घनरसमन्नं क्षीरं घृतमम्बुतं जीवनं भुवनम्॥"

घनवल्लिका, स्त्री, (घनस्य मेघस्य वल्लिका लता इव।) विद्युत्। इति हारावली। ५८॥

घनवल्ली, स्त्री, (घना घनरसा वल्ली लता।) अम्लतसवा लता। इति राजनिर्घण्टः॥ (घनस्य मेघस्य वल्लीव इति विग्रहे विद्युत्॥)

घनवातः, पुं, (घनो निविड़ो वातो वायुर्यत्र।) नरकभेदः। इति हेमचन्द्रः। ५। २॥

घनवासः, पुं, (घनस्तीक्ष्णः वासो गन्धो यस्य।) कुष्माण्डः। इति हारावली। ६७॥

घनवाहनः, पुं, (घन इव शुभ्रं वाहनं यस्य। शुभ्रत्वेवाहनत्वादेवास्य तथात्वम्।) शिवः। इति हेमचन्द्रः। २। १११॥ (घनो मेघः वाहनं यस्य।) इन्द्रः। मेघवाहन इत्यमरदर्शनात्॥

घनश्यामः, त्रि, (घनो मेघस्तद्वत् श्यामः श्यामवर्णः।) निविड़कृष्णवर्णः। मेघतुल्यश्यामवर्णः। योगरूढ़िरयं शब्दः श्रीरामकृष्णयोर्बोधकः। इति कैश्चित् तत्र पुं। यथा, महानाटके।

"अये राम! घनश्याम! तुभ्यामि सुखपङ्कजम्।
यदि जीवामि शोकेन पुनर्द्रक्ष्यामि ते सुखम्॥"

"समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम्।
हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम्॥"

इति श्रीभागवतम्॥

घनसारः, पुं, (घनः शुक्लमेघस्तद्वत् शुभ्रः सारो यस्य।) कर्पूरम्। (यथा, सुश्रुते उत्तरतन्त्रे ४७ अध्याये।

"पीनस्तनोरुजघना घनसारदिग्धा-
स्ता एवमार्द्रवसनाः सह संविशेयुः॥"

यथाच महाभागवतपुराणे प्रकृतिखण्डे। ६।

"दिक्कान्ताघनसारचन्दनरसासाराः श्रयन्तां मनः॥")

घनो निविड़ः सारो यस्य।) दक्षिणावर्त्तपारदः। इति मेदिनी रे। २६०॥ वृक्षभेदः। (घनस्य मेघस्य सारः।) जलम्। इति धरणी॥

घनस्कन्धः, पुं, (घनो दृढ़ः स्कन्धो यस्य।) कोशाम्रवृक्षः। इति राजनिर्घण्टः॥

घनस्वनः, पुं, (घनो सुस्ता तद्वत् सुष्ठु अनिति प्राणितीति। अन घञु प्राणने + अच्।) तरुलीयशाकः। इति राजनिर्घण्टः॥ (घनस्य मेघस्य स्वनः।) मेघशब्दश्च॥

घना, स्त्री, (घन + टाप्।) माषपर्णी। रुद्रजटा। इति राजनिर्घण्टः॥

नाकरः, पुं, (घनानां मेघानामाकरः।) वर्षाकालः। इति शब्दरत्नावली॥

घनाघनः, पुं, (हन्तीति। हन वधे + पचाद्यच्। ततः "हन्तेर्घत्वञ्च।" ३। १। १३४। इत्यस्य वार्त्तिके इति द्वित्वं आक चाभ्यासस्य।) इन्द्रः। धातुकमरुद्धस्ती। वर्षुकमेघः। इत्यमरः। ३।३। १०६॥ (यथा, राजतरङ्गिण्याम्। ४। ३६५।

"अभीक्ष्णानि घनाघनव्यवहितोऽप्युल्लाघयत्यंशुमान्
दूरस्थोऽपि पयोधरोऽतिघृणिघृणिरस्यर्कं करोत्यातपम्॥")

अन्योन्यघट्टनं इति धरणी॥

घनाघनः, त्रि, निरन्तरः। (हन्तीति। हन् + अच्। "हन्तेर्घत्वञ्च।" इति द्वित्वं आक् चाभ्यासस्य।) घातुकः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। १०। १०३। १।

"आशुः शिशानो वृषभो न भीमो
घनाघनः क्षोभणश्चर्षणीनाम्॥")

घनाघना, स्त्री, (घनाघन + टाप्।) काकमाची। इति शब्दचन्द्रिका॥

घनात्ययः, पुं, (घनानां मेघानामत्ययो नाशो यस्मिन्।) ग्रीष्मकालः। इति हेमचन्द्रः। २। ७२॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।

"पैत्तिकानां व्याधीनामुपशमो हेमन्ते श्लैष्मिकानां शिशिरे वातिकानां घनात्यये स्वभावत एव॥"

"हैमन्तिकं दोषचयं वसन्ते
प्रवाहयन् श्लैष्मिकमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक्
प्राप्नोति रोगानृतुजान्न जातु॥"

इति चरके शरीरस्थाने द्वितीयोऽध्याये॥)

घनामयः, पुं, (घनो दृढ़ः आमयो यस्मात्।) खर्জ্জুরवृक्षः। इति त्रिकाण्डशेषः॥

घनामलः, पुं, (घनो निविड़ः अमलश्च।) वास्तूकशाकः। इति त्रिकाण्डशेषः॥

घनाश्रयः, पुं, (घनानां मेघानामाश्रयः।) आकाशम्। इति हेमचन्द्रः। २। ७७॥

घनोदधिः, पुं, (घनानां लौहसुद्गराघातसदृशः समुद्र इव। लौहसुद्गरप्रचुरतया एवास्य तथात्वम्।) नरकभेदः। इति हेमचन्द्रः। ५। २॥

नीपलः, पुं, (घनस्य मेघस्य उपलः।) करकाः। इति हेमचन्द्रः। २। ८०॥ (करकाशब्दे अस्य विवरणं ज्ञातव्यम्॥)

घम्, गतौ। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) ओष्ठ्यवर्णयोपधः। घम्बति। इति दुर्गादासः॥

घरट्टः, पुं, (घर घर इति शब्देन घटति भाष्यतीति। घट + निपातनात् द्वित्वे साधुः) पेषणी। इति पुराणम्॥ जाता इति भाषा॥ (यथा, श्रीकण्ठचरिते। ६। ४२।

"अरुक्षमतसजवघट्टपदरञ्जाघट्टं
बतप्रोच्छलत्तुङ्गसुमनावरभूजतानाम्।
मानस्य पद्मलहया सहसैव पेतुं
तत् अरमाज्यघरट्टविलासलासोत्॥")

घर्घटः, पुं, (घर्घ इत्यस्फुटशब्दं घटति गच्छतीति। घट + अच्। प्रकन्धादित्वात् साधुः।) मत्स्यविशेषः। इति शब्दरत्नावली॥ टाङ्गरा इति भाषा॥

घर्घरः, पुं, (घर्घेति अव्यक्तं ध्वनिविशेषं रातीति। रा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पर्व्वतद्वारम्। द्वारम्। उलूकः। नदविशेषः। स्वरभेदे त्रि। इति मेदिनी। रे। १५१॥ ध्वनिः। (यथा, राजतरङ्गिण्याम्। २। १०३।

"चण्डेर्डमरुनिर्घोषैर्घर्घरं श्रुतवान् ध्वनिम्॥")

हास्यम्। इति हेमचन्द्रः। २। २१०॥ तुघानलः। इति भूरिप्रयोगः॥

घर्घरकः, पुं, (घर्घर एव। स्वार्थे कन्।) घर्घरनदः। यथा, राजनिर्घण्टे।

"ग्रीष्मे घर्घरके जलन्तु रुचिदं सन्तापशोषापहं
पथ्यं वह्निकरं तथाच बलदं चीणाङ्गदृद्धिप्रदं॥"

घर्घरा, स्त्री, (घर्घ इत्यव्यक्तशब्दं रातीति। रा + कः स्त्रियां टाप्।) क्षुद्रघण्टिका। वीणाभेदः। इति मेदिनी। रे। १५१॥ (गङ्गा। यथा, काशीखण्डे। २६। ५७।

"घुरघुरा पिङ्गरतनुर्घर्घरा घर्घरस्वना॥")

घर्घरिका, स्त्री, (घर्घरेव। स्वार्थे कन्। अत इत्वञ्च।) क्षुद्रघण्टिका। भृष्टधान्यम्। नदीविशेषः। वादित्रदण्डः। इति हेमचन्द्रः॥ वाद्यप्रभेदः। इति विश्वः॥

घर्घुर्घा, स्त्री, (घुर ध्वनौ + क्विप्। घुर्घुरा ध्वनिविशेषेण गायतीति। गै + डः। निपातनात् गस्य घत्वम्।) यमकीटः। इति रत्नमाला॥ घुरघुरिया इति भाषा॥

घर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफोपधः। घर्ब्बति। इति दुर्गादासः॥

घर्म्मः, पुं, (घरति क्षरति अङ्गादिति। घृ क्षरणे + "घर्म्मः।" उणां। १। १४८। इति मन्प्रत्ययेन निपातनात् साधुः।) श्रमवारि। अङ्गजलम्। घाम् इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। २१२।

"दयितस्य श्रीन्मीलित-
घर्म्मजलस्खलितचरणनखलाक्षे॥")

तत्पर्य्यायः। निदाघः २ स्वेदः ३। इत्यमरः। १। ७। ३३॥ सिग्रः ४। इति जटाधरः॥ सवणम् ५। इति शब्दरत्नावली॥ अस्य निदानं स्वेदशब्दे द्रष्टव्यम्॥ (घरति क्षरति स्वेदः शरीरादनेन इति। घृ + करणे मन्।) आतपः। ग्रीष्मः। उष्मा। इति हेमचन्द्रः॥ (यथा, सुश्रुते उत्तरतन्त्रे ६४ अध्याये।

"सरांसि सरितो वापि वनानि रुचिराणि च।
चन्दनानि पराद्यानि सजः सकमलोत्पलाः॥
तालवृन्तानिलाहारांस्तथाशीतगृहाणि च।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च॥")

घर्म्मदोषः, पुं, (घर्म्मस्य स्वेदस्य दोषः विकृतिः।) स्वेदस्य विकारः। तस्यौषधं यथा,—

"मन्दोष्णकोष्णनीवारचर्म्मसु कनकस्य च।
तैनोदकैस्तदहरेद्दृषदुशीरप्रसारिकाम्॥
त्वग्दोषश्चैव देवेन्द्र! घर्म्मदोषश्च नश्यति॥"

इति गारुड़े १६४ अध्यायः॥

घर्म्मविचर्चिका, स्त्री, (घर्म्मजनिता स्वेदोत्पन्ना विचर्चिका। घर्म्मो ग्रीष्मकालस्तज्जनिता विचर्चिका वा।) घर्म्मविचर्चा। घर्म्मचर्चिका। घामाचि इति भाषा॥ यथा, प्रयोगरत्ने।

"स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा।
ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्म्मचर्चिका॥
राजिकाकृतिरुग्णोत्था यतो घर्म्मविचर्चिका॥"

अस्याश्चिकित्सा स्वेदशब्दे द्रष्टव्या॥

घर्म्मान्तः, पुं, (घर्म्मस्य निदाघकालस्य अन्तोऽत्र।) वर्षाकालः। इति राजनिर्घण्टः॥ (यथा, मेघदूते। १०६।

"घर्म्मान्ते मे विगणय कथं वासराणि व्रजेयुः॥")

वर्षाकालविवरणेऽस्य विशेषो बोध्यः॥)

घर्म्मान्तकामुकी, स्त्री, (घर्म्मान्ते वर्षासु कामुकी कामार्त्ता। वर्षाकाले हि अस्याः मैथुनस्पृहा भवतीति प्रसिद्धिः। यद्वा, घर्म्मान्तं वर्षाकालं कामयते इति। कम् + उकञ् स्त्रियां ङीप्।) बलाका। इति राजनिर्घण्टः॥

घर्षणं, क्ली, (घृष् + भावे ल्युट्।) घर्षः। घषा इति भाषा॥ यथाह, माधवकरः।

"घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम्।
उपासावान्वितं तद्धि घृष्टमित्यभिधीयते॥"

घर्षणालः, पुं, (घर्षणे घर्षणाय वा अलति पर्य्याप्नोति। अल् + अच्।) श्लीपदरोगः। इति त्रिकाण्डशेषः॥ लोड़ा इति भाषा॥

घर्षणी, स्त्री, (घृष्यते इति। घृष + कर्म्मणि ल्युट्। टित्त्वात् ङीप् च।) हरिद्रा। इति त्रिकाण्डशेषः॥ (विवृतिरस्या हरिद्राशब्दे ज्ञातव्या॥)

घष, इ ङ चरे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) आद्यस्वरी। इ, घंषते। ङ, घंषते। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

घस, इ ङ चरणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) इ, घंस्यते। ङ, घंसते। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

घस, ल औ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं-अनिट्।) ल, अघसत्। औ, घस्ता। इति दुर्गादासः॥

घसिः, पुं, (घस् भक्षणे + भावे इन्।) आहारः। इति हेमचन्द्रः॥ (तथाच, वैद्यके।

"घसिना मे मासं एकया जर्ज्जे मे नाभेः सीद॥")

घस्मरः, त्रि, (घस + "हृषिमृडिघसिकसिभ्यरः।" ३। २। १६०। इति करच्। अत इत्वञ्च।) अग्रगः। भक्षकः। इत्यमरः। ३। १। २०॥ (यथा, महाभारते। ८। ४०। ३६।

"गौर्य्यो हृष्टा निर्हीकाः मद्रिकाः कम्बलावृताः।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम॥")

घस्रं, क्ली, (घस् + रक्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥

घसः, पुं, (घसति भक्षयति अन्धकारम्। घस्+रक्।) दिनम्। हिंसे त्रि। इति मेदिनी। रे। ३०॥ (यथा, पद्मदशाम्। ६। १८५।
"रात्रिघसौ सन्निबोधायुन्मीलननिमीलने।
तूष्णीम्भावमनोराज्ये इव स्थिलयाविमौ॥")

घा, स्त्री (हन्+ङः। हस्य घत्वम्। टाप् च।) काञ्ची। घातः। इति मेदिनी। घे। १॥

घाटः, पुं (घटते सङ्कुचते शिरोऽनेन देहे इत्यर्थः। घट्+करणे घञ्।) घाटा। इति शब्दरत्नावली॥ (घाटा अस्यास्तीति। "अर्श आदिभ्योऽच्।" ५। २। २७। इत्यच्। घाटाविशिष्टे, त्रि। इति व्युत्पत्तिलब्धोऽर्थः॥)

घाटा, स्त्री, (घाटा विद्यतेऽस्मिन् इति घाटः ततः टाप्।) ग्रीवापश्चाङ्गागः। घाड़ इति भाषा॥ तत्पर्य्यायः। अवटुः २ कक्काटिका ३। इत्यमरः॥ शिरःपश्चात्सन्धिः। इति राजनिर्घण्टः॥ घाटः ५ कक्काटी ६। इति शब्दरत्नावली॥ घाटिका ७। इति शब्दचन्द्रिका॥

("दोषास्तु दुष्टास्त्रय एवमन्यां
संपीड्य घाटां सुरुजां सुतीव्राम्॥"
इत्युत्तरतन्त्रे पञ्चविंशेऽध्याये सुश्रुतेनोक्तम्॥)

घाटिका, स्त्री, (घाटा+स्वार्थे कन्। टापि अत इत्वञ्च।) घाटा। इति शब्दचन्द्रिका॥ (यथा, पद्मतन्त्रे गङ्गदत्तप्रकरणे। ४। २५। "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्पस्तेनात्मना स्वालयं नीतः॥")

घाण्टिकः, पुं, (घण्टया चरतीति। चरतीति ठक्।) यो बहुभिर्मिलित्वा स्तुतिं पठति सः। यो देवताद्यर्थे घण्टाघातेन शंसति स श्रावणाख्यः। इति स्वामी। इति सारसुन्दरी॥ (यदुक्तम्। "राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः।") तत्पर्य्यायः। घाटिकः २। इति भरतः॥ चाक्रिकः ३। इत्यमरः। २। ८। ६७॥ अन्यच्च। "मिलिता बहवो ये तु भवेयुः स्तुतिकारकाः। चाक्रिकास्ते निगदिताश्चक्रिका अपि कुत्रचित्॥ घण्टावादस्तावका ये घाण्टिका घण्टिकाश्च ते।"
इति शब्दरत्नावली॥
धुस्तूरटङ्कः। इति हारावली। १०७॥

घातः, पुं, (हन्+करणभावादौ घञ्। "हनस्तोऽचिण्णलोः।" ७। ३। ३२। इति हन्तेस्तकारोऽन्तादेशः। "हो हन्तेर्ञ्णिन्नेषु।" ७। ३। ५४। इति कुत्वञ्च।) काष्ठः। प्रहारः। इति मेदिनी। ते। १७॥ (यथा, गोः रामायणे। ६। ८८। २४।
"सुष्टिभिः पाणिघातैश्च बाहुघातैश्च शोभने।
घोरैर्जानुप्रहारैश्च नयनाञ्चनपीड़नैः॥")
अङ्गपूरणम्। यथा। "समत्रिघातश्च घनः प्रदिष्टः।" इति लीलावती॥ (वधः। यथा-पद्मतन्त्रे। १। ३१२।
"यदि शत्रुमपि प्राप्तं विश्वस्तमकृतोभयम्।
यो हन्यात् तस्य पापं स्याच्छतब्राह्मणघातजम्॥"
लुण्ठनम्। यथा, मनुः। ६। २७४।
"ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने॥"
"ग्रामघाते ग्रामलुण्ठने तस्करादिभिः।" इति कुल्लूकभट्टः॥ द्रव्याद्युत्खातः हानिर्वा। यथा, याज्ञवल्क्यः। २। १६२।
"माधानशौ तु महिषी शस्त्रघातस्य कारिणी॥"
भङ्गः। उच्छेदादिर्वा। यथा, पद्मतन्त्रे। १। सञ्जीवककथायाम्। "प्रोवाच भो शैलभागे अयुक्तं मया पापेन कृतं सञ्जीवकं व्यापादयता यस्माद् विश्वासघातादन्यन्नास्ति पापतरम्॥")

घातकः, त्रि, (हन्तीति। हन्+ण्वुल्। णितितान्तादेशे कृत्वम्।) हननकर्त्ता। यथा,—
"गौरीमाधवयोर्भक्ता राधिका शिवसन्निधौ।
इन्दुः कुमुदहन्ता च सूर्य्यः कमलघातकः॥"
इति विदग्धमुखमण्डनम्॥
(तथा च मनुः। ५। ५१।
"संस्कर्त्ता चोपहर्त्ता च खादकश्चेतिघातकाः॥")

घातनं, क्ली, (हन्+णिच्+भावे ल्युट्।) हननम्। वधः। यन्त्रार्थपशुवधः। इति शब्दरत्नावली॥ (यथा, महाभारते। २। ४४। ४०।
"पशुवद्घातनं वा मे दहनं वा कटाग्निना॥")

घातनः, त्रि, (हन्ति मारयतीति। हन्+कर्त्तरि ल्युः स्वार्थे णिच्।) वधकर्त्ता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (कैश्चित्तु एतस्य प्रामादिकत्वमुक्तम्। "हन्तेर्युन्नाद्यन्तयोर्धत्वतत्वे।" ५। ४२। इत्यणादिसूत्रेण हन्तेर्युनिक्रते आद्यन्तयोर्धत्वतत्वे घतनः। इत्युक्तत्वात्। अतः सुधीभिश्चिन्त्यम्।)

घातिः, पुं, (हन्+इण्।) पक्षिबन्धनम्। इत्युणादिकोषः॥ प्रहरणम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

घातिपक्षी, [न्] पुं, (घातिः घातकः पक्षीति कर्म्मधारयः।) श्येनपक्षी। इति हारावली। ८६॥

घातुकः, त्रि, (हन्तीति। हन्+"लषपतपदस्थाभूवृषहनकमगमशभ्य उकञ्।" ३। २। १५४। इति उकञ्।) हिंसकः। क्रूरः। इत्यमरः। ३। १। ४७॥ (यथा, अथर्ववेदे। १२। ४। ७।
"ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः॥")

घात्यं, त्रि, (हन्यतेऽसौ हन्तुमर्हो य इत्यर्थः। हन्+ण्यत्।) हननयोग्यम्। इति व्याकरणम्॥ (यथा, पद्मतन्त्रे। ३। २२८। "ततो मम सुखघात्याः सञ्जाताः॥") [हेमचन्द्रः॥

घारः, पुं, (घृ सेचने+घञ्।) सेचनम्। इति

घार्त्तिकः, पुं, (घृतेन निर्वृत्तः। इति ठञ्।) घृतपूरः। इति हेमचन्द्रः॥ (घृतसंयुक्ते त्रि। यथा, पद्मतन्त्रे। ५। ३५॥ "अन्यस्य घार्त्तिकभोजनं दत्तम्॥")

घासः, पुं, (घस्यतेऽसौ पशुभिरित्यर्थः। घस्+कर्म्मणि घञ्।) गवाद्यदनीयतृणविशेषः। तत्पर्य्यायः। यवसम् २। इत्यमरः। २। ५। १६७॥ यवसः ३ जवसः ४। इति भरतः॥ यवासम् ५। इति शब्दरत्नावली॥ (यथा, पद्मतन्त्रे। ४। ५३।

घासिः, पुं, (घसति भक्षयति इयमिति। घस+"जनिघसिभ्यामिण्।" उणां ४। १३० इति इण्।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। १। १६२। १४। [देवेष्वस्तु॥")
"यच्च पपौ यच्च घासिं जघास सर्व्वा ता ते अग्ने"

घिण, इ ङ ग्रहणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इ, घिण्यते। ङ, घिण्यते। जेघिण्यते। इति दुर्गादासः॥

घु, ङ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) ङ, घवते। इति दुर्गादासः॥

घुः, पुं, (घुङ् ध्वनौ+भावे बाहुलकात् डुः।) ध्वनिः। इति जटाधरः॥

घुट, ङ ल्ल परिवर्त्ते। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) परिवर्त्तो गतवतः प्रत्यागमनं विनिमयो वा। ङ, घोटते नदी। ल्ल, अघुटत्। इति दुर्गादासः॥ (यथा, कविरहस्ये १४६।
"यस्य व्याघोटते दण्डो नाज्ञतार्थः कृतक्षण॥")

घुट, ग्रि प्रतिहतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, घुटति अघुटीत् शत्रुं शूरः। जुघोट। इति दुर्गादासः॥

घुटः, पुं, (घुट् प्रतिहतौ+संज्ञायां अच्।) चरणग्रन्थिः। इति हेमचन्द्रः॥ [कोषः॥

घुटिः, स्त्री, (घुट+इन्।) गुल्फः। इति द्विरूपघुटिकः, पुं, (घुट्+ठन्।) गुल्फः। इति हेमचन्द्रः॥ [मरः। २। ६। ७२॥

घुटिका, स्त्री, (घुटिक+टाप्।) गुल्फः। इत्यघुटी, स्त्री, (घुट्+इन्। "ऋदिकारान्तादक्तिनः।" इति ङीष्।) गुल्फः। इति द्विरूपकोषः॥

घुड, ग्रि आघाते। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, घुड़ति अघुड़ीत्। इति दुर्गादासः॥

घुण, ङ भ्रमणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, घोणते। इति दुर्गादासः॥

घुण, इ ङ ग्रहणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इ, घुण्यते। ङ, घुणते जोघुण्यते। इति दुर्गादासः॥

घूण, ग्र भ्रमणे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) ग्र, घुणति घोणिता। इति दुर्गादासः॥

घुणः, पुं, (घुणति काष्ठं भक्षयन् काष्ठाभ्यन्तरेभ्राम्यतीति। घुण भ्रमणे+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) काष्ठकृमिः। (यथा, सुश्रुते सूत्रस्थाने। ६ अध्याये। "घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमृखेष्वेष्यस्य॥") तत्पर्य्यायः। काष्ठवेधकः २। इति लिङ्गादिसंग्रहटीकायां भरतः॥ काष्ठलेखकः ३। इति भूरिप्रयोगः॥

घुणवल्लभा, स्त्री, (घुणः वल्लभो यस्याः। घुणस्य वल्लभा वा।) अतिविषा। इति भावप्रकाशः॥ (व्यवहारोऽस्या यत्र तद्यथा,—
"कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवल्लभाम्।
पिबेत्तण्डुलतोयेन————"
इति वाभटे चिकित्सास्थानेऽष्टमेऽध्याये॥)

घुष्टः, पुं, (घुष्यते परिहृत्यतेऽनेन। घुट+ बाहुलकात् कः निपातनात् मुम् च।) गुल्फः। इति शब्दमाला॥ [हेमचन्द्रः॥

घुष्टकः, पुं, (घुष्ट+स्वार्थे कन्।) गुल्फः। इति

घुष्टिकं, क्ली, (घुष्ट इव कायतीति। के+ कः।) वनस्थकरीषम्। इति शब्दचन्द्रिका॥ विलघुंटे इति भाषा॥ [शब्दरत्नावली॥

घुस्कः, पुं, (घोषते भाष्यतीति।) भ्रमरः। इत्यु-

घुर, भ्र भीमौ। भीमार्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) भीमो भयानकरस-स्तस्य अर्थो निमित्तं हेतुरिति यावत् भीमार्थः। भ्र, घुरति बाह्यो मनुष्याणां भयहेतुर्भवतीत्यर्थः। घुर भीमार्थाभिशब्दयोरिति प्राचः। आर्त्ते इति शब्दविशेषणमिति रमानाथः। घुरत्यार्त्ते च कुरुते इति। शब्दानुशासनौ भट्टमल्लः। घोरिता। इति दुर्गादासः॥

घुर्घुरः, पुं, (घुरति मनुष्याणां भयहेतुर्भवतीति। घुर्+किप्। ततः घुरो भयानकात् जन्तोरपि घुरः भयानकः। एतद्ग्रन्थेन प्रायशो जन्तु-सम्भवादेव तथात्वम्।) कीटविशेषः। घुर-घुरिया इति भाषा॥ तत्पर्य्यायः। यमकीटः२। इति चिकाण्डशेषः॥ घर्घुर्घा ३। इति रत्न-माला॥ (शूकरशब्दः। इति चिन्तामणिः॥)

घुर्घुरी, स्त्री, (घुर्घुरः शूकरशब्दतद्यक्तशब्दः सोऽस्या अस्तीति। घुर्घुर+"अर्शआदिभ्यो ऽच्।" ५। २। १२७। इत्यच्। ततो गौरा-दित्वात् ङीष्।) जलजन्तुविशेषः। तत्पर्य्यायः। घृत्किरा २। इति चिकाण्डशेषः॥

घुलघुः, पुं, गवेधुका। इति रत्नमाला॥ गड़-गड़ इति भाषा॥

घुलघुलारवः, पुं, (घुल् घुल् इत्यव्यक्तमारौतीति। आ+रु+अच्।) पारावतभेदः। इति राज-निर्घण्टः॥

घुष, इ ङ घूषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) घूषः कान्तिश्चेति। इ, घुष्यते। ङ, घुषते चन्दनं गात्रम्। इति दुर्गा-दासः॥

घुष, इर् वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इर्, अघुषत् अघोषीत्। इति दुर्गादासः॥

घुष, कि इर् शब्दे। स्तुतौ इति यावत्। विभ्रन्दे। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-सेट्।) विभ्रन्द इह कथनं आविष्करणं नाना-शब्दकरणं वा आद्यपूर्व्वकः सततक्रन्दने। इति तट्टीका॥ किं, घोषयति घोषति गूढमर्थमभि-युक्तः। नानाशब्दे वाद्यं घोषयति द्वारि यस्य कश्चिदुपदृतः। इति हलायुधः। इर्, अघुषत् अघोषीत्। घुष किरनुवर्त्तते। किं, आघोषयति आघोषति शोकार्त्तः सततं क्रन्दतीत्यर्थः। इति दुर्गादासश्च॥

घुषिरं, त्रि, (घुष्यते स्म इति। घुष विशब्दे+ क्तः। "घुषिरविशब्दने।" ७। २। २३। इति कथनात् अच इट्।) ग्रन्थितम्। इति सुपद्म व्याकरणम्॥

घुस्रं, त्रि, (घुष्यते स्म इति। घुष+"सुघ्यवार-स्त्रान्ध्यान्तेति" सुधबोधसूत्रात् निपातनात् साधुः।) ग्रन्थितम्। इति सुग्धबोधम्॥ (यथा, हरिवंशे। २०। ८६।

"हंससारसघुस्रेषु कारण्डवरतेषु च॥"

ग्रन्थितान्यर्थे तु "घुषिरविशब्दने।" ७। २। २३। इति नेट्। "घुस्रा रज्जुः।" इति सिद्धान्त-कौमुदी॥)

घुस्रणं, क्ली, (घुष्यते स्रूयते इति भावः। घुष+ बाहुलकात् ऋणक्। पृषोदरादित्वात् साधुः। यद्वा घुंष्यते कान्तिविशिष्टं क्रियते शरीर-मनेन। घुषि धूषि+ऋणक्।) कुङ्कुमम्। इति चिकाण्डशेषः॥ (यथा, काशीखण्डे। २६। ५७।

"घुस्रणापिञ्जरतनुर्घर्घरा घर्घरस्वना॥"

यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"चन्दनं घुस्रणोपेतं रुगनाभिसमायुतम्।
न शीतं न च वा शीतं वर्षाकाले तदिष्यते॥"

इति घुस्रणकुङ्कुमम्॥)

घूकः, पुं, (घू इत्यव्यक्तशब्देन कायति शब्दायते इति। घू+कै+कः।) उलूकः। इति हेम-चन्द्रः। ४। ३६॥

घूकारिः, पुं, (घूकस्य पेचकस्य अरिः शत्रुः।) काकः। इति हेमचन्द्रः। ४। ३८८॥

घूकावासः, पुं, (घूकानां पेचकानां आवासो वास-स्थानम्।) प्राखोटवृक्षः। इति राजनिर्घण्टः॥

घूर, य ङ ईं हिंसाव्याप्त्योः। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अकं च-सेट्।) दीर्घो। य ङ, घूर्य्यते। ईं, घूर्णः। व्याप्तिर्मरणवधुवयो-भावः। इति दुर्गादासः॥

घूर्ण, भ्रु भ्रमणे। इति कविकल्पद्रुमः॥ (तुदां-उभं-अकं-सेट्।) भ्रु, घूर्णति घूर्णते। भ्रु, घूर्णती घूर्णन्ती। इति दुर्गादासः॥ (यथा, गोः रामायणे। ४। १५। २५।

"स तु वाली रणगतः सालताड़नविह्वलः।
गुरुभारसमाक्रान्तश्चचाल च जुघूर्ण च॥")

घूर्णः, पुं, (घूर्णति स्रोतःपत्तिभूमौ घूर्ण्याकारेण सम्भवतीति। घूर्ण+अच्। घूर्ण्याकारेण जाय-मानत्वात् तथात्वम्।) गोधूमसुन्दरकः। इति शब्दचन्द्रिका॥ गोमा इति भाषा॥ (घूर्ण+ भावे अच्।) भ्रमणञ्च॥ (विघूर्णिते, त्रि। यथा, भागवते। ७। २। २।

"आह चेदं रुषा घूर्णः संदष्टश्छदपुटः॥")

घूर्णनं, क्ली, (घूर्ण+भावे ल्युट्।) भ्रमणम्। तत्-पर्य्यायः। चक्रावर्त्तः २ भ्रमः ३ भ्रान्तिः ४ भ्रमिः ५ घूर्णिः ६। इति हेमचन्द्रः। ६।१५५॥ (यथा, गीतगोविन्दे। ८। ११।

"अनमीलनमौलिघूर्णनचलन्मन्दारविसंसन-स्रस्राकर्षणदत्तिहर्षलसमहामन्त्रः कुरङ्गी-दृशाम्॥")

घूर्णायमानः, त्रि, (घूर्ण इवाचरतीति। घूर्ण+ क्यङ्। ततो घूर्णायते इति। घूर्णाय+शानच्।) भ्राम्यमाणः। यथा, कलापधातुव्याख्यासारे।

"इन्द्रादेरखिलार्थसाधनपरैः संस्तूयमानं मुहुः
पीतोन्मत्तफलातुलालसतया घूर्णायमानेक्षणम्॥"

घूर्णिः, स्त्री, (घूर्ण+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति भावे इन्।) घूर्णनम्। इति हेमचन्द्रः। ६। १५५॥

घूर्णितः, त्रि, (घूर्णते स्म इति। घूर्ण+क्तः।) भ्रमितः। तत्पर्य्यायः। प्रचलायितः २। इत्य-मरः। ३। १। ३२॥ (यथा, कथासरित्-सागरे। २४। १।

"मदघूर्णितवक्त्रेभ्यः सिन्दूरैरुद्धरन् महीम्।
हेरम्बः पातु वो विघ्नान् स्वतेजोभिर्दहन्निव॥")

घूर्ण्यमानः, त्रि, (घूर्ण्यते इति। घूर्ण+णिच्+कर्म्मणि शानच्।) भ्राम्यमाणः। यथा, महानाटके।

"भो दृष्टाः पर्व्वतस्था बहुकुसुमयुता वायुना घूर्ण्यमानाः॥"

अग्निजन्ते तु घूर्णमाण इत्येव स्यात्। यथा, हरिवंशे ४८। ३६।

"भ्रमन्तं घूर्णमानञ्च स्तुतिं देवाः प्रचक्रिरे॥")

घृ, सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) घरति तरुं मेघः। इति दुर्गादासः॥

घृ, क सेके। क्षादने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-अनिट्।) क, घारयति। इति दुर्गा-दासः॥

घृ, र लि भासि। सेके। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-अनिट्।) र वैदिकः। लि, जघर्ल्लि घृतं दीप्यते चरति वेत्यर्थः। इति दुर्गा-दासः॥

घृण, इ ङ ग्रहणे। कविकल्पद्रुमः॥ (भ्वां आत्मं-सकं-सेट्।) इ, घृणते। ङ, घृणते जरी-घृण्यते। इति दुर्गादासः॥

घृण, द न उ दीप्तौ। इति कविकल्पद्रुमः॥ (तनां-उभं अकं-सेट्। उदित्वात् क्त्वावेट्।) द न, घृणोति घर्णति। घृणुते घर्णते। उ, घर्णित्वा घृत्वा। इति दुर्गादासः॥

घृणा, स्त्री, (घ्रियते सिच्यते हृदयमनया।। घृ सेके+बाहुलकात् नक् स्त्रियां टाप्। दयारसेन हि हृदयं सिक्तमिवार्द्रं भवतीति तथात्वम्।) करुणा। (यथा, किरातार्জ্জुनीये। १५। १३।

"मन्दमस्त्रिभुलतां घृणया सुनिरेष वः।
प्रणुदत्यागतावज्ञं जघनेषु पस्पृनिव॥" *॥

घ्रियते आच्छाद्यते गुणादिकमनयेति।) जुगुप्सा। तत्पर्य्यायः। अर्त्तनम् २ ऋतीया ३ घृणीया ४ इत्यमरः। ३। २। ३२॥ रौच्या५ घृणिया ६ घ्रिणीया ७ घृणीया ८। इति तट्टीका॥ (यथा, रघुः। ११। १७।

"तां विलोक्य वनितावधे घृणां
पत्रिणा सह समोच राघवः॥")

घृणावासः, पुं, (घृणाया आवासः।) कुष्माण्डः। इति चिकाण्डशेषः॥ घृणायुक्ते त्रि॥

घृणिः, पुं, (जघर्त्ति दीप्यते इति। घृ+"घृणि-पृश्निपार्ष्णिचूर्णिभूर्णि।" उणा०। ४। ५२। इति निप्रत्ययेन निपातनात् साधुः।) किरणः। इत्यमरः। १। ३। ३३॥ सूर्य्यः। (घरति सिञ्चतीति। घृ सेके+निः, गुणाभावश्च।) जलम्। इति मेदिनी॥ (जघर्त्ति दीप्यते इति व्युत्पत्त्या दीप्तिशालिनि, त्रि। यथा, भागवते। ७। २। ७। "तस्य त्वक्तस्वभावस्य घृणेर्मायावनौकसः॥") घृतः, पुं क्ली,.(जघर्त्ति चरतीति। घृ+"अञ्जि-घृसिभ्यः क्तः।" उणा०। ३। ८६। इति क्तः।) पक्वनवनीतम्। घि इति भाषा॥ तत्पर्य्यायः। आज्यम् २ हविः ३ सर्पिः ४। इत्यमरः। २। ९। ५२॥ पवित्रम् ५ नवनीतकम् ६ अन्टतम् ७ अभिधारः ८ होम्यम् ९ आयुः १० तैजसम् ११। इति राजनिर्घण्टः॥ आज्यम् १२। यथा,—

"घृतोऽग्नौ चाज्यमाज्यञ्च सर्पिः स्यादन्टतं हविः।"

इति जटाधरः॥

तस्य गुणाः। वृद्ध्यग्निशुक्रौजोमेदःस्मृतिकफकारित्वम्। वातपित्तविषोन्मादरोगग्रहोन्मादालक्ष्मीज्वरनाशित्वम्। मांसादष्टगुणगुरुत्वञ्च। इति राजवल्लभः॥ रसायनत्वम्। स्वादुत्वम्। चक्षुर्हितत्वम्। शीतवीर्य्यत्वम्। पापनाशित्वम्। अत्यभिस्यन्दित्वम्। कान्तितेजोलावण्यस्वरायुर्हितबलकारित्वम्। पवित्रत्वम्। गुरुत्वम्। उदावर्त्तमूलागदव्रणक्षयवीसर्परक्तनाशित्वम्। स्निग्धत्वम्। रूक्षत्वञ्च। इति भावप्रकाशः॥ * ॥ अथ गव्यघृतस्य गुणाः। विशेषेण चक्षुर्हितत्वम्। शीतत्वम्। वातपित्तकफालक्ष्मीपापरक्तोनाशित्वम्। शुक्राग्निस्वादुपाकमेधालावण्यकान्त्योजस्तेजोदृष्टिवयःस्थितिबलायुर्हितकारित्वम्। गुरुत्वम्। पवित्रत्वम्। सुमङ्गल्यत्वम्। रसायनत्वम्। सुगन्धित्वम्। रोचनत्वम्। चारुत्वम्। सर्व्वाण्येषु गुणाधिकत्वञ्च। इति भावप्रकाशः॥ बुद्धिस्मृतिपुष्टिवपुःस्थैर्य्यकारित्वम्। श्रमोपशमनत्वम्। हृद्यतमत्वम्। बहुगुणत्वञ्च॥ * ॥ माहिषघृतगुणाः। उत्तमत्वम्। धृतिसौख्यकान्तिबलवर्द्धनचक्षुर्हितकारित्वम्। वातश्लेष्मदुर्नामव्यहृद्रोगविकारनाशित्वम्। मन्दानलोद्दीपनत्वम्। नवनीतात् परमहृद्यत्वम्। मनोहारित्वञ्च। इति राजनिर्घण्टः॥ स्वादुत्वम्। पित्तरक्तनाशित्वम्। शीतत्वम्। श्लेष्मशुक्रवृद्धिकारित्वम्। गुरुत्वम्। स्वादुपाकित्वञ्च॥ * ॥ छागीघृतगुणाः। अग्निचक्षुर्हितबलकारित्वम्। कासश्वासक्षयेषु हितत्वम्। कटुपाकित्वञ्च। इति भावप्रकाशः॥ कफनाशित्वम्। इति राजनिर्घण्टः॥ * ॥ मेषीघृतगुणाः। पित्तमेदस्कारित्वम। योनिदोषे शोथे कफे अनिले च शस्तत्वम्। रूक्षत्वम्। दुर्नामोन्मादनाशित्वञ्च। इति राजवल्लभः॥ पाके लघुत्वम्। पित्तकोपकारित्वम्। शोफे कण्ठे च हितत्वञ्च॥ * ॥ मेढ़कघृतगुणाः। अतिगौरवात् सुकुमारदेहिवर्ण्यत्वम्। बुद्धिपाटवहरत्वम्। बलकारित्वम्। वृष्यो वपुको विस्रगन्धकारित्वञ्च॥ * ॥ हस्तिनीघृतगुणाः। कफपित्तविषक्रमिनाशित्वम्। कषायत्वम्। लघुत्वम्। विदग्धित्वम्। तिक्तत्वम्। वह्निकरत्वञ्च॥ * ॥ अश्वाघृतगुणाः। कटुत्वम्। मधुरत्वम्। कषायत्वम्। श्वयथुमिदीपनत्वम्। बाल्यप्रदत्वम्। मूर्च्छाहारित्वम्। गुरुत्वञ्च॥ * ॥ गर्दभीघृतगुणाः। अग्निबलकारित्वम्। मूत्रदोषकफनाशित्वम्। पाके लघुत्वम्। कषायत्वम्। उष्णवीर्य्यत्वञ्च॥ * ॥ उष्ट्रीघृतगुणाः। मधुरत्वम्। विपाके कटुत्वम्। शीतलत्वम्। कुष्ठक्रमिविषवातकफगुल्मोदरनाशित्वञ्च। इति राजनिर्घण्टः॥ शोथनाशित्वम्। इति राजवल्लभः॥ * ॥ नारीघृतगुणाः। चक्षुर्हितरुचिकारित्वम्। पथ्यत्वम्। मन्दाग्निदीपनत्वम्। पाके लघुत्वम्। सर्व्वामयविषनाशित्वञ्च। इति राजनिर्घण्टः॥ प्रमेहनाशित्वम्। इति राजवल्लभः॥ * ॥ दुग्धभवघृतगुणाः। ग्राहित्वम्। शीतलत्वम्। नेत्ररोगकारित्वम्। पित्तदाहासृगदमूर्च्छाभ्रमानिलनाशित्वञ्च॥ * ॥ क्षत्तनदधिजघृतं तदेव हैयङ्गवीनम्। तस्य गुणाः। चक्षुर्हितत्वम्। दीपनत्वम्। रुचिबलकारित्वम्। हृद्यत्वम्। वृष्यत्वम्। विशेषाज्ज्वरनाशित्वञ्च॥ * ॥ वर्षादूर्द्धं पुराणस्य तस्य गुणाः। त्रिदोषमूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरनाशित्वम्। इति भावप्रकाशः॥ मदग्निरःकर्णादिरोगभ्रान्तिनाशित्वम्। व्रणस्य शोधनत्वम्। रोपणत्वञ्च। आयुर्वृद्धिश्चरीरदृढ़तासौकुमार्य्यकान्तिस्मृतिबलकारित्वम्। बाल्ये तरुणे वार्द्धके चातिबल्यत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ प्रतिश्यायामकासजीर्णज्वरसर्व्वरोगनाशित्वम्। श्रेष्ठत्वम्। धातुसाम्यकारित्वञ्च॥ * ॥ तस्य लक्षणम्।

"उग्रगन्धं पुराणं स्याद्गव्यवर्षस्थितम् घृतम्। लाक्षारसनिभं शीतं प्रपुराणमतः परम्। यथा यथा भवेज्जीर्णं गुणवत् स्यात्तथा तथा॥"

कांस्यपात्रे दशदिनस्थितं घृतं त्वाज्यम्। इति राजवल्लभः॥ औषधघटितपक्वघृतस्य पूर्ववीर्य्यं षण्मासपर्य्यन्तं तिष्ठति। इति वैद्यकपरिभाषा॥

("घृतं धीस्मृतिमेधाग्नि-बलायुःशुक्रचक्षुषाम्। बालवृद्धप्रजाकान्ति-सौकुमार्य्यस्वरार्थिनाम्॥ क्षतक्षीणपरीसर्पग्रस्तानग्निश्रमार्दितान्। वातपित्तविषोन्मादग्रहालक्ष्मीज्वरापहम्॥ स्नेहानामुत्तमं शीतं वयसः स्थापनं परम्। सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत्॥" इति पूर्व्वखण्डे पञ्चमेऽध्याये भावप्रकाशोक्तम्॥

"विपाके मधुरं हृद्यं वातपित्तकफापहम्। चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तरम्॥"

इति गव्यघृतम्॥

"आजं सन्दीपनीयञ्च चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये शूलैः सु लघुपाके कफापहम्॥"

इत्याजघृतम्॥

"वातपित्तसमं सर्व्वं सुशीतं माहिषं घृतम्। मधुरं गुरु विदग्धि भवत्यल्पगुणात्मकम्॥"

इति माहिषघृतम्॥

"औष्ट्रं कटु घृतं पाके श्लीपकृमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्॥"

इत्यौष्ट्रघृतम्॥

"पाके लघ्वाविकं सर्पिः सर्व्वरोगविषापहम्। वृद्धिं करोति चास्यापि वाजिरीशर्करापहम्॥"

इत्याविकं घृतम्॥

"वृद्धिं करोति देहाग्नेर्लघु पाके विषापहम्। चक्षुष्यं दीपनञ्चाग्नेर्वातदोषनिवारणम्। वृद्धिं करोति चास्त्रीणां तत्प्रोक्तञ्च विषापहम्॥"

इत्यश्वीघृतम्॥

"कफेऽनिले योनिदोषे श्लीपे पित्तेषु तद्धितम्। सामग्र स्त्रीणाञ्च चक्षुष्यं सर्पिः स्यादन्टतोपमम्॥"

इति नारीघृतगुणाः॥

"तर्पणं नेत्ररोगघ्नं दाहहृत् पयसो घृतम्॥"

इति क्षीरोद्भवघृतम्॥

"दोषापहं वह्निसन्दीपनञ्च मूर्च्छादिकोन्मादकर्णाक्षिशूले। श्लीपार्शसोर्योनिदोषे व्रणेषु शस्तं सर्पिर्जीर्णमेव वृष्यं स्यात्॥ उग्रगन्धं पुराणं स्याद्गव्यवर्षोषितं घृतम्। यथा यथा जरां याति गुणवत् स्यात्तु तत्तथा॥"

इति जीर्णघृतगुणाः॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥

"स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्द्धनम्। वातपित्तविषोन्मादश्लीपालक्ष्मीज्वरापहम्॥ सर्व्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः। सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत्॥ मदापस्मारमूर्च्छार्यश्लीपोन्मादगरज्वरान्। योनिकर्णशिरःशूलं घृतं जीर्णमपोहति॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥

"विशेषतः पुराणञ्च घृतं तत् प्रायशेऽक्षिकम्। त्रिदोषघ्नं पवित्रत्वात् विशेषाद्ग्रहमोक्षणम्॥ गुणकर्म्माधिकं स्थानादास्वादात् कटुतिक्तकम्। उग्रगन्धं पुराणं स्याद्गव्यवर्षस्थितं घृतम्॥ लाक्षारसनिभं शीतं तद्धि सर्व्वग्रहापहम्॥ मेध्यं विरेचनेष्वग्र्यं प्रपुराणमतः परम्॥ नासाध्यं नाम तस्यास्ति यत् स्याद्वर्षशतस्थितम्। दृष्टं सूक्ष्मघ्राणातं तद्धि सर्व्वग्रहापहम्। अपस्मारग्रहोन्मादवतां शस्तं विशेषतः॥"

इति चरके चिकित्सास्थाने चतुर्दशेऽध्याये॥

"घृतन्तु सौम्यं शीतवीर्य्यं मृदुमधुरमल्पाभिष्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरं आयुष्यं वृष्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पापालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च॥ विपाके मधुरं शीतं वातपित्तविषापहम्। चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम्॥ आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम्।

कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु ।
मधुरं रक्तपित्तघ्नं गुरुपाके कषायहृत् ।
वातपित्तप्रशमनं सुशीतं माहिषं घृतम् ।
औष्ट्रं कटुरसं पाके श्लीपकृमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ।
पाके लघ्वाविकं सर्पिर्नं च पित्तप्रकोपणम् ।
कफेऽनिले योनिदोषे श्लीपे कर्म्मे च तद्धितम् ।
पाके लघ्वाजवीर्य्यञ्च कषायं कफनाशनम् ।
दीपनं बह्वमूत्रञ्च विद्यादैकशफं घृतम् ।
चक्षुष्यमग्र्यं स्त्रीबालवृद्धानां सर्पिः स्यादमृतोपमम् ।
दृष्टिं करोति देहाग्नेर्लघुपाकं विषापहम् ।
कषायं बह्वविष्मूत्रं तिक्तमग्निकरं लघु ।
हन्ति कारेवकं सर्पिः कफकुष्ठविषक्रमीन् ॥".

चीरघृतं पुनः संग्राहि रक्तपित्तश्रमसूर्च्छा-प्रशमनं नेत्ररोगहितञ्च। सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्रास्थिहृदां मूलघ्नो वस्तिनस्यास्थि-प्रपूरणेषूपदिश्यते। सर्पिः पुराणं सरं कटु-विपाकं त्रिदोषापह मूर्च्छामेदोन्माद उदर-ज्वरगरश्लीपापस्मारयोनिश्रोत्रास्थिहृदः मूलघ्नं दीपनं वस्तिनस्यास्थिपूरणेषूपदिश्यते। भवन्ति चात्र।

"पुराणं तिमिरश्वासपीनसज्वरकासजित् ।
मूर्च्छाज्वरविषोन्मादग्रहापस्मारनाशनम् ॥
एकाद्यैर्घृतशतैर्यत्संस्कृतं घृतमुत्तमम् ।
रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम् ॥
पेयं महाघृतं भूतैः कर्षणं पवनार्दितैः ।
वल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहम् ॥
सर्व्वभूतहरत्वेन घृतमेतत् प्रशस्यते ॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ * ॥

क्ली, सलिलम्। इति मेदिनी। ते। १७॥)

घृतः, त्रि, (जवर्त्ति दीप्यते घरति सिञ्चतीति वा। घृ+"अञ्जिघृसिभ्यः क्तः।" उणा। ३। ८६। क्तः।) दीप्तः। सेचकः। इति शब्दरत्नावली॥

घृतकरञ्जः, पुं, (घृतमिव करञ्जः। घृतवद्रस-वाहुल्यादस्य तथात्वम्।) करञ्जभेदः। चिया-करमूचा इति भाषा। तत्पर्य्यायः। प्रकीर्य्यः २ घृतपर्णकः ३ स्निग्धपत्रः ४ तपस्वी५ विषारिः६ विरोचनः ७। अस्य गुणाः। कटुत्वम्। उष्ण-त्वम्। वातव्रणकर्म्मत्वग्दोषविषक्षयार्शोनाशित्वञ्च। इति राजनिर्घण्टः॥

घृतकुमारिका, स्त्री, (घृतेन घृतसदृशरसेन कुमारिका सुन्दरी बालिकेव वा। यद्वा कुमारी कन्येव। यद्वै पालित-तया तथात्वम्।) स्वनामख्यातगुल्मः। घिकु-मारी इति भाषा। तत्पर्य्यायः। कुमारी २ तरणिः ३ सहा ४। इति शब्दरत्नावली॥ कन्यका ५ दीर्घपत्रिका ६ स्थलेरुहा ७ स्नुहुः ८ कन्या ९ बहुपत्रा १० अमरा ११ अजरा १२ कण्टकप्राहृता १३ वीरा १४ भद्रेष्टा १५ विपु-लासवा १६ ब्रह्मणी १७ तरुणी १८ रामा १९ कपिला २० अम्बुधिस्रवा २१ सुकण्टका २२ स्थूलदला २३ गृहकन्या २४। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। मदगन्धित्वम्। कफपित्त-कासविषश्वासकुष्ठनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ भेदकत्वम्। नेत्रहित-त्वम्। मधुरत्वम्। दृंहणत्वम्। शुक्रबलकारि-त्वम्। वातगुल्मप्लीहयकृत्पृड्विज्वरग्रन्थ्यामिदग्ध-विस्फोटपित्तरक्तत्वग्रोगनाशित्वञ्च। इति भाव-प्रकाशः॥ (कुमारीशब्दे विवरणमस्या ज्ञेयम्॥)

घृततैलादिकल्पः, पुं, (घृततैलादीनां रोगविना-शकपक्वघृततैलादीनां कल्पो विधिः।) रोग-नाशकनानौषधिपक्वघृततैलादिवर्गः। यथा।

धन्वन्तरिरुवाच।

"घृततैलादि वक्ष्यामि शृणु सुश्रुत! रोगनुत्।
शृङ्गपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ॥
अभया गुडुची चैव वटरूपकवाकुची।
एतैरर्द्धसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसप्रस्थैश्चीरप्रस्थसमन्वितम्।
एतद्ब्राह्मीघृतं नाम श्रुतिमेधाकरं परम् ॥१॥
त्रिफलात्रिकटुकबलानिर्गुण्डीनिम्बवासकाः।
पुनर्नवा गुडूची च दृहती च शतावरी ॥
एतैर्घृतं यथालाभं सर्व्वरोगविमर्द्दनम् ॥ २ ॥
बलाशतकषाये तु तैलस्यार्द्धाढकं पचेत् ॥
कल्कैर्मेधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः।
स्थूलेलापिप्पलीकुष्ठत्वगेलागुरुकेशरैः ॥
गन्धाश्मजीवनीयैश्च चीराढकसमाश्रितम्।
एतन्मृदग्निना पक्वं स्थापयेद्रजते शुभे ॥
सर्व्ववातविकारांस्तु सर्व्वधात्वन्तराश्रयान्।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम् ॥ ३ ॥
शतावरीरसप्रस्थं चीरप्रस्थं तथैव च।
घृतपुष्पा देवदारु मांसी शैलेयकं बला ॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत् ॥
कुब्जवामनपङ्गूनां बधिरत्वञ्चकुब्जिनाम्।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने ॥
जराजर्जरगात्राणामाभाग्यसुखशोषिणाम्।
त्वगतावापि ये वाताः शिरास्नायुगताश्च ये ॥
सर्व्वान् नाशयत्याशु तैरेव स्याद्गृहाङ्गकम्।
नारायणमिदं तैलं विष्णुनोक्तं रणर्द्दनम् ॥ ४ ॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक्।
शतावर्य्या गुडूच्या वा चित्रके रोचनायुतः ॥
निर्गुण्ड्या वा प्रसारण्याः कण्टकार्य्या रसा-दिभिः ॥

वर्य्या वानलया वापि वासकेन फलत्रिकैः।
भार्ङ्गया चैरण्डकेनापि भृङ्गराजेन सुश्रिना ॥
मूलैर्बल्या दशमूलेन खदिरेण वटादिभिः।
वटिका मोदको वापि चूर्णं स्यात् सर्व्वरोगनुत् ॥
घृतेन मधुना वापि युक्तं खण्डगुडादिभिः।
लवणैः कटुकैर्युक्तं यथालाभञ्च रोगनुत् ॥ ५ ॥
चित्रकार्कारुत्रिघृतामलव्रणहयमारकम्।
सुधाञ्च बालागणिकासप्तपर्णसुवर्चिकाम् ॥
ज्योतिष्मतीञ्च संभृज्य तैलं धीरो विपाचयेत्।
एतन्निस्यन्दनं तैलं भग्नं दद्याद्गरन्दरे ॥
श्लीपनं रोचनञ्चैव सर्व्ववर्णकरं परम्।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम् ॥ ६ ॥
अजमोदां ससिन्दूरां हरितालं निशाद्वयम्।
क्षारद्वयं फेनयुतमार्द्रकं सरलोद्भवम्।
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः ॥
एभिः सर्षपजं तैलमनमूत्रैश्च योजितम्।
स्नुहिभिना पचेदेतदर्कक्षीरेण संयुतम् ॥
अजमोदादिकं तैलं गण्डमालां व्यपोहति।
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ॥
रोपणं स्नुहुभावञ्च तैलेनानेन कारयेत्।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगनुत् ॥"७॥

इत्यादिमहापुराणे गारुड़े १७८ अध्याये ॥

घृतदीधितिः, पुं, (घृतेन प्रदीप्ता दीधितिः किरणं यस्य। घृताहुत्या अग्निवर्द्धनादेव तथात्वम्।) अग्निः। इति त्रिकाण्डशेषः॥

घृतपर्णकः, पुं, (घृतयुक्तमिव पर्णं पत्रं यस्य। कप्।) घृतकरञ्जः। इति राजनिर्घण्टः॥

घृतपूरः, पुं, (घृतेन पूर्य्यते इति। पूरी ङ य पूर्त्तौ+कर्म्मणि अप्। प्रचुरघृतपाच्यत्वादेवास्य तथात्वम्।) पिष्टकविशेषः। यथाह राजवल्लभः।

"महितां समितां चीरनारिकेलघृतादिभिः।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते ॥
घृतपूरो गुरुर्वृष्यः कफरक्तरक्तमांसदः।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽपरः।"
तत्पर्य्यायः। पिष्टपूरः२ घृतवरः ३ धार्त्तिकः४।
इति हेमचन्द्रः। ३। ६४॥ (अस्य पाक-प्रकारादि यदुक्तं चिन्तामणौ।

"चीरेण महितं चूर्णं गोधूमानां सुगालितम्।
विस्नाय्य सर्पिषा पाच्यं कटाहेऽथ सितान्वितम्।
घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः॥"
नारिकेलजो यथा,—
"समिता महिता चीरे नारिकेलसितार्द्रकैः।
अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृतः॥"
दुग्धजो यथा,—
"पाकपिण्डीकृतं चीरं शर्कराचूर्णमिश्रितम्।
घृतपूरविनिर्म्माणं कारयेत् स्वस्यसिद्धिये॥"
शालिभवो यथा,—
"सुशालिपिष्टं दुग्धस्तु कथितं वस्त्रगालितम्।
खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम्॥"
कणेरुभवो यथा,—
"कणेरचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः।
निर्म्माणं घृतपूराणां शर्करासहितं भवेत्॥"

आम्रजो यथा,—
"पक्वाम्रस्य घृते तप्ते रसखण्डलपिण्डितः।
शुद्धशर्करया योज्यो घृतपूरो यदृच्छया॥
क्षीरमाद्यं स्वरूपं हि खण्डं चूर्णं ततः स्मृतम्।
योजिते यो विशेषोऽत्र तदाख्याखण्डसंज्ञितः॥
घृतपूरो गुरुर्ज्ञेयो हृद्यः पित्तानिलापहः।
सद्यः प्राणप्रदो बल्यः सुरुचोऽग्निप्रदीपनः॥
षड्भ्राटकसुखानामप्येवं स्यात् घृतपूरकः।
विचार्य्यं वस्तुसंयोग तद्गुणानपि चाहरेत्॥")

घृतपूर्णकः, पुं, (घृतेन पूर्णं इव कायतीति। कै+कः।) करम्भदृष्टः। इति त्रिकाण्डशेषः॥

घृतमण्डलिका, स्त्री, (घृतस्य मण्डलं समूहः। तदिव निर्य्यासः अस्या अस्यां वा अस्तीति। घृतमण्डल+"अत इनिठनौ।" ५।२।११५। इति ठन्।) हंसपदीवृक्षः। इति राजनिर्घण्टः॥

घृतमण्डा, स्त्री, (घृतमण्डवत् निर्य्यासोऽस्यास्याः। "अर्शं आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) वायसोलीवृक्षः। इति शब्दचन्द्रिका॥ माकड़-हाता इति भाषा॥

घृतवरः, पुं, (घृतमेव वरं बाहुल्यात् प्रधानं यत्र।) घृतपूरः। इति हेमचन्द्रः। ३। ६४॥

घृता, स्त्री, (घृतवत् निर्य्यासोऽस्यास्याः। "अर्शं आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) घृतमण्डा। इति शब्दचन्द्रिका॥

घृताची, स्त्री, (घृतेन अक्तेन अञ्चति क्षिप्रं गच्छतीति। अनुच+क्विप्। नलोपे स्त्रियां ङीप्। सर्व्वथा मनुष्याहारवर्ज्जितानां देवजातीनां स्नेहतमयघृतभोजनं महाभारतपुराणादिप्रसिद्धम्।) अप्सरोविशेषः। इति हलायुधः॥ (यथा, विष्णुपुराणे। १।६।१०१।
"घृताचीप्रमुखा ब्रह्मन् नृतुर्ज्ञाप्सरोगणाः॥"
गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२।६।४६।
"घनारिमण्डला पूर्णा घृताची घनवेगिनी॥")

घृताचीगर्भसम्भवा, स्त्री, स्थूलेला। इति राज-निर्घण्टः॥

घृताक्तः, पुं, (घृतस्य आक्तः आक्ता यस्य। यद्वा, घृतेन आक्तयते स्वगन्धेन इति। आ+अञ्ज+कः।) सरलद्रवः। इति त्रिकाण्डशेषः॥

घृतेली, स्त्री, (घृतं इलति तद्भक्षणाय तत्र स्थिति-रीति। इल स्थैर्ये+अच्। गौरादित्वात् ङीष्।) कीटविशेषः। तैलपायिका इति केचित्॥ तत्-पर्य्यायः। पिङ्गकपिङ्गा २। इति हेमचन्द्रः। ४।२०३॥

घृतोदः, पुं, (घृतमिव स्वादु आकृत्या शुभ्रं वा उदकं यस्य। उदकस्योदादेशः।) घृतसमुद्रः। यथा,
"एवं सुरोदाद्दधिसंज्ञितद्विगुणः समानेन घृतोदेन यथा पूर्व्वः कुशद्वीपः।" इति श्रीभागवते ५।१।३॥

घृष, उ संघर्षे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) उ, घर्षित्वा घृष्ट्वा। घर्षति चन्दनं लोकः। इति दुर्गादासः॥

घृष्टः, त्रि, (घृष्+कर्म्मणि क्तः।) घर्षितः। घसा इति भाषा॥ यथा। घृष्टो मलयजो गन्धः। इति शुद्धितत्त्वम्॥ (यथाच काशीखण्डे। १६।५६।
"धातुका चूर्णितजला घृष्टपातकसन्ततिः॥")

घृष्टिः, स्त्री, (घृष्यतेऽसौ। घृष्+कर्म्मणि क्तिच्।) वाराही। चामर आलु इति भाषा॥ इत्य-मरः। २।४।१५१॥ (घृष्+भावे क्तिन्।) घर्षणम्। स्पर्द्धा। अपराजिता। (घर्षतीति। घृष्+कर्त्तरि क्तिच्।) शूकरे पुं,। इति मेदिनी। टे। १३॥

घृष्टिला, स्त्री, (घृष्टिं घर्षणं लातीति। ला+कः।) चित्रपर्णिका। पृश्निपर्णी। इति रत्नमाला॥

घृष्विः, पुं स्त्री, (घर्षति इति। घृष संघर्षे+"क्रविघृष्विङ्क्वीति।" उणा। ४।५६। इति क्विन्प्रत्ययेन निपातनात् सिद्धः।) शूकरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (भावे+क्विन्। घर्षणम्। यथा, ऋग्वेदे। १।३०।४।
"प्रवः शुक्राय घृष्वये।" "घृष्वये शत्रुघर्षणा-युक्ताय।" इति भाष्यम्॥)

घेषुलिका, स्त्री, क्रौञ्चादनम्। इति रत्नमाला॥ घेँषु इति भाषा॥ (यथा, वैद्यकरत्नमालायाम्। "क्रौञ्चादनं घेषुलिका॥")

घोटः, पुं स्त्री, (घोटते परिवर्त्तते इति। घुट परि-वर्त्तने+पचाद्यच्।) घोटकः। इति राज-निर्घण्टः॥

घोटकः, पुं स्त्री, (घोटते गत्वा प्रत्यागच्छतीति। घुट परिवर्त्तने+ण्वुल्।) पशुविशेषः। घोड़ा इति भाषा॥ तत्पर्य्यायः। पीतिः २ तुरगः ३ तुरङ्गः ४ अश्वः ५ तुरङ्गमः ६ वाजी ७ वाहः८ अर्व्वा ९ गन्धर्व्वः १० हयः ११ सैन्धवः १२ सप्तिः १३। इत्यमरः। २।८।४४॥ घोटः १४ पौती १५ पौथिः १६। इति भरतः॥ तार्क्ष्यः १७ हरिः १८ वीती १९। इति हेमचन्द्रः॥ सुन्नभोजी २० धाराटः २१ जवनः २२ जितवः २३ जवी २४ वाहनश्रेष्ठः २५ शीघ्राता २६ अश्ततसोदरः २७। सुन्नभुक् २८ ग्रालिहोत्रः २९ लक्ष्मीपुत्रः ३० प्रकीर्णकः ३१। इति जटाधरः॥ वातायनः ३२ श्रीपुत्रः ३३ चामरी ३४ हेयी ३५ ग्रालिहोत्री ३६ मरु-द्वयः ३७ वाजस्कन्धः ३८ हरिद्राक्तः ३९ एक-ग्रहः ४० किन्नरी ४१ ललाममः ४२ विमानकः ४३॥ इति शब्दरत्नावली॥ अत्यः ४४ वह्निः ४५ दधिक्रा ४६ दधिक्रावा ४७ एतवः ४८ एतग्वः ४९ पेडुः ५० दीर्घशेफः ५१ उच्चैःश्रवसः ५२ आशुः ५३ ब्रध्नः ५४ अरुषः ५५ मांसलः ५६ अश्वयः ५७ श्येनासः ५८ सुपर्णाः ५९ पतङ्गाः ६० नरः ६१ आर्य्याणाम् ६२ हंसासः ६३। इति वैद्य-निघण्टौ १ अध्यायः॥ हरी इन्द्रस्य १ रोहितः अग्नेः २ हरितः आदित्यस्य ३ रासभौ अश्विनोः ४ अजाः पूष्णः ५ एषत्वो मरुताम् ६ अरुण्यो गावः उषसाम् ७ श्यावाः सवितुः ८ विश्वरूपा हरयस्ते: ९ नियुतो वायोः १०। इति दशा-

दिशोपयोजनानि। इति च वैद्यनिघण्टौ १ अध्यायः॥ अस्य मांसगुणाः। उष्णत्वम्। वात-नाशित्वम्। लघुगुरुत्वम्। अतिसेवनात् पित्त-दाहप्रदत्वञ्च। इति राजनिर्घण्टः॥ अग्निकफ-बलकारित्वम्। दृंहणत्वम्। चक्षुर्हितत्वम्। मधुरत्वञ्च। इति भावप्रकाशः॥ * ॥

अथाश्वपरीक्षा।
"सप्तधा वाजिनः पूर्व्वं संजाता धीमचारिणः।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्विताः॥
इन्द्रादेशात्कालिहोत्रस्तेषां पञ्चमथाच्छिनत्।
ततः प्रभृति निष्पन्नासुरङ्गा धरणीं गताः॥
उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे।
चतुर्द्धा वाजिनो भूमौ जायन्ते देशसंश्रयात्॥
ताजिताः खुरशालाच्च तुषाराच्चोत्तमा हयाः।
गोजिकाणाच्च कैकाणाः प्रौढ़ाहाराच्च मध्यमाः।
ताड़जा उत्तमाश्चाच्च वाजशूलाच्च मध्यमाः।
गत्वराः साधवासाच्च सिन्धुदाराः कनीयसः॥
अन्यदेशोद्भवा ये च ते वै नीचाः प्रकीर्त्तिताः।
वाजिनो जलजाः केचिद्वह्निजातास्तथापरे॥
समीरप्रभवाश्चान्ये तुरगा ग्लमजाः परे।
जलोद्भवा द्विजा ज्ञेयाः क्षत्रिया वह्निसम्भवाः॥
प्रभञ्जनभवा वैश्या ग्लजाः शूद्रजातयः।
पुण्यगन्धिर्भवेद्विप्रः क्षत्रियोऽगुरुगन्धिकः॥
घृतगन्धो भवेद्वैश्यो मीनामोदी च शूद्रकः।
विवेकी सद्गुणो विप्रस्तेजस्वी क्षत्रियो बली॥
कोच्चाभावो भवेद्वैश्यः शूद्रो निःसत्त्वको भवेत्।
विप्राद्या वाहनाः सर्व्वे त्रयो भूमिपतेः सदा॥
शूद्रजातिं तुरङ्गन्तु न सृजन्ति नरेश्वराः॥"
इत्युत्पत्तिः॥ * ॥

अथाङ्गाङ्गविभागः।
"सप्तविंशत्यङ्गुलिभिर्मुखमानं विधीयते।
कर्णौ षड़ङ्गुलौ प्रोक्तौ भालकं चतुरङ्गुलम्॥
चत्वारिंशच्च सम्प्राप्ता स्कन्धः संपरिकीर्त्तितः।
पृष्ठवंशश्चतुर्विंशः सप्तविंशा तथा कटी॥
इति स्त्र्यं तथा निम्नं प्रतिपुच्छं द्व्यधिकम्।
लिङ्गं हस्तप्रमाणन्तु तथाण्डौ चतुरङ्गुलौ॥
मध्यस्थानं चतुर्व्विंशं हृदयं षोड़शात्मकम्।
कटिकुक्ष्यन्तरं प्रोक्तं चत्वारिंशत् प्रमाङ्गतः॥
मणिबन्धद्वयञ्चैव खुराश्च चतुरङ्गुलाः।
अष्टौत्यङ्गुलिकाः पादा दीर्घा विंशाधिका मताः॥"
इत्यङ्गुलिविभागः॥ * ॥

अथ वयोविभागः।
"दन्तेषु यत्नं यत्नेन ज्ञेयो वयःक्रमः॥"
तद्यथा,—
"कालिका हरिणी शुक्ला काम्या मध्यिकया सह॥
शुक्लो मुषलकश्चैव दन्तानां चलता तथा।
इत्यष्टौ अङ्गनाम्नाहुरश्वेषां लक्षणं शुभम्॥
चतुर्भिर्वत्सरे दन्ताश्चत्वारः परिकीर्त्तिताः।
षड्भिश्च षड़्विधैर्व जायन्ते तथ कालिकाः॥
षष्ठे संवत्सरे प्राप्ते कालिकाख्या भवेत्तु हि।
तथाख्या सप्तमे वर्षे चतुर्थी कालिका भवेत्॥
अष्टमे वत्सरे प्राप्ते जायन्ते सर्व्वकालिकाः।

घोटकः

नवमे त्वथ ताः सर्वा आपीताः सम्भवन्ति च॥
केचिदेकादशे वर्षे तावत् पीतत्वमागताः।
ततः श्वेताः प्रजायन्ते चतुर्दशसमावधि॥
ततः काचप्रभाः सम्यक् यावत् संवत्सराक्षयः।
ततः खप्रदशादूर्द्धं यावद्वर्षाणि विंशतिः॥
मक्षिकाभां वदन्त्येषां यावद्वर्षत्रयं पुनः।
शुद्धाभासाः सर्वदन्ता भवन्ति वाजिनां ततः॥
त्रयोविंशात् परे वर्षे दशना सुषिरा मताः।
षड्विंशात् परतो दन्ताः स्थानाच्चलनमाप्नुयुः॥
यावद्वर्षत्रयं पञ्चात्रिपतन्ति समात्रये।
द्वात्रिंशद्वत्सरे वाजी नूनं निर्दशमाप्नुयात्॥"

अथ शुभलक्षणानि।

"दीर्घाः शुष्का विशालास्या ये भवन्ति तुरङ्गमाः।
ते ग्रस्ताः पार्थिवेन्द्रस्य यानवाहनकर्मणि॥
आस्यं भुजौ चापि हृत्काटिका च
दीर्घं चतुष्कं तुरगस्य शस्तम्।
तथोन्नते भालपुटे ललाटे
कपश्च वाजिप्रवरस्य बोध्यः॥
श्रोत्रे च मक्षिवन्मध्ये पुच्छं कोडं लघूत्तमम्।
पीताङ्गः श्वेतपादो यो यश्च स्यात् सितलोचनः॥
चक्रवाकः स विज्ञेयो राजार्हः प्रियसत्तमः।
मुखे चन्द्रकसंभीतः पद्मजम्बूफलाकृतिः॥
श्वेतपादः स विज्ञेयो मल्लिकाख्यः सुपूजितः।
सर्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत्।
स वाजी वाजिमेधार्हः श्यामकर्णः सुदुर्लभः॥
यस्य पादाः सिताः सर्वे पुच्छो सुक्को सुखं तथा।
महिषास्तु सिता यस्य तन्मिद्यादशमङ्गलम्॥
यस्य पादाः सिताः सर्वे चन्द्रकश्च ललाटके।
कल्याणपञ्चकः प्रक्तो भर्तुः कल्याणकारकः॥
विमिश्रवर्णकाः सर्वे प्रशस्ता वाजिनो मताः।
यस्योत्तरोत्तरा वर्णा वृद्धिं यान्ति शनैः शनैः॥
नाशयन्ति तथा नीचान् करोति स बहून् हयान्।"

अथावर्तगुणाः।

"रोमणां भ्रमिरावर्त इति गद्यते।
बहुविधो दक्षिणो वामो दक्षिणस्तु शुभावहः॥
नासिकाग्रे ललाटाग्रे शृङ्गे कण्ठे च मस्तके।
आवर्तो जायते येषां ते धन्यास्तु तुरङ्गमाः॥
ललाटे यस्य चावर्तो द्वितीयस्तु कुकुन्दरे।
मस्तके च तृतीयस्तु स विज्ञेयो हयोत्तमः॥
शङ्खावर्तो भवेद् यस्य वाजिनो दक्षिणाश्रयः॥
न करोति महासौख्यं स्वामिनः शिवसंज्ञितः।
कर्णमूले यदावर्तः स्तनमध्ये तथापरः।
विजयाख्यावुभौ तौ तु युद्धकाले जयप्रदौ॥
स्कन्धपार्श्वे यदावर्तः स भवेत् सुखकारकः।
नाभामध्ये यदावर्तो एको वा यदि वा त्रयः॥
चक्रवर्ती स विज्ञेयो वाजी भूपालभूषितः।
कण्ठे यस्य महावर्तः प्रोक्तश्चिन्तामणिः शुभः॥
रोमणां दक्षिणवत् स्यात् शुक्तिरित्यभिधीयते।
वामावर्ते शुभस्तत्र शुक्तिस्तत्र शुभावहा॥"

अथ दोषाः।

"चत्वारोऽप्यसिताः पादाः सर्वश्वेतस्य वाजिनः।
भवन्ति यस्य च ज्ञात्वा यमदूतः सुदूरतः॥

घोटकः

चत्वारो यस्य वै पादाः परस्परविवर्णकाः।
स ज्ञात्व्यो सुबली नाम्ना मुनिभिः कुलनाशनः॥
दुर्लक्ष्मवाजिनं ज्ञात्वा यदीच्छेत् श्रात्मतों श्रियम्।
यस्तु वर्णविभेदेन ज्ञायते रोमसम्भवात्॥
पुच्छाख्यः स परित्याज्यः सर्ववाजिभयावहः।
यस्यावयेषवर्णेन छाद्यते च प्रधानतः॥
विवृद्धिं गच्छतः सोऽपि कुरुते हयसंक्षयम्।
इति स्कन्धे गले चैव कटिदेशे तथैव च॥
नाभौ कुक्षौ च पार्श्वांशे मध्यमः स प्रकीर्त्तितः।
एको वामकपोलस्थो यस्यावर्तः प्रदृश्यते॥
चर्वणी स हयस्याज्यः करुते स्वामिनाशनम्।
वामगण्डाश्रयावर्तः प्रकरोति धनक्षयम्॥
कण्ठान्ते यस्य चावर्तः स स्तूपं कुरुते विभोः।
क्षिप्रं जानुगतावर्तः प्रवासं कुरुतेऽथवा॥
वाजी मेढ्रगतावर्तो वर्ज्जनीयो महीभुजा।
त्रिवलिप्रभवावर्तस्त्रिवर्गस्य प्रणाशकः॥
पृष्ठवंशे यदावर्त एकः संपरिलक्ष्यते।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः॥
गुह्ये पुच्छे बलौ यस्य भवन्त्यावर्तकाक्षयः।
च छतान्तस्तु रूपेण वर्ज्जनीयस्तुरङ्गमः॥
अधोर्द्धेच्च यदा वाजी सम्पुटं न सृणेत् क्वचित्।
यमदूतः स विज्ञेयो वर्ज्जनीयस्तुरङ्गमः।
हीनदन्तोऽधिकश्चैव करालो ज्ञातालुकः।
सुबली च तथा ज्ञङ्घी षड्ढते घातकाः स्मृताः॥
तत्राद्यौ विदितार्थौ तु शेषार्थां लक्षणं ब्रुवे।
त्रयः पादाः सिता यस्य ज्ञाणश्चैकोऽभिजायते॥
त्रयो वाप्यसिता यस्य एकः शुक्लोऽभिजायते।
सूबली नाम पापोऽयं दूरे त्याज्यो हयाधमः॥
विकटो विषमो यस्य दशनः च करालकः।
करालो कुरुते नाशं भर्तुरत्र न संशयः॥
ज्ञातालुर्हयो नाशं कुरुते नात्र संशयः।
विवृद्धतो भवेद्यस्तु ज्ञातालुर्न दुष्यते॥
कर्णान्ते चूलिकान्ते च ज्ञङ्घवक्षस्थले यदि।
स ज्ञङ्घी कुरुते नाशं राज्ञस्य च कुलस्य च॥
एकाक्षोऽजातकाक्षश्च हीनाक्षोऽभ्यधिकाक्षकः।
घण्टी च कम्बली चैव षड्ढते पापलक्षणाः॥"

अथारिष्टम्।

"सुप्तस्यापि च नेत्रान्ते स्थातं नीले च वाजिनः।
तथैव तस्य जानीयाद्वैवन्मृत्युर्द्विवार्षिकी॥
नीलपीते च नेत्रान्ते त्रिभिर्मासैर्वपुःक्षयः।
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते॥
विंशेषाद्वाजिनो ज्ञेयं तस्यायुः पञ्चमासिकम्।
जिह्वायां जायते बिन्दुरकस्माद्यदि वाजिनः॥
मासैकं जीवितं तत्र पीते मासद्वयन्तथा।
रक्ते स्तंबुखिभिर्मासैश्चतुर्भिश्च विचिन्तके॥
पञ्चभिर्नीलवर्णे च षड्भिर्वभ्रुसमाकृतौ।
सप्तभिः पाटलाकारे चणकाभे तथाष्टभिः॥
नवभिश्च हरिद्राभे दशभिर्नतुकोपमे।
एकादशे सुवर्णाभे वत्सरेण हिमद्युतौ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम्।
जिह्वा हि मलिनाकारा मासषट्कं स जीवति॥
जिह्वाग्रे पिडका यस्य पादान्ते च तथोदरे।

घोटकः

मूत्रं करोति रक्तमा मासषट्कं स जीवति॥
कर्णयोः क्षतजं यस्य नेत्राभ्यां वा प्रवर्त्तते।
वाजिनः पित्तग्रस्तस्य दशमासान् स जीवति।
यस्य नेत्रे हरिद्राभे यस्य वातार्दितस्य च।
तस्यायुः सप्तमासीयं बहुवर्णे तथा दिने॥
यस्यैकं लोचनं हीनं द्वितीयं रक्तसन्निभम्।
पुटान्ते च स विज्ञेयः पीताभे मासजीवकः॥"
एतानि अरिष्टानि रक्तदोषजानि।
"स्फुलिङ्गा यस्य दृश्यन्ते पुच्छतोऽस्य वह्निजाः।
निर्गच्छन्तः प्रभोर्नाशं ते वदन्ति निशागमे॥
अश्वशालां समासाद्य यदा च मधुमक्षिकाः।
मधुशालं प्रबध्नन्ति तदाश्वान् घ्नन्ति क्षुत्क्षयः॥"

अथ हयक्रियाकालः।

"स्वरुणगुरुभार्गवेषु भौमार्कवारे
स्वतिथिकरणतारालग्नयोगोदयेषु।
शुभमिह हयकार्यं कार्यमार्येण बुद्धा
न शनिरविकुजानां वासरे नोग्रतारे॥"

इति कालः॥ * ॥

अथ हयारोहणज्ञानम्।

"चलकिंशुलयपादः कर्णमध्यैकदृष्टि-
र्नचलति कटिदेशः स्वासने संस्थितो यः।
हयहृदयगतिज्ञः स्थानदण्डावपातः
स खलु तुरगयाता पूज्यते पार्थिवेन्द्रैः॥
मेरुः स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च।
स वाजिवाहः प्रथितः पृथिव्यां
शेषा नरा भारकरा हयानाम्॥ * ॥

तत्र ताडनविधिः।

"रक्तकोष्ठे सुखे चौष्ठे गले पुच्छे च ताड्येत्।
भीते वक्षःस्थले हन्याद्दक्षं चोन्मार्गगामिनः॥
कुपिते पुच्छसंस्थानं भ्रान्ते जानुहृयं तथा।
सर्वस्याप्राप्तदण्डस्य दण्डमेकं निपातयेत्॥
अस्थानदण्डपातात्च बहुदोषः प्रजायते।
तस्मान्निरीक्ष्य कर्त्तव्यं हये दण्डनिपातनम्॥"*॥

अथ धावनविधिः।

"हस्तैश्चतुर्भिर्गतिभिर्हयैस्तु उदाहृतः।
अक्ष्णोर्निमेषणान्यष्टौ मात्रा प्रोक्ता विचक्षणैः॥
मात्राषोड्शकैर्नाश्वो यो धावति धनुःशतम्।
तमुत्तमोत्तमं विद्यादुत्तमवेगं महाजवम्॥
विंशत्या मध्यमो ज्ञेयो ज्ञतोऽन्ये चाधमा मताः।
नभस्याश्वयुजे मासि नैवाश्वान् वाहयेन्नृपः॥
वक्ष्यामिसद्यं पित्तं श्रमात् कुप्यति वाजिनाम्।
कार्येण महता वापि योज्यो मासि तु कार्त्तिके॥
हेमन्ते शिशिरे योगो वसन्ते च यदृच्छया।
बालं वृद्धं क्षयं रुग्णं दत्तखेदं वृहद्बलिम्।
पूर्णातिरिक्तकोष्ठञ्च गुर्विणीञ्च न वाहयेत्॥*॥

अथ रक्तमोक्षणविधिः।

"द्वासप्ततिसहस्राणि नाड्यो नृणां भवन्ति हि।
वाजिनामिह सर्वेषामायु रक्तं व्यवस्थितम्॥
तासां निर्मोक्षणार्थाय द्वारायष्टौ वदाम्यहम्।
यैर्याति कुत्सितं रक्तं सर्वदेहसमुद्भवम्॥
कण्ठे कर्णे लोचनयोरंसयोश्च मुखे तथा।

अक्ष्योरथ पादेषु पार्श्वयोरुभयोरपि ॥
एतद्धर्म्मं सुविज्ञेयं वाजिनां भिषगुत्तमैः ।
अन्ये समुदयाख्याहुः सिराद्वाराणि वाजिनः ॥
येषु रक्तं हृतं सद्यः प्रकरोति ततः सुखम् ।
गुल्फे गले तथा मेढ्रे कक्षान्ते चैव पत्त्रके ।
गुदे पुच्छेऽथ वस्तौ च जङ्घयोः सर्व्वसन्धिषु ।
जिह्वायां चाधरे चौष्ठे नेत्रयोरुभयोरपि ॥
कर्णमूले मणौ गण्डे रुधिरं स्रावयेद्भिषक् ।
सौश्रुतमानपत्रेण त्याज्यं रक्तं तुरङ्गप्रमाणम् ॥"
तद्यथा,—
"घृतं सुखे त्याज्यं कक्षयोश्चैकमेव च ।
घृताक्तं नेत्रदेशाच्च मेढ्रदेशात्तथैव च ॥
गण्डयोरक्ष्योश्चैव स्रावयेत् पञ्चविंशतिम् ।
द्वादशैव गुदे प्राहुरश्वशास्त्रविचक्षणाः ॥
पैत्तिकं कालिकं विद्याद्वाते विद्यात् सशोणितम् ।
पिच्छिलं श्लेष्मलं पाण्डु कषायोदकवच्च यत् ॥"*

अथ ऋतुचर्य्या ।

"न प्राज्ञो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेदुद्गतन्तस्य वाहनं दशमासिकम् ॥
कूपोदकं कटुकतैलनिवातगेहं
ग्रस्तं पलार्द्धलवणं दिवसान्तरेण ।
तत्रान्यथा सति सुखामयवीर्य्यहानि-
र्मुख्यैर्बलैर्विरहितस्तु वयो विनश्येत् ॥
ग्रसति गुडघृतं पयः प्रशस्तं
ग्रसति सिताऽपलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थं
घृतयुतनोलसुकुष्टकाश्च भोज्याः ॥
हेमन्तकाले घृततैलमाषा
निर्व्वातसंस्था च पयो यथेच्छम् ।
ग्रसेः प्रनैर्वाहनकर्म्म कुर्य्याद्-
यवांश्च पक्वा वितरेद् विधिज्ञः ॥
शिशिरे तैलपलाष्टकं कटिस्थं
दिनसप्तावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवमाष तथाण्डतण्डुलरूपाः ॥
यस्य हृता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृत्वापि क्रियाः सर्व्वाः स हयः सुखमश्नुते ॥
वसन्ते संप्राप्ते निजसुखवशाद्धयान् हयान्
घृतं तैलं ग्रस्तं सकलविधिरुक्तोऽपि च मतः ।
पयो दद्यादस्मै सलवणमथो वाहनविधि-
र्भृशं योज्यस्तेनाब्दमपि सुखमिच्छेद्धयवरः ॥
वसन्तसमये योऽश्वः स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्यति सालस्यं जायते वपुः ॥
ग्रीष्मे घृतं घृतजमोक्षणघर्म्मशान्ति-
सुच्छायबन्धनविमर्द्दनग्रीततोयम् ।
दूर्व्वा हृद्यं लघु च कोमलमन्यदेव
यत्किञ्चिदेवसुपयुक्तमिदं वदन्ति ॥"* ॥
भोजे तु हयलक्षणमन्यथा,—
स्निग्धाङ्गो लघुतरलोमकस्तु पुच्छो
दीर्घास्थिनयनकेशपृष्ठवंशः ।
रक्तोष्ठः पृथुजनितम्भभारवक्षा
राजार्हो भवति तुरङ्गमः प्रशस्तः ॥
नाभेरारभ्य देहस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वकायस्थिता रक्ताः शुभाय हयसंस्थिताः ॥
अधःकाये स्थिता रक्ता अधमत्वप्रकाशकाः ।
शुक्लीनां विपरीत्येन प्रशस्तफलमादिशेत् ॥"*॥
वातस्यस्तु ।
"ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।"
तद्यथा,—
"ये शुक्लाः सुविमलपुष्पगन्धा ये वा
शुद्धाङ्गाः सदृशसदृश्यभोजिनो वा ।
अक्षुद्राः समरगता भृशञ्च पुष्टा-
स्ते विप्राः क्षितिपतिवाहनेऽतियोग्याः ॥
ये रक्ताः सदगुरुगन्धयोऽहता वा
संरुद्धाः बहुतरभोजिनो बलाढ्याः ।
अश्रान्ताः सकलगुणग्रहाः प्रवीणा
विज्ञेया विधिकरचातजातयस्ते ॥
ये पीताः खलु घृतगन्धयोऽपि ये वा
ये चाक्षुद्राः कथमपि रोषशालिनो ये ।
बद्धा वा बहुतरनादघोषणा वा
विज्ञेया नृपवर ! वैश्यजातयस्ते ॥
ये कृष्णाः सरुधिरगन्धयोऽपि ये वा
अन्यथा बहुतरताड़नैरपीमे ।
क्षीणाङ्गा लघुतनवोऽपि वेगहीना-
स्ते शूद्राः क्षितिपतिना भृशं विहेयाः ॥"
एतत्तु एकैकमेव लक्षणं न सासुदायिकम् ॥
"लक्षणद्वयसम्बन्धात् द्विजातिः स्यात्तुरङ्गमः ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधमः ॥"*॥
अन्यच्च तु ।
"सात्त्विका राजसाश्चेति तामसाश्चेति ते हयाः ॥
ये शुद्धवर्णा भृशवेगयुक्ता
अश्रान्तिभाजो बहुभोगिनश्च ।
अक्रोधशीलाः समरेऽतिरुष्टा-
स्ते सात्त्विका भूप ! तुरङ्गमाः स्युः ॥
ये रक्तवर्णा गुरुवेगरोषाः
कषाभिघातं न हि ये सहन्ते ।
येऽमी बलाढ्याः खलु दीर्घदेहा-
स्ते राजसा भूप ! तुरङ्गमाः स्युः ॥
ये कृष्णवर्णास्तनुरोषवेगा
अल्पाग्निनो लक्षणलक्षिताश्च ।
ये दुर्ब्बलाः सर्व्वगुणैर्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमाः ॥
हयोर्लक्षणसम्बन्धात् द्विगुणो वाजिमध्यमः ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दितः ॥"
पराशरसंहितायान्तु ।
"पृथिव्यप्वायुतेजःखैः पञ्चभिस्तुरगाश्रितैः ।
उक्तैः पञ्चधा भेदाः परस्परमता यथा ॥
ये स्थूलाः श्रमसहदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाच्च दीर्घाः ।
अक्रुद्धाः समरगतास्तु रोषभाजो
भौमास्ते घनगुरुघर्घरस्वरास्तु ॥
ये शुषाङ्गास्तनुबलाः श्रमासहकलेवराः ।
अक्रोधवेगाः सखरा आप्यास्ते तुरगाधमाः ॥
ये वातवेगप्रतिमोग्रवेगाः
शुष्का भृशं दीर्घकलेवराश्च ।
अश्रान्तिभाजो बहुदूरगाश्च
ते वायवा वाजिवराः प्रदिष्टाः ॥
ये क्रोधशीला भृशवेगयुक्ता
सुस्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यदा तैजससंज्ञकोऽश्वः
किं कार्य्यमन्यैस्तुरगाधमेषु ।
शुद्धं यदा क्षीरकलङ्कमेकं
किं कार्य्यमन्यैर्मणिभिर्विचित्रैः ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्रुधा भृशं वेगसमन्विताश्च ।
ये लङ्घयन्तः परिखामपारां
ते गागना पुण्यतमाः प्रदिष्टाः ॥
हयोर्लक्षणसम्बन्धात्तुरगः स्यात् द्विभौतिकः ।
स्वजातिगुणभूतानां हयानां वाहनं शुभम् ॥
ग्राह्यिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
असम्भवे हि दुष्टाश्वं वाहयेदिति चेत्तदा ॥
तिलं सकाञ्चनं दद्याल्लवणं वा गुड़ान्वितम् ।
रेवन्तं पूजयेद्वापि निजं निर्म्मत्सर्य्यचेत्तदा ॥
दद्यात्ताम्रपलं वापि अभावे सर्व्वकर्म्मसु ॥"
एवमन्यत्रापि ।
"काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
ब्रह्मादिजातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।"

इति हयपरीक्षा ॥ * ॥

इति भोजराजकृतयुक्तिकल्पतरुः ॥

("येन ज्ञानवता हिमालयतरुच्छायासु विक्रीड़ितम्
यः स्नातो हिमपुण्यवातशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितैः
पायाद्वः स तुरङ्गघोषतनयः श्रीग्राह्यिहोत्रो मुनिः ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो नृपतिः ।
भीमार्জ্জুनसहदेवास्तदनु च ये वाजिग्राह्यिकतत्त्वज्ञाः ॥
दृष्ट्वा सम्यङ्नकुलः ग्राह्यं कृत्स्नं च ग्राह्यि-
होत्रीयम् ।
ब्रूते ग्राह्यार्थमन्यच्छास्त्रं कृत्वा समासेन ॥
प्रश्नो जातिवर्णमावर्णदन्ता
लक्षं वेगा वाहनं धातुरत्नम् ।
कालो नस्यं पिण्डमाप्यं कषायं
ग्राह्यां चेष्टां वाजिनामत्र वक्ष्ये ॥
सपक्षा वाजिनः सर्व्वे सञ्जाता योगचारिणः ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा जवसम्भ्रमानसञ्ज्ञान्वाहनोचितान् ।
शक्रः प्रोवाच पार्श्वस्थं ग्राह्यिहोत्रं मुनीश्वरम् ॥
नास्त्यसाध्यं मुने ! किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्हान् हयोत्तमान् ॥

घटोकः

ये च मे युद्धकालेषु प्रवहन्ति रथं सदा ।
अग्रकं वारणेन्द्रेण दानवैर्बलवत्तरैः ॥
ईषिकाख्यं समुत्सृज्य पक्षच्छेदं यथात्तदा ।
वाजिनां शुक्रवाक्येन ग्रालिहोत्रो महामुनिः ॥
छिन्नपक्षास्तु ते सर्व्वे गत्वा तत्पर्षिमब्रुवन् ।
दीनाः सुदुःखसम्पन्ना रुधिरेण परिप्लुताः ॥
भगवन् ! किं निमित्तं नः पक्षच्छेदः कृतस्त्वया ।
अपराधविहीनानां नेदृगिच्छन्ति पण्डिताः ॥
तस्मादृतिर्भवेत् प्राज्ञ ! सर्व्वेषामिह वाजिनाम् ।
यथा स्यात् सर्व्वदा सौख्यं पुष्टिश्च मुनिपुङ्गव ! ॥
अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान् ।
इन्द्रादेशात् कृतं सर्व्वं भवतां पक्षपातनम् ॥
तस्माद्वः प्रकरिष्यामि भविष्यति यथासुखम् ।
पुष्टीरन्या यथा देहे गौरवं च जगत्त्रये ॥
यूयं शुक्रादिदेवानां वाहनत्वं करिष्यथ ।
तथा भूमिपोतनाच्च गौरवेण समन्विताः ॥
यो राजा भवतां पुष्टिं खन्नपानादिभिः सदा ।
करिष्यति न सन्देहो भविष्यति स दुर्ज्जयः ॥
न च त्यक्ष्यति तं लक्ष्मीः कदाचिच्चपलत्वया ।
अपि सर्व्वैर्गुणैर्हीनं बहुशुभ्रुभिरावृतम् ॥
तथा चैव विधास्यामि परमञ्च चिकित्सितम् ।
पुष्टेश्च रोगनाशार्थं नराणां विहितं यथा ॥
तस्माद्गच्छत भूलोकं पातालञ्च तथापरे ।
स्वर्गे चान्ये मदादेशादृषेण ग्रान्तिभावेद् ध्रुवम् ॥
एवं विसृज्य तान् सर्व्वान् ग्रालिहोत्रस्तु रङ्गमान् ।
चक्रे द्वादशसाहस्रीं तदर्थे संहितां सुधीः ॥
ततःप्रभृति लोकेऽस्मिन् वाह्या जातास्तुरङ्गमाः ।
तच्चिकित्सितं तेषां ग्रालिहोत्रप्रभाषितम् ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते प्रश्नो नाम
प्रथमोऽध्यायः ॥

अथ जातिः ।

"उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे ।
चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥
ताजिकाः खुरशाणाश्च उत्तराश्चोत्तमा हयाः ।
गोचिकाकाश्च कैकाणाः प्रौढ़ाहाराश्च मध्यमाः ॥
भाङ्गलाश्चोत्तमाग्राश्च राजशूलाश्च मध्यमाः ।
गोडराः ग्रावराश्चैव सिन्धुपाराः कनीयसः ॥
अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः ।
वाजिनो जलजाः केचिद्द्विजातास्तथापरे ॥
समीरप्रभवाश्चान्ये उलूकगरुजास्तथा ।
जलोद्भवा द्विजातीयाः क्षत्रिया वह्निसम्भवाः ॥
समीरप्रभवा वैश्या एणोलूकाश्च शूद्रजाः ।
विवेकी सत्त्वसंयुक्तो विप्रस्तेजस्वी क्षत्रियो बली ॥
दृढभावस्तथा वैश्यः शूद्रो निःसत्त्वकातरः ।
ब्राह्मणाः सामवाही च भेदवाही च क्षत्रियः ॥
उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताड़ितः ।
पुष्पगन्धः सदा विप्रः क्षत्रियोऽगुरुगन्धकः ॥
घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः ।
विप्राद्या वाजिनः सर्व्वे क्षत्रियो भूपतेः सदा ॥
द्वौ वैश्यस्याथ शूद्रस्य शूद्र एव सुखावहः ।
केचिदिच्छन्ति भूपानां सर्व्वेषां वाहनोचिताः ॥
तदर्थं भूतले यस्माच्छालिहोत्रेण निर्म्मिताः ।

घोटकः

ब्राह्मणाः क्षेमकृत्येषु सिद्धिं मच्छन्ति वाजिनः ॥
क्षत्रिया युद्धकार्य्येषु वैश्या वित्तार्ज्जने सदा ।
शूद्राश्चान्येषु कृत्येषु ज्ञात्वैवं वाजिनः सदा ॥
आरोहेत् सर्व्वकार्य्येषु यदीच्छेच्छाश्वतीं श्रियम् ।
सदा शुभा भवन्त्येते वाजिनो यस्य भूतले ॥
सदैव निद्रावशगा निद्राच्छेदस्य सम्भवः ।
जायते सङ्करे प्राप्ते कर्करस्य च भक्षणे ॥
प्रबुद्धाः कथयन्त्यश्वाः शुभं वा यदि वाशुभम् ।
स्वस्वामिनो निचेष्टिष्टैस्तद्विज्ञेयं विचक्षणैः ॥
यः सन्नद्धो हयो रावमूर्ध्वमूर्ध्वं करोति च ।
खुराग्रेण लिखन् भूमिं स ग्रंसति रणे जयम् ॥
यः करोत्यवलूनग्रीवं पुरीषश्वासमोचनम् ।
स ग्रंसति पराभूतिं यश्चैवं वर्त्तते हयः ॥
निरामिषं निष्पीथे यो जागर्त्ति नृपतेर्हयः ।
स ग्रंसति हतन्तस्य स्थिरस्यापि प्रयाणकम् ॥
यदा यावं विना वाजी ग्रासन्त्यजति दुर्म्मनाः ।
अश्रुपातञ्च कुरुते तदा भर्त्तुरशोभनम् ॥
पुलकाङ्कितपुच्छा ये जायन्ते भूपतेर्हयाः ।
निरीक्षन्तः प्रभोर्नाग्रं ते वदन्ति निशागमे ॥
घरटं रचयेद्यत्नात् प्रविग्नन्तं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छदेग्रे च वह्नयः ।
प्ररचक्रागमाग्रंसी विज्ञेयो हयपण्डितैः ॥
अश्वग्रालां समासाद्य यदान्तर्मधुमक्षिकाः ।
मधुजालं प्रकुर्व्वन्ति तदाश्वान् ग्रन्ति कृतज्ञग्रः ॥
तस्मात् सर्व्वप्रयत्नेन वाजिग्रालां प्ररचयेत् ।
उपायेष्वथ सर्व्वेषु य इच्छेद्भूतिमात्मनः ॥
ब्राह्मणान्वाचयेत् स्वस्ति नित्यं वेदविचक्षणान् ।
तिलहोमस्तथा कार्य्यो जपश्च घृतरुद्रियः ॥
मन्दुरान्ते सदा धार्य्यो रक्तवक्त्रो महाकपिः ।
सर्व्वपापविनाग्राय वाजिनाञ्च विवृद्धये ॥
सरघां रचयेद् यत्नात् प्रविग्नन्तीं हयालये ।
यदीच्छेच्छाश्वतीमृद्धिं तेषाञ्चैव तथात्मनः ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते जात्यधिकारे
द्वितीयोऽध्यायः ॥

अथ वर्णवर्णनम् ।

"वर्णाः सप्त भवन्तीह सर्व्वेषां वाजिनां ध्रुवम् ।
तानहं कीर्त्तयिष्यामि भेदैर्जातानने कधा ॥
सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च ।
नीलः कृष्णोऽथ सर्व्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥
पट्टार्द्धो भूपतेर्वाजी सर्व्वश्वेतः प्रग्रस्यते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥
श्वेतः प्रालेयसङ्काग्रो रक्तः कुङ्कुमसन्निभः ।
हरिद्रासदृग्रः पीतः सारङ्गः कर्व्बुरः स्मृतः ॥
पिङ्गः कपिलकाकारो नीलो दूर्व्वायसन्निभः ।
कृष्णो जम्बूफलाकारः ग्रास्त्रज्ञैः समुदाहृतः ॥
पीताभः श्वेतपादो यस्तथा स्यात् सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥
सर्व्वश्वेतो हयो यस्तु भवेन्नेचककर्व्बकः ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥
मुखे चक्रकसंवीतो नृपलक्षणसंयुतः ।
श्वेतपादः स विज्ञेयो मङ्गिकाख्यः स पूजितः ॥

घोटकः

चत्वारोऽप्यसिताः पादाः सर्व्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥
यस्य पादाः सिताः सर्व्वे पुच्छं वक्त्रं सुखं तथा ।
मूर्द्धजाश्च सिता यस्य तं विद्यादश्वमङ्गलम् ॥
भस्माभं वाजिनं ज्ञात्वा सुदूरेण नराधिपः ।
यदि वाञ्छति कल्याणं वाञ्छेच्च श्रीसमुद्भवम् ॥
यस्य रोमविभेदेन जायन्ते रोमविन्दवः ।
पुष्पाख्यः स परित्याज्यः सर्व्ववाजिभयावहः ॥
यस्य पादाः सिताः सर्व्वे तथा वक्त्रञ्च मध्यतः ।
कल्याणपक्षकः प्रोक्तः सर्व्वकल्याणदश्च सः ॥
विमिश्रवर्णकाः सर्व्वे प्रग्रस्ता वाजिनः स्मृताः ।
श्यामनीलस्य मिश्रत्वमेकं मुक्त्वा सुदूरतः ॥
यस्योत्कृष्टतरो वर्णो वृद्धिं याति ग्रनैः ग्रनैः ।
नाग्रयति तथा नीचान् सकरोति बहून् हयान् ॥
यस्याधमेन वर्णेन ह्रादते च प्रधानजः ।
विवृद्धिं गच्छता सोऽथ करोति हयसंक्षयम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वर्णो नाम
तृतीयोऽध्यायः ॥

अथ आवर्त्ताः ।

"आवर्त्ता विंग्रतिः प्रोक्ता ग्रालिहोत्रमहात्मना ।
गात्रस्थानविभागेन तेषां लक्षणमुच्यते ॥
ललाटे मस्तके चैव ग्रीवायां हृदये तथा ।
पादे पृष्ठे मणीबन्धे नाभिदेग्रे विग्रेषतः ॥
स्कन्धे पार्श्वे गले वक्त्रे कुक्षौ रन्ध्रे चिके तथा ।
आद्यास्त्रयोदग्रावर्त्ता विज्ञेया वाजिपण्डितैः ॥
नासिकाग्रे ललाटाग्रे ग्रृङ्गे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तुरगोत्तमाः ॥
हृदि स्कन्धे गले चैव कटिदेग्रे तथैव च ।
नाभौ कुक्षौ च पार्श्वाङ्गे मध्यमास्ते प्रकीर्त्तिताः ॥
ललाटे यस्य चावर्त्तो द्वितीयस्य स लिङ्गकः ।
मस्तके च तृतीयश्च पूर्णकुक्षिः स उत्तमः ॥
पृष्ठवंग्रे तथावर्त्तो यस्यैकः संप्रजायते ।
स करोत्यश्वसंघातान् स्वामिनः सूर्य्यसंज्ञकः ॥
कक्षायां जानुमेढ्रे च चिबुलौ पुच्छसन्धिौ ।
पुच्छे गुह्ये बलावर्त्तावावर्त्ता अधमा हये ॥
त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥
एवमेव प्रकारेण त्रयो ग्रीवां समाग्रिताः ।
त्रयावर्त्तः स वाजीग्रो जायते भूपमन्दिरे ॥
ललाटे युगलावर्त्तौ चन्द्रार्कौ संप्रकीर्त्तितौ ।
वाजिनो यदि तौ स्यातां राष्ट्रवृद्धिकरौ परौ ॥
उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःग्रेषि सतु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥
एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृग्यते ।
वर्त्तमानः स विज्ञेयः स इच्छेत् स्वामिनाग्रनम् ॥
कपोलाभ्यन्तरावर्त्तो विद्यते वाजिनो यदि ।
तावश्विनाविति प्रोक्तौ युद्धकाले जयप्रदौ ॥
गण्डावर्त्तो भवेद्यस्य वाजिनो दक्षिणाश्रयः ।
स करोति महासौख्यं स्वामिनः ग्रिवसंज्ञकः ॥
तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम् ।
इन्द्राक्षाख्यौ भ्रुवौ प्रोक्तौ नृपराज्यविवृद्धिदौ ॥
कर्णमूले यदावर्त्तस्तन्मध्ये च तथापरः ।

विजयाख्यावुभौ ज्ञेयौ युद्धकाले जयप्रदौ ॥
नासामध्ये यदावर्त्तौ एको वा यदि वा त्रयः
चक्रवर्त्तौ स विज्ञेयो वाजी भूपालपूजितः ॥
कण्ठे यस्य महावर्त्तः एकोऽश्वस्य प्रजायते ।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः ॥
स्कन्धे पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः ।
करोति विधिवत् पट्टे स्वामिनः सततं सुखम् ॥
शुक्लाख्यौ तालुकान्तस्थावावर्त्तौ कीर्त्तितद्विदौ ।
हयस्य स्वामियुक्तस्य सदैव सुसुखावहौ ॥
एकावर्त्तो भवेद्यस्य कण्ठान्ते वाजिनो यदा ।
स रणे दृढमाप्नोति द्वौ च स्वामिविनाशनौ ॥
जानुदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
प्रवासं सततं ब्रूते स्वभर्त्तुः क्लेशसंयुतम् ॥
वाजी मेढ्रतलावर्त्तो वर्जनीयो महीभुजाम् ।
स करोति हरेर्नाशं परदारसमुद्भवम् ॥
त्रिवलिस्थो यदावर्त्तस्त्रिवर्गस्य प्रणाशकः ।
वाजिनस्ते परिज्ञेयाः स्त्रीपार्श्वस्था भयप्रदाः ॥
पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥
गुह्ये पुच्छे वलौ यस्य भवन्त्यावर्त्तकाश्चयः ।
स कृतान्तस्वरूपेण वर्जनीयस्तुरङ्गमः ॥
अध ऊर्द्धं यदा वाजी सम्पुटं न सृणेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्जनीयः प्रयत्नतः ॥
हीनदन्तोऽधिदन्तश्च करालो दग्धतालुकः ।
सृग्वली च तथा ग्रङ्गी वर्द्धते स्वामिघातकाः ॥
एकाक्षजातश्चैकाक्षो हीनाङ्गोऽप्यधिकाङ्गकः ।
परित्याज्यः स वाञ्छद्भिरन्विष्य परमं यशः ॥
घण्टी वदनको वाली ग्रङ्गी चैव चतुर्थकः ।
वर्जनीयः प्रयत्नेन सर्व्वे ते पापकृत्तमाः ॥
घण्टी च स्वामिनं हन्ति वदनी धनसंक्षयम् ।
अन्तःपुरं तथा वाली ग्रङ्गी राष्ट्रविनाशनः ॥
षट्पदाभो भवेद्यश्च क्षुत्तालुर्न दुष्यति ।
गृध्रपादसुखो यस्तु आवर्त्तैः कुत्सितैरपि ।
न दुष्यति सदावर्त्तैः ग्रालिहोत्रमतं यथा ॥

इति श्रीनकुलविरचिते ऽश्वचिकित्सिते आवर्त्ताध्यायश्चतुर्थः ॥

अथ दन्ताः ।

दन्तोद्भेदं प्रवक्ष्यामि वाजिनामायुलक्षणम् ।
येन विज्ञातमात्रेण आयुर्ज्ञानं प्रजायते ॥
अश्वस्तु तनुभिर्दन्तैः क्षीरदन्त इति स्मृतः ।
तथा द्वाविंशतिः कोणो प्राज्ञैर्दन्तमासिकः ॥
त्रिंशन्मासोद्भवाः सर्व्वे अखण्डाः परिकीर्त्तिताः ।
द्वौ स्यातां द्वौ च न स्यातां मर्द्धोपरि यथाक्रमम् ॥
चतुर्भिर्वत्सरैर्दन्ताः कालिकान्ये भवन्ति च ।
तथाग्रः सप्तमे वर्षे चतुर्थः कालिको भवेत् ॥
अष्टमे वत्सरे प्राप्ते प्राप्ताः स्युः सार्व्वकालिकाः ।
नवमे त्वथवा रेखा पीतत्वं ग्रंसयन्ति च ॥
तथाप्येकादशे वर्षे तावत् पीतत्वमागताः ।
तिष्ठन्ति दशनास्तेषां वाजिनामप्यसंशयम् ॥
ततः श्वेताः प्रदृश्यन्ते यावद्वर्षत्रयं पुनः ।
ततः कृष्णप्रभाः सम्यक् यावत् संवत्सराक्षयः ॥
ततः कादशाद्दूर्द्धं यावद्वर्षाणि विंशतिः ।
मध्यिकाभारदाक्षेषां यावद्वर्षत्रयं पुनः ॥
तस्माद्दूखलं प्राप्नोत्यावद्वर्षत्रयं पुनः ।
प्रकम्पश्च समागम्य पश्चात् पातः समात्रयम् ॥
द्वात्रिंशद्दन्तरेरेव वाजी निर्व्वाणमाप्नुयात् ।
दंष्ट्राचतुष्टयं श्वेतं वक्त्रेण परमायुषि ॥
अश्वानामेव सर्व्वेषां दन्ता द्वादश कीर्त्तिताः ।
कालिका हारिणी शुक्ला काचा वाप्यथ मध्यिका ॥
ग्रङ्खोदूखलकश्चैव दन्तानाश्चलनं तथा ।
ततस्तु पतनं विद्यादेव यञ्जनसंयुतः ॥
चतुर्विंशतयो दंष्ट्राः ग्रालिहोत्रमतं तथा ।
एवं दन्तविशेषेण सर्व्वेषामिह वाजिनाम् ।
विज्ञेया चायुषः संख्या वाजिगोयशतत्वरैः ॥

इति श्रीनकुलकृते ऽश्वचिकित्सिते दन्तोद्भेदो नाम पञ्चमोऽध्यायः ॥

अथ अवयवप्रमाणम् ।

दीर्घलम्बविमांसास्था ये भवन्ति तुरङ्गमाः ।
ते ग्रस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मणि ॥
स्कन्धमभ्युन्नतं दीर्घं वक्त्रग्रीवं विशेषतः ।
चमरालङ्कृतं सम्यक् स्त्रीकपालसमन्वितम् ॥
येषां पृष्ठं सुवर्ग्गं स्याद्विपुलं ग्रथवर्त्तितम् ।
किञ्चिन्मध्ये भवेन्निम्नं राजार्हास्ते तुरङ्गमाः ॥
स्निग्धरोमा सुदृश्या च सुश्लक्ष्णा विपुला कटी ।
ग्रथिताः सुदृढा रम्या भुजा मांसप्रपूरिताः ॥
पादा निर्मांसला वक्राश्चक्राकारखुरान्विताः ।
अप्रमाणं तथा वक्त्रः कर्णौ लघुतरौ स्मृतौ ॥
पार्श्वौ तनुतरौ ग्रस्तौ सुरसस्निग्धतालुकम् ।
दन्ताश्च स्निग्धराकारा विपुला चन्द्रवर्च्चसः ॥
सप्तविंशप्रमाणेन सुखमश्वस्य ग्रस्यते ।
कर्णौ षड्ङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सम्पाद्याः स्कन्धाः सम्यक् प्रकीर्त्तिताः ।
एकविंशप्रमाणेन सप्तविंशा तथा कटी ॥
अतिरूक्ष्मा तथा निम्ना पुच्छं हस्तद्वयायतम् ।
लिङ्गं हस्तप्रमाणञ्च तथाण्डौ चतुरङ्गुलौ ॥
मार्गस्थानं चतुर्व्विंशं हृदयं षोड्ग्राङ्गुलम् ।
कटिकाण्डान्तरश्रोणी चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुल उत्सेधो देघ्येण द्व्यधिकं शतम् ।
एवं क्रमेण गात्रस्य प्रमाणं वाजिनां मतम् ॥

दीर्घाणि चत्वारि तथोन्नतानि
चत्वारि रक्तानि च सूक्ष्मकाणि ।
ह्रस्वानि चत्वार्यथ चायतानि
भूयश्च चत्वार्यथ गम्भकानि ॥

द्वात्रिंशत् क्रमशोऽप्याहुर्ल्लक्षणानि मुनीश्वराः ।
तान्यहं कीर्त्तयिष्यामि वाजिनाञ्च पृथक् पृथक् ॥

आस्यं भुजौ केशलकाटिकाश्च
दीर्घं चतुष्कं तुरगस्य ग्रस्तम् ।
तथोन्नते ग्राक्षपुटे ललाटे
मुखाश्च तज्ज्ञासरणौ वदन्ति ॥
ओष्ठौ च जिह्वाश्यथ तालुकश्च
मेढ्रं तुरङ्गं शुभदं हयस्य ।
लघूनि वन्याक्षरणेषु कोष्ठं
श्रोत्राणि सर्व्वाणि तथैव पुच्छम् ॥
कर्णान्तरं कर्णसमन्वितञ्च
वंशं तथा दृक्षतरं प्रशस्तम् ।
वक्त्रं सुखं कन्धराजानुनी च
पार्श्वञ्च सप्तेः शुभदं प्रदिष्टम् ॥
कक्षान्तरं चोदरमध्यमञ्च
निम्ना कटी तानि समानुकानि ।
वक्षःग्रफोरूजघनस्थलञ्च
चतुष्कमेतत् पृथुलं प्रदिष्टम् ॥

इति श्रीनकुलकृते ऽश्वचिकित्सिते सर्व्वावयव-प्रमाणो नाम षष्ठोऽध्यायः ॥

अथ वेगः ।

गुणानामिह सर्व्वेषां गुणो वेगमयोऽधिकः ।
अश्वानां ग्रस्यते तज्ज्ञैरश्वग्रागविचक्षणैः ॥
संवाहनविधानेन प्रकाशं यान्त्यसंशयम् ।
तस्मात् सर्व्वप्रयत्नेन वेगो ज्ञेयश्च वाजिनाम् ॥
अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः ।
अश्वानां वाहनं पथ्यं सातुरागञ्च मोचयम् ॥
अधमा मध्यमास्ते स्युर्मध्यमाश्च तथोत्तमाः ।
उत्तमाश्चोत्तमा भूयो वाह्यमानास्तुरङ्गमाः ॥
रूपमश्वविदां श्रेष्ठं रूपे सर्व्वं प्रतिष्ठितम् ।
रूपेण तु विहीनस्य लक्षणं चाप्यलक्षणम् ॥
रूपावर्त्तगतिच्छायासत्ववर्ण्यवयोबलम् ।
जवहीनस्य वाहस्य सर्व्वमेव निरर्थकम् ॥
गतेर्धैर्य्यतरो वर्णो वर्णाद्धैर्य्यतरः स्वरः ।
स्वराद्धैर्य्यतरं सत्वं सर्व्वं सत्वे प्रतिष्ठितम् ॥
लङ्घनं माल्लदोषेण पिल्लदोषेण ताडनम् ।
दौर्ब्बल्यं स्वामिदोषेण खलदोषो नास्ति वाजिनाम् ॥

जवो हि सप्तेः प्रथमं विभूषणं
जपाङ्गनायाः क्षमता तपस्विनः ।
द्विजस्य वेदोऽथ सुनेरपि क्षमा
पराक्रमः ग्रस्त्रबलोपजीविनः ॥

आकर्षन्निव गां खमन्निव खुरौ पर्य्याङ्गसद्यन्निव
क्रीकुर्व्वन्निव खं पिबन्निव दिशो वायुं समन्वन्निव ।
साङ्गारप्रकरान् सृजन्निव महीं छायाममर्षन्निव
चक्षुश्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥
अलक्षितगलागतैर्न्नगड्ग्रां कटाक्षैरिव
क्षणानुनयग्रीतलैः प्रलयकेलिकोपैरिव ।
सुवृत्तमसृणोत्तरैर्न्नगड्ग्रासुरोजैरिव
त्वदीयतुरगैरलं धरणिचक्रमाक्रम्यते ॥
येषां दीपशिखोपमानि नयनान्युद्भावितः सन्निव
ग्रीवा क्रौञ्चनिभा विभाति च समा पादाश्च सुश्लोपमाः ॥
वेगो वायुरिवाथ वाग्रवसमः स्वाङ्गारसम्प्रेङ्खितं
गृध्रक्रौञ्चगणेन्द्रदुन्दुभिघनस्वानैर्भवुच्यस्वनः ॥
वक्त्रे यो हरिताधिपप्रतिनिभो ग्रीवोपमो बाहुभिः
आवर्त्तैश्चशुभैः प्रधानकुलजाः सुस्निग्धवर्ण्यप्रभाः ।
उद्ग्राचाः प्रियदर्ग्गनाश्च सुभगाः ग्रासैः सुगन्धैश्च ये

धन्यास्ते जयराज्यवित्तसुखदाः संवाहका भूपतेः ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वेगवर्णनो-नाम सप्तमोऽध्यायः ॥

अथ आरोहणम् ।

अथातः संप्रवक्ष्यामि हयारोहणसुत्तमम् ।
येन विज्ञानमात्रेण रेवन्तेनोपमीयते ॥
चलकिसलयपादः कर्णमध्येकदृष्टेः
न चलति कटिदेशे आसने संस्थितश्च ।
हयहृदयगतिज्ञः स्थानदक्षोऽवधानी
स खलु तुरगयोक्ता मान्यते पार्थिवेन्द्रैः ॥
यो नित्यं दृढसुश्लिष्टललघुकः क्रोधानलैर्वर्जितः
सत्त्वैकस्थिरबुद्धिमध्यमतनुः प्राज्ञस्यतत्त्वज्ञकः ।
काले दक्षनिपातविश्रमयुतः ताम्बूलवक्त्रान्वितः
त्वेवं लक्षणसंयुतो हयरहो राज्याधिपैः पूज्यते ॥
ऊरू स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च ।
स वाजिवाहः कथितः पृथिव्यां
श्रेष्ठा नरा भारवहा हयानाम् ॥
प्राज्ञः सत्त्वबलोत्साही दृढः सर्व्वाङ्गसौष्ठवः ।
जितशीतातपक्लेशो जितायासो जितासनः ॥
हयकालबलप्राज्ञजवकाभाध्वयोगवित् ।
श्रान्तोपचारसारज्ञो रणक्रीडासु दीक्षितः ॥
वाजिनां हृदयज्ञश्च स्थाने दक्षनिपातवित् ।
दुष्टाश्वदमने दक्षः सर्व्वक्लेशसहः शुचिः ॥
यासौषधान्नपानीये परत्यूहावलोकने ।
त्रिषु श्रेष्ठः प्रवेशे च निर्गमे कुशलोऽश्ववित् ॥
रोगं विकुरुते यच्च दृष्ट्वा बाधाविचारवित् ।
धनुःकुन्तासिशक्तिज्ञः सोऽश्ववाहः प्रकीर्त्तितः ॥
वक्त्रे स्कन्धे सुखे कोष्ठे गात्रे सक्थौ च ताड़येत् ।
उन्मार्गो यदि भ्रष्टोऽश्वो मूढ़ः स्खलति द्वेषते ॥
कुपिते पुच्छसंस्थाने भ्रान्ते जानुहये तथा ।
सर्व्वथा प्राप्तदक्षस्य दक्षमेकं निपातयेत् ॥
द्वेषणे स्कन्धसुद्दिष्टं स्खलिते जघनान्तरम् ।
भीते वक्षःस्थलं हन्याद्वक्रोन्मार्गगामिनम् ॥
अस्थाने ताड़ितो वाजी बहून् दोषान् प्रदर्शयेत् ।
तावद्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥
दक्षेनाभिभवेद्वाहान्नारोहेद्दक्षवर्जितान् ।
दक्षो हि साधनं तीव्रं पदं दक्षात् प्रजायते ॥
तुलावदुद्धृता वल्गा नात्युच्चा नातिलम्बिता ।
दोषं दृष्ट्वा तु कर्त्तव्या तिर्य्यगाकुंचिता शनैः ॥
कटिं सन्धिं च शैथिल्याद्वहमानस्य ताड़येत् ।
सद्यः प्रस्खलिते गात्रं तत्र दक्षं प्रदापयेत् ॥
अकालदक्षपाताच्च त्वकालग्रहमोक्षणात् ।
अकालहिंसावाताच्च तेन वाजी न धावति ॥
त्रासनं शिथिलं यस्य स्वरो यस्य न भीषणः ।
लघुप्रहारदाता च वाजी तस्य न धावति ॥
सर्व्वलक्षणसम्पन्नः सर्व्वदोषविवर्जितः ।
कुलशीलबलोपेतः कथमश्वो न धावति ॥
गतिरेका प्लुता चान्या चतुराख्या तृतीयका ।
वेगसन्धिश्चतुर्थी च धारावेगगतिस्तथा ॥
हयरागार्थवेषस्य चञ्चलस्य त्रिकोणतः ।
नित्यमुद्यतदक्षस्य तस्य वाजी न धावति ॥
धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति ।
सर्व्वकर्म्माक्षमो वाजी तस्मात्तां परिवर्जयेत् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते आरोहणं नाम अष्टमोऽध्यायः ॥

अथ ऋतुचर्य्या ।

कर्म्मचर्य्यासु नित्यानां शुद्धान्नं सुनिवर्हितम् ।
धनुरष्टादशे योज्यं वाजिनां मण्डलं क्रमात् ॥
सङ्कोचयेच्च्यं तावद् यावत् कार्मुकपञ्चकम् ।
तदूर्द्धं मण्डलैर्योज्यो गोमूत्रान्नदनन्तरम् ॥
ऋतुवृत्तानुवृत्ता च गोमत्रा सर्व्वकर्म्मसु ।
युज्यमानानि दृश्यन्ते प्रायशो हि विचक्षणैः ॥
शालिहोत्रसुनिप्रोक्ता चर्य्या षोड़श वाजिनाम् ।
तासामनुपयोगित्वान्न कृतः संग्रहो मया ॥
तीक्ष्णस्वेकेन सुदितो द्वाभ्यां भद्रस्तु धावति ।
त्रिभिर्दक्षैस्तदा मन्दः क्रमात् षड़ाभिताड़नैः ॥
तीक्ष्णाश्वभद्रमन्दानां प्रधानो जव उच्यते ।
सोऽप्यनेनैव मार्गेण संविभज्यो विजानता ॥
अवाहिता विनश्यन्ति सर्व्वकर्म्माक्षमा हयाः ।
क्षुधा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥
बलं कालो वयो भूमिः कालः सत्त्वमतः क्रमात् ।
कुर्य्यादेकान्तरे योगञ्चातियोगो हि दोषवान् ॥
तच्च लोकप्रसिद्धं हि बोद्धव्यं यत्नतो बुधैः ।
हयवाहनवेज्ञानी नरेन्द्रैः पूज्यते सदा ॥
धावितं ये गुणाः सप्तैर्वल्गमाणान्निबोध तान् ।
शालिहोत्रादिशास्त्राणां व्यायामफलसम्भवान् ॥
स्थिरमांसो भारसहो लघुगात्रः पराक्रमी ।
दीप्तामिव सुशीलत्वं व्यायामेनोपजायते ॥
सत्यार्थो विनयी प्रीतो निर्द्वेषस्तापवर्जितः ।
वेदवित्सादिचित्तज्ञ उक्तो धावति तिष्ठति ॥
सुभावर्त्तगतिच्छायाबलशीलसमन्वितम् ।
गत्यवर्णस्वरोत्कण्ठसारपुष्टविभूषितम् ॥
एवं विधं समारुह्य देवतांशं हयं नृपः ।
जित्वा रिपुकुलं भुंक्ते निःशङ्कोऽथ वसुन्धराम् ॥
जवः श्रेष्ठस्तुरङ्गानामुत्तमाधममध्यमः ।
त्रिविधोऽपि तथा भिन्नो जवभेदः स उच्यते ॥
यवोदरैरष्टसङ्ख्यैरङ्गुलं परिकीर्त्तितम् ।
हस्तश्च तैश्चतुर्विंशैः कार्मुकं तैश्चतुर्गुणैः ॥
अक्षौहिणीभेषणे काष्ठा अश्वलक्षणं तथा ।
मात्रा ज्ञेया प्रमाणेन पूर्व्वप्रोक्ता तपोधनैः ॥
मात्राधोड़शकेनाश्वो यो धावति धनुःशतम् ।
तमश्वसत्तमं विद्याद्वायुवेगं महाजवम् ॥
यथोत्तमजवा वाहास्तथाश्वा मध्यमाधमाः ।
चतुरख्याधिका वृद्धिं मात्राणां लक्षणं बुधाः ॥
नभस्यश्वयुजे मासि भाराध्वानं जवं त्यजेत् ।
वह्न्यग्निसदृशं पित्तं श्रमात् कुप्यति वाजिनाम् ।
कार्य्यैरेव महान् किञ्चिद् युज्यो नभसि कार्त्तिके ॥
हेमन्ते शिशिरे योगं वसन्ते च यथेच्छया ।
शैत्यक्षयात् शनैर्गात्रं न शीघ्रे वाहयेद्धयम् ।
बालो वृद्धः क्षुधो रोगी दग्धस्नेहो महाबली ॥
पूर्णातिरिक्तकोष्ठश्च गुर्व्विणीं न च वाहयेत् ।
समां च विपुलाश्चैव किञ्चित्-पांशुसमन्विताम् ॥
एकान्ते विजने चैव रङ्गभूमिं हयं नयेत् ।
सान्द्रश्चैव सुकठिनां पाषाणोदकवर्ज्जिताम् ॥
तृणकाष्ठसमायुक्तां रङ्गभूमिं विवर्ज्जयेत् ।
विगूढं कारयेदश्वं क्रोशक्रोशद्वयान्तरे ॥
वारि दद्याद् यथाकामं घासं सुस्निग्ध चारयेत्
अन्यथा दोषजातानि वक्ष्याम्येतानि तावतः ॥
गुरुविसब्यगात्रश्च क्षिप्तश्वासी च कम्पते ।
दुर्म्मना रुद्धविण्मूत्रः सर्व्वकर्म्माक्षमो हयः ॥
गूढमेढ्रोन्नतग्रीवो रक्तमेही गुरुक्लमः ।
क्षुत्तृष्णार्तश्शुष्कास्यश्छायां प्राप्य वितिष्ठति ॥
तर्जनैर्हन्यमानोऽपि विधुनोति शिरः परम् ।
सुदुर्विनमते दृष्टं पदमेकं न गच्छति ॥
भाराध्वानपरिश्रान्तं श्रमैः संक्रामयेत् पथि ।
नावतारितपर्य्याणं मार्गेऽध्वानसमागतम् ॥
सुस्नपुच्छाग्रवन्यस्त खलीनं नावतारयेत् ।
मर्द्दयित्वास्य गात्राणि पांशुमध्ये विवर्त्तयेत् ॥
स्नानपानावगाहस्य प्रतिपानं सभोजनम् ।
सर्व्वं क्रमेण कर्त्तव्यमन्यथा दोषसम्भवः ॥
रक्तपित्तसमीरोत्थमन्यास्त्रोदरादयः ।
हृद्रोगा वातशूलानि शीतोष्णोदकपानतः ॥
रक्तपित्तहरं देयं प्रतिपानं गुड़ौदनम् ।
रक्तपित्तसमीरोत्थं दातव्यं शर्करोदकम् ॥
जीवनं वातपित्तघ्नं हृद्यं बल्यतमं ततः ।
सर्व्वरोगहरोऽश्वानां मधु जाङ्गलको रसः ॥
स्वच्छात्तच्च घृतं क्षीरं वारियुक्तं तुरङ्गमः ।
पीत्वा हि निर्हरेद्दोषान् श्रमभाराध्वसंश्रवान् ॥
धर्म्मार्थकामा विजयो यशःश्री-
प्रीतिसुखं ज्ञातिजनेश्च पूज्या ।
रणे निमित्तानि शुभावहानि
नृपस्य चैवं विनिवेदयन्ति ॥
प्रत्यूषकाले च दिनं निरीक्ष्य
वह्निं द्विजं पूर्णघटं कुमारीम् ।
छत्रं ध्वजं चामरदर्पणञ्च
रूपञ्च दृष्ट्वा तुरगं जयाय ॥
श्रुत्वा तु शब्दाम्युदवेदवाक्यं
पुण्याहमाङ्गल्यशिवस्य गीतम् ।
हर्षं निमित्तं भवति स्वनेन
ध्रुवं जयं तत्र रणे नराणाम् ॥
सन्त्याड्घ्रिघातेन महीं निहन्ति
हृष्यन्ति ये स्वामिसुखं निरीक्ष्य ।
प्रदक्षिणावर्त्तविकीर्णपुच्छा
जयावहास्ते समरे नृपाणाम् ॥
विच्छिन्नदीनस्वरगद्गदा ये
अश्रुस्रुता भिन्नपुरीषमूत्राः ।
अनल्पमाना दिनकृन्निरीक्ष्याः
पराजयं ते कथयन्ति युद्धे ॥
अन्यापदं याच्च वदन्ति दीना
सशेतरं चक्रविकीर्णपुच्छाः ।
युग्यासनादीन् परिवर्जयन्ते
पराजयं ते कथयन्ति भर्त्तुः ॥
विना निमित्तं रसयन्त्यभीक्ष्णं
आकुञ्चिता व्यापितमक्षिकाक्षाः ।

ध्यायन्ति घातेच्छ न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम् ॥
श्लोकं श्लीलं भयं लज्जामालस्यं चैवमादिशु ।
सुकुलं तं विजानीयादलं पर्य्याणवारणे ॥
स्थाणुकण्टकवृक्षेच्छ सुधाखदिरकण्टकैः ।
स्वामिघाताय चादत्ते तेषां रूपमिदं शृणु ॥
वानरोलूकमार्जारतरक्षुगर्दभलोचनाः ।
गतिर्वा व्यसरैस्तुल्या स्थूलमेढ्रशिरान्विताः ॥
लम्बौष्ठकर्णनासाच्छ क्रुतघ्नहीनाधिकद्विजाः ।
विच्छिन्नप्रोथगर्दा ये भ्रुकुटीचित्रमेहनाः ॥
एते दोषास्तथान्येऽपि सुकुलाश्वसमुद्भवाः ।
खलानामिह राजेन्द्र! वक्तुं शक्या न मादृशैः ॥
लक्ष्यं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्ष्यलक्षणमेतेषां तेनेदं दुष्करं विदुः ॥
अश्वाग्निरतिसंक्षेपादतिव्याप्तिच्च विस्तरात् ।
मुनीनामेकवाक्यत्वाद् ब्रूयामः स्थितिदुष्करा: ॥
सत्ववर्णगतिछायास्वरस्थानगतिः कृशम् ।
पुच्छं पुष्टकनामानि दोषं वा जवलक्षणम् ॥
एवं लक्षणसंयुक्तं दृश्यते शूररक्षणे ।
लक्षणेन विहीना ये निर्दोषाःस्युः प्रधाविताः ॥
हयरोहस्य का चिन्ता लक्षणैः सुभनिन्दितैः ।
तेनाच न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥
हयवाहनविज्ञानं कौतुकाहितबुद्धयः ।
अनायासेन गच्छन्ति परं क्षुद्रा इमे जनाः ॥
चलासनं कषा रागाः प्राणिघातप्रतोदनम् ।
पदप्रघातसंज्ञानि दोषो यैरुपजायते ॥
कामात् कोपाद्भयान्मोहाद्दर्पाच्चैव मदाश्रयात् ।
पर्य्याणारोहदोषाच्च दुष्यन्तेऽश्वा निसर्गतः ॥

श्रीयुक्तसामन्तनरेन्द्रवन्दितं
रणे हयारोहवराभिनन्दितम् ।
धर्मार्थकामादियशःप्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः संप्रवक्ष्यामि धातूनां लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
ततः शुद्धशरीरोऽत्यरक्तदोषानवाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राप्नोत्येव महाभयान् ।
तस्मात् सर्व्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः ।
आषाढ़समये प्राप्ते शिरामोक्षेण कृतक्षणः ॥
तेन संशोधयेत् रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽथ पिण्डाद्यैश्च बलीकृतः ॥
स्नायुमे शुष्यमासाद्य वज्रवत् सुदृढ़ो भवेत् ।
यदि रक्ताधिको वाजी श्लेष्मलमश्नाति कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकश्वासपुटः स्नेहाद्यैः श्लेष्मलमत्ति चेत् ॥
संप्राप्य श्लेष्मरिपुत्वाद्यो नाशमवाप्नुयात् ।
हीनरक्तो यदा श्लेष्मं रूक्षोऽश्नाति तुरङ्गमः ॥
तदा वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तस्मेदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्व्वेषां ज्ञेयचिह्नं विचक्षणैः ।
पित्तरक्तप्रकोपेण यदा संपीड्यते हयः ॥
तदा कण्डूतिमासाद्य कषते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥
सुदुर्वाञ्छति पानीयमाहारच्च विशेषतः ।
एवं वातोत्थरक्तेन ज्ञात्वाश्वमीड़ितं ततः ॥
शिरामोक्षं विधायैव दद्यात् सकटुकं गुड़म् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥
पित्ताश्रगदूषितो वाजी यदि चाश्रूणि सृजति ।
नेत्रान्ते पाण्डुरत्वच्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥
अधोवक्त्रो भवेन्नित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्साहं कुरुते क्वचित्॥
न विन्दति कण्डूघातं न च पार्श्वे न चासनम् ।
नासाग्रेण त्रिपेत्तोयं वह्निर्घर्म्मेच्छ वाञ्छति ॥
तस्यापि प्रोथयित्वाश्रग् दद्याच्छुण्ठ्या युतं गुड़म् ।
सर्व्वं रक्तं ततः शुद्धा निःश्लेष्मं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य सदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकण्डूस्तस्य तथोदरे ॥
तदा मृत्युमवाप्नोति षण्मासाभ्यन्तरे ध्रुवम् ॥

शुण्ठ्याढ्यता गोक्षुरक घनच्च
श्यामावचाहिङ्गुयुता च यष्टिः ।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धच्च कफापहच्च ॥

नोचेदश्नाति शुण्ठ्याढ्यं सैन्धवं नस्यमार्गतः ।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः ॥
कुक्षिह्रदये हयस्तीव्रं मुहुः श्वासं प्रमुञ्चति ।
नैकत्र मन्यते स्थातुं क्षिपते च निरर्गलम् ।
एवं वातोद्भवं ज्ञात्वा रक्तन्दद्यै हयस्य च ॥
प्रोथयित्वाथ सन्दद्यान्महाशृतमनल्पकम् ।
ततः शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति ॥
उत्साहं कुरुते मार्गे सर्व्वदोषविवर्जितः ।
वातरक्तप्रकोपेण लोचनान्ते हयस्य च ॥
यदा स्यातां सिते रक्ते काश्यः कण्डूस्तथानने ।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम् ॥
अश्मकञ्च युतन्दद्या माहिषेण निशागमे ।
सन्निपातेऽथ रक्तेन यदा सम्पीड्यते हयः ॥
यदा वेपथुमाप्नोति कासते च निरर्गलम् ।
निद्रालस्याग्निमन्दत्वं वस्तौ मलनिबन्धनम् ॥
कर्णयोः पातनञ्चैव वक्त्राल्लालाविमोक्षणम् ।
तत्रापि प्रोथयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्णाशं स्तोकोदकक्रियाशनः ।
क्वचिद्दुर्वां क्वचिच्छीतं क्वचिद्भेषजसंयुतम् ॥
प्रदेयं युक्तितत्त्वज्ञैर्वारि वार्य्यं न कुत्रचित् ।
सपथ्या चाम्लता चैव कटुका च वचा तथा ॥
शमयेत्तत्क्षणादेव त्रिधातुकुपितं ज्वरम् ।
शिरीषं श्रीफलञ्चैव वेतसञ्चैव वृद्धिभाक् ॥
मन्दाग्नित्वं सदोषाणां करुते भक्षसादृढतम् ।
मधुकं मधुजालञ्च माधुर्य्यं कुलिकान्वितम् ॥
शिरीषं क्षुद्रकं लाक्षां क्वाथयित्वा त्रिभागतः ।
यस्यैतत् सन्निपाताय वाजिनः संप्रदीयते ॥
तस्य तन्नाशमायाति तमः सूर्य्योदये यथा ।
स्वस्थस्यापि हि नेत्रान्ते स्यातां नीले च वाजिनः॥
गन्धश्च सदृशः स्त्रीणां तदा मृत्युर्द्विमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित् ।
स निर्व्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम्॥
जिह्वायां जायते बिन्दुरकस्माद् यस्य वाजिनः ।
क्रुच्छ्रेच्छ जीवते मासं स वाजी नाच संशयः ॥
पीतो मासद्वयेनैव सन्निर्द्देशं प्रयच्छति ।
त्रिभिर्मासैस्थाररक्तश्चतुर्भिश्च विचिन्तितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्व्यञ्जसमाकृतिः ।
सप्तभिः पाटलाकारश्चन्यकाभस्तथाष्टभिः ॥
नवभिश्च हरिद्राभो दशभिर्जन्तुकोपमः ।
एकादशभिर्धूम्राभो वत्सरेण हिमद्युतिः ॥
यस्य श्वासो भवेदुग्रः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
ग्रीवाग्रे पिड़िका यस्य जायते च तथाधरे ।
स्रुवं करोति रक्ताढ्यं मासषट्कं स जीवति ॥
वर्णः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ॥
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभे स्यातां नेत्रे वातार्दितस्य तु ।
मासत्रयञ्च क्रुच्छ्रेण यः सप्तिः स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्तार्दितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तर्भवेन्मृत्युः सप्तरात्रादसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥
यस्य पित्तप्रसक्तस्य काले नीरदवर्जिते ।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥
एवं रक्तविकाराणां ज्ञात्वा धातुं तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा॥
भयादपीतपानीयग्रहीतविश्रीयुतस्य च ।
आर्त्तोऽपि ताड़ितोऽत्यर्थं तिर्य्यग्विद्धो यदापि वा॥
श्रमाद्धराच्च बन्धाद्वा गात्रे वा विषमस्थिते ।
क्षीणशोणितमांसस्य शिरावेधः प्रशस्यते ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वासप्ततिसहस्राणि नाड़ीनां हि भवन्ति च ।
वाजिनामिह सर्व्वेषां वायुरक्तं व्यवस्थितम् ॥
तासां निर्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
यैर्याति कुत्सितं रक्तं सर्व्वदोषसमुद्भवम् ॥
कण्ठे वक्षसि तालौ च नाभयोश्च मुखे तथा ।
अक्षयोरथ पादेषु पादयोरुभयोरपि ॥
कालं बलञ्च विज्ञाय वाजिनां भिषगुत्तमः ।
शिरामोक्षं प्रकुर्वीत स्थानेष्वेतेषु पण्डितः ॥
अन्ये सप्तदश प्राहुः शिराद्वाराणि वाजिनः ।
विकारयुक्तं यद्रक्तं सुखरूपमपि वर्जयेत् ॥
एवं शरदि यः सम्यक् पुष्टिं नयति वाजिनाम् ।

तस्य यद्वाञ्छितं किञ्चिद्दृयानार्थं तच्च सिध्यति ॥
ततो हैमन्तमासाद्य निवातं निबधेद्वयम् ।
मासोत्थं यवसन्दद्यात् पानीयञ्च यथेच्छया ॥
घृतं वा यदि वा तैलं पाने दद्याद्विचक्षणः ।
वाहयेच्च शनैर्नित्यं सर्व्वदोषप्रशान्तये ॥
ततः शिशिरमासाद्य दद्यात्तैलं हि वाजिनाम् ।
पलार्द्धकप्रमाणेन यावद्दिनत्रिसप्तकम् ॥
यवोत्थं यवसन्दद्यादेकविंशत्यहानि च ।
यवाभावेऽथ चणकान् दद्यादार्द्रतरान् सदा ॥
तदभावे मसूरांश्च शुष्कार्द्रांस्तैलसंयुतान् ।
यवसं चापि तद्देयं नीरोगो जायते हयः ॥
औषधानाञ्च सर्व्वेषां काथानां नस्यकर्म्मणाम् ।
तैलानाञ्च घृतानाञ्च यवसं यवसं परम् ॥
पर्व्वतानां यथा मेरुरायुधानाञ्च वज्रकम् ।
तथा सर्व्वोपचाराणां संप्रेः श्रेष्ठतमा यवाः ॥
देवतानां यथा विष्णुर्ब्रह्मा वेदविदां वरः ।
नदीनाञ्च यथा गङ्गा तथा श्रेष्ठा यवा हये ॥
यथोदितः सहस्रांशुर्नभसि तिमिरं जयेत् ।
तथा शरीरजान् दोषान् यवाः सप्तेर्हरन्ति च ॥
उपचारक्रियाः सर्व्वाः पञ्चर्त्तुजनिता हये ।
कृताः स्युर्यवभोज्येन सप्तेस्तस्य कृता नरैः ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृतापि कृता सर्व्वा पञ्चर्त्तुजनिता हये ॥
कृताः स्युर्यवभोज्येन सप्तेस्तस्य कृता नरैः ।
नीरोगास्तुरगाः सर्व्वे शालिहोत्रमतं यथा ॥
पञ्चर्त्तुजनिता वाथ क्रिया न्यस्ता तुरङ्गमे ।
अतीतास्ते विज्ञानीयाद्यवभोज्यविवर्जिताः ॥
एवं रक्तविशुद्धानां ज्ञात्वा यत्नेन वाजिनाम् ।
दद्याद्गोधूमसंयुक्तां सतैलां च हरीतकीम् ॥
दिनं त्रिसप्तकं यावत् पलपञ्चप्रमाणतः ।
ततः शुद्धिमवाप्नोति निःशेषाद्धिरोद्गमात् ॥
ततो नवतृणाहारं संप्राप्य मृगनोहरम् ।
परां पुष्टिमवाप्नोति नीरोगश्च प्रजायते ॥
न प्रायो वाहयेदश्वं प्रावृट्काले कथञ्चन ।
य इच्छेद्वाजिनस्तस्य वाहनं दशमासिकम् ॥
कूपोदकं सदा ग्रस्तं पानाय जलदागमे ।
अभ्यङ्गः कटुतैलेन निर्वातस्थानबन्धनम् ॥
एकाहान्तरितं दद्याल्लवणञ्च विचक्षणः ।
पलद्वयप्रमाणेन सुखवायपरिगुप्तये ॥
सुखरोगमवाप्नोति चारस्वादविवर्जितः ।
दृष्ट्वाभीभिस्तु सिक्ताङ्गस्तेजसा त्यज्यते हयः ॥
अशुद्धोदकजान् प्राप्तान् प्राप्नोति ग्रसतः परान् ।
नवोदकप्रधानेन बलहीनश्च जायते ।
तस्मात् सर्व्वप्रयत्नेन प्रावृट्काल उपस्थिते ।
अनेन विधिना प्राज्ञो वाजिनः परिपोषयेत् ॥
ततः शरदमासाद्य बहुखड्गसमन्वितम् ।
ग्रस्तं चारोदनं सप्तपलाद्यपरिसंख्यया ॥
दुग्धं वा केवलं रात्रौ क्षपितं संप्रशस्यते ।
तथान्यदपि यत्किञ्चिन्मधुरं संप्रजायते ॥
पानाय सारसं तोयं यवसं सुमनोहरम् ।
नीलवर्षभुकूष्माण्ड घृतं प्राशेन संयुतम् ॥
वाहनं च प्रयत्नेन सुखस्थमपि वर्जयेत् ॥

परीक्षायौ यथा देव्याः स्नेहस्य च प्रतिक्रिया ।
हयकौवस्य तद्वच्च परीक्षा यवभक्षणे ॥
यथा सांयात्रिकः पारं गत्वोर्व्वैः स्वस्थतां व्रजेत् ।
तद्वत् यवाशनोत्तीर्णाः शुद्धदेहा हयोत्तमाः ॥
अल्पेनापि हि छिद्रेण यथा नश्यति नौर्जले ।
स्वल्पेनापि हि दोषेण यवदोषास्तथैव च ॥
एवं ज्ञात्वा विदग्धेन यवा देयाः प्रयत्नतः ।
प्राप्तचीरा विशेषेण शिशिरे समुपस्थिते ॥
शुष्का वापि यवा देयाः सर्व्वकालं च वाजिनाम् ।
प्राणदास्ते ततो ज्ञेयाः सर्व्वव्याधिविनाशनाः ॥
यश्चाश्नाति यवानाशु शुष्कांश्च स्वेच्छया सदा ।
न तस्य जायते रोगः कदाचिच्च यवाशभाक् ॥
न च शूलं न च श्वासो न च क्षीहा न च क्रमः ।
न च रक्तप्रकोपश्च न च वातादिधातवः ॥
योग्योऽग्नार्थं वाहानां प्रधानो यव इष्यते ।
यवाभावेऽथ चणका धान्यमन्यतमं परम् ॥
यवाभावेऽथवा दद्यान्मुकुष्टांस्तैलसंयुतान् ।
भोजने तुरगेन्द्राणां परां पुष्टिमभीप्सताम् ॥
सुकृष्टभोजनाद्वाजी पुष्टिं गच्छत्यलौकिकीम् ।
उत्साहं परमं धत्ते स च रोगैर्विमुच्यते ॥
अप्राप्तौ च सुकृष्टानां मुद्गा देया मनीषिभिः ।
सतैलास्तेऽपि कुर्व्वन्ति पुष्टिं सत्त्वविवर्द्धनीम् ॥
एते पुष्टिगुणाः प्रोक्ताश्चणकाहारजा हये ।
नान्यस्तत्सादृशभावेन सर्व्वेषां तान् विनिर्द्दिशेत् ॥
नान्यद्धितं प्रशंसन्ति पञ्चमं वाजिनां बुधाः ।
भक्षणार्थं यतस्तस्य दानोल्लङ्घनमुत्तमम् ॥
अन्नाभावे प्रदातव्यं घृतं वा यदि वा पयः ।
ग्रस्यं वा मांसमेवाथ पुष्टार्थं वाजिनां सदा ॥
यस्याश्वः ग्रस्यमश्नाति सदा लवणमिश्रितम् ।
किं तस्य ग्रस्यदानेन यथाभूतेन भूपतेः ॥
ग्रस्याभावेऽथ यवसं शुष्कं वा यस्य वाजिनः ।
दिवानिशमरण्ये च स्वेच्छया संविमुञ्चिकाः ॥
ते चापि वाजिनो ज्ञेया यथा ग्रस्यचरास्तथा ।
तथा सर्व्वप्रयत्नेन मुक्तान् सञ्चारयेद् वने ॥
आरोग्यार्थं सुपुष्ट्यर्थं सुतसाहार्थं विशेषतः ।
वित्तव्ययस्य रक्षार्थं हरेद्रोगं प्रयत्नतः ॥
वसन्तसमये प्राप्ते वाहयेत् सततं हयम् ।
सनिम्बं लवणं दद्यात्ताभ्यां तैलं विशेषतः ॥
सर्व्वत्र सम्भवे भोज्यं तैलं वा यदि वा घृतम् ।
न दोषकारणं प्रोक्तं सञ्चारं लवणान्नतः ॥
वसन्तसमये योग्यः स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्येत बालस्यं जायते वपुः ॥
ततो मन्दाग्निनाविष्टो रोगाभावे प्रजायते ।
तस्मात् सर्व्वप्रयत्नेन वसन्ते वाहयेद्वयम् ॥
ग्रीष्मकाले च संप्राप्ते दूर्व्वाभोज्यं प्रशस्यते ।
वाजिनामिह सर्व्वेषां घर्म्मतापोपशान्तये ॥
घृतपानं विशेषेण सुच्छायासु निबन्धनम् ।
रक्तस्रावे च गात्रेषु यासं वा घृतसंयुतम् ॥
दूर्व्वाभावे प्रदातव्यं तुरगाय घृतान्वितम् ।
क्षुत्तकाग्रस्यमध्यांश्च सर्व्वदोषोपशान्तये ॥
एवं स्वस्थमयं सम्यगुपचारं करोति यः ।
हयस्य तु गृहे नित्यं तस्य वर्द्धन्ति वाजिनः ॥

नीरोगाः पुष्टिसंयुक्ताः प्रकृत्योत्साहसंयुताः ।
तर्पिता भूमिपैरश्वा भूमिमार्गक्रियाक्षमाः ॥

इति श्रीनकुलशतेश्वचिकितसिते कृतुपर्य्यायाध्याय एकादशः ॥

अथ नस्यः ।

कासश्वाससमो नस्यो वातपित्तकफोद्भवः ।
नस्यः संनाशयेत्तस्मात्तं नस्यं योजयेद्धये ॥
पिप्पली सैन्धवं सारं नागरञ्च गुडान्वितम् ।
क्षत्तिकासारमध्याग्र्यं वाजिनां श्रेष्मनाशनम् ॥
चूलिकालवणं नस्ये सदा रोगविनाशनम् ।
सिता चन्दनतोयानि सात्कुकाख्यानि वाजिनाम् ।
नस्यकर्म्माणि युक्तानि नाड़ीवातप्रशान्तये ।
रुद्रुकैरार्द्रकं सान्द्रं वचाचारविमिश्रितम् ॥
नस्ये दत्तं वातशान्त्यै हयरोगविनाशनम् ।
शर्करां माक्षिकं सैरं पटोलं पलसंयुतम् ॥
नस्ये शरदि सप्तीनां जायते रोगशान्तये ।
वचा चोशीरकं कुष्ठं सुखी च कासमर्द्दिका ॥
युक्तं घृतोदके स्तोके तैर्यां नस्येऽपसर्पयेत् ।
गुड़ूची कौसुदी ताली मिश्रिता कूपवारिणा ॥
नस्ये दत्ता वराश्वानां शिशिरे सुखदा स्मृता ।
व्यपामार्गे महानस्यं सर्व्वरोगविनाशनम् ॥
केवलं कटुतैलं वा गोमूत्रे पाचितञ्च यत् ।
मैथुनादिक्लमघ्नीनां स्रोतोबलकरं विदुः ॥
कण्ठरोगे तथा नस्यं गोमूत्रलवणान्वितम् ।
महद्गुणकरं प्रोक्तं सर्व्वदोषनिवारणम् ॥
व्यपामार्गस्य मूलेन नस्ये मूत्रञ्च छागलम् ।
सुखरोगविनाशाय नस्यं मत्स्यवसोद्भवम् ॥
लशुनं पिप्पलीमूलं गण्डकी नागकेशरम् ।
दत्तं नस्येन रोगघ्नं कटुतैलेन वाजिनाम् ॥
नस्यं पर्य्युषितस्नेहैः प्रातर्दत्तं तु केवलैः ।
अश्वानाञ्च नराणाञ्च चाक्षुष्यं बलवर्द्धनम् ॥
पिप्पलीमिश्रतोयेन सशितासलिलेन च ।
नस्यं यच्छति सप्तीनां सर्पिषा यच्छते बलम् ॥
नस्यं स्निग्धं तथा रूक्षं तिक्तञ्च मधुरं तथा ।
चतुर्द्धा वाजिशास्त्रज्ञैर्यथावत्परिकीर्त्तितम् ॥
देयं वाताधिके स्निग्धं रूक्षं तिक्तं कफाधिके ।
मधुरं चैव पित्ताढ्ये तुरङ्गे समयोचितम् ॥
द्विपञ्चाशत्पलमाषां वा श्रेष्ठं तन्नस्यमुच्यते ।
पादोनं मध्यमं तच्च षड्विंशत्या तथाधमम् ॥
नस्यान्ते वाजिनो रक्तं सदा पुष्टं प्रजायते ।
नस्यदानात् हृतं तस्य विनाशमुपगच्छति ॥
दाड़िमं पुष्करं श्रीकं श्वेतदूर्व्वाङ्कुरास्तथा ।
घृतोदकेन संयुक्तं रक्तं दुष्टं न जायते ॥
धातकी गोशुरं रोध्रं कुसुम्भं सिन्धुवारकम् ।
घृतोदकेन संयुक्तं नस्यं रक्तविनाशनम् ॥
धातकी गण्डकी चैव गोमूत्रं लवणं तथा ।
नस्ये दत्तं कफं हन्ति तमः सूर्य्योदये यथा ॥
सुखी घृतञ्च दुग्धञ्च रससारं तथैव च ।
वातदोषविनाशाय नस्यमेतत्प्रयोजयेत् ॥
माक्षिकं शर्करायुक्तं चन्दनं केशराणि च ।
नस्योऽयं वारिणा सद्यः पित्तनाशकरः परः ॥
गुड़ूची सुखी सुक्ता च तगरं सितसर्षपाः ।

सन्निपाते सपित्तेऽयं नस्यः स्याच्छीतरक्तके ॥
अभया पुत्रिणी धात्री एला लाक्षा घृतावरी ।
सन्निपातेऽनिलाधिक्ये नस्योऽयं क्षेमकारकः ॥
मरिचं पिप्पलीमूलं वचा भारङ्गिकाभया ।
सन्निपाते कफाधिक्ये नस्यं सर्षैः सुखप्रदम् ॥"

इति श्रीवकुलकृतेऽश्वचिकित्सिते नस्याधिकाराध्यायो द्वादशः ॥

अथ पिण्डः ।

"कटुका च जयन्ती च भामरी सुरसा घना: ।
पञ्चाम्लतमयः पिण्डो वाजिनामयमिष्यते ॥
एला घृतघ्नी सुरसा काकजङ्घा घृतावरी ।
माक्षिकं सक्षितं पिण्डः पित्तयुक्ते हि वाजिनि ॥
माक्षिकं सैन्धवं मुस्ता गोमूत्रञ्च हरीतकी ।
समभागेन पिण्डोऽयमुक्तो वह्निप्रदीपकः ॥
कंकोलं केतकी द्राक्षा शर्करा मधुयष्टिका ।
दत्तो घृतयुतः पिण्डः पुष्टिं नयति वाजिनः ॥
मत्स्यमांसेन संयुक्तं यावचूर्णं घृतप्लुतम् ।
बलहीनस्य वाहस्य पिण्डोऽयं बलवर्द्धनः ॥
बला मद्यं दधि क्षौद्रं भक्ष्यंस्तुरगो भवेत् ।
अतिवृद्धोऽपि कृच्छ्रोऽपि यथा षट्सप्तवार्षिकः ॥
मेथिका धातकी काली सारखी बीजपूरकः ।
पिण्डो दत्तो वराश्वानां तेजोवृद्धिकरः स्मृतः ॥
कटुका मद्यसंमिश्रा धात्री लोध्रगुडान्विता ।
दत्ता पिण्डविधानेन वाजिनां सुखवृद्धिदा ॥
त्रिफला कटुका मुस्ता विड्लानि च चित्रकम् ।
सदालस्यसमेतानां वाजिनां पिण्ड आर्त्तिजित् ॥
वचा विदलिताः स्निग्धाः सघृताः क्षारभाविताः ।
पिण्डैर्दत्ताः प्रकुर्वन्ति वाजिनां व्याधिनाशनम् ॥
सैन्धवं नागरं श्यामा गुडूची सितसर्षपाः ।
अश्ववेतसमञ्चानां पिण्डोऽयं मूलनाशनः ॥
पिप्पली पिप्पलीमूलं कटुका सहदेविका ।
दूर्वापल्लवसंमिश्रः पिण्डोऽयं क्लीवनाशकः ॥
केशरं श्रीफलं तालं माक्षिकं गिरिकर्णिका ।
पिण्डोऽयं व्रणने श्रेष्ठो वाजिनां सुगतिप्रदः ॥
वचा लोध्रं सकर्पूरं गुडा श्यामा गुडं मधु ।
समांशकेन पिण्डोऽयं करोति लघुतां हये ॥
मद्यं मरिचसंयुक्तं लशुनं नागकेशरम् ।
द्विगुणं मेषमांसञ्च पिण्डो दत्तो जयेत्क्रमम् ॥
जम्बीरं बलिनीपत्रं वचा किञ्जल्कमेव च ।
जातश्रोणितवाहानां पिण्डोऽयं रक्तनाशनः ॥
तमालं पुष्करं लोध्रमपामार्गं सतिन्दुकम् ।
पयसा पिण्डमेतद्धि वातकोपप्रशान्तनम् ॥
आरनालं प्रविश्य च पथ्या नेपालिकाफलम् ।
पिण्डे दत्ते हये दद्या निहन्यात्तु विजृम्भितम् ॥
मुद्गपूपं वचाभिश्रं तथा सर्ज्जरसान्वितम् ।
पिण्डे दत्ते निहन्यात्तु क्षमिसंघं व्रणोद्भवम् ॥
खुरीचीरं सकर्पूरं कूपोदकविभावितम् ।
पिण्डोऽयं हन्ति मध्यस्थान् रोगान् सर्व्वान् क्षमिव्रणान् ॥
सिता दुग्धं सकर्पूरमेलया पत्रसंयुतम् ।
अश्विदाहार्त्तियुक्तानां पिण्डोऽयं वाजिनां स्मृतः ॥
ग्रीष्मासह्यप्रतप्तानामारनालं परिप्लुतम् ।
सक्तदिच्छन्ति पिण्डेन वाजिनां सुखकारकम् ॥
दृष्टिवातार्दितानाञ्च वाजिनां पुष्टिवर्द्धनः ।
पिण्डः कृतः सतैलेन लशुनेन पलेन च ॥
महाघृतं सकर्पूरं शर्करा दुग्धमेव च ।
कफनाशकरः प्रोक्तः पिण्डोऽयं सुखदः स्मृतः ॥
रोचना च वरी धात्री तथा स्याद्वीजपूरकः ।
गुल्मं प्रशमयत्याशु वाजिनां हृदयोद्भवम् ॥
सहदेवी वचा कुष्ठं वरुणा चेन्द्रवारुणी ।
अतिश्वासं हरत्येते वाजिनां मधुना सह ॥
उदुम्बरफलं मांसं शूकरं माहिषं दधि ।
हयस्य चातिवृद्धस्य करोति परमं सुखम् ॥
विभीतकं प्रियङ्गुश्च सर्ज्जिका लवणं तथा ।
कासदोषोपशमनः पिण्डः सर्षैः सुखप्रदः ॥
तक्रं कर्पूरचूर्णञ्च शिवं सौवर्चलान्वितम् ।
पिण्डोऽयं वस्तिसंरोधे वाजिनः संप्रकीर्त्तितः ॥
सौवर्चलं हरिद्रा च पिप्पली चेन्द्रवारुणी ।
मूत्रकृच्छ्रे परीक्षन्ति पिण्डोऽयं तुरगस्य हि ॥
पिण्डीरसत्तवः क्षौद्रं भल्लातकफलं वृषम् ।
रक्तमूत्रे तु पिण्डोऽयं वाजिनां रक्तनाशनः ॥
अभया यष्टिका श्यामा देवदारु सगन्धकम् ।
पुरीषे रक्तसंमिश्रे सदा शंसति वाजिनः ॥
पटोलं धातकी मुस्ता यष्टिका गिरिकर्णिका ।
रक्ताधिके हृतः पिण्डः करोति रुधिरक्षयम् ॥
हरिद्राद्वयसंयुक्तं गन्धकं कटुतैलकम् ।
पिण्डकं श्रुतियुक्तानां सदाश्वानां प्रशस्यते ॥
अतसीपत्रकं निम्बं न्यग्रोधकलिकान्वितम् ।
अतीसारे सृग्दंशन्ति पिण्डोऽयं वाजिनः शुभः ॥
व्रणैः क्रमिभिरत्यर्थं सदा वाजी प्रपीड्यते ।
तदा पिण्डः प्रदातव्यः स्थूलैरखदलैरलम् ॥
कर्पूरशर्करालोध्रं माक्षिकं त्रिफलान्वितम् ।
तुरङ्गिण्याः प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥
पत्रकं सिन्धुवारश्च भामरं चक्रकिंशुकम् ।
मांसवृद्धौ प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥
सैन्धवं चूलिकाक्षारं विड्लानि मधूनि च ।
शूलपीड़ाभिभूतस्य पिण्डोऽयस्य प्रशस्यते ॥"

इति श्रीवकुलकृतेऽश्वचिकित्सिते पिण्डाध्यायश्चयोदशः ॥

अथ घृतविधानम् ।

"शिलाजतु विशाला च पद्मकं नागकेशरम् ।
लाक्षा पद्मकमूलञ्च निम्बद्वयसमन्वितम् ॥
घृतं माक्षिकसंयुक्तं सप्तविंशतिकं विदुः ।
अश्वांशं तु समादाय सुरामांसघृतस्य च ।
पलमात्राणि सर्व्वाणि पूर्व्वद्रव्याणि निःक्षिपेत् ।
तेषां दानेन तत्सर्पिर्जायते सर्व्ववाजिनाम ॥
बलपुष्टिकरं नित्यं सर्व्ववातविनाशनम् ।
सर्व्वरोगप्रशमनं कायाग्नेश्च प्रदीपनम् ॥
श्रोणस्करं व्रणानाञ्च श्रीहश्रोणप्रणाशनम् ।
धातकी केशरं कुष्ठं कुसुम्भं कुङ्कुमं नलम् ॥
दाडिमं सितलोध्रञ्च पलमात्राणि निःक्षिपेत् ।
घृतञ्च पाचयेत् प्राज्ञादभिघातान्वितो हयः ॥
जायते सर्व्वसुहृल्लो महाप्राणेन संयुतः ।
आरनालं वचा कुष्ठं पिङ्गला सिक्थकं घृतम् ॥
एते: पर्क घृतं सम्यक् पित्तव्याधिविनाशनम् ।
हरिद्राद्वयसंयुक्तं गन्धकं तु मनःशिला ॥
क्वाथयेन्नवनीतेन त्रिगुणेन घृतेन च ।
अभ्यङ्गेनाथ पानेन सप्तरात्रेण वाजिनः ॥
कण्डूतिर्निःशयं याति तथोद्भवा रुजः ।
माक्षिकं निम्बपत्राणि नखं गुग्गुल एव च ॥
भृङ्गराजो विशाखा च पाठा चैव पुनर्नवा ।
विल्वमारुष्कके लोध्रं सैन्धवं तगरं तथा ॥"
एते: पक्वं घृतं वाजी संप्राप्यार्त्तैर्विमुच्यते ॥

इति श्रीवकुलकृतेऽश्वचिकित्सिते घृताध्यायश्चतुर्दशः ॥

अथ क्वाथः ।

"पूर्व्वाणि समभागानि क्वाथयेत् कूपवारिणा ।
ततोऽर्द्धांशं समादाय तोयस्य क्वथितस्य च ॥
एतत् सिद्धार्थकं नाम क्षुत्करं सर्व्ववाजिनाम् ।
कायाग्निं वर्द्धयत्याशु नीरोगत्वं प्रयच्छति ॥
मुस्ता मधुकपत्राणि केशरं लवणं वृहा ।
घृताक्षा श्लाक्ष्णली धात्री चपुषं फलिनी तथा ॥
क्वाथयित्वा जलं कौपं दत्तेस्तुल्ये विचक्षणः ।
त्रिभागमेवमादाय ततो द्रव्याह्वयस्य च ॥
प्रकरोति सदा नाशं पित्तस्यागन्तुकस्य च ।
एकविंशदिनं यावच्छालिहोत्रमतं यथा ॥
शुण्ठी हरीतकी पाठा ब्राह्मी मुस्ता शिखालिका ।
हरिद्राद्वयसंयुक्ता हरितालं मनःशिला ॥
सिद्धस्त्रिभागशेषोऽयं क्वाथो हन्यात्तिराचिकम् ।
सन्निपातमशेषेण पलिकः पलमात्रकः ॥
मधुकं केशरं पत्रं भल्लातकविभीतकम् ।
शृङ्गपुष्पं वृहा सारं समभागेन मिश्रितम् ॥
कासार्त्तस्य समुद्दिष्टः क्वाथोऽयं त्रिफलात्मकः ।
उत्साहवर्द्धकः सद्यस्तथा कायाग्निदीपकः ॥
कुमारी श्लाक्ष्णली पाठा मञ्जिष्ठा चेन्द्रवारुणी ।
काकोली समभागेन क्वाथयेत् समभागतः ॥
पलद्वयप्रमाणेन ततः पीतेन वाजिना ।
मोहयेच्छूलनं दोषं मूत्रदोषं च तत्क्षणात् ॥
यवानी माक्षिकं क्षारं सौवर्चलयुताभया ।
क्वाथयेदष्टमांशेन तत्पानाच्छाम्यते हयः ॥
प्रदीप्ताग्निस्तु तेजस्वी सर्व्वरोगाद्विमुच्यते ।
स शीघ्रमार्गगामी च स्निग्धो रोगविवर्जितः ॥
शेफालिका वृहासारे वेणुका सिन्धुवारिका ।
एते: क्वाथः कृतः सम्यक् क्रिमिनाशकरः परः ॥
मातुलुङ्गस्य बीजानि चन्दनं सितसर्षपाः ।
उशीरं पुष्करं ब्राह्मी लक्ष्मणा च पुनर्नवा ॥
क्वाथोऽयं मुखिचूर्णेन धावितक्लेदनाशनः ।
प्रकरोति तुरङ्गाणां सर्व्वदैव सुखं तथा ॥"

इति श्रीवकुलकृतेऽश्वचिकित्सिते क्वाथाध्यायः पञ्चदशः ॥

अथ विषम् ।

"वारुणी माक्षिकी गौरी श्रीतालीबीजपूरकम् ।
क्षमिक्लेदविनाशाय क्वाथो नित्यं रजाहरः ॥
अश्वगन्धा घृतं क्षौद्रं विषदग्धस्य वाजिनः ।
विषनाशं करोत्येव सर्व्वगात्रेषु तत्क्षणात् ॥
सामान्येन प्रदिष्टोऽयमगदो विषनाशनः ।

पृथक् पृथग्विभागेन कर्त्तव्यं साम्यतः परम् ॥
त्रिविधं कीर्त्तितं चैव कृत्रिमञ्च ततःपरम् ।
त्रिविधं कीर्त्तितं प्राज्ञैर्विषज्ञानविचक्षणैः ॥
स्थावरं कन्दजं प्रोक्तं जङ्गमं सत्त्वसंस्थितम् ।
कृत्रिमं योगजं प्रोक्तं त्रिविधं विषमुच्यते ॥
यदा स्थिरं समश्नन्ति कदाचित्तुरगोत्तमाः ।
तदा कार्य्यं विधानन्तु रेवतस्य प्रयोजनम् ॥
केशरं पद्मनालञ्च सौपर्णी वदरीफलम् ॥
तक्रमिश्रं हये दत्तं सर्व्वथा विषनाशनम् ॥
सौपर्णी सिन्धुवारञ्च नागबला जटा तथा ।
विषार्त्ते प्राप्य संमिश्रं दुग्धे खादायुधी हयः ॥
अश्वगन्धा रुहा एला घृतमिश्रा प्रयोजिता ।
विषनाशं नयत्याशु जङ्गमं हयगात्रजः ॥
मूलं चन्दनवृक्षस्य माषचूर्णपरिप्लुतम् ।
जङ्गमस्य विषस्याशु प्रकरोति च संक्षयम् ॥
तक्रं केशरसंयुक्तं विषं सद्यो नवाभ्रकम् ।
हयस्य जङ्गमं नाशं विषन्नयति तत्क्षणात् ॥
सौपर्णी विषकट्फोली पिष्ट्वा मद्येन भाविता ।
जङ्गमं गात्रतः क्षत्तं विषं नयति तत्क्षणात् ॥
एला कट्फोलिकामूलं सौपर्णीघृतमिश्रितम् ।
विषनाशं करोत्याशु नस्यदानेन वाजिनाम् ॥
कौसुम्भं केशरं लाक्षा माक्षिका नाकुली तथा ।
कृत्रिमस्य विषस्याशु प्रकरोति च संक्षयम् ॥
चम्पकं मालतीमूलमुन्मत्तकरसं तथा ।
अश्वानां नाशयत्याशु विषं जङ्गममाश्रितम् ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते विषयोगाध्यायः षोड़शः ॥

अथ अश्वशालाविधिः ।

"पृथवेश्मवामभागे शुभदिने तु कारयेद्वयागारम् ।
पूर्व्वश्रियं प्रयत्नाद्वेः अवसं प्रतिष्ठाप्य ॥
सुशुभे भूमिविभागे पूर्व्वोत्तरजलप्रवविधानात् ।
तस्मिन् शालां चिरां दशहस्तसमुच्छ्रितां दृढां कुर्य्यात् ॥
खादनकोष्ठकमस्मिन् हस्तद्वितयं समुच्छ्रितं कुर्य्यात् ।
संस्थाप्य वृषभगावौ सप्ताहं वाजिशालायाम् ॥
अत ऊर्द्धन्तु हुताग्निः प्रवेशयेद्वाजिनो यथायोग्यम् ।
कुशलैस्तरुणैर्दक्षैरनुकूलैः स्थानपालैश्च ॥
कृतमङ्गलसंस्कारा वन्ध्यास्तोत्रैश्च चोत्तराभिमुखाः ।
नात्यायता न शिथिलाः स्थाने वा दक्षिणाभिमुखम् ॥
वैद्यानां तुरगाय समीपं गृहं कारयेत् पूर्व्वम् ।
कार्य्यासिकेन सूत्रेण मापिकाया निवारणम् ॥
गन्धैर्माल्यैर्धूपैः स्थानानि विभूषयेदलङ्कारैः ।
सविशेषं लवणीतौ हुताग्निं पूरयेद्विद्वान् ॥
स्वच्छिद्रं नातियवसं यथा पश्यन्ति वाजिनः ।
स्थानं चैव पृथक् प्राज्ञं प्रयत्नं रोगिणां न वै ॥
कोष्ठी कुष्ठी ज्वरी यक्ष्मी परस्परं दूषयति चारैः ।
तिथिवारे केशांश्च खुरांश्च प्रच्छन्ति दीर्घान् ॥
अश्वस्याङ्गे प्रलिपेद्धरिद्रया वरिष्ठया मङ्गल्याच्च ।
सुपवित्रान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते अश्वशालाविधिरष्टादशोऽध्यायः ॥ सप्तदशाध्यायस्तु नाधिगम्यते ॥

अथ ग्रहनामलक्षणानि ।

"दृश्यन्ते यानि लिङ्गानि ग्रहदोषेण वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि ग्रहनामानि यानि तु ॥
लोहिताक्षो विरूपाक्षो हरिर्वल्लिस्तथैव च ।
सकाग्नी चैव विख्यातः सङ्काग्नी च परः स्मृतः ॥
सुसंस्थितश्च कौदेरो वैशाखश्च स्टदुग्रहः ।
ऊर्द्ध्वश्च दारुणश्चैव षड्विधो वरुणग्रहः ॥
वृहस्पतिश्च सोमश्च तथा सूर्य्यग्रहोऽपरः ।
एते प्रोक्ता ग्रहाः सर्व्वे दारुणा मुनिसत्तमैः ॥
एतैर्दृष्टाः स्फुटं वाहा नैव जीवन्ति सर्व्वदा ।
चिह्नं सर्व्वं प्रवक्ष्यामि यथा शास्त्रे व्यवस्थितम् ॥
कम्पते पूर्व्वकायस्तु निश्चलो यस्य पश्चिमः ।
पश्चाच्छ्वी सकम्पश्च खिद्यते हरिपीड़ितः ॥
भवन्ति बिन्दवो रक्ता अकस्माद् यस्य चक्षुषः ।
हरिताक्षग्रहीतोऽश्वो ग्रासद्वेषी च जायते ॥
प्रस्विन्नगुरुगात्रश्च लुब्धचङ्क्रमणक्रियः ।
मीलतोन्मीलतां चाक्ष्णा स्वभावान्निश्चलैव च ॥
विरूपाक्षग्रहीते तु कम्पः खेदश्च जायते ।
उत्थितः सहसा यस्तु मूर्च्छा पतति भूतले ॥
स्रस्ताक्षो मुच्यते केशैस्तथा बालैः खुरैरपि ।
बलिग्रहगृहीतोऽसौ स्रस्तकर्णशिरोधरः ॥
अकस्माद् यस्य लोमानि ग्रीष्यन्ते यश्च लङ्घति ।
सूनपक्ष्मपादस्य तस्य काग्निग्रहं वदेत् ॥
सहसा कुपितो वाजी स्वानि गात्राणि खादति ।
प्रोथत सततञ्चैव सङ्काग्निग्रहपीड़ितः ॥
खिन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति ।
कौवेरग्रहसन्दृष्टं तं विद्यात् कृच्छ्रजीवितम् ॥
क्ष्वेडते सततं यस्तु पश्चादात्मानमीक्षते ।
सुसंस्थितग्रहाविष्टः स विज्ञेयो मनीषिभिः ॥
स्रस्तेन गुरुणा चैव वेपमानेन पीड़ितः ।
गात्रेण विद्याद् वाहं तु वैशाखग्रहसेवितम् ॥
ग्रीवां चैव तथा जिह्वां परिवर्त्तं मुहुर्मुहुः ।
जृम्भते पूर्व्वकायेन प्रीतोच्छ्वासी विलोचनः ॥
नोद्विजेत्त्रासहतः दृष्टे कश्चया पाणिनापि वा ।
तं वै दीर्घस्वरग्रस्तं दृष्ट्वैव परिवर्जयेत् ॥
श्यामं जिह्वासुखं यस्य नष्टदृष्टिस्तिरीभवेत् ।
ऊर्द्ध्वग्रहगतं दोषं तस्य दीनस्य निर्दिशेत् ॥
तालुजिह्वे च नेत्रे च वृषणौ मेढ्रमेव च ।
श्यावं रूक्षञ्च यस्य स्याद् गात्रगौरवमेव च ॥
तस्य खेदपरीतस्य बुद्धिमान् वरुणग्रहैः ।
क्षतं दोषं महाघोरं स्रस्ताङ्गस्य विनिर्दिशेत् ॥
क्ष्वेडते सततं यस्तु कृष्टरोमा तुरङ्गमः ।
स्रस्ताक्षो जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः ॥
सुविस्फुरितसर्व्वाङ्गः सलिले निश्चलस्थितः ।
क्ष्वेडते विस्तरं वाजी वरुणग्रहपीड़ितः ॥
सुदूर्नावस्थितस्तोये जानुभ्यां योऽवगच्छति ।
मुखपाकश्च यस्याग्ने तं विद्याद्दकग्रहम् ॥
उद्वर्त्तिताक्षः खिन्नश्च संग्रहीतश्च यः ।
कम्पमानश्च यो वाजी स रविग्रहपीड़ितः ॥
स्रस्तग्रीवो न जानाति कशाघातं सुदुर्म्मनाः ।
जलग्रहगृहीतोऽश्वो वामपार्श्वेन निश्चलः ॥
सूनाक्षिकूटो रक्ताक्षः क्षुभ्यः स्खलति यो मुहुः ।
वृहस्पतिग्रहीतोऽसौ नैव जीवति ताद्दशः ॥
कम्पते पूर्व्वकायेन स्वल्पपानाशनश्च यः ।
ग्रीवे प्रसार्य्य गात्राणि ग्रीताङ्गः सोमपीड़ितः ॥
रक्ताक्षः सूनकण्ठश्च कम्पमानश्च श्वासयुक् ।
फेनतीव्राङ्गखेदश्च ग्रस्तः सूर्य्यग्रहेण सः ॥
उदके तत्समीपे वा प्रायो गच्छति दारुणः ।
तुरङ्गं सत्त्वहीनन्तु षड्विधो वारुणग्रहः ॥
यज्ञभूमिचितावैत्यशून्यवेश्मसुरालये ।
लोहिताक्षादयो रोषाद् ग्रहा यच्छन्ति वाजिनः ॥
एवंविधैर्निदानैस्तु ग्रहदोषं विनिर्दिशेत् ।
वातपित्तकफानान्तु निदानैर्व्याधिमादिशेत् ॥
एकाकारेण रोगेण म्रियते वा हयो यदा ।
तुरङ्गाणां तदा ज्ञेया उपसर्गाः सुदारुणाः ॥
ग्रहदोषेषु सर्व्वेषु उपसर्गांस्तथैव च ।
अथोक्ताश्च महाशान्तिं गान्धर्व्वीञ्च प्रयोजयेत् ॥
अश्वरक्षाविधानाय ऋक्षं सम्मान्य पावकम् ।
जुहुयादृक्षसंयुक्तं शुचिः स्नात्वा सुपूजितः ॥
शान्तिकं कारयेत् कर्म्म बलिञ्चापि प्रयोजयेत् ।
ग्रहदोषेषु सर्व्वेषु शान्तिकर्म्माणि कारयेत् ॥
देवद्विजप्रव्रजितगुरुवृद्धान् यतीनपि ।
तोषयेद्भोजनैर्दानैर्वस्त्रगोकाञ्चनादिभिः ॥
रात्रौ शालासमीपे तु बलिं दद्यात् चतुर्दिशम् ।
मत्स्यमांसैश्च पक्वान्नैः क्षुद्भैः पायसादिभिः ॥
चिराचं पञ्चराचं वा सप्तराचमथापि वा ।
नीराजनविधिं कृत्वा नयेदश्वान् पृथक् पृथक् ॥"

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ग्रहग्रहशान्तिचिकित्सिते सप्तपञ्चाशत्तमोऽध्यायः ॥)

घोटिका, स्त्री, (घोटते परिवर्त्तते क्वथादिगुणैरिति । घुट् + ण्वुल् । ततष्टाप् अत इत्वम् ।) वृक्षभेदः । तत्पर्य्यायः । कर्कटी २ तुरङ्गी ३ चतुरङ्गा ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मधुरत्वम् । वातव्रणकण्डूकुष्ठासश्वयथुनाशित्वञ्च । इति राजनिर्घण्टः ॥

घोणा, स्त्री, (घोणते गच्छति वस्तुगन्धम् । घुण् + अच् टाप् च । घोणतेऽनया इति करणे घञ् वा ।) नासा । (यथा, महाभारते । १ । १५६ । ३३ ।
"दीर्घघोणं महोरस्कं विकटोद्वहपिङ्गिकम् ॥"
"घोणायां हे ॥" इति सुश्रुते शारीरस्थाने पञ्चमाध्याये ॥) अश्वनासिका । तत्पर्य्यायः । घ्राणः २ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, अश्ववैद्यके । २ । ७ ।
"नासाच्छिद्रान्तिमध्ये तु घोणाख्यः ससुदाहृतः ।
घोणापार्श्वगतौ गण्डौ चौरिके च ततः परम् ॥")

घोणी, [न्] पुं, (प्रशस्ता घोणा अस्त्यस्य इति । "अतोऽनेकस्वरात् ।" ५ । २ । ११७ । इति इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

घोण्टा, स्त्री, (घुण्यते गच्छते भक्षणायेति । घुण् + बाहुलकात् टः ।) वृक्षविशेषः । श्रेयाकुल

इति भाषा ॥ तत्पर्य्यायः । वदरः २ गोपघोण्टा ३ शृगालकोलिः ४ कपिकोलिः ५ । इति कात्रित् रत्नमाला ॥ हस्तिकोलिः६ वदरीच्छदा ७ कर्कन्धुः । इति रत्नकोषः ॥ पूगवृक्षः । इति मेदिनी । टे । १४ ॥ (यथा, उत्तरस्थाने त्रिंशेऽध्याये वाभटेनोक्तम् ।

"घोण्टाफलत्वग्लवणं सलाचं
बूकस्य पत्रं वनितापयश्च ।
स्नुगर्कदुग्धान्वित एष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम् ॥")

घोनसः, पुं, (गोनसः + पृषोदरादित्वात् साधुः ।) गोनसः । तिलितृससर्पः । इति हेमचन्द्रः । ४ । ३६२ ॥ (क्वचित् मूर्द्धन्यमध्योऽपि दृश्यते ॥)

घोरं, क्ली, (हन्यते वध्यतेऽनेनेति । हन् + "हन्तेरच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) विषम् । इति राजनिर्घण्टः ॥

घोरः, पुं, (घोरयति भयानकरसनिमित्तीभवतीति । घुर + अच् । यद्वा, हन्ति विनाशयति रुद्ररूपेण इति । हन वधे + "हन्तेरच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) शिवः । भयानके त्रि । इति हेमचन्द्रः ॥ (यथा, मनुः । १२ । ५४ । [चयात्।

"बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥")

घोरदर्शनः, पुं स्त्री, (घोरं भयानकं दर्शनं यस्य ।) उलूकः । इति राजनिर्घण्टः ॥ भयानकरूपे त्रि ॥ (यथा, रामायणे । १ । १ । ५५ ।

"मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥")

घोरपुष्पं, क्ली, कांस्यम् । इति राजनिर्घण्टः ॥ घोरघुष्यमपि पाठः ॥

घोररासनः, पुं, (घोरं भयानकं रासनं शब्दो यस्य ।) शृगालः । इति शब्दरत्नावली ॥

घोररावी, [न्] पुं, (घोरं यथा तथा रवति शब्दं करोतीति । रव शब्दे + णिनिः ।) शृगालः । इति हेमचन्द्रः । ४ । ३५६ ॥

घोरा, स्त्री, (घोरति भयानकरसनिमित्तीभवतीति । घुर + अच् + टाप् च ।) रात्रिः । इति त्रिकाण्डशेषः ॥ देवदाली लता । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २६ । ५५ ।

"घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी ॥"

रविसंक्रान्तिविशेषः । इति ज्योतिषम् ॥ यथा, तिथितत्त्वे रविसंक्रान्तिप्रकरणे ।

"मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी ।
राक्षसीमिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया रुद्रौ मन्दाकिनी तथा ।
त्रिप्रे ध्वांक्षी विजानीयाद्रुद्रे घोरा प्रकीर्त्तिता ॥")

भयानका । (यथा, कालीध्याने ।

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥")

घोलं, क्ली, (घुलते आलोड्यते यत् । घुट + अच् । पृषोदरादित्वात् साधुः ।) ससरं निर्जलं मथितं दधि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।

"यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥")

तत्पर्य्यायः । दध्नाहृतम् २ कालसेयम् ३ अरिष्टम् ४ गोरसः ५ घलम् ६ मलिनम् ७ केवलम् ८ भग्नसन्धिकम् ९ । तस्य भेदाः ।

"तक्रं ह्युदश्विन्मथितं पादाम्बुर्द्वांसुनिर्जलम् ।
ससारं यद्भवेत्तक्रं कट्टरं तत् प्रकीर्त्तितम् ॥"

इति शब्दचन्द्रिका ॥

अस्य विशेषाः तक्रशब्दे द्रष्टव्याः ॥

घोली, स्त्री, पत्रशाकविशेषः । तत्पर्य्यायः । घोलिका २ घोलिः ३ कलम्बुः ४ कुवकाम्लुका ५ । चैत्रजातायाः अस्याः गुणाः । लवणत्वम् । रुचिकारित्वम् । अम्लत्वम् । वातकफनाशित्वञ्च ॥ आरामघोलिकागुणाः । अम्लत्वम् । रूक्षत्वम् । रुच्यत्वम् । वायुनाशित्वम् । पित्तश्लेष्मकारित्वञ्च । क्षुधायाः जीर्णज्वरनाशित्वम् । इति राजनिर्घण्टः ॥

घोषं, क्ली, (घोषति शब्दायते इति । घुष विशब्दने + अच् ।) कांस्यम् । इति राजनिर्घण्टः ॥

घोषः, पुं, (घोषन्ति शब्दायन्ते गावो यस्मिन् । घुषिर् विशब्दने + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) आभीरपल्ली । (यथा, रघुः । १ । ४५ ।

"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥"

घोषति शब्दायते इति । घुष + कर्त्तरि अच् ।) गोपालः । (घुष + भावे घञ् ।) ध्वनिः । (यथा, मनुः । ७ । २२५ ।

"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥")

घोषकलता । कांस्यम् । मेघशब्दः । इति मेदिनी । षे । ११ ॥ मशकः । इति त्रिकाण्डशेषः ॥ (वर्णोच्चारणवाद्यप्रयत्नविशेषः । यदुक्तं शिक्षायाम् । २० ।

"संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥")

कायस्थादीनां पद्धतिविशेषः । (यथा, कुलदीपिकायाम् ।

"वसुवंशे च सञ्जौ द्वौ नाम्ना लक्ष्मणपूर्ब्बकौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाक्रतौ ॥")

घोषकः, पुं, (घोष एव । घोष + संज्ञायां कन् ।) घोषालता । तत्पर्य्यायः । धामार्गवः २ । इत्यमरः । २ । ४ । ११७ ॥ घोषकाकृतिः ३ आदानी ४ देवदानी ५ तुरङ्गकः ६ घोषः ७ घोषालता ८ । इति शब्दरत्नावली ॥ कोषकालः ९ । इति जटाधरः ॥ महांश्चेत् हस्तिघोषातकी ॥ * ॥ पीतघोषायाः पर्य्यायः । धामार्गवः १ पीतघोषा २ राजघोषातकी ३ कर्कोटकी ४ महाजाली ५ चुड़ः ६ कोषफला ७ कोषातकी ८ । इति च जटाधरः ॥ * ॥ श्वेतघोषायाः पर्य्यायः । घोषातकी १ स्रदङ्गी २ जालिनी ३ क्षतवेधकः ४ श्वेतपुष्पा ५ व्याकृतिच्छदा ६ ज्योत्स्ना ७ इति रत्नमाला ॥

घोषकाकृतिः, पुं, (घोषकस्य घोषलतायाः आकृतिरिवाकृतिर्यस्य ।) घोषकः । इति रत्नमाला ॥

घोषणा, स्त्री, (घुषिर् विशब्दने + "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।" ३ । ३ । १०७ । इति युच् ।) उच्चैःशब्दः । लोकविज्ञापनायोच्चैःशब्दितम् । (यथा, कथासरित्सागरे । २४ । ५० ।

"गच्छ भ्रमय क्षतक्षेत्र पुरे पटहघोषणाम् ॥")

तत्पर्य्यायः । उच्चैर्घुष्टम् २ । इत्यमरः । १ । ६ । १२ ॥ निघुष्टम् ३ घुष्टघोषणम् ४ । इति शब्दरत्नावली ॥

घोषयित्नुः, पुं, (घोषयतीति । घुष् + णिच् + बाहुलकात् इत्नुच् ।) ब्राह्मणः । कोकिलः । वन्दी । इति शब्दरत्नावली ॥

घोषवती, स्त्री, (घोषो विद्यतेऽस्याः । घोष + मतुप् मस्य वः । स्त्रियां ङीप् ।) वीणा । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । ११ । ३ ।

"स बभूव मृगे राजा सुखेष्वेकान्ततत्परः ।
सदा सिषेवे मृगयां वीणां घोषवतीञ्च ताम् ।
दत्तां वासुकिना पूर्ब्बं नक्तं दिनमवादयत् ॥"

तथाच तत्रैव । १२ । ३२ ।

"अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस्तथा ॥")

शब्दविशिष्टे त्रि ॥ (यथा, महाभारते । १ । २५ । ११ ।

"त्वं वज्रमतुलं घोरं घोषवांस्त्वं बलाहकः ॥")

घोषा, स्त्री, (घोष्यन्ते मधुकरी यया । घुष + णिच् + घञ् ।) मधुरिकौषधिः । मौरी इति भाषा । इति मेदिनी ॥ (यथा, गारुड़े १६ अध्याये ।

"घोषाफलं सैन्धवञ्च तल्लिमार्गः पतेत्तथा ॥")

कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २६ । ५५ ।

"घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥"

गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४४ ।

"ऋग्मिन्त्रमयी घोषा घनसम्पातदायिनी ॥")

घोषातकी, स्त्री, श्वेतघोषा । इति रत्नमाला ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"घोषातकी स्रदङ्गी स्याज्जालिनी क्षतवेधनः ।
श्वेतपुष्पा क्षतिच्छत्रा ज्योत्स्नाकोषातकी
क्वचित् ॥")

घ्रा, गन्धोपादाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) जिघ्रति पुष्पं लोकः । इति दुर्गादासः ॥

घ्राणं, क्ली, (जिघ्रत्यनेनेति । घ्रा + करणे ल्युट् । यद्वा, घ्रा + क्तः "तुदविदोन्द्रात्रेति ।" ८ । २ । ५६ । इति निष्ठातस्य नो वा ।) नासिका । इत्यमरः । २ । ६ । ८६ ॥ (यथा रघुः । १६ । ११ ।

"घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः ॥")

न्यायमते घ्राणेन्द्रियग्राह्यगन्धत्वादि । (घ्रा + भावे ल्युट् । आघ्राणम् । यथा, देवीभागवते । १ । १४ । २४ ।

"आलिलिङ्ग सुदुर्घ्राणं मूर्द्धि तस्य चकार ह ॥")

घ्राते त्रि । इति मेदिनी । णे । ११ ॥

घ्राणतर्पण:, पुं, (घ्राणमिन्द्रियविशेषं तर्पयतीति। तृप+ल्युट्।) सुगन्धि:। इत्यमर:। २।५।११॥ (यथा, रामायणे। २। ८४। १४।
"घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत्॥")

घ्राणदु:खदा, स्त्री, (घ्राणस्य दु:खं ददातीति। दा+क:। स्त्रियां टाप्।) छिक्कनी। इति भावप्रकाश:॥

घ्रात:, त्रि, (घ्रा+क्त:। "गुदविदेति।" ८। २। ५६। इति प्राच्यिको नत्वाभाव:।) गृहीतगन्धपुष्पादि:। घ्राण लग्योया इति सोंका इति च भाषा। तत्पर्य्याय:। घ्राण:२। इत्यमर:। ३। १। ८०॥ घ्रिक्षित:३। इति जटाधरशब्दरत्नावल्यौ॥ (यथा, मनु:। ५। १२५।
"पक्षिगन्धं गवाघ्रातमवधूतमवप्लुतम्।
दूषितं केशकीटैश्च स्तनप्रस्रवणं त्यजेत्॥")

घ्राति:, स्त्री, (जिघ्रत्यनया। घ्रा+करणे क्तिन्।) नासिका। इति शब्दचन्द्रिका॥ (भावे क्तिन्। आघ्राणम्। यथा, मनु:। ११। ९७।
"ब्राह्मणस्य रज: क्षत्वा घ्रातिरग्रेयमद्ययो:॥")

ङ

ङ:

ङ, ङकार:। स तु यञ्जनपञ्चमवर्ण:। अस्योच्चारणस्थानं नासिकाकण्ठ:। इति वाकरणम्॥ ("जिह्वामूले तु कु: प्रोक्त:।" इति। "अनुस्वारयमानाश्च नासिकास्थानमुच्यते॥" इति च शिक्षोक्तेस्तथात्वम्॥) अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"ङकारं परमेशानि! स्वयं परमकुण्डली।
सर्व्वदेवमयं वर्ण्णं त्रिगुणं लोललोचने!॥
पञ्चप्राणमयं वर्ण्णं ङकारं प्रणमाम्यहम्॥"
अपि च।
"ऊर्द्धाध:क्रमतो रेखा किञ्चिदाकुञ्चिता तत:।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी॥
रेखात्रयेषु ब्रह्मेशविष्णव: सन्ति देवता:॥
ध्यानं यथा, तत्रैवोद्धारतन्त्रे।
"धूम्रवर्णां महाघोरां ललज्जिह्वां चतुर्भुजाम्।
पीताम्बरपरीधानां साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

ङु

तस्य नामानि यथा,—
"ङ: शुक्री भैरवश्चण्डो विष्वक्सेन: शिवप्रिय:।
एकरुद्रो दशनख: खर्परो विषयसृहा॥
कान्ति: श्वेताक्ष्यो धीरो द्विजात्मा ज्वालिनी वियत्।
मन्त्रशक्तिश्च मदनो विघ्नेशो वात्मनायक:॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यति:।
शिवयोषा नीलकण्ठ: कामेशी च मयांशुकौ॥"
इति नानातन्त्राणि॥
(मालतीमाधवे अस्य दक्षिणकराङ्गुलाग्रेषु न्यस्तता॥)

ङ:, पुं, (ङयते शब्द इन्द्रियैरिति। ङु+बाहुलकात् ड:।) विषय:। विषयसृहा। इति मेदिनी। डे। १॥ भैरव:। इत्येकाक्षरकोष:॥ (यथा, स्तुतिपञ्चाशति।
"ङवन्दिते! ङलिखिते! ङकारवर्णरूपिणि!॥")

ङु, ङ ध्वनौ। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-अकं-अनिट्।) ङ, ङवते। इति दुर्गादास:॥

च

च, चकारः। व तु अञ्जनसदृवर्णः। (द्वितीयवर्ग-स्याद्यवर्णश्च।) असोष्ठारव्यस्थानं तालु। इति आकरग्रन्थः॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "इचु-यशानां तालु।" इति। तथा च शिक्षायाम्। "कण्ठ्याव्हाविचुयशास्तालव्या ओष्ठजावुपू॥") वङ्गाक्षरेरस्य स्वरूपं यथा, कामधेनुतन्त्रे। "चवर्णं शृणु सुश्रोणि! चतुर्वर्गप्रदायकम्। कुण्डलीसहितं देवि! स्वयं परमकुण्डली॥ सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा॥ चिच्छक्तिसहितं वर्णं चिबिन्दुसहितं प्रिये!॥" अपि च। "वार्त्ताकुवर्त्तुलाकार ऊर्द्धाधः क्रमतो गतः। रेखात्रयेषु चन्द्राग्निसूर्य्यास्तिष्ठन्ति नित्यशः। शक्तिर्मात्रा तु विज्ञेया ध्यानमस्य प्रचक्षते॥" तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे "तुषारकुन्दपुष्पाभां नानालङ्कारभूषिताम्। सदा षोडशवर्षीयां वराभयकरां पराम्॥ शुक्लवस्त्रावृतकटिं शुक्लवस्त्रोत्तरीयिणीम्। वरदां शोभनां रम्यामष्टबाहुसमन्विताम्॥ एवं ध्यात्वा चकारन्तु तन्मन्त्रं दशधा जपेत्॥" तस्य नामानि यथा, नागतन्त्रे। "चः पुष्करो हली वाणी चात्मशक्तिः सुदर्शनः। चर्म्मासुखधरो भूत्वा महिषाचारसन्निभो॥ एकरूपो रुचिः कूर्म्मश्चासुखा दीर्घबालुकः। वामबाहुर्मूलमाया चतुर्मूर्त्तिस्वरूपिणी॥ दयितश्च त्रिनेत्रश्च लक्ष्मीक्षितयलोचनः। चन्द्रनं चन्द्रमा देवश्चेतनो रुचिको बुधः॥ देवो केटसुखे ख्यातो कौमारी पूर्व्वकालगुणी। अनङ्गमेखला वायुर्म्मेदिनी च शुभावती॥" (मालतीमाधवे वामबाहुमूले एवास्य न्यासः॥)

च, य (चयति चिनोतीति वा। चय ह्रस्वे चिण् चित्वं वा+"अन्येभ्यपि दृश्यते।" ३। २। १०१। इति ड।) अन्वाचयः। यत्र एकस्य प्राधान्येनापरस्य गौणत्वेनान्वयानां योऽन्वाचयः। यथा। भो वटो! भिक्षामट गाञ्चानय। भिक्षा-मटनमत्र प्रधानं तत् कुर्य्याश्चो यदि गां पश्यसि तदा तामप्यानयेति गो चेत् भिक्षामेवाटेति। समाहारस्तिरोहितावयवभेदः इतरेतर उद्भिन्ना-वयवभेदः। अतएव चार्थे द्वन्द्व इति सूत्रं विधाय चार्थोऽत्र समाहार इतरेतरश्चेति व्याख्याय समाहारे जनभिव्यक्तावयवत्वात् एकवचनम्। इतरेतरयोगे संदृश्यमानप्रधानत्वात् द्विवहु-वचनम्। यथा। "ब्राह्मणाद् अम्बष्ठकौवर्हे ब्रह्म-क्षत्रियविट्शूद्राः। ब्रह्मन्यश्चोधाविति परैरुक्तम्। समुच्चयः समुच्चय; प्राधान्येन क्वचित् क्रिया-विषयेऽनेकस्य चीयमानता। यथा। धर्म्मश्च स्त्रियश्च हिन्धि। इति भरतः॥ समाहारः। अन्वाचार्थः। समुच्चयः। (यथा, मनुः।१२।८८। "इह चासुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्यते॥") पदार्थान्तरम्। (यथा, हितोपदेशे।

"मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः। तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥" तथा च शकुन्तलायां १ मे अङ्के।

"ग्राम्यमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।

अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥") पादपूरणम्। (यथा, रामायणे। १।२०।१६। "तेन सत्योदितौ तौ तु राघवौ च महाबलौ। मारीचञ्च सुबाहुञ्च यज्ञविघ्नं करिष्यतः॥") अवधारणम्। इति मेदिनी। चे। १२॥ हेतुः। इति त्रिकाण्डशेषः॥

चः, पुं, (चयति शब्दायते इति। चय शब्दे+ "अन्येभ्यपि दृश्यते।" ३। २। १०१। इति डः।) चक्रपक्षी। (त्रिणेति खाङ्गानि सङ्कोचय-तीति। चि+डः।) कच्छपः। (चीयते उप-चीयते क्रमशः कलाभिः प्रतिपदादिभारभ्य-त्यर्थः।) चन्द्रः। (चिनोति सञ्चिनोति पर-धनानि इति।) चौरः। इति मेदिनी॥ चे। १॥ निर्भोजे दुर्जने च त्रि। इति शब्दरत्ना-वली॥

चक, इ भ्रान्तौ। सौत्रो धातुरयम्। इति कवि-कल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) इ, चक्रुः रथे। इति दुर्गादासः॥

चक, भ ड म प्रतिघाते। इत्सौ। इति कविकल्प-द्रुमः॥ (भ्वां-उभं-आत्मं-सकं-अकच-सेट्।) भ, चकति चकते खलः साधुम्। ड, चकते जनस्तृप्यतीत्यर्थः। म, चकयति। इति दुर्गा-दासः॥

चकास, ऋ च दीप्तौ। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) ऋ, अचीचकासत् अच-कासत्। अनेकाक्षरात् सन्नद्भावविकल्पः। च, चकासति। लु, चकास्ति। इति दुर्गादासः॥

चकित, त्रि, (चक भ्रान्तौ+क्तः।) भीतम्। इति त्रिकाण्डशेषः॥ (यथा, कलाविलासे।२।८। "दत्त्वा दिग्धि दिग्धि इदं याचकचकितोऽव-गुण्ठनं लात्वा।

चौर इव कुटिलचारी पलायते विकटरथाभिः॥ स्त्री, भावे क्तः। भयम्। नायिकालङ्कारविशेषः। तल्लक्षणं यदुक्तं साहित्यदर्पणे। ३। १२१। "कृतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः॥") "प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत्।" इत्युज्ज्वलनीलमणिः॥ (स्त्री, छन्दोविशेषः। यथा, छन्दोमञ्जर्याम्। "भात् नसतगैरष्टभिर्दे स्वादिह चकिता॥")

चकोरः, पुं स्त्री, (चकते चन्द्रकिरणेन दृश्यतीति। चक दृशौ+"कटिचकिभ्यामोरन्।" उणां। १। ६४। इति ओरन्।) पक्षिविशेषः। (यथा, भागवते। ३। २१। ३३। "सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम्॥") तत्पर्य्यायः। चन्द्रिकापायी २ कौमुदीजीवनः३ अस्य मांसगुणाः। यथा, राजनिर्घण्टे।

"चटकं शीतलं रूक्षं तृष्णं क्षापित्तश्लेष्मजित्। तद्वच्चकोरजं मांसं तृष्णघ्नं बलपुष्टिदम्॥" ("वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः। अक्षरीं हन्ति विशदो बलकृन्मांसलश्चयः॥ चकोरः शुक्रकारी च समदोषा गुणागुणैः॥" इति हारीते प्रथमस्थाने एकादशेऽध्याये॥ अस्य डिम्बगुणा यथा, चरके सूत्रस्थाने २७अः। "धार्म्मराजचकोराणां दक्षाणां शिखिनामपि। चटकानाञ्च यानि स्युरण्डानि च हितानि च॥ रेतःशोधेषु कासेषु छर्द्दिरोगेषु सप्तसु च। मधुराण्यविपाकीनि सद्यो बलकराणि च॥").

चकोरकः, पुं स्त्री, (चकोर एव। चकोर+ स्वार्थे कन्।) चकोरपक्षी। इत्यमरः।२।५।३५॥

चक्क, क अर्त्तौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। आक्षरस्वरमध्यः। अर्त्तिः पीड़नम्। क, चक्कयति शूलं शूरः। इति दुर्गा-दासः॥

चक्रं, क्लीं, (क्रियतेऽनेनेति। कृ+वर्णे कः। कृवादीनामिति ह्रस्वश्च।) व्रजः। सङ्घः। सैन्यम्। रथाङ्गम्। चाका इति भाषा॥ (यथा, याज्ञवल्क्ये। १। ३५१। "यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्। तथा पुरुषकार्य्येण विना दैवं न सिध्यति॥") राङ्गम्। दम्भविशेषः। कुम्भकारोपकरणम्। कुमारेर चाक इति भाषा॥ (यथा, याज्ञ-वल्क्ये। ३। २४६। "मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति तद्वदन्तःस्थैर्गृहं वा शरीरकम्॥") अस्त्रविशेषः। (यथा, रघुः। ७। ४६। "आधोरणानां गजसन्निपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः॥") जलावर्त्तः। इति मेदिनी॥ भगवतः सुदर्शन चक्रम्। (यथा, महाभारते। १। १६। ६। "ततो भगवता तस्य शिरश्छिन्नमलङ्कृतम्। चक्रायुधेन चक्रेण पिबतोऽन्तमोजसा॥") तस्य भगवन्मन्दिरे स्थापनविधिर्यथा, श्रीभाग-वते। ३। १। २३। "अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः। प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृत्स्नमनुस्मरन्ति॥" "द्विजदेवैः ऋषिभिर्देवैश्च कृतानि अङ्गमङ्गं प्रति वर्णन्ते इति प्रत्यङ्गान्यायुधानि तैर्यं मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यादेषु चिह्नितानि मन्दिराणि येषु तानि नानाविधानि विष्णो-रायतनानि क्षेत्राणि तीर्थानि च आसिषेवे। येषां चक्राङ्कितमन्दिरवतां दर्शनात् श्रीलक्ष्म-स्मरणं भवति।" इति सटीकायां श्रीधरस्वामी॥* अथ चक्रलक्षणम्।

"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। चक्रं स्यादक्षिणावर्त्तः शूलश्च श्रीहरेः स्मृतः॥" इति श्रीहरिभक्तिविलासे ४ विलासः॥

ग्रामजालम्। इति त्रिकाष्ठशेषः॥ नगरपुष्पम्। इति राजनिर्घण्टः॥ यूहविशेषः। (एतस्य लक्षणं यथा,—

"अष्टारं वर्त्तुलाकारं यूहचक्रं त्रिनाड़िकम्। दक्षचतुष्टयं वाह्ये कर्णैश्च चतुर्दिशम्॥ पूर्व्वदक्षायतो ऽन्यस्य दिनभाद्यं भमण्डलम्। प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे॥ ग्रंग्निसंज्ञारकं मध्ये तद्वाह्ये भानुसंज्ञकम्। तृतीयं राहुसंज्ञञ्च केतुर्दक्षचतुष्टये॥ चन्द्रार्के विजयो लाभः सूर्य्यार्के मध्यमं फलम्। राहुधिष्ण्यारके विघ्नं मृत्युः केतुचतुष्टये॥ एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्। तद्दिने तत् फलं तस्य सर्व्वकार्य्येषु सर्व्वदा॥" एतच्चक्रन्तु भगवता द्रोणाचार्य्येण अभिमन्युवधार्थेवाभिकल्पितम्। तत्र यूहमध्ये निर्म्माणप्रकारः कः कुत्र आसीदिति प्रदर्शयितुमाह।

"चक्रयूहो महाराज! आचार्य्येणाभिकल्पितः। तत्र शक्रोपमाः सर्व्वे राजानो विनिवर्त्तिताः॥ अवस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्च्चसः। संघातो राजपुत्राणां सर्व्वेषामभवत्तदा॥ लताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः। रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥ सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः। चन्दनागुरुदिग्धाङ्गाः सर्व्वे सूक्ष्मवाससः॥ संहिताः पर्य्यधावन्त कार्त्तिं प्रति युयुत्सवः। तेषां दशसहस्राणि बभूवुर्द्दुर्धनिनाम्॥ पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम्। अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥ अन्योन्यं रक्षमाणाश्चाप्यन्योन्यस्य हिते रताः॥ दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः। कर्णेदुःशासनाद्यैस्तु तो राजा महारथैः॥ देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः। चामरव्यजनाद्यैश्च दृश्यन्निव भास्करः॥ पृष्ठतस्तस्य सैन्यस्य द्रोणोऽवस्थितनायकः। विन्ध्यराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः॥ विन्ध्यराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः। सुताश्च महाराज! गिरिशृङ्गसन्निभाः॥ गान्धारराजः कितवः शकुनो भूरिश्रवास्तथा। पार्श्वतः विन्ध्यराजस्य वराजन्त महारथाः॥ ततः प्रवर्त्तते युद्धं तुमुलं लोमहर्षणम्। तावकानां परेषाञ्च हत्वा हत्वा निवर्त्तनम्॥" इति महाभारते। ७। ११३। १३—२४॥)

तैलयन्त्रम्। इत्यमरटीकायां स्वामी॥ (यथा, आर्य्यासप्तशत्याम्। ५६२। [कारस्य॥"

"क्वेमयान्ति पीड्यतः किं चक्रेणापि तैलकालज्ञापकयन्त्रविशेषः। यथा, गोलाध्याये।

"चक्रं चक्राग्राङ्कं परिधौ त्रयश्चक्रवालादिकाधारम्। धात्रौ त्रिभ आधारात् कल्प्या भार्द्धेऽन्तरं खार्द्धम्॥ तन्मध्ये कृष्णार्द्धं छिन्नार्काभिमुखनेमिकं कार्य्यम्। भूमेरन्नतभागास्तत्कालोन्नतया भुक्तः। [लम्। तत्खार्द्धान्तरे च गता उन्नतनवर्क्षभुक्तिकृता दृङ्नतोन्नतांशभक्ताः स्युः फलाः परैः प्रोक्ताः।"

धातुमयं दारुमयं वा समं चक्रं कृत्वा तन्नेम्यां ध्रुवकलादिराधारः ग्रथिलः कार्य्यः। चक्रमध्ये कृष्णं सुविरमाधारात् सुविरोपगामिनी लम्बवदूर्द्धरेखा कार्य्या। तन्मध्यतोऽन्या तिर्य्यक्रेखा चात्र कार्य्या। तच्चक्रं परिधौ भगणांशैरङ्कयित्वाधारात् त्रिभ इति नवतिभागान्तरे तिर्य्यगेखा तत्परिधिसम्पाते धात्री क्षितिः कल्प्या। भार्द्धेऽन्तरं खार्द्धरेखानेमिसम्पाते खार्द्धं कल्प्यम्। सुविरे कृष्णा शलाका प्रदातव्या। सा चाक्षसंज्ञा। तच्चक्रमर्काभिमुखनेमिकञ्च यथा भवति तथाधारे धार्य्यम्। तथा धृतेऽक्षस्य छाया परिधौ यत्र लगति तत्कृतचिह्नयोरन्तरे ये अंशास्ते रवेरुन्नतांशाः। ये छायाखार्द्धयोरन्तरे ते नतांशा ज्ञेयाः। एवमत्र नतोन्नतांशज्ञानमेव भवति। अतोऽन्यैर्घटिका अप्यागताः। तद्यथा, तस्मिन् दिने गणितेन मध्यन्दिनोन्नतांशान् दिनार्द्धमानञ्च ज्ञात्वानुपातः कृतः। यदि मध्यन्दिनोन्नतांशैर्दिनार्द्धनाड्यो लभ्यन्ते तदैभिः किमित्येवं स्फुटा घटिकाः स्युः॥ अथ वेधेन यद्ज्ञानमाह।

"पैचर्च्चपुष्यान्तिमवारुणानां-
ऋक्षद्वयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽल्पेषु भखेचरौ वा
तथात्र यत्नं सुधिया प्रधार्य्यम्॥
नेमिस्थदृष्ट्याचगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगतारां।
नेम्यङ्कयोरल्पयुजोस्तु मध्ये
ये तेंऽशाः स्थिता भध्रुवको युतस्तैः॥
प्रत्यक्स्थिते भेऽथ पुरःस्थिते वै
हीनो ध्रुवः स्यात् खचरस्य भुक्तम्॥"

तत्र यत्नस्त्वाधो नेम्यां दृष्टिं कृत्वोर्द्धनेम्यासक्तचाक्षी मध्ये भद्वितयं युगपन्नेमिगतं यथा स्यात् तथा यत्नं स्थिरं कृत्वा नेम्यां धिष्ण्ययोरेकतरं स्थानमङ्कयेत्। ततोऽन्ये पृष्ठतो वा दृष्टिं चालयित्वा यद्वं विध्येत्। यद्वः प्रायोऽचगतो दृश्यते। अचमूलस्य यद्वस्य चान्तरं ध्रुवो यद्वावधिः अचमूलं नेम्यां यत्र लग्नं दृश्यते तत् स्थानमध्यक्षम्। अथ भग्रहाङ्कयोर्मध्ये ये तेंऽशास्तैर्भध्रुवो युतः स्फुटग्रहो भवति यदा ग्रहात् पश्चिमस्थं नक्षत्रम्। यदा पूर्व्वस्थं नक्षत्रं तदा भध्रुवो हीनः स्फुटग्रहो भवति। अथवाल्पग्रहं नक्षत्रं रोहिण्याद्यं ततो दूरेऽन्तरे यदा ग्रहस्तदा तावेव विदृश्य प्रोक्तवद्ग्रहज्ञानम्। इति चक्रयन्त्रम्॥ शरीरस्थषट्चक्राणि यथा। मूलाधारः १ स्वाधिष्ठानम् २ मणिपूरम् ३ अनाहतम् ४ विशुद्धम् ५ आज्ञाख्यम् ६। तद्यथा,—

"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके। मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥ तदूर्द्धे कामबीजन्तु कलाघण्टोड्डनादकम्। तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥ तद्वह्नौ हेमवर्णाभं वसुवर्णं चतुर्दलम्।

हृत्पद्मसमप्रख्यं पद्मं तत्र विभावयेत्॥ तदूर्द्धेऽम्बिसमप्रख्यं षड्दलं हीरकप्रभम्। वादिलान्तषड्वर्णैश्च युक्ताधिष्ठानसंज्ञकम्॥ मूलमाधारषट्कानां मूलाधारं ततो विदुः। स्वयम्भूस्थं परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥ तदूर्द्धे नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः॥ मणिवद्भिन्नतत्पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्॥ शिवेनाधिष्ठितं पद्मं विशालोकैककारणम्। तदूर्द्धेऽनाहतं पद्मसुदयादित्यसन्निभम्॥ कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम्। तन्मध्ये वायुलिङ्गन्तु सूर्य्ययुतसमप्रभम्॥ शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते। तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम्॥ आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्। तदूर्द्धन्तु विशुद्धाख्यं कलषोड्शपङ्कजम्॥ स्वरैः षोड्शकैर्युक्तं धूम्रवर्णं महाप्रभम्। विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकगात्॥ विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम्। आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम्॥ आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्। कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः॥ एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत!॥"॥

मन्त्रोद्धारार्थषट्चक्राणि यथा। कुलाकुलचक्रम् १ राशिचक्रम् २ नक्षत्रचक्रम् ३ अकथहचक्रम् ४ अकडमचक्रम् ५ ऋविधनिचक्रम् ६। तद्यथा,—

"कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह। वायुग्निभूजलाकाशाः पञ्चाग्न्यक्षिपयः क्रमात्॥ पञ्चस्वराः पञ्चदीर्घा विन्दवः सन्धिसम्भवाः। कादयः पञ्चगः पञ्च लसहाक्षाः प्रकीर्त्तिताः॥ तथा च।

अ आ ए क च ट त प य वाः मारुताः।
इ ई ऐ ख छ ठ थ फ र शाः आग्नेयाः।
उ ऊ ओ ग ज ड द ब लाः पार्थिवाः।
ऋ ॠ औ घ झ ढ ध भ व साः वारुणाः।
ऌ ॡ अं ङ ञ ण न म ग्र हाः नाभसाः॥

साधकस्याचरं पूर्व्वं मन्त्रस्यापि तदचरम्। यद्येकभूतदैवत्यं जानीयात् सकुलं हि तत्॥ भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम्। मारुतं पार्थिवानाञ्च शत्रुराग्नेयमम्भसाम्॥ नाभसं सर्व्वमित्रं स्यादिरुद्धं नैव शीलयेत्॥"

अथ राशिचक्रम्।

"रेखाद्वयं पूर्व्वपरागतं स्यात्
तन्मध्यतो याम्यकुवेरभेदात्।
एकैकमीशानिशाचरे तु
हुताशवाय्वोर्विलिखेत्ततोऽर्वाक्॥
वेदाग्निवह्नियुगलभवर्णाक्षिसंख्यान्
पञ्चेषुवाणशरपञ्चचतुष्कवर्णान्।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कक्षात्रयान्तः प्रविलिखेदथ ग्रादिवर्णान्॥

तन ञ आ ह ई मेषः। उ ऊ ऋ वृषः। ऋ ॠ ऌ मिथुनम्। ए ऐ कर्कटः। ओ औ सिंहः। अं अः शृंखलाः कन्या। कवर्गशृंखला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः। खराशीनामनुकूलं मन्त्रं भजेत्।

राशीनां शुद्धता ज्ञेया त्यजेत् शुद्धं न्दितं त्रयम्।
खराशेर्मन्त्रराशस्थं गणनीयं विचक्षणैः॥
यदा तु खराशेरज्ञानं तदा साधकनामाद्यक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत्॥ *॥

अथ नक्षत्रचक्रम्।

"अ आ अश्विनौ देवगणः। इ भरणी मानुषः। ई उ ऊ कृत्तिका राक्षसः। ऋ ॠ ऌ ॡ रोहिणी मानुषः। ए ऐगशिरो देवः। ओ औ पुनर्वसुर्देवः। क पुष्यो देवः। ख ग अश्लेषा राक्षसः। घ ङ मघा राक्षसः। च पूर्वफल्गुनी मानुषः। छ ज उत्तरफल्गुनी मानुषः। झ ञ हस्ता देवः। ट ठ चित्रा राक्षसः। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थ द अनुराधा देवः। ध न ज्येष्ठा राक्षसः। प फ ब मूला राक्षसः। भ पूर्वाषाढ़ा मानुषः। म उत्तराषाढ़ा मानुषः। य र श्रवणा देवः। ल व धनिष्ठा राक्षसः। श ष स शतभिषा राक्षसः। ह क्ष पूर्वभाद्रपदा मानुषः। त्र ज्ञ उत्तरभाद्रपदा मानुषः। अं अः ल च रेवती देवः॥ तथा च।

"अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः।
वक्ष्यमाणविधानेन तन्मध्ये वर्णकान् लिखेत्॥
उत्तराहस्तचित्रायान्तु रेखां कुर्याच्चतुर्थीम्।
दश रेखाः पश्चिमायाः कर्तव्या वीरवन्दिते!॥
अकारादिहकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्द्रनेत्रचन्द्रांश्च अश्वेषान्तं खगौ प्रिये!॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्द्रनेत्राग्निचन्द्रकान्।
मघादिज्येष्ठपर्यन्तं द्वितीयं नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युग्मेन्द्रनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यंशगताः क्रमात्॥
पूर्वोत्तराश्चयश्चैव भरण्यार्द्रा च रोहिणी।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठाशतभिषाश्लेषाधनिष्ठाश्चैवकृत्तिकाः।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्वसुः।
अनुराधाश्चगशिरःश्रवणा देवतारकाः॥
स्वातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥
जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः॥"
जन्मत्रिपञ्चसप्तानि वर्ज्यानीवानि नक्षत्राणि।
खनक्षत्रादेव नक्षत्रं गणनीयम्। खनक्षत्राज्ञाने खनामाद्यक्षरसम्बन्धिनक्षत्राश्रयणीयम्॥ *॥

अथाकथहचक्रम्।

"चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्।
पुनश्चतुष्कं तत्रापि लिखेद्धीमान् क्रमेण तु।
इन्दग्निरुद्रनवनेत्रयुगार्कदिक्षु
ऋत्वष्टकोऽग्नयतुर्दृग्भौतिकेषु।
पातालपक्षदशवह्निहिमांशुकोष्ठे
वर्णान् लिखेत् लिपिभवान् क्रमशस्तु धीमान्॥
नामाद्यक्षरमारभ्य यावन्नक्षत्रादिमाक्षरम्।
चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठकोष्ठेषु सव्यतो नाम आदितः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमान्न्यस्येत् मनीषिभिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो यद्यमाचष्टे रिपुर्मूलं निहन्यते॥"*॥

अथाकडमचक्रम्।

"रेखाद्वयं पूर्वपरेण कुर्यात्
तन्मध्यतो यान्यकुवेरभेदात्।
महेश्वरर्क्षाधिपतिक्रमेण
तिर्यक् तथा व्यायुहुताशनेन॥
आकारादिहकारान्तान् जीवहीनान् लिखेत्ततः।
तथा ऋ ॠ वर्णद्वयं ल ळ तद्धि क्लीवं प्रचक्षते॥
एकैकक्रमतो लेखान् मेषादिषु दृष्टान्तकान्।
गणयेत् क्रमशो भद्रे नामादिवर्णकादिमान्॥
मेषादितश्च मीनान्तं गणयेत् क्रमशः सुधीः।
जन्मः खनामतो मन्त्री यावन्नक्षत्रादिमाक्षरम्॥
सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥
सुसिद्धस्त्रिसप्तके रन्ध्रे वेदाष्टद्वादशे रिपुः।
एतत्ते कथितं देवि! अकडमादिकमुत्तमम्॥
तारासुद्धिर्वैद्यवानां कोष्ठसुद्धिः शिवस्य च।
राशिसुद्धिस्तथैवोक्ता गोपालेऽकडमः स्मृतः॥"

अथ ऋणधनिचक्रम्।

"कोष्ठान्येकादशान्येव वेदेन पूरितानि च।
अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित्॥
प्रथमं प्रथमकोष्ठेषु ह्रस्वदीर्घक्रमेण तु।
द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः॥
शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत् सुधीः॥

दौ दौ स्वरौ पञ्चसु कोष्ठकेषु
शेषान् स्वरान् षट्सु षड्रेकमेकम्।
कादीन् हशेषान् विलिखेत्ततोऽर्णा-
वेकैकमेकादशसु त्रिकेषु॥
षट्कालकालवियदग्निसमुद्रवेद-
खाकाशशून्यदहनाः खलु साध्यवर्णाः॥
युग्मद्विपञ्चवियदम्बरयुक्प्रभाङ्क-
व्योमाग्निवेदशशिनः खलु साधकार्णाः॥
नामाद्यभक्तादकठवादृगणसुक्तशेषं
ज्ञात्वोभयोरधिकशेषगणं धनं स्यात्॥
मन्त्रो यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके॥
मूलं मन्त्रं विजानीयात्तस्माच्छून्यं विवर्जयेत्॥"

इति तन्त्रसारः॥ *॥

अथोत्तरायणचक्रं यथा,—

"चक्रं सारं विलिख्याथ पतिरयने संक्रमं यत्र करोति
यस्मिन्मृत्वे तदहं मरणभयकरं शूलमूलेऽपि दद्यात्।
तत् पञ्चादारभूते विविधभयकरं शूलपार्श्वे लाभः
सख्यं स्यात् शूलमध्ये भवति च नियतं वित्तवामक्रमेण॥"

केतुचक्रं यथा,—

"कण्ठे हृदि विभयुगे क्रतुमागलाभौ
षट्पृष्ठभं चयकरं धनदं करे चिः।
वामे चतुर्षु च रुजं पदयोस्तथाष्टौ
क्षेमो भयञ्च नितरामिह केतुचक्रम्॥"*॥

अहिचक्रं यथा,—

"अथाहिचक्रं वक्ष्यामि विभान्तद्वयशल्ययोः।
ऊर्द्धं रेखाष्टकं लेख्यं तिर्यक् च पञ्चरेखिकाः॥
स्यानदारसुखं चक्रमष्टाविंशतिकोष्ठकम्।
तत्र पौष्णाश्वियान्त्यैन्द्रस्वातिकामघभाग्यभम्॥
उत्तराफल्गुनी लेख्या पूर्वषड्भां भसप्तकम्।
अहिब्रध्नोऽजपादर्क्षं शतभं त्राक्षसर्पभम्॥
पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमाश्रितम्।
अभिजिद्विश्वसृवस्वर्कं सौम्यं रौद्रं पुनर्वसुम्॥
चित्रभश्च तृतीयायां षड्क्तौ धिष्ण्यस्य सप्तकम्।
विश्वर्क्षं तोयभं मूलं ज्येष्ठमैत्रविशाखभम्॥
स्वातीं षड्क्तौ चतुर्थ्यान्तु कर्तव्यं पन्नगाङ्कितं।
द्वारभाखे मघा याम्ये द्वारस्था कृत्तिका ततः॥
अश्वीशपूर्वाषाढ़ादिचिकपञ्चचतुष्टयम्।
रेवती पूर्वभाद्रेन्दोर्भानि शेषाणि भाखतः॥
उदयादिगता नाड्यो भन्नाः षष्ट्याप्तशेषके।
दिनेन्दुसुक्तयुक्तोऽसौ भवेत्तत्कालचक्रमाः॥
चक्रवत्साधयेत् सूर्यनक्षत्रशेषकालिकम्।
चन्द्र ऋक्षे यदार्केन्दू तदास्तं निखिलं निधिः॥
भानु ऋक्षे स्थितौ तौ चेत्तदा शून्यं न संशयः।
स्वस्वमे दितयं ज्ञेयं नास्ति किञ्चिद्विपर्यये॥
स्थितं न लभ्यते द्रव्यं चन्द्रे क्रूरग्रहान्विते।
पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽपकोनिधिः।
हेमतारञ्च ताम्रारं रत्नं कांस्यं तथा वपुः।
नागं चन्द्रे विजानीयाद्भास्करादिग्रहे स्थिते॥
मिश्रेमिश्रं भवेत्तद्वयं शून्यं दृष्टिविवर्जिते॥
हेमतारञ्च ताम्रारं पाषाणं लयमायसम्।
सूर्यादिग्रहगे चन्द्रे द्रव्यभाङ्गं प्रजायते॥
शुक्लराशंशमानेन भूमानं परिकल्पयेत्।
नीचे छिद्रं परे नीचे जलसंस्थो भवेन्निधिः॥
खोचस्थे तूर्द्धगं द्रव्यं नवांशकक्रमेण च।
परमोचे भवेत्तद्वै भित्तिसन्धिसंक्रमे।
अधिष्ठितं भवेद्द्रव्यं यत्र चन्द्रो यहान्वितः॥"*॥

कुलाकुलचक्रं यथा,—

"द्वितीया दशमी षष्ठी कुलाकुलसुदाहृतम्।
विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥
रविश्चन्द्रो गुरुः सौरिश्चतुरोऽप्याकुला मताः।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः॥
वरुणार्द्राभिजिन्मूलं कुलाकुलसुदाहृतम्।
कुलानि समधिष्ण्यानि शेषभान्यकुलानि च॥
तिथौ वारे च नक्षत्रे अकुले यायिनो जयः।

कुलाख्ये स्थायिनो नूनं सन्धिश्चेव कुलाकुले ॥"

अथ कुम्भचक्रम् ।

"कुम्भाकारं लिखेच्चक्रं तिर्य्यग्रेखाप्रभेदितम् ।
क्रमादूर्ध्वमधो लेख्यमेकैकान्तरभं क्रमात् ॥
भानुभानि लिखेत्तत्र रिक्तः पूर्णं इति क्रमात् ।
एवं राशिक्रमो लेख्यो रिक्तः पूर्णं इति द्विधा ॥
रिक्ते रिक्ता भवेद्यात्रा पूर्णे पूर्णा शुभावहा ॥"

अथ कोटचक्रम् ।

"अथातः सम्प्रवक्ष्यामि कोटचक्रमिहारघा ।
लोकोऽरिः कुरुते यत्र भूरिसैन्यपराजयम् ॥
प्रथमो धन्वयः कोटो द्वितीयो जलकोटकः ।
तृतीयो ग्रामकोटश्च चतुर्थस्तत्र गह्वरः ॥
पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः ।
सप्तमो वक्रभूमिष्ठो विषमाख्यस्तथाष्टमः ॥
ग्रामे साधयेत् खड्गिं जलस्थे वन्यमोक्षणम् ॥
ग्रामदुर्गेऽग्निदाहश्च प्रवेशं गह्वरे तथा ।
पर्व्वते स्थानभेदश्च भूतलं डामरे रणे ॥
वक्रस्थे कवियोगश्च विषमे स्थायियायिनौ ।
अतिदुर्गे कालकर्षी चक्रावर्त्तश्च टिङ्गनम् ॥
तुलावर्त्तश्च पद्माख्यो यत्नभेदश्च शार्ङ्गरम् ।
एतन्नामाष्टकं ज्ञेयं वर्गाष्टकक्रमेण च ॥
यस्य वर्गस्य ये भक्ष्या वर्ण्यास्तन्नामनागराः ।
योजयेत् तेन वर्गेण तद्वर्गास्तस्य भङ्गदाः ॥
अ गरुडः क मार्জারश्च सिंहश्च मुनीसुतः ।
त सर्पश्च प आखुश्च य गजः ग्र अजासुतः ॥
दुर्गवर्गस्य ये भक्ष्या वर्गानामस्थिता नराः ।
तद्वर्गे ते रणे त्याज्या न कर्त्तव्या गड़ाधिपाः ॥
अवर्गात् पञ्चमे स्थाने खड्गिभङ्गश्च जायते ।
अवर्गाद्यष्टकं ज्ञेयं पूर्व्वाद्यदिशां क्रमात् ॥
कोटचक्रं लिखेदादौ चतुरस्रं त्रिनाड़िकम् ।
कृत्तिकादीनि धिष्ण्यानि साभिजित्नि न्यसेद्बुधः ॥
बहिःकोटे तथा मध्ये कोटे मध्ये बहिर्बहिः ।
प्रवेशो निर्गमस्तत्र ज्ञातव्यः खरवेदिभिः ॥
बहिर्दादशभान्यत्र प्राकारे तारकाष्टकम् ।
दुर्गमध्ये तथा चाष्टौ मध्ये स्तम्भचतुष्टयम् ॥
कृत्तिकापुष्यसर्पेन्द्र मघास्वातिविशाखभे ।
अनुराधाभिजिद्विष्ण्वर्धनिष्ठात्रियमा बहिः ॥
ब्रह्मा पुनर्व्वसुभाग्यं चित्रा ज्येष्ठा तथोत्तराः ।
शतभं रेवती चैव प्राकारे तारकाष्टकम् ॥
नगरीद्रोत्तरा हस्तं मूलमाषाढपूर्व्वकम् ।
पूर्व्वोत्तरा तथा भद्रा मध्ये ऋक्षाष्टकं विदुः ॥
पूर्व्वे रौद्रं यमे हस्त पूर्व्वाषाढा च वारुणे ।
उत्तरे चोत्तरं भाद्रमेतत् स्तम्भचतुष्टयम् ॥
कृत्तिकाद्यं मघाद्यञ्च मैत्राद्यं वासवादिकम् ।
त्रीणि त्रीणि प्रवेशे च भानि द्वादश निर्गमे ॥
कृत्तिकादिरयं न्यासः सुबोधोऽयं प्रदर्शितः ।
दुर्गभादृगणनाच्च ग्रहैर्व्वाच्यं ततः फलम् ॥
चतुरस्रं तथावृत्तं त्रिकोणं वृत्तदीर्घकम् ।
अर्द्धचन्द्रं वर्त्तुलञ्च गोस्तनं धनुराकृति ॥
चतुरस्रे यथा न्यासो भूमिभागक्रमेण च ।
प्रवेशे निर्गमे कार्य्यं तथा वृत्तादिसप्तके ॥
दुर्गे भित्तिविभागेन ज्ञातव्यं धिष्ण्यमण्डलम् ।
बाह्यमे मध्यमे चैव यत्रस्थाः क्रूरखेचराः ॥
तत्र स्थाने कृते यत्ने हस्तिदुर्गं ससैनिकम् ।
ऊर्द्धदृष्टौ च भौमार्कौ केकरौ बुधभार्गवौ ॥
समदृष्टौ च जीवेन्दू शनिराहू ह्यधोदृशौ ।
गाड़ीचये वह्निमध्ये गर्भे नामादि लिख्यते ॥
कालपद्मौदग्रक्रेभ्यः परावक्रमविक्रया ।
वातुर्भे कालनाड़ीस्थे ऋक्षमध्यपदे स्थिते ॥
चौर्य्यभयोपतापाच्च रौद्रनार्य्या पुरग्रहः ।
क्रूरा गर्भे पुरं हन्ति प्राकारे खड्गिकारकाः ॥
बहिःस्था वैरके सैन्ये भङ्गदा नात्र संशयः ।
क्रूरा गर्भे शुभा बाह्ये ग्रहते निश्चितं पुरम् ॥
सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते ।
क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः ॥
भेदाङ्गको भवेद्दुर्गे विना युद्धेन गृह्यते ।
प्राकारे संस्थिताः क्रूरा मध्ये सौम्यग्रहा यदि ॥
दुर्गभङ्गे समुत्पन्ने भङ्गमायान्ति वैरकाः ।
मध्यनाड़ीस्थिताः सौम्याः क्रूरा बहिरवस्थिताः ॥
सैन्यावर्त्तो बहिः शत्रोर्विना युद्धेन जायते ।
प्राकारे पुरमध्ये च यदा क्रूरा अवस्थिताः ॥
सौम्या बाह्ये तदा दुर्गमयत्नेनापि सिध्यति ।
सौम्या मध्ये च कोटे च बाह्ये पापग्रहा यदि ॥
दैवैर्न्नाशादिभिः कोटो गृह्यते न कदाचन ।
प्राकारबाह्यगाः क्रूराः सौम्या मध्यगता यदि ॥
युद्धं प्राकारखड्गिभ्यं पुरभेदो न जायते ।
स्तम्भान्तरगता यस्य ग्रहाः सौम्याः शुभान्विताः ॥
भवेद्वृत्तस्य कोटस्य न नाशो विद्यते क्वचित् ।
स्तम्भान्तरगता यस्य रविराहुशनैश्चराः ॥
भूमिपुत्रश्च तस्यापि नाशः कोटस्य निश्चितम् ।
सौम्या बाह्ये तथा कोटे मध्ये क्रूरग्रहाः स्थिताः ॥
स्वयं दुर्गं प्रयच्छन्ति वैरकाय गड़ाधिपाः ।
बाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभनग्रहाः ॥
रिपुर्हयं स्वयं याति विना युद्धेन निश्चितम् ।
प्राकारस्था ग्रहाः क्रूरा बहिर्मध्ये शुभाः स्थिताः ॥
समयुद्धं भवेत्तत्र खड्गिपातो दिने दिने ।
सौम्याः क्रूरास्तथा चाष्टौ प्राकारमध्यबाह्यगाः ॥
एकस्या यत्र कुर्व्वन्ति संग्रामस्तत्र दारुणम् ।
गजाश्वरथभूपालाः सामन्ता मण्डलेश्वराः ॥
कुर्व्वन्ति च भटा युद्धमुभयोरपि सैन्ययोः ।
विचार्य्य कुरुते युद्धं कोटचक्रं खरोदयौ ॥
प्रवेशाधिष्ठिताग्ने चन्द्रे जीवपञ्चर्क्षसंस्थिते ।
निर्गते कविरयं दुर्गे कर्त्तव्यं वैरकैर्नृपैः ॥
कर्त्तव्यं कवियुद्धञ्च रात्रौ सुप्ते बहिर्जने ।
प्रवेशनिर्गमावुक्तौ सैनयोरुभयोरपि ॥
कवौ कोटे जयो युद्धे विपरीते पराजयः ।
विहाय प्रकृतं चारं वक्रं गच्छति चेद्गुरुः ॥
तदा प्राग्दिशि भङ्गः स्यात् रुद्धयोः पूर्व्वसैन्ययोः ।
भौमे च वक्रिते भङ्गो भवेत् दक्षिणतोऽपि च ॥
भवेत् पश्चिमतो भङ्गो भार्गवे वक्रगामिनि ।
बुधे वक्रगतौ चैव भङ्गश्चोत्तरतो भवेत् ॥
यदि तत्र स्थितौ स्यातां न जीवार्कग्रहेश्वरौ ॥
क्रूरो वक्री प्रवेशर्क्षे पुरमध्ये स्थितो यदा ।
तदा कोटविनाशाय कोटस्थो बाह्यभूपतेः ॥

प्रवेशबाह्यगे क्रूरे वक्रे स्वसैन्यविग्रहः ।
दुर्भिक्षं मृत्युभङ्गौ च वह्निः सैन्यस्य जायते ॥
निर्गमर्क्षे वहिःस्थे च क्रूरो वक्रं करोति चेत् ।
प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च ॥
पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः ।
दुर्गं त्यक्त्वा तदा काले दुर्गस्थः प्रपलायते ॥
यथा क्रूरैस्तथा सौम्यैः फलं ग्राह्यं विपर्य्ययात् ।
मिश्रैर्मिश्रं विजानीयात् कोटचक्रं न संशयः ॥
दुर्गसैन्यं तथैवोक्तं प्राकारे मध्यभागगम् ।
नीचस्थं वैरकं सैन्यं ज्ञातव्यं खरवेदिभिः ॥
कोटे कोटाधिपे नीचौ विग्रहौ भौमभास्करौ ।
समस्थौ च पुरे सर्व्वे उच्चस्थौ निष्फलौ च तौ ॥
प्राकारं वैरकं हन्ति उच्चस्थौ राहुसूर्य्यजौ ।
प्राकारस्थौ बहिःसैन्यं नीचस्थौ तौ च निष्फलौ ॥
सितेऽर्कपुत्रे तु रवौ गुरावन्यसितेऽपि च ।
वक्रिता नैव गृह्णन्ति स्युर्विधातुं कोटभेदनम् ॥
समदृष्ट्या गुरुश्चन्द्रः पश्यतः सर्व्वतः सदा ।
तिर्य्यक्स्थितौ बुधशुक्रौ फलदौ नात्र संशयः ॥
ऊर्द्धदृष्टिगते कुर्य्यात् टिङ्गनीयन्त्रवाहनम् ।
समे च साधयेत् खड्गिं रन्ध्रपातमधोमुखे ॥
कोटभं सुखपृच्छस्थं राहोर्यदि गलादिके ।
कोटश्च भज्यते क्षिप्रं पूर्व्वोक्तविधिना चिरात् ॥
दुर्गमध्यगते सूर्य्ये जलग्रोषः प्रजायते ।
चक्रे भङ्गः कुजे दाहो बुधे बुद्धिबला नराः ॥
वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम् ।
चलचित्ता नराः शुक्रे मृत्युरोगौ शनैश्चरे ॥
राहौ मध्यगते दुर्गे भङ्गो भेदो महद्भयम् ।
केतौ मध्यगते तत्र विषादः स्याद्गड़ाधिपे ॥
सौरिश्च वाक्पतिश्चैव भवेतां दिशि संस्थितौ ।
यस्यां तया स कोटस्तु भज्यते नात्र संशयः ॥
इत्येवोक्तं फलं मध्ये एवं बाह्यगते ग्रहे ।
उपग्रहसमायोगादत्यन्तं प्राणसंशयः ॥
अकारादिस्वराः पञ्च पूर्व्वाशादिचतुष्टये ।
मध्यान्ताः सप्तमाक्षेखा अन्तस्थाः खड्गिकारकाः ॥
दुर्गनाम्नः स्वरो यस्य बालो वास्तमितोऽपि वा ।
तद्दिने प्रारभेत् युद्धं दुर्गं सिध्यति नान्यथा ॥"

इति कोटचक्रम् ॥

इति समयाण्टतम् ॥* चक्रान्तराणि तत्तच्छब्दे द्रष्टव्यानि ॥ (चित्रकाव्यविशेषः । ग्रन्थालङ्कारभेदः । अस्य च तथाविधलिपिसन्निवेशवशेन चमत्कारिविधायिनामपि वर्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन चमत्कारिविधायिभिर्वर्णैरभेदेन उपचारत्वात् ग्रन्थालङ्कारत्वम् । उदाहरणं यथा, काव्यालङ्कारे । ५ । ६—१३ ।

"माराशिशुक्ररामेभसुखेशसारंहसा ।
साराश्वसत्त्वा नित्यं तदर्तिहरणक्षमा ॥
माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा ।
मान्याथ सीमारामाणां ग्रामे दिग्धाद्रुमादिभा ॥
मायाविनं महाद्रावा रसायातं ससद्रुमा ।
जातलीला यथा सारवाचं महिषमावधीः ॥

मामभीदा शरण्यासुतसदेवारुक्प्रदा च धीः।
धीरा पवित्रा सन्त्रासात्त्रासीष्टा मातरारम ॥
मानसापरुषं लोकदेवीं सदस सत्रम।
मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम् ॥
मा सुधो राजस स्वासूंल्लोककूटेग्रदेवताम्।
तां ग्रिवावाग्रितां सिद्धगाथासितां हि स्तुतां
स्तुहि ॥
माङ्घिवाखे रथोऽन्या तु सों डु नानेवमत्र हि।
हिमातङ्कादिवासुं च कं कम्पिनमुग्रद्गुतम् ॥
मातङ्गानङ्गविधिनासुना पादं तसुद्यतम्।
तङ्गयित्वा ग्रिरस्यस्य निपात्याहन्ति रंहसा ॥”

अथ चक्रे वर्णविन्यासक्रमः।



चक्रः, पुं, (करोति अस्फुटशब्दम्। कृ + बाहुलकात् कः ततो निपातनात् द्वित्वे साधुः।) चक्रवाकपक्षी। इत्यमरः। २। ५। २२ ॥

चक्रकः, त्रि, (चक्र इव कायति प्रकाशते इति। कै + कः।) तर्कविशेषः। तस्य लक्षणं यथा। स्वापेक्षगीयापेक्षितसापेक्षितत्वनिबन्धनप्रसङ्गत्वम्। अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ज्ञाप्या। तत्राद्या यथा। एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजन्यज्ञानभिन्नं स्यात्। द्वितीया यथा। घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजन्यभिन्नः स्यात्। तृतीया यथा। घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत इति। इति तर्कग्रन्थम् ॥ (वेदान्तदर्शनमते तु “स्वग्रहसापेक्षग्रहकत्वं आत्माश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वं अन्योन्याश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहकत्वम् चक्रकम् ॥”)

चक्रकारकं, क्ली, (चक्रं चक्रवदाकारं करोत्यात्मनः वक्रनखाकृत्या इति शेषः। यद्वा चक्रं चक्राकृतिरेखादिकं करोतीति। कृ + खुल्।) व्याघ्रनखनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२६ ॥

चक्रकुल्या, स्त्री, (चक्रस्य चक्राख्यौषधीलताकृत्यभेदस्य कुल्या इव।) चित्रपर्णी। इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥ (चित्रपर्णिकाशब्दे ज्ञेयमस्या विवरणम् ॥)

चक्रगजः, पुं, (चक्रेण चक्राख्यया गण्यते ग्रन्थ्यते। यद्वा चक्रे चक्राकृतिदद्रुव्याधौ गज इव। गज इव दद्रुरोगमर्दक इत्यर्थः।) चक्रमर्दवृक्षः। इति राजनिर्घण्टः ॥

चक्रगण्डुः, पुं, (चक्रमिव वर्त्तुलाकारो गण्डुः।) वर्त्तुलाकारोपाधानम्। इति चतुरग्रन्थार्थे हेमचन्द्रः ॥ गोलबालिश इति गालबालिश इति च भाषा ॥

चक्रगुच्छः, पुं, (चक्रवद्गुच्छः पुष्पगुच्छोऽस्मिन् अस्य वा।) अशोकवृक्षः। इति शब्दचन्द्रिका ॥

चक्रजीवकः, पुं, (चक्रेण कुम्भाद्युत्पादनयन्त्रविशेषेण जीवतीति। जीव + ण्वुल्।) कुम्भकारः। इति हेमचन्द्रः ॥

चक्रदंष्ट्रः, पुं, (चक्रं चक्राकृतिर्दंष्ट्रायां यस्य चक्रमिव दंष्ट्रा यस्येति वा।) शूकरः। इति राजनिर्घण्टः ॥

चक्रदन्ती, स्त्री, (चक्रमिव दन्तरूपमिव च इत्येके।) दन्तीवृक्षः। इति राजनिर्घण्टः ॥

चक्रदन्तीबीजं, क्ली, (चक्रदन्त्या बीजम्।) जयपालः। इति राजनिर्घण्टः ॥

चक्रधरः, पुं, (धरतीति। धृ + अच्। चक्रं सुदर्शनाख्यं द्वादशारादिलक्षणलक्षितमस्त्रम्। तस्य धरः। चक्रं धरति धारयतीति वा।) विष्णुः। (यथा, रघुः। १६। ५५।

“विगाहितुं श्रीमदिमातुरूपं
प्रचक्रमे चक्रधरप्रभावः ॥”

चक्रं फणा तस्य धरः।) सर्पः। (यथा, महाभारते। ३। ८५। ७०।

“अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रधरास्तथा ॥”)

श्यामलालिनि त्रि। इति मेदिनी ॥ (यथा, महाभारते। ३। ८५। ७६।

“यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥”)

चक्रनखः, पुं, (चक्रमिव नखः नखाकृत्यग्रविशेषोऽस्यस्य इति। “अर्श आदिभ्योऽच्” इत्यच्।) व्याघ्रनखनामगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

चक्रनामा, [न्] पुं, (चक्रं सरघानिर्म्मितमधुचक्रं तन्नामेव नामास्य।) माक्षिकधातुः। इति हेमचन्द्रः ॥

चक्रनायकः, पुं, (चक्रं कर्षणजन्यचक्राकाररेखादिकं नयतीति। नी + ण्वुल्।) व्याघ्रनखः। इति राजनिर्घण्टः ॥ (चक्रस्य नायके त्रि ॥)

चक्रपद्माटः, पुं, (चक्रं चक्रवत् यत् पद्मं दद्रुरोगः तत्र अटति तं रुद्गातीत्यर्थः।) चक्रमर्दकवृक्षः। इति शब्दरत्नावली ॥

चक्रपरिव्याधः, पुं, (चक्रं दद्रुरोगं परिविध्यतीति। परि + व्यध + अण्।) आरग्वधवृक्षः। इति वैद्यकम् ॥

चक्रपर्णी, स्त्री, (चक्राकारं पर्णमस्या इति। जातौ संज्ञायां वा ङीष्।) चक्रकुल्यालता। इति शब्दचन्द्रिका ॥

चक्रपाणिः, पुं, (चक्रं सुदर्शनाख्यं पाणौ यस्य। अधिकरणबहुव्रीहिसमासः।) विष्णुः। इत्यमरः। १। १। २० ॥ (यथा, विष्णोरष्टोत्तरशतनामकीर्त्तने।

“वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः ॥”)

चक्रपादः, पुं, (चक्रं पाद इवास्य।) रथः। (चक्रवत् पादा यस्य।) हस्ती। इत्यजयपालः ॥

चक्रपुष्करिणी, स्त्री, (चक्रेण विष्णुचक्रेण खनिता पुष्करिणी।) मणिकर्णिका। इति काशीखण्डम् ॥

चक्रफलं, क्ली, (चक्राकारं फलं फलकमस्य।) अस्त्रविशेषः। तत्पर्य्यायः। अङ्गनम् २। इति त्रिकाण्डशेषः ॥

चक्रबान्धवः, पुं, (चक्रस्य पद्मस्य बान्धवः बन्धुः।) सूर्य्यः। इति हेमचन्द्रः ॥

चक्रभृत्, [द्] पुं, (चक्रं बिभर्त्तीति। भृ + क्विप्।) विष्णुः। इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम्। १। ३८।

“चक्रभृद्विजयेग्रादिकेग्रवे गानभूषिते ॥”)

चक्रभेदिनी, स्त्री, (चक्रं चक्रवाकमिथुनं भिनत्ति पृथक् करोतीति। भिद् + णिनिः। ततो ङीप्। निग्रायां हि चक्रवाकयोर्विग्रोजनं भवतीति लोकप्रसिद्धम्।) रात्रिः। इति त्रिकाण्डशेषः ॥

चक्रमण्डली, [न्] पुं, (चक्राकारेण यन्मण्डलं तदस्यास्य इति इनिः।) अजगरसर्पः। इति हेमचन्द्रः ॥

चक्रमर्दः, पुं, (चक्रं चक्राकारदद्रुरोगं रुद्गातीति। रुद् + “कर्म्मण्यण्।” ३। २। १। इत्यण्।) क्षुपविशेषः। चाकुन्दिया इति भाषा ॥ तत्पर्य्यायः। एडगजः २ अडगजः ३ गजाख्यः ४ मेघाख्यः ५ एडहस्ती ६ व्यावर्त्तकः ७ चक्रगजः ८ चक्री ९ पुन्नाटः १० पुन्नाडः ११ विमर्दकः १२ दद्रुघ्नः १३ तर्व्वटः १४ चक्राह्वः १५ शुकनाशनः १६ दृढ़बीजः १७ प्रपुन्नाड़ः १८ खर्ज्जुघ्नः १९। इति राजनिर्घण्टः ॥ चक्रमर्दकः २० पद्माटः २१ उरुगाख्यः २२। इत्यमरः। २। ४। १४७ ॥ प्रपुन्नड़ः २३ प्रपुनाड़ः २४ उरुगाचः २५। इति तट्टीका ॥ अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। मेदोवातकफकण्डूकुष्ठदद्रुपामादिदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ लघुत्वम्। स्वादुत्वम्। रूक्षत्वम्। पित्तश्वासक्षमिनाशित्वम्। कृमित्वम्। हिमत्वञ्च। तत्फलगुणाः। उषातिकुष्ठकण्डूदद्रुविषानिलगुल्मकासक्रिमिश्वासनाशित्वम्। कटुत्वञ्च। इति भावप्रकाशः ॥ (अस्य गुणाः पर्य्यायाश्च यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।

“चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेघलोचनः।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि ॥
चक्रमर्दो लघुः स्वादु रूक्षः पित्तानिलापहः।
कृमौ हिमः कफश्वासकुष्ठदद्रुक्रिमौन् हरेत् ॥
हन्त्युष्णान्ततफलं कुष्ठकण्डूदद्रुविषानिलान्।
गुल्मकासक्रिमिश्वासनाशनं कटुकं स्मृतम् ॥”)

चक्रमर्दकः, पुं, (चक्रं दद्रुरोगविशेषं रुद्गातीति। रुद् + ण्वुल्।) चक्रमर्दः। इत्यमरः। २। ४। १४७ ॥ (स्त्रियान्तु काम्नि अत इत्वञ्च।

राजमालविशेषः। यथा, राजतरङ्गिण्यां। ४।२१३।
"ललितादित्यभूभर्तुर्वल्लभा चक्रमर्दिका॥")

चक्रयानं, क्ली, (चक्रेण अन्वितं यानम्।) रथादि। चक्रयुक्तवाहनम्। इत्यमरटीकायां रायमुकुटादयः॥

चक्ररदः, पुं, (चक्रवद्दृत्तो रदः दन्तोऽस्येति।) शूकरः। इति त्रिकाण्डशेषः॥

चक्रलक्ष्मा, स्त्री, (चक्रे चक्राकारे दर्व्यां मण्डलाकारे कुठादौ वा लक्ष्यं आरोग्याय चिह्नं आरोग्यसूचनमित्यर्थः यस्याः।) गुडूची। इति रत्नमाला॥ (चक्रं लक्ष्यं यस्य इति व्युत्पत्त्या। रथे विष्णौ च पुं॥)

चक्रलताम्रः, पुं, (चक्र+रक्। चक्रः ह्लादिजनकः लताम्रः यत्र यस्य वा।) बहुरसालवृक्षः। इति राजनिर्घण्टः॥

चक्रला, स्त्री, (चक्रं चक्राकारं लाति आदत्ते चक्राकारेण वर्त्तत इति यावत्। ला+कः ततष्टाप्।) उच्चटा। इत्यमरः। २। ४। १६०॥

चक्रवर्त्तिनी, स्त्री, (चक्राकारेण वर्त्तते इति। वृत्+णिनिः।) जनीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १५३॥ अलक्तकः। जटामांसी। इति राजनिर्घण्टः॥ (चक्रं पृथ्वीचक्रं वर्त्तते अस्यां यद्वा चक्रं सेनाचक्रं अग्नेयव्यूहरचनयाधिष्ठितं सेनाबृन्दं वर्त्तयितुं शीलमस्या इति। सर्व्वभूमेरीश्वरी॥ चक्रेषु समूहेषु वर्त्तते या। यूथेश्वरी। यथा, कथासरित्सागरे। २०। ११४।
"एवं बाल्येऽपि जाताहं डाकिनीचक्रवर्त्तिनी॥")

चक्रवर्त्ती, [न्] पुं, (चक्रं पद्माकारमुभचिह्नं करे वर्त्तते यस्य। वृत्+णिनिः। यद्वा चक्रं पृथ्वीचक्रं तेन वर्त्तते इति। वृत+णिनिः।) समुद्रपरिवृतायाः सर्व्वभूमेरीश्वरः। तत्पर्य्यायः। सार्व्वभौमः २। इत्यमरः। २। ८। २॥ (यथा, शुक्रनीतौ १ म अङ्के।
"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")
वास्तुकम्। इति राजनिर्घण्टः॥ (श्रेष्ठः। यथा, गीतगोविन्दे। १। २।
"वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती॥"
"चारणचक्रवर्त्ती नर्त्तकश्रेष्ठः।" इति तट्टीकायां चैतन्यदासः। यद्वा पद्मावती महालक्ष्मीः राधा तस्याश्चरणचारणे परिचर्य्यायां यच्चक्रं मण्डलं तत्र वर्त्तते इति व्युत्पत्त्या वैष्णवसम्प्रदायविशेषः॥)

चक्रवाकः, पुं क्ली, (चक्र इत्याख्यया उच्यतेऽसौ। वच+कर्म्मणि घञ्। ततो "व्यञ्जादीनाञ्च।" ७। ३। ५३। इति कुत्वम्।) पक्षिविशेषः। चकाचकि इति भाषा॥ (यथा, महाभारते। १। ६६। ५६।
"धृतराष्ट्रौ तु हंसांश्च जलजांश्च सर्व्वशः।
चक्रवाकांश्च भद्रं ते जनयामास वै तु॥")

तत्पर्य्यायः। कोकः २ चक्रः ३ रथाङ्गाह्वयनामकः ४। इत्यमरः। २। ५। २२॥ भूरिप्रेमा ५ इष्टचारी ६ सहायः ७ कान्तः ८ कामी ९ रात्रिविश्लेषगामी १० रामावक्षोजोपमः ११ कासुकः १२। अस्य मांसगुणाः। लघुत्वम्। स्निग्धत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (यथा, चरके सूत्रस्थाने २७ अ।
"चक्रवाकास्थान्ये च खगाः सन्त्वम्बुचारिणः।")

चक्रवाटः, पुं, (चक्रेण चक्राकारेण वाटः वेष्टनं यस्य।) क्रियारोधः। पर्य्यन्तः। प्रखातरुः। इति मेदिनी। टे। ६२॥

चक्रवाड़, क्ली, (चक्रवद् वाड़ते वेष्टयतीति। वाड़+अच्।) चक्रवालम्। इत्यमरटीकायां भरतः॥ पर्व्वतविशेषे पुं। इति मेदिनी। डे। ३८॥

चक्रवात, पुं, (चक्रवद्वातः। ह्रस्वपार्श्वादीत्वादाय चक्राकारेण भ्राम्यति यो वायुरिति यावत्।) भ्रमिवातः। घूर्ण्णवातास इति भाषा॥ तत्पर्य्यायः। वात्या २। यथा, भागवते। १०। ७। २०।
"दैत्यो नाम्ना तृणावर्त्तः कंसभृत्यः प्रचोदितः।
चक्रवातस्वरूपेण जहारासीनमर्भकम्॥"

चक्रवाल, क्ली, (चक्रमिव वाड़ते वेष्टयतीति। वाड़+अच्। ह्रस्य लत्वम्।) मण्डलाकारेण परिवृतं समूहमात्रम्। मण्डलाकारो दिक्समूहः इति माधवी। इति भरतः॥ तत्पर्य्यायः। मण्डलम् २। इत्यमरः। १। ३। ६॥ (यथा, भागवते। ५। १८। १४।
"हित्वा यदं संसृतिचक्रवालं
वृसिंहपादं भजतानुतोभयम्॥")

चक्रवाल, पुं, (चक्रेण चक्राकारेण वलते लोकालोकौ परिवेष्ट्य विराजते इत्यर्थः। वल+बाहुलकात् घञ्। अस्य पर्व्वतस्य लोकालोकपरिवेष्टनकारितया विराजमानत्वात्तथात्वम्।) लोकालोकपर्व्वतः। इत्यमरः। २। ३। २॥ (मनुष्यादीनां मण्डलाकारेण स्थितिः। यथा, हरिवंशे। ७६। ३५।
"एवं स लक्ष्यो गोपीनां चक्रवालेरलङ्कृतः।
शारदीषु सचन्द्रासु निशासु सुसुदे सुखी॥")

चक्रवृद्धिः, स्त्री, (चक्रमिव चक्रभ्रमणमिव वृद्धिः उत्तरोत्तरं वृद्धेरपि वृद्धिरित्यर्थः।) यत्र वृद्धिरूपं धनं दातुमग्नोऽधमर्णः सवृद्धिकमिदं दास्यामीतिस्वीकरोति तत्र या वृद्धिः सा। सुदेर सुद इति भाषा। यथाह नारदः।
"वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता॥"
(तथाच मनुः। ८। १५३।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या।"
"कायिका कायसंयुक्ता मासव्याह्वा च कालिका।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना सता॥"
इति तट्टीकायां कुल्लूकभट्टधृतवृद्धहारीतवचनम्।)

चक्रव्यूहः, पुं, (चक्रवत् मण्डलाकारेण रचितो व्यूहः रचनयाधिष्ठापितः सेनासमूह इति यावत्।) युद्धार्थमण्डलाकारेण सैन्यरचना। (एतस्य रचनालक्षणादिचक्रशब्दे द्रष्टव्यः॥

व्यूहोऽयमभिमन्युवधेषुणा भगवता द्रोणाचार्य्येणाभिकल्पितः। यथा, महाभारते। ७। ३३। १२—२३।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अवस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्चसः।
सङ्गतो राजपुत्राणां सर्व्वेषामभवत्तदा॥
लताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्तास्त्रधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः सगुविग्राः सुवाससः॥
सहिताः पर्य्यधावन्त काङ्क्षिणं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्द्रुघनिनाम्॥
पौत्रं तव पुरस्कृत्य लक्ष्यं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं स्पर्द्धमानाश्चाप्यन्योन्यस्य हिते रताः।
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः॥
कर्म्मदुःशासनपदैर्वृतो राजा महारथैः।
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः॥
चामरव्यजनाग्रैश्च दीप्यन्निव भास्करः।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः॥
सिन्धुराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः।
सिन्धुराजस्य पार्श्वस्था अन्वत्यामपुरोगमाः॥
सतास्तव महाराज! त्रिंशच्छतदशसन्निभाः।
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य वराजन्त महारथाः॥")

चक्रशल्या, स्त्री, (चक्रवत् चक्राकारेण वा शल्या यत्र।) काकतुण्डी। श्वेतशुङ्गा। इति राजनिर्घण्टः॥

चक्रश्रेणी, स्त्री, (चक्रमिव चक्राणां वा श्रेणी यत्र।) अजशृङ्गीवृक्षः। इति रत्नमाला॥

चक्रसंज्ञं, क्ली, (चक्रेण वैद्यकयोगचक्रेण संज्ञायते इति। सं+ज्ञा+कः। चक्रस्य संज्ञा संज्ञा यस्य वा।) वङ्गम्। इति हेमचन्द्रः॥

चक्रसंवरः, पुं, (चक्रं अविद्याकामकर्म्मादिजन्यविषयवासनासमूहं इन्द्रियाणां समूहं वा संवृणोति संगमयतीति। सं+वृ+अच्।) बुद्धभेदः। तत्पर्य्यायः। हेरुकः २ हेवकः ३ देवः ४ वज्रकपाली ५ निशुम्भी ६ अग्निग्रीवेश्वरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

चक्रा, स्त्री, (चक्र ह्रस्वौ+रक्। ततष्टाप्।) नागरमुस्ता। कर्कटशृङ्गी। इति राजनिर्घण्टः॥

चक्राङ्की, स्त्री, (चक्रेण चक्राकारेण अङ्कते गच्छतीत्यर्थः। अकि गतौ+अच् ततो ङीष्।) हंसी। इति शब्दरत्नावली॥ चक्राकी च पाठः॥

चक्राङ्गः, पुं, स्त्री, (चक्रेण चक्राकारेण अङ्गति गच्छतीति। अङ्ग+अच्) हंसः। इत्यमरः। २। ५। २३॥ (यथा, महाभारते। ८। ४१। २१।
"इदमूचुःस चक्राङ्गा वचः काकं विहङ्गमाः॥"
चक्रमङ्गमस्येति व्युत्पत्त्या रथोऽपि॥ (चक्र) वाकः। यथा, मनुः। ५। १२।
"कलविङ्कं शुकं हंसं चक्राङ्गं ग्राम्यकुक्कुटम्॥")

चक्राङ्गा, स्त्री, (चक्रमिवाङ्गमस्यास्याः इति। "अर्शआदिभ्योऽच्।" ५।२।१२७। इत्यच् ततष्टाप्।) सुदर्शना लता। इति रत्नमाला॥

चक्राङ्गी, स्त्री, (चक्राङ्ग+जातौ ङीष्।) कटुरोहिणी। इति मेदिनी। गे। ३५॥ (अस्याः पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"कट्वी तु कटुका तिक्ता शल्यभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥")
हंसी। इति शब्दरत्नावली॥ झिल्लीमोचिका। इति चिकित्साशास्त्रे॥ मञ्जिष्ठा। इति राजनिर्घण्टः॥ कर्कटशृङ्गी। इति रत्नमाला॥

चक्राटः, पुं, (चक्रं धूर्त्ततालं शाल्मलिसम्बन्धं आलम्ब्य अटतीति। अट्+अच्।) विधवेदः। धूर्त्तः। दीनारः। इति मेदिनी। टे। ४२॥

चक्राणः, त्रि, (चक्रे कर्म्मादिकं इति। कृ+कानच् प्रत्ययः। ततो धातौ अभ्यस्त णत्वम्।) कृतवान्। कर्म्मवाच्ये कृतः। भाववाच्ये स्त्री कृतम्। इति सुग्धबोधव्याकरणं तट्टीका च॥

चक्राधिवासी, [न्] पुं, (चक्र ङ्यौ+रक्। चक्रं ङ्यञ्जनकं अधिवासवतीति। अधि+वस्+घिच्+णिनिः।) नागरङ्गवृक्षः। इति चिकित्साशास्त्रे॥

चक्रावर्त्तः, पुं, (चक्राकारः आवर्त्तः।) घूर्णनम्। इति हेमचन्द्रः॥

चक्राक्षः, पुं, (चक्रं इत्याख्या संज्ञा यस्य।) चक्रमर्दः। इति राजनिर्घण्टः॥ (चक्रवाकपक्षिविशेषः। यथा, भागवते। ३।१०।२४।
"हंससारसचक्राङ्गकाकोलूकादयः खगाः॥"
यथाच, हारीते प्रथमस्थाने ११ अध्याये।
"चक्राङ्गोऽतिकषायश्च गुरुर्जननो दृष्योऽतिरुच्योरुष्टुः॥")

चक्रिः, पुं, (करोतीति। कृ+"आदृगमहनजनः किकिनौ लिट् च।" ३।२।१७१। इति किन्। स च लिड्वत्।) कर्म्मा। इति सुग्धबोधम्॥ (यथा, ऋग्वेदे। १।६।२।
"चक्रिं विश्वानि चक्रये।"
"चक्रये पुरुषार्थैकरचनायै॥" इति दयानन्दभाष्यम्॥)

चक्रिका, स्त्री, (चक्रं चक्रवद्गोलाकारो विद्यते अस्या वा। चक्र+ठन् टाप् च।) जातु। इति राजनिर्घण्टः॥ (यथा, राजतरङ्गिण्याम्। ४।२०६।
"अथोभयधनादानि भल्लचक्रिकया समम्॥")

चक्री, [न्] पुं, (चक्रं सुदर्शनाख्यं भगवत्तत्त्वालङ्कारमिति यावत् अस्त्यस्येति। चक्र+इनिः।) विष्णुः। (यथा, महाभारते। १३।१४६।११०।
"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः॥")
चक्रं ग्रामचक्रं ग्रामसमूह इत्यर्थः अधिकारितयास्यास्य इति इनिः।) ग्रामणीलिकः। (चक्रं चक्राकारचिह्नविशेषोऽस्यास्य।) चक्रवाकः। (चक्रं घटादिनिर्म्माणकरणचक्रविशेषः। सोऽस्यास्य इति।) कुलालः। (चक्रं प्रभा अस्यास्य इति।) सर्पः। कृष्णकः। इति विश्वमेदिन्यौ॥ अजः। तैलिकभेदः। इति शब्दरत्नावली॥ चक्रवर्त्ती। इति हेमचन्द्रः॥ चक्रमर्दः। तिनिशः। बालनखः। काकः। खरः। इति राजनिर्घण्टः॥ (कुलालतैलिकराजचक्रवर्त्त्यर्थे प्रमाणं यथा आर्य्यासप्तशत्याम्। ५६२।
"खेदमयान् पीड़यतः किं चक्रेणापि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री॥")
चक्रविशिष्टे त्रि॥ (चक्रयुक्तरथादियानारूढः। यथाह मनुः। २।१३८। [स्त्रियाः॥"
"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
"चक्रिणः चक्रयुक्तरथादियानारूढस्य॥"
इति तट्टीकायां कुल्लूकभट्टः॥")

चक्रीवान्, [त्] पुं, स्त्री, ("आवन्नीवद्दशोरुचक्रीवदिति।" ८।३।१२। चक्रशब्दस्य चक्रीभावः ततो निपातनात् साधुरिति।) गर्हभः। इत्यमरः॥ रावणविशेषः। इति सिद्धान्तकौमुदी॥

चक्रुः, पुं, (करोतीति। कृ+"कृञश्च।" उणा। १।२२। इति कुः।) कर्म्मा। इति सिद्धान्तकौमुदी॥

चक्रेश्वरी, स्त्री, (चक्राणां जिनविशेषाणां ईश्वरी अधिष्ठात्री।) जिनानां विद्यादेवीविशेषः। इति हेमचन्द्रः॥

चक्ष, ञ ङ वदे। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) वदः कथनम्। (दर्शने च इति केचित्।) ञ ङ, आचष्टे धर्म्मं धीरः। तृतीयस्वरादुत्तस्य इति प्राचः। इकार उच्चारणार्थ इति केचित्। छन्दसि शुणागमार्थ इति केचित्। वेदेषूच्चारणार्थ इति केचित्। अत्र वहश्वसु तृतीयस्वरो भमकारितः किन्तु चतुर्थस्वरादुत्तरोऽयं निष्ठायां इमनिधेधार्थः तेन वर्ज्जनार्थे खाणकसाणादेश्चयोरप्राप्तौ आचष्टं वर्ज्जनमित्याहुः। इति दुर्गादासः॥

चक्ष्यं, क्ली, (चक्ष्यते कथ्यते मद्यपानाय मद्यपानेन सह वा। चक्ष+क्युट्। यद्वा, चक्ष्यते भक्ष्यते मद्यमनेनेति। चक्ष+क्युट् निपातनात् कुत्वागमश्च।) मद्यपानरोचकभक्ष्यद्रव्यम्। इति हेमचन्द्रः। ३।५।७१॥ (चक्ष+भावे क्युट्।) कथनम्। (दर्शनम्। यथा, ऋग्वेदे। १।१३।५।
"स्तृणीत बर्हिरासदे वृतदृष्टं मनीषिणः।
यत्रान्तस्तस्य चक्ष्यम्॥")

चक्षाः, [स्] पुं, ढक्ष्यति। इति चिकित्साशास्त्रे॥ उपाध्यायः। इत्युणादिकोषः॥ (क्ली, दर्शनम्। यथा, ऋग्वेदे। १।७।३।
"इन्द्रो दीर्घाय चक्षस आ सूर्य्यं रोहयद्दिवि।
वि गोभिरद्रिमैरयत्॥")

चक्षुः, [स्] क्ली, (चष्टे प्रकाशयतीति। चक्ष+"चक्षेः शिच्च।" उणा। २।१२०। इति उसिः स च शित्। शित्त्वात् खाणादेराभावः।) दर्शनेन्द्रियम्। तस्य स्थानं उद्भूतरूपम् १ महद्द्रव्यम् २ पृथक्त्वम् ३ संख्या ४ विभागः ५ संयोगः ६ परत्वम् ७ अपरत्वम् ८ स्नेहः ९ द्रवत्वम् १० संस्कारपरिमाणम् ११ योग्यवृत्तिक्रिया १२ योग्यवृत्तिजातिः १३ योग्यवृत्तिसमवायः १४। अस्येन्द्रियसहकारिणः आलोकः उद्भूतरूपं महत्त्वम्। इति भाषापरिच्छेदः॥ अस्याधिष्ठात्री देवता सूर्य्यः। इति श्रीभागवतम्। तत्पर्य्यायः। लोचनम् २ नयनम् ३ नेत्रम् ४ ईक्षणम् ५ अक्षि ६ दृक् ७ दृष्टिः ८। इत्यमरः। २।६।८३॥ अम्बकम् ९ दर्शनम् १०। इति हेमचन्द्रः॥ तपनम् ११। इति राजनिर्घण्टः॥ विलोचनम् १२ दृशा १३ वीक्षणम् १४ प्रेक्षणम् १५ देवदीपः १६ देवदीपः १७ दृक्षिः १८ दृशी १९। इति शब्दरत्नावली॥ *॥ यथा, कर्म्मलोचने।
"प्राक्षिप्यां न सृणेश्चक्षुश्चक्षुषी नैकपाक्षिणा।
चक्षुः परहिताकाङ्क्षी न सृणेरेकपाक्षिगा॥"
मेषशृङ्गीवृक्षः। इति रत्नमाला॥

चक्षुर्व्वरणं, क्ली, (चक्षुर्ज्योतिर्वरणमनेनेति। वृ+ल्युट्। चक्षुर्ज्योतिरुद्बोधकारित्वादेव तथात्वम्।) मेषशृङ्गीवृक्षः। इति रत्नमाला॥

चक्षुःश्रवाः, [स्] पुं, (चक्षुर्नयनमेव श्रवः श्रवणं यस्य।) सर्पः। इत्यमरः। १।८।७॥ (यथा, नैषधे। १।२८।
"इति स्म चक्षुःश्रवसां प्रिया नले
सुहृन्ति निन्दन्ति हृदा तदालयः॥"
अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"आशुग्राहीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः।
चक्षुःश्रवा दन्दशूको गूढ़पात् पन्नगोरगाः॥")

चक्षुष्यं, क्ली, (चक्षुषे लोचनाय हितम्। चक्षुस्+"शरीरावयवात् यत्।" ५।१।६। इति यत्।) प्रपौण्डरीकम्। अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"प्रपौण्डरीकं चक्षुष्यं श्वेतं श्वेतपुष्पकम्॥"
सौवीराञ्जनम्। खर्परीतुत्थम्। इति राजनिर्घण्टः॥

चक्षुष्यः, पुं, (चक्षुषे हितः। "शरीरावयवात् यत्।" ५।१।६। इति यत्।) केतकवृक्षः। पुण्डरीकवृक्षः। इति मेदिनी। ये। ८२॥ श्वेताञ्जनवृक्षः। इति राजनिर्घण्टः॥ रसाञ्जनम्। इति हेमचन्द्रः॥

चक्षुष्यः, त्रि, (चक्षुषे हितः। चक्षुस्+यत्।) प्रियदर्शनः। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ३। ४६५।
"धिया भाग्यानुगामिन्या चेष्टमानो न याचितम्।
अभूत् सर्व्वस्य चक्षुष्यः स तु दुर्ल्लभवर्द्धनः॥"
चक्षुषः। इति विश्वः। यथा, माघे। ८।५७।
"चक्षुष्यः खलु महतामभ्रेरलङ्घ्यः॥"
"चक्षुषि भवश्चक्षुष्यः प्रियोऽभिजन्यः।" इति तट्टीकायां मल्लिनाथः॥) चक्षुर्हितः। इति मेदिनी। ये। ८२॥ (यथा, सुश्रुते सूत्रस्थाने २० अध्याये।

"दक्षिणो मारुतः श्रेष्ठचक्षुष्यो बलवर्द्धनः।")

चक्षुष्या, स्त्री, (चक्षुष्य + टाप्।) कुलत्थिका। सुभगा। इति मेदिनी। ये। ८२॥ अजशृङ्गी। अरण्यकुलत्थिका। इति राजनिर्घण्टः॥

चघ, न घातने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, चघ्नोति। इति दुर्गादासः॥

चक्कुरं, क्ली, (चकति लप्नोत्यनेन। चक + उरच्। इदित्वान्नुम्।) यानमात्रम्। तत्पर्य्यायः। घोरणम् २। इति चिकाण्डशेषः॥

चक्कुरः, पुं, (चक्यते लप्यतेऽनेन। चकि + उरच्।) इदित्वान्नुम्।) रथः। इति मेदिनी। रे। १५३॥

चङ्क्रमणं, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति। चङ्क्रम + भावे ल्युट्।) पुनःपुनर्भ्रमणम्। (यथा, भागवते। ३। २१। ५०।

"नूनं चङ्क्रमणं देव! सतां संरक्षणाय ते।
वधाय चासतां यत्तं हरेः प्रकृतिहि पालिनी॥")

अतिशयभ्रमणम्। इति शाकरणम्॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।

"स्थानासनं चङ्क्रमणं यानयानातिभाषणम्॥")

अनतिदेहपीड़ाकारकचङ्क्रमणस्य गुणाः। आयुर्बलमेधास्थैर्य्यसुद्धिकारित्वम्। सदोषानद्रहित-पादचङ्क्रमणदोषाः। अनारोग्यत्वम्। अनायुष्यत्वम्। इन्द्रियदृष्टिनाशित्वञ्च। इति राजवल्लभः॥

चङ्गः, त्रि, शोभनः। दक्षः। इति मेदिनी। गे। ७॥ (पुं, राजमन्त्रिविशेषः। यथा, राजतरङ्गिण्याम्।

"अन्तरङ्गाश्च चङ्गाद्या येऽभूवंस्तत्र मन्त्रिणः।
ते स्त्रीवदासितन्तूर्णौ चक्रे; ग्रन्थान्तिरेरपि॥")

चचेड्डा, स्त्री, (चि + बाहुलकात् ड्डः। चं उपचीयमानं अड्डवत् पलं अस्याः ततो निपातनात् साधुः।) पललताविशेषः। चिचिड़ा इति भाषा। तत्पर्य्यायः। वेणुकूलः २ श्वेतराजी ३ दृढतृफलः। अस्या गुणः। पटोलगुणात् किञ्चिन्यूनत्वम्। विशेषात् श्लेष्मिणो हितत्वञ्च। इति मदनविनोदः॥

चञ्चत्पुटः, पुं, (चञ्चत् गुरुलघूनां लयविशेषाणां पुटं इन्द्वं यत्र।) तालप्रभेदः। यथा,—

"ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु द्वयम्॥"

इति सङ्गीतदामोदरः॥

चञ्चत्पुटोऽपि कुत्रापि चत्पाठः॥

चञ्चरी, स्त्री, पुं, (चञ्चूर्य्यते पुनः पुनरतिशयेन वा चरति भ्राम्यतीति। चर + यङ् लुक् ततो टक् टित्वात् ङीप् च।) भ्रमरी। यथा,—

"करी वरी भरीति चेद्दिग्गं सरी सरीति कम्।
स्थिरी चरी करीति चेन्न चञ्चुरीति चञ्चरी॥"

इत्यद्भटः॥

चञ्चरीकः, पुं, (चरति पुनःपुनरिति "चर्करीकादयश्च।" उणा। ४। २०। इति बहुलगुणेन साधुः।) भ्रमरः। इति चिकाण्डशेषः॥

चञ्चलं त्रि, (चञ्चं गतिं लातीति। ला + कः।) अस्थिरम्। (यथा, हरिवंशे। ६४। ७।

"एव वत्सान् पालयन्ती गोभमाना महावनम्।
चञ्चूर्य्यन्ती रमन्ती स किशोराविव चञ्चलौ॥")

तत्पर्य्यायः। चलनम् २ कम्पनम् ३ कम्पम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १०। इत्यमरः। ३। १।७५॥ चपलम् ११ चटुलम् १२। इति तट्टीका॥ वायौ पुं। इति मेदिनी। ले। ६०॥

चञ्चला, स्त्री, (चञ्चं लाति। ला + कः टाप् च। यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्याः इति अच्।) लक्ष्मीः। विद्युत्। इति मेदिनी। ले। ६०॥ पिप्पली। इति शब्दचन्द्रिका॥ (वर्णवृत्तविशेषः। यथा, शब्दार्थचिन्तामणौ।

"तूर्य्यतालपणिराजमेरुहारनायकेन।
चामरध्वजेन चापि मण्डिता सुवर्णकेन॥
वर्णितातिसुन्दरेण पन्नगेन्द्रपिङ्गलेन।
चञ्चला चकोरचारुलोचने शुभङ्गलेन॥")

चञ्चा, स्त्री, (चञ्च + अच् + टाप्।) नलनिर्म्मिता। चाँच इति भाषा। (चञ्चेव मनुष्यः। इति इवार्थे कन् ततः "सुम्मनुष्ये।" ५। ३। ६८। इति कनो लुप्।) लवणनिर्म्मितपूरुषः। इति मेदिनी। त्रे। ५॥

चञ्चुः, पुं, (चनुच + बाहुलकात् उः।) गोगाड़ीचः। स तु नाड़ीचक्राकः। रथकटचः। इति मेदिनी। चं। ५॥ त्यगः। इति शब्दरत्नावली॥ रक्तैरण्डः। क्षुद्रचञ्चुटचः। इति राजनिर्घण्टः॥

चञ्चुः, स्त्री, (चञ्चति प्राप्नोति गृह्णाति भक्ष्यमनया।) प्रक्षिणामोष्ठः। पाखिर ठोँट् इति भाषा। (यथा, पातकाष्टके। ६।

"भ्रातश्चातक! पातकं किमपि ते सम्यङ् न यत्तेऽस्मिन्न पतन्ति चञ्चुपुटके द्विन्नाः पयोबिन्दवः॥")

तत्पर्य्यायः। चोटिः २। इत्यमरः। २।५।३६॥ चञ्चूः ३ चोटी ४ चञ्चुका ५। इति शब्दरत्नावली॥ खपाटिका ६। इति हेमचन्द्रः॥ पक्षिग्राकविशेषः। तत्पर्य्यायः। विजला २ चञ्चूः ३ कलभी ४ चीरपत्रिका ५ चञ्चुरः ६ चञ्चुपत्रः ७ सुग्राकः ८ क्षेत्रसम्भवः ९। अस्या गुणाः। मधुरत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। गुल्मोदरविबन्धार्शोग्रहणीनाशित्वञ्च॥

"चिक्कचक्षुश्चिक्षुकी च दीर्घपत्रा सतिक्तिका।
चञ्चुः शीता सरा रुच्या स्वादी दोषत्रयापहा।
धातुपुष्टकरी बल्या मेध्या पिच्छिलिका स्मृता॥"

इति भावप्रकाशः॥

तस्या बीजस्य गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मशूलोदररोगविषत्वग्दोषकण्डूखर्जूकुष्ठनाशित्वञ्च। इति राजनिर्घण्टः॥ (शवहारोऽस्य यथा,

"आमे परिणते यस्तु विबन्धमतिसार्य्यते।
सशूलपिच्छमल्पाल्पं बहुशः संप्रवाहिकम्॥
तं मूलकानां यूषेण वदराम्लमथापि वा।
उपोदकायाः चौरिण्या यवान्या वासुकस्य वा॥
सुवर्चलायाश्चञ्चोर्वा शाकेनावल्गुजस्य वा॥")

इति चरके चिकित्सास्थाने दशमेऽध्याये॥)

चञ्चुका, स्त्री, (चञ्चु + स्वार्थे कन् टाप् च।) चञ्चुः। प्रक्षिणामोष्ठः। इति शब्दरत्नावली॥

चञ्चुपत्रः, पुं, (चञ्चाकारं पत्रमस्य) चञ्चुशाकः। इति राजनिर्घण्टः॥

चञ्चुभृत्, पुं, स्त्री, (चञ्चुं बिभर्त्तीति। भृ + क्विप्।) पक्षी। इति चिकाण्डशेषः॥

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्यस्येति। नित्ययोगे मतुप्।) पक्षी। इति हारावली॥

चञ्चुरः, पुं, (चञ्चति चञ्चुवदाकृतिं गच्छतीति। चञ्च गतौ + बाहुलकात् उरच्।) चञ्चुशाकः। इति राजनिर्घण्टः॥ (दक्षः। यथा, काशीखण्डे। १०। ४६।

"विज्ञाताखिलशास्त्रार्थो लौकिकाचारचञ्चुरः।
कदाचिच्चिन्तयामास हृदि ध्यात्वा महेश्वरम्॥")

चञ्चुरुचिः, पुं, (चञ्चुः रुचिरिव यस्य।) कारण्डवपक्षी। तत्पर्य्यायः। सुमुखः २ पीततुण्डः ३। इति चिकाण्डशेषः। मरलः ४ चञ्चुरुचिकः ५। इति हेमचन्द्रः। ४। ४०७॥

चञ्चुरुचिकः, पुं स्त्री, (चञ्चुरुचि + स्वार्थे कन् यद्वा चञ्चुः रुचिरिव यस्य इति कप्।) चञ्चुरुचिपक्षी। इति हेमचन्द्रः। ४। ४०७॥

चञ्चूः, स्त्री, (चञ्चु + "ऊडुतः।" ४। १। ६६। इत्यत्र "अप्राणिजातेश्चारज्ञ्वादीनामुपसंख्यानम्।" इति वार्त्तिकोक्त्या ऊङ्।) चञ्चुः। इति हेमचन्द्रः॥

चट, भेदे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) चटेति। इति दुर्गादासः॥

चट, क वधे। भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, चाटयति। इति दुर्गादासः॥

चटकः, पुं, (चटति भिनत्ति धान्यादिकं चञ्चुपुटेनेति। चट भेदे + "नन्दिग्रहीति।" ३। १। १३४। इति पचादित्वादच् ततः स्वार्थे कन्।) पक्षिविशेषः। चटा इति भाषा॥ (यथा, देवीभागवते। १। ४। ८।

"वीक्ष्य प्रेमाङ्कुरं तत्र बाले चटकयोस्तदा।
त्रासचिन्नातुरः कामं मनसा समचिन्तयत्॥")

तत्पर्य्यायः। कलविङ्कः २। इत्यमरः। २।५।१८॥ चित्रपृष्ठः ३ गृहनीड़ः ४ वृषायवः ५। इति हारावली॥ कासुकः ६ नीलकण्ठकः ७ कालकण्ठकः ८ कामचारी ९। इति जटाधरः॥ कलाविकलः १०। इति शब्दरत्नावली॥ तन्मांसगुणाः। शीतत्वम्। लघुत्वम्। शुक्रवलप्रदत्वञ्च। तद्वातरक्तचटकं तत् क्रव्यं लघु पथ्यदम्॥

इति राजनिर्घण्टः॥

("चटकाः शैम्बलाः स्निग्धा वातघ्नाः शुक्रलाः परम्।
गुरुत्वस्निग्धमधुरा वर्गाद्यातो यथोत्तरम्॥"

इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये॥

"चटका मधुराः स्निग्धा बलशुक्रविवर्द्धनाः।
सन्निपातप्रशमनाः श्रमना मारुतस्य च॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

चटकका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति पत्वे इदादेशाभावः ।) चटका । इति मुग्धबोधव्याकरणम् ॥

चटका, स्त्री, (चटक + टाप् ।) चटकपत्नी । (चटकस्य चटकाया वा स्त्रीपत्यम् । चटका + ऐरक् । स्त्रियामपत्ये लुक् वक्तव्यः । तत्र टाबन्तात् तद्धिते लुप्ते "लुक् तद्धितलुकि ।"१।२।४६। इति टापो लुकि पुनः अजाद्यतष्टाप् । स च जातिलक्षणङीषो बाधकः ।) चटकस्त्रीपत्यम् । चटी इति भाषा ॥ इत्यमरः । २ । ५ । १८ ॥ पिप्पलीमूलम् । इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ श्यामापत्नी । इति राजनिर्घण्टः ॥

चटकाशिरः [स्] क्ली, (चटकायाः शिर इव ।) पिप्पलीमूलम् । इति हेमचन्द्रः ॥

चटकिका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति इदादेशः ।) चटका । इति मुग्धबोधव्याकरणम् ।

चटिका, स्त्री, (चटति भिनत्ति रोगादिकं नाशयतीत्यर्थः । चट् + बाहुलकात् इकन् ।) पिप्पलीमूलम् । (चटति भिनत्ति ध्यान्यादिकं खचक्षुपुटेनेति ।) चटका । इति हलायुधः ॥

चटिकाशिरः, [स्] क्ली, (चटिकायाः चटकपत्न्याः मस्तकमिव आकृतिरस्य ।) पिप्पलीमूलम् । इत्यमरः । २ । ६ । ११० ॥

चटिकाशिरः, पुं, ("सर्व्वे सान्ता अदन्ताः स्युः ।" इत्युक्तेः एषोदरादित्वात् सलोपः ।) पिप्पलीमूलम् । इत्यमरटीकायां भरतः ॥ (अस्य पर्य्यायाः यथा, वैद्यकरत्नमालायाम् ।

"ग्रन्थिकं पिप्पलीमूलं षडग्रन्थिश्चटिकाशिरः ॥")

चटुः, पुं, (चटति शोकसन्तापादिकं भिनत्तीति । चट भेदे + "गत्यर्थादयश्च ।" उणां । १ । ३७ । इति कुः ।) प्रियवाक्यम् । (यथा, माघे । ४ । ६ ।

"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम् ॥")

उदरम् । प्रतिनामासनभेदः । इति मेदिनी । टे । १४ ॥ प्रियभाषणे क्लीवलिङ्गोऽपि । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चटुलः, त्रि, (चटतीति । चट् + बाहुलकादुलच् । यद्वा, चटु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मत्वर्थे लच् ।) चञ्चलः । इति हेमचन्द्रः । ६ । ६१ ॥ (यथा, रघुः । ६ । ५८ ।

"त्रासातिमात्रचटुलैः सरतः सुनेत्रैः
प्रौढ़प्रियानयनविभ्रमचेष्टितानि ॥")

सुन्दरः । इत्युणादिकोषः ॥

चटुला, स्त्री, (चटुल + "अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) विद्युत् । इति जटाधरः ॥ (गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४७ ।

"चटुला चण्डिकाचित्रा चित्रमाल्यविभूषिता ॥")

चटुलोलः, त्रि, (चटुलश्चञ्चलः लोलश्च । अतिचञ्चलत्वात्तथात्वम् । निपातनादलोपे साधुः ।) चाटुलोलः । सुचञ्चलः । इति हारावली ।२१६॥

चड, इ क रोधे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) इ क, चण्डयति । इति दुर्गादासः ॥

चड, इ ड रोधे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) इ, कर्म्मणि चण्ड्यते । ड, चण्डते । इति दुर्गादासः ॥

चण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चणति । इति दुर्गादासः ॥

चण, म दाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) म, चणयति । इति दुर्गादासः ॥

चण, मि गतौ । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) मि, चणयति चाणयति । इति दुर्गादासः ॥

चणकः, पुं, (चणति वेदीचारणादिध्वनिना शब्दायते इति । चण शब्दे + कुन् ।) मुनिविशेषः । इति शब्दरत्नावली ॥ (चण्यते दीयते इति । चण दाने + कुन् ।) शस्यविशेषः । चना वुट छोला इति च भाषा ॥ तत्पर्य्यायः । हरिमन्थकः २ । इत्यमरः । २ । ६ । १८ ॥ हरिमन्थजः ३ । इति तट्टीका ॥ चणः ४ हरिमन्थः ५ सुगन्धः ६ क्षुद्रचक्षुकः ७ बालभोज्यः ८ वाजिभक्ष्यः ९ कक्षुकी १० । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । मेहवान्त्यसपित्तनाशित्वम् । दीपनत्वम् । वर्णबलरुच्याध्मानकारित्वञ्च ॥*॥ आमस्य तस्य गुणाः । शीतलत्वम् । रुक्षत्वम् । सन्तर्पणत्वम् । दाहश्लेष्मास्रदोषनाशित्वम् । गौल्यत्वम् । कषायत्वम् । ईषत्कफवीर्य्यकारित्वञ्च ॥*॥ भृष्टस्य तस्य गुणाः । रुक्षत्वम् । वातनाशित्वम् । रक्तदोषकारित्वम् । उष्णवीर्य्यत्वम् । लघुत्वम् । खेदश्लेष्महरत्वञ्च ॥ * ॥ तस्य यूषस्य गुणाः । मधुरत्वम् । कषायत्वम् । कफवातविकारश्वासोर्द्धकासक्लमपीनसनाशित्वम् । बलदीपनत्वञ्च ॥ * ॥ प्रातस्तच्छलपानगुणाः । चन्द्रमरीचिवत् शीतलत्वम् । पित्तरोगनाशित्वम् । पुष्टिप्रदत्वम् । पाके नैजगुणत्वम् । सन्तर्पणत्वम् । मञ्जुलत्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥*॥ तस्य आर्द्रभृष्टस्य गुणः । बलकारित्वम् । रोचनत्वञ्च ॥ * ॥ स्विन्नस्य तस्य गुणः । पित्तकफनाशित्वम् ॥ * ॥ तत्सूपः शोभकरः ॥ * ॥ तस्य शाकस्य गुणाः । रुक्षत्वम् । दुर्ज्जरत्वम् । कफवातकारित्वम् । अग्नित्वम् । विष्टम्भजनकत्वम् । पित्तदग्नशोथनाशित्वञ्च । इति भावप्रकाशः ॥

चणकात्मजः, पुं, (चणकस्य मुनिविशेषस्य आत्मजः ।) वात्स्यायनमुनिः । इति हेमचन्द्रः । ३ । ५१७ ॥

चणकाम्लकं, क्ली, (चणकजातमम्लम् । ततः स्वार्थे कन् ।) चणकलवणम् । तस्य गुणाः । अत्यम्लत्वम् । दीपनत्वम् । दन्तहर्षणत्वम् । लवणानुरसत्वम् । रुक्षत्वम् । शूलाजीर्णविबन्धनाशित्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

चणकाम्लवाः, [र्] क्ली, (चणकाम्लस्य चणकलवणस्य वार् जलम् ।) क्षेत्रस्थफलवच्चणकपत्रशिशिरवारि । इति रत्नावली ॥

चणद्रुमः, पुं, (चणश्चणक इव द्रुमो वृक्षः ।) क्षुद्रगोक्षुर इति राजनिर्घण्टः ॥ चणीद्रुमोऽपि पाठः ॥

चणपत्री, स्त्री, (चणश्चणकस्तस्य पत्रमिव पत्रं यस्याः । स्त्रियां ङीप् ।) रुदन्तीवृक्षः । इति राजनिर्घण्टः ॥

चणिका, स्त्री, (चणति दुग्धवद्रसं ददातीति । चण दाने + कुण् । टाप् अत इत्वञ्च ।) क्षुद्रविशेषः । तत्पर्य्यायः । गोदुग्धा २ सुनीला ३ क्षेत्रजा ४ हिमा ५ । अस्या गुणाः । बीजैर्वृष्यत्वम् । बल्यत्वम् । अतिमधुरत्वञ्च । क्षुद्रोः पशुहितत्वम् । इति राजनिर्घण्टः ॥

चण्डं, क्ली, (चण्डते इति । चडि + पचाद्यच् ।) तीक्ष्णम् । इति शब्दरत्नावली ॥

चण्डः, पुं, (चण्डति चण्डयति वा अन्धरसं ददातीत्यर्थः । चड + "अमन्तात् डः ।" उणां ।१।११४। इति डः ।) तिन्तिड़ीवृक्षः । चण्डते कुप्यतीति । चडि + अच् ।) यमकिङ्करः । दैत्यविशेषः । इति मेदिनी । डे । ११ ॥ (अयं हि शुम्भासुरसेनानीः । कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान् । ततः शुम्भार्थं भगवत्यानयनाय गतोऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहतः । एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम् । कार्त्तिकेयः यथा, महाभारते । ३ । २३१ । ४ ।

"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥")

चण्डः, त्रि, (चण्डते रुष्टो भवतीति । चडि + पचाद्यच् ।) अत्यन्तकोपनः । इत्यमरः । ३ ।१।३२ ॥ (यथा, महाभारते । ३ । २३३ । ११ ।

"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्चपलाश्च वध्याः ॥")

तीक्ष्णताविशिष्टः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ३२ । २३ ।

"दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥")

चण्डता, स्त्री, (चण्डस्य भावः । चण्ड + तल् ।) उग्रता । इति हेमचन्द्रः । २ । २३२ ॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका ।) दुर्गा । इति शब्दरत्नावली ॥ अष्टनायिकान्तर्गतनायिकाविशेषः । (यथा, दुर्गाध्याने ।

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम् ॥")

तस्या ध्यानं यथा, देवीपुराणोक्तदुर्गोत्सवपद्धतौ ।

"चण्डनायिकां नीलवर्णां षोड़शभुजाम् ।
कपालं खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम् ।
पाशञ्च शोभनां शक्तिं वामहस्तेन बिभ्रतीम् ॥
सृग्गरं शूलवज्रञ्च खड्गञ्चैव तथाङ्कुशम् ।
शरं चक्रं शलाकाञ्च दक्षिणेन च बिभ्रतीम् ॥"

चण्डरुद्रिका, स्त्री, (चण्डः प्रचण्डः रुद्रः अधिष्ठातृतयास्त्यस्याः । चण्डरुद्र + "अत इनिठनौ ।"

५।२।११५। इति टन्। स्त्रियां टाप्। यद्वा प्रचण्डरुद्रौ रुद्रशक्तिविशेषौ। ततः स्वार्थे कन्। टापि पूर्ब्बह्रस्वः।) विद्याविशेषः। इति रत्नावली॥

चण्डवती, स्त्री, (चण्ड+"अमन्ताड्डुः।" उणां। १।११४। इति डः। चण्डि+अच् वा। चण्डस्य चण्डता विद्यतेऽस्याम्। यद्वा, चण्डः रुद्रांशो भैरवविशेषो रुचकतया विद्यतेऽस्याः। मतुप् ततो भस्य वत्वम्।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्तर्गतनायिकाविशेषः। अस्या ध्यानं यथा। चण्डवतीं धूम्रवर्णां षोड़शभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥

चण्डा, स्त्री, (चम् चण् वा+डः। चण्डि+अच् वा। ततष्टाप्।) अष्टनायिकान्तर्गतनायिकाविशेषः। (यथा, देवीपुराणे।

"चण्डा चण्डवती चण्डनायिकाप्यतिचण्डिका॥") अस्या ध्यानं यथा। चण्डां शुक्लवर्णां षोड़शभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥ जिनानां शासनदेवताविशेषः। इति हेमचन्द्रः॥ चोरनामगन्धद्रव्यम्। इत्यमरः। २।४।१२८॥ (यथा, चरके सूत्रस्थाने ऋतीयेऽध्याये।

"कुष्ठं हरिद्रे सुरसं पटोलं
निम्बाश्वगन्धे सुरदारुशिग्रु।
ससर्षपं तुम्बुरुधान्यवन्यम्
चण्डाश्च चूर्णानि समानि कुर्य्यात्॥")

शुक्लपुष्पी। इति मेदिनी। डे। १२॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये॥ "श्लातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्प प्रियङ्गुहरेणुकाद्याग्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकशालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुसृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति॥" लिङ्गिनीलता। कपिकच्छुः। आखुकर्णी। श्वेतदूर्ब्बा। इति राजनिर्घण्टः॥ नदीविशेषः। इति शब्दरत्नावली॥

चण्डांशुः, पुं. (चण्डाः प्रखरास्तीव्रा वा अंशवो रश्मयोऽस्य।) सूर्य्यः। यथा, महानाटके।

"चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुज्जृम्भते।"

(तथाच राजतरङ्गिण्याम्। ४। ४०१।

"भ्रातरौ तौ समासाद्य राज्यं नैव बराजत।
हेमन्तशिशिरौ प्राप्य चण्डांशोरिव मण्डलम्॥")

चण्डातः, पुं, (चण्डं चण्डतां तीव्रत्वं अतति निरन्तरं प्राप्नोतीति। अत+अच्।) करवीरः। इत्यमरः। २। ४।७६॥ (पर्य्यायोऽस्य यथा,—

"द्वितीयो रक्तपुष्पश्च चण्डातो लगुड़स्तथा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणाश्चास्य करवीरशब्दे ज्ञातव्याः॥)

चण्डातकं, क्ली. (चण्डां स्त्रियं अतति सततं गच्छति प्राप्नोतीत्यर्थः। अत+ण्वुल्।) अर्द्धोरुकम्। वरस्त्रीणामर्द्धोरुपर्य्यन्तं वासः। इत्यमरः। २।६।११६॥ पुंस्काण्डे वोपालितधृतात् पुंलिङ्गोऽपि॥

चण्डालः, पुं, (चण्डते कुप्यतीति। चड़ि कोपे+"पतिचण्डिभ्यामालच्।" उणां।१।११६। इत्यालच्। यद्वा, चण्डं विकटं अलं अलङ्कारो यस्य इत्युज्ज्वलदत्तः।) वर्णसङ्करजातिविशेषः। चाँड़ाल इति भाषा। स तु ब्राह्मणीगर्भे शूद्रौरसाज्जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। श्वपचः २ मातङ्गः ३ दिवाकीर्त्तिः ४ जनङ्गमः ५ निषादः६ श्वपचः ७ अन्तेवासी ८ चाण्डालः९ पुक्कसः१०। इत्यमरः। २। १०। १६॥ जलङ्गमः ११ निषादः १२ श्वपक् १३ पुक्कशः १४ पुक्कषः१५। इति तट्टीका॥ निष्कः १६। इति चिकाण्डशेषः॥ तस्योत्पत्तिर्यथा, रामायणे।

"अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव ह।
चण्डालदर्शनो राम! सद्य एव दुराकृतिः॥
नीलपीताम्बरधरो रक्ताम्बरकृतोत्तरः।
संरब्धताम्रघोराक्षः करालो हरिपिङ्गलः॥
ऋक्षचर्म्मनिवासी च लौहाभरणभूषितः॥"

श्मशानचण्डालस्य निवासकर्म्मादि यथा,—

"चण्डालश्वपचानान्तु वह्निर्ग्रामात् प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च॥"

(एतैर्हेतस्य पशोर्मांसशुद्धिमाह मनुः।५।१३१। "अभिहृतस्य यन्मांसं शुचि तन्मुनिरब्रवीत्। क्रयाद्विक्रयतश्चान्नाद्याचितादाहृतादपि॥") क्रूरकर्म्मा। इति संक्षिप्तसारे उणादिवृत्तिः॥ (स्त्रियां ङीष्। तल्लक्षणशक्तिविशेषः॥)

चण्डालकन्दः, पुं, (चण्डालप्रियः कन्दः।) कन्दविशेषः। तस्य गुणाः। मधुरत्वम्। कफपित्तासदोषविषभूतादिदोषनाशित्वम्। रसायनत्वञ्च। तस्य भेदाः। एकपत्रः द्विपत्रः त्रिपत्रः चतुष्पत्रः पञ्चपत्रः। इति राजनिर्घण्टः॥

चण्डालवल्लकी, स्त्री, (चण्डालवादनीया वल्लकी वीणा।) चण्डालवीणा। इत्यमरः।२।१०।३२॥ अस्याः पर्य्यायः। कण्डोलवीणाशब्दे द्रष्टव्यः॥

चण्डालिका, स्त्री, (चण्डालः वादकत्वेनास्त्यस्याः। चण्डाल+ठन् टाप् च।) चण्डालवल्लकी। उमा। (चण्डं प्रचण्डभावं अलतीति। अल+ण्वुल् कापि अत इत्वञ्च।) औषधीभेदः। इति मेदिनीकरहेमचन्द्रौ॥

चण्डिः, स्त्री, (चड़ि कोपे+इन्।) चण्डी। इत्यमरटीकायां भरतः॥

चण्डिका, स्त्री, (चण्डी+स्वार्थे कन् टापि पूर्ब्बह्रस्वः। चण्डि+कन् वा।) दुर्गा। इत्यमरः। १।१।३६॥ (यथा, मार्कण्डेये। ८२। २६।

"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा॥"

इयमेव अमरकण्टके पीठशक्तिरूपेण विराजते। यथा, देवीभागवते। ७। ३०। ७३।

"छगलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके॥"

गायत्रीरूपा देवी। यथा, देवीभागते। १२। ६। ४७। [धिता॥")

"चटुला चण्डिका चित्रा चित्रमाल्यविभू-

चण्डिलः, पुं, (चण्डते कोपयुक्तो भवतीति। चड़ि कोपे+इलच्। चण्ड+अस्यर्थे इलच् वा।) रुद्रः। नापितः॥ वास्तूकम्। इति हेमचन्द्रः॥

चण्डिला, स्त्री, (चण्डिल+स्त्रियां टाप्।) नदीभेदः। इत्युणादिकोषः॥

चण्डी, स्त्री, (चण्ड+"वर्ब्बादिभ्यश्च।" ४।१।४५। इति वा ङीष्।) दुर्गा। (यथा, तिथितत्त्वे दुर्गोत्सवबोधनप्रकरणे। [स्कृया॥")

"चण्डीमामन्त्रयेद् विद्वान् नाच षष्ठी पुरहिंसा। कोपना। इति मेदिनी। ते। १२॥ (यथा, रघुवंशे। १२। ५। [वरौ॥")

"सा किलाश्वासिता चण्डी भर्त्रा तत् संश्रुतौ अस्या रूपान्तराणि। चण्डिः चण्डा चण्डिका। इत्यमरटीकायां भरतः॥ *॥ मार्कण्डेयपुराणोक्तदेवीमाहात्म्यम्। तस्य पाठक्रमो यथा,—

"अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष त्रिधोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षयेन्नित्यं चण्डिका चितयं तथा॥"

इति तत्त्वम्॥

अपि च।

"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
आदौ च प्रणवं दद्या दित्युवाचादिपूरुषः॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः॥
हस्तसंस्थापनादेव यस्मादल्पफलं लभेत्।
स्वयञ्च लिखितं यत्तु कृतिना लिखितं न यत्॥
अब्राह्मणेन लिखितं तत्रापि विफलं भवेत्।
ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः॥
स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत्।
सङ्कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः॥
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन।
कृते विरामे मध्ये तु अध्यायादिं पठन्नरः॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णोभवादरात्।
श्रुत्वान्यवर्णजाद्राजन्! वाचकान्नरकं व्रजेत्॥
देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः।
ग्रन्थिञ्च ग्रथितं कुर्य्याद्वाचकः कुरुनन्दन!॥
पुनर्न्नमेत् ततः स्तोत्रं न मुक्त्वा धारयेत् क्वचित्।

विसृष्टमदृतं ग्रान्तं सप्ताक्षरपदन्तथा ॥
कलस्वरसमायुक्तं रसभावसमन्वितम् ।
युध्यमानः सदर्थं वै ग्रन्थार्थं क्षत्रसत्तमो नृप ! ॥
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थंचापयेन्नृप ! ।
य एवं वाचयेद्ब्रह्मन् ! स विप्रो याति उच्यते ॥
सप्तस्वरसमायुक्तं काले काले विगाम्यते ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ! ॥"
तस्य फलं यथा,—
"चण्डीपाठफलं देवि ! शृणुष्व गदतो मम ।
एकाहृत्त्यादिपाठानां यथावत् कथयामि ते ॥
सङ्कल्प्य पूर्व्वं सम्पूज्य न्यस्याङ्गेषु मनून् सतत् ।
पाठाद्बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥
उपसर्गस्य ग्रान्त्यर्थं त्रिराहृत्तं पठेन्नरः ।
यज्ञोपग्रान्त्ये कर्त्तव्यं पञ्चाहृत्तं वरानने ! ॥
महाभये समुत्पन्ने सप्ताहृत्तं समुन्नयेत् ।
नवाहृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्राहृत्तसुदीरयेत् ।
अर्काहृत्त्या काम्यसिद्धिर्वैरहानिश्च जायते ॥
मन्वाहृत्त्या रिपुर्व्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशाहृत्त्या श्रियमाप्नोति मानवः ॥
कलाहृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्य्यात् सप्तदशाहृत्तं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोक्षाय त्रिंशाहृत्तिं पठेत् सुधीः ॥
पञ्चविंशाहृत्तिनात्तु भवेद्बन्धविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्सामये तथा ॥
जातिध्वंसे कुलोच्छेदे व्याधयो नाश्च आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्य्यात्शतावृत्तं शतावृत्तिं ततः सम्यजते शुभम् ॥
श्रियोवृद्धिः शतावृत्ताद्व्याधिवृद्धिस्तथापरे ।
मनसा चिन्तितं देवि ! सिद्धेदशोत्तराच्छतात् ॥
शतावमेधयज्ञानां फलमाप्नोति सुव्रते ! ।
सहस्रावर्त्तनाल्लक्ष्मीरायाति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः ॥
स्तवानामपि सर्व्वेषां तथा सप्तशतीस्तवः ।
अथवा बहुनोक्तेन किमेतेन वरानने ! ।
चण्डयाः शतावृत्तपाठात् सर्व्वाः सिध्यन्ति सिद्धयः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥

अथ प्रथमचरितस्य ब्रह्मर्षिर्मधुकाली देवता गायत्री छन्दो नन्दा शक्तिः रक्तदन्तिका बीजमग्निस्तत्त्वम् । तत्र महाकाल्या ध्यानं यथा,—
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपा भयङ्करी ।
खड्गशूलगदाबाणतोमरञ्च शुशुण्डिभृत् ॥
परिघं कार्म्मुकं शीर्षं निधोतदधिरं दधौ ।
मधुकैटभयोर्युद्धे ध्येया सा तामसी शिवा ॥"
मध्यमचरितस्य विष्णुर्ऋषिर्मध्यमकाली देवता अनुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं वायुस्तत्त्वम् । तत्र सरस्वत्या ध्यानं यथा,—
"गौरीदेहसमुत्पन्ना या सत्त्वैकगुणाश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥
दधौ चाष्टभुजा बाणं मुसलं शूलचक्रकम् ।
शङ्खघण्टाहलञ्चैव कार्म्मुकञ्च तथा परम् ॥
ध्येया सा सुतिकालादौ वधे शुम्भनिशुम्भयोः ॥"
इति कात्यायनीतन्त्रम् ॥
(छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"नयुगलसयुगलगैरिति चण्डी ॥")

चण्डीकुसुमः, पुं, (चण्डीप्रीतिजनकं कुसुमं यस्य ।) रक्तकरवीरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य करवीरशब्दे बोद्धव्या ॥)

चण्डुः, पुं, (चण्ड्+बाहुलकात् उः ।) उन्दुरः । इति शब्दचन्द्रिका ॥

चत, ए अ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचतीत् । अ, चतति चतते । इति दुर्गादासः ॥

चतुः, [र्] अ, चतुर्व्वारम् । इति व्याकरणम् ॥

चतुःपत्री, स्त्री, (चत्वारि चत्वारि पत्राण्यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥

चतुःपर्णी, स्त्री, (चत्वारि चत्वारि पर्णानि यस्याः ।) क्षुद्राल्मिका । इति राजनिर्घण्टः ॥

चतुःपला, स्त्री, (चत्वारि पलानि यस्यां यस्या वा ।) नागबला । इति राजनिर्घण्टः ॥

चतुःपुरुषः, पुं, (चत्वारि पुरुषाणीव यत्र ।) भिक्षावृक्षः । इति राजनिर्घण्टः ॥

चतुःशालं, क्ली स्त्री, (चतसृणां शालानां समाहारः ।) परस्पराभिमुखगृहचतुष्टयम् । चकमिलनवाड़ी इति भाषा ॥ इत्यमरः । २ । २ । ६ ॥
(यथा, महाभारते । १ । १४५ । ८ ।
"तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ॥")

चतुःशालकं, क्ली, (चतुःशाल + स्वार्थे कन् ।) चतुःशालम् । इति शब्दरत्नावली ॥

चतुःषष्टिः, स्त्री, (चतुरधिका षष्टिः ।) चतुरधिकषष्टिसंख्या । चौषट्टि इति भाषा ॥ कलानाम्नी उपविद्या । (यदुक्तं रूपगोस्वामिकृतभगवन्माहात्म्ये ।
"चतुःषष्टिकलानान्तु विद्यानां पारदृश्वनः ।
ऋते कृष्णाद्भगवतः कः क्षमो देहवान्नरः ॥")
ऋग्वेदः । इति मेदिनी । टे । ६२ ॥

चतुरः, त्रि, (चत्यते याच्यते इति । चत + "मन्निवाग्निमथिचतिचक्षिभ्य उरच् ।" उणा । १ । ३८ । इत्युरच् ।) कार्य्यक्षमः । निरालस्यः । तत्पर्य्यायः । दक्षः २ पेशलः ३ पटुः ४ कृत्यानम् ५ उक्षाः ६ । इत्यमरः । २ । १० । १६ । पेशलः ७ पेशलः ८ इति तट्टीकायां भरतः ॥ निपुणः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । १ । १७ । ४४ ।
"चतुरो नैव सुस्थेतं मूर्खः सर्व्वत्र सुस्थति ॥")
तस्य लक्षणं यथा । वाक्चेष्टायज्ञसमागमः । तत्र वचनयज्ञसमागमो यथा, रसमञ्जर्य्याम् ।

"तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत प्रातोदरिकः सहायः ॥"

चेष्टायज्ञसमागमो यथा,—
"कान्ते कनकणन्मौरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ विन्दुभिन्दुसुखी ददौ ॥"
(उपभोगक्षमः । यथा, रघुः । ६ । ४७ ।
"त्यजत मानमलं वत विग्रहैः
न पुनरेति गतं चतुरं वयः ॥"
"चतुरं उपभोगक्षमम् ।" इति तट्टीकायां मल्लिनाथः ॥) नेत्रगोचरः । इति हेमचन्द्रः ॥

चतुरः, पुं, (चत + उरच् ।) चक्रवाकः । हस्तिशाला । इति हेमचन्द्रः ॥

चतुरङ्गमः, पुं, (चतुरः चातुर्य्यान्वितः क्रमः प्रणाली यत्र ।) सप्तधारूपकान्तर्गतरूपकभेदः । यथा—
"हतहन्दं श्रुतहन्दं तथा प्रान्ते गुरुर्भवेत् ।
द्वाविंशत्यक्षरैर्युक्तः श्लङ्गारे चतुरङ्गमः ॥"
इति सङ्गीतदामोदरः ॥

चतुरङ्गं, क्ली, (चत्वारि अङ्गानि यस्य ।) हस्त्यश्वरथपदातिरूपं सैन्यम् । यथा, रामायणे ।
"चतुरङ्गं क्षपि बलं सुमहत् प्रसहेमहि ।"
अश्वक्रीड़ाविशेषः । चौरंखेला इति भाषा ॥ यथा,—
युधिष्ठिर उवाच ।
"अश्वकोड्याच या क्रीड़ा तां मे ब्रूहि तपोधन ! ।
प्रकर्षेणैव मे नाथ चतुराजी यतो भवेत् ॥
व्यास उवाच ।
अष्टौ कोष्ठान् समालिख्य प्रदक्षिणकमेण तु ।
अरुणं पूर्व्वतः कृत्वा दक्षिणे हरितं बलम् ॥
पार्थ ! पश्चिमतः पीतसुत्तरे श्यामलं बलम् ।
राज्ञो वामे गजं कुर्य्यात् तस्मादश्वं ततस्तस्मिन् ॥
कुर्य्यात् कौन्तेय ! पुरतो युद्धे पत्तिचतुष्टयम् ।
कोणे नौका द्वितीयेऽश्वस्तृतीये तु गजो वसेत् ॥
तुरीये च वसेद्राजा वटिका पुरतः स्थिता ॥
पञ्चकेन वटी राजा चतुष्कोणेव कुञ्जरः ॥
विकेश तु चलत्यश्वः पार्थ ! नौकाद्वयेन तु ॥
कोष्ठमेकं विलङ्घाय सर्व्वतो याति भूपतिः ॥

अग्र एव वटी याति बलं हन्त्यग्रकोणगम् ।
यथेष्टं कुञ्जरो याति चतुर्हिक्षु महीपते ! ॥
तिर्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोष्ठकोष्ठद्वयं लङ्घ व्रजेन्नौका युधिष्ठिर ! ॥
सिंहासनं चतूराजी कृपाक्षस्तु षट्पदम् ।
काकाक्षं दृङ्नौका नौकाक्षस्तप्रकारकम् ॥
घाताघाते वटी नौका बलं हन्ति युधिष्ठिर ! ।
राजा गजो हयश्चापि त्यक्त्वा घातं निहन्ति च ॥
अत्यन्तं खबलं रक्षेत् खराजा बलसत्तमम् ।
अल्पस्यारक्षया पार्थ ! हन्तव्यं बलसत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमस्य ॥
मतङ्गजस्य गर्व्वेण राजा क्रीड़ति निर्भरम् ।
तस्मात् सर्व्वबलं दत्त्वा रक्ष कौन्तेय ! कुञ्जरम् ॥
सिंहासनं चतूराजी यदवस्थानतो भवेत् ।
सर्व्वसैन्यैर्गजैर्वापि रक्षितव्यो महीपतिः ॥
अन्यद्राजपदं राजा यदाक्रान्तो युधिष्ठिर ! ।
तदा सिंहासनं तस्य भक्षयते नृपसत्तम ! ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत् ॥
द्विगुणं पण्यं दातव्यैव प्रापयेत् ॥
मित्रसिंहासनं पार्थ यदारोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं नयति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा वष्टपदाश्रितः ।
तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र स्वकीये च नृपत्रयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपेणैव नृपं हत्वा चतूराजी यदा भवेत् ।
द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत् ॥
स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव ।
चतुरङ्गे तदा भूप ! वाहयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी समुत्थिता ।
चतूराजी भवत्येव न तु सिंहासनं नृप ! ॥
अत्रेदं बीजं उभयथा जयेऽपि परसिंहासनाधिकारात् परराजवधे शौर्य्याधिक्यनिष्कृष्टत्वदर्शनात् । क्रीड़ायामपि तथा कल्प्यते ॥ * ॥
राजद्वयं यदा हस्ते आत्मनो राज्ञि संस्थिते ।
परेण संस्थितत्वेको बलेनाप्यपहार्य्यते ॥
राजद्वयं यदा हस्ते न स्यादन्यकरे परः ।
तदा राजा हि राजानं घातेऽपि तं हनिष्यति ॥
नृपाक्रान्ते यदा राजा गमिष्यति युधिष्ठिर ! ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षकः ॥
कोणं राजपदं त्यक्त्वा वटिकान्तं यदा व्रजेत् ।
वटी नयेत् पदं नाम तदा कोष्ठबलं च वट् ॥
यदि तस्य भवेत् पार्थ ! चतूराजी च षट्पदम् ।
तदापि च चतूराजी भवत्येव न संशयः ॥
पदातेः षट्पदे विद्धे राज्ञा वा हस्तिना तथा ।
वटपदं न भवेत्तस्य अवश्यं ग्रहणं पार्थिव ॥
भ्रमणे कोष्ठके या स्याद्वटिका दृङ्नकेन वै ।
तदान्योन्यस्य हन्तव्यं सुखाय दुर्ब्बलं बलम् ॥
त्रिवटीकस्य कौन्तेय ! पुरुषस्य कदाचन ।
वटपदं न भवत्येव इति गोतमभाषितम् ॥
नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति ॥
गाढ़ावाच्यापदं राजपदं कोणपदञ्च तत् ।
हस्ते रङ्गे बलं नास्ति काकाक्षं तदा भवेत् ॥
वदन्ति राक्षसाः सर्व्वे तस्य न क्लो जयाजयौ ।
प्रार्थिते पञ्चमे रात्रि मृतवत्याञ्च षट्पदे ॥
अशौचं स्यात्तदा राजन् ! चलित्वा चालितं पदम् ।
द्विराहृत्या गतौ तस्माद्धन्यात् परबलं जयी ॥
सिंहासनं भवत्येव काकाक्षं न भक्ष्यते ॥
उपविश्य यत् स्थानं तस्योपरिचतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टयं तत्र दृङ्नौकेति भक्ष्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गजम् ॥
यदि कुर्व्वीत धर्म्मज्ञ ! पापभ्रष्टो भविष्यति ।
स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गोतमभाषितम् ।
प्राप्ते गजद्वये राजन् ! हन्तव्यो वामतो गजः ॥"
इति तिथ्यादितत्त्वे चतुरङ्गक्रीड़नम् ॥

चतुरङ्गा, स्त्री, (चत्वारि अङ्गानि यस्याः ।) घोटिकाहृद्यः । इति राजनिर्घण्टः ॥

चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथपदातयः सन्त्यस्यामिति । चतुरङ्ग + इनिः ।) चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महाभारते । १ । ७३ । २० ।
"प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥")

चतुरङ्गुलः, पुं, (चतसः अङ्गुलयः परिमाणमस्य । समासे अच् ।) आरग्वधवृक्षः । इत्यमरः । २ । ४ । २३ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ॥")

चतुरङ्गुलिपरिमिते त्रि ॥ (यथा, शतपथब्राह्मणे । १० । २ । २ । १ ।
"स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥")

चतुरम्लं, क्ली, (चतुर्णां अम्लानां समाहारः ।) चतुर्विधाम्लद्रव्यम् । यथा, भावप्रकाशे ।
"अम्लवेतसदृष्टाम्लदृष्ट्यम्लीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥"
इत्याह्निकतत्त्वे बौधायनः ॥
लवाश्चतुर्थाष्टमलवणम् । इति दीपिका ॥

चतुराननः, पुं, (चत्वारि आननानि मुखानि यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य चतुराननत्वे कारणं यथा,—
"तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ।
परिक्रमन् खानि निवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥"
इति श्रीभागवते । ३ । ८ । १६ ॥ (यथा,—
"इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन ! ।
अरसिके तु रहस्यनिवेदनं
शिरसि मा लिख मा लिख मा लिख ॥"
इत्युद्भटः ॥)

चतुरूषणं, क्ली, (चतुर्णां ऊषणानां समाहारः ।) पिप्पलीमूलसहितं त्रिकटु । यथा, भावप्रकाशे ।
"त्र्यूषणं सकणामूलं कथितं चतुरूषणम् ।
योगस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥"

चतुर्गतिः, पुं, (चतुर्भिर्गतिरस्य ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१६ ॥ (चतुर्णां आश्रमाणां वर्णानां ब्राह्मणादीनां यथोक्तकारिणां गतिराश्रयः । विष्णुः । यथा, महाभारते । १३ । १४६ । ६५ ।
"चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥")

चतुर्थः, त्रि, चतुर्णां पूरणः । ("तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततः "षट्कतिपयचतुरां थुक् ।" ५ । २ । ५१ । इति थुक् ।) चतुर्थसंख्यापूरणः । इति मुग्धबोधम् ॥ चौथा इत्यादि भाषा ॥

चतुर्थांशः, पुं, (चतुर्थः अंशः ।) चतुर्भागैकभागः । तत्पर्य्यायः । तुरीयः २ पादः ३ । इति राजनिर्घण्टः ॥ (चतुर्थः अंशो यस्य । चतुर्थांशस्वामिनि त्रि । यथा, मनुः । ८ । २१० ।
"तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥")

चतुर्थिका, स्त्री, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥

चतुर्थी, स्त्री, (चतुर्णां पूरणी । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततः "षट्कतिपयचतुरां थुक् ।" ५ । २ । ४१ । इति थुक् । ततस्त्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति स्मृतिः ॥ (चतुर्थी तु पञ्चमीयुता ग्राह्या । "युग्मानि कृतभूतानि ।" इति युग्मवचनात् तथा,—
"एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः ॥"
इत्यग्निपुराणवचनाच्च ॥

भविष्ये,—
"अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥'
यत्तु,—
'चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीययायुता नैव पञ्चम्या कारयेत् क्वचित् ॥'
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुतानिषेधकं तद्विनायकव्रतपरमिति गुरुचरणाः तृतीयायुता निषेधकत्वे क्वचिदित्यनुपपत्तेः सर्व्वत्रैव पञ्चमीयुताया ग्रहणात् । सारस्वतादिप्रदीपमाहः ।
'त्रयोदश्याश्चतुर्थ्याश्च सप्तम्या द्वादशीतिथेः ।
प्रदोषेऽध्ययनं धीमान् न कुर्व्वीत यथाक्रमम् ।
सारस्वतो गणपतः सौरश्च वैष्णवस्तथा ॥'
प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः ।

रात्रिपर इति निर्णयामृतकृद् भोजदेवः ॥
'शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तच्च तं ततः ॥'
चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः । अतः,—
'पक्षाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'
दैवात् प्रमादाद्वा दर्शने तु ।
"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥"
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । माघमासस्य शुक्लचतुर्थ्यां गौरी पूजनीया । यथा, भविष्योत्तरे माघशुक्लपक्षमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"स्वपुत्रमित्रप्रमदाप्रमोदी
घृताभिलाषी कृपया समेतः ।
विवादशीलो विजयी विवादे
भवेच्चतुर्थीप्रभवः कठोरः ॥"

चतुर्द्दन्तः, पु, (चत्वारो दन्ता यस्य ।) ऐरावतहस्ती । इति हेमचन्द्रः । २ । ६१ ॥ (खनामख्यातः पञ्चतन्त्रोक्तगजविशेषः । यथा, पञ्चतन्त्रे । ३ । ८० । "कस्मिंश्चिद्वनोद्देशे चतुर्द्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म ॥") चतुर्द्दश, [न्] त्रि, चतुरधिका दश । चौद इति भाषा । इति ज्योतिषम् ॥ (यथा, नैषधे । १ । ४ ।
"अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्द्दशत्वं कृतवान् कृतः स्वयं
न वेद्मि विद्वांसु चतुर्द्दशस्वयम् ॥"
चतुर्द्दशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) पूरणार्थे अकारान्तोऽयं शब्दः ॥ (यथा, रामायणे । २ । ११२ । २५ ।
"चतुर्द्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ! ।
न द्रक्ष्यामि यदि त्वान्तु प्रवेक्ष्यामि हुताशनम् ॥")
तद्वाचकानि । विद्या १ यमः २ मनुः ३ इन्द्रः ४ भुवनम् ५ ध्रुवतारकम् ६ । इति कविकल्पलता ॥

चतुर्द्दशी, स्त्री, (चतुर्द्दश + टित्त्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्द्दशकलाक्रियारूपा । तत्पर्य्यायः । भूता २ । इति तिथ्यादितत्त्वम् ॥ ("सा च शुक्ला पूर्णिमायुता ग्राह्या युग्मात् कृष्णा पूर्व्वयुता ।
"कृष्णपक्षेऽमी चैव कृष्णपक्षे चतुर्द्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।
उपवासादिकार्य्येषु एष धर्म्मः सनातनः ॥'
इति निगमवचनात् अपराह्णव्यापित्वे तु शुक्लचतुर्द्दश्यपि पूर्व्वविद्धा ग्राह्या
'चतुर्द्दशी तु कर्त्तव्या त्रयोदश्या युता विभो ! ।
मम भक्तैर्महावाहो ! भवेद्या चापरुद्धिकी ।
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा सुने ॥'
इति स्कन्दपुराणात् मम भक्तैरिति ईश्वरोक्तेः शिवव्रतविषयम् । त्रयोदश्यां दिवातनमुहूर्त्तचतुर्द्दश्यलाभे तु पद्मपुराणम् ।
'एकादशश्च षष्ठी उभे पक्षे चतुर्द्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ॥
एतद्विषय एव ।
'शिवा घोरा तथा प्रेतासावित्री च चतुर्द्दशी ।
कृष्णयुक्तैव कर्त्तव्या कृष्णामेव हि पारणम् ॥'
इति वचनम् ।" इति च तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विरूक्षशीलः पुरुषः सरोष-
श्चौरः कठोरः परवञ्चकश्च ।
परान्नभोक्ता परदारचित्त-
श्चतुर्द्दशी चेत् जननस्य काले ॥"
मासविशेषे तत्र कर्म्माणि यथा । ज्येष्ठकृष्णचतुर्द्दश्यां स्त्रीकर्त्तृकसावित्र्यादिदेवतापूजा स्वामिपूजा च ॥ भाद्रशुक्लचतुर्द्दश्यां अनन्तपूजा चतुर्द्दशपिष्टकभक्षणं डोरकबन्धनञ्च ॥ कार्त्तिककृष्णचतुर्द्दश्यां चतुर्द्दशप्रदीपाकभक्षणं चतुर्द्दशप्रदीपदानं यमतर्पणञ्च ॥ अग्रहायणशुक्लचतुर्द्दश्यां गौरीपूजा पाषाणाकारपिष्टकभक्षणञ्च ॥ माघकृष्णपक्षे रटन्त्याख्यचतुर्द्दश्यां कालीपूजारुणोदये स्नानञ्च ॥ फाल्गुनकृष्णपक्षे शिवरात्र्याख्यचतुर्द्दश्यामुपवासः शिवपूजा च ॥ चैत्रशुक्लपक्षे मदनचतुर्द्दश्यां मदनतृतीयपक्षत्वेन कामदेवपूजा । इति स्मृतिः ॥

चतुर्द्दोलं, क्ली, पुं, (चतुर्भिर्वाहकैर्द्दोल्यते उत्क्षिप्य नीयते उह्यते इति यावत् । दोलि + कर्म्मणि घञ् । यद्वा, चतुर्भिर्दण्डैरुपलक्षितं दोलं दोलायमानयानविशेषः ।) खनामख्यातयानविशेषः । यथा,—
"राज्ञो यद्विपदं यानं विशेषाख्यमलं विदुः ।
चतुर्भिरुह्यते यत्तु चतुर्द्दोलं तदुच्यते ॥
भोजस्तु ।
चतुर्भिर्वाहकैर्द्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः ।
स्तम्भैरष्टाभिरुदितं चतुर्द्दोलमनुत्तमम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानां चतुर्द्दोलाः प्रकाशिताः ॥
त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान् ।
हस्तद्वयोन्नतः प्रोक्तश्चतुर्द्दोलो जयाख्यया ॥
चतुर्हस्तायतो यस्तु सार्द्धेन्दुस्तदन्यथा ।
चतुर्द्दोलः समाख्यातः कल्याणस्तावदुन्नतः ॥
पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् ।
तावदेवोन्नतो वीरश्चतुर्द्दोल उदाहृतः ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
चतुर्द्दोलो ह्ययं सिंहस्तदर्द्धोन्नत शुभः ॥
सर्व्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
आद्यः समरवर्षासु परः केलिधनात्यये ॥
सर्व्वेषामेव काष्ठानां रङ्गः स्यादुचितवरणः ।
चन्दनेनैव घटना सर्व्वेषामुपयुज्यते ॥
लोलजं सर्व्ववस्त्रेषु कनकं सर्व्वधातुषु ।
कुम्भश्च पद्मकोषश्च गिरिश्चेति यथाक्रमम् ॥
त्रैदेशानां महीन्द्राणां चतुर्द्दोलेषु विन्यसेत् ॥
दर्पणश्चार्द्धचन्द्रश्च हंसः केकी शुको गजः ।
अश्वः सिंहश्च तस्याग्रे आदित्यादिद्वयोत्तरान् ॥
मणिनियमस्तु दण्डवत् ॥
रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारुणः ।
नीलः कपिल इत्युक्तः पताकानान्तु संग्रहः ॥
चतुर्द्दोलः सपताकः शुभयानमिति स्मृतम् ॥
सुवर्णरजतैर्द्दण्डैर्युक्तः स्याद्राजकेशिनाम् ।
चामरदण्डैर्द्दण्डैर्भिर्दिग्जयिनां चतुर्द्दोलः ॥
चामरच्छस्य पुच्छस्य सर्व्वोपरि परिन्यसेत् ।
यात्रासिद्धिरयं नाम्ना चतुर्द्दोलो महीभुजाम् ॥
स्तम्भच्छादरहितो निश्छदिरुक्तश्चतुर्द्दोलः मानं पूर्व्ववत् ॥
स पुनर्द्विविधः प्रोक्तः सध्वजश्चाथनिर्ध्वजः ।
ध्वजान् षड्वच्च न्यस्यन्ति षड्वर्गविजयैषिणः ॥
तेषां मानन्तु चत्वारः स्वामिहस्तैकसम्मिताः ।
कोणेषु पश्चादग्रे च हस्तद्वयमितौ ध्वजौ ॥
सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम् ।
मणिचामरकुम्भानां खड्गादीनां विनिश्चयः ॥
चतुर्द्दोलध्वजे राज्ञां विज्ञेयो नवदण्डवत् ।
निर्ध्वजे च चतुर्द्दोले मानमन्यतमं ग्रहेत् ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
विजयो नाम विज्ञातश्चतुर्द्दोलो महीभुजाम् ॥
विजयो मङ्गलो भव्यो वितत्यैकैकवर्द्धितः ।
त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥
अष्टाभिरुह्यते यस्तु अष्टदोलमुशन्ति च ।
सोपानद्वितयञ्चात्र विज्ञेयं श्रुत्यनिर्म्मितम् ॥
भोजस्तु ।
अष्टाभिर्वाहकैर्द्दण्डैः षड्भिस्तु दशभिर्घटैः ।
स्तम्भैस्तु दशभिर्ज्ञेयमष्टदोलं महीभुजाम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानामष्टदोलाः प्रकाशिताः ॥
षड्भिर्हस्तैर्म्मितायामः परिणाहश्चतुर्भुजः ।
चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः ॥
आयामपरिणाहाभ्यां पञ्चहस्तमितो हि यः ।
कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः ॥
सप्तहस्तायतः कार्य्ये प्रवरे पञ्चहस्तकः ।
पञ्चहस्तोन्नतो वीरश्चाष्टदोलो महीभुजाम् ॥
आयामपरिणाहाभ्यामष्टहस्तमितो हि यः ।
सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोन्नतः ॥
सर्व्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
काष्ठवस्त्रघटादीनां मणीनां चामरस्य च ॥
चतुर्द्दोलवदुक्तेयो नियमोऽन्योऽपि सूरिभिः ।
पूर्व्ववन्निश्छदेमानं ध्वजमानमिहोच्यते ॥
दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नताः ।
पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ ॥
मणिचामरपद्माणां निर्णयो निध्यताकवत् ।
निर्ध्वजश्चाष्टदोलो यः शिविकेति स गद्यते ॥
मणिकुम्भसुखादीनां नियमो नवदण्डवत् ।
इत्यष्टदोलकथनम् ॥ * ॥

एवं द्वादशघोड़शविंशतिदोलादिका: कार्य्या: ।
मानं सार्द्धद्विगुणं सार्द्धत्रिगुणितं युक्तमेतेषाम् ॥
विंशतिदोलात् परतो भोजमते सम्भवेद्यानम् ।
यानं बहुनुयोज्यं बहुगुणमेतच्च गाद वेदव्यास: ॥
भविष्योत्तरेऽपि ।
यदुक्तं देवदं यानं तेन मानेन यो नृप: ।
स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते ॥
स्वयोगयुक्तयानस्थो भोगमाप्नोति मानव: ।
परयौगिकयानस्थ: क्लेशमाप्नोति पुष्कलम् ॥
यो दम्भादथवाज्ञानाद्यानं प्रकुरुतेऽन्यथा ।
तस्येतानि विनश्यन्ति आयुर्विद्या यशो धनम् ॥
प्रधानं यानमाश्रित्य नियमोऽयं समाश्रित: ।
नाप्रधाने निर्णयोऽस्ति तस्मिन्नु मनोज्ञता ॥"
इति युक्तिकल्पतरु: ॥

चतुर्धा, व, (चतु:प्रकारमिति । "धाच् प्रकारे ।" इति मुग्धबोधव्याकरणेन धाच् ।) चतु:प्रकारम् । चारिप्रकार इति भाषा ॥ इति व्याकरणम् ॥ (यथा, भागवते । ३ । २६ । १४ ।
"मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥")

चतुर्भोजं, क्ली, (चतुर्णां भोजानां समाहार: ।) मेथिका चन्द्रसूरं कालाजाजी यवानिका एतच्चतुष्टयं मिलितम् । तत्गुणे नित्यभक्षणगुण: । पवनामयाजीर्णशूलाध्मानपार्श्वशूलकटिव्यथानाशित्वम् । इति भावप्रकाश: ॥

चतुर्भद्रं, क्ली, (चत्वारि भद्राणि यत्र वृन्दे । यद्वा, चतुर्णां धर्म्मार्थकाममोक्षसंज्ञकानां भद्राणां श्रेयसां समाहार: ।) सबलधर्म्मार्थकाममोक्षम् । इत्यमर: । २ । ७ । ५८ ॥ अन्यूनाधिकशक्ति-धर्म्मार्थकाममोक्षम् । इति तट्टीकासारसुन्दरी ॥ (तत्तन्मङ्गलमयगुणयुक्ते त्रि । यथा, महाभारते । ७ । ६२ । १७ ।
"स चेन्मार क्षत्रिय ! चतुर्भद्रतरक्षया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथा: ॥")

चतुर्भुज:, पुं, (चत्वारो भुजा यस्य ।) विष्णु: । इत्यमर: । १ । १ । २० ॥ (यथा, देवीभागवते । १ । ७ । ५ ।
"विष्णुं प्रबोधयाम्यद्य घोरैर्वै सूक्तं वनार्हणम् ।
चतुर्भुजं महावीर्यं दु:खहा च भविष्यति ॥"
वटिकौषधविशेष: । यथा,—
"रसस्तस्य भागौ द्वौ भागैकं हेमभस्मकम् ।
त्रयकस्तूरिका चैव हरितालञ्च तत्समम् ॥
सर्व्वं खल्वतले पिष्ट्वा कन्याखरसमर्द्दितम् ।
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम् ॥
संशोष्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ।
एतद्रसायनवरं त्रिफलामधुसंयुतम् ।
तदूर्ध्वमखिलं खादेद्बलीपलितनाशनम् ।
अपस्मारे ज्वरे कासे प्लीहे मन्दानले क्षये ॥
दुष्टकर्म्मे शिर:कर्म्मे गात्रकर्म्मे विशेषत: ।
वातपित्तसमुत्थांश्च कफजं नाशयेदृभुवम् ॥
सर्व्वौषधिप्रयोगैर्यै व्याधयो न निवर्त्तिता: ।
कर्म्मभि: पञ्चभिश्चैव योजयेद्वरराजत: ॥
चतुर्भोजो रसो नाम महेशेन प्रकाशित: ।
क्रमेण प्लीहलितं हन्ति वृद्धमिन्द्राग्निर्यथा ॥"
इति चतुर्भुजो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ॥
स्त्रियां गायत्रीरूपा महाशक्ति: । यथा, देवीभागवते । १२ । ६ । ४७ ।
"चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥"
चतुर्भुजविशिष्टे, त्रि । यथा, देवीभागवते । १ । १५ । ५६ ।
"तदा प्रान्ता भगवती प्रादुरास चतुर्भुजा ।
शङ्खचक्रगदापद्मवरायुधधरा शिवा ॥")

चतुर्मुख:, पुं, (चत्वारि मुखानि अस्य । यद्वा चत्वारो वेदाश्चत्वारि मुखानीवास्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, रघु: । १० । २२ ।
"चतुर्व्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ।
चतुर्व्वर्णमयो लोकस्तत: सर्व्वं चतुर्मुखात् ॥"
"सर्व्वं चतुर्मुखात् चतुर्मुखरूपिणस्तस्त: जातमिति श्लेष: ।" इति तट्टीकायां मल्लिनाथ: ॥
शिव: । यथा, महाभारते । १३ । १७ । ७६ ।
"चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥")
औषधविशेष: । यथा,—
"रसगन्धकलौहाभ्रं समं क्षतार्द्धं हेम च ।
सर्व्वं खल्वतले क्षिप्त्वा कन्यारसविमर्द्दितम् ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम् ।
संशोष्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ॥
एतद्रसायनवरं त्रिफलामधुसंयुतम् ।
तदूर्ध्वमखिलं खादेत् बलीपलितनाशनम् ॥
क्षयमेकादशविधं कासं पञ्चविधन्तथा ।
कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान् ॥
शूलं श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम् ।
व्रणान् सर्व्वानाढ्यवातं विसर्पं विद्रधिन्तथा ॥
अपस्मारग्रहोन्मादान् सर्व्वाङ्गीं सित्वगामयान् ।
क्रमेण सेवितं हन्ति वृद्धमिन्द्राग्निर्यथा ॥
पौष्टिकं बल्यमायुष्यं पुत्रप्रसवकारणम् ।
चतुर्मुखेन देवेन ब्रह्मणाचेयेन सूचितम् ॥"
इति प्रयोगान्ते चतुर्मुखरस: ॥
(औषधान्तरं यथा,—
"स्तं स्तं स्तं स्वर्णं ह्याभ्यां तुल्या मन:शिला ।
विमर्द्दितञ्च तैलेन चातसीसम्भवेन च ॥
तन्नोलं वस्त्रतो बद्ध्वा ब्रह्मयेलेपयेत्तत: ।
अतसीफलकल्केन दोलायन्त्रे च पाचं पचेत् ॥
उद्धृत्य धारयेद्वक्त्रे जिह्वास्यदन्तरोगनुत् ॥"
इति चतुर्मुखो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे सुखरोगाधिकारे ॥)

चतुर्युगं, क्ली, चतुर्णां युगानां समाहार: । इति व्याकरणममरटीका च ॥ (चत्वारि युगानि यत्र इति विग्रहे चतुर्युगविशिष्टे, त्रि । यथा, रघौ । १० । २२ ।
"चतुर्व्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ॥"
"चत्वारि युगानि कृतत्रेतादीनि यासु ताश्चतुर्युगा: कालावस्था: कालपरिमाणम् ॥" इति तट्टीकायां मल्लिनाथ: ॥)

चतुर्व्वक्त्र:, पुं, (चत्वारि वक्त्राणि अस्य वस्तुतस्तु चत्वारो वेदा एव वक्त्राणि सुखानीवास्य ।) ब्रह्मा । इति हलायुध: ॥

चतुर्व्वर्ग:, पुं, (चतुर्णां धर्म्मार्थकाममोक्षाणां वर्ग: समूह: ।) धर्म्मार्थकाममोक्षम् । इत्यमर: । २ । ७ । ५८ ॥ (यथा, रघौ । १० । २२ ।
"चतुर्व्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ॥")

चतुर्व्विद्य:, पुं, (चतसो विद्या अस्मिन्निति । यद्वा । ७ । ३ । ३१ । इत्यस्य सूत्रस्य वार्त्तिकोक्तं यथा, "चतुर्व्वेदस्योभयपदवृद्धिश्च । चतुरो वेदानधीते चतुर्व्वेद: स एव चातुर्व्वेद्य: । चतुर्व्विद्यस्येति पाठान्तरम् । चतुर्व्विद्य एव चातुर्व्वेद्य: ।") चतुर्व्वेदवेत्ता । अस्य रूपान्तराणि । चतुर्व्वेद: । चातुर्व्वेद्य: । चातुर्व्वेद: । इति व्याकरणम् ॥

चतुल:, त्रि, (चत + उलच् ।) स्थापयिता । इति संक्षिप्तसारे उणादिवृत्ति: ॥

चतुष्कं, क्ली, (चत्वारोऽवयवा यस्य वा कन् । चतुष्कं चतुरवयवम् । यथा, मनु: । ७ । ५० ।
"प्रानमन्त्रा: स्त्रियश्चैव रत्नगा च यथाक्रमम् ।
एतत् कृतमं विद्याच्चतुष्कं कामजे गणे ॥"
गृहविशेष: । यथा, कुमारे । ५ । ६८ ।
"चतुष्कपुष्पप्रकरावकीर्णयो:
परोऽपि को नाम तवानुमन्यते ॥")
यष्टिभेद: । इति शब्दरत्नावली ॥
(पुंसि तु राजविशेष: । यथा, राजतरङ्गिण्याम् । ८ । २८४ ।
"अथ पांक्तीहरिर्योऽभूच्चतुष्क: कोष्टकानुज:॥")

चतुष्की, स्त्री, (चतुष्क + स्त्रियां ङीप् ।) मशूरी । मशारि इति भाषा ॥ पुष्करिणीभेद: । इति मेदिनी । के । ८७ ॥

चतुष्टयं, क्ली, केन्द्रम् । इति नीलकण्ठीयजातकम् ॥ (चत:संख्या । यथा, कुमारे । ७ । १३ ।
"तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ॥"
चत्वारोऽवयवा यस्य । "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । ततो रेफस्य विसर्गे सत्वे च कृते "इस्वात्तादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) चतुरवयवे त्रि । इति मुग्धबोधम् ॥ (यथा, मनु: । ८ । १३० ।
"वधेनापि यदा त्वेतान्नियह्णीतुं न शक्नुयात् ।
तदेषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥"
यथाच, कुमारे । २ । १७ ।
"प्रवृत्तिरासीच्छन्दानां चरितार्था चतुष्टयी ॥")

चतुष्पथं, क्ली, (चतुर्णां पथां समाहार: । "तद्धितार्थेति ।" २ । १ । ५१ । इति समास: । "ऋक्पूरब्धू:पथामानक्षे ।" ५ । ४ । ७४ । इति अ: । "इदुदुपधस्येति ।" ८ । ३ । ४१ । इति षत्वम् । यद्वा, चत्वार: पन्थानो यत्र इति ।) एकत्र मिलितपथचतुष्टयम् । चौमाता पथ इति भाषा ॥ तत्पर्य्याय: । शृङ्गाटकम् २ । इत्य-

मरः। २। १। १७॥ (यथा, मनुः। ४। ३६।
"गुरुदक्षान् देवतं विप्रं धृतं मधु चतुष्पथम्।
प्रदक्षिणानि कुर्वीत प्रज्ञानांश्च वनस्पतीन्॥")
चतुष्पथः, पुं, (चत्वारः पन्थानो ब्रह्मचर्य्यादय आश्रमा यस्य। "ऋक्पूरिति।" ५। ४।७४। इति अः।) ब्राह्मणः। इति मेदिनी। थे २७॥
चतुष्पदः, पुं, (चत्वारि पदानि यस्य।) पशुः। (यथा, हरिवंशे। २१। १७।
"तरवश्च निरूपस्थाङ्कुरा नरचतुष्पदा हृष्टाः॥")
करणविशेषः। इति मेदिनी। दे। ४८॥ तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे।
"चतुष्पदभवो मर्त्यः सदाचारविवर्जितः।
स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः॥"
"मेषवृषसिंहराशयः मकरपूर्व्वार्द्धं धनुःपरार्द्धञ्च।"
इति दीपिका॥
(चतुष्पदविशिष्टे। त्रि। यथा, महाभारते। १। ६०। ११।
"चतुष्पदं द्विपदश्चापि सर्व्वमेवं भूता गर्भभूता भवन्ति॥"
व्याधिनिवारणोपायः। यथा,—
"वैद्यो व्याधुपसृष्टस्तु भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः।
उदग्राहरहोऽब्रह्माणो यथाध्वर्य्युं विनाध्वरे॥
वैद्यस्तु गुणवानेकस्त्रारयेदातुरान् सदा।
ध्रुवं प्रतितरैर्हीनं कर्णधार इवाम्भसि॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते॥
आयुष्मान् सत्त्ववान् साध्यो ह्यथवानात्मवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रश्नस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्॥
दोषघ्नमग्न्यनिकरमविकारि विपर्य्यये।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥
स्निग्धोऽनुगुप्तुर्बलवान् युक्तो व्याधितरक्षणे।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्याये॥)
चतुष्पदी, स्त्री, (चत्वारः पादा यस्याः। "संख्यासुपूर्व्वस्य।" ५। ४। १४०। इति अन्तलोपे। "पादोऽन्यतरस्याम्।" ४। १। ८। इति ङीपि। "पादः पत्।" ६। ४। १३०। इति पदादेशः।) पद्यम्। इति मेदिनी। दे। ४८॥ चौपदी इति भाषा॥ (यथा, छन्दोमञ्जर्य्याम्। १ स्तवके।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा॥")
चतुष्पाटी, स्त्री, (चतस्रः दिशः पाटयति भिनत्तीति। पाटि+अण+स्त्रियां ङीप्।) नदी। इति शब्दमाला॥
चतुष्पाठी, स्त्री, चतुर्णां वेदानां पाठो यस्यां सा। छात्राध्ययनस्थानम्। चौपाठी इति भाषा॥ इति लोके प्रसिद्धिः॥
चतुष्पाणिः, पुं, (चत्वारः पाणयो हस्ता यस्य।) विष्णुः। इति हारावली। ६॥ (चतुर्हस्तविशिष्टे, त्रि॥)
चतुःसमं, क्ली, (चतुर्णां चन्दनागुरुकस्तूरीकुङ्कुमानां समः समभागो यत्र। यद्वा, चतुर्भिश्चन्दनादिभिः समं एकत्र सद्भावस्थानं यत्र।) मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम्। इति हेमचन्द्रः। ३। ३०३॥ औषधविशेषः। यथा, सुखबोधे।
"लवङ्गं सैन्धवं पथ्या यमानी च चतुःसमम्।
आममूलविवन्धघ्नं पाचनं भेदि श्लोषघुत्॥"
अन्यच्च।
"जातीफलं त्रिदशपुष्पसमन्वितञ्च
जौरञ्च टङ्कणयुतं चरकेण चोक्तम्।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
आमातिसारमखिलं गुरु हन्ति शूलम्॥"
चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत्। चौंतिस् इति भाषा॥ इति ज्योतिषम्॥ (यथा, ऋग्वेदे। १। १६२। १८।
"चतुस्त्रिंशद्वानिनो देवबन्धो
र्वैक्तोरश्वस्य स्वधितिः समेति॥")
चतुस्त्रिंशज्ज्ञातज्ञः, पुं, (चतुस्त्रिंशज्ज्ञातं जानातीति। ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) बुद्धभेदः। इति हेमचन्द्रः। २। १४७॥
चतूराजी, स्त्री, (चतुर्भिरङ्गैः राजते दीप्यते इति। राज्+"कर्म्मण्यण्।" ३। २। १। इति अण्। स्त्रियां ङीप्।) चतुरङ्गक्रीड़ाविशेषः। इति तिथ्यादितत्त्वम्॥
चत्वरं, क्ली, (चत्वते क्षीक्रियते इति। चत+"कृगृशृदृचतिभ्यः क्वरच्।" उणां। २। १२१। इति क्वरच्।) स्वखिलम्। होमार्थपरिष्कृता भूमिः। अङ्गनम्। इत्यमरः। २। ७। ८॥ उठान चाताल इति च भाषा॥ (चतस्रणां रथ्यानां सङ्गमः। इति शब्दार्थचिन्तामणिः॥ यथा, महाभारते। ३। १५। २०।
"अतुरथ्यासु सर्व्वासु चत्वरेषु च कौरव!।
बलं बभूव राजेन्द्र! प्रभूतगजवाजिमत्॥"
नानाजनपदेभ्यः समागतानां वासस्थानम्। मठ इति भाषा॥ यथा, कथासरित्सागरे। ६।४१।
"कृत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम्।
अतिष्ठं चत्वरे गत्वा क्वायायां नगराद्बहिः॥")
चत्वारः, त्रि, (चतुरशब्दस्य प्रथमाविभक्तेर्बहुवचनेन सिद्धेस्थात्वम्।) चतुःसंख्या। चारि इति भाषा॥ इति व्याकरणम्॥ तद्वाचकानि। वेदः १ ब्रह्मास्यम् २ वर्णः ३ समुद्रः ४ हरिबाहुः ५ खर्दन्तिदन्तः ६ सेनाङ्गम् ७ उपायः ८ यामः ९ युगम् १० आश्रमम् ११ वृत्तपादः १२। इति कविकल्पलता॥ चतुःसंख्याविशिष्टे त्रि। इत्यमरः॥
चत्वारिंशत्, स्त्री, (चत्वारो दशतः परिमाणमस्याः। "षड्त्रिंशत्त्रिंशतोरिति।" ५। १। ५६। इति निपातनात् साधुः।) संख्याविशेषः। इति ज्योतिषम्॥ चल्लिश् इति भाषा॥ (यथा, भागवते। ४। १। ६०।
"तेभ्योऽमयः समभवन् चत्वारिंशच्च पञ्च च॥")
चत्वालः, पुं, (चत्वते प्रार्थ्यते स्वीक्रियते होमार्थेति। चत+"स्फायितञ्चिवञ्चिलूषिपिशिकुशिकचिभ्यो वलच्" उणां। ३। १५३। इति वलच्। नित्वं टित्वञ्च।) होमकुण्डम्। दर्भः। इति मेदिनी। ले। ८६॥ गर्भः। इति विश्वहेमचन्द्रौ॥
चद, ए अ याचे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-सेट्।) ए, अचदीत्। अ, चदति चदते। इति दुर्गादासः॥
चद, ए आह्लादे। दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ए, कर्म्मणि चन्द्यते। आह्लादो हर्षः। इति दुर्गादासः॥
चदिरः, पुं, (चन्दति दीप्यते स्वप्नरीरादिना इति। चदि+बाहुलकात् किरच् निपातनात् नस्य लोपः।) हस्ती। चन्द्रः। कर्पूरम्। सुभगः। इति संक्षिप्तसारे उणादिवृत्तिः॥
चन, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) चनति। इति दुर्गादासः॥
चन, म हिंसे। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) म, चनयति। इति दुर्गादासः॥
चन, य असाकल्यम्। अकार्त्स्न्यम्। यथा। किञ्चन। इत्यमरभरतौ॥ ("किमः क्षेपात् चित्तिचनौ।" इति सूत्रेण।) प्रत्ययोऽयं विभक्त्यन्तकिमुशब्दादुत्तरे भवति। इति सुग्धबोधम्॥
चनच, उ इतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वेट्।) उ, चञ्चित्वा चक्ता। इतिगतिः। इति दुर्गादासः॥
चन्दः, पुं, (चन्दयति आह्लादयति यद्वा चन्दति दीप्यते इति। चन्दि वा चन्द+घञादयश्च।) चन्द्रः। इति भरतधृतशब्दार्णवः॥
चन्दकः, पुं, (चन्दयति आह्लादयति लोकानिति। चदि आह्लादे+णिच्+"खुलञ्चौ।" ३। १।१३३। इति खुल्।) मत्स्यविशेषः। चाँदा इति भाषा॥ तस्य गुणः। रुचिबलकारित्वम्। अनभिष्यन्दित्वञ्च। इति राजवल्लभः॥ चन्द्रकोऽपि पाठः॥ (चन्द्रकशब्देऽस्य विवृतिर्द्रष्टव्या॥)
चन्दनः, पुं, क्ली, (चन्दयति आह्लादयतीति। चदि आह्लादे+णिच्+ल्युः।) स्वनामख्यातवृक्षः। (यथा, गोः रामायणे। ५। ७४। ३।
"चन्दनांस्तिलकांश्चूतानशोकान् सिन्धुवारकान्॥"
तथा च पञ्चतन्त्रे। १। ४२।
"विना मलयमन्यत्र चन्दनं न प्ररोहति॥")
तत्पर्य्यायः। गन्धसारः २ मलयजः ३ भद्रश्रीः ४। इत्यमरः। २। ६। १३१॥ श्रीखण्डम् ५ महार्हम् ६ श्वेतचन्दनम् ७ गोशीर्षम् ८ तिलपर्णम् ९ भद्रश्रीम् १० मलयोद्भवम् ११ गन्धराजम् १२ सुगन्धम् १३ सर्व्वासम् १४ शीतलम् १५ गन्धाढ्यम् १६ भोगिवल्लभम् १७ गाव-

नम् १८ शीतगन्धः १९ । इति राजनिर्घण्टः ॥ तैलपर्णिकः २० चन्द्रद्युतिः २१ । इति भावप्रकाशः ॥ भद्रश्रियम् २२ हितम् २३ हिमम् २४ । इति रत्नमाला ॥ पटीरः २५ वर्णकः २६ भद्राश्रयः २७ सेव्यः २८ रौहिणः २९ । इति शब्दरत्नावली ॥ याम्यः ३० शीतसारः ३१ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतलत्वम् । स्वादे कियत्कषायत्वम् । पित्तभ्रान्तिवमिज्वरक्रिमिदृष्टासन्तापग्लानिकारित्वम् । दृश्यत्वम् । वक्रदोषनाशित्वम् । शरीरकान्तिवृद्धिकारित्वम् । लेपने कामवृद्धिकारित्वम् । अतिसौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । तिक्तत्वम् । आह्लादनत्वम् । लघुत्वम् । श्रमशीतरोगविषशैत्यामदाहनाशित्वञ्च ॥ * ॥ श्रेष्ठचन्दनलक्षणं यथा,—

"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।
यन्मिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥"

इति भावप्रकाशः ॥

वानरविशेषः । इति हेमचन्द्रः । ३ । ३०५ ॥

चन्दनं, क्ली, (चन्द्यते आह्लाद्यते अस्मादनेन वा इति । चदि आह्लादे + ल्युच् + ल्युट् ।) भद्रकाली । इति मेदिनी । ने । ६१ ॥

चन्दनगोपी, स्त्री, (चन्दनमपि गोपायति स्वगन्धादिना रक्षतीति । गुप + अच् । ततो ङीप् । यद्वा, चन्दनवद् गुप्यति दीप्यते इति । अच् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

चन्दनधेनुः, स्त्री, (चन्दनेन अङ्किता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) पतिपुत्रवत्कृतनार्य्युद्देश्यकोत्सृष्टचन्दनाङ्कितसवत्सगौः । तत्प्रमाणप्रयोगौ लिख्येते ।

"नत्वा शिवं चन्दनचर्चिताया
धेनोः प्रदाने सविधिप्रयोगम् ।
रत्नाकरादेर्लिखितं विलोक्य
तनोति वाचस्पतिरग्रबुद्धिः ॥

अथ चन्दनधेनुदानविधिः । तत्र रत्नाकरे देवलः । जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि । सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥ पतिपुत्रवती नारी म्रियते यावतस्तयोः । दृश्यं न चोत्सृजेत् पुत्रः पिता यावच्च जीवति ॥ तथा कर्म्मोपदेशिन्यां ब्राह्मणसर्व्वस्वे च हलायुधधृतानि वचनानि । यथा स्मृतिः ।

पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्कितां धेनुं तस्याः स्वर्गाय कल्पयेत् ॥

तथा जातूकर्णः ।

धेनुं चन्दनमालिप्य यो दद्याद्भर्त्तृहेतवे ।
यदि पापशतैर्युक्ता तथापि स्वर्गमाप्नुयात् ॥

तथा वह्निपुराणे ।

न युक्तञ्च वृषोत्सर्गो यावत् पितरि जीवति ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥ *॥

चतुर्हस्तो भवेद्यूपो यज्ञवृक्षसमुद्भवः ।
वर्त्तुलः शोभनः स्थूलः कर्णस्थो धेनुमौलिकः ॥
बिल्वस्य बकुलस्यैव कलौ यूपः प्रशस्यते ।
अभावे वारुणेनापि यूपं कुर्य्याद्विधानतः ॥
वृषोत्सर्गे तु वृषभौलिकः ।
तरुणी रूपसम्पन्ना सुशीला च पयस्विनी ।
न्यायार्জ্জिता गृहे जाता देया सा श्रोत्रियाय गौः ॥
नदीतीरे वने गोष्ठे देवतायतनेषु च ।
शैवक्षेत्रे कुशक्षेत्रे राजद्वारे चतुष्पथे ॥

एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्गविधीर्युगपदुपसंहारदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते । अतोऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते । एकोद्दिष्टं न कुर्व्वीत न्यासिनाञ्चैव सर्व्वदा । अहन्येकादशे प्राप्ते पार्व्वणन्तु विधीयते ॥ इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसन्यासिनां एकोद्दिष्टनिषेधपार्व्वणविधीर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव । यद्वा पतिपुत्रवतीरूपप्रेतविशेषाधिकृतत्वं न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकृतसामान्यवृषोत्सर्गविध्यवगतफलभावनाकरणीभूतवृषकर्म्मैकत्वागमनुद्य तत्कर्म्मीभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधिर्लाघवादवगम्यते । पशुयागे सामान्यविध्यवगतापः प्रणयनीयाधिकरणीभूतचमसस्थाने गोदोहेनापः प्रणयेदिति विशेषविधिना गोदोहगुणविधिवत् । नालाभेऽपि प्रवेक्ष्यिनीम् । उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणमित्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च । अन्यथा धेनूत्सर्गस्य पृथक्कर्म्मत्वे फलभावना तत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात् । उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात् । ततश्च करणैक्यात् फलैक्यमिति । चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्ब्वकस्वर्गप्राप्तिः फलम् । एवं कपिलमन्त्रस्यापाठ्यपशुमस्वर्गप्रार्थनाया अपि तथैव तात्पर्य्यम् । तथा जातूकर्ण्यवचनस्यापि स्वर्गपदयोरपि तथैव तात्पर्य्यं बोध्यम् । भूतार्थानां विधिशेषिणामेव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात् । पापिष्ठमपि शुद्धेन शुद्धं पापहृतापि वेति कात्यायनवचनस्यापापदस्य प्रेतत्वे एव तात्पर्य्यदर्शनाच्च । अत्र यद्यपि पतिपुत्रवतीत्यत्र पतिपुत्रवत्त्वस्य विशेष्यीभूतकर्त्तृत्वयिमरणान्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकवन्ध्यो देवदत्तस्य गृहा इतिवत् कादाचित्कतद्वत्तामादायापि पतिपुत्रवतीतिप्रयोग उपपद्यते । तथापि अग्रतस्तयोर्भर्त्तुरग्रत इत्याभ्यां मरणकालिकी पतिपुत्रसत्तावगम्यते । गवां गोष्ठं इतिवत् । अथवा पराह्णान्वयेन धेनूत्सर्गकालिकीति । नचापुत्रिता सृता काचित् तस्या धेनुर्विगर्हिता । इति कपिलवचने अपुत्रितायाः पुत्रकर्त्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्रकर्त्तृकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्रवतीत्यस्य सपत्नीपुत्रवतीपरत्वं अवश्य वाच्यम् । तदेकवाक्यतया पुत्रिणीत्यादावपि तथात्वमिति वाच्यम् । अपुत्रितेति कपिलार्द्धस्य प्रसक्तिपूर्ब्वकतार्थं पतिपुत्रवत् निवृत्तरजस्काया धेनूत्सर्गनिषेधार्थत्वात् गर्भा सर्व्वा लक्षणाया बीजाभावात् । प्रतियोगिवत्ध्वंसप्रागभावयोरपि अत्यन्ताभावविरोधित्वमस्तु तु अजातपुत्रस्त्रीपरत्वं वा भवतु तथात्वेऽपि तस्या धेनुर्विगर्हितेति अप्रसक्तार्थापि अपुत्रिताधेनुदाननिन्दा पतिपुत्रवत्याश्चन्दनधेनुदानस्तुतिपरा । यथा हरेरुत्थाने मौञ्जीग्रहेण किञ्चिन प्रतिपद्यथ यो निगृह्यप्रसक्तापि निन्दा एकादश्यादिपौर्णमास्यन्तपक्षके रेवत्यन्तपादयोगविधिस्तुतिपरा । यथा वा वेदगाने यो गिरा गिरेति ब्रूयात् स आत्मानमपि गिरेत् इत्यप्रसक्तनिन्दा ऐरं श्रुत्वा अवगिरेदिति विधेः स्तुतिपरा । अतएव उक्तं शाबरभाष्ये । न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तर्हीतरत् स्तोतुमिति । स्तुतौ हि अप्रसिद्धगुणदोषारोपणदोषाय । न चात्र काम्यस्यैव कार्त्तिक्यादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम् । तन्मात्रपरत्वे मानाभावात् । प्रत्युत म्रियत इति वर्त्तमानार्थकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीतोपस्थितेश्च । ये तु वक्ष्यमाणमेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्व्वास्तासेन पुत्रेण प्राह पुत्रवतीर्मनुरिति मनुना पुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्वञ्च सपत्नीपुत्रवती प्रतीयते इति ब्रुवते तेऽतीवभ्रान्ताः । पुत्रवतीति पदस्याखण्डतया मतुपा पतिपदस्यान्वये तदसम्भवापत्तेः ॥ *॥

ननु वृषतुल्यवयो वर्णो वृषः स्याद्दक्षिणा द्विजाः ।
वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्रीगौर्विधिष्यते ॥
इति भविष्यसंवादाद्धेनुदानमिदं पतिपुत्रवत्या वृषोत्सर्गे दक्षिणादानस्य विशेषरूपम् । न तु प्रधानकर्म्मान्तरं गौरवात् । न च दक्षिणाया अङ्गत्वेन फलासङ्गतिः । यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीतिवत्तदुपपत्तेरिति चेत् न । वृषोत्सर्गदक्षिणातश्चन्दनाङ्कितधेनुदानस्य प्रकरणान्तराम्नायेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः । वृषोत्सर्गस्थानीयत्वेनानुवर्त्तमानग्रहणाचारात् । धेनुदानमुपगच्छद्वृषोत्सर्गनिषेधानामसङ्गतेः । कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीति कर्त्तव्यतायां वृषरूपदक्षिणादानविधानाच्च ॥ * ॥

यथा कपिल उवाच ।

अतः परं प्रवक्ष्यामि धेनुदानमनुत्तमम् ।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ॥
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
तथा ।
जीवद्भर्त्तृका तु या नारी पुत्रिणी म्रियते यदि ।
सवत्सामङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
साध्वी पतिव्रता नारी म्रियते यावतस्तयोः ।
दृश्यं नैवोत्सृजेत् पुत्री यावत् पितरि जीवति ॥

मृतपुत्रा च या नारी संगृहीता तु या भवेत्।
तस्या धेनुर्न दातव्या वृषोत्सर्गो विधीयते॥
अपुत्रिता मृता काचित्तस्या धेनुर्विगर्हिता।
दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत्॥
द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः।
त्रयाणां द्वौ सुतौ ज्येष्ठौ चतुर्णाञ्च त्रयः स्मृताः॥
पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः।
ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः॥
हेमशृङ्गीं खुरे रूप्यैः सुशीलां वस्त्रसंयुताम्।
कांस्योदरीं ताम्रदृष्टां घण्टाचामरभूषिताम्॥
प्रवालमालिकां दद्यात् कर्णयोरुभयोरपि।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत्॥
गवां लोकमवाप्नोति दिवि देवैश्च मोदते।
चन्दनेनाङ्कितां धेनुं दत्त्वा गच्छेत् सुरालयम्॥
तावत्तिष्ठति स्वर्लोके यावदाहूतसंप्लवम्।
न चोत्सर्गो वृषस्याच्च वत्सतर्प्यन्वितस्य च॥
वृषोत्सर्गविधानेन कर्त्तव्यं सर्व्वकर्म्म च।
मा नस्तोकेति मन्त्रेण दत्ते वृषाभ्यसीति च॥
धेनोश्च सक्थिदेशे तु त्रिशूलाङ्कं समालिखेत्।
वामभागे विशेषोऽयं दत्ते चक्रं समालिखेत्॥
तच्चान्यद्वर्ण्यदृविद्वानाचार्य्यस्तु विधानवित्।
ततो वै संलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम्॥
शूलं षड़ङ्गुलं कार्य्यं दत्ते वामे यथाविधि।
पूर्व्वाग्राभिमुखीं धेनुं यजमानोत्तराननः॥
मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत्॥" *॥

शिरसि ओं ब्रह्मणे नमः। ललाटे ओं वृषभध्वजाय नमः। कर्णयोः ओम् अश्विनीकुमाराभ्यां नमः। चक्षुषोः ओं अग्निभास्कराभ्यां नमः। जिह्वायां ओं सरस्वत्यै नमः। दन्तेषु ओं वसुभ्यो नमः। ओष्ठयोः ओं सन्ध्यायै नमः। ग्रीवायां ओं नीलकण्ठाय नमः। हृदि ओं स्कन्दाय नमः। रोमकूपेषु ओम् ऋषिभ्यो नमः। दक्षिणपार्श्वे ओं कुबेराय नमः। वामपार्श्वे ओं वरुणाय नमः। रोमाग्रेषु ओं रुद्रेभ्यो नमः। ककुदि ओं धर्म्माय नमः। जङ्घासु ओम् अधर्म्माय नमः। श्रोणितटे ओं पितृभ्यो नमः। खुरमध्ये ओं गन्धर्व्वेभ्यो नमः। खुराग्रे ओम् अप्सरोभ्यो नमः। लाङ्गूले ओं द्वादशादित्येभ्यो नमः। गोमये ओं महालक्ष्म्यै नमः। गोमूत्रे ओं गङ्गायै नमः। पयोधरेषु ओं चतुःसागराय नमः।

एवमङ्गानि संपूज्य पठेन्मन्त्रं समाहितः।
ओम् इन्द्रस्य च त्वमित्राणी विष्णोर्वक्षोऽसि च या स्मृता।
रुद्रस्य गौरी या देवी सा देवी वरदास्तु मे॥
ओं या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी तस्याः पापं व्यपोहतु॥
ओं देहस्था या च ब्रह्माणी गुरुरस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु॥
ओं सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु॥

गृहीत्वार्घ्यञ्च पाद्यञ्च उत्सृजेत्तामलङ्कृताम्।
दीयते ब्राह्मणायैषा आचार्य्याय महात्मने॥
एवंविधिर्यां धेनुं दत्त्वा तर्पणमारभेत्।
पुच्छं गृहीत्वा पित्रादीन् वृषोत्सर्गविधानतः॥
ऐशान्याञ्चालयेत् किञ्चिदाचार्य्याय च दक्षिणाम्।
वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम्॥
पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्यादिभिस्ततः।
कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः॥
आचार्य्याय प्रदातव्यं ब्रह्मणे कनकं तथा।
आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः॥
दीनानाथकृपणादींश्च अन्नाद्यैः परितोषयेत्॥"

इति कापिले धेनुदानप्रमाणम्॥ *॥

पुस्तकान्तरे पाठाधिक्यं यथा,—

"एकादशाद्ये प्रेतायाः षण्मासे चाब्दिके तथा।
त्रिपक्षे मासिके वापि दद्याद्धेनुं चन्दनाङ्किताम्॥

तथा वराहपुराणम्।

अयने विषुवेऽभ्यां युगाद्यापूर्णिमासु च।
दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम्॥

नन्वाद्यश्राद्धे त्रिपक्षे वेत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः। न वा सर्व्वे काला: स्युः। तत्र नाद्यः त्रिपक्षादौ श्रिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदं अशौचान्तद्वितीयदिनपरम्। अशौचान्तादृद्वितीयेऽह्नीत्यादेकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विघ्नपतिततत्त्वन एकादशाद्यौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्य्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यन्यतमकालेऽपि वृषोत्सर्गस्यावश्यप्रेतत्वपरीहारकत्वेन तस्य पुनः संवत्सरसाध्यसकृत्कृतस्य नित्यत्वं कल्प्यम्। एवं धेनुदानस्यापि। अतएव पूर्व्वसंवत्सरे मलमासपातेऽपि प्रागुक्तवचनेन कार्य्य एव इति नवीना जगुः। एककर्तृकानेकवृषोत्सर्गोऽपि श्रिष्टाचार एकदिनेऽपि। तथा हि स्वर्गलोकगमनफलश्रुतेः काम्यत्वेन यो भूय आरभते तस्मिन् फले विशेष इति न्यायादविरोधः॥ नन्वेवं नैमित्तिकत्वात् कथमावृत्तिः सकृत्कृते कृतः शास्त्रार्थ इति न्यायात्। न चैकत्र क्रियाद्वयमिति वचनात्। अत्रायं विशेषः। काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं नैमित्तिकमात्रं सकृदेव। किञ्च। संक्रान्त्यादिनिमित्तकश्राद्धमपि पुनः पुनः स्यात्। मैवं तत्र पिण्डरूपप्रधानफलस्य सकृत्वेन चरितार्थ इति॥ *॥ अत्रोक्तानि सर्व्वाण्येतानि वचनानि तिर्य्यगधिकरणन्यायमूलानि। तथा हि तिर्य्यगधिकरणे तिर्य्यक्पङ्क्त्यार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् पङ्क्तेः प्रचरणविरहात् आर्षेयाणां अन्धबधिरमूकानामवैदग्ध्यश्रवणोच्चारणविरहात् साङ्गयागासामर्थ्ये तेषां यथा यागानधिकारस्तद्वदत्र

स्वपितुः पिण्डदत्वेषु अधिकारो न विद्यते। इति छन्दोगपरिशिष्टे अग्निष्वात्ताद्यन्तर्गणसूक्ता जीवत्पितृकश्चेतानन्यांश्चेतर इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुच्छगलितोदकतर्पणविरहात् साङ्गकरणासामर्थ्ये वृषोत्सर्गानधिकारः। अतएव हेतनिर्णयेऽपि। अनूचितस्त्रियां करणीभूतगर्भाधेन यागवद्वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाच्चाधिकार एवाभ्युदयिकश्राद्धवत् जन्मास्युपनयनाङ्गसंग्रिखवपनवच्च। अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स तु यदि पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यादित्येव मात्रस्तदा पुत्र इत्यादिवचनभागवैयर्थ्यं स्यात्। यदि च जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इत्येव मात्रस्तदा पूर्व्वभागवैयर्थ्यं स्यात्। यदि वा पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्य्यादित विशिष्टरूपस्यापि पतिपुत्रवत्यास्तदुभयरहितायाश्च जीवत्पितृकपौत्रादिना वृषोत्सर्गः स्यात्। स चायुक्त एव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनन्यायसंवादाद्वाक्यद्वयमेव सिध्यति। प्रमाणवद्वौरवस्य सर्व्वाङ्गीकृतत्वात्। दर्शपौर्णमासयोः षट्प्राधानापूर्व्ववत्। अथवोक्तदेवलादिवचने ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानत इत्यन्तकापिलसकलवचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरजनस्यकापिलप्रतिप्रसूतकनिष्ठपुत्रभिन्नजीवत्पितृकात् अन्यो जनो वृषोत्सर्गं कुर्य्यात्। इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्रवत्या ज्येष्ठपुत्र एव चन्दनाङ्कितधेनुसुत्सृजेदिति विधिश्च सिध्यति। ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रसत्त्व एव तेन तदन्यत्तपितृकेण वा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्राभावे तु न केनापि। एवं पत्न्यादिना चन्दनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम्॥ वस्तुतस्तु पतिपुत्रवत्या वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिसत्त्वं पुत्रसत्त्वं वा। मृतपुत्रेत्यादिप्रागुक्तकापिलवचने पतिसत्त्वे कनिष्ठपुत्रसत्त्वे च वृषोत्सर्गावगतेः। तत्पुत्रस्य पितुः सत्त्व एवानधिकारोक्त्या तन्मरणे वृषोत्सर्गावगमाच्च। न वा तदुभयसत्त्वं मिलितं उक्तन्यायावगततत्पुत्रस्य जीवत्पितृकत्वहेतोरेव तादृशनिषेधप्राप्तेः पतिपुत्रसत्त्वयोर्निर्बीजहेतुत्वकल्पनानौचित्यात् तयोर्व्यभिचारिहेतुत्वे तु अदृष्टकल्पनाया अन्याय्यत्वात् सिद्धजीवत्पितृकनिषेधप्रयुक्तया पतिपुत्रवत्या निषेधोपपत्तौ अधिकानिषेधकल्पने

गौरवाच्च। यस्तु जीवत्पितृकवृषोत्सर्गनिषेधे पतिपुत्रवत्या: पृथगुपसंहार: सोऽपि तस्या: पुत्रानधिकारमात्रप्रयुक्तस्विद्वृषोत्सर्गाभावभागित्वानुवाद:। पूर्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम्। ततश्चोक्तवचने तिर्यग्धिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गकर्मत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते। एतेन वृषोत्सर्गकर्मणि कपिलप्रतिप्रसूतसपतिकावृषोत्सर्गश्रुतिमत्कनिष्ठपुत्राद्यजीवत्पितृकेतरत्वविशेषणं सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्रस्यैव चन्दनाङ्कितधेनूत्सर्गमात्रञ्च लभ्यते। अतो जीवत्पितृकेण काम्यवृषोत्सर्ग: पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्य्य:। एवं सपतिकाया अपि पुत्रस्य कर्मयोग्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्ग: कार्य्य एवेति स्थितम्। इदन्तु रत्नाकरहलायुधाचार्य्यचूड़ामणिविद्याभूषणशुभङ्करमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रचरति। क्वचिद्देशे स्मार्त्तभट्टाचार्य्यस्यापि सम्मतपद्धतिर्दृश्यते। अतएवात्र विशेषादग्निनामनाचारोऽनाचारएव। अत्र भविष्योक्तप्रकारस्तु वैकल्पिक एव। स्मृतिग्रन्थे विकल्पो हि आकाङ्क्षापूरके सतीति जैमिन्युक्ते:। तत्र त्वपूजाहोमाद्यङ्गेषु विशेषमन्त्रतन्त्रोक्ते:। कापिलकल्पेन वृषोत्सर्गधर्म्मातिदेशेन विशेषोक्तनिरासाच्च॥३॥ सम्प्रति विचारितकापिलकल्पप्रयोगोऽभिधीयते यथा। गोग्रासादौ वितानयुक्ते प्रागुदक्प्रवणं देशं गोमयेनोपलिप्य कृतनित्यक्रिय आचान्त: कृताङ्गन्यासो द्विराचम्य प्राङ्मुख: ओं तद्विष्णो: परमं पदं इति विष्णुं स्मृत्वा नत्वा च उदङ्मुख: ओं तत् सदद्यामुकार्य्य कृतैतिलजलपूर्णताम्रपात्रमादाय विशेषानुपदेशात् सुस्थचान्द्रमासोल्लेखेन अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्राया: प्रेतायाऽमुकाया: अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्राया: प्रेतायाऽमुकाया: प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकाम: चन्दनाङ्कितसवत्सधेनुदानकर्म्माहं करिष्यामीति सङ्कल्पयेत्। ततस्तज्जलमेग्राम्यां क्षिपेत्। तत: स्वस्तीत्वा सङ्कल्पसूक्तं पठेत्। तत: प्रथमं ब्रह्मवरणम्। तत्र उत्तरामुखं ब्रह्माणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमान: प्राञ्जलि: ओं साध्वभवानास्तां इति वदेत्। ओं साध्वहमासे इति प्रतिवचनं दत्त्वा ब्रह्मा तदासनं उपविशति। तत: कर्त्ता ओम् अर्चयिष्यामो भवन्तं इति वदेत्। ओम् अर्चेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूलवस्त्राभरणैर्ब्रह्माणं संपूज्य तद्दक्षिणं जानु स्पृष्ट्वा ओम् अद्यामुकेमासि अमुकेपक्षेऽमुकतिथौ अमुकगोत्राया: प्रेताया: अमुकाया अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्रममुकप्रवरं श्रीअमुकदेवशर्म्माणं त्वामस्मिन् चन्दनाङ्कितधेनुदानाङ्गहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धादिभिरभ्यर्च्याहं वृणे इति ब्रह्माणं वृणुयात्। ओं वृतोऽस्मीति प्रतिवचनम्। ओं यथाविहितं ब्रह्म कर्म्म कुरु। ओं यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं गानाशक्तौ ब्रह्मकर्म्म करणायेत्यत्र ब्रह्मादिकर्म्मकरणायेति वदेत्। स्वयं होमासामर्थ्ये होतारं वृणुयात्। तत्र होत्रकर्म्मकरणायेति विशेष:। एवं तत्तद्धारकाचार्य्यमपि। आचार्य्यान्तराभावे ब्रह्मैवाचार्य्यत्वेनापि वरणीय:। तत्र ब्रह्माचार्य्यकर्म्मकरणायेति विशेष:। एवं प्रागुक्तवत् सदस्यवरणमपि। दक्षाङ्गुल्यादिमानन्तु यागमानिकमेव सर्व्वत्र ग्राह्यम्। तत: पुण्याहस्वस्त्यृद्धिवाचनं कृत्वा चन्दनाङ्कितधेनुदाननिमित्तकहोमीयवह्निरचयलकामो भारतनामोच्चारणं कुर्य्यात्। ततो यजमानो होता वा गायत्र्या गोमन्त्रं ओं गन्धद्वारेत्यादिना गोमयं ओम् आप्यायस्वेत्यादिना दुग्धं ओं दधिक्राव्ण इत्यादिना दधि ओं तेजोऽसीत्यादिना घृतं ओं देवस्य त्वा सवितु: प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति कुशोदकञ्च प्रोक्षयित्वा गायत्र्या सर्व्वमेकीकृत्य तेन वेदीमभ्युक्ष्य तत्र घटान् संस्थाप्य गन्धैरभ्यर्च्य विष्णुञ्च संपूजयेत्। ततो हस्तप्रमाणं स्रुक्खिलं शुक्लैरक्षारास्थिकेशतुषादिरहितं पूर्व्वोत्तरप्रवणं समं वा गोमयेनोपलिप्य तत्र स्वस्यग्न्युक्तविधिनाग्निं संस्थाप्य स्वस्यग्न्युक्तवृषोत्सर्गपद्धतिक्रमेण कर्म्म कृत्वा प्राङ्मुखो धेनुमग्निसमीपं नीत्वा ओं मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽश्वेषु रीरिष:। वीराम्मा नो रुद्रभामितोऽवधीर्हविष्मन्त: सदमित्त्वा हवामहे। इति मन्त्रेण धेनोर्वामसक्थिनि षड़ङ्गुलं त्रिमूलं चन्दनेन कुशेन लिखेत्। वीराम्मा न इति सामगानाम्। यजुषान्तु मा नो वीरानिति मन्त्रभागे पाठ:। तत: ओं वृषोक्षणि भासुना दुमन्तं त्वा हवामहे पवमान: स्वर्द्दृशम्। इति मन्त्रेण दक्षसक्थिनि पश्चाङ्गुलं आरद्वीर्घं चक्रञ्च तथैवाचार्य्यो लिखेत्। अस्मिन्नवसरे अग्नेरुत्तरे सवत्सधेनुमौलिकं यूपमारोपयेत्। तत: स्वस्यग्न्युक्तविधिना वृषवह्निं स्थापयेत्। तत: सितवाससा जलमपनीय गन्धचन्दनपुष्पाञ्जनसिन्दूरगोरोचनाद्यै: स्वर्णब्रह्माभ्यां रूप्यसपत्नेन वस्त्रेण कांस्यक्रोडेन ताम्रपृष्ठेन चतुश्चामराभ्याञ्च यथायोग्यं तथा कर्णयो: प्रवालमालिकाभ्याञ्च धेनुं भूषयित्वा पाद्यादिभिरभ्यर्च्य स्वस्यग्न्युक्तमन्त्रान् आवर्त्य च प्राङ्मुखीं धेनुं शुक्लवाससा यूपे बध्नीयात्। ततो यजमान उत्तरामुख: धेनोर्मस्तकादिक्रमेण तत्तन्मन्त्रै: पूजयेद्यथा। शिरसि ओं ब्रह्मणे नम:। एवं ललाटे वृषभध्वजाय नम:। कर्णयो: अश्विनीकुमाराभ्याम्। चक्षुषो: सूर्य्यभास्कराभ्याम्। जिह्वायां सरस्वत्यै। दन्तेषु वसुभ्य:। ओष्ठयो: सन्ध्यायै। गलायां नीलकण्ठाय। हृदि स्कन्दाय। रोमकूपेषु ऋषिभ्य:। दक्षपार्श्वे कुबेराय। वामपार्श्वे वरुणाय। रोमाग्रे रश्मिभ्य:। ऊरुषु धर्म्माय। जङ्घासु अधर्म्माय। श्रोणीतटे पितृभ्य:। खुरमध्ये गन्धर्व्वेभ्य:। खुराग्रेषु अप्सरोभ्य:। लाङ्गूले हनूमदादिभ्य:। गोमये महालक्ष्म्यै। गोमूत्रे गङ्गायै। पयोधरेषु चतुःसागराय। एवं संपूज्य पठेत्।

ओम् इन्द्रस्य च त्वमिन्द्राणी विष्णोर्लक्ष्मीश्च या स्मृता।
रुद्रस्य देवी या गौरी सा देवी वरदास्तु मे॥
ओं या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥
ओं देवस्या या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्या: शान्तिं प्रयच्छतु॥
ओं सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्या: स्वर्गं प्रयच्छतु॥

तत: ओम् आचार्य्याय नम: इत्यनेनोदङ्मुखं सम्प्रदानब्राह्मणं पाद्यादिभि: संपूज्य एवं ओं रुद्राय नम: इति तद्देवतां संपूज्य ओं चन्दनाङ्कितसवत्सधेनवे नम: इत्यनेन पाद्यार्घ्याचमनीयगन्धपुष्पैर्धेनुं संपूज्य संप्रोक्ष्य च ब्राह्मणहस्ते जलं दत्त्वा कुशतिलजलान्यादाय ओं तत् सदद्यामुके मासि अमुके पक्षे अमुकतिथावमुकगोत्राया: प्रेताया अमुकाया अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्राया: प्रेताया अमुकाया: प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकामोऽहं एतां सालङ्कारां चन्दनाङ्कितसवत्सधेनुं रुद्रदेवताकां अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्यब्राह्मणाय तुभ्यं ददानीति ब्राह्मणहस्ते जलं दद्यात्। तत: सम्प्रदानब्राह्मण: पुच्छं धृत्वा ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा च सावित्रीं पठेत्। ततो धेनुरियं रुद्रदेवताकेति वदेत्। यथाशाखं कामस्तुतिञ्च पठेत्। यथा सामवेदे। ओं क इदं कस्मा अदात् काम: कामायादात् कामो दाता काम: प्रतिग्रहीता काम: समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥ यजुर्व्वेदे तु। ओं द्यौष्ट्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु कोऽदात् कस्मा अदात् काम: कामायादात् कामो दाता काम: प्रतिग्रहीता कामैतत्ते तव कामदुघात् भुनजामहै॥ ऋग्वेदे तु। सामगमन्त्रान्ते। ओं हरिरसि द्यौष्ट्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु। इदमधिकम्। ततो यजमान: ओं अद्येत्यादि कृतैतत्साङ्गचन्दनाङ्कितसवत्सधेनुदानकर्म्मण: साङ्गतार्थं दक्षिणामिमां हिरण्यं तन्मूल्यं वा विष्णुदैवतं अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्याय ब्राह्मणाय तुभ्यमहं ददानीत्याचार्य्याय दद्यात्। आचार्य्यस्तु ओमिति गृहीत्वा

स्वस्तीति वदेत्। ततो वृषोत्सर्गवन्मन्त्रोहेन स्वस्यगृह्योक्तआद्यादिग्रेयं कर्म्म समापयेत्। ततः सदस्यदक्षिणां दत्त्वा आहूतान् वस्त्रमाल्यादिभिः पूजयेत्। सामगश्चेदिदानीं ब्रह्महोत्राचार्य्यसदस्येभ्यो ब्राह्मणेभ्यो दक्षिणां वृषोत्सर्गवद्दद्यात्। अन्यवेदी तु स्वस्यगृह्योक्तरीत्या यथास्थानं दक्षिणां वृषोत्सर्गवद्दद्यात्। शूद्रस्तु यजुर्वेदिवत् सर्व्वं कुर्य्यात्। किन्तु मन्त्रपाठं ब्राह्मणेन कारयेत्। दीनानाथादींश्च वस्त्रान्नादीन्संतोषयेदिति॥"*॥ इति श्रीचन्द्रशेखरवाचस्पतिभट्टाचार्य्यविरचितः चन्द्रनाङ्कितधेनुदानविधिप्रयोगः समाप्तः॥

चन्दनपुष्पं, क्ली, (चन्दनमिव सुगन्धि पुष्पं यस्य।) लवङ्गम्। इति राजनिर्घण्टः॥

चन्दनप्यारिवा, स्त्री, (चन्दनगोपी प्यारिवा। प्याकपार्थिवादिवत् समासः।) प्यारिवाविशेषः। इति राजनिर्घण्टः॥

चन्दनसारः, पुं, (चन्दनस्येव सारो यस्य।) वज्रसारम्। इति राजनिर्घण्टः॥

चन्दना, स्त्री, (चन्दयति आह्लादयति स्वगन्धादिनेति। चदि आह्लादे+णिच्+युच्। स्त्रियां टाप्।) प्यारिवाविशेषः। इति राजनिर्घण्टः॥ नदीविशेषः। सा तु मधुखाल्याख्यनगरसमीपे प्रसिद्धा॥

चन्दनाचलः, पुं, (चन्दनस्य चन्दनोत्पादको वा अचलः। चन्दनाकरः पर्व्वत इत्यर्थः।) मलयपर्व्वतः। इति जटाधरः॥

चन्दनाद्रिः, पुं, (चन्दनस्य चन्दनोत्पादको वा अद्रिः पर्व्वतः।) मलयपर्व्वतः। इति त्रिकाण्डशेषः॥

चन्दनी, स्त्री, (चन्दयति आह्लादयति जलादिदानेनेत्यर्थः। चन्दन+ङीष्) नदीविशेषः। इति मेदिनी। ने। ६०॥ (यथा, गोः रामायणे। ४। ४०। २०।
"रुचिरां कुटिलाञ्चैव चन्दनीं चापगां तथा॥")

चन्दनीया, स्त्री, (चन्द्यते दीप्यतेऽनया। चदि+करणे अनीयर्।) गोरोचना। इति राजनिर्घण्टः॥

चन्द्रिः, पुं, (चन्दन्ति हृष्यन्ति लोका येन। चदि आह्लादे+"इषिमदीदि।" उणां। १।५१। इति किरच्।) चन्द्रः। हस्ती। इति मेदिनी। रे। १५२॥

चन्द्रं, क्ली, (चन्दति दीप्यते इति। चदि+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) स्वर्णम्। पुष्करम्। इति राजनिर्घण्टः॥ (वृत्तविशेषः। यथा, वृत्तरत्ने।
"द्विजवरगणयुगसुपधाय परिकलय करमथनगणयुगलमिह गन्धयुगमपि वितर। पण्डितपतिभणितमिति चन्द्रमिदमिति प्रथयत सकलकविकुलहृदयमोदकरमवतुरत॥")

चन्द्रः, पुं, (चन्दयति आह्लादयति चन्दति दीप्यते इति वा। चन्द+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) देवताविशेषः। चाँद इति भाषा। तत्पर्य्यायः। हिमांशुः२ चन्द्रमाः३ इन्दुः४ कुमुदबान्धवः५ विधुः६ सुधांशुः७ शुभांशुः८ ओषधीशः९ निशापतिः१० अब्जः११ जैवातृकः१२ सोमः१३ क्षपाकरः१४ मृगाङ्कः१५ कलानिधिः१६ द्विजराजः१७ शशधरः१८ नक्षत्रेशः१९ क्षपाकरः२०। इत्यमरः। १। ३। १३—१४॥ रोहिणीनाथः२१ निशीथिनीनाथः२२ शर्व्वरीशः२३ एणाङ्कः२४ शीतरश्मिः२५। इति शब्दान्तरम्॥ ससुद्रनवनीतः२६ सारसः२७ श्वेतवाहनः२८ नक्षत्रनेमिः२९ उडुपः३० सुधासूतिः३१ तिथिप्रभुः३२ अमतिः३३ चन्दिरः३४ चित्राटीरः३५ शशधरः३६ अजः३७ नभश्चमसः३८ राजा३९ रोहिणीशः४० अत्रिनेत्रजः४१ पद्मजः४२ सिन्धुजन्मा४३ दशाश्वः४४ हरचूड़ामणिः४५ माः४६ तारापीड़ः४७ निशामणिः४८। इति जटाधरः॥ मृगलाञ्छनः४९ दर्शपतिपत्५० क्षायाभृद्गधरः५१ गहनेमिः५२ दाक्षायणीपतिः५३ जलौकसहजः५४ सुधाकरः५५ सुधाधारः५६ शीतभानुः५७ तमोहरः५८ तुषारकिरणः५९ हरिः६० हिमद्युतिः६१ द्विजपतिः६२ विश्वसाः६३ अष्टतदीधितिः६४ हरिताश्वः६५ रोहिणीपतिः६६ सिन्धुनन्दनः६७ तमोनुत्६८ रजतिलकः६९ कुमुदेशः७० क्षीरोदनन्दनः७१ कान्तः७२ कलावान्७३ यामिनीपतिः७४ सिप्रः७५ मृगपिप्रुः७६ सुधानिधिः७७ तुङ्गी७८ पद्मजन्मा७९ चन्दः८० अत्रिनवनीतकः८१ पीयूषमहाः८२ शीतमरीचिः८३ शीतलः८४। इति शब्दरत्नावली॥ त्रिनेत्रचूड़ामणिः८५ अत्रिनेत्रभूः८६ सुधाशुः८७ परिशाः८८ वलक्षगुः८९ तुङ्गीपतिः९० यज्ञनाम्यतिः९१ पर्व्वधिः९२ क्षेदुः९३ जयन्तः९४ तपसः९५ खचमसः९६ विकसः९७। इति त्रिकाण्डशेषः॥ दशवाजी९८ श्वेतवाजी९९ अष्टतनुः१०० कौमुदीपतिः१०१ कुमुदिनीपतिः१०२ भपतिः१०३ दक्षजापतिः१०४ ओषधीपतिः१०५ कलाभृत्१०६ शशभृत्१०७ एणभृत्१०८ क्षायाभृत्१०९ अत्रिदृग्जः११० निशाराजम्१११ निशाकरः११२ अष्टतः११३ श्वेतद्युतिः११४। इति हेमचन्द्रः। २। १६॥ *॥ तस्योत्पत्तिर्यथा,—
"ब्रह्मणो मानसः पुत्रस्त्रिनेत्रसम महातपाः।
अपुत्रकाम! प्रजा वतस! तपस्तेपे सुदुश्चरम्॥
त्रीणि वर्षसहस्राणि दिव्यानीतीह नः श्रुतम्।
ऊर्द्धबाहुरभूत्तस्य रेतः सोमत्वमीयिवत्॥
नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः।
तं गर्भं ब्रह्मणादिष्टा दश देवी दधुर्दिशः॥
संगत्येव महाराज! नैव ताः समशक्नुवन्।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः॥
ततस्ताभिः सहैवासौ निपपात वसुन्धराम्।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः॥
रथमारोपयामास लोकानां हितकाम्यया।
स तेन रथमुख्येन सागरान्तां वसुन्धराम्॥
त्रिःसप्तकृत्वो दुहितृणोत्कार्य्यन्तं प्रदक्षिणम्।
तस्य तत्प्लावितं तेजः पृथिवीमन्वपद्यत॥
तेनौषधयः समुद्भूता याभिः सन्धार्य्यते जगत्।
स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम्॥"
तस्य शीतत्वपूर्णत्वयोः कालो यथा,—
"कृष्णाष्टमीदिनादूर्द्धं यावच्छुक्लाष्टमीदिनम्।
तावत् कालं शशी शीतः पूर्णस्तत्रोपरि स्मृतः॥"
इत्यग्निपुराणे ज्योतिःशास्त्रम्॥
तस्य क्षयवृद्धिकारणं यथा, पाद्मे स्वर्गखण्डे।
"अश्विन्यादास्तु दक्षस्य उपयेमे सुता विधुः।
रोहिण्यामेव सततं बद्धप्रेमा रराम ह॥
दृष्ट्वा तदितरास्ताश्च तमाः पितरमब्रुवन्।
असाकं कामदस्तात! जामाता तव रोहिणीम्।
रमयत्येव सततं तेन तप्ता वयं पितः!॥
तत् श्रुत्वा चाप्रियं दक्षः सोममाह भृशञ्च भोः।
प्रेम्णा समेन सर्व्वासु दुहितृष्मम मानद!॥
जग्राह तद्वचो नैव सोमः सप्रेम रोहिणीम्।
तथैव रमयामास श्रुत्वा दक्षश्चुकोप ह॥
शशाप ते न भविता क्षयत्वं मद्वचोऽतिगः।
यस्माच्च परिग्रस्तो भव त्वं शीघ्रमेतकः॥
अथ क्षयमिते तस्मिन् सर्व्वास्ताः सहिताः क्षियः।
पितरं शरणं प्राप्ताः शीर्य्यते नः पतिः पितः!॥
न वयं तेन वर्त्स्यामो विना सुखनिराकृताः॥
उवाच दक्षस्ताः सर्व्वाः शापो मे नान्यथा भवेत्।
मासमध्ये पञ्चमेकं वर्द्धतां स क्रमेण वै॥
क्षयं क्रमेण प्राप्नोतु पञ्चमेकं क्षयस्थया।
एवं शापं ददावस्मै दक्षश्चैव क्षयस्थया॥
तथैव राजते योनि क्षयवृद्धी दधद्विधुः॥"
स च गौरवर्णः वायुकोणस्थोवैश्यजातिसत्त्वगुणकर्कटराशिरुग्रगणशिरोनक्षत्रसौम्यलवणरसमुक्तागैरिकादिधातुसर्पाणामधिपतिः। आर्द्रभूमिचारी तपस्वी अपराह्णकाले प्रबलः श्लेष्मप्रकृतिः स्थूलो युवा शुभग्रहः शुक्लाभश्च। इति ताजकज्ञातकादयः॥ अर्द्धोदयः शशी प्रायः। इति समयाध्यतम्॥ *॥ कर्पूरम्। स्वर्णम्। (यथा, ऋग्वेदे। १। १४१। १२। [वसुन्धरः॥")
"उतनः सुदोत्मा जीरात्रो होता मन्द्रः शशयजलम्। काम्पिलः। इति मेदिनी। रे। ३१॥ द्वीपविशेषः। इति शब्दमाला॥ विसर्गः। इति तन्त्रम्॥ कमनीयः। मेचकः। स तु वर्हचन्द्रकः। इति हेमचन्द्रः॥ रक्तरजतम्। तत्तु शीघ्रमुक्ताफलम्। (योगोक्तक्रीड़ाकृती। यथा, हठयोगप्रदीपिकायाम्। २। ७।
"वह्निपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्॥"
"चन्द्रेण चन्द्रनाथेड़या।" इति तट्टीका॥ भ्रूमध्यभागस्थसोममण्डलम्। यथा, तत्रैव। ३। ४६।
"चन्द्रात् स्रवति यः सारः स स्यादमरवारुणी॥"
"चन्द्रात्भ्रुवोरन्तर्वामभागस्थात् सोमात्।
तट्टीका॥)
आह्लादजनकद्रव्ये त्रि। इति भरतधृतवाक्यात्॥

चन्द्रकं, क्ली, (चन्द्र इव चन्द्रप्रभा इव कायतीति । कै+कः । वर्णसाहश्यात्तथात्वम् ।) सितमरिचम् । इति राजनिर्घण्टः ॥

चन्द्रकः, पुं, (चन्द्र इव कायति प्रकाशते इति । कै+कः ।) वर्हनेत्रम् । मयूरपुच्छेर चाँद इति भाषा । तत्पर्य्यायः । मेचकः २ । इत्यमरः । २ । ५ । ३१ ॥ (यथा, गीतगोविन्दे । २ । ३ ।

"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ॥")

नखः । इति शब्दचन्द्रिका ॥ मत्स्यविशेषः । चाँदा माछ इति भाषा । अस्य गुणाः । अनभिष्यन्दित्वम् । मधुरत्वम् । बलवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । चलत्पूर्णिमा २ चन्द्रचञ्चला ३ चन्द्रिका ४ । इति शब्दरत्नावली ॥ (मण्डलम् । यथा, माघे । ५ । ४० ।

"यां चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ॥"

"चन्द्रकैश्चन्द्राकारैर्मण्डलैर्मदानदीनाम् ।" इति मल्लिनाथः ।) चन्द्रशब्दात् स्वार्थे कः चन्द्रश्च ॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं सुखभागं कलयतीति । कलि+अच् टाप् च ।) द्रगड़वाद्यम् । वाचामत्स्यः । इति शब्दरत्नावली ॥ (चन्द्रस्य कला ।) चन्द्रस्य षोड़शभागेषु भागः । तद्यथा,—

"पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ॥
अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डला ।
तद्विद्येवाऽमृता चेति कलाः सोमस्य षोड़श ॥"

आसां प्रयोजनं तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य प्रणवादिसविन्दुप्रत्येकाक्षरयुक्तनमोऽन्ततत्तत्प्रत्येककलानामरूपैर्मन्त्रैश्चालनम् । इति कामशास्त्रम् ॥ * ॥ तन्त्रोक्ता कला यथा,

"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ।
आसां प्रयोजनं कलावतीदीक्षादौ पूजनम् ॥"

इति रुद्रयामलम् ॥

(चन्द्रः । यथा, कथासरित्सागरे । १ । ३६ ।

"स च दक्षमखस्तेन नाशितो मन्युना मया ।
ततो जाता हिमाद्रेरुमध्ये चन्द्रकला यथा ॥")

चन्द्रकान्तं, क्ली, (चन्द्रवत् कान्तं कान्तिः कमनीयता अस्य ।) श्वेतखण्डचन्दनम् । कैरवम् । इति रत्नमाला ॥

चन्द्रकान्तः, पुं, (चन्द्रः कान्तः प्रियो यस्य ।) कैरवम् । (चन्द्र इव कान्तः कान्तियुक्तः । चन्द्रः कान्तः अभीष्टो अधिष्ठातृदेवोऽस्येति वा ।) मणिभेदः । इति मेदिनी । ते । १६५ ॥ अस्य पर्य्यायाः । चन्द्रमणिः २ चान्द्रः ३ चन्द्रोपलः ४ । इति हेमचन्द्रः । ४ । १६२ ॥ इन्दुकान्तः ५ चन्द्राश्मा ६ संज्ञवोपलः ७ शीताश्मा ८ चन्द्रिकाश्मवः ९ अग्निकान्तः १० । (यथा, पञ्चतन्त्रे । १ । ८८ ।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
चिभिर्वराटैर्विपणन्ति गोपाः ॥")

अस्य गुणाः । स्निग्धत्वम् । स्निग्धत्वम् । अस्रदाहग्रहालक्ष्मीनाशित्वम् । शिवप्रीतिकरत्वम् । स्वच्छत्वञ्च ॥* ॥ तदुद्भववारिगुणाः । विमलत्वम् । लघुत्वम् । पित्तमूर्च्छापिपासादाहकासमदात्ययरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः ।) रात्रिः । इति शब्दचन्द्रिका ॥ (चन्द्रस्य कान्ता ।) चन्द्रपत्नी च ॥

चन्द्रकालानलं, क्ली, चक्रविशेषः । यथा,—

"चन्द्रकालानलं चक्रं सोमाकारं लिखेद्बुधः ।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ॥
पूर्वत्रिशूलमध्यस्थं दिनं ऋक्षादि लिख्यते ।
त्रिशूले च बहिर्मध्ये मध्ये वह्निस्त्रिशूलके ॥
स्तम्भस्त्रिशूले नामर्क्षे मध्यमं बहिरष्टके ।
क्षेमलाभजयप्राप्ताः नामर्क्षे चन्द्रगर्भगे ॥
वर्जनीयं प्रयत्नेन प्रथमाष्टत्रिपञ्चकम् ॥"

इति समयाष्टतम् ॥

चन्द्रकी, पुं, स्त्री, (चन्द्रको विद्यतेऽत्रेति अच् । चन्द्रक+ङीष् ।) मयूरः । इति त्रिकाण्डशेषः ॥

चन्द्रकुण्डः, पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्म्मितः कुण्डो वा । चन्द्राधिष्ठातृकः कुण्ड इत्यर्थः ।) कामरूपस्थसरोवरविशेषः । (यथा, कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्याये ।

"चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ॥")

चन्द्रकूटः, पुं, (चन्द्राख्यः कूटः पर्व्वतः । यद्वा, चन्द्रः कूटे शृङ्गे यस्य । प्रतिदिने चन्द्रप्रदक्षिणकरणादेवास्य तथात्वम् ।) कामरूपस्थपर्व्वतभेदः । यथा,—

"पूर्व्वं वायुगिरेः शृङ्गैश्चन्द्रकूट इति स्मृतः ।
त्रिकोणस्ताम्रसङ्काशस्तदूर्द्धे चन्द्रमण्डलम् ॥
द्वितीयवर्णसाद्यन्तु विन्दिन्दुभ्यामलङ्कृतम् ।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः ।
प्रदक्षिणीकरोत्येव दशभी रश्मिभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाख्यं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
स्वर्गादवभृतश्चन्द्रः कामाख्यासेवने यदा ।
तदा तद्रश्मिसंघातनिःसृतास्तोयराशयः ॥
तैस्तोयैर्व्वासवः कुण्डमकरोदिन्द्रचन्द्रयोः ।
मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ।
सुधास्रवश्च ! साऽऽद ! त्वं चन्द्र ! कल्मषं हर ॥
इत्यनेन तु मन्त्रेण सुस्नाय चन्द्रमायसि ।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः ॥
अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते ।
परत्र चन्द्रभवनं भित्त्वा याति परं पदम् ॥
तीरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः ।
तस्मिन् वसति शुक्रस्तु कामाख्यासेवने रतः ॥
न्यग्भावं समासाद्य सर्व्वदेवेश्वरो हरिः ।
सेवितुं चिदग्नेयानीं सततं वर्त्तते नरः ॥
चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः ॥
प्रतिदर्शं तथा चन्द्रः प्रदक्षिणयति त्रिधा ॥
चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम् ।
आराध्य शुक्रं लोकेशं महाफलमवाप्नुयात् ॥"

इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥

चन्द्रगुप्तः, पुं, (चन्द्रेण गुप्तः रक्षितः । चन्द्रवदाह्लादजनकरूपगुणवत्त्वात्तथात्वं वा ।) राजविशेषः । (यथा, भागवते । १२ । १।११—१२ ।

"नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ ।
स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥")

चित्रगुप्तः । इति केचित् ॥

चन्द्रगोलस्थाः, पुं, (चन्द्र एव गोलः चन्द्रगोलकस्थानं चन्द्रलोक इत्यर्थः । तत्र तिष्ठन्ति ये ।) दिव्यपितरः । इति त्रिकाण्डशेषः । बहुवचनान्तोऽयं शब्दः ॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोलः साधनत्वेनाऽस्त्यस्याः । इति ठन् टाप् च ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २० ॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव चलच्चलस्यचन्द्रवत् चञ्चला ।) चन्द्रकमत्स्यः । इति शब्दरत्नावली जटाधरश्च ॥

चन्द्रदाराः, पुं. (चन्द्रस्य दाराः पत्न्यः ।) अश्विन्यादिनक्षत्राणि । इति हलायुधः ॥ बहुवचनान्तोऽयम् ॥

चन्द्रपुष्पा, स्त्री, (चन्द्र इव पुष्पमस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

चन्द्रप्रभः, पुं, (चन्द्र इव प्रभा यस्य ।) वृत्ताढ्यद्विशेषः । इति हेमचन्द्रः । १ । २७ ॥ (चन्द्रप्रभाविशिष्टे, त्रि । यथा, महाभारते । ६ । २०१८ ।

"चन्द्रप्रभं श्वेतमथातपत्रं
सौवर्णदण्डं व्यजते चोत्तमाङ्गे ॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा स्निग्धादिगुणवत्त्वास्याः ।) वाकुची । इति राजनिर्घण्टः ॥ औषधविशेषः यथा, सुश्रुते ।

"कृमिरिपुदहनयोधचित्रफलामरदारुचयभृन्निशम् ।
मागधिमूलं सुरसं सप्तदीवचामाचिकल्वेव ॥
लवणत्रिकारनिशायुगकुस्तुम्बुरुगजकणातिविषाः ।
कर्षांशकान्येव समानि कुर्य्यात्
पलाष्टकं चाम्लजतोर्विदध्यात् ।
निष्पञ्चमुष्टस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव ॥
सिताचतुष्कं पलमत्र वंशा
निकुम्भकुम्भत्रिसुगन्धियुक्तम् ।
चन्द्रप्रभेयं गुटिका प्रयोज्या
चार्शांसि निर्गाशयते बलेव ॥
भगन्दरं पाण्डुरकामलाञ्च
निर्नष्टवह्नेः कुरुते च दीप्तिम् ।

हन्त्यामयान् पित्तकफानिलोत्था-
न्नाड़ीगते मर्म्मगते व्रणे च ॥
यस्यार्ब्बुदे विद्रधिराजयक्ष्मणो-
र्मेहे भगार्शे प्रबले च योज्या।
शुक्रक्षये चाश्मरिमत्रकृच्छ्रे
शुक्रप्रवाहेऽप्युदरामये च ॥
भक्तस्य पूर्व्वं सततं प्रयोज्या
तक्रानुपानं त्वथ मस्तुपानम्।
व्याघो रसो जाङ्गलजो रसो वा
पयोऽथवा घृतजलानुपानम् ॥
बलेन नागस्तुरगो जवेन
दृष्ट्या सुपर्णः श्रवसे वराहः ॥
वलीपलितनिर्मुक्तो दृढोऽपि तरुणायते ॥
न पानभोज्ये परिहार्य्यमस्ति
क्व घृतवातातपमैथुनेषु।
ग्रस्तुं समर्थश्च कृतप्रसादे-
नाम्ना गुड़ी चन्द्रमसः प्रसादात् ॥"
("कृतकृत्याम्बकं लौहं नागं वङ्गं समं समम्।
एलाबीजं लवङ्गञ्च जातीकोषफलन्तथा ॥
मधूकं मधुयष्टी च धात्री च समशर्करा।
कर्पूरं खादिरं सारं घृताक्ता कण्टकारिका ॥
अन्येवेतसतुल्यांश्चमन्त्रलोमीद्रवैर्दिनम्।
भावयेन्मेषशृङ्गी च नागवल्ली दिनं दिनम् ॥
वटिकां वदराख्याभां कृत्वा चन्द्रप्रभां पराम्।
भक्षयेत्तीव्रमेहार्त्तः सर्व्वमेहकुलान्तकम् ॥
धात्री पटोलपत्रं वा कषायं वाऽथतायुतम्।
सक्षौद्रं पाययेच्चापि सर्व्वमेहप्रशान्तये ॥"
इति चन्द्रप्रभावटी।
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)

चन्द्रभागः, पुं, (भज्+भावे घञ्। चन्द्रस्य भागो-विभागो यत्र इति।) पर्व्वतविशेषः। यथा,—
ऋषय ऊचुः।
"चन्द्रभागा कथं सिन्धुसम्भवोत्पन्ना महागिरौ।
कौदृक् सरस्तद्गिरेन्द्र! दृषद्लोहितसंज्ञकम् ॥
कथं स पर्व्वतश्रेष्ठश्चन्द्रभागाह्वयोऽभवत्।
चन्द्रभागाह्वया कस्मान्नदी जाता वृषोदका ॥
एतन्नः श्रोतुमाख्यानं जायते कौतुकं महत्।
माहात्म्यं चन्द्रभागायाः कासारस्य गिरेस्तथा ॥
मार्कण्डेय उवाच।
श्रूयतां चन्द्रभागाया उत्पत्तिर्द्विजसत्तमाः।
युष्माभिश्चन्द्रभागस्य माहात्म्यं नामकारणम् ॥
हिमवत्गिरिसंसक्तघृतयोजनविस्तृतः।
योजनत्रय उच्छ्रायः कुन्देन्दुधवलो गिरिः ॥
तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुद्धं सुधानिधिम्।
विभज्य कल्पयामास देवार्थं स पितामहः ॥
पित्र्यर्थञ्च तथा तस्य तिथिवृद्धिक्षयात्मकम्।
कल्पयामास जगतां हिताय कमलासनः ॥
विभक्तचन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे।
अतो देवाश्चन्द्रभागं नाम्ना चक्रुः पुरा गिरिम् ॥"
इत्यादि कालिकापुराणे २० अध्यायः ॥

चन्द्रभागा, स्त्री, (चन्द्रभागः पर्व्वतविशेषः स उत्पत्तिस्थानत्वेनास्त्यस्याः। "अर्शआदिभ्योऽच्।" ५। २। १२७। इत्यच् ततष्टाप्। चन्द्रभागात् पर्व्वतविशेषात् जाता इति वा।) नदीविशेषः। इत्यमरः। १। १०। ३४ ॥ तत्पर्य्यायः। चन्द्रभागी २ चन्द्रिका ३। इति शब्दरत्नावली ॥ सा तु काश्मीरदेशे प्रसिद्धा। तस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच।
"यत्र देवसभा भूता सानौ तस्य महागिरेः।
तत्र जाता देवनदी घृतास्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं घृतातोयैर्मनोहरैः।
चन्द्रं पपुर्ब्रह्मवाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा घृतोदजलं चन्द्रस्नानयोगाच्च साम्प्रतम्।
भूत्वा निपतितं तस्मिन् दृषल्लोहितसंज्ञके ॥
तद्विवृद्धं तदा तोयं तस्मिन् सरसि निर्म्मलम्।
तद्दर्शं स्वयं ब्रह्मा विवृद्धं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ॥
भार्य्यार्थे सञ्चारस्तान्तु जग्राह ब्रह्मसम्मते।
तत्रैवाधिष्ठितं तोयं गदाग्रेण निशापतिः ॥
निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहयत्।
ततः साम्प्रतजलं भित्त्वा दृषल्लोहितसंज्ञकम् ॥
कासारं सागरं जातं चन्द्रभागा नदी तु सा।
सागरोऽपि तदा भार्य्यां चन्द्रभागां महानदीम् ॥
तेन तोयप्रवाहेण निनाय भवनं स्वकम्।
एवं तस्मिन् समुत्पन्ना चन्द्रभागाह्वया नदी ॥
चन्द्रभागे महाशैले गुणैर्गङ्गासमा सदा।"
इति कालिकापुराणे २२ अध्यायः ॥
अस्या जलस्य गुणः। सुगौतलत्वम्। दाहपित्त-वातनाशित्वञ्च। इति राजनिर्घण्टः ॥

चन्द्रभागी, स्त्री, (चन्द्रभागस्य तदाख्यया प्रसिद्धस्य पर्व्वतस्य इयम्। चन्द्रभागपर्व्वतसङ्गातत्वात्तथात्वम्। चन्द्रभाग+"तस्येदम्।" ४। ३। १२० ॥ इत्यण्। अत्र न वृद्धिः। ततः "वङ्गादिभ्यश्च।" ४। १। ४५। इति ङीष्।) चन्द्रभागानदी। इति शब्दरत्नावली।

चन्द्रभूतिः, स्त्री, (चन्द्रस्येव शुक्ला भूतिः सम्पत् कान्तिरिति यावत् यस्य। चन्द्रवत् शुभ्रदीप्तितयास्य तथात्वम्।) रूप्यम्। इति राजनिर्घण्टः ॥

चन्द्रमणिः, पुं, (चन्द्रप्रियश्चन्द्रकान्त इत्यर्थः मणिः। शाकपार्थिववत् समासः।) चन्द्रकान्तमणिः। इति हेमचन्द्रः। ४। १३३ ॥

चन्द्रमण्डलं, क्ली, (चन्द्रस्य मण्डलम्।) चन्द्रबिम्बम्। चन्द्रपरिवेषः॥ (यथा, गोः रामायणे १५। ३२। ४८।
"तस्याश्च विमलं वक्त्रं सुदन्तं सुगुणैर्युतम्।
यथा राहुविनिर्म्मुक्तमभवच्चन्द्रमण्डलम् ॥")

चन्द्रमाः, [स] पुं, (चन्द्रमानन्दं मिमीते यद्वा चन्द्रं कर्पूरं साद्रश्येन माति परिमातीति। मा+"चन्द्रे मो डित्।" उणा। ४। २२८। इति असिः स च डित्। चन्द्रं रजतं अञ्चतीव मीयते चन्द्र इति वा मीयते इति दासी-भारादित्युत्पादने हरदत्तः।) चन्द्रः। इत्यमरः। १। ३। १३ ॥ (यथा, पञ्चतन्त्रे। ३। ६८।
"एकोपि कोपि सेव्यो यः क्षीणं क्षीणं पुनर्नवम्।
अनुदियः करोत्येव सूर्य्यश्चन्द्रमसं यथा ॥")

चन्द्रमौलिः, पुं, (चन्द्रः मौलौ शेखरे यस्य।) शिवः। इति हारावली। ८ ॥ (यथा, कुमारे। ५। ८६।
"अद्य प्रभृत्यवनताङ्गि! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ॥")

चन्द्ररेखा, स्त्री, (चन्द्रस्य रेखा इव आकृतिर्यस्याः।) वाकुची। इति भैषज्यरत्नावली ॥ हाकुच इति भाषा ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठाधिकारे।
"गुडुची चन्द्ररेखा च सोमराट् चक्रमर्द्दकम्॥"
वाकुचीशब्दे विवरणमस्या ज्ञातव्यम्॥)

चन्द्ररेणुः, पुं, (चन्द्र आह्लादको रेणुर्यत्र।) कांस्यचौरः। इति त्रिकाण्डशेषः ॥

चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृतिर्यस्याः।) वाकुची। इति राजनिर्घण्टः ॥ (अक्षरोविशेषः। यथा, काश्मीरखण्डे। ६। ७।
"उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा॥"
छन्दोविशेषः। यथा, छन्दोमञ्जर्य्याम्।
"स्नौ भो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा॥")

चन्द्रलोहकं, क्ली, (चन्द्र इव शुभ्रं लोहकं धातुत्रयम्।) रूप्यम्। इति राजनिर्घण्टः ॥

चन्द्रवंशः, पुं, (चन्द्रस्य वंशः अन्ववायः।) चन्द्रसन्तानः। यथा। ब्रह्मणः पुत्रः अत्रिः तस्य पुत्रश्चन्द्रः तस्य बुधः तस्य वैवस्वतमनुकन्यायां इलायां भार्य्यायां पुरूरवाः स प्रतिष्ठाननगरे इदानीं विठोरसंज्ञे राजचक्रवर्त्ती आसीत्। तस्योर्व्वश्यां षट् पुत्रा आसन् तेषां आयुर्ज्येष्ठः। तस्य पुत्रो नहुषस्तस्य ययातिश्चक्रवर्त्ती। तस्य द्वे भार्य्ये वृषपर्व्वणो दानवराजस्य सुता शर्म्मिष्ठा शुक्रस्य कन्या देवयानी च। देवयान्यां ययातेर्द्वौ पुत्रौ यदुस्तुर्व्वसुश्च। शर्म्मिष्ठायां त्रयः पुत्राः द्रुह्युः अनुः पूरुश्च। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञालेखनं कृतवन्तः पित्रा शप्ताः। ज्येष्ठपुत्रं यदुं शशाप तव वंशेराजचक्रवर्त्ती माभूत्। तुर्व्वसुद्रुह्यूनून् शशाप युष्माकं वंश्या वेदबाह्या म्लेच्छा भविष्यन्ति। पूरुस्तु पितुराज्ञया दुष्करं कर्म्म कृत्वा पितुरतिप्रिय आसीत्। ययातिः स्वमरणसमये कनिष्ठपुत्रं पूरुं राजचक्रवर्त्तिनं कृतवान्। यदवे दक्षिणस्यां दिशि किञ्चिद्राज्यखण्डं दत्तवान्। तथा द्रुह्यवे पूर्व्वस्यां दिशि, पश्चिमायां तुर्व्वसवे, उत्तरस्यां अनवे, सर्व्वान् पूरोरधीनांचक्रे। यदुरतीवधर्म्मशीलस्तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः। तच्चरितं सर्व्वशास्त्रप्रसिद्धम्॥ (अधुना यदोर्वंश उच्यते। यदोः पुत्रः क्रोष्टा (क्रोष्टु) तस्य वृजिनिवान् तस्य आहिः तस्य श्वाजिः तस्य चित्ररथः तस्य शशबिन्दुः तस्य पृथुकीर्त्तिः पृथुजयः पृथुदानः पृथुश्रवा इति चत्वारः पुत्राः। पृथु-

श्रवसः तमः तस्य उशनाः तस्य शितायुः तस्य रुक्मकवचः तस्य व्यामघः तस्य विदर्भः तस्य क्रथः तस्य कुन्तिः तस्य धृष्टिः तस्य निवृत्तिः तस्य दशार्हः तस्य व्योमः तस्य जिमूतः तस्य विकृतिः तस्य भीमरथः तस्य मधुरथः तस्य प्रकुनिः तस्य करम्भिः तस्य देवमतः तस्य देवक्षत्रः तस्य मधुः तस्य कुरुवशः तस्य अनुरथः तस्य पुरुहोत्रः तस्य अंशुः तस्य सत्वश्रुतः तस्य वृष्णिः देवावृधः अन्धकः महाभोजः इति चत्वारः पुत्राः। तेषु वृष्णिन्यङ्कः तस्य सुमित्रः तस्य अनमित्रः तस्य वृष्णिः तस्य चित्रकः तस्य विदूरथः तस्य शूरः तस्य भजमानः तस्य शिनिः तस्य भोजः तस्य राधिकः तस्य देवमीढ़ः तस्य शूरसेनः तस्य वसुदेवः तस्य पुत्रो भगवान् श्रीकृष्णः ॥*॥) ययातिपुत्रस्य पूरोरतिविस्तीर्णो वंश उच्यते। पूरोः पुत्रो जनमेजयः तस्य प्रचिन्वान् तस्य प्रवीरः तस्य मनस्युः तस्य चारुपदः तस्य सुद्युः तस्य बहुगवः तस्य संयातिः तस्य अहंयातिः तस्य रौद्राश्वः तस्य ऋचेयुः तस्य रन्तिनारः तस्य सुमतिः (तंसुः) तस्य रैभ्यः (सुरोधः) तस्य दुष्मन्तश्चक्रवर्त्ती। तस्य शकुन्तलायां भार्य्यायां भरतश्चक्रवर्त्ती आसीत्। यस्यायं श्लोकः—तमसमेधान् कृतवान् पञ्चाग्नीन्राजसूयान् एवमन्यान् नानाविधान् यज्ञान् अकरोत् बहूनि धनरत्नादीनि दत्तवान् सप्तविंशतिसहस्रवत्सरान् एकच्छत्रं राज्यं कृतवान्। तस्य पुत्रो वितथः तस्य मन्युः तस्य बृहत्क्षत्रः तस्य हस्ती येन हस्तिनापुरं निर्म्मितम्। तस्य अजमीढ़ः तस्य ऋक्षः तस्य संवरणः तस्य कुरुः तस्य जह्नुः तस्य सुरथः तस्य विदूरथः तस्य सार्व्वभौमः तस्य जयत्सेनः तस्य राधिकः तस्य अयुतायुः तस्य ऋक्षः तस्य दिलीपः तस्य प्रतीपः तस्य देवापिः शान्तनुः बाह्लीक इति त्रयः पुत्राः। तत्र देवापिः कलापग्रामे योगी भूत्वा वर्त्तते। स कलौ चन्द्रवंशे नष्टे कलेरन्ते पुनः सत्ययुगे चन्द्रवंशं भावयिष्यति ॥*॥ तत्र शान्तनू राजा अभवत् स चक्रवर्त्ती तस्य गङ्गायां भीष्मः पुत्रो जातः स परमधर्म्मात्मा महावीरः येन पितुर्दाशकन्याविवाहार्थं पितृराज्यं त्यक्तम् यः स्वस्य विवाहं त्यक्त्वा ऊर्द्धरेता जातः। शान्तनोर्दाशकन्यायां द्वौ पुत्रौ जातौ चित्राङ्गदो विचित्रवीर्य्यश्च। सत्यवत्यां कन्याकाले पराशरात् व्यासो जातः। पुनर्भुनेर्वरात् व्यासजन्मानन्तरं सा कन्यारूपाभवत्। चित्राङ्गदो युद्धे गन्धर्व्वेण हतः। विचित्रवीर्य्यस्य क्षेत्रे सत्यवत्याज्ञया व्यासः धृतराष्ट्रं पाण्डुञ्च जनयामास। धृतराष्ट्रस्यान्धस्य गान्धार्य्यां भार्य्यायां दुर्य्योधनप्रभृतिं पुत्रशतं बभूव। पाण्डोर्द्वे भार्य्ये कुन्ती माद्री च। ऋषीभूतस्य मुनेः शापाच्चैवनरहितस्य पाण्डोराज्ञया कुन्ती धर्म्माद्युधिष्ठिरं पवनाद्भीमं इन्द्रादर्জ্জুनं जनयामास। माद्री अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास। युधिष्ठिरस्तु राजसूययाजी। अर्জ্জुनस्य सुभद्रायां भार्য্यायां अभिमन्युक्षस्य उत्तरायां भार्য্यायां परिक्षित्। युधिष्ठिरादनन्तरं कलियुगस्यारम्भे स राजासीत् चक्रवर्त्ती। तस्य जनमेजयः तस्य श्रुतानीकः तस्य सहस्रानीकः तस्य अश्वमेधजः तस्य असीमकृष्णः तस्य नेमिचक्रः स हस्तिनागरे गङ्गाक्षते कौशाम्ब्यां पुर्य्यां राजासीत्। तस्य उष्णः तस्य चित्ररथः तस्य शुचिरथः तस्य वृष्टिमान् तस्य सुषेनः तस्य सुनीथः तस्य नृचक्षुः तस्य सुखीनलः तस्य परिप्लवः तस्य सुनयः तस्य मेधावी तस्य नृपञ्जयः तस्य दूर्व्वः तस्य तिमिः तस्य बृहद्रथः तस्य सुदासः तस्य श्रुतानीकः तस्य दुर्दमनः तस्य महीनरः तस्य दण्डपाणिः तस्य निमिः तस्य क्षेमकः। एतत्पर्য্যन्तमस्य वंशस्य भ्रान्तिः एते कलेः सहस्रवर्षपर्য্यन्तं स्थिताः ॥*॥ सोमवंशशाखान्तरे मगधवंशा राजानः कलौ बहुकालं स्थिताः। अतस्ते वर्ण्यन्ते। तत्र युधिष्ठिरसमकालीनो जरासन्धसुतः सहदेवो मगधेषु राजासीत्। तस्य मार्জ্জारिः तस्य श्रुतश्रवाः तस्य अयुतायुः तस्य निरमित्रः तस्य सुनक्षत्रः तस्य बृहत्सेनः तस्य कर्म्मजित् तस्य श्रुतञ्जयः तस्य विप्रः तस्य शुचिः तस्य क्षेमः तस्य सुव्रतः तस्य धर्म्मसूत्रः तस्य शमः तस्य द्रढ़सेनः तस्य सुमतिः तस्य सुबलः तस्य सुनीथः तस्य सत्यजित् तस्य विश्वजित् तस्य पुरञ्जयः एते राजानः कलेः सहस्रवत्सरपर्য্यन्तं राज्यं कृतवन्तः ॥ * ॥ ततः पुरञ्जयस्य मन्त्री शुनकः पुरञ्जयं हत्वा तस्य पुत्रं प्रद्योतं राजानं कृतवान्। तदारभ्य राजानो वर्णसङ्करदोषदुष्टा जाताः। प्रद्योतपुत्रः पालकः तस्य विशाखयूपः तस्य राजकः तस्य नन्दिवर्द्धनः। एते पञ्च अष्टत्रिंशोत्तरशतवर्षं भूमिपा आसन् ॥ * ॥ नन्दिवर्द्धनस्य पुत्रः शिशुनागः तस्य काकवर्णः तस्य क्षेमधर्म्मा तस्य क्षेत्रज्ञः तस्य विधिसारः तस्य अजातशत्रुः तस्य दर्भकः तस्य अजयः तस्य नन्दिवर्द्धनः तस्य महानन्दिः एते दश नृपाः षष्ट्युत्तरशतत्रयं वत्सरान् भूमिपाला आसन् ॥ * ॥ महानन्दिसुतो नन्दः शूद्रायां सम्भूतपन्नः राजासीत् तस्य सुमाल्याद्या अष्टौ पुत्रा आसन्। ते शतवत्सरान् राज्यं कृतवन्तः। चाणक्यनामा कश्चिद्ब्राह्मणः नन्दं तत्पुत्रांश्च हत्वा मौर्য্यं चन्द्रगुप्तं राजानं कृतवान्। कलौ नन्दान्तः क्षत्रियवंशः। इति श्रीभागवतं महाभारतञ्च॥

चन्द्रवल्लरी, स्त्री, (चदि आह्लादे + रक्। चन्द्रा आनन्ददायिका वल्लरी। सुधातुल्यमधुरत्वात्तथात्वम्। चन्द्रस्य वल्लरी लता इति केचित्।) सोमवल्लरी। सोमलता इति ख्याता। ब्रह्मी ग्राकमिति केचित्। इत्यमरटीकायां भरतः॥

चन्द्रवल्ली, स्त्री, (चन्द्र इव आनन्ददायिका वल्ली।) प्रसारणी। माधवीलता। इति राजनिर्घण्टः॥

सोमलता च॥ (सोमलताशब्दे गुणादयोऽस्या ज्ञेयाः॥)

चन्द्रवाला, स्त्री, (चन्द्रं कर्पूरमपि वलते संवृणोति स्वगन्धेन इति। वल संवरणे + अण्। ततष्टाप्।) स्थूलेला। इत्यमरः। २। ४। १२५॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला हृद्देला च चन्द्रबाला च निष्कुटिः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चन्द्रविहङ्गमः, पुं, (चन्द्र इव शुभ्रो विहङ्गमः।) बकपक्षी। इति त्रिकाण्डशेषः॥

चन्द्रव्रतं, क्ली, (चन्द्राय चन्द्रलोकप्राप्तये यत् व्रतम्। यद्वा, चन्द्रस्य ह्रासवृद्धिभ्यां कृतं यद्व्रतं तत्।) चान्द्रायणम्। इति स्मृतिः॥ (एतद्विवरणं चान्द्रायणशब्दे द्रष्टव्यम्॥)

चन्द्रशाला, स्त्री, (चन्द्रेण शालते शोभते इति। शाल + अच्। ततष्टाप्।) ज्योत्स्ना। इति त्रिकाण्डशेषः॥ (चन्द्र इव शालते भ्राजते इति। उपस्थानस्थितत्वादेव तथात्वम्।) प्रासादोपरिगृहम्। तत्पर्য্यायः। शिरोगृहम् २। इति हेमचन्द्रः। ४। ६१॥ चन्द्रशालिका ३ वड़भी ४ कूटागारम् ५। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १३। ४०।

"तस्यायमन्तर्हितसौधभाजः
प्रसक्तसङ्गीतनदद्घनोघः।
वियद्गतः पुष्पकचन्द्रशालाः
त्वां प्रत्युदग्रमुखराः करोति॥")

चन्द्रशालिका, स्त्री, (चन्द्र इव शालते इति। शाल + ण्वुल्। टापि अत इत्वम्। यद्वा, चन्द्रशाला + स्वार्थे कन्।) वड़भी। इति त्रिकाण्डशेषः॥

चन्द्रशूरं, क्ली, (फलविशेषः। हालिम् इति भाषा। तत्पर्য্यायः। चन्द्रिका २ चर्म्मेहन्ती ३ पशुमेहनकारिका ४ नन्दनी ५ कारवी ६ भद्रा ७। अस्य गुणाः। त्रिदोषवातश्लेष्मातिसारिणां हितत्वम्। अश्मवातरोगहितत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति भावप्रकाशः॥

चन्द्रशेखरः, पुं, (चन्द्रः शेखरे मौलौ यस्य। यद्वा, चदि आह्लादे + रक्। चन्द्रः आह्लादः आनन्दानुभवरूपपरमात्मज्योतिः शेखरे ललाटोर्द्ध्वभागे यस्य। स्वप्रकाशात्मनां शरीरत्रयोपाधिवर्জ্জितानां योगीन्द्रपुरुषाणामपि ललाटदेशे सत्यज्ञानानन्दाद्वैतसंवेदः परब्रह्मणः स्वाभासङ्गज्योतिर्मण्डलस्य प्रकाशमानत्वात् अन्येष्वपि चन्द्रशेखरत्वमिति चेन्न। विश्वगुरोर्महादेवादन्यत्र पूर्णतमयोगसिद्धेरप्रसिद्धेः। किञ्च महेश्वरादिशब्दवत् रूढ़िप्रवृत्तितोऽपि सर्व्वयोगीन्द्रगुरौ भगवति महेश्वरे एव चन्द्रशेखरपदस्य समन्वर्थतेति पूर्व्वाचार्য্यपादाः॥) शिवः। इत्यमरः। १।१।३२॥ (यथा, कुमारे। ५। ५८।

"यदा युधे सर्व्वगतस्त्वमुत्थसे
न वेत्सि भावस्त्वमिमं कथं जनम्।

इति स्वदत्तोल्लिखितञ्च सुन्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥"
चन्द्रयुक्तः शेखरः शङ्कं यस्य ।) पर्व्वतविशेषः । यथा, आगमे शिववाक्यम् ।
"विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥"
(तथा, महाकालेश्वरतन्त्रे ।
"शम्भुनाथचन्द्रनाथचन्द्रशेखर पर्व्वते ॥")
चट्टलदेशे महापीठे भैरवविशेषः । यथा,—
"चट्टले देववाहुर्म्मे भैरवश्चन्द्रशेखरः ।
शक्तिरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥
करवीरपुरराजा । स च पौष्यराजपुत्रः । यथा,-
"अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भाविकर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाच्चो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाऽभवत् ॥
पूषः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि सम्प्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
तमुवाच स राजानं किमिच्छसि वदस्व मे ।
प्रसन्नोऽस्मि नृपश्रेष्ठ ! प्रदास्यामि यथेप्सितम् ॥
यदिदं तव जायानां तत्तद्दास्यामि साम्प्रतम् ॥
पौष्य उवाच ।
हिरण्यगर्भापुत्रोऽहं पुत्रार्थी त्वामुपाश्रये ।
त्वयि प्रसन्ने पुत्रो मे भवेल्लक्षणसंयुतः ॥
एतदर्थं सभार्य्योऽहं भक्त्या त्वां समुपस्थितः ।
यथा मे जायते पुत्रस्तथा कुरु जगत्पते ! ॥
पुन्नाम्नो नरकात् पुत्रस्त्रायते पितरं प्रभुम् ।
अतस्त्वमाढ्यं ब्रह्मन् ! त्वं नाशयितुमर्हसि ॥
ब्रह्मोवाच ।
शृणु पौष्य ! यथा भावी पुत्रस्तव कुलोद्वहः ।
तदहं ते वदाम्यद्य भार्य्याभिस्तव समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ! ।
अनेन वहुवे काले प्राप्तेऽपि सुरतं सदा ।
फलमेतत् समादाय यावत् संवत्सरत्रयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभावते भगः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन्! भार्य्याभिस्तिसृभिः सह ॥
ततस्ते जनयोपेतस्तनयः कुलवर्द्धनः ।
भविष्यति च यः शास्ता चक्रवर्त्ती भविष्यति ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
निराशी संयताहारः कदाचित् फलभोजनः ।
शङ्खतीनदीतीरे फलं संस्थाप्य चात्मवान् ॥
पुण्यार्घ्यधूपदीपाद्यैर्वृषध्वजमतर्पयत् ।
स तु वर्षत्रयेऽतीते महादेवो जगत्पतिः ॥
पौष्यस्य नृपतेः सम्यक् प्रसादार्थसिद्धये ।
प्रसन्नः प्राह नृपतिं महादेवो हसन्निव ॥
उपासते किमर्थं मां तत्ते वरं ददामि ते ॥
पौष्य उवाच ।
अपुत्रोऽहं पुत्रकामः पूजयामि वृषध्वज ! ।
यथाहं पुत्रवान् वै स्यां वृषध्वज ! तथा कुरु ॥
इति संस्तवदाजा भार्य्याभिः सह हर्षितः ।
प्रणम्य स्तुतिपूर्व्वेण भक्तिनम्रात्ममानसः ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं ब्रह्मदत्तं विभज्य नृपते त्रिधा ।
भोजयैता सवर्णाया ह्यं प्रहृष्टः सुसंयतः ॥
ततः प्रवृत्ते भवत एतासु ऋतुसङ्गमे ।
आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ! ॥
काले प्राप्ते च युगपत् प्रसवो योषितां तव ।
भविष्यति नृपश्रेष्ठ ! ता एवं त्वं करिष्यसि ॥
एकस्या जठरे ग्रीवे भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ।
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ॥
योजयिष्यसि पश्चात्ते पुत्र एको भविष्यति ।
तस्य ग्रीवे चन्द्ररेखा सहजा संभविष्यति ॥
तेनैव नाम्ना स ख्यातिं गमिष्यति च भूपते ! ।
इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा ॥
संस्कर्त्तुं जातवीतोयमात्मनः शिरसो न्यधात् ।
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ॥
ततश्चखात् ततः फलं भूतं त्रिभागं स्वयमेव हि ।
पौष्यस्तत् फलमादाय मुदितः सह भार्य्यया ॥
प्रययौ मन्दिरं हृष्टो अनुज्ञाप्य वृषध्वजम् ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्तितः ॥
तत् फलं नृपशार्दूल! गर्भाधाय्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ।
एकं पिण्डं चकारासु तत्र पुत्रो व्यजायत ।
तस्य ग्रीवे तदा राजन सहजेन्दुकला शुभा ॥
विरराज यथा स्वच्छा शरत्काले कला विधोः ।
तं सर्व्वलक्षणोपेतं पीनोरस्कं सुनासिकम् ॥
सिंहग्रीवं विशालाक्षं दीर्घायतभुजं तदा ।
दृष्ट्वा पौष्योऽथ भार्य्याभिस्तिसृभिः सह संमुदम् ।
लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः ।
तस्य नामाकरोद्राजा ब्राह्मणैः खैः पुरोहितैः ॥
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ।
ववृधे स महाभागः प्रत्यहं शास्त्रवत्सुतः ॥
कलाभिरिव तेजस्वी शरदीव निशाकरः ।
एवं तिसृणामम्बानां गर्भे जातो यतो हरः ॥
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः ।
स राजपुत्रः कौमारावस्थां प्राप यदा तदा ॥
सर्व्वशास्त्रार्थतत्त्वज्ञो जिष्णोस्तुल्यो बभूव ह ।
वले वीर्य्ये प्रहरणे शास्त्रे ग्रीवे च ततसमः ॥
नान्योऽभून्नृपशार्दूल! नो वा भूमौ भविष्यति ।
अभिषिच्याथ तं बालं कुमारं बलवत्तरम् ॥
राज्यपदेकवर्षीयं सर्व्वराजगुणैर्युतम् ।
तिसृभिः सह भार्य्याभिर्वनं पौष्यो विवेश ह ॥
गृहोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः ।
गते पितरि राजा स वनवासं महाबलः ॥
सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः ।
सार्व्वभौमो नृपो भूत्वा राजभिः परिसेवितः ॥
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ।
एवं पौष्यसुतो भूत्वा चाम्बकः प्राप्य निर्वृतिम् ॥
ब्रह्मावर्त्ताख्ये रम्ये करवीराख्ये पुरे ।
शङ्खतीनदीतीरे राजा भूत्वा समोद ह ॥"
इति कालिकापुराणे ४६ अध्यायः ॥ * ॥
(खनामख्यातः पण्डितविशेषः । असौ हि सिद्धपुरुषः त्रिवेणीसन्निकर्षस्थवन्द्यपाड़ाख्यग्रामे १६०० शकस्य प्रारम्भ एव वर्त्तमान आसीत् । अद्यापि तस्य सिद्धिस्थानं तत्रैव वर्त्तते । अयं नानाशास्त्रवेत्ता विशेषतो ज्योतिषशास्त्रेषु लब्धप्रतिष्ठो बभूव । एतत्संकलिता बहवो ग्रन्था अस्मद्देशेऽद्यापि प्रचरन्ति ॥ * ॥)
षोड़शध्रुवकान्तर्गतनवमध्रुवकः । तद्विवरणं ध्रुवकशब्दे द्रष्टव्यम् ॥ अपि च ।
"ऊनविंशतिवर्णाढ्यः सिद्धिदश्चन्द्रशेखरः ।
कथितः कैङ्कके ताले भवेत् शङ्कारवीरयोः ॥"
इति सङ्गीतदामोदरः ॥
(वटिकौषधविशेषः ।
"क्षतो गन्धरङ्गः सोमः स्या-
देतैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो भावयेत्तु त्रिवारं
वह्नौ देयः शङ्खवेरस्य वारा ॥
सम्यक् तापे वारिभक्तं सतक्रं
दत्त्वाकाशं पथ्यमेव प्रदिष्टम् ।
अङ्गे रोगं हन्ति सामं प्रभावात्
पित्ताधिक्ये मुद्गं वारिप्रयोगः ॥"
इति उदकमञ्जरीरसः ॥
"अत्रैव शर्करां त्यक्त्वा शिला च यदि दीयते ।
गुडैः समो भवेदस्य गन्धो च चन्द्रशेखरः ॥"
इति चन्द्रशेखरो रसः ४)
चन्द्रसंज्ञः, पुं, (चन्द्रस्य संज्ञा संज्ञा यस्य ।) कर्पूरम् । इत्यमरः । २ । ६ । १३० ॥
चन्द्रसम्भवा, स्त्री, (चन्द्रः सम्भवो यस्याः ।) शुद्रेला । इति शब्दचन्द्रिका ॥ (बुधे, पुं ॥)
चन्द्रहासं, क्ली, (चन्द्रस्येव शुक्लो हासः प्रभा यस्य ।) रौप्यम् । इति राजनिर्घण्टः ॥
चन्द्रहासः, पुं, (चन्द्रस्येव शुक्लो हासो दीप्तिर्यस्य ।) खड्गः । रावणखड्गः । इति मेदिनी । गे, ५२ ॥
चन्द्रहासा, स्त्री, (चन्द्रहास + टाप् ।) गुड़ूची । इति राजनिर्घण्टः ॥ (चन्द्रवदाह्लादकरो हासो यस्याः इति । गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४८ ।
"चन्द्रहासा चारुदासी चकोरी चन्द्रहासिनी ॥"
इक्षुः । तस्याः पर्य्यायाः यथा,—
"क्षुद्रायां क्षुद्रभण्टाख्यां इक्षुरीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा कथिता चेक्षुदूतिका ॥

गर्भदा चन्द्रभा चन्द्री चन्द्रपुष्पा प्रियङ्करी ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

चन्द्रा, स्त्री, (चन्द्यति आह्लादयतीति। चदि+णिच्+रक्। स्त्रियां टाप्।) एला। वितानम्। इति शब्दरत्नावली ॥ गुडूची। इति केचित् ॥

चन्द्रातपः, पुं, (चन्द्र इव आतपति प्रीतिं करोति छायादानेन। आ+तप्+अच्।) आच्छादनविशेषः। चाँदोया इति भाषा ॥ तत्पर्य्यायः। उल्लोचः २ वितानम् ३ चन्द्रा ४। इति शब्दरत्नावली ॥ (चन्द्रस्य आतपः रश्मिः।) ज्योत्स्ना। इति हेमचन्द्रः। २। २१ ॥ (यथा, कादम्बर्याम्। "चन्द्रातपमिव रसतासुपेतम् ॥")

चन्द्रापीड़ः, पुं, (चन्द्रः आपीड़े शेखरे यद्वा आपीड़ः शिरोभूषणं यस्य।) शिवः। इति त्रिकाण्डशेषः ॥ (काश्मीरस्य राजविशेषः। यथा, राजतरङ्गिण्याम्। ४। ४५।

"राजचूड़ामणिः श्रीमांश्चन्द्रापीड़स्ततोऽभवत्।
पीड़ितेन्दुतिथिः कीर्त्या कलेः पीड़ाश्चकार यः॥"

कादम्बरीवर्णितनायकविशेषः। स तु राज्ञस्तारापीड़स्य पुत्रः। यथा, कादम्बर्याम्। १३७।

"अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये सुहूर्त्ते गाः सुवर्णं च कोटिशो ब्राह्मणेभ्यो दत्त्वा 'मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्टः' इति स्वप्नानुरूपमेव राज्ञा सुनोश्चन्द्रापीड़ इति नाम चकार।"

अयं हि एकदा मृगयां गच्छन् किन्नरमिथुनमनुधावन् हिमालयशिखरमधिरूढश्च अच्छोदसरोवरसमीपं गतवान्। तत्रस्थश्च महाश्वेतां गन्धर्व्वकुमारीमवलोक्य तन्मुखात् तस्याः सर्व्ववृत्तान्तमाकर्ण्य च तया सह गन्धर्व्वलोकं गतवान्। तत्र गत एव गन्धर्व्वराजस्य चित्ररथस्य कादम्बरीं नाम कन्यां ददर्श्य। दृष्ट्वा च तां कन्दर्पबाणपीड़ितोऽभवत्। ततोऽतिकष्टेन तस्मात् स्थानात् प्रत्यागत्य स्वसहचरं वैशम्पायनं स्कन्धावाररक्षकत्वेन परिकल्प्य पित्राज्ञातः स्वभवनमाजगाम। अथ गच्छति काले वैशम्पायनानयनाय गतोऽसौ चिरबन्धोर्वैशम्पायनस्य कमलवार्त्तामाकलय्य छिन्नतरुरिव भूतले पतित्वा महाश्वेताचन्द्रिकर्ष एव विदीर्णहृदयो गतासुरासीत्। ततो दैवाद्दैवेन रचितशरीरोऽसौ पुनर्जीवितश्च कादम्बरीं परिणीतवान्। इत्येषातीवाश्चर्य्यजनिका कथा कादम्बरीग्रन्थत एव विशेषतो विज्ञेया ॥)

चन्द्रावली, स्त्री, गोपीविशेषः। सा तु चन्द्रभानुकन्या व्रजे श्रीकृष्णस्य नित्यप्रिया राधातुल्या। यथा, उज्ज्वलनीलमण्यौ।

"राधाचन्द्रावलीमुख्याः प्रोक्ता नित्यप्रिया व्रजे।
लक्ष्मावित्यसौन्दर्य्यवैदग्ध्यादिगुणाश्रयाः॥"

चन्द्रिका, स्त्री, (चन्द्र आश्रयत्वेनास्त्यस्याः।) "अत इनिठनौ।" ५। २। ११५। इति ठन्।) ज्योत्स्ना। इत्यमरः। १। ३। १६ ॥ (यथा, रघुः। १६। ३६।

"अन्यसुरतक्लमापहां
मेघसुप्तविशदां स चन्द्रिकाम्॥")

खूलेला। चन्द्रक्रमतुल्यः। चन्द्रभागानदी। इति शब्दरत्नावली ॥ कर्णस्फोटा। मल्लिका। श्वेतकण्टकारी। मेधिका। खस्फोला। इति राजनिर्घण्टः ॥ चन्द्रसूरम्। इति भावप्रकाशः ॥ (पीठस्य देवीविशेषः। सा तु हरिश्चन्द्रे विराजते। यथा, देवीभागवते। ७। ३०। ६७।

"सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका॥"

छन्दोविशेषः। तल्लक्षणं यथा, छन्दोमञ्जर्य्याम्।

"ननततगुरुभिश्चन्द्रिकाश्चर्त्तुभिः॥"

वासपुष्पा। अस्याः पर्य्याया यथा,—

"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

चन्द्रिकाद्रावः, पुं, (चन्द्रिकया द्रावो द्रवणं यस्य।) चन्द्रकान्तमणिः। इति राजनिर्घण्टः ॥

चन्द्रिकापायी, [न्] पुं स्त्री, (चन्द्रिकां ज्योत्स्नां पिबतीति। पा+णिनिः।) चकोरपक्षी। इति राजनिर्घण्टः ॥

चन्द्रिकाम्बुजं, क्ली, (चन्द्रिका इव शुभ्रं अम्बुजम्।) सितोत्पलम्। इति राजनिर्घण्टः ॥

चन्द्रिलः, पुं, (चन्द्रो विद्यतेऽस्य। चन्द्र+बाहुलकात् अस्त्यर्थे इलच्।) शिवः। नापितः। वास्तूकम्। इति मेदिनी। ले, ८६ ॥

चन्द्री, स्त्री, (चन्द्यति आह्लादयतीति। चदि+णिच्+रक्। गौरादित्वात् ङीष्।) वाकुची। इति राजनिर्घण्टः ॥

चन्द्रेष्टा, स्त्री, (चन्द्रः इष्टः प्रियो यस्याः। निष्ठायाः परनिपातः।) उत्पलिनी। इति राजनिर्घण्टः ॥

चन्द्रोदयः, पुं, (चन्द्रस्य उदयः।) आकाशे चन्द्रस्य प्रकाशः। स च यद्दिने सार्द्धप्रहरद्वयव्यापिनी या तिथिस्तत्तिथ्यनुसारेण भवति। तस्य प्रमाणं यथा, पुराणसमुच्चये।

"गवां क्रीड़ादिने यत्र रात्रौ दृश्यते चन्द्रमाः।
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा॥
तदुदयसम्भावनच्च निर्णयाऽस्ते निर्णीतम्।
प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते। तदुक्तसमाधानविषये दृढप्रातातपेन।
द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी।
अमावास्यां चतुर्दश्यां परतः सीमदर्शनादिति॥
अपराह्णश्च पञ्चधाविभक्तस्याङ्घ्चतुर्थो भागः। ततश्च यत्र प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति।" इति श्रीहरिभक्तिविलासे १६ विलासः ॥ (चन्द्रस्य वल्कखण्डादिरचितचन्द्राकृतिरातपो यत्र।) चन्द्रातपः। औषधविशेषः। इति हेमचन्द्रः। ३। ३४५॥ स तु मकरध्वजाक्षरसविन्दूरम्। यथा,—

"प्रथं खलु खर्जदलं रसेन्द्रं
पलार्द्धकं गोड़गुड़ं गन्धकस्य।

ग्रीवेः सुकार्पासभवैः प्रसूनैः
सर्व्वं विमर्द्यार्थ कुमारिकाङ्गैः॥
तत्काचकुम्भे निहितं सुगाढ़े
ग्रन्थकर्पटैस्तद्विधसत्त्वयच्च।
पचेत् क्रमाग्नौ सितकास्थयन्त्रे
ततो रजः पल्लवरागरम्यम्॥
निगृह्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं सोमगमिन्द्रपुष्पं
कस्तूरिकाया इह भाग एकः॥ * ॥
चन्द्रोदयोऽयं कथितस्तु मासो
भुक्तोऽद्विवह्नीन्दलमध्यवर्त्ती।
मदोन्मदानां प्रमदाजनानां
गर्व्वाधिकत्वं ग्रथयत्यकाण्डे॥
घृतं घनीभूतमतीव दुग्धं
ग्रन्थूनि मांसानि समस्तकानि।
माषान्नपिष्टानि भवन्ति पथ्या-
न्यानन्ददायीन्द्रियराशि चाद्य॥ * ॥
वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः
समस्तगदखण्डनः प्रचुररोगपाषाणनः।
गृहेषु रसराड़यं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो ग्रगदशां भवेद्दुर्ल्लभः॥"

इति सारकौमुदी सुखबोधञ्च ॥

चन्द्रोदया, स्त्री, (चदि आह्लादे+भावे रक्। चन्द्रस्य दर्शनादिजन्यानन्दस्य उदयो यस्याः। नेत्ररोगस्यौषधविशेषः। यथाह चक्रपाणिदत्तः।

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च।
विभीतकस्य मज्जा च श्लक्ष्णाभिर्मनःशिला॥
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत्।
नाशयेत्तिमिरं कृष्णं पटलान्यर्ब्बुदानि च॥
अधिकानि च मांसानि यच्च रात्रौ न पश्यति।
अपि द्विवार्षिकं पुंसं मासेनैकेन साधयेत्।
वर्त्तिश्चन्द्रोदया नाम्ना तथा दृष्टिप्रसादनी॥")

चन्द्रोपलः, पुं, (चन्द्रप्रभोद्भासित उपलः प्रस्तरः।) चन्द्रकान्तमणिः। इति हेमचन्द्रः। ४। १३३ ॥

चप, सान्त्वे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) सान्त्वं प्रियवचनं उपग्रमो वा। चपति पुत्रं माता। इति दुर्गादासः॥

चप, क म कल्के। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कल्कचूर्णीकरणम्। क म, चपयति तण्डुलं गिलां। इति दुर्गादासः॥

चपटः, पुं, (चप+घञर्थे कः। चपः सान्त्वना चूर्णीकरणं वा तस्मै अटति गच्छतीति। अट+पचाद्यच्। ततः प्रकन्दादिवत् साधुः।) चपेटः। इत्यमरटीका ॥ चड़ इति भाषा ॥

चपलं, क्ली, (चपं सान्त्वनां लाति प्राप्नोतीति। ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) घृतम्। इति मेदिनी। ले, ८८ ॥ चञ्चिकम्। इति हेमचन्द्रः ॥

चपलः, पुं, (चोपति मन्दं मन्दं गच्छतीति। चुप मन्दायां गतौ+"चुपेरोपधायाः।" उणां। १। १११। इति कलच् धातोरुकारस्य अकारा-

देशश्च ।) पारदः । (अस्य पर्य्याया यथा,—
"पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः शूतः शिवाक्षयः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी ।
ले, ८७॥ शवः । इति राजनिर्घण्टः ॥ (मक्षिकाविशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्ब्बसूक्ताः शुक्रविषा मक्षिका ये समासतः ।
नामलक्षणभेषज्यैरष्टादश निबोध तान् ॥"
"कुलिङ्गशालितश्चैव चपलः कपिलस्तथा ॥"
एतस्य दंशनेन यल्लक्षणं भवति तदुपशमनाय च यदौषधं तदृयथा तत्रैव,—
"चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह लक्षया ।
सभ्रमश्चाक्षिणी सजटां चौद्रेण विफलां लिहेत् ॥")
चपलः, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप + कलः । धातोरुकारस्याकारादेशश्च ।) तरलः । चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा, आर्य्यासप्तशत्याम् । ५३० ।
"विचरति परितः क्षणे राधायां रागचपल-
नयनायाम् ।
दग्धविधविशुद्धं विधिरखं विदधाति विषमेषुः ॥")
दोषमणिचित्य वधबन्धनादेः कर्त्ता । तत्पर्य्यायः । चिकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ विकलः । इति शब्दरत्नावली ॥
चपला, स्त्री, (चपल + टाप् ।) लक्ष्मीः । (यथा, माघे । ६ । १६ ।
"निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजञ्च तया ।
दिवसात्ययात्तदपि सुक्तमहो
चपलाजनं प्रति न चोदमदः ॥"
"चपला चापलवती स्त्री कमला च ॥" इति तट्टीकायां मल्लिनाथः ॥) विद्युत् । (यथा, आर्य्यासप्तशत्याम् । १७६ ।
"किंपुच्चि! गरुडग्रैलभमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलासितगर्ज्जितदेष्णान्तर-
भान्तीः ॥")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥ (अस्याः पर्य्याया यथा,—
"पिप्पली मागधी क्षुण्णा वैदेही चपला कणा ।
उपकुल्योषणा ग्रौढी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा । इति राजनिर्घण्टः ॥ (आर्य्याछन्दोविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्नकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")
चपेटः, पुं, (चप + घञर्थे कः । चपः सान्त्वना चूर्णीकरणं वा तत्रे एटति गच्छतीति । एट गतौ + अच् ।) विस्तृताङ्गुलिपाणिः । चड इति चापड इति च भाषा । तत्पर्य्यायः । प्रतलः २ प्रहस्तः ३ । इत्यमरः । २ । ६ । ८४ ॥

चपेटी, स्त्री, भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां अक्षयफलप्राप्तिकामः स्नानादिकं कुर्य्यात् । सन्तानकामो जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै नमः इति आरण्यषष्ठीपूजावत् । चापड़ाषष्ठी-यम् । इति कृत्यचन्द्रिकायाख्या ॥ * ॥ अन्यच्च ।
"प्रसूता द्वादशे मासि सम्पूज्यापत्यद्वये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्येष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्ह्मी ख्याता श्रावणे सुखदा मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाम्नाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मांसप्ररूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रे शोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्थानषष्ठी इति केचित् ॥
चम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ, चमित्वा चान्त्वा । इति दुर्गादासः ॥
चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) न, चन्मोति । र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गादासः ॥
चमत्कारः, पुं, (चमत्करोतीति । कृ + अण् ।) अपामार्गः । इति शब्दरत्नावली ॥ (चमत् + कृ + भावे घञ् ।) चित्तविस्तारस्वरूपः । तत्पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥ अमरः ३ । इति चिकाकश्चेषः ॥ लोकातीतार्थाकलनेन किमेतदिति ज्ञानधारानन्दे चित्तस्य दीर्घप्रायत्वं चित्तविस्तारः । इष्टहेतुभ्योऽसम्भवित्वज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एव चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥ (यथा, कथासरित्सागरे । २२ । २५७ ।
"एवं सकलजगच्चयहृदयचमत्कारकारि-
चरितानाम् ।
स्वयमनुधावन्ति सदा कल्याणपरम्पराः पदवीम् ॥")
चमरं, क्ली, (चमरस्येदम् । चमर + अण् । अत्र न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५२ ॥
चमरः, पुं, (चमति भक्षयतीति । चम + "अर्ज्जि-कमिभ्रमिचमीति ।" उणां । ३ । १३२ । इति अरच् ।) चमरगौः । तत्पर्य्यायः । अजनी २ वन्यः ३ धेनुगः ४ बालधिप्रियः ५ । इति राजनिर्घण्टः ॥ (यथा, रैः रामायणे । २६ । ३ ।
"चमराः रुरवश्चैव ये चान्ये वनचारिणः ॥")
चमरपुच्छः, पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।) कोकड़ः । स तु विलेशयभेदः । इति राजनिर्घण्टः ॥ चामरे क्ली च ॥
चमरिकः, पुं, (चमरमिव केशरोऽस्यास्य । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) कोविदार-वृक्षः । इत्यमरः । २ । ४ । २२ । (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुक्षीतान्नप्रभेदश्च सन्नाकः खण्डकेशरी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर + स्त्रियां ङीष् ।) चमरगवी । तत्पर्य्यायः । दीर्घ-वाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥ (यथा, कुमारे । १ । १३ ।
"यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥
चमसः, पुं, क्लो, (चम्यते भक्ष्यते पीयते इति यावत् सोमोऽस्मिन्निति । चस भक्षणे + "अत्यवि-चमीति ।" उणां । ३ । ११७ । इति असच् ।) यज्ञपात्रभेदः । इति मेदिनी । से, २१ ॥ चमच् इति भाषा ॥ (एतल्लक्षणादिकसूक्तं यथा,—
"चमसानां तु वक्ष्यामि दण्डाः सुचतुरङ्गुलाः ।
बाहुलस्तु भवेत् स्कन्धो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः श्लक्ष्णावार्ग्विलाश्चमसाः स्मृताः ।
अन्येभ्यो वापि वा कार्य्यास्तेषां दण्डेषु लक्षणम् ॥
होतुर्मण्डल एव स्यात् ब्रह्मणश्चतुरस्रकः ।
उद्गातृणाञ्च त्रयः स्याद् याजमानः पृथुः स्मृतः ॥
प्रशास्तुरवतः स्याद्धोतोर्ध्वो ब्रह्मणंसिनः ।
पोतुरग्रे विशाखौ स्याग्नेध्रः स्याद्विग्रहीतकः ॥
अच्छावाकस्य राज्ञाव आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि ।
पलाशाश्वत्थ वटाद्यार्द्रदृषद्वा चमसाः स्मृताः ॥")
चमसः, पुं, (चम्यते भक्ष्यते इति । चम + असच् ।) पर्पटः । पिण्डभेदः । लड्डुकः । इत्यजयपालः ॥ (ऋषभदेवस्य पुत्राणामन्यतमः । यथा, भाग-वते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥
एते भागवतधर्म्मदर्शनो नव महाभागवताः ॥")
चमसी, स्त्री, (चमस + गौरादित्वात् ङीष् ।) सुद्रमस्करादिपिण्डम् । काष्ठरचितं यज्ञपात्र-मित्यर्थे । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
"चर्म्म यच्चक्ष्मभाषाणां चमसी सा विधीयते ।"
इति भावप्रकाशः ॥
चम्पः, क्ली, (चमति भक्षयति ग्रन्थान् नाशयतीत्यर्थः । चम + "क्रमिचमितनीति ।" उणां । १ । ८० । इति कः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य महतीं चम्पम् ॥")
सेनाविशेषः । तत्र ७२६ हस्तिनः ७२६ रथाः २१८७ अश्वाः ३६४५ पदातयः । समुदायेन ७२६० द्विगुणनवत्यधिकसप्तसहस्रम् । इत्यमर-मेदिनीकरौ ॥
चम्पः, पुं, क्लो, (चमतीति । चम + "खर्जिपिञ्जा-दिभ्य ऊरोलचौ ।" उणां । ४ । ६० । इति ऊरः । पृषोदरादित्वात् अत उलच् ।) हरिद्राविशेषः । इत्यमरः । २ । ५ । ६ ॥ (यथा, माघे । १ । ८ ।
"चकासतां चारुचमूरुचर्म्मणा
कृशेन नागेन्द्रमिवेन्द्रवाहनम् ॥")
चम्यः, पुं, (चम्यतीति । चम्य + अच् ।) कोवि-दारवृक्षः । इति शब्दमाला ॥

चम्पकः, क्ली, (चम्पति सदृगन्धं गच्छतीति। चम्प + खुल्।) कदलीफलविशेषः। चाँपा कला इति भाषा। अस्य गुणाः। वातपित्तनाशित्वम्। गुरुत्वम्। वीर्य्यकारित्वम्। अतिशीतत्वम्। रसे पाके मधुरत्वञ्च। इति राजवल्लभः॥ (चम्पकस्य इदम्। चम्पक + अण्। ततोऽणो लुक्।) चम्पकपुष्पम्॥ (सांख्यशास्त्रोक्तसिद्धभेदः। यथा,—
"न्यायेन स्वयं परीक्षितमप्यर्थं तावन्न श्रद्दधते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवादयते। अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी चम्पकमुच्यते॥")

चम्पकः, पुं, (चम्पयति सदृगन्धादिकं गच्छतीति। चम्प + खुल्।) वृक्षविशेषः। चाँपा इति भाषा। तत्पर्य्यायः। चाम्पेयः २ हेमपुष्पकः ३। इत्यमरः। २। ४। ६३॥ स्वर्णपुष्पः ४ शीतलच्छदः ५ सुभगः ६ भृङ्गमोही ७ शीतलः ८ भ्रमरातिथिः ९ सुरभिः १० दीपपुष्पः ११ स्थिरगन्धः १२ अतिगन्धकः १३ स्थिरपुष्पः १४ हेमपुष्पः १५ पीतपुष्पः १६ हेमाङ्गः १७ सुकुमारः १८ वनदीपः १९। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहकुष्ठकण्डूव्रणनाशित्वम्। गुणाढ्यो राजचम्पकः। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। विषश्लेष्मकृच्छ्रकफवातास्रपित्तनाशित्वञ्च। इति भावप्रकाशः॥ फलस्यैकदेशावयवश्च॥

चम्पककलिका, स्त्री, (चम्पकस्य कलिका कोरकः।) चम्पककोरकः। तत्पर्य्यायः। गन्धफली २ वङ्कुगन्धा ३ गन्धमोदिनी ४। इति राजनिर्घण्टः॥

चम्पकचतुर्दशी, स्त्री, (चम्पकसाध्या चतुर्दशी। अस्यां चम्पकैः शिवपूजनात् शिवलोकप्राप्तिस्तथात्वम्।) ज्येष्ठशुक्लचतुर्दशी। यथा, ज्येष्ठमासपटलस्य मत्स्यसूक्ते ४५ पटले।
"चतुर्दश्याञ्च शुक्लायां चम्पकैः पूजयेत् शिवम्। अयुतेनैव सहस्रैर्वा शतैर्वा परमेश्वरि!॥ पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती। वत्सरेण विशेषेण न भूयो जायते भुवि॥ त्रिमध्वक्तैश्चम्पकैश्च सहस्रं जुहुयान्नरि। व्यपोहेज्जन्मरान् हन्ति हत्वा ब्रह्महणि यानि च॥ चम्पकचतुर्दशी ख्याता पूजयेद्वा सदाशिवम्। दशजन्मकृतं पापमर्चनादेव नश्यति॥"
अन्यच्च।
"चतुर्दश्याञ्च शुक्लायां ज्येष्ठे मासि महेश्वरम्। चम्पकैः पूजयेत् भक्त्या शिवलोकमवाप्नुयात्॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥
अपि च।
"ज्येष्ठराशौ चतुर्दश्यां पुष्पैश्चम्पकसम्भवैः। अर्चयित्वा महादेवं रुद्रलोके महीयते॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम्॥

चम्पकरम्भा, स्त्री, (चम्पक इति नाम्ना प्रसिद्धा रम्भा। यद्वा, चम्पकपुराणतद्वृक्षविशिष्टा रम्भा।) सुवर्णकदली। इति राजनिर्घण्टः॥

(चाँपा कला। इति भाषा॥ गुणादिकं चम्पकशब्दे द्रष्टव्यम्॥)

चम्पकालुः, पुं, (चम्पकवत् चम्पकपुष्पवर्णवत् आशु रथन्तरदीर्घकोषो यस्य। यद्वा, चम्पकं चम्पकवर्णं आलाति प्रतिगृह्णातीति। आ + ला + मितद्वादित्वात् डुः।) पनसः। इति भूरिप्रयोगः॥

चम्पकन्दः, पुं, (चम्पकवर्णः सन् उनत्तीति। उन्दी क्लेदने + अच्। पृषोदरादित्वात् अकारलोपः।) मत्स्यभेदः। चाँदकुड़ा। इति भाषा। अस्य गुणाः। गुरुत्वम्। शुक्रकारित्वम्। मधुरत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

चम्पकोषः, पुं, (चम्पश्चम्पक इव कोषो यस्य।) पनसः। इति त्रिकाण्डशेषः॥

चम्पा, स्त्री, (चम्पा नदी विद्यतेऽस्यामिति। "अर्शं आदिभ्योऽच्।"५। २। १२७। इत्यच्। यद्वा, चम्पेन राज्ञो हरिश्चन्द्रस्य प्रपौत्रेण निर्म्मिता या पुरी। यदुक्तं भागवते।९।८।१। "हरितो रोहितसुतश्चम्पस्तस्मादिनिर्म्मिता। चम्पा पुरी.....॥") कर्णपुरी। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। मालिनी २ लोमपादपूः ३ कर्णपूः ४। इति हेमचन्द्रः। ४। ४२॥ चम्पावती ५ चम्पापुरी ६। इति शब्दरत्नावली॥ (इयन्तु अङ्गदेशान्तर्गता। यदुक्तं हेमचन्द्रेण। ४। २३।
"वङ्गास्तु हरिकेलीया अङ्गाश्चम्पोपलक्षिताः॥" तथा च महाभारते। १२। ५। ६—७।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ। अङ्गेषु नरशार्दूल! स राजासीत् सपत्नजित्॥ पालयामास चम्पाञ्च कर्णः परबलार्दनः। दुर्य्योधनस्यानुमते तवापि विदितं तथा॥" इयमेव पुरा राज्ञो लोमपादस्य राजधानी आसीत्। इति रामायणम्॥ अङ्गदेशस्यनदीविशेषः॥)

चम्पाधिपः, पुं, (चम्पाया अधिप ईश्वरः।) कर्णराजः। इति हेमचन्द्रः॥

चम्पापुरी, स्त्री, (चम्पा एव पुरी।) चम्पानगरी। इति शब्दरत्नावली॥

चम्पालुः, पुं, (चम्पकस्यैव कोशवर्णं आलाति आ + ला + डुः।) पनसः। इति शब्दरत्नावली॥

चम्पावती, स्त्री, (चम्पा तदाख्यया प्रसिद्धा नदी विद्यतेऽस्यामिति। चम्पा + मतुप्। मस्य वत्वम्।) चम्पापुरी। इति शब्दरत्नावली॥

चम्पूः, स्त्री, काव्यविशेषः। इति जटाधरः॥ तल्लक्षणं यथा,—
"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते॥" इति साहित्यदर्पणे। ६। २६८॥

चम्पेशः, पुं, (चम्पाया ईशः।) कर्णराजः। इति त्रिकाण्डशेषः॥

चम्पोपलक्षितः, पुं, (चम्पया नगर्य्या नद्या वा उपलक्षितः।) अङ्गदेशः। इति हेमचन्द्रः। ४। २३॥ तद्देशस्थे पुं भूम्नि॥

चम्, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चम्मति। इति दुर्गादासः॥

चय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, चयते। इति दुर्गादासः॥

चयः, पुं, (चीयते इति। चि + "अरच्।" ३। ३। ६६। इति कर्म्मणि अच्।) वप्रम्। इत्यमरः। २। २। ३॥ तत्तु प्राकारादिमूलबद्धम्। यदुपरि प्राकारो निरूप्यते सः। पगार इति ख्यात इति केचित्। इति तट्टीकासारसुन्दरी॥ दुर्गनगरे उद्धृतमृत्तिकास्तूपबद्धं यदुपरि प्राकारो निवेश्यते। तथाचार्थशास्त्रम्। खातसुद्धृतमृद्दा वप्रं कारयेत् तस्योपरि प्राकारमिति। इति भरतः॥ समूहः। (यथा मनौ। १। ३।
"चयश्चैषामित्यवधारितं पुरा॥")
समाकृतिः। इति मेदिनी। ये, २१॥ प्राकारः। (यथा, महाभारते। ३। १६०। ३७।
"शैलादभ्युच्छ्रयवता चयेनाट्टालकशोभिना॥")
पीठम्। इति हेमचन्द्रः॥ (दोषार्त्ता सञ्चयप्रकोपप्रशमादिषु प्रकारविशेषः। तद्यथा,—
"शीते सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति। वर्षार्त्ता चीयते पित्तं शरत्काले प्रकुप्यति॥ हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति। प्रायेण प्रशमं याति स्वयमेव समीरणः॥ शरत्काले वसन्ते च पित्तं प्रावृड्भवौ कफः।"
"चयकोपशमान् दोषा विहाराहारसेवने। सनानैर्यान्त्यकाले ऽपि विपरीतैर्विपर्य्ययम्॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम्॥ प्रयोगः। यथा,—
"कटुतैलान्वितैर्लेपात् सर्षपैर्निर्म्लोकभस्मभिः। चयः शाम्यति गण्डस्य प्रकोपः स्फुटति द्रुतम्॥"
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे॥)

चर, गमने। अदने। आचारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चरति। इति दुर्गादासः॥

चर, क संशीत्यसंशीत्योः। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) संशीतिः संशयः। असंशीतिरसंशयः। क, विचारयति यो धर्म्ममिति हलायुधः। चर असंशये। इति प्राचः। केचित्तु संशये इति पठित्वा संशये हि विचारणा स्यादित्याहुः। इति दुर्गादासः॥

चरः, पुं, (चरति स्वपरराष्ट्रस्य शुभाशुभज्ञानाय भ्राम्यतीति। चर + अच्।) राष्ट्रादेः शुभाशुभादिज्ञानार्थं राज्ञा सगोपनं नियुक्तः पुरुषः। परतत्त्वज्ञानार्थभ्रमणकर्त्ता। तत्पर्य्यायः। यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ स्पशः ६ गूढपुरुषः ७। इत्यमरः। २। ८। १३॥ अपसर्पकः ८ प्रतिष्कः ९ प्रतिष्कसः १० ब्रह्मगतिः ११ मलगूढः १२ हितसन्धीः १३। इति शब्दरत्नावली॥ उदाहृतः १४। इति जटाधरः॥ तत्कार्य्यौ भिक्षुबलिगादिवेशेन नित्यस्थायिनि चरे। पक्षे स्वदेशपरदेशभ्रमणग्राह्ये इत्यर्थे। इति भरतः॥ तस्य लक्षणं यथा,—

"विवस्वानिव तेजोभिर्नभस्वानिव वेगतः ।
राजा चरैर्जगत् सर्व्वं प्राप्नुयाल्लोकसम्मतैः ॥
तर्कैङ्गितज्ञः स्मृतिमान् स्वीयभावाप्रकाशकः ।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्जितः ॥
सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान् ।
दृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः ॥
कालज्ञो मन्त्रकुशलान् संवत्सरचिकित्सकान् ।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः ॥
अक्रुद्धांश्च तथाशुभ्रान् दृष्टार्थान् तत्त्वभाषिणः ।
पाषण्डिनस्तापसादीन् परराष्ट्रे नियोजयेत् ॥
स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान् ।
वर्षाहर्य्यान् बहूंश्चैव चराञ्चारे विनियोजयेत् ॥
नैकस्य वचने राजा चारस्य प्रत्ययं वहेत् ।
द्वयोः समन्यमाज्ञाय तदृयुक्तं कार्य्यमारभेत् ॥
तस्मात्राजा प्रयुञ्जीत चरान् बहुसखान् बहून् ।
नीरोतोवामनाः क्लृप्ताश्चिधा ये च कारवः ॥
भिक्षुकश्चारणा दासो मालाकार्य्यः कलाविदः ।
अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम् ॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः ॥"

इति भोजराजकृतयुक्तिकल्पतरुः ॥ * ॥

अचद्भूतभेदः । भौमः । चलः । इति मेदिनी । रे, ३० ॥ खञ्जनपक्षी । इति शब्दमाला ॥ कपर्दकः । इति राजनिर्घण्टः ॥ मेषकर्कटतुलामकरलग्नानि । इति ज्योतिषम् ॥ अस्थिरविभूतिमिदं चलमटनं स्खलितनियममपि चरमे । इति दीपिका ॥ (यथा, तिथितत्त्वे ।

"चरलग्ने चरांशे वा स्थापनञ्च विसर्জ্জनम् ॥"

जङ्गमे, त्रि । यथा मनुः । ७ । १५ ।

"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ॥"

तथाच चरकं शब्दस्थाने २७ अध्याये ।

"नरः शरीरावयवः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते॥
चरोलूपजलाकाशधन्वाद्यो भक्षसंविधिः ।
जलजानूपनाश्चैव जलानूपचराश्च ये ॥
गुरुभक्त्याश्च ये सक्ता सर्व्वे ते गुरवः स्मृताः॥")

चरकः, पुं, (चर एव । स्वार्थे कन् ।) चारः । इत्युणादिकोषः ॥ पर्पटः । इति राजनिर्घण्टः ॥ (चरति गच्छति वेत्ति वेदवेद्यकादीनि सर्व्वशास्त्राणीति । चर + अच् ततः कन् च । यद्वा चर इव महीदृक्तं द्रष्टुमागतः । चर + इवार्थे कन् ।) मुनिविशेषः । तत्कृततत्तन्नामकग्रन्थः । तयोरुत्पत्तिर्यथा,—

"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महीदृक्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीड़ितान् ।
क्लेशेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
संचिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तेषु कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ॥
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥"

इति भावप्रकाशः ॥

चरटः, पुं, (चरति वृथतीव विचरतीर्थः । चर + बाहुलकात् अटच् ।) खञ्जनपक्षी । इति शब्दमाला ॥

चरणं, क्ली, (चर + भावे ल्युट् ।) गमनम् । (यथा, ऋग्वेदे । ६ । ११४ । ६ ।

"यत्राकामं चरणं त्रिनाके त्रिदिवे दिवः ॥")

भक्षणम् । (यथा, मनुः । २ । १८६ ।

"अक्षतञ्च भैक्षचरणमसमिश्र च पावकम् ।
अगर्हितः सप्तगृहमवकीर्णिव्रतञ्चरेत् ॥")

आचारः । इति हेमचन्द्रः । ३ । ५०७ ॥ (यथा, ऋग्वेदे । १० । १३६ । ६ ।

"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन् ॥")

चरणः, पुं क्ली, वृक्षादिः । (यथा, प्रपञ्चतन्त्रे । ४ । ३ ।

"न वृक्षे चरणं गोत्रं न च विद्या कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥"

अपि च महाभाष्यवचनम् । यथा,—

"सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥"

"चरणशब्दो वेदैकदेशवाची कठादिरूपः ।" इति सुबोधटीकायां भरतः ॥) मूलम् । गोत्रम् । इति मेदिनी । णे, १७ ॥ (चरतीति । चर + ल्युः । चरत्यनेनेति करणे ल्युट् वा । अधमाङ्गम् । तत्पर्य्यायः । पादः २ पतु ३ अङ्घ्रिः ४ । इत्यमरः । २ । ६ । ७१ ॥ विक्रमः ५ पदः ६ आक्रमः ७ । इति राजनिर्घण्टः ॥ क्रमणः ८ चलनः ९ क्रमः १० । इति हेमचन्द्रः । ३ । २८० ॥ पदम् ११ पातः १२ । इति जटाधरः ॥ (यथा, मनुः । ६ । २७७ ।

"अङ्गुलीग्रन्थिभेदस्य क्षेदयेत् प्रथमे गदे ।
द्वितीये दण्डचरणौ तृतीये वधमर्हति ॥"

श्लोकचतुर्थभागः । यथा, उत्तररामचरिते १ अध्याये ।

"श्लेषं गाथाभिः षड्भिश्चरणैश्चोपलक्षितः ॥")

चरणग्रन्थिः, पुं, (चरणस्य ग्रन्थिः ।) गुल्फः । इति हेमचन्द्रः । ३ । ६१५ ॥

चरणव्यूहं, क्ली, (चरणानां वेदशाखानां व्यूहोऽत्र ।) वेदव्यासविरचितचतुर्व्वेदविवरणग्रन्थभेदम् । तच्च वेदशब्दे द्रष्टव्यम् ॥

चरणायुधः, पुं, (चरण एवायुधं अस्त्रविशेषो यस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (पर्य्यायोऽस्य यथा,—

"कुक्कुटः कलवाकुः स्यात् कलयञ्चरणायुधः ।
ताम्रचूडरुषा दक्षो यामनादी शिखण्डिकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम् ॥

चरणास्त्रे, त्रि । यथा, रामायणे । ३ । ५६ । ३५ ।

"तुरङ्गपक्षप्रहारेण जटायुश्चरणायुधः ॥")

चरमः, त्रि, (चरतीति । "चरेष्टः ।" उणां ५ । ६८ । इति अमच् ।) अन्तः । पश्चिमः । इत्युणादिकोषः ॥ (यथा, मनुः । २ । १६४ ।

"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥")

चरमक्षाभृत्, पुं, (क्ष्मां बिभर्त्तीति । भृ + क्विप् । ततः चरमश्चासौ क्षाभृच्चेति कर्म्मधारयः ।) अस्ताचलः । इत्यमरः । २ । ३ । २ ॥

चरमाचलः, पुं, (न चलतीति पृषोदरात् अचलः पर्व्वतः । ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः ।) अस्तपर्व्वतः । इति त्रिकाण्डशेषः ॥

चरमाद्रिः, पुं, (चरमश्चासावद्रिश्चेति ।) अस्ताचलः । इति हेमचन्द्रः ॥

चराचरं, क्ली, (चराचरयोः समाहारः ।) जगत् । इति मेदिनी । रे, २६० ॥ (तथा च मनुः । १ । ५७ ।

"एवं स जागत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")

आकाशः । इति धरणी ॥ जङ्गमाजङ्गमम् । यथा, देवीभागवते ।

"तया विरच्यते विश्वं जगदेतच्चराचरम् ॥"

चराचरः, त्रि, (चरश्चलं आचरो व्यवहारचेष्टादिकं तौ विद्यतेऽस्मिन् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ शङ्खः । इति विश्वः ॥ इडः । इति हेमचन्द्रः ॥ कपर्दके पुं । इति राजनिर्घण्टः ॥ (चरतीति चरो जङ्गमः अचरः स्थावरः । चरेण सह अचरः । स्थावरजङ्गमः । यथा, भागवते । ३ । ६ । ६ ।

"युक्तोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ॥")

चरिः, पुं, (चर + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) पशुः । इत्युणादिकोषः ॥

चरितं, क्ली, (चर + भावे क्तः ।) चरित्रम् । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । १ । १ ।

"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः ।
राज्ञाञ्चोभयवंश्यानां चरितं परमाद्भुतम् ॥")

तद्द्विविधं यथा, उज्ज्वलनीलमणौ ।

"अनुभावाश्च लीला चेत्युक्तं चरितं द्विधा ।
अनुभावा अलङ्काराख्याः उद्भास्वराख्याः वाचिकाख्याश्च । लीला स्यादरविक्रीड़ा रासकल्लकखेलाद्या चारुक्रीड़ा प्रकीर्त्तिता । ताण्डवं वेणुवादनं गोदोहः पर्व्वतोद्धारो गोधूलिर्गमनादिका ॥" (यथा, गीतगोविन्दे । १ । २ ।

"वाग्देवताचरितचित्रितचित्तसद्मा ॥"

वाच्यलिङ्गे तु । चर + कर्म्मणि क्तः । ततम् । आचरितम् । यथा, रामायणे । १ । ३ । १ ।

"श्रुत्वा पूर्व्वं कायवीर्यं देवर्षेर्नारदाद्वचः ।
लोकाद्रन्विच्य भूयश्च चरितं चरितव्रतः ॥")

चरितार्थः, त्रि, (चरितः कृतः अर्थः प्रयोजनं येन सः ।) प्राप्तप्रयोजनः । यथा, कुमारसम्भवे । २ । ७ ।

"पुराणस्य कवेस्तस्य चतुर्म्मुखसमोदिता ।
प्रवृत्तिरासीच्छन्दांसि चरितार्था चतुष्टयी ॥"

चरित्रं, क्ली, (चर+"अर्त्तिलूधूसूखनसहचर इत्रः।"उ। २। १८३। इति इत्रः।) स्वभावः। तत्पर्य्यायः। चरितम् २ चारित्रम् ३ चरीत्रम् ४। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ४। ८३।

"अचिन्त्यं शीलगुणानां चरित्रं कुलयोषिताम्॥")

चरित्रा, स्त्री, (चरित्र+टाप्।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥

चरिष्णुः, त्रि, (चरतीति। चर+"अलङ्कृञ्निति।" २। २। १३६। इति इष्णुच्।) जङ्गमः। इत्यमरः।३।१।७४॥ (यथा, भागवते। २।६।४०।

"द्रव्यं विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः॥")

चरीत्रं, क्ली, (चरित्र+पृषोदरादित्वाद्दीर्घत्वम्।) चरित्रम्। इति शब्दरत्नावली॥

चरुः, पुं, (चरन्ति भक्षयन्ति देवा इमं चर्य्यते भक्ष्यते अग्न्यादिभिर्देवैरिति वा चरति होमादिकमनेनादिलोके। चर+"भृञ्जीति।" उणा १। ७। इति उः।) हविरन्नम्। तत्पाकभाजनम्। इति मेदिनी। रे, ३२॥

"ततश्च संस्कृते वह्नौ गोचीरेण चरुं पचेत्॥"

इति शारदातिलकम्॥

तस्यानुष्ठानं यथा। अग्नेः प्रक्षिमायान्दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितं वारुणसुदूखलं सुमलं वैष्णवच्च सर्पे वारुणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा सर्पे निधाय चमसस्थजलेन ओं वास्तोष्पतये त्वा जुष्टं प्रोक्षामि ओम् इन्द्राय त्वा जुष्टं प्रोक्षामि ओं भूस्त्वा जुष्टं प्रोक्षामि ओं भुवस्त्वा जुष्टं प्रोक्षामि ओं स्वस्त्वा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं निर्व्वपामि ओं भूस्त्वा जुष्टं निर्व्वपामि ओं भुवस्त्वा जुष्टं निर्व्वपामि ओं स्वस्त्वा जुष्टं निर्व्वपामि ओं प्रजापतये त्वा जुष्टं निर्व्वपामि इति प्रत्येकं गृहीत्वा उदूखले क्षापयेत् हिरण्यौम्। ततो दक्षिणहस्तोपरि कृत्वा सुवर्णेनावहत्य सर्पेण प्रस्फोटयेत्। इत्यमेव वारत्रयं कृत्वा चिः प्रक्षालयेत्। ततश्चरुस्थाल्यामग्नेयकं कृतोत्तराग्रं पवित्रं निधिय प्रक्षालिततण्डुलं निधाय दुग्धं निधिय श्लोकं श्लोकसदृशं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं अग्रे उभयतोऽङ्गुष्ठपर्व्वप्रमाणं चतुष्कोणपुष्कलं मेध्यं दक्षिणावर्त्तेन श्रामयित्वा तथा पचेत् यथाऽन्नस्य सम्यक् पाको भवति गालनं न भवति दाहश्च न भवति ततः सम्यक्पाके भूते मध्ये घृतप्लुतं कृत्वा प्रागादिदिक्स्थितं चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतप्लुतं दद्यात्। इति भवदेवभट्टः॥

चरुव्रणः, पुं, (चरोर्व्रण इव।) चिप्पापूपः। इति त्रिकाण्डशेषः॥ चिताइ पिटा इति भाषा॥

चर्च, क इड्सने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इड्सनम् अध्ययनम्। क, चर्चयति वेदं विप्रः। इति दुर्गादासः॥

चर्च, ग उल्लौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) रेफोपधः। ग्र, चर्चतीति चर्च्चन्ती। गुणस्थानरहितानां तुदादिपाठफलन्तु ग्रन्थान्तरादीपोरिति गुणो विभाषा वेदेषूच्चारणभेदश्च। इति दुर्गादासः॥

चर्चरी, स्त्री, (चर्च+बाहुलकात् अरन् ततो गौरादित्वात् ङीष्।) गीतभेदः। चर्चरी गीतभेदे च कैशभित्करग्रन्थ्योरिति रुद्रः॥ हर्षक्रीड़ेति भूमिः। कापटिकानां सादरवचनं तौर्य्यत्रिकचेत्यन्ये। वसन्तसमयक्रीड़ेत्येके। इत्यमरटीकायां भरतः॥ हर्षक्रीड़ावाक्। तत्पर्य्यायः। चर्भटी २। इति हेमचन्द्रः॥ (यथा, रत्नावल्याम्। १ अङ्के। "अये! मधुरमभिहन्यमानदुन्दुभिध्वनानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्चरीध्वनिः॥" एतदुदाहरणं यथा, विक्रमोर्व्वश्याम्। ४ अङ्के। अनन्तरे चर्चरीत्युक्ता,—

"गन्धोन्मादितमधुकरगीतै-
र्वाद्यमानैः परभृततूर्य्यैः।
प्रसरितपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारैर्नृत्यति कल्पतरुः॥"

वर्णवृत्तविशेषः। यथा, ग्रन्थार्थचिन्तामणौ।

"हारयुक्तसुवर्णकङ्कणपाणिग्रन्थविराजिता
पादनूपुरसङ्गता सुपयोधरहृयभूषिता।
शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता
चर्चरी तरुणीव चेतसि चारुसीति सुसङ्गता॥")

चर्चरीकः, पुं, (चर्च+"फर्फरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययान्तेन निपातनात् साधुः।) महाकालः। कैशभिन्यासः। शाकः। इति मेदिनी। के, १८७॥

चर्चा, स्त्री, (चर्च्यते विचार्य्यते वेदवेदान्तादितत्त्वशास्त्रैरसौ इति। चर्च+णिच्+अङ्।) दुर्गा। चिन्ता। चार्च्चिक्यम्। इति मेदिनी। चे, ४॥ विचारणा। इत्यमरः। १।५।२॥ (चर्च+भावे अङ्। लेपनम्। यथा, छन्दोमञ्जर्य्याम्। १५। ४।

"रुगमदलतचर्चा पीतकौशेयवासाः॥"

गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४६।

"ज्ञानधातुमयी चर्चा चर्चिता चारुहासिनी॥")

चर्चिका, स्त्री, (चर्चा+स्वार्थे कन्। कापि अत इत्वम्।) दुर्गा। इति त्रिकाण्डशेषः॥ चर्चा। इति द्विरूपकोषः॥ (रोगविशेषः। तदपनोदनं तुषारपानीयं यथा,—

"तौषारं लघुशीतलं श्रमहरं पित्तार्त्तिशूलान्तकं
दोषाणां शमनं ज्वलार्त्तिहननं सर्व्वामयघ्नं परम्।
कुलक्षीपदचर्चिका-विषहरं पामाविसर्पापहं
शीर्णानां क्षतशोधिणां हितकरं संसेव्यते
मानवैः॥"

इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥ (चर्चां वेदादिविचारणां वेत्ति इति। ठन्। वेदाद्यध्येतरि, त्रि॥)

चर्चितं, त्रि, (चर्च+कर्म्मणि क्तः। चर्चा लेपनं सञ्जातास्य इति इतच् वा।) चन्दनादिना क्षतलेपनम्। तत्पर्य्यायः। दिग्धम् २ लिप्तम् ३। इति जटाधरः॥ (यथा, गीतगोविन्दे। १।४०।

"चन्दनचर्चितनीलकलेवरपीतवसनवनमाली॥")

चर्त्तयः, त्रि, (चर्त्तते इति। चृत हिंसायाम्+"ऋदुपधाच्चाकृपिचृतेः। ३। १। ११०। इति ण्यत्।) हननीयः। इति याज्ञिकाकरक्रमः॥

चर्पटः, पुं, (चृप्+अटन्।) स्फारः। विपुलः। चपेटः। पर्पटः। इति मेदिनी। टे, ३१॥

चर्पटा, स्त्री, (चर्पट+टाप्।) भाद्रशुक्लषष्ठी। चापड़াষষ্ঠী इति भाषा॥ अस्या विवरणं चपेटीशब्दे द्रष्टव्यम्॥

चर्पटी, स्त्री, (चर्पट+ङीष्।) पोली। इति त्रिकाण्डशेषः॥

चर्भ्म, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चर्भति। इति दुर्गादासः॥

चर्भटः, पुं, (चर+क्विप्। भटति भरति स्वशरीरदानेनेति। भट्+अच्। ततः कर्म्मधारयः।) इन्द्रवारुणः। इति हलायुधः॥

चर्भटी, स्त्री, (चर्भट+ङीष्।) चर्च्चरी। हर्षक्रीड़ावाक्। इति हेमचन्द्रः॥

चर्म्म, क्ली, (चर्म्मे साधनतयास्त्यस्य अच्।) फलकः। इत्यमरटीकायां भरतः॥ (यथा, मनुः। ७। १६२।

"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः क्वचे॥")

चर्म्म, [न्] क्ली, (चर+"सर्व्वधातुभ्यो मनिन्।" उणा। ४।१४५। इति मनिन्।) इन्द्रियविशेषः। चाम इति भाषा॥ तत्पर्य्यायः। त्वक् २ असृग्धरा ३ क्षत्तिः ४ अजिनम् ५ देहचर्म्म ६ रक्ताधारः ७ रोमभूमिः ८ शरीरावरणम् ९। इति राजनिर्घण्टः॥ असृग्धरा १०। इति भरतधृतसर्व्वधरः॥ (यथा, भागवते।३।६।१६।

"निर्भिन्नान्यस्य चर्म्माणि लोकपालोऽनिलोऽविशत्॥")

शरीरावरकं शुष्कम्। छाल इति भाषा॥ तत्पर्य्यायः। फलकः २ फलम् ३। इत्यमरः। २। ८। ६०॥ फरम् ४ चर्म्मम् ५। इति भरतः॥*॥

तस्य लक्षणं यथा, युक्तिकल्पतरौ।

"शरीरावरकं शुष्कं चर्म्म इत्यभिधीयते।
तत् पुनर्द्विविधं कार्ष्णचर्म्मसम्भवभेदतः॥
शरीरावरकत्वञ्च लघुता दृढ़ता तथा।
दुर्भेद्यतेति कथिता चर्म्मणां गुणसंग्रहः॥
खरत्वता गुरुता च स्पृष्टता सुखभेदता।
विरूक्षवर्णता चेति चर्म्मणां दोषसंग्रहः॥

सितो रक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः।
ब्रह्मादिजातिभेदेन चर्म्मणां वर्णनिर्णयः॥
चित्रवर्णस्तु सर्व्वेषां सर्व्वदेवोपपद्यते॥"*॥
ब्रह्मचारिधार्य्यकृष्णसारचर्म्म। इत्यमरः। २।७। ४७॥ (यथा, मनुः। २। ४१।
"काञ्चनौरववास्तानि चर्म्माणि ब्रह्मचारिणः॥")

चर्म्मकषा, स्त्री, (चर्म्मणः कषा। चर्म्म कषतीति। कष+अच् टाबन्तो वा।) पश्चिमदेशजातं गन्धद्रव्यम्। केचित्तु चामारकषा इति ख्याता इत्याहुः। इति भरतः॥ तत्पर्य्यायः। सप्तला २ विमला ३ सातला ४ भूरिफेना ५। इत्यमरः। २। ४। १४३॥ प्रातला ६ चर्म्मकषा ७। इति भरतः॥ मांसरोहिणी। इति राजनिर्घण्टः॥
("चर्म्मकषायाः कल्कं विल्वसमं गृह्णीयात्। काकपदमस्य।
क्षत्वा कृष्णात् कटभीं कटुकोटफलाप्रधमनञ्च॥"
इति चरके चिकित्सास्थाने पञ्चविंशेऽध्याये॥)

चर्म्मकषा, स्त्री, (चर्म्मणः कषा।) चर्म्मकषा। इत्यमरटीकायां भरतः॥

चर्म्मकारः, पुं, (चर्म्म चर्म्मनिर्म्मितव्यादिकं करोतीति। कृ+"कर्म्मण्यण्"। ३।२।१। इति अण्।) वर्णसङ्करजातिविशेषः। चामार इति मुचि इति च भाषा॥ स तु चण्डाल्यां तीवरात्जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। पादुकृत् २। इत्यमरः। २।१०॥ पादुकृत् ३ चर्म्मारः ४। इति तट्टीका॥ चर्म्मकृत् ५ पादुकाकारः ६। इति हलायुधः॥ चर्म्मरुः ७ कुरटः ८। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १०। ३६।
"कारावरो निषादात्तु चर्म्मकारः प्रसूयते॥")

चर्म्मकारी, स्त्री, (चर्म्म करोति वर्द्धयति उत्कर्षं करोतीति यावत्। कृ+अण्। चर्म्म किरतीति चर्म्म+कॄ+अण्। ततो ङीष्।) चर्म्मकषौषधिः। इति मेदिनी। रे, २६१॥

चर्म्मकीलः, पुं, (चर्म्मे कीलतीति। कील+अच्। चर्म्मणि गुह्यस्थचर्म्मणि कील इवेति वा।) गुह्यरोगविशेषः। डालीश इति हारिस् इति च भाषा॥ तस्य निदानं यथा,—
"क्षारो रहाला क्षेत्राणां करीषाग्निश्च वह्निः।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः॥
वातेन तोदप्राग्रूप्यं पित्तादसितरक्तता।
श्लेष्मणा रूक्षता तस्य ग्रथितत्वं सवर्णता॥"
इति माधवकरेण रोगविनिश्चयग्रन्थे अर्शोरोगाधिकारे धृतम्। अतोऽस्य चिकित्सा अर्शोरोगचिकित्सावत्। अपि च।
"चर्म्मकीलं जतुप्रख्यं मसकान् तिलकालकान्।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामथेषतः॥"
इति भावप्रकाशः॥

चर्म्मकृत्, पुं, (चर्म्म करोति चर्म्मघटितपादुकादिकम् उत्पादयतीत्यर्थः। चर्म्म+कृ+क्विप्।) चर्म्मकारः इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ४। ५५। [योगिनीम्॥")
"चर्म्मकृत् कोऽपि न भ्रातः कुटीं चेत्प्रोप-

चर्म्मचटका, स्त्री, (चर्म्मणा चटकेव।) निशाचरपक्षिविशेषः। चामुचिका इति भाषा॥ तत्पर्य्यायः। जतुका २ अजिनपत्रिका ३। इति हेमचन्द्रः॥ जतूका ४ गृहमाचिका ५ जतुनीड् अजिनपत्रा ७ चार्म्मिः ८ चर्म्मचटी ९। इति शब्दरत्नावली॥ चर्म्मपत्रा १०। इति जटाधरः॥ चर्म्मचटिका ११। इति केचित्॥

चर्म्मचटी, स्त्री, (चर्म्मणा चटीव। यद्वा, चर्म्म चटति भिनत्तीति। चट+अच् ङीष्।) चर्म्मचटका। इति शब्दरत्नावली॥

चर्म्मचित्रकं, क्ली, (चर्म्मणि चित्रकं चित्रितमिवेत्यर्थः। चर्म्मे चित्रयतीति वा। चित्र+ण्वुल्।) श्वेतकुष्ठम्। इति राजनिर्घण्टः॥

चर्म्मजं, क्ली, (चर्म्मणो चर्म्मणि वा जायते। जन+डः।) रोम। रुधिरम्। इति राजनिर्घण्टः॥

चर्म्मखती, स्त्री, (चर्म्मैव उत्पत्तिहेतुत्वेनास्त्यस्याः इति मतुप् मस्य वत्वम्।) नदीविशेषः। सा तु बुन्देलखण्डाख्यदेशे चम्बल् इति ख्याता॥ कदली। इति मेदिनी। ते, १६६॥ (आसीत् किल पुरा रन्तिदेवनामा (शब्दविन्दुनामा वा) कश्चित् राजचक्रवर्त्ती। तस्य यज्ञे मारिता ये गावस्तेषां चर्म्मगलितरक्तौघादिभ्यो जातेयं नदीति पौराणिकी गाथा। यथा, देवीभागवते। १। १८। ५४।
"चर्म्मणां पर्व्वतो जातो विन्ध्याचलसमः पुरः।
मेघानुभावसञ्जाता नदी चर्म्मखती शुभा॥")

चर्म्मदण्डः, पुं, (चर्म्मभिश्चर्म्मणा वा निर्म्मितो दण्डः।) कशा। इति हेमचन्द्रः॥ चाबुक् इति भाषा॥
("चर्म्मदण्डाहतो विप्रः शुष्कापातिरुषा चतम्॥"
इति महाभारतशान्तिपर्व्वणि॥)

चर्म्मदूषिका, स्त्री, (चर्म्म दूषयति दोषयति वा। दुष्+णिच्+ण्वुल्। ततष्टाप् अत इत्वम्।) कोठरोगः। इति राजनिर्घण्टः॥

चर्म्मतरङ्गः, पुं, (चर्म्मणां चर्म्मभिर्वा तरङ्ग इव।) वलिः। त्वक्सङ्कोचः। इति राजनिर्घण्टः॥

चर्म्मद्रुमः, पुं, (चर्म्म त्वक्क्षतिवल्कजमधो द्रुमः।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चर्म्मपत्रा, स्त्री, (चर्म्ममयं पत्रं पक्षवदयं यस्याः।) चर्म्मचटी। इति जटाधरः॥

चर्म्मपादुका, स्त्री, (चर्म्मनिर्म्मिता चर्म्ममयी वा पादुका।) उपानत्। चामड़ार जुता इति भाषा॥ यथा। "ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुकायुगले पादौ निदध्यात्।" इति भवदेवभट्टः॥ अस्या गुणाः पादुकाशब्दे द्रष्टव्याः॥

चर्म्मपुटः, पुं, (चर्म्मनिर्म्मितः पुटः पात्रम्।)
चर्म्मपुटकः, पक्षे स्वार्थे कन्। चर्म्ममयं पुटमत्र इति कप् इत्येके।) चर्म्मनिर्म्मितपात्रविशेषः। छाप इति भाषा॥ यथा। इतिचर्म्मे पुटकः। इतिचर्म्मपुटे मतुस्वे चेति मेदिनी॥ इति पुंलिङ्गसंग्रहटीकायां भरतः॥ तत्पर्य्यायः। डतिः। खड्गचर्म्ममयीति हेमचन्द्रः॥

चर्म्मप्रभेदिका, स्त्री, (चर्म्म प्रभिनत्तीति। प्र+भिद्+ण्वुल्। टापि अत इत्वञ्च।) चर्म्मप्रभेदनास्त्रम्। इत्यमरः। २। १०। ३५॥ पोड़ इति भाषा॥

चर्म्मप्रसेवकः, पुं, (चर्म्मणा प्रसीव्यते इति। ण्यन्तसन्तानात्+"संज्ञायाम्।" ३। ३। १०६। इति कर्म्मणि ण्वुल् बाहुलकात् वुन् वा।) चर्म्मप्रसेविका। इत्यमरटीकायां भरतः॥

चर्म्मप्रसेविका, स्त्री, (चर्म्मप्रसेवक+टाप् अत इत्वञ्च।) अग्निसन्दीपनार्थं चर्म्म निर्म्मितयन्त्रम्। भत्ती इति जाँता इति च भाषा॥ तत्पर्य्यायः। भस्त्रा २। इत्यमरः। २।१०।३३॥

चर्म्मसुखा, स्त्री, (चर्म्मणः जीवरहितदेहस्येत्यर्थः सुखमस्त्यस्यां सुखा इति। छिन्नशिरोधारणादेव तथात्वम्।) दुर्गा। इति हेमचन्द्रः। २। १२०॥ (चर्म्मसुखा। इत्यपि क्वचित् पाठः॥)

चर्म्मरङ्गा, स्त्री, (चर्म्मणे रङ्गो यस्याः।) आवर्त्तकीलता। इति राजनिर्घण्टः॥ (देशविशेषे, पुं। स च देशः कूर्म्मविभागे पश्चिमोत्तरस्यां दिशि उक्तः। यथा, बृहत्संहितायाम्। १४। २३।
"दिशि पश्चिमोत्तरस्याम्।" इत्युपक्रम्य,—
"वेणुमती फल्गुतुका
गुरुहा मरुकुचचर्म्मरङ्गाख्याः॥"
इत्युक्तवान्॥)

चर्म्मरुः, पुं, (चर्म्म रचयतीति। रच+बाहुलकात् डुः।) चर्म्मकारः। इति त्रिकाण्डशेषः॥

चर्म्मजम्भवा, स्त्री, (चर्म्मणि सम्भव उत्पत्तिर्यस्याः।) रला। इति हारावली। ६७॥

चर्म्मसारः, पुं, (चर्म्मणः सारः। शुक्लद्रव्येभ्यो रसस्य लड्मध्ये जायमानत्वात् तथात्वम्।) रसः। इति राजनिर्घण्टः॥

चर्म्माम्भः, पुं, (चर्म्मणोऽम्भः जलम्। सर्व्वे साम्ता अदन्ताश्च।" इति न्यायादत्र अकारान्तः। क्वचित् क्लीवे सान्तोऽपि दृश्यते।) रसः। इति राजनिर्घण्टः॥

चर्म्मारः, पुं, (चर्म्म चर्म्मक्रियां ऋच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) चर्म्मकारः। इति जटाधरः॥

चर्म्मी, [न्] पुं, (चर्म्म शरीरावरकं शुक्लविशेषोऽस्यास्य। चर्म्म+इनिः।) चर्म्मधारियोद्धा। ढाली इति भाषा॥ तत्पर्य्यायः। फलकपाणिः २। (यथा, महाभारते। ३।२७।३१।
"श्यामं दृष्ट्वा तरुणं चर्म्मिणामुत्तमं रणे।
नशूलं ते वने दृष्ट्वा कस्मात् मन्युर्न वर्द्धते॥"
चर्म्म त्वक् अस्त्यस्येति।) भूर्जवृक्षः। इत्यमरः। २। ६। ४६॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अः। "चर्म्मिटङ्गगिरिकर्णिकाग्रीवानीलिवनिचुलदाड़िमाजकर्णहरिद्दचराजादनगोपनदीविकङ्कतेषु वा यवागूविकारांश्च सेवेत॥") भृङ्गरीटः। योगा। इति शब्दरत्नावली।

चर्य्या, स्त्री, (चर+"गदमदचरयमश्चानुपसर्गे।" ३।१।१००। इति यत्। स्त्रियां टाप्।) ईर्य्यापथस्थितिः। इत्यमरः। २।७।३६॥ नियमापरित्यागः। ईर्य्यते गुरोः शास्त्रोपासनया ज्ञायते ईर्य्या सा च ध्यानधारणादिः तस्याः पन्था उपायः तत्र व्रतिनां या स्थितिरवस्थानमपरित्यागः सा। इति भरतः॥ (यथा, महाभारते। १।२।३२६।
"चर्य्यायां हयसुतृष्टं पार्श्ववस्थानुगच्छतः॥") गमनम्। अदनम्। आचरणम्। इति मुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ६।३२।
"व्यासां महर्षिचर्य्यायां व्याख्यातमतया तनुम्॥" सेवा। यथा, हेः रामायणे। २।२६।१५।
"वनवासस्य शूरस्य मम चर्य्या हि रोचते॥" त्रि, अनुष्ठेयः। आचरणीयः। यथा, मनुः।३।१।
"षट्त्रिंशद्दाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्॥")

चर्व्व, किं भक्षे। इति कविकल्पद्रुमः॥ (चुरां-यद्धे भ्वां-परं-सकं-सेट्।) कि, चर्व्वयति चर्व्वति तद्भुक्तं बालकः। इति दुर्गादासः॥

चर्व्वणं, क्लीं, (चर्व्व+भावे ल्युट्।) दन्तैश्चूर्णनम्। इति हेमचन्द्रः। ३।८८॥ चिबान इति भाषा॥ (यथा, हारिते प्रथमे स्थाने प्रथमेऽध्याये।
"चर्व्वणं गिरिनद्यापि कासितं श्वासितं तथा॥")

चर्व्वा, [न्] पुं, तलप्रहारः। इति हारावली। १६७॥

चर्व्वितं, त्रि, (चर्व्वते स्म इति। चर्व्व+कर्म्मणि क्तः।) क्षतचर्व्वणम्। भक्षितम्। इत्यमरः। ३।२।११०॥ (यथा, भागवते। ७।५।३०।
"अदान्तगोभिर्विधृतां तमिस्रं पुनः पुनश्चर्व्वितचर्व्वणानाम्॥")

चर्व्वितपात्रकं, क्लीं, (चर्व्वितानां ताम्बूलादीनां त्यागपात्रम्। ततः स्वार्थे कन्।) चर्व्वितताम्बूलादित्यागपात्रम्। पीकदान इति भाषा॥ यथा, रासलीलायां पातालखण्डे।
"ताम्बूलं दर्पणं पानपात्रं चर्व्वितपात्रकम्॥"

चर्व्व्य, त्रि, (चर्व्वते दन्तैश्चूर्ण्यते इति। चर्व्व+कर्म्मणि ण्यत्।) चर्व्वणीयम्। यथा,—
"षट्कोटिं ब्राह्मणांश्चैव भोजयामास नित्यशः। भक्ष्यपेयैश्चोष्यचर्व्यैरतिलघ्निं दिने दिने॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

चर्षणिः, पुं, (कर्षतीति। कृष+"कृषेरादेश्च चः।" पां-उणा। २।१०३। इति अनिः आदेश्च चः।) जनः। यथा, श्रीभागवते।
"स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः॥"
मनुष्यजातिः। यथा,—
"अर्य्यन्नो मालका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता॥"
इति श्रीभागवते। ६।६।३१॥ "चर्षणयः क्षताक्षतज्ञानवन्तः। पश्यन्तिकर्म्मलेन निघण्टावुक्तेः। यत्र वेषु आत्मानुसन्धानविशेषेण मानुषी जातिश्चोपकल्पिता। तथा च श्रुतिः। पुरुषत्वे चाविस्तरामात्मेति।" इति तट्टीकायां श्रीधरस्वामी॥ (अत्र उणादिवृत्तिकृतोज्ज्वलदत्तेन तु "कृषेरादेश्च धः।" इति पठित्वा धर्षणिर्बन्धकीति व्याख्यातम्॥)

चल, क भृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, चालयति। दन्त्यवकारादिरयमिति दुर्गासिंहानुमरनन्दी। भृतिरिह पोषणम्। इति दुर्गादासः॥

चल, ञ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ञ, चालः चलः। मिश्रणे इति वक्ष्यमाणं न पठित्वा इममेव मानुबन्धं आन्ताः पठन्ति तन्नेयम्। तेनास्य चालयति हस्तिनं यन्ता। चलमानोऽनिल इत्यत्र ताच्छील्ये शतुः शानः। मिश्रणे। पूर्व्वेणान्वयः। चलधातुः कम्पने मानुबन्धः स्वादित्यर्थः। म, चलयति लतां वायुः। चलयन् भङ्गरुचस्तवालकानिति रघुः। चालयन् सकलां पृथ्वीमिति घञन्तात् चालं करोतीति णौ शतृन्तम्। इति दुर्गादासः॥

चल, भ्र विलासे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) भ्र, चलती चलन्ती। विलासः क्रीड़नम्। इति दुर्गादासः॥

चलं, त्रि, (चलति गच्छतीति। चल+पचाद्यच्।) चञ्चलम्। इत्यमरः। ३।१।७४॥ (यथा, रघुः। ११।१५।
"ताड़का चलकपालकुण्डला कालिकेव निविड़ा बलाकिनी॥"
पारदः। इति हेमचन्द्रः। ४।११६॥ अष्टादशाक्षरवृत्तभेदः। यथा, वृत्तरत्नाकरे।
"भौ नृजौ भौ चेच्चलमिदमुदितं युगेर्मुनिभिः स्वरैः॥")

चलः, पुं, (चल+पचाद्यच्।) कम्पः। तद्युक्तं त्रि। इति मेदिनी। ले, १५॥ (शिवः। यथा, महाभारते। १३।१७।११६।
"महाकेतुर्महाधातुर्नैकसानुचरश्चलः॥"
विष्णुः। यथा, तत्रैव। १३।१४६।६२।
"वीरहा विषमः शून्यो घृताशीरचलश्चलः॥"
"वायुरूपेण चलः।" इति भाष्यम्॥)

चलचक्षुः, पुं, (चला चञ्चला चक्षुरस्य।) चकोरपक्षी। इति हेमचन्द्रः। ४।४०५॥

चलत्पूर्णिमा, स्त्री, (चलन्ती पूर्णिमा तदाश्रयीभूतचन्द्र इवेति तात्पर्य्यार्थः।) चन्द्रकमत्स्यः। इति त्रिकाण्डशेषः॥

चलदङ्गः, पुं, (चलत् चञ्चलं अङ्गं यस्य।) मत्स्यविशेषः। चेङ्गा इति भाषा॥ अस्य गुणाः। अनभिष्यन्दित्वम्। वाते हितत्वम्। रोचनत्वञ्च। इति राजवल्लभः॥

चलदङ्गकः, पुं, (चलदङ्गं यस्य इति क्प्।) चलदङ्गमत्स्यः। इति जटाधरः॥

चलदलः, पुं, (चलानि दलानि पत्राणि यस्य।) अश्वत्थवृक्षः। इत्यमरः। २।४।२०॥ (अस्य वृक्षस्य गुणादयो ज्ञातव्याः॥)

चलनं, क्लीं, (चल+भावे ल्युट्।) भ्रमणम्। (यथा, देवीभागवते १।१७।१६।
"चलनञ्च विना कार्य्यं न भवेदिति मे मतिः॥") कम्पनम्। (यथा, पञ्चतन्त्रे। २।१७३।
"द्वादुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने। हस्तयोश्चलनादेको द्वितीयः पादवेगजः॥") कर्म्म, त्रि। इति मेदिनी। ने, ६१॥

चलनः, पुं, (चलत्यनेन इति। चल+करणे ल्युट्।) पादः। इति हेमचन्द्रः॥ हरिणः। इति जटाधरः॥

चलनकः, पुं, (चलन+संज्ञायां कन्।) चञ्चातकम्। इति हेमचन्द्रः। ३।३३८॥

चलनी, स्त्री, (चलन+ङीप्।) वारीभेदः। जगदम्बनी। वल्लघर्घरी। इति हेमचन्द्रः॥ चाघरा इति भाषा॥

चलपत्रः, पुं, (चलानि पत्राणि यस्य।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ (यथा, नैषधे।
"अङ्गेन केनापि विजेतुमस्या गवेष्यते किं चलपत्रपत्रम्। नचेद्विधेयादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन॥")

चला, स्त्री, (चलतीति चल+पचाद्यच् टाप च। नैकत्रावस्थितत्वात् तथात्वम्।) लक्ष्मीः। इति मेदिनी। ले, १५॥ सिध्मकः। इति रत्नमाला॥

चलाचलः, त्रि, (चलतीति चल+अच्। चरिचलिपतिवदीनां वा द्वित्वमितिद्वित्वे अभ्यासस्य आगमश्च इति वार्त्तिकसूत्रेणास्य सिद्धिः।) चञ्चलः। इत्यमरः। ३।१।७४॥ (यथा, किरातार्জ্জুनीये। ११।३०। [चलाम॥")
"अस्मिन्नोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचले पुं,। इति राजनिर्घण्टः॥

चलातङ्कः, पुं, (चले चलने आतङ्को भयं यस्मात्।) वातरोगः। इति राजनिर्घण्टः॥

चलितं, त्रि, (चल+कर्म्मणि क्तः।) कम्पितम्। इत्यमरः। ३।१।८७॥ (यथा, राजतरङ्गिण्याम्। ५।३६५।
"तयोर्विलासवलितैश्चलिताग्रविभ्रमैः॥") गतम्। चल ञ गताविति दर्शनात्॥ (यथा, गीः रामायणे। ३।५७।२३।
"अधिरूढे गवारोहे यथास्याश्चलितो गजः॥")

चलुः, पुं, (चल+उप्।) गण्डूषः। इति हेमचन्द्रः। ३।२६२॥

चलुकः, पुं, (चलुना कायतीति। कै+कः।) प्रहृतिः। भाण्डभेदः। इति मेदिनी। के, ८६॥

चविः, स्त्री, (चर्व्वते इति। चर्व्व+इन्। पृषोदरादित्वात् रलोपे साधुः।) चविका। इति शब्दरत्नावली॥

चविकं, क्लीं, (चवि+संज्ञायां कन्।) चविका। इति भरतधृतरुद्रः॥

चविका, स्त्री, (चवि+स्वार्थे कन्।) वृक्षविशेषः। चव इति भाषा। तत्पर्य्यायः। चव्यम् २। इत्यमरः। २।४।६४॥ यथा ३ चविकम् ४

चवी ५ । इति भरतः ॥ चविः ६ । इति शब्दरत्नावली ॥ तेजोवती ७ कोला ८ नाकुली ९ उषणा १० चषकम् ११ वह्निरः १२ गन्धनाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६ कुटिलसप्तकम् १७ तीक्ष्णम् १८ करिकरणावल्ली १९ कुकरः २० । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।

"सारिवाद्वयपथ्याङ्गचविकारत्वक्चन्दनैः ॥")

अस्या गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । रोचनत्वम् । दीपनत्वम् । जन्तूद्रेककासश्वासशूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदकत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥

चवी, स्त्री, (चवि + "वह्वादिभ्यश्च ।" ४ । १ । ४५ । इति ङीष् ।) चविका । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ६ । १५१ ।

"सर्व्ववर्म्मा चवीहस्तः प्रतिज्ञां तां सुदुष्कराम् । पश्यन् सानुशयः सर्व्वं स्वभार्य्यार्थे शशंस तत् ॥")

चष्यं, क्ली, (चष्यते इति । चष्य + ण्यत् । पृषोदरादित्वात् रलोपे साधुः ।) चविका । इत्यमरः । २ । ४ । ६८ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।

"चष्येन्द्रयवकं त्रिफला सर्पिर्म्मांसरसाम्बुभिः ॥")

चषकं, क्ली, (चषमेव । स्वार्थे कन् ।) चविका । इति राजनिर्घण्टः ॥

चषजा, स्त्री, (चषमिव जायते इति । जन + डः ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया ॥)

चषफलं, क्ली, (चषमिव फलं यस्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥

चषा, स्त्री, (चष + टाप् ।) चविका । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।

"सर्पिर्म्मेदुभ्यां चिकटु प्रलिह्याचषाविड्क्षोपहितं यथार्चिः ॥")

वदरी । इति मेदिनी ॥ कार्पासी । इति राजनिर्घण्टः ॥

चष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चषति । इति दुर्गादासः ॥

चष, च भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) च, चषति चषते । इति दुर्गादासः ॥

चषकः, पुं, क्ली, (चषति भक्षयति पिबत्यनेनेत्यर्थः । चष + "कुन् शिल्पिसंज्ञयोरपूर्ब्बस्यापि ।" उणां । २ । ३२ । इति कुन् ।) मद्यपानपात्रम् । तत्पर्य्यायः । गल्वर्कः २ सरकः ३ अनुतर्षणम् ४ । इति हेमचन्द्रः । ४ । १०२४ ॥ * ॥

अथ चषकोद्देशः ।

"यत् पानपात्रं भूपानां तच्छ्रेयं चषकं बुधैः ।
कानकं राजतञ्चैव स्फाटिकं काचमेव च ॥
दृतं खरादिकोणं चतुर्थां पृथिवीभुजाम् ।
इत्यन्यसम्मतं तेषां निर्णयः पाठसम्मतः ॥
खसुधिसम्मितं रत्नैश्चतुर्व्वर्णैः समन्वितम् ।
प्रार्थितं वाथ फालं वा सर्व्वेषामुपदृश्यते ॥
काष्ठजं धातुजं शृङ्गं चाङ्गजादि महीभुजाम् ।
यदन्यत्तोयपानादि पात्रं पृथ्वीभुजां भवेत् ॥"
एवं तत्रापि नियम इति भोजस्य निश्चयः । इति युक्तिकल्पतरुः ॥ * ॥ सुरापात्रम् । मधु । मद्यभेदः । इति मेदिनी । के, ८६ ॥

चषतिः, पुं, (चष भक्षे वधे वा + भावे अतिः ।) भक्षणम् । वधः । इति सिद्धान्तकौमुदीसुबादिवृत्तिः ॥

चषालः, पुं, (चष्यते वध्यते ऽस्मिन् । चष + "सानसिवर्णसीति ।" उणां । ४ । ७० । इति आल प्रत्ययेन निपातनात् साधुः ।) यूपकटकः । इत्यमरः । २ । ७ । १८ ॥ यज्ञसमाप्तिपश्वर्थं पशुबन्धनार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्दर्भरूपकाष्ठविशेषो यः काष्ठविकारः सः । यूपमूले विहितलोहवलयश्च । इति केचित् । इति भरतः ॥ मधुस्थानम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चह, ग्राव्णे । प्रतारण इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चहति । इति दुर्गादासः ॥

चह, तृ क ग्राव्णे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) चहयति खलः । इति दुर्गादासः ॥

चह, क म ग्राव्णे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क म, चहयति खलः साधुं प्रतारयतीत्यर्थः । इति दुर्गादासः ॥

चाकचक्यं, क्ली, उज्ज्वलता । चकचक् इति भाषा । यथा, न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथा हि । कामलादिदोषदूषितलोचनस्य पुरोवर्त्तिन्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति । इति वेदान्तपरिभाषा ॥

चाकचिक्या, स्त्री, शतवृङ्गा । इति रत्नमाला ॥

चाक्रिकः, पुं, (चक्रेण चक्रहेन यन्त्रविशेषेण वा चरतीति । चक्र + "चरति ।" ४ । ४ । ८ । इति ठक् ।) बहुभिर्मिलित्वा यः स्तौति सः । तत्पर्य्यायः । घाण्टिकार्थकः २ । इत्यमरः । २ । ८ । १७ ॥ (यथा, याज्ञवल्क्ये । १ । १६५ ।

"पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥")

तैलकारः । इति हेमचन्द्रः ॥ शाकटिकः । इति महाभारते राजधर्म्मः ॥ गाड़ीयान् इति भाषा ॥

चाक्षुषं, क्ली, (चक्षुषा निर्व्वृत्तम् । चक्षुष् + "तेन निर्व्वृत्तम् ।" ५ । १ । ७६ । इत्यण् ।) प्रत्यक्षविशेषः । तत्तु चक्षुरिन्द्रियजन्यज्ञानम् । द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः । इति सिद्धान्तमुक्तावली ॥ तथा च ।

"द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥"

इति भाषापरिच्छेदे ॥ ५६—६० ॥ (चक्षुषा ग्रह्यते इति । चक्षुष + अण् । चक्षुर्ग्राह्यरूपादि । चक्षुर्ग्राह्ये, त्रि ॥)

चाक्षुषः, पुं, (चक्षुषः ब्रह्मणो लोचनात् जातः । चक्षुष् + अण् । एतन्निरुक्तिर्यथा, मार्कण्डेये । ७६ । २ ।

"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ! ॥")

षष्ठमनुः । अस्मिन्मन्वन्तरे अजितनामको विष्णोरवतारः । मन्त्रद्रुम इन्द्रः । आप्यादयो देवाः । हर्य्यश्वशरीरकादयः सप्तर्षयः । पुरुषपुरुषसुद्युम्नादयो मनुपुत्राः । इति श्रीभागवतम् ॥ (अस्य अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम् ॥)

चाङ्गः, पुं, (चीयते इति । चि + डः । चमङ्गं यस्य ।) चाङ्गेरी । इत्यमरटीकायां रायमुकुटः ॥

चाङ्गेरी, स्त्री, (चाङ्गं ईरयतीति । ईर + अण् । ततो ङीष् ।) अम्लशोणिका । इत्यमरः । २ । ४ । १४० ॥ ("ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

चाचपुटः, पुं, तालभेदः । यथा,—

"गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥"

इति सङ्गीतदामोदरः ॥

चाञ्चल्यं, क्ली, चञ्चलस्य भावः । चञ्चल + ष्यञ् ।) चञ्चलता । चापल्यम् । यथा —

"चाञ्चल्यरहिता लक्ष्मीः पुत्रपौत्रावधिस्थिरा ॥"

इति जगन्मङ्गलाख्यकवचम् ॥

चाटः, पुं, (चट्यते भिद्यते यस्मात् । चट + घञ् । यद्वा चटति भिनत्ति भित्त्यादिकम् । चट + णः ।) चौरः । इति मिताक्षरा ॥ प्रतारकः । यथा,—

"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति । प्रच्छन्नापहारिणस्तस्कराः । दुर्व्वृत्ता इन्द्रजालिकक्षितवादयः । सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहस्रं महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः । आदिशब्दान्मौलिककुहकवृत्तयः । एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत् । कायस्था गणका लेखकाश्च तैः पीड्यमाना विशेषतो रक्षेत् । तेषां राजवल्लभतया अतिमायावितया च दुर्निवारत्वात् ।" इति मिताक्षरायां आचाराध्यायः ॥

चाटकैरः, पुं, (चटकस्य चटकाया वा पुमपत्यमिति । "चटकाया ऐरक् ।" ४ । १ । १२८ । इत्यैरक्प्रत्ययः । "चटकस्येति वाच्यम् । लिङ्गविशिष्टपरिभाषया स्त्रिया अपि" इति वार्त्तिकम् ।) चटकस्य अपत्यम् । इत्यमरः ॥ चटारा इति भाषा ॥

चाटुः, पुं, क्ली, (चटतिं भिनत्ति मनस्तोषामोदवाक्येनेति। चट+"इसनीति।" उणां १।३। इति णुच्।) प्रियवाक्यम्। तत्पर्य्यायः। चटुः २ प्रियप्रायम् ३। इति हेमचन्द्रः॥ स्फुटवादी। इति संक्षिप्तसारे उणादिवृत्तिः॥ मिथ्याप्रियवाक्यम्। इति महाभारतम्॥ स्तोत्रामदिया कथा इति भाषा॥ (यथा, गीतगोविन्दे। २।१२।

"प्रथमसमागमलज्जितया
पटुचाटुशतैरनुकूलम्॥"

चाटूक्त्यादौ त्रि। यथा, राजतरङ्गिण्याम्। १।२१३।

"उपनिन्ये च संयत्ता पुटकैश्चाटुसीतृक्षतैः॥")

चाटुपटुः, पुं, (चाटुषु पटुः निपुणः।) भण्डः। इति हारावली॥ भाँड़ इति भाषा॥

("पाण्डवानां पण्डितोऽसौ यास्याचाटुपटुः कविः॥ इति नैषधम्॥")

चाटुलोलः, त्रि, (चाटुरेव लोल इति कर्म्मधारयः। चाटुषु लोल इत्येके।) चटुलोलः। इति हारावली॥

चाटुवटुः, पुं, (चाटुपटु+एषोदरात् साधुः।) चाटुपटुः। इति भूरिप्रयोगः॥

चाटूक्तिः, स्त्री, (चाटुरूपा उक्तिः। चाटूनामुक्तिर्वा।) सेवा। इति हारावली॥ प्रियकथा च॥

चाण्डकीनं, त्रि (चण्डकानां भवनं क्षेत्रंवा। "धान्यानां भवने क्षेत्रे खञ्।" ५।२।१। इति खञ्।) चण्डकीतृप्तियोग्यक्षेत्रम्। इत्यमरटीकायां रायमुकुटः॥

चाणक्यः, पुं, (चणकस्य गोत्रापत्यम्। "गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। तत्पर्य्यायः। द्रौमिणः २ कश्यपः ३। इति त्रिकाण्डशेषः॥ (अयमेव द्विजस्त्रभिचारक्रियायोगेन योगनन्दराजं मारयन् नन्दौरसात् मौरकारपत्नीगर्भे जातं स्वशिष्यं चन्द्रगुप्तं राज्येऽभिषेचयंश्च तस्यामात्यपदवीमप्यङ्गीचकार। एतद्विवरणं मुद्राराक्षसविष्णुपुराणभागवतादिषु विशेषतो दर्शनीयम्। इतश्च क्वचिन्मतभेदोऽपि दृश्यते यथाच, कथासरित्सागरे। ५।१२१—२३।

"स चाणक्यो द्विजः क्वापि गत्वा कृत्यामसाधयत्।
तदवग्राह्ययोगेनन्दोऽथ दाहज्वरमवाप्य सः॥
सप्तमे दिवसे प्राप्ते पञ्चत्वं समुपागमत्।
हत्वा हिरण्यगुप्तञ्च मूकटाक्षेन तत्सुतम्।
पूर्व्वनन्दसुते लक्ष्मीश्चन्द्रगुप्ते निवेशिता॥"

चाणक्येन प्रोक्तमित्यण्।) ग्रन्थविशेषे, क्ली। यथा, तत्रैव।

"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
मन्त्रबीजमिदं ग्राह्यं चाणक्यं सारसंग्रहम्॥"

चाणक्यमूलकं, क्ली, (चणकमेव चाणक्यं तद्वन्मूलमस्य। इति कप् स्वार्थे कन् वा।) मूलकप्रभेदः। चणकमूलीति ख्यातम्। तत्पर्य्यायः। वालेयम् २ विष्णुगुप्तकम् ३ स्थूलमूलम् ४ महाकन्दम् ५ कौटिल्यम् ६ मरुसम्भवम् ७ शालाकटुकम् ८ मिश्रम् ९। अस्य गुणाः। उष्णत्वम्। कटुत्वम्। रुचिकारित्वम्। दीपनत्वम्। कफवातक्रिमिगुल्मनाशकत्वम्। ग्राहकत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

चाणूरः, पुं, (कंसराजस्य मल्लविशेषः। यथा,—

"ततः क्रोधातिताम्राक्षः कंसः परमकोपनः।
चाणूरमादिशद्युद्धे कृष्णस्य सुमहाबलम्॥"

इति महाभारते हरिवंशम्॥

(तथाच, भागवते। १०।४४।

"भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह॥")

चाणूरसूदनः, पुं, (चाणूरं सूदयतीति। सूदिँ क्षरणे। ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (एतत्सम्बन्धस्य नाम्नस्तात्पर्य्यं हरिवंशे ८६ अध्याये द्रष्टव्यम्॥)

चाण्डालः, पुं, (चण्डति कुप्यति सततमिति। "मतिबुद्धिभ्यामालच्।" उणां १।११७। इति आलच्। यद्वा, चण्डाल+"कुलादिभ्योऽण्" यद्वा चण्डाल एवेति प्रज्ञादिभ्योऽण्।) चण्डालः। इत्यमरः। २।१०।१६॥ (यथा, मनुः। ४।७६।

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः॥"

कर्म्मदोषतो ब्राह्मणानामपि पारिभाषिकचाण्डालत्वम्। यथा, महाभारते। १२।७५।

"आक्रोशका देवलका नक्षत्रग्रामयाजकाः।
एते ब्राह्मणचाण्डाला महापथिकपक्षमाः॥")

चाण्डालिका, स्त्री, (चाण्डाली वादकत्वेनास्त्यस्याः। इति ठन्। चण्डालेन निर्वृत्ता इति ठक् वा।) चण्डालवीणा। इत्यमरः। २।१०।३२। चण्डालिकाग्न्यर्थोऽप्यत्र॥ (चण्डालेन कृतेति कुलालादिभ्योऽण्। चण्डालाकृतवस्तुमात्रे, त्रि॥)

चाण्डाली, स्त्री, (चाण्डाल+जातित्वात् ङीष्।) लिङ्गिनी। इति राजनिर्घण्टः॥ चाण्डालपत्नी च॥

चातकः, पुं, (चतते याचते जलमम्बुदमिति। चत याचने+ण्वुल्।) खनामख्यातपक्षी। तत्पर्य्यायः। स्तोककः २ सारङ्गः ३ मेघजीवनः ४। इति राजनिर्घण्टः॥ तोककः ५। इत्यमरः। २।५।१७॥ शारङ्गः ६। इति भरतः॥ (यथा, मेघदूते। ६।

"वामश्चायं नदति मधुरं चातकस्ते सगर्व्वः॥")

तन्मांसगुणाः। लघुत्वम्। शीतत्वम्। कफरक्तपित्तनाशित्वम्। अग्निकारित्वञ्च। इति राजवल्लभः॥

चातकानन्दनः, पुं, (चातकं आनन्दयतीति। आ+नन्द+णिच्+ल्युः।) वर्षाकालः। इति राजनिर्घण्टः॥

चातुरः, पुं, (चतुर्भिरङ्गैः हस्तपदद्दष्टिशिरोभिरित्यर्थैः गम्यते इति। चतुर+अण्। यद्वा चतुर एव। स्वार्थे अण्।) चक्रगडुः। इति मेदिनी॥ गोलवालिया इति भाषा॥

चातुरः, त्रि, (चतुर+स्वार्थे अण्।) नेत्रगोचरः। चाटुकारः। नियन्ता। इति मेदिनी। रे, १५३॥

चातुरकः, त्रि, (चातुर+स्वार्थे कन्।) चातुरः। इति हेमचन्द्रः॥

चातुराश्रम्यं, क्ली, (चतुर्णां आश्रमाणां कर्म्म इति। "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थभिक्षुरूपाश्रमचतुष्टयानां धर्म्मः। इति पुराणम्॥ (यथा, महाभारते। १२।४६।२२।

"चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च।
राजधर्म्मांश्च निखिलान् पृच्छेनं पृथिवीपते॥"

चत्वार आश्रमा एवेति स्वार्थे ष्यञ्। चतुराश्रममात्रम्॥)

चातुरिकः, पुं, (चातुरीं रथपरिचालनकौशलं वेत्तीति ठक्।) सारथिः। इति जटाधरः॥

चातुरी, स्त्री, (चतुरस्येयं "तस्येदम्।" ४।३।१२०। इत्यण्। ततो ङीप्। यद्वा चतुरस्य भावः इति ष्यञ् ञित्वात् ङीष् ततो यलोपः।) दाक्ष्यम्। चतुरता। इति मेदिनी॥ [चातुरी॥"

"या लोकद्वयसाधनी तनुभृतां सा चातुरी
इत्युक्तः॥)

(गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२।६।४७।

"चतुर्भुजा चारुदन्ता चातुरी च ऋतप्रदा॥")

चातुर्जातकं, क्ली, (चतुर्जातक एव इति स्वार्थे अण्।) गुडत्वगेलापत्रनागकेशररूपचतुष्टयम्। इति राजनिर्घण्टः॥ (अस्य लक्षणं गुणाश्च।

"त्वगेलापत्रकेसुल्लेखिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥
तद्वयं रेचनं रूक्षं तीक्ष्णोष्णसुखगन्धकृत्।
लघुपित्तास्रिदृग्वर्ण्यं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चातुर्थकः, पुं, (चतुर्थे चतुर्थेऽह्नि भव इति। चतुर्थ+वुञ्।) प्रतिचतुर्थदिनभवज्वरः। तस्य मन्त्रौषधं यथा, ओं जम्भनि स्तम्भनि विमोहय सर्व्वव्याधीन्मे वर्व्वेय फट्। इति। पुष्यभक्षितं जम्भा हस्ते दत्त्वाथ न स्पृशेत्। चातुर्थको ज्वरो रुद्र! अन्ये चैव ज्वरास्तथा॥ जम्बुफलं हरिद्रा च सर्षपस्यैव च कणुकम्। सर्व्वज्वराणां धूपोऽयं हर! चातुर्थकस्य च॥"

इति गारुडे १८७ अध्यायः॥

(अस्य लक्षणचिकित्सादीनि यथा,—

"चातुर्थो द्विविधो ज्ञेयो वातश्लेष्मात्मको ज्वरः।
चातुर्थको नाम गदो दारुणो विषमज्वरः॥
प्रोषणः सर्व्वधातूनां बलवर्णाग्निनाशनः।
त्रिदोषजो विकारः स्यादस्थिमज्जगतोऽनिलः॥
कुपितं पित्तमेवन्तु कफञ्चैवं स्वकालतः।
शीतदाहकरस्तीव्रस्त्रिकालञ्चानुवर्त्तते॥
स सन्निपातसम्भूतो विषमो विषमज्वरः।
ऊर्द्धं कायस्य यद्याति यः पूर्व्वं सोऽनिलात्मकः।
पूर्व्वं यद्यात्यधः कायं श्लेष्मपूर्व्वज्वरश्च सः।
जङ्घाभ्यां श्लेष्मिको ज्ञेयः शिरसोऽनिलसम्भवः।
एवं विज्ञाय भद्वैद्यः कुर्य्यात्तत्र प्रतिक्रियाम्।
वेलाज्वरो रसगतो रक्तञ्चैकाह्निकस्तथा॥

मांसगोऽपि तृतीयः स्याच्चतुर्थोऽस्थिसमाश्रितः ।
सर्व्वधातुगतो ज्ञेयो जीर्णो धातुक्षयङ्करः ॥
भूतजे भूतविद्या स्याद्धाति समताड़नम् ।
वासाधात्रीदारुपथ्या नागरत्रिफला भवः ॥
मधुना संयुतः काथश्चातुर्थकनिवारणः ॥
अगस्तिपत्रस्वरसो निहन्ति
नस्ये च चातुर्थकरोगसङ्घम् ।
कासं भ्रमञ्चापि शिरोरुजाञ्च
विनाशयत्याशु हि तन्नराणाम् ॥"
इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्रं, क्ली, (चतुर्भद्रमेवेति अण् ।) नागरातिविषामुस्ता गुड़ूचीति चतुष्टयम् । इति राजनिर्घण्टः ॥

चातुर्म्मास्यं, क्ली, (चतुर्षु मासेषु क्रियते इति । "चतुर्म्मासाड्ड्यो यज्ञे ।" ५ । १ । ६४ । इत्यस्य सूत्रस्य वार्त्तिकोक्तेः ड्यः । यागविशेषः । चातुर्म्मास्यवागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति शब्दार्थचिन्तामणिः ॥) आषाढ़शुक्लद्वादश्यादिचतुर्म्मासकर्त्तव्यनियमविशेषः । "अत्र वाराहे ।
'आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्कोऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तत्कीर्य्यं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥'
मात्स्ये ।
'चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् घ्राणनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा सुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निरधिर्णीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ।
नमो नारायणायेति जप्त्वानन्तफलं भवेत् ॥
पादाभिवन्दनाद्विष्णोर्लभेन्नोदानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥'
सनत्कुमारः ।
'इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं त्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥'
समाप्तौ च ।
'इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥'
अत्रैव प्रतिमधिकृत्य काठकगृह्यम् ।
'एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥'
एतद्गृह्यविषयम् । 'ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी' इति गृह्योक्तेः ।"इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तत्रोपक्रमकालः सनत्कुमारेणोक्तः ।
"एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं व्रतम् ॥"
तत्र मन्त्रः ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥"
अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।
"यो विना नियमं मर्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥"
अथ चातुर्म्मास्यनियमाः । स्कान्दे नागरखण्डे ।
"श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥"
तत्रैव श्रीब्रह्मनारदसंवादे ।
"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् सुनिगृह्णादूर्द्धं ! यावदाभूतसंप्लवं ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ॥
सप्तजन्मार्ज्जितं पुण्यं हरते नात्र संशयः ॥"
किञ्च ।
"रूक्षं तत्तत्काललभ्यं फलमूलादि वर्ज्जयेत् ।
जपहोमादयस्तस्य नामसङ्कीर्त्तनन्तथा ।
स्त्रीकृत्य प्रार्थयेद्देवं गृहीतनियमो बुधः ॥
इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥"*॥
अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।
"शृणु नारद ! कार्त्तस्नेन चातुर्म्मास्यव्रतक्रियाः ।
या निर्व्वर्त्त्य नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनस्यपि चिकीर्षतः ।
नरस्य क्षयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नरः शान्तो नित्यस्नायी दृढ़व्रतः ।
योऽर्च्चयेच्चतुरो मासान् हरिं स्यात्तस्य लोकभाक् ॥
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु केशवसुद्दिश्य चान्द्रायणपरायणः ।
चातुर्म्मास्यं नयेद्भक्त्या स विष्णुतनुमाविशेत् ॥"
भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्ब्बकम् ।
तेषां फलानि वक्ष्यामि ततः कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरसम्पन्नो भवेल्लवणवर्ज्जनात् ।
लभते सन्ततिं दीर्घां तैलस्य परिवर्ज्जनात् ॥
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्गः प्रजायते ।
पक्वतैलपरित्यागाच्चक्षुर्नाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कटूम्लतिक्तमधुरक्षारकाषायजान् रसान् ॥
यो वर्ज्जयेत् स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी अपक्वादोऽमलो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तचरणो यज्ञो द्रव्यपतिर्भवेत् ॥
दधिदुग्धतक्रनियमात् गोलोकं लभते नरः ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्ततिं दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा सुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोमानां गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ।
भूमौ शुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नरः ।
विष्णोर्दैवकुले कुर्य्यादुपलेपनमार्জ্জने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणत्रयं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रेक्षणिकं दिव्यं स्थानमप्सरसां लभेत् ॥
तीर्थाम्भसि कृतस्नानो निर्म्मलं देहमाप्नुयात् ।
पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत् ।
नक्तभोजी समग्रन्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपप्रपाफलम् ।
षष्ठकालेऽन्नभोजी यः स्थायी स्वर्गे नरो भवेत् ॥
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ।
भाजनं वर्ज्जयेद्यस्तु स स्थानं पौष्करं लभेत् ॥
पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् स्नानं प्रयागजम् ॥
यामद्वयजलत्यागान्न रोगैः परिभूयते ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति तोषितः ॥"
किञ्च ।
"योगनिद्रां समालम्ब्य शेषाहिशयने स्थितम् ।
क्षीरोदतोयवीच्यर्द्धौतपादः समाश्रितः ॥
लक्ष्मीकरासुजैः स्पृष्टैर्मृद्यमानपदद्वयः ।
तस्मिन् काले च मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डवश्रेष्ठ ! मानवः ।
कल्पस्थायी विष्णुलोके भवेन्नास्त्यत्र संशयः ॥

सत्यां व्रतसमाप्तौ च श्रीकृष्णस्य प्रसादतः ।
यदृच्छालाभादिकृत्यञ्च लेखं तत्तच्च कार्त्तिके ॥
स्तुत्वाथ कृष्णमभ्यर्च्च्य प्रसाद्य च पुनः पुनः ।
प्रेषं गृह्णीतदीर्थे च स्वीकुर्य्याद्देवतैः सह ॥
गीतनृत्यादिना देवं परितोष्याथ वैष्णवान् ।
संपूज्य नरयानेन देवं स्वालयमानयेत् ॥
प्रभोर्नीराजनं कृत्वा विसर्ज्जं वत वैष्णवान् ।
निवेश्य स्वासने देवं गृह्णीत भुवि तं स्मरन् ॥
एवञ्च कुर्व्वतो मासाश्चत्वारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद्दुःखमनादृष्टिश्च जायते ॥
तथा च भविष्ये ।
मिथुनस्थे सहस्रांशौ न स्नापयति यो हरिम् ।
वैष्णवैः सह सम्भूय क्षुनादृष्टिस्तदा भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो देवस्नपनं पार्थ ! अनुमोद्य समाचरेत् ।
उत्थानं वापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्व्वर्ण्य, क्ली, (चत्वारो वर्णाः । "चतुर्व्वर्णादीनां स्वार्थे उपसंख्यानम् ।" इति ष्यञ् ।) ब्राह्मण-क्षत्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४७२॥ (यथा, मनुः । १२ । १ ।
"चातुर्व्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्म्मस्वयानघ ! ॥") चतुर्व्वर्णधर्म्मश्च ॥

चातुर्व्वेद्यः, पुं, (चतुरो वेदानधीते इति चतुर्व्वेदः । स एव । "चतुर्व्वेदस्योभयपदवृद्धिश्च ।" इति ष्यञ् ।) चातुर्विद्यः । चतुर्व्वेदवेत्ता । इति व्याकरणम् ॥

चात्वाल, क्ली पुं, (चतते याचते इति । चत+ "स्थाचतिन्दशेरालच्वालजालीयचः ।" उणा १ । ११५ । इति वालच् ।) गर्त्तः । अग्निहोत्रोपकरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, तैत्तिरीयसंहितायाम् । ६ । १ । ३ । ८ ।
"योनिर्वै यज्ञस्य चात्वालम् ॥")

चान्द्र, क्ली, (चन्द्रस्य इदम् । चन्द्र+अण् । यद्वा, चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रायणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्रः, पुं, (चन्द्रस्यायम् । "तस्येदम् ।" ४।३।१२०। इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४।१३३ ॥ चान्द्रमासः । इति शब्दरत्नावली ॥

चान्द्रकं, क्ली, (चान्द्रं आर्द्रकमिव कायतीति । कै+कः ।) शुण्ठी । इति राजनिर्घण्टः ॥

चान्द्राख्यं, क्ली, (चान्द्रमित्याख्या संज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चान्द्रश्चन्द्रसम्बन्धी भागो यस्याम्) चन्द्रभागानदी । इति द्विरूपकोषः ॥

चान्द्रमसं, क्ली, (चन्द्रमाश्चन्द्रोऽधिष्ठाटदेवता यस्य । चन्द्रमस्+अण् ।) मृगशिरोनक्षत्रम् । इति हेमचन्द्रः । २ । २३ ॥ (चन्द्रमसश्चन्द्रस्य इदम् । चन्द्रमस्+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) चन्द्रमस्सम्बन्धिनि त्रि ॥ (यथा, महाभारते । १२ । २५० । २० ।
"सर्व्वतः सुखमन्वेति वपुश्चान्द्रमसं यथा ॥")

चान्द्रमसायनः, पुं, (चन्द्रमसोऽपत्यं पुमान् । चन्द्रमस्+फक् ।) बुधग्रहः । इति हलायुधः ॥ ("तिकादिभ्यः फिञ् ।" ४ । १ । १५५ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमासः, पुं, (चान्द्रश्चन्द्रसम्बन्धी मासः ।) चन्द्रसम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । सामान्यचिंग्नक्तिथ्यात्मकमासश्च ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धाद्यश्राद्धादिसपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म्मनित्यस्नानं गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्म्म । गौणचान्द्रे अष्टकादिपार्व्वणश्राद्धं वारुणीस्नानं जन्मतिथिकृत्यं जन्माख्यादुपवासः दुर्गोत्सवादितिथिनियतपूजा । सामान्यचिंग्नक्तिथ्यात्मकमासेन मासिकादिमासगणना । इति स्मृतिः ॥

चान्द्रायणं, क्ली, (चान्द्रस्य चन्द्रलोकस्य अयनं प्राप्तिर्यस्मात् । "धर्म्मार्थं यश्चरेद्देतच्चन्द्रस्येति सलोकताम् ।" इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रः अमृतानन्दमयपुरुषः अयनं आश्रयोऽधिष्ठाटदेवो यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेषः । तत्पर्य्यायः । इन्दुव्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्व्विधं पिपीलिकामध्याख्यम् १ यवमध्याख्यम् २ यतिचान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥"
"एतदेव पिपीलिकामध्याख्यम् ।" इति कुल्लूकभट्टः ॥
"एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥
तद्विधानं यथा, गारुड़े १०५ अध्याये ।
"तिथिपिण्डांश्चरेद्भुक्त्वा शुक्ले शिखण्डसंमितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपयुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवणं स्नानं पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥
अनादिष्टेषु सर्व्वेषु मुक्त्वाचान्द्रायणेन च ।
धर्म्मार्थी यश्चरेद्देतत् चन्द्रस्येति सलोकताम् ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमश्नुते ॥"
अपि च ।
"एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
उपस्पृश्य त्रिषवणं विपरीतोषमर्द्दनम् ॥"
इति तत्रैव २२६ अध्यायः ॥

चान्द्री, स्त्री, श्वेतकण्टकारी । (चन्द्रस्य इयम् । चन्द्र+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥ (चन्द्रसम्बन्धिनि त्रि । यथा, माघे । २ । २ ।
"गुरुकाव्यागुणां विभ्रच्चान्द्रीमभिनभः श्रियम् ॥")

चापं, क्ली पुं, (चपस्य वंशविशेषस्य विकारः । "अवयवे च प्राण्योषधिवृक्षेभ्यः ।" ४।३।१३५। इत्यण् ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, रघुः । १२ । ४७ ।
"क्रमशस्ते पुनस्तस्य चापात् समभिवोट्टयुः ॥"
वृत्तचेचार्द्धः । यथा, सिद्धान्तशिरोमणौ ।
"दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तूर्य्यगोलम् ॥"
नवमराशिः । यथा, बृहत्संहितायाम् ।४२।१०।
"चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि ॥")

चापपटः, पुं, (चापो धनुरादृवत् वक्रीभूताकृतिः पटः पत्रं यस्य ।) पियालवृक्षः । इति जटाधरः ॥

चापलं, क्ली, (चपलस्य भावः कर्म्म वा युवादित्वादण् ।) अनवस्थितिः । इति हेमचन्द्रः । २ । २२६ ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ।
"मात्सर्य्यदैन्यरागादेश्चापलन्त्वनवस्थितिः ॥"
(यथा, रघुः । १ । ६ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥")

चापल्यं, क्ली, (चपलस्य भावः कर्म्म वा । ब्राह्मणादित्वात् ष्यञ् ।) चपलता । चाञ्चल्यम् । यथा,
"परदारं परद्रव्यं परीवादं परस्य च ।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्ज्जयेत् ॥"
इति चाणक्ये । ३० ॥

चामरं, क्ली पुं, (चमरी मृगविशेषस्तस्या इदम् । चमरी+अण् ।) चमरीपुच्छलोमनिर्म्मितव्यजनम् । चौरी । इति भाषा ॥ तत्पर्य्यायः । प्रकीर्णकम् २ । इत्यमरः । २ । ८ । ३१ ॥ चमरम् ३ चामरा ४ चामरी ५ । इति भरतः ॥ वालव्यजनम् ६ रोमगुच्छकम् ७ । इति रभसः ॥ (यथा, पञ्चतन्त्रे । ३ । २६६ ।
"गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः ।
चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां नृपश्रियम् ॥")
अस्य वायुगुणः । ओजःकारित्वम् । मक्षिकादिश्रमोपहनत्वञ्च । इति राजवल्लभः ॥ * ॥
अथ चामरोद्देशः ।
"हस्तद्वयोन्नतः शुक्लः सुवर्णबलिभूषितः ।
हरेर्बालकृतो राज्ञां भयमानसुखप्रदः ॥
बलेश्चामरदैर्घाद्वा आयामत्वं प्रकाशितम् ।
भयो भद्रो जयः शीलः सुखः सिद्धिबलः स्थिरः ॥
वितस्त्येकैकसंवृद्ध्या दिनेशादिदिशां सुवाम् ।
सौवर्णं राजतं युग्मं चैदेशानां महीभुजाम् ॥
योजयेदिति निश्चित्य बलिकल्पनकर्म्मणि ।
स्थलजं जाङ्गलो राजा अनूपो जलजं वहेत् ॥
हीरञ्च पद्मरागञ्च वैदूर्य्यं नील एव च ।
मणिर्बलिषु योक्तव्यो ब्रह्मादीनां यथाक्रमम् ॥*॥

शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकैश्वर्य्य न सामान्यस्य भूपतेः ॥
न भवमानतो नूनं चामरं गुणमावहेत् ॥"

अथ चामरपरीक्षा ।

स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु याच्यमर्य्यो भवन्ति हि ॥
तासां वालस्य जायेत चामरेत्यभिधा भुवि ॥
आपीताः कनकाद्रिजा हिमगिरेः शुभ्रायता विन्ध्यजाः ।
कैलासादसिताः सिता मलयजाः शुक्लासया पिङ्गलाः ।
आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विषः ।
कृष्णाः केचन गन्धमादनभवाः पाण्डुत्विष-चामराः ॥
अन्येषु प्रायशः कृष्णाश्चामराः सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधाः ॥
चमर्य्यः पर्व्वतोद्भूता यथापूर्व्वं गुणावहाः ।
दीर्घवालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः ।
विरलास्तनुपर्व्वाणश्चमर्य्यो ब्रह्मजातयः ।
विना संस्कारमप्यासां चामरं विमलं भवेत् ॥
दीर्घवालाः सुगुरवः कर्करांशा भृशं घनाः ।
विज्ञेयाः शूलपर्व्वाणश्चमर्य्यो वैश्यजातयः ॥
संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् ।
खर्व्ववालाः सुलघवः कोमलाङ्गा भृशं घनाः ॥
चमर्य्यस्तनुपर्व्वाणो विज्ञेयाः शूद्रजातयः ।
संस्कारेणापि मलिनमासां चामरमिष्यते ॥*॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्याद्वनकीर्त्तिश्च घने स्युः स्थिरसम्पदः ॥
खर्व्वे खर्व्वायुरुद्दिष्टं गुरुर्गुरुभयप्रदः ।
वैवर्ण्ये रोगशोकौ च मलिनं दूरतो नयेत् ॥"

इति स्थलजम् ॥ * ॥

अथ जलजम् ।

"लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु ।
यथोत्तरं गुणवद्भाश्चमर्य्यः सप्त सप्तसु ॥
पुच्छानि तासां कृत्तानि जन्तुभिर्म्मकरादिभिः ।
कदाचिदुपलभ्येत तत्तीरे पुण्यशालिभिः ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
वह्नौ स्निग्धञ्च वालञ्चेत् किञ्चिच्चटचटायते ॥
इक्षुसिन्धूद्भवं ताम्रं चामरं विमलं लघु ।
मक्षिका मशकाश्चैव तस्मिन् व्यजति चामरे ॥
सुराब्धिजातं कलुषं कर्व्वरं गुरुकर्कशम् ।
तन्नर्त्तनेनैव माद्यन्ति अपि दृष्ट्वा मतङ्गजाः ॥
सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घन लघु ।
वायुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना ॥
जलसिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत् ।
अस्य वातेन नश्येत्तु तृष्णा मूर्च्छा मदो भ्रमः ॥
नारिष्टं नेतयस्तस्य यस्येदं चामरं गृहे ।
क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामरराजस्य विज्ञेयो गुणविस्तरः ।
नास्मिन तपसा लभ्यो देवानामपि जायते ॥
द्वियतेऽभ्यन्तरे सिन्धोर्नागैः सम्पत्तिलोलुपैः ।
एषां पूर्व्ववदुन्नेयं जातिदोषगुणादिकम् ॥ * ॥
स्थलजे जलजे चैव भाव्यमेतद्विशेषणम् ।
स्थलजं सुखदृश्यं हि दाहे मिषमिषायते ॥
जलजं वह्निदुर्दृश्यं महान्तं धूमसुद्गिरेत् ।
चामराणां समुद्दिष्टमित्येवं लक्षणद्वयम् ॥
एवं विज्ञाय यो धत्ते स राजा सुखमश्नुते ॥*॥
जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नालं वर्णद्वये तेषां विधेयं म्लिष्मिना क्रमात् ।
संस्कारो वालुकायन्त्रे मस्करसलिलादिभिः ।
तदुष्णसलिलक्वाथात् क्षत्रियत्वं विपद्यते ॥"

इत्युपकरणयुक्तौ चामरोद्देशः । इति भोजराजकृतयुक्तिकल्पतरुः ॥

चामरपुष्पः, पुं, (चामरवत् पुष्पमस्य ।) शुवाकः । काशः । आम्रः । केतकः । इति मेदिनी ।पे ३१॥

चामरपुष्पकः, पुं, (चामरपुष्प+स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काशः । इति जटाधरः ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर+अजादित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, स्त्री, (चामर+संज्ञायां ङीष् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, [न्] पुं स्त्री, (चामर इव केशरोऽस्यस्य । इति इनिः ।) घोटकः । इति त्रिकाण्डशेषः ॥

चामीकरं, क्ली, (चमीकरः रत्नाकरविशेषः तत्र भवमित्यण् ।) स्वर्णम् । (यथा, शिवपुराणे वायुसंहितायाम् । २ । १३ ।
"दृष्ट्वा मुनयो देवा देवर्षिगणसेवितम् ।
सुहृच्चामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥")
धुस्तूरः । इत्यमरः । २ । ६ । ६५ ॥

चामुण्डा, स्त्री, (महासंग्रामे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया हत्वा निहतौ अतः परितुष्टया भगवत्या कौशिक्या अस्याश्चामुण्डेति संज्ञा रचिता । एतत् सर्व्वन्तु वक्ष्यमाणासु प्रवृत्तिषु दर्शनीयम् ।) दुर्गा । इति जटाधरः ॥ मातृकाभेदः । इति शब्दरत्नावली ॥ तत्पर्य्यायः । चर्च्चिका २ चर्म्ममुण्डा ३ मार्ज्जारकर्णिका ४ कर्णमोटी ५ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्रः ॥ अस्या ध्यानं यथा,—
"काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥"

अस्याश्चामुण्डेति नामकारणं यथा,—
"यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि । भविष्यसि ॥"

इति चण्डी ॥

अस्यास्तन्त्रादिकं यथा,—
"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समाग्निसहितो दन्त्यः प्रान्तस्तस्मात् पुरःसरः ।
षष्ठस्वराग्निविन्दुसहितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सकाग्रमनाः शृणु ॥
नीलोत्पलदलश्यामा चतुर्बाहुसमन्विता ।
खड्गाङ्कं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्धाधोभावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणाननः ।
एषा ताराख्या देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विघाटका ॥
करालाऽमूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी जाड्यहानिकरी सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते ॥"

इति कालिकापुराणे ६० अध्यायः ॥

चाम्पिला, स्त्री, (चपि+भावे घञ्। ततष्टाप्। चम्पेवेति चाम्पा । ततोऽस्त्यर्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेषः ॥

चाम्पेयः, पुं, (चम्पायां नद्यां भव इति ढक् ।) चम्पकः । इत्यमरः । २ । ४ । ६३ ॥ (यथास्य पर्य्यायाः ।
"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नागकेशरः । (यथा,—
"नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
राजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
"चाम्पेयो नासटोवश्चधरो वल्लापुराधिपः ॥"
विश्वामित्रपुत्राणामन्यतमः । यथा, महाभारते । १३ । ४ । ५७ ।
"आरण्यिर्नाचिकश्चैव चाम्पेयोऽथ जयस्तथा ॥"
क्ली, सुवर्णे । यथा काशीखण्डे । २४ । ३६ ।
"मणिमाणिक्य-चाम्पेयदुकूलेभाश्वगोधनम् ॥")

चाम्पेयकं, क्ली, (चाम्पेय इव कायतीति । के+कः । स्वार्थे कन् वा ।) किञ्जल्कः । इति राजनिर्घण्टः ॥

चाय्यं, क्ली, (चय्यते भक्ष्यते इति । चम+कर्म्मणि ण्यत् ।) भक्ष्यम् । इति व्याकरणम् ॥

चाय, ऋ ञ निश्चामे । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अचचायत् । ञ, चायति चायते । निश्चाम इति चान्द्रधातुपाठः ।
तं पर्व्वतीया प्रमदाश्चचायिरे । इति माघः ।
इति दुर्गादासः ॥

चारं, क्ली, (चर्य्यते भक्ष्यते कोपदेशादिवशादिति। चर+कर्म्मणि घञ्।) क्षत्रिमविषम्। इति हेमचन्द्रः। ३। ३६८॥

चारः, पुं, पियालवृक्षः। गतिः। बन्धः। अपसर्पः। इति मेदिनी। रे, ३३॥ कारागारम्। इति हेमचन्द्रः। ३। ३६८॥ (चर एव इति स्वार्थे अण्।) गूढ़पुरुषः। चरः। तद्विवरणम्। यदुक्तं कालिकापुराणे ८५ अध्याये।

"क्षविदुर्गञ्च वाणिज्यं खन्यानां करसाधनम्।
आदानं स्नेन्यकरयोर्बन्धनं गजवाजिनोः॥
शून्यवप्रमुखानाञ्च योजनं सततं जनैः।
प्रजानां सारसेतूनां बन्धनं चेति चाष्टमम्॥
एतदर्थासु वर्गेषु चारान् सम्यक् प्रयोजयेत्।
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम्॥
अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिवः।
दशसन्धेषु युञ्जीत क्रमतः शृणु तानि मे॥
स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा।
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम्॥
दुर्गयुक्तं चाष्टवर्गे चारं नात्मनि योजयेत्।
तस्मादिमानि शेषाणि पञ्च चारपदानि तु॥
शुद्धान्तेष्वेव पुत्रेषु सकूपूपादौ महानसे।
शून्यदासीनयोश्चैव बलाबलविनिश्चये॥
आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत्।
नयात् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत्॥
निरूप्य तत्प्रतीकारमवश्यं हिततश्चरेत्।
यथानियोगमेतेषां यो यो यत्रान्यथा चरेत्॥
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत्।
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः॥
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत्।
सुपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे॥
नियुक्तांस्तान् मध्यरात्रौ पृच्छेत् यद्यपि मन्त्रिणि।
एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना॥
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम्।
नैकवेश्मधरश्चारो नैको नोत्साहवर्जितः॥
संस्तुतो न हि सर्व्वत्र नातिदीर्घो न वामनः।
सततं न दिवाचारी न रोगी नाप्यदुर्मतिः॥
न वितर्विभवैर्हीनो न भार्य्यापुत्रवर्जितः।
कार्य्यचारो नृपतिना गुह्यतत्त्वविनिर्णये॥
अनेकवेश्मग्रहणक्षमं भार्य्यासुतैर्युतम्।
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम्॥
दृढभक्तं प्रकुर्व्वीत चारं शुक्लमसाध्वसम्।
अधितिष्ठेत् स्वयं राजा क्षणिमात्रमसंस्तुता॥
बणिक्पथे च दुर्गादौ तेषु शुक्लान्नियोजयेत्।
अन्तःपुरे पितुस्तुल्यान् धीरान् वृद्धान् नियोजयेत्॥
षण्डान् पङ्गून् तथा वृद्धान् स्त्रियो या बुद्धितत्पराः।
शुद्धान्तदारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणीः॥"

यथा च युक्तिकल्पतरौ।

"नृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः।"

(कापटिकपुरुषादयः। यथा, मनुः। ७।१८४।

"उपगृह्यास्पदस्थांश्च चारान् सम्यग्विधाय च॥"

"चारांश्च कापटिकादीन्।" इति कुल्लूकभट्टः॥

प्रचारः। यथा, रामायणे। २। ६६। २६।

"निवृत्तचारः सहसा गतो रविः
प्रवृत्तचारा रजनी ह्युपस्थिता।"

"निवृत्तचारः निवृत्तकिरणप्रचारः प्रवृत्तचारा प्रवृत्ततमःप्रचारा।" इति तट्टीकायां रामानुजः॥ वाणिज्यादिव्यवहारः। यथा, महाभारते। ५। ३८। १२।

"भृतैर्वाणिज्यचारञ्च पुत्रैः सेवेत च द्विजान्॥"

सञ्चारः। प्रवृत्तिः। यथा, देवीभागवते। १। ११। ९२।

"न स्त्री दुष्यति चारेण न विप्रो वेदकर्म्मणा।"

"चारेण रजःसञ्चारेण।" इति टीकायां नीलकण्ठः॥)

चारकः, पुं, (चारयति इति। चर+णिच्+ण्वुल्।) अश्वादेः पालकः। सञ्चारकः। (यथा, रामायणे। ३। ६६। १८।

"इयं ऋते भ्रातरि मे मयि वत्स्यति मैथिली।
न चाहमाप्तां कुर्य्यां ते पाप! प्रच्छन्नचारक!॥")

बन्धः। इति मेदिनी॥ के, ८७। पियालवृक्षः। इति राजनिर्घण्टः॥ (चर एव स्वार्थे अण् चारः। ततः स्वार्थे कन्। गुप्तचरः। यथा महाभारते। २।५।३८। [चारकैः॥"

"त्रिभिस्त्रिभिरविज्ञातैर्वेतृसि तीर्थानि चरणग्रीवे,त्रि। यथा,कथासरित्सागरे।१४।६५।

"गुप्तं विरचितां नाम भेजेऽन्तःपुरचारिकाम्॥")

चारटिका, स्त्री, (चर+णिच्+"ग्रकादिभ्योऽटन्।" ४। ८१। उणां। इति अटन् ततः संज्ञायां कन् कापि अत इत्वञ्च।) नलीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

चारटी, स्त्री, (चर+णिच्+"ग्रकादिभ्योऽटन्।" इति अटन् ततो गौरादित्वात् ङीष्।) पद्मचारिणीवृक्षः। इत्यमरः। २। ४। १४६॥ भूम्यामलौ। इति राजनिर्घण्टः॥

चारणः, पुं, (चारयति प्रचारयति नृत्यगीतादिविद्यां तज्ज्ञत्वकीर्त्तिं वा। चर+णिच्+ल्युः।) नटविशेषः। तत्पर्य्यायः। कुशीलवः। इत्यमरः। २। १०। १२॥ (यथा, मनुः। १२। ४४।

"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः॥"

"चारणाः नटादयः।" इति कुल्लूकभट्टः॥")

गन्धर्व्वविशेषः। यथा,—

"गन्धर्व्वाणां ततो लोकः परतः शुक्रयोजनात्।
देवानां गायनास्ते च चारणाः स्तुतिपाठकाः॥"

इति पाद्मे पातालखण्डम्॥

(देवयोनिविशेषः। यथा, भागवते। २। १। ३६।

"गन्धर्व्वविद्याधरचारणाप्सरः
स्वरःस्वतीरसुरानीकवीर्य्यम्॥"

चारपुरुषः। यथा, भागवते। ४। १६। १२।

"अन्तर्वहिश्च भूतानां पश्यन् कर्म्माणि चारदैः।
उदासीन इवाधत्ते वायुरात्मेव देहिनाम्॥")

चारभटः, पुं, (चारेषु चरेषु भटः। यद्वा, चारे बुद्धिकौशलादिप्रचारे भटः।) वीरः। इति हेमचन्द्रः। ३। २८॥ (यथाह भर्त्तृहरिः। १। ६१।

"कक्षुभ्यति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि।
चारभटचौरचेटकनटविटनिष्ठीवनप्ररावम्॥"

चारवायुः, पुं, (चारेण सूर्य्यस्योदगतिभेदेन प्रेरितो यो वायुः।) निदाघजवायुः। इति चिकाण्डशेषः॥

चारिणी, स्त्री, (चारयति स्वगुणमिति। चर+णिच्+णिनिः ङीप् च।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

चारित्रं, क्ली, (चरित्रमेव इति। स्वार्थे अण्।) चरित्रम्। इति हेमचन्द्रः। ३। ५००॥ (यथा, रामायणे। ३। ५६। ६।

"कुलाक्रोशकरं लोके धिक् ! ते चारित्रमीदृशम्॥"

मरुद्गणानामन्यतमः। यथा, हरिवंशे। १६६।५४।

"जयोनयश्चाङ्गुतिश्चैव चारित्रं बहुपन्नगम्॥"

चरतीति। "चरेर्वृत्ते।" ४। १७२। उणां। इति णित्रम्। वृत्तान्तम्॥)

चारित्रा, स्त्री, (चारित्रं अन्नस्वभावो विद्यतेऽस्या इति। अच् टाप्।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥

चारी, स्त्री, (चारः पदनिक्षेपभेदः गतिभेदो वा अस्त्यस्यामिति। "अर्शआदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) नृत्याङ्गविशेषः। यथा,—

"न हि चारीं विना नृत्ये नृत्यस्याङ्गं प्रवर्त्तते।
शृङ्गारादिरसानान्तु भावोद्दीपनकारिका॥
माधुर्य्योद्वर्त्तनात् नित्यं चारी चारुगतिर्मता॥"

अन्ये तु।

"एकपादप्रचारो यः सा चारी तु निगद्यते।
पादयोश्चारणं यच्च सा चारीति निगद्यते॥
करणानां समायोगः खण्डकः परिकीर्त्तितः।
त्रिभिः खण्डैश्चतुर्भिर्वा मण्डलं समुदाहृतम्॥
समनखा नूपुरविद्धा तिर्य्यक्सुखी सबला च।
कातरा च कुवीरा च विश्लिष्टा रथचक्रिका॥
पार्ष्णिरेचितका तलहृग्नी गजहस्तिका।
परावृत्ततला चोरुताड़िताग्रार्द्धमण्डला॥
स्तम्भक्रीड़निका हरिण्यासिका चोरुरेचिका।
तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च॥
लङ्घितजङ्घा सङ्कुटिता स्यादथ मदालसा।
उत्कुञ्चितातितिर्य्यक्कुञ्चिता चापकुञ्चिता॥
षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभिः॥"

अन्ये तु।

"समपादस्थिता वर्णा शकटास्याधहिंकापि च।
विद्याधा ताड़िता बद्धा एड़का क्रीड़िता तथा॥
ऊरुवृत्ता क्रन्दिता जनितापस्यन्दिता तथा।
स्यन्दितावत्समतन्वी समोत्सारितमञ्जिता॥
उच्छन्दिता च विज्ञेयाश्चार्य्यः षोड़श भूमिगाः॥"

इति भूमिचारी॥ * ॥

आकाशचारी यथा,—

"चारीचाकाशगा वक्षे विद्येषा लघरी तथा।
अङ्गिताड़िता भ्रमरी पुरःक्षेपा च रुचिका॥

अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता।
ऊरुजङ्घान्दोलिता च जङ्घा जङ्घनिका तथा॥
विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोड़श॥"
अन्ये तु।
"विभ्रान्तातिक्रान्तापक्रान्ता पार्श्वक्रान्तिका।
ऊर्द्धजानुर्दोलपादादृत्ता नूपुरपादिका॥
भुजङ्गभासिका चित्राविद्धा ताला च स्रूचिका।
विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च॥
आकाशचारिका एताः षोड़शैव निरूपिताः॥"
एताश्चैव भूमिचारीव्यतिरेभेदोऽस्ति तिर्य्यक्-चारी ऊर्द्धचारी अधश्चारीति ता ऊहनीयाः॥
"तैलाभ्यक्तेन गात्रेण लङ्घाहारो जितश्रमः।
स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत्॥
रूक्षाहारं तथान्नञ्च भुक्त्वा तां न समाचरेत्।
वृत्यपादस्य विन्यासचारी सैवाभिधीयते॥
हङ्कारादिरसानान्तु भवेद्दीपनकारणम्।
माधुर्य्यो भूमसा नित्यं हृद्यतालत्रयान्विता॥
नियतोऽङ्गविशेषाणां चारी सञ्चारतो भवेत्॥"
इति सङ्गीतदामोदरोक्तचारीलक्षणम्॥

चारः, पुं, (चरति देवेषु गुरुत्वेन। चर + "दृ-सनिजनिचरीति।" उणां १। ३। इति उण्।) बृहस्पतिः। (चरति चित्ते इति।) मनोज्ञे त्रि। इति मेदिनी। रे, ३३॥ (यथा, गीतगोविन्दे। १०। ६। [मधिवचनजातम्॥"
"इति चटुलचाटुपटुचारुसुरवैरिणो राधिका-श्रीकृष्णस्य रुक्मिणीगर्भसम्भूतपुत्राणामन्यतमः। यथा, हरिवंशे। ११७। ३६।
"चारुश्च वलिनां श्रेष्ठं सुताश्चारुमतीं तथा॥")

चारुक, पुं, (चारु + संज्ञायां कन्।) धनबीजम्। अस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। रक्त-पित्तकफापहत्वम्। शीतत्वम्। लघुत्वम्। अदृष्यत्वम्। कषायत्वम्। वातकोपनत्वञ्च। इति भावप्रकाशः॥

चारुकेशरा, स्त्री, (चारूणि केशराणि अस्याः।) नागरमुस्ता। तरुणीपुष्पम्। इति राजनिर्घण्टः॥

चारुगर्भः, पुं, (चारुः मनोज्ञः गर्भः अभ्यन्तरवर्त्तिप्रान्तः-करणमिति यावत् यस्य। यद्वा चारुर्गर्भे उत्-पत्तिस्थानं यस्य।) श्रीकृष्णपुत्रः। यथा, हरि-वंशे। १६०। ६।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च॥"

चारुगुप्तः, पुं, (चारु यथा स्यात् तथा गुप्तः। यद्वा चारुणा ईश्वरेण कृष्णेन गुप्तः पालितः।) श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ६।
"सुवेशश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान्॥"

चारुदेष्णः, पुं, रुक्मिण्यां श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ५।
"द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः॥"

चारुधारा, स्त्री, (चारूणां मनोहरपदार्थानां धारा इव, तैलोक्यसुन्दरत्वेनाख्यातत्वात्। चार्व्वी धारा नीतिर्यत्रवहारो यस्याः वा।) ग्रन्थी। इति त्रिकाण्डशेषः॥ (चारु धाम यस्याः।) चारुधामा इत्यपि पाठः॥

चारुनालकं, क्ली, (चारु नालं यस्य कप्।) रक्तपद्मम्। इति पुरुषोत्तमः॥

चारुपर्णी, स्त्री, (चारु मनोज्ञं पर्णं पत्रं अस्याः।) प्रसारणी। इति राजनिर्घण्टः॥ गन्धभादालिया इति भाषा॥ (प्रसारणीशब्देऽस्या गुणादिकं ज्ञेयम्॥)

चारुफला, स्त्री, (चारु मनोहरं फलं अस्याः।) द्राक्षा। इति राजनिर्घण्टः॥

चारुबाहुः, पुं, (चारू बाहू यस्य।) श्रीकृष्ण-पुत्रः। यथा, हरिवंशे। १६०। ६।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा॥"

चारुबिन्दः, पुं, (चारुं चारुतां बिन्दतीति। विदि + अण्।) श्रीकृष्णपुत्रः। यथा, हरि-वंशे। १६०। ६।
"सुवेशश्चारुगुप्तश्च चारुबिन्दश्च वीर्य्यवान्॥"

चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या अस्तीति। मतुप् ततो ङीप्।) रुक्मिण्यां श्रीकृष्णस्य कन्या। यथा, हरिवंशे। १६०। ६।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा॥"

चारुलोचनः, पुं, (चारवौ लोचनेऽस्य।) हरिणः। इति त्रिकाण्डशेषः॥ (चारुलोचनविशिष्टे त्रि॥)

चारुवर्द्धना, स्त्री, (चारु चारुत्वं श्रियमित्यर्थः। वर्द्धयति स्वगुणैरिति यावत्। वृध + णिच् + युच्। कर्त्तरि ल्युर्वा ततष्टाप्।) नारी। इति राजनिर्घण्टः॥

चारुव्रता, स्त्री, (चारु व्रतमस्याः।) मासोप-वासिनी। इति त्रिकाण्डशेषः॥

चारुश्रिला, स्त्री, (चारुश्चार्व्वी श्रिला इति नित्य-कर्म्मधारयः।) मणिः। इति त्रिकाण्डशेषः॥

चार्चिक्यं, क्ली, (चर्चिकैव। स्वार्थे ष्यञ्।) चन्दनादिना देहविलेपनविशेषः। इत्यमरः॥ तत्पर्य्यायः। चर्चा २ स्यासकः ३। इत्यमरः॥ चर्चिक्यम् ४। इति भरतः॥ अपि च।
"स्यासकः स्यायकश्चर्चा चर्चिक्यञ्च चतुष्टयम्।
वस्त्रादौ कुङ्कुमादीनां छटादिषु निगद्यते॥"
इति शब्दरत्नावली॥

चार्म्मः, पुं, (चर्म्मणा परिवेष्टितः इति। चर्म्म + अण्।) चर्म्माच्छादितरथः। इति भरतः॥ चर्म्माच्छन्नदण्डे त्रि॥

चार्म्मण्यं, क्ली, (चर्म्मणां समूहः इति। भिक्षा-दिभ्योऽण्।" ४। २। ३८। इत्यण्।) चर्म्म-समूहः। इत्यमरटीकायां भरतः॥

चार्म्मिणं, क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः। इति अण्।) चर्म्मिसमूहः। इत्यमरटीकायां स्वामी॥

चार्व्वाकः, पुं, (चारुः आपातमनोरमः लोक-चित्ताकर्षकः इति यावत् वाकः वाक्यमस्य। ततः पृषोदरादित्वात् साधुः।) तार्किकविशेषः। तत्पर्य्यायः। बार्हस्पत्यः २ नास्तिकः ३ लौकायतिकः ४। इति हेमचन्द्रः॥ स च आकाशा-भिन्नभूतचतुष्टयवादी। प्रत्यक्षमेकं प्रमाणमिति चार्व्वाकाः। इति न्यायसंग्रहः॥ (यथा च सर्व्वदर्शनसंग्रहे। "अथ कथं परमेश्वरस्य निःश्रेय-सपदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारित-त्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम्॥")
दुर्य्योधनसखा राक्षसविशेषः। (यथा, महा-भारते। १२। ३८। २२—२३।
"निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत्॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः।
साक्षः शिखी त्रिदण्डी च दृष्टो विगतसाध्वसः॥")

चार्व्वी, स्त्री, (चारु + गुणवचनत्वात् ङीष्।) कुबेरपत्नी। ज्योत्स्ना। बुद्धिः। शोभना। इति मेदिनी। वे, ६॥ दीप्तिः। इति शब्दरत्ना-वली॥

चालः, पुं, (चालयति हृदयतीति। चल + णिच् + अच् णो वा। यद्वा चालयति आच्छादयत्यनेने-ति। चल + णिच् + करणे घञ्।) स्वनाम-ख्यातयष्ट्याच्छादनम्। तत्पर्य्यायः। पिटम् २। इति त्रिकाण्डशेषः॥ पटलम् ३ छदिः ४। इत्य-मरः। २। २। १४॥ कटलम् ५। इति शब्द-रत्नावली॥ छादम् ६। इति जटाधरः॥ स्वर्ण-चूड़पक्षी। इति भूरिप्रयोगः॥

चालकः, पुं, (चलति स्वेच्छयैव। चल + ण्वुल्।) अङ्कुशदुर्द्धरहस्ती। इति त्रिकाण्डशेषः॥

चालनं, क्ली, (चालयत्यनेनेति। चल + णिच् + करणे ल्युट्।) चालनी। इत्यमरटीकायां भरतः॥ (यथा, कर्म्मप्रदीपे।
"क्षुद्रच्छिद्रसमोपेतं चालनं ततः स्मृतः॥"
भावे ल्युट्। प्रेरणम्। यथा, भागवते। ३। २६। ३७।
"चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः॥")

चालनी, स्त्री, (चालयत्यनेनेति। चल + णिच् + करणे ल्युट् ङीप् च।) स्वनामख्यातशस्यादि-चालनपात्रम्। तत्पर्य्यायः। तितउः २। इत्य-मरः। २। ९। २६॥ चालनम् ३ क्षुद्रच्छिद्रा ४। इति भरतः॥ पाचीरः ५। इति जटाधरः॥

चाषः, पुं, (चाषयति भक्षयति कथादिकमिति। चष + स्वार्थे णिच् + अच्। यद्वा चष्यते भक्ष्यते-ऽसौ मांसाग्निभिरिति। चष् + कर्म्मणि घञ्।) खञ्जनपक्षी। सोनाचड़ा इति ख्यातः। नील-कण्ठ इति क्वचित् ख्यातः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। किकीदिविः २ नीलाङ्गः ३ पुण्यदर्शनः ४। इति राजनिर्घण्टः॥

चासः, पुं, (चाष + पृषोदरात् सत्वम्।) चाष-पक्षी। इक्षुः। इति मेदिनी। से, ६॥

चि, च चित्याम्। चयने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-अनिट्।) च, चयति चयते धनं लोकः। इति दुर्गादासः॥

चि, च च चित्याम्। इति कविकल्पद्रुमः॥ (स्वां-उभं-द्विकं-अनिट्।) चितिश्चयनं राशीकरण-मिति यावत्। च च, चिनोति चिनुते। इति दुर्गादासः॥

चि, क मि चित्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-द्विकं-सेट् ।) क मि, चययति चाय-यति । स्वमते तु चपयति चापयतीत्यपि । इति दुर्गादासः ॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति। कित्+"गुप्तिज्किद्भ्यः सन् ।"३।१।५। इति स्वार्थे सन्+ण्वुल् ।) चिकित्साकर्त्ता । (यथा, मनुः । ८ । २८४ ।

"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः॥") तत्पर्य्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५ । इत्यमरः । २ । ६ । ५७ ॥ तस्य लक्षणं यथा, चरके ।

"आयुर्व्वेदस्ताभ्यासः सर्व्वेषां प्रियदर्शनः । आर्य्यशीलगुणोपेत एष वैद्यो विधीयते ॥"

चिकित्सा, स्त्री, (चिकित्सनमिति । कित् आधि-प्रतीकारे+"गुप्तिज्किद्भ्यः सन् ।"३ । १ । ५ । इति स्वार्थे सन् ततः अप्रत्ययः ।) रोगप्रतीकारः । तत्पर्य्यायः । रुक्प्रतिक्रिया २ । इत्य-मरः । २ । ६ । ५० ॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वेदनानिष्टा ६ क्रिया ७ उपक्रमः ८ ग्रमः ९ । इति राजनिर्घण्टः ॥ चिकित्सितम्१० प्रतीकारः ११ भिषग्जितम् १२ । इति रत्न-माला ॥ रोगप्रतिकारः १३ । इति शब्दरत्ना-वली ॥ सा त्रिधा यथा, वैद्यके ।

"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता । कृतप्रधाना दैवी स्यात् छेदभेदात्मिकासुरी ॥ मानुषी षड्रसा ज्ञेया जपहोमादिसंस्कृता । कलौ बाह्यबले लोके मानुषी तत्र पूजिता ॥"

तस्या लक्षणं यथा,—

"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः । सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥ या क्षुदीर्णं श्रमयति नान्यं व्याधिं करोति च । सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥"

चिकित्साविधुपदेशो यथा,— [गदः ।

"जातमात्रचिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया यद्विशत्रुर्विषेस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥ रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् । ततः कर्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत् ॥ औषधं कवलं कर्त्तुं यो जानाति न चौषधम् । वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः ॥ व्याधावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः । भेषजानां विधानेऽथ ततः कुर्य्यात् चिकित्सितम्॥ प्रीते प्रीतप्रतीकारसुखे चोज्झनिवारणम् । कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥ अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता । क्रियाहीनातिरिक्ता च साध्येष्वपि न सिध्यति ॥ क्रिया यासु गुणालाभे क्रियामन्यां प्रयोजयेत् । पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो मतः ॥"

चिकित्सापलं यथा,—

"क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः । कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥"* ॥

चिकित्साङ्गानि यथा, भावप्रकाशे ।

"रोगी दूतो भिषग्दीर्घमायुर्व्रत्यञ्च सेवकः । सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः ॥"

चिकित्सितं, क्ली. (कित्+स्वार्थे सन् ततो भावे क्तः ।) चिकित्सा । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने २ अः । [तम् ॥"

"बीजं चिकित्सितस्येतत् समासेन प्रकीर्त्ति-पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम् ।

"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्-जितम् ॥"

चिकित्स्यतेऽनेनेति । करणे क्तः । भेषजम् । अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः।

"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्। प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥ विद्याङ्गेषजनामानि भेषजं द्विविधञ्च तत् । यदूर्द्ध्वाधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम् ॥ चिकित्सितार्थं एतावान् विकाराणां यदौ-षधम् ।"

यथा, भागवते । १ । ५ । ३२ ।

"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्। यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम् ॥") कृतप्रतीकारे च ॥

चिकिनः, त्रि, (नि नता नासिकास्यस्य । "इनच्-पिटच्-चिकचि च ।" ५ । २ । ३३ । इति इनच् प्रकृतेश्चिकादेशश्च ।) चिप्रिटनासिकः । इति केचित् ॥

चिकिलः, पुं, (चि+बाहुलकात् इलच् कुक् च ।) पङ्कः । इति हेमचन्द्रः । ४ । १५६ ॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति।"धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा ।" ३ । १ । ७ । इति कृधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष् । ततः "अप्रत्ययात् ।" ३ । ३ । १०२ । इत्यः ।) कर्त्तुमिच्छा । इति सुग्धबोधम् ॥ करिवार वाञ्छा इति भाषा । (यथा, भागवते ।२।१०।२४। "हस्तौ रुरुहतुस्तस्य नाशुकर्म्मचिकीर्षया ॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति। कृ+सन्+ "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) कर्त्तुमिच्छुः । करणेच्छाविशिष्टः । इति व्याकरणम् ॥

चिकुरः, पुं, (चि इत्ययुक्तशब्दं कुरतीति । कुर-शब्दे+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) केशः । (यथा, राजतरङ्गिण्याम् ।८।३६७। "चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या ॥")

सर्पः । (अयं हि ऐरावतकुलजातस्य सुमुखस्य पिता । यथा, महाभारते । ५ । १०३ । २४ । "एतस्य हि पिता नागश्चिकुरो नाम मातले !। न चिरात् वैनतेयेन पञ्चत्वमुपपादितः ॥")

पर्व्वतः । पक्षिभेदः । वृक्षविशेषः । गृहबभुः । तरलः । इति मेदिनी । रे, १५५ ॥

चिकुरः, त्रि, (चि+कुर+कः ।) चपलः । स तु दोषमनिश्चित्य वधबन्धनादेः कर्त्ता । इत्यमरः । ३ । १ । ४६ ॥

चिकुरपक्षः, पुं, (चिकुराणां केशानां पक्षः समूहः ।) कचसमूहः । केशसमुदयः । इत्य-मरः । २ । ६ । ८८ ॥

चिकुरपाशः, पुं, (चिकुराणां केशानां पाशः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ८८॥

चिकुरहस्तः, पुं, (चिकुराणां हस्तः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ८८ ॥

चिकूरः, पुं, (चिकुर+निपातनात् दीर्घः ।) केशः । इति शब्दभेदप्रकाशः ॥

चिक्क, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः । तृतीयस्वरभध्यः । अर्त्तिः पीड़नम् । क, चिक्कयति शत्रुं शूरः। इति दुर्गादासः ॥

चिक्कः, पुं, (चिक् इत्ययुक्तशब्देन कायति शब्दा-यते इति । चिक्+कै+कः ।) कुच्छुन्दरिः । इति चिकाख्यशेषः ॥ (नि नता नासिकास्य-स्येति । "इनच्पिटचिति ।" ५ । २ । ३३ । इत्यस्य वार्त्तिं "कप्रत्ययचिकादेशौ च वक्तव्यौ।" इति कप्रत्ययो नेश्चिकादेशश्च । नतनासिके, चि । इति सिद्धान्तकौमुदी ॥)

चिक्कणं, त्रि, (चिक्यते ज्ञायते इति । चित्+ "चितेः कनः कश्च ।" उणां । ४ । १७६ । इति कर्म्मणि कनः ककारान्तादेशः । बाहुलकाद-गुणः ।) स्निग्धयञ्जनादि (स्निग्धत्वमस्टणत्वादि-गुणवद्वस्तु ।) इत्यमरः । २ । ६ । ४६ ॥ चिक्कण इति भाषा ॥ (यथा, महाभारते । १२ । १८४ । ३४ ।

"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु-दारुणः ॥")

चिक्कणः, पुं, (चिक्कणं स्निग्धगुणं विद्यतेऽस्य । अर्श्वआदित्वादच् ।) पूगवृक्षः । तत्फले क्ली । इति राज-निर्घण्टः ॥ (औषधपाकस्यावस्थाविशेषो यथा,

"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः ॥" इति वाभटे कल्पस्थाने षष्ठेऽध्याये ॥)

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः । अर्श्वआदित्वादच् । ततष्टाप् ।) उत्तमा गौः । तत्पर्य्यायः । नेचिकी २ । इति शब्दचन्द्रिका ॥ पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कणी, स्त्री, (चिक्कण+गौरादित्वात् ङीष् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कसः, पुं, (चिक्कयति पीड़यति चूर्णकारण-मिति । चिक्क+असच् ।) यवचूर्णम् । इति हेमचन्द्रः । ३ । ६६ ॥

चिक्का, स्त्री, (चिक्कयति पीड़यति भोक्तारमिति । चिक्क+अच् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिङ्गटः, पुं, (चिङ्ग इत्ययुक्तशब्देन अटतीति । अट गतौ+अच् । प्रकन्यादिवत् अलोपः ।) मत्स्य-विशेषः । गलाचिङ्गड़ी इति मोचाचिङ्गड़ी इति च भाषा ॥ तत्पर्य्यायः । महाशल्कः २ ।

इति हारावली । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवर्द्धनत्वम् । मेदःपित्तास्रनाशित्वम् । वृष्यत्वम् । रोचनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (ऊषापानविधौ भक्ष्यनिषेधोऽस्य यथा,—

"प्रातः पानीयपाने महऋषिगणितं द्रव्यमेतच्च नाद्यात् ।
मांसं क्षीरञ्च शाकं सकलविदलकं पिष्टकं चिञ्चटञ्च ॥"

इति वैद्यक-ऋतुचर्य्यायाम् ॥)

चिञ्चटी, स्त्री, (चिञ्चट + जातौ ङीष् ।) मत्स्यविशेषः । घुषाचिञ्चड़ी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिञ्चड़ः, पुं, (चिञ्चट + एषोदरादित्वात् टस्य डत्वे साधुः ।) चिञ्चटमत्स्यः । इति शब्दमाला ॥ (विवरणमस्य चिञ्चटशब्दे आख्यातम् ॥)

चिञ्चिण्डः, पुं, फलविशेषः । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्य्यायः । श्वेतराजिः २ सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलरुचिकारित्वम् । ग्रीष्मिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने दशमेऽध्याये ।

"चिञ्चिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
ग्रीष्मिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥")

चिञ्चा, स्त्री, (चिं चयनं चिनोतीति । चि + अन्येभ्योऽपीति ड: ।) तिन्तिड़ीवृक्षः । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—

"चिञ्चादलरसक्षारैः पथ्यं दध्योदनं हितम् ॥"

इति वैद्यकभैषज्यव्यवहारिग्रन्थे गुल्माधिकारे ॥)

चिञ्ची, स्त्री, (चिञ्च + गौरादित्वात् ङीष् ।) गुञ्जा । इति केचित् ॥

चिञ्चाम्लं, क्ली, (चिञ्चा तिन्तिड़ी तद्वत् अम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चासारः, पुं, (चिञ्चायास्तिन्तिड्याः सार इव सारोऽस्य यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चोटकः, पुं, (चिञ्चेव अटतीति । अट + ण्वुल् । एषोदरात् साधुः ।) लवणविशेषः । चैँच्को इति चैँच्ड़ा इति च भाषा ॥ तत्पर्य्यायः । अक्लोदः २ । इति रत्नमाला ॥ चिञ्चाटकोऽपि पाठः ॥

चिट, प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट, क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ईं, चित्तः । ज्ञानमिह जागरणम् । ज्ञानञ्च अविद्यानिद्रयाक्रान्ते जगत्येकः स चेतयतीति हलायुधः । चिचेत रामस्तत् छद्मम् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ क, चिन्तयति विद्यां सुधीः । इति दुर्गादासः ॥

चित, क ड ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ड, चेतयते । राक्षसस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते ततश्चेतं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री. (चित संज्ञाने + सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा, भागवते । ३ । ७ । २ ।

"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥")

चित्, य, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित् कञ्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किमः क्वन्नाचिच्चनौ ।" इति सुग्धबोधव्याकरणप्रणेता पूज्यपादोपदेवाचार्यः ॥)

चित:, त्रि, (चि + कर्म्मणि क्तः ।) छन्नः । इति मेदिनी । ते, १८ ॥ (क्रतचयनः । सञ्चितः । "इह वै कर्म्मचितो लोकः क्षीयते एवममुत्र पुण्यचितः क्षीयते ।" इति श्रुतेः ॥)

चिता, स्त्री, (चीयते श्मशानाग्निरस्यां यद्वा चीयते उच्चीयतेऽसौ प्रेतस्य परलोकश्रर्म्मणे इति। चि + अधिकरणे वा कर्म्मणि क्तस्ततष्टाप् ।) शवदाहाधारचुल्ली । तत्पर्य्यायः । चित्या २ । इत्यमरः । २ । ६ । ११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूड़कम् ५ चित्यम् ६ । इति त्रिकाण्डशेषः ॥ चितिः ७ । (यथा, महाभारते । ३ । २१६ । १७ ।

"चितायेरुद्वहन्नार्य्यं पत्नीभ्यां तत् प्रवर्त्तते ॥")

संहतिः । इति मेदिनी । ते, १८ ॥

चिताचूड़कं, क्ली, (चितेव चूड़कम् ।) चिता । इति त्रिकाण्डशेषः ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि + अधिकरणे क्तिः ।) चिता । (यथा, भागवते । ४ । २८ । ५० ।

"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")

समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,

"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् यस्यां स्थिता सर्व्वं महा वा प्रकृतिर्मता ॥"

इति देवीपुराणे ४५ अध्यायः ॥ * ॥

भित्तिस्थेष्टिकादिसङ्ख्याज्ञानार्थाङ्कविशेषः । यथा,

चितौ करणसूत्रं सार्द्धवृत्तम् ।

"उच्छ्रयेण गुणितं चितेः किल
क्षेत्रयुग्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिचितेः
स्युः स्वराश्च दृषदां चितेरपि ॥

उदाहरणम् ।

अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः ।
उच्छ्रितिश्चाङ्गुला यस्यामिष्टिकास्तास्त्रिचितौ किल ॥
यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकानां
सङ्ख्या च का ब्रूहि कतिस्वराश्च ॥



इष्टिकायाः घनहस्तमानम् $\frac{३}{६४}$ चितेः क्षेत्र-फलम् ४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० । लब्धा इष्टिकासङ्ख्या २५६० । स्वरसङ्ख्या २४ । एवं पाषाणचयेऽपि । इति चितिव्यवहारः ॥" इति लीलावती ॥ (इष्टाङ्गविशेषः । यथा, मार्कण्डेये । २२ । ६ ।

"चितयश्चत्र कर्म्मण्या नान्तरिक्षगता यतः ॥")

चितिका, स्त्री, (चितिः कायतीति । कै + कः ।) कटिश्रृङ्खला । इति हारावली । २२४ ॥

चित्तं, क्ली, (चेतत्यनेनेति । चित् + करणे क्तः ।) अनुसन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥

"यत्तत् सत्त्वगुणं स्वच्छं स्वान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं प्रशान्तत्वमिति चेतसः ।
प्रवृत्तिलक्षणं प्रोक्तं यथार्थाः प्रकृतेः परा ॥"

इति श्रीभागवतम् ॥

अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महानितिसंज्ञा अध्यात्मरूपेण चित्तं उपास्यरूपेण वासुदेवः अधिष्ठाता तु तस्य क्षेत्रज्ञः ।" इति श्रीधरस्वामी ॥ (अनेनैव चित्तवृत्तेः प्रथमसम्बन्धः । अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।" तथा च मुण्डकोपनिषदि । ३ । १ । ६ ।

"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥")

मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।) हर्षः । इति हेमचन्द्रः । २ । २२६ ॥

चित्तविप्लवः, पुं, (चित्तस्य विप्लवो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पुं, (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्मादशब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नतिः, स्त्री, (चित्तस्य समुन्नतिः समुन्नयनं उत्तेजनमिति यावत् ।) मानः । इत्यमरः । १ । ७ । २२ ॥

चित्राभोगः, पुं. (चित्रस्य आभोगः परिपूर्णता इत्यर्थः ।) एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । ७ ॥

चित्रोन्नतिः, स्त्री. (चित्रस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्र्यं, क्ली, (चीयते इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात्गुणागमे साधुः । यद्वा, व्यप्प्रत्ययेन पितौ गुणागमः ।) चिता । इति चिकाण्डशेषः ॥ (तज्जाते चि । यथा, रामायणे । १ । ५८।११ ।

"चित्रमाल्याम्बरागञ्च आयसाभरणोऽभवत् ॥")

चित्र्यः, पुं, (चीयतेऽसौ इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः ।) अग्निः । इति सुग्धबोधम् ॥

चित्र्या, स्त्री. (चीयतेऽग्निरस्यां प्रेतस्य । चि + यः निपातनात् साधुः । व्यप् वा ।) चिता । इत्यमरः । २ । ६ । ११७ ॥

चित्र, तृ क चलिकेचणे । लेखेऽनुते । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।)चलिकेचणं कदाचिद्दर्शनम् । चित्रयति चित्रापयति राजा लोकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्रं, क्ली, (चित्रयतीति । चित्र + कर्म्मणि अप् । यद्वा, चीयते इति ।"अमिचिमिश्मिभ्यः क्रः ।" उणां ४ । १६४ । इति क्रः ।) तिलकम् । आलेख्यम् । (यथा, पद्मदश्याम् । ६ । ५ ।

"उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् ॥") अद्भुतम् । (यथा, रामायणे । १ । १० ।

"चित्रं संक्रीड़मानास्ताः क्रीड़नैर्विविधैस्तथा ॥") कर्ब्बुरवर्णः । (यथा, माघे । १ । ८

"निसर्गचित्रोज्ज्वलरूपपत्त्या ॥")

तद्युक्ते त्रि । इति मेदिनी । रे, २५ ॥ (अलङ्कारविशेषः । यथा,—

"तच्चित्रं यत्र वर्णानां खड्गात्याकृतिहेतुता ।" सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गसुरजपद्माकारमुखासयन्ति तच्चित्रं काव्यम् ॥ * ॥

अग्निसंज्ञकयोऽशाक्षरावृत्तिच्छन्दोभेदः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।

"चित्रसंज्ञमीरितं समानिकापदद्वयन्तु ।" उदाहरणं यथा,—

"विद्मारुणाधरोऽशोभि वेणुवाद्यश्रुत-वल्लवीनगाङ्गसङ्गजातसुखकण्टकाङ्ग ! ।
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव ! यस्यपुण्यचित्रकेण्य ! त्वां स्मरामि गोपवेण्य ! ॥")

आकाशः । कुलविशेषः । इति हेमचन्द्रः ।६।३४॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । १ । ३ ।

"चित्राः श्रोतुं कथाश्चैव परिवव्रुस्तपस्विनः ॥")

चित्रः, पुं, (चित्रयति पापपुण्ये विचार्य्य चित्रं करोति लिखतीत्यर्थः । चित्र + णिच् + अच् । यद्वा चीयन्ते उपचीयन्ते प्रेतलोका येन । चि + "अमिचिमिश्मिभ्यः क्रः ।" उणां ।४।१६४ । इति क्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे ।

"एकोदराय चित्राय चित्रगुप्ताय वै नमः ॥"

कर्ब्बुरवर्णः । इत्यमरटीकायां भरतः ॥ (सर्पविशेषः । यथा, महाभारते । २ । ६ । ८ ।

"लक्षणञ्च लोहितश्चैव पद्मचित्रश्च वीर्य्यवान् ॥"

धृतराष्ट्र-पुत्रभेदः । यथा, तत्रैव ।१।११७।४।

"चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥")

एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिघण्टः ॥

चित्रकं, क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्रमिव कायति । कै + कः ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (वृक्षविशेषः । यथा, गारुड़े १८७ अध्याये ।

"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ॥")

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै + कः ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ् इति भाषा । तत्पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ नखगान्तकः ४ शूरः ५ क्षुद्रशार्दूलः ६ चित्रव्याघ्रः ७॥ वृक्षविशेषः । चिता इति भाषा ॥ तत्पर्य्यायः । अग्निः २ शार्दूलः ३ चित्रः ४ पाचीकटुः ५ शिखी ६ क्षपाचुः ७ दहनः ८ बालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ शुक्रः १६ पाचौ १७ हुतभुक् १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । श्लेष्मकफार्शोवातोदरार्शोग्रहणीकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाकेऽग्नितुल्यत्वम् । कुष्ठनाशित्वम् । इति राजवल्लभः ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् ।

"चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःश्लेष्मकासजित् ॥
वातश्लेष्महरो श्वासी वातार्शःश्लेष्मपित्तकृत् ।
विचित्रं चैत्रकं शाकं कासमर्द्दविमर्द्दितम् ॥
तप्ततैले सवाक्षीके पाचितं तक्रसम्भृतम् ॥"

ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।

"पूतिकश्चित्रकः पाठा विड़ङ्गैलाहरेणवः ॥")

एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कुन् ।) चित्रकारः । इति हेमचन्द्रः ॥ (सुपुकुन्दः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

सुपुकुन्दः चित्रवृक्षश्चित्रकः प्रतिविषुकः ॥"

अस्य गुणः । शिरःपीड़ापित्तास्रविषनाशित्वञ्च ॥)

चित्रकण्ठः, पुं, (चित्रः चित्रितः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतशब्देऽस्य विवृतिर्व्याख्याता ॥)

चित्रकमलः, पुं, (चित्रश्चासौ कमलश्चेति ।) कमलविशेषः । दुलिचा गालिचा इत्यादि भाषा ॥ यथा, उणादिकोषे ।

"कुथः स्त्रीपुंसयोश्चित्रकम्बले पुंसि वर्हिषि ॥"

चित्रकरः, पुं, (चित्रं करोतीति । क्र + टः ।) वर्णसङ्करजातिविशेषः । पटुया इति भाषा ॥ स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । रङ्गाजीवः २ । इत्यमरः । २ । १० । ७ ॥ रङ्गजीवकः ३ । इति शब्दरत्नावली ॥ वर्णौ ४ वर्णाटः ५ चित्रकारः ६ । इति जटाधरः ॥ (यथा, आर्य्यासप्तशत्याम् । ३४५ ।

"चित्रकरतूलिकेव त्वां सा प्रतिभित्ति भावयति ॥")

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्मास्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ बहुव्रीहौ आश्चर्य्यकर्म्मा चित्रकारश्च ॥

चित्रकायः, पुं. (चित्रो नानावर्णयुक्तः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः ।४।३५१॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकारः, पुं, (चित्रं करोतीति । क्र + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा, महाभारते । १ । १२८ । ४० ।

"संमार्ज्जितं सौधकारैश्चित्रकारैश्च चित्रितम् ॥")

अस्य उत्पत्तिविवृतिर्यथा, पराशरपद्धतौ ।

"स्यपतेरपि गान्धिक्यां चित्रकारो व्यजायत ॥"

चित्रकूटः, पुं, (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ पुरा रामो वनं गत्वा प्रथमे यत्र वासमकरोत् । (पर्व्वतोऽयं प्रयागश्चैत्रस्यभरद्वाजाश्रमात् सार्द्धयोजनद्वयेऽतीते पार्श्वगताया मन्दाकिन्याख्याया सरितो दक्षिणतो राजते । यदुक्तं रामायणे । २ । ६२ । १० —१२ ।

"भरतार्द्धतृतीयेषु योजनेष्वजने वने ।
चित्रकूटगिरिश्चैव रम्यनिर्झरकाननः ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुमसंच्छन्ना रम्यपुष्पितकानना ॥
अनन्तरं ततस्तस्याश्चित्रकूटश्च पर्व्वतम् ।
तयोः पर्णकुटीं तात ! तत्र तौ वसतो ध्रुवम् ॥")

अधुना बुन्देलखण्डाख्यदेशे कामृता इति ख्यातः ॥ (अयं हि पीठस्थानेषु अन्यतमः । अत्र च भगवती सीतारूपेण महादेवचन्द्रचूड़रूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ७० ।

"चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥"

तथा, महालिङ्गेश्वरतन्त्रे ।

"चित्रकूटे चन्द्रचूड़ो योगेन्द्रो विन्ध्यपर्व्वते ॥")

चित्रकृत्, पुं, (चित्रं नानावर्णं करोतीति । क्र + क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २७ ॥ (चित्रमालेखं करोतीति ।) चित्रकरः । इति हलायुधः ॥

चित्रकोलः, पुं, (चित्रो विचित्रः कोल क्रोड़देशो यस्य ।) अञ्जनिका । इति चिकाण्डशेषः ॥

चित्रगन्धं, क्ली, (चित्रो विचित्रो गन्धो यस्य ।) हरितालम् । इति राजनिर्घण्टः ॥

चित्रगुप्तः, पुं, (गुप रक्षणे + भावे क्तः । चित्राणां नीवक्तव्यपापपुण्यादिविचित्राणां गुप्तं गोपनं

रत्नयं यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रत्नयं यस्य।) चतुर्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। ते, १९८॥ तस्योत्पत्तिर्यथा,-

"ब्रह्मपादांगुतः पूर्व्वमसीग्रौ द्वौ बभूवतुः।
एको मसीग्रः सर्व्वाख्यः सर्व्वांगीहृदयद्विजात्॥
कुलप्रदीपः खीयानां जातीनां पूततासृहः।
वगलेति महाविद्यां गृहीत्वा साधयन् सुदा॥
सर्व्वांगीहृदयाख्यस्य पण्डितस्य प्रसादतः।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो॥
कृपया कुरु मां नाथ। त्वमेव वगला मम।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपतिर्भूत्वा सुदा तत्र सुखिष्यति।
गुर्व्वाज्ञया मसीग्रः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च त्रिधारूपो बभूव ह।
चित्रगुप्तश्चित्रसेनश्चित्राक्षद इति त्रयः॥
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तमः।
चित्रगुप्तो महाविद्यां प्राप्य कृष्णाख्यविग्रतः॥
पुत्रान् याचितवान्नैव गुरोर्दैवलमावहन्।
यमान्तिस्थो बभूवापि स्वमैत्र्याधोविवेचकः॥
चिरं शुभाशुभं कर्म्म विविध्य ग्रमनान्तिके।
यद्वदेत् सकलानान्तु तदेवाभोजयेदयमः॥"

इत्याचारनिर्णयतन्त्रम्॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम्॥

चित्रजल्पः, पुं, (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"श्रेष्ठस्य सुहृदा लोके गूढरोषाभिसूचितः।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्।
विजल्पो जल्पसंजल्पावजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः॥
असद्भावेवचित्री चमत्कृतिसुदुस्करः।
अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते॥
तत्र प्रजल्पः।
असूयेर्ष्यामदभ्रुवा योऽवधीरणसूचया।
प्रेयस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते॥
यथा,—
मधुप! कितवबन्धो! मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्बं यस्य दूतत्वमीदृक्॥ १॥

अथ परिजल्पितम्।

प्रभोर्निर्दयतायाश्चापलाद्युपपादनात्।
खविच्चतुरतायुक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मात् भवाब्धेः।
परिचरति कथं तत्पादपद्मं नु पद्मा
अपि बत हृततेता ह्युत्तमश्लोकजल्पैः॥ २॥

अथ विजल्पः।

व्यक्तयाऽसूयया गूढमानसुद्रान्तरालया।
अर्थद्वयपि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥
यथा,—
किमिह बहु षडङ्घ्रे! गायसि त्वं यदूनामधिपतिमधुरायामागतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः॥ ३॥

अथोल्लपः।

हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया।
सासूयस्य तदाक्षेपो धीरैरुल्लप ईर्य्यते॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्व्वयं का
अपि च कृपयपृच्छे ह्युत्तमश्लोकशब्दः॥ ४॥

अथ संजल्पः।

सोल्लुण्ठया गर्हणया कथाय्याक्षेपसूचया।
तस्याक्षतस्यतायुक्तिः संजल्पः कथितो बुधैः॥
यथा,—
विहृत्य शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यधुरदधुरतत्त्वेताः किन्नु सन्धेयमस्मिन्॥ ५॥

अथ अवजल्पः।

हरौ काठिन्यकामित्वधौर्त्त्यादिसाक्षयोग्यता।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः॥
यथा,—
स्वगायुरिव कपीन्द्रं विजधे लुब्धधर्म्मा
स्त्रियमकृतविरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वाऽवेश्यवद्वाङ्ववद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थैः॥ ६॥

अथाभिजल्पितम्।

भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति॥ ७॥

अथ आजल्पः।

व्यक्तिस्तस्यार्त्तिदत्वञ्च निर्व्वेदादुद्यत्र कीर्त्तितम्।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः॥
यथा,—
वयमृतमिव जिह्मवाङ्कृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कालबध्वो हरिण्यः।
दहसुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुजसुपमन्त्रिन्! भण्यतामन्यवार्त्ता॥ ८॥

अथ प्रतिजल्पः।

दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राणिनां दैवतन्त्रितम्।
दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः॥
यथा,—
"प्रियसख! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग!।
नयसि कथमिहारात्रान् दुस्त्यजद्वन्द्वपार्श्वं
सततसुरसि सौम्य! श्रीवधूः साकमास्ते॥ ९॥

अथ सुजल्पः।

यत्रार्त्तवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरेः प्रष्टुः स सुजल्पो निगद्यते॥
यथा,—
अपि बत! मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान्! सौम्यबन्धूंश्च गोपान्।
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु॥"१०॥

इत्युज्ज्वलनीलमणौ स्थायिभावः॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य।) विड्गम्। इति रत्नमाला॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विड्गम्। इत्यमरः। २। ४। १०६॥ (यथास्याः पर्य्यायाः।

"पुंसि स्त्रीदे विड्गः स्यात् क्षमिश्रो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लसमोषा चित्रतण्डुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चित्रदण्डकः, पुं, (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलटवृक्षः। इति रत्नमाला॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति। दिव्+अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८६॥

चित्रपक्षः, पुं, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः॥

चित्रपक्षिका, स्त्री, (चित्राणि विचित्राणि पक्षाणि पर्णानि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला॥ द्रोणपुष्पी। इति राजनिर्घण्टः॥

चित्रपत्री, स्त्री, (चित्राणि पक्षाणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) गोधापदीलता। इति शब्दमाला॥ छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्॥ (चित्रं पदं वस्तुविन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि। यथा, महाभारते। ३। ३१। १।

"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि! त्वया वचः।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्याः। कापि अत इत्वम्।) चित्रपर्णीभेदः। तत्पर्य्यायः। दीर्घा २ शृगालविन्ना ३ त्रिपर्णी ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ अतिगुहा ७ पृष्ठिला ८। इति रत्नमाला॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इत्यमरः।

२।४।६२॥ कर्कस्फोटालता। चलपिप्पली। द्रोणपुष्पी। इति राजनिर्घण्टः॥ मञ्जिष्ठा। इति रत्नमाला॥ (यथास्याः पर्य्यायाः।
"मञ्जिष्ठा विकसा लिङ्गी काला योजनपर्ण्यपि।
ताम्रवल्ली चित्रपर्णी काकोरी रक्तयष्टिका॥"
इति वैद्यकरत्नमालायाम्॥)

चित्रपादा, स्त्री, (चित्रौ पादौ यस्याः।) सारिकापक्षी। इति हारावली। ८६॥

चित्रपिच्छकः, पुं, (चित्राणि पिच्छानि पुच्छकानि यस्य। ततः कप्।) मयूरः। इति राजनिर्घण्टः॥

चित्रपृष्ठः, पुं, (चित्रः पृष्ठो यस्य।) शरः। इति चिकाण्डशेषः॥

चित्रपुष्पी, स्त्री, (चित्राणि पुष्पाणि यस्याः। स्त्रियां ङीप्।) अम्बष्ठा। इति राजनिर्घण्टः॥ (विवरणमम्बष्ठाशब्देऽस्या ज्ञेयम्॥)

चित्रपृष्ठः, पुं, (चित्रं नानावर्णं पृष्ठं यस्य।) कलविङ्कपक्षी। इति हारावली। ८६॥

चित्रफलः, पुं, (चित्रं फलं फलकं तद्वदाकृतिर्विद्यतेऽस्य। अच्।) मत्स्यविशेषः। चितल इति भाषा॥ अस्य गुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। दृष्यत्वम्। बलप्रदत्वञ्च। इति राजवल्लभः॥

चित्रफलकः, पुं, (चित्रफल+स्वार्थे कन्।) चित्रफलमत्स्यः। इति भूरिप्रयोगः॥

चित्रफला, स्त्री, (चित्राणि फलानि यस्याः।) चिर्भिटा। ऋगेर्व्वारुः। लिङ्गिनी। महेन्द्रवारुणी। वार्त्ताकी। कण्टकारी। इति राजनिर्घण्टः॥ मत्स्यविशेषः। फलइ इति भाषा॥ तत्पर्य्यायः। राजगीवः २ फलकी ३ मद्गोन्मदः ४। इति शब्दरत्नावली॥

चित्रभानुः, पुं, (चित्रा नानावर्णा भानवो रश्मयो यस्य।) अग्निः। (यथा, महाभारते।२।३१।४२।
"चित्रभानुः सुरेशश्च अनलश्चं विभावसो!॥")
सूर्य्यः। इति मेदिनी। ने, १८३॥ चित्रकटुश्चः। अर्कटुश्चः। वह्निसंज्ञक इति अर्काश्च इति चामरदर्पणात्॥ भैरवः। इति शब्दरत्नावली॥ (वर्षविशेषः। यथा, बृहत्संहितायाम्। ८।३५।
"श्रेष्ठं चतुर्थस्य युगस्य पूर्व्वं
यच्चित्रभानुं कथयन्ति वर्षम्॥")

चित्रभेषजा, स्त्री, (चित्रं भेषजं यस्याः।) काकोदुम्बरिका। इति राजनिर्घण्टः॥

चित्रमेखलः, पुं, (चित्रा विचित्रा मेखला यस्य।) मयूरः। इति चिकाण्डशेषः॥

चित्रयोधी, [न्] पुं, अर्জ্জुनश्चः। इति राजनिर्घण्टः॥ (चित्रं यथा स्यात् तथा युध्यतीति। युध+णिनिः।) पार्थः॥ (चित्रयुद्धयोधे, त्रि। यथा, महाभारते। १।१।१८६।
"यदा द्रोणो विविधानस्त्रमार्गा-
न्निदर्शयन् समरे चित्रयोधी॥")

चित्ररथः, पुं, (चित्रो रथो यस्य।) सूर्य्यः। गन्धर्व्वविशेषः। इति मेदिनी। थे, २८। (अस्य पर्य्यायः। गन्धर्व्वराजः २ अङ्गारपर्णः ३ कुबेरसखः ४ दग्धरथः ५। (यथा, महाभारते। १। १७१। ३७—३६।
गन्धर्व्व उवाच।
"जितोऽहं पूर्व्वकं नाम सुधाम्यङ्गारपर्णताम्।
न च श्राद्धे बलेनाङ्ग! न नाम्ना जनसंसदि॥
साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम्।
गान्धर्व्वया मायये च्छामि संयोजयितुमर्জ্জुनम्॥
अस्त्रामिना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")
स तु मुनिनाम्न्यां दक्षकन्यायां कश्यपौरसाञ्जातः। इति महाभारते। १। ६५। ४३॥

चित्रलः, पुं, (चित्रमाश्चर्य्यं लातीति। ला+कः।) कर्ब्बुरवर्णः। तड़इति चि। इति शब्दरत्नावली॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

चित्रला, स्त्री (चित्रल+"अजाद्यतष्टाप्।" ४। १।४। इति टाप्।) गोरक्षीवृक्षः। इति राजनिर्घण्टः॥

चित्रलेखा, स्त्री, (चित्रो लेखो लेखनशक्तिर्यस्याः। चित्रं लेखयतीति वा। लिख+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) चित्रलेखनदक्षतयास्यास्त्यात्मम्।) अप्सरोविशेषः। सा ऊषायाः सखी कुम्भाण्डस्य कन्या। यथा, हरिवंशे। १७४। ७४—७५।
"उवाच रुदतीमेव कुम्भाण्डतनया सखीम्।
कुशला ते विशालाक्षि! सर्व्वथा सन्निविग्रहे॥
अप्सराश्चित्रलेखा वै शिप्रं विज्ञाप्यतां सखि!॥"
यथा, श्रीभागवते। १०। ६२। १४।
"बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।
सखायुच्छन् सखीमूषां कौतूहलसमन्विता॥"
(अस्याश्चित्रलेखनपटुत्वकथा यथा हरिवंशे। १७४। ८०—८८।
"चित्रलेखाऽब्रवीद्वाक्यमूषां हर्षयती मुने:॥"
"देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम्।
ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च॥
यथा प्रधानतः सर्व्वानालिखिष्याम्यहं सखि!।
मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः॥
सप्तरात्रेण ते भीरु! दर्शयिष्याम्यहं प्रियम्।
ततो विज्ञाय पट्टस्थं भर्त्तारं प्रतिलप्स्यसे॥
सा चित्रलेखया प्रोक्ता ऊषा हितचिकीर्षया।
क्रियतामेवमित्याह चित्रलेखां सखीं प्रति॥
ततः कुशलहस्तत्वात् यथा लेखं समन्ततः।
दृष्ट्वा सप्तरात्रेण कृत्वा लेखगतांस्तु तान्॥
चित्रपट्टगतान् सुखानानयामास शोभनान्॥")
छन्दोविशेषः। इति छन्दोमञ्जरी। अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्॥

चित्रलोचना, स्त्री, (चित्रे लोचने यस्याः।) सारिकापक्षी। इति जटाधरः भूरिप्रयोगश्च॥

चित्रवदाकः, पुं, (चित्रवत् आ समन्तादकति पर्य्याप्नोतीति। आ+अक+अच्।) पाठीनमत्स्यः। इति जटाधरः॥

चित्रवल्लिकः, पुं, (चित्रा विचित्रा वल्लिर्लता। सा इव कायतीति। कै+कः।) वदालमत्स्यः। इति हेमचन्द्रः। ४। ३११॥

चित्रवल्ली, स्त्री, (चित्रा विचित्रा वल्ली लता यस्याः।) ऋगेर्व्वारुः। महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रवीर्य्यः, पुं, (चित्रमाश्चर्य्यजनकं वीर्य्यमस्य।) रक्तैरण्डः। इति राजनिर्घण्टः॥

चित्रशिखण्डिजः, पुं, (चित्रशिखण्डिनोऽङ्गिरसो सुनेर्ज्जायते इति। जन+डः।) दृढ़व्रतिः। इत्यमरः। १। ३। २४॥

चित्रशिखण्डिप्रसूतः, पुं, (चित्रशिखण्डिनोऽङ्गिरसः प्रसूतः सन्ततिः।) दृढ़व्रतिः। इति हलायुधः॥

चित्रशिखण्डी, [न्] पुं, (चित्रः शिखण्डः शिखा अस्यास्य। "अत इनिठनौ।" ५। २। ११५। इति इनिः।) सप्तर्षयः। इत्यमरः। १। ३। २०॥ यथाह भरतः।
"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।
वशिष्ठश्चेति सप्तैते ज्ञेयश्चित्रशिखण्डिनः॥"
(यथाच, महाभारते। १२। ३३५। २६—२८।
"ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः।
तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमम्॥
वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ।
आस्ते: सप्तभिरव्यग्रैर्लोकधर्म्ममनुत्तमम्॥
मरीचिरत्रङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः॥")

चित्रसर्षः, पुं, (चित्रः नानावर्णरञ्जितः सर्षः।) मालुधानसर्षपः। इति शब्दरत्नावली॥

चित्रसेनः, पुं, ब्रह्मपादजमसीग्राह्यकायस्थस्य चित्रगुप्तादित्रितयान्तर्गतमूर्त्तविशेषः। स तु मर्त्यलोकविवेचकः। यथा,—
"चित्रसेने महाविद्या वगलेति गुरोर्नयन्।
अम्बा सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः॥
राज्यं चकार स्वदृयुक्तचित्राङ्गद अधो गतः॥"
इत्याचारनिर्णयतन्त्रम्॥
(चित्रा सेना यस्य। गन्धर्व्वविशेषः। यथा, महाभारते। २। १०। २५।
"चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च।
एते चान्ये च गन्धर्व्वा धनेश्वरमुपासते॥"
धृतराष्ट्रपुत्रविशेषः। यथा, महाभारते। १। ६५। ५७। "तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः। दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति॥" पूरुवंशीयस्य परिक्षितः पुत्राणामन्यतमः। यथा, महाभारते। १।६४।५२।
"परिक्षितोऽभवन् पुत्राः सर्व्वे धर्म्मार्थकोविदाः।
कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्य्यवान्॥"
शम्बरासुरस्य पुत्रविशेषः। यथा, हरिवंशे। १६१। ४३।
"चित्रसेनोऽतिसेनश्च विश्वक्सेनजितस्तथा॥"
नरिष्यन्तपुत्रः। यथा, भागवते। ६। २। १६।
"चित्रसेनो नरिष्यन्तात् दक्षस्तस्य सुतोऽभवत्॥")

चित्रा, स्त्री, (चित्रयति चित्रकर्म्म करोति सर्व्वगुणैः शोभते इति वा। चित्र + अच् + टाप्।) श्रीत्र्यासस्त्रीविशेषः। यथा, उज्ज्वलनीलमणौ।
"परमप्रेष्ठसख्यस्तु ललिता सविशाखिका।
सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका।
रङ्गदेवी सुदेवी चेत्यष्टौ सर्व्वगुणाग्रिमाः॥"
अस्याः कृष्णः श्रीकृष्णस्य पूर्व्वस्यां व्रानन्दसुखदो नाम। वयः अष्टमासाधिकत्रयोदशवत्सरम्। वर्णो गौरः। अस्या वस्त्रं जातीपुष्पतुल्यम्। कर्म्म चित्रम्। इति गोस्वामिग्रन्थः॥ * ॥ स्त्रधिकपर्णी। गोदुग्धा। सुभद्रा। इन्द्रिका। (पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"चित्रा दन्ती निकुम्भः स्याद्गुप्तचित्रा सुकूलकः।
दारुणद्वी विशल्या च तथोदुम्बरपर्ण्यपि॥")
माया। सर्पभेदः। नदीविशेषः। इति मेदिनी॥ अप्सरोविशेषः। इति हेमचन्द्रः॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्दशनक्षत्रम्। तत्तु सुक्लावदुज्ज्वलं एकतारकामयम्। अस्य अधिष्ठात्री देवता विश्वकर्म्मा। यथा,—
"एकमौक्तिकसमुज्ज्वलप्रभे
त्वष्टरीन्दुवदने स्वमध्यगे।"
इति कालिदासः॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे।
"प्रतापसन्तापितशत्रुपक्षो
दक्षो नये चापि विचित्रवासाः।
प्रसूतिकाले यदि यस्य चित्रा
वृद्धिर्विचित्रा खलु तस्य भाग्ये॥"
ऋगेर्व्वारः। (यथा, चरके सूत्रस्थाने। ११ अः।
"तिलः प्रियालाभियुक्तो विभीतकाक्षिनाभयेङ्गुदमधूकसर्षपाः।
कुसुम्भविस्वार्कसुलकातसी
निकोटकाघोड़करञ्जशिग्रुयुक्ताः॥
क्षेत्राण्याः स्यावरसंज्ञितास्तथा
खुर्ज्जक्षमा मत्स्यसञ्ज्ञाः सपिच्छकाः॥")
गर्दभपूर्व्वा। सुतश्रेष्ठी। मल्लिका। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये।
"चित्राबलमभित्यक्त्वैव रथादाहविनाशनम्॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्। (गायत्रीस्वरूपा महाशक्तिः। यथा, देवीभागवते।१२।६।५२।
"चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी॥")
चित्राक्षी, स्त्री, (चित्रं अक्षिणी नेत्रे यस्याः। समासे वच् स्त्रियां ङीष्।) सारिकापक्षी। इति त्रिकाण्डशेषः॥
चित्राक्षुपः, पुं, (चित्रा स्त्रधिकपर्णीव क्षुपः इक्षुराकारत्वात्।) द्रोणपुष्पी। इति राजनिर्घण्टः॥
चित्राङ्गं, क्ली, (चित्रं अङ्गं यस्मात्।) हिङ्गुलम्। हरितालम्। इति राजनिर्घण्टः॥
चित्राङ्गः, पुं, (चित्रमङ्गं यस्य।) चित्रकः। रक्तचित्रकः। सर्पः। इति राजनिर्घण्टः॥ (यथास्य गुणाः।
"चित्राङ्गो वातशमनो दीपनो बलकृन्मतः।
श्वेतस्तु कथितो वापि दुर्ज्जरो मेदवर्द्धकः॥"
इति हारीते प्रथमे स्थाने एकादशेऽध्याये॥
धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १। ११७। ६।
"अयोनिजो दुर्मदाद्युचित्राङ्गचित्रकुण्डलः॥")
चित्राङ्गदः, पुं, चन्द्रवंशीयराजविशेषः। स तु शान्तनुराजपुत्रः। विचित्रवीर्य्यभ्राता। (अयन्तु शान्तनुराजस्य स्वर्गगमनानन्तरं राज्यं लब्ध्वा ऐश्वर्य्यवीर्य्यमदेन शूरान् सर्व्वान् तृणवदमन्यत। अथ कदाचित् गन्धर्व्वराजचित्ररथः युद्धार्थमेनमभ्ययात्। ततः कुरुक्षेत्रमध्ये महति महते युद्धे समधिकमायाबलेनायं गन्धर्व्वराजेन निहतोऽयं कौरवप्रवीरः। इत्येषा कथा महाभारते। १। १०१। अध्याये द्रष्टव्या॥) गन्धर्व्वविशेषः। इति महाभारतम्॥ (यथा, देवीभागवते। १। २०। २२।
"चित्राङ्गदस्तु गन्धर्व्वो दृष्ट्वा तं मार्गगं नृपम्। उत्तस्थारान्निकं भूमेर्विमानवरमास्थितः॥")
ब्रह्मपादजमसीग्राह्यकायस्थस्य चित्रगुप्तादिचित्रयान्तर्गतमूर्त्तविशेषः। स अधोलोकविवेचकः। तस्याधोगमनकारणं यथा,—
"अधोगतस्य हेतुस्त्वं वगले! ब्रूहि कालिके!।
वगलेति मृगं प्राप्य विप्रः स्यामिति वाञ्छया॥
तपश्चकार पञ्चाब्दं नान्यत् किञ्चिदुपाहरत्।
फलमूलादिकं किञ्चित् सायमात्तं यथा मिलेत्॥
विहाय विप्रस्य गुरोरपि पूजाच भार्व्वति!।
जपेन्नित्यं हि वगलामन्यविप्रच नेक्षयन्॥
शालेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा।
वचो हि मधुरं किञ्चित् प्रियाङ्गत्वाच सुन्दरि!।
रे चित्राङ्गद! अश्रव्यं वत्स! विप्रत्वमिच्छसि।
कदाप्युपायनं मत्तस्त्वं नैवेति न हि बुध्यसे॥
वत्स! शीघ्रमधो गच्छ चिरं कुरु तपो मुदा॥"
चित्राङ्गदः श्रुत्वा तं शापं श्रुत्वा ब्राह्मणान् तुष्टाव ततो ब्राह्मणा लज्जिताः सन्तस्तमब्रुवः।
"हे चित्राङ्गद! हे तात वत्स! त्वं गोत्रवः किल।
दुःखन्तां कुरु मा तात भद्रं ते कथयाम भोः॥
जनस्तोषकरेणैव सर्व्वं प्राप्नोत्यसंशयम्।
नार्हतीश विना तात! ब्राह्मणो भवितुं किल॥
इतीश्वराज्ञा वेदेऽस्ति प्रतिज्ञानीहि तत्त्वतः।
वरं प्राप्नोति देवत्वं ब्राह्मणत्वं कदापि न॥
यथामरत्वमीशेन विना ज्ञापि न शक्यते।
नोतृसवक्षमधो गच्छ सुखेन वगलां जप॥
कलेर्द्वादशसहस्राब्दि नागलोकेश्वरो भव।
ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि॥
राज्यं शुक्रान्ततो नैव पुनरावर्त्तनं तव।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु॥
तात गच्छ सुखं सद्यः नागलोकेऽपि विस्तरात्।
तत आनन्दमनसा गतश्चित्राङ्गदस्तदा॥"
इत्याचारनिर्णयतन्त्रम्॥
(स्त्रियां टाप्। मणिपुरेश्वरस्य चित्रवाहनस्य कन्या यथा महाभारते। १।२१६।१५।
"तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना॥")
चित्राङ्गदसूः, स्त्री, (चित्राङ्गदं सूते प्रसूते इति। षू ङ प्रसवे + क्विप्।) सत्यवती। सा व्यासमाता। इति त्रिकाण्डशेषः॥
चित्राङ्गी, स्त्री, (चित्रमङ्गं यस्याः। स्त्रियां ङीप्।) मल्लिका। कर्णजलौका। इति राजनिर्घण्टः॥
चित्राटीरः, पुं, (चित्रां नक्षत्रावलीं अटतीति। अट गतौ + बाहुलकात् ईरच्।) चन्द्रः। (चित्रं तिलकं अटति गच्छति प्राप्नोति वलिच्छागास्रबिन्दुभिरित्यर्थः। अट + ईरच्।) घण्टाकर्णवलिच्छागासबिन्दुभिरङ्कितभालः। इति मेदिनी। रे, २६३॥
चित्रापूपः, पुं, (चित्रो विचित्र आपूपः पिष्टकः।) पिष्टकभेदः। चिताइ पिटा इति भाषा॥ तत्पर्य्यायः। पञ्चवाणः २। इति त्रिकाण्डशेषः॥
चित्रायसं, क्ली, (चित्रमायसं लोहम्।) तीक्ष्णलोहम्। इति राजनिर्घण्टः॥
चित्रिकः, पुं, (चित्रा नक्षत्रविशेषः सा पौर्ण्णमास्यामस्यस्य। चित्रा + ठन्।) चैत्रमासः। इति शब्दरत्नावली॥
चित्रिणी, स्त्री, (चित्रं विचित्रताऽस्त्यस्याः। चित्र + इनिः + ङीप्।) पद्मिन्यादिचतुर्विधस्त्रीमध्ये स्त्रीविशेषः। सा मीनगन्धा। तस्या लक्षणं यथा। रतिमञ्जर्य्याम्। ४।
"भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धोदेहोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा॥"
(इयं हि पद्मजातीयपुरुषं लब्ध्वा सम्भुक्ता भवति। यदुक्तं तत्रैव। ८।
"शूद्रके पद्मिनी तुष्टा चित्रिणी रमते शशम्।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥"
अस्या रतिकरणप्रकारमाह तत्रैव। २६।
"शीत्कारं चुम्बनं पीड़ा गले हस्ते च चुम्बनम्।
चक्षे चक्षे स्तने हस्तं चित्रिणीरतिमादिशेत्॥")
चित्रेशः, पुं, (चित्रा नक्षत्रविशेषस्तस्या ईशः पतिः,) चन्द्रः। इति शब्दचन्द्रिका॥
चित्रोक्तिः, स्त्री (चित्रा आश्चर्य्यकरी उक्तिर्वाणी।) आकाशवाणी। इति त्रिकाण्डशेषः॥ आश्चर्य्यकथनञ्च॥
चित्रौदनं, क्ली, (चित्रमोदनम्।) विचित्रान्नम्। इति भरतधृतत्वम्॥
चिद्रूपः, त्रि, ज्ञानवान्। इति भूरिप्रयोगः। (चित् ज्ञानमेव रूपं यस्य।) ज्ञानमयः। यथा। चिद्रूपे परमात्मनीति योगशास्त्रम्॥
चिन्ता, स्त्री (चिन्तनमिति। चिन्ति + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च।" ३। ३। १०५। इति अङ्।) चिन्तना। चिन्तनम्। तत्पर्य्यायः। स्मृतिः २ आध्यानम् ३। इत्यमरः। १। ७। २६॥ आधा ४ ध्यानम् ५ चिन्तिः ६। इति शब्दरत्नावली॥ चिन्तिया ७। इति हेमः॥ (यथाह कश्चित्।

"चिंता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी। चिंता दहति निर्जीवं चिन्ता हि जीवितन्तथा॥") दर्शनसम्भोगयोः प्रकारभावना। इति रसमञ्जरी॥ (सा च व्यभिचारिभावविशेषः। यथा. साहित्यदर्पणे। ३। १७०। [कृत्॥")

"ध्यानं चिन्ता हितानाम्नेः शून्यताश्वासतापः

चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणिरिव। प्राकपार्थिवादिवत् समासः। यद्वा, चिन्तया ध्यानधारणादिना मण्यते आह्वयते इति। मण+इण्।) ब्रह्मा। इति शब्दरत्नावली॥ (चिन्ता एव मणिरिव यस्य। चिन्ताप्रीतत्वादेवास्य तथात्वम्।) बुद्धविशेषः। इति चिकाण्डशेषः॥ मणिविशेषः। यथा, भट्टिः।

"सामर्थ्यसम्पादितवाञ्छितार्थ-
चिन्तामणिः स्यान्न कथं हनूमान्॥"

सार्थमणिः। तथा च।

"यथा चिन्तामणिं कृत्वा लोष्टं काञ्चनतां भजेत्॥"

इति पाद्मोत्तरखण्डम्॥

(अश्वविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४। १६।

"कण्ठे यस्य महावर्णं एकोऽप्यस्य प्रजायते।
चिन्तामणिः स विज्ञेयश्चिनातार्थविदुद्विदः॥")

चिन्तावेश्म, [न्] क्ली, (चिन्तायाः मन्त्रणादेर्वेश्म गृहम्।) मन्त्रणागृहम्। तत्पर्य्यायः। दार्व्वटम् २। इति हारावली। १६॥

चिन्तिड़ी, स्त्री, (तिन्तिड़ी। पृषोदरादित्वात् तस्य चत्वम्।) तिन्तिड़ी। इति हिरूपकोषः॥ इति क्वचित्॥

चिन्तितं, त्रि, (चिति+कर्म्मणि क्तः।) ज्ञातचिन्तनम्। यथा,—

"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।"

रत्नकोषः॥

कर्म्मणि क्ते चिन्तायुक्तः। भावे क्ते चिन्ता॥

चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् रुट् च।) चिन्ता। इति शब्दरत्नावली॥

चिन्तिया, स्त्री, चिन्ता। इति चिकाण्डशेषः॥

चिप्रः, पुं, शस्त्रविशेषः। इति शब्दचन्द्रिका॥ चिना इति भाषा॥ (चीनशब्दे विशेषोऽस्य ज्ञातव्यः॥)

चिपिटः, पुं, (चयतीति। चि+बाहुलकात् पिटच् स च कित्।) भक्ष्यद्रव्यविशेषः। चिड़ा। इति भाषा॥ तत्पर्य्यायः। पृथुकः २। इति हेमचन्द्रः। १। ६५॥ चिपिटकः ३। इत्यमरः॥ चिपुटः ४। इति भरतः॥ धान्यचमसः ५। इति चिकाण्डशेषः॥ चिपोटकः ६। इति शब्दरत्नावली॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। हृंहणत्वम्। कफपित्तकत्वञ्च॥ शीरयुक्तस्य तस्य गुणाः। बलकारित्वम्। वायुनाशित्वम्। मलभेदकत्वञ्च। इति राजवल्लभः॥ बृंहणत्वम्। गुरुत्वञ्च। तस्य लक्षणं यथा, भावप्रकाशे पूर्व्वखण्डे द्वितीये भागे।

"धानाः सप्तयवा आर्द्रा भृष्टा अस्फुटितास्ततः।
कुट्टितास्चिपिटाः प्रोक्तास्ते स्युताः पृथुका अपि॥"
"प्रालेया यावनालाद्याश्चिपिटाः पृथिवर्द्धनाः॥"

इति राजनिर्घण्टः॥

तस्य भक्षणविधिनिषेधौ यथा,—

"द्विःस्निग्धमन्नं पृथुकं शुष्कं देशविशेषके।
नात्यन्तगुरुकं विप्राणां भक्षणे च निवेदने॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम्॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

(नि नता नासिका विद्यतेऽस्य। "इनच्पिटच्चिकचि च।" ५। २। ३३। इति पिटच् प्रत्ययेश्चिरादेशश्च। नतनासिके त्रि। यथा, विश्वकर्म्मप्रकाशे। १३। २।

"दिग्वक्त्रं चिपिटञ्चैव यङ्गन्तं सुरजन्तथा।"

इत्यस्य फलमाह तत्रैव। ५म श्लोके।

"तुङ्गहीनञ्च चिपिटं यङ्गन्तानर्थदर्शनम्॥"

चिपिटाकारसुखादौ च। यथा, काश्मीरखण्डे। ३७। १४।

"वक्त्रो हस्तश्च चिपिटः सुखसौभाग्यभङ्गकः॥"
"चिपिटः चिप्टिकाकारः" इति तट्टीका॥)

चिपिटकः, पुं, (चिपिट+स्वार्थे कन्।) चिपिटः। इत्यमरः। २। ६। ४७॥ (स्त्रियां टाप्। नतनासिका॥)

चिपिटा, स्त्री, गुरुत्वाधिनीद्रव्यम्। इति राजनिर्घण्टः॥ (चिपिटा चिपिटाकारा इति। चिपिट+टाप्। चिपिटमस्ति। यथा, काश्मीरखण्डे। ३७। १६। "चिपिटाभिर्भवेद्दासी॥")

चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।) चिपिटकः। इति भरतधृतरुद्रकोषः॥

चिप्पः, पुं, (चिक्कति पीड़यति अङ्गुलिमिति। चिक्क+अच्। निपातनात् ककारस्थाने पकारागमे साधुः।) नखरोगविशेषः। आङ्गुलछाड़ा इति भाषा॥ तल्लक्षणं यथा,—

"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥"

अथ कुनखस्य लक्षणमाह।

"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः।
भवेत्तं कुनखं विद्यात् कुम्भीरं वा विधानतः॥"

अथ तयोश्चिकित्सा।

"चिप्पं रुधिरमोक्षेण प्रोक्षनेनाप्युपाचरेत्।
गतोष्माणमथैनन्तु सेचयेदुष्णवारिणा।
शुष्केणापि यथायोग्यमुक्त्वा स्रावयेत्ततः॥
व्रणोक्तेन विधानेन रोपयेत्तं विचक्षणः।
खरेण हरिद्रायाः पात्रे क्षत्वायसेऽथवा॥
घृष्ट्वा तल्लेन कल्केन लिम्पेच्चिप्पं पुनः पुनः।
काश्मर्य्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितः॥
अङ्गुलीवेष्टकः पुंसां ध्रुवमाशु प्रशाम्यति।
श्लेष्मविद्रधिकल्पेन कुनखं समुपाचरेत्॥
नखकोटिप्रविष्टेन टङ्कणेन प्रशाम्यति।
कुनखश्चेत्तदा शीते सलिले ह्रवतेऽपि च॥"

इति भावप्रकाशे मध्यखण्डे ४र्थे भागः॥

(लक्षणान्तरमस्य यथा,—

"कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्
चिप्पमत्यन्तरोगञ्च विद्यादुपनखञ्च तम्॥"

इति वाभटेनोत्तरस्थाने ३१ अध्याये उक्तम्॥

चिकित्सास्य यथा,—

"चिप्पं शुद्ध्या जितोग्राग्यं साधयेच्छस्त्रकर्म्मणा॥"

इत्युत्तरस्थाने द्वाविंशेऽध्याये वाभटेन चोक्तम्॥)

चिमिः, पुं, (चिनोति सञ्चिनोतीति मनुष्यजातिवद्वाक्यानीति। चि+बाहुलकात् मिक्।) शुकपक्षी। इति शब्दमाला॥

चिमिकः, पुं, (चिमि+स्वार्थे कन्।) शुकपक्षी। इति शब्दरत्नावली॥

चिरं, अ, (चि+बाहुलकात् रक्।) दीर्घकालः। तत्पर्य्यायः। चिराय२ चिरायाय ३ चिरस्य ४। इत्यमरः॥ चिरेण ५ चिरात् ६ चिरे ७। इति भरतः॥ चिरतः८। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ६०।

"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते वसेत्॥")

चिरकारी, [न्] त्रि, (चिरं व्याप्य करोतीति। कृ+णिनिः।) चिरक्रियः। (यथा, महाभारते। १२। २६६। ३।

"चिरकारी हि मेधावी नापराध्यति कर्म्मसु॥")

गौतमस्य पुत्रभेदः। अस्य निरुक्त्यादिकं यदुक्तं महाभारते। १२। २६५। ४-५।

"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः।
चिरेण सर्व्वकार्य्याणि विन्दत्यर्थान् प्रपद्यते॥
चिरं सञ्चिनुयादर्थांश्चिरं जायत चिरं खपन्।
चिरं कार्य्याभिपत्तिञ्च चिरकारी तथोच्यते॥")

चिरकालः, पुं, (चिरः काल इति कर्म्मधारयः।) दीर्घकालः। तत्पर्य्यायः। दीर्घरात्रम् २। इति त्रिकाण्डशेषः॥

चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया यस्य।) चिरकालेन क्रियाकारकः। तत्पर्य्यायः। दीर्घसूत्रः। इत्यमरः। २। १। १७॥

चिरजीवकः, पुं, (चिरं जीवतीति। जीव+ण्वुल्।) जीवकवृक्षः। इति जटाधरः॥

चिरजीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति मेदिनी॥ जीवकवृक्षः। शालमलिवृक्षः। इति राजनिर्घण्टः॥ मार्कण्डेयः। अश्वत्थामा। बलिः। व्यासः। हनूमान्। विभीषणः। कृपः। परशुरामः। इति तिथ्यादितत्त्वम्॥ बहुकालजीविनि त्रि। इति जटाधरः॥ (यथा, रामायणे। २। १। ३६।

"अथ राज्ञो बभूवैव वृद्धस्य चिरजीविनः॥")

चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति हेमचन्द्रः। ४। ३८८॥ जीवकवृक्षः। शालमलिवृक्षः। इति राजनिर्घण्टः॥ चिरजीविनि त्रि॥

चिरण्टी, स्त्री, (चिरात् चिरेण वा अटति पिब्बयदादिति। अट+अच्। "वयसि प्रथमे।" ४। १। २०। इति ङीप्। ततः, पृषोदरात् साधुः।) खण्डासिनी। जड़ा अनूढ़ा वा पिङ्ग-

गेहस्थिता कन्या। द्वितीयवयाः स्त्री। सा च युवती। इति भरतधृतरुद्रः हैमचन्द्रश्च॥

चिरतिक्तः, पुं, (चिरं चिरात् वा चिरावधीत्यर्थः तिक्तः।) वृक्षविशेषः। चिरता इति भाषा॥ तत्पर्य्यायः। चिरातिक्तः २ तिक्तकः ३ अनार्य्यतिक्तकः ४ किराततिक्तः ५ भूनिम्बः ६ किरातकः ७ सुतिक्तकः ८। इति शब्दरत्नावली॥ (भूनिम्बशब्दे विवरणमस्य ज्ञातव्यम्॥)

चिरत्नः, त्रि, (चिर+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४।३।२३। स्वरस्य वार्त्तिकोक्त्या त्नप्रत्ययः।) पुरातनः। चिरकालोत्पन्नः। इति जटाधरः॥

चिरन्तनः, त्रि, (चिरं भवं इति। "सायंचिरमिति।"४।३।२३। इति ट्युल् तुट् च। निपातनात् साधुः।) पुरातनः। इत्यमरः।३।१।७७॥ (यथा, पद्मतन्त्रे। १। ८०। "अयमसाकं चिरन्तनो मन्त्रिपुत्रो दमनकोऽद्याहतप्रवेशः॥" पुं, मुनिविशेषः। यथा, सिद्धान्तकौमुद्याम्। ४। ३। १०५। इत्यस्य वार्त्तिके। "ब्राह्मणेषु पुराणेन चिरन्तनेन मुनिना॥")

चिरपाकी, [न्] पुं, (चिरेण पाकोऽस्यास्य। पा+क+इनिः।) कपित्थः। इति राजनिर्घण्टः॥

चिरपुष्पः, पुं, (चिराणि पुष्पाणि यस्य।) वकुलवृक्षः। इति राजनिर्घण्टः॥

चिरम्, व्य, (चि+रसुक्।) चिरार्थम्। दीर्घकालार्थम्। तत्पर्य्यायः। चिराय २ चिरराचाय ३ चिरस्य ४ चिरात् ५ चिरेण ६। इति हैमचन्द्रः।३।१६८॥ (यथा, रघौ।३।६२। "तथापि शुश्रूषयवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः॥")

चिरमेही, [न्] पुं, स्त्री, (चिरेण मेहतीति। मिह+णिनिः।) गर्द्दभः। इति हैमचन्द्रः।४।३२२॥

चिरभयः, पुं, (चिरं भयति क्षोभयतीति। चिरं+भय+अच्।) चिल्लः। इति चिकाण्डशेषः॥

चिररात्रं, क्ली, (चिरा रात्रिरिति योगविभागात् अच् समासे।) दीर्घकालः। इति हलायुधः॥ (यथा, महाभारते। १। १६८। ३। "चिररात्रोषिता स्नेह ब्राह्मणस्य निवेशने॥")

चिरराचाय, व्य, (चिररात्रं अयते इति। अय+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) दीर्घकालः। इत्यमरः।३।४।१४॥ (यथा, मनुः। ३। २६६। "हविर्यैश्चिरराचाय यज्ञानन्त्याय कल्पते। पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः॥")

चिरविल्वः, पुं, (चिरं विलति आच्छादयति पत्रकण्टकादिभिरिति। विल आच्छादने+वः।) करञ्जवृक्षः। इत्यमरः। २।४।४७॥ (यथा,— "चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः। कपोतपदकश्चाग्नी पुरीषाग्नि च दारुणम्॥" इति सुश्रुते सूत्रस्थाने षट्त्रिंशेऽध्याये॥)

चिरस्नता, स्त्री, (चिरं स्नता या सा।) चिरप्रस्नता गवी। केयेन गाइ इति भाषा। तत्पर्य्यायः। अस्नायनी २। इत्यमरः। २।९।७१॥

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति। स्था+णिनिः।) बहुकालस्थाता॥

चिरस्य, व्य, (चिरमस्यते इति। अस्+यत्। प्रकन्यादित्वात् साधुः।) दीर्घकालः। इत्यमरः।३।३।११॥ (यथा, हरिवंशे।१२६।२३। "चिरस्य खलु कृष्णेन संस्कृतोऽस्मि महात्मना॥")

चिराटिका, स्त्री, (चिरं अटतीति। अट+ण्वुल् कापि अत इत्वञ्च।) श्वेतपुनर्नवा। इति रत्नमाला॥ पाताड़ी इति भाषा॥ यथा, वैद्यके।

"गोमूत्रयुक्तस्य पुरातनस्य यद्वायसस्तानि चिराटिकायाः॥"

चिरात्, व्य, (चिरं अततीति। अत्+क्विप्) दीर्घकालः। इति हैमचन्द्रः। ६। १६८॥ (यथा, पञ्चतन्त्रे। ४। ७८। "भो भगिनीसुत! किमतिचिराद्दृश्योऽसि॥")

चिरात्, पुं, (चिरं चिरेण वा अत्ति। अद्+क्विप्।) गरुड़ः। इति चिकाण्डशेषः॥

चिरातिक्तः, पुं, (चिरं चातिक्तः।) चिरतिक्तः। इति शब्दरत्नावली॥

चिराय, व्य, (चिरं अयते। अय+अच्।) दीर्घकालः। इति हैमचन्द्रः। ६। १६८॥ (यथा, महाभारते। १३। ८४। १०।

"पुरा धर्म्मो वर्त्तते नेह यावत् तावद्गच्छामः सुरलोकं चिराय॥")

चिरायुः, [स्] पुं, (चिरमायुर्यस्य।) देवता। इति चिकाण्डशेषः॥ चिरजीविनि त्रि। यथा, "भवति यदि मनुष्यो गुर्व्वधीनश्चिरायुः॥" इत्यागमः॥ (यथा च पद्मतन्त्रे। ५। ३४। "यदि विस्तारविस्तीर्णं तद्भवेन्न चिरायुषम्॥")

चिरि, र ण हिंसे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) रेफोपधः। र वैदिकः। न, चिरिण्वोति। इति दुर्गादासः॥

चिरिः, पुं, (चिनोति मनुष्यवद्वाक्यादिकम्। चि+किरच्।) शुकपक्षी। इति चिकाण्डशेषः॥

चिरिण्टी, स्त्री, (चिरण्टी+पृषोदरात् साधुः।) छद्मा अनूढा वा पितृगृहस्थिता कन्या। तत्पर्य्यायः। स्वयंवरा। इत्यमरः। २। ६। ८॥ चिरण्टी २ सुवासिनी ४। इति भरतः॥ द्वितीयवयाः स्त्री। युवतौ। इति मेदिनी॥

चिरिबिल्वः, पुं, (चिरबिल्वः। पृषोदरादित्वात् साधुः।) चिरबिल्वः। करञ्जवृक्षः। इत्यमरटीकायां भरतः॥

चिरु, स्त्री, (चिरु चयने+क्विप्। चि चयनं यद्वयमित्यर्थः रातीति। रा+ष्टगयादयश्चेति कुः। वाहुलन्यवलम्बाश्रित्यैव यद्वयक्रियासम्भवात् तथात्वम्।) वाहुवन्धिः। इति शब्दचन्द्रिका॥

चिरे, व्य, चिरम्। इत्यमरटीकायां रायमुकुटः॥

चिरेण, व्य, चिरम्। इति हैमचन्द्रः॥ (यथा, रघुः। ५। ६४।

"भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव॥")

चिर्भटी, स्त्री, (चिरेण भटतीति। भट+अच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् साधुः।) कर्कटी। इति हैमचन्द्रः। ४। २५५॥ (यथा, पञ्चतन्त्रे।२।१६७।"अहो अविवेकोऽस्मदूपतेयैः पुरीषोत्सर्गमाचरंश्चिर्भटीभक्षणं करोति॥")

चिर्भिटा, स्त्री, कर्कटीभेदः। चिभिड़ा इति वेलसेद इति च देशान्तरीयभाषा॥ तत्पर्य्यायः। सुचित्रा २ चित्रफला ३ क्षेत्र चिर्भिटा ४ पाण्डुफला ५ पथ्या ६ रोचनफला ७ चिर्भिटिका ८ कर्कचिर्भिटा ९। इति राजनिर्घण्टः॥ चिर्भिटम् १० वैशदुग्धम् ११ गोरक्षकर्कटी १२। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। गुरुत्वम्। पित्तकफापहत्वम्। अशुक्लत्वम्। ग्राहित्वम्। विष्टम्भित्वञ्च॥ पक्वायाः अस्याः गुणाः। उष्णत्वम्। पित्तलत्वञ्च। इति भावप्रकाशः॥ गौल्यत्वम्। दीपनत्वञ्च॥ वालायाः अस्याः गुणाः। तिक्तत्वम्। किञ्चिदम्लत्वञ्च। शुष्कायाश्चास्याः गुणाः। श्लेष्मवातास्रपित्तार्शोनाशित्वम्। रोचनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते॥)

चिल, ग्र वासे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) वासः परिधानम्। ग्र, चिलति वस्त्रं लोकः परिदधातीत्यर्थः। चेलिता। इति दुर्गादासः॥

चिलमीलिका, स्त्री, (चिरं मीलतीति। मील मीलोचे+ण्वुल्। ततष्टापि अत इत्वम्। रस्य लत्वे साधुः।) कण्डीभेदः। खद्योतः। विद्युत्। इति मेदिनी। के, २२८॥

चिलिचिमः, पुं, (चिरिं हिंसां चिनोतीति। चिरि+कि+मक्। रस्य लत्वम्।) मत्स्यविशेषः। वालियागड़क इति ख्यातः। इचाक इत्यके। इति भरतः॥ तत्पर्य्यायः। तलमीनः २। इत्यमरः। १। १०। १८॥ तलमीनः ३ चिलीचिमिः ४ चिलीचिमः ५ चिलिचीमः ६ चेलिचीमः ७ चिलीमः ८ चिलिमीनकः ९ चिलिचीमिः ११ कवलः ११ विलोटकः १२। इति भरतधृतकोषान्तरम्॥ चेङ्गो इति ख्यातो मत्स्यः। तस्य गुणाः। लघुत्वम्। रूक्षत्वम्। अनभिष्यन्दित्वम्। वायुकारित्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥

चिल्ल, ग्रैथिल्ये। ह्रीवत्वतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ह्रस्वी लघ्वन्तः। चिल्लति चेचिल्लतः। इति दुर्गादासः॥

चिल्लः, पुं, (चिल्लति ह्रीभावेन उड्डीयते इति। चिल्ल+अच्।) पक्षिविशेषः। चिल् इति भाषा॥ तत्पर्य्यायः। आतायी २। इत्यमरः। २। ५। २१॥ शकुनिः ३ आतापी ४। इति हैमचन्द्रः॥ खञ्जनिः ५ कञ्जनीडकः ६ चिरञ्जः ७। इति चिकाण्डशेषः॥ (यथा, विष्णुधर्म्मोत्तरे।

"गृधः कङ्कः कपोतश्च उलूकः श्येन एव च। चिल्लश्च चर्म्मचिल्लश्च भासः पाङ्कर एव च॥" स्निग्धे चक्षुषी अस्य। "स्निग्धस्य चित्पिल् लक्षास्य चक्षुषी।"५। २। ३३। इत्यस्य वार्त्तिके इति चिलादेशो लप्रत्ययश्च।) स्निग्धचक्षुः। स्निग्धनेत्रयुक्ते त्रि। इति मेदिनी। ले, १६॥

चिल्लका, स्त्री, (चिल्ल इव कायतीति। के+कः।) भिल्लिका। इति शब्दरत्नावली॥

चिल्लभक्षा, स्त्री, (चिल्लस्य भक्षा भक्षणीया।) कङ्कविलासिनी। इति शब्दचन्द्रिका॥

चिल्लाभः, पुं, (प्रसक्तं हारकत्वात् चिल्ल इव आभातीति। आ+भा+कः।) प्रसक्तचौरः। इति चिकाकश्लेषः॥ हातहैं चढ़ इति गाँटिकाटा इति च भाषा॥

चिल्ली, स्त्री, (चिल्लति हार्वं करोति चिल्लातेऽनेन वा। चिल्ल+इन्। ततो वा ङीष्।) लोहः। यत्रशाकभेदः। तत्पर्य्यायः। चिल्लिका २ क्षुद्री ३ अग्रलोहिता ४ क्षुद्रपत्री ५ चारदला ६ चारपत्रा ७ वास्तुकी ८ महत्रका ९ गौड़वास्तुकः १०। (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "सतीनो वास्तुकक्षुद्र चिल्ली मूलकमोतिकाः। मल्लकपर्णी जीवन्ती शाकवर्गे प्रशस्यते॥") अस्य गुणाः। वास्तुकतुल्यत्वम्। चारत्वम्। श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम्। पथ्यत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥ ("तद्वच्चिल्ली तु विज्ञेया वातपित्तविकारिणाम्॥" इति हारीते प्रथमे स्थाने दशमेऽध्याये॥) भिल्लिका। इति शब्दरत्नावली॥

चिवि:, पुं, (चीयते आदराय यत्नते इति। चीव यत्नने+"सर्व्वधातुभ्य इन्।" उणा ४। ११७। इति इन्। पृषोदरादित्वात् ह्रस्वः।) चिबुकम्। इति जटाधरः॥

चिविट:, पुं, (चिपिटः निपातनात् पस्य वः।) चिपिटः। इत्यमरटीका॥

चिविल्लिका, स्त्री, क्षुद्रक्षुपविशेषः। तत्पर्य्यायः। रक्तदला २ क्षुद्रघोणी ३ मधुमालपत्रिका ४। अस्या गुणाः। कटुत्वम्। कषायत्वम्। जीर्णज्वरे अतिहितत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

चिबुः, पुं, (चीयते आदरार्थं गृह्यतेऽसौ। चीव +"हनगृदृयश्च।" उणा। १। ३८। इति कुप्रत्ययेन साधुः।) चिबुकम्। इति भरतः॥

चिबुकं, क्लो, (चिबु+स्वार्थे कन्। अभिधानात् क्लीवत्वम्।) अधराधोभागः। रत्नमरः। २। ६। ८०॥ थुँति इति हाड़ि इति च भाषा॥ (यथा, हठयोगप्रदीपिकायाम्। १। ४६। "उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥")

चिबुकः, पुं, (चिबुरिव कायतीति। के+कः।) शुषुक्कृक्षः। इति राजनिर्घण्टः॥

चिह्न, लक्षणे। (अदन्तचुरां-परं-सकं-सेट्।) सौत्रधातुरयमिति दुर्गादासः। इत्यमरटीकायां भरतः॥

चिह्नं, क्लो, (चिह्नयतेऽनेनेति। चिह्न लक्षणे+करणे घञ्।) चिह्नयते येन तत्। चिना इति दाग् इति च भाषा॥ तत्पर्य्यायः। कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७। इत्यमरः। १। ३। १७॥ लक्ष्मणः ८। इति भरतः॥ अभिज्ञानम् ९। इति जटाधरः॥ (यथा, भागवते। ४। १५। ९।

"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः। पादयोररविन्दञ्च तं वै मेने हरेः कलाम्॥") पताका। इति मेदिनी। ने, ४॥

चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति। चिह्न+ णिनिः।) घोरदर्शनः। विघाती। इति विश्वः॥

चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा। चिह्न+णिनिः स्त्रियां ङीप्।) श्यामालता। इति शब्दचन्द्रिका॥

चिह्नित:, त्रि, चिह्न+कर्म्मणि क्तः। चिह्नयुक्तः। अङ्कितः। लक्षितः। (यथा, मनुः। १०। ५५।

"दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥")

चीक, कि मर्शने। इति कविकल्पद्रुमः॥ (चुरां-उभे भां-परं-सकं-सेट्।) किं, चीकयति चीकति। मर्शनं स्पर्शः। तथा च। चन्द्रावतीतरङ्गार्द्रांचीकयन्ति च यदूवपुरिति हलायुधः। वायवः सृप्तगतीत्यर्थः। भट्टमल्लस्तु मर्षेऽयं इति मर्षेऽन्यमर्थं पठित्वा क्षमार्थमाह। इति दुर्गादासः॥

चीड़ा, स्त्री, गन्धद्रव्यविशेषः। चीड़ागन्ध इति ख्याता। तत्पर्य्यायः। दारुगन्धा २ गन्धबधूः ३ गन्धमादनी ४ तरुजा ५ तारा ६ भूतमारी ७ मङ्गल्या ८ कपटिनी ९ यक्षभीतिर्जित् १०। अस्या गुणाः। कटुत्वम्। कासकफनाशित्वम्। दीपनत्वम्। अत्यन्तसेवनात् पित्तदोषप्रशमापहत्वञ्च। इति राजनिर्घण्टः॥

चीनं, क्लो, (चिनोति कीर्त्त्यादिकमिति। चि+ बाहुलकात् नक् दीर्घश्च।) पताका। इति चिकाकश्लेषः॥ सीसकम्। इति रत्नमाला॥

चीनः, पुं, (चीयते सञ्चीयते वृक्षलतादिदोषो यत्र। चि+बाहुलकात् नक् दीर्घश्च।) देशविशेषः। चीना इति भाषा॥ यथा,—

"काश्मीरन्तु समारभ्य कामरूपान्तु पश्चिमे। भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे। मानसेशाद्दक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः॥"

इति शक्तिसङ्गमतन्त्रम्॥

(तद्देशवासिषु तन्नृपेषु च बहुवचनान्तः। यथा, महाभारते। २। २६। ६। [२भवत्॥")

"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत्॥") शुकविशेषः। (यथा, शुकसप्ततौ १ भाङ्के। "चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥") व्रीहिभेदः। तण्डुलः। रत्नविशेषः। इति मेदिनी। ने, ४॥

चीनकः, पुं, (चीन एव। चीन+स्वार्थे कन्।) धान्यविशेषः। चीना इति भाषा॥ तत्पर्य्यायः। काककङ्गुः २। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे। १। ६। २१।

"प्रियङ्गवो नदारालाश्च कोरदूषाः सचीनकाः॥") अस्य गुणाः। ग्रीष्मत्वम्। वायुवर्द्धकत्वम्। पित्तश्लेष्मनाशित्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥ कङ्गुनी। चीनकर्पूरः। इति राजनिर्घण्टः॥ (चीनदेशवासिषु बहुवचनान्तः। यथा, महाभारते। ८। ८। १६।

"सुह्मागङ्गाश्च वादांश्च निषधान् पुलुचीनकान्॥")

चीनकर्पूरः, पुं, (चीननामकः कर्पूरः।) कर्पूरविशेषः। चीनकर्पूर इति देशान्तरीयभाषा॥ तत्पर्य्यायः। चीनकः २ क्षत्रिमः ३ धवलः ४ पटुः ५ मेघसारः ६ तुषारः ७ हीमकर्पूरजः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। ईषच्छीतत्वम्। कफकण्डूदोषक्रिमिनाशित्वम्। मेध्यत्वम्। पावनत्वञ्च। इति राजनिर्घण्टः॥

चीनजं, क्लो, (चीने चीनदेशे जायते इति। जन +डः।) लोहम्। तच्च तीक्ष्णलौहम्। इति राजनिर्घण्टः॥

चीनपिष्टं, क्लो, (चीनस्य सीसकस्य पिष्टं क्षतपेषणं वस्तु चूर्णमित्यर्थः।) सिन्दूरम्। इति हेमचन्द्रः॥ सीसकम्। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। २३। ८५।

"चीनपिष्टमयो लोकचारुश्चैकमयी च भूः॥")

चीनवङ्गं, क्लो, (चीनभवं वङ्गम्।) सीसकम्। इति राजनिर्घण्टः॥

चीनाकः, पुं, (चीनं चीनाकारमकतीति। अक +अच्।) कर्पूरविशेषः। तद्गुणाः। यथा, भावप्रकाशे।

"चीनाकसंज्ञः कर्पूरः कफघ्नयकरः स्मृतः। कुष्ठकण्डूमिहरक्षया तिक्तरसश्च सः॥"

चीनाककर्कटी, स्त्री, (चीनमिव स्वादुः कर्कटी। ततः, पृषोदरात् साधुः।) कर्कटीप्रभेदः। सा तु चित्रकूटदेशे प्रसिद्धा। तत्पर्य्यायः। राजकर्कटी २ सुदीर्घा ३ राजफला ४ बाला ५ कुलककर्कटी ६। अस्या गुणाः। रूक्षत्वम्। शिशिरत्वम्। पित्तदाहश्लेष्मनाशित्वम्। मधुरत्वम्। लघुत्वम्। वृद्धत्वञ्च। इति राजनिर्घण्टः॥

चीभ, ऋ ङ कत्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) कत्थः प्रशंसा। ऋ, अचिचीभत्। ङ, चीभते गुणिनं गुणी ओष्ठ्यकारादिरयमित्येके। इति दुर्गादासः॥

चीय, ऋ च संवृत्यादानयोः। (भ्वां-उभं-सकं-सेट्।) चतुर्थस्वरौ। ऋ, अचिचीयत्। च, चीयति चीयते। इति दुर्गादासः॥

चीरं, क्लो, (चिनोति आवृणोति वृक्षं कटिदेशादिकं वा। चि+"शुचिचिमीनां दीर्घश्च।" उणा। २। २५। इति क्रन् दीर्घश्च।) वृक्षत्वक्। (यथा, रामायणे। ५। ३१। २२।

"प्रागेव तु महाबुद्धिः सौमित्रिर्भ्रातृवत्सलः। पूर्व्वजस्यानुयात्रार्थं हेमचीरैरलङ्कृतः॥") जीर्णवस्त्रखण्डम्। इति शुभूतिः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, भागवते। २। २। ५।

"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")
गोस्तनः । वस्त्रभेदः । (यथा, मनुः ।११।१०१।
"चीरवासा द्विजोऽरण्ये चरेद्ब्रह्मह्णो व्रतम्॥") रेखाभेदः । लेखनभेदः । इति मेदिनी ॥ चूड़ा । (यथा, महाभारते । ३ । ११ । ४६ ।
"सुस्रवन्त्यर्ज्जरीभूता बहुवस्त्रा इव द्रुमाः ।
चीराजीव व्युदस्तानि रेजुस्तत्र महावने ॥")
सीसकम् । इति हेमचन्द्रः ॥

चीरकः, पुं, (चीर+संज्ञायां कन् ।) विक्रियालेखः । विकारलेखनम् । इति विश्वः ॥ (स्वार्थे-कनि चीरशब्दार्थोऽप्यत्र ॥)

चीरपत्रिका, स्त्री, (चीरमिव पत्रमस्य । ततः कन् टापि अत इत्वञ्च ।) चक्षुष्याकः । इति राजनिर्घण्टः ॥

चीरपर्णः, पुं, (चीरमिव पर्णमस्य ।) शालतरुः । इति राजनिर्घण्टः ॥ (विटतिरस्य शालशब्दे विज्ञेया ॥)

चीरिः, स्त्री, (चि+बाहुलकात् क्रिः दीर्घश्च ।) नेत्राञ्जनम् । इति शब्दरत्नावली ॥

चीरिका, स्त्री, (चीरीति शब्दं कायति शब्दायते इति । कै+कः ।) भिक्षी । इति हेमचन्द्रः ॥

चीरितच्छदा, स्त्री, (चीरित: चीरमिव जातश्छदः पत्रं यस्याः ।) पालङ्क्यशाकम् । इति भावप्रकाशः ॥

चीरी, स्त्री, (चीरि+"ऋदिकारादिति ।" वा ङीष् ।) कच्छाटिका । भिक्षी । इति हेमचन्द्रः ॥

चीरुकं, क्ली, (चीं इति शब्दं कृत्वा रौति । रु+क्विप् । चीरुभिर्भक्षीयतङ्गः स इव इति इवार्थे कन् ।) फलविशेषः । चेँचर इतिभाषा ॥ अस्य गुणाः । रुचिदाहकफपित्तकारित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥

चीर्ण, त्रि, (चर+क्तः । पृषोदरात् साधुः ।) भक्षितम् । इति त्रिकाण्डशेषः ॥

चीर्णपर्णः, पुं, (चीर्णं विदीर्णं पर्णमस्य ।) निम्बवृक्षः । खर्ज्जूरवृक्षः । इति मेदिनी ॥

चीलिका, स्त्री, (चीरिका+रस्य लत्वे साधुः ।) चीरिका । भिक्षी । इति शब्दरत्नावली ॥

चील्लका, स्त्री, (चीलिका+पृषोदरात् साधुः । चीलिति शब्देन लक्ष्यते इति । लक्ष+घञ् । ततः पृषोदरादित्वात् साधुः इति वा ।) भिक्षी । इति शब्दरत्नावली ॥

चीव, ऋ न गतौ । संवृतौ । इति कविकल्पद्रुमः ॥ (भ्वां उभं-सकं-सेट् ।) ऋ, अचिचीवत् । न, चीवति चीवते वस्त्रलं भिक्षुः । यत्नाति परिदधाति वेत्यर्थः । इति दुर्गादासः ॥

चीव, क्र दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, चीवयति । इति दुर्गादासः ॥

चीवरं, क्ली, (चीयते तन्तुसन्तानेरिति । चि+"चिवरच्छावरधीवरेति ।" उणां । ३ । १ । इति वरच् । निपातनात् धातोर्दीर्घत्वे साधुः ।) भिक्षुवस्त्रम् । इत्यमरादिकोषः ॥ (यथा, महाभारते । १ । ६१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोचरगतो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥")

चीवरी, [न्] पुं, (चीवरं अस्त्यस्येति । इनिः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

चुक्क, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः पञ्चमस्वरमध्यः । अग्निः पौड़नम् । क, चुक्कयति शूलं शूरः । इति दुर्गादासः ॥

चुक्कारः, पुं, (चुक्क+भावे अप् । चुक्कं पौड़नं आराति सम्यक् ददातीति । सिंहनादश्रवणेन भीरूणां भयजनकत्वात्तथात्वम् । आ+रा+कः ।) सिंहनादः । इति त्रिकाण्डशेषः ॥

चुक्रं, क्ली, (चक्यते क्षय्यतेऽनेन इति । चक+"चक्रिरम्योरुचोपधायाः ।" उणां । २ । १४ । इति रक् उपधायाश्च उत्वं ।) अम्लद्रव्यविशेषः । महादा इति ख्यातम् । तत्पर्य्यायः । तिन्तिड़ीकम् २ तृणाम्लम् ३ । इत्यमरः । २ । ६ । ३५ ॥ चुक्रकम् ४ । इति शब्दरत्नावली ॥ महाम्लम् ५ । इति जटाधरः ॥ (अम्लतृणकम् ६ । इति भावप्रकाशः । १ । १ ॥) पत्रशाकविशेषः । चुक इति भाषा ॥ तत्पर्य्यायः । चुक्रवास्तूकम् २ लिकुचम् ३ अम्लवास्तुकम् ४ दशाम्लम् ५ अम्लशाकाख्यम् ६ अम्लादि ७ द्विदलमोचिका ८ । अस्य गुणाः । अम्लपत्रत्वम् । लघुत्वम् । उष्णत्वम् । वातगुल्मनाशित्वम् । रुच्यत्वं वातपित्तकारित्वम् । पथ्यत्वम् । तत्पर्य्यायगुणाः ।
"चुक्रिया स्यात्तु पत्राम्ला रोचनी श्रुतवेधिनी ।
चुक्रा लम्बतरा स्वाद्वी वातघ्नी कफपित्तलृत् ॥
रुच्या लघुतरा पाके तृष्णाके नातिरोचनी ॥"
इति भावप्रकाशः ॥ * ॥
("चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥
वमिष्ण्वास्यवैरस्यकृत्तृपीड़ावह्निमान्द्यकृत् ॥"
इति शब्दार्थचिन्तामणिधृतवैद्यकम् ॥)
त्रायमाणप्रभेदः । तत्पर्य्यायः । सहस्रवेधम् २ रसाम्लम् ३ चुक्रवेधकम् ४ शाकाम्लभेदनम् ५ चन्द्रम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य गुणाः । तिक्तत्वम् । अम्लत्वम् । स्वादुत्वम् । कफपित्तनाशिकारोगदुर्गन्धग्निरोरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥*॥ सन्धानवर्गविशेषः । यथा,
"यव्यक्षादिघृतौ भार्ङ्गे सगुड़ञ्चौद्रकाक्षिकम् ।
धान्यराशौ चिरात्तस्यं युक्तं चुक्रं तदुच्यते ॥
द्विगुणं गुड़मध्वारवालमस्तु क्रमादिह ॥"
इति परिभाषा ॥
(अस्य लक्षणं यथा,—
"विगते संहितो यस्तु तच्चुक्रमभिधीयते ॥"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ॥)

चुक्रः, पुं, (चक्यते क्षय्यतेऽनेनेति । चक+रक् उपधायाश्च उत्वं ।) अम्लः । अम्लवेतसः । इति विश्वः ॥

चुक्रकं, क्ली, (चुक्र+संज्ञायां कन् ।) शाकविशेषः । चुकापालङ्ग इति भाषा ॥ अस्य गुणाः । दुर्ज्जरत्वम् । भेदकत्वम् । वायुनाशित्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (चुक्रार्थे स्वार्थे कन् ॥)

चुक्रफलं, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति वा । फल+अच् ।) तृणाम्लम् । इति राजनिघण्टः ॥ (तृणाम्लशब्देऽस्य विशेषो ज्ञातव्यः ॥)

चुक्रा, स्त्री, (चुक्रः अम्लत्वं विद्यतेऽस्या इत्यच् टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ३५ ॥ आमरुल इति भाषा ॥ (अस्या गुणा यथा,—
"चुक्रा लम्बतरा स्वाद्वी वातघ्नी कफपित्तलृत् ।
रुच्या लघुतरा पाके तृष्णाके नातिरोचनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
तिन्तिड़ी । इति शब्दरत्नावली ॥ (यथास्याः पर्य्यायाः भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च विघिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")

चुक्राम्लं, क्ली, (चुक्रमिव अम्लम् । चुक्रवदम्लोऽपि च इति वा ।) तृणाम्लम् । इति राजनिर्घण्टः ॥ (तृणाम्लशब्दे विटतिरस्य ज्ञेया ॥)

चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लत्वं विद्यतेऽस्याः । अच् टाप् च ।) अम्लवेतिका । चिञ्चा । काम्लिकभेदः । इति राजनिर्घण्टः ॥

चुक्रिका, स्त्री, (चुक्रो विद्यतेऽस्मिन् इति । ठन् टाप् च ।) अम्लवेतिका । इत्यमरः । २ । ४ । १४० ॥ (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्लवेतसाम्लिका ।
आम्लान्तकस्तु शफरी कुशली चाम्लपत्रकः ॥")
कुचाङ्गेरी । इति रत्नमाला ॥ चुकापालङ्ग इति भाषा ॥ (यथास्याः पर्य्यायाः ।
"चुक्रिका स्यात्तु पत्राम्ला रोचिनी श्रुतवेधिनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
तिन्तिड़ी । तत्पर्य्याया यथा, तत्रैव ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ॥
अम्ला च विघिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")

चुचुकं, क्ली, (चुचु इत्यव्यक्तशब्देन कायति पानकाले इति । कै+कः ।) कुचाग्रम् । तत्पर्य्यायः । चूचुकम् २ चुचूकम् ३ । इति शब्दरत्नावली ॥ कुचाननम् ४ । पुंलिङ्गोऽपि । इति रत्नकोषः ॥ स्तनतुण्डम् ५ । इत्यमरटीकायां भरतः ॥ (देशविशेषे तद्देशवासिषु च पुं । यथा, महाभारते । १२ । २०७ । ४२ ।
"दक्षिणापथजञ्चान: सर्व्वे नरवरान्वयाः ।
गुहाः पुलिन्दाः शबराश्चुचुका मद्रकैः सह ॥")

चुचूः, पुं, सुनिषण्णशाकम् । इति त्रिकाण्डशेषः ॥

चुचूकं, क्ली, (चुचुक+पृषोदरादित्वात् दीर्घः ।) चुचुकम् । इति शब्दरत्नावली ॥

चुच्छ, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकच्छ-सेट् ।) तालव्यवर्गाद्योपधः । पच्छ-

मखरी। ईं, पुक्तः। यद्दयान्तोऽयमित्येके। अभिषवः स्नानं मद्यपानं पीड़नं सन्धानञ्च। इति दुर्गादासः॥

चुचुः, पुं, क्षुक्षुन्दरिः। इति हारावली। ८३॥ (सङ्करजातिविशेषः। यथा, मनुः। १०। ४८। "मेदान्ध्रचुचुमद्गूगामारवयपशुहिंसनम्॥")

"चुचुर्मदगुरुश्चैव हैहकवन्दिस्त्रियोर्नाऽऽसीन जातौ वौधायनेनोक्तौ बोद्धव्यौ।" इति तट्टीकायां कुल्लूकभट्टः॥ आकरशोक्तप्रत्ययविशेषः। स तु प्रसिद्धार्थे भवति। यथा, विद्यया वित्तो विद्याचुचुः। इति सिद्धान्तकौमुदी॥ स्त्री, उद्भिज्जविशेषः। चेचुना इति लोके। गाड़ीचवत्। अस्या पर्य्यायो गुणाश्च यथा,—

"चिञ्चा चञ्चुश्चुकी च दीर्घपत्रा सतिक्तका। चुचुः शीता सरा बल्या स्वादुर्दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"गुवर्चलाया चुच्चोर्वा लोणिकाया रसैरपि॥"

इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

चुचुरी, स्त्री, (चुचुरिव रातीति। रा+कः। स्त्रियां ङीप्।) तिन्तिड़ीवृक्षः। इति त्रिकाण्डशेषः॥ काँइवीचिर खेजा इति भाषा॥

चुचुली, स्त्री, (चुचुरी। स्वार्थे लत्वम्।) तिन्तिड़ीकास्थिभिर्द्यूतक्रीड़ा। इति हारावली। ६२॥

चुट, तुच्छने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। चोटति नदी ग्रीष्मे। इति दुर्गादासः॥

चुट, इ तुच्छने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। इ, चुण्टते नद्या ग्रीष्मे। इति दुर्गादासः॥

चुट, इ क छेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, चुण्टयति धान्यं लोकः। इति दुर्गादासः॥

चुट, क्ष्वि छेदे। इति कविकल्पद्रुमः। (चुरां-तुदां-पर-सकं-सेट्।) क, चोटयति। क्ष्वि, चुटति अचुटीत्। इति दुर्गादासः॥

चुड्ड, क तुच्छने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) टद्वयान्तः। पञ्चमस्वरः। एकटकार इति रामः। तुच्छनमल्पीभावः। क, चुड्डयति नदी ग्रीष्मे। इति दुर्गादासः॥

चुड, इ तौच्छ्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) इ, चुड्डते। तौच्छ्यमल्पीभावः। इति दुर्गादासः॥

चुड, इ क छिदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, चुड्डयति। इति दुर्गादासः॥

चुड, इ क रोषे। (चुरां-परं-अकं-सेट्।) इ क, चुड्डयति। इति दुर्गादासः॥

चुड, इ ड रोषे। (भ्वां-आत्मं-अकं-सेट्।) इ, चुड्डते। ड, चुड्डते। इति दुर्गादासः॥

चुड्ड, क्षतौ। क्षावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्।) टवर्गद्वितीयोपधः। क्विपि संयोगान्तलोपे चुड्। कातन्त्रादौ क्षावकरण इत्येकोऽर्थो दृश्यते। अमी क्षावाः क्रियाः शब्दकारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो क्षाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताधरं कान्तः। इति दुर्गादासः॥

चुण, श्नि छिदि। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श्नि, चुणति अचुणीत् चुच्चोय। इति दुर्गादासः॥

चुण्टा, स्त्री, (चुण्टतेऽसाविति। चुण्ट छेदे+घञ्। यद्वा चुण्टिकाखननेन जायमानत्वात्तथात्वम्।) कूपः। इति त्रिकाण्डशेषः॥

चुण्टी, स्त्री, कूपः। इति त्रिकाण्डशेषः॥ उपकूपम्। कूप समीपे खल्पजलाधारः। इति हेमचन्द्रः॥

चुत, इर् क्षरे। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं सेट्। अकं-इति केचित्।) इर्, अचुतत् अचोतीत्। क्षर इह आसेचनम्। चोतति क्षतं वह्नौ यज्वा आसिञ्चतीत्यर्थः। इति दुर्गादासः॥

चुतः, पुं, (चोतति क्षरति मलश्लेष्मशोणितादिर्यस्मात्। चुत+घञर्थे कः।) गुदद्वारम्। इति शब्दरत्नावली॥

चुतिः, स्त्री, (चोतति क्षरति मलश्लेष्मशोणितादिर्यस्याः। चुत+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) गुदद्वारम्। इति शब्दरत्नावली॥

चुद, क तुदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) तुदि प्रेरणे। क, चोदयति वाणं चापः। इति दुर्गादासः॥

चुद्ड, क्षतौ। क्षावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्।) तवर्गद्वितीयोपधः। क्विपि संयोगान्तलोपे चुद्। कातन्त्रादौ क्षावकरण इत्येकोऽर्थो दृश्यते। अमी क्षावाः क्रियाः शब्दकारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो क्षाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताधरं कान्तः। इति दुर्गादासः॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थः। गायकादीनिति। चुद+कः। निपातनात्नुमागमः। ततः स्त्रियां ङीप्।) छुछुन्दरी। इति हेमचन्द्रः। ३। १६०॥

चुप, अनैर्शब्दौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चोपति खड्गः। चोपति दुष्टं राजा। इति रमानाथः। इति दुर्गादासः॥

चुब, इ कि चुम्बने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) चुम्बनं सुखसंयोगः। इ, चुम्बयते। कि, चुम्बयति चुम्बति कान्ताधरं कामी। प्रियासुखं किम्पुरुषश्चुम्बे॥ इति यतीहारे आत्मनेपदम्। इति दुर्गादासः॥

चुम्बं, क्ली, (चुम्बतेऽनेनाच वा। क्षावे चुम्बने +"अन्येभ्योऽपीति।" उणां। २। २८। इति रप्रत्ययो नकारलोपश्च।) वदनम्। इत्यादिकोषः॥

चुम्बकः, पुं, (चुम्बति आकर्षति लौहमिति। चुम्ब+ण्वुल्।) कान्तलोहभेदः। तत्पर्य्यायः। कान्तपाषाणः २ अयस्कान्तः ३ लोहकर्षकः ४। अस्य गुणाः। लेखनत्वम्। शीतत्वम्। मेदोविषगरापहत्वञ्च। इति भावप्रकाशः॥ (विशेषोऽस्य कान्तलोहशब्दे ज्ञेयः॥) घटस्योर्द्धावलम्बनम्। इति मेदिनी। के, ८६॥

चुम्बकः, त्रि, (चुम्बतीति। चुम्ब+ण्वुल्। चुम्बनपरः। धूर्त्तः। बहुग्रन्थकदेशज्ञः। इति मेदिनी। के, ८६।

चुम्बनं, क्ली, (चुम्ब इ कि चुम्बने+भावे ल्युट्।) सुखसंयोगः। चुमा इति भाषा॥ तस्य स्थानानि यथा, कामशास्त्रे।

"सुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि।
गण्डे च कर्णरोश्चैव कक्षोरुभगमर्द्दने।
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह॥"

चुर, कि क्षेपे। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, चोरयति चोरति धनं चौरः। इति दुर्गादासः॥

चुरा, स्त्री, (चुर+बाहुलकात् कः। स्त्रियां टाप्।) चौर्य्यम्। इति शब्दरत्नावली॥

चुरी, स्त्री, (चुर+कः। स्त्रियां ङीप्।) उपकूपम्। कूपसमीपस्थाल्पजलाधारः। इति हेमचन्द्रः। ४। १५६॥

चुलुकं, क्ली, (चोलयतीति। चुल+बाहुलकात् उकञ्।) मांसमज्जनजलम्। यथा। मांसमज्जनजलमात्रां तच्चुलुकमिति मद्दोपनिषत्॥

चुलुकः, पुं, (चोलयति उन्नतो भवतीति। चुल उन्नतौ+बाहुलकात् उकञ्।) घनपङ्क्तिः। इति त्रिकाण्डशेषः॥ प्रस्थतिः। भाण्डप्रभेदः। इति हेमचन्द्रः॥

चुलुकी, [न्] पुं, (चुलुक ऊर्द्धोन्नतिर्विद्यतेऽस्य। चुलुक+इनिः।) शिशुमारावस्थतिमत्स्यः। इति शब्दरत्नावली॥ (यथा, वाभटे सूत्रस्थाने। ६।५८।

"चुलुकी नक्रमकरशिशुमारतिमिङ्गिलाः।
राजीपिलिचिमाद्याश्च मांसमित्याहुरुद्धा॥")

चुलुम्प, लोपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) अन्तःस्थद्वितीयमध्यः। पञ्चमस्वरद्वयी। ओष्ठ्यवर्गशेषोपधः। चुलुम्पति। यगादौ चुलुम्प्यते इत्यादि। न तु नकारजावनुस्वारपञ्चमाविति स्वरसाम्प्रकृतित्वे यगादौ तल्लोप इति वाच्यम्। तर्हि नोपधस्थेव पठितुमुचितत्वात्। एवं सति अङ्कादीनां न प्रकृतित्वेऽपि ङमध्यपाठः कथमिति चेन्न। ते तु कस्यचिन्मते ङमध्या एवेति ज्ञापनाय ङमध्याः पठिताः। न च तर्हि इदित् पाठोऽपौरुषेयत्वादिति वाच्यम्। क्विपि संयोगान्तलोपे इदितपाठे चुलुम् चुलुम्प लोपे चुलुम् इति भेदात्। एवं सर्व्वत्र। इति दुर्गादासः॥

चुलुम्पः, पुं, (चुलुम्प्यते इति चुलुम्पनमिति वा। चुलुम्प+भावे घञ्।) वाससाञ्जनम्। इति जटाधरः॥

चुलुम्पा, स्त्री, (चुलुम्पति चञ्चला भवतीति। चुलुम्प+अच्। स्त्रियां टाप्।) छागी। इति चिकाण्डशेषः॥

चुलुम्पी, [न्] पुं, (चुलुम्पो लौल्यं चञ्चलता इत्यर्थः। सोऽस्यास्तीति। इनिः।) शिशुमाराकृतिमत्स्यः। उत्पलमत्स्यः। इति कश्चित्। इति शब्दरत्नावली॥

चुल्ल, हावक्रतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी लङ्यान्तः। एकोऽर्थः। चुल्लन्ति चारुनयनाश्च सह प्रियेणेति हलायुधः। इति दुर्गादासः॥

चुल्लः, पुं, क्लिन्नचक्षुः। (क्लिन्ने चक्षुषी अस्य। "चुल् च।" ५। २।३३। इत्यस्य वार्त्तिकोक्त्या क्लिन्नस्य चुलादेशो लप्रत्ययश्च।) तदयुक्तेऽपि। इति हेमचन्द्रः। ३। १२५॥

चुल्लकी, स्त्री, (चुल्लति हावभावेन क्रीड़तीति। चुल्ल+ण्वुल्। गौरादित्वात् ङीष्।) शिशुमारः। कुण्डीभेदः। कुलविशेषः। इति मेदिनी शब्दरत्नावली च॥

चुल्लिः, स्त्री, (चुल्लते प्रज्वाल्यते अग्निरत्र। चुल्ल+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्। यद्वा, चुद्यते प्रेर्य्यते अग्निर्यत्र। चुद्+वाहुलकात् लिक्।) पाकार्थमग्निस्थानम्। चुल्ला इति आखा इति च भाषा॥ तत्पर्य्यायः। अश्मन्तम् २ उद्धानम् ३ अधिश्रयणी ४ अन्तिका ५। इत्यमरः। २। ६।२६॥ अश्मन्तम् ६ उधानम् ७ उद्धारम् ८ चुल्ली ९ आन्दिका १०। इति तट्टीका॥ उद्धानिः ११। इति शब्दरत्नावली॥

चुल्लो, स्त्री, (चुल्लि+"कृदिकारादक्तिनः।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) चिता। उद्धानम्। इति मेदिनी। ले, १७॥ (यथा, मनुः। ३। ६८।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥")

चुल्लं, क्ली पुं, वृत्तम्। तत्तु मांसपिण्डकविशेषः॥ स्थालीभृष्टमांसम्। पनसादिफलस्यासारभागः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ भोता इति ख्यातः॥

चूचुकं, क्ली पुं, (चूष्यते पीयते इति। चूष पाने+वाहुलकात् उकः। षस्य चत्वञ्च।) चुचुकम्। इत्यमरटीकायां भरतः॥ (यथा, रामायणे। ६। २३। १३।

"स्तनौ च विरलौ पीनौ समौ मे मत्तचूचुकौ॥")

चूड़कः, पुं, (चुडति अल्पीभवतीति। चुड़+ण्वुल् ततो निपातनात् दीर्घत्वे साधुः।) कूपः। इति चिकाण्डशेषः॥

चूड़ा, स्त्री, (चोलयति मस्तकादुपरि उन्नता भवतीति। चुल क् उन्नतौ+भिदादित्वाड्ड ततो दीर्घस्तोलस्य ड़त्वे साधुः।) मयूरशिखा। शिरोमध्यशिखामात्रम्। तत्पर्य्यायः। शिखा २। इत्यमरः। २। ५। ३२॥ केशपाशौ ३। जूटिका ४ जुटिका ५। यथा, शब्दरत्नावल्याम्।

"शिखा चूड़ा केशपाशौ जूटिका जुटिकेत्यपि।
शिरोमध्यवड्डचूड़े भवेदेतत्तु पञ्चकम्॥"

वड़भी। वाहुभूषणम्। इति मेदिनी। ड़े, १२॥ अग्रम्। इति हेमचन्द्रः॥ (यथा, हितोपदेशे।

"अस्माचलचूड़ालम्बिनि भगवति चन्द्रमसि॥")

कूपः। इति चिकाण्डशेषः॥ दग्धसंस्कारान्तर्गतसंस्कारविशेषः। यथा। चूड़ा कार्य्या यथाकुलमिति मलमासतत्त्वम्॥ (यथाच,—

"अयुग्माब्दे तथा मासि चूड़ा भौमशनीतरे।
अर्केन्दुकालशुद्धौ च जन्ममासेऽष्टमेऽपि वा॥
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते॥"

इति संस्कारतत्त्वधृतज्योतिषवचनम्॥

अस्य विशेषविवरणं चूड़ाकरणशब्दे द्रष्टव्यम्॥)

चूड़ाकरणं, क्ली, (चूड़ायाः करणं कर्म्म।) दग्धसंस्कारान्तर्गतसंस्कारविशेषः। तस्य क्रमो यथा। कुलाचारवशात् प्रथमे द्वितीये वा वर्षे चूड़ाकरणं कर्त्तव्यम्। तत्र प्रथमं प्रातःस्नातस्नानः स्नातदृङ्माङ्गः पिता सत्यनामानमग्निं संस्थाप्य विरूपाक्षजपान्तं कृत्वाग्निकां समाप्याग्नेयदक्षिणत एकविंशतिदर्भपिञ्जलीः सप्तसप्तभिरेकीकृत्य कृत्वान्तरेण वेष्टयित्वा उष्णोदकसहितं कांस्यपात्रं ताम्रनिर्म्मितक्षुरं तदभावे दर्पणं वा लौहक्षुरपार्श्वे नापितं स्थापयेत् अग्नेरुत्तरतो दृषदोमयं तिलतण्डुलमाषसिद्धञ्च क्षुरं अग्नेः पूर्ब्बतो मिश्रितव्रीहियवतिलमाषपूरितपात्रत्रयं स्थापयेत्। माता शुचिना वस्त्रेण कुमारमाच्छाद्य क्रोड़े निधाय अग्नेः पश्चिमतो भर्त्तुर्व्वामपार्श्वे उत्तराग्रेषु कुशेषु प्राङ्मुखी उपविशति। ततः पिता प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा यत्तसमस्तमहाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भूः स्वाहा। प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ओँ स्वः स्वाहा। प्रजापतिर्ऋषिर्बृहती छन्दः प्रजापतिर्देवता यत्तसमस्तमहाव्याहृतिहोमे विनियोगः। ओँ भूर्भुवः स्वः स्वाहा। ततः पिता उत्थाय प्राङ्मुखः कुमारस्य मातुः पश्चादवस्थितः क्षुरपार्श्वं नापितं पश्यन् तमेव सवितृरूपं ध्यायन् जपति। प्रजापतिर्ऋषिः सविता देवता चूड़ाकरणे विनियोगः। ओम् आयमगात् सविता क्षुरेण। तत उष्णोदकसहितं कांस्यपात्रं पश्यन् वायुं मनसा ध्यायन् जपति। प्रजापतिर्ऋषिर्वायुर्देवता चूड़ाकरणे विनियोगः। ओँ उष्णेन वाय उदकेनैधि। ततः कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन दक्षिणकपुञ्जिकामन्त्रेण क्लेदयति। कपुञ्जिकाशब्देन दक्षिणोत्तरतः शिखास्थानादधः शिरसः कर्णाभिसुखोचदेशः उच्यते। ततः प्रजापतिर्ऋषिरापो देवता चूड़ाकरणे विनियोगः। ओम् आप उदन्तु जीवसे। ततस्ताम्रक्षुरं तदभावे दर्पणं वा पश्यन् जपति। प्रजापतिर्ऋषिर्विष्णुर्देवता चूड़ाकरणे विनियोगः। ओँ विष्णोर्दंष्ट्रोऽसि। ततः कुशवद्धसप्तदर्भपिञ्जलीर्गृहीत्वा क्षिप्तदक्षिणकपुञ्जिकादेशे अनेन मन्त्रेण ऊर्द्धमूला निदध्यात्। प्रजापतिर्ऋषिरोषधिर्देवता चूड़ाकरणे विनियोगः। ओम् ओषधे त्रायस्वैनम्। ततो वामहस्तगृहीतकुशपिञ्जलीसहितकपुञ्जिकादेशे स्वदक्षिणहस्तगृहीतताम्रक्षुरं दर्पणं वा अनेन मन्त्रेण निदध्यात्। प्रजापतिर्ऋषिः स्वधितिर्देवता चूड़ाकरणे विनियोगः। ओँ स्वधिते मैनं हिंसीः। ततः केशच्छेदो यथा न भवति तथा ताम्रक्षुरं दर्पणं वा तत्रैव कपुञ्जिकादेशे अनेन मन्त्रेण प्रेरयेत्। प्रजापतिर्ऋषिः पूषा देवता चूड़ाकरणे विनियोगः। ओँ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय बलाय वर्च्चसे। तूष्णीं वारत्रयम्। ततो लौहक्षुरेण दक्षिणकपुञ्जिकादेशस्य केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य वालमिश्रविधृतपात्रस्थदृषद्गोमयोपरि निधानं कुर्य्यात्। ततः कपुच्छलदेशस्य कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन पूर्ब्ववदेव आप उन्दन्तु जीवसे इत्यनेन मन्त्रेण क्लेदनं ओँ विष्णोर्दंष्ट्रोऽसि इत्यनेन ताम्रक्षुरस्य दर्पणस्य वा प्रेरणं ओम् ओषधे त्रायस्वैनं इत्यनेन कपुच्छलदेशे ऊर्द्धमूलदर्भपिञ्जलीनिधानं ओँ स्वधिते मैनं हिंसीरित्यनेन ताम्रक्षुरस्य दर्पणस्य वा कपुच्छलदेशे निधानं ओँ येन पूषा बृहस्पतेरित्यनेन पूर्ब्वाभिमुखं ताम्रक्षुरप्रेरणं लौहक्षुरेण कपुच्छलदेशस्य केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य वालमिश्रविधृतपात्रस्थदृषद्गोमयोपरि निधानं कुर्य्यात्। कपुच्छलशब्देन पश्चिमतः शिखास्थानादधःशिरसो नापितक्रोड़ाभिमुखोचदेशोऽभिधीयते। तथैव वामकपुञ्जिकाभावनादिच्छेदनपूर्ब्वकं दृषद्गोमयोपरिदेशे निधानान्तं पूर्ब्ववत् सर्व्वं कुर्य्यात्। ततः कुमारस्य शिरः पाणिभ्यामुपगृह्य जपति। प्रजापतिर्ऋषिर्गायत्री छन्दो जमदग्निकश्यपागस्त्यादयो देवताश्चूड़ाकरणे विनियोगः। ओँ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्नोऽस्तु त्र्यायुषम्। ततोऽग्नेरुत्तरदेशं नीत्वा पुण्याहजलदृतो नापितः कुमारं स्नापयति। सर्व्वमेव केशं दृषद्गोमयोपरि निधायारण्ये वंशविटपे स्थापयेत् ततः पूर्ब्ववत् यत्तसमस्तमहाव्याहृतिहोमं हुत्वा तूष्णीं प्रादेशप्रमाणघृताक्तसमित्प्रक्षेपान्तप्रकृतं कर्म्म समाप्य उदीच्यं प्राचार्य्यानहोमादिवामदेवगानान्तं कर्म्म निर्व्वर्त्य कर्म्मकारयितृब्राह्म-

लाय दक्षिणां दद्यात्। क्षुरघान्ययवतिलमाषश्वरावान् नापिताय दद्यात्। इति चूड़ाकरणं समाप्तम्॥" इति भवदेवभट्ट:॥

चूड़ामणि:, पुं, (चूड़ा शिरोभूषणं मुकुटकिरीटादिकम्। तत्र स्थितो मणि:। शाकपार्थिवादिवत् समास:।) शिरोरत्नम्। (यथा, महाभारते। १। ११६। ३८।

"ततश्चूड़ामणिं निष्कमङ्गदे कुण्डलानि च॥"

चूड़ायामयभागे मणिरिव यस्य।) काकचिञ्चाफलम्। इति मेदिनी। णे, ६४॥ योगविशेष:। (स तु ग्रहणकाले एव भवति।) यथा गारुड़े।

"सूर्य्यग्रह: सूर्य्यवारे सोमे सोमग्रहस्तथा।
चूड़ामणिरयं योगस्तत्रानन्तं फलं स्मृतम्।
अन्यस्मादृग्रहणात् कोटिगुणमत्र फलं लभेत्॥"

इति तिथ्यादितत्त्वम्॥

शुभाशुभगणनाविशेष:। तस्य विवरणं गरुड़पुराणे २०५ अध्याये द्रष्टव्यम्॥ * ॥ वङ्गदेशीयपण्डितोनासुपाधिश्च॥

चूड़ाम्रं, क्ली, (चूड़ायां अग्रभागे आम्रो यस्य।) वृक्षाम्रम्। इति राजनिर्घण्ट:॥

चूड़ालं, क्ली, (चूड़ा अस्त्यस्य। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ६६। इति लच्।) मस्तकम्। इति शब्दरत्नावली॥ चूड़ायुक्ते त्रि। इति हेमचन्द्र:॥ (यथा, महाभारते। १०। ७। ३७।

"चूड़ाला: कर्त्तिकाराश्च प्रवृद्धा: पिठरोदरा:॥")

चूड़ाला, स्त्री, (चूड़ा शिखा अस्त्यस्या:। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ६६। इति लच्। ततोऽजादित्वात् टाप्।) उच्चटाख्यम्। इत्यमर:। २। ४। १६०॥ श्वेतगुञ्जा। नागरमुस्ता। इति राजनिर्घण्ट:॥

चूड़ावान्, [त्] (चूड़ा अस्त्यस्य। चूड़ा+मतुप्। मस्य वत्वम्।) चूड़ाविशिष्ट:। इति चूड़ालाशब्दार्थे मेदिनी। ले, ६०॥

चूण, क सङ्कोचे। इति कविकल्पद्रुम:॥ (चुरां-परं-अकं-सेट्।) तालव्यवर्गादि:। षष्ठस्वरी। क, चूणयति चक्षु: सङ्कुचितं स्यादित्यर्थ:। इति दुर्गादास:॥

चूत:, पुं, (चूष्यते पीयते इति। चूष+कर्म्मणि क्त:। पृषोदरादित्वात् धलोप:। रसालत्वादेवास्य तथात्वम्।) आम्रवृक्ष:। इत्यमर:। २। ४। ३३॥ (यथा, रामायणे। ३। ७६। १७।

"परिपुष्पति संविश्य भ्रमरश्चूतमञ्जरीम्।
नवसङ्गमसंहृष्ट: कामी प्रणयिनीमिव॥"

चोतति चरति श्लोणितादिकमस्मादिति। चुत+चरणे+बाहुलकात् घञर्थे क:। दीर्घश्च।) गुदद्वारम्। इति शब्दरत्नावली॥ चूत इत्यपि पाठ:॥

चूतक:, पुं, (चूत एव। चूत+स्वार्थे कन्।) आम्र:। कूपक:। इति मेदिनी। के, ६०॥

चूर, इं ङ य दाहे। इति कविकल्पद्रुम:॥ (दिवां-आत्मं-सकं-सेट्। (दीर्घो। ङ य, चूर्य्यते वह्निरित्यनम्। इं, चूर्ण:। इति दुर्गादास:॥

चूर्ण, क पेषे। इति कविकल्पद्रुम:॥ (चुरां-परं-सकं-सेट्।) षष्ठस्वरी। पेषञ्चूर्णीकरणम्। क, चूर्णयति शिला। इति दुर्गादास:॥

चूर्ण, क्ली, (चूर्ण्यते पिष्यते यत्। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरज:। तस्य लक्षणं यथा,—

"अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रज: क्षोदस्तन्मात्रा कर्षसम्मिता॥
चूर्णे गुड़: समो देय: शर्करा द्विगुणा मता।
चूर्णेषु भर्ज्जितं हिङ्गु देयं नोत्क्लेदलक्षवेत्॥
लिहेच्चूर्णं द्रवै: सर्व्वैर्घृताद्यैर्द्विगुणोक्तितै:।
पिबेच्चतुर्गुणैरेव चूर्णमालोड़ितं द्रवै:॥
चूर्णावलेहगुटिका कल्कानामनुपानकम्।
पित्तवातकफघ्नेन त्रिभ्वेकफलमाहरेत्॥"

इति भावप्रकाश:॥ * ॥

चूर्णौषधस्य पूर्ववीर्य्यं पक्षत्रयपर्य्यन्तं तिष्ठति। इति वैद्यकपरिभाषा॥

("कर्षचूर्णस्य कल्कस्य गुड़िकानाञ्च सर्व्वश:। द्रवशुक्ला स लेह्यश्च: पातव्यश्च चतुर्द्रव:॥" इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

आवीर इति ख्यातम्। (यथा, मेघदूते। ७०।

"अर्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्रीमूढ़ानां भवति विफला प्रेरणा चूर्णमुष्टि:॥")

पटरसाच्चोद इत्यन्ये। इति भरत:॥ गन्धगुँड़ा इति ख्यातम्। इति सारसुन्दरी॥ तत्पर्य्याय:। वासयोग:। २। इत्यमर:। २।६।१३४॥ वासयुक्ति:। ३। इति मेदिनी। ने, १२॥ गन्धयुक्ति:। ४। इति भूरिप्रयोग:॥ पटयुक्ति:। ५। इति शब्दरत्नावली॥ (कुङ्कुमादिरज:। यथा, रघु:। ४। ५४।

"अलकेषु चमरेषु चूर्णप्रतिनिधीकृत:॥")

चूर्ण:, पुं, (चूर्ण्यते सम्पिष्यते इति। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरज:। चूर इति गुँड़ा इति फाकि इति च भाषा॥ तत्पर्य्याय:। चोद:। २। इत्यमर:। २। ८। ६६॥ चूर्णम् ३ रज:। ४। इति भावप्रकाश:॥ (यथा, महाभारते। ६। ११८। ३।

"कन्याश्चन्दनचूर्णैश्च लाजैर्माल्यैश्च सर्व्वश:।
अवाकिरञ्छान्तनवं तत्र गत्वा सहस्रश:॥")

धूलि:। चारविशेष:। इति मेदिनी। ने, १२॥ चूण इति भाषा॥ (यथा,—

"पर्णानि शीर्णवर्णानि सीदन्त्यार्कर्णलोचने!।
चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!॥")

श्लेष्मस्य गुण:। वातश्लेष्मभेदोनाग्निबल्यम्॥ शुद्धचूर्णस्य गुणा:। कटुत्वम्। चारत्वम्। उष्णत्वम्। कृमिनाशित्वञ्च। इति राजवल्लभ:॥

चूर्णकं, क्ली, (चूर्ण इव कायतीति। चूर्ण+के+क:।) गद्यविशेष:। यथा,—

"अपाद: पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदत:॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदु:।
तत्तु वैदर्भरीतिस्थं गद्यं क्षुद्रसरं भवेत्॥

भवत्युत्कलिकाप्रायं समासाढ्यं दृढ़ाक्षरम्। वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुन: स्मृतम्॥

चूर्णकं यथा। स हि त्रयाणामेव जगतां गति: परमपुरुष: पुरुषोत्तमो दमदानवभरेण भङ्गुराङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशे अवततार।" इति छन्दोमञ्जरी॥ (क्वचित् वृत्तकं इत्यपि दृश्यते॥)

चूर्णक:, पुं, (चूर्णै: कायते प्रकाश्यते इति। के+क:।) सक्तु:। इति त्रिकाण्डशेष:॥ (वष्टिक:। यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "वष्टिकाङ्कुकसुकुन्दकपीतकप्रभेदककाकलकासनपुष्पकमहावष्टिकचूर्णककुरवककेदारकप्रभृतय: वष्टिका:॥") स्वार्थे क। चूर्णशब्दार्थोऽप्यत्र॥

चूर्णकार:, पुं, (चूर्णं चारविशेषं करोतीति। चूर्ण+कृ+"कर्म्मण्यण्।" ३। २। १ इत्यण्।) वर्णसङ्करजातिविशेष:। चूनरी इति भाषा॥ स नटकन्यायां पुल्कशात्। इति पराशरपद्धति:॥

चूर्णकुन्तल:, पुं, (चूर्णं वासयोगसदृशयुक्त: कुन्तल:। शाकपार्थिवादिवत् समास:।) अलक:। इत्यमर:। २। ६। ६६॥

चूर्णखण्ड, क्ली, (चूर्णाय यत् खण्डम्।) कर्करम्। इति हारावली। २०८॥ काँकर इति घुटिं इति च भाषा॥

चूर्णपारद:, पुं, (चूर्ण: पारदस्य। एकदेशिसमास:। पारदजन्यतया एवास्य तथात्वम्।) हिङ्गुलम्। इति राजनिर्घण्ट:॥

चूर्णशाकाङ्ग:, पुं, (चूर्ण इव शुभ्र: शाकस्तमङ्गते सादृश्येन गच्छतीति। अङ्ग गतौ+अच्।) गौरसुवर्च्चशाकम्। इति राजनिर्घण्ट:॥

चूर्णि:, स्त्री, (चूर्णयति खण्डयति अशेषपण्डितानां तर्कमिति। चूर्ण+"सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्। यद्वा, "वृणिवृञ्भ्यामीदिति।" उणा। ४। ५२। इति इ:।) पातञ्जलव्याकरणम्। महाभाष्यम्। कपर्दक:। इति लिङ्गादिसंग्रहटीकायां भरत:॥ घृतसंस्थककपर्दका:। इति सिद्धान्तकौमुदीसुबादिवृत्ति:॥

चूर्णिका, स्त्री, (चूर्ण: क्षोदोऽस्यास्तीति। चूर्ण+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) सक्तु:। इति भूरिप्रयोग:॥

चूर्णिवृत्, पुं, (चूर्णिं महाभाष्यं करोतीति। कृ+क्विप्।) भाष्यकार:। इति त्रिकाण्डशेष:॥

चूर्णी, स्त्री, (चूर्णि:+"छादिकारादक्तिन:।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) कपर्दक:। इति मेदिनी। णे, १२। नदीविशेष:। सा राणाघाटाख्यग्रामसमीपे तिष्ठति॥

चूल:, पुं, (चोलयति पुन: पुन: छेदेऽपि उत्तिष्ठतीति। चुल उच्छ्रती+"इगुपधज्ञेति।" ३। १। १३५। इति क:। निपातनात् दीर्घ:। यद्वा, चूर्य्यते इति। चूर्+क:। रस्य लत्वम्।)

केशः। यथा। "सुक्तकेशाश्च चूलिनः।" इति लिङ्गपुराणम्॥

चूलकः, पुं, (चूल एव। चूल+स्वार्थे कन्।) केशः। यथा, मत्स्यसूक्ते ३८ पटले।
"गृहीतचूलको विप्रो म्लेच्छेन रजकादिना। प्राजापत्यद्वयं कुर्य्यात् शूद्रः कुर्य्यात्तु भागतः॥ सशिखं निर्व्वपेत् केशं घृते चान्त्यावसायिना। अन्त्यजेषु शिखावर्ज्जं शूद्रेरग्राङ्गुलित्रयम्॥"

चूला, स्त्री, (चूड़ा+इस्य लत्वम्।) चन्द्रशाला। गृहोपरिगृहम्। इति शब्दरत्नावली॥ चूड़ा च॥

चूलिकं, क्ली, (चोलयति गोधूमचूर्णं पिष्टकाकारेण उन्नयति उत्पादयतीत्यर्थः। चुल+णिच्+खुल्। पृषोदरात् दीर्घत्वे अत इत्वे च साधुः।) घृतभृष्टगोधूमचूर्णम्। इति शब्दचन्द्रिका॥ लूची इति भाषा॥

चूलिका, स्त्री, (चोलयति सन्निहितचर्म्ममांसराशिं उन्नयतीति। चुल+खुल्+कापि अत इत्वच। पृषोदरात् दीर्घत्वे साधुः।) हस्तिकर्णमूलम्। इत्यमरः।२।८।३८॥ नाटकाङ्गविशेषः। इति मेदिनी। के, ६०॥

चूष, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) दीर्घो चूषत्यास्यं लोकः। इति दुर्गादासः॥

चूषा, स्त्री, (चूष्यते पीयते पृष्ठमांसेनाद्रयतां नीयते इति। चूष+घञर्थे कः।) कक्षा। इत्यमरः। २। ८। ४२॥ काछदड़ी इति भाषा॥

चृतृ, कि सन्दीपने। इति कविकल्पद्रुमः॥ (चुरां-परे भ्वां-परं-सकं-सेट्।) कि, चर्त्तयति। इति दुर्गादासः॥

चृतृ, ग्र हिंसे। ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, चृतति चर्त्तिता। ग्रन्थो ग्रन्थनम्। इति दुर्गादासः॥

चेटः, पुं, (चेटतीति। चिट् परप्रेषे+अच्।) दासः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ६। १२७।
"एतत्तस्य सुखाच्छ्रुत्वा राजचेटस्य दुर्म्मनाः॥" सतु ग्रङ्गारसहायः। यथा, साहित्यदर्पणे।३।४६।
"ग्रङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः॥")

चेटकः, पुं, (चेटति दासत्वं करोतीति। चिट+खुल्।) दासः। इत्यमरः। २। १०। १७॥ (यथा, कथासरित्सागरे। ६। १२४।
"आवाभ्यां राजहंसाख्य आहूतो राजचेटकः॥") उपपतिनायकभेदः। तस्य लक्षणं सन्धानचतुरः। इति रसमञ्जरी॥

चेटिका, स्त्री, (चेटी+स्वार्थे कन् टापि अत इत्वं पूर्व्वह्रस्वः। यद्वा चिट् खुल् टापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥ (यथा, कथासरित्सागरे। ४। ५१।
"अङ्गीकुर्व्वन् स तन्मूढश्चेटिकाभिः प्रवेशितः॥")

चेटी, स्त्री, (चेट+ङीप्।) दासी। इति हेमचन्द्रः॥ (यथा, रामायणे। २। ६१। ६४।
"प्रेष्याश्चेट्यश्च वध्याश्च बलस्थाश्चापि सर्व्वशः॥")

चेड़ः, पुं, (चेटति परप्रेष्यत्वं करोतीति। चिट+अच्। टस्य ड़त्वञ्च।) दासः। इत्यमरटीकायां रमानाथः॥

चेड़कः, पुं, (चेटति इति। चिट+खुल्। टस्य ड़त्वम्।) दासः। इत्यमरटीका॥

चेड़िका, स्त्री, (चेड़क+टाप्। कापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥

चेड़ी, स्त्री, (चेड़+ङीप्।) दासी। इत्यमरटीका॥

चेत्, व, (चित्+विच्।) याद। इत्यमरः। ३। ४। १२॥ (यथा, पद्मदशाम्। ६। ४२।
"अन्यत्वकारकं सत्वमिति चेदन्यवारणम्। कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्॥"
पद्मान्तरम्। असन्देहेऽपि सन्देहवचनम्। यथा,
"सत्यचेदृगुरुवाक्यमेव पितरो देवाश्च चेद्-योगिनी
प्रीता चेत् परदेवता च यदि चेद्वेदाः प्रमाणं हि चेत्।
ग्राह्यीयं यदि दर्शनं भवति चेदाज्ञाप्य मोघास्मि चेत्
स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्यान्मे जयः सर्व्वदा॥"
इति शब्दार्थचिन्तामणिधृतश्लोकः॥)

चेतः, [स्] क्ली, (चेतत्यनेन इति। चित्+करणेऽसुन्।) चित्तम्। इत्यमरः। १। ४। ३१॥ (यथा, पद्मदशाम्। १। ५४। [यत्।
"ताभ्यां निर्व्विचिकित्सेऽर्थे चेतसः स्थापितस्य एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥")

चेतकी, स्त्री, (चेतयते उन्मीलयति ज्ञानेन्द्रियबलादीनि। चित+खुल्। गौरादित्वात् ङीष्।) हरीतकी। इत्यमरः।२।४।५६॥ हिमाचलभवा त्रिशिरा हरीतकी। सा च सर्व्वरोगनाशिनी गन्धयुक्तत्रयकरणे प्रशस्ता। इति वैद्यकम्॥
("चेतकी द्विविधा प्रोक्ता आकाराङ्गतस्तथा। षड़ङ्गुला हिता प्रोक्ता शुक्ला चैकाङ्गुला स्मृता॥ श्रेष्ठा कृष्णा समाख्याता रेचनार्थे जिगीषुणा। चेतकी वृक्षशाखायां यावत्तिष्ठति तां पुनः॥ भिन्दन्ति पशुपक्षाद्या नराणां कोऽत्र विस्मयः। चेतकीं यावद्विधृत्य हस्ते तिष्ठति मानवः॥ तावद्विनश्यन्ति रोगांस्तु प्रभावान्नात्र संशयः॥" इति कल्पस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥ एतस्या उत्पत्तिगुणजात्यादिकं यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽन्तकम्। ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी॥ हरीतक्यभया पथ्या कायस्था पूतनाऽमृता। हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा॥ वयस्था विजया चापि जीवन्ती रोहिणीति च। विजया रोहिणी चैव पूतना चामृताऽभया॥ जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः। श्यामायुक्ता विजया वृत्ता सा रोहिणी स्मृता॥ पूतनास्थिमती सूक्ष्मा कथिता मांसलाऽमृता। पञ्चरेखाऽभया प्रोक्ता जीवन्ती सर्व्ववर्णिनी॥ त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः। विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी॥ प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता। अस्थिरोगेऽभया ग्रस्ता जीवन्ती सर्व्वरोगहृत्॥ चूर्णार्थे चेतकी ग्रस्ता यथायोगं प्रयोजयेत्। चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः॥ षड़ङ्गुलायता शुक्ला कृष्णात्वेकाङ्गुला स्मृता। काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्॥ काचित् स्पर्शेन दृष्टान्या चतुर्द्धा भेदयेच्छिवा। चेतकी पादपच्छायासुपसर्पन्ति ये नराः॥ भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः। चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः॥ तावद्विद्येत रोगेषु प्रभावान्नात्र संशयः। न धार्य्यं सुकुमाराणां कृशानां भेषजद्विषाम्॥ चेतकी परमा ग्रस्ता हिता सुखविरेचनी॥")
जातीपुष्पम्। इति राजनिर्घण्टः॥

चेतनः, पुं, (चेतति जानाति सर्व्वं इति। चित्+कर्त्तरि ल्युः।) आत्मा। इति हेमचन्द्रः॥ (यथा, पद्मदशाम्। ६। ४५।
"चेतना चेतनभिदा कूटस्थात्मकृता न हि। किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥")
मनुष्यः। इति राजनिर्घण्टः॥ प्राणी। इत्यमरः। १। ४। ३०॥
("रथादौ नियता चेष्टा चेतनेनाधितिष्ठिते। न दृष्टा चेतनस्तेन प्राणादीनां प्रवर्त्तकः॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥)
चेतनं चैतन्यं विद्यतेऽस्य इति। "अर्शआदिभ्योऽच्।"५।२।१२७। इत्यच्।) प्राणयुक्ते त्रि। इति मेदिनी। ने, ६४॥ (यथा, मेघदूते। ५।
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥")

चेतनकी, स्त्री, (चेतनं करोति बुद्धीन्द्रियादिस्फुरणं वर्द्धयतीत्यर्थः। कृ+ड। ततो ङीष्।) हरीतकी। इति राजनिर्घण्टः॥

चेतना, स्त्री, (चेतयतेऽनया इति। चित् संज्ञाने "ग्रासग्रन्थेति।" युच् टाप् च।) बुद्धिः। इत्यमरः।१।५।१॥ (यथा, भागवते। ४।२१। ३४।
"प्रधानकालाशयधर्म्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम्॥"
"एष विभुः परमान्दोऽपि शरीरे विषयकारां बुद्धिं प्राप्य क्रियाफलत्वेन प्रतीयते।" इति टीकाकृच्चूर्णिः॥) सा गर्भस्थबालकस्य सप्तभिर्मासैर्भवति। इति सुबोधः॥ (ज्ञानात्मिका मनोवृत्तिः। यथा, भगवद्गीतायाम्। १३। ६।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः॥"
तस्यामभिव्यक्तेन्द्रियवृत्तिः तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरसविद्वा चेतना इति ग्राङ्करभाष्यम्। ज्ञानात्मिका मनोवृत्तिरिति श्रीधरस्वामी॥ स्वरूपज्ञानयष्टिकायां प्रमाणासाधारणकारणिकायां चित्तवृत्तौ ज्ञानाख्यायां भगवतो विभूताविति शब्दार्थचिन्तामणिः॥)

चेतनीया, स्त्री, (चित्+णिच्+अनीयर् टाप् च। यद्वा चेतनायै हिता इति च्छः।) ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

चेदिः, पुं, देशभेदः। तत्पर्य्यायः। चेपुरः २ डाहलः ३ चैद्यः ४। (अयं देशस्तु आर्य्यायां दिशि शुक्तिमतीनदीतीरे स्थितः। यथा, हरिवंशे। १४। ८।
"शौलिकविदर्भवत्सान्धचेदिकाश्चोर्द्धकण्ठाश्च॥") तद्देशस्थे पुं भूम्नि। इति हेमचन्द्रः॥

चेदिपतिः, पुं, (चेदिदेशस्य पतिः पालकः राजा।) उपरिचरवसुः। यथा,—
"इन्द्रप्रीत्यै चेदिपतिश्चकारेन्द्रमहञ्च सः।
पुत्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः॥"
इति महाभारतम्॥
(शिशुपालः। यथा, महाभारते। २। ४०।१५।
"इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः।
भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत॥")

चेदिराजः, पुं, (चेदीनां राजा इति। "राजाहःसखिभ्यष्टच्।" इति टच्।) शिशुपालः। इति पुराणम्॥ (यथा, महाभारते। २। ४०। १२।
"विश्रुता चास्य दुर्बुद्धेर्बुद्धिर्बुद्धिमतांवर!।
चेदिराजस्य कौन्तेय! सर्व्वेषाञ्च महीक्षिताम्॥")
उपरिचरवसुः। स तु चन्द्रवंशीयक्षत्रियराजपुत्रो विष्णुभक्त इन्द्रसखा इन्द्रादेशाच्चेदिराज्यं गृहीतवान् इन्द्रदत्ताकाशगविमानेनोपरिचरो बभूव। एकदा ऋषयो देवाश्च विवदमानास्तमपृच्छन् किमोषधा पशुना वा यज्ञाः कल्प्यास्तेनोक्तं पशुना तत ऋषयस्तं शेपुर्भवता यथाशास्त्रमनुक्ता देवानां पक्षपातः कृतस्तस्मादधो गच्छ इत्यभिशप्तः स ततश्चयात् भूविवरे गतः। श्रीविष्णुना तस्य भक्षणार्थं नान्दीश्राद्धादौ गृहीतौ धृतधारादानं विहितम्। इति महाभारतम्॥

चेदिराट्, [ज्] पुं, (चेदिषु राजते इति। राज+क्विप्। यद्वा चेदिषु राट्।) शिशुपालः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। २। ३८। ३१।
"स वै पश्येदयथा धर्म्मं न तथा चेदिराड्यमम्॥"
उपरिचरवसुः। दमघोषश्च। इति पुराणम्॥)

चेदी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

चेल, कृ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकंच-सेट्-ऋदित्।) कृ, अचिचेलत्। इति दुर्गादासः॥

चेलं, क्ली, (चेल्यते विस्तार्य्यते तन्तुभिरिति। चेल चाले+कर्म्मणि घञ्। यद्वा चिल्यते परिधीयते यत् इति। चिल+कर्म्मणि घञ्।) वस्त्रम्। (यथा, मनुः। ११। १६६।
"चेलचर्म्माभिधाणाञ्च चिरात्तं स्वादभोजनम्॥")
अधमे त्रि। इत्यमरः। ३। ३। २०१॥

चेलाजः, पुं, (चेल+आजच्।) फललताविशेषः। चेलना इति भाषा॥ तत्पर्य्यायः। अल्पप्रमाणकः २। इति रत्नमाला॥ अस्य फलस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। मधुरत्वम्। कफवायुकारित्वञ्च। इति राजवल्लभः॥

चेलालः, पुं, (चेलमिव त्वचं आलाति। आ+ला+"कर्म्मण्यण्।" ३।२। १। इत्यण्।) फललताविशेषः। तत्पर्य्यायः। चित्रफलः २ सुखाग्रः ३ राजतेमिषः ४ लतापनसः ५ नाटाम्रः ६ सेदुः ७। इति त्रिकाण्डशेषः॥

चेलिका, स्त्री, (चिल्यते परिधीयतेऽसौ इति। चिल+इन्। स्वार्थे कन् ततष्टाप्।) पट्टवस्त्रविशेषः। चेलिरकापड़ इति भाषा॥ यथा,—
"सेयं क्षणस्य वनिता पीतशाटीपरिच्छदा।
रक्तचेलिकया च्छन्ना शातकुम्भघनस्तनी॥"
इति पाद्मे पातालखण्डम्॥

चेलुकः, पुं, (चेलति बुद्धितत्त्वं गच्छति इति। चेल+उकः।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। श्रामणेरः २ प्रव्रजितः ३ महापासकः ४ गोमी ५। इति त्रिकाण्डशेषः॥

चेल्ल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) लङ्यान्तः। ऋ, अचिचेल्लत्। अस्य ऋदनुबन्धः कुटतेः कुटादिपाठवन्निष्फलः वेदेषूच्चारणभेदार्थो वा। अयं केचिन्न मन्यते। इति दुर्गादासः॥

चेष्ट, ङ ईहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ईहो व्यापारः। ङ, चेष्टते पठितुं शिष्यः। इति दुर्गादासः॥

चेष्टकः, पुं, (चेष्टते इति। चेष्ट+ण्वुल्।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।
"पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्।
कान्तः क्रोड़े स्थितां नारीं बन्धोऽयं चेष्टको मतः॥"
चेष्टाकर्म्मणि त्रि॥

चेष्टा, स्त्री, (चेष्ट+भावे अङ् टाप् च।) कायिकव्यापारः। इति सुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ७। ६७।
"आकारमिङ्गितं चेष्टां भक्ष्येषु च चिकीर्षितम्।"
"प्रवृत्तिरत्र चेष्टा ज्ञानेच्छा प्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नवानात्मा प्युपलभ्यते॥" इति सिद्धान्तसुक्तावली। ५५॥)

चेष्टानाशः, पुं, (चेष्टायाः स्वस्वादेर्व्यापारस्य नाशो निवृत्तिरत्र।) प्रलयः। इति राजनिर्घण्टः॥

चेष्टितं, क्ली, (चेष्ट+भावे क्तः।) गतिः। चेष्टा। इति मेदिनी॥ (यथा, देवीभागवते। १। १५। १८।
"जलकेव सदा नारी रुधिरं पिबतीति च।
सर्व्वस्तु न विजानाति मोहितो भावचेष्टितैः॥")

चैतन्यं, क्ली, (चेतन एवेति। स्वार्थे भावे वा ष्यञ्।) प्रकृतिः। इति राजनिर्घण्टः॥ चेतना॥ (यथा,
"चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते।
ज्ञानक्रिये जगत्कर्त्तर्य्यदृश्येते चेतनाश्रये॥
नेष्यते वैशेषिकैः साङ्ख्यैश्चेति शेषः।"इति ग्रन्थार्थचिन्तामणिः॥ तथाच, याज्ञवल्क्यः। ३। ८१।
"मनश्चैतन्ययुक्तोऽसौ नाड़ीस्थायुशिरायुतः।
सप्तमे चाष्टमे चैव लड्घ्यसंस्कृतिमानपि॥")

चैतन्यः, पुं, (चेतन एव। स्वार्थे ष्यञ्।) भगवदवतारविशेषः। तस्य प्रमाणं यथा,—
"श्रुत्वा तु कलिधर्म्मांस्तान् ब्रह्मा लोकपितामहः।
सर्व्वलोकहितार्थाय प्रोवाच मधुसूदनम्॥
भविष्यति कलौ केनोपायेन धर्म्मपालनम्।
भक्तिमार्गस्थितिः कस्मात्तद्दस्य जगद्गुरो!॥
श्रीभगवानुवाच।
अवतीर्णो भविष्यामि कलौ निजगणैः सह।
शचीगर्भे नवद्वीपे स्वर्धुनीपरिवारिते॥
अप्रकाश्यमिदं गुह्यं न प्रकाश्यं बहिर्मुखे।
भक्तावतारं भक्ताख्यं भक्तं भक्तिप्रदं स्वयम्॥
मन्मायामोहिताः केचिन्न ज्ञास्यन्ति बहिर्मुखाः।
ज्ञास्यन्ति मद्भक्तियुताः साधवो न्यासिनोऽमलाः॥
कृष्णावतारकाले या स्त्रियो ये पुरुषाः प्रियाः।
कलौ तेऽवतरिष्यन्ति श्रीदामसुबलादयः॥
चतुःषष्टिर्महान्तस्ते गोपा द्वादश बालकाः।
धर्म्मसंस्थापनार्थाय विहरिष्यामि तैरहम्॥
काले नष्टं भक्तिपथं स्थापयिष्याम्यहं पुनः।
कृष्णचैतन्यगौराङ्गो गौरचन्द्रो गौरहरिः॥
शचीसुतः प्रभुर्गौरो नामानि भक्तिदानि मे।
गच्छन्तु भुवि ते पुत्रा जायन्तां भक्तरूपिणः॥
धर्म्मसंस्थापनं काले कुर्व्वन्तु ते ममाज्ञया।
कृष्णावतारकाले ये मद्भक्तास्तान् ग्रहणं क्रमात्॥
श्रीदामनामगोपालो मम रामस्य च प्रियः।
अभिराम इति ख्यातः पृथिव्यां स भविष्यति॥
सुदामनामगोपालः श्रीमान् सुन्दरठक्कुरः।
वसुदामप्रियसखः श्रीधनञ्जयपण्डितः॥
सुबलो मे प्रियसखो गौरीदासाख्यपण्डितः।
कमलाकरपिप्पलाइः पूर्व्वख्यातो महाबलः॥
महाबाहुर्गोपबालः श्रीमान् साहसपण्डितः॥
पुरुषोत्तमो वैश्यकुले स्तोककृष्णः प्रियो मम।
अर्জ্জुनः पूर्व्वदेहे यः कलौ श्रीपरमेश्वरः॥
पूर्व्वप्रियो लवङ्गो मे कृष्णाख्यः स कलौ युगे।
श्रीधरः श्रीधरसमः पूर्व्वे श्रीमधुमङ्गलः॥
सुबलो बलरामसखः कलौ श्रीहलायुधः।
द्वादशैते भविष्यन्ति कलौ महर्म्मरचणे॥
चतुःषष्टिर्महान्तो ये स्त्रियः केचिच्च पूरुषाः।
पुरा गोपाङ्गनाः ख्याताः कलौ ता पुरुषा भुवि॥
यतिर्यस्मात् कलौ चाहं तदर्थे पुरुषाः स्त्रियः।
नीलाम्बरश्चक्रवर्त्ती गर्गः ख्यातो मुनिः पुरा॥
अतिप्रिया राधिका मे श्रीगदाधरपण्डितः।
राधिकायाः प्रियांशः स श्रीगदाधरठक्कुरः॥
मधुमती प्रियसखी श्रीनरहरिसंज्ञकः।
वृन्दा देवी प्राणसखी श्रीमुकुन्दः कलौ युगे॥
चन्द्रावली प्राणतुल्या कविराजः सदाशिवः।
ललिता या सखी मुख्या जगदानन्दपण्डितः॥
विशाखा या प्रियसखी श्रीदामोदरनामकः।
वनमाली कविराजः श्रीविशाखा सखी मम॥
श्रीरघुनाथभट्टश्च रङ्गदेवी मम प्रिया।
श्रीगदाधरभट्टस्तु सुदेवी सा मम प्रिया॥
प्रबोधानन्दविख्यातस्तुङ्गविद्या तथा प्रिया।
श्रीलराघवगोस्वामी चम्पकाख्या लता प्रिया॥

गोस्वामी श्रीलभूगर्भ इन्दुलेखा तथा प्रिया।
काग्निमिश्रः अग्निरेखा रूपः श्रीरूपमञ्जरी॥
श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी।
श्रीरघुनाथदासः श्रीस्वरूपमञ्जरी मम॥
द्वितीयो रघुनाथश्च श्रीरागमञ्जरी प्रिया।
श्रीलगोपालभट्टः श्री-अनङ्गमञ्जरी सखी॥
लोकनाथः प्रेमभक्तो लवङ्गमञ्जरी सखी।
श्रीगदाधरभट्टस्तु प्रिया श्रीगुणमञ्जरी॥
भट्टः श्रीजीवगोस्वामी योगमाया सहायिनी।
दूती कलावती प्रेष्या श्रीगोविन्दः प्रियो मम॥
दूती लीलावती श्रीमान् माधवः प्रीतिवर्द्धनः।
वासुघोषाभिधो दूती ममानन्दप्रदायिनी॥
श्रीग्रिवानन्दभार्य्या सा मतृप्रियेन्दुमती सखी।
श्रीपरमानन्दपुरि प्रियो मे उद्धवः सखा॥
श्रीलराघवदासस्तु धनिष्ठा मे प्रिया सखी।
शुक्लाम्बरो ब्रह्मचारी याज्ञिको ब्राह्मणः स्मृतः॥
पण्डितो जगदीशश्च यज्ञपत्नी मम प्रिया।
आचार्यः श्रीलभगवान् श्रीचैतन्यप्रियांशभाक्॥
पण्डितो गरुडः श्रीमान् गरुडो मम वाहनः।
श्रीलगोपीनाथसिंहोऽक्रूरो भक्तो मम प्रियः॥
घोषः प्रङ्कर आख्यातो गुणसागरनायकः।
माधवः शान्तनुर्मुनिर्विश्वकर्म्मा तु भास्करः॥
वनमाली सुदामा च सार्व्वभौमो दृहस्पतिः।
प्रिया इन्दुमुखी या मे मकरध्वजविश्रुतः॥
सिंहानन्दो लोकनाथः कविचन्द्रस्ततः परम्।
श्रीनाथो रामनाथश्च चत्वारः सनकादयः॥
काग्निमिश्रस्तु कुब्जा स्यादामानन्दोऽर्ज्जुनः सखा।
प्रतापरुद्रः ख्यातोऽसाविन्द्रद्युम्नो महीपतिः॥
टक्कुरश्च कालिदासः पुलिन्दीवनचारिणी।
शिखी च राधिका दासी मा इति ख्यातिसंयुता॥
आचार्य्यगोपीनाथश्च रत्नावती मम प्रिया।
शार्ङ्गदासः पद्मिनी स्यात् सूर्य्यो विश्वेश्वरः स्मृतः॥
भानुमती सत्यराजो रामानन्दः कलावती।
जयश्च विजयश्चैव गोविन्दो गरुडस्तथा॥
आचार्यरत्नचन्द्रः स्याद्व्यासो वृन्दावनः स्मृतः।
शुकदेवी व्यासपुत्रो भट्टो वल्लभ ईरितः॥
शिवानन्दोऽञ्जन इव देवानन्दश्च भार्गवः।
पण्डितः श्रीजगन्नाथो दुर्व्वासा मुनिरुच्यते॥
आचार्य्यः श्री-अनन्तश्च हरिदासस्तथैव च।
एता गोप्यो व्रजे ख्याता हृदयानन्द एव च॥
प्रियाश्चतुःषष्टिरेते धर्म्मसंस्थापने कलौ।
एतेषां पुण्यनामानि ये स्मरन्ति दिने दिने॥
ते प्राप्नुवन्ति मद्भक्तिं पुनन्ति भुवनत्रयम्।
मद्भक्तदासा ये मर्त्या नास्ति तेषां समः क्वचित्॥
श्रुत्वा भगवतो वाक्यं ब्रह्मा हर्षमवाप्तवान्।
स्तौति तं देवदेवेशं नेदुर्दुन्दुभयस्तदा॥
जगुर्गन्धर्व्वप्रवरास्तुमुरुप्रमुखास्तदा॥"

इत्यनन्तसंहितायां श्रीचैतन्यजन्मखण्डे सप्तपञ्चाशत्तमोऽध्यायः॥ * ॥ अपि च।

"यः सत्ये सितवर्णमादधदसौ श्रीशुक्लनामाभवत्
त्रेतायां मखसृक् मखाख्य उचितोऽभूद्रक्तवर्णं दधत्।
यः श्यामं दधदास्तु वर्णकममुं श्यामो युगे द्वापरे
सोऽयं गौरविधुर्विभाति कलयन्नावतारं कलौ॥
नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः॥"

इति गौरगणोद्देशः॥

(अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्त्तकस्तत्सम्प्रदायेष्वोपास्येष्टदेवत्वेनासौ परिगृहीतश्च। असौ एव वृन्दावनरमण-श्रीकृष्णस्य पूर्णावतार इति केचित्, परन्तु प्रामाणिकग्रन्थवचनादप्रौनात् तन्न मन्यते अतएवास्मिन् विषये पण्डितानां प्रायशो मतभेदो दृश्यते।

स तु प्रभुः (१४०७) सप्ताधिकचतुर्दशशतशके कुम्भस्थे सवितरि फाल्गुन्यां तिथौ शुक्रवारे प्रदोषसमये नवद्वीपाख्यनगर्य्यां प्रादुर्बभूव। तस्मिन्नेव महामहिन्नस्तस्य भगवतो जन्मसमये चन्द्रदेवं प्रति सैंहिकेयोपरागो जातः। एतदुपलक्षीकृत्य गङ्गास्नानार्थं बहवो लोका नानादिग्देशादागत्य तत्र मिलिताः। तदा ग्रस्तेऽपि राहुणा चन्द्रमसि भक्तजनकुमुदबान्धवो गौरचन्द्रः समवेतलोकानां हरिसंकीर्त्तनप्रभृतिभिर्मङ्गलाचरणैः सह शचीपूर्व्वपर्व्वताद्युदियाय। भवन्ति हि शुभसूचकानि महतामाविर्भूतानि। अतस्तदापि प्रसन्ना दिक् प्रेयसौगन्ध्यमान्द्यादिगुणगणाढ्यो मलयसमीरणः प्रसन्नानि च साधु जनमनांसि समभवन्। अस्य पिता जगन्नाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत्। कदाचित् गङ्गास्नानार्थमेव नवद्वीपमागत्य विप्रचक्रवर्त्तिकुलतिलकस्य नीलाम्बरचक्रवर्त्तिनः शचीनाम्नीं कन्यां परिणीतवान्। ततो गच्छति काले अयं चैतन्यदेवः शचीगर्भे त्रयोदशमासं यावदुषित्वा जगन्नाथमिश्रस्य दशमपुत्रत्वेन समभवत्। अस्य पूर्व्वजो विश्वरूपो नाम जगन्नाथमिश्रस्यापरः पुत्र आसीत्। स तु यौवन एव ज्ञानवैराग्यविशारदो दारपरिग्रहमनङ्गीकुर्व्वन् पारिव्राज्यधर्म्मं समाश्रयत्।

अथ चैतन्यदेवस्य जातकर्म्मादिसंस्कारे यथाकालं क्रमशो निवृत्ते अस्य मातामहो नीलाम्बरचक्रवर्त्ती सुलक्षणादिकमवलोक्य विश्वम्भर इति नाम्नेनमाजुहाव। शचीदेवी तु पुनः पुनः पुत्रधनेन वञ्चिता प्रियतममेनं कनीयांसं संसारस्थितिदीर्घजीवनकामनया निमाइ इत्याख्यया पौरवासिनस्तु असामान्यरूपलावण्यतया परमसमादरेण गौर इत्याख्यया च आहूतवन्तः। परं धर्म्मरसिकानां भक्तानां समाजे, शाक्यसिंहस्य बुद्धदेव इव अस्य महाप्रभुरिति चैतन्यदेव इति च आख्या प्रसिद्धा।

अथ प्राप्ते काले चैतन्यदेवोऽयं ज्ञानसागरपारगमप्रेयवुधवर्गवन्दितचरणारविन्दं महामहोपाध्यायं गङ्गादासपण्डिताख्यमुपाध्यायत्वेनाङ्गीकृत्य स्वल्पेनैव कालेन सर्व्वशास्त्रार्थतत्त्वज्ञः समभवत्। अस्य बुद्धिप्राखर्य्यमवगम्य तदा सर्व्व एवैनं देवांशसम्भूतममन्यन्त। अथ कदाचिदयं गङ्गास्नानार्थं गत्वा तत्र वल्लभाचार्य्यस्य लोकातीतरूपलावण्यां लक्ष्मीं नाम कन्यामवलोक्य मोहित आसीत्। वल्लभाचार्य्यस्तु एतदवगम्य स्वयमेव तां कन्यामस्मै सम्प्रददे। विवाहानन्तरमेवासौ छात्रानध्यापयितुं प्रवृत्तः। एतस्मिन्नेव समये बहवो दिग्विजयिनः पण्डिता नवद्वीपमागत्य अस्य तर्कजालैः समाच्छन्ना भग्नदर्पाश्च सन्तः प्रतिनिवृत्ताः। असावपि दिग्विजिगीषया पूर्व्वादिस्थलीं गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमलं यशः प्राप्तवान्। एतस्मिन्नेव काले अस्य पूर्व्वपत्नी कालधर्म्मं प्राप्ता। चैतन्यदेवस्तु तस्या विरहेऽप्याकुलितोऽपि मातुरनुरोधेनैव पुनः सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार। परं सर्व्वगुणविभूषितायाः साक्षात् लक्ष्म्या इव लक्ष्म्या मरणादेवासौ संसारविरक्तः श्रीवासादिभिर्भक्तवर्गैर्मिलितो हरिभक्तिरसनिमग्न एव कालं यापयामास। अथ कदाचित् पिण्डलोकोद्धारवासनया गयातीर्थं गत्वा भक्तचूड़ामणेः श्रीमदीश्वरपुरिनाम्नो गोस्वामिनः सकाशात् हरिनामाद्यन्तदीक्षां लब्ध्वात्मानं कृतकृतार्थं मत्वा च स्वदेशं प्रत्यावृत्तवान्। एतस्मिन्नवसरे पाषण्डदुराचारौ दस्युप्रवरौ जगाइ माधाइ चेति प्रसिद्धौ ब्रह्मबन्धू अन्यांश्च कुष्ठादिव्याधिपीड़ितान् महापातकिनः करुणया हरिनामदीक्षादानेन संसारसागरात् समुद्धृत्य यवनजातीयकाजिप्रभृतीन् वैष्णवद्वेषिणः स्वमहिम्ना दमयामास। ततः प्रभृत्येवासौ भक्तिरसप्रधानं वैष्णवधर्म्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्य्यादिभिर्भक्तवर्गैः सह नानाजनपदं परिभ्रमन् बहूनेव जनान् प्रेमोन्मत्तानकरोत्। अथ(१४३१) एकत्रिंशदधिकचतुर्दशशतशके उत्तरायणसंक्रान्त्यां संसारमायां परित्यज्य काटोयाख्यग्रामे केशवभारतिसकाशात् सन्यासधर्म्मं समाश्रयत्। अथ नीलाचलमागत्य श्रीजगन्नाथदेवं दृष्ट्वा राज्ञः प्रतापादित्यस्य सभापण्डितं वेदान्तशास्त्रपारदर्शिनं सार्व्वभौमं विचारेण पराजित्य वैष्णवदीक्षां प्रदत्तवान्। अथ कदाचित् गोदावरीतीरे भक्तवरं रामानन्दमवलोक्य सेव्यनिर्णयेधर्म्मालापैरात्मानं कृतकृत्यवदमन्यत। ततोऽसौ त्रिपदी-शिवकाञ्ची-विष्णुकाञ्ची-त्रिमल्लप्रभृतीन् बहून् दाक्षिणात्यजनपदान् हरिप्रेमरसेन प्लावयित्वा द्वारकातीर्थदर्शनार्थं प्रस्थितः। तत्रैवासौ 'कृष्णकर्णामृतं' नाम सुप्रसिद्धवैष्णवग्रन्थं लब्धवान्। अतः परं पुनरेव नीलाचलमागत्य काशीश्वरनाम्नः कस्यचिद्भक्तप्रधानस्य भवने अवस्थितवान्। अत्रैवासौ श्रीश्रीजगन्नाथदेवस्य रथयात्रामहोत्सवे हरिसंकीर्त्तनादिकं विधाय प्रेमोन्मादप्रलापादिभिर्भक्तिलक्षणं दर्शयामास। अथ गच्छति काले वृन्दावनं

जिगमिषुर्वन्येनैव पथा व्रजन् स्वभावसारल्येन व्याघ्रादीनपि हिंसजन्तून् भक्तिप्रेम्णा मादयित्वा वृन्दावनमुपतस्थे। तत्र स्वभक्तवृन्दावृत एवासौ गोपीवल्लभश्रीकृष्णस्य विहारस्थानादिकमवलोक्य मथुरामुद्दिश्य प्रस्थितः। ततोऽस्मात् स्थानात् प्रयागागमनकाले बहून् पाषण्डानपि यवनान् हरिभक्तान् विधाय वाराणसीमुपस्थितः। तत्र कियत्कालमुषित्वा स्वधर्म्मं प्रचार्य्य च पुनर्नीलाचलमाजगाम। अत्रस्थ एवासौ स्वप्रचारितवैष्णवधर्म्मस्य माहात्म्यं विज्ञापयितुं भक्तवृन्दाग्रगण्यान् रूपसनातनादीन् नानातीर्थस्थानेषु प्रेषयामास। अथ स्वभक्तैर्मिलितो नानाविधमहोत्सवेन हरिसंकीर्त्तनादिकं विधाय भक्तिरसस्य उत्कटकोटिमभिगम्य विरहोन्मादादिप्रगाढभक्तिलक्षणैरन्वित आसीत्। तत एवासौ स्वभक्तगणान् कलियुगे हरिसंकीर्त्तनस्य माहात्म्यादिकं श्रावयित्वा अष्टचत्वारिंशद्वर्षवयसि कालस्य दुरतिक्रमणीयत्वात् (१४५५) पञ्चपञ्चाशदधिकचतुर्दशशतशकके मानवकायं परित्यज्य अन्तर्हितवान्॥)

चैत्यं, क्ली पुं, (चित्यस्य इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण्।) आयतनम्। इत्यमरः। २। २। ७॥ यज्ञस्थानं केचित्तु सुखरहितं देवकुलबद्धग्रंथज्ञायतनं सचित्यमचित्यमपीत्याहुः। देवायतनमात्रम्। इदं देवकुलम्। इति भरतः॥ (यथा, महाभारते। २। ३। १२। "यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः॥") चिता। इति त्रिकाण्डशेषः॥

चैत्यः, पुं, (चैत्ये देवायतनादिस्थाने तिष्ठतीति। चैत्य+अण्।) बुद्धः। विष्णुः। उद्देशवृक्षः। इति मेदिनी भरतश्च॥ शिवस्य पर्य्यायः। देवतरुः २ देवावासः ३ करिभः ४ कुञ्जरः ५। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ६। ३। ४०। "वृक्षाः पतन्ति चैत्याश्च ग्रामेषु नगरेषु च॥" चैत्यशब्दः पुरुषः। यथा, भागवते। ३। २६। ६०। "अहङ्कारस्तयोरुद्रश्चित्तं चैत्यस्ततोऽभवत्॥")

चैत्यद्रुः, पुं, (चैत्य एव द्रुर्वृक्षः।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥ (अश्वत्थशब्दस्य गुणादयो ज्ञातव्याः॥)

चैत्यसुखः, पुं, (चैत्यं चितिसम्भवं विस्तृतमित्यर्थः सुखं यस्य।) कमण्डलुः। इति त्रिकाण्डशेषः॥

चैत्यवृक्षः, पुं, (चैत्यसंज्ञया प्रसिद्धो वृक्षः।) अश्वत्थवृक्षः। इति रत्नमाला॥ (यथा, मनुः। ६। २६४। "चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥")

चैत्रं, क्ली, (चीयन्ते जीवाः स्थानात् स्थानान्तरमनेनेति। चि+बाहुलकात् करणे ष्ट्रन्। ततः स्वार्थे अण्।) घृतम्। देवकुलम्। इति मेदिनी। रे, ३०॥ देउल इति भाषा॥ (यज्ञस्थानम्। यथा, महाभारते। १। १०६। १३। "भीष्मेण धर्म्मतो राजन्! सर्व्वतः परिरक्षिते। बभूव रमणीयश्च चैत्रयूपश्चतादृतः॥")

चैत्रः, पुं, (चित्रे विचित्रे कार्य्यादौ साधुः। चित्र+अण्।) बुद्धभिक्षुकः। इति त्रिकाण्डशेषः॥ वर्षपर्व्वतविशेषः। इति मेदिनी। रे, ३७॥ (यथा, हरिवंशे। "हिमवान् हेमकूटश्च निषधो मेरुरेव च। चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः॥" चित्रायां भवः। चित्रा+अण्।) चित्रागर्भजो बुधपुत्रः। स सप्तद्वीपाधिपतिः सुरथराजपितामहः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ (चित्रानक्षत्रयुक्ता पौर्णमासी यत्रसः। चित्रा+"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४। २। २३। इति पक्षे अण्।) मासभेदः। स तु सौरचान्द्रभेदेन द्विविधः। तत्र मीनराशिस्थरविकः सौरः मीनस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। इति मलमासतत्त्वम्॥ तत्पर्य्यायः। चैत्रिकः २ मधुः ३। इत्यमरः। १। ४। १५॥ चैत्री ४ कालादिकः ५। इति राजनिर्घण्टः॥ चैत्रकः ६ चित्रिकः ७। इति शब्दरत्नावली॥ *॥ तत्र जातफलम्।

"सत्कर्म्मशाली विनयी सुवेषो
भोगी सुखी स्यान्मधुरान्नभोजी।
सत्सङ्गयुक्तो द्विजदेवभक्तो
भवेन्नरो मधुमासजन्मा॥"

इति कोष्ठीप्रदीपः॥ *॥

(चैत्रजन्यानि तु वारुण्यशोकाष्टमी-श्रीरामनवमी-मदनत्रयोदशी-मदनचतुर्दशीप्रभृतीनि। एतेषां प्रकरणादिकं तत्तच्छब्दे द्रष्टव्यम्।) तत्र शिवव्रतं कर्त्तव्यम्। यथा,—

"चैत्रे मास्यथ माघे वा योऽर्च्चयेत् शूकरं व्रती।
करोति नर्त्तनं भक्त्या वेत्रपाणिर्दिवानिशम्॥
मासं वाप्यर्द्धमासं वा दश सप्त दिनानि वा।
दिनमानं युगं सोऽपि शिवलोके महीयते॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

अधुनास्य सन्न्यास इति गाजन् इति च भाषा॥

चैत्रकः, पुं, (चैत्र+एव। स्वार्थे कन्।) चैत्रमासः। इति शब्दरत्नावली॥

चैत्ररथं, क्ली, (चित्ररथेन गन्धर्व्वेण निर्वृत्तम्। "तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) कुबेरस्योपवनम्। तत्तु चित्ररथगन्धर्व्वनिर्म्मितम्। इत्यमरः। १। २। ७३॥ (यथा, रघुः। ५। ६०। "एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्॥"
इदन्तु पीठस्थानानामन्यतमं। यथा, देवीभागवते। ७। ३०। ५८।
"मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे॥")
पुं, कुरुपुत्रविशेषः। यथा, महाभारते। १। ६४। ४६।
"अविचित्तमभिष्यन्तं तथा चैत्ररथं सुनिम्।
जनमेजयश्च विख्यातं पुत्रांश्चास्यानुशुश्रुम॥")

चैत्रावली, स्त्री, (चैत्रं चैत्रमासं वा सम्यक्रूपेण वरयत्यभिलषतीति। आ+वर+णिच्+अच्। स्त्रियां ङीप्। रस्य लत्वम्।) चैत्री पूर्णिमा। तत्पर्य्यायः। मधूत्सवः २ सुवसन्तः ३ काममहः ४ वासन्ती ५ कर्दनी ६। इति त्रिकाण्डशेषः॥

चैत्रिकः, पुं, (चित्रानक्षत्रयुक्ता पौर्णमासी विद्यतेऽस्मिन्। "विभाषा फल्गुनीति।" ४। २। २३। इति पक्षे ठक्।) चैत्रमासः। इत्यमरः। १। ४। १५॥

चैत्री, [न्] पुं, (चैत्री चित्रायुक्ता पौर्णमासी विद्यतेऽस्मिन्। ज्योत्स्नादित्वादिनिः।) चैत्रमासः। इति राजनिर्घण्टः॥ (चित्रा+इण्।) चैत्रिरिति च पाठः॥

चैद्यः, पुं, (चेदीनां जनपदानां राजा। चेदि+ष्यञ्।) शिशुपालः। स तु दमघोषसुतः। इति जटाधरः॥ (यथा, माघे। २। ३८। "त्वया विप्रकृतश्चैद्यो रुक्मिणी हरता हरे॥" चेदिराजवसुः। इति पुराणम्॥) तद्देशीयः पुं भूम्नि। इति त्रिकाण्डशेषः॥

चोच्यः, त्रि, (ख्यायते उच्यते गीयते इत्यर्थः। चक्ष+कर्म्मणि घञ्। ततः पृषोदरात् साधुः।) गीतः। शुचिः। (यथा, मनुः। ३। २०७। "अवकाशेषु चोच्येषु नदीतीरेषु चैव हि। विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा॥") दक्षः। (यथा, महाभारते। १२। ७०। ८। "अनीर्ष्युर्गुप्तदारः स्याच्चोच्यः स्यादक्षवी नृपः॥") तीक्ष्णः। मनोज्ञः। इति मेदिनी। ये, १२॥

चोचं, क्ली, (प्रशस्तं चोचं त्वक् विद्यतेऽस्य। "अर्शआदिभ्योऽच्।" ५। २। १२७। इत्यच्।) गुडत्वक्। इत्यमरः। २। ४। १३४॥ (यथा, सुश्रुते चिकित्सास्थाने। २५। ४५। "त्वक्पत्रचोचमूलानि समङ्गाधातकीरसाः।" इति वाभटे सूत्रस्थाने। १५। ४५। तेजपात इति ख्यातम्। इति केचित्॥ (अस्य पर्य्यायाः यथा,—

"त्वक्पत्रञ्च वराङ्गं स्यात्कुङ्कुमं चोचमुत्कटम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
उपसुक्तफलावह्निम्। चोँचा इति ख्यातम्॥ तालफलम्। इति भरतः। कदलीफलम्॥ इति सारसुन्दरी॥ नारिकेलम्। इति स्वामी॥ वल्कलम्। चर्म्म। इति धरणी॥

चोचकं, क्ली, (चोच+स्वार्थे कन्। यद्वा, चोचेन त्वचा कायतीति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोटी, स्त्री, झाटी। इति हेमचन्द्रः। ३। ३६६॥

चोड़ः, पुं, (चुड़ति संवृणोति शरीरमिति। चुड़ संवरणे+अच्।) प्रावरणम्॥ देशविशेषः। इति मेदिनी। ड़े, १३॥

चोदना, स्त्री, (चोद्यते प्रवर्त्ततेऽनयेति। चुद क् तुदि+युच् टाप् च।) विधिः। (यथा, गीतायाम्। १८। १८। "ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना॥") प्रेरणा। यथा। चोदना लक्षणोऽर्थो धर्म्म इति जैमिनिसूत्रम्॥ एकोद्दिष्टादिश्राद्धादौ ब्राह्मणादि चोदना। इति स्मृतिः॥

चोदनागुड़ः, पुं, (चोदनया प्रेरणया गुड्यते उत्क्षिप्यते इति। गुड+"इगुपधज्ञेति।" ३। १

१३५। इति कः। क्रीड़नकाले कन्दुकानां ऊर्द्ध-क्षेपणप्रसिद्धतयास्य तथात्वम्।) कन्दुकः। इति त्रिकाण्डशेषः॥

चोद्य, क्ली, (चोदयति प्रेरयति चित्तं रसविशेषे अनेनेति। चुद्+णिच्+ण्यत्।) अद्भुतम्। प्रश्नः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ४३। ३४।

"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च।
अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च॥")

चोद्यः, त्रि, (चोदयितुं प्रेरयितुं योग्यः। "अर्हे कृत्यतृचश्च।" ३। ३। १६८। इति यत्।) चोदनार्हः। प्रेरणयोग्यः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ३८। ७।

"नीवारशूकैकदृगात्तवृत्तिः
सुसंयता चाग्निकार्य्येषु चोद्यः।
वने वसन्नतिथिष्वप्रमत्तो
धुरन्धरः पुण्यकृदेष तापसः॥")

चोपनं, क्ली, (चुप मन्दगमने+भावे ल्युट्।) शनैर्गमनम्॥

चोरः, पुंस्त्री, (चोरयतीति। चुर+णिच्+पचाद्यच्।) स्तेयकर्त्ता। तत्पर्य्यायः। चौरः२ दस्युः३ तस्करः४ प्रतिरोधी५ मलिम्लुचः६ स्तेनः७ ऐकागारिकः८ स्तेन्यः९ प्रच्छन्नजनः१० मोषकः११ पाटचरः१२ पराक्रन्दी१३ कुम्मिलः१४ खनकः१५ ग्रन्थिभेदकः१६ खानिकः१७। इति शब्दरत्नावली॥ प्रचुरपुरुषः१८। इति त्रिकाण्डशेषः॥ लुपः१९ तक्का२० रिभ्वा२१ रिपुः२२ रिक्का२३ विहायाः२४ तायुः२५ वनर्गुः२६ हुरश्चित्२७ मूषीवान्२८ मलिम्लुचः२९ अदाशंगुः३० टृक्कः३१। इति वैद्यनिघण्टौ ३ अध्यायः॥ (यथा, देवीभागवते १। १६। ६।

"चोरेषु चौरबुद्धिस्ते साधुबुद्धिस्तु तापसे।
खपरत्वं तवाप्यस्ति विदेहत्वं कथं नृप!॥")

क्रूरग्रहटी। इति क्रमचन्द्रिकाधृतहड्डचन्द्रः॥ गन्धद्रव्यविशेषः। यथा। चोरकुङ्कुमरोचनाः। इत्यष्टगन्धकथने आगमः॥

चोरकः, पुं, (चोरो गन्धद्रव्यविशेषस्तद्वत् कायतीति। कै+कः।) टृक्का। इति रत्नमाला॥ पिड़िङ्ग इति भाषा। (चोर+स्वार्थे कन्।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। ग्रन्थिकः२ खड्गः३ दुष्यत्रः४ क्षेमकः५ रिपुः६ चपलः७ कितवः८ धूर्त्तः९ पटुः१० नीचः११ निशाचरः१२ गन्धहासः१३ कोपनकः१४ चोरः१५ पलचोरकः१६ दुष्कुलः१७ ग्रन्थिलः१८ सुग्रन्थिः१९ पर्णचोरकः२० ग्रन्थिपर्णः२१ ग्रन्थिदलः२२ ग्रन्थिपत्रः२३। (यथा, सुश्रुते कल्पस्थाने ६ अध्याये।

"चोरको वरुणः कुष्ठं सर्व्वगन्धा ससप्तला॥")

अस्य गुणाः। तीव्रगन्धत्वम्। उष्णत्वम्। तिक्तत्वम्। वातकफनाशासुखरुजाजीर्णकृमिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

चोरपुष्पिका, स्त्री, (चोरपुष्पी+स्वार्थे संज्ञायां वा कन् टाप् पूर्व्वह्रस्वश्च।) चोरपुष्पी। इति शब्दरत्नावली॥ ("ग्रन्थिनी चोरपुष्पिका।" इति वैद्यकम्॥)

चोरपुष्पी, स्त्री, (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि पुष्पमस्याः। "पाककर्णपर्णेति।" ४। १। ६४। इति ङीष्।) वृक्षविशेषः। चोरा इति चोरहुली इति च ख्याता इति भरतः॥ तत्पर्य्यायः। ग्रन्थिनी २ कैग्निनी ३। इत्यमरः। २। ४। १२६॥ चोरपुष्पिका ४। इति शब्दरत्नावली॥ (चोरा ५। इति शब्दचन्द्रिका॥)

चोरस्नायुः, स्त्री, (चोरस्य स्नायुरिव।) काकनासालता। तस्करस्नायुरिति राजनिर्घण्टदर्शनात्॥

चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धोऽस्यस्य। अच् ततष्टाप्।) चोरपुष्पी। इति शब्दचन्द्रिका॥

चोरिका, स्त्री, (चोरस्य भावः। मनोज्ञादित्वात् ठन्।) चौरिका। चौर्य्यम्। इत्यमरटीकायां रायमुकुटः॥

चोलः, पुं, (चोलयति वसुच्छ्रयति स्त्रीणां वक्षःप्रदेशे इति। चुल उन्नतौ+अच्।) कञ्चुलिका। काँचुलि इति भाषा॥ (यथा, आनन्दलहर्य्याम्। ६६। तम्॥")

"निजां वीणां वाणी निचुलयति चोलेन निभृतं
तत्पर्य्यायः। कूर्पासकः२। इत्यमरः। २। ६। ११८॥ कञ्चुकः३। इति जटाधरः॥ कुञ्चुली ४ कुञ्चुलिका५। इति शब्दरत्नावली॥ स्त्रीणां निचोल इति रमानाथः॥ पुंसोऽप्येतौ चोला इति ख्यातौ इति सुभूतिः॥ नदादित्वात् चोली च। कूर्परः कफोणिर्णासु च तद्द्वयमस्यते क्षिप्यते अत्र कूर्पासः घञमनीषादित्वाद्रलोपः ततः स्वार्थे कः। इति भरतः॥ * ॥ देशविशेषः। इति शब्दरत्नावली। अधुना ताञ्जोर इति ख्यातः॥ क्षत्रधारिवेदयागानधिकारिक्षत्रविशेषः। स तु पूर्व्वं क्षत्रिय आसीत् सगरराजेनास्य धर्म्मनाशं वेश्यान्यत्वञ्च चकार। इति हरिवंशः॥

चोलकं, क्ली, (चोलयति आच्छादयतीति। चुल+णिच+अच्+स्वार्थे कन्। यद्वा चोल इव कायति इति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोलकः, पुं, (चोल इव कायति इति। कै+कः।) वाणवारः। कवचम्। इति हारावली। १६७॥ (देशभेदः। यथा कथासरित्सागरे। १६। ६५।

"उल्लङ्घ्यमाना कावेरी तेन संमर्द्दकारिणा।
चोलकेश्वरकीर्त्तिश्च कालुष्यं ययतुः समम्॥")

चोलकी, [न्] पुं, (चोलकमिवास्थास्य इति इनिः।) करीरः। नारङ्गः। किष्कुपर्व्व। इति मेदिनी। ने, १८४॥

चोलखुडकः, पुं, (चोलस्य अखुडक इव शुष्कत्वादित्वात् साधुः।) शिरोवेष्टः। इति त्रिकाण्डशेषः॥

चोषः, पुं, (चीयते इति। चि+घञ्।) तत्र उपदाहे+अप्। चोषासौ उपचीयते।) पार्श्वज्वाला॥ यथा.—

"हृच्छूलपीड़नयुतं पवनेन पित्ता-
च्छृड्दाहचोषबहुलं सकफप्रसेकम्।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च॥

चोषः पार्श्वस्थितायिनेव सन्तापः।" इति भावप्रकाशः॥ (यथाच, सुश्रुते। १। ४२।

"यो गले चोषसुत्पादयति सुखवेद्यञ्च जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः॥")

चोष्कः, पुं, (चन्द्यति आह्लादयति। चदि+घञ्। ततः स्कन्दति आक्रमते शत्रून् स्कुगति आश्रयते वा। स्कन्दि स्कु वा+घञ्। ततः पृषोदरादित्वे साधुः।) सिन्धुवारदेशीयाश्वः। इति त्रिकाण्डशेषः॥

चौर्य्यं, त्रि, (चोर एव इति। स्वार्थे ष्यञ्।) मनोज्ञम्। इति महाभारतम्॥

चौरः, पुं स्त्री, (चोर एव प्रज्ञादिभ्योऽण्। यद्वा चुरा शीलमस्य। "इति कुत्सादिभ्यो णः।" ४। ४। ६२। इति णः।) चोरः। इत्यमरः। २। १०। २४॥ (यथा, देवीभागवते। १। १६। ५६।

"चौरं वा तापसं वापि समानं मन्यते कथम्॥")

असुरविशेषः। यथा, हरिवंशे। १७६। १६।

"किरातीं चौरवसां चौरसेनानमस्कृताम्॥"

कविभेदः।

"कविरमरः कविरमरुः कविश्चौरो मयूरकः॥"
इत्युद्भटः॥)

चोरपुष्पी। इति मेदिनी। रे, ३७॥ (चोरपुष्पीशब्दे विवरणमस्य ज्ञेयम्॥) सुगन्धिद्रव्यविशेषः। इति हेमचन्द्रः॥

चौरिका, स्त्री, (चोरस्य कार्य्यं भावो वा। "इन्मनोज्ञादिभ्यश्च।" ५। १। १३३। इति युञ्। टापि अत इत्वम्।) चौर्य्यम्। इत्यमरः। २। १०। २५॥ (यथा, मनुः। १। ८२।

"चौरिकाकृतमायाभिर्धर्म्मज्ञाप्येति पादयः॥")

चौरी, स्त्री, (चौर+ङीष्।) चौर्य्यम्। इति शब्दरत्नावली॥ (गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४६।

"चन्द्रिका चन्द्रधात्री च चौरी चौरा च
चण्डिका॥")

चौर्य्यं, क्ली, (चोरस्य कर्म्म भावो वा। "गुणवचनाद् ब्राह्मणादिभ्यः कर्म्मणि च।" ५। १। १२४। इति ष्यञ्।) चौरधर्म्मः। चोरी इति चुरी इति च भाषा॥ तत्पर्य्यायः। स्तेयम्२ स्तेयम्३ चौरिका४। इत्यमरः। २। १०। २५॥ चौरी५। इति शब्दरत्नावली॥ चोरिका६। इत्यमरटीका॥ (यथा, मनुः। ६। २७६।

"सन्धिं छित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥")

चौलकर्म्म, [न्] क्ली, (चूड़ाया इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण् डस्य लत्वञ्च।

ततश्चौलमेव कर्म्म इति कर्म्मधारयः ।) चूड़ाकर्म्म । इति स्मृतिः ॥

चौलुक्यः, पुं. (चुलकस्य गोत्रापत्यमिति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) राजर्षिभेदः । इति हेमचन्द्रः । ३ । ७१२ ॥

च्यु, क क्षरणे । सहने । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सकच-सेट् ।) अन्तःस्याद्योपधः । क, च्यावयति । इति दुर्गादासः ॥

च्यु, ड गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) अन्तःस्याद्योपधः । ड, च्यवते । इति दुर्गादासः ॥

च्युत्, इर् क्षरणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । क्वचित् अकच ।) अन्तःस्यादियुक्तः । इर्, अच्युतत् अच्योतीत् । क्षर इह आसेचनम् । द्योतति घृतं वह्नौ यज्वा । आसिच्य तीत्यर्थः । इति दुर्गादासः ॥ (यथाच, भट्टिः । ६ । २८ ।

"सीतां जिघांक्षू सौमित्रे ! राक्षसावारतां ध्रुवम् ।
इदं प्रोक्षितमभ्यक्षं सम्पुक्षारेऽच्युतत्तयोः ॥"

"अच्युतत् गलितमकर्म्मकोऽत्र।" इति तट्टीकायां जयमङ्गलभरतौ ॥")

च्युतं, त्रि, (च्यूयते स्म इति । च्यु + कर्म्मणि क्तः । यद्वा च्युत् + घञर्थे कः ।) चरितम् । यथा,—

"पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतम् ॥"
इति श्रीभागवतम् ॥

(स्खलितम् । यथा, रघुः । ११ । २५ ।

"सम्भ्रमोऽभवदपोढकर्म्मणां
ऋत्विजां च्युतविकङ्कतस्रुचाम् ॥")

च्युतिः, स्त्री, (अवते प्रोणितादिकमस्या इति । च्यु + अपादाने क्तिन् ।) भगम् । इति हेमचन्द्रः । ३ । ६०६ ॥ गुदद्वारम् । इति शब्दरत्नावली ॥ (च्यु + भावे क्तिन् ।) चरणम् । यथा,—

"कुर्य्या हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥"
इति कुमारसम्भवे । ३ । १० ॥

च्युप्तः, पुं, (अवप्ते भाग्यतेऽनेन इति । च्यु + "च्युवः किच्च ।" उणां । ३ । २४ । इति पः स च कित् च्युधातुरत्र भाग्यार्थे वर्त्तते इत्युज्ज्वलदत्तः ।) सुखम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

च्युस, क क्षरणे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क्वचित् पुस्तके क्षरे । अन्तःस्यादियुक्तः । क, च्योसयति । इति दुर्गादासः ॥

च्योतं, क्ली, (च्युत + एषोदरादित्वादोत्वे साधुः ।) क्षीतम् । घृतादिक्षरणम् । इत्यमरटीका ॥

च्यौत्नः, त्रि, (च्यवते इति । "जनिदाच्युसि ति ।" उणां । ४ । १०४ । इति त्नक् ।) गमनकर्त्ता । अश्वजः । क्षीणपुण्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ बलम् । इत्युज्ज्वलदत्तः ॥)

छ

छ, छकारः । स तु यञ्जनसप्तमवर्णः । चवर्गद्वितीयवर्णश्च । (वङ्गाक्षरैः) तस्य लेखनप्रकारो यथा,

"ऊर्द्धादधोगता रेखा कुचिता कुण्डली ततः ।
पुनश्चाधोगता तासु सन्ति ब्रह्मग्रविष्णवः ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ ("इचुयशानां तालु ।" इति सूत्रकारेणोक्तम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥"
इति शिक्षाग्रन्थः ॥)

अस्योत्पत्तिर्यथा । प्रपञ्चसारे ।

"विसर्गस्तालुगः सोष्मा शं चवर्गश्च यन्तथा ।"

अघोषत्वेऽपि वर्गस्य द्वितीयादिवर्णोच्चारणे स्वरसद्भावादिति श्लोकगम्भीरसंसद्भावादिति च यथास्थानमन्वेतीति तट्टीकाकारो विश्वरूपः ॥ अस्या ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्याः प्रवक्ष्यामि द्विभुजान्तु त्रिलोचनाम् ।
पीताम्बरधरां नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"छकारं परमाक्षर्यं स्वयं परमकुण्डली ।
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिबिन्दुसहितं वर्णं सदा ईश्वरसंयुतम् ॥
पीतविद्युल्लताकारं छकारं प्रणमाम्यहम् ॥"

तस्य नामानि यथा, तन्त्रशास्त्रे ।

"छच्छन्दनं सुखमृगा च पशुः पशुपतिर्मृतिः ।
निर्म्मलं तरलं वह्निर्भूतमात्रा विलासिनी ॥
एकनेत्रश्च वृषली द्विशिरा वामकूर्परः ।
गोकर्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
माता निशाचरः पायुर्विचत्तः स्थितिशब्दकः ॥"

छं, त्रि, (छायते परिक्षिप्यते यत् इति । छो + कर्म्मणि घञर्थे कः ।) निर्म्मलम् । इति मेदिनी । छे, १ ॥ तरलम् । इत्येकाक्षरकोषः ॥

छः, पुं, (छो + भावे डः घञर्थे को वा ।) छेदनम् । इत्येकाक्षरकोषः ॥

छगः, पुं क्ली, (छं यज्ञादौ छेदनं गच्छति प्राप्नोतीति । गम + डः ।) छागः । इति हेमचन्द्रः । ४ । १२०५ ॥

छगणं, क्ली पुं, (छद + ल्युः । छः तस्मै अन्नेऽन्नादनायेत्यर्थः गण्यते इति । गण + कर्म्मणि अप् ।) करीषः । इति हेमचन्द्रः ।४।१२।७३ ॥

छगलं, क्ली, (छ्यति छिनत्ति छाद्यते वा । छो + छेदने + "छो गुग् डश्च ।" उणां । १ । ११३ । इति कलच् प्रत्ययः धातोर्गुणागमो डश्च ।) गौलक्ष्म् । इति मेदिनी । ले, १ ॥

छगलः, पुं क्ली, (छाद्यते छिद्यते देवोपहाराय इति । छो + कलच् गुणागमो डश्च ।) छागः । इति मेदिनी । ले, ६१ ॥ (यथा, सुश्रुते । १ । ४६ ।

"नाति स्थौल्यं गुरुः स्निग्धो मन्दपित्तकफः स्मृतः ।
छगलस्यनभिष्यन्दी तैर्यां पौरुषनाशनः ॥")

छगलकः, पुं स्त्री, (छगल + स्वार्थे कन् ।) छागः । इत्यमरः । २ । ६ । ७६ ॥

छगला, स्त्री, (छगलस्तदाकारोऽस्यस्य छगलवत् त्वक् विद्यतेऽस्येति वा । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् टाप् च ।) वृहदारकवृक्षः । इति शब्दरत्नावली मेदिनी च ॥ (व्यवहारोऽस्या यथा, "सुचूपूथिकातरणीजीवन्तीविभीतिकानन्दीभल्लातकच्छगलान्त्रीवृक्षादनीफल्गुशाल्मलीग्रेसुवनसतिप्रसवग्रन्थिकर्व्वुदारकोविदारप्रभृतीनि ।" इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

छगलाङ्घ्री, स्त्री, (छगलवदङ्घ्रिर्मूलमस्याः । ततो ङीष् ।) छगलान्त्री । इत्यमरटीकायां रमानाथः ॥

छगलान्त्री, स्त्री, (छगलवदन्त्रं अन्त्रं यस्याः ।) छगलान्त्री । इत्यमरटीकायां रायमुकुटः ॥ (पुंसि तु पीठस्थानभेदे । यथा, देवीभागवते । ७ । ३० । ७३ ।

"छगलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके ॥")

छगलान्त्रिका, स्त्री, (छगलान्त्री + स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) छगलान्त्री । इति शब्दरत्नावली ॥

छगलान्त्री, स्त्री, (छगलवदन्त्रं यस्याः ।) वृहदारकवृक्षः । इत्यमरः । २ । ४ । १३७ ॥ वृकः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने । ३८ अध्याये । "श्यामासहाश्यामात्रिवृद्दन्तीग्रन्थिनीतिल्वककम्पिल्लकरञ्चकक्षुकपुत्रश्रेणीगवाक्षीराजवृक्षकरञ्जदयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")

छगली, स्त्री, (छगल + जातित्वात् ङीष् ।) छागमाता । वृहदारकवृक्षः । इति विश्वः ॥

छटा, स्त्री, (छो + अटन् किच्च ।) दीप्तिः । (यथा, राजतरङ्गिण्याम् । ४ । १२८ ।

"प्रतापांशुच्छटाकूटैः पटवासमधर्म्मभिः ।
जम्बुद्वीपद्विजेन्द्रस्य येनातन्यत मण्डनम् ॥")

समूहः । यथा, माघे । १ । ४७ ॥

"सटाच्छटाभिन्नघनेन बिभ्रता
तृसिंहसैंहीमतनुं तनुत्वया ।"

(सटाच्छटाभिः केशरसमूहैः ।" इति मल्लिनाथः ॥)

छटाफलः, पुं, (छटा इव परस्परसंश्लष्टानि फलानि यस्य ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (पूगशब्दे विवृतिरस्य ज्ञेया ॥)

छटाभा, स्त्री, (छटाभिर्दीप्तिभिर्भाति इति । भा + किप् । यद्वा । भा + कः । टाप् च ।) विद्युत् । इति हारावली । ५८ ॥

छद(च)र्त्तं, क्ली, (छादयत्यनेनातपादिकमिति । छद + णिच् + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां । ४ । १५८ । इति ष्ट्रन् णिलोपः ह्रस्वश्च ।) रौद्रवृष्टिनिवारणार्थावरणविशेषः । छाति इति भाषा ॥ तत्पर्य्यायः । आतपत्रम् २ । इत्यमरः । २ । ८ । ३२ ॥ छायामित्रम् ३ पटोटजम् ४ । इति शब्दरत्नावली ॥ आतपवारणम् ५ । राजच्छत्रं यथा,—

"आतपत्रञ्च राज्ञस्तु वृषलक्ष्म सितन्तु तत् ।

पुष्करीकमधो भद्रासनं राजासनं तु यत् ॥"
इति जटाधरः ॥

अपि च शब्दरत्नावल्याम्।
"छत्रे कनकदण्डे तु रागश्छत्रमुदाहृतम्।
नृपलक्ष्म भवेत्तत्तु यच्छत्रं पृथिवीभुजाम् ॥"
तस्य गुणाः। दृष्टातपधूलिवायुहिमनाशित्वम्। वर्णदृष्टिकारित्वम्। गुप्तावरणमङ्गलकारित्वञ्च। इति राजवल्लभः ॥ * ॥ तस्योत्पत्तिर्यथा। एकदा व्येऽमासे जमदग्निमुनिर्धनुषि बाणान् सन्धाय सन्धाय प्रचिक्षेप ततत्पत्नी रेणुका तान् बाणानानीयानीय तस्मै प्रादात्। सा मध्याह्नकाले रौद्रेण पीड़िता वृक्षच्छायामवलम्ब्य किञ्चित् कालं स्थित्वा तानानिनाय। ऋषिस्तदा क्रुद्धस्तामाह किं चिरेणागता। सा आह सूर्य्यतेजसा मे शिरः पादौ च सन्तप्तौ तेन वृक्षच्छायामाश्रित्य स्थिता तस्मात् चिरायेतत् कृतम्। तच्छ्रुत्वा मुनिराह अद्य सूर्य्यमस्त्राग्नितेजसा निपातयिष्यामीत्युक्त्वा धनुषि बाणान् सन्धाय सूर्य्याभिमुखोऽतिष्ठत्। सूर्य्यस्तं दृष्ट्वा भीतो द्विजरूपेण आगत्य आह सूर्य्यादनादि भवति तेनान्नेन भवद्भिः कर्म्माणि क्रियन्ते कथमेनं हनिष्यसि एवं माकार्षीस्तथापि मुनिः शमं न जगाम। अथ सूर्य्यः शिरस्त्राणं छत्रं निर्म्माय तस्मै दत्त्वा अद्यप्रभृति एतत् लोके प्रचरिष्यति व्रतादिषु च अस्य दानं महाफलं स्यादित्युक्त्वा गतः ॥ * ॥ तस्य दानफलं यथा,—
"छत्रं हि भरतश्रेष्ठ! यः प्रदद्यात् द्विजातये।
शुभं शतशलाकं वै स प्रेत्य सुखमेधते॥
स शक्रलोके वसति पूज्यमानो द्विजातिभिः।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ!॥"
इति महाभारते दानधर्म्मः ॥

अथ छत्रयुक्तिः।
"विशेषश्चाथ सामान्यं छत्रस्य द्विविधा भिदा।
राज्ञश्छत्रं विशेषाख्यं सामान्यञ्चान्यदुच्यते ॥
तत्र विशेषच्छत्रोद्देशः।
सदण्डञ्चाथ निर्दण्डं तज्ज्ञेयं द्विविधं पुनः।
सदण्डं तत्र विज्ञेयं सारणाकुञ्चनात्मकम् ॥
दण्डः कन्दः शलाकाश्च रज्ज्वर्व्वस्त्रञ्च कीलकः।
षड्भिरेतैः सुसन्दिष्टैश्छत्रमित्यभिधीयते ॥
दिगष्टषट्चतुर्हस्तदीर्घो दण्डो युगक्रमात्।
षड्बाणवेदनयनवितस्त्या कन्द उच्यते ॥
शतान्यशीतिः षष्टिश्च चत्वारिंशद्युगक्रमात्।
शलाकाः षट्पञ्चवेदत्रिहस्तैः सम्मिताः क्रमात् ॥
कवभिस्तन्तुभिः सूत्रं सूत्रैस्तु नवभिर्गुणः।
गुणैस्तु नवभिः पाशो रश्मिस्तैर्नवभिर्भवेत् ॥
नवाष्टसप्तषट्संख्यैरश्मिभी रज्जवः क्रमात्।
वस्त्रं शलाकाद्विगुणमायामेन प्रतिष्ठितम् ॥
भानुदिग्ग्रहवसुभिरङ्गुलीभिस्तु कीलकः।
वस्त्रात् षष्ठ्यानसदितं तदाज्ञामेव भूतये ॥
पादोनं युवराजस्य अन्येषान्तु तदर्द्धतः ॥
एतेन राज्ञो दण्डो दशहस्तः युवराजस्य ततु अन्येषामपि तदेव।

विशुद्धकाष्ठस्य तु दण्डकन्दौ
तथा शलाका अपि शुद्धवंशजाः।
रज्जुश्च रक्ता वसनञ्च रक्तं
छत्रप्रसादं नृपतेर्व्वदन्ति ॥
प्रसादमिति प्रसादार्हम्।
नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु कानकः।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥
चान्दनौ दण्डकन्दौ चेत् सुशुक्ले रज्जुवाससी।
छत्रं मनोहरं राज्ञां स्वर्णकुम्भोपशोभितम् ॥
शुक्लानि रज्जुवासांसि स्वर्णकुम्भस्तथोपरि।
इदं कनकदण्डाख्यं छत्रं सर्व्वार्थसाधकम् ॥
दण्डकन्दशलाकाश्च शुद्धस्वर्णेन निर्म्मिताः।
कीलकं स्वर्णघटितमशुक्ले रज्जुवाससी ॥
कुम्भादिरथ हंसादिश्चामरादिर्यथाक्रमम्।
कुम्भादावथ हंसादौ नवरत्नानि रचयेत् ॥
द्वात्रिंशन्मौक्तिकी माला द्वात्रिंशद्वस्त्र दापयेत्।
सर्व्वोपरि ब्रह्मजातिं विशुद्धं हीरकं न्यसेत् ॥
दण्डान्ते कुरुविन्दांश्च पद्मरागांश्च विन्यसेत्।
स्वामिहस्तैकमानेन चामरः सित इष्यते ॥
इत्ययं नवदण्डाख्यश्छत्रराजो महीभुजाम्।
अभिषेके विवाहे च ग्रहाणां प्रीतिवर्द्धनः ॥
पताका नवदण्डाग्रे राज्ञोऽङ्गुलिसंमिता।
अयं दिग्विजयी नाम छत्रराजो महीभुजाम्॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥

छत्रः, पुं, (छद+णिच्+ष्ट्रन् ह्रस्वश्च।) मूलेन पत्रेण च वचाकारवृक्षः। छातारियाविष। छातनाविष। खरविष इति च भाषा। तत्पर्य्यायः। अतिच्छत्रः २ कटुः ३। इति रत्नमाला ॥ भूतलक्षणम्। इति राजनिर्घण्टः ॥

छत्रकः, पुं, (छत्रमिव कायति इति। कै+कः।) मत्स्यरङ्गपक्षी। इति शब्दचन्द्रिका ॥ अतिच्छत्रः। राङ्गा कुलेखाड़ा इति भाषा ॥ इति रत्नमाला ॥ ईश्वरगृहविशेषः। इति शब्दरत्नावली ॥

छत्रगुच्छः, पुं, (छत्रमिव गुच्छो यस्य।) गुच्छलक्षणम्। इति राजनिर्घण्टः ॥

छत्रचक्रं, क्ली, (छत्राकृति चक्रम्।) चक्रविशेषः। यथा, समयान्ते छत्रचक्रम्।
"अश्विनीमघमूलाद्यं चक्रं छत्रचयात्मकम्।
प्रतीचीमध्यरेखाया ईशानान्तं हयाधिपः॥
आग्नेयान्तं नराधीशो नैर्ऋतान्तं गजाधिपः।
एषां छत्रविभागेन ज्ञातव्यञ्च शुभाशुभम्॥
अन्यस्य राज्ञो नामर्क्षं यत्र छत्रे ततः फलम्।
चामरं कलसं वीणा छत्रं दण्डः पतद्ग्रहः॥
आसनं कीलकं रज्जुर्नव भेदाः प्रकीर्त्तिताः।
यत्र छत्रे स्थितः सौरिर्भङ्गं तस्य विनिर्द्दिशेत्॥
चामरे चञ्चता वायोरनावृष्टिः प्रजायते।
दुर्भिक्षञ्च भवेत् घोरं प्रजापीड़ा न संशयः॥
कलसस्थे भवेद्युद्धं भङ्गो घातादिकं ध्रुवम्।
वीणास्थेनार्कपुत्रेण षड्राज्ञो विनश्यति॥
चलचित्तो भवेद्राजा भयभीता च मेदिनी।
यदा ऋक्षत्रये सौरिश्छत्रे दण्डे पतद्ग्रहे॥

तदा तस्य भवेद्भङ्गश्छत्रस्यास्य न संशयः।
आसनस्थे भवेन्नाश आसनस्थे शनैश्चरे॥
युवराजत्रयः कीले बन्धनं रज्जुसंस्थिते।
सौम्ययुक्तोऽतिचारस्थः शनिरुक्तफलो न हि॥
वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति सः।
शनिराहुकुजादित्या यदा जीवेन्दुसंयुताः॥
उत्तराधोशराज्ञो वै निश्चितं छत्रभङ्गदाः।
क्रूरं चतुष्टयञ्चैव बुधचन्द्रेण संयुतम्॥
पूर्व्वच्छत्रविनाशाय तथा पापचतुष्टयम्।
शुक्रेन्दुसंयुतं छत्रे दक्षिणे शस्त्रभङ्गदम्॥
एवमन्येषु राज्येषु नामर्क्षात् फलमादिशेत्।
यथा दुष्टफलः सौरिस्तथा सौम्यफलो गुरुः॥
भौमज्ञौ गुरुराहू च रविचन्द्रौ बले समौ।
यथा हानिकराः क्रूरास्तथा सौम्याः शुभङ्कराः॥
एतेऽष्टौ ग्रहाश्छत्रे परचक्रेण भङ्गदाः।
नृपनामर्क्षगो राहुः केतुर्व्वा यत्र संस्थितः॥
छत्रभङ्गो भवेत्तस्य विषदानेन भूपतेः।
मृगयासाहसं याचां दुष्टहस्त्यश्वबाहनम्॥
विग्रहञ्च त्यजेद्राजा छत्रस्थे क्रूरखेचरे।
ज्ञात्वैवं शान्तिकं कुर्य्यात् ग्रहाणां जायते शुभम्॥"

छत्रधारः, पुं, (छत्रं धरतीति। धृ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) छत्रधरः। छातिधरा इति भाषा॥ तत्पर्य्यायः। छायाकरः २। इति हेमचन्द्रः। ३। ४२८॥ (यथा, पद्मतन्त्रे। ३। ६७। "खपत्रे च यथा, जननी देवी कञ्चुकी मालिकः ग्रथ्यापालकः सभाध्यक्षः सांवत्सरिकः भिषक् जलवाहकः ताम्बूलवाहकः आचार्य्यः अङ्गरक्षकः स्थानचिन्तकः छत्रधारः विलासिनी च॥")

छत्रपत्रं, क्ली, (छत्रमिव पत्रमस्य।) स्थलपद्मम्। इति त्रिकाण्डशेषः॥

छत्रपत्रः, पुं, (छत्रमिव विस्तृतं पत्रमस्य।) भूर्जवृक्षः। इति रत्नमाला॥ (भूर्जशब्दे विवृतिरस्य ज्ञातव्या॥) मानकचुः। इति केचित्॥ सप्तपर्णवृक्षः। इति च केचित्॥

छत्रभङ्गः, पुं, (छत्रस्येव रचितुः स्वामिन इत्यर्थः भङ्गो यत्र।) वैधव्यम्। खातन्त्र्यम्। नृपनाशः। इति मेदिनी। गे, ५६॥

छत्रा, स्त्री, (छत्रमिव आकृतिर्विद्यतेऽस्याः। अर्शआदित्वादच्। ततष्टाप्। यद्वा, छदति आच्छादयति स्रोतःपत्तिस्थानमिति। छद्+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा। ४।१५८। इति ष्ट्रन्। ततः स्त्रियस्य ङीषोऽनित्यत्वात् टाप्।) मिषिः। मौरी इति भाषा॥ कुसुम्भुरु। धन्या इति भाषा॥ (यथा,—
"सुस्नपर्पटकोदीच्यछत्राख्योशीरचन्दनैः।
शृतं शीतं जलं दद्यात् छर्द्दाहज्वरशान्तये॥
छत्रा धान्याकम्॥" इति भावप्रकाशः॥)
शिलीन्ध्रम्। इति मेदिनी। रे, ३८॥ कोँड़कछाता इति भाषा॥ मञ्जिष्ठा। इति राजनिर्घण्टः॥ (निवृत्तसन्तापान्तर्गतरसायनौषधिविशेषः। तस्य

लक्षणं यथा, सुश्रुते चिकित्सितस्थाने ३० अः।
"क्षणसर्पस्वरूपेण वाराहीकन्दसम्भवा।
एकपत्रा महावीर्य्या भिन्नाञ्जनसमप्रभा॥
कृत्तातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसम्भवे॥")

कृत्ताकं, क्ली, (कृत्ता इव कायतीति। कै+कः।) किण्वाकुः। कृत्तिका। इति प्रायश्चित्तविवेकः॥ (यथा, मनुः। ५। १६।
"कृत्ताकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्वा जग्ध्वा पतेद्द्विजः॥")

कृत्ताकः, पुं, (कृत्तमिव अकति आच्छादकत्वं गच्छतीति। कृत्त+अक्+अच्।) जालवर्व्वूरकवृक्षः। इति राजनिर्घण्टः॥

कृत्ताकी, स्त्री, (कृत्ताक+गौरादित्वात् ङीष्।) राम्ना। इत्यमरः। २। ४। ११५॥

कृत्तातिच्छत्रः, पुं, (कृत्तमतिक्रम्य छदति आच्छादयतीति। अति+छद्+क्विप्।) कृत्ताकारजलोद्भवसुगन्धाख्यतृणविशेषः। तत्पर्य्यायः। कृत्तातिच्छत्रा २ पालघ्नः ३ अतिच्छत्रा ४ सुगन्धा ५ कृत्तकः ६ कटुकः ७ कटुः ८। इति शब्दरत्नावली॥

कृत्ताधान्यं, क्ली, (कृत्ता धान्यमिव।) धान्याकम्। इति राजनिर्घण्टः॥

कृत्तिका, स्त्री, (कृत्ता एव। कृत्ता+स्वार्थे कन्। अत इत्वच।) घृतीलीन्ध्रम्। कौँड़काछाता इति भाषा॥ तत्पर्य्यायः। गोमयच्छत्रिका २ दिलीरम् ३ घृतीलीन्ध्रकम् ४ उर्व्वङ्गम् ५ वसारोहम् ६ गोलासम् ७। इति हारावली॥ कृत्ताकम् ८। इति स्मृतिः॥ उच्छिलीन्ध्रम् ९। इति श्रीभागवतम्॥ करीषेचुपलालपृथ्वीवेणुजच्छत्रिकायाः सामान्यगुणाः। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। पित्तश्लेष्मत्वम्। गुरुत्वम्। कृद्दोषातीसारज्वरश्लेष्मरोगकारित्वञ्च॥ पलालजच्छत्रिकागुणाः। पाके स्वादुरसत्वम्। रूक्षत्वम्। दोषकारित्वञ्च॥ शुचिस्थानकालवंशगोलजश्वेतच्छत्रिकाया गुणाः। अतिदोषकारित्वम्। अन्यच्छत्रिकास्तेभ्यो विगर्हिताः। इति राजवल्लभः॥

कृत्री, [न्] पुं, (कृत्तं कौशलादिभिराच्छादकत्वं विद्यतेऽस्य। कृत्त+इनिः।) नापितः। इति शब्दरत्नावली॥ कृत्तविशिष्टे, त्रि। यथा,—
"गच्छेद्वर्षातपे कृत्री दण्डी राज्ञटवीषु च।"
इति स्मृतिः॥
(यथा च हरिवंशे। २५३। ५।
"मौञ्जी यज्ञोपवीती च कृत्री दण्डाजिनी तथा।
वामनो धूमरक्ताक्षो भगवान् बालरूपधृक्॥")

कृत्वरः, पुं, (कृदते अपवारयति वर्षोष्णादिकमिति। कृद अपवारणे+"कृदिकारादक्वरच्।" उणां। ३। १। इति क्वरच् प्रत्ययेन साधुः।) गृहम्। कुञ्जः। इति सिद्धान्तकौमुदीसुषेणादिवृत्तिः॥

कृद्, तृ क संवृतौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं सकं सेट्।) कृदयति। इति दुर्गादासः॥ (यथा, कविरहस्ये। १६।
"कृदयति सुरलोकं यो गुणैर्यश्च युद्धे
सुरयुवतिविमुक्ताश्छादयन्ति स्म यञ्च॥")

कृद, कि ञ संवृतौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-उभं-सकं-सेट्।) कि ञ, छादयति छादयते कृदति कृदते दिशं मेघः। आच्छादयति इत्यर्थः। इति दुर्गादासः॥

कृद, म कि ञ ऊर्ज्जने। ऊर्ज्जनं बलं जीवनञ्च। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-उभं-सकं-सेट्।) कृदयति पुत्रं पिता। जीवयति बलवन्तं करोति वा इत्यर्थः। इति दुर्गादासः॥

कृदः, पुं, (कृदति आच्छादयतीति। कृद+अच्।) पत्रम्। (यथा, रामायणे। २।५५।६।
"ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम्॥")
पत्रः। ग्रन्थिपर्णवृक्षः। तमालवृक्षः। इति मेदिनी। दे, ५॥

कृदनं, क्ली, (कृदति आच्छादयतीति। कृद+ल्युः।) पत्रम्। पत्रः। (यथा, महाभारते। ३। १५८। ६६।
"विमलस्फाटिकाभानि पाण्डरच्छदनैर्द्विजैः।
कलहंसैरुपेतानि सारसाभिरुतानि च॥"
कृद+भावे ल्युट्।) पिधानम्। इति मेदिनी। ने, ६५॥ तमालपत्रम्। इति राजनिर्घण्टः॥ तेजपात इति भाषा॥

कृदपत्रः, पुं, (कृदानि आच्छादकानि पत्राणि यस्य।) भूर्जपत्रवृक्षः। इति कात्यायनी रत्नमाला॥

कृदिः, [स्] क्ली, (कृदयतीति कृद्यतेऽनेन वा। कृद्+णिच्+"अर्च्चिशुचिहुसृपिकृदिभ्यः इसिः।" उणां। २। १०६। इति इसिः। "इसनृचनृक्षिषु च।" ६। ४। ६७। इति ह्रस्वः।) पटलम्। इत्यमरः। २। २। १४॥ (यथा, भागवते। ७। १४। १३।
"कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम्।
क्व तदीयरतिर्भार्य्या क्वायमात्मा नभश्छदिः॥")

कृद्म, [न्] क्ली, (कृद्यते आव्रियते स्वरूपमनेनेति। कृद+"सर्व्वधातुभ्यो मनिन्।" उणां। ४। १४४। इति मनिन्।) व्याजः। (यथा, रघुः। १२। २
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्तामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा॥")
कपटः। प्राज्ञम्। व्यपदेशः। स्वरूपाच्छादनम्। इति मेदिनी। ने, ६४॥

कृद्मतापसः, पुं, (कृद्मना कपटेन तापसः। अप्रकृततपस्वितया एवास्य तथात्वम्।) कूलतपस्वी। तत्पर्य्यायः। सर्व्वाभिसन्धी २ वैड़ालव्रतिकः ३ वेषधारी ४। इति शब्दरत्नावली॥

कृद्मिका, स्त्री, (कृद्म अस्त्यस्याः। व्रीह्यादित्वादिनिः संज्ञायां कन् टाप् च।) गुडूची। इति राजनिर्घण्टः॥

कृन्दः, पुं, (कृन्द्यते इति। कृन्द+भावे घञ्।) अभिप्रायः। (यथा, रामायणे। २। ६। ७।
"मयोच्यमानं यदि ते श्रोतुं कृन्दो विलासिनि!।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम्॥")

वग्रः। इत्यमरः। ३। ३। ८८॥ अभिलाषः। इति भरतः॥ विषम्। इति शब्दचन्द्रिका॥ रहसि च। इत्यमरटीकासारसुन्दरी॥

छन्दः, [स्] क्ली, (चन्द्यते आह्लाद्यते चन्द्यतेऽनेन वा। चदि आह्लादे+"चन्देरादेश्च छः।" उणां। ४। २१८। इति असुन् चस्य छश्च।) वेदः। (यथा, रघुः। १। ११।
"आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥")
स्वेराचारः। अभिलाषः। (यथा, महाभारते। १२। २०१। १२।
"कामात्मकाश्छन्दसि कर्म्मयोगा
एभिर्विमुक्तः परमभ्युपैति॥")
पद्यम्। इति मेदिनी। से, २२॥ अस्य लक्षणं यथाह गङ्गादासः।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्॥"
एषामर्थः। अक्षरसंख्यातं अक्षरगणनया परिप्राप्तं वृत्तमुच्यते। मात्राकृता मात्रागणनया निर्णीता जातिर्जातिसंज्ञिका भवति। समं समचतुष्पादम्। अर्द्धसमं यस्य प्रथमः पादः तृतीयेन पादेन तुल्यः चतुर्थः पादो द्वितीयेन पादेन तुल्यः। विषमं पृथक्लक्षणचतुष्पादम्॥ (तच्च समवृत्तन्तु उक्थादिसंज्ञाभेदेन षड्विंशतिप्रकारकम्। यदुक्तं छन्दोमञ्जर्य्याम्।
"आद्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः।
पादैरुक्थादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम्॥
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्व्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥
त्रिष्टुप् च जगती चैव तथातिजगती मता।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा स्मृते॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चैव तथातिकृतिरुत्कृतिः॥"
छन्दोलक्षणोपयोगिगणास्तु दश्र। यदुक्तं तत्रैव,
"म्यरस्तजैर्भुगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥
गुरुरेको गकारस्तु लकारो लघुरेककः।
क्रमेण चैषां रेखाभिः संस्थानं दर्शयते यथा॥"
म ऽऽऽ, न ।।।, भ ऽ।, य ।ऽऽ, ज ।ऽ।,
र ऽ।ऽ, स ।।ऽ, त ऽऽ।, ग ऽ, ल।)
छन्दस्तु नानाविधम्। तस्य ग्रन्थाः छन्दोविचितिपिङ्गलच्छन्दोमञ्जरीवृत्तरत्नाकरश्रुतबोधाद्यः सन्ति तेषु छन्दोमञ्जर्य्यादुक्तलक्षणोदाहरणादीनि लिख्यन्ते॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
एकाक्षरा वृत्तिः । उक्था ।		
श्रीः	गश्री ऽ	श्रीस्ते । सास्ताम् ॥
द्व्याक्षरा वृत्तिः । अत्युक्था ।		
स्त्री	गौ स्त्री ऽ,ऽ	गोपस्त्रीभिः । कृष्णो रेमे ॥
त्र्याक्षरा वृत्तिः । मध्या ।		
नारी	मो नारी ऽऽऽ	गोपानां नारीभिः । श्लिष्टोऽवात् कृष्णो वः ॥
मृगी	रो मृगी ऽ।ऽ	सा मृगीलोचना । राधिका श्रीपतेः ॥
चतुरक्षरा वृत्तिः । प्रतिष्ठा ।		
कन्या	गौ चेत् कन्या ऽ,ऽऽऽ	भास्वत्कन्या सैका धन्या । यस्याः कूले कृष्णोऽखेलत् ॥
सती	नगि सती ।।।,ऽ	सुररिपो ! तव पदम् । नमति सा ननु सती ॥
पञ्चाक्षरा वृत्तिः । सुप्रतिष्ठा ।		
पङ्क्तिः	भ्गौ गिति पङ्क्तिः ऽ।।,ऽ,ऽ	कृष्णसनाथा तर्णकपङ्क्तिः । यासुनकच्छे चारु चचार ॥
प्रिया	सलगैः प्रिया ।।ऽ,।,ऽ	व्रजसुभ्रुवो विलसत्कलाः । अभवन् प्रिया सुरवैरिणः ॥
षडक्षरा वृत्तिः । गायत्री ।		
तनुमध्या	त्यौ चेत् तनुमध्या ऽऽ।,।ऽऽ	मूर्त्तिर्मुरघ्नोरद्भुतरूपा । आस्तां मम चित्ते नित्यं तनुमध्या ॥
ग्रन्थिवदना	ग्रन्थिवदना न्यौ ।।।,।ऽऽ	ग्रन्थिवदनानां व्रजतरुणीनाम् । अधरसुधोर्म्मिं मधुरिपुरेच्छत् ॥
सोमराजी	द्विया सोमराजी ।ऽऽ,।ऽऽ	हरे ! सोमराजीसमा ते यशः श्रीः । जगन्मण्डलस्य च्छिनत्त्यन्धकारम् ॥
विद्युल्लेखा	विद्युल्लेखा मो मः ऽऽऽ, ऽऽऽ	
वसुमती	तृसौ चेद् वसुमती ऽऽ।,।।ऽ	
सप्ताक्षरा वृत्तिः । उष्णिक् ।		
मधुमती	ननगि मधुमती ।।।,।।।,ऽ	रविदुहितटे नवकुसुमततिः । यधित मधुमती मधुमथनमुदम् ॥
कुमारललिता	कुमारललिता जसगाः ।ऽ।,।।ऽ,ऽ	सुरारितनुवल्ली कुमारललिता सा । व्रजैणनयनानां ततान मुदमुच्चैः ॥
मदलेखा	मसगौ स्यात् मदलेखा ऽऽऽ,।।ऽ,ऽ	रङ्गे बाहुविलम्बान्नीन्द्राम्मदलेखा । लम्बाभून्मुरघ्नौ कस्तूरीरसचर्चा ॥
हंसमाला	सरगैर्हंसमाला ।।ऽ,ऽ।ऽ,ऽ	
अष्टाक्षरा वृत्तिः । अनुष्टुप् ।		
चित्रपदा	चित्रपदा यदि भौ गौ ऽ।।,ऽ।।,ऽ,ऽ	यासुनसैकतदेशे गोपवधूजलकेलौ । कंसरिपोर्गतिलीला चित्रपदा जगदव्यात् ॥
माणवकम् माणवकक्रीड़मिति केचित् ।	भात्तलगा माणवकम् ऽ।।,ऽऽ।,।,ऽ	चञ्चलचूड़ञ्चपलैर्वृत्तसकुलैः केलिपरम् । ध्याय सखे स्मेरमुखं नन्दसुतं माणवकम् ॥
विद्युन्माला	मो मो गो गो विद्युन्माला ऽऽऽ,ऽऽऽ,ऽ,ऽ	वासो वल्लीविद्युन्माला वर्हश्रेणी शाक्रञ्चापः । यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः ॥
समानिका	न्यौ रजौ समानिका तु ऽ,।,ऽ।ऽ,।ऽ।	यस्य कृष्णपादपद्ममस्ति हृत्तड़ागसद्म । धीः समानिका परेण नोचिताच मत्सरेण ॥
प्रमाणिका नगसरूपिणी इति कुत्रापि ।	प्रमाणिका जरौ लगौ ।ऽ।,ऽ।ऽ,।,ऽ	पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः । श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥
गजगतिः	नभलगा गजगतिः ।।।,ऽ।।,।,ऽ	रविसुतापरिसरे विहरतो हरि हरेः । व्रजवधूगजगतिसुदमलं यतनुत ॥
हंसरुतम् नाराचिका	न्यौ गौ हंसरुतमेतत् ऽऽऽ,।।।,ऽ,ऽ नाराचिका तरौ लगौ ऽऽ।,ऽ।ऽ,।,ऽ	
नवाक्षरा वृत्तिः । बृहती ।		
भुजगशिशुभृता भृतेत्यत्र स्तेति युतेति च केचित् ।	भुजगशिशुभृता नौ मः ।।।,।।।,ऽऽऽ	वृन्दातटनिकटचौञ्चौ भुजगशिशुभृता यासीत् । सुररिपुदलिते नागे व्रजजनसुखदा साभूत् ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मणिमध्यम्	स्यान्मणिमध्यं चेत् भमसाः ऽ।।,ऽऽऽ,।।ऽ	कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।
		चित्रपदाभो नन्दसुतश्चारु ननर्त्त स्मेरमुखः ॥
भुजङ्गसङ्गता	सजरैर्भुजङ्गसङ्गता ।।ऽ,।ऽ।,ऽ।ऽ	तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।
		कथमेतु वत्सचारकश्चपलः सदैव तां हरिः ॥
हलमुखी	राज्ञसाविह हलमुखी ऽ।ऽ,।।।,।।ऽ	
भद्रिका	भद्रिका भवति रो नरौ ऽ।ऽ,।।।,ऽ।ऽ	
दशाक्षरा वृत्तिः । षड्वृत्तिः ।		
रुक्मवती	रुक्मवती सा यत्र भमस्गाः ऽ।।,ऽऽऽ,।।ऽ,ऽ	कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंशद्विषि भक्तिः ।
रूपवती क्वचित् । चम्पकमाला इति क्वापि ।		राज्यपदे हन्मिग्रालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥
मत्ता	ज्ञेया मत्ता मभसगरुष्टा ऽऽऽ,ऽ।।,।।ऽ,ऽ	पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे ।
		उद्दीयन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥
त्वरितगतिः	त्वरितमतिश्च नजनगैः ।।।,।ऽ।,।।।,ऽ	त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता ।
		सुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥
मनोरमा	नरजगैर्भवेन्मनोरमा ।।।,ऽ।ऽ,।ऽ।,ऽ	तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।
		सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥
शुद्धविराट्	भ्सौ ज्गौ शुद्धविराड्इदं मतम् ऽऽऽ,।।ऽ,।ऽ।,ऽ	
पणवम्	न्सौ य्गौ चेति पणवनामेदम् ऽऽऽ,।।।,।ऽऽ,ऽ	
मयूरसारिणी	र्नौ र्गौ मयूरसारिणी स्यात् ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ	
उपस्थिता	तो नौ गुरुश्चेयमुपस्थिता ऽऽ।,।ऽ।,।ऽ।,ऽ	
दीपकमाला	दीपकमाला भ्मौ मता जगौ ऽ।।,ऽऽऽ,।ऽ।,ऽ	
हंसी	ज्ञेया हंसी मभनगयुता ऽऽऽ,ऽ।।,।।।,ऽ	
एकादशाक्षरा वृत्तिः । त्रिष्टुप् ।		
इन्द्रवज्रा	स्यादिन्द्रवज्रा यदि तौ जगौ गः ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतियुक्तदृष्टौ ।
		यो गोकुलं गोपकुलञ्च सुप्तं चक्रे स नो रक्षतु चक्रपाणिः ॥
उपेन्द्रवज्रा	उपेन्द्रवज्रा जतजास्ततो गौ ।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते ।
उपेन्द्रवज्रायाः इन्द्रवज्रायाश्च चरणघटिता उपजातयः । ताश्च चतुर्व्वर्णप्रस्तारभेदादात्यन्तौ त्यक्त्वा चतुर्दशप्रकारा भवन्ति ।	अनन्तरोदितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्याश्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥	स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥
सुमुखी	नजजलगैर्गदिता सुमुखी ।।।,।ऽ।,।ऽ।,ऽ,ऽ	तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः ।
		तिमिरमुदस्य सुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम् ॥
ग्रालिनी	मात्तौ गौ चेत् ग्रालिनी वेदलोकैः ऽऽऽ,ऽऽ। ऽऽ।,ऽ,ऽ	अंहो हन्ति ज्ञानवृद्धिं विधत्ते धर्म्मं धत्ते काममर्थञ्च सूते।
अस्याश्चतुर्थे ततः सप्तमे च यतिः ।		सूक्तिं दत्ते सर्व्वदोपास्यमाना पुंसां श्रद्धाग्रालिनी विष्णुभक्तिः॥
वातोर्म्मी	वातोर्म्मीयं गदिता म्नौ तगौ गः ऽऽऽ,ऽ।।,ऽऽ।,ऽ,ऽ	ध्याता मूर्त्तिः चरणमधश्युतस्य श्रेणी नाम्नां गदिता हेलयापि । संसारेऽस्मिन् दुरितं हन्ति पुंसां वातोर्म्मीपोतमिवाम्भोधिमध्ये ॥
भ्रमरविलसिता भ्रमरविलसितमिति केचित् ।	मो गो नौ गो भ्रमरविलसिता ऽऽऽ,ऽ,।।।,।।।,ऽ	मुग्धे ! मानं परिहर न चिरात्तारुण्यन्ते सफलयतु हरिः ।
		फुल्लावल्ली भ्रमरविलसिताभावे शोभां कलयति किमु ताम् ॥
अनुकूला	स्यादनुकूला भतनगगाश्चेत् ऽ।।,ऽऽ।,।।।,ऽ,ऽ	वल्लववेश्या सुररिपुमूर्त्तिर्गोपन्यासोद्धतरतिपूर्त्तिः ।
		वाञ्छितसिद्ध्यै प्रणतिपरस्य स्यादनुकूला जगति न कस्य ॥
रथोद्धता	रात् परैर्नरलगे रथोद्धता ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ	राधिका दधिविलोड़नस्थिता तत्यवेणुनिनदैरथोद्धता ।
		यासुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात्॥
स्वागता	स्वागता रनभगैर्गुरुश्च ऽ।ऽ,।।।,ऽ।।,ऽ,ऽ	यस्य चेतसि सदा सुरवैरी वल्लवीजनविलासविलोलः ।
		तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
दोधकम्	दोधकमिच्छति भत्रितयाद्गौ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	देव ! सदोधकदम्बतलस्थ ! श्रीधर ! तारकनामपदं मे । कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि क्षणमेष्यति योगम् ॥
मोटनकम्	स्यान्मोटनकं तजजाश्च लगौ ऽऽ।,।ऽ।,।ऽ।,।,ऽ	रङ्गे खलु मल्लकलाकुशलश्चाणूरमहाभटमोटनकम् । यः केलिलवेन चकार स मे संसाररिपुं प्रतिमोटयतु ॥
श्येनी श्येनिका इति क्वचित् ।	श्येन्युदीरिता रजौ रलौ गुरुः ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	यस्य कीर्त्तिरिन्दुकुन्दचन्दनश्येन्यश्येलोकपावनी सदा । जाह्नवीव विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् ॥
श्रीः	वाणरसैः स्यात् भतनगगैः श्रीः ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
वृत्ता	ननसगगुरुरचिता वृत्ता ।।।,।।।,।।ऽ,ऽ,ऽ	
भद्रिका	ननरलगुरुभिश्च भद्रिका ।।।,।।।,ऽ।ऽ,।,ऽ	
मौक्तिकमाला	मौक्तिकमाला यदि भतनात् गौ ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं ज्सौ तादृ गकारौ ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
उपचित्रम्	उपचित्रमिदं ससमाक्षगौ ।।ऽ,।।ऽ,।।ऽ,।,ऽ	
कुपुरुषजनिता	कुपुरुषजनिता ननौ र्गौ गः ।।।,।।।,ऽ।ऽ,ऽ,ऽ	
अनवसिता	अनवसिता न्यौ भ्गौ गुरुरन्ते ।।।,।ऽऽ,ऽ।।,ऽ,ऽ	
विध्वङ्कमाला	विध्वङ्कमाला भवेत्तौ तगौ गः ऽऽ।,ऽऽ।,ऽऽ।,ऽ,ऽ	
सान्द्रपदम्	सान्द्रपदं स्याद्भतनगलेश्च ऽ।।,ऽऽ।,।।।,ऽ,।	
शिखण्डितम्	शिखण्डितमिदं ज्सौ त्गौ गुरुश्चेत् ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
द्वादशाक्षरा वृत्तिः । जगती ।		
चन्द्रवर्त्म	चन्द्रवर्त्म निगदन्ति रनभसैः ऽ।ऽ,।।।,ऽ।।,।।ऽ	चन्द्रवर्त्म पिहितं घनतिमिरे राजवर्त्म रहितं जनगमने: । इदवर्त्म तदलङ्कुरु सरसे ! कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
वंशस्थविलम् वंशस्थनितमिति क्वापि ।	वदन्ति वंशस्थविलं जतौ जरौ ।ऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	विलासवंशस्थविलं सुखानिलैः प्रपूर्य्य यः पञ्चमरागसुन्दिरम् । व्रजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु नः ॥
इन्द्रवंशा वंशस्थविलेन्द्रवंशचरणोभयघटिता- श्चतुर्वर्णप्रस्तारीयाद्यन्तव्यतिरिक्त- चतुर्दशप्रकारा उपजातयो भवन्ति।	स्यादिन्द्रवंशा ततजैरसंयुता ऽऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	दैत्येन्द्रवंशाभिरुदीर्णदीधितिः पीताम्बरोऽसौ जगतीतमोहरः । यस्मिन् ममज्जुः मुखभा इव स्वयं ते कंसचाणूरसुखा मखद्विषः ॥
जलोद्धतगतिः	जसौ जसयुतौ जलोद्धतगतिः ।ऽ।,।।ऽ,।ऽ।,।।ऽ	यदीयहसतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः । विलासविपिनं विवेश सहसा करोतु कुशलं हरौ स जगताम् ॥
भुजङ्गप्रयातम्	भुजङ्गप्रयातं चतुर्भिर्यकारैः ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	सदारात्मजज्ञातिभृत्यो विहाय स्वमेतं हृदं जीवनं लिप्समानः । मया क्लेशितः कालियेत्थं कुरु त्वं भुजङ्ग ! प्रयातं द्रुतं सागराय ॥
तोटकम्	वद तोटकमब्धिसकारयुतम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ	यमुनातटमच्युतकेलिकला- लसदङ्घ्रिसरोरुहसङ्गरुचिम् । मुदितोऽट कलेरपनेतुमघं यदि चेच्छसि जन्म निजं सफलम् ॥
सखिणी	कीर्त्तितेयं चतूरेफिका सखिणी ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	इन्द्रनीलोपलेनेव या निर्म्मिता प्रातकुम्भद्रवालङ्कृता शोभते ! नद्यमेघच्छविः पीतवासा हरे- र्मूर्त्तिराक्षां ममेवोरसि सखिणी ॥
वैश्वदेवी	वाणाब्धेश्छिन्ना वैश्वदेवी ममौ यौ ऽऽऽ,ऽऽऽ,।ऽऽ,।ऽऽ	अथोमध्येशं त्वं विहायामराणा- मद्रेतेनैकं ह्यात्मसंभर्त्तृ भक्त्या । तवाप्येषात्मम्भरित्वे भाविनी ते म्भरा: ! सम्यगाराधना वैश्वदेवी ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रमिताक्षरा	प्रमिताक्षरा सजसैः कथिता ।।२,।२।,।।२,।।२	अस्तस्य शीकरमिवोद्गिरती रदमौक्तिकांशुलहरीच्छुरिता । प्रमिताक्षरा सुररिपोर्भणिति- व्रजसुभ्रुवामभिजहार मनः ॥
द्रुतविलम्बितम्	द्रुतविलम्बितमाह नभौ भरौ ।।।,।।।,।।।,।।२	तरणिजापुलिने नवबल्लवी- परिषदा सह केलिकुतूहलात् । द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे ॥
मन्दाकिनी	ननररघटिता तु मन्दाकिनी ।।।,।।।,।।२,।।२	बलिदमनविधौ बभौ सङ्गता पदजलरुचि यस्य मन्दाकिनी । सुरनिहितसिताम्बुजस्रङ्भा हरतु जगदघं स पीताम्बरः ॥
कुसुमविचित्रा	नयसहितौ म्यौ कुसुमविचित्रा ।।।,।२२,।।।,।२२	विपिनविहारे कुसुमविचित्रा कृतुकितगोपीमहितचरित्रा । सुररिपुभङ्गिर्मुखरितवंशा चिरमवताद्वस्तरलवतंसा ॥
तामरसम्	इह वद तामरसं नजजा यः ।।।,।२।,।२।,।२२	स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तव सुखतामरसं सुरशत्रो ! हृदयतडागविकाशि ममास्तु ॥
मालती यमुनेति क्वापि ।	भवति नजावथ मालती जरौ ।।।,।२।,।।।,।।२	इह कलयाद्युतकेलिकानने मधुरससौरभसारलोलुपः । कुसुमसङ्गतस्मितचारुविभ्रमा मलिरपि चुम्बति मालतीं मुहुः ॥
मणिमाला अस्याः षड्वर्णैर्यतिः ।	म्यौ म्यौ मणिमाला क्षिप्ता गुरुवक्त्रैः २२।,।२२,२२।,।२२	प्रङ्कामरमौलौ रत्नोपलकुट्टने जातप्रतिबिम्बा श्लोणा मणिमाला । गोविन्दपदाब्जे राजी नखराणा- मास्तां मम चित्ते ध्वान्तं भ्रमयन्ती ॥
जलधरमाला अस्याश्चतुर्भिरष्टाभिश्च यतिः ।	मो भः स्त्रौ चेज्जलधरमालाभ्यन्तैः २२२,२।।,।।२,२२२	या भक्तानां कलिदुरितोत्तप्तानां तापोच्छेदे जलधरमाला नव्या । भव्याकारा दिनकरपुत्रीकूले केलीलोला हरितनुरयात् सा वः ॥
पुटः	वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ।।।,।।।,२२२,।२२	
प्रमुदितवदना प्रभेति मल्लिनाथः । गौरीति कौमुदीकारः ।	प्रमुदितवदना भवेन्नौ च रौ ।।।,।।।,।२।,।२।	
प्रियंवदा	भुवि भवेन्नभजरैः प्रियंवदा ।।।,।२।,।२।,।२।	
ललिता	धीरैरभाणि ललिता तभौ जरौ २२।,।२।,।२।,।२।	
उज्ज्वला	ननभरसहिता गदितोज्ज्वला ।।।,।।।,।२।,।२।	
नवमालिका	इह नवमालिका नजभयैः स्यात् ।।।,।२।,।।।,।२२	
ललना	पञ्चमुनि भ्मौ सात् सयुता ललना २।।,२२२,।।२,।।२	
ललितम्	ललितमभिहितं नौ स्त्रौ नामतः ।।।,।।।,२२२,।।२	
द्रुतपदम्	द्रुतपदं भवति नभनयास्त्रेत् ।।।,।।।,।।।,।२२	
विद्याधारः	सर्वे मा यस्मिन् सोऽयं विद्याधारः स्यात् २२२,२२२,२२२,२२२	
पञ्चचामरम्	लघुर्गुरुर्वदन्ति पञ्चचामरम् ।।।।।।।।।।।।	
सारङ्गम्	सारङ्गसंज्ञं समस्तैस्सकारैस्तु २२।,२२।,२२।,२२।	
मौक्तिकदाम	समस्तनमीरय मौक्तिकदाम ।।।,।।।,।।।,।।।,	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
मोटकम् तरलनयनम् चयोदशाक्षरा वृत्तिः। अतिजगती।	मोटकनाम समस्तभमीरय ऽ।।,ऽ।।,ऽ।।,ऽ।। वरिलघु तरलनयनमिह ।।।।।।।।।।।।	
प्रहर्षिणी त्रिभिर्दशभिश्च यतिः।	त्रयोभिर्मनजरगाः प्रहर्षिणीयम् ऽऽऽ,।।।,।ऽ।,ऽ।ऽ,ऽ	गोपीनामधरसुधारसस्य पाने- रुत्तुङ्गस्तनकलसोपगूहनैश्च । आचार्य्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत् प्रहर्षिणीह ॥
रुचिरा चतुर्भिर्नवभिश्च यतिः।	जभौ सजौ गिति रुचिरा चतुर्थ्यहैः ।ऽ।,ऽ।।,।।ऽ,।ऽ।,ऽ	पुनातु वो हरिरतिरासविभ्रमी परिभ्रमन् व्रजरुचिराङ्गनान्तरे । समीरणोल्लसितलतान्तरालगो यथा मरुत्तरलतमालभूरुहः ॥
मत्तमयूरः चतुर्भिर्नवभिश्च यतिः।	वेदरन्ध्रैर्मृतौ यसगा मत्तमयूरः ऽऽऽ,ऽऽ।,।ऽऽ,।।ऽ,ऽ	लीलानृत्यन्मत्तमयूरध्वनिकान्तं वृत्यद्गोपामोदिपयोदानिलरम्यम् । कामक्रीड़ाकृष्टमना गोपवधूभिः कंसध्वंसी निर्ज्जनवृन्दावनमाप ॥
चण्डी	नयुगलसयुगलगैरिति चण्डी ।।।,।।।,।।ऽ,।।ऽ,ऽ	जयति दितिजरिपुताण्डवलीला- कुपितकवलकरकालियमौलौ । चरणकमलयुगचापलचण्डी पदनखरुचिजितभोगमणिश्रीः ॥
मञ्जुभाषिणी सुनन्दिनीति प्रभौ	सजसा जगौ च यदि मञ्जुभाषिणी ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	अम्बतोर्म्मिगीतलकरेण लालयं- स्तनुकान्तिचोरितविलोचनो हरे !। नियतं कलानिधिरसौति वल्लवी सुदमच्युते यधित मञ्जुभाषिणी ॥
चन्द्रिका उतुपलिनीति क्वापि। विद्युदिति चमेति च क्वापि। सप्तभिः षड्भिश्च यतिः।	ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः ।।।,।।।,ऽऽ।,ऽऽ।,ऽ	प्रखरदृष्टतरुचञ्चन्द्रिकाचालिते दिनकरतनयातीरदेशे हरिः। विहरति रभसाद्गोपीभिः समं त्रिदिवयुवतिभिः कोऽपि देवो यथा ॥
कलहंसः सिंहनादः क्वापि।	सजसाः सगौ च कथितः कलहंसः ।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः। जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनूजः ॥
प्रबोधिता	सजसा जगौ च भवति प्रबोधिता ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	प्रणयिता त्वया चटुलमानिनद्रया रतिकेलिकुञ्जनिलये विलासिनी। सुरवैरिणा वदनचुम्बनादिना क्षितमातनान सपदि प्रबोधिता ॥
नगेन्द्रसुखम्	भवति नगेन्द्रसुखं नजौ जरौ गः ।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	गुरुभुजवीर्य्यभरं हरिं मदान्धा युधि समुपेत्य न दानवा जिजीवुः। क्षुधितनगेन्द्रसुखं नगा उपेत्य क्व नु खलु बिभ्रति जीवनस्य योगम् ॥
चञ्चरीकावली	यमौ रौ विख्याता चञ्चरीकावली गः ।ऽऽ,ऽऽऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
चन्द्ररेखा	नसरयुगलैश्चन्द्ररेखत्तुलोकैः ।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
कन्दुकम्	इदं कन्दुकं यत्र येभ्यश्चतुर्भ्यो गः।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,ऽ	
नगेन्द्रसुखम्	भवति नगेन्द्रसुखं नजौ जरौ गः।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ तसौ यदि गुरुः स्यात् ।ऽ।,।।ऽ,ऽऽ।,।।ऽ,ऽ	
मञ्जुहासिनी	जतौ सजौ गो भवति मञ्जुहासिनी ।ऽ।,ऽऽ।,।।ऽ,।ऽ।,ऽ	
नन्दिनी	इह नन्दिनी सजससैर्गरयुक्तैः ।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
कुटजगतिः	कुटजगतिर्नजौ सप्तर्तुं मृतौ-गुरुः ।।।,।।।,ऽऽऽ,ऽऽ।,ऽ	
प्रभावती ।	यस्यां प्रिये ! प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशान्तिमम् । सान्त्यं भवेदृयतिरपि चेद्दृयुगग्रहैः सा लक्ष्यतामम्बतरते ! प्रभावती ॥	
चतुर्दशाक्षरा वृत्तिः । शर्करी ।		
असम्बाधा षड्भिर्नवभिश्च यतिः ।	मो गो गो नौ मः शरनवभिरसम्बाधा ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽऽ	वीर्य्याग्नौ येन ज्वलति रणरसात् चित्ते दैत्येन्द्रे जाता धरणिरियमसम्बाधा । धर्म्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः ॥
वसन्ततिलकम् अष्टाभिः षड्भिश्च यतिः । सिंहोन्नता क्वापि । सिंहोन्नता इति सुनिकाश्यपः । उद्धर्षिणी इति सुनिसेतवः ॥	ज्ञेयं वसन्ततिलकं तभजा जगौ गः ऽऽ।,ऽ।।,।ऽ।,।ऽ।,ऽ,ऽ	पुष्पं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति । वात्येष पुण्यसुरभिर्मलयाद्रिवातो यातो हरिः स मथुरां विधिना हताः स्मः ॥
अपराजिता सप्तभिर्यतिः ।	ननरसलघुगैः खरैरपराजिता ।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	यदनवधिभुजप्रतापक्षताखदा यदुनिचयचमूः परैरपराजिता । व्यजयत समरे समस्तरिपुव्रजं स जयति जगतां गतिर्गरुड़ध्वजः ॥
प्रहरणकलिका सप्तभिर्वर्णैर्यतिः ।	ननभनलगिति प्रहरणकलिका ।।।,।।।,ऽ।।,।।।,।,ऽ	शथयति कुसुमप्रहरण ! कलिका प्रमदवनभवा तव धनुषि तता । विरहविपदि मे शरणमिह ततो मधुमथनगुणस्मरणमविरतम् ॥
वासन्ती	मात्तो नो मो गौ यदि गदिता वासन्तीयम् ऽऽऽ,ऽऽ।,।।।,ऽऽऽ,ऽ,ऽ	भाम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला । लीलालोला पल्लवविलसद्बल्लीहस्तैः कंसारातौ वृत्यति सहसा वासन्तीयम् ॥
लोला व्यस्राः सप्तभिर्यतिः ।	द्विःसप्तच्छिदि लोला मृसौ भौ गौ चरणौ चेत् ऽऽऽ,।।ऽ,ऽऽऽ,ऽ।।,ऽ,ऽ	सुग्धे यौवनलक्ष्मीर्विद्युद्विभ्रमलोला त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः । तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे श्रीनाथेन समेता खल्वन्दं कुरु केलिम् ॥
नान्दीसुखी व्यस्राः सप्तभिर्यतिः ।	खरभिदि यदि नौ तौ च नान्दीसुखी गौ ।।।,।।।,ऽ।।,ऽ।।,ऽ,ऽ,	सरसखगकुलालापनान्दीसुखीयं लहरिभुजलता चारुफेनस्मितश्रीः । सुरहरकलयासक्तिमासाद्य किन्ते प्रसुदितहृदया भानुजा नृत्यतीह ॥
इन्द्रवदना नदी सप्तभिर्यतिः ।	इन्द्रवदना भजसनैः सगुरुयुग्मैः ।।।,।।।,।।ऽ,।।।,ऽ,ऽ ननतजगुरुगैः सप्तयतिर्नदी स्यात् ।।।,।।।,ऽऽ।,।।।,ऽ,ऽ	
लक्ष्मीः	लक्ष्मीरन्तविरामा मृसौ तभौ गुरुयुग्मम् ऽऽऽ,।।ऽ,ऽऽ।,ऽ।।,ऽ,ऽ	
सुपवित्रम्	त्रिननगगिति वसुयति सुपवित्रम् ।।।,।।।,।।।,।।।,ऽ,ऽ	
मध्यश्यामा	मध्यश्यामा युगदशविरमा भौ न्यौ गौ ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ	
कुटिलम्	युगदिग्भिः कुटिलमिति सभौ न्यौ गौ चेत् ।।ऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ	
प्रमदा	नजभजला गुरुश्च भवति प्रमदा ।।।,।ऽ।,ऽ।।,।ऽ।,।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मञ्जरी पञ्चमे नवमे च यतिः ।	सजसा यलौ गिति शरग्रहैर्मञ्जरी ।।२,।२।,।।२,।२२,।,२	
कुमारी अष्टमे नवमे च यतिः ।	नजभजगैर्गुरुश्च वसुषट् कुमारी ।।।,।२।,२।।,।२।,२,२	
सुकेसरम्	नरनरलैर्लगौ च रचितं सुकेसरम् ।।।,२।२,।।।,२।२,।,२	
चन्द्रोरसः	भौ न्यौ ल्गौ चेद्दिह भवति च चन्द्रोरसः २२२,२।।,।।।,।२२,।,२	
चक्रपदम्	चक्रपदमिह भननगलगुरुभिः २।।,।।।,।।।,।।।,।,२	
वासन्ती	वासन्तीयं स्यादिह खलु मतौ न्यौ गौ चेत् २२२,२२।,।।।,।२२,२,२	
पञ्चदशाक्षरा वृत्तिः । अतिशर्करी ।		
ग्रन्थिकला	गुरुनिधनमनुलघुरिह ग्रन्थिकला ।।।।।।।।।।।।,२	मलयजतिलकरसमुदितग्रन्थिकला व्रजयुवतिलसदलिकगगनगता । सरसिजनयनहृदयसलिलनिधिं यतनुत वितनुतरभसपरितरलम् ॥
शक्वरी अक्षाः षड्भिर्नवभिश्च यतिः ।	सगियमपि च रसनव-रचितयतिः ।।।।।,।।।,।।।।।,२	अयि सहचरि! रुचिरतरगुणमणौ स्वदिमवसतिरनघगतपरिमला । मगिव निवस विलसदनुपमरसा सुसखि ! सुदितदनुजदलनहृदये ॥
मञ्जिष्ठमिकरः अष्टभिः सप्तभिश्च यतिः ।	वसुमुनियतिरिति मञ्जिष्ठमिकरः ।।।।।।,।,।।।।।,२	नरकरिपुरवतु निखिलसुरगति- रमितमहिमभरसङ्गजनिवसतिः । अनवधिमञ्जिष्ठमिकरपरिचितः सरिदधिपतिरिव हृततनुविभवः ॥
मालिनी अष्टभिः सप्तभिश्च यतिः ।	नगमथयुतेयं मालिनी भोगिलोकैः ।।।,।।।,२२२,।२२,।२२	नगमदनतपत्रौ पीतकौषेयवासा रुचिरशिखिशिखण्डावद्धधम्मिल्लपाश्वा । अनुनिहितमंसे वंशमुत्तालयन्ती हृतमधुरिपुलीला मालिनी पातु राधा ॥
लीलाखेलः	एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः २२२,२२२,२,२,२२२,२२२,२	पायादो गोविन्दः कालिन्दीकूलचौचौचक्रे रासोल्लासक्रीड़ालोपीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरोपान्ते खेरक्रीड़ाभिर्लोलो यद्वद्देवानामीशः सर्व्वेश्याभिः खेलन्तीभिः ॥
विपिनतिलकम्	विपिनतिलकं नसनरेषयुग्मैर्भवेत् ।।।,।।२,।।।,२।२,२।२	विपिनतिलकं विकसितं वसन्तागमे मधुलतमदैर्मधुकरै रञ्जितं वृतम् । मलयमरुता रचितलास्यमालोकयन् व्रजयुवतिभिर्विहरति स सुखी हरिः ॥
तूणकम्	तूणकं समानिकापदद्वयं विभान्तिमम् २,।,२।२,।२।,२,।,२।२,।२	सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पश्चबाणबाणजालपूर्णहेमतूणकम् । राधिका वितर्क्य माधवाद्य मासि माधवे मोहमेति निर्भरं त्वया विना कलानिधे ! ॥
चन्द्रवेत्रा सप्तमे अष्टमे च यतिः ।	भौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रवेत्रा २२२,२।२,२२२,।२२,।२२,	विच्छेदे ते मुरारे! पाण्डुप्रकाशा लक्ष्माङ्गी ज्ञानच्छायं दुकूलं न भ्राजते बिभ्रती सा । राधाम्भोदस्य गर्भे लीना यथा चन्द्रवेत्रा किंवार्त्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥
चित्रा	चित्रा नामच्छन्दश्चित्रचेत् नयौ मा यकारौ २२२,२२२,२२२,।२२,।२२	गोपाली लीलालोला यदतु कलिन्दात्मजान्ते खेलन्मुक्ताहारा वन्यसुमसज्जाङ्गचित्रा । कंसारातेर्मूर्त्तिरङ्गे हरि [illegible] कोऽन्यः स्वर्गो मोक्षो वाञ्छाद्विद्यते तत्र जाने ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रभद्रकम्	भवति नजौ भजौ रसद्वितौ प्रभद्रकम् ।।।,।।।.ऽ।।,।ऽ।,ऽ।ऽ	
एला पञ्चभिर्दशभिश्च यतिः ।	सजना नयौ गुरुदशयतिरियमेला ।।ऽ,।ऽ।,।।।,।।।,।ऽऽ	
कामक्रीड़ा	मा: पञ्च स्युर्यस्यां सा कामक्रीड़ासंज्ञा ज्ञेया ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ	
सुखेलकम्	नजभजरैर्विराजितमिदं सुखेलकम् ।।।, ।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ	
चन्द्रकान्ता सप्तभिरष्टाभिश्च यतिः ।	चन्द्रकान्ताभिधा रौ मृसौ यो विरमः खराष्टौ ऽ।ऽ,ऽ।ऽ,ऽऽऽ,।।ऽ,।ऽऽ	
उपमालिनी अष्टाभिः सप्तभिश्च यतिः ।	ननतभरक्षतारुखरैरुपमालिनी ।।।,।।।,ऽऽ।,ऽ।।,ऽ।ऽ	
ऋषभः	ऋषभाख्यमेतदुदितं सजसा सयौ चेत् ।।ऽ,।ऽ। ।।ऽ,।।ऽ,।ऽऽ	
मानसहंसः	कथयन्ति मानसहंसनाम सजौ जभराः ।।ऽ,।ऽ।,।ऽ। ऽ।।,ऽ।ऽ	
नलिनी	सगणैः शिववक्त्रमितैर्गदिता नलिनी ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,	
निश्चिपालकम्	भ्रंस निश्चिपालकमिदं भजसगाश्च रः ऽ।।,।ऽ।,।।ऽ,।।।,ऽ।ऽ	
षोड़शाक्षरा वृत्तिः । अष्टिः ।		
चित्रम्	चित्रसंज्ञमीरितं समानिका पदद्वयम् ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ।	विहसारुणाधरोष्ठशोभिवेणुवाद्यहृद्- वल्लवीजनाङ्गसङ्गजातसुग्धकण्टकाङ्ग ! । त्वां सदैव वासुदेव ! पुण्यलभ्यपादसेव ! वन्यपुष्पचित्रकेश ! संस्मरामि गोपवेश ! ॥
ऋषभगजविलसितम् गजतुरगविलसितमिति भ्रमौ । सप्तभिर्नवभिश्च यतिः ।	भवितगैः खराङ्कऋषभगजविलसितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,ऽ	यो हरिरुरखान खरतरनखरशरै- र्दुर्ज्जयदैत्यसिंहसुविकटवक्षःस्थलटम् । किन्विह चित्रमेष यदखिलमपहृतवान् कंसनिदेशदुष्टऋषभगजविलसितम् ॥
चकिता अस्या अष्टमे यतिः ।	भातु समतनगैरुरुच्छेदे स्यादिह चकिता ऽ।।,।।ऽ,ऽऽऽ,ऽऽ।,।।।,ऽ	दुर्ज्जयदनुजश्रेणीदुःखेदाग्नृतचकिता यदृभुजपरिघत्राता याता साध्वसविगमम् । दीव्यति दिवि यन्माला खेच्छं नन्दनविपिने गच्छत शरणं लक्ष्मीं तं भीता भवरिपुतः ॥
पञ्चचामरम्	प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम् ।ऽ।,ऽ।ऽ,।,ऽ,।ऽ।,ऽ।ऽ,।,ऽ	सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते लसद्वितानभूषिते सलीलविभ्रमालसम् । सुराङ्गनाभवल्लवीकरप्रपञ्चचामर- स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥
मदनललिता चतुर्थे षष्ठे च यतिः ।	भौ नौ यौ गो मदनललिता वेदैः षड्भुतुभिः ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।।।,ऽ	विभ्रत्समालितचिकुरा धौताधरपुटा स्खायतृपत्रावलिकुचतटोच्छ्वासोर्म्मितरला । राधार्थं मदनललितान्दोलालसवपुः कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥
वाणिनी	नजभजरैर्वेदा भवति वाणिनी गयुक्तैः ।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ,ऽ	स्फुरतु ममाननेऽद्य नतु वाणि ! नीतिरम्यं तव चरणप्रसादपरिपाकतः कवित्वम् । भवजलराशिपारकरणक्षमं सुछन्दं सततमहं स्तवैः खरचितैः स्तवानि नित्यम् ॥
प्रवरललितम्	यमौ नः सौ गश्च प्रवरललितं नाम वृत्तम् ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ	भुजोत्क्षेपः स्फूर्ज्ये चलवलयझङ्कारयुक्तो सुधा पादन्यासः प्रकटिततुलाकोटिनादः । स्फुरत् वक्षोरुक्षादृढघ्नि पटुकटाक्षोर्म्मिलीला हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
अचलधृतिः	द्विगुणितवसुलघुभिरचलधृतिरिह ।।।।।।।।,।।।।।।।।	तरणिदुहितृतटरुचिरतरवसति- रमरसुनिसुखजनविहितधृतिरिह। मधुरिपुरभिनवजलधररुचितनु- रचलधृतिरुदयति सुकृतिहृदि खलु॥
गरुडरुतम्	गरुडरुतं नजौ भजतगा यदा स्फुटदा ।।।,।ऽ।,ऽ।।,।ऽ।,ऽऽ।,ऽ	अमरमयूरमानसमुदे पयोदध्वनि- र्गरुडरुतं मुरारिसुजगेन्द्रसन्त्रासने। धरणिभरावतारविधिडिण्डिमाडम्बरः स जयति कंसरङ्गभुवि सिंहनादो हरेः॥
धीरललिता	संकथिता भरौ नरनगाश्च धीरललिता ऽ।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ	
अश्वगतिः	पञ्चभकारयुताऽश्वगतिर्यदि चान्त्यगुरुः ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ	
मञ्जिकाफलता	नजरभेन गेन च स्याद्मञ्जिकाफलता ।।।,।ऽ।,ऽ।ऽ,ऽ।।,ऽ।।,ऽ	
रूपम्	यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद्रूपं नाम ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ	
वरयुवतिः	भो रयना नगौ च यस्यां वरयुवतिरियम् ऽ।।,ऽ।ऽ,।ऽऽ,।।।,।।।,ऽ	
सप्तदशाक्षरा वृत्तिः। अष्टयतिः।		
शिखरिणी षष्ठे एकादशे च यतिः।	रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।।,।,ऽ	करादस्य भ्रष्टे ननु शिखरिणी द्रुह्यति शिरो- र्विलीना: स्रः सत्यं नियतमवधेयं तदखिलैः। इति त्रस्यन्नोपानुचितनिभृतालापजनितं स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः॥
पृथ्वी अष्टमे नवमे च यतिः।	जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।ऽ।,।।ऽ,।ऽ।,।।ऽ,।ऽऽ,।,ऽ	दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं जहार निजलीलया यदुकुलेऽवतीर्योऽसु यः। स एष जगतीगतिर्दुरितभारभङ्गादृशां हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः॥
वंशपत्रपतितम् वंशदलमिति ग्रन्थौ वंशपत्रपतिता इति केचित्। अस्य दशमे सप्तमे च यतिः।	दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ऽ।।,ऽ।ऽ,।।।,ऽ।।,।।।,।,ऽ	नूतनवंशपत्रपतितं रजनिजलवं पश्य मुकुन्द! मौक्तिकमिवोत्तममरकतगम्। एष च तं चकोरनिकरः प्रपिबति मुदितो वान्तमवेत्य चन्द्रकिरणैरन्तकवमिव॥
मन्दाक्रान्ता अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः। इयं दौत्यवर्णनोपयोगिनी श्रुता।	मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ऽऽऽ,ऽ।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	प्रेमालापैः प्रियविरचयैः प्रीणितालिङ्गनाद्यै- र्मन्दाक्रान्ता तदनु नियतं वञ्चयतामेति बाला। एवं श्रुत्वा वचनसुधया राधिकायाः सखीनां प्रीतः प्रायात् स्मितसुवदनो देवकीनन्दनो नः॥
हरिणी षष्ठे चतुर्थे सप्तमे च यतिः।	नसमरसला गः षड्वेदैर्दयैर्हरिणी मता ।।।,।ऽ,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ	अथित स विधिर्नेयं नीत्वा ध्रुवं हरिणीगणाद्- व्रजन्दगदृशां सन्दोहस्रोऽसन्नयनश्रियम्। यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे व्यकिरदधिकं वक्त्राकाङ्क्षं विलोलविलोचनम्॥
नर्दटकम्	यदि भवतो नजौ भजजला गुरु नर्दटकम् ।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ	व्रजवनिता वसन्तलतिका विलसन्मधुपं मधुमथनं प्रयान्तमनवाञ्छितकल्पतरुम्। विभुमभिनौति कोऽपि सुकृती सुदितेन हृदा रुचिरपदावलीघटितनर्दटकेन कविः॥
कोकिलकम् अस्य सप्तमे षष्ठे चतुर्थे च यतिः।	हयनृतुसागरैर्यतियुतं यदि कोकिलकम् ।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ	लसदरुणेऽह्नि मधुरभाषणमोदकरं मधुसमयागमे सरसकेलिभिरुल्लसितम्। अलिललितद्युतिं रविसुतावनकोकिलकं ननु कलयामि तं सखि! सदा हृदि नन्दसुतम्॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
हारिणी अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः ।	वेदर्तुश्वेर्मभनमयला गश्चेत्सदा हारिणी ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।ऽऽ,।,ऽ	यस्या नित्ये श्रुतिकुवलये श्रीश्चालिनी लोचने रागः स्त्रीयोऽधरकिसलये लाक्षारसारञ्जनम् । गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा सा कंसारेरजनि न कथं राधा मनोहारिणी ॥
भाराक्रान्ता चतुर्थे षष्ठे सप्तमे च यतिः ।	भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हयैः ऽऽऽ,ऽ।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात् कम्पं धत्ते श्रमजलकणं तथा परिसुष्यति । इत्याशङ्क्य जयति जलदश्यामकुलवल्लभो- संश्लेषोत्थं सारविलसितं विलोक्य गुरुं हरिः ॥
हरिः	रसयुगहययुङ् नौ म्नौ सो लगौ हि यदा हरिः ।।।,।।।,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ	
कान्ता	भवेत् कान्ता युगरसहयैर्यभौ नरसा लगौ ।ऽऽ,ऽ।।.।।।,ऽ।ऽ,।।ऽ,।,ऽ	
चित्रलेखा दशमे सप्तमे च यतिः ।	ससजा भजगा ग दिक्शरैर्भवति चित्रलेखाः ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
अतिग्रायिनी	ससजैरतिग्रायिनी मता भजपरैर्गुरुभ्याम् ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
पञ्चचामरम्	अवेहि पञ्चचामरं जरौ जरौ जगौ लघुश्च ।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,।	
अष्टाक्षराद्याचरा वृत्तिः । धृतिः ।		
कुसुमितलतावेल्लिता पञ्चमे षष्ठे सप्तमे च यतिः ।	स्याद्भूतर्तुश्वेः कुसुमितलतावेल्लिता मृतौ नयौ यौ ऽऽऽ,ऽऽ।,।।।,।ऽऽ,।ऽऽ,।ऽऽ	क्रीडत्कालिन्दीललितलहरीवारिभिर्दाच्चिणात्ये- र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम् । भृङ्गालीगीतैः किसलयकरोल्लासितोल्लास्यलक्ष्मीं तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥
नन्दनम् एकादशे सप्तमे च यतिः । इदमेव वेदरेफैश्छिन्ना महामालिका त्रयोदशभिस्तारका दशवसुभिर्लसा इति कुत्रापि ।	नजभजरैस्तु रेफसहितैः शिवेर्हयैर्नन्दनम् ।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ,ऽ।ऽ	तरङ्गिसुतातरङ्गपवनैः सलीलमान्दोलितं मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् । सुरहरचित्तचेष्टितकलाकलापसंसारकं क्षितितलनन्दनं व्रज सखे ! सुखाय वृन्दावनम् ॥
नाराचम्	इह नगरचतुष्कस्तु नाराचमाचक्षते ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
चित्रलेखा चन्द्रलेखा इति क्वचित् ।	मन्दाक्रान्ता नपरलघुयुता कौर्तिता चित्रलेखा ऽऽऽ,ऽ।।,।।।,।,ऽऽ।,ऽऽ।,ऽ,ऽ	दिनकरतनयातटीकानने चारुसञ्चारिणी श्रवणनिकटलम्बमेणीक्षणा क्षणा ! राधा त्वयि । ननु विकिरति नेत्रनाराचमेषातिदूरच्छेदनं तदिह मदनविभ्रमोद्भ्रान्तचित्तावधत्स्व हृतम् ॥
शार्दूलललितम् द्वादशे चरमान्ते च यतिः ।	मः सो जः सतसा दिनेशऋतुभिः शार्दूललालितम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,।।ऽ	श्रुत्वा कंसवधे पराक्रमविधिं शार्दूललालितं यश्चक्रे क्षितिभारकारिषु सुरारातिष्वतिदरम् । सन्मोदं परमन्तु देवनिवहे त्रैलोक्यशरण्यं श्रेयो वः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥
हरिणप्लुतम् हरिणप्लुतेति कुत्रापि ।	मातु सो जौ भरसंयुतौ करिवाणखेर्हरिणप्लुतम् ऽऽऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ	
अश्वगतिः	पञ्चभकारयुताश्वगतिर्यदि चान्त्यसरञ्चिता ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,।।ऽ	
सुधा	सुधा तर्कैर्ऋक्षैर्भवति ऋतुभिर्यौ मौ नयसताः ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,।।ऽ	
चित्रलेखा	वर्णाश्चेर्मनगततमकैः कौर्तिता चित्रलेखेयम् ऽऽऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽऽऽ,	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भ्रमरपदकम्	भाद्रनगा नसौ भ्रमरपदकमिदमभिहितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,।।ऽ	
शार्दूलम्	शार्दूलं वद मासषट्कयति मः सो जसौ रौ मचेत् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽ।ऽ,ऽऽऽ	
केसरम्	अर्थाश्वैर्मभनयरयुगैर्वृत्तं मतं केसरम् ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ।ऽ,ऽ।ऽ	
चलम्	स्त्रौ नृजौ स्त्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः खरैः ऽऽऽ,ऽ।।,।।।,।ऽ।,ऽ।।,ऽ।ऽ	
लालसा	सेका वसुविरतिस्तनौ रेचतुर्भिर्युता लालसा ऽऽ।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
लता	भवति नयुगलं रभौ रौ दशभिर्गजेन्द्रैर्लता ।।।,।।।,ऽ।ऽ,ऽ।।,ऽ।ऽ,ऽ।ऽ	
सिंहविस्फूर्जितम्	तद्भूतर्तवश्चेन्मौ भ्मौ विरतिश्चेत् सिंहविस्फूर्जितं त्रौ ऽऽऽ,ऽऽऽ,ऽ।।,ऽऽऽ,।ऽऽ,।ऽऽ	
हरनर्तनम् विबुधप्रिया इति च कुत्रापि ।	रसौ नजौ भरसंयुतौ करिनाशखैर्हरनर्तनम् ऽ।ऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ	
क्रीडचक्रम्	इदं क्रीडचक्रं सदीर्घं समस्तैर्यकारैः समेतम् ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,	
हीरकम्	हीरकमुदितं भसनजनैरिह रगश्चोन्नतः ऽ।,।ऽ,।।।,।ऽ।,।।।,ऽ।ऽ	
जनविभ्रमश्चरा इति च । अतिधृतिः । मेघविस्फूर्जिता षष्ठे षष्ठे सप्तमे च यतिः ।	रसर्तवश्चैर्यौ नृसौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् । ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका विनिद्राः कन्दल्यो दिशि दिशि सुदा दर्दुरा ह्रादनादाः । निशा वृत्यद्विद्युल्लसितलसन्मेघविस्फूर्जिता चेत् प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमलात् किमन्यत् ॥
छाया षष्ठे द्वादशे अन्ते च यतिः ।	भवेत् सैवच्छाया तयुगगयुता स्यात् द्वादशान्ते यदा ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	अभीष्टं तुष्टो यो वितरति लसद्धोचारुग्रासोज्ज्वलः स्फुरन्नानारत्नस्तवकिततनुश्चित्रांशुकालम्बितः । न यस्याङ्घ्र्यायासप्रगतवतां संसारतीव्रातप- क्लान्तिं प्रोत्तापं स जगदवतात् कंसारिकल्पद्रुमः ॥ गोविन्दं प्रथमोत्तमाङ्ग ! रसने ! त्वं घोषयाद्यङ्घ्रिं पाणी ! पूजयतं मनः ! स्मर पदे ! तस्यालयं गच्छतम् । एवश्चेत् कुरुताखिलं मम हितं श्रीर्वादयस्यद्य्रुवं न प्रेत्ये भवतां क्षते भवमहाशार्दूलविक्रीडितम् ॥
शार्दूलविक्रीडितम् द्वादशे जनविभ्रमौ च यतिः ।	सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	कामक्रीडासदृग्गो मधुसमयसमारम्भरभसात् कालिन्दीकूलकुञ्जे विहरणकुतुकाक्षिप्तहृदयः । गोविन्दो वल्लवीनामधररससुधां प्राप्य सुरसां प्रङ्के पीयूषपानप्रभवबलसुखं यस्मरदसौ ॥
सुरसा सप्तमे चतुर्दशे अन्ते च यतिः ।	स्त्रौ भ्नौ यो नो गुरुश्चेत् खरमुनिकरणैराह सुरसाम् ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ,।।।,ऽ	
फुल्लदाम प्रथमे द्वादशे अन्ते च यतिः । पुष्पदाम इति केचित् ।	मो गौ नौ तौ गौ खरहयतुरगैः फुल्लदाम प्रसिद्धम् ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	प्रथ्वश्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं हृष्यच्चेतोभिरिन्दिववसतिभिर्योमसंस्थैर्विमुक्तम् । सुधामोदेन स्वागतदग्रदिगाभोगमाहूतभृङ्गं मौलौ दैत्यारेर्न्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥
पथ्यचामरः	नयुगलगलघू रजौरलगा यदा स पथ्यचामरः ।।।,।।।,ऽ,।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	
विम्बम्	वृत्तं विम्बार्कैः प्ररसनितुरगैर्मौ तौ नृसौ ततौ वैदृगुरुः ऽऽऽ,ऽऽ।,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मकरन्दिका	रसैः षड्भिर्लोकैर्यमनसजला गुरुमकरन्दिका ।२२,२२२,।।।,।।२,।२।,।२।,२	
मणिमञ्जरी	द्वगाद्यैः स्यात् यभनयजजगाः कीर्तिता मणि-मञ्जरी ।२२,२।।,।।।.।२२,।२।,।२।.२	
वसुव्रतता	मजाश्चितुरगैर्जसौ जसतभा गश्चेत् वसुव्रतता ।२।,।।२,।२।,।।२,२२।,२।।,२	
विंशत्यक्षरा वृत्तिः । कृतिः ।		
सुवदना सप्तमे चतुर्दशे विंशतौ च यतिः ।	ज्ञेया सप्ताश्वषड्भिर्मरभगयुता भौ गः सुवदना २२२,२।२,२।।,।।।,।२२, २।।,।,२	प्रत्याहृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना त्वां ध्यायन्ती निकुञ्जे परमतरसयं हर्षोत्पुलका । आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका कामार्त्तिं त्यक्तुकामा ननु नरकरिपो! राधा मम सखी ॥
गीतिका	सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ।।२,।२।,।२।,२।।,२।२,।।२,।,२	करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा । बहुलानुरागनिवासरासससङ्गवा भवरागिणं विदधौ हरिं खलु वल्लवीजनचारु चामरगीतिका ॥
वृत्तम्	वृत्तमीदृग्वद नामतो रजौ रजौ रजौ गुरुर्लघुश्च २।२,।२।,२।२,।२।,२।२,।२।,२,।	चित्तवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण राजमानसद्वयोविलाससम्यदा कलाकुतूहलेन । यः समं व्रजाङ्गनाजनैः सुराङ्गनाभिः सुखं समेत्य विष्णुरुल्लास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥
शोभा षष्ठे त्रयोदशे अष्टमे च यतिः ।	रसाश्वार्कैः शोभा नयुगगजठरा मेघविस्फू-र्ज्जिता चेत् ।२२,२२२,।।।,।।।,२,२।२,२।२,२	सपीयूषोन्मीलत्सरसिजयुगला मध्यनम्रा पलाभ्यां तयोरूर्द्ध्वं राजत्तरलकिशलयाक्षिरसस्निग्धशाखा । लसन्मुक्तारक्तोत्पलकुवलयवचन्द्रविभाचिताया महाशोभा मौलौ मिलदलिपटलैः लक्ष्य ! सा कापि वल्ली ॥
सुवंशा	ख्याता पूर्वैः सुवंशा यदि मरभना तद्वयं गो गुरुश्च २२२,२।२,२।।,।।।,२२।,२२।,२,२	
मत्तेभविक्रीड़ितम् त्रयोदशे यतिः ।	सभरा नृगौ यलगाश्चयोदशयतिर्मत्तेभविक्रीड़ितम् ।।२,२।।,२।२,।।।,२२२,।२२,।,२	
एकविंशत्यक्षरा वृत्तिः। प्रकृतिः ।		
सग्धरा सप्तमे चतुर्दशे एकविंशतौ च यतिः।	म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता सग्धरा कीर्त्तितेयम् २२२,२।२,२।।,।।।,।२२,।२२,।२२	श्यामोधिन्दीवराभा कनककबलसत्पीतवासाः सुहासा बर्हैरुच्चन्द्रकाणां ब्रजलयितचिकुरा चारुकर्णावतंसा । अंसन्यासक्तवंशध्वनिसुखितजगद्वल्लवीभिर्लसन्ती स्निग्धोपास्य विष्णोरवतु जगति वः सग्धरा हारिहारा ॥
सरसी सिंहकमिति सलिलनिधिरिति च कापि।	नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ।।।,।२।,२।।,।२।,।२।,।२।,२।२	चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्म्मिषु स्फुटवदनाम्बुजासु विलसद्भुजबालदलालवल्लिषु । कुचयुगचक्रवाकमिथुनानुगता सुकलाकुतूहली चरचयदद्भुतो व्रजवधूनयनासरसीषु विभ्रमम् ॥
द्वाविंशत्यक्षरा वृत्तिः । आकृतिः ।		
हंसी अष्टमे द्वाविंशतौ च यतिः ।	मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी २२२,२२२,२,२,।।।,।।।,।।।,।।।,२,२	सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती कामक्रीड़ाकूतस्फीतप्रमदरसरभसमलघु रसन्ती । कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे कंसारातेः पश्य खेच्छं सरभसगतिरिह विलसति हंसी ॥
मदिरा	सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा २।।,२।।,२।।,२।।,२।।,२।।,२।।,२	माधवमासि विकस्वरकेसरपुञ्जलसन्मदिरामुदिते- र्भृङ्गकुलैरुपगीतवने वनमालिनमालि! कलानिलयम् । कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं त्वं भज माधविका मृदुनर्मकथासुनवातलतोपगमा ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भद्रकम्	भौ नरगा रनावथगुरुर्दिगर्कविरमं हि भद्रकमिदम् ऽ।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ	
लालित्यम्	लालित्यं भुजगेन्द्रेण भाषितमेतच्चेन् मसरस्त- जनगुभिः ऽऽऽ,।।ऽ,ऽ।ऽ,।।ऽ,ऽऽ।,।ऽ।,।।।,ऽ	
महासग्धरा	सजता नसौ ररौ गः फणितुरगहयैः स्यान्महा सग्धराख्या ।।ऽ,।ऽ।,ऽऽ।,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
त्रयोविंशत्यक्षरा वृत्तिः । विक्रीडितं अद्रितनया अश्वललितमित्यन्यच्च ।	नजभजभा जभौ लघुगुरू वुधैस्तु गदितेय- मद्रितनया ।।।,।ऽ।,ऽ।।,ऽ।।,।ऽ।,ऽ।।,।,ऽ	खरतरशौर्यपावकशिखापतङ्गनिभमग्रदनुजो जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा । भुवनहितावतारचतुरश्चराचरधरोऽवतीर्ण इह हि क्षितिवलयेऽस्ति कंसशमनस्तवेति तमवोचदद्रितनया ॥
मत्ताक्रीड़म् अष्टमे त्रयोदशे त्रयोविंशतौ च यतिः । मत्ताक्रीड़ा इति क्वचित् ॥	मत्ताक्रीड़ं वखिञ्चाग्न्यायति मधुगगयुगमनुलघु- गुरुभिः ऽऽऽ,ऽऽऽ,ऽ,ऽ,।।।।।।।।।।।।,ऽ	सुरभीन्मीलन्मत्ताक्रीड़ं मधुसमयसुलभमधुरमधुरसात् गाने याने किञ्चित्स्यन्दत्पदमरुणनयनयुगलसरसिजम् । रासोल्लासक्रीड़त्कन्यव्रजयुवतिवलयरचितसुभरसं सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम् ॥
सुन्दरिका	इह सुन्दरिका पिङ्गलमुनिनोक्ता सदयतो भसता जलभगाः ।।ऽ,।।ऽ,ऽ।।,।।ऽ,ऽऽ।,।ऽ।,।,ऽ।।,ऽ	
चतुर्विंशत्यक्षरा वृत्तिः । संस्कृतिः । तन्वी पञ्चमे द्वादशे चतुर्विंशतौ च यतिः।	भूतमुनीनैर्यतिरिह भतनाः सुभौ भनयाश्च यदि भवति तन्वी ऽ।।,ऽऽ।,।।।,।।ऽ,ऽ।।,ऽ।।,।।।,।ऽऽ	माधव मुग्धेर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः कम्पमुपेता मलयजसलिलैः श्रावनतोऽप्यधिगततनुदाहा । पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूने निःश्वसती सा सुहृरतिपरमं ध्यानलये तव निवसति तन्वी ॥
किरीटम्	नाम किरीटमिदं भगणा यदि पिङ्गलनाग- मुनीन्द्रमतं किल ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।	
दुर्मिलम्	सगणैरिह वृत्तवरं वसुभिः किल दुर्मिलमुक्तमिदं कविभिः ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ	
पञ्चविंशत्यक्षरा वृत्तिः । अतिक्रीतिः । क्रौञ्चपदा पञ्चमे दशमे अष्टादशे पञ्च- विंशतौ च यतिः ।	क्रौञ्चपदा स्यात् भो मसभाद्यैर्दिङ्मुनिरवसुमुनि- यति मधुलघुगैः ऽ।।,ऽऽऽ,।।ऽ,ऽ।।,।।।।।।।।।।।,ऽ	क्रौञ्चपदालीचित्रिततीरा मदकलखगकुलकलकलरुचिरा फुल्लसरोजश्रेणिविलासा मधुसुदितमधुपरवरभसकरी । फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनुः पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिम- किरणजा ॥
षड्विंशत्यक्षरा वृत्तिः। उत्क्रीतिः। भुजङ्गविजृम्भितम् अष्टमे जनविंशतौ षड्विंशतौ च यतिः ।	वखीशाग्नेश्छेदोपेतं ममतनययुग रसलगै- र्भुजङ्गविजृम्भितम् ऽऽऽ,ऽऽऽ,ऽऽ।,।।।,।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	शैलोदञ्चन्नाद्यत्पाद्प्रकटविकटगटगभ रभतृकरतालक- झारप्रेङ्खद्धूड़ावर्हः स्फुतितरलनवकिसलयस्फारङ्गित- हारधृत् । चक्यन्नागस्त्रीभिर्भक्त्या सकुलितकरकमलयुगं स्तुतस्तुति- रघुतः पायाद्वश्चिन्दन् कालिन्दीह्रदशतनिलयसतिदृढ्ढजङ्ग- विजृम्भितम् ॥
अपवाहम्	मो नाः षट् सगाविति यदि नवरसरसशर- यतियुतमपवाहाख्यम् ऽऽऽ,।।।,।।।,।।।,।।।,।।।,।।।,।ऽ,ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
अथ दण्डकाः । सप्तविंशत्यक्षरा वृत्तिः । चण्डवृष्टिप्रपातः	यदिह नयुगलं ततः सप्तरेफास्तदा चण्ड- वृष्टिप्रपातो भवेद्दण्डकः ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	प्रलयघनघटाभहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं सपदि समवलोक्य सद्येन हस्तेन गोवर्द्धनं नाम शैलं दधज्जीलया । कमलनयन ! रक्ष रक्षेति गर्ज्जन्नसम्भ्रमगोपाङ्गनालिङ्ग- नानन्दितो गलदभिनवधातुधारावचित्राङ्गरागो सुरारातिरस्तु प्रमोदाय वः ॥
प्रचितकः	प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्यादुत्तरैः सप्तभिर्यैः ।।।,।।।,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	सुरहर ! यदुकुलाम्भोधिचन्द्र ! प्रभो ! देवकीगर्भरत्न ! त्रिलोकैकनाथ ! प्रचितकपटसुरारिव्रजोद्दामदम्भावलम्बोमविद्रावदक्षे केशरीन्द्र ! । चरणनखरसुधांशुच्छटोज्जेवलि:शेषितध्वायिचेतो निविडान्धकार ! प्रणतजनपरितापोग्रदावानलोच्छेदमेघ ! प्रसीद प्रसीद प्रसीद ॥
कुसुमस्तवकम्	सगणः सकलः खलु यत्र भवेत्तमिह प्रवदन्ति बुधाः कुसुमस्तवकम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ	विरराज यदीयकरः कनकद्युतिवन्दुरवामदृशः कुचकुड्मलगो भ्रमरप्रकरेण यथाहृतमूर्त्तिरशोकलतावलिसत्कुसुमस्तवकः॥ स नवीनतमालदलप्रतिमच्छविबिम्बदतीवविलोचनहारिवपु- र्वपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुज- मध्यगतः ॥
मत्तमातङ्गलीलाकरः	यत्र रेफः परं शैक्ष्यया गुम्फितः स स्मृतो दण्डको मत्तमातङ्गलीलाकरः ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	हेमगौरं वसानोरुंशुकं शुक्लनीलासिते वर्त्मनि सन्दिधा- नेषुपाणिस्तो हारतारांशुवस्त्रोत्तभक्तिभ्रमाजाधिसो भक्तभूगोप्तृलाङ्गः समं वीरिणा । अञ्जनाभाखरेन्द्वब्जकुन्दाभ दैत्येन लीलापरिहास- हासोल्लिकौतूहलैः कंसरङ्गाङ्गिणः पातु वश्चक्रपाणिर्गतिक्रीड्या मत्तमातङ्ग- लीलाकरः ॥
अशोकपुष्पमञ्जरी	यत्र दशते गुरोः परो लघुः क्रमात् स उच्यते बुधैरशोकपुष्पमञ्जरीति ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।	मूर्द्धि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारु- चन्द्रिका कचेषु कर्णयोरशोकपुष्पमञ्जरीवतंसको गलेच कान्तकेशरो- यकुलस्रदाम । फुल्लनागकेशरादिपुष्परेणुरूषितं तनौ विचित्रमित्युपात्त- वेश एष वः केशवः पुनातु वः सुपुष्पभूषितः स मूर्त्तिमानिवागतो मधुर्विहर्त्तुमत्र ॥
अनङ्गशेखरः	लघुर्गुरुर्निवेश्यते यदा निवेश्यते तदैव दण्डको भवेदनङ्गशेखरः ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।	उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके ! विजृम्भ- माणगौरदीधितौ रतिरहस्यनिर्म्मितः कलाकुतूहलेन चारुचम्पकैरनङ्ग- शेखरः किमु । इति प्रमोदकारिणीं प्रियाप्रमोदलब्धयां गिरं ससुस्मिर- मुरारिरद्भुतां प्रदोषकालसङ्गमोल्लसन्मना मनोजकेलिकौतुकी करोतु वः कृतार्थतां ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
त्रिंशदक्षरा वृत्तिः ।	प्रतिचरणविहङ्गरेफाः सुरवोऽर्णवबालजोन्मत-	जय जय जगदीश विष्णो हरे राम दामोदर श्रीनिवासा-
अर्णवः	लीलाकरोद्दामगजादयः	च्युतागच्छ नारायण
	प्रतिचरणं चक्रवृत्तिप्रपातस्य दृष्टार्थः ।	त्रिदशगजगुरो मुरारे मुकुन्दासुरारे हृषीकेश पीताम्बर
	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	श्रीपते माधव ।
		गरुडगमन शङ्ख वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधा-
		धोक्षज श्रीनिधे
		वलिदमन वृषिंह शौरे । भवाम्भोधिघोरार्णसि त्वं निमज्जन्त-
		मभ्युद्धरोपेत्य मामु ॥
सिंहविक्रीड़ः	यकारैः कवीन्द्रासुरोधान्निवद्धैः प्रथिष्ठो विशुद्धो	
	ऽपरो दण्डकः सिंहविक्रीड़नामा	
	।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
चतुस्त्रिंशदक्षरा वृत्तिः ।		
अर्णवः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	अर्णोवदर्णवादीनामुदाहरणानि षोडशापि ॥
अशोकमञ्जरी	खेच्छया रजौ क्रमेण तंनिनेयवसुदारधीः कविः	
	स दण्डकः स्मृतो जयत्यशोकमञ्जरी	
	ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ	
षट्त्रिंशदक्षरा वृत्तिः ।		
व्याल:	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
अनचत्वारिंशदक्षरा वृत्तिः ।		
जीमूतः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ	
चत्वारिंशदक्षरा वृत्तिः ।		
शैलाकरः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ,ऽ।ऽ	
एकचत्वारिंशदक्षरा वृत्तिः ।		
उद्दामः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
सिंहविक्रान्तः	नयुगलगुरुयुगेवं यकारा: कवीन्द्रासुरोधा-	
	त्तदा यत्र वस्यन्त एवोऽपरो दण्डकः प्रख्यितै-	
	रीरितः सिंहविक्रान्तनामा	
	।।।,।।।,।,ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,	
	।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
अष्टचत्वारिंशदक्षरा वृत्तिः ।		
शङ्खः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
इत्यादयः ।	ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
इति समवृत्तानि समाप्तानि ॥*॥		
अथार्द्धसमवृत्तानि ।		
उपचित्रम् ११ । ११ वृत्तिः ।	विषमे यदि सौ जगणा दले भौ युजि भाद्-	
	गुरुकावुपचित्रम् ।	
	द्विराहृत्या श्लोकः पूरयितव्यः	
प्रथमपादे तृतीयपादे च	।।ऽ,।।ऽ,।।ऽ,।,ऽ	सुरवैरिवपुस्रुतां सुरं हेमनिभांशुकचन्दनलिप्तम् ।
द्वितीयपादे चतुर्थपादे च	ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	गगनचपलामिलितं यथा शारदनीरधरेऽपचित्रम् ॥
वेगवती १० । ११ वृत्तिः ।	विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती	
	स्यात्	
प्रथमपादे तृतीयपादे च	।।ऽ,।।ऽ,।।ऽ,ऽ	स्मर वेगवती भजत. [illegible]
द्वितीयपादे चतुर्थपादे च	ऽ।।,ऽ।।,ऽ।।,ऽ	रभसान्न गुरून् गणयन्ती कैरिति मुग्धयाथ जगाद ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भद्रविराड् १०।११ वृत्तिः ।	ओजे तरौ जरौ गुरुश्चेत् मुखौ नगौ ग भद्रविराड् भवेदनोजे	
प्रथमपादे द्वतीयपादे च	ऽऽ।।ऽ।।ऽ।ऽ	
द्वितीयपादे चतुर्थपादे च	ऽऽऽ।।।ऽ।।ऽ।ऽ	
केतुमती १०।११ वृत्तिः ।	असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः	
प्रथमपादे द्वतीयपादे च	।।ऽ।ऽ।।।ऽ	
द्वितीयपादे चतुर्थपादे च	ऽ।।।ऽ।ऽ।।।ऽ।ऽ	
विपरीतपूर्व्वा ११।११ वृत्तिः ।	जतौ नगौ गो विषमे समे चेत् तौ नगौ ग एषा विपरीतपूर्व्वा	
प्रथमपादे द्वतीयपादे च	।ऽ।।ऽऽ।।ऽ।ऽ।ऽ	
द्वितीयपादे चतुर्थपादे च	ऽऽ।।ऽऽ।।ऽ।ऽ।ऽ	
आख्यानकी ११।१२ वृत्तिः ।	आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत्	
प्रथमपादे द्वतीयपादे च	ऽऽ।ऽऽ।।ऽ।ऽ।ऽ	
द्वितीयपादे चतुर्थपादे च	।ऽ।।ऽऽ।।ऽ।ऽ।ऽ	
हरिणप्लुता ११।१२ वृत्तिः ।	अयुजि प्रथमेन विवर्णितं द्रुतविलम्बितकं हरिणप्लुता	
प्रथमपादे द्वतीयपादे च	।।,ऽ।।,ऽ।।,ऽ।ऽ	स्फुटफेनचया हरिणप्लुता वलिमनोज्ञतटा तरङ्गैः सुता ।
द्वितीयपादे चतुर्थपादे च	।।।,ऽ।।,ऽ।।,ऽ।ऽ	कलहंसकुलारवव्याकुलिनी विहरतो हरति स्म हरेर्मनः ॥
अपरवक्त्रम् ११।१२ वृत्तिः ।	अयुजि नयरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ	
प्रथमे द्वतीये च पादे	।।।,।।।,ऽ।ऽ,।,ऽ	स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम् ।
द्वितीये चतुर्थे च पादे	।।।,ऽ।।,ऽ।।,ऽ।ऽ	व्रजयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमाः ॥
द्रुतमध्या ११।१२ वृत्तिः ।	भवति मोजगतं गुरुणौ चेद् युजि च नजौ व्ययुजौ द्रुतमध्या	
प्रथमपादे द्वतीयपादे च	ऽ।। ऽ।।,ऽ।।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	।।।,ऽ।।,ऽ।।,ऽ।ऽ	
मालभारिणी ११।१२ वृत्तिः ।	विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम्	
प्रथमपादे द्वतीयपादे च	।।ऽ,।।ऽ,ऽ।।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	।।ऽ,ऽ।।,ऽ।ऽ,।ऽऽ	
कौमुदी १२।१२ वृत्तिः ।	अयुजि ननभभा समेऽपि तु नयुगरयुगलं तदा कौमुदी	
प्रथमपादे द्वतीयपादे च	।।।,।।।,ऽ।।,ऽ।।	
द्वितीयपादे चतुर्थपादे च	।।।,।।।,ऽ।ऽ,ऽ।ऽ	
पुष्पिताग्रा १२।१३ वृत्तिः ।	अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा	
प्रथमपादे द्वतीयपादे च	।।।,।।।,ऽ।ऽ,।ऽऽ	करकिसलयशोभया विभान्त्या कुचफलभारविनम्रदेहयष्टिः ।
द्वितीयपादे चतुर्थपादे च	।।।,ऽ।।,ऽ।।,ऽ।ऽ,ऽ	स्खलितरुचिरविलासपुष्पिताग्रा व्रजयुवतिर्ब्रततौ हरेर्मुदेऽभूत् ॥
नवमती १२।१३ वृत्तिः ।	स्यादयुग्मके रजौ रयौ समे चेत् जरौ जरौ गुरुर्ज्जवात् परा मतीयम्	
प्रथमपादे द्वतीयपादे च	ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽऽ	
द्वितीयपादे चतुर्थपादे च	।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ	
मञ्जुसौरभम् १२।१३ वृत्तिः ।	यदि विषमे भवतो नजौ जरौ सजया: समे तु जगौ मञ्जुसौरभम्	
प्रथमपादे द्वतीयपादे च	।।।,ऽ।।,ऽ।।,ऽ।ऽ	
द्वितीयपादे चतुर्थपादे च	।ऽ,ऽ।।,ऽऽ,।ऽ।,ऽ	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
सुन्दरी १०।११ वृत्तिः।	अयुजोर्यदि सौ जगौ युजोः सभराः लगौ यदि सुन्दरी तदा	
प्रथमे तृतीये पादे च	।।ऽ,।।ऽ,।ऽ।,ऽ	यदवोचदवेक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा।
द्वितीये चतुर्थे पादे च	।।ऽ,ऽ।।,ऽ।ऽ,।,ऽ	अपि कंसहरस्य दुर्वचं वचनन्तद्धिदधीत विस्मयम्॥
इत्यर्द्धसमवृत्तानि समाप्तानि॥* ॥		
अथ विषमवृत्तानि।		
उद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्य-नन्तरम्। यदथ भनभगाः स्फुरधो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	विललास गोपरमणीषु तरङ्गितनयाप्रभोद्गता।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	क्षणनयनचकोरयुगे दधती सुधांशुकिरणोर्म्मिविभ्रमम्॥
तृतीये १०	ऽ।।,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
अन्यविधोद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्य-नन्तरम्। यदथ भनजलगाः स्फुरधो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	अथ वासवस्य वचनेन रुचिरवदनश्चिलोचनम्।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः॥
तृतीये ११	ऽ।।,।।।,ऽ।।,।,ऽ	इति भारवाद्युद्गताभेदः। १२। १॥
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
सौरभम्	त्रयसुद्गता सदृग्मेव पदमिह तृतीयमन्यथा। जायते रनभगैर्यथितं कथयन्ति सौरभक-मेतदीदृग्मम्॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	परिभूतपुष्पगुतपत्रवनविद्रुतगन्धविभ्रमा।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	कस्य चेन्न हरतीह हरे सुखपद्मसौरभकला त्वाङ्गुता॥
तृतीये १०	ऽ।ऽ,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
ललितम्	नयुगं सकारयुगलञ्च भवति चरणे तृतीयके। तदुदितसुरुमतिभिर्ललितं यदि शेषमस्य सकलं यथोद्गता।	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	व्रजसुन्दरी सदुदयेन मुदितमनसा स्म पीयते।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	हिमकरगलितमिवाम्रतकं ललितं मुरारिमुखचन्द्र-विच्युतम्॥
तृतीये १२	।।।,।।।,।।ऽ,।।ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
वक्त्रम्	वक्त्रं युगर्त्वा मगौ स्यातामब्धेर्यौ।गुरुभिः ख्यातम्।	
प्रथमे पादे ८	ऽऽऽ।ऽऽऽ	वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं पुष्पम्।
द्वितीये ८	ऽऽऽ।ऽऽऽ	वल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः॥
तृतीये ८	ऽ।ऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽ।ऽऽऽ	
पथ्यावक्त्रम्	युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम्।	
प्रथमे पादे ८	ऽ।ऽ।।ऽ।	रासकेलिसदृश्यास्य कृष्णस्य मधुवासरे।
द्वितीये ८	ऽऽ।।।ऽ।	आसीन्नोपनतागतीनां पथ्या वक्त्रमधुस्तुतिः॥
तृतीये ८	ऽऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽ।ऽ।	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
अनुष्टुप्	पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।	
	गुरु षष्ठञ्च पादानां प्रेषेष्वनियमो मतः ॥	
	प्रयोगे प्रायिकं प्राहुः केऽप्येतल्लक्षणक्षमम् ।	
	लोकेऽनुष्टुबिति ख्यातं तस्माद्वाचरता मता ॥	
प्रथमे चरणे ८	ऽ।ऽ।।ऽ।	पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
द्वितीये ८	ऽ।ऽ।।ऽ।	गुरु षष्ठञ्च पादानां प्रेषेष्वनियमो मतः ॥
तृतीये ८	।।ऽ।ऽऽऽ	
चतुर्थे ८	ऽऽ।।।ऽ।	
इति वृत्तमनुष्टुभानि समाप्तानि ॥*॥		
अथ मात्रावृत्तानि ।		
आर्या अपरनाम गाथा	लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः ।	
	षष्ठो जश्च न लघु वा प्रथमार्धे नियतमार्यायाः ॥	
	षष्ठे द्वितीयलात् परके नृणे सुखलाच्च सयतिपद-	
	नियमः ।	
	चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥	
प्रथमे पादे १२	ऽऽ।ऽ।ऽ	छाया: शिशु: सुतो मे बल्लवकुलटाभिराहृतो न दृष्टे ।
द्वितीये १८	।।।।ऽ।ऽ।।।ऽ	चरमपि वत्सलयतीति जगाद गोष्ठां यशोदार्या ॥
तृतीये १२	।।।।।ऽ।।।	
चतुर्थे १५	।ऽ।ऽऽ।ऽऽऽ	
प्रकारान्तरो यथा		
प्रथमे पादे १२	ऽऽ।ऽ।ऽऽ	वृन्दावने सलीलं वल्गुद्रुमकाञ्चनिहिततनुयष्टिः ।
द्वितीये १८	ऽऽ।।ऽ।।।।।ऽऽ	क्षीरसुखार्पितवेणुः छात्रो यदि मनसि कः स्वर्गः ॥
तृतीये १२	।।ऽ।।ऽऽ	
चतुर्थे १५	ऽऽ।।।।ऽऽऽ	
नवधा आर्या क्रमेण यथा ।		[पथ्या ।
पथ्या	प्रथमगणत्रयविरतिर्दलयोरुभयोः प्रकीर्तिता	
प्रथमे पादे १२	।।।।ऽ।ऽऽ	जय जय नाथ! सुरारे! केशव! कंसान्तकाच्युतानन्त ।।
द्वितीये १८	।।ऽऽ।ऽ।ऽऽऽ	कुरु करुणामिति विगतिः पथ्या भवरोगदुःस्थानाम् ॥
तृतीये १२	।।।।ऽ।।।ऽ	अत्र द्वितीयपादान्तलघोर्गुरुत्वम् ।
चतुर्थे १५	ऽऽ।ऽ।ऽऽऽ	पूर्वापरार्धयोर्द्वादशमात्रायां यतिः ॥
विपुला	संलक्ष्य गणत्रयमादिमं युगलयोर्द्वयोर्भवति पादः।	
	यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति॥	
प्रथमे पादे १८	ऽऽ।ऽऽऽ।।ऽऽ	पुंसां कलिकालबालहतानां गाम्भीर्यप्रहतिरस्यापि ।
द्वितीये १२	ऽ।।।ऽऽऽ	वीर्यविपुला सुखे चेत् स्याद्गोविन्दाख्यमन्त्रकला ॥
तृतीये १८	ऽ।।।ऽ।ऽऽ	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम् ।
चतुर्थे १३	ऽऽऽ।ऽ।ऽ	पूर्वापरार्धयोर्द्वादशमात्रां संलक्ष्य यतिः ॥
चपला	दलयोर्द्वितीयतुर्यौ गणौ जकारौ तु यत्र	
	चपला सा ।	
प्रथमे पादे १२	।।ऽ।ऽ।ऽऽ	चपला न चेत् कदाचिन्मयि भवेद्भक्तिभावना छात्रे ।
द्वितीये १८	।ऽ।ऽऽ।ऽ।ऽऽऽ	धर्मार्थकाममोक्षास्तदा करस्था न सन्देहः ॥
तृतीये १२	ऽऽ।ऽ।ऽऽ	
चतुर्थे १५	।ऽ।ऽऽ।ऽऽऽ	
सुखचपला	आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।	
	प्रेम्णः पूर्वमलक्ष्या सुखचपला सोदिता मुनिना ॥	
प्रथमे पादे १२	ऽ।।।ऽ।ऽऽ	नन्दसुत! वक्त्रकमलं दृष्ट्वं न ते प्रेम गच्छ तत्रैव ।
द्वितीये १८	।ऽ।ऽऽ।ऽ।ऽऽऽ	यत्र भवति ते रागः कापि जगादेति सुखचपला ॥
तृतीये १२	ऽ।।।।ऽऽऽ	अत्र द्वितीयपदान्तलघोर्गुरुत्वम् ॥
चतुर्थे १५	ऽ।ऽऽ।।।।ऽ	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
जघनचपला	प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपलायाः।	
	लक्ष्माश्रयेत यौ क्रमौ विशुद्धधीभिर्जघनचपला॥	
प्रथमे चरणे १२	ऽऽऽ।।ऽ	लक्ष्मा: प्रङ्कारपटुर्यौवनमदचञ्चल: सुललिताङ्ग:।
द्वितीये १८	।।।।।ऽ।।।ऽऽ	आसीद्व्रजाङ्गनानां मनोहरो जघनचपलानाम्॥
तृतीये १२	ऽऽऽ।ऽऽ	
चतुर्थे १५	।ऽ।ऽ।।।।ऽऽ	
गीतिः	आर्याप्रथमार्द्धसमं यस्या अपरार्द्धमाह तां गीतिम्।	
प्रथमे चरणे १२	ऽ।।ऽऽऽ	केशवकंसगीतिलोकमनोहरिवहारिणी जाति।
द्वितीये १८	ऽ।।ऽ।।।ऽ।।ऽ	गोपीमानयत्येविंमोचनी दिव्यगायनाचार्या॥
तृतीये १२	ऽऽऽऽऽ	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम्॥
चतुर्थे १८	।ऽ।ऽ।ऽ।ऽऽऽ	
उपगीतिः	आर्यापरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम्।	
प्रथमे चरणे १२	।।ऽ।ऽऽ	नवगोपसुन्दरीणां राजोल्लासे मुरारातिम्।
द्वितीये १५	ऽऽऽ।ऽऽऽ	अक्षारयदुपगीतिः खर्गसुरङ्गीढयां गीतिम्॥
तृतीये १२	ऽ।।।।ऽऽ।	
चतुर्थे १५	ऽ।।ऽ।ऽऽऽ	
उद्गीतिः	आर्याद्वितीयकलद्वितये विपरीते पुनरिहोद्गीतिः।	
प्रथमे चरणे १२	ऽऽ।ऽ।ऽ।।	नारायणस्य सन्ततमुद्गीतिः संस्तुतिर्भक्त्या।
द्वितीये १५	ऽऽऽ।ऽऽऽ	अभ्यायामासक्तिर्दुस्तरसंसारसागरे तरणिः॥
तृतीये १२	ऽऽऽऽऽ	
चतुर्थे १८	ऽ।।ऽ।ऽ।ऽ।ऽ	
आर्यागीतिः	आर्याप्राग्दलमन्तेऽधिकगुरु तादृगपरार्द्धमार्यागीतिः।	
प्रथमे चरणे १२	ऽऽऽ।।।ऽ	हर्षोद्वेल्लितगात्रप्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः।
द्वितीये २०	।ऽ।ऽ।ऽ।ऽ।ऽऽ	आर्यागीतिं भक्त्या गायन्ति श्रीपतेश्चरितसन्दोहाम्॥
तृतीये १२	ऽऽऽऽऽ	लघुगुरुविपर्ययरूपप्रस्तारभेदेन बहुविधा आर्या भवन्ति॥
चतुर्थे २०	ऽऽऽ।ऽ।।।ऽऽ	
पूर्वार्द्धे विंशत्या चतुर्विंशत्या वा मात्राणां परार्द्धे षोडशमात्राणां परे लघुवर्णचतुष्टये सति प्रथमं द्वितीयं वा लक्ष्यचरं प्राप्य आर्याया: सामान्येन यतिनियम:॥		
वैतालीयम्। अपरवक्त्रमित्येके।	षड्विषमेऽष्टौ समे कलास्ताश्च समेष्वर्णो निरन्तरा। न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥	
प्रथमे चरणे १४	।।ऽ।ऽ।ऽ।ऽ	बृहच्छोण मदेन चर्चितं तव यन्निन्दति राधिके कुचम्।
द्वितीये १६	।।ऽ।।ऽ।ऽ।ऽ	मुदमातनुतेऽत्र पक्षिमं तद्वैतालीयं फलं हरेः॥
तृतीये १४	।।ऽ।।ऽ।ऽ।ऽ	लघुगुरुवत्त्वयेनापि बहुधा भवति॥
चतुर्थे १६	ऽऽऽऽ।ऽ।ऽ	
औपच्छन्दसकम्	तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रछन्दम्।	
प्रथमे चरणे १६	ऽऽऽऽ।ऽ।ऽऽ	आतन्वानं मुरारिकान्तास्वौपच्छन्दसकं हृदा विनोदम्।
द्वितीये १८	ऽऽऽ।।ऽ।ऽ।ऽऽ	कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम्॥
तृतीये १६	ऽऽऽऽ।ऽ।ऽऽ	
चतुर्थे १८	ऽऽऽ।।ऽ।ऽ।ऽऽ	
एतदेतालीयमेव:॥		

छन्दसां वृत्तिगामानि ।	छन्दसां लक्षणगाथाः ।	छन्दसामुदाहरणानि ।
पञ्झटिका	प्रतिपदयमकितषोड़शमात्रा नवमगुरुत्वविभूषितगात्रा । पञ्झटिकापुनरत्र विवेकः क्वापि न मध्यगुरुर्गण एकः ॥	
प्रथमे चरणे १६	।।।।२२२२२२	तरलवतंसाश्लिष्टस्कन्धचलतरपञ्झटिकाकटिबन्धः ।
द्वितीये १६	।।।।२।२।२२	मौलिचपलशिखिचन्द्रकवृन्दः कालियशिरसि ननर्त्त मुकुन्दः॥
तृतीये १६	२।।।।।२।२२	इयं प्रतिपदयमकितषोड़शमात्रा लघुगुरुत्वत्वयेनापि बहुधा। अस्या नवमी मात्रा च कदाचित् लघ्वी भवति ॥
चतुर्थे १६	२।।।।।२।२२	
दोहड़िका	मात्रा चयोदशकं यदि पूर्व्वं लघुकविरामि। पश्चादेकादशकन्तु दोहड़िका द्विगुणेन ॥	
प्रथमे चरणे १३	२२२।।।।।।	माई दोहड़िपठय सुणि हासिओ काणु गोआल।
द्वितीये १३	२।२२।२२।	वृन्दावणघणकुञ्ज चलिओ कमलरसाल ॥
तृतीये ११	२२।।।।२।	अस्यार्थः । हे मातः ! दोहड़िकापाठं श्रुत्वा कश्चो गोपालो हसित्वा कमपि रसालं चलितः कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविड़निकुञ्जे । राई इति क्वचित् पाठः तत्तेन राधिकाया दोहड़िकापाठं श्रुत्वा ॥
चतुर्थे ११	।।।।।।२।	
अस्या अन्या मात्रा लघ्वी अपभ्रंशभाषया प्रचारः ॥		गुरुलघुत्वत्वयेन बहुधा भवति ॥
इति मात्रावृत्तानि समाप्तानि ॥*॥		

अत्र समवृत्तानि (२४७) सप्तचत्वारिंशदधिकं द्विशतं, अर्द्धसमवृत्तानि (१५) पञ्चदश, विषमवृत्तानि (७) सप्त, मात्रावृत्तानि च (१५) पञ्चदश, समुदायेन (२८४) चतुरशीत्यधिकद्विशतसंख्यकानि छन्दांसि लिखितानीति ॥ * ॥

छन्दकंपातनः, पुं, (छन्दकेन छद्मना पातयति लोकानिति। पत्+णिच्+ल्युः।) छद्मतापसः। इति जटाधरः ॥

छन्दोगः, पुं, (छन्दो वेदविशेषं सामेत्यर्थः गायतीति। गै+"गोपोष्टक्।" ३।२।८। इति टक्।) सामगः। सामवेदी। इति जटाधरः ॥ (यथा, मनुः। ३। १४५।
"यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम्।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्निकम्॥")

छन्दोगपरिशिष्टं, क्ली, (छन्दोगेन सामगेन कात्यायनेन मुनिनेत्यर्थः। प्रणीतं यत् परिशिष्टम्। यद्वा, छन्दोगेभ्यः हितं परिशिष्टम्।) कात्यायनमुनिप्रणीतं सामवेदिकर्म्मबोधकगोभिलसूत्रस्याद्यं परिशेषशास्त्रम्। इति स्मृतिः ॥

छन्दोविचितिः, स्त्री, (छन्दसां विचितिर्यत्र।) स्मृतिच्छन्दसां प्रत्यायकं शास्त्रम्। इत्यमरटीकायां भरतः ॥ (यथा, हरदत्तसंहितायाम्। १०४। ६४।
"विपुलामपि मुद्रा छन्दोविचितिं भवति कार्य्यमेतावत्।
स्मृतिसुखदत्तसंग्रहमिममाह वराहमिहिरोऽतः॥")

छद्म, क्ली, (छद्+क्मः।) रहः। निर्जनस्थानम्। इति मेदिनी। ने, ५॥

छद्मः, त्रि, (छद्+क्मः।) छादितः। इति मेदिनी। ने, ५॥ (आप्तः। यथा, महाभारते। ३। २०। २४।
"न हया न रथो वीर! न यन्ता मम दारुकः।
अदृश्यन्त शरैश्छन्नास्तेनाहं सैनिकाश्च मे॥")

रहः। इत्यमरः। २। ८। २२॥

छप, ड क सर्पे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) ड क, छम्पयति। सर्पो गतिः। इति दुर्गादासः॥

छम, ड भक्षे। इति कविकल्पद्रुमः। (भ्वां-परं सकं-सेट्। उदित्वात् क्त्वेट्।) छमति। ड, छमित्वा छान्त्वा। इति दुर्गादासः॥

छमड्डः, पुं, (छमति भक्षयति जन्मग्रहणान्तरं पितरं नाशयतीत्यर्थः। छम+बाहुलकादड्डन्।) श्राद्धपिण्डकः। इत्युणादिकोषः। छैमड़ा इति भाषा॥ वन्युर्द्दानः। इति संक्षिप्तसारे उणादिवृत्तिः॥

छर्द्द, क वमने। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) वमनं वान्तिः। क, छर्द्दयति अन्नं लोकः। इति दुर्गादासः॥ (तथाच, महाभारते। ५। ६६। ४२।
"क्षपन्ति च भवन्ति च छर्द्दयन्ति च मानवाः॥")

छर्द्दि, स्त्री, (छर्द्द+भावे क्तिन्।) वमनम्। इति हेमचन्द्रः। ३। १३३॥

छर्द्दनं, क्ली, (छर्द्द+भावे ल्युट्।) वमनम्। इति हेमचन्द्रः॥ (यथा, सुश्रुते। ४। १०।
"तत्रास्य मदनालाबुविम्बीकोशातकीफलैः।
छर्द्दनं दधुदन्त्रिभ्यामथवा तद्फलाम्बुना॥")

छर्द्दनः, पुं, (छर्द्दयति नरपश्वादिकं यस्मिन् पुनरुद्गिरतीति। छर्द्द+ल्युः।) अलम्बुषराक्षसः। (छर्द्दयति कटुगन्धेन उद्गिरत्यनेनेति। छर्द्द+ल्युट्।) निम्बवृक्षः। इति हेमचन्द्रः॥ मदनवृक्षः। इति भावप्रकाशः॥

छर्द्दापनिका, स्त्री, (छर्द्दं वमनं आपयति प्रापयतीत्यर्थः। आप्+णिच्+ल्युः। ततः स्वार्थे कः। टापि अत इत्वच।) कण्टकटी। इति राजनिर्घण्टः॥

छर्द्दिः, स्त्री, (छर्द्दयत्यनेनेति। छर्द्द वमने+इन्।) वमिरोगः। वाँति इति भाषा॥ तत्पर्य्यायः। प्रच्छर्द्दिका २ छर्द्दम् ३ वमथुः ४ वमनम् ५ वमिः ६। इति हेमचन्द्रः। ३। ३३॥ छर्द्दिका ७ छर्द्दीका ८ वान्तिः ९ उद्गारः १०। इति राजनिर्घण्टः॥ उत्कासिका ११ छर्द्दनम् १२। इति शब्दरत्नावली॥ तस्या निदानादि यथा,—
"दुष्टैर्दोषैः पृथक्सर्व्वैर्वीभत्सालोकनादिभिः।
छर्द्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते॥
अतिद्रवैरतिस्निग्धैरुष्णैर्लवणैरति।
अकाले चातिमात्रेण तथा सात्म्येन्च भोजनैः॥
अमाद्यवायुतोयेक्षुगादजौर्णात् क्रिमिदोषतः।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः॥
वीभत्सैर्हेतुभिश्चान्यैर्द्दं तमुत्क्लेशितो बलात्।
छादयन्मानसं वेगैरर्द्दयन्नङ्गभञ्जनैः॥
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः॥"
तस्याः पूर्व्वरूपं यथा,—
"कण्ठास्योद्गाररोधौ च प्रसेको लवणास्यता।
भक्ते द्वेषोऽन्नपाने च वमीनां पूर्व्वलक्षणम्॥"
वातजायास्तस्या रूपं यथा,—
"हृत्पार्श्वपीड़ासुखशोषशीर्षे-
नाभ्यर्त्तिकासस्वरभेदतोदैः।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नलक्ष्यं तनुकं कषायम्॥
लक्ष्येत चाध्मं महता च वेगेनार्त्तोऽनिलाच्छर्द्दयतीह दुःखम्॥"
तस्याः पित्तजाया रूपं यथा,—
"मूर्च्छा पिपासा सुखशोषमर्द्द-
ताल्वक्षिसन्तापतमोभमार्त्तः।

पीतं भृङ्गोणं हरितं सतिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥"

तस्याः श्लेष्मजाया रूपं यथा,—

"तन्द्रास्यमाधुर्यकफप्रसेक-
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्धं
सलोमहर्षोऽल्परुजं वमेच्च ॥"

तस्यास्त्रिदोषजाया रूपं यथा,—

"शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्दिस्त्रिदोषालवणाम्बनील-
सान्द्रोणरक्तं वमतां नृणां स्यात् ॥"

असाध्याया लक्षणं यथा,—

"विट्स्वेदमूत्रानुवहानि वायुः
स्रोतांसि संरुध्य यदोर्द्धमेति ।
उत्सन्नदोषस्य समाचितं तं
दोषं समुद्धूय नरस्य कोष्ठात् ॥
विण्मूत्रयोस्तत्समगन्धवर्णं
लट्श्वासकासार्त्तियुतं प्रसक्तम् ॥
प्रच्छर्दयेद्दुरुमिहातिवेग-
त्तयार्द्दितत्वाशु विनाशमेति ॥"

आगन्तुजाया लक्षणं यथा,—

"वीभत्सजा दौर्हृदजामजा तु
असात्म्यजा या क्रिमिजा च या हि ।
सा पञ्चमी ताश्च विभावयेच्च
दोषोच्छ्रयेणैव यथोक्तमादौ ॥"

क्रिमिजाया लक्षणं यथा,—

"शूलच्छ्वासबहुला क्रिमिजा च विशेषतः ।
क्रिमिच्छर्द्योगतुल्येन लक्षणेन च लक्षिता ॥
क्षीणस्य या च्छर्दिरतिप्रसक्ता
सोपद्रवा शोणितपूययुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्याधिकित्सेन्निरुपद्रवाञ्च ॥"

तस्या उपद्रवा यथा,—

"कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्य
मेव च ।
छर्द्योगसमकश्चैव ज्ञेयाश्छर्द्यैरुपद्रवाः ॥"

इति माधवकरः ॥

तस्यौषधं यथा, गारुड़े १८७ अध्याये ।

"अश्वगन्धाभया चैव उदकेन समं पिबेत् ।
हरीतकीकुष्ठचूर्णं लीढ्वा आस्यञ्च पूरयेत् ॥
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ।
गुड़ूचीपद्मकारिष्टधन्वार्क रक्तचन्दनम् ॥
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाश्रमञ्जयेत् ॥"

अपिच ।

"विल्वमूलञ्च समधु गुड़ूचीकथितं जलम् ।
पीतं हरेच्च त्रिविधां छर्द्दिं वै नात्र संशयः ॥
पीता दूर्व्वा च्छर्द्दिं नश्येत् पिष्टा तण्डुलधारिया ॥"

इति च गारुड़े १६४ अध्यायः ॥*॥

अथ छर्द्दिचिकित्सा ।

"आमाशयोत्क्लेशभवा हि सर्व्वा-
च्छर्द्दीर्मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संशोधनं वा कफपित्तहारि ॥"

अत्र च्छर्द्दीशब्दः ।

"हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
सुस्निग्धमलकयूषो वा ससर्पिष्कः ससैन्धवः ॥
क्षीरोदकं नाग्नितप्तं क्षीरस्योदकम् ।
गुड़ूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेत् मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गौन्नते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥
विड़ङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विड़ङ्गन्नवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥
ध्रुवं केवर्त्तीमुस्तं गुड़तक्री इति लोके ।
पिष्ट्वा धात्रीफलं लाजान् शर्करान्च पलोन्मितान् ।
दत्त्वा मधुपलञ्चापि कुड़वं सलिलस्य च ॥
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोषजाम् ।
गुड़ूच्या रचितं हन्ति हिमं मधुसमन्वितम् ॥
दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥
एलालवङ्गगजकेशरकोलमज्जा-
लाजाप्रियङ्गुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
छर्द्दिं निहन्ति कफमारुतपित्तजाताम् ॥

इति एलादिचूर्णम् ॥

अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वापितं जले ।
तल्लं पानमात्रेण छर्द्दिं जयति दुर्জ্জयाम् ॥
यथा त्रिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाग्नियेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥
बिल्वत्वचो गुड़ूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां तथा ॥
आम्राश्मबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्याच्छर्द्दितीसारं वैश्वानर इवाहुतिम् ॥

निर्यूहः क्वाथः ।

जम्ब्वाम्रपल्लवक्षतं लाजरजःसंयुतं शीतम् ।
शमयति मधुना युक्तं वमिमतिसारं दवाग्नि-
सुषाम् ॥
बीभत्सजां हृद्यतमैरिष्टैर्हृद्यां फलैः ।
लङ्घनैरामजां छर्द्दिं जयेत् सात्म्यो रसात्मजाम् ॥
कृमिच्छर्द्योगवद्वक्ष्याद्वमिं कृमिसमुद्भवाम् ।
तत्र तत्र यथा दोषं क्रियां कुर्य्याच्चिकित्सकः ॥

इति छर्द्यधिकारः ।" इति भावप्रकाशः ॥

छर्द्दिः, [स्] स्त्री, (छर्द्दयति छर्द्यते इति वा । छर्द्द वमने + "अर्च्चिशुचिहुसृपिच्छादिछर्द्दिभ्य इसिः ।" उणा । २ । १०८ । इति इसिः ।) वमिः । इत्युणादिकोषः ॥ (यथा, चरके चिकित्सास्थाने २३ अध्याये ।

"तदभिवेश्यस्य वचो निशम्य
प्रीतो भिषक्श्रेष्ठ इदं जगाद ।
छर्द्दौ पि यानीह पुरोदितानि
विस्तारतस्तानि निबोध सम्यक् ॥")

छर्द्दिका, स्त्री, (छर्द्दि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, छर्द्दयतीति । छर्द्दि + ण्वुल् । टापि अत इत्वञ्च ।) छर्द्दिः । विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

छर्द्दिकारिपुः, पुं, (छर्द्दिकायाः रिपुः नाशक इत्यर्थः ।) क्षुद्रेला । इति शब्दचन्द्रिका ॥

छर्द्दिघ्नः, पुं, (छर्द्दिं हन्तीति । हन् + टक् ।) निम्बवृक्षः । इति रत्नमाला ॥ (निम्बशब्देऽस्य विवरणं ज्ञेयम् ॥)

छलं, क्ली, (छो + कृषादित्वात् कलच् । यद्वा, छल + अच् ।) स्खलितम् । शाठ्यम् । इति मेदिनी । ले, १७ ॥ (यथा, मनुः । ८ । ४६ ।

"धर्म्मेण व्यवहारेण च्छेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥"

व्याजः । यथा, मार्कण्डेये । २५ । १० ।

"सा वै मदालसा पुत्रं बालसुज्ञानशायिनम् ।
उल्लापनच्छलेनाह रुदमानमविस्वरम् ॥"

तात्पर्य्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरेण कथनम् । यथा, अक्षपादसूत्रे । ५० ।

"वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ॥"

"अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पः अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वादुक्तस्य विघातो दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितम् । तात्पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा । यथा, नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्धाभिधानम् । प्रमेयं धर्म्मित्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्धाभिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् । तत्त्रिविधम् । वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥" "छलं नाम परिशुद्धमर्थाभासमपार्थकं वाग्वस्तुमात्रमेव । तद्विविधं वाक्छलं सामान्यच्छलञ्च । तत्र वाक्छलं नाम यथा कश्चिद्ब्रूयात् नवतन्त्रोऽयं भिषगिति भिषग् ब्रूयात् नाहं नवतन्त्र एकतन्त्रोऽहमिति । परो ब्रूयात् नाहं ब्रवीमि नव तन्त्राणि तवेति अथतु नवाभ्यस्तं ते तन्त्रमिति भिषग् ब्रूयात् न मया नवाभ्यस्तं तन्त्रं अनेकशताभ्यस्तं मया तन्त्रमिति । एतद्वाक्छलम् । सामान्यच्छलं नाम यथा, व्याधिप्रशमनायौषधमित्युक्ते परो ब्रूयात् सतु सत्प्रशमनायेति भवानाह सतृरोगः सदौषधं यदिच सत्प्रशमनाय भवति सतृकासः सतृक्षयः सतृसामान्यात् कासस्तेक्षयप्रशमनाय भविष्यतीति एतत्सामान्यछलम् ॥" इति चरके विमानस्थाने अष्टमे अध्याये ॥)

छल्लिः, स्त्री, (छदं छाद्यतां लातीति । ला + बाहुलकात् किः ।) त्वक् । इति शब्दरत्नावली ॥ छाल इति भाषा ॥

छल्ली, स्त्री, (छदं छाद्यतां लातीति । ला + किः । ततः छदिकारादिति वा ङीष् ।) वीरुत् । सन्तानः । वल्कलम् । कुसुमविशेषः । इति मेदिनी । ले, १८ ॥

छविः, स्त्री, (छ्यति क्षयं करोति यद्वा छ्यति क्षिणोति दूरीकरोति मालिन्यादिकमेवेति । छो + "छ्यशुभ्यिच्छविस्यविकिकोदिवि ।"

उणा० । ४ । १५६ । इति किन् प्रत्ययेन निपातनात् साधुः ।) शोभा । दीप्तिः । इत्यमरः । १ । ३ । १७ ॥ (यथा, मेघदूते । ३५ ।

"भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ॥")

छष, ण वधे । इति कविकल्पद्रुमः । (भ्वा-उभं-सकं-सेट् ।) ण, छषति छषते । अयं केचिन्न मन्यते । इति दुर्गादासः ।

छा, स्त्री, (छद् + ङः टाप् च ।) आच्छादनम् । इति मेदिनी । छे, १ ॥

छाः, पुं, (छाद्यते माल्यपत्राभ्यामसौ । छद् + "सर्व्व-धातुभ्योऽसुन् ।" उणा० । ४ । १८८ । इति असुन् ततः पृषोदरात् साधुः ।) श्रावकः । इत्येकाक्षरकोषः ॥

छागः, पुं, स्त्री, (छायते छिद्यते देवबलये इति । छो + "छापूखड़िभ्यः कित् ।" उणा० । १ । १२४ । इति गन् ।) पशुविशेषः । तत्पर्य्यायः । बस्तः २ छगलकः ३ अजः ४ शुभः ५ । इत्यमरः । २ । ६ । ७६ ॥ छगः ६ छगलः ७ छागलः ८ तभः ९ क्षभः १० शुभः ११ । इति तट्टीका ॥ लघुकामः १२ क्रयसदः १३ वर्करः १४ पर्व्वभोजनः १५ लम्बकर्णः १६ मेगादः १७ वृकः १८ अरण्यायुः १९ शिवाप्रियः २० । इति शब्दरत्नावली ॥ अवृकः २१ मेध्यः २२ पशुः २३ पयस्वलः २४ । तस्यांसगुणाः । लघुत्वम् । स्निग्धत्वम् । नातिशीतत्वम् । रुचिबलपुष्टि-दात्रत्वम् । निर्दोषत्वम् । वातपित्तनाशित्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥ शुक्रधातु-साम्यकारित्वम् । दृंहणत्वम् । स्निग्धत्वम् । स्पृदुत्वम् । अनभिष्यन्दित्वम् । नातिप्रशस्तत्वञ्च । इति राजवल्लभः ॥* ॥ छागपोतमांसगुणाः । लघुत्वम् । शीतत्वम् । प्रमेहनाशित्वञ्च ॥ हव्य-चारिछागस्य मांसगुणः । दृंहणत्वम् । बल-दात्रत्वञ्च ॥ तन्मूत्रगुणाः । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । नाड़ीविशाणिश्लीपोदरकफपित्तास-गुल्मशोफनाशित्वम् । लघुत्वञ्च । इति राज-निर्घण्टः ॥

"छागलो वर्करश्छागो वस्तोऽजश्छगलकः शुभः ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषजुत् ॥
नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् ।
परं बलकरं रुच्यं दृंहणं बलवर्द्धनम् ॥
अजाया अप्रसूतायाः मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वरहरं श्रेष्ठं सुखादु बलदं भृशम् ॥
मांसं निष्कासिताक्षस्य छागस्य कषजस्य च ।
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तजुत् ॥
वृद्धस्य वातलं रूक्षं तथा व्याधिन्वितस्य च ।
ऊर्द्धजत्रुविकारघ्नं छागमुष्कं रुचिप्रदम् ॥"

इति भावप्रकाशः ॥

(एतन्मांसं पितॄणां तृप्तिकरत्वात् श्राद्धाय देयम् । यथाह याज्ञवल्क्यः । १ । २५८ ।

"मातृस्वसारिगौरश्वमृगाकूर्म्मच्छागमामिषम् ॥"

छागमांसेन पितॄणां यावत्तृप्तिः । यथाह मनुः । ३ । २६६ ।

"यावान् छागस्य मांसेन पार्षतेन च सम्मवेत् ॥"

भोजराजेन युक्तिकल्पतरौ इतस्तुरीयोक्ता । यथा,—

"नवश्राद्धानां विभेदेन नराणान्तु गजत्रयम् ।
तेषां शुभाय निर्द्दिष्टं पशुवस्त्रत्रयं बलौ ।
ये छाग्याः शुक्लयश्छागाः पशवोऽन्ये तथैव च ।
देवजातिभिरुत्सृष्टास्ते सर्व्वार्थोपसिद्धये ॥
ये पीता हरिता वापि नरजातेरदीरिताः ।
ये शुक्लाश्च महान्तो वा रक्ताभाताः शुभप्रदाः ॥
यो मोहादथवाज्ञानादबलिमन्यं प्रयच्छति ।
वध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत् ॥"

इतस्य पशोर्लक्षणादिकं विशेषतो देवीपुराणे-तायाम् ६५ अध्याये उक्तम् । यथा,—

"छागशुभाशुभलक्षण-
मभिधास्ये नवदशारदन्ताक्तं ।
धन्याः स्याप्या वेश्मनि
सन्त्याज्याः सप्तदन्ता ये ॥
दक्षिणपार्श्वे मण्डल-
मसितं शुक्लस्य शुभफलं भवति ।
अथ निभक्ष्याललोहित-
वर्णानां श्वेतमपि शुभदम् ॥
स्तनवदवलम्बते यः
कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलद-
श्चत्वारो द्विमणयो ये ॥
शुक्लाः सर्व्वे शुभदाः
सर्व्वसिताः सर्व्वलक्षणादेयाश्च ।
अर्द्धासिताः सितार्द्धा
धन्याः कपिलार्द्धलक्ष्याश्च ॥
विचरति यूथाख्याये
प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्द्धा वा
मूर्द्धनि वा टिल्लिका यस्य ॥
वृषभतकक्षशिरा वा
तिलपिष्टनिभश्च ताम्रदृक् शुक्लः ।
लक्ष्मचरणः सितो वा
लक्ष्मो वा श्वेतचरणो यः ॥
यः लक्ष्माक्षः श्वेतो
मध्ये लक्ष्णेन भवति पट्टेन ।
यो वा चरति सशब्दं
मन्दञ्च स शोभनश्छागः ॥
अथ शिरोरुहपादो
यो वा प्राक् प्राक्तुरो ऽपरे गौलः ।
स भवति शुभलक्षछागः
शोकघ्नाश्चैव गर्गोक्ताः ॥
कुहकः कुटिलश्चैव जटिलो वामनस्तथा ।
ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति ते ॥
अथाप्रशस्ताः खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निश्चित्तकर्णा द्विप्रमुखाकाश्च
भवन्ति ये चाचिततानुजिह्वाः ॥
वर्णैः प्रशस्तैर्मिलिताश्च युक्ता
सुकाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां
सौख्यानि कुर्व्वन्ति यशः श्रियश्च ॥")

छागलः, पुं, (छाग एव । स्वार्थे अण् ।) करी-षाग्निः । इति त्रिकाण्डशेषः ॥ घुँटेर आगुन इति भाषा ॥

छागभोजी, [न्] पुं, स्त्री, (छागं मुष्के भक्षय-तीति । भुज् + णिनिः ।) वृकः । इति राज-निर्घण्टः ॥ छागभक्षके, त्रि ॥

छागरथः, पुं, (छागः रथो वाहनमस्य ।) अग्निः । इति हेमचन्द्रः । ३ । १६३ ॥

छागलः, पुं, स्त्री, (छगल एव इति प्रज्ञादित्वात् ।) छागः । इति राजनिर्घण्टः ॥ (यथा, पञ्च-तन्त्रे । ३ । ११७ ।

"बहुदुहिसमायुक्ताः सुविज्ञाना बलोत्कटाः ।
मुक्ता वधयितुं धूर्त्ता ब्राह्मणं छागलादिव ॥"

छगलस्य गोत्रापत्यं पुमान् इति । छगल +
" विकर्णशुङ्गच्छगलाद्वृतसभरद्वाजाजिन्नु ।"
४ । २ । १२७ । इति अण् । आत्रेय ऋषिभेदः । इति सिद्धान्तकौमुदी ॥)

छागलकः, पुं, (छागल इव कायतीति । कै + कः ।) मत्स्यविशेषः । यथा,—

"श्वेतं सुपाकं समदीर्घवृत्तं
निःशल्कलं छागलकं वदन्ति ।
गले द्विकण्टः किल तस्य दृष्टे
कण्टः सुपथ्यो रुचिरो बलप्रदः ॥"

इति राजनिर्घण्टः ॥

(स्वार्थे कन् ।) छागलच्च ॥

छागलाद्यं, क्ली, (छागल आद्यः प्रधानो यत्र ।) छागलादिघृतम् । तच्च वातरोगस्यौषधम् । यथा,

"आजं चर्म्मविनिर्मुक्तं लक्षमज्जगवादिकम् ।
पचमूलीद्वयचैव जलद्रोणे विपाचयेत् ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ।
जीवनीयैः सयष्ट्याह्वैः क्षीरेणैव घृतावरी ॥
छागलाद्यमिदं नाम्ना सर्व्ववातविकारजित् ।
अर्दिते कर्ण्यशूले च बाधिर्य्ये मुखमिञ्चिने ॥
जङ्घागुह्यदरश्रोणी खञ्जे शस्यसिकुञ्जयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते ॥
पृथग्दर्भतुलां पञ्चमूलद्वन्द्वाजमांसयोः ।
निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते ॥"

इति खण्डच्छागलाद्यं घृतम् ॥ * ॥

घृतारम्भे मन्त्रः ।

"ओँ कालि वर्च्चेश्वरि अमुकस्य बलसिद्धं देहि वज्रवचनेन स्वाहा ।

क्वाथयित्वा छागमादौ मधु दत्त्वा ललाटके ।
उदङ्मुखः प्राङ्मुखो वा भिषगेनमुपालभेत् ॥

छागमारम्भमन्त्रः ।

ओँ हाँ ओँ गाँ गणपतये स्वाहा ।

छागमांसतुलां गृह्य दग्धमूल्याः पलं मृतम् ।
अश्वगन्धापलशतं वाराहीकन्दमेव तथा ।
घृताढकं पचेत्तोयेनतुर्भागावशेषितैः ।

क्षीरं क्षेत्रसमं दद्यात् घृतावर्य्या रसं तथा ॥
ताम्रपात्रे दृढे चैव घृतेनैर्द्वङ्गिना पचेत् ।
अस्यौषधस्य कल्कस्य प्रत्येकं युक्तिसम्मितम् ॥
जीवन्ती मधुकं द्राक्षाकाकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं राखा पर्णिनीद्वयशारिवे ॥
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ घृटी ।
दार्व्यौ प्रियङ्गु चिपला नतं तालीशपद्मकौ ॥
एलापत्रं वरीनागजातीकुसुमधान्यकम् ।
मञ्जिष्ठा दाड़िमं दारु रेणुकं शैलवालुकम् ॥
विड़ङ्गं जीरकश्चैव पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते च घृते च शर्करापस्थसंयुतम् ॥
निधापयेत् स्निग्धभाण्डे आर्द्रे वा भाजने शुभे ।
अस्यौषधस्य सिद्धस्य प्रस्थं वीर्य्यमतःपरम् ॥
देवदेवं नमस्कृत्य संपूज्य गणनायकम् ।
पिबेत् पाचितस्य तस्य वाधिं वीक्ष्यानुपानतः ॥
सर्व्ववातविकारेषु अपस्मारे विशेषतः ।
उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे ॥
कर्णरोगे शिरोरोगे वाधिर्य्ये चापतन्त्रके ।
भूतोन्मादे च गृध्रस्यां सोन्नादे वातिपातके ॥
पार्श्वशूले च कृच्छ्रे वा वाय्वायामार्दिते तथा ।
वातकण्टकवृद्धौगमूरुस्तम्भे सपङ्गुले ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे वाधनि मिञ्जिने ।
अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्ध्वगे ॥
आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा ग्रीवे शीते चैवाववाहुके ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
वीर्य्यक्षये विषे कुष्ठे शोफःस्तम्भे मदात्यये ॥
आढ्यवातेऽभिमान्थे च वातरक्तगदेषु च ।
एकाङ्गरोगिणे चैव तथा सर्व्वाङ्गरोगिणे ॥
हस्तकर्म्मे शिरःकर्म्मे जिह्वाकर्म्मे जड़े भ्रमे ।
चीर्णेन्द्रिये नष्टशुक्रे युक्तिनःसरणे तथा ॥
स्त्रीणां वातासपाते च पटले चाक्षिसन्दने ।
एकाङ्गस्यन्दने चैव सर्व्वाङ्गस्यन्दने तथा ॥
नगादिपतिते वाते स्त्रीणामप्राप्तिहेतुके ।
आभिचारिकदोषे च धनसन्तापसम्भवे ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः ॥
माठ्यग्रहाभिभूतस्य शिरसुर्यैश्च विमुच्यति ।
प्रष्ठीवबलमांसस्य न वर्त्मगमनक्षमः ॥
एतेनानेन सिध्यन्ति वज्रसुक्तिरिवासुरान् ।
निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥
रसायनं वह्निबलप्रदञ्च
वपुःप्रकर्षं विदधाति रूपम् ।
इन्द्रावलेन्द्रेण समन्वितेदं
दीर्घायुषं पुत्रशतं करोति ॥
स्त्रीणां घृतं गच्छति वातिरेकं
न याति शीघ्रं वरसः समाङ्गः ।
अपुत्रिणीपुत्रशतं करोति
घृतायुषं कामसमं बलिष्ठम् ॥
महद्घृतं नाम तु छागलाद्यं
विनिर्म्मितं वातनिसूदनञ्च ।
शिवं शुभं रोगभयापहञ्च
चकार हारीतमुनिर्विशिष्टः ॥
श्वगालवर्हिणः माके पुमांसं तत्र दापयेत् ।
मयूरी नकुली छागी वीर्य्यहीनाः स्वभावतः ॥
भाषितं काशिराजेन छागमेव नपुंसकम् ॥"
घृतम् १६ शेर । काथार्थं छागमांसपलम् १००।
पाकार्थं जलं प्रं ६४ । शेषः प्रं १६ । विल्वादि-
दशमूलं प्रपलम् १० । जलं प्रं ६४ । शेषः
प्रं १६ । अश्वगन्धा १०० पलम् । जलं प्रं ६४ ।
शेषः प्रं १६ । वाट्यालकं १०० पलम् ।
जलं प्रं ६४ । शेषः प्रं १६ । दुग्धं प्रं १६ ।
शतमूलीरसः प्रं १६ । कल्कार्थं जीवन्त्या-
दीनां जीरकपर्य्यन्तानां कल्कद्रव्याणां प्रं तो ४ ।
वस्त्रपूते घृते शर्करा प्रं २। इति बृहच्छागलाद्यं
घृतम् । इति भैषज्यरत्नावली ॥
("छागमांसं तुलार्द्धं स्यात् दशमूलं तथापरम् ।
तोयद्रोणे पचेद्धीमान् यावत् स्यादंशशेषितम् ॥
तैलप्रस्थद्वयञ्चैव क्षीरञ्चैव घृतावरी ।
जीवनीयं समधुकं बला राखा च शैलजम् ॥
मांसीस्थाह्वेमतालीशनागपुष्पकाधनवालुकम् ।
पृथक् पृथक् समादाय सर्व्वमेकत्र साधयेत् ॥
मञ्जिष्ठालोध्रलाक्षा च प्रत्येकं कुड़वान्वितम् ।
आढ़कञ्च जलञ्चैव विधिना च विपाचयेत् ॥
छागलाद्यमिदं तैलं हारीतेन महात्मना ।
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ।
सर्व्वज्वरगदं हन्ति सन्निपञ्चास्थिजन्तथा ॥"
इति छागलाद्यं तैलम् ॥
इति वैद्यकक्षेमालिकायां वातरोगाधिकारे ॥)

छागलाङ्घिका, स्त्री, (छागलाङ्घी + संज्ञायां कन् । टापि पूर्व्वह्रस्वः ।) वृक्षदारकवृक्षः । इति राज-निर्घण्टः ॥

छागलाङ्घी, स्त्री, (छागलं अन्तयतीति वाहु-लकात् रक् ततो ङीष् ।) वृकः । इति राज-निर्घण्टः ॥

छागवाहनः, पुं, (छागेन आत्मानं वाहयतीति । वह + णिच् + ल्युट् । यद्वा, छागो वाहनमस्य ।) अग्निः । इति त्रिकाण्डशेषः ॥

छागिका, स्त्री, (छागी + स्वार्थे कन् । ततः टापि पूर्व्वह्रस्वः ।) छागी । इति हेमचन्द्रः ।४।३४१ ॥

छागी, स्त्री, (छायते छिद्यते देवोपहारायेति । छो + "छापूखड़िभ्यः कित् ।" उणां ।२।१२४। इति गन् कागः ततः स्त्रियां जातौ ङीष् ।) छागमाता । वकरी इति पाँटी इति च भाषा । तत्पर्य्यायः । अजा २ पयस्विनी ३ भीरुः ४ मेध्या ५ गलेस्तनी ६ । इति राजनिर्घण्टः ॥ छागिका ७ मङ्गा ८ सर्व्वभक्ष्या ९ गलस्तनी १० । इति हेमचन्द्रः ॥ सुलुभ्या ११ । इति त्रिकाण्ड-शेषः ॥ सङ्गा १२ सुखविलुण्ठिका १३ । इति शब्दरत्नावली ॥ तद्दुग्धगुणाः । मधुरत्वम् । शीतलत्वम् । ग्राहित्वम् । दीपनत्वम् । रक्त-पित्तविकारक्षयकासनाशित्वञ्च । यथा, राज-निर्घण्टे ।

"अजानां लघुकायत्वान्नानाद्रव्यनिषेवणात् ।
नात्यम्बुपानात् व्यायामात् सर्व्वव्याधिहरं पयः ॥"
कषायत्वम् । लघुत्वम् । अतीसारज्वरजाग्नि-त्वञ्च । यथा, भावप्रकाशे ।
"छागं कषायं मधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
अजानामल्पकायत्वात् कटुतिक्तादिभक्षणात् ।
स्तोकाम्बुपानाद्व्यायामात् सर्व्वरोगापहं पयः ॥"
तद्दधिगुणाः । उत्तमत्वम् । ग्राहित्वम् । लघु-त्वम् । दोषत्रयापहत्वम् । श्वासकासार्शः-क्षय-कार्श्येषु शस्तत्वम् । दीपनत्वञ्च । इति भाव-प्रकाशः ॥ कफवातनेत्रदोषदुर्नामश्वासकास-नाशित्वम् । उष्णत्वम् । रूक्षत्वम् । पाचनत्वञ्च ॥ तन्नवनीतगुणाः । लघुत्वम् । मधुरत्वम् । कषा-यत्वम् । त्रिदोषनाशित्वम् । चक्षुष्यत्वम् । दीप-नत्वम् । बल्यत्वम् । सदा हितत्वञ्च ॥ तन्नवोत्थ-नवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । परमदीपनत्वञ्च ॥ तद्घृतगुणाः । चक्षुष्यत्वम् । दीपनत्वम् । बलवर्द्धनत्वम् । कास-श्वासकफनाशित्वम् । राजयक्ष्मणि शस्तत्वञ्च । इति राजनिर्घण्टः ॥

छातः, त्रि, (छो + क्तः । "शाच्छोरन्यतरस्याम् ।" ७ । ४ । ४१ । इति विभाषायामित्वाभावः ।) छिन्नः । दुर्ब्बलः । इत्यमरः । ३ । १ । १०३ ॥

छात्रं, क्ली, वरटीच्छत्रसम्भवं मधु । तस्य गुणाः । श्वित्रक्रिमिरोगरक्तपित्तनाशित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥
("वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥"
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमलड्मोहविषघ्नत् तर्पणञ्च गुणाधिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

छा(त्र)त्रः, पुं, (छत्रं गुरोर्दोषाभावरणं तच्छील-मस्येति । "छत्राद्यो णः ।" ४ । ४ । ६२ । इति णः ।) शिष्यः । इत्यमरः । २ । ७ । ११ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८७ ।
"भूभुजा दानशौण्डेन पैत्रिके स्वस्थिते सति ।
छात्राणामार्य्यदेशानां तेन विद्यार्थिनां मठः ॥")

छात्रकं, क्ली, (छात्र + स्वार्थे कन् ।) छात्रं मधु । यथा, राजनिर्घण्टे ।
"छत्राकारन्तु पटलं सरघाः पीतपिञ्जलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधु छात्रकमीरितम् ।
श्वित्रमेहक्रिमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ॥"
अपिच भावप्रकाशे ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ॥
भ्रमलड्मोहविषघ्नत्तर्पणञ्च गुणाधिकम् ॥"

छात्रगडः, पुं, (छात्रो गड इव ।) पदाद्यवित् । विभक्त्यन्तस्य श्लोकचरणस्य वा आदिमात्रवेत्ता ।

(अल्पच्छात्रः।) इति हारावली। २१६॥

छात्रदर्शनं, क्ली, (छात्रं वरटीच्छत्रसम्भूतं मधु तदिव दृश्यते इति। दृश+कर्म्मणि ल्युट्।) हैयङ्गवीनम्। इति शब्दचन्द्रिका॥ (छात्राणां दर्शनम्।) शिष्यावलोकनञ्च॥

छादं क्ली, (छाद्यते गृहमनेनेति। छद+णिच्+करणे घञ्। छादयतीति। छद्+णिच्+अच् वा।) पटलम्। इति जटाधरः॥ छात इति चाल इति च भाषा॥

छादनं, क्ली, (छद कि संवृतौ+णिच्+करणे ल्युट्।) छदनम्। अन्तर्द्धानम्। (कर्त्तरि ल्युः।) पत्रम्। इत्यमरटीकायां भरतः॥ (भावे ल्युट्।) आच्छादनम्। (यथा, हरिवंशे। ६१। २५।

"नियोगपाशैरासक्तैर्गर्गरीरिक्तमस्मद्गृहम्।
छादनाय प्रकीर्णैश्च कण्टकैस्तृणसङ्कटैः॥")

छादनः, पुं, (छादयति आवृणोति पत्त्रादिभिरिति। छद्+ल्युः।) नीलाम्बानवृक्षः। इति राजनिर्घण्टः॥

छादितः, त्रि, (छाद्यते स्मेति। छद+"वा दान्तशान्तेति।" ७।२।२७। इड्भागमात् साधुः।) छन्नः। इति जटाधरः॥ आच्छादितः। यथा,

"घनतरघनदृष्टेश्छादितौ पुण्यवन्तौ॥"

इत्युद्भटः॥

छान्दसः, पुं, (छन्दो वेदं अधीते वेत्ति वा। छन्दस्+"तदधीते तद्वेद।" ४।२।५९। इत्यण्।) वेदाध्येता। इत्यमरः। २।७।६॥ (छन्द एवेति। स्वार्थे अण्। वेदः।

"मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात्॥"

इति भागवते। १। ४। १३॥

त्रि, छन्दसो वाक्यावयवस्तत्र भवः। "छन्दसो यदणौ।" ४। ३। ७१। इत्यण्। वेदभवः॥ छन्दसोऽयम्। "तस्येदम्।" इत्यण्। वेदसम्बन्धी। स्त्रियान्तु ङीप्। यथा, हरिवंशे। २१५। ७।

"छान्दसीभिरुदाराभिः श्रुतिभिः समलङ्कृतः॥")

छान्दोग्यं, क्ली, (छन्दोगानां धर्म्मः आम्नायो वा। छन्दोग+"छन्दोगौक्थिकयाज्ञिकबह्वृचनटाण्ण्याः।" ४। ३। १२९। इति ण्यः।) सामवेदोपनिषत्। इति वैदिकसम्प्रदायः॥ (यथा, मौक्तिकोपनिषदि १ अध्याये।

"ऐतरेयञ्च छान्दोग्यं बृहदारण्यकन्तथा॥")

छाया, स्त्री, (क्षति क्षिनत्ति सूर्य्यादेः प्रकाशं नाशयतीत्यर्थः। क्षी+"माच्छासिसिभ्यो यः।" उणा। ४। १०९। इति यस्तस्याट् च।) रौद्रशून्यम्। अतपस्थायः। भावानुगा २ श्यामा ३ अतेजः ४ भीतः ५ अनातपः ६ आभीतिः ७ तापाभावः ८ भावालीना ९। अस्या गुणाः। मधुरत्वम्। स्निग्धत्वम्। दाहश्रमहरत्वञ्च। इति राजनिर्घण्टः॥ घर्म्मनाशित्वम्। मेघच्छायागुणः। श्रमभ्रममूर्च्छातृष्णातापनाशित्वम्। इति राधवल्लभः॥ *॥

छायाविशेषे दोषो यथा,—

"दीपखद्योतनुच्छाया छिन्नकेशनखादिकम्।
अजमार्ज्जारश्वेनुष्ट्र हन्ति पुण्यं पुराकृतम्॥"

इति कर्म्मलोचनम्॥ *॥

(लक्षणभेदेनास्या अरिष्टकारित्वं यथा,—

"व्योत्स्नायामातपे दीपे सलिलादर्शयोरपि।
अङ्गेषु विकृता यस्य छायाप्रेतस्तथैव सः॥
छिन्ना भिन्नाकुला च्छाया हीना वाप्यधिकापि वा।
नष्टा तन्वी द्विधा च्छाया विशिरा विकृता च या॥
एताश्चान्याश्च याः काश्चित् प्रतिच्छाया विगर्हिताः।
सर्व्वा मुमूर्षतां ज्ञेया नचेक्षस्यनिमित्तजाः॥
संस्थानेन प्रमाणेन वर्णेन प्रभया तथा।
छाया विवर्त्तते यस्य स्वप्नेऽपि प्रेत एव सः॥"

"खादीनां पञ्चपात्राणां छाया विविधलक्षणाः।
नाभसी निर्म्मला नीला सर्व्वेच्छा सप्रभेव च॥
रूक्षा श्यावारुणा या तु वायवी सा हतप्रभा।
विशुद्धरक्तालायेयी दीप्ताभा दर्शनप्रिया॥
शुद्धवैदूर्य्यविमला सुस्निग्धा चाभसी मता।
स्थिरा स्निग्धा घना श्लक्ष्णा श्यामा श्वेता च पार्थिवी॥
वायवी गर्हिता त्वासां चतस्रः सुः सुखोदयाः।
वायवी तु विनाशाय क्लेशाय महतेऽपि वा॥
स्यात्तेजसी प्रभा सर्व्वा सा तु सप्तविधा स्मृता।
रक्ता पीता सिता श्यावा हरिता पाण्डुरा सिता॥
तासां याः स्युर्विकासिन्यः स्निग्धाश्च विपुलाश्च याः।
ताः शुभा रूक्षमलिनाः संक्षिप्ताश्चाशुभोदयाः॥
वर्णमाक्रामति च्छाया भासु वर्णप्रकाशिनी।
आसन्ना लक्ष्यते च्छाया भाः प्रकृष्टा प्रकाशते॥
नाच्छायो नाप्रभः कश्चिद्विशेषाच्चिह्नयन्ति तु।
वृथा शुभाशुभोत्पत्तिं काले च्छायाः प्रभाश्रिताः॥"

इतीन्द्रियस्थाने सप्तमेऽध्याये चरकेणोक्तम्॥)

प्रतिबिम्बम्। (यथा, याज्ञवल्क्ये। १। २०६।

"मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत्॥")

सूर्य्यपत्नी। सा संज्ञाप्रतिकृतिः। (यथा मत्स्यपुराणे। ११। ५।

"नारीमुत्पादयामास स्वशरीरादनिन्दिताम्।
त्वाष्ट्रीस्वरूपेण नाम्ना छायेति भामिनी तदा॥")

पालनम्। उत्कोचः। कान्तिः। (यथा, मेघदूते। ३१।

"वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिः शीर्णपर्णैः॥")

सच्छोभा। षड्भिः। इति मेदिनी। ये, २३॥ काश्यायनी। इति शब्दरत्नावली॥ तमः। इति हेमचन्द्रः॥ साहश्यम्। यथा,—

"अन्नादन्नेतृत्वं जन्मा आधाय शिशुमूर्द्धनि।
वक्षादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्॥
पुत्रच्छाया पुत्रसादृश्यम्।" इति दत्तकचन्द्रिका॥

(ऋग्विंशत्यक्षरवृत्तिविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

छायाकरः, त्रि, (करोतीति। कृ+अच्। छायायाः करः। छायां करोतीति वा।) छत्रधारः। इति हेमचन्द्रः॥ छातावरदार इति भाषा॥

छायातनयः, पुं, (छायायाः सूर्य्यपत्न्यास्तनयः पुत्रः।) शनिः। इति हलायुधः॥

छायातरुः, पुं, (छायाप्रदः छायाप्रधानो वा तरुः। प्राकपार्थिववत् मध्यपदलोपिसमासः।) स्थिरच्छायवृक्षः। इति त्रिकाण्डशेषः॥ (अस्य लक्षणं यदाह कश्चित्।

"पूर्व्वाह्णे च पराह्णे च तलं यस्य न सुच्यति।
अत्यन्तशीतलच्छाया स च्छायातरुरुच्यते॥"

यथा, मेघदूते। १।

"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥")

छायात्मजः, पुं, (छायायाः सूर्य्यपत्न्या आत्मजस्तनयः।) शनिग्रहः। इति त्रिकाण्डशेषः॥

छायापथः, पुं, (छाया मेघच्छाया तद्भन्नरः पन्थाः। छायायुक्तः पन्था इत्येके।) देवपथः। आकाशः। इति त्रिकाण्डशेषः॥

छायापुरुषः, पुं, (छायायां दृष्टः पुरुषः पुरुषाकृतिविशेषः।) आकाशे दृष्टः स्वीयच्छायारूपपुरुषः। यथा,—

श्रीदेव्युवाच।

"भगवन्! देवदेवेश! सर्व्वागमविशारद!।
नराणां पापिनां लोके पापनिर्म्मोचनं कथम्॥
कालज्ञानं कथं वा स्यात् सूक्ष्मोपायेन तद्वद।
श्रुतानि साधनानीश! मयानेकानि भूरिशः॥
तथापि तानि मनुजैरशक्यान्यल्पबुद्धिभिः।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम्॥
अनेकवर्षसाध्येऽस्मिन् योगाभ्यासे ह्यशक्तयः॥

शिव उवाच।

साधु देवि! त्वया दृष्टं लोकानां हितकाम्यया।
तादृशं साधनं वक्ष्ये सर्व्वसाधारणं ह्यहम्॥
गोपनीयं प्रयत्नेन न वाच्यं वै कथञ्चन।
सिद्धाय भक्तियुक्ताय सेवकाय सुचेतसे॥
पापिने क्रूरचेष्टाय भक्तिहीनाय भामिनि!।
न वदेदयदि वा मोहात् वदेत् सिद्धिं न विन्दति॥
तस्मात् परीक्ष्य वक्तव्यं शिष्याय ज्ञानिने शिवे!।
स्वच्छायापुरुषं पश्येन्नगने शुद्धमानसः॥
तस्यावलोकनात् सद्यः पापराशिर्विनश्यति।
महापातकसङ्घैश्च तत्समैश्चोपपातकैः॥
विमुच्यते नरार्द्धेन तूलराशिर्यथानलात्।
कालज्ञानञ्च वक्ष्यामि तस्मिन् दृष्टे भवेद्ध्रुवम्॥

देव्युवाच।

अतश्छायां कथं पश्येन्नगने भूतलस्थिताम्।
वक्ष्यस्यकालज्ञानञ्च तस्मिन् दृष्टे कथं भवेत्॥

शिव उवाच।

निरभ्रे गगनं देवि! यदा भवति निर्म्मलम्।
तदा छायासुखो भूत्वा निजवक्त्रं प्रयत्नतो धिया॥

स्वच्छायाकण्ठमालोक्य स्वगुरूक्तक्रमेण वै ।
सम्मुखं गगनं पश्येन्निर्निमेयस्तथैकधीः ॥
शुद्धस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते ।
न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत् ॥
बहुधा दर्शनेनैव साक्षात्कारो भवेद् ध्रुवम् ।
कस्यचिद् भाग्यतः पश्येद् यदि विघ्नोऽत्तिगोचरः ॥
भवत्येव न सन्देहो गुरुविश्वासतः शिवे ! ।
गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः ॥
तथा षण्मासपर्य्यन्तं मृत्युस्तस्य न विद्यते ।
शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे मृतिः ॥
यदा पादौ न दृश्येते भार्य्याहानिर्न संशयः ।
न दृश्येते यदा पाणी भ्रातुर्हानिर्न संशयः ॥
एतज्ज्ञात्वा सुधीः सम्यक् गङ्गातीरं समाश्रयेत् ।
योगाभ्यासेन सततं प्राणायामेन संस्कृतिः ॥
यथा वा सत्समीपस्थो लक्षं मृत्युञ्जयं जपेत् ।
यो न मुक्तो हविष्याशी यतवाग्यतमानसः ॥
मृत्युञ्जयेन सन्देहो ह्यन्यथा मृत्युरुच्छति ।
यदा तु मलिनं पश्येत् ज्वरपीड़ा भवेत्तदा ॥
तस्य शान्तिं प्रकुर्वीत शिवसेवां समाहितः ।
रक्तवर्णं यदा पश्येद्वैश्वर्य्यं भवति ध्रुवम् ॥
मध्यच्छिद्रं यदा पश्येत् शत्रुघातो भवेत्तदा ।
एवं सन्दर्शनाद् देवि ! ज्ञानवान् भवति ध्रुवम् ॥
नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम् ।
तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ ॥
स्वच्छायादर्शनं देवि ! कलौ पुरुषलक्षणम् ।
दीर्घायुः समवाप्नोति ज्ञानवापि सुनिर्मलम् ॥"

इति योगप्रदीपिकायां उमामाहेश्वरसंवादे छायापुरुषलक्षणं नाम पञ्चमः पटलः ॥ * ॥

"ओमृगस्य श्रीछायापुरुषमन्त्रस्य ब्रह्मर्षिर्बृहद्गायत्री छन्दः छायादेवी देवता: ह्रां बीजं स्वाहा शक्तिः पुरुष इति कीलकं सर्व्वसिद्धिसन्दर्शनसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि षड़ङ्गन्यासः ॥ मायया मायया लौं लौं ह्रीँ माया शिवविद्यार्य्या ऋषयः ओँ ह्रीँ अं गां सरस्वति ओँ नमो भगवते भूतशरीरमात्मानमाकाशे दर्शय दर्शय चाँ चाँ चाँ ह्रीँ भैरवाय नमः स्वाहा । इति मन्त्रः ।

पादाभावे च पुत्रं वा बाहुभावे च बान्धवम् ।
आत्मानं शिरसोऽभावे सर्व्वाभावे कुलक्षयम् ॥
विप्रौर्णे विष्टते धूते कुम्भे धूमे च विल्वरम् ।
दुर्भिक्षं जायते घोरं कच्छले च पराङ्मुखे ॥
संपूर्णे च सुखे स्निग्धे क्षेमलाभं सुसिद्धये ।
हीने रक्ते जये प्रीते उच्चे मृत्युर्न संशयः ॥
प्रतिभीतिं शुक्लघातमिति वेदविदो विदुः ।
मृत्युञ्जयं जपन्नेव शान्तिस्तस्य विधीयते ॥
षण्मासे मरणं तस्य ग्रीर्षाद्यपचये विदुः ॥

अथ मृत्युञ्जययन्त्रम् ।

"प्रथमं प्रणवमालिख्य तन्मध्ये साध्यनामकम् ।
वज्रिरुद्दलं पद्मं यान्तान्तं वसुपत्रके ॥
विलेखेत् षड़्कारञ्च कोणरेखं सुशोभितम् ।
तद्बहिश्चन्द्रवृत्तं स्यात् षोड़शस्वरकं लिखेत् ॥
द्वारं भूपुरमालिख्य चतुर्द्वारञ्च वारुणम् ।
पार्थेयञ्च चतुष्कोणं चक्रं मृत्युञ्जयं भवेत् ॥
ज्वरादिसर्व्वरोगादिदाहशान्तिकरं परम् ।
मृत्युञ्जयं महाचक्रं सर्व्वरक्षाकरं नृणाम् ॥"

अथ ध्यानम् ।

"चन्द्रार्काग्निविलोचनं स्मितसुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥ * ॥
नत्वा तातगुरुं शिवं गणपतिं मन्त्रं जपेत् सर्व्वदा ।
खे लक्षेत् सततं विलोकनपरं शुक्ले रवौ प्रत्यहम् ॥
खे विलोकनमन्वस्तु ।
ओँ ह्रीँ भूचरी खेचरी आत्मानमाकाशे दर्शय सर्व्ववृत्तान्तं कथय कथय हुं फट् स्वाहा ।
यः पश्येत् सर्व्वगं शान्तमात्मानं सत्यमद्वयम् ।
न तेन किञ्चिद्ज्ञातव्यं ज्ञातव्यं वावशिष्यते ॥"

इति योगप्रदीपिकायां छायापुरुषोपदेशो नाम षष्ठः पटलः ॥

छायाव्यवहारः, पुं, ज्योतिःशास्त्रोक्ताङ्कविशेषः ।

अथ छायाव्यवहारे करणसूत्रं वृत्तम् ।

"छाययोः कर्णयोरन्तरे ये तयोर्वर्गविश्लेषभक्ता रसाद्रीषवः ।
सैकलब्धेः पदघ्नन्तु कर्णान्तरं
भान्तरैक्येनयुक्तं दले स्तः प्रभे ॥

उदाहरणम् ।

नन्दचन्द्रैर्मितं छाययोरन्तरं
कर्णयोरन्तरं विंशतुल्यं ययोः ।
ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ
यत्तमश्चत्तयुक्तं हि मन्येऽखिलज्ञ ॥

न्यासः



कां $\frac{७}{२}$ छाया $\frac{४५}{२}$

छायान्तरम् । १६ । कर्णान्तरम् । १३ । अनयोर्व्वर्गान्तरेण । १६२ । भक्ता रसाद्रीषवः । ५७६ । लब्धम् । ३ । सैकस्यास्य । ४ । मूलम् । २ । अनेन कर्णान्तरम् । १३ । गुणितम् । २६ । द्विशम् । २६ । भान्तरैक्य । १६ । ऊनयुते ।

७ । ४५ । तदर्द्धे लब्धे छाये $\frac{७}{२}$ $\frac{४५}{२}$ ततश्छायो-

र्योगपदमित्यादिना जातौ कर्णौ $\frac{२५}{२}$ $\frac{५१}{२}$

छायान्तरे करणसूत्रं वृत्तार्द्धम् ।

शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्न-
च्छाया भवेद्विनरदीपशिखौच्चभक्तः ।

उदाहरणम् ।

शङ्कुप्रदीपान्तरभूक्षिहस्ता
दीपोच्छ्रितिः सार्द्धकरत्रया चेत् ।
शङ्कोस्तदार्कालुलसम्मितस्य
तस्य प्रभा स्यात् कियती वदाशु ॥

न्यासः



भूः ३ छाया $\frac{१}{२}$ शङ्कुः $\frac{१}{२}$ प्रदीपशङ्कुतलान्तरम् ३

अनयोर्घातः $\frac{३}{२}$ विनरदीपशिखौच्चेन ।३। भक्तो

लब्धानि छायाङ्गुलानि । १२ ।

अथ दीपोच्छ्रित्यानयनाय करणसूत्रं वृत्तार्द्धम् ।

छायाहते तु नरदीपतलान्तरघ्ने
शङ्कौ भवेन्नरयुते खलु दीपकौच्चम् ।

उदाहरणम् ।

प्रदीपशङ्कुन्तरभूक्षिहस्ता
छायाङ्गुलैः षोड़शभिः समा चेत् ।
दीपोच्छ्रितिः स्यात् कियती वदाशु
प्रदीपशङ्कुन्तरसुस्थतां मे ॥

न्यासः



भूः ३ छाया $\frac{२}{३}$

शङ्कुः । १२ । छायाङ्गुलानि । १६ । शङ्कुप्रदीपान्तरहस्ताः । ३ । लब्धं दीपकौच्चं

हस्ताः $\frac{११}{४}$

प्रदीपशङ्कुन्तरभूमानानयनाय करणसूत्रं वृत्तार्द्धम् ।

विशङ्कुदीपोच्छ्रयसंगुणा भा
शङ्कूद्धृता दीपनरान्तरं स्यात् ॥

उदाहरणम् । पूर्व्वोक्त एव दीपोच्छ्रायः $\frac{११}{४}$

शङ्कुङ्गुलानि । १२ । छाया । १६ । लब्धाः शङ्कुप्रदीपान्तरहस्ताः । ३ ।

छायाप्रदीपान्तरदीपौच्चानयनाय करणसूत्रं सार्द्धवृत्तम् ।

छायाग्रयोरन्तरसंगुणा भा
छायाप्रमाणान्तरभक्तवंशः ।

भूशङ्कुघातः प्रभया विभक्तः
प्रजायते दीपशिखौचमेवम् ॥
चैराशिकेनैव यदेतदुक्तं
व्याप्तं खमेदैर्हरिणैव विश्वम् ॥

उदाहरणम् ।

शङ्कोर्भार्कमिताङ्गुलस्य सुमते! दृष्टा किलाष्टाङ्गुला
छायाग्राभिमुखे करद्वयमिते व्यस्तस्य देशे पुनः।
तस्मेवार्कमिताङ्गुला यदि तदा छायाप्रदीपान्तरं
दीपौचाग्र च कियद्भवत्यवहृतिं छायाभिधां वेत्सि चेत् ॥

ग्रन्थः



भूः $\frac{१३}{२}$ छा $\frac{१}{२}$ भूः २ छा $\frac{१}{२}$

अत्र छायाग्रयोरन्तरमङ्गुलात्मकम् । ५२ । छाये च । ८ । १२ । अनयोराद्या । ८ । इयमनेन । ५२ । गुणिता । ४१७ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भूमानम् । १०४ । इदं प्रथमछायाग्रदीपतलयोरन्तरमित्यर्थः । एवं द्वितीयच्छायाग्रमानम् ।१५६। भूशङ्कुघातः प्रभया विभक्त इति जातसुभयतोऽपि दीपौचं

सममेव छला: $६\frac{१}{२}$ ।

एवमित्यत्र छायाव्यवहारे चैराशिककल्पनयानयनं वर्णते तद्यथा । प्रथमच्छायातो द्वितीयच्छाया । १२ । यावताधिका तावता छायावयवेन यदि छायाग्रान्तरतुल्याभूर्लभ्यते तदा छायया किमिति एवं लब्धक पृथक् छायाप्रदीपतलान्तरप्रमाणं लभ्यते । ततो द्वितीयं चैराशिकं यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौचप्रसुभयतोऽपि तुल्यमेव । एवं पञ्चराशिकादिकमखिलं चैराशिककल्पनयैव सिद्धं यथा भगवता श्रीनारायणेन जननमरणक्लेशापहारिणा निखिलजगज्जननैकबीजेन सकलभुवनभावनेन गिरिसरित्सुरनरासुरादिभिः खमेदैरिदं जगद्व्याप्तं तथेदमखिलं गणितजातं चैराशिकेन व्याप्तं यदेवं तदवबुध्यः किमित्याशङ्क्याह । यत्किञ्चिदृगुणभागहारविधिना बीजेऽत्र वा गण्यते
तत् चैराशिकमेव निर्मलधियामेवावगम्यं विदाम् ।
एतद्यद्बहुधाखदादिजडधीवोद्धुद्धया बुधैस्तद्देशान् सुगमान् विधाय रचितं प्राज्ञैः प्रकीर्णादिकम् ॥"

इति श्रीभास्कराचार्यविरचितायां लीलावत्यां छायाधिकारः समाप्तसामगात् ॥

छायाभृत्, पुं, (छायां छायारूपमङ्गलाङ्गनं बिभर्त्ति छायां श्रीतलकान्तिं बिभर्त्तीति । भृ+क्विप् ।) चन्द्रः । इति हेमचन्द्रः । २ । १६ ॥

छायामित्रं, क्ली, (छायया छायाकरणेन मित्रमिव छायाया मित्रमिति वा ।) छत्रम् । इति शब्दरत्नावली ॥

छायाङ्गधरः, पुं, (छाया छायारूप एव अङ्गानि धरतीति । धृ+अच् । छायाङ्गस्य धरो वा ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

छायासुतः, पुं, (छायायाः सूर्य्यपत्न्याः सुतः पुत्रः ।) शनिः । इति हेमचन्द्रः । २ । ३४ ॥

छिः, पुं, (छ्यति छिनत्ति कीर्त्त्यादिकं नाशयतीत्यर्थः । छो+बाहुलकात् किः ।) गर्हा । इत्येकाक्षरकोषः ॥

छिक्कनी, स्त्री, (छिक् इत्यव्यक्तशब्दं कनत्यनया । कन्+करणे अप् ततो ङीष् ।) वृक्षविशेषः । छिक्कनी इति गाकछिक्कनी इति हाँचोटी इति च भाषा ॥ तत्पर्य्यायः । त्रपुसम् २ तिक्ता ३ छिक्किका ४ व्याघ्रदुःस्पर्शा ५ । अस्या गुणाः । कटुत्वम् । रुच्यत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । वह्निपित्तकारित्वम् । वातरक्तकुष्ठकृमिवातकफनाशित्वञ्च । इति भावप्रकाशः ॥

छिक्का, स्त्री, (छिगित्यव्यक्तशब्देन कायतीति । कै+कः । ततष्टाप् ।) क्षुतम् । इति शब्दरत्नावली ॥ छिँक् इति हिन्दी भाषा ॥ (यथा, गारुड़े ज्योतिश्चक्रे ६० अध्याये ।
"छिक्काया लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैर्ऋते शोकसन्तापौ मिश्रान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम् ॥")

छिक्किका, स्त्री, (छिक्का क्षुतं साधुत्वेनास्त्यस्याः । बाहुलकात् ठन् ।) छिक्कनी । इति भावप्रकाशः ॥ [छेदनकर्त्ता ॥

छित्, [द्] त्रि, (छिनत्तीति । छिद्+क्विप् ।)

छित्तं, त्रि, (छ्यति स्मेति । छो+क्तः । "श्राच्छीरन्यतरस्याम् ।" ७।४।४१ । इति ईत्वम् ।) छिन्नम् । इत्यमरः । ३ । १ । १०६ ॥

छित्तिः, पुं, (छिद्+क्तिन् ।) करपत्रम् । इति शब्दचन्द्रिका ॥ छेदश्च ॥

छित्वरः, त्रि, (छिनत्तीति । छिद्+"छित्वरच्छत्वरेति ।" उणा । ३ । १ । इति क्वरच् प्रत्ययेन निपातनात् साधुः ।) छेदनशीलम् । धूर्त्तः । वैरी । इत्युणादिकोषः ॥

छिद्, इर ध न औ छेदे । इति कविकल्पद्रुमः ॥ (रुधां-उभं-सकं-अनिट् ।) छेदो द्विधाकरणम् । इर्, अच्छिदत् अच्छैत्सीत् । ध न, छिनत्ति छिन्ते दात्रेण लवं लोकः । औ, छेत्ता । इति दुर्गादासः ।

छिदकं, क्ली, (छिनत्तीति। छिद्+कुन् ।) वज्रम् । इत्युणादिकोषः ॥

छिदा, स्त्री, (छिद्+" सिदिभिदादाङ् ।" ३ । ४ । १०४ । इत्यङ् ततष्टाप् ।) छेदनम् । इति मुग्धबोधम् ॥

छिदिः, स्त्री, (छिद्यतेऽनया इति । छिद्+"कृगृपृकुटिभिदिछिदिभ्यश्च ।" उणा । ४ । १४२ । इति इः सच्च कित् ।) कुठारः । इत्युणादिवृत्तिः ॥

छिदिरः, पुं, (छिनत्त्यनेनेति । छिद्+"इषिमदिमुदिखिदिच्छिदीति ।" उणा । १ । ५१ । इति किरच् ।) करवालः । परश्वधः । पावकः । रज्जुः । इति मेदिनी । रे, १५५ ॥

छिदुरः, पुं, (छिनत्तीति । छिद्+"विदिभिदिच्छिदेः कुरच् ।" ३।२।१६२ । इति कुरच् ।) छेदनद्रव्यम् । धूर्त्तः । वैरी । इति मेदिनी । रे, १५६ ॥ (स्वयं छिन्ने, त्रि । यथा, रघुः । १६।६२।
"संलक्ष्यते न छिदुरोऽपि हारः ॥")

छिद्र, तृ क भेदे । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-परं-सकं-सेट् ।) भेद इह रन्ध्रकरणम् । छिद्रयति छिद्रापयति बालकः । इति दुर्गादासः ॥

छिद्रं, क्ली, (छिद्यते भिद्यते यत् । छिदिरौ छेदने+"स्फायितञ्चिवञ्चीति ।" उणा । २।१३। इति रक् ।) भेदः । छेँदा इति भाषा । तत्पर्य्यायः । कुहरम् २ शुषिरम् ३ विवरम् ४ विलम् ५ निर्व्यथनम् ६ रोकम् ७ रन्ध्रम् ८ स्वभ्रम् ९ वपा १० शुषिः ११ । इत्यमरः । १ । ८ । २ । स्वभ्रम् १२ शुषी १३ । इति तट्टीका ॥ (यथा, महाभारते । ३।८२।५३ ।
"ततो गच्छेत धर्म्मज्ञ! हिमवत्सुतमर्ब्बुदम् ।
पृथिव्यां यच्च वै छिद्रं पूर्व्वमासीत् युधिष्ठिर!॥")
दूषणम् । इति मेदिनी । रे, ३८ ॥ (यथा, महाभारते । २ । १२ । २६ ।
"बहुविघ्नश्च नृपते! क्रतुरेष स्मृतो महान् ।
छिद्राण्यस्य तु वाञ्छन्ति यज्ञघ्ना ब्रह्मराक्षसाः॥"
अवकाशः । नवमसंख्या । इति ज्योतिषम् ॥ लग्नादष्टमस्थानम् । "छिद्राख्यमष्टमं स्थानमिति ।" इति ज्योतिस्तत्त्वम् ॥)

छिद्रवेदेही, स्त्री, (छिद्रप्रधाना वेदेही पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

छिद्रान्तः, [र्], पुं, (छिद्रमन्तर्मध्ये यस्य ।) नलः । इति राजनिर्घण्टः ॥

छिद्राफलं, क्ली, (छिद्रं दूषणमाप्नलतीति । आ+फल+अच् ।) मायाफलम् । इति राजनिर्घण्टः ॥

छिद्रितः, त्रि, (छिद्र+क्तः ।) क्षतच्छिद्रः । तत्पर्य्यायः । वेधितः २ विद्धः ३ । इत्यमरः । ३ । १ । ६६ ॥

छिन्नं, त्रि, (छिद्यते स्म इति । छिद्+क्तः ।) क्षतच्छेदनम् । छेँड़ा इति काटा इति च भाषा । तत्पर्य्यायः । क्षतम् २ लूनम् ३ क्षत्तम् ४ दातम् ५ दितम् ६ क्षितम् ७ वृक्णम् ८ । इत्यमरः । ३।१।१०३॥ क्षतभृद् क्षादितम् १० । इति जटाधरः ॥ छेदितम् ११ खण्डितम् १२ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ६० । ११ ।

"छिन्ने धनुषि देवेन्द्रस्तथा शक्तिमयाददे ॥"*॥
मन्त्रविशेषे, पुं। तल्लक्षणादिकं यथा, विश्वसारे।
"मनोर्वेस्वादिमध्यान्तेष्वानिलं बीजमुच्यते।
संयुक्तं वा वियुक्तं वा पराक्रान्तक्षिधा पुनः॥
चतुर्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः॥")

छिन्नग्रन्थिनिका, स्त्री, (छिन्ना ग्रन्थिर्यस्याः। संज्ञायां कन् ततष्टाप् पूर्वह्रस्वश्च।) त्रिपर्णिका। इति राजनिर्घण्टः॥

छिन्नपत्री, स्त्री, (छिन्नं पत्रं यस्याः। स्त्रियां ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥ (विवरणमस्या अम्बष्ठाशब्दे ज्ञेयम्॥)

छिन्नमस्ता, स्त्री, (छिन्नं मस्तं शिरो यस्याः।) दशमहाविद्यान्तर्गतषष्ठमहाविद्या। सा च प्रचण्डचण्डिका। यथा,—
"प्रचण्डचण्डिकां वक्ष्ये सर्व्वकामफलप्रदाम्।
यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः॥
अपुत्रो लभते पुत्रं अधनो धनवान् भवेत्।
कवित्वञ्च सुपाण्डित्यं लभते नात्र संशयः॥"
अथ प्रचण्डचण्डिकामन्त्राः। विश्वसारे तामले च।
"लक्ष्मीं लज्जां ततो मायां मात्रां द्वादशिकामपि।
वज्रवैरोचनीये द्वे माये फट्स्वाहया युतः॥
लक्ष्मीबीजं यदाद्यं स्यात् तदा श्रीः सर्व्वतोसुखी।
लज्जाबीजेन चाद्येन वश्यतां यान्ति योषितः॥
मायाबीजेन चाद्येन महापातकनाशनम्।
मात्रां द्वादशिकां बीजमाद्यं स्यान्मुक्तिदायकम्॥
भैरवोऽस्य ऋषिर्देवि! सम्राट् छन्द उदीरितम्।
छिन्नमस्ता स्मृता देवी बीजं कूर्चद्वयं पुनः॥
स्वाहा शक्तिरभीष्टार्थे विनियोग उदाहृतः॥"
"अत्र लज्जापदं कामबीजपरम्। तथा च।
अत्र लज्जापदे देवि! कामबीजं वितन्यते।
महाकालमतं ज्ञेयं मन्त्रोद्धारं शुभावहम्॥"
पूर्व्वमायापदे इति पाठे मायायाः पूर्व्वं लज्जाबीजं तस्मिन्नित्यर्थः। तथा च। पूर्व्वमायापदेन लज्जाबीजमुच्यते। अन्यथा तापिन्यादिविरोधः। तथा च।
"कामाद्यां वाग्भवाद्यां वा मायाद्यां वा जपेत् सुधीः।
लज्जाद्यां वा जपेद्विद्यां चतुर्व्वर्गफलप्रदाम्॥
अन्येषाञ्च मुनीनां मते सर्व्वत्र मायापदं कूर्चपरम्। तत्रैव।
वाग्भवं वह्निसमायुक्तं रतिबिन्दुसमन्वितम्।
लक्ष्मीबीजमिदं प्रोक्तं सर्व्वकामार्थसिद्धये॥
वामाक्षिवह्निसंयुक्तं बिन्दुनादविभूषितम्।
शिववीजं महेशानि! लज्जाबीजमुदाहृतम्॥
ईशानमुद्धृत्य पुरारिबीजं
सबिन्दुकं नादविभूषितञ्च।
सवामकर्णं परितः प्रकल्प्य
मायां वदन्तीह मनीषिणस्ताम्॥
द्वादशस्वरवर्णं स्यात् नादबिन्दुविभूषितम्।
वाग्भवं बीजमित्युक्तं सर्व्ववाक्यविशुद्धये॥
इति मन्त्रे चतुर्व्वीरव्याख्यानात् व्यक्तम्

समीचीनः। भैरवमते तु माया भुवनेश्वर्य्येव॥
लक्ष्मीः प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः।
तृतीयेऽस्मिन् सदा देवी महापातकनाशिनी॥
चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका।
वकारे वरुणः साक्षात् जकारे तु सुराधिपः॥
रेफे हुताशनो देवो वकारे वसुधाधिपः।
ऐकारे त्रिपुरा देवी रेफे त्रिपुरसुन्दरी॥
त्रैलोक्यविजया देवी सदैवौकारसंस्थिता।
चकारे चन्द्रमा देवो नकारे हि विनायकः॥
ईकारे कमला साक्षात् यकारे च सरस्वती।
मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता॥
वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः।
हाकारे च रतिस्तिष्ठेदेवं मन्त्रसमुच्चयः॥"
इति व्याख्यानाच्च॥*॥

अस्याः पूजाप्रयोगः।
प्रातःकृत्यादिकं कृत्वा मन्त्राचमनं कुर्य्यात्।
यथा,—
"लक्ष्मीमायाकूर्च्चबीजैस्त्रिभिः पीत्वाम्बु साधकः।
वाग्भवेनौष्ठौ संदश्य मायाभ्यान्तु द्विरुन्मृजेत्॥
कूर्च्चेन चालयेत् पाणी शोभमन्त्रेण विन्यसेत्।
श्रीमायाकूर्च्चवाक्कामत्रिपुटाभगवर्त्मकैः॥
कामकलाङ्कुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान्।
नाभिहृन्मस्तकं पांसौ सृष्ट्वा शम्भुर्भवेत् क्रमात्॥
आद्यन्यैवं छिन्नमस्तां वज्रवैरोचनीं प्रपश्यति।
ततः प्राणायामान्तं विधाय षोढान्यासं कुर्य्यात्।
मन्त्रषोढां ततः कुर्य्यात् त्रैलोक्यवशकारिणीम्।
श्रीबालात्रिपुटायोनिप्रासादप्रणवैस्तथा॥
कालीवध्वङ्कुशैः कामकलाकूर्चाख्यकैः क्रमात्।
षोढ़शैर्मनुवर्णैश्च पृथगष्टादशाक्षरी॥
एभिर्बीजैर्मालकार्य्यान् खेषु स्थानेषु विन्यसेत्।
एषा ब्रह्मस्वरूपा हि बीजषोढ़ा प्रकीर्त्तिता॥
अस्याः संन्यसनात् सर्व्वे वज्रदेहा भवन्ति हि।
सर्व्वैश्वर्य्ययुतास्ते हि जीवन्मुक्ता दृशान्वितः॥"*॥
तत ऋष्यादिन्यासः।

अस्य मन्त्रस्य भैरव ऋषिः सम्राट् छन्दः छिन्नमस्ता देवता हुंकारद्वयं बीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः। यथा, शिरसि भैरवऋषये नमः। मुखे सम्राट्छन्दसे नमः। हृदि छिन्नमस्तायै देवतायै नमः। गुह्ये हूँ हूँ बीजाय नमः। पादयोः स्वाहाशक्तये नमः॥ ततः कराङ्गन्यासौ। ओम् ऐं खड्गाय हृदयाय स्वाहा। इति कनीयसि। ओम् ईं सुखड्गाय शिरसे स्वाहा। इति पवित्राङ्गुलयोः। ओम् ऊं सुवज्राय शिखायै स्वाहा। इति मध्यमयोः। ओम् ऐं पाशाय कवचाय स्वाहा। इति तर्ज्जन्योः। ओम् ऐं अङ्कुशाय नेत्रत्रयाय स्वाहा। इत्यङ्गुष्ठयोः। ओम् ऋः सुरक्षारक्षासुरक्षायास्त्राय फट्। इति करतलपृष्ठयोः। एवं हृदयादिषु। तदुक्तं भैरवतन्त्रे।
"उच्चरेत् प्रणवं पूर्व्वमाकारं बिन्दुसंयुतम्।
खड्गाय हृदयायेति स्वाहायुक्तं कनीयसि॥

ईंकारञ्च ततो देवि! चन्द्रकोटिसमप्रभम्।
सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम्॥
स्वाहायुक्तं ततो वाच्यं पवित्राङ्गुलिसंयुतम्।
ऊकारञ्च ततो वाच्यं बिन्दुलाञ्छितमस्तकम्॥
सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्।
स्वाहान्तं मध्यमायाञ्च विन्यसेत्तदनन्तरम्॥
मात्रां द्वादशिकां देवीं विन्यसेच्च ततः परम्।
पाशायेति समुच्चार्य्य प्रवदेत् कवचाय च॥
स्वाहान्तं विन्यसेन्मन्त्रं तर्ज्जन्यां तदनन्तरम्।
औङ्कारञ्च ततो देवि! चाङ्कुशं तदनन्तरम्॥
नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे करयोर्द्वयोः।
अकारञ्च विसर्गान्तं सुरक्षारक्षसंयुतम्॥
असुरक्षायसंयुक्तं अस्त्रायेति ततः परम्।
फड्घटरसमायुक्तं विन्यसेत् करयोर्द्वयोः॥
हृदि मूर्द्धि शिखायाञ्च कवचे नेत्रमण्डले।
यावदस्त्रं चतुर्दिक्षु विदिक्षु च यथाक्रमम्॥"
त्रिशक्तितन्त्रे भैरववाक्यम्।
"उच्चरेत् प्रणवं पूर्व्वमाकारं बिन्दुसंयुतम्।"
इत्यादिवाक्यात् कराङ्गेषु प्रणवसम्बलितो न्यासः। ततो मूलेन मस्तकादिपादपर्य्यन्तं पादादिमस्तकपर्य्यन्तं वारत्रयं न्यसेत्॥*॥
ततो ध्यानम्।
"स्मरणौ नीरजं ध्यायेद्रक्तं विकसितं स्मितम्।
तत्पद्मकोषमध्ये तु मण्डलं चक्ररोचिषः॥
जवाकुसुमसङ्काशं रक्तबन्धूकसन्निभम्।
रजःसत्त्वतमोरेखायोनिमण्डलमण्डितम्॥
मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम्।
छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम्॥
प्रसारितसृजौ देवीं लेलिहानाग्रजिह्विकाम्।
पिबन्तीं रौधिरीं धारां निजकण्ठविनिर्गताम्॥
विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम्।
दक्षिणे च करे कर्त्रीं सुखड्गमालाविभूषिताम्॥
दिगम्बरीं महाघोरां प्रत्यालीढ़पदे स्थिताम्।
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम्॥
रतिकामोपरिष्ठाञ्च सदा ध्यायन्ति मन्त्रिणः।
सदा षोड़शवर्षीयां पीनोन्नतपयोधराम्॥
विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ।
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
वर्णिनीं लोहितां सौम्यां शुक्लकेशीं दिगम्बरीम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः।
वामयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव॥
प्रत्यालीढ़पदां दिव्यां नानालङ्कारभूषिताम्।
सदा द्वादशवर्षीयामस्थिमालाविभूषिताम्॥
डाकिनीं वामपार्श्वे तु कल्पसूर्य्यानलोपमाम्।
विद्युज्जटां त्रिनयनां दत्त्वा श्वखाकिनीम्॥
दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्।
महादेवीं महाघोरां शुक्लकेशीं दिगम्बरीम्॥
लेलिहानमहाजिह्वां शुक्लमालाविभूषिताम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
करस्थितकपालेन भीषयन्तीमतिभीषणाम्॥

आभ्यां निषेव्यमाणां तां ध्यायेद्वीं विचक्षणः ॥"
ध्यानस्यावश्यकत्वमाह । तन्त्रे ।
"प्रचण्डचण्डिकामेवमर्थात्वा यस्तु पूजयेत् ।
स्वदस्तस्य शिरश्छित्वा देवी पिबति शोणितम् ॥"
पिबन्तीमिति तेन सुखेनेति शेषः ।
तथा च ।
"खमस्तकं सखर्परं रक्तधाराभिपूरितम् ।
ललज्जिह्वं महाभीमं धृतं वामभुजे तथा ॥"
इति भैरवतन्त्रे ।
तत्रैव ।
"सितं कुर्याद्दलं पूर्वमाद्येयं रक्तवर्णकम् ।
याम्यं कृष्णमतः पीतं शुक्लं रक्तं सितासितम् ॥
ततः पीतां प्रकुर्वीत कर्णिकां तस्य मध्यगाम् ।
तन्मध्ये तु प्रकुर्वीत मण्डलं चक्ररोचिषः ॥
रजःसत्त्वतमोरेखा रक्ता शुक्लासिता क्रमात् ।
मायायुग्मं ततो न्यस्य षड्वक्त्रसमन्वितम् ॥
वाह्यं तस्य च चक्रस्य कुर्यात् प्राकारवेष्टितम् ।
पूर्वं रक्तं ततः कृष्णं सितं पीतं यथाक्रमम् ॥
चतुर्द्वारसमायुक्तं क्षेत्रपालैरधिष्ठितम् ॥"
इत्यस्याः पूजायन्त्रम् ॥ * ॥
यथा वा ।
"त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ।
तन्मध्ये विन्यसेद्योनिं द्वारत्रयसमन्विताम् ॥
बहिरष्टदलं पद्मं भूबिम्बत्रितयं पुनः ।
कूर्चबीजं लिखेन्मध्ये त्रिकोणे फट् समन्वितम् ॥"
यद्वा एतद्ध्यानोक्तं यन्त्रम् ।
तथाच ।
"अपरञ्च प्रवक्ष्यामि शृणु देवि ! यथाक्रमम् ।
स्वनाभौ नीरजं ध्यायेद्भानुमण्डलसन्निभम् ॥
योनिचक्रसमायुक्तं गुणत्रितयसंयुतम् ।
तत्र मध्ये महादेवीं छिन्नमस्तां स्मरेद्यतिः ॥
प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम् ।
योनिमुद्रासमायुक्तां हृदयस्थितलोचनाम् ॥
ध्येयमेतद्यतीनाञ्च गृहस्थानां निगद्यते ॥"
यथा,—
"अन्तरे खप्परीरक्त नाभिनीरजसङ्गताम् ।
निर्लेपां निर्गुणां सूक्ष्मां बालचन्द्रसमप्रभाम् ॥
समाधिमात्रगम्यान्तु गुणत्रितयवेष्टिताम् ।
कलातीतां गुणातीतां मुक्तिमात्रप्रदायिनीम् ॥"
एवं ध्यात्वा मानसैः संपूज्य तारिणीवच्छङ्खस्थापनं कुर्यात् । ततः पीठपूजा । आधारशक्तये । प्रकृतये । कूर्माय । अनन्ताय । पृथिव्यै । क्षीरसमुद्राय । रत्नद्वीपाय । कल्पवृक्षाय । तदधः स्वर्णसिंहासनाय । आनन्दकन्दाय । सम्बिन्नालाय । सर्वतत्त्वात्मकपद्माय । सं सत्त्वाय । रं रजसे । तं तमसे । आं आत्मने । अं अन्तरात्मने । पं परमात्मने । ह्रीं ज्ञानात्मने नमः । पद्ममध्ये रतिकामाभ्याम् ॥ भैरवभते तु ।
"आधारशक्तिं कूर्मञ्च नागराजमतःपरम् ।
पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रविग्रहैः ॥
मण्डलं चतुरस्रञ्च रजः सत्त्वं तमस्तथा ।
रतिकामौ च संपूज्य शक्तिपूजां समाचरेदिति ॥
रतिकामोपरि वज्रवैरोचनीये देहि देहि एहि एहि यक्ष यक्ष मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूं फट् स्वाहेति पीठमन्त्रः ॥ सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । पुनर्ध्यात्वावाहयेत् । सर्वसिद्धिवर्द्धनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहावह इहावह पुनस्त्वमन्त्रमुच्चार्य इह तिष्ठ इह तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व इत्यनेनावाह्य आं ह्रीं क्रों हंसः इत्यनेन प्राणप्रतिष्ठां कृत्वा । ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षडङ्गं विन्यस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात् । यथा । वज्रवैरोचनीये देहि देहि एहि एहि यक्ष यक्ष इमं बलिं मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूं फट् स्वाहा इति मन्त्रेण । ततो देव्या दक्षिणे ओं वर्णिन्यै नमः । वामे ओं डाकिन्यै नमः । ततो देव्यङ्गे षडङ्गं संपूज्य दक्षिणे ओं गुह्यनिधये नमः । वामे ओं पद्मनिधये नमः । पूर्वादिदिक्षु लक्ष्मीं लज्जां मायां वाणीञ्च पूजयेत् । विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान् मध्ये सदाशिवं सर्वत्र प्रणवादि नमोऽन्तेन पूजयेत् । ततः पञ्च पुष्पाञ्जलिं दत्त्वा आवरणान् पूजयेत् । अग्नीशासुरवायुषु मध्ये दिक्षु च ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षडङ्गानि संपूज्य अष्टपत्रेषु पूर्वादिक्रमेण ओम् ह्रीं काल्यै नमः एवं वर्णिन्यै डाकिन्यै भैरव्यै महाभैरव्यै इन्द्राक्ष्यै पिङ्गाक्ष्यै संहारिण्यै सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । यथा,—
"एका नामाभिधा कालीं वर्णिनीं डाकिनीं तथा ।
भैरवीञ्च महापूर्वां भैरवीं तदनन्तरम् ॥
इन्द्राक्षीञ्च सपिङ्गाक्षीं ततः संहारकारिणीम् ।
पूर्वादिके दले पूज्याः शक्तयश्च यथाक्रमम् ॥
प्रणवादिनमोऽन्तेन लज्जाबीजं समुच्चरन् ।"
पद्ममध्ये ह्रूं ह्रूं फट् नमः स्वाहा नमः । देव्या दक्षिणे सम्राट्कुन्दसे नमः । देव्या उत्तरे सर्ववर्णेभ्यो नमः । पुनर्दक्षिणे ब्रह्मीं बीजशक्तिभ्यां नमः । पत्रायेषु पूर्वादिक्रमेण ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । ततश्चतुर्दिक्षु द्वारेषु ओम् करालाय नमः । विकरालाय नमः । एवं अतिकरालाय महाकरालाय । यथा, भैरवीये ।
"पूर्वद्वारे करालञ्च विकरालञ्च दक्षिणे ।
पश्चिमेऽतिकरालञ्च महाकरालमुत्तरे ॥"
ततो धूपादिविसर्जनान्तं कर्म समापयेत् । विसर्जने त्वयं विशेषः । संहारमुद्रां प्रदर्श्य अञ्जलावारोप्य वामनासापुटेन ।
योनिमुद्रासमारूढां प्रदीपकलिकोज्ज्वलाम् ।
कृष्णपक्षे विधुमिव क्रमेण क्षीणतां गताम् ॥
इमं मन्त्रं समुच्चार्य चक्षूरन्ध्रौ निवेशयेत् ।
उत्तरे शिखरे इत्यादि । अस्य पुरश्चरणं सहस्रजपः । सिद्धविद्यात्वात् ॥ * ॥ बलिदाने तु भैरवीये ।
"रात्रौ बलिः प्रदातव्यो मत्स्यमांसासवादिभिः ।
अथवा मधुपानाद्यैर्मधुरैर्विभवक्रमैः ॥
मन्त्रस्तु ।
उच्चरेत् प्रणवं पूर्वं सर्वसिद्धिप्रदेऽन्वितम् ।
वर्णिनीये ततो वाच्यं सर्वसिद्धिप्रदे ततः ॥
डाकिनीये ततो वाच्यं देवीनाम ततः परम् ।
एह्येहीति ततो वाच्यं इमं बलिमनन्तरम् ॥
गृह्ण गृह्ण ततः प्रोक्ता मम सिद्धिमनन्तरम् ।
देहि देहीति मायां च ततः फट्स्वाहया युतः ॥
बलिमन्त्रः समाख्यातः पूजितोऽयं सुरेश्वरीति ॥
मन्त्रान्तरम् ।
भुवनेशी कामबीजं कूर्चबीजञ्च वाग्भवम् ।
भुवनेशी कूर्चबीजं वाग्भवं तदनन्तरम् ॥
वज्रवैरोचनीये च हूं फट् स्वाहा ततः परम् ॥
अस्य पूजाप्रयोगन्यासपूजादिकं षोढ़शीवत् कार्यम् ॥ * ॥
कृष्णरेखा मादनं लक्ष्मीर्बीजभवं कूर्चमेव च ।
अक्षान्ता छिन्नमस्ताया महाविद्या प्रकीर्तिता ॥
अस्यापि सदृशी विद्या जगत्स्वपि न विद्यते ।
षड्वर्णोऽयं मनुः साक्षान्मोक्षदो नात्र संशयः ॥
अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने ! ।
प्रत्यालीढ़पदां सदैव दधतीं छिन्नं शिरः कर्तृकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा ।
नागावद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरिदृढ़ां ध्यायेज्जवासन्निभाम् ॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी ।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागावद्धशिरोमणिर्मम मुदे मां पातु देवी सदा
सासृजः ॥
वामे कृष्णातनुस्तथैव दधती खड्गं तथा खर्परं
प्रत्यालीढ़पदा कबन्धविगलद्रक्तं पिबन्ती मुदा ।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्तिः सापि परात्परा भगवती नाम्ना परा डाकिनी ॥
इति ध्यानम् ।
अस्याः पूजादिकं सर्वं षोढ़शीवत् कार्यम् ॥ * ॥
मन्त्रान्तरम् ।
तारं लज्जाद्वयं वज्रवैरोचनीये हूं फट् स्वाहा ।
अस्यापि ध्यानपूजादिकं सर्वं षोढ़शीवत् ॥ * ॥
वियत्सूक्ष्मयुतं बिन्दुनादयुक्तं ततः प्रिये ! ।
एकाक्षरी महाविद्या त्रैलोक्यवशकारिणी ॥
सूक्ष्मं दीर्घ ऊकारः ॥
ठठान्तेयं महाविद्या त्रैलोक्यमोहकारिणी ।
ताराद्यन्ता भवेदेषा चतुर्वर्गफलप्रदा ॥ * ॥

मन्त्रान्तरं यथा,—
वधूवैरोचनीये च कूर्चयुग्मं सफट्ठटः।
तारादेवी महाविद्या सर्व्वतेजोऽपहारिणी॥
त्रैलोक्याकर्षिणी विद्या चतुर्व्वर्गफलप्रदा।
ध्यानपूजादिकं सर्व्वं षोड़शीवत् समाचरेत्॥*॥
इदानीं षोड़शीविद्याप्रशंसामाह।
तथा सर्व्वप्रयत्नेन सर्व्वाराध्या च षोड़शी।
लक्ष्मीबीजादिका सैव सर्व्वैश्वर्य्यप्रदायिनी॥
लक्ष्म्या स्वर्गभूनागयोषिदाकर्षिणी परा।
कूर्चाद्या सर्व्वजन्तूनां महापातकनाशिनी॥
वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी।
एषा तु षोड़शीविद्या वेदा सप्तदशाक्षरी॥
श्रीबीजपुटिता सा तु लक्ष्मीवृद्धिकरी सदा।
लक्ष्म्या पुटिता विद्या त्रैलोक्याकर्षिणी परा॥
कूर्चेन पुटिता सर्व्वपापिनां पापहारिणी।
वाग्बीजपुटिता चैषा वागीशत्वप्रदायिनी॥
चतुर्व्विधेति विद्येषा प्रिये! सप्तदशाक्षरी।
ताराद्या षोड़शी चान्या भवेत् सप्तदशाक्षरी।
एषा विद्या महाविद्या मुक्तिमुक्तिकरी सदा।
कमला भुवनेशानी कूर्चबीजं सरस्वती॥
वधूवैरोचनीये च पूर्व्वबीजानि चोच्चरेत्।
फट् स्वाहा च महाविद्या वसुचन्द्राक्षरी परा।
तारादेकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी।
एते विद्योत्तमे देवि! मुक्तिमुक्तिप्रदे शुभे॥*॥
लक्ष्माद्यादिपुटिता पूर्व्वा रन्ध्रचन्द्राक्षरी भवेत्।
चतुर्द्धा च महाविद्या चतुर्व्वर्गफलप्रदा॥
प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा।*।
विद्यान्तरं प्रवक्ष्यामि सावधानावधारय।
कूर्चलोकूर्चवाग्बीजवधूवैरोचनीये ङूं॥
अस्त्रं स्वाहा महाविद्या चतुर्दशाक्षरी मता।
सर्व्वैश्वर्य्यप्रदा चैषा सर्व्वसंमोहकारिणी॥*॥
भुवनेशी चितत्त्वञ्च वाग्बीजं प्रणवं ततः।
वधूवैरोचनीये च फट् स्वाहा च तथापरा॥
चतुर्दशाक्षरी चैषा चतुर्व्वर्गफलप्रदा।
एषा विद्या महाविद्या जन्ममृत्युविनाशिनी॥*॥
तन्त्रान्तरे।
रमा कामस्तथा लक्ष्मी वाग्भवं वधू वै पदम्।
रोचनीये लक्ष्माद्यन्तं स्वाहासमन्वितम्॥
इयं सा षोड़शी प्रोक्ता सर्व्वकामफलप्रदा।
कथिताः सकला विद्याः सारात्सारतराः शुभाः॥
आसां ऋषिर्भैरवोऽहं नाम्ना तु क्रोधभूपतिः।
सम्राट् छन्दो देवता च छिन्नमस्ता प्रकीर्त्तिता।
षड्दीर्घभाक्षरैरेव प्रणवाद्येन सुन्दरि!।
षड़ङ्गादेन षडङ्गानि षड़ङ्गानि प्रकल्पयेत्॥
नारिदोषादिकञ्चासां सा सुसिद्धा सुरासुरैः।
सकलेषु च वर्गेषु सकलेष्वाश्रमेषु च॥
अग्निमेषु च वर्गेषु मुक्तिमुक्तिप्रदायिका।
प्रणवाद्याश्च या विद्या शूद्रादौ न समीरिताः॥
अस्याश्चैव विशेषोऽयं योषिच्चेत् समुपाश्रयेत्।
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते॥
पतिहीना पुत्रहीना यथा स्यात् सिद्धयोगिनी।
इति ते कथितं सत्यं रहस्यमखिलं प्रिये!॥
अतिस्नेहतरङ्गेन भक्त्या दासोऽस्मि ते प्रिये!।
एतासां ध्यानपूजादिकं षोड़शीवत् कार्य्यम्॥*॥
नाभौ शुद्धारविन्दं तदुपरि कमलं मण्डलं चण्ड-
रश्मेः
संसारस्नेकसारां त्रिभुवनजननीं धर्म्म-
कामोदयाढ्याम्।
तस्मिन् मध्ये त्रिकोणे त्रितयतनुधरां छिन्नमस्तां
प्रशस्तां
तां वन्दे ज्ञानरूपां निखिलभयहरां योगिनीं
योगसुद्राम्॥"
इति छिन्नमस्ताप्रकरणम्। इति तन्त्रसारः॥
छिन्नरुहः, पुं, (छिन्नोऽपि रोहतीति। रुह+
"इगुपधज्ञेति।" ३।१।१३५। इति कः।)
तिलकवृक्षः। इति राजनिर्घण्टः॥
छिन्नरुहा, स्त्री, (छिन्नं सत्यपि रोहतीति। रुह
+कः। अजादित्वात् टाप्।) गुडूची। इत्य-
मरः। २।४।८२॥ (यथास्याः पर्य्यायाः।
"वत्सादनी छिन्नरुहा मधुपर्ण्यन्तताम्रा।
कुण्डल्यन्ततन्त्री च गुडूची चक्रलक्षणा॥"
इति वैद्यकरत्नमालायाम्॥)
स्वर्णकेतकी। शुक्लकी। इति राजनिर्घण्टः॥
छिन्नवेणिका, स्त्री, (छिन्नो विच्छिन्नो वेणो यस्याः।
संज्ञायां कन्। ततश्चापि अत इत्वम्।) पाठा।
इति शब्दचन्द्रिका। आकनादी इति भाषा॥
छिन्ना, स्त्री, (छिद्यतेऽसौ। छिद+क्त। "अजा-
द्यतष्टाप्।"४।१।४। इति टाप्।) गुडूची। (यथा,
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"गुडूची मधुपर्णी स्यादमृतास्तन्तवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥"
छिद्यते कुलात् वह्निश्चिक्रियते इति।) पुंश्चली।
इति विश्वः॥
छिन्नोद्भवा, स्त्री, (छिन्ना विभिन्ना सत्यपि उद्भवति
पुनर्जायते इति। उत्+भू+अच्। यद्वा,
छिन्ने छेदनेऽपि उद्भव उत्पत्तिर्यस्याः।)
गुडूची। इति राजनिर्घण्टः॥ (गुडूचीशब्देऽस्या
विवृतिर्ज्ञेया॥)
छिलिण्डिकः, पुं, (चिलिना वधनखरूपतया
हिलते अनादियते इति। हिल अनादरे+
अच्। पृषोदरादित्वात् चस्य छः।) पाताल-
गरुड़वृक्षः। इति भावप्रकाशः॥
कुकुन्दरी, स्त्री, (कुकुमित्यव्यक्तशब्दो दीर्य्यते
निर्गच्छत्यस्याः। दृ+"सर्व्वधातुभ्य इन्।" उणा
४।११७। इति इन्। ततः ङीदिकारादिति
ङीष्।) जम्बुविशेषः। कुँचा इति भाषा। तत्-
पर्य्यायः। गन्धमूषा २। इति हेमचन्द्रः। ४।
१६७॥ चिक्कः ३ वेश्मनकुलः ४ पुंड्रः ५ गन्ध-
मूषिकः६। इति चिकाकड्रोषः॥ गन्धमूषिका७।
इति हलायुधः। राजपुत्री ८ प्रतिमूषिका ९
सुगन्धिमूषिका १० गन्धमुखिनी ११ सुखि-
मूषिका १२। इति राजनिर्घण्टः॥ गन्धाखुः १३
गन्धनकुलः १४ शुचुः १५। इति हारावली।
(कुकुन्दरिः १६। इति भार्कवीयपुराणम्॥१५।३१॥

"अभ्यङ्गान्नाशुयेत् क्षिप्रं गण्डमालां सुदारुणाम्।
कुकुन्दर्य्या विपक्वन्तु क्षणात्तैलवरं ध्रुवम्॥"
इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाधिकारे॥)
कुट, क्र शि छेदे। इति कविकल्पद्रुमः॥ (चुरा-
तुदां च-सकं-सेट्।) क, कोटयति। शि,
कुटति। अच्कुटीत्। इति दुर्गादासः॥
कुण्ड, क्लो, (कुद+रक्। पृषोदरादित्वात् उत्वम्।)
प्रतीकरणम्। रश्मिः। इति संक्षिप्तसार
उणादिवृत्तिः॥
कुप, शृ औ खर्ग्गे। इति कविकल्पद्रुमः॥ (तुदां-
परं-सकं-अनिट्।) शृ, कुपति। औ, कोपा।
इति दुर्गादासः॥
कुपः, पुं, (कुप+चर्म्मणि कः।) चुपः। खर्ग्गम्।
इति मेदिनी। पे, ६॥ चपलः। युद्धम्।
इति विश्वः॥
कुर, छेदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-
सकं-सेट्। छोरति। अच्छोरीत्॥)
कुर, शि लोपे। इति कविकल्पद्रुमः। (तुदां-परं-
सकं सेट्।) शि, कुरति, अच्कुरीत् चुच्छोर।
लोपश्छेदः। इति दुर्गादासः॥
कुरा, स्त्री, (कुरति रक्षयति नाशयति दुर्गन्धा-
दिकमिति वा। कुर+कः टाप् च।) सुधा।
चूर्णम्। इति हारावली। १३५॥
कुरिका, स्त्री, (कुरति छिनत्तीति। कुर+कुन्।
यद्वा, कुरी+स्वार्थे कन्। पूर्व्वह्रस्वश्च।)
अस्त्रविशेषः। कुरी इति ख्याता। तत्पर्य्यायः।
शल्की २ असिपुत्री ३ असिधेनुका ४। इत्य-
मरः। २।८।९२॥ कुरी ५। इति भरतः॥
खुरी ६ क्षुरी ७ क्षुपाधिका ८ धेनुपुत्री ९।
इति हेमचन्द्रः॥ कूरिका १०। इति शब्द-
रत्नावली॥ (यथा, कथासरित्सागरे।२५।१४६।
"तावत् स्त्रियमपश्यन्तौ क्षित्वा क्षुरिकया सुहृत्।
खादन्तौ तस्य मांसानि पुंसः शूलाग्यवर्त्तिनः॥")
कुरितं, त्रि, (कुर+क्तः।) खचितम्। इति
जटाधरः॥ (रञ्जितम्। यथा, माघे।१।२२।
"परस्परेण क्षुरितामलच्छवी
तदेकवर्णाविव तौ बभूवतुः॥")
छिन्नच॥
कुरी, स्त्री, (कुरति छिनत्तीति। कुर छेदे+
"इगुपधज्ञेति।" ३।१।१३५। इति कः।
ततो ङीष्।) कुरिका। इति भरतः॥
कुरिकापत्री, स्त्री, (कुरिका इव पत्राणि यस्याः।
स्त्रियां ङीष्।) चेता। इति राजनिर्घण्टः॥
कूरी, स्त्री, (कुरी+पृषोदरादित्वात् दीर्घः।)
कुरिका। इति हेमचन्द्रः। ३। ४४८॥
कृद, कि सन्दीपे। इति कविकल्पद्रुमः। (चुरा-
दौ भ्वां-परं-सकं-सेट्।) सन्दीपा
करणम्। कि, कर्दयति कर्दति दीपं लोकः।
इति दुर्गादासः॥
कृद, उ ण घ इर् देवने। स्विधि। वमने। इति
कविकल्पद्रुमः॥ (रुधां-उभं-सकं-सेट्। उदित्वात्
क्त्वावेट्।) उ, कर्दित्वा कृत्वा। ण घ, कृत्वा

छृन्ने। इर्, अच्छृदत् अच्छृदीत्। देवनं जिगीषेच्छाव्यवहारस्तुतिद्युतिक्रीड़ागतयः। इति केचित्। क्षमते तु क्रीड़नमेव अन्यथा त्रिषो ग्रहणमनर्थकं स्यात्। त्रिषि दीप्तौ। इति दुर्गादासः॥

छेकः, त्रि, (अति वनवासादिसुखं छिनत्ति नाशयतीति। छो य लूनौ + बाहुलकात् केकन्।) गृहासक्तपक्षिभेदगौ। तत्पर्य्यायः। शल्यकः २। इत्यमरः। २।५।४३॥ नागरः। इति मेदिनी। के, २४॥ (ग्रन्थालङ्कारविशेषे, पुं। स तु अनुप्रासभेदः। तल्लक्षणं यथा, साहित्यदर्पणे।१०।४।

"छेको वक्ष्यनसङ्घस्य सकृत्साम्यमनेकधा॥"

तदुदाहरणं यथा, तत्रैव,— [भ्रमरान्।

"आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः॥"

अत्र गन्धानन्धीति संयुक्तयोः कावेरीवारीत्यसंयुक्तयोः पावनः पवन इति बहूनां वक्ष्यनानां सकृदावृत्तिः। छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः॥")

छेकोक्तिः, स्त्री, (छेकानां विदग्धानां उक्तिः।) वक्रोक्तिः। इति जटाधरः॥ (विशेषस्तु वक्रोक्तिशब्दे ज्ञेयः॥)

छेद, तृ क छेदे। इति कविकल्पद्रुमः॥ (अदन्त पुरां-परं-सकं-सेट्।) अचिच्छेदत्। इति दुर्गादासः॥

छेदः, पुं, (छिद + भावे घञ्।) छेदनम्। इति हेमचन्द्रः॥ ३। ३६॥ (यथा, कुमारे।२।४१।

"तेनामरवधूहस्तैः सदयालूनपक्षवाः।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः॥"

नाशः। अपगतिः। यथा, श्राकुन्तले २य अङ्के।

"भेदच्छेदलघोरदं लघु भवत्युत्थानयोग्यं वपुः
वस्त्वागामपि लक्ष्यते विक्षतिमच्चित्तं
भयक्रोधयोः॥" *॥

छिद्यते इति। छिद् + कर्म्मणि घञ्।) खण्डम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १। ४।

"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

छेदनं, क्ली, (छिद् + भावे ल्युट्।) अङ्गेन द्विधा करणम्। तत्पर्य्यायः। वर्हणम् २। इत्यमरः। ३। २। ७॥ कर्त्तनम् ३ कल्पनम् ४ छेदः ५। इति हेमचन्द्रः॥ (यथा, मनुः। ११। १४२।

"फलदानानु वृक्षाणां छेदने जप्यमृक्शतम्॥"

नाशः। अपभोदनम्। यथा, महाभारते। ३। १८५। २४।

"मृत्युरेव तु महात्मानो सुतयोऽभ्यद्रवन् द्रुतम्।
सनत्कुमारं धर्म्मज्ञं संप्रयच्छेदनाय वै॥"३॥)

भेदः। इति मेदिनी। ने, ६५।

(छिनत्तीति। छिद् + ल्युः। छेदके, त्रि। यथा, महाभारते। २। ५४। ६।

"प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते।
छेदने शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम्॥"

उषाच तत्रैव। १। ३३। ३।

"ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्म्मितम्॥")

छेदनीयः, पुं, (छेत्तुं योग्यः। छेद + "अर्हे कृत्यतृचश्च।" ३।३।१६९। इति अनीयर्।) कतकवृक्षः। इति राजनिर्घण्टः॥ (कतकवृक्षे गुणादयोऽस्य आख्याताः॥) छेद्ये, त्रि॥ (यथा, सुश्रुते। १। २७।

"अनुत्तुण्डित शल्यानि छेदनीयमुखानि च॥")

छेदिः, त्रि, (छिनत्तीति। छिद् + "कृपिचि-रुहीति।" उणां ४। ११८। इति इन्।) छेदनकर्त्ता। इत्युणादिकोषः॥

छेदितं, त्रि, (छेद तृ क छेदे + क्त।) छिन्नम्। इति हेमचन्द्रः॥ (यथा, काशीखण्डे।२६।६२।

"छेदिताखिलपापौघा छन्नाशी छलहारिणी॥")

छेमड़ः, पुं, (छम् अदने + बाहुलकात् अड़च् अत इत्वञ्च।) पिठहीनः। इत्युणादिवृत्तिः। १। १२८। छेमड़ा इति भाषा॥

छेलुः, पुं, सोमराजी। इति शब्दचन्द्रिका॥

छो, य लूनौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) लूनिश्छेदः। य, यति धान्यं लोकः। इति दुर्गादासः॥

छोटिका, स्त्री, (छुटति यज्ञविघ्नकारिणां माथां छिनत्तीति। छुट + ण्वुल्। टापि अत इत्वञ्च।) तर्ज्जन्यङ्गुष्ठाङ्गुलिध्वनिः। यथा, "छोटिकाभिर्दशदिग्बन्धनं कृत्वा भूतशुद्धिं कुर्य्यात्।" इति तन्त्रसारः॥

छोटी [नृ] पुं, (छुटति नीचजातितया खल्पीभवतीति। छुट + णिनिः।) कैवर्त्तः। इति त्रिकाण्डशेषः॥

छोरकं, क्ली, (छुर + भावे ण्वुल्।) परित्यागः। इति त्रिकाण्डशेषः॥ छोड़न इति हिन्दी भाषा॥

छोलङ्गः, पुं, (छुरतीति। छुर + बाहुलकात् अङ्गच्। ततो रस्य लत्वम्।) मातुलुङ्गः। इति शब्दरत्नावली॥ टाबालेबु इति भाषा॥

ज्यु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, ज्यवते। इति दुर्गादासः॥

ज

ज, जकारः। स यज्ञनाशमन्त्रार्णः। चवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं तालु। इति वाक्यरत्नम्॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु।" तथाच शिक्षायाम्।

"कण्ठ्यावहाविचुयशास्तालव्या ओऽनासपूः॥")

अस्योत्पत्तिर्यथा, प्रपञ्चसारे।

"विसर्गसानुगः सोष्मा यं चवर्गश्च यस्तथा॥"

(वज्रादरेखा) अस्य लेखनप्रकारो यथा, वर्णोद्धारतन्त्रे।

"ऊर्द्धाधःकुञ्चिता रेखा तासु ब्रह्मेशसंविदः।
वाग्देवी कमला नित्या द्विधा माद्या प्रकीर्त्तिता॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"जकारं परमेशानि! या स्वयं मध्यकुण्डली।
शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!॥"

तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।

"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने!।
नानालङ्कारसंयुक्तैर्भुजैर्द्वादशभिर्युताम्॥
रक्तचन्दनदिग्धाङ्गीं विचित्राम्बरधारिणीम्।
त्रिलोचनां जगद्धात्रीं वरदां भक्तवत्सलाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

तस्य पर्य्याया यथा,—

"जः शृङ्गी वानरः शूली भोगदा विजया स्थिरा।
ललदेवो जयो जेता धातकी सुसुखी विभुः॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्त्तृकाधरा।
दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः॥
जवनो वेगितो वामो मानवाश्वः सदात्मकः।
कुम्भारुतेश्वरो वेगी चामोदो मदविह्वलः॥"

इति नानातन्त्रम्॥

(धातुपाठेऽस्यगुदन्यविशेषः। यथा, कविकल्पद्रुमे।

"जो व्यञ्जादो थिरद्यक्तश्चः साधुर्दुःस्थिमकः-
युतः॥"

छन्दःशास्त्रोक्तमध्यगुरुर्गणविशेषः। (। २।)

यदुक्तं छन्दोमञ्जर्य्याम्।

"जो गुरुमध्यगतो रलमध्यः॥" इति॥)

जः, पुं, (जयति जायते वा। जि जन् वा + "अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) स्त्र्यञ्जयः। अनिः। तातमाचम्। जनार्द्दनः। इति मेदिनी। जे, १॥ विषम्। भुक्तिः। तेजः। पिशाचः। इति शब्दरत्नावली॥ वेगः। इत्येकाक्षरकोषः॥

जः, त्रि, (जयति विपक्षमिति। जि + डः।) जेता। वेगितः। इति शब्दरत्नावली॥

जकुटं, क्ली, (जं जातं सत् कुटति वक्रीभवतीति। कुट् कौटिल्ये + "इगुपधज्ञेति।" ३।१।१३५। इति कः।) वार्त्ताकुपुष्पम्। इति मेदिनी॥ जे, ४३॥

जकुटः, पुं, (जो जातः सन् कुटतीति। कुट् + कः।) मलयपर्व्वतः। कुकुरः। इति मेदिनी॥ जे, ४३॥

जक्ष, द म ङ दाने। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, जक्षते। न मध्यपाठे नेवेष्यन्ते इदुपधत्वो वेदेषूच्चारणभेदार्थः। न, अजक्षि अजाक्षि जक्षुः जक्षुः जाक्षुः जाक्षुः अनुबन्धबलादगुपधाया अपि दीर्घः। क्षमते तु अत्र दीर्घविधिरुपधां नापेक्षते। ङ, जक्षते। इति दुर्गादासः॥

जच्च, च लु घ भक्षे। हासे। इति कविकल्पद्रुमः॥ (अदां-परं-भक्षे सकं-हासे-अकच-सेट्।) केचित्तु विष्णुपुराणे यक्षराक्षसोत्पत्तिप्रसङ्गे यक्ष्यतामिति यैरुक्तं वै वै यक्षास्तु यक्षणादिति भक्षणार्थस्यैव यक्षशब्दव्युत्पादनादेतन्मतः-स्यादिं मन्यन्ते॥ तच्च अमरटीकायां वर्म्म-

अकारस्यान्तःस्थयकारस्यान्दसो दृश्य इयुङ्वा वर्ण्यादिरयं निर्णीतः। च, जक्षति। इयु च, अक्षिति। इति दुर्गादासः॥

जक्षणं, क्ली, (जक्ष+भावे ल्युट्।) भक्षणम्। इति हेमचन्द्रः। ३। ८७॥

जक्षः, पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+बाहुलकात् मन्।) जक्षा। इत्यमरटीका॥ (कैश्चित् तु "अर्शिंसुसुक्षुक्षिति।" १। १३६। उणादिसूत्रेण यत्र पूजायामिति धातोर्मनुप्रत्ययनिर्देशात् अन्तःस्थयकारादिरिति मन्यन्ते॥)

जक्ष्मा, [न्] पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+"सर्व्वधातुभ्यो मनिन्।" उणा। ४। १४४। इति मनिन्।) यक्ष्मरोगः। इत्यमरटीकायां भरतः॥

जगच्चक्षुः, [स्] पुं, (जगतां भुवनानां चक्षुरिव प्रकाशकत्वात्।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥ (यथा, काश्मीरखण्डे। ४६। ४४।

"इति काश्मीरप्रभावस्तो जगच्चक्षुस्समोद्भवः।
श्रुत्वा द्वादशधात्मानं काश्मीपुर्य्यां व्यवस्थितः॥")

जगत्, क्ली, (गच्छतीति। गम+"द्युतिगमिभ्यो-तीनां डित्त्वं च।" ३। २। १३८। इत्यस्य वार्त्तिके इति क्विपि डित्त्वे च "गमः क्वौ।" ६। ४।४०। इति मलोपे तुक्।) विश्वम्। तत्पर्य्यायः। जगतौ २ लोकः ३ पिष्टपम् ४ भुवनम् ५। इत्यमरः। २। १। ६॥ विष्टपम् ६। इति तट्टीका॥ (यथा, मनुः। १। ५२।

"यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति॥"

गच्छति इतस्ततो यातीति।) वायौ, पुं। (गच्छन्त्यस्मिन् जीवा इति। महादेवः। यथा, महाभारते। १३। १७। १५१।

"विहस्तो हस्ततेजाश्च श्रीमान् श्रीवर्द्धनो जगत्॥")
जङ्गमे त्रि। इति मेदिनी। ते, १०८॥

जगत्कर्त्ता, [ऋ] पुं, (करोतीति। कृ+तृच्। ततो जगतः कर्त्ता कारकः।) ब्रह्मा। इति हेमचन्द्रः। २। १२६॥

जगत्प्राणः, पुं, (जगतां विश्वस्थजीवानां प्राणो जीवनम्।) वायुः। इत्यमरः। १। १। ३५॥

जगत्साक्षी, [न्] पुं, (जगतां भुवनानां साक्षी कर्म्मदृष्टा।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥

जगती, स्त्री, (गच्छति कार्य्यत्वात् नश्वरा भवतीति। गम+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतवच्च।" उणा। २। ८४। इति अतिप्रत्ययेन निपातनात् साधुः। ततः ङीप्रत्ययात्।) भुवनम्। (यथा, रामायणे। २। ६८। ११।

"स्रष्टेऽपि सागरं शुष्कं वज्रञ्च पतितं भुवि।
उपरुद्धाश्च जगतीं तमसेव समावृताम्॥")
पृथ्वी। (यथा, मार्कण्डेये। ६। २५।

"तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा भूमिं शरैः शितैः॥")

जगः। छन्दोविशेषः। इति मेदिनी। ते, १०६॥ (सा च द्वादशाक्षरा वृत्तिः। यथा, छन्दोमञ्जर्य्यां १ स्तवके।

"त्रिष्टुप् च जगती चैव तथातिजगती मता॥"

अस्या उदाहरणादीनि छन्दःशब्दे द्रष्टव्यानि॥)
जम्बूवृक्षः। इति हेमचन्द्रः॥

जगदम्बा, स्त्री, (जगतामम्बा माता।) दुर्गा। यथाह कश्चित्।

"अदूरे जगदम्बाया श्वारदीयो महोत्सवः॥"

"जगदम्बापदद्वन्द्वभक्तानां क्षयसाधनम्॥"
इति शूलपाणिः॥
अपि च ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याये।

"विष्णुमायां भगवतीं दुर्गां दुर्गतिनाशिनीम्।
प्रकृतिं जगदम्बाञ्च पतिपुत्रवतीषु च॥"

जगदम्बिका, स्त्री, (जगतां अम्बा जननी। ततः स्वार्थे कन्। टापि अत इत्वम्।) दुर्गा। यथा,

"सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका।
अहं सर्व्वान्तरस्था च संसारार्णवतारिणी॥"
इति भगवतीगीतायां ५ अध्यायः॥
(यथा च देवीभागवते। १। ७। ४६।

"कामं कुरुष्व वधमद्य ममैव मातर्दुःखं न मे मरणजं जगदम्बिकेऽत्र॥")

जगदाधारः, पुं, (जगतामाधारः आश्रयः।) वायुः। इति शब्दचन्द्रिका। जगदाश्रयः। यथा,

"कालो हि जगदाधारः।" इति स्मृतिः।

जगदीशः, पुं, (जगतामीशो नियन्ता।) विष्णुः। इति शब्दरत्नावली॥ (यथा, पाद्मे उत्तरखण्डे। १११ अध्याये।

"सर्व्वान्तर्यामी जगदीशश्चाजरमक्षयः प्रभुः॥"

विधाता। यथा, कुमारे। २। ६।

"जगद्योनिरयोनिश्च जगदन्तो निरन्तकः।
जगदादिरनादिश्च जगदीशो निरीश्वरः॥"

खनामख्यातपण्डितविशेषः। स च न्यायशास्त्रटीकाद्यास्यार्थवादिग्रन्थप्रणेता अस्य जन्मस्थानं नवद्वीपः॥)

जगद्गौरी, स्त्री, (जगत्सु मध्ये गौरी।) मनसादेवी। इति शब्दरत्नावली॥

जगद्धात्री, स्त्री, (जगतां धात्री विधात्री।) दुर्गाविशेषः। अस्याः पूजायाः कालो विधिश्च यथा, निगमकल्पसारज्ञानसारस्वते ग्रन्थे दुर्गाकल्पे।

श्रीशिव उवाच।

"प्रसीद जगतां मातर्ज्ञानिस्तारकारिणि!।
अतएव महेशानि! तवाहं शरणागतः॥
त्वया यत् कथितं पूर्व्वं तत् सर्व्वञ्च श्रुतं मया।
जगद्धात्री महादुर्गा चतुर्व्वर्गफलप्रदा॥
तस्याः पूजाविधिर्दिव्यं कालं तत्र प्रकाशितम्।
तदेव कथयेशानि! श्रोतुमिच्छामि साम्प्रतम्॥

श्रीदेव्युवाच।

कथयामि महेशान! सावधानोऽवधारय।
तस्याः पूजाविधिर्दिव्यं समयं भावभेदतः॥
कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः।
सा प्रशस्ता महादेव! महादुर्गाप्रपूजने॥

प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता।
सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता॥
जयशब्दादिभिर्देव! इति चैकालिकी मता।
अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर!॥
सप्तम्यादिनवम्यान्तं पूजाकालमितीरितम्।
त्रिदिने त्रिविधा पूजा दशम्यान्च विसर्জ্জयेत्॥
पूजापरेऽह्नि देवेश! तत्रापि च विसर्জ্জनम्।
बोधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता॥

श्रीशिव उवाच।

त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः।
त्रिकाले त्रिविधा पूजा कथं देवी जगन्मयि!॥
कथयस्व महेशानि! इति मे संशयो हृदि॥

श्रीदेव्युवाच।

सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः।
त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्॥
सकलैर्व्यापिनी चापि तत्र यात्रा महेश्वर!।
एककाले त्रिधा पूजा साधको नैव कारयेत्॥
इति ते कथितं वत्स! किमन्यत् श्रोतुमिच्छसि।
कथयिष्यामि तद्भक्त्या तव प्रीत्या त्रिलोचन!॥"

श्रीपार्व्वत्युवाच।

"दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर!।
कथं त्रिकालं पूजा सा लभ्येत परमेश्वर!॥

श्रीशिव उवाच।

नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्।
निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि!॥
नवमीदिनमाश्रित्य पूजाविधिरिहोदितः।
दशम्यां बलिदानन्तु निषिद्धं नात्र पार्व्वति!॥
ज्ञानार्ण्णवसारे पूर्व्वं पूजाप्रकारं उक्तवान्।

"सकलैर्व्यापिनी चापि प्रातश्चैव नवमी तिथिः।
तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!॥
त्रिकालं पूजयेत्तत्र नैककाले कदाचन॥"

अथ कात्यायनीतन्त्रे अष्टसप्ततिपटले।

"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च।
उपस्थाप्योदितो भानुर्दुर्गामाराध्य यत्नवान्॥
पुत्रारोग्यबलं वेश्मे लोकसाक्षित्वमेव च।
तां तिथिं प्राप्य मनुजः श्रवणिभौमदिने यदि॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्॥"

शक्तिसङ्गमतन्त्रे।

"कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः।
पूजयित्वा परदिने प्रतिमां तां विसर्জ্জयेत्॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः।
पुत्रपौत्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी॥"

तन्त्रान्तरे।

"शुक्लवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः।
प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्॥"

तन्त्रान्तरे।

"त्रिकालं पूजयेद्दुर्गां सकलैकाचरेऽपि च।
नानारत्नविधानेन गीतवाद्यपुरःसरम्॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः।
लब्धैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्॥"

योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः ।
प्रगल्भान्तु जगद्धात्रीं पूजयेद्दीपमालया ॥"
आगमतत्त्वसारे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे ।
आविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी ॥"
उत्तरकामाख्यातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्यक्प्रहृष्टये ॥"*॥
कुलिकातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥"*॥
दुर्गाकल्पे विद्योत्पत्तिः ।
"कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः ।
सर्व्वदेवहितार्थाय दुर्व्वृत्तघ्नमनाय च ॥
आविरासीज्जगच्छान्त्यै युगादौ परमेश्वरी ॥"
व्रतकालविवेकधृतवचनम् ।
"कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि ।
पूजयेत्तां जगद्धात्रीं सिंहस्थे निवेदुषीम् ॥"*॥
स्मृतिः ।
"युगाद्या वर्षहृद्विश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीयान्ते न तत्र तिथियुग्मता ॥"*॥
कृत्यतत्त्वार्णवे ।
"कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये तत्र पूजाविधिरिहोदितः ॥"*॥
भविष्यपुराणकृत्यतत्त्वार्णवयोः ।
"कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये कार्य्यात्मिका परदिने यदि ॥
तत्र पूजादिकं कुर्य्यात् पित्र्यनिर्व्वपणादते ॥"
स्मृतिसागरे ।
"कार्त्तिकस्य युगाद्यायामृद्धिकामोऽर्च्चयेदुमाम् ॥"
इति जगद्धात्रीपूजाकालव्यवस्था ॥ * ॥ * ॥

अथ जगद्धात्रीविद्योत्पत्तिः ।

श्रीपार्व्वत्युवाच ।
"भगवन् ! प्राणनाथेश ! सर्व्वतन्त्रविशारद ! ।
श्रुता कात्यायनीविद्यासम्भूतिस्त्रिलोचन ! ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेदृषतः ।
तत् सर्व्वं ब्रूहि भगवन् ! कृपया परमेश्वर ! ॥
यदि न कथ्यते देव ! विशङ्कामि तदा तनुम् ॥

श्रीशिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि रहस्यं परमाद्भुतम् ।
यत् श्रुत्वा लभते देवि ! सौभाग्यं सुखमुत्तमम् ॥
पुरा पुरन्दरसखाः खेश्वरत्वाभिमानिनः ।
प्राहुः किमीश्वरोऽस्माभ्यादतिरिक्तः सुरानिति ॥
अथ दुर्गा जगन्माता नित्या चैतन्यरूपिणी ।
एतेषां धर्म्ममेतूनामिन्द्रादीनां नियन्त्रणम् ॥
करिष्यामीति निश्चित्य ज्योतीरूपं दधात्यलम् ।
तेषामाविरभूद्दुर्गा जगद्धात्री जगन्मयी ॥
कोटिसूर्य्यप्रतीकाशा चन्द्रकोटिसमप्रभा ।
ज्वलन्तं पर्व्वतमिव सर्व्वलोकभयङ्करी ॥
तद्दृष्ट्वः सुराः सर्व्वे भयमापुर्म्महौजसः ।
किमेतन्न विनिश्चेतुं शक्तास्ते ह्यभवन् सुराः ॥

वायुमाहूः समाहूय किमेतत् परमाद्भुतम् ॥
विजानीहि मरुद्वीर ! मातरिश्वा दिशः पते ! ॥
ततो वायुर्द्रुतं तत्र गतस्तेजोऽन्तिकं ततः ।
तमन्तिकमुपायातं प्राह तेजोमयी ततः ॥
बलवान् कस्त्वमायातो वीर्य्यं किं वास्ति वा त्वयि ।
आदातुं शक्यते सर्व्वं पृथिवीतलसम्भवम् ॥
इति प्रत्युक्तवान् वायुः त्वयं तत्रैव तिष्ठति ।
आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम् ॥
वायुः सर्व्वप्रयत्नेन नादातुं तत् क्षमोऽभवत् ।
ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः ॥
अग्ने ! एतद्विजानीहि किमेतत् कर्म्म चाद्भुतम् ।
इत्युक्तो देवतादृन्दैरग्निस्तेजोऽन्तिकं गतः ॥
अमरा जातवेदा वा तेजो वागित्युवाच तम् ।
स प्रोक्तवानग्निरस्मि सर्व्वदाहकशक्तिकः ॥
दहेतत्तृणमत्यल्पमिति तस्मै तृणं ददौ ।
अग्निः सर्व्वप्रयत्नेन दग्धुं नैतत् क्षमोऽभवत् ।
ततो निवृत्ते वह्निर्भूत्वा सोऽपत्रपान्वितः ।
एकत्रस्थाः सुराः सर्व्वे मन्त्रयामासुरुत्तमम् ॥
इयमेवेश्वरी नूनं स्तोष्यामो नेश्वरा वयम् ।
इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम् ॥
प्राहुर्देवगणाः सर्व्वे त्वमीशा नेश्वरा वयम् ।
ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम् ॥
क्षन्तुमर्हसि तत् सर्व्वं कृपया जगदम्बिके ! ।
तव रूपं सुगोप्यं यच्छङ्कां सर्व्वमङ्गलम् ॥
तद्दृष्टुं वयांमच्छामो देहि दर्शनमुत्तमम् ।
इत्युक्तानां सुरहीनामाविरासीच्छिवाम्बरे ॥
तेजस्यन्तर्हिते तस्मिन् चमत्कारकलेवरे ।
सिंहस्योपरि सुस्थेरा सर्व्वालङ्कारभूषिता ॥
चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा ।
बालार्कसदृशीदेहा नागयज्ञोपवीतिनी ॥
त्रिनेत्रा कोटिचन्द्राभा देवर्षिसुनिसेविता ।
दर्शयामास देवानामेवं रूपं जगन्मयी ॥
ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम् ।
वरं प्रापुः सुरगणा यथेष्टं त्रिदशालये ॥
तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी ।
इति ते कथितं भद्रे ! विद्योत्पत्तिं सुदुर्ल्लभाम् ॥"
इति कात्यायनीतन्त्रे ७६ पटलः ॥ * ॥

श्रीशिव उवाच ।
"अथ दुर्गामनुं वक्ष्ये शृणुष्व हरवल्लभे ! ।
यस्य प्रसादमात्रेण सुयते भवबन्धनात् ॥
यान्तवर्णं ससृज्य वामकर्णे विभूषितम् ।
इन्दुबिन्दुसमायुक्तं बीजं परमदुर्ल्लभम् ॥
चतुर्व्वर्गप्रदं साक्षान्महापातकनाशनम् ।
एकाक्षरीसमा नास्ति विद्या त्रिभुवने प्रिये ! ॥
कूर्चाद्यां वा जपेद्विद्यां तदन्ते वह्निसुन्दरी ।
लज्जाद्यां वा जपेद्विद्यां षड्वर्णं वा जपेत् सुधीः ॥
वधूबीजयुतां वापि खाद्यान्तां वा जपेत् पुनः ।
लज्जाद्यां वा जपेद्विद्यां चतुर्व्वर्गफलाप्तये ॥
वाग्भवाद्यां जपेद्वापि प्रणवाद्यां जपेत् पुनः ।
कामबीजादिकां वापि षड्वर्णां वा जपेत् पुनः ॥
चाचरी विविधा विद्या कथिता ब्रह्मणा पुरा ।
विना गन्धैर्विना पुष्पैर्विना होमपुरःसरैः ॥

प्राणायामं विना देवि ! जपमात्रेण सिद्धिदा ।
मन्त्रस्यास्य ऋषिर्देवि ! नारदः परिकीर्त्तितः ॥
गायत्री छन्द आख्यातं जगद्धात्री च देवता ।
चतुर्व्वर्गप्रदा दुर्गा सर्व्वसत्त्वेषु संस्थिता ॥
दीर्घस्वरसमायुक्तनिजबीजानि पार्व्वति ! ।
विन्यसेदात्मनो देहे हृदयादिषु षट्सु च ॥
पूर्व्ववत्प्रासवर्णन्तु पूर्व्ववत् कर्म्म चाचरेत् ।
कालीवदाचरेद्विद्यां जपेद्विद्यामहर्निशम् ॥
लक्षाद्वादशकैर्देवि ! पुरश्चरणमीरितम् ।
यथास्थाने यथाकाले यथाचारविधानतः ॥
प्रजपेत् परया भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥*॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व नगनन्दिनि ! ॥
सिंहस्कन्धाधिसंरूढां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्व्बाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनुम् ॥
नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालसृणालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ॥
प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीम् ।
एवं ध्यात्वा जगद्धात्रीं पूर्व्वोक्तपूजनं चरेत् ॥
यन्त्रमस्याः प्रवक्ष्यामि शृणुष्व हरवल्लभे ! ।
त्रिकोणत्रितयद्वादौ त्रैविम्बसहितन्ततः ॥
अष्टपत्रं ततो लिख्य त्रिरेखासहितं ततः ।
वज्रभूपुरसंयुक्तं विलिखेद्विधिनासुना ॥
तत्र तां पूजयेद्देवीं मूलप्रकृतिरूपिणीम् ।
प्रभाद्याः शक्तयः पूज्या गन्धाद्यैर्नवकोणके ॥
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी पुनः ।
सुप्रभा विजया सर्व्वसिद्धिदा नव शक्तयः ॥
ह्रीमाद्याः पूजयेत्तासु रक्तचन्दनदूर्व्वकैः ।
शङ्खपद्मनिधी देया वामदक्षिणयोगतः ॥
पूजयेत् परया भक्त्या रक्तचन्दनदूर्व्वकैः ।
अर्घ्यदानं ततः कुर्य्यात् पूजान्ते नगनन्दिनि ! ॥
अङ्गदृतिः पुनः पूज्या पत्रकोणेषु मातरः ।
वज्राद्यायुधसंयुक्ता भूपुरे लोकनायकाः ॥"
इति कात्यायनीतन्त्रे ७७ पटलः ॥ * ॥

श्रीशिव उवाच ।
"पूजा तिथिविशेषेण चतुर्व्वर्गफलाप्तये ।
कर्त्तव्या या तु दुर्गायास्तां शृणुष्व शुभानने ! ॥
अष्टम्याञ्च चतुर्दश्यां नवम्यां वापि यत्नतः ।
यः पूजयेन्महादुर्गां सोऽभीष्टफलमाप्नुयात् ॥
पौर्णमास्याममायां वा रविसंक्रमणे तथा ।
शनिभौमदिने चैव पूजयेत् परमेश्वरीम् ॥
सुखं सौभाग्यमारोग्यमैश्वर्य्यं लभते ध्रुवम् ।
शनिभौमदिने चैव यदि स्यादष्टमी तिथिः ॥
तत्र पूज्या जगद्धात्री पुत्रपौत्रधनप्रदा ।
सोमवारेऽप्यमावास्या मघानक्षत्रसंयुता ॥
उत्तरा सप्तमीयुक्ता आदित्यार्हे च पार्व्वति ! ।
चतुर्थ्यङ्गारवारे च रोहिणीसंयुता यदि ॥
गुर्व्वङ्क्ष्यां तथा स्वाती यदि स्यात् परमेश्वरि ।
एषु पूजा महादेवाः कर्त्तव्या सर्व्वसिद्धये ॥
मधुमासे सिताष्टम्यां वैशाखत्रितयेऽहनि ।

पौर्णमास्यां तथा ज्येष्ठे अमायाञ्च महेश्वरि ! ॥
मिथुनेऽर्के द्वितीयायां श्रावणे द्वादशीदिने ।
भाद्रे मास्यसिताष्टम्यां आश्विने शुक्लपक्षके ॥
सप्तम्यामेव चाष्टम्यां नवम्याञ्च विशेषतः ।
अमायां कार्त्तिके चैव नवम्यां शुक्लपक्षके ॥
नक्तं मार्गशिरे भूते पौषेऽष्टम्यां सितेतरे ।
माघे च सितपञ्चम्यां फाल्गुन्यां च सुरेश्वरि ! ॥
एषु द्वादशमासेषु तिथिष्वेतासु पार्वतीम् ।
पूजयेत् परया भक्त्या यथाविभवविस्तरैः ॥
राजराजेश्वरो भूत्वा वसेत् कल्पायुतं दिवि ।
पुत्रपौत्रधनर्द्धीनामधिपो जायते चिरात् ॥
अन्ते देवीपुरं याति सुक्ला भोगान् यथेप्सितान् ॥

श्रीपार्व्वत्युवाच ।

देवदेव ! महादेव ! विश्वनाथ ! महेश्वर ! ।
श्रुता तव मुखाम्भोजाद्दुर्गापूजा महाफला ॥
केन वा पूजिता देवी कस्य वा किञ्च सिध्यति ।
केन प्रकाशिता सृष्टौस्तत् सर्व्वं कथय प्रभो ! ॥

श्रीशिव उवाच ।

रामरावणयोर्युद्धे दुर्गा रामेण पूजिता ।
अवधीद्रावणं राम इषे मासि प्रपूजनात् ॥
तेन लोकाश्चरिष्यन्ति दुर्गायाः शारदोत्सवम् ।
एवमाराध्य देवेशीमिन्द्रजिद्रावणात्मजः ॥
अभवत् कार्त्तिके यो वै दुर्गामेवं समर्चयन् ।
अमायां कार्त्तिके मासि तारकासुरनाशकः ॥
कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उषस्यर्द्धोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्रारोग्यवरं लेभे लोकसाचित्वमेव च ।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि ॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ।
एवं मार्गशिरे मासि दशराशिगते विधौ ॥
चतुर्दश्यां निशायान्तु चन्द्रः संपूज्य पार्व्वतीम् ।
महापापाद्विमुक्तोऽसौ रात्रौशत्वमवाप च ॥
तेन मार्गशिरे मासि चतुर्दश्यां प्रपूजयेत् ।
इन्द्रत्वमेवमिन्द्रोऽसौ लेभे दुर्गां समर्चयन् ॥
ब्रह्मत्वमपि विष्णुत्वं रुद्रत्वञ्च महेश्वरि ! ।
देवत्वं सर्व्वदेवानामभवच्चण्डिकार्चनात् ॥
भूतं भव्यं भविष्यं यत् स्थावराणि चराणि च ।
सर्व्वं दुर्गाप्रभावेण सुखभोगमवाप्नुयुः ॥
विना दुर्गां महेशानि ! न किञ्चिदपि वर्त्तते ।
इति ते कथितं देवि ! संक्षेपेण तवाग्रतः ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिं सुदुर्लभाम् ॥"

इति कात्यायनीतन्त्रे ७८ पटलः ॥

(सरस्वती । यथा, मार्कण्डेये । २३ । ३० ।
"जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

जगद्बलः, पुं, (जगतां बलं यस्मात् ।) वायुः । इति चिकाण्डशेषः ॥

जगद्योनिः, पुं, (जगतां योनिरुत्पत्तिस्थानम् ।) शिवः । इति चिकाण्डशेषः ॥ (यथा, महाभारते । ७ । २०० । १३ ।
"जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् ॥")

विष्णुः । इति तस्य सहस्रनाम ॥ (यथा, विष्णुपुराणे । १ । १२ । ३२ ।
"ते समेत्य जगद्योनिमनादिनिधनं हरिम् ॥"
केचित्तु हरिविशेषणं कल्पयन्ति ॥)
ब्रह्मा । (यथा, कुमारे । २ । ६ ।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ॥")
पृथिवी । इति शब्दचन्द्रिका ॥

जगद्वहा, स्त्री, (जगन्ति वहति धारयतीति । वह + अच् । अजादित्वात् टाप् ।) पृथिवी । इति चिकाण्डशेषः ॥

जगद्विनाशः, पुं, (जगतां विनाशो ध्वंसः अखिलकार्य्यनाश इत्यर्थः यस्मिन् ।) युगान्तः । इति हलायुधः ॥ (प्रलयकाले च अखिलकार्य्यशून्यत्वं यथाह मनुः । १ । ५२—५३ ।
"यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति ॥
तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः ।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥
युगपच्च प्रलीयन्ते तदा तस्मिन् महात्मनि ।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः ॥")

जगन्नाथः, पुं, (जगतां नाथ ईश्वरः ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते ।१।४।३६।
"देवदेव ! जगन्नाथ ! भूतभव्यभवत्प्रभो ! ।
तपश्चरसि कस्यार्थं किं ध्यायसि जनार्द्दन ! ॥")
पुरुषोत्तमक्षेत्रम् । यथा,

सूत उवाच ।

"पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम् ।
यत्रास्ते द्वारवत्यां श्रीर्यो मानुषलीलया ॥
दर्शनान्मुक्तिदः साक्षात् सर्व्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत् क्षेत्रं केन निर्म्मितम् ॥
ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन्नास्ते परमपूरुषः ॥

जैमिनिरुवाच ।

एतत् क्षेत्रवरस्यास्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्नाख्यापितं हि तत् ॥
यथा चानुदिनं देवाः सिद्धाः ब्रह्मर्षयस्तथा ।
समर्चितुमिहायान्ति देवीं न तथान्यतः ॥
अहो ! तत् परमं क्षेत्रं विस्तृतं दशयोजनैः ।
तीर्थराजस्य सलिलाद्युत्थितं वालुकाचितम् ॥
नीलाचलेन महता मध्यस्थेन विराजितम् ।
एकं स्तनमिवावन्याः सुदूरात् परिभावितम् ॥"
ब्रह्माणं प्रति विष्णुवाक्यम् ।
"सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ।
स प्रदेशः पृथिव्यां हि सर्व्वतीर्थफलप्रदः ॥
एकाम्रकाननादूर्ध्वावह्निकोणदधितीरभूः ।
पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः ॥
सिन्धुतीरे च यो ब्रह्मन् ! राजते नीलपर्व्वतः ।
पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् ॥
सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम ।
सर्व्वसङ्गपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥
दृष्ट्वालयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ।
नीलाद्रेरन्तरभुवि कल्पन्त्यर्योधमूलतः ॥
वारुण्यां दिशि यत् कुण्डं रोहिणं नाम विश्रुतम् ॥

तत्तीरे निवसन्तो मां पश्यन्त्यक्ष्मैचक्षुषा ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥
व्रतेषु तीर्थेषु च यद्दानयोः
पुण्यं यदुक्तं विमलात्मनां हि ।
अहर्निवासाल्लभते च सर्व्वं
निमेषवासात् खलु चाश्वमेधिकम् ॥

जैमिनिरुवाच ।

उदकार्णः समागत्य कृतक्षिह्नायसोत्तमः ।
कारणोदकसम्पूर्णे तस्मिन् कुण्डे निमज्जितः ॥
विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम् ।
काकदेहं सस्तुत्वस्य लुठमानं सहुः क्षितौ ॥
शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥"
यमं प्रति लक्ष्मीवाक्यम् ।
"पक्षक्रोशमिदं क्षेत्रं सप्तप्राकारभावस्थितम् ।
चक्रोशं तीर्थराजस्य तटभूमौ सुनिर्म्मलम् ॥
सुवर्णवालुकाकीर्णं नीलपर्व्वतशोभितम् ।
योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः ॥
संयम्य विषयग्रामं सप्तद्वतटमाश्रितः ।
उपासितुं जगन्नाथं चतुःषष्ट्युत्तमः प्रभुः ॥
यमेश्वर इति ख्यातो यमसंयमनाश्रमः ।
यं दृष्ट्वा पूजयित्वा तु कोटिसिद्धफलं लभेत् ॥
सीमा प्रतीची क्षेत्रस्य शङ्खाकारस्य शङ्खिनि ।
शङ्खाग्रे नीलकण्ठः स्यादेतत् क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ।
शङ्खोत्तरभागस्तु सप्तद्रोदकसंयुतः ॥
यत्सम्पर्कात् सप्तद्रोऽत्र तीर्थराजत्वमागतः ।
यथायं भगवान्मुक्तिप्रदो दृष्टिपथं गतः ॥
तथेदं मरणात् क्षेत्रं सिन्धुस्नानाद्विमुक्तिदम् ।
चिच्छेद ब्रह्मणः पूर्व्वं रुद्रः क्रोधात्तु पञ्चमम् ॥
तच्छिरो दुस्त्यजं पाणौ ब्रह्माणं परिवभ्रमे ।
तत्रागतो यदा ब्रह्मकपालं परिमुक्तवान् ॥
कपालमोचनं तीर्थं द्वितीयावर्णसंस्थितम् ।
तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् ॥
तृतीयावर्णसीमायां शक्तिं मे विमलाख्यया ।
जानीहि धर्म्मराज ! त्वं मुक्तिमुक्तिफलप्रदाम् ॥
नाभिदेशे स्थितं क्षेत्रं चक्रं कुण्डं वटो विभुः ।
कपालमोचनं यावद्ब्रह्माग्नेः प्रतिष्ठिता ॥
मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना ।
तां दृष्ट्वा प्रणमेद्यस्तु भोगान् सोऽश्नाति यथेप्सितान् ॥
सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै ।
कोटपश्चिमभुव्यावां मरणान्मुक्तिदो मतः ॥
अन्तर्व्वेदी स्थितं पुण्या वाञ्छन्ति विदुषोरपि ।
अत्र स्थितान् हि पश्यन्ति सर्व्वांश्चक्राब्जधारिणः ॥
कामाख्या क्षेत्रपालश्च विमला चान्तरा स्थिता ।
साक्षाद्ब्रह्मस्वरूपोऽसौ वृक्षिंहो दक्षिणे विभोः ॥
अन्तर्व्वेदी रक्षणार्थं शक्तयोऽष्टौ प्रकल्पिताः ।
उग्रेण तपसा पूर्व्वमहं सर्व्वैः भाविता ॥
पत्न्यर्थं सा मया दृष्टा गौरी तस्याथ भाविनी ।
सर्व्वसौन्दर्य्यवसतिर्वपुषो मे विनिर्गता ॥
तदा दृष्ट्वा मया भद्रे ! वचनं मे प्रियं कुरु ।
अन्तर्व्वेदीं रक्ष मम परितस्तं स्वशक्तिभिः ॥

सात्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता।
मङ्गला वटमूले तु पश्चिमे विमला तथा।
अग्रतस्य पूर्वभागे तु संस्थिता सर्वमङ्गला॥
अर्द्धाग्नौ तथा लक्ष्मा कुबेरदिशि संस्थिता।
कालरात्रिर्दक्षिणस्यां पूर्वस्यान्तु मरीचिका।
कालरात्र्यास्तथा पश्चात् पक्षरूपावस्थिता।
रुद्रागयाच्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः।
आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम्॥
कपालमोचनं नाम क्षेत्रपालं यमेश्वरम्।
मार्कण्डेयं तथेशानं विश्वेशं नीलकण्ठकम्॥
वटमूले वटेशञ्च लिङ्गान्यष्टौ महेशितुः।
यानि दृष्ट्वा तथा स्नात्वा पूजयित्वा विमुच्यते॥"
तत्र जगन्नाथस्याविर्भावकारणम्।

जैमिनिरुवाच।

"इन्द्रद्युम्नस्य नृपतेः क्षेत्रे श्रीपुरुषोत्तमे।
जगदीशप्रसादाय पितामहनिदेशतः॥
एकोनं क्रमशः संख्यामवाप पृथिवीपतेः॥
सहस्रं हयमेधस्य यथावद्विधिचोदितम्।
स्नात्वा सप्तदिनात् पूर्वं या रात्रिरभवद्द्विजाः॥
तस्यास्तुरीयप्रहरे ध्यायतो विष्णुमव्ययम्।
ध्याने तस्मिन् ददर्शासौ महाभाग्यवशान्नृपः।
प्रलयोर्मिव च क्षेतद्वीपं स्फाटिकनिर्मितम्।
तन्मध्ये ददृशे देवं शङ्खचक्रगदाधरम्॥
नीलजीमूतसङ्काशं वनमालाविभूषितम्।
दक्षपार्श्वे स्थितं तस्य अनन्तं धरणीधरम्॥
हलाङ्गलशङ्खाब्जस्फुरद्बाहुचतुष्टयम्।
दक्षपार्श्वे स्थितां विष्णोर्लक्ष्मीं तां शुभलक्षणाम्॥
वराभयाब्जहस्तां वै कुङ्कुमाभां सुलोचनाम्।
ददर्श पद्मासनगां लावण्याम्बुधिपुत्रिकाम्॥
पितामहश्च ददृशे पुरतोऽस्य कृताञ्जलिम्।
वामपार्श्वस्थितं चक्रं सर्वज्ञानमयं विभोः॥
ततः प्रवृत्ते स्तुत्या नृपतेर्वाग्मिमेधिका।
शृण्वतोः श्लोकैर्दिव्यदृग्भिर्वर्षक्रमसमुज्ज्वलैः॥
दक्षिणे तटभूदेशे विश्वेश्वरसमीपतः।
नियुक्ताः सेवका राज्ञा ससम्भ्रमसुपस्थिताः॥
न्यवेदयन्तो नृपतिं कृताञ्जलिपुटा द्विजाः।
देव! दृष्टो महाटचत्तटभूमौ महोदधेः॥
प्रविशाग्रसमुद्भान्तकल्लोलप्रबलक्लकः।
माङ्गिल्यवर्णैः सर्वत्र शङ्खचक्रादिभिः शुभैः॥
न दृष्टपूर्वो दृष्टोऽयमुद्यत्सूर्यनिभोऽनघः।
नियुक्तानां वचः श्रुत्वा राजा नारदमब्रवीत्॥
तत् किं निमित्तं यद्दृष्टं तत्रश्रेष्ठं वदन्ति ते।
नारदः प्रहसन् वाक्यमुवाच नृपसत्तमम्॥
उपस्थितन्तु ते भाग्यं स्वप्ने यद्दृष्टवान् पुरा।
श्वेतद्वीपे विश्वमूर्तिर्दृष्टो यो विष्णुरव्ययः।
तदङ्गस्खलितं लोम तरुत्वमुपपद्यते।
तद्भाग्यवशगः सर्वलोकानां नयनातिथिः॥
भविष्यति महाराज! सर्वकल्मषनाशनः।
समाप्यावभृथस्नानं तटान्ते सरितां पतेः॥
उत्सवं सुमहत् कृत्वा कृतकौतुकमङ्गलम्।
महावेद्यां स्थापयाच यज्ञेशं तरुरूपिणम्॥
विचार्यैत्थं सुरा मुख्यौ तौ च नारदभूभुजौ।
सुसद्दृशौ ततो यातौ यत्रासौ भगवान् द्रुमः॥
पुनः पुनः प्रणम्येनं हर्षाश्रुनयनो नृपः।
द्विजैराहारयामास तरुं कल्लोललोहितम्॥
स्रग्गन्धालेपनं दिव्यं महावेद्यां विनिन्यतुः।
वचसा नारदस्येनं पूजयामास पार्थिवः॥
पूजावसाने पप्रच्छ नारदं मुनिसत्तमम्।
कीदृशीं प्रतिमां विष्णोर्घटयिष्यति कः पुनः॥
विचारयन्तौ तावित्थं यावन्नारदपार्थिवौ।
अशरीरा ततो वाणी शुश्राव चान्तरीक्षतः॥
अपौरुषेयो भगवान् सद्विचारपथे स्थितः।
सुगुह्यायां महावेद्यां स्वयं सोऽवतरिष्यति॥
प्रच्छाद्यतां दिनान्येव यावत् पञ्चदशानि वै।
उपस्थितोऽयं यो दृष्टः शुक्लपार्श्वस्तु वह्निकौ॥
एनमन्तः प्रवेश्यैव द्वारं बध्नन्तु यत्नतः।
बहिर्वाद्यानि कुर्वन्तु यावत्तु घटना भवेत्॥
श्रुतस्तद्घटनाशब्दो बाधिर्यान्धत्वदायकः।
नरके वसतिश्चैव कुर्यात् सन्ताननाशनम्॥
नान्तः प्रवेशनं कुर्यान्न पश्येच्च कदाचन।
नियुक्तान्यः प्रपश्येच्चेद्राज्ञो राज्यस्य चैव हि॥
दृष्ट्वापि महाभीतिरन्यता च युगे युगे।
तच्छ्रुत्वा नारदाद्यास्ते यथोक्तं विष्णुना स्वयम्॥
चिकीर्षन्ति तथा कर्तुं तत्रायातस्तु वह्निकौ।
प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टस्तु याज्ञया॥
ता एवाहं घटिष्यामि दारुणा दिव्यरूपिणा।
इत्युक्त्वान्तर्दधे वेदां दृढवर्हकिरूपधृक्॥
वचनार्थं मनुष्याणां साक्षान्नारायणो विभुः।
ततः स पृथिवीपालस्तथा कृत्वान्तरीक्षगा॥
यदुवाच गिरां देवी तत्तत् परिचचार च।
निर्ययौ स्वयं देवः क्रमात् पञ्चदशे दिने॥
चतुर्मूर्तिः स भगवान् यथा पूर्वं मयोदितः।
दिव्यसिंहासनगतो बलभद्रसुदर्शनैः॥
शङ्खचक्रगदापद्मलसद्बाहुर्जनार्दनः।
हलं मूषलचक्राढ्यं धारयन् पन्नगाकृतिः॥
कुचैलतपनाभासप्रसृकुटोज्ज्वलकुण्डलः।
सुभद्रा चारुवदना वराभयधारिणी॥
लक्ष्मीः प्रादुर्भवेयं सर्वचैतन्यरूपिणी।
सुदर्शनन्तु यच्चक्रं सदा विष्णोः करे स्थितम्॥
ग्रासाग्रस्तभमध्यस्थं तद्रूपन्तु तुरीयकम्॥ *॥
निर्वृत्ते भगवद्रूप चतुर्द्धा दिव्यरूपिणी॥
लोकानामुपकाराय पुनराहान्तरीक्षगा।
पटैराच्छाद्य सुदृढं नृपते! प्रतिमास्विमाः॥
स्वं स्वं वर्णं प्रापयामु वर्णकैश्चित्रकर्मणा।
अस्थिरत्वस्वरूपेण हरेः पापाय हेतवः॥
गोपनीया प्रयत्नेन मद्वनिर्वासवल्लभैः।
स्निग्धिभिः कर्मकुशलैर्दृढमाच्छादयायतः॥
वर्षे वर्षे च संस्कार्या पूर्वसंस्कारमोचनात्।
ऋते वल्कललेपन्तु स तु दिव्यचिरन्तनः॥
प्रमादाद्यदि तं लेपमपनीयेत कश्चन।
दुर्भिक्षं मरकं राज्ये सन्ततिश्चास्य क्षीयते॥
नेच्छितवाक्यया राजन्! कदाचिदपवारणाः।
मनुष्येण च राजेन्द्र! हरेः सुमहतेजसः॥
तस्मात् सुचिरा दृष्ट्वा मद्वलेपविलेपिताः।
नीलाद्रौ कल्पवृक्षस्य वायव्यां श्रुतदेवतः॥
प्रदेशे सुमहत्स्थाने प्रासादं सुदृढायतम्।
उत्तरे नरसिंहस्य सहस्रकरसंस्कृतम्॥
कारयित्वा प्रतिष्ठाप्य तत्रेनं विनिवेशय।
पुरा स्थितः पर्वतेऽस्मिन् योऽभ्यर्चयति माधवम्॥
नाम्ना विश्वावसुर्नाम श्रवरो वैष्णवोत्तमः।
तस्य सन्ततिरेवास्य सेवनस्यागकर्मणि॥
नियुज्यतां महाराज! भविष्यत्यृद्धसंवेद्य च।
ततः स नृपतिः श्रीमान् शिल्पशास्त्रविशारदान्॥
सत्कारैर्दानमानैश्च योजयामास सारदम्।
दिने दिने सुघटितः प्रासादो वटधे द्विजाः॥
परितः पूर्यमाणस्तु शुक्लपक्षे यथा शशी॥

नारद उवाच।

प्रवर्षं वहु राजेन्द्र! स्थित्वा चास्मिन् चिरं भुवि।
आराधय जगन्नाथमुपचारैर्महोत्सवैः।
पितामहं द्रष्टुकामो गन्ता चेदन्तिकं विभोः॥
उपदेक्ष्यति सोऽप्यस्य यात्रास्तात्र महोत्सवाः।
उभौ तौ दिव्ययानेन जग्मतुर्मुनिभूसुरौ॥
प्रदक्षिणीकृत्य हरिं व्योममण्डलमध्यगम्।
दृष्ट्वा पितामहं दूरात् सहारं जगतां नृपः॥
अमन्यत द्विजश्रेष्ठाः साक्षाद्धारमयं हरिम्।
प्रणैः प्रणैर्ययौ भूपः प्रणनाम कृताञ्जलिः॥
स्तवन् प्रणिपतन् भूमौ साध्वसस्खलितं व्रजन्।
जानन्नपि हि तत् कार्यं मायानृपसत्तमम्॥
उवाच परमप्रीतः इन्द्रद्युम्नं पितामहः।
किमर्थमागतोऽत्यन्त तद् ब्रूहि हृदयस्थितम्॥

इन्द्रद्युम्न उवाच।

आविर्बभूव भगवान् भूतभव्यभवत्प्रभुः।
गत्वा देवं जगन्नाथं स्थापयिष्यसि च प्रभो!॥

ब्रह्मोवाच।

त्वमद्यतोऽधरां गत्वा यावत् सम्भारसङ्गिमत्।
करिष्यसि महाभाग! तावदेव व्रजाम्यहम्॥
इन्द्रद्युम्नोऽपि हृदयात्वा दृष्ट्वा ब्राह्मीं श्रियं
द्विजाः।
आजगाम सुखं विप्रा विधिना चानुमोदितः॥
आगत्य च जगन्नाथं चिरादुत्कण्ठमानसः।
दण्डवत् प्रणनामासौ धनरोमाञ्चकञ्चुकः॥
ततः क्रमात् समुद्दश्य विमानाग्यं प्रजापतेः।
स्वर्णहंसयुतैः स्वर्णवेत्रमालं समन्ततः॥
प्रणिपत्य जगन्नाथं त्रिः परीत्य पितामहः।
आनन्दसिन्धुसंमग्नः सरोमाञ्चवपुः स्वयम्॥
ससुतस्त्रीं ततो ब्रह्मा कृतस्वस्त्ययनः स्वयम्।
ऋत्विग्भिर्नारदाद्यैश्च विद्वद्भिर्ब्राह्मणैस्तथा॥
प्रासादद्वारि रचिते रत्नस्तम्भोपशोभिते।
वासयित्वाभिषेकाय सम्मुखादर्शमण्डले॥
सुवासिते रत्नकुम्भैस्तीर्थवार्ध्युपबृंहिते।
युक्ताभ्यां स्त्रीपुरुषयोरभिषेकं पितामहः॥
चकार भगवान् लोकसंग्रहार्थं द्विजोत्तमाः!
ततोऽभ्यक्तकृतान् देवान् गन्धमाल्योपशोभितान्॥
नीराजयित्वा विधिवत् स स्वयं लोकभावनः।
रत्नसिंहासने रम्ये स्थापयामास मन्त्रतः॥
स्थापयित्वा जगन्नाथं दृष्ट्वा तस्य मुखाम्बुजम्।

आयुष्यं मन्त्रराजं सहस्रं प्रजजाप ह ॥
वेणुशस्यामले पक्षे अरण्यां प्रथयोगतः ।
हता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥"
तन्महाप्रसादमाहात्म्यं यथा,—
"बहून् नियोजयेत्तत्र लोकान् त्रैवर्गिकाद्भुत ।
लौकिकव्यवहारोऽयं प्रथति श्रीः स्वयं ध्रुवम् ।
भुङ्क्ते नारायणो नित्यं तथा पक्वं शरीरवान् ॥
अन्नतं तद्धि नैवेद्यं पापघ्नं ब्रह्महे धारत्वात् ।
भक्षणान्नद्यपानादिमहादुरितनाशनम् ॥
आघ्राणाच्चानसं पापं दर्शनाद्दृष्टिजं तथा ।
आस्वादाद्वाक्कृतं पापं श्रवणाच्च त्वगोद्भवम् ॥
स्पर्शनात् त्वक्कृतं पापं मिथालापं तथा द्विजाः ॥
गात्रे लेपाद्देहे पापं शारीरं वै न संशयः ॥
महापवित्रं हि हरेर्निवेदितं
नियोजयेद्यः पितृदेवकर्मसु ।
तृप्यन्ति तस्मै पितरः सुराश्च
प्रयान्ति लोकं मधुसूदनस्य ॥
अतः परं हि वक्ष्यामि हयकर्णेषु भो द्विजाः ॥
नराणां रूपमास्थाय तदश्नन्ति दिवौकसः ॥
विष्णोर्नयगतं तद्धि निर्माल्यं पतितादयः ।
भुञ्जन्ति येन दुष्टं हि यथा विष्णुस्तथैव तत् ॥
निन्दन्ति ये तदज्ञाता ज्ञाः पण्डितमानिनः ।
स्वयं दण्डधरस्तेषु सहते नापराधिनः ॥
येषामत्र न दृष्टेऽदृष्टवा तेषां हि दुर्गतिः ।
कुम्भीपाके महाघोरे पच्यन्ते तेऽतिदारुणे ॥
चिरस्थमपि संभुक्तं गीतं वा दूरदेशतः ।
यथा तथोपभुक्तं तत् सर्वपापापनोदनम् ॥
नैवेद्यान्नं जगद्धात्र्युर्गान्नं वारि समं त्रयम् ।
दृष्टिस्पर्शनचिन्ताभिर्भक्षणादघनाशनम् ॥"
इत्युत्कलखण्डम् ॥ * ॥

स च कलेर्द्वात्रिंशत्सहस्रवर्षपर्यन्तं पृथिव्यां स्थास्यति। यथा,—
"प्रयास्यामो हरेर्मूर्त्तिं जगन्नाथस्य भारतम् ।
कलेर्द्वात्रिंशसहस्राब्दे यथौ तत्रा हरेः पदम् ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥

(स्वनामख्यातो बहुग्रन्थकर्त्ता पण्डितविशेषः । अयं हि तैलङ्गवंशोद्भवः । अस्य पिता पेरमभट्ट इति ख्यातः । असौ पण्डितराजजगन्नाथो दिल्लीप्रभोः शाहजहान्-श्येनस्तोर्यवनस्य दाराशाहस्य सभायामासीत् । यतोऽनेन जगदाभरणकाव्ये दाराशाहस्यैव यशोवर्णनं कृतम् । अपिच भामिनीविलासस्थमाद्यो "दिल्लीश्वरजगदीश्वरयवनेश्वर गीतं नवीनं वयः" इत्युक्तम् । दाराशाहस्तु १५८१ एकाशीत्यधिकषोडशशतकाब्दपर्य्यन्तं जीवित आसीत् । अतः पण्डितराजजगन्नाथोऽयं तात्कालिक इत्येवावातम् । अनेन पण्डितराजपदवीं शाहजहानृपाज्ञो दिल्लीप्रभोः प्राप्नोति ततस्तादात्म्यविलासनामकग्रन्थादेवागम्यते यथा,—
"अथ सकलजोकविस्मारविस्तारितमहोपकारपरम्पराधीनमानसेन प्रतिदिनमुदयदनवद्यविद्यापद्यानेकविद्याविद्योतितानःकरणैः कविभिरुपास्यमानेन कृतयुगोद्भवकलिकालेन कुमतिदुष्यजालसमाच्छादितवेदवनमार्गविलोकनाय समुद्दीपितसुतर्कदहनज्वालाजालेन मूर्त्तिमतेव नव्यावासप्रकाशमयप्रसादेन भाषुरकुलसमुद्रेन्दुना रायसुकुन्देनादिष्टेन सार्व्वभौमश्रीशाहजानृप्रसादाधिगतपण्डितराजपदवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनाभवविलासाख्येयमाख्यायिका निरमीयत। सेयमनुग्रहेण बहुदयानामनुदिनसुखाविता भवतात् ॥"

एतत्पण्डितविरचिता बहवो ग्रन्थाः सन्ति । तेषु अद्यावधि ज्ञाताश्चेते, रसगङ्गाधरः १, यमुनावर्णनचम्पूः२, रतिमन्मथनाटकम्३, वसुमतीपरिणयनाटकम् ४, जगदाभरणकाव्यम् ५, प्राणाभरणकाव्यम् (कामरूपदेशाधिपस्य प्राणनारायणभूपस्य स्तुतिरूपोऽयं ग्रन्थः) ६, पीयूषलहरी ७, अन्दलहरी (यमुनास्तुतिरूपोऽयं ग्रन्थः) ८, सुधालहरी (सूर्य्यस्तवरूपोऽयं ग्रन्थः) ९, करुणालहरी (विष्णुलहरी वा) १०, लक्ष्मीलहरी ११, भामिनीविलासः १२, मनोरमाकुचमर्द्दिनी १३, अन्यापटीकाकाव्यम् १४, आसफविलासः १५ ॥ * ॥

तर्कपञ्चाननोपाधिकोऽपरपण्डितविशेषः । अयं हि विवादभङ्गार्णवसेतु-रामचरितादिग्रन्थानां प्रणेता । पिताऽस्य रुद्रदेवः माता च अम्बिका । रुद्रदेवस्तु चतुःषष्टितमवयसि पूर्व्वसदृधर्म्मिण्यां सत्यतायां मृतायां संसारविरक्तः काश्मीरावासुखमभिलषन् चिरसुहृदं निजानन्दपुरनिवासिनं ज्योतिर्विद्याविशारदं सुप्रसिद्धं चन्द्रशेखरवाचस्पतिमभिगम्य स्वीयान्तिमदशाफलानि पृष्टवान् । चन्द्रशेखरस्तु रुद्रदेवस्य जन्मलग्नमासुसारतत्परमे वयसि सुप्रसिद्धपुत्रलाभरूपं शुभफलमवगम्य वासुदेवनाम्नः कस्यचिद् विप्रवरस्यास्मिन्नानां कन्यासुदाहयामास । रुद्रदेवस्तु ज्योतिर्विद्यापारदर्शिनं चन्द्रशेखरस्य शास्त्रादिकां परिक्षीय सत्पुत्रप्राप्तिकामो काश्मीरमभिगम्य विश्वेश्वरसुहृद्भिर्वेकविंशतिपुरश्चरणं कृतवान् । चरमपुरश्चरणदिवसीयरात्रिमध्ये शिवस्वामे प्राप्तसत्पुत्रलाभस्वप्नः प्रहृष्टमनाः पुनः स्वस्थानं त्रिवेणीप्रदेशं प्रत्यागत्य गार्हस्थ्यधर्म्मानुरक्तो बभूव । अथ गच्छति काले पतिपरायणाम्बिका गर्भमुपलभ्य १६१६शके (११०१परिमितवङ्गाब्दे) सौराब्दिनस्य दैवीपद्मीयपञ्चम्यां पुत्ररत्नं जगन्नाथं प्रसूतवती। रुद्रदेवस्तु नवजातपुत्रस्य जातसंस्कारादिकं विधाय राजशुसारतो रामराम इति नाम चक्रे परं कुमारस्य मातामहो वासुदेवः अस्मिन्नेव समये श्रीजगन्नाथक्षेत्रात् तीर्थस्नानात् प्रत्यागत्य दौहित्रसुखं दृष्ट्वा जगन्नाथ इत्याख्येयमयोजयत्। ततः प्रभृत्येवायं जगन्नाथ इति नाम्ना प्रसिद्धोऽभूत् ।

अयन्तु बाल्यावस्थायामतीवचञ्चलप्रकृतिर्दुर्दान्तोऽपि स्मृतिशक्तिसत्यवादितादिगुणनिकरैश्च बहूनां वितरां प्रियपात्रमासीत् । अयं प्रथमतः पितृसन्निधाने व्याकरणमधीत्य ततो ज्येष्ठतातस्य न्यायसङ्गतोपनामकस्य भवदेवस्य समीपे साहित्यादिकमधीतवान् । ततो भवदेवस्य परलोकगमनानन्तरं कामाणपुरनिवासिनं रघुदेवविद्यावाचस्पतिं अध्यापकत्वेन वीक्ष्य दर्शनशास्त्रादिचिन्तया कालं यापयामास। अस्य एतादृशी प्रखरा स्मृतिशक्तिरासीत् यदनधीतस्यापि भिन्नदेशीयभाषायां निबद्धस्य ग्रन्थस्य द्वित्रिपत्राणि एकवारमात्रमाकर्ण्यैवायं अनर्गलं अश्रान्त इव आवर्त्तयितु समर्थः। एतादृशीमेधाशक्तिरेवैनं अल्पसमयेन बहुशास्त्रपारदर्शिनमकरोत् ।

षोडशवर्षवयस्क एवासौ द्रौपदीनाम्नीं सुलक्षणां कन्यामुपयेमे। विवाहात् परमेवास्य ज्येष्ठतातो भवदेवः परलोकं गतः । माता तु पूर्व्वमेव कालवर्म्मसुपगता पिता च चतुर्व्विंशतिवयस्कमेनमवलोक्यैव इह लोकं तत्याज। पितृवियोगानन्तरमेवायं छात्रानध्यापयितुं प्रवृत्त आसीत्।

अथ कदाचित् वर्द्धमानाधिपतिर्महाराजत्रिलोकचन्द्रबाहादुरोऽस्य पाण्डित्यप्रभावमवगम्य राजसभामधिरोहयितुं निमन्त्रयामास। जगन्नाथस्तु राजप्रसादसुपलब्धुं राजसभां प्रविश्य तर्कजालेन तत्रस्थान् पण्डितान् जितवान् । महीपतिस्तु जगन्नाथस्य तादृशीं बुद्धिशक्तिं मेधाशक्तिञ्चावलोक्य विशेषेण परीक्षितुं पथि इतस्ततः समयक्षमणो वार्त्तां विज्ञापयितुमादिदेश । जगन्नाथस्तु नृपतेर्मनोऽभिप्रायमवगम्य त्रिवेणीप्रदेशात् वर्द्धमानपर्य्यन्तं यावत् पथि स्थितानां प्रत्येकपादपमन्दिराश्रमपि वृत्तान्तं कथयामास। राजा तु स्वकर्म्मचारिभिरेतद्वृत्तान्तस्य याथार्थ्यमुपगम्य सातिशयेनानन्दितो बभूव ।

एकदा सुधिंदावादाख्यप्रदेशनृपतेर्यवनस्य मन्त्री गन्दकुमारोऽस्य पाण्डित्यमवगम्य (नवाब) महीपतिसमीपमेनमानयामास। नृपतिस्तु बहुविधैर्दुरूहप्रश्नैरेनं वञ्चयितुमभिलषन् परं जगन्नाथः स्वीयबुद्धिप्राखर्य्येण नृपतिप्रेषितप्रश्नानां सदुत्तरं दत्त्वा तं सन्तोष्य च तस्माद् बहुशार्थप्रदां भूम्यादिसम्पत्तिं लब्धवान् ।

अथ कालचक्रगत्यनुसारतो यवनराजानां वैभवविरहं गतः इंराजराजानां सौभाग्यसमयः वसुपागतश्च । तदा इंराजनृपतयस्तदानीन्तनप्रजारञ्जनार्थं विचारकार्य्यस्य सौकर्य्याय जगन्नाथतर्कपञ्चाननं समाहूय व्यवहारोपयोगिनं ग्रन्थमेकं प्रणेतुमादिदेशुः । जगन्नाथस्तु नवीननृपतिभिस्तयादिष्टः "विवादभङ्गार्णवसेतु" नामकं ग्रन्थं प्रणीतवान् ।

अस्य द्वित्रिंशत्तमवयसि सहधर्म्मिणी द्रौपदी बहुपुत्रपौत्रादिकं संरक्ष्य परलोकं गता । अस्य द्वौ पुत्रौ तिस्रः कन्याश्चाभवन्। पुत्रयोर्यवनग्रामसार्व्वभौम एव ज्येष्ठः प्रतिभाशाली बहुग्रन्थ-

पारदर्शी च। जगन्नाथोऽयमन्तिमावस्थायां दृष्ट्वा प्रपौत्रादिसुखमवलोक्य अतिदुर्लभमेतादृशं संसारसुखमनुभूय शकनरपतेः १७२६ वत्सरे (१२१४वङ्गाब्दे) आश्विनशुक्लपञ्चदशीतिथौ गङ्गातीरे प्राणान् तत्याज। ततः प्राक्कालपर्य्यन्तमेवास्येन्द्रियशैथिल्यं न जातम्। गङ्गातीरं गतेन सुस्पर्शवायुना स्नायुप्राबाधे हतः श्लोको यथा,—

"केचिद् ब्रह्म निराकारं नराकारञ्च केचन।
वयन्तु दीर्घयोगेन नीराकारमुपास्महे॥" इति॥)

जगद्गुः, पुं, (जगता विश्वस्थजीवजातेन गम्यते इति। जगत्+गम्+बाहुलकात् डुः। यद्वा, गु+क्विप् एषो। गु नैवनं स्तुतिरित्यर्थः जगति विश्वसंसारे गुः स्तुतिर्यस्य। सर्व्वजीवस्तुतत्वाद्देवोऽस्यतथात्वम्।) अग्निः। जन्तुः। इति विश्वः शब्दरत्नावली च॥ जगद्गुरपि पाठः॥

जगरः, पुं, (जागर्त्ति संग्रामेऽनेनेति। जागृ+अप्। एषोदरादित्वात् साधुः।) कवचः। इति हेमचन्द्रः। ३। ४३०॥

जगलः, पुं, (पुनःपुनरतिशयेन वा गलतीति। गल चरणे+यङ्लुगन्तात् अच्। संज्ञापूर्व्वकत्वात् "दीर्घोऽकितः।"७।४।८३। इति न दीर्घः। यद्वा, जनु+डः। जः जातः सन् गलति निर्गच्छतीति। गल+अच्।) सुराकल्कम्। मेया इति भाषा॥ तत्पर्य्यायः। मेदकः २। इत्यमरः। २। १०। ४२॥ (यथा, शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये।

"तद्धो जगलो ज्ञेयो मेदको जगलाह्वः॥")

मदनदृष्टः पिष्टमद्यम्। (तद्गुणा यथा,—

"शूलप्रवाहिकाटोपकफवातार्शसां हितः।
जगलो गाहिरूक्षोष्णः श्लेष्मघ्नो मुक्तपाचनः॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥

"ग्राम्यौ जगलः पक्षौ रूक्षस्तृट्कफशोषकृत्।
क्षुद्रः प्रवाहिकाटोपदुर्नामानिलशोषकृत्॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥) धूर्त्ते त्रि। इति मेदिनी। ते, ६१॥ कवचः। रलयोरैक्यात्॥ गोमये, क्ली। इति रत्नमाला॥ (यथा, वैद्यकरत्नमालायाम्।

"गोमयं जगलं गोविट् गोदग्धं तच्च गोशकृत्॥")

जगर्ध, त्रि, (अद्यते स इति। अद् भक्षणे+क्तः। "अदो जग्धिर्ल्यप्ति किति।" २। ४। ३६। इति जग्धादेशः। इकार उच्चारणार्थः।) भुक्तम्। इत्यमरः। ३। २। १११॥

("स्निग्धं घनं कुटजवल्कमजन्तु जग्धम्॥"

इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)

जग्धिः, स्त्री, (अद भक्षणे+क्तिन्। "अदो जग्धिर्ल्यप्ति किति।" २। ४। ३६। इति जग्धादेशः।) सद्भोजनम्। इत्यमरः। २।६।५५॥ भक्षणम्। इति हेमचन्द्रः॥ (यथा, मनौ। ३। ११५।

"अदत्त्वा तु य एतेभ्यः पूर्व्वं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥")

जग्मिः, पुं, (गच्छति इतस्ततो वातीति। गम+"आदृगमहनजनः किकिनौ लिट् च।" ३।२। १७१। इत्यस्य "भाषायां धात्वन्तरगमिजनिनमिभ्यः।" इति वार्त्तिकोक्त्या किन्नित्वञ्च।) वायुः। इति केचित्॥

जघनं, क्ली, (हन्यते इति। हन्+"हन्तेः शरीरावयवे डे च।" उणा। ५। ३२। इति अच् डित्वञ्च। "अभ्यासाच्च।" ७। ३। ५५। इति कुत्वम्।) स्त्रीकट्याः पुरोभागः। (यथा, माघे। ५। २६।

"नाभिह्रदेः परियतीरयाचि यत्र
स्त्रीणां दृषज्जघनसेतुनिवारितानि॥")

कटिः। इति मेदिनी। ने, ६७॥ (यथा, देवीभागवते। १। ६। ८१।

"भगवान् द्विगुणं चक्रे जघनं विस्तृतौ तदा।
श्रोणिं सन्दधतां तत्र जघने परमाद्भुते॥")

जघनकूपकौ, पुं, (जघनकूपे इव कायतः इति। कै+कः।) कुकुन्दरौ। इति हलायुधः॥ द्विवचनान्तोऽयं शब्दः॥

जघनेफला, स्त्री, (जघने इव मध्यभागे फलमस्याः।) काकोदुम्बरिका। इत्यमरः। २। ४। ६१॥

जघन्यः, त्रि, (कुटिलं हन्यते निन्द्यते इति। हन+यङन्तात् अचो यत्। अनित्यमागमशास्त्रमिति नुगतोऽनुनासिकान्तस्येति न नुक्। यद्वा, जघनमिव। "शरीरावयवाच्च।" ५। ३। १०३। इति यत्।) चरमः। (यथा, वैद्यकचक्रपाणिसंग्रहे क्षेत्राधिकारे।

"उत्तमस्य पलं मात्रा त्रिभिरत्रैव मध्यमे।
जघन्यस्य पलार्द्धेन क्षेत्रकाद्यौषधेषु च॥")

गर्हितः। (यथा, महाभारते। ३। ३५। १३।

"तत्र द्यूतमभवन्नो जघन्यं
तस्मिन् जिताः प्रव्रजिताश्च सर्व्वे॥"*॥

जघने कटिदेशे भवम्। दिगादित्वात् यत्।) मेहने, क्ली। इति मेदिनी। ये, ८३॥ पुं, शूद्रः। इति शब्दरत्नावली॥ (हीनजातिमात्रम्। यथा, मनौ। ८। ३६६।

"उत्तमां सेवमानस्तु जघन्यो वधमर्हति॥"

"हीनजातिस्त्रियं मोहादुद्वहन्तौ व्रजत्यधः।
अनिच्छन्तीं वा गच्छन् जात्यपेक्षयाऽङ्गच्छेदमारभ्यात्मकं वधमर्हति॥" इति तट्टीकायां कुल्लूकभट्टः॥*॥ पृष्ठभागः। यथा, रामायणे। २। १०४। २६।

"ततो जघन्यं सहितैः समन्त्रिभिः
पुरप्रधानैश्च तथैव सैनिकैः।
जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम्॥"

"जघन्यं जघनभागं पृष्ठभागमाश्रितः सन्।" इति तट्टीकायां रामानुजः॥*॥ राजानुचरविशेषः। यथा, हर्षचरितायाम्। ६८। ३१, ३२—३४।

"पश्चात्परे वामनको जघन्यः
कुब्जोऽपरो मङ्कणकोऽथ सामी।
पूर्व्वोक्तभूपानुचरा भवन्ति
सङ्कीर्णसंज्ञाः प्रभुलक्षणेस्तान्॥"
"मालव्यसेवी तु जघन्यनामा
खर्जूरतुल्यश्रवणः सुगन्धिः।
सुक्रेण सारः पिशुनः कविश्च
रूक्षच्छविः स्थूलकराङ्गुलीकः॥
क्रूरो धनी स्थूलमतिः प्रतीत-
स्ताम्रच्छविः स्यात् परिहासशीलः।
उरोऽङ्घ्रिहस्तेष्वसिशक्तिपाश-
परश्वधाङ्कश्च जघन्यनामा॥")

जघन्यजः, पुं स्त्री, (जघन्ये चरमे जायते इति। जन्+"सप्तम्यां जनेर्डः।" ३। २। ६७। इति डः।) शूद्रः। कनिष्ठे, त्रि॥ इति मेदिनी॥ जे, ३२॥ (यथा, महाभारते। १। ६५। १६।

"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥")

जघ्निः, पुं, (हन्यते इति। हन+"आदृगमहनेति।" ३। २। १७१। इति किन् डित्वञ्च।) हननयोग्यास्त्रम्। इति संक्षिप्तसारः॥ (यथा, ऋग्वेदे। ६। ६१। २०।

"अग्निर्भिनत्तमभित्यं सहिर्व्याजं दिवे दिवे॥")

जघ्नुः, त्रि, (हन्तीति। हन वधे+"जुसृधृभ्यः।" उणा। १।२३। चकारात् हन्तेरपि कुर्डित्वञ्च।) हन्ता। हननकर्त्ता। इत्युणादिकोषः॥

जङ्गमः, त्रि, (पुनः पुनर्गच्छतीति। गम्+यङ्+अच्।) अस्थावरः। गतिशक्तिविशिष्टः। तत्पर्य्यायः। चरिष्णुः २ चरः ३ चलः ४ इङ्गः ५ चराचरः ६। इत्यमरः। १। १। ७४॥ (यथा, रघौ। २। ४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः॥"

"ओषधयस्तावद्द्विविधाः स्थावरा जङ्गमाश्च।"

"जङ्गमाश्चापि चतुर्व्विधा जरायुजाण्डजस्वेदोद्भिज्जाः। तत्र पशु-मनुष्य-वाजादयो जरायुजाः। खग-सर्प-सरीसृप-प्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमक्कूकप्रभृतय उद्भिज्जाः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये।)

जङ्गमकुटी, स्त्री, (जङ्गमा गतिशक्तिविशिष्टा कुटी गृहमिव।) छत्रम्। इति त्रिकाण्डशेषः॥

जङ्गलं, त्रि, (पुनः पुनरतिशयेन वा गलतीति। गल+यङ्+अच्। एषोदरादित्वात् साधुः।) निर्ज्जलदेशजः। इति शब्दरत्नावली॥ निर्ज्जलस्थानम्। पिशिते, क्ली। इति मेदिनी। ले, ६३॥

जङ्गलः, पुं, (जङ्घां कुटिलगतिं अलति प्राप्नोतीति। अल+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) रोधविशेषः। जाङ्गाल इति भाषा॥ तत्पर्य्यायः। आलिः २ प्रकारः ३ सेतुः ४ सचरः ५। इति जटाधरः॥

जङ्गुल, क्ली, विषम्। इति त्रिकाण्डशेषः॥

जङ्घा, स्त्री, (जङ्घन्यते कुटिलं गच्छतीति। हन वधे गतौ च यङ्लुगन्तात्+"अन्येभ्योऽपीति।"

ङ:।) गुल्फोर्द्धनाल्वधोभाग:। जाड् इति भाषा॥ तत्पर्य्याय:। प्रहता २। इत्यमर:॥ टङ्क ३ टङ्कम् ४ टङ्किका ५। इति शब्दरत्नावली॥ (यथा, महाभारते। ५।१३३।१६।
"शुचुर्निमज्जता गाङ्गो जङ्घायां प्रपतिष्यता॥")

जङ्घाकरिक:, पुं, (जङ्घा तत्साध्यगतिरेव आकरो निधि: जीविकानिर्व्वाहधनस्येत्यर्थ:। सोऽस्यास्येति। जङ्घाकर+"अत इनिठनौ।" ५।२।११५। इति ठन्।) धावक:। तत्पर्य्याय:। आङ्गिक:२। इत्यमर:। २।८।७३॥ डाकचक्री३। इति शब्दरत्नावली॥

जङ्घात्राणं, क्ली, (जायतेऽनेनेति। त्रै+करणे ल्युट्। चार्म्म। ततो जङ्घायास्त्राणमिति।) जङ्घासन्नाह:। तत्पर्य्याय:। मङ्क्षुणम् २। इति त्रिकाण्डशेष:॥

जङ्घाल:, त्रि, (प्रशस्ता वेगवतीत्यर्थ: जङ्घास्त्यस्येति। जङ्घा+"सिध्मादिभ्यश्च।"५।२।९७। इति लच्। जङ्घावत्त्वेनैव वेगस्य जननात्तथात्वम्।) अतिवेगवान्। तत्पर्य्याय:। अविव:२। इत्यमर:। २।८।७३॥ (यथा, काशीखण्डे गङ्गामाहात्म्ये। २६।६४।
"आद्यवीच्या जगन्माता जघ्ने जङ्घाल-
वीचिका॥")

हरिण:। एण:। कुरङ्ग:। ऋष्य:। एषत:। न्यङ्कु:। शम्बर:। राजीव:। सृङ्की। (यथा,—
"एणहरिणश्यैकुरङ्गकराजतृतमालशम्बर-
श्यैराजतचारुष्करङ्गमाल्काप्रभृतयो
जङ्घाला मृगा: कषाया मधुरा लघवो वातपित्त-
हरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च॥" इति सुश्रुते सूत्रस्थाने ४६ अध्याय:॥)
एषां मांसगुणा:।
"जङ्घाला: प्रायश: सर्व्वे पित्तश्लेष्महरा: स्मृता:।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धना:॥"
इति भावप्रकाश:॥

जङ्घाशूलं, क्ली, (जङ्घाया: शूलं रोगविशेष:।) जङ्घावेदना। तस्यौषधं यथा,—
"हरीतकी शृङ्गवेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाशूलमरुत्सक्तं सप्तरात्रे तु नाशयेत्॥"
इति गारुड़े १८७ अध्याय:॥

जञ, युधि। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) जञति। युधि योधने। इति दुर्गादास:॥

जञ, द्र युधि। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) द्र, जञ्ज्रति। युधि योधने। इति दुर्गादास:।

जञ्जपूक:, त्रि, (पुन:पुनरतिशयेन वा जपतीति। जप+यङ्+"यजजपदशां यङ:।"३।२।१६६। इति ऊक:।) पुन:पुनर्जपकर्त्ता। इति मुग्धबोधम्॥

जट, संहतौ। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) जटति केशा: परस्परं सम: स्याविल्यर्थ:। इति दुर्गादास:॥

जटा, स्त्री, (जटति परस्परं संलग्ना भवतीति। जट्+अच्। यद्वा, जायते प्रादुर्भवतीति। जन्+"जनेष्टन् लोपश्च।" उणां। ५।३०। इति टन् अन्यलोपश्च।) व्रतिनां शिखा। जयकच:। तत्पर्य्याय:। शुटा २। इत्यमर:॥ अटि:३ जटी४ जूट:५ लुटकम्६ शुटम्७ कौटीरम् ८ जूटकम् ९ हस्तम् १०। इति शब्दरत्नावली॥ (यथा, महाभारते।३।११२।२।
"नीला: प्रसन्नाश्च जटा: सुगन्धा
हिरण्यरज्जुग्रथिता: सुदीर्घा:॥")
मूलम्। यथा,—
"यदि न समुहरन्ति यतयो हृदि कामजटा
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणि:॥"
इति श्रीभागवते श्रुतिस्तवे ८७ अध्याय:॥
मांसी। इति मेदिनी। टे, १५॥ रुद्रजटा। (यथा, सुश्रुते कल्पस्थाने ७ अध्याये।
"कालेयकं पद्मकञ्च मधुकं नागरं जटाम्॥")
शतावरी। इति राजनिर्घण्ट:॥ कपिकच्छु:। इति रत्नमाला॥ (वेदपाठविशेष:। यथा,—
"जटा माला शिखा रेखा ध्वजो दण्डो रथो घन:।
अष्टौ विकृतय: प्रोक्ता: क्रमपूर्व्वं महर्षिभि:॥")

जटाजूट:, पुं, (जटानां जूट: समूह:।) जटासमूह:। यथा, महानाटके।
"जटाजूटग्रन्थिं दृढ़यति रघूणां परिवृढ़:॥"
शिवजटा च॥

जटाज्वाल:, पुं, (जटेव ज्वाला यस्य।) प्रदीप:। इति हारावली। २४॥

जटाटङ्क:, पुं, (जटा टङ्क इवास्य।) शिव:। इति त्रिकाण्डशेष:॥

जटाटीर:, पुं, (जटामटतीति। अट्+बाहुलकादीरन्।) शिव:। इति त्रिकाण्डशेष:॥

जटाधर:, पुं, (धरतीति। धृ+अच्। जटाया धर:।) शिव:। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। १२६।
"त्रिनेत्रश्च विषज्ञाङ्गो मणिविद्धो जटाधर:॥")
वृक्षभेद:। इति त्रिकाण्डशेष:॥ पर्य्यायनानार्थकोषाख्याभिधानतन्त्रकारश्च॥ (स्कन्दस्यानुचरविशेष:। यथा, महाभारते। ६। ४५। ५६।
"परिश्रुत: कोकनद: शङ्खकेशी जटाधर:॥"
देशविशेष:। स तु दाक्षिणात्यप्रदेश:। यथा, बृहत्संहितायाम्। १४। १३।
"अथ दक्षिणेन।" इत्युक्त्वा,—
"कौशद्वीपजटाधरकावेर्यो रिष्यमलकश्च॥"
इत्युक्तवान्॥

जटाधारिण्, त्रि। यथा, रामायणे।२।८६।२५।
"जटाधरौ तौ हमचीरवाससौ
महाबलौ कुञ्जरयूथपोपमौ॥")

जटामांसी, स्त्री, (जटां जटाकृतिं मन्यते इति। मन+"मनेर्दीर्घश्च।" उणां।३।६४। इति सो दीर्घश्च।) सुगन्धिद्रव्यविशेष:। तत्पर्य्याय:। नलदम् २ बह्निनी २ पेषी ४ मांसी५ क्रव्यजटा६ जटी ७ किरातिनी ८ जटिला ९ लोमशा १० तपस्विनी ११। इति रत्नमाला॥ भूतजटा १२। इति भावप्रकाश:॥ पेषी १३ क्रव्यादि १४ पिशिता १५ पिशी १६ पेशिनी १७ जटा १८ हिंस्रा १९ मांसिनी २० जटाला २१ नलदा २२ मेषी २३ तामसी २४ चक्रवर्त्तिनी २५ माता २६ अग्नतजटा २७ अनन्ता २८ जटावती २९ मृगभक्षा ३० जटामांसी ३१ मिंसी ३२ मिसि: ३३ मिसी ३४ लोमिका ३५ मिषि: ३६। इति शब्दरत्नावली॥ अस्या गुणा:। सुरभित्वम्। कषायत्वम्। कटुत्वम्। शीतलत्वम्। कफभूतदाहपित्तनाशित्वम्। कान्तिमोदकारित्वञ्च। इति राजनिर्घण्ट:॥ तिक्तत्वम्। मेध्यत्वम्। बलप्रदत्वम्। स्वादुत्वम्। त्रिदोषास्रवीसर्पकुष्ठनाशित्वञ्च। इति भावप्रकाश:॥ अनुलेपनेन ज्वररुक्षतानाशित्वम्। इति राजवल्लभ:॥

जटायु:, पुं, (जटां याति प्राप्नोतीति। या+मृगय्वादित्वात् कु:। सान्तपक्षे जटं संहतमायुर्यस्य।) खगामखावपक्षी। स तु अरुणपुत्र: सम्पातेर्भ्रातु: दशरथराजसख: सीताहरणसमये रावणेन हत:। इति रामायणम्॥ (यथा, च महाभारते। ३।२७८। १—७।
"सखा दशरथस्यासीत् जटायुरमितौजस:।
अरुणो महावीर: सम्पातिर्यस्य सोदर:॥
स ददर्श्व तदा सीतां रावणाङ्कगतां सुभाम्।
सङ्क्रोधोऽभ्रवत् पक्षी रावणं राक्षसेश्वरम्॥
अथैनमब्रवीद्दृष्ट्वा सुघ सुघ मैथिलीम्।
प्रियमार्य्ये मयि कथं हरिष्यसि निशाचर!॥
नहि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम्।
उत्क्रोश राक्षसेन्द्रं तं चक्रुस्ते नखरैर्भुजम्॥"
"स वध्यमानो गृध्रेण रामप्रियहितैषिणा।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिण:॥
निहत्य गृध्रराजं स भिन्नाभ्रशिखरोपमम्।
ऊर्द्धबाहुरुमे सीतां गृहीत्वाङ्के राक्षस:॥")
गुग्गुलु। इति मेदिनी। ये, ८४॥
("गुग्गुलुर्देवधूपश्च जटायु: कौशिक: पुर:।
कुम्भीलूखलकं क्लीवे महिषाक्ष: पलङ्कष:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"जटायु: कालनिर्य्यास: कौशिको गुग्गुलु: पुर:॥"
इति वैद्यकरत्नमालायाम्॥)
सान्तोऽप्ययम्। इति द्विरूपकोष:॥ (यथा, महाभारते। १। ६६। ७०।
"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम्॥")

जटाल:, पुं, (जटाऽस्यास्येति। जटा+"सिध्मादिभ्यश्च।" ५।२।९७। इति लच्।) कर्ज्जूर:। वट:। शुष्ककः। गुग्गुलु:। इति राजनिर्घण्ट:। जटायुक्ते, त्रि। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १८०। २२।
"चीरिणं शिखिनञ्चान्ये जटालोर्द्धशिरोरुहा:॥")

जटाला, स्त्री, (जटाऽस्त्यस्या इति। जटा+"विभाषा-दिभ्यश्च। ५।२।९७। इति अच्। ततो ऽजादित्वात् टाप्।) जटामांसी। इति राज-निर्घण्टः॥ (विवरणमस्या जटामांसीशब्दे ज्ञातव्यम्॥)

जटावती, स्त्री, (जटा विद्यतेऽस्याः। जटा+मतुप्। मस्य वः स्त्रियां ङीप् च।) जटामांसी। इति राजनिर्घण्टः॥

जटावल्ली, स्त्री, (जटेव वल्ली।) वटजटा। जटा-मांसी। इति राजनिर्घण्टः॥

जटिः, स्त्री, (जटति परस्परं संलग्ना भवतीति। जट+"सर्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) जटाहस्तः। इति शब्दरत्नावली॥ जटा। सन्न्यासिः। इत्युणादिकोषः॥

जटिल, पुं, (जटा अस्त्यस्येति। जटा+"जोमादि-भ्यामादिपिच्छादिभ्यः शनेलचः।" ५। २।१००। इति इलच्।) शिवः। इति शब्दचन्द्रिका॥ (ब्रह्मचारी। यथा, मनुः। ३। १५१।

"जटिलं चानधीयानं दुर्बलं कितवन्तथा॥"

"जटिलो ब्रह्मचारी।" इति तट्टीकायां कुल्लूक-भट्टः॥) जटायुक्ते, त्रि। इति मेदिनी। ले, ६२। (यथा, कुमारे। ५। ३०।

"विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा॥")

जटिला, स्त्री, (जटिल+अजादित्वात् टाप्।) जटामांसी। इत्यमरः। २। ४। १३४॥ ("जटामांसी भूतजटा जटिला च तपस्विनी॥" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥) पिण्डखजूरी। इति मेदिनी॥ वचा। उशवा। इति रत्नमाला। दमनकवृक्षः। इति राजनिर्घण्टः॥ राक्षिकाचञ्चुः। यथा, गौरगणोद्देशे।

"जटिला राक्षिकाचञ्चुः कार्यतोऽविग्रदेव तम्॥" (ऋषिपत्नीविशेषः। यथा, महाभारते। १।१६७।१३।

"श्रूयते हि पुराऽपि जटिला नाम गौतमी।
अरुन्धतीमधासितवती सप्त धर्मेष्वतामरा॥")

जटी, स्त्री, (जटि+"शार्ङ्गादिकारादिति।" ४।१।४५। ङीष्यस्य वार्त्तिकोक्त्या वा ङीष्।) प्रकटीवृक्षः। इति शब्दरत्नावली॥ जटामांसी। इति रत्नमाला॥

जटी [न्], पुं, (जटा अस्त्यस्येति। जटा+इनिः।) शिवः। इत्यमरः। २। ४। ३२॥ (यथा,— "शिखी जटी पर्णकरी च पर्णटी च स्त्रियामपि।"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥ खाण्डवदाहचरविशेषः। यथा, महाभारते। ६। ४५। ५८।

"ज्वालाजिह्वः करालश्च घृतकेशो जटी हरिः॥") जटाविशिष्टे, त्रि। (यथा, महाभारते। ७।५०।३२

"ततो हरो जटी स्थाणुर्निग्राचरपतिः शिवः॥")

जटुलः, पुं, (जटति देहे संहतो भवतीति। जट संहतौ+बाहुलकादुलच्।) जतुकम्। जवड़ इति भाषा॥ तत्पर्य्यायः। काचलः २ पिण्डुः ३। इत्यमरः। २। ६। ४८॥

जठरं, त्रि, (जटति एकत्रीभवतीति। जट+ बाहुलकादरः ठान्तादेशश्च। यद्वा, जनयते इति। जन+"जनेररुच्च।" उणां ५। ३८। इति अरः ठश्चान्तादेशः।) बहुम्। कठिनम्। इति शब्दरत्नावली॥ (यथा, ज्ञानसङ्कलिनीतन्त्रे। ४। १३।

"इदानीमस्माकं जठरकमठपृष्ठकठिना
मनोवृत्तिस्तत् किं वसनिविसुखेव त्वयसि॥")

जठरः, पुं क्ली, (जायते गर्भो मलं वा अस्मिन्निति। जन+"जनेररुच्च।" उणां। ५। ३८। इति अरः ठश्चान्तादेशः।) उदरम्। इति मेदिनी॥ (यथा, हितोपदेशे। २। ४४।

"पृष्ठतः सेवयेद्धर्मं जठरेण हुताशनम्।
स्वामिनं सर्वभावेन परलोकमभाययां॥"

देशविशेषे, पुं। स तु कूर्म्मविभागे आग्नेय्यां दिशि वर्त्तते। यथा, हरिवंशे। १४। ८।

"आग्नेय्यां दिशि कोशलकलिङ्गवङ्गो
प्रवङ्गजठराङ्गाः॥"

तथाच महाभारते। ६। ९। ४२।

"अत ऊर्द्धं जनपदान् निबोध गदतो मम।"

इत्युपक्रम्य,—

"जठराः कुक्कुराश्चैव सदग्रार्णाश्च भारत!॥"

इत्युक्तवान्॥ पर्व्वतविशेषः। यथा, भागवते। ५। १६। २७। "जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्र-सुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः॥" उदररोगविशेषः।

"राजी जन्म बलीगाद्यो जठरे जठरेऽथ तु।"

इति निदानस्थाने द्वादशेऽध्याये वाभटेनोक्तम्। एतत्सम्प्राप्तिर्यथा, सुश्रुते निदानस्थाने ७ अध्याये।

"कोष्ठाङ्गवैगुण्यवदन्नसारो
निःसृत्य दुष्टोऽनिलवेगशुद्धः।
स्वयं समुन्नम्य गुदैः समन्ता-
दिवर्द्धमानो जठरं करोति॥")

जठरगुद, पुं, (गुदतीति। गुद्+क्विप्। ततः षष्ठीतत्पुरुषः। एतत्सेवनेनोदरभङ्गादेरस्य तथात्वम्।) आरग्वधवृक्षः। इति शब्दचन्द्रिका॥

जठरामयः, पुं, (जठरस्य आमयो रोगः।) जलोदररोगः। इति राजनिर्घण्टः॥ (अतीसाररोगश्च। तस्य चिकित्सा यथा,—

"कपित्थमर्द्धं जीर्णा तु सक्षौद्रा चौद्गरं करम्।
षट्पलं मधुयुक्तं वा सुखते जठरामयात्॥"

इति चरके चिकित्सास्थाने दशमेऽध्याये॥)

जड़, क्ली, (जलति लोकान् जीवयतीति। जल+ अच्। उकारयोरेत्वात् लस्य डत्वम्।) जलम्। इत्यमरटीकायां रायमुकुटः॥ (जलति घनी-भवतीति।) सीसकम्। इति राजनिर्घण्टः॥ (अचेतनपदार्थानां स्वरूपम्। यदुक्तं प्रश्न-टीकायाम्। ६। १२७।

"अचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत्॥")

जड़ः, त्रि, (जलति बुद्धिग्रक्तिमाच्छादयतीति। जल आच्छादने+अच्।) हिमयुक्तः। (शीतलः। यथा, रघौ। ३। ६८।

"परान्भृशं हर्षजडेन मानिना
तदीयमङ्गं कुलिशव्रणाङ्कितम्॥"

"हर्षजडेन हर्षशिथिरेण।" इति तट्टीकायां मल्लिनाथः॥) मूकः। (यथा, मनौ। २।११०।

"नाप्टः कस्यचिदन्नयात् न चाप्यायेन पृच्छतः।
जानन्नपि हि मेधावी जड़वल्लोक आचरेत्॥"

बधिरः। यथा, तत्रैव। ६। २०१।

"उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः॥"

तथा तत्रैव। ८। ३६३।

"अन्धो जड़ः पीठसर्पी वामना खविरश्च यः॥"

"अन्धो बधिरः पङ्गुः सम्पूर्णसप्तविवरः।" इति तट्टीकायां कुल्लूकभट्टः॥) अप्रज्ञः। इति मेदिनी। डे, १४॥ (यथा, विक्रमोर्व्वश्याम् १ अङ्के।

"अस्राः सर्गविधौ प्रजापतिरभूवन्नो तु कान्तिप्रदः
शृङ्गारैकरसः स्वयं तु मदनो मासो तु पुष्पाकरः।
वेदाभ्यासजडः कथं तु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥")

निष्पन्नः। यथा, रघौ। २। ४२।

"जड़ीकृतज्याकठिनत्वचेन
वर्मं ससज्जेव बृहत्पृषत्कि॥"

मोहितः। यथा, तत्रैव। ८।७५। [अमन्त्रितः अथ तं वचनाय दीक्षितः प्रतिपादाद् दुहरा-मभिवन्द्यचरं विजज्ञिवान् इति ग्रिव्वेव जिज्ञासयोदयत्॥")

जड़क्रिय, त्रि, (जड़श्च मोहितश्चेव क्रिया कार्य्यं यस्य।) दीर्घसूत्री। चिरक्रियः। इति हेमा-द्रिधृतः॥

जड़ता, स्त्री, (जड़स्य भावः। जड़+भावे तल्।) आधिक्यम्। तत्पर्य्यायः। स्तैमित्यम्२ शीतलत्वम्३ अपाटवम्४। इति राजनिर्घण्टः॥ (यथा, रघुः। ९। ४६।

"अनयद्दासनरज्जुपरिग्रहे
सुजनतां जड़तामवलाजनः॥"

इयं हि व्यभिचारिभावविशेषः। अस्या लक्षणं यथा, साहित्यदर्पणे। ३। १४४।

"अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तस्य॥")

विरहदुःखेन जीवनमात्रस्थितिः। इति रस-मञ्जरी॥

जड़ा, स्त्री, (जड़यति ततुकरोतीति जिजनात् अच् ततष्टाप्।) भूम्यामलकी। इत्यमरः॥ भूम्यामलकी। इति रत्नमाला॥

जड़िमा, [न्] पुं, (जड़स्य भावः। "वर्णदृढ़ादिभ्यः ष्यञ् च।" ५। १। १२३। इति इमनिच्।) जड़ता। तस्य लक्षणं यथा,—

"इष्टानिष्टापरिज्ञानं यत्र प्रत्येकमुत्तरम्।

दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते ॥"
इत्युज्ज्वलनीलमणिः ॥

जड़ुलः, पुं, (जटुलः पृषोदरादित्वात् टस्य डत्वम्।) देहस्थितिलकः। इति हेमचन्द्रः ॥

जतु, क्ली, (जायते वृक्षादिभ्य इति। जन+"पलिपाटिनमिमनिजनामिति।" उणां १। १६। इति उः तोऽन्तादेशश्च।) वृक्षनिर्य्यासविशेषः। जौ इति ला इति च भाषा ॥ तत्पर्य्यायः। राक्षा २ लाक्षा ३ यावः ४ अलक्तः ५ द्रुमामयः ६। इत्यमरः ।६।२।१२५॥ रक्षा ७। इति रभसः ॥ कीटजा ८ क्रिमिजा ९ जतुका १० जन्तुका ११ गवाधिका १२। इति रत्नमाला ॥ जतुकम्१३ यावकः१४ अलक्तकः१५ रक्तः १६। इति शब्दरत्नावली ॥ यलङ्क्षा १७ लमिः १८ वरवर्णिनी १९। इति जटाधरः ॥ (यथा, महाभारते। १। १४७। १३।

"जिघ्रन् सोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्॥")

जतुकं, क्ली, (जतु इव कायतीति। कै+कः।) हिङ्गु। (जतु एव। स्वार्थे कन्।) लाक्षा। इति मेदिनी। के, ६१ ॥

जतुका, स्त्री, (जतु इव आकृत्या कायतीति। कै+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) जनीनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः ॥ चर्म्मचटिका। इति शब्दरत्नावली ॥ (यथा, वैद्यकचक्रपाणिसंग्रहेऽपस्काराधिकारे।

"जतुकाशुक्लता तद्वद्गन्धैर्वा वस्त्ररोमभिः।
अपस्कारहरो लेपो व्रणविड्वार्थशुग्भिः॥")

पर्णटी। इति भावप्रकाशः ॥ लताविशेषः। सा तु मालवे प्रसिद्धा। तस्याः पर्य्यायाः। जतुकारी२ जगनी३ चक्रवर्त्तिनी४ तिर्य्यक्फला५ निशान्धा६ बहुपुत्री७ सुपुत्रिका८ राजवृक्षा९ जनेष्टा१० कपिकच्छुफलोपमा११ रङ्गनी१२ क्षुद्रवल्ली१३ भ्रमरी१४ क्षुद्रवल्लिका१५ विष्णुलिका१६ क्षुद्रवृक्षा१७ ग्रन्थिपर्णा१८ सुवर्चिका१९ तरुवल्ली२० दीर्घफला२१। अस्या गुणाः। स्निग्धित्वम्। तिक्तत्वम्। रक्तपित्तकफदाहक्षयाविषनाशित्वम्। रुचिकारित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः ॥ जन्तुकापि पाठः निशान्धाक्षुद्रवृक्षयोरित्यत्र क्रमेण निशाढ्या वृक्षवृद्धा च पाठः ॥ (लाक्षा। तत्पर्य्याया यथा,—

"कीटजा क्रिमिजा लाक्षा जतुका च गवाधिका॥"
इति वैद्यकरत्नमालायाम् ॥)

जतुकारी, स्त्री, (जतु करोतीति। जतु+कृ+"कर्म्मण्यण्।" ३। २। १। इत्यण् ततः स्त्रियां ङीष्।) जतुकाशता। इति राजनिर्घण्टः ॥ (गुणादयोऽस्या जतुकाशब्दे व्याख्याताः॥)

जतुकृत्, स्त्री, (जतु करोति उत्पादयतीति। कृ+क्विप्। जतोः कृदिति वा।) जनीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १५३ ॥ (अस्याः पर्य्याया यथा,—

"पर्णटी रङ्गना लाक्षा जतुका जगनी जनी।
जतुकृल्लाक्षिसंज्ञार्हा जतुकचक्रवर्त्तिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

जतुक्षया, स्त्री, (जतु इव क्षया।) पर्पटी। इति भावप्रकाशः ॥

जतुनी, स्त्री, (जतु इव नयति जत्वाकारेण प्रापयति संश्लिष्टद्रव्यमिति। नी+क्विप्। अस्याः संश्लेषात् द्रव्यस्य जतुवद्रूपत्वात्तथात्वम्।) चर्म्मचटिका। इति त्रिकाण्डशेषः ॥

जतुपुत्रकः, पुं, (जतुनिर्म्मितः पुत्र इव। इवार्थे कन्।) प्राणकगुटिका। नयः। इति त्रिकाण्डशेषः ॥

जतुमणिः, पुं, क्षुद्ररोगविशेषः। (अड़ुल इति भाषा ॥) तस्य निदानं यथा,—

"समस्तसन्निपातजं मस्तकं कपरक्तजम्।
सहजं लक्ष्म चैकेषां लक्ष्मो जतुमणिश्च सः ॥"
इति माधवकरः ॥

तच्चिकित्सा यथा—

"चर्म्मकीलं जतुमणिं मग्नकान् तिलकालकान्।
उत्तुल्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

जतुरसः, पुं, (जतुनो रसः।) अलक्तकः। इति राजनिर्घण्टः ॥ (विवृतिरस्यालक्तकशब्दे ज्ञातव्या ॥)

जतूका, स्त्री, (जतुका निपातनात् दीर्घः।) जनीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १५३ ॥ चर्म्मचटी। इति शब्दरत्नावली ॥

जत्रु, क्ली, (जायते बाहुरस्मात्। जन्+"अन्यादयश्च।" उणां ४। १०२। इति त्रुर्नकारस्य तकारश्च।) स्कन्धसन्धिः। इत्यमरः। २। ६। ७८॥ गलरा इति भाषा ॥ (यथा, महाभारते। ३। १७। २२।

"तैः स विद्धो महाबाहुः प्रद्युम्नः समरे स्थितः।
जत्रुदेशे भृशं वीरो बभासीद्रथे तदा ॥")

जत्वर्कं, क्ली, (जतु एव। स्वार्थे कन्।) जतु। इति शब्दरत्नावली ॥

जत्वभ्रकं, क्ली, (जतुरूपमभ्रकम्।) गिरिजातु। इति राजनिर्घण्टः ॥

जन, ईं म य ड जनौ। इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट्।) ईं, जातः। म, जनयति। य ड, जायते जन्यते। जनिर्ज्ञम। प्रादुर्भावे इति प्राचः। प्रादुर्भावः स्फुटीभावः। प्राकाश्ये प्रादुरविः स्यादित्यमरः। बीजादङ्कुरो जायते पत्रकाण्डादिभेदेन प्रकाश्यते इत्यर्थः। प्रादुर्भावोऽसदुत्पत्तिरिति केचित्। घटो जायते। इति दुर्गादासः ॥

जन, म लि र जनौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) म, जनयति। लि, जज्ञिः। रवैदिकः। इति दुर्गादासः ॥

जनः, पुं, (जायते इति। जन+अच्।) लोकः। (यथा, महाभारते। १। १४६। ६।

"अथ प्रवाते तुमुले निम्नि सुप्ते जने तथा।
तदुपादीपयत् भीमः शेते यत्र पुरोचनः ॥")

महर्लोकादूर्द्ध्वलोकः। मामरः। इति मेदिनी। ने, ६ ॥ (असुरविशेषः। जनार्द्दन इति शब्ददर्शनात् ॥)

जनकः, पुं, (जनयतीति। जन+ण्वुच+ण्वुल्।) पिता। राजभेदः। स तु मिथिलाधिपतिः। इति मेदिनी। के, ६० ॥ इक्ष्वाकुराजपुत्रो निमिर्वंशश्रेष्ठं त्यक्त्वा यज्ञं ततवान् वशिष्ठस्तद्यज्ञस्थानमागत्य राज्ञानं आकारयामास राजा तदा निद्रित आसीत्। मुनिस्तु क्रोधात् त्वं विदेहो भव इत्युक्त्वा तमभिशशाप। ततः,—

"दृष्ट्वा विदेहं राजानस्तदयः सर्व्व एव ते।
तच्च ते याजयामासुर्यावद्दीर्घां मनौधिकः॥
नरेन्द्रस्यापि तं देहमरण्यमृषिपुङ्गवाः।
वसिष्ठोल्लेख गन्धेन पूज्यमानं सुदुर्मुदुः॥
ऋषयोऽपि महात्मानो निमिदेहं ममन्थिरे।
अरणिन्तस्य देहात्तु मन्थावत्यापि चक्रिरे॥
मन्थहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा।
अरण्यां मथ्यमानायां प्रादुर्भूतो यतश्च सः॥
अतो मिथिरिति ख्यातो जनकाज्जनकोऽभवत्।
विदेहत्वाभवद्यस्माद्विदेहा महात्मा स महानृपः॥
तस्माद्विदेहाः प्रोच्यन्ते सर्व्वे तद्वंशजा नृपाः।
एवं विदेहराजस्तु पूर्व्वको जनकोऽभवत्॥
मिथिर्नाम महावीर्य्यो येन सा मिथिलाभवत्॥"
इति रामायणम् ॥

(ऋषिविशेषः। स तु वैद्यसन्देहभञ्जनग्रन्थस्य प्रणेता। यथा, ब्रह्मवैवर्त्ते। १। १६। १६।

"चकार जनको योगी वैद्यसन्देहभञ्जनम्।"

शम्बरासुरस्य पुत्रविशेषः। यथा, हरिवंशे। १६१। ४४।

"श्रुत्वा तु शम्बराद्यानं सुतास्ते शम्बरस्य ह।
सन्नद्धा निर्य्ययुर्हृष्टाः प्रद्युम्नवधकाम्यया॥"
इत्युपक्रम्याह।
"सेनस्कन्धोऽतिसेनश्च सेनको जनकस्तथा॥")
उत्पादके, त्रि॥ (यथा, ब्रह्मवैवर्त्ते। १। १६। २७।

"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः॥")

जनकतनया, स्त्री, (जनकस्य विदेहनृपतेस्तनया।) सीता। इति रामायणम् ॥ (यथा, मेघदूते। १।

"यच्चन्द्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥")

जनकनन्दिनी, स्त्री, (जनकस्य नन्दिनी।) सीता। इति रामायणम् ॥

जनकसुता, स्त्री, (जनकस्य सुता।) सीता। इति रामायणम् ॥

जनकात्मजा, स्त्री, (जनकस्य आत्मजा।) सीता। इति शब्दरत्नावली ॥ (यथाह कश्चित्।

"युग्मतृप्तते खञ्जनगञ्जनाक्षि!
शिरो मदीयं यदि यातु यातु।
जूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि॥")

जनकारी, [नृ], पुं, (जनान् किरति आच्छादयति स्ववर्णेनेति। कृ आच्छादने+क्विप्।) अलक्तकः। इति राजनिर्घण्टः ॥

जनङ्गमः, पुं. (जनेभ्यो गच्छतीति। "गमश्च।" ३। २। ४३। खच् सुमागमश्च।) चाण्डालः। इत्यमरः। २।१०।१६॥ (यथा, माघे।१५।३५।
"अवधीज्जनङ्गम इवैष
यदि हृतदृष्टो दृशं ननु।
स्वर्गमशुचिवपुरर्हति न
प्रानमाननान्तु नितरां नृपोचिताम्॥")

जनता, स्त्री, (जनानां समूहः। जन+"ग्राम-जनबन्धुसहायस्तल्।" ४। २। ४२। इति तल्।) जनसमूहः। इत्यमरः। २। २। ४२॥ (यथा, रघौ। ११। ८२।
"तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनात्यये
पार्व्वणौ शशिदिवाकराविव॥"*॥
जनस्य भावः।) जनत्वञ्च॥

जननं, क्ली, (जन्यतेऽस्मिन्निति। जन+अधिकरणे ल्युट्।) वंशः। (जन+भावे ल्युट्।) जन्म। इति मेदिनी। ने, ६६॥ (यथा, महानिर्व्वाण-तन्त्रे। ३। ५०।
"जननमरणभीतिर्भ्रंश सच्चित्सुखरूपं
सकलसुखनबीजं ब्रह्मचैतन्यमीड़े॥"
उत्पत्तिः। यथा, कुमारे। १। ४२।
"अन्योन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः॥"
पुं, जनयति उत्पादयति जीवानिति। जन+णिच्+कर्त्तरि ल्युः। विष्णुः। यथा, महाभारते। १३। १४६। ११८।
"जननो जनजन्मादिर्भीमो भीमपराक्रमः॥"
"जन्मनः जनयतः जननः।" इति तट्टीकायाम्॥
जनयतीति। जनि+ल्युः। उत्पादके, त्रि। यथा, महाभारते। ३। ३६। ३५।
"एकत्र चिरवासो हि न प्रीतिजननो भवेत्॥")

जननिः, स्त्री, (जनयति ब्राह्मसुखमिति। जन+णिच्+बाहुलकात् अनिः।) जनीनामगन्ध-द्रव्यम्। इति शब्दरत्नावली।

जननी, स्त्री, (जनयतीति। जनि+बाहुलकादनिः। ऋदिकारादिति वा ङीष्। यद्वा, ल्युट्यल्युटो बहुलमिति ल्युट् टित्वात् ङीप्।) माता। (यथा, पद्मतन्त्रे। १। ३६।
"निरतिशयं गरिमाणं
तेन जनन्याः स्मरन्ति विद्वांसः।
यत् कमपि वहति गर्भं
महतामपि यो गुरुर्भवति॥")
दया। इति मेदिनी। ने, ६६॥ जनीनाम-गन्धद्रव्यम्। (प्रयोगा यथा,—
"षण्टी रक्षना क्षणा जतुका जननी जनी।
जतुकृष्णाग्निसंयुक्ता जतुकृत्यकरर्त्तिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
चर्म्मचटी। इति शब्दरत्नावली। यूथिका। इति शब्दचन्द्रिका। कटुका। मञ्जिष्ठा। अलक्तकः। जटामांसी। इति राजनिर्घण्टः॥

जनपदः, पुं, (जनस्य लोकस्य पदं आश्रयस्थानं यत्र। जनः पदं वस्तु यस्येति वा।) देशः। (यथा, चाणक्यशतके। ३१।
"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥"
जनपदनामानि महाभारते भीष्मपर्व्वणि द्वितीयाध्याये कथितानि अतस्तत्रैव विशेषतो द्रष्टव्यानि॥)
जनः। इति मेदिनी। दे, ४८॥

जनप्रवादः, पुं, (जनेषु लोकेषु प्रवादोऽपवादः।) लोकापवादः। तत्पर्य्यायः। कौलीनम् २ विगानम् ३ वचनीयता ४। इति हेमचन्द्रः। ।२।१८४॥ (यथा, महाभारते। २।७२।१६।
"जनप्रवादान् सुबहून् शृण्वन्नपि नराधिपः।
ह्रिया च धर्म्मसंयोगात् पार्थो द्यूतमियात् पुनः॥")

जनप्रियः, पुं, (जनानां प्रियः।) धान्यकम्। शोभाञ्जनवृक्षः। इति राजनिर्घण्टः॥ (लोक-प्रिये, त्रि॥)

जनमेजयः, पुं, (जनान् शत्रुजनान् एजयति प्रतापैः कम्पयतीति। एजृ कम्पने+णिच्+"एजेः खश्।"३।२।२८। इति खश् ततो सुमागमः।) परीक्षितराजपुत्रः। तत्पर्य्यायः। राजर्षिः २ पारीक्षितः ३। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। २। ११। ६।
"पौरजानपदा लोकाश्चक्रुस्तं नृपतिं शिशुम्।
जनमेजयनामानं राजलक्षणसंयुतम्॥"
जन्मेजय इति पाठोऽपि क्वचित् दृश्यते। तन्नि-रुक्तिस्तच्छब्दे द्रष्टव्या॥

अयं हि चतुरश्रीतिवर्षाणि राज्यं कृतवान्। तत्र अश्वमेधादिकं बहुयज्ञं कृत्वा पितृवधा-मर्षात् सर्पसत्रं चकार। यत्रैवासौ जरत्-कारुपुत्रेण आस्तीकेन प्रार्थितः सर्पसत्रात् विरराम ततश्चित्तप्रशमनार्थं भारतादिकं श्रुत-वान्। इत्याख्यानेषु क्रमशः प्रदर्शते। यथा, राजावल्यां १ परिच्छेदे।
"पारीक्षितस्तदा राजा नीतिमानीतिभीतितः।
पृथिवीं पालयामास निवसन् गजसाह्वये।
हत्वा पितृवधामर्षी सर्पैष्टिं मुनिभिः समम्।
नाशयामास सर्पाणां कुलानि कुलनायकः॥
हयमेधशतञ्चक्रे सम्भारैर्बहुविस्तरैः।
ब्रह्महत्याभवत्तत्र यागेऽकालकृते तदा॥
तत् पापमभवत् तस्य दारुणं पृथिवीपतेः।
वैशम्पायनतो वेदव्यासशिष्यात्तपोनिधेः।
श्रुत्वा भारतमाख्यानं ततःपापात् सुक्तिमाप सः।
चतुरश्रीतिवर्षाणि हत्वा राज्यं सुनिर्म्मलम्।
प्रजानीकं सुतं राज्ये संस्थाप्यैव दिवं गतः॥"
सोमश्रवसन्धिमसौ पौरहित्याय कृतवान्।
तत्कथा यथा, महाभारते। १।३।१—२०।
"जनमेजयः पारिक्षितः सह भ्रातृभिः कुरु-क्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरश्चयः श्रुत-सेन उग्रसेनो भीमसेन इति। तेषु तत्सत्र-मुपासीनेष्वागच्छत् सारमेयः। स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीप-मुपागच्छत्। तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति। स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतो-ऽस्मीति। तं माता प्रत्युवाच यत्तं त्वया तत्रा-पराद्धं येनास्यभिहत इति। स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति। तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्त्ता ततः सत्रमुपागच्छदृत्विजं स जनमेजयः सह भ्रातृभिर्दीर्घं सत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति नावे-क्षते हवींषि नावलेढि किमर्थमभिहत इति। न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादय-मभिहतोऽनपकारी तस्मादद्यत्वां भयमाग-मीष्यतीति। जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषसादासीत्। स तस्मिन् सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरो-हितमृत्विरूपमन्विच्छमानः परं यत्नमकरोत् यो मे पापकृत्यां शमयेदिति। स कदाचि-न्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत्। तत्र कश्चिदृषि-रासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्र आस्ते सोमश्रवा नाम। तस्य तं पुत्र-मभिगम्य जनमेजयः पारीक्षितः पौरहित्याय वव्रे। स नमस्कृत्य तत्तपिसुवाच भगवन्नयं तव पुत्रो मम पुरोहितोऽस्तिति। स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय! पुत्रोऽयं मम सर्य्याङ्गातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपो-वीर्य्यसम्भृतो मच्छुक्रपोतवत्यास्तस्याः कुक्षौ जातः। समर्थोऽयं भवतः सर्व्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम्। अस्य त्वेक सुपाशुव्रतं यदेनं कश्चिद्ब्राह्मणः कश्चिदर्थ-मभियाचेत्तं तस्मै यदादेयं यदेतदुत्सहसे ततो नयस्वेनमिति। तेनैवमुक्तो जनमेजयस्तं प्रत्यु-वाच भगवंस्तत्तथा भविष्यतीति॥*॥
अस्य सर्पसत्रविवरणकथा यथा देवीभागवते। २। ११। ४६—६०।
"इति तस्य वचः श्रुत्वा राजा जन्मेजयस्तदा।
नेत्राभ्यामश्रुपातञ्च चकारातीवदुःखितः॥
धिङ्मामस्तु सुदुर्बुद्धेर्वृथामानकरस्य वै।
पिता यस्य गतिं घोरां प्राप्तः पन्नगपीड़ितः॥
यद्यहं मखमारभ्य करोम्यद्यपितिं पितुः।
हत्वा सर्पानसन्दिग्धो दीप्यमाने विभावसौ॥
आहूय मन्त्रिणः सर्व्वान् राजा वचनमब्रवीत्।
कुर्व्वन्तु यज्ञसम्भारं यथार्हं मन्त्रिसत्तमाः!॥
गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः।
कुर्व्वन्तु मण्डपं रम्यं शतस्तम्भं मनोहरम्॥
वेदी यज्ञस्य कर्त्तव्या ममाद्य सचिवाः खलु।
तदङ्गत्वे विधेयो वै सर्पसत्रः सुविस्तरः॥
तच्चकर्त्तु पशुस्तत्र होतोत्तो महामुनिः।
शीघ्रमाहूयतां विप्राः सर्व्वज्ञा वेदपारगाः॥
मन्त्रिणस्तु तदा चक्रुर्भूपवाक्येऽविचक्षणाः।

यज्ञस्य सर्व्वसम्भारं वेदीं यज्ञस्य विस्तृताम् ॥
हवने वर्त्तमाने तु सर्पाणां तक्षको गतः ।
इन्द्रं प्रति भयार्त्तोऽहं त्राहि मामिति चाब्रवीत् ॥
भयभीतं समाश्वास्य स्वासने सन्निवेश्य च ।
ददावभयमत्यर्थं निर्भयो भव पन्नग ! ॥
तमिन्द्रशरणं ज्ञात्वा सुनिर्द्दत्ताभयं तथा ।
उत्तङ्कोऽथयदुद्विग्नः सेन्द्रं क्षत्वा निमन्त्रयम् ॥
स्तुतस्तदा तक्षकेण यायावरकुलोद्भवः ।
आस्तीको नाम धर्म्मात्मा जरत्कारुसुतो मुनिः॥
तत्रागत्य मुनेर्बालस्तुष्टाव जनमेजयम् ।
राजा तमर्घयामास दृष्ट्वा बालं सुपण्डितम् ॥")

जनयित्री, स्त्री, (जनयिट + ङीप् ।) माता । इत्यमरः । २ । ६ । २६ ॥ (यथा, रघुः । १०।७०।

"कैकेय्यास्तनयो ऽन्ये भरतो नाम शीलवान् ।
जनयित्रीमलक्ष्मीकं यः प्रश्रय इव श्रियम् ॥")

जनरवः, पुं, (जनेषु लोकेषु रवः प्रवादः ।) लोकवादः । यथाह लक्ष्मणसेनः ।

"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्यग्रेवर्घान्नां हरति महिमानं जनरवः ॥"

जनलोकः, पुं, (जन एव लोकः ।) महर्लोकोपरिभुवनम् । यथा,—

"अयं स हि महर्लोकः स्वर्लोकात् परमाद्भुतः ।
कल्पायुषो वसन्त्यत्र तपसा धुतकल्मषाः ॥
इत्थं कथां कथयतोर्भगवद्गणयोः प्रिये ! ।
त्वष्टार्द्धेन विमानस्थजनलोकं निनाय तान् ॥
निवसन्त्यमला यत्र मानसा ब्रह्मणः सुताः ।
सनन्दनाद्या योगीन्द्राः सर्व्वे ते ऊर्द्धरेतसः ॥
अन्ये तु योगिनो ये वै त्वखण्डब्रह्मचारिणः ।
सर्व्वद्वन्द्वविनिर्मुक्तास्ते वसन्त्यत्र निर्म्मलाः ॥
महर्लोकः स्थितेरूर्द्धमेककोटिप्रमाणतः ।
कोटिद्वयेतिसंख्यातो जनो भूर्लोकतो जनैः ॥"

इति स्कान्दे काशीखण्डम् ॥

जनवल्लभः, पुं. (जनानां लोकानां वल्लभः प्रियः ।) श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ लोकप्रिये, त्रि ॥

जनवादः, पुं, (जनेषु लोकेषु वादोऽपवादः ।) जनप्रवादः । इति हलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् । ४१६ ।

"भक्तपरवशोऽपि गिरिशे स्नेहमयी त्वमुचितेन
सुभगासि ।
मोघस्तयि जनवादो यदौषधिप्रस्थदुहितेति ॥")

जनश्रुतिः, स्त्री, (जनेभ्यः श्रुतिः श्रवणम् ।) सत्यमसत्यं वा लोकप्रवादः । तत्पर्य्यायः । किंवदन्ती २ । इत्यमरः । १ । ६ । ७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६५ ।

"पुंसां दर्शय सुन्दरि ! सुखेन्द्रमीषत्प्रणामपात्रत्वं ।
जायाजित इति रूढा जनश्रुतिर्मे यशो भवतु ॥")

जनस्थानं, क्ली, (जनस्य स्थानं भूभागः ।) दण्डकारण्यम् । इति जटाधरः ॥ दण्डकारण्यसमीपस्थानविशेषः । यथा । इक्ष्वाकुराजपुत्रो दण्डः शुक्राचार्य्यकन्यामरजां बलाद्गृहीत्वा मैथुनं कृतवान् स मुनिस्तत् श्रुत्वा राजानं शशाप । यथा,—

"सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्म्मेषमाचारो वधं प्राप्नोति दुर्म्मतिः ॥
सर्व्वसत्त्वानि यानीह जङ्गमानि स्थिराणि च ।
सर्व्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति ॥
दण्डस्य विषयो यावत् तावत् सवनमाश्रमम् ।
पांशुभूतमिवाकस्मात् सप्तरात्राद्भविष्यति ॥
इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम् ।
जनं जनपदस्थान्ते स्थीयतामित्यवोचत ॥
सप्ताहाद्दग्धसाङ्गतः स चापि ब्रह्मतेजसा ।
तस्य दण्डस्य विषयो विन्ध्यशैलस्य सानुषु ॥
तदाप्रभृति काकुत्स्थ ! दण्डकारण्यमुच्यते ।
तप्यन्तः स्थिता यत्र तज्जनस्थानमुच्यते ॥"

इति रामायणम् ॥

(अत्र रावणस्य खरदूषणप्रभृतीनि सैन्यान्यासन् । यथा, रामायणे । १ । १ । ४६ ।

"तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥"

"जनस्थानं नाम दण्डकारण्ये रावणबलनिवेशस्थानम् ।" इति तट्टीकायां रामानुजः ॥)

जना, स्त्री, (जननमिति । जन + बाहुलकात् डः ।) उत्पत्तिः । इति सुन्धनोधमः ॥

जनान्तः, पुं, (जनस्य प्रदेशस्य अन्तः ।) देशः । इति धनञ्जयः । सेला इति पारस्यभाषा ॥

जनान्तिकम्, क्ली, अप्रकाशः । इति त्रिकाण्डशेषः ॥ (एतल्लक्षणं यथा, साहित्यदर्पणे ।

"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ॥"

एतल्लक्षणोक्तमप्रकाशकथनम् । नाटके एव अस्य भूरिप्रयोगो दृश्यते ॥ जनस्य अन्तिकम् । जनसमीपञ्च ॥)

जनार्द्दनः, पुं, विष्णुः । इत्यमरः । १ । १ । १६ ॥ तन्नामव्युत्पत्तिर्यथा । "ससुद्रान्तवासिनो जनान्लोकासुरान् अर्द्दितवान् जनार्द्दनः । अर्द्द च वधे अर्द्दक्च गन्धादित्वादनः । किंवा जनैर्लोकैरर्द्दते याच्यते पुरुषार्थानसौ जनार्द्दनः । अर्द्द याचनागतियाचने कर्म्मणि अनट् । किंवा जनं जनः भावे घञ् । जनं जन्म अर्द्दयति हन्ति भक्तस्य मुक्तिदत्वादिति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति हररूपेण संहारकत्वादिति जनार्द्दनः । किंवा जनयति उत्पादयति लोकान् ब्रह्मरूपेण सृष्टिकर्त्तृत्वादिति जनः जनेर्ण्यन्तात् पचाद्यच् । अर्द्दति हन्ति लोकान् हररूपेण संहारकारित्वादिति अर्द्दनः जनश्चासौ अर्द्दनश्चेति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति गच्छति प्राप्नोति रक्षणार्थं पालकत्वादिति जनार्द्दनः ।" इत्यमरटीकायां भरतः ॥ * ॥ गयायां तस्य हस्ते जीवितस्य पिण्डदानविधिर्यथा,—

"जनार्द्दनो भक्तकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यधवान्धेभ्यो सर्व्वेभ्यश्च तिलैर्विना ॥
जीवता दधिसंमिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो ऋते प्रभो !।
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ।
जनार्द्दन ! नमस्तुभ्यं नमस्ते पितृमोचद ! ॥
पितृपात्र नमस्तुभ्यं नमस्ते पितृरूपिणे ।
गयायां पितृरूपेण स्वयमेव जनार्द्दनः ॥
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।
नमस्ते पुण्डरीकाक्ष ! ऋणत्रयविमोचन ! ॥
लक्ष्मीकान्त ! नमस्तेऽस्तु पितृमोक्षप्रदो भव ।
वामजानु च सव्यात्य नत्वा भीमो जनार्द्दनम् ॥
आद्धं सपिण्डकं कृत्वा भ्रातृभिर्बन्धुलोकभाक् ।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतेन च ॥
शिलायां यक्षरूपेण यक्षायक्षात्मना स्थितः ।
लक्ष्मीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला ॥"

इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः ॥ * ॥ ग्रामस्यामशिलाविशेषः । तल्लक्षणं यथा,—

"सशङ्खचक्रोजगदं जनार्द्दनमिहो नमः ।
उपेन्द्रं गदिनं सार्विपद्मगर्भ ! नमोऽस्तु ते ॥"

इति पाद्मे पातालखण्डे १० अध्यायः ॥

"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥"

इति कर्म्मलोचनम् ॥

जनाग्रनः, पुं (जनानग्रति भक्षयतीति । अग्र + ल्युः ।) दक्षः । इति राजनिर्घण्टः ॥

जनाश्रयः, पुं, (जनानां लोकानामाश्रयः ।) मण्डपः । इत्यमरः । २ । २ । ६ ॥

जनिः, स्त्री, (जननमिति । जन + "जनिघसिभ्यामिञ् ।" उणा ४ । १२६ । इति इञ् । जनिवध्योश्चेति वृद्धिनिषेधः ।) उत्पत्तिः । इत्यमरः । १ । ४ । ३० ॥ (यथा, हरिवंशे । २०८ । ४० ।

"वनस्पत्योषधीश्चैव युगपत् प्रतिपद्यसे ।
बालभावाय वसुधा पत्ते पत्ते जनिस्तव ॥"

जायते यस्याम् । जन + आधारे इण् ।) नारी । माता । इति शब्दरत्नावली ॥ (जायते सुखमनयेति । करणे इण् ।) जलीनामगन्धद्रव्यम् । इत्यमरटीकायां रायमुकुटः ॥

जनिका, स्त्री, (जायते वंशो यस्यामिति जनिः । ततः स्वार्थे कन् टाप् च ।) कुषा । इति शब्दरत्नावली ॥ (जनिशब्दार्थः ॥) जननकर्त्री च ॥

जनितं, त्रि, (जन्यते स्मेति । जन + क्विप् + क्तः ।) उत्पादितम् । यथा,—

"सेनाचरी भवदिभाननदानवारि-
वासेन यस्य जनिता सुरभौ रजश्रीः ॥"

इति नैषधम् ॥

(यथा च हरिवंशे । १६१ । ३१ ।

"अन्योऽहं कामयामि त्वां नहि त्वं जनितो मया ।
रूपन्ते सौम्य ! पश्यन्ती सीदामि हृदि दुर्म्मना ॥")

जनुः

जनिता [तृ] पुं, (जनयतीति। जन+णिच्+तृच्। "जनिता मन्त्रे।" ६। ४। ५३। इति निपातनात् णिलोपः।) पिता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १। १२६। ११।

"अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो॥"

क्वचित् लौकिकेऽपि दृश्यते। यथा, पञ्चतन्त्रे। १। ६।

"अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते। जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः॥")

जनित्री, स्त्री, (जनित+स्त्रियां ङीप्।) माता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ३। ४८। २।

"तं ते माता परि योषा जनित्री महः पितुर्दम आसिञ्चदग्रे॥"

यथाच शब्दरत्नावलिविष्णुस्तोत्रे ६।

"या सृष्टे सृष्टजातं सकलमपि सदा सन्निधानेन पुंसो वत्ते या सत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम्। धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि॥")

जनित्रः, पुं, (जायतेऽस्मादिति। जन+"जनिदाप्यसीति।" उणां ४। १०४। इति इत्रन्।) पिता। इत्युणादिकोषः॥

जनित्वा, स्त्री, (जायतेऽस्याः। जन+इत्वन्। अजादित्वात् टाप्।) माता। इत्युणादिकोषः॥

जनिनीलिका, स्त्री, (जन्या उत्पत्त्या नीलिका।) महानीली। इति राजनिर्घण्टः॥ (महानीलीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

जनिमा, [मन्] पुं, (जन्यते इति। जन+"जनिष्टृभ्यामिमनिन्।" उणां ४। १४८। इति इमनिन्।) जन्म। इत्युणादिकोषः॥

जनी, स्त्री (जायते सन्ततिर्यस्यामिति। जन+"जनिवध्योश्चेति।" उणां ४। १२६। इतीण् जनिवध्योश्चेति वृद्धिनिषेधः। ततः स्त्रियां कृदिकारादिति ङीष्।) सीमन्तिनी। वधूः। (जन+भावे इण्।) उत्पत्तिः। (जायते आरोग्यमनया। करणे इण्।) आयुर्वेदीयौषधिः। इति मेदिनी। ने, ६॥ गेयस्य पर्य्यायः। जतूका २ रजनी ३ जतुकृत् ४ चक्रवर्त्तिनी ५ संस्पर्शा ६। इत्यमरः। २। ४। १५३॥ जतूका ७ जनिः ८ जननी ९। इति भरतः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ जतूकाशब्दे द्रष्टव्यौ॥

जनुः [स्] क्ली, (जन्यते इति। जन+"जनेरसुः।" उणां। २। ११६। इति उसुः॥) जन्म। इत्यमरः। १। ४। ३०॥ (यथा, ऋग्वेदे। ४। १७। २०।

"त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्ञियेषु॥")

जनुः, स्त्री, (जन्यते इति। जनोभ्याड् जनी+बाहुलकात् उः।) जन्म। इत्युणादिकोषः॥

जन्तुः

जनूः, स्त्री, (जनु+स्त्रियां ऊङ्।) जन्म। इति शब्दरत्नावली॥

जनेष्टः, पुं, (जनागामिष्टः प्रियः।) सुन्नरट्टक्षः। इति राजनिर्घण्टः॥

जनेष्टा, स्त्री, (जनागामिष्टा प्रिया।) जतुका। वृद्धिनामौषधिः। जातीपुष्पम्। हरिद्रा। इति राजनिर्घण्टः॥

जनोदाहरणं, क्ली, (जनैरुदाह्रियते कथ्यते इति। उत्+आ+हृ+कर्म्मणि ल्युट्।) यशः। इति धनञ्जयः॥

जनौः, पुं, (जनानवति रक्षतीति। अव+।क्विप्।) "क्ष्वोः शूडनुनासिके च।" ६। ४। १९। इति ऊट् ततो वृद्धिः।) जगरक्षकः। इति सुधाबोधम्॥

जन्तुः, पुं, (जायते उद्भवतीति। जन+"कमिमनिजनीति।" उणां। १। ७२। इति तुः।) प्राणी। इत्यमरः। १। ४। ३०॥ (यथा, मनौ। ४। २४०।

"एकः प्रजायते जन्तुरेक एव प्रलीयते। एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम्॥"

मनुष्ये बहुवचनान्तः। इति निघण्टुः॥ यथा, ऋग्वेदे। १। ६४। ५।

"विश्वा गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः॥"

सोमकस्य राज्ञः पुत्रविशेषः। अस्य विवरणसूत्रं यथा, महाभारते। ३। १२७—१२८ अध्याययोः।

"युधिष्ठिरासीन्नृपतिः सोमको नाम धार्म्मिकः। तस्य भार्य्याशतं राजन्! सदृशीनामभूत्तदा॥ स वै यज्ञेन महता तासु पुत्रं महीपतिः। कञ्चिन्नासादयामास कालेन महता क्वपि॥ कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः। जन्तुर्नाम सुतस्तस्मिन् क्षीयते समजायत॥ तं जातं मातरः सर्व्वाः परिवार्य्य समासते। सततं पृच्छतः श्रुत्वा कामभोगान् विशाम्पतेः॥ ततः पिपीलिका जन्तुं कदाचिददशत् स्त्रियाः। स दष्टो वेदनार्त्तं तेन दुःखेन बालकः॥ ततस्ता मातरः सर्व्वाः प्राक्रोशन् भृशदुःखिताः। प्रावार्य्य जन्तुं सहिताः स शब्दस्तुमुलोऽभवत्॥ तमार्त्तनादं सहसा शुश्राव स महीपतिः। अमात्यपर्षदो मध्ये उपविष्टः सहर्त्विजा॥ ततः प्रस्थापयामास किमेतदिति पार्थिवः। तस्मै चाख्यौ यथावृत्तमाचचक्षे सुतं प्रति॥ त्वरमाणः स चोत्थाय सोमकः सह मन्त्रिभिः। प्रविवेशान्तःपुरं पुत्रमाश्वासयदरिन्दमः॥ सान्त्वयित्वा तु तं पुत्रं निष्क्रान्तोऽन्तःपुराद्गृपः। ऋत्विजा सहितो राजन्! सहामात्य उपाविशत्॥

सोमक उवाच।

धिगस्त्विदेकपुत्रत्वमपुत्रत्वं वरं भवेत्। नित्यातङ्कान्वितानां शोक एवैकपुत्रता॥ इदं भार्य्याशतं ब्रह्मन्! परीत्य सदृशं प्रभो!।

जन्तुघ्नः

पुत्रार्थिना मया चोढ़ं न तासां विद्यते प्रजा। एकः कथञ्चिदुत्पन्नः पुत्रो जन्तुरयं मम। यतमानासु सर्व्वासु किन्नु दुःखमतः परम्॥ वयञ्च समतीतं मे सभार्य्यस्य हि चोत्तम!। आसां प्राणाः समायत्ता मम चात्रैकपुत्रके॥ स्यात्तु कर्म्म तथा युक्तं येन पुत्रशतं भवेत्। महता लघुना वापि कर्म्मणा दुष्करेण वा॥

ऋत्विगुवाच।

अस्ति चेदृङ्मं कर्म्म येन पुत्रशतं भवेत्। यदि ग्राह्योऽपि तत् कर्त्तुमथ वक्ष्यामि सोमक!॥

सोमक उवाच।

कार्य्यं वा यदि वाकार्य्यं येन पुत्रशतं भवेत्। ज्ञातमेवेति तद्ब्रूहि भगवन्! ब्रवीतु मे॥

ऋत्विगुवाच।

यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ। ततः पुत्रशतं श्रीमद्भविष्यत्यचिरेण ते॥ वपायां हूयमानायां धूममाघ्राय मातरः। ततस्ताः सुभगावीर्य्यान् जनयिष्यन्ति ते सुतान्। तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः। उत्तरे चास्य सौवर्णे लक्ष्म पार्श्वे भविष्यति॥ ततः स याजयामास सोमकं तेन जन्तुना। मातरस्तु बलात् पुत्रमपाकार्षुः क्षुपान्विताः॥ हा हताः स्मेति वाश्रुन्यस्तोव्रशोकसमाहताः। रुदत्यः करुणञ्चापि गृहीत्वा दक्षिणे करे॥ सद्यं प्राणी गृहीत्वा तु याजकोऽपि स्म कर्षति। क्रुररीत्यामिवार्त्तानां समाहृत्य तु तं सुतम्॥ विग्रस्य चैनं विधिना वपामस्य जुहाव सः। वपायां हूयमानायां गन्धमाघ्राय मातरः॥ आर्त्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन!॥ सर्व्वाश्च गर्भानलभंस्ततस्ताः परमाङ्गनाः॥ ततो दशसु मासेषु सोमकस्य विशाम्पतेः। जज्ञे पुत्रशतं पूर्णं तासु सर्व्वासु भारत!॥ जन्तुर्ज्येष्ठः समभवत् जनित्र्यामेव पार्थिव!। स तासामिष्ट एवासीत् न तथा ते जिताः सुताः॥ तस्य लक्षणमस्यासीत् सौवर्णे पार्श्व उत्तरे। तस्मिंस्तु पुत्रशते चाग्र्यः स बभूव गुणैरपि॥")

जन्तुकन्दुः, पुं, (जन्तुश्चेतनाविशिष्टः कन्दुरिव।) क्षमिशत्रुः। इति राजनिर्घण्टः॥

जन्तुका, स्त्री, (जन्तुभिः कायति प्रकाशते इति। के+कः। अजादित्वात् टाप्।) लाक्षीहिङ्गु। लाक्षा। इति राजनिर्घण्टः॥ (यथा,—

"जन्तुका जतुजन्मा च तथा शावरकन्यकम्।"

इत्युत्तरस्थानेऽष्टादशोऽध्याये वाभटेनोक्तम्॥)

जन्तुघ्नं, क्ली, (जन्तून् क्षमीन् हन्तीति। हन+"आसन्युथकर्णेषु च।" ३। २। ५३। इति टक्।) विड्लवणम्। इति शब्दरत्नावली॥ (यथा, भावप्रकाशस्य मध्यखण्डे चतुर्थभागे योगिकनिर्णयाधिकारे।

"पौरिकाण्यास्यवक्त्रं रजन्यञ्जनकटङ्कटाः॥")

विड्लवणं। इति रत्नमाला॥

जन्तुघ्नः, पुं, (जन्तून् क्षमीन् हन्तीति। हन+टक्।) नीलपूरः। इति राजनिर्घण्टः॥

जन्तुघ्नी, स्त्री, (जन्तुघ्न+टित्त्वात् ङीप्।) विड्-लवणम्। इति राजनिर्घण्टः॥

जन्तुनाशनं, क्ली. (जन्तून् क्रिमीन् नाशयतीति। नश्+णिच्+ल्युः। यद्वा, जन्तूनां नाशनं विनाशो यस्मादिति।) हिङ्गु। इति राजनिर्घण्टः॥

जन्तुपादपः, पुं, (जन्तुप्रधानः पादपः।) कोषाम्र-वृक्षः। इति राजनिर्घण्टः॥

जन्तुफलः, पुं, (जन्तवः कीटाः फले यस्य।) उडुम्बरः। इत्यमरः। २। ४। २२॥ (पर्य्यायोऽस्य यथा,—

"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

जन्तुमारी, स्त्री, (जन्तून् क्रिमीन् मारयतीति। जन्तु+मृ+णिच्+"कर्म्मण्यण्।" ३।२।१। इत्यण्। ततो ङीप्।) निम्बः। इति राजनिर्घण्टः॥

जन्तुला, स्त्री, (जन्तून् कीटान् लाति आददा-तीति। ला+कः।) काश्मलशम्। इति त्रिकाण्ड-शेषः॥

जन्तुहन्त्री, स्त्री, (हन्तीति। हन्+ट्रच् स्त्रियां ङीप्। ततो जन्तूनां हन्त्री गाधिका।) विड्-लवणम्। इति राजनिर्घण्टः॥

जन्म, [न्] क्ली, (जायते इति। जन+"सर्व्वधातुभ्यो मनिन्।" उणा। ४। १४४। इति मनिन्।) उत्पत्तिः। आद्यत्वयसमन्वः। इति तिथि-तत्त्वेऽवस्थाप्रकरणे व्याख्यातम्॥ तथा च।

"अध्वस्तत्वयोगस्य त्वयोगो जनिर्मता।"

इति सामान्यलक्षणाग्रन्थे शिरोमणिधृतोदय-नाचार्य्यकारिका॥ तत्पर्य्यायः। जनुः २ जन-नम् ३ जनिः ४ उद्भवः ५। इत्यमरः।१।४।३०॥ जन्मम् ६ जनी ७। इति भरतः॥ प्रभवः ८ भावः ९ भवः १० सम्भवः ११ जनुः १२ प्रज-ननम् १३। इति शब्दरत्नावली॥ जातिः १४। इति जटाधरः॥ तच्च शुभाशुभकर्म्मणा भवति। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।

"शुभानामशुभानाञ्च कर्म्मणां जन्म जायते। पुण्यक्षेत्रे च सर्व्वत्र नान्यत्र मुक्तये जनाः॥"*॥

तस्य क्रमो यथा,—

"ऋतौ विकाले भवति योनिः कमलवत् सदा। गर्भाशयस्थतः शुक्रं धत्ते रक्तसमन्वितः॥ अन्यच्च काले सुकुला योनिर्भवति योषिताम्। सृष्टं शुक्रमतो योनौ नेति गर्भाशयं मुनेः॥ ऋतावपि च योनिश्चेद्वातपित्तकफार्दिता। भवेत्तदा विशेषेण नैव तस्यां प्रजायते॥ ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम्। तदा सङ्गायुना सृष्टं क्षीरक्तैक्यतां व्रजेत्॥ विशेषं मानवं स्त्रीणां वीज प्राप्य रजस्वथ। सूक्ष्ममात्रोऽपि नरकात् स्वर्गाद्वापि प्रपद्यते॥ विसर्गकाले शुक्रस्य जीवः करणसंस्थितः। भ्रष्ट्वा प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः॥ तच्छुक्रशोणितैक्यस्यैकाहात् कलनं भवेत्। पञ्चरात्रेण कलनं बुद्बुदाकारतां व्रजेत्॥ बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः। द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढा॥ वीजस्थैवाङ्कुराः पेश्याः पञ्चविंशतिरात्रतः। भवन्ति मासमात्रेण पञ्चधा जायते पुनः॥ ग्रीवा शिरश्च कण्ठश्च पृष्ठवंशस्तथोदरम्। पाणिपादं तथा पार्श्वं कटिमात्रं तथैव च॥ मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि। त्रिभिर्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसञ्चयः॥ मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम्। स्थैर्य्यं चतुर्थे चाङ्गानां पञ्चमे ग्रीवितोद्भवः॥ सुखं नासा च कर्णौ च जायन्ते मासि पञ्चमे। षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः॥ दन्तपंक्तिक्षुधा गुह्यं जायन्ते च नखाः पुनः। कर्णयोश्च भवेच्छिद्रं घ्राणास्याभ्यन्तरेण च॥ पायुर्मेढ्रसुपस्थञ्च नाभिश्चैवोपजायते। सप्तमे चाष्टमे चैव लक्षांशस्मृतिमानपि॥ अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः। विभक्तावयवः स्पष्टः पुनर्म्मासाष्टमेन च॥ नवमे दशमे मासि प्रबलैः सूतिमारुतैः। निःसार्य्यते बाल इव जन्तुश्छिद्रेण सत्वरः॥ मनसश्चञ्चलत्वेन यदा गर्भस्थितिर्भवेत्। तदा विस्मृतिरूपेण पापात्मा हि प्रजायते॥ पुटद्वयं समासाद्य यदा वहति मारुतः। तदा प्रस्मरते पापिष्ठान् बन्धान् कर्म्मविनिर्म्मितान्॥ मातरक्तोत्तरा नारी पितुः शुक्रोत्तरो नरः। उभयोर्बीजसामान्ये जायते वै नपुंसकम्॥" अन्यच्च।

"विषमायां तिथौ स्त्रिं कुर्य्याद्वीजन्तु कन्यकाम्। समायां पुरुषं नूनं केचिदाहुर्मनीषिणः॥ वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत्। रक्ताधिक्ये मातृरूपं रेतोऽधिक्ये तु पैतृकम्॥ शुक्रशोणितसङ्घाते वायुना च द्विधा कृते। यमौ स्यातां त्रिधा चेति चतुर्द्धा बहुधापि वा॥ ततो हीनाधिकत्वङ्गकुब्जवामनकादयः। जायन्ते सर्व्वकुब्जाद्या विज्ञाताश्च योनयः॥" तथा च सारकलिकायाम्।

"गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीडने। संमूर्च्छा तस्य जठराज्जायमानस्य देहिनः॥ जायमानः पुरीषाद्यैर्मूत्रशुक्रविलाननः। प्राजापत्येन वातेन पौरुषमार्गसम्बन्धः॥ अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः। क्लेशाग्निभ्रान्तिमायाति जठराज्जातुरातुरः॥ ततस्तं वैष्णवी माया समाक्रन्दति मोहिनी। तया विमोहितात्मासौ ज्ञानभंशमवाप्नुयात्॥ दृष्टमात्रस्य घोरश्च ज्वरः समुपजायते। तेन ज्वरेण महता महामोहः प्रजायते॥ काष्टकैरिव हिमाद्रेः क्रकचैरिव दारितः। पूतिप्रज्ञाग्निपतितो घरण्यां कृमिको यथा॥ दह्यमानशरीरोऽसौ क्वचित्तिष्ठति वा रटन्। विष्णूपभक्षणाद्यच्च मृतप्रायः समाचरेत्॥ कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः। स्नानपानादिकाहारमप्याप्नोति परेच्छया॥ अशुचिः संस्मरे क्षुद्रकीटदंशादिभिस्तथा। भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे॥ केन वन्धनबद्धोऽहं कारणं किमकारणम्। किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते॥ कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम्। किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत्॥ संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः। रतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि॥ रक्तो मूढश्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते। देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति॥ तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम्। न चात्मानं विजानाति न परं न च दैवतम्॥ न शृणोति परं श्रेयः सति चक्षुषि नेक्षते। बुद्धौ सत्यां न जानाति बुध्यमानो बुधैरपि॥ संसारे क्लिश्यते तेन रागलोभवशानुगः॥"

इति सुखबोधः॥

जन्म, क्ली, (जायते इति। जन+बाहुलकात् मन्।) उत्पत्तिः। "अनन्तरं गाङ्गेति मप्रत्यये जन्म मदन्तञ्च। जन्ममदन्तमपीत्युणादावितिं सुकुटः। जन्मे पञ्चनवस्थिते कलहरिप्रभयमिति ज्योतिषे।" इत्यमरटीकायां भरतः॥

जन्मकीलः, पुं, (जन्मनः कील इव। विष्णुसेव-नेन हि जन्माभावात् तथात्वम्।) विष्णुः। इति त्रिकाण्डशेषः॥

जन्मदः, पुं, (जन्म ददातीति। जन्म+दा+"आतो ऽनुपसर्गे कः।" ३। २। ३। इति कः।) पिता। इति शब्दरत्नावली॥

जन्मवर्त्म, [न्] क्ली, (जन्मन उत्पत्तेर्वर्त्म पन्थाः।) योनिः। इति त्रिकाण्डशेषः॥

जन्मान्तरं, क्ली, (जन्मनः अन्तरम्।) परलोकः। इति भरतः॥ तत्पर्य्यायः। भावान्तरम् २ प्रेत्य ३ असुच ४। इत्यमरः॥ (यथा, महा-भारते। ३ पर्व्वणि।

"नूनं जन्मान्तरकृतं पापमाचरितं महत्॥"

अन्यत् जन्म। मयूरव्यंसकादित्वात् समासः। पुनर्जन्म। यथा, पद्मतन्त्रे। २। १८५।

"वरं प्राणपरित्यागो न वियोगो भवादृशैः। प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः॥")

जन्माष्टमी, स्त्री, (जन्मनः श्रीकृष्णोत्पत्तेरष्टमी तिथिः।) भाद्रकृष्णाष्टमी। सा च श्रीकृष्णस्य जन्मतिथिः। सा तु सूर्य्यचान्द्रेण श्रावणस्य कृष्णाष्टमी गौणचान्द्रेण भाद्रस्य। तत्र श्रीकृष्णस्य जन्मकालो यथा, ब्रह्मपुराणे।

"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे। अर्द्धरात्रिगतिमे जातः कृष्णोऽसौ देवकीसुतः॥"

विष्णुपुराणे महामायां प्रति भगवद्वाक्यम्।

"प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि। उत्पत्स्यामि नवम्यान्तु प्रसूतिं त्वमवाप्स्यसि॥ श्रावणे वा नभस्ये वा रोहिणीसहिताष्टमी। यदा स्यात् तत्र जातेऽहं सा जयन्ती प्रकीर्त्तिता॥"

अग्निपुराणे ।
"रोहिणीसहिता कृष्णा भाद्रे मासि पदेऽष्टमी ।
सप्रम्यामर्द्धरात्राधःकलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत् कालं तत्र कुर्य्याच्च जागरम् ॥
अविद्धायाञ्च सप्तम्यां जातो देवकीनन्दनः ॥"
इति सप्तम्यवेधे जन्माश्रवणकल्पभेदादविरुद्धम् ।
नवम्यादियोगस्य प्रशंसा यथा । ब्रह्मवैवर्त्ते ।
"उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतैरेतैरपि लभ्यते वा न वा विभो ! ॥"
पद्मपुराणे ।
"प्रेतयोनिगतानान्तु प्रेतत्वं नाशितन्तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥"
उपवासादिफलं यथा, भविष्यपुराणे ।
"एकेनैवोपवासेन कृतेन कुरुनन्दन ! ।
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥"
ब्रह्मवैवर्त्ते ।
"मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजने ।
फलं भाद्रपदेऽष्टम्यां भवेत् कोटिगुणं द्विज ! ॥
तस्मान्तिथौ वारिमात्रं पितृणां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन सुताम्बं नात्र संशयः ॥"
उपवासाकरणे दोषो यथा, भविष्योत्तरे ।
"श्रावणेऽबहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु स भवेत् क्रूरराक्षसः ॥
वर्षे वर्षे च या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाक्रूरा घोरी भवति कानने ॥"
स्कान्दे ।
"न करोति यदा विष्णोर्ज्वयन्तीसंज्ञकं व्रतम् ।
यमस्य वशमापन्नः कुरुते नारकीं यथाम् ॥"
भविष्ये ।
"तुष्ट्यर्थं देवकीसूनोर्ज्वयन्तीसंज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥
अकुर्व्वन् नरकं याति यावदिन्द्राश्चतुर्दश ॥"
तत्रोपवासक्रमः, भविष्यपुराणे ।
"पार्थ ! तद्दिवसे प्राप्ते दन्तधावनपूर्व्वकम् ।
उपवासस्य नियमं शक्तीयाद्भक्तिभावतः ॥
वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यज्ञेविन्द ! त्रियोनिजम् ।
तस्मे सुप्तस्तु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
एतदुपक्रम्य ।
"तन्मध्ये प्रतिमा स्थाप्या काञ्चनादिविनिर्म्मिता ।
प्रतप्तकाञ्चनाभा सा देवकी सुतसंस्थिता ।
मातरञ्च बालकं सद्यः प्रसूता रोरदच्छिशुम् ।
वसुदेवोऽपि तत्रैव एवं गच्छन्प्रप [illegible]

यशोदा चापि तत्रैव प्रसूतवरकन्यका ।
बलभद्रस्तथा नन्दो दध्यौ गर्गसुतुर्मुखः ॥
एवं संपूजयेद्भक्त्या गन्धपुष्पाक्षतैः फलैः ।
स्थण्डिले स्थापयेद्देवीं सचन्द्रां रोहिणीमथा ॥
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ।
चण्डिकां बलदेवञ्च पूज्य पापैः प्रमुच्यते ॥
अर्द्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम ॥
कर्त्तव्यं तत्तथाद्रात्रौ प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं काञ्चनं गाञ्च वासांसि कुसुमानि च ॥
यदृयदिष्टतमं लोके तत्तो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ॥
भौमस्य ब्रह्मणो गुप्त्रे तस्मै ब्रह्मात्मने नमः ।
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ॥
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्ज्जयेत् ॥
एवं यः कुरुते देवा देवक्या सुमहोत्सवम् ।
वर्षे वर्षे भगवतो मद्भक्त्या धर्म्मनन्दन ! ।
नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥
पुत्रसन्तानमारोग्यधनधान्यर्द्धिमद्गृहम् ।
सम्यर्कैवापि यः कुर्य्यात् कस्मिंश्चन्माष्टमीव्रतम् ॥
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥"
पूजा च मध्यरात्रे गारुडे ।
"कृष्णाष्टम्यान्तु रोहिण्यामर्द्धरात्रेऽर्चनं हरेः ॥"
व्रतपारणयोः कालनियमः । एकदिने जयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्याम् । उभयत्रैरोहिणीयुताष्टमीलाभे परदिने तल्लाभे तु निशीथसम्बन्धिन्याम्यष्टम्यां उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति । उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा महानिशायाः पूर्व्वमेकतरस्यावसानमन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणं 'यदा महानिशायामुभयस्थितिस्तदा उत्तरान्ते पारणम् ।" इति तिथ्यादितत्त्वम् ॥ * ॥

हरिभक्तिविलासमते तूपवासकालो यथा,—
"जन्माष्टमी पूर्व्वविद्धा न कर्त्तव्या कदाचन ।
पूर्ववेधे तु विप्रेन्द्र ! सप्तम्यां चाष्टमीं त्यजेत् ॥
सुरायां बिन्दुना सृष्टं गङ्गाम्भःकलसं यथा ।
विना ऋक्षेण कर्त्तव्या नवमीसंयुताष्टमी ॥
सप्तम्यापि न कर्त्तव्या सप्तमीसंयुताष्टमी ।
तस्मात् सर्व्वप्रयत्नेन त्याज्यमेवासुभं बुधैः ॥
वेधे पुण्यक्षयं याति तमः सूर्य्योदये यथा ।
यत्र वह्निपुराणादौ प्रोक्तं विद्धाष्टमीव्रतम् ।
अवैष्णवपरं तत्र कृतं वा देवमायया ॥"
पारणकालो यथा,—
"यद्वा तिथ्यर्क्षयोरेव द्वयोरन्ते तु पारणम् ।
समर्थानामशक्तानां द्वयोरेकदियोगतः ॥
केचित्तु भगवज्जन्ममहोत्सवदिने शुभे ।
भक्तोत्सवान्ते कुर्व्वन्ति वैष्णवा व्रतपारणम् ॥"

तद्भुतकथा यथा,—
"एकदा श्रीकुलाचार्य्यं वशिष्ठन्दधिसत्तमम् ।
राजा दिलीपः पप्रच्छ विनयावनतः सुधीः ॥
दिलीप उवाच ।
भाद्रे मासि सिते पक्षे यस्यां जातो जनार्द्दनः ।
तत्कथां श्रोतुमिच्छामि कथयस्व महामुने ! ॥
कथं वा भगवान् जातः शङ्खचक्रगदाधरः ।
देवकीजठरे विष्णुः किं कर्त्तुं केन हेतुना ॥
वशिष्ठ उवाच ।
शृणु राजन् ! प्रवक्ष्यामि यस्माज्जातो जनार्द्दनः ।
पृथिव्यां त्रिदिवं दृष्ट्वा भवते कथयाम्यहम् ॥
पुरा वसुन्धरा ह्यासीत् कंसाराधनतत्परा ।
स्वाधिकारप्रमत्तेन कंसदूतेन ताड़िता ॥
क्रन्दन्ती लज्जिता सापि ययौ धूर्जटिलोचना ।
यत्र तिष्ठति देवेशः उमाकान्तो वृषध्वजः ॥
कंसेन ताड़िता नाथ ! इति तस्मै निवेदितम् ।
वाष्पधारां प्रवर्षन्तीं विवर्णामप्रमानिताम् ॥
क्रन्दन्तीं तां समालोक्य कोपेन स्फुरिताधरः ।
उमया सहितः सर्व्वैर्द्दैवतैरेरुतः ॥
आजगाम महादेवो विधातुर्भवनं रुषा ।
गत्वा चोवाच ब्रह्माणं कंसध्वंसनिमित्तकम् ॥
उपायः क्रियतां ब्रह्मन् ! भवता विष्णुना सह ।
ऐश्वरं तद्वचः श्रुत्वा गन्तुं प्र [illegible] मदात्मभूः ॥
क्षीरोदे यत्र वैकुण्ठः सुप्तः स भुजगोपरि ।
हंसयुक्ते समारुह्य हरेरन्तिकमाययौ ॥
तत्र गत्वा हरिं ध्यात्वा देववृन्दैर्हरादिभिः ।
तुष्टाव भगवान् वाग्भिरर्थाभिर्ब्बाग्विदाम्वरः ॥
नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त ! नमोऽस्तु ते ॥
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे ।
नमः समस्तदेवानामधिपाय महात्मने ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
इति तैभ्यः स्तुतीः श्रुत्वा प्रत्युवाच जनार्द्दनः ।
देवा नन्वसुखाः सर्व्वे भवतामागमः कथम् ॥
ब्रह्मोवाच ।
शृणु देव ! जगन्नाथ ! यस्मादस्माकमागमः ।
कथयामि सुरश्रेष्ठ ! तदहं लोकतारण ! ॥
भूमिदत्तवरोन्मत्तः कंसराजो दुरासदः ।
वसुधा ताड़िता तेन पदाघातेन मुष्टिना ॥
वरं दत्त्वा पुरापुत्रो मायया स प्रवञ्चितः ।
भागिनेयं विना राजन् ! घ्राता न भविता तव ॥
तस्माद्गच्छ स्वयं देव ! हन्तुं कंसं दुरासदम् ।
देवकीजठरे जन्म लभ गत्वा च गोकुलम् ॥
ब्रह्मणा प्रेषितो विष्णुः प्रत्युवाच पशोः पतिम् ।
पार्व्वतीं देहि देवेश ! चण्डं स्थित्वागमिष्यति ॥
उमया रमया सार्द्धं शङ्खचक्रगदाधरः ।
उद्दिश्य मथुरां चक्रे प्रयाणं कंसनाशनम् ॥
देवकीजठरे जन्म लेभे विष्णुर्गदाधरः ।
यशोदाकुक्षिमध्ये तु सर्व्वाणी नगलोचना ॥
नव मासांश्च विश्राम्य कुक्षौ नवदिनाधिकान् ।
भाद्रे मासि सिते पक्षे अष्टमीसंज्ञया तिथौ ॥

रोहिणीतारकायुक्ता रजनी घनघोरिता ।
घूमयोनौ तड़िद्युक्ते वारि वर्षति सर्व्वदा ॥
तस्यां जातो जगन्नाथः कंसारिर्व्वसुदेवजः ।
वैराटे नन्दपत्नी च यशोदाजीवनं सुताम् ॥
पुत्रं पद्मकरं पद्मनाभं पद्मदलेक्षणम् ।
रमां चतुर्भुजं शान्तं शङ्खचक्रगदाधरम् ॥
तदा क्रन्दितुमारेभे दृष्ट्वा चानकदुन्दुभिः ।
तत्रैव वाग्यभूद्देवी देवकीमात्रगोचरा ॥
पुत्रं दत्त्वा यशोदायै कन्यां तस्याः समानय ।
कंसासुरभयात्तं हि उवाच देवकी तदा ॥
वैराटं गच्छ विप्रेन्द्र ! सुतं प्रत्यर्पितुं प्रभो ! ।
पुत्रं दत्त्वा यशोदायै सुतां तस्याः समानय ॥
तां दृष्ट्वा कंसराजोऽपि सभायां न हनिष्यति ।
तस्या वचः समाकर्ण्य वसुदेवोऽतिदुःखितः ॥
अङ्के कुमारमादाय वैराटाभिमुखं ययौ ।
यमुना जलसंपूर्णा ततृपथे मध्यवर्त्तिनी ॥
अतिश्रोता महावीर्य्या सुतीक्ष्णोर्म्मिभयाकुला ।
तां दृष्ट्वा तत्तटे स्थित्वा यमुनामवलोकयन् ॥
वसुदेवोऽतिदुःखार्त्तो विलोलचेतनोऽभवत् ।
किं करोमि क्व गच्छामि विधिनात्रापि वञ्चितः ॥
कथमद्य गमिष्यामि वैराटे नन्दमन्दिरम् ।
हरिणा तत्र सानन्दं मायया वञ्चितः पिता ॥
क्षणमात्रं तटे स्थित्वा यमुनामप्यलोकयत् ।
तेन दृष्टा पुनः सापि क्षीणा जानुवहाभवत् ॥
ततः सोऽपि पुरो दृष्ट्वा धावन्तं खलु जम्बुकम् ।
क्रोड़े कृत्वा सुतं खेरं गन्तुं पारं प्रचक्रमे ॥
तं दृष्ट्वा हृष्टचित्तन्तु भगवान् यमुनाजले ।
मायां कृत्वा जगन्नाथो ह्यङ्कात् स पतितः पितुः ॥
तं सुतं पतितं दृष्ट्वा सूर्य्यजाजीवने द्विजः ।
तदा क्रन्दितुमारेभे भाले घात्वा करं दृढ़म् ॥
विधिना वैरिणा ह्यत्र दुःखितोऽहं प्रवञ्चितः ।
त्राहि मां जगतां नाथ ! पुत्रं देहि सुरोत्तम ! ॥
जनकं क्रन्दितं दृष्ट्वा कंसारिः कृपया विभुः ।
जलक्रीड़ां समाधाय पितुरङ्केऽवसत् पुनः ॥
यथा तेन द्विजश्रेष्ठो गतवान्नन्दमन्दिरम् ।
सुतं दत्त्वा यशोदायै सुतां तस्याः समानयत् ॥
सुतामङ्के तथा सोऽपि गृहीत्वानकदुन्दुभिः ।
निजागारं पुनः प्राप्य प्रत्यर्प्य तादृशीं सुताम् ॥
प्रतियुध्य पदे लोहमासीत् पूर्ब्ववदाहृतः ।
देवकी च प्रसूतेति वार्त्ता प्राप्ता सुरारिणा ॥
आनेतुं प्रहितो दूतः सुतं दुहितरञ्च वा ।
आगत्य कंसदूतोऽसौ सुतां नेतुं प्रचक्रमे ॥
बलादङ्कात् समाकृष्य देवकीवसुदेवयोः ।
कंसदूतो गृहीत्वा तां कंसायादर्शयत् पुनः ॥
दृष्ट्वा तां कंसराजोऽपि सभयोऽभूद्दुरासदः ।
सुवर्णकाञ्चनवर्णाभां पूर्णेन्दुसदृशाननाम् ॥
दृष्ट्वा कंसो विहस्यैनां विद्युत्स्फुरितलोचनाम् ।
आदिदेशासुरश्रेष्ठो वध कृत्वा शिलोपरि ॥
आज्ञां लब्ध्वासुरास्ते तु निध्येष्टुं तां प्रवर्त्तिताः ।
विद्युद्रूपधरा गौरी जगाम शङ्करान्तिकम् ॥
अन्तरीक्षे चरं स्थित्वा कंसं प्रोवाच शङ्करी ।
त्वां हन्तुं गोकुले जातः पूर्ब्वशत्रुर्न संशयः ॥
तत्रातिष्ठज्जगन्नाथः कंसारिः सुरवल्लभः ।
क्रीड़ित्वा बालभावेन कंसध्वंसे मनो दधौ ॥
प्राप्निमात्रेण तं कंसं जघान जगदीश्वरः ।
एतत्ते कथितं राजन् ! कृष्णजन्माष्टमीव्रतम् ॥
य इदं कुरुते राजन् ! या च नारी हरेर्व्रतम् ।
प्राप्नोत्यैश्वर्य्यमतुलमिह लोके यथेप्सितम् ॥
अन्तकाले हरेः स्थानं दुर्ल्लभञ्च गमिष्यति ।
एकेनैवोपवासेन कृतेन कुरुनन्दन ! ॥
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
वत्सरद्वादशे चैव यत् पुण्यं समुपार्ज्जितम् ॥
विफलं तद्भवेत् सर्व्वं पुरा व्यासेन भाषितम् ।
न द्रष्टव्यं सुखं तेषां नराणां न च योषिताम् ॥
जयन्ती न कृता यैस्तु जागरादिसमन्विता ।
श्वानश्चैते तु विज्ञेया जयन्तीविमुखा नराः ॥
योषितश्च न सन्देहः सत्यमुक्तं तव सुव्रते ! ॥"

इति भविष्यपुराणे वह्निष्टदिलीपसंवादे श्रीकृष्णजन्माष्टमीव्रतकथा समाप्ता ॥

जन्मी [न्] पुं, (जन्म अस्त्यस्येति । जन्मन् + "व्रीह्यादिभ्यश्च ।" ५ ।२। ११६। इति इनिः ।) प्राणी । इत्यमरः । १ । ४ । ३० ॥ (यथा, भारविः । ११ । ३० ।

" जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ।
भवान्मास्म वधीत् न्याय्यं न्यायाधारा हि साधवः ॥")

जन्मेजयः, पुं, (जनान् गूचून् एजयति कम्पयतीति । एज + णिच् + "एजेः खश् ।" ३।२।२८। इति खश् ततो सुमागमात् जनमेजय इति सिद्धे गूकन्धादित्वादलोपे साधुः ।) जनमेजयराजः । इति श्रीभागवतम् ॥ (एतन्निरुक्तिर्यथा देवीभागवतस्य । २ । ११ । ४६ श्लोकटीकायाम् । "जन्मनैवातिशुद्धेन गूचूनेजितवान् यतः ।
एजृङ् कम्पने धातोर्हि जन्मेजय इतिश्रुतः ॥")

जन्य, क्ली, (जन्यते इति । जनि + "तकिगृसिचतियतिजनिभ्यो यङ्लाघ्यः ।" इति वार्त्तिकोक्त्या यत् ।) हृद्यः । परीवादः । संग्रामः । इति मेदिनी । ये, २५ ॥ (यथा, रघौ । ४ । ७७ । "तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गजैरभूत् ॥")

जन्यः, पुं, (जायते जनयति वा । जन + "भव्यगेयेति ।" ३ । ४ । ६८ । इति कर्म्मरि यत् ।) जनकः । इति मेदिनी । ये, २६ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५६ । "उग्रतेजा महातेजा जन्यो विजयकालवित् ॥" देहः । यथा, भागवते । १ । ६ । ३१ ।

"निवृत्तसर्व्वेन्द्रियवृत्तिविभ्रम-
स्तुष्टाव जन्यं विजनं जनार्द्दनम् ॥"

जनस्य जन्यः । जन + "सतजनहलादिति ।" ४ । ४ । ६७ । इति यत् । जनजन्यः । इति सिद्धान्तकौमुदी ॥)

जन्यः, त्रि, (जन्यते इति । जन् + णिच् + कर्म्मणि यत् ।) उत्पाद्यः । यथा,—

"जनकस्य स्वभावो हि जन्ये तिष्ठति चिन्तितम् ।
यथा श्रीकृष्णपादाब्जं कालीयवंशमस्तके ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
("जन्यानां जनकः कालो जगतामाश्रयो मतः ॥"
इति च भाषापरिच्छेदे ५५ ॥)

जनयिता । (जनीं वधूं वहति प्रापयति वा । संज्ञायामिति साधुः ।) नवोढ़ाज्ञातिः । नवोढ़ाभर्त्ता । वरस्य स्निग्धः । स तु जामाटवत्सलः । इति मेदिनी । ये, २६ ॥ (जनाय हितः । यत् ।) जनहितः । इति व्याकरणम् ॥

जन्या, स्त्री, (जायतेऽस्याम् । जन् + ण्यत् यत् वा । मार्टतुल्यत्वादेवास्यास्तथात्वम् ।) मार्टवधस्था । इति मेदिनी । ये, २६ ॥ (यथा, रघौ । ६ । ३० ।

"अथाङ्गराजादवतार्य्य चक्षु-
र्यां वीक्षितं जन्यामवदत् कुमारी ॥")

प्रीतिः । इति हेमचन्द्रः ॥

जन्तुः, पुं, (जायते इति । जन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा ३ । २ । इति युच् ।) प्राणी । अग्निः । धाता । इति मेदिनी । ये, २६ ॥ (उत्पत्तिः । जन्म । यथा, हरिवंशे । १२३ । ४६ ।

"अन्यतायां द्वितीयोऽयं जन्तुर्हि मम सर्व्वथा ॥")

जप, व्यक्तायां वाचि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोश्चिन्तनं व्यक्तवाचः । जपति मन्त्रं साधकः । इति दुर्गादासः ॥

जपः, पुं, (जप्यते इति । जप + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति भावे अप् ।) विधानेन मन्त्रोच्चारणम् । तद्विधिर्यथा,—

"नीचैर्ज्जपेच्च संकुर्य्यात् रहः कुर्य्यादतन्द्रितः ।
समाहितमनाभूत्वा मनसा वापि चिन्तयेत् ॥
विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥
विना दर्भैस्तु यत् स्नानं यच्च दानं विनोदकम् ।
असंख्येयन्तु यद्जप्यं सर्व्वं तदफलं स्मृतम् ॥
मुक्ताफलैर्विद्रुमेण रुद्राक्षैः स्फटिकेन वा ।
गणना सर्व्वथा कार्य्या सम्यगङ्गुलिपर्व्वभिः ॥
हिरण्यरत्नमणिभिर्जप्यं धृतगुणं भवेत् ।
सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत् ॥
नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न संशयः ।
पुत्रजीवकजप्यस्य परिसंख्या न विद्यते ॥
दशभिर्जन्मजनितं धृतेन च पुरा कृतम् ।
त्रियुगं तु सहस्रेण गायत्र्या हन्ति दुष्कृतम् ॥
दर्भहस्तस्तथासीनो दर्भैर्धृदकपाणिना ।
प्राङ्मुखो वर्णयेत् मालां सहस्रं धृतमेव वा ॥"

इत्याद्ये वह्निपुराणे नित्याह्निकस्नानविधिनामाध्यायः ॥ तस्यानुष्ठानं यथा,—

"मनः संकृत्य विषयान्नान्यार्थगतमानसः ।
न हसं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत् ॥
जपः स्याद्यद्यदुक्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थसहितं मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥

किञ्चिदूनवयोयोगः स्यादुपांशुः स जपः स्मृतः ।
मन्त्रस्योच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः ।
जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥"
तत्र वर्ज्यं यथा,—
"विस्मृत्योत्सर्गशङ्कादियुक्तः कर्म्म करोति च ।
अपार्थकादिकं सर्व्वमपवित्रं भवेत् प्रिये ! ॥
मलिनाम्बरकेशादिसुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥"
अथ करमालाजपनियमो यथा,—
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाद्यो मध्यमा चैकपर्व्विका ।
पर्व्वत्रयं मध्यमाया मेरुत्वेनोपकल्पयेत् ।
अनामामध्यमारभ्य कनिष्ठादित एव च ॥
तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ।
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
एतद्वचनन्तु अशौचरक्षतादिविषयम् ।
मुक्तिविषये पुनः ।
"अनामिकाद्यं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि ॥
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत् ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ॥
मध्यादिमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
श्रीविद्याविषये पुनः ।
"अनामामध्यमायाश्च मूलाग्रयोश्च द्वयं द्वयम् ।
कनिष्ठायाश्च तर्ज्जन्याश्चायं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यात् त्रितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्ज्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
इदमपि अशौचरक्षतादिविषयम् ॥ * ॥
"अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते सति ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥
गणनाविधिसंलक्ष्य यो जपेत्तज्जपं यतः ।
यद्वन्ति राक्षसास्तेन गच्छेत् सर्व्वथा बुधः ॥
हृदये हस्तमारोप्य तिर्य्यक् ज्ञात्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥"
जपसंख्यायां निषिद्धदर्भं यथा,—
"नाग्रतेऽस्तपर्व्वभ्यां न धान्येन च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां कारयेत् ॥"*॥
अथ विहितदर्भं यथा,—
"नागाकृतीदसिन्दूरं गोमयञ्च करीषकम् ।
एभिर्निर्म्माय वटिकां जपसंख्यान्तु कारयेत् ॥"
अथ वर्णमालाजपनियमो यथा,—
"सबिन्दुं वर्णसञ्चार्य पञ्चाशन्नं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमतः ।
पञ्चाशल्लिपिभिर्भिन्ना विहिता सर्व्वकर्म्मसु ॥
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ।
चार्द्धं मेरुसुखं तत्र कल्पयेन्मुनिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥"*॥
तस्य फलं यथा,—
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां आयतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥
यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
नाग्निं नोपसर्पन्ति भयभीताः समन्ततः ॥
यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः साहस्रो मानसः स्मृतः ॥"
इति तन्त्रसारः ॥

जपनं, क्ली, (जप क्षुद्वचारे + भावे ल्युट् ।) जपः । इत्यमरटीका ॥ (यथा, महाभारते । १२ । १६६ । ७ ।
"संन्यास एव वेदान्ते वर्णिते जपनं प्रति ॥")

जपपरायणः, त्रि, (जप एव परमयनं आश्रयो यस्य ।) जपासक्तः । जपनशीलः । यथा,—
"शिवरात्रिव्रतं देव ! पूजाजपपरायणः ।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ! ॥"
इति तिथ्यादितत्त्वम् ॥

जपा, स्त्री, (जपन्ति तान्त्रिका अनयेति । जप + अप् ततष्टाप् ।) जवापुष्पवृक्षः । इति हेमचन्द्रः । ४ । २१३ ॥ तस्य पर्य्यायगुणाः ।
"ओड्रपुष्पं जपा चाथ त्रिसन्ध्या सादरा स्मिता ।
जपा संध्याह्वयी कोशा त्रिसन्ध्या कपवातजित् ॥"
इति भावप्रकाशः ॥
(विशेषवार्त्ता जवाशब्दे ज्ञातव्या ॥)

जभ, जभने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) जभनं मैथुनम् । जभति युवा । इति दुर्गादासः ॥

जभ, इ जभने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) जभनं मैथुनम् । इ, जभ्यते । इति दुर्गादासः ॥

जभ, इ क गश्चि । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) गश्चीति अन्तर्भूतण्यर्थत्वान्नष्टीकरणे । इ क, जम्भयति पापं गङ्गा । इति दुर्गादासः ॥

जभ, इ ड जृम्भे । गात्रग्रैथिल्य इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) इ, जम्भते । ड जम्भते । प्रत्यूषकाले भुजगाङ्गनानां सुखेषु कामः प्रतिजृम्भतीव । इति गणरत्नतानित्यत्वात् । इति दुर्गादासः ॥

जभ, ड जृम्भे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) जृम्भो गात्रग्रैथिल्यमिति गोविन्दभट्टः । ड, जम्भते लोकः । शुक् जभो-ऽचीत्यत्रैव नुक् आत्मनेपदप्रकरणे सूत्रविधानसामर्थ्यात् । इति दुर्गादासः ॥

जभ, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जम्भित्वा जाम्भ्वा । इति दुर्गादासः ॥

जभ्, य, पत्नी । इति जभ्यतीशब्दटीकायां भरतधृतनामप्रपञ्चः ॥

जभ्यौ, त्रि, (यमौ एकत्र सहचरौ सन्तौ जायेते इति । जभ + ड । पृषोदरादित्वात् यस्य जः ।) यमजौ । इति द्विरूपकोषः ॥

जमदग्निः, पुं, (जमन् हुतभक्षणशीलः प्रज्वलित इत्यर्थः । तथाविधोऽग्निरिव । यद्वा, यमदग्निः । पृषोदरादित्वात् यस्य जः ।) यमदग्निसुनिः । इति द्विरूपकोषः ॥ स तु भृगुवंशोद्भव ऋचीकसुनिपुत्रः परशुरामपिता च । इति श्रीभागवतम् ॥ (अस्य जन्मविवरणादिकं महाभारते वनपर्व्वणि ।११५-११६ अध्याययोर्द्रष्टव्यम् ॥ असौ च सावर्णिके मन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये ।७६।६-१०।
"अत्रिश्चैव वशिष्ठश्च काश्यपश्च महामुनिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्रो भगवान्ऋचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते सप्तयोऽत्र तथाऽन्तरे ॥")

जमनं, क्ली, (जम भक्षे + भावे ल्युट् ।) भोजनम् । इत्यमरटीकायां भरतः ॥

जम्पती, पुं, (जाया च पतिश्च । राजदन्तादिगणे पाठात् जायाशब्दस्य जम्भावो निपात्यते ।) जायापती । इत्यमरः । २ । ६ । ३८ ॥ द्विवचनान्तोऽयं शब्दः ॥

जम्बालः, पुं, (जसु अदने + बाहुलकादुम्बागमः । यद्वा, जम्ब + भावे घञ् । जम्बं आलातीति । ला + कः ।) पङ्कः । इत्यमरः । १ । १० । ६ ॥ (यथा, श्रीकृष्णचरिते । २ । १० ।
"अवद्यजम्बालजवेषजाय
ह्रतोद्यमानां खलसैरिभाणाम् ।
कवीन्द्रवाङ्निर्झरनिर्झरिण्यां
संजायते वर्त्मनि मनोरथस्य ॥")
ग्रैवालः । इति मेदिनी । ले, ६१ ॥ केतकवृक्षः । इति शब्दरत्नावली ॥

जम्बालिनी, स्त्री, (जम्बालः ग्रैवालोऽस्यस्या इति । जम्बाल + इनिः ।) नदी । इति हेमचन्द्रः । ४ । १४६ ॥

जम्बिरः, पुं, (जम्बीर + निपातनात् ह्रस्वः ।) जम्बीरः । इति शब्दरत्नावली ॥

जम्बीरः, पुं, (जम्भते भक्षयते इति । जसु भक्षे + "गम्भीराद्यश्च" इति निपातनात् ईरन् प्रत्ययेन साधुः ।) फलवृक्षविशेषः । आमीर इति क्षेत्रे इति च भाषा । तत्पर्य्यायः । दन्तशठः २ जम्भः ३ जम्भीरः ४ जम्भलः ५ । इत्यमरः । २ । ४ । २४ ॥ जम्भी ६ रोचनकः ७ ग्रोधी ८ जाचारिः ९ दन्तहर्षणः १० गम्भीरः ११ जम्बिरः १२ दन्तकर्षणः १३ । इति शब्दरत्नावली ॥ रेवतः १४ वज्रशोधी १५ दन्तहर्षकः १६ । इति जटाधरः ॥ तस्य गुणाः ।

"जम्बीरसुरां गुर्वन्नं वातश्लेष्मविबन्धनुत् ।
शूलं कासकफक्लेदच्छर्दिहृल्लासदोषजित् ॥
आस्यवैरस्यहृत्पीड़ावह्निमान्द्यक्रमीन् हरेत् ।
स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्दिनिवारिणी ॥"

इति भावप्रकाशः ॥

तस्य फलस्य गुणाः । अम्लमधुररसत्वम् । वातनाशित्वम् । पथ्यत्वम् । पाचनत्वम् । रोचनत्वम् । पित्तबलाग्निदृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अत्यन्तत्वम् । गुरुत्वम् । सुगन्धित्वम् । दुर्जरत्वम् । वह्निकफवातविबन्धनाशित्वञ्च । इति राजवल्लभः ॥ पक्वस्य तस्य गुणाः । मधुरत्वम् । कषार्त्तिपित्तासदोषनाशित्वम् । वर्णवीर्यरुचिपुष्टिबलप्रदत्वञ्च । मधूकः । अर्जकः । सितार्जकः । इति राजनिर्घण्टः ॥ (क्षुद्रपत्रतुलसी । यथा, वैद्यकरत्नमालायाम् ।
"खरपर्णस्तु जम्बीरः प्रस्थपुष्पः फणिज्झकः ॥")

जम्बुः, स्त्री, (जम्बते इति । जसु भक्षणे + "अन्दूडृनृफूजम्बिति ।" उणा० १ । ६५ । इति कू प्रत्ययेन निपातनात् साधुः । बाहुलकात् ह्रस्वः ।) जम्बूः । इत्यमरटीकायां भरतः ॥ (यथा,—
"जम्बुर्ग्राही मधुरकफहा रोचनो वातहारी ।"

इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

जम्बु, क्ली, स्त्री, जम्बूफलम् । तत्पर्य्यायः । जम्बूः२ जाम्बवम् ३ । इत्यमरः । २ । ४ । १६ ॥

जम्बुकः, पुं, (जमतीति । जसु भक्षणे + "ऋगयुषदयश्च ।" उणा० १ । ३८ । इति कुप्रत्ययेन निपातनात् साधुः । ततः स्वार्थे कन् ।) शृगालः । (यथा, महाभारते । १ । १४१ । ४६ ।
"एवं तेषु प्रयातेषु जम्बुके दुरमानसः ।
खादति स्म तदा मांसमेकः सन्मलनिश्चयात् ॥")

वरुणः । (जम्बु इव कायतीति । के + कः ।) वृक्षविशेषः । गोलापफाम इति भाषा ॥ नीचे त्रि । इति शब्दरत्नावली ॥ म्लेच्छाकप्रभेदः । इति राजनिर्घण्टः ॥ (सुवर्णकेतकी । यथा,—
"केतकः स्फुटिकापुष्पो जम्बुकः ककचच्छदः ।
सुवर्णकेतकी तस्या लघुपुष्पा सुगन्धिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जम्बुद्वीपः, पुं, (जम्बुवृक्षयुक्तो द्वीपः ।) पृथिव्याः सप्तद्वीपान्तर्गतद्वीपविशेषः । अयं द्वीपः पद्मकोषमध्यवर्त्तिकोष इव लक्षयोजनविस्तीर्णः; पद्मपत्र इव समवर्त्तुलः लक्षयोजनविस्ततलवणसमुद्रेण वेष्टितः । यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नव वर्षाणि तेषां वर्षाणामष्टौ सीमपर्व्वताः सन्ति । ॥ एषां वर्षाणां मध्ये इलावृतवर्षे मध्यवर्त्ति यस्य मध्यदेशे सुमेरुपर्व्वतः लक्षयोजनोत्सेधः । इलावृतवर्षस्योत्तरे नीलपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः । ॥ । तदुत्तरे रम्यकवर्षं तदुत्तरे श्वेतपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः । ॥ । तदुत्तरे हिरण्मयवर्षं तदुत्तरे शृङ्गवान् पर्व्वतः तस्य विस्तारादयः श्वेतपर्व्वतवत् दैर्घ्येण श्वेतपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । ॥ । तदुत्तरे कुरुवर्षं तदुत्तरे लवणसमुद्रः । इलावृतवर्षस्य दक्षिणे निषधपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः । ॥ । तद्दक्षिणे हरिवर्षं तद्दक्षिणे हेमकूटपर्व्वतः अस्य विस्तारादयो निषधवत् दैर्घ्येण निषधात् किञ्चिदधिकदशांशेन न्यूनः । तद्दक्षिणे हिमालयपर्व्वतः अस्य विस्तारादयः पूर्व्ववत् दैर्घ्येण हेमकूटपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । ॥ । तद्दक्षिणे भारतवर्षं तद्दक्षिणे क्षारसमुद्रः । इलावृतस्य पश्चिमे माल्यवान् पर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः उत्तरदक्षिणयोर्नीलनिषधपर्व्वतावधि दीर्घः । ॥ । ततपश्चिमे केतुमालवर्षं ततपश्चिमे लवणसमुद्रः । इलावृतस्य पूर्व्वे गन्धमादनपर्व्वतः अस्य विस्तारादयो माल्यवद्वत् । ततपूर्व्वे भद्राश्ववर्षं ततपूर्व्वे लवणसमुद्रः । ॥ । मेरोः पूर्व्वादिचतुर्दिक्षु मन्दरमेरुमन्दरसुपार्श्वकुमुदनामानः पर्व्वतास्तिष्ठन्ति । तेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारो वृक्षाः सन्ति । ते सर्व्वे दैर्घ्येण एकादशशतयोजनपरिमिताः विस्तारे शतयोजनपरिमिताः । तेषां शाखाविस्तारः एकादशशतयोजनपर्य्यन्तम् । तेषु पर्व्वतेषु ह्रदाश्चत्वारः; पयोमधिक्षुरसमन्दरजलाः । एवं नन्दनचैत्ररथवैभ्राजकसर्व्वतोभद्रसंज्ञकानि चत्वारि देवोद्यानानि च सन्ति । ॥ । मन्दरोपरिस्थितैकादशशतयोजनोच्चचूतमस्तकात् पर्व्वतशृङ्गवत् स्थूलानि फलान्यष्टकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतसुपप्लावयति । ॥ । एवं जम्बूफलानामलघुनिपातविशीर्णानामनस्थिप्रायाणामभिकायनिभानां रसेन जम्बूर्णाम नदी मेरुमन्दरशिखरादवनितले निपतन्ती दक्षिणेनेलावृतं वहति । तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनाशुविध्यमाना वायुर्कसंयोगविपाकेन सदासरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति ।॥ सुपार्श्वपर्व्वतस्थो यो कदम्बवृक्षस्तस्य पञ्चकोटरेभ्यो विनिःसृताः पञ्चयामसमूलाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्यः पश्चिमेनेलावृतमभिमोदयन्ति । ॥ । कुमुदपर्व्वतोपरिस्थितो यो वटवृक्षस्तस्य स्कन्धेभ्यो निर्गताः पयोदधिघृतमधुगुडान्नाद्यम्बरगव्यशय्याभद्रादियुक्ताः कामदुघा नदाः कुमुदाग्राद् प्रपतन्त उत्तरेणेलावृतमुपभोजयन्ति । ॥ । तान् नदान् सेवमानानां प्रजानां वलीपलितजन्मदौर्गन्ध्यजरामयश्रमक्लमशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा न कदाचित् भवन्ति यावज्जीवं निरतिशयसुखमेव । कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरिशिरिरपतङ्गरुचकनिषधशिति-
वासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीरदाद्याः पर्व्वता मेरोर्मूलदेशे परित उपकुल्याः । मेरोः पूर्व्वदिशि उत्तरस्यामष्टादशयोजनदीर्घौ जठरदेवकूटपर्व्वतौ तिष्ठतः । तौ द्विसहस्रयोजनविस्तारौ एवं द्विसहस्रयोजनोच्चौ । मेरोः पश्चिमायान्दिशि पवनपारियात्रौ पर्व्वतौ उत्तरस्यां अष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं दक्षिणस्यान्दिशि कैलासकरवीरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवमुत्तरस्यां त्रिशृङ्गमकरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं वर्षे वर्षे नदाः नद्यश्च बहवः सन्ति ॥ ॥ ॥ तत्रापि भारतमेव वर्षं कर्म्मक्षेत्रं अन्यान्यानि वर्षाणि सर्गिणां पुण्यशेषोपभोगस्थानानि भूस्वर्गनामाख्यातानि । एषु वर्षेषु पुरुषाणां आयुरयुतवर्षाणि ते देवकल्पा अयुतहस्तिबलविशिष्टाः वज्रवद्दृढशरीराः सर्व्वदा मोदयुक्ताः सन्ति । येषु देवपतयः सगणाः सलोकाः नानास्थानेषु स्वैरं विहरन्ति । नवसु वर्षेषु भगवान् नारायणस्तत्तत्पुरुषाणामभ्युदयाय स्वमूर्त्तिभेदेनाद्यापि सन्निहितो भवति ॥ ॥ इलावृते तु वर्षे भगवान् शिव एक एव पुरुषः भवानी प्रधानार्द्धसहस्रैः स्त्रीभावैः परिवृतः नारायणस्य सङ्कर्षणसंज्ञां मूर्त्तिं ध्यानेन सन्निधाय स्तुवन्नास्ते ॥ ॥ भद्राश्वे वर्षे तद्वर्षपतिभद्रश्रवा नाम धर्म्मसुतः ततः कुलपतयः पुरुषा भगवतो हयशीर्षाभिधानां मूर्त्तिं परमसमाधिना सन्निधाय्य स्तुवन्ति ॥ ॥ हरिवर्षे भगवान्नरहरिरूपेणास्ते तत्र प्रह्लादो दैत्यदानवकुलतीर्थस्वरूपः तद्दर्शनैः सहानन्यभक्तियोगेनोपास्ते ॥ ॥ केतुमाले भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया आस्ते तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेता अहःसु तद्भर्तृभिरुपेता उपास्ते ॥ ॥ हिरण्मये वर्षे भगवान् कूर्म्मतनुं बिभ्राणो निवसति तद्भगवन्मूर्त्तिं पितृगणाधिपतिरर्यमा तद्वर्षपुरुषैः सह उपास्ते ॥ ॥ उत्तरकुरुवर्षे भगवान् वराहरूपी आस्ते तं भूमिस्तद्वर्षपुरुषैः सहाखलितभक्तियोगेनोपास्ते ॥ ॥ किम्पुरुषे वर्षे भगवान् दाशरथी रामरूपेणास्ते तं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् अविरतभक्तिरद्वर्षपुरुषैरुपास्ते ॥ ॥ भारते वर्षे भगवान्नरनारायणाख्य आत्मज्ञानिनामनुग्रहायाशुकम्पया अवतीर्णगतिशमपथरति । तन्मूर्त्तिं नारदः पर्व्वतमुनिभिर्भारतवर्षीयप्रजाभिः सह भगवदनुभावोपबर्हणं पञ्चरात्रं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेन सेवते ॥ ॥ भारतेऽप्यस्मिन् वर्षे सरिच्छैला बहवः सन्ति । यथा, मलयः मङ्गलप्रस्थः मैनाकः त्रिकूटः

ऋषभः कूटकः कोलः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः महेन्द्रः वारिधारः विन्ध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्द्धनः रैवतकः ककुभः नीलः कोकः गोमुखः इन्द्रकीलः कामगिरिरिति चाग्ने च घृतसङ्ग्रहः शैलाः। *। तेषां नितम्बप्रभवा नद्यो ह्यसंख्याताः। यथा, चन्द्रवंश्या साम्बपर्णी अवटोदा क्षतमाला वैहायसी कावेरी वेत्रा पयस्विनी घृतकुल्या त्रिसामा गण्डकी वाग्मती कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूः ओघवती सुषोमा शतद्रुः चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा इति महानद्यः। अन्याः शोणश्च नदौ। *। अस्मिन् वर्षे लब्धजन्मभिः पुरुषैः शुक्लारुणकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो भवन्ति॥ *॥ अस्मद्द्वीपस्य अष्टौ उपद्वीपाः सन्ति सगरात्मजैरन्वेष्टुमेषु इमां महीं परितो निखनद्भिरुपकल्पिताः। तद्यथा, स्वर्णप्रस्थः चन्द्रशुक्लः आवर्त्तनः रमणकः मन्दहरिणः पाञ्चजन्यः सिंहलः लङ्का इति। इति श्रीभागवते। ५। १६ अध्याये। तथा च मार्कण्डेये ५४ अध्याये मातृस्वे ११२ अध्याये च द्रष्टव्यम्॥ *॥ ज्योतिःशास्त्रमते लवणसमुद्रस्योत्तरे जम्बुद्वीपः। स तु भूम्यर्द्धभागः। तस्य दक्षिणे द्वितीयार्द्धभागे द्वीपषट्कस्य सप्तसमुद्रस्य च निवेशः। इति सिद्धान्तशिरोमणिः॥

जम्बुलः, पुं, (जम्बुं जम्बुफलं लातीति। ला+कः।) जम्बूवृक्षः। केतकवृक्षः। इति विश्वः॥ (यथा, सुश्रुते। १। १६।
"अवमन्थः सकण्डूको ग्रन्थिको जम्बुलक्षया॥")

जम्बुवनजं, क्ली, (जम्बुवनमिव जायते इति। जन्+डः।) श्वेतजवापुष्पम्। यथा,—
"पारिभद्रं पाटला च वकुलं गिरिशालिनी।
तिलकं जम्बुवनजं पीतकं तगरन्त्वपि॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने॥"
इति वामनपुराणम्॥

जम्बूः, स्त्री, (जम्यते भक्ष्यते इति। जसु अदने+"अन्दूडनूफूजम्बिति।" उणा १। ६५। इति कूः।) नागदमनी। इति राजनिर्घण्टः॥ वृक्षविशेषः। जाम इति भाषा। तत्पर्य्यायः। सुरभिपत्रा २ नीलफला ३ श्यामला ४ महास्कन्धा ५ राजार्हा ६ राजफला ७ शुकप्रियाऽ मोदमोदिनी ९। तत्फलगुणाः। कषायत्वम्। मधुरत्वम्। श्रमपित्तदाहकण्ठार्त्तिशोषक्लमिदोषश्वासातिसारकफकासविनाशित्वम्। विष्टम्भित्वम्। रोचनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ गुरुत्वम्। स्वादुत्वम्। शीतलत्वम्। अग्निसंदूषकत्वम्। रूक्षत्वम्। वातकारित्वम्। इति राजवल्लभः॥ सा द्विधा क्षुद्रभेदेन द्विविधा। तत्र द्वितीयायाः पर्य्यायः। महाजम्बूः १ महाफला २ राजजम्बूः ३ दृढफला ४। इति रत्नमाला॥ प्रदेशेषु ५ गन्दः ६ महाफला ७ सुरभिपत्रा ८। एतत्फलगुणाः। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वम्। इति भावप्रकाशः॥ क्षुद्रायाः पर्य्यायः। क्षुद्रजम्बूफला १ दीर्घपत्रा २ मध्यमा ३। वनजम्बूपर्य्यायः। भूमिजम्बूः १ काकजम्बूः २ नादेयी ३ श्वेतपल्लवा ४। इति रत्नमाला॥ क्षुद्रपत्रा ५ जलजम्बुका ६। तत्फलगुणाः। ग्राहित्वम्। रूक्षत्वम्। कफपित्तास्रदाहनाशित्वञ्च। इति भावप्रकाशः॥ तत्फलस्य पर्य्यायः। जम्बु २ जाम्बवम् ३। इत्यमरः। २। ४। १६॥ (खनामख्याता नदी। यथा, मातृस्वे। १२०। ६७।
"मेरोः पार्श्वात् प्रभवति हृदच्चन्द्रप्रभो महान्।
जम्बूखेव नदी पुण्या यस्यां जाम्बूनदं स्रुतम्॥")

जम्बूकः, पुं, स्त्री, (जम्बुकः एषोदरादित्वात् दीर्घः।) शृगालः। इति शब्दरत्नावली॥ जम्बुकशब्दार्थोऽप्यत्र॥

जम्बूका, स्त्री, (जम्बूरिव कायतीति। कै+कः। अजादित्वात् टाप्।) काकलीद्राक्षा। इति राजनिर्घण्टः॥

जम्बूलः, पुं, (जम्बूं जम्बूफलं लातीति। ला+कः।) जम्बूवृक्षः। केतकवृक्षः। इति मेदिनी। ले, ६४॥ (यथा, हरिवंशे। ६६। १६।
"जम्बूजम्बूलवृक्षाढ्यं कन्दकन्दलभूषितम्॥"
वरपत्नीयस्त्रीणां परिहासवचनम्। इति नीलकण्ठः॥)

जम्बूलमालिका, स्त्री, (जम्बूलस्य वरपत्नीयरमणीपरिहासवचनस्य मालिका परम्परा।) कन्यावरयोर्मुखचन्द्रिका। इत्युद्वाहतत्त्वम्॥ (यथा, हरिवंशे। १८३। २२।
"आग्नीध्रैर्व्यहृयित्वा च देवर्षिः श्लक्ष्णमब्रवीत्।
अनिरुद्धस्य वीर्य्याख्यो विवाहः क्रियतां विभो!।
जम्बूलमालिकां द्रष्टुं अद्य हि मम जायते॥")
"जम्बूलं वरपत्नीयस्त्रीणां परिहासवचनं तेषां मालिका श्रेणी।" इति तट्टीकायां नीलकण्ठः॥

जम्भः, पुं, (जम्भते भृम्भते इति। जभि गात्रविनामे+घञर्थात्। "रधिजभोरचि।" ७। १। ६१। इति नुम्।) दैत्यभेदः। (इन्द्र एनं निहतवान्॥ अपरो दैत्यविशेषः। विष्णुरेनं जघान। यथा, महाभारते। ३। १०२। २४—२५।
"असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः।
यज्ञघ्नोभकरः क्रूरस्त्वयैव विनिपातितः॥
एवमादीनि कर्म्माणि येषां संख्या न विद्यते।
अस्माकं भयभीतानां त्वं गतिर्मधुसूदन!॥"
प्रह्लादपुत्राणामेकतमः। यथा, हरिवंशे। २१८। ३५।
"प्रह्लादस्य त्रयः पुत्रा विक्रान्ताश्च महाबलाः।
विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः॥"
राक्षसविशेषः। स तु रावणस्यानुचरः। यथा, महाभारते। ३। २८४। रामरावणयुद्धे। २।
"पर्व्वतः पूतनो जम्भः खरः क्रोधवशो हरिः॥"
जम्भ्यते भक्ष्यतेऽनेनेति। जम्भ+करणे घञ्।) दन्तः। यथा, ऋग्वेदे। ८। ६१। २।
"इमं जम्भसुतं पिब।" "जम्भसुतं दन्तैरभिस्रुतम्।" इति तद्भाष्यम्॥ *॥ जम्भ्यते भक्ष्यतेऽसौ इति कर्म्मणि घञ्।) जम्बीरः। (यथा,—
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ *॥
जम्भ+भावे घञ्।) भक्षणम्। इति मेदिनी। मे, ४॥ (यथा, महाभारते। ५। ६४। २०।
"इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः॥")
अंशुः। हनुः। तूणः। इति हेमचन्द्रः॥

जम्भकः, पुं, (जम्भ एव। स्वार्थे कन्।) जम्बीरः। इति शब्दचन्द्रिका॥ (स्वनामख्यातो नृपविशेषः। यथा, महाभारते। २। ३१। ७।
"ततश्चर्म्मण्वतीकूले जम्भकस्यात्मजं नृपम्।
ददर्श वासुदेवेन शोषितं पूर्व्ववैरिणा॥"*॥)
जम्भतीति जभ्रज्भने+ण्वुल्। कासुके, त्रि॥)

जम्भका, स्त्री, (जम्भा एव। स्वार्थे कन्।) तृष्णा। इति राजनिर्घण्टः॥

जम्भगः, पुं, (जम्भाय भक्षणाय गच्छति गमतीति। गम+डः। अतिशयभक्षणशीलत्वात् तथात्वम्।) राक्षसविशेषः। यथा,—
"देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः।
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः॥
विद्याधरा जलाधारास्तथैवाकाशगामिनः।
निराहाराश्च ये जीवाः पापेऽधर्म्मे रताश्च ये॥
तेषामाप्यायनायैतद्दीयते सलिलं मया॥"
इत्याह्निकाचारतत्त्वधृतपद्मपुराणवचनम्॥

जम्भद्विट्, [द्] पुं, (जम्भं तदाख्यया प्रसिद्धमसुरं द्वेष्टीति। द्विष्+क्विप्। जम्भस्य द्विट् इति वा।) इन्द्रः। इति हेमचन्द्रः॥ (विष्णुः। इति महाभारतम्॥)

जम्भभेदी, [न्] पुं, (जम्भं भेत्तुं शीलमस्य। भिद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः।) इन्द्रः। इत्यमरः। १। १। ४६॥

जम्भरः, पुं, (जम्भं भक्षणरुचिं राति ददातीति। जम्भ+रा+कः।) जम्बीरः। इति शब्दचन्द्रिका॥

जम्भलः, पुं, (जम्भर। रस्य लत्वम्।) जम्बीरः। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः॥")
वृद्धदेवविशेषः। इति मेदिनी। ले, ६३॥

जम्भला, स्त्री, (जम्भं भक्षणं लाति आददातीति। ला+कः।) राक्षसीविशेषः। यथा,—
"समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी।
तस्याः स्मरणमात्रेण विघ्नस्तस्या गर्भिणी भवेत्॥"
इति ज्योतिषतत्त्वे राजमार्त्तण्डः॥

जम्भा, स्त्री, (जम्भ्यते इति। जभि नृम्भायाम्+भावे घञ्। ततः स्त्रियां टाप्।) तृष्णा। इति राजनिर्घण्टः॥

जम्भारिः, पुं, (जम्भस्यासुरस्य अरिः शत्रुः।) इन्द्रः। यथा, "जम्भारिदम्भोलयः।" इत्युत्तरनैषधम्॥ वह्निः। वज्रम्। इति विश्वः॥ (विष्णुः। इति महाभारतम्॥)

जम्भी, [न्] पुं, (जम्भयति क्षुधामान्द्यादिकं नाशयतीति। जभि क नाशे+इनिः।) जम्भीरः। इति शब्दचन्द्रिका॥

जम्भीरः, पुं, (जम्भाते अभिदृङ्नार्थं भक्ष्यते इति। जभ+"गम्भीरादयश्च।" इति ईरन्। ततो "रधिजभोरचि।" ७।१।६१। इति नुम्।) जम्बीरः। इत्यमरः। २।४।७६॥ मरुवकः। इति तट्टीकायां भरतः॥

जयः, पुं, (जि जये+"एरच्।" ३।३।५६। इत्यच्।) शत्रुपराङ्मुखीकरणम्। जित् इति भाषा। तत्पर्य्यायः। विजयः २ जयनम् ३। इत्यमरः। २।८।१०॥ (यथा, मनुः।७।४४। "इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥") अग्निमन्थः। (जयतीति। जि+पचाद्यच्।) जयन्तः। युधिष्ठिरः। इति मेदिनी। ये, २५॥ (एतन्नाम तु विराटगृहे कङ्कप्रवाससमये जातम्। यथा, महाभारते। ४।५।३४।

"जयो जयन्तो विजयो जयत्सेनो जयद्बलः।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः॥")

विजयनन्दनराजः। स तु इक्ष्वाकुवंशोद्भवः। इति हेमचन्द्रः। ३।३५८॥ श्रीनारायणपार्षदः। यथा,—

"एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च।
कदर्थीकृत्य मां यन्तौ बलाद्गातामतिक्रमम्॥"
इति श्रीभागवते। ३।१६।२॥

(सर्व्वाणि भूतानि जयतीति। जीयते संसारमनेन वा। विष्णुः। यथा, महाभारते। १३। १४६। ६७।

"जयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः॥"
नागविशेषः। यथा, महाभारते।५।१०३।१६।
"विरजा धारणश्चैव सुबाहुर्मुखरो जयः॥"
दानवविशेषः। यथा, हरिवंशे। २३४। ८३।
"जयो निकुम्भः कुपथश्च दानवो
रराजुरेते दश दानवाधिपम्॥"
दशमसन्वन्तरीय-ऋषिविशेषः। यथा, भागवते। ८। १३। २१—२२।
"दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मनुः॥"
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिरदाङ्गिराः॥"
ध्रुववंशीयस्य वत्सरस्य पुत्रविशेषः। यथा, तत्रैव। ४। १३। १२।
"सुवीथीर्वत्सरस्येष्टा भार्य्याऽसूत षडात्मजान्।
पुष्पार्णं तिग्मकेतुञ्च इषमूर्ज्जं वसुं जयम्॥"
विश्वामित्रपुत्रविशेषः। (यथा, तत्रैव। ६। १६। ३६।
"एष वः कुशिकाः वीरो दैवरातसमन्वितः।
अश्वैः चाष्टकहारीतजयक्रतुमदादयः॥"
ऊर्ज्वग्रीवगर्भजातः पुरुरवसः पुत्रविशेषः। यथा, तत्रैव। ६। १५। १।
"ऐलस्य चोर्ब्वग्रीवगर्भात् षड़ासन्नात्मजा नृप!।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः॥"
राजर्षिविशेषः। यथा, महाभारते। २।८।१४।
"तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः।
यमं वैश्रवणं तात! प्रहृष्टाः पर्य्युपासते॥"
इत्युपक्रम्याह।
"अङ्गो विजश्च वेणश्च दुष्मन्तः सृञ्जयो जयः॥"
धृतराष्ट्रपुत्राणामन्यतमः। यथा, तत्रैव। १। ६३। ११७।
"जयः सत्यव्रतश्चैव पुरमित्रश्च भारत!॥"
सृञ्जयस्य राज्ञः पुत्रः। यथा, हरिवंशे। २६। २।
"सृञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः॥"
सृञ्जयस्य राज्ञः पुत्रः। यथा, भागवते। ६। १७। १६। [जयः॥"
"कृशात् प्रतिः क्षत्रवृद्धात् सञ्जयस्तत सुतो
दौष्मन्तेर्भग्नो पुत्रविशेषः। यथा, तत्रैव। ६। २१। १।
"वितथस्य सुतात् मन्योर्बृहत्क्षत्रो जयस्ततः॥"
युयुधानपुत्रः। यथा, तत्रैव। ६। २४। १४।
"युयुधानः सात्यकिर्वै जयस्तस्य कुलिस्तः॥"
भारतादिग्राम्यविशेषः। यथा, भविष्यपुराणे।
"अष्टादशपुराणानि रामस्य चरितं तथा।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत!॥
कार्य्याश्च पञ्चमो वेदो यन्महाभारतं स्मृतम्।
सौराश्च धर्म्मा राजेन्द्र! भागवोक्ता महीपते!॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः॥"
दधिसङ्गारयहम्। इति शब्दार्थचिन्तामणिः॥
वत्सरविशेषः। तत्फलं यथा,—
"क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़िताङ्गे वरारोहे! जये सर्व्वे न संशयः॥")

जयकोलाहलः, पुं, (जयस्य कोलाहलो यत्र।) पाण्डवकभेदः। इति शब्दरत्नावली॥ (जयस्य कोलाहलः।) जयध्वनिश्च॥

जयघण्टा, स्त्री, (जयघोषिका घण्टा। विजयकाले एव वादनादस्य तथात्वम्।) वाद्यविशेषः। इति लोकप्रसिद्धा। जयढाक इति भाषा॥

जयदत्तः, पुं, (जयेन विजयेन दत्त इव। जयप्रीतत्वादेवास्य तथात्वम्।) इन्द्रपुत्रः। इति हेमचन्द्रः। २। ८६॥

जयनं, क्ली, (जीयतेऽनेनेति। जि+करणे ल्युट्।) तुरङ्गादिसमाहः। (यथा, माघे।१७।२३।
"सकवचं शिरदगजं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाहिनः।
त्वरायुजः स्वयमपि कुर्व्वतो नृपाः
पुनः पुनस्तदधिसतानतत्वरम्॥"*॥
भावे ल्युट्।) जयः। इति मेदिनी। ने, ६७॥

जयनी, स्त्री, (जयन+स्त्रियां ङीप्।) इन्द्रकन्या। इति शब्दरत्नावली॥

जयन्तः, पुं, (जयतीति। जि+"तृभूवहिवसीति।" उणां ३।१२८। इति झच्।) इन्द्रपुत्रः। तत्पर्य्यायः। पाकशासनिः २। इत्यमरः। १।१।४६॥ ऐन्द्रिः ३। इति मेदिनी। ते, ११०। (यथा, रघौ। ३।२३।
"उमाद्वितीयौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ॥"
विष्णुः। यथा, महाभारते। १३। १४६। ६८।
"अर्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी॥"
"अतिशूरयेगारिन् जयते जयहेतुरिति वर जयन्तः।" इति तद्भाष्यम्॥) शिवः। (यथा, मातृके। ५। ३०।
"सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादशगणेश्वराः॥")
चन्द्रः। इति त्रिकाण्डशेषः॥ भौमः। इति मेदिनी। ते, ११०॥ (एतन्नाम तु कृष्णना विराटगृहवासकाले जातम्। यथा, महाभारते। ४।५।३४।
"जयो जयन्तो विजयो जयत्सेनो जयद्बलः।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः॥"
मरुत्वतीगर्भजातो धर्म्मपुत्रविशेषः। अयं हि उपेन्द्र इत्याख्यया प्रसिद्धः। यथा, भागवते। ६।६।८।
"मरुत्वांश्च जयन्तश्च मरुत्वान् बभूवतुः।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः॥"
राज्ञो दशरथस्य मन्त्रिविशेषः। यथा, रामायणे। १।७।२—३।
"अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः॥
दृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः।
अकोपो धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित्॥"
पर्व्वतविशेषः। यथा, हरिवंशे।१७०।१४।
"ततश्च पर्व्वताः सप्त केशवं समुपस्थिताः।
जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः।
महामेरुः सकैलाशः इन्द्रकूटश्च गामतः॥"
ज्योतिषोक्तयात्रिकयोगविशेषः। यथा,—
"यत्र स्वोच्चगतश्चन्द्रो जन्मादेकादशे स्थितः।
जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत्॥")
षोड़शध्रुवकान्तर्गतध्रुवविशेषः। तस्य लक्षणं यथा,—
"आदितोऽयं जयन्तः स्यात् शृङ्गाररससंयुतः।
रुद्रसंख्याक्षरपदः आयुर्वृद्धिकरः परः॥"
इति सङ्गीतदामोदरः॥

जयन्तिका, स्त्री, (जयन्तीव कायतीति। के+कः। ततो ह्रस्वो निपातनात्।) हरिद्रा। इति राजनिर्घण्टः॥ (दुर्गायाः सखीविशेषः। यथा, कालीखण्डे। ४०। ४६।
"यथा जया च विजया यथा चैव जयन्तिका॥")

जयन्ती, स्त्री, (जयतीति। जि+"तृभूवहीति।" उणां ३। १२८। इति झच्। ततो गौरा-

दित्वात् ङीष् ।) गौरी । (यथा, कलिकापुराणे ।
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमो-
ऽस्तु ते ।")
इन्द्रपुत्री । पताका । इति मेदिनी । ते, १०६ ॥
वृक्षविशेषः । तत्पर्य्यायः । जया २ तर्कारी ३ नादेयी ४ वैजयन्तिका ५ । इत्यमरः ।२।४।६५॥ बला ६ मोटा ७ हरिता ८ विजया ९ सूक्ष्मपत्रा १० विक्रान्ता ११ अपराजिता १२ । (यथा, तिथितत्त्वे ।
"कदली दाड़िमो धान्यं हरिद्रा मानकं कचु ।
विल्वोऽग्नीको जयन्ती च विज्ञेया नवपत्रिकाः॥")
अस्याः गुणाः । मदगन्धयुक्तत्वम् । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । क्रिमिभूतनाशित्वम् । कण्ठविशोधनत्वञ्च । तत्र क्षुद्रा रसायनी । इति राजनिर्घण्टः ॥ एतच्छाकस्य गुणाः । गरदोषनाशित्वम् । पक्षत्रहितत्वम् । मधुरत्वम् । हिमत्वञ्च । इति राजवल्लभः ॥
("श्वेतजयन्ती मूलं पिष्टं पीतञ्च गव्यपयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ॥"
इति वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ॥)
योगविशेषः । यथा, तिथ्यादितत्त्वे स्कान्दम् ।
"जयं पुण्यञ्च कुरुते जयन्तीमिति तां विदुः ।
रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी ॥
अर्द्धरात्रादधश्चोर्द्धं कलयापि यदा भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्व्वपापप्रणाशिनी ॥"
(द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"उन्मिलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्येताः महापुण्याः सर्व्वपापहरा द्विज ! ॥"
वटिकौषधविशेषः । तद्यथा,—
"विषं पाठाश्वगन्धा च वचातालीशपत्रकम् ।
मरिचं पिप्पलीनिम्बमजामूत्रेण तुल्यकम् ।
वटिका पूर्ब्ववत्कार्य्या जयन्तीयोगवाहिका ॥"
इति जयन्ती वटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
जयपत्रं, क्ली, (जयस्यकं पत्रम् ।) अश्वमेधीययज्ञघोटककपाले वह्ना लिपिः । तद्यथा,—
"त्रैलोक्यविजयी रामो रावणान्तकरः प्रभुः ।
स दीक्षितो वाजिमेधे तस्यायं प्रोक्षितः पशुः ॥
पालितो लक्ष्मणेनैव सुलक्षणविलक्षितः ।
संपूज्य च परित्याज्यः सर्व्वैरिति च संस्कृताम् ॥"
इति वाशिष्ठरामायणम् ॥*॥
विवादविषयकजयबोधकलिपिः । डिक्रि इति इङ्गराजी भाषा । यथा, व्यवहारतत्त्वे ।
"यदृष्टं व्यवहारात्तु पूर्ब्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ॥
पूर्ब्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्यात्तस्यिने लेखं जयपत्रं तदुच्यते ॥"
जयपालः, पुं, (जयं पालयतीति । पालि+ "कर्म्मण्यण् ।" ३।२।१ । इलच् ।) विधिः । विष्णुः । भूपालः । इति शब्दरत्नावली । इत्य-

विशेषः । जमालगोटा इति भाषा । तत्पर्य्यायः । सारकः २ रेचकः ३ तिन्तिड़ीफलम् ४ दन्तीबीजम् ५ मलद्राविड् बीजरेचनम् ७ कुम्भीबीजम् ८ कुम्भिनीबीजम् ९ घण्टाबीजम् १० घण्टिनीबीजम् ११ निकुम्भाख्यबीजम् १२ शोधनीबीजम् १३ चक्रदन्तीबीजम् १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । विरेचनत्वम् । दीपनत्वम् । क्रिमिकफामजउदरामयनाशित्वञ्च । इति राजनिर्घण्टः ॥
जयपुत्रकः, पुं, (जयेन विजयेन पुत्र इव कायतीति । कै+कः । पुत्रतुल्यप्रीतिप्रदत्वात् तथात्वम् ।) पाशुकभेदः । इति शब्दरत्नावली ॥
जयमङ्गलः, पुं, (जय एव मङ्गलं यस्य । जयेन मङ्गलं यस्मादिति वा ।) राजवाजिहस्ती । इति शब्दरत्नावली ॥ ध्रुवकविशेषः । यथा,—
"चतुर्व्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः ।
शृङ्गारवीरयोरेव ताले चाचपुटे च सः ॥"
इति सङ्गीतदामोदरः ॥ *
ज्वररस औषधविशेषः । यथा,—
"हिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा ।
ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा ॥
समं सर्व्वं समाहृत्य द्विगुणं स्वर्णभस्मकम् ।
तदर्द्धं कान्तलौहञ्च रूप्यभस्मापि तत् समम् ॥
तत्समं पारदसमम् ।
एतत् सर्व्वं विचूर्ण्याथ भावयेत् कनकद्रवैः ।
श्लेष्मातीदलजैश्चापि दशमूलरसेन च ॥
किराततिक्तकक्वाथैस्त्रिवारं भावयेत् सुधीः ।
भावयित्वा तु तत् कार्य्यं गुञ्जाद्वयमिता वटी ॥
अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम् ।
जीर्णज्वरं महाघोरं चिरकालसमुद्भवम् ॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान् ॥
मेदोगतं मांसगतमस्थिमज्जगतं तथा ।
अन्तर्गतं महाघोरं व्रह्मिस्थञ्च विशेषतः ॥
नानादेशोद्भवञ्चैव ज्वरं शुक्रगतं तथा ।
निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात् ॥
जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः ।
बलपुष्टिकरश्चैव सर्व्वरोगनिवर्हणः ॥"
इति श्रीजयमङ्गलो रसः ।
इति भैषज्यरत्नावली ॥
जयवाहिनी, स्त्री, (जयस्य जयन्तस्य वाहिनी यद्वा स्वयंवरसभायां संग्रामे वा जयं वहतीति । वह+णिनिः । ततो ङीप् ।)
शूची । इन्द्राणी । इति हेमचन्द्रः । २।८६ ॥
जया, स्त्री, (जीयतेऽनया । जि+"इरच् ।" इति करणे अच् ततष्टाप् ।) दुर्गा । (यथा, महाभारते । ६ । २२ । २२ ।
"कात्यायनि महाभागे करालि विजये जये ! ॥")
अस्या युत्पत्तिर्यथा,—
"जयः कल्याणवचनो झाकारो दात्ववाचकः ।
जयं ददाति सा नित्यं वा जया परिकीर्त्तिता ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ।

जयन्तीवृक्षः । यथा, वैद्यवररत्नमालायाम् ।
"वैजयन्ती च तर्कारी जयन्ती विजया जया ॥"
तिथिविशेषः । सा तु तृतीयाष्टमीत्रयोदश्यः । (यथा, ज्योतिषे ।
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥"
द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्येताः महापुण्याः सर्व्वपापहरा द्विज ! ॥")
हरीतकी । दुर्गासखी । इति मेदिनी । ये, २४ ॥
(यथा, काशीखण्डे । ४७ । ४६ ।
"यथा जया च विजया यथा चैव जयन्तिका ॥"
देवी भगवती तु वराहशैले पीठस्थाने जया-संज्ञा विराजते । यथा, देवीभागवते ।७।३०।५२ ।
"वराहशैले तु जया कमला कमलालये ॥")
विजया । (यथा, रसप्रदीपे अजीर्णचिकित्सायाम् ।
"क्षारत्रयं क्षुतगन्धौ पञ्चकोलमिदं शुभम् ।
सर्व्वैस्तुल्या जया भद्रा तद्वर्द्धा शिग्रुजा जटा ।")
शान्ताहृक्षः । नीलदूर्व्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशस्य पूर्ब्वखण्डे प्रथमे भागे ।
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी पणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥")
पक्षाकाविशेषः । इति युक्तिकल्पतरुः ॥
(ज्वरौषधविशेषः । यथा,—
"विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपञ्चकम् ।
विड़ङ्गमष्टमं चूर्णं छागमूत्रैः समं समम् ।
वणकाभा वटी कार्य्या स्याज्जया योगवाहिका ॥
जयन्ती वा जया वाथ क्षौद्रैः पित्तज्वरापहा ।
सुद्राममलकयूषेण पथ्यं देयं घृतं विना ॥
जयन्ती वा जया वाथ विषमज्वरनुद्वृतैः ।
सर्व्वज्वरं मधुयोगैर्गवां मूत्रेण पीतकम् ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा ।
जयन्ती वा जया वाथ माक्षिकेण च कासजित् ॥
जयन्ती वा जया वाथ गोमूत्रेण युतां पिबेत् ।
हन्त्यासु काकजं कुष्ठं सुलेपेन च तद्वृतम् ॥
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाचयेत् ।
जयन्ती वा जया वाथ मेहं हन्ति सुराक्षयम् ॥
जयन्ती वा जया वाथ मधुना सर्व्वमेहजुत् ।
जयन्ती वा जया वाथ गुड़ैः कोष्णजलैः पिबेत् ॥
त्रिदोषोत्थं हरेद्गुल्मं रसो वा नन्दभैरवः ।
जयन्ती वा जया वाथ मुस्ता सर्व्वभगन्दरम् ।
जयन्ती वा जया वाथ तक्रेण ग्रहणीप्रणुत् ।
जयन्ती वा जया वाथ शङ्खभस्मावचैर्निशान्वितम् ॥
जयन्ती वा जया वाथ दृष्ट्वा स्वल्पेन चाञ्जनम् ।
आवर्त्तं सर्व्वदोषोत्थं मांसदृद्धिञ्च नाशयेत् ॥"
इति जयाजयन्ती वटी ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥*॥)
जयावहा, स्त्री, (जयमावहतीति । आ+वह+अच् ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥
जयाश्रया, स्त्री, (जयमाश्रयतीति । आ+श्रि+अच् ।) जरड़ीवृक्षः । इति राजनिर्घण्टः ॥

जयाङ्का, स्त्री, (जयस्य आङ्का आख्या आङ्का यस्या:।) भद्रदन्तीवृक्ष:। इति राजनिर्घण्ट:॥

जयी, [न्] त्रि, (जेतुं शीलमस्य। जि+"जिदृक्षिविश्रीति।" ३।२।१५७। इति इनि:।) जययुक्त:। विजयी। यथा,—

"जगति जयिनो यस्य विशिखा:।"

इति महिम्न: स्तोत्रम्॥

(यथा, च रघौ। ४। ३४।

"पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी।
प्राप तालीवनश्यामसुपकण्ठं महोदधे:॥")

जय्य:, त्रि, जेतुं शक्य:। ("शकि लिङ् च।" ३।३।१७२। इति शक्तौ यत्। गुण:। "च्व्यजय्यौ शक्यार्थे।" ६।१।८१। इति। यान्तादेश:।) जयकरत्वयोग्य:। इत्यमर:। २।८।७४॥ (यथा, शतपथब्राह्मणे। १४। ४।३।२४।

"सोऽयं मनुष्यलोक: पुत्रेणैव जय्यो नान्येन कर्म्मणा॥")

जरठ:, त्रि, (जीर्य्यत्यनेनेति। जॄ वयोहानौ+उठां १।१०२। सूत्रे बाहुलकात् जॄधृमोरथट: इत्युज्ज्वलदत्तोक्तेरठ:।) कर्कश:। पाण्डु:। कठिन:। इति मेदिनी। ठे, १३॥ (यथा, माघे। ४। २६।

"अयमतिजरठा: प्रकामगुर्वी-
रलघुविलम्बिपयोधरोपरुद्धा:॥")

जीर्ण:। इति हेमचन्द्र:॥ (वृद्ध:। यथा, भागवते। ६।१।२५।

"स बहुज्ञदयस्तस्मिन्नर्भके कलभाषिणि।
निरीक्षमाणस्तल्लीलां सस्नेहे जरठो भृशम्॥"

परिणत:। यथा, माघे। ११। १४।

"हिमरुचिरुचिरुचा राजते रज्यमाने-
र्जरठकमलकन्दच्छेदगौरैर्मयूखै:॥")

जरायां पुं। इति विश्व:॥

जरड़ी, स्त्री, (जॄ+बाहुलकात् अड़। ततो गौरादित्वात् ङीष्।) लताविशेष:। तत्पर्य्याय:। गन्धोटिका २ सुनाला ३ जयाश्रया ४। अस्या गुणा:। मधुरत्वम्। शीतत्वम्। सारकत्वम्। दाहरक्तदोषनाशित्वम्। रुच्यत्वम्। पथ्यत्वम् दुग्धदात्रत्वञ्च। इति राजनिर्घण्ट:॥

जरणं, क्ली, (जरयतीति। जॄ+ल्युट्+ल्यु:।) हिङ्गु। कुष्ठौषधी। जीर्णे, त्रि। इति शब्दरत्नावली॥ (श्वेतजीरक:। यथा वा,—

"अजाजी जरणं दीप्यं मागधी जीरकं सितम्॥"

इति वैद्यकरत्नमालायाम्॥)

जरण:, पुं, (जरयतीति। जॄ+ल्युट्+ल्यु:।) जीरक:। (यथा,—

"जीरको जरणो जाजी कणा स्याद्दीर्घजीरक:॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) लघुजीरक:। सौवर्चललवणम्। इति शब्दरत्नावली॥ कासमर्द:। इति राजनिर्घण्ट:॥

जरणा, स्त्री, (जरण+टाप्।) लघुजीरक:। इति राजनिर्घण्ट:॥ (यथा, ऋग्वेदे। १०।३७।६।

"भद्रं जीवन्तो जरणामशीमहि॥")

जरणद्रुम:, पुं, (जरणो जीर्ण: द्रुम:।) अश्वकर्णवृक्ष:। इति राजनिर्घण्ट:॥

जरण्ड:, त्रि, (जीर्य्यतीति। जॄ+अण्डच्।) जीर्ण:। इति संक्षिप्तसारे उणादिवृत्ति:॥

जरत्, त्रि, (जॄ+अतृन्) वृद्ध:। इत्यमर:। २।६।४२॥ पुरातनम्। इति हेमचन्द्र:॥

जरत्कारु:, पुं, मुनिविशेष:। तत्पर्य्याय:। यायावर: २। इति त्रिकाण्डशेष:॥ (एतन्निरुक्तिर्यथा, महाभारते। १। ४०। ३—४।

"जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम्।
शरीरं कारु तस्यासीत्तत् स धीमाञ्छनै: शनै:॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते।
जरत्कारुरिति ब्रह्मन्! वासुकेर्भगिनी तथा॥"

एतद्विवरणं यथा, देवी भागवते। २।१२।९-६।

"जरत्कारुर्मुनि: श्रान्तो न चकार गृहाश्रमम्।
तेन दृष्टा वने गर्त्ते लम्बमाना: खपूर्व्वजा:॥
ततस्तमाहु: कुरु पुत्रदारान्
यथा च न: स्यात् परमा हि तृप्ति:।
स्वर्गे व्रजाम: खलु दु:खमुक्ता
वयं सदाचारयुते सुते वै॥
स तानुवाचाथ लभे सनामा-
मयाचितां चातिवशानुगाञ्च।
तदा गृहारम्भमहं करोमि
ब्रवीमि तथ्यं मम पूर्व्वजा वै॥

इत्युक्ता तान् जरत्कारुर्गतस्तीर्थान् प्रति द्विज:॥"

अथ मात्राभिभ्रष्टो वासुकि: ब्रह्मोपदेशात् स्वभगिनीं जरत्कारुमेनमर्पयामास। तदुयथा, तत्रैव। २। १२। ३५—४५।

"वासुकिस्तु तदाकर्ण्य वचनं ब्रह्मण: शिवम्।
वनं गत्वा सुतां तस्मै ददौ विनयपूर्व्वकम्॥
सनामां तां समिच्छन्तो जरत्कारुरवाच तम्।
अप्रियं मे यदा कुर्य्यात्तदा तां सन्त्यजाम्यहम्॥
वाग्बन्धं तादृशं कृत्वा मुनिर्जग्राह तां स्वयम्।
दत्त्वा च वासुकि: कामं भवनं स्वं जगाम ह॥
कृत्वा पर्णकुटीं शुभ्रां जरत्कारुर्महावने।
तया सह सुखं प्राप रममाण: परन्तप!॥
एकदा भोजनं कृत्वा सुप्तोऽसौ मुनिसत्तम:।
भगिनी वासुकेस्तत्र संस्थिता वरवर्णिनी॥
न सम्बोधयितुञ्चाहं त्वया कान्ते! कथञ्चन।
इत्युक्ता तु गतो निद्रां मुनिस्तां सुदतीं तदा॥
रविरस्तगिरिं प्राप्त: सन्ध्याकाल उपस्थिते।
किं करोमि न मे शान्तिरद्येत्यां बोधित: पुन:॥
धर्म्मलोपभयाद्भीता जरत्कारुरचिन्तयत्।
नोचेत् प्रबोधयाम्येनं सन्ध्याकालो वृथा व्रजेत्॥
धर्म्मनाशाद्धरं त्यागस्तथापि मरणं ध्रुवम्।
धर्म्महानिर्नराणां हि नरकाय भवेत् पुन:॥
इति सञ्चिन्त्य सा बाला तं मुनिं प्रत्यबोधयत्।
सन्ध्याकालोऽपि सञ्जात उत्तिष्ठोत्तिष्ठ सुव्रत!॥
उत्थितोऽसौ मुनि: कोपात्तामुवाच व्रजाम्यहम्।
त्यक्तु भ्रातृगृहं याहि निद्राविच्छेदकारिणी॥
वेपमानाब्रवीद्वाक्यमित्युक्ता मुनिना तदा।
भ्रात्रा दत्ता यदर्थं तत् कथं स्यादमितप्रभ!॥
मुनि: प्राह जरत्कारुं तदस्तीति निराकुल:॥"

अस्य पुत्र: आस्तीकनामा मुनिप्रवर:। योऽसौ जनमेजयं गत्वा सर्पसत्रात् निवारयामास। जरत्कारुमुनेर्विशेषविवरणन्तु महाभारते आदिपर्व्वणि ४४—४८ अध्यायेषु द्रष्टव्यम्॥)

जरत्कारु:, स्त्री, मनसादेवी। इति त्रिकाण्डशेष:॥ (यथा, देवीभागवते। २। १२। ४७।

"मुनि: प्राह जरत्कारुं तदस्तीति निराकुल:॥")

जरत्कारुप्रिया, स्त्री, (जरत्कारो: मुनेर्नाम्ना ख्यातस्य मुने: प्रिया।) मनसादेवी। इति शब्दरत्नावली॥

जरती, स्त्री, (जरत्+"उगितश्च।" ४। १। ६। इति ङीप्।) वृद्धा। इति राजनिर्घण्ट:॥

जरद्गव:, पुं, (जरं प्राप्तो गौरिति। "गोरतद्धितलुकि।" ५। ४। ५२। इति टच्।) जीर्णवृष:। तत्पर्य्याय:। वृद्धोक्ष: २। इत्यमर:। २। ६। ६१॥ (यथा, पञ्चतन्त्रे। ४। ८४।

"अकृत्य पौरुषं या श्री: किं तयापि सुभोग्यया।
जरद्गव: समश्नाति देवादुपगतं तृणम्॥"

जरन् क्षीयमाणो गौर्वृषरूपो धर्म्म:। धर्म्मरूपजीर्णवृष:। यथा, महाभारते। १३।६३।६८।

"नेतस्तेह यथाशाकं शुष्कच्छास्त्रं जरद्गव:।
अलस: क्षुत्परो मर्खस्तेन गोवाच्छुना सह॥")

गृध्रपक्षिविशेष:। यथा,—

"अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्জ্জारस्य हि दोषेण हतो गृध्रो जरद्गव:॥"

इति हितोपदेशे मित्रलाभपरिच्छेद:॥

जरन्, पुं, (जरतीति। जॄ+शतृ।) वृद्ध:। इति राजनिर्घण्ट:॥

("वाल्मीके जरत् पित्तं मूलमाशु यपोहति॥"

इति माधवकृतरुग्विनिश्चये मूलाधिकारे॥)

जरन्त:, पुं, (जीर्य्यतीति। जॄ+"जॄविशिभ्यां झच्।" उणां। ३।१२६। इति झच्।) मन्थिय:। वृद्ध:। इति त्रिकाण्डशेष:॥

जरसान:, पुं, (जीर्य्यति जरायुक्तो भवतीति। जॄ वयोहानौ+"कृन्दृस्यसानच् सुजभ्याम्।" उणां। २। ८६। इति असानच्।) मनुष्य:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥

जरा, स्त्री, (जीर्य्यत्यनया। जॄ+"विदृभिदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। "ऋदृशोऽङि गुण:।" ७। ४। १६। इति गुण:।) वय:कृतशथमांसादावस्थाभेद:। वार्द्धक्यम्। "जीर्य्यत्यनया जरा जॄ वयोहानौ विच्चात् ड:, दृश्रोर्गुणरिति गुण:।" इत्यमरटीकायां भरत:॥ तत्पर्य्याय:। विस्रसा २। इत्यमर:। २।६।४१॥ सा तु कालकन्या। यथा,—

"कालकन्या जरा साक्षात् लोकान्तां नाभिनन्दति।
खसारं जगृहे कल्प: क्षयाय यवनेश्वर:॥"

इति श्रीभागवतम्।

रुधां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः। मृत्युकन्यासुतास्त्वेव जरा तस्याश्च कन्यका। जरा च भ्रातृभिः सार्द्धं ग्रसद्भ्रमति भूतलम्॥ एते चोपायवेत्तारं न गच्छन्ति च संयतम्। पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः॥ चक्षुर्जलस्य यायामः पादाधस्तैलसेवनम्। कर्णयोर्मूर्द्ध्नि तैलस्य जरायाधिविनाशकम्॥ यस्तप्ते भस्मनि वह्निसेवां स्वप्ने करोति यः। बालाश्च सेवते काले जरा तं नोपगच्छति॥ स्नातशीतोदकस्नायी सेवते चन्दनद्रवम्। नोपयाति जरा तस्य निदाघेऽनिलसेविनम्॥ प्रावृष्युष्णोदकस्नायी घनतोयं न सेवते। समये च समाहारी जरा तं नोपगच्छति॥ शरदौदं न गृह्णाति भस्मस्नातश्च वर्ज्जयेत्। स्नातस्नायी समाहारी जरा तं नोपतिष्ठते॥ स्नातस्नायी च हेमन्ते काले वह्निं निषेवते। मुद्गस्य नवान्नस्यश्च जरा तं नोपगच्छति॥ शिशिरेऽप्युष्णवह्निञ्च नवोष्णान्नञ्च सेवते। य एवोष्णोदकस्नायी जरा तं नोपगच्छति॥ सक्षौमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतञ्च सेवते यो हि जरा तं नोपगच्छति॥ मुद्गस्य सदन्नं ऋतुकाले त्वग्यायां पीयते जलम्। नित्यं मुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति॥ दधि हैयङ्गवीनञ्च नवनीतं तथा गुडम्। नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति॥ शुष्कमांसं स्त्रियं वृद्धां बालार्कन्तरुणं दधि। संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह॥ रात्रौ यो दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्। तानुपेति जरा क्षुब्धा भ्रातृभिः सह सुन्दरि!॥ रजस्वला च कुलटा चावीरा जारदूतिका। सूतयाजकपत्नी या ऋतुहीना च या सती!॥ यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः। तेन पापेन सार्द्धं सा जरा तमुपगच्छति॥ पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम्। पापं व्याधितरोर्बीजं विघ्नबीजञ्च निश्चितम्॥ पापेन जायते व्याधिः पापेन जायते जरा। पापेन जायते दैन्यं दुःखं शोको भयङ्करः॥ तस्मात् पापं महावैरं दोषबीजमसङ्गजम्। भारते सन्ततं सन्तो नाचरन्ति भयातुराः॥ स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम्। गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च॥ व्रतोपवासयुक्तञ्च सदा तीर्थनिसेवकम्। रोगा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः॥ एतान् जरा न सेवेत व्याधिसंघश्च दुर्ज्जयः। सर्व्वं बोध्यमसमये काले सर्व्वं प्रसिध्यति॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १।१६।३३—५५॥

जरायाः औषधं यथा, गारुडे १६६ अध्याये।

"पलाशचूर्णं समधु गवाज्यामलकान्वितम्। सविड्ङ्गं पीतमात्रं नरं कुर्य्यान्महामतिम्॥ मासेकेन महादेव! जरामरणवर्ज्जितः। पलाशबीजं सघृतं तिलमध्वन्वितं समम्। सप्ताहं भक्षितं रुद्र! जरां नयति संक्षयम्॥"

अपिच।

"ब्रह्मणीकृतं भृङ्गराजस्य चूर्णं
तिलार्द्धकं चामलकार्द्धकञ्च।
सशर्करं भक्षयते गुडेर्व्वा
न तस्य रोगो न जरा न मृत्युः॥

अन्धः पङ्गोरमनरहितो मत्तमातङ्गगामी मूको वाग्मी श्रवणरहितो दूरशब्दानुसारी। नीरङ्गात्मा भवति पलितो नीलजीमूतकेशो जीर्णा दन्ताः पुनरपि नवाः क्षीरगौरा भवन्ति॥"

इति भैषज्यरत्नावल्यां भृङ्गराजादिचूर्णम्॥

("क्लैब्यं जरासम्भवं हि प्रवक्ष्याम्यथ ततु शृणु।
जघन्यमध्यप्रवरं वयस्त्रिविधमुच्यते।
अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम्।
रसादीनां संक्षयाच्च तथैवाऽत्यशनेवनात्।
बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात्।
परिक्षयादायुषश्चाप्यनाहारात् श्रमात् क्षमात्।
जरासम्भवं क्लैब्यं इत्येतैर्हेतुभिर्नृणाम्॥
जायते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बलः।
विवर्णो विफलो दीनः क्षिप्रं व्याधिमवाप्नुते।
एतज्जरा सम्भवं हि॥"

"जरासम्भवने क्लैब्ये सवजे चैव कारयेत्।
क्लेदस्वेदोपपन्नस्य सक्लेदं शोधनं हितम्।
क्षीरसर्पिर्द्वयोगा वस्तयश्चैव यापनाः।
रसायनप्रयोगाश्च तयोर्भेषजमुच्यते॥"

इति चरके चिकित्सास्थाने त्रिंशेऽध्याये॥*॥

"या च भार्य्या विरूपाक्षी कक्षला कलहप्रिया।
वचनोत्तरवक्त्री च सा जरा न जरा जरा॥"

इति चाणक्यम्॥*॥)

चौरिकादृष्टः। इति शब्दचन्द्रिका॥ राजयक्ष्मविशेषः। यथा, श्रीभागवते।

"अन्यस्यामपि भार्य्यायां शुक्रबीजे दृढद्रथात्।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते॥"

जरातुरः, त्रि, (जरया आतुरः।) जीर्णः। जरारोगग्रस्तः। इति शब्दमाला॥ (यथा, मेघदूते। १।१३५।

"मर्त्तृकण्ठच्युता जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी।
अतिस्नवोरेव जलस्तदर्द्यतां
ब्रह्मो विधे! त्वां करुणा रुजन्ति न॥")

जरापुरः, पुं, (जरया रक्षसा पुरः।) जरासन्धः। इति शब्दरत्नावली॥

जराभीरुः, पुं, (जरातो भीरुः।) कामदेवः। इति हेमचन्द्रः। २।१३१॥ जरामरणभीरौ, त्रि॥

जराभिः, पुं, (जराया राक्षस्या अपत्यम्। जरा+बाहुलकात् इञ्। ततः प्राप्तजीवत्वात् तथात्वम्।) जरासन्धः। इति शब्दरत्नावली॥

जरायुः, पुं, (जरामेतीति। जरा+इण्+"क्विब्रयोः श्रिणः।" उणा १।४। इति उसुच्।) येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः। 'गर्भवेष्टनचर्म्म। ओंबोल इति भाषा। तत्पर्य्यायः। गर्भाशयः २ उल्बम् ३ कलः ४। इत्यमरः। २।६।३८॥

"या तु चर्म्मावृतिः सूक्ष्मा जरायुः सा निगद्यते॥"

इति महाभागवते भगवतीगीता॥

अग्निजारदृष्टः। इति राजनिर्घण्टः॥

जरायुजः, त्रि, (जरायौ जायते इति। जन+डः।) गर्भाशयजातः। स तु वृषवादिः। इत्यमरः। ३।१।५०॥

"या तु चर्म्मावृतिः सूक्ष्मा जरायुः सा निगद्यते।
शुक्रशोणितयोर्योगस्तस्मिन् संजायते यतः।
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः॥"

इति महाभागवते भगवतीगीता॥

जरासन्धः, पुं, (जरया तदाख्यया प्रसिद्धया राक्षस्या सन्धा देहसंयोजनमस्य।) चन्द्रवंशीयराजविशेषः। स तु बृहद्रथराजपुत्रः। कंसश्वशुरः, द्वन्द्वयुद्धे भीमसेनं हतवान्। अस्य नामकरणं यथा,—

"अन्यस्यामपि भार्य्यायां शुक्रबीजे द्वे बृहद्रथात्।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते॥
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः॥"

इति श्रीभागवतम्॥

तत्पर्य्यायः। बार्हद्रथिः २। इति त्रिकाण्डशेषः॥ (अस्य जन्मविवरणं महाभारते सभापर्व्वणि १७ अध्याये तथा मृत्युविवरणं तत्रैव २४ अध्याये द्रष्टव्यम्॥ अयं हि विप्रचित्तिनामकस्यासुरस्यावतारः। यथा, महाभारते। १।६७।४।

"विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः।
जरासन्ध इति ख्यातः स आसीत् मनुजर्षभः॥"

धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १।११७।८।

"दृढसन्धो जरासन्धः सत्यसन्धः सदःसुवाक्॥")

जरासन्धजित्, पुं, (जयतीति। जि+क्विप्। ततो जरासन्धस्य जित् जेता।) भीमः। इति त्रिकाण्डशेषः॥

जरी, [न्] त्रि, (जरास्यस्येति। जरा+इनिः।) वृद्धः। इति हेमचन्द्रः। ३।४॥

जरूथं, क्ली, (जीर्य्यतीति। जॄ+"जॄवृञ्भ्यामथन्।" उणा। २।६। इति ऊथन्।) मांसम्। इति त्रिकाण्डशेषः॥

जर्ब्ब, ग्र उत्सौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जर्ब्बती जर्ब्बन्ती। गुरुस्थानरहितानां तुदादिपाठफलन्तु ग्रन्थान्तरादीपोरिति तुणो विभाषा वेदेषूच्चारणभेदश्च। भर्त्सनञ्च भर्त्सनम्। इति दुर्गादासः॥

जर्ब्भ, ग्र उत्सौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जर्ब्भती जर्ब्भन्ती। भर्त्सनञ्च भर्त्सनम्। इति दुर्गादासः॥

जर्ब्ब, ग्र वाचि। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जर्ब्बती जर्ब्बन्ती। भर्त्सनञ्च भर्त्सनम्। इति दुर्गादासः॥

जर्ब्बरः, पुं, (जर्ब्बति स्वगुणेनापरान् निन्दतीति। जर्ब्ब+बाहुलकात् अरः।) श्लेष्मलः। (जर्ब्बति ग्रन्थान् तर्ज्जयतीति।) ग्रन्थकृच्छ्रः। (जर्ब्बते निन्द्यते इति। कर्म्मणि बहुलवचनादरः।)

जरातुरे, त्रि। इति मेदिनी। रे, १५७॥ (जीर्णे। यथा, महाभारते। ३। ११। ६५।
"अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्।
भूतले भ्रामयामास वाक्यचेदमुवाच ह॥"
विदीर्णे। यथा, माघे। ४। २३।
"कृत्वा पुंवत्प्रातसुचेर्भृगुभ्यो
ह्रह्रिं याच्ञां जर्जरा निर्झरौघाः॥")

जर्जरीकः, त्रि, (जर्जति जीर्णो भवतीति। जर्ज्ज + "फर्फरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययेन साधुः।) बहुच्छिद्रद्रव्यम्। जरातुरः। इति मेदिनी। के, १८६॥

जर्भ्, ग्र भर्त्सने। उक्तौ। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) ग्र, जर्भ्भति जर्भ्भते। भर्त्सनम्। इति दुर्गादासः॥

जर्भः, पुं, (जीर्य्यति क्षीणो भवतीति। जॄ + "कृवृजिदृपीति।" उणा ३।१०। इति भन्।) चन्द्रः। दृप्तः। इति मेदिनी। भे, १३॥ जीर्णे, त्रि। इति हेमचन्द्रः॥

जर्भः, पुं, (जायतेऽस्मादिति। जन + बाहुलकात् तप्रत्ययेन साधुः।) योनिः। हस्ती। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अत्र जर्तुरित्येव पाठो भवितुं युक्तः॥)

जर्मिलः, पुं, वनोद्भवतिलः। इति राजनिर्घण्टः॥ हेमचन्द्रश्च॥ (यथा, विष्णुपुराणे। १।६।२५।
"श्यामाकाश्चैव नीवारा जर्मिलाः सगवेधुकाः।
तथा वेणुयवाः प्रोक्तास्तान् मर्कटका सुने!॥")

जर्त्तुः, पुं, (जायते यस्मादिति। जन + "जनेस्तुरः।" उणा ५। ४६। इति तुः रेफश्चान्तादेशः।) योनिः। हस्ती। इत्युणादिकोषः॥

जर्त्स, भर्त्सने। रुषे। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) रेफयुक्तः दन्त्यवर्गाद्योपधः। जर्त्सति। भर्त्सा भर्त्सनमुक्तिश्च। इति दुर्गादासः॥

जर्हिलः, पुं, अरण्यतिलः। इति राजनिर्घण्टः॥

जल, क धिधाने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पिधानमाच्छादनम्। क, जालयति चन्द्रं मेघः। इति दुर्गादासः॥

जल, ज धान्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। अकं इति केचित्।) ज, जालः। जलः। धीयते अनेनेति धानं तस्य भावः धान्यं जीवनोपयोगिक्रिया। जलति लोकान् जलम्। जीवयतीत्यर्थः। धीयते आच्छाद्यते अनेनेति धानं तस्य भावः धान्यं आच्छादनक्रिया। जलति जालेन मत्स्यान् जालिक इति वा। गोविन्दभट्टस्तु धनस्य भावः धान्यं सङ्घट्टः। जलति धनी सङ्घट्टः स्यादित्यर्थं इत्याह। इति दुर्गादासः॥

जलं, क्ली, गोकलनम्। क्षीवेरम्। इति मेदिनी। ले, १८॥ (यथा, भावप्रकाशे अरोचकाधिकारे।
"जलं सकर्पूरगुरुभृङ्गकेसरम्।" इति॥ * ॥
जलति जीवयति लोकान् जलति आच्छादयति भूम्यादीनिति वा। जल + पचाद्यच्।) पानीयम्। पञ्चभूतान्तर्गतभूतविशेषः। अस्य धर्म्माः। रूपं द्रवत्वं प्रत्यक्षयोग्यत्वञ्च। इदं गुरुरसविशिष्टञ्च। अस्य गुणाश्चतुर्दश। यथा,—
स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२ रसः १३ स्नेहः १४। अस्य वर्णः शुक्लः रसो मधुरः स्पर्शः शीतलः। स्नेहः द्रवत्वं स्वाभाविकगुणः। परमाणुजलं नित्यम्। सावयवजलं अनित्यम्। अनित्यजलं त्रिविधं यथा।
देहं अयोनिजम् १ इन्द्रियं रसनम् २ विषयः सिन्धुहिमादिः ३। इति भाषापरिच्छेदः॥ * ॥
तस्योत्पत्तिर्यथा.—
"रूपमाप्याद्विकुर्व्वाणात्तेजसो देव चोदितात्।
रसमात्रमभूत्तस्मादप्सो जिह्वारसग्रहः॥"* ॥
तस्य लक्षणं यथा,—
"स्नेहनं पिच्छलं क्लिन्नं शीतलं शमनं तृषः।
तापापनोदो भूयस्त्वमप्सो दृष्टयक्षिमाः॥"
इति श्रीभागवतम्॥ * ॥
"अपां शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता।
जिह्वाविस्यन्दनत्वापि भौमानां अपञ्च तथा॥
चतुर्थमापो विज्ञेयं जिह्वाधातुं प्रचक्षते।
अधिभूतं रसस्तत्र सोमस्तत्राधिदेवतम्॥"
इत्यात्मभेदिकपर्व्व॥ * ॥
तत्पर्य्यायः। आपः २ क्षीरादिकुम्बवचनान्तोऽयम्। वाः ३ वारि ४ सलिलम् ५ कमलम् ६ पयः ७ कीलालम् ८ अष्टतम् ९ जीवनम् १० भुवनम् ११ वनम् १२ कबन्धम् १३ उदकम् १४ पाथः १५ पुष्करम् १६ सर्व्वतोमुखम् १७ अम्भः १८ अर्ण्णः १९ तोयम् २० पानीयम् २१ नीरम् २२ क्षीरम् २३ अम्बु २४ सम्बरम् २५ मेघपुष्पम् २६ घनरसः २७। इत्यमरः।१।१०।३॥ आपः २८ शान्तस्त्रीवोऽयम्। सरिलम् २९ सलम् ३० जड़म् ३१ कम् ३२ अम्भम् ३३ कपन्धम् ३४ उदम् ३५ दकम् ३६ नारम् ३७ शुम्बरम् ३८ अब्भपुष्पम् ३९ घनरसम् ४० घृतम् ४१। इति भरतः॥ पीप्पलम् ४२ कुशम् ४३ विषम् ४४ काण्डम् ४५ सवरम् ४६ सरम् ४७ कपीटम् ४८ चन्द्रोरसम् ४९ सदनम् ५० कर्ब्बुरम् ५१ व्योम ५२ सम्बः ५३ सरः ५४ इरा ५५ वाजम् ५६ तामरम् ५७। इति जटाधरः॥ कमलम् ५८ स्यन्दनम् ५९ सम्बलम् ६० जलपीयम् ६१ चरम् ६२ ऋतम् ६३ ऊर्ज्जम् ६४ कोमलम् ६५ सोमम् ६६। इति शब्दरत्नावली॥* ॥ तस्य गुणाः। ईषत् कषायत्वम्। मधुरत्वम्। स्नेहित्वम्। शीतलत्वम्। क्षुण्णाग्नित्वम्। अव्यक्तरसत्वम्। शरीरेन्द्रियतर्पणत्वञ्च॥* ॥ सुगन्धस्य तस्य गुणाः। अव्यक्तरसत्वम्। सुशीतलत्वम्। तर्पणाग्नित्वञ्च॥ * ॥ स्वच्छस्य तस्य गुणाः। लघुत्वम्। हृद्यत्वम्। गुणवत्त्वञ्च॥ * ॥ पर्य्युषितबालकर्दमयुक्तजलगुणाः। पिच्छिलत्वम्। क्लमिलत्वम्। क्लिन्नत्वम्। विवर्णत्वम्। विरसत्वम्। सान्द्रत्वम्। दुर्गन्धित्वम्। अहितकारित्वञ्च॥ * ॥ दिवाकर्य्यकिरणशशाङ्कचन्द्ररश्मिसृष्टजलगुणाः। अरुक्षत्वम्। अनभिष्यन्दित्वम्। गगनाम्बुतुल्यत्वञ्च॥ * ॥ साधारणजलगुणाः। तृप्यत्वम्। दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च॥ * ॥ वर्षाकालीनजलगुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। मधुरत्वम्। सारकत्वञ्च॥ * ॥ शरत्कालीनजलगुणाः। अनभिष्यन्दित्वम्। लघुत्वञ्च॥* ॥ हैमन्तिकजलगुणाः। स्निग्धत्वम्। बल्यत्वम्। तृप्यत्वम्। हितकारित्वम्। गुरुत्वञ्च॥ * ॥ शैशिरजलगुणः। कफवातनाशित्वम्। हैमन्तिकात् किञ्चिल्लघुत्वञ्च॥ * ॥ वासन्तिकजलगुणाः। कषायत्वम्। मधुरत्वम्। बल्यत्वम्। रूक्षत्वञ्च॥ * ॥ ग्रैष्मिकजलगुणः। अनभिष्यन्दित्वम्॥ * ॥ शीतलजलगुणाः। मदमूर्च्छाच्छर्द्दिपित्तज्वरश्रमक्लमभ्रमदाहमदात्ययविषनाशित्वम्॥ * ॥ पवनाहतधारापातजलगुणाः। विदम्भित्वम्। दुर्जरत्वञ्च॥ * ॥ यत् अन्तर्व्वाष्पशीतलं तत् हृतशीतं तस्य गुणः। त्रिदोषनाशित्वम्॥ * ॥ जलस्य सिद्धकरणप्रकारः। हेमन्ते शिशिरे पादहीनं वसन्ते पादस्थितं ग्रीष्मशरत्कालयोरर्द्धावशेषितं वर्षाखण्डावशेषितम्। दिवासिद्धं जलं रात्रौ गुरु रात्रिसिद्धं दिवागुरु॥ * ॥ पुष्पसुवासितशुक्लवस्त्रपूतनूतनन्तृप्राप्तस्यजलगुणः। मङ्गलरुचिकारित्वम्॥ * ॥ अजीर्णे जलमौषधं जीर्णे बलप्रदं आहारकाले आयुर्जनकं भुक्ताग्रोपरि रात्रौ न पेयम्॥ * ॥ रात्रिशेषे जलपानगुणाः। कासश्वासातीसारज्वरवमथुकटीकोठकुष्ठमूत्राघात-उदरार्शःश्वयथुगलशिरःकर्णनासाचक्षुरोगवातपित्तकफक्षयजरोगनाशित्वम्॥ * ॥ मेघशून्यरात्रिशेषे नाशिकारन्ध्रेण जलपानगुणाः। बुद्धिकारित्वम्। चक्षुर्हितत्वम्। वलीपलितसर्व्वरोगनाशित्वञ्च॥ * ॥
"जलञ्च तुर्व्विधं प्राहुरन्तरीक्षोद्भवं बुधाः।
धारञ्च कारकञ्चैव तौषारं हैममित्यपि॥"
इति राजनिर्घण्टः॥ * ॥
क्षुधिताय रोगिणेऽपि जलं देयं यथा,—
"पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वार्य्यते॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते॥
क्षुधितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
तस्माज्जलमवश्यं हि दातव्यं भेषजैः समम्॥"
इति राजवल्लभः॥ * ॥
"पादेन घटमुत्थाप्य भाजने पूरयेज्जलम्।
तज्जलं मदिरातुल्यं भाण्डस्थं सुरया समम्॥"
इति कर्म्मलोचनम्॥ * ॥
तस्य दानमाहात्म्यं यथा,—
"अन्ने दत्ते नरैरेह प्राणा दत्ता भवन्त्युत।
प्राणदानाद्धि परमं न दानमिह विद्यते॥

अन्नं नापि प्रभवति पानीयात् कुरुसत्तम ! ।
नीरजातेन हि विना न किंचित् संप्रवर्त्तते ॥
अन्नौषधी महाराज ! वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! ॥
तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।
तच्च दत्तानरो नित्यं यदीच्छेद्गतिमात्मनः ॥
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शृणुष्वाप्यधि कौन्तेय ! यदा तिष्ठति तोयदः ॥
सर्व्वकामानवाप्नोति कीर्त्तिंचैवेह शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥
तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥"
इति महाभारते दानधर्म्मः ॥ * ॥
"एकहस्ते धृतं तोयमभक्ष्यं सर्व्वसम्मतम् ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥ * ॥
"उद्धृतं वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तुल्यं स्यान्मनुराह प्रजापतिः ॥"
इति मनुः ॥

तस्य वेदोक्तपर्य्यायाः । अर्णः १ चोदः २ सलः ३ नभः ४ अभ्रः ५ कवन्धम् ६ सलिलम् ७ वाः ८ वनम् ९ घृतम् १० मधु ११ पुरीषम् १२ पिप्पलम् १३ क्षीरम् १४ विषम् १५ रेतः १६ कशः १७ अभ्रं १८ वृवूकम् १९ वसम् २० तुग्र्या २१ वर्ष्मरम् २२ सुखेमं २३ धरुणम् २४ सुरा २५ अरविन्दानि २६ धन्वन्तु २७ जामि २८ आयुधानि २९ शपः ३० अद्भिः ३१ अक्षरम् ३२ सोतः ३३ क्षत्रिः ३४ रहसः ३५ उदकम् ३६ पयः ३७ रसः ३८ भेषजम् ३९ सदः ४० ध्रुवः ४१ यहः ४२ ओजः ४३ सुखम् ४४ क्षत्तम् ४५ आवयाः ४६ शुभम् ४७ यादुः ४८ भूतम् ४९ सुवनम् ५० भविष्यत् ५१ आपः ५२ महत् ५३ व्योमः ५४ यज्ञः ५५ महः ५६ सर्व्वौकम् ५७ स्वतीकम् ५८ सतीनम् ५९ गहनम् ६० गभीरम् ६१ गम्भनम् ६२ ईम् ६३ अम्मम् ६४ हविः ६५ सद्म ६६ सदनम् ६७ ऋतम् ६८ योनिः ६९ ऋतस्ययोनिः ७० सत्यम् ७१ नीरम् ७२ रयिः ७३ सत् ७४ पूर्व्वम् ७५ सर्व्वम् ७६ अचितम् ७७ वर्हिः ७८ नाम ७९ सर्पिः ८० अपः ८१ पवित्रम् ८२ अन्तम् ८३ इन्दुः ८४ हेम ८५ स्वः ८६ स्वर्गः ८७ शम्बरम् ८८ अम्मम् ८९ वपुः ९० अम्बु ९१ तोयम् ९२ तूयम् ९३ कपीटम् ९४ शुक्रम् ९५ तेजः ९६ स्वधा ९७ वारि ९८ जलम् ९९ जलाषम् १०० । इदमिलैकशतसदकनामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥

अस्य गुणाः ।
पानीयं भ्रमनाशनं क्लमहरं मूर्च्छापिपासापहं तन्द्राच्छर्द्दिविनाशनं बलकरं निद्राहरं तर्पणम् । हृद्यं गुरुरसं क्षुजीर्णशमकं नित्यं हितं शीतलं लघुच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥"
अथ तस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।
दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम् ॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥"
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
श्लिलायां वा सुधायां वा धौतायां पतितञ्च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने न्यग्नये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्देश्यरसं लघु ।
सौम्यं रसायनं वल्यं तर्पणं क्षादिजीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
हृद्यां हरति तत्पथ्यं विशेषात् प्राट्शरि स्मृतम्॥"
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसासुद्रभेदतः ॥"
तत्रगाङ्गसासुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता दृष्टीः कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हेमजे पात्रे राजते न्यग्नयेऽपि वा ।
ग्राह्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तद्गाङ्गं सर्व्वदोषघ्नं ग्रेयं सासुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ।
विस्रञ्च दोषलं तीक्ष्णं सल्ककर्म्मसु गर्हितम् ।
सासुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य दिशर्धेरुदयात् सकलं जलम् ।
निर्म्मलं निर्विषं स्वादु शुक्लं स्यादोषलम् ॥"
अतएवाह ।
"पुत्कारविषवातेन नागानां श्वासचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥"
अथागस्त्यजलगुणाः ।
"अगस्त्यं प्रसुवन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितम् ॥"
अगस्त्यं पौषादिमासचतुष्टयविषयम् ॥
अथ करकजलस्य लक्षणं गुणाश्च ।
"दिव्यवायुसंयोगात् संहताः खात्पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारकोऽभ्रतोपमाः ॥
करकाजं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं साम्रं पित्तक्षतकफवातक्षत् ॥"
अथ तौषारजललक्षणं गुणाश्च ।
"अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः ।
धूमावयवनिर्म्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥"
अपि नद्याः समुद्रान्ते वह्निः । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते । तद्भवाः वह्निभवाः । धूमावयवनिर्म्मुक्ताः धूमांशरहिताः आपस्तुषाराख्याः । तुष इति लोके तुस इति च ।
"अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ताहिताः ।
तुषाराम्बु हिमं रूक्षं स्वाद्वातलमपित्तलम् ॥
कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत् ॥"
अथ हैमजलस्य लक्षणं गुणाश्च ।
"हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्म्मनीषिणः ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ॥"
हैमं जलं कुहंसजलम् । अन्ये तु ।
"और्व्वानलधूमेरित-
मम्बु समुद्रस्य यद्घनीभूतम् ।
पवनानीतमुदीच्यां
तद्धिममिति कथ्यते मुनिभिः ॥
हिमं कुहंस इति लोके ।
हिमन्तु शीतलं रूक्षं दारुणं क्लमजिमत्यपि ।
न तद्भवते वातं नच पित्तं न वा कफम् ॥"*॥
अथ भौमं जलं तद्भेदाश्च ।
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ग्रीष्मो जाङ्गलो देशस्तत्रत्यं जाङ्गलं जलम् ॥
बहुवार्म्बहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
साधारणन्तु मधुरं दीपनं शीतलं लघु ॥
तर्पणं रोचनं क्षुदादाहदोषत्रयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ।
नद्यः शैलवहा लघ्वः सर्व्वा याश्चामलोदकाः ॥
गुर्व्व्याः शैवालसंछन्ना मन्दगाः कलुषाश्च याः ।
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ॥
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
अथौद्भिदस्य लक्षणं गुणाश्च ।
"विदार्य्य भूमिं निर्य्यत्या यन्नद्या धारया स्रवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
ग्रैष्मिकं मधुरं वल्यमीषद्वातकरं लघु ॥"
अथ नैर्झरस्य लक्षणं गुणाश्च ।
"शैलसानुसवद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥
नैर्झरं रुचिदन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुकं पाके वातलं स्यादपित्तलम् ॥"
अथ सारसस्य लक्षणं गुणाश्च ।
"नद्याः शैलादिरुद्धाया यत्र संमुख्य तिष्ठति ।
तत् सरो जलजच्छन्नं तदम्भः सारसं स्मृतम् ॥
सारसं सलिलं वल्यं हृद्यान्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बह्वम्लमलं सितम् ॥"
अथ तडागस्य लक्षणं गुणाश्च ।
"प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तडागः स्यात्तडागं तज्जलं स्मृतम् ॥
तडागसदकं स्वादु कषायं कटुपाकि च ।
वातलं बह्वविण्मूत्रमरुक्पित्तकफापहम् ॥"
अथ वाप्यस्य लक्षणं गुणाश्च ।

"पाषाणैरिष्टकाभिर्वा बद्धकूपा दृढत्तरा।
ससोपाना भवेद्वापी तज्जलं वाप्यमुच्यते॥
वाप्यं वारि यदि चारं पित्तकृत् कफवातहृत्।
तदेव मिष्टं कफकृत् वातपित्तहरं भवेत्॥"
अथ कौपस्य लक्षणं गुणाश्च।
"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु।
तत् चारं कफवातघ्नं दीपनं कफकृत् परम्॥"
अथ चौद्यस्य लक्षणं गुणाश्च।
"शिलाकीर्णं स्वयं स्वभ्रं नीलाञ्जनसमोदकम्।
लतावितानसंछन्नं चौद्यमित्यभिधीयते॥
अश्मादिभिरबद्धं यत्तत् चौद्यमिति चापरे।
तत्त्रयमुदकं चौडं मुनिभिः समुदाहृतम्॥
चौडं वह्निकरं नीरं रूक्षं कफहरं लघु।
मधुरं पित्तनुद्दृद्यं पाचनं विशदं स्मृतम्॥"
अथ पाक्वलस्य लक्षणं गुणाश्च।
"अल्पं सरः पल्वलं स्यात् यत्र चन्द्रर्क्षगे रवौ।
न तिष्ठति जलं किञ्चित् तज्जलं वारि पाक्वलम्॥
पाक्वलं वार्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत्॥"
अथ विकिरस्य जलस्य लक्षणं गुणाश्च।
"नद्यादिनिकटे भूमिर्यत्र भवेद्वालुकामयी।
उद्गायते ततो यत्तु तज्जलं विकिरं विदुः॥
विकिरं शीतलं स्वच्छं निर्दोषं लघु तत् स्मृतम्।
तुवरं स्वादु पित्तघ्नं चारं तत् पित्तलं मनाक्॥"
अथ केदारस्य लक्षणं गुणाश्च।
"केदारं क्षेत्रसुद्दिष्टं केदारं तज्जलं स्मृतम्।
केदारं वार्यभिष्यन्दि मधुरं गुरु दोषकृत्॥"
अथ दृतिजलस्य लक्षणं गुणाश्च।
"वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं जलम्।
चिराच्चसुषितं तत्तु प्रसन्नमम्लतोपमम्॥"
अथ हेमन्तादिकालविशेषे विहितो जलविशेषः।
"हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम्।
हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम्।
न देयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः॥
विषवद्वनवृक्षाणां पत्राद्यैर्दूषितं यतः।
औद्भिदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम्॥
ग्रस्तं ग्रहदि नादेयं नीरमम्बूदकं परम्।
दिवा रविकरैर्ग्रस्तं निशि शीतकरांशुभिः॥
ज्ञेयमम्बूदकं नाम स्निग्धं दोषत्रयापहम्।
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम्॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम्॥"
रविकरैर्ग्रस्तमित्युक्ते दिवापदं समस्तदिवसप्राप्त्यर्थं शीतकरांशुभिर्ग्रस्तमित्युक्ते निशीतिपदं समस्तरात्रिप्राप्त्यर्थम्। अन्यच्च।
"ग्रहदि स्वच्छसदयादगस्त्यस्याखिलं हितम्॥"
दृढसुश्रुतस्तु।
"पौषे वारि सरोजातं माघे तत्तु तडागजम्।
फाल्गुने कूपसम्भूतं चैत्रे चौद्यं हितं मतम्॥
वैशाखे नैर्झरं नीरं ज्येष्ठे ग्रस्तं तथौद्भिदम्।
आषाढ़े ग्रस्यते कौपं श्रावणे दिव्यमेव च॥
भाद्रे कौपं पयः ग्रस्तमाश्विने चौद्यमेव च।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते॥"
अथ जलस्य ग्रहणकालः।
"भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते।
ग्रीतलं निर्मलत्वञ्च यतस्तेषां महान् गुणः॥"
अथ जलस्य पाने विधिः।
"अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि॥"
अथ ग्रीतलजलपानस्य विषयाः।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये।
भ्रमे श्रमे विदग्धेऽन्ने तमके वमथौ तथा।
ऊर्द्ध्वगे रक्तपित्ते च ग्रीतमम्भः प्रशस्यते॥"
अथ तन्निषेधः।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे।
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ।
हिक्कायां स्नेहपाने च ग्रीताम्बु परिवर्जयेत्॥"
अथाल्पजलपानस्य विषयाः।
"अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये।
सुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे।
ग्रन्थौ च मधुमेहे च पिबेत् पानीयमल्पकम्॥"
अथ जलपानस्यावश्यकता।
"जीवानां जीवनं जीवो जगत् सर्वन्तु तन्मयम्।
अतोऽत्यन्ततया सुज्ञो न क्वचित् वारि वार्यते॥"
हारीतश्च।
"क्षुधा गरीयसी घोरा सद्यःप्राणविनाशिनी।
तस्मादेयं क्षुधार्त्ताय पानीयं प्राणधारणम्॥
क्षुधितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्वास्ववस्थासु न क्वचित् वारि वारयेत्॥"
अथ ग्रशस्तं जलम्।
"अगन्धमरसं सुग्रीतं तर्षनाशनम्।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते॥"
अथ निन्दितं जलम्।
"पिच्छिलं क्रमिलं क्लिन्नं पर्णशैवालकर्दमैः।
विवर्णं विरसं मान्द्रं दुर्गन्धं न हितं जलम्॥
कलुषं क्षुद्रमत्स्योष्णनीलशैलशणादिभिः।
दुर्द्दैग्रजलसंसृष्टं सौरचान्द्रमसांशुभिः॥
अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम्।
आपन्नं परिहर्त्तव्यं सर्वदोषप्रकोपणम्॥
तत् कुर्य्यात् स्नानपानार्थं क्षुधाध्मानोदर-
ज्वरान्।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा॥"
अथ दुष्टजलस्य निर्दोषीकरणोपायः।
"निन्दितं चापि पानीयं कथितं सूर्य्यतापितम्।
सुवर्णं रजतं लोहं पाषाणं सिकतां स्पृदम्॥
भृशं संतप्य निर्व्वाप्य सप्तधा साधितं तथा।
कर्पूरजातिपुन्नागपाटलादिसुवासितम्॥
शुचिसान्द्रपटस्रावैः क्षुद्रजन्तुविवर्ज्जितम्।
स्वच्छं कनकमुक्तादेः शुद्धं स्याद्दोषवर्ज्जितम्॥
पर्णमूलविसग्रन्थिमुक्ताकनकशैवलैः।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम्॥"
अथ पीतस्य जलस्य पाकावधिः।
"आमं जलं जीर्य्यति याममात्रं
तदर्द्धमात्रं ग्रतग्रीतलञ्च।
तदर्द्धमात्रं तु ग्रतं कटुष्णं
पयःप्रपाकेऽवधिरेष उक्तः॥"
इति भावप्रकाशे वारिवर्गः॥
अथ जले भगवत्पूजाविधिः।
"उत्तापेऽर्कांशुतो जाते ग्रीतलेन सुगन्धिना।
जलेन पूरिते पात्रे शीक्षणमुपवेशयेत्॥
नित्यार्चाविधिनाभ्यर्च्च्य सायं सन्ध्यासपास्य च।
देवं सिंहासने नीत्वा गन्धादिभिरथार्चयेत्॥
नीराज्य देवं सर्व्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम्।
द्वादश्यान्तु विशेषेण रात्रौ तोयस्थमर्चयेत्॥"
तस्माहात्म्यं यथा, गारुड़े।
"स्वर्णपात्रेऽथवा रौप्यैस्ताम्रे वा स्फाटिकेऽपि वा।
तोयस्थं योऽर्चयेद्भक्त्या ग्रालग्रामससुद्भवम्॥
चक्राङ्कितं वा भूपाल! निवृत्ते मधुमाधवे।
प्रतिमां स महाभागस्तस्य पुण्यमनन्तकम्॥
यावद्वसुधरो लोके यावच्चन्द्रदिवाकरौ।
तावत्तस्य कुले कश्चिन्न भवेद्भूप! नारकी॥
तस्माच्छ्रेष्ठे सदा भूप! तोयस्थं पूजयेद्धरिम्।
वीततापो नरस्त्विष्टैर्यावदाभूतसंप्लवम्॥
क्षतैः सुग्रीतलैस्तोयैस्तुलसीदलवासितैः।
शुचिशुक्लगते काले येऽर्चयिष्यन्ति केशवम्॥
जलस्थं विविधैः पुष्पैर्मुच्यते यमयातनात्॥
जलस्था यतो विष्णुर्जलशायी जलप्रियः।
तस्मादग्नौ विशेषेण जलस्थं पूजयेद्धरिम्॥
नीरमध्यस्थितं कृत्वा ग्रालग्रामससुद्भवम्।
योऽभ्यर्चयेन्महाभक्त्या स भवेत् कुलपावनः॥
कर्किराशिगते सूर्य्ये मिथुनस्थे विशेषतः।
येनार्चितो हरिर्भक्त्या जलमध्ये महीपते!॥
द्वादश्यान्तु विशेषेण जलस्थं जलशायिनम्।
योऽभ्यर्चयेत् कृतं तेन यज्ञकोटिशतं भुवि॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेन्नरुड़ध्वजम्।
द्वादश्यां पूजयेद्यात्रौ सुक्तिभागी भवेन्नरः॥"
किञ्च।
"घनागमे प्रकुर्व्वन्ति जलस्थं ये जनार्द्दनम्।
ये नरा नृपतिश्रेष्ठ! तेषां वै नरकं ध्रुवम्॥"
"तथैवाश्वयुजसमये कालिन्द्यादौ विशेषतः।
सम्पादयेद्भगवतो जलक्रीड़ामहोत्सवम्॥"
इति श्रीहरिभक्तिविलासे १५ विलासः॥

जलः, त्रि, (जलति आच्छादयति विनाशयति वा ज्ञानं बुद्धिप्रतिभां वेति। जल+अच्।) जड़ः। (इति मेदिनी। ले, १८॥ (यथा, काशीखण्डे। २८।६६।
"जाड्यविध्वंसनकरी जगदृग्योर्निर्म्मलाविलां॥"
"जलानां जड़नामज्ञानानामित्यर्थः। आविलेव कलुषितेव आहतेवेति वा।" इति तट्टीका॥)

जलकण्टकः, पुं, (जले जातः कण्टकः। कण्टकान्वितत्वादेवास्य तथात्वम्।) मत्स्याटः। (भावो-

फल इति भाषा ॥ (जले कण्टकः प्रचुरिव।) कुम्भीरः। इति हारावली। ७६ ॥
जलकपिः, पुं, (जले कपिरिव।) शिशुमारः। इति हारावली। ७७ ॥
जलकरङ्कः, पुं, (जलपूर्णः करङ्कः। मध्यपदलोपिसमासः।) नारिकेलफलम्। (जले करङ्कः अशस्यनारिकेलफलास्थि इव।) पद्मम्। ग्रन्थिः। जललता। मेघः। इति मेदिनी। के, २२८ ॥
जलकल्कः, पुं, (जलस्य कल्क इव।) जम्बालः। इति हारावली। २०५ ॥
जलकाकः, पुं, (जले जलस्य वा काक इव।) पक्षिविशेषः। पानीकौड़ि इति भाषा ॥ तत्पर्य्यायः। दात्यूहः २ कालकण्टकः ३। अस्य मांसगुणाः। स्निग्धं गुरु हिमं दृष्यं मांसं जलपक्षिणामन्यु वातहरम्। इति राजनिर्घण्टः ॥
जलकाङ्क्षः, पुं, स्त्री, (जलं काङ्क्षति अभिलषतीति। जल+काङ्क्ष+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) हस्ती। इति चिकाण्डशेषः ॥
जलकाङ्क्षी, [न्] पुं स्त्री, (जलं काङ्क्षति अभिलषतीति। काङ्क्ष+णिनिः।) हस्ती। इति हारावली। १४ ॥ जलाभिलाषिणि, त्रि ॥
जलकान्तारः, पुं, (जलमेव कान्तारं दुर्गमपथो यस्य यस्मे इति वा। जलाधिष्ठातृत्वादेवास्य तथात्वम्।) वरुणः। इति हेमचन्द्रः। २।१०२॥
जलकामुकः, पुं, (जलस्य कामुकः अभिलाषुकः।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः ॥ (स्त्री, अर्कपुष्पी। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ॥")
जलकिराटः, पुं, (जले किरः शूकर इव अटति गच्छतीति। अट+अच्।) ग्राहः। इति हारावली। ७७ ॥
जलकुक्कुटी, स्त्री, (जले कुक्कुट इव। ततः स्त्रियां जातित्वात् ङीष्।) गङ्गाचिल्ली। इति हारावली। ८६ ॥
जलकुक्कुभः, पुं, (जले कुक्कुभः पक्षिविशेष इव।) जलचरपक्षिविशेषः। कोड़ापाखी इति भाषा ॥ तत्पर्य्यायः। कोयष्टिः २ शिखरी ३। इति हेमचन्द्रः ॥
जलकुन्तलः, पुं, (जलस्य कुन्तल केश इव।) शैवालम्। इति भूरिप्रयोगः ॥ (शैवालशब्देऽस्य विवृतिर्विधेया ॥)
जलकूपी, स्त्री, (जलस्य कूपीव।) कूपगर्भः। पुष्करिणी। इति मेदिनी। पे, २४ ॥
जलकूर्म्मः, पुं, (जले कूर्म्म इव। प्रवनसमये कूर्म्मस्येव दृश्यत्वादस्य तथात्वम्।) शिशुमारः। इति चिकाण्डशेषः ॥
जलकेशः, पुं, (जलस्य केश इव।) शैवालम्। इति हारावली। १०६ ॥
जलक्रीड़ा, स्त्री, (जलेन जले वा क्रीड़ा।) नद्यादौ वयस्यादिभिः सह जलनिःक्षेपादिरूपक्रीड़ा। तत्पर्य्यायः। करपाचम् २ व्यायुची ३ करपचिका ४। इति हारावली। ११६ ॥ (यथा, महाभारते। १। १२८। ३६।
"सहिता भ्रातरः सर्व्वे जलक्रीड़ामवाप्नुयः ॥")
जलगुल्मः, पुं, (जलस्य गुल्म इव।) जलावर्त्तः। कच्छपः। जलचत्वरम्। इति मेदिनी। मे, ६० ॥
जलङ्गः, पुं, (जलं गच्छतीति। जल+गम्+डः। तत्तो सुम्।) महाकालः। लताविशेषः। इति राजनिर्घण्टः ॥
जलङ्गमः, पुं, (जलं ग्रामान्तजलभूमिं गच्छतीति। जल+गम+"गमश्च।" ३। २। ४७। इति खच् सुम् च। ग्रामान्तवासित्वादेवास्य तथात्वम्।) जनङ्गमः। चाण्डालः। इत्यमरटीकायां भरतः ॥
जलचारी, [न्] पुं, (जले चरतीति। चर+णिनिः।) मत्स्यः। इति शब्दचन्द्रिका ॥ जलचरे, त्रि ॥ (यथा, रामायणे। ३। १५। ६।
"ददृशुः सहिता रम्यं तड़ागं योजनायतम्।
शरारिहंसकुररैराकीर्णं जलचारिभिः ॥")
जलजं, क्ली, (जले जायते इति। जन+डः।) पद्मम्। (यथा, कुमारे। २। ३०।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्ज्वलनासनम् ॥")
शङ्खः। इति मेदिनी। जे, २४ ॥ (यथा, रघुः। ७। ६३।
"ततः प्रियोपात्तरसेऽधरौष्ठे
निवेश्य दध्मौ जलजं कुमारः ॥")
लोणारम्। इति राजनिर्घण्टः ॥
जलजः, पुं, (जले जायते इति। जल+जन्+डः।) मत्स्यः। इति शब्दचन्द्रिका। (यथा, रामायणे। २। ६१। २२।
"स ताडग्रः सिंहबलो वृषभाक्षो नरर्षभः।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥")
जले निवासात् कुम्भीरशिशुमारादयः। एषां मांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वातनाशित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः ॥ हिज्जलवृक्षः। शैवलः। वानीरवृक्षः। शङ्खः। इति राजनिर्घण्टः ॥ कुमीलुः। इति भावप्रकाशः ॥ कर्कटमीनकुम्भराशयः मकरशैघार्द्धञ्च। इति दीपिका ॥ जलजाते, त्रि ॥ (यथा, हरिवंशे। ६०। ३२।
"जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां गुणैः।
जलजैः कुसुमैश्चित्रां जलजैरिवोदकाम् ॥")
जलजन्तुः, पुं, (जलजातो जन्तुः।) जलजप्राणी। तत्पर्य्यायः। यादः २। इत्यमरः। १।१०।२० ॥
जलजन्तुका, स्त्री, (जलजो जन्तुः। ततः संज्ञायां कन्। स्त्रियां टाप्।) जलौका। इति भरतः ॥
जलजन्म, [न्] क्ली, (जले जन्म यस्य।) पद्मम्। इति हेमचन्द्रः। ४। २२८॥ (स्थावरकन्दके, पुं। तद्यथा,—
"जन्तूका जलजन्मा च तथा स्थावरकन्दकम् ॥"
इत्युत्तरस्थाने २७शेऽध्याये वाभटेनोक्तम् ॥)
जलजम्बूका, स्त्री, (जलप्रधाना जम्बूका क्षुद्रजम्बूः।) क्षुद्रजम्बूः। इति भावप्रकाशः ॥ भूँइजाम इति वनजाम इति च भाषा ॥
जलजिह्वः, पुं, (जड़ा स्वादग्रहणासमर्था जिह्वा यस्य। ङस्य लः।) नक्रः। इति हारावली। ७६॥
जलडिम्भः, पुं, (जले डिम्ब इव।) शम्बूकः। इति हारावली। ११२ ॥ (शम्बूकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
जलतापिकः, पुं, (जलतापिन्+संज्ञायां कन्।) इङ्गीशमत्स्यः। काकचीमत्स्यः। इति शब्दरत्नावली ॥
जलतापी, [न्] पुं, (जलेऽपि तपति प्रकाशयतीयेति। तप+णिनिः।) इङ्गीशमत्स्यः। इति शब्दरत्नावली ॥
जलताल, पुं, (जलं अगाधसलिलं तलति आश्रयत्वेन गच्छतीति। तल+अण्।) इङ्गीशमत्स्यः। इति त्रिकाण्डशेषः ॥
जलतिक्तिका, स्त्री, (स्वल्पा तिक्ता तिक्तिका। स्वल्पार्थे कन्। जलप्रधाना तिक्तिका।) शुल्लकीवृक्षः। इति राजनिर्घण्टः ॥
जलत्रा, स्त्री, (जलात् त्रायते इति। त्रै+कः।) छत्रम्। इति हारावली। ४० ॥
जलदः, पुं, (जलं ददातीति। दा+कः।) मेघः। (यथा, मेघदूते। १३।
"मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्॥")
सस्यकम्। इति मेदिनी। दे, २६ ॥ (यथा,—
"अष्टता-नागर-सहचर-भद्रोत्कट-पथ्यमूल-
जलदजलम्।
घृतपीतं मधुयुक्तं निवारयति सूतिकातङ्कम्॥"
इति वैद्यकचक्रपाणिसंग्रहे सूतिकाधिकारे ॥
ग्राकाद्वीपान्तर्गतवर्षविशेषः। यथा, महाभारते। ६। ११। २२—२३।
"वर्षाणि तेषु कौरव्य! सप्तोक्तानि मनीषिभिः।
महामेरुर्महाकाशो जलदः कुसुदोत्तरः।
जलधारो महारूप! सुकुमार इति स्मृतः॥")
जलदागमः, पुं, (जलदानां मेघानां आगम आगमनं यत्र।) वर्षाकालः। इति राजनिर्घण्टः ॥ (यथाह वररुचिः।
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम्॥")
जलदाशनः, पुं, (अश्नते भक्षयते इति। अश+कर्म्मणि ल्युट्। जलदानां मेघानामशनः। मेघाः ग्राकाशपर्व्वं भक्षयन्तीति प्रसिद्धेः।) आकाशवृक्षः। इति शब्दचन्द्रिका ॥
जलधरः, पुं, (धरतीति धरः। धृ+अच्। जलस्य धरः।) मेघः। (यथा, महाभारते। १। १३५। १८।
"नभो जलधरैर्हीनं साङ्गारक इवांशुमान्॥")
सस्यकम्। इत्यमरः। १।३। ७,२। ४। १५६॥ समुद्रः। इति हेमचन्द्रः ॥ तिनिशवृक्षः। इति राजनिर्घण्टः ॥ जलधारिणि, त्रि ॥

जलधिः, पुं, (जलानि धीयन्तेऽस्मिन्निति। जल+धा+"कर्म्मण्यधिकरणे च।" ३।३। ९३। इति किः।) समुद्रः। (यथा, आर्य्यासप्तशत्याम्। ४८०।

"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्त्वमितरस्याम्।
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाचरसि॥")

दशगुणकसङ्ख्या। सा तु शतलक्षकोटयः। इति लीलावती॥

जलधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति। गम+डः। स्त्रियां टाप्।) नदी। इति हेमचन्द्रः। ३। १४६॥

जलधिजा, स्त्री, (जलधौ जायते इति। जन्+"सप्तम्यां जनेर्डः।" इति डः।) लक्ष्मीः। इति त्रिकाण्डशेषः॥

जलधेनुः, स्त्री, (जलकल्पिता धेनुः।) दानार्थकल्पितधेनुः। यथा,—

होतोवाच।

"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्ब्बकम्।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्॥
तत्र मध्ये च राजेन्द्र! पूर्णकुम्भन्तु विन्यसेत्।
जलपूर्णसुगन्धाढ्यं कर्पूरागुरुचन्दनैः॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत्।
वत्सं तथापरं कल्प्य घृतेन परिपूरितम्॥
वर्द्धनीकं महाराज! पत्रपुष्पैः समन्वितम्।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम्॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप!।
मांसीसुगन्धीरं कुङ्कुमं तथा श्वेतयवाक्षतम्॥
आमलासर्षपाश्वेताः सर्व्वधान्यानि पार्थिव!।
चतुर्दिक्ष्वपि पत्राणि चत्वार्य्येव प्रकल्पयेत्॥
एवं घृतमयं पात्रं द्वितीयं दधिपूरितम्।
तृतीयं मधुनश्चैव चतुर्थे शर्करायुतम्॥
सुवर्णं सुखचन्द्रञ्च शृङ्गं क्षौमगुरूणि च।
प्रशस्तपत्रश्रवणे मुक्ताफलमयेक्षणाम्॥
ताम्रदृष्टां कांस्यदोहां दर्भरोमसमन्विताम्।
पुच्छं सूत्रमयं कृत्वा क्षौमाभरणभूषिताम्॥
कम्बले पुष्पमालाभ्यां गुड़ाक्तां मुक्तिदन्तिकाम्।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम्॥
इक्षुपादान्तु राजेन्द्र! गन्धपुष्पोपशोभिताम्।
क्षौमाजिनोपरि स्थाप्य वस्त्रैराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्च विप्राय विनिवेदयेत्।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे॥
साधुविप्राय राजेन्द्र! श्रोत्रियायाहिताग्नये।
तपोदृढे वयोदृढे दातव्या च कुटुम्बिने॥
यो ददाति नरो राजन्! यः पश्यति शृणोति च।
प्रतिगृह्णाति यो विप्रः सर्व्वे सुध्यन्ति पातकात्॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः।
विसृष्टः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः।
जलधेनुञ्च यो दद्यात् समेतावराधिपः॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः।
अथवा हविष्येकदिने यः पयोव्रतमास्थितः॥
ग्राहकोऽपि चिरार्त्तं वै तिष्ठेद्देवं न संशयः।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः॥
यत्र चाक्षरसा गीतं तत्र यान्ति जलप्रदाः।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः॥"

इति वाराहे जलधेनुमाहात्म्यनामाध्यायः॥

जलनकुलः, पुं, (जले नकुल इव।) जलजन्तुविशेषः। धाड़िया इति उड़िड़ाल इति च भाषा। तत्पर्य्यायः। उद्रः २ जलमार्জ্জারः ३ जलाखुः ४ जलश्वः ५। इति त्रिकाण्डशेषः। जलविड़ालः ६ नीराखुः ७। इति हारावली। ।७६॥ पानीयनकुलः ८ वसी ९। इति हेमचन्द्रः॥

जलनिधिः, पुं, (जलानि निधीयन्तेऽस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः। जलानां निधिरिति वा।) समुद्रः। इत्यमरः। १।१०।२०॥ (यथा, आर्य्यासप्तशत्याम्। ६१४।

"सरित इव यस्य गेहे शुष्यन्ति
विशालगोत्रजा नार्य्यः।
धारास्वेव स दृष्यति जलनिधिलहरीषु
जलद इव॥"

चतुःसंख्या समुद्रवाचित्वात्। यथा, सप्तशत्यसुक्तावल्याम्।

"वारे प्रीतकरं तिथौ जलनिधिं
भेऽस्मिन्च योगे द्वयम्॥" इति॥)

जलनिर्गमः, पुं, (गम+"अकर्त्तरि च कारके संज्ञायाम्।" ३।३।१९। इति भावे घञ्। जलानां निर्गमो बहिर्गमनं यस्मात्।) प्राकारगृहभित्त्यादिषु जलनिःसरणमार्गः। इति भरतः॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम्। इति सर्व्वानन्दः॥ तत्पर्य्यायः। भमः २। इत्यमरः। १।१०।७॥ वक्त्रम् ३ पुटभेदः ४। इति स्वामी॥

जलनीली, स्त्री, (जलं नीलयतीति। नील+तत् करोतीति णिच्+ततः "कर्म्मण्यण्।" ३।२।१। इत्यण्। ततो ङीष्।) शैवालम्। इत्यमरः। १।१०।३८॥ (शैवालशब्देऽस्या विवृतिर्द्रष्टव्या॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति। जल+धृ+बाहुलकात् खच् सम् च।) असुरविशेषः। तस्योत्पत्तिकारणं यथा,—

इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः कुतः। स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान। ततो रुद्रस्तेजसा प्रजज्वाल। तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्थोत्पन्नं भालनेत्रस्थवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् ततः स बालरूपोभूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका बधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं बालं समुद्रक्रोड़े दृष्ट्वा तं पप्रच्छ कस्यार्थं पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्त्वा ब्रह्मा क्रोड़े ददौ स बालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाहूय तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे। इति पाद्मोत्तरखण्डम्॥

जलपतिः, पुं, (जलस्य पतिः।) वरुणः। इति हेमचन्द्रः। २।१०२॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे। १२। ८६—९५।

"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः॥
आविरासीन्महादेवस्तुष्टस्तत्तपसा ततः।
उवाच कार्द्दमे! ब्रूहि कं ददामि वरोत्तमम्॥

कार्द्दमिरुवाच।

यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पक!।
सर्व्वासामाधिपत्यं मे देह्यपां यादसामपि॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः।
अभ्यषिञ्चत्-तं तत्र वारुणे परमे पदे॥
रत्नानामब्धिजातानामम्भोनां सरितामपि।
सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः॥
जलाशयानां सर्व्वेषां प्रतीच्याञ्चापि वै दिशः।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः॥")

समुद्रः। अप्यतिरित्यमरदर्शनात्॥

जलपारावतः, पुं, (जले पारावत इव।) पक्षिविशेषः। तत्पर्य्यायः। कोपी २ जलकपोतः ३। इति राजनिर्घण्टः॥

जलपित्तं, क्ली, (जलानां पित्तमिव।) अग्निः। इति शब्दरत्नावली॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली।) पिप्पलीविशेषः। पनिसगा इति लोके। जलपिपरी इति हिन्दी भाषा। तत्पर्य्यायः। महाराष्ट्री २ शारदी ३ तोयवल्लरी ४ मत्स्याक्षी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्री १० प्राणदा ११ लघुपत्रिका १२ बहुशिखा १३। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। व्रणकीटादिदोषरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"जलपिप्पल्यभिहिता शारदी शकुलादनी।
मत्स्याक्षी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता॥
जलपिप्पलिका कृच्छ्रा चक्षुष्या शुक्रला लघुः।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा॥
कटुपाका रसे रूक्षा कषाया वह्निबर्द्धिनी॥"

इति भावप्रकाशः॥

("गम्भीरो जलपिप्पल्यास्तुम्बुरुः शृङ्गवेरिका।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च॥"

इति शरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

जलपृष्ठजा, स्त्री, (जलस्य पृष्ठे उपरि प्रदेशे जायते इति। जन+डः।) शैवालम्। इति शब्दचन्द्रिका॥

जलप्रायं, क्ली, (जलस्य प्रायो बाहुल्यं यत्र।) जलबहुलस्थानम्। अनूपदेशः। इत्यमरः। २।१।१०॥

जलप्रियः, पुं, (जलं प्रियं यस्य।) चातकपक्षी। इति शब्दरत्नावली॥ मत्स्यः। इति शब्दचन्द्रिका॥

जलप्लवः, पुं, (जले प्लवते इति। प्लु+अच्।) जलनकुलः। इति हारावली। ७६॥

जलफलं, क्ली, (जलजातं फलम्।) शृङ्गाटकम्। इति भावप्रकाशः॥

जलबन्धः, पुं, (जलं बध्नाति जीवनहेतौ निर्व्यत्नेन परिकल्पयतीति। बन्ध+अच्।) मत्स्यः। इति शब्दचन्द्रिका॥

जलबन्धकः, पुं, (जलं बध्नातीति। बन्ध+ण्वुल्।) जलमध्यगं स्रोतोभेदकरं दारुशिलादि। तत्पर्य्यायः। विदारकः २ कूपकः ३। इति शब्दरत्नावली॥

जलधालकः, पुं, (जलेन वलयति जीवयति स्वाश्रितवृक्षादीनिति। वल जीवने+णिच्+ण्वुल्।) विन्ध्यपर्व्वतः। इति हेमचन्द्रः। ४।६५॥

जलबालिका, स्त्री, (जलस्य बालिकेव।) विद्युत्। इति हेमचन्द्रः। ४।१७१॥

जलबुद्बुदं, क्ली, (जलस्य बुद्बुदम।) जलविप्लवम्। यथा, सुश्रुतसंहितायां शरीरस्थानवचनम्।
"मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स वै मूढो जलबुद्बुदसन्निभे॥"

जलब्रह्मी, स्त्री, (जले ब्रह्मीव।) छिलमोची। इति हारावली। १८०॥

जलभूः, पुं, (भवत्यस्मादिति। भू+अपादाने क्विप्। ततो जलस्य भूः।) मेघः। (जलं भूरुत्पत्तिस्थानमस्य।) कच्छपः। इति शब्दचन्द्रिका॥

जलमक्षिका, स्त्री, (जलजाता मक्षिका।) वारिकृमिः। इति त्रिकाण्डशेषः॥

जलमद्गुः, पुं, (जले मद्गुरिव।) मत्स्यरङ्गपक्षी। इति हारावली। ८८॥

जलमधुकः, पुं, (जलजातो मधुकः।) मधुकवृक्षप्रभेदः। जलमहुया इति भाषा। तत्पर्य्यायः। मङ्गल्यः २ दीर्घपत्रकः ३ मधुपुष्पः ४ क्षौद्रप्रियः ५ पतङ्गः ६ कीरेष्टः ७ गैरिकाक्षः ८। अस्य गुणाः। मधुरत्वम्। व्रणवान्तिनाशित्वम्। शुक्रवलकारित्वम्। शीतत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः। अथ महुया वनमहुया।
"मधुको गुडपुष्पः स्यात् मधुष्ठीलो मधुस्रवः।
वानप्रस्थो मधुष्ठीलो जलजोऽथ मधूलकः॥
मधूकपुष्पं मधुरं शीतलं गुरु दृंहणम्।
वलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्॥*॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्।
अक्षुद्यं हन्ति तृष्णासदाहश्वासक्षतक्षयान्॥"
इति भावप्रकाशः॥

जलमसिः, पुं, (जलेन जलाकारेण मस्यति परिणमतीति। मस परिणामे+इन्। घनीभूतमेघस्य जलाकारेण परिणमनात् तथात्वम्।) मेघः। इति हारावली। १८॥

जलमार्गः, पुं, (जलस्य मार्गः निर्गमपथः।) प्रणाली। इति हेमचन्द्रः। ४।५५॥ नर्दमा इति भाषा॥

जलमार्जारः, पुं, (जलस्य मार्जार: जले मार्जार इव इति वा।) जलनकुलः। इति त्रिकाण्डशेषः॥

जलमुक्, [च्] पुं, (जलं मुञ्चतीति। मुच्+क्विप्।) मेघः। इत्यमरः। १।३।७॥ (यथा, मेघदूते। ७१।
"शृङ्गोत्सङ्गप्रथमरभसानेकसस्यामकक्षा
यत्र ज्यायान् क्षितिधरपतेर्दक्षिणस्तोयवाहः।
विद्युत्वन्तं ललितवनितासेवितं सानुमन्तं
तोयोत्सर्गस्तनितमुखरो मन्दमन्दं जलमुक्॥")

जलमूर्त्तिः, पुं, (जलं मूर्त्तिर्यस्य।) शिवः। इति तस्याष्टमूर्त्तिपूजायां तिथ्यादितत्त्वम्॥

जलमूर्त्तिका, स्त्री, (जलस्य मूर्त्तिः घनीभूताकृतिः। ततः स्वार्थे संज्ञायां वा कन् टाप् च।) करका। इति शब्दचन्द्रिका॥

जलमोदं, क्ली, (जलेन जलसंयोगेन मोदयति आनन्दयति सद्गन्धप्रदानेनेत्यर्थः। मुद्+णिच्+अण्।) उशीरम्। इति राजनिर्घण्टः॥

जलयन्त्रगृहम्, क्ली, (जलयन्त्रमिव छत्रं गृहम्।) जलमध्यछत्रगृहम्। जलटुङ्गि इति फोयारार घर इति च भाषा। तत्पर्य्यायः। समुद्रगृहम् २। इति त्रिकाण्डशेषः॥ जलयन्त्रनिकेतनम् ३। इति हारावली॥ जलयन्त्रमन्दिरम् ४। यथा.—
"क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।"
इति कालिदासः॥

जलरङ्कः, पुं, (जले सरसि रङ्कु इव।) वकपक्षी। इति हारावली। १८३॥

जलरङ्कुः, पुं, (जले रङ्कुरिव।) दात्यूहपक्षी। इति हलायुधः॥

जलरङ्गः, पुं, (जले रजति अनुरक्तो भवतीति। रञ्ज अनुरागे+अच्।) वकपक्षी। इति हेमचन्द्रः। ४।३।८॥ (वकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

जलरज्जुः, पुं, (जलस्य रज्जु इव भयजनकत्वात्।) जलावर्त्तः। पयोरेणुः। भुजङ्गमः। इति हेमचन्द्रः शब्दरत्नावली च॥

जलरसः, पुं, (जलजातो रसः। जलप्रधानो रसो वा।) लवणम्। इति हारावली। ७५॥

जलरुट्, [ह्] पुं, (जले रोहतीति। रुह+क्विप्।) पद्मम्। इति हेमचन्द्रः। ४।२२८॥

जलरुहं, क्ली, (जले रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) पद्मम्। इति हेमचन्द्रः। ४।२२८॥ (यथा, महाभारते। १।१२८।४१।
"जलञ्च शुशुभे छन्नं पुष्पैर्जलरुहैस्तथा॥")

जलरूपः, पुं, (जलस्य रूपमिव रूपं यस्य। शुभ्रवर्णत्वादस्य तथात्वम्।) मकरः। इति त्रिकाण्डशेषः॥

जललता, स्त्री, (जले लतेव तदाकारत्वात्।) तरङ्गः। इति हारावली। २०५॥

जलवरण्टः, पुं, (जलं रसस्तत्प्रधानो वरण्टो वसन्तः।) जलवसन्ताख्यवृक्षः। पानीवसन्त इति भाषा। तत्पर्य्यायः। भोगः २। इति हारावली। १४२॥

जलवल्कलः, पुं, (जलस्य वल्कल इव।) कुम्भिका। इति हारावली॥ ११२। पाना इति भाषा॥)

जलवल्ली, स्त्री, (जलजाता जलप्रधाना वा वल्ली।) शृङ्गाटकः। इति राजनिर्घण्टः॥

जलवायसः, पुं, (जले वायसः काक इव कृष्णवर्णत्वात्।) मद्गुपक्षी। इति हेमचन्द्रः। ४।३८॥ पानीकौड़ि इति भाषा॥

जलवासं, क्ली, (जलेन वासो गन्धो यस्य।) उशीरम्। इति राजनिर्घण्टः॥

जलवासः, पुं, (जलं वासयतीति। वस+णिच्+अण्।) विष्णुकन्दः। इति राजनिर्घण्टः॥ (जले वासः निवासः। सलिलनिवासः। यथा, महाभारते। १२। २६०। ५।
"स चिन्तायामास मुनिर्जलवासे कदाचन॥"
जले वासो यस्य इति विग्रहे जलवासिनि, त्रि। यथा तत्रैव। १२। २६०। ४।
"स कदाचित् महातेजा जलवासो महीपते!।
चचार लोकान् त्रिप्रर्षिः प्रेक्षमाणो
मनोजवः॥")

जलवाहः, पुं, (जलं वहतीति। वह+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) मेघः। इति हेमचन्द्रः। २। ७८॥ (यथा, भारविः। १२।२१
"सान्द्रजलधिजलवाहपं
सद्गिरयुवानिव विश्वमोजसा॥"
जलवाहके, त्रि। यथा, महाभारते। २।७।२०।
"जलवाहास्तथा मेघा वायवस्तनयित्नवः॥")

जलविड़ालः, पुं, (जले विड़ाल इव।) जलनकुलः। इति हारावली। ७६॥

जलविन्दुजा, स्त्री, (जलविन्दुभ्यो जायते इति। जन+डः।) यावनालीशर्करा। इति राजनिर्घण्टः॥

जलविश्वः, पुं, (जलप्रधानो विश्व इव।) कर्कटः। पर्य्याङ्गः। जलचत्वरम्। इति मेदिनी। वे, ५८॥ चातरजल इति भाषा॥

जलविप्लवं, क्ली, (जलप्रधानं विप्लवम्।) तुलासंक्रान्तिः। तत्पर्य्यायः। आश्विनचित्रितम् २। इति शब्दरत्नावली॥ चक्रविप्लवः। यथा,—
"मानं गिरे षण्मुखपञ्चवेदं
वर्षचतुर्भे बहुवित्तलाभः।

भोग: करे षट्पदयोस्तु षट्के
भीतिर्नृणां स्याद्विभुवस्य चक्रे ॥
यस्मिन्रुचे वसेद्भानुस्तस्मात् संगण्यतेऽद्भुत: ॥"
इति समयाम्बतम् ॥

जलवृश्चिक:, पुं, (जले वृश्चिक इव।) चिङ्गट-मत्स्य:। इति त्रिकाण्डशेष: ॥

जलवेतस:, पुं, (जलजातो वेतस:।) वानीर-वृक्ष:। इति राजनिर्घण्ट: ॥ (यथास्य पर्य्याया गुणाश्च।
"निकुञ्जक: परिव्याधो नादेयो जलवेतस:।
जलजो वेतस: प्रोक्त: कुब्जकुब्जातकोपन: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जलशय:, पुं, (जलं विध्यतीति। व्यध+अच्।) कङ्कत्रोटमत्स्य:। इति त्रिकाण्डशेष: ॥

जलशाल:, पुं, (जलस्थितो व्यालो हिंसजन्तु:।) अजगरसर्प:। इत्यमर:। १। ८। ५ ॥ क्रूर-कर्म्मा जलजन्तु:। इति राजनिर्घण्ट: ॥

जलशय:, पुं, (जले शेते। शी+अच्। पुंसीति घो वा।) विष्णु:। इति हेमचन्द्र:। २।१२८ ॥

जलशयन:, पुं, (जले क्षीरोदसलिले शेते इति। शी+ल्यु:।) विष्णु:। इति हलायुध: ॥

जलशायी, [न्] पुं, (जले शेते इति। शी+णिनि:।) विष्णु:। यथा, पुराणम्।
"जलमध्ये वराहश्च पावके जलशायिनम् ॥"

जलशुक्ति:, स्त्री, (जलचरी शुक्ति:।) शम्बूक:। इत्यमर:। १। १०। २३ ॥ ग्रामूक इति जल-सीपी इति च भाषा ॥ तत्पर्य्याय: वारि-शुक्ति: २ कृमिशुक्ति:३ क्षुद्रशुक्तिका४ शम्बूका५ नरशुक्ति: ६ पुटिका ७ तोयशुक्तिका ८। तस्या गुणा:। कटुत्वम्। स्निग्धत्वम्। दीपन-त्वम्। गुल्माशूलविषदोषनाशित्वम्। रुच्यत्वम्। पाचनत्वम्। बलदाढ्यत्वञ्च। इति राजनिर्घण्ट:॥

जलशूकं, क्ली, (जले शूकं सूच्याग्रमिव।) शैवालम्। इति हेमचन्द्र:। ४।२३३ ॥ (पुंलिङ्गेऽपि दृश्यते। यथा,—
"जलशूक: स्वयं गुप्ता रजन्यौ दृहतीद्वयम् ॥"
इत्युत्तरस्थाने २४ अध्याये वाभटेनोक्तम् ॥)

जलशूकर:, पुं, (जले जलस्य वा शूकर इव।) कुम्भीर:। इति हेमचन्द्र:। ४। ४१५ ॥

जलसर्पिणी, स्त्री, (जले सर्पति गच्छतीति। सृप+णिनि+ङीप्।) जलौका। इति हेमचन्द्र:। ४। २७० ॥

जलसूचि:, पुं, (जले सूचिरिव। अभिधानात् पुंस्त्वम्।) कङ्कत्रोटमत्स्य:। झङ्झाट:। शिंशु-मार:। जलौकायां स्त्री। इति मेदिनी। चे, २० ॥ काक:। इति हेमचन्द्र: ॥

जलस्तम्भनं, क्ली, (जलस्य स्तम्भनम्।) मन्त्रादि-द्वारा जलगतिनिवारणम्। तन्मन्त्रो यथा,—
"ओम् नमो भगवते जलं स्तम्भय स्तम्भय संस-मंसके कके कचर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते ध्रुवं ॥"
इति गारुडे १७६ अध्याय: ॥

पुस्तकान्तरे १८६ अध्याय: ॥ (जलस्तम्भनविद्या दुर्य्योधनेन विदितासीत्। अतएवायं द्वैपायन-ह्रदजलं संस्तभ्य तत्र सुष्वाप। एतत्कथा महाभारते शल्यपर्व्वणि २६ अध्याये द्रष्टव्या ॥)

जलस्था, स्त्री, (जले जलबहुलप्रदेशे तिष्ठतीति। स्था+क:। स्त्रियां टाप्।) गण्डदूर्व्वा। इति राजनिर्घण्ट: ॥ (जलावस्थिते, त्रि। यथा, भाग-वते। ३। २७।१२।
"यथा जलस्थ आभासो जलस्थेनावदृश्यते।
स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थित:॥")

जलहं, क्ली, (जलेन हन्यते इति। हन+वाहु-लकात् ड:।) स्वल्पजलयन्त्रगृहम्। इति त्रिकाण्डशेष: ॥

जलहास:, पुं, (जलानां हास इव शुक्लत्वात्।) समुद्रफेन:। इति त्रिकाण्डशेष: ॥

जलाका, स्त्री, (जले आकायति प्रकाशते इति। आ+कै+क:।) जलौकस:। इति शब्द-रत्नावली ॥

जलाक्षी, स्त्री, (जलमश्नोति व्याप्नोति करण-तयेति। अक्ष+अण्।) जलपिप्पली। इति शब्दरत्नावली ॥

जलाखु:, पुं, (जले आखुरिव।) जलनकुल:। इति त्रिकाण्डशेष: ॥

जलाक्षलं, क्ली, (जलमक्षति व्याप्नोतीति। अक्ष+वाहुलकात् अलच्। यद्वा, जले अक्षल: वल्कप्रान्त इव। अभिधानात् क्लीवत्वम्।) शैवालम्। खलो वारिनिर्गम:। इति मेदिनी। ले, १५४ ॥

जलाटन:, पुं, (जले अटति भ्रमतीति। अट+ल्यु:।) कङ्कपक्षी। इति मेदिनी। ने, १८४ ॥ (विशेषोऽस्य कङ्कशब्दे ज्ञातव्य: ॥)

जलाटनी, स्त्री, (जले अटति भ्रमतीति। अट+ल्यु:। स्त्रियां ङीष्।) जलौका। इति मेदिनी। ने, १८४ ॥

जलाण्डक:, पुं, (जले अण्डते इतस्ततो भ्रम-तीति। अण्ड गतौ+खुल्। पृषोदरादित्वात् ठस्य ट:।) नक्रराज:। इति हारावली ।७७॥

जलाण्डकं, क्ली, (जले अण्डमिव कायतीति। कै+क:।) पोताधानम्। इति शब्दरत्ना-वली ॥

जलात्मिका, स्त्री, (जलमेव आत्मा यस्या:। कप् ततः टापि अत इत्वम्।) जलौका। इति शब्दरत्नावली ॥

जलाधार:, पुं, (जलस्य आधार:।) जलाश्रय:। इत्यमर:। १। १०। २५ ॥ (यथा, याज्ञ-वल्क्ये। ३। १४४।
"आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्॥")

जलाधिदैवत:, पुं, (जलस्याधिदैवतं अधिष्ठाची देवता।) वरुण:। इति हलायुध: ॥ (जलं अधिदैवतं यस्य।) पूर्व्वाषाढानक्षत्रे, क्ली। इति ज्योतिषम् ॥

जलाम्बिका, स्त्री, (जलस्य अम्बिका माता इव। क्रोड़देशे जलधारणादस्यास्तथात्वम्।) कूप:। इति हारावली। ४१ ॥ जलाम्लिका इति क्वचित् पाठ: ॥

जलायुका, स्त्री, (जलमायुरस्या:। कप्। पृषो-दरादित्वात् सलोप:।) जलौका। इति शब्द-रत्नावली ॥ (यथा, सुश्रुते। १। १३।
"अथ जलायुका: वक्ष्यन्ते। जलमांसामायु-रिति जलायुका:॥" अस्या अन्यद्विवरणं जलौका:शब्दे द्रष्टव्यम्॥ यस्मिन्नियं अवहृता तद्यथा,—
"नस्याञ्जनाभ्यञ्जनपानधूमं
तथावपीड़ं कवलग्रहञ्च।
संशोधनञ्चोभयत: प्रयुञ्जा-
द्रक्तं हरेच्चापि जलायुकाभि:॥"
इति सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ॥)

जलार्द्र:, पुं, (जलेन आर्द्र: सिक्त:।) आर्द्र-वस्त्रम्। इति हारावली। १६६ ॥ (जलसिक्ते, त्रि। यथा, मेघदूते। ४५।
"तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारै: स्नपयतु भवान् व्योमगङ्गाजलार्द्रै:॥")

जलार्द्रा, स्त्री, (जलेन आर्द्रा सिक्ता।) क्लिन्न-वस्त्रम्। इति हेमचन्द्र:। ३। ३४३ ॥ (आर्द्र-तालवृन्तम्। यथा, वैद्यजीवने।
"ध्रुवित्वं तालवृन्तं स्याद्वृत्तच्छेद्यजनच्च तत्।
जलेनार्द्रं जलार्द्रा स्यात्———— ॥")

जलार्णव:, पुं, (जलप्रचुरोऽर्णव: समुद्रो यत्र काले।) वर्षाकाल:। इति त्रिकाण्डशेष: ॥ (जलप्रचुरोऽर्णव:।) जलसमुद्रश्च ॥

जलालु:, पुं, (जलजात आलु:। प्राकपार्थिववत् समास:।) पानीयालु:। इति राजनिर्घण्ट: ॥

जलालुकं, क्ली, (जलालुरिव कायति प्रकाशते इति। कै+क:।) पद्मकन्द:। इति राज-निर्घण्ट: ॥

जलालुका, स्त्री, (जले अलति गच्छतीति। अल गतौ+वाहुलकात् उक:।) जलौका। इति शब्दरत्नावली ॥

जलालोका, स्त्री, (जले आलोक्यते दृश्यते इति। आ+लोक दर्शने+कर्म्मणि घञ्।) जलौका। इत्यमरटीकायां भरत: ॥

जलावर्त्त:, पुं, (जलस्य आवर्त्त: सम्भ्रम:।) जल-गुल्म:। अम्भसां भ्रम:। इति जटाधर: ॥

जलाशयं, क्ली, (जले जलबहुलप्रदेशे आशेते इति। आ+शी+अच्।) उशीरम्। इत्य-मर:। २। ४। १६४ ॥ लामज्जकम्। इति राजनिर्घण्ट: ॥ (जलशायिनि, त्रि। यथा, महाभारते। ३। १४३। ५४।
"तत: सत्त्वान्युपाक्रामन् सुबहूनि महान्ति च।
रुरुवानरसिंहांश्च महिषांश्च जलाशयान् ॥")

जलाशय:, पुं, (जलस्य आशय आधार:।) जलाधार:। स तु पुष्करिण्यादि:। इत्यमर:। १। १०। २६ ॥ (यथा, मनु:। ४। १२६।

"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥"
जलं आशेते तिष्ठत्यत्र। आ+शी+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) समुद्रः। इति हेमचन्द्रः॥ झङ्गाटकः। इति राजनिर्घण्टः॥

जलाशया, स्त्री, (जले जलसमीपे आशेते उद्भवतीति। आ+शी+अच्। स्त्रियां टाप्।) गुडूचालताख्यः। इति राजनिर्घण्टः॥

जलाश्रयः, पुं, (जले जलप्रचुरप्रदेशे आश्रय उत्पत्तिस्थानं यस्य।) वृत्तगुडूचम्। इति राजनिर्घण्टः॥

जलाश्रया, स्त्री, (जले जलबहुलप्रदेशे आश्रयो यस्याः।) मूलीलताख्यम्। बलाका। इति राजनिर्घण्टः॥

जलाष्ठीला, स्त्री, (जलेनाष्ठीला संहता।) पुष्करिणी। इति हारावली। ४२॥

जलाह्वयं, क्ली, (जले आह्वयः संज्ञा यस्य।) उत्पलम्। इति राजनिर्घण्टः॥

जलिका, स्त्री, (जलं उत्पत्तिस्थानत्वेनास्त्यस्याः। जल+"अत इनिठनौ।" ५।२।११५। इति ठन् स्त्रियां टाप्।) जलौका। इत्यमरटीकायां भरतः॥

जलुका, स्त्री, (जले तिष्ठतीति। जल+बाहुलकात् उकः।) जलौका। इति शब्दरत्नावली॥

जलूका, स्त्री, (जलुका। पृषोदरादित्वात् दीर्घः।) जलौका। इति हेमचन्द्रः। ४।२७०॥ (यथा, देवीभागवते। १।१५।१८।
"जलूकेव सदा नारी रुधिरं पिबतीति वै।
मूर्खस्तु न विजानाति मोहितो भावचेष्टितैः॥")

जलेचरः, पुं, (जले चरतीति। चर+"चरेष्टः।" ३।२।१६। इति टः। "ततपुरुषे कृति बहुलम्।" ६।३।१४। इत्यलुक्।) जलचरपक्षी। स तु हंसमद्गुवकादिः। तस्य मांसगुणाः। गुरुत्वम्। उष्णत्वम्। स्निग्धत्वम्। मधुरत्वम्। वातघ्नत्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ (जलचारिणि, त्रि। यथा, महाभारते। १।२१७।११।
"स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम्।
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः॥")

जलेच्छया, स्त्री, (जलमेतीति जलेतृ जलप्रचुरस्थानम्। इ+क्विप्। तत्र शेते उद्भवतीति। शी+अच्। स्त्रियां टाप्।) हस्तिशुण्डावृक्षः। इति शब्दरत्नावली॥

जलेजातं, क्ली, (जले जातमुत्पन्नम्।) पद्मम्। इति शब्दरत्नावली॥

जलेन्द्रः, पुं, (जलस्य इन्द्रः अधिपतिः।) वरुणः। महोदधिः। जम्बालः। इति मेदिनी। रे, १५८॥

जलेन्धनः, पुं, (जलाभ्येव इन्धनानि यस्य।) वाडवाग्निः। इति भूरिप्रयोगः॥

जलेरुहा, स्त्री, (जले रोहति उद्भवतीति। रुह+कः। "ततपुरुषे कृति।" ६।३।१४। इत्यलुक्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

जलेवाहः, पुं, (जले जलमध्ये वाहते जलमद्रव्यस्य लाभार्थं प्रयतते इति। वाह प्रयत्ने+अच्।) जातिविशेषः। डुबर इति भाषा॥ यथा, पाद्मे पातालखण्डे।
"जलेवाहानधाक्षीच्च बहूंस्तत्र व्ययोजयत्।
तत् श्रुत्वा परमं यत्नमापुराभरणं न ततः॥"

जलेशयः, पुं, (जले शेते इति। शी+अच्।
"ततपुरुषे कृतीति।" अलुक्।) मत्स्यः। इति त्रिकाण्डशेषः॥ (कारणतोयशायित्वात् विष्णुः। यथा, हरिवंशे। २२।६८।
"नमोऽस्त्वनन्तपतये अच्युताय महात्मने।
जलेशयाय देवाय पद्मनाभाय विष्णवे॥"
महादेवः। यथा, महाभारते। १३।१७।६८।
"तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः॥"
जलाशायिनि, त्रि॥)

जलेश्वरः, पुं, (जलस्य ईश्वरः।) वरुणः। इति शब्दरत्नावली॥ (यथा, महाभारते।१।२२६।३।
"तमब्रवीत् धूमकेतुः प्रतिगृह्य जलेश्वरम्।
चतुर्थे लोकपालानां देवदेवं सनातनम्॥"
जलानामाश्रयत्वात्) समुद्रश्च॥

जलोका, स्त्री, (जलमोकं आश्रयो यस्याः। पृषोदरादित्वात् साधुः।) जलौका। इत्यमरटीकायां भरतः॥

जलोच्छ्रासः, पुं, (जलानां उच्छ्रासः।) जलाप्लवं परिपूर्य समधिकजलस्य सर्वतो वहनम्। इति कैयटः॥ समधिकजलस्योपायेनिष्कासनम्। इति स्वामी॥ जलाप्लुपचये पुष्करिण्यादावुपायेन-जलनिष्कासनम्। इति सर्वस्वम्॥ सेतुभङ्गादिभयेन जलाप्लवादुपायेर्जलविहिष्करणम्। इत्यन्ये॥ पुष्करिण्यादौ जलप्रवेशार्थंसुपायः सुयान् इति खात इत्येके। इति भरतः॥ तत्पर्य्यायः। परीवाहः२। इत्यमरः।१।१०।१०॥

जलोदरं, क्ली, (जलप्रधानं उदरं यस्मात्।) जठरामयः। तस्य निदानादि यथा,—
"यः स्नेहपीतोऽप्यनुवासितो वा
वान्तो विरिक्तोऽप्यथवा निरूढः।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथवापि तेषु
एकोदरं पूर्ववदभ्युपैति।
स्निग्धं महत्तत् परिवृत्तनाभि-
समाततं पूर्णमिवाम्बुना च॥
यथा द्रतिः क्षुभ्यति कम्पते च
शब्दायते चापि एकोदरन्तत्॥
जन्मन्येवोदरं सर्वं प्रायः क्लेशकृतमं मतम्।
बलिनस्तदजातस्य यत्नसाध्यं नवोत्थितम्॥"
इति माधवकरः॥
(अस्य संस्कारणजलक्षणचिकित्सितं यथा, हारीते चिकित्सितस्थाने २७ अध्याये।
आत्रेय उवाच।
"वियमाग्नेयोपवेशात् पीतस्नेहादथापि वा।
अमाध्यश्वासनिष्क्रान्तादतिव्यायामतोऽपि वा॥
पीतन्तूदरमेवच्च तस्माज्जातं जलोदरम्।
उदरं सजलं यस्य सघोषमतिवर्द्धितम्॥
श्वयथुः पादयोः श्रोथो जलोदरस्य लक्षणम्।
विरेकं वमनं कुर्य्यात् पाचनानि च कारयेत्॥
क्षारयोगश्च वटकस्तेन तदुपशाम्यति।
तस्मान्नाभेर्वलीभागे वस्त्रयित्वाङ्गुलद्वयम्॥
जलनाड्यानुमन्त्र्य कुशपत्रेण वेधयेत्।
एरण्डजलनालञ्च तत्र सञ्चारयेद्बुधः॥
अन्तर्गतं जलं स्रावं ततः सञ्चारयेद्द्रुतम्।
यदा न धरते तत्र तदा दाहः प्रशस्यते॥
कणा कल्कं परिस्राव्य घृतं देयं चतुर्गुणम्।
शुण्ठी विषा समं पाठ्यं पानमालेपनं हितम्॥
शुल्बकर्म भिषक् श्रेष्ठो विज्ञातेनैव कारयेत्।
दुष्करं शुल्बकर्मैव न कुर्य्यात् यत्र तत्र तु॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्।
तस्मादवश्यकर्त्तव्यमौशरं साधिकारिणा॥"*॥)

जलोद्भवा, स्त्री, (जले उद्भवो यस्याः।) क्षुद्रनाड्यौ। इति राजनिर्घण्टः॥ (कालानुसारिवा। शिउली छोपर इति च यस्य ख्यातिः। यथास्याः पर्य्यायाः।
"शीतली शीतकुम्भी च शुक्लपुष्पा जलोद्भवा।
कालानुसारिवा तस्याः प्रवाहो नतवद्गुणैः॥"
इति वैद्यकरत्नमालायाम्॥)

जलोद्भूता, स्त्री, (जले उद्भूता।) गुडूचालताख्यः। इति राजनिर्घण्टः॥

जलोरगी, स्त्री, (जले उरगी सर्पिणीव।) जलौका। इत्यमरटीकासारसुन्दरी॥

जलौकसः, स्त्री, (जले ओको वासस्थानं यासाम्।) जलौका। सान्तबहुवचनान्तोऽयं शब्दः। इत्यमरः। १।१०।२२॥

जलौकसः, पुं, स्त्री, (जलमेव ओको वासस्थानं तदस्यस्येति। अर्शआदित्वादच्।) जलौका। इत्यमरटीकायां रायमुकुटः॥ अकारान्तोऽयम्॥

जलौकाः, [स्] स्त्री, (जलमेव ओको वसतिस्थानं यस्याः।) जलौका। इति भरतः॥ (यदुक्तम्।
"यश्चाति साधुरपरस्य गुणं न दोषं
दोषान्वितो गुणिगुणं परिहाय दोषम्।
बालस्तनात् पिबति दुग्धमसृग्विहाय
त्यक्त्वा पयो रुधिरमेव न किं जलौकाः॥"
जलवासिनि, त्रि। यथा, महाभारते। १३।५८।१०।
"जलौकसां स सत्त्वानां बभूव प्रियदर्शनः॥"
विवरणमस्या यथा,—
"नृपाद्य-बाल-स्थविर-भीरु-दुर्बल-नारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं श्रोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफ-दुष्ट-श्रोणितं यथासङ्ख्यं शृङ्ग-जलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्वाणि सर्वत्र॥"
"उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्।
तस्माद्दोषोपदृष्टे तु हिते तदवसेचने॥
शीताधिवासा मधुरा जलौका वारिसम्भवा।

तस्मात् पित्तोपसृष्टे तु हिता सा त्वरसेचने ॥
अलाबुकटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्।
तस्मात् श्लेष्मोपसृष्टे तु हितं तद्वरसेचने ॥"

"अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश, तासां सविषाः षट् तावत्य एव निर्व्विषाः। तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तासञ्जनचूर्णवर्णा पृथुशिराः कृष्णा। वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा। रोमशा महापार्श्वा कृष्णमुखलगर्द्दा। इन्द्रायुधवद्दूर्द्दरावलिभिश्चित्रा इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरक्तमुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्द्दिर्मदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्याः। इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः।

अथ निर्व्विषाः। कपिला पिङ्गला शुक्लमुखी मूषिका पुण्डरीकमुखी सावरिका चेति। तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां दृष्टे स्निग्धसृष्टवर्णा कपिला। किञ्चिदृक्ता वृत्तकाया पिङ्गासुगा च पिङ्गला। यत्कृष्णा ग्रीवापायिनी दीर्घतीक्ष्णमुखी शुक्लमुखी मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। सृष्टवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी। स्निग्धा पद्मपत्रवर्णाद्यङ्गाङ्गुलप्रमाणा सावरिका सा च पर्य्यर्थे। इत्येता अविषा व्याख्याताः। तासां यवनपाण्डुसच्छवीतनादीनि चेत्राणि। तेषु महाशरीरा बलवत्यः ग्रीवापायिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति। तत्र सविषमत्स्यकीटदर्दुरसत्त्वपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः। पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेषु अम्भःसु च निर्व्विषाः॥"

"क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु।
न च सङ्कीर्णचारिण्यो न च पङ्कशयाः सुखाः॥"

"अथैनां नवे महति घटे सरक्षुद्रागोदकपद्मभाषाण्य निदध्यात्। भक्षार्थे चास्मासुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांषृणीद्वल्य शयार्थं दृणमौदकानि च पत्राणि। द्वाद्वात्राद्वाधान्यच्छलं भक्ष्यं च दद्यात् सप्तरात्रात् सप्तरात्राच्च घटमन्यं संक्रामयेत्॥"

"शूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः।
अग्राह्यिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः॥
अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरुक्ष्य चास्य तमवकाशं श्लक्ष्णमयचूर्णैर्यथरुजः स्यात्। गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः श्लिलसरकमध्ये सुकृतस्थिता विगतक्षमा ज्ञात्वा तासां रोगं ग्राहयेत्। सूक्ष्मशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयादग्रहन्त्ये क्षीरबिन्दुं प्रोक्षितबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदन्यां ग्राहयेत्। यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्मथ्य च स्कन्धं तदा जानीयाद् गृह्णातीति गृह्णन्तीञ्चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्ज्ञानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ प्रोक्षितगन्धेन न सुखेस्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैल-लवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलीभ्यां शनैः शनैरनुलोमानुमार्ज्जयेदासुखाद्गमयेत्तावद् यावत् सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत्। दुर्व्वान्तायां व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्ब्ववत् सन्निदध्यात् प्रोक्षितस्य च योगायोगानवेक्ष्य जलौको व्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्गृहीत वा व्रणं कषायमधुर-स्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति।"

"क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणम्।
जलौकसाञ्च यो वेत्ति तत् साध्यान् स जयेद्गदान्॥"

इति सूत्रस्थाने त्रयोदशाध्याये सुश्रुतेनोक्तम्॥)

जलौका, स्त्री, (जलमेव ओकं वसतिस्थानं यस्याः।) जलजन्तुविशेषः। जोंक इति भाषा। तत्पर्य्यायः। रक्तपा २ जलौकसः ३ इत्यमरः। १। १०। २२॥ जलूका ४ जलाका ५ जलौकाः ६ जलोरगी ७ जलायुका ८ जलिका ९ जलासुका १० जलजन्तुका ११ वेणी १२ जलालोका १३ जलौकसः १४ जलौकसी १५। इति भरतः॥ जलौकसम् १६ जलौकसा १७। इति रायमुकुटः॥ रक्तपायिनी १८ रक्तसन्दृग्धिका १९ तीक्ष्णा २० वमनी २१ जलजीवनी २२। इति राजनिर्घण्टः॥ रक्तपाता २३ वेधिनी २४ जलसर्पिणी २५ जलरुचिः २६ जलाटनी २७ जलाका २८ जलपटालिका २९ जलिका ३० जलाबुका ३१। इति शब्दरत्नावली॥ (यथा सुश्रुते शारीरस्थानेऽष्टमेऽध्याये।
"सिरा-विधानतुल्येषु जलौकाभिः प्रदेशयेत्।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितम्॥"
अस्या विवरणमन्यत् सविस्तरं जलौकःशब्दे व्याख्यातम्॥)

जल्प, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परस्मै-सकं-सेट्।) अन्तःस्थलतीयोपधः। जल्पति। इति दुर्गादासः॥ (यथा, महाभारते। ७। १४६। १२।
"नारिं जित्वा विकत्थन्ते न च जल्पन्ति दुर्व्वचः॥")

जल्पः, पुं, (जल्प वाचि+घञ्।) विजिगीषोः कथा। परमतखण्डनपूर्ब्बकं स्वमतव्यवस्थापनम्। इति जटाधरो गौतमश्च॥ ("यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः॥" इति न्यायसूत्रम्। १। ४२॥
"स वादो द्विविधः संग्रहेण जल्पो वितण्डा च। तत्र पक्षाश्रितयोर्व्वचनं जल्पः।"
"यथैकस्य पक्षः पुनर्भवोऽस्तीति नास्तीत्यपरस्य तौ च स्वपक्षं स्वहेतुभिः स्थापयतस्तत्परपक्षसूद्भावयतः एषः जल्पः।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥) कथा। (यथा, भागवते। १। ७। १७।
"इति प्रियां वल्गुविचित्रजल्पैः
स सान्त्वयित्वाच्युतमित्रसूतः॥")

जल्पनं, क्ली, (जल्प+भावे ल्युट्।) कथनम्। यथा,—
"किं मिथ्या श्रुतजल्पनेन सततं रे वक्र रामं वद॥"
इत्युद्भटः। (जल्पतीति। जल्प+नन्द्यादित्वाद् ल्युः। कथके, त्रि॥)

जल्पाकः, त्रि, (जल्पतीति। जल्प+"जल्पभिक्षकुट्टलुण्टवृङः षाकन्।" ३। २। १५५। इति षाकन्।) बहुकुत्सितभाषी। तत्पर्य्यायः। वाचालः २ वाचाटः ३ बहुगर्ह्यवाक् ४। इत्यमरः। ३। १। ३६॥ (स्त्रियां विशेषात् ङीप्। यथा, भट्टिः। ७। १६।
"जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया॥")

जल्पितं, त्रि, (जल्पते स्म इति। जल्प+क्तः। उक्तम्। इत्यमरः। ३। १। १०७॥ (यथा, पञ्चतन्त्रे। १। १४६। "भो भो गोरम्भ! सत्यमेतत् यत् त्वया जल्पितम्। किं देवी दन्तिलेन समालिङ्गिता॥") कथने, क्ली। (यथा, पञ्चतन्त्रे। २। १३२।
"सा प्राह भो प्रियतम! मिथ्याजल्पितमेतत्॥")

जवः, पुं, (जवनमिति। लु वेगगतौ+"ऋदोरप्।" ३। ३। ५७। इति अप्।) वेगः। (यथा, महाभारते। ३। १४१। २१।
"यस्य बाहुबले तुल्यः प्रभावे च पुरन्दरः।
जवे वायुर्मुखे सोमः क्रोधे मृत्युः सनातनः॥")
वेगवति, त्रि। इति मेदिनी। वे, ७॥

जवनं, क्ली, (जु वेगगतौ+भावे ल्युट्।) वेगः। इत्यमरः। ३। २। ३६॥

जवनः, पुं, (जु+"जुचङ्क्रम्येति।" ३। २। १५०। इति युच्।) वेगः। वेगयुक्ताश्वः। देशविशेषः। इउनान इति पारस्यभाषा। इति हेमचन्द्रः॥ श्रीकारी रुगः। घोटकः। इति राजनिर्घण्टः॥ म्लेच्छजातिविशेषः। एष पूर्ब्बं जवनदेशोद्भवः क्षत्रिय आसीत् सगरराजेनास्य सर्ब्वशिरोमुण्डनं सर्ब्वधर्म्मबहिष्कृतत्वञ्च चकार। इति हरिवंशः॥ (स्कन्दस्य सैनिकविशेषः यथा, महाभारते। ९। ४५। ७२।
"शृङ्गो नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः॥"

इत्युपक्रम्याह।
"लोहाजवक्षो जवनः कुम्भवक्त्रश्च कुम्भकः॥") वेगयुक्ते त्रि। इति मेदिनी। ने, ६६॥ (यथा, महाभारते। ३। १६। १६।
"अपायाज्जवनैरश्वैः शास्त्रज्ञाणप्रपीडितः॥")
जवनालं, क्ली, (जवनाय अलति पर्य्याप्नोतीति। अल + अच्।) फलविशेषः। जनार इति भाषा॥ अस्य गुणाः। स्वादुत्वम्। ग्रीतत्वम्। वायुकारित्वम्। कफपित्तनाशित्वञ्च। इति राजवल्लभः॥
जवनिका, स्त्री, (जवनं वेगेन प्रतिरोधनमस्त्यस्याः। जवन + ठन्। टाप् च।) अवधायकवस्त्रम्। कानात् इति भाषा॥ तत्पर्य्यायः। प्रतिसीरा२ तिरस्करिणी ३। इत्यमरः। २।६।१२०॥ यवनिका ४ यमनिका ५ तिरस्कारिणी ६। इति तट्टीका॥ अन्तस्पटः७ पटी ८ चित्रा ९ काण्डपटः १०। इति शब्दरत्नावली॥ (यथा, माघे। ४। ५४।
"समीरश्चिश्चिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम्॥")
जवनी, स्त्री, (जूयते आच्छाद्यतेऽनया। जु + करणे ल्युट्। स्त्रियां ङीप्।) अपटी। कानात् इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। ५३८।
"व्रीड़ाप्रसरः प्रथमं तदनु च रसभावपुष्टवेष्टेयम्।
जवनीविनिर्मादनु नटीव दयिता मनो हरति॥")
ओषधीभेदः। इति हेमचन्द्रः॥ (जवनजातिस्त्री। यथाह।
"जवनी नवनीतकोमलाङ्गी
ग्रयनीये यदि नीयते कथञ्चित्॥")
वेगशीला। यथा, ऋग्वेदे। १। ५१। २।
"इन्द्रं दानाशकभवो मदच्युतं
शतक्रतुं जवनी सूनृतारुहत्॥")
जवसं, क्ली, (जूयते भक्षार्थं प्राप्यते गवादिभिरिति। जु + बाहुलकात् कर्म्मणि असच्।) घासः। इति शब्दरत्नावली॥
जवा, स्त्री, (जवते रक्तवर्णत्वं गच्छतीति। जु गतौ + अच्। ततष्टाप्।) स्वनामख्यातपुष्पवृक्षः। तत्पर्य्यायः। ओड्रपुष्पम् २। इत्यमरः। २। ४। ७६॥ जपा ३ ओड्राक्षा ४ रक्तपुष्पी ५ अर्कप्रिया ६ रागपुष्पी ७ प्रतिकाम ८ हरिवल्लभा ९। (यथा, माघे। ६। ४६।
"अनुवनं वनराजिवधूमुखे
बहलरागजवाधरधारणि॥")
अस्या गुणाः। कटुत्वम्। उष्णत्वम्। इन्द्रसुप्रविनाशकारित्वम्। विरूक्षदृङ्मनुजनकत्वम्। स्त्र्याराधनसाधनत्वञ्च। इति राजनिर्घण्टः॥ मलमूत्रस्खलनरक्षनकारित्वम्। इति राजवल्लभः॥
(यस्मिन्नियं व्यवह्रियते तद्यथा,—
"सकाङ्क्षिकं जवापुष्पं भटं ज्योतिश्चतीदलम्।
दूर्व्वापिष्ट्वा संप्राश्य वनिता स्वामेवं लभेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥)
जवादि, क्ली, सुगन्धिद्रव्यभेदः। तत्पर्य्यायः। गन्धराजम् २ कृत्रिमम् ३ गन्धधर्म्मजम् ४ समूहगन्धम् ५ गन्धाढ्यम् ६ स्निग्धम् ७ सान्द्राणिकर्दमम् ८ सुगन्धतैलनिर्य्यासम् ९ कटुमोदम् १०। अस्य लक्षणम्। नीरसत्वम्। स्निग्धत्वम्। ईषत्पिङ्गत्वम्। सुगन्धत्वम्। आतपे बहलामोदत्वम्। राज्ञां योग्यत्वञ्च। अस्य गुणाः। सौगन्धिकत्वम्। स्निग्धत्वम्। उष्णत्वम्। सुखावहत्वम्। वाते हितत्वम्। राज्ञां मोहनाङ्गादकारकत्वञ्च। इति राजनिर्घण्टः॥
जवाधिकः, पुं, (जवेन वेगेन अधिकः।) वेगाधिकघोटकः। इत्यमरः। २। ८। ४५॥ अतिशयवेगयुक्ते, त्रि॥
जवापुष्पं, क्ली, (जवायाः स्वनामख्यातवृक्षस्य पुष्पम्। यद्वा, जवैव पुष्पम्।) ओड्रपुष्पम्। इति शब्दरत्नावली॥
जवी, [न्] त्रि, (जवो वेगः सोऽस्यास्तीति। जव + इनिः।) वेगयुक्तः। इति हेमचन्द्रः। ३। १५८॥ (यथा, याज्ञवल्क्ये। २। १११।
"समकालमिषुं क्षिप्रमानीयाग्रो जवी नरः।
गते तस्मिन् निमग्नाङ्गं पश्येद्वेत् सुष्ठिमाप्नुयात्॥")
पुं, उष्ट्रः। घोटकः। इति राजनिर्घण्टः॥
जष, ञ वधे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, जषति जषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥
जस, इ क रक्षणे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट।) इ क, जंसयति। इति दुर्गादासः॥
जस, उ इर् य मोक्षे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) उ, जसित्वा जस्त्वा। इर्, अजसत् अजासीत्। असात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, जस्यति वत्सं गोपः। इति दुर्गादासः॥
जस, क वधे। अनादरे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जासयति। इति दुर्गादासः॥
जसुरिः, पुं, (जस्यते सुप्यते हन्यते वाऽनेनेति। जस + "जसिसहीरुरिन्।" उणां। २। ७३। इति उरिन्।) वज्रम्। इत्युणादिकोषः॥
जहकः, पुं, (जहाति परित्यजतीति। ओ हाक त्यागे + "जहातेर्डे च।" उणां। २।३४। इति कुन् डित्वञ्च।) कालः। इति त्रिकाण्डशेषः॥ त्यागकर्त्तरि, त्रि। इत्युणादिकोषः॥ बालः। निर्म्मोहः। निर्म्मोकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
जहा, स्त्री, (जहातीति। हा + बाहुलकात् घः।) सुखितिका। इति शब्दचन्द्रिका॥ सुखिरी इति भाषा॥
जहानकः, पुं, प्रलयः। इति हेमचन्द्रः। २। ७५॥
जह्नुः, पुं, (जहातीति। हा + बाहुलकात् उनुडित्वञ्च।) अपत्यम्। यथा। "इति श्रुतानुषङ्ग आप्लवनप्रयनाटनस्नानादिषु सह स्नगजह्नुना स्नेहानुबद्धहृदयः आसीत्।" इति श्रीभागवते पञ्चमस्कन्धे आदिभरतचरिते। ८। ११॥
"इत्येवं श्रुतोऽनुषङ्गो आसक्तिर्य्येन। स्नगजह्नुना स्नगाप्यलेन सह। स्नेहानुबद्धं हृदयं येन।" इति तट्टीकायां श्रीधरस्वामी॥
जह्नुः, पुं, (जहातीति। हा + "जहातेर्डे अन्तलोपश्च।" उणां। ३। ३६। इति नुः डित्वमन्तलोपश्च।) विष्णुः। राजर्षिभेदः। स चन्द्रवंशोद्भवकुशराजपुत्रः। गङ्गागमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनेन ऊरुं भित्त्वा बहिर्निर्गमिता तेन सा जाह्नवीति ख्याता। इति रामायणम्॥
जह्नुतनया, स्त्री, (जह्नोस्तनया।) गङ्गा। इत्यमरः। १। १०। ३१॥
जह्नुसप्तमी, स्त्री, (जह्नोः सप्तमी। अस्यां तिथौ जह्नुसुनिना हि गङ्गा पीता पुनस्यक्ता अतोऽस्यास्तथात्वम्।) वैशाखशुक्लसप्तमी। तन्नामकारणं यथा वाराहे नारदाम्बरीषसंवादे।
"वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा।
क्रोधात् पीता पुनस्यक्ता कर्णरन्ध्रात्तु दक्षिणात्॥
तस्यां समर्चयेद्देवीं गङ्गां भुवनमेखलाम्।
स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः॥
तस्यां सन्तर्पयेद्देवान् पितॄन् मर्त्यान् यथाविधि।
साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम्॥"
इति श्रीहरिभक्तिविलासे १४ विलासः॥
अपि च उत्तरकामाख्यातन्त्रे ११ पटले।
"शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्रिकाम्।
प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलाप्तये॥"
जह्नुसुता, स्त्री, (जह्नोः सुता।) गङ्गा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १।६८।१८।
"अहं गङ्गा जह्नुसुता महर्षिगणसेविता॥")
जा, स्त्री, (जायते सम्बन्धिनी या। जन + बाहुलकात् डः।) याता। भर्त्तुर्भ्रातृपत्नी। इत्येकाक्षरकोषः॥
जागरः, पुं क्ली, (जाग्र जागरणे + भावे घञ्। "जाग्रोऽविचीति।" ७। ३। ८५। इति गुणः।) जागरणम्। इत्यमरः। २। ८। ६४॥ (यथा, आर्य्यासप्तशत्याम्। ३६०।
"प्रोञ्छति तवापराधं मानं मर्दयति निर्दयं हरति।
खलसाम्निहन्ति मधुपान् जागरदीर्घा निशा सुभग!॥")
जागर्त्ति जीवति संग्रामस्यलेऽनेनेति। जाग्र + करणे घञ्।) कवचे, पुं। इति तट्टीका॥
जागरर्य्यं, क्ली, (जाग्र + भावे ष्यञ्।) निद्राभावः। जागरा इति भाषा॥ तत्पर्य्यायः। जागर्य्या २ जागरा ३ जागरः ४। इति हेमचन्द्रः॥ जाग्रिया ५ जागर्त्तिः ६। इत्यमरटीका॥ (यथा, महाभारते। २। १२६।१२।
"रात्रिजागरणात् श्रान्ताः सौप्तिकैः समतीत्य तान्॥")

जागरिता, [ऋ] त्रि, (जागर्त्तीति। जाग्र+तृच्।) जागरणशीलः। इत्यमरः। ३।१।३२॥
जागरी, [न्] त्रि, (जागरो जागरणमस्त्यस्येति। जागर+"अत इनिठनौ।" ५।२।११५। इति इनिः।) जागरूकः। इति हेमचन्द्रः। ३।१०७॥
जागरूकः, त्रि, (जागर्त्तीति। जाग्र+"जागरूकः।" ३। २। १६५। इति ऊकः।) जागरणशीलः। जागरणकर्त्ता। तत्पर्य्यायः। जागरिता २। इत्यमरः। ३।१। ३२॥ जागरी ३। इति हेमचन्द्रः।३।१०७॥ (यथा, रघुः।१०।२४।
"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव॥"
कर्त्तव्यपालनादर्थे अप्रमत्तः। यथा, रघुः। १४। ८५।
"निगृह्य घ्रोकं स्वयमेव धीमान्
वन्याश्रमावेक्षणजागरूकः॥")
जागर्त्तिः, स्त्री, (जाग्र+भावे क्तिन्।) जागरणम्। इत्यमरटीकायां रायमुकुटः॥
जागर्य्या, स्त्री, (जाग्र+"जागर्त्तेरकारो वा।" ३। ३। १०१। इत्यस्य वार्त्तिकोक्त्या यक्। "जाग्रोऽविचौति।" ७। ३। ८५। इति गुणः।) जागरणम्। इत्यमरः। ३। १। १६॥
जागुड़, क्ली, (जागुड़े तदाख्यया प्रसिद्धे देशे भवमित्यण्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥ (देशविशेषः। यथा, माघे। २०। ३।
"अभिचेदमगाद्रथोऽपि शौरे-
रवनिं जागुड़कुङ्कुमाभितान्वैः॥"
जागुड़ोऽभिजनोऽस्येत्यण्। तद्देशवासिनि, त्रि,। यथा, महाभारते। ३। ५१। २४।
"जागुड़ान् रामठान् सुक्षान् क्षीराध्यानथ-
तङ्गणान्॥")
जाग्र, च सु जागरे। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) च, जाग्रति। सु, जागर्त्ति। दिग्रो निरीक्षमाणस्य नास्ति जाग्रतो भयमिति पचाद्यजादिनि जागर इवाचरतीति क्यौ ग्रचन्तम्। इति दुर्गादासः॥
जाग्रविः, पुं, (जागर्त्ति सार्त्तिरूपतयेति। जाग्र+"जृषिमन्धिकुण्डिशीङ्स्थाभ्यः क्विन्।" उणा। ४। ५४। इति क्विन्।) अग्निः। इति हेमचन्द्रः। ४। १६५॥ (यथा, ऋग्वेदे। ५। ११। १।
"जनस्य गोपा अजनिष्ट जाग्रविरग्निः॥"
जागर्त्ति प्रजानां शुभाशुभकार्य्यदर्शनार्थमिति। वृत्तिः। इत्युणादवृत्तः॥)
जाग्रत्, त्रि, (जागर्त्तीति। जाग्र+शतृ।) जागरणविशिष्टः। यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्तृषा-
स्फुर्ज्जत्तृष्णतृणत्तृतीतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा॥"
इति काव्यचन्द्रिका॥
(जागरणम्। यथा, मनौ। १। ५७।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम्।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः॥")

जाग्रिया, स्त्री, (जाग्र+"जागर्त्तेरकारो वा।" इति पक्षे ग्रस्तातो रिडादेशः।) जागरणम्। इत्यमरटीकायां रायमुकुटः॥
जाघनी, स्त्री, (जघनस्य समीपम्। जघन+ग्रैषिकोऽण्। ततः स्त्रियां ङीप्।) ऊरुः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १०।१०८।
"क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम्।
चण्डालहस्तादाददे धर्म्माधर्म्मविचक्षणः॥"
विश्वामित्रस्य श्वजाघनीहरणकथा महाभारते ग्रापत्तिपर्व्वणि १४१ अध्याये द्रष्टव्या॥)
जाङ्गलं, क्ली, (जाङ्गलेषु स्थलजपशुविशेषेषु भवम्। जाङ्गल+अण्।) मांसम्। इति हेमचन्द्रः॥
जाङ्गलः, पुं, (जङ्गले भवः। जङ्गल+अण्।) कपिञ्जलपक्षी। इति मेदिनी। ले, ६५॥ निर्व्वारिदेशः। इति ग्रब्दरत्नावली॥ (अस्य लक्षणं यथा,—
"स्वल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः।
स ज्ञेयो जाङ्गलो देशः बहुधान्यादिसंयुतः॥")
भावप्रकाशग्रन्थेऽस्य लक्षणं यथा,—
"आकाशग्रुभ्र उच्चश्च स्वल्पपानीयपादपः।
ग्रमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः॥
हरिणैर्ऋक्षपृषतगोकर्णखरसङ्कुलः।
सुखादुफलवान् देशो वातलो जाङ्गलः स्मृतः॥"
("खरपरुषविशालाः पर्व्वताः कण्टकीर्णाः
दिशि दिशि ग्रटगह्वा भूरुहाः ग्रीर्णपर्णाः।
अतिखररविरिक्षाः पांसुभृत् शुष्कभूमिः
सरसरसविहीनः कूपकाम्भःप्रकर्षः॥
तदनुविरसग्रस्याहारगो गोमनुष्यः
प्रभवति रसमांसं रूक्षभावश्च सम्यक्।
पुनरपि हिमवाहं ग्रालिग्रस्यं न चेच्चु-
र्भवति रुधिरपित्तं कोपमाशु ह्युपैति॥"
इति च हारीते प्रथमस्थाने चतुर्थेऽध्याये॥)
तस्य गुणाः। वातपित्तकारित्वम्। उष्णत्वम्। रूक्षत्वञ्च। तद्देशीयजलगुणाः। अनूपदेशात् विपरीतत्वम्। इति राजवल्लभः॥ रूक्षत्वम्। लघुत्वम्। लघुत्वम्। तनुत्वम्। पथ्यत्वम्। वह्निकफबहुविकारकारित्वञ्च। इति भावप्रकाशः॥ जङ्गलदेशोद्भवञ्च॥
जाङ्गलः, त्रि, स्थलजपशुविशेषः। यथा,—
"हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः।
राजीवोऽपि च सृक्वी चैत्यादा जाङ्गलसंज्ञकाः॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः।
कुरङ्ग ईषत्ताम्रः स्यात्कृष्णविन्दुसङ्कुलः॥
ऋष्यो नीलाङ्कको लोके स रोरु इति कीर्त्यते।
पृषतश्चन्द्रविन्दुः स्यात्कृष्णविन्दुसङ्कुलः॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान्।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः॥
यो मृगः शृङ्गहीनः स्यात् स सृक्वीति निगद्यते॥"
तस्य मांसस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। कषायत्वम्। लघुत्वम्। बल्यत्वम्। दृंहणत्वम्। दृष्यत्वम्। दीपनत्वम्। दोषहरत्वम्। श्लेष्मपित्तनाशनत्वञ्च। दलाहितवाधिर्य्यादधिकहृद्रोगमेह सुखजरोगग्लीपदगलगण्डवायुनाशित्वञ्च। इति भावप्रकाशः॥ ग्रीतत्वम्। मनुष्यहितत्वम्। इति राजवल्लभः॥ *॥
जाङ्गलिः, पुं, (जाङ्गलो जङ्गलभवः सर्पादिर्य्यास्यतयास्त्यस्येति। जाङ्गल+बहुलवचनात् इञ्।) व्यालग्राही। इति ग्रब्दरत्नावली॥
जाङ्गली, स्त्री, (जङ्गले भवा। जङ्गल+अण्। ततो ङीप्।) ग्रूकग्रिम्बी। इति। मेदिनी। ले, ६५॥ (यथास्याः पर्य्यायाः।
"कपिकच्छुरात्मगुप्ता दृष्या प्रोक्ता च मर्कटी।
अजरा कण्डुरा यज्ञा दृष्यर्ग्गा प्रावृषायणी॥
जाङ्गली ग्रूकग्रिम्बी च सैव प्रोक्ता महर्षिभिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
जाङ्गुलं, क्ली, (जङ्गुलमेव। स्वार्थे अण्।) विषम्। जानिलीफलम्। इति ग्रब्दरत्नावली॥
जाङ्गुलिः, पुं, (जङ्गुलं विषं व्यवहार्य्यतया विद्यतेऽस्येति। जङ्गुल+बाहुलकात् इञ्।) विषवैद्यः। इति ग्रब्दरत्नावली॥ सापुड़े इति भाषा॥
जाङ्गुलिकः, पुं, (जाङ्गुलो विषप्रधानः सर्पादिर्य्यास्यतयास्त्यस्येति। जाङ्गुल+ठन्।) व्यालग्राही। इत्यमरः। २। ८। ११॥
जाङ्गुली, स्त्री, (जङ्गुलस्य ग्रयम्। "तस्येदम्।" ४। ३। १२०। इत्यण्। ततो ङीष्।) विषविद्या। इति हेमचन्द्रः॥
जाङ्घिकः, पुं, (जङ्घामभिचरतीति। जङ्घा+"पर्पादिभ्यष्ठन्।" ४।४।१०। इति ठन्। यद्वा, जङ्घाभिर्जीवतीति। "वेतनादिभ्यो जीवति।" ४। ४। १२। इति ठन्।) उष्ट्रः। ग्रीकारीवृक्षः। इति राजनिर्घण्टः॥ जङ्घाजीवी। धावकादिः। तत्पर्य्यायः। जङ्घाकरिकः २। इत्यमरः। २। ८। ७३॥ (प्रग्रस्तजङ्घाविशिष्टे, त्रि। यथा, भोजराजचरितयुक्तिकल्पतरौ।
"जाङ्गलस्था जाङ्घिकाश्च स्थानस्ते राजसा
मताः॥")
जाज्वल्यमानः, त्रि, (भृशं ज्वलतीति। ज्वल+यङ्+ग्रानश्।) देदीप्यमानः। यथा, चण्डी।
"जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात्॥"
जाटलिः, पुं स्त्री, (जाटं सङ्घातं जातीति। जा+बाहुलकात् किः।) वृक्षविशेषः। इति जिह्वादिसंग्रहे अमरः॥
जाड्यं, क्ली, (जड़स्य भावः। जड़+ष्यञ्।) जड़ता। तत्पर्य्यायः। स्तम्भः २। (यथा, पञ्चदश्यां। ६। ६६।
"विना जाड्यानुभूतिं न कथञ्चिदुपपद्यते॥")
मौर्ख्यम्। इति हेमचन्द्रः॥
जाड्यारिः, पुं, (जाड्यस्य अरिः ग्रत्रुः। अग्निना जाड्यदोषनिराकरणात् तथात्वम्।) जम्बीरः। इति राजनिर्घण्टः॥
जातं, क्ली, (जन+कर्म्मणि क्तः।) यक्ष्मम्। सम्मदः। (यथा, भट्टिः। १। ११।
"अन्याकृतिं द्रावयितुं सविप्रा-
श्चिषीषवस्तोऽभरपाचजातम्॥"

भावे क्तः ।) जन्म । (पारिभाषिकपुत्रविशेषे, पुं । यथा, पद्मतन्त्रे । १ । ४३१—४३२ ।
"जातः पुत्रोऽनुजातश्च अतिजातस्तथैव च ।
अपजातश्च लोकेऽस्मिन् मन्वथाः ग्राह्यवेदिभिः ॥
माद्दतुल्यगुणो जातस्त्वनुजातः पितुः समः ।
अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः ॥")
उत्पन्ने त्रि । इति मेदिनी । ते, १६ ॥ (यथा, हितोपदेशे । १ । १४ ।
"कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥")

जातकं, क्ली. (जातं जन्म तदधिकृत्य कृतो ग्रन्थः इत्यण् ततः स्वार्थे कन् । यद्वा, जातेन शिशोर्जन्मना कार्यतीति । कै + कः ।) जातबालकस्य शुभाशुभनिर्णायकग्रन्थः । तस्य भेदाः । जातकदीपिका १ जातकाभरणम् २ जातकतरङ्गिणी ३ जातककौमुदी ४ जातकरत्नाकरः ५ जातकसारः ६ जातकार्णवः ७ जातकचन्द्रिका ८ लघुजातकम् ९ बृहज्जातकम् १० इत्यादि । इति ज्योतिषम् ॥

जातकः, पुं, कारस्करः । भिक्षुः । (जात + स्वार्थे कन् ।) जाते, त्रि । इति धरणिः ॥

जातकर्म्म, क्ली, (जातस्य जाते सति वा यत् कर्म्म ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तस्य क्रमो यथा । पुत्रे जाते पिता नाभिं मा छिन्त छिन्द्धि मा दत्त इत्यभिधाय छिन्नायां छिन्नायां नाभौ मा रुदत इत्यभिधाय रुदद्भिराप्तैः प्रक्षालितशिलायां ब्रह्मचारिणा कुमार्य्या गर्भवत्या वा श्रुतस्वाध्यायशीलब्राह्मणेन वा अनाहृतलोहपिष्टौ व्रीहियवौ दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा मन्त्रेण कुमारस्य जिह्वां मार्ष्टि । ततस्तथैव सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततः पुनरपि सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततो नाभिं छिन्त छिन्द्धि दत्तेति पिता ब्रूयात् । स्नानं पुनः पिता न कुर्य्यात् । इति भवदेवभट्टः ॥

जातवेदाः, [स्] पुं, (विद्यते लभ्यते इति । विद् लाभे + असुन् । जातं वेदो धनं यस्मात् ।) अग्निः । (अस्य निरुक्तिरुक्ता यथा, महाभारते २ । ३१ । ४१ ।
"पावनात् पावकत्वासि वह्नेराहुतवाहनः ।
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ॥")
चित्रकवृक्षः । इत्यमरः । १ । १ । ५६ ॥
(जाते जाते सर्व्वप्रपञ्चस्य स्वस्मिन् अध्यस्ततया विद्यते यो जीवः । यद्वा, जातानि सर्व्वाणि कारणत्वेन विदन्ति यमिति । विद् ज्ञाने + असुन् । अन्तर्य्यामी परमेश्वरः । यथा, भागवते । ५ । ७ । १४ । "ओं परो रजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ।" "जातं वेदो धनं कर्म्मफलं यस्मात् कर्म्मफलदमित्यर्थः ॥" इति श्रीभागवतटीकायां श्रीधरस्वामी ॥)

जातरूपं, क्ली, (जातं प्रशस्तं रूपं यस्य ।) स्वर्णम् । (यथा, भागवते । १ । १७ । ३८ ।
"पुनश्च याचमानाय जातरूपमदात् प्रभुः ॥")
धुस्तूरः । इत्यमरः । २ । ६ । ६५ । उत्पन्नरूपे, त्रि । यथा, नैषधे । १ । १२६ ।
"न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ॥"

जातापत्या, स्त्री, (जातमपत्यमस्याः ।) प्रसूता । इत्यमरः । २ । ६ । १६ ।

जातिः, स्त्री, (जायतेऽस्यामिति । जन् + अधिकरणे क्तिन् ।) गोत्रम् । (जन + भावे क्तिन् ।) जन्म ॥ अम्लवेतसः । आमलकी । सामान्यम् । तत्तु ब्राह्मणक्षत्रियवैश्यशूद्रात्मकम् । छन्दः । जातीफलम् । मालती । इति मेदिनी । ते, १६ ॥ (अस्याः पर्य्यायाः यथा,—
"जातिर्ज्जाती च सुभगा मालती राजपुत्रिका ।
चेतिका छत्रगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काम्पिल्लः । इति विश्वः ॥ गोत्रादिः । तस्य लक्षणं यथा, मुग्धबोधे ।
"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥"
अस्यार्थः । "आक्रियते अभ्यतेऽनयेति आकृतिः संस्थानं आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिराकृतिग्रहणा भवति संस्थानग्रह्या इत्यर्थः । तेन मनुष्यगोत्वगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमाना मनुष्यत्वगोत्वहत्वहंसत्वादिर्जातिः । एवं ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् संस्थानाभावाद्ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्व्वभागिति या सर्व्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः । जातिभेदाः पुमाख्याश्च इत्यमरसिंहे जातिभेदानां स्त्रीपुंस्योरेवेति नियमे ब्राह्मणादीनां सर्व्वलिङ्गभाजित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनैर्हंसं दृष्ट्वतोऽपि तस्य संस्थानेन हंसत्वं वा ज्ञातुं न शक्यते इति हंसस्यापि जातित्वं न्यायतमिति पूर्व्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाग्रन्थस्यापि सर्व्वलिङ्गभाजित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति सकृदेकवारमाख्यातेन उपदेशेन निर्निश्चयेन ग्राह्या गृहीतुं शक्या इत्यर्थः । तेन ईदृशो हंस इत्युपदेशे हंसं दृष्ट्वतस्तस्य संस्थानेन हंसत्वं शङ्कितुं शक्यत एवेति पूर्व्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाग्रन्थस्य एकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यपुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्व्वलिङ्गभाजित्वात् संस्थानग्रह्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह गोत्रञ्चेति । पुत्रपौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्व्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्ग्यौवात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणश्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशग्रहणी कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तं गार्ग्यादिनां क्तिन्नादीपि सिद्धेऽपि जातिसंज्ञा फलन्तु गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ गोत्राककोङित्यादिना पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ ङीडादिः पुंवदित्यादिना पुनः पुंवद्भावः ।" इति दुर्गादासः ॥
"सामान्यं द्विविधं प्रोक्तं परत्वापरत्वमेव च ।
द्रव्यादिनिष्ठवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥"
इति भाषापरिच्छेदे । ८-९ ॥
तल्लक्षणन्तु "नित्यत्वे सत्यनेकसमवेतत्वम् ।" इति सिद्धान्तमुक्तावली ॥

जातिकोशं, क्ली, (जातेः कोशमिवेति ।) जातीफलम् । इति भावप्रकाशः ॥

जातिकोषं, क्ली, (जातेः कोषमिव ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (जयित्री इति लोके प्रसिद्धम् । तदस्य जातीफलानामावरणदलं व्यवहृतम् । तदृयथा वैद्यकरसेन्द्रसारसंग्रहे कासाधिकारे ङङ्कारोच्चरसे ।
"कर्पूरं जातिकोषं सजलमिभकणाजातिपत्रं लवङ्गं
मांसी तालीशचोचे गजकुसुमगदं धातकी
चेति तुल्यम् ।
पथ्या धात्री विभीतं त्रिकटुरपि पृथक्त्वर्द्ध-
भागं द्विभाग-
मेलाजातीफलाख्यं त्रितितलविधिनाशुद्धगन्धस्य
कोलम् ॥"
जातिकोषजातीफलयोरेकस्मिन्नौषधे समुल्लेखादेव जयित्रीति लोकप्रसिद्धम् । औषधन्तु सर्व्वत्रैव प्रयुज्यते ॥)

जातिकोषी, स्त्री, (जातिकोषमस्या अस्तीति । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीप् ।) जातीपत्री । इति राजनिर्घण्टः ॥

जातिफलं, क्ली, (जात्याख्यं फलमिति ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥

जातिभ्रंशकरं, क्ली, (जातेर्भ्रंशं करोतीति । भ्रंश + टः ।) नवविधपापान्तर्गतपापविशेषः । यथा, मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्वा घ्रातिरज्ञेयमद्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥"
"ब्राह्मणस्य दण्डहस्तादिना पीडाक्रिया अज्ञेयं शुनपुरीषादि जैह्म्यं कुटिलत्वं वक्रता । इति कुल्लूकभट्टः ॥

जातिवैरं, क्ली, (जात्या स्वभावतो वैरं शत्रुत्वम् ।) स्वाभाविकशत्रुत्वम् । तत्पञ्चविधम् । स्त्रीकृतम्१

यथा श्रीकृष्णाग्निपुराणयोः ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयोः ॥ सापत्नम् ४ मूषिकनकुलयोः ॥ अपराधजम् ५ यथा पूजनीयब्रह्मदत्तयोः ॥ इति महाभारतम् ॥

जातिसारं, क्ली, (जात्या स्वभावतः सारोऽत्र ।) जातीफलम् । इति राजनिर्घण्टः ॥ (जातीफलग्रन्थेऽस्य विवृतिर्ज्ञेया ॥)

जाती, स्त्री, (जन + क्तिच् । ततो वा ङीप् ।) जातीपुष्पम् । चमेली इति हिन्दी भाषा ॥ तत्पर्य्यायः सुरभिगन्धा २ सुमनाः ३ सुरप्रिया ४ श्वेतकी ५ सुकुमारा ६ सन्ध्यापुष्पी ७ मनोहरा ८ राजपुत्री ९ मनोज्ञा १० मालती ११ तैलधाविनी १२ जनेष्टा १३ हृद्यगन्धा १४ । (एतस्या हि सर्व्वपुष्पेषु श्रेष्ठत्वमुक्तम् । यथा, "पुष्पेषु जाती नगरेषु काञ्ची ।" इति उद्भटः ॥) अस्या गुणाः । तिक्तत्वम् । शीतत्वम् । कफसुखप्राकनाग्नित्वम् । इति राजनिर्घण्टः ॥ उष्णत्वम् । तुवरत्वम् । लघुदोषाग्निरोऽहिदन्तरोगविषकुष्ठव्रणरक्तदोषनाशित्वञ्च । इति भावप्रकाशः ॥ तत्कुटमलस्य गुणाः । नेत्ररोगव्रणविस्फोटकुष्ठनाशित्वम् । इति राजनिर्घण्टः ॥

जातीकोशः, क्ली, (जातीत्याख्यया कोशमिव फलमिति यावत् ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलम् । कक्कोलकं लवङ्गञ्च तिक्तं कटुकषायकम् ॥")

जातीकोषं, क्ली, (जातीत्याख्यया कोषमिव फलम् ।) जातीफलम् । इति हेमचन्द्रः ॥

जातीपत्री, स्त्री, (जातीपत्रमिवास्त्यस्यामिति । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । ततो ङीप् ।) जातीफलत्वक् । जैत्री इति भाषा । तत्पर्य्यायः । जातिकोषी २ सुमनःपत्रिका ३ मालतीपत्रिका ४ सौमनसायनी ५ जातिपत्री ६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । सुरभित्वम् । कफजाद्यनाशित्वम् । वक्त्रवैशद्यजननत्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । स्वादुत्वम् । उष्णत्वम् । रुचिवर्णकारित्वम् । कफकासवमिश्वासव्रणाविषनाशित्वञ्च । इति भावप्रकाशः ॥ दुर्गन्धनाशित्वम् । इति राजवल्लभः ॥

जातीफलं, क्ली, (जातीत्याख्यं फलम् ।) सुगन्धफलविशेषः । जायफल इति भाषा ॥ तत्पर्य्यायः । जातीकोषम् २ । इत्यमरः । २ । ६ । १३२ ॥ जातीकोशम् ३ जातिफलम् ४ । इति तट्टीका ॥ जातिग्रन्थम् ५ ग्रालूकम् ६ मालतीफलम् ७ मज्जसारम् ८ जातिसारम् ९ पर्पटम् १० सुमनःफलम् ११ फलजातिः १२ फलजाती १३ कोशम् १४ कोषम् १५ जातिकोषम् १६ कोषकम् १७ । इति ५ दरत्नावली ॥ (यथा, वृहत्संहितायाम् । १६ । ३० ।
"जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृगोः ॥")
अस्य गुणाः । कषायत्वम् । उष्णत्वम् । कटुत्वम् । कण्ठामयार्शिवातातीसारप्रेहनाग्नित्वम् । वृष्यत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ रसे तिक्तत्वम् । तीक्ष्णत्वम् । रोचनत्वम् । ग्राहित्वम् । खरहितत्वम् । श्रेष्मानिलसुखवैरस्यमलदौर्गन्ध्यक्षयतालुकाठकासवमिश्वासशोषपीनसक्षुद्रुङ्नाशित्वञ्च । इति भावप्रकाशः ॥ लघ्वाश्मूलनाशित्वम् । इति राजवल्लभः ॥

जातीयः, त्रि, (जातौ भवः । "दृङ्हाक्षः ।" ४ । २ । ११४ । इति छः । जातिभवः । यथा, कथासरित्सागरे । २३ । ४८ ।
"प्राग्जन्मभिन्नजातीयाः परिच्छत्वेव कन्यकाः ॥")
तद्धितप्रत्ययविशेषः । स तु प्रकारार्थे भवति । यथा । तार्किकजातीया । इति सुग्धबोधमतम् । (प्राणिभिन्ने तु जातीयर् ॥)

जातीरसं, क्ली, (जात्या रसः इव रसो यस्य ।) वोलः । इति राजनिर्घण्टः ॥

जातु, य, (जन + क्तुन् । पृषोदरात् साधुः ।) कदाचित् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, मनुः । २ । ६४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥")
सम्भावितार्थः । (यथा, महाभारते । ५ । १७६ । २२ ।
"का जातु परभावं हि नारीं बालामिव स्थिताम् ।
वासयेत गृहे जानन् स्त्रीणां दोषो महात्ययः ॥")
गर्हार्थः । इति शब्दरत्नावली ॥ [रम् ॥"
("जातु निन्दसि गोविन्दं जातु निन्दसि शङ्करम् ।
इति सुग्धबोधव्याकरणम् ॥)

जातुकं, क्ली, (जातु गर्हितं निन्दितं दूषितमित्यर्थः कं जलं यस्मादिति ।) हिङ्गु । इति शब्दचन्द्रिका ॥

जातुधानः, पुं, (धीयते सन्निधीयते इति धानं सन्निधानमस्य जातु गर्हितं धानमभिधानमस्येत्येके ।) यातुधानः । राक्षसः । इत्यमरटीकायां रमानाथः ॥ (यथा, कालिकापुराणे ।
("जातुधानाः पिशाचाश्च कुष्माण्डा भैरवादयः ॥")

जातुर्षं, त्रि, (जतुनो विकारः । "चर्पूजतुनोर्युक् ।" ४ । ३ । १३८ । इति अण् युक् च ।) जतुविकारः । जतुनिर्म्मितम् । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । १२० ।
"अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जातुषाभरणस्येव रूपेणापि हि तस्य किम् ॥")

जातोच्चः, पुं, (जातश्चासौ उच्चा चेति । जातः प्राप्तदशावस्थः उच्चा इत्यर्थः । "अचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) उत्पन्न उच्चा । इत्यमरः । २ । ६ । ४१ ॥ उत्पन्नो दृढदशभावः । प्राप्तबलीवर्दभाव उच्चा । इति भरतः ॥

जात्यः, त्रि, (जातौ भवः इति यत् ।) कुलीनः । श्रेष्ठः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । १६ । ६ ।
"स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥")
काम्यः । इति जटाधरः ॥ (यथा, महाभारते । ५ । ३३ । १२२ ।
"अतीव स जायते ज्ञातिमध्ये
महामणिर्ज्वालय इव प्रसन्नः ॥")

जात्यन्धः, त्रि, (जात्या जन्मनैव अन्धः ।) जन्मान्धः । यथा, मनुः । ६ । २०१ ।
"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥"

जादौ, त्रि, (जात इत्यस्य आदौ इतीत्वत्प्रयोगस्तु प्राकृतलक्षणेश्वरसम्मत इति बोध्यम् ।) जातः । इति प्राकृतलक्षणेश्वरः ॥

जानकी, स्त्री, (जनकस्य मिथिलाधिपस्यापत्यं स्त्रीत्यण् ङीप् च ।) सीता । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २७३ । १ ।
"प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ ! ।
रक्षसा जानकी तस्य हृता भार्य्या बलीयसः ॥")

जानपदः, पुं, (जानेन जन्मना पदयते इति अण् ।) जनः । (यथा, याज्ञवल्क्ये । २ । ३७ ।
"देयं चौराहृतं द्रव्यं राज्ञा जानपदाय तु ।
अदद्धि समवाप्नोति किल्बिषं यस्य तस्य तत् ॥")
जनपद एव । स्वार्थे अण् ।) देशः । इति मेदिनी । दे, ४ । ४८ ॥ जनपदे भवः । इति "उतुसादिभ्योऽण् । ४ । १ । ८६ इत्यण् । देशभवे, त्रि ॥ यथा, मनुः । ८ । ४१ ।
"जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च धर्म्मवित् ॥")

जानु, क्ली, (जायते इति । जन "वृसनिजनिचरिचटिभ्यो नुक् ।" उणा १ । ३ । इति नुक् ।) ऊरुजङ्घयोर्म्मध्यभागः । हाँटु इति भाषा ॥ (यथा, महाभारते । ४ । ३२ । ३६ ।
"तस्य जानु ददौ भीमो जघ्ने चैनमरिन्दमः ॥")
तत्पर्य्यायाः । ऊरुपर्व्व २ अष्ठीवत् ३ अष्ठीवान् ४ । इत्यमरः । २ । ६ । ७२ ॥ चक्रिका ५ । इति राजनिर्घण्टः ॥

जापः, पुं, (जप + भावे घञ् ।) जपः । इति जटाधरः ॥

जापकः, त्रि, (जपतीति । जप् + ण्वुल् ।) जपकर्त्ता । (यथा, महाभारते । १२ । १६६ । ३ ।
"जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ! ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥"
जपेन कृतं जपजन्यमित्यर्थः । जप् + अण् + स्वार्थे कन् । जपजन्ये, त्रि । यथा, महाभारते । १२ । १६६ । ४६ ।
"अथवा सर्व्वमेवेह मामकं जापकं फलम् ॥")

जापनं, क्ली, (जप् + स्वार्थे णिच् + भावे ल्युट् ।) निरसनम् । निर्व्वसनम् । इति धरणिः ॥ (अपा । यथा, संवर्त्तकसंहितायाम् । २०६ ।
"मुच्यते सर्व्वपापेभ्यो गायत्र्याश्चैव जापतः ॥")

जाबालः, पुं, (जबालाया अपत्यं पुमानिति। अण्।) अजाजीवः। इत्यमरः। २। १०।११॥ मुनिविशेषः। (यथा, ब्रह्मवैवर्त्ते। १। १६।१४॥ "जाबालो याज्ञलिः पैलः करथोऽगस्त्य एव च। एते वेदाङ्गवेदज्ञाः षोड़शग्रन्थाधिनायकाः॥" उपनिषद्विशेषः। यथा, मौक्तिकोपनिषदि। "ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः। दर्शनग्राह्यविशेषः। यथा, रामचन्द्रदत्तशाप प्रकरणे। [यात्॥") "अधोत्य कूटजाबालं ग्रार्गालिं योनिमाप्नु-

जाबालिः, पुं, (जबालाया अपत्यं पुमान् इति। इञ्।) मुनिविशेषः। यथा, रामायणम्॥ "सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम्।" (तथाच ब्रह्मवैवर्त्ते। २। ४। ७०। "कण्वगर्ग्गो भरद्वाजश्चास्तीको देवलस्तथा। जैगीषव्योऽथ जाबालिर्यङ्कृत्वा सर्व्वपूजितः॥")

जामदग्न्यः, पुं, (जमदग्नेरपत्यं पुमान् इति। "गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) जमदग्निपुत्रः। परशुरामः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। २५। ४१। "पित्राज्ञया जामदग्न्येन पूर्व्वं छिन्नं शिरो मातुरिति प्रसिद्धम्।")

जामाता, [तृ] पुं, (जायां माति मिमीतेमिनोति वा। "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातरिति।" उणा। २। ९९। इति निपातनात् साधुः।) दुहितृपतिः। इत्यमरः। २। ६। ३२। जामाइ इति भाषा॥ (यथा, हरिवंशे। ११६। २५। "जामाता त्वभवत्तस्य कंसस्तस्मिन् हते युधि॥") सूर्य्यावर्त्तः। धवः। इति मेदिनी। ते, ११०॥

जामिः, स्त्री, (जम्+इञ्। इत्नु निपातनात् साधुरित्येके।) स्वसा। कुलस्त्री। इत्यमरः। ३। ३। १४२॥ (यथा, मनुः। ३। ५७। "शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्॥")

जामी, स्त्री, (जामि+वा ङीष्।) जामिः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। ४६। ७। "यामीमुग्रानि गेहानि निशातानीव कृत्यया॥")

जामेयः, पुं, (जाम्या अपत्यमिति। "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) भागिनेयः। इति हेमचन्द्रः॥

जाम्बवं, क्ली, (जम्बूः फं मूः। "जम्बा वा।" ४। ३। १६४। इवेत्यण् तस्य विधानात् न लुक्।) जम्बूफलम्। इत्यमरः। २। ४। १६॥ (यथा, सुश्रुते। १। ४६। "अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित्॥") सुवर्णम्। इति राजनिर्घण्टः॥ जाम्बवति, पुं। इति शब्दभेदः॥

जाम्बवती, स्त्री, (जाम्बवतो अपत्यं स्त्री। अण् नञो ङीप्।) श्रीकृष्णपत्नी। जाम्बवत्कन्या। इति श्रीभागवतम्॥ (यथा, हरिवंशे। ३८। ४१। "लेभे जाम्बवतीं कन्यान्द्यराजस्य सम्मताम्॥") नागदमनी। इति राजनिर्घण्टः॥

जाम्बवान्, [त्] पुं, (जम्बोर्वर्णः जाम्बवं तदस्यास्तीति मतुप् मस्य वः। पृषोदरादित्वात् साधुः। जम्बुतुल्यकृष्णत्वादस्य तथात्वम्।) ऋक्षराजः। स ब्रह्मपुत्रः। यथा, रामायणे। "ऋक्षराजस्य पुत्रोऽत्र महाप्राज्ञः सुदुर्ज्जयः। पितामहसुतश्चात्र जाम्बवानिति विश्रुतः॥") (यथाच, हरिवंशे। ३८। ३५। "धात्र्या कुमारमादाय सुतं जाम्बवतो नृप!॥")

जाम्बवी, स्त्री. (जाम्बवस्याकारोऽस्यास्याः इति।) नागदमनी। इति राजनिर्घण्टः॥

जाम्बुवान्, [त्] पुं, (जाम्बवान् पृषोदरात् साधुः।) जाम्बवान्। इति भरतो द्विरूपकोषश्च॥

जाम्बूनदं, क्ली, (जम्बूनद्यां भवमिति। अण्।) स्वर्णम्। धुस्तूरः। इति राजनिर्घण्टः॥ स्वर्णविशेषः। यथा। "मेरुमन्दरपर्व्वतस्थजम्बूफलानामत्युच्चनिपातनविशीर्णानां अनस्थिप्रायाणां इभकायनिभानां रसेन जम्बूनामनदी इलाहृतं वहति तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वायुर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति।" इति श्रीभागवतम्॥

जायकं, क्ली, (जयति अपरं गन्धमिति। जि+ण्वुल्।) कालीयकम्। कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम्। इत्यमरः। २। ६। १२५॥

जाया, स्त्री, (जायते पुत्ररूपेणात्मास्यामिति। जन्+यक् आत्वञ्च।) भार्य्या। इत्यमरः। २। ६। ६॥ (यथा, मनुः। ९। ८। "पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥")

जायाजीवः, पुं, (जाया आजीवः जीवनोपायो यस्य इति। जायया जीवतीति वा। जीव+अच्। जायायाः सङ्गीतनर्त्तनादिना जीवनादस्य तथात्वम्।) नटः। इत्यमरः। २। १०। १२॥

जायानुजीवी, [न्] पुं, (जायया अनुजीवतीति। अनु+जीव+णिनिः।) नटः। वकपक्षी। इति मेदिनी। नि, १५५॥ वेश्यापतिः। इति शब्दरत्नावली॥ दुश्चरः। इति हेमचन्द्रः॥

जायापती, पुं, (जाया च पतिश्चेति तौ।) भार्य्यापती। मातृभातार इति भाषा॥ नित्यद्विवचनान्तोऽयं शब्दः। इत्यमरः। २। ६। ३८॥

जायी, [न्] पुं, (जे+णिनिः। यद्वा, जि+णिनिः।) ध्रुवकभेदः। यथा,— "जायीति नाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः। सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे॥" इति सङ्गीतदामोदरः॥ (यथा, महाभारते। ३। ३५। ८। "अफलं जन्म तस्याहं मन्ये दुर्ज्जातजायिनः॥")

जायुः, पुं, (जयति रोगान् इति। जि+उण्।) औषधम्। इत्यमरः। २। ६। ५०॥ (जयतीति। जयश्रीले, त्रि॥)

जारः, पुं, (जीर्य्यति स्त्रियाः सतीत्वमनेन। जॄ+करणे घञ्।) उपपतिः। इत्यमरः। २। ६। ३५॥ (यथा, याज्ञवल्क्ये। २। ३०। "जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्॥" जारयति नाशयति इति। जॄ+णिच्+अच्। हन्ता। यथा, ऋग्वेदे। १। ६६। ४। "यमोऽह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्॥")

जारजः, त्रि, (जारात् उपपतेर्ज्जायते इति। जन्+डः।) उपपतिजातसन्तानः। इत्यमरः। २। ६। ३६॥ (यथा, मनुः। ३। १५८। श्लोके कुल्लूकभट्टधृतटीकायाम्। "अन्हते जारजः कुण्डो मृते भर्त्तरि गोलकः॥")

जारणी, स्त्री, (जारयति परिपाकं कारयतीति। जॄ+णिच्+ल्युः। ततो ङीप्।) शूलजीरकः। इति राजनिर्घण्टः॥

जारी, स्त्री, (जारयति जीर्णं कारयतीति। जॄ+णिच्+अच्+गौरादित्वात् ङीष्।) ओषधीविशेषः। इति मेदिनी। रे, ३६। जाड़ी इति भाषा॥

जारूथ्यः, पुं, (जरूथं मांसं तदर्हतीति। जरूथ+ण्यः।) त्रिगुणदक्षिणाकाययज्ञः। (यथा, महाभारते। ३। २६०। ७०। "ततो देवर्षिसहितः सरितं गोमतीमनु। दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान्॥")

जालं, क्ली, (जलते आच्छाद्यतेऽनेनेति। जल-संवरणे+करणे घञ्। यद्वा, जल्ते क्षिप्यते इति। जल+"ग्रहे।" ३। २। ६२। इत्यण्।) खनामख्यातसूत्रादिनिर्म्मितमत्स्यादिधारणोपायः। तत्पर्य्यायः। आनायः २। इत्यमरः। ३। ३। १६६॥ जालकम् ३। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ५५८। "वंशावलम्बनं यद् यो विस्तारो गुणस्य यावन्तः। तज्जालस्य खलस्य च निजाङ्गसुप्तप्रणाशाय॥") गवाक्षः। (यथा, रघुः। ६। ४३। "प्रासादवातायनवेशिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः॥") शारकः। स तु अस्फुटकलिकाकुड्मलाख्यादिक्षुद्रफलश्च। दम्भः। समूहः। इति मेदिनी। ले, १६॥ (यथा, रघुः। ७। ६२। "ततो धनुष्कर्षणमूढहस्तं एकांशपर्य्यस्तशिरस्त्रजालम्॥" वंशलोहादिनिर्म्मितजालवद्द्रव्यविशेषः। यथा, भट्टिः। १। ८। "अन्तर्निविष्टोज्ज्वलरत्नभासो वाचश्च जालैरभिनिष्पतन्त्यः॥") इन्द्रजालम्। इति हेमचन्द्रः। ३। ५६०॥

जालः, पुं, (जालयति शाखाप्रशाखादिभिः संवृणोतीति। जल संवरणे+णिच्+"नन्दिग्रहीति।" ३। १। १३४। इत्यच्।) कदम्बवृक्षः। इति मेदिनी। ले, १६॥

जालकं, क्ली, (जल संवरणे + भावे घञ्। जालेन ईषदावरणेन कायति प्रकाशते इति। कै + कः। जाल + स्वार्थे कन् वा।) अस्फुटकलिका। इति भरतः॥ (यथा, मेघदूते। ६६।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्॥")
कुष्माण्डादिच्छद्रफलम्। इति शब्दरत्नावली॥ तत्पर्य्यायः। चारकः २। इत्यमरः। २। ४। १६॥ कोरकः। दम्भः। कुलायः। आनायः। इति मेदिनी। के, ६२॥ (यथा, सुश्रुते। उत्तरतन्त्रे ७ अध्याये।
"दृष्टिर्भृशं विकलति द्वितीयं पटलं गते। मक्षिकान् मशकान् केशान् जालकानि च पश्यति॥")
समूहः। इति शब्दरत्नावली॥ (यथा, शाकुन्तले प्रथमाङ्के।
"वह्निं कर्णशिरीषरोधि वदने धर्म्माम्भसां जालकं बन्धे संसिनि चैकहस्तयमिता पर्य्याकुला मूर्द्धजाः॥")
वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषः। यथा, पञ्चतन्त्रे। ३। १७। ६।
"ततो यष्टिं शलाकाञ्च जालकं पञ्जरं तथा। बभञ्ज शुष्कको दीनां कपोतीञ्च सुमोच तान्॥")

जालकं, क्ली क्ली, (जल संवरणे + भावे घञ्। जालेन आवरणेन कायति प्रकाशते इति। कै + कः।) मोचकफलम्। इति मेदिनी॥ के, ६२॥

जालकः, पुं, (जालेन वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषेण कायतीति। कै + कः।) गवाक्षः। इति हेमचन्द्रः। ४। ७८॥

जालकारकः, पुं, (जालं करोतीति। कृ + ण्वुल्। जालस्य कारको वा।) मर्कटकः। इति हेमचन्द्रः। ४। २७६॥ जालकर्त्तरि, त्रि॥

जालकिनी, स्त्री, (जालकं लोमसमूहस्तदस्त्यस्या इति। "अत इनिठनौ।" ५।२।११५। इति इनिस्ततो ङीप्।) मेषी। इति हेमचन्द्रः। ४।३।४३॥

जालगर्द्दभः, पुं, रोगविशेषः। तस्य लक्षणं यथा,
"विसर्पवत् सर्पति यः शोथस्तुदपाकवान्। दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः॥"
अपाकवान् ईषत्पाकवान्। पित्तप्रकोपेन सर्व्वथा पाकाभावस्यायुक्तत्वात्। अयमग्निवात इति ख्यातः॥*॥ अथ विकृतेन्द्रवृद्धागर्द्दभिकाजालगर्द्दभानां चिकित्सा।
"विकृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम्। पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्। पाके तु रोपयेदाशु: पक्वैर्मधुरभेषजैः॥"
इति भावप्रकाशः॥

जालगोणिका, स्त्री, (जालवत् गोण्या छिद्रवत्त्वेन कायतीति। कै + कः। ततो ङीष्।) दधिमन्थनभाण्डविशेषः। तत्पर्य्यायः। कण्ठाला २। इति शब्दरत्नावली॥

जालन्धरः, पुं, त्रिगर्त्तदेशः। इति हेमचन्द्रः। ४। १४॥ (देशोऽयं पीठस्थाननामन्यतमः। अत्र भगवती विश्वसुखीमूर्त्या विराजते। यथा, देवीभागवते। ७। ३०। ७६।
"जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते॥")
जालन्धरोऽभिजन एषामिति। अण्।) तद्देशे पुं भूम्नि। (वैत्यवद्बहुषु। यथा, काशीखण्डे। २१। १०
"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम्। पादाङ्गुष्ठाग्ररेखोत्थं चक्रं सृष्ट्वा हरोऽहरत्॥"
ऋषिविशेषः। इति व्याकरणम्॥)

जालपात् [द्] पुं, (जालमिव पादौ यस्य।) हंसः। इति चिकाण्डशेषः॥ (यथाह सम्वर्त्तः। १४६।
"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा॥")

जालप्राया, स्त्री, (जालस्य प्रायो बाहुल्यं यत्र।) अङ्गरक्षिणी। इति हेमचन्द्रः। ३। ४३३॥ लोहार सांजीया इति भाषा॥

जालवर्व्वूरकः, पुं, (जालाकारो वर्व्वूरकः। शाकपार्थिवादिवत्समासः।) वर्व्वूरवृक्षविशेषः। तत्पर्य्यायः। कृचाकः २ स्थूलकण्टकः ३ क्षुद्रशाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६। अस्य गुणाः। रूक्षत्वम्। वातामयकफनाशित्वम्। पित्तदाहकारित्वम्। कषायत्वम्। उष्णत्वञ्च। इति राजनिर्घण्टः॥

जालिकः, पुं, (जालेन जीवतीति। जाल + "वेतनादिभ्यो जीवति।" ४। ४। १२। इति ठन्। यद्वा, जालेन चरतीति। "पर्पादिभ्यः ष्ठन्।" ४। ४। १०। इति ठन्।) कैवर्त्तः। इति चिकाण्डशेषः॥ वागुरिकः। जालेन रुगबन्धनकर्त्ता इत्यमरः। २। १०। १४॥ मर्कटकः। इति हेमचन्द्रः। ४। २७७॥ (ऐन्द्रजालिकः। इति शाकरभाष्यम्॥)

जालिकः, त्रि, (जालेन जीवतीति। जाल + ठन्।) ग्रामजाली। जालोपजीवी। इति मेदिनी। के, ६४॥

जालिका, स्त्री, (जालं जालवदाकृतिरस्त्यस्याः। जाल + "अत इनिठनौ।" ५। २। ११५। इति ठन्।) वस्त्रविशेषः। गिरिसारः। (जलमेवेति स्वार्थे अण्। ततो जालं सलिलं उत्पत्तित्वेनास्त्यस्या इति ठन्।) जलौका। विधवा। भटानामक्षरचिताङ्गरक्षिणी। इति मेदिनी। के, ६४॥

जालिनी, स्त्री, (जालं चित्रकर्म्मवस्तुसमूहो विद्यतेऽस्यामिति। इनिस्ततो ङीप्।) चित्रशाला। इति हेमचन्द्रः। ४। ६५॥ (जालं आनायसदृशद्रव्यं विद्यतेऽस्या इति।) कोशातकी। इति राजनिर्घण्टः॥ (यथास्याः पर्य्याया भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"धामार्गवः पीतपुष्पो जालिनी क्षतवेधना। राजकोशातकी चेति तथोक्ता राजिमत्फला॥"
घोषातकी। इति रत्नमाला॥ प्रमेहरोगिणः पीड़काविशेषः। यथा, सुश्रुते निदानस्थाने ६ अध्याये। "तत्र वसामेदोभ्यामभिपन्नमूरोरस्त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पीड़का जायन्ते। तद्यथा, शराधिका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति।"
"जालिनी तीव्रदाहा तु मांसजालसमावृता॥")

जाली, स्त्री, (जालं जालाकृतिरस्त्यस्याः। अच् ततो गौरादित्वात् ङीष्।) ज्योत्स्नी। इत्यमरः। २। ४। ११८॥ झिङ्गा। इति ख्याता। पटोलः। इति राजनिर्घण्टः॥

जाल्मः, त्रि, (जालयति दूरीकरोति हिताहितज्ञानमिति। जल + णिच् + बाहुलकात् मः।) पामरः। (यदुक्तम्।
"क्षणं विश्राम्यतां जाल्म! स्कन्धं ते यदि बाधति। न तथा बाधते स्कन्धं यथा बाधति बाधते॥")
क्रूरः। असमीक्ष्यकारी। इति मेदिनी। मे, १६॥ (यथा, माघे। १५। ३६।
"त्वयि पूजनं जगति जाल्म! कृतमिदमपाकृते गुणैः। हासकरमघटते नितरां शिरसीव कङ्कतमपेतमर्द्धजे॥")

जाषकं, क्ली, (जक्षति सुप्यति सन्ध्यादिकमिति। जक्ष + ण्वुल्। पृषोदरादित्वात् सस्य यत्वम्।) कालीयनामगन्धद्रव्यम्। इत्यमरटीकासारसुन्दरी॥

जाहकः, पुं, घोड़ः। घोड़ इति भाषा। मार्ज्जारः। खड़्गः। कारण्डिकः। इति मेदिनी। के, ६२॥ विलेशयजन्तुविशेषः। तत्पर्य्यायः। गात्रसङ्कोची २ मण्डली ३ बहुरूपकः ४ कामरूपी ५ विरूपी ६ विलवासः ७। इति राजनिर्घण्टः॥

जाह्नवी, स्त्री, (जह्नोरपत्यं स्त्री। जह्नु + अण् + ङीप्।) गङ्गा। इति हेमचन्द्रः। ४। १४७॥ एतन्नामकारणं यथा,—
"जानुद्वारा पुरा दत्त्वा जह्नुः संपीय कोपतः। तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥*॥
तस्यां तिथिविशेषे स्नानफलं यथा,—
"सामान्यदिवसस्नानसङ्ख्यं शृणु सुन्दरि!। पुण्यं दशगुणञ्चैव मौषलस्नानतः परम्॥ ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने। अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने॥ ततो दशगुणं पुण्यं नराणामुत्तरायणे। चातुर्म्मास्यां पौर्णमास्यामनन्तं पुण्यमेवच॥ अक्षय्यायाञ्च तत्तुल्यं नैतद्दानरूपितम्। असंख्यपुण्यफलदमेतेषु स्नानदानकम्॥ सामान्यदिवसस्नानात् दानात् शतगुणं भवेत्॥ मन्वन्तरायां देवेशि! युगाद्यायां तथैव च। माघस्य सितसप्तम्यां भौमाश्वत्थे तथैव च॥ ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्ल्लभे!। दशहरादशम्याञ्च युगाद्यादि समं फलम्॥ नन्दासमञ्च वारुण्यां महत्पूर्व्वे चतुर्गुणम्। ततश्चतुर्गुणं पुण्यं द्विमहत्पूर्व्वके सति॥ पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत्।

चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः ॥
पुण्येऽप्यर्द्धोदये काले ततः शतगुणं फलम् ।
सर्व्वेषामेव सङ्कल्पं वैगुण्यानां विपर्य्ययः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

जि, जये । अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकंच-अनिट् ।) जय उत्कर्षः स्वीकारश्च । उत्कर्षेऽकर्म्मकः । जयन्ति यमुनाकूले रङ्गः-केलयः । मखैरसङ्ख्यैरजयत् सुरालयमिति कादम्बरी । जयति शत्रुं बली । अनभिधानादस्मात् तुवन्त्योः प्रयोगाभावः । किञ्च तयोः स्थाने तिवन्तीति । किञ्च तुपः स्थाने तातङ् दृश्यते । यथा, भावगम्यलयः कोऽपि जयताङ्गगोचरः । इति दुर्गादासः ॥

जिः, त्रि, (जयतीति । जि + बाहुलकात् डिः ।) जेता । पिशाचे, पुं । इत्येकाक्षरकोषः ॥

जिगमिषु, पुं, (गन्तुमिच्छति । गम + "गमेः सन्वच्च ।" उणां ३ । ३१ । इति क्नुः सन्वत्कार्य्यञ्च । अनुदात्तोपदेश इत्यादिना मलोपः ।) प्राणवायुः । इत्युणादिकोषः ॥

जिगमिषा, स्त्री, (गन्तुमिच्छा । गम + सन् + अ । ततष्टाप् ।) गमनेच्छा । इति व्याकरणम् ॥

जिगीषा, स्त्री, (जेतुमिच्छा । जि + सन् + अ । ततष्टाप् ।) जयेच्छा । (यथा, महाभारते १ । ७६ । ६ ।
"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ॥") अवसायः । प्रकर्षः । इति मेदिनी । षे, ३६ ॥

जिघत्सा, स्त्री, (अत्तुमिच्छा । अद् भक्षणे + सन् + अः । "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लृ ।) क्षुधा । इति हेमचन्द्रः । ३ । ५७ ॥

जिघत्सुः, त्रि, (अत्तुमिच्छुः । अद् + सन् + "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्-लादेशः । ततः "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) क्षुधितः । इत्यमरः । ३ । १ । २० ॥

जिघांसकः, त्रि, (जिघांसति हन्तुमिच्छतीति । हन + सन् + ण्वुल् ।) हननेच्छुकः । इति व्याकरणम् ॥

जिघांसा, स्त्री, (हन्तुमिच्छा । हन् + सन् + "अभ्यासाच्च ।" ७ । ३ । ५५ । इति कुत्वम् । "अज्झनगमां सनि ।" ६ । ४ । १६ । इति दीर्घः । ततः अप्रत्ययस्तः स्त्रियां टाप् ।) हननेच्छा । इति व्याकरणम् ॥ (यथा, मनुः । ११ । २०६ ।
"जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥")

जिघांसुः, पुं, (हन्तुमिच्छुः । हन् + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) शत्रुः । इति हेमचन्द्रः । ३ । ३६३ । हननेच्छौ, त्रि । यथा, भट्टिः ।
"प्रशान्तचेष्टं हरिणं जिघांसुः ॥"
(यथाच, महाभारते । ३ । १५४ । १८ ।
"जिघांसवः क्रोधवशाः सुभीमा
मीमं समग्रात् परिवव्रुरुग्राः ॥")

जिघ्रः, त्रि, (जिघ्रतीति । घ्रा गन्धोपादाने + "घ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।" ३ । १ । १३७ । इति घ्रः ।) घ्राणकर्त्ता । यथा, साहित्यदर्पणे ।
"स्वामी निश्वसितेऽप्यस्यति मनोजिघ्रः सपत्नीजनः ॥"

जिङ्गिनी, स्त्री, वृक्षविशेषः । तत्पर्य्यायः । झिङ्गिनी २ झिङ्गी ३ सुनिर्य्यासा ४ प्रमोदिनी ५ । (यथा, गारुडे १६४ अध्याये ।
"जिङ्गिन्यैरण्डकं रुद्र ! मूकाग्निर्भीसमन्वितम् ।
शीतोदकेन तन्नस्यो बाहुशीर्षार्त्तिहरेत् ॥"
यथाच, वाभटे सूत्रस्थाने १५ अध्याये ॥
"रोधघ्नावरकरोध्रपलाशा
जिङ्गिनी सरलकट्फलयुक्ताः ।
कृत्तसिताम्लकदली गतशोकाः
सेवनायुपरिपेलवमोचाः ॥")
अस्या गुणाः । मधुरत्वम् । उष्णत्वम् । कषायत्वम् । योनिशोधनत्वम् । कटुत्वम् । व्रणरुग्दोगवातातीसारनाशित्वम् । पटुत्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥

जिङ्गी, स्त्री, मञ्जिष्ठा । इत्यमरः । २ । ४ । ६० ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठचिकित्सायाम् ।
"आसु जिङ्गी महातिक्ता विशाला कृमिपञ्चकम् ॥")

जिज्ञासा, स्त्री, (ज्ञातुमिच्छा । ज्ञा + सन् + अः । स्त्रियां टाप् ।) ज्ञातुमिच्छा । यथा,—
"अथातो ब्रह्मजिज्ञासा ।"
इति शारीरकप्रथमसूत्रम् ॥
तत्पर्य्यायः । अनुयोगः १ प्रश्नः २ पृच्छा ३ निरूपणा ४ । इति जटाधरः ॥

जिज्ञासितः, त्रि, (जिज्ञासास्य जाता । तारकादित्वात् इतच् । यद्वा ज्ञा + सन् + कर्म्मणि क्तः ।) ज्ञातजिज्ञासः । दृष्टः । विचारितः । यथा, श्रीभागवते १ । ५ । ४ ।
"जिज्ञासितमधीतञ्च ब्रह्म यत्तत् सनातनम् ॥"
"किञ्च यत् सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तमेवेत्यर्थः ।" इति श्रीधरस्वामी ॥

जिज्ञासुः, त्रि, (ज्ञातुमिच्छुः । ज्ञा + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) आत्मज्ञानेच्छुः । यथा, श्रीभगवद्गीतायां ७ । १५ ॥
"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्জ্জুন ! ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥"
सामान्यबोधेच्छकश्च ॥

जिज्ञास्यः, त्रि, (जिज्ञास्यते इति । ज्ञा + सन् + कर्म्मणि यत् ।) जिज्ञासितव्यः । जिज्ञासनीयः । (विचार्य्यम् । यथा, भागवते । २ । ६ । ३५ ।
"एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥"
"आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम् ॥" इति श्रीधरस्वामी ॥)

जितः, पुं, (जितं जयमस्यास्तीति । अच् ।) अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

जितः, त्रि, (जि + कर्म्मणि क्तः ।) प्राप्तपराजयः । तत्पर्य्यायः । पराभूतः २ परिभूतः ३ अभिभूतः ४ भग्नः ५ पराजितः ६ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १८१ ।
"एभिर्जितेश्च जयति सर्व्वान् लोकानिमान् गृही ॥")

जितकाशिः, पुं, (जितेन जयोद्यमेन काशते प्रकाशते इति । काश + इन् ।) दृढ़सुष्टिः । इति भारतटीकायां नीलकण्ठः ॥

जितकाशी [न्] त्रि, (जितेन जयेन काशते इति । काश + णिनिः ।) जययुक्तः । तत्पर्य्यायः । जिताह्वः २ । इति हेमचन्द्रः । ३ । ४७० ॥ (यथा, हरिवंशे । १०५ । १४१ ।
"अनिरुद्धं रणे वासो जितकाशी महाबलैः ।
वाचं प्रोवाच संक्रुद्धो गृह्यतां हन्यतामिति ॥")

जितनेमिः, पुं, (जिता नेमिर्येन ।) अश्वत्थनिर्म्मितदण्डः । तत्पर्य्यायः । आश्वत्थः २ । इति हेमचन्द्रः । ३ । ४६० ॥

जितशत्रुः, पुं, (जितः शत्रुर्येन ।) वृत्ताईत्पिता । इति हेमचन्द्रः । १ । ३६ ॥ क्षतशत्रुपराजये, त्रि ॥

जिताक्षरः, त्रि, (जितानि आयत्तीकृतानि अक्षराणि येन ।) कृताक्षरजयः । वशीभूताक्षरकः । दृष्टिमात्रेणाक्षरबोधेन पाठकमः । इति लोकप्रसिद्धिः ॥

जितामित्रः, पुं, (जिता अमित्रा रागद्वेषादयो बाह्यावरणादयश्च येन इति ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १४६ । ६६ ।
"अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥"
जितोऽमित्रः शत्रुर्येन ।) कृतशत्रुपराजये, त्रि ॥ (यथा, मार्कण्डेये । ३४ । ११३ ।
"ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।
जितामित्रो नृपो यत्र बलवान् धर्म्मतत्परः ॥")

जितारिः, पुं, (जिता अरयः कामक्रोधादयो येन ।) बुद्धः । इति त्रिकाण्डशेषः ॥ वृत्ताईत्पिता । इति हेमचन्द्रः । १ । ३६ ॥ (कुरुपुत्रस्याविक्षितः पुत्राणामन्यतमः । यथा, महाभारते । १ । ६५ । ५० ।
"अविक्षितः परिक्षिच्च श्रवणाश्च वीर्य्यवान् ।
आदिराजो विराजश्च शिल्पिनश्च महाबलः ।
उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः ॥")
जितशत्रौ, त्रि ॥

जिताष्टमी, स्त्री, (जिता पुत्रसौभाग्यदानेन सर्व्वोत्कर्षेण स्थिता या अष्टमी ।) भौगाश्विनकृष्णाष्टमी । सैव जीमूताष्टमी । यथा, "आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजा । तत्राष्टमी प्रदोषव्यापिनी ग्राह्या । भविष्योत्तरे ।
"इदं मासशिते पक्षे अष्टमी या तिथिर्भवेत् ।
पुत्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्रिका ॥
शालिवाहनराजस्य पुत्रो जीमूतवाहनः ।

तस्यां पूज्यः स नारीभिः पुत्रसौभाग्यलिप्सया ॥
प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः ।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम् ॥"
किञ्च विष्णुधर्म्मोत्तरे ।
"पूर्व्वेद्युरपरेद्युर्वा प्रदोषे यत्र चाष्टमी ।
तत्र पूज्यः सदा स्त्रीभी राजा जीमूतवाहनः ॥"
तथा च । यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतं उभयदिने चेत् परदिने त्रिसन्ध्यव्यापित्वात् । उभयदिने प्रदोषाव्याप्तौ उदयगामिन्यां तदुक्तं निर्णयामृतसिन्धौ ।

"लक्ष्मीव्रतं चाश्विते प्रगाङ्गे
यत्राष्टमी चाश्विनकृष्णपक्षे ।
तत्रोदयं वै कुरुते दिनेग्र-
सदा भवेल्लोवितपुत्रिका सा ॥" इति ।

अस्यामष्टम्यां स्त्रीभिर्न भोक्तव्यम् ।

"आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते ।
मृतवत्सा भवेयुस्ता वैधव्यञ्च भवेद्ध्रुवम् ॥"
इति वचनात् ।

इति वाचस्पतिमिश्रकृतचमत्कारचिन्तामणिः ॥

जिताहवः, पुं, (जित आहवो युद्धं येन ।) जितकाशी । इति हेमचन्द्रः । ३ । ४७० ॥

जितेन्द्रियः, त्रि, (जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनि येन ।) वशीकृतेन्द्रियः । तत्पर्य्यायः । शान्तः २ शान्तः ३ । इति हेमचन्द्रः ॥ (यथा, शब्दचिन्तामणिधृतवचनम् ।
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥",

जितेन्द्रियाङ्कः, पुं. (जितेन्द्रियं आह्वयते स्पर्द्धते इति । आ + ह्वे + कः ।) कामदहिवृक्षः । इति राजनिर्घण्टः ॥

जित्तमः, पुं, (अयमेषामतिशयेन जित् जयशीलः । जित् + तमप् ।) जितुमः । मिथुनराशिः । इति ज्योतिषतत्त्वम् ॥ जयशीलानां मध्ये उत्तमश्च ॥

जित्वा, स्त्री, (जि + "विपूयविनीयजित्वाशुक्लकृष्णहलिषु ।" ३ । १ । ११७ । इति क्वप् ।) हलिः । इति हेमचन्द्रः । ३ । ५५४ ॥ (सिद्धान्तकौमुदीमते तु पुंलिङ्गान्तोऽयं शब्दः ॥)

जित्वरः, त्रि, (जयतीति । जि + "इण्नशजिसर्त्तिभ्यः क्वरप् ।" ३ । २ । १६३ । इति क्वरप् ।) जेता । इत्यमरः । २ । ८ । ७७ ॥ (यथा, माघे । २ । ६ ।
"करदीकृतभूपाली भालभिर्जित्वरैर्दृशाम् ।
विनाप्यस्मदलम्भूष्णुरिज्याये तपसः सुतः ॥")

जित्वरी, स्त्री, (जयति सर्व्वोत्कर्षेण वर्त्तते इति । जि + क्वरप् । "टिड्ढाणेति ।" ४ । १ । १५ । इति ङीप् ।) काशी । इति त्रिकाण्डशेषः ॥

जिनः, पुं, (जयतीति । जि + "इण् धिन् जीति ।" उणां । ३ । २ । इति नक् ।) अर्हन् । बुद्धः । विष्णुः । इति हेमचन्द्रः । २ । १३० ॥ अतिवृद्धः । इत्युणादिकोषः ॥ जित्वरे, त्रि । इति मेदिनी । ने, ८ ॥

जिनयोनिः, पुं. स्त्रगः । इति शब्दरत्नावली ॥

जिनसद्म, [न्] क्ली, (जिनानां सद्म गृहम् ।) जिनगृहम् । तत्पर्य्यायः । चैत्यः २ विहारः ३ । इति हेमचन्द्रः । ४ । ६० ॥

जिनेन्द्रः, पुं, (जिनानां इन्द्रः ।) बुद्धः । इति हलायुधः ॥

जिम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जिमित्वा जिग्ध्वा । इति दुर्गादासः ॥

जिरि, र न हिंसायाम् । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) रेफोपधः । र, वैदिकः । न, जिरिणोति । इति दुर्गादासः ॥

जिव, इ प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इखी । इ, जिन्वति । जिन्वति लोकः पितरम् । इति दुर्गादासः ॥

जिवाजिवः, पुं, (जीवञ्जीवः पृषोदरादित्वात् साधुः ।) जीवञ्जीवपक्षी । इति शब्दरत्नावली ॥

जिष्णिः, पुं, (जीर्य्यत्यनेनेति । जॄष वयोहानौ + "जीर्य्यतेः क्रिन् रश्च वः ।" उणां ५ । ४६ । इति क्रिन् । इरादिकार्य्यं रेफस्य च वः । बाहुलकात् इनि चेति न दीर्घः ।) समयः । पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (जीर्व्वि, त्रि । यथा, ऋग्वेदे । १ । ७० । १५ । [भरन्त ।"]
"वित्ता नरः पुत्रस्य सप्तर्यन् पितुर्न जिष्णेर्वि वेदो
जिष्णु, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, जेषित्वा जिष्ट्वा । इति दुर्गादासः ॥

जिष्णुः, पुं. (जयतीति । जि जये + "स्फायिञ्जिवञ्चि गृक्षुः ।" १ । २ । १३६ । इति गृक्षुः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, महाभारते । ५ । ७० । १३ ।
"विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते ।
प्राप्यत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥")
इन्द्रः । (यथा, अथर्ब्ववेदे । ११ । ६ । १८ ।
"जयंश्च जिष्णुश्चामित्रा जयतामिन्द्रमेदिनौ ॥")
अर्জ্জुनः । (यथा, महाभारते । ४ । ४२ । २१ ।
"अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥"
भौत्यस्य मनोः पुत्राणामन्यतमः । यथा, हरिवंशे । ७ । ८८ ।
"तरङ्गभीरुश्चञ्चश्च तरस्वानुग्र एव च ।
अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः ॥")
जेतरि त्रि । इति मेदिनी । णे, १३ ॥ (यथा, रघुः । ४ । ८५ ।
"इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां क्षत्रमूलेषु मौलिषु ॥")

जिह्मं, क्ली, (जहातीति । हा + "जहातेः सन्वदालोपश्च ।" उणां । १ । १४० । इति मन् ।) तगरवृक्षः । इति मेदिनी । मे, १३ ॥

जिह्मः, त्रि, (जहाति परित्यजति शारल्यमिति । हा + "जहातेः सन्वदालोपश्च ।" उणां । १ । १४० । इति मन् ।) कुटिलः । (यथा, महाभारते । १ । १०२ । १८ ।
"सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनाः ॥")
मन्दः । इति मेदिनी । मे, १३ ॥

जिह्मगः, पुं, (जिह्मं कुटिलं वक्रमित्यर्थः यथा स्यात् तथा गच्छतीति । गम + डः ।) सर्पः । (यथा, महाभारते । १ । ६ । १६ ।
"स लब्ध्वा दुर्लभां भार्य्यां पद्मकिञ्जल्कवर्चसम् ।
व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥"
जिह्मं मन्दं गच्छतीति ।) मन्दगे, त्रि । इति मेदिनी । गे, २५ ॥

जिह्ममोहनः, पुं. (जिह्मं कुटिलं यथा तथा सृजतीति । सृह + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः । यद्वा, जिह्मस्य कुटिलस्य सर्पस्य मोहनश्चित्तमोहनः । भक्ष्यत्वात् ।) भेकः । इति शब्दरत्नावली ॥

जिह्मशल्यः, पुं, (जिह्मं कुटिलं शल्यं यस्मात् ।) खदिरः । इति जटाधरः ॥

जिह्मं, क्ली, (जिह्मं निपातनात् मस्य वत्वे साधुः ।) तगरमूलम् । इति रत्नमाला ॥

जिह्वः, पुंस्त्री, (हूयते आह्वयतेऽनेनेति । ह्वे + बाहुलकात् डप्रत्ययेन ह्वित्वादौत्वेति साधुः ।) जिह्वा । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । ११२ । ६५ ।
"द्विसहस्रेण जिह्वेन वासुकिः कथयिष्यति ॥")

जिह्वलः, त्रि, (जिह्वेन जिह्वया लाति आदत्ते परद्रव्यमिति । जिह्व + ला + कः ।) लुब्धः । लोलुपः । यथा, आह्निकतत्त्वे ।
"आद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः ।
पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः ॥"

जिह्वा, स्त्री, (जयति रसमनयेति । जि + "ग्रीवाकृशिकाशीवाघृभीवाः ।" उणां । १ । १५४ । इति वन् प्रत्ययेन हुगागमे निपातनात् साधुः ।) रसज्ञानेन्द्रियम् । जिव् इति भाषा । तत्पर्य्यायः । रसज्ञा २ रसना ३ । इत्यमरः । २ । ६ । ८१ ॥ रज्ञना ४ रसनम् ५ जिह्वः ६ । इति तट्टीका ॥ रसालः ७ सुधासवा ८ रसिका ९ रसाङ्का १० । इति शब्दरत्नावली ॥ रसा ११ लोला १२ रसाला १३ रसला १४ ललना १५ । इति जटाधरः ॥ (यथा, मुकुन्दमालायाम् । २६ ।
"जिह्वे ! कीर्त्तय केशवं मुररिपुं चेतो ! भज श्रीधरं
पाणिद्वन्द्व ! समर्चयाच्युतकथां श्रोत्रद्वय ! त्वं शृणु ।
कृष्णं लोकय लोचनद्वय ! हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण ! मुकुन्दपादतुलसीं मूर्द्धन्नमाधोक्षजम् ॥")

अस्याः परीक्षा यथा, भावप्रकाशे ।
"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तात् श्लेष्मार्द्रा धवला कफात् ॥
परिदग्धा खरस्पर्शा क्षया दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"
(यथास्या उत्पत्तिविधयः ।

"उद्रे पथ्यमानानामाध्मानादूकसारवत् ।
कफशोणितमांसानां सारो जिह्वा प्रजायते ॥"
इति सुश्रुते शारीरस्थाने ४र्थे अध्याये ॥)

जिह्वानिर्लेखनं, क्ली. (जिह्वाया निर्लेखनं संस्कारः ।) जिह्वामार्जनम् । जिवऱ्याचड़ान इति भाषा । जिह्वामार्जनद्रव्यम् । जिवऱ्याचड़ा चेयाड़ि इति भाषा । तत् दग्धाङ्गुलं कोमलं क्षुद्रं स्वर्णरूप्यताम्रलोहनिर्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्य गुणः । वक्त्रवैरस्यजिह्वाश्रित-मलनाशित्वम् । आरोग्यरुचिकारित्वञ्च । इति राजवल्लभः ॥
("जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्चमेव च । तन्मलापहरं श्रेष्ठं लघुक्षुद्रं दग्धाङ्गुलम् । मुखवैरस्यदौर्गन्ध्य-श्लेष्मजाद्यहरं सुखम् ॥"
व्यवहारविधयेन रोगजनकता यथा.—
"जिह्वानिलेखनाक्षुब्धकफजाद्यभिघातनः ।
कुपितो हनुमूलस्थः संक्षयित्वानिलो हनू ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुसंग्रहः स तेन स्यात् क्षुच्छ्वासव्यञ्जनाभाषणम् ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)

जिह्वापः, पुं, (जिह्वया पिबतीति । पा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुक्कुरः । व्याघ्रः । विड़ालः । भल्लूकः । इति शब्दरत्नावली ॥ चित्रकव्याघ्रः । इति विश्वः ॥

जिह्वामलं, क्ली, (जिह्वाया मलम् ।) जिह्वा-स्थितमलम् । तत्पर्य्यायः । कुलुकम् २ । इति चिकित्साशास्त्रे ॥

जिह्वामूलीयः, पुं, (जिह्वामूले भवः । "जिह्वा-मूलाङ्गुलेश्छः ।" ४ । ३ । ६२ । इति छः ।) वक्ष्यमाणवर्णः । वोपदेवेनास्य मू इति संज्ञा कृता । स तु कखपरे विसर्गस्थाने भवति । यथा हरि × काम्यः । अस्योच्चारणं विसर्गवत् । इति व्याकरणम् ॥
"अधोविरेकयुक्ताग्र्यामात्रवद्वयरूपकः ।
जिह्वामूलीय इत्येव गजकुम्भोपमोऽपरः ॥"
इति सुपद्मव्याकरणटीका ॥

जिह्वारदः, पुं, (जिह्वा एव रदो दन्त इव यस्य ।) पक्षी । इति हारावली । ५६ ॥

जिह्वारोगः, पुं, (जिह्वाया रोगः ।) मुखरोगान्तर्गतरसनाजातव्याधिः । तत्र जिह्वारोगाणां निदाननामसंज्ञाः प्राह ।
"वातजः पित्तजश्चापि कफजोऽसृक्संज्ञकः ।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्तिताः ॥"
तत्र वातजस्य लक्षणमाह ।
जिह्वानिलेनस्फुटिता प्रसुप्ता
भवेच्च शोकच्छदनप्रकाशा ।
स्फुटितामनाविद्धीर्णा । प्रसुप्ता रसानभिज्ञा तया सुप्तेव । शोकच्छदनप्रकाशा शोको मरु-भूमिजो द्रुमः तद्वत् कण्टकचिता ॥ * ॥
पित्तजमाह ।
पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपिकाग्रकैश्च ।
अयं रोगो लोके जलौति ख्यातः । जाड़ौति वङ्गभाषा ॥ * ॥ कफजमाह ।
कफेन गुर्व्वी बहलाचिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः ।
बहला स्थूला । मांसोच्छ्रयैः मांसजकण्टकैः ॥*॥
असासमाह ।
जिह्वातले यः श्वयथुः प्रगाढ़ः
वोलाससंज्ञः कफरक्तमूर्त्तिः ।
जिह्वां सरुक् स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥
प्रगाढ़ः प्रकर्षेण गाढ़ो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वास्तम्भेन वायुरत्र बोद्धव्यः । शेषं पाकेन पित्तञ्च । अतस्त्रिदोषजोऽयम् । असाध्यत्व-मस्य ॥ * ॥ उपजिह्विकामाह ।
जिह्वाग्ररूपः श्वयथुश्च जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः ।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति ॥
जिह्वाग्ररूपः जिह्वायाग्रतुल्यः ॥"* ॥
अथ जिह्वारोगाणां चिकित्सा ।
"जिह्वागतविकाराणां शस्तं शोणितमोक्षणम् ।
गुडुचीपिप्पलीनिम्बकवलः कटुभिः सुखः ॥
श्लेष्मप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम् ।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु ॥
पित्तजे परिदग्धे तु निःसृते दूषशोणिते ।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वल्पशः क्षये ।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
उपजिह्वासु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूषधूमैश्चैनासुपाचरेत् ॥
शोषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम् ।
उपजिह्वाप्रशान्त्यर्थमेभिर्लेखञ्च पाचयेत् ॥"
इति भावप्रकाशः ॥

जिह्वालिट् [ह्] पुं. (जिह्वया लेढ़ीति । लिह + क्विप् ।) कुक्कुरः । इति भूरिप्रयोग. ॥

जिह्वाग्रल्यः, पुं, (जिह्वाया ग्रल्यमिव । अभिधानात् पुंस्त्वम् ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

जिह्वास्वादः, पुं, (जिह्वया स्वाद आस्वादनम् ।) लेहनम् । इति हेमचन्द्रः । ३ । ८८ ॥

जीनः, त्रि, (जिनाति जीर्य्यतीति । व्ये वयो हानौ + "गत्यर्थेति ।" क्तः । यद्दिच्येति सम्प्र-सारणम् । हल इति दीर्घः । लादिर्द्धेति नत्वम् ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (चर्म्मपुटे । यथा, मनुः । ११ । १३८ ।
"जीनकाम्बुकवस्त्रादीन् पृथग् दद्यात् विशुद्धये ॥")

जीमूतः, पुं, (जयति आकाशमिति । जि + "जेर्मूट्चोदात्तः ।" उणां ३ । ६१ । इति क्तः । मुड़ागमो धातोर्दीर्घश्च ।) पर्व्वतः । (यथा-मत्स्यपुराणे । १२० । ७५ ।
"जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्व्वतः ।
आयताश्चे महाशैलाः समुद्रं दक्षिणं प्रति ॥"*॥
जीवनं जलं सूचयति सावयतीति । पृषोदरा-दित्वात् साधुः । इति पुरुषोत्तमदेवः ।) मेघः । (यथा, महाभारते । ६ । १६ । ३१ ।
"राजानमन्वयुः पश्चात् जीमूता इव वार्षिकाः ॥")
मुस्ता । देवताड़वृक्षः । इत्यमरः । ३ । ३ । ५८ ॥ इन्द्रः । भूतिकरः । घोषकलता । इति हेम-चन्द्रः ॥ (यथा, चरके सूत्रस्थाने प्रथमेऽध्याये ।
"धामार्गवमथेच्छाकु जीमूतं क्षतवेधनम् ॥"
सूर्य्यः । यथा, महाभारते । ३ । ३ । सूर्य्य-स्याष्टोत्तरशतनामकीर्त्तने । २२ ।
"वरुणः सागरोऽंशुश्च जीमूतो जीवनोऽरिहा ॥"
ऋषिविशेषः । यथा, महाभारते ५ । १११ । २४ ।
"जीमूतस्याथ विप्रर्षेरुपस्थे महात्मनः ॥"
मल्लविशेषः । भीमसेनस्तु विराटगृहवासकाले नियुद्धेनैनं क्षिपतवान् । यथा, महाभारते । ४ । १२ । २२ ।
"ततस्तु वृत्तसङ्काशं भीमो मल्लं समाह्वयत् ।
जीमूतं नाम तं तत्र मल्लं विख्यातविक्रमम् ॥"
स्वनामख्यातो दग्धार्हस्य पौत्रः । यथा, हरि वंशे । ३८ । २५ ।
"दग्धार्हस्य सुतो योमा योम्नो जीमूत
उच्यते ॥"
वसुश्रुतपुत्रः । स तु शाल्मलद्वीपस्य ईश्वर-विशेषः । यथा, ब्रह्माण्डे ३६ अध्याये ।
"शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः ।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ॥"
अस्य वर्षस्तु एतन्नाम्नैव विख्यातः । यथा, तत्रैव,—
"जीमूतस्य च जीमूतो रोहितस्य च रोहितः ॥"
जनपदस्यारिंशदक्षरवृत्तिविशेषः । तल्लक्षणा-दिकं छन्दःशब्दे द्रष्टव्यम् ॥)

जीमूतकूटः, पुं, (जीमूतो मेघः कूटे शिखरे यस्य । आद्युदात्तत्वादेवास्य तथात्वम् ।) पर्व्वतः । इति हारावली । ५१ ॥

जीमूतमूलं, क्ली, (जीमूतस्य मुस्तायाः मूलमिव मूलमस्य ।) शटी । इति रत्नमाला ॥

जीमूतवाहनः, पुं, (जीमूतो मेघो वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरदर्पणात् । धर्म्मरत्न-नामकस्मृतिसंग्रहकर्त्ता ॥ (यदुक्तं दायभागे ।
"बहुविधपूर्व्वनिबन्धव्याख्यासङ्गतसंग्रयस्येतत् ।
जीमूतवाहनकृतं प्रकरणमपनुत्तये ध्येयम् ॥
परिभद्रकुलोद्भूतः श्रीमान् जीमूतवाहनः ।
दायभागं चकारेमं विदुषां संग्रयच्छिदे ॥"
शालिवाहननृपस्य पुत्रः । आश्विनशुक्ला-ष्टम्यां पुत्रसौभाग्यकामाभिर्नारीभिरयं पूज्यः । एतद्विवरणं जितन्तमीशब्दे द्रष्टव्यम् । जीमूत-केतोर्नृपस्य पुत्रः । यथा, कथासरित्सागरे । २२ । २४ ।
"अथ तस्याचिराद्देव राज्ञः सूनुरजायत ।
जीमूतवाहनं तं च नाम्ना स विदधे पिता ॥")

जीमूतवाही, [न्] पुं. (जीमूतं वहति जीमूता-कारेणात्मानं परिणामयतीत्यर्थः । वह +

भिनिः। मेघयोनित्वादेवास्य तथात्वम्।) धूमः। इति हेमचन्द्रः॥

जौरः, पुं, (जवतीति। जु गतौ + "जोरी च।" उणा २। २३। इति रक् ईत्वान्तादेशः।) जीरकः। खड्गः। इति मेदिनी। रे, ३६॥ अदुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (विद्यायति, त्रि। यथा, ऋग्वेदे। १।४४।२१। "मनुष्वदेव धीमहि प्रचेतसं जौरं दूतमग्निम्।" "जौरं विद्यावन्तम्।" इति दयानन्दभाष्यम्॥)

जौरकः, पुं, (जौर + संज्ञायां कन्।) वस्त्रिग्द्रव्यविशेषः। जीरा इति भाषा। तत्पर्य्यायः। जरणः २ अजाजी ३ कणा ४। इत्यमरः। २। ६। ३६॥ जीर्णः ५ जीरः ६ दीप्यः ७ जीरगः ८ अजाजिका ९ वह्निशिखः १० मागधः ११ दीपकः १२। इति जटाधरः॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। वातगुल्माध्मानातीसारग्रहणीक्रिमिनाशित्वञ्च। इति राजनिर्घण्टः॥ रुचिस्वरकारित्वम्। गन्धयुक्तत्वम्। कफवातनाशित्वम्। पाके कटुत्वम्। तीक्ष्णत्वम्। लघुत्वम्। पित्तवर्द्धनत्वञ्च। इति राजवल्लभः॥ अपि च। शुक्लजीरा कृष्णजीरा कलौञ्जी एषां नामानि गुणाश्च।

"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः।
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः॥
कलाजाजी तु सुषवी कालिका चोपकालिका।
एष्यीका कारवी एष्वी एषुस्तूणोपकुञ्चिका॥
उपकुञ्ची च कुञ्ची च दृढ्भारक इत्यपि।
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम्॥
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्॥"

इति भावप्रकाशः॥

जौरगः, पुं, (जौरकः पृषोदरादित्वात् कस्य गः।) जीरकः। इति राजनिर्घण्टः॥

जौरिका, स्त्री, (जीर्य्यतीति। जॄ + बाहुलकात् रिक्। ईत्वान्तादेशः। ततः स्वार्थे कन्।) वंशपत्रीशणम्। इति राजनिर्घण्टः॥

जौर्य्य, क्ली, (जीर्य्यति स्नेति। जॄ ष् वयोहानौ + गत्यर्थेति क्तः। निष्ठातस्य नत्वम्।) श्लेष्मजम्। इति राजनिर्घण्टः॥ (वयःप्रकारविशेषः। यथा, "तद्वयो यथा स्थूलभेदेन त्रिविधम्। बालं मध्यं जौर्य्यमिति।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

जौर्य्यः, पुं, (जौर्य्यत्यनेनेति। जॄ + करणे क्तः।) जीरकः। इति राजनिर्घण्टः॥ (वृक्षः। इति हेमचन्द्रः। ४। १८०॥)

जौर्य्यः, त्रि, (जौर्य्यतीति। जॄ + "गत्यर्थाकर्म्मकश्लिषेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) वृद्धः। इत्यमरः। २। ६। ४२॥ पुरातनः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। २०। १७।

"तत्याज देहं धर्म्मात्मा देही जीर्णमिवाम्बरम्॥")

गतवहुवयः। जराविग्निष्टः। पक्वः। पाकविग्निष्टः॥ * ॥ (यथा, चाणक्ये। ७६।

"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं ग्रस्त्रञ्च गृहमागतम्॥")

अथ जीर्णद्रव्याणि।

"नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं
जम्बीरोत्थरसो घृते ससुचितः सर्पिस्तु मोचाफले।
गोधूमेषु च कर्कटी हिततमा मांसात्यये कांक्षिकं
नारङ्गे गुडभक्षणञ्च कथितं पिण्डारके कोद्रवः॥
पिण्डान्ने सलिलं प्रियालफलजे पथ्या हिता माषजे
खण्डं क्षीरभवे तु तक्रसुचितं कोष्णाम्बु कोलम्बजे।
मत्स्ये चूतफलं त्वजीर्णगमनं मध्वम्बुपानात्यये
तैलं पौष्करजे कटुप्रशमनं ग्रैवान्तु दुग्धा जयेत्॥

पनसे कदलं कदले च घृतं
घृतपाकविधावपि जम्बुरसः।
तदुपद्रवशान्तिकरं लवणं
लवणेषु च तण्डुलवारि वरम्॥
नारिकेलफलतालबीजयोः
पाचनं य इह तण्डुलं विदुः।
ते वदन्ति सुनयोऽथ तण्डुलात्
क्षीरवारि परिपाचयत्यपि॥
दाडिमामलकतालतिन्दुकी-
बीजपूरजलवेतसफलान्यपि।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं स्वमूलतः॥
मधूक-मालूर-शृपादनानां
परूषखर्ज्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमर्दबीजं
घृतेऽपि तक्रं प्रवदन्ति पथ्यम्॥
गोधूममाषहरिमन्थसतीनसुद्ग-
पाको भवेदिति च मातुलपत्रकेण।
खर्ज्जूरिकाविशुकशूरुसितासु शुष्कं
शुद्धाटके मधुफलेष्वपि भद्रमुक्तम्॥
पिण्डितपनसयोः स्यादाम्रबीजेन पाकः
क्षीरमहिषयोर्घृतदुग्धयोः सैन्धवेन।
चिपिटपरिणतिः स्यात् पिप्पलीदीप्यकाभ्या-
मपहरति तुषाम्भो वेदलानामजीर्णम्॥

कर्पूरपूगीफलनागवल्ली-
काश्मीरजातीफलजातिकोशम्।
कस्तूरिका सिक्थकनारिकेल-
जलं पचत्याशु ससुद्रफेनः॥
श्यामाकनीवारकुलत्थयष्टि-
निष्पावकङ्गूदधिमस्तकेषु।
चिञ्चाकुलत्थौ तिलतैलयोगात्
जटाब्दनादस्य निहन्त्यधाध्मम्॥
कपित्थखर्ज्जाटशालशूली-
खर्ज्जूरखर्जा अपि नागरेण।
पलाशभस्मापि तथार्द्रको वा
रसो निहन्याद्रसमिक्षुजातम्॥

अन्नेन केनाप्यथ योगयोग्येन
कोष्णाम्बुना वा घृतमेति पाकम्।
तिलादितैलान्यपि काङ्क्षिकेन
सर्ज्जस्य मज्जा पनसामलक्योः॥
किमत्र चित्रं बहुमांसमत्स्य-
भोजी सुखी स्यात् परिपीय शुक्तम्।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यं परिपाकमेति॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि जग्ध्वा।
काश्यस्य मूलं परिपेयसर्ष्पां
सुखीभवेन्ना बहुधो न भूतम्॥
यौषे रसाला सुरभीयवस्तु-
मण्डेन कोष्णेन विपाकमेति।
गुडस्य चूर्णेन हयारिनारी-
पयोदधिक्षीरसुपैति पाकम्॥
वटो वेसवाराक्षवङ्गेन केशी-
ग्रमं पर्पटः शिग्रुबीजेन याति।
कणामूलतो लड्डुका पूपकादे-
र्विपाको भवेच्छ्रुल्लीमण्डयोश्च॥
श्वाविद्गोधा गण्डकाश्चित्रतैलाद्-
यावत् क्षारात् कोलकूर्म्मादयोऽपि।
जीर्य्यन्त्येवं पायसो सुद्गयूषात्
सासुद्रादप्यारनालं सुखाय॥
तप्तं तप्तं हेम वा तारमम्भो
तोये क्षिप्तं सप्तकृत्यस्तदम्भः।
पीत्वावश्यं दीर्घकालोपपन्न-
मम्भो जीर्णं शीघ्रमेवं जहाति॥
पालङ्किकाकेसुककारवल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम्।
उपोदकालाडुपटोलकानां
सिद्धार्थको मेवदरस्य पक्ता॥
शुष्कौसतीनस्य च नागरङ्ग-
जम्बीरयोः कोद्रवको निहन्ता।
जरामिरं गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं बहुधो न भूतम्॥
पटोलवंशाङ्कुरकारवल्ली-
फलान्यलाबूनि बहूनि जग्ध्वा।
क्षारोदकं ब्रह्मतरोर्निपीय
भोक्तुं पुनर्व्याकृति तावदेव॥
विपच्यते शूरकको गुडेन
तथालुकं तण्डुलतोयपानात्।
जम्बीरजीरेण निशारजोनं
सुस्तेन तूर्णं परिपाकमेति॥
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्षयितेन पाकः।
शाकानि सर्व्वाण्यपथ्यानि पाकं
क्षारेण सद्यस्तलनालजेन॥
आम्रातकोदुम्बरपिप्पलीनां
फलानि च क्षत्रवटादिकानाम्।
स्नुः शामनं पर्य्युषितोदकेन
पियालमज्जा च कटुष्णकेन॥

केदारकौलैः संदिग्धं मुद्गपूपैः
आज्यैः पूर्णं पूरिभिः वेदिपात्रम्।
मध्ये मूर्तिमन्मेदिनीं तत्र-
त्रिस्थं तत्त्वत्रयं पूर्वदेवैः।
तत्रैव कौलं द्विर्द्विरेवं पीठ-
मध्येऽपि च द्वारपालौ गुहाटे।
वेदैरेतैः सेवितं तत्त्वसिद्धैः
सिद्धा सिद्धा आसते कौलिराजः।
साक्षन्मन्त्रैर्लक्षितैर्मूर्तिभेदैः
संतृप्तैते तत्त्व मुख्यं तत्त्व।
तेषैव त्वं देवतामूर्तिभेद
हृत्वा तत्त्वमात्मनो विद्धात्।
कौलेज्यं तत्कुलाचारहारि
कारीषत्वाद्वत्सरार्धावरार्द्धम्।
दर्शोत्पन्नं पूर्णमासे प्रपूर्णं
पात्रीवर्गैर्गोत्रिभिर्भोक्तव्यम्।
यत्तत्त्वं सोमं यजमानेन्द्रपूर्णं
प्रजानन्ति, सुरतत्त्वमात्रे।
कौलेज्यायामेवमाहुर्विधिज्ञ
पात्राकल्पं पूरणार्थं तिलानाम्।
अन्नस्यापूर्णं पूरणार्थं तिलैस्तैः
अन्नस्यापूर्णस्य पूर्णं हि तैः।
अन्नस्यैतद्यत्तिलैः पूरणं वै
तस्मात्तेषु प्रीतिमान्नारायणः।"

इति कौलेज्यविधिः।

कौलेज्वर, पुं, (कौलः पूजादौ ज्वरः।) पूजा-तत्परज्वरोक्तः। अथ कौलेज्वरचिकित्सा। तत्र कौलेज्वरस्य लक्षणमाह।

"यो द्वादशाहो दिवसैः व्यतीते
दोषत्रयस्तीव्रतृषं करोति।
दृष्टौ सदौ सिक्तति सन्दहेदो
भिन्नभिन्नो ज्वर इत्र कौलः।"

कौलेज्वरस्यैव विशेषं बालग्रहलक्षणमाह।

"एकं मन्दज्वरो रूक्षः शूरः कृष्णेन सिक्तति।
कण्ठाक्षः क्षेपमूर्छी दर्शी बालग्रहाकुलो।"

बालग्रहाकुलो ज्वरोन्मादेन इति बाल-ग्रहाकुलो। तत्र ईहमूर्छयेत्। शूरः शौर्यो। क्षेपमूर्छी बहुकर्मेहकः। ७।

अथ कौलेज्वरस्य साध्यासाध्यविवेकमा।

"कौलेज्वरी नरः कुर्याद्रोगमासं कदाचन।
अहन्यहं न संदेहः कौलो ज्वरस्तु स्याद्यदा।
दुरात्मेति ज्वरं तीव्रा यदा पश्येत् दुरात्मता।
अहर्वैद्यस्य तं गच्छेत् पूर्वेषत्कारयेत् क्रियाम्॥"

तथा पूर्वेषत्। ७।

"त्रिदिवसकालमात्रकालतां
कार्यं पूर्वेषत्मिति तत्त्वज्ञानेकम्।
कौलेज्वरारोपकलक्षणमूल-
मात्मानिमात्मादिनकौलेषत्।
कल्पद्रुकारं प्राप्तः सार्वं तैलोक्यवृक्षते॥"

इति त्रिदिवसकालम्। ९।

"ज्वरोपद्रवसंयुक्तमाक्षिप्तोद्वेगकः।
कौलेज्वरकरणं पञ्चमकलक्षणोऽथवा।

कल्पद्रुमः कल्पतरुः द्वौ तौ कौलेन्द्रवोरिमम्।
मद्गरादपूपं कौलं कौलेज्वरहरं परम्।
त्रिस्थानोद्भवसंसिद्धं गुडपीलरकं त्रिवेत्।
कौलेज्वरस्यवैद्यकशास्त्रोक्तहरम्।
कौलेज्वरोपसर्गे च इक्षुदे वृद्धिमतो।
कालाग्नीमर्दितशतकृत्वाक्षुत्करोद्भवः।
द्विगुणः त्रिगुणोपूर्वद्वीपे त्रिवर्षं मतः।
त्रिगुणो मद्गरपूपः वैद्यकर्मविदाहितो।
कालाग्नेयस्तरुणो वाक्षुत्वोद्वोद्गतो।
कालं त्रिवर्षं तथा त्रिगुणो मैलवं तथा।
पूर्वोक्तोऽयं वर्षा वैद्यः वर्षेकरः परः।
वैद्यो रविकरः वैद्यहर्षा कौलवत्परः।"

इति कालसङ्गादिपूपकः। ७।

"कालाक्षरा हटी कट्टी मुख्यं रक्तचन्दनम्।
काकरं कटुका पटा मूर्तिमः मदुरात्मकः।
उद्वोरं घातकं मद्यं वाकं वस्त्रकारिका।
पुष्करं विद्युमद्वेष्ट दन्तादाद्रिमिदं स्तुतम्।
कौलेज्वरारिदन्तामकालमध्यदुरात्मकम्।"

इति द्वादशदन्तद्रव्याणि। ७।

"त्रिदिवा मद्यदिवा वा मद्यदिवापरा वदा।
मद्यकौरव संदिग्धा विवेद्य दिवादि हि।
तत्रैव मूर्तदेवेतः पूर्वं त्रिदिवसिद्धात्।
त्रिवर्षा ज्वरसंज्ञाभिः लालुपाक्षर्गोमत्र द्वाभ्यति।
कामः सार्थोऽभिलाषश्च कथाविद्यश्च यच्छति।
यथादिष्टत्रिदिवसोऽयं दुःखदृष्टिर्वं यथादृष्टिः।

इति वर्द्धमानविधानं। ७।

"दार्वहिङ्गवचोग्रा स्यात् क्रिया बालग्रहार्दने।
कौलें ज्वरे वरे कौलें सर्वज्वरविनाशिते।
नरः पौरुषवद्यं तत्रैव तु विशेषतः।
पलदार्द्धं हिमं तैलं कौलेज्वरविनाशनम्।
तथा दारुपलमेलं कौलेज्वरहरं परम्।"

इति कौलेज्वरचिकित्सा। इति भावप्रकाशः।

कौलेज्वरः, पुं, (कौलस्य ज्वर इव यत्र।) वृहदारक-वृक्षः। विदारीवृक्षेऽपि इति मेदिनी। तत्पर्यायः। कौलेज्वरी २ दुग्धिका ३ अवरा ४ मूल-पर्णी ५। अस्य गुणाः। गौल्लत्वम्। त्रिदोषत्वम्। ज्वरातीसारमेदोवातास्रित्वम्। वल्यत्वं च। इति राजनिर्घण्टः।

कौलेज्वरिका, स्त्री, (कौलेज्वरः प्रकाशस्थाः। कन् अतइत्वम्।) वृक्षपर्णीवृक्षः। इति राजनिर्घण्टः।

कौलेज्वरः, पुं, (कौलेज्वरः प्रकाशस्थाः। कन् अतइत्वम्।) वृक्षपर्णीवृक्षः। इति राजनिर्घण्टः। (कौलें ज्वरं ज्वरम्।) दुरालभवृक्ष, क्ली। (कौलें ज्वरं नाशयति इति त्रिदोषदुरालभवृक्षे च। यदुक्तं वैद्यके। "ज्वरमूले संवृद्धायां ज्वरांशे यातसम्भवः। कौलेज्वरे हरेद्राजः शिरादीक्षणवाहिनी।")

कौलेन्दुः, पुं, (कौलोऽहिर्दृष्टो यत्रेन्दुः मस्तके।) शङ्करः। इति राजनिर्घण्टः।

कौलेन्दुफलं, क्ली, (कौलो दुष्टो मूलं यस्य। ततः बहु।) परिमलम्। इति राजनिर्घण्टः। कैवोटमुता इति भाषा।

कौलेन्द्रं, क्ली, (कौलें इन्द्रं हीरकमिव।) वैक्रान्तमणिः। इति राजनिर्घण्टः।

कौलेन्द्रं, क्ली, (कौलें दुरालभं यस्य।) दुरा-लभवृक्षः। तत्पर्यायः। वटवरम् २। रक्त-वरः। २। ६। ११६।

कौलं, क्ली, (कौलेऽवतरति। अ+कुलें छः।) कुलकौरवः। इति राजनिर्घण्टः।

कौलिं, क्ली, (कु+क्लिन्।) आर्द्रः। कौलेन्द्रा। इत्यमरः। ३। ३। ६।

कौलोद्धारः, पुं, (कौलानां मद्यमन्दिराणां उद्धारः संस्कारः।) मद्यमन्दिरादेः संस्कारः। यथा, विश्वकर्मोदाहरणे कौलोद्धारे।

"यस्य राष्ट्रस्य विषये देवेशः स्थिरो भवेत्।
तस्य सौख्यं तदार्थं देवेशः यथा तथा।
तत्रा कौलस्य संस्कारं तथा देवेशवेश्मनि।
द्विगुणं मद्यमाप्नोति नात्र कार्या विचारणा।"

विश्वकर्मणि।

"यस्तिष्ठन्ति च यः कर्णा यत्नमारभ्य रचिता।
विश्वोपायतरन्तेन स वरी विश्वकोत्तमाद्।"

कौलोद्धारे।

"यतिं यत्नमारभ्य तथाहेत्युटितं वरः।
समुद्धृत्य हरेर्यत्नं द्विगुणं यत्नमाप्नुयात्।"

देवीपुराणे।

"सुरानन्दसुखं दृष्ट्वा प्राप्तुयात्कौलोद्धारकः।
तस्मात् सर्वप्रयत्नेन कौलेज्योद्धारमाचरेत्।"

इत्यौद्धारप्रकरणे।

"दानीकृत्यसंहाराणां सुरद्रव्यां तथाच्च।
प्रतिमायां तथाच्च संस्कारं यो नरो भुवि।
दुग्धं द्वादशं तस्य सर्वेश्वरात्मा संग्रहः।
प्रतिष्ठाता दिवि कामैस्तथा मन्दिरनिर्मिते।
प्राप्तः शैवदशोत्तीरपुरावेव वैष्णवे।
देवायतनप्रतिष्ठा च स्थाता तत्रिश्वरेण किम्।
कैलासेशादयोदेवैः संपूजां या दिवेषतः।
देवत्वं देवताया: प्रतिष्ठाविधिना सदा।
संस्कार्यं मद्यशालासु मद्यदोषक्षयेच्छया।"

इति कौलोद्धारविलासे २० विलासः।

कौलिं, पुं, (कौलेषु क्लिन्नेषु वस्तुषु तेषेति। कु+"कुलुम्बुरुक्षिक्षि इन्।" उणा ४। ५४। इति करणे इन्।) कुठारः। इति सिद्धान्त-कौमुदानुसारिणः। (कौलेषु तेषेति। कौलेर इन्।) शकटम्। आयः। पद्मः। इति संक्षिप्तसारे उणादिवृत्तिः।

कौव, अ प्राप्तौ। इति कविकल्पद्रुमः। (स्वां-परं-अकं-सेट्।) अ, अकौषीत् अकौषीत्। प्राप्तः प्राप्तवान्। कौवति लोकः। इति दुर्गादासः।

कौवः, पुं, (कौवतमिति। कौव+"हलश्च।" ३। ३। १२१। इति घञ्।) अनुधारकम्। इत्यमरः। २। ८। ११८। (यथा, हरिवंशे। १०४। ८३।

"अहमेव त्रिलोक्यस्य कौवरं प्रतिमाति ते।
सहायैः सुहृदो कौवो यथा कौवं समाश्रयम्।")

(जीवतीति। जीव प्राणे+"ण्वुलृतृचौ।" ३।१।१३५। इति कः।) प्राणी। (यथा, भागवते। १।१३।४४।
"अष्टलक्षाणि सङ्ख्यानामपदानि चतुर्व्यदाम्। पलमूनि तत्र महतां जीवो जीवस्य जीवनम्।") इतिः। इतिविशेषः। (स एव महाविभ्रष्टः। तत्पर्य्यायो यथा,—
"महाविभ्रः क्षुतोन्मेषो रम्भको विश्रुतिष्कः। केशाम्बुटिनिभश्चैव कार्ष्मुको जीव एव च।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
हड्डसतिः। इति मेदिनी। वे, ८। (यथा, काशीखण्डे। १७। ४३।
"अस्थालिङ्गार्धनाशिनं जीवभूतोऽसि मे वतः। अतो जीव इति ख्यातिं त्रिषु लोकेषु यास्यसि।") कर्म्मः। इति धरणी। चेष्टनम्। तत्पर्य्यायः। आत्मा २ पुरुषः ३ पुद्गलः ४ अन्तर्यामी ५ ईश्वरः ६। इति विकाण्डशेषः। (यथा, भगवद्गीतायाम्। १३।२ टीकायां श्रीधरस्वामिधृतः।
"तत्र क्षेत्रज्ञं संसारिणं जीवं वस्तुतः सर्व्वक्षेत्रेष्वनुगतं मामेव विद्धि।") तस्य स्वरूपं यथा,—
"कर्म्मणा जीवरूपश्च सन्ततं तत्फलप्रदः। कर्म्मरूपश्च भगवान् श्रीकृष्णः प्रकृतेः परः। सोऽपि तद्धेतुरूपश्च कर्म्म तेन भवेत् सति। जीवः कर्म्मफलं भुङ्क्ते आत्मा विलिप्त एव च। आत्मनः प्रतिबिम्बश्च देही जीवः स एव च। प्राणदेहादिभृद्देही स जीवः परिकीर्त्तितः।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्। ४।
(तथाच भागवते। १२। १८४। १७।
"जीवं पश्यामि वृत्त्याभासमैतन्यं न विद्यते।") वेदान्तमते घटावच्छिन्नाकाशवत् शरीरावच्छिन्नं चैतन्यम्। केषाञ्चिन्मते दर्पणस्थमुखप्रतिबिम्बवत् बुद्धिस्थचैतन्यप्रतिबिम्बम्। (जीवयति लोकावन्तर्य्यात्मात्मकरूपेणेति। जीव+क्विप्+कर्त्तरि क्यप्। विष्णुः। यथा, महाभारते। १३। १५६। ६८।
"जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।") जीवनविशिष्टे, त्रि। यथा, महाभारते। १२। २८८। २३।
"मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जनः।") जीव, पुं क्ली, (जीव+भावे घञ्।) जीवितम्। इति मेदिनी। वे, ६। (यथा, भागवते। १। २। १०।
"जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः।"
"जीवस्य जीवनस्य च पुंनर्हेभानुष्ठानहारा कर्म्मभिर्यं इह प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति।" इति तट्टीकायां श्रीधरस्वामी।)
जीवकः, पुं, (जीवयति आरोग्यं करोतीति। जीव+क्विप्+ण्वुल्।) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। कूर्चशीर्षः २ मधुरकः ३ मुद्गः ४ हंसाङ्घ्रिः ५। रत्नमरः। २। ४। १४२। जीवनः ६ दीर्घायुः ७ प्राणदः ८ जीवः ९ भद्राङ्गः १० प्रियः ११ चिरञ्जीवी १२ मधुरः १३ मङ्गल्यः १४ कूर्चशीर्षकः १५ इन्द्रियः १६ आयुष्मान् १७ जीवदः १८ बलदः १९। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तविसर्पिदाहज्वरवाग्निलम्। शुक्रकफकृमिविषनाशित्वञ्च। इति राजनिर्घण्टः। बलकारित्वम्। कार्श्यवातवाग्निलम्। तस्य रूपं यथा,—
"जीवकर्षभकौ श्वेतौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दसदृशौ निःसारौ कन्दसन्निभौ। जीवकः कूर्चकाकारः ऋषभो वृषभस्वरः। जीवकर्षभकस्थाने विशारीगुणम्।"
इति भावप्रकाशः। ७।
प्रावकः। पीतप्रावः। चणकः। इति मेदिनी। के, ६५।
जीवकः, त्रि, (जीवति प्रभुसेवानुज्ञया इति। जीव+ण्वुल्।) सेवकः। इड्याजीवी। जीवी। (यथा, महाभारते। १३। १४१। ६६।
"जैविदो याजको विद्वान् न याध्ययनजीवकः।") अहितुण्डिकः। इति मेदिनी। के, ६५।
जीवजीवः, पुं, (जीवेन भक्षणुदकीटादिना जीवतीति। जीव+अच्। यद्वा, जीवञ्जीव+एषोदरात् साधुः।) जीवञ्जीवपक्षी। इति शब्दरत्नावली।
जीवञ्जीवः, पुं, (जीवं जीवयति विश्रब्धोभं वाश्रयतीति। जीवशब्दात् बहुलमिति बाहुलकात् क्वच्।) चकोरपक्षी। रत्नमरः। २। ५। ६५॥ (अमरः पक्षिविशेषः। विषादिविकृतस्वास्थ्यादेः परीक्षार्थमस्यावश्यकत्वं भवति। यथा, वाभटे सूत्रस्थाने ७ अध्याये १६।
"हंसः प्रस्खलति ग्लानिर्ज्जीवञ्जीवस्य जायते। चकोरस्त्वधिवैराग्यं क्रौञ्चस्य स्वाग्नदोदयः।") इत्यविशेषः। इति मेदिनी। वे, ५६।
जीवतोक्षा, स्त्री, (जीवत् तोक्षं अपत्यं अस्याः।) जीवत्पुत्रिका। तत्पर्य्यायः। जीवत्सः २। इति हेमचन्द्रः।
जीवत्पतिः, स्त्री, (जीवन् पतिर्यस्याः।) सधवा। इति हेमचन्द्रः।
जीवत्पितृकः, पुं, (जीवन् पिता यस्य इति कप्।) विद्यमानपितृकः। यथा,—
"अमावास्यां गयाश्राद्धं दत्त्वाऽमुखभोजनम्। न जीवत्पितृकः कुर्य्यात् कृतेऽपि पितृहा भवेत्।"
इति तिथ्यादितत्त्वम्।
जीवथः, पुं, (जीवत्यनेनेति। जीव+"ग्रीहृग्रपिरुगभिवधिजीवि प्राविभ्योऽथः।" उणा। १। ११३। इति अथः।) प्राणः। कूर्म्मः। मयूरः। मेघः। धार्म्मिके चिरायुषि च त्रि। रत्नमालादिकोषः।
जीवदः, पुं, (जीवं जीवनं ददाति औषधादिसुप्रयोगेणेति। दा+कः।) वैद्यः। विष्टि। इति मेदिनी। दे, २६। जीवनदातरि, त्रि।
जीवदात्री, स्त्री, (जीवं जीवनं ददातीति। दा+ल्युट् ङीप् च।) अहिः। इति राजनिर्घण्टः।
जीवधनं, क्ली, (जीव एव धनमिति।) प्राणिकम्। इति विकाण्डशेषः।
जीवनं, क्ली, (जीवतोऽनेनेति। जीव+करणे ल्युट्।) इतिः। (यथा, भागवते। ११।३।३६।
"अष्टलक्षाणि सङ्ख्यानामपदानि चतुर्व्यदाम्। पलमूनि तत्र महतां जीवो जीवस्य जीवनम्।"
"जीवनं जीविकेति।" तट्टीकायां श्रीधरस्वामी।) जलम्। (यथा, आश्वमेधिके। ६६।
"यदुवाच वरं तस्मात् सखिं! मतिमतं जीवनं मम।"
जीव+भावे ल्युट्।) प्राणधारणम्। इति मेदिनी। ने, ६८। (यथा, भट्टोजिदीक्षितकृतायां सिद्धान्तकौमुद्यां कृदभिकारे। २। ३।
"यावद्धारणं स्थितौ हेतौ तावज्जीवनमुच्यते।"
"प्राणान् धरति यस्मात्प्राणो जीवनं ततः स्मृतं जीवनम्।
क्षितावर्द्धं क्षारभूमौ प्रावरा वसुधिका।" रत्नमालायां। इति हेमचन्द्रः। मज्जा। इति राजनिर्घण्टः। (मङ्गा। यथा, काशीखण्डे। २६। ६५।
"जीवनं जीवनप्राणा जगज्जेष्ठा जगन्मयी।") जीवकः, पुं, (जीवयति सेवादिना। जीव+कर्त्तरि ण्वुल्।) जीवकौषधम्। वातः। इति राजनिर्घण्टः। सुदर्शनकन्दश्च। इति शब्दचन्द्रिका। पुत्रः। इति हेमचन्द्रः। (सर्व्वान् प्राणरूपेण जीवयतीति। जीव+क्विप्+कर्त्तरि ण्वुल्। विष्णुः। यथा, महाभारते। १३। १४६। ११२।
"वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः।" श्लिष्टः। महाभारते। १३। १७। १२१।
"सर्व्वेषां जीवनो मतः शुभाशो बहुकर्म्मणः।") जीवनकं, क्ली, (जीवतेऽनेन। जीव+करणे ल्युट्। ततः स्वार्थे कन्।) जलम्। इति हेमचन्द्रः।
जीवनयोनिः, स्त्री, (जीवनस्य योनिः कारणम्।) जलविशेषः। स तु अतीन्द्रियः शरीरे प्राणसञ्चारकारणम्। इति भाषापरिच्छेदः।
जीवनहेतुः, पुं, (जीवनस्य हेतुरुपायः।) धर्म्मोपायः। स च दशविधः। यथा,—
"विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः। इतिभैक्षं कुशीदञ्च दश जीवनहेतवः।"
इति मात्स्ये ९१३ अध्यायः।
जीवना, स्त्री, (जीवयतीति। जीव+क्विप्+युच् ङ्यु वा ततष्टाप्।) मेरौषधम्। इति मेदिनी। ने, ६८।
जीवनाधारं, क्ली, (जीवनं आहरत्यनेनेति। आ+हृ+करणे घञ्।) दिवसम्। इति शब्दचन्द्रिका।
जीवनाधारः, पुं, (आधारत्यस्मिन्। आ+धृ+घञ्। जीवनं जलं आधारोऽस्य।) वरुणः। इति शब्दरत्नावली। (वारिवासिनि, त्रि।)
जीवनिका, स्त्री, (जीवन+ठन्। टाप्। यद्वा, जीवनी+संज्ञायां कन् इत्वञ्च।) हरीतकी। इति राज-

निर्घण्टः ॥ (हरीतकीशब्दे विवरणविशेषोऽस्याः ज्ञातव्यः ॥)

जीवनी, स्त्री, (जीवयत्यनेनेति । जीव + करणे ल्युट् ङीप् च ।) जीवन्ती । (पर्य्यायो यथा,—

"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) काकोली । डोड़ी । मेदा । महामेदा । इति राजनिर्घण्टः ॥ यूथी । इति शब्दचन्द्रिका ॥

जीवनीयं, क्ली, (जीवत्यनेन अस्मादा । जीव + करणे अपादाने वा अनीयर् ।) जलम् । इति हेमचन्द्रः ॥ (जीवनप्रदे, त्रि । यथा, सुश्रुते । १ । ४५ ।

"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम् ॥")

जीवनीयगणः, पुं, (जीवनीयानामोषधीनां गणः ।) औषधविशेषः । यथा, वैद्यकपरिभाषायाम् ।

"अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा ।
जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा ॥"

("जीवन्ती काकोल्यौ मेदे द्वे सूक्ष्मासपर्ण्यौ च ।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥"

इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये ॥)

जीवनीया, स्त्री, (जीवनीय + टाप् ।) जीवन्ती । इत्यमरः । २ । ४ । १४२ ॥

जीवनेत्री, स्त्री, (जीवं नयतीति । जीव + णी + तृच् + ङीप् च ।) सैंहली । इति राजनिर्घण्टः ॥

जीवनौषधं, क्ली, (जीवनस्य औषधं उपायविशेषः ।) येन म्रियमाणो जीवति तदौषधम् । जीवरक्षाकारि । जीवनोपायः । तत्पर्य्यायः । जीवाः २ । इत्यमरः । २ । ६ । १२० ॥

जीवन्तः, पुं, (जीवयति जीवतेऽनेन वा । जीव + "दृक्षिनन्दिजीविप्राणिभ्यः शितायिषि ।" उणा० । ३ । १२७ । इति झच् ।) औषधम् । प्राणः । आयुर्विशिष्टे, त्रि । इत्युणादिकोषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

जीवन्तिकः, पुं, (जीवान्तकः । पृषोदरात् साधुः ।) जीवान्तकः । इत्यमरटीकासारसुन्दरी ॥

जीवन्तिका, स्त्री, (जीवयतीति । जीव + झच् + कन् टाप् च । कापि अत इत्वम् ।) वन्दा । वृक्षोपरिजातवृक्षः । गुडूची । जीवाख्यशाकः । इति मेदिनी । के, १६० ॥ जीवन्ती हरीतकी । इति राजनिर्घण्टः ॥

जीवन्ती, स्त्री, (जीवन्त + ङीष् ।) लताविशेषः । जीवद् इति जीयातो इति च भाषा । तत्पर्य्यायः । जीवनी २ जीवनीया ३ जीवा ४ मधुः ५ । इत्यमरः । २ । ४ । १४२ ॥ जीवना ६ मधुस्रवा ७ स्रवा ८ । इति तट्टीका ॥ पयस्विनी ९ जीवा १० जीवदा ११ जीवदात्री १२ शाकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ वृक्षाटी १९ जीवदृष्टा २० काङ्क्षिका २१ गृध्रगन्धिका २२ सुपिङ्गला २३ । इति राजनिर्घण्टः ॥ मधुस्रवा २४ जीवदृषा २५ सुखङ्करी २६ नगराटिका २७ जीवपत्री २८ जीवपुष्पा २९ । इति केचित् ॥ (यथा,—

"वरा शाकेषु जीवन्ती सर्षपाम्बुवरा परम् ॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

अस्या गुणाः । मधुरत्वम् । शीतत्वम् । रक्तपित्तवायुक्षयदाहज्वरनाशित्वम् । कफवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुत्वम् । स्निग्धत्वम् । त्रिदोषनाशित्वम् । रसायनत्वम् । बलकारित्वम् । चक्षुर्हितत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ श्वासकासधातुक्षयनाशित्वम् । स्वरकारित्वञ्च । सुराष्ट्रदेशजस्वर्णवर्णहरीतकी । सा स्नेहपाके प्रशस्ता जीर्णरोगनाशिनी । इति राजवल्लभः ॥ (अस्याः लक्षणं व्यवहारश्च यथा,—

"जीवन्ती स्वर्णवर्णिनी ॥"
"जीवन्ती सर्व्वरोगघ्नी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) भ्रमी । गुडूची । (पर्य्याया यथा,—

"गुडूची मधुपर्णी स्यादमृतात्मतवल्लरी ।
छिन्ना च्छिन्नरुहा च्छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वन्दा । इति मेदिनी । ते, ११२ ॥ डोड़ी । इति राजनिर्घण्टः ॥ (जीव इति शाकविशेषः । शर्करावन्मधुरपुष्पा ब्रततिः । अस्याः पर्य्याया यथा,—

"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जीवन्मुक्तः, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायात्वरहितः ।) जीवद्दशायां मायाबन्धरहितः । (यथा, देवीभागवते । १ । १६ । ४८ ।

"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः ।
तथवक्त्रातिशान्तश्च योगी योगप्रियः सदा ॥")

तल्लक्षणं यथा । "स्वस्वरूपाखण्डसुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥'

इत्यादिश्रुतेः ।

अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण अन्यमान्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्ततत्पूर्व्वपूर्व्ववासनया क्रियमाणानि कर्म्माणि सुख्यमानानि प्रागविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति, यथा इदमिन्द्रजालमिति ज्ञानवान् तद्दिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति । सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इत्यादिश्रुतेः । उक्तञ्च ।

'सुप्तमव्यक्तमेति यो न पश्यति
हृयच्च पश्यन्नपि चाहृयत्वतः ।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः
स आत्मविन्मान्य इतीह निश्चयः ॥' इति ।

अस्य ज्ञानात् पूर्व्वं विद्यमानानामेवाहारविहारादीनां अदुष्टवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति । शुभाशुभयोरौदासीन्यं वा । तदुक्तम् ।

'ब्रह्मादितसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥
ब्रह्मवित्त्वं तथा सूक्ष्मं स आत्मेति न चेतरः ।' इति ।

तदानीममानित्वादीनि ज्ञानसाधनान्यहेतुकादयः सहजगाश्चालङ्कारवदनुवर्त्तन्ते । तदुक्तम् ।

'उत्पन्नात्मावबोधस्य ह्यहेतुकादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥' इति ।

किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति ब्रह्मज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते । इत्येवमादिश्रुतेः ।" इति वेदान्तसारः ॥

जीवपुत्रकः, पुं, (जीवः प्राणान् पुत्र इव । पुत्रवद्वर्द्धनकत्वात् तथात्वम् । स्वार्थे कन् ।) इक्षुदीवृक्षः । इति शब्दरत्नावली ॥ वृक्षविशेषः । इत्यमरटीकायां रमानाथः ॥ जीयापुता इति भाषा ॥

जीवपुष्पा, स्त्री, (जीवयतीति । जीव + णिच् + अच् । जीवं प्राणदं पुष्पमस्याः ।) वृक्षजीवन्ती । इति राजनिर्घण्टः ॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात् ।) हरीतकी । इति राजनिर्घण्टः ॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं मङ्गलं यस्याः ।) जीवन्तीलता । वृद्धिनामौषधम् । इति राजनिर्घण्टः ॥

जीवमन्दिरं, क्ली, (जीवस्य आत्मनो मन्दिरं गृहमिव ।) शरीरम् । इति शब्दचन्द्रिका ॥

जीवला, स्त्री, (जीवं उदरस्थकृमिं लाति गृह्णाति नाशयतीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) सैंहली । इति राजनिर्घण्टः ॥

जीववल्ली, स्त्री, (जीवयतीति जीवा प्राणदात्री । सा चासौ वल्ली चेति ।) क्षीरकाकोली । इति राजनिर्घण्टः ॥

जीवशाकः, पुं, (जीवो हितकरः शाकः। जीवाख्यः शाको वा।) मालवे प्रसिद्धशाकविशेषः। तत्पर्य्यायः जीवन्तः २ रक्तनालः ३ ताम्रपत्रः ४ प्रवालः ५ शाकवीरः ६ सुमधुरः ७ मेधकः ८। अस्य गुणाः। सुमधुरत्वम्। दृंहणत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पाचनत्वम्। बल्यत्वम्। हृद्यत्वम्। पित्तापहारकत्वञ्च। इति राजनिर्घण्टः॥

जीवशुक्ला, स्त्री, (जीवयतीति। जीव+णिच्+अच्। जीवा हितकरी शुक्ला शुभ्रवर्णलता।) क्षीरकाकोली। इति राजनिर्घण्टः॥

जीवश्रेष्ठा, स्त्री, (जीवाय जीवनाय श्रेष्ठा।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥

जीवसंज्ञः, पुं, (जीव इति संज्ञा यस्य। यद्वा, जीवस्य संज्ञा आख्या संज्ञा यस्य।) कामदृद्धिवृक्षः। इति राजनिर्घण्टः॥

जीवसाधन, क्ली, (जीवस्य जीवनस्य साधनं कारणम्।) धान्यम्। इति राजनिर्घण्टः॥

जीवस्तः, स्त्री, (जीवं प्राणिनं स्तुते इति। स्तु+क्विप्।) जीवत्पुत्रिका। हेमचन्द्रः। ३। १६४॥ (यथा, महाभारते। १।२००।७।
"जीवस्तवीरस्तर्भद्रे! बहुसौख्यगुणान्विता।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता॥")

जीवस्थानं, क्ली, (जीवस्य जीवनस्य स्थानम्।) मर्म्म। इति हलायुधः॥

जीवा, स्त्री, (जीवयतीति। जीव+णिच्+अच्। ततष्टाप्।) जीवन्तीवृक्षः। मौर्व्वी। (यथा, आर्य्यासप्तशत्याम्। ३। २१।
"निर्गुण इति स्तुत इति च द्वावेकार्थाभिधायिनौ विद्वि।
यस्य धनुर्गुणशून्यं निर्जीवं तदिह शंसन्ति॥"
"निर्गता जीवा ज्या यस्मात् तत्। 'जीवा ज्या ग्रिञ्जिनीत्यपि' इत्यभिधानात्।" इति तट्टीका॥) वचा। ग्रिञ्जितम्। भूमिः। इति मेदिनी। वे, ८॥ जीवितम्। इति जटाधरः॥

जीवातुः, पुं, क्ली, (जीवत्यनेनेति। जीव+"जीवेरातुः।" उणा।१।८०। इति करणे आतुः।) भक्तम्। जीवनौषधम्। (यथा, काशीखण्डे। २६। ६५।
"जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी॥"
"जीवानां प्राणिनां जीवनौषधरूपा।" इति तट्टीका॥*॥ (जीव+भावे आतुः।) जीवितम्। इति मेदिनी। ते, ११२॥ (यथा, उत्तररामचरिते २ अङ्के।
"रे हस्त दक्षिण! स्तस्य ग्रिघ्रोर्द्दिजस्य जीवातवे विसृज शूद्रसुनौ कृपाणम्।
रामस्य गात्रमसि दुर्व्वहगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते॥")

जीवात्मा, [न्] पुं, (जीवस्य जीवनस्य आत्मा व्यधिष्ठाता। यद्वा, जीवश्चासौ आत्मा चेति कर्म्मधारयः।) देही। तत्पर्य्यायः। पुनर्भवी २ जीवः ३ असुमान् ४ सत्त्वभृत् ५ देहभृत् ६ जन्तुः ७ जन्तुः ८। इति हेमचन्द्रः॥ प्राणी ९ चेतनः १० जन्मी ११ शरीरी १२। इत्यमरः। १।४।३०॥ (यथा, भागवते। ८। २२। २५।
"यदा कदाचित् जीवात्मा संसरन्निजकर्म्मभिः।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥"
"एवं चतुर्व्विधगतिभिरसत्त्वैः सिद्ध वपुर्ण्दे।
जीवात्मा नियतो नित्यं वसति स्वात्मदूतवान्॥
स देही कथ्यते पापपुण्यदुःखसुखादिभिः।
याप्तो बद्धश्च मनसा क्लृप्तिभिः कर्म्मबन्धनैः॥
कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः।
इन्द्रियाणि दुर्बुद्धिश्च तस्य बन्धाय देहिनः॥
आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये श्रीधरस्वामिनोक्तम्॥)

जीवाधारः, पुं, (जीवस्य क्षेत्रज्ञस्य आधारः आश्रयस्थानम्।) क्षेत्रम्। इति हेमचन्द्रः॥

जीवान्तकः, पुं, (जीवं अन्तयति नाशयतीति। अन्त+णिच्+ण्वुल्।) जीवनार्थे पक्षिघातकः। तत्पर्य्यायः। व्याकुनिकः २। इत्यमरः। २। १०। १४॥ जीवनाशके, त्रि॥

जीवाला, स्त्री, (जीवं उदरस्थक्रिमिं आलाति गृह्णाति नाशयतीत्यर्थः। आ+ला+कः।) सैंहिली। इति राजनिर्घण्टः॥

जीविका, स्त्री, (जीवतेऽनयेति। जीव+"गुरोश्च हलः।" ३।३।१०३। इत्यः। ततः संज्ञायां कन् टापि अत इत्वञ्च।) जीवनोपायः। तत्पर्य्यायः। आजीवः २ वार्त्ता ३ वृत्तिः ४ वर्त्तनम् ५ जीवनम् ६। इत्यमरः। २। ६। १॥ जीवः ७। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ११।
"अनिन्द्यामग्रजां शुद्धां जीवेद्ब्राह्मण्य-
जीविकाम्॥")
जीवन्ती। इति मेदिनी। के, ६५॥

जीवितं, क्ली, (जीव+भावे क्तः।) जीवनम्। इति हेमचन्द्रः॥ (यथा, उत्तररामचरिते २ अङ्के।
"त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुद्ध्य सुप्तां
तामेव शान्तमथवा किमिहोत्तरेण॥"*॥
कर्त्तरि क्तः।) जीवनयुक्ते, त्रि॥ (यथा, रघुः। १२। ७५।
"कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मुखा वत्सलस्यास्यं जीविताक्षीति लक्षिता॥")

जीवितकालः, पुं, (जीवितस्य जीवनस्य कालः।) आयुः। इत्यमरः। २। ८। १२०॥

जीवितज्ञा, स्त्री, (जीवितस्य जीवनस्य ज्ञा ज्ञानं यस्याः। नाड़ीसन्दर्शनेन हि जीवानां जीवनज्ञानादस्याः तथात्वम्।) नाड़ी। इति राजनिर्घण्टः॥

जीवितेशः, पुं, (जीवितस्य ईशः प्रभुः।) प्राणनाथः। यमः। (यथा, रघुः। ११। २०।
"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्वधिरचन्दनोचिता
जीवितेशवसतिं जगाम सा॥"
"जीवितेशस्य अन्तकस्य प्राणेश्वरस्य च वसतिं जगाम।" इति तट्टीकायां मल्लिनाथः॥) चन्द्रः। सूर्य्यः। इति शब्दरत्नावली॥ जीवातुः। इति हेमचन्द्रः॥ जीवितेश्वरे, त्रि। इति मेदिनी। शे, ३५॥

जीवी, [न्] पुं, (जीवोऽस्यास्तीति। जीव+इनिः।) प्राणी। यथा, ब्रह्मवैवर्त्ते गणेशखण्डे।
"जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः।
भक्तो वैद्यस्तं निहन्ति कृष्णभक्तिरसायनात्॥"

जीव्या, स्त्री, (जीवाय जीवनाय हिता। जीव+यत्।) गोक्षुरद्रुग्धा। जीवन्ती। हरीतकी। इति राजनिर्घण्टः॥

जु, रंहणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) रंहो वेगगतिः। जवति घोटकः। इति दुर्गादासः॥

जु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) ङ, जवते। इति दुर्गादासः॥

जुग्र, इ त्यागे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, कर्म्मणि जुग्रते। इति दुर्गादासः॥

जुगुप्सनं, क्ली, (गुप+स्वार्थे सन्+ल्युट्।) निन्दा। इति हेमचन्द्रः।२।१८५॥ (निन्दाशीले, त्रि। तत्र "अशुदात्तेतश्च हलादेः।" ३।२। १४६। इति युच्॥)

जुगुप्सा, स्त्री, (गुप निन्दायाम्+सन्+भावे अ+स्तियाम् टाप्।) निन्दा। इत्यमरः। १। ६। १३॥ (यथा, साहित्यदर्पणे। ३। १७६।
"दोषैरेषादिभिर्गर्हा जुगुप्सा विषयोद्भवा॥")

जुङ्गः, पुं, (जुगि+अच्।) क्षुद्रदारकः। इत्यमरः। २। ४। १३७॥ (यथास्य पर्य्यायाः।
"जुङ्गर्ल्लघुन्याच्छगलान्त्रावेगी क्षुद्रदारकः॥"
इति वैद्यकरत्नमालायाम्॥)

जुङ्गकः, पुं, (जुङ्ग+स्वार्थे कन्।) क्षुद्रदारकवृक्षः। इति राजनिर्घण्टः॥

जुङ्गा, स्त्री, (जुङ्ग+टाप्।) जुङ्गः। इत्यमरटीकायां रमानाथः॥

जुङ्गितः, त्रि, (जुग इ त्यागे+कर्म्मणि क्तः।) त्यक्तः। इति व्याकरणम्॥

जुटकं, क्ली, (जुट् संहतौ+"इगुपधेति।" ३। १। १३५। इति कः। ततः संज्ञायां कन्।) जटा। इति शब्दरत्नावली॥

जुटिका, स्त्री, (जुटक+टाप्। टापि अत इत्वञ्च।) शिखा। इति शब्दरत्नावली॥ झुँटी इति टिकी। इति च भाषा॥ (यथा, आह्निकसूत्रधृतब्रह्मपुराणवचनम्।
"जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत्॥")

जुड़, क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जोड़यति। गोदः प्रेरणम्। इति दुर्गादासः।

जुड़, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जुड़ति जोड़िता। इति दुर्गादासः॥

जुड़, शि बन्धे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) शि, जुड़ति व्यजुड़ीत्। तापु-च्छ्रुलतापन्नान् प्रहर्षेण जुड़त्यसौ। जुजोड़। इति दुर्गादासः॥

जुत, ऋ ड दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अजुनोतत्। ड, जोततते। इति दुर्गादासः॥

जुन, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जुनति जोनिता। इति दुर्गादासः॥

जुर्व, ई वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इखौ। ऊ; जुरौ जुरः। ई, जूर्णः। इति दुर्गादासः॥

जुल, क पिधि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जोलयति। पिधि चूर्णीकरणे। इति दुर्गादासः॥

जुष, कि तर्के। ल्गौ। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-अकं च-सेट्।) कि, जोषयति जोषत्यन्यगुणं सुधीः। तर्कयतीत्यर्थः। इति दुर्गादासः॥

जुष, ग्र ड ई ञि सृदि। सेवे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सकं च-सेट्।) पञ्चम-स्वरी। ग्र ड, जुषते। ई ञि, जुषोऽस्ति। सृदि हर्षे। इति दुर्गादासः॥

जुष्कः, पुं, (जुष्+कक्। ततः संज्ञायां कन्।) यूषः। इति शब्दचन्द्रिका॥

जुष्टं, क्ली, (जुष्यते स्म इति। जुष+क्तः।) उच्छि-ष्टम्। सेविते, त्रि। इति मेदिनी। टे, १५॥ (यथा, भट्टिः। १। ४।

"पुण्यो महात्रक्षसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः॥")

जुष्यः, त्रि, (जुष्+कर्मणि क्यप्।) सेव्यः। इति मुग्धबोधम्॥

जुहुवानः, पुं, (हूयते इति। हु+कर्मणि कानच्।) कठिनहृदयः। अग्निः। उच्चः। इति संक्षिप्त-सारे उणादिवृत्तिः॥

जुहूः, स्त्री, (जुहोत्यनया। इति हु+"हुवः शुवच।" उणां। २।६०। इति क्विप् निपातनात् दीर्घत्वं द्वित्वञ्च।) पलाशकाष्ठनिर्मितार्द्धचन्द्रा-कृतियज्ञपात्रम्। जुहोत्यनया जुहूः। इत्यमर-भरतौ॥ (यथा, ऋग्वेदे। १। ७६। ५।

"अग्ने! मन्द्रया जुह्वा यजस्व॥")

जुहूराणः, पुं, (जुहूं रणति इति। "कर्म्मण्यण्।" ३। २। १। इत्यण्।) अग्निः। अध्वर्युः। इति विश्वः॥ चन्द्रः। इत्युणादिकोषः॥

जुहूवान्, [त्] पुं, (जुहूः पात्रं होमक्रियोद्देश्य-तयास्त्यस्मिन्। जुहू+मतुप् निपातनात् मस्य वत्वम्।) अग्निः। इति शब्दरत्नावली॥

जूः, स्त्री, (जु+"क्विब्वचिप्रच्छीति।" उणां। २। ५७। क्विप् दीर्घश्च।) आकाशः। सरस्वती। शिप्राचण्डी। जवनम्। इति शब्दरत्नावली॥ त्वरा-गमनम्। गमनम्। इति मेदिनी। जे, २॥

जूटः, पुं, (जट सङ्घाते+अच् निपातनादूत्वागमे साधुः।) शिवजटा। इत्यमरटीकायां भरतः। जटा। इति शब्दरत्नावली॥

जूटकं, क्ली, (जूट+स्वार्थे कन्।) केशबन्धः। जटा। इति भूरिप्रयोगः॥

जूतिः, स्त्री, (जु वेगे+"क्तियूतिजूतीति।" ३।३।९७। इति क्तिन् निपातनात् दीर्घत्वञ्च।) वेगः। इत्यमरः।३। २। ३९॥ (यथा, अथर्व-वेदे। १३। २। १३।

"तं समाप्नोति जूतिभिः॥")

जूतिका, स्त्री, (जूत्या कायतीति। कै+कः। तत टाप्।) कर्पूरभेदः। इति राजनिर्घण्टः॥

जूर, ड य ई व्यानौ। वधे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सकं-च-सेट्।) दीर्घौ। ड य, जूर्य्यते। ई, जूर्णः। व्यानिर्गतबहुवयोभावः। इति दुर्गादासः॥

जूर्णाख्यः, पुं, (जूर+क्तः। जूर्ण इति आख्या यस्य।) लवणविशेषः। उलू इति भाषा॥ तत्पर्य्यायः। लवणः २ क्षारकः ३ दर्भः ४ खरच्छदः ५। इति रत्नमाला॥ उलूकम् ६ उलपः ७। इति केचित्॥

जूर्णाक्यः, पुं, (जूर्ण इति आक्यः आख्या यस्य।) देवधान्यम्। इति हेमचन्द्रः॥

जूर्णिः, स्त्री, (ज्वर+"वीप्याज्वरिभ्यो निः।" उणां। ४। ४८। इति निः। "ज्वरत्वरेति।" ६। ४। २०। इत्यूट् च।) वेगः। इत्युणादिकोषः॥ आदित्यः। देहः ब्रह्मा। ज्वरः। इति संक्षिप्त-सारे उणादिवृत्तिः॥

जूर्णिः, स्त्री, (ज्वर्+भावे क्तिन्। "ज्वरत्वरे-त्यादिना"ऊठ्च।) ज्वरः। इत्यमरः।३।२।३६॥

जूष, ञ वधे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) षष्ठस्वरी। ञ, जूषति जूषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥

जूषं, क्ली, पुं, (यूष+पृषोदरात् साधुः।) यूषम्। सुश्रुतादिकाथरसः। इति लिङ्गादिसंग्रहटीकायां भरतः॥

जूषणं, क्ली, (जूष्यतेऽनेनेति। जूष+करणे ल्युट्।) दृषद्विशेषः। इति शब्दचन्द्रिका॥ धाइपुल इति भाषा॥

जृ, ष्टकारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) ष्टकारस्तिरस्करणम्। जरति शूचं शूरः। इति दुर्गादासः॥

जृभ, इ ड जृम्भे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षष्ठस्वरी। इ, जृम्भते। ड, जृम्भते। इति दुर्गादासः॥

जृभ, ड ई जृम्भे। गात्रशैथिल्य इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, जर्भते। ई, जृभ्यः। इति दुर्गादासः॥

जृम्भः, पुं क्ली, (जृम्भ+भावे घञ्।) सुखादिविकाशः। हाइ इति भाषा॥ तत्पर्य्यायः। जृम्भणम् २ जृम्भा ३ जृम्भिका ४। इति शब्दरत्नावली॥ जम्भा ५ जम्भका ६। इति राजनिर्घण्टः॥

(यस्य लक्षणं यथा, सुश्रुते। ३। ४।

"निद्रार्णस्येव यस्येहा तस्य तन्द्रा विनिर्दिशेत्।
पौलैकमनिलोच्छ्वासमङ्गेषून् विततानन॥
यन्मुञ्चति सनेत्रास्यं स जृम्भ इति संज्ञितः॥")

"जृम्भार्त्थं समीरणात्।" इति वैद्यकम्॥

"क्षुदुत्पतनजृम्भेषु जीवोत्क्षिप्ताङ्गलिध्वनिः।
अवश्यमेव कर्त्तव्यस्तान्यथा तद्वधो भवेत्॥"

इति कर्म्मलोचनम्॥ *॥

विकाशः। स्फारितः। इति शब्दरत्नावली॥ (यथा, प्रबोधचन्द्रोदये।४।२८। "एताश्च प्रति-मुकुलल्लमधुपावलीरञ्जितसुखरा जृम्भारम्भ-भरविगलन्मकरन्दद्रुहिनाः कुसुमसुरभयः॥")

जृम्भणं, क्ली, (जृम्भ+भावे ल्युट्।) जृम्भः। इत्य-मरः। १। ७। ३५॥ (यथा, सुश्रुते। ३। ।।

"इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः॥")

जृम्भा, स्त्री, (जृम्भ+भावे घञ् ततष्टाप्।) जृम्भः। इति शब्दरत्नावली॥ (यथा, देवी-भागवते। १। १५। ६१।

"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च
भूस्तयः॥")

जृम्भिका, स्त्री, (जृम्भा+स्वार्थे कन् टापि अत इत्वञ्च।) जृम्भः। इति शब्दरत्नावली॥ (निद्रावेगधारणजनितरोगविशेषः। यथा, वाभटे सूत्रस्थाने चतुर्थेऽध्याये।

"निद्राया मोहमूर्द्धाक्षिगौरवालस्यजृम्भिकाः।
अङ्गमर्दश्च तत्रेष्टः स्वप्नः संवाहनानि च॥"

जृम्भ+णिच्+ण्वुल्। टापि अत इत्वम्। जृम्भणकारकोऽस्त्रविशेषः। यथा, महाभारते। ५। ६। ५२।

"अस्त्रजंस्ते महास्त्रज्ञा जृम्भिकां दत्तवाग्नि-नीम्॥")

जृम्भितं, क्ली, (जृभि+भावे क्तः।) विचेष्टितम्। ग्रहणम्। जृम्भा। स्फुटितम्। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे।२६।८६।

"अहो किमेतदाश्चर्य्यमायाङ्गमरजृम्भितम्॥")

स्त्रीणां करणम्। इति मेदिनी। ते, ११२॥

जृम्भिणी, स्त्री, (जृभि+णिनिः।) एलापर्णी। इति शब्दचन्द्रिका॥ (एलापर्णीशब्देऽस्या विशेषो ज्ञेयः॥)

जॄ, इर् ध म य व्याने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-अनिट्।) इर्; अजरत् अजा-रीत्। ध, जरा। म, जरयति। य, जीर्य्यति। व्यानं गतबहुवयोभावः। इति दुर्गादासः॥

जॄ, गि कि व्याने। इति कविकल्पद्रुमः॥ (क्र्यां-चुरांपक्षे भ्वां-च-परं-अकं-सेट्।) गि, जृणाति जीर्णः जीर्णिः। कि, जारयति जरति। इति दुर्गादासः॥

जेता, [तृ] त्रि, (जयतीति। जि+तृच्।) जयशीलः। तत्पर्य्यायः। जिष्णुः २ जित्वरः ३ जैत्रः ४। इत्यमरः। २। ८। ७७॥ (यथा, रघुः। १२। ८६।

"जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम्॥"

विष्णुः । यथा, महाभारते । १३ । १४६ । २६ ।
"अनघो विनयो जेता विश्वयोनिः पुनर्वसुः ॥")

जेन्ताकः, पुं, खेदविशेषः । यथा, "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत पूर्व्वस्यान्दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे देशे क्षणमधुरस्निग्धे सुवर्णवर्णस्निग्धे वा नदीपरीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा क्षपतीर्थे समसुविभक्तभागे देशे सप्ताहौ वा अरत्नीः प्रक्रम्य उदकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्तारतः परमरत्नीः षोड़शसमन्तात् संहृतं स्तृतकर्म्मसम्पन्नमनेकवातायनम्। अस्य च कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकवाटाग्रमथे चास्य च कूटागारस्य चतुष्किष्कुमात्रं द्विपुरुषप्रमाणं स्तम्भत्रयं कन्दुसंस्थानं बहुसूक्ष्मच्छिद्रं अङ्गारकोष्ठकस्तम्भं सन्निधानं कारयेत्। तस्य खादिराणामाम्रकर्णिकानां वा मेध्येन काष्ठेनापूरयित्वा प्रदीपयेत्। स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमानि अथ तप्तं केवलमग्निना तदग्निगर्भं खेदयोग्येन चोष्मणा युक्तमिति। ततैनं वातहराभ्यङ्गाभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् सौम्य! प्रविश कल्याणायारोग्याय चेति प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः। न च त्वया खेदमूर्च्छापरीतेनापि सता पिण्डिकैषा मोक्तव्या आप्राणोच्छ्वासात् भस्मसाद्भूतः पिण्डिकावकाशात् द्वारमधिगच्छन् खेदमूर्च्छापरीततया सद्यः प्राणान् जह्याः तस्मात् पिण्डिकां न कथञ्चन मुञ्चेथाः। स यदा जानीयाद्विगताभिष्यन्दमात्मानं सम्यक् प्रशान्तखेदपिपासं सर्व्वस्रोतोविमुक्तं लघुभूतमपगतविबन्धस्तम्भसुप्तिगौरववेदनमिति ततस्तां पिण्डिकामुवसन् द्वारं प्रपद्येत निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतसुदकं स्पृशेत्। अपगतक्लमसन्तापस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽन्नीयात्।" इति चरकः ॥

जेमनं, क्ली, (जिमु भक्षणे + भावे ल्युट् ।) भोजनम्। इत्यमरः । २ । ६ । ५६ ॥

जेयः, त्रि, (जीयते इति । जि जये + "अचो यत्।" ३ । १ । ६७ । इति कर्म्मणि यत् ।) जेतव्यमात्रकम्। इत्यमरः । २ । ८ । ७४ ॥
(यथा, मार्कण्डेये । २७ । १२ ।
"तस्मात् कामादयः पूर्व्वं जेयाः पुत्र! महीसुता। तज्जये हि जयोऽवश्यं राजा नश्यति तेर्ज्जितः॥")

जेय, ऋ ङ गत्याम्। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिजेयत् । ङ, जेयते जिजेये । इति दुर्गादासः ॥

जेह, ङ ऋ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, जेहते जिजेहे । ऋ, अजिजेहत् । इति दुर्गादासः ॥

जै, च्यै । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) जायति । इति दुर्गादासः ॥

जैत्रं, क्ली, (रोगजयात् जेतृ । तदेव । "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इत्यण् ।) औषधम् । इति राजनिर्घण्टः ॥

जैत्रः, त्रि, (जेतैव । जेतृ + प्रज्ञादित्वादण् ।) जेता । इत्यमरः । २ । ८ । ७४ ॥ (यथा, माघे । ३ । ६१ ।
"शरीरिणा जैत्ररथेन यत्र
निःशङ्कमूधे मकरध्वजेन ॥")

पारदे, पुं । इति राजनिर्घण्टः ॥

जैत्ररथः, पुं, (जैत्रो जयशीलो रथो यस्य ।) जयशीलः । इति हलायुधः ॥

जैत्री, स्त्री, (जयति रोगादिनाशकतया सर्व्वोत्कर्षेण वर्त्तते इति । जि + क्तच् । ततः स्वार्थे अण् ततः स्त्रियां ङीप् ।) जयन्तीवृक्षः । इति शब्दरत्नावली ॥

जैनः, पुं, (जिन एव । यद्वा, जिन उपास्यदेवतास्येति । जिन + अण् ।) जिनोपासकः । बौद्धः । इति हलायुधः ॥ (धर्म्मश्चैत्रेऽस्मिन् भारतवर्षे प्रचलितेषु विविधेषु धर्म्मेषु जिनधर्म्म एव श्रेष्ठतम इति जैनाः प्रवदन्ति । एषामुपास्यदेवता जिनः । ते तु श्वेताम्बरदिगम्बरभेदेन द्विविधाः । श्वेताम्बरास्तु प्रायशः आश्रमिणः । अधुना नानाशाखासु विभक्ताः समभवन् । दिगम्बरास्तु प्रायशो निर्ग्रन्थाः । एतेषां यन्मतं तत् सर्व्वदर्शनसंग्रहात् प्रदर्श्यते । यथा,—
"ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेदनीयः प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तौतातितैः ।
सर्व्वज्ञो दृश्यते तावन्नेदानीमसदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यसर्व्वज्ञबोधकः ।
न च तत्रार्थवादानां तात्पर्य्यमपि कल्पते ॥
न चान्यार्थप्रधानेषु तदुक्तत्वं विधीयते ।
न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥
अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् ।
क्वचिन्मेन त्वसत्त्वेन स कथं प्रतिपाद्यते ॥
अथ तद्वचनेनैव सर्व्वज्ञोऽनेन प्रतीयते ।
प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोरयोः ॥
सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदुक्तता ।
कथं तदुभयं सिध्येत् सिद्धमूलान्तराद्ऋते ॥
असर्व्वज्ञप्रणीतासु वचनाम्नूलवर्जितात् ।
सर्व्वज्ञमवगच्छन्तः सद्भावोक्तं न जानते ॥
सर्व्वज्ञसदृशं किञ्चिदादि पश्येम सम्प्रति ।
उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥
उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः ।
अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवत् ॥
इत्यादि ॥

अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तदयुक्तं तत्सद्भावादेकस्यानुमानादेः सद्भावात्। तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययत्वात् यदृयद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययं तत्तत्साक्षात्कारि यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि। तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति। न तावदग्रेवार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं चोदनाबलान्निखिलार्थज्ञानात् नोत्पत्तान्यथानुपपत्त्या सर्व्वमनेकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयतीत्येवंजातीयकैरुच्चरमीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम्। न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्-दर्शनादित्रयलक्षणस्यावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया सूक्ष्मयापि युक्त्योपपत्तेर्वा विद्वद्भाः।
नन्वावरणप्रक्षयवशादशेषविषयं ज्ञानं विशदं सुखप्रख्यं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञस्यानादिसुक्तत्वेनावरणस्यैवासम्भवादिति चेत्तन्न अनादिसुक्तत्वस्यैवासिद्धेर्न सर्व्वज्ञोऽनादिसुक्तः सुक्तत्वादितरसुक्तवत् बद्धापेक्षया च सुक्तव्यपदेशः तद्रहिते चास्याप्यभावः स्यादाकाशवत्। गन्धगादेः चित्त्वादिकार्य्यपरम्परायाः कर्तृत्वेन तत्सिद्धिः तथाहि चित्त्वादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवासिद्धेः। न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति सावयवत्वं किमवयवसंयोगित्वं अवयवसमवायित्वं अवयवजन्यत्वं समवेतद्रव्यत्वं सावयवबुद्धिविषयत्वं वा। न प्रथमः आकाशादावनैकान्त्यात्। न द्वितीयः सामान्यादौ व्यभिचारात्। न तृतीयः साध्याविशिष्टत्वात्। न चतुर्थः विकल्पयुगलागलग्रहणत्वात् समवायसम्बन्धमात्रवद्द्रव्यत्वं समवेतद्रव्यत्वजन्यत्वं समवेतद्रव्यत्वं वा विवक्षितं हेतूक्रियते। आद्ये गगनादौ व्यभिचारः तस्यापि गुणादिसमवायवत्त्वद्रव्यत्वयोः सम्भवात्। द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात्। अभ्युपगम्यैतदभिवस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात्। नापि पञ्चमः आत्मादिनानैकान्त्यात्तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात्। न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येयं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत्। किञ्च किमेकः कर्त्ता साध्यते किं वा खतन्त्रः प्रथमे प्रासादादौ व्यभिचारः स्वपत्यादीनां बहूनां

पुरुषार्थो तत्र कर्तृत्वोपलम्भादनेनैव सकलजगज्जननोत्पत्तादितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ।

कर्त्तास्ति नित्यो जगतः स चैकः
स सर्व्वगः सन् स्ववशः स सत्यः।
—इमाः कुदेवाः कुविडम्बनाः स्युः
स्वेषां न येषामनुशासकस्त्वम्॥ इति॥

अन्यत्रापि।

कर्त्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः।
कार्य्यं किमत्र भवतापि च तत्त्वकाद्यै-
राहत्य च त्रिभुवनं पुरुषः करोतीति॥

तस्मात् प्रागुक्तकारणचितयबलादावरणप्रक्षये सार्व्वज्ञ्यं युक्तम्। न चास्योपदेष्टृन्तराभावात् सम्यग्दर्शनादिचितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादस्मद्व्याख्येयार्थज्ञानस्य। नचान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्परायां बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्।

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादिचितयमर्हत्प्रवचनसङ्गृहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति। विहितश्च योगदेवेन येन रूपेण जीवाद्यर्थो यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यथार्थमेतत् श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थे श्रद्धानं सम्यग्दर्शनमिति। अन्यदपि।

रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते।
जायते तन्निसर्गेण गुरोरधिगमेन वेति॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः बाह्यार्थादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यथोक्तम्।

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥
इति॥

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् मतिश्रुतावधिमनः पर्य्यायकेवलानि ज्ञानमिति। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य आपृतः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं सत्यं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तमवच्छिन्नविषयं ज्ञानमवधिः। ईर्य्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोमतस्वार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानसंस्पृष्टं केवलम्। तच्चाद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम्।

विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम्।
प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति॥

अन्तर्गणिकभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापागमनकारणक्रियानिवृत्तिः समाक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता। सर्व्वथावद्ययोगानां त्यागश्चारित्रमुच्यते। कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥

अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः॥
न यत्प्रमादयोगेन जीवितव्यपरोपणम्।
चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम्॥
प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते।
तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत्॥
अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥
दिव्यौदारिककामानां कृतानुमतकारितैः।
मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥
सर्व्वाभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥
भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्।
महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति॥
भावनापञ्चकप्रपञ्चञ्च प्ररूपितम्।
हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्यभाषणेनापि भावयेत् सूनृतं व्रतम्॥
इत्यादिगा॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानावरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्।

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना।

चिदचिद्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः॥
हेयं हि कर्म्मरागादि तत्कार्य्यमविवेकिनः।
उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥

सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणे ज्ञानदर्शने उपयोगः स परस्परप्रदेशासु प्रदेशवन्तात् कर्म्मणैकीभूतस्य आत्मनोऽन्यत्वप्रतिपत्तिकारणं लक्षणं भवति। सकलजीवसाधारणं चैतन्यमुपयोगक्षयक्षयोपशमभवभावौपशमिकक्षयात्मकक्षयौपशमिकभावैः कर्म्मेन्द्रियवशात् कलुषाद्याकारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति। यदवोचदाचकाचार्यः औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानभावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्मा भावो मिश्रः यथा जलस्यार्द्धस्वच्छता। कर्म्मोदये सति भवन् भाव औदयिकः। कर्म्मोपशमाद्यनपेक्षः सहजो भावस्तेतनत्वादिः पारिणामिकः। तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः। तदुक्तं स्वरूपसम्बोधने।

ज्ञानाद् भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन।
ज्ञानं पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्तितः॥
इति॥

ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्येव वास्तवत्वाद्भयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम्।

अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवाकाश-धर्म्माधर्म्म-पुद्गलास्तिकायभेदात्। एतेषु पञ्चसु तत्त्वेषु कालक्षयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः। तत्र जीवा द्विविधाः संसारिणो मुक्ताश्च भवाद् भवान्तरप्राप्तिमन्तः संसारिणः। ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः। गृद्ध्याक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः। ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः। तत्र मार्गगतधूलिः पृथिवी इष्टकादिः पृथिवीकायः पृथिवी कायत्वेन येन गृहीता स पृथिवीकायकः पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः। एवमवरादिष्वपि भेदचतुष्टयं द्रष्टव्यम्। तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात्। ते च स्थावराः स्पर्शनैकेन्द्रियाश्च भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्त्रे एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतुः। तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशप्रदेवदनीये सर्व्वत्रावस्थितिगतिस्थित्युपग्रहौ धर्म्माधर्म्मयोरुपकारः अतएव धर्म्मास्तिकायः प्रवृत्तानुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः। अन्यवस्तुप्रदेशमधीत्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशकृत्यम्। स्पर्शरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च। भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः। तत्र द्व्यणुकादिस्कन्धभेदादखण्डितत्वपटते अखण्डितसंघातात् द्व्यणुकादित्वपद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः अतएव पूरयन्ति गलन्तीति पुद्गलाः। कालस्यानेकप्रदेशत्वाभावेनास्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्य्यायवद्द्रव्यमिति। द्रव्याश्रया निर्गुणा गुणाः यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्म्माधर्म्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि-

सामान्यानि गुणाः। तस्य द्रव्यस्योक्तरूपेण भवनसुत्पादः तद्भावः परिणामः पर्याय इति पर्यायाः; यथा जीवस्य घटादिज्ञानसुखक्षीणादयः पुद्गलस्य स्वत्विक्षघटादयः धर्मादीनां गत्यादिविशेषाः; अतएव षट् द्रव्याणीति प्रसिद्धिः।

केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रव-बन्ध-संवर-निर्जर-मोक्षास्तत्त्वानीति। तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते। औदारिकादिकायादिसलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः; यथा सलिलावगाहिद्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणाड़िकयाकर्मास्रवतीति स योग आस्रवः। यथा आर्द्रं वस्त्रं समन्ताद्वासानीतं रेणुजातमुपादत्ते तथा कषायसलार्द्रं आत्मा योगानीतं कर्म्म सर्व्वप्रदेशैर्गृह्णाति यथा वा निश्छायः पिण्डे जले क्षिप्ते अम्भः समन्ताद् गृह्णाति तथा कषायोष्मा जीवो योगानीतं कर्म्म समन्तादादत्ते। कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः; क्रोधो मानो माया लोभश्च स द्विविधः; शुभाशुभभेदात्। तत्राहिंसादिः शुभः; काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः। तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्म्मयोगः स आस्रवः; शुभः पुण्यस्य अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण ससंरम्भमभाणि। अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रव इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् सृष्यङ्कुपादिज्ञानरूपेण परिणमत इति।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तान्तप्रदेशानां पुद्गलानां कर्म्मबन्धयोग्यानामादानसुपश्लेषणं यत् करोति स बन्धः। तदुक्तं सकषायत्वाज्जीवः कर्म्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति। तत्र कषायग्रहणं सर्व्वबन्धहेतूपलक्षणार्थम्। बन्धहेतून् प्रपाठ वाचकाचार्यः। मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति। मिथ्यादर्शनं द्विविधं मिथ्याकर्म्मोदयात् परोपदेशानपेक्षं तत्त्वश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशपूर्व्वम्। पृथिव्यादिषट्कायादानाक्षं षड्विन्द्रियासंयमनञ् अविरतिः। पञ्चसमितिगुप्तिव्यतिरिक्ताः प्रमादः। कषायः क्रोधादिः। तत्र कषायान्ताः मिथ्यात्वभावबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः। बन्धश्चतुर्व्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति यथा निम्बगुड़ादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमात्मावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्बोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्ज्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवल्लेचस्रोचनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानलमन्तरायस्य स्वभावः कोष्ठाधान्यवत्। सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्म्मावान्तरभेदमूलप्रकृतिवेदनीयः। तथावोचदुमास्वातिवाचकाचार्यः; आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदश्च समग्रतः प्रज्ञापनावार्त्तिंशतिचतुर्द्विपञ्चद्विपञ्चभेदा यथाक्रममिति। एतच्च सर्व्वं विद्यानन्दादिभिर्व्विस्तृतमिति विस्तरभयान्न प्रस्तूयते। यथा अजागोमहिष्यादिक्षीरास्रावमेतावत्तमनेहसं माधुर्य्यस्वभावादप्रच्युतिस्थितिः; तथा ज्ञानावरणादीनां मूलप्रकृतीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परास्थितिरित्यादुक्तं कालदुर्द्धानवत् स्वीयस्वभावादप्रच्युतिस्थितिः। यथा अजागोमोहिष्यादिक्षीरार्णां तीव्रमन्दादिभावेन स्वकार्य्यकरणे सामर्थ्यविशेषोऽनुभावः तथा कर्म्मपुद्गलानां स्वकार्य्यकरणे सामर्थ्यविशेषोऽनुभावः। कर्म्मभावपरिणतपुद्गलस्कन्धानामनन्तान्तप्रदेशानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः। आस्रवनिरोधः संवरः। येनात्मनि प्रविशत् कर्म्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः। संसारकारणाद्योगादात्मनो गोपनं गुप्तिः। सा त्रिविधा कायवाङ्मनोनिग्रहभेदात्। प्राणिपीड़ापरिहारेण सम्यगयनं समितिः सा ईर्य्याभाषादिभेदात् पञ्चधा। प्रपञ्चितश्च हेमचन्द्राचार्य्यैः। लोकातिवाहिते मार्गे युक्तिते भास्वदंशुभिः। जन्तुरक्षार्थमालोक्य गतिरीर्य्या मता सताम्॥ आपद्य रागतः सर्व्वजनीनं मितभाषणम्। प्रिया वाचंयमानां सा भाषा समितिरुच्यते॥ द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम्। मुनिर्यदन्नमादत्ते सैषणासमितिर्मता॥ आसनादीनि संवीक्ष्य प्रतिलेख्य च यत्नतः। गृह्णीयान्निक्षिपेद्वायेत् सादानसमितिः स्मृता॥ कफमूत्रमलप्रायैर्निर्ज्जन्तु जगतीतले। यत्नादुत्सृजतेत् साधुः सोत्सर्गसमितिर्भवेत्॥ अत एवास्रवः स्रोतसो द्वारं संवृणोतीति संवर इति निराहुः। तदुक्तमभियुक्तैः। आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्। इतीयमार्हती मुष्टिरन्यदस्याः प्रपञ्चनम्॥ अर्ज्जितस्य कर्म्मणस्तपःप्रभृतिभिर्निर्ज्जरणं निर्ज्जराख्यं तत्त्वं चिरकालप्रवृत्तक्षयोपशमकालं पुण्यं सुखदुःखे च देहेन जरयति नाशयति क्षेपोल्लुञ्चनादिकं तप उच्यते। सा निर्ज्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्ज्जरा कामादिपाकजेति च वेगीयते। यत् कर्म्म तपोबलात् स्वकालमनयोदयावलिं प्रवेश्य प्रपद्यते तत कर्म्म निर्ज्जरा। यदाह।

संसारबीजभूतानां कर्म्मणां जरणादिह।
निर्ज्जरा संस्मृता देधा सकामा कामनिर्ज्जरा॥
स्मृता सकामा यमिनामकामा सत्त्वदेहिनामिति॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः; अभिनवकर्म्माभावात् निर्ज्जराहेतुसन्निधानेनार्ज्जितस्य कर्म्मणो निरसनादात्यन्तिककर्म्ममोक्षणं मोक्षः; बन्धहेतुभवहेतुनिर्ज्जराभ्यां कृत्स्नकर्म्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्धं गच्छत्यालोकान्तात् यथा कुलालचक्रमुपरतेऽपि तस्मिन् तदावेगसंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत् हतं प्रणिधानं तस्य तद्भावेऽपि पूर्व्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा एरण्डिकाबीजफलमलाबुद्रव्यं जलेऽधःपतति पुनरपेतमृत्तिकाबन्धमूर्द्धं गच्छति तथा कर्म्मरहित आत्मा असङ्गत्वादूर्द्धं गच्छति बन्धच्छेदादेरण्डबीजवदग्निशिखावच्चेति। अतएव पठन्ति।

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः।
अद्यापि न निवर्त्तन्ते त्वालोकाकाशमागता इति।

अन्ये तु गतसमस्तक्लेशतद्धासनस्वभावावरणज्ञानस्य सुखैकतानस्यात्मन ऊर्द्धदेशावस्थानं मुक्तिरित्यास्थिषत। एवमुक्तानि सुखदुःखबाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः। तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्ज्जरणं बन्धो मोक्षश्च नव तत्त्वानीति। संग्रहे प्रवृत्ता वयमुपरताः स्म।

अत्र सर्व्वत्र सप्तभङ्गिनयाख्यां न्यायमवतारयन्ति जैनाः; स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः; स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः; स्यादस्ति च नास्ति चावक्तव्य इति तत्सर्व्वमनल्पबोधैः; प्रत्यपीपदत्। तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥ क्रमेणोभयवाक्यायां प्रयोगः समुदायवाक्। युगपत्तद्विवक्षायां स्यादवाच्यसमुक्तिः॥ आद्यावाक्यविवक्षायां पञ्चमो भङ्ग इष्यते। अन्त्यावाक्यविवक्षायां षष्ठभङ्गसमुद्भवः॥ सप्तत्वेन युक्तश्च सप्तमो भङ्ग उच्यत इति। स्याच्छब्दः सत्त्वयं निपातः तिङन्तप्रतिरूपको ऽनेकान्तद्योतकः। यथोक्तम्:

वाक्येष्वनेकान्तद्योतिगम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा

स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थकम्। तदाह।

स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः। सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति॥

यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्सासंजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्त्वेन ज्ञानोपादाने प्रेक्षावतामनुपपत्तेते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रश्नयं न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगार्थायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्।

घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः॥
इत्यादि॥

तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्व्विधाः पुनरप्यनिर्व्वचनीयमतेनामिश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमञ्जरीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्। यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्।

अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्।
एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥
आयानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यत इति॥

अन्योन्यपक्षप्रतिपक्षभावाद्-
यथापरे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छ-
न्प्रपक्षपाती समयस्तथार्हत इति॥

जिनदत्तसूरिणा जैनं मतमित्थमुक्तम्।

बलभोगोपभोगानामुभयोर्द्दानलाभयोः।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्॥
हिंसा रत्यरती रागद्वेषौ रतिरतिस्मरः।
शोको मिथ्यात्वमेतेऽष्टादश दोषा नयस्य सः॥
त्रिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्मनि॥
स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च।
नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा॥
जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च।
बन्धो निर्ज्जरणं मुक्तिरेषां व्याख्याधुनोच्यते॥
क्षेतनालक्षणो जीवः स्यादजीवस्तदन्यकः।
सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः॥
आस्रवः कर्म्मणां बन्धो निर्ज्जरस्तद्वियोजनम्।
अष्टकर्म्मचयान्मोक्षोऽवान्तभावश्च केषुचित्॥
पुण्यस्य संस्तवे पापस्यास्रवे क्रियते पुनः।
लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चात्मनः।
क्षीणाष्टकर्म्मणो मुक्तिर्निर्व्याबाधत्तिर्ज्जिनोदिता॥
सरजोहरणा भैक्षसुजो लुञ्चितमूर्द्धजाः।
श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥
क्षेपिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्द्धाग्निनो गृहे दातुर्द्वितीयाः क्षुल्लिकार्यकाः॥
मुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति॥"
इति सर्व्वदर्शनसंग्रहे आर्हतदर्शनम्॥)

जैपालः, पुं, (जयपालः पृषोदरादित्वात् साधुः।) जयपालवृक्षः। इति द्विरूपकोषः॥

जैमिनिः, पुं, मुनिविशेषः। स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतकृत् वज्रवारकश्च। यथा, पुराणवचनम्।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥"

जैवालकः, पुं, (जीवयति ओषधिप्रभृतीनीति। जीव+णिच्+"आलकन् वृद्धिश्च।" उणा। १।८१। इति आलकन् ऐकारस्य वृद्धिश्च।) चन्द्रः। कर्पूरः। इत्यमरः। १। ३। १४, २। ६। १३०॥ पुत्रः। इति संक्षिप्तसारे उणादिवृत्तिः॥ भेषजम्। इति हेमचन्द्रः॥

जैवालकः, त्रि, (जीवतीति। जीव+आलकन् वृद्धिश्च।) दीर्घायुः। (यथा, दशकुमारचरिते। "जैवालक! ननु श्रूयते प्रतिरथ्याः मिथिलायां प्रहारवर्म्मासीत्।") क्षुद्रः। इति मेदिनी। के, १६०॥

जैह्म्यं, क्ली, (जिह्मस्य कुटिलस्य भावः। जिह्म+भावे ष्यञ्।) जिह्मता। कुटिलता। यथा, मनुः। ११। ६७।

"जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥"

जोङ्गकं, क्ली, (जुङ्गति त्यजति शङ्खमिति। जुङ्गि त्यागे+खुल्। निपातनात् गुणः।) अगुरु। इत्यमरः। २। ६। १२६॥

जोङ्गटः, पुं, (जुङ्गति वरोचकत्वं परित्यजत्यनेनेति। जुङ्ग+बाहुलकात् घटन् गुणश्च।) गर्भिण्यभिलाषः। इति हारावली। २१६॥ साधु इति भाषा॥

जोटिङ्गः, पुं, (जूटेन इङ्गति प्रकाशते इति। अच्। पृषोदरादित्वात् साधुः।) महादेवः। महाव्रती। इति चिकाण्डशेषः॥

जोन्नाला, स्त्री, देवधान्यम्। इति हेमचन्द्रः। ४। २४४॥ (जोम्नाला इति क्वचित् पाठः॥)

जोषं, क्ली, (जुष हर्षे+भावे घञ्।) सुखम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे १।१२०।१। "का राधद्धोत्राश्विना वां को वां जोष उभयोः॥" "जोषे प्रीतिजनके व्यवहारे।" इति दयानन्दभाष्यम्॥)

जोषम्, व्य, (जुष्+बाहुलकात् अम्।) तूष्णीम्। (यथा, महाभारते। २। ६८। १६।

"मैवमित्यब्रवीच्चैनं जोषमास्सेति भारत!॥")
सुखम्। इत्यमरः। ३। ३। २५०॥

जोषा, स्त्री, (जुष्यते सेव्यते उपभुज्यते इति। जुष्+घञ्। स्त्रियां टाप्।) योषा। इति शब्दरत्नावली॥

जोषिका, स्त्री, (जुष्यते सेव्यते इति। जुष+ण्वुल्। टापि अत इत्वम्।) जालिका। इति शब्दरत्नावली॥

जोषित्, स्त्री, (युष्यते उपभुज्यते। युष्+"हृसृरुहियुषिभ्य इतिः।" उणा। १। ६६। इतिप्रत्ययः। पृषोदरादित्वात् यस्य जः।) योषित्। इति शब्दरत्नावली॥

जोषिता, स्त्री, (जोषित्+हलन्तत्वाद्वा टाप्।) योषित्। इति शब्दरत्नावली॥

ज्ञः, पुं, (जानातीति। ज्ञा+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) ब्रह्मा। बुधः। पण्डितः। (यथा, चरके सूत्रस्थाने ३० अध्याये।

"पशुः पशूनां दौर्ब्बल्यात् कश्चित् मध्ये वृकायते।
ससत्त्वं वृकमासाद्य प्रकृतिं भजते पशुः॥
तद्वदज्ञो जगन्मध्यस्थः कश्चित् मौख्यसाधनः।
स्वापयत्यात्मनात्मानमात्मं ज्ञासाद्य भिद्यते॥")
महीसुतः। इति धरणी॥

ज्ञप, क म ज्ञप्तौ। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) क म, ज्ञपयति। ज्ञप्तिर्म्मारणतोषणनिशानयोः। ज्ञापक इत्यनेनैवेहसिद्धौ ज्ञपपाटशब्दादिरुभयपदीतिमते फलवत्कर्त्तरि परस्मैपदार्थः। इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमज्ञादेव निष्पादितम्। तेन अनिर्द्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अतएव प्रक्ष्णौ ग्र क्षीरे इत्यत्र अक्षेव सनन्तस्य निष्पादितेन क्षीरशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये प्रतिपक्ष्यज्ञप्तिरिक्षेत्यमरः। इति दुर्गादासः॥

ज्ञपितः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः।) ज्ञापितः। इत्यमरः। ३। १। ६८॥

ज्ञप्तः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः। "वा दान्तशान्तेति।" ७। २। २७। इति साधुः।) ज्ञापितः। इत्यमरः। ३। १। ६८॥

ज्ञप्तिः, स्त्री, (ज्ञप्यते ज्ञायतेऽनयेति। ज्ञप+भावे क्तिन्। इडभावः।) बुद्धिः। इत्यमरः। १। ५। १॥ (यथा, कथासरित्सागरे। २५। ५७।

"ततो दीर्घतपोवाक्यात् सम्भाव्य द्वीपगाश्च ताम्।
तज्ज्ञप्तये दाशपतेरुत्स्थलद्वीपवासिनः॥")

ज्ञा, क प्रेरणे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) प्रेरणमिह नियोजनम्। क, ज्ञापयति भृत्यं स्वामी नियुक्तं करोतीत्यर्थः। इति दुर्गादासः॥

ज्ञा, क म मारणे। ज्ञालोके। निज्ञाणे। तोषणे। स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां परं-सकं-सेट्।) क म, ज्ञपयति। ज्ञप्तिः। ज्ञापि ज्ञपं ज्ञप

ज्ञापं ज्ञापम्। आलोको दर्शनप्रेरणम्। निष्ठार्थं तिरस्क्रीकरणम्। तोषणं तुष्टीकरणम्। क्षपयति शत्रुं शूरो मारयतीत्यर्थः। क्षपयति रूपं कामिनी चित्रकारान् दर्शयतीत्यर्थः। क्षपयति खड्गं कर्म्मकारः शाणयतीत्यर्थः। क्षपयति गुरुं शिष्यस्तोषयतीत्यर्थः। स्तुतिः केचिन्न मन्यते। आलोको ज्ञानप्रेरणमित्यनुन्यासरक्षितौ। अतएव क्रमदीश्वरोऽपि जानातेर्घटादिज्ञं विभाषया मन्यते। तेन क्षपयितुं बोधयितुमिच्छमाणो ज्ञीप्समान इति पाणिनीयवृत्तौ ज्ञानप्रेरणापि इच्छे सनि ज्ञीप्समान इति प्रसिद्धम्। एवं विज्ञप्तिरेषा मम जीववन्धौ इत्यादिषु च विज्ञापनमेवार्थः। इति दुर्गादासः॥

ज्ञा, ग बोधे। इति कविकल्पद्रुमः॥ (क्र्यां-परं-सकं-अनिट्।) ग, जानाति। "सन्दर्भशुद्धिं गिरां जानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्मण्यात्मनेपदम्। ततोऽनुजज्ञे गमनं सुतस्य इत्यत्रानुशब्दस्योपसर्ग प्रतिरूपकत्वेनानुपसर्गत्वात्॥" इति दुर्गादासः॥

ज्ञातं, त्रि, (ज्ञायते विद्यते स्मेति। ज्ञा+कर्म्मणि क्तः।) श्रुतज्ञानम्। जाना इति भाषा। तत्पर्य्यायः। विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवसितम् १०। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। १। १२३।
"पूर्व्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा॥")

ज्ञातव्यं, त्रि, (ज्ञायते यदिति। ज्ञा+तव्य।) ज्ञानीयम्। ज्ञेयम्। वेद्यम्। अवगन्तव्यम्। बोधम्। (यथा, महाभारते। ३। २८। ५।
"स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः॥")
मन्तव्यम्। इति व्याकरणम्॥

ज्ञातसिद्धान्तः, पुं, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन।) शास्त्रतत्त्वज्ञः। तत्पर्य्यायः। तान्त्रिकः २। इत्यमरः। २। ८। १५॥

ज्ञाता, [तृ] त्रि, (ज्ञा+तृच्।) ज्ञानशीलः। तत्पर्य्यायः। विदुरः २ विन्दुः ३। इत्यमरः। ३। १। ३०॥ विदितः ४ ज्ञानसमन्वितः ५। इति शब्दरत्नावली॥

ज्ञातिः, पुं, जानाति छिन्नं कुलस्थितिञ्च ज्ञातिः नान्नीति तिक्। इत्यमरटीकायां भरतः॥ सपिण्डादिः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ बन्धुः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ३४॥ अंशकः ७ गन्धः ८ दायादः ९। इति त्रिकाण्डशेषः॥ सकुल्यः १० समानोदकः ११। इति जटाधरः॥ स चतुर्व्विधः। सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततश्चतुर्दशपुरुषपर्य्यन्तं सकुल्यः। ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः। ततः परं गोत्रजः। इति शुद्धितत्त्वम्॥ एषां विशेषस्तत्तच्छब्दे द्रष्टव्यः॥*॥
ज्ञातिद्रोहे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोड़शीम्॥"
(ज्ञायते विद्यतेऽस्मादिति। ज्ञा+अपादाने क्तिन्।) पिता। इति मेदिनी। ते, २०॥

ज्ञातेयं, क्ली, (ज्ञातेर्भावः कर्म्म वा। ज्ञाति+"कपिञ्ज्ञात्योर्ढक्।" ५। १। १२७। इति ढक्।) ज्ञातित्वम्। इत्यमरः। २। ६। ३५॥

ज्ञानं, क्ली, (ज्ञा+भावे ल्युट्।) विशेषेण सामान्येन चावबोधः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।"
इत्यमरः। १। ५। ६॥
अस्यार्थः। "मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः। अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते एषा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं विज्ञानञ्च यथाज्ञानान्मुक्तिरिति सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति। अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकज्ञानमिति ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मताः इति। ब्रह्मणो नित्यविज्ञानानन्दरूपत्वादिति एवं चित्रज्ञानं व्याकरणज्ञानं घटपटादिविज्ञानमित्यादिकं प्रयुज्यत एव। मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित्। मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्विज्ञानं क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित्। अवबोध इत्यर्थाच्छब्द मोक्षविषये अवबोधो धीः अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित्।" इति भरतः॥ *॥ योगशास्त्रमते तु।
"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम्॥"
इति मोक्षधर्म्मः॥
"एकत्वं बुद्धिमात्रेणावस्थानं बुद्धिवृत्तिनिरोध इति यावत्।" इति तट्टीका॥ *॥
"अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"
सात्त्विकराजसतामसभेदेन तत्त्रिविधम्।
सात्विकं यथा,—
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम्॥"
राजसं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"
तामसं यथा.—
"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥" ३॥
इति श्रीभगवद्गीतायाम्। १८। २०—२२॥
"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं निर्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्विकं विद्धि॥ १॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखिदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि॥ २॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरूपपत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अतएवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम्॥" ३॥
इति तट्टीकायां श्रीधरस्वामी॥
न्यायमते तु।
"अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते।
तत्रूप्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे आत्मबुद्धिः शुक्त्यादौ रौतिमा मतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निर्णयः॥
स संशयो भवेदूया धीरेकत्राभावभाववोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः॥"
"गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्धृत विशेष्यकम्॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम्॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्॥"
इति भाषापरिच्छेदः॥
(यथा, वायुपुराणे उत्तरभागे। ११। ३६।
"वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः प्रतितो वापि मुच्यते नात्र संशयः॥"
विष्णुः। यथा महाभारते। १३। १४६। ६१।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम्॥"
"ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्व्वस्य साधकमिति ज्ञानमुत्तमं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः॥" इति तद्भाष्यम्॥)

ज्ञानदर्पणः, पुं, (ज्ञानं दर्पण इव यस्य।) पूर्व्वजिनः। इति त्रिकाण्डशेषः।

ज्ञानयोगः, पुं, (युज्यते ब्रह्मणानेनेति। युज+करणे घञ्। ज्ञानमेव योगः।) ब्रह्मज्ञानप्राप्त्युपायः। यथा,—
"सर्व्वभूतेषु गोविन्दो बहुरूपो व्यवस्थितः।
इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत्॥

शब्दादयो ये विषया विषयी चाथ पूरुषः ।
ज्ञानीयात्तदग्रेसरं वे स्वरूपं परमात्मनः ॥
परमात्मा च भगवान् विश्वक्सेनो जनार्द्दनः ।
तद्भक्तिमान् भगवतो नाल्पपुण्यैर्हि जायते ॥
भगवच्छासनानल्पो भगवच्छासनप्रियः ।
भगवद्भक्तिमाप्नाय वत्स ! भागवतो भव ॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः ।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम् ॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम् ।
ततो भागवतो भूत्वा भवस्यन्तात् प्रमोक्ष्यसि ॥
तत्र चित्तं समाधातुं न शक्नोति भवान् यदि ।
तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम् ॥
तत्र यत्सम्भवं ज्ञानयोगे मद्भावते ! ।
क्रियायोगे दिवारात्रौ ततपरः सततं भव ॥"
इत्यादि वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः । विस्तारस्तु श्रीभगवद्गीतायां ७ अध्यायं द्रष्टव्यः ॥

ज्ञानलक्षणा स्त्री, (ज्ञानं लक्ष्यं स्वरूपं यस्याः ।) त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षः । तस्य लक्ष्यं यथा,—
"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ॥"
इति भाषापरिच्छेदे । ६५ ॥
अस्यार्थः ।"तद्विषयव्यापकतद्विषयज्ञानम् । यथा पूर्व्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम् ॥"

ज्ञानवापी, स्त्री, (ज्ञानस्य ज्ञानरूपोदकस्य वापी दीर्घकेव ।) वाराणस्यन्तर्गततीर्थविशेषः । तदुत्पत्त्यादिर्यथा,—
अगस्त्य उवाच ।
"स्कन्द ! ज्ञानोदतीर्थस्य माहात्म्यं वद साम्प्रतम् ।
ज्ञानवापीं प्रशंसन्ति यतः स्वर्गौकसोऽप्यलम् ॥
स्कन्द उवाच ।
घटोद्भव ! महाप्राज्ञ ! शृणु पापापनोदिनीम् ।
ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाधुना ॥
व्यतीतसिद्धे संसारे पुरा देवयुगे मुने ! ।
प्रायः कृतघ्नदीज्ञानश्चरन् खेरमितस्ततः ॥
न वर्षन्ति यदाभ्राणि न प्रावर्षन्त निम्नगाः ।
जलाभिलाषो न यदा स्नानपानादिकर्म्मणि ॥
क्षारत्वादुदधेरेव यदासीज्जलदर्शनम् ।
पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित् ।
निर्व्वाणकमलाक्षेत्रं श्रीमदानन्दकाननम् ॥"
"सुखसन्तानजनकं मोक्षसाधनसिद्धिदम् ।
प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा ।
जलस्निग्धमूलविमलरश्मिजालसमाकुलः ॥
आकुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः ।
महाहमहमिकायां प्रादुरास यदादितः ॥
ज्योतिर्म्मयीभिर्म्मालाभिः परितः परिवेष्टितम् ॥"
"अस्मेशानस्य तल्लिङ्गं दृष्ट्वेत्यभवत्तदा ।
स्नापयामि महालिङ्गं कलसैः शीतलैर्जलैः ।
चक्रान्न च विमूलेन दधिन्याग्नेयकक्षतः ॥
ऊर्द्ध्वं प्रवृद्धवेगेन रुद्रो रुद्रवपुर्द्धरः ।
पृथिव्यां वह्नयाभासि निष्क्रान्तानि तदा मुने ॥
भूप्रमाणाद्गुणैर्यैरियं वसुधाहृता ।
तैर्जलैः स्नापयाञ्चक्रे त्वसृष्टैरन्यदेहिभिः ॥"
"विश्वभर्त्तुरुमास्पर्शसुखातिसुखकारिभिः ।
महाबलैश्चसुस्नानमहाशुद्धिविधायिभिः ॥
सहस्रधारैः कलसैः स ईशानो घटोद्भव ! ।
सहस्रसङ्ख्यः स्नपयामास संहृष्टमानसः ॥
ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः ।
तस्मवाच तदेशानं रुद्रं रुद्रवपुर्द्धरम् ॥
तव प्रसन्नोऽस्मीशान ! कर्म्मणानेन सुव्रत !
गुरुज्ञानन्यपूर्व्वेण समातिप्रीतिकारिणा ॥
ततस्त्वं जटिलेशान ! वरं ब्रूहि तपोधन ! ।
अदेयं न तवास्त्यद्य महोद्यमपरायण ! ॥
ईशान उवाच ।
यदि प्रसन्नो देवेश ! वरयोग्योऽस्म्यहं यदि ।
तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर ! ॥
विश्वेश्वर उवाच ।
त्रिलोक्यां यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि ।
तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम् ॥
शिवं ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः ।
तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् ॥
यतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम् ।
अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥
ज्ञानोदतीर्थसंस्पर्शाद्दत्त्वभेधफलं लभेत् ।
स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः ॥
फलमुक्तीर्थे नरः स्नात्वा संतर्प्य तु पितामहान् ।
यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा ॥"
"ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च ।
आद्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम् ॥
इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत ।
कृतकृत्यमिवात्मानं सोऽप्यमंस्त चिरूलभृत् ॥
ईशानो जटिलो रुद्रस्तत् प्राप्य परमोदकम् ।
अवाप्तवान् परं ज्ञानं येन निर्व्वृतिमाप्तवान् ॥"
इति स्कान्दे काशीखण्डे ३३ अध्यायः ॥

ज्ञानी, [न्] पुं, (ज्ञानमस्त्यस्येति । ज्ञान+ "अत इनिठनौ ।"५।२।११५। इति इनिः ।) देवज्ञः । (सामान्यबोधयुक्तमात्रे, त्रि । यथा, मार्कण्डेये । ८१ । ३६ ।
"ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि केवलम् ।
यतो हि ज्ञानिनः सर्व्वे पशुपक्षिमृगादयः ॥") ज्ञानयुक्ते च, त्रि । इति मेदिनी । ते, ६८ ॥
तस्य लक्ष्यं यथा,—
"प्रजहाति यदा कामान् सर्व्वान् पार्थ! मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चायं कर्म्मोऽङ्गानीव सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥"
ज्ञानिनामपि कर्म्म कर्त्तव्यम् । यथा,—
"सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत ।
कुर्य्याद्विद्वांस्तथा सक्तश्चिकीर्षुः कर्म्म संग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम् ।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो ! गुणकर्म्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥"
ज्ञानिप्रशंसा यथा.—
"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्জ্জুন ! ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥
उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः ॥"
इति श्रीभगवद्गीता ॥

ज्ञानेन्द्रियं, क्ली, (ज्ञायतेऽनेनेति । ज्ञा+करणे ल्युट् । ज्ञानप्रकाशकं ज्ञानसाधनं वा इन्द्रियमिति ।) बुद्धीन्द्रियम् । तत् षड्विधम् । मनः १ नेत्रम् २ श्रोत्रम् ३ घ्राणम् ४ जिह्वा ५ त्वक् ६ । इति श्रीभागवतम् ॥

ज्ञापनं, क्ली, (ज्ञा+णिच्+भावे ल्युट् ।) बोधनम् । इति व्याकरणम् । जानान इति भाषा ॥ (यथा, राजतरङ्गिण्याम् । ४ । १८२ ।
"क्षितिभृद्दक्षिणाशानां तिर्य्यक्त्वज्ञापनाय सः ।
पुच्छं महीतलस्पृष्टं चक्रे कौपीनवाससि ॥")

ज्ञाप्तिः, स्त्री, (ज्ञा+णिच्+भावे क्तिन् ।) ज्ञापनम् । इति सुग्धबोधम् ॥

ज्ञेयं, त्रि, (ज्ञायते इति । ज्ञा+कर्म्मणि यत् ।) ज्ञानयोग्यम् । ज्ञातव्यम् । यथा,—
"ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतः पाणिपादं तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्জ্জितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य धिष्ठितम् ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥"
इति श्रीभगवद्गीतायां १३ अध्यायः ॥

ज्या, शि जरायाम् । इति कविकल्पद्रुमः ॥ (ज्यां-परं-अक्-अनिट् ।) जरा गतवयोवयोभावः ।
ज्या, शि, जिनाति हन्ति । जीनः । इति दुर्गादासः ॥
ज्या, स्त्री, (ज्या+अन्येभ्योऽपीति ङीष्सहाप् ।) धनुर्गुणः । तत्पर्य्यायः । मौर्व्वी २ शिञ्जिनी ३ गुणः ४ इत्यमरः ।२।८।८५॥ शिञ्जा ५ जीवा ६

पतत्रिका ७। इति शब्दरत्नावली ॥ गया ८ वाणासनः ९ द्रुणा १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । २२६ । २० ।
"जग्राह बलमास्थाय व्यथा च युयुजे धनुः ॥")
माता । वसुधा । इति मेदिनी । ये, २ ॥

ज्यानिः, स्त्री, (व्या + "वीव्याव्वरिभ्यो निः ।" उणा ४ । ४८ । इति निः ।) जीर्णता । हानिः । तटिनी । इति शब्दरत्नावली ॥

ज्यायान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + ईयसुन् ज्यादेशश्च ततो "ज्यादादीयसः ।" ६ । ४ । १६० । इत्वात्वम् ।) वृद्धतमः । तत्पर्य्यायः । वर्षीयान् २ दशमी ३ प्रशस्यः ४ । इत्यमरः । २ । ६ । ४३ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति जटाधरः ॥ (यथा, मनुः । ३ । १३७ । [पिता ॥")
"ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोचियः

ज्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ङ, व्यवते । इति दुर्गादासः ॥

ज्युत, इर् दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) इर्, अज्युतत् अज्योतीत् जुज्योत । इति दुर्गादासः ॥

ज्युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थादियुक्तः । ऋ, अजुज्योतत् । ङ, ज्योतते चन्द्रः । इति दुर्गादासः ॥

ज्येष्ठः, त्रि, (अयमेषामतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + इष्ठन् ततो ज्यादेशः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महाभारते । १३ । १४३ । ७ ।
"ज्येष्ठं वर्णमनुप्राप्य तस्माद्रक्षेत वै द्विजः ॥"
ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् इति जैष्ठी सा अस्मिन् मासीति पुनरण् संज्ञापूर्व्वस्य विधेरनित्यत्वान्न वृद्धिः ।) ज्येष्ठमासि, पुं । इति मेदिनी । ठे, ५ ॥ अग्रजः । (यथा, रघुः । १२ । १६ ।
"दृढभक्तिरिति ज्येष्ठे राज्यलक्ष्मीपराङ्मुखः ॥")
अधिकवयाः । इति भरतः ॥

ज्येष्ठतातः, पुं, (तातस्य पितुर्ज्येष्ठः । राजदन्तादिलात् पूर्व्वनिपाते साधुः ।) पितुरग्रजः । इति शब्दरत्नावली ॥ ज्येठा इति भाषा ॥

ज्येष्ठवर्णः, पुं; (वर्णानां ज्येष्ठः श्रेष्ठः निर्द्धारणे तु वर्णेषु ज्येष्ठः । पूर्व्वनिपातः ।) ब्राह्मणः । इति शब्दरत्नावली ॥

ज्येष्ठवला, स्त्री, (ज्येष्ठाख्या बला ।) सहदेवी । इति राजनिर्घण्टः ॥

ज्येष्ठश्वश्रूः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव संज्ञात्वात् पुंवद्भावः ।) पत्न्या ज्येष्ठभगिनी । बड़शाली इति भाषा । तत्पर्य्यायः । कुली २ । इति हेमचन्द्रः ॥

ज्येष्ठसाम, [न्] क्ली, (ज्येष्ठं साम इति नित्यकर्म्मधारयः ।) सामभेदः । तदध्ययनाङ्गव्रतम् । इति मिताक्षरा ॥ (यथा, महाभारते ।१२।३४८।४६।
"ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥")

ज्येष्ठा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृतितारकचित्रयात्मिका । इति कालिदासः ॥ वलयाकृतिः । अस्या देवता इन्द्रः मिश्रगुणः । इति दीपिका ॥ अत्र जातस्य फलम् ।
"सत्कीर्त्तिपुत्रैर्विविधैः समेतो
वित्तान्वितोऽत्यन्तलसत्प्रतापः
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वन्त्यश्वानुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यसुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राजनिर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं यथा । परिणीतत्वे सति भर्त्तुरधिकस्नेहा । इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भगवतीं प्रति महादेववाक्यम् ।
"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! ॥
ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता ।
उत्पन्ना साब्रवीद्देवान् किं कर्त्तव्यं मयेति वै ॥
तामब्रुवंस्तदा देवीं सर्व्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहः संप्रवर्त्तते ॥
तत्तं स्थानं प्रयच्छामो वासस्तत्र शुभानने ! ।
यस्य गेहे कपालास्थिभस्मकेशादिचिह्नितम् ॥
परुषं भाषते नित्यं वदन्त्यनृतवादिनः ।
सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु ॥
तत्र ते सततं स्थानं भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यस्तत्रामति दुर्म्मतिः ॥
तं भजस्व सदा देवि ! कलुषेणावृता भृशम् ।
व्रणाङ्गारकपालाश्मवालुकायसचर्म्मभिः ॥
दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः ।
रमस्व कलिना देवि ! तेषां वेश्मसु नित्यशः ॥
तिलपिष्टञ्च नक्तञ्च कालिङ्गश्चिगुरुञ्जनम् ।
क्षुत्राकं विड्वराहञ्च विल्वकोपातकीफलम् ॥
अलाबुश्लीफलं ये वै खादयन्ति नराधमाः ।
तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा ॥
इत्यादिश्य सुराः सर्व्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः ॥"
इति पाद्मे उत्तरखण्डम् ॥

ज्येष्ठामूलीयः, पुं, (ज्येष्ठां मूलां वा नक्षत्रमर्हति पौर्णमास्यामिति छः ।) ज्येष्ठमासः । इति त्रिकाण्डशेषः ॥ (यथा, ग्रन्थार्थचिन्तामणिः ।
"ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्व्वजम् ॥")

ज्येष्ठाम्बु, क्ली, (ज्यैष्ठं विविधरोगविनाशकत्वात् श्रेष्ठं अम्बु तण्डुलधौतं जलमिति । नित्यकर्म्मधारयः ।) तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चेलुनि जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पुं, (आश्रमोऽस्यास्य इति । आश्रम + इनिः । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥"
"यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः ॥"
इति वचनाच्च गृहस्थाश्रमस्य सर्व्वाश्रमेषूत्कृष्टत्वात् तथात्वम् ।) गृहस्थः । इति हेमचन्द्रः ॥

ज्येष्ठी, स्त्री, गृहगोधा । जेठी इति टिकटिकी इति च भाषा । तत्पर्य्यायः । मुसली २ मुसलीश कुक्षिमतल्या ४ गृहगोधिका ५ [illegible] ६ टुक्टुकी ७ शकुनज्ञा ८ गृहापिका ९ । इति शब्दरत्नावली ॥ तस्याः पतनफलं यथा,—
"निपतति यदि पत्नी दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणकृदिस्था सर्व्वसौख्यं ददाति ॥"
इति ज्योतिषम् ॥
दिग्विशेषे तस्य शब्दफलम् ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः ससुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिश्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरुते च्युतेऽप्येवमूचुः केचिच्च कोविदाः ॥"
इति तिथ्यादितत्त्वम् ॥

ज्यैष्ठः, पुं, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् ङीप् च । सा अस्मिन् मासे इति पुनरण् ।) मासविशेषः । जैष्ठानक्षत्रयुक्ता पौर्णमासी जैष्ठी सा यत्र मासे भवति सः । वृषस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तचान्द्रः । वृषराशिस्थरविकः सौरः । इति स्मृतिः ॥ तत्पर्य्यायः । शुक्रः २ । इत्यमरः । १ । ४ । १६ ॥ ज्येष्ठः ३ । इति शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—
"विदेशवृत्तिः पुरुषः सुतीव्रः
क्षमान्वितः स्यात् खलु दीर्घसूत्रः ।
विचित्रबुद्धिर्विदुषां वरिष्ठो
जैष्ठाभिधाने जननं हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥

ज्यैष्ठसामा, [न्] पुं, (ज्यैष्ठसाम अधीते यः सः । इत्यण् ।) ज्यैष्ठसामा । ज्यैष्ठसामवेदाध्येता । इति मिताक्षरा ॥

ज्यैष्ठी, स्त्री, (ज्यैष्ठानक्षत्रान्विता पौर्णमासीत्यण् ङीप् च ।) जैष्ठपूर्णिमा । इति शब्दरत्नावली ॥ (यथा, तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री जैष्ठी पञ्चदशी सिता ।
मन्वन्तरादयस्ता दत्तस्याक्षयकारिकाः ॥")
ज्येष्ठी च ॥

ज्यो, ङ नियमे । व्रताद्देशे । उपनीतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं नियमार्थे-व्रताद्देशादौ तु सकं-अनिट् ।) व्रतस्यादेशो व्रताद्देशः । ङ, व्यवते यान्निषो नियमो स्यादित्यर्थः ।

व्यवते पण्डितो जनं व्रतमुपदिशतीत्यर्थः। व्यवते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

ज्योतिः, [स्] क्ली, (द्युत दीप्तौ + इसिः। यद्वा, द्युत दीप्तौ + "द्युतेरिसिन्नादेश्च जः।" उणा। २। १११। इति इसिन् दस्य च जः।) दृष्टिः। नक्षत्रम्। (यथा, "ज्योतींष्यग्निश्च मेध्यमश्नन्ति च नाभिवीक्षेत॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये॥) प्रकाशः। इति मेदिनी। से, २३॥

ज्योतिः, [स्] पुं, (ज्योतते इति। द्युत + कर्त्तरि इसिः। द्युत + इसिन् वा।) अग्निः। (यथा,— "तस्यान्तरंग नाभेस्तु ज्योतिः स्थानं ध्रुवं स्मृतम्। तदा धमति वातस्तु देहस्तेनास्य वर्द्धते॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥) सूर्य्यः। इति मेदिनी। से, २२॥ मेघिका। इति राजनिर्घण्टः॥ (विष्णु··· यथा, महाभारते १३।१४६।७६। "स्वधः स्वङ्गः श्रुतानन्दो नन्दिर्ज्योतिर्गणेश्वरः॥")

ज्योतिरिङ्गः, पुं, (ज्योतिषा इङ्गतीति। इगि गतौ + अच्। ज्योतिरिव इङ्गतीति वा।) खद्योतः। इति शब्दरत्नावली॥

ज्योतिरिङ्गणः, पुं, (ज्योतिरिव इङ्गतीति। इगि गतौ + ल्युः।) कीटविशेषः। ज्योनाकपोका इति भाषा। तत्पर्य्यायः। खद्योतः २ ध्वान्तोल्मेषः ३ तमोमणिः ४ हरिद्वन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८। इति शब्दरत्नावली॥ ज्योतिर्व्वीजम् ९ निमेषरुक् १०। इति चिकाण्डशेषः॥

ज्योतिर्व्वीजं, क्ली, (ज्योतिर्व्वीजमिवास्य ज्योतिषो वीजमिव वा।) ज्योतिरिङ्गणः। इति चिकाण्डशेषः॥

ज्योतिर्हंस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः।) दुर्गा। अस्या नामनिरुक्तिर्यथा,— "हस्तं शरीरमित्याहुर्हंस्तश्च गगनं तथा। ज्योतिषि ग्रहनक्षत्राण्यंतिर्हंस्ता ततः स्मृता॥" इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्मयं चक्रम्। ज्योतिर्भिः स्वस्वावस्थानेन विरचितं चक्रं वा।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम्। राशिचक्रम्। यथा, "ज्योतिश्चक्रं सुखो मानमर्हा प्रोवाच केशवः। चातुर्लक्षं ज्योतिषस्य सारं रुद्राय सर्व्वदः॥" इति गरुडपुराणम्॥ अपि च तिथ्यादितत्त्वे। "सप्तविंशतिभेर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्।) वेदाङ्गशास्त्रविशेषः। तत् ग्रहगणितगणशास्त्रम्। इत्यमरटीकायां भरतः॥ "पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता। केरलैः प्राक्तनैश्चैव ————————॥" इति प्रश्नरत्नटीका॥

अस्य सम्बन्धादि यथा,— "अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति चोदितः। अभिधेयश्च जगतां शुभाशुभनिरूपणम्॥ इत्याधययनसंक्रान्तिग्रहयोर्ग्रहकर्म्मणाम्। प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः॥" इति नारदीयम्॥ * ॥

अस्याध्ययनं द्विजैः कर्त्तव्यम्। यथा,— "सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्। वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्॥ विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति। तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा॥ अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः॥" इति नारदः॥ * ॥

शूद्रस्य पाठनिषेधो यथा,— "स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा। शूद्रायासुपदेशन्तु दद्यात् स नरकं व्रजेत्॥" इति गर्गः॥ * ॥

अस्य ज्ञानमावश्यकं यथा,— "वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्व्या विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥ यथा शिखा मयूराणां नागानां मणयो यथा। तद्वदेदाङ्गशास्त्राणां गणितं मूर्द्धनि संस्थितम्॥" इति वेदाङ्गज्योतिषम्॥ * ॥

अस्याध्ययनफलं यथा,— "एवंविधस्य श्रुतिनेत्रशास्त्र-स्वरूपभर्त्तुः खलु दर्शनं वै। निहन्त्यघौघं कलुषं जनानां षड्वर्गजं धर्म्मसुखास्पदं स्यात्॥" इति माधवः॥ * ॥

अस्य ज्ञाने फलं यथा,— "ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम्। ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम्॥" इति गर्गः॥

ज्योतिषिकः, पुं, (ज्योतिर्ज्योतिःशास्त्रं अधीते इति। क्रतूक्थादित्वात् ठक् संज्ञापूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः।) ज्योतिषिकः। इत्यमरटीका॥ (यथा, मार्कण्डेये। "धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाप्लकाः॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च।) तारा। इति हेमचन्द्रः। ज्योतिषशास्त्रज्ञे, त्रि॥

ज्योतिष्कः, पुं, (ज्योतिरिव कायतीति। कै + कः।) चित्रकवृक्षः। मेथिकाबीजम्। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण स्वल्पिका पिबेत्॥" इति चिकित्सितस्थाने चतुर्दशेऽध्याये सुश्रुतेनोक्तम्॥) गणिकारिकावृक्षः। इति रत्नमाला॥

ज्योतिष्काः, पुं, (ज्योतिर्भिः कायतीति। कै + कः।) चन्द्रार्कग्रहनक्षत्रतारकाः। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति। कै + कः टाप् च।) ज्योतिष्मतीलता। इत्यमरटीकायां स्वामी॥

ज्योतिष्टोमः, पुं, (ज्योतींषि चित्रदादयः स्तोमा यस्य। "ज्योतिरायुषः स्तोमः।" ८।३।८२। इति षत्वम्।) षोड़शऋत्विक्साध्ययज्ञविशेषः। तच्च द्वादशप्रातगोदक्षिणा। इति मलमासतत्त्वम्॥ (यथा, महाभारते। ३। २२१। ३९।

"बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति। मतुप् उदित्वात् ङीप् च।) लताविशेषः। मालकङ्गनी इति लताफट्करी इति नयाफट्की इति च भाषा॥ तत्पर्य्यायः। पारावताङ्घ्रिः २ कटभी ३ पिण्या ४। इत्यमरः। २। ४। १५०॥ पारावतपदी ५ नगणा ६ स्फुटवल्गनी ७ पूतितैला ८ इङ्गुदी ९। इति रत्नमाला॥ स्वर्णलता १० अनलप्रभा ११ ज्योतिर्लता १२ सुपिङ्गला १३ दीप्ता १४ मेध्या १५ मतिदा १६ दुर्ज्जरा १७ सरस्वती १८ अम्बष्ठा १९। अस्याः सूक्ष्माया गुणाः। अतितिक्तत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वञ्च। अस्याः स्थूलायाः गुणाः। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञादृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ तीक्ष्णत्वम्। व्रणविस्फोटनाग्निदत्वञ्च। इति राजवल्लभः॥ रात्रिः। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, मात्स्ये।१२०। ६५।

"सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या। अवगाढ़े शुभयतः समुद्रौ पूर्व्वपश्चिमौ॥"

ज्योतिर्विशिष्टे, त्रि। यथा, रघुः। ६। २२।

"नक्षत्रतारायहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सूर्य्यादीनामाधारत्वात् तथात्वमिति बोध्यम्।) ध्रुवः। इति चिकाण्डशेषः॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति। "ज्योत्स्नातमिस्रेति।" ५।२। ११४। इति निपातनात् नप्रत्यय उपधालोपश्च।) चन्द्रज्योतिः। चाँदनी इति हिन्दी भाषा॥ तत्पर्य्यायः। चन्द्रिका २ कौमुदी ३। इत्यमरः। १। ३। १६॥ चान्द्री ४ कामवल्लभा ५ चान्द्रातपः ६ चन्द्रकान्ता ७ प्रीता ८ अम्बततरङ्गिणी ९। (यथा, महाभारते। १। १। ८६।

"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः॥")

ज्योत्स्नायुक्तरात्रिः। इति मेदिनी। ने, ८॥ पटोलिका। इत्यमरटीकायां स्वामी॥ अस्याः गुणाः। त्रिदोषघ्नमलत्वम्। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। दाहरक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥ श्वेतघोषा। इति

रत्नमाला ॥ दुर्गा । यथा,—
"प्रभाप्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"रौद्राये नमो नित्याये गौर्य्यै धात्र्य नमो नमः।
ज्योत्स्नाये चेन्दुरूपिण्ये सुखाये सततं नमः॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्यायः ॥
(प्रभातकालः । यथा, विष्णुपुराणे । २ ।५।३६।
"ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥")
ज्योत्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः।
इति हेमचन्द्रः ॥
ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारणं वृक्ष
इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥
ज्योत्स्नी, स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप्
च । संज्ञापूर्ब्बकस्य विधेरनित्यत्वान्न वृद्धिः ।)
चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति
ख्याता । पटोलिका । इत्यमरः ।२ । ४ । ११८॥
झिङ्गा इति भाषा ॥ रेणुकानाम गन्धद्रव्यम् ।
इति शब्दचन्द्रिका ॥
ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषग्राह्यमधीते
वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्य-
मरः । २ । ८ । १४ ॥
ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।)
दीप्तः । ज्योत्स्नायुक्तः ॥
ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति
ठक् पूर्ब्ववृद्धिश्टाप् च ।) ज्योत्स्नान्विता निशा।
इति शब्दरत्नावली ॥
ज्यौत्स्नी, स्त्री, (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका
व्यस्त्र्याः इत्यण् पूर्ब्ववृद्धिः ङीप् च ।) पूर्णिमा-
युक्तरात्रिः । इति हेमचन्द्रः ॥ ज्योत्स्नी । इत्य-
मरटीकायां रायमुकुटः ॥
ज्वि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां परं-
सकं-अनिट् ।) रेफोपधः । ज्वयति शत्रुं बली ।
इति दुर्गादासः ॥
ज्वी, गि कि ज्याने । गतवत्तुवयोभाव इति यावत् ।
इति कविकल्पद्रुमः ॥ (क्र्यां-चुरां पक्षे भ्वां-परं-
सकं-अनिट् ।) गि, जीयाति जीयः जीगिः ।
कि, जाययति जयति । गिकाभ्यामेव प्राप्तिक-
चुरादिके सिद्धे कि पाठो भ्वादिस्वार्थः । इति
दुर्गादासः ॥
ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) ज्वरति जनो धातुवैषम्यात् । म,
ज्वरयति । इति दुर्गादासः ॥
ज्वरः, पुं, (ज्वरति जीर्णां भवत्यनेन । ज्वर+
करणे घञ् भावे घञ् वा । संज्ञापूर्ब्बक-
त्वात् वृद्ध्यभावः ।) ज्वरणम् । स्वनामख्यात-
रोगः । तत्पर्य्यायः । जूर्णिः २ । इत्यमरः । ३ ।
२ । ३६ ॥ ज्वरिः ३ आतङ्कः ४ रोगश्रेष्ठः ५
महागदः ६ । इति राजनिर्घण्टः ॥ तापकः ७
सन्तापः ८ । इति शब्दरत्नावली ॥ * ॥
तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्बणम् ।
बभूवुर्व्याहवाः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णवं ज्वरम् ।
तं चिक्षेप ज्वरं हन्तुं माहेशं रणमूर्द्धनि ॥"*॥
माहेशज्वराकारो यथा,—
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥"*॥
तस्य भेदाः ।
"वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरस्त्रिदोषश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा, हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुर्व्याहान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूतं वपुः कृत्वा पञ्चसु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्तश्चतुर्भागः खोरकश्च चतुर्थकः ॥
मानुषेष्वथ खेदाय वस त्वं प्रविभज्य वै ।
जातिष्वथावशेषासु निवस त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागः तस्य
चतुर्भागं कृत्वा एकांशेन पञ्चसु वस द्वितीयेन
एकान्ता देवास्त्रेषु तृतीयांशः खोरकः चतु-
र्थांशेन मानुषेषु वस ॥"
"वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ॥"
आतुर्य्यं निःसारता ॥
"पक्षिणीषु हिमो भूत्वा पृथिव्यामपि चोष्णरः ।
अपां तु नीलिकां विद्यात् शिखोद्भेदश्च वह्निजाम् ।
गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोव्यसंस्थारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च नान्यस्तां विषहिष्यति ॥"
तस्य गारुडोक्तनिदानादिर्यथा,—
धन्वन्तरिरुवाच ।
"वक्ष्ये ज्वरनिदानं हि सर्व्वज्वरविबुद्धये ।
ज्वरो रोगपतिः प्राणा श्चलुराजोऽग्नयोऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोद्भूनयनोद्भवः ।
तत्सन्तापो मोहमयः सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिशलकः कुक्कुरेषु ।
इन्द्रमदो जलदेषु नीलिका ज्योतिरोषधिषु
भूम्यामघरो नाम ॥ * ॥
"दृङ्नासस्भ्रूहनं कासः स्तम्भः शीर्षं त्वगादिषु ।
अङ्गेषु शीतपिड़कामाचोदर्द्दः कफोद्भवे ।
काले यथास्वं सर्व्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा आलस्यमेव च ॥
वस्तिर्विसर्गविलया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं सुखम् ॥
यच्च सुप्तगुरुत्वञ्च गात्राणां बहुसूत्रता ।
न विजीर्णा न चाश्वानिर्ज्जरस्यामस्य लक्षणम् ॥
सुप्तत्वामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरग्नौ निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽक्षिमूर्द्धावमिदेहदाह-
कण्ठास्यपाकारुचिपर्व्वभेदाः ।
उन्निद्रता संभ्रमरोमहर्षा
वृम्भातिवाक्त्वं पवनात् सपित्तात् ॥*॥
तापप्रलापारुचिपर्व्वशिरोरुक्-
पीतसभ्रसनकासविबन्धाः ।
प्रीतिज्वातजनितज्वरलिङ्गम् ॥ * ॥
प्रीतस्तम्भस्वेददाहव्यवस्था-
त्वष्णाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्रतिक्तास्यता च
श्लेष्मं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्द्दाहोऽत्र च मुहुर्मुहुः ।
तद्दृच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतेर्हाऽवर्त्तनम् ॥
साश्रुणी कलुषे रक्ते भयो लुलितपक्ष्मणी ।
अक्ष्णी पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः ॥
सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुसस्ताङ्गसन्निभा ॥
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्तःसुपीड़ितम् ।
व्यवायित्वाच्च सौक्ष्म्याच्च वहिर्मार्गं प्रपद्यते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विदग्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः ॥
असाध्यः सोऽन्यथा लक्ष्यो भवेद्दैकलदोषिवा ।
अन्यच्च सन्निपातोक्तो यच्च पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा दाहं विदधाति पुरोगु वा ।
तद्वद्वातकफौ प्रीतं दाहादिर्दुस्तरस्तयोः ॥
प्रीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
प्रीते ग्लान्यरुके मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदभमिक्रमाः ॥ * ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारतः ॥
चतुर्द्धा तु कृतच्छेददाहाद्यैरभिघातजः । * ।
अभाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् ॥
सयथाग्नौषधैर्वर्ग्यं सरुजं कुरुते ज्वरम् ।

ग्रहावेशौषधिविषक्रोधभीशोककामजः ॥
अभिघङ्गादृग्रहेणासिन्न कस्मात्तासरोदने ।
ओषधीगन्धवे मूर्च्छा शिरोरुग्वमथुः श्वयः ॥*॥
विषाम्मूर्च्छातिसारास्यशोषता दाहलड्भ्रमः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे ॥
कामाद्मोहरुचिर्दाहो हीनिद्राधीधृतिक्षयः ॥
ग्रहादौ सन्निपातस्य रूपादौ मरुतस्तयोः ॥
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसद्भतमौ मतौ ॥*॥
तत्राभिचारिकैर्मन्त्रैर्धूपमानस्य तप्यते ।
पूर्वचेतस्ततो देहस्ततो विस्फोटलड्भ्रमैः ॥
सदाहमूर्च्छैर्ग्रस्तस्य प्रबलं वर्द्धते ज्वरः ।
इति ज्वरोऽधा दृष्टः समासाद्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरोऽधिकं विकाराः स्युरन्तःशोभो मलग्रहः ॥
बहिरेव बहिर्भागे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वातादेः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः सुदुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्यात् पित्तश्च शरदि तस्य चानुबलः कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानुशयाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं मधेदनु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमज्ञानिर्व्वहुसूत्रता ॥
न प्रवृत्तिर्न विजीर्णा न क्षुत् क्षामज्वरार्त्तिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रेण लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलावलात् ॥
प्रायशः सन्निपातेन भूयसाप्युपद्रुयते ।
सप्तमः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशुक्रहार्द्रिमोत्तमाः स्वापिनो मलाः ॥
तापयन्तस्तनूं सर्व्वां तुल्यदुष्टादिवर्द्धिताः ।
बलिनो गुरवस्तद्वद्विशेषेण रसान्विताः ॥
सततं निशतिद्वन्द्वा ज्वरं कुर्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं सपचेत्ततः ॥
सर्व्वाकाररसादीनां शुद्धाशुद्धाऽपिवा क्रमात् ।
वातपित्तकफैः सप्तदशद्वादशवासरान् ॥
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ।
इत्यभिप्रेतशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
तथा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्धाशुद्धैः ज्वरः कार्यो दीर्घमध्यच वर्त्तते ।
कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्टादेर्व्यत्यन्तमतो बलम् ।
न प्रवृत्तिका विमं यस्मात्तद्विषयान्वितः ॥
शोऽरिपक्षो ज्वर कुर्याद्विषमज्वरविभाक् ।
दोषः प्रवर्त्तते तेषां खे काले ज्वरयन् बली ॥
निवर्त्तते पुनश्चैव प्रत्यनीकबलाबलः ।
द्वीयदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्य्यवैवर्ण्यजाड्यादीनादधाति सः ।
व्यासन्नविहतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः स्वपाकालेन सङ्गवान् ।
दोषो रक्ताश्रयः प्रायः करोति सन्तं ज्वरम् ॥
अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके ॥
ग्राही पित्तानिलाम्भूर्ड्स्त्रिकस्य कफपित्ततः ।
स पृष्ठास्थानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्म्मेदो मज्जास्थ्यन्यतरस्थिते ।
मज्जामूत्रचैत्यपरः प्रभावमनुदर्शयेत् ॥
द्विविधं कफेन जङ्घाभ्यां सपूर्व्वं शिरसोऽनिलात् ।
अस्थिमज्जारूपगते चातुर्थकविपर्य्ययः ॥
त्रिधा चाहं ज्वरयति दिनमेकञ्च सुञ्चति ।
बलाबलेन दोषाणामनुवेलादिजन्मनाम् ॥
पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत् ।
ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा ॥
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
तुल्यो ब्रूयाच्च दोषाणां दुश्चिकित्स्यश्चतुर्थकः ॥
सूक्ष्मात् सूक्ष्मतरास्थेषु दूरादूरतरेषु च ।
दोषो रक्तादिमार्गेषु शनैरल्पशिरेषु यत् ॥
याति देहस्य नाशेषं सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः स्वपाकालानुसारवान् ।
यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम् ॥
कालेनाप्नोति सदृग्रान् स रसादींस्तथा तथा ।
दोषो ज्वरयति क्रुद्धस्त्रिरात्रिरतरेण च ॥*॥
भूमौ स्थितं जलैः सिक्तं कालेनैव प्रतीच्यते ।
अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा ॥
क्षेपं कृत्वा विषं यद्वदाशये नीयते बलम् ।
कुप्यत्याप्नवलं भूयः काले दोषविषं तथा ॥
एवं ज्वराः प्रवर्त्तन्ते विषमाः सततादयः ॥*॥
उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ॥
अरोचको वमिः श्वासः सर्व्वस्मिन्नृसृगे ज्वरे ।
रक्तनिष्ठीवनं तृष्णा अक्ष्णोस्तु पिड़कोद्गमः ॥
दाहरागश्रमममदप्रलापो रक्तसंश्रिते ।
लड़्घनाग्निसदृवर्चस्कमन्तर्दाहो भ्रमस्तमः ॥
दौर्ब्बल्यं गात्रशैथिल्यं मांसस्थे मेदसि स्थिते ।
स्वेदोऽतिलवणा वमनं दौर्गन्ध्यं चासहिष्णुता ॥
प्रलापो ग्लानिरुच्छिरस्त्रिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरूर्द्ध्वाधःश्वासाङ्गक्षेपकूजनम् ॥
अन्तर्दाहो वहिःशैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं सन्धिच्छेदनं स्वभेदृता ॥
शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चान्ये तु विपर्य्यये ॥
प्रस्निग्धमिव गात्राणि श्लेष्मणा गौरवेति च ।
मन्दज्वरः प्रलापस्तु सप्तमीतः स्मृतः प्रलेपकः ॥
नित्यं मन्दज्वरो रूक्षः प्रीतः सूक्ष्मेण गच्छति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेदङ्गबलाशकः ॥*॥
हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति ।
स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः ॥
कफवातौ समौ यत्र हीनपित्तस्य देहिनः ।
तीक्ष्णोऽथवा दिवा मन्दो जायते रात्रिजो ज्वरः ॥
दिवाकरातीतबले यामार्द्धे विशोधिते ।
शरीरे नियतस्थाता ज्वरः स्यात् पौर्व्वरात्रिकः ।
आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते ।
तदार्द्धं शीतलं देहे ह्यर्द्धं चोष्णं प्रजायते ॥*॥
कार्ये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः ।
उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ॥*॥
रसरक्ताश्रयः साध्यो मांसमेदो गतश्च यः ।
अस्थिमज्जागतः कृच्छ्रस्तैले साङ्गेर्हतप्रभः ॥*॥
विसंज्ञो ज्वरदेगार्त्तः सक्रोध इव वीक्ष्यते ।
सदोषशब्दश्च शुक्लदृग्वं सुञ्चति वेगवत् ॥*॥
देहो लघुर्व्यपगतक्लमसोष्मतापः
पाको सुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः स्रवः प्रकृतिगामि मनोऽभिलिप्सा
कण्ठश्च मूर्द्धि विगतज्वरलक्षणानि ॥
इत्यादि महापुराणे गारुड़े ज्वरनिदानं समाप्तम् । १५२ अध्यायः ।

अथ ज्वरस्य चिकित्सा ।

धन्वन्तरिरुवाच ।

"ज्वरोऽधा पृथक् द्वन्द्वसङ्घातागन्तुजः स्मृतः ।
सुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
पृतशीतं जलं दद्यात् पिपासाज्वरशान्तये ॥१॥
नागरं देवकाष्ठञ्च धान्याकं वृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरितायं ज्वरापहम् ॥२॥
आरग्वधाभयासुस्ततिक्तयन्थिकनिम्बितः ।
कषायः पाचनं सामे सशूले च ज्वरे हितः ॥३॥
मधूकसारभिन्नूत्यवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥४॥
चित्रदृष्टिशालाचिफलाकटुकारग्वधैः कृतः ।
सक्षारो भेदनं क्वाथः पेयः सर्व्वज्वरापहः ॥५॥
महौषधन्तृतासुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥६॥
अपामार्गजटा कट्या लोहितैः सप्तपत्रभिः ।
बद्धा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम् ॥७॥
गङ्गाया उत्तरे कूले ह्यपुत्रस्तापसो मृतः ।
तस्मै तिलोदकं दद्यान्नश्येत्तेनाहिको ज्वरः ॥८॥
गुड़ूच्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च ।
स्नुहीकाया बलायाश्च सिद्धाः स्नेहाः ज्वरं क्षिपेत् ॥९॥
धात्री शिवा कणा वह्निक्वाथः सर्व्वज्वरान्तकः ।१०
ज्वरातिसारहरणमौषधं प्रवदाम्यथ ।
एष्टिपर्णीबिलाविल्वनागरैरुत्पलधान्यकैः ॥
पाठेन्द्रयवभूनिम्बसुस्तपर्पटकाः स्मृताः ।
जयन्त्याममतीसारज्वरं रक्तसमुद्भवाः ॥११॥
नागरातिविषासुस्तभूनिम्बाब्दतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सार्व्वातीसारनाशनः ॥१२॥
सुस्तपर्पटकोदीच्यश्रृङ्गवेवयुतां पयः ।

शालपर्णी पृश्निपर्णी दृहती कण्टकारिका ॥
बलाश्वदंष्ट्राविश्वानि पाठा नागरधान्यकम् ।
एतदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
बिल्वचूतास्थिनिर्य्यूहः खर्जं मध्वतिसारगुत् ।१४।
अतीसारे हितस्तक्रात् कुटजत्वक्फलात्कृतः ॥१५॥
वत्सकातिविषाविश्वबालाकन्दकषायकः ।
सविश्व आमशूलार्त्तो ज्ञतीसारे सशोणिते ॥"१६

इति गारुड़े १७४ अध्यायः ॥

अपि च ।

"हस्तवद्वं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिगुद्भवेत् ॥ १७ ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाशयेदाहज्वरञ्च परमेश्वर ! ॥ १८ ॥
शिखायाश्चैव तद्वद्धं भवेदैकाहिकादिगुत् ।१९।
एतत् सकाक्षिकं पीतं रक्तकुष्ठज्वरादिगुत् ॥"२०

इति तत्रैव १९३ अध्यायः ॥

"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रीषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च ग्रासनम् ॥२१
अभयामलकद्राक्षाः पाठा चैव विभीतकम् ।
शर्करा च समश्चैव जयं ज्वरहरं भवेत् ॥"२२

इति च गारुड़े १९९ अध्यायः ॥ * ॥

वैद्यकमते शिवज्वरस्योत्पत्तिर्यथा,—
"दक्षयज्ञापमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥
तस्य विपक्षष्टकारणकथनपूर्ब्बिका सम्प्राप्तिर्यथा,
"मिथ्याहारविहारस्य दोषा स्रामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः सूरसानुगाः॥"
तस्य सामान्यलक्षणं यथा,—
"खेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥"*॥
तस्य पूर्ब्बरूपं यथा,—
"श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनस्रवः ।
इच्छाद्वेषौ सुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः ।
व्यप्रहर्षश्च शीतश्च भवत्युपस्थिते ज्वरे ॥"*॥
सन्तताद्विज्वराणां प्रति नियतदूष्या धातवो यथा,
"सन्ततं रसरक्तस्थः सौम्येद्युः पित्तसंश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ॥
सन्तत्या श्लोऽविसर्गी स्यात् सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
केचिद्भूताभिसङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकाद्याही दृष्टाद्दातकफात्मकः ॥
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ॥
जङ्घाभ्यां श्लैष्मिकः पूर्ब्बं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ॥
मध्ये अहनी ज्वरयत्यादावन्ते च मुञ्चति ॥"*॥
वातबलासकज्वरो यथा,—
"नित्यं मन्दज्वरी रूक्षः शूनकक्षेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥"
विषमज्वरविशेषाः ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धोष्णं प्रजायते ॥"*॥
शीतपूर्ब्बो ज्वरो यथा,—
"लक्ष्यौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥"
दाहपूर्ब्बो ज्वरो यथा,—
"करोत्यादौ तथा पित्तं लक्ष्यं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥
ह्यावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्ब्बस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥"
उक्तवातादिज्वराणां धातुविशेषदूष्यतया अधिकलक्षणानि यथा,—
"गुरुता हृदयोत्क्लेशः सदनं हृद्गलरोचकौ ।
रसस्थ तु ज्वरे लिङ्गं देयञ्चास्योपजायते ॥ १ ॥
रक्तनिष्ठीवनं दाहो मोहश्चर्द्दनविभ्रमौ ।
प्रलापः पिड़का हृष्या रक्तप्राप्ते ज्वरे नृणाम्॥२
पिच्छिलोद्वेष्टनं हृष्याहृष्टमूत्रपुरीषतः ।
उष्मान्तर्द्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्चर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता॥४
भेदोऽस्थां कूजनं श्वासो विरेकश्चर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥ ५ ॥
तमःप्रवेशनं हिक्का कासः श्वैत्यं क्षमिस्तथा ।
अन्तर्द्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
श्लेष्मसः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सामाह ।
"अंशांशं यत्र दोषाणां निर्व्वेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियान्तत्र विदधीत चिकित्सकः ॥
सामान्यतो ज्वरी पूर्ब्बं निर्व्वाते निलये वसेत् ।
निर्व्वातमाशुयो वह्निमारोग्यं कुरुते यतः ॥
व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः ॥
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥
वंशव्यजनजः सोम्यो रक्तपित्तप्रकोपनः ।
चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा रूक्षाः सुपूजिताः ।
नवज्वरी भवेद्व्यत्यादगुरुण्यवसनावृतः ।
यथर्त्तुपक्वं पानीयं पिबेत् किञ्चिन्निवारयन् ॥
विनापि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते ।
न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥"*।
ततो ज्वरे वर्ज्जनीयान्याह सुश्रुतः ।
"परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं स्निग्धरं जलम् ॥
क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी ॥"
परिषेकः स्नानादिः । प्रदेहो अनुलेपनाभ्यङ्गादिः । स्नेहान् पाने निषिद्धान् ॥ * ॥
निषिद्धानिषेधादोषमाह ।
"श्लेष्मं कुर्य्यात् मदं मूर्च्छां भ्रमं तृष्णामरोचकम् ।
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ॥"
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येवं दूषणमुक्तम् ।
"व्यायामाध्वरसंदुष्टिर्व्यवायात् स्तम्भमूर्च्छनम् ।
स्तम्भश्च स्नेहपानात्तु मूर्च्छा कुर्य्यान्मदोऽरुचिः ॥
गुर्व्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अग्निसादः खरत्वञ्च स्रोतसां चाप्रबर्हणम् ॥"
स्तम्भरिति व्यवायादित्यत्र सम्बध्यते । स्वप्नात् दिवास्वापात् ॥ * ॥ अन्यच्च वर्ज्जयेत् ।
"सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्यन्नपानानि विरुद्धाध्यशनानि च ।
व्यायाममतिचेष्टाञ्चाभ्यङ्गं स्नानञ्च वर्ज्जयेत् ।
तेन ज्वरः शमं याति न शान्तञ्च पुनर्भवेत् ॥
ज्वरी लङ्घनं कुर्य्यादिति चरकः वाग्भटश्च ।"
"आमाशयस्थो हृत्वाग्निं सामो मार्गं पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
अस्यायमर्थः । "यतो हेतोः आमाशयस्थो दोषो वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा आच्छाद्य सामः व्यपकाहारसहितोमार्गं रसमार्गं पिधापयन् । अचार्थत्वादहेतावपि कर्मणीन् । तेन पिदधदित्यर्थः । ज्वरं करोति तस्माद्धेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
"त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते प्रौढ़नं तच्च मूलादुत्क्लेशनात् ॥"
चक्रश्च ।
"तरुणन्तु ज्वरं पूर्ब्बं लङ्घनेन उपाचरेत् ।
आमदोषमलिङ्गाद्वा लङ्घयीत यथाविधि ॥"
अन्यच्च ।
"ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्ध्यै यथाबलम् ॥
दोषग्रेषस्य पाकार्थमग्नेः सम्मुखतायै च ।
लङ्घितस्याप्यदोषस्य यवागूपानमाचरेत् ।
शालिषष्टिकमुद्गानां यूषं वा भक्षमाहरेत् ।
पञ्चकोलेन संसिद्धा यवागूर्मध्यलङ्घने ॥
अतिलङ्घितञ्च तं ज्ञात्वा तस्य सन्तर्पणं हितम् ।
द्राक्षादाड़िमखर्ज्जूरप्रियालैः सपरूषकैः ॥
तर्पणार्हं तु कर्त्तव्यं तर्पणं ज्वरशान्तये ॥"
अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः ।
"आनद्धस्तिमितैर्दोषैर्व्याप्तं कालमातुरः ।
तावत्स्वनशनं कुर्य्यात्ततः संसर्गमाचरेत् ॥"
आनद्धस्तिमितैर्दोषैर्निश्चलैर्दोषैः सम्बद्धः ।
संसर्गं औषधान्नादिप्रसङ्गम् ॥ * ॥
यत्तु चरक आह ।
"चतुःप्रकारा संशुद्धिः उपवासो मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"
चतुःप्रकारा संशुद्धिः वमनविरेचननिरूहवस्ति-

ग्निरोविरेचनानि । न लघुवासनं तस्य दृंहण-
त्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । तथा च
सुश्रुतः ।
"शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः ।
तल्लङ्घनमिति ज्ञेयं दृंहणात्तु पृथग्विधम् ॥
लङ्घनात् कर्षणादन्यत् शरीरपोषकमित्यर्थः ॥*॥
नन्वत्र आमलङ्घितमितेर्हेमेरित्यादिपूर्वोक्तसुश्रुत-
वचनात् सामान्यतो ज्वरिणा यथाग्निरूपं
लङ्घनं क्रियते तथा चतुःप्रकारा संशुद्धिः
इत्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्वै-
र्ज्वरिभिः कथं न क्रियते । तत्रोच्यते । वम-
नादिकमवस्थाविशेषेषु क्रियते न तु सर्वज्वरेषु ।
तथा च सुश्रुतः ।
"श्लेष्मोल्लेशे बलिने देयं वमनं श्लैष्मिके ज्वरे ।
पित्तप्राये विरेकस्तु कार्यः प्रग्रथिलाग्नये ॥"
प्रग्रथिलाग्नये अत्र प्रोपसर्गः वैपरीत्ये तेन गृहाग्नये इत्यर्थः ॥ * ॥
"सरसेऽनिलजे कार्यं सोदावर्ते निरूहणम् ।
कफाभिपन्ने शिरसि कार्यमूर्ध्वविरेचनम् ॥"
अपि च । सर्वज्वरिभिः पिपासानियहश्च न
कार्यः ॥ यत आह हारीतः ।
"दृष्ट्वा गरीयसी घोरा सदाःप्राणविनाशिनी ।
तस्माद्देयं ज्वरार्ताय पानीयं प्राणधारणम् ॥"
अतोऽवस्थाविशेष एव पिपासासहनम् ॥ * ॥
ज्वरिभिर्मारुतसेवनं न कार्यम् । सुश्रुतेन प्रवात-
सेवनस्य सर्वथा निषिद्धत्वात् अतो मारुतसेवनं
अवस्थाविशेष एव युक्तम् । आतपसेवनचा-
वस्थाविशेष एव संग्रहीतम् ॥ * ॥
"लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते ।
तदा तं सुखवैरस्यदाहारोचकनाशनैः ॥
ज्वरघ्नैः पाचनैर्दीप्तैः कषायैः समुपाचरेत् ।"
इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः । व्यायामोऽपि न कार्यस्तस्यातिनिषिद्धत्वात् । अवस्था-
विशेषे पुनःपार्श्वपरिवर्तनादिरूपः सोऽपि
कार्यः । तस्माच्चतुःप्रकारां संशुद्धिरित्यादि-
श्लोके लङ्घनपदं कर्षणपर्यायमिति निर्णीतम् ॥
अथाग्निरूपस्य लङ्घनस्य फलमाह ।
"लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले ।
विष्वग्वातं लघुत्वं च क्षुत्तैवास्योपजायते ॥
लङ्घनेन अनशनेन दोषे प्रदहे क्षयं नीते ।
यत आह ।
"आहारं पचति ह्यग्निर्दोषानाहारवर्जितः ।"
पचतीति । सन्धुक्षितेऽनले व्याख्यादग्धदोषे
संशोधे क्षयं प्रदीप्ते । यथोक्तसम्प्राप्तिसामग्री
विघटनात् । विष्वग्वातं शरीरस्य गौरवाभावेन
लघुत्वम् । क्षुत् बुभुक्षा च जायते इत्यर्थः ॥ * ॥
अन्यदाह सुश्रुतः ।
"अनवस्थितदोषार्थे लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
अनवस्थितदोषार्थैः अनवस्थितः स्वस्थानादि-
त्वतो गतो दोषोऽपि यस्य तस्य ज्वरिणः ।
काङ्क्षा अन्नाभिलाषः । रुचिः लङ्घनेनामपाका-
न्मुखशोषादिनाशे सुखस्य यत् प्रसन्नत्वं सैव
रुचिः शोभा । रुचिः स्त्री दीप्तौ शोभायामभि-
लाषयोरिति मेदिनीकारः ॥ * ॥ संप्रति क्षतस्य
लङ्घनस्य लक्षणमाह ।
"वातमूत्रपुरीषाणां विसर्गोद्गारलाघवे ।
हृदयोद्गारकण्ठास्य शुद्धौ तन्द्राक्लमे गते ॥
क्षुदे जाते रुचौ वापि क्षुत्पिपासासहोदये ।
क्षतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥"
हृदयस्य शुद्धिरनवरोधः । उद्गारशुद्धिःधूमा-
ज्योद्गाराभावः । कण्ठस्य शुद्धिः कफाद्यलिप्तत्वम् ।
आस्यशुद्धिः मुखस्य प्रसन्नतरत्वम् । तन्द्राक्लमे
तन्द्रया क्लमः तस्मिन् । तन्द्रा निद्रावत् ।
क्लमोऽत्र ग्लानिः । क्षुत्पिपासासहोदये क्षुत्-
पिपासाभ्यां सह युगपदुदये । अन्तरात्मनि
मनसि । एतानि लक्षणानि मिलितान्येव सम्यक्
क्षतं लङ्घनं बोधयन्ति । न तु प्रत्येकम् ॥ * ॥
हीनस्य लङ्घनस्य लक्षणमाह ।
"कपोतक्लेद्यः सङ्क्लासः क्षीवत्वं सहुर्मुहुः ।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने ॥
कपोतक्लेद्यः कपस्य वमनायोपस्थितिः ॥
क्लासः हृदयात् कण्ठनिर्गमः ॥ * ॥
अतिग्रथितस्य लङ्घनस्य लक्षणमाह ।
"पर्वभेदोऽङ्गमर्दश्च कासः श्लेष्मा मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः ॥
मनसः संभ्रमोऽभीक्ष्णमूर्ध्ववातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽति कृते भवेत् ॥
दौर्बल्यं श्रोत्रनेत्रयोः कर्णनेत्रयोः स्वविषय-
ग्रहणासामर्थ्यम् । मनसः संभ्रमः भ्रान्तिः ।
ऊर्ध्ववात उद्गारबाहुल्यम् । हृदि तमः अन्ध-
कारप्रविष्टस्येव ज्ञानम् ॥ * ॥ कथं रचनं
लङ्घनं कारयेदित्याह ।
"बलाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
अयमर्थः । एनं ज्वरितं बलविरोधिना अनति-
बलक्षयकारिणा लङ्घनेन उपपादयेत् उप-
चरेत् । कुत इत्यपेक्षायाह । यदर्थ इति । यस्मै
आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः ।
तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः ॥*॥
केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः ।
तद्धि मारुतलक्षणात्क्षुन्मुखशोषश्रमान्वितैः ।
न कार्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः ॥
न क्षयाध्वश्रमक्रोधकामशोकचिरज्वरे ।
तत्र अनशनं उल्बणमारुतयुक्तेन ज्वरिणा न
कार्यम् । मारुतोऽत्र निरामो बोद्धव्यः । सामे तु
मारुते लङ्घनं कार्यमेव । यत आह तन्त्रान्तरे ।
"अवश्यमेव कुर्वीत ज्वरी सामे समीरणे ।
लङ्घनं श्लेष्मपाकार्थं न तदूर्ध्वं यथा कफे ॥
तदूर्ध्वं आमपक्वादूर्ध्वम् । अतएवोक्तम् ।
कफपित्ते ह्रवे धातू सहिते लङ्घनं बहु ।
आमक्षयादूर्ध्वमपि वायुर्न सहते क्षयम् ।"*॥
आमस्य लक्षणमाह ।
"आहारस्य रसः सारो यो न पक्वोऽग्निबाधवात् ।
आमसंज्ञां स लभते बहुव्याधिसमाश्रयः ॥"
तन्त्रान्तरे ।
"आममन्नरसं केचित् केचित्तु मलसञ्चयम् ।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते ॥"
अन्यच्च ।
"अपि पक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम् ।
यदन्नं सर्वगात्राणामाम इत्यभिसंज्ञितः ॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः ।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः ॥"
अत्र सामस्य वातस्य लक्षणमाह ।
"वायुः सामो विबन्धाग्निसादतन्द्रालङ्घनैः ।
वेदना श्लोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत् ॥
विचरेदृग्युगपच्चापि यस्यातिकुपितो भृशम् ।
खेष्वाद्यैर्वृद्धिमायाति मेघस्यूर्ध्वे निशि ॥"
विचरेदृग्युगपद्वायुरामश्चैककालं विचरेत् ।
कुपितः सामो वायुः भृशमतिशयेन यस्यात्य-
ङ्गानीत्यर्थः ॥ * ॥ तस्यैव निरामस्य लक्षण-
माह ।
"निरामो विशदो रूक्षो निर्विबन्धोऽल्पवेदनः ।
विपरीतगुणैः श्रान्तिं क्लिन्धैर्याति विशेषतः ॥*॥
अत्र प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह ।
पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु ।
अम्लीकाकण्ठहृद्दाहकरं ग्लानौ तथा क्लिरम् ॥
अम्लीका अम्लिलपुप्पी इति लोके ॥ * ॥
तस्य निरामस्य लक्षणमाह ।
"निरामं पीतमात्रान्नमतुग्रं कटुकं सरम् ।
दुर्गन्धि रुचिलङ्घित्रबलवर्धनमीरितम् ॥
अथ सामस्य कफस्य लक्षणमाह ।
"आविलस्तन्तुलस्त्यानः कण्ठदेशेऽवतिष्ठते ।
सामो बलाग्नो दुर्गन्धस्तृट्क्षुधोरभिघातकृत् ॥
स्त्यानः संहतः ॥
तस्य निरामस्य लक्षणमाह ।
"श्लेष्मा निरामो निर्गन्धः फेनवांश्चेदवानपि ।
भवेत् स पिच्छितः पाण्डुरास्यवैरस्यनाशनकृत् ॥"
अथ सामस्य व्याधेर्लक्षणमाह ।

"आलस्यतन्द्राहृदयाविशुद्धि-
दौर्बल्यप्रसक्तावसन्नतताभिः ।
गुरूदरत्वारुचिसुप्तताभि-
रामान्वितं व्याधिमुदाहरन्ति ॥
आमं जयेल्लङ्घनकोलपेया
लघ्वन्नरूपौदनतिक्तयूषैः ।
विरूक्षणस्वेदनपाचनैश्च
संशोधनैरूर्ध्वमधस्तथैव ॥

तद्धि मारुतलक्षणात्क्षुदित्यादिश्लोके ज्वरापि निरा-
मैव विवक्षिता तेन निरामज्वरान्तिके लङ्घनं
न कार्यम् । सामायान्तु ज्वरायां लङ्घनं कार्यमेव ।
तथा सुखश्लोषश्रमादापि निरामावेव विवक्षितौ ।
सामयोस्तु तयोर्लङ्घनं कार्यमेव । गुर्विणीबाल-
वृद्धादिभिरपि निरामैरेव लङ्घनं न कार्यम् ।
सामैः पुनस्तैरपि लङ्घनं कार्यमेव । क्षयो धातु-
क्षयो राजयक्ष्मा । वातजे ज्वरे लङ्घनं न कार्यम् ॥
ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः ।

क्षपितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
हारीतश्च ।
क्षुधा गरीयसी घोरा सदाःप्राणविनाशिनी ।
तस्मादेयं क्षुधार्त्ताय पानीयं प्राणधारणम् ॥
अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिवेदुयत आह सुश्रुत एव ।
जीवनं जीविनां जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सर्व्वो न क्वचिद्वारि वारयेत् ॥
जीवनं जलम् ॥ किञ्चित्तु वारयेदेव । तथा च ।
ज्वरे नेत्रामये कोठे मन्देऽग्यादरे तथा ।
अरोचके प्रतिश्याये प्रसेके क्षयथौ क्षये ॥
ग्रहे च मधुमेहे च पानीयं मन्दमाचरेत् ॥
प्रसेके सुखप्रसेके । मन्दमाचरेत् अल्पं पिबेत् ।
यत आह ।
"अतियोगेन सलिलं क्षुद्यतेऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तञ्च ज्वरितस्य विशेषतः ॥"
तच्च जलं ज्वरी शृतं न पिबेदित्याह सुश्रुतः ।
नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सदाःशुद्धौ तथाध्माने आधौ वातकफोद्भवे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विभ्रमे ।
हिक्कायां स्नेहपाने च शृतं वारि विवर्ज्जयेत् ॥"
अन्यच्च स एव ।
"श्लेष्मणेन शृतेन ज्वरस्तोयेन वर्द्धते ।"
अत्र शृतं जलमक्वथितं निषिद्धम् । तथा सति क्वथितं ग्राह्यं आयातम् । तच्च क्वथितस्य विधिर्गौणाच्च ।
"काथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ।
तत्तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु ॥
निर्व्वेगं मृदुभिः । क्वथितस्य विधयानाह सुश्रुतः ।
"वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु क्षुद्यते ।
दीपनं स्यात् कफच्छर्दि वातपित्तानुलोमनम् ॥
तद्धि माईवलघ्वोषसोतसां शृतमन्यथा ॥"
वाग्भटश्च ।
"क्षुद्यायां प्राप्तसुप्तायां पिबेद्वातकफज्वरे ।
तत् कफं विलयं नीत्वा क्षुधामाशु निवर्त्तयेत् ॥
उदीर्य्य चापि स्रोतांसि समुत्क्लेश्य विशोषयेत् ।
वातपित्तकफक्लेदश्लेष्मणश्चापि सारयेत् ॥" * ॥
अधोद्योदकस्य लक्षणं गुणाश्च ।
"काथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामदोषजाम् ।
नाशनं वह्निसंदीप्तिं पथ्यमुष्णोदकं सदा ॥" ॥"
अथर्त्तुभेदे जलस्य पाकभेदः ।
त्रिपादशेषं सलिलं शीते शरदि शस्यते ।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥" ॥
अन्ये तु ।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ।
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिदुधाः प्राहुर्ज्ज्वेष्टागमदर्शनात् ॥"
केचित्तु ।
"वसुध्वङ्गेषु वाजेषु वेदेषु त्रिषु पक्षयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥"
अत्र दोषाणां यथोक्तबलता हीनता वा तथा व्यवस्था कल्पनीया ॥
"तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातशुत् ।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यत्रिप्रदं लघु ॥" ॥
त्रिपादहीनस्य तन्नामान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणं गुणाश्च ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥
सद्यो ज्वरहरं प्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मग्रोथोदरापहम् ॥"
अथर्त्तुभेदे जलस्य ग्रहणाय देशभेदः ।
"हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम् ।
वसन्तग्रीष्मयोः कौप्यं वार्य्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ।
विषवत् पञ्चपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम् ।
ग्रहणं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्ज्जुष्टं शीतं शीतकरैर्निशि ॥
श्लेष्मलं शूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
वर्ष्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
अन्यच्च ।
"शरदृगस्तेरुदयादखिलं सलिलं हितम् ।
इति सुश्रुतश्च ।
"कार्त्तिके मार्गशीर्षे च पयोमाद्यं प्रशस्यते ॥"
यथर्त्तुपक्वमपि जलं विषयविशेषे शीतलं पिबेदित्याह सुश्रुतः ।
"दाहातिसारपित्तास्रमूर्च्छामदविषार्त्तिषु ।
मूत्रकृच्छ्रे पाण्डुरोगे क्षुद्याच्छर्द्दिभ्रमेषु च ।
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥"
क्वथितस्य जलस्य शीतलकरत्वविशेषे गुरुविशेषमाह सुश्रुतः ।
"शृतस्यु तन्निदोषघ्नं यदन्तर्व्वाष्पशीतलम् ।
अरुक्षमनभिष्यन्दि क्लमिमृद्ध्वरहृल्लघु ॥
धारापातेन विक्षिप्तं दुर्ज्जरं पवनाहतम् ।
अन्तर्व्वाष्पशीतलं ग्रिहितमेव शीतलम् ।
अन्यापरेऽपि विशेषाः ।
"दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति ।
रात्रौ शृतं दिवा पीतं गुरुत्वमधिगच्छति ॥
तत्तु पर्य्युषितं वह्निगुणभूयः विदोषजित् ।
गुर्व्वभ्यपाकं विष्टम्भि सर्व्वरोगेषु निन्दितम् ॥
शृतं शीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्म्मुष्णेऽपि तथा शीतः पुनस्तप्तो विषोपमः ॥"
रात्रौ तृष्णोदकस्य लक्षणमन्यदाह ।
"अष्टमेनाग्निवेश्म चतुर्थेनार्द्धकेन वा ।
अथवा क्षणनेनैव सिद्धसुप्तोदकं वदेत् ॥"
तस्य गुणाः ।
"श्लेष्मानिलामदोषघ्नं दीपनं वह्निबोधनम् ।
श्वासकासज्वरहरं पीतसुप्तोदकं निशि ॥"
अन्यच्च ।
"भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतसुप्तोदकं निशि ॥"
रात्र्यादुप्तोदकञ्च तत्रैव पिबेदित्याह ।
"उष्णं तदग्निजननं लघ्वक्षं वह्निबोधनम् ।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥
ग्रस्तं स्रोतःश्वासमूत्रेषु सदाःशुद्धौ नवज्वरे ॥"
विषयविशेषे त्वाममेव जलं शीतलं पिबेदित्याह सुश्रुतः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
श्रमश्रमणरोगेषु तमके वमथौ तथा ॥
धूमोष्णारेऽविदग्धेऽन्ने ग्रीष्मे च सुखकक्षयोः ।
अङ्गेषु रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
शीतमम्भः आममेव न तु क्वथितम् । क्वथितन्तु शीतं दाहादिष्वं यदुक्तं तत् सज्वरेषु । विज्वरेषु तु दाहादिष्वामं शीतं प्रशस्यते इति भेदः ॥
आमादिजलानां जठराग्निना पाककालावधिमाह ।
"आमं जलं पाकमुपैति यामं
पक्वं पुनः शीतलमर्द्धयामम् ।
पक्वं कटुत्वञ्च ततोऽर्द्धकालं
कालात्ययः पीतजलस्य पाके ॥
पित्तमद्यविषोत्थेषु तिक्तकैः शृतशीतलम् ॥"
जलं हितमिति शेषः । ॥ तिक्तानि बहुलानि तेभ्यो निर्द्धार्य्य योगमाह सुश्रुतः ।
"सुरसपर्पटकोशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् छर्द्दिदाहज्वरार्त्तये ॥"
छर्द्दाम्र धान्यकम् । यत आह निघण्टौ धन्वन्तरिः । कुसुम्बुदः सर्षिकारा छर्द्दा धान्यं वितुन्नकमित्यादि । तद्गुणाश्च ।
"धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयश्रमश्वासकासज्वरप्रणाशनम् ॥"
चक्रदत्तवङ्गसेनशार्ङ्गधरादयः छर्द्दास्थाने नागरं पठन्ति । तद्यथा,—
"सुरसपर्पटकोशीरचन्दनोदीच्यनागरैरिति ।
नागरं कटुकमपि नाम पित्तजनकं मधुरपाकित्वादिति तेषामभिप्रायः । नागरं नागरमुस्तकं इति केचित् । क्वचिदेकदेशेन समुदायोऽवगम्यते । यथा भीमो भीमसेन इति । ठीसटे तु नागरस्थाने पद्मकम् । ॥ एतस्य प्रक्रिया । चन्दनैरित्यत्र सहार्थे तृतीया । तेन सुरसादिभिः षड्भिरामैरेव मुस्तैः सहितं जलं शृतं जलमेव केवलं यथर्त्तुपक्वं पश्चात्तच्छीतलीकृतं दद्यात् । तथा च वङ्गसेनः ।
यदत्र शृतशीतास्यु षड्भागादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं यावद्भेषजं प्राप्तिकेऽम्भसि ॥
अस्यायमर्थः । यत् हेतोः । अत्र जले ।
शृतशीतास्यु शृतास्यु केवलास्वेव यथर्त्तुपक्वास्यु शीतलीकृतास्यु । षड्भागादि द्रव्यं प्रयुज्यते । आममेव संशुद्धं जले स्थाप्यते । ततः प्रदेयत्वात् कर्षमात्रं द्रव्यं समुदितं षड्भागादि

प्रास्थिकेऽह्नि प्रथमाद्ये कथितशीतले जले क्षेपं ग्राहयेत्। अतएव षड़ङ्गमभिधाय षड़ङ्गपानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन् पक्षे चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्कषायलेपयोरेव प्रयोक्तुसुक्तम्। यत आह। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति। षड़ङ्गपानीयमिदम्॥ * ॥ षड़ङ्गादेः पाने तु विधातवेऽ प्रक्रिया भिन्ना तामाह वङ्गसेनः। कर्षमात्रमिह द्रव्यं ग्राहयेत् प्रास्थिकेऽह्नि। अर्द्धप्रस्थं प्रयोक्तव्यं पाने पेयादिसम्विधौ॥ आदिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥* पानप्रक्रियां शार्ङ्गधरोऽप्येनामेवाह।

क्षुण्णं द्रव्यं पलं साध्यं चतुःषष्टिपले जले। अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसम्विधौ॥ पानप्रयोगश्च षड़ङ्गसुक्तवान्। अस्मिन् पक्षे चन्दनं रक्तं ग्राह्यम्। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति वचनात्॥ * ॥

अथ रक्तचन्दनस्य गुणाः।

तत्तु रक्तं हिमं स्वादु स्फर्द्दिष्णामपित्तजित्। तिक्तं नेत्रहितं दृष्यं ज्वरव्रणविषापहम्॥

षड़ङ्गादि प्रयुज्यते इत्यादि ग्रन्थेन वक्ष्यमाणा योगा उच्यन्ते। ते यथा,—

श्रीपर्णीचन्दनोशीरपरूषकमधुकजम्। पानं पित्तज्वरं हन्याच्छारिवाद्यं सशर्करम्॥

अत्र श्रीपर्णीपरूषकयोः पक्षे ग्राह्ये। मधूकस्य तु पुष्पम्। अन्यच्च।

हन्यात् सयष्टीमधुकं तथैवोत्पलपूर्व्वकम्। पानं घृतं हिमं किंवा सोत्पलं शर्करायुतम्॥

हन्यात् पित्तज्वरमिति शेषः। उत्पलमत्र कमलमित्यादि।

दिवास्वापं न कुर्व्वीत यतोऽसौ श्लेष्मकोपदः। ग्रीष्मवर्षासु कालेषु दिवास्वापो निषिद्ध्यते॥ उचितो हि दिवास्वापो नित्यं तेषां शरीरिणाम्। वातादयः प्रकुप्यन्ति येषामस्वपतां दिवा॥ * ॥

तेषां दिवास्वप्न उचितस्तामाह।

व्यायामप्रमदाध्ववाहनरतान् क्षान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीड़ितान्।
चौरान् चौरकषान् स्त्रियून् मदहतान् दृष्ट्वा नृपाज्ञीर्ष्णवो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत्॥ * ॥

अथ वातिकादिज्वराणां पाकावधिमाह।

वातिकः सप्तरात्रे तु दशरात्रेण पैत्तिकः। श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥*

रसस्यामलेऽवधिमतिक्रम्यापि ज्वरस्तिष्ठति। यत आह सुश्रुतः।

बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे। लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते॥ तदा तं सुखवैरस्यक्षयारोचकनाशनैः। कषायैः पाचनैर्द्दीप्तैर्ज्वरघ्नैः समुपाचरेत्॥ * ॥

ज्वरस्य तारुण्यमध्यावस्थता जीर्णतावधिः। आसप्तरात्रात्तरुणं ज्वरमाहुर्मनीषिणः। द्वादशाहमभिव्याप्य मध्यं जीर्णं ततः परम्॥ आसप्तरात्रादिति। अत्राङ् मर्य्यादायाम्। रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तमदिवसादर्व्वाक् ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे।

ज्वरे व्यतीते षड़हे जीर्णं इत्युच्यते बुधैरिति। दशरात्रात् परं जीर्णमाहुरन्ये मनीषिणः। अतएव जातूकर्णः। जीर्णज्वरोदग्रदिवस इति॥ अथ ज्वरे भेषजप्रयोगसमयः।

वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके। श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥ सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः। अतएवोक्तम्।

पाचनेदातुरं सामसौषधं सप्तमे दिने। ग्रमनेनाथ वा हत्वा निरामं तमुपाचरेदिति॥ शार्ङ्गधरेणापुक्तम्।

गुड़ूचीपिप्पलीमूलनागरैः पाचनं हृतम्। वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनीति॥ हारीतेनापुक्तम्।

एतां क्रियां प्रयुञ्जीत षड़ाद्यं सप्तमेऽहनि। पिबेत् कषायसंयोगात् पेयां ज्वरविनाशिनीम्॥ एतां क्रियां लङ्घनादिरूपाम्। कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः॥ खरनादेनाप्युक्तम्।

इति षड़ाह्निकः प्रोक्तो नवज्वरहरो विधिः। ततः परं पाचनीयं ग्रमनीयं ज्वरे हितम्॥ ततः परं सप्तमेऽहनीत्यर्थः॥ वाग्भटश्च।

सप्ताहादौषधं केचिदाहुरन्ये दशाहतः। लघुन्ने भोजिते केचिद्देयमामोल्बणे न तु॥ सप्ताहात् सप्ताहमारभ्येत्यर्थः। अत्र ल्यब्लोपे कर्म्मणि पञ्चमी। अतएव सुश्रुतः।

दशरात्रात् परं सर्व्वैर्हातव्यमिति निश्चितम्। अतएव दशरात्रेण द्वादशाहेनेति लङ्घनवता यतीतेनेत्यर्थः॥ अत्र चरकस्त्वेवमाह।

ज्वरितं षड़हेऽतीते लघुन्नं प्रतिभोजितम्। पाचनं ग्रमनीयं वा कषायं पाययेत्तु तम्॥ अस्यायमर्थः। ज्वरितं षड़हे लङ्घनेन यतीते सप्तमेऽहनि भोजितलघुन्नं अष्टमे दिने कषायं पाययेदित्यर्थः॥ तथा च सुश्रुतः।

सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्॥ सप्तरात्रात् परं अष्टमेऽहनीत्यर्थः। केचिच्चरकादयः। चक्रदत्तोऽपि।

सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः। निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥ एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयोर्विकल्पः॥ * ॥ तत्रापि वयोबलाग्निदोषदेशकालोचितं कुर्य्यात् भेषजमन्नञ्च दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः।

"पैत्तिके वा ज्वरे देयमल्पकालमसुस्थिते। अचिरज्वरितस्यापि भेषज्यं दोषपाकतः॥" इति। अस्यायमर्थः। अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृष्ट्वा भेषज्यं देयम्। न तु तत्र दशरात्रापेक्षा। तथा अचिरज्वरितस्यापि पैत्तिकेतरनवज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भेषज्यं देयमित्यर्थः॥ * ॥ दोषपाकलक्षणमाह सुश्रुतः।

रूढौ ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधमिति॥ ज्वरे रूढौ स्वस्थीभूते। मलेषु वातपित्तकफमूत्रपुरीषेषु। प्रचलेषु स्वमार्गसञ्चारिषु। पक्वं निरामम्। दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम्। दोषाणां दुष्टवातपित्तकफानां प्रकृतिः ज्वरस्य तदुपद्रवाणां चोत्पादनम्। तस्या वैकृत्यं वैपरीत्यं तस्मात् दोषपाकज्ञानं एकेषां मते।

क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम्। दोषप्रकृतिरित्याहो निरामज्वरलक्षणम्॥ दोषप्रकृतिः दोषाणां स्वमार्गसञ्चारः। माधवनिदाने उत्साहस्थाने अत्राह इति पाठः॥*॥

ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्। अचानुक्ते प्रभातं स्यात् कषायेषु विशेषतः॥ सुखभेषजसम्बन्धो निर्विघ्नस्तरुणे ज्वरे। तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजम्॥ सुखभेषजं क्वाथः तस्य सम्बन्धः पानम्। यत आह।

न कषायं प्रयुञ्जन्ति नराणां तरुणे ज्वरे। कषायेणाकुलीभूता दोषा नेतुं सुदुस्तराः॥ आकुलीभूताः प्रवृद्धाः स्वमार्गं परित्यज्य यतस्ततो गताः। अत्र कषायशब्देन क्वाथो गृह्यते॥ * ॥ उक्तश्च क्वाथस्य पर्य्यायाः।

पृष्टं क्वाथः कषायश्च निर्य्यूहः स निगद्यते। तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजमिति॥ तत्र तरुणे ज्वरे भेषजं सुखभेषजं क्वाथरूपम्। तोयपेयादिसंस्कारैर्निर्दोषम्। यत आह।

न तु कल्पनमुद्दिश्य कषायः प्रतिषिद्ध्यत इति। कल्पनं तोयपेयायवाग्वादिकम्॥ * ॥ ननु। खरसश्च तथा कल्कः क्वाथश्च हिममाशुटौ। ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्॥ इति वचनात् खरसादयोऽपि कथं न निषिध्यन्ते। तन्न।

यः कषायः कषायः स्यात् स वर्ज्यस्तरुणे ज्वरे। इति।

यः कषायः कषायः स्यात् चतुर्थभागावशेषकरणेन अष्टमभागावशेषकरणेन वा कषायवर्ज्यः कषायरसश्च स्यात्। स कः क्वाथः। स तरुणज्वरे निषिद्धः॥ * ॥ क्वाथवाचकस्य कषायस्य लक्षणमाह।

पादशिष्टः कषायः स्यादयं षोड़शगुणाम्भसा। क्वथितोऽतः षड़ङ्गादि न निषिद्धो नवज्वरे॥ अस्यायमर्थः। यः कात्यायनात् षोड़शगुणेनाम्भसा क्वथितः पक्वः अथ च पादशिष्टः चतुर्थभागावशेषः स कषायः स्यात्। अतः षड़ङ्गादिस्तरुणज्वरे न निषिद्धः। अपाकादर्द्ध-

पाकाद्योक्तलक्षणाभावेन कषायत्वाभावात् ॥*॥
तरुणज्वरे कषायस्य दोषमाह।
"दोषा वृद्धाः कषायेण स्तम्भितास्तरुणे ज्वरे।
स्तम्भान्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम्॥
कषायेण स्तम्भिताः प्रवृत्तये निवारिताः।
यत आह कषायरसगुणान्।
कषायः स्तम्भनः प्रीतो रूक्षः पित्तकफापहः।
इत्यादि।
स्तम्भान्ते आध्मानं कुर्व्वन्ति। न विपच्यन्ते सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्ते इति यावत्॥ अन्यच्च।
"न च्यवन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः।
तिर्य्यग्विमार्गगा वाते घोरं कुर्य्युर्नवज्वरम्॥*॥
अनुपस्थितदोषाणां वमनं तरुणे ज्वरे।
वृद्धोगं श्वासमानाहमोहञ्च कुरुते भृशम्॥"
अस्यायमर्थः। कफादिदोषोपस्थितौ स्वयमेव चेद्भवति वमनं न तद्दोषाय। अनुपस्थितदोषाणान्तु तरुणे ज्वरे वमनं यत्नकृतं वृद्धोगादीन् करोतीत्यर्थः। एतेन वचनेन तरुणे ज्वरे यत्नाद् वमनं निषिद्धम्॥*॥
अवस्थाविशेषे तदपि कर्त्तव्यमित्याह।
"सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः॥"
वमनं वेति विकल्पो लङ्घनापेक्षया वमनार्हस्येत्यनेन गर्भिण्यतिवृद्धातिवृद्धादिनिरासः। वाग्भटोऽपि वृद्धवाग्भटः॥
"वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत्।
वमनं श्लेष्मबाहुल्याद्बाल्याल्लङ्घनकर्षितम्।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः॥"
अनशनमिति शेषः। अनेन वचनेन गुर्व्विण्यादीनामनशननिषेधात् ज्वरे सामे पाचनं निरामे शमनं पथ्यान्नमण्डादिकञ्च दद्यात्॥*॥
पाचनशमनयोर्लक्षणमाह।
"यत् पचत्यामदोषादीन् पचेद्दोषांस्तद्धि पाचनमुच्यते॥
न शोधयति यद्दोषान् समान्नोदीरयत्यपि।
समीकरोति संवृद्धांस्तत् संशमनमुच्यते॥"
न शोधयति नोर्द्धाधोमार्गाभ्यां पातयति, नोदीरयति न वर्द्धयति॥*॥ तयोः संप्रदानं कालञ्चाह।
"पाययेदातुरं सामं पाचनं सप्तमे दिने।
शमनेनाथवा दृष्ट्वा निरामं तमुपाचरेत्॥
तस्मादादौ प्रदेयन्तु पाचनं दिवसत्रयम्।
शमनीयं प्रदेयन्तु पञ्चरात्रं ततः परम्॥
शोधनं दीपनञ्चैव एकरात्रं प्रदापयेत्॥"
इत्यत्रिसंहितातः॥ अन्यच्च।
"शस्यञ्चैवाल्पदोषञ्च शमनीयैरुपाचरेत्॥"
नञ्।
"लालाप्रसेको वृत्तास्यो हृदयाप्युद्गारोचकौ।
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता॥
क्षुन्माद्यो-बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम्॥
भेषजं श्यामदोषस्य भूयो जनयति ज्वरम्॥"
भूयो बाहुल्येन। अन्यच्च।
"पाययेद्दोषहरणं मोहादामज्वरे तु यः।
स सुप्तं कृष्णसर्पन्तु करेणैव पराम्शेत्॥"
इति वचनादामज्वरे भेषजनिषेधात् कथं सामे ज्वरे पाचनं देयम्। उच्यते निरुपद्रवे सामे ज्वरे पाचनं देयम्। सोपद्रवे तु सामे भेषजं निषिद्धम्। तथा च वाग्भटः।
"सप्ताहात् परतोऽदृष्टे सामे स्यात् पाचनं ज्वरे।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत्॥"
अदृष्टे निरुपद्रवे। स्तब्धे सोपद्रवे॥*॥ अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः।
"नागरं देवकाष्ठञ्च धामकं वृहतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरितेभ्यो ज्वरापहम्॥
धामकं रौहिषम्। तदलाभादुशीरं दद्यात्। वृहतीद्वयं वृहत्फला सूच्यफला वृहती। क्षुद्रा वृहती चेति। कण्टकारीद्वयं वा दद्यात्॥ कण्टकारीद्वयं शुण्ठी धामकं सुरदारु चेति शार्ङ्गधरेण उक्तत्वात्। नागरादिक्वाथः सर्व्वज्वरेषु॥*॥ अथ सामान्यतः संशमनीयान्याह सुश्रुतः।
"अथ संशमनीयानि कषायाणि निबोध मे।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता॥
वृक्षीरविल्ववर्षाभूपयः सोदकमेव च।
पचेत् क्षीरावशेषं तत् पेयं सर्व्वज्वरापहम्॥
वृक्षीरः श्वेतपुनर्नवा। वर्षाभूः रक्तपुनर्नवा। तथाच मदनपालः।
"पुनर्नवः श्वेतमूलो वृक्षीरो दीर्घपत्रकः।
पुनर्नवा परा रक्ता वर्षाभूः रक्तपुष्पकः॥"
पाकप्रकारमाह।
"क्षीरमष्टगुणं द्रव्यात् क्षीराक्षीरं चतुर्गुणम्।
क्षीरावशेषं पातव्यं क्षीरपाके ह्ययं विधिः॥"
द्रव्यात् पलपरिमितात्॥ अन्यच्च।
"वृक्षकादिगुणं क्षीरं स्निग्धपासारमेव च।
तत् क्षीरशेषं कथितं पेयं सर्व्वज्वरापहम्॥
गुडूचीधान्यकाटिष्टं पञ्चकं रक्तचन्दनम्।
एषां क्वाथः सुप्रसिद्धः सर्व्वज्वरहरः स्मृतः॥
दीपनो दाहवृक्षासक्षाच्छर्द्दारुचीर्हरेत्॥"
गुडूच्यादिक्वाथः॥*॥ संशोधनं तरुणज्वरिणो निषिद्धं तदाह सुश्रुतः।
"वृद्धिं मूर्च्छां मन्दमोहं भ्रमवृद्धिमज्वरान्।
संशोधनस्य पानेन प्राप्नोति तरुणज्वरी॥"
संशोधनस्य लक्षणमाह।
"स्थानाद्वृद्धिर्मलेदूर्द्धमधो वा दोषसञ्चयम्।
संशोधनं तदेव स्याद्देवदाल्याफलं यथा॥"
निषिद्धमपि संशोधनमवस्थाविशेषे देयं यत आह।
"रोगे शोधनसाध्ये तु यं विद्याद्दोषदुर्ब्बलम्।
तं समीक्ष्य भिषक् कुर्य्याद्दोषप्रध्वंसनं वृद्धौ॥"
शोधनसाध्यान् रोगानाह।
"सद्योज्वरे विषेऽजीर्णे मन्दाग्नावरुचौ तथा।
सान्यरोगे च वृद्धोगे कासे श्वासे च वामयेत्॥
जीर्णज्वरगरच्छर्द्दिगुल्मप्लीहोदरेषु च।
मूले शोथे मूत्रघाते कृमिरोगे विरेचयेत्॥"
दोषदुर्ब्बलं दोषैरुपचितैर्दुर्ब्बलं न तु उपवासादिक्लान्तम्। अतएव समीक्ष्येति। अन्यच्च॥
"बले दोषे वृद्धौ कोष्ठे नेत्रेतात्र बलं नृणाम्।
अथापतत् दुर्ब्बलस्यापि शोधनं हि तदा भवेत्॥"
कुतो बलं नापेक्षणीयमित्याशङ्क्यायामाह।
तदा तस्यामवस्थायां शोधनं दुर्ब्बलस्यापि दोषदुर्ब्बलस्यापि अथापतत् भवेत्। छर्द्यादिथाधिक्षत् न भवतीत्यर्थः॥*॥ बलवतः पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुतः।
"पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महाभयम्।
विषमं वा ज्वरं कुर्य्यादलक्षणापादमेव च॥"
पक्वः लङ्घनतिक्ताम्बुपानपेयादिभिः। अनिर्हृतः अधोमार्गेणाहृतश्चेत्। महाभयं विषमज्वरं चातुर्थकम्। तस्यैव महाभयत्वादिति गदाधरः॥ गम्भीरमिति कार्त्तिकः॥ महाभयं महाकष्टं वा। बलस्यापादं बलक्षयम्॥*॥
संशोधनमाह।
"आरग्वधगुन्द्रिकसुस्तितिक्ता-
हरीतकीभिः कथितः कषायः।
सामे समूले कफवातपित्त-
ज्वरे हितो रेचनपाचनश्च॥"
आरग्वध धनवहेरा॥ अन्यच्च।
"पथ्यारग्वधतिक्ताचित्रदामलकैः पृथक् तोयम्।
पाचनसारकसूक्तं मुनिभिर्ज्वरिणे ज्वरे सामे॥"
इति आरोग्यपञ्चकल्पयम्॥*॥
"अनन्ता बालकं सुस्तं नागरं कटुरोहिणीम्।
पिष्ट्वा सुखाम्बुना कल्कं पाययेदक्षसम्मितम्॥
कल्कः खल्वेन कालेन हन्यात् सर्व्वज्वरानयम्।
विदध्यात् कोष्ठसंशुद्धिं दीपयेच्च हुताशनम्॥"
अनन्ता सारिवा। इति सारिवादिकल्कः॥*॥
संशोधनं संशमनञ्च येषां निषिद्धं तानाह।
"पीताम्बुर्लङ्घनक्षीणो जीर्णो भुक्तः पिपासितः।
न पिबेदौषधं यत्तु संशोधनमथेतरत्॥"
पीताम्बुः पीततिक्ताम्बुः। भुक्तः भुक्तवानित्यर्थः। अत्राधवसितादित्वात् कर्त्तरि क्तप्रत्ययः। इतरत् संशमनम्॥*॥
"त्रिफला रजनीयुग्मं कण्टकारीयुतं वृटी।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडूची धन्वयासकः॥
कटुका पर्पटो मुस्तं चायमाणा च बालुकम्।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः॥
यवानीन्द्रयवो भार्गी शिग्रुबीजं सुरेणुका॥
वचा वत्सकपद्मकोशीरचन्दनातिविषा बला॥
शालीपर्णी पृश्निपर्णी विड्ङ्गं तगरं तथा।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम्॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचनम्।
पुष्करीकञ्च काकोली पत्रकं जातिपत्रकम्॥
तालीशपत्रमेतानि समभागानि चूर्णयेत्।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम्।

ज्वरांश्च निखिलान् हन्यान्नात्र कार्या विचारणा॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमांस्तथा।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्॥
ग्रीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं क्लमाम्।
कासं श्वासञ्च पाण्डुञ्च कृद्रोगं कामलामपि॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत्।
ग्रीतामुना पिबेदेतत् सर्वज्वरनिवृत्तये॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्वेषां चूर्णमेतत् प्रणाशनम्॥"
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्ग्यभावे कण्टकारीमूलम्। सौराष्ट्राभावे स्फटिकां दद्यात्। तगराभावे कुष्ठं देयम्। जीवकर्षभकयोरभावे विदारीकन्दस्य भागद्वयं दद्यात्। पुष्करीकं श्वेतकमलम्। काकोल्यभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रिकाभावे खर्जूरतालौ प्रदीयते। इति। अथवा कण्टकारीजटा देया। इति सुदर्शनचूर्णम्। *।
"ग्रटी निशाद्वयं शुण्ठी दारु पुष्करमूलकम्।
एला गुडूची कटुका पर्पटश्च सवासकः॥
भार्गी किरातितिक्तश्च दशमूलं तथैव च।
क्वाथमेषां पिबेत् क्षौद्रसिन्धुचूर्णयुतं नरः॥
ज्वरान् सर्वान् इतं हन्ति नात्र कार्या विचारणा॥"
अद्भुतमद्भुतमेतत्॥ *।
"हरीतकीबिल्वदृढदारुकर्षा पृथग्भवेत्।
पलद्वयं कणा शुण्ठी गुडूची गोक्षुरो वरी॥
सहदेवी विडङ्गश्च प्रत्येकं पलसम्मितम्।
मधुना वटिकां कृत्वा खादेत् ज्वरमपोहति॥
क्वाथं क्वाथं मलक्षारं वह्निमान्द्यं नियच्छति॥
जाया दशाश्वा अरुजा षडश्वा
सचन्दनं लोहितचन्दनञ्च;
त्वक्पत्रकं वारि सुरा सशुक्ता
प्रत्येकमेतानि पलोन्मितानि॥
किरातितिक्तक्षितृतासतिक्ता-
न्द्रतात्वगपर्पटकण्टकार्याः।
विडङ्गविश्वामलकानि वासा-
रसानिशाधातवश्चसिन्धुवाराः॥
एतानि देयानि पृथक् पलार्द्ध-
मानानि सर्वाण्यि च भेषजानि।
कल्कानमीषां विदधीत गव्य-
दुग्धेन वै सार्द्धतुलामितेन॥
तैलं तिजानान्तु तुलाप्रमानं
तेनैव कल्केन घृतैः पचेत्तु।
हन्यात् ज्वरान् तैलमिदं समस्तान्
कुर्याद्बलं वीर्यमतीवपुष्टिम्॥
विमर्द्दनादाशु परिश्रमं श्रमं
भ्रमं नयेत् संजनयेत् द्युतिं तनोः।
तथा यथामस्यिससुद्भवामपि
प्रहृत्य निद्रां सुखमाप्नुयेत् सुखम्॥"
अजशृङ्गी। वारि वासा। रसा राम्ना।
इति क्वाथादितैलम्॥ *।
"क्वाथरससमं तैलं तैलाल्लस्तु चतुर्गुणम्।
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः॥
समूर्वारोहिणीरास्नाशृताक्षामधुकैः समैः।
सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिना॥
सर्वज्वरक्षयोन्मादश्वासापस्मारवातनुत्।
यक्ष्मराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते॥"
मस्तु दधिजलम्। कौन्ती रेणुका। चन्दनमत्र श्वेतमेव न तु रक्तम्। रोहिणी कटुकी। इति च लाक्षादितैलम्॥ *।
"लाक्षा हरिद्रा मञ्जिष्ठा फेनिलं मधुकं बला।
लामज्जकं चन्दनञ्च चम्पकं नीलमुत्पलम्॥
प्रत्येकमेषां पलमुष्टीः पक्त्वा तोये चतुर्गुणे।
चतुर्भागावशेषे तु गर्भे चैतत् समापयेत्॥
रेणुका पद्मकञ्चैव वाणिगन्धा तथैव च।
वेतसं चोरकं कुष्ठं देवदारु नखं त्वचम्॥
घृतपुष्पा पुष्करीकं मांसी मधुकमेव च।
एभिरुन्मितैः कल्कैः कषायेणैव पेषितैः॥
मस्तुसुक्तारनालानामाढ्याढ्यकमावपेत्॥
क्षीराढ्यकसमायुक्तं तैलप्रस्थं विपाचयेत्॥
अभ्यङ्गात्तैलमेतद्धि ग्रीवं दाहमपोहति।
अपोहति तथा वातं पित्तं श्लेष्मभवं ज्वरम्॥
सप्रलापं सदाहञ्च तालुशोषभ्रमान्वितम्।
ग्रहोपसृष्टा ये बाला रक्तःसंदूषिताश्च ये॥
तेषां कष्टं प्रशमयेत्तैलं लाक्षादिकं महत्॥"
फेनिलं वदरम्। लामज्जकमुशीरवत् पीतच्छविर्लक्षणविशेषः।
लामज्जकं यदा न स्यादुशीरं दीयते तदा।
चम्पकमित्यस्य स्थाने कुत्रापि गैरिकं इति पाठः।
नीलोत्पलस्थाने तु कुसुदं देयमित्यपि।
समापयेत् प्रक्षिपेदित्यर्थः। चोरकं ग्रन्थिपर्णस्य भेदः भण्टिडर इति नेपालदेशे भवति। तदभावे ग्रन्थिपर्णं देयम्। पुष्करीकं श्वेतकमलम्। मस्तु दधिजलम्। शुक्तं सन्धानभेदः। आरनालमपि सन्धानभेदः। इति महालाक्षादितैलम्॥ *॥ अथ नवज्वरे रसाः।
"क्षतो गन्धकशुद्धः ग्रोषणञ्च
सर्वैस्तुल्या शर्करा मत्स्यपित्तैः।
भूयो भूयो मर्दयेत्तं चिरात्रं
वह्नेर्दद्यः प्रह्वदेरद्रवेण॥
तापे ग्रीतं वीक्षनेत्सक्तभक्तं
तृष्णाकाद्यं पथ्यमेतत् प्रदिष्टम्।
अग्नौ चोग्रं हन्ति सद्यो ज्वरन्तु
पित्ताधिक्ये मद्यं तोयञ्च दद्यात्॥"
अस्य प्रक्रिया। पारा शुद्ध भाग १ गन्धकशुद्ध भाग १ सोहागाभ्रष्ट भाग १ मरिच भाग १ शर्करा भाग ४ रोहुमत्स्यकपित्त भाग ३। अमुं प्रतिदिनं सर्वं दिनत्रयं मर्दयेत्। रसमिमं रक्तित्रयमितमार्द्रकरसेन दद्यात्। ओदनं तक्रं तृष्णाकफलं भोक्तुं दद्यात्। अथनाद्यैः ग्रीतलमुपचारं कुर्यात्। उदकमक्षरीरसो नवज्वरेषु॥ *। रसरत्नप्रदीपे।
"अद्यात् समं क्षतरसशुद्धपेन
छिन्नूजगन्धं परिमर्द्य यामम्।
नवज्वरे वह्नियुगं चिरस-
मार्द्राम्भसायं ज्वरधूमकेतुः॥"
प्रक्रिया। पारा शुद्धगन्धकशुद्धछिन्नूजशुद्धसशुद्धफेनसभागं सर्वं याममेकमार्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसेन दिनत्रयं नवज्वरी भक्षयेत्। दिनत्रयान्नवज्वरो नश्येत्। इति ज्वरधूमकेतुः॥ *। रसेन्द्रचिन्तामणौ।
"शुद्धः क्षतो विषो गन्धः प्रत्येकं ग्राह्यसंमितः।
धूर्त्तबीजं त्रिगुणं स्यात् सर्वेभ्यो द्विगुणा भवेत्॥
हेमाह्वा कारयेदेषां चूर्णं सूक्ष्मं प्रयत्नतः।
जम्बीरजीरकैर्द्वैधचूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसेनापि ज्वरं हन्ति चिदोषजम्।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्॥
विषमञ्च ज्वरं हन्यान्नवं जीर्णञ्च सर्वथा।
महाज्वराङ्कुशो नाम्ना रसोऽयं सर्वसंमतः॥"
प्रक्रिया। शुद्धपारा शुद्धगन्धक शुद्धविष प्रत्येकं टङ्क १ धत्तूरबीज टङ्क ३ धोकटङ्क १२ सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥*। सर्वज्वरेषु ग्राह्यंधरे।
"एको भागो रसात् शुद्धाच्छैवेयः पिप्पली शिवा।
आकारकरभो गन्धः कटुतैलेन शोधितः॥
पलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी।
एकत्र मर्दयेच्चूर्णमिन्द्रवारुणिकारसैः॥
माषोन्मितां वटीं कृत्वा दद्यात् सद्योज्वरे बुधः।
छिन्नारसानुपानेन ज्वरघ्नी वटिका मता॥"
शैवेयः छड़ इति लोके। शिवात्र हरीतकी। आकारकरभः अकरकरहा इति लोके। चतुर्भागमिता अमी शैवेयादयः षट् वसुदिता भागचतुष्टयमिताः। इति ज्वरघ्नीवटिका॥*। ग्राह्यंधरे।
"रसं गन्धञ्च दरदं जैपालं क्रमवर्द्धितम्।
दन्तीरसेन संपिष्य वटी गुञ्जामिता कृता॥
प्रभाते सितया सार्द्धमसिता ग्रीतवारिणा।
एकेन दिवसेनैषा नवज्वरहरी भवेत्॥"
इति च ज्वरघ्नीवटिका॥ *। रसरत्नप्रदीपे।
"रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च।
पथ्या विभीतकं धात्री दन्तीबीजञ्च शोधितम्॥
चूर्णमेषां समांशानां द्रोणपुष्पीरसैः पुटेत्।
वटीं माषनिभां कुर्यात् भक्षयेन्नूतने ज्वरे॥"
इति नवज्वरीहरीवटी। इति नवज्वरे रसाः॥*।
अथ सामान्यज्वरे रसाः।
"शुद्धं क्षतं विषं गन्धं धूर्तबीजं त्रिभिः समम्।
चतुर्थांशं द्विगुणं शोधं चूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसैः किंवा जम्बीरस्य रसैर्युतम्।
महाज्वराङ्कुशो नाम्ना सर्वज्वरविनाशनः॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमं वा चिदोषं वा ज्वरं हन्ति न संशयः॥"
प्रक्रिया। शुद्धपाराटङ्क १ शुद्धविषटङ्क १ शुद्धगन्धटङ्क १ धत्तूरबीजटङ्क ३ शोटिटङ्क ४ पीपरीटङ्क ४ मरिचटङ्क ३ सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥

सर्व्वज्वरेषु सर्व्वरसग्रन्थेषु ।
"सूतं गन्धं विषञ्चैव टङ्कणञ्च मनःशिला ।
एतानि टङ्कमात्राणि मरिचं त्वष्टटङ्ककम् ॥
कटुत्रयं टङ्कयटकं खल्ले चिप्ता विचूर्णयेत् ।
रसः श्वासकुठारोऽयं श्वाससर्व्वज्वरापहः ॥"
इति श्वासकुठारो रसः ॥ * ॥
श्वासे सर्व्वज्वरे रसरत्नाकरे ।
"दारुमूषा शिखिग्रीवां रसकञ्च पृथक् पृथक् ।
टङ्कत्रयाणुमानेन गृहीत्वा कनकद्रवैः ॥
मर्द्दयेत्त्रिदिनं कार्य्या वटी चणकमात्रया ।
मरिचैरेकविंशत्या सप्तभिस्तुलसीदलैः ॥
खादेदृटीदृयं पथ्यं दुग्धभक्तं सशर्करम् ।
तरुणं विषमं जीर्णं हन्यात् सर्व्वज्वरं ध्रुवम् ॥"
दारुमूषा दारुमयी । शिखिग्रीवा तुतिया ।
रसकं खपरिया । प्रत्येकं टङ्क ३ धत्तूरपत्रस्वरसेन मर्द्दयेत् । इति ज्वराङ्कुशः ॥ * ॥
सर्व्वज्वरेषु ।
"नागरं कर्षमात्रं स्यात् कर्षमात्रञ्च टङ्कणम् ।
मरिचं सार्द्धकर्षं स्यात् तावद्गन्धवराटकम् ॥
विषं कर्षचतुर्थांशं सर्व्वमेकत्र चूर्णयेत् ।
रसो हुताशनो नाम्ना खाद्यो गुञ्जामितो ज्वरे ॥"
इति हुताशनो रसो ज्वरे ॥ * ॥
"शुद्धजेपालटङ्कन्तु कट्फीटङ्कद्वयोन्मितम् ।
गौरिकं टङ्कमेकञ्च कन्यानीरेण मर्द्दयेत् ॥
कलायसदृशी कार्य्या वटिका तान्त्र भक्षयेत् ।
शीतलेन जलेनैवा वटी जीर्णज्वरापहा ॥"
इति ज्वरव्रीवटी ॥
"त्रिभागतालेन हतञ्च ताम्रं
रसञ्च गन्धञ्च समीनमायुः ।
विषं समञ्च द्विगुणञ्च ताम्रं
त्रिसप्तरात्रेण दिवाकरांशैः ॥
विमर्द्दारिष्टस्वरसेन चूर्णं
गुञ्जैकदत्तं सितया समेतम् ।
ज्वराङ्कुशोऽयं रविसुन्दराख्यो
ज्वरान्निहन्त्यष्टविधान् समस्तान् ॥"
अस्य प्रक्रिया । पारादटङ्क १ गन्धकटङ्क १ विषटङ्क१ द्विगुणतालकहततात्रटङ्क२ रोहुमत्स्यकपित्त १ सब एकत्र खल्ले जवचूर्ण होइ मिले तब नीबिके पातकी स्वरसकभावना २१ वामे मह देवइ मात्रा रत्ती एक अनुपान श्वेतशर्करा रत्ती २ खार । इति सर्व्वज्वरे रविसुन्दरो रसः ॥ * ॥
"शुद्धं सूतं तथा गन्धं खल्ले तावद्विमर्द्दयेत् ।
सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत् ॥
एषा कज्जलिका ख्याता दृंदृयी वीर्य्यवर्द्धिनी ।
नागानुपानयोगेन सर्व्वव्याधिविनाशिनी ॥"*॥
कज्जलिकाविधानं तद्गुणञ्च रसरत्नप्रदीपे ।
"जयापत्ररसेनाथ भृङ्गमारुरसेन च ।
भृङ्गराजरसेनापि काकमाच्या रसेन च ॥
रसं संशोध्य यत्नेन तत्समं शोधयेद्दलिम् ।
भृङ्गराजरसैः पिष्ट्वा शोधयेदर्करान्वितैः ॥
सप्तधा वा त्रिधा वापि पश्चाच्चूर्णं तु कारयेत् ।
चूर्णयित्वा समं तेन रसेन सह मर्द्दयेत् ॥
नष्टसूतं यदा चूर्णं भवेत् कज्जलसन्निभम् ।
निर्धूमे वरदाङ्गारे द्रवीकुर्य्यात् प्रयत्नतः ॥
तत्र तं महिषीविष्ठास्थापिते कदलीतले ।
निःक्षिप्य तदुपर्य्यन्यत् पत्रं दत्त्वा प्रपीड़येत् ॥
शीतलान्तात् ततः पत्रात् समुद्धृत्य विचूर्णयेत् ।
एवं सिद्धा भवेद्वटयाधिघातिनी रसपर्पटी ॥
ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः ।
चकार कृपया युक्तः सुधावद्रसपर्पटीम् ॥
रक्तिकासंमितां तावद्भृष्टजीरकसंयुताम् ।
गुञ्जार्द्धभृष्टहिङ्गाढ्यां भक्षयेद्रसपर्पटीम् ॥
रोगानुरूपभैषज्यैरपि तां भक्षयेद्बुधः ।
पिबेत्तदनुपानीयं शीतलं शुक्लचन्दनम् ॥
प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक् ।
नाधिकां दशगुञ्जातो भक्षयेत्तां कदाचन ॥
एकादशदिनारभ्यात् तां तथैवापकर्षयेत् ।
एवमेताः समश्नीयान्नरो विंशतिवासरान् ॥
घृतं गुरुं तथा विप्रान् पूजयित्वा प्रणम्य च ।
अनया भक्षयेदेतां क्षीरमांसरसाशनः ॥
ज्वरञ्च ग्रहणीञ्चापि तथातीसारमेव च ।
कामलां पाण्डुरोगञ्च शूलप्लीहजलोदरम् ॥
एवमादीन् गदान् हत्वा हृष्टः पुष्टश्च वीर्य्यवान् ।
जीवेद्वर्षशतं सार्य्यं वलीपलितवर्ज्जितः ॥"
इति रसपर्पटी ॥ * ॥
अथ ज्वरिणि अन्नदानसमयः । तत्र चरकः ।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"
अन्यच्च ।
"आमे पाकं गते नृणां यदा भोजनलालसा ।
भवेत् काले ह्यकाले वा सोऽन्नकाल उदाहृतः ॥"
तत्र कालमाह । ज्वरस्य पाकावस्थान्नदानकालः ज्वरस्य पाककालश्च ।
"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥"
ज्वरस्य पाक उपशमः ॥ ज्वरपाकेनैव रसपाके दोषपाकोऽपि कथितः । यतो दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति ॥*॥ ननु यथा पैत्तिको ज्वरो दशाहोरात्रेण पाकं याति । एकादशे दिनेऽन्नं दीयते । तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति त्रयोदशदिवसेऽन्नं दीयते । तथा वातिको ज्वर सप्ताहोरात्रेण पाकं याति । अष्टमे दिवसेऽन्नं कथं न दीयते । कथं सप्तम एव दिवसेऽन्नं दीयते । इति । उच्यते ।
"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमजयादूर्द्धमपि वायुर्न सहते क्षयम् ॥"
इति वचनादामरसपाके जाते आहारलाभं विना वायुः क्षयमात्रमपि सोढुं न शक्नोति । स आशुकारित्वात् क्षयादाशेषकादीन् विकारान् संजनयति ॥ अतो वातिके ज्वरे पाकदिनानामन्तिमे सप्तम एव दिनेऽन्नं दीयते । तथा च धन्वन्तरिः ।
"ज्वराभिभूतः षड़हे व्यतीते
विपक्वदोषः क्षतलङ्घनादिः ।
यो भेषजं खादति वैद्यवक्त्रो
निःसंशयं हन्त्यचिरात् स रोगान् ॥"
ज्वराभिभूतः वातज्वराभिभूतः । विपक्वदोषः पक्ववातः । क्षतलङ्घनादिः आदिशब्दात् क्षतपक्वजलपानविश्रान्तिव्यहवासगुरुव्रावसनधारणादिः । भेषजमित्यन्नस्याप्युपलक्षणम् । अतएव चरकः ।
"ज्वरितं षड़हेऽतीते लघुन्नं प्रतिभोजितम् ।
पाचनं शमनीयंवा कषायं पाययेत्तु तमिति ॥"
ज्वरितं वातज्वरिणम् ॥ षड़हेऽतीते इत्युपलक्षणम् । पित्तज्वरिणं दशाहेऽतीते ॥ श्लेष्मज्वरिणं द्वादशाहेऽतीते ॥ लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयंवा कषायं पाययेत् । पुनः स एव ।
"सर्व्वज्वरेषु ज्वरितं दिनान्ते भोजयेल्लघु ॥"
दिनान्तेऽन्तशब्दोऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये ॥ उक्तञ्च वाग्भटेन ।
"वयोऽहोरात्रिसुक्तानां तेऽन्तमध्यादिगाः क्रमात् ।
इति ।"
ते वातपित्तश्लेष्माणः ॥ पित्तकालेऽपि मध्याह्नादर्व्वाक् । यत आह ।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥"इति ॥
एतत् सुश्रुतपरमिति चेत्तन्न । यत आह ।
"श्लेष्मक्षये प्रवृद्धोष्मा बलवानग्निरुल्बणः ।
वेगापाये ऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
तदा पित्तप्राधान्यसमये । अन्यथा उक्तसमयादन्यदा । वेगापाये जठराग्निवेगनाशे । तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ अत्र विषमज्वरिणेऽन्नं दातुं कालविशेषमाह चरकः ।
"सर्व्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत् ।
वेगापाये ऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
सर्व्वज्वरेषु सर्व्वविषमज्वरेषु । वेगापाये ज्वरवेगापाये भोजयेत् । अन्यथा ज्वरवेगापायं विना । तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ यथान्नग्रहणाय स्थानमाह ।
"आहारनिद्रास्थानविहारयोगाः
सदैव सद्भिर्विजने विधेयाः ॥" इति ॥*॥
अल्पबलस्य ज्वरितस्य भोजनार्थोपवेशनप्रकारमाह सुश्रुतः ।
"ज्वरे प्रमेहो भवति खल्वैरपि विचेष्टितैः ।
निषण्णं भोजयेत्तस्माच्चोचारौ च कारयेत् ॥"
निषण्णं यथास्थानस्थितमेव न तु स्थानान्तरं नीतम् ॥ * ॥ अन्नग्रहणसमये प्रथमं ज्वरितेन कवलः कर्त्तव्य इत्याह ।
"यथा दोषोचितैर्द्रव्यैः कर्त्तव्यः कवलग्रहः ।
अरोचकास्यवैरस्यमलपूतिप्रसेकहृत् ॥
भृङ्गजीरकचूर्णेन सिन्धुलवणयुतेन च ।
जिह्वां दन्तान् सुखस्पर्शान्मृदुना कवलं चरेत् ॥

सुखे मलं विगन्धत्वं विरसत्वञ्च नश्यति ।
मनः प्रसन्नं भवति भोजनेऽतिरोचिर्भवेत् ॥
ज्वरितो हितमश्नीयादृद्यद्यप्यत्यारुचिर्भवेत् ।
अन्नकाले ह्यसुखान्नः क्षीयते म्रियतेऽपि च ॥"
अयमर्थः । यद्यपि अस्य ज्वरितस्य हिते भक्ष्ये अरुचिर्भवेत् तथापि ज्वरितो हितमेवाश्नीयादिति नियमः । यत आह सुश्रुतः ।
"गुर्वभिष्यन्दाकालघ्न ज्वरी नाद्यात् कथञ्चन ।
न तु तस्याहितं भुक्तमायुषे चासुखाय च ॥
आनद्धस्मिमितैर्दोषैर्यावन्तं कालमातुरः ।
तावत्कालं स लघ्वन्नमश्नीयात सविरिक्तवत् ॥"
आनद्धस्मिमितैर्दोषैः अपक्वैर्दोषैर्यावन्त इत्यर्थः ॥
ननु हिते वस्तुनि कथमरुचिः स्यादत आह ।
सातत्यात् स्वाङ्गभावाच्च पथ्यं द्वेष्यत्वमागतमिति ।
सातत्यात् एकस्यैव भक्ष्यस्य सर्व्वदोपयोगात् ।
स्वाङ्गभावाच्च भक्ष्यान्तरादपि विस्वादुतः । पथ्यमप्रियं स्यात् तथापि तदेव [illegible]थ्यम् । कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनरिति ॥
अथ च ज्वरितोऽन्नकालेऽश्नीयादेवेति द्वितीयो नियमः । कुत इतिचेत् हि यतो हेतो असुखान्नः क्षीयतेऽपक्वधातुर्भवति ततो म्रियतेऽपि च ॥*॥
ज्वरिताय हितान्यन्नादीन्याह ।
"रक्तशाल्यास्यः शस्ता पुराणा षष्टिकैः सह ।
यवान्नोदनलाजार्थं ज्वरितानां ज्वरापहाः ॥"
तत्र रक्तशालिगुणाः ।
"रक्तशालिर्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहकृद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो मध्यदाद्यः ॥"
रक्तशालिर्यो मगधदेशे दाउदखानी इति प्रसिद्धः ॥
"सुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्टकान् ।
यूषार्थं यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥"
तत्र मुद्गादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
"पटोलपत्रं वार्ताकुं कुलकं कारवेल्लकम् ।
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥
पत्रं गुडूच्याः शाकार्थं ज्वरितानां प्रदापयेत् ॥"
तत्र पटोलादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
"लावान् कपिञ्जलानेणान् हरिणान् पृषतान् शशान् ।
कुरङ्गान् कालपुच्छांश्च तथैव रुरुमार्ष्टकान् ॥
मांसार्थं मांससात्म्यानां ज्वरितानां प्रदापयेत् ।
सारसक्रौञ्चशिखिनस्तथा तित्तिरकुक्कुटान् ॥
गुरुत्वाल्लाघ्नं शंसन्ति केचिदेवं व्यवस्थिताः ॥"
तित्तिरिरत्र कृष्णतित्तिरिः । गौरतित्तिरेः कपिञ्जलपदेन पूर्व्वं गृहीतत्वात् ॥
"ज्वरितानां प्रकोपन्तु यदा याति सभीरवः ।
तदैतेऽपि हि ग्रस्यन्ते साक्षात्कालोपपादिताः ॥
कपिञ्जल इति ख्यातो लोकेषु गौरतित्तिरिः ॥"
इति ॥ * ॥
"निम्बकं दाडिमं धात्रीफलमम्लं प्रकाङ्क्षते ।
प्रदद्यादम्लसात्म्याय काङ्क्षितं वा पुरातनम् ॥"
अथौषधसिद्धायाः पेयायाः गुणाश्च ।
"अन्नकाले हिता पेया यथाग्नेः पाचने: कृता ।
दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥"
यथाग्नेः पाचने: कृता यथादोषं पाचने: कृता ।
यथा,—
"पञ्चमूल्याः कषायन्तु पाचनं वातिके ज्वरे ।
सक्षौद्रं पैत्तिके सुस्तकटुकेन्द्रयवैः कृतम् ॥
पिप्पल्यादिकषायन्तु पाचनं कफजे ज्वरे ।
लघुना पञ्चमूलेन पिप्पल्या सह धान्यया ॥
महत्या पञ्चमूल्याथ व्याघ्री दुस्पर्शगोक्षुरैः ।
सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे ।"
अस्यायमर्थः । वातपित्ते लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत ।
"शालिपर्णी पृश्निपर्णी कण्टकारीद्वयं तथा ।
गोक्षुरः पञ्चमः प्रोक्तः पञ्चमूलमिदं लघु ॥
श्लेष्मपित्ते वातपित्ते पिप्पल्या सह धान्यया ॥"
कफवाते महत्या पञ्चमूल्या ।
"श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥
त्रिदोषजे ज्वरे देया व्याघ्री दुस्पर्शगोक्षुरैः ।
व्याघ्री कण्टकारिका । दुस्पर्शो यवासः ।
पेयांवा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
विबद्धवर्चाः सयवां पिप्पल्यामलकैः शृताम् ।
सर्पिष्मन्तीं पिबेत् पेयां ज्वरी दोषानुलोमनीम् ॥
कासीश्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥"
यवोऽन्नम् । अत्र पञ्चमूली शृतौ लघौ च हिता । तया शृतां पेयां पिबेदित्यर्थः ।
"पेया भेषजसंयोगाल्लघुत्वाच्चाग्निदीपिका ।
वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥
स्वेदनाय च सोष्णात्वाद्द्रवत्वात् लट्वग्नाय च ।
आहारभावात् प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नीहेतुसात्म्यत्वात्तस्मात्तां पूर्व्वमाचरेत् ॥"
हेतुसात्म्यत्वात् हेतवो वातपित्तकफास्तेषां सात्म्यत्वात् ॥
"यवकोलकुलत्थानां सुद्गमूलकयूषयोः ।
एकैकं सुरिमादाय पचेदष्टगुणे जले ॥
पञ्चसुष्टिक इत्येष वातपित्तकफापहः ।
मूले प्रशस्यते गुल्मे कासे श्वासे क्षये ज्वरे ॥"
पञ्चसुष्टिकयूषः ॥ * ॥
"रक्तमूत्रपुरीषस्य गुदे वर्त्तिं निधापयेत् ।
पिप्पलीपिप्पलीमूलं यवानीचव्यसाधितम् ॥
पाययेत यवागूं वा मारुताद्यनुलोमनीम् ॥"
पेयाया यवागूवाश्च क्वचित्प्रवादमाह ।
"मदात्यये मदात्यये ग्रीष्मे पित्तकफोत्थिते ।
ऊर्द्ध्वगे रक्तपित्ते च यवागूर्न्न हिता ज्वरे ॥
दाहच्छर्द्यर्दितं श्यामं निरन्नं क्षीणयान्वितम् ।
शर्करारामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजशक्तुरूपं तर्पणम् । तथा च अन्यान्तरे ।
"दाहच्छर्द्यर्दितं श्यामं निरन्नं क्षीणयान्वितम् ।
घर्म्मार्त्तं मद्यपञ्चापि तोयालोडितशक्तुकम् ॥
शर्करारामधुसंयुक्तं पाययेल्लाजतर्पणम् ।
ज्वरापहैः फलरसैर्युक्तमन्नं हितं क्वचित् ॥"*॥
सन्तर्पणस्वरूपञ्चाह धन्वन्तरिः ।
"द्राक्षादाडिमखर्ज्जूरमृदिताम्बुसशर्करम् ।
लाजचूर्णं समध्व्याज्यं सन्तर्पणमुदाहृतम् ॥
लाजाचूर्णम् द्राक्षादिजलशर्करामध्व्याज्यसहितं तर्पणमुक्तमित्यर्थः ॥ लाजशक्तुगुणाश्च गुणग्रन्थे ।
"लाजानां शक्तवः क्षौद्रसिताढ्या विश्रुताः ।
छर्द्यतीसारलड्दाहविषमूर्च्छाज्वरापहाः ॥"
चरकश्च ।
"तत्र तर्पणमेवादौ प्रदेयं लाजशक्तुतः ।
ज्वरापहैः फलरसैर्युक्तं मधुसशर्करम् ॥"
ज्वरघ्नानि फलान्याह चरक एव ।
"द्राक्षादाडिमखर्ज्जूरपियालैः सपरूषकैः ।
तर्पणार्हस्य दातव्यं तर्पणं ज्वरनाशनम् ॥"
पियालमत्र एकफलं न तन्मज्जातिगुरुत्वात् ।
तर्पणार्हस्य दाहच्छर्द्यलंघार्त्तस्य लङ्घितस्य क्षीणस्येत्यर्थः ।
श्रमोपवासानिलजे हितो नित्यं रसौदनः ॥
रसोऽत्र मांसरसः । तेन सिक्त ओदनो रसौदनः । अन्नेन अन्नमित्यनेन समासः ॥
"मुद्गयूषौदनस्येव हितः कफसमुत्थिते ।
स एव सितया युक्तः पीतपित्तज्वरे हितः ॥"
स एव मुद्गयूषौदन एव ॥
"क्षुण्णोत्थदोषो यः क्षीणकफो जीर्णज्वरान्वितः ।
विबन्धारुग्दोषश्च रूक्षः पित्तानिलज्वरी ॥
पिपासार्त्तः सदाहश्च पयसा स सुखी भवेत् ॥"
अन्यच्च ।
"अजाहृग्धं गुडोपेतं पातव्यं ज्वरशान्तये ।
तदेव तु पयः पीतं तरुणी हन्ति मानवम् ॥"
तरुणी ज्वरे ; अन्यच्च ।
"क्षीणे ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणी पीतं विषवद्धन्ति मानवम् ॥"*॥
अथ ज्वरिणो नियममाह ।
"न द्विरह्नान्न पूर्व्वाह्णे नाभिष्यन्दि कदाचन ।
न तीक्ष्णं न गुरुप्रायो भुञ्जीत तरुणज्वरी ॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्षितम् ।
तेन संशमितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥"*॥
अथ ज्वरविमुक्तेः पूर्व्वरूपमाह ।
"दाहः खेदो भ्रमस्तृष्णा कम्पविड्भिदसंज्ञिताः ।
कूजनं चाति वैगन्ध्यमाकृतिज्वरमोक्षणे ॥"
विड्भित् मलप्रवृत्तिः । अत्र सम्पदादित्वात् भावे क्विप् । कूजनं कूत्यनम् । अतिवैगन्ध्यं गात्रस्य । ज्वरमुक्तौ भविष्यत्यामेतल्लक्षणं भवति ॥
ननु दोषत्रयं विना न व्याधिनिवृत्तिः । क्षीणश्च दोषः कथमेवंविधं रूपं करिष्यति । उच्यते । कश्चित् क्षीणोऽपि दोषः विनाशकाले स्वशक्तिं दर्शयति । यथा निर्व्वाणावस्थायां दीपो विशेषात् प्रज्वलति । वाग्भटोऽप्याह ।
"धातून् प्रद्योभयन्दोषो मोक्षकाले विलीयते ।
ततो नरः श्वसन् कूजन् वमन् क्लिद्यन्न चेष्टते ॥"
न चेष्टते अचेष्टश्च स्यात् ।

"त्रिदोषजे ज्वरे ह्येतदन्तर्वेगे च धातुगे।
लक्षणं मोक्षकाले स्यादन्यस्मिन् खेददर्शनम्॥"
एतद्वाग्भटादिकं लक्षणं मोक्षकाले एतेष्वेव ज्वरेषु स्यात्। कैयु त्रिदोषजे। अन्तर्वेगे। धातुगे ज्वरे। अन्यस्मिन् खेदमात्रं दर्शनं भवति॥ * ॥

अथ ज्वरमुक्तस्य लक्षणमाह।

"देहो लघुर्यदगतक्लममोहतापः
पाको मुखे करणसौष्ठवमग्यथत्वम्।
खेदः स्रवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्ठस्य मूर्द्धि विगतज्वरलक्षणानि॥"

सुश्रुतोऽप्याह।

"खेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च।
स्रवथुश्चानाकाङ्क्षा च ज्वरमुक्तस्य लक्षणम्॥"*॥

अथ ज्वरमुक्तस्य नियमाः।

"व्यायामञ्च व्यवायञ्च स्नानं क्रोधमजीर्णताम्।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत्॥"

अन्यच्च।

"व्यायामञ्च व्यवायञ्च प्रवातं शिशिरं जलम्।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत्॥
अपि ज्वरविमुक्तस्य स्नानं कुर्यात् पुनर्ज्वरम्।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत्॥
बलवर्णाग्निवृद्धयो यावन्न प्रकृतिर्भवेत्।
तावज्ज्वरेण मुक्तोऽपि वर्ज्जनीयानि वर्ज्जयेत्॥"

अथ वातज्वराधिकारः। तत्र वातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्ब्बिकां संप्राप्तिमाह।

"वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः॥"

अथ तस्य पूर्ब्बरूपमाह। जृम्भात्यर्थं समीरणादिति। समीरणात् ज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात्। जृम्भा च श्रमादिपूर्ब्बिका भवति॥

अथ वातज्वरस्य लक्षणमाह।

"वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम्।
निद्रानाशः स्रवस्रम्भो गात्राणां रौक्षमेव च॥
शिरोहृन्नाभिरुग्वक्त्रवैरस्यं बद्धविट्कता।
मूलाधाने जृम्भणञ्च भवत्यनिलजे ज्वरे॥"

एतानि लक्षणानि प्रायो भावित्वेन सुश्रुतेन निर्द्दिष्टानि। चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि। तान्येव श्लोकेन प्रदर्शयते।

"भवन्ति विविधा वातवेदना स्रादसुप्रता।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता॥
जरसादौ हतस्रम्भो विशेषः सन्निपातजः।
शुष्ककासो वमिर्लोमहर्षस्तृष्णमोहौ॥
अरुणं नैचमूत्रादि त्वट् प्रलापोष्णकामिता॥"

विषमो वेगः शरीरोष्मतादिरूपो ज्वरवेगो विषमो भवतीत्यर्थः। स्रवस्रम्भः क्षिक्काया अभावः। तथा च वाग्भटः।

"हर्षो रोमाङ्गदन्तेषु वेपथुः स्रवथोर्यहः॥"इति।

चरकोऽपि। स्रवथूद्गारनिग्रह इति। शिरोहृन्नाभिरुक् गात्रपदे प्रयुक्ते शिरोहृच्छब्दप्रयोगस्तत्र विशेषेण वेदनाबोधनार्थः॥ * ॥

अथ वातज्वरचिकित्सा।

"आमाशयस्थो हृत्वाग्निं सामो मार्गान् पिधापयन्।
विदधाति ज्वरं दोषस्तस्मात्तल्लङ्घनमाचरेत्॥"

इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने वातज्वरिणो लङ्घनविधाने विशेषमाह चरकः।

"ज्वरितं षड्हेरीतीति लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयंवा कषायं पाययेद्भिषक्॥"

सुश्रुतोऽप्याह।

"वातिके सप्तरात्रेण दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति॥"

ननु अन्नं वै प्राणिनां प्राणा इति श्रुतिः तदन्नं विना प्राणिभिः कथं स्थातव्यमित्याह।

"दोषाक्रामेव सा शक्तिर्लङ्घने या सहिष्णुता।
न हि दोषक्षये कश्चित् सोढुं शक्नोति लङ्घनम्॥
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमाशयादूर्द्ध्वमपि वायुर्न सहते क्षयम्॥"*॥

भेषजमाह।

"श्रीफलः सर्व्वतोभद्रा कामदूती च शोणकः।
तर्कारी गोक्षुरः क्षुद्रा हृद्दती कलसी स्थिरा॥
राम्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः।
सुस्नाह्नता बला बालं द्राक्षा यासः घृतार्द्धिका॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम्।
सोपद्रवञ्च योगोऽयं सर्व्वयोगवरः स्मृतः॥"

श्रीफलो विल्वः। सर्व्वतोभद्रा गम्भारी। कामदूती पाटला। शोणकः शोनापाढ़ा इति लोके। तर्कारी गणिकारिका। कलसी वृश्चिपर्णी। स्थिरा शालिपर्णी। बालं सुगन्धबाला। यासो यवासः। इति दशमूलादिक्वाथः॥ * ॥

सुश्रुतस्तु।

"पञ्चमूली कषायन्तु पाचनं वातिके ज्वरे।"इति।

अत्र पञ्चमूली हृद्दतपञ्चमूली। अतएव चिभटी।

"श्रीपर्णी तर्कारी श्रीफलटुण्टुकपाटलामूलैः।
पाचनमुदितं मारुतजनितज्वरहारिवारिणि कथितैः॥"

इति हृद्दतपञ्चमूली क्वाथः॥ * ॥

"किरातान्द्राग्लतोदीच्यहृद्दतीद्वयगोक्षुरैः।
त्रिपर्णीकलसीबिल्वैः क्वाथो वातज्वरापहः॥"

उदीच्यं बालकम्। त्रिपर्णी शालिपर्णी। कलसी वृश्चिपर्णी। इति किरातादिक्वाथः॥*॥

"गुडूचीपिप्पलीमूलनागरैः पाचनं हृतम्।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनि॥"

कालिङ्गं हृतं ऐन्द्रयवं हृतम्॥ * ॥

चिभटी।

"विश्वाम्लतार्ग्यन्थिकसिहतोयं
मरुज्वरस्याग्निवतः कृतोऽयम्।
क्वाथोऽथ कुसुम्भुरुदेवदारु-
क्षुद्रौषधैः पाचनमत्र शस्तम्॥"

औषधं शुण्ठी। क्वाथः पाचनमिति। वेदाः प्रमाणमितिवत्।

"पञ्चमूलीबलारास्नाशुलत्यैः षड्भ पुष्करैः।
क्वाथो हन्त्याशु शिरःकम्पं पर्व्वभेदं मरुज्वरम्॥"

पञ्चमूली बिल्वादिः। इति हृद्दतपञ्चमूल्यादिक्वाथः॥

"कणारसोनाग्नितवह्निविश्वा-
निदिग्धिकासिन्धुकभूमिनिम्बैः।
समुस्तकैरावरितः कषायो
हिताग्निना हन्ति गदानिमांस्तु॥
ज्वरं मरुद्दुष्टिसमुद्भवं तथा
बलासजञ्चानलमन्दताञ्च।
कण्ठावरोधं हृदयावरोधं
खेदञ्च रोमार्च्चहिमत्वमोहान्॥"

इति कणादिक्वाथः॥ * ॥

"शुण्ठ्यं शुण्ठ्यरुजमच्युतलितं मारारिगारीरजस्तावत्तावदमापतिस्फुटगलालङ्कारवस्तु स्मृतम्॥
तावत्येव मनःशिला च विमला तावत्तथा टङ्कणं
खण्डी द्व्यक्षमिता कणा च मरिचं दिक्पाल-संख्याश्चकम्॥
विषादि वस्तूनि शिलोपरिष्टा-
द्विचूर्णयेद्वाससि शोधयेच्च।
ततस्तु खल्ले रसगन्धकौ च
चूर्णञ्च तद्यामयुगं विमर्द्य॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः।
समीरणश्लेष्मगदान् हरते मात्रास्य शुक्लैका॥
आर्द्रकेण समभेष भक्षितो
हन्ति वातकफसम्भवं ज्वरम्।
श्वासकासमुखसेकशीलता-
वह्निमान्द्यविरुचींश्च नाशयेत्॥
नस्येनाशेष हरति शिरोऽर्त्तिं कफवातजाम्।
मोहं महान्तमपि च प्रलापं स्रवथुग्रहम्॥"

कल्पतरुरसः। सामान्यज्वरचिकित्सोक्तो महाज्वराङ्कुशः प्रदेयोऽत्र॥ * ॥

"विश्वमहौषधमागधिकोषणा
त्रुमिरिक्तकमार्द्रकमर्हितम्।
क्रमविवर्द्धितसुद्दलितज्वर-
क्षिप्ररभेरव एष रसो वरः॥"

त्रुमिः मारितं ताम्रं तस्य भागः एकः। रक्तकं हिङ्गुलं तस्य भागः षट्। मारितरक्तकार्द्धम्। त्रिपुरभैरवो रसो ज्वरे॥ * ॥

"वातश्लेष्मज्वरे खेदं लङ्घनपार्श्वशिरशूलानि।
पीनसश्वासवाधिर्य्ये कारयेत्सद्भिषग्विधिवत्॥
लोतसां शोधनं कृत्वा नीत्वा पाचनमाशयम्।
हत्वा वातकफस्तम्भं खेदो ज्वरमपोहति॥"

"खपरभरुपेटखितवाह्निकसंसिक्तवासुकाग्नेः
शमयति वातकफाभ्यसस्तकशूलाङ्गमर्दादीन्॥"

वासुकाग्नेः कर्म्म शिरोहृदयगात्रबाधायां जृम्भायाम्। पादसुप्ततायां पिण्डिकोद्वेष्टने ऊरुसादे हृतस्तम्भे लोमहर्षे च॥ * ॥

"मातुलुङ्गफलकेशरो हृतः
सिन्धुजन्मरिचान्वितो सुखे।
हन्ति वातकफरोगमास्यग
श्लोषमाशु जडतामरोचकम्॥"

इति कवलः कण्ठौष्ठसुखशोषे॥ *

अन्यच्च ।
"शर्करादाडिमाभ्याच्च द्राक्षादाडिमयोरथा ।
कल्कं विधारयेद्दास्ये श्रीषवेरस्यनाग्रनम् ॥
द्राक्षामलकयोः कल्कं सर्पृतं वदने क्षिपेत् ।
तेन पृष्ठा सुखस्थान्तः संशोषस्तेन ग्राम्यति ॥
सुरसं जायते वक्त्रं रुचिर्भवति भोजने ॥" * ॥
निद्रानाशस्य निदानमाह ।
"लाघवं लङ्घनं चिन्ता व्यायामः शोकभीक्रुधः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसंचयात् ॥"
अस्य चिकित्सामाह ।
"भृष्टस्तु विजयाचूर्णं मधुना निशि भक्षयेत् ।
निद्रानाशेऽतिसारे च अरुण्यां पावकक्षये ॥
गुडं पिप्पलीमूलस्य चूर्णेनालोड्य लिहन् ।
चिरादपि च संनष्टां निद्रामाप्नोति मानवः ॥
वायसजङ्घामूलं मूलं वा शिरसि काकमाच्याश्च ।
विधृतं निद्राजनकं खुड्मूलं वा धृतं सगुड्म् ॥"
पीतमिति शेषः ॥
"मूलन्तु काकमाच्या वह्निं सूत्रेण मस्तके नियतम् ।
विदधाति नष्टनिद्रो निद्रामाश्वेव सिद्धामदम् ॥
श्रीलयेन्मन्दनिद्रस्तु क्षीरमम्लरसान् दधि ।
अभ्यङ्गोद्वर्तनस्नानमूर्द्धकर्णाक्षितर्पणम् ॥"
रसं मांसरसम् ॥
"कान्तावाहुलताश्लेषानिवृत्तिश्रमतत्क्षया ।
मनोऽनुकूला विषयाः कामं निद्रासुखप्रदाः ॥
रसे घ्राणे च रूपे च सर्पिर्यूषपयःसु च ।
निद्रां सङ्जनयत्याशु पलाण्डुरुपयोजितः ॥"
रसे मांसरसे ॥
"ऐक्षवं पैत्तकी माषाः सुरा मांसरसः पयः ।
गोधूमतिलमत्स्याश्च निद्रां कुर्वन्ति देहिनाम् ॥"
निद्रानाशे ॥ * ॥
"दारु हैमवती कुष्ठं शृताक्षाहिङ्गुसैन्धवैः ।
लिम्पेत् कोलैरजापिष्टैः शूलाध्मानयुतोदरम् ॥"
हैमवती श्वेतवचा । दारुवट्कलेपः शूलाध्मानयोः ॥ * ॥
"कटुतैलं कणाहिङ्गुवचालशुनसाधितम् ।
उष्णं विनिहितं हन्ति कर्णयोर्निस्वनं तथाम् ॥"
तैलं कर्णस्वने ॥ * ॥
"कणासुरभिवचया यवान्या च समन्विता ।
ताम्बूलसहिता हन्ति शुष्ककासं सखे धृता ॥"
शुष्ककासे ॥ * ॥ अथान्नमाह ।
"अमोपवासानिलजे हितो नित्यं रसौदनः ।
सुद्राम्लकव्यूषस्तु वह्निविट्काय दीयते ॥"
रसो विहितमांसरसः ॥
"पेयांशा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
स्वेदोत्कारुष्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
काशी श्वासी च हिक्की च पञ्चमूलीहृतां पिबेत् ॥"
पेयमिति शेषः । इति वातज्वराधिकारः ॥*॥
अथ पित्तज्वराधिकारः । तत्र पित्तज्वरस्य विप्रकृष्टसन्निकृष्टकारणकार्यव्यञ्जिकां संप्राप्तिमाह ।
"पित्तलाहारचेष्टाभां पित्तधामाग्नयाश्रयम् ।
वाहनिरस्य कोष्ठाग्नं ज्वरजित्स्यादसाधुगम् ॥"
पित्तस्य पङ्गुत्वात्तेन कोष्ठाग्नेरुष्मा वह्निर्नेतुं न शक्यते । यत आह ।
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥"
इति ॥
ततोऽत्र पित्तं वायुसहायं बोद्धव्यम् । यत आह ।
"द्वयमेकरसं नास्ति न रोगोऽपैत्तिकोद्भवः ।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥" इति ।
अथ तस्य पूर्वरूपमाह । पित्तान्नयनयोर्हार्द्र इति । पित्तात् ज्वरे उत्पद्यमाने नेत्रदाहः स्यात् । स च अमादिपूर्वको भवति ॥ * ॥
अथ पित्तज्वरस्य लक्षणमाह ।
"वेगस्तीक्ष्णोऽतिसारश्च निद्रानाशस्तृषा वमिः ।
कण्ठौष्ठसुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥"
अतिसारः पित्तस्य सरत्वात् सद्रवा प्रवृत्तिर्न त्वतीसार एव तस्य ज्वरोपद्रवत्वात् । वमिः यदा पित्तं कफस्थानं याति तदा बोद्धव्या । प्रलापोऽनर्थकं वचः । मूर्च्छारूपादेरज्ञानम् । मदः पूगकोद्रवपलूरभक्षणादिव मत्तता । भ्रमः चक्राकृष्टस्येव ज्ञानम् । चकारात् रक्तकोष्ठादयो बोद्धव्याः ॥*॥ अथ पित्तज्वरस्य चिकित्सा ।
"आमाशयस्थो हृत्वाग्निं सामो मामान् विधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घनवता यतीतेनेत्यर्थः ॥ * ॥
किन्तद्भेषजं तदाह ।
"तिक्तासुस्तायवैः पाठाकटुफलाभ्यां सदीप्यकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिकाथः ॥ * ॥
"पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः काथ एषां शर्करया युतः ॥
पिपासादाहपित्तासयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिकाथः ॥ * ॥
"द्राक्षा हरीतकी सुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः काथ एषां पित्तज्वरापहः ॥
सुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिकाथः ॥ * ॥
"पटोलयवधान्याकमधूकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णां छर्दिप्रमाधिनीम् ॥"
इति पटोलादिकाथः ॥ * ॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिकाथः ॥ * ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दन क्षीरवालकैः ॥"*॥
"क्षीरेरं चन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि तट्टर्दिज्वरदाहजुत् ॥"
इति क्षीरेरादिकाथः ॥ * ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवाष्टताः ।
बालकं धान्यकं बिल्वं कषायो मार्तिकान्वितः ।
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिकाथः ॥ * ॥
"द्राक्षाचन्दनपद्मानि सुस्ता तिक्ताम्बुतापि च ।
धात्री बालसुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधूकं कुलकं चापि किराततो धान्यकं तथा ॥
एषां काथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्दिं तथा शूलं सशोषमरोचकम् ।
कासं श्वासञ्च दुश्छासं नाशयेन्नात्र संशयः ॥"
इति महाद्राक्षादिकाथः ॥ * ॥
"ससितो निशि पर्युषितः प्रातर्धान्याकतण्डुलकाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"
इति धान्याककाथः ॥ * ॥
"अन्वताया हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"
"गुडूची भूनिम्बश्च बालं वीरणमूलकम् ।
लघु सुस्तं चिरबिल्वाची द्राक्षा वासा च पर्पटः ॥
एषां काथो हरत्येव ज्वरं पित्तकृतं हृतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"
इति गुडूच्यादिकाथः ॥ * ॥
"प्रलापस्य वदर्या वा निम्बस्य पटुपल्लवैः ।
अम्लपित्तेः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥*॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ति
निहन्ति दाहं त्वरितं ज्वरञ्च ॥ * ॥
पथ्यां तैलघृतक्षौद्रैर्लिह्यादुज्वरापहः ।
कासास्रकृपित्तवीसर्पश्वासान् हन्ति वमीरपि ॥
तैलघृतक्षौद्रैरित्यत्र न समुच्चयस्तेन केवलेन क्षौद्रेणापि लिह्यात् ॥ * ॥
"काङ्क्षिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसंस्विन्नशीतलीकृतवाससा ॥ * ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाडिमबीजैर्वा धानाकल्केन च क्वचित् ॥"
धानाश्च धान्याकम् । इति कवलः ॥ * ॥
अथान्नमाह ।
"दाहज्वरार्दितं शाम निरन्नं लघ्वन्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजाशृक्तरूपं तर्पणम् । सक्तुतर्पणस्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ॥*॥
"सुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ।
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ॥
मलयोदकसंसिक्ते स्वप्यात् पित्तज्वरी नरः ॥
हारावली चन्दनशीतलाना
सुगन्धपुष्पाम्बरभूषितानाम

नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः।
नार्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥"

इति पित्तज्वराधिकारः ॥ * ॥ * ॥

अथ श्लेष्मज्वराधिकारः। तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह।

"श्लेष्मलाहारचेष्टाभ्यां कफ आमाशयाश्रयः।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्वाद्रसानुगः ॥"

कफस्य कोष्ठाग्नितेजसो बहिर्नयनेन पङ्गुत्वादाशङ्कायां जातायां पित्तस्येव सिद्धान्तो बोद्धव्यः ॥ * ॥ अथ तस्य पूर्व्वरूपमाह।

कफोन्नाभिनन्दनमिति। कफात् ज्वरे उत्पत्स्यति अन्नानभिलाषः स्यात्। स च श्रमादिपूर्व्वको भवति ॥ * ॥ अथ श्लेष्मज्वरस्य लक्षणमाह।

"स्तैमित्यं स्तिमितो वेगः आलस्यं मधुरास्यता।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं प्रीतसुप्तक्लेदो रोमहर्षोतिनिद्रता।
प्रतिश्यायोरुचिः कासः कफक्लेष्वोतिशुक्लता ॥

स्तैमित्यं अङ्गानामार्द्रपटावगुण्ठितमिव। स्तिमितो वेगः ज्वरस्य भग्नवेगः। आलस्यं समर्थस्यापि कर्म्मण्युत्साहः। स्तम्भः अङ्गानम्रता। तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यम्। गौरवं गात्राणाम्। प्रीतं प्रीतं लगति। उत्क्लेदः वमनोपस्थितिरिव। अतिनिद्रता निद्राधिक्यम्। प्रतिश्यायो नासारोगविशेषः। अरुचिः भोजनानिच्छा। चकारात् पिड़का प्रीता सुखप्रसेकश्छर्द्दिस्तन्द्रा हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति। यत उक्तम्।

"प्रसेकः पिड़काः प्रीताश्छर्द्दिस्तन्द्रोष्णकामिता।
कफेन लिप्तहृदयं भवेदग्निश्च मन्दता ॥"

अथ श्लेष्मज्वरचिकित्सा।

"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन्।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"

इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने श्लेष्मज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः। श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति। द्वादशाहेन लङ्घनवता यतीतेनेत्यर्थः ॥ * ॥ किन्तद्भेषजं तदाह।

"पिप्पल्यादिकषायन्तु कफजे परियाचनमिति।"

पिप्पल्यादिगणमाह।

"पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली।
नागरं चित्रकं चव्यं रेणुकैलाजमोदिका ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः।
महानिम्बस्य मूर्व्वा च विषा तिक्ता विडङ्गकम्॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः।
गुल्मशूलज्वरहरो दीपनश्चामपाचनः ॥"

इति पिप्पल्यादिक्वाथः ॥

"चौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः।
प्लीहानं हन्ति हिक्काञ्च बालानामपि प्रस्थते ॥
पिप्पलीं चिफलाञ्चापि समभागां ज्वरी लिहन्।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥ * ॥

कट्फलं पौष्करं शृङ्गी लक्षा च मधुना सह।
श्वासकासज्वरहरो लेहोयं कफनाशनः ॥"

इति चातुर्भेद्रिकावलेहः ॥ * ॥

"कटफलं पौष्करं शृङ्गी यवानी कारवी तथा।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्याद्धुना वा कफज्वरी।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये ॥"

इत्यष्टाङ्गोवलेहः ॥ * ॥

"सिन्धुवारदलक्वाथं कणाढ्यं कफजे ज्वरे।
जङ्घयोश्च बले पीते कर्णे च पिहिते पिबेत् ॥
यवानी पिप्पली वासा तथा खाखसवल्कलम्।
एषां क्वाथं पिबेत् कासे श्वासे च कफजे ज्वरे ॥
वासान्तुद्राष्टताक्वाथः चौद्रेण ज्वरकासहृत् ॥"

इति वासादिक्वाथः ॥ * ॥

"मरिचं पिप्पलीमूलं नागरं कारवी कणा।
चित्रकं कट्फलं कुष्ठं ससुगन्धिवचा शिवा ॥
कण्टकारी वटा शृङ्गी यवानी पिचुमर्द्दकः।
एषां क्वाथो हरत्येव ज्वरं सोपद्रवं कफात् ॥"

इति मरिचादिक्वाथः ॥

वातज्वराधिकारोक्तकल्पतरुरसोऽपि। श्लेष्मज्वरे दातव्यस्तस्य कफक्षयाधिक्यहरत्वात् ॥ * ॥

"सिन्धुचित्रकटुराजीभिरार्द्रकेण कफे हितः ॥"

कवल इति शेषः ॥ * ॥ अथान्नमाह।

"सूपयूषौदनो दोषो ज्वरे कफसमुत्थिते ॥"

इति श्लेष्मज्वराधिकारः ॥ * ॥

अथ वातपित्तज्वराधिकारः। तत्र द्वन्द्वज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह। तत्र वातपित्तज्वरस्य।

"वातपित्तकरैर्व्वातपित्ते आमाशयाश्रये।
बहिर्निरस्य कोष्ठाग्निं रसगे ज्वरकारिणी ॥"

स्यातामिति शेषः ॥ * ॥

अथ तस्य पूर्व्वरूपमाह।

"प्रायूषे वातपित्तस्य भवतो वातपैत्तिके ॥"

ज्वर इति शेषः ॥ * ॥

अथ वातपित्तज्वरस्य लक्षणमाह।

"तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरोरुजा।
कण्ठास्यशोषो वमथू रोमहर्षोरुचिस्तमः ॥
पर्व्वभेदश्च जृम्भा च वातपित्तज्वरालृतिः ॥"

पर्व्वभेदः पर्व्वाणि भिद्यन्त इवेति सन्धिषु व्यथा ॥

अथ वातपित्तज्वरस्य चिकित्सा।

"वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि।
किराततिक्तामृतां द्राक्षामामलकीं घटीम्।
निष्काथ्य सगुड़ं क्वाथं वातपित्तज्वरे पिबेत् ॥"

इति किरातादिक्वाथः ॥ * ॥

"गुड़ूची पर्पटो मुस्तं किरातो विश्वभेषजम्।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥"

इति पञ्चभद्रक्वाथः ॥ * ॥

"त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥"

इति त्रिफलादिक्वाथः ॥ * ॥

"मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम्।
काश्मीरफलकं लोध्रं त्रिफला पद्मकेशरम् ॥
परूषकं मृणालञ्च क्षिपेत् संचूर्ण्य वारिणि।
निशोषितं सिताक्षौद्रलाजयुक्तञ्च तत् पिबेत्।
वातपित्तज्वरं दाहं तृष्णामूर्च्छारुचिभ्रमान् ॥
शमयेदक्तपित्तञ्च जीमूतमिव मारुतः ॥"

अत्र मधुकादिद्राक्षान्तं समुदितं पलपरिमितं संचूर्ण्य क्षिपेत् वारिणि षट्पलपरिमिते। मधुकादिर्द्विमो दाहे ॥ * ॥

अथान्नमाह।

"मुद्गामलकयूषस्तु वातपित्तज्वरे हितः।
महादाहे प्रदातव्यो यूषश्चणकसम्भवः ॥"

दाड़िमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके।

"कफपित्तहरा मुद्गाः कारवेल्लादयस्तथा।
प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे ॥
दक्षास्तु ज्वरविष्टम्भशूलोदावर्त्तकारिणः ॥"

इति वातपित्तज्वराधिकारः ॥ * ॥

अथ वातश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह।

"वातश्लेष्मकरैर्व्वातकफावामाशयाश्रयौ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥"

पूर्व्वरूपमाह।

"प्रायूषे वातकफयोः स्यातां वातकफज्वरे ॥"

तस्य लक्षणमाह।

"स्तैमित्यं पर्व्वणां भेदो निद्रागौरवमेव च।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ॥
सन्तापे मध्यवेगश्च वातश्लेष्मज्वरालृतिः ॥"

स्वेदाप्रवर्त्तनं स्वेदस्य आ समन्ताद्भावेन प्रवृत्तिः ॥ तथाह हारीतः।

"शिरोग्रहः स्वेदभवश्च कासो
ज्वरस्य लिङ्गं कफवातजस्येति ॥"

स्वेदभवः स्वेदोत्पत्तिः ॥ * ॥

ननु स्वेदः पित्तस्य धर्म्मः अतएव पित्तज्वरे कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायत इत्युक्तम्। तस्मात् कथं वातश्लेष्मज्वरे स्वेदस्रावप्रवृत्तिः। उच्यते। विकृतिविषमसमवायारब्धत्वान्न दोष इति कार्त्तिकः। प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः। प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्य्यकारणभावः सम्बन्धः प्रकृतिसमसमवायः कारणानुरूपं कार्य्यमिति यावत्। यथा प्रकृतेर्यथास्थितैः शुक्लैस्तन्तुभिः समवायकारकैरारब्धः पटः शुक्ल एव भवति। तथा प्रकृतेरेव केवलेन वातेन पित्तेन कफेन वा जनितो ज्वरो वातादुचितैर्धर्म्मैर्वर्त्तमानैर्गुणाधिक्य-

नैमित्यादिभिर्युक्तो भवति। विकृतिविषमसमारभ्यस्तु विकृत्या हेतुभूतया विषमः कारणानुरूपः समवायः कार्यस्य कारणेऽसम्बन्धः। यथा संयोगाद्विकृताभ्यां हरिद्राचूर्णाभ्यां हेतुभूताभ्यां विषमः कारणानुरूपो लोहितो वर्णो जायते। तथा योगेन विकृताभ्यां वातश्लेष्मभ्यां हेतुभूताभ्यां विषमा कारणानुरूपा स्वेदस्रावप्रवृत्तिरिति सिद्धान्तः॥ * ॥

अथ वातश्लेष्मज्वरस्य चिकित्सा।

"वातश्लेष्मज्वरे देयमौषधं नवमेऽहनि।
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः।
दीपनीयः स्रुतो वर्गो वातश्लेष्मज्वरापहः॥
कोलमात्रोपयोगित्वात् पञ्चकोलमिदं स्रुतम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्॥
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"

इति पञ्चकोलम्॥ * ॥

"किरातविश्वान्ततिक्तिसिंहिका-
कणाकणामूलरसोनसिन्धुकैः।
स्रुतः कषायो विनिहन्ति सत्वरं
ज्वरं सशीतात् सकफात् ससूत्थितम्॥"

इति किरातादिकाथः॥ * ॥

"पिप्पल्यादिगणं काथं पिबेद्वातकफज्वरी।
नातःपरं किञ्चिदस्मिन् ज्वरे भेषजमुत्तमम्॥"

इति पिप्पल्यादिकाथः॥ * ॥

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
वचा सातिविषा जातीपाठावत्सकरेणुकम्॥
किराततिक्तको मूर्वा सर्षपा मरिचानि च।
कटफलं पुष्करं भार्गी विडङ्गं कर्कटाह्वयम्॥
अर्कमूलं हृहत्सिंही श्रेयसी सदुरालभा।
दीप्यकाजमोदा च शुकनासा च रूक्षका॥
एतानि समभागानि गन्धयोऽर्धविंशतिः।
एषां काथो निपीतः स्यात्सर्वश्लेष्मज्वरापहः॥
हन्ति वातं तथा पीतं प्रसेदमपि वेपथुम्।
प्रलापपरितन्द्राञ्च रोमहर्षपरुषौ तथा॥
महावातेऽपतन्त्रे च शून्यत्वे सर्वजाड्ये।
पिप्पल्यादिर्महाकाथो ज्वरे सर्वत्र पूजितः॥"

इति बृहत्पिप्पल्यादिकाथ॥ * ॥

"दशमूलीरसः पीतः कणाढ्यः कफवातजे।
ज्वरे विपाके निद्रार्थी पार्श्वरुक्श्वासकासके॥"

इति दशमूलीकाथः॥ * ॥

तत्र अग्र्यो रक्षा वातश्लेष्मज्वरहरत्वात्॥

"पिप्पलीभिः स्रुतं तोयमनभिष्यन्दि दीपनम्।
वातश्लेष्मज्वरं हन्ति सेवितं क्षणाशनम्॥"

इति पिप्पलीकाथः॥ * ॥

"स्रुतकं टङ्कणं भृष्टं गन्धं शुद्धं समं समम्।
द्विगुणं स्रुतकादेयं जैपालं तुषवर्जितम्॥
सैन्धवं मरिचं चित्रा त्वक् क्षारः शर्करापि च।
प्रत्येकं स्रुततुल्यं स्याच्चूर्णमेतैर्दृढीकृतम्॥
सर्वश्लेष्मज्वरनाशार्थं रसो गुञ्जाद्वयोन्मितः।
भक्षितस्तप्ततोयेन वातश्लेष्मज्वरापहः॥"

इति श्लेष्मज्वरो रसो वातश्लेष्मज्वरे शीतज्वरे च॥ रसप्रदीपे।

"स्वेदोद्गमे भृष्टकुलत्थचूर्ण-
निपातनं ग्रस्तमिति ब्रुवन्ति।
जीर्णं गुडक्षौद्रयवस्य भाजनं
संचूर्णितं स्वेदहरं सुधूलनात्॥
मरिचं पिप्पली शुण्ठी पथ्या लोध्रस्य पौष्करम्।
भूनिम्बः कटुका कुष्ठं कर्चूरो लिङ्गिका शटी॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
एतद्धूलनं श्रेष्ठं स्रोतोवत् स्वेदनिर्गमे॥"

लिङ्गिका पद्मगुरिया इति लोके। अत्र शटी गन्धपलाशी। इति मरिचाद्यधूलनम्॥ * ॥

"भूनिम्बकारवीतिक्तावचाकटफलजं रजः।
एषासुधूलनं श्रेष्ठं सन्ततं स्वेदसंसवे॥"

इति भूनिम्बाद्यधूलनम्॥ * ॥

पूर्वोक्तो बालुकास्वेदोऽप्यत्र समुचितः॥ यत उक्तम्।

"पौनस्नश्वासवाधीर्ये जङ्घापार्श्वास्थिशूलिनि।
वातश्लेष्मज्वरे स्वेदं कारयेत् तद्विधानवित्॥*॥
मातुलुङ्गफलकेशरो धृतः
सिन्धुजन्मसरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं
श्लोषमाशु जडतामरोचकम्॥

इति कवलः॥"

अथान्नमाह।

"मसूरा पञ्चमूल्यान्नं सम्यक् सिद्धं चिकित्सकः।
सप्तमे दिवसे दद्यात् ज्वरे वातबलासजे॥"

इति वातश्लेष्मज्वराधिकारः॥ * ॥

अथ पैत्तिकश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह।

"पित्तश्लेष्मकरैः पित्तकफवामाग्न्यया अथो।
वह्निर्न्यस्य क्रोशायिं रसगौ ज्वरकारिणौ॥"

पूर्वरूपमाह।

"प्राग्रूपे पित्तकफयोः स्यातां पित्तकफे ज्वरे॥"

अथ तस्य लक्षणमाह।

"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
सुदुर्दिनो गुरुः शीतं पित्तश्लेष्मज्वरातिः॥"

आस्यस्य तिक्तत्वं पित्तेन। लिप्तत्वं कफेन। तन्द्रा अर्द्धोन्मीलितनेत्रवम्। मोहो मूर्च्छा॥*॥

अथ पित्तश्लेष्मज्वरस्य चिकित्सा।

"पित्तश्लेष्मज्वरे देयमौषधं दशमेऽहनि।
गुडूचीनिम्बधान्याकचन्दनं कटुरोहिणी॥
गुडूच्यादिरयं काथः पाचनो दीपनः स्रुतः।
तृष्णादाहारुचिच्छर्दिपित्तश्लेष्मज्वरापहः

इति गुडूच्यादिकाथः। *

"अम्लताकटुकारिष्टपटोलं वनचन्दनम्।
नागरेन्द्रयवश्वेतदन्ताश्मकमीरितम्॥
क्वथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहम्।
हृल्लासारोचकच्छर्दितृष्णादाहनिवारणम्॥"

इति अम्लताश्मकम्॥ * ॥

"कराटकार्यम्लता भार्गी विश्वेन्द्रयववासकः
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणीम्।
विपाच्य पाययेत् काथं पित्तश्लेष्मज्वरापहम्।
दाहतृष्णारुचिच्छर्दिकासशूलनिवारणम्॥"

इति कराटकार्यादिकाथः॥ * ॥

"नागरोशीरविल्वाब्दधान्यमोचरसाम्बुभिः।
स्रुतः काथो भवेद्ग्राही पित्तश्लेष्मज्वरापहः॥"

इति नागरादिकाथः॥ * ॥

"सशर्करामलमात्रां कटुकाक्षोद्रवारिणा।
पीत्वा ज्वरं जयेच्छीघ्रं पित्तश्लेष्मसमुद्भवम्॥"

अत्र कटुकाया द्वादशमाषाः। शर्करायाश्चत्वारो माषाः। एवं कर्ष इति चक्रदत्तः॥ वैद्यव्यवहारे तु कटुकाशर्करयोः समभागयोरेव कर्षः। इति कटुकीकल्कः॥ * ॥

"सपत्रपुष्पवासायाः रसः क्षौद्रसितायुतः।
पित्तश्लेष्मज्वरं हन्ति सासपित्तं सकामलम्॥"

अत्र वासाया रसो अर्द्धपलपरिमितो देयः। मधुसितयोः प्रत्येकं टङ्कः प्रक्षेप्यः॥ * ॥

अथान्नमाह।

"कषायः परिपीतस्तु भृङ्गवेरपटोलयोः।
पित्तश्लेष्मज्वरवमीदाहकण्डूहरो भवेत्॥"*॥

अन्यच्च।

"पटोलधान्ययोर्यूषः पित्तश्लेष्मज्वरापहः॥"

इति पित्तश्लेष्माधिकारः॥ * ॥

अथ सन्निपातज्वराधिकारः। तस्य निदानादिचिकित्सा सन्निपातज्वरशब्दे द्रष्टव्या॥*॥

अथागन्तुकज्वराधिकारमाह। तत्रागन्तुकज्वरस्य निदानान्याह।

"अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्॥"

अभिघातः शस्त्रमुष्टिलगुडादिभिरभिहननम्। अभिषङ्गः कामशोकभयक्रोधभूतादीनामावेशः। अभिचारः क्षत्यादुत्पादनम्। अभिशापः ब्राह्मणगुरुवृद्धसिद्धादिकृतः शापः। तं आगन्तुज्वरं यथास्वं यथादोषलक्षणं दोषैर्विभावयेत् विजानीयात्॥ * ॥ अपराण्यपि निदानान्याह।

"ये भूतविषवायुमिश्रितभङ्गादिसम्भवाः।
रागद्वेषभयाद्यै च ते स्युरागन्तवो गदाः॥"

भयाद्येत्यादिशब्देन भूतविषवायुमिश्रितभङ्गादयः संगृह्यन्ते। तेन रागादयोभङ्गाद्यन्ता हेतवोऽप्यागन्तुसंज्ञाः स्युः। कार्यकारणयोरभेदोपचारात्। एवं च आगन्तुजः स्रुत इत्यत्राप्यागन्तुशब्दो हेतुवाची आगन्तुर्जायते दोषैरित्यत्र त्वधिकरणवाची अभिघाताभिषङ्गाभ्यामित्यादि श्लोके दोषैर्यथास्वं तं विभावयेदितिवचनेनैव प्रतीयते। अभिघातादीनां विप्रकृष्टकारणत्वं मिथ्याहारविहाराणामिव दोषाणां सन्निकृष्टकारणत्वम्। तथा सति दशापमानसंक्षुब्धरन्ध्रेत्यादि श्लोके आगन्तुज्वरस्यात्मत्वविघातो दोषस्येत्येव प्रवेशात्। उच्यते। आगन्तुज्वरस्य दोषा आरम्भका न किन्तु पश्चादनुबन्धिनः॥*॥ तथा चागन्तुज्वरस्य सम्प्राप्तिमाह चरकः। आगन्तुर्हि यथापूर्वं जायते पश्चान्नैजैर्दोषैरनुबध्यत इति॥ * ॥

तत्र कस्यागन्तोः को निजो दोष इत्यपेक्षायामाह ।

'कामशोकभयाद्वायुः क्रोधात् पित्तं चयो मलाः।
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥"

कामशोकभयात् कामशोकभयजादागन्तोर्वायुः कुप्यति। क्रोधात् क्रोधजादागन्तोः पित्तं कुप्यति। भूताभिषङ्गात् भूतावेशजादागन्तोः चयो मला दोषाः कुप्यन्ति इत्यर्थः। भूतसामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणाः मलाः ॥ * ॥

अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।

"श्यावास्यता विषक्लमे तथातीसार एव च।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥"

विषक्लमे स्थावरजङ्गमदियभक्षणक्लमे ज्वरे। श्यावः शुक्लानुविद्धः कृष्णो वर्णः श्याववर्णो वा। अतीसारः स्थावरविषेणैव तस्याधोगामित्वात्। तोदः सूचीव्यधनेनेव व्यथा ॥ *

"ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥"

कामजे समीहितकान्ताद्यप्राप्तिनिमित्तके ज्वरे। चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि। तानि यथा,—

"कामाद्भ्रमोऽरुचिर्हृद्रोगो द्रौनिद्राधीधृतिक्षयः।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥"

भयात् भयजे ज्वरे प्रलापः। शोकाच्च चकारेण प्रलाप एवानुक्रम्यते। कोपाच्च कोपादपि वेपथुर्भवति ॥ * ॥ ननु वेपथुर्वातस्य धर्मः तत् कथं क्रोधजे ज्वरे वेपथुः। यत उक्तम्। क्रोधात् पित्तमिति। उच्यते।

"एकः प्रकुपितो दोष इतरानपि कोपयेत् ॥"

इति वचनात् पित्तकोपितवातजन्य एवाच वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति। यत उक्तं विदेहेन। क्रोधशोकौ स्मृतौ वातचित्तरक्तप्रकोपनाविति। यत उक्तम्।

"भूताभिषङ्गाद्धसितं रोदनं कोपने।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥"

भूताभिषङ्गोत्थो विषमज्वरो भवति। कदाचिदपि वेगवान् कदाचिच्छान्तवेग इत्यर्थः ॥

"अभिचाराभिशापाभ्यां मोहस्मृत्याच जायते।"

स्मृत्या चेति चकारेण हारीतानुवादि वाग्भटोक्तञ्च बोद्धव्यम्। तद्यथा,—

"अचाभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते।
पूर्वं मनस्ततो देहस्ततो विष्फोटविभ्रमैः।
सदाहमूर्च्छार्तस्यास्य प्रत्यहं वर्द्धते ज्वर इति ॥"

अथ तेषां चिकित्सा।

"आगन्तुजे ज्वरे नैव नरः कुर्वन्ति लङ्घनम् ॥"

तथा च वाग्भटः।

"शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥"

नेष्यते इति शेषः। अन्यच्च।

"लङ्घनं न हितं कामशोकचिन्ताग्रहारुजे।
भयभूतक्षमक्रोधलङ्घनेषु कृते ज्वरे ॥
किन्तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनम् ॥
अभिघातज्वरे युञ्ज्यात् क्रियासृग्विवर्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्मेधेश्च तथा मांसरसौदनैः ॥"

मेधैर्मेधाय हितैः ॥ * ॥

"अधवन्यश्रमाध्वभङ्गभ्रंशसमुद्भवान्।
ज्वरानुपाचरेत् पूर्वं क्षीरमांसरसौदनैः ॥"

अधस्ताड़नं कर्णादिवेधो वा। भङ्गश्छेदभेदादिकः। भ्रंशो वृक्षादितः पतनम् ॥ * ॥

"अध्वश्रान्तेषु चाभ्यङ्गं दिवानिद्राञ्च कारयेत्।
ओषधीगन्धविषजौ विषपित्तप्रबाधनैः।
जयेत् कषायैर्मतिमान् सर्वगन्धकृतैर्भिषक् ॥"

सर्वगन्धमाह।

"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्।
लवङ्गसहितश्चैव सर्वगन्धं विनिर्दिशेत् ॥ * ॥
क्रोधजे पित्तजे काम्ये नार्याः सङ्गाच्यमेव च।
श्वासेनेश्वलाभेन वायोः प्रश्वसनेन च ॥
हर्षणैश्च शमं यान्ति कामशोकभयज्वराः।
कामैरथ मनोज्ञैश्च पित्तजेष्वाप्युपक्रमेः ॥
सद्भाक्ष्येश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥"

कामैः कामावेशैः। मनोज्ञैः धिक्कारादिभिर्भयजनकवचनैर्वा ॥ * ॥

"कामात् क्रोधज्वरो नश्येत् क्रोधात् कामज्वरस्तथा।
घातिताभ्यामुभाभ्याञ्च कामक्रोधज्वरश्चयः ॥"
घातिताभ्यामुभाभ्यां मनसि निगृहीताभ्यां कामक्रोधाभ्याम् ॥ * ॥

"भूतविद्यासमुद्दिष्टैर्बन्धादेशनताड़नैः।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वैश्च मानसम् ॥"

ताड़नैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ॥

"सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति।
एकद्वित्रिचतुर्भिर्दिवसैर्भूतज्वरं पुंसाम् ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिभिर्जयेत्।
दानस्वस्ययनातिथ्यैरुत्तमातपगन्धहृद्विजौ ॥"

इत्यागन्तुज्वराधिकारः ॥ * ॥

अथ विषमज्वराधिकारमाह। तत्र विषमज्वरस्य निदानादिचिकित्सापर्यन्तं विषमज्वरशब्दे द्रष्टव्यम् ॥ * ॥

अथ जीर्णज्वराधिकारः। तस्य निदानादिकं जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥

अथ दुर्ब्बलजनितस्य ज्वरस्य चिकित्सामाह।

"हरीतकी निम्बपत्रं नागरं सैन्धवोज्वलः।
एषां चूर्णं सदा खादेत् दुर्ब्बलज्वरशान्तये ॥"

इति हरीतक्यादि चूर्णम् ॥ * ॥

"अरुचिमनलमान्द्यं पीनसश्वासकास-
मुदरसदृक्कदोषानास्य हन्यादशेषान्।
जनयति तनुकान्तिं चित्तवैमल्यसादं
पलपरिमितमुशुण्ठीचूर्णमिश्रः कषायः ॥"

इति शुण्ठीकाथः ॥ * ॥

"विल्वं भागद्वयं दग्धकपर्दैः पञ्चभागकैः।
मरिचं नवभागाच्च चूर्णं वस्त्रेण शोधयेत् ॥
आर्द्रकस्य रसेनास्य कुर्य्यान्मुद्गनिभां वटीम्।
वारिणा वटिकाद्वयं प्रातः सायञ्च भक्षयेत् ॥
व्यथं रसो ज्वरे योज्यः सामे दुर्ब्बलजेऽपि च।
अजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥"

इति दुर्ब्बलजेता रसः ॥ * ॥

"पटोलमुस्ताम्बतवल्लिवासकं
सनागरं धान्यकिरातितिक्तकम्।
कषायमेषां मधुना पिबन्नरो
निवारयेत् दुर्ब्बलदोषसम्भवम् ॥"

इति पटोलादिकाथः ॥ * ॥

"किराततिक्तत्रिवृदम्बुपिप्पली-
विड़ङ्गविश्वाकटुरोहिणीरजः।
निहन्ति लीढ़ं मधुनातिदुस्तरं
सुदुस्तरं दुर्ब्बलदोषजं ज्वरम् ॥"

इति किराततिक्तादिचूर्णम् ॥ * ॥

"भोजनादौ नरैर्भुक्तं शुण्ठीराज्यमधोत्थितम्।
कल्कं तु सहते नित्यं नानादेशोद्भवं जलम् ॥
महार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा।
नानादेशसमुद्भूतंवारिदोषमपोहति ॥"

अथ साध्यस्य ज्वरस्य लक्षणमाह।

"बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥"

ज्वरस्योपद्रवानाह।

"श्वासमूर्च्छारुचिर्च्छर्द्यतीसारविड्ग्रहाः।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥"

प्रसङ्गादुपद्रवाणां चिकित्सायां विशेषमाह।

"संजातोपद्रवो व्याधिस्त्याज्यो न स्याच्चिकित्सकैः।
व्याधौ शान्ते प्रशाम्यन्ति सद्यः सर्व्वेऽप्युपद्रवाः ॥
अतो व्याधिं जयेदूर्ध्वात् पूर्व्वं पश्चादुपद्रवम्।
भिषग्वैद्यः कुशलः स्याच्च जयेत् पूर्व्वमुपद्रवम् ॥
तेष्वपि प्रचुरेषु प्राङ्नाशयेदाशुकारिणम्।
मूलव्याधिं जयेत् पूर्वं जेयो यो वा भवेद्बली ॥
अविरोधेन वा कार्य्यादुभयोरपि च क्रियाम् ॥"

तत्र ज्वरे श्वासस्य चिकित्सा।

"सिंही व्याघ्री ताम्रमूली पटोली
भार्ङ्गी पद्मा पुष्करं रोहिणी च।
शार्ङ्गेष्टा शैलमल्लाश्च बीजं
श्वासं हन्यात् सन्निपाते दशाङ्गः ॥"

सिंही वड़ाकटेया। व्याघ्री कटेया। ताम्रमूली दुरालभा। पद्मा भार्गी। रोहिणी कटुकी। शैलमल्ली वांरेया। इति दशाङ्गो योगः ॥ * ॥

"भार्गीनिम्बधनाभयास्तलताभूनिम्बवासाविषा-
व्याघ्रीकटुकावचाचिकटुकश्लोणाकणश्चद्रमैः।
राजायासपटोलपाटलिघटीदार्व्वीविशाला-
चित्रक-
ब्राह्मीपुष्करसिंहिकाह्वयनिशाधात्र्यश्चदेव-
द्रुमैः ॥
क्वाथोऽयं खलु सन्निपातविहितान् हृच्छ्वासपीनसौ।
दुर्ब्बर्षाक्रियतेऽसकृत् विजयते सर्पान् गरुत्मानिव

किञ्च श्वासवलासकासगुदरुग्ग्रहणीगरहिक्कामरु-
न्मान्द्याग्निभगलामयार्हितमला विश्वम्भराप्य-
पि ॥"
विषा अतीस । शृङ्गवेरम् । कुटजम् । देवदारु । इति हारिश्चन्द्रकाथः । * ॥
"मधुना लवणाकटफलकर्कटशृङ्गीभवं चूर्णम् ।
श्वासामये महोग्रे पीत्वा लोकः सुखी भवति ॥
वन्योपलाक्षितापितदारुस्थाग्नेय पञ्जरे दाहः ।
अपहरति श्वासामयमसंशयं भाषितं मुनिभिः॥"
अथ ज्वरे मूर्च्छायाश्चिकित्सा ।
"आर्द्रकस्य रसैर्नस्यं मूर्च्छायामाचरेन्नरः ।
अञ्जनञ्च प्रयुञ्जीत मधुसिन्धुशिलोद्भवे: ॥
शीताम्भसाभिषेकः सुरभिर्धूपः सुगन्धिपुष्पञ्च ।
वृन्तालवृन्तवातः कोमलकदलीदलप्रायैः ॥"
अथ ज्वरे अरुचेश्चिकित्सा ।
"अरुचौ तु शृङ्गवेरजरसकैः सार्द्धैः ससिन्धुजैः
कवलः ।
सिन्धूत्थमातुलुङ्गीफलकेशरधारणं वक्त्रे ॥"
अन्यच्च ।
"अरुचौ मातुलुङ्गस्य केशरं साध्यसैन्धवम् ।
धात्रीद्राक्षासितानां वा कल्कमास्ये तु
धारयेत् ॥"
अथ ज्वरे छर्द्देश्चिकित्सा ।
"काथो गुडूच्याः समधुः सुशीतः
पीतः प्रशान्तिं वमनस्य कुर्य्यात् ।
विष्कन्धिकाया मधुनावलीढा
सचन्दना शर्करयान्विता च ॥"
अथ ज्वरे तृष्णायाश्चिकित्सा ।
"दन्तशठीबीजपूरकदाडिमवदरैः सयूषकैर्वेदने ।
पेयो जयति पिपासामथ रजतशुटीसुखाम्भःसा ॥
शीतं पयः क्षौद्रयुतं निपीत-
मामलकमार्द्रमेव तद्वद्भेषजं ।
तर्षप्रकर्षप्रशमाय वक्त्रे
दध्याद्रदाडिमवटाग्रलाजान् ॥"*॥
अथ ज्वरे अतीसारस्य चिकित्सा ।
"लङ्घनमेकं सुखकारि नान्यद्रुक्षौ भेषजं बलिनः ।
सप्तदशैतान्यतिसारं शमयति तत् पाचयत्यपि च ॥
वत्सादनीवत्सकवारिवाह-
विश्वम्भरानिम्बविषाः सविश्वाः ।
ज्वरातिसारं त्वरितं जयन्ति
विश्वामृतावत्सकवारिवाहः ॥"
विश्वम्भरानिम्बो भूनिम्बः ।
"पाठाम्बुतापर्पटमुस्तविश्वा-
किराततिक्तेन्द्रयवान् विपाठ्य ।
पिबन् हरत्येव दृढेन सर्व-
ज्वरातिसारानपि दुर्निवारान् ॥"*॥
अथ ज्वरे विड्ग्रहस्य चिकित्सा ।
"विड्ग्रहे वातजित् कर्म कुर्य्यादन्नानुलोमनम् ।
मलं प्रवर्त्तयेदाशु तीक्ष्णाभिः फलवर्त्तिभिः ॥
पथ्यारुग्वधतिक्तात्रिवृदामलकैः शृतं तोयम् ।
जीर्णज्वरे विबन्धे दद्यादाश्वेव विड्ग्रहः
शाम्येत् ॥"
अथ ज्वरे हिक्कायाश्चिकित्सा ।
"नीरेण सिन्धूत्थरजोऽतिरुक्षं
नस्येन नूनं विनिहन्ति हिक्काम् ।
मुखौ हठाद्वा सितया समेता
धूपोऽथवा हिङ्गुससुक्तवक्त्र ॥"*॥
अथ ज्वरे कासस्य चिकित्सा ।
"कासे कणाकणामूलं कलिङ्गमफलं रजः ।
सविश्वभेषजं लिह्यात् मधुना वा दृषद्रसम् ॥"
रजः पर्पटकम् ।
"पुष्करमूलकटुत्रिकशृङ्गीकट्फलयासककार-
विकाभिः ।
मधुगुलिताभिरयं खलु लेहः कासरिपुः कफ-
रोगहरश्च ॥"*॥
अथ ज्वरे दाहस्य चिकित्सा ।
"दाहाधिकारलिखितं दाहे कुर्य्याच्चिकित्सितम् ।
परं ज्वराविरुद्धं यन्मुखो नाम्नो ज्वरो यतः ॥"
अथ सुखसाध्यस्य ज्वरस्य लक्षणम् ।
"सप्ताहोऽभ्यधिको वाह्यस्तृष्णादीनाञ्च मार्द्दवम् ।
बहिर्व्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥"
लङ्घनादित्यादिग्रन्थेनान्तर्दाहसन्धास्थि-वयो-
श्वासा गृह्यन्ते । तेषामार्द्दवमल्पता । बहि-
र्व्वेगस्य ज्वरस्य ।
"वर्षाशरद्वसन्तेषु वातादेः प्राकृतः क्रमात् ।
प्राकृतः सुखसाध्यस्तु शरत्सुरभिसम्भवः ॥"
सुरभिर्व्वसन्तः । * ॥
अथ कृच्छ्रसाध्यस्य ज्वरस्य लक्षणमाह ।
"वैकृतोऽन्यः स दुःसाध्यः प्राकृतेष्वनिलोद्भवः ॥"
अन्यः प्राकृतादन्यः वैकृतः । * । वर्षादिषु
ज्वरं जनयतां वातादीनां चिकित्साविशेषार्थं
प्राधान्यमप्राधान्यञ्चाह ।
"वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितं ज्वरम् ।
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ॥"
तस्य पित्तज्वरस्य चिकित्सामाह ।
"तत्प्रकृत्या विसर्गाच्च तच्च नानशनाद्भयम् ॥"
तत्प्रकृत्या तस्य पित्तस्य प्रकृत्या स्वभावेन ।
यत उक्तम् ।
"कफपित्ते द्रवे धातू सन्तते लङ्घनं बहु ॥" इति ।
विसर्गाच्च शरदो विसर्गकालत्वाच्च । यत उक्तम् ।
वर्षाशरद्धेमन्ता विसर्गाः कालास्त्रयोपचितबला-
प्राणिनो भवन्ति सोमस्य बलवत्त्वादिति । तच्च
शरदि पित्तज्वरे अनशनाद्भयं न । कफो वसन्ते
तमपि वातपित्तं भवेदतु । वसन्ते कफज्वरेऽपि
कफप्रकृत्या लङ्घनाद्भयं न भवति । किन्तु
वसन्तस्यादानकालत्वात् निःशङ्कं न कर्त्तव्यम् ।
यत उक्तम् । शिशिरवसन्त-ग्रीष्मास्वादानकालाः
क्षत्रापचितबलाः प्राणिनो भवन्ति सूर्य्यस्य
बलवत्त्वादिति । एतेनेदं उक्तम् । वर्षासु वायुः
प्रधानं पित्तश्लेष्माणावप्रधाने । शरदि पित्तं
प्रधानं कफोऽप्रधानम् । वसन्ते श्लेष्मा प्रधानं
वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधा-
न्येन चिकित्सा कर्त्तव्या । सा चाप्रधाना
निरुद्धा विधेया । एवं वैकृतेष्वपि प्रधा-
नस्य प्राधान्येन चिकित्सा कर्त्तव्या । तथा
चोक्तम् ।
"संसर्गे यो गरीयान् स्यादुपक्रम्य स वै भवेत् ।
भेषजदोषविरोधेन सन्निपाते तथैव च ॥"
संसर्गे दोषद्वयस्य संसर्गे । गरीयान् प्रधानः ।
"अन्तर्दाहोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्धास्थिशूलमस्वेदो दोषवर्चोविनिग्रहः ॥
अन्तर्व्वेगस्य लिङ्गानि कृच्छ्रसाध्यत्वमेव च ॥"
वर्चोविनिग्रहः पुरीषाप्रवृत्तिः । * ॥
अथासाध्यस्य ज्वरस्य लक्षणमाह ।
"ज्वरः क्षीणस्य शूलस्य गम्भीरो दैर्घ्यरात्रिकः ।
असाध्यो बलवान् यश्च केशसीमन्तकृत् ज्वरः ॥"
दैर्घ्यरात्रिकः बहुरात्रानुबन्धी । केशसीमन्तकृत्
प्रभावात् केशेषु सीमन्तं यः करोति । * ॥
गम्भीरस्य लक्षणमाह ।
"गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चास्यर्थं कासश्वासोद्भमेन च ॥"
आनद्धत्वेन विबद्धमलत्वेन । * ॥ सामान्य-
ज्वरेऽपि कर्णमूलग्रीवास्साध्यत्वादिकमाह ।
"ज्वरस्य पूर्वं ज्वरमध्यतो वा
ज्वरान्ततो वा श्रुतिमूलग्रीवः ।
क्रमात्साध्यः खलु कृच्छ्रसाध्यः
सुखेन साध्यो मुनिभिः प्रदिष्टः ॥"*॥
अथारिष्टमाह । तत्रारिष्टस्य लक्षणम् ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादरिष्टमप्यभिधीयते ॥
हेतुभिर्बहुभिर्ज्ञातो बहुभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद्यश्च ग्रीवमिन्द्रियनाशनः ॥"
ग्रीवमिन्द्रियनाशनः तत्पन्नमात्र एव चिकित्-
स्यमानोऽपीन्द्रियाणां चक्षुरादीनां शक्तिं यो
नाशयति । * ॥ अन्यचारिष्टमाह ।
"विसंज्ञस्साम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्द्दितोऽन्तरुष्मा च ज्वरेण म्रियते नरः ॥"
विसंज्ञः विगतज्ञानः । साम्यते नश्यति । शेते
निपतितोऽपि वा अत्रापिशब्द एवार्थः निप-
तित एव तिष्ठति न चोत्थातुं समर्थः तथा सन्
शेत एव । शीतार्दितः बहिः । अन्तरुष्मा:
अन्तर्दाहवान् । * ॥ अन्यच्च ।
"यो ह्रस्वरोमा रक्ताक्षो हृदि सङ्घातमूलवान् ।
वक्त्रेण चैवोच्छ्वसिति ज्वरस्तं हन्ति मानवम् ॥"
ह्रस्वरोमा रोमाल्पवान् । हृदि सङ्घातमूलवान्
सान्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति
न तु नासिकया । * ॥ अन्यच्च ।
"हिक्काश्वासज्वरायुक्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वसितं क्षीणं नरं क्षपयति ज्वरः ॥"
क्षपयति समापयतीत्यर्थः । * ॥ अन्यच्च ।
"हृतप्रभेन्द्रियं क्षाममरोचकनिपीडितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ॥"
हृता प्रभा दीप्तिर्येषाम् । अथवा हृता प्रभा
प्रतिभा विषयग्रहणशक्तिर्येषां तथाविधानीन्द्रि-
याणि यस्य तं हृतप्रभेन्द्रियम् । क्षामं क्षीणम् ।
गम्भीरतीक्ष्णवेगार्त्तं गम्भीरः उक्तलक्षणः

तीक्ष्णवेगः अतिदुःसहवेगः ताभ्यां आर्त्तं दुःखितम् ॥ * ॥ अन्यच्च ।
"मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शैफस्यः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"
व्याख्यातोऽयं शोकः ॥ * ॥
विषमज्वरस्यारिष्टमाह ।
"आरम्भाद्विषमो यस्य यस्य वा दैर्घ्यराचिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो हन्ति यस्य तम् ॥"
यस्य आरम्भाद्विषमः प्रथमोत्पत्तेरेव विषमः न तु ज्वरोत्तरस्य । यस्य दैर्घ्यराचिको वा यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति तं विषमो दैर्घ्यराचिको गम्भीरश्च हन्तीत्यर्थः ॥ इति ज्वराधिकारः ॥*॥ अथ ज्वरातिसाराधिकारः ।
"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥"
अथ ज्वरातिसारस्य चिकित्सामाह ।
"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेत् पुनः ॥"
अयमभिप्रायः । ज्वरहरमनुलोमनं भवति । अतीसारहरं स्तम्भनं भवति । अतः परस्परविरुद्धत्वात् पृथक् उक्तं भेषजं मिलितयोर्न कार्य्यम् । यत आह ।
"अनुलोमनं ज्वरघ्नं ग्राहकमतिसारनुद्भवति ।
पृथगुक्तमौषधं तज्ज्वरातिसारे विरुद्धमन्योन्यम् ॥
अतस्तौ प्रतिकुर्व्वीत विशेषोक्तचिकित्सितैः ।
लङ्घनमेकं सुक्त्वा नान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत् पाचयेत्तथा शमयेत् ॥
लङ्घनसुभयोरुक्तं मिलिते कार्य्ये विशेषतस्तद्वत् ।
उत्पलषट्कसिद्धं लाजमण्डादिकं सकलम् ॥"
उत्पलषट्कं यथा,—
"पृश्निपर्णीबलाविल्वधनिकानागरोत्पलैः ।
ज्वरातिसारी पेयां वा पिबेत् साम्लां ग्रहणीं नरः ॥"
अत्र लाजमण्डाद्यपेक्षया वाशब्दः । व्यतिसारे पुरीषातिप्रवृत्त्या साम्लत्वञ्च दाड़िमरसादिना कर्त्तव्यम् । इत्युत्पलषट्कम् ॥ * ॥
"कणा करिकणा लाजकाथो मधुसितायुतः ।
पीतो ज्वरातिसारस्य तृष्णावम्योश्च नाशनः ॥"
इति कणादिक्काथः ॥ * ॥
"नागरातिविषामुस्ताभूनिम्बवत्सकैः ।
काथः सर्व्वज्वरहरः सर्व्वातीसारनाशनः ॥"
इति नागरादिक्काथः ॥ * ॥
"गुडूच्यतिविषाधान्यसुण्ठीबिल्वाब्दवालकैः ।
पाठा भूनिम्बकुटजं चन्दनोशीरपर्पटैः ।
पिबेत् कषायं सक्षौद्रं ज्वरातीसारशान्तये ॥
श्लेष्मासृक्छर्द्दिदाहघ्नमीनां विनिवृत्तये ॥"
इति गुडूच्यादिक्काथः ॥ * ॥
"उत्पलं दाड़िमत्वक् च पद्मकेशरमेव च ।
पिबेत्तण्डुलतोयेन ज्वरातीसारनाशनम् ॥"
इत्युत्पलादिचूर्णम् ॥*॥
बिल्ववालकभूनिम्बगुडूचीधान्यनागरैः ।
कुटजाब्दयुतः क्काथो ज्वरातीसारशूलजुत् ॥
इति बिल्वादिक्काथः ॥ * ॥
"नागरातिविषाविश्वागुडूचीबिल्वमुस्तकैः ।
कषायः पाचनः श्रेष्ठो ज्वरातीसारनाशनः ॥"
इति नागरादिक्काथः ॥ * ॥
"दशमूलीकषायेण विश्वामत्तसमां पिबेत् ।
ज्वरे चैवातिसारे च सप्लीहे ग्रहणीगदे ॥"
इति दशमूलीक्काथः ॥ * ॥
इति ज्वरातिसाराधिकारः । इति भावप्रकाशः ॥
ज्वरघ्नः, पुं, (ज्वरं हन्तीति । हन् + टक् ।) गुडूची । वासकम् । इति राजनिर्घण्टः ॥ ज्वरनाशके, त्रि । (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"ज्वरघ्नं पाचनं बल्यं दृष्यं रुच्यं कफापहम् ॥")
ज्वरहन्त्री, स्त्री, (ज्वरं हन्ति या । हन् + क्तिच् ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ज्वरघ्नी च ॥
ज्वराग्निः, पुं, (ज्वर एवाग्निः । दाहकत्वादस्य तथात्वम् ।) ज्वररूपाग्निः । तत्पर्य्यायः । आधिमन्थवः २ । इति हारावली ॥
ज्वराङ्गी, स्त्री, (ज्वरमङ्गति विनाशयतया प्राप्नोतीति । अङ्ग गतौ + अच् । गौरादित्वात् ङीष् ।) भद्रदन्तिका । इति राजनिर्घण्टः ॥
ज्वरान्तकः, पुं, (ज्वरस्य अन्तको विनाशकः ।) नेपालनिम्बः । आरग्वधः । इति राजनिर्घण्टः ॥ ज्वरघ्नौषधविशेषः । यथा,—
"भास्करो गन्धकः शुल्वं देवी विहङ्गतीक्ष्णकम् ।
श्रोत्रितं गगनञ्चैव पुष्यकञ्च महेश्वरम् ॥
भूनिम्बादिगणैर्भाव्यं मधुना गुटिका दृढ़ा ।
चातुर्थकं तृतीयञ्च ज्वरं सन्ततकं तथा ।
आमज्वरं भूतशतं सर्व्वज्वरमपोहति ॥
अत्र भास्करः ताम्रम् । शुल्वं रसः । देवी सौराष्ट्रमृत्तिका । विहङ्गं स्वर्णमाक्षिकम् । गगनं अभ्रकम् । पुष्यकं रसाञ्जनम् । महेश्वरं सुवर्णम् । अन्यत् सुगमम् । ताम्रादीनां समभागचूर्णं भूनिम्बादिक्काथेन भावयेत् । भूनिम्बादशदशपत्राणि सर्व्वत्रयतुल्यानि अष्टभागावशिष्टं क्काथं छाला दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्द्य अणुरूपं लिहेत् । ज्वरान्तको रसः ।" इति भैषज्यरत्नावली ॥ ज्वरनाशकश्च ॥
ज्वरापहा, स्त्री, (ज्वरं अपहन्ति नाशयतीति । अप + हन + डः ।) विल्वपत्री । इति शब्दचन्द्रिका ॥ वेलशुँठा इति भाषा ॥ ज्वरनाशके, त्रि ॥
ज्वरारिः, पुं, (ज्वरस्य अरिः शत्रुर्नाशकत्वात् ।) ज्वरघ्नौषधविशेषः । यथा,—
"दरदवलिरसानां शुल्वनागाभ्रकाणां
सुभगविटशिलानां सर्व्वमेकत्र योज्यम् ।
विपिनतृपदलोत्थैर्भावितं श्रोथयेत्तं
दिवसदशसमाप्तौ रक्तिकैकाञ्च कुर्य्यात् ॥
एकैकां भक्षयेदस्य चार्द्धकस्य रसैर्युतम् ।
दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते ॥
सर्व्वमूलविकारघ्नो च कफपित्तविनाशनः ॥
बलिः । गन्धकः । सर्व्वं श्रोनालिपत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम् । ज्वरारौ रसः ।" इति भैषज्यरत्नावली ॥
ज्वराग्निः, पुं, (ज्वरे अग्निर्वह्निमिवामोघत्वात् ।) ज्वरनाशकौषधविशेषः । यथा,—
"रसं गन्धं सैन्धवञ्च विषं ताम्रसमं भवेत् ।
सर्व्वचूर्णसमं लौहं ततुसमं चूर्णमभ्रकम् ॥
लौहं च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च ।
मर्द्दयेदयत्नतः पश्चान्मरिचं शतसंख्यकम् ॥
पर्णेन सह मातयो रसो रक्तिकसम्मितः ।
सर्व्वज्वरहरश्रेष्ठो ज्वराग्निरुदाहृतः ॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम् ।
धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम् ॥
यकृत्प्लीहोदरग्रन्थिहृदयघ्नञ्च विनाशयेत् ॥
ज्वराग्निनो रसः ।" इति भैषज्यरत्नावली ॥
ज्वरितः, त्रि, (ज्वरः सञ्जातोऽस्य । ज्वर + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) ज्वरी । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।
"सद्गान् मद्यरांश्चाम्लकान् कुलत्थान् समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥"
यथाच,—
"ज्वरितो हितमश्नीयात् यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले सुसुज्ञानः क्षीयते म्रियतेऽथवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ज्वरी, [न्] त्रि, (ज्वरोऽस्यस्येति । ज्वर + इनिः ।) ज्वरयुक्तः । (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।
"गुर्व्वभिष्यन्दकाले वा ज्वरी गाढात् कथञ्चन ॥")
ज्वल, ज म चले । लिघि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) वकारयुक्तः । ज, ज्वालः ज्वलः । म, प्रज्वलयति । मित्त्वेऽपि णौ ज्वलङ्कलञ्जल इत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । ज्वालयति ज्वलयति प्रज्वलयति । लिट् दीप्तिः । ज्वलति वह्निः । इति दुर्गादासः ॥ (यथाह कश्चित् ।
"जागर्त्ति लोको ज्वलति प्रदीपः
सखीगणः पश्यति कौतुकेन ।
मुहूर्त्तमात्रं कुरु नाथ ! धैर्य्यं
वुभुक्षितः किं द्विकरेण भुङ्क्ते ॥")
ज्वलः, पुं, ज्वालः । दीप्तिः । (ज्वलतीति । ज्वल दीप्तौ + अच् ।) दीप्तिविशिष्टे, त्रि । इति सुग्धबोधम् ॥
ज्वलका, स्त्री, (ज्वलतीति । ज्वल + बाहुलकात् वुन् ।) अग्निशिखा । इति हेमचन्द्रः ॥
ज्वलत्, त्रि, (ज्वल + शतृ ।) दीप्तिमत् । तत्पर्य्यायः । जमत् १ कल्मलीकिनम् २ ऊष्मनाभवन् ३ मल्मलाभवन् ४ अर्चिः ५ श्रोचिः ६ तपः ७ तेजः ८ हरः ९ रुचिः १० प्रद्युम्नाग्नि ११ । इत्येकादश ज्वलति नामधेयानि ॥*॥ भ्राजते १ भासते २ भास्वति ३ दीदयति ४ श्रोचति ५ मन्दते ६ भन्दते ७ रोचते ८ द्योतते ९

द्योतते १० दुमत् ११। इत्येकादश ज्वलति-कर्म्माणः। इति वेदनिघण्टौ १ अध्यायः॥

ज्वलनः, पुं, (ज्वलतीति। ज्वल+"कुचड्क्रम्य-ङ्क्रम्यञ्जिघ्वलशुचलषपतपदः।" ३। २। १५०। इति युच्।) अग्निः। (यथा, कला-विलासे। १। ४।

"यत्र त्रिनयननयनज्वलनज्वालावलीमुलभ-वृत्तिः।
जीवति मानसजन्मा शुभ्रिवदनावदनकान्ति-पीयूषैः॥",

चित्रकृत्तः। इत्यमरः। १।१।५६॥ (ज्वल+भावे ल्युट्।) दहने, क्ली॥

वलनाश्मा, [न्] पुं, (ज्वलनः सूर्य्यवद्दीप्ति-विशिष्टः अश्मा प्रस्तरमणिः। नित्यकर्म्मधारयः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

ज्वलितः, त्रि, (ज्वल+क्तः।) दग्धः। उज्ज्वलः। इति मेदिनी। ते, ११०॥ (प्रदीप्तः। यथा, महाभारते। ६। १८। ६।

"काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः॥")

ज्वलिनी, स्त्री, (ज्वलो दीप्तिरस्यस्याः। ज्वल+इनिः+ङीप्।) मूर्व्वालता। इति राज-निर्घण्टः॥

ज्वालः, पुं स्त्री, (ज्वलतीति। ज्वल+"ज्वलितिक-न्तेभ्यो णः।" ३। १। १४०। इति णः। पक्षे स्त्रियां टाप्।) अग्निशिखा। इत्यमरः। १।१।६०॥ (यथा, महाभारते। ३। २१८। ३।

"दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान्॥")

दीप्तिविशिष्टे, त्रि। इति मुग्धबोधम्॥

ज्वाला, स्त्री, दग्धान्नम्। इति शब्दचन्द्रिका॥ (ज्वलतीति। ज्वल+णः+टाप्।) अग्निशिखा। इत्यमरः। १। १। ६०॥ (यथा, विष्णुपुराणे। १। १२। २४।

"अभ्युद्यतोग्रशस्त्राग्नि ज्वालामालाकुलैर्मुखैः॥")

दाहश्च॥ (खनामख्याता ऋक्षस्य पत्नी। यथा, महाभारते। १। ६५। २५।

"ऋक्षः खलु तत्रकदुहितरमुपयेमे ज्वालां नाम। तस्यां पुत्रं मतिनारं नामोत्पादयामास॥")

ज्वालागर्द्दभकः, पुं, (ज्वालगर्द्दभ+स्वार्थे कन्। ततः पृषोदरादित्वात् साधुः।) रोगविशेषः। तत्पर्य्यायः। ज्वालारसभकाभयः २ ज्वाला-खरगदः ३ गर्द्दभगदः ४। इति राजनिर्घण्टः॥ अस्य लक्षणं ज्वालगर्द्दभशब्दे द्रष्टव्यम्॥

ज्वालाजिह्वः, पुं, (ज्वाला शिखा एव जिह्वा यस्य।) अग्निः। इति हेमचन्द्रः। ४।१६५॥ (स्कन्दस्यानुचरविशेषः। यथा, महाभारते ६। ४५। ५८।

"ज्वालाजिह्वः करालश्च श्रुतकेशो जटी हरिः॥")

दानवविशेषः। स तु बलिराजस्य सेनानी-विशेषः। यथा, हरिवंशे। २३२। ६।

"करालो ज्वालजिह्वश्च शतजिद्धः शतलोचनः॥")

ज्वालासुखी, स्त्री, (ज्वालेव सुखं प्रधानं यस्याम्। तत्रात्रस्तप्रज्वलितज्वालाभिरेव पूजादिकं गृह्णाति देवीत्यतोऽस्यास्तथात्वम्।) पीठस्थानावयवः। तत्र भगवत्या जिह्वा पतिता। तत्र अम्बिका देवी। उन्मत्तनामकभैरवश्च। इति पीठमाला॥ यथाच।

"ज्वालासुखां महाजिह्वां देव उन्मत्तभैरवः।
अम्बिका सिद्धिदा नाम्नी स्थानं ज्वालान्तरे मम॥"

इति तन्त्रचूड़ामणौ पीठनिर्णयः॥

विद्याविशेषः। यथा,—

"ज्वालासुखीक्रमं वक्ष्ये सा पूज्या मध्यतः शुभे!।
नित्यारुणा मदनान्तरा मदमोहापञ्चशरेषिः॥
कमला श्रीभारती च आकर्षणी महेन्द्रापि।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चासुखेति च पूजयेत्।
विजया चाजिता चैव मोहनी चापराजिता॥
स्तम्भनी जृम्भनी पूज्या कालिका पद्मवाह्यतः।
ज्वालासुखीक्रमं पूज्य विद्यादिहरणं भवेत्॥"

इति गारुड़े ज्वालासुखीविद्या २०४ अध्यायः॥

झ

झ, झकारः। स यञ्जननवमवर्णः चवर्गचतुर्थ-वर्णश्च। अस्योच्चारणस्थानं तालु। इति शाक-रणम्॥ (यदुक्तं शिक्षायाम्। १७।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्टजावुपू॥")

अस्योत्पत्तिर्यथा,—

"विसर्गसालुगः सोष्मा झं चवर्गश्च यस्तथा॥"

इति प्रपञ्चसारः॥

(वर्णीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,

"त्रिकोणकुण्डलीरूपा वामदक्षिणयोगतः।
क्रमशश्चासु तिष्ठन्ति चन्द्रसूर्य्याग्नयः प्रिये!॥
तत्र क्रोड़गता मात्रा शक्तित्रह्मस्वरूपिणी।
ऊर्द्धमात्रा तथेन्द्राणी मध्ये नारायणी स्मृता॥"

अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।

"ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्॥
रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्।
चतुर्हस्तयुतां देवीं रत्नहारोज्ज्वलां पराम्॥
ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्॥"

अस्य स्वरूपं यथा,—

"झकारं परमेशानि! कुण्डली मोक्षरूपिणी।
रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं तथा॥"

इति कामधेनुतन्त्रम्॥

तस्य ३५ पञ्चत्रिंशत् नामानि यथा,—

"झो झङ्कारी गुहो झञ्झावायुः सत्यः षडुन्नतः।
अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः।
दीर्घबाहुबलो रूपमाक्रन्दितः शुचञ्चलः॥
दुर्मुखो नष्ट आत्मवान् विकटा कुचमण्डलः॥
कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः।
दक्षहासाट्टहासश्च पाथात्मा यञ्जनः स्मरः॥"

इति नानातन्त्रग्राह्यम्॥

झः, पुं, (झटति सङ्घीभवतीति। झट सङ्घाते+बाहुलकात् डः।) झञ्झावातः। अम्बुवर्षणम्। इति शब्दरत्नावली॥ झण्टीशः। सुरगुरुः। देवराजः। ध्वनिः। तारवायुः। इति मेदिनी। झे, १॥ नष्टे, त्रि। इति शब्दरत्नावली॥

झगझगायमानः, त्रि, (झगझग इवाचरतीति। झगझग+"कर्त्तुः क्यङ् सलोपश्च।" ३।१।११। इति क्यङ् ततः शानच्।) चाकचिक्ययुक्तः। झक्‌झकिया इति भाषा। यथा,—

"मयूरवरगामिनीं सुरदशुद्धवर्णोत्कटां
रणत्क्वणितघण्टिकां निश्चितशक्तिहस्तोद्यताम्।
प्रभानिकररश्मिभिर्झगझगायमानांशुकां
नयामि गृहसम्भवां त्रिदशशृङ्खनिर्णाशिनीम्॥"

इति देवीपुराणे रुरुवधे मालतीवनामाध्यायः॥

झङ्कारः, पुं, (झ+भावे घञ् कारः। झमित्यव्यक्त-शब्दस्य कारः करणं यत्र।) भ्रमरादिशब्दः। यथाह वल्लालसेनः।

"प्रारब्धो मधुपैरकारणमहो झङ्कारकोला-हलः॥"

(तथाच पद्मतन्त्रे। ५। ४२।

"शरच्छ्रोतुस्त्राहते दूरं तमसि प्रियसन्निधौ।
धन्यानां विभ्रति श्रोत्रे गीतझङ्कारजा सुधा॥")

झञ्झा, स्त्री, (झमित्यव्यक्तशब्देन झटति वेगेन वहतीति। झट+बाहुलकात् डः। ततष्टाप्।) ध्वनिविशेषः। जलकणवर्षणम्। इति शब्द-रत्नावली॥

झञ्झानिलः, पुं, (झञ्झाध्वनियुक्तोऽनिलः।) प्रावृषिजवायुः। झञ्झावातः। इति त्रिकाण्ड-शेषः॥

झञ्झावातः, पुं, (झञ्झाध्वनियुक्तो वातः।) प्रावृषिजवायुः। इति हलायुधः॥ (यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।

"झञ्झावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनम्॥")

झट, संहतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) झटति केशः। परस्परं लग्नः स्यादित्यर्थः। इति दुर्गादासः॥

झटिः, पुं, (झटति परस्परं संलग्नो भवतीति। झट संहतौ+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इति इन्।) क्षुद्रवृक्षः। इत्युणादिकोषः॥

झटिति, अ, द्रुतम्। शीघ्रम्। तत्पर्य्यायः। झाक् २ अञ्जसा ३ अञ्जाय ४ सपदि ५ झाक् ६ मंक्षु ७। इत्यमरः। ३। ४। २॥ (यथा, पद्मपुराणे। ७। १२५।

"तत्त्वविस्मृतिमात्रान्नार्थः किन्तु विपर्य्ययात्।
विपर्य्येतु न कालोऽस्ति झटिति स्मरतः क्वचित्॥")

झत्ति, अ, (झटिति इति शब्दस्य प्राकृतभाषायां झत्ति इति सिद्धम्।) झटिति। इति प्राकृत-भाषायां काव्यप्रकाशः॥

झनत्कारः, पुं, (झन+भावे घञ् कारः। झनदित्यव्यक्तशब्दस्य कारः करणं यत्र।) अनुकरणशब्दः। कङ्कणादिध्वनिः। यथा, कालिदासः।
"उद्वेल्लद्भुजवल्लिकङ्कणझनत्कारः स्मरं वार्थताम्॥"

झम, उ भत्वे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) उ, झमित्वा झान्त्वा। इति दुर्गादासः॥

झम्पः, पुं. (लम्फः पृषोदरादित्वात् साधुः।) सम्पातपतनम्। लम्फः। इति जटाधरः॥ (यथा, महावीरचरिते। [तार्थः॥")
"पुच्छास्फोटदलत्-ससुद्रविवरैः पातालभाम्पाश्च

झम्पाकः, पुं, (झम्पं लम्फं आराति आददातीति। आ+रा+बाहुलकात् डुः।) वानरः। इति शब्दरत्नावली॥

झम्पाग्नी, [न्] पुं, (झम्पेन सम्पातेन अश्नातीति। अग्न+णिनिः। मतुस्यादिधारयत्काले झम्पदानपूर्ब्बकपतनादस्य तथात्वम्।) मतुस्यरङ्गपक्षी। इति जटाधरः॥

झम्पी, [न्] पुं, (झम्पो लम्फोऽस्यास्तीति। झम्प+"अत इनिठनौ।" ५।२।११५। इति इनिः।) वानरः। इति शब्दरत्नावली॥

झरः, पुं, (झीर्य्यति जीर्णीभवति पतनादिस्थानमनेनेति। झृ+"ऋदोरप्।" ३।३।५७। इत्यप्।) निर्झरः। पर्व्वतावतीर्णजलप्रवाहः। इत्यमरः। २।३।५॥ (समूहः। यथा, मेघदूते।२।३२।
"कलसे निजहेतुदत्तजः
किसु चक्रभ्रमिकारिता गुणः।
य तदुच्चकुचौ भवन् प्रभा-
झरचक्रभ्रमिमातनोति यत्॥"
"य कलसः प्रभाझरूपेण कान्तिसन्दोहेन चक्रभ्रमिं कुलालचक्रभ्रमसमातनोति जनयति। यद्वा प्रभाझरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिमातनोति।" इति तट्टीका॥)

झरा, स्त्री, (झर+टाप्।) झरः। इत्यमरटीकायां भरतः॥

झरी, स्त्री, (झर+ङीष्।) झरः। इत्यमरटीकायां भरतः॥

झर्ष, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) रेफोपधः। ग्र, झर्षतीति झर्षन्ती। गुणस्थानरहितानां तुदादिपाठफलन्तु ग्रन्थान्तरादवगन्तव्यम्। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्ष्ष, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, झर्ष्षन्ती झर्ष्षन्ती। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्म्भ, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, झर्म्भन्ती झर्म्भन्ती। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्झरः, पुं, (झर्झ इत्यव्यक्तशब्दं रातीति। रा+कः। यद्वा, झर्झायति शब्दायते इति। झर्झ+बहुलवचनात् अरः।) वाद्यविशेषः। इत्यमरः। १।७।८॥ चर्म्मपुटाच्छादितकाष्ठस्थानम्। इति तट्टीकासारसुन्दरी॥ करड इति ख्यातः।
"डिण्डिमो डेङ्करी प्रोक्तो झर्झरः पटहः स्मृतः॥"
इति भरतधृतवेकुण्ठः॥
तत्पर्य्यायः। झल्लकी २ झल्ली ३ झल्लरी ४ झर्झरी ५। इति शब्दरत्नावली॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ८५।
"आदौ जलधिनीमूतभेरीझर्झरसम्भवः॥"
झर्झर्यते निन्द्यते इति। झर्झ भर्त्सने+अरः।) कलियुगम्। (झर्झरो झर्झरशब्द इवास्यास्येति। अच्।) नदभेदः। इति मेदिनी। रे, १५८। (हिरण्याश्वपुत्रविशेषः। यथा, हरिवंशे। ३। ७६।
"हिरण्याश्वसुताः पञ्च विद्वांसः सुमहाबलाः।
झर्झरः शुकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

झर्झरकः, पुं, (झर्झर+स्वार्थे कन्।) कलियुगम्। इति त्रिकाण्डशेषः॥

झर्झरा, स्त्री, (झर्झर्यते निन्द्यते इति। झर्झ भर्त्सने+बाहुलकात् अरः। ततष्टाप्।) वेश्या। इति त्रिकाण्डशेषः॥ (जलशब्दविशेषः। यथा, काशीखण्डे। २६। ६८। [वतो॥")
"झिण्टीशवन्द्या झाङ्कारकारिणी झर्झरा-

झर्झरी, स्त्री, (झर्झर+गौरादित्वात् ङीष्।) झर्झरवाद्यम्। इति शब्दरत्नावली॥ (यथा, हरिवंशे। २३७। २।
"गोमुखाडम्बराणाञ्च भेरीणां सुरजः सह।
झर्झरीडिण्डिमानाञ्च यत्रयन्त महास्वनाः॥")

झर्झरीकः, पुं, (झर्झर्तीति। झर्झ+"पर्षरीकादयश्च।" उणा। ४।२०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) शरीरम्। इत्युणादिकोषः॥ देशः। चित्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

झलज्झला, स्त्री, (झलज्झल इत्यव्यक्तशब्दोऽस्यास्यति। अच्।) हस्तिकर्णास्फालनम्। इति त्रिकाण्डशेषः॥

झल्लरी, स्त्री, (झल्लरी। पृषोदरादित्वात् लत्वोपः।) डुडुक्कः। झर्झरवाद्यम्। बालचक्रम्। केशचक्रम्। इति मेदिनी। रे, १५६॥

झल्ला, स्त्री, कन्या। आतपस्योर्म्मिः। इति मेदिनी। ने, २०॥

झल्लः, पुं, वर्णसङ्करजातिविशेषः। इति जटाधरः॥ स च क्षत्रियात् व्रात्यात् सवर्णायां जातः। (यथा, मनुः। १०।२२।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च॥")
प्रहासकः। इति महाभारतम्॥ भाँड़ इति भाषा॥ (स्त्री, झर्झरवाद्यम्॥)

झल्लकं, क्ली, (झल्ल+स्वार्थे कन्।) कांस्यनिर्म्मितकरतालकम्। यथा, तिथ्यादितत्त्वे।
"शिवागारे झल्लकञ्च सर्व्वागारे च शृङ्गकम्।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्॥"

झल्लकण्ठः, पुं, (झल्लो झल्लकशब्द इव कण्ठः कण्ठस्वरो यस्य।) पारावतः। इति हारावली। ८७॥

झल्लरी, स्त्री, (झल्लं झल्लकशब्दं रातीति। रा+कः। स्त्रियां ङीष्।) डुडुक्कः। झर्झरवाद्यम्। (यथा, काशीखण्डे। २६। ६८।
"झल्लरीवाद्यझङ्कार झलज्झालजलाप्लुता॥")
बालचक्रम्। बालड़ीति ख्यातम्। इति मेदिनी। रे, १५६॥ शुद्धम्। क्षेदः। इत्यजयपालः॥

झल्लिका, स्त्री, (झल्लीव कायतीति। कै+कः। पृषोदरादित्वात् साधुः।) उद्वर्त्तनपटः। क्षौतः। इति मेदिनी। के, ६६॥ उद्वर्त्तनमलम्। इति शब्दरत्नावली॥

झल्ली, स्त्री, (झल्ल+ङीष्।) झर्झरवाद्यम्। इति शब्दरत्नावली॥

झल्लोलः, पुं, (झर्झ क्विप् ताडग्रः सन् लोलः। ततः पृषोदरादित्वात् साधुः।) तर्कुलासकः। इति हारावली। २१३॥ टेकुयार वाँटुल इति भाषा॥

झष, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) आद्यक्षरी। झषति। षष्ठक्षरी चायमिति केचित्। झूषति। इति दुर्गादासः॥

झष, ञ यष्टे। पिधाने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, झषति ज्ञपते वस्त्रं जनो यज्ञाति परिदधाति वेत्यर्थः। सप्तमस्वरादिरयमिति पूर्णचन्द्रविलोचनरामाः। अर्षति अर्षते। इति दुर्गादासः॥

झर्ष, क्ली, (झष यष्टे+अच्।) खिलम्। इत्यजयपालः॥

झषः, पुं, (न्यायते वध्यते भक्ष्याय झष्यते यज्ञते इति वा। झष+"खनो च च।" ३।३।१२५। इति च।) मत्स्यः। इत्यमरः। १।१०।१॥ (यथा, भगवद्गीतायाम्। १०।३१।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥")
मकरः। यथा, रामायणे। २।११४।४।
"लीनमीनझषयाहां लक्ष्मां गिरिनदीमिव॥")
तापः। वनम्। इति मेदिनी। षे, १२। मीनराशिः। यथा,—
"सार्द्धसप्तझषे मेषे वसुसार्द्धे घटे वृषे॥"
इति समयप्रदीपः॥

झषकेतनः, पुं, (झषो मकरो मीनो वा केतनं केतुरस्य।) कन्दर्पः। इति हेमायुधः॥

झषा, स्त्री, (झष+अच् ततष्टाप्।) नागबला। इत्यमरः। २।४।११७॥

झषाङ्कः, पुं, (झषः अङ्को यस्य।) अनिरुद्धः। इति हेमचन्द्रः॥ (कन्दर्पः। यथा, श्रीकण्ठचरिते। ११।२।
"यत्कला किल झषाङ्कपुलिन्द-
स्यन्दमानवडिशव्रतमाधात्॥")

झषाशनः, पुं, (झषान् मत्स्यान् अश्नातीति। अश्न् ग भोजने+कर्त्तरि ल्युः।) शिशुमारः। इति त्रिकाण्डशेषः॥

झषोदरी, स्त्री, (झषो मत्स्य एव उदरं उत्पत्तिस्थानमस्याः । झषस्य उदरं उत्पत्तिस्थानतयास्त्यस्याः इति अर्शआदित्वात् अच् ।) व्यासमाता । इति त्रिकाण्डशेषः ॥

झाङ्कृतं, क्ली, (झाम् इत्यव्यक्तशब्दस्य कृतं करणं यत्र ।) चरणालङ्कारविशेषः । इति धरणिः ॥

झाटः, पुं, (झट + घञ् ।) निकुञ्जः । कान्तारः । वृक्षादीनां मार्ज्जनम् । इति मेदिनी । टे, १६ ॥

झाटलः, पुं, (झाटं लातीति । ला + कः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३६ ॥

झाटा, स्त्री, (झट् + णिच् + अच् ततष्टाप् च ।) भूम्यामलकी । इत्यमरः ॥ यूथीवृक्षः । इति शब्दचन्द्रिका ॥

झाटिका, स्त्री, (झाटा + स्वार्थे कन् । टापि अत इत्वञ्च ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

झामकं, क्ली, (झम् + खुल् ।) दध्येडका । इति हारावली । २१४ ॥ झामा इति भाषा ॥

झामरः, पुं, (झामं रातीति । रा + कः ।) तर्कुग्राहः । इतिशब्दरत्नावली ॥ टेकुयार ग्राहु इति भाषा ॥

झार्झरः, पुं क्ली, (झर्झरवादनं शिल्पमस्य । "मड्डुकझर्झरादन्यतरस्याम् ।" ४ । ४ । ५६ । इति अण् ।) झार्झरिकः । झर्झरवाद्यकर्त्ता । इति व्याकरणम् ॥

झालिः, स्त्री, वह्निनविशेषः । झारि इति ख्याता । यथा, भावप्रकाशस्य पूर्व्वखण्डे २ भागे ।

"आम्रमागधजं पिष्टं राजिकालवणान्वितम् ।
भृष्टं शिखियुतं पूतं चोलितं झालिरुच्यते ॥
झालिर्झरति जिह्वायाः कण्ठस्यं कण्ठशोधिनी ।
मन्दं मन्दं निपीता सा रोचनी वह्निबोधिनी ॥"

(झारिः झालिः इति पाठोऽपि कुत्रचित् दृश्यते ॥)

झावुः, पुं, (झा इति शब्दं वाति वायुरत्र । वा + डुः ।) वृक्षविशेषः । इति शब्दरत्नावली ॥ झाउ इति भाषा ॥

झावुकः, पुं, (झावुरेव । स्वार्थे कन् ।) वृक्षविशेषः । झाउ इति भाषा । तत्पर्य्यायः । पिचुलः २ झावुः ३ झाबूः ४ । इति शब्दरत्नावली ॥

झिङ्गाकं, क्ली, (झिगि + आकन् । पृषोदरादित्वात् साधुः ।) फलविशेषः । झिङ्गा इति भाषा । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । श्लेष्मवातमन्दाग्निकारित्वञ्च । इति राजवल्लभः ॥

झिङ्गिनी, स्त्री, (झिगि + इनिः । पृषोदरात् साधुः । ङीप् च ।) झिङ्गिनीवृक्षः । इति भावप्रकाशः ॥ उल्का । इति शब्दरत्नावली ॥

झिङ्गी, स्त्री, (झिगि + अच् ङीष् । पृषोदरात् साधुः ।) झिङ्गिनीवृक्षः । इति भावप्रकाशः ॥

झिञ्झिमः, पुं, (झिम् इत्यव्यक्तशब्दं लात्वा झमति अस्ति वृक्षादीन् दहतीत्यर्थः । (झम भस्मे + अच् । पृषोदरादित्वात् साधुः ।) दावाग्निः । इति हारावली । २६८ ॥

झिञ्झिरिका, स्त्री, क्षुपविशेषः । झिञ्झिरीटा । इति भाषा । तत्पर्य्यायः । सहा २ पीतपुष्पा ३ झिञ्झिरा ४ रोमाश्रयफला ५ वृत्ता ६ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । रक्तातिसारनाशित्वम् । दृष्यत्वम् । सन्तर्पणत्वम् । वल्यत्वम् । मक्षिकाचीरवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

झिल्ली, स्त्री, (झिल्ला इत्यव्यक्तशब्दोऽस्यस्याः । अच् ततो ङीष् च ।) झिल्ली । यथा,—

"झिल्लीवाद्यक्तमधुरा कूजन्ती मधुराकृतिः ।"

इत्यागमः ॥

झिल्लीटी, स्त्री, (झिमिति शब्दं कृत्वा रटतीति । रट् + अच् । ङीष् च पृषोदरात् साधुः ।) पुष्पवृक्षविशेषः । झाँटी इति भाषा । तत्पर्य्यायः । सैरीयकः २ इत्यमरः । २ । ४ । ७५ ॥ कण्टकुरण्टः ३ सैरेयकः ४ झिण्टिका ५ । इति राजनिर्घण्टः ॥ नीलझिण्टायाः पर्य्यायः । वाणा १ दासी २ वर्षाभूः ३ । इत्यमरः । २ । ४ । ७४ ॥ वाणः ४ आर्षभलः ५ इति तट्टीका ॥ सहचरः ६ नीलकुरण्टकः ७ । इति रत्नमाला ॥ अरुणझिण्टायाः पर्य्यायः । कुरबकः १ । इत्यमरः ॥ पीतझिण्टायाः पर्य्यायः । कुरण्टकः १ सहचरी २ । इत्यमरः ॥ सहचरः ३ सहाचरः ४ । इति तट्टीका ॥ वीरः ५ पीतपुष्पः ६ दासी ७ कुरण्टकः ८ । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयव्रणवातकफशोफकासत्वग्दोषनाशित्वञ्च । कुन्दरत्नम् । इति राजनिर्घण्टः ॥

झिरिका, स्त्री, (झिरीति अव्यक्तशब्देन कायति शब्दायते इति । कै + कः टाप् च ।) झिल्ली । इति शब्दरत्नावली ॥

झिरी, स्त्री, (झिर् इत्यव्यक्तशब्दो अस्यस्याः । अच् ङीष् ।) झिल्ली । इति शब्दरत्नावली ॥

झिल्लिः, स्त्री, (झिर् इत्यव्यक्तशब्देन लिङ्गतीति । लिङ्ग् + डिः । रस्य लः ।) वाद्यविशेषः । यथा, गूढार्थदीपिकायाम् ।

"घण्टाशङ्खकथा भेरीन्दङ्गौ झिल्लिरेव च ।
पञ्चानां ग्रस्यते वाद्यं देवताराधनेषु च ॥"

झिल्लिका स्त्री, (झिर् इत्यव्यक्तशब्दं लिङ्गतीति । लिङ्ग् + डिः रस्य लत्वे साधुः । ततः स्वार्थे कन् ।) झिल्ली । (यथा, रामायणे । २ । ६१ । ११ ।

"झिल्लिकाविरुतैर्घोरैर्वृक्षैरिव समन्ततः ॥")

व्यातपरुचिः । विलेपनमलम् । इति हेमचन्द्रः ॥ झिल्लिकारावः । उङ्गणवस्त्रम् । इति शब्दरत्नावली । (उङ्गणवस्त्रम् । झिण्टी । इति मेदिनी । के, ६६ ।)

झिल्ली, स्त्री, (झिल्लि + कृदिकारादिति वा ङीष् ।) कीटविशेषः । झिँझिणोका इति भाषा । तत्पर्य्यायः । झिल्लीकाः २ झिल्लिकाः ३ झिरिकाः ४ झीरुका ५ झिरी ६ चीलिका ७ चीलिका ८ चिल्ली ९ झङ्कारी १० चीलका ११ । इति शब्दरत्नावली ॥ चीरी १२ । इत्यमरः । २ । ५ । २८ ॥ चीरुका १३ । इति तट्टीका ॥ (यथा, भागवते, ३ । ६ । १२ । ५

"अदृश्यझिल्लीखनकर्णशूल-
उलूकवाग्भिर्व्यथितान्तरात्मा ॥")

व्यातपरुचिः । वर्त्ती । उङ्गणांशुकम् । इति मेदिनी ॥ स्थालीलयदग्धान्नम् । इत्यजयपालः ॥

झिल्लीकण्ठः, पुं, (झिल्लीवत् कण्ठः कण्ठशब्दोऽस्य ।) शङ्खकपोतः । इति त्रिकाण्डशेषः ॥

झिल्लीका, स्त्री, (झिल्ली + संज्ञायां कन् ततष्टाप् ।) झिल्लिका । इति हेमचन्द्रः ॥

झीरुका, स्त्री, (झिर इति शब्दायत्तं रौतीति । रु + शब्दे बाहुलकात् कक् टाप् च ।) झिल्ली । इत्यमरः । २ । ५ । २८ ॥

झुङ्, ड गत्याम् । (भ्वां-आत्मं-सकं-अनिट् ।) झुडस्थाने झुड इत्यपि केचित् । ड, भवति । इति दुर्गादासः ॥

झुण्टः, पुं, (झट् संघाते + घञि पृषोदरात् साधुः ।) स्तम्बः । अग्रकाण्डवृक्षः । इति शब्दचन्द्रिका ॥

झुमरिः, स्त्री, रागिणीविशेषः । यथा,—

"प्रायः शृङ्गारबहुला माधुर्य्यकमधुरा लघुः ।
एकैव झुमरिर्लोके वर्णादिनियमोज्झिता ॥
अतो लक्षणमेतस्या नोदाहारि विशेषकम् ।
इदं हि ग्राहकं सर्व्वं प्रसिद्धं नृपरञ्जनम् ॥"

इति सङ्गीतदामोदरः ॥

झूलिः, पुं, क्रमुकभेदः । स्त्री, दुष्टदेवश्रुतिः । इति मेदिनी । ले, १२ ॥

झृ, ष य च्याने । गतवद्बोधोभाव इति यावत् । (दिवां-परं-अकं-अनिट् ।) इति कविकल्पद्रुमः ॥ ष, झरा । य, झर्य्यति । इति दुर्गादासः ॥

झोड्टः, पुं, गुवाकवृक्षः । इति भूरिप्रयोगः ॥

झ्रु, ड गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ॥)

ञ

ञ, व्यञ्जनवर्णविशेषः । स श्रवणदशमवर्णः चवर्गपञ्चमवर्णश्च । (असौ तु अर्द्धमात्राकालेनोच्चार्य्यः ।) अस्योच्चारणस्थानं नासिका तालुञ्च । इति शाकल्यम् ॥ ● ॥ अस्योत्पत्तिर्यथा,—

"विसर्गस्तालुगः सोष्मा यं चवर्गश्च यत्तथा ॥"

इति प्रपञ्चसारः ॥ ● ॥

(पाणिनिमते तु अस्योत्पत्तिस्थानं नासिकान्वितं तालु । अस्योच्चारणे जिह्वामध्यं तालुमध्यस्थं सम्यक् आध्मानप्रयत्नः । संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः । माहेश्वरसूत्रेऽस्य वामभक्तेर्बाहुल्यमे व्याकरिष्यते । वर्णोच्चारणशिक्षायां अस्य उच्चारणप्रकारो यथा,

"कुण्डलीरूपमास्याय दष्टवतो वामतस्ततः ।
ऋजुर्याधोगता माया वामतः कुटिला पुनः ।
तिष्ठन्ति तासु निलासु सर्व्वेश्वरवरूथाः सदा ।
कुण्डलीहृदयरूपा तु या माया मध्यतः स्थिता ।
मध्यशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥ ● ॥
चतुर्भुजां घूम्रवर्णां क्षणाम्बरविभूषिताम् ।
नागालङ्कारसंयुक्तां जटासुकुटराजिताम् ।

ईषद्हास्यमुखीं नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,कामधेनुतन्त्रे ।
"सदा ईश्वरसंयुक्तं णकारं शृणु सुन्दरि ! ।
रक्तविद्युल्लताकारं या स्वयं परकुण्डली ॥
पञ्चदेवनयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥"
तस्य २२ द्वाविंशतिर्नामानि यथा,—
"णकारो बोधनी विश्वा कुण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखो वकः ॥
गुर्व्वीगुरुर्चिता बुद्धिः सर्गात्मा घर्घरध्वनिः ।
धर्मैकपादः सुमुखो विरजा चन्द्रनेश्वरी ॥
मनः पुष्पधन्वा च रागात्मा च वराश्रिणी ॥"
इति नानातन्त्रशास्त्रम् ॥

णः, पुं, गायनः । घर्घरध्वनिः । इत्येकाक्षरकोषः ॥ बलीवर्दः । शुक्रः । वामभतिः । इति मेदिनी । णे, १ ॥ (गणपाठे धातोरुभयपदत्वविज्ञापकोऽनुबन्धविशेषः । इति बोपदेवः ॥)

णिः, पुं, प्रत्ययविशेषः । स प्रेरणार्थे भवति । तस्य इकारस्तिष्ठति । धातोरनुबन्धविशेषः । स वर्त्तमानक्तप्रत्ययबोधकः । इति बोपदेवस्वामी ॥

णान्तः, पुं, (णिः प्रत्ययविशेषोऽन्ते यस्य ।) णिप्रत्ययान्तः । यथा, "णिश्रन्थिग्रन्थिदम्भिस्वञ्जीनामात्मनेपदप्रकरणीयसूत्रम् ॥ स च प्रत्ययः धातोः शब्दाच्च भवति । यथा, णिः प्रेरणे इति लेः लत्वाख्याने णिरिति च मुग्धबोधव्याकरणम् ॥ मुग्धबोधव्याकरणस्य परिच्छेदविशेषः । यथा, इति णान्तपादः ॥

ट

ट, टकारः । स वञ्जनैकादशवर्णः । टवर्गप्रथमवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वाग्रस्थस्य स्पर्शः आभ्यन्तरप्रयत्नः । माहत्कात्यासोऽस्य दक्षिणस्फिचि न्यासत्वम् । वर्णीयवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा कुण्डलीरूपतस्त्रयः ।
तिष्ठन्ति तासु नित्यासु कुवेरयमवायवः ॥
मात्रा कोणगता चोर्द्धा तत ऊर्द्धगता तु सा ।
या नित्या परमा शक्तिश्चतुर्व्वर्गप्रदायिनी ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! ।
मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम् ॥
दशबाहुसमायुक्तां सर्व्वालङ्कारसंयुताम् ।
परमोक्षप्रदां नित्यां सदा क्षीरसुखीं पराम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,—
"टकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
कोटिविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम् ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रम् ॥

तस्य २७ सप्तविंशतिनामानि यथा,—
"टङ्कारः कपाली च सोमवाः खेश्वरी ध्वनिः ।
सुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
दक्षाङ्गार्हश्चन्द्रश्च जरा भूतिः पुनर्भवः ।
हृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ॥
राजा गिरिर्मेहाधनुर्नाथात्मा सुसुखो मरुत् ॥"
इति नानातन्त्रशास्त्रम् ॥

टं, क्ली, (टक् + डः ।) करङ्कः । इति विश्वः ॥

टः, पुं, (टल् + डः ।) वामनः । पादः । निखनः । इति मेदिनी । टे, १ ॥

टक, इ क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, टङ्कयति । इति दुर्गादासः ॥

टङ्कदेशीयः, पुं, (टङ्कदेशे भव इति छः ।) यावूकशाकः । इति त्रिकाण्डशेषः ॥

टङ्गरः, पुं, (टः टङ्कणः चारविशेषः गर इव । तीव्रगुणत्वात्तथात्वम् ।) टङ्कणक्षारः । हेलाविभ्रमगोचरः । केकराक्षे, त्रि । इति मेदिनी । रे, १६० ॥

टङ्कः, पुं, (टकि + घञ् ।) कोपः । कोषः । असिः । शावदारणः । इति मेदिनी । के, २४ ॥ (यथा, अनर्घराघवे । १ । २२ ।
"यः चन्द्रदेहं परितस्य टङ्के-
स्पोमर्यैर्ब्रह्मसुचकार ॥")
परिमाणविशेषः । स तु चतुर्म्भायकरूपश्चतुर्विंशतिरक्तिकारूपो वा । जङ्घा । इति हेमचन्द्रः । ३ । ५८३ ॥ दर्पः । इति हलायुधः ॥

टङ्कः, पुं क्ली, (टकि + घञ् अच् वा ।) नीलकपित्थः । (यथा, सुश्रुते सूत्रस्थाने ४६ ।
"शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु ॥")
खनित्रम् । टङ्कणः । इति मेदिनी । के, २४ ॥ दर्पः । इति शब्दरत्नावली ॥

टङ्ककः, पुं, (टङ्कति बध्नाति मनः स्नेहेनेति । टकि + ण्वुल् । यद्वा, टङ्कते बध्यतेऽनेन मन इति । घञ् । ततः संज्ञायां कन् ।) रजतमुद्रा । इति रूप्याध्यक्षशब्दे अमरटीकासारसुन्दरी भरतश्च ॥ टाका इति भाषा ॥

टङ्ककपतिः, पुं, (टङ्ककस्य पतिः रक्षकः ।) रूप्याध्यक्षः । टङ्कशालानियुक्तः । इत्यमरटीकासारसुन्दरी । टाकशालेर अधक्ष इति भाषा ॥

टङ्कशाला, स्त्री, (टङ्ककस्य शाला ।) रजतमुद्रायहम् । इत्यमरटीकासारसुन्दरी ॥ टाकशाल इति भाषा ॥

टङ्कटीकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

टङ्कणः, पुं, (टङ्कि बन्धे + ल्युः । एषोदरात् गत्वे साधुः ।) क्षारविशेषः । सोहागा इति भाषा । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"विरूक्षयोऽनिलकरः क्लेश्मघ्नः पित्तदूषणः ।
अग्निदीप्तिकरस्तीक्ष्णश्टङ्कणः क्षार उच्यते ॥")

टङ्किणी

तत्पर्य्यायः । पाचनकः २ माक्षतीतीरजः ३ लोहद्रवणः ४ रसशोधनः ५ । इति हेमचन्द्रः । ३ । १० ॥ टङ्कणक्षारः ६ रङ्गक्षारः ७ रसाधिकः ८ लोहद्रावी ९ रसजः १० सुभगः ११ रङ्गदः १२ वर्त्तुलम् १३ कनकम् १४ क्षारम् १५ मलिनम् १६ धातुवज्रभम् १७ । इति राजनिर्घण्टः ॥ मालतीतीरसम्भवः १८ द्रावी १९ द्रावकः २० लोहशुद्धिकारकः २१ । इति भावप्रकाशः ॥ स्वर्णपाचकः २२ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफस्थावरादिविषकासश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवातपित्तकारित्वम् । रूक्षत्वम् । इति भावप्रकाशः ॥ (देशविशेषः । यथा, बृहत्संहितायाम् । १४ । १२ ।
"कङ्कटटङ्कणवनवासि शिविककलिङ्गकोङ्कणाभीराः ॥")

टङ्का, स्त्री, (टकि + अच् टाप् ।) जङ्घा । इति मेदिनी । के, २५ ॥

टङ्कानकः, पुं, (टङ्कं दर्पं कोपं वा आनयति उद्दीपयतीति । अन् + णिच् + ण्वुल् ।) ब्रह्मदारुवृक्षः । इति शब्दचन्द्रिका ॥

टङ्कारः, पुं, (टल् वैक्लवे + बाहुलकात् घञ् । टं वैक्लवं चित्तस्य विक्लृप्तिं करोतीति । कृ + कर्म्मण्यण् ।) विस्मयः । प्रसिद्धः । शिञ्जितध्वनिः । इति मेदिनी । रे, १६० ॥ (यथा, काव्यादर्शे । २६ । ६६ ।
"टीकिताग्रेषपाताला टङ्किकैलोऽद्रिपाटले ।
टङ्कारशब्दतृक्कोला टीकनीया महाभटा ॥"
कृ + घञ् । कारः टं इति अव्यक्तशब्दस्य कारः करणं यत्र । ध्वनिमात्रे । यथा, भागवते । ३ । १७ । ६ ।
"अन्तर्गतेषु सुखतो वमन्तो वह्निमुल्बणम् ।
भृगालोलुकटङ्कारैः प्रणेदुरशिवाः शिवाः ॥")

टङ्कारी, स्त्री, (टङ्कं ऋच्छतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततो गौरादित्वात् ङीष् ।) क्षुपविशेषः । टेंकारी इति भाषा । अस्य गुणाः । पातश्लेष्मशोषोदरव्रणनाशित्वम् । तिक्तत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

टङ्गः, पुं क्ली, (टकि + अच् ।) खनित्रम् । खड्गभेदः । जङ्घा । इति मेदिनी । गे, ७ ॥

टङ्गः, पुं, (टङ्ग + पृषोदरात् साधुः ।) नक्रः । इति शब्दचन्द्रिका ॥ सोहागा इति भाषा । चतुर्म्भायकपरिमाणम् । इति वैद्यकपरिभाषा ॥

टङ्गणः, पुं क्ली, (टङ्कण + पृषोदरात् साधुः ।) टङ्कणः । सोहागा इति भाषा । अस्य गुणाः । श्लेष्मवायुनाशित्वम् । क्षारत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । अग्निवर्द्धकत्वम् । विरूक्षणत्वम् । भेदकत्वम् । बलवर्द्धनत्वञ्च । इति राजवल्लभः ॥

टङ्किणी स्त्री. (टकि बन्धे + णिनिः । ततः पृषोदरात् गत्वे ङीषि च साधुः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ आकनादि इति भाषा ॥

टङ्गी, स्त्री, (टङ्ग इत्यव्यक्तशब्द नयतीति। नी+क्विप्।) ज्येष्ठी। इति त्रिकाण्डशेषः॥

टङ्गरी, स्त्री, (टङ्गमित्यव्यक्तशब्दं रातीति। रा+कस्ततो ङीष्।) रुपावादः। लम्पावाद्यम्। पटहवाद्यम्। इति मेदिनी। रे, १५६॥

टङ्गुरः, पुं, (टङ्गु इत्यव्यक्तशब्दं रातीति। रा+कः।) भेरीशब्दः। इति हेमचन्द्रः॥

टल, ञ विलवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ञ, टालः टलः। विलवो विश्लेषीभावः। इति दुर्गादासः॥

टलनं, क्ली, (टल+भावे ल्युट्।) विलवः। टला इति भाषा॥

टा, स्त्री, (टलति प्रलये भूकम्पादौ वा। टल+ड टाप् च।) पृथिवी। इत्येकाक्षरकोषः॥

टाङ्गरः, पुं, (टङ्गस्येदं टाङ्गम्। टङ्ग+अण्। टाङ्गं रातीति। रा+कः।) नागवीटः। इति त्रिकाण्डशेषः॥

टारः, पुं, (टां पृथ्वीं ऋच्छतीति। ऋ+अण्।) तुरङ्गः। तुरङ्गः। इति हेमचन्द्रः॥

टिक, ऋ ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सर्कं-सेट्।) ऋ, अटिटिकत्। ड, टेकते। इति दुर्गादासः॥

टिट्टिभकः, पुं, (टिटीत्यव्यक्तशब्दं भजतीति। भज+ड्वुः। ततः स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरटीका॥

टिट्टिभः, पुं, (टिट्टीत्यव्यक्तशब्दं भजतीति। भज+ड्वुः।) पक्षिविशेषः। टीटि इति भाषा। तत्पर्य्यायः। टौटिभकः २। इति शब्दरत्नावली॥ टिट्टिभकः १। इत्यमरः। २।५।३५॥ टिट्टिभकः ४। इति तट्टीका॥ (यथा, मनुः। ५। ११।

"अभिहिंसां चैकशफांष्टिट्टिभञ्च विवर्ज्जयेत्॥")

अवोदग्रमन्वन्तरीयेन्द्रशत्रुदानवविशेषः। यथा,

"इन्द्रो दिवस्पतिः शत्रुष्टिट्टिभो नाम दानवः।
मायूरेण च रूपेण घातयिष्यति माधवः॥"

इति गारुडे ८७ अध्यायः॥

(ब्रह्मचर्य्यभारवहनयोग्यानामन्यतमः। अग्नौ हि मन्त्रधर्म्मेणविधिज्ञैः। यथा, महाभारते। २। ६। १५।

"टिट्टिभो विटभूतश्च संहादश्चेन्द्रतापनः॥"

रघुपक्षभेदः।

"सर्व्वे वयवराः शूराः सर्व्वे विगतसंशयाः॥")

टिट्टिभकः, पुं, (टिट्टिभ+स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरः। २।५।३५॥ [प्रकाशः॥

टिट्टिभिका, स्त्री, अम्बुशिरोधिका। इति भावप्रकाशः॥

टिण्डिश्रः, पुं, वृक्षविशेषः। डिण्डिश्रा। इति डेँड्सी इति च भाषा। तत्पर्य्यायः। रोमशफलः २ तिन्दिशः ३ सुनिषण्णकः ४। इति राजनिर्घण्टः॥ डिण्डिशः ५। अस्य गुणाः। रुचिकारित्वम्। मेदकत्वम्। पित्तश्लेष्मास्रदोषनाशित्वम्। सन्धीपत्वम्। वातलत्वम्। रूक्षत्वम्। स्रंसनत्वञ्च। इति भावप्रकाशः॥

टिप, क गतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सर्कं-सेट्।) क, टेपयति। गतौ प्रेरणे। इति दुर्गादासः।

टिप्पनी, स्त्री, (टेपयति आख्यायतेऽनया। टिप+करणे ल्युट् ङीप् च। पृषोदरादित्वात् पस्य द्वित्वे साधुः।) टीका। यथा,—

"श्रीमत्कञ्चनमं नत्वा लीलावत्याः सुटिप्पनी।
भवेद्येन सुबोधार्थं क्रियते यद्गुरोः श्रुतम्॥")

टीक, ऋ ड गत्याम्। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सर्कं-सेट्।) ऋ, अटिटीकत्। ड, टीकते। इति दुर्गादासः॥

टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते वानया। टीक+घञर्थे कः। टाप् च।) विवरणग्रन्थः। इति लिङ्गादिसंग्रहे अमरः॥

टुण्टुकः, पुं, (श्योनाकवृक्षः। इत्यमरः।२।४।५६॥ लाक्षारुद्रिवृक्षः। इति शब्दचन्द्रिका॥ (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः।) पक्षिविशेषः। इति शब्दरत्नावली॥ टुण्टुनि इति भाषा। श्योनाकप्रभेदः। इति राजनिर्घण्टः॥

टुण्टुकः, त्रि, नीचः। इति मेदिनी॥ क्रूरः। इति विश्वः॥

टुण्टुका, स्त्री, टङ्गिणीवृक्षः। इति शब्दचन्द्रिका॥

टुनाका, स्त्री, तालमूलीवृक्षः। इति शब्दचन्द्रिका॥

टेरक, त्रि, वक्रचक्षुः। टेरा इति भाषा। तत्पर्य्यायः। वलिरः २ केकरः ३ केदरः ४। इति शब्दरत्नावली॥

ट्वल, ञ विलवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। ञ, ट्वालः ट्वलः। विलवो विश्लेषीभावः। इति दुर्गादासः॥

ठ

ठ, ठकारः। स यञ्जनवर्णोद्भवबर्णः टवर्गद्वितीयवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्योऽयं वर्णः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (अस्योच्चारणे जिह्वामधोग मूर्द्धस्थानस्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासघोषा महाप्राणश्च बाह्यप्रयत्नाः। वर्णमालायाम्) तस्य लेखनप्रकारो यथा,—

"वार्त्ताकुवर्त्तुलाकारो रेफाधिष्ठितदेवताः।
तिष्ठन्ति क्रमतो नित्यं चन्द्रसूर्य्यात्मयः प्रिये!॥
मात्राहीनस्तूर्द्ध्वशिखकारः परमेश्वरि!॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
पूर्णचन्द्रप्रभां देवीं विकसत्पद्मसंस्थिताम्॥
सुन्दरीं षोड़शभुजां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति तन्त्रोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"ठकारं चञ्चलापाङ्गि! कुण्डली मोक्षरूपिणी।
पीतविद्युल्लताकारं रजो गुणसंयुतम्॥
पद्मदेवात्मकं वर्णं पद्मप्राणमयं सदा।
त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं सदा॥"

तस्य ३१ एकत्रिंशन्नामानि यथा—

"ठः शून्यो मञ्जरी बीजः पाणिनी जाह्नवी तथा।
वनजो नन्दनो जिह्वा सुनन्दो घूर्णकः सुधा॥
वर्त्तुलः कुण्डली वह्निरन्तं चन्द्रमण्डलः।
दग्धजानूरुभावश्च देवभक्षो दृढव्रतिः॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः।
दग्धश्रो नलिनी विष्णुर्मेहेशो ग्रामणीः शुभौ॥"

इति नाम्नां तन्त्रशास्त्रम्॥

ठः, पुं, शिवः। महाध्वनिः। चन्द्रमण्डलः। इत्येकाक्षरकोषः॥ मण्डलः। शून्यम्। लोकगोचरः। इति मेदिनी। ठे, १॥

ठक्कुरः, पुं, देवता। ठाकुर इति ख्यातः। यथा,

"श्रीदामनामगोपालः श्रीमान् सुन्दरठक्कुरः॥"

इत्यनन्तसंहिता॥

ठठं } ठठं } च, अनुकरणशब्दः। ठन् ठन् इति भाषा। यथा, महाभाटके। ६६।

"रामाभिषेके मद्विघ्नलाभाः
कथाश्रुतौ हेमघटस्तनस्थाः।
सोपानमारुह्य चकार शब्दं
ठठं ठठं ठं ठठठ ठठं ढुः॥"

ठेरः, त्रि, वृद्धः। यथा, जा ठेरं व हसती। इति काव्यप्रकाशे देशीभाषा॥

ड

ड, डकारः। स यञ्जनवर्णोद्भवबर्णः टवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"स्फुर्म्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः॥")

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,

"ऊर्द्धाधःक्रमतो रेखा मध्ये त्वाकुञ्चिता तथा।
तत्पार्श्वायी भवानी च क्रमशस्तत्र संस्थिता॥
ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्त्तिताः।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता मम।
जवासिन्दूरसङ्काशां वराभयकरां पराम्॥
त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"डकारं चञ्चलापाङ्गि! सदा त्रिगुणसंयुतम्
पद्मदेवमयं वर्णं पद्मप्राणमयं सदा॥
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा।
चतुर्ज्ञानमयं वर्णं आत्मादित्वसंयुतम्॥
पीतविद्युल्लताकारं डकारं प्रणमाम्यहम्॥"

तस्य २४ चतुर्विंशतिनामानि यथा,—

"डः स्तुतिर्हारवल्ली नन्दिरूपिणी योगिनी प्रियः।
कौमारी शङ्करस्थाश्चिन्नो वह्नो भनिः॥

दुरूढो जटिलो भीमा द्विजिह्वः पृथिवी सती।
कोरगिरिः क्षमा कान्तिर्नाभिः खाती च लोचनम्॥"
इति नागातन्त्रशास्त्रम्॥
(पद्मादौ अस्य प्रथमोपन्यासे फलं श्रीभा। यदुक्तं वृत्तरत्नाकरटीकायाम्।
"डः श्रीभां दो विश्रीभां भयञ्चमथ रः यस्तु खं यस्तु युद्धम्॥")

डः, पुं, (डयते उड्डीयते भक्तानां हृदयाकाशे यः। डी+दाडृञ्कात् डः।) शिवः। (डीयते आकाशमार्गे नभोगुणत्वादिति। डी+डः।) शब्दः। त्रासः। इत्येकाक्षरकोषः॥ वाड़वाग्निः। इति मेदिनी। डे, १।

डङ्करी, स्त्री, (डं अरोचकादिजनितत्रासं गिरति नाशयतीति। गॄ+अच्। निपातनात् समागमः। ततो ङीष्।) फलविशेषः। तत्पर्य्यायः। डाङ्करी २ दीर्घेम्बारः ३ दङ्करी ४ डङ्गारी ५ नासशुण्डी ६ रजदन्तफला ७। अस्या गुणाः। शैतल्यत्वम्। रुचिकारित्वम्। दाहपित्तास्रदोषार्शोनाशश्लेष्मरोधनाग्नित्वम्। तर्पणत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥

डङ्गारी, स्त्री, (डङ्करी पृषोदरादित्वादात्वम्।) डङ्करीफलम्। इति राजनिर्घण्टः॥

डप, ङ क ड ञ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-उभं-चात्मं च-सकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क ड, डम्भयते। ञ, डम्भयति डम्भयते। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डप, ङ क ड ञ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क, डम्भयति। नोदः प्रेरणम्। इति दुर्गादासः॥

डभ, ङ क ञ सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-उभं-अकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क, डम्भयति डम्भयते। अयमात्मनेपदीति केचित्। सङ्घो राशीकरणम्। इति दुर्गादासः॥

डमः, पुं, (डं नीचयोनित्वाय भीतिं माति ददातीति। मा+कः।) वर्णसङ्करजातिविशेषः। डोम इति भाषा। सच चाण्डाल्यां वैटात् जातः। इति ब्रह्मवैवर्त्तपुराणम्॥

डमरं, क्ली, (डं+मृ वधे अप्। मरं पलायनं धातूनामनेकार्थत्वात्। उन चासेन मरम्।) भीत्यापत्ज्ञायनम्। तत्पर्य्यायः। प्रदगालिका २ विद्रवः ३ डिम्भः ४। इति हारावली॥६६॥

डमरः, पुं, (डेन भयेन मरो मृतिर्विरम्यत्र।) मरभक्षादिभयम्। अस्यकलहः। इत्यमरटीकायां स्वामी। तत्पर्य्यायः। डिम्भः २ विप्लवः ३। इत्यमरः। ३। २। १४॥ डिम्बः ४ विम्बः ५ डामरः ६। इति भरतः॥ (यथाह गर्गः।
"तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः।
स्निग्धस्ताडक् प्राप्यां शाखाख्यो डमरमरकाय॥")

डमरुः, पुं, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ+"सृगृधृदृक्षि।" उणां १। ३८। इति कुप्रत्ययेन निपातनात् साधुः।) वाद्यभेदः। इत्यमरः। १। ७। ८॥ कपालियोगिवाद्यम्। इति भरतः॥ चौरमध्यो गुटिकाद्वयालम्बितः। इति सारसुन्दरी॥ (यथा, योगसारे २ परिच्छेदे।
"वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः॥")
चमत्कारः। इति त्रिकाण्डशेषः॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति। डी+करणे ल्युट्।) कर्णीरथः। (डी ङ नभोगतौ+भावे ल्युट्।) नभोगतिः। इति हेमचन्द्रः। ४। ३८४॥

डलकं, क्ली, (वंशादिनिर्म्मितपात्रम्। डाला इति भाषा। यथा,—
"त्रिप्रतञ्च वरार्द्धिकं डलकं वस्त्रसंयुतम्।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थः, पुं, काष्ठमयन्दगः। यथा,—
"डित्थः काष्ठमयो हस्ती डवित्थस्त्वश्वमयो नगः॥"
इति सुपद्मव्याकरणे विभक्तिपादः॥
(द्रव्यवाचिसंज्ञाशब्दविशेषः। यथा साहित्यदर्पणे। "द्रव्यशब्दा एकयक्तिवाचिनो हरिहरडित्थडवित्थादयः॥")

डहुः, पुं, (दहति तापयति सर्व्वशरीरमिति। दह+सृगृधृदृक्षिभ्यः कुप्रत्ययेन निपातनात् साधुः।) वृक्षविशेषः। डेहुया इति मादार इति च भाषा। तत्पर्य्यायः। लकुचः २ लिकुचः ३। इत्यमरः। २। ४। ९०॥ अस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। त्रिदोषश्लेष्मकारित्वञ्च। इति राजवल्लभः॥

डहुः, पुं, (डहुः। पृषोदरादित्वात् दीर्घः।) डहुः। इति शब्दरत्नावली॥

डा, स्त्री, (डीयते नभोमार्गे गच्छतीति। डी+अन्येष्वपीति डः स्त्रियां टाप्।) डाकिनी। इति मेदिनी। डे, १॥

डाकिनी, स्त्री, (डाय भयदानाय वक्रति कुटिलं व्रजतीति। वक्र वक्रगतौ+इनिः। ततो ङीप्।) कालीगणविशेषः। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"सार्द्धञ्च डाकिनीनाञ्च विकटानां त्रिकोटिभिः॥"
(डाकानां समूहः। "खलादिभ्य इनिर्वक्तव्यः।" ४। २। ५१। इत्यस्य वार्त्तिकोक्त्या इनिः। डाकानां समूहः। इति सिद्धान्तकौमुदी॥)

डाङ्करी, स्त्री, (डङ्करी पृषोदरादित्वादात्वम्।) डङ्करीफलम्। इति राजनिर्घण्टः॥

डामरः, पुं, (शिवोक्तशास्त्रविशेषः। (यथा, कालीखण्डे। २६। ७०।
"डमडुमरुहस्ता च डामरोक्तमहाडका॥"
"डामरो डामरकल्पो नवाक्षरदेवीमन्त्रस्य प्रतिपादको ग्रन्थो महाराष्ट्रे सुप्रसिद्धस्तन्त्रोक्तं प्रतिपादितं मन्त्रमयं महच्छरीरं यस्याः॥"
इति तट्टीकायां॥) स तु षड्विधः। तेषां नामानि श्लोकसंख्याञ्च यथा। योगडामरः २३,५३३। शिवडामरः ११,००७। दुर्गाडामरः ११,५०३। सारस्वतडामरः ६,६०५। ब्रह्मडामरः ७,१०५। गन्धर्व्वडामरः ६०,०६०। इति वाराहीतन्त्रम्॥ डमरः। इत्यमरटीकायां भरतः॥ चमत्कारः। यथा। भूतानां डामरत्वमत्कारोऽत्रेति भूतडामरशब्दनिर्व्वचने निबन्धकारः॥ (गर्व्वः। आटोपः। यथा, गीतगोविन्दे। १२। २२।
"मम रुचिरे चिकुरे कुरु मानद! मानसजध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे॥"
कोटचक्रविशेषः। यथा, समयाचारे।
"अथातः संप्रवक्ष्यामि कोटचक्रमिहाद्भुतम्॥"
इत्युपक्रम्य,—
"पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः॥"
इत्युक्तवान्॥
अस्य विशेषविवृतिः चक्रशब्दे द्रष्टव्या॥*॥
क्षेत्रपालविशेषः। यथा, प्रयोगसारे।
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः॥"
इत्युपक्रम्य,—
"टङ्कपाणिस्तथा चान्यस्थानवस्तुश्च डामरः॥")

डालिमः, पुं, (दाडिम्बः पृषोदरादित्वात् साधुः।) दाडिम्बः। इत्यमरटीकायां भरतः॥

डाहलः, पुं, त्रिपुरदेशः। इति भूरिप्रयोगः॥

डाहुकः, पुं, दात्यूहपक्षी। इति जटाधरः॥

डिङ्गरः, पुं, डङ्गरः। क्षेपः। खलः। धूर्त्तः। सेवकः। इति शब्दरत्नावली॥

डिण्डिमः, पुं, (डिण्डीति शब्दं मातीति। मा+कः।) वाद्यप्रभेदः। इत्यमरः। १। ७। ८॥ डेङ्गरीति ख्यातः। इति भरतः॥ माहेश्वरडण्डीति ख्यातः। इति सारसुन्दरी॥ (यथा, महाभारते। ७। १६३। ४४।
"भेरीशाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रशः॥"
डिण्डिम इव आकृतिरस्यस्येति। अर्श आदित्वादच्।) क्षुद्रपाकफलः। इति शब्दचन्द्रिका॥ मानी आमला इति भाषा॥

डिण्डिरः, पुं, (डिण्डिरः पृषोदरादित्वात् ह्रस्वः।) समुद्रफेनः। इति हेमचन्द्रः। ४। १४३॥

डिण्डिरमोदकं, क्ली, (मोदयतीति। मुद्+ण्वुल्। डिण्डिर इव मोदकम्।) शुक्लनम्। इति राजनिर्घण्टः॥

डिण्डिश्रः, पुं, टिण्डिश्रः। ढेँड़श् इति भाषा। (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमभागे।

"डिडिम्भो रोमशपक्षी सुनिनिर्मित इत्यपि। डिडिम्भो रविशङ्खेदी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः॥")

डित्थः, पुं, काष्ठमयहस्ती। यथा, सुपद्मव्याकरणे विभक्तिपादे।

"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो रथः॥" विशेषलक्षणयुक्तपुरुषः। यथा,—

"श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः। सर्व्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते॥"

इति कलापटीकायां व्याख्यासारः॥

(द्रव्यवाचिसंज्ञाशब्दभेदः। यथा, साहित्यदर्पणे। "द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः॥")

डिप, क्षेपे ड अ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च-सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। क ड, डेपयते। अ, डिप्यति डिप्यते। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डिप, क्षेपे ड अ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। क ड, डेपयते। अ, डेपयति डेपयते। पुनःपाठान्नेदुवन्धः। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डिप, क्षिप्तौ क य इर क्षुदि। इति कविकल्पद्रुमः॥ (तुदां-चुरां-दिवां च-सकं-सेट्।) क्षि, डिपति अडिपीत्। क, डेपयति। य, डिप्यति। इर् अडिपत् अडेपीत्। तुदादयन्तर्गणस्यैव कुटादित्वमिति दिवादिपक्षे हुयः। दिवादिपक्षे पुषादित्वान्नित्यं ड इत्यन्ये। क्षुदि प्रेरणे। इति दुर्गादासः॥

डिव, ड क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। ड क, डिमयति। गोदः प्रेरणम्। इति दुर्गादासः॥

डिभ, ड क अ सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-उभं-सकं-सेट्।) ड क अ, डिम्भयति डिम्भयते। अयमात्मनेपदीति केचित्। सङ्घो राशीकरणम्। इति दुर्गादासः॥

डिस, क्षिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट।) डिडिसः। सौत्रधातुरयम्। इति दुर्गादासः॥

डिसः, पुं, नाटकस्य रूपकविशेषः। इति हेमचन्द्रः। २। १६८॥ (लक्षणादिकं यदुक्तं साहित्यदर्पणे। ६। २४६।

"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः। उपरागेण च भूयिष्ठो डिमः स्यात्प्रथितप्लवः॥ अङ्गी रौद्ररसश्चात्र सर्व्वेऽङ्गानि रसाः पुनः। चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ॥ नायका देवगन्धर्व्वयक्षराक्षसभोगिनः। भूतप्रेतपिशाचाद्याः षोढ़ोद्धात्यन्तसङ्कुलाः। हृतयः कौशिकीवर्जा निर्विमर्शाश्च सन्धयः। दीप्ताः स्युः षड्रसाः प्रायो हास्यश्रृङ्गारवर्জ্জिताः॥")

डिम्बं, क्ली, (डिम्ब+घञ्।) भयम्। कललम्। फुप्फुसः। इति हारावली। २४४॥ डमरः। इत्यमरः। ३। २। १४॥

डिम्बः, पुं, (डिबि भेदे+भावे घञ्।) भयध्वनिः। अरुम्। फुप्फुसः। क्षीहा। विप्लवः। इति मेदिनी। बे, ५॥ डिम्भः। इति द्विरूपकोषः॥

डिम्बाहवः, पुं, (डिम्बः नृपतिहीनत्वात् विप्लवमूल आहवः।) नृपतिरहितयुद्धम्। इति जटाधरः॥ (यथा, मनुः। ५। ६५।

"डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च॥"

"डिम्बाहवो नृपरहितयुद्धं तत्र हतानाम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

डिम्बिका, स्त्री, (डिम्बयति नायकसमीपे नोदयत्यात्मानमिति। डिम्ब+ण्वुल्। टाप् अत इत्वञ्च।) कासकी। जलविम्बः। ग्रीवाकृतः। इति शब्दरत्नावली।

डिम्भः, त्रि, (डिम्भयति संहतो भवतीति। डिम्भ+पचाद्यच्।) शिशुः। इत्यमरः। २। ५। ३८॥ (यथा, रसिकरञ्जने। १।

"शुभारम्भेऽदम्भे महितमतिडिम्भेङ्गितशतं। मखिस्तम्भे रम्भेशबसकुचकुम्भे परिचितम्॥") मूर्खः। इति मेदिनी। भे, ४॥ अस्य रूपान्तरं डिम्बः। इति द्विरूपकोषः॥

डिम्भकः, त्रि, (डिम्भ एव। डिम्भ+स्वार्थे कन्।) बालकः। इति शब्दरत्नावली॥ (स्वनामख्यातः ग्राख्यदेशाधिपतेर्ब्रह्मदत्तस्य पुत्रः। यथा, हरिवंशे भविष्यपर्व्वणि। ३२। १८।

"हंसो व्येष्ठो नृपसुतो डिम्भकोऽन्तरोऽभवत्॥" अस्य विशेषविवरणं तत्रैव विस्तरशो द्रष्टव्यम्॥)

डिम्भचक्रं, क्ली, (डिम्भ इव चक्रम्।) नराणां शुभाशुभनिर्णायकचक्रविशेषः। यथा,—

"डिम्भचक्रे न्यसेद्वानि भानुभादित्रिमस्तके। मुखे त्रीणि हृयं स्कन्धे चैकैकं बाहुहस्तयोः॥ हृदि पञ्च नाभिगुह्ये चैकैकं षट् च जानुनोः। चरणाभ्यां तथैकैकं जन्मर्क्षपतनात् फलम्॥ ग्रीवर्क्षे क्षत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम्। स्कन्धे धनी च बाहुभ्यां स्थानभ्रष्टो भवेन्नरः॥ पाणिभ्यां तस्करो लक्ष्मीर्हृदयाश्रुच नाभितः। गुह्ये कामी भगो जान्वोरल्पजीवी च पादयोः॥"

इति खरोदयः॥

डिम्भा, स्त्री, (डिम्भ+टाप्।) अतिशिशुः। इत्यमरः। २। ६। ४१॥

डी, ओ ड य गतौ। नभोगतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं अकं च-सेट्।) ओ, डीनः। ड य, डीयते। इति दुर्गादासः॥

डी, ड नभोगतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, डयते पक्षी। अस्यापि निष्ठायां डीनः। इति कातन्त्राद्याः। धातुपारायणिकास्तु इमुनिषेधे ओदुपधत्वाडौ यङ्लुगादसादिमिवक्तथाद्गुषे डयित इत्याहुः। गोयीचन्द्रोऽपि। डयितः डयितवान् इत्युदाहार। स्वमते तु डीत इत्येव। इति दुर्गादासः॥

डीनं, क्ली, (डी + भावे क्तः।) पक्षिगतिः। इति जटाधरः॥ तद्भेदा यथा,—

"पक्षात् संपत्य निष्क्रम्य पक्षसम्पातमुच्यते। ऊर्द्धाधोगतिसम्बन्धः समुदीर्णं प्रचक्षते॥ संकल्प्य प्रक्षगमनमुच्यते व्यतिरिक्तकम्। षड्विप्लुतिरमी भेदाः पातानामिह दर्शिताः॥ महाडीनं विहायेषां पातानां त्रिविधा गतिः। गतं तत्र यथोद्दिष्टं आगतं पुनरागमः॥ प्रत्यावृत्तिः प्रतिगतिरिति षट् सद्भिः स्मृताः। तेषां निपाताः कथ्यन्ते प्रत्येकं पञ्चविंशतिः॥" तद्यथा। उड्डीनं ऊर्द्धगमनम् १ अवडीनं अधःपतनम् २ प्रडीनं पतनवेगवत्ता ३ डीनं पतनमात्रम् ४ निडीनं नीचैःपतनम् ५ संडीनं सम्यक्पतनम् ६ तिर्य्यग्डीनं तिर्य्यक्पतनम् ७ विडीनं विचित्रं पतनम् ८ परिडीनं सर्व्वतः पतनम् ९ पराडीनं पराङ्मुख्य गमनम् १० सुडीनं सुकुमारपातः ११ अभिडीनं आभिमुख्येन पुनः पुनः पतनम् १२ महाडीनं क्षुद्रपतनेन प्रत्यावृत्तिः १३ निडीनं भक्ष्यमाश्रयं वा पश्यतः पतनम् १४ अतिडीनं दीर्घपतनम् १५ अवडीनं अधःपतनम् १६ प्रडीनं अधःपतने वेगवत्ता १७ अवसंडीनं अधःपतने शोभनवत्ता १८ डीनडीनकं पतनं निर्विशेषं कुत्सितञ्च १९ संडीनोड्डीनं शोभनमूर्द्धगमनम् २० संडीनडीनं शोभनगगनमात्रम् २१ पुनर्डीनं तदेव सामान्यगमनम् २२ डीनावडीनकं तदेवाधः कुत्सितञ्च २३ सम्पातं बहुभिः सह गमनम् २४ समुदीर्णं परस्परसहया गमनम् २५ ततोऽन्यत् व्यतिरिक्तकं तस्मात् ऊर्द्धाक्षतादेत्यक्षेहक्षतं पतनम् २६। एतेषु षड्विप्लुतिसंख्येषु पतनं एकं डीनसंज्ञकं निर्विशेषं पतनमात्रं सविशेषाणि पतनानि पञ्चविंशतिसंख्यानि तत्र तानि सविशेषाणि दर्शयन्नाह चतुर्भिर्विशेषकैर्विशिष्टानि इति ग्रन्थं निर्विशेषमेकमिति एकोत्तरं शतम्। तानि चत्वारिंशद्विशेषयानि यथा। गतं गमनमात्रम्। आगतं आगमनम्। प्रतिगतं गत्वैव पुनरागमनं आगत्यैव पुनर्गमनञ्च। इति महाभारते। ८। ४१ अ॥ ६॥ आगमशास्त्रविशेषः। यथा, सुश्रुतसंहितायाम्।

"डामरं डमरं डीनं श्रुतं कालीविलासकम्। सप्तकोटिमहातन्त्रा मम वक्त्राद्विनिर्गताः॥"

डीनडीनकं, क्ली, (डी+भावे क्तः। ततः स्वार्थे कन्। डीनेन सह डीनकं निर्विशेषं कुत्सितं वा पतनम्।) पक्षिणां गतिक्रियाविशेषः। इति जटाधरः। अस्य विवरणं डीनशब्दे द्रष्टव्यम्॥

डीनावडीनं, क्ली, (डीनेन सह अवडीनम्।) पक्षिगतिविशेषः। तस्य एकस्यां गतौ गत्यन्तरमिश्रणम्। अधःकुत्सितगमनञ्च। इति महाभारते कर्णपर्व्वटीका॥

ढुण्डुः, पुं, (ढुमिति कृत्वा डयते गच्छतीति। डी+डुः।) ढुण्ढुभसर्पः। इति त्रिकाण्डशेषः॥

ढुण्ढुभः, पुं, (ढुण्ढुः सन् भातीति। ढुण्ढु इत्यनुकरणशब्देन भाति वा। भा+कः।) सर्पविशेषः। ढोंड़ा इति भाषा। तत्पर्य्यायः। राजिलः २ इत्यमरः॥१। ८। ५॥ ढुण्ढुभः ३। इति भरतः॥ नागभृत् ४ ढुण्ढुः ५। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते।२।११।२८।
"एकदा स वने घोरं ढुण्ढुभं जरसान्वितम्।
अपश्यद्दण्डमुद्यम्य हन्तुं तं समुपाययुः॥")

ढुण्ढुलः, पुं, (ढुण्ढुरिति शब्दं लातीति। ला+कः।) चुद्रपेचकः। तत्पर्य्यायः। चुद्रोलूकः२ शाकुनेयः ३ पिङ्गलः ४ दृष्टाश्रयी ५ दृष्टद्रावी ६ विघ्नाशात्तः ७ भयङ्करः ८। इति राजनिर्घण्टः॥

ढुलिः, स्त्री, (ढुलि+पृषोदरादित्वात् साधुः।) ढुलिः। कमठी। इत्यमरटीकायां रायमुकुटः॥

ढुलिका, स्त्री, (ढुलिरिव कायतीति। कै+कः। ततष्टाप्।) खञ्जनाकारपक्षिविशेषः। इति षटाधरः॥

ढुली, स्त्री, (ढुलिः+ङीष् वा।) चिल्लीशाकः। इति राजनिर्घण्टः॥

ढोड़ी, स्त्री, चुपविशेषः। तत्पर्य्यायः। जीवन्ती २ शाकश्रेष्ठा ३ सुखासुका ४ बहुवल्ली ५ दीर्घपत्रा ६ चुद्रपत्रा ७ जीवनी ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। कफवातकण्डूकामयरक्तपित्तार्शिदाहनाशित्वम्। रुचत्वञ्च। इति राजनिर्घण्टः॥

ढोमः, पुं, चुनामख्यातवाद्यभाजनम्। यथा,—
"चाण्डालश्चैव ढोमश्च ज्ञानकश्च तथा हरिः।
दक्षोरश्चैव भक्षीरो भूयुण्डश्च त्रयाश्रमी॥
त्रयाणामी शिङ्गधारी सभा एते यशस्विनि!।
भूत्वा प्रमादतः स्नात्वा गायत्र्यायुतं जपेत्॥"
इति मत्स्यसूक्ततन्त्रे ३६ पटलः॥

ढोरं, क्ली, हस्तादिवन्धनरज्जुः। यथा,—
"कोऽनन्त रज्जुदीर्घाय हस्ता तत्करपञ्जवम्।
हस्तादाकृष्य तद्ढोरं चिप्रवान् पावकोपरि॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

ढोरकं, क्ली, (ढोर+स्वार्थे कन्।) ढोरम्। यथा,
"चतुर्ग्रन्थियुक्तं कुङ्कुमाक्तं सुढोरकम्।
स्त्रियश्च पुरुषश्चैव बध्नीयात् वामदक्षिणे॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

ढोरडी, स्त्री, (ढोरमिव डयते इति। डी+क्विप्।) दृष्टती। इति राजनिर्घण्टः॥

ण

ण, णकारः। स च यञ्जनचतुर्दशवर्णः। टवर्गचतुर्थवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्यः।) अस्योच्चारणस्थानं मूर्द्धा। इति वाकरणम्। (पाणिनीयादिग्रन्थे अस्योच्चारणे जिह्वामध्यभागेन मूर्द्धाः स्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा महाप्राणश्च बाह्यप्रयत्नाः। माहकान्यासेऽस्य दक्षपादाङ्गुलीमूले न्यासक्रिया। वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा वामदक्षिणतो गता।
ततः सा कुण्डलीरूपा विष्णोर्ग्रन्थिरूपिणी॥
महाशक्तिमयी माचा ध्यानमस्य प्रचक्षते।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम्॥
अष्टादशभुजां भीमां महामोचप्रदायिनीम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"णकारं परमाराध्यं या स्वयं कुण्डली परा।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम्।
रक्तविद्युल्लताकारं णकारं प्रणमाम्यहम्॥"
तस्य २६ षड्विंशतिनामानि यथा,—
"णो णका निर्ऋतिः पूर्व्वो यज्ञेशादनदेश्वरः।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः॥
दक्षपादाङ्गुलेर्मूलं सिद्धिदस्त्रा विनायकः।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः॥
विघ्नेशः पाशिनी लक्षधारिणी क्रोड़पुच्छकः।
एलापूरं लगाला च विशाखा श्रीमनोरतिः॥"
इति नानातन्त्रशास्त्रम्॥

णः, पुं, (णौकते उच्चैःशब्देन आह्वयतीति। णौक गत्याह्वयनयोः+डः।) णका। (यथा, तन्त्रे।
"णो णका निर्ऋतिः पूर्व्वो यज्ञेशादनदेश्वरः॥")
श्वा। श्लाङ्गूलम्। इति मेदिनी। णे, १॥ निर्गुणः। ध्वनिः। इत्येकाक्षरकोषः॥

णकः, पुं, देशविशेषः। इति भूरिप्रयोगः॥ णका इति भाषा॥

णका, स्त्री, (णक् इति गभीरशब्देन कायतीति। कै+कः टाप् च।) वाद्यविशेषः। णाक इति भाषा। तत्पर्य्यायः। यशःपटहः २। इत्यमरः।१।७।६॥ विजयमर्दलः ३। इति शब्दरत्नावली॥ (यथा, अर्य्यासप्तशत्याम्।२४७।
"णकामाहत्य मदं वितन्वते करिण इव चिरं पुरुषाः॥")

णकारी, स्त्री, (णकं जयणकावत् गभीरसिंहनादं अश्नुते समराङ्गणे इति। अश+अण् ङीप् च।) तारिणी। यथा,—
"णकारवा च णकारी णकारवरवा णका॥"
इति कुलसङ्केते ताराषट्सहस्रनामस्तोत्रम्॥

णण्टी, स्त्री, वाद्यविशेषः। यथा, रुद्रयामले अन्नपूर्णासहस्रनाम कथने।
"णण्टीवाद्यस्वरूपा च णकाराक्षररूपिणी॥"

णालं, क्ली, (णौकते आह्वयति शरीरं अनेन। णौक+अच्। पृषोदरात् आलत्वे लत्वे च साधुः।) पद्मकम्। णालिपद्मजयकरीति अन्नदाकल्पीयसहस्रनामविवरणात्॥

णाली [न्] त्रि, (णालमस्त्यस्येति। इनिः।) णालविशिष्टः। चर्म्मी। यथा,—
"णालिपद्मजयकरी णकारवर्णरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

णामरा, स्त्री, हंसी। इति धनञ्जयः॥

णुख, अन्वेषणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) णाद्यन्तो दन्त्यनोपधः। णयोगान्मूर्द्धन्यः। तेन यगादौ तङ्लोपे णुटात इत्यादि। णुखति धनं लोकः। इति दुर्गादासः॥

णुखिः, पुं, (णुखतेऽसौ भक्तैरिति। णुख अन्वेषणे+इन्।) गणेशः। तन्नामकरणं यथा,—
गणेशं प्रति शिववाक्यम्।
"अन्वेषणे णुखिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थणुखिततया भव णुखिनामा।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक! णुखिराज!॥"
तच्चाहात्म्यं यथा,—
"णुखे! प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति गुमानिह काशिवासी।
तत्कर्म्ममूलमधिमम्य पुरादिशामि
ततकिञ्चिदत्र न पुनर्भवतास्ति येन॥"
"यः प्रत्यहं नमति णुखिविनायक! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि॥"
"प्रथमं णुखिराजोऽसि मम दक्षिणतो मनाक्।
आणुख्य सर्व्वभक्तेभ्यः सर्व्वार्थान् संप्रयच्छसि॥"
तस्य याचाविधानं यथा,—
"माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः।
ये त्वां णुखेऽर्चयिष्यन्ति तेऽर्चाः स्युरसुरद्विषाम्॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम्।
शुक्लां शुक्लतिलैर्ब्रह्मन् प्राग्वीयाज्जड्डुकान् व्रती॥
कार्य्या यात्रा प्रयत्नेन त्वेवसिद्धिमभीप्सुभिः।
तस्यां चतुर्थ्यां तत्प्रीत्यै णुखे! सर्व्वोपसर्गहृत्॥
तां यात्रां नाच यः कुर्य्यान्निवेद्य तिलजड्डुकान्।
उपसर्गसहस्रैस्तु स हन्तव्यो! ममाज्ञया॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः।
तस्यां चतुर्थ्यां मन्त्रज्ञस्य मन्त्रः प्रसेत्स्यति॥"
इति काशीखण्डे। ५० अध्याये॥

णोलः, पुं, (णः णका तदाकारं लातीति। ला+कः पृषोदरात् ओत्वे साधुः। दुल उत्क्षेपे अच्। पृषोदरात् साधु वा।) चुनामख्यातवाद्यम्। यथा,—
"णकाढोलप्रिया सिद्धा ढोलवाद्यप्रमोदिनी।
ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

णौक, ह्वे ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) चतुर्दशस्वरः। ह्व, अणुणौकत्। ङ, णौकते। इति दुर्गादासः॥ (आह्वतौ। यदनं णौकते। इति कालिदासः॥

ण

ण, णकारः। स च व्यञ्जनपञ्चदशवर्णः। टवर्ग पञ्चमवर्णश्च। (अर्द्धमात्राकालेनोच्चारणीयः।) अस्योच्चारणस्थानं मूर्द्धा। इति वाकरणम्॥ (शिक्षायन्त्यादिमते तु अस्योच्चारणे जिह्वामध्येन मूर्द्धः सार्द्धः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषाः अल्पप्राणश्च बाह्यप्रयत्नाः। माल्लकान्यासेऽस्य दन्तपादाङ्गुल्ये न्यासक्रिया॥ वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—

"कुण्डलीत्वगता रेखा मध्यतस्तत ऊर्द्धतः।
वामादधोगता सैव पुनरूर्द्धं गता प्रिये!॥
ब्रह्मेशविष्णुरूपा सा चतुर्व्वर्गफलप्रदा॥
ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु।
द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्॥
राजीवलोचनां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा,—

"णकारं परमेशानि! या स्वयं परकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि! सदा त्रिगुणसंयुतम्।
आत्मादितत्त्वसंयुक्तं महामोहप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

तस्य ५४ चतुर्विंशतिनामानि यथा,—

"णो निर्गुणं रतिर्ज्ञानं जगत्पतिवाहनः।
जया ग्रन्थो नरकजित् निष्कला योगिनीप्रियः॥
द्विसुखं कोटवी श्रोत्रं सच्चिद्बोधनी मता।
त्रिनेत्रो मानुषी श्रोमदष्टपादाङ्गुलेर्मुखः॥
माधवः ग्रन्थिनी वीरो नारायणश्च निर्णयः॥"

इति नानातन्त्रग्रन्थम्॥

णः, पुं, (णखति गच्छति जानात्यनेन इति। णख गतौ + ड:। पृषोदरादित्वात् णत्वम्।) ज्ञानम्। निश्चयः। इत्येकाक्षरकोषः। विष्णुदेवः। स बुद्धदेवताविशेषः। भूषणम्। गुणवर्ज्जितः। पानीयनिलयः। इति मेदिनी। णे, १॥

णच, व्रजे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) नचति। व्रजो गतिः। इति दुर्गादासः॥

णख, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) प्रणखति। इति दुर्गादासः॥

णट, नृत्यहिंसयोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) प्रणटति। गोपदेशविधौ वर्ज्जनेऽपि अस्य परस्य चेह पाठः केषाञ्चिदनुरोधात्। अत्र नृत्यं साभिनयनर्त्तनम्। इति दुर्गादासः॥

णट, म नृतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) म, प्रणटयति। नृतावितिं नृत्यतेरीणादिकिप्रत्यये रूपम्। अत्र मिकारानुबन्धनेवेदमर्द्धं पूर्व्वं नृत्यगच्छमप्रभेदार्थम्। तेन पूर्व्वं नृत्यं साभिनयनर्त्तनम् इह तु नृतिरभिनयरहितनर्त्तनमिति। यथा पूर्व्वस्य। स्फटिककटकभूतिर्नाटयत्येव ग्रैलः। इति माघः। अस्य तु। नाथेन केन नटयिष्यति दीर्घमायुरिति मुरारिः। इति दुर्गादासः॥

णद, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ध्वनिरव्यक्तशब्दः। नदति घण्टा। इति दुर्गादासः॥

णद, क भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, नादयति। इति दुर्गादासः॥

णभ, ल ड हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ल, अनभत। ड, नभते। इति दुर्गादासः॥

णभ, थ ग हिंसे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां-च-परं-सकं-सेट्।) य, नभ्यति। ग नभ्नाति। इति दुर्गादासः॥

णम, औ शब्दे। नतौ। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-नतौ सकं अकं च अनिट्।) औ, नम्ता। शब्दार्थो न भाषायाम्। नतिरिह नमस्कारो नम्रीभावश्च। नमति गुरुं लोकः। नमन्ति फलिनो वृक्षाः। अमन्तोऽयस्य ज्वलत्कलञ्चलेत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः। नमयति नामयति प्रणमयति। ऋपृच्छमवनामितं वधिरकर्णजापः कृतः। इत्यादौ अवनमनं अवनामः घञ् ततो अवनामं करोतीति णौ रूपम्। इति दुर्गादासः॥

णय, ड गतौ। रक्षे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-सेट्।) ड, नयते। इति दुर्गादासः॥

णर्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) गोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः केषाञ्चिदनुरोधात्। प्रणर्दति। इति दुर्गादासः॥

णल, ज बन्धे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्।) ज, नालः गलः। नलति केशं लोकः बध्नाति इत्यर्थः। गन्धे इति केचित्। गन्धोऽदर्शनमिति गोविन्दभट्टः। इति दुर्गादासः॥

णश, ल य ऊ नाशे। इति कविकल्पद्रुमः॥ (दिवां-परं-अक-वेट्-स्वरड्वान्।) नाशो दर्शनाभावः। इति प्राचः। लुकायनमिति सर्व्वस्वः। ल, अनेशत् अनशत्। य, नश्यति प्रदुस्त्रिरोभवति इत्यर्थः। ऊ, नशिष्यति नङ्क्षति। इति दुर्गादासः॥

णस, ड कृतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सकं च-सेट्।) कृतिरिह कुटिलीभावस्तत्करणञ्च। ड, नसते खलः कुटिलः स्यादित्यर्थः। नसते लतां वायुः कुटिलांकरोतीत्यर्थः। इति दुर्गादासः॥

णह, य ब ऊ बन्धे। इति कविकल्पद्रुमः॥ (दिवां-उभं-सकं-अनिट्।) य ब, नह्यति नद्धते। ऊ, अनद्ध। इति दुर्गादासः॥

णाथ, ऋ ड आशिषि। एवेशेऽर्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अकं च-सेट्।) गोपदेशविधौ वर्ज्जनेऽप्यस्य पाठः कस्य चिदनुरोधात्। ऋ, अननाथत्। ड, प्रणाथते। एव उपतापः। आशीरिहार्थस्याशंसनम्। ङित्त्वेऽपि अपथाशीर्गत्यनुकारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मैपदम्। नाथति ग्रन्थं बली उपतापयति इत्यर्थः। नाथते श्रियं लोकः आशंसत इत्यर्थः। नाथति धनी ईश्वरःस्यादित्यर्थः। नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः। मार्गणेरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ। याचनमप्याशंसाविशेषः। आशिषि नित्यमात्मनेपदमन्यत्र विभाषेति केचित्। इति दुर्गादासः॥

णाध, ऋ ड नाथे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) गोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः कस्यचिदनुरोधात्। ऋ, अननाधत्। ड, नाधते नाथो एवाशीरैश्वर्य्यार्थनानि। इति दुर्गादासः॥

णास, ऋ ड ध्वाने। शब्द इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अननासत्। ड, नासते। इति दुर्गादासः॥

णिच, चुम्बने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) निचति। इति दुर्गादासः॥

णिज, इल ड शुद्धौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं सेट्-इदित्।) शुद्धिरिह शुद्धीकरणम्, इ, कर्म्मणि निञ्जाते। ल ड, प्रणिङ्क्ते। इच्छौ, यानां विप्राणां समूहः इति हलायुधः। इति दुर्गादासः॥

णिज, लि इर् च औ पोषे। शुद्धौ। इति कविकल्पद्रुमः॥ (जुहो-उभं-सकं-अनिट्।) लि अनेनेक्ति नेनिक्ते। इर्, अनिजत् अनेक्षीत्। औ, नेक्ता। इति दुर्गादासः॥

णिद, इ कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) निंसनिन्दनिन्द्यं गोपदेशफलं चिन्त्यम्। णत्वविकल्पने स्वरूपग्रहणात्। केचित्तु क्तादिविकल्पमिच्छन्ति त्यादौ तूपसर्गादसमासे उपसर्गात् समासे त्यादौ नित्यमित्यर्थः। यथा, प्रणिन्दकः प्रनिन्दकः। प्रणिन्दति। भट्टौ तु त्यादावपि विकल्पो दृश्यते। इ, कर्म्मणि निन्द्यते। निन्दति दुष्टं लोकः। इति दुर्गादासः॥

णिद, ऐ च सन्निधौ। कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-अकं-कुत्सने-सकं-सेट्-ऋदित्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। च, नेदति नेदते दयालुं दीनः। निनिदुः। इति दुर्गादासः॥

णिल, ग्र गहने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) दुःखी। गहनं दुर्ब्बोधः। ग्र, निलति ग्राह्यं कुधीः दुःखेन जानातीत्यर्थः। इति दुर्गादासः॥

णिव, इ सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। इदित्।) क्लेदी। इ, निन्वति। इति दुर्गादासः॥

जिग्, ग्रीवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ग्रीवे समाधौ । नेग्रति योगी । निनिग्रतुः । इति दुर्गादासः ॥

जिघ, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, नेघित्वा निघ्ना । इति दुर्गादासः ॥

जिघ, इ ङ ण घुम्बने । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-सकं-सेट् ।) ल ङ, निंघ्ते । इ, निंघ्सते । इति दुर्गादासः ॥

जी, ण प्रापणे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) जोपदेशग्राहो नादित्वेन प्राग्वत् इति गत्यर्थः । प्रजयति । एवं सर्वत्र । प्रापयमिह ज्ञानस्य रूपम् । तथा च । वृद्धाति जन्मवति च वैद्यत्वपि नयत्यम् । इति क्रियानिर्घण्टः ॥ ण, नयति नयते गां वनं गोपः प्रापयतीत्यर्थः । इति दुर्गादासः ॥

जीव, वर्ह । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सन्नं च-सेट् ।) वर्ह इह ज्ञानवर्द्धीभावस्तत्करत्वच्च । नीवति पत्रं तमालस्य । नीवति सूत्रं तन्त्रवायः । इति दुर्गादासः ॥

जीव, ञीवेग । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) नीवति जीवः स्थूलः स्यादित्यर्थः । इति दुर्गादासः ॥

जु, ञ स्तुतौ । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-सेट् ।) ञ, नौति । इति दुर्गादासः ॥

जुद, ञ ग्र औ प्रेरणे । इति कविकल्पद्रुमः ॥ (तुदां-उभं-सकं-अनिट् ।) ञ ग्र, नुदति नुदते ग्रहं योधः । औ, नोत्ता । इति दुर्गादासः ॥

जू, ण्वि स्वपने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) इखान्तोऽयमिति वररुचिः । ण्वि, नुवति । अनुवीत् । इति दुर्गादासः ॥

जेद, ऋ ण सन्निधौ । कृतुत्वने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-अकं-सकं च-सेट् ।) सन्निधिः सन्निकर्षः । ऋ, अनिनेदत् । ण, नेदति नेदते दयालुं दीनः । निनेदुः । इति दुर्गादासः ॥

जेष, ऋ ङ ञ्ने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अनिनेषत् । ङ, नेषते निनेषे । ञ्नो गतिः । इति दुर्गादासः ॥ ॥ इते धातवः स्वभावतो दन्त्यनादयो ओपदेशेन मूर्द्धन्यनादाः ॥

त

तं, तकारः । स वक्ष्यमाणोऽनुबंधः । तवर्गप्रथमवर्णश्च । (अर्धमात्राकालेनोच्चार्यः ।) अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् । (अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासघोषाः बाह्यप्रयत्नाः । माहकान्यासेऽस्य वामस्फिचि न्यासक्रिया स्यात् । वङ्गीयवर्णमालायां) तस्य लेखनप्रकारो यथा,—



"आदौ विन्दुसतो मध्ये कुण्डलीलमवाप्य वा ।
दग्धाङ्गमगता निता ब्रह्मविष्णुशिवरूपिणी ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम् ॥
सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम् ।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"तकारं चञ्चलापाङ्गि ! शृणु परमकुण्डली ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
त्रिगुणसहितं वर्णं आत्मादितत्त्वसंयुतम् ।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम् ॥"

तस्य ३२ द्वात्रिंशन्नामानि यथा,—

"तः पूतना हरिः शुद्धिः शुक्लो शुक्लिर्जटी भगा ।
वामस्फिक्वामकटौ च कामिनी मध्यकर्त्तकः ॥
आषाढ़ी तक्षतुरङ्गश्च कामिका पृष्ठपुच्छकः ।
रक्तकश्च श्यामसुखो वाराही मकरोऽरुणा ॥
सुगतोऽर्द्धसंज्ञा पृष्ठजानुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामदच्छत्रधातुरात्मा च कौरवः ॥
जवनिपुलजो जानिरङ्गमदमातुरा ॥"

इति नानातन्त्रशास्त्रम् ॥

तं, क्लो क्ली, (त+भावे घञ् ।) तरत्वम् । (तरति भवसागरमनेनेति । तॄ+करणे घञ् ।) पुण्यम् । इति मेदिनी । ते, १ ॥

तः, पुं, (तर्दति तर्मति वा हिनस्ति द्रव्यादिहरणेन जनानिति । तर्द तर्म वा+घञ् ।) चौरः । अन्ततम् । पुच्छम् । क्रोड़ः । लेच्छः । इति मेदिनी । ते, १ ॥ गर्भः । गृहः । इति शब्दरत्नावली ॥ रत्नम् । सुगतः । योधः । गौरविवर्जितपुच्छम् । क्रोड़पुच्छम् । इत्येकाक्षरकोषः ॥

तक, सहने । हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-हासे अकं-सेट्) तकति । इति दुर्गादासः ॥

तक, इ दौर्ब्बल्ये । इति कविकल्पद्रुमः (भ्वां-परं-अकं-सेट् ।) दौर्ब्बल्यं दुःखेन जीवनम् । इ, तक्नुते दरिद्रतेव दुःखेन जीवते इत्यर्थः । तक्नुहि दीनः दुःखेन जीवति इत्यर्थः । इति दुर्गादासः ॥

तकिलः, त्रि, (तक्+"मिथिलादयश्च ।" उणां । १ । ५६ । इति इलच् नलोपश्च ।) धूर्तः । इत्यद्यादिकोषः ॥

तकिला, स्त्री, (तकिल+टाप् ।) ओषधम् । इत्युणादिकोषः ॥

तक्वः, त्रि, (तकं हासमर्हतीति । तक+वत् ।) हास्यः । (तक सहने+"तकिग्रहि चलति जनिभ्यो यङ्लुगन्तेभ्यः ।" ६ । ३ । ६५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या वत् ।) सहनीयः ॥

तक्रं, क्ली, (तनक्ति सङ्कोचयति दुग्धं पादानुदधिरूपेण परिणमयतीत्यर्थः ।"क्यायितक्वीति ।" उणां । २ । १३ । इति रक् क्वश्चादित्वात् कुत्वं च ।) पादानुसंयुतदधि । इत्यमरः ।२।९।५३ ॥

तत्पर्य्यायः । गोरसजम् २ घोलम् ३ कालशेयम् ४ विलोड़ितम् ५ दध्याहृतम् ६ अरिष्टम् ७ अम्लम् ८ उदश्वित् ९ मथितम् १० ह्रयः ११ । इति राजनिर्घण्टः ॥ तस्य भेदविधम् । तेषां निष्पत्तिं गुणांश्च तत्रैवाभिहितान् यथा,—

"सवारं निर्जलं शीतं मथितं लवणोदकम् ।
तक्रं पादजलं प्रोक्तमरिष्टं दण्डवारिकम् ॥
हस्तिका सरहीनं स्यादच्छा प्रचुरवारिका ॥"

तेषां गुणाः ।

"वातपित्तहरं शीतं मथितं कफपित्तजुत् ।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ॥
वीर्य्योष्णं दीपनं हृद्यं प्रीणनं वातनाशनम् ।
ग्रहण्यादिगतं पथ्यं भवेत् संग्राहि लाघवात् ॥
किञ्च स्वादु विपाकिलाघ्न च पित्तप्रकोपजम् ।
कषायोष्णविकाशित्वादग्नीक्षाऽपि कफापहम् ॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराभाजनदग्धं सुखाय
तथा नराणां सुवि तक्रमाहुः ॥
उदश्वित् कफजित्तघ्नं श्रमघ्नं वरमं मतम् ।
हस्तिका शीतला ह्यल्पा पित्तश्रमभ्रमापहा ॥
वातघ्नं कफजित् वा तु दीपनी लवणान्विता ॥"

अथोद्धृतदृष्टलोकोद्धृतदृष्टानां तक्राणां गुणाः ।

"सद्युद्धृतं दृष्टं तक्रं पथ्यं लघु विशेषतः ।
लोकोद्धृतदृष्टं तस्माद्गुरु दृष्यं कफापहम् ॥
अद्युद्धृतदृष्टं सान्द्रं गुरु पुष्टिकफप्रदम् ॥"

अथ दोषविशेषे व्याधिविशेषे च तक्रविशेषाः ।

"वातेऽम्लं ग्रस्यते तक्रं गुडौषैन्धवसंयुतम् ।
पित्ते स्वादुसितायुक्तं कफोल्बणे कटु ॥
त्रिकटुजीरयुतं शीतं शैम्बवेन कृतं युतम् ।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम् ॥
सुदधं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।
न्यग्रोधे तु सगुड़ं माक्षुरोगे सचित्रकम् ॥"

अथामपक्वतक्रगुणाः ।

"तक्रमामं कफं कोठे हन्ति कुक्षौ करोति च ।
पीनसश्वासकासादौ प्रकुप्यति प्रयुज्यते ॥"

अथ तक्रसेवननिमित्तानि ।

"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ॥
तत्तु हन्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेहोदरव्रण्यर्शोग्रहण्यष्ठीलगुल्मनुत् ॥
मेहं गुल्ममतीसारं शूलप्लीहोदरव्रणौ ।
चित्रकोष्ठतवाधौ च कुष्ठशोथप्रमोदौ ॥"

अथातक्रविधयः ।

"नैव तक्रं पिबेद्रात्रौ शरत्काले न दुर्जले ।
न च्छर्द्यामदाहेषु न रोगे रक्तपैत्तिके ॥"

अथ गवादीनां तक्राणां विशिष्टगुणाः ।

"गव्यमाजं दधीत्याहुः तद्गुणं तक्रमादिशेत् ॥"

इति भावप्रकाशः ॥

("गव्यस्निग्धोष्णमम्लं तक्रं श्लेष्मलदुच्यते ।
दीपनं रुचिदन्मेध्यमग्नेर्दीरविकारजित् ॥"
इति गव्यतक्रगुणाः ॥
"माहिषं कफलत् किञ्चिद्धनं श्लेष्मकरं गुरु ।
ग्रीष्मार्शोग्रहणीगुल्मपाण्ड्वामयविनाशनम् ॥"
इति माहिषतक्रगुणाः ॥
"छागलं लघु संस्निग्धं त्रिदोषघ्नमनं परम् ।
गुल्माग्निग्रहणीशूलं पाण्ड्वामयविनाशनम् ॥"
इति छागीतक्रगुणाः ॥
"तथाच त्रिविधं तक्रं कथ्यते ह्यत्र पुस्तके ।
यथायोगेन तत् सम्यक् ग्रस्यते येषु रोगिषु ॥
समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतञ्च तत् ।
अनुद्धृतघृतञ्चान्यदित्येतत्त्रिविधं मतम् ॥
सर्व्वं लघु च पञ्चच त्रिदोषघ्नमनं वरम् ।
ततः परं गुणैस्तत्तं क्रमेण समुदीरितम् ।
समुद्धृतघृतन्तक्रं लघु पञ्चतमं मतम् ॥
गरोदरार्शोग्रहणीपाण्डुरोगज्वरातुरे ।
वर्च्चोमूत्रग्रहे वापि शीघ्रावापदमेहिषु ॥
हितं संग्रोधनं वह्नेः पित्तरक्तविशोधनात् ।
अर्द्धोद्धृतघृतं तस्मादूर्ध्वं गुरु कफप्रदम् ।
मधुरं पित्तरक्तघ्नं श्रमघ्नं परमं मतम् ॥
अनुद्धृतघृतं सान्द्रं गुरु विद्यात् कफावहम् ।
बलप्रदञ्च शीतानामामघ्नीपातिसारजित् ॥"
इति त्रिविधतक्रगुणाः ॥७॥
"तक्रं यादि कषायाम्लं दीपनं लघु ।
श्रमापहरणं स्निग्धं ग्रहण्यर्शोऽतिसारहृत् ।
इति तक्रगुणाः प्रोक्ता न दद्याद् यत्र तक्रकम् ।
वाते शोषे च पीतानां रोगाणाञ्चे प्रदूषणे ॥
संमूर्च्छाभ्रमशोषासु तथाच रक्तपित्तके ।
न ग्रस्यं तक्रपानञ्च करोति विविधान् गदान् ॥"
एतेषां तक्रं निषिद्धम् ।
इति हारीते प्रथमस्थाने २५ अध्याये ॥७॥)

तक्रकूर्चिका, स्त्री, (तक्रजाता कूर्चिका ।) तक्रयोगेन जलदुग्धात् जाता । छाना इति भाषा । अस्या गुणाः । मलवद्धवातकारित्वम् । रूक्षत्वम् । दुर्जरत्वञ्च । इति राजवल्लभः ॥
(यथा सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका ॥")

तक्रमांसं, क्ली, (तक्रयोगेन पाचितं मांसम् ।) व्यञ्जनविशेषः । एखनि इति पारस्य भाषा । तस्य पाकप्रकारो यथा,—
"पाकपात्रे घृतं दत्त्वा हरिद्राद्विहु भर्ज्जयेत् ।
छागादेः सकलस्यापि खण्डान्यष्टौ च भर्ज्जयेत् ॥
सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा ।
राजिकादियुते तक्रे मांसखण्डानि वापयेत् ॥"
तस्य गुणाः ।
"तक्रमांसन्तु वातघ्नं लघु वह्नेर्बलप्रदम् ।
कफघ्नं पित्तलं किञ्चित् वर्ण्यमाहारसाधनम् ॥"
इति भावप्रकाशः ।

तक्राटः, पुं, (तक्राय तक्रोत्पादनाय अटतीति । अट्+अच् ।) मन्थानदण्डः । इति हारावली । ३४ ॥

तक्ष, त्वचो त्याहे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो त्याहत्वमेवो यत्नकरणम् । तक्ष त्वचने इति प्राचः । त्वचनं संवरणमिति रमानाथः । तक्षति कार्यं वर्म्मेवा भटः । इति दुर्गादासः ॥

तक्ष, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-वेट् ।) ऊ, तक्ष्णिष्यति अतक्षीत् । कार्श्ये क्षयकरत्वम् । तक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्ष, ऊ न दृष्टौ । इति कविकल्पद्रुमः ॥ (स्वां-परं-उभं-सेट् ।) तक्षः क्षयकरत्वम् । ऊ, तक्ष्णिष्यति अतक्षीत् । न, तक्ष्णोति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्षकः, पुं, (तक्षतीति । तक्ष+ण्वुल् ।) पातालस्थनागानामगंतनागविशेषः । स कश्यपात् कद्रुगर्भे जातः इन्द्रसखः । अस्य वासः खाण्डवदहने आसीत् । अयं परीक्षितं दष्टवान् । इति श्रीभागवतम् ॥ (अयं हि छद्मकरूपधारी उतङ्कस्य सुनेर्गुरुदक्षिणार्थमागीते कुण्डले ऽपहृत्य नागलोकं गतवान् । यथा, महाभारते । १ । ३ । १२७ ।
"तक्ष तक्षको दष्टमात्रः स तं जग्राह । गृहीतमात्रः च तद्रूपं विहाय तक्षकरूपं धृत्वा सहसा धरण्यां विततं महाविलं प्रविवेश ॥
तक्ष तनूकरणे + "कृञ् छिदिरुधिपतिदम्भूवः ।" उणा । २ । १२ । इति कुन् ।) सर्पः । इत्यमरः । १ । ८ । ४ ॥ विषकर्म्मा । इति शब्दरत्नावली ॥ हृमभेदः । इति हेमचन्द्रः ॥ रत्नधारः । इत्यमरटीकायां रायमुकुटः ॥ (खगमन्त्रात: प्रसेनजित्-पुत्रः । यथा, भागवते । ६ । १२ । ८ ।
"ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ॥"
हेदके, त्रि । यथा, रामायणे । २ । ८० । १२ ।
"तथा वर्द्धकयश्चैव मार्गिणो दृढतक्षकाः ॥")

तक्ष्यं, क्ली, (तक्ष तनूकरणे + भावे ण्यट् ।) क्षयकरत्वम् । (यथा, मनुः । ५ । ११५ ।
"द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्ष्यम् ॥")

तक्ष्णी, स्त्री, (तक्ष्यतेनेनेति । तक्ष+करणे ल्युट् । टित्वात् ङीप् ।) वासी अस्त्रम् । इति शब्दरत्नावली ॥

तक्ष्णिका, स्त्री, देशविशेषः । इति सिद्धान्तकौमुदी । (यथा, महाभारते । १ । ३ । २२ ।
"तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः स तथा भ्रातृन् सन्दिश्य तक्ष्णिकां प्रत्यभिप्रतस्थे ॥")

तक्षा, [न्] पुं, (तक्षति तनूकरोतीति । तक्ष+"कनिन् युवृषितक्षिराजीति ।" उणा २ । ५५ । इति कनिन् ।) सूत्रधरः । इत्यमरः । २ । १० । ६ ॥ (यथा, माघे । १२ । २५ ।
"कक्षाङ्कवक्षौ विगताक्षपाटवे
दृशा निकामं विकलीकृते रथे ।
"व्याप्तेन तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लक्षणपूर्व्वकः क्रमः ॥")

तट, ट स्खलने । कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट् ।) ट, कर्म्मणि तट्यते । इति दुर्गादासः ॥

तगरं, नदीदृष्टः । पिङ्गतगर इति कोङ्कणे प्रसिद्धः । तगरमूल इति ख्यातश्च । तत्पर्य्यायः । कालानुसारिवा २ वक्रम् ३ कुटिलम् ४ शठम् ५ महीरुहम् ६ नतम् ७ शिखम् ८ दीपनम् ९ तगरपादिकम् १० । इति रत्नमाला ॥ विलम्बम् ११ कुचिलम् १२ षण्ढम् १३ नडुलाख्यम् १४ दण्डहस्तम् १५ वर्षेश्यम् १६ पिङ्गौतगरकम् १७ पार्थिवम् १८ राजहर्म्यम् १९ कालानुसारकम् २० चक्रम् २१ दीनम् २२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । दोषत्रिविषार्त्तिभूतोन्मादभयनाशित्वम् । मद्यत्वञ्च । आकुल्यदृष्टयः । इति राजनिर्घण्टः ॥ गन्धद्रव्यविशेषः । तस्य पर्य्यायगुणाः ।
"कालानुसार्य्यं तगरं कठिनं लघु वंशतम् ।
अपरं पिङ्गतगरं दण्डहस्ति च वर्षेश्यम् ॥
तगरद्वयमुक्तं स्यात् खादु स्निग्धं लघु स्मृतम् ।
विषापस्मारभूतार्त्तिरोगदोषत्रयापहम् ॥"
इति भावप्रकाशः ॥

तगरः, पुं, (तं क्रोधभावं गिरतीति । गृ+अच् ।) पुष्पदन्तविशेषः । टगर इति भाषा । तत्पर्य्यायः । चित्रपुष्पः २ । कालपर्व्वः ३ कटुस्कन्दः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १०४ । ८५ ।
"प्रियङ्गुचन्दनाभ्याञ्च विल्वेन तगरेण च ।
पृथगेवानुलिम्पेत केशरेण च बुद्धिमान् ॥")
मदनवृक्षः । इति राजनिर्घण्टः ॥

तगरपादिकं, क्ली, (तगरस्य पादो मूलदेश इव विद्यतेऽस्य इति उन् ।) तगरम् । इति रत्नमाला ॥

तङ्गः, पुं क्ली, (टङ्ग+एषोदरात् साधुः ।) पाषाणदारकः । इत्यमरटीकायां रमानाथः ॥ (तङि तङ्गभावने+भावे घञ् ।) प्रियविरहजन्यस्तापः । भयम् । इति जिह्वादिगणवृत्तौ भरतः ॥

तन्वी, स्त्री, (तं पुरुषाकारं नयति गच्छतीति । नी+क्विप् ङीप् ।) द्विजपत्नी । इति राजनिर्घण्टः ॥

तट, उच्छ्राये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) उच्छ्रायः उच्चीभावः । तटति पुष्पितम् । इति दुर्गादासः ॥

तट, क आघाते । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, ताटयति । इति दुर्गादासः ॥

तटं, क्ली, (तटति उच्छ्रितं भवतीति । तट उच्छ्राये + घञर्थात् क ।) क्षेत्रम् । इति मेदिनी । टे, १६ ॥ (प्रदेशः । यथा, महाभारते । १ । ३६ । ३ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥")

तटः, त्रि, (तटति उच्छ्रितो भवतीति । तट्+अच् ।) तीरम् । इत्यमरः । २ । १० । ७ ॥

तड् इति भाषा ॥ (यथा, हरिवंशे । ६०।५५ ।
"कर्म्मवमार्गो आचेते हृदस्यास्य तटाद्भौ ॥"
महादेवे, पुं । सर्व्वोच्छ्रितत्वादस्य तथात्वम् ।
यथा, महाभारते । १२ । २८४ । ३६ ।
"नमस्तटाय तथाय: तटागाभ्यतये नमः ॥")
तटङ्क, क्ली, (तटस्य विशेषः । तस्य स्वरूपं यथा,
तद्विशब्दे यति तद्दोधकत्वम् । तथाच ।
"स्वरूपं तटङ्कं द्विधालक्षणं स्यात्
स्वरूपस्य बोधो यतो लक्षणाभ्याम् ।
स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात्
यथा काकयन्तो गृहाः खं विलङ्घ ॥"
इति वेदान्तकारिका ॥
(तटे तिष्ठतीति । स्था + कः ।) तटस्थिते,
त्रि ॥ (उदासीनः । यथा, वैद्यके । २ । ५५ ।
"धिक् चापले वतृषिमवतृषलत्वं
यत्प्रेरणाद्गुरुतरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्गा
मया तटस्थस्तृषहतोऽसि ॥"
समीपस्थः । यथाह बलः ।
"तटस्थः स्यादुदासीने तीरस्थनिकटस्थयोः ॥")
तटाकः, पुं, (तटमकति गच्छतीति । अक +
"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तड़ागः ।
पद्मादियुक्तसरः । इति शब्दरत्नावली । (यथा,
वैराग्यशतके । ४६ ।
"प्रादेशमात्रसुदरं परिपूरयितुं कियानयं यत्नः ।
सुकृतेनाम्भः पातुं खनितव्यः किं तटाकोऽपि ॥")
तटिनी, स्त्री, (तटमस्यस्या इति । तट + "अत
इनिठनौ ।" ५ । २ । ११५ । इति इनि-
स्ततो ङीप् ।) नदी । इत्यमरः । १।१०।३० ॥
(यथा, आर्य्यासप्तशत्याम् । ६६२ ।
"कृत्वा तटिनि ! तरङ्गैर्भमितभ्रूभङ्गेषु नाथ्ये
निहितः ।
मकरदलवल्कलरहितस्खयान्तरिक्षे तरुस्यक्तः ॥")
तटी, स्त्री, (तटति उच्छ्रिता भवतीति । तट +
अच् । ङीप् ।) तीरम् । इत्यमरः । १।१०।७ ॥
(यथा, साहित्यदर्पणे । ३ । ८६ ।
"मालयच्च प्रभागच्च नद्यादीनां तटी तथा ॥")
तड, इ ड आघाते । इति कविकल्पद्रुमः । (भ्वां-
आत्मं-सकं-सेट् ।) इ, तड्यते । ड, तडते ।
इति दुर्गादासः ॥
तड, क त्विषि । आघाते । इति कविकल्पद्रुमः ॥
(चुरां-परं-अकं-सकं च-सेट् ।) क, ताड-
यति । त्विषि दीप्तौ । इति दुर्गादासः ॥
तड़ागः, पुं, (तड्यते आहन्यते ऊर्म्मिभिरिति ।
तड + आगः । एषोदरादित्वात् आलोपे साधुः ।)
तड़ागः । इति द्विरूपकोषः ॥
तड़ाकः, पुं, (तड्यते आहन्यते ऊर्म्मिमालाभि-
रिति । तड़ि आहतौ + "पिनाकादयश्च ।"
उणां ४ । १५ । इति आकप्रत्ययेन निपातनात्
साधुः ।) तड़ागः । इति शब्दरत्नावली ॥
तड़ाका, स्त्री, (तड़ाक + स्त्रियां टाप् ।) नदी-
वसुद्राणां तटभागः । (तड़ि आहतौ + भावे
आकः ।) आघातः । इति संक्षिप्तसारे उणादि-
वृत्तिः ॥ (प्रभा । इत्युज्ज्वलदत्तः । ४ । १५ ॥)
तड़ागः, पुं क्ली, (तड + तड़ागादयश्च । इति
आगप्रत्ययेन निपातनात् साधुः ।) यज्ञकूटकः ।
इति मेदिनी । गे, ३६ ॥ (तड्यते आहन्यते
ऊर्म्मिमालाभिरिति । तड़ि आहतौ + कर्म्मणि
आकः ।) पद्मादियुक्तं सरः । तत्पर्य्यायः ।
पद्माकरः २ । इत्यमरः । १ । १० । २८ ॥
तड़ाकः ३ तटाकः ४ । इति शब्दरत्नावली ॥
तड़गः ५ । इति द्विरूपकोषः ॥ अथ शुभ-
धनुःपरिमाणजलाशयः । चतुर्हस्तु पञ्चचत्वा-
रिंशद्धस्तात्मूनतायां सहस्रहस्तियहस्तात्मूनत्वेन
तड़ागः । इति नयवर्द्धमानधृतो वह्निपुः ॥ * ॥
तस्य जलगुणाः । वायुकारित्वम् । स्वादुत्वम् ।
कषायत्वम् । पाके कटुत्वम् । स्निग्धरुक्षकत्वे
प्रशस्तत्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्-
सर्गविधिर्यथा,—
पुलस्त्य उवाच ।
"शृणु राजन्महाबाहो ! तड़ागादिषु यो विधिः ।
पुराणेष्वितिहासेषु मन्यते राजसत्तम ! ॥
प्राप्य पर्व्व शुभं शुक्लमागते चोत्तरायणे ।
पुण्येऽह्नि विप्रैः क्रियते ज्ञात्वा ब्राह्मणवाचनम् ॥
प्राकप्रसवणाद्दमस्तड़ागस्य समीपतः ॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्ततः ।
तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्मुखः ॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला ।
नवसप्तथवा पञ्च योनिवक्त्रा नृपात्मज ! ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुल-
विस्तृता ।
सर्व्वे खड़स्तमात्राः स्युस्त्रिपर्व्वोच्छ्रितमेखलाः ॥
सर्व्वे च सर्व्ववर्णाः स्युः पताकाध्वजसंयुताः ।
अश्वत्थोड़म्बरप्लक्षवटशाखाश्चतानि च ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथापरे ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रियाः ।
कुलशीलवयोयुक्ताः स्थापिता द्विजसत्तमाः ॥
प्रतिस्तम्भेषु कलसा यज्ञोपस्करणानि च ।
यजनञ्चासनं शुभ्रं ताम्रपात्रं सुविस्तरम् ॥
आचार्य्यः प्रथिवेद्भ्रात्रमशुचन्द्रं विचक्षणः ।
चतुरत्निमात्रो यूपः स्यात् खादिरश्चविनिर्म्मितः ॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥
हेमालङ्करणः कार्य्यः पञ्चविंशतिरत्निजः ॥
कुण्डलानि च हेमानि केयूरकटकानि च ।
तथाङ्गुलीयविज्ञानि वासांसि विविधानि च ॥
दद्युः समानि सर्व्वेषामाचार्य्ये द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् क्षतम् ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यकुक्कुभौ ।
तथा कुलीरमण्डूका वायसः गृध्रमारकः ॥
एवमाषाद्य ततः सर्व्वं सर्व्वपापं विशाम्यते ! ।
शुक्लमाश्वास्यरघरः शुक्लगन्धानुलेपनः ॥
सर्व्वौषधिकषायाक्तः पाठितो वेदपुङ्गवैः ।
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्चितम् ।
वोड़शारं ततश्चक्रं पद्मरागसुशोभनम् ॥
वेद्यासुपरि ततः क्षिप्त्वा यद्यात् यद्यपतीक्षया ।
संन्यसेच्चाहतः सर्व्वान् प्रतिदिक्षु विचक्षणः ॥
ततः पात्रं स्थापयेन्मध्ये वास्तुं मन्त्रमाश्रितम् ।
ब्रह्माणञ्च शिवं विष्णुं तत्त्वेन स्थापयेद्बुधः ॥
विनायकञ्च विन्यस्य कमलामन्त्रिकां ततः ।
शान्त्यर्थं सर्व्वलोकानां भूतग्रामस्य शोभनः ।
पुण्यभक्ष्यफलैर्युक्तमेवं ज्ञात्वाधिवासनम् ।
कुम्भांश्च रत्नगर्भांश्च वासोभिः परिवेष्टयेत् ॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् ॥
वह्नौ पूर्व्वत: स्थाप्यौ दक्षिणे च यमुर्विदौ ।
पश्चिमे सामगौ स्थाप्यावुत्तरेऽथर्व्वगौ ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम् ॥
उत्तरन्यस्तमन्त्रपाठेन तिष्ठध्वं मन्त्रजापकाः ।
एवमादिश्य तान् सर्व्वान् पर्य्युपास्यं च
मन्त्रवित् ॥
जुहुयादाहुतीर्मन्त्रैराज्यञ्च समिधस्तथा ।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वतः ॥
वैराजं पौरुषं सूक्तं प्रौढ़ं चन्द्रं सुसंहितम् ।
शैवञ्च पञ्चनिधनं गायन्ति ज्येष्ठसामगाः ॥
वामदेव्यं बृहत्साम रौरवं सरथन्तरम् ।
गवां व्रतं विकर्णञ्च रथोन्नं नरथन्तथा ॥
गायन्ति सामगा राजन् ! पश्चिमद्वारमाश्रिताः ।
अथर्व्वगाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ॥
जपन्ते मनसा देवमाश्रिता वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो मन्त्रैरेवं ज्ञात्वाधिवासनम् ॥
गजाश्वरथावल्मीकसंग्रामरवगोकुलात् ।
मृदमादाय दद्याच्च प्रथिवेच्च यथा तथा ॥
रोचनाञ्च सर्षिद्वार्थान् गन्धान् गुग्गुलमेव च ।
क्षपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम् ॥
वृद्धिं कर्त्तुमैहामन्त्रैरेवं ज्ञात्वा विधानतः ।
एवं रक्षति राज्यार्थान् विधियुक्तेन कर्म्मणा ॥*॥
ततः प्रभाते विमले संजाते तु गवां शतम् ।
ब्राह्मणेभ्यः प्रदातव्यं होमान्ते वाथवा पुनः ॥
पञ्चाशद्ब्राह्मणान् षट्त्रिंशत् पञ्चविंशतिरेव च ।
ततः संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने ॥
वेदशब्देश्च गान्धर्व्वैर्वाद्यैश्च विविधैः पुनः ।
कनकालङ्कृतां ज्ञात्वा जले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ।
धृतांश्चतुर्भिर्व्विप्रैश्च वेदवेदाङ्गपारगैः ॥
महानदीजलोपेतान् दध्यक्षतविभूषितान् ।
उत्तराभिमुखो गुरुो जलमध्ये प्रकालयेत् ॥
आथर्व्वणेन सुस्नातः पुरुषसूक्तेन चैव च ।
आपो हि ष्ठेति मन्त्रैश्च त्रिपेदागत्य मण्डपम् ॥

पूजयित्वा सुरांस्तत्र बलिं दद्यात् समन्त्रितः।
पुनर्हवींषि होतव्यं चत्वारि राजसत्तम!॥
चतुर्थीकर्म्मणे कार्य्यं देयं तत्रापि शक्तितः।
स्नात्वा तु यज्ञपात्राणि यज्ञोपकरणानि च॥
ऋत्विग्भ्यस्तु समं दद्यात् भक्ष्यं विप्रांश्च पूजयेत्।
होमशाम्नाय ब्रह्माणं आचार्य्यांश्च निवेदयेत्॥
ततः सहस्रं विप्राणामथवाऽशक्तितो तथा।
भोजयेच्च यथान्यायं पश्चाद्दद्याच्च दक्षिणाः॥
एवमेव पुरा प्रोक्तं तड़ागविधिरुच्यते।
भूमयश्चोद्धरेत् तत्र तथा पुण्यद्रव्याणि च॥
इष्टं इष्टं विधिर्दृष्टः प्रतिष्ठाङ्गं तथैव च।
मन्त्रतस्तु विशेषः स्यात् प्रासादोद्यानभूमिषु॥
अथवा ऋत्विगाचार्य्यैर्विधिदृष्टेन कर्म्मणा।
अल्पेनैवाधिकं कार्य्यं वित्तघ्नाढ्याढते नृणाम्॥"
तड़ागे कालविशेषे जलस्थितेः फलं यथा,—
"प्रावृट्काले स्थितं तोयमग्निरोगसमं स्मृतम्।
शरत्काले स्थितं तोयं बहुपित्तबलप्रदम्॥
वाजपेयबलसमं हैमन्तशिशिरस्थितम्।
अश्वमेधसमं ग्रीष्मवसन्तसमयस्थितम्॥
योगेऽपि तु स्थितं तोयं राजसूयफलाधिकम्॥"
तड़ागकरणे फलं यथा,—
"एतान्महाराज! विशेषधर्म्मान्
करोति योऽर्थोन्नयते सुबुद्धिः।
स याति ब्रह्मालयमेककल्पं
दिवं पुनर्याति तथैव दिव्यम्॥"
इति पाद्मे क्रियाखण्डम्॥

तड़ाघातः, पुं, (तटे आघातः। एषोदरात् टस्य डत्वम्।) जलौलस्य दक्षिणशाखाघातः। यथा,
"उच्चैःकरिकराघाते तड़ाघातं विदुर्बुधाः॥"
इति कुमारसम्भवटीका॥

तड़ित्, स्त्री, (ताड़यत्यभ्रमिति। तड़ आघाते+"वार्त्तिबिलुक्च॥" उणां। १।१००। इति इतिप्रत्ययः बेर्लुक्च।) विद्युत्। इत्यमरः।१।३। ६॥ (यथा, रघुः। ६।५४।
"अथ नभस इव त्रिदशायुधं
कनकपिङ्गतड़िद्गुणसंयुतम्।
धनुरधिज्यमनाधिरुपाददे
नरपतिः परिपोषितकेसरी॥")

तड़ित्वान्, [त्] पुं, (तड़ित् विद्युदस्यास्तीति। तड़ित्+मतुप्। मस्य वः।) मेघः। सुक्तकम्। इत्यमरः। १।३। ७,२।४। १५६॥ (विद्युद्विशिष्टे, त्रि। यथा,—
"सस्तुदितनिचयेन तड़ित्वतीं
जयवता शरदमुदसंहतिम्॥"
इति किरातार्जुनीये। ५।४॥)

तक्कः पुं, (तक्कते हृत्यतीति। तक्क+खुल्।) खञ्जनपक्षी। पेगः। समाखप्रायवाक्। एहदारु। तरस्कन्धः। मायाबहुलके, त्रि। इति मेदिनी। के, ६८॥

तक्कः, पुं क्ली, (तक्क+खुल्।) परिच्छदः। इति शिल्पादिसंग्रहे अमरः॥

तक्कः, पुं, शिवद्वारपालविशेषः। इति हलायुधः॥

तक्कुरीकः, पुं, कोटमात्रम्। (तक्कुरे भवः। तक्कुल+ढक्। लस्य रः।) तक्कुलोदकम्। वर्म्मरे, त्रि। इति मेदिनी। के, ६५॥

तक्कुलः, पुं, (तक्कते आहन्यते इति। तक्क आघाते+"वासक्लिवर्क्षतीति।" उणां ४।१०७। इति उलच्। यद्वा, "इन्मुटितनितड़िभ्य उलन् तक्कश्च।" उणां ५।६८। इतिउलन् तक्कादेशश्च।) विड़ङ्गम्। इति मेदिनी। के, ६६॥
("पुंसि क्लीबे वेल्लः स्यात् क्रमिघ्नो जन्तुनाशनः।
तक्कुलश्च तथा वेल्लममोघा चित्रतक्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तक्कुलीयशाकम्। इति शब्दरत्नावली॥ धान्यादिनिकरः। इति मेदिनी। के, ६६॥ चाउल इति भाषा। (यथा, पञ्चतन्त्रे। २।५५।
"वज्रसूतिः श्रेयसी पुंसां स्वपत्ये च विशेषतः।
तुषैरपि परिष्कारो न प्ररोहन्ति तक्कुलाः॥
सुदुर्जरः खादुरसो दृढ़ंश्यस्तक्कुलो नवः।
शस्यानामन्नमेवाहुः पुराणस्तण्डुलः स्मृतः॥
क्रयसंयोगसंस्कारविकारान् समवेक्ष्य तु।
यदाकारमभिप्राप्य भोक्तृणां छन्दतोऽपि वा॥
अनेकवर्णयोनित्वात्तण्डुलान् विनिर्दिशेत्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)
भक्ततक्कुलगुणाः। सुगन्धित्वम्। कफनाशित्वम्। रूक्षत्वम्। पित्तकारित्वञ्च। इति राजवल्लभः॥

तक्कुलपरीक्षा, स्त्री, (तक्कुलेन परीक्षा।) नवविधदिव्यान्तर्गतदिव्यविशेषः। चालपड़ा इति भाषा। तद्विधानं यथाह पितामहः।
"शौर्य्ये तु तक्कुला देया नान्यत्रेति विनिश्चयः।
तक्कुलान् कारयेच्छुद्धांश्चाक्षेत्रान्यस्य कस्य चित्॥
अरण्ये भाजने स्नात्वा आदित्यस्याग्रतः शुचिः।
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत्॥
प्राक्सुखोपोषितं स्नातं शिरोरोपितपञ्चकम्।
तक्कुलान् भक्षयित्वा तु पञ्च निष्ठीवयेत्त्रिधा॥
भूर्ज्जस्येव तु गात्रस्य अभावे पिण्यलस्य तु।
शोणितं दृश्यते यस्य हनुस्थाभ्यां च शीर्य्यते॥
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत्॥"
स्नानोदकेन देवतास्नानोदकेन। तथा च कात्यायनः।
"देवतास्नानपानीयक्षिप्ततक्कुलभक्षणे।
शुद्धनिष्ठीवनात् शुद्धो नियम्योऽशुचिरन्यथा॥"
शिरोरोपितपञ्चकं तक्कुलान् भक्षयित्वा निष्ठीवयेत् प्राड्विवाकः इति। निष्ठीवयेदिति ण्यन्तात् सिद्धम्। तुलानिरूपितं सर्व्वदिव्यसाधारणञ्च धर्म्मशास्त्रादिदहनानां पूर्व्ववदिहापि कर्त्तव्यम्॥
शिरोरोपितपञ्चकेक्षणमन्त्रादि यथा,—
तत्रार्थमभियुक्तस्य लेखयित्वा तु पत्रके।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम्॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मो हि जानाति नरस्य वृत्तम्॥
इति दिव्यतत्त्वम्॥

तक्कुला, स्त्री, (तक्कते आहन्यते इति। तक्क+उलच् ततष्टाप्।) महाशमठा। विड़ङ्गम्। इति राजनिर्घण्टः॥

तक्कुलाम्बु, क्ली, (तक्कुलस्य अम्बु।) तक्कुलोदकम्। वेलुनि इति भाषा। तत्पर्य्यायः। क्लेदालु २। इति वैद्यकपरिभाषा॥ तक्कुलीत्यम् ३। इति राजनिर्घण्टः॥ यथा, वैद्यकचक्रपाणिसंग्रहे अहरण्यधिकारे।
"पिबेत् यमानं तत्पूर्व्वं यवौद्गं तक्कुलाम्बुना॥"

तक्कुली, स्त्री, (तक्कुल+ङीष्।) यवतिक्ता लता। ग्रन्थाकुलीकर्कटी। तक्कुलीयशाकः। इति राजनिर्घण्टः॥ (विस्तरस्तास्तक्कुलीशब्दे ज्ञातव्यः॥)

तक्कुलीकः, पुं, (तक्कुलीव कायतीति। के+कः।) तक्कुलीयशाकः। इति शब्दरत्नावली॥

तक्कुलीयः, पुं, (तक्कुलाय हितः। तक्कुल+"विभाषा हविरपूपादिभ्यः।" ५।१।४। इति छः।) पत्रशाकविशेषः। क्षुद्रियानटिया इति चाँपानटिया इति च वङ्गभाषा। चवराइ इति अल्पमरुवा इति च हिन्दी भाषा। तत्पर्य्यायः। अल्पमारिषः २। इत्यमरः।२।४। १३६॥ तक्कुलीकः ३ तक्कुलः ४। इति शब्दरत्नावली॥ भक्कीरः ५ तक्कली ६ तक्कुलीयकः ७ ग्रन्थिलः ८ बहुवीर्य्यः ९ मेघनादः १० घनस्वनः ११ सुशाकः १२ पथ्यशाकः १३ स्फूर्जथुः १४ खनिताक्षयः १५ वीरः १६ तक्कुलनामा १७। अस्य गुणाः। ग्रिग्धिरत्वम्। मधुरत्वम्। विषपित्तदाहभ्रमनाशित्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। तद्गुणाः। हिमत्वम्। अर्शःपित्तरक्तविषकासविनाशित्वम्। शीतत्वम्। मधुरत्वम्। विपाके दाहग्लोपशमनत्वम्। रुचिदाल्यत्वञ्च। इति राजनिर्घण्टः॥ विड़ङ्गम्। ताप्यम्। इति मेदिनी। ये, ११६॥
अस्य पर्य्यायगुणाः।
"तक्कुलीयो मेघनादः शाकेरस्तक्कुलेरकः।
भक्कीरस्तक्कुलीबीजो विषघ्नश्चाग्निमारिषः॥
तक्कुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित्।
हृद्यस्त्वमलो रुच्यो दीपनो विषहारकः॥
तद्भेदः। जलतक्कुलीयं शाके कच्चटमिति प्रसिद्धम्।
"पानीयतक्कुलीयन्तु कच्चटं सप्तदाहृतम्।
कच्चटं तिक्तकं रक्तपित्तानिलहरं लघु॥"
इति भावप्रकाशः॥

तक्कुलीयकः, पुं, (तक्कुलीय+स्वार्थे कन्।) तक्कुलीयशाकः। (यथा, हारीते १ स्थाने १० अः।
"स्वादुः पाके लवक्पित्तविषघ्नस्तक्कुलीयकः।
हन्ति वातं विड्विबन्धं मूत्रवासकफे हितः॥")
विड़ङ्गम्। इति राजनिर्घण्टः॥

तक्कुलीयिका, स्त्री, (तक्कुलीय+स्वार्थे कन् स्त्रियां टाप्। कापि अत इत्वञ्च।) विड़ङ्गम्। इति राजनिर्घण्टः॥

तण्डुलः, स्त्री, (तक्कुल+एषोदरात् उले साधुः।) विड़ङ्गम्। इति शब्दरत्नावली॥

तण्डुलेरः, पुं, (तण्डुल+वाहुलकात् स्वार्थे ढ्रः।) तण्डुलीयशाकः। इति हेमचन्द्रः। ४। २५०॥

तण्डुलोत्थं, क्ली, (तण्डुलात् तण्डुलप्रक्षालनात् उत्तिष्ठतीति। उत्+स्था+कः।) तण्डुलाम्बु। इति राजनिर्घण्टः॥

तण्डुलोदकं, क्ली, (तण्डुलस्य तण्डुलक्षालनस्य उदकम्। तण्डुलक्षालितं उदकं वा।) तण्डुलाम्बु। यथा, वैद्यकपरिभाषायाम्।

"जलमरुगुर्वं दत्वा पर्वं कथिततण्डुलात्।
भावयित्वा ततो देयं तण्डुलोदकमम्बिके॥"

(अस्य गुणा यथा,—

"सद्यानं शीतलं वल्यं मद्यातिसारनाशनम्।
सुखादु शीतलञ्चैव दंदह्यं तण्डुलोदकम्॥"

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥)

तण्डुलोयः, पुं, (तण्डुलानामोघ इव यत्र।) वेरवंशः। इति शब्दचन्द्रिका॥ वेउड़वाँश इति भाषा। तण्डुलवंशश्च॥

तत्, व, हेतुः। इत्यमरः। ३। ४। ३॥ (यथा, रघुः। ३। ४६।

"तदङ्गमर्त्यं मघवन्! महाक्रतो-
रसुं तुरङ्गं प्रतिमोक्तुमर्हसि॥")

तत्, [द्] त्रि, बुद्धिस्थपरामर्शः। वेद इति भाषा। सर्वनामशब्दोऽयम्। इति वाकरणम्॥ (यथा, किरातार्जुनीये। २। २।

"अपि वागधिपस्य दुर्वचं
वचनन्तद्विदधीत विस्मयम्॥")

तत्, क्ली, ब्रह्मणो नामविशेषः। यथा,—

"ओँ तत् सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥
तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥"

इति श्रीभगवद्गीतायाम्। १७। २३-२५॥

ततं, क्ली, (तनोति मनोऽनेनेति। तन+"तनि-पत्दन्भ्यां किच्च।" उणा। ७।८८। इति तन्।) वीणादिवाद्यम्। इत्यमरः। १। ७। ४॥

ततः, त्रि, (तन्यते स्म इति। तन्+क्तः।) विस्तृतः। (यथा, महाभारते। ४। ५। १।

"ये वीरा बद्धनिस्त्रिंशास्ततायुधकलापिनः॥")

व्याप्तः। (यथा, भगवद्गीतायाम्। ८। २२।

"यस्यान्तःस्थानि भूतानि येन सर्व्वमिदं ततम्॥")

वायौ, पुं। इति मेदिनी। ते, २०॥

ततः, [स्] अ, (तद्+"पञ्चम्यास्तसिल्।" ५। ३। ७। इति तसिल्। यद्वा, सर्व्वविभक्तिषु तसिल्।) हेतुः। इत्यमरः। ३। ४। ३॥ (यथा, महाभारते। १२। ३४८। ७६।

"दोषाः सत्त्वेन रजसा तमो वैकारिकाः स्मृताः॥")

आदिः। परिग्रहः। पक्षार्थः। (यथा, मनुः। १२। ८५।

"सर्व्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।
तद्ह्यग्र्यं सर्व्वविद्यानां प्राप्यते ह्यमृतं ततः॥"

सम्बन्धार्थः। यथा, मनुः। ४। १५।

"न विद्यमानेष्वर्थेषु नार्त्तोऽपि यतस्ततः॥"

तृतीयार्थः। यथा, नारदपञ्चरात्रे। २। ६।

"आराधितो यदि हरिस्तपसा ततः किं
नाराधितो यदि हरिस्तपसा ततः किम्॥")

कथान्तरम्। आनन्तर्य्यम्। इति विश्वः॥ (यथा, महाभारते। ४। ५। २।

"ततस्ते दधिरं तीरमन्वगच्छन् पदातयः॥")

ततपत्री, स्त्री, (ततं विस्तृतं पत्रमस्याः।) कदली-वृक्षः। इति शब्दचन्द्रिका॥

ततमः, त्रि, (तेषां मध्ये निर्द्धारितो योऽसौ। तद्+"वा बहूनां जातिपरिप्रश्ने डतमच्।) ५। ३। ९२। इति डतमच्।) बहुत्व मध्ये सः। अनेकेर मध्ये सेइ इति भाषा। (यथा, ऐतरेयोपनिषदि। ३। १२। १३।

"स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति॥")

ततरः, त्रि, (तयोर्मध्ये निर्द्धारितो योऽसौ। तद्+"किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्।" ५। ३। ९२। इति डतरच्।) द्वयोर्मध्ये सः। दुयेर मध्ये सेइ इति भाषा॥

ततस्यं, त्रि, (ततस्तत्र भवसिति। ततस्+"अव्ययात् त्यप्।" ४। २। १०४। इत्यस्य "अमेह-तवत्तिलेभ्य एव।" इति वार्त्तिकोक्तेः त्यप् प्रत्ययः।) तत्रभवम्। ततस्यत्वमि। इति वाकरणम्। तार इति भाषा॥

ततिः, स्त्री, (तन्+भावे क्तिन्।) श्रेणी। इति हेमचन्द्रः। ३। ५६॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे। १५।

"अस्माकं विषयाद्दोष्यखिलसुनिजनप्रार्थ-नीयानि सेयं
दद्यादाद्यानवद्या ततिरतिदचिरामङ्गलान्यङ्गु-लीनाम्॥")

तति, त्रि, (तत् परिमाण्यमेषामिति। तद्+डति।) तत्परिमाणम्। ततगुणि इति भाषा। बहु-वचनान्तोऽयम्। इति वाकरणम्॥

ततुकालः, पुं, (स चासौ कालश्चेति।) वर्त्तमान-कालः। ततुपर्य्यायः। तदात्वम्। १। इत्यमरः। २।८।२६॥ (यथा, कथासरित्सागरे। २। ८३।

"वर्त्तस्व वेश्म वसुभिः स किमादरेण
ततुकालमेव समपूरयदुन्नतश्रीः॥")

ततुकालधीः, त्रि, (तस्मिन् काले कार्य्यकाले धीरुपस्थिता बुद्धिर्यस्य।) प्रत्युत्पन्नमतिः। उपस्थितबुद्धिः। इति हेमचन्द्रः। ३। ८॥

ततुक्रियः, त्रि, (सा क्रिया निसर्गतो वेतनलते यस्येति।) कर्म्मकारः। वेतनं विना भारवहादि-कर्त्ता। इत्यमरः॥

ततुत्वः, पुं, (स चासौ त्वगिति स एव त्वगो वा।) सत्वः। इत्यमरः। ३। ४। ६॥ (यथा, रघुः। १। १४।

"दिग्भ्यः प्रसेदुर्मरुतो ववुः सुखाः
प्रदक्षिणार्चिर्हविरग्निराददे।

II.

तत्त्वन्यासः, पुं, (तत्त्वानां न्यासः ।) विष्णुपूजाविषयकन्यासविशेषः । यथा,—
"मादिकान्तानथार्णांश्च जीवादीकैकगो वदेत् ।
नमः परायेत्युच्चार्य्य ततस्तत्त्वात्मने नमः ॥
जीवं प्राणं हृदयं प्रोक्ता सर्व्वाङ्गेषु विन्यसेत् ।
ततो हृदयमध्ये च तत्त्वत्रयञ्च विन्यसेत् ॥
इत्यभ्युतीरितततुर्व्विदधीत तत्त्व-
न्यासं समूर्ब्बकपराक्षरनल्युपेतम् ।
भूयः पराय च तदाक्षयमात्मने च
नत्यन्तसुन्दरतु तत्त्वमनुक्रमेण ॥
सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।
कसुखहृदयगुह्याङ्घ्रिष्वथोग्रब्दपूर्ब्बं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्ब्बम् ॥
वागादीन्द्रियवर्गमात्मनिलये त्वाकाशपूर्ब्बं गणं
मूर्द्धास्ये हृदये शिरे चरणयोर्हृत्पुण्डरीकं हृदि ॥
भूं बीजं हृत्पुण्डरीकतत्त्वं हृदि विन्यसेत् ।
हूं बीजं सूर्य्यमण्डलतत्त्वं हृदि विन्यसेत् ॥
सं बीजं चन्द्रमण्डलतत्त्वं तत्रैव विन्यसेत् ।
रं बीजं वह्निमण्डलतत्त्वं तत्रैव विन्यसेत् ॥
यं बीजं परमेष्ठितत्त्वं वासुदेवञ्च मूर्द्धनि ।
यं बीजमथ पुंस्तत्त्वं सङ्कर्षणमथो मुखे ॥
लं बीजं विश्वतत्त्वञ्च प्रद्युम्नञ्च हृदि न्यसेत् ।
वं बीजं तैजसतत्त्वञ्च अनिरुद्धमुरस्थके ॥
लं बीजं सर्व्वतत्त्वञ्च पादे नारायणं न्यसेत् ।
क्षौं बीजं लोपतत्त्वञ्च नृसिंहं सर्व्वगात्रके ॥
एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेत् ॥"
अस्य फलं यथा,—
"तत्त्वन्यासं ततः कुर्य्यात् साधकः सिद्धिहेतवे ।
ज्ञातेन येन देवस्य रूपतामेव याप्यसौ ॥"
इति गौतमीयतन्त्रम् ॥

ततूपरः, त्रि, (यः परोऽस्य । यद्वा, तदेव परं सर्व्वोत्तममस्य ।) आसक्तः । इत्यमरः । ३ । १ । ६ ॥ (यथा, भागवते । ४ । १५ । ६ ।
"एष साध्वाहरेरंशो जातो लोकरिरक्षया ।
दृष्यञ्च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥")

ततूपरायणः, त्रि, (तदेव परमयनमस्य ।) तदासक्तः । यथा,—
"मुह्यन्ति यद्यन्येऽन्यजाः ज्ञानपरायणाः ॥"
इति पद्मोत्तरखण्डम् ॥

ततूफलः, पुं, (तदेव फलमस्य । यद्वा, तनोति तन्यते वा । तन + क्विप् तुक् च । ततू विस्तृतं फलमस्य ।) कुवलयम् । कुष्ठनामौषधिः । चौरनामसुगन्धिद्रव्यम् । इति धरणिः ॥

तत्र, इ कुटुम्बधारणे । इति प्राचः । (भ्वां-परं-अकं-सेट् ।) द्वावेतौ धारणेऽर्थे वर्त्तेते । इति चान्द्राः । केचित्तु कुटुम्बधातुममन्यमानास्तत्रिधातुः कुटुम्बस्य धारणेऽर्थे वर्त्तते इत्याहुः । तत्र धारणे इत्यनेनैवेऽसिद्धे इदनुबन्धो वेदेभूचारणभेदार्थः । इति दुर्गादासः ॥

तत्र } इ साद्दे । मोहे । (भ्वां-परं-अकं-सेट् ।)
तद्र } दन्त्यवर्गाद्योपधः । तन्त्रीः । दन्त्यवर्गाद्यतीयोपधः । इति केचित् । तन्त्रीः । सौत्रधातुरयम् । इति दुर्गादासः ॥

तत्र, इ क ड धारणे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) आदिमध्योक्तारः ऐयो रेफयुक्तः । धारणं धरणम् । भाषायामस्य विस्तारणे प्रायः प्रयोगः । इ क ड, तन्त्रयते तन्त्रम् तन्त्रवायः । इति दुर्गादासः ॥

तत्र, अ, (तस्मिन्निति । तद् + "सप्तम्याश्चल् ।" ५ । ३ । १० । इति चल् ।) तस्मिन् । तयोः । तेषु । इति आकरग्रन्थम् ॥ सेखाने इति भाषा । (यथा, मनुः । २ । ११२ ।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

तत्रत्यः, त्रि, तत्र भवः । (तद् + "अव्ययात्त्यप् ।" ४ । २ । १०४ । इत्यस्य "अमेड्कतसिलेभ्य एव ।" इति वार्त्तिकोक्त्या त्यप् ।) तस्मिन्नुत्पन्नः । इति सुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ५ । ६६ ।
"प्राप्तस्त्वेव च तत्रत्यो जनोऽरोदीत् पुरो मम ॥")

तत्रभवान्, [त्] त्रि, (इतराभ्योऽपि दृश्यन्ते इति प्राग्दीव्यतीयः प्रथमार्थे चल् । ततः सुप्सुपेति समासः ।) श्राद्धः । इति जटाधरः ॥

तथा, अ, (तेन प्रकारेण । तद् + "प्रकारवचने थाल् ।" ५ । ३ । २३ । इति थाल् । तेन प्रकारेणेत्यर्थः । यथा, मनुः । १ । ४ ।
"स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान् सर्व्वान् महर्षीन् श्रूयतामिति ॥")
सत्यम् । इत्यमरः । ३ । ४ । ६ ॥ (यथा, मनुः । ६ । ६० ।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥")
अभ्युपगमः । पृष्टप्रतिवाक्यम् । वसुचयः । (यथा, देवीभागवते । १ । २ । २६ ।
"सप्तादलञ्च तथा भारतं मुनिना श्रुतम् ।
इतिहास इति प्रोक्तं पञ्चमं वेदसम्मतम् ॥")
निश्चयः । इति मेदिनी । थे, ३६ ॥ (यथा, रघुः । १ । २६ ।
"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")

तथागतः, पुं, (यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गतः । यद्वा, तथा सत्यं गतं ज्ञानं यस्य । सुप्सुपेति समासः ।) बुद्धः । इत्यमरः । १ । १ । १३ ॥ (यथा, सर्व्वदर्शनसंग्रहे ।
"यथा गतास्ते सुनयः शिवां गतिं
तथा गतिं सोऽपि गतस्तथागतः ॥"* ॥
तथा तेन प्रकारेणागतः ।) पूर्व्वोक्तप्रकारेणागते, त्रि ॥ (यथा, महाभारते । ३ । ७७ । ५ ।
"ततो बभूव नगरे सुमहान् हर्षजः स्वनः ।
जगस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतम् ॥")

तथाच, अ, (तथा च, च च इति द्वन्द्वसमासः ।) पूर्व्वोक्तार्थदृढ़ीकरणम् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, मनुः । १ । १६ ।
"तथाच श्रुतयो वक्त्रो निगीता निगमेष्वपि ॥"
अव्ययद्वयेनैव सिद्धेः केचिदयं शब्दो न मन्यते ॥)

तथैव, अ, (तथा च एव च ।) तद्वदेव । सेइ प्रकार इति भाषा । यथा, चाणक्ये । ४२ ।
"अस्ति पुत्रो वशे यस्य भार्य्या भर्त्तुस्तथैव च ॥"
अव्ययद्वयेनैव सिद्धेः केचिच्छब्दोऽयं न मन्यते ॥)

तथ्यं, क्ली, (तथा साधु । तथा + "तत्र साधुः ।" ४ । ४ । ६८ । इति यत् ।) सत्यम् । (यथा, मनुः । ८ । २७४ ।
"कार्य्यं वाप्यथवा खल्पमल्पं वापि तथाविधम् ।
तत्थेनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥")
तद्धिते त्रि । इत्यमरः । १ । ६ । २२ ॥ (यथा, महाभारते । ७ । १५७ । ३ ।
"यदर्জ্জुनगुणांस्त्वत्तो वीर्य्यवानं नराधम ! ।
शूरदेवात् सुदुर्बुद्धे ! त्वं भर्तृ सयसि मातुलम् ॥")

तदा, अ, (तस्मिन् काले । "तदो दा च ।" ५ । ३ । १६ । इति दा ।) तस्मिन् काले । इत्यमरः । ३ । ४ । २२ ॥ सेइ समये इति भाषा ॥ (यथा, मनुः । १ । ५५ ।
"न च स्वं कुरुते कर्म्म तदोद्क्रामति मूर्त्तितः ॥")

तदात्वं, क्ली, (तदा इत्यस्य भावः । तदा + "तस्य भावस्त्वतलौ ।" ५ । १ । ११६ । इति त्व ।) तत्कालः । वर्त्तमानकालः । इत्यमरः । २ । ८ । २६ ॥ (यथा, महाभारते । २ । ५६ । १४ ।
"स चोपभोगजोभान्यो हिरण्यार्थे परन्तप ! ।
आयतिञ्च तदात्वञ्च उभे सद्यो धनाश्रयत् ॥")

तदानीं, [म्] अ, (तस्मिन् काले । "तदो दा च ।" । ५ । ३ । १६ । इति चकारात् दानीम् ।) तस्मिन् काले । इत्यमरः । ३ । ४ । २२ ॥ (यथा, ऋग्वेदे । १० । १२६ । १ ।
"नासदासीन्नोसदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत् ॥")

तदासुखं, क्ली, (तदा तस्मिनेव काले सुखं यस्य ।) आरम्भः । इति भूरिप्रयोगः ॥

तद्दिनं, [म्] अ, (तत् प्रखरकिरणत्वेन प्रसिद्धं दिनं दिनांशुः ।) दिनमध्यम् । (तस्मिन्देव दिनम् ।) प्रतिदिनम् । इति हेमचन्द्रः ॥ (तस्मिन्देव दिनम् ।) पूर्व्वोक्तदिने, क्ली ॥

तद्धनः, पुं, (तस्मिन्देव अव्ययेनाहीनं धनं यस्य ।) कृपणः । इति हेमचन्द्रः । २ । ३२ ॥ (तस्मिन्देव धनमिति विग्रहे पूर्व्वोक्तधने, क्ली ॥)

तद्वलः, पुं, (तस्मिन् तस्मिन्नेव बलं यस्य ।) वायुविशेषः । इति हेमचन्द्रः । ३ । ४४४ ॥

तन, उ कि उपक्षतौ । श्रद्धाघाते । शब्दोपतापयोः । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-अकं-सकं च-सेट् । उदित्त्वात् क्त्वेट् ।) उ, तनित्वा तत्वा । कि, तानयति तनति । उपक्षतिरपकारः । अश्रद्धाती हिंसावर्জ্জनम् । सुनीतिरिति गोविन्दभट्टः । उपसर्गादिर्घकं । दैर्घकं दीर्घीकरणम् । वितानयति यः कीर्त्तिं वितनत्यमरः यशः । इति हलायुधः । इति दुर्गादासः ॥

तन, द ज उ विस्तृतौ। इति कविकल्पद्रुमः॥ (तनां-उभं-सकं-सेट्। उदित्वात् क्त्वेट्।) द ज, तनोति तनुते पुत्रं ऋषिः। उ, तनित्वा तत्वा। इति दुर्गादासः॥

तनयः, पुं. (तनोति विस्तारयति कुलमिति। तनु+"वलिमलितनिभ्यः कयन्।" उणा। ४। ६६। इति कयन्।) पुत्रः। इत्यमरः। २। ६। २७॥ (यथा, मनुः। ३। १६।

"भूतावेदी पतत्यत्रेरुतथ्यतनयस्य च॥")

तनया, स्त्री, (तनोति कुलमिति। तन+कयन्+टाप्।) कन्या। इत्यमरः। २। ६। २७॥ (यथा, भागवते। १। १६। २।

"य उत्तरस्य तनयामुपयेमे इरावतीम्॥")

चक्रकुल्यालता। इति शब्दचन्द्रिका॥

तनिष्ठः, त्रि, अयमनयोरतिशयेन तनुः। (तनु+इष्ठन्।) क्षुद्रः। इति व्याकरणम्॥

तनीयान् [स्] त्रि, अयमेषामतिशयेन तनुः। (तनु+ईयसुन्।) अल्पः। इति व्याकरणम्॥

तनुः, स्त्री, (तनोति तन्यते इति वा। तन+"भृञ्शीतृचरीति।" उणा। १। ७। इति उः।) शरीरम्। (यथा, विष्णुपुराणे। १। १७। ५।

"देवाः स्वर्गं परित्यज्य तत्रासात् सुनिसत्तम!। विचेरुरवनौ सर्व्वे विभ्राणा मानुषीं तनुम्॥") त्वक्। इति मेदिनी। ने, ६॥ स्त्री। इति राजनिर्घण्टः॥

तनुः, त्रि, (तन+"भृञ्शीति।" उणा। १। ७। इत्नुः।) अल्पः। विरलः। (यथा, मनुः। ३। १०।

"तनुरोमकेशदशनां मृदङ्गीमुद्वहेत् स्त्रियम्॥") क्षुद्रः। इति मेदिनी। ने, ६॥ (यथा, आर्य्यासप्तशत्याम्। ५२५। [गात्रि!]॥")

"वितरन्ती रसमन्तर्मनाङ्नैर्भार्यं तनोषि तनुः

तनुः, [स्] स्त्री, (तनोति तन्यते वा। तन+"अर्त्तिपूपवियजितनिधनितपिभ्यो नित्।" उणा। २। ११८। इति उसिः स च नित्।) शरीरम्। इत्युणादिकोषः॥

तनुचौरः, पुं, (तनौ चौरं बहुलनिर्य्यासो यस्य।) आम्रातकः। इति राजनिर्घण्टः॥

तनुच्छायः, पुं, (तनुर्विरला स्वल्पा छाया यस्य।) आम्रवर्ब्बूरकवृक्षः। इति राजनिर्घण्टः॥ (तनोश्छाया।) शरीरच्छायायां क्ली स्त्री च॥

तनुजः, पुं, (तनोः शरीरात् जायते इति। जन+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) पुत्रः। इति हलायुधः॥ (यथा, पञ्चतन्त्रे। ५। २३।

"स्वामी देहि सुसेवितोऽपि बहुशा
प्रोज्झन्ति सद्भाववा
द्योतन्ते न गुणाद्यजन्ति तनुजाः
स्वीकारीभवन्त्यपरः।
भार्य्या नो तमवैति नापि भजते
नो यान्ति मित्राणि च
न्यायारोपितविक्रमानपि नरान् येषां
न हि स्याद्धनम्॥")

तनुजा, स्त्री, (तनोः शरीरात् जायते इति। जन+डः+टाप्।) कन्या। इति शब्दरत्नावली॥

तनुजं, क्ली, (तनुं त्रायते इति। त्रै+"आतोऽनुपसर्गे कः।" ३। २। ३। कः।) वर्म्म। इत्यमरः। २। ८। ६४॥

तनुत्राणं, क्ली, (त्रायतेऽनेनेति। त्रै+करणे ल्युट्। तनोः शरीरस्य त्राणम्।) तनुत्रम्। इति हलायुधः॥ (यथा, महाभारते। ३। १७४। ४।

"इदञ्च मे तनुत्राणं प्रायच्छन्मघवान् प्रभुः॥") शरीररक्षणञ्च॥

तनुत्वचा, स्त्री, (तनुः तन्वी त्वक् वल्कलमस्याः।) क्षुद्राम्बिमत्स्यः। इति राजनिर्घण्टः॥

तनुपत्रः, पुं, (तनूनि पत्राणि यस्य।) इक्षुदीर्घः। इति राजनिर्घण्टः॥

तनुभस्त्रा, स्त्री, (तनोः शरीरस्य भस्त्रा इव। निश्वासवायुनिर्गमात्तथात्वम्।) नासिका। इति शब्दरत्नावली॥

तनुरसः, पुं, (तनोर्देहस्य रस इव तनोर्निर्गतो रस इति वा।) घर्म्मः। इति हारावली॥१५४॥

तनुरुट्, [ह्] क्ली, (तनौ शरीरे रोहतीति। रुह+क्विप्।) तनूरुहम्। इति शब्दरत्नावली॥

तनुरुहं, क्ली, (तनौ रोहति उत्पद्यते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तनूरुहम्। इति शब्दरत्नावली॥

तनुलः, त्रि, (तन्यते स्म इति। तन+उलच्।) विस्तृतः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तनुवातः, पुं, (तनुः क्षीणो वातः वायुर्यत्र।) नरकविशेषः। इति हेमचन्द्रः। ५। २॥

तनुवीजः, पुं, (तनु क्षीणं स्वल्पमात्रं वा वीजमस्य।) राजबदरः। इति राजनिर्घण्टः॥

तनुव्रणः, पुं, (तनुः क्षुद्रः स्वल्पः व्रणो यत्र।) वल्मीकरोगः। इति शब्दरत्नावली॥

तनुसञ्चारिणी, स्त्री, (तनु अल्पमात्रं यथा स्यात् तथा सञ्चरतीति। सम्+चर+णिनिः ङीप् च।) बालिका स्त्री। इति शब्दमाला॥

तनूः, स्त्री, (तनु+ऊङ्।) शरीरम्। इत्यमरः। २। ६। ७१॥

तनूकृतः, त्रि, (अतनुस्तनुरकारि। कृ+कर्म्मणि क्तः।) तनूः। अल्पीकृतः। इत्यमरः। ३। १। ६६॥

तनूजः, पुं, (तन्वाः शरीरात् जायते इति। जन+डः।) पुत्रः। इति जटाधरः॥ (यथा, रघुः। ५। ५३।

"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥"

स्त्री, कन्या॥)

तनूनपं, क्ली, (तन्वा ऊनं ह्रस्वं पातीति। पा+कः।) घृतम्। इति शब्दचन्द्रिका॥

तनूनपात्, [द्] पुं, (तनूनपं घृतं अत्तीति। अद्+विच् किञ्चिल्लोपे। यद्वा, तनूं स्वशरीरं न पातयतीति। पत+णिच्+क्विप्।"नभ्राण्नपात्।" ६। ३। ७५। इति निपातितः।) अग्निः। (यथा, ऋग्वेदे। ३। २८। ११।

"तनूनपाद्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते॥")

चित्रकवृक्षः। इत्यमरः। २। ४। ८०॥

तनूरुहं, क्ली, (तन्वां रोहतीति। रुह+कः।) रोम। (यथा, भागवते। ७। ८। २२।

"चन्द्रांशुगौरैस्फुरितं तनूरुहै-
र्विष्वग्भुजानीकशतं नखायुधम्॥"

तथाच शिवपुराणे। वायुसंहितायाम्। १। १४।

"नमश्चकार तं दृष्ट्वा हृष्टसर्व्वतनूरुहः॥")

पतत्रम्। इति मेदिनी। हे, ३०॥

तनूरुहः, पुं, (तन्वाः शरीरात् रोहति उत्पद्यते। रुह+कः।) पुत्रः। गरुत्। (यथा, हरिवंशसंहितायाम्। ६३। १।

"कुक्कुटस्तृणतनूरुहाङ्कुलि-
स्ताम्रवक्त्रनखचूलिकः सितः॥")

लोम। इति हेमचन्द्रः॥

तनूह्रदः, पुं, (तन्वाः तन्वां वा ह्रद इव।) पायुः। इति चिकित्साशास्त्रम्॥

तनूच, उ इत्नौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उ, तनित्वा तत्वा। इति दुर्गादासः॥

तनूच, उ घ सङ्कुचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-चकं-सेट्।) उ, तनित्वा तत्वा। घ, तनत्भूमि योम विस्तृतम्। इति दुर्गादासः॥

तनूज, उ घ सङ्कोचे। इति कविकल्पद्रुमः॥ (भ्वां-परं-चकं-सेट्।) उ, तञ्जित्वा तञ्जा। घ, तनज्भूमि योम विस्तृतम्। इति दुर्गादासः॥

तन्तुः, पुं, (तन्यते विस्तीर्य्यते इति तनोति वा। तन+"सितनिगमीति।" उणा। १। ७०। इति तुन्।) सूत्रम्। इत्यमरः। २। १०। २८॥ (यथा, महाभारते। १२। ४७। २२।

"यस्मिन् नित्यं तते तन्तौ इदं सर्गिव विश्वति॥")

व्याहः। इति हेमचन्द्रः॥ सन्ततिः। यथा,—

"अन्तःस्थः सर्व्वभूतानामात्मा योगेश्वरो हरिः।
स्वमायया सृजत्येभिर्भूभिर्वैराजाः कुरुतन्तवे॥"

इति श्रीभागवतम्॥

तन्तुकः, पुं, (तन्तुरिव तन्तुनेव वा कायतीति। कै+कः। तन्तु+संज्ञायां कन् वा।) तन्तुभः। सर्षपः। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते कल्पस्थाने ४ अध्याये। "पिङ्गलस्तन्तुकपुष्यप्राप्तुः षड्गोऽग्निको वभ्रुकषायः॥")

तन्तुकाष्ठं, क्ली, (तन्तुसमन्वितं काष्ठम्।) तूली। इति शब्दरत्नावली॥ ताँतेर काट इति भाषा॥

तन्तुकी, स्त्री, (तन्तुरिव कायतीति। कै+कः ङीप् च।) नाड़ी। इति राजनिर्घण्टः॥

तन्तुकीटः, पुं, (तन्तूत्पादकः कीट इति। शाकपार्थिववत् मध्यपदलोपी समासः।) कोषकारः। इति जटाधरः॥ गुटिपोका इति भाषा॥

तन्तुगः, पुं, (तंन+वाहुलकात् तुनन् निपातनात् गत्वं दन्त्यनकारान्त इत्येके।) व्याहः। इति हेमचन्द्रः॥ डाङ्गर इति भाषा॥

तनुपर्व्व, [न्] क्ली, (तनुः यज्ञोपवीतं तत्प्रदानाय यत् पर्व्व तिथिरित्यर्थः।) परमेश्वरोपवीतदानतिथिः। यथा श्रावणी पूर्णिमा। इति तिथ्यादितत्त्वम्॥

तनुनाथः, पुं, (तनुर्नाथ इव।) याज्ञः। इति हेमचन्द्रः॥

तनुनिर्व्वापः, पुं, (तनुनेव निर्व्वापः तनुवत् निर्व्वापो यस्य वा।) ताप्यः। इति शब्दरत्नावली॥

तनुभः, पुं, (तनुरिव भातीति। भा+कः।) सर्षपः। इत्यमरः। २।९।१७॥ वत्सः। इति जटाधरः॥

तनुरं, क्ली, (तनुरस्त्यस्येति। तनु+कुक्षादित्वात् रः।) रक्तलम्। इति शब्दरत्नावली॥

तनुलं, क्ली, (तनुरम्। रक्तं लातीति।) रक्तलम्। इति हेमचन्द्रः॥

तनुवायः, पुं, (तन्तून् वयतीति। वय+"कर्म्मण्यण्।" ३। २। १। इति अण्।) तन्त्रवायः। इति जटाधरः॥ ताँति इति भाषा। तन्त्रम्। इति शब्दभाषा॥ ताँतु इति भाषा॥

तनुवायः, पुं, (तन्तून् वयति विस्तारयति जालाकारेणेति। वे+"अन्यायाच्च।" ६। २। ७७। इत्यच्।) लूता। इत्यमरः। २।४।१३॥ (तन्तून् वयतीति। वे+"कर्म्मण्यण्।" ३। २। १। इत्यच्।) तन्त्रवायः। इति शब्दरत्नावली॥ (यथा, मनुः। ८। १६७।

"तनुवायो दशपलं दद्यादेकपलाधिकम्॥")

तनुविग्रहा, स्त्री, (विग्रह्यतेऽसौ। वि+ग्रह+अप्। विग्रहो देहः। तनुर्विग्रहो ऽस्याः।) कदली। इति त्रिकाण्डशेषः॥

तनुशाखा, स्त्री, (तनुवपनार्थं या शाखा गृह्यतेऽसौ।) तनुवपनगृहम्। साँतघर इति भाषा। तत्पर्य्यायः। गर्भिका २। इति हेमचन्द्रः॥

तनुसन्ततं, त्रि, (तनुना तनुभिर्वा सन्ततं व्याप्तम्।) क्षत्रविस्तृतवस्त्रादि। सिङ्गार कापड़ इति भाषा। तत्पर्य्यायः। क्षतम् २ स्यूतम् ३ उतम् ४। इत्यमरः। ३। १। १०१॥

तनुसारः, पुं, (तनुः एव सारो यत्र।) गुवाकवृक्षः। इति त्रिकाण्डशेषः॥

तन्त्रं, क्ली, (तनोति तन्यते इति वा। तन+कर्त्रादौ यथायथं ष्ट्रन्। तत्रि कुटुम्बधारणे+घञ् वा।) कुटुम्बधारणम्। (कुलप्रतिष्ठादिकस्थितिः। यथा, महाभारते। १३।४८।६।

"सर्व्वानुपायानथ सम्प्रधाय
बहुश्रुतेन खलु कुलस्य तन्त्रम्॥")

सिद्धान्तः। ओषधिः। प्रधानम्। तन्त्रवायः। परिच्छदः। श्रुतिशास्त्राविशेषः। हेतुः। उभयार्थप्रयोजकम्। इतिकर्त्तव्यता। इति मेदिनी॥ राष्ट्रम्। परच्छन्दः। करणम्। अर्थबोधकः। तनुः। सैन्यम्। खराद्यूचिन्ता। इति हेमचन्द्रः॥ (यथा, माघे। २। ८८।

"तन्त्रावापविदा योगैर्मङ्गलान्यधितिष्ठता॥")

प्रबन्धः। इति शब्दरत्नावली॥ ग्रन्थः। इति धरणिः॥ धनम्। यज्ञम्। वपनवापनम्। (यथा, महाभारते। १३।१३०। "तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्ती॥") कुलम्। इति नानार्थध्वनिमञ्जरी। (शास्त्रम्। इति विश्वः। यथा, देवीभागवते। ३।११।१६।

"अवेरश्मतन्त्रञ्च बालदैत्यासमन्वितम्॥")

व्यवहारः। नियमादिः। यथा, महाभारते। १। १०३। २६।

"मुक्ता त्वं प्रतिपद्यस्व प्राज्ञैः सह पुरोहितैः।
आपद्धर्म्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च॥")

शिवोक्तशास्त्रम्। तच्च चतुःषष्टिसंख्यकम्। यथा,—

"सिद्धेश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम्।
ज्ञानार्णवं नीलतन्त्रं पितृकारीतन्त्रमुत्तमम्॥
देवागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम्।
मतस्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा॥
वाराहीतन्त्रं देवेशि! योगिनीतन्त्रमुत्तमम्।
गन्धेश्वरविमर्षिण्यौ तन्त्रं निलातन्त्रं शिवागमम्॥
वासुकाख्यं महेशानि! सुक्ष्मालाख्यतन्त्रकम्।
हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम्॥
कुलप्रकाशकं देवि! कल्पं गान्धर्व्वकं शिवे!।
क्रियासारं विवन्नाख्यं खतन्त्रं तन्त्रमुत्तमम्॥
सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे!।
राधाख्यं मालिनीतन्त्रं वह्नियामलमुत्तमम्॥
दुष्टतन्त्रीक्रमं तन्त्रं गवाक्षं सुकुलदिनी।
विमुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम्।
योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि!॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्।
तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा॥
कुलचूड़ामणितन्त्रं भावचूड़ामणीयकम्।
तन्त्रदीपप्रकाशञ्च कामाख्यातन्त्रकं तथा॥
कामधेनु कुमारी च भूतडामरसंज्ञकम्।
मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम्॥
विश्वसारं महातन्त्रं महाकालं कुलाद्भुतम्।
कुलोड्डीशं कुलिकाख्यं यन्त्रचिन्तामणीयकम्॥
एतानि तन्त्ररत्नानि सफलानि युगे युगे।
कालीविलासकादीनि तन्त्राणि परमेश्वरि!॥
कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु।
महाचीनादितन्त्राणि व्यधिकल्पे महेश्वरि!॥
सुसिद्धानि वरारोहे! रथक्रान्तासु भूमिषु॥"

इति महासिद्धिसारस्वतम्॥ * ॥

अपि च।

"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति!।
सफलानीह वाराहे! विष्णुक्रान्तासु भूमिषु॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च।
पाशवक्षोभणायैव विफलानीह सुन्दरि!॥"

इति महाविश्वसारतन्त्रम्॥

तन्त्रागमस्य लक्षणं यथा,—

"सृष्टिश्च प्रलयश्चैव देवतानां यथार्च्चनम्।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्व्विधः।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः॥" * ॥

यामलस्य लक्षणम्।

"सृष्टिश्च ज्योतिषाख्यानं नित्यञ्चात्यप्रदीपनम्।
क्रमश्चैव वर्णभेदो जातिभेदस्तथैव च॥
युगधर्म्मश्च संख्यातो यामलस्यापि लक्षणम्॥" *॥

तन्त्रस्य लक्षणम्।

"सर्गश्च प्रतिसर्गश्च मन्वनिर्णय एव च।
देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्॥
तथैवाश्रमधर्म्मश्च विप्रसंस्थानमेव च।
संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः॥
सृतपत्तिश्चिन्तुधानाञ्च तन्त्रञ्च कल्पसंज्ञितम्।
संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च॥
मोक्षस्य कथनञ्चैव व्रतानां परिभाषणम्।
श्रौताश्रौतस्य शास्त्राणां नरकाणाञ्च वर्णनम्॥
हरचक्रस्य शास्त्राणां स्त्रीपुंसोश्चैव लक्षणम्।
राजधर्म्मो दानधर्म्मो युगधर्म्मस्तथैव च॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्॥
इत्यादिभिश्चतुर्युक्तं तन्त्रमित्यभिधीयते॥" * ॥

तस्य माहात्म्यम्।

"विष्णुर्मेरौ देवानां हृदागासुदधिर्यथा।
नदीनाञ्च यथा गङ्गा पर्व्वतानां हिमालयः॥
व्रतत्यः वर्णश्रेष्ठानां राज्ञामग्निर्यथा वरः।
देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा॥
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्॥
सर्व्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम्।
कीर्त्तनं देवदेवस्य हरस्य मतमेव च॥
पावनं श्रद्दधानानामिह लोके परत्र च॥"*॥

तस्य श्लोकसंख्या यथा,—

"न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि।
संक्षेपादहं प्रवक्ष्यामि लोकानुग्रहकाम्यया॥
दिवि देवे नवलक्षं पातालेऽब्रह्मशासने।
लक्षमात्रं भारते च यानि तन्त्राणि यानि च।
आगमं त्रिविधं प्रोक्तं चतुर्थमेश्वरं स्मृतम्॥
कल्पश्चतुर्व्विधः प्रोक्तः आगमो डामरस्तथा।
यामलश्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक्॥
सूक्तकाख्यं प्रपञ्चश्च सारदाख्यश्च नारदः।
महार्णवश्च कपिलो योगः कल्पः कपिञ्जलः॥
अष्टतन्त्रविधिर्वीरश्च सिद्धसंवरतन्त्रतथा।
प्रथमोऽष्टसहस्राणि श्लोका दश प्रकीर्त्तिताः॥
द्वितीयो सूक्तकस्तत्र षट्सहस्राणि संख्यया।
श्लोकाः श्रुताईसंख्यातस्तृतीयश्चिसहस्रकः॥
श्रुतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः।
त्रिंशोत्तरसहस्राणि श्लोकानां भानुसंख्यया॥
प्रपञ्चे प्रथमे तन्त्रे द्वितीये वसुसंख्यया।
सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया॥
भूतनेत्रसहस्राणि ततीये पञ्चसहस्रकम्।
श्रुतत्रयं षड्त्रिंशोकाः प्रपञ्चः कथितस्त्रिधा॥
कलासंख्या सहस्राणि शारदाया प्रकीर्त्तिताः।
पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे॥
विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया।
वसुश्लोकाश्च कथिताः कपिले श्लोकसंख्यया॥
त्रयोदशसहस्राणि कालोत्तरश्रुतत्रयम्।

श्लोकसंख्याससुद्दिष्टं योगे कल्पे च संख्यया ॥
वागसंख्यासहस्राणि श्लोका नवति: कीर्त्तिता: ।
श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया ॥
श्लोकाश्च भानुसंख्यातास्तन्त्रेऽपि च कपिञ्जले ।
अन्तस्तुद्धौ सहस्राणि पञ्चश्लोकाधिकानि च ॥
पञ्चैव कथिता नेत्रसंख्यातानि यथार्थत: ।
वीरागमे षड़धिकानि शतानि परिसंख्यया ॥
सहस्राणि च तावन्ति श्लोकानान्तु यथार्थत: ।
पञ्चाधिकसहस्राणि श्लोकानान्तुसंख्यया ॥
सिद्धसम्भरणोल्लासे ऐश्वरेण यथा पुरा ॥ * ॥
डामर: षड्विधो ज्ञेय: प्रथमो योगडामर: ॥
श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्चशतानि च ।
त्रिविंशतिसहस्राणि श्लोकानि चैव संख्यया ।
एकादशसहस्राणि संख्याता: शिवडामरे ॥
श्लोका: सप्तैव निर्द्दिष्टा ईश्वरेणैव भाषिता: ।
तावत्श्लोकसहस्राणि पञ्चश्लोकशतानि च ।
गुणोत्तराणि दुर्गाया डामरे कथितानि च ॥
नवश्लोकसहस्राणि नवश्लोकशतानि च ।
सारस्वते तथा श्लोका: पञ्चैव परिकीर्त्तिता: ॥
खरसंख्यासहस्राणि श्लोकानां ब्रह्मडामरे ।
पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु ॥
बहि: श्लोकसहस्राणि गान्धर्व्वे डामरोत्तमे ।
श्लोकाश्च बहिसंख्याता ब्रह्मणायत्तयोनिना ॥
वामला: षट्च संख्यातास्तन्त्रादावादियामले ।
द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत्शतानि च ॥
द्वितीये ब्रह्मसंज्ञे ते द्वात्रिंशत्तिथ संख्यया ।
सहस्राणि शतान्यत्र तान्येव कथितानि च ॥
तावत्संख्यासहस्राणि शतानि परिसंख्यया ।
विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले ॥
कालसंख्यासहस्राणि वेदसंख्याशतानि च ।
पञ्चसप्ततिसंख्या श्लोका: कनिष्ठे रुद्रयामले ।
नवश्लोकसहस्राणि त्रयोदशशतानि च ।
द्वात्रिंशत्तिसंख्या श्लोका गणेशे यामलोत्तमे ॥
रविसंख्यासहस्राणि आदित्याख्ये तु यामले ।
तन्त्रे नीलपताकायां सहस्राणि च पञ्च च ॥
पञ्चविंशतिश्लोकाश्च कथिता वामकेश्वरे ।
त्रयोदशसहस्राणि द्वे शते विंशतिस्तथा ॥
श्लोका रुद्रयुते तन्त्रे संख्याताश्चन्द्रवेदिभि: ।
गजसंख्यासहस्राणि त्रीणि संख्याशतानि च ॥
सप्तश्लोकास्तथैवात्र तन्त्रे योगार्णवोत्तमे ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
मायाख्ये च महातन्त्रे यथार्थत: प्रकीर्त्तिता: ।
पञ्चश्लोकसहस्राणि तावन्त्येव शतानि च ॥
शतार्द्धसंख्या श्लोका दधिवाह्नृत्तिसंज्ञके ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
त्रयोदश तथा श्लोका: कालिकाख्ये च तन्त्रके ।
कामेश्वर्यास्तन्त्ररत्ने सहस्राणि त्रयं महत् ॥
श्लोकानां संख्या चात्र तन्त्रराजे च संख्या ।
नवश्लोकसहस्राणि नवश्लोकशतानि च ॥
द्वात्रिंशति सहस्राणि हरगौर्य्योश्च तन्त्रके ।
तथा च विंशति: श्लोकास्तन्त्रेऽस्मिन् परि-
कीर्त्तिता: ।
अर्कसंख्यासहस्राणि द्वितीये तन्त्रवेदिभि: ।
अष्टाविंशतिश्च श्लोका: सङ्ख्यातास्तन्त्रनिर्ण्णये ॥
कुलिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया ।
सहस्राणि तथा सप्तशतानि मनीषिभि: ॥
द्वितीये षट्सहस्राणि तदर्द्धं कनिष्ठके ।
अर्कसंख्यासहस्राणि तथाङ्कशतानि च ॥
तावद्वेद्या महातन्त्रे सङ्ख्यातानि द्विजोत्तमै: ।
द्वात्रिंशतिसहस्राणि द्वात्रिंशतिशतानि च ॥
कालायन्यास्तु तन्त्रस्य सङ्ख्यातानि मनीषिभि: ।
वसुश्लोकसहस्राणि तावन्त्येव शतानि च ॥
प्रत्यङ्गिरायास्तन्त्रे च लिखितानि यथार्थत: ।
भूतसङ्ख्यासहस्राणि तथाहि तच्छतानि च ॥
महालक्ष्म्यास्तन्त्रराजे पञ्चश्लोकाश्च कीर्त्तिता: ।
गजसंख्यासहस्राणि श्लोकाश्च ऋतुसङ्ख्या ।
त्रिपुरार्णवे महातन्त्रे लिखिता: परमर्षिभि: ।
खरसंख्या: सहस्रे द्वे द्वे शते सङ्ख्या स्मृते ॥
पञ्चश्लोकास्तथैवात्र विज्ञातव्या द्विजातिभि: ।
द्वात्रिंशतिसहस्राणि आद्ये तन्त्रोत्तमोत्तरे ॥
अष्टसङ्ख्याशतान्यत्र श्लोका: पञ्चदशैव तु ।
द्वात्रिंशतिसहस्राणि तथा वाणशतानि च ।
द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके ।
द्वितीये षट्सहस्राणि तथा च त्रिशतानि च ॥
त्रय: श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे ।
ऊर्म्मिसङ्ख्यासहस्राणि तत्त्वसङ्ख्याशतानि च ॥
गवाक्षे तन्त्रराजेऽस्मिन् श्लोका हि तत्त्वसङ्ख्या ।
वर्ज्जसङ्ख्यासहस्राणि द्वे शते परिनिश्चिते ॥
श्लोकाश्चयच सङ्ख्याता स्तन्त्रे नारायणीयके ।
वेदसङ्ख्यासहस्राणि तान्येव च शतानि च ॥
श्लोका नवतिसङ्ख्याता रुद्रडामरतन्त्रराजके ।
तृतीये त्रिसहस्राणि त्रिशतानि कनिष्ठके ॥
त्रिंशत्तृश्लोकाश्च सङ्ख्याता ज्ञातव्यास्तन्त्र-
वेदिभि: ॥"

उपतन्त्राणि यथा,—
"गौडोक्तान्युपतन्त्राणि कापिलोक्तानि यानि च ।
अद्भुतानि च एतानि जैमिन्युक्तानि यानि च ॥
वशिष्ठ: कपिलश्चैव नारदो गर्ग एव च ।
पुलस्त्यो भार्गव: सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥
शुक्रो दक्षश्चतिश्चैव अन्ये ये मुनिसत्तमा: ।
एभि: प्रकीर्त्तितान्येव उपतन्त्राणि यानि च ॥
न सङ्ख्यातानि तान्यत्र धर्म्मविद्भिर्म्महात्मभि: ।
वाराह्यास्तन्त्रराजस्यैव सङ्ख्यातानि निबोधत ॥"
इति वाराहीतन्त्रम् ।

(आगमतत्त्वविलासोल्लसितानामानि यथा,—
"खतन्त्रतन्त्रं पैतृकारीतन्त्रसुत्तरतन्त्रकम् ।
नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रसुज्ज्वलम् ॥
कालीनारायणीतन्त्रे तारिणीतन्त्रसुत्तमम् ।
वालातन्त्रञ्च समयातन्त्रं भैरवतन्त्रकम् ॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकम् ।
कुब्जिकेश्वरतन्त्रञ्च मालतीतन्त्रमेव च ॥
पवनकुमारतन्त्रञ्च विमुक्तेश्वरतन्त्रकम् ।
सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकम् ॥
द्रङ्गोत्तमीयतन्त्रं भूतभैरवतन्त्रकम्
चामुण्डाग्निजलातन्त्रे वाराहीतन्त्रकं तथा ॥
सुरुमाताखतन्त्रञ्च योगिनीतन्त्रसुत्तमम् ।
मालिनीविजयं तन्त्रं तन्त्रं खच्छन्दभैरवम् ॥
महातन्त्रं शक्तितन्त्रं तन्त्रं चिन्तामणिं परम् ।
उच्छ्मभैरवं तन्त्रं त्रैलोक्यसारतन्त्रकम् ॥
विश्वसाराख्यं तन्त्रं तथा तन्त्रान्तराभिधम् ।
महापैतृकारीयतन्त्रं वायवीयञ्च तोड़लम् ॥
मालिनीललितातन्त्रे त्रिशक्तितन्त्रकं तथा ।
राजराजेश्वरीतन्त्रं महामोहखरोत्तरम् ॥
गवाक्षतन्त्रं गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनम् ।
हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकम् ॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकम् ।
मायातन्त्रं मन्त्रराजं कुलिकातन्त्रसुत्तमम् ॥
विज्ञानलतिकां लिङ्गागमं कालोत्तरं तथा ॥"

* * * *

"ब्रह्मयामलकक्षादियामलं रुद्रयामलम् ॥
दक्षयामलकं सिद्धयामलं कल्पसूचकम् ।
मतङ्गसूक्तं कल्पसूक्तं कामराजं शिवागमम् ॥
उड्डीशञ्च कुलोड्डीशमुड्डीशं वीरभद्रकम् ।
भूतडामरकं तद्वत् डामरं यक्षडामरम् ॥
कालिकाकुलसर्व्वस्वं कुलसर्व्वस्वमेव च ।
कुलचूड़ामणिं दिव्यं कुलसारं कुलार्ण्णवम् ॥
कुलाम्नतकुलावल्यौ तथा कालीकुलार्ण्णवम् ।
कुलप्रकाशं वाग्विलं सिद्धसारस्वतं तथा ॥
योगिनीहृदयं कालीहृदयं मालतार्ण्णवम् ।
योगिनीजालकुरकं तथा लक्ष्मीकुलार्ण्णवम् ॥
तारार्ण्णवं चन्द्रपीठं मेरुचन्द्रं चतु:शतीम् ।
तत्त्वबोधं महोदयच खच्छन्दसारसंग्रहम् ॥
तारादीपं सङ्केतचन्द्रोदयमतिस्फुटम् ।
षट्त्रिंशत्तत्त्वकं लक्ष्मनिर्ण्णयं त्रिपुरार्ण्णवम् ॥
विष्णुधर्म्मोत्तरं मन्त्रदर्पणं वैष्णवाग्नतम् ।
मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीम् ॥
भुवनेश्वरीं पारिजातं प्रयोगसारसुत्तमम् ।
कामरत्नं क्रियासारं तथैवागमदीपिकाम् ॥
भावचूड़ामणियन्त्रं तन्त्रचूड़ामणिं परम् ।
दक्षक्रीक्रमसंज्ञञ्च तथा श्रीक्रमसंज्ञकम् ॥
सिद्धान्तशेखरं ग्रन्थं तां गणेशविमर्शिनीम् ।
मन्त्रसुत्तावलीं तन्त्रकौमुदीं तन्त्रकौमुदीम् ॥
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्च्चनचन्द्रिकाम् ।
शारदातिलकं ज्ञानार्ण्णवं सारसमुच्चयम् ॥
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकाम् ।
आगमोत्तरकं तत्त्वसागरं सारसंग्रहम् ॥
देवप्रकाशिनीं तन्त्रार्ण्णवञ्च क्रमदीपिकाम् ।
तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकम् ॥
तन्त्रप्रदीपं तारायां विलासं विश्वमातृकाम् ।
प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ॥"
कालतन्त्रम् । वाचनाजालम् । यथा, मत्स्य-
भारते । १ । ३ । १४२ ।
"तन्त्रञ्चेदं विश्वरूपे युवत्यौ
वयस्तन्त्रन्तु सततं वर्त्तयन्ती ॥"
"तन्त्रं कालतन्त्रं विश्वोपादाननिमित्तादिकारण-
समूहसम्बन्धम् ॥" इति दुर्घटार्थप्रकाशिन्यां

विमलबोधः। "इह तन्त्रं वासनाजालम्।" इति नीलकण्ठः।)

तन्त्रवर्त्म, क्ली, (तन्त्रात् क्षुत्वायात् अधिरापद्यतम्। तन्त्र+"तन्त्रादधिरापद्यते। ५। २। ७१। इति ष्यञ्।) नूतनवस्त्रम्। इत्यमरः। २। ६। ११२॥

तन्त्रवाङ्, क्ली, (तन्त्रस्थं वाक्यम्।) तन्त्रवायस्य सूत्रे। इति त्रिकाण्डशेषः॥

तन्त्रता, स्त्री, (तन्त्रस्य भावः। तन्त्र+तल्।) अनेकसहिष्णु सङ्घातप्रवृत्तिः। यथा।"आग्नेयाष्टाकपालेन्द्रदर्शेन्द्रपयोयागानां अयाणां आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां अयाणां सङ्घातं सङ्घातप्रवृत्तिवेव प्रयाजाङ्गोपकारः सिध्यति।""तथा नानाब्रह्मवधस्थले सर्व्वोद्देशेन सङ्घातं प्रायश्चित्ते कृते ब्रह्मवधजन्यपापनाशः।" "तन्त्रतायां हेतुश्च। अङ्गार्थैकवाक्यतीयकर्म्मैक्यं कालदेशकर्त्रादीनां प्रयोगाङ्गत्ववैधहेतुभूतानामभेदे उद्देश्यविशेषायत्व इति। एवञ्च।

'स्नातोऽधिकारी भवति देवे पैत्रे च कर्म्मणि।
पवित्राणां तथा प्राप्ते दाने च विधिदर्शितः॥'

इति विष्णूक्तम्॥

'अस्नाता नाचरेत् कर्म्म जपहोमादि किञ्चन।' इति दक्षोक्तञ्च क्रियाङ्गस्नानं कर्त्तृसंस्कारद्वारैव तद्विकर्त्तव्याग्नेयकर्म्मार्थमेकमेव न तु प्रतिकर्म्म कर्त्तव्यम्।" इति प्रायश्चित्ततत्त्वम्॥

तन्त्रवायः, पुं, (तन्त्रते विस्तीर्य्यते इति तन्त्रं सूत्रम्। तत् वयतीति। वय+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) तन्तुवायः। तन्त्रे, पुं स्त्री। इति शब्दरत्नावली॥

तन्त्रवायः, पुं, (तन्त्रेण वयतीति। वे न तन्तुसन्ताने +"घञादयश्च।" ३। २। २। इत्यण्।) वर्णसङ्करजातिविशेषः। ताँति इति भाषा। अस्योत्पत्तिर्यथा, पराशरपद्धतौ।

"ताम्रकुशाच्छकार्य्यां मणिकारश्च जायते।
मणिकारात् ताम्रकुशां मणिबन्धोऽप्यजायत।
मणिबन्धाच्चिकार्य्यां तन्त्रवायाश्च जज्ञिरे॥"

तत्पर्य्यायः। कुविन्दः २। इत्यमरः।२।१०।६॥ तन्त्रवापः३। इति भरतः॥ तन्तुवापः ४। इति जटाधरः॥ तन्तुवायः५। इति शब्दरत्नावली॥ जुलाहा। इत्यमरटीकायां स्वामी॥

तन्त्रिका, स्त्री, (तन्त्री एव। तन्त्री+स्वार्थे कन्। पूर्व्वहस्वश्च।) गुडूची। इत्यमरः। २।४।८२॥ (यथास्याः पर्य्यायाः।

"गुडूचीमधुपर्णी स्यादमृतास्तवयस्करी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका वीरा विशल्या च रसायनी॥
चन्द्रहासी वयस्था च मद्यगन्धा देवनिर्म्मिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तन्त्रिपालकः, पुं, जयद्रथराजः। इति शब्दमाला॥

तन्त्रीः, स्त्री. (तन्त्रयति मोदयति लोकानिति। तन्त्र+"अवितॄस्तृतन्त्रिभ्य ईः।" उणा। १। १५८। इति ईः।) वीणागुणः। (यथा, रामायणे। २। ३६। २६।

"गातव्यविदुषे वीणा नाचक्षो विद्यते रथः॥"

वीणा। यथा, तत्रैव। १। २। १८।

"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
श्लोकार्द्धस्तु प्रवृत्तो मे श्लोको भवतु नान्यथा॥")

गुडूची। देहशिरा। इति मेदिनी॥ वदीविशेषः। युवतीभेदः। इति शब्दरत्नावली॥ रज्जुः। इति हेमचन्द्रः॥ (यथा, मनुः। ४।३८।

"न लङ्घयेत्तृतन्त्रीं न प्रधावेच्च वर्त्मनि।
न चोदके निरीक्षेत स्वं रूपमिति धारणा॥")

तन्त्रवायः, पुं, (तन्त्रवायः निपातनात् तस्य दः।) तन्त्रवायः। इत्यमरटीकायां रायमुकुटः॥

तन्द्रा, स्त्री, (तत् द्रातीति। तत्+द्रा+कः। निद्रातन्द्रेति वान्तत्वं निपात्यते। यद्वा, तन्द्र अवसादे+भावे चप् ततष्टाप्।) निद्रा। आलस्यम्। इति हेमचन्द्रः॥ (यथा, हठयोगप्रदीपिकायाम्। ३। ३६।

"न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा॥")

तस्या निदानं यथा। "तमोवातकफात्तन्द्रा।" इति। चक्रदत्तः।

"इन्द्रियार्थेष्वसंविष्टगौरवं जृम्भणं श्रमः।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्द्दिशेत्॥"

इति माधवकरः॥

(कारकपूर्व्वकमस्याः सम्पाद्यत्वञ्च चिन्तितसत्त्व यथा, चरके सिद्धिस्थाने नवमेऽध्याये।

"मधुरस्निग्धगुर्व्वम्लसेवनाचिन्तनाद्भयात्।
श्लोकाद्याश्रयणाच्च वायुनोदीरितः कफः॥
यदासौ समवस्कन्द्य हृदयं हृदयाश्रयात्।
समाददीति ज्ञानादींस्तदा तन्द्रोपजायते॥
हृदये चाकुलीभावो वाक्चेष्टेन्द्रियगौरवम्।
मनोनुग्रहप्रसादश्च तन्द्राया लक्षणं मतम्॥
कफश्च तत्र कर्त्तव्यं श्लोषणं श्रमनाणि च।
व्यायामो रूक्षमोक्षश्च भोज्यञ्च कटुतिक्तकम्॥")

तन्द्राक्षुः, त्रि, (तत् द्रातीति। तत्+द्रा+"सृद्रि स्यर्द्धीति।" ३। २। १५८। इति आक्षुच् तत्शब्दस्य नान्तत्वं निपात्यते।) निद्राक्षुः। इति जटाधरः॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।

"अपि जायत् स्वपन् जन्तुस्तन्द्राक्षुश्च प्रलापवान्॥")

तन्द्रिः, स्त्री, (तदि खेदे धातुः+"वहिश्रिगादयश्च।" उणा। ४। ६६। इति क्रिन्।) निद्रा। आलस्यम्। इत्यमरादिकोषः॥ (यथा, भागवते। ३। २०। ४०।

"क्षुद्रा भूतपिशाचार्च्या भगवन्मायातन्द्रिका।
दिग्वासो हसते केशान् वीक्ष्य धामौर्ध्वदृङ्मुनौ॥")

तन्द्रिका, स्त्री, (तन्द्रिरेव। स्वार्थे कन् टाप् च।) तन्द्रिः। इति शब्दरत्नावली॥

तन्द्री, स्त्री, (तन्द्रि+"ऋदोरप्।" वा ङीप्।) अत्यन्तश्रमादिना सर्व्वाङ्गेन्द्रियाप्रसुप्तम्। अत्यन्तश्रमादिना सर्व्वाङ्गनिमीलनं निःसङ्कोचेति भाषायां प्रसिद्धे। इति भरतः॥ तत्पर्य्यायः। प्रमीला २। इत्यमरः॥ तन्द्रा ३ तन्द्रिः ४। इति तट्टीका॥ तन्द्रिका ५ विषयाज्ञानम् ६। इति राजनिर्घण्टः॥ (यथा, महाभारते। ३। ३०३। १६।

"निद्रिष्य राजपुत्री तु तन्द्रीं मानं तथैव च।
आतस्थे परमं यत्नं भर्त्राराधनकर्म्मणि॥")

निद्रा। इति मेदिनी। रे, ४२॥ (केचित्तु तन्द्रधातोर्वाहुलकात् ईप्रत्ययेन तन्द्रीरिति पदं साधयन्ति यथा, चरके सूत्रस्थाने त्रयोदशेऽध्याये।

"प्राकृता गौरवं जाड्यं पुरीषस्याविपक्वता।
तन्द्रीरत्यधिकस्तेषां स्यादतिस्निग्धलक्षणम्॥")

तन्त्रिः, स्त्री, (तन्त्रयतीति। तन्त्र+बाहुलकात् क्विः।) चक्रकुल्या। इति रत्नमाला। तन्त्रिरपि पाठः॥

तन्मात्रं, क्ली, (तदेवेति। तत्+स्वार्थे मात्रच्। यद्वा, सा मात्रा यस्य।) अपञ्चीकृतरूपरसगन्धस्पर्शशब्दानां संज्ञा। यथा,—

"एभ्यो भूतेभ्यः सूक्ष्मभूतानि तन्मात्राख्यान्यपञ्चीकृतानि चोत्पद्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।" इति वेदान्तसारः।४७॥ तट्टीका यथा। "तन्मात्रेभ्यः तात् पञ्चतन्मात्रादिभ्यः क्रमेण जायन्ते इति हि श्रुतौतिहासपुराणेषु प्रसिद्धिरस्तु कथमाकाशादेरित्यादीनामुत्पत्तिरवगम्यते तत्राह एतेभ्य इति। एतान्येवाकाशादीनि सूक्ष्मभूतानि अवद्धारावगम्यानि शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि परमसंहृतानि चेति श्रुत्यादिषूच्यन्ते महर्षिभिरित्यर्थः॥" इति विष्णुमनोरञ्जिनी॥ *॥ अपि च।

"भूतादिस्तु विकुर्व्वाणः सर्गे तन्मात्रिकं ततः।
तस्मात्तु शब्दतन्मात्राकाशं शब्दलक्षणम्॥"

इति विष्णुपुराणे १२ अध्यायः॥

तन्यतुः, पुं, (तनोति विस्तारयति तमः शब्दं वा। तनु विस्तारे+"ऋतन्यञ्जिवनीति।" उणा। ।४। २। इति यतुच्।) राजिः। वाद्यम्। इत्यजादिकोषः॥ (वायुः। इत्युज्ज्वलदत्तः॥ अग्निः। इति माधवः॥ विद्युत्। इति स्यानन्दः॥ यथा, ऋग्वेदे। १। ५२। ६।

"दृक्षस्य यत् प्रवणे दुर्गृभिश्वनो निवघस्य हन्वो रिश्रतन्यतुम्॥")

तन्वी, स्त्री, (तनुः+"ओतो गुणवचनात्।" ४। १। ४४। इति ङीप्।) क्षुद्राङ्गी। यथा,—

"तव तन्वि! कृशायाः कुचावेतौ निरन्तौ चक्रवर्त्तिनौ।
आवसुदकरण्याद्यौ भवान् खलु करप्रदः॥"

इति कालिदासः॥

शालपर्णी। इति राजनिर्घण्टः॥ (चतुर्भिश्छन्दश्चरद्वृत्तिविशेषः। इति छन्दोमञ्जरी॥ तस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

तप, क्ष दाहे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, तापयति। अयमात्मनेपदीत्येके। इति दुर्गादासः॥

तप, ङ ण दाहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-उभयं-सकं-सेट्।) ङ, तपते। ण, तपति तपते। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

तप, औ } दैवेश्वर्ययोः। इति कविकल्प-
तप्, य ङ औ } द्रुमः॥ (भ्वां-परं-सकं-अकंच-अनिट्। दिवादिपक्षे आत्मं।) दैव उपतापः। "तपति तनुगात्रि! मदनस्त्वाम्।" औ, अतापीत्। य ङ, तप्यते धनी ईश्वरः स्वादिलक्षणे। औ, अतप्त। दिवादिपक्षे ऐश्वर्य्य एव इत्यन्ये। इति दुर्गादासः॥

तपः, [स्] क्ली, (तपति तापयति वा। तप उपतापे+"सर्व्वधातुभ्योऽसुन्।" उणां। ४।१८८। इति असुन्।) वैधक्लेशजनकं कर्म्म। यथा,—
"उमेऽतिचपला पुत्रि! न चमं तावकं वपुः।
सोढुं क्लक्ष्णस्वभावस्य तपसः सौम्यदर्शने॥"
इति तिथ्यादितत्त्वे मत्स्यपुराणवचनम्॥ ०॥
तत्फलं यथा,—
"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्वतः।
दुर्भगत्वं हृथा लोको वहते यति साधने॥"
इति च तत्रैव तद्वचनम्॥ ०॥
अपि च। मरीचिरुवाच।
"ब्राह्मणस्य तपोमूलं यज्ञः स्वाध्याय एव च।
तस्मादग्ने! परं ब्रूहि तपसोऽध्ययनस्य च॥
वह्निरुवाच।
स्वाध्यायतपसोर्वक्ष्ये तत्त्वं निगदितं ब्रह्म।
तपसो हि परं नास्ति तपसा विन्दते महत्॥
तपसा शोध्यते पापं मोदते सह दैवतैः।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः॥
तपसा सर्व्वमाप्नोति तपसा विन्दते परम्।
ज्ञानविज्ञानसम्पन्नः सौभाग्यं रूपमेव च॥
तपसा लभते सर्व्वं तथैवाध्ययनेन च।
तस्मात् स्वधर्म्मसंयुक्तो नित्यं सिध्यति पण्डितः॥
धर्म्मात् सुखमवाप्नोति इह लोके परत्र च॥"
इत्याद्ये वह्निपुराणे नित्याह्निकज्ञानविधिनामाध्यायः॥ तपस्या। तत्त्रिविधम्। शारीरं वाचिकं मानसञ्च। यथा,—
"देवद्विजगुरुप्राज्ञपूजनं शौचमार्জ্জवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥१॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते॥२॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥३॥
तदपि त्रिविधम्। सात्त्विकं राजसं तामसञ्च यथा,—
"श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥१॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥२॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥३॥
इति श्रीभगवद्गीतायाम्। १७। १४—१९॥

जनलोकादूर्द्ध्वलोकः। यथा,—
"अस्योपरि तपोलोकस्त्रैलोक्यमय उदाहृतः।
वैराजा यत्र ते देवा वसेयुर्द्देवपूजिताः॥
वासुदेवे मनो येषां वासुदेवेऽर्पितक्रियाः।
तपसा लोध्य गोविन्दमभिलाषविवर्জ্জिताः॥
तं तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः।
त्रिलोक्यहृत्तपो ये वै दग्धोलूखलिकाश्च ये॥
वैश्वानराश्च सुनयः शीर्षपर्णाशिनश्च ये।
शीर्णं पर्णायितपसो वर्षासु स्थण्डिलेशयाः॥
हेमन्ते शिशिरे वा ये क्षिपन्ति सलिले क्षमाः।
कुशाग्रनीरबिन्दूंश्च क्षुधिता यतयोऽपिबन्॥
वाताग्निगोऽतिसुधिताः पादाङ्गुष्ठाग्रभूसृग्भः।
ऊर्द्धहस्ता रविद्वग्लक्ष्येकाङ्घ्रिस्थाननिश्चलाः॥
ये वै दिवानिरुच्छ्वासा मासोच्छ्वासाश्च ये परे।
मासोपवासं कुर्व्वन्ति चातुर्म्मास्यव्रताश्च ये॥
ऋक्षन्ने तोयपाना ये ये षण्मासोपवासकाः।
ये च वर्षानिमेषा वै वर्षधारामृतर्षकाः॥
स्थाणुसाध्योपसंप्राप्ता ध्रुवकङ्कूतिसौख्यदाः।
जटाटवीकोटरान्तः क्षतनीड़ाश्रयाश्च ये॥
प्ररूढ़वल्मिकाङ्गाश्च कायुनङ्गास्त्रिसन्ध्यया।
लताप्रतानैः परितो वेष्टितावयवाश्च ये॥
शुष्काणि च प्ररूढ़ानि यदश्नन्ति महीपते!।
इत्येतैर्नियमैर्ये तु क्षिपन्त्यात्मानमक्षयान्॥
ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः॥"
इति पद्मपुराणम्॥ ०॥
चान्द्रायणादिव्रतम्। धर्म्मः। इति मेदिनी। से, २४॥

तपः, पुं, (तपति तापयति वा। तप क्लेशापे+पचाद्यच्।) सौरः। इत्यमरः। १। ४। १६॥ (यथा, माघे। १। ६६।
"तपेन वर्षाः शरदो हिमागमो
वसन्तलक्ष्माणि शिशिरः समेत्य च।
प्रसूनकल्पानि दधत् सदर्त्तवः
पुरोऽस्य वास्तव्यकुटुम्बितां ययुः॥")

तपःकरः, पुं, (तपः करोतीति। क्त+टः।) तपस्वी मत्स्यः। इति शब्दरत्नावली॥ तपस्याकारके, त्रि॥

तपःक्लेशसहः, त्रि, (तपसः क्लेशं सहते इति। सह+अच्।) दान्तः। इत्यमरः। २। ७।४३॥

तपःस्थली, स्त्री, (तपसः स्थली।) काशी। इति त्रिकाण्डशेषः॥

तपती, स्त्री, छाया नाम सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ सूर्य्यकन्या। सा पूरुवंशीयऋक्षराजपुत्रसम्वरणभार्য্যা। इति श्रीभागवतम्॥ (यथा, महाभारते। १। ६४। ४७।
"ततः सम्वरणात् सौरी सुषुवे तपती कुरुम्॥"
अस्या विशेषविवरणादिकं तत्रैव १७२ अध्याये द्रष्टव्यम्॥)

तपनः, पुं, (तपतीति। तप+कर्त्तरि ल्युः।) सूर्य्यः। (यथा, महाभारते। ३। ३। ६२।
"सहस्ररश्मिरादित्यस्तपनश्च गवां पतिः॥")
भल्लातवृक्षः। अग्न्यादिदाहात्मकनरकः॥ शैवः। इति हेमचन्द्रः॥ तापः। इति मेदिनिः॥ अर्कवृक्षः। क्षुद्राग्निमन्थवृक्षः। सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥ (यथा, आर्य्यासप्तशत्याम्। २६।
"अगस्यपथे प्रिये! न यथा यथा डाह एव दुष्प्रापे।
ज्ञानेऽकैवल्यं निधि तपनग्निशा वासरे व्यवति॥"
अग्निविशेषः। यथा, हरिवंशे। १७८। ३१।
"ते जातवेदसः सर्व्वे कक्षाग्नयः कुसुमस्तथा।
दहनः शोषकश्चैव तपनश्च महाबलः॥"
स्त्रीणां सप्तसे अलङ्कारविशेषे, स्त्री। तल्लक्षणं यथा साहित्यदर्पणे। २। ११६।
"तपनं प्रियविच्छेदे खरावेशोत्यचेष्टितम्॥"
उदाहरणं यथा, तत्रैव,—
"श्वासान्धुवति भूतले विलुठति त्यक्तार्गलमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः शय्यां सुधा-
वल्लरीम्।
किञ्च प्राणसमानकाङ्क्षितवती स्वप्नेऽपि ते
सङ्गमं
निद्रां वाञ्छति न प्रयच्छति पुनर्हन्त्यो विधि-
स्तामपि॥")

तपनच्छदः, पुं, (तपनः अतिरूक्षच्छदो यस्य।) आदित्यपत्रवृक्षः। इति राजनिर्घण्टः॥

तपनतनया, स्त्री, (तपनस्यापत्यं वह्निगर्भत्वादस्यास्तथात्वम्।) यमुना। वह्निगर्भत्वादस्यास्तथात्वम्।) यमुनदृक्षः। (तपनस्य सूर्य्यस्य तनया।) यमुना। इति राजनिर्घण्टः॥

तपनमणिः, पुं, (तपनः सूर्य्यस्तत्प्रियो मणिः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

तपनात्मजा, स्त्री, (तपनस्य सूर्य्यस्य त्मात्मजा कन्या।) गोदावरी नदी। इति हेमचन्द्रः॥ यमुना च॥

तपनी, स्त्री, (तपनः सूर्य्यो जनकतयास्त्यस्या इति अच्। ततो गौरादित्वात् ङीष्।) गोदावरी। इति हेमचन्द्रः॥

तपनीयं, क्ली, (तप+अनीयर्। वह्नौ शोधनीयपरीक्षणीयत्वादस्य तथात्वम्।) सुवर्णम्। इत्यमरः। २। ६। ६४॥ (यथा, रघुः। १५।३१।
"तस्मादधः किपिदिवावतीर्णा-
वसंसृष्टौ तपनीयपीठम्॥")

तपनीयकं, क्ली, (तपनीय+स्वार्थे कन्।) सुवर्णम्। इति राजनिर्घण्टः॥

तपनेष्टं, क्ली, (तपनस्य सूर्य्यस्येष्टम्। सूर्य्यप्रियत्वादस्य तथात्वम्।) ताम्रम्। इति राजनिर्घण्टः॥

तपसः, पुं, (तपतीति। तप+"अशनायोदन्यधनायतपसरसयः।" उणां। ३। ११७। इति असच्।) चन्द्रः। इति त्रिकाण्डशेषः॥ मधौ। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तपस्कषः, पुं, (तपस्कामं तक्षति तनूकरोतीति। तक्ष तनूकरणे+अच्। सूर्य्येणातिप्रेक्षणेन तपस्विनां तपोविघ्नकरत्वादस्य तथात्वम्।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥

तपस्यं, क्ली, (तपसि ग्रीष्मे भवम्। तपस्+यत्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥ (तपश्चरतीति। तपस्+क्तौ क्वच्। ततो भावे घञ्। तपश्चरणम्। यथा, महाभारते। १३।१०।१३। "अथास्य बुद्धिरभवत् तपस्ये भरतर्षभ!॥")

तपस्यः, पुं, (तपसि ग्रीष्मे साधुः। तपस्+"तत्र साधुः।" ४।४।९८। इति यत्।) फाल्गुनमासः। इत्यमरः। १।४।१५। (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये। "तत्र माघादयो द्वादशमासाः हिमाभिकल्पितं ज्ञात्वा बहुतरो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यो शिशिरः॥") अर्जुनः। इति हेमचन्द्रः॥ (तामसस्य मनोः पुत्रविशेषः। यथा, हरिवंशे। ७। २४।

"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः।
तपोरतिरकल्मषस्तपो धन्यो परन्तपः।
तामसस्य मनोरेते दश पुत्रा महाबलाः॥")

तपस्या, स्त्री, (तपश्चरतीति। "कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः।" ३।१।१५। इति क्यङ्। ततः "अ प्रत्ययात्।" ३।३।१०२। इति अ ततष्टाप्।) तपः। तत्पर्य्यायः। व्रतादानम् २ परिव्रज्या ३ नियमस्थितिः ४। इति हेमचन्द्रः॥ व्रतचर्य्या ५। इति मेदिनी॥

तपस्विनी, स्त्री, जटामांसी। इत्यमरः। २। ४। १३४॥ (तपस्वितुल्यजटायुक्तत्वादस्यास्तथात्वम्। यथा, वैद्यकरत्नमालायाम्।

"नलदं नन्दिनी पेषी मांसी क्षुद्रजटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥")
कटुरोहिणी। इति हेमचन्द्रः॥ महाश्रावणिका। इति भावप्रकाशः॥ (तपोऽस्या अस्तीति। तपस्+"तपःसहस्राभ्यां विनीनी।" ५।२।१०२। इति विनिः। ततः स्त्रियां ङीप्।) तपोयुक्ता स्त्री॥ (यथा, रामायणे। ३।२।७।

"पत्नीं च च महाहर्हां सिद्धां शुद्धां तपस्विनीम्।
अनसूयां महाभागां सर्व्वभूतहिते रताम्॥"
दीना। दुःखिता। यथा, भागवते। १।६।४४।
"ततो युधिष्ठिरो गत्वा सह कृष्णो गजाह्वयम्।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम्॥"
पतिव्रता। यथा, नैषधे। १।१३५।

"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्द्दय-
न्नहो विधे! त्वां करुणा रुणद्धि न॥"
"वरटा हंसी मम स्त्री नवा नूतना प्रसूतिः प्रसवो यस्यास्तादृशी सापि खलो जीवितुमसमर्थां तर्हि पत्यन्तरेण तस्या जीविका भवेदित्यपि निषेधयति यतस्तपस्विनी पतिव्रता मम मरणानन्तरं पत्यन्तराश्रयणाभावात् तस्या जीवनं शिशूनां पोषणञ्च दुर्घटमेव भवेदिति भावः॥" इति तट्टीका॥)

तपस्विप्रियः, पुं, (तपस्विप्रियं पत्रमस्य।) दमनकवृक्षः। इति राजनिर्घण्टः॥

तपस्वी, [न्] त्रि, (तपोऽस्यास्तीति। तपस्+"तपःसहस्राभ्यां विनीनी।" ५।२।१०२। इति विनिः।) तपोयुक्तः। तत्पर्य्यायः। तापसः २ पारिकाङ्क्षी ३। इत्यमरः।२।७।४२॥ पारकाङ्क्षी ४ पारिकाङ्क्षकः ५। इति शब्दरत्नावली॥ तपोधनः ६। (यथा, मनुः। ४। १६२। [खिन्नः॥")

"न हिंस्यादब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विनः।" इति मेदिनी। ने, १८५॥

तपस्वी, [न्] पुं, (तपस्+अस्त्यर्थे विनिः।) नारदः। इति शब्दरत्नावली॥ मत्स्यविशेषः। तपस्या माछ इति भाषा। तत्पर्य्यायः। तपःकरः २ चेष्टकः ३ चेष्टः ४। इति शब्दचन्द्रिका॥ (चाक्षुषस्य मनोः पुत्रविशेषः। यथा, हरिवंशे। २। १८।

"ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवान् कविः॥")
शुकरङ्गवृक्षः। इति राजनिर्घण्टः॥

तपाः, [स्] पुं, (तप्यतेऽस्मिन्निति। तप+असुन्।) ग्रीष्मः। इत्यमरटीकायां नयनानन्दः॥ माघमासः। शिशिरकालः। इति मेदिनी। से, २४॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।

"तेषां तपस्तपस्यो शिशिरः॥")

तपाव्ययः, पुं, (तपस्य ग्रीष्मस्य अव्ययो यत्र।) वर्षाकालः। इति हेमचन्द्रः। २।७१॥ (यथा, कुमारे। ५। २३।

"तपाव्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणमसूचदूर्द्धगम्॥")

तपित, त्रि, (तप्यते स्मेति। तप दाहे+क्तः।) तप्तम्। इति द्विरूपकोषः॥ (यथा, हरिवंशे। २३४। २६।

"सपितकनकविन्दुपिङ्गलाक्षो
दितितनयोऽसुरसैन्यमुद्वमेता॥")

तपुः, [स्] पुं, (तपति तापयतीति वा। तप+"अर्त्तिपॄवपीति।" उणा। २। ११८। इति उसिः।) अग्निः। सूर्य्यः। इत्युज्ज्वलदत्तः॥ (ऋचः। इत्युव्वटः॥ तापयुक्ते तापने च, त्रि। यथा, ऋग्वेदे। १। ३६। १६।

"तपुर्जम्भ यो अग्नेधुक्॥")

तपोधनः, पुं, (तप एव धनं यस्य।) तपस्वी। इति मेदिनी॥ (यथा, मनुः। ११। २४२।

"यत्किञ्चिदेनः कुर्व्वन्ति मनोवाङ्मूर्त्तिभिर्जनाः।
तत् सर्व्वं निर्द्दहन्त्याशु तपसैव तपोधनाः॥")
दमनकवृक्षः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायाः।

"उत्तो दमनको दान्तो सुनिपुत्रस्तपोधनः।
गन्धोत्कटो ब्रह्मजटो विनीतः कुलपत्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तपोधना, स्त्री, (तपो ग्रीष्मकाल एव घनमिव यस्याः।) शुक्लीरी। इति मेदिनी॥ (तपोधने, त्रि। यथा, महाभारते। ५।१८८।२०।

"वल्कवासाः वायुभक्षा च स्याद्भूता तपोधना॥")

तपोवटः, पुं, ब्रह्मावर्त्तदेशः। इति त्रिकाण्डशेषः॥

तप्तः, त्रि, (तप्यते स्मेति। तपौ सन्तापे+क्तः।) तापयुक्तः। तत्पर्य्यायः। सन्तापितः २ दूनः ३ धूपायितः ४ धूपितः ५। इति हेमचन्द्रः॥ (यथा, हठयोगप्रदीपिकायाम्। १। १०।

"अग्नेश्चतापतप्तानां समाश्रयमठो दृढः॥")

तप्तकुम्भः, पुं, (तप्तः उत्तापितः कुम्भो यत्र। नरकविशेषः॥ (यथा, मार्कण्डेये। १२।३४-३६।

"अतःपरं भीमतरं तप्तकुम्भं निबोध मे।
समन्ततस्तप्तकुम्भा वह्निज्वालासमाकुलाः॥
ज्वलदग्निचयोद्दृप्ततैलायश्चूर्णपूरिताः।
तेषु दुष्कृतकर्म्माणो याम्यैः क्षिप्ता ह्यधोमुखाः॥
क्राथन्ते विस्फुटद्गात्रगलन्मज्जासृगाविलाः।
स्फुटत्कपालनेत्रास्थिछिद्यमाना विभीषणैः॥
यमैरुत्पाद्य सुच्यन्ते पुनस्तेष्वेव वेगितैः।
पुनः सिमसिमायन्ते तैलेनैवं व्रजन्ति च॥
द्रवीभूतैः शिरागात्रक्षायुमांसत्वगस्थिभिः।
ततो याम्यैर्नरैरास्यु दर्व्याघट्टनचर्चिताः॥
क्षतावर्त्ते महातैले मथ्यन्ते पापकर्म्मिणः।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः!॥")

तप्तकृच्छ्रः, पुं क्ली, (तप्तेन जलदुग्धादिना आचरितं कृच्छ्रं कष्टं यत्र। यद्वा, तप्तेनाचरितं कृच्छ्रम्।) व्रतविशेषः। यथा, "पयोष्टसगुदकं वायुतप्तं प्रतिग्राहं पिबेत् स तप्तकृच्छ्रः।" इति गौतमः॥ (द्वादशाहसाध्यव्रतमेतत्। यथा, मनुः। ११। २१५।

"तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्।
प्रतिग्राहं पिबेदुष्णान् सकृत्स्नायी समाहितः॥"
"तप्तकृच्छ्रं चरन् द्विजातिः त्र्याहसुष्णोदकं त्र्याहसुष्णगोक्षीरं त्र्याहसुष्णघृतं त्र्याहसुष्णवायुं एकवारं स्नानं कुर्व्वन् संयतवान् पिबेत्। अत्र पराशरोक्तविशेषः।

षट्पलन्तु पिबेदम्भः क्षिपलन्तु पयः पिबेत्।
पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते॥"
इति तट्टीकायां कुल्लूकभट्टः॥)

तप्तपाषाणकुड्यं, क्ली, (तप्तानां पाषाणानां कुड्यमिव।) नरकविशेषः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

तप्तबालुकः, पुं, (तप्ता बालुका यत्र।) नरकविशेषः। इति पुराणम्॥ (उक्ततप्तबालुकामये, त्रि। यथा, भागवते। ३। ३०। २२।

"क्षुत्तृड्भ्यां परिशोकदावनलतो
संतप्यमानः पथि तप्तबालुके॥)

तप्तमाषकं, क्ली, (तप्तं माषमितं सुवर्णादिकं यत्र कप्।) परीक्षाविशेषः। तद्विधिर्यथा। पितामहः।

"कारवेदाथवं पात्रं ताम्रं वा लोहमाहुलम्।
चतुरङ्गुलखातन्तु श्लक्ष्णं वाथ मसृणम्॥
मसृणं श्लक्ष्णमसृणाकारं वर्त्तुलमिति यावत्।
पूरयेद्घृततैलाभ्यां विंशत्या तु पलेषु तत्।
सुवर्णमाषकं तस्मिन् सुतप्ते निःक्षिपेत्ततः॥

अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते ।
शुद्धो भवति धर्म्मेण पितामहवचो यथा ॥
कल्पान्तरमाह ।
सौवर्णे राजते ताम्रे आयसे न्यग्रयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीञ्च सुशोधिताम् ।
सलिलेन सङ्गृह्णीतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥
भग्नहीनेतरस्फाट्या न गच्छत्यग्नेर्गोचरे ।
परीक्षेतार्द्रपर्णेन चुचुकारं चषोषकम् ॥
ततस्तेनैव मन्त्रेण सङ्गृह्णीतदभिमन्त्रयेत् ।
परं पवित्रमन्तं घृत ! त्वं यज्ञकर्म्मसु ॥
दह पावक ! पापं त्वं हिमप्रीतः शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
व्याहरेन्मुद्रिकां तासु घृतमध्यगतान्तथा ।
प्रदेशिन्यौ च तस्याथ परीक्षेयुः परीक्षकाः ॥
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाशुचिः॥
प्रयोगस्तु । मध्यविधाद्यवतङ्गुलमध्यमिताङ्गुलिबोद्ग्राङ्गुलमितप्रस्तारे तथाविधाङ्गुलिचतुष्टयखाते ताम्रादिपट्टिते१ग्रस्तो न्यग्रये वा चक्राकारे वर्त्तुले पात्रे लौकिकाष्टरत्तिकाधिकमाषद्वयाधिकत्रयस्त्रिंशद्गुञ्जातोलकरूप- ३३ । २ । ८। वैदिकपलदशकमितं घृतं एवं तैलञ्च निक्षिप्य लौकिकचतुरत्तिकाधिकपञ्चमाषकषट्यष्टितोलकरूप- ६६।५ । ४ । वैदिकविंशतिपलपरिमितं केवलं गव्यं घृतं वा निक्षिप्य तस्मिन् घृतत्रे सङ्गृह्णीतां पश्चरत्तिकामितां काञ्चनमुद्रिकां रजतादिकां वा निक्षिपेत् । धर्म्मावाहनादिहवनान्तं तुलोक्तं सदक्षिणं कर्म्म कृत्वा,—
ओम् परं पवित्रमन्तं । घृत त्वं यज्ञकर्म्मसु ।
दह पावक ! पापं त्वं हिमप्रीतः शुचौ भव ।
इत्यनेनाभिमन्त्रयेत् प्राङ्विवाकः । ततः कृतोपवासः स्नातार्द्रवासाः श्रोत्रियगृहे प्रतिग्रापत्रं निधाय,—
ओम् त्वमग्ने ! सर्व्वभूतानामन्तश्चरसि पावक !।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥
इत्यनेनाभिमन्त्र्य आर्द्रपत्रनिक्षेपन्नतपुटकमुन्मृद्य घृतात् मुद्रिकां तर्ज्जन्यङ्गुष्ठाभ्यां उत्तोलयेत् । घृततैलाभ्यां वा तप्तमाषकमुत्तोलयेत् । अदग्धश्चेत्तदा शुद्ध इति । ततो दक्षिणां दद्यात् ॥"
इति दिवतत्त्वम् ॥

तप्तमुद्रा, स्त्री, (तप्ता अग्निसन्तप्ता मुद्रा ।) शरीरधार्य्याग्नितप्तधातुमयभगवदायुधचिह्नम् । यथा,
"आषाढ़शुक्लद्वादश्यां हरौ शिशयिषौ सति ।
वैष्णवः पारणं कृत्वा तप्तमुद्राञ्च धारयेत् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तिनर्द्विजे ।
कुर्व्वन्नात्मार्पणं तप्तमुद्राभिर्दैहमङ्कयेत् ॥*॥
तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे ।
चक्रादिधारणं पुंसां परं सन्तत्वेदनम् ।
यातिब्रह्मनिमित्तं हि वलयादिविभूषणमिति ॥*
अथ तप्तमुद्राधारणनिमित्तता । वायुपुराणे ।

अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः ।
धारयेत् सर्व्ववर्णानां हरिसालोक्यविच्छये ।"
ब्रह्मखण्डे ।
छत्वा धातुमयीं मुद्रां तापयित्वा खकां तनूम् ।
चक्रादिचिह्नितां भूप ! धारयेद्वैष्णवो नरः ॥
नारदीयपञ्चरात्रे ।
द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
हरेः सुदर्शनं तप्तं धारयेत्सिद्धिमक्षयः ॥
सौपर्णे च श्रीभगवद्गरुडसम्वादे तप्तमुद्राप्रकरणे ।
गरुडस्तप्तविप्रेषु सर्व्ववर्णेष्वयं विधिः ।
विप्रो वा क्षत्रियो वापि वैश्यः शूद्रस्तथैव च ॥
पाद्मे ।
अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम् ॥
किञ्च । तत्रैवोत्तरखण्डे श्रीशिवोमासम्वादे ।
शङ्खचक्राङ्कनं कुर्य्याद्ब्राह्मणो बाहुमूलयोः ।
हुताग्निनैव सन्तप्य कर्म्मणापापशुद्धये ॥
चक्रं वा शङ्खचक्रे वा तथा पद्मायुधानि वा ।
धारयित्वैव विधिवद्ब्रह्मकल्पे समारभेत् ॥*॥
किञ्च । तत्रैव ।
अकृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् ॥
किञ्च ।
न तस्य किञ्चिदन्नीयादपि ब्रह्मसहस्रिणः ।
सर्व्ववेदविदो वापि सर्व्वशास्त्रविशारदः ॥
अकृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ॥
किञ्च ।
तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विशेषतः ।
औतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्धेः तथैव च ॥
हरेः पूजाधिकारार्थं चक्रं सर्व्वं विधीयतः ।
वैष्णवस्य विशेषार्थं भक्तिसिद्धेः विशेषतः ॥
किञ्च ।
उपवीतादिवद्ब्राह्म्याः शङ्खचक्रादयस्तथा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥*॥
स्मृतयश्च । यो ह वै सुशोभनौ वैष्णवौ धर्म्मानसुतिष्ठमानोऽग्निनाचक्रं धत्ते । अग्निर्वै सहस्रारः सहस्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति ॥

चक्रं बिभर्त्ति वपुषाभितप्तं
वलं देवानामूर्जितस्य विष्णोः ।
स इति नाकं दुरितं विधूय
विशन्ति यद्यतयो वीतरागा इति ॥"

ऋक्परिशिष्टे । अतप्ततनुर्नतदामो अश्नुतेऽश्नुता सह इद्दह्नस्तत्समाशतेति यजुः ॥ ऋग्वेदीयाश्वलायनशाखायाञ्च ।

प्रतप्तिश्चोरजचक्रे सुतप्ते
जन्माम्भोधिं वर्त्तते चर्क्वशीकाः ।
मूले बाहोर्द्धतेऽन्ये पुराणा
लिङ्गान्यन्ये तप्तायुधान्यर्चयन्ते इति ।
छन्दोगपरिशिष्टे । यद्दोषाच यज्ञवल्क्यशतपुमानात्महिताय प्रेम्णा हरिमर्चयेत् । शुद्धो कर्मौवैर्धर्म्माख्यन्नेम्यभिधाधत्ते इति श्रुतयो स्मृतिः ॥

अथर्व्वपरिशिष्टे तप्तचक्रादिप्रकरणे ।

देवासो यत्र वितनेन बाहुना
सुदर्शनेन प्रयताः स्वर्गमायन् ।
येनाङ्किता मनवो लोकसृष्टिं
वितन्वते ब्राह्मणास्तद्वदन्तीति ॥*॥

किञ्च । पाद्मे श्रीशिवेन तप्तमुद्राप्रसङ्गे ।

विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्व्वकर्म्मसु ।
विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्ज्जयेत् ॥
नारदीये तप्तमुद्राप्रसङ्गे ।

श्रीवत्सचक्राङ्कविहीनगात्रः
ब्रह्मज्ञानतुल्यः पुरुषोऽथ नारी ।
दृष्ट्वा नरस्तं नृपते ! सवासाः
स्नात्वा समर्च्चेद्धरिमङ्ग सद्य इति ॥*॥

यद्यच्च वेङ्कटाचार्य्यपादप्रभृतिभिर्ब्रुधैः ।
स्मृतयः स्मृतयोऽप्यत्र विख्याता लिखिताः परैः ॥
अतश्चैव तदनादरे दोषाः । पाद्मे ।

तप्तचक्राङ्कितं दृष्ट्वा ये निन्दति नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥
अग्निपुराणे च । दशरथहतपुत्रविप्रविलापे ।

शिलाबुद्धिः स्मृता किंवा प्रतिमायां हरेर्म्मया ।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥
तन्मद्राङ्कितदेहस्य चेतसा नादरः कृतः ।
येन कर्म्मविपाकेन पुत्रशोको ममेदृशः ॥*॥
अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे ।

अशुचिर्म्लेच्छनाचारः सर्व्वधर्म्मबहिष्कृतः ।
प्रतप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः ॥
वाराहे तप्तमुद्राधारणप्रसङ्गे ।

म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा क्रोशे मम चेत्रं वसुन्धरे ! ॥
ब्रह्मखण्डे ।

आयुधैर्व्वैष्णवैः सर्व्वैस्तापितैः स्वतनुं यदि ।
चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम् ॥
पाद्मे च तत्रैव ।

अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः ।
ब्रह्मा यमपुरं घोरं यान्ति विष्णोः परं पदम् ॥
हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम् ।
तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अकृत्वा जपकर्म्मं संसाराम्बोधभाग्भवेत् ॥
अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः ।
ते सर्व्वे पापनिर्म्मुक्ता यान्ति विष्णोः परं पदम् ॥
किञ्च ।

अप्राप्ता महालाभो विष्णुचक्रेण लाञ्छिताः ।
विष्णुचिह्नविहीनास्तु प्राप्ताः पतिताः स्मृताः ॥
इति ॥

इत्थं निर्व्वेदवचनं निर्म्मूलं सदनादृतम् ।
वलक्षं यच्च तत् सन्यक्त्विध्यभावादितत्परम् ॥*॥
अथ तप्तमुद्राधारणविधिः ।

तप्तमुद्राधारणार्थमुपचारेषु पञ्चभिः ।
स्नानमभ्यर्च्च संपूज्य चक्रमुद्रौ तथा नमेत् ॥
तत्र मन्त्रः ।

सुदर्शन ! नमस्तेऽस्तु पाञ्चजन्य नमोऽस्तु ते इति ।

अग्निमभ्यर्च्य मूलेन हुत्वा चाज्याहुतीः शतौ ।
चक्रशङ्खगदादीनि शस्त्राण्यस्त्राणि प्रतापयेत् ।
तत्तन्मन्त्रैरथावाह्य तान्यभ्यर्च्य प्रणम्य च ।
गुरुं कृत्वा च संवन्द्य भक्त्या विज्ञापयेदिदम् ।
उच्छिष्टभोजनादेव किङ्करः शरणागतः ।
तप्तचक्रगदादीनि तवाङ्गानीह धारये । इति ।

अथ चक्रादीनामावाहनादिमन्त्रः ।

ओम् नमो भगवते सुदर्शनाय निर्दारितसकल-रिपुव्रजाय भगवत्प्रायणकराम्भोरुहस्पर्श-दुर्ललिताय ।
एह्येहि त्वं वहस्वार चक्रराज सुदर्शन ! ।
यज्ञभागं प्रयच्छस्व पूजामेव नमो नमः ॥
ओम् नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरधीरध्वन्याकुलीकृतकौरववाहिनीनादाय त्रिरेखादधिवर्णाय त्रिप्रणवात्मने ।
एह्येहि पाञ्चजन्य ! त्वं नारायणकरस्थित ! ।
यज्ञभागं प्रयच्छस्व पूजामेव नमो नमः ॥
ओम् रं खं मं नं पाञ्चजन्याय नमः ॥ ओम् भगवते खड्गाय नन्दकाय त्रैलोक्यपाविधाय जयिने वज्रवज्रसुरासुरस्त्रुरीनेत्रोत्पलार्चिताय ॥
एह्येहि खड्गराज ! त्वं नन्दकाख्य सुरार्चित ! ।
यज्ञभागं प्रयच्छस्व पूजामेव नमो नमः ॥
ओम् खड्गाय नमः ॥ ओम् नमो भगवते कौमोदक्यै गदायै दानवेन्द्रनिकृन्तनायै भगवद्-भट्टारकवासुदेवजालिताये ।
एह्येहि त्वं गदे ! देवि कौमोदक्यायुधेश्वरि ! ।
यज्ञभागं प्रयच्छस्व पूजामेव नमो नमः ॥
ओम् रं सं चं कं खं गदायै नमः ॥ एवं पञ्चाय नमः । शङ्खाय शार्ङ्गाय नमः । इति ॥ * ॥

अथ धारणमन्त्रः ।

सुदर्शन ! महाज्वाल कल्पकोटिसमप्रभ ! ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥
तथा ।
पाञ्चजन्य ! विषज्वालाभयङ्करपापतक्षक ।
पाहि मां पापिनं घोरसंसारार्णवपातिनमिति ॥
इत्यनुधारयन् मन्त्रं दक्षिणादिक्रमेण तु ।
भुजयोश्चक्रपूर्वाणि शस्त्राण्यस्त्राणि धारयेत् ॥
कलत्रादिपरीवारान् निजान् सर्वांश्च वैष्णवः ।
भगवत्प्रपेयन् तप्तमुद्राभिस्ताभिरङ्कयेत् ॥
तथा च । वाराहे ।
अङ्कयेत्तप्तचक्राद्यैरात्मनो बाहुमूलयोः ।
कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदे ॥
किञ्च ।
आयुधं विधिवत् कृत्वा मन्त्रायुधविधानतः ।
तत्तन्मन्त्रैश्च मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक् ॥
ललाटे च गदा धार्या नाहिं चापं शरस्तथा ।
नन्दकश्चैव हस्तेषु शङ्खश्चैव सुखड्गके ॥
किञ्च ।
दक्षिणे तु भुजे विप्रो विश्वाहे सुदर्शनम् ।
सव्ये च शङ्खं विश्वाहेति मन्त्रविदो विदुः ॥
अथ चक्रादिप्रतिष्ठातिक्रमम् । नवमन्त्रमन्त्र-राजे ।

सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा ।
चक्रं कृत्वा तु मेधावी धारयेत् विधिवच्च इति ॥
एवमेव प्रयोगार्थं द्वारयन्त्रं भगवत्परैः ।
तप्तमुद्रा धृतं धार्या द्वारकायां विशेषतः ॥

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

तप्तरूपकं, क्ली, (तप्तं वह्निशोधितं रूपकं रूप्यम् ।) शुद्धरौप्यम् । इति राजनिर्घण्टः ॥

तप्तभूर्मिकुड्यं, क्ली, (तप्ता अग्निमयी भूर्मिः भौमप्रतिमूर्तिर्यत्र । तथाविधं कुड्यं यस्मिन् ।) नरकविशेषः । इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥

तप्तसुराकुड्यं, क्ली, (तप्तायाः सुरायाः कुल्यमिव ।) नरकविशेषः । इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥

तम, उ इर् भ य खेदे । इच्छायाम् । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) उ, तमित्वा तान्त्वा । इर्, अतमत् अतमीत् । अस्मात् पुषादित्वात् निष्ठां ङ इत्यन्ये । भ य, ताम्यति लोकः उत्पन्नः स्यादित्यर्थः । इति दुर्गादासः ॥

तमं, क्ली, (ताम्यत्यनेनेव वा । तम + अपादाने करणे वा संज्ञायां घः ।) अन्धकारः । इति शब्दरत्नावली ॥ पादाग्रम् । इति शब्दचन्द्रिका ॥

तमः, पुं, (ताम्यत्यनेनेति । तम + संज्ञायां घः ।) तमोगुणः । इत्यमरटीकायां रायमुकुटः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥ (राहुः । इत्यमरः ।१।३।२६। यथा, ज्योतिषे होरायाम् । "श्रुतमनुधनजैरिति । कितवस्त्रमखेति वराहः ॥" इति उद्वाहतत्त्वटीकायां उद्-धृतवृत्तः । ४ । १८८ ॥)

तमः, [स्] क्ली, (ताम्यत्यनेनेति । तम + "सर्व-धातुभ्योऽसुन् ।" उणा० । ४ । १८८ । इति असुन् ।) प्रकृतेर्गुणविशेषः । यथा,—

"सत्त्वं रजस्तम इति द्रव्यस्थाः पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्तन्त आत्मनि ॥
प्रभूतत्त्व यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याद्धाने तपसि यद्रतिः ॥
यदा कर्मसु कार्य्येषु भक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्मणाञ्चापि काम्यानां द्वापरस्तदनस्तमः ॥
यदा मृषातृतं तन्द्री निद्राहिंसादिविधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"

इति गारुडे ९२० अध्यायः ॥ * ॥

अपि च ।

"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ! ॥
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ! ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ! ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ! ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥
कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"

इति श्रीभगवद्गीतायाम् । १४ । ८ १८ ॥

तत्तु आवरकं मोहहेतुः । इत्यमरभरतौ ॥ अस्य कार्य्यं संहारः । इति श्रीधरस्वामी ॥ तस्य धर्म्मो यथा । प्रमादः १ मोहः २ भयम्३ क्लान्तिः ४ विषादः ५ शोकः ६ अरतिः ७ अगार्य्यता ८ । इति मोक्षधर्म्मः ॥ श्रमः ९ तन्द्रा १० । इत्यग्निपुराणे ॥ अन्धकारः । (यथा, महाभारते । १ । १०५ । १० ।

"तमसा लोकमावृत्य नौगतामेव भारत ! ॥")

तत्पर्य्यायः । तमसम् २ निद्राचर्म्म ३ नीलपङ्कम्४ रजोवर्म्म ५ दिवान्धकः ६ वियद्भूतिः७ खलुक्८ दृग्घः ९ । इति त्रिकाण्डशेषः ॥ रजोरसम् १० दिनान्तरम्११ अन्धकम्१२ । इति शब्दरत्नावली ॥ अमरोक्तपर्य्यायोऽन्धकारशब्दे द्रष्टव्यः ॥ श्लोकः । इति मेदिनी । से, २४ ॥ पापम् । इति हेमचन्द्रः ॥ (राहुः । इति मेदिनी । से, २४ । यथा, रघुः । ८ । ३० ।

"निमिमीव नरोत्तमप्रिया
कृतचन्द्रा तमसेव कौमुदी ॥")

तमङ्कः, पुं, (तमकः । मशकः । इति हेमचन्द्र-त्रिकाण्डशेषौ च ॥

तमतः, त्रि, (तम + "शृन्द्रद्रिभ्रियजिपर्व्विपच्चमि-तमीति ।" उणा० । ३ । ११० । इति अतच् ।) दृषितः । वाञ्छितः । इत्युणादिकोषः ॥

तमप्रभः, पुं, (तम इव प्रभाऽस्य अस्मिन् वा ।) नरकभेदः । इति हेमचन्द्रः ॥

तमरं, क्ली, (तमं रातीति । रा + कः ।) वङ्गम् । इति हेमचन्द्रः ॥

तमराजः, पुं, (तम इव राजते । राज + अच् ।) शुक्लरोगविशेषः । नवात इति ख्यात इति केचित् । तत्पर्य्यायः । श्लेष्मकः २ । तस्य गुणः । दृष्ट्या-ध्वरदाहरक्तपित्तनाशित्वम् । इति राजवल्लभः ॥

तमसं, क्ली, (तम + "अत्यविचमितमीति ।" उणा० । ३ । ११० । इति असच् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ नगरम् । इति संक्षिप्त-सारे उणादिवृत्तिः ॥

तमसः, पुं, (तम + असच् ।) कूपः । अन्धकारः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तमसा, स्त्री, (तमइव जलमस्यस्याः । अच् टाप् च ।) नदीविशेषः । इति संक्षिप्तसारेउणादि-वृत्तिः ॥ (यथा, महाभारते । ३ । २२१ । २४ ।

"तमसा नर्म्मदा चैव नदी गोदावरी तथा ॥")

तमस्तति:, स्त्री, (तमसस्तति: षष्ठ्यु: ।) अन्धकारसमूह: । इति तमिस्राशब्दार्थे मेदिनी ॥

तमस्विनी, स्त्री, (तमो विद्यतेऽस्यामिति विनि: ङीप् च ।) रात्रि: । (यथा, महाभारते । ४ । २१ । ३८ ।

"अदृश्यमानस्तस्याद् तमस्विन्यामनिन्दिते ! ।
गोगोचिलमिवाक्रम्य योधयिष्यामहं शिर: ॥") हरिद्रा । इत्यमर: । २ । ६ । ४१ ॥

तमा, स्त्री, (तमोऽस्यस्यामिति । तम + अच् टाप् च ।) रात्रि: । इति हेमचन्द्र: । तमालवृक्ष: । इति शब्दचन्द्रिका ॥

तमा:, [स्] पुं, राहु: । इति मेदिनी । से, २४ ॥

तमाकं, स्त्री, (तम्यते काङ्क्ष्यते इति । तमु काङ्क्षायाम् + "तमिविशिविधिभ्यो ।" उणा । १ । ११७ । इति काकन् ।) पचकम् । इति राजनिर्घण्टः ॥

तमाक:, पुं, (तमु काङ्क्षायाम् + काकन् ।) वृक्षविशेष: । तत्पर्य्यायः । कालस्कन्धः २ तापिञ्छः ३ । इत्यमरः । २ । ४ । ६८ ॥ तापिञ्छः ४ । इति भरतः ॥ नीलतालः ५ तमालकः ६ नीलध्वजः ७ कालतालः ८ महातरुः ९ । (यथा, भागवते । २ । ११ । ३३ ।

"तमालनीलं सितदन्तकोत्या
क्वासतृप्तिघ्नमं गजलीलयाङ्ग ॥")

अस्य गुणाः । मधुरत्वम् । वल्यत्वम् । दृष्यत्वम् । स्निग्धिरत्वम् । गुरुत्वम् । कफपित्तव्रणदाहश्रमभ्रान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ तिलकम् । (यथा, कुट्टनीमते । १६ ।

"यस्यासपवनधौर्या तमालपत्राणि युवतिवदने च।
नखरप्रहाररचितं तन्नीवाद्येषु सुरतकलहेषु ॥"

तमालस्यापि पुष्पदृष्टयः युवतिवदनपक्षे तिलकमिति ।) खड्गः । वरुणवृक्षः । इति मेदिनी । के, ६० ॥ तमालदिरः । इति शब्दचन्द्रिका ॥ दृष्यमेदें वंशत्वचि च पुं स्त्री । इति जिह्वादिवर्गे अमरभरतौ ॥

तमालकं, स्त्री, (तमालपत्रवत् वर्णेन कायतीति । के + कः ।) सुगन्धिद्रव्यभेदः । इति चिकाण्डशेषः ॥ (तमालमेव । स्वार्थे कन् ।) पचकम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तमालक:, पुं, स्त्री, (तमाल एव । स्वार्थे कन् ।) तमालवृक्षः । (यथा, रामायणे । २ । ६१ । ५० ।

"ततः सरजताकाश्च तिलकाः सतमालकाः ।
प्रहृष्टाश्चाभवन्सर्वे शुभा भूताय वामनाः ॥") वंशत्वक् । इति शब्दरत्नावली ॥

तमालपत्रं, क्ली, (तमालस्य पत्रमिव वर्णोऽस्यास्तीति । अर्शं आदित्वात् अच् ।) तिलकम् । पचकम् । (यथास्य पर्य्यायाः ।

"पचन्तमालपत्रञ्च तथा स्यात् पत्रनामकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) तमालवृक्षः । इति मेदिनी । रे, १०२ ॥ (तमालस्य पत्रम् । यथा, रघुः । ६ । ६४ ।

"तमालपत्राभरणास्तु रन्तुं
प्रसीद शब्दापयसालयेषु ॥")

तमालिका, स्त्री, (तमालाः सन्त्यत्र । तमाल + ठन् ।) तामलिप्तदेशः । इति चिकाण्डशेषः ॥ तान्त्रवल्ली । भूम्यामलकी । इति राजनिर्घण्टः ॥

तमालिनी, स्त्री, (तमालो तमालवर्णोऽस्यस्या इति । इनिः ततो ङीप् ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ तामलिप्तदेशः । इति हेमचन्द्रः ॥

तमाली, स्त्री, (तम + कालन् । गौरादित्वात् ङीष् ।) तान्त्रवल्ली । वरुणवृक्षः । इति राजनिर्घण्टः ॥

तमिः, स्त्री, (तम्यते म्लायतेऽत्र । तम + "वर्षधातुभ्य इन् ।" उणा । ४ । ११७ । इतीन् ।) रात्रिः । इत्यमरटीकायां भरतः ॥

तमिस्रं, स्त्री, (तमोऽस्यत्र । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः । यद्वा, तमिस्रा अस्त्यात्रयत्वेनास्य अच् ।) अन्धकारम् । इत्यमरः । (यथा, महाभारते । ४ । २१ । १७ ।

"यदेतन्नगनागारं मत्स्यराजेन कारितम् ।
दिवाच कन्या वृत्यन्ति रात्रौ यान्ति यथासुखम् ।
तमिस्रे तत्र गच्छेयु र्मन्यन्नाक्षत्र जानते ॥") क्रोधः । इति मेदिनी । रे, ६१ ॥ (नरकविशेषः । यथा, भागवते । ४ । ७ । ४४ ।

"अमङ्गलाभाच तमिस्रसुखं
विपर्य्ययः केन तदेव कस्यचित् ॥")

तमिस्रपक्षः, पुं, (तमिस्रमन्धकारं ततुल्यधामः पक्षः ।) कृष्णपक्षः । यथा, तमिस्रपक्षचुटिकूटभक्षितमिति श्रीहर्षः ॥

तमिस्रा, स्त्री, (तमोबहुलमस्त्यस्याम् । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः ।) अन्धकाररात्रिः । कृष्णपक्षनिशा । इत्यमरः ॥ तमोयुक्तरात्रिमात्रम् । इति रायमुकुटः ॥ दर्शरात्रिः । इति वाचस्पतिः ॥ तमस्तति: । इति मेदिनी । रे, १६१ ॥ (यथा, रघुः । ५ । १३ ।

"सूर्य्ये तपत्यावरणाय दृष्टे:
कल्पेत लोकस्य कथं तमिस्रा ॥")

तमी, स्त्री, (तमिः क्षुदिकारादिति वा ङीष् ।) रात्रिः । (यथा, माघे । ६ । २३ ।

"दहशेऽपि भास्करदयाद्रि न यः
स तमीं तमोभिरभिगम्य ततान्त ॥") हरिद्रा । इत्यमरः । २ । ६ । ४१ ॥

तमीघ्नः, पुं, (तमोऽन्धकारं मोहमज्ञानं वा हन्तीति । हन + टक् ।) वह्निः । सूर्य्यः । (यथा, महाभारते । ७ । १४३ । १२६ ।

"स देवराजूभिव देवराजः
किरीटमाली वपुषा समन्तात् ।
यथा तमांस्युदितस्तमोघ्नः
पूर्व्वप्रतिज्ञां समवाप्य वीरः ॥") वन्यः । पुष्पः । वेश्यवः । शम्भुः । इति मेदिनी । घे, ७१ ॥

तमोज्योतिः, [स्] पुं, (तमसि ज्योतिर्यस्य ।) ज्योतिरिङ्गणः । इति शब्दरत्नावली ॥

तमोदुत्, [द्] पुं, (तमोऽन्धकारं नुदतीति ॥ नुद् + क्विप् ।) अग्निः । सूर्य्यः । चन्द्रः । दीपः इति शब्दरत्नावली ॥ (तमोनाशके, त्रि । यथा महाभारते । १३ । १६६ । ८ ।

"एवमुक्तस्तदात्रिर्वै तमोनुदमवच्छ्रुतौ ।
अभवत् सौम्यभावाच्च सोमवत् प्रियदर्शनः ॥")

तमोनुदः, पुं, (तमोऽन्धकारं नुदतीति । नुद् + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) सूर्य्यः । इति शब्दरत्नावली ॥ (अग्निः । चन्द्रः । इति त्रिकः ॥ यथा, रघुः । ३ । ३३ ।

"नरेन्द्रकन्यामासाद्य वसुपतिं
तमोनुदं दक्षसुता इवाबभुः ॥"

प्रकृतिप्रेरकः । यथा, मनुः । १ । ६ ।

"ततः स्वयम्भुर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥")

तमोपहः, पुं, (तमोऽन्धकारं अपहन्तीति । अप + हन् + "अपे क्रोशतमसोः ।" ३ । २ । ५० । इति डः ।) सूर्य्यः । चन्द्रः । बुद्धिः । अग्निः । इति मेदिनी । हे, ३० ॥ (अज्ञाननाशके, त्रि । यथा, किरातार्जुनीये । ५ । २२ ।

"आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥")

तमोभित्, [द्] पुं, (तमस्तिमिरं भिनत्ति खद्योतिःप्रकाशनेन नाशयतीति । भिद् + क्विप् ।) खद्योतः । इति शब्दमाला ॥

तमोमणिः, पुं, (तमसि अन्धकारे मणिरिव ।) खद्योतः । इति चिकाण्डशेषः ॥ गोमेदकमणिः । इति राजनिर्घण्टः ॥

तमोलिप्ती, स्त्री, (तमसा लिप्यते इति । लिप + क्तः निपातनात् ङीप् ।) देशविशेषः । तमोलुक इति भाषा ॥ तत्पर्य्यायः । तामलिप्तः २ वेलाकूलम् ३ तमालिका ४ । इति शब्दरत्नावली ॥ तामलिप्तम् ५ तामलिप्ती ६ । इति चिकाण्डशेषः ॥ दामलिप्तम् ७ तमालिनी ८ ताम्रपूः ९ विष्णुगृहम् १० । इति हेमचन्द्रः ॥

तमोविकारः, पुं, (तमसेव विकारो यत्र ।) रोगः । इति राजनिर्घण्टः ॥

तमोहरः, पुं, (तमो हरतीति । हृ + अच् । तमस्य हर इति वा ।) चन्द्रः । इति शब्दरत्नावली ॥ (अग्निः । सूर्य्यः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

तम्या, स्त्री, (तम्यति गच्छतीति । तम्म + अच् । पृषोदरादित्वात् साधुः ।) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तम्म, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । तम्मति । इति दुर्गादासः ॥

तम्मा, स्त्री, (तम्मति गच्छतीति । तम्म + अच् ।) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तय, ङ गतौ । रक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, तयते । इति दुर्गादासः ॥

तरः, पुं, (तृतरये + "ऋदोरप् ।"३।३।५७। इति अप् ।) तरणम् । (यथा, मनुः । ८। ४०४। "पथं यानं तरे दाप्यं पौरुषोऽर्घपथं तरे ।") लङ्घनात् । इति मेदिनी । रे, ४० । दक्षः । इति भूरिप्रयोगः । ("तरतमौ द्विबहूनामेकोत्कर्षे ।" इति मुग्धबोधसूत्रात् प्रत्ययविशेषश्च ।)

तरः, [स्] क्ली, (तृ प्लवनतरणयोः + करणादौ ययायथं असुन् ।) बलम् । (यथा, रघुः । ११ । ७७ ।

"तिष्ठतु प्रथनमेवमप्यहं
तुल्यबाहुतरसा जितस्त्वया ।")

वेगः । तीरम् । प्लवगः । इति शब्दरत्नावली ।

तरक्षुः, पुं, (तरक्षु + पृषोदरात् उलोपः ।) तरक्षुः । इत्यमरटीकायां भरतः । (यथा, हरिवंशे । ३ । ६ । २८ । शैलकूटेस्तरक्षुर्वा व्याघ्रो व्याघ्रगणाधिपः ।)

तरक्षुः, पुं, (तरं बलं मार्गं वा क्षिणोति । क्षिण हिंसायाम् + मितद्वादित्वात् कुः ।) व्याघ्रविशेषः । नेकड़े बाघ इति भाषा । तत्पर्य्यायः । तर्क्षुः २ ऋष्यादनः ३ तरक्षुकः ४ । इति शब्दरत्नावली । (यथा, हरिवंशे । १६३।१४। "ततो मायां परां चक्रे देवश्रेष्ठः प्रतापवान् । सिंहान् व्याघ्रान् वराहांश्च तरक्षून् ऋक्षवानरान् ।")

तरक्षुकः, पुं, (तरक्षु + स्वार्थे कन् ।) तरक्षुः । इति शब्दरत्नावली ।

तरङ्गः, पुं, (तरति प्लवते इति । तृ + "तरत्यादिभ्यश्च ।" उणां । १ । ११६ । इति अङ्गच् ।) वायुना नाट्यादिजलस्य तिर्य्यगूर्द्ध्वप्लवनम् । ढेउ इति भाषा । तत्पर्य्यायः । भङ्गः २ ऊर्म्मिः ३ वीचिः ४ । इत्यमरः । ऊर्म्मी ५ वीची ६ विचिः ७ लहरी ८ हली ९ विलिः १० । इति भरतः । लहरिः ११ । इति सारसुन्दरी । चलजता १२ भङ्गिः १३ । इति शब्दरत्नावली । उत्कलिका १४ ऊर्म्मिका १५ । इति जटाधरः । वस्त्रम् । इत्यादीनां समुत्पादः । इत्यु-आदिकोषः ।

तरङ्गिणी, स्त्री, (तरङ्गो वीचिरस्त्यस्या इति । तरङ्ग + "अत इनिठनौ ।" इति इनिः ।) नदी । इत्यमरः । १ । १०।२०। (यथा, माघः । "तरङ्गिणी वेगिरिवायता भुवः ।")

तरणं, क्ली, (तृ + भावे ल्युट् ।) प्लवपूर्व्वकदेशान्तरगमनम् । इति दुर्गादासः । पारगमनम् । उत्तारणम् । यथा, मोक्षद्वारे । ६ ।

"यद्यपि बहवो भ्रान्तिपरेका
भवति भवार्णवतरणे नौका ।"

तरणः, पुं, (तीर्य्यतेऽनेनेति । तृ + करणे ल्युट् ।) भेलकः । इति चिकित्साशास्त्रे । स्वर्गः । इति शब्दचन्द्रिकायाम् ।

तरणिः, स्त्री, (तीर्य्यतेऽनयेति । तृ + "वर्षितृषृधमीति ।" उणां । २ । १०३ । इति अनिः ।) नौका । (यथा, आर्य्यासप्तशत्याम् । ३६० ।

"आमशुषावति तरणिस्तदपि गुणाकर्षतरणे-
यम् ।")

हेतुकुमारी । इत्यमरः । ३ । २ । ७२ ।

तरणिः, पुं, (तरति पापमनेनेति । तृ + अनिः ।) सूर्य्यः । (यथा, देवीभागवते । ३ । ६ । २८ । "इत्युक्त्वा तरणिः क्रुद्धो तत्क्षणस्त्रां सुलज्जिताम् । शप्त्वा जगाम देवेशो वरं दत्त्वाभिवाञ्छितम् ।") अर्कवृक्षः । इत्यमरः । भेलकः । (यथा, वोपदेवप्रणीतशतश्लोकः ।

"सोऽयं व्याकरणार्णवैकतरणिर्व्याख्यातुमैच्छिन्मतिं-
जौवात् कोविदमर्म्मपर्व्वतपविः श्रीवोपदेवः
कविः ।")

किरणः । इति हेमचन्द्रः ।

तरणिपेटकः, पुं, (तरणिः पेटक इव ।) काष्ठादिवाहिनी । इति जटाधरः ।

तरणिरत्नं, क्ली, (तरणिः सूर्य्यस्तत्प्रियं रत्नम् ।) माणिक्यम् । इति राजनिर्घण्टः ।

तरणी, स्त्री, (तरणिः । ऋदिकारादिति वा ङीष् ।) नौका । इति शब्दरत्नावली । पद्मचारिणी । इति शब्दचन्द्रिका । हेतुकुमारी । इत्यमरटीकायां भरतः ।

तरन्तः, पुं, क्ली, (तरति प्लवत इति । त प्लवनतरणयोः + बाहुलकात् अन्तन् ।) वह्निप्रीक्षणबल्लकाष्ठादि । प्लवः । नौका । इति मेदिनी । ते, २६ । कुम्भतुम्बीरभादिवचरः । इति शब्दरत्नावली ।

तरन्तः, पुं, देशविशेषः । इति शब्दरत्नावली ।

तरन्तपादा, स्त्री, (तरन्तः प्लवनशीलः पादः प्रायेण तुरीयांशो यस्याः ।) नौका । इति शब्दरत्नावली ।

तरन्ती, स्त्री, (तरत्यनयेति । त + अन्तन् । गौरादित्वात् ङीष् ।) नौका । इति शब्दरत्नावली । (तरन्ता । इति हारावलीधृतपाठः । ५५ ।)

तरन्त्, [द्] स्त्री, (तरत्यनेनेति । त + वाहुलकादिः ।) प्लवः । (तरतीति । तृ + कर्त्तरि अदिः ।) कारण्डवपक्षी । इति मेदिनी । दे, २६ ।

तरन्दी, स्त्री, कण्टकिवृक्षभेदः । तत्पर्य्यायः । तारन्दी २ तीव्रा ३ खर्व्वुरा ४ रक्तबीजका ५ । अम्ला गुर्व्वाः । तिक्तत्वम् । मधुरत्वम् । गुरुत्वम् । वल्यत्वम् । कफपित्तघ्नत्वञ्च । इति राजनिर्घण्टः ।

तरन्तः, पुं, (तरतीति । त + "तृभूवहिवसीति ।" उणां । २ । १२८ । इति झच् ।) भेलकः । आचारः । (तीर्य्यते इति । + कर्म्मणि झच् ।) वसुमः । इत्यादिकोषः ।

तरन्नी, स्त्री, (तीर्य्यतेऽनयेति । तृ + झच् । ततो ङीष् ।) तरिः । इत्यादिकोषः ।

तरप्यं, क्ली, (तृ + भावे क्यप् । तरस्तरणं तस्य पण्यम् ।) क्षारः । इत्यमरः । १ । १० । ११ । नौका भाड़ा इति भाषा ।

तरम्भुजं, क्ली, (तरं तरणं अम्भुवत् जायतेऽत्र । जन + बहुलवचनात् डः ।) फलविशेषः । तरमुज इति ख्यातः । यथा, उत्तरकामाख्यातन्त्रे ।

"ज्येष्ठे मासि महेशानि ! पौर्णमास्यां निशार्द्धके ।
दृष्ट्वातुरा महाकाली भ्रमन्ती पिङ्गलानने ।
तज्ज्ञात्वा ब्रह्मया तस्यै फलं दत्तं तरम्भुजम् ।
तत्फलभक्षणात्तृप्ता वरदा सा हरप्रिया ।
यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगम् ।"

तरलः, पुं, (तृ + "तृषादिभ्यश्चित् ।" उणां । १ । १०८ । इति कलप्रत्ययश्चित् ।) हारः । हारमध्यमणिः । (यथा, महाभारते । ८ । ४३।१६ ।

"प्रकीर्णका विप्रकीर्णाश्च राजन् !
प्रवालमुक्तातरलाश्च हाराः ।")

तलम् । इत्यजयपालः । (जनपदविशेषः । तद्देशवासिनि बहुवचनान्तः । यथा, महाभारते । ८ । ८ । २० । [नृपि ।")

"वतृषान् कलिङ्गान् तरलानश्मकान्तृषिकान्-

तरलः, त्रि, (तृ + कलच् ।) चलः । (यथा वैद्यके । ५ । २४ ।

"आः स्वभावमधुरैरशुभावै-
रावकैरतितरां तरलाः स्युः ।")

खिञ्जः । भास्करः । इति मेदिनी । ले, ६५ । मध्यभूम्यन्नभम् । इति धरणिः । द्रवीभूतश्च ।

तरलशोचना, स्त्री, (तरले चञ्चले शोचने यस्याः ।) चञ्चलनयना नारी । इति हेमचन्द्रः ।

तरला, स्त्री, (तृ + कलच् टाप् च ।) यवागूः । सुरा । इति मेदिनी । ले, ६६ । मधुमक्षिका । इति हेमचन्द्रः ।

तरलितं, त्रि, (तरलं तारल्यमस्य जातम् । तरल + इतच् । तरल इवाचरति तारलं करोतीति । तरल + क्विप् + क्विच् + क्त इति केचित् ।) जाततारल्यम् । तत्पर्य्यायः । प्रेङ्खोलितम् २ लुलितम् ३ प्रेङ्खितम् ४ हृतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः । (यथा, गीतगोविन्दे । १२ । १५ ।

"बालोल: केशपाशस्तरलितमलके: खेदलोलौ कपोलौ ।")

तरवारिः, पुं, (तरं समागतविपक्षवलं वारयतीति । तृ + क्विप् + इन् ।) खड्गः । तरवार इति भाषा । इति हेमचन्द्रः । ३ । ४४५ ।

अथ खड्गपरीक्षा ।

"अङ्गं रूपं तथा जातिर्नेचारिष्टे च भूमिका ।
अभिमानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम् ॥
अभिन्ने छिद्यते याहक् विभिद्य घटिते तथा ।
यदेव छिद्यते चिह्नं तदङ्गं संप्रचक्षते ॥
गोलक्षत्रादिकं खड्गे रूपमित्यभिधीयते ।
तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते ॥
अङ्गातिरिक्तं यज्ञातिस्त्वाहार्य्यो पस्कृचकम् ।
तन्नेममिति जानीयात् खड्गे खड्गविशारदाः ॥
अङ्गातिरिक्तं खड्गादियच्छुद्धत्वापस्कृचकम् ।
तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारयम् ॥

यः खड्गे जायते ग्रन्थो नखदक्षादिनाहते ।
स ध्वनिस्तुलनामानं ज्ञानमष्टविधन्त्विदम् ॥
पश्चाद्वा निपुणैः खड्गे सम्भाव्यन्तेऽपि क्षत्रियाः।
अन्यावक्षत्रियौ ज्ञेयौ तावेव सहजाविति ॥
प्रतमङ्गानि चत्वारि रूपाणि जायतस्तथा ।
चिह्नान्नेत्राणि जानीयादरिष्टानि तथैव च ॥
भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः ।
मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः ॥"॥

अथ खड्गस्य प्रताङ्गगणना लौहार्णवे ।

"रूप्यस्वर्णगजोरुवूकदमनस्थूलाङ्गक्षणारुण-श्वेता-
म्भोजगदातिलानलकणाग्रन्थिस्थिरातेक्षिराः ।
मालाजीरकवट्पदोर्द्वमरिचश्यामाश्ववर्हाञ्जन-
क्षौद्रक्षुद्रकमक्षिकातुषयवव्रीहिक्षुमासर्षपाः ॥
सिंहीतण्डुलगोशिराशिवनखग्राहाक्षि केशोपल-
द्रोणीकाककपालपत्रतुवरीविम्बीफलीसर्षपाः ।
नीलीरक्तवचारसोनसुमनाजिङ्गीशमीरोहित-
प्रोष्ठीमारिषमार्कवाखुरतक्रिमेघाद्रिगुञ्जाप्रराः॥
दूर्वाबिल्वमसूरटुण्टुकशुटीमार्जारिकाकेतकी-
मूर्वावज्रकलायचम्पकबलान्यग्रोधवंशासनाः ।
ध्येष्ठीजालपिपीलिकानखरजः कृष्णाक्षरोम-
स्पृष्टी
कर्कन्धुर्भकुलारनालमहिषस्वच्छन्तुवक्रा इति ॥
प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः
क्रमात् ॥"

अथ तस्य चत्वारि रूपाणि ।

"नीलः कृष्णः पिशङ्गश्च धूम्रश्चेति चतुर्विधः ।
वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः ॥"

अथ चतसो जातयः ।

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः ।
जातिभेदो विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः ॥"

अथ चिह्नान्नेत्राणि ।

"चक्रं पद्मं गदा ग्रन्थो डमरुर्हुंडुरङ्कुशः ।
छत्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः ॥
कुम्भः शूलश्च शार्दूलः सिंहः सिंहासनं गजः ।
हंसो मयूरो निक्षो च दण्डनः खड्ग एव च ॥
पुत्रिका चामरं शैलः पुष्पमाला भुजङ्गमः ।
चिह्नदेतानि नेत्राणि खड्गानां कथितानि वै ॥"

अथ चिह्नदरिष्टानि ।

"छिद्रं काकपदं रेखा भिन्नं भेकश्च मूषिकः ।
विड़ालः शर्करा नीली मशको भृङ्गलक्षिके ॥
चिचिण्डः कालिका दारी कपोतः काक एव च ।
खर्परः शकली क्रोड़ी कृशपत्रकणालिके ॥
करालकङ्कक्षर्ज्जूरश्वङ्गपुच्छखनिचकम् ।
लाङ्गलं वड़िशाख्यश्च मुनिना तत्त्ववेदिना ॥
प्रोक्तोन्येतान्यरिष्टानि खड्गानां चिह्नदेव हि ॥"

अथ द्विविधा भूमिः ।

"दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत् ।"

अथाष्टधा ध्वनिः ।

"हंसकांस्याश्वटङ्कानां काकतन्त्रीखराक्षगम् ।
ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुनमुनेर्मताः ॥"

अथ द्विविधं मानम् ।

"उत्तमाधममेदेन मानं तद्विविधं भवेत् ।
इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे ॥
एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः ॥"

इति सूत्राध्यायः ॥ * ॥

तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत ॥

लौहप्रदीपे ।

"रूप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते ।
ऊर्द्धं तर्क्षुं महाश्लक्ष्णं रूप्यवच्चमुदाहृतम् ॥
एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् ॥१॥
स्वर्णरेखा वली तन्वी यङ्गमौ निकषोपमा ।
स्वर्णवच्चमिति प्राहुरायुर्लक्ष्मीजयप्रदम् ॥२॥
गजयुग्माकृतिर्भूमौ क्षणायामङ्गसम्भवः ।
गजवच्चमिति प्राहू रक्तस्वर्णे तु तद्भिधेत् ॥
ज्वरादिव्याधिग्रमनं तस्य प्रक्षालनाम्भसा ।
अपि क्षीणोऽपि भूपालस्तद्वीर्य्यात् साधयेन्
महीम् ॥३॥

एरण्डबीजप्रतिममङ्गं भूमिः सितेतरा ।
रुधुवच्चमिदं नाम्ना ग्रन्थुदर्पविषङ्करः ॥
एतस्य स्पर्शमात्रेण नरः सद्यविमुच्यते ।
महिषाख्यमिदं वज्रं केचिदाहुर्मनीषिणः ॥४॥
अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते ।
विद्याद्दमनवच्चञ्च तज्ज्ञेयं द्विविधं बुधैः ॥
नीला शुभा भवेद्भूमिस्तच्च नीला गरीयसी ।
तस्मिन् पर्य्युषितं तोयं गन्धे दमनकोपमम् ॥
तत्प्रभावान्महीपालः क्षत्रियां पृथ्वीं हि साध-
येत् ॥५"॥

प्राङ्गरस्य ।

"एका स्थूला सिता रेखा भूमिर्नीला दृढ़ा यदि ।
स्थूलाङ्गमङ्गवच्चं तद्विद्याल्लक्ष्मीयशःप्रदम् ॥
एतदुच्यते भवेच्छ्रीयः स्थूलश्चिरतरस्थितिः ।
एतं महान्तमपरे वदन्ति खड्गकोविदाः ॥६॥
दृष्टायां दृश्यते भूमौ अङ्गञ्च प्रतिबिम्बितम् ।
अङ्गवच्चं भवेत्तस्य द्विधाभूमिः सितासिता ॥७"॥

लौहप्रदीपेऽपि ।

"निरङ्गं रूप्यपत्राभमीषच्छ्यामिनिभञ्च यत् ।
दुर्लभं तन्महाश्लक्ष्णं कान्तलौहं प्रचक्षते ॥
क्षणा भूमिर्भवेत् स्वच्छा पीता वज्राङ्गसङ्गता ।
क्षणवच्चमिति प्राहुस्तदुच्यते मोह उच्यते ॥"

प्रदीपेऽपि ।

"क्षणा भूमिः सुवर्णाभमीषच्छ्यामाङ्गसङ्गतम् ।
डाहुलीवच्चकं विद्यात् कालसंज्ञमथापरे ॥८॥
अरुणं सूक्ष्ममूर्द्धस्थेदङ्गं भूमिः सितेतरा ।
अरुणाख्यमिदं वज्रं ग्रन्थुदर्पनिसूदनम् ॥
सूर्य्यांशुसदृशमात्रेण वह्निरूपां वमेत् शिखाम् ।
तस्य स्पर्शनमात्रेण पद्मकोषः स्फुटेन्निशि ॥
दुर्लभं तन्मनुष्याणां भाग्ये कुत्रापि लभ्यते ।
तदूयोजनसहस्रस्य रिष्टं नाशयति ध्रुवम् ॥९॥
श्वेताक्षिसो यदा रेखा आमूलादुपलक्ष्यते ।
श्वेताङ्गमिति तद्विद्यादृग्यजौलक्ष्मीबलप्रदम् ॥१०॥
अम्भोजदलसङ्काशमङ्गं भूमिः सितेतरा ।
अम्भोजवच्चं तज्ज्ञेयं कथितं मुनिपुङ्गवैः ॥११॥
अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा ।
गदावच्चमिदं ब्रूयात् ततुच्यते मूलसम्भवः ॥१२॥
अङ्गं क्षणातिलाकारं भूमिश्चैव सितासिता ।
तिलवच्चमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम् ॥
तत्तुच्यते तिलतैलाभा वसा प्रच्यवतेऽधिकम् ॥१३॥
धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम् ॥
अग्निवच्चमिदं ज्ञेयं ग्रन्थूनां दाहकारकम् ।
अत्र घृतोदकं न्यस्तं तप्तं भवति च क्षणात् ॥
ग्राणे वह्निं वमेद्यस्तु तथा सूर्य्यांशुसङ्गमात् ।
तत्तुच्यते बलवान् दाहो दग्धवच्च व्रणो भवेत् ॥
एतत् परमभाग्येन लभ्यते धरणीतले ।१४।
भूमिः सिता तिला वापि अङ्गञ्चेत् पिप्पली-
प्रभम् ॥
कणावच्चमिदं ज्ञेयमन्तर्दाहस्तु तत्तुच्यते ।१५।
क्षणाभूमिर्यदैवाङ्गे दृश्यते ग्रन्थिसञ्चयः ॥
ग्रन्थिवच्चमिदं ज्ञेयं वैरिपक्षविनाशनम् ।
तत्तुच्यते बलवान् दाहस्तृषा च ज्वर एव च॥१६॥
ग्रालपर्णीदलाकारमङ्गं क्षणासमुद्भिदां ।
शिरावच्चमिदं प्राहुस्तत्तुच्यते वेपथुर्भवेत् ॥१७॥
यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा ।
एतत्तित्तिरिवच्चं स्यात् तत्तुच्यते बहुवेदनम् ॥१८॥
वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते ।
मालाङ्गमिति तद्विद्यात्तस्त्रोयं गन्धवद्भवेत् ॥
अत्र तप्तोदकं न्यस्तं घृतं भवति तत्क्षणात् ।
एष दाहपरीतानामाख्यते पित्तदृतात्मनाम् ॥
भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते ।१९।
यदा क्षीरकसङ्काशमङ्गं भूमिः सितासिता ॥
एतत्क्षीरकवच्चं स्यात्तत्तुच्यते तत्क्षणाच्छ्वरः।२०।
भूमिः सितासितश्चित्रा अङ्गं भृङ्गाभमिष्यते ॥
तच्च चैक्षध्यमन्यस्तं श्लेष्मामोति केवलम् ।
एतद्भ्रमरवच्चं स्यात्तत्तुच्यते स्याद्विसूचिका॥२१॥
ऊर्द्धगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
ऊर्द्धवच्चमिदं प्राहुर्विषवेगनिसूदनम् ॥"

लौहप्रदीपेऽपि ।

"ऊर्द्धगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
लाङ्गलाङ्गन्तु तद्विद्यात् स्पर्शे तस्याहिनाशनम् ॥
२२ ॥

अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा ।
मरीचाङ्गमिदं वज्रं तत्तुच्यते कटुरक्तता ॥
ततःप्रक्षालनतोयेन नश्यन्ति पीनसादयः।२३।
यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला ॥
भुजङ्गवच्चं तद्विद्यात्तत्तुच्यते विषवद्दृशा ।
तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते ॥
एकस्यास्य प्रसादेन ततृष्णां ग्राप्नुयान्महीं नृपः ।
२४ ।

यदाश्वखुरसङ्काशमङ्गं भूमिस्तु निर्मला ॥
अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम् ।
तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति ॥
तस्य क्षालनतोयेन हयानां रोगनाशनम् ।
एतत्तुच्यते भृङ्गं मूर्च्छा दाहश्च भ्रम एव च ।२५॥
मयूरपिच्छसङ्काशमङ्गं भूमिः सितेतरा ।
वर्हाङ्गमिति तं विद्यात्तत्तुच्यते वान्तिरिष्यते ॥
सर्पाणामिह सर्व्वेषामस्य स्पर्शोऽहिघातुता ।
एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते ॥२६॥

भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत् ।
अञ्जनाक्षमिदं प्राय: सर्व्वदेवोपलभ्यते ।"
लौहप्रदीपेऽपि ।
"धारा मुग्धा भवेद्यस्य भूमि: कज्जलसन्निभा ।
क्षणरङ्गेचितं वापि विद्यात् कज्जलवच्चकम् ॥२७॥
मधुवर्णसमा भूमिरङ्गं वा मधुबिन्दुवत् ।
चौद्राक्षमिति जानीयात् जयलक्ष्मीयग्र:प्रदम् ।"
ग्रार्ङ्गधरेऽपि ।
"निच्चक्षो भवेद्यत्र रात्रिन्दिवविशेषित: ।
मधुरो मधुवर्णाभ: स खड्गो देवबल्लभ: ॥
विशेषाद्यात्र रण्यन्ति सततं मक्षिकादय: ।२८।
आसीमकोणिका यस्य क्षुद्राङ्गं कृष्णलीक्षतम् ॥
क्षुद्रवच्चकनामानं प्राह नागार्ज्जुनो मुनि: ।
इदं कृष्णलवच्चच प्राह लौहार्णवे मुनि: ॥
अस्य क्षतेषु बलवान् दाह: समवलोकित: ।२९।
यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता ॥
क्षेद: सुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत् ।३०।
अङ्गं यदा तुषाकारं या च भूमि: सितासिता ॥
तुषवच्चमिदं ख्यातं प्राह नागार्ज्जुनो मुनि: ।३१।
अङ्गं यवफलाकारं भूमि: क्षारा सिता तथा ॥
यवाङ्गमिति तं विद्यात्तत्खड्गे कल्कसम्भव: ।
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ।३२
अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा क्षतेऽतिरुक् ।
तद्व्रीहिवच्चं जानीयाच्छ्रूणां भयवर्द्धनम् ३३ ।
अतसीफलसङ्काशमङ्गं भूमि: सितासिता ।
अतसीवच्चमाहुस्तं तत्क्षते ग्लिरसो रुजा ३४ ।
यदा सर्षपगौराभमङ्गं भूमि: सितासिता ।
खरधार: खरस्पर्श: सर्षपाङ्ग: स दुर्ल्लभ: ।३५।
सिंह्याकारं भवेद्यस्य अङ्गं भूमि: सितासिता ।
सिंहीवच्चन्तु तद्विद्यात्तत्क्षते प्रलपेन्नर: ॥
एतद्भावनतोयेन कासरोगोपनाशनम् ।३६।
अङ्गं तण्डुलसङ्काशं भूमिर्धूम्रा सितासिता ।
तण्डुलाङ्गमिमं विद्यादृग्य: श्रीबलवर्द्धनम् ।
एतत्पर्य्युषितं तोयं तण्डुलोदकसन्निभम् ॥
अस्य प्रभावाच्चतुरो धरां हि लभते श्रियम् ।३७
अङ्गचेन्नोत्पुराकारं भूमिराघातनि:सहा ॥
खड्गाधमिदं विद्यान्नीचं नाम नामत: ।३८।
सूना दीर्घा: शिरा: क्षारा भूमिश्चैव सिता-
सिता ॥
शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधा: ।३९।
शिवच्छिन्नाक्षतिच्चाङ्गे धारा चैव सिताथवा ॥
शिवाङ्गमिति तं ब्रूयाच्छुभपक्षनिसूदनम् ।४०।
यदा याग्रनखाकारमङ्गं भूमिस्तु पिङ्गला ॥
नखवच्चमिदं ब्रूयात्तत्क्षते क्षयमुर्भवेत् ।
एतदामिषसंस्पर्शात् प्रविशेत् स्वयमेव हि ।४१।
याहपुच्छोपमाङ्गं भूमिर्धूम्रा खराक्षति: ।
याहाङ्गमिति जानीयाच्छुभपक्षोपनाशनम् ।
अस्य स्पर्शनमात्रेण जीवन्तृष्णा जहत्यसून् ।४२।
यदा मधुजनेत्राभमङ्गं भूमि: सितासिता ॥
नेत्राङ्गमिति जानीयात् संग्रामे विजयप्रदम् ।
एतद्भावनतोयेन नूनमन्धोऽपि पश्यति ।४३।
अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता ।
केशाङ्गमिति जानीयात् क्लेशदु:खभयापहम् ।४४।
निरङ्गं स्थूलप्रक्षतिसुपलाङ्गं विदुर्बुधा: ।
एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम ! ।"४५
पद्मपुराणस्य ।
"निरङ्गा निग्निता धारा ग्राग्ये वह्निं वमत्यपि ।
द्रोणीवच्चमिदं ज्ञेयं पृथिव्यां नातिदुर्ल्लभम् ।४६।
अङ्गं काकपदाकारं भूमिराघातनि:सहा ।
एष खड्गाधमख्याप्यो काकाङ्गो भूति-
मिच्छता ।४७।
यदा कपालसङ्केषु दृश्यते स्वर्णत: खरम् ।
एतद्धि दु:खजनकं कपालाङ्गं बुधस्त्यजेत् ।४८।
तन्वीपत्रा बलाङ्गा या सुवर्णाङ्गासिपुत्रिका ।
पत्रवच्चकमाहुस्तं आयुर्व्वेदविदो जना: ।"
लौहार्णवेऽपि ।
"सुपर्णसन्निभा भूमिरङ्गं कालं प्रतीयते ।
तत् पत्रवच्चं काकस्य सुपर्णसुपजायते ।४९।
तुवरीदलसङ्काशमङ्गं यस्मिन् प्रतीयते ।
तुवरीवच्चमाहुस्तं तत्क्षते ग्लिरसो भ्रम: ।
एष खड्गाधमख्याप्यो यदीच्छेज्जीवनं निजम् ।
५० ।
विम्बीदलसमा भूमिरङ्गं विम्बीफलोपमम् ।
विम्बीवच्चन्तु तद्विद्यात्तच्चलं तिक्तसुच्यते ।
पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते ।५१।
प्रियङ्गुसदृशच्चङ्गं भूमिश्च कपिलाक्षति: ।
फलवच्चमिदं प्रोक्तं ग्राग्ये धूम्रं वमत्यपि ।५२।
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता ।
एतत् सर्षपवच्चं स्यात् ग्राग्ये वह्निं वमत्यपि ।
अपि कुष्ठक्रियां याति एतद्व्रणकोमलम् ।
एतत्प्रसादात् क्षितिप: क्षतृष्णां साधयते महीम् ।
५३ ।
नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत् ।
नीलीवच्चमिदं दृष्टं ग्राग्ये वह्निशिखां वमेत् ।
एष खड्गवरो नृणामरिष्टभयनाशन: ।५४।
रक्तास्त्रिको महारेखा भूमिश्चैव सितासिता ।
रक्ताङ्गमिति जानीयादेरिपक्षविनाशनम् ।
ग्राग्नेय यस्तु रक्तांवा नीलांवा वमते शिखाम् ।
रक्तस्पर्शनमात्रेण स्वयमेव निहन्यति ।
क्षतेऽस्य रक्तक्षयमुत्सृजा दाहश्च जायते ।५५।
अङ्गं वंशादलसमं भूमिश्चैव सितासिता ।
वंशवच्चमिदं ज्ञेयं तत्क्षताद्विषनाशनम् ।
एष खड्गवरो राज्ञा साधनीय: प्रयत्नत: ।५६।
रसोनादृत्तमं क्षङ्गं भूमिस्तस्य दलोपमा ।
रसोनवच्चं जानीयात् ग्राग्ये वह्निं वमत्यपि ।
अस्य धावनतोयेन श्यामवातविनाशनम् ।५७।
निरङ्गा निर्म्मला भूमिर्धारा तीक्ष्णा खर: खर: ।
सुमनावच्चमेतत् स्याद्भुवि नात्यन्तदुर्ल्लभम् ।५८।
मञ्जिष्ठासदृशा दीर्घास्तन्वो रेखा: सुविस्तरा: ।
जिङ्गीवच्चमिदं नाम सर्व्वकामार्थसाधनम् ।५९।
अङ्गं भ्रमीपत्रसमं भूमिर्धूम्रा सितासिता ।
भ्रमीवच्चमिदं ज्ञेयं भ्रनेश्वरसदावहम् ।
ग्राग्नेयं वमते वह्निं सहते वह्निपीड़नम् ।६०।
रोहितवल्कलसदृशमङ्गं भूमि: सितासितापि ।
धूम्रा गम्भीरखरयुक्तं धारा तीक्ष्णा सिता
भवेद्रेखा ।
रोहिताक्षमिदं वच्चं सर्व्वारिष्टविनाशनम् ।
वह्निसंस्पर्शमात्रेण किच्चिच्चिमिचिमायते ।
इत्ययं दुर्ल्लभ: खड्गो देवानामपि कथ्यते ।६१।
ग्रफरीवल्कलाकारमङ्गं भूमि: सितासिता ।
प्रोष्ठीवच्चमिदं प्रोक्तं च्यस्तं तरति वारिणि ।
एष खड्गोत्तमो राज्ञां विपक्षकुलनाशक: ।
कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही ।६२।
अङ्गं मारिषपत्राभं भूमि: स्याद्विषमक्षिव: ।
इत्ययं मारिषाङ्ग: स्यात् पृथिव्यां नातिदुर्ल्लभ: ।
६३ ।
भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्दलप्रभा ।
आघातं सहते नैव एष खड्गाधमो मत: ।६४ ।
धारा तीक्ष्णा खराकारा भूमिरङ्गविवर्ज्जिता ।
आघातं सहते घोरं ग्राग्ये वह्निं वमत्यपि ।
खराङ्गमिति जानीयात् पृथिव्यां नातिदुर्ल्ल-
भम् ।६५।
निर्म्मला समला भूमिर्भवेच्चैव कदा कदा ।
मन्दा तीव्रा भवेद्धारा तड़ित्पत्रस्य लक्षणम् ।६६।
नीलाञ्जनसमा भूमिरङ्गं जलतरङ्गवत् ।
मेघाङ्गमिति जानीयाच्छाग्ये ग्रीतं भवत्यपि ।
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ।
भर्त्तु: प्रतापं ग्रसयेद्रविबिम्बं यथा घन: ।६७।
मन्दा धारा भृशं गाढ़ा भूमिरङ्गविवर्ज्जिता ।
पर्व्वताङ्गमिदं नाम सर्व्वच्चेवोपलभ्यते ।६८।
अङ्गं गुञ्जाफलसमं भूमिर्म्मौनदलोपमा ।
गुञ्जावच्चमिदं दृष्टं तप्तं भवति वर्ष्मणे ।
ग्राग्ये सिन्दूरसङ्काशं रजो वमति चासकृत् ।
एष खड्गवरो राज्ञा भाग्यादेवोपलभ्यते ।
अस्य प्रभावात्तन्नास्ति यन्न साधयते नृप: ।६९।
अङ्गं तनुशराकारं भूमिश्चैव सितासिता ।
धारा तीक्ष्णा वमति च ग्राग्ये वह्निसमा:
शिखा: ।
शरवच्चमिदं ज्ञेयं राज्ञां वाञ्छितसिद्धये ।७०।
दूर्व्वादलनिभा भूमिर्धारा तीक्ष्णा खर: खर: ।
ग्राग्नेय वमते वह्निं दूर्व्वावच्चं सुदुर्ल्लभम् ।७१।
अङ्गं विल्वदलाकारं भूमिश्चैव सितासिता ।
विल्ववच्चमिदं ग्राग्ये नीलपीते वमेच्छिखे ।
एष खड्गवर: प्रोक्त: शत्रूणां कुलनाशन: ।७२।
मक्षरदलसङ्काशा भूमिरङ्गं मक्षरवत् ।
मक्षराङ्गमिदं ग्राग्ये रजो वमति चारुणम् ।७३।
प्रोथपुष्पनिभा रेखा दीर्घा भूमि: सितेतरा ।
प्रोथाङ्गमिति जानीयात् खड्गं परमदुर्ल्ल-
भम् ।७४।
ग्रटीदलसमा भूमिरङ्गं तत्कुसुमोपमम् ।
ग्रटीवच्चमिदं प्राहो लभ्यते गुरुवत्तरम् ।७५।
मार्ज्जारलोमसदृशमङ्गं भूमि: सितेतरा ।
मार्ज्जाराङ्गमिदं ज्ञात्वा रोगशोकभयावहम् ।
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ।
७६ ।
केतकीपत्रसदृशमङ्गं यस्मिन् प्रतीयते ।

विद्यात् केतकवर्चं तत् वाराणससमुद्भवम्।”७७
लौहप्रदीपस्य ।
“अङ्गं मूर्ध्वातनुनिभं भूमिर्मूर्वादलच्छविः ।
घ्राणेन वमते शुक्लां शिखां मौर्वीं भवेत्तत: ॥
मौर्व्याङ्गमिदमुत्तमं यशःश्रीर्तिबलावहम् ॥७८॥
स्निग्धं तीक्ष्णं खरं गाढं घ्राणे वह्निं वमेत् कणम्॥
छिनत्त्यन्यविधं लौहं वज्राङ्गमिति तद्विदुः॥७९॥
कलायपुष्पसदृग्गमङ्गं भूमिः सितासिता ।
कलायवर्चं जानीयात् तत्त्यजते पाक इष्यते ॥८०॥
अङ्गं चम्पकपुष्पाभं भूमिः श्यामा तथा सिता ।
शिखां घ्राणे वमेच्छीतं तिक्तं तस्य जलं भवेत् ।
इदं चम्पकवर्चं स्यात् सर्वत्र विजयप्रदम्॥८१॥
अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा ।
बलावर्चमिदं ज्ञेयं नागाभावं भवेद्दृढम् ॥
इत्ययं वातरोगाणां नाशने परमौषधम् ॥८२॥
अङ्गं वटारोहसमं भूमिर्वटदलच्छविः ।
वटवर्चमिदं ज्ञेयं खरं खड्गाधमं बुधैः ।
एतस्य सर्पमात्रेण नरो मुच्येत सम्यदा॥८३॥
वंशगौलीसमा भूमिः खरधारा सितासिता ।
वंशाङ्गमिति जानीयाद्घृष्टद्विकरं परम् ॥८४॥
भूमिः घ्राणदलाकारा अङ्गं लघु सितासितम् ।
घ्राणाङ्ग एष खड्गः स्यात् पूज्यः सर्वार्थदायकः ।
अयं घ्राणे वमेद्वह्निं धारा चाप्यधवा भवेत्॥८५॥
भूमिः सितासिता वापि अङ्गं ज्येष्ठीसमं लघु ।
ज्येष्ठीवर्चमिदं निन्द्यं न शस्त्रं वा हितेच्छुभिः ॥
८६ ॥
पुराणशालसदृग्गमङ्गं भूमिः सितासिता ॥
शालवर्चमिदं पूज्यं घ्राणसम्पत्तिनाशनम् ।
यदि घ्राणे वमेन्नीलां शिखां वह्निं वमेच्च वा ॥
तदेष दुर्लभः खड्गो नान्यथा भयहेतुकः॥८७॥
अङ्गं पिपीलिकाकारं भूमिर्घूम्रा तथासिता ॥
पिपीलिकाङ्ग इत्येष तत्त्यजते कच्छसम्भवः ।
स्वयं यदि भवेद्धूम्रः घ्राणे पूज्यतमस्तदा ॥८८॥
नलपत्रसमा भूमिरङ्गन्तत्कुसुमोपमम् ।
नलाङ्गमिति जानीयाद्भर्तुः सर्वार्थसाधकः ॥
८९ ॥
निरङ्गा निर्मला भूमिर्घृष्टं दृष्टं वमेद्रजः ।
दृढा धारा भृशं स्थूला आघातं सहते न च ॥
रजोवर्चमिदं निन्द्यं घ्राणचूर्णा विजयावहम्॥९०॥
कुशाङ्कबीजसदृग्गमङ्गं भूमिः सितासिता ॥
कुशाङ्कवर्चं जानीयात्तत्त्यजते वेगनिग्रहः ॥९१॥
अङ्गं शूरोमसदृग्गं भूमिर्घूम्रा सितासिता ।
रोमाङ्गमिति जानीयात्तत्त्यजते पिङ्गकोद्गमः॥९२॥
भूमिः क्षुद्दीदलसमा अङ्गं तत्कक्षटकोपमम् ॥
धारा तीक्ष्णा रवस्तीक्ष्णो लघुर्मानं खरा शुभा।
सुधाङ्गः खड्ग इत्येष तत्त्यजते दाहदर्दुक्षमाः ॥
सुखाद्यिकर्मनासानां दाहः पाकश्च जायते ।
अयं यदि च सर्पाणां फणारूपरि विश्यते ॥
फणाविदारमाप्नोति सर्पो लोटयते शिरः ।
अस्य धावनतोयेन कुष्ठरोगविनाशनम् ॥९३॥
कर्कन्धुदलसृष्टाभा भूमिरङ्गन्न तत्समम् ।
कर्कन्धुवर्चं जानीयात्तत्त्यजते दाहनाशनम् ॥
एष खड्गाधमख्याप्यो जेतव्या यदि विद्विषः ॥
९४ ॥
रङ्गं वकुलपुष्पाभं भूमिस्तत्फलसन्निभा ॥
वकुलाङ्गमिदं पूज्यं घ्राणे सुरभिगन्धवत् ।
तन्नास्ति जगतीमध्ये यदनेन न साध्यते ॥९५॥
अङ्गं संमिश्रितं यस्मिन्न किञ्चिद्व्यक्तमीक्ष्यते ।
सर्वेषां दर्शनं वापि तीक्ष्णधारः खरस्वरः ॥
एष काञ्चिकवर्चः स्यादृषलादेर्नोपलभ्यते ।
नैनं प्राप्यापि वर्द्धन्ते शेवाचिन्नादयोऽपि च ॥
९६ ॥
भूमिः श्यामा निरङ्गा चेद्धारा तीक्ष्णा दृढापि वा ।
आघातं सहते घोरं रक्तं सर्पेण यो विशेत् ॥
घ्राणेन वह्निं वमति ध्रुवं वाप्यतिघर्षणात् ।
महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः ॥
९७ ॥
अत्यन्तनिर्मला भूमिः शरीरं प्रतिबिम्बितम् ।
धारा तीक्ष्णा खरस्तीक्ष्णः स्वच्छाङ्गं तद्विनिर्दिशेत् ॥९८॥
तस्मिन् यदा भवेद्रेखा ऊर्ध्वा ऋत्वाकृतिं तदा॥९९
अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥१००॥
एतत्त्रितयसुद्दिष्टं खड्गानां प्रवरं बुधैः ।
प्रायशो लभ्यते लोके यदि सर्वगुणावहम् ॥
इतीदं निखिलं प्रोक्तं वर्चानां लक्षणं मया ।
प्रयत्नेलिखितं चक्रं सर्वेषां हितकाम्यया ॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते ।
तस्य दोषो भवान्मेष प्रतिज्ञेति श्रुता मया ॥
द्विजिह्वमिश्रमालोक्य मिश्राङ्गमिति निर्दिशेत् ।
सर्वेषामङ्गमालोक्य सर्वाङ्गमिति निर्दिशेत् ।”
इति खड्गपरीक्षायामङ्गाध्यायो द्वितीयः ॥*॥
खड्गस्य रूपाणि यथा,—
“नीलोत्पलायकुसुमच्छविरञ्जनाभा
या चन्द्रनीलमणिकाचमणिप्रभा च ।
भूमिश्च या मरकतप्रतिमावभासा
खड्गस्य नीलमिति रूपमिदं वदन्ति ॥
तत्र चैन्निन्दितान्यङ्गान्यरिष्टानि बहून्यपि ।
दृश्यन्ते बहुदोषापि तथापि गुणवत्तरम् ॥१॥
या कालकामुदमसीरसकालसर्प-
गृङ्गान्धकारकचभारसमा विभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा
खड्गस्य श्यामामिति रूपमिदं वदन्ति ॥
अत्र नेत्राणि सम्पत्तौ अरिष्टान्यशुभानि च ।
साधारणमिदं रूपं प्राह नागार्ज्जुनो मुनिः ॥२॥
या प्रावृषेण्यनवमेकसमानवर्णा
गोमेदरत्नसदृशापि च यस्य भूमिः ।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति
भर्तुर्यशोबलधनक्षयकारणाय ॥३॥
या मन्दधूमसदृशा च शिरीषपुष्प-
तुल्या विभाति मलिनापि च खड्गभूमिः ।
नागार्ज्जुनो वदति मूल्यमिदं हि रूपं
भर्तुर्यशोबलधनायुविवर्द्धनाय ॥४॥
द्विरूपं मिश्रितं ज्ञात्वा घृङ्करं प्रवदेद्बुधः ।
त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरसङ्कितम् ॥
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तरम् ॥”
इति लौहार्णवस्य खड्गपरीक्षायां वर्णाध्यायस्तृतीयः ॥ * ॥
“जातिश्चतुर्विधा प्रोक्ता खड्गानां या पुरा मया ।
सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते ॥
शुक्लाङ्गः शुक्लवर्णश्च सुनेत्रः सुस्वरश्च यः ।
स्पृदुसर्गः सुसन्धेयस्तीक्ष्णधारो महागुणः ॥
खड्गं ब्राह्मणजातिं तं प्राह नागार्ज्जुनो मुनिः ।
अस्य क्षते भवेच्छोथो घोरः सर्वाङ्गगोचरः ॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते ।
अदृष्टं त्रिफलाकल्कमर्द्धरात्रेन्दिवोषितम् ।
मलिनत्वं न सन्धत्ते निर्मलं कुरुते परम् ।
तरुणादित्यकिरणस्पर्शादेव क्षये स्थितः ॥
दहेत् सर्वं न तु करं पुरुषस्य हि धारिणः ।
गायत्र्युच्चारमात्रेण खरतां व्रजति स्फुटम् ॥
एष खड्गवरः सर्वमरिष्टं नाशयेद्ध्रुवम् ।
अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत् ॥
तस्मादेष मनुष्याणां सुलभो न हि भूतले ।
दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये ॥१॥
धूम्रवर्णं महाधारं तीक्ष्णधारं खरस्वरम् ।
सर्वाघातसहं सर्वनेत्रवर्णखराकरम् ॥
खड्गं क्षत्रियजातिं तं जानीयात् खड्गकोविदः ।
अस्य क्षते भवेद्दाहस्तृषानाहो ज्वरो भ्रमः ॥
स्पृदुश्च जायते घ्राणे वमेद्वह्निकणान् बहून् ।
संस्कारे चाप्यसंस्कारे नैर्मल्यं तस्य लक्ष्यते ॥
घ्राणेऽप्यघ्राणे खरता मूर्ध्नि चाप्यन्ततीक्ष्णता ।
रक्तसर्पनमात्रेण विशेदन्तरमन्तरम् ॥
अयं खड्गवरः पूज्यो मनुष्येरपि लभ्यते ॥२॥
नीलवर्णः श्यामवर्णः संस्कारे निर्मलो भवेत् ॥
घ्राणेन खरता चास्य घाततुल्यं निगद्यते ।
वैश्यजातिरयं खड्गः क्षते रक्ताच्चदर्शनम् ॥
नात्युत्कटो नातिहीनं सर्वत्रैवोपलभ्यते ॥३॥
सजलाम्भोदसङ्काशः स्थूलधारो स्पृदुस्वरः ॥
संस्कारे चैव मलिनः घ्राणे चापि खरेतरः ।
शूद्रजातिरयं खड्गः क्षते नास्यापि वेदना ॥
दूरादेवोऽधमख्याप्यो यदीच्छेद्धितमात्मनः ।
प्रायशः सर्वलोकेषु स्वयमेवोपदृश्यते ॥४॥
इत्योर्जयशमालोक्य जातिं खड्गमादिशेत् ।
जयार्थी क्षत्रियेणैव जातिसङ्करसुच्यते ॥”
इति लौहार्णवस्य खड्गपरीक्षायां जात्यध्यायः ॥ * ॥
अथ त्रिंशन्नेत्राणि लक्षणानि ।
“चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते ।
तं चक्रनेत्रं जानीयात् भर्तुः सर्वार्थसाधनम् ॥
अनेनैकेन खड्गेन क्षत्रियां साधयते महीम् ॥१॥
प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम् ॥
यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत् ।
अयं खड्गवरो यत्र तत्रैव कमलालया ॥२॥
ऊर्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते ।
गदानेत्रमिदं विद्धि सर्वशत्रुनिसूदनम् ॥३॥
शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते ।

ग्रहनेत्रमिदं सर्व्वदेवानामपि दुर्ल्लभम् ॥४॥
डमरूप्रतिमं नेत्रं यस्य भूमौ प्रतीयते ।
सर्व्वार्थसाधकं खड्गं तं विद्याद्विजयप्रदम् ॥५॥
धनुःसदृशं यन्नेत्रं धनुर्नेत्रमुशन्ति तम् ।
तस्य स्पर्शनमात्रेण मन्दोऽपि प्रसुखायते ॥
अयं निग्रीये विजने खड्गो भानभनायते ॥६॥
यन्नेत्रमङ्कुशाकारं तंविद्यादृगुणवत्तरम् ॥
खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्व्वार्थसाधकम् ।
अलक्ष्मीपापरोगघ्नं क्षत्रायश्चनिवारणम् ॥७॥
क्षत्राकारं यदा नेत्रं क्षत्रनेत्रं वदन्ति तम् ।
अस्य प्रभावात् चीणोऽपि सार्व्वभौमो भवेन्नृपः॥
दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः ।
महेश्वरोऽपि सचिवः सचिवो मरुदेश्वरः ॥
मरुदेशाधिपत्वं भवेदत्र न संशयः ॥८॥
पताकाकृतिनेत्रश्चेत् सर्व्वसम्पत्तिकारकम् ॥
पताकानेत्रमाहुस्तं संग्रामे विजयप्रदम् ॥९॥
नेत्रं वीणाकृति यदा वीणानेत्रमुशन्ति तम् ।
निग्रीये विजने खड्गो वीणावत् खनमावहेत् ।
अस्य प्रभावात् सर्व्वेशा अपि वशा भवन्ति
हि ॥१०॥
मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षितिपः क्षतृक्षां साधयते
महीम् ॥११॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदुः ।
भर्त्तुः सर्व्वार्थसंसिद्ध्यै शत्रूणां नाशनाय च ॥
वामपार्श्वे तु याचायां धर्त्तव्योऽयं तथा रणे१२।
अत्र ध्वजाङ्कुशचन्द्रकलसानां लक्षणानि पतितानि । १३ । १४ । १५ ।
मूलाकृति यदा नेत्रं मूलनेत्रं वदन्ति तम् ।
सर्व्वार्थसाधकः सर्व्वारिष्टनिष्टप्रणाशनः ॥१६॥
शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः ।
शत्रुश्रेणीविनाशाय संग्रामे विजयाय च ॥१७॥
सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः ।
अस्य प्रभावात् चीणोऽपि क्षतृक्षां साधयते
महीम् ॥१८॥
तत् सिंहासननेत्रं स्यात् नेत्रं सिंहासनोपमे ।
अस्य प्रभावात् क्षितिपः क्षतृक्षां साधयते
महीम् ॥१९॥
गजाकृति यदा नेत्रं गजनेत्रं वदन्ति तम् ।
अस्य प्रभावात् चीणोऽपि लभते राजसम्पदम् ॥
२० ॥
नेत्रं हंसाकृति यदा हंसनेत्रं वदन्ति तम् ।
अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् ॥
२१ ॥
मयूराकृतिनेत्रे द्वे तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावान्मनुजः सर्पदर्पान्निरुदयेत् ॥२२॥
जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च ।
संग्रामखड्गरत्नेवं क्षिपेद्वैरिशिरोरुहः ॥२३॥
दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम् ।
अयं रिपुगजं हन्ति चर्व्वयत्यतिभैरवम् ॥२४॥
खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम् ।
तस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि ॥२५॥

मनुष्यपुत्रिकाकारा पुत्रिकानेत्रमुच्यते ॥
अयं सग्रेलां सद्वीपां क्षतृक्षां साधयेत् क्षितिम् ।
न चेयं पुत्रिका किन्तु जयलक्ष्मीरिह स्वयम् ॥
तस्मान्नायं मनुष्याणामस्यभाग्येन लभ्यते ॥२६॥
चामराकृतिनेत्रत्वात्तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावाज्जायन्ते चामरोद्धूतसम्पदः ॥२७॥
एकानेकशिखे ग्रैवनेत्रे तन्नेत्रसंज्ञकम् ।
अपि राष्ट्रभये युद्धे विषमे वैरिसङ्कटे ।
स्थिरीकरोति धरणीं धरणीं पर्व्वतो यथा ॥२८॥
पुष्पमालासमं नेत्रं पुष्पनेत्रं वदन्ति तम् ।
अस्य प्रभावात्तुष्यन्ति ग्रहाः सर्व्वाश्च देवताः ॥
२९ ॥
भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम् ।
अयं शत्रुगणं हन्ति यथा मर्त्तेय भुजङ्गमः॥३०॥
सवर्णं समवर्णञ्च तत् सर्व्वं द्विविधं भवेत् ।
सवर्णं भ्रान्तिसम्युक्तं रिपुनाशे तथापरम् ॥
द्वयोरेकत्र दृष्टे च तत् पुनर्व्विविधं भवेत् ।
एकलोकसुखं नेदं ददाति द्विविधं द्वयोः ॥
मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत् ।
अग्रे चाग्राफलं नेयं मध्ये मध्यफलं मतम् ॥
मूले फलं जघन्यं स्यात् प्राह नागार्জ্জুनो मुनिः ।
एकं द्वे चीणि नेत्राणि नात्र संख्या व्यतिक्रमः ॥
एकं धर्म्मः स्वर्गकामौ द्वे चीणि च त्रिवर्गकम् ।
तत्फलानि प्रयच्छन्ति प्राह नागार्জ্জुनो मुनिः ॥
द्विनेत्रमिति जानीयात् खसंज्ञां नेत्रयोर्द्वयोः ।
त्रिनेत्रञ्च त्रिभिर्ज्ञेयं बहुनेत्रमतः परम् ॥
यथोत्तरं गुणवद्धं खड्गमाहुरनुत्तमम् ।
दिङ्मात्रमिति निर्द्दिष्टं नेत्राणां शुभदायिनाम् ॥
तीव्राणां मङ्गलानाञ्च दर्शनञ्च शुभावहम् ।"
इति खड्गपरीक्षायां नेत्राध्यायः पञ्चमः ॥*॥
"यथा नेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत् ।
नेत्रेषु स्थानभियमो नारिष्टे स्थाननिर्णयः ॥
प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टनेत्रेण
निन्दितः ॥"
अथ चिह्नदरिष्टानां लक्षणानि ॥
"छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते ।
छिद्रारिष्टमिदं विद्धि भर्त्तुर्व्वीर्य्यबलापहम् ॥१॥
यदा काकपदाकारमरिष्टं दृश्यते क्वचित् ।
अयं काकपदारिष्टः सर्व्वाभीष्टविनाशनः ॥२॥
रेखाकारं यदारिष्टमृर्द्धे वा तिर्य्यगेव वा ।
रेखारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् ॥३॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः ।
भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न व्रजेत्
स्वयम् ॥४॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित् ।
भेकारिष्टमिदं ज्ञात्वा संग्रामे भयदायकम् ॥५॥
अरिष्टे सुषिकाकारे सुषिकारिष्टमुच्यते ।
अयं खड्गाधमः कुर्य्यात् प्रभुः पातालसङ्गमम् ॥६॥
विड़ालनयनाकारो बिन्दुरेकोऽतिविस्तरः ।
विड़ालारिष्टमेतत् स्यात् भर्त्तुः सर्व्वार्थनाशनम् ॥७॥

अरिष्टं शूकराकारं यदा स्पर्शेन बुध्यते ।
शूकरारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ॥८॥
यदा नीलीरसाभासमरिष्टं दृश्यते क्वचित् ।
नील्यरिष्टमिदं ज्ञेयं यशोलक्ष्मीविनाशनम् ॥९॥
अरिष्टे मशकाकारे मशकारिष्टमुच्यते ।
भर्त्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् ॥
१० ॥
भृङ्गप्रतिमो बिन्दुरेकोऽनेकोऽथवा यदा ।
भृङ्गारिष्टं स्मृतं धृतिस्मृतिविनाशनः ॥११॥
स्रुचीरूपमरिष्टं स्याद्दूर्द्धे वा तिर्य्यगेव वा ।
स्रुच्यरिष्टमिदं नाम भर्त्तुः कुलविनाशनम् ॥१२॥
जयच्छिन्द्रो राजन् ! षड्क्रयो विषमेऽथ वा ।
उपर्य्युपरि बाधोऽक्षिबिन्दाख्यमरिष्टकम् ॥
तस्य स्पर्शनमात्रेण सचेलः स्नानमाचरेत् ॥१३॥
कालिकारिष्टमित्येतद् धीधृतिस्मृतिनाशनम् ॥
१४ ॥
एकत्र यदि न स्थैर्य प्रयत्नेनापि संगतः ।
दारी नाम महारिष्टं सर्व्वाभीष्टविनाशनम् ॥
अनेकगुणसम्पन्नः खड्गो लोकैर्न पूज्यते ॥१५॥
कपोतपक्षप्रतिममरिष्टं क्षत्रदाहयम् ।
भर्त्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् ॥१६॥
काकाकृति यदारिष्टं काकारिष्टं तदोच्यते ।
अनेन भर्त्तुः संग्रामे भङ्ग एवोपजायते ॥१७॥
अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते ।
भर्त्तुर्यशो बलं वीर्य्यं बुद्धिं प्रीतिञ्च नाशयेत् ॥१८॥
यदान्यलोहसृक्कलं लक्ष्यं स्यादिव लक्ष्यते ।
शृक्कलीति स वै खड्गः सर्व्वाभीष्टनिसूदनः॥१९॥
क्रोड़ीकुक्षुपक्षकयोर्लक्ष्ये पतिते २० । २१ ।
यस्मिन्निम्नमिवाभाति मध्ये वा दृश्यते क्वचित् ।
जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम्॥२२॥
एकैकरेखा दीर्घाग्रा यदा पक्षविनी भवेत् ।
सर्पे वाथ करेणाय करालारिष्टमुच्यते ।
अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्न हि ।
दर्शनादेव नश्यन्ति यशोलक्ष्मीजयादयः ॥२३॥
अरिष्टे कङ्कपक्षाभे कङ्कारिष्टं तदुच्यते ।
अस्य स्पर्शनमात्रेण गच्छत्यायुर्यशो बलम् ॥२४॥
खर्ज्जूरदृष्टप्रतिमं यदारिष्टन्तु लक्ष्यते ।
खर्ज्जूरारिष्टमेतत् स्याद्भर्त्तुः कुलधनापहम् ॥२५॥
गोशृङ्गाभमरिष्टञ्चेत् शृङ्गारिष्टं तदुच्यते ।
अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः ॥२६॥
गोपुच्छाकृति चेत् खड्गे अरिष्टं संप्रतीक्ष्यते ।
पुच्छारिष्टमिदं नाम भर्त्तुः सर्व्वार्थनाशनम्॥२७॥
खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते ।
शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति ॥२८॥
अरिष्टे जाङ्गलाकारे जाङ्गलारिष्टमुच्यते ।
अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा ।
अयमायुः श्रियं हन्ति विद्यां बलमशेषतः॥२९॥
वड़िशारिष्टस्य लक्षणं पतितम् ॥३०॥
इत्यरिष्टानि प्रोक्तानि नागार्জ্জुनात् प्रयत्नतः ।
विचार्य्यैतानि मतिमान् खड्गं कोशे निधापयेत्॥
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम् ।
अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम् ॥

अरिष्टमेकमेव स्यादरिरिष्टं शुभावहम्।
अन्योन्यमशुभं हन्यादुविधस्य हि विधं यथा॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा।
यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः॥
इति खड्गपरीक्षायामरिष्टाध्यायः षष्ठः॥*॥

अथ द्विविधा भूमिः।
दिव्यभौमविभागेन भूमिर्या द्विविधा मता।
दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा॥
तल्लक्षणमग्नेयेन लिख्यते तन्निबोधत।
देवदानवयोर्मध्ये खड्गरूपेरिभूत् पुरा॥
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः॥
दिव्यलक्षणं यथा,—
ये खड्गाः शूलधारा भृशमतिलघवो निर्म्मलाङ्गाः सुनेत्रा
ये रिष्टाभाखरूपाः सुविमलतनवश्चाप्यसंस्कारयोगात्।
दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्नतो दाहपाकौ
ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोदृद्धिमाशु॥१॥

अथ भौमलक्षणं दृष्टहारीते।
पूर्व्वं मन्वेयेन विधानि यानि
शुक्लानि तेषां पतितासु बिन्दवः।
यस्मिन् प्रदेशे स स एव देशः
कालायसाकरतां जगाम॥
पुराऽन्तं क्षीरसमुद्रमथा-
दुत्पाद्य संयुज्य ययुः सुरेन्द्राः।
तद्बिन्दवो यत्र निपेतुरेष
शुद्धायसाकरतां जगाम॥
ये विषोत्था भृशङ्गाजाः खराङ्गाः सम्भवन्ति हि।
मूर्च्छादाहज्वरानाहशोकहिक्कावमीकराः॥
येऽन्तोत्थाः कर्बुराङ्गा मन्दाङ्गाः संभवन्ति च।
बलीपतितमालिन्यजराव्याधिविनाशनाः॥
यत्रैव पतितं यत्तु तत्तदाकरताङ्गताः॥
तद्यथा,—
वाराणसीमगधसिंहलभूमिभागे
नेपालभूमिषु तथाङ्गमहीप्रदेशे।
सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे
शुद्धायसाः क्षतिवराः प्रवदन्ति सन्तः॥
तद्यथा,—
वाराणसेयाः सुस्निग्धाश्लक्ष्णधाराः सदङ्गिनः।
लघवः सुखसन्धेया ग्रेया श्यामेदग्रालिनः॥
मागधाः कर्कशाः शूलधारा गूढतराङ्गिनः।
गुरवो दुःखसन्धेयाः खड्गा ग्रेया विचक्षणैः॥
नेपालदेशप्रभवा निरङ्गा निश्चलाश्च ये।
ग्रेयाः सदङ्गा मलिना लघवः शूलधारिणः॥
कालिङ्गा गुरवः सच्छा यक्तास्तङ्गास्तनुद्दैतवः।
सौराष्ट्रा निर्म्मलाः स्निग्धाः सुयक्ताङ्गा भृशं खराः॥
सिंहलक्षीयजातानां चतुर्द्धा भेद उच्यते।
केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः॥
केचित् सदङ्गा लघवः सुस्निग्धा शूलधारिणः।
एषां रूपेण मिश्रेण ग्रेया हि द्विजातयः॥
सामान्यात् द्विगुणश्चौड्रं कलिङ्गप्रगुणस्ततः।
कलेः शतगुणं भद्रं भद्राद्दशं सहस्रधा।
दशात् षष्ठिगुणः पाञ्चिर्निरविर्द्वग्रभिर्गुणैः।
ततः कोटिसहस्रेण क्षयस्कान्तः प्रशस्यते॥"
इत्यादिकं रसायनौपयौगिकमेव न तु खड्गे दृष्टफलम्॥ यदाह।
आसान्तु लौहजातीनां वर्य्यं खड्गाय युज्यते।
तथाच।
ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः
केचित् साङ्गा निरङ्गाः कति च न समला निर्म्मलाः केचिदेव।
ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा
ते दुःखं शोकमुग्रं दधति बलकुलश्रीयशोनाशकास्ते॥
इति खड्गपरीक्षायां भूम्यध्यायः सप्तमः॥२॥*॥

अथाष्टधा ध्वनिः।
ध्वनिरष्टविधः प्रोक्तो यः पूर्व्वं सूत्रसंग्रहे।
तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्॥
तद्यथा,—
पूर्व्वे चत्वारः शुभदाः परे निन्द्यास्तथा तथा।
विचार्य्य खड्गमानञ्च कर्त्तव्यं खड्गकोविदैः॥
घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः।
घोरः स्यात् सुखसन्धेयस्तार उच्चाटने मतः॥
यत्र हंसरवस्येव खड्गे नखहते ध्वनिः।
हंसध्वनिरयं खड्गः सकलार्थप्रसाधनः॥१॥
कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
कांस्यध्वनिरयं खड्गः प्राह नागार्জ্জुनो मुनिः॥२॥

अश्मस्थलक्षणं पतितम्॥३॥
टङ्कशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
टङ्कध्वनिरयं खड्गः सर्व्वशस्त्रनिसूदनः॥४॥
काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः।
काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुलनाशनः॥५॥
तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः।
तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः॥६॥
खरस्येव ध्वनिर्यस्मिन् खरध्वनिरयं मतः।
श्रीयशोज्ञानविज्ञानजयतेजोविनाशनः॥७॥
प्रस्तरस्येव यः खड्गः स निन्द्यः खड्गलक्षणे॥८॥

गभीरतारध्वनिता खड्गस्यासुभलक्षणम्।
उत्तानमन्द्रध्वनिता खड्गस्यासुभलक्षणम्॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः।
अन्धः कुरूपो मधुजो यथा भुवि सुगायनः॥
सर्व्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्জ্জितः।
स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्জ्जितः॥
नखेन वाथ दन्तेन तथा लौहशलाकया।
लोष्टेन प्रकरैराभिर्वा ध्वनिविज्ञानमुच्यते॥"
इति खड्गपरीक्षायां ध्वन्यध्यायोऽष्टमः॥*॥

अथ द्विविधं मानम्।
यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते।
उत्तमाधममेदेन भेदो हि द्विविधो मतः॥
उत्तमं यद्विशालं स्याल्लघुमानं प्रकीर्त्तितम्॥१॥
अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्त्तितम्॥२॥
तत्पुनस्त्रिविधं प्रोक्तमादिमध्यान्तभेदतः।
यो मुष्टिविंशतिसमायततीव्रधारो
भर्त्तुर्भवेत् प्रसरतोऽपि षड्ङ्गुलीभिः।
मानेन चारुपलिकः स हि खड्गमध्ये
नातिप्रशस्तनविशस्तफलप्रदः स्यात्॥
यो द्वादशाष्टनवसुष्टिभिरायतः स्यात्
मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः।
तावत्पलैः परिमितस्तु ततोऽधिको वा
खड्गाधमो धनयशःकुलनाशनाय॥
नागार्জ্জुनोऽपि।
यावत्यो मुष्टयो दैर्घ्ये तद्दार्ढ्याङ्गुलयो यदा।
प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्॥
यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः।
पलैस्तद्दैर्घ्यसंमितः स खड्गो मध्य उच्यते॥
यावत्यो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत्।
अधमः कीर्त्तितः खड्गस्तत्समो वाधिकः पलैः॥
भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः॥"
इति खड्गपरीक्षायां मानाध्यायः॥*॥

भोजस्तु।
"दीर्घता लघुता चैव खरविस्तीर्णता तथा।
दुर्भेदता सुघटता खड्गानां गुणसंग्रहः॥
खर्व्वता गुरुता चैव मन्दता तनुता तथा।
सुभेदता दुर्घटता खड्गानां दोषसंग्रहः॥
इति निखिलसुदारसूक्तमत्र
बहुतन्त्रेषु निदर्श्य खड्गयष्टेः।
नृपतिरिति विचिन्त्य यो विधत्ते
स चिरतरां श्रियमुच्चितां लभेत॥"
इति युक्तिकल्पतरूक्तखड्गपरीक्षा समाप्ता॥

तरस्, क्ली, (तृ+बाहुलकात् असच्।) मांसम्। इत्यमरः। २।६।६३॥ (यथा, काश्यायनश्रौतसूत्रे।
"तरसमया: पूर्व्वोक्तभागाः॥"
"तरसमया मांसमयाः।" इति कर्कः॥)

तरस्थानं, क्ली, (तराय अवतरणाय यत् स्थानम्। तरस्य स्थानं वा।) घट्टः। इति जटाधरः॥

तरस्वान्, [त्] त्रि, (तरो वलं वेगो वा अस्त्यस्येति मतुप्। मस्य वः।) शूरः। वेगी। इति आकरग्रन्थः॥ (चतुर्थमनुपुत्रविशेषः। यथा, हरिवंशे। ७। ८८।
"तरङ्गभीरुर्वृङ्गश्च तरस्वाञ्छुच एव च।
अभिमानी प्रवीरश्च शिशुः सङ्क्रन्दनस्तथा॥")

तरस्वी, [न्] त्रि, (तरो वेगः वलं वास्त्यस्य। तरस्+"अस्मायामेधास्रजो विनिः।" ५।२।१२१। इति विनिः।) शूरः। वेगी। इत्यमरः। ३।३।१२७। (यथा, भागवते। ८।१०।३१।
"राहुश्च तथा सोमः पुलोमा युयुधेऽनिलः।

निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ॥") गरुड़े वायौ च पुं। इति राजनिर्घण्टः ॥

तराम्बुः, पुं, (तराय तरणाय तरे तरणे वा अम्बुरिव अतिगभीरमध्यदेशत्वात् तथात्वम्।) नौकाविशेषः। भड़ इति भाषा। तत्पर्य्यायः। डोङ्गः २ वहनम् ३ वार्व्वटः ४ वहित्रम् ५। इति त्रिकाण्डशेषः ॥

तरालुः, पुं, (तराय तरणार्थं अलति पर्य्याप्नोतीति। अल + उन्।) नौकाविशेषः। इति हारावली॥

तरिः, स्त्री, (तरत्यनया इति। तॄ + "अच इः।" उणां। ४। १३८। इति इः।) नौका। इत्यमरः। २।१०।१०॥ (यथा, महाभारते। १। १००। ४८।

"तान्नदीद्वाग्रकन्याश्च धर्म्मार्थं वाहये तरिम्॥") द्वारा। वस्त्रादिपेटकः। इति हेमचन्द्रः॥

तरिकः, पुं, (तराय तरणाय हितः। तॄ + ठन्।) नरः। इति त्रिकाण्डशेषः॥ (तरणे तरणनिमित्तकदेयशुल्केऽधिकारोऽस्यास्य। तरणशुल्लग्रहणाधिकारी। यथा, याज्ञवल्क्यः। २। २६६। [दण्ड्य॥")

"तरिकः खलजं शुल्कं गृह्णन् दाप्यः पणान् दश॥")

तरिका, स्त्री, (तरिक + टाप्।) नौका। इति शब्दरत्नावली॥

तरिणी, स्त्री, (तरस्तरणं शब्लत्वेनास्त्यस्याः इति इनिः ङीप् च।) नौका। इति हेमचन्द्रः॥

तारता, स्त्री, (तर + इतच्।) तर्ज्जनी। इति शब्दचन्द्रिका॥ गञ्जनम्। गाँजा इति भाषा। यथा, कुलार्णवतन्त्रे।

"अहिफेनं खर्ज्जुरसक्षारिका तरिता तथा॥"

तरिरथः, पुं, (तरेर्नौकाया रथ इव तत्परिचालनात्तथात्वम्।) अरित्रम्। इति हारावली॥

तरीः, स्त्री, (तरत्यनया इति। तॄ + "अवितृस्तृतन्त्रिभ्य ईः।" उणां। ४। १५८। इति ईः।) नौका। (यथा, माघे। ३। ७६।

"तरीव तत्त्वमपलगुणाकृष्टम्॥") द्वारा। वस्त्रादिपेटकः। इत्यमरादिकोषः॥ भूमिः। इति त्रिकाण्डशेषः॥ द्रोणी। इति जटाधरः। दण्डा। इति मेदिनी। रे, ४०॥

तरीषः, पुं, (तॄ + "तॄस्त्र्याभीषयन्।" उणां। ४। २६। इति ईषन्।) श्रीभनाकारः। भेलः। अवसायः। इत्यमरादिकोषः॥ समुद्रः। समर्थः। इति संक्षिप्तसारे उणादिवृत्तिः॥ स्वर्गः। इति मेदिनी। षे, ३७॥

तरीषी, स्त्री, (तरीष + संज्ञायां ङीष्।) इन्द्रकन्या। इति मेदिनी। षे, ३८॥

तरुः, पुं, (तरति समुद्रादिकमनेनेति। तॄ + "भृञ्मृशॄतॄचरीति।" उणां। १। ७। इति उः।) वृक्षः। इत्यमरः। २। ४। १॥ (यथा, रघुः। ३। ७०।

"सनिबन्धतरुच्छायां देव्या तया सह शिश्रिये॥")

तरुकूणिः, पुं, (तरौ वृक्षे कूणयतीति। कूण + इन्।) वाग्गुदपक्षी। इति त्रिकाण्डशेषः॥

तरुजीवनं, क्ली, (तरोर्जीवनं जीवनकारणम्।) वृक्षमूलम्। इति शब्दचन्द्रिका॥

तरुणं, क्ली, (तॄ + "त्रो रच लो वा।" उणां। ३। ५४। इति उनन्।) कुङ्कुमपुष्पम्। इति मेदिनी। णे, ४६॥

तरुणः, पुं, (तॄ + उनन्।) स्थूलजीरकः। एरण्डः। इति राजनिर्घण्टः॥

तरुणः, त्रि, (तरति व्रवते प्रमोदचलिते इति। तॄ + त्रो रच लो वा।" उणां। ३। ५४। इति उनन्।) युवा। इति मेदिनी। णे, ४६। (यथा, महाभारते। १। ४०। २६।

"तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः॥") नूतनः। इति धरणिः॥ (यथा, छन्दोमञ्जर्य्याम्।

"तरुणं सर्षपशाकं नवौदनं पिच्छिलानि दधीनि।
स्वल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति॥")

तरुणज्वरः, पुं, (तरुणश्चासौ ज्वरश्चेति।) सन्ताहावधिज्वरः। (यथा, चक्रदत्तः।

"आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः॥"

तरुणदधि, क्ली, (तरुणं तरुणत्वयोक्तं दधीति।) पक्वदिनोत्तोलदधि। इति वैद्यकम्॥

"गुरुं मांसं स्त्रियो दृष्ट्वा बालार्कस्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट्॥"

इति चाणक्ये। ६४॥

तरुणी, स्त्री, (तरुण + गौरादित्वात् ङीष्।) द्वितीयवयाः स्त्री। (यथा,—

"ततस्तु तरुणी श्रेया द्वात्रिंशद्गृहतुसराविध। निदाघशरदोर्बाला हिता विषयिणी मता॥ तरुणी शीतसमये॥"

'नित्यबाला सेयमागा नित्यं वर्द्धयते बलम्। तरुणी ह्यसयेच्छक्तिम्॥"

"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भूयोभूयः प्रवर्त्तमानरजाः स्त्री। इत्यमरटीकासारसुन्दरी॥ तत्पर्य्यायः। युवती २। इत्यमरः। २। ६। ८॥ तरुणी ३ युवतिः ४। इति भरतः॥ यूनी ५ दिक्करी ६ धनिका. ७ धनीका ८। इति शब्दरत्नावली॥ यक्षकन्या। दन्तीवृक्षः। चौड़ानामगन्धद्रव्यम्। पुष्पविशेषः। सेउती इति भाषा॥ तत्पर्य्यायः। सहा २ कुमारी३ गन्धाढ्या ४ चारुकेशरा ५ भङ्गेष्टा ६ रामतरुणी ७ सुदला ८ बहुपत्रिका ९ भङ्गवल्लभा १०॥ इति राजनिर्घण्टः॥ सेवती ११। यथा, गारुडे पुराणे।

"चम्पकात् पुष्पशतकादशोकं पुष्पसप्ततम्। अशोकात् पुष्पसाहस्रात् सेवतीपुष्पसप्ततम्। सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पसप्ततम्॥"

(यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"गुडपत्री तरुणयुक्ता कर्णिका चारुकेशरा। महाकुमारी गन्धाढ्या लाक्षाढ्यातिमङ्गला॥"

तर्क, क दीप्तौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अर्क-सेट्।) क, तर्कयति। वितर्कणोऽप्ययम्। (अत्र सकं।) तर्कयत्यन्धगुणं सुधीः। इति दुर्गादासः॥

अस्या गुणाः। अग्निप्रियत्वम्। स्निग्धत्वम्। पित्तदाहज्वरसुखपाकदाहविच्छर्द्दिनाशित्वम्। मधुरत्वञ्च। इति राजनिर्घण्टः॥

तरुणीकटाक्षमालः, पुं, (तरुणीनां कटाक्षाणां माला यत्र।) तिलकवृक्षः। इति राजनिर्घण्टः॥

तरुतूलिका, स्त्री, (तरुस्थिता तूलिका चित्रशलाका इव। यद्वा, तरौ वृक्षे दोलयतीति। दुल क्षेपे + ण्वुल्। टाप्। अत इत्वम्। पृषोदरादित्वात् साधुः।) वातुलिः। इति हारावली॥ वाहुड़ इति भाषा॥ तरुदूलिकापि पाठः॥

तरुनखः, पुं, (तरौ तरोर्वा नख इव।) कण्टकः। इति हारावली॥

तरुसुक्, [च्] पुं, (तरुं सुनक्तीव। सुच + क्विप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुस्कन्धः, पुं, (तरौ तिष्ठन् स्कन्ध इव। प्राक्पार्थिववत् मध्यपदलोपी समासः। यद्वा, तरु प्रियो स्कन्धः पशुः।) वानरः। इति शब्दरत्नावली॥

तरुरागं, क्ली, (तरो रागो रक्तिमाभा यस्मात्।) किंशुकम्। नूतनपल्लवः। इति हारावली॥

तरुराजः, पुं, (तरूणां राजा अत्युच्चत्वादस्य तथात्वम्। समासे टच्।) ताडवृक्षः। इति राजनिर्घण्टः॥ (सर्व्वपूज्यत्वात् स्वर्लोकभोग्यत्वाच्च पारिजातपुष्पवृक्षः। यथा, हरिवंशे। १२४। ५५।

"यदेतदाहृतं स्वर्गात् तत् त्वदर्थं मया विभो!। देवोपभोग्यमेतद्धि तरुराजसमुद्भवम्॥")

तरुरुहा, स्त्री, (तरौ रोहतीति। रुह + कः। टाप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुरोहिणी, स्त्री, (तरुषु रोहतीति। रुह + णिनिः + ङीप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुवल्ली, स्त्री, (तरुषु वल्लीव तरुर्वल्लीव वा।) जतुकालता। इति राजनिर्घण्टः॥

तरुशायी, [न्] पुं, (तरौ तरुकोटरे शाखायां वा शेते इति। शी + णिनिः।) पक्षी। इति हारावली॥

तरुसारः, पुं, (तरोः सारः।) कर्पूरः। इति हारावली॥ (यथा, सुश्रुते चिकित्सितस्थाने ३५ अध्याये। "तत्रनेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि शस्त्राणीति।"कर्पूरशब्देऽस्य विवृतिर्ज्ञातव्या॥)

तरुस्था, स्त्री, (तरौ तिष्ठतीति। स्था + कर्त्तरि टाप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरूटः, पुं, (तरोः ऊट इव।) उत्पलकन्दः। अस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ (यथा, चरके सूत्रस्थाने सप्तविंशेऽध्याये।

"तरूटविसशालूककौशादनकशेरुकम्। शृङ्गाटकं कलोड्यञ्च गुरुविष्टम्भि शीतलम्॥")

तर्कः, पुं, (तर्क+भावे घञ्।) आकाङ्क्षा। वितर्कः। यथा, मृच्छकटिके। ३। १९। १०८।
"मुञ्चतर्कं परित्यज्य आश्रयस्व धृतिम्॥")
स च षड्विधः। यथा। आत्माश्रयः १ अन्योन्याश्रयः २ चक्रकः ३ अनवस्था ४ प्रमाणबाधितार्थकः ५। इति जगदीशः॥ एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥ ऊहः। हेतुज्ञानम्। तत्तु मीमांसादि। इति मेदिनी। के, २५। (यथा, मनुः। १२। १०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः॥"
न्यायशास्त्रम्। यथा, नैषधे।
"यत्काव्यं मधुवर्षिभिर्धवितपरास्तर्केषु यस्योल्लसः॥"
ज्ञानम्। यथा, महाभारते। १। १६८। १८।
"तं वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा॥"
अर्थवाद इति कर्कोपाध्यायः। यथा, अत्रिः। घृतकरा उपदधातीति विधिः श्रूयते। तच्चाज्यसाधनं घृतं तैलं वा तन्मध्ये केनात्रा इति संशये तैजो वै घृतमित्यर्थवादात् घृतेनात्रा इति निर्णीयते। अतस्तर्कोऽर्थवादः॥")
तर्ककः, पुं, (तर्केण आकाङ्क्षया कायति प्रकाशते इति। के+कः।) याचकः। इति हेमचन्द्रः॥ (यथा, महाभारते। १२। ४५। ६।
"सधानुजीविनो भृत्यान् संश्रितानतिदीनपि।
कामैः सम्पर्यामास तृपर्थांस्तर्ककानपि॥"
तर्कयतीति। तर्क+ण्वुल्।) तर्ककारकश्च॥
तर्कविद्या, स्त्री, (तर्कोपदेशी विद्या तर्करूपा या विद्या वा।) न्यायविद्या। तत्पर्य्यायः। आन्वीक्षिकी २। इत्यमरः। १।६।५॥ (यथा, महाभारते। १३। ३७। १२।
"आन्विक्षिकीं तर्कविद्यामगुरक्तो निरर्थिकाम्॥")
तर्कारी, स्त्री, (तर्कं ऋच्छतीति। ऋ+कर्म्मण्यण्।" ३। २। १। इत्यण्। ङीप् च।) जयन्तीवृक्षः। इत्यमरः। ३। २। ६५॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।
"वैजयन्ती च तर्कारी जयन्ती विजया जया॥"
अस्या गुणा यथा,—
"तर्कारी वरुणं स्वादु सतिक्तं कफवातजित्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
अस्याः पत्रवारो यथा,—
"तर्कारी विष्णुशिवसूरसवत्सकनिम्बजैः।
पत्रमूलफलैस्तोयं प्रस्तुण्याश्च सेचनम्॥
इति चरके चिकित्सास्थाने सप्तविंशोऽध्याये॥
इयं गणिकारिकापि वाच्या। तत्पर्य्याया यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका॥
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
तर्किणः, पुं, चक्रमर्दवृक्षः। इतिरत्नमाला॥ तर्कीलोऽपि पाठः॥ (चक्रमर्दशब्देऽस्य विवृतिर्वीक्षाता॥)

तर्की, [न्] त्रि, (तर्कयितुं शीलमस्य यद्वा तर्कयतीति। तर्क+णिनिः।) तर्कविशिष्टः। मीमांसकः। यथा,—
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयस्त्राश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा॥"
इति मनुः। १२। १११॥
तर्कुः, स्त्री, (कृत्+उः। निपातनात् साधुः।) सूत्रनिर्म्माणयन्त्रम्। टेको इति भाषा॥ तत्पर्य्यायः। कपालनालिका २। इति त्रिकाण्डशेषः॥ तर्कुटी ३ सूत्रला ४। इति हारावली॥ (कुम्भकारस्य चक्राकारशिलाभाण्डम्। यथा, अनर्घराघवे। २। ६।
"शृङ्गे सम्पति यावदभ्युदयते तत्तर्कुटोन्नृत्यता
रथ्याहिम्बरजश्छटावलयितो देवस्त्विषामीश्वरः॥")
तर्कुटं, क्ली. (तर्कयति सूत्रोत्पादकतया शोभते इति। तर्क दीप्तौ+बाहुलकात् उटन्।) कर्णनम्। इति त्रिकाण्डशेषः॥ काटनाकाटा इति भाषा॥
तर्कुटी, स्त्री, (तर्कुट+स्त्रियां गौरादित्वात् ङीष्।) तर्कुः। इति हारावली। २१३।
तर्कुपिण्डः, पुं, (तर्कुस्थितः पिण्डः। मध्यपदलोपिसमासः।) तर्कुस्थितन्तृपिण्डः। टेकोर वाँटुल इति भाषा॥ तत्पर्य्यायः। वर्त्तिनी २। इति जटाधरः॥ तर्कुपीठी ३ वर्त्तुला ४। इति हारावली। २१३॥
तर्कुपीठी, स्त्री, (तर्कुस्थिता पीठी खण्डो यत्र तृपिण्डः।) तर्कुपिण्डः। इति हारावली। २१३॥
तर्कुलासकः, पुं, (लासयति श्लोभयतीति। लस कान्तौ+णिच्+ण्वुल्। तर्कुः सूत्रनिर्म्माणयन्त्रं तस्य लासकः।) भक्षोलः। इति हारावली। २१३॥ खरसा इति भाषा॥
तर्कुग्राहः, पुं, (तर्कोः ग्राहः।) सामकः। इति त्रिकाण्डशेषः॥ टेकोर ग्राह इति भाषा॥
तर्क्षुः, पुं, (तरत्नुः पृषोदरादित्वात् साधुः।) तरत्नुः। इति शब्दरत्नावली॥
तर्क्ष्यः, पुं, यवक्षारः। इति रत्नमाला॥
तर्ज्ज, भर्त्सने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तर्ज्जति। इति दुर्गादासः॥
तर्ज्ज, क ड भर्त्सने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं सकं-सेट्।) क ड, तर्ज्जयते। भर्त्सनम्। तामतर्ज्जयदमरे। इति रघुप्रयोगस्तु तर्ज्जनं तर्ज्जः। तर्ज्जं करोतीति णौ साधुः। इति दुर्गादासः॥
तर्ज्जनं, क्ली, (तर्ज्ज+भावे ल्युट्।) भर्त्सनम्। यथा। अधीरायास्तर्ज्जनताडनादि। इति रसमञ्जरी॥ (यथाच कुमारे। ६। ४५।
"भ्रूभेदिभिः सकम्पोष्ठैर्लक्षिताङ्गुलितर्ज्जनैः।
यच्च कोपैः कृता स्त्रीणामाप्रसादार्थिनः प्रियाः॥")
तर्ज्जनी, स्त्री, (तर्ज्यतेऽनयेति। तर्ज्ज भर्त्सने+करणे ल्युट्। ततः स्त्रियां ङीप्।) अङ्गुष्ठसमीपाङ्गुलिः। तत्पर्य्यायः। प्रदेशिनी २। इत्यमरः। २। ६। ८१॥ सा तु मर्म्मस्थस्य चतुर्भिर्मासैर्भवति। इति सुश्रुतः॥ (यथा, कथासरित्सागरे। १७। ८८।
"तच्छ्रुत्वा श्वशुरं तं सा वधूः सोमप्रभा क्रुधा।
विलोक्य भ्रामयामास यमाज्ञामिव तर्ज्जनीम्॥")
तर्ज्जिकः, पुं. (तर्ज्जस्तर्ज्जनमस्त्यस्य। तर्ज्ज+ठन्।) देशविशेषः। तत्पर्य्यायः। तायिकः २। इति हेमचन्द्रः। ४। २४॥
तर्णः, पुं, (तर्णोति क्षुधादिकं भक्षयतीति। तृह् भक्षणे+क्यप्।) वत्सः। इति हेमचन्द्रः। ४। ३२६॥
तर्णकः, पुं, (तर्ण एव। स्वार्थे कन्।) वत्सोवासवत्सः। इत्यमरः। २। ९। ६१॥ गोमवे बाछुर इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ५। ४३६।
"ज्ञानचौरां वरां पत्नीं वहद्वारां निषादते।
आलिङ्गमानां क्रन्दद्भिस्तर्णकैरिव दारकैः॥"
बालकः। यथा, अनर्घराघवे। २। २३।
"मुनिविनियोगलूनप्ररूढदुग्धाहुतानि बर्हींषि।
गोकर्णतर्णकोऽयं तर्णोत्पुपकण्डकच्छेद्यः॥")
तर्ण्यः, पुं, (तरणिः पृषोदरादित्वाद्धलोपः।) खर्य्यः। शवः। इति शब्दार्थकल्पतरुः॥
तर्णरीकं, क्ली, (तीर्य्यतेऽनेनेति। तॄ+"पर्णरीकादयश्च।" उणां। ४। २०। इति ईकन्प्रत्ययेन निपातनात् साधुः।) नौका। (तरतीति। कर्त्तरि ईकः।) पारगे, त्रि। इति मेदिनी। के, १६१॥
तर्द, हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तर्दति। इति दुर्गादासः॥
तर्दूः, स्त्री, (तरति प्लवते इति। तॄ+"भृञो दुक् च।" उणां। १। ६१। इति ऊः दुगागमश्च।) दारुहस्तकः। इत्यमरः। २। ९। ३४। काठेर हाता इति भाषा॥
तर्पणं, क्ली, (तृप प्रीणने+भावे ल्युट्।) हविः। प्रीणनम्। इत्यमरः। २। ६। ५६॥ (यथा, कथासरित्सागरे। २६। २३६।
"तच्चाहूय तरोर्मूले वेतालं वृक्षवेश्मनि।
पूजयित्वाकरोत्तस्य तृप्तांसबलितर्पणम्॥")
यज्ञकाष्ठम्। इति हेमचन्द्रः॥ (दत्त्वान्नं पितरो येन। दृप्+करणे ल्युट्।) देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन हविःसम्पादनम्। यथा,
"एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः।
नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्धमानसः।
आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्।
तीर्थक्षीरघृतक्षौद्रदधिदर्भे तथा।
वसित्वा वसनं शुक्लं स्मृत्वा चाक्षीर्ज्जनार्द्दनम्।
विधिज्ञास्तर्पणं कुर्य्युर्न पात्रे तु कदाचन।
यदपां क्रूरसंस्पृष्टं यदमेध्यञ्च किञ्चन।
अज्ञानान्मलिनं यच्च तत् सर्व्वमपगच्छतु।
गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना।
प्रक्षिपेद्दिक्षु नैर्ऋत्यां रक्षोपहतयेऽद्भुतम्।
अनाक्षिकन्तु यद्दुष्टं पापाद्यच्च प्रतिग्रहम्।

दुष्कृतं यच्च मे किञ्चिदाह्नानःकायकर्म्मभिः ॥
पुनातु मे तदिन्द्रस्तु वरुणः सहदेवतिः ।
सविता च भगश्चैव सुनयः सनकादयः ॥
आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यतिति ध्रुवम् ।
त्रिपेदपोऽञ्जलींस्त्रींस्तु कुर्व्वन् सङ्कल्पतर्पणम् ॥"
इति गारुडे २१५ अध्यायः ॥

तर्पणविशेषस्तु गारुडे २१६ अध्याये तथा वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याये च द्रष्टव्यः ॥ * ॥ जीवत्पितृकस्य तर्पणनिषेधो यथा,—

"दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूप! कुर्य्यात् कृत्वाघमाप्नुयात्॥"
इति कालिकापुराणे ८६ अध्यायः ॥

महायज्ञविशेषः । तत्तु पितृयज्ञः । पितृणां कव्यगलादीनाञ्च विधिना जलान्नदानेन तृप्तिसम्पादनम् । इत्यमरटीकायां भरतः ॥ "तत् द्विविधं प्रधानं अङ्गञ्च । तत्राद्यं यथा,—

'तर्पणञ्च शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः ।
देवेभ्यञ्च ऋषिभ्यञ्च पितृभ्यञ्च यथाक्रमम् ॥'
इति प्राचेतसः ॥

विधवामधिकृत्य काश्मीरखण्डे ।

'तर्पणं प्रत्यहं कार्य्यं भर्तुः कुशतिलोदकैः ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्ब्बकम् ॥'

द्वितीयं यथा, ब्रह्मपुराणे ।

'नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥'

तर्पणाकरणे दोषः । यथा, योगियाज्ञवल्क्यः ।

'नास्तिक्यभावादृक्थाच्च न तर्पयति वै सुतः ।
पिबन्ति देहरुधिरं पितरो वै बलार्थिनः ॥"

तस्य निषिद्धस्नानादि यथा । "नेरुकारचिते स्थाने पितॄंस्तर्पयेत् ।' इति ब्रह्मलिखितौ ॥

'यत्र सर्व्वाय चोत्सृष्टं यत्राभोज्यनिपातनम् ।
तद्वर्ज्यं सलिलं तात ! सदैव पितृकर्म्मणि ॥'
इति मार्कण्डेयपुराणम् ॥ * ॥

तस्य विधानं यथा । स्नातस्वार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात् परिवर्त्तितवासाश्चेत् तीरमुत्तीर्य्येति । इति विष्णुः ॥ तीर्थे विशेषो यथा, मत्स्यपुराणे ।

'तिलोदकाञ्जलिर्द्देयो जलस्थैस्तीर्थवासिभिः ॥'

तीर्थे स्नात्वा तर्पणं करोति तदा जलैकचरणः आचम्य कुर्य्यात् तस्य जले च तर्पणमविरुद्धम् । स्थले तर्पणं दर्भेषु कार्य्यम् । यथा,—

'प्रागग्रेषु सुरांस्तर्प्पेत् मनुष्यांश्चैव मध्यतः ।
पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन् ॥'
इति आग्नेयपुराणम् ॥

अशुचिदेशे तु ।

'यत्राशुचिस्थलं वा स्याद्दूरे देवतापितॄन् ।
तर्पयेत्तु यथाकाममशु सर्व्वं प्रतिष्ठितम् ॥'
इति विष्णुः ॥

'प्रादेशमात्रं उद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मुखान्यांस्तर्प्पेत पितॄन् दक्षिणतस्तथा ॥'
इति व्यासः ॥

उद्धृतोदके तु ।

'पात्राद्वा जलमादाय शुचौ पात्रान्तरे क्षिपेत् ।
जलपूर्णेऽथवा गर्त्ते न स्थले तु विवर्द्धयेत् ॥'
इति हारीतः ॥

'यद्दाहृते: प्रसिञ्चेत्तु तिलान् संमिश्रयेज्जले ।
अतोऽन्यथा तु सर्व्वेण तिला ग्राह्या विचक्षणैः ॥'
इति योगियाज्ञवल्क्यः ॥

"अङ्गुष्ठानामिकाभ्याञ्च दक्षिणस्तेतरात् करात्।
तिलान् गृहीत्वा पात्रस्थान् ध्यायन् सन्तर्पयेत् पितॄन् ॥'
इति नारदः ॥ * ॥

देवतर्पणं यथा,—

'ब्रह्माणं तर्पयेत् पूर्ब्बं विष्णुं रुद्रं प्रजापतिम् ।
देवा यक्षास्तथा नागा गन्धर्व्वाश्चरसोऽसुराः ॥
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगाः ।
विद्याधरा जलाधारास्तथैवाकाशगामिनः ॥
निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥'

इदं उपवीतिना प्राङ्मुखेन देवतीर्थेन कार्य्यम् ॥

मनुष्यतर्पणं यथा,—

'सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।'

इदं निवीतिना मनुष्यतीर्थेन सामगेन प्रत्यङ्मुखेन कार्य्यम् । अन्यवेदिना उदङ्मुखेन कार्य्यम् ॥ * ॥ तत ऋषितर्पणं प्राङ्मुखेन उपवीतिना देवतीर्थेन कार्य्यम् । ततो दिव्यपितृतर्पणं दक्षिणामुखेन प्राचीनावीतिना सतिलजलेन पितृतीर्थेन कार्य्यम् । ततः पितृतर्पणम् ॥ * ॥ भीष्माय्यं भीष्मतर्पणम् । तस्य मन्त्रो यथा,—

'वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥'

प्रार्थनमन्त्रो यथा,—

'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥'

प्रेतपतृदर्य्यां यमतर्पणं यथा,—

'यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥'
प्रत्येकनामभिर्द्व्योम्नाञ्जलीन् दद्यात् ॥ * ॥

तिलतर्पणनिषेधो यथा,—

'रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे ।
सप्तम्यां जन्मदिवसे न कुर्य्यात् तिलतर्पणम् ॥'
इति स्मृतिः ॥

'संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा ।
श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम् ॥'
इति मत्स्यपुराणम् ॥

तत्र प्रतिप्रसवो यथा,—

'अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च ।
उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे ॥
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे ।
तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्व्वदा ॥'
इति स्मृतिः ॥

'तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम् ॥'
इति मरीचिवचनम् ॥ * ॥

तिलाभावे प्रतिनिधिर्यथा ।

'तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।
तदभावेऽपि सिञ्चेत्तु दर्भैर्मन्त्रेण चाग्रथ ॥'
इति याज्ञवल्क्यः ॥ * ॥

अशक्तौ । आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यतु । इत्यनेन चोत्सर्पयेत् ।" इत्याह्निकतत्त्वम् ॥

काश्मीरखण्डमते तु ।

"आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥"* ॥

जन्माष्टम्यां तर्पणस्य फलं यथा,—

"तस्यां तिथौ वारिमात्रं पितृभ्यां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन घृताक्तं नात्र संशयः ॥"
इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तर्पणी, स्त्री, (तृप्यतेऽनयेति । तृप + करणे ल्युट् । स्त्रियां ङीप् ।) गुरुस्कन्धवृक्षः । स च श्लेष्मातकवृक्षः । इति शब्दमाला ॥ (सर्व्वजनतृप्तिप्रदायित्वात् गङ्गा । यथा, काश्मीरखण्डे ।२६।७२।

"तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ॥"
प्रीतिप्रदे, त्रि । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"क्षुत्तृट्श्रमक्लान्तिहरी पेया वातानुलोमनी ।
विशेषी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी ॥")

तर्पणेच्छुः, पुं, (तर्पणमिच्छतीति । तृप + उः निपातनात् साधुः ।) भीष्मः । इति शब्दरत्नावली ॥ तर्पणाकाङ्क्षिणि, त्रि ॥

तर्पिणी, स्त्री, (तर्पयति प्रीणयतीति । तृप् + णिच् + णिनिः । ततो ङीप् ।) पद्मचारिणी । इति शब्दचन्द्रिका ॥

त(र्ब)र्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपधः । तर्बति । इति दुर्गादासः ॥

तर्बटः, पुं, (तर्बति हतं गच्छतीति । तर्ब + बाहुलकात् अटन् ।) वत्सरः । इति शब्दरत्नावली ॥ चक्रमर्दः । इति राजनिर्घण्टः ॥

तर्म्मे, [न्] क्ली, (तरतीति । तॄ + "सर्व्वधातुभ्यो मनिन् ।" उणा ४ । १४४ । इति मनिन् ।) यूषाख्यम् । इत्यमरः । २ । ७ । १६ ॥

तर्षः, पुं, (तृष पिपासायाम् + भावे घञ् ।) अभिलाषः । (यथा, महाभारते । १२ । २०४ । ६ ।

"तर्षक्षेदो न भवति पुरुषस्येह कल्मषात् ।
निवर्त्तते तदा तर्षः पापमात्मगतं यदा ॥")
तृष्णा । इत्यमरः । २ । ६ । ५५ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४८० ।

"लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् ।

यतप्रतापो रिपुस्त्रीणां सनेत्राम्भोऽभजन्मुखम्॥"
यथा, वैद्यकचक्रपाणिसंग्रहे व्रणाधिकारे।
"काश्मर्य्यग्रर्करायुक्तं चन्दनोशीरपद्मकम्।
द्राक्षामधुकसंयुक्तं पित्ततर्षे जलं पिबेत्॥"
तीर्य्यतेऽनेनेति। तॄ प्लवनतरणयोः+"तृतॄवदिहनीति।" उणा ३। ६२। इति सः।) प्लवः। (तीर्य्यतेऽसौ इति कर्म्मणि सः।) समुद्रः। इत्युणादिकोषः॥ सूर्य्यः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तर्षः, क्ली, (तृष+भावे घञ्।) पिपासा। इति जटाधरः॥ (अभिलाषः। यथा, भागवते। ३। २५। ७।
"निर्विण्णा नितरां भूमन्नसदिन्द्रियतर्षणात्।
येन संभाव्यमानेन प्रपन्नान्धं तमः प्रभो!॥")

तर्षितः, त्रि, (तर्षोऽस्य जातः। तर्ष+तारकादित्वात् इतच्।) तृषितः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ६। ६। २७।
"राजा तदृषिवृन्दस्य प्रविश्य निधिं तर्षितः।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम्॥"
जाताभिलाषः। यथा, रामायणे। २।१०४।१।
"वशिष्ठः पुरतः कृत्वा दारान् दशरथस्य च।
अभिचक्राम तं देशं रामदर्शनतर्षितः॥")

तल, गतौ। (भ्वां-परं-सकं-सेट्।) सौत्रधातुरयम्। तालिग्रः। इति दुर्गादासः॥

तल, कि प्रतिष्ठितौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-चकं-सेट्।) कि, तालयति तलति व्रतम्। संपूर्वः स्वादित्वर्थः। इति दुर्गादासः॥

तलं, क्ली पुं, (तलतीति। तल प्रतिष्ठायाम्+पचाद्यच्।) स्वरूपम्। यथा महीतलम्। (यथाच माघे। २। १११।
"क्लान्तं क्लान्तविदग्धीर्घेष्वनः प्रणिधयः पदम्।
विद्राङ्कुर्वन्तु महत्तलं विहिमदम्भसः॥"
"तलं स्वरूपं प्रमाणमिति यावत्॥" इति तट्टीकायां मल्लिनाथः॥) अनूर्द्धम्। इति मेदिनी। ले, २१॥ (अधः। इत्यमरः। ३। ३। २०१॥ यथा, मनुः। २। ५६।
"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते॥"
यथा च श्रीभक्तिरसामृतसिन्धौ। २। १६।
"वासो वल्कलमाखरः किशलयान्योक-
स्तरूणां तलं
मूलानि क्षतये क्षुधां गिरिनदीतोयं
क्षयाश्रान्तये॥"
हस्तादीनामुपरिभागः। यथा,—
"तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः।
बाह्वोः कर्म्मक्षयकरी————————॥"
इति माधवनिदानरुग्विनिश्चये वातव्याधौ॥
"तलं हस्तस्योपरिभागः तलशब्दोऽत्र उपरिवचनः यथा भूतलमिति गयदासः। तेनायमर्थः, बाह्वोः पृष्ठं बाहुपृष्ठं तत आरभ्य हस्ततलं यत्तीक्ष्णमिति॥" इति विजयरक्षितकृतव्याख्यानम्॥)

तलं, क्ली, (तलतीति। तल+घञ्।) व्याघातवारणम्। (यथा,—
"ततः समुत्पेतुरुदायुधास्ते
महीक्षितो बद्धतलाङ्गुलित्राः॥")
इति महाभारते। १। १६०। १५।
काननम्। कार्य्यबीजम्। इति मेदिनी। ले, २१॥ गर्त्तः। इति त्रिकाण्डशेषः॥ पादतलस्य मध्यम्। इति हेमचन्द्रः। ३। २८२॥ (यथा, भागवते। ८। २०। २३।
"रसामचष्टाङ्घितलेऽथ पादयो-
र्महीं महीध्रान् पुरुषस्य जङ्घयोः।
पतत्त्रिणो जानुनि विश्वमूर्त्ते-
रूर्व्वोर्गजं मारुतमिन्द्रसेनः॥"
हस्तस्य मध्यमपि। यथा, मनुः। ४। १४३।
"पृष्ठे तानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु॥")

तलः, पुं, तालवृक्षः। चपेटः। (यथा, मार्कण्डेये। ६०। १६।
"स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः।
देयास्त्वयापि सा देवी तलेनोरस्यताडयत्॥"
करतलाघातजन्यशब्दः। यथा, महाभारते। ३। २७७। २४।
"ततः प्रहसिताः सर्व्वे तेऽन्योन्यस्य तलान् ददुः॥")
तूणरः। सव्यपाणिना तन्त्रीघातः। इति मेदिनी। ले, २१॥ स्वभावः। आधारः। इति हेमचन्द्रः॥ महादेवः। यथा, महाभारते शिवसहस्रनामस्तोत्रे। १३। १७। १२८।
"तलस्तालः करस्थाली ऊर्द्धसंज्ञनको महान्॥")

तलकं, क्ली, (तलेन गभीरगर्त्तेन कायतीति। के+कः।) पुष्करिणी। इति हारावली। ४२॥ तलाओ इति हिन्दी भाषा॥

तलप्रहारः, पुं, (तलेन पाणितलेन प्रहारो यस्य।) चपेटः। तत्पर्य्यायः। चर्व्वा २। इति हारावली। १६७॥ (यथा, मार्कण्डेये। ६०। १७।
"तलप्रहाराभिहतो निपपात महीतले॥
तलस्य प्रहारः।) तलाघातः॥

तलसारकं, क्ली, (तले सारो यस्य कम्।) घोटकस्थान्नभोजनपात्रम्। इति केचित्॥ घोटकस्य वक्त्रस्थलबन्धनरज्जुः। तत्पर्य्यायः। वक्त्रपट्टः २ तलिका ३। इति हेमचन्द्रः। ४। ३१७॥

तलहृदयं, क्ली, (तलस्य पादतलस्य हृदयमिव।) पादतलस्य मध्यम्। इति हेमचन्द्रः। ३। २८२॥

तला, स्त्री, (तल+स्त्रियां टाप्।) गोधा। व्याघातवारणा। इत्यमरः। २। ८। ८४।

तलाची, स्त्री, (तलमञ्चतीति। अञ्च+क्विप्। स्त्रियां ङीष्।) तलनिर्म्मितकटः। इति हारावली। १७७॥

तलातलं, क्ली, (नास्ति तलं यस्येति अतलम्। तलादपि अतलम् अत्यन्तनिम्नतयास्य तथात्वम्।) पातालविशेषः। इति शब्दमाला॥ तत्र मयनामा दानवस्त्रिपुराधिपतिर्भवता त्रिपुरारिणा त्रिलोक्याः शं चिकीर्षुणा निदग्धस्वपुरत्रयस्तत्प्रसादात् लब्धपदो मायाविनामाचार्य्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते।" इति श्रीभागवतम्॥

तलिका, स्त्री, (तलं वक्त्रस्योऽधोभागो बन्धनस्थानत्वेनास्त्यस्या इति। तल+ठन्।) तलसारकम्। इति हेमचन्द्रः। ४। ३१७॥

तलितं, क्ली, भृष्टमांसम्। यथा,—
"शुद्धमांसावघातेन मांसं सम्यक् प्रसाधितम्।
पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः॥"
अस्य गुणाः। यथा, भावप्रकाशे। १। १।
"तलितं बलमेधाग्निमांसौजःशुक्रवर्द्धनम्।
तर्पणं लघु सुस्निग्धं रोचनं दृढ़ताकरम्॥"

तलिनं, क्ली, (तल्यते शय्यनार्थे गम्यतेऽत्र। तल+"तलिपुलिभ्यां नः।" उणा। २। ५३। इति इनन्।) शय्या। इति हारावली। १७२॥

तलिनः, त्रि, (तल+इनन्।) विरलः। श्लोकः। स्वच्छः। इति मेदिनी। ने, ७०॥ दुर्बलः। इति हेमचन्द्रः॥

तलिमं, क्ली, (तल+बाहुलकात् इमन्।) कृत्रिमम्। तल्पम्। चन्द्रहासः। वितानकः॥ इति मेदिनी। मे, ४४॥

तलुनः, पुं, (तरति वेगेन गच्छतीति। त+"ज्वरत्वरेति वा।" उणा। ३। ५४। इति उनन् रस्य लश्च।) पवनः। युवा। इति मेदिनी। ने, ७०॥

तलुनी, स्त्री, (तलुन+गौरादित्वात् ङीष्।) तरुणी। युवतिः। इति शब्दरत्नावली॥

तलेचरः, पुं, (तले अधोभागे ईचरं इङ्गितस्य।) शूकरः। इति शब्दार्थकल्पतरुः॥

तलोदरी, स्त्री, (तलमतिगभीरमपर्य्यन्ततयेतिभावः उदरं यस्याः। बहुव्रीहौऽपि "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च।" ४। १। ५५। इति ङीष्। आद्ययोर्बहुव्रीह्योर्निषेधो बाधते पुरस्तादपवादन्यायात्।) भार्य्या। इति शब्दार्थकल्पतरुः॥

तलोदा, स्त्री, (तले उदकं यस्याः। उदकशब्दस्योदादेशश्च।) नदी। इति त्रिकाण्डशेषः॥

तल्कं, क्ली, (तल्+बाहुलकात् कन्।) वनम्। इति त्रिकाण्डशेषः॥

तल्पं, क्ली पुं, (तल्यते शय्यनार्थे गम्यतेऽत्र। तल+"खण्यशिल्पशय्यवाय्यरूपपर्पतल्पाः।" उणा। ३। २८। इति पप्रत्ययेन निपातनात् साधुः।) शय्या। (यथा, मनुः। ३। ६।
"सङ्विधं तल्पमासीनमर्हयेत् प्रथमं गवा॥")
अट्टालिका। दाराः। इत्यमरभरतौ॥ (यथा, सम्बन्धसंहितायाम्। १५८।
"पितृव्यदारगमने श्यालभार्य्यागमे तथा।
गुरुतल्पव्रतं कुर्य्यात् नान्या निष्कृतिरुच्यते॥")

तल्पकीटः, पुं, (तल्पे शय्यायां जातः कीडः।) कीटविशेषः। डांसपोका इति भाषा। यथा,
"जन्मैकं तल्पकीटश्च तदा मुद्गो भवद्धवम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्ण जन्मखण्डम्॥

तल्पनं, क्ली, (तल्प इवाचरति। तल्प+क्विप्+ल्युच्।) करिपृष्ठम्। इति भूरिप्रयोगः॥ पृष्ठवंशस्य मांसम्। इति हारावली॥

तल्लं, क्ली, (तस्मिन् भूदेशे लीयते इति। ली+डः।) विलम्। इति त्रिकाण्डशेषः॥

तल्लः, पुं, (तस्मिन् लीयते इति। ली+डः।) जलाधारविशेषः। इति मेदिनी। ले, २२॥ तलाओ इति हिन्दीभाषा॥

तल्लजः, पुं, (तत प्रसिद्धं यथास्यात् तथा लजतीति। लज+अच्।) प्रग्रस्तः। इत्यमरः॥ अयं अजहल्लिङ्गः समासे उत्तरपदे भवति। यथा कुमारीतल्लजः। इत्यमरटीका॥

तल्ली, स्त्री, (तत् प्रसिद्धं यथा तथा लसतीति। लस+डः स्त्रियां ङीष् च।) वरयोषी। इति मेदिनी। ले, २२॥

तवक्षीरं, क्ली, (तु+अच्। तवं क्षीरमिति नित्यकर्म्मधारयः।) तोयाक्षीर इति ख्यातम्। तत्पर्य्यायः। पयःक्षीरम् २ यवजम् ३ यवजोद्भवम् ४। अस्य गुणाः। मधुरत्वम्। स्निग्धरत्वम्। दाहपित्तक्षयकासकफश्वासदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

तवक्षीरी, स्त्री, (तवक्षीर+ङीष्।) मल्लपर्णा। इति राजनिर्घण्टः॥

तवराजः, पुं, (तु+अच् तवः पूर्णः सन् राजते। राज+अच्।) यवासग्रकैरा। इति राजनिर्घण्टः॥ (यवासग्रकैराशब्दे अस्य विवृतिर्गीतया॥)

तवराजोद्भवखड्गः, पुं, (उद्भवत्यस्मादिति। उत्+भू+अच्। उद्भव उत्पत्तिस्थानम्। तवराज उद्भवोऽस्य। यद्वा, तवराजात् उद्भवतीति। उद्+भू+अच्।) ततः कर्म्मधारयः। यवासग्रकैराभवखड्गः। तत्पर्य्यायः। सुधामोदकजः २ खड्गोद्भवजः ३ सिद्धमोदकः ४ अम्लतसारजः ५ सिद्धखड्गः ६। अस्य गुणाः। दाहतापतृष्णामोहमूर्च्छाश्वासनाशित्वम्। इन्द्रियतर्पणत्वम्। प्रीतत्वम्। सदासुमधुरत्वञ्च। इति राजनिर्घण्टः॥

तविषः, पुं, (तव+"तवेर्विद्वा।" उणा।१।१४८। इति टिषच्।) स्वर्गः। समुद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तविषी, स्त्री, (तविष+संज्ञायां ङीष्।) नदी। देवकन्या। भूमिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (बलम्। यथा, ऋग्वेदे।१।३५।४।

"क्षयाय जिष्णो तविषीं दधानः॥")

तष्टः, त्रि, (तक्ष+क्तः। पृषोदरात् कलोपे साधुः।) तनूकृतः। इत्यमरः।३।१।६६।

तष्टा, [ऋ] पुं, (तक्षकार्य्ये+लच् पृषोदरात् कलोपे साधुः।) त्वष्टा। कुतार इति भाषा। विश्वकर्म्मा। आदित्यविशेषः। इत्यमरटीकायां रमानाथः॥

तस, ड कि अवक्षेपणे। इति कविकल्पद्रुमः॥ (चरां-पक्षे भ्वां-परं-सकं-सेट्।) ड, कर्म्मणि तंस्यते। कि, तंसयति तंसति हारो जनम्। इति दुर्गादासः॥

तस, य उ ड्र उत्क्षेपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) य, तस्यति धूलिं वायुः। उ, तसित्वा तस्त्वा। ड्र, अतसत्। अतासीत्। अतसीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

तसरः, पुं, (तनोतीति। तन+"तॄफलिभजिमनितसिगमिदम्पिशिरिधिषिभ्यः क्सरन्।" उणा ३। ७५। इति सरन् किच्च।) वसरः। सूत्रवेष्टनम्। इत्युणादिकोषः॥ (यथा, वाजसनेयसंहितायाम्। १६। ८३।

"रसं परिस्रुता न रोहितं
नयद्धुर्धीरस्तसरं न वेम॥")

तस्करः, पुं, (तत् करोतीति। कृ+"दिवाविभेति।" ३। २। २१। इत्यस्य सूत्रस्य "किं यत्तद्वहुषु छन्दोविधानम्।" इति वार्त्तिकोक्तेरच्। ततः।) "तदृष्टहतोः करपत्योः इति सुट्दलोपौ।) चौरः। एकाग्राकः। इति रत्नमाला॥ मदनवृक्षः। इति जटाधरः॥ कर्णः। यथा, रघुः। १। २७।

"यातस्ता यत् परस्वेभ्यः स्मृतौ तस्करता स्थिता॥"

"तस्करः कर्णचौरयोरिति कोषान्तरम्।" इति तट्टीका॥

तस्करवायुः, पुं, (तस्करस्य एकाग्राकस्य वायुरिव।) काकनासालता। इति राजनिर्घण्टः॥

तस्करी, स्त्री, (तद्+कृ+चौरार्थे टः टित्त्वात् ङीप्। सुटि दलोपे च साधुः।) क्रोपना नारी। इति शब्दार्थकल्पतरुः॥

ताटङ्कः, पुं, (ताड्यङ्क+पृषोदरात् साधुः।) ताड्यङ्कः। इति द्विरूपकोषटीकायां भरतः॥ (यथा, देवीभागवते। १२। ६। ७१।

"तलोदरी तिरोभावा ताटङ्कप्रियवादिनी॥")

ताटस्थ्य, क्ली, (तटस्थ+भावे ष्यञ्।) उदासीनत्वम्। निकटस्थत्वम्। यथा, ताटस्थ्येन उदासीनत्वेन इति। तटस्थो निकटस्थः प्रसिद्धपूर्व्वप्रत्यय इति च काव्यप्रकाशटीकायां चण्डिदासः॥

ताड़ः, पुं, (तड़+भावे घञ्।) ताड़नम्। शब्दः। सुष्टिमेयत्वादि। इति मेदिनी। ड़े, १४॥ पर्व्वतः। इति हेमचन्द्रः॥

ताड़का, स्त्री, राक्षसीविशेषः। सा सुकेतुयक्षकन्या ब्रह्मवरेण सहस्रहस्तिबलयुता सुन्ददैत्यपुत्रस्य सुन्दस्य भार्य्या मारीचमाता सुन्दे निहते पुत्रेण सह अगस्त्यमृषिं धर्षयितुमुद्यता तस्य शापात् सपुत्रा राक्षसत्वं गता श्रीरामेण निहता। इति रामायणम्॥

ताड़काफलं, क्ली, (तारकेव नक्षत्रमिव फलमस्य। रस्य ड़त्वम्।) इङ्गुदेला। इति रत्नमाला॥

ताड़ङ्गः, पुं, (तालं तालपत्रमिव अङ्गतेऽत्र लक्ष्यते इति। अङ्ग+घञ्। लस्य ड़त्वम्। पृषोदरादित्वात् साधुः।) कर्णभूषा। कानतड़का इति भाषा॥ तत्पर्य्यायः। कर्णदर्पणः २। इति त्रिकाण्डशेषः॥ ताटङ्कः ३। इति द्विरूपकोषटीकायां भरतः॥ कर्णिका ४ तालपत्रम् ५। इत्यमरः॥ ताड़पत्रम् ६। इति हेमचन्द्रः। ३। ३२०॥ कर्णसुकरः ७। इति जटाधरः॥ (यथा, मनसाधाने।

"ताड़ङ्काड़्दमेखलागुणरणन्मञ्जीरतां प्रापितां
केरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे॥")

ताड़नं, क्ली, (ताड़ि+भावे ल्युट्।) आघातः। यथा, शृङ्गारतिलके। [तपः॥"

"श्राद्धं नीरसकाष्ठताड़नभृतं श्राद्धः प्रचण्डा-

यथाच, गारुड़े ६६ अध्याये।

"श्रुतिस्मृत्युक्तमाचारं कुर्य्याच्चर्म्मादि न स्पृशेत्
न निन्दाताड़ने कुर्य्यात् सुतं शिष्यञ्च ताड़येत्
आचरेत् सर्व्वदा धर्म्मं तद्विरुद्धन्तु नाचरेत्॥"

अपि च चाणक्ये। १२।

"लालने बहवो दोषास्ताड़ने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत्॥"

ताड़नी, स्त्री, (ताड्यतेऽनयेति। ताड़ि+करणे ल्युट् स्त्रियां ङीप्।) अश्वताड़नयष्टिः। तत्पर्य्यायः। चर्म्मयष्टिः २ कशा ३ भीमाः चर्म्मलालिका ५। इति शब्दमाला॥

ताड़पत्रं, क्ली, (तालस्य पत्रमिव। लस्य ड़त्वम्।) ताड़ङ्कः। इति हेमचन्द्रः। ३। ३२०॥

ताड़िः, स्त्री, (ताड़यति पत्रैः शोभते इति। तड़ शोभौ+क्विप्+इन्।) वृक्षविशेषः। इत्यमरटीकायां भरतः॥ ताड़ियात् इति भाषा॥

ताड़ी, स्त्री, (ताड़िः छन्दिकारादिति वा ङीष्।) पत्रहस्तः। इत्यमरभेदिनीकरौ॥ तत्पर्य्यायः। ताड़िः २ तालीं ३ ताखिः ४। इति भरतः॥ ताड़ियातु इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ३। ३२८।

"शुयानमालपत्राणि शीर्णैस्ताड़ीदलानि च।
तत्सेनार्णवतीराणि चक्रेऽरिस्त्रीसुखानि च॥")

आभरणविशेषः। इति दुर्गासिंहः॥

ताड़ुलः, पुं, (ताड़यतीति। तड़+क्विप्+उल।) ताड़यिता। इति संक्षिप्तसारे उणादिवृत्तिः॥

ताड्यमानः, पुं, (ताड्यते असौ। ताड़ि+कर्म्मणि शानच्।) पटहादिः। इति त्रिकाण्डशेषः॥ ताड़नयुक्ते, त्रि। (यथा, कुमारे। १। ४५।

"अथान्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्व्वितन्त्रीरिव ताड्यमाना॥")

ताण्डवं, क्ली, पुं, नृत्यम्। इत्यमरः। १। ७।१०॥ ताण्डेन मुनिना प्रोक्तं ताण्डि नृत्यशास्त्रं तदस्यास्तीति। इति भरतः॥ तण्डुना प्रोक्तमिति स्वामी॥

("पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते॥" इति शब्दार्थचिन्तामणिधृतवचनेन पुंनृत्यम्॥) लयविशेषः। उद्धतनृत्यम्। इति मेदिनी। वे, ३६॥ (यथा, मत्स्यपुराणे। १। १।

"प्रचण्डताण्डवाटोपे-प्रक्षिप्ता येन दिग्गजाः।
भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः॥")

ताण्डवतालिकः, पुं, (ताण्डवे शिवनृत्यकाले यस्तालः स कार्य्यतयास्त्यस्येति । ठन् ।) नन्दी। स शिवद्वारी। इति त्रिकाण्डशेषः ॥

ताण्डवप्रियः, पुं, (ताण्डवं उद्धतनृत्यं प्रियमस्य ।) शिवः। इति शब्दमाला ॥

ताण्डि, स्त्री, (ताण्डेन मुनिना कृतम्। ताण्ड + बहुलवचनात् इञ् ।) कृत्यशास्त्रम्। इत्यमरटीकायां भरतः ॥

तातः, पुं, (तनोति विस्तारयति गोत्रादिकमिति। तन + "दुतनिभ्यां दीर्घश्च।" उणा। ३।९०। इति क्तः दीर्घश्च। यद्वा तातेति अव्यक्तशब्देन लोपः।) पिता। इत्यमरः। २।६।२८। (यथा, रघुः। ९। ७५।

"हा तातेति क्रन्दितमाकर्ण्यविवस्वत्स्वस्यान्विष्यन् वेतसगृहं प्रभवं सः।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥")

अश्वकन्याः। इति मेदिनी। ते, २१ ॥ (यथा, भागवते। २। १४। ३६।

"कच्चित्तेऽनामयं तात! भ्रश्यतेजा विभासि मे।
म्लायमानोऽब्जवदनः किं वा तात! चिरोषितः ॥")

पूज्ये, त्रि। इति शब्दरत्नावली ॥ (यथा, रघौ। १। ७२। वशिष्ठं प्रति दिलीपोक्तिः।

"तस्मात् सुखे यथा तात! संविधातुं तथार्हसि।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥")

तातगुः, पुं, (तातस्य पितुरिव गौर्वाचकशब्दो यत्र। गवाम्नलात् गौरण्ये दृश्यः।) क्षुद्रतातः। पितृव्यः। जनकस्य हिते, त्रि। इति मेदिनी। गे, ३६ ॥

तातजनयित्र्यौ, स्त्री, (तातश्च जनयित्री च ते।) मातापितरौ। इत्यमरः ॥ द्विवचनान्तोऽयम् ॥

ततुल्यः, त्रि, (तातस्य पितुस्तुल्यः।) पितृसमः। तत्पर्य्यायः। मनोभवसः २। इति हेमचन्द्रः। ३। १५२ ॥ मनोभवः ३ पितृसन्निभः ४। इत्यमरः। तातलः ५ इति मेदिनी ॥

तातनः, पुं, (तातं मनोहरं यथा तथा वृत्यतीति। वृत् + बाहुलकात् डः।) खञ्जनपक्षी। इति त्रिकाण्डशेषः ॥

तातलः, पुं, (तापं लातीति। ला + कः। पृषोदरादित्वात् पस्य तः।) रोगः। पाकः। लौहकूटः। मनोभवः। इति मेदिनी। ले, ६८ ॥ तप्तमात्रे, त्रि। इत्यजयपालः ॥

तातिः, पुं, पुत्रः। इति शटाधरः ॥

तात्कालिकः, त्रि, (तत्काले भवः। तत्काल + "आपदादिपूर्व्वपदात्कालान्तात्।" ४। २। ११६। इत्यस्य वार्त्तिकोक्त्या ठञ्।) तत्कालभवः। यथा, शुद्धितत्त्वे ग्रहः।

"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥"

तात्पर्य्यं, क्ली, (तत्परस्य भावः। तत्पर + ष्यञ्।) अभिप्रायः। इति शब्दार्थकल्पतरुः ॥ वक्तुरिच्छा। (यथा, भाषापरिच्छेदे। ८४।

"आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम् ॥")

तादात्म्यं, क्ली, (तदात्मनो भावः। तदात्मन् + ष्यञ्।) तत्स्वरूपम्। अभेदसम्बन्धः। इति न्यायशास्त्रम् ॥

तादृक्, [ग्] त्रि, स इव दृश्यतेऽसौ।(तद् + दृश् + "तदादिभ्यः दृशेरनालोचने कञ्च।" ३। २। ६०। इति क्विन्। "आ सर्व्वनाम्नः।" ६। ३। ९१। इति आत्वम्।) तादृशः। तादार मत इति भाषा ॥ इति मुग्धबोधम् ॥ (यथा, पञ्चतन्त्रे। १। २७६।

"यादृशैः सेवते भर्त्तर्यादृग्भावोपसेवते।
कदाचिन्नान्यसन्देहस्तादृग् भवति पूरुषः ॥")

तादृशः, त्रि, (स इव दृश्यते इति। तद् + दृश् + "तदादिभ्यश्च" क्सोऽपि वाच्य इति क्सः।) तादृक्। इति मुग्धबोधम् ॥ (यथा, राजतरङ्गिण्याम्। ४। २४२।

"ततः प्रभृति तादृश्ययोग्यार्थप्राप्तिलालसः।
परिहासपुरे चक्रे स्थिरां गुर्व्वीं सपर्य्यिणीम् ॥")

तादृशः, त्रि, (स इव दृश्यते इति। तद् + दृश् + "तदादिभ्यः" इति कञ्।) तादृक्। (यथा, पञ्चतन्त्रे। १।४३५।

"उपदेशो न दातव्यो यादृशे तादृशे जने ॥")

तानं, क्ली, (तन इ न विस्तारे + भावे घञ्।) विस्तारः। ज्ञानविषयः। इति शब्दार्थकल्पतरुः ॥

तानः, पुं, (तन्यते गीतमनेनेति। तन + घञ्।) गानाङ्गविशेषः। यथा, सङ्गीतदामोदरे।

"विस्तार्य्यन्ते प्रयोगा येर्मूर्च्छनाग्रामसंश्रयाः।
तानास्तेऽपूर्णपञ्चाशत् सप्तस्वरसमुद्भवाः ॥
तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्।
ते स्युः पञ्चसहस्राणि त्रयस्त्रिंशच्छतानि च ॥"

तानवं, क्ली, (तनोर्भावः। तनु + "दृगन्ताच्च लघुपूर्व्वात्।" ५। १। १३१। इत्यण्।) गात्रे तनुता। यथा, उज्ज्वलनीलमणौ।

"तानवं तनुता गात्रे दौर्ब्बल्यश्रमजादिकृत् ॥"
(यथा, आर्य्यासप्तशत्याम्। ३६३।

"परपतिनिर्दयकुलटाशोषित शूद्र! नेर्ष्यया न कोपेन।
दग्धममतोपतप्ता रौद्रिमि तव तानवं वीक्ष्य ॥")

तानूरः, पुं, (तनु + बाहुलकात् ऊरच्।) पयसां भ्रमः। आवर्त्तः। इति भूरिप्रयोगः ॥

तान्तः, त्रि, (तम + क्तः।) आन्तः। इति शब्दार्थकल्पतरुः ॥ (यथा, प्रद्युम्नविजये। २अङ्के।

"पान्थं श्रान्तिनितान्ततान्तमतुलं सन्तोषयत्याश्रयन्
यत्रात्यन्तघनच्छदैर्विटपिभिश्छन्ने निरुद्यातपे ॥")

तान्त्रिकः, त्रि, (तन्त्रं सिद्धान्तं अधीते वेद वा। तन्त्र + "उक्थादिभ्यः ठक्।) ज्ञातसिद्धान्तः। शास्त्रतत्त्वज्ञः। इत्यमरः। २।८।२५॥ तन्त्रशास्त्रवेत्ता तत्सम्बन्धी च ॥ (यथा, भागवते। ८।६।६।

"श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ॥")

तापः, पुं. (तप + घञ्।) सन्तापः। (यथा, भागवते। ३। १४। ४८।

"नेदाघजं तापमिवोडुराजः ॥")

क्लेशः। इति मेदिनी। पे, ७॥ (त्रिविध दुःखम्। यथा देवीभागवते। १। १। ७।

"दीर्घायुर्भव सर्व्वज्ञ! तापत्रयविवर्ज्जितः ॥")

तापकः, पुं, (तापयतीति। तप + णिच् + ण्वुल्।) ज्वरः। इति शब्दरत्नावली ॥ तापकर्त्तरि त्रि ॥

तापत्यः, पुं, (तपती सूर्य्यकन्या तस्या अपत्यं पुमान्। तपती + ण्यः।) अर्ज्जुनः। इति पुराणम् ॥ (यथा, महाभारते। ५।४६।२।

"तस्मात्तापत्य! यत्किञ्चिन्नृणां श्रेय इहेप्सितम्।
तस्मिन् कर्म्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥"

तपतीवंशोद्भवकौरवमात्रम्। यथा, तत्रैव। १। १७१। ६६।

"सोऽहं त्वयेह विजितः संख्ये तापत्यवर्त्मना! ॥"

तपत्या उपाख्यानम्। तपती + ष्यञ्। तपत्युपाख्याने, क्ली। यथा, तत्रैव। १।२।१०६।

"तापत्यमथ वाग्विष्टमौर्व्वोपाख्यानसत्तमम् ॥"

एतदुपाख्यानन्तु महाभारते आदिपर्व्वणि १७२ अध्याये द्रष्टव्यम् ॥)

तापनः, पुं, (तापयतीति। तप + णिच् + कर्त्तरि ल्युः।) सूर्य्यः। इति हेमचन्द्रः। २। ६ ॥ (यथा, महाभारते। ५। ४६। २।

"शुक्रादब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते।
तच्छुक्रं ज्योतिषां मध्ये तप्तं तपति तापनम्।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥")

कामबाणः। इति जटाधरः ॥ (यदुक्तं,—

"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥")

सूर्य्यकान्तमणिः। इति राजनिर्घण्टः ॥ (क्ली, नरकविशेषः। यथा, याज्ञवल्क्ये। ३। २२४।

"असिपत्रवनञ्चैव तापनञ्चैकविंशकम् ॥"

भावे ल्युट्। तापकरणम्। यथा, सुश्रुते। १।३१।

"तद्दहनपचनदारणतापनप्रकाशनगमभावकर्म्मकरमिति ॥") तापयितरि, त्रि ॥ (यथा, महाभारते। १। १६। २१।

"ततोऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रमभिन्नतापनम् ॥")

तापसं, क्ली, तमालपत्रम्। इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तापसः, त्रि, (तपोऽस्त्यस्येति। तपस् + "अश्वादिभ्यश्च।" ५। २। १०३। इति अण्। यद्वा, तपः शीलमस्य। "कृत्यादिभ्यो यः।" ३। ३। ९२। इति यः।) तपस्वी। इत्यमरः। २।७।३२॥ (यथा, मनुः। ६। २७।

"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥"

तपःसम्बन्धी। यथा, गोः रामायणे। २।५२।५।

"तापसं व्रतमास्थाय तपो गुरुसुवाच ह ॥")

पुं, दमनकवृक्षः। वकपक्षी। इति राजनिर्घण्टः ॥ (इक्ष्वाकुविशेषः। यथा, सुश्रुते। १। ४५।

"कान्तारतापसेष्वेव कार्ष्ण्यं रुचिपत्रकः ॥"
"इत्येता जातयः स्त्रीत्वात् गुणान् वक्ष्याम्यतः परम् ॥"
"कान्तारतापसाविष्णू वंशकानुगुणौ मतौ ॥")
तापसतरुः, पुं, (तापसप्रियस्तरुर्वृक्षः।) इङ्गुदीवृक्षः। इत्यमरः। २। ४। ४६॥ (इङ्गुदीशब्देऽस्य विवरणं ज्ञातव्यम्॥)
तापसद्रुमः, पुं, (तापसप्रियो द्रुमः।) इङ्गुदीवृक्षः। इति हेमचन्द्रः। ४। २०६॥ (पर्य्यायोऽस्य यथा,—
"इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तापसद्रुमसन्निभा, स्त्री, (तापसद्रुमस्य सन्निभा उपमा।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः॥
तापसप्रियः, पुं, (तापसानां प्रियः।) प्रियालवृक्षः। इति राजनिर्घण्टः॥ (इङ्गुदीवृक्षः। यथा, वैद्यकरत्नमालायाम्।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः॥")
तापसप्रिया, स्त्री, (तापसानां प्रिया।) द्राक्षा। इति राजनिर्घण्टः॥ (द्राक्षाशब्देऽस्या गुणादयो ज्ञातव्याः॥)
तापहरी, स्त्री, (तापं अरुचिजन्यसन्तापं हरतीति। हृ+बाहुलकात् टः। स्त्रियां ङीप्।) अञ्जनविशेषः। यथा,—
"इते हरिदासंयुक्ता माषार्धा भर्जयेद्घटीः।
तद्धूलीमपि निर्धौतान् सहैव परिभर्जयेत्॥
सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्।
लवङ्गैकद्विफूनि मात्रया तत्र निःक्षिपेत्॥
एषा स्निग्धं समायाता प्रोक्ता तापहरी बुधैः॥"
अस्या गुणाः।
"भवेत्तापहरी वल्या दृष्या श्लेष्मान्यमाचरेत्।
दृष्टेः तर्पणी रुच्या गुर्व्वी तत्र गुणाः स्मृताः॥"
ताहरी इति लोके। इति भावप्रकाशः॥
तापहारिण्यां स्त्री॥
तापिञ्छः, पुं, (तापिनं सन्तापं छृदति आच्छादयतीति। छद्+अन्येष्वपीति डः। पृषोदरादित्वात् साधुः।) तमालवृक्षः। इत्यमरः। २। ४। ६८॥ (यथा, गीतगोविन्दे। ११।११।
"अनयोर्निचितपदक्षनं श्रवणयोस्तापिञ्छगुच्छावलीम्॥"
क्लीबे, तापिञ्छस्य पुष्पम्। फले लुगिति तद्धितलुक्। द्विहीनं प्रसवे सर्व्वमिति नपुंसकत्वम्। तापिञ्छपुष्पम्। यथा, माघे। १। २२।
"प्रफुल्लतापिञ्छनिभैरभीक्षुभिः
सुभेच सप्तच्छदपांशुपाण्डुभिः॥")
तापिञ्जं, क्लो, (तापिनं जयतीति। जि+डः।) धातुमाक्षिकम्। इति राजनिर्घण्टः॥
तापिञ्जः, पुं, तापिञ्छः। इत्यमरटीकायां भरतः॥
तापी, स्त्री, (तापयतीति। तप+णिच्+अच्। गौरादित्वात् ङीष्।) तापिनी नदी। सा पश्चिमवाहिनी विन्ध्याचले प्रसिद्धा। इति राजनिर्घण्टः॥ (यथा, मात्स्ये। ११३। २७।
"तापी पयोष्णी निर्व्विन्ध्या सिप्रा च ऋषभा नदी।
विन्ध्यपादप्रसूतास्ताः सर्व्वाः शीतजलाः शुभाः॥"
इयं सह्यपादोद्भवा इति विष्णुपुराणम्। २। ३। ११॥
"तापी तापा च गोलोमी गोमती ग्राहिता मही।
सरस्वती युता नद्यो नर्म्मदा पश्चिमानुगाः॥
आसां जलं घनं शीतं पित्तघ्नं कफलं तथा।
वातदोषहरं हृद्यं कण्डूकुष्ठविनाशनम्॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)
यमुना। इति त्रिकाण्डशेषः॥
तापी, [न्] (तापोऽस्यास्तीति। ताप+"अत इनिठनौ।" ५। २। ११५। इति इनिः।) बुद्धः। इति त्रिकाण्डशेषः॥ तापयुक्ते, त्रि॥
तार्य्यं, क्लो, (तापे हितम्। ताप+यत्।) धातुमाक्षिकम्। इति रत्नमाला॥ हेमचन्द्रे पुंलिङ्गोऽयम्। ४२१॥ (यथा, भावप्रकाशे।
"ताप्यस्य पलत्रितयं क्षौद्रस्यावल्लीकायाः॥")
ताप्यकं, क्लो, (ताप्यमेव। स्वार्थे कन्।) माक्षिकम्। इति राजनिर्घण्टः॥ (माक्षिकशब्दे विवृतिरस्य ज्ञेया॥)
ताप्यसंज्ञकं, क्लो, (ताप्यसंज्ञा यस्य। कप्।) माक्षिकधातुः। इति रत्नमाला॥
तामः, पुं, (तान्यत्यनेनेति। तम+करणे घञ्।) भीषणः। दोषः। इत्यजयपालः॥
तामरं, क्लो, (तामं म्लानिं रातीति। रा+कः।) जलम्। घृतम्। इति भरतधृतरुद्रः॥
तामरसं, क्लो, (तामरे जले सरतीति। सस्+डः। यद्वा, बाहुलकात् अमेरप्यसच्। तस्य णित्त्वञ्च। धातोस्तुगागमश्च। णित्त्वात् वृद्धिः। इत्युज्ज्वलदत्तः। ३। ११७॥) पद्मम्। (यथा, राजेन्द्रकर्णपूरे। ५४।
"जाता तामरसोदरे भगवतो धातुः सुतार्था स्थितिः॥")
सारसः। इत्यमरः। १। १०। ४०॥ स्वर्णम्। ताम्रम्। इति मेदिनी। से, ५३॥ (छादयत्याचरच्छन्दोविशेषः। तस्य लक्षणादिकं छन्दःग्रन्थे द्रष्टव्यम्॥)
तामलकी, स्त्री, भूम्यामलकी। इत्यमरः। २। ४। १२७॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।
"कटुकेक्षुयवोशीरसिंही तामलकीघनैः॥")
तामलिप्तं, क्लो, } देशविशेषः। तमलुक् इति
तामलिप्ती, स्त्री, } भाषा॥ तत्पर्य्यायः। दामलिप्तम् २ तामलिप्ती ३ तमालिनी ४ ताम्रपूः ५ विष्णुगृहम् ६। इति हेमचन्द्रः। ४। ४५॥ तमोलिप्ती७ वेलाकूलम् ८ तमालिका ९। इति त्रिकाण्डशेषः॥
तामसं, त्रि, (तम एव। तमस्+स्वार्थे अण्।) प्रकृतिगुणविशेषः। तद्धर्म्मा यथा,—
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥
मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञानं तत्तामसमुदाहृतम्॥"
इति श्रीभगवद्गीतायां १७ अध्यायः॥ * ॥
किञ्च तत्रैव १८ अध्याये।
"नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
यत्तु कृतम्बदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते॥
अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता॥
यदग्रे चानुबन्धे च सुखमोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥"
तामसः, पुं, (तमसो गुणः प्रधानत्वेनास्यास्तीति। अण्।) सर्पः। खलः। इति मेदिनी। से, २५॥ उलूकः। इति राजनिर्घण्टः॥ चतुर्थमनुः। अस्मिन्मन्वन्तरे हरिनामा विष्णोरवतारः। त्रिशिखनामा इन्द्रः। वैधृतयो देवाः। ज्योतिर्धामादयः सप्तर्षयः। धृषखातिनराद्यो मनुसुताः। इति श्रीभागवतम्॥ * ॥ तमोगुणयुक्ते, त्रि॥ (यथा, मनुः। १२। ३३।
"लोभः स्वप्नोऽधृतिः क्रौर्य्यं नास्तिक्यं भिन्नवृत्तिता।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम्॥")
तामसमुनयो यथा। कणादः१ गौतमः२ अक्षिः३ उपमन्युः ४ जैमिनिः ५ दुर्व्वासाः ६ रुक्कुः ७ हरिवंशः ८ भार्गवः ९ जमदग्निः १०॥ तामसशास्त्राणि यथा। असुरमोहनार्थमीश्वरकृतशैवपाशुपतादि १ कणादगौतमयमजैमिनिपटादि २ ब्राह्मणरूपिभगवद्कृतबौद्धशास्त्रम् ३ जैमिनिकृतनिरीश्वरसांख्यम् ४॥ तामसपुराणानि यथा। मात्स्यम् १ कौर्म्मम् २ लैङ्गम् ३ शैवम् ४ स्कान्दम् ५ आग्नेयम् ६॥ तामसस्मृतयो यथा। गौतमम् १ बाहस्पत्यम् २ सासुद्रम् ३ यमम् ४ शाङ्खम् ५ औशनसम् ६॥ * ॥ राजसतामसकर्म्माणि यथा,—
"यत् शैवं दैवतं पैत्रमौपदेवं तथार्षकम्।
शाक्तं शैवं गाणपत्यं यागहोमादिकं तथा॥

पौरोहित्यं याजनञ्च देवलत्वं ग्रामयाजकम् ।
विष्णुसेवापराधञ्च तथा नामापराधकम् ॥
असत्प्रतिग्रहं देवि ! साङ्कल्यमाभिचारिकम् ।
पशुजीवादिहननं पातकञ्चोपपातकम् ॥
अतिपापं महापापमनुपातकमेव च ।
लोभं मोहमहङ्कारं कामं क्रोधं मदन्तथा ॥
एतद्यदपरं कर्म्म गर्हितञ्च वरानने ! ।
राजसं तामसं प्रोक्तं मया च मुनिभिः सदा ॥"
इति पाद्मोत्तरखण्डम् ।

तामसिकं, त्रि, (तमसा तमोगुणेन निर्वृत्तम् । तमस् + ठञ् ।) तामसम् । तमोगुणकार्य्यम् ॥

तामसी, स्त्री, (तमोऽन्धकारः प्राधान्येन अस्ति अस्याम् । तमस् + अण् । स्त्रियां ङीष् ।) निशा । दुर्गा । इति मेदिनी । से, २५ ॥ जटामांसी । इति राजनिर्घण्टः ॥ (तमोगुणसम्बन्धिनी । यथा, देवीभागवते । ३ । ८ । ५ ।
"सात्त्विकी राजसी चैव तामसी च तथा परा ।
श्रद्धा तु त्रिविधा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥")

तामिस्रं, क्ली, (तमिस्रं अन्धकारततिरस्त्यस्येति । तमिस्र + अण् ।) अन्धकारमयनरकम् । इति मनुः ॥ परवित्तापत्यकलत्रापहर्त्तृणां यमदूतैर्निर्भात्स्यते यत्र । इति श्रीभागवतम् ॥ (अन्धकारमये, त्रि । यथा, महाभारते । ३ । १६२ । १० ।
"तामिस्रं प्रथमं पश्य वीतशोकभयो वस ॥"
अन्धकारविचारिणि । यथा, रघुः । १५ । २ ।
"लवणेन विलुम्पेष्यास्तामिस्रेण तमश्चयः ॥")

तामिस्रः, पुं, (तमिस्रं तमोगुणोत्थः क्रोधः प्रचुरतयास्त्यस्येति । अण् ।) भोगेच्छाप्रतिघाते क्रोधः । इति श्रीभागवतटीकायां स्वामी ॥ (यथा, भागवते । ३ । १२ । २ ।
"सप्तम्यामन्धतामिस्रमथ तामिस्र आदिशत् ॥")

ताम्बूलं, क्ली, (तम + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा । ४ । ६० । इति ऊलच् वुगागमो दीर्घश्च ।) पर्णम् । पान इति भाषा । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । क्षारत्वम् । कषायत्वम् । वातश्लेष्मिककफदुःखदोषनाशित्वम् । कामाग्निसन्दीपनत्वम् । स्त्रीसम्भावनभूषणत्वम् । धृतिवक्त्रपाटवोत्साहकान्तिकारित्वम् । सुप्तोत्थिते भुक्ते च प्रशस्तत्वम् । दन्तास्यहृद्गदे त्याज्यत्वम् । स्वर्गेऽपि दुर्लभत्वञ्च । इति राजवल्लभः ॥ अपि च । तीक्ष्णत्वम् । पीनसकासनाशित्वम् । रुच्यत्वम् । दाहकारित्वञ्च ॥ * ॥ क्षयापर्णस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । दाहवक्त्रव्रणाद्यमलधारित्वञ्च ॥ * ॥ शुभ्रपर्णस्य गुणाः । श्लेष्मवातामयनाशित्वम् । पथ्यत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च ॥ * ॥ सद्यश्चोटिततांबूलभक्षणगुणाः । सुखरोगजाद्यदोषवातारोचकरक्तमलविष्टम्भकान्तिकारित्वम् ॥ चिराच्चोटितभूयोजलयोजिततांबूलगुणाः । उत्तमत्वम् । रुचिबलकारित्वम् । त्रिदोषाग्निनाशित्वञ्च ॥ * ॥
"शिरापर्णन्तु ग्रैथिल्यं कुर्य्यात्तस्यामृद्वसः ।
ग्रीर्णं त्वग्दोषदन्तस्य भक्षिते तु सितासिते ॥
अनिधाय मुखे पर्णं पूगं खादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥"
इति राजनिर्घण्टः ॥*॥
"पर्णमूले वसेद्ब्राह्मीः पर्णाग्रे पापसञ्चयः ।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी ॥
गायुरग्रे विषं मूले मध्येऽलक्ष्मीर्व्यवस्थिता ।
तस्मादग्रञ्च मूलञ्च मध्यं पर्णस्य वर्ज्जयेत् ॥
चूर्णाधिकं हरति गन्धमथाधिपूगं
रागं तथाधिकदलञ्च सुगन्धिकारि ।
ताम्बूलसुत्तमिदं रसनाग्रभिन्न-
पर्णं निशास्वधिकखण्डितपर्णमिश्रं ॥
ताम्बूलं न हितं प्रोक्तं शरीरे रूक्षदुर्ब्बले ।
ज्वरास्रश्लीपित्तास्रमदमूर्च्छाक्षिरोगिषु ॥
ताम्बूलाद्युपयोगात् स्याच्छोषः पित्तानिलासृजाम् ।
देहहृत्कोष्ठदन्तास्यिश्रोत्रवर्णबलक्षयः ॥"
इति राजवल्लभः ॥ * ॥
"विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि ।
तावद्भवति चण्डालो यावद्गङ्गां न गच्छति ॥"
इति कर्म्मलोचनम् ॥ * ॥
"ताम्बूलं विधवास्त्रीणां यतिनां ब्रह्मचारिणाम् ।
तप्तस्त्रिनाच्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ * ॥
अस्य नामानि गुणाश्च । यथा, भावप्रकाशे ।
"ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥
वह्निं तिक्तकटुक्षारं रक्तपित्तकरं लघु ।
बलं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥"
क्रमुकम् । इति मेदिनी । ले, ६७ ॥

ताम्बूलकरङ्कः, पुं, (ताम्बूलस्य ताम्बूलरक्षणाय वा करङ्कः ।) ताम्बूलपात्रम् । पानेर वाटा इति भाषा ॥ तत्पर्य्यायः । स्थगी २ । इति हेमचन्द्रः । ३ । ३८२ ॥

ताम्बूलदः, त्रि, (ताम्बूलं ददातीति । दा + कः ।) ताम्बूलदाता । तत्पर्य्यायः । वाग्गुलिकः २ । इति त्रिकाण्डशेषः ॥

ताम्बूलपत्रः, पुं, (ताम्बूलस्य पत्रमिव पत्रमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (ताम्बूलपर्णे, क्ली । यथा, सुश्रुते । १ । ४६ ।
"ताम्बूलपत्रं तीक्ष्णोष्णं कटुपित्तप्रकोपनम् ॥")

ताम्बूलरागः, पुं, (ताम्बूलस्य चर्व्वितताम्बूलस्य राग इव रागोऽत्र ।) मक्षरः । इति हारावली । १३३ ॥ ताम्बूलस्य रङ्गश्च ॥

ताम्बूलवल्लिका, स्त्री, (ताम्बूलस्य वल्ली ततः स्वार्थे कन् टापि पूर्व्वह्रस्वश्च ।) ताम्बूली । इति शब्दरत्नावली ॥

ताम्बूलवल्ली, स्त्री, (ताम्बूलस्य वल्ली ।) ताम्बूललता । पानेर गाछ । इति भाषा ॥ तत्पर्य्यायः । ताम्बूली २ नागवल्ली ३ । इत्यमरः । २ । ४ । १२० ॥ पर्णलता ४ सप्तशिरा ५ सर्पलता ६ पत्रिवल्ली ७ भुजगलता ८ भक्ष्यपत्रा ९ । इति राजनिर्घण्टः ॥ ताम्बूलवल्लिका १० पर्णवल्ली ११ ताम्बूलिः १२ । इति शब्दरत्नावली ॥ नागिनी १३ नागवल्लरी १४ । इति भावप्रकाशः ॥

ताम्बूली, स्त्री, (ताम्बूल + गौरादित्वात् संज्ञायां वा ङीष् ।) ताम्बूलवल्ली । इत्यमरः । २ । ४ । १२० ॥ (यथा, कथासरित्सागरे । ६ । ८१ ।
"ताम्बूलीच्च सहाम्रानिमालातिलकयुक्तिभिः ॥")

ताम्रं, क्ली, (तम्यते आकाङ्क्ष्यते इति । तमु काङ्क्षायाम् + "अमिनमोर्दीर्घश्च ।" उणा । २ । १६ । इति रक् उपधाया दीर्घश्च ।) तैजसधातुविशेषः । तामा इति तांवा इति च भाषा ॥ तत्पर्य्यायः । ताम्रकम् २ शुल्बम् ३ म्लेच्छमुखम् ४ द्वाष्टम् ५ वरिष्ठम् ६ उडुम्बरम् ७ । इत्यमरः । २ । ६ । ९७ ॥ द्विष्टम् ८ उदम्बरम् ९ औदुम्बरम् १० उदुम्बरम् ११ औडुम्बरम् १२ । इति तट्टीका ॥ तपनेष्टम् १३ अम्बकम् १४ अरविन्दम् १५ रविलोहम् १६ रविप्रियम् १७ रक्तम् १८ नैपालिकम् १९ रक्तधातु २० सुनिपित्तलम् २१ अर्कम् २२ सूर्य्याङ्गम् २३ लोहितायसम् २४ । इति शब्दरत्नावली ॥ सुपक्वस्य तस्य गुणाः । मधुरत्वम् । कषायत्वम् । तिक्तत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कफपित्तविबन्धशूलपाण्डूदरगुल्मनाशित्वञ्च । इति राजनिर्घण्टः ॥ अम्लत्वम् । सारकत्वम् । रोपणत्वम् । लघुत्वम् । लेखनत्वम् । अर्शोज्वरकुष्ठकासश्वासक्षयपीनसान्नपित्तश्लीपक्रमिनाशित्वम् । अल्पदृङ्नाशत्वञ्च । इति भावप्रकाशः ॥ परिणामशूलशीर्षवायुशूलवङ्क्षणरोगनाशित्वम् । शुक्रकारित्वम् । बलायुस्तेजःपुष्टिशुक्रकारित्वं नित्यसेवने वलीपलितनाशित्वञ्च ॥ * ॥ रुद्रवेष्टितशूरणकन्दगर्भनिहितगोमयाग्निभस्मीकृतपक्वाम्लद्वारा पक्वपुटदत्तताम्रस्य गुणाः । वान्तिभ्रान्तिशूलाग्निमान्द्यान्नपित्तनाशित्वम् । बलकारित्वञ्च ॥ * ॥ अशोधितताम्रदोषाः । आयुःशुक्रबलनाशित्वम् । रोगवृद्धिच्छर्द्दिमूर्च्छाभ्रमक्लेदनानारोगकुष्ठशूलविदाहस्वेदारुचिपित्तसन्तापकारित्वम् । विषतुल्यत्वञ्च । इति सुखबोधः ॥ * ॥ तस्योत्पत्तिर्यथा,—
"शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले ।
तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥"
तस्य लक्षणं यथा,—
"जपाकुसुमसङ्काशं स्निग्धं स्निग्धं घनं क्षमम् ।
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥
क्षणारूक्षमतिस्निग्धं श्वेतच्छायि घनासृहम् ।
लोहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम् ॥"
तस्य शोधनविधिर्यथा,—
"पत्तलीकृतयत्राणि ताम्रस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा
एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते ॥"
अथ तस्य मारणविधिर्यथा,—
"सूक्ष्माणि ताम्रपत्राणि क्षिप्त्वा खर्जेदयेद्बुधः ।

वासरत्रयमर्दनेन ततः खल्वे विनिःक्षिपेत् ॥
पादांशं स्फटिकं दत्त्वा याममर्दनेन मर्दयेत् ।
ततः उद्धृत्य पत्राणि लेपरेद्विगुणेन च ।
गन्धकेनाम्लदृष्टेन तस्य कुर्य्याच्च गोलकम् ॥
ततः पिष्ट्वा च मौनाक्षीं षाङ्गेरीं सपुनर्नवाम् ।
तत्कल्केन बहिर्गोलं लेपयेद्रुद्धलोम्मितम् ॥
शुष्कं तन्गोलकं भाण्डे मृरावेश्य च रोधयेत् ।
वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः ॥
दत्त्वा भाण्डमुखे सम्यक् ततचुल्यां विपाचयेत् ।
क्रमदृद्ध्याग्निना सम्यक् यावद्यामचतुष्टयम् ॥
क्षाङ्गृहीतं समुद्धृत्य मर्दयेच्छूरणद्रवैः ।
यामैकं गोलकं तत्र निःक्षिपेच्छूरणोदरे ॥
सदा लेपस्तु कर्त्तव्यः सर्व्वतोऽङ्गुष्ठमात्रकः ।
पाच्यं गजपुटे सिद्धं भवति निश्चितम् ॥
वमनञ्च विरेकञ्च भस्म क्षममथार्द्धिम् ।
विदाहं खेदमुत्क्लेदं न करोति कदाचन ॥"
इति भावप्रकाशः ॥ * ॥
शुक्लनिभः । अरुणवर्णः । इति हेमचन्द्रः ॥ शब्दरत्नावली च ॥ तद्वति, त्रि ॥
("न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते ।
एकदोषो विषे त्वष्टौ दोषास्ताम्रे प्रकीर्त्तिताः ॥
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदश्छर्द्दिवान्नयः ।
अरोचकश्चित्तसन्ताप एते दोषा विषोपमाः ॥
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये ।
पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत् ।
अथौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनः पुनः ॥
मतान्तरम् ।
गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते ॥
इति ताम्रशोधनम् ॥ * ॥
अथ ताम्रमारणम् ।
शतमेकं द्विधा गन्धं यामं मर्द्यन्तु कन्यया ।
द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्याल्यां निधापयेत् ।
सम्यक् शूरणजैः सार्द्धं पार्श्वे भस्म निधापयेत् ।
चतुर्थांशं पचेच्चुल्यां पाचयेत्तं सगोमये ॥
जलं पुनः पुनर्देयं क्षाङ्गृहीतं विमर्द्दयेत् ।
म्रियते नात्र सन्देहः सर्व्वरोगेषु योजयेत् ॥
मतान्तरम् ।
जम्बूनाम्भसा सैन्धवसंयुतेन
सगन्धकं स्थापय शुल्वपत्रम् ।
पक्वायमानं पुटपेत् सुयुक्त्या
वातादिकं यावदुपैति शान्तिम् ॥
अन्यतरमतम् ।
शुद्धं ताम्रदलं विमर्द्य पटुना चारेण जम्बीरजै-
र्नीरैर्घर्षसमिदं क्षुद्यर्कपयसा लिप्तं घर्मेत् सप्तधा ।
निर्गुण्ड्याम्बुहिमं रसेन्द्रकलितं दुग्धाष्यगन्धेन तत्
तुल्यैनाथ मृतं भवेत् सुपठितं पञ्चान्दलेन त्रिधा ॥
गुणा यथा,—
वान्तिभ्रान्तिविवर्ज्जितं क्षयरुजाकुष्ठानि पाण्डामयं
शूलं मेहगदाङ्कुरानिलगदानुल्लाघनं जीवयेत् ।
गुञ्जामात्रमिदं प्रशस्तमनिशं द्विगुणितं तच्छुद्धकाथेन चेत्
भुक्तः स्यौल्यजरापमृत्युगुल्मनं पथ्याग्निना वत्सरात् ॥
ताम्रसूर्णं गरहरं यक्ष्मतृष्णीहोदरापहम् ।
क्रिमिशूलाग्निवातघ्नं श्वहृद्ग्रहग्रहोन्मादपित्तजित् ॥"
इति ताम्रमारणम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥)
ताम्रः, पुं, (ताम्रस्येव वर्णोऽस्यास्य । अच् । ताम्रवर्णत्वादस्य तथात्वम् ।) कुष्ठरोगविशेषः । इति कर्म्मविपाकः ॥ (द्वीपभेदः । यथा, महाभारते । २ । ३१ । ६५ ।
"द्वीपं ताम्राक्षयञ्चैव पर्व्वतं रामकं तथा ॥")
ताम्रकं, क्ली, (ताम्र + स्वार्थे संज्ञायां वा कन् ।) ताम्रम् । इत्यमरः । २ । ६ । ६७ ॥
ताम्रकर्णी, स्त्री, (ताम्रवर्णौ कर्णौ यस्याः स्त्रियां ङीष् ।) अञ्जना नाम पश्चिमदिग्गजस्त्रि-पत्नी । इत्यमरः । १ । ३ । ५ ॥
ताम्रकारः, पुं, (ताम्रं करोति ताम्रधातुभिः पात्रादिकं निर्म्मातीति । कृ + अण् ।) वर्ण-सङ्करजातिविशेषः । तत्पर्य्यायः । ताम्रिकः २ प्रौष्किकः ३ ताम्रकुट्टकः ४ । इति शब्दरत्नावली ॥ अस्योत्पत्तिः कंसकारशब्दे द्रष्टव्या ॥
ताम्रकुट्टकः, पुं, (ताम्रं कुट्टयतीति । कुट्ट + ण्वुल् ।) ताम्रकारः । इत्यमरः । २ । १० । ८ ॥
ताम्रकूटः, पुं क्ली, (ताम्रनिर्म्मितं कूटमिव ताम्रस्य कूटमिव वा ।) क्षुपविशेषः । तामाक् इति भाषा । यथा,—
"सम्मिदा कालकूटश्च ताम्रकूटश्च धुस्तुरम् ।
अहिफेनं खेर्ज्जुरसः तारिका तरिता तथा ॥
इत्यष्टौ सिद्धिदाश्चापि यथा सूर्य्यादकं प्रिये ॥"
इति कुलार्णवतन्त्रम् ॥
ताम्रकृमिः, पुं, (ताम्रवर्णः कृमिः कीटः ।) इन्द्रगोपकीटः । इति भूरिप्रयोगः हारावली च ॥
ताम्रगर्भं, क्ली, (ताम्रं गर्भे उत्पत्तिस्थानमस्य ।) तुत्थम् । इति राजनिर्घण्टः ॥
ताम्रचूड़ः, पुं स्त्री, (ताम्रा ताम्रवर्णा चूड़ा अस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (यथा, महाभारते । ३ । २२४ । २४ ।
"अपरेणाग्निदायादस्ताम्रचूड़ं शुभेक्षणः ।
महाकायमुपक्षिप्तं कुक्कुटं बलिनां वरम् ॥"
यथा चोत्तरतन्त्रे ३६ अध्याये सुश्रुतेनोक्तम् ।
"ताम्रचूड़स्य मांसेन पिबेद्वा मद्यमुत्तमम् ॥")
कुक्कुरः । इति राजनिर्घण्टः ॥
ताम्रदुग्धा, स्त्री, (ताम्रं रक्तवर्णं दुग्धं क्षीरं रसोऽस्याः ।) गोरक्तदुग्धा । इति राजनिर्घण्टः ॥
ताम्रपट्टं, क्ली, (ताम्रेण निर्म्मितं पट्टं पत्रम् ।) ताम्रनिर्म्मितलेखनपत्रम् । यथा,—
"दत्त्वा भूमिं निवर्त्तं वा क्षत्वा लेखयेत्तु कारयेत् ।
आगामिभद्रनृपतिः परिज्ञानाय पार्थिवः ॥
पटे वा ताम्रपट्टे वा समद्रोपरिचिह्नितम् ॥"
इति मिताक्षरा ॥
ताम्रपत्रः, पुं, (ताम्रं ताम्रवर्णं पत्रमस्य ।) जीवशाकः । इति राजनिर्घण्टः ॥ ताम्रनिर्म्मितपत्रे, क्ली ॥
ताम्रपर्णी, स्त्री, दीर्घकाभेदः । इति भूरिप्रयोगः ॥ नदीविशेषः । इति पुराणम् ॥ (यथा, रघुः । ४ । ५० ।
"ताम्रपर्णीं समेतस्य मुक्तासारं महोदधेः ॥")
ताम्रपल्लवः, पुं, (ताम्रवर्णं पल्लवमस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ताम्रपाकी, [नृ] पुं, (पच्यते इति । पच + घञ् कुत्वञ्च । ताम्रः ताम्रवर्णः पाकः परिणतिरस्यस्येति । इनिः ।) गर्द्दभाण्डवृक्षः । इति रत्नमाला ॥
ताम्रपादी, स्त्री, (ताम्रो रक्तवर्णः पादो मूलदेशोऽस्याः ।) हंसपदी । इति राजनिर्घण्टः ॥ (हंसपदीशब्दे विवृतिरस्या ज्ञातव्या ॥)
ताम्रपुष्पः, पुं, (ताम्रवर्णं पुष्पमस्य ।) कृतकाञ्चनः । इति जटाधरः ॥ (अस्य पर्य्यायाः यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुचली ताम्रपुष्पश्च स्वल्पकेसरी ॥")
भूमिचम्पकः । इति शब्दचन्द्रिका ॥
ताम्रपुष्पिका, स्त्री, (ताम्रवर्णं पुष्पमस्याः । कप् टापि अत इत्वञ्च ।) रक्तचित्रतृण । इति राजनिर्घण्टः ॥ (रक्तचित्रतृणशब्दे ज्ञातव्यमस्या विवरणम् ॥)
ताम्रपुष्पी, स्त्री, (ताम्रवर्णं पुष्पमस्या इति । ङीष् ।) धातकी । (अस्याः पर्य्यायो यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाटलावृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायाः यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
शणपत्रा कुबेराक्षी कालस्थाल्यालवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ताम्रफलः, पुं, (ताम्रं ताम्रवर्णं फलमस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
ताम्रमूला, स्त्री, (ताम्रं ताम्रवर्णं मूलमस्याः ।) दुरालभा । (यथा, भावप्रकाशे । ज्वराधिकारे श्वासचिकित्सायाम् ।
"सिंही यात्री ताम्रपर्णी पटोली ॥")
लम्बालुः । इति राजनिर्घण्टः ॥ कच्छुरा । इति रत्नमाला ॥ खिराइ इति भाषा ॥
ताम्रवर्णः, पुं, (ताम्रस्येव वर्णोऽस्य ।) पद्मरागः । इति राजनिर्घण्टः ॥ (भारतवर्षीयद्वीपभेदः । यथा, मात्स्ये । ११३ । ८ ।

"भारतस्याम्य वर्षस्य नव भेदान् निबोध मे।
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान्॥")
ताम्रवर्णा, स्त्री, (ताम्रस्येव वर्णोऽस्या इति। टाप्।) ओड्रपुष्पवृक्षः। इति शब्दचन्द्रिका॥
ताम्रवल्ली, स्त्री, (ताम्रवर्णा वल्ली। मध्यपदलोपी समासः।) मञ्जिष्ठा। इति रत्नमाला॥ चित्रकूटदेशप्रसिद्धा लता। तत्पर्य्यायः। ताम्रा २ ताली ३ तमाली ४ तमालिका ५ सत्त्ववल्ली ६ सुलोमा ७ शोधनी ८ तालिका ९। अस्या गुणाः। कषायत्वम्। कफदोषमुखकण्ठोत्थरोगनाशित्वम्। श्लेष्मशुद्धिकारित्वञ्च। इति राजनिर्घण्टः॥
ताम्रवीजः, पुं, (ताम्रवर्णं वीजमस्य।) कुलत्थः। इति राजनिर्घण्टः॥
ताम्रवृक्षः, पुं, (ताम्रमिव रक्तवर्णो वृक्षः।) रक्तचन्दनम्। कुलत्थः। इति रत्नमाला॥
ताम्रवृन्तः, पु, (ताम्रमिव रक्तवर्णं वृन्तमस्य।) कुलत्थः। इति त्रिकाण्डशेषः॥
ताम्रवृन्ता, स्त्री, (ताम्रमिव रक्तवर्णं वृन्तमस्याः इति टाप्।) कुलत्थिका। इति हेमचन्द्रः। ४।२४१॥
ताम्रशिखी, [न्] पुं स्त्री, (ताम्रवर्णा शिखा चूडा अस्यास्त इति इनिः।) कुक्कुटः। इति जटाधरः॥
ताम्रसारं, क्ली, (ताम्रवत् रक्तवर्णः सारोऽस्य।) रक्तचन्दनम्। इति रत्नमाला॥
ताम्रसारकं, क्ली, (ताम्रसार+स्वार्थे कन्।) रक्तचन्दनम्। इति राजनिर्घण्टः॥
ताम्रसारकः, पुं, (ताम्रवत् रक्तवर्णः सारोऽस्येति कप्।) रक्तखदिरः। इति राजनिर्घण्टः॥
ताम्रा, स्त्री, (ताम्र+टाप्।) सैंहली। इति राजनिर्घण्टः॥ (प्रजापतेः कश्यपस्य पत्नीनामन्यतमा। यथा, मात्स्ये। ६। २।
"सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा॥"
समुद्भवगन्तर्गतचतुर्थखण्डविशेषः। यथा,—
"चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना॥" इति सुश्रुते शारीरस्थाने चतुर्थोऽध्याये॥)
ताम्राक्षः, पुं, उपद्वीपभेदः। इति शब्दमाला॥
ताम्राक्षः, पुं, (ताम्रे रक्तामे अक्षिणी यस्य। अक्षिन्+समासे षच्।) कोकिलः। इति त्रिकाण्डशेषः॥ (ताम्रनयने, त्रि। यथा, भागवते। १। ७। ३३।
"तत आसाद्य तरसा दारुणं गौतमौसुतम्।
वध्यामर्षताम्राक्षः पशुं रसनया यथा॥")
ताम्राभं, क्ली, (ताम्रमिवाभातीति। आ+भा+कः। ताम्रवदाभा अस्येति वा रक्तवर्णत्वात् तथात्वम्।) रक्तचन्दनम्। इति शब्दचन्द्रिका॥ (पर्व्वतविशेषः। यथा, ब्रह्माण्डे ४७ अध्याये।
"रुचका निषधं प्राप्ता ताम्राभं निषधादपि॥")
ताम्रार्हं, क्ली, (ताम्रस्यार्हं अर्हभागतया उत्पत्तिकारणमस्य ताम्रस्यार्हं उत्पादकोऽस्य इति वा।) कांस्यम्। इति त्रिकाण्डशेषः॥

ताम्रिकः, पुं, (ताम्रं तत्पात्रादिनिर्म्माणं कार्य्यत्वेनास्त्यस्य। ताम्र+ठन्।) कंसकारः। इति शब्दरत्नावली॥ ताम्रनिर्म्मिते, त्रि। यथा, कार्षिके ताम्रिके पणः। इत्यमरः। २। ६। ८८॥ (यथा, मनुः। ८। १३६।
"कार्षापणन्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥")
ताम्रिका, स्त्री, (ताम्रवद्वर्णोऽस्त्यस्या इति ठन् ततः टाप्।) गुञ्जा। इति राजनिर्घण्टः॥ मानरत्नावाद्यम्। इति भूरिप्रयोगः॥
ताम्री, स्त्री, (ताम्रस्य विकारः। इति अण् ततो ङीप्।) वाद्यविशेषः। तत्पर्य्यायः। मानरन्ध्रा २ विकारिका ३। इति त्रिकाण्डशेषः॥
ताय, ञ्च ड पालने। सन्ततौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) सन्ततिर्विस्तारः। ञ्च, अतन्तायत्। ड, तायते विद्यां सुधीः। इति दुर्गादासः॥
तायिकः, पुं, (तायं पालने साधुरिति ठञ्।) तन्त्रिकाभिधदेशः। इति हेमचन्द्रः। ४।२४॥
तारं, क्ली, (तार्य्यते विस्तार्य्यते इति। तॄ+णिच्+घञ्।) रूप्यम्। इति मेदिनी। ते, ४३॥
("दग्धोत्तीर्णं सुगीतं यन्निर्म्मलं कुन्दसन्निभम्।
गुरुस्निग्धकुमारञ्च तारसूत्तममिष्यते॥"
अशुद्धस्याशुद्धतस्यास्य गुणा यथा,—
"आयुः शुक्रं बलं हन्ति रोगसंघं करोति च।
अशुद्धचाशुद्धतन्तारं शुद्धमार्थमतो बुधैः॥"
अस्य मारणं यथा,—
"कण्टवेध्यं तारपत्रं दिव्याद्विगुणहिङ्गुलम्।
पातयन्ते रसो याह्यो रजतं म्रियते यथा॥"
इति वैद्यकरसेन्द्रसारसंग्रहे चारणमारणाधिकारे॥) सूक्ता। इति राजनिर्घण्टः॥ (यथा, रसेन्द्रसारसंग्रहे त्रैलोक्यचिन्तामणिवटिकायाम्।
"हारं सुवर्णं शुद्धञ्च तारम्॥"
"तारं मौक्तिकम्। तारशब्देनाच मौक्तिकमेवोच्यते न तु रजतम्।" इति तट्टीका॥ गौणसिद्धिभेदः। यथा, "विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातायेत्य इति इमा सुखाख्यिस्रः सिद्धयस्तदुपायतया त्रितरा गौण्यः पञ्चसिद्धयश्चापि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः। ताश्चाद्या अध्ययनादिलक्षणाः सिद्धयो हेतवः सुखास्तु हेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानां श्रवणरूपग्रहणमध्ययनं प्रथमसिद्धिस्तारमुच्यते॥" इति तत्त्वकौमुदी॥ अग्निमन्थम्। इति मेदिनी। रे, ४३॥)
तारः, पुं, वानरविशेषः। सुक्तावि॰। शुद्धमौक्तिकः। इति मेदिनी। रे, ४३॥ (तार्य्यते उत्तार्य्यते भवसागरादनेन। तॄ+णिच्+घञ्। यद्वा तारयति खोद्धारणजनादिभिर्लोकान्। तॄ+णिच्+अच्। एतन्निरुक्तिर्यथा, काशीखण्डे। ७३ अध्याये।
"तारयेद् यद् भवाम्भोधेः खजपासक्तमानसम्।
ततस्तार इति ख्यातो यस्तं ब्रह्मादयोऽकवन्॥")
प्रणवः। इति तन्त्रम्॥ (यथा, महागणपतिस्तोत्रे। २।
"तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदुस्तस्मै स्तात् प्रणतिर्गणाधिपतये यो रागिभिरभ्यर्च्यते॥")
तरणम्। इति विश्वः॥ कूर्च्चबीजम्। इति तन्त्रसारम्॥ (नक्षत्रम्। इति मेदिनी। रे, ४३॥ अत्युच्चशब्दः। इति हेमचन्द्रः। ६। ३८॥ यथा, हेमचन्द्रटीकायाम्।
"वृषासुरसि मन्त्रस्तु द्वात्रिंशतिविधो ध्वनिः।
स एव कण्ठमध्यः स्तात् तारः शिरसि गीयते॥"
विष्णुः। यथा, महाभारते। १३। १४६। ११७।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः॥"
राक्षसविशेषः। यथा महाभारते। ३। २८४। ६।
"युयुधे लक्षणश्चापि तथैवेन्द्रजिता सह।
विरूपाक्षेण सुग्रीवस्तारेण च निखर्व्वटः॥"
दैत्यविशेषः। यथा, हरिवंशे। ४३। ६।
"तारस्तु क्रौञ्चविस्तारमायसं वायसध्वजम॥")
महादेवः।
"काश्यां विश्वेश्वरोऽहं गिरिपतितनयासंयुतो वामभागे
शुण्डादण्डेन दत्ते त्रिपथगतटिनीतीर-
मुद्वामुभागे।
मायाबीजञ्च कर्णे सुरमुनिसहितो ध्यानमुक्तं
वदामि
प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते
तारनाम॥"
इति शब्दार्थचिन्तामणिः॥)
तारः, त्रि, अत्युच्चशब्दविशिष्टः। इति मेदिनी। रे, ४४॥ स्फुरितकिरणः। निर्म्मलः। इति धरणिः॥ (तारं सुक्तास्त्यस्येति अच्। सुक्ताविशिष्टः। यथा, अमरशतके। २८।
"उरसि निहितसारो हारः क्षता जघने
घने॥")
तारकं, क्ली, (तारेव कनीनिकया कायतीति। कै+कः।) चक्षुः। इति मेदिनी। के, १००॥
तारकं, क्ली, स्त्री, (तारमेव। स्वार्थे कन्।) चक्षुस्तारा। नक्षत्रम्। इति मेदिनी। के, १००॥
तारकः, पुं, (तारयति देवानिति। तॄ+णिच्+ण्वुल्।) द्वादशमन्वन्तरीयेन्द्रभूचरसुरविशेषः। यथा,—
"मनोस्तु दक्षपुत्रस्य द्वादशस्यात्मजान् शृणु।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान्।
मित्रबाहुः सुवर्चाश्च दक्षपुत्रमनोः सुताः॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्दुतिश्चान्य ऋषयश्च तपोधनाः॥
सुधर्म्माणः सुतपसो हरिता रोहितास्तथा।
सुरारयो गणाः पञ्च प्रत्येकं दशको गणः॥

ऋतधामा च तत्रेन्द्रस्तारको नाम तद्रिपुः।
हरिर्नपुंसको भूत्वा घातयिष्यति शङ्कर!॥
इति गारुडे ८७ अध्याये॥
(अपरोऽसुरविशेषः। कार्त्तिकेयः एनं निहतवान्। यथा, मत्स्यपुराणे। १४५। ५—११।
"वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्रस्तु तारकः।
सुरानुद्वासयामास पुरेभ्यः स महाबलः॥
ततस्ते ब्रह्मणोऽभ्याशं जग्मुर्भयनिपीड़िताः।
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषामुवाच ह॥
सन्त्यजध्वं भयं देवाः। शङ्करस्यात्मजः शिशुः।
तुच्छिनाचलदोर्दण्डं हनिष्यति दानवम्॥
ततः काले तु कस्मिंश्चित् दृष्ट्वा वै शैलजां शिवः।
स्रस्तो वह्निवदने यद्वज्जत्कारणान्तरे॥
तद्गर्भं यद्विवदने रेतो देवानतर्पयत्।
विदार्य्य जठराग्नेयो अजीर्णं निर्गतं सुने!॥
पतितं तत् सरिद्वरे ततस्तु शरकानने।
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः।
स सप्तदिवसो बालो निजघ्ने तारकासुरम्॥"
अस्य विशेषविवरणन्तु तत्रैव १४५ अध्यायमारभ्य १५६ अध्यायेषु द्रष्टव्यम्॥ तारयतीति। तॄ+णिच्+ण्वुल्।) कर्णधारः। इति मेदिनी। के, ६६॥ भेलकः। इति शब्दरत्नावली॥ (तरणोपायः। यथा, हठयोगप्रदीपिकायाम्। ४।४०।
"केचिद्रागमगालेन केचिन्नियमसङ्कुलैः।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम्॥"
"तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति।" इति तट्टीका॥ महादेवः। यथा, महाभारते। १२। २८४। ३५।
"गर्भमांसङ्गमालाय तारकाय तराय च।
नमो यज्ञाय यजिने हुताय प्रहुताय च॥")
चातरि, त्रि। इति मेदिनी। के, १००॥ (यथा, प्रबोधचन्द्रोदये। २। १३।
"कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधम्॥"
स्त्रियां टापि अत इत्वम्। यथा, गोः रामायणे। २। ६७। २३।
"नारीणां तारिकाः काश्चित् काश्चित् परमवाजिनाम्॥")

तारकजित्, पुं, (तारकं तारकासुरं जयतीति। जि+क्विप् तुगागमश्च।) कार्त्तिकेयः। इत्यमरः। १। १। १४२॥ (एतद्विवरणं मात्स्ये १५६ अध्याये द्रष्टव्यम्॥)

तारकब्रह्म, क्ली, (तारकं संसारसागरपारकारकं ब्रह्म।) षड़क्षरमन्त्रविशेषः। यथा,—
"षड़क्षरं महामन्त्रं तारकं ब्रह्म उच्यते।
ये भजन्ति च मां भक्त्या तेषां मुक्तिर्न संशयः॥
रामाय नम इत्येवमुच्चार्य्य मन्त्रमुत्तमम्।
सर्व्वदुःखहरश्चैतत् पापिनामपि मुक्तिदम्॥
इमं मन्त्रं जपन्नित्यममलत्वं भविष्यसि।
भस्मास्थिधारणाद्यस्तु सम्भूतश्चाशुचिर्भवेत्॥
मद्दत्तं तद्भवेत् सर्व्वं मन्त्रस्योच्चारणात् शुभात्।
तस्मात्तेन श्रीरामतारकाख्येन मन्त्रतः॥
भूत्वा काश्यां विश्वनाथो महाज्ञापरिपालकः।
कृत्वा मुक्तान् जीवमात्रान् मानुषादीन् परं पदम्॥
अन्यत् किन्ते भयं मन्त्रप्रभावात् प्राप्स्यिष्यसि।
इति सन्दिश्य मां विष्णुर्विससर्ज्ज मरुद्गणान्॥"
इति पाद्मोत्तरखण्डे श्रीशिवं प्रति श्रीविष्णुवाक्यम्॥ अपि च।
"सुमूर्म्मुनिकरण्यान्तु ब्रह्मोदुम्बरनिवासिनः।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम्॥
ओँ श्रीरामरामरामेति तत्तारकमुदाहृतम्।
अतस्त्वं जानकीनाथ! परं ब्रह्म विनिश्चितम्॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिववाक्यम्॥

तारका, स्त्री, क्ली, (तरति तारयति वा। तॄ+णिच्+ण्वुल्। टाप्। "तारका ज्योतिषि।" ७। ३। ४५। इत्यस्य वार्त्तिकोक्त्या न अत इत्वम्।) नक्षत्रम्। (यथा, मार्कण्डेये। १५। ७१।
"व्यप्-विन्दवो यथाम्भोधौ यथा वा दिवि तारकाः।
यथा वा वर्षतो धारा गङ्गायां सिकता यथा॥")
कनीनिका। इति मेदिनी। के, १००॥ (यथा, रघुः। ११। ६६।
"चक्रकोपदहनार्चिषं ततः
सन्दधे दृशमुदयतारकाम्॥")
इन्द्रवारुण्यां स्त्री। इति राजनिर्घण्टः॥

तारकारिः, पुं, (तारकस्य तारकासुरस्य अरिः।) कार्त्तिकेयः। इति हेमचन्द्रः। २। १२३॥

तारकिणी, स्त्री, (तारकाः सन्त्यत्र। तारका+इनिः ङीप्।) रात्रिः। इति राजनिर्घण्टः॥

तारकितं, त्रि, (तारकाः सञ्जाता अस्य। तारका+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) तारकायुक्तम्। यथा,—
"सिति निशा दृशदि स्फुटदुत्पतत्
कणगणाधिपतारकिताम्बरः॥"
इति नैषधम्॥

तारणः, पुं, (तारयतीति। तॄ+णिच्+ल्युः।) भेलकः। इति शब्दरत्नावली॥ (संसारसागरात् तारयतीति। विष्णुः। यथा, महाभारते। १३। १३६। ५०।
"अशोकस्तारणस्तारः शूरः सर्व्वजनेश्वरः॥"
महादेवः। यथा, तत्रैव। १३। १७। ११७।
"तोरणस्तारणो वातः परिधीपतिखेचरः॥"
क्ली, यष्टिवत्सरेषु अष्टादशवत्सरः। यथा, ज्योतिषतत्त्वे।
"अतिवृष्टिश्च जायेत धान्यस्यार्घ प्रपीड़नम्।
शस्यं भवति सामान्यं तारणे सुरवन्दिते!॥"
तथाच बृहत्संहितायाम्। ८। ३६।
"तारणं तदनु भूरिवारिदं
शस्यवृद्धिसुदितञ्च पार्थिवम्॥"
तॄ+णिच्+भावे ल्युट्। उत्तारणम्। उद्धारणम्। यथा, महाभारते। ४। ४। ५३।
"तारणायास्य दुःखस्य प्रस्थानाय जयाय च।")
तरणकारयितरि, त्रि॥

तारणिः, स्त्री, (तारयतीति। तॄ+णिच्+ल्युः।) नौका। इति हारावली। ५६॥

तारतरुलः, पुं, (तारं सुक्तेव शुभ्रस्तरुलो यस्य।) धवलयावनालः। इति राजनिर्घण्टः॥

तारतम्यं, क्ली, तरतमयोर्भावः। (तरतम+ष्यञ्।) न्यूनाधिक्यम्। यथा,—
"निर्द्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका॥"
इत्युद्भटः॥

तारदी, स्त्री, (तरदी एव। स्वार्थे अण् ततो ङीप्।) तरदीवृक्षः। इति राजनिर्घण्टः॥

तारपुष्पः, पुं, (तारं रूप्यमिव शुभ्रं पुष्पं यस्य।) कुन्दवृक्षः। इति राजनिर्घण्टः॥

तारलः, त्रि, (तरल एव। स्वार्थे अण्।) विटः। इति भूरिप्रयोगः॥

तारविमला, स्त्री, (तारं रूप्यमिव विमला।) धातुविशेषः। इति शब्दार्थकल्पतरुः॥

तारशुद्धिकरं, क्ली, (तारस्य रजतस्य शुद्धिं करोतीति। कृ+टः।) सीसकम्। इति राजनिर्घण्टः॥

तारा, स्त्री, पुं, (तारयतीति। तॄ+णिच्+अच्।) नक्षत्रम्। इत्यमरः। १। ३। २१॥ (यथा, महाभारते। १। २११। २६।
"चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः॥")
यथाच कर्म्मलोचने।
"एकतारं नमो दृष्ट्वा सार्त्तयो नारदो मुनिः।
तावद्भवति चाण्डालो यावदन्यां न पश्यति॥"
अक्षिमध्यम्। इति मेदिनी। रे, ४३॥ श्लेष्मस्य पर्य्यायः। विम्बिनी २ कनीनिका ३। इति राजनिर्घण्टः॥ तारका ४। इत्यमरः। १। ३। २१॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ३६।
"तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ॥")

तारा, स्त्री, (तारयति तापादिति। तॄ+णिच्+अच्+टाप्।) बुद्धदेवतामेदः। हर्षस्यति-भार्य्या। इति मेदिनी। रे, ४३॥ (यथा, देवीभागवते। १। ११। ७५।
"ततः कालेन कियता तारारूपं सुतं शुभम्॥")
बालिभार्य्या। सा सुषेणवानरकन्या। इति रामायणम्॥ (यथा, महाभारते। ३। २७६। १८।
"हेममाली ततो बाली तारां तारापिपाननाम्।
उवाच वचनं वाग्मी तां वानरपतिः पतिः॥")
चोड़ा। मुक्ता। इति राजनिर्घण्टः॥ * ॥
द्वितीया शक्तिः। यथा,—
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती।
तारकत्वात् सदा तारा मुक्तिमोक्षप्रदायिनी॥
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तिता॥"

अस्या ध्यानं यथा,—
"प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्तृखर्परसृणा क्रूङ्कारबीजोद्भवा।
खर्व्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा-
स्वयम्॥"
अपि च।
"प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्॥
खड्गकर्त्तृसमायुक्तसव्येतरभुजद्वयाम्।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम्॥
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्।
बालार्कमण्डलाकारलोचनत्रयभूषिताम्॥
स्फुरद्दंष्ट्राकरालास्यां घोरदंष्ट्रां करालिनीम्।
सावेष्टसोरुवदनां स्फारालङ्कारविभूषिताम्॥
विश्वव्यापकतोयान्तःश्वेतपद्मोपरिस्थिताम्॥"
अस्या दशाक्षरमन्त्रोद्धारो यथा,—
"श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे।
दधानां बहुवर्णाभिर्बहुरूपाभिरावृताम्॥
शक्तिभिः सोरुवदनां सोरमौक्तिकभूषणाम्।
रक्तपादुकयोर्न्यस्तपादाम्बुजयुगां स्मरेत्॥"
इति तन्त्रसारः॥
(अस्या बीजं यथा, "ह्रीँ स्त्रीँ हुँ फट्॥")

तारापतिः, पुं, (तारायाः पतिः।) शिवः। चन्द्रः। (यथा, राजेन्द्रकर्णपूरे। २७।
"ध्वान्तध्वान्तकलङ्क शङ्करशिखालङ्कार तारापते
राकाकान्त सविभ्रमं भ्रम सदा निःशङ्कमङ्के दिवः॥")
दृष्टस्रुतिः। वाली। सुग्रीवः। इति पुराणम्॥
(यथा, नैषधे। १६। ८।
"व्रजति कुसदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नवे दूरं तारापतौ च हृतौजसि।
लघु रघुपतेर्ज्यायां मायामयीमिव रावणि-
स्त्रिमरचिकुरव्याहं रात्रिं हिनस्ति गभस्ति-
राट्॥")

तारापथः, पुं, (तारायां नक्षत्रायां पन्थाः। समासे अ।) आकाशः। इति हेमचन्द्रः॥
(देशविशेषः। यथा, रघुः। १५। ६०।
"अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवौ।
ग्राहयामास रघुनाथस्य चक्रे तारापथेश्वरौ॥"
"तारापथेश्वरौ।" इति वा पाठः॥)

तारापीड़ः, पुं, (तारायां नक्षत्रायां पीड़ो भूषणमिव।) चन्द्रः। इति त्रिकाण्डशेषः॥
(स्वनामख्यातचन्द्रापीड़स्य राज्ञो भ्राता। यथा, राजतरङ्गिण्याम्। ४। ४६।
"तारापीड़ोऽपि तनयः क्रमात् तस्यामजायत॥"
कादम्बरीकथितनायकविशेषः। यथा, कादम्बर्याम्। १०२ पत्रे। "अवतार इव धर्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य परिच्छदप्रजापीड़ो राजा तारापीड़ोऽभवत्॥")

तारापूजा, स्त्री, (तारा नक्षत्राणि पूजा पूजणं यस्याः।) रात्रिः। इति राजनिर्घण्टः॥

ताराभः, पुं, (तारो निर्म्मलोऽभ्र इव। मुक्तवर्णत्वादस्य तथात्वम्।) कर्पूरः। इति राजनिर्घण्टः॥ (विवरणमस्य कर्पूरशब्दे द्रष्टव्यम्॥)

तारामण्डलः, पुं, (तारानां मुक्तानां मण्डलं यत्र।) ईश्वरगृहविशेषः। इति शब्दरत्नावली॥ (नक्षत्रमण्डले, क्ली॥)

तारारिः, पुं, (तारस्य रूप्यस्य अरिः। एतत्संसर्गेण रूप्यस्य चाकचिक्यादिकं विनश्यतीत्यतोऽस्य तथात्वम्।) विटमाक्षिकः। इति हेमचन्द्रः। ४। १२१॥

तारावती, स्त्री, चन्द्रशेखरराजपत्नी। सा च ककुत्स्थराजेन तत्पत्न्यां मनोऽक्षिण्यां जाता। असौ गिरिजांशजा। यथा,—
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
भोगवत्याञ्ययान्तु पुर्य्यां रिपुनिसूदनः॥
सर्व्वलक्षणसम्पन्नो भूपालगुणसंयुतः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्रिका॥
सा मनोऽक्षिणी नाम्ना पूजिता पतिवल्लभा।
तस्याः पुत्रशतं जज्ञे देवगर्भाभमच्युतम्॥
बलवीर्य्यसमायुक्तं ककुत्स्थनृपसत्तमात्।
पुत्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे॥
निभृतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत्।
पूज्यमाना महादेवी चण्डिका राजभार्य्यया॥
प्रसन्ना सा त्रिभिर्व्वर्षैस्तां स्वप्ने चाब्रवीदिदम्।
योगिलक्षणसंयुक्ता सार्व्वभौमस्य भाविनी॥
नक्षत्रमालया युक्ता पुत्री तव भविष्यति।
सापि स्वप्ने वरं प्राप्य मुदितामूद्वपाङ्गना॥
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह।
सा मनोऽक्षिणी देवी प्रसूते ऋतुसङ्गमे॥
गर्भं दधौ महासत्त्वं चन्द्रिकेवाब्दतोयकरम्।
सम्पूर्णे तु ततः प्राप्ते तदा नक्षत्रमालिनीम्॥
सा मनोऽक्षिणी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां शरच्छ्रोतस्विनीप्रभां शुभाम्॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्।
सङ्कल्पेनाथ हारेण भूषिता सा ककुत्स्थजा॥
वर्द्धते मन्दिरे तस्य वर्षासिव सुरापगा।
तेनैव हारचिह्नेन तस्यास्तारावतीति वै॥
नामाकरोत् पिता काले यथोक्ते नृपसत्तमः।
कालक्रमेण सा बाल्यं यतीत्य वरवर्णिनी॥
मङ्गलं यौवनोद्भेदं प्राप श्रीरिव माधवे।
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह॥
ककुत्स्थः कारयामास समयेऽथ स्वयंवरम्।
माधवे मासि संप्राप्ते चन्द्रदृष्टौ शुभे दिने॥
स्वयंवरसभां चक्रे तारावत्याः पिता सुतैः।
वार्त्तिकान् सुबहून् राजा वहवाभिः क्रमेण वै॥
तूर्णं प्रस्थापयामास नानादेशनृपान् प्रति।
ते राजानस्तथा श्रुत्वा वार्त्तां वै वार्त्तिकाननात्॥
तूर्णमेव समाजग्मुस्तारावत्याः स्वयंवरम्।
तत् श्रुत्वा पौष्यसनयश्चतुरङ्गबलैर्यतः॥

स्वयंवरं जगामाशु देवालङ्कारमण्डितः।
एतस्मिन्नन्तरे राज्ञः कुमारी वरवर्णिनी॥
दृष्ट्वा धात्रीं निजां सम्यक् सम्पूर्णज्ञानशालिनीम्।
स्वयंवरसभां द्रष्टुं प्राहिणोत् सदृशं प्रति॥
स्वयंवरसभां गत्वा चारुरूपं सुलक्षणम्।
नृपं निरूप्य भो धात्रि! मह्यमेत्य निवेदय॥
एवं तां प्रेषयित्वाथ धात्रीं नृपतिपुत्रिका।
सा मनोऽक्षिणी यत्र प्राराधयति चण्डिकाम्॥
तत्र प्रायाद्महाभागा शुभा तारावती तदा।
तत्र गत्वा महादेवीं प्रणम्य कालिकाङ्कयाम्॥
मानुषेणाथ भावेन न ज्ञात्वात्मानमात्मना।
प्रणनाम महाभक्त्या वाक्यञ्चैतदुवाच ह॥
प्रणमामि महामायां योगनिद्रां जगन्मयीम्।
सा मे प्रसीदतां गौरी चण्डिका भक्तवत्सला।
यदि सत्यं जनन्या मे मदर्थे त्वं प्रपूजिता।
तेन सत्येन सुभगः पतिर्म्मम नृपोत्तमः॥
स्वयंवरेऽद्य भवतु प्रसीद हरवल्लभे!॥
इति तस्या वचः श्रुत्वा चण्डिका हरमोहिनी॥
मोहयन्ती नृपसुतां यथात्मानं न वेत्ति च।
अथ प्राहाशरीरिण्यशरीरिदं वचः॥
श्रीदेव्युवाच।
पौष्यस्य तनयो योऽसौ नाम्ना तु चन्द्रशेखरः।
स मनोहररूपस्ते प्रियः स्वामी भविष्यति॥
तस्मिन्ककलया पूर्णे चिह्नितं नृपसत्तमम्।
वरयस्व वरारोहे पार्व्वतीव वृषध्वजम्॥
अथाजगाम सा धात्री निरूप्य सदृशं पतिम्।
तारावत्यास्तदाचष्ट रहस्यं नृपसत्तमम्॥
दृष्ट्वा तामागतां धात्रीं प्रहृष्टा नृपतेः सुता।
पप्रच्छ निभृतं कीदृक् को वा दृष्टस्त्वया नृपः॥
सा प्राह धात्री वचनात्तव भूपा विलोकिताः।
चारुरूपाः कुलीनाश्च ग्राम्ये ग्राम्ये च पारगाः॥"
"नृपौ पुनर्म्महासत्त्वौ सिंहस्कन्धौ दृढ़भुजौ।
सर्व्वलक्षणसम्पन्नौ देवालङ्कारमण्डितौ॥
तयोरपि वयःस्थत्वात् प्रशस्तश्चन्द्रशेखरः।
स एव ते पतिर्योग्यश्चिह्नेनानेन सुन्दरि॥
तं त्वं वरय राजानं तव योग्यं शुभोदयम्।
धात्र्याश्चैवं वचः श्रुत्वा राजपुत्री जगाद ताम्॥
मत्पार्श्वचारिणीं भूत्वा निदेहि नृपोत्तमम्।
तावतीर्य्य तदा याह्ययागात्तारावती तदा॥
धात्र्या चानुगया युक्ता चचरत् सदशोऽन्तरे।
सभामध्ये चिरं सा तु विलुल्ल वरवर्णिनी॥
भाविलाभियतेर्योगाच्चण्डिकायाः प्रसादतः।
तयोः समत्वादेकत्वात्तया धात्र्या विमोहिता॥
इति खेदजधर्म्माम्भःकलिकानिचितानना।
पतिं पूर्व्वतरं पुत्री राज्ञान्तारावती सती॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्।
वैवाहिकेन विधिना स राजा चन्द्रशेखरः॥
तारावतीं तदा भार्य्यां ककुत्स्थनृपतेः सुताम्।
संस्कृत्य श्रापयामास देवेभ्यो वैदिकैर्मखैः॥
प्राप्तियज्ञसंस्कारं कृत्वा तां सहचारिणीम्।
कश्मीरपुरमासाद्य प्रथयौ चन्द्रशेखरः॥"
इति कालिकापुराणे ४८ अध्यायः॥

II. 77/153.

तारिका, स्त्री, (तारस्तीव्रतास्या अस्तीति। तार + "अत इनिठनौ।" ५।२।११५। इति ठन्।) तालरसः। ताड़ी इति भाषा। यथा,—
"सन्दिग्धा कालकूटश्च ताम्रकूटश्च धुस्तुरम्।
अहिफेनं खर्जुरसस्तारिका तरिता तथा॥"
इति कुलार्णवतन्त्रम्॥
(तरणमस्त्रे, क्ली। यथा, मनुः। ८। ४०७।
"गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे॥")
तारिणी स्त्री, (तारयतीति। तॄ + णिच् + णिनिः ङीप् च।) बुद्धदेवतामेदः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओंकारा ४ खाहा ५ श्रीः ६ मनोरमा ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वेश्या १४ नीलसरस्वती १५ अग्निनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥*॥ द्वितीया शक्तिः। यथा,—
"अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान्।
येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः॥
कवितां लभते शुद्धामनर्गलविजृम्भिणीम्।
पाण्डित्यं सर्व्वशास्त्रेषु धनैर्धनपतिर्भवेत्॥
राजद्वारे सभायाञ्च विवादे व्यवहारके।
सर्व्वत्र जयमाप्नोति बृहस्पतिरिवापरः॥"
इति तन्त्रसारः॥
अस्या ध्यानं ताराशब्दे द्रष्टव्यम्।
("तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती।
कामेश्वरी भद्रकाली ह्यष्टौ तारिणी स्मृता॥"
इति मन्त्रकोषः॥
त्रि, उद्धारकर्त्री। यथा, मार्कण्डेये।
"तारिणी भवसंसारसागरस्य कुलोद्भवे!॥")
तारुण्यं, क्ली, (तरुणस्य भावः। तरुण + ब्राह्मणादित्वात् ष्यञ्।) यौवनम्। इत्यमरः। २। ६। ४०॥ (यथा, मार्कण्डेये। २४। ७।
"वृक्षकोटिसमं वित्तं तारुण्याद्वित्तकोटिषु॥")
तारेयः, पुं, (तारायां वालिपत्न्यां अपत्यं पुमान्।) तारा + ढक्।) वालिपुत्रः। इति जटाधरः॥ (यथा, रामायणे। ४। २२। १२।
"अङ्गदप्रमुखान् कर्म्माणि विक्रम्य बलवान् रणे।
करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः॥"
बृहस्पतिपत्न्यास्तारायाः पुत्रो बुधोऽपि॥)
तार्किकः, त्रि, (तर्कं वेत्ति अधीते वा। तर्क + ठक्।) तर्कशास्त्रवेत्ता। तर्काध्ययनकर्त्ता। इति शाकरभाष्यम्॥ स षड्विधो यथा। वैशेषिकः १ औलूक्यः २ वार्हस्त्यः ३ नास्तिकः ४ लौकायतिकः ५ चार्व्वाकः ६। इति हेमचन्द्रः॥ (यथा, अप्पयदीक्षित-वैराग्यशतके। ६१।
"कापोतं मैत्रावरुणं शापो वा तार्किकस्य मुनेः।
संसर्ज्यते यदि सखे! क्षुद्रोरपि मास्तु शक्रपदम्॥")
तार्क्षः, पुं, (तृक्ष एव। स्वार्थे अण्।) कश्यपः। यथा, श्रीभागवते।
"प्रमथ्य तरसा राज्ञः शालादीन्वैद्यपक्षगान्।
पश्यतां सर्व्वलोकानां तार्क्षपुत्रः सुधामिव॥"
(विनतायां जातः कश्यपपुत्रविशेषः। यथा, महाभारते। १। १२३। ७०।
"तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्चामितध्वजः।
अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः॥")
तार्क्षी, स्त्री, (तार्क्ष + गौरादित्वात् ङीष्।) पातालगरुड़लता। इति राजनिर्घण्टः॥
तार्क्ष्यं, क्ली, रसाञ्जनम्। इति मेदिनी। ये, २७॥ (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम्।
"तार्क्ष्यं शैलं नीलवर्णमञ्जनञ्च रसाञ्जनम्॥")
तार्क्ष्यः, पुं, (तार्क्षस्य कश्यपस्य अपत्यम्। तार्क्ष + "गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) अश्वः। सर्पः। गरुड़ाग्रजः। गरुड़ः। इति मेदिनी। रे, २७॥ (यथा, रघुः। १।४६।
"स्खलेन तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः॥"
तथाच ऋग्वेदे। १। ८६। ६।
"स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः
स्वस्तिनो बृहस्पतिर्दधातु॥"
"बृहस्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्ति अविनाशं विदधातु।" इति तद्भाष्ये सायणः॥
"तार्क्ष्यो रथो गरुड़ो वा नः स्वस्ति दधातु॥"
इति वाजसनेयसंहिताभाष्ये महीधरः। २५। १६॥ बृहस्पतेर्गोत्रापत्यम्। यथा, महाभारते। १। १८४। ८।
"जग्मुश्चारिष्टनेम्नोऽथ तार्क्ष्यस्याश्रममञ्जसा॥"
तथाच तत्रैव। १२। २८८। ४।
"एवमुक्तस्तदा तार्क्ष्यः सर्व्वशास्त्रविदां वरः।
विबुध्य सम्पदश्चाद्यां तद्वाक्यमिदमब्रवीत्॥")
शालवृक्षः। स्वर्णम्। इति शब्दरत्नावली॥ अश्वकर्णवृक्षः। स्यन्दनम्। इति हेमचन्द्रः। ४। २६८॥ (क्षत्रियविशेषः। यथा, महाभारते। २। ५१। १५। [सह॥"
"अम्बष्ठाः कौकुरास्तार्क्ष्या वस्त्रपाः पह्लवैः
महादेवः। यथा, महाभारते। १३। १७। ६०।
"गन्धर्व्वाः सूदितिस्तार्क्ष्यैः सविश्वेयः सुधारदः॥"
पर्व्वतविशेषः। इति कश्चित्॥)
तार्क्ष्यजं, क्ली, (तार्क्ष्ये सुवर्णे तद्वत् जायते। यद्वा, तार्क्ष्ये पर्व्वते जायते इति। जन + डः।) रसाञ्जनम्। इति भावप्रकाशः॥
तार्क्ष्यध्वजः, पुं, (तार्क्ष्यो गरुड़ः ध्वजे यस्य।) विष्णुः। इति हेमचन्द्रः। २। १२८॥
तार्क्ष्यनायकः, पुं, (तार्क्ष्याणां सर्पाणां नायकः प्रापकः। खमातुर्दासत्वकाले विमातृपुत्रसर्पाणां वहनात् तथात्वम्।) गरुड़ः। इति राजनिर्घण्टः॥ (तार्क्ष्यनाशकः। इति कश्चित्॥)
तार्क्ष्यप्रसवः, पुं, (तार्क्ष्यः पर्व्वतः प्रसवोऽस्य।) अश्वकर्णवृक्षः। इति राजनिर्घण्टः॥
तार्क्ष्यशैलं, क्ली, (तार्क्ष्यशैले भवम्। अण्।) रसाञ्जनम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये।
"सिन्धूद्भूतं शक्रमर्द्दस्य बीज-
मिक्षूद्भूतं केशवं तार्क्ष्यशैलम्॥")
तार्क्ष्यी, स्त्री, (तार्क्ष्यस्य पक्षिणः प्रिया। अण् ङीप् च।) वनलताविशेषः। इति शब्दरत्नावली॥
तालं, क्ली, (तलत्यनेनेति। तल प्रतिष्ठायाम् + "हलश्च।" ३। ३। १२२। इति घञ्।) हरितालम्। (अस्य नामानि यथा,—
"हरितालं तालमालं मालं शैलेयभूषणम्।
पिञ्जकं रोमहरणं तालकं पातमित्यपि॥"
इति वैद्यकरत्नसारसंग्रहे नारङ्गमारब्धाधिकारे॥)
तालीशपत्रम् इति राजनिर्घण्टः॥ दुर्गासिंहासनम्। इति हेमचन्द्रः। ४। २०२॥ (तालस्य विकारः। "तालादिभ्योऽण्।" ४। ३। १५२। इत्यस्य तालाङ्गुलि इति वार्त्तिकोक्त्या अण्। धनुः। इति सिद्धान्तकौमुदी॥ तालस्येदम्। अण् तस्य लुक्।) तालपत्रम्॥ (यथा, महाभारते। ३। १०१। ५।
"शिरोभिः प्रणतश्चक्रे व्याप्यन्तरीक्षात् महीतलम्।
तालैरिव महाराज! द्रुमाद्रुद्रैरदृश्यत॥")
तालः, पुं, (तलत्यत्र। तल + "हलश्च।" ३। ३। १२२। इति घञ्।) वृक्षविशेषः। तत्पर्य्यायः। तालद्रुमः २ पत्री ३ दीर्घस्कन्धः ४ ध्वजद्रुमः ५ वृक्षराजः ६ मधुरसः ७ महाद्रुः ८ दीर्घपादपः ९ चिरायुः १० तरुराजः ११ दीर्घपत्रः १२ गुच्छपत्रः १३ आसवद्रुः १४। इति राजनिर्घण्टः॥ लेखपत्रः १५ महोन्नतः १६। इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। पित्तदाहश्रमापहत्वञ्च॥*॥ अस्य रसगुणः। कफपित्तदाहशीतनाशित्वम्। मदकारित्वञ्च॥*॥ तत्फलगुणाः। शीतलत्वम्। बलत्वम्। स्निग्धत्वम्। स्वादुरसत्वम्। गुरुत्वम्। विष्टम्भित्वम्। वातपित्तास्रवतदाहक्षयनाशित्वञ्च। इति राजनिर्घण्टः॥ पित्तरक्तश्लेष्मविवर्द्धनत्वम्। दुर्ज्जरत्वम्। बहुमूत्रत्वम्। तन्द्राभिष्यन्दिशुक्रदाढ्यत्वञ्च। इति भावप्रकाशः॥ वातश्रमिकृकरक्तपित्तनाशित्वम्। हृद्यत्वम्। वृष्यत्वम्। स्वादुत्वञ्च। इति राजवल्लभः॥*॥ तद्वीजस्य अर्थात् तालशस्यस्य गुणाः। मूत्रकरत्वम्। मिष्टत्वम्। वातपित्तहरत्वम्। गुरुत्वञ्च॥*॥ तदस्थिमज्जगुणाः। मधुरत्वम्। मूत्रलत्वम्। शीतलत्वम्। गुरुत्वञ्च॥*॥ तालास्थ्युगुणाः। पित्तनाशित्वम्। शुक्रस्तन्यवृद्धिकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ तालजतरुणतोयगुणः। अतिश्रमयमदकारित्वम्। तदेवान्त्रीभूतं पित्तवातदोषघ्नत्। इति भावप्रकाशः॥ कफक्लमिहरत्वम्। वृष्यत्वम्। वातलत्वम्। दुर्ज्जरत्वञ्च। इति राजवल्लभः॥*॥ तालप्रलम्बगुणः। रूक्षत्वम्। श्वेतरोगनाशित्वञ्च। इति राजनिर्घण्टः॥*॥ तालतरुणमज्जगुणाः। किञ्चिन्मदकरत्वम्। लघुत्वम्।

श्लेष्मकारित्वम्। वातपित्तनाशित्वम्। सक्षेहत्वम्। मधुरत्वम्। सारकत्वञ्च। इति भावप्रकाश:॥ * ॥ तालशिरोगुणा:। स्वादुत्वम्। तिक्तत्वम्। कषायत्वम्। मूत्रातङ्करोगनाशित्वम्। बलप्राणशुक्रवृद्धिकारित्वञ्च। इति। राजवल्लभ:॥ * ॥

गीतकालक्रियामानम्। अयं खर इयत् कालं गेय: इयत् कालं विलम्बितं इयत् कालं द्रुतं इयत् कालं मध्यमिति बोधयितुं इडाग्नेईडालेरङ्गुल्याङ्गुष्ठस्य प्रसारणादिक्रियाभिर्निर्णेतव्यं गातव्यचेति कालक्रिययो: प्रमाणं ताल:॥ साङ्गे इदमियद्भि: कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति॥ कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियाया: परिच्छन्दात्मिकाया: परिच्छेदहेतुस्ताल इति मधु:॥ कालेन नर्त्तनगलवादनक्रियाणां मानं ताल:। तारादेककालमेषां विरामस्ताल इत्यन्ये। इत्यमरटीकायां भरत:॥ * ॥ तस्योत्पत्तिर्यथा। गौरीहरयोर्नृत्येन तालो बभूव। तस्य कारणम्। क्रियाकालश्च। हरवृत्तस्य ताण्डवं गौर्या वृत्तस्य लास्यं इति संज्ञा अर्थात् पुरुषवृत्तस्य ताण्डवं नार्या वृत्तस्य लास्यमिति नाम। ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता। इति सङ्गीतशास्त्रम्॥ * ॥ तस्य भेदा यथा,—

"चञ्चत्पुट१ चाचपुट:२ षट्पितापुत्रकस्तथा३। उद्घट्टक:४ सन्निपात:५ कङ्कण:६ कोकिलारव:७॥ राजकोलाहलो८ रङ्गविद्याधर९ श्चर्चरी१०। पार्व्वतीलोचनो ११ राजचूड़ामणि१२ जयश्रियौ१३॥ वादकाकुल१४ कन्दर्प१५ नलकूबर१६ दर्पणा:१७। रतिलीलो १८ मोचपति:१९ श्रीरङ्ग: २० सिंहविक्रम: २१॥ दीपको २२ मल्लिकामोदो २३ गजलीलश्च २४ चर्चरी २५। कुहको २६ विजयानन्दो २७ वीरविक्रम २८ टेङ्किके २९॥ रङ्गाभरण ३० श्रीकीर्त्ति ३१ वनमालि ३२ चतुर्म्मुखा:३३। सिंहनन्दन ३४ नन्दीश ३५ चन्द्रबिम्ब ३६ द्वितीयका: ३७॥ जयमङ्गल ३८ गन्धर्व ३९ मकरन्द ४० विभङ्गय: ४१। रतितालो ४२ वसन्तश्च ४३ जगझम्पो ४४ अथ गरुड़ि: ४५॥ कविप्रेखर ४६ घोषौ च ४७ हरवल्लभ ४८ भैरवौ ४९। गतप्रत्यागतो ५० मल्लतालो ५१ भैरवमस्तक:५२॥ सरस्वतीकण्ठाभरण: ५३ क्रीड़ा ५४ नि:सारुरेव च ५५। सुक्तावली ५६ रङ्गराज ५७ भरतानन्दा ५८ दितालका: ५९॥

सम्यक्केदाक ६० इत्यादि ताला भरतसंमता:। संक्षेपतो निगदिता अथेषां लक्षणं यथा॥*॥ अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम्। द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम्॥ ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु: प्लुत: १। गुरुर्लघु: प्लुतश्चैव भवेच्चाचपुटाभिधे॥ २॥ नलगालगलाश्चैव षट्पितापुत्रके मता: ३। उद्घट्टके तु गमना: ४ सन्निपाते गुरुर्म्मत:॥५॥ चतुर्व्विध: परिज्ञेयस्ताल: कङ्कणनामक: ६। पूर्ण: खण्ड: समश्चैव विषमश्चैव कथ्यते॥ लघुचतुष्कं गलौ पूर्णे खण्डे विन्दुद्वयं गुरु:। यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत्॥ खण्डचतुष्कं सयत्यन्तं गुरुर्बिन्दुचतुष्टयम्। सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारव:॥७॥ लघुचतुष्कं सयत्यन्तं खण्डयं खण्डयं लघु:। लघुर्बिन्दुद्वयञ्चेति राजकोलाहलाभिधे॥८॥ खण्डयं द्वौ प्लुतौ यत्र रङ्गविद्याधर: स तु ९। लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै॥ प्लुतद्वयञ्च यत्रास्ति स ताल: स्याच्चण्डीप्रिय:॥१०॥ खण्डयं गुरवौ बिन्दुर्गौ प्लुतौ गौ प्लुतौ पुन:। यत्र ताल: स विज्ञेय: पार्व्वतीलोचनाभिध:॥११॥ राजचूड़ामणौ बिन्दुर्लघ्वन्तौ बिन्दुर्लगौ मतौ॥ १२॥ रगणो नो गुरुश्चैव जयश्रीरिति कथ्यते॥ १३॥ प्लुतौ लघुचतुष्कञ्च मौ नौ द्वितयुगं लघु:। लघुचतुष्कं विना ग्रन्थं ताल: स्याद्वादकाकुल:॥१४॥ द्वितयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितं॥ १५॥ चत्वारो गुरवो यत्र चत्वार: प्लुतका अपि। लघ्वक्षराणि चत्वारि तालोऽयं नलकूबर:॥१६॥ विन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पण:॥ १७॥ रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम्॥१८॥ आदौ षोड़शगुरवो द्वात्रिंशल्लघवस्तत:। चतु:षष्टिर्द्रुता यत्र सोऽयं मोचपतिर्मत:॥ १९॥ श्रीरङ्गसंज्ञके ताले मगणाल्लघुप्लुतौ मतौ॥ २०॥ सिंहविक्रमताले तु मगणो नखगा: खगौ॥२१॥ प्लुतो लघु: प्लुतश्चैव ताले दीपकनामनि॥ २२॥ ताले स्याल्लिकामोदे लक्षयं खण्डचतुष्टयम्॥२३॥ लघुचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम्॥२४॥ अष्टलस्तु चर्च्चर्य्यां विरामान्ते द्वितौ लघु:॥२५॥ द्रुतद्वन्द्वं भवेत्ताले कुहकाख्ये लघुद्वयम्॥२६॥ भवेयुर्विजयानन्दे लक्षयश्च लघुत्रयम्॥ २७॥ वीरविक्रमताले तु द्वितौ लगौ तत: प्लुत:॥ २८॥ टेङ्किका रगणेन स्यादेकेनैव लताद्यदे॥ २९॥ भगणो गप्लुतौ स्यातां रङ्गाभरणनामके॥ ३०॥ श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम्॥३१॥ चतुर्द्रुता लघू द्वौ तु द्वितौ गो वनमालिनि॥ ३२॥ चतुर्म्मुखाभिधे ताले यगणानन्तरं प्लुत:॥ ३३॥ भगण: प्लुतो लगौ विन्दुद्वयं गौ न: प्लुतस्तथा। लघु: प्लुतो द्वितश्चैको लघुद्वयमथापि च॥ नि:ग्रन्थं लघुतश्चैव ताले स्यात् सिंहनन्दने॥३४॥ गो लघुर्गौ लघु: प्लुतस्ताले नन्दीश्वरे मता:॥३५॥ गो द्वितौ नौ प्लुतद्वन्द्वं चन्द्रबिम्बे प्रकीर्त्तितम्॥३६॥ द्वितद्वन्द्व लघुश्चैवास्ताले स्याण् द्वितीयके॥३७॥

सकारश्च यकारश्च जयमङ्गलनामनि॥ ३८॥ चत्वारो गुरवो विन्दुश्चत्वारश्च प्लुता अपि। विन्दवो दशघट् लाश्च ताले गन्धर्व्वसंज्ञके॥३९॥ मकरन्दे द्वितद्वन्द्वं लघुद्वन्द्वमथो गुरु:॥ ४०॥ गुरुर्लघु: प्लुतश्चैव त्रिभङ्गि: परिकीर्त्तित:॥४१॥ अत्र रतितालस्य लक्षयं पतितम्॥ ४२॥ वसन्ततालके कर्णयो नगणो मगणस्तथा॥ ४३॥ जगझम्पे गुरुश्चैको विरामान्तश्च खण्डयम्॥४४॥ गप्लुतौ लौ द्वितौ लश्च प्लुतो गारुणि। ४५। शेखरे॥ ४६॥ प्लुत: शून्ये नगौ लश्च खण्डयञ्च ततो लघु:॥ खण्डचतुष्कं विना ग्रन्थं यत्र घोष: स उच्यते॥४७॥ हरवल्लभताले च प्लुतो लो गौ च खण्डम्॥४८॥ भगण: प्लुतौ नगौ गयौ प्लुतो लघुश्च भैरवे॥४९॥ गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ॥५०॥ चतुर्लघुर्मल्लताले विरामान्तं द्वितद्वयम्। लगौ गौ नो नगौ गश्च खण्डयं लक्षयं पुन:॥५१॥ नखचतुष्कं विना ग्रन्थं ताले भैरवमस्तके। ५२। सरस्वतीकण्ठाभरणे गौ लघुश्च द्वितद्वयम्॥५३॥ एक एव प्लुतो यत्र क्रीड़ाताल: स उच्यते॥५४॥ द्वितद्वयं विरामान्तं ताले नि:सारुके मतम्॥५५। खण्डयं सविरामान्तं गौ पुन: खण्डयन्तथा॥ प्लुतौ ग: खयुगं गश्च यत्र सुक्तावली तु सा॥५६। लगौ विन्दुयुगं गौ लो रङ्गराजे प्रकीर्त्तित:॥५७॥ खण्डयं सविरामान्तं गुरु: प्लुतद्वयं लघु:॥ यत्र ताले स विज्ञेयो भरतानन्दसंज्ञक:॥ ५८॥ आदिताले लगुश्चैक इत्याह भरतो मुनि:॥५९। मगणश्च प्लुतान्त: संझके दाकताल के॥ ६०॥ एकाधिकशते ताले षष्टिर्म्मुख्यतमा इमे॥"*॥

अथ प्रस्तार:।

"गुरु: प्लुताधोभागे तु गुर्व्वधोभागतो लघु:। द्वितं लघोरधोभागे तुर्य्यो तुल्या तु षड्लिका॥ उद्दिष्टा च कला पश्चादित्थं प्रस्तारक्रम:। सर्व्वप्लुतात् समारभ्य माचानिवहनिर्म्मिताद्॥ तावत् प्रस्तारयेदन्तं यावत् सर्व्वद्रुतं भवेत्॥"

अथ तालप्रस्तारे पिङ्गलवन्नष्टोद्दिष्टप्रभेदयताकाद्य: सन्ति बाहुल्यभयान्नोक्ता:॥ * ॥

अथ प्लुतादिमात्रामेदेन तालघातनम्।

"ताले निशातहस्त: प्लुतमग्रुघटयेद्घातमेकं सग्रन्थं
ततपश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेत्कूर्त्तनोऽध:।
शून्यत्वात् पक्षतालाविति जगति पुन: सूचयिद्वौ सनन्दा-
वित्थं घातत्रयं तत् त्रिकलतगुणहिर्व्वर्द्धयेद्वर्णभेदम्॥
एको घात: सग्रन्दो द्विकल इह गुरौ ग्रन्थहीनस्तथाग्र:
षोऽपूर्णं याति लीलावलयवलयितोत्तानहस्ताङ्गुलीभि:।
किञ्चोच्चैकैकमात्रा समुदयिनि लघौ घात एको निगादी

घात्यो मात्रार्द्धभागि हतवपुषि लघोरर्द्धनादेन घातः ॥
इति तालघातनप्रकारः ॥ * ॥
श्रीरङ्गो मणिबन्धकङ्कणवहो मुक्तावलीमण्डनः
क्रीड़ाहेतुवसन्तरत्नहृदयो गन्धर्वलीलारतः ।
साक्षान्मोचपतिश्चतुर्मुखनतो यो राजचूड़ामणिः
सोऽयं तालमयस्त्रयोदशलयवत् संसारवन्द्यं हरिः ॥
अपि च ।
नन्दीशोऽर्द्धतनुर्मुखेन वनतस्तच्चन्द्रबिम्बोदयः
कन्दर्पो नलकूवरश्च तुलितौ यस्यातिरूपे तुले ।
कण्ठान्तः किल कोकिलारवभवो बाहौ जयश्रीरहो
तालात्मा सुरचिच्छिनत्तु सगुणः संसारपाशावलीम् ॥
ख्यातो यः कविचक्रवर्त्तिपदवीं विद्याचनैरर्चितः
सौभद्रेयमिमं यमञ्जुनयशाः सोऽजीजनत् श्रीधरः ।
तस्य श्रीलशुभङ्करस्य भणितौ सङ्गीतदामोदरे
तालाद्यः स्रवकोथुतस्तवनतौ यातस्तृतीयः पटुः ॥"*॥

अन्यच्च ।
"आदावश्वत्थया रुद्रो ब्रह्म इन्द्रश्चतुर्द्दशः ।
दशावतारवन्द्यादि गृह्यनाट्यं ततः परम् ॥
अथाष्टतालभेदाः । आड़ः १ दोणः २ ज्योतिः ३ चन्द्रशेखरः ४ गञ्जनम् ५ पञ्चतालः ६ रूपकम् ७ समतालः ८ ॥ अथ रुद्रतालस्य भेदाः । वीरविक्रमः १ विषमसमुद्रः २ धरणम् ३ वीरदर्पकः ४ मङ्कुकः ५ कन्दर्पः ६ डाँशपाणिड़ः ७ ध्रुवचरणम् ८ दर्पकोषी ९ गणेन्द्रगुरुः १० छुटका ११ । अथ ब्रह्मतालभेदाः । ब्रह्म १ विरामब्रह्म २ षट्कला ३ सप्तमात्रा ४ ॥ अथेन्द्रतालभेदाः । देवसारः १ देवचाली २ मदनदोला ३ गुरुगन्धर्वः ४ पञ्चाली ५ इन्द्रभावः ६ ॥ अथ चतुर्दशतालभेदाः । चित्रतालः १ चन्द्रमात्रा २ वेगमात्रा ३ अर्द्धज्योतिका ४ स्वर्णसारः ५ धमाकः ६ धराधरा ७ वसन्तवाक् ८ काकलता ९ वीरगन्धा १० तालवती ११ हर्षधारिका १२ भावा १३ अर्द्धमात्रा १४ ॥
तेषां लक्षणानि यथा,—
एकतालस्तथा शून्यं युगलं तालिका परे ।
सङ्गीतः प्रथमः सारः आड़तालः प्रकीर्त्तितः १ ॥
एकतालश्च शून्यश्च क्रमेणापि त्रिधा भवेत् ।
ग्रैवशून्यं कलाभेदे दोणाख्यश्च भवेत् पृथक् २ ॥
प्रथमं युगलं तालं एक एकस्तथापरे ।
कलाभेदे गानभेदं ज्योतिश्च परिकीर्त्तितम् ३ ॥
चन्द्रश्चन्द्रस्तथा युग्मं तथा चन्द्रस्तथापरे ।
षट् ताला निभवन्त्येवं चन्द्रशेखरभाषितः ४ ॥
एकतालो भवेच्छ्रेष्ठः क्रमेणापि चतुष्टयम् ।
ग्रैवशून्यं गञ्जनश्च सर्व्वतो मुनिभाषितम् ५ ॥
प्रथमं युगलश्चैव ततपरं तालमेककम् ।
ग्रैवे युग्मं तथा शून्यं पञ्चतालं प्रकीर्त्तितम् ६ ॥
युगलं प्रथमं तालं ततपरन्त्वेकशून्यकम् ।
ग्रैवे च युगलं तालं रूपकं परिकीर्त्तितम् ७ ॥
एकतालं तथा शून्यं क्रमेण द्विविधं भवेत् ।
ग्रैवे युगलतालश्च समतालं भवेत् परम् ८ ॥
एकतालं तथा शून्यं क्रमेण त्रिविधं भवेत् ।
ततपरं युगलं तालमित्येवं वीरविक्रमः १ ॥
युग्मतालं तथा शून्यं ततपरं द्वयतालकम् ।
ग्रैवे च युगलं तालं समुद्रविषमं स्मृतम् २ ॥
युग्मतालश्च शून्यश्च एकतालश्च ततपरे ।
ग्रैवैकत्र त्रिशून्यश्च विषमं धरणं भवेत् ३ ॥
एकतालं तथा शून्यं क्रमेणापि त्रिधा भवेत् ।
युगलं युगलं पश्चात् स वीरदर्पकः स्मृतः ४ ॥
प्रथमं एकतालश्च ततपरं शून्यमेककम् ।
ग्रैवैकत्र त्रितालश्च मङ्कूकस्य गतिर्यथा ५ ॥
समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम् ।
समतालो भवेत् शून्यं कन्दर्पे नास्ति ततः पुनः ६ ॥
पञ्चतालात् परं शून्यं डाँशपाणिड़मुत्तमम् ।
अर्द्धश्च भवेत् चत्वं संग्रामस्य यथा गतिः ७ ॥
एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत् ।
ग्रैवैकत्र त्रितालश्च ध्रुवचरणभाषितम् ८ ॥
एकतालमेकशून्यमित्येवञ्च भवेत् क्रमात् ।
विरामं एकतालश्च वाग्भेदे दर्पकोषिका ९ ॥
युगलं युगलं पश्चात् तदन्तेऽप्येकतालकम् ।
ग्रैवे च युग्मशून्यश्च गणेन्द्रगुरुभाषितम् १० ॥
युग्मशून्यं विरामे च एकतालं भवेत् क्रमे ।
छुटकाख्यानकं धीर सङ्गीतपरिनिष्ठितम् ११ ॥
युग्मश्च चत्वं प्रथमैकतालं
किञ्चिद्विरामे पुनरेकतालम् ।
ब्रह्मस्य तालश्च सङ्गीतमध्ये
यथा कपोती हि करोति शब्दम् १ ॥
युग्मतालं भवेच्चत्वं एकतालश्च ततपरे ।
ग्रैवे द्वितीयशून्ये च विरामब्रह्मतालकम् २ ॥
प्रथमश्चैकतालश्च युग्मशून्यं तथा परे ।
ग्रैवैकत्र त्रितालेति षट्कला खलु कथ्यते ३ ॥
आदौ युग्मं तथा युग्मं त्रितालश्च तथा परे ।
सप्तमात्रा भवत्येवा ब्रह्मतालान्तरे शुभे ४ ॥
सविरामं त्रितालश्च एकं शून्यन्तथापरे ।
ग्रैवे चत्वं त्रितालश्च देवसार इतीर्य्यते १ ॥
द्वितयशून्यं विरामे भवति ततश्च त्रितालानि ।
ग्रैवैश्च द्विशून्यमित्येवं देवचाली २ ॥
प्रथममेव युग्मतालं ततपश्चादेकशून्यं विरामे ।
ग्रैवे त्रितयतालं भवतीति मदनदोला ३ ॥
युग्मतालं समारभ्य पञ्चतालं भवेत्तथा ।
अर्द्धश्च तथा चत्वं गुरुगन्धर्व ईरितः ४ ॥
आवश्यस्य यथा धारास्तथा तालो भवेद्गुरुः ।
पञ्चतालान्तराजीति पञ्चालीति प्रकीर्त्तिता ५ ॥
सविरामं चतुस्तालं त्रितालं शून्यमन्ततः ।
मेघारम्भे यथा केका रूयन्ते इन्द्रभावितः ६ ॥
एकतालश्च शून्यश्च क्रमेण त्रितयं ततः ।
ग्रैवे चतुष्टयं चत्वं चित्रताल इतीर्य्यते १ ॥
एकचन्द्रस्तथा युग्मं तालं प्रत्येकतस्त्रयम् ।
ग्रैवे त्रीणि च शून्यानि चन्द्रमात्रा भवेत् परा २ ॥
प्रथमं षट्कतालश्च अर्द्धतृतीयं भवेत् क्रमे ।
ग्रैवे युग्मं तथा शून्यं देवमात्रा च सोच्यते ३ ॥
चन्द्रशून्यं त्रितालश्च विरामेण क्रमेण तु ।
अर्द्धतृतीयं भवत्येवं अर्द्धज्योतिरिति स्थितिः ४ ॥
एकैकतालान्तरयुग्मतालात्
शून्यत्रयं तत्परमेकतालम् ।
कलाभिदा शून्यभिदा समाख्या
स स्वर्णसाराख्यनवीनतालः ५ ॥
युग्मशून्यं विरामेण देवतालमिति क्रमात् ।
धमाकाख्योऽन्तरे शून्यं इति सर्व्वत्र भाषितम् ६ ॥
नवाम्बुदे दामिनि ग्रीष्मयानं
तथा सुसम्बद्धसुतालभागम् ।
युग्मं सचत्वं क्रमतश्च तालं
ग्रैवे त्रितालश्च धराधराख्या ७ ॥
एकतालश्च शून्यश्च क्रमेणापि चतुष्टयम् ।
क्रमात्तालत्रयश्चैव वसन्तवागुदाहृतः ८ ॥
सविरामं द्वयं तालं युग्मतालं तथा परे ।
ग्रैवैकत्र त्रितालश्च भवेत् काकलतेति सा ९ ॥
त्रितालश्च भवेच्चत्वं ततपरं त्वेकतालकम् ।
ग्रैवेऽपि च त्रितालश्चेत् वीरगन्धा प्रचक्षते १० ॥
युग्मं युग्मं तथा युग्मं तालस्त्वेकं भवेत् क्रमात् ।
ग्रैवशून्यं कलाभेदे तालवतीति भवेत् पृथक् ११ ॥
सविरामं द्वयं तालं युग्मशून्यश्च ततपरम् ।
ग्रैवोऽर्द्धस्तु त्रितालश्च हर्षधारा प्रकीर्त्तिता १२ ॥
चन्द्रशून्यं विरामेण द्वयं तालं भवेत् क्रमात् ।
अर्द्धतृतीयं भवेच्चत्वं भावाख्यं तालमुत्तमम् १३ ॥
अर्द्धतृतीयं त्रितालश्च द्वयं तालं विरामकम् ।
इत्यर्द्धमात्रा विज्ञेया सङ्गीतसुवि सर्व्वतः ॥"
इति सङ्गीतदामोदरः ॥
दशावतारप्रबन्धलक्षणं प्रबन्धशब्दे नित्यनाथप्रबन्धवाद्यलक्षणं वाद्यशब्दे द्रष्टव्यम् ॥ * ॥
करतलम् । अङ्गुलमध्यभाग्यां सम्मितम् । करास्फालः । (यथा, मेघदूते । ७६ ।
"तालैः सिद्धिलयप्रभेदनिपुणैः कान्तया मे यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् ॥")
कांस्यनिर्म्मितवाद्यभाण्डम् । तूणवः । इति मेदिनी । ले, २४ ॥ (महादेवः । यथा, महाभारते । १६ । १७ । १२८ ।
"तलस्तालः करस्त्वाजी कर्द्दसंहननो रणः ॥")
तालकं, क्ली, (तालमेव । ताल + स्वार्थे कन् ।)
हरितालम् । इति राजनिर्घण्टः ॥ (अथ तालकस्याशुद्धस्य दोषमाह ।
"अशुद्धं तालमादूर्त्तुकफमारुतमेहलत् ।
तापस्फोटाङ्गसङ्कोचं कुरुते तेन शोधयेत् ॥
अथ तालकस्य शोधनविधिः ।
तालकं कथयः कृत्वा तचूर्णं कारिके पचेत् ।
दोलायन्त्रेण यामैकं ततः क्षाराम्बुनैर्द्रवैः ॥
तिलतैले पचेद्यामं यामञ्च चिफलाजले ।
एवं यन्त्रे चतुर्यामं पक्वं शुध्यति तालकम् ॥
अथ तालकस्य मारणविधिः ।
सदृशं तालकं शुद्धं पौराणैर्वरसेन तु ।
खल्वे विमर्द्दयेदेवं दिनं पञ्चाद्विशोधयेत् ॥
ततः पुनर्नवाचारैः आर्द्रयामर्द्धं प्रपूरयेत् ।

तच्च तन्नोलकं धृत्वा पुनस्तेनैव पूरयेत् ॥
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
शालीं शुक्लां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् ॥
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदापयेत् ।
एवं तन्म्रियते तालं मात्रा तुल्यैकरक्तिका ॥
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥"
अन्यच्च ।
"तालकं हरते रोगान् कुष्ठन्त्वग्व्यङ्गापहम् ।
शोधितं कुरुते कान्तिं वीर्य्यबुद्धिं तथायुषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
अन्यान्यविधं हरितालमारणम् । यथा, वैद्यक-रसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"तालकं कणशः कृत्वा सुस्थं कुक्किकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवैः ॥
चारोदकेन संपिष्टमर्द्धाहो यावशूकजम् ।
चूर्णं दत्त्वा निरुध्याथ कुम्भाङ्गेन प्रपूरयेत् ॥
पुनर्मुखं निरुध्याथ चतुर्यामं क्रमाग्निना ।
पचेदेवं हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥"
मतान्तरम् ।
"अम्ललोनीजलैर्भाव्यं तालं द्वादशयामकम् ।
तथैव बिम्बनीरेण ततश्चूर्णोदकेन च ।
प्रक्षाल्य शालमलीक्षारैर्द्विगुणैः खातमध्यगम् ।
विधाय कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ।
द्वादशप्रहरं पक्त्वा खाङ्गशीतञ्च चूर्णयेत् ।
खादयेदक्तिकामेकां कुष्ठशीपदशान्तये ॥"
इति हरितालमारणम् ॥)
(तालमिव कायतीति । के + कः ।) द्वारधन्वम् । इति हेमचन्द्रः । ४ । ७१ ॥ ताला इति भाषा ॥ तुवरिका । इति शब्दरत्नावली ॥
तालकाभः, पुं, (तालकस्य हरितालस्य आभा इव आभा यस्य ।) हरितवर्णः । इति हेमचन्द्रः । ६ । ३१ ॥ तद्वति, त्रि ॥
तालकी, स्त्री, (तालकस्य तालवृक्षस्य इयम् । तालक + अण् + ङीष् ।) तालसुरा । इति त्रिकाण्डशेषः ॥ ताड़ी इति भाषा ॥
तालक्षीरकं, क्ली, (तालजातं क्षीरमिव । ततः इवार्थे स्वार्थे वा कन् ।) तालसम्भूतताक्षीरम् । इति राजनिर्घण्टः ॥
तालध्वजः, पुं, (ताल्यो ध्वजो यस्य ।) बलदेवः । इति हलायुधः ॥ (यथा, महाभारते । ६ । ५४ । १० ।
"नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्यं तीर्थवरं दृष्ट्वा विसायं परमं गतः ॥"
पर्व्वतविशेषः । यथा, शत्रुञ्जयमाहात्म्ये । १ । ३५ । २ ।
"शत्रुञ्जयो रैवतश्च सिद्धिक्षेत्रं सुतीर्थराट् ।
टङ्कः कपर्दी सौवित्यस्तालध्वजकदम्बकौ ॥")
तालध्वजा, स्त्री, (तालस्तालवृक्षो ध्वजश्चिह्नं यस्याः ।) पुरीविशेषः । यथा, क्रियायोगसारे ।
"अस्ति तालध्वजा नाम नगरी त्रिदिवोपमा ॥"
तालनवमी, स्त्री, (तालोपहारा नवमी । शाकपार्थिववत् समासः ।) भाद्रशुक्लनवमी । यथा,
"भाद्रे भाद्रपदे या स्यान्नवमी बहुवैतरा ।
तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत् ॥"
इति संवत्सरकौमुदीधृतगरुड़पुराणवचनम् ॥
इयमेव तालनवमी ख्याता ॥ (अस्यां नवम्यां सौभाग्यफलकाङ्क्षिणीभिः स्त्रीभिर्यथाविधानं नारायणं लक्ष्मीञ्च संपूज्य व्रतकथा श्रोतव्या । तत्कथा यथा,—
"मेरुपृष्ठे सुखासीनं शक्रं कमलया सह ।
उवाच मधुरं वाक्यं स्मितपूर्व्वं सुरम्बिका ॥
श्रूयतां मे वचनं देव ! स्त्रीणां सौभाग्यकारणम् ।
केन वा सुभगा चासीत् केन वा दुर्भगा भवेत् ॥
किं व्रतेन विमुच्येत किं व्रतेन फलं लभेत् ।
तन्मे ब्रूहि सुरश्रेष्ठ ! नारीणां कारणं ध्रुवम् ॥
श्रीभगवानुवाच ।
पूर्व्वं हि मम भार्य्ये द्वे सत्यभामा च रुक्मिणी ।
रुक्मिणी सुभगा साध्वी सत्यभामा च दुर्भगा ॥
तस्याः कर्म्मविपाकेन सौभाग्यमन्यथा गतम् ।
केनचिन्नावदोषेण सत्यभामा च दुर्भगा ॥
दुःखार्त्ता शोकसन्तप्ता रुदती बहुशो मुहुः ।
कियत्कालेन च सम्यग्ने व्रजन्ती च तपोवने ॥
अरण्ये विजने गत्वा कस्मिञ्चिन्मुनिवराश्रमे ।
रुदित्वा च विधानेन सर्व्वं दुःखं न्यवेदयत् ॥
तच्छ्रुत्वा तु मुनिश्रेष्ठः प्रोवाच रुदतीं शुभाम् ।
भद्रे पुत्रियि ! मा रोदीः सौभाग्यं ते भविष्यति ॥
सत्यभामोवाच ।
दुःखं मे बहुशस्तात ! शरीरं दुर्भगं कथम् ।
कथ्यतां मुनिशार्दूल ! स्वामिसौभाग्यकारणम् ॥
मुनिरुवाच ।
भाद्रे मासि सिते पक्षे नवमी या तीथिर्भवेत् ।
तस्यां नारायणं लक्ष्मीं पूजयेच्च विधानतः ॥
सत्यभामोवाच ।
विधानं कीदृशं तस्य किं दानं किञ्च पूजनम् ।
तन्मे ब्रूहि मुनिश्रेष्ठ ! कारणं किन्तदुच्यताम् ॥
मुनिरुवाच ।
स्वच्छिद्रे मण्डलं कृत्वा घटं तत्र निवेशयेत् ।
तत्र नारायणं लक्ष्मीं गन्धपुष्पादिनार्च्चयेत् ॥
नैवेद्येन सदा भक्त्या पूजयेत् भक्तवत्सलाम् ।
तालेन पूजयेत् देवीं तालेनैव विनिर्म्मितम् ॥
तस्यै ततु पिष्टकं दत्त्वा ब्राह्मणायोपपादयेत् ।
गन्धमाल्यैः समभ्यर्च्च्य विप्रहस्ते समर्पितम् ॥
स्वस्तीति ब्राह्मणो ब्रूयात् व्रतं साङ्गं समाचरेत् ।
एवं क्रमेण साध्वीभिः कर्त्तव्यमतियत्नतः ॥
नवमं वत्सरं यावत् मासि भाद्रपदे तथा ।
पुत्रपौत्रैः परिवृता सौभाग्यमतुलं भवेत् ॥
धनधान्यसमृद्धिश्च ध्रुवैधर्य्यञ्च नित्यशः ।
अभीष्टफलमाप्नोति नवमीव्रतकारणात् ॥
सम्पूर्णे तु व्रते भूते प्रतिष्ठां तदनन्तरम् ।
विप्राय दक्षिणां देया सुभोज्यञ्च विधानतः ।
एवं कुरु सदा विज्ञे ! शृणु भाग्यसुत्तमम् ॥
तथा चक्रे च सा साध्वी सुनेर्व्वचनगौरवात् ।
व्रते सम्पूर्णतां याते केशवस्तामुपागतः ॥
उवाच प्रहसन् देवो वचनं मधुरं शुभम् ।
त्यजसौभाग्येन यद्दुःखं तत् ते सर्व्वं विनश्यतु ॥
सौभाग्यमतुलं प्राप्य यथा गौरी हरस्य च ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
यथा नारायणे लक्ष्मीस्तथा त्वं भव शोभने ! ।
इति तस्यै वरं दत्त्वा गृहीत्वा तां पुरं ययौ ॥
इदं या कुरुते साध्वी व्रतं सा सुभगा भवेत् ।
एवं व्रतञ्च या नारी करोति धर्म्मतत्परा ॥
तस्याञ्च भवने लक्ष्मीश्चञ्चला निश्चला भवेत् ।
जन्मान्तरे भवेत् साध्वी त्यक्त्वैधर्य्यं सदा पुनः ॥
पञ्चत्वञ्च सुभगा साध्वी पुत्रपौत्रान्विता भवेत् ।
धनधान्यसमृद्धिश्च ततो मोक्षमवाप्नुयात् ॥"
इति भविष्यपुराणोक्ततालनवमीव्रतकथा समाप्ता ॥*॥ व्रतेऽस्मिन् नवफलानि दातव्यानि । तानि यथा,—
"पिण्डखर्জ্জूरं जातिञ्च एला चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भाफलमन्तथा ।
तत्र सूत्रं प्रदातव्यं तालस्य फलसुत्तमम् ॥"*॥)
तालपत्रं, क्ली, (तालस्य पत्रमिव ।) ताड़पत्रः । इत्यमरः । २ । ६ । १०३ ॥ तालवृक्षस्य पर्णञ्च ॥ (एतस्य वचनगुणा यथा,—
"तालपत्रमरुद्वृद्धः कोष्णो वातस्य शान्तिकृत् ।
निद्राकरः प्रीतिकरः शीघ्ररोगविकारहा ॥
दाहपित्तश्रमश्लानिनाशनो भ्रमशान्तिकृत् ।
मधुरोऽतिश्रमघ्नः स्यादार्द्रस्तु कफकोपनः ॥"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)
तालपत्रिका, स्त्री, (तालपत्री + स्वार्थे कन् टाप् ह्रस्वश्च ।) सुवली । तालमूली । इति राजनिर्घण्टः ॥ (तालमूलीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)
तालपत्री, स्त्री, (तालस्य पत्रमिव पत्रमस्याः ।) मूषिकपर्णी । इति मेदिनी । रे, २६३ ॥ (यथा,
"गोजी च पिठा सह तालपत्र्या
यस्यौ विधेयोऽनिलजे प्रलेपः ॥"
इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)
तालपर्णी, स्त्री, स्त्री, (तालः खड्गसुरिरिव पर्णमस्य ।) सुरानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥
तालपर्णी, स्त्री, (तालस्य पर्णमिव पर्णमस्याः । ङीष् ।) मधुरिका । इति जटाधरः ॥ सुरा । इत्यमरः । २ । ४ । १२३ ॥
तालपुष्पकं, क्ली, (तालस्य पुष्पमिव पुष्पमस्य । कप् ।) प्रपौण्डरीकम् । इति शब्दरत्नावली ॥
तालभृत्, पुं, (तालं बिभर्त्ति धनरूपेणेति । भृ + क्विप् ।) बलदेवः । इति त्रिकाण्डशेषः ॥
तालप्रलम्बं, क्ली, (ताले तालवृक्षे प्रलम्बते इति । प्र + लम्ब + घञ् ।) तालजटा । यथा,—
"तथा तालप्रलम्बञ्च रूक्षं चतरुजापहम् ॥"
इति राजवल्लभः ॥
तालमूलिका, स्त्री, (तालमूली + स्वार्थे कन् टाप् ह्रस्वश्च ।) तालमूली । इत्यमरः । २ । ४ । १२६ ॥
तालमूली, स्त्री, (तालस्य मूलमिव मूलमस्याः । ङीष् ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । अर्शोघ्नी २ सुवली ३ ताली ४ खजिनी ५ ।

इति रत्नमाला ॥ सुवहा ६ तालपत्रिका ७ गोधापदी ८ हेमपुष्पी ९ भूतालो १० दीर्घकन्दिका ११। अस्या गुणाः। मधुरत्वम्। स्निग्धत्वम्। वृष्यत्वम्। पुष्टिबलकफप्रदत्वम्। पित्तिश्लत्वम्। पित्तदाहश्रमहरत्वञ्च। इति राजनिर्घण्टः ॥ उष्णवीर्य्यत्वम्। दृंहणत्वम्। गुरुत्वम्। तिक्तत्वम्। रसायनत्वम्। गुदजरोगानिलनाशित्वञ्च। इति भावप्रकाशः ॥

"मुषली च द्विधा प्रोक्ता श्वेता चापरसंज्ञका।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी ॥"
इति राजनिर्घण्टः ॥

(अस्या विषयो यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वरे महाराजवल्याम्।

"माषद्वयमितं भागं तालमूल्या रसेन च।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः ॥")

तालपर्ण्या, [न्] पुं, (तालः एव लक्ष्म चिह्नं यस्य।) बलदेवः। इति हेमचन्द्रः। २।१३८॥

तालपत्रं, क्ली, (तालस्य तालपत्रस्य वृन्तं कार्य्यत्वेन अस्ति अस्य। अच्।) व्यजनम्। इति हेमचन्द्रः। ३। ३५१। तालपातार पाखा इति भाषा ॥ (यदुक्तम्,—

"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम्।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते ॥")

तस्य वायुगुणः। त्रिदोषघ्नमनत्वम्। लघुत्वञ्च। इति राजवल्लभः ॥ (सोमविशेषे, पुं। यथा,—

"एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्विंशतिधा भिद्यते।"
"प्रतानवांस्तालवृन्तः करवीरोऽग्रवानपि ॥"
इति सुश्रुते चिकित्सितस्थाने २६ अध्याये ॥)

तालवृन्तकं, क्ली, (तालवृन्तमेव। स्वार्थे कन्।) व्यजनम्। इत्यमरः। २। ७। १४० ॥

तालवेधनकः, पुं, (तालस्य वेधनं पृथक्करणं संस्थानेन नियमनं यत्र। कप्।) नटः। इति शब्दरत्नावली ॥ तालरेचनकोऽपि पाठः ॥

तालव्यं, त्रि, (तालूत्पन्नम्। तालु+"शरीरावयवात् यत्।" ५। १। ६। इति यत्।) तालुजातम्। इति व्याकरणम् ॥ (यथा, शिक्षायाम्। १७।

"कण्ठ्यावहाविषुयग्शास्तालव्या ओष्ठावुपू॥")

तालाख्या, स्त्री, (तालं तालपर्णं आख्या यस्याः।) सुरा। इति शब्दचन्द्रिका ॥

तालाङ्कः, पुं, (तालस्तालवृक्षः अङ्को ध्वजो यस्य।) बलदेवः। इत्यमरः। १। १। २५॥ करपत्रम्। शाकभेदः। महालक्षणसम्पन्नपुरुषः। पुस्तकम्। हरः। इति हेमचन्द्रः ॥

तालावचरः, पुं, (तालेन अवचरति वृत्यतीति। अव+चर+अच्।) नटः। इति त्रिकाण्डशेषः ॥

तालिः, स्त्री, (तालयति प्रतिष्ठिष्ठजनयेति। तल प्रतिष्ठायाम्+ बिच् + "सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इतीन्।) भूम्यामलकी। इति रत्नमाला ॥ (ताड्यते निहन्यते मतिरनयेति। तड़ ताड़ने+णिच्+करणे इन्। ड़स्य लत्वम्।) ताली। इत्यमरटीकायां भरतः ॥

तालिकः, पुं, (तलेन करतलेन निर्वृत्तः। तल+"तेन निर्वृत्तम्।" ५। १। ७६। इति ठक्।) प्रसारिताङ्गुलिपाणिः। तत्पर्य्यायः। चपेटः २ प्रतलः ३ तलः ४ प्रहस्तः ५ तालः ६। इति हेमचन्द्रः। ३। २३०॥ (यथा, पञ्चतन्त्रे। २। १३७।

"यथैकेन न हस्तेन तालिकः सम्प्रपद्यते।
तथोद्यमपरित्यक्तं न फलं कर्म्मणः स्मृतम् ॥")

लिखितस्य निबन्धनम्। तत्पर्य्यायः। काचनी २ काचनकी ३। इति शब्दरत्नावली ॥

तालिका, स्त्री, (तलेन निर्वृत्ता। तल+ठक्। स्त्रियां टाप्।) चपेटः। तालमूली। इति शब्दरत्नावली ॥ ताम्रवल्ली। इति राजनिर्घण्टः ॥

तालितं, क्ली, (ताड्यते यदिति। तड़ ताड़ने+णिच्+क्तः। ड़स्य लत्वम्।) वाद्यभाण्डम्। तुलितपटः। गुणः। इत्यजयः ॥

तालिम्नः, पुं, (तलतीति। तल गतौ+"इम्नः कप्यपिवड़िभ्यस्तलेषु णित्।" १। ३३६। इत्युणादिकोषवटीकाधृतसूत्रात् इम्नः णित्वात् वृद्धिश्च।) पर्व्वतः। इत्युणादिकोषः ॥

तालो, स्त्री, (तालि+ङ्यादिकारादिति वा ङीष्।) ताड़ी। ताड़ियात् इति भाषा। तामलकी। इत्यमरः। २। ४। २२७॥ भूँइ आमला इति भाषा ॥ (अस्याः पर्य्याया यथा,—

"बहुपुष्पी जलाधारा तालो भूम्यामलक्यपि।
तामलक्यञ्जटा क्षुद्रफला चेत्तालमलक्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

तुवरिका। इति शब्दरत्नावली ॥ तालमूली। इति रत्नमाला ॥ प्रतितालो। कुक्षिकाविशेषः। इति हेमचन्द्रः ॥ ताम्रवल्ली। इति राजनिर्घण्टः ॥ सुरामेदः। इति स्मृतिः ॥ ताड़ी इति भाषा ॥ (करास्फालनम्। यथा, अमरुके। ५।

"यालीभिरालतनुतालो सलतं प्रियकपालीषु खेलति भयव्यालीनकुलासितचूलीभरा चरणधूलीलसन्मुनिवरा ॥")

तालीपत्रं, क्ली, (तालस्य पत्रमिव पत्रमस्य।) तालीशपत्रम्। इति राजनिर्घण्टः ॥

तालीशं, क्ली, (तालीव श्यति नाशयति रोगानिति। शो नाशे+डः।) तालीशपत्रम्। इति राजनिर्घण्टः ॥

तालीशपत्रं, क्ली, (तालीशं रोगनाशकं पत्रं यस्य।) वृक्षविशेषः। तत्पर्य्यायः। तालीशम् २ पत्राढ्यम् ३ शुकोदरम् ४ घाटीपत्रम् ५ चक्रवेधम् ६ करिपत्रम् ७ करिच्छदम् ८ नीलम् ९ नीलाम्बरम् १० तोयम् ११ तालीपत्रम् १२ तमाडयम् १३ तालीशपत्रकम् १४। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। मधुरत्वम्। कफवातकासहिक्काक्षयश्वासच्छर्द्दिदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ लघुत्वम्। अरुचिगुल्मामवह्निमान्द्यनाशित्वञ्च। इति भावप्रकाशः ॥ भूम्यामलकी। इति मेदिनी। रे, ३०३ ॥

तालु, क्ली, (तरत्यनेन वर्णा इति। तॄ+"तॄशॄभ्यां लः।" उणा। १। ५। इति चुण् रस्य लश्च।) जिह्वेन्द्रियाधिष्ठानम्। यथा, श्रीभागवते।

"सुखतस्तालु निर्भिन्नं जिह्वया तन्निपात्यते।
ततो नानारसो जन्तुर्जिह्वया योऽधिगम्यते ॥"

तेलुया इति टाकरा इति च भाषा ॥ तत्पर्य्यायः। काकुदम् २। इत्यमरः। २। ६। ८१ ॥ तालुकम् ३। इति राजनिर्घण्टः ॥

तालुजिह्वः, पुं, (तालु एव जिह्वा यस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१५ ॥

तालूरः, पुं, (तालयतीति। तल+णिच्+बाहुलकात् ऊरः।) आवर्त्तः। इति हेमचन्द्रः। ४। १४२ ॥

तावकीनं, त्रि, तव इदम्। (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च।" ४। ३। १। इति खञ्। ततः "तवकममकावेकवचने।" ४। ३। ३। इति तवकादेशः।) त्वदीयम्। इति व्याकरणम् ॥ तोमार एइ इति भाषा ॥

तावत्, व्य, (तत् परिमाणमस्य। तद्विता इति बहुवचनेनान्येभ्योऽपि दृश्यन्ते इति डावतुप्रत्ययः।) साकल्यम्। अवधिः। मानम्। (यथा, कुमारे। ५। ६७।

"स्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ॥"

"तावत् इति मानार्थे यावन्मात्रं विचारयोग्यं तावन्मात्रमित्यर्थः ॥" इति तट्टीकायां मल्लिनाथः ॥) अवधारणम्। इत्यमरः। ३। ३। २४५॥ (यथा, माघे। २। ६३।

"इन्द्रप्रस्थगमस्तावत् कारि मा यन्तु चेदयः ॥")

प्रशंसा। पश्चात्तरम्। इति शब्दरत्नावली ॥ (तत्परिमाणमस्येति। "यत्तदेतेभ्यः परिमाणे वतुप्।" ५। २। ३६। इति वतुप् प्रत्ययेन ततुपरिमाणे, त्रि। यथा, भागवते। ३। २६। १२।

"महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः।
तन्मात्राण्यपि च तावन्ति गन्धादीनि मतानि मे ॥")

तावरं, क्ली, धनुर्गुणः। इति भूरिप्रयोगः ॥

तावियः, पुं, (तवयते गम्यते सतृकाभिरिच। तव सौत्रो धातुः+"तवेर्यिड्डा।" उणा। १। ४६। इति टिषच् स च णित्।) स्वर्गः। सप्तः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तावियी, स्त्री, (तवति सौन्दर्य्यं गच्छतीति। तव+टिषच् सच णित्। टित्त्वात् ङीष्।) देवकन्या। नदी। पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तावीषः, पुं, (तावियः+पृषोदरादित्वात् दीर्घः।) स्वर्गः। अम्बुधिः। काशम्। इति मेदिनी। षे, ३० ॥

तावीषी, स्त्री, (तावियी + पृषोदरादित्वात् दीर्घः।) चन्द्रकन्या। इति मेदिनी। ते, ३८॥ (इन्द्रकन्या। इति कुत्रचित्॥)

ताइरिः, पुं, दवराग्निः। इति दीपिका॥

तिक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अतितेकत्। ङ, तेकते। इति दुर्गादासः॥

तिक, ग आस्कन्दे। वधे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) ग, तिक्नोति। इति दुर्गादासः॥

तिक्तं, क्ली, (तेजयतीति। तिज + बाहुलकात् क्तः।) पर्पटिकौषधिः। इति हेमचन्द्रः॥

तिक्तः, पुं, (तेजयतीति। तिज + सामान्याप्येच्छापकात् चुरादीनां णिजभावे गत्यर्थाकर्म्मकेति क्तः।) रसविशेषः। तित इति भाषा॥ (यथा, सुश्रुते। १। ४२।
"यो गले चोषसुतृष्णादयति सुखवैशद्यं जनयति भक्तरुचिञ्चापादयति हर्षञ्च स तिक्तः॥") स वायाकाग्नगुण्यबाहुल्यात् भवति। इति शिवदासः॥ तस्य गुणाः। जन्तुकृमिज्वरार्शिकासदाहनाग्नित्वम्। रोचनत्वम्। इति राजनिर्घण्टः॥ शीतत्वम्। त्वाग्दर्शपित्तकफविषोत्क्लेशरक्तगदनाग्नित्वम्। स्वयमरोचिष्णुत्वम्। कण्ठस्रंस्यास्यशोधनत्वम्। वातलत्वम्। अग्निकारित्वम्। नासाशोषणत्वम्। रूक्षत्वम्। लघुत्वञ्च। अतियुक्तस्य तस्य गुणाः। शिरःशूलमन्यास्तम्भभ्रमार्शिकम्पनूर्च्छाटव्याकारित्वम्। बलशुक्रक्षयप्रदत्वञ्च। इति भावप्रकाशः॥ *॥
("तिक्ताख्यो वत वातलोऽपि हि वृणां कुष्ठादि दोषापहः
सोऽम्लः सर्व्वरुजापहो भ्रमहरो रुच्योऽपि संदीपनः।
जिह्वास्फोटकनाशनोऽथ भवति श्रीखण्डतानां हितो
यत्नोत्पन्नकरान्तिहरः प्रकटगुणश्चैतत् निम्बादिकानां रसः॥"
इति हारीते प्रथमे स्थाने षष्ठेऽध्याये॥) सुगन्धः। इति मेदिनी। ते, २१॥ (सुरभिः। यथा, माघे। ५। ३३।
"नादातुमन्धकरिसूक्तमदाम्बुतिक्तं धूलाङ्कुशेन न विहातुमपीच्छताभः॥"
तिक्तरसिक्तरसोऽस्यास्तीति। अर्शं आदित्वात् अच्।) कुटजवृक्षः। इति शब्दचन्द्रिका॥ वरुणवृक्षः। इति शब्दमाला॥ तिक्तरसयुक्ते, त्रि। इत्यमरः। १। ५। ६॥

तिक्तकः, पुं, (तिक्तेन तिक्तरसेन कायतीति। के + कः।) पटोलः। इत्यमरः। २। ४। १५५॥ चिरतिक्तः। इति शब्दरत्नावली॥ चिरता इति भाषा॥ (यथा, वाभटे चिकित्सितस्थाने। ३।
"पित्तकासे तनुकफे त्रिफृतां मधुरैर्युताम्।
युञ्जात् विरेकाय युतौ घनश्लेष्मणि तिक्तकैः॥") सप्तपर्णवृक्षः। इति शब्दमाला। इक्षुदीक्षवः।

इति भावप्रकाशः॥ (तिक्तप्रधाने, त्रि। यथा, सुश्रुते। ४। २४।
"निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा॥") द्रव्याणां गणः। यथा चक्रपाणिसंग्रहे ज्वराधिकारे।
"क्वथ्यते सलिलद्रोणे द्रव्याद्धातकपञ्चरे।
मठोत्थे पैत्तिके वापि शीतलं तिक्तकैः हृतम्॥"
"सुरसपर्पटकोशीरचन्दनोदीच्यनागरैः।
हृतशीतं जलं दद्यात् पिपासाज्वरशान्तये॥"
"तिक्तकैः हृतमिति यदुक्तं तदाह सुरसेत्यादि।" इति तट्टीका॥)

तिक्तकन्दिका, स्त्री, (तिक्तरसप्रधानः कन्दो मूलं सोऽस्यस्या इति। तिक्तकन्द + ठन्।) गन्धपत्रा। इति राजनिर्घण्टः॥

तिक्तका, स्त्री, (तिक्तेन रसेन कायतीति। के + कः।) कटुतुम्बी। इति शब्दरत्नावली॥ (कटुतुम्बीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तगन्धिका, स्त्री, (तिक्तो गन्धो यस्याः। कप् ततष्टाप् अत इत्वञ्च।) वराहक्रान्ता। इति शब्दमाला॥

तिक्तगुञ्जा, स्त्री, (गुञ्जेव तिक्ता। राजदन्तादित्वात् प्राङ्निपातः।) करञ्जः। तत्पर्य्यायः। क्षुद्रञ्जा २ रसञ्जा ३ विह्वलकण्टी ४। इति हारावली। १०१॥

तिक्ततण्डुला, स्त्री, (तिक्तस्तण्डुलोऽन्तःसत्त्वं यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—
"पिप्पली चपला रौद्री वैदेही मागधी कणा।
तण्डुलीयकुला मगधी कोला स्यात्तिक्ततण्डुला॥"
इति वैद्यकरत्नमालायाम्॥)

तिक्ततुम्बी, स्त्री, (तिक्ततुम्बी। पृषोदरादित्वात् साधुः।) कटुतुम्बीलता। इति राजनिर्घण्टः॥

तिक्ततुम्बी, स्त्री, (तिक्ता तुम्बी।) कटुतुम्बी। इति रत्नमाला॥

तिक्तदुग्धा, स्त्री, (तिक्तं दुग्धं क्षीरं यस्याः।) क्षीरिणी। अजशृङ्गी। इति राजनिर्घण्टः॥

तिक्तधातुः, पुं, (तिक्तस्तिक्तरसप्रधानो धातुः।) पित्तम्। इति राजनिर्घण्टः॥

तिक्तपत्रः, पुं, (तिक्तानि पत्राणि यस्य।) कर्कोटकः। इति हेमचन्द्रः। ४। २५६॥ काकरोल इति भाषा॥

तिक्तपर्व्वा, [न्] पुं, (तिक्तं पर्व्व ग्रन्थिर्यस्य।) दूर्व्वा। इति जटाधरः॥ स्त्री, छिन्नरुहा। गुडूची। यष्टिमधु। इति मेदिनी। ने, २३७॥

तिक्तपुष्पा, स्त्री, (तिक्तानि पुष्पाणि यस्याः।) पाठा। इति राजनिर्घण्टः॥ (पाठाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तफलः, पुं, (तिक्तानि फलानि यस्य।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तफला, स्त्री, (तिक्तानि फलानि यस्याः।) यवतिक्तालता। वार्त्ताकी। षड्गुणा। इति राजनिर्घण्टः॥

तिक्तभद्रकः, पुं, (तिक्तश्चासौ तिक्तरसप्रधानो भद्रो हितकारी चेति कर्म्मधारयः। ततः स्वार्थे कन्।) पटोलः। इति शब्दचन्द्रिका॥

तिक्तमरिचः, पुं, (तिक्तो मरिच इव।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तरोहिणिका, स्त्री, (तिक्तरोहिणी + स्वार्थे कन् टाप् पूर्व्वहस्वश्च।) कटुका। इति रत्नमाला॥

तिक्तरोहिणी, स्त्री, (तिक्ता सती रोहतीति। रुह + णिजिः + ङीप्।) कटुका। इति राजनिर्घण्टः॥ (कटुरोहिणीशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तिक्तवल्ली, स्त्री, (तिक्ता वल्ली।) गर्व्वालता। इति रत्नमाला॥

तिक्तवीणा, स्त्री, (तिक्तं वीजमस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्तशाकः, पुं, (तिक्तः शाको यस्य।) खदिरवृक्षः। वरुणवृक्षः। (अस्य पर्य्याया यथा,—
"वरुणस्तिक्तशाकश्च सेतुवृक्षोऽश्मसंभवः॥"
इति वैद्यकरत्नमालायाम्॥)
पद्मसुन्दरवृक्षः। इति मेदिनी। के, १६१॥

तिक्तसारं, क्ली, (तिक्तः सारो निर्य्यासो यस्य।) दीर्घरोहिषकवृक्षः। इति राजनिर्घण्टः॥

तिक्तसारः, पुं, (तिक्तः सारो निर्य्यासोऽस्य।) खदिरवृक्षः। इति रत्नमाला॥ (खादिरशब्देऽस्य गुणादयो ज्ञेयाः॥)

तिक्ता, स्त्री, (तिक्तस्तिक्तरसोऽस्यस्याः। अर्श् ततष्टाप्।) कटुरोहिणी। इति मेदिनी। ते, २२॥ (यथास्याः पर्य्यायाः।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पाठा। इति रत्नमाला। यवतिक्तालता। षड्गुणा। इति राजनिर्घण्टः॥ छिन्नरुहा। इति भावप्रकाशः॥

तिक्ताख्या, स्त्री, (तिक्तः आख्या अभिधानं यस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्ताङ्गा, स्त्री, (तिक्तं अङ्गं यस्याः।) पातालगरुडीलता। इति राजनिर्घण्टः॥

तिक्तिका, स्त्री, (तिक्ता + स्वार्थे कन्। टाप् अत इत्वम्।) कटुतुम्बी। इति शब्दरत्नावली॥

तिग, न हिंसायाम्। आस्कन्दे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, तिग्नोति। आस्कन्दः केचिन्न मन्यते। इति दुर्गादासः॥

तिग्मं, क्ली, (तेजयति उत्तेजयतीति। तिज + "युजिरुजितिजां कुच।" उणां। १। १४५। इति मक् कवर्गस्यान्तादेशः।) तीक्ष्णम्। खरम्। तद्वति, त्रि। इत्यमरः। १। ४। ३५॥ (यथा, महाभारते। १। २०। ११।
"तिग्मवीर्य्यविषा ह्येते दन्दशूका महाबलाः॥")
वज्रम्। इति निघण्टुः। २। २०॥ पुं, क्षत्रियविशेषः। यथा, विष्णुपुराणे। ४। २१। १।

"ततो नदुक्षसात् तिग्मस्तिग्मात् दृहद्रथः ॥" मतस्यपुराणमते तु अयं उर्व्वस्य सुतः। यथा, तत्रैव। ५०। ८४।

"उर्व्वो भाव्यो सुतस्तस्य तिग्मात्मा तस्य चात्मजः। तिग्मात् दृहद्रथो भाव्यो वसुदामा दृहद्रथात्॥" अयं तिमिरित्याख्ययापि प्रसिद्धः। इति राजावली ॥ अस्य राज्यपालनकालादिकं तिमिशब्दे द्रष्टव्यम् ॥)

तिग्मांशुः, पुं, (तिग्मास्तीक्ष्णा अंशवः किरणानि यस्य।) सूर्य्यः। इति हलायुधः ॥ (यथा, महाभारते। १। २। १३६।

"धौम्योपदेशात् तिग्मांशुप्रसादादप्रसम्भवः॥" अग्निः। यथा, महाभारते। १। २३३। १८।

"इदं वै सद्म तिग्मांशो वरुणस्य परायणम्॥" तीक्ष्णकिरणे, त्रि॥)

तिघ, न घातने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, तिघ्नोति। तिघ घाते इति जौमराः पठन्ति। तेन तदर्थकल्पनमेवोचितम्। ततश्च घातनमिति हन्त्यर्थस्य प्राचिकपुरादिना हन्तेः स्वार्थे णौ रूपम्। हनन मित्यर्थः। किञ्च। हिंसनपाठेनैवेरसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्नेक्षणवद्विकल्पं चक्षाकामेव कातन्त्रात्सम्मतत्वात्। इति दुर्गादासः॥

तिज, क शिते। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, तेजयति। शितं तीक्ष्णीकरणम्। इति दुर्गादासः॥

तिज, ङ क्षान्तौ। निशाने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं सेट्।) क्षान्तिः सहनम्। ङ, तितिक्षते दुःखं दीनः। तेजते। तत्र तिवादयो न प्रयुज्यन्ते। इति रमानाथः। इति दुर्गादासः॥

तिजिलः, पुं, (तेजयति तीक्ष्णीकरोति। यद्वा, तिज्यते सह्यते सर्व्वैरिति। तिज+"गुपादिभ्यः कित्।" उणा। १। ५७। इति इलच् स च कित्।) चन्द्रः। इत्युणादिकोषः॥ राक्षसः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तिट्टी, स्त्री, चिट्टत्। इति शब्दचन्द्रिका॥ (चिट्टत् शब्दे गुणादिरस्या ज्ञातव्यः॥)

ततउः, पुं, (तत्यन्ते भृष्टसवा अनेति। तन विस्तारे+"तनोतेर्डउः सन्वच्च।" उणा। ५। ५२। इति डउः सन्वच्च तेन अभ्यासस्येत्वादिकार्य्यम्।) पाचनी। इत्यमरः। २। ६। २६॥ हेमचन्द्रश्च। ४। ८४॥ (यथा, ऋग्वेदे। १०। ७१। २।

"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत॥"

यथाच,—

"शूर्पवद्दोषसूतृक्ष्य गुणं गृह्णन्ति साधवः। दोषग्राही गुडत्यागी यथाधुस्तितउर्यथा॥" इत्युणादिः॥

"शूर्पच्छिन्नसमोपेतं चालनं तितउ स्मृतम्॥" इत्युक्तेरस्य स्त्रीत्वमपि॥ क्लीबत्वमपि॥ क्लीबम्। इति उज्ज्वलदत्तः। ५। ५२॥)

तितिक्षा, स्त्री, (तिज+स्वार्थे सन्+"अ प्रत्ययात्।" ३। ३। १०२। इति अ ततष्टाप्।) क्षान्तिः। इत्यमरः। १। ७। २४॥ (परापराधसहनम्। यथा, भागवते। ११। १६। २६।

"शमो दमस्तपः सार्य्यं तितिक्षोपरतिः श्रुतम्॥") शीतोष्णादिद्वन्द्वसहिष्णुता। इति वेदान्तसारः॥ (यथा, भागवते। ४। २२। २४।

"यमैरकामैर्नियमैश्चाप्यनिन्द्या गिरीहया द्वन्द्वतितिक्षया च॥")

तितिक्षितः, त्रि, (तितिक्षा सञ्जातास्य। "तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षान्तः। इति जटाधरः॥

तितिक्षुः, त्रि, (तितिक्षते इति। तिज क्षमायाम्+"गुप्तिज्किद्भ्यः सन्।" ३। १। ५। इति सन्। ततः तितिक्ष+"सनाशंसभिक्ष उः।" ३। २। १६८। इत्युः।) क्षमाशीलः। क्षान्तः। इत्यमरः। ३। १। ३१॥ (यथा, महाभारते। १। ८७। ६।

"अक्रोधनः क्रोधनेभ्यो विशिष्टः क्षया तितिक्षुरतितिक्षोर्विशिष्टः॥"

पुरुवंशीयस्य महामनसः पुत्रविशेषः। यथा, हरिवंशे। ३१। २१।

"महामनास्तु पुत्रौ द्वौ जनयामास भारत!। उशीनरञ्च धर्म्मज्ञं तितिक्षुञ्च महाबलम्॥")

तितिभः, पुं, (तितीति शब्देन भयतीति। भय+डः।) इन्द्रगोपकीटः। इति हेमचन्द्रः। ४। २०५॥

तितिलं, क्ली, (तिलति स्निह्यतीति। तिल+बाहुलकात् कः द्वित्वञ्च।) नन्दकम्। नादा इति भाषा। तैतिलकरञ्च। तिलपिष्टम्। इत्यमरः॥

तित्तिरः, पुं, (तित्ति इति शब्दं राति ददातीति। रा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) तित्तिरिपक्षी। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ६। ३८।

"निलक्षेषु तलक्षेषु निष्क्रामन्ति शिरःस्वथ। कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सङ्घशः॥"

अस्य गुणाः। यथा,—

"तथैव तित्तिरो वृष्यो मेधाग्निबलवर्द्धनः। सर्व्वदोषहरो बल्यो लावकैः समतागुणैः॥ क्षयाग्नौरवभेदाश्च श्रेष्ठो गौरश्च तित्तिरः। तृतीयस्तित्तिरोऽन्योऽपि सामान्यगुणलक्षणैः। सवातश्लेष्मविबलक्षद्वमनः किञ्चिदम्लसारकः॥"

इति हारीते प्रथमे स्थाने ११ अध्याये॥

जनपदविशेषः। तद्देशजाते बहुवचनान्तः। यथा, महाभारते। ६। ४०। ५०।

"वाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत॥")

तित्तिरिः, पुं, (तरतीति। तॄ+"तरतेः सन्वत्तुक् चाभ्यासस्य।" उणा। ४। १४६। इत्यत्र उज्ज्वलदत्तधृतसूत्रात् इः सन्वत्कार्य्यमभ्यासस्य। तुगागमश्च।) पक्षिविशेषः। तित्तिरि इति भाषा। तत्पर्य्यायः। तित्तिरः २। इति शब्दरत्नावली॥ तितिरिः३ तैतिरः४ याजुषोदरः५। अस्य मांसस्य गुणाः। रुच्यत्वम्। लघुत्वम्। वीर्य्यबलप्रदत्वम्। कषायत्वम्। मधुरत्वम्। शीतत्वम्। त्रिदोषघ्नत्वञ्च। इति राजनिर्घण्टः॥

"तित्तिरिः क्षयवर्णः स्यात् स तु गौरः कपिञ्जलः। तित्तिरिर्व्वर्णदो ग्राही त्रिदोषघ्नोऽपहः। श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणः॥"

इति भावप्रकाशः॥

मुनिविशेषः। इति विश्वः॥ (यथा, महाभारते। २। ४। १२।

"तित्तिरिर्याज्ञवल्क्यश्च सप्तलो लोमहर्षणः॥") तैत्तिरीशाखा। इत्युणादिकोषः॥ (नागविशेषः। यथा, महाभारते। १। ३५। १५।

"कुसुदः कुसुदाक्षश्च तित्तिरिर्हरिकेशकस्तथा॥" तथा च स्कान्दे सह्याद्रिखण्डे। ४। ५।

"तित्तिरिर्हरिभद्रश्च जमुरुद्रो बलाहकः॥")

तिथः, पुं, (तेजयतीति। तिज+"तिथपृष्ठगूथयूथप्रोथाः।" उणा। २। १२। इति थक्प्रत्ययेन निपातनात् साधुः।) अग्निः। कामः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ कालः। इति चिकाण्डशेषः॥ प्रावृट्कालः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तिथिः, स्त्री पुं, (तनोति विस्तारयति चन्द्रकलामिति। तन्यते चन्द्रकलयेति वा। तन+बाहुलकात् इथिन् नादिलोपश्च। तदुक्तं "तन्यन्ते कलया यस्मात् तस्मात् तास्तिथयः स्मृताः।" इति। यद्वा, अततीति। अत सातत्यगमने+"ऋतन्यञ्जीति।" उणा। ४। २। इथिन् प्रत्ययेन अतिथिरिति सिद्धे बाहुलकात् अलोपः। इति वर्णविवेकः।) चन्द्रकलाक्रियारूपा। चन्द्रकलाक्रियोपलक्षितः कालः इति वा। तस्याः स्वरूपं यथा,—

"अमादिपौर्णमास्यन्ता या एव ग्रथिताः कलाः। तिथयस्ताः समाख्याताः षोड़शैव वरानने!॥ तत्र प्रथमकलाक्रियारूपा प्रतिपत् एवं द्वितीयादिकलाक्रियारूपा द्वितीयादिः। सा च दृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृष्णा॥ यथा,

"तत्र पक्षावुभौ मासे शुक्लकृष्णाक्रमेण हि। चन्द्रदृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥ पञ्चम्यादास्तु तिथयः क्रमात् पञ्चदश स्मृताः। दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके॥ गोभिर्लोकाभावास्याघटकोपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकावच्छेदेन सहावस्थानयुक्तार्कमण्डलाच्चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लायाः प्रतिपदादितत्तत्तिथेरुत्पत्तिः। एवं गोभिर्लोकपौर्णमासीघटकसमसूत्रपातन्यायावस्थानरूपपरमनियोगानन्तरमर्कमण्डलप्रवेशाय चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकप्रवेशरूपसन्निकर्षश्च कृष्णायास्तत्तत्तिथेरुत्पत्तिरिति।

यथा,—
अर्कांद्विनिःसृतः प्राचीं यदृयात्यहरहः शशी।
भागैर्द्वादशभिस्तत् स्यात्तिथिश्चान्द्रमसं दिनम्॥
चिह्नाग्रकस्तथा रामेभाग इत्यभिधीयते।
आदित्याद्विप्रकृष्टस्तु भागं द्वादशकं यदा॥
चन्द्रमाः स्यात्तदा राम तिथिरित्यभिधीयते॥*॥
सा देवकृत्ये पूर्व्वाह्णयुता ग्राह्या। एकादश्युपवासातिरिक्तस्थले सर्व्वत्र त्रिसन्ध्यव्यापिनी ग्राह्या॥*॥

अथ प्रतिपत्।

सा च कृष्णा द्वितीयायुता ग्राह्या शुक्ला अमावस्यायुता ग्राह्या कृष्णाप्युपवासे द्वितीयायुता न ग्राह्या। अत्र तैलाभ्यङ्गं कृष्णाऽभक्षणं क्षौरञ्च न कार्य्यम्॥*॥

अथ द्वितीया।

सा च कृष्णा पूर्व्वयुता शुक्ला परयुता ग्राह्या। भ्रातृद्वितीया तु अष्टधाविभक्तदिनपञ्चमांशयुता ग्राह्या उभयदिने तल्लाभे परयुता ग्राह्या। तत्र दृहतीभक्षणं न कार्य्यम्॥*॥

अथ तृतीया।

सा च रम्भाव्रतेतरदेवकार्य्येषु चतुर्थीयुता ग्राह्या रम्भाव्रते तु द्वितीयायुता। तत्र मांसभक्षणं पटोलभक्षणञ्च न कार्य्यम्॥*॥

अथ चतुर्थी।

सा च पञ्चमीयुता ग्राह्या। विनायकव्रते तृतीयायुता ग्राह्या। मङ्गलवारे शुक्ला चतुर्थी अक्षया। अत्र मूलकभक्षणं क्षौरं प्रदोषे अध्ययनञ्च न कार्य्यम्। भाद्रमासे चतुर्थ्यां चन्द्रो न द्रष्टव्यः। प्रमादाद्दृष्टः,—
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्॥*॥

अथ पञ्चमी।

सा च चतुर्थीयुता ग्राह्या अत्र विल्वं न भोक्तव्यम्॥*॥

अथ षष्ठी।

सा सप्तमीयुता ग्राह्या। स्कन्दषष्ठी तु पञ्चमीयुता ग्राह्या अस्यां शिरोऽभ्यङ्गो निम्बभक्षणञ्च न कर्त्तव्यम्॥*॥

अथ सप्तमी।

सा षष्ठीयुता ग्राह्या तत्र तालं न भक्षयेत्। शुक्लपक्षस्य सप्तम्यां यदि रविवारो भवेत् सा विजया सप्तमी। माघमासस्य शुक्लसप्तम्यां दिवाकरो रथमापूः तस्मात् सा रथसप्तमी॥ सा मन्वादिश्च। तस्यां अध्ययनं न कर्त्तव्यम्॥*॥

अथाष्टमी।

सा शुक्ला नवमीयुता ग्राह्या कृष्णा सप्तमीयुता। तत्राध्ययनं नारिकेलभक्षणञ्च न कर्त्तव्यम्॥ शनिवारे अथवा मङ्गलवारे कृष्णाष्टमी पुण्यतरा। दृहस्पतिवारे शुक्लाष्टमी अक्षया। दूर्व्वाष्टमी पूर्व्वविद्धा ग्राह्या। जन्माष्टमीव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ नवमी।

सा चाष्टमीयुता ग्राह्या। तत्रालाबुभक्षणं न कर्त्तव्यम्। माघस्य शुक्ला नवमी महानन्दा। रामनवमीव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ दशमी।

सा च शुक्ला एकादश्या कृष्णा तु नवम्या युता ग्राह्या। अत्र कलम्बीभक्षणं न कर्त्तव्यम्॥*॥ एकादशीव्रतस्था श्रीविष्णोः शयनव्रतस्था च तत्तच्छब्दे द्रष्टव्या॥*॥ अथ द्वादशी।

सा च एकादशीयुता ग्राह्या। अत्र पूतिकाभक्षणं न कर्त्तव्यम्। फाल्गुनस्य शुक्ला द्वादशी पुष्यनक्षत्रयुक्ता चेत् गोविन्दद्वादशी॥*॥

अथ त्रयोदशी।

सा च शुक्ला द्वादशीयुता कृष्णा परयुता ग्राह्या। अत्र वार्त्ताकीभक्षणं न कर्त्तव्यम्॥*॥

अथ चतुर्दशी।

सा शुक्ला पूर्णिमायुता कृष्णा त्रयोदशीयुता ग्राह्या। तत्र माषो न भोक्तव्यः। ज्येष्ठकृष्णचतुर्दश्यां प्रदोषे सावित्रीव्रतं कर्त्तव्यम्। तत्र यदा त्रयोदशी दिवाभागे दण्डद्वयमात्रस्पर्शेऽपि चतुर्दशी भवेत् तर्हि व्रतं कर्त्तव्यम्। पूर्व्वाह्णे तद्विद्धत्वेऽपि पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव। यदा तु पूर्व्वापरयोर्न तथाविधा तदापि पराह्ण एव। भाद्रे मासि कृष्णा चतुर्दशी अघोरा। माघे कृष्णा चतुर्दशी रटन्ती। शिवरात्रिव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ पौर्णमासी।

तत्र मांसं न भोक्तव्यम्। सा च चतुर्दशीयुता ग्राह्या। सा तु मासर्क्षयुता चेत् तदा महती। कार्त्तिकमासे कृत्तिकानक्षत्रयुता पौर्णमासी महाकार्त्तिकी एवमन्यत्रापि। महाज्येष्ठीव्रतस्था तच्छब्दे द्रष्टव्या। कोजागरव्रतस्था तच्छब्दे द्रष्टव्या॥*॥ अथामावस्या।

अत्र मांसं न भोक्तव्यम्। सा प्रतिपद्युता ग्राह्या। मङ्गलवारे यदि अमावस्या भवेत् तदा अरुणोदयमारभ्य मौनी भूत्वा यो गङ्गायां स्नायात् स सहस्रगोदानजन्यफलमाप्नुयात्। अमावस्याश्राद्धव्रतस्था श्राद्धशब्दे द्रष्टव्या। पौषमाघयोरमावास्या यदि दिवारविवारव्यतीपात-श्रवणनक्षत्रयुक्ता भवति तदा अर्द्धोदययोगः स्यात्। अयं कोटिसूर्य्यग्रहतुल्यः अत्र तावज्जलं गङ्गोदकतुल्यं यतः किञ्चिद्दानं सेतुसन्निभञ्च भवति। इति तिथ्यादितत्त्वम्। तिथिकृत्यं मासशब्दे द्रष्टव्यम्॥

तिथिक्षयः, पुं, (तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयो यत्र।) अमावस्या। इति शब्दार्थकल्पतरुः॥ दिनक्षयः। चान्द्रसूर्य्यः। यथा,—
"एकस्मिन् सावने लब्धे तिथीनां चितयं यदा।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्॥"
अपिच।
"शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये॥"
इति तिथ्यादितत्त्वम्॥

तिथिप्रणीः, पुं, (तिथिं प्रणयति ह्रासवृद्धिरूपकलाक्रिययेति। प्र+नी+क्विप् णत्वञ्च।) चन्द्रः। इति हेमचन्द्रः। ३। १८॥

तिथी, स्त्री, (तिथिः। कृदिकारादिति वा ङीष्।) तिथिः। इति भरतः॥ (यथा, महाभारते। १३। ८७। १८।
"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्।
श्राद्धकर्म्मणि तिथ्यस्तु प्रशस्ता न तथेतराः॥")

तिनाग्रकः, पुं, (तिनिग्र एव। स्वार्थे कन्। पृषोदरादित्वात् आत्वम्।) तिनिग्रवृक्षः। इति शब्दरत्नावली॥

तिनिग्रः, पुं, (अतिशयेन नेग्रतीति। निग्र समाधौ+"इगुपधेति।" ३। १। १३५। इति कः। यद्वा, अतिक्रान्तो निग्राः अवयव इति समासः। पृषोदरादित्वात् साधुः।) वृक्षविशेषः। मथुरादौ तिनाग्र इति ख्यातः। कुचचित् सादन इति ख्यातश्च। तत्पर्य्यायः। स्यन्दनः २ नेमी ३ रथवृः ४ अतिमुक्तकः ५ वञ्जुलः ६ चित्रवृत् ७। इत्यमरः। २।४।२६॥ चक्री ८ शृताङ्गः ९ शकटः १० रथः ११ रथिकः १२ भक्तगर्भः १३ मेघी १४ जलधरः १५। (यथा, सुश्रुते चिकित्सितस्थाने। १६।
"शृङ्गकोदरीविल्वपलाशशृतिनिग्रत्वचः॥")
अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कफरक्तातीसारवातामयनाशित्वम्। शोषकत्वम्। दाहजनकत्वञ्च। इति राजनिर्घण्टः॥

तिन्तिड़ः, पुं, (तिन्यते क्लिद्यते सुखाद्यनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीकः। ततः पृषोदरादित्वात् साधुः।) दिक्षा। वृक्षाम्बः। इति विश्वः॥ देशभेदः। इति हेमचन्द्रः॥

तिन्तिड़िका, स्त्री, (तिन्तिड़ी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिड़ी, स्त्री, (तिन्यते क्लिद्यते सुखाभ्यन्तरमनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीका। ततः पृषोदरादित्वात् साधुः।) वृक्षविशेषः। तेँतुल इति भाषा॥ तत्पर्य्यायः। दिक्षा २ अम्लिका ३। इत्यमरः। २। ४। ४१॥ तिन्तिड़िकः ४ तिन्तिड़ीकम् ५ तिन्तिड़ीका ६ अम्लीका ७ आम्लिका ८ चाम्लीका ९। दीर्घतर्त्तीका॥ तिन्तिली १० तिन्तिड़िका ११ आन्दिका १२ शुक्रः १३ शुक्रा १४ शुक्रिका १५ अम्बा १६ लाम्बा १७ सक्ता १८ सक्तिका १९ चारिचा २० गुरुपत्रा २१ चिञ्चिणा २२ यमदूतिका २३। इति शब्दरत्नावली॥ शुक्रपुष्पिका २४ सुपुष्पिका २५ सुतिन्तिड़ा २६। अम्बा आमभक्षस्य गुणाः। अम्लत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ वातनाशित्वम्। अम्बा पक्वफलस्य गुणाः। रौक्षत्वम्। रुचिकारित्वम्। भेदित्वम्। उष्णत्वम्। क्रमवातनाशित्वञ्च। इति राजवल्लभः॥ विल्वनाशित्वम्। मधुरास्लत्वम्। पित्तदाहास-

कफदोषप्रकोपणत्वञ्च। पक्वतिन्तिडीफलरसगुणाः। मधुराम्लत्वम्। रुचिप्रदत्वम्। श्लेष्मपाककरत्वम्। लेपे व्रणदोषनाशित्वञ्च॥ अस्याः पक्वस्य गुणाः। श्लेष्मरक्तदोषवातनाशित्वम्। अस्याः शुष्कत्वक्षारस्य गुणः। मूलमन्दाग्निनाशित्वम्। इति राजनिर्घण्टः॥

"अम्लिकायाः फलं पक्वं महितं वारिणा दृढम्। शर्करामरिचोन्मिश्रं लवङ्गेन्द्रसुवासितम्॥ अम्लिकाफलसम्भूतं पानकं वातनाशनम्। पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्॥"

इति भावप्रकाशः॥

तृष्णाम्लम्। इति विश्वः॥

तिन्तिड़ीकं, क्ली, (तिम्यते क्लिद्यते सुखं येन। तिम + "फलेरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययेन निपातनात् साधुः।) तृष्णाम्लम्। इत्यमरः। २। ६। ३५॥ (यथा, तन्त्रसारे पुरश्चरणप्रकरणे।

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्। फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्॥"

यथास्य पर्य्यायाः।

"तृष्णाम्लन्तिन्तिड़ीकञ्च युक्तं स्यादम्लतृष्णकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

आमपक्वावस्थयोरस्य गुणा यथा,—

"वातापहं तिन्तिड़ीकमामं पित्तबलासकृत्। पाक्यन्तु दीपनं रुच्यं सम्यक् कफवातनुत्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

तिन्तिड़ीकः, पुं, (तिम + ईकन्। निपातनात् साधुः।) तिन्तिड़ी। इत्यमरटीकायां भरतः॥

तिन्तिड़ीद्यूतम्, क्ली, (तिन्तिड़ीभिस्तिन्तिड़ीजात बीजैर्यद्द्यूतम्।) चुचुरी। इति शब्दरत्नावली॥ काँइबीचिर खेला इति भाषा॥

तिन्तिलिका, स्त्री, (तिन्तिडिका। ड़स्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्तिली, स्त्री, (तिन्तिड़ी। ड़स्य लत्वम्।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिलीका, स्त्री, (तिन्तिड़ीका। ड़स्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्दिशः, पुं, टिट्टिभवृक्षः। इति राजनिर्घण्टः॥

तिन्दुः, पुं, (तिम्यति आर्द्रीभवतीति। तिम आर्द्रीभावे + "रुगयादयश्च।" इति कुप्रत्ययेन साधुः।) तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिन्दुकं, क्ली, (तिन्दुरिव कायतीति। कै + कः।) कर्षपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, शार्ङ्गधरे पूर्व्वखण्डे १ अध्याये।

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमालिका। अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्॥"

अस्याः पर्य्यायाः।

"विडालदैं मंञ्जणी कर्षे सुवर्णेऽक्षाभयेऽपि च। त्रिवृत्सपदकन्तच्च पिचुम्याणितलन्तथा॥

तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च॥"

इति कल्पस्थाने द्वादशोऽध्याये चरकेणोक्तम्॥)

तिन्दुकः, पुं, क्ली, (तिन्दु + स्वार्थे संज्ञायां वा कन्।) वृक्षविशेषः। गाव् इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ केन्दुकवृक्षः। इति भरतः॥ इति राजनिर्घण्टश्च। तेँदु इति भाषा॥ तत्पर्य्यायः। स्फूर्जकः २ कालस्कन्धः ३ श्रितिसारकः ४। इत्यमरः। २। ४। ३८॥ स्फूर्जकः ५ केन्दुः ६ तिन्दुः ७ तिन्दुलः ८ तिन्दुकिः ९ तिन्दुकी १०। इति शब्दरत्नावली॥ नीलसारः ११ अतिमुक्तकः १२ स्वर्ण्यकः १३ रामठः १४ स्फूर्जनः १५ स्कन्दनाक्षयः १६ कालसारः १७। (यथा, महाभारते। ३। ६४। ३।

"शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः। अर्ज्जुनारिष्टसंकृष्टं स्यन्दनेश्च सशाल्मलैः॥")

अस्य आमफलस्य गुणाः। कषायत्वम्। गुरुत्वम्। वातकारित्वम्। शीतलत्वम्। लघुत्वञ्च। पक्वफलस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। दुर्जरत्वम्। श्लेष्मदत्वम्। गुरुत्वम्। व्रणवातनाशित्वम्। पित्तप्रमेहास्रकारित्वम्। विषदत्वञ्च। इति राजनिर्घण्टः॥ पित्तप्रमेहास्रश्लेष्मनाशित्वम्। इति भावप्रकाशः॥ तत्सारं चिररोगजित्॥ विश्वतिन्दुकमप्येवं विशेषात् गुरु शीतलम्॥ इति राजनिर्घण्टः॥

तिन्दुकिः, स्त्री, (तिन्दुकी। निपातनात् ह्रस्वः।) तिन्दुकः। इति शब्दरत्नावली

तिन्दुकिनी, स्त्री, (तिन्दुकस्तदाकारः फलेऽस्यस्याः। तिन्दुक + इनि + ङीप्।) व्याघ्रनखी। इति राजनिर्घण्टः॥

तिन्दुकी, स्त्री, (तिन्दुक + गौरादित्वात् ङीष्।) तिन्दुकः। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये।

"पियालबीजं तिन्दुकास्तरुणानि फलानि च। यथालाभं समाहृत्य तैलमेभिर्विपाचयेत्। सद्यो व्रणेषु देयानि तानि वैद्येन जानता॥"

अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।

"कालस्कन्दस्तिन्दुकश्च स्फूर्ज्जकस्तिन्दुकीति च॥")

तिन्दुलः, पुं, तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिप, ऊ क्षरे ऊ चुरादि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, तेपिष्यते तेपायते। क्षर, अतितेपत्। ड, तेपते तितिपे। चुरादु चरणम्। इति दुर्गादासः॥

तिम, क्लेदने। आर्द्रीभाव इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।)

तिम, य क्लेदने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, तिम्यति। तितेम। क्लेदनमार्द्रीभावः। इति दुर्गादासः॥

तिमिः, पुं, (तिम्यतीति। तिम क्लेदने + इन्। यद्वा, ताम्यति आकाङ्क्षतीति। तम काङ्क्षायाम् + "क्रमितमिम्रतिसम्भामत इच।" उणा ४। १२१। इति इन् अकारस्य इकारादेश्च।) मत्स्यविशेषः। इत्यमरः। १। १०। १६॥ तिमिर्महाकायो मत्स्यः कश्चित् सामुद्रः। तथा च। अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः। इति भरतः॥ (यथा च रघौ। १३। १०।

"ससत्त्वमादाय नदीमुखाभ्रः संमीलयन्तो विततानलत्वात्। अमी शिरोभिस्तिमयः सरन्ध्रै-रूर्द्धं वितन्वन्ति जलप्रवाहान्॥")

समुद्रः। इति चिकाण्डशेषः॥ (राजविशेषः। स तु दूर्व्वस्य पुत्रः। यथा, भागवते। ६। २२। ४२।

"नृपञ्जयस्ततो दूर्व्वस्तिमिस्तस्माच्चनिष्यति॥"

अयं हि नवमासाधिकसप्तचत्वारिंशत्वर्षं यावत् राज्यं पालयामास। यथा, राजावल्याम्। १ परिच्छेदे।

"तिमिं पुत्रं ततो राज्ये न्यस्य स्वर्गं स्वयं गतः। मुनिवेदमितान् वर्षान्नवमासाधिकान् तिमिः॥ पालयित्वाखिलं राज्यं भुक्त्वा भोगमनुत्तमम्। पुत्रं बृहद्रथं राज्ये सोऽभिषिच्य वनं ययौ॥")

तिमिकोषः, पुं, (तिमेः कोष इव।) समुद्रः। इति चिकाण्डशेषः॥

तिमिङ्गिलः, पुं, (तिमिं गिरतीति। गॄ + कः। रस्य लः। गिलेऽगिलस्येति सुम्।) मत्स्यविशेषः। इत्यमरः। १। १०। २०॥ (यथा, महाभारते। १। २२। ३।

"तिमिङ्गिलसमाकीर्णं मकरैरावृतं तथा॥"

द्वीपविशेषः। तद्दीपजाते, त्रि। यथा, महाभारते। २। ३२। ६६।

"तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः॥")

तिमिङ्गिलगिलः, पुं, (तिमिङ्गिलमपि गिरतीति। गॄ + कः। सुम् च।) महामत्स्यविशेषः। इति हेमचन्द्रः। ४। ४१४॥

तिमितः, त्रि, (तिम + कर्त्तरि क्तः।) स्निग्धः। इति धरणिः॥ (यथा, पञ्चदश्यौ। २। ५५।

"अतस्तिमितगम्भीरं न तेजो न तमस्ततम्॥")

क्लिन्नः। इत्यमरः। ३। १। १०५॥

तिमिरं, क्ली, (तिम्यतीति। तिम + "इषिमदिसदीति।" उणा। १। ५२। इति किरच्।) अन्धकारः। इत्यमरः। १। १०। ३॥ (यथा, रामायणे। २। २८। १८।

"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः। भयानि च महान्त्यत्र अतो दुःखतरं वनम्॥")

नेत्ररोगविशेषः। तस्य लक्षणमाह माधवकरः।

"तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः। रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम्॥"

(अस्य लक्षणानि यथा,—

"दोषे मण्डलसंस्थाने मण्डलानीव पश्यति। द्वित्रैकं दृष्टिमध्यस्थे बहुधा बहुधास्थिते॥ दृष्टेरभ्यन्तरगते ह्रस्वदृग्विपर्य्ययम्। नात्यिकस्यमधःसंस्थे दूरगं नोपरिस्थितम्॥ पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः। प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते॥ तेनोर्द्ध्वमीक्षते नाधस्तमुचैलाङ्गतोपमम्।

यथा वर्णश्च रूढ्येत दृष्टिर्हीयेत च क्रमात् ॥
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ।
लिङ्गनाशं मलः कुर्वन् क्रादयेद्दृष्टिमण्डलम् ॥
तत्र वातेन तिमिरे चाविद्धमिव पश्यति ।
चलाविलारुणाभासं प्रसन्नश्चेक्षते मुहुः ॥
जालानि केशान् मशकान् रश्मीन्धोपेक्षिते
च च ।
काचीभूते दृगरुजा पश्यत्यास्यमनासिकम् ॥
चन्द्रदीपाद्यनेकत्वं वक्रत्वञ्चापि मन्यते ।
वृद्धः काचो दृशं कुर्याद्रजोधूमाहतामिव ॥
सधारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ।
श्लिङ्गनाशो घाते तु सङ्कोचयति दक्पिराः ॥
दृङ्मण्डलं विशत्यन्तर्गम्भीराद्गम्भीरतां स्मृता ।
पित्तेन तिमिरे विद्युत् खद्योतद्योतदीपितम् ॥
ग्रिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ।
काचे दक्काञ्चनीलाभा ताद्दगेव च पश्यति ॥
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ।
भङ्गनीला निरालोका दक्स्निग्धा लिङ्गनाशतः ॥
दृष्टिः पित्तेन दृक्साख्या सा दृक्षा दृक्षदर्शना ।
भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ॥
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ।
ग्रन्थेन्दुकुन्दकुसुमैः कुसुदैरिव चाचितम् ॥
काचे तु निष्पभेन्दर्कं प्रदीपाद्यैरिवाचितम् ।
सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते ॥
सूक्ष्मः कफो दृष्टिगतः स्निग्धो दर्शननाशनः ।
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ॥
उष्णे सङ्कोचमायाति छायायां परिसर्पति ।
ग्रन्थकुन्देन्दुकुसुदस्फटिकोपमशुक्लिमा ॥
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता क्षया वा दृष्टिस्ताद्दक् च पश्यति ॥
लिङ्गनाशेऽपि ताद्दक्तद्वनिष्प्रभा हतदर्शना ।
संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणान् ॥
तिमिरादीनकस्माच्च तैः स्याद्व्यक्ताकुलेक्षणम् ।
तिमिरे श्लेष्मयोर्दृष्टौ चित्रो रागः प्रजायते ॥"
इति वाभटोत्तरस्थाने द्वादशेऽध्याये उक्तम् ॥
अस्य चिकित्सा यथा,—
"तिमिरं काचतां याति काचोऽप्यन्ध-
मुपेक्षया ।
नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्दृढम् ॥
तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषिते ।
तत्कार्षे द्विगुणं क्षीरं घृतप्रस्थं विपाचयेत् ॥
प्रपौण्डरीककाकोली पिप्पली लोध्रसैन्धवैः ।
घृताक्षा मधुकद्राक्षा सितादारुफलत्वचैः ॥
कार्षिकैर्नैशि तत् पीतं तिमिरापहरं परम् ॥"
"पटोलनिम्बकटुका दार्व्वीसैन्धवराष्ट्रयम् ।
सधन्वयासत्रायन्ती पर्पटं पालिकं पृथक् ॥
प्रस्थमामलकानाञ्च क्वाथयेन्नस्खगेऽम्भसि ।
तदाढ्यैर्द्विपलिकैः पिष्टैः प्रस्थं घृतात् पचेत् ॥
सुस्तभूनिम्बषड्ग्रन्थकुटजोदीच्यचन्दनैः ।
सपिप्पलीकैस्तत्सर्पिर्नाशयत्यक्षिरोगजित् ॥
विद्रधिज्वरदुश्चर्मविसर्पापचिकुष्ठजुत् ।
विशेषाच्छुक्रतिमिरनक्तान्ध्योष्णाम्लदाहजुत् ॥"
"चिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुल्बतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्रयम् ॥
अन्यन्मधूक्षितं भ्रातं पक्वं विमलमञ्जनम् ।
तिमिरान्तकरं लोके द्वितीय इव भास्करः ॥
गोनृत्ते क्रुगलरसेऽम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तुल्यं श्वलितमनेकशो निषिक्तं
सत्कुर्य्यात् गरुड़समं नरस्य चक्षुः ॥"
"रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमधाञ्जनम् ।
ईषत् कर्पूरसंयुक्तमञ्जनं नयनाप्तम ॥"
" सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दध्नमूलाम्भसा घृतम् ॥
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ॥"
"पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ।
विपाचितं पाययित्वा स्निग्धस्य यवयेच्छिराम् ॥
श्लेष्मोद्भवेऽस्तकाथवरकाम्बुहृतं घृतम् ।
विध्येच्छिरां पीतवतो दद्याच्चानुविरेचनम् ॥"
"रक्तजे पित्तवत्सिद्धिः प्रीतैस्तस्यं प्रसादयेत् ।"
"दद्याद्दुग्धैरनिर्यूहचूर्णितं कणसैन्धवम् ॥
ततः घृतं सघृतं भूयः पचेत् क्षौद्रं घने पिबेत् ।
घृते चास्मिन् हितमिदं सर्व्वजे तिमिरेऽञ्जनम् ॥"
"चक्षूरक्षार्थमर्व्वाक्तं मनुष्यै-
र्यैलः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥"
इति चोत्तरस्थाने त्रयोदशेऽध्याये वाभटे-
नोक्तम् ॥
"सौवीरमञ्जनन्तुत्थन्ताप्यो धातुर्मनःशिला ।
चक्षुष्यं मधुकं लोहा मलयः पौष्पमञ्जनम् ॥
सैन्धवं शौकरीदंष्ट्रा कतकक्षाञ्जनं शुभम् ।
तिमिरादिषु चूर्णं वा वर्त्तिर्व्वेद्यमयुक्तमा ॥"
"वदने क्षणासर्पस्य निहितं मासमञ्जनम् ।
ततस्तस्मात् समुद्धृत्य सशुष्कं चूर्णयेद्बुधः ॥
सुमनःक्षारकैः शुष्कैरर्द्धांशैः सैन्धवेन च ।
एतन्नित्याञ्जनं कार्यं तिमिरघ्नमयुक्तमम् ॥"
इति चरके चिकित्सास्थाने २६ अध्याये ॥)

तिमिरः, पुं, (तिम्यति क्लिद्यति चक्षुरनेन । तिम + "इषिमदिसदीति ।"उणा ।१।५२। इति किरच् ।) चक्षूरोगविशेषः । तस्य निदानादि यथा । चतुर्थपटलगतदोषमाह ।
"तिमिराख्यः स यो दोषश्चतुर्थपटलं गतः ।
रूपाण्यत्र सर्व्वतो दृष्टिं लिङ्गनाशं इति क्वचित् ॥
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे ।
चन्द्रादित्यौ स नक्षत्राण्यभ्रमरीचे च विद्युतः ॥
निर्म्मलानि च तेजांसि भास्वराणि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥
यो दोषः दोषोऽथ रोगः चतुर्थपटलं वाऽऽ-
पटलं गतः स तिमिराख्यः । तिमिरदर्शनेन तिमिरमस्यास्तीति तिमिरः अर्श आदित्वात् । तस्य लक्षणमाह रूपाण्यत्रेत्यादि । स तिमिराख्यः । सर्व्वतः सर्व्वत्र च । लिङ्गनाश इति क्वचित् तन्त्रान्तरे लिङ्गनाशसंज्ञः । तस्य निरुक्तिश्च । लिङ्गयते चिह्नयते अनेनेति लिङ्गं दृष्टितेजः तस्य नाशोऽस्मिन् इति लिङ्गनाशः । अस्मिन्नपि तिमिरेऽपि तमोभूते तमस्तुल्ये । अत्र तु भूतशब्दस्तुल्यार्थः । भूतं प्राप्ततीते समे त्रिष्वित्यमरवचनात् । नातिरूढ़े अप्रौढ़े । चन्द्रादित्यौ नक्षत्राणि च पश्यति । अन्तरौत्ये अन्तरीक्षस्य प्रकाशमयत्वेन तमोऽभिभावात् । तेजांसि अभ्रादेः । भास्वराणि रत्नसुवर्णादीनि । अस्मिन् प्रौढ़े नीरजे च चन्द्रादित्यादीन्न पश्यतीत्यन्वयः । नीलिकाकाचसंज्ञितः नीलिकाकाचेति नामान्तराभ्यां युक्तः ॥ * ॥
दृष्टिरोगाणां सङ्ख्यानामानि चाह ।
दृष्ट्याश्रया षट् च षड़ेव रोगाः
षड्लिङ्गनाशा हि भवन्ति तत्र ।
वातेन पित्तेन कफेन सर्व्वै-
रक्तात् परिस्राव्य विधिञ्च षष्ठः ॥
दृष्ट्याश्रया षट् च षड़ेव रोगाः षट् षट् द्वादशेत्यर्थः । तत्र लिङ्गनाशाः षट् तान् विशेषेति वातेनेत्यादि ॥ * ॥
तथा नरः पित्तविदग्धदृष्टिः
कफेन चान्यश्च तथा धूमदर्शी ।
यो दृक्षनाशो नकुलान्धसंज्ञो
गम्भीरसंज्ञा च तथैव दृष्टिः ॥
पित्तविदग्धदृष्ट्यादयः षट् । एवं दृष्ट्यादयश्च षट् । एवं दृष्ट्याश्रया द्वादशरोगाः ॥ * ॥
तत्र द्वावन्यौ चाह ।
तत्रैवान्यौ गदौ वह्नौ सनिमित्तानिमित्तकौ ॥
तेषु वातजस्य लिङ्गनाशस्य लक्षणमाह ।
वातेन खलु रूपाणि भ्रमन्तीव च पश्यति ।
आविलान्यरुणाभानि आविद्धानीव मानवः ॥
आविलानि कलुषाणि । अरुणानि अव्यक्तलौहित्ययुक्तानि । आविद्धानीव कुटिलानीव ॥ *
पैत्तिकमाह ।
पित्तेनादित्यखद्योतशक्रचापतड़িদ্‌গুণান্
वृत्यतश्चैव स्निग्धिनः सर्व्वं नीलञ्च पश्यति ॥
आदित्यादीनां गुणान् रूपाणि ॥ * ॥
श्लैष्मिकमाह ।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।
सलिलप्लावितानीव जालकानीव मानवः ॥ *॥
सन्निपातजमाह ।
सन्निपातेन चित्राणि विपरीतानि पश्यति ।
बहुधापि द्विधा वापि सर्व्वाण्येव समश्नुतः ॥
हीनाधिका चान्यथा वा ज्योतींष्यपि च
पश्यति ॥
चित्राणि नानावर्णानि । विपरीतानि वैपरीत्यं विवृणोति बहुधेत्यादि ॥ * ॥
रक्तजमाह ।
पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ।
हरितान्यथ क्षाणानि पीतान्यपि च मानवः ॥ *॥
परिस्रावयितव्यमाह ।
रक्तेन मूर्च्छितं पित्तं परिस्रावयेन्नमाचरेत् ।
तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम् ॥

विकीर्यमाणान् खद्योतैर्वृश्चिकेजांसि चैव हि ॥
विकीर्यमाणान् व्याप्यमानान् अम्रादिभिरिव ॥
वातादिजनितैर्नैकवर्णैरपि स षड्विधः ।
लिङ्गनाशो निगदितो वर्णो वातादितो यथा ॥

रागारुणो मारुततः प्रदिष्टो
श्यावी च नीलश्च तथैव पित्तात् ।
कफात् सितः श्लेष्मिततः सरक्तः
समस्तदोषप्रभवो विचित्रः ॥ * ॥

वातादिना हेतुभूतेन जनिते नेत्रविषये मण्डले रूपविशेषमाह ।

अरुणं मण्डलं वाताच्चलं परुषं तथा ।
पित्ततो मण्डलं नीलं कांस्याभं वा सपीतकम् ॥
श्वेतं पीतं वा कथमेतत् व्याधिप्रभावात् ॥
श्लेष्मणा बहलं स्निग्धं शुक्लकुन्देन्दुपाण्डुरम् ।
चलत्पद्मपलाशस्थशुक्लो बिन्दुरिवाम्भसः ।
दृश्यमाने तु नयने मण्डलं तद्विसर्पति ॥

बहलं स्थूलम् ।

मण्डलं तु भवेच्चित्रं लिङ्गनाशे त्रिदोषजे ।
प्रवालपद्मपत्राभं मण्डलं श्लेष्मितात्मकम् ॥
चित्रं वातादिवर्णम् ।
रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम् ।
परिम्लायिनि रोगे स्यात् म्लानं नीलमथापि वा ॥
दोषचयात् स्वयं तच्च कदाचित् स्यात्तु दर्शनम् ॥
रक्तजं पित्तानुगामिरक्तजम् । स्थूलकाचारुण-
प्रभं स्थूलकाचस्येवारुणा प्रभा यस्य तत् । एतेन
स्थौल्यमरुणत्वञ्च बोध्यते । दोषचयादित्यादि ।
तच्च परिम्लायिनि कालान्तरेण दोषचयात्
कदाचित् स्वयमेव दर्शनं स्यात् ॥ * ॥ अनुक्त-
व्यधादाहगौरवादिदोषलिङ्ग-संग्रहणार्थमाह ।
यथास्वं दोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥*॥
पित्तविदग्धदृष्टेर्लक्षणमाह ।

पित्तेन दुष्टेन गतेन दृष्टिं
पीता भवेद्यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च तेन पश्येत्
सर्व्वो नरः पित्तविदग्धदृष्टिः ॥

पित्तेन गतेन दृष्टिं दृष्टावपि प्रथमद्वितीये पटले गतेनेति बोद्धव्यम् । तेन व्याधिना ॥ * ॥
तस्मिन्नेव पित्ते दृष्टौ तृतीयं पटलं गते रूप-
विशेषमाह ।

प्राप्ते तृतीयं पटलं तु दोषे
दिवा न पश्येन्निशि वीक्षते सः ।
रात्रौ स पीतानुगृहीतदृष्टिः
पित्तात्ययभावात् सकलानि पश्येत् ॥

दोषेऽत्र पित्ते ॥ * ॥ अथ श्लेष्मविदग्धदृष्टि-
लक्षणमाह ।

तथा नरः श्लेष्मविदग्धदृष्टि-
स्तान्येव शुक्लानि हि मन्यते तु ।

अत्रापि श्लेष्मणोदृष्टौ प्रथमद्वितीयपटलगतस्ये-
त्यत्रिङ्गं बोद्धव्यम् ॥ * ॥ स एव श्लेष्मा दृष्टौ
पटलत्रयं गतो मक्षान्धं करोतीत्याह ।

त्रिषु स्थितो यः पटलेषु दोषो
नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यानुगृहीतदृष्टिः
पश्येत्तु रूपाणि कफाल्पभावात् ॥

दोषोऽत्र कफस्तस्योपक्रान्तत्वात् । नक्तान्ध्यस्य
श्लेष्मविदग्धदृष्टावन्तर्भूतत्वाच्च पृथग्ग्रहणम् ॥*॥
धूमदर्शिनमाह ।

शोकज्वरायासशिरोऽभितापै-
रथाहता यस्य नरस्य दृष्टिः ।
धूम्रांस्तु यः पश्यति सर्व्वभावात्
स धूमदर्शीति नरः प्रदिष्टः ॥

शिरोऽभितापः शिरसि घर्म्मादिना सन्तापः ।
एतस्य पित्तदोषो बोद्धव्यः ॥ * ॥
दुःखजात्यमाह ।

यो वासरे पश्यति कष्टतोऽथ
रूपं महच्चापि निरीक्षतेऽल्पम् ।
रात्रौ पुनर्यः प्रकृतानि पश्येत्
स दुःखजात्यो मुनिभिः प्रदिष्टः ॥ * ॥

नकुलान्ध्यमाह ।

विद्योतते यस्य नरस्य दृष्टि-
र्दीर्घाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत्
स वै विकारो नकुलान्ध्यसंज्ञः ॥ * ॥

गम्भीरकमाह ।

दृष्टिर्विरूपा श्वसनोपदृष्टा
सङ्कुच्य याभ्यन्तरतः प्रयाति ।
रुजावगाढ़ा च तमश्चिरोगं
गम्भीरकेति प्रवदन्ति तज्ज्ञाः ॥

विरूपा विकृता । श्वसनोपदृष्टा वातोपहता ।
रुजावगाढ़ा गम्भीरवेदनान्विता ॥ * ॥

बाह्यौ पुनर्द्वावपि संप्रदिष्टौ
निमित्ततश्चाप्यनिमित्ततश्च ।
निमित्ततस्तस्य शिरोऽभितापात्
स्नेह्यस्राभिष्यन्दनिदर्शनैः सः ॥

बाह्यौ सुश्रुतोक्तद्वादशसंख्येभ्योऽधिकौ तत्र
निमित्तत आह शिरोऽभितापात् शिरोऽभि-
ताप्यते येन विषकुसुमगन्धवहपवनसर्शेन स
शिरोऽभितापस्तस्मात् । अभिष्यन्दनिदर्शनैः
रक्ताभिष्यन्दलिङ्गैरिति गदाधरः । सन्निपाता-
भिष्यन्दलिङ्गैरिति कार्त्तिकः ॥ * ॥
अनिमित्तत आह ।

सुरर्षिगन्धर्व्वमहोरगाणां
सन्दर्शनेनापि च भास्करस्य ।
हन्येत दृष्टिर्मनुजस्य तस्य
स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥

अनुपलभ्यमानानां सुरादीनां दर्शननिमित्त-
मप्यनिमित्तं मन्यते ॥ * ॥
अनिमित्ततो लिङ्गनाशस्य लक्षणमाह ।

तत्राक्षिविस्रंसमिवावभाति
वैदूर्य्यवर्णा विमला च दृष्टिः ।

विस्रंसं ज्योतिर्युक्तम् । वैदूर्य्यवर्णा श्यामा
विमला निर्म्मला । इति दृष्टिरोगाः ॥ * ॥
अथ तिमिरचिकित्सा ।

"शुक्ला पाण्डितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥*॥
गृध्रनाभिर्विभीतस्य पथ्यामज्जा मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥
छागीक्षीरेण संपिष्य वर्टीं कुर्य्यादृयवोन्मिताम् ।
हरेणुमात्रां संघृष्य जलेनाञ्जनमाचरेत् ॥
तिमिरं मांसदृष्टिञ्च काचं पटलमर्ब्बुदम् ।
रात्र्यन्धं वार्धिकं पुष्पं वटी चन्द्रोदया हरेत् ॥"

इति चन्द्रोदया वटी ॥ * ॥

कणा सलवणोषणा सहरसाञ्जना साञ्जना
सरित्पतिकफः सिता सितपुनर्नवा सम्भवा ।
रजन्यरुणचन्दनं मधु च तुल्यपथ्याशिला
अरिष्टदलसाधरस्फुटिकगृध्रनाभीन्दवः ॥
इमानि तु विचूर्णयेन्निविड़वाससा श्लोधये-
त्तथायसि विमर्द्दयेत् समधृतास्रखर्ज्जेन तत् ।
इदं मुनिभिरीरितं नयनश्लोधनामाञ्जनं
करोति तिमिरत्रयं पटलपुष्पनाशं बलात् ॥

लवणं सैन्धवम् । अञ्जनं सुरमा इति लोके ।
सरित्पतिकफः समुद्रफेनः । शिला मनःशिला ।
साधरो लोधः । स्फुटिकः फट्कारी । इन्दुः
कर्पूरः । नयनश्लोधं तिमिरे नूतनकुसुमे नूतन-
पटले च ॥ * ॥

हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च गृध्रनाभिर्मनःशिला ॥
सर्व्वमेतत् समं कृत्वा गव्यक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कृच्छ्रं पटलाख्यर्ब्बुदानि च ॥
अपि चैवार्षिकं शुक्लं मासेनैकेन नाशयेत् ।
अधिकानि च मांसानि रात्र्यन्धत्वमेव च ॥

चन्द्रोदया वटी पुष्पे तिमिरे च ॥ * ॥

रजनी निम्बपत्राणि पिप्पली मरिचानि च ।
विड़ङ्गं भद्रमुस्तञ्च सप्तमी त्वभया स्मृता ॥
अजाम्रक्षेण संपिष्य छायायां श्लोषयेद्वटीम् ।
वारिणा तिमिरं हन्ति गोम्रक्षेण तु पिष्टिकाम् ॥
मधुना पटलं हन्ति नारीक्षीरेण पुष्पकम् ।
एषा चन्द्रप्रभावर्त्तिः स्वयं रुद्रेण निर्म्मिता ॥

इति चन्द्रप्रभावर्त्तिः ॥ * ॥

कणा छागयकृन्मध्ये पक्वा तद्रसपेषिता ।
अचिराद्धन्ति नक्तान्ध्यं तद्वत् सक्षौद्रमूषणम् ॥
त्रिफलाया रसं प्रस्थं प्रस्थं भृङ्गरजस्य च ।
वृषस्य च रसं प्रस्थं घृतार्द्धार्द्धञ्च तत्समम् ॥
गुड़ूच्या आमलक्याश्च रसं छागीपयस्तथा ।
प्रस्थं प्रस्थं समाहृत्य सर्व्वैरेभिर्घृतं पचेत् ॥
कल्कः कणा सिता द्राक्षा त्रिफला नीलमुत्-
पलम् ।
मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका ॥
तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् ।
ऊर्द्धं पानमधःपानं मध्ये पानं प्रशस्यते ॥
यावन्तो नेत्रजा रोगास्तान् पानादपकर्षति ।
सुरक्तं रक्तदृष्टिं च रक्तं वा विस्रुते तथा ॥
नक्तान्ध्ये तिमिरे काचे नीलिका पटलार्ब्बुदे ।
अभिष्यन्दोऽधिमन्थे च यच्चकोपे सुदारुणे ॥
नेत्ररोगेषु सर्व्वेषु दोषत्रयकृतेष्वपि ।
परं हितमिदं प्रोक्तं त्रिफलाद्यं महाघृतम् ॥

भृङ्गरजः भृङ्गराजः भङ्गरा इति लोके। क्षीरकाकोल्या अलाभे अश्वगन्धामूलं ग्राह्यम्॥ मधुपर्ण्यश्च जलजं यष्टीमधु च चक्षुष्यत्वात्। तदलाभे सामान्यं यष्टीमधु ग्राह्यं तूल्यगुणत्वात्॥ त्रिफलाद्यं घृतम्॥ * ॥

शतमेकं हरीतक्या द्विगुणश्च विभीतकम्। चतुर्गुणं त्वामलकं वृषमार्कवयोः समम्॥ चतुर्गुणोदकं दत्त्वा घृतेभ्यंऽग्निना पचेत्। भागं चतुर्थं संरक्ष्य क्वाथं तमवतारयेत्॥ शर्करा मधुकं द्राक्षा मधुयष्टिर्निदिग्धिका। काकोली क्षीरकाकोली त्रिफला नागकेशरम्॥ पिप्पली चन्दनं सुस्थं त्रायमाणामथोत्पलम्। घृतप्रस्थसमं क्षीरं कल्कैरेतैः घृतेः पचेत्॥ हन्यात् सतिमिरं काचं नक्तान्धं शुक्रमेव च। तथा स्रावञ्च कण्डूञ्च व्यथयुञ्च कषायताम्॥ कलुषत्वञ्च नेत्रस्य विधर्म्मेपटलान्वितम्। बहुनात्र किमुक्तेन सर्व्वान् नेत्रामयान् हरेत्॥ यस्य चोपहता दृष्टिः सूर्य्याग्निभ्यां प्रपश्यतः। तस्येतद्भेषजं प्रोक्तं मुनिभिः परमं हितम्॥ मार्ज्जितं दर्पणं यद्वत् परां निर्म्मलतां व्रजेत्। तद्देतेन पीतेन नेत्रं निर्म्मलतामियात्॥ वारिद्रोणद्वयं चात्र वृषमार्कवयोस्तुले। काकोलीयुगलालाभे अश्वगन्धामूलं ग्राह्यम्॥ द्वितीयं त्रिफलाद्यं घृतम्॥ * ॥

वासाविश्वान्हतादार्व्वीरक्तचन्दनचित्रकैः। भूनिम्बनिम्बकटुकापटोलत्रिफलामृदैः॥ निशाकलिङ्गकुटजैः क्वाथः सर्व्वाक्षिरोगहा। वैशद्यं पीनसं श्वासं कासं नाशयति ध्रुवम्॥ वासादिक्वाथः।

इति नेत्ररोगाधिकारः।" इति भावप्रकाशः॥*॥

किञ्च। गारुडे १६८ अध्याये।

"कतकस्य फलं शुष्कं सैन्धवं चूर्णयेत् समम्। पेषो रसाञ्जनं चौद्रं विड्ङ्गानि मनःशिला॥ एषां वर्त्तिर्हरन्ति कासं तिमिरं पटलं तथा॥"

तिमिररिपुः, पुं, (तिमिरस्य अन्धकारस्य रिपुः।) सूर्य्यः। इति हलायुधः॥

तिमिषः, पुं, याम्यकर्कटी। इति त्रिकाण्डशेषः॥ नाटाम्बः। इति हारावली। १२६॥

तिमीः, पुं, (तिमिः दृषोदरादित्वात् साधुः।) तिमिमत्स्यः। इति हिरूपकोषः॥ (तिमि+वा ङीष्। तिमिजातिस्त्री। इति केचित्॥)

तिरः, [स्] अ, (तरति व्यतिपथमिति। तॄ+"सर्व्वधातुभ्योऽसुन्।" उणा। ४।१८८। इति असुन्। छन्दिदपवादविषयेऽप्युतसर्गोऽभिनिविशते इति गुणविषये इर्।) अन्तर्द्धानम्। (यथा, भागवते। २। ६। ४१।

"यदा तदेवासत्तर्केणैरिरोधीयेत विप्लुतम्॥") तिर्य्यगर्थः। इत्यमरः। ३। ४। २२५॥ तिरस्कारः। इति तट्टीकायां स्वामी॥

तिरश्ची, स्त्री, (तिर्य्यक्जातिः स्त्रियां ङीप्।) पशुपक्ष्यादीनां स्त्री। इति मुग्धबोधम्। मादी इति भाषा॥

तिरस्करिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति। तिरस्+कृ+"नन्दिग्रहीति।" ३। १। १३४। इति ल्युनिः। संज्ञापूर्व्वकविधेरनित्यत्वात् वृद्ध्यभावः। ततो ङीप्।) व्यवधायकपटः। इत्यमरः। २। ६। १२०॥ कानात् इति भाषा॥ (यथा, कुमारे। १। १४।

"यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंशुकपाङ्गनानाम्। दरीग्रहद्वारविलम्बिबिम्बा- स्तिरस्करिण्यो जलदा भवन्ति॥")

तिरस्कारः, पुं, (तिरस्+कृ+घञ्।) अनादरः। इति हलायुधः॥ (यथा, पद्मपुराणे। ७। ८।

"ममांशस्य तिरस्कारात् अधिष्ठानप्रधानता। यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते॥")

तिरस्करिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति। तिरस्+कृ+णिनिः ङीप्।) तिरस्करिणी। इत्यमरटीकायां नीलकण्ठः॥

तिरस्कृतः, त्रि, (तिरस्+कृ+क्तः।) अनादृतः। कृततिरस्कारः। यथा,—

"अविवक्षितवाच्यो यत्रान्यत् वाच्यं भवेदृक्षनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्॥"

इति भावप्रकाशः॥

(तन्त्रसारोक्तमन्त्रविशेषे, पुं। यथा,—

"यस्य मध्ये हकारोऽस्ति कवर्गं भूर्द्वनि द्विधा। अर्द्धं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते॥")

तिरस्क्रिया, स्त्री, (तिरस्करणमिति। "क्रञः शः च।" ३। ३। १००। इति भावे शः।) अनादरः। तिरस्कारः। इत्यमरः। १। ७। २२॥ (यथा, माघे। १। ३६।

"हरे! हिरण्याक्षपुरःसरासुर- द्विषद्विषः प्रत्युत सा तिरस्क्रिया॥")

तिरिटिः, पुं, इक्षुग्रन्थिः। इति शब्दमाला॥

तिरिमः, पुं, धान्यभेदः। इति राजनिर्घण्टः॥

तिरियः, पुं, धान्यविशेषः। अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। शीतलत्वम्। दाहपित्तसर्व्वामयनाशित्वम्। त्रिदोषशमनत्वम्। रुच्यत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥

तिरीटं, क्ली, (तीर्य्यते शिरोविषदोऽनेनेति। तॄ+"कृतॄकृपिभ्यः कीटन्।" उणा। ४।१८४। इति कीटन्।) किरीटम्। इत्युणादिकोषः॥

तिरीटः, पुं, (तॄ+कीटन्।) लोधः। इत्यमरः। २। ४। ३३॥ (यथा, भावप्रकाशे अर्शोरोगाधिकारे।

"समङ्गोत्पलमोचाम्रतिरीटतिलचन्दनैः॥")

तिरोधानं, क्ली, (तिरस्+धा+भावे ल्युट्।) अन्तर्धानम्। इत्यमरः। १। ३। १३॥ (यथा, भागवते। ३। २१। ४४।

"सिद्धान् विद्याधरांश्चैव तिरोधानेन सोऽहनत्॥")

तिरोहितः, त्रि, (तिरस्+धा+क्तः।) अन्तर्हितः। (यथा, मार्कण्डेये। ३६। २४।

"अतीतानागतानर्थान् विप्रलब्धतिरोहितान्॥") आच्छादितः। इत्यमरः। २। ८। ११२॥

तिर्य्यक्, [च्] अ, वक्रम्। तत्पर्य्यायः। साचि २ तिरः ३। इत्यमरः। ३। १। ३४। (यथा, रामायणे। २। २३। ४।

"तिर्य्यग्गूर्द्धं शरीरे च पातयित्वा शिरोधराम्॥")

तिरोऽर्थः। निरुक्तार्थः। इति शब्दरत्नावली॥

तिर्य्यक्स्रोताः, [स्] पुं, (तिर्य्यक् वक्रं स्रोत आहारसञ्चारो यस्य। भुक्तान्नस्य तिर्य्यक्तया उदरे सञ्चारादस्य तथात्वम्।) पशुपक्ष्यादिः। (यथा, विष्णुपुराणे। १। ५। ८।

"तस्याभिध्यायतः सर्गं तिर्य्यक्स्रोताभ्यवर्त्तत। यस्मात् तिर्य्यक्प्रवृत्तः स तिर्य्यक्स्रोतास्ततः स्मृतः॥")

स ब्रह्मणोऽष्टमः सर्गः। स तु अष्टाविंशद्विधः। यथा,—

"तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः॥"

तेषां लक्षणं यथा,—

"अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः॥"

इति श्रीभागवते। ३। १०। २१॥

"तिरश्चां तिर्य्यक्स्रोतसाम्। अविदः वस्त्वनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। घ्राणज्ञा घ्राणेनैव इदमर्थं जानन्ति। हृदि अवेदिनः दीर्घानुसन्धानशून्याः।" इति तट्टीकायां श्रीधरस्वामी॥ अष्टाविंशतिभेदा यथा,—

"गौरजो महिषः क्षत्त्र्यः शूकरो गवयो रुरुः। द्विशफाः पशवश्चैमे अविरुष्ट्र च सत्तम!॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्॥ श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शशयल्लकौ। सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः॥ कङ्कगृध्रबकश्येनभासभल्लुकबर्हिणः। हंससारसचक्राङ्ककाकोलूकादयः खगाः॥"

इति श्रीभागवते। ३। १०। २२-२३॥

"गवादय उद्गात्रा द्विशफा द्विखुरा नव। खरादयश्चमर्य्यन्ता एकशफाः षट्। श्वादयो गोधान्ताः पञ्चनखा द्वादश। एते भूचराः सप्तविंशतिः। मकरादयो जलचराः कङ्कादयः खगाः अभूचरत्वेनैकीकृता एवमष्टाविंशतिभेदान् वदन्ति। अन्येषामपि तिर्य्यक्प्राणिनां यथायथमेतेष्वन्तर्भावः।" इति तट्टीकायां श्रीधरस्वामी॥

तिर्य्यग्यानः, पुं, (तिर्य्यक् वक्रं यानं गमनं यस्य।) कुलीरः। इति त्रिकाण्डशेषः॥

तिर्य्यङ्, [च्] पुं, (तिर्य्यगञ्चतीति। अनुच+क्विप्। "तिरसस्तिर्य्यलोपे।" ६। ३। ६४। इति तिरिः।) विहङ्गादिः। इति मेदिनी॥ (यथा, महाभारते। १३। १११। १२५।

"पापानि तु नरः कृत्वा तिर्य्यग् जायेत भारत!॥")

यथाच मनुः । ५ । ४० ।
"ओषधयः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणस्तथा॥"
"तिर्य्यञ्चः कूर्म्मादयः।" इति तट्टीकायां कुल्लूकभट्टः ॥) पशुः । इति हेमचन्द्रः । ३ ।१०८ ॥ (यथा, पद्मतन्त्रे । ३ । ११६ ।
"तिर्य्यक्षं मानुषं वापि यो नृतं संसृजेत् कुधीः।
पक्षगयेन शुद्धिः स्यात् तस्य चान्द्रायणेन च ॥")
वक्रगामी । इति शब्दरत्नावली ।

तिर्य्यञ्ची, स्त्री, (तिर्य्यञ्च + स्त्रियां ङीप् ।) तिरश्ची । स्त्रीपशुपक्ष्यादिः । इति मुग्धबोधम् ॥

तिल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) क्ष्वेडी । तेलति । इति दुर्गादासः ॥

तिल, क स्नेहि । इति कविकल्पद्रुमः ॥ (पुरां-तुदां च-परं-चकं-सेट् ।) स्निहि स्निग्धीभावे । क, तेलयति । ग्र, तिलति तैलेनाक्तम् । इति दुर्गादासः ॥

तिलः, पुं, (तिलति स्निह्यति तैलेन पूर्णो भवतीति । तिल + "इगुपधज्ञेति ।"३।१।१३५ । इति कः ।) स्वनामख्यातशस्यम् । तत्पर्य्यायः । होमधान्यम् २ पवित्रः ३ पितृतर्पणः ४ पापघ्नः ५ पूतधान्यम् ६ । इति राजनिर्घण्टः ॥ स्नेहफलः ७ स्नेहफलपूरफलः ८ । अस्य गुणाः । रसे कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । गुरुत्वम् । विपाके कटुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तकारित्वम् । बल्यत्वम् । केश्यहितत्वम् । हिमस्पर्शत्वम् । त्वच्यत्वम् । स्तन्यत्वम् । व्रणे हितत्वम् । दन्त्यत्वम् । अल्पमूत्रकारित्वम् । ग्राहित्वम् । वातघ्नत्वम् । अग्निमतिप्रदत्वञ्च । इति भावप्रकाशः ॥ वर्णकारित्वम् ॥ * ॥
"कृष्णः पथ्यतमः सितोऽल्पगुणदः स्त्रीणां किलाग्ने तिलाः ॥"
इति राजनिर्घण्टः ॥
अपि च । भावप्रकाशः ।
"कृष्णश्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः ।
अन्ये हीनतराः प्रोक्तास्तज्ज्ञैरक्तादयस्तिलाः॥"
तत्तैलगुणाः । बलकारित्वम् । केश्यत्वम् । मधुरत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । बलकारित्वम् । कफवातजन्तुखर्जुव्रणकण्डूतिनाशित्वम् । कान्तिदत्वम् । वस्त्यभ्यङ्गपाननस्यकर्णाक्षिपूरणेषु हितत्वञ्च । इति राजनिर्घण्टः ॥ (तिलप्रतिग्रहनिषेधो यथा, ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् कृष्णार्थं साधुसत्तथा ।
अश्वत्थमपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥"
तिलदाने फलमाह विष्णुः ।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥"
तथा महाभारते ।
"कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा ।
तिलपात्रं प्रयच्छन् वै सर्व्वपापैः प्रमुच्यते ॥"
गरुडपुराणे ।
"धेनुमुद्दिश्य यो दद्यात् हेमगर्भांस्तिलान्नृप ! ।
यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते ॥"
सप्तमीं नवमीं पर्व्वकालञ्च त्यक्त्वा तिलतैलेनाङ्गानि विष्टभ्य स्नानं कर्त्तव्यम् । यथा, मार्कण्डेये ।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनः ।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः ।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्জ্জयेत् ॥"
तिथितत्त्वे जन्मतिथिकृत्ये ।
"तिलोद्वर्त्तो तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥"
रात्रौ तिलान्वितवस्तुमात्रं न भक्षयेत् । यथा, काश्मीरखण्डे ।
"सर्व्वञ्च तिलसम्बद्धं नाद्यादस्तमिते रवौ ॥"
तिलैस्तर्पणनिषेधस्तत्प्रतिप्रसवादिकञ्च तर्पणशब्दे द्रष्टव्यम् ॥) तिलकालकः । यथा,—
"देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप जानामि भानुमत्यास्तिलं यथा ॥"
इति कालिदासः ॥
(स्वल्पप्रमाणम् । तिलतुल्यत्वादस्य तथात्वम् । यथा, राजतरङ्गिण्याम् । ४ । ३२८ ।
"तिलं तिलं तं कृत्वा च चिच्चिपुर्दिक्षु सर्व्वतः ।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥")

तिलकं, क्ली, (तिलति स्निह्यतीति । तिल + "कृञ् श्रिस्थिसंज्ञयोः ।" इति कुन् ।) क्षौम । कृष्णवर्णसौवर्चलम् । इत्यमरः । २ । ६ । ६५ ॥ सौवर्चलम् । इति मेदिनी । के, १०० ॥

तिलकः, पुं, (तिल इव कायतीति । कै + कः ।) पुष्पवृक्षविशेषः । तत्पर्य्यायः । विशेषकः २ सुखमण्डनकः ३ पुण्ड्रकः ४ पुण्ड्रः ५ स्थिरपुष्पी ६ छिन्नरुहः ७ दग्धरुहः ८ क्षतजीवः ९ तरुणीकटाक्षकामः १० वासन्तसुन्दरः ११ दुग्धरुहः १२ भालविभूषणसंज्ञः १३ पुन्नागः १४ रेवतकः १५ । इति राजनिर्घण्टः ॥ क्षुरकः १६ श्रीमान् १७ पुरुषः १८ क्षत्रपुष्पकः १९ । इति भावप्रकाशः ॥ (यथा, रघुः । ६ । ४१ ।
"न खलु गोभयति स्म वनस्थलीं
न तिलकस्तिलकः प्रमदामिव ॥")
अस्य गुणाः । पाके कटुत्वम् । वातपित्तकफनाशित्वम् । बलपुष्टिमेदःकारित्वम् । हृद्यत्वम् । लघुत्वञ्च । तत्त्वग्गुणाः । कषायत्वम् । उष्णत्वम् । पुंस्त्वदन्तदोषकृमिशोफव्रणरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ (तिल + स्वार्थे कन् ।) शरीरस्थतिलः । तत्पर्य्यायः । तिलकालकः २ । इत्यमरः । २ । ६ । ४६ ॥ कालकः ३ पिप्रुः ४ जडुलः ५ । इति हेमचन्द्रः ॥ * ॥ मरुवकः । इति रत्नमाला ॥ व्यङ्गभेदः । रोगभेदः । इति मेदिनी । के, १०० ॥ श्लीपदस्य निदानलक्षणं यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोत्थैकात् तान् विद्यात्तिलकालकान् ॥"
इति माधवकरः ॥
प्रधाने त्रि । इति नानार्थध्वनिमञ्जरी ॥ ध्रुवकभेदः । यथा,—
"पञ्चविंशतिवर्णाढ्यस्तिलको ध्रुवको भवेत् ।
इष्यचन्तुपुटे तालेरसे वीरेऽद्भुतेऽपि वा ॥"
इति सङ्गीतदामोदरः ॥

तिलकः, पुं क्ली, (तिलवत् तिलपुष्पवत् कायतीति । कै + कः ।) चन्दनादिना ललाटादिद्वादशाङ्गकर्त्तव्यचिह्नविशेषः । तत्पर्य्यायः । तमालपत्रम् २ चित्रकम् ३ विशेषकम् ४ । इत्यमरः । २ । ६ । १२३ ॥ (यथा, माघे । ३ । ६३ ।
"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव ॥")
अथ द्वादशतिलकविधिः । पद्मपुराणे उत्तरखण्डे ।
"ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके ॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् ।
त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे ।
पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् ॥
तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि ॥"
किञ्च ।
"ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्व्वेषां प्रथमं स्मृतम् ।
ललाटादिक्रमेणैव धारणन्तु विधीयते ॥ इति ।
एवं न्यासं समाचर्य्य सम्प्रदायानुसारतः ।
न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्व्वार्थसिद्धये ॥"
अथ किरीटमन्त्रः । ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमि-सहितसकलज्योतिर्दीपिकराय सहस्रादित्यतेजसे नमो नमः ।" इति श्रीहरिभक्तिविलासे ४ विलासः ॥ तस्य धारणप्रकारो यथा,—
"द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम् ।
स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं क्षणनामभिः ॥
वामे वक्षसि नेत्रान्ते गण्डेऽग्नेः शङ्खचिह्नितम् ।
तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं सुने ! ॥ * ॥
ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम् ।
वामबाहौ वासुदेवं सखे दामोदरन्तथा ॥
नाभौ नारायणञ्चैव माधवं हृदये तथा ।
गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम् ॥
विष्णुं सखे कर्णमूले दक्षिणे मधुसूदनम् ।
शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः ॥
हरेर्द्वादशनामानि पठित्वा तिलकानि तु ।
यः कुर्य्यादैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात्॥*॥
ये कण्ठलग्नतुलसीभवकाष्ठमाला
ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः ।
ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ * ॥
तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद ! ।
यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम् ॥
आनासामूलमाश्रित्य शिरोमध्यगतं सुने ।
हरिपादाङ्कितं नासामूलमारभ्य यत्नतः ॥

हरिमन्दिरवत् सर्व्वं तदाधारवल्लभीयकम् ।
श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम् ॥
यौगलं तत्तु विज्ञेयं यदि मध्यसुरङ्गितम् ॥ * ॥
यदूर्द्धपुण्ड्रं तिलकं शोभनं तन्मनोहरम् ।
तन्मध्यगीतरेखञ्च श्रीमद्रामानुजं विदुः ॥ * ॥
श्रीरामोपासना यस्य तिलकं तूर्द्धपुण्ड्रकम् ।
भ्रुवोर्म्मध्ये सबिन्दु स्यादूर्द्धं विप्र ! मनोहरम् ॥
हरेः सर्व्वावतारानां मत्स्यादीनां विशेषतः ।
उपासकानां तिलकं केवलं हरिमन्दिरम् ॥*॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियाणां तथैव च ।
वैश्यानान्तु तथा विप्र ! शूद्रादेर्मण्डलाङ्कितम् ॥
अच्छिद्रमूर्द्धपुण्ड्रन्तु ये कुर्व्वन्ति जनाधमाः ।
तेषां ललाटे सततं शुनः पादो न संशयः ॥
दृष्ट्वा भाले द्विजातीनामच्छिद्रमूर्द्धपुण्ड्रकम् ।
कार्ष्णः कृष्णस्मृतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् ॥
ललाटदक्षिणे ब्रह्मा वसेद्रामे महेश्वरः ।
मध्ये विष्णुर्वसेन्नित्यं तस्मान्मध्यं न लेपयेत् ॥*॥
वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं न तु ।
षड्लक्षणसंयुक्तं तिलकं यन्निरर्थकम् ॥
खनित्रयष्टिकुक्कुरचित्रशूलमुकुराङ्कितम् ।
त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् ॥
प्रमाणन्तूर्द्धपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् ।
आनासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि ॥
शूद्रस्येकाङ्गुलं प्रोक्तमायतं द्व्याङ्गुलं विप्र ।
क्षत्रिये त्र्याङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् ।
नासिकायास्त्रिभागेको भागो मानेन योभवेत् ।
भ्रुवोर्म्मध्यादधःस्थानं मूलमाहुर्म्मनीषिणः ॥*॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
कुर्य्यादूर्द्धपुण्ड्रं तद्वैष्णवा हरिमन्दिरम् ॥
वैष्णवा विप्र ! भूपाश्चेत् वैश्यशूद्रान्त्यजाश्रमाः ।
यदूर्द्धपुण्ड्रं विभ्रत्युत्तदेव हरिमन्दिरम् ॥
नरो वाप्यथवा नारी यदि कृष्णपथं लभेत् ।
यत्नतस्तुलसीमाला सन्धार्य्या हरिमन्दिरम् ॥
मध्यच्छिद्रं न कुर्य्यादूर्ध्वतिलकं यदि वैष्णवः ।
श्वपदं तच्चितातुल्यं भवेन्नारद ! नान्यथा ॥ * ॥
दक्षाकारद्विरेखं यत्तिलकं मूलकोणकम् ।
मध्यच्छिद्रन्तु तत् प्राहुरूर्द्धपुण्ड्रं मनोहरम् ॥
अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् ।
मध्यच्छिद्रं युगरेखमूर्द्धपुण्ड्रं प्रकीर्त्तितम् ॥*॥
तीर्थमृत्तृणयज्ञकाष्ठञ्च विल्वो मलयसम्भवम् ।
अश्वत्थतुलसीमूलमृत्तिका गोमयस्य च ॥
जाङ्गलीमृन्महानिम्बतुलसीकाष्ठमेव च ।
कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम् ॥
गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् ।
धात्रीमूलस्य मृन्नद्यो हरिद्रा गोगृहस्य च ॥
स्नानान्ते सर्व्ववर्णानामाश्रमाणान्तथैव च ।
एतानि तिलकान्याहुः सन्ध्यादिसर्व्वकर्म्मसु ॥"*॥
अपि च ।
"गङ्गाम्बुतुलसीमूलमृत्तिका मलयोद्भवम् ।
साधोश्चरणसंलग्नं रजो मृद्गोमयस्य च ॥
याश्वत्थमूलमृद्गोपीचन्दनं तीर्थमृत्तिका ।
कुङ्कुमं तुलसीकाष्ठं वैष्णवाङ्गतमृत्तिका ॥
गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् ।
वल्मीकमृत्तिका गन्धः पद्मकं हरिचन्दनम् ॥
गन्धकाष्ठं महानिम्बो यमुनातीरमृत्तिका ।
गुरुपादरजोवारिणी साध्वङ्घ्रिरजोजले ॥
कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः ।
चारु यत्तिलकं भाव्यं तन्नाम्ना वैष्णवैर्ध्रुवम् ॥*॥
काम्यं नैमित्तिकं नित्यं यत्किञ्चित् कर्म्म नारद ! ।
वर्णाश्रमाणां तत्सर्व्वं स्नानान्ते तिलकं विना ॥
कर्म्म वर्णाश्रमाणां स्यात् देवं पैत्रं न तत्फलम् ।
स्नानं सन्ध्यां पश्चयज्ञान् पैत्रं होमादि कर्म्म यः ।
विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत् ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
"वीक्ष्यादर्शे जले वापि यो विदध्यात् प्रयत्नतः ।
ऊर्द्धपुण्ड्रं महाभाग ! स याति परमाङ्गतिम् ॥"
इति पाद्मे पातालखण्डम् ॥ * ॥
"शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् ।
विष्ण्वागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत् ॥"
इति नागोजीभट्टधृतसूतसंहिता ॥

तिलकटः, पुं, तिलस्य रजः । (तिल + "अलाबू-तिलोभाभङ्गाभ्यो रजस्युपसंख्यानम्" ५ । २ । २६ । इत्यस्य वार्त्तिकोक्त्या कटच् ।) तिलचूर्णम् । इति शब्दार्थकल्पतरुः आकरणञ्च ॥

तिलका, स्त्री, (तिलस्तिलबीजकोष इव कायतीति । कै + कः ।) हारभेदः । इति जटाधरः ॥ (षड्वरपादके छन्दोभेदे । शब्दार्थचिन्तामणिधृततल्लक्षणादिकं यथा,—
"सगणद्वितयं भवतीह यदा ।
रसवर्णपदा तिलकेति तदा ॥"
उदाहरणम् ।
"वनमालिकथा सकलालि ! वृथा ।
पुनरेति कथं मम दृष्टिपथम् ॥")

तिलकालकः, पुं, (तिल इव कालकः कृष्णवर्णः ।) शरीरस्थतिलः । इत्यमरः । २ । ६ । ४६ ॥ तल्लक्षणानि यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान् ॥"
समानि अनुन्नतानि । अयं तिल इति लोके प्रसिद्धः । तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

तिलयुक्तः । इत्यमरटीका ॥

तिलकाश्रयः, पुं, (तिलकस्य आश्रयः ।) ललाटम् । इति शब्दार्थकल्पतरुः ॥

तिलकिट्टं, क्ली, (तिलस्य किट्टं मलम् ।) तिलमलम् । (खरल इति भाषा ॥) तत्पर्य्यायः । पिण्याकः २ तिलखलिः ३ । अस्य गुणाः । स्वप्नलम् । रूक्षत्वम् । विष्टम्भित्वम् । दृष्टिदूषणत्वञ्च । इति भावप्रकाशः ॥

तिलकी, [न्] त्रि, (तिलकमस्यास्तीति । तिलक + इनिः ।) तिलकयुक्तः । यथा । शिखी तिलकी कर्म्म कुर्य्यात् । इति स्मृतिः ॥

तिलचित्रपत्रकः, पुं, (तिलचित्राणि तिलवच्चित्रयुक्तानि पत्राणि यस्य । कप् ।) तेलकन्दः । इति राजनिर्घण्टः ॥

तिलचूर्णं, क्ली, (तिलस्य चूर्णम् ।) चूर्णीकृततिलः । तत्पर्य्यायः । तिलकल्कम् २ पललम् ३ पिष्टकम् ४ । अस्य गुणाः । मधुरत्वम् । रुच्यत्वम् । पित्तास्रबलपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । २ । ८३ ।
"ततस्तिलान् सुखयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि ॥")

तिलतण्डुलकं, क्ली, (तिलस्य तण्डुल इव संश्लेषेण कायतीति । कै + कः । तिलतण्डुलवत् दृढ़संश्लेषणादस्य तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ तिलमिश्रिततण्डुलम् ॥ (तिलस्य शस्यञ्च ॥)

तिलतैलं, क्ली, (तिलस्य स्नेहः । तिल + "स्नेहे तैलच् ।" ५ । २ । २६ । इत्यस्य वार्त्तिकोक्त्या तैलच् ।) तिलस्नेहः । तिलेषु तैलम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ४५ ।
सर्व्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ॥")
अस्य गुणाः तिलशब्दे द्रष्टव्याः ॥ (अपरे गुणाश्च । यथा, हारीते १ स्थाने नवमेऽध्याये ।
"तत्र स्नेहं समासेन यथायोगं यथाविधि ।
कषायानुरसं स्वादु सूक्ष्मसृष्टं व्यवायि च ॥
पित्तरक्तहितग्नञ्च श्लेष्मरोगादिवर्द्धनम् ।
अल्पं रुचिकरं मेध्यं कण्डूकुष्ठविकारनुत् ॥
दृष्यं श्रमापहं श्लेयं तिलतैलं विदुर्बुधाः ।
छिन्ने भिन्ने च्युते दुष्टे क्षते भग्नेऽग्निदाहके ॥
वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम् ।
विधे बालग्रहोनर्त्ये सेकाभ्यङ्गावगाहने ॥
पाने वस्तौ च नस्ये च तथाकर्णप्रपूरणे ।
तिलतैलं विधेयं स्यात् सर्व्वरोगनिवारणम् ॥"
"तथा छिन्नभिन्नविद्रोतृपिष्टच्युतमथितक्षतपिच्छितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नदग्धव्रणालविदग्धप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।
तद्वस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

तिलधेनुः, स्त्री, (तिलैर्विहिता धेनुः । प्राकपार्थिवादिवत् समासः ।) तिलनिर्म्मिता धेनुः । यथा,—
"विधानं तिलधेनोस्त्वं ब्रूहि क्षीघ्रं द्विजोत्तम ! ।
मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप ! ॥
षोड़शाढ़मयी धेनुश्चतुर्भिर्व्वत्सकी भवेत् ।
इक्षुदण्डमयाः पादा दन्ताः पुष्पमयाः शुभाः ॥
नासा गन्धमयी तस्या जिह्वा गुड़मयी तथा ।
स्थितां कृष्णाजिने धेनुं वासोभिर्व्वासितां शुभाम् ॥
सूत्रेण वाचितां कृत्वा-प्रस्थरत्नसमन्विताम् ।
सर्व्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत् ॥
अन्नं मे जायतां सद्यः पानं सप्तरसात्तथा ।
कामं सन्तर्पयत्वार्कं तिलधेनुसुपाश्रिताम् ॥

यज्ञामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः।
कुटुम्बकामं कुरुतां तिलधेनो! नमोऽस्तु ते॥
एवंविधां नरो दत्त्वा तिलधेनुं नृपोत्तम!।
सर्व्वकामसमाप्तिन्तु कुरुते नात्र संशयः॥"
इति पाद्मे क्रियाखण्डम्॥

तिलपर्णं, क्ली, (तिलस्येव पर्णमस्य।) चन्दनम्। इति राजनिर्घण्टः॥ (रक्तचन्दनम्। यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्॥"
तिलस्य पर्णम्।) तिलवृक्षपत्रञ्च॥

तिलपर्णः, पुं, (तिलस्य पर्णानीव पर्णान्यस्य।) श्रीवेष्टः। इति राजनिर्घण्टः॥

तिलपर्णिका, स्त्री, (तिलपर्णी+स्वार्थे कन् टाप् च।) रक्तचन्दनम्। इति हेमचन्द्रः॥ (यथा,—
"वेत्राग्रं दहती वासा कुन्तली तिलपर्णिका॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

तिलपर्णी, स्त्री, (तिलस्येव पर्णान्यस्याः।) पाकर्कर्णेति ङीष्। तिलपर्णी नदी आकरोऽस्यस्या इति अच् ङीष् च। इत्यमरटीका।) रक्तचन्दनम्। इत्यमरः। २। ६। १३२॥ (यथा, सुश्रुते। १। ४६।
"चित्रकस्तिलपर्णी च कफमेदोहरौ लघुः॥"
नदीविशेषः। इत्यमरटीका। २। ६। १३२॥)

तिलपिष्टकं, क्ली, (तिलस्य पिष्टकम्। एषोदरादित्वात् साधुः।) तिलपिष्टकम्। इति कैचित्॥ तिलकुटा इति भाषा॥

तिलपिञ्जः, पुं, (निष्कलस्तिलः। तिल+"तिलान्निष्कलात् पिञ्जपेजौ।" ४। २। ३६। इत्यस्य वार्त्तिकोक्त्या पिञ्जः।) निष्कलतिलवृक्षः। इत्यमरः। २। ६। १६॥

तिलपेजः, पुं, (निष्कलस्तिलः। "तिलान्निष्कलात् पिञ्जपेजौ।" ४। २। ३६। अस्य वार्त्तिकोक्त्या पेजः।) निष्कलतिलः। इत्यमरः। २। ६। १६॥

तिलमयूरः, पुं, (तिलाक्षतिवत् चित्रितो मयूरः। प्राकृपार्थिववत् समासः।) मयूरविशेषः। तत्पर्य्यायः। गुरुवृष्टकः २। इति त्रिकाण्डशेषः॥

तिलरसः, पुं, (तिलस्य रसः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलस्नेहः, पुं, (तिलस्य स्नेहः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलाङ्कितदलः, पुं, (तिलवदङ्कितानि दलानि यस्य।) तेलकन्दः। इति राजनिर्घण्टः॥

तिलापत्या, स्त्री, (तिलवत्कृष्णं क्षुद्रशाकपत्यं बीजमस्याः।) कृष्णजीरकः। इति शब्दचन्द्रिका॥

तिलिप्सः, पुं, गोनससर्पः। इत्यमरः। १। ८। १५॥

तिलोत्तमा, स्त्री, (तिलैः तिलप्रमाणैः सर्व्वरत्नानामंशैरुत्तमा।) सर्व्वश्रेष्ठा। इति शब्दचन्द्रिका॥ तस्या नामकारणं यथा, महाभारते। १। २१२। १७।
"तिलं तिलं समानीय रत्नानां यद्विनिर्म्मिता।
तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः॥"
तिलौदनं, क्ली, (तिलमिश्रितं ओदनम्।) क्षुरः। इति हारावली। १६६॥ (यथा, रामायणे। २। ६६। १०।
"ततस्तिलौदनं भुक्त्वा पुनः पुनरधःशिराः॥"
तिलोदनमिति पाठोऽपि दृश्यते॥)

तिल्यं, क्ली, (तिलानां भवनं क्षेत्रं वा। तिल+"विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५। २। ४। इति यत्।) तिलक्षेत्रम्। तत्पर्य्यायः। तैलीनम् २। इत्यमरः। २। ६। ७॥ (तिलाय हितम्। "खलयवमासतिलतृणपलङ्कशेभ्यश्च।" ५। १। ७। इति यत्। तिलहिते, त्रि॥)

तिल्ल, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) लट्यान्तः। इस्वी। तिल्लति। इति दुर्गादासः॥

तिल्वः, पुं, (तिलतीति। तिल+"उल्वादयश्च।" उणां। ४। ६५। इति वनुप्रत्ययेन निपातनात् साधुः।) लोध्रः। इत्यमरः। २। ४। ३३॥ श्वेतलोध्रः। इति तट्टीकायां सुभूतिः॥ रक्तलोध्रः। इति स्वामी॥

तिल्वकः, पुं, (तिल्व+स्वार्थे कन्।) लोध्रः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"तिल्वकस्तु मतो लोध्रो वृहत्पत्रस्तिरीटकः॥"
अस्य विशिष्टव्यवहारो यथा,—
"तस्य मूलत्वचं शुष्कामन्तर्व्वल्कलवर्ज्जिताम्।
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ त्र्योतयेत्ततः॥
लोध्रस्येव कषायेण तृतीयं तेन भावयेत्।
भागं तं दशमूलस्य पुनः क्वाथेन भावयेत्॥
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्धं प्रयोजयेत्।
दधितक्रसुरामण्डदुर्ब्बेदरसीधुना॥
रसेनामलकानां वा ततः पाक्षिकलं पिबेत्॥"
"तिल्वकस्य कषायेण दशमूलस्य सुभावितम्।
मात्रां कम्पिल्लकस्यैव कषायेण पुनः पिबेत्।
चतुरङ्गुलकल्पेन लेहोऽन्यः कार्य्य एव च॥"
"तिल्वकस्य कषायेण कल्केन च सशर्करः।
सघृतः साधितो लेहः स च श्रेष्ठं विरेचनम्॥"
इति चरके कल्पस्थाने नवमेऽध्याये॥)

तिष्ठद्गुः, पुं, (तिष्ठन्ति गावो यस्मिन् काले दोहाय। "गावो हि रात्रिप्रथमनाड़िकायामतीतायां विश्रान्ताः सत्यः उत्थाप्य दुह्यन्ते।" इति जयमङ्गलः। "तिष्ठद्गुप्रभृतीनि च।" २। १। १७। इति निपातनात् साधुः।) सन्ध्याकालः। यथा, भट्टिः। ४। १४।
"व्यतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्॥"

तिष्यः, पुं, (तुष्यन्त्यस्मिन्निति। तुष+क्यप्। निपातनात् साधुः।) पुष्यनक्षत्रम्। इत्यमरः। १। ३। २२॥ (यथा, महाभारते। ३। १६०। ८७।
"यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यश्च सप्तमे।
एकराशौ समेष्यन्ति प्रवर्त्स्यति तदा कृतम्॥"
तिष्यः पुष्यनक्षत्रं पौर्णमास्यामस्यस्येति। अण्।) पौषमासः। इति शब्दरत्नावली॥ कलियुगम्। इति मेदिनी। ये, २८॥ (अत्र क्लीवेऽपि दृश्यते। यथा, महाभारते। ६। १०। ४।
"चत्वारि भारते वर्षे युगानि भरतर्षभ!।
कृतं त्रेता द्वापरञ्च तिष्यञ्च कुरुवर्द्धन!॥")

तिष्यकः, पुं, (तिष्य एव। स्वार्थे कन्।) पौषमासः। इति शब्दरत्नावली॥

तिष्यपुष्या, स्त्री, (तिष्ये पौषे पुष्यमस्याः।) आमलकी। इति शब्दचन्द्रिका॥

तिष्यफला, स्त्री, (तिष्ये पौषमासे फलमस्याः।) आमलकी। इत्यमरः। २। ४। ५७॥ (विवरणमस्या आमलकीशब्दे ज्ञातव्यम्॥)

तिष्या, स्त्री, (तिष्यः पौषमासः उत्पत्तिकालत्वेनास्त्यस्या इति। अच् टाप् च।) आमलकी॥ इति शब्दरत्नावली॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"धात्री कार्षफला तिष्या वयस्यामलकी शिवा॥")

तिष्ठा, [न्] पुं, व्याधिः। व्रीहिः। धनुः। सद्भावः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तीक्ष्णं, क्ली, (तेजयति तेज्यतेऽनेन वा। तिज निशाने+"तिजेर्दीर्घश्च।" उणां। ३। १८। इति क्नुः दीर्घश्च।) खरम्। विषम्। लौहम्। (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम्।
"क्षणायसं काललोहं रुक्मं तत्तीक्ष्णमन्यथा॥")
युद्धम्। इत्यमरः। ३। ३। ५३॥ भरणम्। शूलम्। शीघ्रम्। इति तट्टीकासारसुन्दरी॥ सामुद्रलवणम्। सुष्कः। इति मेदिनी। णे, १५॥ चणकम्। इति राजनिर्घण्टः॥ मरकम्। इति हेमचन्द्रः॥ * ॥ तीक्ष्णवस्तूनि यथा। प्रतिभा १ हीरकम् २ कटाहः ३ दुर्व्वाक्यम् ४ नखः ५ लवणम् ६ रविकरः ७। इति कविकल्पलता॥

तीक्ष्णः, पुं, (तिज+क्नुः दीर्घश्च।) यवक्षारः। इति मेदिनी। णे, १५॥ (पर्य्यायो यथा,—
"यावशूको यवक्षारो यवशूको यवाग्रजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)
श्वेतकुशः। कुरुण्टकः। इति राजनिर्घण्टः॥ तीक्ष्णागणो यथा। अश्लेषा आर्द्रा ज्येष्ठा मूला। इति ज्योतिषम्॥

तीक्ष्णः, त्रि, (तिज+क्नुः दीर्घश्च।) तिग्मः। (उग्रः। यथा, मनुः। ७। १४०।
"तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः॥"
असह्यः। यथा, वाजसनेयसंहितायाम्। १६। ३६। "नमस्तीक्ष्णेषवे चायुधिने।"
"तीक्ष्णा असह्या इषवो बाणा यस्य स तीक्ष्णेषुस्तस्मै नमः।" इति महीधरः॥) आत्मत्यागी। इति मेदिनी। णे, १५॥ निरालस्यः। सुबुद्धिः इति धरणी॥ योगी। इत्यजयपालः॥

तीक्ष्णकः, पुं, (तीक्ष्ण+संज्ञायां कन्।) शुष्कः। गौरसर्षपः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टकः, पुं, (तीक्ष्णानि कण्टकानि यस्य।) धुस्तूरः। इति जटाधरः॥ वर्व्वरः। इक्षुदी। करीरः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टका, स्त्री, (तीक्ष्णं कण्टकं यस्याः ।) कन्यारीवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकन्दः, पुं, (तीक्ष्णः कन्दोऽधोगेऽस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥

तीक्ष्णकर्म्मा, [न्] त्रि, (तीक्ष्णं कर्म्मास्य ।) तीव्रकर्म्मा । तत्पर्य्यायः । आयःशूलिकः २ । इति त्रिकाण्डशेषः ॥

तीक्ष्णकल्कः, पुं, (तीक्ष्णः कल्को यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकान्ता, स्त्री, (तीक्ष्णा उग्रा कान्ता कमनीया च ।) मङ्गलचण्डिकाया रूपभेदः । यथा,—

"पीठे दिक्करवासिन्या द्विरूपा रमते शिवा ।
तीक्ष्णकान्ताख्या त्वेका योगतारा प्रकीर्त्तिता ॥
पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका ।
तस्यास्तु सततं रूपं तीक्ष्णकान्ताख्यं नृप ! ॥
कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा ।
तेन रूपेण तां देवीं सततं परिपूजयेत् ॥
अङ्गाङ्गिमन्त्रौ रूपञ्च तस्याः प्राक् प्रतिपादितम् ।
त्रिकोणं मण्डलं चास्याः कर्त्तव्यं मन्त्रपूर्ब्बकम् ॥
आदौ रेखे ततः पश्चात् सुरेखेति पदं ततः ।
तथा पदं चाधिगत्य तिष्ठन्त्विति पदं ततः ॥
मण्डलन्यासमन्त्रोऽयं तीक्ष्णायाः परिकीर्त्तितः ।
नव त्रिपुरदेवादियमवेतालदुर्द्धराः ॥
गणाश्चमेऽत्यन्तकान्ता द्वारपालाः प्रकीर्त्तिताः ।
एतांस्तु पूजयेत् सम्यक् मण्डलस्याष्टदिक्षु वै ॥
आदौ सम्बोधनं कृत्वा वह्निपुष्यं ततः परम् ।
वह्निजाया ततः पश्चात् मन्त्रमेषां प्रकीर्त्तितम् ॥
पात्रोपकरणादीनां स्थानन्यासस्य सर्व्वतः ।
सर्व्वसुत्तरतन्त्रोक्तं ग्राह्यं रूपद्वयेऽपि च ॥
चामुण्डा च कराला च शुभगा भीषणा भगा ।
विकटेति च योगिन्यः प्रोक्तास्तस्यासु भूपते ! ॥
हे भगवत्येकजटे विघ्नहे पदमन्ततः ।
विकटदंष्ट्रे धीमहीति तन्नस्तारे प्रचोदयात् ॥
एषा तु तीक्ष्णा गायत्री पीठदेवाः प्रकीर्त्तिताः ।
निर्म्माल्यधारिणी चास्या देवी विकटचण्डिका ॥
माला तु रुद्रमयी प्रोक्ता रुद्राक्षसम्भवापि वा ।
विघ्नेश एव देवास्तु पूजने परिकीर्त्तितः ॥
उपचारादिकं कृत्वा बलिदानं जपादिकम् ।
सर्व्वन्तु पूर्ब्ववद्ग्राह्यं कामाख्यापूजने यथा ॥
पानेषु मदिरा श्रेष्ठा नरो बलिषु पार्थिव ! ।
मोदको नारिकेलश्च मांसं व्यञ्जनमेव च ॥
नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

तीक्ष्णगन्धः, पुं, (तीक्ष्णः प्रवृद्धो गन्धो यस्य ।) श्लेष्मान्तकः । इति राजनिर्घण्टः ॥ रक्ततुलसी । इति रत्नमाला ॥ कुङ्कुमनामगन्धद्रव्यम् । इति जटाधरः ॥

तीक्ष्णगन्धकः, पुं, (तीक्ष्णो गन्धोऽस्य । "श्लेषात् विभाषा ।" ५ । ४ । १५४ । इति कप् ।) श्लेष्मान्तकवृक्षः । इत्यमरः । २ । ४ । ३१ ॥

तीक्ष्णगन्धा, स्त्री, (तीक्ष्ण उग्रो गन्धो यस्याः ।) श्वेतवचा । कन्यारी । राजिका । इति राजनिर्घण्टः ॥ (पर्य्याया यथा,—

"राजी तु राजिका तीक्ष्णगन्धा कुञ्जनिकासुरी ।
शुवः क्षुताभिजनकः कृमिघ्नतृक्षगन्धकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) वचा । इति मेदिनी । धे, ४६ ॥ जीवन्ती । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये ।

"उग्रा कुष्ठं तीक्ष्णगन्धा विड्गं
श्रेष्ठं नित्यं चावपीड़े करञ्जम् ॥")

कट्फलः । इति रत्नमाला ॥

तीक्ष्णतण्डुला, स्त्री, (तीक्ष्णास्तण्डुला यस्याः ।) पिप्पली इति रत्नमाला ॥ (अस्याः पर्य्याया यथा,

"पिप्पली मागधी क्षुण्णा वैदेही चपला कणा ।
उपकुल्योषणा ग्रौढी कोला स्यात्तीक्ष्णतण्डुला ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

तीक्ष्णतैलं, क्ली, (तीक्ष्णमयं तैलं स्नेहो यस्य ।) सर्ज्जरसः । स्नुहीक्षीरम् । सुरा । इति शब्दरत्नावली ॥

तीक्ष्णदंष्ट्रः, पुं, (तीक्ष्णा दंष्ट्रा यस्य ।) व्याघ्रः । इति राजनिर्घण्टः ॥

तीक्ष्णपत्रः, पुं, (तीक्ष्णानि पत्राणि यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णपुष्पं, क्ली, (तीक्ष्णानि पुष्पाणि यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्दस्य गुणादयो ज्ञातव्याः ॥)

तीक्ष्णपुष्पा, स्त्री, (तीक्ष्णं पुष्पं यस्याः ।) केतकी । इति राजनिर्घण्टः ॥

तीक्ष्णफलः, पुं, (तीक्ष्णं फलं यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णमूलः, पुं, (तीक्ष्णं मूलमस्य ।) शिग्रुः । कुलञ्जनः । इति राजनिर्घण्टः ॥ (शिग्रुशब्दे विवृतिरस्य ज्ञातव्या ॥)

तीक्ष्णरसः, पुं, (तीक्ष्णो रसोऽस्य ।) यवक्षारः । इति रत्नमाला ॥

तीक्ष्णशूकः, पुं, (तीक्ष्णः शूकोऽग्रभागो यस्य ।) यवः । इति हेमचन्द्रः । ४ । २३६ ॥

तीक्ष्णसारा, स्त्री, (तीक्ष्णः कठिनः सारो यस्याः ।) शिंशपा । इति राजनिर्घण्टः ॥

तीक्ष्णा, स्त्री, (तीक्ष्ण + टाप् ।) वचा । सर्पकङ्कालिकावृक्षः । इति रत्नमाला ॥ कपिकच्छूः । महाज्योतिष्मती । अत्यम्लपर्णी । इति जटाधरः ॥

तीक्ष्णायसं, क्ली, (अय एव आयसम् । तीक्ष्णञ्च तत् आयसञ्चेति ।) लोहविशेषः । तीखा इति हिन्दीभाषा ॥ तत्पर्य्यायः । लोहमूरं शूलायसम् २ शूलम् ३ शिखा ४ शिखायसम् ५ शूठम् ६ आयसम् ७ निशितम् ८ तीव्रम् ९ खड्गम् १० सुस्थितम् ११ अयः १२ चित्रायसम् १३ चीनजम् १४ । अस्य गुणाः । रूक्षत्वम् । उष्णत्वम् । तिक्तत्वम् । वातपित्तकफप्रमेहपाण्डूशूलनाशित्वम् । तीक्ष्णत्वम् । मुखलोहाधिकत्वञ्च । इति राजनिर्घण्टः ॥ (अयहारोऽस्य यथा, रसेन्द्रसारसंग्रहे शूलाधिकारे त्रिफलालौहे,॥

"तीक्ष्णायचूर्णसंयुक्तं त्रिफला चूर्णसुत्तमम् ।
क्षौद्रेण प्रायये द्वीमान् सद्यः शूलनिवारणम् ॥")

तीम, य क्लेदने । इति कविकल्पद्रुमः ॥ (दिवादिः परं-अकं-सेट् ।) य, तीम्यति तितीम । क्लेदनमार्द्रीभावः । इति दुर्गादासः ॥

तीर, तृ क कर्म्मणां समाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) कर्म्मणामिति सकर्मार्थः । अतितीरत् व्रतं लोकः समापितवानित्यर्थः । इति दुर्गादासः ॥

तीरं, क्ली, (तीरयति समापयति नद्यादिकमिति । तीर + अच् ।) नदीकूलम् । इत्यमरः ।१।२।०।७॥ गङ्गातीरं यथा,—

"सार्द्धहस्तप्लुतं यावत् गर्भतीरमुच्यते ।
भाद्रकृष्णचतुर्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते ॥"

इति प्रायश्चित्ततत्त्वम् ॥

ग्रायकः । इति त्रिकाण्डशेषः ॥

तीरः, पुं, (तीरयतीति । तीर + पचाद्यच् ।) चषु । इति मेदिनी । रे, ४५ ॥

तीरभुक्तिः, पुं, (तीरे भुक्तिरस्य ।) देशविशेषः । तीरहोत इति भाषा ॥ तत्पर्य्यायः । निच्छविः २ विदेह ३ । इति त्रिकाण्डशेषः ॥

तीरितं, क्ली, (तीर कर्म्मणां समाप्तौ + भावे क्तः ।) कर्म्मणां समाप्तिः । इति व्याकरणम् ॥

तीर्णः, त्रि, (तॄ प्लवनतरणयोः + कर्त्तरि क्तः । उत्तीर्णः । (यथा, वह्निपुराणे कन्यादाननामाध्याये ।

"तीर्णत्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥")

अभिभूतः । श्रुतः । (तॄ + कर्म्मणि क्तः । ततोत्तरणः । यथा, महाभारते । १ । १ । १६२ ।

"सत्यां तीर्णां शुचुमध्ये च तेन
तदा नार्य्यसे विजयाय सञ्जय ! ॥")

तीर्णपदी, तालमूली । इति शब्दचन्द्रिका ॥

तीर्थं, क्ली, (तरति पापादिकं यस्मात् । तॄ + "पातृतुदिवचीति ।" उणा । २ । ७ । इति थक् ।) पुण्यस्थानादि । तीर्थतोयस्य स्नाने पुण्यत्वं यथा,—

"नदीदेवनिखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
निपानादुद्धृतं पुण्यं ततः प्रस्रवणादिकम् ।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते ॥
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम् ॥"

इत्यादौ वह्निपुराणे स्नानविधिर्नाम ४ अध्यायः ॥ जलसमीपस्थारत्निमात्रस्थानम् । यथा, आदित्यपुराणे ।

"अरत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमहर्निशम् ।
पश्चाच्च शौचयेत्तीर्थमन्यथा न शुचिर्भवेत् ॥

तस्मिन् देशे शौचं कर्त्तव्यं यस्मादरत्निमात्रव्यवहितं जलं तत् स्थलमेव तीर्थं जलसमीपत्वात् ।"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
विप्रचरणयोस्तीर्थवासस्थानत्वं ब्राह्मणशब्दे द्रष्टव्यम् ॥ * ॥ विप्रदक्षिणकर्णस्य तीर्थवासस्थानत्वं यथा । पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
इत्याह्निकाचारतत्त्वम् ॥
हस्तस्थिततीर्थानि यथा,—
"अङ्गुल्यग्रे तीर्थं दैवं खल्वङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं मूले ह्यङ्गुष्ठस्य ब्राह्मम् ॥"
इत्यमरः । २ । ७ । ५१ ॥
(यथा च मार्कण्डेये ।३४ । १०३—१०६ ।
"कुर्य्यात् कर्माणि तीर्थेन स्वेन स्वेन यथाविधि ।
देवादीनां तथा कुर्य्याद् ब्राह्मेणाचमनक्रियाम् ॥
अङ्गुष्ठोत्तरतो रेखा पार्श्वेयं दक्षिणस्य तु ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥
तर्ज्जन्यङ्गुष्ठयोरन्तः पैत्रं तीर्थमुदाहृतम् ।
पितृणां तेन तोयादि दद्यान्नान्दीमुखादृते ॥
अङ्गुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः ।
तीर्थं कनिष्ठिका मूले कायं तेन प्रजापतेः ॥
एवमेभिः सदा तीर्थैर्देवानां पितृभिः सह ।
सदा कार्य्याणि कुर्व्वीत नान्यतीर्थेन कर्हिचित् ॥
ब्राह्मेणाचमनं प्रोक्तं पित्र्यं पैत्रेण सर्व्वदा ।
दैवतीर्थेन देवानां प्राजापत्यं निजेन च ॥
नान्दीमुखानां कुर्व्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥")
तीर्थं त्रिविधम् । यथा । जङ्गमम् १ मानसम् २ स्थावरम् ३ । तथा च ।
"ब्राह्मणा जङ्गमं तीर्थं निर्म्मलं सार्व्वकामिकम् ।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥
व्यरुचिरुवाच ।
शृणु तीर्थानि गदतो मानसानि ममानघे ! ।
येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् ॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्व्वभूतदया तीर्थं सर्व्वत्रार्জ্জवमेव च ॥
दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ।
ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥
ज्ञानं तीर्थं धृतिस्तीर्थं प्रणयं तीर्थमुदाहृतम् ।
तीर्थानामपि तत्तीर्थं विशुद्धिर्म्मनसः परा ।
एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ॥
भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ।
यथा शरीरसोद्देशाः केचिन्मेध्यतमाः स्मृताः ।
तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः ॥
प्रभावाद्दृषदादूभूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥
तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः ।
उभयेष्वपि यः स्नाति स याति परमां गतिम् ॥"
तीर्थागमने दोषो यथा,—
"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्वा काञ्चनं गाञ्च दरिद्रो नाम जायते ॥"
तीर्थगमने फलं यथा,—
"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ * ॥
तीर्थान्यनुसरन् धीरः श्रद्दधानः समाहितः ।
ऋतपापो विशुध्येत किं पुनः शुद्धकर्म्मकृत् ॥
तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते ।
न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति ॥
तीर्थफलभागिनो यथा,—
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् ।
अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥
अदाम्भिको निरारम्भोलघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्व्वसङ्गेभ्यः स तीर्थफलमश्नुते ॥
अकोपनोऽमलमतिः सत्यवादी दृढव्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥"
इति काशीखण्डम् ॥ * ॥
तीर्थयात्राविधानं यथा,—
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव
दैवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥
एवं कुर्व्वतस्तस्य तीर्थे यदुक्तं
फलं ततु स्यान्नात्र सन्देह एव ॥"
इति ब्रह्मपुराणम् ॥ * ॥
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कक्षानां वपनं कुर्य्यात् तथा न विकचो भवेत् ॥"
इति भविष्यपुराणम् ॥ * ॥
"तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च ।
दृद्धिश्राद्धं प्रकुर्व्वीत बन्धुसर्षिःसमन्वितम् ॥"
इति कूर्म्मपुराणम् ॥ * ॥
"ऐश्वर्य्यलाभमाहात्म्यात् गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्ज्जयेत् ॥"
इति मत्स्यपुराणम् ॥ * ॥
"संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि ।
सङ्कल्पोपवासञ्च तदा यत्नेन कारयेत् ॥"
इति गङ्गावाक्यावली ॥ * ॥
तीर्थप्राप्त्यनन्तरविधानं यथा,—
"न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एवहि ।
सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च ॥
कर्त्तव्यमृषिभिर्दृष्टं पित्र्यार्केण गुहेन च ।
श्राद्धं तत्र तु कर्त्तव्यमर्घावाहनवर्জ्जितम् ॥
अकाले ऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम् ।
अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् ॥
तीर्थप्राप्तिः स्यात्ततोऽह्नः पूर्व्ववासरे ।
प्राप्तेऽह्नि श्राद्धदो भवेत् ॥
तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा ।
शिरोगतानि पापानि यान्ति मुण्डनतो यतः ॥
तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु ॥"
इति काशीखण्डम् ॥
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्জ्जयित्वा गयां गङ्गां विशालां विरजान्तथा ॥"
इति स्कान्दम् ॥ * ॥
"घोड़शांशं स लभते यः परार्थेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"
इति पैठीनसिः ॥
"स्नापयेत् स्निग्धमिश्रादीन् स्नातीस्तीर्थे नरोत्तमः ।
अन्यथापहरन्त्येते बलात्तीर्थभवं फलम् ॥"
इति स्कान्दम् ॥
"मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ।
यस्तिरश्य निमज्जेत अष्टभागं लभेत सः ॥"
इति प्रायश्चित्ततत्त्वे मार्कण्डेयपुराणम् ॥ * ॥
कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा,—
"सरस्वती पुण्यचित्रमाजगाम च भारतम् ।
गङ्गा भागेन कलया स्वयं तस्थौ हरेः पदे ॥
पद्मावतीगिरिरथानीता मर्त्तीं भागीरथी शुभा ।
समाजगाम कलया वाणी भागेन नारद ! ॥
पद्मा जगाम कलया सा च पद्मावती नदी ।
भारतं भारती भागात् स्वयं तस्थौ हरेः पदे ॥
कले: पञ्चसहस्रञ्च वर्षं स्थित्वा च भारते ।
जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् ॥
यानि सर्व्वाणि तीर्थानि कार्त्तीं वृन्दावनं विना ।
यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः ॥"
तीर्थप्रतिग्रहे दोषो यथा,—
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वटस्याच्च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमाचये ॥
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
यानादिना गमने दोषो यथा,—
"पुण्यार्द्धं हरते याने तदर्द्धं छत्रपादुके ।
तदर्द्धं तैलमांसाभ्यां सर्व्वं हरति मैथुने ॥"
इति कर्म्मलोचनम् ॥ * ॥
युगभेदे तीर्थविशेषस्य श्रेष्ठत्वं प्राह्वे ।
"कृते तु पुष्करं तीर्थं त्रेतायां नैमिषन्तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥"
तीर्थसंख्या यथा,—
"तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुवन्तरीक्षे च तानि ते सन्ति जाह्नवि ! ॥"
अथ भूमण्डलस्य प्रादक्षिण्येन तीर्थानि यथा ।
पुष्करम् तत्तु ब्रह्मणः स्थानं तीर्थराजेति नाम्ना ख्यातं तत्र त्रिसन्ध्यं दशकोटितीर्थान्यायान्ति । तस्य फलं अश्वमेधतुल्यं ब्रह्मलोकगमनञ्च । जम्बू-

मार्गः २ तस्य फलं अश्वमेधतुल्यं विष्णुप्राप्तिश्च ॥ तण्डुलिकाश्रमः ३ तस्य फलं दुर्गतिविनाशः ब्रह्मलोकप्राप्तिश्च ॥ अगस्त्यसरः ४ तत्र चिरात्रोपवासेन वाजपेयतुल्यं फलं शाकाहारेण कौमारलोकप्राप्तिश्च ॥ धर्मारण्यम् ५ तत्तु कण्वाश्रमः तस्य फलं प्रवेशमात्रेण पापक्षयः देवपितृपूजनेन अश्वमेधतुल्यं फलं विबुधलोकप्राप्तिश्च ॥ ययातिपतनम् ६ तत्र गमनेन अश्वमेधयज्ञतुल्यं फलम् ॥ कोटितीर्थम् ७ तत्र महाकालस्तिष्ठति स्नानेन अश्वमेधतुल्यं फलम् ॥ भद्रवटः ८ तत्र उमापतिस्तिष्ठति तं दृष्ट्वा गोसहस्रदानफलं दर्शनस्य गाणपत्यश्च भवति ॥ नर्मदा नदी ९ तत्र पितृदेवतर्पणात् अग्निष्टोमतुल्यं फलम् । दक्षिणसिन्धुः १० तत्र ब्रह्मचर्येण अग्निष्टोमतुल्यं फलं त्रिदिवप्राप्तिश्च । चर्मण्वती नदी ११ तत्रेन्द्रियसंयमनेन ज्योतिष्टोमफलम् । हिमवत्सुतार्बुदः १२ तत्र वशिष्ठाश्रमः तस्मिन्नेकरात्रवासेन गोसहस्रदानफलम् । पिङ्गतीर्थम् १३ तत्रेन्द्रियसंयमनेन सवत्सशतकपिलादानफलम् । प्रभासः १४ तत्र हुताशनस्तिष्ठति तत्र स्नानेन अग्निष्टोमातिरात्रयोः फलम् । सरस्वतीसागरसङ्गमः १५ तत्र स्नानेन गोसहस्रदानफलं चिरात्रोपवासेन पितृदेवतर्पणेन च अश्वमेधफलम् । वरदानम् १६ यत्र विष्णवे दुर्वाससा वरो दत्तः तत्र स्नानेन गोसहस्रदानफलम् । द्वारवत्यां पिण्डारकतीर्थम् १७ तत्र पद्मचिह्नयुक्ता मुद्राः शूलचिह्नितानि पद्मानि अद्यापि दृश्यन्ते महादेवस्तिष्ठति स्नानेन बहुसुवर्णयज्ञफलम् । समुद्रसिन्धुसङ्गमः १८ तत्र स्नानेन पितृदेवतर्पणेन च वरुणलोकप्राप्तिः । द्रिमीतीर्थम् १९ तत्र महादेवस्तिष्ठति तत्र स्नानेनाश्वमेधफलं महादेवदर्शनार्चनाभ्यां सर्वपापनाशः । वसुधारा २० तस्या दर्शनेन अश्वमेधफलं स्नानतर्पणाभ्यां विष्णुलोकप्राप्तिः । सिन्धूत्तमम् २१ तत्र स्नानेन बहुसुवर्णयज्ञफलम् । यदुतुङ्गम् २२ तत्र गमनेन ब्रह्मलोकप्राप्तिः । कुमारिकाशुक्रतीर्थम् २३ तत्र स्नानेन विमलत्वं भवति । पञ्चनदः २४ तत्र पञ्चयज्ञफलम् । भीमास्थानम् २५ तत्र स्नात्वा नरो देवीपुत्रो भवति गोसहस्रदानफलञ्च लभते । गिरिकुब्जम् २६ तत्र ब्रह्मा तिष्ठति तस्य नत्वा गोसहस्रदानफलम् । विमलतीर्थम् २७ अद्यापि तत्र सौवर्णराजतमत्स्या दृश्यन्ते तत्र स्नानपानाभ्यां वाजपेयफलम् । वितस्ता नदी २८ तत्र तर्पणेन वाजपेयफलं स्वर्गप्राप्तिश्च । काश्मीरे वितस्ताख्यं तत्रकनागसदनम् २९ तत्र स्नानेन वाजपेयफलं विष्णुलोकप्राप्तिश्च । ग्रामपरा ३० तत्र सायंसन्ध्यायां स्नानेन सप्तार्चिषे चरुनिवेदनेन च अश्वमेधसहस्राधिकफलम् । रुद्रास्यदम् ३१ तत्र महादेवदर्शनात् अश्वमधफलम् । मणिमान् पर्वतः ३२ तत्र चिरात्रोपवासेन ज्योतिष्टोमफलम् । देविका नदी ३३ तत्र महादेवस्थानम् तत्र स्नानमहादेवदर्शनाभ्यां महादेवाय चरुनिवेदनेन च सर्वकामप्राप्तिर्देवलोकप्राप्तिश्च । देविकायां रुद्रतीर्थे तत्र स्नानात् सिद्धिप्राप्तिः । एवं देविकायां यजनयाजनब्रह्मवालुकपुण्यन्याससंज्ञकानि तीर्थानि तेषु स्नानात् मरणभयविनाशः । दीर्घसत्रम् ३४ तत्र गमनादेव दीर्घसत्रफलप्राप्तिः राजसूयाश्वमेधफलप्राप्तिश्च । विनशनम् ३५ मेरुपृष्ठे अन्तर्हिता सरस्वती यत्र याति सा चमसतीर्थे एवं शिरोद्भेदे नागोद्भेदे च दृश्यते चमसे स्नानात् वाजपेयफलं नागोद्भेदे स्नानात् नागलोकप्राप्तिः । अग्निपानतीर्थम् ३६ तत्र स्नानात् शिववद्दीप्तिः गोसहस्रदानफलप्राप्तिश्च । कुमारकोटी ३७ तत्र स्नानेन पितृदेवपूजनेन च गवामययागफलप्राप्तिः । रुद्रकोटी ३८ यत्र कोटिर्ऋषयो मिलिता अहमग्रे रुद्रं द्रक्ष्यामीति प्रस्थितानां तेषां सन्तोषार्थं एको रुद्रः कोटिर्ऋषीणां अभवत् । तत्र स्नानात् अश्वमेधफलप्राप्तिः कुलोद्धरणञ्च । सरस्वतीसङ्गमः ३९ तत्र जनार्दनस्तिष्ठति तत्र स्नानात् बहुसुवर्णयागफलप्राप्तिः । सयावसानम् ४० तत्र गमनात् गोसहस्रदानफलप्राप्तिः । कुरुक्षेत्रम् ४१ तत्र गमनात् सर्वपापक्षयः ततो मचक्रुकद्वारपालस्य नमस्कारेण गोसहस्रदानफलप्राप्तिः । विष्णुस्थानं ४२ तत्र स्नानात् विष्णुदर्शनात् अश्वमेधफलं विष्णुलोकप्राप्तिश्च । परिप्लवम् ४३ तत्र अग्निष्टोमातिरात्रयागफलप्राप्तिः । पृथिवीतीर्थम् ४४ तत्र गोसहस्रदानफलम् । शालूकिनीतीर्थम् ४५ तत्र दशाश्वमेधिके स्नानात् गोसहस्रदानफलम् । सर्पिर्हृदौ ४६ सा नागतीर्थं तत्र गमनेन अग्निष्टोमफलं नागलोकप्राप्तिश्च । अवर्णकद्वारपालः ४७ तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः । पद्मदम् ४८ तत्र कोटितीर्थे स्नानात् अश्वमेधफलम् । अश्वितीर्थम् ४९ तत्र रूपप्राप्तिः । वराहतीर्थम् ५० यत्र वराहरूपी विष्णुः स्थितः तत्र स्नानात् अग्निष्टोमफलप्राप्तिः । जयन्तम् ५१ तत्र सोमतीर्थे स्नानात् राजसूयफलप्राप्तिः । एकहंसतीर्थम् ५२ तत्र गोसहस्रदानफलप्राप्तिः । क्षतशौचम् ५३ तत्र गमनात् पुण्डरीकयज्ञफलप्राप्तिः । सुज्ञावटतीर्थम् ५४ तत्तु महादेवस्थानं तत्रैकरजनीवासात् गाणपत्यप्राप्तिः तत्रैव विप्रालाचीयक्षीदर्शनात् सर्वकामप्राप्तिः । रामह्रदः ५५ यत्र रामेण क्षात्रं सुतत्साद्य तेषां रक्तेन पञ्च ह्रदाः कृताः तेषु स्नानतर्पणाभ्यां पितृगणाद् वरप्राप्तिः बहुसुवर्णयज्ञफलप्राप्तिश्च । वंशमूलकम् ५७ तत्र स्नानात् स्वकुलोद्धरणम् । कायशोधनम् ५८ तत्र स्नानात् देहशुद्धिः । लोकोद्धारः ५९ तत्र स्नानात् स्वकीयलोकोद्धारः । श्रीतीर्थम् ६० तत्र गमनात् उत्तमश्रीप्राप्तिः । कपिलातीर्थम् ६१ तत्र स्नानदेवपितृपूजनाभ्यां कपिलासहस्रदानफलम् । सूर्यतीर्थम् ६२ तत्र स्नानोपवासपितृपूजनैरग्निष्टोमफलं देवलोकप्राप्तिश्च । गवां भवनम् ६३ तत्राभिषेकेण गोसहस्रदानफलम् । गृध्रिणीतीर्थम् ६४ तत्र स्नानात् उत्तमवीर्यप्राप्तिः । ब्रह्मावर्तः ६५ तत्र स्नानात् ब्रह्मलोकप्राप्तिः । सुतीर्थकम् ६६ तत्र पितृदेवानां सान्निध्यं तत्र स्नानपितृदेवपूजनैरश्वमेधफलं पितृलोकप्राप्तिश्च । अम्बुमतीह्रदः ६७ तत्र काश्मीश्वरतीर्थे स्नानात् सर्वरोगनाशः ब्रह्मलोकप्राप्तिश्च तत्रैव माल्यतीर्थं तत्र स्नानात् सन्तानवृद्धिः श्रीप्राप्तिश्च ॥ घृतवनम् ६८ तत्र केशाभ्युक्षणेन पवित्रता ॥ स्वायम्भुवह्रदः ६९ तत्र स्नानात् परमगतिप्राप्तिः । दशाश्वमेधिकम् ७० तत्र स्नानात् निष्कलगतिप्राप्तिः ॥ मानुषतीर्थम् ७१ तत्र व्याधपीडिताः क्षणाच्चतुर्भुजा विगाह्य मानुषत्वं प्राप्ताः तत्र स्नानात् सर्वपापमुक्तिः स्वर्गवसतिश्च ॥ आपगानदी ७२ तत्र देवपितृहविर्भोजनैकब्राह्मणभोजनेन कोटिब्राह्मणभोजनसिद्धिः ॥ अक्षोडसरः ७३ तत्र ब्रह्मा तिष्ठति तत्र सप्तर्षिकुण्डे स्नानात् सर्वपापनाशो ब्रह्मलोकप्राप्तिश्च । कपिलस्य केदारम् ७४ तत्र तपसा सर्वपापनाशः अन्तर्धानप्राप्तिश्च । सरकम् ७५ तत्र दृषध्वजप्रणामेन सर्वकामशिवलोकयोः प्राप्तिः । इलासदम् ७६ तत्र स्नानदेवपितृपूजनाभ्यां दुर्गतिविनाशः वाजपेयफलप्राप्तिश्च । किन्दानम् ७७ तत्र स्नानादप्रमेयदानफलम् । किंशप्यम् ७८ तत्र स्नानात् अप्रमेयतपफलम् ॥ अनाशकतीर्थम् ७९ तत्र नारदस्थानं तत्र प्राणत्यागात् अच्युतलोकप्राप्तिः ॥ वैतरणी नदी ८० तत्र स्नानभूतपाणिपूजनाभ्यां सर्वपापमुक्तिः परमपदप्राप्तिश्च । फलकीतीर्थम् ८१ फलकीवने देवास्तपश्चरन्ति ॥ मिश्रकम् ८२ तत्र नारदेन सर्वतीर्थानि मिश्रितानि तत्र स्नानात् सर्वतीर्थस्नानफलम् ॥ मधुवटी ८३ सा देवीस्थानं तत्र स्नानदेवपितृपूजनाभ्यां गोसहस्रदानफलप्राप्तिः कौशिकीह्रदतीर्थसङ्गमः ८४ तत्र स्नानात् सर्वपापमुक्तिः । किन्दत्तकूपः ८५ तत्र तिलप्रस्थदानात् ऋणक्षयमुक्तिः परमसिद्धिप्राप्तिश्च । वेदीतीर्थम् ८६ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः ॥ अहः सुदिनं तीर्थत्रयम् ८७ तयोः स्नानात् सूर्यलोकप्राप्तिः । वृगधूमः ८८ तत्र विष्णुपदे स्नानात् वामनपूजनाच्च सर्वपापमुक्तिः रविलोकप्राप्तिश्च ॥ सरस्वत्यास्तीर्थे श्रीकुब्जम् ८९ तत्र स्नानात् स्वर्गवसतिः ॥ नैमिषकुब्जम् ९० तस्मिन् स्नानात् हयमेधफलप्राप्तिः । कन्यातीर्थम् ९१ तत्र स्नानात् ज्योतिष्टोमफलप्राप्तिः । ब्रह्मस्थानम् ९२ तत्र स्नानात् शूद्रस्यापि ब्राह्मणत्वं ब्राह्मणस्य परमगतिः ॥ सोमतीर्थम् ९३ तत्र स्नानात् सोमयागफलप्राप्तिः ॥ सप्तसारस्ततीर्थम् ९४ तत्र स्नानजपाभ्यां ब्रह्मलोकप्राप्तिः ॥ औशनसकम् ९५ तत्र त्रिसन्ध्यं कार्तिकेयस्य सन्निधानम् । कपालमोचनम् ९६ तत्र स्नानात् सर्वपापनाशः ॥ अग्नितीर्थम् ९७ तत्र स्नानात् वह्निलोकप्रा

कुलोद्धरणम्च। विश्वामित्रतीर्थम् ९८ तत्र स्नानात् ब्रह्मण्यप्राप्तिः। ब्रह्मयोनिः ९९ तत्र स्नानात् ब्रह्मलोके वासः। पृथूदकम् १०० तत् कार्त्तिकेयस्थानं तत्राभिषेकात् अश्वमेधफलप्राप्तिः पापिनामपि स्वर्गप्राप्तिः। मधुस्रवम् १०१ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः॥ सरस्वत्यरुणासङ्गमः १०२ तत्र चिरात्रोपवासस्नानाभ्यां ब्रह्महत्यापापनाशः। अवकीर्णम् १०३ तत् दर्भिमुनिनिर्म्मितं दर्भिणा चत्वारः समुद्रा आनीताः तत्र स्नानात् दुर्गतिविनाशः। शतसहस्रकम् १०४ साहस्रकम् १०५ उभयत्र स्नानात् गोसहस्रदानफलं दानोपवासौ सहस्रगुणौ भवेत्॥ रेणुकातीर्थम् १०६ तत्राभिषेकपिलदेवपूजनाभ्यां सर्व्वपापनाशः अग्निष्टोमफलप्राप्तिश्च। विमोचनम् १०७ तत्र स्नानात् सर्व्वप्रतिग्रहजतपापनाशः। पञ्चवटतीर्थम् १०८ तत्र गमनात् महापुण्यप्राप्तिः स्वर्गगमनम्च॥ तैजसम् १०९ यत्र ब्रह्मादिभिः सेनापत्ये कार्त्तिकेयोऽभिषिक्तः। कुरुतीर्थम् ११० तत्र स्नानात् रुद्रलोकप्राप्तिः। स्वर्गद्वारम् १११ तत्र गमनात् स्वर्गलोकाग्निष्टोमफलप्राप्तिः। अनरकम् ११२ तत्र स्नानात् दुर्गतिनाशः। अस्थिपुरम् ११३ तत्र पिलदेवतर्पणात् अग्निष्टोमफलप्राप्तिः। गङ्गाह्रदकूपः ११४ तत्र स्नानात् ब्रह्मलोकप्राप्तिः। स्थाणुवटतीर्थम् ११५ तत्र स्नानैकरात्रवासाभ्यां रुद्रलोकप्राप्तिः। बदरीपाचनम् ११६ तत्तु वशिष्ठाश्रमः तत्र चिरात्रोपवासबदरभक्षणाभ्यां अश्वमेधफलम् हरलोकप्राप्तिश्च। इन्द्रमार्गम् ११७ तत्राहोरात्रोपवासात् इन्द्रलोकप्राप्तिः। आदित्याश्रमः ११८ तत्र स्नानात् सूर्य्यलोकप्राप्तिः। सोमतीर्थम् ११९ तत्र स्नानात् सोमलोकप्राप्तिः। कन्याश्रमः १२० तत्र चिरात्रवासोपवासाभ्यां कन्याव्रतप्राप्तिः ब्रह्मलोकगमनम्च। दधीचतीर्थम् १२१ तत्र स्नानात् वाजपेयफलप्राप्तिः। सन्निहितातीर्थम् १२२ तत्र अमावस्यायां सर्व्वाणि तीर्थान्यायान्ति एवं सूर्य्यग्रहणे स्नानात् शतअश्वमेधफलप्राप्तिः स्नानदानाभ्यां स्वर्गलोकप्राप्तिश्च। तत्रामावस्यायां सूर्य्यग्रहणे स्नानश्राद्धाभ्यां अश्वमेधसहस्रफलप्राप्तिः। स्नानमात्रात् सर्व्वपापनाशः ब्रह्मलोकप्राप्तिश्च॥ गङ्गाह्रदः १२३ तत्र स्नानात् राजसूयाश्वमेधफलप्राप्तिः। कुरुक्षेत्रम् १२४ तत् तरन्तुकारन्तुकयोः एवं रामह्रदमक्रुकयोरन्तरं एतत् खमन्तपञ्चकं पितामहस्योत्तरवेदिः॥ धर्म्मतीर्थम् १२५ तत्र स्नानादासप्तमकुलोद्धरणम्॥ कारापचनम् १२६ तत्र स्नानात् अग्निष्टोमफलं विष्णुलोकप्राप्तिश्च। सौगन्धिकवनम् १२७ यत्र ब्रह्मादयो देवाः प्रत्यहमायान्ति तद्दनप्रवेशमात्रेण सर्व्वपापनाशः॥ ब्रह्मसरस्वती १२८ तत्र स्नानपिलदेवपूजनाभ्यां अश्वमेधफलप्राप्तिः। ईशानाधुषितम् १२९ तत्र शाकम्भरी देवी तत्र चिरात्रोपवासशाकाहाराभ्यां द्वादशवर्षशाकाहारफलप्राप्तिः। सवर्णाख्यम् १३० तत्र शिवस्तिष्ठति तस्य पूजनात् अश्वमेधफलगाणपत्ययोः प्राप्तिः। धूमावती १३१ तत्र चिरात्रोपवासात् मनस्कामप्राप्तिः। धूमावती दक्षिणार्द्धे रथावर्त्तः १३२ तत्रारोहणेन महादेवप्रसादात् परमगतिप्राप्तिः। धारा १३३ तत्र स्नानात् श्लोकनाशः। गङ्गाद्वारम् १३४ तत्र कोटितीर्थे स्नानात् पुण्डरीकयागफलप्राप्तिः कुलोद्धरणं एकरात्रवासेन गोसहस्रदानफलप्राप्तिश्च। सप्तगङ्गम् १३५ त्रिगङ्गम् १३६ सप्तावर्त्तः १३७ एतेषु पिलदेवतर्पणात् पुण्यलोकप्राप्तिः। गङ्गायमुनासङ्गमः १३८ तत्र स्नानात् दशाश्वमेधफलप्राप्तिः कुलोद्धरणम्च। कनखलः १३९ तत्र स्नानत्रिरात्रोपवासाभ्यां वाजिमेधफलब्रह्मलोकयोः प्राप्तिः॥ कपिलावटः १४० तत्रैकरात्रवासेन गोसहस्रदानफलप्राप्तिः। कपिलनागराजः १४१ तत्राभिषेकात् कपिलासहस्रदानफलप्राप्तिः। ललितिका १४२ सा शान्तनुतीर्थं तत्र स्नानात् दुर्गतिविनाशः॥ सुगन्धा १४३ तत्र गमनात् सर्व्वपापविशुद्धिः ब्रह्मलोकप्राप्तिश्च। रुद्रावर्त्तः १४४ तत्र स्नानात् ब्रह्मलोकप्राप्तिः॥ गङ्गासरस्वतीसङ्गमः १४५ तत्र स्नानात् अश्वमेधफलप्राप्तिः स्वर्गगमनम्च॥ भद्रकर्णह्रदः १४६ तत्र स्नानश्राद्धपूजनाभ्यां दुर्गतिनाशः विष्णुलोकप्राप्तिश्च। कुब्जाम्रकम् १४७ तत्र गमनात् स्वर्गप्राप्तिः। अरुन्धतीवटः १४८ तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः कुलोद्धरणम्च। वासुद्रकम् १४९ तत्र चिरात्रोपवासेन गोसहस्रदानफलं कुलोद्धरणम्च॥ ब्रह्मावर्त्तः १५० तत्र गमनात् अग्निष्टोमफलं ब्रह्मलोकप्राप्तिश्च। यमुनाप्रभवः १५१ तत्र स्नानात् अश्वमेधफलस्वर्गलोकयोः प्राप्तिः॥ दर्व्वीसंक्रमणम् १५२ तत्र गमनात् वाजिमेधफलप्राप्तिः ब्रह्मलोकगमनम्च। सिन्धुप्रभवः १५३ तत्र पञ्चरात्रवासात् बहुसुवर्णयज्ञफलप्राप्तिः॥ अर्थवेदी १५४ तत्र गमनात् अश्वमेधफलस्वर्गयोः प्राप्तिः॥ वाग्विशी नदी तत्रैव ऋषिकुल्या १५५ वाग्विशी गमनात् सर्व्ववर्णानां द्विजत्वप्राप्तिः ऋषिकुल्यायां स्नानैकमासवासश्राकाहारैः ऋषिलोकप्राप्तिः॥ भृङ्गतुङ्गम् १५६ तत्र गमनात् वाजिमेधफलप्राप्तिः॥ वीरप्रमोचः १५७ तत्र गमनात् सर्व्वपापप्रणाशः॥ सन्ध्या सा विद्यातीर्थम् १५८ उक्त स्नानात् यत्र तत्रैव विद्याप्राप्तिः॥ महाश्रमः १५९ तत्रैककालनिराहारात् शुभलोकप्राप्तिः॥ महालयः १६० तत्र षष्ठकालोपवासेनैकमासवासात् आत्मना सप्तैकविंशतिपुरुषोद्धारः तत्रैव महेश्वरदर्शनात् सर्व्वपापमरणभययोर्विनाशः बहुसुवर्णयागफलप्राप्तिश्च॥ वेतसीका १६१ तत्र गमनात् अश्वमेधफलं औशनसगतिप्राप्तिश्च॥ सुन्दरिका १६२ तत्र गमनात् रूपप्राप्तिः॥ ब्राह्मणिका १६३ तत्र गमनात् ब्रह्मलोकप्राप्तिः। नैमिषम् १६४ तत्र ब्रह्मा तिष्ठति तत्र प्रवेशात् सर्व्वपापनाशः स्नानात् गवामयययागफलप्राप्तिः सप्तकुलोद्धारः उपवासेन प्राणत्यागात् स्वर्गप्राप्तिश्च॥ गङ्गोद्भेदः १६५ तत्र चिरात्रोपवासात् वाजिमेधफलप्राप्तिः विष्णुलोकवासश्च॥ सरस्वती १६६ तत्र पिलदेवतर्पणात् सारस्वतलोकवासः॥ वाहुदा नदी १६७ तत्रैकरात्रिवासात् ब्रह्मलोकप्राप्तिः। गोप्रचारतीर्थम् १६८ ततु सरयूतीरं तत्र स्नानात् सर्व्वपापनाशः देवलोकप्राप्तिश्च॥ गोमत्यां रामतीर्थम् १६९ तत्र स्नानात् अश्वमेधफलप्राप्तिः निजकुलपावनम्च। साहस्रवम् १७० तत्र गमनात् राजसूयाश्वमेधफलप्राप्तिः। राजगृहम् १७१ तत्र स्नानात् कुबेरवदाह्लादप्राप्तिः। मणिनागः १७२ तत्र गमनात् गोसहस्रदानफलप्राप्तिः एवं तत् समीपे नित्यकर्म्मकरणात् सर्पविषभयनाशः एकरात्रवासात् सर्व्वपापनाशश्च। गोतमवनम् १७३ तत्र अहल्याह्रदे स्नानात् परमगतिप्राप्तिः। श्रीदेवी १७४ तत्र गमनात् श्रीप्राप्तिः। उदपानम् १७५ तत्राभिषेकात् वाजिमेधफलप्राप्तिः। जनकराजकूपः १७६ तत्राभिषेकात् विष्णुलोकप्राप्तिः॥ विनशनम् १७७ तत्र गमनात् वाजपेयफलप्राप्तिः। विशल्या १७८ सा सर्व्वतीर्थजलोद्भवा तत्र गमनात् वाजपेयफलप्राप्तिः रविलोकगमनम्च॥ तपोवनम् १७९ तत्राधिवासात् गुह्यकलोकवासः। कन्यना नदी १८० सा सिद्धनिषेविता तत्र गमनात् पुण्डरीकयागफलप्राप्तिः। विशल्या नदी १८१ तत्र गमनात् अग्निष्टोमफलं देवलोके चिरवासश्च। माहेश्वरी १८२ तत्र गमनात् अश्वमेधफलप्राप्तिः स्वकुलोद्धरणम्च। दिवौकःपुष्करिणी १८३ तत्र गमनात् दुर्गतिविनाशः वाजिमेधफलप्राप्तिश्च। रामपदम् १८४ तत्र गमनात् अश्वमेधफलम्। माहेश्वरपदम् १८५ तत्र स्नानात् अश्वमेधफलं तत्र तीर्थकोटी तत्र स्नानात् पुण्डरीकयागफलप्राप्तिः। नारायणस्थानम् १८६ यत्र शालग्रामनामा हरिस्तिष्ठति तत्र गमनात् अश्वमेधफलं विष्णुलोकगमनम्च। तत्रैव उदपानं यत्र चत्वारः समुद्राः सन्निहिताः तत्र स्नानात् दुर्गतिनाशः तत्र महादेवस्तिष्ठति तत्र गमनात् अश्वमेधफलप्राप्तिः इन्द्रलोकवासश्च॥ जातिस्मरः १८७ तत्र स्नानात् जातिस्मरत्वप्राप्तिः। वटेश्वरपुरम् १८८ तत्र केशवस्य दर्शनपूजनाभ्यासुपवासेन च वाञ्छितकामप्राप्तिः। वामनतीर्थम् १८९ तत्र गमनात् दुर्गतिविनाशः विष्णुलोकप्राप्तिश्च। तत्र कौशिकी तिष्ठति तस्याः सेवनात् राजसूययज्ञफलप्राप्तिः। चम्पकारण्यम् १९० तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः। गोष्ठीनम् १९१ तत्रैकरात्रोपवासात् अग्निष्टोमफलप्राप्तिः। तत्र देवा सह विश्वे-

श्च रक्षिष्यति तस्य दर्शनात् मित्रावरुणलोकवासः ॥ कन्यासंवेद्यम् १६२ तत्राहारजयात् मनुलोकप्राप्तिः तत्रान्नदानमक्षयं भवति ॥ निर्झरा नदी १६३ तत्र गमनात् अश्वमेधफलप्राप्तिः स्वकुलोद्धरणञ्च । निर्झरासङ्गमे अन्नदानेन ब्रह्मलोकगमनम् । तत्र वशिष्ठाश्रमः तत्राभिषेकात् वाजपेयफलप्राप्तिः ॥ देवकूटम् १६४ तत्र गमनात् वाजिमेधफलप्राप्तिः कुलोद्धरणञ्च ॥ कौशिकमुनिह्रदः १६५ तत्र मासवासात् अश्वमेधफलप्राप्तिः ॥ सर्व्वतीर्थवरह्रदः १६६ तत्र वासात् बहुसुवर्णयागफलप्राप्तिः दुर्गतिविनाशश्च ॥ वीराश्रमः १६७ तत्र कुमारस्तिष्ठति तत्र गमनात् अश्वमेधफलप्राप्तिः । अग्निधारा १६८ तत्र गमनात् अश्वमेधफलप्राप्तिः कुलोद्धरणञ्च । पितामहसरः १६९ तत्र शैलराजप्रतिष्ठितौ शिवविष्णू तिष्ठतः तत्राभिषेकात् अग्निष्टोमफलप्राप्तिः । तत्रैव कुमारधारा तत्र स्नानात् कृतार्थता त्रिकालोपवासेन ब्रह्महत्यानाशः ॥ गौरीशिखरम् २०० तत्रारोहणात् शुद्धता तत्र कुण्डे स्नानपिण्डदेवार्चनाभ्यां अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च । ताम्रारुणा २०१ तत्र गमनात् वाजिमेधफलप्राप्तिः शुक्रलोकगमनञ्च ॥ नन्दिनी २०२ तत्र चिरदेवसेवितः कूपः तत्र गमनात् नरमेधफलप्राप्तिः ॥ कौशिकारण्यसङ्गमः २०३ तत्र चिरात्रोपवासात् सर्व्वपापमुक्तिः ॥ उर्व्वशीतीर्थम् २०४ सोमाश्रमः २०५ कुम्भकर्णाश्रमः २०६ तेषु स्नानात् अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च ॥ कोकामुखम् २०७ तत्र स्नानात् जातिस्मरत्वम् ॥ नन्दा २०८ तत्र गमनात् कृतार्थता सर्व्वपापनाशः स्वर्गगमनञ्च । ऋषभद्वीपः २०९ तत्र क्रौञ्चनिसूदनसेवनात् सरस्वत्यां स्नानाच्च विमाने विराजः ॥ औद्दालकतीर्थम् २१० तत्राभिषेकात् सर्व्वपापनाशः । ब्रह्मतीर्थम् २११ तत्र गमनात् वाजपेयफलप्राप्तिः । चम्पा २१२ तत्र गमनात् गोसहस्रदानफलप्राप्तिः । नरेतिका २१३ तत्र गमनात् वाजपेयफलं विमानप्राप्तिश्च । संविद्यतीर्थम् २१४ तत्र स्नानात् विद्याप्राप्तिः । लौहित्यम् २१५ तत्र गमनात् बहुसुवर्णयागफलप्राप्तिः । करतोया २१६ तत्र चिरात्रोपवासात् वृषभैकादशदानफलप्राप्तिः ॥ कोशलायां कालतीर्थम् २१७ तत्र गमनात् गोसहस्रदानफलप्राप्तिः स्वर्गगमनञ्च । गङ्गासागरसङ्गमः २१८ तत्र गमनात् अश्वमेधफलप्राप्तिः । गङ्गायाः परद्वीपः २१९ तत्र स्नानचिरात्रोपवासाभ्यां सर्व्वकामप्राप्तिः । वैतरणी २२० तत्र गमनात् सर्व्वपापनाशः ॥ विरजम् २२१ तत्र गमनात् चन्द्रवद्दीप्तिः ॥ प्रभवः २२२ तत्र गमनात् सर्व्वपापनाशः गोसहस्रदानफलस्वकुलपावनञ्च । प्रोष्ठपदीतीर्थसङ्गमः २२३ तत्र पिण्डदेवतर्पणात् अग्निष्टोमफलप्राप्तिः ॥ प्रोष्ठपदप्रभवः २२४ नर्म्मदाप्रभवः २२५ वंशगुल्मः २२६ तत्र स्नानात् वाजिमेधफलप्राप्तिः । ऋषभः २२७ तत्र गमनात् गोसहस्रदानफलप्राप्तिः । पुष्पवती २२८ तत्र स्नानचिरात्रोपवासाभ्यां गोसहस्रदानफलप्राप्तिः कुलोद्धरणञ्च ॥ वदरिकम् २२९ तत्र स्नानात् दीर्घायुष्टप्राप्तिः स्वर्गगमनञ्च । महेन्द्रपर्व्वतः २३० तत्र रामतीर्थे स्नानात् वाजिमेधफलप्राप्तिः । मतङ्गकेदारम् २३१ तत्र स्नानात् स्वर्गलोकप्राप्तिः । श्रीपर्व्वतः २३२ तत्र नदीतीरे स्नानात् अश्वमेधफलं परमसिद्धिप्राप्तिञ्च तत्र महादेवो देव्या सह तिष्ठति तत्र देवह्रदे स्नानात् अश्वमेधफलप्राप्तिः शिवलोकगमनञ्च । पाञ्चालदेशे ऋषभपर्व्वतः २३३ तत्र गमनात् वाजपेयफलप्राप्तिः स्वर्गगमनञ्च ॥ कावेरी २३४ तत्र गमनात् गोसहस्रदानफलम् । समुद्रतीरे कन्यातीर्थम् २३५ तत्र स्नानात् सर्व्वपापनाशः । समुद्रमध्ये गोकर्णतीर्थम् २३६ तत्र शिवस्तिष्ठति तस्य पूजनात् चिरात्रोपवासाच्च दशाश्वमेधतुल्यफलज्ञानपत्यप्राप्तिः । द्वादशरात्रोपवासात् कृतार्थता च । तत्र गायत्रीस्थानं तत्र चिरात्रोपवासात् गोसहस्रदानफलप्राप्तिः ब्राह्मणस्य गायत्रीपाठात् सदा सम्पन्नता अब्राह्मणस्य पाठात् तस्या विनाशः ॥ समर्णवापी २३७ तत्र गमनात् रूपसौभाग्यप्राप्तिः । वेला २३८ तत्र पिण्डदेवतर्पणात् मयूरहंसयुक्तविमानप्राप्तिः ॥ गोदावरी २३९ तत्र गमनेन गवामयज्ञफलप्राप्तिः वायुलोकगमनञ्च । वेलासङ्गमः २४० तत्र स्नानात् सर्व्वपापनाशः । वरदासङ्गमः २४१ तत्र स्नानात् वाजिमेधफलप्राप्तिः । ब्रह्मस्थूणा २४२ तत्र चिरात्रोपवासात् गोसहस्रदानफलप्राप्तिः स्वर्गगमनञ्च । कुशप्लवनम् २४३ तत्र स्नानचिरात्रोपवासाभ्यां चन्द्रलोकप्राप्तिः । देवह्रदः २४४ ब्रह्मवेलासङ्गववनम् २४५ ज्योतिर्मार्चह्रदः २४६ कन्याश्रमः २४७ तेषु गमनात् अग्निष्टोमफलप्राप्तिः । देवह्रदे स्नानात् गोसहस्रदानफलप्राप्तिः । ज्योतिर्मार्चह्रदे स्नानात् जातिस्मरत्वम् ॥ पयोष्णी नदी २४८ तत्र स्नानतर्पणाभ्यां गोसहस्रदानफलप्राप्तिः । दण्डकारण्यम् २४९ तत्र महाराजे जलस्पर्शात् गोसहस्रदानफलप्राप्तिः । शरभङ्गाश्रमः २५० कुशाश्रमः २५१ तत्र गमनात् दुर्गतिनाशः कुलपवित्रता च ॥ सूर्पारकम् २५२ तत्तु रामतीर्थम् तत्र स्नानात् बहुसुवर्णयज्ञफलप्राप्तिः । सप्तगोदावरम् २५३ तत्र स्नानात् महापुण्यप्राप्तिः देवलोकगमनञ्च । देवपथम् २५४ तत्र गमनेन देवसत्रफलप्राप्तिः ॥ तुङ्गकारण्यम् २५५ तत्र प्रवेशात् सद्यः पापनाशः मासवासात् स्वकुलस्य पवित्रता ब्रह्मलोकगमनञ्च । मेधाविकम् २५६ तत्र पिण्डदेवतर्पणात् अग्निष्टोमफलस्मृतिमेधानां प्राप्तिः ॥ कालञ्जरपर्व्वतः २५७ तत्र देवह्रदे स्नानात् सूर्य्यलोकप्राप्तिः । चित्रकूटपर्व्वतः २५८ तत्र मन्दाकिन्यां स्नानपिण्डदेवतर्पणाभ्यां अश्वमेधफलप्राप्तिः परमगतिलाभश्च ॥ भर्तृस्थानम् २५९ तत्र कार्त्तिकेयस्तिष्ठति तत्र गमनात् सर्व्वकामप्राप्तिः । कोटितीर्थे स्नानात् गोसहस्रदानफलप्राप्तिः । ज्येष्ठस्थानम् २६० तत्र महादेवस्तिष्ठति तद्दर्शनात् चन्द्रवद्दीप्तिः । तत्र कूपे चत्वारः समुद्रास्तिष्ठन्ति तत्र स्नानपदक्षिणाभ्यां परमगतिप्राप्तिः । शृङ्गवेरपुरम् २६१ यत्र रामो गङ्गासुत्तीर्णः तत्र स्नानात् सर्व्वपापनाशः विष्णुलोकप्राप्तिश्च । सुस्नावटः २६२ तत्र महादेवस्तिष्ठति तत्र पूजनप्रदक्षिणाभ्यां गाणपत्यप्राप्तिः । तत्तीर्थे जाह्नवीस्नानात् सर्व्वपापनाशः ॥ प्रयागः २६३ तत्र त्रीण्यग्निकुण्डानि तत्र यमुनया गङ्गा सङ्गता यत्र ब्रह्मादयो देवा सिद्धाः पितरः सनत्कुमारमुखा ऋषयो नागसुपर्णसिद्धऋतुगन्धर्व्वाप्सरसस्तिष्ठन्ति एवं वेदा यज्ञाश्च मूर्त्तिमन्तः ब्रह्माणमुपासते । स सर्व्वतीर्थेभ्योऽधिकः । तस्य नामसङ्कीर्त्तनश्रवणोत्तिकालभनैः सर्व्वपापनाशः तत्र स्नानात् त्रिलोके एवं वेदविद्यासु यत् पुण्यं तत्प्राप्तिः राजसूयाश्वमेधफलप्राप्तिश्च तत्र वपनं महत् ॥ भोगवती नाम वासुकितीर्थम् २६४ तत्राभिषेकात् अश्वमेधफलप्राप्तिः ॥ * ॥

"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
तासु वासं प्रकुर्व्वन्ति ये स्नाता वा नराः परम् ।
लभन्ते न पुनर्जन्म मातृगर्भेषु कुत्रचित् ॥"
इति पाद्मे भूमिखण्डम् ॥

ग्राह्यम् । अध्वरः । क्षेत्रम् । उपायः । (यथा, महाभारते । ५ । १२५ । २६ ।
"वासुदेवेन तीर्थेन तात ! गच्छस्व संगमम् ॥"
"तीर्थेन उपायेन ।" इति तट्टीकायां नीलकण्ठः ॥ अवसरः । यथा, भागवते ।३।१६।४।
"स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् ।
मानयन् स वृषे धर्म्मं विष्वक्सेनं प्रकोपयन् ॥")
नारीरजः । अवतारः । ऋषिजुष्टाम्बु । (यथा, रामायणे । १ । २ । ४ ।
"अकर्दमिदं तीर्थं भरद्वाज ! निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥")
पात्रम् । (यथा, मनुः । ३ । १३० ।
"दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥")
उपाध्यायः । (यथा, महाभारते ।४।४०।१८।
"शिक्षितो ह्यसि सारथ्ये तीर्थतः पुरुषर्षभ ! ॥"
"तीर्थतो गुरुतः ।" इति नीलकण्ठः ॥)
मन्त्री । इति मेदिनी । थे, ८ ॥ (मन्त्रिप्रभृत्यष्टादशप्रकृतयः । यथा, महाभारते । २ । ५ । ३८ ।
"कञ्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥"
"तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यवगाह्य

राजा कृतकृत्यो भवति। तानि चोक्तानि नीतिशास्त्रे यथा,—
'मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा॥
कारागाराधिकारी च द्रव्यसञ्चयकस्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः॥
प्रदेष्टा नगराध्यक्षः कार्य्यनिर्म्माणकस्तथा।
धर्म्माध्यक्षः सभाध्यक्षो दण्डपालस्त्रिपञ्चमः॥
घोड़ग्रो दुर्गपालश्च तथा राष्ट्रान्तपालकः।
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु॥
चारान् विचारयेत्तीर्थे स्वात्मनश्च परस्य च।
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि॥
मन्त्रिणं युवराजञ्च हित्वा खेषु पुरोहितम्॥'
इत्येषां तीर्थशब्दवाच्यत्वम्॥ हलायुधः।
योनौ जलावतारे च मन्त्रग्राह्यादग्रखपि।
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात् दर्शनेष्वपि॥"
इति तट्टीकायां नीलकण्ठः॥)
योनिः। दर्शनम्। वक्त्रः। इति हेमचन्द्रः॥
विप्रः। आगमः। निदानम्। अग्निः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (पुण्यकालः। इति स्वामी॥ यथा, भागवते। १। १२। १४।
"हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान्।
प्रादात् स्वनञ्च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्॥"
पुं. सन्ध्यासिनासुपाधिविशेषः। यथा, प्रायश्चित्तविवेके अवधूतप्रकरणे।
"त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे।
स्नायात्तत्त्वार्थभावेन तीर्थेनामा स उच्यते॥")
तीर्थकरः, पुं, (करोतीति करः। तीर्थस्य शास्त्रस्य पुण्यक्षेत्रस्य वा करः।) जिनः। इति हेमचन्द्रः। १। २४॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८७।
"मनोयवस्तीर्थकरो वसुरेता वसुप्रदः॥"
"चतुर्दशविद्यानां बाह्यविद्यामयानाञ्च प्रणेता प्रवक्ता चेति तीर्थकरः।" इति तट्टीकायम्॥)
तीर्थकृत्, पुं, (तीर्थं करोतीति। कृ+क्विप् तुगागमश्च।) जिनः। इति धरणिः॥
तीर्थङ्करः, पुं, (तीर्थं करोतीति। कृ+ख सुम् च।) जिनः। इति हेमचन्द्रः। १।२४॥
तीर्थयात्रा, स्त्री, (तीर्थे यात्रा गमनम्।) तीर्थगमनम्। तद्विधिनिषेधौ यथा,—
ऋषय ऊचुः।
"कर्म्मणा तीर्थयात्रासिन् लोके केन कथं द्विजैः।
श्रोतुं न एतदिच्छामो वद वह्निमतां मुने!॥
सूत उवाच।
एतत् श्रुत्वा ततः सूतः पुराणो मुनिसत्तमः।
प्रोवाच तान् मुनिश्रेष्ठान् स्वधर्म्मे ह्यनुतापघाः॥
यज्ञाधिकारे च गते द्विजेन्द्राः
सर्व्वस्वनाशे क्षितिपोऽथ वैश्यः।
शुश्रूषणायां बलवीर्य्यहीनः
शूद्रस्तु तीर्थानि भजेत् सुदान्तः॥
तस्मात्तुभिस्तीर्थगतिर्मुनीन्द्रैः
कार्य्या तथा तत्फलकाङ्क्षिभिश्च।
तां ब्रह्मचारी विधिवत् करोति
स्वयं यतो गुरुणा सन्नियुक्तः॥
नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिस्तीर्थगतिर्निगद्या।
मातुः पितुर्भक्तिमना गृहस्थः
सुतो न कुर्य्यात् खलु तीर्थयात्राम्॥
गङ्गाजलेनानुदिनं मनुष्यो
गङ्गोमयेनापि सदा सुनीन्द्राः।
स्नातोह सम्यक् यदि भावशुद्धः
फलं तदाप्नोति न चान्यदेतत्॥
सर्व्वाणि तीर्थानि हि यानि तानि
स्वर्गेऽन्तरीक्षेऽपि पुनः पृथिव्याम्।
तुल्यानि सम्यक् सुनयोऽभिहोत्रे
सदा गृहस्थाश्रमसंश्रितस्य॥
यस्येह यज्ञेष्वधिकारितास्ति
गृहेऽन्वहं दानवतो सुनीन्द्राः।
संक्षुब्धतः कल्कविवर्ज्जितस्य
तीर्थे गतिः पूर्व्वतरैर्निगद्या॥"
इति वह्निपुराणे १ अध्यायः॥
तीर्थराजी, स्त्री, (तीर्थानां राजी श्रेणिरिव। यद्वा, तीर्थेषु राजते शोभते इति। राज+क्विप्। ततो वा ङीष्।) काशी। इति त्रिकाण्डशेषः॥
तीर्थवाकः, पुं, (तीर्थस्येव वाको वचनमस्य। उक्तमाङ्गस्थित्या प्रश्नसनीयत्वादस्य तथात्वम्।) केशः। इति हेमचन्द्रः। ३। २३१॥
तीर्थसेवी, [न्] पुं स्त्री, (तीर्थं घट्टादिजलप्रान्तस्थानं सेवते इति। सेव+णिनिः।) वकपक्षी। इति राजनिर्घण्टः॥ तीर्थवासिनि, त्रि॥
तीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) तीवति। इति दुर्गादासः॥
तीवरः, पुं, (तीर्यते इति। तॄ प्लवनतरणयोः+"छित्वरच्छत्वरेति।" उणां ३। १। इति ष्वरच्प्रत्ययेन निपातनात् साधुः।) वसुदः। (तीरयति कर्म्मसमाप्तिं करोतीति। तीर+ष्वरच्। गुणाभावो रेफलोपश्च। इत्युज्ज्वलदत्तः।) व्याधः। इति मेदिनी। रे, १६३॥ वर्णसङ्करजातिविशेषः। तैयोर इति भाषा। स तु राजपुत्रस्त्रियां क्षत्रियाज्जातः। इति ब्रह्मवैवर्त्तम्॥ चूर्णकभार्य्यायां पुल्कसाज्जातः। इति पराशरपद्धतिः॥
तीवरी, स्त्री, (तीवर+ङित्त्वात् ङीप्।) व्याधपत्नी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
तीव्रं, क्ली, (तीव स्थौल्ये+बाहुलकात् रक्। तिज निशाने+बाहुलकात् रन्। दीर्घत्वम्। जकारस्य वकारः। इत्युज्ज्वलदत्तः। २।२८॥) अतिशयः। इत्यमरः। १। २। ७०॥ तीक्ष्णम्। तीक्ष्णम् त्रपु। इत्युणादिकोषः॥ लोहम्। इति राजनिर्घण्टः॥
तीव्रः, त्रि, (तिज+बाहुलकात् रन्।) दीर्घत्वादिकञ्च। अत्युग्रः। नितान्तः। (यथा, रघुः। ८।६५।
"तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखायलमसुक्तान्॥")
कटुः। इत्युणादिकोषः॥ (दुःसहः। यथा, आर्य्यासप्तशत्याम्। ६६१।
"हन्त विरहः समन्ताज्ज्वलयति दुर्व्वारतीव्रसंवेगः॥"
तीक्ष्णम्। यथा, तत्रैव।१५२।
"कृतकस्याप मदीयश्चासध्वनिदत्तकर्ण! किं तीव्रैः।
विध्यसि मां निश्वासैः सरः शरैः शब्दवेधीव॥")
शिवे, पुं। इति शब्दरत्नावली॥
तीव्रकण्डः, पुं, (तीव्रः कण्डो यस्मात्। अस्य भक्षणेन हि कण्डदेशे पीड़ोत्पत्तेस्तथात्वम्।) शूरणः। इति राजनिर्घण्टः॥
तीव्रगन्धा, स्त्री, (तीव्रः कटुर्गन्धो यस्याः।) यवानी। इति राजनिर्घण्टः॥
तीव्रज्वाला, स्त्री, (तीव्रं यथा स्यात् तथा ज्वालयति उत्तेजयति सेविनमिति। ज्वल+णिच्+अच् टाप् च।) धातकी। इति राजनिर्घण्टः॥
तीव्रवेदना, स्त्री, (तीव्रा अत्यन्ता वेदना।) यातना। अतिशयवेदना। इत्यमरः। २।१०।३॥
तीव्रा, स्त्री, (तीव्र+टाप्।) कटुरोहिणी। गण्डदूर्व्वा। राजिका। इति मेदिनी। रे, ४५॥ नदीविशेषः। इति शब्दरत्नावली॥ महाज्योतिष्मती। तरदीप्तचः। तुलसी। इति राजनिर्घण्टः॥
तु, ल क्त्तौ। हिंसायाम्। पूर्त्तौ। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सकं च-सेट्।) ल, तौति तवीति। इति दुर्गादासः॥
तु, अ, पादपूरणम्। (यथा, मनुः। ११। २०७।
"अवगूर्य्य लब्धग्रतं सहसमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते॥")
भेदः। अवधारणम्। इत्यमरः॥ समुच्चयः। (यथा, मनुः। ११। २०२।
"उच्छ्यानं समारुह्य खरयानन्तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति॥")
पश्चान्तरम्। नियोगः। प्रशंसा। विनिग्रहः। इति शब्दरत्नावली॥
तुक्, [च्] पुं, (तुज्यते तौयतेऽनेनेति। तुज प्राणे+क्विप्।) अपत्यम्। इति हेमचन्द्रः॥
तुकाचौरी, स्त्री, (तुगाचौरी+पृषोदरादित्वात् गस्य कः।) तुगाचौरी। इति हेमचन्द्रः।४।२२०॥
तुगा, स्त्री, (तुज+बाहुलकात् घः किच्च।) वंशलोचना। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"स्यादवंशरोचना वंशी तुगाचौरी तुगा शुभा।
त्वक्चौरी वंशजा शुभ्रा वंशचौरी च वेणुवी॥")
तुगाचौरी, स्त्री, (तुगा सा एव चौरी।) वंशलोचना। इति राजनिर्घण्टः॥ वंशलोचनाभेदः। अस्या गुणाः। क्षयश्वासकासनाशित्वम्। मधुरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ (यथा, भावप्रकाशे मध्यखण्डे २ भागे काशरोगाधिकारे।
"द्विगुणा च तुगाचौरी सिता सर्व्वत्तुगुणा॥")

तुङ्गः, पुं, (तुङ्ग हिंसायाम् + घञ् ।) पुन्नागवृक्षः । (यथा, वैद्यकरत्नमालायाम् ।
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")
पर्व्वतः । बुधग्रहः । इति हेमचन्द्रः । ६ । ६४ ॥
नारिकेलः । गण्डकः । इति राजनिर्घण्टः ॥
योगभेदः । इति शब्दरत्नावली ॥ स तु ग्रहाणां उच्चराशिः । यथा,—
"सूर्य्यादुच्चान् क्रियवृषमृगस्त्रीकुलीरान्त्ययूके
दिग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशांश्च विंशान् ।
अंशानेतान् वदति भवनश्चान्यतुङ्गान् सुतुङ्गां-
स्त्वानेवांशान् मदनभवनेष्वाह नीचान् सुनी-
चान् ॥"
इति दीपिका ॥
"आदित्यमेषे वृषभे मृगाङ्के
कन्यागते मे च गुरौ कुलीरे ।
मीने च शुक्रे मकरे महीजे
शनौ तुलायामिति तुङ्गगेहाः ॥"
इति समयाश्चतम् ॥ * ॥
अथ तुङ्गस्थग्रहफलम् ।
"तुङ्गेऽर्के: शुभसंयुतः शुभकरैर्मित्रेक्ष दृष्टो यदा
देवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा
त्रिकम् ।
विघ्नेशः प्रथितो विमर्दितरिपुः श्रीमीशमान्यो
व्यापालार्च्चितपादपद्मयुगलो राजा त्रिकोणे
यदा ॥
तुङ्गे चन्द्रमसि प्रसन्नवपुषि ब्रह्मादनष्टद्युतौ
ख्यातोऽरिविमर्द्दकोऽगदतनू राजेश्वरो रूप-
वान् ।
व्यापालार्च्चितपादपद्मयुगलो वा धर्म्मशीलो
महान्
यौ म्येरेव युतोऽथवा प्रियतमेर्द्दृष्टे त्रिकोणेऽपि
च ॥
यदि भवति मृगस्थो भूमिपुत्रस्तदा वै
न दिनकरमयूखादृग्भवद्भिर्नरेन्द्रः ।
अगदतनुरभीतः शत्रुदर्पापहारी
प्रथितरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः ॥
कन्यास्थः शुक्रलाञ्छनस्य तनयस्त्रिस्थंशकैः
संयुतो
दृष्टो वा यदि संयुतः शुभकरैर्ज्ञातस्तदा
भूपतिः ।
याधार्यां तुरगोष्ट्रमत्तकरिणां यातैर्महीं कम्पते
सद्माश्वद्विरदोरुहा विगलिता यान्ति त्रिकोणे-
ऽपि च ॥
तुङ्गे गुरौ मित्रखगेन दृष्टो
राजा भवेदिन्द्रसमानमूर्त्तिः ।
गजाश्वनौकागरपूर्णलक्ष्मीः
पृथ्वीपतिः स्वस्य त्रिकोणगेऽपि ॥
तुङ्गे भृगौ शुभसुहृत्प्रयुते च दृष्टे
देवात् पुनः स यदि पश्यति मित्रसंघान् ।
भूपाधिपो भवति कीर्त्तिकरप्रधानो
दीर्घायुरुग्रसुखभुग्भृगुजे त्रिकोणे ॥
तुङ्गे शनौ मित्रखगेन दृष्टे
प्रचण्डदण्डो नृपतिप्रधानः ।
न दृश्यते दिग्गमने च धुर्व्वी
त्रिकोणगे चापि नरेन्द्रमूर्त्तिः ॥
भवति धरणिपालो नीचबुद्धिः प्रतापी
हयगजधनपूर्णो जातिवर्गे विरक्तः ।
कुटिलमतिरनीतो भूरिभाण्डारयुक्त-
स्तमसि मिथुनसंस्थे जायते मानवेन्द्रः ॥
भृगुपतिदृष्टकन्याकर्कटस्थे च राहौ
भवति विपुललक्ष्मी राजराजाधिपो वा ।
हयगजनरनौकामण्डितः सार्व्वभौमो
नृपतिरमरपूज्यो राहुतुङ्गी चिरायुः ॥
अरिनिधनव्ययतुङ्गे कौर्त्तितमेतत् फलं यथर्क्षम् ।
केन्द्रत्रिकोणे लाभे वा तुङ्गफलं यथोद्दिष्टम् ॥"
इति कोष्ठीप्रदीपः ॥
तुङ्गः, त्रि, (तुङ्ग हिंसायाम् + घञ् ।) उग्रः । प्रधानम् । उन्नतः । इति शब्दरत्नावली ॥ (यथा, रघुः । ६ । ३ ।
"शिलाविभङ्गैर्व्वरराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह ॥"
प्रचुरः । यथा, तत्रैव । ४ । ७० ।
"तेषां सदम्बभूयिष्ठास्तुङ्गा द्रविणराशयः ॥")
किञ्जल्के क्ली । इति राजनिर्घण्टः ॥
तुङ्गकः, पुं, (तुङ्ग + स्वार्थे संज्ञायां वा कन् ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (अरण्यरूप-तीर्थविशेषे, क्ली । यथा, महाभारते । ३ । ८५ । ४६-५४ ।
"तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः ।
वेदानध्यापयत् तत्र सनीन् सारस्वतः पुरा ॥
तत्र वेदेषु नष्टेषु सनेरङ्गिरसः सुतः ।
ऋषीणामासनारीयेषु रूपविष्टो यथासुखम् ॥
ओंकारेण यथान्यायं सम्यगुच्चारितेन ह ।
येन यत् पूर्व्वमभ्यस्तं तत् सर्व्वं समुपस्थितम् ॥
ऋषयश्चैव देवाश्च वरुणोऽग्निः प्रजापतिः ।
हरिर्नारायणश्चैव महादेवस्तथैव च ॥
पितामहश्च भगवान् देवैः सह महाद्युतिः ।
भृगुं नियोजयामास यजनार्थं महाद्युतिम् ॥
ततः स चक्रे भगवानृषीणां विधिवत्तदा ।
सर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा ॥
आज्यभागेन तत्राग्निं तर्पयित्वा यथाविधि ।
देवाः स्वभवनं याता ऋषयश्च यथाक्रमम् ॥
तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम ! ।
पापं प्रणश्यत्यखिलं स्त्रिया वा पुरुषस्य वा ॥
तत्र मासं वसेद्धीरो नियतो नियताशनः ।
ब्रह्मलोकं व्रजेद्राजन् ! कुलञ्चैव समुद्धरेत् ॥")
तुङ्गभद्रः, पुं, (तुङ्ग उच्चोऽपि भद्रः ।) मदोत्कटहस्ती । इति मेदिनी । रे, २६३ ॥
तुङ्गभद्रा, स्त्री, (तुङ्गा प्रधाना भद्रा निर्म्मला च ।) नदीविशेषः । सा दक्षिणे प्रसिद्धा । (यथा, मत्स्यपुराणे । ११३ । २६ ।
"तुङ्गभद्रा सुप्रयोगा वाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृता ॥")
तस्या जलस्य गुणाः । स्निग्धत्वम् । निर्म्मलत्वम् । स्वादुत्वम् । गुरुत्वम् । कफपित्तामदाहत्वम् । प्रायःसात्म्यत्वम् । मेधाकरत्वञ्च । इति राजनिर्घण्टः ॥
तुङ्गशेखरः, पुं, (तुङ्गान्युच्चानि शेखराणि शृङ्गाणि यस्य ।) पर्व्वतः । इति शब्दमाला ॥
तुङ्गा, स्त्री, (तुङ्ग + टाप् ।) वंशलोचना । भूमी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायाः यथा,—
"भूमी भूस्तुफला तुङ्गा केशग्रहणी शिवा फला ।
मङ्गल्या च तथा लक्ष्मीः शमीरः सात्त्विका स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुङ्गिनी, स्त्री, (तुङ्गो वृक्षविशेषस्तद्वदाकृतिरस्यस्याः । तुङ्ग + इनिः । ङीप् ।) महाश्रुतावरी । इति राजनिर्घण्टः ॥
तुङ्गी, स्त्री, (तुङ्ग + गौरादित्वात् ङीष् ।) हरिद्रा । वर्व्वरी । इति मेदिनी । गे, ८ ॥ (अस्याः पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे १भागे ।
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णाख्यस्तच्च क्षुण्णे तु कटिल्लककुटेरकौ ॥"
रात्रिः । इति त्रिकाण्डशेषः ॥)
तुङ्गी, [न्] पुं, (तुङ्गः उच्चस्थानं आश्रयत्वेन अस्त्यस्य । इनिः ।) तुङ्गस्थानस्थितः । उच्चग्रहः । इति ज्योतिषम् ॥
तुङ्गीपतिः, पुं, (तुङ्गा निशायाः पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
तुङ्गीशः, पुं, (तुङ्गी सर्व्वप्रधाना ईशः प्रभुश्च ।) शिवः । ब्रह्मा । सूर्य्यः । इति शब्दरत्नावली ॥
तुच्छं, क्ली, (तौति असारत्वं गच्छतीति । तु + "छोऽदिकचिभ्यां श्रुतुभ्यान्तु कित् पीपूड्भ्यः खश्च" २ । ३३ । उणादिकोषटीकाधृतसूत्रात् छः स च कित् ।) पुलाकजम् । इत्युणादिकोषः ॥ भुधि इति भाषा ॥
तुच्छः, त्रि, (तुद् + किप् । तेन तं वा श्रयतीति । छो + कः ।) शून्यः । रत्नमरः । ३ । १ । ५६ ॥ हीनः । इत्युणादिकोषः ॥ (यथा, भागवते । ७ । ७ । ४५ ।
"किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥")
अल्पः । इति हेमचन्द्रः । ६ । ६२ ॥
तुच्छदुः, पुं, (तुच्छो हीनो दुर्वृत्तः ।) एरण्डवृक्षः । इति शब्दचन्द्रिका ॥
तुच्छधान्यकं, क्ली, (तुच्छं धान्यम् । अल्पार्थे कन् ।) पुलाकः । इति रत्नमाला ॥ आगड़ा इति भाषा ॥
तुच्छा, स्त्री, (तुच्छ + टाप् ।) तुत्था । नीलीवृक्षः । इति भावप्रकाशः ॥ (क्षुद्रैला । गुजराट्देशीया एलाची । अस्याः पर्य्यायाः यथा,
"क्षुद्रोपकुञ्चिका तुच्छा कोरङ्गी द्राविड्यपि
गुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुज, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) तोजति । इति दुर्गादासः ॥

तुज, इ प्राणे। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ, तुञ्जते। प्राणो जीवनम्। हिंसायाञ्चनायामिति कश्चित्। इति दुर्गादासः॥

तुज, इ क भाषवृद्धौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ क, तुञ्जयति। भा दीप्तिः। यद्वार्थो निकेतनहिंसाबलदानानि। इति दुर्गादासः॥

तुट, श्लि कलहे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) श्लि, तुटति अतुटीत् नीचः परस्परं वचसा। तुतोट। इति दुर्गादासः॥

तुटुमः, पुं, (तुटति नाशयति द्रव्यजातमिति। तुट+बाहुलकात् उमः।) उन्दुरुः। इति त्रिकाण्डशेषः॥

तुड, इ ड वधे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) पञ्चमस्वरी। इ, तुण्डते। इ, तुण्डते। वधो निष्पीड़नमिति रमानाथः। तुण्डते पात्यं पिकः। इति दुर्गादासः॥

तुड, ऋ वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। ऋ, अतुतोड़त्। वधो द्विधाकरणमिति गोविन्दभट्टः। तोड़ति मल्लो मल्लाङ्गं भिनत्तीत्यर्थः। इति दुर्गादासः॥

तुड, श्लि भेदे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श्लि, तुड़ति अतुड़ीत् तुतोड़। उपसूचने इति कश्चित्। इति दुर्गादासः॥

तुड्, नादरे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी ङ्ङ्यान्तः। नादरः अनादरः। तुड्डति। फलाभावान्न ऋदनुबन्धः। इति दुर्गादासः॥

तुण, ग्र जैह्म्ये। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) जैह्म्यमिह कुटिलीकरणम्। ग्र, तुणति ह्रस्वं वायुः। तोणिता। इति दुर्गादासः॥

तुणिः, पुं, (तुणति सङ्कोचयतीति। तुण जैह्म्ये+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) कुणिः। तुन्नवृत्तः। इत्यमरटीकायां स्वामी॥ (अस्य पर्य्याया गुणाश्च यथा,—
"तुणिस्तुन्नक आपीनस्तुणिकः कच्छकस्तथा।
कुटेरकः कान्तलको नन्दिवृक्षश्च नन्दकः॥
तुणी रक्तः कटुः पाके कषायो मधुरो लघुः।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तुण्डं, क्ली, (तुण्डते निष्पीड़यति अभ्यन्तरस्थद्रव्यमिति। तुण्ड+पचाद्यच्।) मुखम्। इत्यमरः। २। ६। ८६॥ (चञ्चुः। यथा, देवीभागवते। २। १। २६।
"आमिषं स तु विज्ञाय श्येनमभ्यद्रवत् खगम्।
तुण्डयुद्धमथाकाशे तावुभौ समचक्रतुः॥"
पुं महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। १५। १५।
"नमस्तुण्डाय तुष्याय नमस्तुटितुटाय च॥"
राक्षसविशेषः यथा, महाभारते। ३।२८४।६।
"तुण्डेन च नमस्तस्य पटुघ्नः पनसेन च॥")

तुण्डकेरिका, स्त्री, कार्पासी। इति राजनिर्घण्टः॥
तुण्डकेरी, स्त्री, (प्रशस्तं तुण्डम्। प्रशंसायां कन्। ङीष्। तदीर्त्ते ईरयति वा तत्तुल्यशोभाधारणात्। ईर+कर्म्मण्यण्। स्त्रियां ङीष्।) बिम्बिका। इत्यमरटीकायां भरतः॥ तेलाकुचा इति भाषा॥
तुण्डिः, पुं, (तुण्डते निष्पीड़यति मध्यस्थद्रव्यमिति। तुण्ड+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इतीन्।) सुखम्। चञ्चुः। इत्युणादिकोषः॥ नाभौ स्त्री। इति शब्दरत्नावली॥
तुण्डिका, स्त्री, (तुण्डिरेव। तुण्डि+स्वार्थे कन् टाप् च।) नाभिः। बिम्बिका। इति शब्दरत्नावली॥ (अस्या गुणा यथा,—
"तुण्डिका चाग्निरुचिकृद्वातपित्तनिवारणी॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये॥)
तुण्डिकेरी, स्त्री, कार्पासी। बिम्बिका। इत्यमरः। २। ४। ११६॥ (अस्या पर्य्यायाः यथा,
"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका॥"
इति वैद्यकरत्नमालायाम्॥)
अस्या रूपान्तराणि। तुण्डिकेरिका तुण्डिकेरिः तुण्डकेरी तुण्डिकेयी। इत्यमरटीका॥
तुण्डिकेयी, स्त्री, बिम्बिका। इति शब्दचन्द्रिका॥
तुण्डिभः, त्रि, (तुण्डिर्वृक्षो नाभिरस्य। "तुन्दिवलिवटेभः।" ५।२।१४०। इति भः।) "सङ्कीर्णोपधोऽयं तुण्डिः।" इति माधवः।) वृक्षनाभिः। वृक्षनाभियुक्तः। इत्यमरः। २। ६। ६१॥
तुण्डिलः, स्त्री, (तुण्डिरस्त्यस्येति। सिध्मादित्वात् लच्।) वृक्षनाभिः। इत्यमरः। २।६।६१॥ सुखरः। इत्युणादिकोषः॥
तुत्थ, तृ क स्तुतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) आद्ये पञ्चमस्वरः शेषो दन्त्यवर्गाद्ययुक्तस्थकारः। तुत्थयति तुत्थापयति। स्तुतिराच्छादनम्। इति दुर्गादासः॥
तुत्थं, क्ली, (तुदति पीड़यत्यनेन। तुद+"मातृतुदेति।" उणां २। ७। इति थक्। यद्वा, तुत्थ आच्छादने+अच्।) खर्परीतुत्थम्। उपधातुभेदः। तुतिया इति भाषा। तत्पर्य्यायः। नीलाञ्जनम् २ हरिताश्मम् ३ तुत्थकम् ४ मयूरग्रीवकम् ५ ताम्रगर्भम् ६ अष्टतोलवम् ७ मयूरतूत्थम् ८ शिखिकण्ठम् ९ नीलम् १०। इति राजनिर्घण्टः॥ तुत्थाञ्जनम् ११ शिखिग्रीवम् १२ वितुन्नकम् १३ मयूरकम् १४। इत्यमरः। २।६।१०१॥ तूतकम् १५ स्फटातुत्थम् १६ स्फटामदम् १७। इति शब्दचन्द्रिका॥ अस्य गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। श्वित्रनेत्रामयनाशित्वम्। सर्व्वविषदोषघ्नमनत्वम्। वान्तिकारकत्वञ्च। इति राजनिर्घण्टः॥ क्षारत्वम्। निर्म्मलत्वम्। लघुत्वम्। भेदकत्वम्। कृमिकण्डुकुष्ठकफनाशित्वञ्च। इति राजवल्लभः॥ *॥
"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्।
तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्॥
किञ्चित्ताम्रगुणं तस्माद्रूक्ष्यमाणगुणञ्च तत्।
तुत्थकं कटुकं क्षारं कषायं वामकं लघु॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूनं खर्परं चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥
(अस्य शोधनविधिर्यथा,—
"ओतोर्व्विश्लासमं तुत्थं सप्तांशं टङ्गणार्द्धयुक्।
त्रिधा सुपुटितं शुद्धं वान्तिभ्रान्तिविवर्জ্জितम्॥"
अन्यच्च।
"गन्धकेन समं तुत्थं तुत्थार्द्धेनार्द्धयामकम्।
वान्तिभ्रान्ती यदा न स्तस्तदा सिद्धिं विनिर्द्दिशेत्॥"
शोधितस्यास्य गुणा यथा,—
"तुत्थं सकटुकक्षारं कषायं विशदं लघु।
लेखनं भेदि चक्षुष्यं कण्डूक्रिमिविषापहम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)
रसाञ्जनम्। शावा। इत्युणादिकोषः॥ अग्निः। इति संक्षिप्तसारे उणादिवृत्तिः॥ अग्नौ पुं। इति हेमचन्द्रः॥
तुत्थकं, क्ली, (तुत्थमेव। स्वार्थे कन्।) तुत्थम्। इति शब्दचन्द्रिका॥ (अस्य गुणा यथा,—
"तुत्थकं कटुकं क्षारं कषायं वामकं लघु।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूनं खर्परञ्चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तुत्था, स्त्री, (तुत्थ+टाप्।) नीलीवृक्षः। क्षुद्रेला। इत्यमरः। २। ४। ६५॥ महानीली। इति राजनिर्घण्टः॥
तुत्थाञ्जनं, क्ली, (तुत्थयति तुत्थ्यते वा। तुत्थ+अच्। तुत्थञ्च तदञ्जनञ्चेति कर्म्मधारयः।) उपधातुविशेषः। तुत्थम्। इत्यमरः।२।६।१०१॥
तुद, व्य ग्र औ व्यधे। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) व्य ग्र, तुदति तुदते। औ. तोत्ता। व्यध इह न्यासस्य रूपम्। तुदोद गदया वारिम्। इति भट्टिः॥ विधुन्तुदः। इति दुर्गादासः॥
तुन्दं, क्ली, (तुदतीति। तुद+"अन्दादयश्च।" उणां ४। ६८। इति दन् तुदेर्नुमश्च इत्युक्तेर्नुम् ततो दस्य लोपः।) उदरम्। इत्यमरः। २। ६। ७७॥
तुन्दकूपिका, स्त्री, (क्षुद्रः कूपः कूपिका। तुन्दस्य उदरस्य कूपिकेव।) नाभिः। इति हेमचन्द्रः। ३। २। ७०॥
तुन्दकूपी, स्त्री, (तुन्दस्य उदरस्य कूपी क्षुद्रकूप इव।) नाभिः। इति त्रिकाण्डशेषः॥
तुन्दपरिमार्ज्जः, त्रि, (तुन्दमुदरं परिमार्ष्टीति। परि+मृज+अण्।) तुन्दपरिमृजः। इत्यमरटीकायां रमानाथः॥ (अलसादप्यच्च तुन्दपरिमार्ज्ज एव।" इति सिद्धान्तकौमुदी। पां ३। २। ५॥)

तुन्दपरिमृजः, त्रि, (तुन्दसुदरं परिमार्ष्टीति। परि+मृज+"तुन्दशोकयोः परिमृजापनुदोः।" ३।२।५। इत्यत्र "आलस्यसुखाहरणयोरिति वक्तव्यम्।" इति वार्त्तिकोक्त्या कः।) अलसः। इत्यमरः। २।१०।१८॥

तुन्दि, क्ली, (तुद+इन् बाहुलकात् नुम् च।) उदरम्। इति हेमचन्द्रः। ३।१६८॥ गन्धर्व्वविशेषे, पुं। इति जटाधरः॥

तुन्दिः, स्त्री, (तुद्+इन् बाहुलकात् नुम् च।) नाभिः। इति चिकाण्डशेषः॥

तुन्दिकः, त्रि, (अतिशयितं तुन्दसुदरमस्यास्य। "तुन्दादिभ्य इलच्।" ५।२।११७। इति चकारात् ठन्।) विशालजठरो जनः। इति शब्दरत्नावली॥

तुन्दिका, स्त्री, (तुन्दसुदरं आश्रयत्वेनास्त्यस्याः। तुन्द+ठन् टाप् च।) नाभिः। इति शब्दरत्नावली॥

तुन्दितः, त्रि, तुन्दिलः। इति भरतस्य द्विरूपकोषः॥

तुन्दिभः, त्रि, (तुन्दिर्हृद्या नाभिरस्यास्येति। तुन्दि+"तुन्दिवलिवटेर्भः।" ५।२।१३६। इति भः।) तुन्दिलः। इति शब्दरत्नावली॥

तुन्दिलः, त्रि, (तुन्दं विशालसुदरमस्यास्येति। तुन्द+"तुन्दादिभ्य इलच्।" ५।२।११७। इतीलच्।) विशालजठरो जनः। भुँड़ि इति भाषा॥ तत्पर्य्यायः। पिचिण्डिलः २ दृढतुन्दिः ३ तुन्दिकः ४ तुन्दिभः ५ तुन्दी ६। इति शब्दरत्नावली॥

तुन्दिलफला, स्त्री, (तुन्दिलवत् फलमस्याः।) त्रपुषी। इति राजनिर्घण्टः॥

तुन्दी, स्त्री, (तुन्दि+वा ङीष्।) नाभिः। इति शब्दरत्नावली॥

तुन्दी, [न्] त्रि, (तुन्दं विशालसुदरमस्यास्येति। "तुन्दादिभ्य इलच्।" ५।२।११७। इति चकारात् इनिः।) तुन्दिलः। इति शब्दरत्नावली अमरश्च॥

तुन्नः, पुं, (तुद्यते इति। तुद+क्तः।) नन्दीवृक्षः। तुँद इति भाषा। इत्यमरः। २।४।१२७॥ त्रि, व्यथितः। (यथा, रामायणे। २।१४।२३।

"स तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तमः।
राजा प्रचोदितोऽभीक्ष्णं कैकेयीमिदमब्रवीत्॥"

क्षिप्ते। द्विधाकृते च॥)

तुन्नवायः, पुं, (तुन्नं क्षिप्तं वयतीति। वे+"कृवापाजिमिस्वदिसाध्यशूदृञ्धाञ्सः।" ३।२।२। इत्यण्।) सौचिकः। इत्यमरः। २।१०।६॥ दरजी इति भाषा॥ (यथा, मनुः। ४।२१४।

"शैलूषतुन्नवायान्नं क्रतघ्नस्यान्नमेव च॥")

तुन्प, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तुम्पति। इति दुर्गादासः॥

तुन्प, शु वधे। क्षेपे। इति कविकल्पद्रुमः॥ (तुदां-सकं-व्यकं च-सेट्।) शु, तुप्नति। इति दुर्गादासः॥

तुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तोपति। इति दुर्गादासः॥

तुप, इ क अर्दने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, तुम्पयति। अर्दनं वधः। इति दुर्गादासः॥

तुप, प शु क्षेपे। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-व्यकं-सकं च-सेट्।) प शु, तुम्पति तुतोप। इति दुर्गादासः॥

तुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तोफति। इति दुर्गादासः॥

तुफ, प शु क्षेपे। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-व्यकं-सकं च-सेट्।) प शु, तुम्फति तुतोफ। इति दुर्गादासः॥

तुब, इ कि अर्दै। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) तवर्गाद्यादिः। पञ्चमस्वरी। इ, तुम्बते। कि, तुम्बयति तुम्बति। अर्दौ वधः। इति दुर्गादासः॥

तुभ, ल ड हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ल, अतुभत्। ड, तोभते। इति दुर्गादासः॥

तुभ, य ग हिंसे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां च-परं-सकं-सेट्।) य, तुभ्यति। ग, तुभ्नाति। ततोभ। इति दुर्गादासः॥

तुसरः, पुं क्ली, (तुसति। रस्य लः।) तुसलः॥ इत्यमरटीकायां रायमुकुटः॥ (क्षत्रियजातिविशेषः। यथा, मात्स्ये। ११३। ५३।

"तुसराक्षुभराश्चैव पङ्क्तमा नैषधैः सह॥")

तुसलं, क्ली, (तु सौत्रो धातुः+बाहुलकात् सलक्।) रणसङ्कुलम्। सङ्कीर्णयुद्धम्। इत्यमरभेदिनीकरौ॥ परस्परसम्बाधो रणसंघट्टः। इति भरतः॥ (यथा, देवीभागवते। ५।३१।२८।

"तत्राभूत्तुमुलं युद्धं देवदानवसैन्ययोः॥")

तुसलः, पुं, (तु+बाहुलकात् सलक्।) कलिवृक्षः। इति मेदिनी। ले, ६८॥ आकुलो रणः। इति चिकाण्डशेषः॥ (प्रचण्डे उग्रे सङ्कुलमात्रे च त्रि। यथा, राजतरङ्गिण्याम्। ४।५४१।

"एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्ज्जितैः।
सरित्तरङ्गघोषेण बभूवुस्तुमुला दिशः॥"

तथा, महाभारते। १।५३।१२।

"ववौ गन्धश्च तुसलो दस्यतामनिशं तदा॥")

तुम्बः, पुं क्ली, (तुम्बति नाशयत्यरुचिमिति। तुम्ब अर्दने+अच्।) अलाबुः। इत्यमरटीकायां भरतः॥ (अलाबोः शुष्कत्वक्। यथा, हरिवंशे। ६४।५।

"सञ्जिघ्यतुम्बकरकौ गोपवेणुप्रवादकौ॥")

तुम्बकः, पुं, (तुम्बति अरुचिमिति। तुम्ब+खुल्।) अलाबुः। इति शब्दरत्नावली॥ राजालाबुः। इति राजनिर्घण्टः॥

तुम्बा, स्त्री, (तुम्ब+टाप्।) अलाबुः। इति शब्दरत्नावली॥ (यथा, अश्वाष्टके। ७।

"कुम्भावतीसमविडम्बा गलेन नवतुम्बाभवीक्षणसविधा
ग्रं बाहुवेयग्रन्थिविभाभिरामसुखसंबाधितस्तनभरा॥")

गवी। इति चिकाण्डशेषः॥

तुम्बिः, स्त्री, (तुम्बति नाशयत्यरुचिमिति। तुबि अर्दने+"सर्व्वधातुभ्य इन्।" उणा ४।११७। इतीन्।) अलाबुः। इति शब्दरत्नावली॥ (अलाबुशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तुम्बिका, स्त्री, (तुम्ब अर्दने+खुल्। टापि अत इत्वम्।) अलाबुः। इति शब्दरत्नावली॥ कटुतुम्बी। इति राजनिर्घण्टः॥

तुम्बिनी, स्त्री, (तुम्बति नाशयत्यरुचिमिति। तुम्ब+णिनिः ङीप्।) कटुतुम्बी। इति राजनिर्घण्टः॥

तुम्बी, स्त्री, (तुम्बि+ऋदिकारादिति वा ङीष्।) अलाबुः। इत्यमरः। २।४।१५६॥ (यथा, भ्रान्तिशतके। ३।१६।

"अरे चेतोमीन! भ्रमसि मधुना यौवनजले
वृथा त्वं स्वच्छन्दं युवतिजनधौ पश्यसि न किम्।
तनूजालीजालं स्तनयुगलतुम्बीफलयुगं
मगीभूः कैवर्त्तः क्षिपति परितस्त्वां प्रति मुहुः॥"

"अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला।
मिष्टं तुम्बीफलं रुच्यं पित्तश्लेष्मापहं गुरु॥
दृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कुलिकवृक्षः। इति रत्नमाला॥

तुम्बीपुष्पं, क्ली, (तुम्बाः पुष्पमिव पुष्पमस्य।) लताभूषणम्। अलाबुपुष्पम्। इति हारावली। २०२॥

तुम्बुकं, क्ली, (तुम्ब+बाहुलकात् उकः।) अलाबुफलम्। इति हेमचन्द्रः॥

तुम्बुकः, पुं, (तुम्ब+बाहुलकात् उकः।) अलाबुः। इति भरतधृतहेमचन्द्रः॥

तुम्बुरी, स्त्री, (तुम्बवदाकारं रातीति। रा+कः। ङीप्। पृषोदरादित्वात्वम्।) कुकुरी। धन्याकम्। इति मेदिनी। रे, १६३॥

तुम्बुरु, क्ली, कुस्तुम्बुरु। इत्यमरटीकायां भरतः॥ (यथा, वैद्यके।

"तुम्बुरुभृङ्गषष्ठाङ्गकन्दकं कटुरोहिणी॥"

अस्य तैलगुणाः।

"तुम्बुरुत्थं करञ्जोत्थं ज्योतिष्मत्युद्भवन्तथा।
अर्शःकुष्ठक्रमिश्लेष्मशुक्रमेदोऽनिलापहम्॥"

इति हारीते प्रथमे स्थाने नवमे ऽध्याये॥)

तुम्बुरुः, पुं क्ली, गन्धर्वविशेषः। स्वर्गगायकः। इति जटाधरः॥ (यथा, महाभारते। १।१२३।१५।
"गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः॥"
तपस्विविशेषः। यथा, हरिवंशे। १२६। ६।
"अर्चिर्मांसुमुरुश्चैव भारिश्च वदतां वरः।
नेतारो देवदेवानामेते हि तपसान्विताः॥")
अर्हदुपासकविशेषः। इति हेमचन्द्रः॥ फलवृक्षविशेषः। तत्फलन्तु आम्रसदृशं मरीचवत्। तत् पर्य्यायः। शृङ्गः २। इति रत्नमाला॥ सैरेयः ३ सौरः ४ वनजः ५ सानुजः ६ द्विजः ७ तीक्ष्णकल्कः ८ तीक्ष्णफलः ९ तीक्ष्णपत्रः १० महासुनिः ११ स्फुटलः १२ सुगन्धिः १३। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफवातशूलगुल्मोदरार्शानक्रिमिनाशित्वम्। वह्निदीपनत्वञ्च। इति राजनिर्घण्टः॥ तद्वृक्षपर्य्यायास्तत्फलगुणाश्च।
"तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्यकः।
तुम्बुरु प्रथितं तिक्तं कटुपाके हि तत् कटु॥
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च।
वातश्लेष्मार्शिकर्णौष्ठशिरोरुग्गुरुतानुदम्॥
कुष्ठशूलारुचिश्वासक्रीहकृच्छ्राणि नाशयेत्॥"
इति भावप्रकाशः॥
तुर, लि र वेगे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक-सेट्।) इस्वी। लि, तुतोर्त्ति। र, वैदिकः। वेगः शीघ्रगमनम्। अदादिवर्ज्जधातुभ्यः शपो विधानेनैव सिद्धे अदादेः शपं विधाय तल्लुक्करणं निष्ठायां भावादिधे वोदुडोऽन्यत इत्यनेन गुणार्थमिति चतुर्भुजः। तेन तोरितं तुरितमिति। तन्मते रदेरपि रोदितं रुदितमिति स्यात्। इति दुर्गादासः॥
तुरः, त्रि, (तुतोर्त्ति वेगेन गच्छतीति। तुर+कः।) वेगवान्। इति तुरगशब्दटीकायां भरतः॥ (यथा, ऋग्वेदे। ७। ५६। १६।
"इमे तुरं मरुतो रामयन्तीमे सहः सहस
आ गमन्ति॥"
"तुरं कर्म्मसु क्षिप्रवन्तम्।" इति सायनः॥
क्षिप्रस्तोत्रकारी। यथा, ऋग्वेदे। ८।२६।४।
"उपस्तोमान्तुरस्य दर्शयः श्रिये॥"
"तुरस्य क्षिप्रं स्तोत्रं कुर्वतः।"
इति सायनः॥)
तुरगः, पुं, (तुर वेगे+भावे घञर्थे कः। तुरेण वेगेन गच्छतीति। गम+अन्येष्वपीति डः।) चित्तम्। घोटकः। इति मेदिनी। गे, ३८॥ (यथा, रघुः। ३। ५१।
"ततः प्रहस्याभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता॥")
तुरगगन्धा, स्त्री, (तुरगस्य गन्ध इव गन्धो यस्याः।) अश्वगन्धा। इति रत्नमाला॥ (अश्वगन्धाशब्देऽस्या विवरणमाख्यातम्॥)
तुरगब्रह्मचर्य्यकं, क्ली, (तुरगस्येव ब्रह्मचर्य्यम्। ततः स्वार्थे कन्।) अभावादङ्गनात्यागः। इति त्रिकाण्डशेषः॥
तुरगलीलकः, पुं, (तुरगस्येव लीला यस्य ततः कन्।) तालप्रभेदः। यथा, सङ्गीतदामोदरः।
"हतद्वन्द्वं विरामान्तं लघुस्तुरगलीलके॥"
तुरगी [न्] त्रि, (तुरगो घोटको वाहनत्वेनास्यास्तीति। तुरग+इनिः।) अश्वारोहः। इति हेमचन्द्रः। ३। ४२५॥
तुरगी, स्त्री, (तुरगवत् गन्धोऽस्यास्याः। अर्श आदित्वात् अच् ततो गौरादित्वात् ङीष्।) अश्वगन्धा। इति मेदिनी। गे, ३८॥ अश्वखी। इति व्याकरणम्॥
तुरङ्गः, पुं स्त्री, (तुरेण वेगेन गच्छतीति। तुर+गम्+"गमे सुपि वाच्यः।" ३। २। ३८। इत्यस्य वार्त्तिकोक्त्या खच्। "खच्च डिद्वा वाच्यः।" इति डित्। "अरुर्द्विषदिति।" ६। ३। ६७। इति सुम्।) घोटकः। इत्यमरः। २। ८। ४३॥ (यथा, पञ्चतन्त्रे। १। ३१४।
"स्टगा स्टगैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः॥")
चित्तम्। इति शब्दरत्नावली॥
तुरङ्कः, पुं, (तुरङ्ग इव कायतीति। के+कः।) घोषकाकृतिः। इति रत्नमाला॥ हस्तिघोषा इति ख्यातः॥
तुरङ्गदेषणी, स्त्री, (द्विष भावे ल्युट्। तुरङ्गेण सह द्वेषणं शत्रुता यस्याः। ततो ङीप्।) घोटकेन सह स्वभाववैरिभावान्नैवास्यास्तथात्वम्।) महिषी। इति राजनिर्घण्टः॥ (तुरङ्गद्विषणी तुरङ्गद्वेषिणी इत्यपि च कुत्रचिद् दृश्यते॥)
तुरङ्गप्रियः, पुं, (तुरङ्गाणां घोटकानां प्रियः।) यवः। इति राजनिर्घण्टः॥
तुरङ्गमः, पुं, क्ली, (तुरेण वेगेन गच्छतीति। गम+खच्+मुम् च।) घोटकः। इत्यमरः। २। ८। ४३॥ (यथा, रघुः। ७। ४७।
"तुरङ्गमस्कन्धनिषक्तदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष॥")
तुरङ्गवक्त्रः, पुं, (तुरङ्गस्येव वक्त्रं वदनं यस्य।) किन्नरः। इति जटाधरः॥
तुरङ्गवदनः, पुं, (तुरङ्गस्येव वदनं यस्य।) किन्नरः। इत्यमरः। १। २। ७४॥
तुरङ्गारिः, पुं, (तुरङ्गस्य अरिः शत्रुः। अश्वनाशकत्वादस्य तथात्वम्।) करवीरः। इति रत्नमाला॥
तुरङ्गिका, स्त्री, (तुरङ्गवत् आकृतिरस्यस्य फलादेः। तुरङ्ग+ठन्।) देवदालीलता। इति राजनिर्घण्टः॥ (गुणादस्या देवदालीशब्दे ज्ञातव्याः॥)
तुरङ्गी, स्त्री, (तुरङ्गस्तद्गन्धोऽस्यस्याः। अच्। गौरादित्वात् ङीष्।) अश्वगन्धा। इति शब्दरत्नावली॥ घोटिकाकृक्षः। इति राजनिर्घण्टः॥
तुरायणः, त्रि, (तुरेण वेगेन अयनं यत्र। "पूर्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) परायणः। इत्यमरटीकायां स्वामी॥ (क्ली, यज्ञविशेषः। इति सिद्धान्तकौमुदी॥ यथा, कात्यायनश्रौतसूत्रे। २४। ८। १। २।
"तुरायणं वैष्णवपञ्चम्याम्। चैत्रस्य वा॥"
यथा, महाभारते। १३। १०३। ३५।
तुरायणं हि व्रतमप्यशेष-
मक्रोधनोऽकरवं चिन्तयतोऽन्धान्॥")
तुराषाट्, [ड्] पुं, (तुरं वेगवन्तं साढ्यति अभिभवतीति। सह+णिच्+क्विप्। "सहेः साढ्यः सः।" ८। ३। ५६। इति षत्वम्। अन्येषामपीति पूर्व्वपदस्य दीर्घः।) इन्द्रः। इत्यमरः। १। १। ४७॥ अस्य रूपान्तरम्। तुराषाड्॥ (यथा, देवीभागवते। १।११।६३।
"तुराषाड्रपि तच्छ्रुत्वा क्रोधयुक्तो बभूव ह॥")
तुरिः, स्त्री, (तुतोर्त्ति हतं गच्छतीति। तुर+इन्।) तुरी। इति शब्दरत्नावली॥
तुरी, स्त्री, (तुरि+ऋदिकारादिति वा ङीष्।) तन्त्रवायस्य काष्ठनिर्म्मितोपकरणविशेषः। तत्पर्य्यायः। तन्त्रकाष्ठम् २ तुलिः ३ तुली ४ तुरिः ५। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ४४३।
"मेदिन्यां तव निपतति न पदं वसुवल्लभेति
गर्व्वेण।
अस्मिन्य कैर्न तरुणैस्तुरीव वसनैर्विसृक्ताखि॥")
तुरीयं, क्ली, (चतुर्णां पूरणम्। चतुर्थस्थानस्थितत्वादस्य तथात्वम्।) ब्रह्म। इति वेदान्तसारः॥
"अज्ञानतदुपहितचैतन्ययोराधारभूतं अनुपहितचैतन्यम्। यथा। वनवृक्षतदवच्छिन्नाकाशयोर्जलजलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। प्राज्ञं शिवमद्वैतं चतुर्थं मन्यन्ते। इत्यादि श्रुतेः।" इति वेदान्तसारः॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।
"तुरीयातीतसंन्यासपरिव्राजाश्चमालिका॥")
तुरीयः, त्रि, (चतुर्णां पूरणः। चतुर्+"चतुरश्यतावाद्यचरलोपश्च।" ५। २। ५१। इत्यस्य वार्त्तिकोक्त्या छः। चस्य लोपश्च।) चतुर्थः। इति मुग्धबोधम्॥ (यथा, देवीभागवते। १। १६। ८।
"जायत्स्वप्नसुषुप्तिश्च तव राजन्! भवन्ति हि।
अवस्थासु यथाकालं तुरीया तु कथं नृप!॥"
तारकः। इति सायनः॥ यथा, ऋग्वेदे। ३। ४। ६।
"तन्नस्तुरीयमध पोषयित्नु
देव त्वष्टर्विरराणः स्यस्व॥")
तुरीयवर्णः, पुं, (तुरीयश्चतुर्थो वर्णः।) शूद्रः। इति हलायुधः॥
तुरुष्कः, पुं, गन्धद्रव्यभेदः। शिलारस इति ख्यातः। तत्पर्य्यायः। यवनः २ धूम्रः ३ धूम्रवर्णः ४ सुगन्धिकः ५ सिक्थकः ६ सिक्थसारः ७ पीतसारः ८ कपिः ९ पिण्याकः १० कपिणः ११ कल्कः १२ पिण्डितः १३ पिण्डितैलकः १४ करेवरः १५ क्षत्रिमकः १६ लेपनः १७ सिक्थः

१८ कपिचपला: १९ यावल: २० तैलाख: २१ पिच्छिक: २२ जाव: २३ यावत: २४। इति शब्दरत्नावली ॥*॥ अस्य गुणा:। सुरभित्वम्। तिक्तत्वम्। कटुत्वम्। स्निग्धत्वम्। कृष्णकफपित्तास्रशरीरक्लेदकृमिदाहकुष्ठवातज्वरार्त्तिनाशित्वञ्च। इति राजनिर्घण्टः॥ अन्यच्च "अथ शिलारसः। सिक्तकस्तु तुरुष्कः स्यादयतोऽपवनदेशजः। कपिलैलश्च स ख्यातस्तथा च कपिनामकः॥ सिक्तकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत्। दृष्यः कण्डूखेदकुष्ठज्वरदाहग्रहापहः॥"

इति भावप्रकाशः॥

(अस्य प्रोधनविधिर्यथा,—

"तुरुष्को मधुना भाव्यः काञ्जीरेणापि सर्षपैः॥" इति वैद्यकचक्रपाणिसंग्रहे वातरोगाधिकारे॥) म्लेच्छजातिविशेषः। इति मेदिनी। के, १०२॥ तुरुक् इति भाषा। देशविशेषः। तुरुक्स्तान् इति पारस्य भाषा। तत्पर्य्यायः। ग्राखिः २। इति हेमचन्द्रः। ४। २५॥ श्रीवासवृक्षः। इति विश्वः॥ (घोटकविशेषः। यथा, अश्ववैद्यके। ६। ११।

"तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रसुखश्च यः॥")

तुर्य्यः, त्रि, (चतुर्णां पूरणः। चतुर्+"चतुरश्छयतावाद्यक्षरलोपश्च।" ५। २। ५१। इत्यस्य वार्त्तिकोक्त्या यत् चस्य लोपश्च।) चतुर्थः। इति मुग्धबोधम्॥ (यथा, भागवते। ७। ६। ३२।

"योगेन मीलितदृगात्मनिपीतनिद्रस्तूर्य्ये स्थितो न तु तमो न गुणांश्च युङ्क्ते॥")

तुर्व्व, ईं हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) हिंसा। तूः तुरौ तुरः। ईं, तूर्णः। इति दुर्गादासः॥

तुर्व्वसुः, पुं, ययातिराजपुत्रः। (अयं हि देवयानीगर्भसम्भूतः। शापग्रस्तस्य पितुर्ययातेर्जरां नासौ गृहीतवान्।) यथा,—

ययातिरुवाच।

"यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मात् प्रजासमुच्छेदं तुर्व्वसो! तव यास्यति॥ संकीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च। पितृमातृविरुद्धेषु नूनं राजा भविष्यसि॥ गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च। पशुधर्म्मेषु म्लेच्छेषु पापेषु च भविष्यसि॥"

इति मत्स्यपुराणम्॥

तुल, कि उन्मितौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) उन्मितिः परिमाणम्। कि, तोलयति तोलति काञ्चनं भणिक्। त्वदीयं सौन्दर्य्यं तुहिनगिरिकन्ये! तुलयितुमिति प्रकल्पोक्तम्। तुलां करोति इति णौ साधम्। इति दुर्गादासः॥

तुलसारिणी, स्त्री, (तुलेन वेगेन सरतीति। इ+णिनि+ङीप्।) लवणम्। इति शब्दमाला॥

तुलसी, स्त्री, (तुलां सादृश्यं स्यति नाशयतीति। सो+कः। गौरादित्वात् ङीष्। सर्व्वोत्तमत्वादेव सादृश्याभावादस्यास्तथात्वम्। यदुक्तं ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १५। १५।

"नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमक्षमाः। तेन नाम्ना च तुलसीं तां वदन्ति पुराविदः॥"

अस्या अन्या निरुक्तिरुक्ता दृहद्धर्म्मपुराणे। ७। ६३।

"तकारो मरणं प्रोक्तं तद्योगः स्यादुकारतः। न्तता लसति सेत्येवं तुलसीत्येव गीयते॥")

स्वनामख्यातवृक्षः। तत्पर्य्यायः। सुभगा २ तीव्रा ३ पावनी ४ विष्णुवल्लभा ५ सुरेज्या ६ सुरसा ७ कायस्था ८ सुरदुन्दुभिः ९ सुरभिः १० बहुपत्री ११ मञ्जरी १२ हरिप्रिया १३ अपेतराक्षसी १४ श्यामा १५ गौरी १६ त्रिदशमञ्जरी १७ भूतघ्नी १८ भूतपत्री १९। इति राजनिर्घण्टः॥ पर्णासः २० वृन्दा २१ कठिञ्जरः २२ कुठेरकः २३। इति शब्दरत्नावली॥ वैष्णवी २४ पुण्या २५ पवित्रा २६ माधवी २७ अम्लता २८ पत्रपुष्पा २९ सुगन्धा ३० गन्धहारिणी ३१। इति भरतधृतमधुमित्रः॥ सुरवल्ली ३२ प्रेतराक्षसी ३३ सुवहा ३४ ग्राम्या ३५ सुलभा ३६ बहुमञ्जरी ३७ देवदुन्दुभिः ३८। इति भावप्रकाशः॥*॥ क्षुद्रपत्रतुलस्याः पर्य्यायः। खरपत्रः १ जम्बीरः २ पत्रपुष्पः ३ फणिञ्जकः ४ अल्पपत्रः ५ समीरणः ६। इति रत्नमाला॥ मरुवकः ७ प्रस्थपुष्पः ८। इत्यमरः। २। ४। ७६॥*॥ गन्धतुलस्याः पर्य्यायः। सुगन्धकः १ गन्धनामा २ तीक्ष्णगन्धः ३ फणिञ्जकः ४ गन्धफणिञ्जकः ५ सुगन्धः ६ देवदुन्दुभिः ७ इति रक्ततुलस्याः पर्य्यायाः। इति लोकव्यवहारः॥*॥ विल्वगन्धतुलस्याः पर्य्यायः। वैकुण्ठकः १ विल्वगन्धः २ अल्पमानकः ३॥*॥ श्वेततुलस्याः पर्य्यायः। अर्ज्जकः १ श्वेतपर्णासः २ गन्धपत्रः ३ कुठेरकः ४ असार्ज्जकः ५ तीक्ष्णः ६ तीक्ष्णगन्धः ७ सितार्ज्जकः ८॥*॥ कृष्णतुलस्याः पर्य्यायः। कृष्णार्ज्जकः १ कृष्णवर्णः २ कालमानः ३ कराजकः ४ कालपर्णः ५ सुरभिः ६ मानकः ७ कालमानकः ८॥*॥ वर्व्वरीतुलस्याः पर्य्यायः। सुरभिः १ तुलसीदेवा २ सुरसा ३ अपेतराक्षसी ४। इति रत्नमाला॥ वर्व्वरी ५ कवरी ६ तुङ्गी ७ खरपुष्पा ८ अजगन्धिका ९। इत्यमरः। २। ४। १४६॥*॥ सामान्यतुलस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सुरभित्वम्। श्लेष्मवातजन्तुभूतक्लमिवान्तिनाशित्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥ दाहपित्तकारित्वम्। दीपनत्वम्। कुष्ठकृच्छ्रासपार्श्वरुङ्नाशित्वञ्च। शुक्ला कृष्णा च तुलसी गुणैस्तुल्या। इति भावप्रकाशः॥*॥ अस्या उत्पत्तिर्यथा। गोलोके इयं तुलसी गोपी श्रीकृष्णप्रिया श्रीकृष्णेन सह अस्याः क्रीड़ां दृष्ट्वा राधा शशाप त्वं मानवीं योनिं याहि। तच्छ्रुत्वा सा खिन्ना। गोविन्दस्तामुवाच त्वं भारते तपस्तप्त्वा ममांशं नारायणं लभिष्यसि। सा पृथिव्यां धर्म्मध्वजराजपत्न्यां माधव्यां कार्त्तिकीपूर्णिमायां जाता नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमयोग्यास्तेन इह लोकेऽपि तुलसीति नाम्ना ख्याता। सा तपस्तप्तुं वनं गता। तदानीं राधाशापात् सुदामगोपालो दानवीं योनिं प्राप्य शङ्खचूड़नाम्ना ख्यातः। सोऽपि ब्रह्मणो वरात् सर्व्वावध्यत्वं प्राप्तवान् परन्तु यदा तव पत्न्याः सतीत्वनाशो भविष्यति तदा मरिष्यसीति ब्रह्मा तमुक्तवान्। स तुलसीमुवाह देवानामधिकारञ्जहार। देवाः ब्रह्मसभां गताः। ब्रह्मा तैः सार्द्धं शिवलोकं गतवान्। शिवस्तैः सार्द्धं वैकुण्ठं गतवान्। नारायणो ब्रह्माणमुवाच मम शूलं गृहीत्वा शिवो युद्धार्थं तत्र गच्छतु अहञ्च शङ्खचूड़रूपेण तत्पत्न्याः सतीत्वभङ्गं करिष्यामीति श्रुत्वा शिवस्तत्र जगाम, स शिवेन सह युद्धे नियुक्तस्तदानीं नारायणस्तत्पत्नीं तद्रूपेण धर्षितवान्। पश्चात् सा नारायणं ज्ञात्वा शशाप त्वं पाषाणो भव जन्मान्तरे आत्मानं विस्मरिष्यसि इत्युक्त्वा तत्करणे पपात रुरोद च। तदा नारायणस्तामुवाच त्वमिदं शरीरं त्यक्त्वा रमासदृशी भव मया सह क्रीड़ेयं तनुर्गण्डकी नदी भवतु तव केशसमूहस्तुलसीनामा पुण्यवृक्षो भवतु तदा तत् सर्व्वमभूत्। एतद्विवरणन्तु ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायमारभ्य विस्तरशो द्रष्टव्यम्॥*॥ पद्मपुराणमते जलन्धरपत्नीवृन्दावणयदर्शनेन विष्णुर्मुग्धः। तन्मोहवारणार्थं देवा महादेवशरणङ्गताः। महादेवस्तानुवाच मायामाराधय। ते मायां तुष्टुवुः माया तानुवाच अहं रजःसत्वतमोगुणैर्गौरीलक्ष्मीसरस्वतीरूपेण तिष्ठामि। ता युष्माकं कार्य्यं विधास्यन्ति तच्छ्रुत्वा देवास्तासां समीपमागत्य प्रणेमुः तास्तेभ्यो बीजानि दत्त्वोवाच यत्र विष्णुस्तिष्ठति तत्रेमानि बीजानि वपत देवास्तथा चक्रुस्तद्दत्तेभ्यस्त्रयो वृक्षा अभवन् धात्री मालती तुलसी च धात्री स्वयंशभूता मालती लक्ष्मीशभूता तुलसी गौर्य्यंशभूता॥*॥ तुलस्या माहात्म्यं यथा।

ब्रह्मोवाच।

"तुलस्याः शृणु माहात्म्यं पापघ्नं सर्व्वकामदम्। यत् पुरा विष्णुना प्रोक्तं तच्छे वक्ष्याम्यशेषतः॥ सम्प्राप्तं कार्त्तिकं दृष्ट्वा नियमेन जनार्द्दनः। पूजनीयो मद्विधैश्च कोमलैस्तुलसीदलैः॥ दृष्टा स्पृष्टा तथा ध्याता कार्त्तिके नमिताऽर्चिता। रोपिता सेविता नित्यं पापं हरति युगार्ज्जितम्॥ अथवा तुलसी येषु सेविता द्विजसत्तम!। युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे॥ रोपिता तुलसी यावत् कुरुते मूलविस्तृतम्। तावद्युगसहस्राणि तनोति सुखदं हरिः॥ तुलसीदलपुष्पाणि यो दद्याद्धरये सुने!। कार्त्तिके सकलं पापं सोऽत्र जन्मार्ज्जितं दहेत्॥ रोपिता तुलसी यावत् वर्द्धते वसुधातले। तावत्कल्पसहस्राणि विष्णुलोके महीयते॥ यत् फलं सर्व्वपुण्येषु सर्व्वपर्व्वसु यत् फलम्।

तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने ॥
तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश पुनात्याशु भूतग्रामांश्चतुर्विधान् ॥
तुलसीकाननोद्भूता छाया यत्र भवेन्मुने ! ।
तत्र श्राद्धं प्रदातव्यं पितृणां तृप्तिहेतवे ॥
तुलसीबीजनिकरो यस्मिन् पतति वै सुने ! ।
तत् स्थानं परमं ज्ञेयं पितृणां प्रीतिवर्द्धनम् ॥
यस्मिन् गृहे द्विजश्रेष्ठ ! तुलसीतलमृत्तिका ।
तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः ॥
तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत् ।
यमेन नेक्षितुं शक्यो मुक्तः पापशतैरपि ॥
तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते ।
कृतं स्पृशति नो तस्य कलिर्नित्यं निवारितम ! ।
यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः ।
दीपं ददाति विप्रेन्द्र ! स लभेद्वैष्णवं पदम् ॥
तुलसीकाननं चैव गृहे यस्यावतिष्ठते ।
तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः ॥
दर्शनं नर्म्मदायास्तु गङ्गास्नानं तथैव च ।
तुलसीवनसंसर्गः समभेतत्त्रयं स्मृतम् ॥
रोपणात् पालनात् सेवाद्दर्शनात् स्पर्शनान्नृणाम् ।
तुलसी दहते पापं वाङ्मनःकायसञ्चितम् ॥
तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥
पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीदले ॥
तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति ।
यमो न वीक्षितुं शक्तो मुक्तः पापशतैरपि ॥"

इति पाद्मोत्तरखण्डम् ॥ * ॥

"यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! ।
तत्रैव चिदृशाः सर्व्वे ब्रह्मविष्णुशिवादयः ॥
कैशवः पञ्चमध्येषु पत्राग्रेषु प्रजापतिः ।
पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदेव हि ॥
लक्ष्मीः सरस्वती चैव गायत्री सावित्रिका तथा ।
मूले चान्या देवपत्न्यस्तनुपुष्पेषु वसन्ति वै ॥
इन्द्रोऽग्निः शमनश्चैव नैर्ऋतो वरुणस्तथा ।
पवनश्च कुबेरश्च तच्छाखायां वसन्त्यमी ॥
आदित्यादिग्रहाः सर्व्वे विश्वेदेवाश्च सर्व्वदा ।
वसवो मरुतश्चैव तथा देवर्षयोऽखिलाः ॥
विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा ।
तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति वै ॥
चिन्वन्ति दलजातानि तुलसीमूलजानि वै ।
तद्देहस्था ब्रह्महत्यां चिनोति तत्क्षणाद्धरिः ॥
शोषकाले द्विजश्रेष्ठ ! सुगन्धैः घृतलैर्जलैः ।
तुलसीसेचनं कृत्वा नरो निर्व्वाणमाप्नुयात् ॥
चन्द्रायणं वा कृच्छ्रं वा तुलस्या यस्तु यच्छति ।
विशेषतो निदाघेषु स मुक्तः सर्व्वपातकैः ॥
पञ्चामृतैश्चतधाराभिरर्च्चयेत्तुलसीं जनः ।
संचयेत् सोऽश्वमेधस्य फलं प्राप्नोति निश्चयः ॥
अष्टाभिस्तुलसीं दत्त्वा संचयेद्यो नरोत्तमः ।
तस्य वेश्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला ॥
गोमयेरुत्तमे मूले यः कुर्य्यादनुलेपनम् ।
सम्मार्जनञ्च कृत्वा तस्य पापक्षयं शृणु ॥
रजांसि तस्य यावन्ति दूरीभूतानि नैमिने ! ।
तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह ॥
यद्यन्मैकर्म्म कुरुते मनुजः पृथिव्यां-
नारायणप्रियतमां-तुलसीं विना च ।
तत् सर्व्वमेव विफलं भवति द्विजेन्द्र !
पद्मेक्षणोऽपि न हि तुष्यति देवदेवः ॥
यस्य स्यात् तुलसीपत्रं मुखे शिरसि कर्णयोः ।
मृत्युकाले द्विजश्रेष्ठ ! तस्य स्वामी न भास्करिः ॥"

इति पाद्मे क्रियायोगसारः ॥ * ॥

"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
तुलसीपत्रतोये च योऽभिषेकं समाचरेत् ॥
गवामयुतदानेन यत् फलं लभते नरः ।
तुलसीपत्रदानेन तत् फलं कार्त्तिके सति ॥
तुलसीतोयकणिकां मृत्युकाले च यो लभेत् ।
रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च ॥
त्रिकालं तुलसीपत्रं शुद्धं पर्य्युषितं सति ।
श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने ॥
भुक्तं तोयपतितं यद्दत्तं विष्णवे सति ।
मुञ्चन्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि ॥"*॥

तुलसीक्षयनिषेधकालो यथा,—

"पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे ।
तैलाभ्यङ्गे च स्नातेन मध्याह्ने निशिसन्ध्ययोः ॥
अपौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा ।
तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः
शिरः ॥" * ॥

तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषो यथा,—

"तुलसीं सकरे कृत्वा स्वीकारं यो न रक्षति ।
स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ ॥
करोति मिथ्याशपथं तुलस्या यो हि मानवः ।
स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्दश ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ।

तुलसीपत्रचयने मन्त्रो यथा,—

"मातस्तुलसि गोविन्दहृदयानन्दकारिणि ! ।
नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते ॥
कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः ।
त्वया विना नैव तुष्टिं चिनोमि त्वामतः शुभे ॥
त्वया विना महाभागे समस्तं कर्म्म निष्फलम् ।
अतस्तुलसि देवि ! त्वां चिनोमि वरदा भव ॥
चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते ।
तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् ॥
क्षीताञ्जलिरिमान्मन्त्रान् पठित्वा वैष्णवो जनः ।
करतालचयं दत्त्वा चिनुयात्तुलसीदलम् ॥
शुभैः शुभैस्तथाकारैश्चयते तुलसीदलम् ।
यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! ॥
पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् ।
तथा हृदि यथा विष्णोर्दीयते तुलसीपतेः ॥"

इति पाद्मे क्रियायोगसारः ॥ * ॥

तुलसीकाष्ठमालाभाहात्म्यं यथा,—

"तुलसीकाष्ठनिर्म्माणमालां धारयन्ति ये नराः ।
पदे पदेऽश्वमेधानां लभते निश्चितं फलम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

"सालग्रामशिलायाञ्च तुलसीकाष्ठमाला कृष्णसमुद्भवा ।
धार्य्या नित्यं प्रयत्नेन सर्व्वतीर्थफलप्रदा ॥
हरिभक्तस्य तुलसीकृष्णकाष्ठसमुद्भवा ।
चिह्नार्थमात्मनो माला पुरा कृष्णेन दर्शिता ॥"

इति पाद्मोत्तरखण्डम् ॥ * ॥

गणेशपूजने तुलसीनिषेधो यथा । तुलसीं प्रति गणेशवाक्यम् ।

"पुण्यानां सारभूता त्वं भविष्यसि मनोरमे ! ।
कलांशेन महाभागे ! स्वयं नारायणप्रिया ॥
प्रिया त्वं सर्व्वदेवानां कृष्णस्य च विशेषतः ।
पूजा विमुक्तिदा नृणां मम त्याज्या च सर्व्वदा ॥"

इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥

तुलस्याः स्तवो यथा,—

नारायण उवाच ।

"वृन्दां वृन्दावनीं विश्वपूजितां विश्वपावनीम् ।
पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥
एतन्नामाष्टकञ्चैतत् स्तोत्रं नानार्थसंयुतम् ।
यः पठेत्ताञ्च संपूज्य सोऽश्वमेधफलं लभेत् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

महादेवाय तस्याः पत्रदानफलं यथा,—

"यथाश्राद्धफलं दातुः पितृणां परितोषदम् ।
तत्फलं स्याच्छतगुणं तुलसीपत्रदानतः ॥"

इति वृहद्धर्म्मपुराणे १० अध्यायः ॥ * ॥

तस्यास्तन्मञ्जर्य्याञ्च हरिहरपूजने मुक्तिप्रदत्वं पाद्मे दोढ़तविकुण्ठलसंवादे ।

"तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥"

इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥

तत्पत्रेण पुष्पपूजाविधिर्यथा,—

"वाजिदन्तकपत्रैश्च पुष्पैरेरपि चण्डिकाम् ।
तुलसीकुसुमैः पत्रैरर्चयेच्छ्रीविष्णवे ॥"

इति श्रीकालिकापुराणे ६८ अध्यायः ॥ * ॥

अथ तुलसीग्रहणविधिः । वायुपुराणे ।

"अक्षालां तुलसीं छित्त्वा यः पूजां कुरुते नरः ।
सोऽपराधी भवेत् सद्यं तत् सर्व्वं निष्फलं भवेत् ॥"

तत्रादौ मन्त्रः । स्कान्दे ।

"तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थं चिनोमि त्वां वरदा भव शोभने ॥
त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् ।
तथा कुरु पवित्राङ्गि कलौ मलविनाशिनि ! ॥"

गारुड़े च ।

"मोचैकहेतो धरणीप्रसूस्ते
विष्णोः समस्तस्य गुरोः प्रियेति ।
आराधनार्थं वरमञ्जरीकं
लुनामि पत्रं तु क्षमस्व ॥

शुक्ला तुलसीं नत्वा चित्वा दक्षिणपाणिना ।
पत्राग्रेणैकशो न्यस्येत् सत्पात्रे मञ्जरीरपि ॥"

तन्माहात्म्यञ्च स्कान्दे ।

"मन्त्रेणानेन यः कुर्य्याद् गृहीत्वा तुलसीदलम् ।
पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् ॥"

किञ्च ।

"शालग्रामशिलार्चार्थं प्रत्यहं तुलसीच्छिदौ ।

तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ॥"
इति ॥ * ॥
"संक्रान्त्यादौ निषिद्धोऽपि तुलस्यवचयः स्मृतः ।
परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते ॥"*॥
अथ तुलस्यवचयनिषेधकालः । विष्णुधर्मोत्तरे ।
"न छिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः
क्वचित् ॥"
गारुडे ।
"भानुवारं विना दूर्वां तुलसीं द्वादशीं विना ।
जीवितस्याविनाशाय न विचिन्वीत धर्मवित् ॥"
पाद्मे च ।
श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।
"द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके ।
स्पृशति स नरो गच्छेन्निरयानेकविंशतिम् ॥"
अतएवोक्तम् ।
"देवार्थं तुलसीच्छेदो होमार्थे समिधान्तथा ।
इन्द्रवधे न दुष्येत गवार्थे तु वधस्य च ॥
एवं ज्ञात्वा महापूजामङ्गोपाङ्गादिकं प्रभोः ।
क्रमादृथा सम्प्रदायं तत्तत्स्थानेषु पूजयेत् ॥"
इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥
अथ तुलसीविवाहः प्रतिष्ठाविधिश्च ।
श्रीवशिष्ठ उवाच ।
"विवाहं संप्रवक्ष्यामि तुलस्यास्तु यथाविधि ।
यथोक्तं पद्मरात्रे वै ब्रह्मणा भाषितं पुरा ॥
आदावेव वनेऽवाप्य तुलसीं खगदेऽपि वा ।
वर्षत्रयेण पूर्णेन ततो यजनमारभेत् ॥
सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा ।
अथवा कार्त्तिके मासि भीष्मपञ्चदिनेषु च ॥
वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः ।
मण्डपं कारयेत्तत्र कुण्डवेदीं तथा पुनः ॥
शान्तिकञ्च प्रकर्त्तव्यं मातॄणां स्थापनं तथा ।
मातृश्राद्धादिकं सर्वं विवाहवत् समाचरेत् ॥
ब्राह्मणांश्च शुचिस्नातान् वेदवेदाङ्गपारगान् ।
ब्रह्मा चादेशकश्चैव चत्वारश्च तथर्त्विजः ॥
वैष्णवेन विधानेन वर्द्धनीकलसं यजेत् ।
मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम् ॥
ग्रहयज्ञं पुरः कृत्वा मातॄणां यजनं तथा ।
कृत्वा नान्दीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिम् ॥
कृत्वारोप्य च तुलसीं लग्ने लग्नमिते रवौ ।
वासः प्रतेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत् ॥
यदा वध्नेति मन्त्रेण कङ्कणं पाणिपल्लवे ।
कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते ॥
ततः कुण्डे समागत्य आचार्यः सहसा द्विजैः ।
आचार्यो वैदिकाकुण्डे जुहुयाच्च नवाहुतीः ॥
विवाहकर्म्मवत् सर्वं वैष्णवं दैशिकोक्तमेः ।
कर्त्तव्यञ्च ततो होमो विशेषाद्विधिपूर्वकम् ॥"
ॐ नमो भगवते केशवाय नमः स्वाहा । नारायणाय स्वाहा । माधवाय । गोविन्दाय । विष्णवे । मधुसूदनाय । त्रिविक्रमाय । वामनाय । श्रीधराय । हृषीकेशाय । पद्मनाभाय । दामोदराय । उपेन्द्राय । अनिरुद्धाय । अच्युताय ल्लाय । गदिने । चक्रिणे । विश्वाक-

सेनाय । वैकुण्ठाय । जनार्द्दनाय । मुकुन्दाय । अधोक्षजाय स्वाहा । इति होमः ॥
यजमानः सपत्नीको ह्यन्ये ये गोत्रबान्धवाः ।
प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह ॥
तुलस्याः पाणिग्रहणे वैदिकायां विभावसौ ।
घृतकुम्भं जपेत् सूक्तं पावमानीं विशेषतः ॥
तथैव शान्तिकाध्यायं नवसूक्तं तथैव च ।
जीवसूक्तं पुनर्ब्रह्मा तथा वैष्णवसंहिताम् ॥
शङ्खभेरिनिर्घोषैर्वेदतूर्य्यस्य निस्वनैः ।
गायन्ते मङ्गला नार्य्यो माङ्गल्यं विधिमाचरेत् ॥
दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः ।
ब्राह्मणे वृषभं दद्यादाचार्य्यं परिधाप्य च ॥
गां पटञ्च तथा शय्यामाचार्य्याय प्रदापयेत् ।
ऋत्विग्भ्यो दापयेद्दक्षाराश्चेयां दद्याच्च दक्षिणाम् ॥
एवं प्रतिष्ठितां देवीं विष्णुना च समर्घयेत् ।
आजन्मोपार्ज्जितं पापं दर्शनेन प्रणश्यति ॥
रोपयेत्तुलसीं यस्तु सेवयेच्च प्रयत्नतः ।
प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः ॥
स मोक्षं लभते जन्तुर्विष्णुलोकं तथाक्षयम् ।
प्राप्नोति विपुलान् भोगान् विष्णुना सह
मोदते ॥
प्रतिष्ठा श्रीतुलस्यास्तु लिखिता विष्णुयामले ॥"
इति श्रीहरिभक्तिविलासे २० विलासः ॥
तुलसीदेवी, स्त्री, (तुलसीं देवि तुल्यगन्धत्वात् खण्डते इति । द्विध+अच् । ततष्टाप् ।) वर्ब्बरी । इति रत्नमाला ॥ (वर्ब्बरीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)
तुला, स्त्री, (तोल्यतेऽनया । तुल उन्माने भिदादङ् । यतुलोपमाभ्यामिति निर्द्देशात् गुणाभावः ।) सादृश्यम् । (यथा, रघुः । ८।१५ ।
"नभसा निभृतेन्द्रना तुलां
मुदितार्केण समारुरोह तत् ॥")
मानम् । (यथा, पञ्चतन्त्रे । २ । ८४ ।
"सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति
सारतां तस्य ।
हस्तितुलयापि निपुणाः पलपरिमाणं
विजानन्ति ॥")
गृहाणां दारुबन्धाय पीठिका । पलशतम् । (यथा, अमरकोषे । २ । ६ । ८७ ।
"तुला स्त्रियां पलशतं भारः स्यात् विंशतिस्तुला ॥")
भारखम् । इति मेदिनी । ले, २५ ॥ मेषादिद्वादशराश्यन्तर्गतसप्तमराशिः । तत्पर्य्यायः । यूकः २ युक् ३ घटः ४ तौली ५ तुलाभृत् ६ । इति ज्योतिषम् ॥ सा चित्रार्द्धपादद्वयस्वातीविशाखाप्रथमपादत्रयेण भवति । तदधिष्ठातृदेवता तुलाधारिपुरुषः । अस्याः शीर्षस्य उदयः नानावर्णः उष्णस्वभावः । सा पश्चिमदिक्स्वामिनी वायुराशिः स्निग्धा चित्रणा निःशब्दा वनचारिणी अल्पसन्तानः अल्पस्त्रीसङ्गा शूद्रवर्णा समानाङ्गा च । तत्र

जातस्य फलम् । वक्ता विद्यावरः स्त्रीदुःखितः ।
इति जातकम् ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"वृषतुरङ्गगजक्रयविक्रयो
द्विजसुरार्चनदानमनाः पुमान् ।
अग्निनि तौलिगते बहुदारभाविभवसंस्थितचित्तविक्रमः ॥"
इति कोष्ठीप्रदीपः ॥
तस्या उदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं दण्डाद्यङ्गुलाधिकपञ्चाङ्गुलप्रमे देशे वर्त्तमानोनविंशायनांशे षट्चिंशत् पलाधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तत्र जातफलम् ।
"तुलालग्ने पुमान् जातः सुधीः सत्कर्म्मतत्परः ।
विद्वान् सर्व्वकलाविज्ञो धनाढ्यो जनपूजितः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
परीक्षाविशेषः । यथा नारदः ।
"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥"*
अथ तस्या उत्पत्तिविधिः । यन्नियं वृत्तं यूपवन्मन्त्रपूर्व्वकं क्षित्वा लोकपालेभ्यः प्रदाय पश्चिमे चतुर्हस्ता चतुरस्रा ऋजुस्तुला कार्य्या तत्र विंशु स्थानेषु बलयानि दातव्यानि । तत्र वक्ष्यमाणौ स्तम्भौ कृत्वा हस्तद्वयप्रमाणेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखननं कृत्वा षट्धारककीलकाग्रस्तम्भयोरुपरि अन्तर्हस्तच्छिद्रं मध्यनिवेशितलौहाङ्कुशपट्टकं निधाय तत्पट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यबलयस्थलौहं संयुञ्जयात् । एवञ्च सति स्तम्भयोरन्तरतिर्य्यक् तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यद्वयरज्ज्वन्तं कुर्य्यात् । तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरिरूढसंनद्धौ न्यग्न्यायावधोमुखौ घटमस्तकमुन्निनावबलम्बौ कार्य्यौ । तुलादण्डः पूर्व्वपश्चिमयोर्धार्य्यः । पूर्व्वशिक्ये शिलां तोलयेत् पश्चिमे कर्त्तारं तुलाया उपरि जलं देयं यदि जलं न भवते तदा तुला समा ज्ञेया ॥ * ॥ अथैतत्प्रयोगः । कृतोपवासः कृतस्नानादिः प्राङ्विवाको ब्राह्मणः कार्य्यं दृक्षेत् निवेदितं विवेचयेत् । ततोऽभियुक्तं तोलयित्वावतार्य्य धर्म्मावाहनादिकं कुर्य्यात् । ॐ तत् सदित्युच्चार्य्य ब्राह्मणत्रयं गन्धादिना पूजयित्वा तान् स्वस्तिपुण्याहर्द्धिं प्रत्येकं निर्व्वाचयित्वा दिग्भागभूतहोमार्थं ब्रह्मचतुष्टयं ऋत्विक्चतुष्टयञ्च पाद्यादिभिरभ्यर्च्य वृणुयात् । अग्रतश्चैकं ब्राह्मणमेकं ऋत्विजञ्च । ततस्तुलां समतां ध्वजालङ्कृतां भूमौ निधाय तस्यां प्राङ्मुखः प्राङ्विवाकः पुण्याहमादाय ॐ भूर्भुवः स्वरित्युच्चार्य्य ।
एह्येहि भगवन् धर्म्म! दिव्ये ह्यस्मिन् समाविश ।

सहितो लोकपालेश्च वस्वादित्यमरुद्गणैः ॥
इति मन्त्रेण धर्म्ममावाह्य इदमर्घ्यं ॐ धर्म्माय नमः इत्यादिप्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयवस्त्रयज्ञोपवीताचमनीयमुकुटकटकभूषणान्तं दत्त्वा तथैवार्घ्यादिभूषणान्तं प्रणवादिनमोऽन्तेन स्वस्वनाम्ना पूर्व्वस्यां इन्द्राय दक्षिणस्यां यमाय पश्चिमे वरुणाय उत्तरस्यां कुबेराय आग्नेय्यां अग्नये नैर्ऋत्यां निर्ऋतये वायव्यां वायवे ऐशान्यां ईशानाय। इन्द्रस्य दक्षिणपार्श्वे अष्टवसुभ्यः प्रत्येकं नामभिः। तत्र धराय ध्रुवाय सोमाय आपाय अनिलाय अनलाय प्रत्यूषाय प्रभासाय। इन्द्रेशानयोर्म्मध्ये तथा द्वादशादित्येभ्यः तत्र धात्रे अर्य्यमणे मित्राय वरुणाय अंशवे भगाय इन्द्राय विवस्वते पूष्णे पर्জ্জन्याय त्वष्ट्रे विष्णवे। अग्निपश्चिमभागे तथैकादशरुद्रेभ्यः तत्र वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिब्रध्नाय पिनाकिने अपराजिताय भुवनाधीश्वराय कपालिने स्थाणवे भवाय। यमरक्षसोर्म्मध्ये तथा माहेभ्यः तत्र ब्राह्म्यै माहेन्द्र्यै कौमार्य्यै वैष्णवै वाराह्यै माहेन्द्र्यै चामुण्डायै निर्ऋत्युत्तरे गणेशाय वरुणोत्तरे अष्टमरुद्भ्यः तत्र असनाय स्पर्शनाय वायवे अनिलाय मारुताय प्राणाय प्राणेशाय जीवाय घटोत्तरभागे दुर्गायै पाद्यादिभूषणान्तं दत्त्वा धर्म्माय गन्धपुष्पधूपदीपनैवेद्यानि पूर्ब्बवद्दत्त्वा इन्द्रादिदुर्गान्तेभ्यो गन्धादिकं दद्यात्। ततश्चतुर्हस्तं चतुर्भिर्ऋत्विग्भिश्चतुरोऽमीन् अग्रस्थावेकर्त्विजेकमग्निं प्राङ्विवाकः ग्रन्थोक्तविधिना संस्थाप्य प्रणवपुटितां सव्याहृतिकां गायत्रीं स्वाहान्तां सुचार्य्य घृतेन पायसेन समिद्भिर्मिलिताभिरष्टोत्तरशतं अष्टाविंशतिं अष्टौ वा जुहुयात्। ततो दक्षिणां दद्यात्। एवं हवनान्तं देवपूजां विधाय ग्रीष्मे कृतोपवासं आद्यंवासं पश्चिमाग्नेये कृत्वा दक्षकांश्च पूर्ब्बाग्नेये कृत्वा उक्तोक्त्य घटोपरि जलदानेन साम्यमवगम्य अवतारयेत्। ततः प्राङ्विवाकः तद्दिनकञ्चलग्नस्था विच्छेदाद्यादिसूत्यां षड्लिङ्गेन समसंख्याक्षरेण

आदित्यचन्द्रावनिलो नलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥

इति चतुश्चत्वारिंशदक्षरमन्त्रसमेतामभियुक्तार्थकरणाकरणरूपमिदमस्मे दत्तमिदमद्यमस्मान्मया न गृहीतमित्यादिरूपां प्रतिज्ञां लिपिपत्रे विलिख्य तत् पत्रं ग्रीष्म शिरोगतं कुर्य्यात्। ततः प्राङ्विवाको घटमामन्त्रयेदेभिः।

त्वं घटो ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम्।
धकाराद्धर्म्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम्॥
धृतो धारयते यस्माद्घटस्तेनाभिधीयते।
त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च॥
त्वमेव देव! जानीषे न विदुर्यानि मानवाः।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति॥
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि॥"

तुलाधारकश्च नियमेदनेन। [साक्षिणः।
"ब्रह्मघ्ना ये स्मृता लोका ये लोकाः कूटतुलाधारस्य ते लोकास्तुलां धारयतो मृषा॥"

ग्रीष्मस्तु तुलामभिमन्त्रयेदनेन।

त्वं तुले! सत्यधामासि पुरा देवैर्विनिर्म्मिता।
तत् सत्यं वद कल्याणि! संशयान्मां विमोचय॥
यद्यस्मिन् पापसम्भारस्ततो मां त्वमधो नय।
शुद्धश्चेन्मयि हे मां सर्व्वं वेत्सि कृताकृतम्॥

ततः प्राङ्विवाकः पूर्ब्बाननं तं पूर्ब्बवदृक्षमारोपयेत्। आरोपितं मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वाधीः कान्तं वक्रं वृत्तं पूर्णं चन्द्रं मला रात्रौ चेत्। चुतुष्कामः प्राटंश्चेत्क्षेतो राहुः क्रूरः प्राप्तात्तस्माद्दान्ते हर्म्मस्यान्ते ग्रथ्नेकान्ते कर्त्तया इत्यस्य पक्षधा पाठकालस्तत्र शुद्धाशुद्धज्ञानाय स्थापयेत्। ततः प्रतिमानद्रव्यादूर्द्धावस्थाने शुद्धः। अधोऽवस्थाने त्वशुद्धः। समावस्थाने अल्पदोषः। सन्देहे पुनःपरीक्षा देया। कक्षकीलकग्निक्ययपादाद्यादीनां दृष्टकारणव्यतिरेकेण छेदे भङ्गे वाप्यशुद्धिमादिशेत्। ततः पुरोहिताचार्य्यादीन् दक्षिणादिभिस्तोषयेत्।" इति दिव्यतत्त्वम्॥

तुलाकोटिः, स्त्री, (तुलां षाडयं कोटयते इति। कुट+इन्।) नूपुरः। (यथा, माघे। १२।४४।

"लीलाचलत्कलक्वीचरणरणोत्पल-
खलत्तुलाकोटिनिनादकोमलः॥"

तुलया मानेन कुटतीति। कुट कौटिल्ये+इन्।) मानभेदः॥ अर्बुदः। इति हेमचन्द्रः। ३। ३२६॥

तुलाकोटी, स्त्री, (तुलाकोटि+ङीदिकारादिति वा ङीष्।) तुलाकोटिः। इत्यमरटीकायां भरतः॥

तुलाकोषः, पुं, (तुलायाः परिमाणस्य कोष इव।) तुलापरीक्षा। इति मिताक्षरा॥

तुलाधारः, पुं, (तुलां धरति धारयति वा। तुला+धृ+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) तुलाराशिः। वणिजि, त्रि। इति मेदिनी। रे, २६४॥ तुलागुणः। इति हेमचन्द्रः॥ (खनामख्यातो वणिग्धर्म्मा पुरुषविशेषः। यथा, महाभारते। १२। २६०। ८।

"तुलाधारो वणिग्धर्म्मा वाराणस्यां महायशाः।
सोऽप्येवं नाहते वक्तुं यथा त्वं द्विजसत्तम!॥")

तुलापुरुषदानं, क्ली, (तुलापुरुषस्य तुलोन्मितपुरुषभारसमपरिमितद्रव्यस्य दानम्। यद्वा, तुलापुरुषविधिना दानम्।) षोड़शमहादानान्तर्गतदानविशेषः। यथा,—

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्॥"

तस्य कालो यथा,—

"नोक्तानि यानि गुह्यानि महादानानि षोड़श।
तानि ते संप्रवक्ष्यामि यथावदनुपूर्ब्बशः॥
तुलापुरुषयागोऽयं येषामादौ विधीयते।
अयने विषुवे चैव व्यतीपाते दिनक्षये॥
युगादिषूपरागेषु तथा मन्वन्तरादिषु।
संक्रान्त्यां पौर्णमास्यां च द्वादशीष्वष्टकासु च॥
यज्ञोत्सवविवाहेषु दुःस्वप्नादृभुतदर्शने।
ग्रहयज्ञाङ्गलाभो वा श्रद्धा वा यत्र जायते॥"

तस्य देशो यथा,—

"तीर्थे वायतने गोष्ठकूपारामसरित्सु च।
गृहे वाथ वने वापि तड़ागे रुचिरेऽथवा॥
महादानानि देयानि संसारभयभीरुणा॥"

अस्य विधानं यथा,—

"पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्।
मण्डपं रचयेद्विद्वान् षोड़श द्वादश वा करान्॥
मण्डपं कारयेद्विद्वांश्चतुर्भद्रासनं बुधः।
सप्तहस्ता भवेद्वेदी मध्ये पञ्चकराथ वा॥
तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं शुभम्।
कुर्य्यात् कुम्भानि चत्वारि चतुर्दिक्षु विचक्षणः॥"

तुलारोपणप्रस्तावे।

"रश्मिभस्तोरणाग्रे तु बन्धयेच्च विधानतः।
सुमेखलायोनिसमायुतानि
संपूर्णकुम्भानि सहासनानि।
सुताम्रकुण्डद्वयसंयुतानि
सयज्ञपात्राणि सहस्रवाणि॥
हस्तप्रमाणानि तिलाज्यपूर-
पुष्पोपहाराणि सुशोभनानि।
पूर्ब्बोत्तरे हस्तमिता च वेदी
ग्रहादिदेवेश्वरपूजनाय॥
अर्घ्यार्चनं ब्रह्मशिवाच्युतानां
तत्रैव कार्य्यं फलवस्त्रमाल्यैः।

ब्रह्मशिवाच्युतानां प्रतिमासु पूजा कार्य्या इतरेषां स्थण्डिले कार्य्या।

लोकेशवर्णाः परितः पताका-
मध्ये ध्वजं किङ्किणिकायुतं स्यात्॥
द्वारेषु कार्य्याणि च तोरणानि
चत्वार्यपि क्षीरवनस्पतीनाम्।
द्वारेषु कुम्भद्वयमत्र कार्य्यं
सगन्धपूपाम्ररत्नयुक्तम्॥ * ॥

यत्पूर्ब्बं सारदारुमयं कुर्य्यादित्युक्तं तस्येदानीमनुष्ठानमाह।

सालेङ्गुदीचन्दनदेवदारु-
श्रीपर्णिबिल्वप्रियकाश्वगोत्थम्।
स्तम्भद्वयं हस्तयुगावखातं
कृत्वा दृढं पञ्चकरोच्छ्रितं तत्॥
तदन्तरं हस्तचतुष्टयं स्या-
दधोत्तरायाश्च तदङ्गमेव॥ * ॥

चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ।
अन्तरन्तु तयोर्हस्तौ भवेदर्धाङ्गमेव च॥

समानजातिश्च तुलावलम्बा
हैमेन मध्ये पुरुषेण युक्ता।

हैमेन पुरुषेणेति सुवर्णनिर्म्मितवासुदेवाद्यतिरेकेणेति बोद्धव्यम्।

दैर्घ्येण सा हस्तचतुष्टयं स्यात्
पूर्णत्वमस्यास्तु दशाङ्गुली स्यात्॥
सुवर्णपत्राभरणा च कार्य्या
सुलोहपाशद्वयमत्र हस्तलाभिः।

युता सुवर्णेन तु रत्नमाला
विभूषिता माल्यविलेपनाढ्या ॥
चक्रं लिखेद्वारिजगर्भयुक्तं
नानारजोभिर्भुवि कीर्णपुष्पम् ।
वितानकस्योपरि पञ्चवर्णं
संस्थापयेत् पञ्चपताकशोभम् ॥
इति तुलानिर्म्माणमुक्तम् ॥ * ॥
अथ द्विजा वेदविदश्च कार्ष्ण्यः
सुवामवेशान्वयशीलयुक्ताः ।
विधानदक्षाः पटवोऽनुकूला
ये चार्य्यदेशप्रभवा द्विजेन्द्राः ॥
गुरुश्च वेदाङ्गविदार्य्यदेश-
समुद्भवः शीलकुलाभिरूपः ।
कार्य्यः पुराणाभिरतोऽतिदक्षः
प्रसन्नगम्भीरसरस्वतीकः ॥
पूर्व्वेण ऋग्वेदविदौ यथास्यां
यजुर्विदौ दक्षिणतश्च पश्चात् ।
स्याप्यौ द्विजौ सामविदौ च पश्चा-
दथर्व्वणाबुत्तरतश्च कार्य्यौ ॥
विनायकादित्यहलोकपाल-
वसुद्रकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशानवनस्पतीनां
क्रमक्रतो होमचतुष्टयं स्यात् ॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथा स्वरूपम् ।
अभ्यर्च्चयेल्लोकपतीन् क्रमेण
मन्त्रैरमीभिर्यजमानयुक्तः ॥
इत्यावाह्य सुरान्दद्यादृत्विग्भ्यो हेमभूषणम् ।
कुण्डलानि च हैमानि सूत्राणि कटकानि च ॥
द्विगुणं गुरवे दद्याद्भूषणाच्छादनादिकम् ।
जपेयुः शान्तिकाध्यायं जापकाः सर्व्वतो दिशम् ॥
उपोषितास्ततः सर्व्वे कृत्वैवमधिवासनम् ।
आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम् ॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमाकृत्य गृहीतकुसुमाञ्जलिः ॥
शुक्लमाल्याम्बरो भूत्वा तां तुलामभिमन्त्रयेत् ।
नमस्ते सर्व्वदेवानां शक्तिरूपं शक्तिमाश्रिता ।
साक्षीभूता जगद्धात्रा निर्म्मिता विश्वयोनिना ॥
एकतः सर्व्वसत्यानि तथा भूतशतानि च ।
धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते ॥
त्वं तुले ! सर्व्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥
योऽस्य तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः ।
स एवाधिष्ठितो देवि ! त्वयि तस्मान्नमोऽस्तु ते ॥
नमो नमस्ते गोविन्द ! तुलापुरुषसंज्ञक ! ।
त्वं हरे ! तारयस्वास्मानस्मात् संसारसागरात् ॥
पुण्यं कालमथासाद्य कृत्वाधिवासनं पुनः ।
पुनः प्रदक्षिणं कृत्वा तां तुलामारुहेद्बुधः ॥
सखड्गचर्म्मः कवची सर्व्वाभरणभूषितः ।
धर्म्मराजमथादाय हेमं सूर्य्येण संयुतम् ॥
कराभ्यां मृदुमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम् ।
ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः ॥
सा स्याद्यधिकं यावत् काञ्चनं चातिनिर्म्मलम् ।
पुष्टिकामस्तु कुर्व्वीत भूमिसंस्थन्नरेश्वर ! ॥
क्षणमात्रं ततः स्थित्वा पुनरेतदुदीरयेत् ।
नमस्ते साक्षीभूतानां साक्षीभूते सनातनि ! ॥
पितामहेन देवि ! त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्व्वं सहस्थावरजङ्गमम् ॥
सर्व्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।
ततोऽवतीर्य्य गुरवे पूर्व्वमर्हं निवेदयेत् ॥
प्राप्य तेषामनुज्ञाञ्च तथान्येभ्योऽपि दापयेत् ।
दीनानाथविशिष्टादीन् पूजयेत् ब्राह्मणैः सह ॥
न चिरं धारयेद्गेहे हेम संप्रोक्षितं बुधः ।
तिष्ठद्ध्यावहं यस्माच्छोकव्याधिकरं नृणाम् ॥
क्षीघ्रं परस्त्रीकरणात् श्रेयः प्राप्नोति पुष्कलम् ॥"
तस्य फलविशेषेण फलं यथा,—
"अश्मनामपि धातूनां यस्तुलां कुरुते नरः ।
सर्व्वपापैः प्रमुच्येत मनोवाक्कायसम्भवैः ॥
यावद्धातु स्थितं तत्र तावत् कोटिशतानि च ।
मोदते तत्र वर्षाणां स्वर्गलोके न संशयः ॥
अथ मानुष्यमाक्रम्य कदाचित् कालपर्य्यये ।
धनधान्यसमृद्धो वै जायते भूपतां कुले ॥
आत्मनस्तु तुलां कृत्वा सुवर्णं यः प्रयच्छति ।
स तारयेत् पितृगणान् दश पूर्व्वान् दशापरान् ॥
आत्मनस्तु तथा तद्वत् फलभागुजायते नरः ।
जन्मप्रभृति यत् पापं मालानं पैतृकं तथा ॥
सुवर्णदानात् दारिद्र्यं न पश्यति कदाचन ।
रजतस्य तुलां कृत्वा सुकृती यः प्रयच्छति ॥
तावद्वर्षप्रमाणेन निर्म्मलः स्वर्गभाग्भवेत् ।
अनन्तरं भवेद्राजा पृथिव्यां नात्र संशयः ॥
सुवर्णहारी कुष्ठी वा सर्व्वव्याधियुतोऽपि वा ।
ताम्रस्य तु तुलां कृत्वा मुच्यते नात्र संशयः ॥
स तु वर्षसहस्रं वै स्वर्गलोके महीयते ।
कांस्यस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
स तु इन्द्रपदं प्राप्य ऊर्व्वशा सह मोदते ।
आयसस्य तुलां कृत्वा दाता रत्नाधिपो भवेत् ॥
लभते द्युत्तमस्थानं बलवान् जायते सदा ।
त्रैत्यस्य तु तुलां कृत्वा यो ददाति द्विजातये ॥
सोऽमरः शतसंकीर्णे विमाने दिवि मोदते ।
सीसकस्य तुलां कृत्वा यो ददातीह मानवः ॥
स गन्धर्व्वपदं गच्छेत् नानाभरणभूषितः ।
रङ्गस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
विमुक्तः सर्व्वपापेभ्यश्चन्द्रसायुज्यमाप्नुयात् ।
घृतस्य तु तुलां कृत्वा ये प्रयच्छन्ति मानवाः ॥
तेजस्विनोऽभिजायन्ते गोभिश्च चिरजीविनः ।
तैलस्य तु तुलां कृत्वा यो वै दद्याद् द्विजा-
तये ॥
अरोगित्वं सुखित्वं वै आयुष्मानपि जायते ।
अन्नदः सर्व्वसौभाग्यं सर्व्वान् कामान् मधुप्रदः ॥
अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ॥
कल्पकोटिशतं यावत्तस्मिंल्लोके महीयते ॥
कर्म्मक्षयादिह पुनर्भुवि राजराजो
भूपालमौलिमणिराजितपादपीठः ।
अह्नान्वितो भवति यज्ञसहस्रयाजी
दीप्रप्रतापजितसर्व्वमहीपलोकः ॥
यो दीप्यमानमपि पश्यति तन्नियुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानरूपः
प्राप्नोति वासवपुरं परदेवदुष्प्रम् ॥"
इति दानसागरः ॥

तुलाबीजं, क्ली, (तुलायास्तोलनस्य बीजं मूलम् । यद्वा, तुलायै परिमाणाय बीजम् ।) गुञ्जा । इति त्रिकाण्डशेषः ॥

तुलिः, स्त्री, (तुरिः । रस्य लः ।) तुरी । इति शब्दरत्नावली ॥ तूलिका । इत्यमरटीकायां भरतः ॥

तुलिका, स्त्री, (तोलयति सादृश्यं गच्छतीति । तुल + बाहुलकात् इकन् । स च कित् ।) खञ्जनिका । इति त्रिकाण्डशेषः ॥

तुलिनी, स्त्री, (तूलमस्ति फलेऽस्याः । तूल + इनिः । ङीप् । पृषो० ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुलिफला, स्त्री, (तूलि तूलयुक्तं फलं यस्याः । पृषोदरादित्वात् ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुली, स्त्री, (तुरी + रस्य लः ।) तुरी । इति शब्दरत्नावली ॥

तुल्यः, त्रि, (तुलया सम्मितः । "नौवयोधर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) सादृश्ययुक्तः । तत्पर्य्यायः । समः २ सदृक्षः ३ सदृशः ४ सदृक्ष साधारणः ६ समानः ७ । इत्यमरः । २ । १० । ३७ ॥ सधर्म्मः ८ सम्मितः ९ सरूपः १० । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । २७८ ।
"तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥")
उत्तरपदस्थास्तुल्यवाचका यथा । निभः १ सङ्काशः २ नीकाशः ३ प्रतीकाशः ४ उपमा ५ । इत्यमरः । २ । १० । ३८ ॥ भूतः ६ रूपः ७ कल्पः ८ । इति भरतः ॥ प्रभः ९ । इति शब्दरत्नावली ॥ (पुं, स्वनामख्यातो गन्धर्व्वविशेषः । यथा, महाभारते । १ । १०१ । ७ ।
"गन्धर्व्वराजो बलवांस्तुल्यनामाभ्ययात्तदा ॥")

तुल्यपानं, क्ली, (तुल्यैरात्मीयजनैः सह पानम् ।) आत्मीयेन जनेन सह मिलित्वा एककाले कृतं पानम् । तत्पर्य्यायः । सप्रीतिः २ । इत्यमरः । २ । ९ । ५५ ॥

तुवरः, पुं क्ली, (तवति हिनस्ति रोगानिति । तु + बाहुलकात् वरच् प्रत्ययेन साधुः ।) कषायरसः । इत्यमरः । १ । ५ । ९ ॥ त्रि, कषाययुक्तः । (यथा, सुश्रुते १ । ४५ ।
"नातिस्नान्द्रवं तक्रं वाहृद्यं तुवरं रसे ॥")
ह्रस्वहीनः । इत्युणा ॥

तुवरयावनालः, पुं, (तुवरः कषायो यावनालः ।) धान्यविशेषः । तत्पर्य्यायः । तुवरः २ कषाय-

यावनालः ३ रक्तयावनालः ४ लोहितकुसुम्भुरुधान्यम् ५। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। विरेचकत्वम्। संग्राहित्वम्। वातघ्नमनत्वम्। विदाहित्वम्। ग्रीषकारित्वञ्च। इति राजनिर्घण्टः॥

तुवरिका, स्त्री, (तुवरः कषायरसोऽस्त्यस्याः। तुवर+ठन्।) सुराकृन्नत्तिका। इत्यमरः। २। ४। १३१॥ (तुवर्य्येव। तुवरी+स्वार्थे कन् ह्रस्वश्च।) आफ़ची। इति भरतः॥

तुवरी, स्त्री, (तुवर+विच्वात् ङीष्।) आफ़ची। (यथा, वैद्यकरत्नमालायाम्।

"आफ़ची तुवरी ज्ञेया॥"

वर्व्वरी तुलसी। तत्पर्य्यायाश्च यथा,—

"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सौराकृन्नत्तिका। तत्पर्य्यायः। नत्तृ २ सौराष्ट्री ३ नत्तृका ४ आखुपर्णी ५ मसी ६ सुराकृना ७ नत्तालकम् ८ काली ९ नत्तिका १० सुरनत्तिका ११ स्तुत्या १२ काची १३ सुजाता १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। उष्णत्वम्। लेखनत्वम्। चक्षुष्यत्वम्। ग्राहित्वम्। कृद्दिपित्तज्वरानाग्निञ्च। इति राजनिर्घण्टः॥

"तुवरी ग्राहिणी ग्रीता लघ्वी कफविषास्रजित्।
तीक्ष्णोष्णा वह्निदा कंण्डूकुष्ठकोठकृमिप्रणुत्॥"

इति भावप्रकाशः॥

तुवरीशिम्बः, पुं, (तुवरी आफ़चीव शिम्बः। तुवरीसदृशत्वात् तथात्वम्। यद्वा, तुवर्य्या इव शिम्बा फलत्वक् यस्य।) चक्रमर्दवृक्षः। इति शब्दचन्द्रिका॥

तुवि, स्त्री, तुम्बी। इति शब्दमाला॥ (बहुशब्दार्थः। इति निघण्टुः। ३। १॥ "तवतिवृंहार्थः सौत्रो धातुः। 'अच इः।' उणां ४। १३८। इति इः। 'तृह्रिहि बहुः।' इति तट्टीका॥ "उरु। तुवि। पुरु। भूरि। प्रभ्वत्। विश्वम्। परीणसा। यावनिः। प्रतम्। सहस्रम्। सलिलम्। कुविदिति द्वादश बहुनामानि॥" इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ३। ३०।

"तुविकूर्मिर्ऋधावान्॥")

तुष, ल च औ णि तुषौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) ल, अतुषत्। य, तुष्यति। औ, तोष्टा। णि, तुषोऽस्ति। इति दुर्गादासः॥

तुषः, पुं, (तुष+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) धान्यत्वक्। (यथा, प्रबोधचन्द्रोदये द्वितीयाङ्के।

"त्रीहीन् जिहासति सितोत्तमतण्डुलाद्यान्
को नाम भोक्तुमवकल्पयतोपहितान् हितार्थी॥")

विभीतकवृक्षः। इत्यमरः। २। ४। ५८॥

तुषग्रहः, पुं, (तुषेण गृह्यते इति। ग्रह+कर्म्मणि अप्।) अग्निः। इति त्रिकाण्डशेषः॥

तुषसारः, पुं, (तुषं सरति अनुसरतीति। सृ+अण्। तुषपुञ्जाभ्यन्तरे क्रमशः सञ्चारादस्य तथात्वम्।) अग्निः। इति शब्दमाला॥

तुषानलः, पुं, (तुषस्यानलः।) तुषाग्निः। तत्पर्य्यायः। कुक्कूलः २। इति हेमचन्द्रः। ४। १६७॥ (यथा, धूर्त्तसमागमे।

"तुषानलकणप्रायाश्च भूरेणवः॥")

तुषारः, पुं, (तुष्यत्यनेन ग्रस्यादिरिति। तुष तुष्टौ+"तुषारादयश्च।" उणां ३। १३६। इति आरन् स च कित्।) हिमम्। (यथा, ऋतुसंहारे। ४। १।

"विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये!॥")

तौषारलक्षणगुणाश्च यथा,—

"अपि नद्याः समुद्रान्ते वह्निरापस्तदुद्भवाः।
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः॥
अपि नद्याः समुद्रान्ते वह्निः नदीमारभ्य समुद्रपर्य्यन्ते वह्निरास्ते तदुद्भवाः। वह्निभवा धूमावयवनिर्मुक्ता धूमांशरहिताः। आपस्तुषाराख्याः। तुष इति लोके। तुषार इति च।
अपथ्याः प्राणिनां प्रायः भूरुहाणान्तु हिताः।
तुषारास्तु हिमं रूक्षं स्वादुतालमपित्तलम्।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) देशभेदः। (तदेशोद्भवे, पुं भूम्नि। यथा, मात्स्ये। १२०। ४५।

"तुषारान् वर्व्वरान् कारान् पह्लवान् पारदान् शकान्॥")

ग्रीकरः। हिमभेदः। इति हेमचन्द्रः। ६। २१॥ (यथा, मार्घे। १। १५।

"न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्व्वताविव॥")

कर्पूरभेदः। इति राजनिर्घण्टः॥ ग्रीतले, त्रि। यथा, नैषधे। ३। ६३।

"अपां हि लघ्वाय न वारिधारा
स्वादुः सुगन्धिः खदते तुषारा॥"

तुषितः, पुं, (तुष्यतीति। तुष तुष्टौ+बाहुलकात् कितच्। यद्वा, तुष+क्विप्। तुट् सन्तोषोऽस्य जातः। तारकादित्वात् इतच्।) देवगणविशेषः। इत्यमरः। १। १। १०॥ ते षट्त्रिंशद्गणाः स्मृताः। इति भरतः॥ केषाञ्चिन्मते द्वादश। ते तु मन्वन्तरभेदे विभिन्ननामानः। यथा,—

"प्राणापानसमाभाश्च उदानो व्यान एव च।
चक्षुः श्रोत्ररसा घ्राणस्पर्शो बुद्धिर्मनस्तथा।
द्वादशैते तु तुषिता देवाः सारोचिषेऽन्तरे॥"

इति सारसुन्दरी॥

(यथाच विष्णुपुराणे। १। १५। १२७-१३३।

"पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे॥
उपस्थितेऽतियज्ञेऽस्मिन्नद्यास्मिन्वैवस्वतेऽन्तरे॥
समवायीकृताः सर्व्वे समागम्य परस्परम्॥
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै।
मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति॥
एवमुक्ता तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः।
मारीचात् कश्यपात् जातास्तेऽदित्या दक्षकन्यया॥
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः॥
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः॥"

तथा च मत्स्यपुराणे। ६। ३—४।

"तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः।
वैवस्वतेऽन्तरे चैते आदित्या द्वादश स्मृताः॥
इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणो यमः।
विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च॥"

तथा, भागवते। ८। १। ७।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः।
इध्मः कविर्विभुः स्वाहा सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् सायम्भुवान्तरे॥")

तुषोत्थं, क्ली, (तुषादुत्तीष्ठतीति। उत्+स्था+कः।) तुषोदकम्। इति राजनिर्घण्टः॥

तुषोदकं, क्ली, (तुषादुत्थितमुदकम्।) काञ्जिकम्। इति हारावली। ११५॥ काञ्जिकभेदः। अस्य लक्षणं यथा,—

"तुषोदकं यवैरामैः सतुषैः शुक्लीकृतैः॥
यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्॥
अस्य गुणाः। दीपनत्वम् लघुत्वम्। पाण्डुक्रिमिगदवस्तिशूलनाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पाचनत्वम्। पित्तरक्तकारित्वञ्च। इति भावप्रकाशः॥ (यथाच।

"तुषोदकं वातहरं प्रभेदि
प्रकोपयेदक्तपित्तं सदैव।
विपाचनं स्याच्चरणं कृमिघ्न-
मजीर्णहन्तृ कटुकं विपाके॥"

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥)

तुष्टः, त्रि, (तुष+कर्म्मणि क्तः।) तोषप्राप्तः। यथा, पुराणे।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥"

(यथाच हितोपदेशे।

"सर्व्वा एवापदस्तस्य यस्य तुष्टं न मानसम्॥")

तुष्टिः, स्त्री, (तुष+भावे क्तिन्।) तोषः। (यथा, मनुः। २। ६। [दाम्।

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

अधिगतार्थादन्यच्च तुच्छत्वबुद्धिः। इति चण्डीटीकायां नागोजीभट्टः॥ (सा च नवविधा। इति सांख्याचार्य्याः॥ तथाचोक्तम्।

"आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः॥"

इयमेव पुराणमते दक्षस्य प्रजापतेः कन्या धर्म्मस्य पत्नी च। यथा, मार्कण्डेये। ५०। १६। २१।

"प्रसूत्याच्च तथा दक्षचतस्रो विंशतिस्तथा।
ससप्तैव कन्यास्तासाच्च सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिश्चयो-
दशौ॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः॥")
माल्लकाविशेषः। इति भवदेवभट्टः॥ (शक्ति-
विशेषः। यथा, देवीभागवते। १। १५। ६१।
"तुष्टिः पुष्टिः क्षमा लज्जा तृष्णा तन्द्रा च शक्तयः।
संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक्
पृथक्॥")
तुष्टुः, पुं, (तुष+बाहुलकात् तुक्।) कर्ण-
मलिः। इति शब्दचन्द्रिका॥
तुस, ध्याने। इति कविकल्पद्रुमः॥ (भ्वां-परं-
अकं-सेट्।) तोषति। इति दुर्गादासः॥
तुसः, पुं, (तुषः। पृषोदरादित्वात् सत्वम्।) तुषः।
इत्यमरटीकायां रमानाथः॥
तुस्सं, क्ली, धूलिः। इति लिङ्गादिसंग्रहे वृत्तशब्द-
टीकायां भारतसुन्दरी॥
तुह, इर् अर्दने। इति कविकल्पद्रुमः॥ (भ्वां-
परं-सकं-सेट्।) इर्, अतुहत् अतोहीत्।
अर्दनमिह वधः। इति दुर्गादासः॥
तुहिनं, क्ली, (तोहति अर्दति तुह्यतेऽनेनेति वा।
तुह+"वेपितुह्योर्हश्च।" उणां। २। ५२।
इति इनन् गुणे ह्रस्वश्च।) हिमम्। इत्य-
मरः। १। ३। १८॥ (यथा, आर्य्यासप्त-
शत्याम्। ६३२।
"सा श्यामा तन्वङ्गी दहता प्रीतोपचारतीव्रेण।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्व्वेव॥")
चन्द्रतेजः। इत्युणादिकोषः॥ (यथा, पञ्च-
तन्त्रे। २। ५८।
"किं चन्दनैः सकर्पूरैस्तुहिनैः प्रीतलैश्च किम्।
सर्व्वे ते मित्रगात्रस्य कलां नार्हन्ति षोड़शीम्॥")
प्रीतले, त्रि। यथा, आर्य्यासप्तशत्याम्। ३६६।
"प्रसरतु शरत्क्षियामा जगन्ति धवलयतु धाम
तुहिनांशोः।
पञ्जरशकोरिकाणां कणिकाकल्पोऽपि न
विशेषः॥")
तुहिनांशुतैलं, क्ली, (तुहिनांशोः कर्पूरस्य तैलम्।)
कर्पूरतैलम्। इति राजनिर्घण्टः॥
तूड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वां-
परं-सकं-सेट्।) बहुस्वरी। ऋ, अतुतूड़त्।
इति दुर्गादासः॥
तूण, क सङ्कोचे। इति कविकल्पद्रुमः॥ (चुरां-
परं-अकं-सेट्।) दन्त्यवर्गादादिः। क, तूणयति
चक्षुः सङ्कुचितं स्यादित्यर्थः। इति दुर्गादासः॥
तूण, क ड पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) क ड, तूणयते। इति दुर्गा-
दासः॥
तूण, तृ क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्त-
चुरां-परं-अकं-सेट्।) दीर्घौ ऋदन्त्योपधः।
अततूर्णत्। इति दुर्गादासः॥

तूणः, पुं स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
पूरणे घञ्।) बाणाधारः। तत्पर्य्यायः। उपा-
सङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५। इत्य-
मरः। २। ८। ८८॥ तूणी ६। इति शब्द-
रत्नावली॥ (यथा, महाभारते। ३। १७०। ३।
"तूणखड्गधरः शूरो बहुगोधाङ्गुलित्रवान्॥")
तूणकं, क्ली, (तूणयति सङ्कुचितं भवति समा-
निकापदद्वयमिति। तूण+खुल्।) छन्दो-
विशेषः। यथा, छन्दोमञ्जर्य्याम्।
"तूणकं समानिकापदद्वयं विनान्तिमम्॥"
तूणी, स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
कर्म्मणि घञ्। गौरादित्वात् ङीष्।) तूणः।
इति शब्दरत्नावली॥ (यथा, रघुः। ६। ५६।
"तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति॥"
वेदनाविशेषः। यथा, सुश्रुते निदानस्थाने
१ अध्याये।
"अधो या वेदना याति वर्च्चोमूत्रानुलोमिता।
भिन्दतीव गुदोपस्थं सा तूणीत्युपदिश्यते॥")
तूणी, [न्] पुं, (तूणवदाकृतिरस्यास्तीति। तूण+
इनिः।) गन्धीदृक्षः। इति राजनिर्घण्टः॥
(अस्य पर्य्याया यथा,—
"तूणी तुम्बक आपीनस्तुम्बिकः कच्छकस्तथा।
कुठेरकः कान्तलको नन्दिवृक्षश्च गन्धकः॥"
गुणाश्चास्य यथा,—
"तूणी रूक्षः कटुः पाके कषायो मधुरो लघुः।
तिक्तो याही हिमो दृष्यो व्रणकुष्ठास्रपित्त-
जित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तूणयुक्ते, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि।
१८। ३५।
"आरुह्य भगवान् विष्णुर्गरुड़ं पक्षिपुङ्गवम्।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तलत्र-
वान्॥")
तूणीकः, पुं, (तूणी तूण इव कायतीति। के+
कः।) गन्धीदृक्षः। इति राजनिर्घण्टः॥
तूणीरः, पुं, (तूण्यते पूर्य्यते बाणैरिति। तूण+
बाहुलकात् ईरन्।) तूणः। इत्यमरः। २। ८।
८८॥ (यथा, महाभारते। ७। २८। १६।
"तस्य पार्श्वौ धनुश्चित्रा तूणीरान् वज्रिसन्निभान्।
शरमाणो द्विषन्नाशा सर्व्वमर्म्मस्वताड़यत्॥"
स्त्रीलिङ्गेऽपि दृश्यते। यथा, तत्रैव। ६। ५१।
५१।
"तूणीरास्यश्च वज्राणि विचित्राणि धनूंषि च॥")
तूतकं, क्ली, तुत्थम्। इतिशब्दचन्द्रिका। तुतिया
इति भाषा॥ (तुत्थशब्देऽस्य गुणादिर्ज्ञातव्यः॥)
तूदः, पुं, (तुदतीति। तुद व्यथने+"इगुपधेति।"
३। १। १३५। इति कः। पृषोदरादित्वात्
दीर्घः।) तूलदृक्षः। इति राजनिर्घण्टः॥
तूर, व ड ई हिंसे। वेगे। इति कविकल्पद्रुमः।
(दिवां-आत्मं-सकं-वेगे अकं-सेट्।) व ड,
तूर्य्यते। ई, तूर्णः। इति दुर्गादासः॥

तूरं, क्ली, (तूर्य्यते ताड्यते इति। तूर+घञ्।)
वाद्यम्। इति हेमचन्द्रः। २। २००॥
तूरी, स्त्री, (तूरं वाद्यविशेषस्तदाकृतिः पृषोदरा-
दौ अस्त्यस्येति। तूर+अच्। गौरादित्वात् ङीष्।)
धुस्तूरवृक्षः। इति भावप्रकाशः॥
तूर्णं, क्ली, (त्वर सम्भ्रमे+क्तः। पक्षे इड़भावः
"ज्वरत्वरेति।" ६।४।२०। इत्यूट्। "रदाभ्यां
निष्ठातो नः पूर्व्वस्य च दः।" ८। २। ४२।
इति तस्य नः।) शीघ्रम्। (यथा, देवीभाग-
वते। १। १०। ३१।
"तां दृष्ट्वा चपलापाङ्गीं समीपस्थां वराम्बराम्।
पप्रच्छाब्धरीताङ्गस्तूर्णमाबीकृतव्रतः॥")
तड़ति, त्रि। इत्यमरः। १। २। ६८॥
तर्द्दिः, पुं, (त्वरते त्वरयं वा। त्वर+"वह्निमि-
नृहनिधान्यायिभ्यो नित्।" उणां। ४। ५१।
इति निः स च नित्।) मलम्। इत्युणादि-
कोषः। २। १४१॥ त्वरा। इति हेमचन्द्रः।
२। २३६॥ शोकः। मनः। इति संक्षिप्तसारे
उणादिवृत्तिः॥ (क्षिप्रे, त्रि। इति निघण्टुः।
२। १५॥ यथा, ऋग्वेदे। १०। ८८। ६।
"मायान्तु यज्ञियानामेतामपो यत्तूर्ब्भिश्चरति
प्रजानन्॥"
"तूर्ब्भिस्त्वरमाणः।" इति सायणः॥)
तूर्य्यं, क्ली, (तूर्य्यते ताड्यते इति। तूर्+यत्।)
वाद्यम्। इति हेमचन्द्रः। २। २८६॥ (यथा,
महाभारते। १। ११३। ४४।
"स तूर्य्यशतशब्दानां भेरीणाञ्च महास्वनैः।
हर्षयन् सर्व्वसैन्यानि विवेश गजसाह्व-
यम्॥")
तूर्य्यखण्डः, पुं, (तूर्य्यस्य खण्ड इव।) द्रगड़वाद्यम्।
इति हारावली। २२२॥ (क्वचित् तूर्य्यगण्डोऽपि
पाठः॥)
तूल, क ड पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) दीर्घौ। क ड, तूलयते। इति
दुर्गादासः॥
तूल, क निष्कर्षे। इति कविकल्पद्रुमः॥ (चुरां-
परं-सकं-सेट्।) दीर्घौ। निष्कर्षः इह दयता-
परिच्छेदः। क, तूलयति कार्पासं वणिक्। इति
दुर्गादासः॥ (क्वचित् तूल कि निष्कर्षे इति
पाठोऽपि दृश्यते। कि, तूलति तूलयति॥)
तूलं, क्ली, (तूलयते पूरयति सर्व्वं व्यापकत्वात्।
तूल पूरणे+कः।) आकाशम्। इति मेदिनी।
ले, २५॥ अश्वत्थाकारवृक्षविशेषः। पलाश-
पिप्पल इति तूल इति च भाषा॥ तत्पर्य्यायः।
तूदः २ ब्रह्मकाष्ठम् ३ ब्राह्मवेधः ४ पूषकः ५
ब्रह्मदारु ६ सुपुष्पम् ७ सुरूपम् ८ नीलवल्क-
कम् ९ कलुषः १० विप्रकाष्ठम् ११ मदसारः १२।
इति राजनिर्घण्टः॥ गुणः १३। तत्पञ्चाङ्ग-
गुणाः। गुरुत्वम्। स्वादुत्वम्। हिमत्वम्।
पित्तानिलनाशित्वञ्च। तदामफलगुणाः। गुरु-
त्वम्। सारकत्वम्। अम्लत्वम्। उष्णत्वम्।
रक्तपित्तकारित्वञ्च। इति भावप्रकाशः॥ मधु-

राम्लत्वम्। दाहप्रशमनत्वम्। दृष्यत्वम्। कषायत्वम्। कफनाशित्वञ्च। इति राजनिर्घण्टः॥

तूलं, क्ली पुं, (तूल्यते इयत्तया परिच्छिद्यते इति। तूल+कर्म्मणि घञ्। यद्वा, तूलयते स्वल्पोऽपि बहुस्थानं पूरयतीति। तूल+"इगुपधेति।"कः।) कार्पासादितूलः। (इति मेदिनी। ले, २६॥ तत्पर्य्यायः। पिचुः २। इत्यमरः। २।६।१०६॥ पिचुलः ३ पिचुतूलः ४ तूलपिचुः ५। इत्यमरटीका॥ पिचुतूलम् ६। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ५। १०। ३६।

"विपरीतं यदा दैवं तूलं वज्रसमं भवेत्।
विधिचेत् सुसुखः कामं कुलिशं तूलवत्तदा॥")

तूलकं, क्ली, (तूल+स्वार्थे कन्।) तूलः। इति हेमचन्द्रः। ४। २०। ५॥

तूलकार्म्मुकं, क्ली, (तूलाय तूलस्फोटनाय कार्म्मुकमिव।) तूलस्फोटनार्थधनुः। धुनखरा इति भाषा। तत्पर्य्यायः। पिञ्जलम् २। इति त्रिकाण्डशेषः॥

तूलचापः, पुं, (तूलाय तूलस्फोटनाय चाप इव।) तूलकार्म्मुकम्। इति शब्दरत्नावली॥

तूलनालिका, स्त्री, (तूलनिर्म्मिता नालिका नाली।) पिञ्जिका। इति त्रिकाण्डशेषः॥ पाँइज इति भाषा॥

तूलनाली, स्त्री, (तूलनिर्म्मिता नाली।) तूलनालिका। इति भूरिप्रयोगः॥

तूलपिचुः, पुं, (तूलप्रधानः पिचुस्तूलवृक्षः।) तूलः। इत्यमरटीकायां भरतः॥

तूलवृक्षः, पुं, (तूलस्य तूलप्रधानो वा वृक्षः।) शाल्मली। इति राजनिर्घण्टः॥

तूलशर्करा, स्त्री, (तूलस्य शर्करेव।) कार्पासबीजम्। इति शब्दमाला॥

तूलसेचनं, क्ली, (तूलस्य सेचनम्।) सूचकर्म्मनम्। इति शब्दमाला॥ काटना इति भाषा॥

तूला, स्त्री, (तूलयते पूरयति स्थानमिति। तूल+अच्+ततः स्त्रियां टाप्।) कार्पासी। इति राजनिर्घण्टः॥ तूलि। इति शब्दरत्नावली॥

तूलिः, स्त्री, (तूलतीति। तूल निष्कर्षे+"इगुपधात् कित्।"उणां। ४। ११६। इति इन् स च कित्।) स्वनामख्यातचित्रकरोपकरणम्। इति सिद्धान्तकौमुदीसुबादिवृत्तिः॥

तूलिका, स्त्री, (तूलिरेव। स्वार्थे कन्।) चित्रकरोपकरणम्। तूली इति भाषा। (यथा, कुमारे। १। ३२॥

"उन्मीलितं तूलिकयेव चित्रं
सूर्य्यांशुभिर्भिन्नमिवारविन्दम्॥")

तत्पर्य्यायः। ईषिका २। इत्यमरः। २।१०।३३॥ तुलिः ३ तूली ४ ईषीका ५ इषीका ६। वीरखादिशूलाका। इत्यन्ये। आवर्त्तितमनावर्त्तितं सुवर्णं ज्ञातुं यन्निक्षिप्यते तच्चेत्यन्ये। आवर्त्तितसुवर्णं द्रवाकारं यत्र निक्षिप्यते तच्चेति केचित्। इति भरतः॥ (तूलमस्त्यस्या इति। तूल+ठन्।) ग्रन्थोपकरणम्। इति मेदिनी। के, १०२॥ तोषक् इति भाषा। (यथा, कथासरित्सागरे। २६। ७८।

"प्रविश्य चान्तः सदन्तपर्य्यङ्के न्यस्ततूलिके।
पटावगुण्ठिततनुं शयानां काचिदैक्षत॥"

तथा च काशीखण्डे। ४। ६७।

"कञ्चुकं तूलगर्भञ्च तूलिकां रूपवीतिकाम्॥")

वर्त्तिः। इति शब्दरत्नावली॥

तूलिनी, स्त्री, (तूलोऽस्त्यस्याः। तूल+इनिः। ङीप्।) लक्ष्मणाकन्दः। इति राजनिर्घण्टः॥ शाल्मलिवृक्षः। इति भावप्रकाशः॥ (तद्यथा, "ताम्बूलं कटुतैलसुप्तभवनं तूलीपटी तूलिनी॥" इति वैद्यकपथ्यापथ्यविधौ ग्निग्धिराद्याचारे॥)

तूलिफला, स्त्री, (तूलि तूलयुक्तं फलमस्याः।) शाल्मलिः। इति रत्नमाला॥

तूली, स्त्री, (तूलयतीति। तूल+इन् ह्रस्वादिकारादिति वा ङीप्।) नीली। वर्त्तिः। इति शब्दरत्नावली॥ तूलिका। इत्यमरटीकायां भरतः॥ (यथा,—

"उच्चैस्तूलीविलासं सुललितशयनं प्राणिनामाभिरामम्॥"

इति वैद्यकपथ्यापथ्यविधौ हेमन्तकृत्ये॥)

तूवरः, पुं, (तु सौत्रो धातुः+बाहुलकात् ष्वरच् दीर्घश्च।) काले अजातश्मश्रुर्गौः। नेड़ा गरु इति भाषा। अश्मश्रुपुरुषः। इत्यमरः। ३।३। १६४॥ माकुन्दिया इति भाषा। पुरुषव्यञ्जनत्यक्तः। कषायरसः। इति मेदिनी। वे, १६४॥

तूवरिका, स्त्री, (तूवरी+स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) तुवरिका। इत्यमरटीकायां रमानाथः॥

तूवरी, स्त्री, (तूवर+विलात् ङीष्।) आफ़की। सौराष्ट्रवृत्तिका। इत्यमरटीकायां भरतः॥

तूष, तुष्टौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वशस्करी। तूषन्ति कुलदेवताः। इति दुर्गादासः॥

तूष्णीं, [म्] व्य, मौनम्। इत्यमरः। ३। ४। ६॥ (यथा, मनुः। ८। १४७।

"यत्किञ्चिद्गुरवेऽधि सन्निधौ प्रेप्सते धनी।
मुच्यमानं परेस्तूष्णीं न स तल्लब्धुमर्हति॥")

तूष्णींशील, त्रि, (तूष्णीं मौनं शीलं स्वभावो यस्य।) मौनी। तत्पर्य्यायः। तूष्णीक २। इत्यमरः। ३। १। ३६॥

तूष्णीक, त्रि, (तूष्णीं शीलं यस्य। "शीले को मलोपश्च।" ५। ३। ७३। इत्यस्य वार्त्तिकोक्त्या कः मलोपश्च।) तूष्णींशीलः। इत्यमरः। ३। १। ३६॥ (यथा, महाभारते। ५। ३४। २३।

"आसीनमपि तूष्णीकमनुरज्यन्ति तं प्रजाः॥")

तूष्णीकां, [म्] व्य, (तूष्णीम्+अकचप्रकरणे "तूष्णीमः कामु वक्तव्यः।" इति वार्त्तिकोक्त्या कामु। मित्त्वादन्त्यादचः परः।) मौनम्। इत्यमरः। ३। ४। ६॥

तूस्तं, क्ली, (तुस शब्दे+बाहुलकात् तुसेरपि तन् दीर्घश्च। इत्युज्ज्वलदत्तः। ३। ८६।) धूलिः। ("तूस्तानि विनिहन्ति वितूस्तयति पन्थानं वातः।" इति सुग्धबोधम्॥) जटा। इति मेदिनी। ते, २२॥ पापम्। सूक्ष्मम्। इति शब्दरत्नावली॥

तृच, इत्वाम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) सन्नमस्करी। तृचति। इत्वां गतौ। इति दुर्गादासः॥

तृत्तं, क्ली, जातीफलम्। इति शब्दचन्द्रिका॥

तृट्, [ध्] स्त्री, (तृष्+क्विप्।) इच्छा। तृष्णा। (यथा, ऋतुसंहारे। १। ११।

"त्वगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः॥")

कामकन्या। इति मेदिनी। धे, १३॥

तृण, ह्न उ भक्षे। इति कविकल्पद्रुमः॥ (तर्णा-उभं-सकं-सेट्। क्त्वावेट्।) ह्न, तृणोति तर्णोति तृणुते तर्णुते। उ, तर्णित्वा तृत्वा। इति दुर्गादासः॥

तृणं, क्ली, (तृण्यते भक्ष्यते गवादिभिरिति। तृण+घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, तृह हिंसायाम्+"तृहेः क्नो हलोपश्च।"उणां ५। ८। इति क्नप्रत्ययो हकारलोपश्च।) नड़ादि। चिनाखड़ इति ख्यातम्। इति केचित्। इति भरतः॥ तत्पर्य्यायः। अर्च्चुनम् २। इत्यमरः। २। ५। १६७॥ त्रिणम् ३ खटम् ४ खेट्टम् ५ हरितम् ६ ताण्डवम् ७। इति शब्दरत्नावली॥*॥ (यथा, पञ्चतन्त्रे। १। ३४। [त्रणम्।

"जातस्य नदीकूले तस्य तृणस्यापि जन्म कल्याय
यत् सलिलमज्जनाकुलजनहस्तावलम्बनं भवति॥")

गोभ्यस्तृणदानफलं यथा,—

"तीर्थस्नानेषु यत् पुण्यं यत् पुण्यं विप्रभोजने।
यत् पुण्यञ्च महादाने यत् पुण्यं हरिसेवने॥
सर्व्वव्रतोपवासेषु सर्व्वेष्वेव तपःसु च।
भुवः पर्य्यटने यत्तु सत्यवाक्येषु यद्भवेत्॥
यत् पुण्यं सर्व्वयज्ञेषु दीक्षायाञ्च लभेन्नरः।
तत् पुण्यं लभते प्राज्ञो गोभ्यो दत्त्वा तृणानि च॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥*॥

धनिष्ठादिपञ्चनक्षत्रेषु गृहनिर्म्मितौ तृणकाष्ठादारणे दोषा यथा,—

"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः।
संयुक्ते तृणकाष्ठानां क्षते वस्वादिपञ्चके॥"

इति ज्योतिःसारसंग्रहः॥

(गन्धद्रव्यविशेषः। रामकर्पूर इति भाषा॥ अस्य पर्य्यायाः यथा,—

"कुलञ्जञ्च सुगन्धञ्च तृणं प्रीतं सुशीतलम्॥"

इति वैद्यकरत्नमालायाम्॥)

तृणकुङ्कुमं, क्ली, (तृणरूपं कुङ्कुमम्।) सुगन्धद्रव्यभेदः। तत्पर्य्यायः। तृणाक्त २ गन्धि ३ तृणशोणितम् ४ तृणपुष्पम् ५ गन्धाधिकम् ६ तृणोत्थम् ७ तृणगौरम् ८ शोणितम् ९। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफमारुतशोथकण्डूतिपामाकुष्ठामदोषनाशित्वम्। परमभाग्यत्वम्। इति राजनिर्घण्टः॥

तृणकुटी, स्त्री, (तृणाच्छादिता कुटी।) तृणाच्छादितगृहम्। तत्पर्य्यायः। कायमानम् २। इति त्रिकाण्डशेषः॥ तृणौकः ३। इति हेमचन्द्रः॥

तृणकूर्म्मः, पुं, (तृणस्य कूर्म्म इव।) तुम्बी। इति शब्दमाला॥

तृणकेतुः, पुं, (तृणेषु केतुर्ध्वज इव।) वंशः। इति हारावली। १०८॥

तृणकेतुकः, पुं, (तृणकेतु+स्वार्थे कन्।) वंशः। इति राजनिर्घण्टः॥

तृणगोधा, स्त्री, (तृणस्य गोधेव चुम्बनात्।) चित्रकोलः। ककलासः। इति मेदिनी। धे, ४६॥ तृणजलौका। इति केचित्॥

तृणग्रन्थिः, स्त्री, (तृणस्य ग्रन्थिरिव ग्रन्थिर्यस्य।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥

तृणग्राही, [न्] पुं, (तृणं गृह्णातीति। ग्रह+णिनिः।) नीलमक्षिः। इति राजनिर्घण्टः॥ मक्षिविशेषः। इति शब्दार्थकल्पतरुः॥ काफुरदाना इति भाषा। तत्पर्य्यायः। शूकापूट्टः २ तृणमक्षिः ३। इति हारावली॥

तृणजम्भा, [न्] त्रि, (तृणं जम्भो भक्ष्यं यस्य। "जम्भा सुहरिततृणसोमेभ्यः।" ५।४।१२५। इति निपातनात् साधुः।) तृणभक्षकः। (तृणमिव जम्भो दन्तो यस्य।) तृणवर्णदन्तयुक्तः। इति सिद्धान्तकौमुदी॥

तृणता, स्त्री, धटुः। (तृणस्य भावः। तृण+भावे तल्।) तृणत्वम्। इति मेदिनी। ते, ११३॥

तृणद्रुमः, पुं, (तृणप्रधानो द्रुमः। तृणमिव द्रुमो वा।) तालः। गुवाकः। तालौ। केतकी। खर्ज्जूरः। खर्ज्जूरी। नारिकेलः। हिन्तालः। एषां निर्य्यासगुणाः। शीतलत्वम्। लघुत्वम्। मोहनत्वम्। बलकारित्वम्। हृद्यत्वम्। तृष्णासन्तापनाशित्वञ्च। इति राजनिर्घण्टः॥

तृणधान्यं, क्ली, (तृणवद्बहुलं धान्यम्।) धान्यविशेषः। उड़िधान इति भाषा। तत्पर्य्यायः। नीवारः २। इत्यमरः। २। ६। २५॥

तृणध्वजः, पुं, (तृणेषु ध्वज इव दीर्घत्वात्।) वंशः। इत्यमरः। २। ४। १६०॥

तृणनिम्बः, पुं, (तृणाकारो निम्बः।) नेपालनिम्बः। इति राजनिर्घण्टः॥

तृणपत्रिका, स्त्री, (तृणस्येव पत्रमस्त्यस्याः। ठन् टाप् च।) दर्भः। इति राजनिर्घण्टः॥

तृणपत्री, स्त्री, (तृणमिव पत्रमस्याः। ङीष्।) गुडाग्निनी। इति राजनिर्घण्टः॥

तृणपुष्पं, क्ली, (तृणस्य पुष्पमिव।) तृणकुङ्कुमम्। इति राजनिर्घण्टः॥

तृणपुष्पी, स्त्री, (तृणमिव पुष्पमस्याः। ङीष्।) सिन्दूरपुष्पीवृक्षः। इति राजनिर्घण्टः॥

तृणपूली, स्त्री, (तृणस्य पूलः संहतिर्यत्र। ततो गौरादित्वात् ङीष्। तृणनिर्म्मितत्वादस्य तथात्वम्।) चप्पा। इति हारावली। १६६॥ चाँच इति भाषा॥

तृणमणिः, पुं, (तृणेषु मणिः।) तृणग्राही। इति हारावली। २१६॥

तृणमत्कुणः, पुं, तृणकः। इति त्रिकाण्डशेषः॥ जामिनू इति भाषा॥

तृणराजः, पुं, (तृणेषु राजते शोभते इति। राज+अच्।) तृणानां राजा वा समासे टच्।) तालवृक्षः। इत्यमरः। २। ५। १६८॥ (यथा, आर्य्यासप्तशत्याम्। ५६७। [लक्ष्मः। "श्रीः श्रीफलेन राज्यं तृणराजेनाक्षयसाम्बतो कृष्णयोः सम्यक् साम्यात् गतौ घटचक्रवर्त्तित्वम्॥") नारिकेलः। इति राजनिर्घण्टः॥

तृणवल्लजा, स्त्री, (तृणरूपा वल्लजा।) वल्लजा। इति राजनिर्घण्टः॥

तृणबीजः, पुं, (तृणस्य बीजमिव बीजमस्य।) श्यामाकः। इति रत्नमाला॥

तृणबीजोत्तमः, पुं, (तृणबीजेषु उत्तमः।) श्यामाकः। इति राजनिर्घण्टः॥

तृणशीतं, क्ली, (तृणेषु शीतं शीतलम्।) कर्पूरम्। गन्धतृणम्। इति रत्नमाला॥

तृणशीता, स्त्री, (तृणेषु शीता शीतला।) जलपिप्पली। इति राजनिर्घण्टः॥

तृणशून्यं, क्ली, (तृणेन शून्यम्।) मल्लिका। केतकीफलम्। इति मेदिनी। ये, ११६॥ (एतद्गुणा यथा,—
"नीपं सभार्गवं पीलु तृणशून्यं विकङ्कतम्।
प्राचीनामलकञ्चैव दोषघ्नङ्करहारि च॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥) तृणरहिते, त्रि॥

तृणषट्पदः, पुं, (तृणमिव षट् पदा यस्य।) वरोलः। इति हारावली। २१७॥ बोलता इति भाषा॥

तृणसारा, स्त्री, (तृणवत् सारो यस्याः। असारत्वात् तथात्वम्।) कदली। इति हारावली। १०५॥

तृणसिंहः, पुं, (तृणेषु सिंह इव तन्नाशकत्वात्।) कुठारः। इति शब्दार्थकल्पतरुः॥

तृणहर्म्याः, पुं, (तृणाच्छादितो हर्म्यः।) तृणयुक्ताट्टालिका। अट्टालिकोपरि तृणनिर्म्मितगृहम्। तत्पर्य्यायः। मयटः २। इति हारावली। २२३॥

तृणाङ्घ्रिपः, पुं, (तृणरूपोऽङ्घ्रिपो वृक्षः।) मत्स्याक्षकतृणम्। इति राजनिर्घण्टः॥

तृणाग्निः, पुं, (तृणजातोऽग्निः। शाकपार्थिववत् समासः।) तृणजाताग्निः। तत्पर्य्यायः। वृत्रसत्रुः २। इति त्रिकाण्डशेषः॥

तृणाञ्जनः, पुं, (तृणमिव अञ्जनो ज्येष्ठी। तृणवदातितीक्ष्णादस्य तथात्वम्।) ककलासः। इति त्रिकाण्डशेषः॥

तृणाट्यं, क्ली, (तृणेषु आढ्यं पुष्टत्वात्।) पर्व्वततृणम्। इति राजनिर्घण्टः॥

तृणाम्लं, क्ली, (तृणेषु अम्लम्।) लवणतृणम्। इति राजनिर्घण्टः॥

तृणाश्रुक्, [ञ्] पुं, (तृणेषु अश्रुरिव रक्तवर्णत्वात्।) तृणकुङ्कुमम्। इति राजनिर्घण्टः॥

तृणेक्षुः, पुं, (तृणेषु इक्षुरिव।) वल्लजा। इति राजनिर्घण्टः॥

तृणोत्तमः, पुं, (तृणेषु उत्तमः।) उखर्व्वलतृणम्। इति राजनिर्घण्टः॥

तृणोद्भवः, पुं, (तृणैः सह उद्भवतीति। उत्+भू+अच्।) नीवारः। इति राजनिर्घण्टः॥

तृणौकः, [स्] क्ली, (तृणनिर्म्मितमोको वसतिस्थानम्।) कायमानम्। तृणनिर्म्मितगृहम्। इति हेमचन्द्रः। ४। ६२॥ खड़ुया घर इति भाषा॥

तृणौषधं, क्ली, (तृणात्मकं औषधम्।) एलवालुकाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

तृण्या, स्त्री, (तृणानां समूहः। "पाशादिभ्यो यः।" ४। २। ६८। इति यः।) तृणसमूहः। इत्यमरः। २। ५। १६८॥

तृतीयः, त्रि, (त्रयाणां पूरणः। त्रि+"त्रेः सम्प्रसारणञ्च।" ५। २। ५५। इति तीयः सम्प्रसारणञ्च।) त्रयाणां पूरणः। इति शाकरणम्॥ तेसरा इत्यादि भाषा। (यथा, मनुः। २। ३५।
"चूड़ाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥")

तृतीयप्रकृतिः, स्त्री, तृतीया प्रकृतिः। इत्यमरटीकायां भरतः॥

तृतीया, स्त्री, (त्रयाणां पूरणी। त्रि+"त्रेः सम्प्रसारणञ्च।" ५। २। ५५। इति तीयः सम्प्रसारणञ्च। ततष्टाप्।) तिथिविशेषः। सा चन्द्रमण्डलस्य तृतीयकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा। इति तिथ्यादितत्त्वम्॥
अस्यां जातस्य फलं यथा,—
"सकलगुणगभीरो भूमिपालानुरागी
पवनगरविगाही सर्व्वलोकोपकारी।
परविषयनिवासी कौतुकी सत्यवादी
भवति निखिलविद्यो यस्तृतीयाप्रसूतः॥"
इति कोष्ठीप्रदीपः॥
सा वैशाखस्य शुक्ला अक्षयतृतीया। यथा, स्मृतिः।
"वैशाखे मासि राजेन्द्र! शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यं अक्षयं समुदाहृतम्॥"
भविष्ये।
या शुक्ला कुरुशार्दूल! वैशाखे मासि वै तिथिः।
तृतीया साक्षया लोके गौर्व्वाणैरभिवन्दिता॥
योऽस्यां ददाति करकान् वारिवासनसंयुतान्।
स याति पुरुषो वीर! लोकान् वै हेममालिनः॥
करकान् कुम्भान्। वासनमन्नम्। हेममालिनः सूर्य्यस्य॥ ब्रह्मपुराणे।
"यः प्रयच्छति तृतीयायां कृष्णं चन्दनचर्चितम्।

वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥" स्कन्दपुराणम् ।
"वैशाखस्य सिते पक्षे तृतीयायामयं द्विजा । तत्र मां वेषयेद्गन्धलेपनैरतिशोभनैः ॥"* ॥ ब्रह्मपुराणम् ।
"वैशाखशुक्लपक्षे तु तृतीयायां जनार्दनः । यवानुत्पादयामास युगचारुयवान् शुभम् ॥ ब्रह्मलोकान्निपथगां पृथिव्यामवतारयत् । तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ॥ यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राश्नयेद्-यवान् । पूजयेत् शङ्करं गङ्गा कैलासञ्च हिमालयम् ॥ भगीरथञ्च नृपतिं सागराणां सुखावहम् । जातं दानं तपः आद्धं जपहोमादिकञ्च यत् ॥ अक्षया क्रियते तच्च तदानन्त्याय कल्पते ॥ अत्रानन्त्यफलश्रुतेः पूर्ब्बवचने गयाचयोगः गजा-तिथ्ययार्थः ।" इति तिथ्यादितत्त्वम् ॥ * ॥
भाद्रे श्रीवराहधरणीसंवादे ।
"त्रेतायुगं तृतीयायां शुक्लायां माधि माधवे । प्रवृत्तञ्च यतोधर्म्मः प्रवृत्तास्ते प्रवर्त्तिताः ॥ अक्षया सोच्यते लोके तृतीया हरिवल्लभा । स्नाने दाने जपे होमे आद्धे पूर्ब्बतपर्पणे ॥ ये चैवन्ति यवैर्विष्णुं आद्धं कुर्ब्बन्ति यत्नतः । तस्यां ददति दानानि धन्यास्ते वैष्णवा नराः ॥" इति श्रीहरिभक्तिविलासे १४ । १६४ ॥
तृतीयाव्रतं, क्ली, (तृतीयं कर्षकं व्रतम् । "ज्ञानो द्वितीयतृतीयशब्दाभ्यां व्रतौ ।" ५ । ४ । ५८ । इति ष्ठाच् ।) वारत्रयव्रतविशेषम् । इत्यमरः । २ । ८ । ३६ ॥ तिनबार खाय देओया चेत इति भाषा ॥
तृतीयाप्रकृतिः, स्त्री, (तृतीया प्रकृतिः । "संज्ञा-पूरण्याच ।" ६ । ३ । ३८ । इति न पुंवद्भावः ।) नपुंसकम् । इत्यमरः । २ । ६ । ३६ ॥
तृद, हिंसे । (भ्वां-परं-सकं-सेट् ।) तर्दति । इति दुर्गादासः ॥
तृद्, उ न घ इर् । अनादरे । हिंसे । इति कवि-कल्पद्रमः ॥ (रुधां-उभं-सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, तर्दित्वा तृत्वा । न घ, तृन्त्ति तृन्ते । इर्, अतृदत् अतर्दीत् । इति दुर्गादासः ॥
तृनृप, ग्र प्रीणने । इति कविकल्पद्रमः ॥ (तुदां-परं-सकं-सेट् ।) प्रीणनमिह प्रीतीभावः । ग्र, तृप्यति तृम्पति वा लाभाल्लोकः । तत्तृप्त । इति दुर्गादासः ॥
तृनृह, ग्र प्रीणने । इति कविकल्पद्रमः ॥ (तुदां-परं-सकं-सेट् ।) ग्र, तृह्यति तृम्हति । तत्तृह्म । इति दुर्गादासः ॥
तृनृह, ऊ ग्र हिंसे । इति कविकल्पद्रमः ॥ (तुदां-परं-सकं-वेट् ।) सन्नन्तस्वरौ । ऊ, अतर्हीत् अतर्हीत् । ग्र, तृहति । इति दुर्गादासः ॥
तृप, कि सन्दीपने । प्रीणने । इति कविकल्पद्रमः ॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट् ।) कि, तर्पयति तर्पति । योऽग्निचयं तर्पयतीति हलायुधः । इति दुर्गादासः ॥
तृप, न प्रीणने । इति कविकल्पद्रमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीणनं प्रीतीकरणम् । न, तृप्नोति पितरं पुत्रः । ततर्प । इति दुर्गादासः ॥
तृप, प ग्र प्रीणने । इति कविकल्पद्रमः ॥ (तुदां-परं-सकं-सेट् ।) प ग्र, तृम्पति ततर्प । इति दुर्गादासः ॥
तृप, णि ल य ऊ प्रीणने । इति कविकल्पद्रमः ॥ (दिवां-परं-अकं-सकं च-वेट् ।) णि, तृप्तोऽस्मि । ल, अतृपत् । अस्य ह्रस्वित्वेऽपि क्षयन्तृप्यादिवि-शेषविधानात् पक्षे टाप्सिद्धेन अताप्सीत् अत्राप्सीत् अतर्पीदित्यपि । य, तृप्यति । ऊ, तर्पिष्यति तर्प्स्यति । प्रीणनमिह प्रीतीभावः प्रीतीकरणञ्च । स्यन्दीनि तृप्यतु मधूनि पिब-त्विवायमिति श्रीहर्षः । पितृनताप्सीन्नृपरक्षतोयै-रिति भट्टिः । इति दुर्गादासः ॥
तृपत्, पुं, (तृप्नोति प्रीणयतीति । तृप + "संज्ञा-तृपदृहत् ।" उणां २ । ८५ । इति अतिप्रत्ययेन निपातनात् साधुः ।) चन्द्रः । इत्युणादिकोषः ॥ हृत्वम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (प्रीणयति, त्रि । यथा, ऋग्वेदे । २ । २२ । १ । "तृपत्तोमपिबद्विहना सुतं यथावशृत् ।" "तृप प्रीणने तुदादिः । आगमानुशासनस्या-नित्यत्वान्नुमभावः तृप्यन् इन्द्रः ॥" इति सायणः ॥)
तृपला, स्त्री, (तृप्यतीति । तृप प्रीणने + "कल-तृपच ।" उणां १ । १०६ । इति कलः । तत-टाप् ।) लता । इत्युणादिकोषः ॥ त्रिफला । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (त्रिफलप्रहा-रिणि, त्रि । यथा, ऋग्वेदे । ६ । ६७ । ८ । "प्रहंसासस्तृपलं मन्युमच्छामादस्तं वृषणजा: अयासुः ॥" "तृपलशब्दः त्रिफलवाची । तदुक्तं यास्केन । तृपलप्रभर्म्मा त्रिफलप्रहारीति । त्रिफलप्रहारिणं मन्युम् ।" इति सायणः ॥)
तृप्तः, त्रि, (तृप प्रीणने + क्तः ।) तृप्तियुक्तः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, नैषधे । ३ । ८३ ।
"सुहृत्तसम्भोगनिताम्ततुष्टे न नैषधे कार्यमिदं निगद्यम् । अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः खदते तुषारा ॥")
तृप्तिः, स्त्री, (तृप प्रीणने + भावे क्तिन् ।) भक्ष-णादिनाकाङ्क्षानिवृत्तिः । तत्पर्य्यायः । सौहि-त्यम् २ तर्पणम् ३ । इत्यमरः । २ । ६ । ५६ ॥ प्रीणनम् ४ आसितम्भवम् ५ । इति शब्द-रत्नावली ॥ (यथा, देवीभागवते ।१।१।२० । "शृतान्यन्नानि सर्व्वाणि तृप्तिस्तानि च । नैव तृप्तिं व्रजामोऽद्य सुधापानेऽमरा यथा ॥")
तृप्रः, पुं, (तृप्यत्यनेनेति । तृप + "स्फायितञ्चीति ।" उणां २ । १३ । इति रक् ।) हतम् । इत्यु-णादिकोषः ॥ पुरोडाशः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (तर्पके, त्रि । यथा, ऋग्वेदे । ८ । २ । ५ ।
"न यं शुक्रो न दुराधीर्न तृप्रा उरुव्यचसम् । अपस्यूषते सुहार्दम् ॥" "तृप्राः तर्पका अन्ये चरुपुरोडाशादयश्च यस्मिन्नं नापस्यूषते न न प्रीणयन्ति अपि तु प्रीणयन्त्येव तस्मिन्नं स्तुमः इति शेषः ।" इति तद्भाष्ये सायणः ॥)
तृप, प ग्र प्रीणने । इति कविकल्पद्रमः ॥ (तुदां-परं-सकं-सेट् ।) प ग्र, तृम्फति ततर्फ । इति दुर्गादासः ॥
तृफला, स्त्री, (तृम्फति प्रीणातीति । तृफ + "कल-तृपच ।" उणां १ । १०६ । इति चकारात् तृपतेरपि कलः ।) त्रिफला । इति त्रिकाण्ड-शेषः ॥
तृफूः, पुं, (तृफति प्रीड्यतीति । तृफ क्रीड्ये + "खर्ज्जादिभ्य ऊः ।" १ । ४६६ । इत्युणादिकोष-टीकाधृतसूत्रेण ऊः । निपातनात् न गुणः ।) सर्पजातिः । इत्युणादिकोषः ॥
तृभ, इर् य तृम्भि वि । इति कविकल्पद्रमः ॥ (दिवां-परं-सकं-सेट् ।) इर्, अतृभत् अत-र्भीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । य, तृभ्यति । भि, तृभितोऽस्ति । तृट् आकाङ्क्षा । तथा च । इच्छाकाङ्क्षा बुभुक्षा तृट् वाञ्छा लिप्सा मनोरथः । इत्यमरसिंहः । तदुप-स्थितमयूखादेः पितुराज्ञेति न भोगतृष्णयेति रघुः । तृष्यति धनं लोकः । तृषि पिपासायाम-मिति प्राचः । तृष्यति तोयं पान्थः । इति रमानाथः । इति दुर्गादासः ॥
तृषा, स्त्री, (तृष + क्विप् पक्षे टाप् ।) तृष्णा । (अस्याः निवारणोपायो यथा,—
"काश्मर्य्यं पद्मकोशीरं द्राक्षामधुकचन्दनम् । वालकं शर्करायुक्तं कार्यं पित्ततृषापहम् ॥ वटादनो रोधसिता च चन्दनं सदाड़िमं तण्डुलधावनेन च । पिबेत् सुशीतेन जलेन वापि पीतश्च पित्तोत्थतृषापहश्च ॥"
इति हारीते चिकित्सितस्थाने चतुर्दशेऽध्याये ॥ शुक्लोद्भवायास्तृषाया हेतुर्यथा,—
"स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्व्वन्नमेवाशु तृषां करोति ॥"
इति वैद्यकमाधवकरभृतरुग्विनिश्चये तृष्णाधि-कारे ॥) इच्छा । (यथा, हितोपदेशे ।१।२६६ । "लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् । तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥") कामकन्या । इति शब्दरत्नावली ॥ बाह्लि-कीदेशः । इति शब्दचन्द्रिका ॥
तृषाभूः, स्त्री, (तृषाया भूरुत्पत्तिस्थानम् ।) जिह्वा । इति शब्दचन्द्रिका ॥
तृषाहं, क्ली, (तृषां हन्तीति । हन + डः ।) जलम् । इति शब्दचन्द्रिका ॥
तृषाहा, स्त्री, (तृषां हन्तीति । हन + डः + टाप् ।) मधुरिका । इति शब्दचन्द्रिका ॥
तृषितः, त्रि, (तृट् तृषा वा सञ्जातास्य । तारका-दित्वात् इतच् ।) तृष्णायुक्तः । तत्पर्य्यायः ।

तर्पितः २ षष्ठट् ३। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। २। ८। २०।
"क्षुधितञ्च परिश्रान्तः क्षुधितश्चोत्तरासुतः॥"
भावे क्तः।) तर्षायाम्, स्त्री॥
तर्षितोत्तरा, स्त्री, (तर्षितः उत्तरो यस्याः।) अग्नपर्णी। इति शब्दचन्द्रिका॥
तर्षुक्, [ष्ण्] त्रि, (तर्षति आकाङ्क्षतीति। तर्ष् + "सर्पितर्षोर्नजिङ्।" ३। २। १७२। इति नजिङ्।) तृष्णः। इत्यमरः। ३। १। ९२॥ (तर्षितः। यथा, ऋग्वेदे। १। ५। ११।
"अविष्टनमुतये गोतमाय तर्षुजे॥")
तर्षा, स्त्री. (तर्ष + "तर्षिमुषिरादिभ्यः कितू।" उणा ३। १२। इति नः स च कित्।) अगस्तीयस्त्रीकारेच्छा। इति चण्डीटीकायां नागोजीभट्टः॥ सा लिप्सा। (यथा, रघुः। ८२।
"तदुपस्थितमग्रहीदणः
पितुराज्ञेति न भोगतर्षया॥")
पानेच्छा। इति मेदिनी। षे, १६॥ तत्पर्य्यायः। उदन्या २ पिपासा ३ षट् ४ तर्षः ५ इत्यमरः। ३। ३। ५१॥ तृषा ६। इति शब्दरत्नावली॥ तर्षणम् ७। इति जटाधरः॥*॥
रोगविशेषः। तन्निदानं यथा,—
"वातात् पित्तात् कफात् तर्षा सन्निपातात् द्रवक्षयात्।
षष्ठी स्वादुपसर्गाच्च वातपित्ते तु कारणम्॥
सर्व्वासु तत्र प्रकोपो हि सौम्यधातुप्रशोषणात्।
सर्व्वदेहे भ्रमात् कम्पतापसन्दाहमोहकृत्॥
जिह्वाताल्वगलस्रोमतालुतोयवहाः शिराः।
संशोष्य तर्षा जायन्ते तासां सामान्यलक्षणम्॥*॥
मुखशोषो जलाटन्निरन्नद्वेषः स्वरक्षयः।
कण्ठोष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं श्रमः॥
प्रलापश्चित्तविभ्रंशो दृष्टिग्रहोत्क्लेशयामयाः।
मरुतः श्यामता देन्यं शूलतोदः शिरोभ्रमः॥
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्रावलक्षयाः।
शीताम्बुफेनदृष्टिश्च पित्ताच्मूर्च्छास्यतिक्तता॥
रक्तक्षयश्च सततं शोषो दाहोऽतिधूमकः।
कफं रुणद्धि कुपितस्तोयवाहिषु मारुतः॥
स्रोतःसु स कफस्तेन पङ्कवत्क्लेद्यते ततः।
मूकैरिवाचितः कण्ठो निद्रामधुरवक्त्रता॥
आलस्यः शिरसो जाड्यं स्तैमित्यच्छर्द्यरोचकाः।
आलस्यमविपाकश्च यः स स्यात् सर्व्वलक्षणः॥
आमोद्भवा च भक्तस्य संरोधाद्वातपित्तजा।
उच्चक्रान्तस्य सहसा शीताम्भो भजतस्तृषा॥
तृष्णा बोद्धुं गतं कोष्ठं कुर्य्यात् पित्तरुजैव सा।
या च पानातिपानोत्था तौक्ष्ण्याद्यैः कोष्ठपाकजा॥
स्निग्धकट्वम्लवह्न्यौजोभोजनेन कफोद्भवा।
तृष्णारसक्षयोक्तेन लक्षणेन क्षयात्मिका॥
शोषमोहज्वरादूयस्य दीर्घरोगोपसर्गतः।
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता॥"
इति गारुडे तृष्णानिदानम् १५६ अध्यायः॥*॥

तदौषधं यथा,—
"त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम्।
भोजनादौ हि समधु पिपासां त्वरितं हरेत्॥"
इति तत्रैव १६४ अध्याये॥*॥
अपि च। "अथ तृष्णाधिकारः। तत्र तृष्णाया निदानपूर्व्विकां सम्प्राप्तिमाह।
भयश्रमाभ्यां बलसङ्क्षयाद्वा
ऊर्द्धं क्षितं पित्तविवर्द्धनैश्च।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम्॥
स्रोतःस्वपां वाहिषु दूषितेषु
दोषैश्च षट् सम्भवतीह जन्तोः।
तिस्रः क्षतात्मनः क्षतजा चतुर्थी
क्षयात्तथान्यामसमुद्भवा च॥
शुक्तोद्भवा सन्निमिकेति तासां
निबोध लिङ्गान्यनुपूर्व्वशस्तु॥
नराणां क्षितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितम्। भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च वातः कुपितः। तदयं ऊर्द्धं प्रसरन् तालुप्रपन्नं सत् पिपासां जनयेत्। न केवलं तालुन्येव दूषिते तृषा भवति। किन्तु जलवाहिस्रोतःस्वपि। अत आह। स्रोतःस्वित्यादि। गन्धत्र बहुवचनं युक्तम्। यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते। उच्यते। तयोरेवानेकप्रतानयोगान्न दोषः। अपां वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम्। यत आह चरकः रसवाहिनीश्च धमनीर्जिह्वा हृदयमतालुकीम च। संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलां पित्तानिलाविति॥ सङ्ग्रामाह। तिस्र इत्यादि॥ तृष्णायाः सामान्यं लक्षणमाह।
सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति।
सहु काङ्क्षति तोयन्तु तं तृष्णार्हितमादिशेत्॥
वातजाया लक्षणमाह।
श्यामास्यता मारुतसम्भवायां
तोदस्तथा शङ्खशिरःसु चापि।
स्रोतोनिरोधो विरसत्व वक्त्रं
शीताभिरद्भिश्च विवृद्धमेति॥
शङ्खशिरःसु शङ्खयोः शिरसि च। स्रोतोनिरोधो रसाम्बुवाहिधमनीनिरोधः॥*॥ पित्तजामाह।
मूर्च्छाभ्रमविदाहविलापदाहा
रक्तक्षयत्वं प्रततञ्च शोषः।
शीताभिनन्दा सुखतिक्तता च
पित्तात्मिकायां परिधूपनञ्च॥
विलापः प्रलापः। प्रततञ्च शोषः अविरतञ्च शोषः। शीताभिनन्दा शीतेच्छा। परिधूपनं कण्ठाद्धूमनिर्गम इव॥
कफजामाह।
वास्यावरोधात् कफसंवृतेऽग्नौ
तृष्णा बलासेन भवेन्नरस्य।
निद्रागुरुत्वं मधुरास्यता च
तयार्हितः शुष्यति चातिमात्रम्॥
अग्नौ जठराग्नौ। कफसंवृते स्वकारणकुपितेन कफेनोपरिरुद्धादाच्छादिते। वास्यावरोधात् अग्नेरास्यावरोधात्। अवरुद्धानलोष्मणाम्बुवहस्रोतःशोषणात् बलासेन कफेन नरस्य तृष्णा भवेत्। तया तृष्णया अर्हितः पीड़ितः। शुष्यति क्षयी भवति॥*॥
क्षतजामाह।
क्षतस्य रक्तशोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु।
क्षतस्य शस्त्रादिक्षतयुक्तस्य। रुक् पीड़ा॥*॥
क्षयजामाह।
रसक्षयाद्या क्षयसम्भवा सा
तयाभिभूतस्तु निशादिनेषु।
पेपीयतेऽम्भः स सुखं न याति
तां सन्निपातादिति केचिदाहुः॥
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेण भिषग्विदित्वा।
रसक्षयलक्षणानि सुश्रुतेनोक्तानि॥ रसक्षये क्षुत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति। विदित्वा जानीयात्॥*॥
आमजामाह।
क्लिन्नोष्मलिङ्गामसमुद्भवा च
कृच्छ्रानिलश्लीवनसादकर्त्री॥*॥
शुक्तोद्भवामाह।
स्निग्धं तथाम्लं लवणञ्च शुक्तं
गुर्व्वन्नमेवासु तृषां करोति।
लवणञ्चेति चकारात् कटु च॥*॥
उपसर्गजामाह।
क्षीणस्वरः प्रताम्यन् दीनाननहृदयशुष्कगलतालुः।
भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा॥
शोषिणी धातुशोषिणी॥*॥
उपसर्गानाह।
ज्वरो मोहः क्षयः श्वासो वाधिर्य्यं कास एव च।
बहिर्निर्गतजिह्वात्वं सप्तैते तदुपद्रवाः॥*॥
तदुपद्रवा अरिष्टत्वेनाह।
ज्वरमोहक्षयकासश्वासाद्युपद्रुतदेहानाम्।
सर्व्वास्वतिप्रसक्ता रोगलक्षणानां वमिप्रसक्तानाम्॥
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः।
आदिशब्दात्तीसारादीनां ग्रहणम्। अतिप्रसक्ताः निरन्तराः। घोरोपद्रवयुक्ताः अतीवसुखशोषादियुताः॥*॥
अथ तृष्णायाश्चिकित्सा।
वातघ्नमन्नपानं स्वादु लघु शीतञ्च वाततृष्णायाम्।
तृष्णायां पवनोत्थायां सगुड़ं दधि शस्यते।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णापहं परम्॥*॥
सुरुपर्ण्यटकोशीरचक्राह्वोशीरचन्दनैः।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये॥
क्वथ्य धान्याकम्। कश्चिद्वाचीरञ्च दद्यात्।
चन्दनमत्र धवलं दद्यात्तस्यातितृष्णाहरत्वात्।
धृतमङ्गपक्कमत्र कर्त्तव्यम्। इति षड़ङ्गपानम्॥१॥
लाजोदकं मधुयुतं शीतं गुड़धिमर्दितम्।
काश्मरीशर्करायुक्तं पिबेत् तृष्णार्दितो नरः॥२॥

आस्तरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोष्णोऽपि देहिनां
नियतम् ॥ ३ ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ॥४॥
वेषतं जनयत्यास्ये सन्दधाति सुखे जलम् ।
तृष्णादाहप्रशमनं मधुशस्यूषधारणम् ॥ ५ ॥
जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥ ६ ॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥७॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥ ८ ॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशोधनम् ॥ ९ ॥
आमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रबलां हन्त्येषा सुखशीघ्रं च दारुणम् ॥१०॥
शतोद्भवां रविदिनवारजेन
जयेत् शतानामहजञ्च पातैः ।११।
शयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुरोदकं वा ॥ १२ ॥
आमोद्भवां विल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम् ।१३।
गुर्वन्नजामुल्लिखनैर्व्यवेत्य
शयं विना सर्वगतां च तृष्णाम् ॥
उल्लिखनैः लेखनद्रव्यैः ॥ १४ ॥
स्निग्धोष्णे भुक्तवतो या तृष्णा स्यात्तां गुडाम्बुना
शमयेत् ।
अतिरोगदुर्बलानां तृष्णां शमयेन्नृणामिहाशु
पयः ॥
पयोऽत्र दुग्धम् ॥ १५ ॥
मृच्छार्क्षदिष्टवादाहक्लोमशोषशमकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥ १६ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः ।
तस्यां जितायामप्योऽपि व्याधिः शुष्यच्चिकित्-
सितुम् ॥ १७ ॥ * ॥
तृष्यन् पूर्वोपयुक्तोषो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्वास्ववस्थासु न कथञ्चिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते ॥
इति तृष्णाधिकारः ॥" इति भावप्रकाशः ॥
(अथास्याः पथ्यापथ्यनियमः ॥ पथ्यानि यथा,—
"शोधनं शमनं निद्रा स्नानं कवलधारणम् ।
जिह्वाधःशिरसोर्द्दोहो दीपदग्धहरिद्रया ॥
कोद्रवाः शालयः पेया विलेपी लाजशक्तवः ।
अन्नमम्लो धन्वरसाः शुष्कशाकवाग्वाडवौ ॥
मुद्गैर्मुद्गैर्मसूरैर्वा चणकैर्वा कृतो रसः ।
रम्भापृष्ठं तैलकूष्माण्डात्रापर्पटपल्लवाः ॥
कपित्थं कोलमम्लीका कुष्माण्डकसुपोदिका ।
खर्ज्जूरं दाडिमं धात्री कर्कटी नलदाम्बु च ॥
जम्बीरं करमर्दञ्च बीजपूरं गवां पयः ।
मधूकपुष्पं क्षीरेरं तिक्तानि मधुराणि च ॥
बालतालाम्बु शीतास्तु पयः पेटीप्रपानकम् ।
माक्षिकं सरसां तोयं घृताक्ता नागकेशरम् ॥
एलाजातीफलं पथ्या कुसुम्बुरु च टङ्कणम् ।
वनसारो गन्धसारः कौसुदी शिशिरानिलः ॥
चन्दनार्द्रप्रियाङ्गोत्थो रक्ताभरणधारणम् ।
हिमानुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥"
अपथ्यानि यथा,—
"स्नेहाञ्जनस्वेदनधूमपान-
व्यायामनस्यातपदन्तकाष्ठम् ।
गुर्वन्नमम्लं लवणं कषायं
कटु स्त्रियं दुष्टजलानि तीक्ष्णम् ॥
एतानि सर्व्वाणि हिताभिलाषी
तृष्णातुरो नैव भजेत् कदाचित् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे तृष्णाधिकारे ॥)
तृष्णाक्षयः, पुं. (तृष्णाया विषयलिप्साया: क्षयो नाशो यत्र ।) भ्रान्तिः । इति हेमचन्द्रः । २ । २१८ ॥ (यथा, ग्रन्थारम्भे चण्डीमाहात्म्यवचनम् ।
"यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् ।
तृष्णाक्षयसुखस्यैते कलां नार्हन्ति षोडशीम् ॥"
तृष्णायाः पिपासायाः क्षयः ।) पिपासानाशश्च ॥
तृष्णारिः, पुं, (तृष्णायाः पिपासायाः अरिः शत्रुः ।) पर्पटः । इति राजनिर्घण्टः ॥
तृह, घ ञ भ्र हिंसे । इति कविकल्पद्रुमः ॥ (दन्त्यादिः च-परः सकः-वेट् ।) सप्तमस्वरी । घ, तृणेढि । (यथा, भट्टिः ।
"तृणेटु रामः सह लक्ष्मणेन ॥")
ऊ, अतर्हीत् अतर्हत् । भ्र, तर्हति । इति दुर्गादासः ॥
तॄ, तरे । अभिभवे । भ्वादाम् । इति कविकल्पद्रुमः ॥ (भां-परं-सकं-भ्रुतौ अकं-सेट् ।) तरः । प्लवनपूर्ब्बकदेशान्तरगमनम् । भ्रुतिर्मैथुनाभावः । तरति नदीं भेलया पान्थः । तरति सकलदुःखं वामनं भावयेद्दृयः । तरति शुष्ककाष्ठं जले मन्यति नेत्यर्थः ॥ इति दुर्गादासः ॥
ते, य, त्रया । इति त्रिकाण्डशेषः ॥ (गौरी । यथा, सङ्गीतदामोदरः ।
"तेजश्चैनोच्यते गौरी गजश्चैनोच्यते हरः ।
तेन माङ्गलिकार्थं शब्दस्तेन इति स्मृतः ॥")
तेजः, [स्] क्ली, (तेजयति तेज्यतेऽनेन वा । तिज निशाने + "सर्व्वधातुभ्योऽसुन्।" उणा । ४ । १८८ । इति असुन् ।) दीप्तिः । (यथा, माघे । २ । ६२ ।
"अन्यदुच्छ्वसितं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्त्विषयोः कृतः ॥")
प्रभावः । (यथा, महाभारते । ६ । १४ । ४८ ।
"तस्मान्नूनं महावीर्य्याद्भार्गवाद्युद्धदुर्म्मदात् ।
तेजोवीर्य्यबलैर्भूयान् शिखण्डी द्रुपदात्मजः ॥")
पराक्रमः । (यथा, महाभारते । ३ । २८ । ६ ।
" न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात ! विजानीहि ह्यथमेतदसंशयम् ॥")
रेतः । इति मेदिनी । से, २५ ॥ (यथा, रघुः ।
"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ॥"
"तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्धातुरुदीरयति। ततस्त्रीजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संहन्यते चार्त्तवेन ।"
"तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावबधातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामम् ॥" इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥ सारः । यथा, सुश्रुते ।१।१५।
"रसादीनां शुक्रान्तानां धातूनां यत् परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते खशास्त्रसिद्धान्तात् ॥"
"यत् परं तेजः इति यदुक्तं सारः ।"
इति तट्टीका ॥
शारीराग्निसम्भूतपदार्थविशेषः । तद्यथा,—
"तेजोऽग्न्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहगतं वसाख्यं स्त्रीणां विशेषतो भवति तेन मार्द्दवसौकुमार्य्यश्लक्ष्णरोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति तत् कषायतिक्तशीतरूक्षविरूक्षभिवेगविघातव्यवायव्यायामव्याधिकर्षणैश्च विक्रियते ॥"
इति च सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये ॥)
त्विट् । (देहजकान्तिः । यथा, वाजसनेयसंहितायाम् । १ । ३१ ।
"तेजोऽसि शुक्रमस्यमृतमसि ।
धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥"
"हे आप्त्य ! त्वं तेजोऽसि शरीरकान्तिहेतुत्वात्तेजस्कम् ।" इति महीधरः ॥) नवनीतम् । अग्निः । इति हेमचन्द्रः । २ । १५ ॥ सुवर्णम् । मज्जा । पित्तम् । इति राजनिर्घण्टः ॥ असृक्कणम् । यथा, साहित्यदर्पणे । ३ । ६४ ।
"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राबाल्येऽप्यसहनं तत्तेजः सम्प्रदक्षते ॥"
पञ्चमहाभूतान्तर्गतीयमहाभूतम् । यथा,—
"तृतीयं ज्योतिरित्याहुश्चतुरध्यात्मसुच्यते ।
अधिभूतं ततो रूपं सूर्य्यस्त्वाधिदैवतम् ॥"
इत्याग्नेयेऽधिकपर्व्व ॥
अस्य धर्म्माः । रूपम् १ द्रवत्वम् २ प्रत्ययोगित्वम् ३ ॥ अस्य गुणाः । सङ्ख्या १ संख्या २ परिमाणम् ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ रूपम् ९ द्रवः १० वेगः ११ । अस्य नैमित्तिकद्रवत्वम् । अस्य सङ्ख्या उक्ता । रूपं शुक्लभास्वरम् । इदं द्विधा । परमाणुस्वरूपं नित्यम् । सावयवमनित्यम् । अनित्यं त्रिधा देहः इन्द्रियं विषयः । इति

भाषापरिच्छेदः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ४३ ।
"ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥"
शिवः । यथा, तत्रैव । १३ । १७ । ५२ ।
"तेजोऽपहारी बलहा सुदितोऽर्थोऽजितोऽवरः ॥"
द्विसप्ततिसाध्यमौलिककायस्थानामन्यतमः । तच्च अकारान्तोऽयम् । यथा, कुलदीपिकायाम् ।
"खामः चोमो घर वैद्योषो
वोदस्तेजचार्थव आग्नः ॥")
तेजःफलः, पुं, (तेजसे बलाय तेजःप्रदं वा फलमस्य ।) वृक्षविशेषः । तेजफल इति भाषा । तत्पर्य्यायः । बहुफलः २ आम्रलीफलः ३ स्तवकफलः ४ स्तेयफलः ५ गन्धफलः ६ कण्टवृक्षः ७ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । सुगन्धित्वम् । दीपनत्वम् । वातश्लेष्मारुचिनाशित्वम् । बालरोगकारत्वञ्च । इति राजनिर्घण्टः ॥
तेजनः, पुं, (तेजयति अग्निमिति । तिज + ल्युः ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ सुञ्जः । भद्रसुञ्जः । इति राजनिर्घण्टः ॥ (बाणादीनां फलके । यथा, मनुः । ७ । ६० ।
"न कार्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥"
उद्दीपने, क्ली । यथा, सुश्रुते चिकित्सास्थाने । २४ अध्याये ।
"शिरासुखविरिक्तत्वं त्वक्स्थस्यार्थेच तेजनम् ॥")
तेजनकः, पुं, (तेजयतीति । तिज + णिच् + ल्युः संज्ञायां कन् । यद्वा, तेजनेन फलकेन कायतीति । के + कः ।) शरः । इत्यमरः । २ । ४ । १६२ ॥
तेजनी, स्त्री, (तेजयतीति । तिज + णिच् + ल्युः । गौरादित्वात् ङीष् ।) मूर्व्वा । इत्यमरः । २ । ४ । ८३ ॥ (अस्याः पर्य्याया यथा,—
"तेजनी पिशुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ।
पर्य्यायान्तरं यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
ज्योतिष्मती । इति शब्दरत्नावली ॥ (तेजवती । अस्या पर्य्यायाः यथा,—
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजपत्रं, क्ली, (तेजयतीति । तिज + णिच् + अच् । तेजं पत्रमस्य ।) खगामख्यातवृक्षः । तज इति तेजपात इति च भाषा । तत्पर्य्यायः । गन्धजातम् २ पत्रम् ३ पत्रकम् ४ । इति शब्दरत्नावली । अस्य गुणाः । कफवायुशूलकृमिनाशित्वम् । इति राजवल्लभः ॥ अमरोक्तपर्य्यायास्तूक्तपत्रशब्दे द्रष्टव्याः ॥ तस्य नामगुणाः ।
"त्वक्पत्रञ्च वराङ्गं स्यादुष्णं चौद्यं तथोत्कटम् ।
त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् ।
पित्तलं कफवातघ्नं कण्डूमारुचिनाशनम् ।
कृमिश्लिरोगवातार्शःशमिपीनसशुक्रकृत् ॥"
इति भावप्रकाशः ॥
तेजलः, पुं, (तेजति अतिशयेन पालयति श्रावकानिति । तेज पालने + बाहुलकात् कलच् ।) कपिञ्जलपक्षी । इति राजनिर्घण्टः ॥
तेजस्करं, त्रि, (तेजः करोतीति । तेजस् + कृ + टः ।) तेजोवर्द्धिकारकद्रव्यम् । इति वैद्यकम् ॥
तेजस्विनी, स्त्री, (तेजो विद्यतेऽस्याः । तेजस् + विनिः स्त्रियां ङीप् ।) ज्योतिष्मती । इति शब्दरत्नावली ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (तेजवल्कल इति च । तत्पर्य्यायाः यथा,—
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ॥"
अस्या गुणा यथा,—
"तेजस्विनी कफश्वासकासास्रामयवातहृत् ।
पाचन्युष्णा कटुक्षिप्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजस्वी, [न्] त्रि, (तेजोऽस्यस्येति । विनिः ।) तेजोयुक्तः । यथा,—
"महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती ।
युग्मद्विधोक्तं श्लाघ्यञ्च प्रतिलान्यच्च पण्डितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
(इन्द्रस्य पुत्रविशेषः । यथा, महाभारते । १ । १६८ । २६ ।
"भ्रान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ॥")
तेजितः, त्रि, (तिज + क्तः ।) तीक्ष्णीकृतः । शाणान इति भाषा । तत्पर्य्यायः । निशितः २ क्षुतः ३ शाणितः ४ । इत्यमरः । ३ । १ । ६१ ॥ शान्तः ५ शाणादिभिर्घृष्टः ६ । इति शब्दरत्नावली ॥ क्षुतः ७ निशातः ८ शितः ९ शातः १० । इति जटाधरः ॥
तेजीयान्, [स्] त्रि, (तेजो विद्यतेऽस्य । तेजस् + ईयसुन् ।) तेजोयुक्तः । यथा,—
"अज्ञानी पुरुषः शूरश्चण्डिकश्च स्वकर्म्मजा ।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तेजोमन्थः, पुं, (तेजो मथ्नातीति । मन्थ + कर्म्मण्यण् ।) गणिकारिका । इति रत्नमाला ॥
तेजोरूपं, क्ली, (तेजः सर्व्वप्रकाशकं चैतन्यं रूपं यस्य ।) ब्रह्म । यथा,—
"अशरीरं विश्वशरीरन्द्रियवदतीन्द्रियम् ।
यदसाधि सर्व्वसाधि तेजोरूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तैजोवती, स्त्री, (तेजोऽस्यस्या इति । तेजस् + मतुप् मस्य वः ।) गजपिप्पली । इति शब्दरत्नावली ॥ चविका । इति रत्नमाला ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥ तेजल इति तेजवल्कल इति च भाषा । तस्याः पर्य्यायगुणाः ।
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ।
तेजस्विनी कफश्वासकासास्रामयवातहृत् ॥
पाचन्युष्णा कटुक्षिप्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
(अग्नेर्विमानम् । यथा, ब्रह्माण्डे ३८ अध्याये ।
"महाविमानं ग्रथितं भास्करं जातवेदसः ।
सा हि तेजोवती नाम हुताशस्य महासभा ॥")
तेजोवृक्षः, पुं, (तेजोयुक्तो वृक्षः । अमृतपादकत्वादस्य तथात्वम् ।) क्षुद्राग्निमन्थः । इति राजनिर्घण्टः ॥
तेन, य, तद्धेतुना । इत्यमरटीकायां भरतः ॥ सेइ निमित्ते इति भाषा ॥
तेनः, पुं, (ते गौरी न शिवो यत्र ।) गानाङ्गविशेषः । यथा, सङ्गीतदामोदरे ।
"तेनेति शब्देन स्यात् मङ्गलानां प्रदर्शकः ।
ते शब्देनोच्यते गौरी नशब्देनोच्यते हरः ॥
तेन माङ्गलिकार्थायं शब्देन इति स्मृतः ॥"
तेप, ऋ ङ कम्पे । क्षुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अतितेपत् । ङ, तेपते इत्यः । तितेपे । इति दुर्गादासः ॥
तेमः, पुं, (तिम आर्द्रीभावे + भावे घञ् ।) आर्द्रीभावः । इत्यमरः । ३ । २ । २६ ॥
तेमनं, क्ली, (तिम + भावे ल्युट् ।) आर्द्रीकरणम् । व्यञ्जनम् । इति मेदिनी । ने, ७२ ॥
तेमनी, स्त्री, (तिम्यतेऽनेनेति । तिम + ल्युट् + ङीप् ।) पुत्त्रीभेदः । इति हेमचन्द्रः ॥
तेव, ऋ ङ देवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) देवनमिह क्रीड़ा । ऋ, अतितेवत् । ङ, तेवते । तेवते बालः कन्दुकेनित्यमिति हलायुधः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥
तेवनं, क्ली, (तेवते दीव्यते ऽक्षिभिरिति । तेव क्रीड़ायाम् + अधिकरणे ल्युट् ।) केलिकाननम् । (भावे ल्युट् ।) क्रीड़ा । इति मेदिनी । ने, ७१ ॥ (यथा,शब्दार्थचिन्तामणिधृतरामायणवचनम् ।
"तेवनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥")
तैक्ष्ण्यं, क्ली, (तीक्ष्णस्य भावः । तीक्ष्ण + ष्यञ् ।) तीक्ष्णता । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ५ ।
"ग्रीष्मे मारुतक्रियाग्नौ तैक्ष्ण्यमखेदवेपथू ॥"
कठोरता । यथा, रामायणे । २ । २१ । ४४ ।
"तदेतां विद्धि जानक्यां चण्डधर्म्मात्रितां मतिम् ।
धर्म्ममाश्रय मा तैक्ष्ण्यं मद्वुद्धिरनुगम्यताम् ॥"
क्रूरता । यथा, मनुः । ४ । १६३ ।
"हर्षं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥"
"मातृवर्य्यं धर्म्मानुत्सादामिमानकोपक्रौर्य्याण्यत्यजेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
तैजसं, क्ली, (तेजसो विकारः । तेजस् + "तस्य विकारः ।" ४ । ३ । १३४ । इत्यण् ।) घृतम् । इति स्मृतिः ॥ धातुद्रव्यम् । इत्यमरः । २ । ६ । ६६ ॥ (यथा, मनुः । ५ । १११ ।
"तैजसानां मणीनाञ्च सर्व्वस्याश्मभयस्य च ॥"
तीर्थविशेषः । यथा, महाभारते । ६ । ४६ । १०३ ।
"तैजसं नाम तत्तीर्थं यत्र पूर्व्वमपाप्लुतिः ।

अभिषिक्तः सुरगणैर्ब्रह्मणो भरतर्षभ ! ॥"
तेजःसम्बन्धिनि, त्रि । यथा, रघुः । ११ । ४३ ।
"तेजसस्य धनुषः प्रवृत्तये
तोयदानिव सहस्रलोचनः ॥")
तेजसः, पुं, (तेजसो विकारः । तेजस् + अण् ।)
रूक्ष्मशरीरव्यष्ट्युपहितचैतन्यम् । यथा,—
"एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तैजो-
मयान्तःकरणोपहितत्वात् ॥" इति वेदान्त-
सारः ॥ (तैजसाहङ्कारविशेषः । यथा, भाग-
वते । २ । ५ । २४ ।
"सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥"
घोटकविशेषः । तल्लक्षणादिकं यथा, भोज-
राजकृततयुक्तिकल्पतरौ ।
"ये क्रोधशीला भंग्नवेगयुक्ता
सक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥"
सुमतिपुत्रः । यथा, ब्रह्माण्डे ३६ अध्याये ।
"तैजसस्तनुसुतश्चापि प्रजापतिरमित्रजित् ॥")
तैजसावर्त्तनी, स्त्री, (आवर्त्तते ऽत्र । आ + वृत् +
ल्युट् स्त्रियां ङीप् । तैजसानां धातुत्रयाणां
सुवर्णादीनां आवर्त्तनी ।) मूषा । इत्यमरः ।
२ । १० । ३३ ॥ तैजसगलान मूचो इति भाषा ॥
तैतिलं, क्ली, वर्षाद्येकादशकरणान्तर्गतचतुर्थकर-
णम् । तत्र जातफलं यथा,—
"कलासु दक्षो जलनाभिलाषी
सुमूर्त्तिसन्तर्पितकामदेवः ।
वक्ता गुणज्ञः कुशलः सुशील-
स्तैतैतिलाख्यं करणं प्रसूतौ ॥"
इति कोष्ठीप्रदीपः ॥
तैतिलः, पुं, गण्डकः । इति मेदिनी । ने, ६६ ॥
तैत्तिरं, क्ली, (तित्तिरीणां पक्षिणां समूहः ।
तित्तिरि + "व्रातच्फञोरञ् ।" ४ । २ । ४४ ।
इति अञ् ।) तित्तिरिगणः । इत्यमरः । २ ।
६ । ४३ ॥ (यथा, गोः रामायणे । २ । १०० । ६३ ।
"वाप्यो मैरेयपूर्णाश्च भक्ष्यमांसचयैर्वृताः ।
प्रतप्तैः पेटरैश्चैव मार्गमायूरतैत्तिरैः ॥")
तैत्तिरः, पुं, (तित्तिर एव । स्वार्थे अण् ।)
तित्तिरिपक्षी । इति राजनिर्घण्टः ॥ (गर्भिणी
एतन्मांसाशनाद्दद्याद्गर्भं सुतं जनयेत् तद्यथा,
"नित्यभीतश्च तैत्तिरात् ॥"
इति सुश्रुते शारीरस्थाने तृतीयाध्याये ॥)
तैत्तिरीयकः, पुं, (तैत्तिरं तित्तिरिप्रोक्तयजुर्व्वेदीय-
शाखामधीते वेत्ति वा । छण् । ततः स्वार्थे
कन् ।) तैत्तिरीयी । यजुर्व्वेदीयशाखाविशेष-
वेत्ता ॥ (उपनिषद्विशेषे, क्ली । तच्च यजु-
र्व्वेदान्तर्गतम् । इति मुक्तिकोपनिषत् ॥)
तैत्तिरीया, स्त्री, (तित्तिरिणा प्रोक्ता । छण् ।)
यजुर्व्वेदस्य शाखाविशेषः । यथा,—
"दैवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ सुनयो दद्युस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतया दृढः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥"
इति श्रीभागवतम् ॥
तैरणी, स्त्री, (तीरे नमतीति । नम + डः । ततः
स्वार्थे अण् । स्त्रियां गौरादित्वात् ङीष् ।)
क्षुपविशेषः । तत्पर्य्यायः । तैरवः २ तैरः ३
कुनीली ४ रागदः ५ । अस्य गुणाः । शिशिर-
त्वम् । तिक्तत्वम् । व्रणनाशित्वम् । अरुण-
रक्तदलत्वञ्च । इति राजनिर्घण्टः ॥
तैलं, क्ली, (तैलं तैलवत् स्नेहोऽस्यस्येति । अच् ।)
सिक्थकः । इति रत्नमाला ॥ (तिलस्य तत्-
सदृशस्य वा विकारः । तिल + "तस्य विकारः ।"
४ । ३ । १३४ । इत्यण् ।) तिलादिजातस्नेहः ।
यथा, भावप्रकाशे ।
"तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ॥"
तत्पर्य्यायः । स्नेहनम् २ स्नेहः ३ अभ्य-
ञ्जनम् ४ । इति हेमचन्द्रः । ३ । ८१ ॥ अस्य
गुणाः । कषायत्वम् । मधुरत्वम् । लवणत्वम् ।
उष्णत्वम् । वयःस्थापित्वम् । पित्तकारित्वम् । बहु-
विण्मूत्रत्वम् । श्लेष्मावर्द्धकत्वम् । सर्व्ववात-
विकारनाशित्वम् । मेधाग्निबलवर्द्धनत्वञ्च ।
"नास्ति तैलात् परं किञ्चित् भेषजं मारुता-
पहम् ॥"
इति राजनिर्घण्टः ॥
पक्वपुरातनतैलस्य गुणः । महद्गुणत्वम् ।
किञ्चिदल्पहीनत्वञ्च । द्रव्यसंयोगे संस्कृततैलस्य
सर्व्वरोगनाशित्वम् ॥ अवगाहने युक्ततैलस्य
गुणः । शरीरबलकारित्वम् । शिरासुखरोम-
कूपधमनीनाड़ीद्वारा लघ्निकारित्वञ्च । नित्यं
मस्तके अधिकतैलदानगुणाः । शिरःशूल-
खालित्यपालित्यनाशित्वम् । केशमूलस्य दृढ़ता-
कारित्वम् । केशस्यापतनघनतालम्बतादीर्घता-
कारित्वम् । इन्द्रियप्रसन्नताग्निशुद्धिकारित्वञ्च ॥
नित्यं कर्णे तैलपूरणस्य गुणाः । मन्याहनु-
संग्रहोत्थैः श्रुतिबाधिर्य्यकर्णवातजरोगाजनक-
त्वम् । मर्द्दने तैलस्य गुणः । घृतादधिगुणगुरु-
त्वम् । इति राजवल्लभादिः ॥ * ॥
"प्रातःस्नाने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा ।
मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत् ॥"
इति कर्म्मलोचनम् ॥
"घृतञ्च सार्षपं तैलं यत्तैलं पुंस्त्ववासितम् ।
अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
वारविशेषे तैलग्रहणफलं यथा,—
रवौ क्षुद्रोगः सोमे कौर्त्तिलाभः कुजे मृत्युः बुधे
पुत्रागमः गुरौ अर्थहानिः शुक्रे शोकः शनौ
दीर्घायुः ॥ * ॥
अथ निषिद्धदिने तैलग्रहणदोषशान्त्यर्थदेय-
द्रव्यनियमः । रवौ पुष्पं गुरौ दूर्व्वा कुजे भूमिः
शुक्रे गोमयम् । अस्य प्रमाणं यथा,—
"अर्के मूलं दहति हृदयं कीर्त्तिलाभश्च सोमे
भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्रलाभः ।
अर्थध्वंसो भवति च गुरौ भार्गवे शोकयुक्त-
स्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः ॥"
इति ज्योतिःसारसंग्रहः ॥
वारादिविशेषे तदभ्यङ्गे गुणदोषौ यथा,—
"सन्तापः कीर्त्तिरल्पायुर्धनं निधनमेव च ।
आरोग्यं सर्व्वकामाप्तिरभ्यङ्गाद्भास्करादिषु ॥
उपोषितस्य व्रतिनः क्षत्तकेशस्य नापितैः ।
तावत् श्रीस्तिष्ठति प्रीता यावत्तैलं न संस्पृशेत् ॥"
इति गारुड़े ११४ अध्यायः ॥ * ॥
अथ तैलवर्गः । तत्र तैलस्य स्वरूपनिरूपणम् ।
"तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।
तत्तु वातहरं सर्व्वं विशेषात्तिलसम्भवम् ॥"*॥
अथ तिलतैलगुणाः ।
"तिलतैलं गुरु स्थैर्य्यं बलवर्णकरं परम् ।
हृद्यं विकाशि विशदं मधुरं रसपाकयोः ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं सर्व्वं दृंहणं रक्तपित्तहृत् ॥
लेखनं बद्धविण्मूत्रवर्गाग्न्यायुर्व्रणौघनम् ।
दीपनं बुद्धिदं मेध्यं वयसि व्रणमेहनुत् ॥
श्रोत्रयोर्निशिरःशूलनाशनं लघुताकरम् ।
त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥
छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्छिते ।
भस्मस्फुटितविड्वह्निदग्धाविश्लिष्टदारिते ॥
तथाभिहतनिर्भुग्नदष्टगण्डादिचर्व्विते ।
वस्तौ पाने ऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥
सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥"*॥
नन्वत्र दृंहणलेखनयोः कथं सामानाधिकरण्य-
मित्याह ।
"रूक्षादिदुष्टपवनः स्रोतः सङ्कोचयेद्यदा ।
रसेऽसम्यग्वहन् काश्र्यं कुर्य्यादक्षात्यवर्हणम् ॥
तेषु प्रवेष्टुं सरता स्नैग्ध्यात्स्निग्धतमार्हवैः ।
तैलं चमं रसं मेतुं क्षमाणा तेन दृंहणम् ॥
यथायथोष्मतीक्ष्णोष्णसरत्वैर्म्मेदसः क्षयः ।
घ्नैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥
हृतं पुरीषं बध्नाति खलितं तत् प्रवर्त्तयेत् ।
ग्राहकं सारकं वापि तेन तैलमुदीरितम् ॥
घृतमस्मात् परं पक्वं हीनवीर्य्यं प्रजायते ।
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥"*
अथ सर्षपतैलगुणाः ।
"दीपनं सार्षपं तैलं कटुपाकरसं लघु ।
लेखनं सर्व्ववीर्य्याणां तीक्ष्णं पित्तासृदूषकम् ।
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकोठक्षतक्लिन्नकुष्ठदुष्टव्रणप्रणुत् ॥
तद्वद्राजिकयोस्तैलं विशेषाच्चूलकृच्छ्रहृत् ।
राजिकयोः क्षयाराद्र आरक्तराद्र इयोः ॥*॥
अथ तोरीतैलगुणाः ।
तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत् कण्डूकुष्ठकोठक्षमिप्रणुत् ॥
मेदोदोषापहञ्चापि व्रणशोथहरं परम् ॥ * ॥
अथ तिसीतैलगुणाः ।
"अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तहृत् ।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥

मलक्षयप्रसः खादु ग्राहि लघ्वदोषदुष्टत्व ग्रणम्। पञ्चौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे॥ अनुपानविधौ चापि प्रयोज्यं वातशान्तये॥*॥

अथ वरटतैलगुणाः।

कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च। चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम्॥*॥

अथ खाखसबीजतैलगुणाः।

तैलं खाखसबीजानां बल्यं दृष्यं गुरु स्मृतम्। वातदुत् कफदुच्छीतं स्वादुपाकरसच्च तत्॥*॥

अथ एरण्डतैलगुणाः।

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु। दृष्यं लघ्वं वयःस्थापि मेधाकान्तिबलप्रदम्॥ कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्। विसं स्वादु रसे पाके सतिक्तं कटुकं सरम्॥ विषमज्वरदुष्टोगपृष्ठगुह्यादिशूलहृत्। हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान्॥ वातश्लोणितविड्बन्धव्रणश्लोथामविद्रधीन्। आमवातगजेन्द्रस्य शरीरवनचारिणः। एक एव निहन्तायमेरण्डस्नेहकेशरी॥*॥

अथ रालतैलगुणाः।

तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम्। कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम्॥*॥

अथ सर्ज्जतैलगुणाः।

तैलं खयोनिगुणदुद्भागभटेनाखिलं मतम्। अतः श्रेष्ठस्य तैलस्य गुणा ज्ञेयाः खयोनिवत्॥

इति भावप्रकाशे तैलवर्गः॥*॥

अथ पुराणतैलगुणाः।

"यामं कल्ककषायवीर्य्यमखिलं चर्य्यञ्च पञ्चत्रयं वस्नासान् घृतमोदकौ सहगुड़ौ मासत्रयं गुग्गुलोः। सिद्धानां रसभस्मनां सुविपुलं वीर्य्यन्तु वर्षत्रयं किञ्चिन्न्यविवर्ज्जितं गुणपरं तैलं पुराणं महत्॥"

इति नारायणदासदत्तपरिभाषा॥

तैलकं, क्ली, (स्वल्पं तैलम्। अल्पार्थे कन्।) अल्पपरिमाणतैलम्। इति व्याकरणम्॥

तैलकन्दः, पुं, (तैलप्रधानः कन्दः।) कन्दविशेषः। तत्पर्य्यायः। द्रावककन्दः २ तिलाह्वितदलः ३ करवीरकन्दसंज्ञः ४ तिलचित्रपत्रकः ५। अस्य गुणाः। लोहद्रावित्वम्। कटुत्वम्। उष्णत्वम्। वातापस्मारविषश्लोपनाग्नित्वम्। रसस्य बन्धकारित्वम्। स्नेहसिद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

तैलकारः, पुं, (तैलं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) वर्णसङ्करजातिविशेषः। कलु इति भाषा। स कोटकस्त्रीगर्भे कुम्भकाराज्जातः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥ तत्पर्य्यायः। धूसरः २ चाक्रिकः ३ तैली ४। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।

"स्नेहमयान् पीड़यत किं चक्रेणापि तैलकारस्य।

चालयति पार्थिवानपि यः स कुलालः परं चक्री॥"

याचाकालेऽस्य दर्शनममङ्गलसूचकम्। यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।

"दर्शनमङ्गलं राजा पुरो वर्त्तनि वर्त्तनि॥"

"कुम्भकारं तैलकारं वाधं सर्पोपजीविनम्॥")

तैलकिट्टं, क्ली, (तैलस्य किट्टं मलम्।) तैलमलम्। खलि इति ख्यातम्। तत्पर्य्यायः। पिण्याकः २ खलिः ३ तैलकल्कजः ४। अस्य गुणाः। कटुत्वम्। गौल्यत्वम्। कफवातप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥

तैलङ्गः, पुं, देशविशेषः। इति शब्दरत्नावली॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम्।

"श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः। तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः॥")

तैलचौरिका, स्त्री, (तैलस्य चौरिकेव। चौरवत् तैलपानादस्यास्तथात्वम्।) तैलपायिका। इति शब्दरत्नावली॥

तैलद्रोणी, स्त्री, (तैलपूर्णा द्रोणी।) कण्डपर्य्यन्तमञ्जनार्थतैलपूर्णकाष्ठादिनिर्म्मितपात्रविशेषः। तत्रावस्थितिगुणाः। वातरोगव्याकुलरोगपङ्गुवार्धिर्य्यमिन्निनगदृग्दधन्वङ्गस्तब्धपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्तकक्षयरुधिरभवस्रवक्षक्षुवस्तिरोगेषु शस्तत्वम्। इति राजवल्लभः॥

तैलपर्णकं, क्ली, (तैलं तैलयुक्तमिव पर्णमस्य। कप्।) ग्रन्थिपर्णवृक्षः। इति भावप्रकाशः॥

तैलपर्णिकं, क्ली, (तैलयुक्तं पर्णमस्यस्य। यद्वा, तिलपर्णो वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्येति। ठन्।) हरिचन्दनम्। इत्यमरः। २।६।१३१॥ चन्दनविशेषः। तत्तु तिलपर्णवृक्षजातं धवलं सुग्रीतलम्। इति भरतः॥ (अस्य पर्य्याया यथा,

"श्रीखण्डं चन्दनं न क्ली भद्रश्रीस्तैलपर्णिकः। गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ वृक्षविशेषे, पुं। यथा, हरिवंशे। २२३। ६८।

"कदम्बाश्चैव भव्याश्च दाड़िमा बीजपूरकाः। कालीयका दुकूलाश्च छिन्नवस्तैलपर्णिकाः॥")

तैलपर्णी, स्त्री, (तिलपर्णे वृक्षे जातः। "तत्र जातः।" ४।३।२५। इत्यण् ततो ङीप्।) चन्दनम्। श्रीवासः। (पर्य्यायोऽस्या यथा,—

"तैलपर्णी दधित्याख्यः पिण्याको रक्तगौर्यकः। वेरो रसाङ्गः श्रीवासः श्रीपिण्डसरलद्रवौ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) सिल्हकः। इति मेदिनी। ले, ६६॥

तैलपा, स्त्री, (तैलं पिबतीति। पा पाने+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) तैलपायिका। इति राजनिर्घण्टः॥

तैलपायिका, स्त्री, (तैलं पिबतीति। पा+खुल्। टापि अत इत्वम्।) कीटविशेषः। तैलापोका इति आरसुला इति च भाषा। तत्पर्य्यायः। पयोष्णी २। इत्यमरः। २।५।२६॥ तैलचौरिका ३। इति शब्दरत्नावली॥ तैलपा ४। इति राजनिर्घण्टः॥ तैलाम्बुका ५ खलाधारा ६। इति जटाधरः॥ (यथा, महाभारते। १३। १०४। १११।

"गृहे पारावता धन्याः शुकाश्च सहसारिकाः। गृहेष्वेते न पापाय तथा वै तैलपायिकाः॥")

तैलपिपीलिका, स्त्री, (तैलप्रिया पिपीलिका।) पिपीलिकाभेदः। तत्पर्य्यायः। उदवा २ कपिजाङ्घिका ३। इति राजनिर्घण्टः॥

तैलफलः, पुं, (तैलप्रधानं फलं यस्य।) इङ्गुदी। विभीतकः। इति राजनिर्घण्टः॥

तैलभाविनी, स्त्री, (तैलं भावयति सुगन्धं करोतीति। भू+णिच्+णिनि+ङीप्।) जातीपुष्पवृक्षः। इति राजनिर्घण्टः॥

तैलमाली, स्त्री, (तैलानां माला समूहो यत्र। ततो गौरादित्वात् ङीष्।) वर्त्तिः। इति शब्दमाला॥

तैलम्याता, स्त्री, (तिलपातोऽस्यां वर्त्तते। "घञः सास्यां क्रियेति घः।" ४।२।५८। इति णः। "म्लेनतिलस्य पाते ञे।" ६।३।७१। इति सुम्।) खधा। तिलपातोऽस्यां खधायां सा। इति लिङ्गादिसंग्रहे अमरभरतौ॥

तैलसाधनं, क्ली, (तैलं साधयति निष्पादयति सुगन्धीकरोतीति। साध+णिच्+ल्युः।) गन्धद्रव्यविशेषः। काकला इति भाषा। तत्पर्य्यायः। काकोलम् २ कोलकम् ३ गन्धव्याकुलम् ४ कक्कोलकम् ५ कोषफलम् ६। इति शब्दचन्द्रिका॥

तैलस्फटिकः, पुं, (तैलाक्तः स्फटिक इव। स्वच्छत्वात् तथात्वम्।) लवणभेदः। इति हेमचन्द्रः। ४। १३४॥

तैलागुरु, क्ली, (तैलाक्तमिव अगुरु।) दाहागुरु। इति राजनिर्घण्टः॥

तैलाटी, स्त्री, (तैलेन तैलप्रदानेन अटति दूरीभवतीति। अट गतौ+अच्+गौरादित्वात् ङीष्।) वरटा। इति हेमचन्द्रः। ४।२८१॥

तैलाम्बुका, स्त्री, (तैलं अम्बु जलमिव पेयं यस्याः। कप्। टाप् च।) तैलपायिका। इति जटाधरः॥

तैलिकः, पुं, (तैलं पण्यत्वेनास्त्यस्य। तैल+ठन्।) तैलकारः। इति व्याकरणम्॥ (अस्य व्यपाङ्क्तेयत्वमुक्तम्। यथा, मनुः। ३। १५८।

"समुद्रयायी वन्दी च तैलिकः कूटकारकः॥")

तैलिनी, स्त्री, (तैलं भक्ष्यत्वेन आश्रयत्वेन वा अस्त्यस्येति। तैल+इनि+ङीप्।) कीटभेदः। तत्पर्य्यायः। तैलकीटः २ षड्डिन्या ३ रट्टनाशिनी ४। इति राजनिर्घण्टः॥ दशावर्षिः। इति शब्दमाला॥

तैलिशाला, स्त्री, (तैलिनस्तिलसम्बन्धिनस्तैलकारस्य वा शाला गृहम्।) यन्त्रगृहम्। इति हेमचन्द्रः। ४। ६३॥ घाणिघर इति भाषा॥

तैली, [न्] पुं, (तैलं निष्पाद्यत्वेन पण्यत्वेन वास्त्यस्येति। तैल+इनिः।) तैलकारः। इति हेमचन्द्रः। ३। ५८१॥ तैलसम्बन्धिनि, त्रि॥

तैलीनं, क्ली, (तिलानां भवनं क्षेत्रम् । तिल+ "विभाषा तिलमाषेति ।" ५ । २ । ४ । इति पक्षे खञ् ।) तिलक्षेत्रम् । इत्यमरः ।२।४।७॥ (यथाच शब्दरत्नावल्याम् । "तिलोद्भवोचितं यत्तु तिलं तैलीनमित्यपि ॥") तैषः, पुं, (तैषी तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन्निति । तैषी+"सास्मिन् पौर्णमासीति।" ४ । २ । २१ । इत्यण् ।) पौषमासः । इत्यमरः । १ । ४ । १५ ॥ (तिष्यनक्षत्रसम्बन्धिनि, त्रि । "तैषमहः । तैषी रात्रिः ।" इति सिद्धान्तकौमुदी ॥) तैषी, स्त्री, (तिष्येण नक्षत्रेण युक्ता । "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४ । ३ । १ । इत्यण् । "तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् ।" इति यलोपः । ङीप् ।) पुष्यनक्षत्रयुक्ता पौर्णमासी । इति मुग्धबोधम् ॥ तोकं, क्ली, (तौति पूरयति गृहमिति । तु पूर्त्तौ + बाहुलकात् कः ।) अपत्यम् । पुत्रो दुहिता च । इत्यमरः । २ । ६ । २८ ॥ (यथा, ऋग्वेदे । १ । ६४ । १४ ।

"तोकं पुष्येम तनयं प्रुतं हिमाः ॥"

शिशुः । बालकः । यथा, भागवते । २ । ७ । २७ ।

"तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा प्रकटोऽपराद्धः ॥")

तोकं, क्ली, कर्णमलम् । इति हेमचन्द्रः ॥ मेघः । इत्यजयपालः ॥

तोक्मः, पुं, (तकन्ति हसन्ति आनन्दिता भवन्ति लोका अनेनेति । तक+बाहुलकात् मः ओत्वञ्च ।) हरिद्रयवः । अपक्वयवः । इत्यमरः । २ । ६ । १६ । ("यवास्तोक्माः भृष्टब्रीहयो लाजाः ।" इति वाजसनेयसंहितायां महीधरः । १६ । १ ॥ क्वचित् क्लीवलिङ्गोऽयम् । यथा, वाजसनेयसंहितायाम् । १६ । १३ ।

"दीक्षायै रूपश्रुत्यागि प्रायणीयस्य
तोक्मानि ॥")

पल्लवाद्यङ्कुरः । यथा,—

"पञ्चपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते ॥"

इति श्रीभागवते । १० । २२ । २५ ॥

"निर्यासः घनरसः तोक्माः पल्लवाद्यङ्कुराः ।"

इति तट्टीकायां श्रीधरस्वामी ॥

तोटकं, क्ली, द्वादशाक्षरपादच्छन्दः । इति छन्दोमञ्जरी ॥ (अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

तोड, ऋ नादरे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अतुतोडत् । नादरोऽनादरः । इति दुर्गादासः ॥

तोत्रं, क्ली, (तुद्यते ताड्यतेऽनेनेति । तुद+"हात्रीशस्युयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) गवादितोदनदण्डः । पाँचनी इति ख्यातः । तत्पर्य्यायः । प्राजनम् २ तोदनम् ३ गजस्य तोदनदण्डः । तत्पर्य्यायः । वैणुकम् २ । इत्यमरः । २ । ८ । ४१ ॥ वैणुकम् ३ । इति भरतः ॥ (यथा, रामायणे । २ । ४० । ४१ ।

"न हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः ।
मातुश्च सहितुं शक्तस्तोत्त्रनुन्न इव द्विपः ॥")

तोदः, पुं, (तुद व्यधे+भावे घञ् ।) व्यथा । इति रत्नमाला ॥ (यथा, भागवते । ३ । १८ । ६ ।

"तोदं स्वशिरगादम्बुमध्याद्-
ग्राहाहृतः सकरेणुर्यथेभः ॥"

तुदतीति । तुद+अच् । पीड़ादायके, त्रि । यथा, ऋग्वेदे । ४ । १६ । ११ ।

"यासि कुत्सेन सरथमवस्युर्ह्योदो वातस्य
हर्य्योरीशानः ॥"

"तोदस्तोदकः ।" इति सायनः ॥)

तोदनं, क्ली, (तुद्यतेऽनेनेति । तुद+करणे ल्युट् ।) तोत्त्रम् । इत्यमरः । २ । ६ । १२ ॥ (तुद+भावे ल्युट् ।) व्यथा । इति मेदिनी ॥ ने, ७३ ॥ (यथा, सुश्रुते । १ । २२ ।

"तोदनभेदनताड़नच्छेदनायमनमन्थनेत्यादि ॥"

दृश्यविशेषः । यथा, तत्रैव । १ । ४६ ।

"क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाम्रसन्तकाम्रकर्णफलगुपरूष्यकगार्ङ्गेरुकीपुष्करवर्त्तिबिल्वविम्बीप्रभृतीनि ॥")

तोमरः, पुं क्ली, (तुम्यति क्षिपतीति । तुम्य+बाहुलकात् अरप्रत्ययेन साधुः । इत्युज्ज्वलदत्तोक्तम् । ३ । १३१ ।) अस्त्रविशेषः । शावली इति भाषा । तत्पर्य्यायः । शल्यला २ । इत्यमरः । २ । ८ । ६३ ॥ (यथा, देवीभागवते । ५ । ५ । २६ ।

"गदाभिः पट्टिशैः शूलैश्चक्रैश्च शक्तितोमरैः ॥")

हस्तत्रेयसशस्त्यदण्डः । इति महाभारतटीका॥ रायवाँश इति भाषा ॥ (अस्य आकृत्यादिकसूत्रं वैशम्पायनेन तदृथा,—

"तोमरः काष्ठकायः स्यात् लौहशीर्षः
सपुच्छवान् ।
हस्तत्रयोन्नताङ्गश्च रक्तवर्णस्त्वचक्रगः ॥"

शार्ङ्गधरेण तु,—

"कणवत् शीर्षवेधः स्यात्तोमरस्त्वायसस्तथा ॥"

वैशम्पायनोक्तान्यस्य कार्य्याणि यथा,—

"उद्धानं विनियुक्तिश्च वेधनञ्चेति तत्त्रिकम् ।
बलगितं शस्त्रतत्त्वज्ञाः कथयन्ति नराधिपाः ॥"

अग्निपुराणोक्तधनुर्व्वेदमतेऽस्य कार्य्याणि यथा,

"दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम ! ।
ऋजुपक्षेषुणा पातं तोमरस्य प्रकीर्त्तितम् ॥"

जनपदविशेषः । यथा, मात्स्ये । १२० । ५७ ।

"तोमरान् शाययन्ती च हंसमार्गान्
समूहकान् ॥"

नवाक्षरछन्दोविशेषे, क्ली । शब्दार्थचिन्तामणिधृतं तल्लक्षणादिकं यथा,—

"प्रथमं सर्कं विनिधाय
जगणद्वयञ्च निधाय ।
कुरु तोमरं सुखकारि
कविराजवक्त्रविहारि ॥"

उदाहरणम्,—

"सखि ! माद्रके मधुमासि
व्रज सत्वरं किमिहासि ।
सहते न किं विहरामि
किमु पावकं प्रविशामि ॥")

तोमरधरः, पुं, (तोमरं धरतीति । धृ+अच् । यद्वा, तोमरस्य अस्त्रविशेषस्य धरः ।) अग्निः । इति शब्दार्थकल्पतरुः ॥

तोमरिका, स्त्री, (तोमर+संज्ञायां कन् । स्त्रीलिङ्गत्वात् टाप् अत इत्वञ्च ।) तुवरिका । इति शब्दरत्नावली ॥

तोयं, क्ली, ("तवतेर्वृद्धिकर्म्मणः+'अन्नादयश्च ।' उणां ४ । १०८ । इति यत्प्रत्ययो निपातितो द्रष्टव्यः । वर्द्धते वर्षासु । 'तुदति तोयम्' इति क्षीरस्वामी । तुदतेः पूर्ब्ववत् यत्प्रत्यये निपातनात् दकारलोपे गुणः । यद्वा, तुदिः सौत्र आवरणार्थः ।" इति निघण्टुनिर्ब्बचने देवराजयज्वा । १ । १२ । ६२ ।) जलम् । इत्यमरः । १ । १० । ४ ॥ (यथा, देवीभागवते । १ । ६ । २६ ।

"तया ततमिदं तोयं तदाधारश्च तिष्ठति ॥"

पूर्ब्बाषाढ़ानक्षत्रम् । जलदेवतत्वादस्य तथात्वम् ॥)

तोयकामः, पुं, (तोयं जलं कामयते इति । कम्+अण् ।) परिव्राजः । जलवेतसः । इति जटाधरः ॥ जलाभिलाषिणि, त्रि ॥

तोयकृच्छ्रं, क्ली, (तोयेन तोयमात्रपानेन यत् कृच्छ्रं व्रतम् ।) जलमात्रपानरूपव्रतविशेषः । इति मिताक्षरा ॥ (यथा, मार्कण्डेये ।

"मूलकृच्छ्रं स्मृतं मूलैस्तोयकृच्छ्रं जलेन तु ॥")

तोयडिम्भः, पुं, (तोयस्य जलस्य डिम्भ इव ।) घनोपलः । इति हारावली । ५८ ॥

तोयदः, पुं, (तोयं ददातीति । दा+कः ।) मेघः । (यथा, महानिर्ब्बाणतन्त्रे । ४ । ५३ ।

"यदा चौणी स्वल्पफला तोयदाः स्तोकवर्षिणः
असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलिः ॥")

मुस्तकम् । घृते, क्ली । इति मेदिनी । दे, ३० । जलदातरि त्रि ॥ (यथा, महाभारते शान्तिपर्ब्बणि ।

"तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन् मनुः ॥")

तोयधरः, पुं, (तोयं जलं धरतीति । धृ+अच् । तोयस्य धरो वा ।) मेघः । मुस्ता । सुनिषण्णकशाकः । इति मेदिनी । रे, २६५ ॥ (जलधारिणि, त्रि । यथा, रामायणे । २ । ६३ । १० ।

"सुवन्ति कुसुमान्येते नगाः पर्ब्बतसानुषु ।
नीला इवातपापाये तोयन्तोयधरा घनाः ॥")

तोयधिः, पुं, (तोयानि धीयन्तेऽत्र । धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ६३ । इति किः । आतो लोपः ।) समुद्रः । इति पुराणम् ॥ (यथा, सूर्य्यसिद्धान्ते भूगोलाध्याये । ३० ।

"समन्तात् मेरुमध्यात्तु तुल्यभागेषु तोयधेः ॥")

तोयधिप्रियं, क्ली, (प्रीणातीति। प्री+"इगुपधेति।" ३।१।१३५। इति कः। तोयधिः प्रियो यस्य।) लवङ्गम्। इति शब्दचन्द्रिका॥

तोयनिधिः, पुं, (तोयानि निधीयन्तेऽत्र। नि+धा+किः। तोयानां निधिर्वा।) समुद्रः। इति शब्दरत्नावली॥ (यथा, कुमारे। १। १।

"पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥")

तोयपिप्पली, स्त्री, (तोये जले पिप्पलीव।) काँचड़ा इति ख्यातजलजशाकभेदः। तत्पर्य्यायः। लाङ्गली २ शारदी ३ शाकुलादनी ४। इत्यमरः। २। ४। १११॥

तोयपुष्पी, स्त्री, (तोयेन बहुजलप्रदानेन पुष्पाणि यस्याः।) पाटलावृक्षः। इति शब्दमाला॥

तोयप्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्युः। तोयस्य प्रसादनम्। यस्य फलयोगेन जलस्य निर्म्मलत्वं भवतीति तथात्वम्।) कतकम्। इति भूरिप्रयोगः॥

तोयप्रसादनफलं, क्ली, (तोयप्रसादनस्य तोयप्रसादनाय वा फलम्।) कतकफलम्। इति रत्नमाला॥

तोयफला, स्त्री, (तोयप्रधानं फलं यस्याः।) इर्व्वारुः। इति राजनिर्घण्टः॥

तोयवल्ली, स्त्री, (तोये जलप्रधानस्थाने वल्ली लतासन्ततिर्यस्याः।) कारवेल्लः। इति रत्नमाला॥ उच्छे इति भाषा॥

तोयशुक्तिका, स्त्री, (तोयजाता शुक्तिका। शाकपार्थिवादित्वात् समासः।) जलशुक्तिः। इति राजनिर्घण्टः॥

तोयशूचकः, पुं, (तोयं जलवर्षणं सूचयति रवेरिति। सूच्+ण्वुल्।) भेकः। इति शब्दार्थकल्पतरुः॥

तोयाधिवासिनी, स्त्री, (तोयं जलप्रधानस्थलं अधिवसतीति। अधि+वस+णिनिः। यद्वा, तोयेन अधिवास इव संस्कारोऽस्यस्येति। इनिः।) पाटलावृक्षः। इति रत्नमाला॥ तोयादिवासिन्यपि पाठः॥ (पाटलाशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तोरणं, क्ली, (तोलयति उन्नमयति मस्तकमिति। तुल+ल्युः। लस्य रः।) कन्धरा। कण्ठी। इति हारावली। १७४॥

तोरणः, पुं क्ली, (तुरोर्त्ति त्वरया गच्छत्यनेनेति। तुर त्वरणे+करणे ल्युट्।) बहिर्द्वारम्। इत्यमरः। २। ३। १६॥ (यथा, कुमारे। ७। ३।

"भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे॥")

मूलद्वाराद्बाह्यद्वारम्। इति कौक्कटादयः॥ द्वारार्थे निखातस्तम्भयोरुपरिनिबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यल्लक्ष्यं तत् तोरणमिति बहवः॥ उपरिस्थगादियुक्तस्तम्भादिद्वयनिर्म्मितपुरादिबहिर्द्वारम्। इति साङ्गः॥ बन्धनमालेति ख्यातं इति कैश्चित्। इत्यमरटीकायां भरतः॥ (महादेवे, पुं। यथा, महाभारते। १३। १७। ११७।

"तोरणस्तारणो वातः परिधीपतिखेचरः॥")

तोलं, क्ली पुं, (तुल्यते परिमीयते इति। तुल+कर्म्मणि घञ्।) तोलकम्। यथा,—

"एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम्।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्॥"

इत्यागमः॥

तोलकं, क्ली पुं, (तोलमेव+स्वार्थे कन्।) ग्राह्यमानम्। इति शब्दमाला॥ अशीतिरक्तिपरिमाणम्। तत्तु षोड़शमाषकः यस्यावतिरक्तिपरिमाणञ्च। तोला इति भरि इति च भाषा। तत्पर्य्यायः। कोलम् २ द्रङ्क्षम् ३ वटकम् ४ कर्षार्द्धम् ५। इति वैद्यकपरिभाषा। कर्षम् ६। इति लीलावती॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे दृष्टव्यान्तके।

"रसं गन्धं तोलकञ्च जातीकोषफले तथा।"
"किराततिक्तकं बालं तोलकञ्च समाहरेत्॥")

तोषः, पुं, (तुष सन्तोषे+भावे घञ्।) तुष्टिः। इति धरणिः॥ (यथा,—

"देवञ्च परमं तोयं जगाम च सहोमया॥"

इति हरिवंशे। १७३। १३॥

स्वायम्भुवमन्वन्तरगततुषितानां देवानामन्यतमः। यथा, भागवते। ४। १। ७।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तौक्तिकः, पुं, धनूराशिः। इति दीपिका॥ (यथा, दीपिकायाम्।

"क्रियतावरिणित्तमकुलीरलेयप्राधेययूककौर्पाख्याः।
तौक्तिक आकोकेरो वृद्रोगच्छान्त्यभं चेत्यम्॥")

तौतातिकं, क्ली, (तुतातेन निर्वृत्तम्। तुतात+"तेन निर्वृत्तम्।" ५। १। ७८। इति ठक्।) तुतातभक्षितशास्त्रम्। यथा,—

"नैवाश्रावि गुरोर्म्मतं न विदितं तौतातिकं दर्शनम्।
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा॥"

इति प्रबोधचन्द्रोदयः। २। ३॥

तौतिकं, क्ली, सूक्ता। इति राजनिर्घण्टः॥

तौतिकः, पुं, शुक्तिः। इति राजनिर्घण्टः॥

तौर्य्यं, क्ली, (तूर्य्ये सूरणादौ भवम्। तूर्य्य+अण्।) तूर्य्ये सूरणादौ भवं शब्दरूपम्। इत्यमरटीकायां भरतः॥

तौर्य्यत्रिकं, क्ली, (त्रयोऽवयवा यस्य तत्। त्रि+"संख्याया अतिशदन्तायाः कन्।" ५।२।४२। इति कन्। तौर्य्योपलक्षितं त्रिकम्।) नृत्यगीतवाद्यमिदं समुदितं त्रयं नाट्यञ्च। इत्यमरः। १। ७। १०॥ नटसम्बन्धि नृत्यगीतवाद्यमिति त्रयम्। इति तट्टीकासारसुन्दरी॥ (यथा, मनुः। ७। ४७।

"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")

विष्णुधर्म्मे गीतवाद्यनृत्यफलं यथा,—

"गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः।
तेषां यद्यत् फलं भूमे! शृणुष्व गदतो मम॥
यावन्ति चाक्षराण्येव गीयमाने यशस्विनि!।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः।
नित्यं पश्यति वै वक्त्रमविं देवं न संशयः॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः॥
इन्द्रलोकात् परिभ्रष्टो मम गीतपरायणः।
प्रसक्तः सर्व्वसंसारान्मम लोकाय गच्छति॥
यस्तु गायति सुश्रोणि! कौसुदाश्चैव द्वादशीम्।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति॥
यस्तु गायति गीतानि मम जागरणे सदा।
सर्व्वसङ्गात् प्रमुक्तो वै मम लोकाय गच्छति॥
एतत्ते कथितं देवि! गायनस्य फलं महत्।
यस्य गीतस्य शब्देन तरेत् संसारसागरम्॥*॥
वादित्रस्य प्रवक्ष्यामि तत् शृणुष्व वसुन्धरे!।
प्राप्नवान्मनुजो येन देवेभ्यः समतां स्वयम्॥
सम्यक्कालप्रयोगेण सन्निपातेन वा पुनः।
नववर्षसहस्राणि नववर्षशतानि च॥
कुबेरभवनं गत्वा मोदते वै यदृच्छया।
कुबेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः॥
शून्यादितालसम्यातैर्मम लोकाय गच्छति॥*॥
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे!।
मनुजो येन गच्छन्ति क्षित्वा संसारसागरम्॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः॥
फलं प्राप्नोति सुश्रोणि! मम कर्म्मपरायणः।
रूपवान् गुणवान् शूरः शीलवान् सुपथे स्थितः॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः॥*॥
यस्तु जागरतो नित्यं गीतवाद्येन गर्ज्जकः।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते॥
सर्व्वकर्म्मसमायुक्तो रचिता वै महीपतिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः॥"

इति वराहपुराणम्॥

तौलं, क्ली, (तुला एव। स्वार्थे अण्। स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेरस्य क्लीबत्वम्।) तुला। तुलाराशौ, पुं। तौली। इति ज्योतिषम्॥

तौलिकः, पुं, (तुल्या तुलिकया जीवतीति। तुलि+ठक्।) चित्रकारः। इति शब्दमाला॥ (तुलानिर्वृत्ते, त्रि। यथा, सुश्रुते चिकित्सितस्थाने १२ अध्याये।

"शतं शतं तुलायान्तु सहस्रं दशतौलिके॥")

तौलिकिकः, पुं, (तुलिकया जीवतीति। तुलिका+ठक्।) चित्रकारः। तत्पर्य्यायः। रङ्गाजीवः २ चित्रज्ञः ३। इति हेमचन्द्रः। ३। ५०५॥ तौलिकः ४। इति शब्दमाला॥

तौषारं, क्ली, (तुषारस्येदम्। तुषार+"तस्येदम्।"४।३।१२०। इत्यण्।) तुषारजलम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १।४५। "धारं कारं तौषारं हैममिति॥")

त्यक्त, त्रि, (त्यज्यते स्मेति। त्यज त्यागे+क्तः।) कृतत्यागम्। तत्पर्य्यायः। हीनम् २ विधुतम् ३ सनुज्झितम् ४ धूतम् ५ उत्सृष्टम् ६। इत्यमरः। ३।१।१०७॥ विनाकृतम् ७ विरहितम् ८ निर्व्यूढम् ९। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २।३७।२। "त्यक्तभोगस्य मे राजन्! वने वन्येन जीवतः। किं कार्य्यमनुयात्रेण त्यक्तसङ्गस्य सर्व्वतः॥")

त्यज, औ हानौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अत्याक्षीत्। हानिर्वर्ज्जनम्। त्यजति दुष्टलोकं जनः। इति दुर्गादासः॥

त्यजन, क्ली, (त्यज+भावे ल्युट्।) त्यागः। वर्ज्जनम्॥

त्यत्, [द्] त्रि, (त्यजति संसर्गमिति। त्यज्+"त्यजितनियजिभ्यो डित्।" उणां १।१३१। इति अदिः स च डित्।) तत्। सेइ इति भाषा। अस्य पुंलिङ्गस्त्रीलिङ्गयो रूपं स्यः स्या। सर्व्वनामशब्दोऽयम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे। १।६३।४। "त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन् वृषकर्म्मन्नृभूः॥")

त्यत्, [द्] क्ली, (त्यज्+"त्यजितनीति।" उणां १।१३१। इति अदिः स च डित्।) वायुः। आकाशः। यथा,—

"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति भागवते। १०।२।२६॥

"सत्यव्रतमिति। सत्यं व्रतं सङ्कल्पो यस्य तम्। सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्व्वं प्रलयानन्तरं स्थितिसमये च सत्यं व्यभिचारेण वर्त्तमानम्। तदेवाहुः सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि तच्छब्देन वायाकाशौ एवं सच्च तच्च सत्ये भूतपञ्चकम्। 'तत् सत्यमित्याचक्षते।' इति श्रुतेः। तस्य योनिं कारणम्। अनेन सृष्टेः पूर्व्वं वर्त्तमानतोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितम्। अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽप्यनश्यमाणरूपम्। अनेन प्रलयेऽप्यविनाशित्वे न सत्यत्वं दर्शितम्। एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रं ऋतं सृष्टा वाक्यो सत्यं समदर्शनम्। तथा भयवता वाक्यास्य मानत्वात्। सत्यञ्च समदर्शनम्। ऋतञ्च सृष्टा वाणी कविभिः परिकीर्त्तिता इति। तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्ना इत्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥

त्याग, पुं, (त्यज्+घञ्।) दानम्। इत्यमरः। २।७।२६॥ (यथा, रघुः। १।७। "त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्॥") वर्ज्जनम्। इति मेदिनी। गे, ८॥ (यथा, मनुः। ८।३८९। "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति॥") विवेकिपुरुषः। इति शब्दरत्नावली॥ सर्व्वकर्म्मफलविसर्ज्जनम्। यथा,—

"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥
त्याज्यं दोषवदित्येके कर्म्म प्राहुर्म्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञो दानं तपः कर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि च कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्জ্জুन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
इति श्रीभगवद्गीतायाम्। १८। २-९॥

(त्रि, दाता। यथा, ऋग्वेदे। ४।२४।३। "मिथो यत्त्यागसुभयासो अग्मन् नरः स्तोकस्य तनयस्य सातौ॥" "उभयास उभये यजमानाः स्तोतारश्च त्यागं त्यागकर्त्तारं दातारमिन्द्रं अग्मन् उपगच्छन्ति॥" इति सायनः॥)

त्यागिम, त्रि, (त्यागेन निर्व्वृत्तः। भावप्रत्ययत्वादिमप्।) त्यक्तः। त्यागेन निष्पन्नः। इति व्याकरणम्॥

त्यागी, [न्] त्रि, (त्यजतीति। त्यज्+"सम्यृचानुरुधाङ्यमेति।" ३।२।१४२। इति घिनुण्।) दाता। (यथा, पञ्चतन्त्रे। ३।२५६। "त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी भवति॥") शूरः। इति मेदिनी। नि, ७१॥ वर्ज्जनशीलः। यथा,—

"यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति भगवद्गीता। १८।११।

कर्म्मफलत्यागवान्। यथा,—

"न द्वेष्ट्यकुशलं कर्म्म कुशलेनानुषज्यते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥
न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति श्रीभगवद्गीतायां १८।१०-११।

त्याज्य, त्रि, (त्यज्यते इति। त्यज+कर्म्मणि ण्यत्। "त्यजेश्च।" इति ७।३।६६। इत्यस्य वार्त्तिकोक्त्या न कुत्वम्।) त्यागयोग्यः। वर्ज्जनीयः। यथा, प्रायश्चित्ततत्त्वे।

"तीरे प्रतिग्रहस्याज्यस्याज्यो धर्म्मस्य विक्रयः॥"
(यथा च देवीभागवते। १।११।५६।
"तारामप्यगुरक्तां च यथा न तु तथा गुरौ।
अगुरक्ता कथं त्याज्या धर्म्मतो न्यायतस्तथा॥")

त्रक, इ ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) दन्त्यवर्गादिः। इ, त्रङ्क्ते। ङ, त्रङ्के। इति दुर्गादासः॥

त्रग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, त्रङ्ग्ते। इति दुर्गादासः॥

त्रङ्ग, पुं क्ली, (त्रङ्गति ग्रोभादिकं गच्छतीति। त्रङ्ग+अच्।) पुरविशेषः। इति त्रिकाण्डशेषः॥

त्रद, इ चेष्टे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दन्त्यवर्गादादिः। इ, त्रन्दते तत्रन्द। इति दुर्गादासः॥

त्रप, ऊ ष मि ङ ह्रियि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, अत्रपिष्ट अत्रप्त। ष, त्रपा। मि, त्रपयति त्रापयति। ङ, त्रपते। ह्रियि लज्जायाम्। इति दुर्गादासः॥

त्रपा, स्त्री पुं, (त्रप्यते इति। त्रप+"घिद्विदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। ततष्टाप्।) लज्जा। इत्यमरः। १।७।२३॥ (यथा, रत्नावल्याम्।

"नीचं वर्षवरेमनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः॥")

त्रप्यते अनया अस्याः वा। करणे अपादाने वा अङ्।) कुलटा। इति मेदिनी। पे, ७॥ कुलम्। कीर्त्तिः। इति शब्दरत्नावली॥

त्रपाक, पुं, (त्रप्यते लज्जते इति। त्रप+"आकः खजादेः।" १।२१६। इति उणादिकोषटीकाधृतसूत्रात् आकः।) स्वेच्छविशेषः। इत्युणादिकोषः॥

त्रपारज्जा, स्त्री, (त्रपायां रज्जुरिव। लज्जाहीनत्वादेव तथात्वम्।) वेश्या। इति जटाधरः॥

त्रपिष्ठ, त्रि, (अयमेषामतिशयेन तृप्रः। तृप्र+"अतिशायने तमबिष्ठनौ।" ५।३।५५। इति इष्ठन्। "प्रियस्थिरेति।" ६।४।१५७। इति तृप्रस्य त्रप्-आदेशः।) अतिलज्जितः। इति मुग्धबोधम्॥

त्रपीयान्, [स्] त्रि, (अयमनयोरतिशयेन तृप्रः। तृप्र+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति तृप्रस्य त्रबादेशः।) त्रपिष्ठः। इति व्याकरणम्॥

त्रपु, क्ली, (त्रपते अग्निसंयोगेन लज्जते इव। त्रप + "गृस्वस्निहित्रपीति।" उणां। १।११। इति उ:।) सीसकम्। रङ्गम्। इति मेदिनी। पे, ६॥ (यथा, पद्मतन्त्रे। १।८५।

"कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चाप्युपशोभते
भवति योजयितुर्वचनीयता॥")

त्रपुः, [स्] क्ली, (त्रपते वह्निं प्राप्य लज्जते इव। त्रप + "उस् स्यात्तपादेः स तु कित्।" १।४६०। इति उणादिकोषटीकाधृतसूत्रात् उस्।) रङ्गम्। इत्युणादिकोषः॥ (यथा, भावप्रकाशे।

"भौमे त्रपुः शुनौ लौहं राहावभ्रानि कीर्त्तयेत्॥"

रङ्गशब्देऽस्य विवरणं ज्ञातव्यम्॥)

त्रपुकर्कटी, स्त्री, (त्रपुवत् शुभ्रा कर्कटी।) त्रपुषी। इति राजनिर्घण्टः॥

त्रपुटी, स्त्री, सूच्यौला। इति रत्नमाला॥

त्रपुसं, क्ली, (त्रपते वह्निसंसर्गेण लज्जते इव। त्रप + बाहुलकात् उसच्।) रङ्गम्। इति भरतधृतद्विरूपकोषः॥

त्रपुषं, क्ली, (त्रप + बाहुलकादुषः।) रङ्गम्। इति भरतधृतद्विरूपकोषः॥ त्रपुषीफलम्। घ्रसा इति भाषा। तत्पर्य्यायः। कण्टकिफलम् २ सुधावासम् ३ सुशीतलम् ४। तल्लघुफलगुणाः। नीलत्वम्। बलतृड्भ्रमदाहपित्तरक्तपित्तनाशित्वम्। स्वादुत्वम्। शीतत्वञ्च। तत्पक्वफलगुणाः। अम्लत्वम्। उष्णत्वम्। पित्तलत्वम्। कफवातनाशित्वञ्च। तद्वृहत्फलगुणाः। मूत्रलत्वम्। शीतलत्वम्। रूक्षत्वम्। पित्तासृक्छूलनाशित्वञ्च। इति भावप्रकाशः॥ अस्य सामान्यगुणाः। स्वादुत्वम्। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वम्। सुखप्रियत्वम्। रूक्षत्वम्। अतिमूत्रलत्वञ्च। इति राजवल्लभः॥

त्रपुषी, स्त्री, (त्रपुष + गौरादित्वात् ङीष्।) कर्कटी। इति हेमचन्द्रः। ४। २५५॥ (यथा,

"पटोलकैर्बारुत्रपुष्यलाबूः॥"

इति हारीते प्रथमेस्थाने दशमेऽध्याये॥)

दन्त्यसान्तोऽपि पाठः॥

त्रपुसं, क्ली, (त्रपते वह्नियोगेन लज्जते इव। त्रप + बाहुलकात् उसः।) रङ्गम्। इति राजनिर्घण्टः॥ कर्कटी। अस्य गुणा यथा,—

"बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतम्।
तत् पाण्डुकफक्लेदोर्णमस्रं वातकफापहम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

त्रपुसी, स्त्री, (त्रपुस + गौरादित्वात् ङीष्।) महेन्द्रवारुणी। कर्कटी। लताविशेषः। घ्रसा इति क्षीरा इति च भाषा। तत्पर्य्यायः। पीतपुष्पा २ काण्डालुः ३ त्रपुकर्कटी ४ बहुफला ५ कोषफला ६ तुन्दिलफला ७ कण्टकीलता ८ सुधावासा ९। अस्याः फलस्य गुणाः। रुच्यत्वम्। मधुरत्वम्। शिशिरत्वम्। गुरुत्वम्। भ्रमपित्तविदाहार्शिवान्तिनाशित्वम्। बहुमूत्रत्वञ्च। काण्डालुरित्यत्र कण्टालुरपि पाठः। इति राजनिर्घण्टः॥ (अस्या व्यवहारो यथा, सुश्रुते उत्तरतन्त्रे ४५ अध्याये।

"त्रपुसीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना।
पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा॥")

त्रभ्रं, क्ली, (ब्रश्चं निपातनात् दस्य तः।) ब्रश्चम्। घनेतरदधि। इत्यमरटीकायां भरतधृतविद्याविनोदः॥ पातला दइ इति भाषा॥

त्रयं, क्ली, (त्रयोऽवयवा यस्य। त्रि + "संख्याया अवयवे तयप्।" ५।२।४२। इति तयप्। "द्वित्रिभ्यां तयस्यायच्वा।" ५।२।४३। इति तयस्यायच्।) त्रयावयवम्। इति सुग्धबोधम्॥ तिन इति भाषा॥ (यथा, मनुः। २।७६।

"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः।
वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च॥")

त्रय:, पुं, (तरतीति। तॄ + "तरतेड्डिः।" उणां ५।६६। इति ड्डिः।) त्रिसंख्या। तिन इति भाषा। त्रिशब्दस्य बहुवचनान्तरूपोऽयम्। अस्य स्त्रीलिङ्गक्लीवलिङ्गयो रूपे तिस्रः तीणि। इति व्याकरणम्॥ तद्वाचकानि यथा,—

काल: १ अग्नि: २ भुवनम् ३ गङ्गामार्गः ४ शिवचक्षुः ५ गुणः ६ यौवारेखा ७ कालिदासकाव्यम् ८ बलिः ९ सन्ध्या १० पुरम् ११ पुष्करम् १२ रामः १३ विष्णुः १४ ज्वरपादः १५। इति कविकल्पलता॥ त्रिसंख्याविशिष्टे, त्रि। इत्यमरः॥

"तिस्रोभार्य्या त्रिशालाश्च त्रयो भृत्याश्च बान्धवाः।
ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

त्रयी, स्त्री, (त्रय + "टिड्ढेति।" ४।१।१५। इति ङीप्।) ऋक्सामयजुर्भेदा एतत्त्रितयम्। इत्यमरः। १।६।३॥ (यथा, मनुः। ७।४३॥

"त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भाञ्च लोकतः॥")

पुरन्ध्री। सुमतिः। इति विश्वः॥ सोमराजीवृक्षः। इति शब्दचन्द्रिका॥ दुर्गा। यथा,—

"ऋग्यजुःसामभागेन साङ्गवेदगतापि वा।
त्रयीति पठ्यते लोके दृष्टादृष्टार्थसाधिनी॥"

इति देवीपुराणे ४५ अध्यायः॥

त्रयीतनुः, पुं, (त्रयी वेदा एव तनुः शरीरं यस्य। "त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते।" इति भागवतवाक्यात्। ५।२०।४। अस्य तथात्वम्।) सूर्य्यः। इति हलायुधः॥

त्रयीधर्म्मः, पुं, (त्रय्या वेदत्रयेण विहितो धर्म्मः।) ऋग्यजुःसाम्नां विधानम्। त्रिवेदोक्तकर्म्म। इत्यमरः। १।६।३॥ (यथा, महाभारते। ३।१५०।३२।

"सा चेद्धर्म्मैकता न स्यात्त्रयीधर्म्मेषु भारत॥")

त्रयीमुखः, पुं, (त्रयी वेदा मुखे यस्य।) ब्राह्मणः। इति हेमचन्द्रः। ३।४।७५॥

त्रयोदश, [न्] त्रि, (त्र्यधिका दश इति कर्म्मधारयः। "त्रेरुक्।" ६।३।४८। इति त्रयस्।) संख्याविशेषः। १३ तेर इति भाषा। बहुवचनान्तोऽयम्। (यथा, मनुः। ६।१२६।

"दर्शो स दश्च धर्म्माय कश्यपाय त्रयोदश॥")

तत्संख्यायुक्तश्च। इत्यमरः॥ तद्वाचकः। ताम्बूलगुणः १। इति कविकल्पलता॥

त्रयोदश:, त्रि, (त्रयोदशानां पूरणः। "तस्य पूरणे डट्।" ५।२।४८। इति डट्।) त्रयोदशानां पूरणः। इति व्याकरणम्॥ तेरह इत्यादि भाषा। (यथा, रामायणे।२।७७।२२।

"त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते विभो!।
सायंप्रेषास्त्रिनिचये किमिह त्वं विलम्बसे॥")

त्रयोदशी, स्त्री, (त्रयोदश + टित्त्वात् ङीप्।) तिथिविशेषः। सा चन्द्रस्य त्रयोदशकलाक्रियारूपा त्रयोदशकलाक्रियावच्छिन्नकालरूपा वा। इति तिथ्यादितत्त्वम्॥ तत्र जातस्य फलं यथा,

"रूपान्वितः सात्त्विकभावहीनः
सुखी च बाल्ये जननीप्रियश्च।
सदालसः शिल्पगुणैकवेत्ता
त्रयोदशी जन्मतिथिर्यदि स्यात्॥"

इति कोष्ठीप्रदीपः॥

इयं धर्म्मस्य तिथिः। इति वराहपुराणम्॥

त्रस, क्वथौ। अदे। निषेधे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) एतदाद्याश्चत्वारो रेफयुक्ताद्याः। क, त्रासयति स्वगं बाधः वधति गृह्णाति निराकरोति वा इत्यर्थः। इति दुर्गादासः॥

त्रस, इ किं भाषि। इति कविकल्पद्रुमः॥ (चुरां-पक्षे णां-परं-अकं-सेट्।) इ, त्रंसयते। कि, त्रंसयति त्रंसति। भाषि दीप्तौ। इति दुर्गादासः॥

त्रस, ईं ण भये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। ईदित्वात् अनिड्निष्ठः।) ईं, त्रस्तः। ण, त्रेसतुः तत्रसतुः। त्रसति। इति दुर्गादासः॥

त्रस, य ईं भये। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्। ईदित्वादनिड्निष्ठः।) य, त्रस्यति। ईं, त्रस्तः। इति दुर्गादासः॥

त्रसं, क्ली, (त्रस्यति भिनत्त्यस्मिन् इति। त्रस भये + घञर्थे कः।) वनम्। इति त्रिकाण्डशेषः॥

त्रसः, त्रि, (त्रसतीति। त्रस भये + पचाद्यच्।) जङ्गमः। इत्यमरः। ३।१।७४॥ (यथा, महाभारते। १२।६।१६।

"ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्ज्जकः॥")

त्रसरः, पुं, (त्रसन्ति धातूनामनेकार्थत्वात् सूत्राणि वेष्टयन्त्यनेनेति। त्रस + बाहुलकात् अरन्।) तन्त्रवायोपकरणविशेषः। तासनी इति भाषा। तत्पर्य्यायः। सूत्रवेष्टनम् २। इत्यमरः।३।२।२४॥ तसरः ३। इति भरतः॥

त्रसरेणुः, स्त्री, सूर्य्यभार्य्याविशेषः। इति त्रिकाण्डशेषः॥

त्रसरेणुः, पुं, (त्रसत्यचलत्वात् भीत इव रेणुः।) त्रिंशत्परमाणुपरिमाणम्। स गवाक्षान्तर्गते सूर्य्यकिरणे दृश्यते। तत्पर्य्यायः। ध्वंसी २। यथा, वैद्यकपरिभाषायाम्।

"ज्ञालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते।
त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः॥"

(ह्रस्वकत्रयात्मकरेणुः। यथा, ब्रह्मवैवर्त्ते।

"परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः॥"

तथाच मनुः। ८। १३२।

"जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥")

त्रसुरः, पुं, (त्रसतीति। त्रस भये+उरच्।) भीरुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

त्रस्तः, त्रि, (त्रस भये+क्तः।) भीतः। इति जटाधरः॥ (यथा, देवीभागवते।१।५।२६।

"प्रत्यक्षायां विमुक्तायां मुक्ता कोटिस्तथोत्तरा।
शब्दः समभवद्घोरस्तेन त्रस्ताः सुरासुराः॥")

शीघ्रे, क्ली। यथा,—

"सविरामं वितालञ्च एकं शून्यत्रयापरे।
शीघ्रे त्रस्तं वितालञ्च देवसार इतीर्य्यते॥"

इति सङ्गीतदामोदरः॥

त्रस्नुः, त्रि, (त्रस्यतीति। त्रस भये+"त्रसिगृधिधृषिक्षिपेः क्नुः।" ३। २। १४०। इति क्नुः।) त्रासशीलः। इत्यमरः। ३। १। २६॥ (यथा, भट्टिः। ६। ७।

"सीतां सौमित्रिणा त्यक्तां सप्रीचीं त्रस्नुमेकिकाम्।
विज्ञायामंस्त काकुत्स्थः त्रये क्षेमं सुदुर्लभम्॥")

त्रा, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां आत्मं-सकं-अनिट्।) त्रै ङ पालन इत्यत्र केचिददादौ वा पठन्ति। इति क्रमदीश्वरः॥ इति कविकल्पद्रुमटीकायां दुर्गादासः॥

त्राणं, क्ली, (त्रै+भावे ल्युट् क्लो वा। त्रुदविदेति पक्षे नत्वम्।) रक्षणम्। (यथा, भागवते १ स्कन्धे।

"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥"

त्रायते इति कर्त्तरि ल्युः। रक्षिता। यथा, महाभारते। १। २३। १८।

"त्वं प्रभास्त्वमभिप्रेतं त्वं यज्ञाङ्गमनुत्तमम्॥"

तथाच रघौ। १५। ३।

"अवेक्ष्य रामं ते तस्मिन् न प्रजहुः स्वतेजसा।
त्राणाभावे हि शापास्त्राः कुञ्जन्ति तपसो व्ययम्॥"

त्रायतेऽनेनेति करणे ल्युट्। कवचम्। अस्त्रम्। यथा महाभारते। ३। १६८। १४।

"दंशिता विविधैस्त्राणैर्विचित्रायुधपाणयः॥")

त्रायमाणलता। रक्षिते, त्रि। इति मेदिनी। णे, १४॥

त्राणा, स्त्री, (त्रायते पालयतीति। त्रै+ल्युः। टाप्।) त्रायमाणा। इति राजनिर्घण्टः॥

त्रातं, त्रि, (त्रै+क्तः। त्रुदविदेति नत्वाभावः।) रक्षितम्। इत्यमरः। ३। १। १०६॥ (यथा, मार्कण्डेये। ८४। २२।

"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवन्नमस्ते॥"

भावे क्तः।) रक्षणे, क्ली॥

त्रापुषं, त्रि, (त्रपुषेण निर्वृत्तम्। त्रपुष+"तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) त्रपुषनिर्म्मितम्। इति व्याकरणम्॥ (त्रपुणो विकारः। "त्रपुजतुनोः षुक्।" ४। ३। १३८। इत्यण् षुगागमश्च। रङ्गस्य विकारः। इति सिद्धान्तकौमुदी॥)

त्रायन्ती, स्त्री, (त्रै+सम्पदादित्वात् क्विप्। त्रां त्राणं अयतीति। इ गतौ+शतृ। यद्वा, त्रै ङ पालने+क्वचित् आत्मनेपदी धातुरूपि परस्मैपदमिच्छतीति व्याघात् शतृ। "उगितश्च।" इति ङीप्।) त्रायमाणा लता। इत्यमरः। २। ४। १५०॥ (यथा,—

"त्रायन्ती तु वरा तिक्ता सरा पित्तकफापहा।
ज्वरकुष्ठोगगुल्मार्शोभ्रमशूलविषप्रणुत्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) त्राणकर्त्री च॥

त्रायमाणं, त्रि, (त्रायते इति। त्रै+कर्म्मणि शानच्।) रक्ष्यमाणम्। इति व्याकरणम्॥ (यथा, अथर्ब्ववेदे। ६। ४। १।

"त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः॥")

त्रायमाणा, स्त्री, (त्रायते इति। त्रै+शानच्।) वला इति बहुला इति च ख्याता। तत्पर्य्यायः। वार्षिकम् २ त्रायन्ती ३ वलभद्रिका ४। इत्यमरः। २। ४। १०५॥ क्षतत्रा ५ त्रायमाणिका ६ वलभद्रा ७ सुकामा ८ वार्षिकी ९ गिरिजा १० अतुला ११ माङ्गल्याङ्गी १२ देववला १३ पालिनी १४ भयनाशिनी १५ अवली १६ रक्षणी १७ त्राणा १८। इति राजनिर्घण्टः॥ सुभद्राखी १९ भद्रनामिका २०। इति रत्नमाला॥ अस्य गुणाः। शीतत्वम्। मधुरत्वम्। गुल्मज्वरकफासृग्भ्रमतृष्णात्रयस्रानिविषच्छर्द्दिविनाशित्वञ्च। इति राजनिर्घण्टः॥ पित्तनाशित्वम्। इति राजवल्लभः॥ (यथा,—

"पटोलं पित्तुमर्द्दञ्च दार्व्वीं कटुकरोहिणीम्।
षड्ग्रहाञ्च त्रायमाणाञ्च दद्याद्दोषेषु ग्रान्तये॥"

इति चरके चिकित्सास्थाने एकादशेऽध्याये॥)

त्रासः, पुं, (त्रस+भावे घञ्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा आर्य्यासप्तशत्याम्। ३७६।

"प्रलयचलितोऽपि सकपटकोपकटाक्षैर्भया-
दितस्तम्भः।
त्रासतरलो गृहीतः सहासरभसं प्रियः कण्ठे॥")

मणेर्दोषः। इति मेदिनी। से, ४॥

त्रासदायी, [न्] त्रि, (त्रासं भयं ददातीति। दा+णिनिः।) भयदाता। तत्पर्य्यायः। शङ्कुरः २। इति हेमचन्द्रः। ३। १४३॥

त्रिंशः, त्रि, (त्रिंशत्+"तस्य पूरणे डट्।" ५। २। ४८। इति डट्।) त्रिंशत्पूरणः। इति व्याकरणम्॥ (यथा, तिथ्यादितत्त्वे।

"त्रिंशांशकक्रमेणा राशेर्भाग इत्यभिधीयते॥")

त्रिंशकः, त्रि, त्रिंशत्समूहः। समूहार्थे डकप्रत्ययः। इति सुपद्मव्याकरणम्॥ (त्रिंशता क्रीतः। त्रिंशत्+"विंशतित्रिंशद्भ्यां ड्वुन्संज्ञायाम्।" ५। १। २४। इति असंज्ञायां ड्वुन्। त्रिंशत्संख्याकद्रव्येण क्रीतः। इति सिद्धान्तकौमुदी॥)

त्रिंशत्, स्त्री, (त्रयोदशतः परिमाणमस्य। "षड्भ्यो लुक्। त्रिंशदिति।" ५। १। ५६। इति निपातनात् साधुः।) संख्याविशेषः। त्रिंश इति भाषा। एकवचनान्तोऽयम्। त्रिंशद्वये त्रिंशतौ। त्रिंशतो बहुत्वे त्रिंशतः। इति व्याकरणम्॥ (यथा, मनुः। १। २२।

"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः।
त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः॥")

त्रिंशत्पत्रं, क्ली, (त्रिंशत्संख्यकानि पत्राणि दलानि यस्य।) कुसुदम्। इति शब्दमाला॥

त्रिकं, क्ली, (त्रयाणां समूहः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु।" ५। १। ५८। इति कन्।) पृष्ठवंशाधारः। इत्यमरः। २। ६। ७६॥ (यथा, माघे। १२। १०।

"नम्रा ग्रहीतोऽपि ध्रुवन्विषाण्यो-
र्युगं सकृत्कारविवर्त्तितत्रिकः॥")

त्रयम्। इति मेदिनी। के, २६॥ (यथा, मनुः। ७। ५१।

"दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा॥")

त्रिपथसंस्थानम्। इति हेमचन्द्रः। ४। ५२॥

त्रिफला। त्रिकटु। त्रिमदः। यथा, सुखबोधे। गुडूचीसारसंयुक्तात्त्रिकत्रयसमन्वयात्।

वातरक्तं निहन्त्याशु सर्व्वरोगहरत्रयः॥"

(तृतीयेन रूपेण ग्रहणं यस्य। तृतीय+"तावतियं ग्रहणमिति वुञ्वा।" ५। २। ७७। इति कन् पूरणप्रत्ययस्य च लुक्। तृतीयके, त्रि। यथा, मनुः। ८। १४२।

"द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम्।
मासस्य दृष्टिं गृह्णीयात् वर्णानामनुपूर्व्वशः॥")

त्रिककुत्, [द्] पुं, (त्रीणि ककुत्-सदृशानि ध्वजतुल्यानि शृङ्गाणि यस्य।) त्रिकूटपर्व्वतः। इत्यमरः। २। ३। २॥ (यथा, शतपथब्राह्मणे। ३। १। ३। १२। "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदस्यासीत्तं गिरिं त्रिककुदमकरोत्।" विष्णोर्नामविशेषः। यथा, महाभारते। १२। ३४२। ६०।

"तथैवासं त्रिककुदो वाराहं रूपमास्थितः।
त्रिककुत्त्वेन विख्यातः शरीरस्य प्रमाणतः॥"

दृग्राजसाध्ययज्ञविशेषः। यथा, तैत्तिरीय-संहितायाम्। ७। २। ५। २।
"त्रिककुद्वा एष यज्ञो यद्दृग्राजः ककुत्पञ्च-दृग्राः ककुदेकविंशः कुकुत्त्रयस्त्रिंशो य एवं विद्वान् दृग्राजेन यजते त्रिककुदेव समागानां भवति॥")

त्रिकटः, पुं, (त्रीन् वातपित्तश्लेष्मदोषान् कटति नाशयतीति। कट+अच्।) गोक्षुरकः। इति शब्दरत्नावली॥

त्रिकटु, क्ली, (त्रयाणां कटूनां शुण्ठीमरीचपिप्प-लीनां समाहारः।) मिश्रितशुण्ठीमरीचपिप्पल्यः। तत्पर्य्यायः। चुत्रयम् २ ओषम् ३। इत्यमरः। २। १०। १११॥ कटुत्रयम् ४ कटुत्रिकम् ५। अस्य गुणाः। दीपनत्वम्। श्वासकासत्वगामय-गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसनाशित्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"विश्वौषकुल्या मरिचं त्रयं त्रिकटु कथ्यते।
कटुत्रयन्तु त्रिकटु चुत्रयं ओषमुच्यते॥
चुत्रयं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान्॥"
इति भावप्रकाशः॥

त्रिकण्टं, क्ली, (त्रयाणां कण्टानां दृष्टत्यब्दिदमनी-दुस्पर्शारूपाणां समाहारः।) मिलितदृष्टत्यब्दि-दमनीदुस्पर्शात्रयरूपम्। तत्पर्य्यायः। कण्ट-कारीत्रयम् २ कण्टकत्रयम् ३। इति राज-निर्घण्टः॥

त्रिकण्टः, पुं, (त्रीणि कण्टानि कण्टकानि यस्य।) गोक्षुरकः। इति शब्दरत्नावली॥ पचगुप्रदृक्षः। इति शब्दचन्द्रिका॥ तेकाँटासिज इति भाषा। मत्स्यभेदः। टेङ्गरा इति भाषा। अस्य गुणाः। पित्तकफनाशित्वम्। रूक्षत्वम्। अग्निदीपन-त्वम्। लघुत्वञ्च। इति राजवल्लभः॥
(पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्॥
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः।
त्रिपुटः कण्टकफलः शृङ्गी गोक्षुरः क्षुरः॥")

त्रिकण्टकः, पुं, (त्रीणि कण्टकानि यस्य।) लघु-गोक्षुरवृक्षः। इति त्रिकाण्डशेषः॥ गोक्षुरक-वृक्षः। इति हेमचन्द्रः। ४। २२२॥ (यथा,—
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिक-ण्टकः॥"
इति वैद्यकरत्नमालायाम्॥)

त्रिका, स्त्री, (तिस्रोऽयो यस्याः।) "संख्याया: संज्ञासङ्घसूत्राध्ययनेषु च।"५। १। ५८। इति कन्। ततष्टाप्।) कूपोपरिस्थपङ्क्तप्रान्तभागः। भूमिष्ठकूपपङ्क्तम्। इत्यन्ये॥ कूपस्य समीपे रज्जुधारणार्थं त्रिखिदारयन्त्रम्। इति स्वामी॥ इत्यमरटीकायां भरतः॥

त्रिकायः, पुं, (त्रिकं आध्यात्मिकाधिभौतिकाधि-दैविकदुःखत्रयं अयति गच्छत्यस्मादिति। अय गतौ+अपादाने घञ्। यद्वा, त्रिकं त्रिकालम-यति वेत्तीति। अय+अच्।) बुद्धः। इति हेमचन्द्रः। २। १४८॥

त्रिकार्षिकं, क्ली, (कर्षाय हितम् कार्षिकम्। त्रयाणां कार्षिकाणां समाहारः।) मिलित-नागरातिविषासुस्ताचयरूपम्। इति राज-निर्घण्टः॥

त्रिकालज्ञः, पुं, (त्रिकालं वर्त्तमानातीतभवि-ष्यत्कालविवरणं जानातीति। ज्ञा+"आतो-ऽनुपसर्गे कः।" ३। २। ३। इति कः।) बुद्धः। इति हेमचन्द्रः। २। १४६॥ सर्व्वज्ञे, त्रि॥ (यथा, बृहत्संहितायाम्। १७। १।
"बुद्धं यथा यदा वा भविष्यदादिश्यते त्रिका-लज्ञैः॥")

त्रिकालदर्शी, [न्] पुं, (त्रिकालं वर्त्तमानातीत-भविष्यद्रूपं पश्यतीति। दृश+णिनिः।) ऋषिः। इति हलायुधः॥ भूतभविष्यद्वर्त्तमानवेत्तरि, त्रि॥ (यथा, बृहत्संहितायाम्। २१। ४।
"प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति॥")

त्रिकालवित्, पुं, (त्रिकालं वेत्तीति। विद्+क्विप्।) बुद्धः। इति हलायुधः॥ त्रिकालज्ञे, त्रि॥

त्रिकूटं, क्ली, (त्रिकूटः पर्व्वतः उत्पत्तिस्थानत्वे-नास्त्यस्येति अर्श आदित्वादच्।) सिन्धुलवणम्। सामुद्रलवणम्। इति रत्नमाला॥

त्रिकूटः, पुं, (त्रीणि कूटानि शृङ्गाणि यस्य।) पर्व्वतविशेषः। यस्योपरि लङ्का। (यथा, रामा-यणे। ५। २। १।
"स सागरमनाधृष्यमतिक्रम्य महाबलः।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह॥")
तत्पर्य्यायः। त्रिककुत् २। इत्यमरः। २। ३। २॥ सुवेलः ३ त्रिशृङ्गः ४। इति हेमचन्द्रः॥ त्रिशृङ्गः ५। त्रिचकूटकः ६। इति शब्दरत्ना-वली॥ (अयन्तु पीठस्थानानामन्यतमः। अत्र भगवती रुद्रसुन्दरीरूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
क्षीरोदसमुद्रतीरस्थपर्व्वतः। यथा,—
"सर्व्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्व्वतः।
सुतः पर्व्वतराजस्य सुमेरोर्भास्करद्युतेः॥
क्षीरोदजलवीच्या यो धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः॥
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः।
गन्धर्व्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः॥
विद्याधरैः सपत्नीकैः संयुतेषु तपस्विभिः।
नगद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते॥
पुन्नागैः कर्णिकारैश्च विल्वामलकपाटलैः।
चूतनिम्बकदम्बैश्च चन्दनागुरुचम्पकैः॥
प्रालेयशालेस्तमालैश्च शरलार्जुनपिप्पलैः।
तथान्यैर्विविधैर्वृक्षैः सर्व्वतः समलङ्कृतः॥
नानाधातुकृतैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रख्यैस्त्रिभिर्व्वर्णैश्च सानुभिः॥
नगैः प्राखान्नगैः सिंहैर्मातङ्गैश्च सदामदैः।
जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः॥
तस्यैकं काञ्चनं शृङ्गं सेवते यद्विवाकरः।
नानापुष्पसमायुक्तं नानागन्धाधिवासितम्॥
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम्॥
वज्रेन्द्रनीलवैदूर्य्यज्योतिर्भिरासयन् दिशः।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्॥
न तत्र क्षुत्तृषः पश्यन्ति न शृङ्गं सा न नास्तिकाः।
नातप्ततपसो लोके ये च पापकृतो जनाः॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥
गजो ह्यचलसंकाशो मदाचलितलोचनः।
क्षुधितः पातुकामोऽसावतीर्य्यैव तज्जलम्॥
स लीनः पङ्कजवने यूथमध्यगतश्चरन्।
यदृच्छयैव रौद्रेण ग्राहेणायुक्तमर्षिणा॥
गरुड़स्थो जगन्नाथो लोकाधारस्तपोधन!।
ग्राहग्रस्तं गजेन्द्रं तं तच्च ग्राहं जलाशयात्॥
उज्जहारात्मप्रमेयात्मा नरसा मधुसूदनः।
स्वलक्ष्यं दारयामास ग्राहं चक्रेण माधवः॥
मोचयामास नागेन्द्रं पापेभ्यः शरणागतम्॥"
इति वामनपुराणम्॥
(घोटकविशेषः। यथा, नकुलकृताश्वचिकित्-सिते। ४। ६।
"त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः।
त्रिकूटः स परिज्ञेयो वाजिदङ्गिकरः परः॥")

त्रिकूटलवणं, क्ली, (त्रिकूटं सामुद्रमिव लवणम्।) द्रौणीलवणम्। इति राजनिर्घण्टः॥

त्रिकोणं, क्ली, (त्रयः कोणा यस्य।) योनिः। इति शब्दार्थकल्पतरुः॥ (कामरूपपीठ-विशेषः। यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"करतोयां समारभ्य यावद्दिक्करवासिनी।
शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम्॥")
लक्षात् नवपद्मलये। इति दीपिका॥ (त्रिभुज-क्षेत्रभेदः। इति लीलावती॥) त्र्यस्रे, त्रि। त्रिकोणवस्तूनि यथा। हलः १ शिववक्षुः २ कामाख्या ३ वह्निमण्डलम् ४ एकारः ५ वज्रम् ६ शृङ्गाटम् ७ शृकटादि ८ योनिः ९। इति कविकल्पलता॥

त्रिकोणफलं, क्ली, (त्रिकोणं त्र्यस्रं फलं यस्य।) शृङ्गाटकम्। इति भावप्रकाशः॥

त्रिक्षारं, क्ली, (त्रयाणां क्षाराणां समाहारः।) क्षारत्रयम्। मिलितस्वर्जिकाक्षारयवक्षार-टङ्कणक्षाराणि। इति राजनिर्घण्टः॥ (यथा, वैद्यकरत्नसारसंग्रहे क्षारगणमारणाधिकारे।
"सर्জ্জिका टङ्कणश्चैव यवक्षार उदाहृतः॥")

त्रिक्षुरः, पुं, (त्रीणि क्षुराणीवाग्राणि यस्य।) कोकिलाक्षवृक्षः। इति रत्नमाला॥ कुलेखारा इति भाषा॥

त्रिखं, क्ली, त्रयूषम्। इति शब्दचन्द्रिका॥

त्रिखट्टं, क्ली, तिसृणां खट्टानां समाहारः। खट्टा-त्रयम्। इत्यमरः। ३। ५। ४१॥

त्रिखट्टी, स्त्री, (तिसृणां खट्टानां समाहारः। "द्विगोः।" ४। १। २१। इति ङीप्।) त्रिख-ट्टम्। इत्यमरः। ३। ५। ४१॥

त्रिगः, पुं, (त्रयाणां धर्म्मार्थकामानां गणो वर्गः।) त्रिवर्गः। धर्म्मार्थकामाः। इत्यमरटीकायां नीलकण्ठः॥ (यथा, किरातार्জ্জुनीये। १। ११।

"गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम्॥")

त्रिगर्त्तः, पुं, (त्रयो गर्त्ता यत्र।) देशविशेषः। साहोराख्यदेशैकभागः। तत्पर्य्यायः। जालन्धरः २। इति हेमचन्द्रः। ४। २४॥ (देशोऽयं कूर्म्मविभागे उत्तरस्यामुक्तः। यथा, दक्षसंहितायाम्। १४। २५।

"उत्तरतः कैलासः" इत्युपक्रम्य,—

"त्रिगर्त्ततुरगाननाश्वमुखाः॥"

इत्युक्तवान्॥)

तद्देशस्थे पुंभूम्नि। (यथा, महाभारते। २। २७। १८।

"तनखिगर्त्ताः कौन्तेयं दार्व्वाः कोकनदास्तथा।
क्षत्रिया बहवो राजन्नुपावर्त्तन्त सर्व्वशः॥")

गर्ब्बितान्तरम्। इति मेदिनी। ते, ११३॥

त्रिगर्त्तकः, पुं, (त्रिगर्त्त एव। स्वार्थे कन्।) त्रिगर्त्तदेशः। इति त्रिकाण्डशेषः॥

त्रिगर्त्ता, स्त्री, (त्रयो गर्त्ता यस्याः।) घुर्घुरिका। (त्रयो बहवो गर्त्ता इव योनिद्वाराणि यस्याः।) कासुकाङ्गना। इति मेदिनी। ते, ११३॥

त्रिगर्त्तिकः, पुं, (त्रयो गर्त्ताः सन्ति यत्र। त्रिगर्त्त + बहुलवचनात् ठन्।) त्रिगर्त्तदेशः। इति भूरिप्रयोगः॥

त्रिगुणं, क्ली, (त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः।) सत्त्वरजस्तमांसि। इति श्रीभागवतम्॥ (प्रधानम्। यथा, भागवते। ४। २४। २८।

"यः परं रहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्।"

"रहसः छद्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परम्॥" इति तट्टीकायां स्वामी॥) त्रयाणां पूरणे गुणत्रययुक्ते च त्रि॥ (यथा, मनुः। १। १५।

"महान्तमेव चात्मानं सर्व्वाणि त्रिगुणानि च।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च॥"

त्रयो गुणा आवृत्तयो यस्य। त्रिभिर्गुणिते। यथा, रघुः। २। २५।

"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥")

त्रिगुणा, स्त्री, (त्रयो गुणा यस्याः।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"पदैस्त्रिभिर्व्वलिर्बद्धो रागादित्रिपदाथ वा।
उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता॥"

(तथाच देवीभागवते। १२। ६। ६५।

"त्रिगुणा त्रिपदा तन्त्रीसुलसी तरुणातरुः॥"

स्वनामख्यातो बीजभेदः। इति तत्सारः॥)

त्रिगुणाकृतं, त्रि, (त्रिगुणं कर्णं कृतम्। त्रिगुण + कृतम्। "संख्यायाश्च गुणान्तायाः।" ५। ४। ५६। इति डाच्।) वारत्रयकृष्टचेलम्। इत्यमरः। २। ६। ६॥

त्रिजटा, स्त्री, (तिस्रो जटा यस्याः।) राक्षसीविशेषः। यथा,—

"सीतां ताभिरनार्य्याभिर्दृष्ट्वा सन्तर्ज्जितां तदा।
राक्षसी त्रिजटा दृष्ट्वा प्रबुद्धा वाक्यमब्रवीत्॥"

इति रामायणे सुन्दरकाण्डे २७ अध्यायः॥*॥

विष्णुदृष्टः। यथा, ज्ञानभैरवतन्त्रे ६ पटोले।

"शृणु देवि! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम्।
पञ्चं ब्रह्ममयं देवि! चक्षुतं वरवर्णिनि!॥
श्रीशैवशिखरे जातः श्रीफलः श्रीनिकेतनः।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा॥
ब्रह्मविष्णुशिवाः पञ्चे तृतीयश्च शक्तिरूपिणी।
तृतीयमूले तु वक्त्रं स्यात् पञ्चं ब्रह्म त्रिदं प्रिये!॥
एकञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत्।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः॥"

अन्यत्र विल्वशब्दे द्रष्टव्यम्॥ (भगवती। सा च गायत्रीस्वरूपा। यथा, देवीभागवते। १२। ६। ७२।

"त्रिजटा तित्तिरी ख्याता त्रिविधा तरुणाकृतिः॥")

त्रिजातकं, क्ली, (त्रिगुणितं जातं सुगन्धिद्रव्यरूपम्। ततः स्वार्थे कन्।) मिलिततुल्यत्वगेलापत्राणि। यथा,—

"एलादित्रिभिरुद्दिष्टं त्रिजातं त्रिसुगन्धिकम्।
चातुर्जातं सनागन्तु ह्यथ वातकफापहम्॥"

अपि च।

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥"

इति राजनिर्घण्टः॥

(अस्य लक्षणपर्य्यायो यथा,—

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
तदयं रेचनं रूक्षं तीक्ष्णोष्णं सुखगन्धकृत्।
लघुपित्तास्रदाहघ्नं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्रिदं, क्ली, (दण्ड + पृषोदरादित्वात् साधुः।) दण्डम्। इति शब्दरत्नावली॥ (यथा, दण्डशब्दव्युत्पत्तौ उज्ज्वलदत्तः। ५। ८।

"रेफेकारसंयुक्तमधुत्पन्नं शब्दान्तरमस्ति।
'उत्तिष्ठप्रत्रिपत्रपांशुविहगः सौम्यस्तनः
पूजितः।'

इति वराहः॥")

त्रिणता, स्त्री, (त्रिषु स्थानेषु नता। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) धनुः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १९। ६१।

"खगुणेरापफलप्राग्रेराक्षस्य गणिका इव।
कासुका इव नालीकांस्त्रिणताः सहसासृजन्॥"

त्रिणस्य भावः। त्रिण + तल्।) त्रिणत्वञ्च। (त्रिषु स्थानेषु नते, त्रि। यथा, रामायणे। ६। २०। २८।

"भिन्नसृष्टिपरिच्छन्नं त्रिणतं रक्तरञ्जितम्।
बाणपातान्तरे रामः पतितं पुरुषर्षभम्।
शयानं लक्ष्मणं दृष्ट्वा निराशो जीवितेऽभवत्॥")

त्रिणाचिकेतः, पुं, (त्रिभिस्त्रिभिरचिकेतोऽग्निर्येन। पूर्व्वपदादिति णत्वम्।) यजुर्व्वेदैकदेशो ग्रन्थः। तदेदाध्यायी। (यथा, मनुः। ३। १८५।

"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्ण्णः षडङ्गवित्॥"

"त्रिणाचिकेतः अध्वर्य्युवेदभागस्तद्वत्त्व तद्योगात् पुरुषोऽपि त्रिणाचिकेतः॥" इति तट्टीकायां कुल्लूकभट्टः॥ नारायणस्य नामविशेषः। यथा, महाभारते १२। ३३८। ४।

"पञ्चाग्ने! त्रिणाचिकेत! षडङ्गनिधान!॥")

त्रितयं, क्ली स्त्री, (त्रयाणां तत्त्वानां समाहारः। तत्त्रयम्। इत्यमरः। ३। ५। ४१॥

त्रितयं, क्ली, (त्रयोऽवयवा अस्य। त्रि + "संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्।) त्रयम्। इति शाकरणम्॥ (यथा, महाभारते। १३। १११। १८।

"धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम्।
एतत्त्रयमवाप्नोत्यमधर्म्मपरिवर्জ্জितम्॥"

त्रिप्राकारे, त्रि। यथा, पद्मदशाम्। १। ४६।

"त्रितयीमपि तां सृक्ष्मां परस्परविरोधिनीम्।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते॥")

त्रिदण्डः, पुं, (त्रिदण्डं चतुरङ्गुलगोबालवेष्टनादन्योन्यसम्बन्धं अस्त्यस्येति। अर्शआदित्वादच्।) सन्न्यासाश्रमः। यथा,—

"यस्त्रसंयतषड्वर्गः प्रणष्टेन्द्रियसारथिः।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति॥"

इति श्रीभागवतम्॥

(त्रयाणां दण्डानां समाहारः। यतित्रिदण्डे, क्ली। यथा, महाभारते। १२। ३२०। १५५।

"सम्राड्ऽस्यास्य राज्यस्य त्रिदण्डस्येव तिष्ठतः।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः॥"

कायवाङ्मनोदण्डत्रये। यथा, मनुः। १२। ११।

"त्रिदण्डमेतन्निक्षिप्य सर्व्वभूतेषु मानवः।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥

"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत्।
लोकास्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम्॥"

इति चरके सूत्रस्थाने प्रथमेऽध्याये॥)

त्रिदण्डी, [न्] पुं, (त्रिदण्डमस्त्यस्येति। इनिः।) त्रिदण्डधारियतिः। (यथा, महाभारते। १२। ३२०। ८।

"तया जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः।
तत्र तत्र श्रुतो मोक्षे कथमात्मस्त्रिदण्डिभिः॥")

कायवाङ्मनोदण्डयुक्तः। इति श्रीभागवतम्॥ (यथा, मनुः। १२। १०।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते॥")

यज्ञोपवीतम्। इति लोकप्रसिद्धिः॥

त्रिदला, स्त्री, (त्रीणि त्रीणि दलानि पत्राणि यस्याः।) गोधापदी लता। इति जटाधरः॥

त्रिदलिका, स्त्री, (त्रीणि दलानि यस्याः। कापि अत इत्वम्।) चर्म्मकषा। इति शब्दचन्द्रिका॥

त्रिदशः, पुं, (तृतीय यौवनावस्था दशा यस्य। त्रिशब्दस्यात्र त्रिभागवतृतीयार्थकता। यद्वा, तिस्रो जन्मसत्त्वाविनाशाः। नतु मरणानामिव

दृद्धिपरिणामत्रयाख्याः दृशा यस्य। यद्वा, त्रीन् तापान् दृणति नाशयतीति। दृणश+मूलविभुजादित्वात् कः पृषोदरादित्वात् नलोपः। यद्वा, त्र्यधिकाखिराट्तत्त्वाच्च दृश परिमाणमस्य। समासे डच्। प्राकपार्थिवादिवत् मध्यलोपः।) देवः। इत्यमरः। १। १। ७॥ (यथा, महाभारते। ३।८५।१६।
"न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह॥"
ते च अर्का द्वादश १२ रुद्रा एकादश ११ वसवोऽष्टौ ८ विश्वेदेवौ द्वौ २ समुदायेन त्रयस्त्रिंशत् ३३॥ त्रिंशत् परिमिते, त्रि। यथा, महाभारते। १। ११३। २१।
"ततः स कौरवो राजा विहत्य त्रिदशा निशाः॥")

त्रिदशदीर्घिका, स्त्री, (त्रिदशानां देवानां दीर्घिका।) स्वर्गङ्गा। इति हेमचन्द्रः। ४। १४७॥

त्रिदशमञ्जरी, स्त्री, (त्रिदशप्रिया मञ्जरी यस्याः।) तुलसी। इति राजनिर्घण्टः॥ (तुलसीशब्देऽस्या गुणादयो व्याख्याताः॥)

त्रिदशायुधं, क्ली, (त्रिदशानां देवानां आयुधम्।) वज्रम्। इति त्रिकाण्डशेषः॥

त्रिदशारिः, पुं, (त्रिदशानामरिः शत्रुः।) असुरः। इति शब्दरत्नावली॥

त्रिदशालयः, पुं, (त्रिदशानां देवानां आलयः।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, महाभारते। १। ७६। ६६।
"गुरोरस्य सकाशे तु दशवर्षशतानि सः।
अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम्॥")
सुमेरुपर्व्वतः। इति हलायुधः॥

त्रिदशावासः, पुं, (त्रिदशानां सुराणां आवासो वासस्थानम्।) स्वर्गः। इति हलायुधः॥

त्रिदशाहारः, पुं, (त्रिदशानां आहारः।) अमृतम्। इति हलायुधः॥

त्रिदशेश्वरी, स्त्री, (त्रिदशानामिन्द्रादिदेवानामीश्वरी।) दुर्गा। यथा,—
"सुराङ्गास्त्रिदशा देवा नन्दिनी दुन्दुभिर्मता।
तेषाञ्च वन्दिनी नन्दी दृणत्वात् त्रिदशेश्वरी॥"
इति देवीपुराणे ४५ अध्यायः॥
(गङ्गा। यथा, काशीखण्डे। २६। ७२।
"तपस्वी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी॥")

त्रिदिनसृक्, [ज्] पुं, (त्रिदिनं चान्द्रदिनत्रयं सृजतीति। सृज्+क्विप्।) त्र्यहस्पर्शः। यथा,
"तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनम्। त्रिदिनसृक् दिनत्रयस्पर्शनादद्दः।" इति ज्योतिषतत्त्वम्॥

त्रिदिवः, पुं, (त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति। दिव+"हलश्च।" ३। २। १२१। इति घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, दीव्यन्तीति दिवाः। इगुपधज्ञेति कः। त्रयः सत्त्वरजस्तमोरूपाः दिवाः क्रीड़का विलासका इत्यर्थः यत्र।
"तृतीया द्यौस्त्रिदिवः। घञर्थे कविधानं इति-
विषये संज्ञाशब्दस्य पूरणार्थत्वं त्रिभागवत्।" इति श्रीभुपालवधटीकायां मल्लिनाथः। १। ३६।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, मनुः। ६। २५३।
"रक्षणाद्यार्य्यवृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥")
क्ली, आकाशः। इति हेमचन्द्रः॥

त्रिदिवा, स्त्री, नदीभेदः। इति मेदिनी। वे, ३७॥ (यथा, मत्स्यपुराणे। ११३। ३१।
"त्रिभामा ऋषिकुल्या च इक्षुदा त्रिदिवा-वला॥")

त्रिदिवेशः, पुं, (त्रिदिवस्य स्वर्गस्य ईशः।) देवः। इत्यमरः। १। १। ७॥

त्रिदिवोद्भवा, स्त्री, (त्रिदिवादुद्भवो यस्याः।) शूलेला। इति राजनिर्घण्टः॥ (गङ्गा। स्वर्गोद्भवमात्रे, त्रि। इति व्युत्पत्तिलब्धोऽर्थः॥)

त्रिदृक्, [ग्] पुं, (तिस्रः दृशो नेत्राणि यस्य।) शिवः। इति हेमचन्द्रः। २। ११०॥

त्रिदोषं, क्ली, (त्रयाणां दोषानां समाहारः।) दोषत्रयम्। वातपित्तकफरूपम्। इति राजनिर्घण्टः॥

त्रिदोषज, त्रि, (त्रिदोषाज्जायते इति। जन+"प्रसिद्ध्यमजातौ।" ३। २। ६८। इति डः।) त्रिदोषजनितः। सन्निपातरोगः। यथा,—
"चिरज्वरे वातकफोल्बणे वा
त्रिदोषजे वा दृशमूलमिश्रः।
किरातितिक्तादिगणः प्रगोष्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः॥"
इति चक्रपाणिदत्तः॥
("दृष्ट्वा त्रिदोषजं घोरं ज्वरं प्राणापहारकम्।
तस्मादादौ कफस्यास्य शोधनं परिकीर्त्तितम्॥
न कुर्य्यात् पित्तशमनं यदीच्छेदात्मनो यशः।
कफो वातो बलीयांसु सद्यो हन्ति रुजातुरम्॥
लङ्घनं वमनं वारि क्षौद्रं स्यात्त्रिदोषजे।
चिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा॥
लङ्घनञ्च समुद्दिष्टं ज्ञात्वा दोषबलाबलम्।
कफं विशोधितं ज्ञात्वा ततो वातनिवारणम्॥
पित्तसंशमनं कार्य्यं ज्ञात्वा पित्तस्य कोपनम्।
शोधनीयौ वातकफौ न तु पित्तं विनाशयेत्॥"
इति हारीते चिकित्सितस्थाने द्वितीयोऽध्याये॥)

त्रिधा, अ, (त्रि+"संख्याया विधार्थे धा।" ५। ३। ४२। इति धा।) त्रिप्रकारः। इति मुग्धबोधम्॥ यथा, वराहपुराणे।
"नारायणः परो देवः सत्त्वरूपो जनार्द्दनः।
त्रिधात्मानं स भगवान् ससर्ज परमेश्वरः॥"
(यथा, महाभारते। १३। १४१। ७८।
"धर्म्मेणार्थः समाहार्य्यो धर्म्मलब्धं त्रिधा धनम्।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः॥")

त्रिधातुः, पुं, (त्रीन् धर्म्मार्थकामान् दधाति पुष्णातीति। धा+तुन्।) शिवः। इति त्रिकाण्डशेषः॥ (त्रयाणां धातूनां समाहारः।) धातुत्रये, क्ली॥

त्रिधामा, [न्] पुं, (त्रीणि भूरादीनि सत्त्वादीनि वा धामानि स्थानानि यस्य।) विष्णुः। (यथा, मुकुन्दमालायाम्। ११।
"तृष्णातोये मदनपवनोद्धूतमोहोर्म्मिमाले
दारावर्त्ते सहजतनयग्राहसङ्घाकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्!
पादाम्भोजे वरद! भवतो भक्तिनावे प्रसीद॥")
शिवः। अग्निः। रज्जुः। इति शब्दार्थकल्पतरुः॥ (दशमस्कन्धपरस्य व्यासः। यथा, देवीभागवते। १। ३। २८।
"सारस्वतस्तु नवमे त्रिधामा दशमे तथा॥")
धामत्रये, क्ली स्त्री च॥ (क्ली, स्वर्गः। यथा, भागवते। ३। २४। २०।
"हंसो हंसेन यानेन त्रिधाम परमं ययौ॥"
"त्रिधाम तृतीयं धाम स्वर्गः तस्य परा काष्ठा सत्यलोकम्॥" इति तट्टीकायां स्वामी॥)

त्रिधारकः, पुं, (त्रिस्रो धारा यस्य। ततः स्वार्थे संज्ञायां वा कन्।) गुग्गुलतृणम्। इति राजनिर्घण्टः॥ (त्रयाणां धारकाणां समाहारः।) धारकत्रये, क्ली॥

त्रिधारस्रुही, स्त्री, (त्रिषु भागेषु धारा यस्याः। सा एव स्रुही।) स्नुहीविशेषः। तत्पर्य्यायः। व्यासः २ धारास्रुही ३। इति राजनिर्घण्टः॥

त्रिनयनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि नयनानि यस्य। "सुभ्रादिषु च।" ८। ३। ३६। इति निषेधात् न णत्वम्।) शिवः। इति हलायुधः॥ (यथा, महाभारते। १३। ८। २७।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥")
नयनत्रये, क्ली॥ (लोचनत्रयविशिष्टे, त्रि। यथा, माढकासरस्वतीध्याने।
"सुप्रामोच्चगुरुं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजे-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥")

त्रिनयना, स्त्री, (त्रीणि नयनानि यस्याः। टाप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।
"पश्चिमां चोत्तरं लोकं तथा ब्रह्मायनं परम्।
नयं धर्म्मार्थधर्म्मज्ञं दृष्ट्वा त्रिनयना मता॥"

त्रिनेत्रः, पुं, (त्रीणि नेत्राणि यस्य।) शिवः। यथा, नैषधे। १। ६।
"दिगीशदृन्दांशुविभूतिरोधिता
दिशां स कामप्सरसावरोधिनीम्।
दधार शाखाभि दृशं द्वयाधिकां
निजत्रिनेत्रावतरस्त्रबोधिकाम्॥"
तस्य गणाः। यथा, मत्स्यपुराणे।
"ततः साध्यगणानीशस्त्रिनेत्रानहनत् पुनः।
कोटयश्चतुराशीतिर्नरामरगणर्जिताः॥
वामः स्कन्दमर्मशांस्तान् ब्रह्मणा विनिवारितः।
नैवंविधा भवेत् सृष्टिर्व्वरामरगणर्जिता॥"

त्रिनेत्रचूड़ामणिः, पुं, (त्रिनेत्रस्य महादेवस्य चूड़ामणिः शिरोभूषणम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

त्रिनेत्रा, स्त्री, (त्रीणि नेत्राणीव शरीरे यस्याः।) वाराहीकन्दः। इति राजनिर्घण्टः॥ नेत्रत्रययुक्ता च॥

त्रिपताकं, क्ली, (तिस्रः पताका इव रेखा यत्र।) रेखात्रयाङ्कितभालम्। इति हारावली।१।१४॥ (तिस्रः पताका इव अङ्गुलयो यत्र। त्रिपताकलक्षणान्विते हस्ते, पुं। यथा, साहित्यदर्पणे। ६। १५४।

"त्रिपताकरेखात्रयानपवार्यान्तरा कथाम्।
अन्योन्यामन्त्रणं यत् स्यान्नान्ते तन्नान्तिकम्॥"

"यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत कर्हि सर्वाङ्गुलिनामितागामिकं त्रिपताकलक्षणं करं हस्तान्तरेण सह यन्मन्त्रयते तत्तृतीयान्तिकम्॥")

त्रिपत्रं, क्ली, (त्रीणि त्रीणि पत्राणि यत्र।) दलत्रययुक्तबिल्वपत्रम्। यथा,—

विष्णुरुवाच।

"ऊर्द्धपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम्।
अधः दक्षिणपत्रञ्च त्रिपत्रदलमिष्यते॥"

इति दृहद्धर्म्मपुराणे बिल्वपत्रमाहात्म्ये ११ अध्यायः॥

त्रिपत्रः, पुं, (त्रीणि त्रीणि पत्राणि यस्य।) बिल्वः। इति राजनिर्घण्टः॥ पत्रत्रये, स्त्री॥

त्रिपत्रकः, पुं, (त्रीणि त्रीणि पत्राणि यस्य।) पलाशवृक्षः। इति हेमचन्द्रः। ४। २०२॥ (त्रयाणां पत्राणां समाहारः। ततः कन्। तुलस्यादि पत्रत्रये, स्त्री। यथा, देवीपुराणे।

"तुलसीकुन्दमालूरपत्राण्याहुस्त्रिपत्रकम्॥")

त्रिपथं, क्ली, (त्रयाणां पथां समाहारः। "ऋक्पूरिति।"५। ४। ७४। टच्।) त्रिमार्गम। तेषामयं पथ इति भावः। ततष्ठञ्। त्रैपथिकम् २। इति हेमचन्द्रः। ४। ५२॥

"शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे।
बिल्वयाञ्चेद्गुरुस्तान्त्रिपथे वा भजेन्निशि।
स भवेत् सर्व्वसिद्धीशः सर्व्ववेदविदां वरः॥"

इति गुप्तसाधनतन्त्रम्॥

(तिस्रां गाड़ीनां पन्थाः। इति विग्रहे कपालकुहरे, पुं। यथा, हठयोगप्रदीपिकायाम्।३।३७।

"कलां परादृसखीं कला त्रिपथे परियोजयेत्।
सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते॥")

त्रिपथगा, स्त्री, (त्रिपथे स्वर्गमर्त्यपातालमार्गे गच्छतीति। गम+डः।) गङ्गा। इत्यमरः। १। १०। ३१॥ (अस्या निरुक्तिरुक्ता यथा, रामायणे। १। ४३। ६।

"गङ्गा त्रिपथगा नाम दिवा भागीरथीति च।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता॥")

त्रिपदा, स्त्री, (त्रयः पादा मूलानि यस्याः। टापि पादस्य पदभावः।) हंसपदीवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"गोधापदी तु सुवहा त्रिपदा हंसपद्यपि॥"

इति वैद्यकरत्नमालायाम्।

(त्रयः पादाक्षराणि यस्याः। त्रिपादयुक्ते, त्रि। यथा, मनुः। २। ८१।

"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥")

त्रिपदिका, स्त्री, (त्रयः पादा अस्याः इति त्रिपदी ततः संज्ञायां कन् ततष्टाप्।) अर्थार्थधातुनिर्म्मितत्रिपादयुक्तग्रन्थाधारः। इति तन्त्रसारः॥ ("तत्र त्रिपदिकामारोप्य तदुपरि ग्रन्थं स्थापयेत्।" इति पूजापद्धतिः॥)

त्रिपदी, स्त्री, (त्रयः पादा अस्याः। ङीपि पक्षावः।) गोधापदी। इति रत्नमाला॥ हस्तिगात्रबन्धः। इति हेमचन्द्रः।४।२६६॥ (हस्तिपादबन्धनम्। इति यादवः॥ यथा, रघुः। ४। ४८।

"गास्यत्यु करिणां येवं त्रिपदीच्छेदिनामपि॥")

त्रिपादयुक्ता। पद्यत्रयम्। इति व्याकरणम्॥ भाषाकवितायाञ्छन्दोविशेषः। यथा,—

"षण्मात्रिकान्ता यदि यमकान्ता
द्वादश परिवर्त्तमात्रा।
किन्नरगीतिः तदिति निगीतिः
स्याद्देसमाचरणगात्रा॥"

स्त्र्यादान्त उदाहृतः।

"यैषा सङ्गीतके नित्यं निगीतिः किन्नराश्रिका।
सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता॥"

इति काव्योदयः॥

(त्रिषु मार्गेषु पादो गमनं यस्याः। गङ्गा। यथा, काशीखण्डे। २६। ७६।

"त्रैलोक्यलक्ष्मीरुत्क्षिपदी तथा तिमिरचन्द्रिका॥")

त्रिपर्णः, पुं, (त्रीणि त्रीणि पर्णानि यस्य।) पलाशः। इति राजनिर्घण्टः॥

त्रिपर्णिका, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः। संज्ञायां कन्। टापि अत इत्वञ्च।) कन्दविशेषः। तत्पर्य्यायः। दृढ़पत्रा २ छिन्नग्रन्थिनिका ३ कन्दालुः ४ कन्दबल्ली ५ आम्रवल्ली ६ विनारुहा ७ त्रिपर्णी ८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। श्वासकासविषव्रणविनाशित्वम्। पित्तप्रकोपशमनत्वञ्च। इति राजनिर्घण्टः॥

त्रिपर्णी, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) शालपर्णी। इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका।
शाकशूरश्च रूक्षश्च प्रायो विष्टम्भ जीर्य्यति।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्॥"

इति चरके सूत्रस्थाने २७ अध्याये॥) वनकार्पासी। एतत्पर्य्यायभेदः। इति रत्नमाला॥

त्रिपात्, [द्] पुं, (त्रयः पादा अस्य। "संख्या सुपूर्व्वस्य।" ५। ४। १४०। इति पादस्यान्तलोपः।) विष्णुः। इति त्रिकाण्डशेषः॥ (वेदादिमते संसाररहितो ब्रह्मस्वरूपः पुरुषः। यथा, ऋग्वेदे। १०। ६०। ४।

"त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्येहाभवत् पुनः॥"

पुराणादिमते वामनावतारे त्रिपात् भूत्वा बलिसकाशात् सर्व्वं राज्यादिकं ग्रहीतवानित्यतोऽस्य तथात्वम्। तथाच भागवते।८।२०।३६।

"क्षितिं पदैकेन बलेर्विचक्रमे
नभः शरीरेण दिशश्च बाहुभिः॥
पदं द्वितीयं क्रमतस्त्रिविष्टपं
न वै तृतीयाय तदीयमण्वपि।
उरक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो
महर्जनाभ्यां तपसः परं गतः॥")

ज्वरः। यथा,—

"विद्राविते भूतगणे ज्वरस्तु त्रिपिरात्रिपात्॥"

इति श्रीभागवतम्॥

त्रिपादिका, स्त्री, (त्रयः पादाः मूलानि यस्याः। कप् ततष्टापि अत इत्वम्।) हंसपदीलता। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"हंसपादी हंसपदी कौटमाता त्रिपादिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

त्रिपिष्टपं, क्ली, (त्रिदशानां देवानां पिष्टपं वासस्थानम्। एषोदरादित्वात् दशब्दस्य लोपः। यद्वा, मर्त्यपातालापेक्षया तृतीयं पिष्टपम् भुवनम्। तृप्तौ त्रिशब्दस्य त्रिभागवत् पूरणार्थता।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, महाभारते। १। २०८। ३५।

"ततः त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं वरोचत॥")

आकाशम्। इति शब्दरत्नावली॥

त्रिपिष्टपसत्, [द्] पुं, (त्रिपिष्टपे स्वर्गे सीदतीति। सद+क्विप्।) देवता। इति हलायुधः॥

त्रिपुटः, पुं, (त्रीणि पुटानि यस्य।) सतीलकः। तीरम्। इति मेदिनी। के, ४५। इक्षुभेदः। तालकः। इति शब्दरत्नावली॥ गोक्षुरवृक्षः॥ इति रत्नमाला॥ (कलायविशेषः। खेसारी इति भाषा॥ अस्य पर्य्याया गुणाश्च यथा,—

"त्रिपुटः खञ्जिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ।

त्रिपुटो मधुरश्चिक्कस्तुवरो रूक्षको गुरुः॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा।
किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"अन्यानि चैव शुष्काणि कौलत्थान्युषितानि च।
मसूराश्चिपुटा वल्ल्यः कलायाद्याश्च वर्ज्जिताः॥"

इति हारीते प्रथमे स्थाने नवमोऽध्याये॥)

त्रिपुटा, स्त्री, (त्रीणि पुटानि दलवृत्तयो यस्याः।) मल्लिका। खूलेखा। त्रिवृत्। इति मेदिनी। के, ४५॥ कर्णस्फोटा। खूलेखा। रक्तत्रिवृत्। इति राजनिर्घण्टः॥ देवीविशेषः। यथा,—

"ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः।
त्रिपुटाख्या द्विरुक्तैस्तैर्व्वीजैरङ्गानि षट् क्रमात्॥"

अस्या रूपं यथा,—

"पारिजातवने रम्ये मण्डपे मणिकुट्टिमे।
रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते॥
अधस्तात् कल्पवृक्षस्य निवसां देवतां स्मरेत्।

चापं पाशाम्बुजसरसिजान्यङ्कुशं पुष्पबाणान्
संबिभ्राणां करसरसिजै रत्नमौलिं त्रिनेत्राम्।
हेमाभाभां कुचभरनतां रत्नमञ्जीरकाञ्ची-
श्रेवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम्॥
चामरादर्शताम्बूलकरैरङ्कसमङ्गकान्।
वहन्तीभिः कुचार्त्ताभिर्भूतीभिः परिवारिताम्॥
करुणार्द्रतरार्द्रया प्रपश्यन्तीं साधकं दृशा॥"

इति तन्त्रसारः॥

त्रिपुटी, [न्] पुं, (त्रिपुट इव आकारोऽस्यास्येति। त्रिपुट+इनिः।) एरण्डवृक्षः। इति शब्दमाला॥

त्रिपुटी, स्त्री, (त्रीणि पुटानि यस्याः। गौरादित्वात् ङीष्।) त्रिपुटा। इत्यमरटीकायां भरतः॥ (त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारः। "द्विगोः।" इति ङीप्। ज्ञातृज्ञानज्ञेयरूपपुटत्रयम्। यथा, पञ्चदश्याम्। ११। १४।

"भूतोत्पत्तेः पुरा भूमा त्रिपुटीहेतवर्जनात्।
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो॥")

त्रिपुटीफलः, पुं, (त्रिपुटी पुटत्रयं फले यस्य।) एरण्डः। इति हारावली। १०८॥

त्रिपुण्ड्रं, क्ली, (त्रयाणां पुण्ड्राणां रक्तवर्णाकाराणां समाहारः।) भस्मादिरचितकपालस्थतिर्यग्रेखात्रयम्। यथा,—

"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥
तस्मान्मृन्मयदारुमयं ललाटेऽपि त्रिपुण्ड्रकम्॥"

इति तिथ्यादितत्त्वम्॥

ब्रह्माण्डपुराणे।

"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्।
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः॥"

इत्याह्निकाचारतत्त्वम्॥

"शिवागमे दीक्षितेषु धार्य्यं तिर्य्यक्त्रिपुण्ड्रकम्।
विष्ण्वागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत्॥"

इति नागोजीभट्टधृतसङ्गतिसंहिता॥

(यथा, शब्दचिन्तामणिधृतदेवीभागवतम्।

"येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम्।
श्मशानसदृशं तत् स्यान्न ग्रेह्यं पुण्यकर्म्मभिः॥"

"त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते।
धारयन्ति च ये भक्त्या धारयन्ति तमेव ते॥
तिर्य्यग्रेखा प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम्।
तथापि मानवा मूर्खा न कुर्व्वन्ति त्रिपुण्ड्रकम्॥")

त्रिपुण्ड्रकं, क्ली, (त्रिपुण्ड्रमेव। स्वार्थे कः।) त्रिपुण्ड्रम्। यथा,—

"वक्त्रं ललाटगात्रेषु भस्मरेखात्रिपुण्ड्रकम्॥"

इति हारावली। ६२॥

त्रिपुरं, क्ली, (त्रयाणां पुराणां समाहारः। तद्धितार्थेति समासः। पात्रादित्वात् क्लीवत्वाभावः।) मयदानवनिर्म्मितं पुरत्रयम्। (यथा, महाभारते। ३। ४१। ३८।

"महात्मना शङ्करेण त्रिपुरं निहतं यदा।
तदेतदक्षं निर्म्मुक्तं येन दग्धा महासुराः॥")

पुरा असुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्य्यं मयं शरणमाययुः। स शमनागमने अदृश्या दुर्व्वितर्क्यपरिच्छदा हैमी रौप्यायसीति तिस्रः पुरो निर्म्माय तेभ्यो ददौ ते असुरास्ताभिः पुरीभिरलक्षिताः पूर्व्ववैरमनुस्मरन्तः सेश्वरान् त्रीन् लोकान् नाशयाञ्चक्रुरतः सेश्वरा लोका हरं उपासाञ्चक्रिरे। हरो मा भैरिति सुरानुचार्य्य धनुषि शरं सन्धाय पुरेषु असृजत्। तैः शरैः क्षुण्णाः पुरौकसोऽसुरा असवः सन्तो निपेतुः। महायोगी मयस्तानसुरानानीय त्रिपुरस्थितसिद्धामृतरसकूपेऽक्षिपत् तेऽसुरास्तद्रसं पीत्वा दृढशरीराः सन्त उत्साहसदा विष्णुगर्भब्रह्मा च वत्सो भूत्वा त्रिपुरं प्रविश्य रसकूपान्तरं पपौ असुरा विष्णुमायया मोहिताः सन्तो न व्यधेषन् तदा विष्णुः स्वाभिः शक्तिभिः शस्योर्युद्धोपकरणं रथसारथिधनुर्व्वाणादिकं यधात्। ततः शम्भुः सन्नद्धो रथमास्थाय शरमनुधि सन्धाय मध्याह्नकाले त्रिपुरं ददाह। इति श्रीभागवतम्॥ (त्रीणि पुराणि यस्येति विग्रहे त्रिपुरासुरे, पुं। यथा, महाभारते। ७। २००। ७६।

"आरुह्य स रथं दिव्यं सर्व्वदेवमयं शिवः।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः॥")

त्रिपुरदहनः, पुं, (त्रिपुरं दहतीति। दह+ल्युः।) शिवः। इति हारावली। ८॥

त्रिपुरभैरवी, स्त्री, (त्रिपुरा धर्म्मार्थकामानां दात्री। सा चासौ भैरवी चेति।) देवीविशेषः। तन्मन्त्रादि यथा,—

"वैष्णवा मन्त्रसख्येषु त्रिपुरायास्तथा शृणु।
तस्यास्तु सर्व्वमन्त्राणि त्रयोदशयुतानि वै॥
विंशतिस्तु सहस्राणि तत्राद्यं वाग्भवं स्मृतम्।
द्वितीयं कामराजाख्यं मोहनञ्च तृतीयकम्॥
आग्नेयितं वाग्भवन्तु चतुर्थं परिकीर्त्तितम्।
नेत्रबीजं द्वितीयन्तु द्वित्तं वाग्भवं तथा॥
आद्यं ततु षष्ठमं प्रोक्तं चतुर्भिरपि चाक्षरैः।
नेत्रबीजं द्वितीयन्तु प्रथमं परिकीर्त्तितम्॥
द्वितीयं कामराजन्तु तृतीयं वाग्भवं तथा।
एभिस्त्रिभिश्च यन्मन्त्रं ततु षष्ठं परिकीर्त्तितम्॥
नेत्रबीजद्वितीयेन वाग्भवान्तेन सम्मतम्।
तदेव वाग्भवाद्यन्तु अष्टमं परिकीर्त्तितम्॥
वाग्भवं कामराजञ्चेत्ताभ्यां नवमं स्मृतम्।
कामराजं तथैवाद्यं द्वितीयञ्चैव मोहनम्॥
एकादशमिदं प्रोक्तं तदेवाद्यन्तु वाग्भवम्।
द्वादशं कीर्त्तितं मन्त्रं ग्रेवतस्त्रैपुरं महत्॥
तन्महत् त्रैपुरं मन्त्रं शृणुष्वैकमनास्त्विदम्।
प्राणादिस्तस्य चाद्यादिर्द्वित्रिवाग्भवसंयुतः॥
आद्यं त्रिपुरभैरव्या बीजमाद्यं प्रकीर्त्तितम्।
उपान्त्यश्च तदादिश्च वह्निः ग्रेवस्वरस्तथा॥
समान्निर्विन्दुसहिता संहितास्तु तृतीयकम्।
एतत्तत्त्वं विजानाति यो नरो भुवि भूमनि॥
सिद्धविद्याधरेभ्यश्च सोऽधिको मन्त्रयो महान्।
एतत्त्रयोदशं प्रोक्तं मन्त्रं मन्त्रेषु चोत्तमम्॥
विंशतेस्तु सहस्रेभ्यः पराच्चैते प्रकीर्त्तिताः।
विंशतेस्तु सहस्राणामाद्यमेतत् प्रकीर्त्तितम्॥"

तस्या ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां रक्तवस्त्रविभूषिताम्।
दक्षिणोर्द्ध जपमालाधो विभ्रतीं पुस्तकोत्तमम्॥
अभयं वामहस्ताभ्यां वरञ्च दधतीं तथा।
सहस्रसूर्य्यसङ्काशां त्रिनेत्रां गजगामिनीम्॥
पीनोत्तुङ्गस्तनयुगां सितप्रेतासनस्थिताम्।
स्मितप्रभिन्नवदनां सर्व्वालङ्कारसंयुताम्॥
तिस्रभिर्मुण्डमालाभिः शिरोवक्षःकटीषु च।
त्रिगुणां त्रिगुणीभूतैः प्रत्येकं परिभूषिताम्॥
मदिरापूर्णनयनां रक्तदन्तच्छदद्वयाम्।
चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम्॥"

इति कालिकापुराणे ७७ अध्यायः॥

त्रिपुरमल्लिका, स्त्री, (त्रीणि पुराणि दग्धवत्तयो यस्याः। सा चासौ मल्लिका चेति।) पुष्पवृक्षविशेषः। त्रिपुरमालिका इति ख्याता। तत्पर्य्यायः। श्वेतपुन्ना २। इति चिकित्सकग्रेयः॥

त्रिपुरा, स्त्री, (त्रीन् धर्म्मार्थकामान् पुरति पूरयतीति पुरयतेर्ड्रः। पुरयत्यगमने अत्र अयदाने+"इगुपधज्ञेति।" ३।१।१३५। इति कः। ततष्टाप्।) देवीविशेषः। तन्मन्त्रध्यानादिकं यथा,—

"शृणुतं त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम्।
एतस्या मूलमन्त्रस्तु पूर्व्वमुत्तरतन्त्रके॥
युवयोरिदयोः सम्यक् क्रमात् प्रतिपादितम्।
वाग्भवं कामराजस्तु डामरञ्चेति तत्त्रयम्॥
सर्व्वधर्म्मार्थकामादिसाधनं कूर्च्चसंयुतम्।
त्रीन् यस्मात् पूरयेत् दुर्गा ध्याता महेश्वरी॥
त्रिपुरेति ततः ख्याता कामाख्या कामरूपिणी।
तस्यास्तु स्तवनं यादृक् कामाख्यायाः प्रकीर्त्तितम्॥
तेनैव स्तवनं कुर्य्यात् मूलमन्त्रेण साधकः।
त्रिकोणं मण्डलं चास्यास्त्रिपुरस्तु त्रिरेखकम्॥
मन्त्रस्तु त्र्याक्षरं ग्रेयं तथा रूपत्रयं पुनः।
त्रिविधा कुण्डलीशक्तिस्त्रिदेवाश्च ईरिते॥
सर्व्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मता॥
दहनं स्तवनं कृत्वा आद्यां मूर्त्तिं विचिन्तयेत्।
त्रिधावर्त्ताय हृदये तां मूर्त्तिं शृणु भैरव!॥
सिन्दूरपुञ्जसङ्काशां त्रिनेत्रान्तु चतुर्भुजाम्।
वामोर्द्धे पुण्यकोदण्डं शरञ्च पुस्तकं तथा॥
दक्षिणोर्द्धे पञ्चबाणान्वितमालां दधत्यधः।
चतुर्थीं कुशपाशान्तु एष्ठेऽन्यं कुशपाशकम्॥
निधाय तस्य एष्ठे तु धनुषादेन संस्थिताम्।
जटाजूटाहिचन्द्रेषु समावद्धशिरोरुहाम्॥
नग्नां शिवशिभङ्गेन चारुमध्यां मनोहराम्।
सर्व्वालङ्कारसम्पूर्णां सम्भोगसुन्दरीं शुभाम्॥
सवह्निशशसन्दीप्तां सर्व्वसत्त्वसमंयुताम्।
एवन्तु प्रथमं ध्यात्वा त्रिधाह्लादञ्च चिन्तयेत्॥

द्वितीयं त्रिपुरारूपं तथैव तु तृतीयकम् ।
आवाहनार्थं देवास्तु चिन्तयेत् योनिमुद्रया ॥
वन्यकुसुमसङ्काशां जटाजूटेन्दुमण्डिताम् ।
सर्व्वलक्षणसम्पूर्णां सर्व्वालङ्कारभूषिताम् ॥
उद्यद्रविप्रख्यवस्त्रां पद्मपर्य्यङ्कसंस्थिताम् ।
मुक्ताहारावलीयुक्तां पीनोन्नतपयोधराम् ॥
बलीविभङ्गचतुरामासवामोदमोदिताम् ।
नेत्राब्जादकरीं शुद्धां क्षोभिणीं जगतां तथा ॥
त्रिनेत्रां योगनिद्रां यामीषद्धासससमायुताम् ।
नवयौवनसम्पन्नां नृणालाभचतुर्भुजाम् ॥
वामोर्द्ध पुस्तकं धत्ते अक्षमालान्तु दक्षिणे ।
वामेनाभयदां देवीं दक्षिणाधोवरप्रदाम् ॥
प्रसवद्रक्तरुग्याभां शिरोमालान्तु बिभ्रतीम् ।
आपादलम्बिनीं कल्पद्रुममासाद्य संस्थिताम् ॥
कदम्बोपवनान्तःस्थां कामाब्जादकरीं शुभाम् ।
द्वितीयां त्रिपुरां ध्यायेद्देवरूपां मनोहराम् ॥*॥
तृतीयं त्रिपुरारूपं शृणु वेतालभैरव ! ।
जवाकुसुमसङ्काशां मुक्तकेशीं वराननाम् ॥
सदाशिवं हसन्तन्तु प्रेतवह्निनिधाय वै ।
हृदये तस्य देवस्य शुद्धपद्मासनस्थिताम् ॥
रक्तोत्पलैर्मिश्रितान्तु मुण्डमालां पदानुगाम् ।
ग्रीवायां धारयन्तीन्तु पीनोन्नतपयोधराम् ॥
चतुर्भुजां तथा नग्नां दक्षिणोर्द्धेऽक्षमालिनीम् ।
वरदां तदधो वामे जगन्मायां तथाभयम् ॥
अधस्तु पुस्तकं धत्ते त्रिनेत्रां हसिताननाम् ।
सर्व्वविघ्नभोगार्त्तां तथा सर्व्वाङ्गसुन्दरीम् ॥
एवंविधं तृतीयन्तु रूपं ध्यायेत्तु पूजकः ।
आद्यन्तु वाग्भवं रूपं द्वितीयं कामराजकम् ॥
डामरं मोहनञ्चापि तृतीयं परिकीर्त्तितम् ।
एकैकन्तु त्रिरूपाणि प्राग्विचिन्त्याथ साधकः ॥
मन्त्रत्रयेण प्रत्येकं हृदि षोढ़ान्यसेत्तथा ।
पूजयेदुपचारैस्तु बहिर्यन्त्रे तथैव च ॥"

इति कालिकापुराणे ६२ अध्यायः ॥

(अस्याः बीजम् । "ह्सरैं" "ह्सकलरीं" "ह्सरौं" इति मन्त्रकोषः ॥ ऋग्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "सहोवाच श्रीरामः । ऐतरेयकौपीतकीनादबिन्दुतत्त्वप्रबोधनिर्व्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचानाम्नवेदगतानां दशसंख्यकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥" नगरीविशेषः । यथा, महाभारते । ३ । २५३ । ६ ।

"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा ।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")

त्रिपुरान्तकः, पुं, (त्रिपुरस्य अन्तकः ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, काशीखण्डे १०० अध्याये ।

"साङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ॥"

तथाच महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे ।

"आशुतोषो मित्रमर्थी शत्रूणां त्रिपुरान्तकः ॥")

त्रिपुरी, स्त्री, देशविशेषः । त्रिपुरा इति ख्याता । तत्पर्य्यायः । चेदिनगरी २ । इति हेमचन्द्रः । ४ । ४१ ॥

त्रिपुषा, स्त्री, (त्रीन् वातादिदोषचयान् पुष्णातीति । पुष + कः । ततष्टाप् ।) कर्क्कटिका । इति शब्दचन्द्रिका ॥

त्रिपृष्ठः, पुं, (त्रयो वंश्याः पृष्ठे पश्चिमप्रदेशेऽस्येति ।) राजभेदः । तत्पर्य्यायः । प्राजापत्यः २ । इति हेमचन्द्रः । ३ । ३५६ ॥

त्रिफला, स्त्री, (त्रयाणां फलानां समाहारः । अजादित्वात् "द्विगोः ।" ४ । १ । २१ । इति न ङीप् ।) मिलितसमभागहरीतकीविभीतकामलकीफलानि । तत्पर्य्यायः । त्रिफली २ फलत्रयम् ३ फलत्रिकम् ४ । इति राजनिर्घण्टः ॥ अस्या गुणाः । त्रिदोषनाशित्वम् । नात्युष्णत्वम् । मलभेदित्वञ्च । इति राजवल्लभः ॥ तन्नामगुणाः ।

"पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरा परा ।
चक्षुष्या दीपनी रक्ष्या विषमज्वरनाशिनी ॥"

इति भावप्रकाशः ॥

("हरीतक्याश्चामलक्या विभीतस्य फलस्तथा ।
त्रिफलेत्युच्यते वैद्यैर्वक्ष्यामि भागनिर्णयम् ॥
एकभागं हरीतक्या द्वौ भागौ च विभीतकम् ।
आमलक्यास्त्रिभागञ्च सङ्गृह्य प्रयोजयेत् ॥
त्रिफला कफपित्तघ्नी महाकुष्ठविनाशिनी ॥
आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी ।
वयःप्रदायिनी दृष्टा विषमज्वरनाशिनी ॥
सर्व्वरोगप्रशमनी मेधास्मृतिकरी परा ।
वक्ष्यामि योगयुक्तिञ्च रोगे रोगे पृथक् पृथक् ॥
वाते घृतगुडोपेता पित्ते समधुशर्करा ।
श्लेष्मणि त्रिकटूपेता मेहे समधुवारिणा ॥
कुष्ठे च घृतसंयुक्ता सैन्धवेनाग्निमान्द्यहा ।
चक्षुर्धावनके क्वाथो नेत्ररोगनिवारणः ॥
घृतेन हरते कण्डूं मातुलुङ्गरसैर्वमिम् ।
गुल्मार्शः शूलगुडैः सद्यः स्यादरुचकारकः ॥
क्षौद्रेण राजयक्ष्माणं पाण्डुरोगं गुडेन च ।
भृङ्गराजरसेनापि घृतेन सह योजितः ॥
बलीपलितहन्ता च तथा मेधाकरः स्मृतः ।
सक्षीरः सगुडः क्वाथो विषमज्वरनाशनः ॥
सशर्करो घृतक्वाथः सर्व्वजीर्णज्वरापहः ॥

एषा नराणां हितकारिणी च
सर्व्वप्रयोगे त्रिफला स्मृता च ।
सर्व्वामयानां शमनी च सद्यः
सतेजकान्तिं प्रतिमां करोति ॥
ग्रीथे तथा कामलपाण्डुरोगे
तथोदरे मूत्रयुता हिता च ।
हितातिसारे ग्रहणीविकारे
हिता च तक्रेण पलत्रिका च ॥
क्षीणेन्द्रिये यक्ष्मणि जीर्णरोगे
क्षीरेण युक्ता त्रिफला हिता च ।
स्यान्नेत्ररोगे च शिरोगदे च
कुष्ठे च कण्डूव्रणपीड़िते च ।
मूत्रग्रहे कामलकेऽग्निमान्द्ये
हिता जलेन त्रिफला हि कल्कः ॥

स शीतकाले गुड़नागरेण
सशर्करा क्षीरयुता तथोष्णा ।
वर्षासु शुण्ठी सहिता नराणां
फलत्रिका सर्व्वरुजाहरा स्यात् ॥"

इति महर्ष्याचेयभाषिते हारीतोत्तरे कल्पस्थाने त्रिफलाकल्पोनाम द्वितीयोऽध्यायः ॥)

त्रिफली, स्त्री, त्रिफला । इति राजनिर्घण्टः ॥

त्रिबलीकं, क्ली, (तिस्रो बल्यो यत्र । कप् ।) पायुः । इति हेमचन्द्रः । ३ । २७६ ॥

त्रिभण्डी, स्त्री, (त्रीन् वातादिदोषान् भण्डति परिहसतीति । भण्ड परिहासे + अण् । ततो ङीप् ।) त्रिवृता । इत्यमरः । २ । ४ । १०८ ॥ (पर्य्यायोऽस्या यथा,—

"त्रिवृद्भण्डाक्षी सुवहा त्रिभण्डी त्रिपुटा च सा ।
व्याघ्रादनी कूटरुग्णा निःसृता त्रिवृता कथा ॥"

इति वैद्यकरत्नमालायाम् ॥

यथाच सुश्रुते चिकित्सितस्थाने । १७ ।

"श्यामा त्रिभण्डी त्रिफला सुसिद्धं
हरिद्रयो रोधकटुत्रयेण च ।
घृतं सदुग्धं व्रणतर्पणेन
हन्यादृगर्तिं कोऽगतापि या स्यात् ॥")

त्रिभद्रं, क्ली, (त्रिषु गवाश्वदन्तश्मश्रुमर्द्दनेष्वपि भद्रं यस्मिन् ।) सुरतम् । इति त्रिकाण्डशेषः ॥

त्रिभुवनं, क्ली, त्रयाणां भुवनानां समाहारः । (तद्धितार्थेत्यादिना समासः । पात्रादित्वात् न ङीप् । पां २ । ४ । १७ ।) त्रिलोकी । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ११ । ३० ।

"तावन्निभुवनं सद्यः कल्पान्तेधितसिन्धवः ।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः ॥")

त्रिमदः, पुं, (त्रयाणां मदानां समाहारः । अभिधानात् पुंस्त्वम् ।) सुस्नाग्धचक्कविङ्गानि । इति वैद्यकम् ॥ (यथा, वैद्यकपरिभाषायाम् ।

विङ्गसुस्नाग्धचक्काख्य त्रिमदः समुदाहृतः ॥"

त्रिगुणितो मदः । विद्याधनाभिजनोत्पन्नं गर्व्वत्रयम् । यथा, भागवते । ३ । १ । ४३ ।

"नूनं तृणाग्नि त्रिमदोत्पथानां
महीं मुहुश्चालयतां चमूभिः ।
वधात् प्रपन्नार्त्तिजिहीर्षयेशो
युष्मेक्षतार्थं भगवान् कुरूणाम् ॥")

त्रिमधु, क्ली, (त्रयाणां मधूनां मधुराणां समाहारः ।) मिलितसितामाक्षिकसर्पींषि । तत्पर्य्यायः । मधुरत्रयम् २ मधुत्रयम् ३ । इति राजनिर्घण्टः ॥

त्रिमधुः, पुं, (मधुवाता इत्यादयस्त्रयो मधुशब्दा यत्र ।) ऋग्वेदैकदेशः । (यथा, ऋग्वेदे । १ । ९० । ६—८ ।

"मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य्यः ।
माध्वीर्गावो भवन्तु नः ॥")

मधुवातादिऋक्चयवेत्ता। यथा,—
"त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित्॥"
इति षड्लिंशब्राह्मणवर्णने मार्कण्डेयपुराणम्। ३१। २३॥ तद्व्रतस्थ। तद्व्रताचरणेन यस्तद्ध्यायी सोऽपि। इति विज्ञानेश्वरः॥ * ॥ आह्निकवारमधुग्रन्थोच्चारणविधिर्यथा,—
"गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृति-
पूर्विकाम्।
मधुवाता इति ऋचं मध्वित्येतत् त्रिकं जपेत्॥"
इति आह्निकतत्त्वे मिताक्षराधृतपारस्करवचनम्॥)

त्रिमार्गी, स्त्री, त्रयाणां मार्गाणां समाहारः। त्रिपथम्। इति व्याकरणम्॥

त्रिमुकुटः, पुं, (त्रीणि मुकुटानीव शृङ्गाण्यस्य।) त्रिकूटपर्व्वतः। इति हेमचन्द्रः। ४। ६६॥

त्रिमुखः, पुं, (त्रीणि मुखानि यस्य।) वुद्ध-विशेषः। इति हेमचन्द्रः। १। ४१॥

त्रिमुखा, स्त्री, (त्रीणि मुखानि यस्याः।) वुद्ध-देवतामेदः। सा मायादेवी। तत्पर्य्यायः। मारीची २ वज्रकालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ मौचिरथा ७। इति त्रिकाण्डशेषः॥

त्रिमूर्त्तिः, पुं, (तिस्रो मूर्त्तयो यस्य।) वुद्धः। इति त्रिकाण्डशेषः॥ त्रि, ब्रह्मविष्णुशिवात्मक-मूर्त्तित्रयवान्। यथा,—
"त्रिमूर्त्तेर्यः सर्गस्थितिविलयकर्म्माणि तनुते।"
इति गङ्गेशोपाध्यायः॥
(यथाच कुमारे। २। ४।
"नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने॥")

त्रियष्टिः, पुं, (त्रिषु वातपित्तकफात्मकेषु दोषेषु यष्टिरिव तन्नाशकत्वात्।) चेत्रपर्पटी। इति रत्नमाला॥

त्रियामकं, क्ली, (त्रीन् धर्म्मार्थकामरूपान् त्रिवर्गानपि यमयति नाशयतीति। यम+णिच्+खुल्।) पापम्। इति शब्दमाला॥

त्रियामा, स्त्री, (त्रयो यामाः प्रहरा यस्याः।)
"त्रियामां रजनीं प्राहुस्त्र्यब्दाद्यन्तचतुष्टयम्॥"
इति वचनात् आद्यन्तयोर्द्वयामयोर्वेष्टाकालत्वेन दिनप्रायत्वात् तथात्वम्।) रात्रिः। (यथा, हरिवंशे। १०२। २६।
"स मत्तो वलिनां श्रेष्ठो रराणाघूर्णिताननः।
त्रैग्रिरीषु त्रियामासु यथा खेदालसः गजः॥"
त्रिप्रहरान्विते, त्रि। यथा, गोः रामायणे। २। १०। १७।
"त्रियामापि भृशार्त्तस्य सा रात्रिरभवत्तदा।
तथा विलपतस्तस्य राज्ञो वर्षशतोपमा॥")
हरिद्रा। इत्यमरः। २। ६। ४१॥ यमुना। नीली। लाक्षाचित्रत्। इत्युणादिकोषः॥

त्रियुगः, पुं, (त्रीणि युगानि सत्यत्रेताद्वापररूपाणि आविर्भावकालोऽस्य।) विष्णुः। यथा, भागवते। ७। ६। ३८।
"इत्थं वृतिर्य्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान्।
धर्म्मं महापुरुष! पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्॥"
"एकस्मिन्नेव इत्यादिभिरृभिः शोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधितो न खत इति तदुपसंहरति इत्यमिति विभावयसि पालयसि हंसि घातयसि। कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः यतस्त्रिष्वेव युगेष्वाविर्भावात् स एवभूतस्त्वं त्रियुग इति प्रसिद्धः।" इति तट्टीकायां श्रीधरस्वामी॥ (तथाच तत्रैव। ३। २४। २६।
"स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्।
विविक्त उपसंगम्य प्रणम्य समभाषत॥"
वसन्तप्राट्शरद्रूपकालत्रये, क्ली। यथा, वाजसनेयसंहितायाम्। १२। ७५।
"या ओषधीः पूर्व्वजाता देवेभ्यस्त्रियुगं पुरा॥"
"युगशब्दः कालवाची। त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च।" इति तद्भाष्ये महीधरः॥ कृतत्रेताद्वापररूपयुगत्रयम्। इति ऋग्वेदस्य। १०। ६७। १। भाष्ये सायनः॥ षड्ऐश्वर्य्यशालिनि, त्रि। यथा, महाभारते। ३। ८६। ५।
"त्रियुगौ पुष्करीकाक्षौ वासुदेवधनञ्जयौ॥"
"त्रियुगौ धर्म्मस्य भार्य्यायां मूर्त्तिसंज्ञायां कृतयुगेऽवतीर्णौ नरनारायणौ तावेव द्वापरान्ते केशवार्জ্জुनौ इति पुराणपुरुषावेतौ नास्मदादिवन्मानुषाविति भावः। यद्वा, त्रीणि युगानि युगलानि षड्ऐश्वर्य्याणि भगसंज्ञानि वा षड्ङ्गानि वा ययोस्तौ त्रियुगौ॥" इति तट्टीकायां नीलकण्ठः॥)

त्रियूहः, पुं, कपिलाम्रः। इति हेमचन्द्रः॥ (यथा, अश्ववैद्यके। ३। १०२।
"नीलो नीलक एवाश्वस्त्रियूहः कपिलः स्मृतः॥")

त्रिरात्रं, क्ली, रात्रित्रयम्। तिस्रां रात्रीणां समाहारः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, मनुः। ४। ११६।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं शैचमुच्यते॥
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु॥")

त्रिरेखः, पुं, (तिस्रो रेखा यत्र।) शृङ्गः। इति हेमचन्द्रः। ४। २७२॥

त्रिलवणं, क्ली, (त्रयाणां लवणानां समाहारः। पात्रादित्वात् न ङीप्।) सैन्धवं विड्ं रुचकं मिलितैस्तल्लवणत्रयम्। इति राजनिर्घण्टः॥
("सिन्धुसौवर्चलञ्चैव विड्ं सामुद्रमौद्भिदम्।
एक-द्वि-त्रि-चतुः-पञ्च लवणानि क्रमादिह॥"
इति वैद्यकपरिभाषा॥)

त्रिलोकी, स्त्री, त्रयाणां लोकानां समाहारः। ("द्विगोः।" ४। १। २१। इति ङीप्।) लोकत्रयम्। यथा, भूर्लोकः भुवर्लोकः स्वर्लोकश्च। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, भागवते। १। ५। ७।
"त्वं पर्य्यटन्नर्क इव त्रिलोकी-
मन्तश्चरो वायुरिवात्मसाक्षी॥")

त्रिलोकेशः, पुं, (त्रयाणां लोकानामीशः।) सूर्य्यः। इति शब्दचन्द्रिका॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८२।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥"
"त्रयो लोकास्तदात्मानः स्वेषु स्वेषु कर्म्मसु वर्त्तन्त इति त्रिलोकेशः॥" इति श्रीधरभाष्यम्॥ महादेवः। यथा, महाभारते। १४। ८२७।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥")

त्रिलोकाधिपतौ, त्रि। यथा, तत्रैव। ३। ८४। ११७।
"अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम्।
अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति॥")

त्रिलोचनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि लोचनानि यस्य।) शिवः। इत्यमरः। १। १। ३४॥ (यथा, कुमारे। ५। ७२।
"वपुर्विरूपाक्षमलक्षणञ्च ता
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि! मृग्यते
तदस्ति किं यत्त्रमपि त्रिलोचने॥"
लोचनत्रयविशिष्टे, त्रि। यथा, माघे। १। ७०।
"स बाल आधीड्वृषा चतुर्भुजो
सुखेन पूर्व्वेद्युरभिख्यिलोचनः॥")

त्रिलोचना, स्त्री, (त्रीणि लोचनानि यस्याः।) वुद्धदेवीभेदः। इति त्रिकाण्डशेषः। दुर्गा च॥ (सा च गायत्रीस्वरूपिणी। यथा, देवीभागवते। १२। ६। ६७।
"त्रिकालज्ञानसम्पन्ना त्रिवली च त्रिलोचना॥")

त्रिलोचनाष्टमी, स्त्री, (त्रिलोचनाय त्र्यम्बकपूजायै या अष्टमी।) गौणचान्द्रज्येष्ठशुक्लाष्टमी। यथा,—
"ज्येष्ठे मासि नृपश्रेष्ठ! शुक्लाष्टम्यां त्रिलोचनम्।
यः पूजयति देवेशमीशलोकं स गच्छति॥"
इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम्॥ अपि च।
"ज्येष्ठे माससिते पक्षे अष्टम्याञ्च महेश्वरि!।
शिवार्चने च तल्लोकं लभते नात्र संशयः॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥

त्रिलोचनी, स्त्री, (त्रीणि लोचनानि यस्याः।) दुर्गा। इति पुराणम्॥

त्रिलोहकं, क्ली, (त्रयाणां लोहकानां समाहारः।) सुवर्णं रजतं ताम्रं एतद्धातुत्रयम्। इति राजनिर्घण्टः॥

त्रिलौही, स्त्री, (त्रीणि लौहानि साधनत्वेनास्त्यस्याः। अर्श। गौरादित्वात् ङीष्।) मुद्राविशेषः। यथा, अथ मन्त्रिणां हितार्थाय त्रिलौही मुद्रा निरूप्यते।
"सोमसूर्य्याग्निरूपाः स्युर्वर्णा लौहत्रयं तथा।
रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्तान्ने हुताशनः॥
लौहभागाः समुद्दिष्टाः खराद्यक्षरसंख्यया।

तैलौंहैः कारयेन्मुद्रामसङ्कलितसङ्गताम् ।
एषु स्वराः स्मृताः सौम्याः सप्तार्णाः सौराः
शुभोदयाः ।
आग्नेया व्यापकाः सर्व्वे सोमसूर्य्याग्निदेवताः ॥
स्वराः षोड़श विख्याताः सप्तार्णस्ते पञ्चविंशतिः ।
व्यापका दश ते कामधनधर्म्मप्रदायिनः ॥
साष्टं सहस्रं संजप्य सृष्ट्वा तां जुहुयात्ततः ।
तस्यां सम्पातयेन्नन्दी सर्पिषा पूर्व्वसंख्यया ॥
निःक्षिप्य कुम्भे तां सुद्रामभिषेकोक्तवर्त्मना ।
आवाह्य पूजयेद्देवीमुपचारैर्विधानतः ॥
अभिषिच्य विनीताय दद्यात्तां सुद्रिकां गुरुः ।
इयं सदा क्षुद्ररोगविषज्वरविनाशिनी ॥
बालचौरग्रहादिभ्यो रक्षां कुर्य्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः ॥
मन्त्रसिद्धिकरी पुंसां चतुर्व्वर्गफलप्रदा ।
धारयन्मनुजो नित्यं देवतुल्यो भवेद्भुवि ॥”
इति तन्त्रसारः ॥

त्रिवर्गः, पुं, (त्रयाणां वर्गः समूहः ।) धर्म्मकामार्थाः । इत्यमरः । २ । ७ । ५८ ॥ (यथा, महाभारते । १ । १८१ । ३ ।
“यो हि कारणतः क्रोधं संजातं शमुमर्हति ।
नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥”)
त्रिफला । त्रिकटु । (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
“भागान् दशैतान् विपचेद्विधिज्ञो
दत्त्वा त्रिवर्गं मधुरञ्च ऋतुस्थम् ।”)
दृष्टिस्थानत्रयाः । (यथा, महाभारते । १२ । ६६ । ६६ ।
“त्रिवर्गोऽपि यः प्रोक्तस्तमिहैकमनाः शृणु ।
त्रयः स्थानेषु दृष्टिश्च त्रिवर्गः परमक्षया ॥”)
सत्त्वरजस्तमांसि । इति मेदिनी । गे, ३० ।
सुनीतिः । इति शब्दरत्नावली ॥

त्रिवर्षकं, क्ली, (त्रयो वर्षाः सन्त्यवयवादौ यस्य । कप् ।) गोक्षुरकः । त्रिफला । (यथा, सुश्रुते । १ । ४४ ।
“त्रिवर्षकचूर्णयुक्तमेतद्
गुडेन लिह्यादनवेन चूर्णम् ॥”)
त्रिकटु । इति मेदिनी । के, १६२ । (ब्राह्मणादिवर्णत्रये, श्यामरक्तपीतालके वर्णत्रये च ॥)

त्रिवर्षिका, स्त्री, (त्रीणि वर्षाणि वयो यस्याः सा त्रिवर्षा । ततः स्वार्थे कन् । टापि अत इत्वञ्च ।) त्रिफलायुक्ता । त्रिवर्षा गौः । इति हेमचन्द्रः । ४ । ३३८ ॥

त्रिवलिः, स्त्री, (त्रिभुवित्रा वलिश्चक्षरङ्गः ।) जठरावयवविशेषः । (यथा, देवीभागवते । ५ । ८ । ७१ ।
“ऐन्द्रेणाङ्गुलिमात्रेण मध्यं यातं त्रिवलिसंयुतम् ।”
इदिकारादिति पक्षे ङीपि त्रिवलीत्यपि ।) यथा,
“त्रिवलीवलयोपेताम् ॥”
इति जगद्धात्रीध्यानम् ॥

त्रिविक्रमः, पुं, (त्रीन् लोकान् विशेषेण क्रामति व्याप्नोतीति । वि + क्रमं + अच् । यद्वा, त्रिषु लोकेषु बलिबन्धनार्थं भूयोमखमर्गेषु क्रमः पादन्यासो यस्य ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा, महाभारते । १३ । १४६ । ६६ ।
“आनन्दो नन्दनो नन्दः सत्यधर्म्मत्रिविक्रमः ॥”
“त्रयो विक्रमाश्चित्रेषु लोकेषु यस्य स त्रिविक्रमः ।
‘त्रीणि पदानि विचक्रमे’ इति श्रुतेः ।
‘त्रिरित्येवं त्रयो लोकाः कीर्त्तिता मुनिसत्तमैः ।
विक्रामंस्तु ततः सर्व्वांस्त्रिविक्रमोऽसि जगार्द्दन ॥’
इति हरिवंशे ॥” इति शब्दरत्नावली ॥)
त्रिविष्टपं, क्ली, (त्रयीयं विष्टपं भुवनम् ।) त्रिपिष्टपम् । स्वर्गः । इत्यमरटीकायां स्वामी ॥ (यथा, रामायणे । २ । १०८ । ६ ।
“विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥”)
त्रिभुवनञ्च ॥

त्रिविष्टपसत्, [द्] पुं, (त्रिविष्टपे स्वर्गे सीदतीति । सद् + क्विप् ।) त्रिपिष्टपसत् । (देवः ।) इति हलायुधः ॥

त्रिवीजः, पुं, (त्रीणि त्रीणि बीजानि यस्य ।) श्यामाकः । इति राजनिर्घण्टः ॥

त्रिवृत्, स्त्री, (त्रीण्यवयवान् वृणोतीति । वृ + क्विप् तुक् च ।) लताविशेषः । तेउड़ी इति भाषा । तत्पर्य्यायः । सर्व्वानुभूतिः २ सुवहा ३ त्रिपुटा ४ त्रिवृता ५ त्रिभण्डी ६ रेचनी ७ । इत्यमरः । २ । ४ । १०८ ॥ सुवहा ८ सरणा ९ सरसा १० त्रिपुटी ११ रोचनी १२ । एते त्रिवृता सामान्ये शुक्लत्रिवृतायामिति केचित् । इति भरतः ॥ मालविका १३ मस्करी १४ श्यामा १५ अर्द्धचन्द्रा १६ विदला १७ सुषेणी १८ कालिङ्गिकम् १९ कालमेघी २० काली २१ त्रिवेला २२ त्रिवृत्तिका २३ । इति राजनिर्घण्टः ॥ श्वेता २४ सारा २५ । इति शब्दरत्नावली ॥
श्यामायाः पर्य्यायः । श्यामा १ पालिन्दी २ सुषेविका ३ काला ४ मस्करविदला ५ अर्द्धचन्द्रा ६ कालमेघिका ७ । इत्यमरः । २ । ४ । १०८ ॥ पालिन्दी ८ कालमेघिका ९ । इति भरतः ॥ श्वेतायाः पर्य्यायः । त्रिवृत् १ रुक्षाक्षी २ सुवहा ३ त्रिभण्डी ४ त्रिपुटा ५ ॥ अरुणायाः पर्य्यायः । व्याघ्रादनी १ कुटरुहा २ निःस्रुहा ३ त्रिवृता ४ अरुणा ५ । इति रत्नमाला ॥ सामान्यत्रिवृतागुणाः । कटुत्वम् । उष्णत्वम् । श्लेष्मश्लेष्मोदरार्त्तिकुष्ठकण्डूव्रणनाशित्वम् । विरेचने प्रशस्तत्वञ्च । इति राजनिर्घण्टः ॥ अरुणवर्णत्रिवृद्गुणाः । स्वादुत्वम् । कषायत्वम् । मृदुत्वम् । रेचनत्वम् । रूक्षत्वम् । कटुत्वम् । दोषपाके पित्तकफापहत्वञ्च । अस्याश्चाख्यान्तरगुणा विज्ञेया त्रिवृता सिता । इति राजवल्लभः ॥
श्वेतत्रिवृद्गुणाः । विरेचनत्वम् । स्वादुत्वम् । उष्णत्वम् । वायुकारित्वम् । रूक्षत्वम् । पित्तज्वरश्लेष्मपित्तशोफोदरापहत्वञ्च । श्यामत्रिवृद्गुणाः । श्वेताद्गुणगुरुत्वम् । तीव्रत्वम् । विरेचनत्वम् । मूर्च्छादाहमदश्रान्तिकण्ठोत्कर्षवैशद्यकारित्वञ्च । इति भावप्रकाशः ॥ (त्रिभिर्युक्ते, त्रि । यथा, ऋग्वेदे । १ । ३४ । ६ ।
“क्व त्री चक्रा त्रिवृतो रथस्य ॥”
यथा च मनुः । २ । ४२ ।
“मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ॥”)

त्रिवृत्करणं, क्ली, (त्रिवृतस्त्रयवयवस्य करणं मिश्रीकरणम् ।) त्रिभिरप्तेजसां मिश्रीकरणम् । यथा, “तेजोजलक्षितिमयः प्रत्येकं द्वेधा विभज्य एकस्मिन्नर्द्धे खेतरयोरर्द्धार्द्धं प्रक्षिपेत् ।” इति मोक्षधर्म्मटीकायां नीलकण्ठः ॥

त्रिवृत्पर्णी, स्त्री, (त्रीन् दोषान् नाशयत्येन वृणोति प्राप्नोतीति त्रिवृत् त्रिदोषघ्नम् । त्रिवृत् पर्णं यस्याः । ङीप् ।) हिलमोचिका । इति शब्दचन्द्रिका ॥ (हिलमोचिकाशब्दे विवृतिरस्माभिर्द्रष्टव्या ॥)

त्रिवृता, स्त्री, (त्रिभिरवयवैर्वृता ।) त्रिवृत् । इत्यमरः । २ । ४ । १०८ ॥ (अस्याः पर्य्यायो यथा,—
“त्रिभण्डी त्रिवृता श्यामा सुरभा कोटरा तथा ।
सर्व्वानुभूतिः सुवहा शब्दैः पर्य्यायवाचकैः ॥”
“त्रयश्चणं त्रिफला हिङ्गु कार्षिकं त्रिवृतायुतम् ।
सौवर्च्चलार्द्धकर्षञ्च पलार्द्धाच्चावचेतसाम् ।
तच्चूर्णं शर्करायुक्तं मद्येनाक्षेन वा पिबेत् ।
गुल्मपार्श्वार्त्तिनुत् स्निग्धं जीर्णे चाद्याद्यथौदनम् ॥”
“तुल्याम्बं त्रिवृताकल्कं स्निग्धं गुल्महरं घृतम् ।
मूलं श्यामात्रिवृतयोः पचेदामलकैः सह ।
जले तेन कषायेण पक्त्वा सर्पिः पिबेन्नरः ॥”
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥)

त्रिवेणी, स्त्री, (तिस्रो वेणयः वारिप्रवाहा विश्लिष्टाः संश्लिष्टा वा यत्र ।) स्थानविशेषः । यत्र गङ्गया यमुनासरस्वत्योर्वियोगः । सा दक्षिणप्रयागः । तस्य सीमानिर्णयः । यथा,—
“प्रयुक्तस्य प्रदातुं याम्ये सरस्वत्यास्तथोत्तरे ।
तद्दक्षिणप्रयागस्तु गङ्गातो यमुना मता ॥”
इति प्रायश्चित्ततत्त्वम् ॥
इयं शुक्लवेणीति कथ्यते । प्रयागे शुक्लवेणी । (अत्र गङ्गया यमुनासरस्वत्योः सङ्गमात् ॥ ॥ हठयोगोक्तेडापिङ्गलासुषुम्नाकल्पपरिभाषिकनदीत्रयसङ्गमस्थानम् । यथा, हठयोगप्रदीपिकायाम् । ३ । २४ ।
“कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः ॥”
इदन्तत्वादुवा ङीवेति त्रिवेणिरपि पाठः ॥)

त्रिवेला, स्त्री, (तिस्रो वेला अवयवसीमानो यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥

त्रिशङ्कुः, पुं, (त्रीणि शङ्कूनि यतिक्रमणानि यस्य ।) सूर्य्यवंशीयराजविशेषः । स तु इक्ष्वाकुवंशोद्भवपृथुराजपुत्रः । (अस्य नामनिरुक्तिर्यथा, हरिवंशे । १३ । १६ ।
“एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ॥”)

एष वशिष्ठमाह अहं सशरीरेण स्वर्गं गन्तुं यजेयं वशिष्ठ एतदशक्यमित्याह ततो राजा तस्य पुत्रानुवाच सशरीरो यज्ञेन स्वर्गं यथाभ्रुयां तथा कुरुत यदि भवद्भिः परित्यक्तस्तदान्यं गुरुसुपासिष्ये वशिष्ठपुत्रास्तच्छ्रुत्वा राजानमूचुर्वशिष्ठो भगवान् अशक्यमिति यत् प्राह तदस्माभिः कथं शक्यम् । राजोवाच यदुमन्यां गतिं गमिष्यामि तच्छ्रुत्वा ऋषिपुत्रा राजानं शेपुः श्वपाकाख्यो भविष्यसि । ततस्तस्यां रात्र्यामतीतायां स चाण्डालदर्शनो भूत्वा विश्वामित्रं शरण्यमाययौ विश्वामित्रस्तं क्षीयद्यज्ञेन याजयामास तस्मिन् यज्ञे देवा भागार्थं नागच्छन् ततो विश्वामित्रः क्रोधात् राजानमब्रवीत् मया वाक्यात् प्रभृति यत्तपः कृतं तेन त्वं दिवं व्रज तदा राजा सशरीरो दिवं ययौ । तदा शक्रस्तमुवाच त्रिशङ्को ! त्वं भूमौ पत ततोऽवाक्शिराः पतन् राजा पाहीति विश्वामित्रमुवाच विश्वामित्रस्तिष्ठेति तस्मात् स्वर्गदत्रिशमार्गेऽपरान् सप्तर्षीन् दक्षापरं नक्षत्रचक्रं सप्तसप्तकमे देवाः सम्भ्रान्ता ऋषिमपुरयं सशरीरः स्वर्गं गन्तुं नार्हति विश्वामित्रस्तानुवाच अहमस्य स्वर्गारोहणं प्रतिज्ञाय कथमनृतं करिष्यामि यतो यावल्लोकाः स्थास्यन्ति तावदस्मिन् नक्षत्राण्यत्रैव तिष्ठन्तु त्रिशङ्करप्यवाक्शिरास्तिष्ठतु । इति रामायणम् ॥ * ॥ विड़ालः । शलभः । इति मेदिनी । के, १०१ ॥ चातकपक्षी । इति शब्दरत्नावली ॥ खद्योतः । इति शब्दमाला ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १०२ ।
"अनेकपाच्च कापाली त्रिशृङ्गरजितः शिवः ॥")

त्रिशङ्कुजः, पुं, (त्रिशङ्कोर्जायते इति । जन + डः ।) हरिश्चन्द्रराजः । इति हेमचन्द्रः । ३ । ३६५ ॥

त्रिशङ्कुयाजी, [न्] पुं, (त्रिशङ्कुं स्वर्गं यः प्रार्थयन्नीयराजविशेषं याजयतीति । यज + णिच् + णिनिः ।) विश्वामित्रः । इति हेमचन्द्रः । ३ । ५१४ ॥

त्रिशरणः, पुं, (त्रीणि शरणान्यस्येति ।) जिनः । इति त्रिकाण्डशेषः ॥

त्रिशर्करा, स्त्री, (त्रिभिर्गुणिता शर्करा । शाकपार्थिवादित्वात् समासः ।) मिलितगुड़ोत्पन्ना हिमोत्था मधुरा । इति राजनिर्घण्टः ॥

त्रिशला, स्त्री, (तिस्रः शाला यस्याः । पृषोदरादित्वात् साधुः ।) वृत्ताहैक्ष्वाकुविशेषः । सा वर्द्धमानमाता । इति हेमचन्द्रः । २ । ४१ ॥

त्रिशाखपत्रः, पुं, (त्रिशाखं त्रिदलं पत्रमस्य ।) बिल्वः । इति राजनिर्घण्टः ॥

त्रिशिखं, क्ली, (तिस्रः शिखा यस्य ।) त्रिशूलम् । किरीटम् । इति हेमचन्द्रः ॥

त्रिशिखः, पुं, (तिस्रः शिखा अस्य ।) राक्षसविशेषः । स रावणपुत्रः । इति हेमचन्द्रः ॥ बिल्वः । इति राजनिर्घण्टः ॥ (तामसमन्वन्तरस्य इन्द्रः । यथा, भागवते । ८ । १ । २८ ।
"सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ।
ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥"

त्रिशिराः, [स्] पुं, (त्रीणि शिरांसि मस्तकानि यस्येति ।) कुबेरः । इति हेमचन्द्रः । २ । १०३ ॥ खरः । यथा,—
"त्रिशिरास्ते प्रयच्छोऽहं येतु ते मच्चराद्भयम् ॥"
इति श्रीभागवतम् ॥
रावणपुत्रविशेषः । (यथा, रामायणे । ६ । १२५ । ६ ।
"अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥")
खरसेनापतिः । इति रामायणम् ॥ (यथा, रघुवंशे । १२ । ४७ ।
"तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ॥"
खगामखातरक्षुः प्रजापतेः पुत्रः । यथा, महाभारते । ५ । ६ । २ ।
"त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः ।
सुपुत्रं वै त्रिशिरसमिन्द्रद्रोहात् किलाहनत् ॥")
असुरविशेषः । यथा, तत्रैव । ६ । ३१ । १२ ।
"वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो ॥"
शिखात्रयविशिष्टे, त्रि । यथा, तत्रैव । २६ । १४७ । ५४ ।
"त्रिशिराश्चास्य देवस्य शातकुम्भमयो द्रुमः ।
ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः ॥")

त्रिशीर्षकं, क्ली, (त्रीणि शीर्षाणि यस्य । कप् ।) त्रिशूलम् । इति हेमचन्द्रः । ३ । ४५१ ॥

त्रिशूलं, क्ली, (त्रीणि शूलानि इव अवयवानि यस्य ।) अस्त्रविशेषः । तत्पर्य्यायः । त्रिशिखम् २ । इति मेदिनी । खे, ६ ॥ शूलम् ३ त्रिशीर्षकम् ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते । २ । ३० । ४६ ।
"चक्राणि परिघाश्चैव त्रिशूलानि परश्वधान् ॥")

त्रिशूली, [न्] पुं, (त्रिशूलमस्त्रमस्यास्येति । त्रिशूल + इनिः ।) शिवः । यथा,—
"त्र्यक्षोऽमेद्यस्त्रिशूली च वृषकेतुर्महाबलः ॥"
इति स्कन्दपुराणे नीलकण्ठस्तवः ॥
(त्रिशूलधारिणि, त्रि । स्त्रियां ङीप् । यथा, हरिवंशे । १६१ । ११ ।
"त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम् ॥")

त्रिशृङ्गः, पुं, (त्रीणि शृङ्गाणि यस्य ।) त्रिकूटपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, ब्रह्माण्डे । ३६ । १२ ।
"त्रिशृङ्गो जरधिश्चैव पर्व्वतावुत्तरौ वरौ ॥")
त्रिकोणः । यथा, कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्त-रिति सारसमुच्चयः ॥

त्रिशृङ्गी, [न्] पुं, (त्रीणि शृङ्गाणीव सन्त्यस्येति । त्रिशृङ्ग + इनिः ।) रोहितमत्स्यः । इति शब्दार्थकल्पतरुः ॥

त्रिशृङ्गी, स्त्री, (त्रिषु स्थानेषु शृङ्गायते जड़ीक्रियते इति । शृङ्ग जड़ीकरणे + क्विप् । पृषोदरादित्वात् साधुः ।) छन्दोविशेषः । इति छन्दोमञ्जरी ॥ (यथा, वाजसनेयसंहितायाम् । ६ । ३३ ।
"इन्द्र एकादशाक्षरेण त्रिष्टुभसृजयत्तासुष्टेषम् ॥")
अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् । अस्योत्पत्तिविवरणं यथा, श्रीभागवते । ३ । १२ । २६ ।
"तस्योच्छिगासील्लोमभ्यो गायत्री च त्वचो विभोः ।
त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ॥
मज्ज्ञायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥"

त्रिसन्धिः, स्त्री, (त्रयः सन्धयो विकाशकालाः यस्य ।) पुष्पविशेषः । तत्पर्य्यायः । सान्ध्यकुसुमा २ सन्धिवल्ली ३ सदाफला ४ त्रिसन्ध्यकुसुमा ५ कान्ता ६ सुकुमारा ७ सन्धिला ८ । सा त्रिविधा । रक्ता १ सिता २ असिता च ३ । अस्या गुणाः । कफकासहरत्वम् । रूक्षत्वम् । त्रिदोषशमनत्वञ्च । इति राजनिर्घण्टः ॥

त्रिसन्ध्यं, क्ली, (तिसृणां सन्ध्यानां समाहारः । आवश्यकोवेति पाक्षिकी स्त्रीत्वता ।) पूर्व्वाह्णमध्याह्नापराह्णकालः । इत्यमरः । १ । ४ । ३ ॥ अस्य रूपान्तरम् । त्रिसन्ध्यी । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ३ । ८२ । २१ ।
"सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन ! ।
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।
गन्धर्व्वाप्सरसश्चैव नित्यं सन्निहिता विभो ! ॥")

त्रिसन्ध्याव्यापिनी, स्त्री, (त्रिसन्ध्यं व्याप्नोतीति । वि + व्याप् + णिनि + ङीप् ।) त्रिसन्ध्यघटकीभूतयावत्कालव्यापिनी तिथिः । यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पुण्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति पराशरीयेण त्रिसन्ध्यव्यापित्वेन नियमाभिधानं तदपवादकम् । इति तिथ्यादित्वम् ॥ तयोर्युग्मसांमुख्योरपवादकं तदपवादकम् । इति तट्टीका ॥

त्रिसमं, क्ली, (त्रीणि हरीतकीनागरगुड़ानि समानि यत्र ।) समत्रयम् । समहरीतकीनागरगुड़रूपम् । इति राजनिर्घण्टः ॥

त्रिसरः, पुं, (त्रिभिः सीयते इति । सृ + अप् ।) शरः । इति हेमचन्द्रः । ३ । ६२ ॥

त्रिसवनं, क्ली, (त्रयाणां सवनानां कालानां समाहारः ।) त्रिकालम् । इति प्रायश्चित्ततत्त्वम् ॥

त्रिसवनस्नायी, [न्] पुं, (त्रिसवने त्रिकाले स्नातीति । स्ना + णिनिः ।) त्रिकालस्नायी । इति स्मृतिः ॥

त्रिसिता, स्त्री, (त्रिगुणिता सिता शर्करा ।) त्रिशर्करा । इति राजनिर्घण्टः ॥

त्रिसौत्यं, क्ली, (त्रिवारं सौत्यया सहितम् । "नौवयोधर्म्मेति ।" ४ । ४ । ६१ । इति यत् ।) वारत्रयसहचरितम् । इत्यमरः । २ । ६ । ६ ॥

त्रिसुगन्धि, क्ली, (त्रयाणां सुगन्धिद्रव्याणां समाहारः।) त्रिजातकम्। इति राजनिर्घण्टः॥ (यथा, अश्ववैद्यके। १२। ७३।
"लवंगलाजचूर्णयोगे त्रिसुगन्धि त्रिजातकम्।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते॥")

त्रिसुपर्णः, पुं, वह्वृचानां वेदभागः। तद्व्रतञ्च। तद्योगात् पुरुषोऽपि त्रिसुपर्णः। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः।३। १८५।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्॥")

त्रिस्रोताः, [स्] स्त्री, (त्रीणि स्रोतांसि यस्याः। यद्वा, त्रिषु लोकेषु स्वर्गमर्त्यरसातलेषु स्रोतांसि यस्याः।) गङ्गा। (यथा, माघे। ३। १०।
"अङ्कुरनिर्गतमिवोर्द्धमुचे-
स्त्रिस्रोतसः सन्ततधारमम्भः॥")

नदीभेदः। इति मेदिनी। से, ५४॥

त्रिहलं, त्रि, (त्रिवारं हलेन कृष्टम्। हल+"मतजनहलात् करणजन्यकर्षणे।" ४।४।६७। इति यत्।) वारत्रयकृष्टक्षेत्रम्। तत्पर्य्यायः। त्रिगुणाकृतम् २ तृतीयाकृतम् ३ त्रिसीत्यम् ४। इत्यमरः। २। ६। ६॥

त्रिहायणी, स्त्री, (त्रयो हायना यस्याः। "दामहायनान्ताच्च।" ४। १। २७। इति ङीप्। "त्रिचतुर्भ्यो हायनस्य।" इति णत्वम्।) त्रिवर्षा गौः। इत्यमरटीकायां रमानाथः॥ (यथा, कात्यायनश्रौतसूत्रे। २२। ६। १३।
"वत्सतर्य्यश्च त्रिहायण्योऽप्रीताः पञ्चवर्षा राजीव एधयो नवनीतघृतयोरुषाः पिप्पलाः सारङ्गाः॥") द्रौपदी। यथा,—
"कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदीच्छाया तेन कृष्णा त्रिहायणी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(त्रिवत्सरे, त्रि। यथा, महाभारते। ३। २३६। ६।
"अथ संसारणं कृत्वा लक्षयित्वा त्रिहायणान्।
दत्तो गोपालकैः प्रीतो अहरत् कुरुनन्दनः॥")

त्रुट, क ङ } छिदि। इति कविकल्पद्रुमः॥
त्रुट, य शि } (चुरां-आत्मं-दिवां तुदां-परं-अवयवद्विधाभावमात्रे अर्कं-छेदनमात्रे सर्कं-सेट्।) द्वौ दन्त्यवर्गप्रथमादी। क ङ, चोटयते। य, त्रुत्यति चोटिष्यति। तुदादन्तर्गणस्यैव कुटादित्वमिति। दिवादिपक्षे न कुटादित्वम्। शि, त्रुटति अत्रुटीत्। शेषस्तु विदीर्णभावेऽपि। यथा, चुक्षुद्भीमधनुःकठोरनिनद इति महाकाटकम्। मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थले। कचिच्छनीभावेऽपि यथा। आहत्युते यदि वचस्त्रुट्यति वासवस्तदा जघने इत्युद्भटः। इति दुर्गादासः॥

त्रुटिः, स्त्री, (त्रुट्यते इति। त्रुट्+"इसुसुक्तान्तात् कित्।" उणा। ४।२१८। इति इन् सच कित्।) सुदेला। (यथा, सुश्रुते। उत्तरतन्त्रे। ५२।
"उत्कारिकां सर्षपि नागराढ्यां
पक्वां समूलैस्त्रुटिकोलमात्रैः॥"

अस्याः पर्य्यायो यथा,—
"वयस्था तीक्ष्णगन्धा च सूक्ष्मैला त्रिपुटा त्रुटिः॥"
इति वैद्यकरत्नमालायाम्॥)
अल्पम्। संशयः। कालभेदः। स च ह्रस्वाक्षरचतुर्भागमयहृत्तात्मकः। इत्यमरः।३।३।३७॥ त्रुट्यात्मकः। इति तट्टीकायां स्वामी॥ यथा, भागवते। ३। ११। ५।
"अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्।
त्रसरेणुत्रिकं भुङ्क्ते यः कालः सा त्रुटिः स्मृता॥")

त्रुटिबीजः, पुं, (त्रुटिरल्पं बीजमस्य।) कपुः। इति शब्दमाला॥

त्रुटी, स्त्री, (त्रुटि+"कृदिकारादक्तिनः।" इति वा ङीष्।) त्रुटिः। इत्यमरटीकायां भरतः॥

त्रुनृप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्पति। इति दुर्गादासः॥

त्रुनृप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्फति। इति दुर्गादासः॥

त्रुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोपति। इति दुर्गादासः॥

त्रुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोफति। इति दुर्गादासः॥

त्रेता, स्त्री, (त्रीन् भेदान् एति प्राप्नोतीति। यद्वा, त्रित्वमिता। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, हरिवंशे। २०५। ५।
"त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः।
अतस्त्रेतात्वमापन्नो यदेकस्त्रिविधः स्मृतः॥")
दक्षिणाग्निः गार्हपत्यः आहवनीयः एकोऽग्निरिदमग्नित्रयम्। इत्यमरः।२।७।२०॥ (यथा, हरिवंशे। २६। ४५-४६।
"मथित्वाग्निं त्रिधा कृत्वा अयजत् स नराधिपः।
दृष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकताम्॥
गन्धर्व्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकारयत्।
एकोऽग्निः पूर्व्वमेवासीदैलस्त्रेतामकारयत्॥")
द्वितीययुगम्। तस्य परिमाणं यथा,—
"त्रिचत्वारिंशल्लक्षैश्च विंशत्सहस्राधिकेन च।
चतुर्युगं परिमितं नरमानक्रमेण च॥
द्विषट्लक्षपरिमितं वत्सरैतिसहस्रकम्।
त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
तस्य धर्म्मो यथा,—
"त्रेतायुगे समायाते धर्म्मः पादोनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचित् दयान्वयाः॥
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः॥
क्षत्रा भूमिसृजः शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः॥

कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः॥"
इति पाद्मे क्रियायोगसारः॥

त्रेतायुगं, क्ली, (त्रेतैव युगम्।) द्वितीययुगम्। तस्योत्पत्त्यादि यथा,—
"कार्त्तिकशुक्लनवम्यां सोमवारे त्रेतायुगोत्पत्तिः। तत्र अवतारत्रयम्। रामनपरशुरामश्रीरामचन्द्राः। पुण्यं त्रिपादम्। पापमेकपादम्। पुष्करनामकं तीर्थम्। साग्निको ब्राह्मणः। अस्थिगताः प्राणाः। चतुर्दशहस्तपरिमितो मानवदेहः। दशसहस्रवर्षं परमायुः। अवहार्य्यं रौप्यपात्रम्। तद्युगाब्दाः १२९६०००। तत्र राजानः सूर्य्यवंशीयबाहुकसगरांशुमदसमञ्जसदिलीपभगीरथाजदशरथश्रीरामचन्द्रकुशीलवा एते चक्रवर्त्तिनः। तल्लक्षणम्।
दानधर्म्मरता नित्यं तपस्या तीर्थदर्शनम्।
अग्निहोत्रपरा लोका राजानो यज्ञकारिणः॥
तत्र तारकब्रह्मनाम।
रामनारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन!॥"
इति सुदाङ्कितपञ्जिकातः संगृहीतम्॥

त्रेतायुगाद्या, स्त्री, (त्रेतायुगस्य आद्या प्रथमा तिथिः।) त्रेतायुगारम्भतिथिः। सा च कार्त्तिकशुक्लनवमी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

त्रेधा, व्य, (त्रिप्रकारम्। "संख्याया विधार्थे धा।" ५। ३। ४२। इति धा। "एधाच्।" ५। ३। ४६। इति धा इत्यस्य एधाच्।) त्रिधा॥ इति मुग्धबोधम्॥ (यथा, ऋग्वेदे। १।२२।१७।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूळ्हमस्य पांसुरे॥")

त्रै, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) दन्त्यवर्गाद्यादिः। ङ, त्रायते। चक्रिंस्त्राहीत्यादौ त्राहीति त्रायते त्रा विप् पक्षात् त्रा इत्याचरतीति क्यौ साधयम्। केचिदादौ त्रा पठन्ति। इति क्रमदीश्वरः। इति दुर्गादासः॥

त्रैगुण्यं, क्ली, (त्रिगुणानां भावः कर्म्म वा। त्रिगुण+ष्यञ्।) त्रिगुणधर्म्मः। सत्त्वरजस्तमस्त्वम्। यथा,—
"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्জ্জुन!।"
इति श्रीभगवद्गीतासु॥
ग्रैव्यसौगन्ध्यमान्द्यम्। यथा,—
"त्रैगुण्यललिते त्रारुरुक्षिरुपवीजिते॥"
इति शिवरात्रिव्रतकथा॥
त्रिभिः पूरणञ्च॥

त्रैधं, व्य, (त्रिप्रकारमिति त्रिधा। ततः "द्वित्रिभ्यां धमुञ्।" ५।३।४५। इति धा इत्यस्य धमुञ्।) त्रिधा। इति मुग्धबोधम्॥ (यथा, महाभारते। ३। ३२। ३२।
"सर्व्वमेव हठेनैके दैवेनैके वदन्त्युत।
पुंसः प्रयत्नजं किञ्चित् त्रैधमेतन्निरुच्यते॥")

त्रैपुरः, पुं, (त्रिपुर एव। स्वार्थे अण्।) त्रिपुरदेशः। तत्पर्य्यायः। डाहलः २ चैद्यः ३ चेदिः ४। इति हेमचन्द्रः। ४। २२॥ (देशोऽयं कामरूपस्य सीमाप्रदेशः। यथा, कामाख्यातन्त्रे।
"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम्।
कामरूपाभिधो देशो गणेशगिरिरुच्यते॥"
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत्॥
त्रिपुरस्य राजा। यथा, महाभारते। २। ३१। ५८।
"माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशम्।
त्रैपुरं खवशे कृत्वा राजानमभितौजसम्।
निजग्राह महाबाहुस्सरसा पौरवेश्वरम्॥"
तद्देशवासिनि, पुंभूमि। यथा, मात्स्ये। ११३। ५३।
"स्तोभ्रलाः कोसलाश्चैव त्रैपुरा वैदिशास्तथा॥"
त्रिपुराधिष्ठितासुरभेदे। यथा, हरिवंशे। १२६। ५४।
"येनोद्धतास्त्रैपुरा मायिनो वै
दग्धा घोरेण वितथान्तः पुरेण॥")

त्रैलोक्यं, क्ली, (त्रिलोकी एव। चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) त्रिलोकी। यथा, मार्कण्डेये।
"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा॥"

त्रैलोक्यविजया, स्त्री, (त्रैलोक्यस्य विजयो यस्याः। एतस्याः सेवनेन हि त्रैलोक्यमधीनमिव प्रतिभातीति ज्ञानात् तथात्वम्।) भङ्गा। इति शब्दचन्द्रिका॥ भाङ् इति ख्याता॥

त्रैविद्यः, पुं, (ऋग्वेदयजुर्व्वेदसामवेदरूपात्रिसंख्यो विद्या यस्येति त्रिविद्यस्ततः स्वार्थे अण्। यद्वा, तिस्रो विद्या अधीते वेद वा। "तदधीते तद्वेद।" ४। २। ५९। इति अण्।) त्रिवेदज्ञः। त्रिविद्यावेत्ता। यथा। मनुः। १२। १११।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयाश्रमिगः पूर्व्वं परिषत् स्याद्दशावरा॥"
(व्रतविशेषे, क्ली। यथा, मनुः। २। २८।
"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"
"त्रैविद्याख्येन च व्रतेन।" इति तट्टीकायां कुल्लूकभट्टः॥ वेदत्रयप्रतिपाद्ये, त्रि। यथा, भागवते। ६। २। २४।
"धर्म्मं भागवतं शुद्धं त्रैवेद्यञ्च गुणाश्रयम्॥"
"त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्म्मम्।" इति तट्टीकायां स्वामी॥)

त्रोटकी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

त्रोटिः, स्त्री, (त्रोटयते भिद्यतेऽनयेति। त्रोटि+"अच इः।" उणां। ४। १३८। इति इः।) चक्षुः। कटफलम्। मत्स्यी। मीनभेदः। इति मेदिनी। टे, १८॥

त्रोटिहस्तः, पुं, (त्रोटिरिव हस्तो हस्त इव ग्रहणसाधनं यस्य।) मत्स्यी। इति शब्दचन्द्रिका॥

त्रोटी, स्त्री, (त्रोटि+ऋदिकारादिति वा ङीष्।) त्रोटिः। इति शब्दरत्नावली॥

त्रोत्रं, क्ली, (त्रायते शिष्यते नियम्यतेऽनेनेति। त्रै पालने+"अग्निचादिभ्य इत्रोत्रौ।" उणां। ४। १७२। इति उत्रः।) गवादिताड़नदण्डः। पाँचनी इति ख्यातः। तत्पर्य्यायः। प्राजनम् २ तोदनम् ३ प्रवयणम् ४। गजस्य तोदनदण्डः। तत्पर्य्यायः। वेणुकम् २ वेणुकम् ३ इत्यमरभरतौ॥ अङ्कुशम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ आरूपक्रिया। व्याधिभेदः। इति संक्षिप्तसारे उणादिवृत्तिः॥

त्रौक, ऋ ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) चतुर्दृग्खरी। रेफमध्यः। ऋ, अतुत्रौकत्। ड, त्रौकते। इति दुर्गादासः॥

त्र्यक्षः, पुं, (त्रीणि अक्षीणि नेत्राणि यस्य। ततः समासान्तपप्रत्ययः।) शिवः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १०६। ११।
"आससाद महात्मानं त्र्यक्षं त्रिपुरमर्द्दनम्॥"
देत्यविशेषः। यथा, भागवते। ७। २। ४।
"भो भो दानवदैतेया द्विमूर्द्धंस्त्र्यक्ष! शम्बर!।
शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥"
नेत्रत्रयविशिष्टे, त्रि। यथा, महाभारते। २। ४३। १।
"चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः॥")

त्र्यक्षरः, पुं, (त्रीणि अक्षराणि यत्र।) घटकः। इति त्रिकाण्डशेषः॥ (त्रीणि अकारोकारमकारात्मकानि अक्षराणि यत्र। प्रणवादौ, त्रि। यथा, मनुः। ११। २६६।
"आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता।
स गुह्योऽन्यस्त्रिवृद्वेदो यं वेद स वेदवित्॥"
छन्दोभेदे, क्ली। यथा, वाजसनेयसंहितायाम्। ६। ३१।
"विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्येषम्॥"
"विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा तान् तादृशान् मनुष्यानुज्येषमधिकं जयेयम्।" इति वेददीपे महीधरः॥)

त्र्यङ्गटं, क्ली, (त्रिभिरङ्गैरटत्यते गम्यते इति। त्र्यङ्ग+अट्+अप्। प्रकन्दादित्वादलोपः।) शिवभेदः। धौताङ्गनी। इति मेदिनी। टे, ४४॥

त्र्यङ्गटः, पुं, (त्रिभिरङ्गैरटतीति। अट्+अच्।) धौताङ्गनी। शिवभेदः। ईश्वरः। इति हेमचन्द्रः॥

त्र्यङ्गं, क्ली, (त्रयाणां अङ्गानां समाहारः।) अङ्गनत्रयम्। यथा, कालाङ्गनं पुष्पाङ्गनं रसाङ्गनम्। इति राजनिर्घण्टः॥

त्र्यध्वगा, स्त्री, (त्रिषु अध्वसु मार्गेषु गच्छतीति। गम+डः।) गङ्गा। इति त्रिकाण्डशेषः॥

त्र्यम्बकः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्य। शिवः। इत्यमरः। १। १। ३५॥ (यथा, ऋग्वेदे। ७। ५९। १२।
"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्॥"
"त्रयाणां ब्रह्मविष्णुरुद्राणामम्बकः पिता।" इति ऋग्वेदभाष्ये सायणः।) एकादशरुद्राणामन्यतमः। यथा, मात्स्ये। ५। २६—३०।
"अजैकपादहिब्रध्नो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादशगणेश्वराः॥")
शिवांशुचन्द्रशेखरनामकपौण्ड्रराजपुत्रः। यथा,
"एवं तिरश्चामप्यासन् गर्भे जातो यतो हरः।
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः॥
स राजपुत्रः कौमारावस्थां प्राप यदा तदा।
सर्व्वशास्त्रार्थतत्त्वज्ञो निर्णीतस्तुल्यो बभूव ह॥
बले वीर्य्ये प्रहरणे शास्त्रे शीले च ततसमः।
नान्योऽभूत्पृथिवीशूलो नो वा भूमौ भविष्यति॥
अभिषिच्याथ तं राजा कुमारं बलवत्तरम्।
दशपञ्चैकवर्षीयं सर्व्वराजगुणैर्युतम्॥
तिसृभिः सह भार्य्याभिर्व्वनं पौण्ड्रो विवेश ह।
वृद्धोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः॥
गते पितरि राजा स वनवासं महाबलः।
सर्व्वां चिन्तां वशे चक्रेऽमात्यैः स चन्द्रशेखरः॥
सार्व्वभौमो नृपो भूत्वा राजभिः परिसेवितः।
अमरैरिव देवेन्द्रो विजहार श्रिया युतः॥
एवं पौण्ड्रसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम्।
ब्रह्मावर्त्ताख्ये रम्ये करवीराख्ये पुरे॥
द्वयङ्गतीरदीतीरे राजा भूत्वा समोदते॥"
इति कालिकापुराणे ४६ अध्यायः॥*॥
अन्यत् चन्द्रशेखरशब्दे द्रष्टव्यम्॥

त्र्यम्बकसखः, पुं, (त्र्यम्बकस्य महादेवस्य सखा बन्धुः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कुबेरः। इत्यमरः। १। १। ७१॥

त्र्यम्बका, स्त्री, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्याः।) दुर्गा। यथा,—
"सोमसूर्य्यानलाख्यानि यस्या नेत्राणि अम्बिका।
तेन सा त्र्यम्बका देवी मुनिभिः परिकीर्त्तिता॥")
इति देवीपुराणे ४५ अध्यायः॥

त्र्यहस्पृक्, पुं. (त्र्यहं त्र्यहन्दिनत्रयं स्पृशतीति। स्पृश+क्विप्।) त्रिदिनस्पृक्। तिथित्रयसंस्पर्शयुक्तमहः। इति ज्योतिषम्॥

त्र्यहस्पृक्, क्ली, (त्र्यहं स्पृशतीति। स्पृश+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) त्र्यहस्पर्शः। तथा च वशिष्ठः।
"एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा।
तदा दिनत्रयः प्रोक्तस्त्र्यहस्पृक् फलम्।
फलमिति वैदिककर्म्मपरम्॥
अधिमासे दिनपाते धनुषि रवौ भाद्रसङ्क्रमे।
मासि।
चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहश्च॥
इति भीमपराक्रमः॥

दिनपाते दिनत्रये।
त्र्यहस्पृक् नाम यदेतदुक्तं
तत्र प्रयत्नः कृतिभिर्व्विधेयः॥
विवाहयात्राशुभपुष्टिकर्म्म
सर्व्वं न कार्य्यं त्रिदिनस्पृशे तु॥"
इति ज्योतिस्तत्त्वम्॥

त्र्याहैहिकः, त्रि, (ऐहायां चेष्टायां भवमैहिकं धनम्। "तत्र भवः।" ४।३।५३। इति ठञ्। त्र्याहे दिनत्रये पर्य्याप्तं ऐहिकं धनं यस्य।) दिनत्रयनिर्व्वाहोचितधनयुक्तः। यथा,

"कुम्भूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।
त्र्याहैहिको वापि भवेदश्वस्तनिक एव वा॥"

इति मानवे। ४। ७॥

"कुम्भूलधान्यक इति। कुम्भूलो ग्रीष्मागारं स्यादित्याभिधानिकाः। इष्टकादिनिर्म्मितागार-धान्यसञ्चयो भवेत्। अत्र कालविशेषापेक्षायाम्। यस्य चैवार्षिकं भक्तं पर्य्याप्तं भृत्यभृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति॥

इति मनूक्त एव कालो ग्राह्यः। तेन नित्य-नैमित्तिकधर्म्मैकत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्व्वाहो भवति तावद्धनः कुम्भूलधान्यक उच्यते। वधनिर्व्वाहोचितधान्यादिधनः कुम्भी-धान्यः। प्राक् सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति याज्ञवल्क्येन गृह-स्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव समानिचय एव वेत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः सञ्चितः संवत्सरसञ्चयः। मेधा-तिथिस्तु। यावता धान्यादिधनेन बहुभृत्य-दारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत् सुव-र्णादिधनवानपि कुम्भूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका यास्काधिकधान्यादिनिचयः कुम्भीधान्यक इति व्याख्यातवान्। गोविन्द-राजस्तु कुम्भूलधान्यक इत्येतद्व्याचक्ष्य कोष्ठ-प्रमाणधान्यसञ्चयो वा स्यात् द्वादशाढ-मात्रपर्य्याप्तधनः। कुम्भीधान्यक इत्येतद्व्याचक्षे उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षडाढमात्र-पर्य्याप्तधनः।

द्वादशाढं कुम्भूलेन वृत्तिः कुम्भ्या दिनानि षट्। इमाममूलां गोविन्दराजोक्तिं नाद्रियन्ते।

ऐहा चेष्टा तस्यां भवं ऐहिकं त्र्याहपर्य्याप्तमैहिकं धनं यस्य स त्र्याहैहिकः तथा वा स्यात् दिन-त्रयनिर्व्वाहोचितधन इत्यर्थः। स्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयमिकं ज्ञात्वा नञ् समासः तथा वा भवेत्।" इति कुल्लूकभट्टः॥

त्र्यार्षेयाः, पुं, (ऋषेरयं आर्षेयः। ऋषि+ढक्। त्रय आर्षेयाः ऋषिधर्म्मा नेत्रादीन्द्रियक्रियाभावरूपा येषाम्।) अन्धबधिरमूकाः। यथा।

"अचोक्तानि वचनानि सर्व्वाणि तिर्य्यगधिकरण-न्यायमूलानि। तथा हि तिर्य्यगधिकरणे। तिर्य्यक्पङ्गुत्र्यार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशि-ष्टान्धकरणविरहात् पङ्गोः प्रचरणविरहात् त्र्यार्षेयाणामन्धबधिरमूकानां अवेक्षणश्रवणो-च्चारणविरहादिति श्रीचन्द्रशेखरवाचस्पतिकृत-चन्द्रकान्तु-विधिभृततिर्य्यगधिकरणम्॥ (त्रय त्र्यार्षेया ऋषयो यत्र। त्रिप्रवरो गोत्रभेदः॥)

त्र्याह्निकः, त्रि, (त्र्याह्ने भवः। त्र्याह्न+ठञ्।) ह्लोवेऽह्नि भवः। यथा, ऐकाह्निकद्व्याह्निक-त्र्याह्निकचातुर्थिकसततज्वरविषमज्वर इत्याद्य-पराजितास्तोत्रम्॥

("ऐकाह्निको द्व्याह्निकश्च त्र्याह्निकश्च तथापरः। वेलाज्वरश्चतुर्थोऽपि विज्ञानीयाद्विचक्षणः॥" इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥ अस्यौषधं यथा,—

"रसेन गव्यं घृतञ्च शिखिग्रीवञ्च पाचितम्। गोजिह्वया जयन्त्याश्च तल्लीयेच्च भावयेत्॥ प्रत्येकं सप्तसप्ताथ शुष्कं गुञ्जाचतुष्टयम्। जलेन घृतेनाद्यात् त्र्याह्निकज्वरशान्तये॥"

इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां समाहारः। पात्रादित्वात् क्लीबत्वं न।) मिलितशुण्ठीपिप्पली-मरिचम्। इत्यमरः। २।१०।१११। (यथा, गारुडे १६८ अध्याये।

"यमानी चित्रकं धान्यं त्र्यूषणं जीरकं तथा॥")

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां पिप्पलीमरिच-शुण्ठीनां समाहारः।) त्र्यूषणम्। इत्यमर-टीकायां भरतः॥

("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम्। त्रिकटु त्र्यूषणं योगं कटुत्रयमथोच्यते॥"

इति वैद्यकपरिभाषायाम्॥

अस्य गुणा यथा,—

"त्र्यूषणं दीपनं हन्ति श्वासकासवातगामयान्। गुल्ममेहकफश्लोत्थमेदस्फीपदपीनसान्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

(घृतविशेषः। यथा, चरके चिकित्सास्थाने २२ अध्याये।

"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम्। हे पाठे सरलं आर्शी खगुप्तां त्रिवृतं घटीम्॥ त्रार्शी तामलकीं मेदां काकनासां घृतावरीम्। त्रिकण्टकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्॥ प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्। ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत्॥ कामलार्शोऽनिलाष्ठीलाजीर्णशूलोदयापहम्। त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम्॥")

त्वं, त्रि, (युष्मद्+सु। "त्वाहौ सौ।" ७।२। ९४। इति त्वादेशः।) भवान्। तुमि इति भाषा। युष्मच्छब्दस्य प्रथमैकवचनान्तरूपोऽयं लिङ्गत्रये समानः। इति व्याकरणम्॥

त्वः, त्रि, (तनोति विस्तारयतीति। तन+"तनो-तेरनश्च वः।" उणां। २।६३। इति त्वात् क्विप् अनश्च वः। आगमानित्यत्वात् सुवे-कल्पिकः।) भिन्नः। अन्यः। इत्यमरः। ३। १।८२॥ (एकः। इति निरुक्तिः। १।७॥ यथा, ऋग्वेदे। १०।७१।४।

"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥"

त्वक्छ, त्रि, (त्वगस्यास्तीति। त्वच+छ।) त्वचा-युक्तः। यथा,

"त्वगुद्भ एकवाची। एकः। उतशब्दोऽप्यर्थे। पश्यन्नपि मनसा पर्य्यालोचयन्नपि वायं न ददर्श। दर्शनफलाभावान्न पश्यति। त्व एकः शृण्वन्न-प्येनां वाचं न शृणोति अवश्यफलाभावात्। इत्यनेनार्धेनाविद्वानभिहितः॥" इति तद्भाष्ये सायनः॥)

त्वक्, [च्] स्त्री, (त्वचति संवृणोति मेदश्शोणिता-दिकमिति। त्वच संवरणे+क्विप्। यद्वा, तनोति विस्तारयतीति। तन+"तनोतेरनश्च वः।" उणां। २।६३। इति क्विप् अनश्च वः।) इन्द्रियविशेषः। यथा,—

"पूर्व्ववन्नित्यतायुक्तं देहस्थापि त्वगिन्द्रियम्। प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः॥ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः। रूपान्यच्चक्षुषो योग्यं रूपमन्यापि कारणम्॥ द्रव्याश्रये त्वचो योगो मनसा ज्ञानकारणम्॥"

इति भाषापरिच्छेदः॥

वल्कलम्। (यथा, रघुः। २। ३७।

"कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य॥")

गुडत्वक्। (यथा, वृहत्संहितायाम्। ७७।१२।

"त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णैः। पटवासः प्रवरोऽयं मुखवासपुरःप्रबोधेन॥")

चर्म्म। इति मेदिनी। चे, ६॥ अस्य पर्य्यायः। अस्रधरा २। इत्यमरः॥ असृग्धरा ३। इति तट्टीका॥ त्वचम् ४ त्वचा ५ चर्म्म ६ छली ७ छल्ली ८। इति शब्दरत्नावली॥ (यथा, रघुः। ३। ३१।

"त्वचं स मेध्यां परिधाय रौरवीं
मणिस्खलद्भासि पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः
शिताववूदेकधनुर्द्वितीयवान्॥"

कञ्चुकः। यथा, मनुः। २। ७६।

"महतोऽप्येनसो मासात् त्वचैवाहिर्विमुच्यते॥")

त्वचम्। इति राजनिर्घण्टः॥ दारचिनी इति भाषा॥

त्वक्कण्डूरः, पुं, (कण्डूं रातीति। रा+कः। त्वचः कण्डूरः।) व्रणः। इति हारावली। १५६॥

त्वक्क्षीरा, स्त्री, (वंशत्वचः क्षीरमस्यच।) वंशरोचना। इत्यमरः। २। ६। १०६॥ (वंशरोचनाशब्दे विवृतिरस्या ज्ञातव्या॥)

त्वक्क्षीरी, स्त्री, (वंशत्वचः क्षीरमस्य। गौरा-दित्वात् ङीष्।) त्वक्क्षीरा। इति राज-निर्घण्टः॥ (यथा, सुश्रुते। १। ४४।

"सिताजगन्धा त्वक्क्षीरी विदारी क्षिप्रतः समाः॥"

(पर्य्यायोऽस्या यथा,—

"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा। त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वेणवी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्वक्छदः, पुं, (त्वगेव छदो यस्य।) क्षीरीवृक्षः। इति रत्नमाला॥ क्षीरकञ्चुकी इति भाषा॥

त्वक्पत्रं, क्ली, (त्वगिव पत्राण्यस्य ।) गुडत्वक् । इत्यमरः ।२।४।१३४॥ तेजपत्रम् । इति केचित् । इति भरतः॥ तत्पर्य्यायः। क्षुत्कटम्२ भृङ्गम् ३ त्वचम्४ चोचम्५ वराङ्गकम्६ । इत्यमरः।२। ४ । १३४ ॥ (यथा, महाभारते ।१२।२७०।१८। "चन्दनागुरुसुरवानि त्वक्पत्राणां वनानि च॥" यथा, सुश्रुते । १ । ४४ ।

"रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकम् ॥")

त्वक्पत्री, स्त्री, (त्वक्पत्र+गौरादित्वात् ङीष् ।) द्विजपत्री । तत्पर्य्यायः। कारवी २ पृथ्वी ३ वासीका ४ कवरी ५ पृथुः ६ । इत्यमरः। २। ६ । ४० ॥ तत्पत्री ७ । इति भरतः ॥

त्वक्पुष्पं, क्ली, (त्वचस्वर्म्मणः पुष्पमिव ।) रोमाणः। इति त्रिकाण्डशेषः। किलासम्। इति हेमचन्द्रः। ३ । १३१ ॥

त्वक्पुष्पिका, स्त्री, (त्वक्पुष्पी+स्वार्थे कन् पूर्व्ववत्ह्रस्वः।) किलासम । इति त्रिकाण्डशेषः ॥ कुली इति भाषा ॥

त्वक्पुष्पी, स्त्री, (त्वक्पुष्प+गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वच्, त्वचोयाचे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो ग्राहस्वर्म्मणो यद्दानम् । त्वच त्वचने इति प्राचः । त्वचनं संवरणमिति रमानाथः । त्वक्षति कार्यं वर्म्मणा भटः । इति दुर्गादासः ॥

त्वच, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-वेट् ।) ऊ, त्वचिष्यति त्वक्ष्यति। कार्श्यं क्षयीकरणम् । त्वक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पुं, (त्वचि सारो यस्य ।) वंशः । इत्यमरः । २ । ४ । १६० ॥ (यथा, मनुः ।१०।३० । "चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥"

वंशस्य त्वगपि । नँचाड़ि इति भाषा ॥ यथा, सुश्रुते । १ । ८ ।

"अनुग्रन्थानि तु त्वक्सारस्फटिकाकाचकुरुविन्दचक्षौकाभिचारनखगोजीग्रोफालिकाग्राकपक्षकरीरवालाङ्कुलय इति ॥") गुड़त्वक् । इति ग्रन्थरत्नावली ॥ ग्रोणवृक्षः । रन्ध्रवंशः । इति राजनिर्घण्टः ॥ (तल्लताबाँश इति भाषा ॥ यथा, माघः । ४ । ६१ ।

"त्वक्सारस्नुपरिपूरितलघ्वगीति-
रक्षिप्रभौ स्फुटितपक्ष्मलरक्षकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचः सारं भिनत्तीति । भिद्+णिनिः+ङीप् ।) क्षुद्रचक्षुपक्षः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री, (त्वक्सारो वंश उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्धः, पुं, (त्वचि सुगन्धः सदृगन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वक्सुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः ।) एलावालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग्, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ सकं-सेट् ॥)

त्वगङ्कुरः, पुं, (त्वचश्चर्म्मणः अङ्कुर इव ।) रोमाणः। इति त्रिकाण्डशेषः ॥

त्वगाचोरी, स्त्री, (त्वक्चोरी । पृषोदरादित्वात् साधुः ।) तुगाचीरी । वंशलोचना । इति जटाधरः ॥

त्वग्गन्धः, पुं, (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन+डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोषः, पुं, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्जातरोगः । तस्यौषधं यथा,—

"मन्दोशालोध्रनीराम्बुचूर्णानु कनकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेद्ग्रीष्मप्रसारिकाम् ॥
त्वद्दोषश्चैव सेऽपि च धर्म्मदोषश्च नश्यति ॥"

इति गारुड़े १६४ अध्यायः ॥

स तु महारोगः। यथा, "महारोगिणः पापरोगाश्चकान्यतमरोगवतः। ते च उन्मादक्षुद्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽप्सरी इत्यष्टौ पापरोगा नारदोक्ताः।" इति शुद्धितत्त्वम् ॥

त्वग्दोषापहा, स्त्री, (त्वग्दोषं रोगविशेषं अपहन्तीति । हन+डः ।) वाकुची । इति राजनिर्घण्टः ॥

तग्दोषारिः, पुं, (तग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तद्ग्राहकत्वात् तथात्वम् ।) इक्षिकन्दः । इति राजनिर्घण्टः ॥

त्वच्, ग्र ग्रहणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) वकारयुक्तः । दन्त्यवर्गाद्यादिः । ग्र, त्वचती त्वचन्ती । इतिः संवरणम् । त्वचति कवचेन देहं वीरः । इति दुर्गादासः ॥

त्वचं, क्ली, (ग्रश्नुता त्वगस्त्यस्येति । अर्श आदित्वात् अच् ।) वृक्षविशेषः । दारचिनी इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये । "सोमवल्ल्याश्च ता श्वेता पर्णं कालीयकं त्वचम् ॥") तत्पर्य्यायः । त्वक् २ वल्कलम् ३ भृङ्गम् ४ वराङ्गम् ५ सुखग्रीधनम् ६ ग्रकलम् ७ सिंहलम् ८ वन्यम् ९ सुरसम् १० कामवल्लभम् ११ उत्कटम् १२ बहुगन्धम् १३ विष्णुसम् १४ वरप्रियम् १५ नटपर्णम् १६ गन्धवल्कम् १७ वरम् १८ ग्रीतम् १९ । अस्य गुणाः । कटुत्वम् । ग्रीतलत्वम् । कफकासविनाशित्वम् । मुक्तामग्रमनत्वम् । कण्ठशुद्धिकरत्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे । १७७ । १३६ ।

"श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्द्धरोमा मृदुत्वचः ॥"

कचुकः । खोलस् इति भाषा ॥ यथा, महाभारते । १२ । २४६ । ११ ।

"विसृक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः ॥")

गुड़त्वक् । इति धरणिः ॥

त्वचा, स्त्री, (त्वच्+पचे टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति ग्रन्थरत्नावली ॥

त्वचापत्रं, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति ग्रन्थरत्नावली ॥

त्वचिष्ठः, त्रि, (अतिग्रयेन त्वगवान् । त्वगवत्+इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६४ । इति मतुपो लुक् ।) त्वचीयान् । अतिग्रयत्वग्विशिष्टः । इति व्याकरणम् ॥

त्वचिसारः, पुं, (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

त्वचिसुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) क्षुद्रेला । इति हारावली ।६७॥

त्वत्, त्रि, (तनोतीति । तन+"तनोतेरनश्च वः ।" उणां २ । ६३ । इति चकारात् क्विप् तुक् अनश्च वः ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवतः । इति व्याकरणम् ॥ तोमा हरते इति भाषा ॥

त्वनृच, उ द्रुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । क्लावेट् ।) वकारयुक्तादिः । उ, त्वचिता त्वक्ता । इतिगतिः। इति दुर्गादासः ॥

त्वनृच, उ ध सङ्कोचे । इतिकविकल्पद्रुमः ॥ (दधां-परं-सकं-सेट् । क्लावेट् ॥)

त्वदीयं, त्रि, (तव इदम् । युष्मद्+छः । "प्रत्ययोत्तरपदयोश्च ।" ७ । २ । ९८ । इति सप्तम्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः । ३ । ५० ।

"अतोऽयमन्धः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, त्रि य म ड त्वरे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) त्रि, त्वरितः तूर्णोऽस्ति । वा रवामद्भवलरसंभ्रमाक्षनिभ्यो निष्ठायां वेमक्वेऽपि वेदेषूचारणभेदार्थमेतदनुवन्धमन्ये मन्यन्ते । य, त्वरा । म, त्वरयति । ड, त्वरते । स्वद रह ग्रौद्यमनुष्ठानम् । नाद्यनेनुमवक्राः स तत्वरे । इति दुर्गादासः ॥

त्वरणं, क्ली, (त्वर+भावे ल्युट् ।) त्वरा । इति व्याकरणम् ॥ (त्वरते ग्रीघ्रं गच्छतीति । त्वर+ल्युः । द्रुतगामिनि, त्रि । यथा, अथर्ब्ववेदे ।११। ८ । २८ ।

"आक्रमणश्च वासेयश्च त्वरणाश्च पतत्रिणः ॥")

त्वरा, स्त्री, (त्वरणमिति । त्वर+"चटादयः सितः ।" इति अड् । ततः स्त्रीलिङ्गत्वात् टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।१। २ । २६ ॥ आवेगः ३ त्वरिः ४ तूर्त्तिः ५ संवेगः ६ । इति हेमचन्द्रः ।२।२२६। (यथा, महाभारते । १ । २०८ । २७ ।

"यदहत्वं मया पूर्व्वं निर्ज्जितो जीवितप्रियः ।
सुखो ज्ञातिरिति ज्ञात्वा का त्वरा मरणे पुनः॥")

त्वरिः, स्त्री, (त्वरणमिति । त्वर+भावे इन् ।) त्वरा । इति हेमचन्द्रः । २ । २३६ ॥

त्वरितं, क्ली, (त्वर+क्तः ।) शीघ्रम् । (त्वरते स्मेति । त्वर+गत्यर्थाकर्म्मकेति कर्त्तरि क्तः । यद्वा, त्वरा सञ्जातास्य । त्वरा+तारकादित्वात् इतच् ।) तद्विशिष्टे, त्रि । इत्यमरः । १ । १ । ६८ ॥ (यथा, पञ्चतन्त्रे । ३ । १०२ ।

"बह्वन्तराययुक्तस्य धर्म्मस्य त्वरिता गतिः ॥")

त्वरितोदितं, त्रि, (त्वरितं शीघ्रं यथा तथा उदितं कथितम् ।) शीघ्रोच्चारितवर्णः । तत्पर्य्यायः । निरुत्तभ् २ । इत्यमरः । १ । ६ । २० ॥

त्वष्टः, त्रि, (त्वक्ष्यते तनूक्रियते स्मेति । त्वक्ष तनूकरणे+क्तः ।) तनूकृतः । चाँचा छोला इत्यादि भाषा । तत्पर्य्यायः । तष्टः २ । इत्यमरः । ३ । ११ । ६६ ॥

त्वष्टा, [ष्टृ] पुं, (त्वेषति दीप्यतीति । त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोतृ ।" उणां । २ । ६६ । इति तृच् इतोऽत्वच् ।) आदित्यविशेषः । (यथा, महाभारते । १ । ६५ । १४-१५ ।

"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः । ये राज्ञामतलांस्ते कीर्त्तयिष्यामि भारत ! ॥ धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च । भगो विवस्वान् पूषा च सविता दशमस्तथा । एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥"

एते तु चाक्षुषस्य मनोरन्तरे तुषिता नाम देवा आसन् वैवस्वतेऽन्तरे तु द्वादश आदित्याः । इति विष्णुपुराणे । १ । १५ । १३१—१३३ ॥ तथा मात्स्ये च । ६ । ३—५ ॥ त्वक्षति तनूकरोति काष्ठादिकं शिल्पकार्य्यत्वात् । तक्ष+तृच् ।) विश्वकर्म्मा । इति हेमचन्द्रः । ३ । ५८१ ॥ (यथा, माघे । १ । ३५ ।

"त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसवस्य सीमा ॥"

अयन्तु माघमासे सूर्य्यरथपरिभ्रमणाधिकारिणामन्यतमः । यथा, विष्णुपुराणे । २ । १० । १५ ।

"त्वष्टाथ जमदग्निश्च क्रमणोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ धृतजित् धृतराष्ट्रोऽथ वत्सरः ।
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ॥"

विश्वकर्म्मणः पुत्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च बुद्धिमान् ॥"

प्रजापतिविशेषः । यथा, महाभारते । ५ । ६ । ३ ।

"त्वष्टा प्रजापतिर्ह्यासीत् देवश्रेष्ठो महातपाः ।
स पुत्रं वै चिक्षिरसमिन्द्रद्रोहात् किलाच्छनत् ॥"

महादेवः । यथा, महाभारते । १३ । १७ । १०३ ।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥"

वर्णसङ्करजातिविशेषः । इत्यमरः । २ । १० । ६ ॥ अस्य पर्य्यायः । काष्ठतट्टशब्दे उत्पत्तिश्च द्रष्टव्या ॥ (इन्द्रः । इति ऋग्वेदभाष्ये सायणः । १ । ११७ । २८ ॥ असुरभेदः । इति तत्रैव सायणः । ३ । ४८ । ४ ॥

त्वाचप्रत्यक्षं, क्ली, (त्वाचं त्वच्-सम्बन्धि प्रत्यक्षम् ।) सर्व्वज्ञानम् । त्वगादेः सर्व्वद्वारा बोधः । यथा, "अथ ज्ञानमाचे त्वज्ञानःसंयोगस्य यदि कारणत्वं तदा रासनधात्वादिकाले त्वाचप्रत्यक्षं स्यात् ।" इति सिद्धान्तसुक्तावली ॥

त्वाष्टी, स्त्री, दुर्गा । यथा,—

"तुष तुष्टौ स्तुतो धातुस्तस्य तुष्टी निपातने ।
स्तवनेषा प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

त्वाष्ट्रः, पुं, (त्वष्टुरपत्यं पुमान् । अण् ।) वृत्रासुरः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । ५ । ४ ।

"उद्यमेन हतस्त्वाष्ट्रो नमुचिर्बल एव च ॥"

विश्वरूपः । यथा, भागवते । ६ । ८ । ३ ।

"दृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुवृत्तवते ॥"

त्वष्टृसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । २१ । ८५ ।

"ततोऽस्त्रं त्वाष्ट्रमादाय चिच्छेद प्रति दानवान् ॥"

तथा, भागवते । ६ । १४ । २७ ।

"अपयित्वा चरं त्वाष्ट्रं त्वष्टारमजयद्विभुः ॥"

त्वष्टा अधिष्ठात्री देवतास्येति अण् । चित्रानक्षत्रम् । यथा, बृहत्संहितायाम् । ७ । ११ ।

"घोरा अवसुस्त्वाष्ट्रं वसुदेवं वारुणञ्चैव ॥")

त्वाष्ट्री, स्त्री, (त्वष्टा अधिष्ठात्री देवतास्याः । त्वष्टृ+अण्+ङीप् ।) चित्रानक्षत्रम् । इति हेमचन्द्रः ॥ (त्वष्टुर्विश्वकर्म्मणोऽपत्यं स्त्री ।) संज्ञानामसूर्य्यपत्नी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ६६ । ३५ ।

"त्वाष्ट्री तु सवितुर्भार्य्या वडवा रूपधारिणी ।
असूयत महाभागा सान्त्वरीवेष्वनावुभौ ॥")

रथिका । क्षुद्ररथः । इति त्रिकाण्डशेषः ॥

त्विट्, [ष्] स्त्री, (त्विष दीप्तौ+सम्पदादित्वात् क्विप् ।) शोभा । (यथा, महाभारते । ३ । २० । २ ।

"कपर्दं द्वारकाधाम्नं महाराज ! हतत्विषम् ॥")

प्रभा । (यथा, माघे । १ । ३ ।

"वयस्त्विषामित्यवधारितं पुर-
स्तात् पुरारेरिति विभावितात्मतिम् ॥")

वाक् । इति मेदिनी । षे, १६ ॥ व्यवसायः । जिगीषा । इति विश्वः ॥ (दीप्यमाने, त्रि । यथा, ऋग्वेदे । ४ । १७ । २ ।

"तव त्विषो जनिमन्नुत द्यौरेजद्भूमिर्भियसा सस्मन्मन्योः ॥"

"हे इन्द्र त्विषो दीप्यमानस्य तव स्वदीये जनिमन् जन्मनि सति।" इति तद्भाष्ये सायणः ॥)

त्विष, ञौ भ भासे । इति कविकल्पद्रुमः ॥ (भ्वां-उभ-दाने-सकं-अनुभ च सकं-अनिट् ।) ञौ, अत्विक्षत् । भ, त्वेषति त्वेषते । भासो दीप्तिः । अवदानिवासे दाने च त्विषौ भ अनुवर्त्तते । ञौ, अवात्विक्षत् । भ, अवत्वेषति अवत्वेषते । अनो निवसति ददाति दीप्यते वा इत्यर्थः । इति दुर्गादासः ॥

त्विषा, स्त्री, (त्विष्+इलन्तात् वा टाप् ।) दीप्तिः । इति शब्दरत्नावली ॥

त्विषाम्पतिः, पुं, (त्विषां प्रभाणां पतिः । षष्ठ्या असुक् ।) सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥

त्विषिः, स्त्री, (त्विष दीप्तौ+"इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् स च कित् ।) किरणम् । इति हेमचन्द्रः । २ । १४ ॥ (यथा, ऋग्वेदे । ६ । ७१ । ६ ।

"उच्चैव यूथा परियन्नरावीदधि
त्विषीरधित सूर्य्यस्य ॥")

तृसर, छद्मगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-सेट् ।) दन्त्यवर्गाद्यस्याधोदन्त्यसकारः । तृसरति धूर्त्तः छलेन गच्छतीत्यर्थः । इति दुर्गादासः ॥ (यथा, अथर्ब्ववेदे । ८ । ६ । ८ ।

"यस्या स्वपन्तीं तृसरति यस्या दिप्सति जायतीम् ॥")

तृसरः, पुं, (तृसरति कौटिल्यं गच्छतीति । तृसर + "भृञ्मृशीतृचरितृसरीति ।" उणां १ । ७ । इति उः ।) खड्गमुष्टिः । इत्यमरः । २ । ८ । ६० ॥ तत्पर्य्यायः । मुष्टिः २ तालतलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २४३ ।

"ज्योत्स्नाभिसारसमुचितवेषे ! याकोय-
मल्लिकोत्तंसे ! ।
विभ्रमि मनो निशितेव स्मरस्य कुसुमतृसरुच्छ-
रिका ॥")

सर्पः । यथा, ऋग्वेदे । ५ । ५० । १ ।

"मा मां पदेन रपसा विदत्तृसरुः ।"

"तथा तृसरुश्छद्मगामी जिह्मगः सर्प इत्यर्थः मां पदेन पादभवेन रपसा । रपि शब्दकर्म्मा । शब्देन मा विदत् मा जानातु ।" इति तद्भाष्ये सायणः ॥)

थ

थ, थकारः । स श्वसनसन्दश्यवर्णः । तवर्गद्वितीयवर्णश्च । अस्योच्चारणस्थानं दन्ताः । इति शाकरणम् ॥ (यथा, शिक्षायाम् । १७ ।

"सुमूर्द्धन्या ऋटुरसा दन्त्या ऋतुलसाः स्मृताः ॥")

अस्य स्वरूपं यथा,—

"थकारं पद्मलापाङ्गि ! कुण्डली मोक्षरूपिणी ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
अरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"

इति कामधेनुतन्त्रम् ॥

(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—

"कुक्षिता कुण्डला भूत्वा वामाद्दक्षिणतक्षतः ।
वामतः कुक्षिता भूत्वा दक्षाधोदक्षतो गता ॥
ऊर्द्ध ऋज्वायता रेखा सुरा गङ्गादयः क्रमात् ।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥"

अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम्॥
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
तरुणादित्यसङ्काशं यकारं प्रथमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य नामानि यथा,—
"यः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राहो भयानकः।
ग्रिली ग्रिरसिजो दक्षो भद्रकाली ग्रिलोच्चयः॥
क्षयो वृद्धिर्विकर्म्मा च दक्षनाग्राधिपोऽमरः।
वरदा भोगदा केशो वामजानुरसोऽनलः॥
लोलौजश्चयिनी गुह्यः ग्रारचन्द्रविदारकः॥"
इति नानातन्त्रग्राह्यम्॥

यं, क्ली, रत्नधनम्। मङ्गलम्। साध्यसम्। इति मेदिनी। धे, १॥

यः, पुं, (युड़ संवृतौ + डः।) पर्व्वतः। भयरक्षकः। इति मेदिनी। धे, १॥ व्याधिभेदः। भयचिह्नम्। भक्षणम्। इति ग्रब्दरत्नावली॥

युड, ग्रि संवृतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, युड़ति। अयुड़ीत् तुयोड़। इति दुर्गादासः॥

युतुकारः, पुं, (क्त + भावे घञ्। युदित्यव्यक्तग्रब्दस्य कारः करणं यत्र।) निष्ठीवनत्यागानुकरणग्रब्दः॥

युर्व्व, ईं वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरौ। यूः युरौ युरः। ईं. घूर्णः। इति दुर्गादासः॥

युर्व्वणं, क्ली, हननम्। युर्व्वधातोर्भावे अनटि (ल्युटि) निष्पन्नम्॥

थूथू, व, निष्ठीवनत्यागानुकरणग्रब्दः। यथा,—
थूथूकृत्य वमन्निरध्वगजनैरिति क्षत्रियकान्तम्॥

थैथै, व, वाद्यानुकरणग्रब्दविग्रेषः। इति सङ्गीतदामोदरः॥

थौड़नं, क्ली, संवरणम्। इति युड़धातोर्भावेऽनट् प्रत्ययः (ल्युट्)॥

द

द, दकारः। स च वक्त्रनाग्रादग्रवर्णः तवर्गद्वितीयवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति वाकरणम्॥ (यथा, ग्रिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः
स्मृताः॥")

अस्य स्वरूपं यथा,—
"दकारं ग्रृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
ब्रह्मग्रक्तिसहितं देवि! त्रिविन्दुसहितं सदा।
व्यात्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली॥
रक्तविद्युल्लताकारं दकारं हृदि भावय॥"
इति कामधेनुतन्त्रम्॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते ग्रृणु पार्व्वति!।
चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम्॥
अनेकरत्नघटितहारनूपुरशोभिताम्।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत्॥"
अस्य नामानि यथा, नानातन्त्रग्राह्ये।
"दोर्द्वीपो धातकिर्धाता दाता दक्षं कलाचकम्।
दीनं ज्ञानञ्च दानञ्च भक्तिराहवनी धरा॥
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः।
कात्यायनी ग्रिवा दुर्गा लङ्घना ना त्रिकण्डकी॥
खस्तिकः कुटिलारूपः क्षयान्तोमा जितेन्द्रियः।
धर्म्मेन्द्रद्वारदेवञ्च भ्रमा बहुसुखचञ्चला॥
हरिद्रापुरमञ्चौ च दक्षपार्श्वस्थिरेखकः॥"

दं, क्ली, (ददाति आनन्दमिति। दा + बाहुलकात् कः।) भार्य्या। इत्येकाक्षरकोषः॥

दः, पुं, (दै प शुद्धौ वा दा दाने + बाहुलकात् कः।) अचलः। दत्तः। दाता। इति मेदिनी दे, १॥ (दो क्षये + डः।) खण्डनम्। इति ग्रब्दरत्नावली॥ (यथा, माघे। १६। ११४।
"दाददोद्दद्दुद्दादी दादादोदूददां ददोः।
दुद्दादं ददते दुद्दे ददाद ददोऽदः॥"
"ददते इति दादोदागम्। ददाने कर्म्मणि घञ्। दादं ददातीति दादो दानप्रदः।" इत्यादौ मल्लिनाथकृततटीकायामर्थविग्रेषा द्रष्टव्याः॥)

दंग्रः, पुं, (दग्रतीति। दंग्र दंग्रने + पचाद्यच्।) कीटविग्रेषः। दाँग्र इति भाषा। तत्पर्य्यायः। वनमक्षिका २। इत्यमरः। २। ५। २७॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५। इति ग्रब्दरत्नावली॥ मांशुरः ६ दंग्रकः ७। इति हारावली॥ दुष्टसुखः ८ क्रूरः ९ क्षुद्रिका १०। इति राजनिर्घण्टः॥ (यथा, मनुः। १। ४५।
"खेदजं दंग्रमग्रकं यूकामक्षिकमत्कुणम्।
उग्रणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृग्रम्॥"
दग्रतीव ग्ररीरमिति।) वर्म्म। (यथा, भागवते। ३। १८। ६।
"परानुवक्त्रं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंग्रम्॥"
दग्र + भावे घञ्।) दंग्रनम्। इति मेदिनी। ग्रे, ७।
("सुग्रुता जायते दंग्रे क्षयाश्चातिसवत्यरुक्॥"
इति सुग्रुते कल्पस्थाने षष्ठोऽध्यायः॥)
दन्तः। इति हेमचन्द्रः। ३। २४८॥ खण्डनम्। (दन्तक्षतम्। यथा, आर्य्यासप्तग्रत्याम्। ५११।
"वर्षाक्षुतिर्न ललाटे न क्षुलितमङ्गं न चाधरे दंग्रः।
उत्पलगन्धहारि वारि च न स्रवसुपायपतुरेण॥")
दोषः। मर्म्म। सर्पदन्तम्। इति विश्वः॥ (यथा,
"सर्व्वैरेवादितः सर्पैः ग्राखादस्य देहिनः।
दंग्रस्थोपरिवक्त्रीयादरिष्टाश्चतुरङ्गुले॥
श्रोतश्चर्म्मान्तवल्कानां ग्रुद्धनाग्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितम्॥"
इति सुग्रुते कल्पस्थाने पञ्चमेऽध्याये॥
असुरविग्रेषः। यथा, महाभारते। १२। ३। १६।
"सोऽब्रवीदहमांसं प्राक् दंग्रो नाम
महासुरः॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांसग्रोणिताग्री कीटो जातः। ततः कदाचित् गुरोः परग्ररामस्य निद्रां प्रतिपालयितुः कर्णस्य ऊरुदेग्रं निर्भिद्य ग्रोणितं पीतवान्। ततः परग्ररामेणायं ग्रापात् निर्म्मोचितः॥ एतद्विवरणन्तु तत्रैवाध्याये द्रष्टव्यम्॥)

दंग्रकः, पुं, (दग्रतीति। दंग्र + ण्वुल्।) दंग्रः। इति हारावली। १२३॥ (नृपविग्रेषः। स तु कम्पनादेग्राधिपतिः। यथा, राजतरङ्गिण्याम्। १७८।
"दंग्रकः कम्पनाधीग्रः प्रहृष्टे तत्र सङ्कुधि।
विहृतो विवलाटायां निपत्य निहतः खग्रैः॥")
दंग्रनकर्त्तरि, त्रि॥

दंग्रनं, क्ली, (दग्रतीव ग्ररीरमिति। दंग्र + ल्युः।) वर्म्म। (यथा, महाभारते। ३। २६८। १८।
"संनह्यध्वं सर्व्व एवेन्द्रकल्पा
महान्ति चारूणि च दंग्रनानि॥"
दंग्र + भावे ल्युट्।) दन्तादिना खण्डनम्। इति हेमचन्द्रः॥ कामड़ान कुलफुटान इति भाषा। (यथा, महाभारते। ८। ८३। ३४।
"दंग्रनक्षाहिभिः क्षय्यैर्दाहच्च जतुवेग्मनि॥")

दंग्रभीरुः, पुं स्त्री, (दंग्रात् वनमक्षिकातः भीरुर्भयग्रीलः।) महिषः। इति त्रिकाण्डग्रेषः॥

दंग्रमूलः, पुं, (दंग्रवदयं मूलमस्य।) ग्रिग्रुः। इति राजनिघण्टः॥ (गुणादयोऽस्य ग्रिग्रुग्रब्दे ज्ञातव्याः॥)

दंग्रितः, त्रि, (दंग्रो वर्म्म सञ्जातोऽस्य परिहितत्वादिति। दंग्र + तारकादित्वात् इतच्।) वर्म्मितः। (यथा, महाभारते। २। २६। २।
"महता बलचक्रेण पररादृावमर्द्दिना।
हस्त्यश्वरथपूर्णेन दंग्रितेन प्रतापवान्॥"
दंग्रते इति। दंग्र + णिच् + भावे क्तः।) दष्टः। इति हेमचन्द्रः॥ (भासमानः। यथा. महाभारते। ४। ४०। २।
"धारया यत्र सौवर्णाः पृष्ठे भासन्ति दंग्रिताः।
सुपार्श्व सुग्रहत्वेव कस्तेतद्धनु रुक्तमम॥"
"दंग्रिता भासमानाः।" इति नीलकण्ठः॥)

दंग्री, क्ली, (क्षुद्रो दंग्रः। स्वार्थे ङीष्। यद्वा, दग्रतीति। दंग्र + अच्। गौरादित्वात् ङीष्।) क्षुद्रदंग्रः। इत्यमरः। २। ५। २७। छोटदाँग्र इति भाषा॥

दंष्ट्रा, क्ली, (दग्रतेऽनयेति। दंग्र + "दाम्नीग्रसेति।" ३। २। १८२। इति करणे ष्ट्रन्। यद्वा, "सर्व्वधातुभ्यष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्। गौरादिपाठे पितामहीग्रब्दस्य पाठात् पितां ङीषोऽविद्यत्वात् टाप्।) दन्त-

विशेषः। सत्पर्य्यायः। दाढ़ा २। इति हेमचन्द्रः। ३। २४७॥ (यथा, साहित्यदर्पणे। १। ३।

"यस्यालीयत शुल्कसीन्नि जलधिः पृष्ठे जगन्मण्डलम्।
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी॥")

दंष्ट्रिका, स्त्री, (दंष्ट्रा विद्यतेऽस्याः। दंष्ट्रा+"ब्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन्।) दाढ़िका। इति हेमचन्द्रः। ३। २४७॥

दंष्ट्री, [न्] पुं स्त्री, (प्रशस्ता दंष्ट्रा अस्त्यस्येति। दंष्ट्रा+"ब्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) शूकरः। इत्यमरः। २। ५। २॥ सर्पः। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ३३। २३।

"विषाणि दंष्ट्रिणः सर्व्वे सानूनि मृगपक्षिणः।
त्यजन्त्यसह्ययाक्रीता गजाः सिंहा वनाश्रयम्॥")

दंष्ट्राविशिष्टे, त्रि। यथा,—

"दंष्ट्रिभिः शृङ्गिभिर्व्वापि हता स्वेच्छेच तस्करैः।
ये स्वार्थे हता यान्ति राजन्! स्वर्गं न संशयः॥"

इति शुद्धितत्त्वे अग्निपुराणम्॥

दक्, स्त्री, (उदक+एषोदरादित्वात् साधुः।) जलम्। इति त्रिकाण्डशेषः॥

दक्ष, ड क्षदे। वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) क्षद दृह श्रीघ्रकरणम्। ड, दक्षते धनसृद्योगी। श्रीघ्रमृतुपादयति इत्यर्थः। इति दुर्गादासः॥ (सामर्थ्ये अकर्म्मकोऽयम्। यथा, ऋग्वेदे। २। १।११।

"तमिळा घृतमिन्वासि दक्षसे॥"

"दक्षसे दानाय समर्थो भवसि॥" इति तद्भाष्ये सायणः॥)

दक्ष, ष म ड हन्त्यर्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) म, अदक्षि अदाक्षि। दक्षं दक्षम्। दाक्षं दाक्षम्। मानुबन्धबलादुपधयोरपि दीर्घः। क्षमते तु दीर्घविधिरुपधां नापेक्षते। ष, दक्षा। क्षेमक्षात् सरोरित्यनेनेवेदधिक्षेऽस्य मानुबन्धस्वरपर्य्यन्तघटादिभ्यो ड इति प्राचीनमतानुवादार्थः। ड, दक्षते। हन्त्यर्थे गतिवधयोः। इति दुर्गादासः॥

दक्षः, पुं, (दक्षते वृद्धिप्रवृद्धये समर्थो भवतीति। दक्ष+अच्।) प्रजापतिविशेषः। स ब्रह्मणो दक्षिणाङ्गुष्ठात्जातः। ततः प्रभृति मैथुनेन प्रजा जाताः। यथा,—

"शरीरात्तस्य वक्ष्यामि मानसान् प्रजापतेः।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत॥"

इति मत्स्यपुराणे। ३। ६॥

"यथा सर्ज्जे चैवादौ तथैव शृणुत द्विजाः!।
यदा तु दक्षतस्तस्य दैवर्षिगणपन्नगान्॥
न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः।
दक्षः पुत्रसहस्राणि पञ्चजन्यामजीजनत्॥"

इति च तत्रैव। ६। ३—४॥

अस्य भार्य्या स्वायम्भुवमनुकन्या प्रसूतिः। अस्य षोड़शकन्याः। यथा, श्रद्धा १ मैत्री २ दया ३ शान्तिः ४ तुष्टिः ५ पुष्टिः ६ क्रिया ७ उन्नतिः ८ बुद्धिः ९ मेधा १० स्मृतिः ११ तितिक्षा १२ ह्रीः १३ स्वाहा १४ स्वधा १५ सती १६। तस्य त्रिसहस्रपुत्राः। दक्षप्रजापतिर्द्वितीयश्चक्षुषि दशप्रचेतसः सुतो भूत्वा षष्ठमन्वन्तरे प्रजाश्रष्टिश्चकार। स असिक्न्यां पत्न्यां षष्टिं कन्या जनयित्वा प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। कश्यपाय सप्तदश। चन्द्राय सप्तविंशतिः। तार्क्ष्याय दे। भूताय दे। अङ्गिरसे दे। इति श्रीभागवतम्॥ * ॥ ताम्रचूड़ः। (यथा, चरके सूत्रस्थाने २७ अध्याये।

"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि।
चटकानाञ्च यानि स्युरन्नानि च हितानि च॥")

मुनिभेदः। (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६७।

"कणादो गौतमः कण्वः पाणिनिः शाकटायनः।
ग्रन्थञ्चकार यत्नेन दक्षः कात्यायनः स्वयम्॥"

अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः। यथा, याज्ञवल्क्ये। १। ५।

"पराशरयमव्यासशङ्खलिखित दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥")

हरस्यः। द्रुमभेदः। वह्निः। इति विश्वः॥ महेशः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। ११३।

"धृतिमान् मतिमान् दक्षः सत्यवाक्यच युगाधिपः॥"

विष्णोर्नामविशेषः। यथा, महाभारते। १३। १४८। १११।

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः॥"

बलम्। इति निघण्टुः। २। ६। "दक्ष ग्लैप्ये। चकारात् वृद्धौ। दक्ष गतिहिंसनयोः। दक्षतिरुत्साहार्थः। इति स्कन्दस्वामी। असुन्। ग्रन्थविजये स्निग्धो भवत्यनेन स्निह्यन्ति वानेन ग्रन्थवः स्नेतृसाहितो वा भवति ग्रन्थविजये।" "दक्ष इति सकारान्तं बलनाम अकारान्तमपि तस्यैवमर्थान्तरे द्रष्टव्यम्॥" इति तट्टीकायां देवराजयज्वा। यथा, ऋग्वेदे।१।६५।६।

"स दक्षाणां दक्षपतिर्बभूव॥"

"सोऽग्निर्दक्षाणां सर्व्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव।" इति तद्भाष्ये सायणः॥ गरुड़स्य पुत्राणामन्यतमः। यथा, महाभारते। ५। १०१। १२।

"मेघवृत् कुमुदो दक्षः सर्पान्तः सोमभोजनः॥")

त्रि, पटुः। इति मेदिनी। के, १४॥ अस्य पर्य्यायः चतुरग्र्यः द्रष्टव्यः॥ (यथा, महाभारते। १। ७४। ३६।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥"

समर्थः। यथा, ऋग्वेदे। १। ५६। ४।

"वृहती इव सूनवे रोदसी
गिरो होता मनुष्यो न दक्षः॥"

प्रवृद्धः। यथा, तत्रैव। १। १५। ६।

"युवं दक्षं धृतव्रत मित्रावरुण दूळभम्॥"

"दक्षं प्रवृद्धम्।" इति तद्भाष्ये सायणः॥

दक्षिणः। अपसव्यम्। यथा, महानिर्व्वाणे। ३। ४४।

"प्राणायामं ततः कुर्य्यान् मूलेन प्रणवेन वा।
मध्यमानामिकाभ्याञ्च दक्षनासस्य पार्श्वतः॥")

दक्षकन्या, स्त्री, (दक्षस्य प्रजापतेः कन्या।) दुर्गा। इति त्रिकाण्डशेषः॥ दक्षप्रजापतेः सुता। ताः षष्ट्यामृतसञ्ज्ञकाः। तासां नामानि यथा,—

"सती ज्योतिः क्षमा क्षान्तिः स्वाहा क्षुत्क्षया स्वधा तथा।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धती वसुर्यामी लवा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः॥
अदितिश्च दितिश्चैव दनुः काला दनायुषा।
सिंहिका सुरसा कद्रुर्विनता सुरभिः खसा॥
क्रोधा दरा च प्रोवा च दक्षकन्याः प्रकीर्त्तिताः।
षष्ट्यामृता सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

(अयं द्वितीयजन्मनि प्राचेतसो भूत्वा षष्टिं कन्या जनयामास। यथा, मत्स्यपुराणे। ५।१२-१४।

"ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः।
वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा॥
प्रादात् स दश धर्म्माय कश्यपाय त्रयोदश।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये॥
द्वे चैव भृगुपुत्राय द्वे त्वङ्गिरस धीमते।
द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरः॥
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः॥"

एतासां नामानि तत्रैव द्रष्टव्यानि॥)

दक्षजा, स्त्री, (दक्षात् प्रजापतेर्जायते इति। जन+"षष्ठ्यामजातौ।" ३। २। ६२। इति डः।) दुर्गा। इति हेमचन्द्रः॥ (अश्विन्यादिदक्षजन्यानां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (दक्षजायाः सत्याः पतिः इति विग्रहे शिवः॥)

दक्षसावर्णिः, पुं, नवममनुः। अस्मिन् मन्वन्तरे ऋषभनामा भगवदवतारः। शुतनामा इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। भूकेतुदीप्तिकेतुप्रभृतयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्॥ (अस्य विशेषविवृतिस्तु मार्कण्डेयपुराणे ६४ अध्याये द्रष्टव्या॥)

दक्षा, स्त्री, (दक्षते वर्द्धते भारधारणे समर्था भवतीति वा। दक्ष+अच्। टाप्।) पृथिवी। इति मेदिनी। के, १५॥

दक्षाध्वरध्वंसकृत्, पुं, (दक्षाध्वरस्य दक्षयज्ञस्य ध्वंसं नाशं करोतीति। कृ+क्विप् तुगागमश्च।) शिवः। इति हलायुधः॥

दक्षाय्यः, पुं, (दक्षते कार्य्येषु समर्थो भवतीति। दक्ष+"शुदक्षिक्षुक्षिभ्यः क्याय्यः।" उणा॰ ३। ६६। इति क्याय्यः।) गरुड़ः। यज्ञः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (दक्ष वृद्धौ+क्याय्यः। त्रि, वर्द्धकः। यथा, ऋग्वेदे। १। ६१। ३।

"शुचिर्द्युमसि प्रियो न मित्रो
दक्षाय्यो अर्य्यमेवासि सोम!॥"

"त्वमर्य्यमेवासाभिर्द्दक्षमाणः क्षयं इव दक्षाय्योऽसि सर्व्वेषां वर्द्धकोऽसि।" इति सायणः॥ पूजनीयः। यथा, तत्रैव। ७। १। २।

"दक्षाय्यो यो दम आस नित्यः॥"

"योऽग्निर्हमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा।" इति तद्भाष्ये सायणः॥)

दक्षिणः, त्रि, (दक्षते इति। दक्ष वृद्धौ+"हृदक्षिभ्यामिनन्।" उणा॰। २। ५०। इति इनन्।) दक्षिणोद्भूतः। (दक्षिणदिग्भवः। यथा, रघुः। ४। ८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आदत्ते नातिशीतोष्णो नभस्वानिव दक्षिणः॥"

दक्षिणदिक्स्थितः। यथा, मनुः। ५। ६२।

"दक्षिणेन स्तनं शूद्रं पुरुषारेण निर्हरेत्॥")

सरलः। (यथा, महाभारते। ४। ५। २७।

"दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

परेच्छानुवर्त्ती। आरामः। इति मेदिनी॰ शे, ५०॥

("दक्षिणः सरलोवामपरेच्छानुवर्त्तिषु।
वाच्यवद्दक्षिणावाटीयज्ञदानप्रतिष्ठयोः॥"

इति विश्वप्रकाशात्। शे, ४५॥)

दक्षः। अपसव्यम्। इति हेमचन्द्रः॥ डाहिन इति भाषा। (यथा, मनुः। २। ६३।

"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः॥")

दक्षिणहस्तादानदाने दोषो यथा,—

"दत्तहस्तादाता च सर्पश्च सप्तजन्मसु।
ततो भवेद्धस्तहीनो मानवश्च ततः शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥

दक्षिणहस्ते प्रतिग्रहो यथा,—

"ओंकारसुचरन् प्राज्ञो द्रविणं प्रतुमोदकम्।
यज्ञोपवीतिदक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्॥"

इत्यादित्यपुराणम्॥

(प्रदक्षिणः। यथा, भागवते। १। १४। १३।

"प्रस्थाः कुर्व्वन्ति मां सर्व्वं दक्षिणं पद्मयोऽपरे।
वाञ्छांश्च पुरुषव्याघ्र! लक्षये रुदतो मम॥")

पुं, चतुर्थनायकान्तर्गतनायकविशेषः। तस्य लक्षणम्। (यथा, साहित्यदर्पणे। ३। ४०।

"यत्र त्वनेकमहिलासु समरागो दक्षिणः
कथितः॥")

यथा च "सकलनायिकाविषयसमसङ्गाभुरागः।

अस्योदाहरणं यथा,—

"अन्तःपुरे स्फुरति पद्मदृशां सहस्र-
मस्थिरयं कथय कुत्र निवेशयामि।
इत्याकलय्य नयनाम्बुरुहे निमील्य
रोमाञ्चितेन वपुषा स्थितमच्युतेन॥"

इति रसमञ्जरी॥ *॥

(तत्तोक्ताचारविशेषे, क्ली। यथा, कुलार्णवे ५ खण्डे।

"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हि॥")

दक्षिणकालिका, स्त्री, (दक्षिणा अनुकूला कालिका।) आद्याशक्तिः। यथा,—

"ऊर्द्धे वामे क्षपायां करकमलतले छिन्नमुण्डं तथाधो
हस्ते चाभीवरञ्च त्वजगदघहरे दक्षिणे कालिके च।" इति तन्त्रसारः॥

दक्षिणतः, व्य, (दक्षिण+"दक्षिणोत्तराभ्यामतसुच्।"५।३।२८। इति अतसुच्।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ३। ६१।

"पृष्ठवास्तुनि कुर्व्वीत बलिं सर्व्वात्मभूतये।
पित्रभ्यो बलिशेषन्तु सर्व्वं दक्षिणतो हरेत्॥"

दक्षिण+तसिल्। दक्षिणभागे। यथा, महानिर्व्वाणतन्त्रे। ३। ४८।

"पुनर्दक्षिणतः कुर्य्यात् पूर्व्ववत् सुरपूजिते॥")

दक्षिणतारं, क्ली, दक्षिणतीरम्। यथा, "दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरम्।" इति सिद्धान्तकौमुद्यां समासप्रकरणम्॥

दक्षिणपूर्व्वा, स्त्री, (दक्षिणस्याः पूर्व्वस्याश्च दिशोरन्तरालम्। "दिङ्नामान्यन्तराले।" २। २। २६। इति समासः।) पूर्व्वदक्षिणकोणः। इति व्याकरणम्॥ (यथा, भागवते। ६। १६। २२।

"दिशि दक्षिणपूर्व्वस्यां हृत्वा दक्षिणतो यदुम्॥"

तद्दिग्भागस्थे, त्रि। यथा, आश्वलायनश्रौतसूत्रे। ४। २। ११।

"दक्षिणपूर्व्व उद्धृतान्ताहवनीयं निदधाति॥")

दक्षिणस्थः, पुं, (दक्षिणे भागे तिष्ठतीति। स्था+कः।) सारथिः। इत्यमरः। २। ८। ६०॥

दक्षिणस्थिते, त्रि।

दक्षिणा, स्त्री, (दक्षते इति। दक्ष वृद्धौ+"हृदक्षिभ्यामिनन्।" उणा॰। २। ५०। इति इनन्। ततष्टाप्।) दक्षिणदिक्। तत्पर्य्यायः। अवाची २ ग्रामनी ३ यामी ४ वैश्वस्वती ५। इति राजनिर्घण्टः॥ (यथा, कुमारे। ३। २५।

"दिक् दक्षिणा गन्धवहं सुखेन
बलीकनिश्वासमिवोत्ससर्ज॥")

दक्षिणवायुगुणाः। षड्रसयुक्तत्व। चक्षुर्हितत्वम्। बलवर्द्धनत्वम्। रक्तपित्तप्रशमनत्वम्। सौख्यकान्तिमतिप्रदत्वम्। शुक्रनाशित्वम्। विदाहित्वम्। अस्मारुतकोपनत्वम्। गण्डूपदादिकीटानां जनकत्वञ्च। इति द्रव्यगुणः॥ *॥

अस्या दिशोऽधिपतयः दृषकन्यामकरराश्यः। इति ज्योतिषम्॥ यज्ञादिविधिदानम्। इति मेदिनी॥ प्रतिष्ठा। इति हेमचन्द्रः॥ यज्ञादिसम्पादकतदन्तविहितदानम्। सा यज्ञपत्नी श्रीकृष्णदक्षिणांशभूता। यथा,—

"कार्त्तिकीपूर्णिमायान्तु रासे राधामहोत्सवे।
आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा॥"

दक्षिणाया यदाने तस्या इहत्वियथा,—

"यज्ञो दक्षिणया सार्द्धं पुत्रेण च फलेन च।
कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः॥
कृत्वा कर्म्म च तत्रैव तूर्णं दद्याच्च दक्षिणाम्।
तत्कर्म्मफलमाप्नोति वेदैरुक्तमिदं मुने!॥
कर्म्म कर्म्मणि पूर्णे च तत्फलं यदि दक्षिणाम्।
न दद्याद्ब्राह्मणेभ्यश्च देवेनाज्ञानतोऽथ वा॥
मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम्।
एकरात्रे व्यतीते तु भवेत् शतगुणा च सा॥
त्रिरात्रे तद्भवेद्गुणा सप्ताहे द्विगुणा ततः।
मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते॥
संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत्॥
कर्म्म तदूषजमानानां सर्व्वञ्च निष्फलं भवेत्।
स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः॥
दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी।
तदृग्रहाद्व्रजति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्॥
पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम्।
एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम्॥*॥
दाता न दीयते दानं गृहीता च न याचते।
उभौ तौ नरकं यातश्छिन्नरज्ज्वेव घटः॥
नार्य्यवेदूषजमानश्चेदूषयाचितारञ्च दक्षिणाम्।
भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्॥
वर्षलक्षं वसेत्तत्र यमदूतेन ताड़ितः।
ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः॥
पातयेत् पुरुषान् सप्त पूर्व्वांश्च सप्तजन्मनः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥

नायिकाविशेषः। यथा,—

"या गौरवं भयं प्रेम सद्भावं पूर्व्वनायके।
न सुचत्यन्यसक्तेऽपि सा ज्ञेया दक्षिणा बुधैः॥"

इति विष्णुपुराणटीकायां स्वामी॥

(य, दक्षिणस्यां दिशि दक्षिणा दिग् वा। "दक्षिणादाच्।" ५। ३। ३६। इति आच्। दक्षिणस्यां दिशि॥)

दक्षिणाग्निः, पुं, (दक्षिणः अनुकूलोऽग्निः।) यज्ञाग्निविशेषः। इत्यमरः। २। ७। १६॥ दक्षिणस्या दिशोऽधिदेवताग्निः। इति भरतः॥ अस्य नामकरणम्। यथा,—

"दत्तासु दक्षिणाद्यासु दक्षिर्भूत्वा यतोऽमरान्।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत्॥"

इति वराहपुराणम्॥

दक्षिणाचलः, पुं, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे दक्षिणप्रदेशे वा स्थितोऽचलः पर्व्वतः।) मलयपर्व्वतः। इति हेमचन्द्रः। ४। ६५॥

दक्षिणाचारः, पुं, (दक्षिणोऽप्रतिकूल आचारः।) आचारविशेषः। यथा,—
"स्वधर्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत्।
स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्॥"
इत्याचारभेदतन्त्रम्॥
(एतदाचारोक्तकर्म्मादिकं वामाचारवत् कठोरतरं न। तथाच काश्मीराजप्रणीतदक्षिणाचारतन्त्रे।
"दक्षिणाचारतन्त्रोक्तं कर्म्म तच्छ्रुतवेदिकम्॥"
दक्षिणोऽनुकूलः साधुराचारो व्यवहारो यस्य। शिष्टाचारविशिष्टे, त्रि। यथा, महाभारते। ४। ५। २०।
"दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

दक्षिणात्, य, (वसत्यांगतो रमणीयं वा। दक्षिणस्यां दिशि दक्षिणस्या दिशः दक्षिणा वा दिक् इति। "उत्तराधरदक्षिणादातिः।" ५। ३। ३४। इति आतिः।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥

दक्षिणापथजन्मा, [न्] पुं, (दक्षिणा दक्षिणस्यां दिशि यः पन्थाः तत्र जन्म यस्य।) जातिविशेषः। यथा, महाभारते।१२।२०७।४२-४५।
"दक्षिणापथजन्मानः सर्व्वे नरवरात्मकाः।
गुहाः पुलिन्दाः शबराः चुचुका मद्रकैः सह॥
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौधकाम्बोजगान्धाराः किराता बर्ब्बरैः सह॥
एते पापकृतस्तात! चरन्ति पृथिवीमिमाम्।
अपाकबलयुद्धानां सधर्म्माणो वराधिप!॥
नेते कृतयुगे तात! चरन्ति पृथिवीमिमाम्।
नेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ!॥"

दक्षिणासुखः, त्रि, (दक्षिणा दक्षिणस्यां दिशि सुखं यस्य।) दक्षिणदिक्सुखः। यथा,—
"अमावास्यां गयाश्राद्धं दक्षिणासुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥

दक्षिणायनं, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे गोले वा अयनम्।) सूर्य्यस्य दक्षिणामतिः। सा श्रावणादिषट्सु मासेषु भवति। इत्यमरः॥ * ॥ यथा,—
"कर्कटावस्थिते भानौ दक्षिणायनमुच्यते।
उत्तरायणमुक्तं मकरस्थे दिवाकरे॥ इति।
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्॥"
इति विष्णुपुराणोक्तात्यूढादावयनपरिग्रहः सौरेण।
दिनमानादिवोधे तु सिद्धान्तादयनपरिग्रहः।
इति॥
अजसंक्रान्तितः पूर्व्वं पञ्चाशारादिकान्तरे।
एकवर्षे चतुःपञ्चघटमानक्रमेण तु॥
षट्षष्टितत्खरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भकं क्रमात्॥
अनुक्रमेण च तदत् स्यादुदगयानं रवेर्ध्रुवम्॥
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम्।
अयनाग्रक्रमेणैव विषुवारम्भणं तथा॥"
इति च ज्योतिस्तत्त्वम्॥
तच्च जातस्य फलं यथा,—
"यान्यायने यस्य भवेत् प्रसूतिः
शूरः कठोरः पिशुनस्वभावः।
चतुष्पदाढ्यः क्षमिमानहृष्यु-
र्व्याघामशान्तो मनुजः प्रतापी॥"
इति कोष्ठीप्रदीपः॥ * ॥
कर्कटसंक्रान्तिः। यथा,—
"नक्रकर्कटसंक्रान्ती हे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापरा॥"
इति तिथ्यादितत्त्वम्॥ * ॥
अयनचक्रं यथा,—
"चक्रं सारं विलिख्य ग्रहपतिरयने संक्रमचेत् करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं मूलमूले निदध्यात्।
ततपश्चादारमूले विविधभयकरं मूलपार्श्वेऽर्थलाभः
सौख्यं स्याच्चक्रगर्भे विविधसुनिगतं विद्धि वामक्रमेण॥"
इति ज्योतिषम्॥
("त इते प्रीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने हे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाग्रहेमन्तार्त्तेषु भगवानाप्यायते सोमोऽम्लवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

दक्षिणारुः, [सु] पुं, (दक्षिणो दक्षिणभागे अरुर्व्रणमस्य।) आधकर्त्तृकदक्षिणाङ्गग्रथितदृग्गः। इत्यमरः। २। १०। २४॥

दक्षिणार्हः, त्रि, (दक्षिणामर्हतीति। अर्ह+"अर्हः।" ३। २। १२। इत्यच्।) दक्षिणायोग्यः। ऋत्विग्भ्यो दक्षिणामर्हति यः। इति भरतः॥ तत्पर्य्यायः। दक्षिणीयः २ दक्षिण्यः ३। इत्यमरः। ३। १। ५॥

दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तते इति। आ+वृत्+ण्वुल्। गौरादित्वात् ङीष्।) वृश्चिकालिः। इति राजनिर्घण्टः॥

दक्षिणाशापतिः, पुं, (दक्षिणाशाया दक्षिणस्या दिशः अधिपतिः।) यमः। इति हेमचन्द्रः। २। ६८॥

दक्षिणीयः, त्रि, (दक्षिणामर्हतीति। दक्षिणा+"कडङ्करदक्षिणाच्छ च।" ५। १। ६६। इति छः।) दक्षिणार्हः। इत्यमरः। ३। १। ५।
(यथा, हरिवंशे। ६८। ७६।
"क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्हि जातिभिः।
दक्षिणाश्चोपवर्त्तन्तां यथोक्ताः सर्व्वसञ्चयः॥"
तथाच अथर्व्ववेदे। ८। १०। ४।
"यज्ञतोदक्षिणीयो वासतेयो भवति य एवं वेद॥")

दक्षिणेन, य, (दक्षिण+"एनबन्यतरस्यामदूरेऽपञ्चम्याः।" ५। ३। ३५। इति एनप्।) दक्षिणदिग्भि। इति रायमुकुटः॥ दक्षिणभागे।
(अस्य योगेन द्वितीया भवति।) यथा,—
"दक्षिणेन हरिं रुद्रो गोविन्दमतिनेश्वरः।
येनेशं हरिरीशञ्च तेनेशमभितोऽचैकाः॥"
इति सुग्धबोधम्॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते। यथा, महाभारते। ३। ८३। ४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे॥")

दक्षिणेर्म्मा, [न्] पुं, (दक्षिणे इर्म्मे व्रणं यस्य।
"दक्षिणेर्म्मा सुव्यथयोगे।" ५। ४। १२६। इति अनिच्।) आधग्ररोधातात् दक्षिणाङ्गव्रणयुक्तमृगः। तत्पर्य्यायः। दक्षिणागः २। इत्यमरः। १०। २४॥ (यथा, भट्टिः। ४। ४४।
"ऋगयुमिव ऋगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन्॥")

दक्षिण्यः, त्रि, (दक्षिणामर्हतीति। "कडङ्करदक्षिणाच्छ च।" ५। १। ६६। इति चकारात् यत्।) दक्षिणार्हः। इत्यमरः। ३। १। ५॥
(यथा, भट्टिः। २। २६।
"दक्षिण्यदिष्टां कृतमार्ज्जनीने-
स्तदुपातुधानैश्चिचिते प्रसर्पत्॥")

दग्धं, क्ली, कृतृणम्। इति रत्नमाला॥

दग्धः, त्रि, (दह्यते स्म इति। दह+क्तः।) भर्जौकृतः। पोड़ा इति भाषा। तत्पर्य्यायः। पुष्टः २ भृष्टः ३ उषितः ४। इत्यमरः। ३। १। ६६॥ (यथा, मनुः। ८। १८६।
"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेव वा।
न दद्यात् यदि तस्मात् स न संहरति किञ्चन॥")
"पञ्चाशामामिषं पर्ष्ठम्।
गोर्व्वर्ष्यमामिषं क्षीरं फले जम्बीरमामिषम्।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम्॥"
इति कर्म्मलोचनम्॥
(स्नानम्। यथा, अमरुशतके। २४।
"दग्धायामपि वाचि सञ्चितमिदं दग्धानलं
जायते॥"
चन्द्राश्रितराशिमूलकपारिभाषिकग्रहम्। यथा, ज्योतिषतत्त्वे।
"मृगसिंहौ तृतीयायां प्रथमार्धा तुलाऽलगौ।
पञ्चम्या बुधराशी द्वौ सप्तम्यां चापयन्त्रमे॥
नवम्यां सिंहकोटाख्यावेकादश्यां गुरोर्गृहे।
वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्त्रमी ग्रहाः।
दग्धसद्मनि यत् कर्म्म कृतं सर्व्वं विनश्यति॥")

दग्धकाकः, पुं, (दग्ध इव कृष्णवर्णः काकः।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३८६॥

दग्धरथः, पुं, (दग्धो रथोऽस्य।) चित्ररथगन्धर्व्वः। इति महाभारतम्॥ (यथा, महाभारते। १। १७१। ३६।
"अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")

दग्धरुहः, पुं, (दग्धोऽपि रोहतीति। रुह+कः।) तिलकवृक्षः। इति राजनिर्घण्टः॥

दग्धरुहा, स्त्री, (दग्धापि रोहतीति। रुह+कः टाप्।) दग्धावृक्षः। इति राजनिर्घण्टः॥

दग्धा, स्त्री, (दह्यते स्म इव या। दह+क्तः। ततष्टाप्।) स्थितार्का दिक्। इति मेदिनी। रे, ७॥ वृक्षविशेषः। कुरुह इति ख्यातः॥ तत्पर्य्यायः। दग्धरुहा २ दग्धिका ३ स्थलेरुहा ४ रोमशा ५ कर्कशदला ६ भस्मरोहा ७ सुदग्धिका ८। अस्या गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। कफवातनाशित्वम्। पित्तप्रकोपनत्वम्। जठरानलदीपनत्वञ्च। इति राजनिर्घण्टः॥ *॥

मासदग्धा यथा,—सौरचैत्रपौषयोर्द्वितीया एवं ज्येष्ठफाल्गुनयोश्चतुर्थी वैशाखश्रावणयोः षष्ठी आषाढ़ाश्विनयोरष्टमी भाद्राग्रहायणयोर्दशमी कार्त्तिकमाघयोर्द्वादशी। अस्याः प्रमाणं यथा,

"द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः।
मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी॥
दशमी वृश्चिके सिंहे द्वादशी मकरे तुले।
एभिर्यातो न जीवेत यदि ग्रंक्रसमो भवेत्॥"

अस्याः प्रतिप्रसवो यथा, वैशाखे शुक्ला षष्ठी ज्येष्ठे कृष्णा चतुर्थी आषाढ़े शुक्लाष्टमी श्रावणे कृष्णा षष्ठी भाद्रे शुक्ला दशमी आश्विने कृष्णाष्टमी कार्त्तिके शुक्ला द्वादशी अग्रहायणे कृष्णा दशमी पौषे शुक्ला द्वितीया माघे कृष्णा द्वादशी फाल्गुने शुक्ला चतुर्थी चैत्रे कृष्णा द्वितीया। एतत्प्रमाणं यथा,—

"मेषे दिनेशे वृषगे नगेन्द्रे
यूके धनुःस्थे कलसे च शुक्ला।
कुलीरकन्यालिमृगास्यमीन-
वृषेषु कृष्णास्तिथयः प्रदग्धाः॥"*॥

दिनदग्धा यथा,—रविवारे द्वादशी सोमे एकादशी मङ्गले दशमी बुधे तृतीया वृहस्पतौ षष्ठी शुक्रे पञ्चदशी शनौ सप्तमी। एतत्प्रमाणं यथा,

"मासा रुद्रा दिशो रामाः षट्पञ्चमुनयस्तथा।
दह्यन्ते तिथयः सप्त सूर्य्यादेः सप्तसप्तभिः॥"

इति ज्योतिःसारसंग्रहः॥

दग्धिका, स्त्री, (कृतसिता दग्धा। "कृतसिते।" ५।३।७४। इति कन्।) दग्धान्नम्। पोड़ा भात इति भाषा। चाची इति ख्याता इति केचिदिति भरतः॥ तत्पर्य्यायः। भिसटा २। इत्यमरः। २।९।४६॥ भिसटिका ३ भिक्षिटा ४ भिक्षिका ५ भिक्षिका ६। इति तट्टीकासारसुन्दरी॥ दग्धावृक्षः। इति राजनिर्घण्टः॥

दग्धेरुका, स्त्री, (दग्धा इरुका।) भ्रामकम्। इति हारावली। २१४॥

दघ, इ त्यागे। अवघने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, दघ्नोति। अवघनं रक्षणम्। इति दुर्गादासः॥

दघ, न घातने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, दघ्नोति। दघ घाते। इति जौमराः पठन्ति। तेन तदर्थकल्पनमेवोचितम्। ततश्च घातनमिति हन्त्यर्थस्य पारिभाषिकपुरादिलेन स्वार्थे णौ रूपं हननमित्यर्थः। किञ्च हिंसनपाठेनैवेहसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्वेषणवद्विफलं जयाणामेव कातन्त्रादसम्मतत्वात्। इति दुर्गादासः॥

दङ्क, तृ क तत्पाते। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-सकं-सेट्।) तत्पातस्तद्दङ्कपातनम्। क, दङ्कयति दङ्कापयति अमराधिपं राणा। इति दुर्गादासः॥

दण्डः, पुं क्लीं, (दण्डयति अनेनेति। दण्ड+घञ्। यद्वा, दान्त्यत्वनेनेति। दम्+"अमन्तात् डः।" उणां १।११३। इति डः।) लगुड़ः। इत्यमरः। ३।३।४१॥ (यथा, हठयोगप्रदीपिकायाम्। ३।११।

"यथा दण्डहतः सर्पो दण्डाकारः प्रजायते॥")

तस्य धारणगुणाः। खलतः संप्रतिष्ठानत्वम्। भ्रूचुनिषेधनत्वम्। अवष्टम्भनत्वम्। आयुष्यत्वम्। भयघ्नत्वञ्च। इति राजवल्लभः॥ (यथा, चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्।

"पुनः सरीसृपव्यालविषाग्निभ्यो भवाम्यहम्।
अमस्खलनदोषघ्नं स्थविरे च प्रशस्यते॥
सत्त्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनम्।
अवष्टम्भकरश्चापि भयघ्नं दण्डधारणम्॥")

भ्रूरक्षागतरक्षणादि। यथा,—

"भ्रूरक्षागतसंरक्षां भूतानामप्यहिंसनम्।
बहिर्वेदि च यद्दानं दण्डमित्यभिधीयते॥

इति मोक्षधर्म्मः॥

(दण्डाकारत्वात् क्षत्रादीनामङ्गविशेषः। यथा, वृहत्संहितायाम्। ७३।४,६।

"युवराजनृपतिपत्न्याः सेनापतिदण्डनायकानाञ्च।
दण्डोऽर्धपञ्चहस्तः समपञ्चकृतार्द्धविस्तारः॥"

"अन्येषाञ्च नराणां प्रीतातपवारणन्तु चतुरस्रम्।
समवृत्तदण्डयुक्तं क्षत्रं कार्य्यं तु विप्राणाम्॥"

चामरादीनामङ्गविशेषश्च। यथा, तत्रैव। ७२।३-४।

"अर्धार्धहस्तप्रमितोऽस्य दण्डो
हस्तोऽथवारत्निसमोऽथवान्यः।
काष्ठाच्छुभात् काञ्चनरूप्यगुम्फात्
रत्नैर्विचित्रश्च हिताय राज्ञाम्॥
वज्रातपत्राङ्कुशवेत्रचाप-
वितानकुम्भध्वजचामराणाम्।
व्यापीतदण्डीमधुकध्वजाश्च
वर्ष्मक्रमेणैव हिताय दण्डाः॥"

ब्रह्मचारिधार्य्यदण्डगुडाकारपदार्थः। यथा, देवीभागवते। १।१६।३१। शुकं प्रति जनकस्योक्तिः।

"दण्डाजिनजटा चिन्ता यथा तव धनेऽपि च।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा॥"

वर्ष्मभेदेन तत्प्रमाणादिकमुक्तम्। यथा, मनौ। २।४५-४७।

"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वटखादिरौ।
पैलवौदुम्बरो वैश्यो दण्डानर्हन्ति धर्म्मतः॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः॥
ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः॥"

वाणनिक्षेपकालीन स्थानविशेषे, क्ली। यथा, आग्नेयधनुर्व्वेदे।

"तिर्य्यग्भूतो भवेद्वामो दक्षिणेऽपि भवेदृजुः।
गुल्फौ पार्ष्ण्यग्रकौ चैव स्थितौ पश्चाद्भुलान्तरौ॥
स्थानं दण्डं भवेदेतत् द्वादशाङ्गुलमायतम्॥")

दण्डः, पुं, (दण्डयत्यपराधिनमनेनेति। दण्ड+घञ्। यद्वा, दान्यतिं शान्तं करोत्यनेन। दम+डः।) राज्ञां चतुर्थोपायः। (यथा, देवीभागवते। १।१७।३।

"विना दण्डं कथं राज्यं करोति जनकः किल।
धर्म्मे न वर्त्तते लोको दण्डभेन्न भवेद् यदि॥")

स च त्रिविधः। वधः अर्थग्रहणं बन्धनताड़नादिच। इत्यमरटीकासारसुन्दरी॥ तत्पर्य्यायः। साहसम् २ दमः ३। इत्यमरः। २।८।२१। (दण्ड+भावे घञ्। दमनम्। (यथा, मनुः। १२।१०।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च॥"

दण्ड इवाचरतीति। दण्ड+क्विप्। ततो भावे घञ्।) ऊर्द्धस्थितिः। दाँड़ान इति भाषा। इति सारसुन्दरी॥ व्यूहभेदः। (अस्य लक्षणभेदादिकं यथा, अग्निपुराणे २४१ अध्याये।

"मण्डलासंहतौ भागौ दण्डास्ते बहुधा स्मृताः।
तिर्य्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या वृत्तिरेव च॥
मण्डलः सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः।
प्रदरो दृढ़कोऽसह्यश्चापो वैकुण्ठिरेव च॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ।
विशालो विजयः रुचौ सूचा कर्णश्चमरसुखौ॥
सर्पाखो वलयश्चैव दण्डभेदाश्च दुर्ज्जयाः।
अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैकपक्षतः॥
अतिक्रान्तस्तु पक्षाभ्यां चयोऽन्ये तद्विपर्य्ययः।
पक्षोरक्षैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्य्ययः॥
सूचापक्षो धनुःपक्षो द्विसूचो दण्ड ऋङ्गजः।
द्विगुणोऽयन्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः॥
द्विचतुर्दण्ड इष्टेते ज्ञेया लक्षयतः क्रमात्।
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा॥")

प्रकाण्डः। अंशः। कोणः। मन्थानः। सैन्यम्। काण्डः। घड़ी इति भाषा। मानभेदः। काठा इति भाषा। ("दण्डैश्चतुर्भिर्भवतीह दण्डः।" इति लीलावती॥) चण्डांशोः पारिपार्श्विकः। (यथा, महाभारते। ३।३।६८।

"ये च तेऽनुचराः सर्व्वे पादोपाग्रं समाश्रिताः।
माठरारुणदण्डाद्यास्तान् वन्देऽग्निसुतान्॥")

यमः। अभिभागः। इति मेदिनी। दे, १६॥ गृह-

भेदः । इति हेमचन्द्रः ॥ इक्ष्वाकुराजपुत्रः । इति रामायणम् ॥ (यथा, हरिवंशे । १० । २२ ।
"धृष्टकस्याम्बरीषश्च दण्डस्येति सुताश्रयः ।
यश्चकार महात्मा वै दण्डकारण्यमुत्तमम् ॥"
क्रोधहन्तुरसुरस्यांशेनावतीर्णः खनामख्यात-
नृपविशेषः । यथा, महाभारते ।१।६७।४६।
"क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः ।
दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १०५ ।
"धनुर्द्धरो धनुर्व्वेदो दण्डो दमयिता दमः ॥"
महादेवः । यथा तत्रैव । १२ । २८४ । १६ ।
"शूलमुद्यम्य दण्डाय पर्णचीरपटाय च ॥")
कालभेददण्डस्य प्रमाणं यथा,—
"षट्पलं पात्रनिर्म्माणं गभीरं चतुरङ्गुलम् ।
सर्व्वमाषैः कृतच्छिद्रं कुर्य्याच्च चतुरङ्गुलैः ॥
यावच्चलति पात्रं तत्कालं दण्डमेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
ब्राह्मणं प्रति दण्डोद्यमे दण्डनिपातने च दोषो यथा, प्रायश्चित्ततत्त्वे ।
विप्रदण्डोद्यमे लक्षमतिलक्षं निपातने ॥"
"कौटसाक्ष्ये दण्डा यथा,—
लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व्वशः ॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् ॥
कामाद्दशगुणं पूर्व्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानात् द्वे शते पूर्णे बाल्याच्छतमेव तु ॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः ।
धर्म्मस्यार्थविचारार्थमधर्म्मनिधनाय च ॥
कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ * ॥
दण्डस्य स्थानानि यथा,—
दण्डस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि क्षुरचतो ब्राह्मणो व्रजेत् ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ वालोक्य दण्डं दण्ड्येषु पातयेत् ॥*॥
अधर्म्मादण्डेषु दोषो यथा,—
अधर्म्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम् ।
अस्वर्य्यञ्च परत्रापि तस्मात्तत् परिवर्ज्जयेत् ॥
अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥ * ॥
दण्डस्य पौर्व्वापर्य्यनियमो यथा,—
वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डन्तु वधदण्डमतः परम् ।
वधेनापि यदा चैतान्निग्रहीतुं न शक्नुयात् ॥
तदेषु सर्व्वमेवैतत् प्रयुञ्जीत चतुष्टयम् ॥
दण्डस्य भेदा यथा,—
प्रणानां हि शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः ॥
ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥ * ॥
दोषविशिष्टकन्यादाने दण्डो यथा,—
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥
अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ * ॥
गवादीनां शस्यभक्षणे दण्डो यथा,—
पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः ।
स पालः शतदण्डार्हो विपालान् वारयेत् पशून् ॥
क्षेत्रादिसीमाविवादे दण्डा यथा,—
क्षेत्रकूपतडागानामारामस्य गृहस्य च ।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥
सामन्तास्त्रिषु वा ब्रूयुः सेतौ विवदतां नृणाम् ।
सर्व्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥
गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विगुणो दमः ॥*॥
वाक्पारुष्ये दण्डा यथा,—
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्य स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥
नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्व्वतः ।
निःक्षेपोऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥
धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः ।
तप्तमासे चयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥
श्रुतं देशञ्च जातिञ्च कर्म्म शरीरमेव च ।
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥
मातरं पितरं जायां भ्रातरं तनयं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः ॥
ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्य्यो विजानता ।
ब्राह्मणे साहसः पूर्व्वः क्षत्रिये त्वेव मध्यमः ॥
विट्शूद्रयोरेवमेव स्वजातिं प्रतितत्त्वतः ।
छेदवर्ज्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ * ॥
दण्डपारुष्ये दण्डा यथा,—
येन केनचिदङ्गेन हिंसायेत् श्रेष्ठमन्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥
अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवगूढ्यतो गुदम् ॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायान्तु ग्रीवायां वृषणेषु च ॥
त्वग्भेदकः शतं दण्ड्यो लोहितस्य तु दर्शकः ।
मांसभेत्ता तु षण्निष्कान् प्रवास्यस्त्वस्थिभेदकः ॥
वनस्पतीनां सर्व्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्य्यो हिंसायामिति धारणा ॥
मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति ।
यथा यथा महद्दुःखं दण्डं कुर्य्यात्तथा तथा ॥
अङ्गानां पीड़नायाञ्च प्राणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्व्वं दण्डमथापि वा ॥
इत्याग्नि हिंसादृष्टो यस्य ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम् ॥
चर्म्मचार्म्मिकभाण्डेषु काष्ठलोष्टमयेषु च ।
मूल्यात् पञ्चगुणो दण्डः पुष्पमूलफलेषु च ॥
यानस्यैव तु यातुश्च यानस्वामिन एव च ।
दण्डातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥
छिन्नाक्षे भिन्नयुगे तिर्य्यक् प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्मोस्तथैव च ।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत् ॥
यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगुतं दमम् ॥
प्राजकस्त्वेदृभवेदाप्तः प्राजको दण्डमर्हति ।
युग्यस्थाः प्राजकेनाग्रे सर्व्वे दण्ड्याः शतं शतम् ॥
स चेत्तु पथि संरुद्धः पशुभिर्व्वा रथेन वा ।
प्रमापयेत् प्राणभृतस्तत्र दण्डो विधारितः ॥
मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषी भवेत् ।
प्राणभृत्सु महत्स्वङ्गं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनाञ्च हिंसायां द्विगुतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्द्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वशूकरनिपातने ॥
भार्य्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथातु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥
चौरस्य दण्डविधिर्यथा,—
यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥
तथाधरिममेयानां शतादभ्यधिके वधः ।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम् ॥
पञ्चाशत्तदभ्यधिके हस्तच्छेदनमिष्यते ।
शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः ।
मुख्यानां चैव रत्नानां हरणे वधमर्हति ॥
महापशूनां हरणे शस्त्रास्यानामौषधस्य च ।
कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत् ॥
गोषु ब्राह्मणसंस्थासु क्षुरिकायाञ्च भेदने ।
पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपादिकः ॥
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ।

दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ।
वेणुवेदलभाण्डानां लवणानान्तथैव च ।
मृण्मयानाञ्च हरणे मृदो भस्मन एव च ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च ।
पक्वान्नानाञ्च सर्व्वेषां तन्मूल्याद्द्विगुणो दमः ॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च ।
अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्च कृष्णलः ।
परिपूतेषु धान्येषु शाकमूलफलेषु च ॥
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ।
स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् ॥
निरन्वयं भवेत् स्तेयं हृत्वापह्नवते च यत् ।
यश्चैतान्युपकृष्टानि द्रव्याणि स्तेनयेन्नरः ॥
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेदगृहात् ।
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥"*॥
परदारहरणे दण्डो यथा,—
परदाराभिमर्षेषु प्रवृत्तान् नक्षमहीपतिः ।
उद्वेजनकरैर्दण्डैश्छिन्द्यिला प्रवासयेत् ॥
परस्य पत्न्या पुरुषः संभाषां योजयन् रहः ।
पूर्व्वमाचारितो दोषैः प्राप्नुयात् पूर्व्वसाहसम् ॥
परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनामपि संभेदे स संग्रहणमाप्नुयात् ॥
उपचारक्रिया केलिः सख्यं भूषणवाससाम् ।
सहखट्टासनञ्चैव सर्व्वं संग्रहणं तथा ॥
स्त्रियं सृग्गेददेशे यः स्पृशेद्वा मर्म्मयेत्तथा ।
परस्परस्यानुमते सर्व्वं संग्रहणं स्मृतम् ।
अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति ॥
न सभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥
नैष चारणदारेषु विधिर्नालोपजीविषु ।
सञ्चयन्ति हि ते नारीर्निगूढाचारयन्ति च ॥
किञ्चिदेव तु दाप्यः स्यात् संभाषां ताभिराचरन् ।
योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति ॥
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ।
कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत् ॥
जघन्यं सेवमानान्तु संयतां वासयेद्गृहे ।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति ॥
शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि ।
अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः ॥
तस्याशु कर्त्तयेदङ्गुल्यौ दण्डञ्चार्हति षट्शतम् ।
सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ।
द्विशतन्तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥
कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः ।
शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ॥
या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति ।
अङ्गुल्योरेव च च्छेदं खरोष्ट्रहरणं तथा ॥
भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥
पुमांसं दाहयेत् पापं शयने तप्त आयसे ।
अभ्यादधुश्च काष्ठानि तत्र दह्येत पापकृत् ॥
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ।
ब्राह्मया सह संवासे चाण्डाल्या तावदेव तु ॥
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्ग सर्व्वस्वैर्गुप्तं सर्व्वेण हीयते ॥
वैश्यः सर्व्वस्वदण्ड्यः स्यात् संवत्सरनिरोधतः ।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं सूत्रेण चार्हति ।
ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम् ॥
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह ।
विज्ञतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥
वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्यो मुण्ड्यस्तु तौ व्रजन् ।
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ।
क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः ॥
सूत्रेण मौण्ड्यमर्हेत्तु क्षत्रियो दण्डमेव वा ॥
अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात् सहस्रमन्त्यजस्त्रियम् ॥ * ॥
ऋत्विजं यस्त्यजेद्याज्यो याज्यर्त्विक् त्यजेद्यदि ।
शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम् ॥
न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥"
इति मनुः ॥ * ॥
दण्डस्य फलं यथा, युक्तिकल्पतरौ ।
"दण्डः संरक्षते धर्म्मं तथैवार्थं विधानतः ।
कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते ॥
राजदण्डभयाल्लोकाः पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परलोकभयात्तथा ॥
दण्डश्चैव भवेल्लोके विभजन् साध्वसाधु वा ।
मूले मत्स्यानि वा यच्चन् दुर्ब्बलान् बलवत्तराः ॥
अपराद्धेषु भूपालो दण्डं कुर्य्यादृषयाविधि ।
अन्यथाकरणात्तस्मात् राजा भवति किल्बिषी ॥
विरुद्धमपि जल्पन्तो दूता दण्ड्या न भूभृता ।
दूतहन्ता तु नरकमाविशेत् सचिवैः सह ॥
विपश्चिद्वचनादन्यो भृत्यो दण्डं न चार्हति ।
विपश्चिद्वचनाद्दण्डः स्वामिनं नरकं नयेत् ॥"

दण्डकः, पुं क्ली, (दण्ड इव कायतीति । कै + कः ।) श्लोकविशेषः । छन्दोभेदः । इत्यमरटीकाभारतसुन्दरी ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥ (दृश्यो दण्डः । "दृश्ये" ५ । ३ । ८६ । इति कन् । क्षुद्रलगुडः । सोंटा इति भाषा ॥ पुं, इक्ष्वाकुपुत्रः । यथा, भागवते । ९ । ६ । ४ ।
"श्रुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥"
एतन्नृपसन्निवेशस्थानं दण्डकारण्यमितिख्यातम् । यथा, रामायणे । १ । १ । ४० ।
"रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥")

दण्डकन्दकः, पुं, (दण्डवत् कन्दो मूलं यस्य । कप् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

दण्डका, स्त्री, (दण्डक + स्त्रीलिङ्गत्वादत्र टाप् ।) जनस्थानम् । दण्डकारण्यम् । इति जटाधरः ॥ (यथा, रामायणे । २ । ३० । ३६ ।
"मम सन्ना मतिः सीते ! नेतुं त्वां दण्डकावनम् ।
वृषिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥")

दण्डकाकः, पुं, (दण्डो यमदण्ड इव काकः । अशुभसूचकत्वादस्य तथात्वम् ।) दीर्घकाकः । इति हेमचन्द्रः ॥

दण्डताडा, स्त्री, (दण्डताड्यमाना ताडा ।) वाद्यविशेषः । दामामा इति नागरा इति च भाषा । तत्पर्य्यायः । नाडी २ घटी ३ यामनाडी ४ यमेरुका ५ यामघोषः ६ । इति त्रिकाण्डशेषः ॥ दमामः ७ दुन्दुभिः ८ दुन्दुः ९ गभीरिका १० । इति शब्दरत्नावली ॥

दण्डताली, स्त्री, (दण्डेन ताड्यमाना तालीतालनिर्म्मितवाद्यम् ।) तालीवाद्यम् । इति शब्दरत्नावली ॥

दण्डधरः, पुं, (दण्डस्य धरः । दण्डं धारयति । धृञ् धारणे + पचाद्यच् खिसुक् । इत्युज्ज्वलदत्तः । २ । २२ ।) यमः । इत्यमरः । १ । १ । ६२ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६५६ ।
"नक्षदण्डक्षतं दण्डं मुक्ता दण्डधराधिपः ।
अकाण्डदण्डस्खलाय ययौ दण्डधरान्तिकम् ॥")
राजा । इति जटाधरः ॥ (यथा, रघुः । ६ । ३ ।
"बलनिषूदनमर्थपतिञ्च तं
श्रमशुदं मनुदण्डधरान्वयम् ॥")
क्षि, लगुडधारकः ॥ (ग्राहकः । यथा, महाभारते । १२ । २३ । ४३ ।
"एवमेतन्मया कार्य्यं नाहं दण्डधरस्तव ॥"
चतुर्थोपाययुक्तः । यथा, भागवते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजानामिह योजितः ॥")

दण्डधारः, पुं, (दण्डं धरतीति । धृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) पृथ्वीनाथः । (यथा, गोः रामायणे । २ । ८८ । ७ ।
"उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केरलाः ।
दण्डधाराश्च सामुद्रा रत्नान्युपहरन्तु ते ॥")
प्रेताधिपः । इति मेदिनी । रे । २६६ ॥ (सगरसम्भातनृपविशेषः । स तु क्रोधवर्द्धनस्यासुरस्यांशेन जातः । यथा, महाभारते । १ । ६७ । ३७ ।
"क्रोधवर्द्धन इत्येव यस्यन्यः परिकीर्त्तितः ।
दण्डधार इति ख्यातः सोऽभवन्मनुजेश्वरः ॥"
धृतराष्ट्रपुत्राणामेकतमः । यथा, तत्रैव धृतराष्ट्रपुत्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची बाह्वी दण्डधारो धनुर्द्धरः ॥"

चि, दण्डधरः। (शासकः। यथा, राजतरङ्गिण्याम्। ४। १०६।
"दण्डधारे त्वयि शास! क्षितिमेतां प्रशासति।
को वैरक्षेद्वयोः पारमनाद्यावसीदति॥")
दण्डनायकः, पुं, (दण्डं राज्ञां चतुर्थोपायं नयतीति। नी+ण्वुल्।) सेनानीः। स चतुरङ्गबलाध्यक्षः। इति हेमचन्द्रः। ३। ३८६॥ (यथा, राजतरङ्गिण्याम्। ७। ६६६।
"कन्दर्पे कोटभट्टानां भिन्नानां सङ्गरोद्यते।
क्रुधन् राजपुरीं राजा यदृच्छादण्डनायकम्॥")
दण्डनीतिः, स्त्री, (दण्डेन नीयते या। यद्वा, दण्डो नीयतेऽनयेति। नी+कर्म्मणि करणे वा क्तिन्।) अर्थशास्त्रम्। इत्यमरः। १। ६। ५॥ तत् शास्त्रकारादिप्रणीतं नीतिशास्त्रम्। इति भरतः। तस्य निरुक्तिर्यथा,—
"दण्डेन नीयते चेदं दण्डं नयति वा पुनः।
दण्डनीतिरिति ख्याता लोकोऽकारान्तिवर्त्तते॥
तच्च ब्रह्मशतग्रन्थसहस्राध्यायपरिमितम्।
तद्यथा,—
"ततोऽध्यायसहस्राणां ग्रन्थचक्रे सुबुद्धिजम्।
यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णितः॥
त्रिवर्ग इति विख्यातो यत्र एष स्वयम्भुवा।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः॥
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः॥
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः॥
त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ!।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः॥
अमात्यरक्षा प्रणिधी राजपुत्रस्य लक्षणम्।
चारश्च विविधोपायः प्रणिधेयः पृथग्विधः॥
सामभेदप्रदानञ्च ततो दण्डश्च पार्थिव।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता॥
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च।
विभ्रमश्चैव मन्त्रस्य सिद्धसिद्धौ च यत् फलम्॥
सन्धिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः।
भयं सत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितम्॥
यात्राकालश्च चत्वारस्त्रिवर्गस्य च विस्तरः।
विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह॥
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः।
लक्षणं पञ्चवर्गस्य त्रिविधश्चात्र वर्णितम्॥
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिगृह्यितः।
प्रकाशोऽष्टविधस्तत्र गुप्तश्च बहुविस्तरः॥
तथा नागा हयाश्चैव पादाताश्चैव पाण्डव!।
विष्टिर्नावश्चरास्चेह देशिका इति चाष्टमम्॥
अङ्गान्येतानि कौरव्य! प्रकाशानि बलस्य च।
अङ्गमाज्ञप्तिमाश्रित्य गूढयोगा विधादयः॥
सर्व्वे चाभ्यवहार्य्ये वाप्युपांशुस्त्रिविधः स्मृतः।
अरिभिश्चसुदासीन इत्येतेऽप्यनुवर्णिताः॥
कृत्स्नो मार्गगुणश्चैव तथा भूमिगुणाश्च ह।
आत्मरक्षणमाश्रित्य सर्गाणां चान्ववेक्षणम्॥
कल्पना विविधाश्चापि नृनागरथवाजिनाम्।
यूहाश्च विविधाभिख्या विविधं युद्धकौशलम्॥
उत्पातांश्च निपातांश्च सुयुद्धं सुपलायनम्।
शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ!॥
बलव्यसननिर्युक्तं तथैव बलहर्षणम्।
पीड़ा चापदकालश्च पत्तिज्ञानञ्च पाण्डव!॥
तथा खातविधानञ्च योगसञ्चार एव च।
चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीड़नम्॥
अग्निदैरसदैश्चैव प्रतिरूपककारकैः।
श्रेणिमुख्योपजापेन वीरघ्नश्छेदनेन च॥
दूषणेन च नागानां आशुङ्काजननेन च॥
आराधनेन भक्तस्य प्रत्ययोपार्जनेन च॥
सम्राज्ञश्च च राज्यस्य ह्रासवृद्धौ समक्षसम्।
दूतसामर्थ्ययोगाश्च राष्ट्रस्य च विवर्द्धनम्।
अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनम्॥
अवमर्दैः प्रतीघातस्तथा चैव बलीयसाम्।
व्यवहारः सुकृत्यञ्च तथा कण्टकशोधनम्॥
श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः॥
अभृतानाञ्च भरणं भृतानाञ्चानवेक्षणम्।
अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता॥
तथा राजगुणाश्चैव सेनापतिगुणाश्च ह।
कारणञ्च त्रिवर्गस्य गुणदोषास्तथैव च॥
दुश्चेष्टितञ्च विविधं वृत्तिश्चैवानुजीविनाम्।
गृह्यितत्वञ्च सर्व्वस्य प्रमादस्य च वर्জ্জनम्॥
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनम्।
प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्तदा॥
विसर्गोऽर्थस्य धर्म्मार्थे कामहेतुकमुच्यते।
चतुर्थं व्यसनाघाते तच्चैवाचानुवर्णितम्॥
क्रोधजानि तथोग्राणि कामजानि तथैव च।
दृष्टोक्तानि क्रुरश्रेष्ठ! व्यसनान्यत्र चैव ह॥
मृगयाश्चास्तथा पानं स्त्रियश्च भरतर्षभ!।
कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा॥
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च।
निग्रहोऽथात्मनस्त्यागमर्थदूषणमेव च॥
यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः।
अवमर्दैः प्रतीघातः केतनानाञ्च भञ्जनम्॥
चैत्यद्रुमावमर्दञ्च रोधः कर्म्मान्तनाशनम्॥
उपस्कारोऽथ वसनं तथोपायाश्च वर्णिताः।
पनवानकशङ्खानां भेरीणाञ्च युधिष्ठिर!॥
उपार्জ্জनञ्च द्रव्याणां परिमर्दञ्च तानि षट्।
लक्षस्य च प्रशमनं सतां चैवाभिपूजनम्॥
विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता।
मङ्गलालभनञ्चैव शरीरस्य प्रतिक्रिया॥
आहारयोजनञ्चैव नित्यमास्तिक्यमेव च।
एकेन च पथोत्थेयं सत्यत्वं मधुरा गिरः॥
उत्सवानां समाजानां क्रियाः केतनजास्तथा।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ॥
वृत्तिर्भरतशार्दूल! नित्यश्चैवान्ववेक्षणम्।
अदण्डाज्ञं च विप्राणां युक्त्या दण्डनिपातनम्॥
अनुजीविजजातिभ्यो गुणेभ्यश्च समुद्भवः।
रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम्॥
मण्डलस्या च या चिन्ता राजन्! द्वादशराजिका॥

हासप्रतिविधा चैव शरीरस्य प्रतिक्रिया।
देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः॥
धर्म्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः।
उपायश्चात्र लिप्सा च विविधा भूरिदक्षिण!॥
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः।
दूष्यं स्रोतांसि चैव वर्णितश्च स्थिराम्भसाम्॥
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः।
तत् सर्व्वं राजशार्दूल! नीतिशास्त्रेषु वर्णितम्॥
एतत् श्रुत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः।
देवानुवाच संहृष्टः सर्व्वान् शक्रपुरोगमान्॥
उपकाराय लोकस्य त्रिवर्गस्थापनाय च।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता॥
दण्डेन सहिता ह्येषा लोकरक्षणकारिका।
निग्रहानुग्रहरता लोकाननुचरिष्यति॥"
इति महाभारते राजधर्म्मः॥
दुर्गा। यथा,—
"नयानयगतालोके विकल्पनिलयामला।
दण्डनाङ्गमनाङ्गापि दण्डनीतिरिति स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
दण्डपांशुलः, पुं, (दण्डेन दण्डधारकेण पांशुलो नीचः।) द्वारपालः। इति शब्दरत्नावली॥
दण्डपाणिः, पुं, (दण्डः पाणौ यस्य।) यमः। (यथा, भागवते। १। १७। ३५।
"परीक्षितैवमादिष्टः स कलिर्जातवेपथुः।
असुरुतासिमाश्रित्य दण्डपाणिमिवोद्यतम्॥")
काशीस्थशिवगणविशेषः। स पूर्व्वभद्रस्य पुत्रः हरिकेशनामा शिवमाराध्य शिववरेण काश्यां दण्डनायकत्वमवाप्तवान्। यथा,—
"भक्तस्य धीरस्य तपोनिधेर्हरौ
हरो वराणां निकरं तदा ददौ।
क्षेत्रस्य यस्यास्य मम प्रियस्य भो
भवाधुना दण्डधरो वराश्रम॥
स्थिरस्त्वमद्यादि दुरात्मदण्डकः
सुपालकः पुण्यकृतान्त्र मत्प्रियः।
त्वं दण्डपाणिर्भव नामतोऽधुना
सर्व्वान् गणान् प्राधि ममाज्ञयोत्कटान्॥"
"त्वत्सात्कृतक्षेत्रवरेऽद्य यच्चराट्
कस्त्वामनाराध्य सुमुक्तिभाग्जनः।
सभाजनं प्रागत एव ते चरेत्
ततः समर्च्यो मम भक्त आदरात्॥
मद्भक्तियुक्तोऽपि विना त्वदीयां
भक्तिं न काशीवसतिं लभेत।
गणेषु देवेषु हि मानवेषु
तदग्रमान्यो भव दण्डपाणे!॥"
इति काशीखण्डे ३२ अध्यायः।
(खनामख्यातचन्द्रवंशीयनृपविशेषः। यथा, मात्स्ये। ५०। ८७।
"वह्नीनरात्मजश्चैव दण्डपाणिर्भविष्यति॥"
अयन्तु मासत्रयाधिकचत्वारिंशद्वर्षपर्य्यन्तं राज्यं चकार। यथा, राजावल्याम् १ परिच्छेदे।
"चत्वारिंशत् समाश्चैव सोऽपि मासत्रयाधिकाः।
बुभुजे पृथिवीमेतां दण्डपाणिर्महाबलः॥"

दण्डधरे, त्रि। यथा, महाभारते। १।१३६।२८।
"भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः।
प्रविवेश महासेनां मकरः सागरं यथा॥")
दण्डपारुष्यं, क्ली, (दण्डेन यत् पारुष्यं परुषता। दण्ड्यतेऽनेनेति दण्डो देहक्लेशेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा।) राज्ञां सप्तव्यसनान्तर्गतव्यसनविशेषः। इति हेमचन्द्रः। ३। ४०३॥ अष्टादशविवादान्तर्गतविवादविशेषः। तत्तु ताड़नादि। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः। ८। २७८।
"अत ऊर्द्धं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम्॥")
दण्डपालः, पुं, (दण्डं शरीरं पालयतीति। पालि+अण्।) अङ्गरक्षकसत्तमः। दाँड़िका इति भाषा। इति हारावली। १६०॥ (दण्डेन पालयतीति। पालि+अच्।) द्वारपालः॥
दण्डपालकः, पुं, (दण्डपालवत् कायतीति। के+कः।) अङ्गरक्षकसत्तमः। इति हारावली। १६१॥
दण्डबालधिः, पुं, (दण्ड इव बालधिर्यस्य।) हस्ती। इति शब्दरत्नावली॥
दण्डभृत्, पुं, (दण्डं चक्रभ्रामणार्थं लगुड़ादिकं बिभर्त्तीति। भृ+क्विप् तुगागमश्च।) कुम्भकारः। इति त्रिकाण्डशेषः॥ (दण्डं दमनं बिभर्त्तीति।) दण्डधारके, त्रि॥
दण्डयात्रा, स्त्री, (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम्।) दिग्विजयः। संयानम्। वरयात्रा। इति मेदिनी। रे, २६५॥
दण्डयामः, पुं, (दण्डं यच्छतीति। यम+अण्।) यमः। दिनम्। अगस्त्यः। इति मेदिनी। मे, ६०॥
दण्डरी, स्त्री, डङ्गरीफलम्। इति राजनिर्घण्टः॥
दण्डवादी, [न्] पुं, (दण्डेन वदतीति। वद+णिनिः।) दण्डटः। द्वारपालः। इति हारावली। १२८॥ दण्डवक्तरि, त्रि॥
दण्डवासी, [न्] पुं, (दण्डेन वसतीति। वस+णिनिः।) द्वारपालः। इति त्रिकाण्डशेषः॥ दण्डयामाधिष्ठितजनः। इति जटाधरः॥
दण्डविष्कम्भः, पुं, (दण्डं मन्थानदण्डं विष्कम्भाति निबध्नाति यत्र। वि+स्कम्भ+अधिकरणे घञ्। वेः स्कम्भातेर्नित्यमिति वत्वम्।) यत्र स्तम्भादौ आकर्षणार्थं रज्वा दण्डो निबध्यते सः। घोलमञ्चोया खुँटी इति भाषा। तत्पर्य्यायः। कुठरः २। इत्यमरः। २।६।७४॥
दण्डवृक्षकः, पुं, (पत्रविहीनत्वात् दण्ड इव वृक्षः। ततः स्वार्थे कन्।) स्नुही। इति राजनिर्घण्टः॥
दण्डहस्तं, क्ली, (दण्ड इव हस्तो वृन्तरूपो यस्य।) तगरपुष्पम्। इति राजनिर्घण्टः॥
दण्डाजिनं, क्ली, प्राव्रज्यम्। इति शब्दार्थकल्पतरुः॥ (कपटिनां बहिर्दण्डादिकं यतीनां दण्डाजिनवत् आर्य्यलिङ्गत्वेन प्रतीयमानत्वात् तदर्थोऽत्रोपचर्य्यते। दण्डश्च अजिनञ्च द्वयोः समाहारः। यतीनां दण्डं धारणञ्च। यथा, देवीभागवते। १। १६। ३१।
"दण्डाजिनजटा चिन्ता यथा तव वनेऽपि च।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा॥")
दण्डादण्डि, व्य, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम्। "इच् कर्म्मव्यतिहारे।" ५। ४। १२७। इति इच्।) परस्परदण्डकरणकप्रहाररूपयुद्धम्। इति व्याकरणम्॥ लाठालाठि इति भाषा॥
दण्डारः, पुं, (दण्डं ऋच्छतीति। ऋ+अण्।) वाहनम्। मत्तहस्ती। शरयन्त्रकम्। कुम्भकारस्य चक्रम्। इति मेदिनी। रे, १६८॥
दण्डाहतं, क्ली, (दण्डेन आहतम्।) घोलम्। इत्यमरः। २।६।१५३॥ (दण्डेन ताड़िते, त्रि॥)
दण्डिकः, पुं, (दण्डोऽस्यास्तेति। दण्ड+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) दण्डधारकः। छड़िवरदार इति आसावरदार इति च भाषा। मत्स्यविशेषः। डाणिकाछा माछ इति भाषा। अस्य गुणाः। कफवायुपित्तनाशित्वम्। तिक्तत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ (दण्डदातरि नियामके, त्रि। यथा, महाभारते। ६। ११। ३६।
"न तत्र राजा राजेन्द्र! न दण्डो न च दण्डिकः।
स्वधर्म्मेणैव धर्म्मज्ञ! ते रक्षन्ति परस्परम्॥")
दण्डिका, स्त्री, (दण्डवदाकृतिरस्यस्याः। दण्ड+ठन्+टाप्।) हारविशेषः। इति जटाधरः॥ रज्जुः। यथा, अङ्कुस्रोतःकर्षं दण्डिकां छिनत्ति। इति सुपद्मव्याकरणम्॥ दण्डिका रज्जुरिति तट्टीकाकारः॥
दण्डितः, त्रि, (दण्डः सञ्जातोऽस्येति। दण्ड+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) कृतदण्डः। तत्पर्य्यायः। दापितः २ साधितः ३। इति हेमचन्द्रः॥
दण्डी, [न्] पुं, (दण्डोऽस्यास्तेति। दण्ड+"अत इनिठनौ।" ५। २। ११५। इति इनिः।) जिनविशेषः। इति त्रिकाण्डशेषः॥ (स तु कवीनामन्यतमः काव्यादर्शदशकुमारचरितादिग्रन्थप्रणेता। शङ्करार्य्यसमकालीनोऽयम्। यथा, शङ्करविजये। १५। १४०।
"स कथाभिरवन्तिषु प्रसिद्धान्
विदुषान् वाग्मयूरदण्डिमुख्यान्।
ग्रथिलीकृतदुर्म्मताभिमानान्
निजभाष्यश्रवणोत्सुकांश्चकार॥")
यथा, कालिदासः।
"जाते जगति वाल्मीकौ कविरित्यभिधा ययौ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥"
दमनकवृक्षः। इति राजनिर्घण्टः॥ यमः। (यथा, महाभारते। १। १६०। १७।
"तं वृक्षमादाय रिपुप्रमाथी
दण्डीव दण्डं पितृराज उग्रम्॥")
द्वारस्थः। चतुर्थाश्रमी। (अस्य व्यवहारादिकं यदुक्तं मनौ। ६। ४१-५८।
"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः।
समुपोढ़ेषु कामेषु निरपेक्षः परिव्रजेत्॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्।
सिद्धिमेकस्य संपश्यन् जहाति न हीयते॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत्।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः॥
कपालं वृक्षमूलानि कुचेलमसहायता।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम्।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत्॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः।
आत्मनैव सहायेन सुखार्थी विचरेदिह॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा क्वचित्।
आकीर्य्यं भिक्षुकैर्ब्रान्यैरागारमुपसंव्रजेत्॥
कृष्णकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन्॥
अतैजसानि पात्राणि तस्य स्युर्नित्यशो यतेः।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥
अलाबुं दारुपात्रञ्च मृण्मयं वैदलन्तथा।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्॥
एककालञ्चरेद्भैक्षं न प्रसज्जेत विस्तरे।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥
विधूमे सन्नमुषले अङ्गारे शुक्तवज्जने।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत्॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः।
अभिपूजितलाभैश्च यतिर्भुक्तोऽपि बध्यते॥")
दण्डग्रहणादेव दण्डी। भार्य्यादिषु विद्यमानेषु दण्डग्रहणेन प्रत्यवायो जायते। यदुक्तं महानिर्व्वाणतन्त्रे १३ पटले।
"स्थितायां यौवनयुतकान्तायां परमेश्वरि!।
सर्व्वं हि विफलं तस्य यः कुर्य्याद्दण्डधारणम्॥
विद्यते पितरौ देवि! यः कुर्य्याद्दण्डधारणम्।
सन्न्यासं विफलं तस्य रौरवाख्यं गमिष्यति॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि!॥
सगुरुश्चापि शिष्यश्च रौरवाख्यं प्रयद्यते॥")
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्रदायान्तर्गता अतस्तेषां निर्गुणब्रह्मोपासनैव परमो धर्म्मः। एते तु सुखिनः प्रायशः परिहितरञ्जितवस्त्रा रुद्राक्षमालाधारिणश्च। दण्डिनस्तु द्वादशवर्षपर्य्यन्तं भिक्षापर्य्यटनादिकं विधाय दण्डान् परित्यज्य परमहंसाश्रममाश्र-

येयुः इति साम्प्रदायिकाः ॥ एतेषां काश्यो एव प्रधानतमं वासस्थानम् ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । १२६ ।
"मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥"
योगाचार्य्यविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । उत्तरभागे । १० । ५ ।
श्रीकृष्ण उवाच ।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यश्छलेन तु ।
अवतारांश्च मुख्यस्य शिष्यांश्च भगवन् ! वद ॥"
उपमन्युरुवाच ।
"महाकालश्च मुण्डी च दण्डी मुण्डी स एव च ॥"
धृतराष्ट्रपुत्राणामेकतमः । यथा, महाभारते धृतराष्ट्रपुत्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची दण्डी दण्डधारो धनुर्द्धरः ॥"
दण्डीत्यत्र पाठान्तरम् ॥) दण्डयुक्ते त्रि । इति हेमचन्द्रः । ३ । ३८५ ॥ (यथा, महाभारते । १३ । १४ । ३७४ ।
"दण्डी मुण्डी कुशी चीरी धृताक्षो मेखलीकृतः ॥")
दण्डोत्पलं, क्ली, (दण्डयुक्तसुत्पलमिव ।) वृक्षविशेषः । डालिपोला इति डालकुनि इति च भाषा । अस्य गुणाः । वयश्वासकासनाशित्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ तत्तु पीतरक्तश्वेतपुष्पभेदेन त्रिविधम् । पीतस्य पर्य्यायः । गोवन्दनी २ गन्धवल्ली ३ सहदेवी ४ सहा ५ । रक्तस्य पर्य्यायः । विश्वदेवा १ । श्वेतस्य । दण्डोत्पला १ । इति रत्नमालाः ॥
दण्डोत्पला, स्त्री, (दण्डोत्पल + टाप् ।) श्वेतपुष्पदण्डोत्पलम् । इति रत्नमाला ॥
दण्ड्यः, त्रि, (दण्डयते इति । दण्ड + कर्म्मणि ण्यत् । यद्वा, दण्डमर्हतीति । दण्ड + "दण्डादिभ्यो यत्" ५ । १ । ६६ । इति यत् ।) दण्डनीयः । दण्डितव्यः । (यथा, मार्कण्डेये । २८ । ३४ ।
"यश्चोल्लङ्घ्य स्वकं धर्म्मं स्ववर्णाश्रमसंज्ञितम् ।
नरोऽन्यथा प्रवर्त्तेत स दण्ड्यो भूभृतो भवेत् ॥")
तत्पर्य्यायः । दण्डार्हः २ । इति जटाधरः ॥ (यथा, रघुः । १ । २५ ।
"स्थिते दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ॥")
दत्, पुं, दन्तः । इति शब्दचन्द्रिका । अस्य बहुवचने दतः ॥
दत्तं, त्रि, (दीयते इति । दा + क्तः ।) दत्तितम् । कृतदानम् । तत्पर्य्यायः । विसृष्टम् २ । इति त्रिकाण्डशेषः ॥ विश्राणितम् ३ । इति शब्दरत्नावली ॥ (यथा, माघे । १ । १५ ।
"स्वहस्तदत्तं सुनिमासने सुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥"
दा + भावे क्तः ।) दाने, क्ली । तत् सप्तविधं यथा,—
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।
पण्यगल्यं श्रुतिस्मृत्या स्नेहात् प्रत्युपकारतः ।
क्रीयुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकावेशगुरुग्लितैः ।
धर्म्मोत्कोचपरीहारव्यलीकच्छलयोगतः ॥
बालनष्टोन्मत्तदासत्वार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते ।
यद्दत्तं स्यादवज्ञानात् तददत्तमिति स्मृतम् ॥"
इति मिताक्षरा ॥
दत्तः, पुं, राजविशेषः । स अग्निसिंहनन्दनः । इति हेमचन्द्रः । ३ । ३६० ॥ (स तु जैनविशेषः । अपरः क्षत्रियवंशोत्पन्नो नृपविशेषः । यथा, महाभारते । १२ । २६६ । १५ ।
"आयुर्मतङ्गो दत्तश्च हृदो मात्स्य एव च ॥"
यदुवंशीयस्य राजाधिदेवस्य पुत्रः । यथा, हरिवंशे । ३८ । २ ।
"राजाधिदेवपुत्रास्तु जज्ञिरे वीर्य्यवत्तराः ।
दत्तातिदत्तौ वलिनौ पानश्च श्वेतवाहनः ॥") वैश्यस्योपाधिविशेषः । यथा,—
"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इत्युद्वाहतत्त्वम् ॥
अधुना कायस्थादेरुपाधिश्च । (यथा, कुलदीपिकायाम् ।
"गौड़ेऽौ कीर्त्तिमन्तश्चिरवसतिलता मौलिका ये हि सिद्धा
ते दत्ताः सेनदासाः करणहसहिताः पालिताः सिंहदेवाः ॥")
भगवदवतारविशेषः । स अत्रिपुत्रः दत्तात्रेय इति नाम्ना ख्यातः । इति श्रीभागवतम् ॥ (पुत्रविशेषः । यथा, देवीभागवते । १ । ६ । ४८ ।
"क्रीतः सहोढः कानीनः क्रीतः प्राप्तस्तथा वने ।
दत्तः कृत्रिमश्चाष्टौ पुत्रा धनहारिणः स्मृताः ॥"
तथा, महाभारते । १ । १२० । ३४ ।
"दत्तः क्रीत उपक्रीत उपगच्छेत् स्वयञ्च यः ॥")
दत्तकः, पुं, (दत्त एव । स्वार्थे कन् ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । सपिण्डदत्तकस्य अशौचव्यवस्था । यथा, "सापिण्डस्य पुत्रीकरणे तु सपिण्डमरणादिनिमित्तं दत्तकस्य तन्मरणादिनिमित्तं सपिण्डानां दशराचमेव निर्विवादम् । इति श्रीमन्तभट्टधृतदत्तकदीधितिः ॥ * ॥
औरसपुत्रेण सह तस्य समभागित्वम् । यथा,—
"दत्तपुत्रे यथाजाते कदाचित्त्वौरसो भवेत् ।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥
इत्यपि वचनं शूद्रविषयम् ।" इति दत्तकचन्द्रिका ॥
अन्यत् पोष्यपुत्रशब्दे द्रष्टव्यम् ॥
दत्तकपुत्रः, पुं, (दत्तक एव पुत्रः ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । यथा, याज्ञवल्क्ये ।
"दद्याच्चाता पिता वा यं स पुत्रो दत्तको भवेत् ॥"
तत्परिग्रहस्य प्रकारो यथा,—
"शुक्रशोणितसम्भवः पुत्रो मातापित्रनिमित्तकः ।
तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥
नैवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषाम् ।
स्त्री पुत्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः ॥
पुत्रं प्रतिगृह्णीयन् बन्धूनाकार्य्य राजनि निवेद्य निवेशनस्य मध्ये चाङ्गुलिभिर्हुत्वा प्रतिगृह्णीयादिति ।" इति वशिष्ठः ॥ तस्य गोत्रधनप्राप्तिर्यथा,—
"गोत्रऋक्थे जनयितुर्नैवेत्त्रिमः सुतः ।
गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ! ।
आचूड़ान्तं न पुत्रः स पुत्रतां याति चान्यतः ॥
चूड़ादा यदि संस्कारो निजगोत्रेण वै कृतः ।
दत्तादासनयास्ते सुरन्यथा दास उच्यते ॥
ऊर्द्धन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ! ।
गृहीत्वा पञ्चवर्षीयपुत्रेष्टिं प्रथमञ्चरेत् ॥"
इत्युद्वाहतत्त्वम् ॥
दत्तको द्विविधः । केवलदत्तकः द्व्यामुष्यायणदत्तकश्च । केवलदत्तको जनकेन प्रतिगृह्णीतार्थमेव दत्तः तस्यैव पुत्रः । द्व्यामुष्यायणस्तु जनकप्रतिग्रहीतृभ्यामावयोरयमिति संप्रतिपन्नः स उभयोरपि पुत्रः ।" इति मिताक्षरा ॥
दत्तापदानिकं, क्ली, (दत्तस्य आपदानं ग्रहणमस्यस्य । दत्तापदान + ठन् ।) अष्टादशविवादपदान्तर्गतविवादपदविशेषः । दत्तस्य पुनराहरणं यस्मिन् विवादपदे तत् । यथा, नारदः ।
"दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्तापदानिकं नाम व्यवहारपदं हि तत् ॥"
"असम्यग्विहितमार्गेण ।" इति मिताक्षरा ॥
दत्तात्मा, [न्] पुं, (दत्तः आत्मा येन ।) पुत्रविशेषः । यथा,—
"दत्तात्मा तु स्वयं दत्तः ।" इति कात्यायनः ॥ अस्य विवरणम् । "दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्तत्वमुपगतः ।" इति मिताक्षरा ।२।१३४॥ (विश्वदेवानामन्यतमः । यथा, महाभारते । १३ । ६२ । ३४ ।
"सोमपः स्वर्य्यसावित्रो दत्तात्मा पुष्करीयकः ॥")
दत्तानपकर्म्म, [न्] क्ली, (दत्तस्य अनपकर्म्म आदानं यत्र ।) दत्तापदानिकम् । इति मनुः ॥
दत्तिः, स्त्री, (दा + भावे क्तिन् ।) दानम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ८६ ।
"अपत्यीकमनाः कुटुम्बिनी-
मनुगृह्णीष्व निवापदत्तिभिः ॥")
दत्तेयः, पुं, (दत्तायां अपत्यं पुमान् । दत्ता + ढक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥
दद, ड दाने । धृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ड, ददते । इति दुर्गादासः ॥
ददनं, क्ली, (दद + भावे ल्युट् ।) दानम् । इति शब्दरत्नावली ॥
ददः, पुं, कच्छपः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (ददाति कण्डूमिति । दद + बाहुलकात् रुः । यद्वा, दरिद्राति दुर्गच्छत्यनेनेति । दरिद्रा + रुगयादिलात् कुप्रत्ययेन साधुः । इत्युज्ज्वलदत्तः । १ । ६२ ।) रोगविशेषः । दाद

इति भाषा। तस्य रूपान्तराणि। दद्रुः २ दद्रः ३ दर्द्रः ४। इति भरतधृतशब्दभेदः॥ तस्य लक्षणं यथा,—
"सकण्डुरागपिड़कं दद्रुमण्डलसंयुतम्॥"
इति माधवकरः॥
तस्यौषधम् यथा,—
"विड़ङ्गेड़गजाकुष्ठनिम्बासिन्यूत्यसर्षपैः।
सूत्रामुपिष्टो वेषोऽयं दद्रुकुष्ठविनाशनः॥
प्रपुन्नाड़स्य बीजानि धात्री सर्ज्जरसः खुही।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम्॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत्।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च॥"
इति गारुड़े १७५ अध्यायः॥ *॥
"एकञ्च त्रिफलाभागस्तथा भागद्वयं भिवे!।
सोमराजस्य बीजानां चूर्णं पथ्या च दद्रुजित्॥
अम्लतक्रं सगोमूत्रं कथितं लवणान्वितम्।
कांस्यस्थं खरं लेपात् कुष्ठदद्रुविनाशनम्॥
हरिद्रा हरितालञ्च दूर्व्वा गोमूत्रसैन्धवम्।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा॥"
इति गारुड़े १६४ अध्यायः॥ *॥
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं शुक्लोत्पलम्।
एषाञ्च चार्द्धिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा अग्नेर्दूरमिना पचेत्॥
पामा विचर्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रशाम्यन्ति कोमलत्वञ्च जायते॥"
इति च गारुड़े १६८ अध्यायः॥ *॥
अथ दद्रुचिकित्सा।
"कुष्ठलाङ्गलिनो दद्रोर्निशासैन्धवसर्षपाः।
चक्रपिष्टः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः॥
दूर्व्वाभयासैन्धवचक्रमर्द्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः।
त्रिभिः प्रलेपैरपि बद्धमूलां
दद्रुञ्च कुष्ठञ्च विनाशयन्ति॥"
कुठेरकः ममरी इति लोके।
लोके गन्धिलकाख्या सिद्धार्थकश्च खुहीक्षीरम्।
त्रयमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः॥
अष्टगुणे गोतक्रे तानि प्रक्षेतानि संदधात्।
दिवसचितयादूर्द्धं सम्यक् निष्पेषयेत्तानि॥
वन्योपलेन घृष्ट्वा दद्रुमालेपयेत्तेन।
सप्ताहाल्लेपोऽयं दद्रुकण्डूमवश्यं विनाशयति॥"
इति भावप्रकाशः॥
("लाक्षाकुष्ठं सर्षपाः श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य बीजम्।
क्षत्वैकस्थं तक्रपिष्टः प्रलेपो
दद्रुयुक्तो मूलकाड्डीजयुक्तः॥
सिन्धूद्भूतं चक्रमर्द्दस्य बीज-
मिक्षूद्भूतं केशरं तार्क्ष्यशैलम्।
पिष्ट्वा लेपोऽयङ्गपित्थाद्रसेन
दद्रून्सर्वं नाशयत्येव योगः॥
हेमक्षीरी व्याधिघातः शिरीषो
निम्बः सर्ज्जो वत्सकः साजकर्ण्यः।
शीघ्रं तीव्रा नाशयन्तीह दद्रुः
क्षाराक्षेपोद्दर्षणेषु प्रयुक्ताः॥"
इति च सुश्रुते चिकित्सितस्थाने नवमेऽध्याये॥)
दद्रुकः, पुं, (दद्रुरेव। स्वार्थे कन्।) दद्रोगः। इति शब्दरत्नावली॥
दद्रुघ्नः, पुं, (दद्रुं दद्रोगं हन्तीति। हन+टक्।) चक्रमर्दकः। इत्यमरः। २।४।१४०॥ (यथा, भावप्रकाशे क्षुद्रकुष्ठचिकित्सायाम्।
"वाकुची चाथ दद्रुघ्नः पिचुमर्दो हरीतकी॥"
अस्य गुणा यथा,—
"दद्रुघ्नपत्रं दोषघ्नमग्नं वातकफापहम्।
कण्डूकासक्रमिश्वासदद्रुकुष्ठप्रणाशनम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दद्रुघ्नः, त्रि, (दद्रुरस्यस्येति। दद्रु+"लोमादि-पामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति नः।) दद्रोगी। इत्यमरः। २।६।५६॥
दद्रुनाशिनी, स्त्री, (दद्रुं नाशयतीति। नश+णिच+णिनिः। ङीप्।) तेजिनीकोटः। इति राजनिर्घण्टः॥
दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्यस्येति। दद्रुरोग+इनिः।) दद्रुरोगविशिष्टः। देदुया इति भाषा। तत्पर्य्यायः। दद्रुघः २। इत्यमरः। २।६।५६॥
दद्रुः, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति। दरिद्रा+"दरिद्राते र्यालोपश्च।" उणा १।६२। इति कः रकारेकारयोर्लोपश्च।) दद्रुः। इत्यमरटीकायां भरतः॥
दद्रुघ्नः, पुं, (दद्रुं हन्तीति। हन+टक्।) दद्रुघ्नः। इति शब्दरत्नावली॥
दद्रूणः, त्रि, (दद्रुरस्यस्येति। दद्रु+पामादित्वात् नः।) दद्रुघः। इत्यमरटीकायां रमानाथः॥
दध, ङ दधे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, दधते। दधे दानधृत्योः। आदध्यादन्धकारे रतिमतिशयिनीमिति मयूर-भट्टोक्तम्। गत्यर्थतावित्यात् अस्येव दीपरक्षेपद-साध्यत्वमिति रमानाथः। वस्तुतस्तु डु धाञ् धारणे इत्यस्येव स्यां साध्यम्। इति दुर्गादासः॥
दधि, क्ली, (दधातीति। धा+"भावायां धाञ्ज्ञ-ह्यगमिजनिनमिभ्यः।" ३।२।१७१। इत्यस्य वार्त्तिकोक्त्या किः स च णिद्वत्।) श्रीवासः। वसनम्। इति शब्दरत्नावली॥ क्षीरोत्तरा-वस्थाभावः। दह इति भाषा। तत्पर्य्यायः। क्षीरजम् २ मङ्गल्यम् ३ विरलम् ४। इति राजनिर्घण्टः॥ पयस्यम् ५। घनेतरत् दधि दध्याम्। इत्यमरः ३ अस्य गुणाः। अम्लत्वम्। गुरुत्वम्। वातदोषघ्नमनलत्वम्। संग्राहित्वम्। मूत्रावहत्वम्। बल्यत्वम्। श्लेष्मकफाभिवृद्ध्य-घ्नमनलत्वम्। वह्निभ्रान्तिकारित्वम्। कासश्वास-पीनसविषमज्वरशीतज्वररहितत्वम्। रक्तोद्रेक-शुक्रदृद्धिकारित्वञ्च। इति राजनिर्घण्टः। उष्ण-त्वम्। दीपनत्वम्। स्निग्धत्वम्। कषायानुरस-त्वम्। पाकेऽम्लत्वम्। पित्तमेदःप्रदत्वम्। सूत्र-श्लेष्मातिसारार्शोतीसाररुचिकार्श्येषु शस्तत्वञ्च। इति भावप्रकाशः॥ स्वादुत्वम्। हृद्यत्वम्। रोचनत्वम्। मङ्गल्यत्वम्। इति राजवल्लभः॥*॥
अथ पक्वदुग्धदधिगुणाः। रुच्यत्वम्। स्निग्धत्वम्। उत्तमगुणत्वम्। पित्तानिलाप्रहृत्वम्। सर्व्व-धात्वग्निबलवर्द्धनत्वञ्च॥ * ॥
निःसारदुग्धदधिगुणाः। संग्राहित्वम्। शीतल-त्वम्। वातलत्वम्। लघुत्वम्। विष्टम्भित्वम्। दीपनत्वम्। रुच्यत्वम्। ग्रहणीरोगनाशित्वञ्च॥*॥
बहुदधिगुणाः। सुस्निग्धत्वम्। मधुरत्वम्। नातिपित्तकरत्वञ्च॥ * ॥
शर्करासहितदधिगुणाः। श्रेष्ठत्वम्। क्षया-पित्तास्रदाहनाशित्वञ्च॥ * ॥
गुड़युक्तदधिगुणाः। वातनाशित्वम्। हृद्यत्वम्। हृंहणत्वम्। तर्पणत्वम्। गुरुत्वञ्च। इति भाव-प्रकाशः॥ * ॥
वातजक्षयनाशित्वम्। इति चक्रदत्तः॥ * ॥
रात्रौ दधिसेवने विशेषो यथा, रात्रौ दधि न भुञ्जीत किन्तु सघृतशर्करं ससुद्गरूपं सक्षौद्रं उष्णं सामलकं भुञ्जीत। रक्तपित्तकफोत्थेषु विकारेषु च अभ्युद्धृतान्वितमपि दधि नहितम्॥ ऋतुविशेषे विधिनिषेधौ। हेमन्तशिशिरवर्षासु दधि शस्तं शरद्ग्रीष्मवसन्तेषु प्रायशो विगर्हितम्॥ * ॥
अविधिना दधिसेवने दोषः। ज्वरारुचकृमि-वीसर्पकुष्ठपाण्डुभ्रमकामलारोगप्राप्तिः॥ * ॥
अथ गोदधिगुणाः। विशेषस्वादुत्वम्। बल्य-त्वम्। रुचिप्रदत्वम्। पवित्रत्वम्। दीपनत्वम्। स्निग्धत्वम्। पुष्टिकारित्वम्। वायुनाशित्वम्। अश्वेषदधिभ्यो गुणाधिक्यत्वञ्च॥ * ॥
माहिषदधिगुणाः। सुस्निग्धत्वम्। श्लेष्मलत्व-वातपित्तनाशित्वम्। स्वादुपाकित्वम्। अभि-ष्यन्दित्वम्। गुरुत्वम्। रक्तकफदूषणत्वञ्च॥ * ॥
छागीदधिगुणाः। उत्तमत्वम्। ग्राहित्वम्। त्रिदोषनाशित्वम्। श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम्। दीपनत्वञ्च। इति भावप्रकाशः॥*॥
आविकदधिगुणाः। दुर्नामकफव्याधिप्रकोपन-त्वम्॥ अश्वीदधिगुणाः। वातनाशित्वम्। दीपनत्वम्। चक्षुर्हितत्वञ्च॥ * ॥
औष्ट्रकदधिगुणाः। क्षारत्वम्। अत्यम्लत्वम्। कटुपाकित्वञ्च॥ * ॥
हस्तिनीदधिगुणाः। वीर्य्योष्णत्वम्। कषाय-त्वम्। कफवातनाशित्वञ्च॥ * ॥
मानुष्यदधिगुणाः। मधुरत्वम्। बल्यत्वम्। स्निग्धत्वम्। सन्तर्पणत्वञ्च। इति राजवल्लभः॥*॥
अथ दधिभेदाः।
"आदौ मन्दं ततः स्वादु स्वाम्लञ्च ततः परम्।
अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पच्यते॥" * ॥
मन्दादीनां लक्षणानि गुणाश्च।
"मन्दं दुग्धवदत्यल्परसं किञ्चिद्घनं भवेत्।

मन्दं स्यात् हृद्विशूलं दोषत्रयविदाहकृत् ।
यत् सम्यग् घनतां यातं यत्तं स्वादुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥
यत्तिरोहितमाधुर्यं यत्तास्वत्वं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥
तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तपित्तपुष्टिकरं परम् ॥"

इति भावप्रकाशः ॥ * ॥

"लवणमधुरसर्पिःशर्करासुद्गधात्री-
कुसुमरसविहीनं नैतदश्नन्ति नित्यम् ।
न च शरदि वसन्तं नोष्णकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि खादेत् ।
त्रिकटुकयुतमेतद्राजिकाजीर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्दीपनञ्च ।
तुहिनगिरिशिरःकाले सेवितञ्चातिपथ्यं
रचयति तनुदार्ढ्यं कान्तिसत्वञ्च नृणाम् ॥
दधिमधुरमतीवस्निग्धं वाहितञ्च नात्युष्णम् ।
यावद् यावन्मधुरं दोषहरं तावदुष्णमिदम् ॥"

इति राजनिर्घण्टः ॥ * ॥

"दधि यत् स्वादु तन्मेदःकफाभिष्यन्दकारकम् ।
दध्नस्तृतीयभागोक्तदूषणं कफपित्तकृत् ॥
विदाहि हृद्विशूलं मन्दजातं त्रिदोषकृत् ।
दधि त्वसारं रूक्षन्तु ग्राहि विष्टम्भि वातलम् ॥
पीनसे चातिसारे च ग्रीष्मके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"

इति राजवल्लभः ॥ * ॥

(ऋतुभेदे दधिविशेषगुणा यथा,—

"शारदं दधिगुर्व्वम्लं रक्तपित्तविवर्द्धनम् ।
श्लेष्मं तृष्णां ज्वरं शूलं करोति विषमज्वरम् ॥

इति शारददधिगुणाः ॥ * ॥

गुरु स्निग्धञ्च मधुरं कफशुक्रबलवर्द्धनम् ।
हृद्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिदन्दिदम् ॥

इति हैमन्तदधिगुणाः ॥ * ॥

शैशिरं सर्व्वमेवाह्नं मधुरं गुरु एव च ।
हृद्यं बलकरं पित्तश्रमापहरयं परम् ॥

इति शैशिरदधिगुणाः ॥ * ॥

वासन्तं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकम् ।
बलशुक्रौजसां प्रोक्तं वसन्ते न प्रशस्यते ॥

इति वासन्तदधिगुणाः ॥ * ॥

लघु चाम्लं भवेद्ग्रैष्मे चात्युष्णं रक्तपित्तकृत् ।
श्लेष्मश्रमपिपासाघ्नदधियुक्तं न ग्रैष्मके ॥

इति ग्रैष्मदधिगुणाः ॥ * ॥

वार्षिकं हितकृत् प्रोक्तं दधि ग्राह्यं न दोषलम् ।
श्लेष्मवातश्रमान् हन्ति श्रमातीसारनाशनम् ॥"

इति वार्षिकदधिगुणाः ॥ * ॥

"हिक्काश्वासग्रीहार्शोनामतिसारे भगन्दरे ।
शस्तं प्रोक्तं दधि क्षौद्रा लवणेन विमिश्रितम् ॥

इति दधिभोजनविधिः ॥" * ॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

"रोचनं दीपनं हृद्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लसुखं वातघ्नं मङ्गल्यं वृंहणं दधि ॥
पीनसे चातिसारे च ग्रीष्मके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"
"चिरोषितं मन्दकं जातं वातघ्नं दधि शुक्रलम् ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥

"दधि तु मधुरमम्लमल्पक्षपायानुरसं स्निग्धसुखं पीनसविषमज्वरातिसारारोचक-
मूत्रकृच्छ्रकार्श्यापहं हृद्यं प्राणकरं माङ्गल्यञ्च ॥
मद्दाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तहृदम्लं स्यादत्यम्लं रक्तदूषणम् ॥
विदाहि हृद्विशूलं मन्दजातं त्रिदोषकृत् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघुवातक्षयापहम् ॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।
विपाके मधुरं हृद्यं वातपित्तप्रसादनम् ॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदोऽर्शिकं दधि ॥
वातमर्शांसि कुष्ठानि क्रिमीन् हन्युदराणि च ।
दीपनं कफवातानां दुर्नाम्नाश्वाधिकं दधि ॥
रसे पाके च मधुरमम्लमभिष्यन्दि दोषलम् ।
दीपनीयमचक्षुष्यं वाड्वं दधि वातलम् ॥
रूक्षसुखं कषायञ्च कफमात्रापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ॥
कषायानुरसं नार्या दधि वर्च्चोविवर्द्धनम् ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयानि सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं हृद्यं न च पित्तकृत् ॥
कुर्य्याद्रुक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
प्रस्तात् चीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विष्टम्भीऽनिलनाशनः ॥
वह्निविबन्धनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

धारणकर्त्तरि, त्रि । इति सुग्धबोधम् ॥

दधिकूर्चिका, स्त्री, (दधिजाता कूर्चिका ।) अर्द्धोदकोष्णदुग्धे दध्नःसंयोगात् जाता । इति केचित् । उष्णदुग्धे दध्नःसंयोगात् जाता इत्यन्ये । छेना इति भाषा । अस्या गुणाः । वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्या यथा,—

"दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

दधिचारः, पुं, (दधिं चालयति विलोड़यतीति । दधि + चल + घञ् + अण् । लस्य रत्वम् ।) दधिमथनदण्डः । तत्पर्य्यायः । वैणावः २ तक्राटः ३ करटवेणः ४ । इति हारावली ॥२४॥

दधिज, क्ली, (दध्नो जायते इति । जन + "पचाद्यजातौ ।" ३ । २ । ६८ । इति डः ।) नवनीतम् । इति राजनिर्घण्टः ॥ (नवनीतशब्दे ऽस्य विशेषो ज्ञातव्यः ॥)

दधित्थः, पुं, (दधिवर्णो द्रवस्तिष्ठत्यस्मिन्निति । स्था + "सुपिस्थः ।" ३ । २ । ४ । इति कः । पृषोदरादित्वात् साधुः ।) कपित्थः । इत्यमरः । २ । ४ । २१ ॥ (यथा,—

"तद्दधित्थविल्वाम्लं जम्बुमध्वेः प्रपञ्चयेत् ॥"

इति वाभटे चिकित्सास्थाने नवमेऽध्याये ॥

"दधित्थविल्वचाङ्गेरी तक्रदाड़िमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाचनक्रिया ॥"

इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

दधित्थाख्यः, पुं, (दधित्थं आख्याति कपित्थवदनुकरोतीति । आ + ख्या + कः ।) ग्रहलद्रवः । इति रत्नमाला । लोवान् इति भाषा ।

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दानार्थदध्यादिनिर्म्मिता धेनुः । यथा, वराहपुराणे ।

"दधिधेनोर्म्मे हाराज ! विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ! ॥
गोचर्म्ममात्रे तु पुनः पुण्यप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां शक्राजिनकुशोत्तराम् ।
दधिकुम्भं सुसंस्थाप्य सदा धान्यचयोपरि ।
चतुर्थांशेन वत्सन्तु सौवर्णसुखमण्डितम् ।
आच्छाद्य वस्त्रयुगलेन पुष्पगन्धैस्तु पूजिताम् ।
ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ।
क्षमादिगुणयुक्ताय दद्यात्तां दधिधेनुकाम् ।
पुच्छदेशोपविष्टस्तु सुद्रिकाकर्णमाधवैः ॥
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमनुस्मरेत् ।
दधिक्रावेत्यनेनैव दधिधेनुं प्रदापयेत् ।
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ! ॥
एकाहारो दिनं तिष्ठेद्दत्ता च नृपनन्दन ! ॥
यजमानो वसेद्ब्राह्मे चिरायच्च द्विजोत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ।
यत्र क्षीरवहा नद्यो यत्र पायसकर्द्दमाः ।
सुलभ ऋषयः सिद्धास्तत्र गच्छन्ति धेनुदाः ।
य इदं श्रावयेद्वापि शृणुयाद्वापि मानवः ।
सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति ॥"

दधिपुष्पिका स्त्री, (दधीव शुभ्रं पुष्पमस्याः । कप् । टापि अत इत्वम् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥

दधिपुष्पी, स्त्री, (दधीव पुष्पमस्याः । जातित्वात् ङीष् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

दधिफलः, पुं, (दधीव शुभ्रो द्रवः फले यस्य ।) कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ॥

दधिमण्डः, पुं, (दध्नः मण्डः ।) मस्तु । इति रत्नमाला ॥ मात् इति भाषा ॥

दधिमण्डोदः, पुं, (दधिमण्ड इव उदकं यत्र । उदकस्य उदादेशः ।) दधिसमुद्रः । (यथा, भागवते । ५ । १ । ३३ ।

"क्षीरोदेक्षुरसोदसुरोदशतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः ॥")

दधिमुखः पुं, (दधिवत् शुभ्रं मुखं यस्य ।) वानर-विशेषः । स सुग्रीवश्वशुरः तस्य मधुवनपाल-कश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ । [वान्॥"

"श्रीमान् दधिमुखो नाम हरिरुद्वोऽति वीर्य्य-नागविशेषः । यथा, महाभारते । १ । ३५ । ८ ।

"सुरासुखो दधिमुखस्तथा विमलपिङ्गकः ॥"

अथवा दर्व्वीं करोत्यां सर्पाणामन्यतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ॥)

दधिग्रीवः, पुं, वानरः । इति चिकाण्डशेषः ॥

दधिस(ग्र)क्तवः, पुं, दध्युपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ६ । ४८ ॥ दइक्कातु इति भाषा ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, महाभारते । १३ । १०४ । ६२ ।

"न प्राशी लवणं विद्वान् प्राश्नीयान्न च रात्रिषु । दधिसक्तून् न भुञ्जीत तथामांसञ्च वर्जयेत् ॥")

दधिसारं, क्ली, (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्नेहः, पुं, (दध्नः स्नेहः ।) घृतसरः । तत्-पर्य्यायः । सरः २ दध्युत्तरम् ३ कट्टरम् ४ । इति रत्नमाला ॥

दधिस्वेदः, पुं, (दध्नः स्वेद इव ।) घोलम् । इति जटाधरः ॥

दधीचः, पुं, दधीचिसुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।

"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचिः, पुं, मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्द्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्र-वधार्थं देवैरस्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा,—

"ऋतेऽस्थिभ्यो दधीचस्य निर्हन्तुं त्रिदशद्विषः । तस्मात् यत्नाद्वरिश्रेष्ठो याच्यतां सुरसत्तमाः ॥ दधीचेऽस्थीनि देहीति तैर्व्वधिष्यथ दानवान् । तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥ ददौ चास्थीनि देवेभ्यो दधीचः सुमनास्ततः । प्राणायामं ततः कृत्वा देहं त्यक्त्वा शुभाक्षरान् ॥ सर्व्वलोकान् त्रयान् प्राप्तो येभ्यो नावर्त्तनं पुनः । तस्यास्थिभिरथो शक्रः प्रहरैः सुमनास्तथा ॥ कारयामास दिव्यानि तानि प्रहरणान्युत । वज्रासिशूलचक्रञ्च परिघा विविधा गदाः ॥ विश्वकर्म्मा सुरश्रेष्ठः परिघाद्यायुधानि च ॥"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दधीचस्थि, क्ली, (दधीचेरस्थि ।) वज्रम् । हेम-कम् । इति चिकाण्डशेषः ॥

दध्रक् [ञ्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् ह्रस्वादिकश्च निपात्यते ।) धृष्टः । इति चिकाण्ड-शेषः ॥ (धर्षकः । यथा, ऋग्वेदे । ५ । ६६ । ३ ।

"रातहव्यस्य सुष्टुतिं दध्रक्स्तोमैर्मनामहे ॥")

दध्नः, पुं, (दधते जीवेभ्यः पापपुण्यफलानि ददातीति । दध दाने + बाहुलकात् नः ।) यमः । इति शब्दरत्नावली ॥

दध्याकरः, पुं, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभ्रतां आनयतीति । आ + नी + क्विप् ।) सुदग्धना । इति रत्नमाला ॥ सुदर्शनगुलश्च इति भाषा । दरखरु इति केचित् । पुरारि इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तरं, क्ली, (दध्नः उत्तरं श्रेष्ठजातम् ।) दधि-स्नेहः । इति शब्दचन्द्रिका ॥ (यथा, हरिवंशे । ७८ । ६२ ।

"पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च । यथाकामं प्रदानाय भोज्यादिश्रयणाय च ॥")

दध्युत्तरगं, क्ली, (दध्न उत्तरं चरमावस्थां गच्छ-तीति । गम + डः ।) दधिस्नेहः । इति रत्न-माला ॥

दध्युदः, पुं, (दधिवदुदकं यस्य । उत्तरपदस्य च इत्युदकस्योदादेशः ।) दधिसमुद्रः । इति जटा-धरः ॥

दनुः, स्त्री, कश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति चिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।

"कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् । अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥ सुरभिर्विनता तद्वत् ताम्रा क्रोधवशा इरा । कद्रूर्विश्वा मुनिस्तद्वत्तासां पुत्रान्निबोधत ॥"

"दनुः पुत्रशतं लेभे कश्यपाद् बलदर्पितम् । विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥ द्विमूर्द्धा शङ्कुनिश्चैव तथा शङ्कुशिरोधरः । अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥ मरीचिर्मेघवांश्चैव इरा गर्भशिरास्तथा । विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥ इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च । एकचक्रो महाबाहुर्व्वाचस्तारकस्तथा ॥ असिलोमा पुलोमा च विन्ध्यवाग्यो महासुरः । स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥"

दानवविशेषे, पुं । यथा, गोः रामायणे कबन्ध-स्योक्तौ । ३ । ७५ । २४ ।

"श्रियो मां मथमं पुत्रं दनुं नाम्ना च दानवम् ॥")

दनुजः, पुं, (दनोर्जायते इति । जन + डः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ६ । ४० ।

"तवैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ड्] पुं, (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् द्वेष्टीति । द्विष् + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवशत्रौ, त्रि । यथा, प्रयोगरत्नमालायां शब्दप्रकरणस्यादौ ।

"नमो नन्दकुमार परात्र दनुजद्विषे ॥")

दनुसूनुः, पुं, (दनोः सूनुः पुत्रः ।) असुरः । इति जटाधरः ॥

दन्तः, पुं, (दम + "हसिमृग्रिणीति ।" उणा । ३ । ८६ । इति तन् ।) अस्थिकटकः । कृष्णः । इति मेदिनी । ते, २३ ॥ शैलशृङ्गम् । इति चिकाण्डशेषः ॥ चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि गुह्यदन्तपङ्क्ति-र्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २ । ६ । ९१ ॥ द्विजः ५ खरः ६ । इति शब्दरत्नावली ॥ * ॥ तत्शुद्ध-कारकौषधं यथा,—

हरिरुवाच ।

"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् । जातीं हिङ्गुलकं लाक्षा पक्वतेलेन पेषयेत् ॥ हरीतकीकषायेण घृष्ट्वा दन्तान् प्रलेपयेत् । दन्ताः सुलोहिताः पुंसः श्वेता रुद्र ! न संशयः ॥"

इति गारुडे १८३ अध्यायः ॥ * ॥

"शुक्लमामलकीपत्रं धातक्याः कुसुमानि च । पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे ॥ स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"

इति तत्रैव १८५ अध्यायः ॥ * ॥

"मूलं गोक्षुरकस्यैव चर्व्वित्वा नीललोहित ! । दन्तकीटव्यथां नश्येद्दन्तासुरविमर्द्दन ! ॥"

इति च गारुडे १९३ अध्यायः ॥ * ॥

सद्दन्तजातस्य शुभाशुभफलं यथा,—

अथ जातभदादि । तत्र दन्तजन्मचिन्ता ।

"जातः सदन्तः पितृमाद्दहन्ता तातं विहन्यात् प्रथमे तु मासे । अम्बां द्वितीये सहजं तृतीये मासि चतुर्थे शुभकारकः स्यात् ॥ मिष्टान्नभोजी सुभगः सुताख्ये षष्ठे सुखी पण्डितकल्पबुद्धिः । ततोऽधिकः स्यात् बलवान् दृढाख्ये मासेऽष्टमे वित्तसुखैर्विहीनः ॥ सुरप्रतापी नवमे ऋतुश्च दशमे तथा । एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥ अष्टौ पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकैस्तथा । स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः ॥ स्नानं संक्रमजस्याथ शान्तोर्द्दानमनन्तरं । होमं विप्रार्चनञ्चैवमशुभे दन्तदर्शने ॥"

इति ज्योतिस्तत्त्वम् ॥

रतिक्रीड़ायां तस्याघातस्थानानि यथा,—

"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥"

इति कामशास्त्रम् ॥ * ॥

अथ दन्तरोगाणां निदानादि यथा,—

"श्लेष्मितं दन्तवेष्टेभ्यो यस्याक्षसृक् प्रवर्त्तते । दुर्गन्धीनि सशब्दानि प्रक्लेदीनि चलानि च ॥ दन्तमांसानि शीर्य्यन्ते पच्यन्ति च परस्परम् । शीतादो नाम स व्याधिः कफश्लोणितसम्भवः ॥१॥ दन्तयोस्त्रिषु वा यस्य श्यावपुप्पोयते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २ ॥ स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च । दन्तवेष्टः स विज्ञेयो दुष्टश्लोणितसम्भवः ॥ ३ ॥ श्यावपुप्पुटदन्तस्तु यस्यावान् कफरक्तजः । लालास्रावी च विज्ञेयः शौषिरो नाम नामतः ॥ कण्डूमान् शौषिरो यस्तु ॥ इति च पाठः ॥ ४ ॥

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परितुद्यते ॥
यस्मिन् स सर्व्वजो व्याधिर्महाग्नेयगिरसंज्ञितः ॥५॥
दन्तमांसानि म्रीर्य्यन्ते यस्मिन् क्षीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥६॥
वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।
अभ्याहताः प्रसवन्ति म्रोणितं दन्तवेदना ॥
आध्मायन्ते सुते रक्ते मुखं पूति च जायते ।
यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः ॥७॥
दुष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वैदर्भोऽभिघातजः ॥८॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥९॥
घ्नन्तैः घ्नन्तैः प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकृतान् दन्तान् करालो न स सिध्यति ॥ १० ॥
हानये पञ्चमे दन्ते महान् म्रोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
दीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते ॥
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥१२॥
छाद्यच्छिद्रबलः स्रावी सशब्दो महारुजः ।
अनिमित्तरुजो घातात् स ज्ञेयः क्रिमिदन्तकः ॥१३॥
वक्रं वक्रं भवेद्दृश्यं दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
म्रोतरुद्धप्रवाताम्बुसङ्घोनामसङ्घा द्विजाः ।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसैर्मलस्रावैर्वाह्यान्तः क्षयपुर्गुरुः ।
सदाहरुक्स्रवैर्व्विद्रिः पूयास्यं दन्तविद्रधिः ॥)
मलो दन्तमतो यस्तु कफमारुतम्रोथितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यन्तु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी ॥१७॥
योऽक्षिकूटेन पित्तेन दग्धो दन्तस्त्रयेषतः ।
ग्लावतां नीलतां वापि गतः स ग्लावदन्तकः ॥"१८
इति माधवकरः ॥

दन्तकः, पुं, (दन्त एव । स्वार्थे कन् ।) पर्व्वतशृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १०० ॥ (दन्तः । इति युत्पत्तिलब्धोऽर्थः ॥ त्रि, दन्तेषु प्रसितः । दन्त + "स्वाङ्गेभ्यः प्रसिते । ५ । २ । ६६ । इति कन् ॥)

दन्तकर्षणः, पुं, (दन्तान् कर्षतीव यः । क्षद् + ल्युः ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठं, क्ली, (दन्तधावनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तदृयथा नरसिंहपुराणे ।
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्ततान् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
महाभारते ।
"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥"
निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते वृक्षराजकाः ॥
वृक्षराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावच्चन्द्रं न पश्यति ॥"
तस्य स्थौल्यं परिमाणञ्चाह विष्णुः ।
"कनिष्ठ्यसमं स्थौल्यं सकूर्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावकम् ॥"
मरीचिः ।
"द्वादशाङ्गुलजं विप्राणां क्षत्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणाञ्च षड़ङ्गुलमुदाहृतम् ॥"
इत्याह्निकतत्त्वम् ॥

दन्तकाष्ठकं, क्ली, (दन्तं काष्ठं काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥

दन्तच्छदः, पुं, (दन्तान्छादयत्यनेनेति । छद संवरणे + णिच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९ । इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
"दन्तच्छदैर्दन्तविधातचिह्नैः
स्तनेषु प्राप्तयत्नताभिवेशैः ।
संलक्ष्यते निर्हृयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥")

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यत्र । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यस्थानम् ।) विम्बी । इति राजनिर्घण्टः ॥

दन्तधावनं, क्ली, (दन्तानां धावनम् ।) दन्तमार्জ্জনम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा, गारुड़े २१४ अध्याये ।
"उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
सुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
कदम्बविल्वखदिरकरवीरवटार्জ্জुनाः ।
तगरं दहती जातिकरञ्जार्कातिमुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोडुम्बरार्জ্জुनाः ।
क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च घनारोग्यसुखप्रदाः ।
प्रक्षाल्य शुक्ला च शुचौ देशे व्यक्ता तदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्জ্জयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्व्वीत मुखशोधनम् ॥"
दन्तमुद्धिः । तस्य विधिर्यथा,—
"प्रातर्भुक्त्वा च सुहृद्यं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥"*॥
तस्य काष्ठानि यथा,—
"कोऽप्यत्र करवीराख्यकरञ्जबकुलाग्रजान् ।
दन्तकाष्ठार्थमन्यें तु सर्व्वान् कण्टकिनोऽभ्यधुः ॥
खदिरञ्च कदम्बञ्च करञ्जञ्च वटस्तथा ।
तिन्तिड़ी वेणुपृष्ठञ्च आम्रनिम्बौ तथैव च ।
अपामार्गञ्च विल्वञ्च अर्कश्चोडुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ॥"*॥
तस्य निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालखर्জ্জूरैः केतकीयुतैः ।
नारिकेलेन ताड्या च न कुर्य्याद्दन्तधावनम् ॥"*॥
तस्य दिङ्मेदेन शुभाशुभफलं यथा,—
"पूर्व्वः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः ।
पूर्व्वास्योत्तरास्येन सम्पदो दन्तधावनात् ॥"*॥
तस्य तिथिविशेषे निषेधो यथा,—
"प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥"*॥
दन्तधर्षणानन्तरं चक्षुःसेचनं यथा,—
"दन्तानूर्द्धमधो दृष्ट्वा प्रातः सिञ्चेच्च लोचने ।
तोयपूर्णसुखस्थेन दृष्टिरासु प्रसीदति ॥"*॥
रोगविशेषे दन्तकाष्ठवर्জ্জनं यथा,—
"अर्हितौ कर्कटशृङ्गी च दन्तरोगी नवज्वरी ।
म्रोथी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्জ्जयेत् ॥"*॥
तस्य गुणा यथा,—
"निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् ।
आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥"
इति राजवल्लभः ॥ * ॥
"क्षतशौचस्ततः प्राज्ञः कुर्य्याद्दन्तस्य धावनम् ।
जिह्वायाश्चार्জ্जनञ्चापि रसज्ञच्छदवादिभिः ॥
दधिक्षीराभिसुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेन्नारकी भवेत् ॥
मध्यमानामिकाभ्याञ्च हृद्धाङ्गुष्ठेन च द्विजः ।
दन्तस्य धावनं कुर्य्यात् तर्জ্जन्या न कदाचन ॥
अश्वत्थवटविल्वानां धाराभिः काष्ठकस्य वुधः ।
न दन्तधावनं कुर्य्यात्तथैवेक्षुरसस्य च ॥
विल्वक्रियापलं प्रेक्षुरस्या दन्तधावनम् ।
प्रभाते कुरुते प्राज्ञः सूर्य्योदयविवर्জ्जिते ॥
सूर्य्योदये द्विजश्रेष्ठ ! यः कुर्य्याद्दन्तधावनम् ।
नित्यक्रियाफलं तस्य सर्व्वमेव विनश्यति ॥
यः स्नानसमये कुर्य्यात् जैमिने ! दन्तधावनम् ।
निराशाः पितरो यान्ति तस्य देवाः सुरर्षयः ॥
दन्तस्य धावनं कुर्य्यादृयो मध्याह्नापराह्णयोः ।
तस्य पुण्यं न गृह्णन्ति देवताः पितरो जलम् ॥
स्नानकाले पुष्करिण्यां यः कुर्य्याद्दन्तधावनम् ।
तावज्ज्ञेयः स चण्डालो यावद्गङ्गां न पश्यति ॥
भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्तधावनम् ।
तद्दन्तकाष्ठीं पितरो भुक्त्वा गच्छन्ति दुःखिनः ॥
उपवासदिने विप्र ! पिण्डश्राद्धदिने तथा ।
न च तत्फलमाप्नोति दन्तधावनतत्परः ॥
प्रभाते मार्জ्जयेद्दन्तान् वाससा रसनां तथा ।
कुर्य्याद्द्वादश विप्रेन्द्र ! कवलानि जलैर्मुखः ॥
उपवासे पिण्डश्राद्धे विधिनानेन जैमिने ! ।
दन्तधावनतत्त्वज्ञः संपूर्णं लभते फलम् ॥"
इति पाद्मे क्रियायोगसारः ॥

दन्तधावनः, पुं. (धावयत्यनेनेति। धावि+ल्युट्। दन्तानां धावनः।) खदिरवृक्षः। गुच्छकरञ्जः। इति राजनिर्घण्टः॥ वकुलः। इति शब्दचन्द्रिका॥

दन्तपत्रं, क्ली, (दन्ता इव पत्राणि यस्य।) कुरुबकम्। इति शब्दरत्नावली॥ (यथा कुमारे। ७। २३।

"कर्णावसक्तामलदन्तपत्रं
माता तदीयं मुखमुन्नमय्य॥")

दन्तपत्रकं, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य। कप्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥

दन्तपुष्पं, क्ली, (दन्त इव शुभ्रं पुष्पमस्य।) कतकफलम्। इति शब्दचन्द्रिका॥

दन्तफलं, क्ली, (दन्त इव शुक्लं फलमस्य।) कतकम्। इति शब्दचन्द्रिका॥

दन्तफलः, पुं, (दन्त इव शुक्लं फलमस्य।) कपित्थः। इति राजनिर्घण्टः॥

दन्तफला, स्त्री, (दन्तवत् शुभ्रं फलं यस्याः। टाप्।) पिप्पली। इति राजनिर्घण्टः॥

दन्तभागः, पुं, (दन्तसहितो भागः। प्राकपार्थिवादिवत् समासः।) गजाग्रभागः। गजस्य मुखतः स्कन्धपर्य्यन्तो योऽग्रभागः स दन्तसहितः। इत्यमरभरतौ॥

दन्तमलं, क्ली, (दन्तलग्नं दन्तस्य वा मलम्।) दन्तलग्नक्लेदः। तत्पर्य्यायः। पुप्पिका २। इति हारावली। १६५॥

दन्तमूलिका, स्त्री, (दन्त इव शुक्लं मूलमस्याः। कप्+टापि अत इत्वच।) दन्तीवृक्षः। इति शब्दरत्नावली॥

दन्तरोगः, पुं, (दन्तस्य रोगः।) रदनामयः। तन्निदानादि दन्तशब्दे द्रष्टव्यम्। तस्यौषधं यथा,

"काकजङ्घाग्निमूले सुखेन विधृते शिव!।
चर्वित्वा दन्तरोगाणां विनाशो हि भवेद्ध्रुवं!॥"

दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः॥ इति गारुड़े १८६ अध्यायः॥ अपि च गारुड़े १६८ अध्याये।

"शुष्कमूलकमुष्टीनां चारो हिङ्गुजागरम्।
मूतपुष्पी वचा कुष्ठं दारु ग्रियु रसाञ्जनम्॥
सौवर्चलं यवक्षारं साम्लं तैलं तथा।
भृङ्गयन्थि विड़ं सुक्ष्मं मधु शुक्रं चतुर्गुणम्॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम्।
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः।
पूरणादस्य तैलस्य क्षयः कर्णयोः खिलाः॥
क्षिप्रं विनाशमायान्ति ग्रध्राङ्गुलीतशेखर!।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम्॥"

अन्यच्च।

"तैलं क्षाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत्।
द्रव्यैः पलमितैरेतैः क्वाथेश्चापि चतुर्गुणैः॥
लोध्रकट्फलमांसरोहिषपद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥
दारुणं दन्तशूलञ्च दन्तमोक्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विरुचिं विरसास्यताम्॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥
इति लाक्षादं तैलम्।

जयेद्विसर्पवर्त्मः खिन्नमवलं क्रमिदन्तकम्।
तथा च पीतैर्व्रातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रमिदन्तापहं कोष्णं हिङ्गुदन्तान्तरे स्थितम्॥
दृष्टतीभूमिकदम्बीपत्राङ्कुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रमिदन्तकवेदनाशमकः॥
नीली वायसवल्ली कटुतुम्बीमूलमेकैकम्।
संचूर्ण्य दशनविधृतं दशनक्रमिपातनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषश्चैतस्य च।
निर्यूहाच्चानिलाघ्नानां दन्तहर्षप्रमर्दनाः॥
चैतस्य सर्पिषः चित्रता पक्षस्य सर्पिषः कवल इत्यर्थः।
स्नेहिकोऽत्र हितो धूमो नस्यं स्नेहिकमेव च।
पेया रसयवाग्वश्च क्षीरसन्तानिकाधृतम्॥
शिरोवस्तिश्चितश्चापि क्रमो यश्चानिलापहः।
अत्र दन्तहर्षे।
अच्छिद्रदन्तमूलानि मूक्तैरासुद्धरेद्भिषक्।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तान् प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका क्षुद्रतमा तत्राप्येषा क्रिया हिता॥
अत्र दन्तशूलकरायाम्। एषा क्रिया दन्तहर्षक्रिया।
फलान्यम्लानि शीतानि रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥"
इति भावप्रकाशः॥

दन्तवल्कं, क्ली, (दन्तानां वल्कमिवाच्छादकत्वात्।) ओष्ठः। इति हेमचन्द्रः। ३। २४५॥

दन्तवासाः, [स्] पुं, (दन्तस्य वासो वल्कमिवावरकत्वात्।) ओष्ठः। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ३४।

"अपि त्वदावञ्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा॥")

दन्तवीजकः, पुं, (दन्ता इव वीजानि यस्य। ततः स्वार्थे कन्।) दाड़िमः। इति राजनिर्घण्टः॥

दन्तशटः, पुं, (दन्तेषु शट इव म्लानिजनकत्वात्।) दन्तशठः। इत्यमरटीकायां मथुरानाथः॥

दन्तशठः, पुं, (दन्तेषु शठ इव म्लानिकारकत्वात्।) जम्बीरः। कपित्थः। कर्म्मरङ्गकः। नागरङ्गकः। इति मेदिनी। ठे, १६॥ (यथा, सुश्रुते। १। ४६।

"रेरावतं दन्तशठमग्रं श्लोत्तिपित्तकृत्॥")

अम्बः। इति हेमचन्द्रः। ६। २४॥

दन्तशठा, स्त्री, (दन्तेषु शठा।) चाङ्गेरी। इति मेदिनी। ठे, १६॥ (यथा, भावप्रकाशे।

"चाङ्गेरी घुक्रिका दन्तशठाम्लाम्लौषिका॥")

क्षुद्राम्बिका। इति राजनिर्घण्टः॥

दन्तशर्करा, स्त्री, (दन्तस्य शर्करेव।) दन्तरोगविशेषः। कफवायुश्लोषितदन्तगतमलम्। पाथुरि इति भाषा॥ (तस्य लक्षणं यथाह माधवकरः।

"मलो दन्तगतो यस्तु कफमारुतशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥"

यथा च सुश्रुते निदानस्थाने १६ अध्याये।

"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै।
सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा॥")

तस्यौषधम् यथा,—

"गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्करान्॥"
इति गारुड़े १६० अध्यायः॥

दन्तशाणः, पुं, (दन्तानां शाण इव। चिक्कणताजनकत्वात्।) निचुलवृक्षः। इति त्रिकाण्डशेषः॥ मिधि इति भाषा॥

दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र।) माड़ी। इति शब्दरत्नावली॥

दन्तशूलः, पुं, (दन्तस्य शूल इव। शूलवेदनवद्वेदनादायकत्वात्।) दशनवेदना। तस्यौषधम्॥ यथा,—

"चिफलाग्निमयष्ट्याह्वं कटुकारग्वधैः शृतम्।
पाययेन्मधुना मिश्रं दन्तशूलोपशान्तये॥"
इति गारुड़े १७४ अध्यायः॥

दन्तहर्षः, पुं, (दन्तानां हर्षो यस्मात्।) दन्तरोगविशेषः। इति माधवकरः॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये।

"दशनाः शीतसुप्ताश्च सहन्ते स्पर्शनं न च।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात्॥"

दन्तखानिः। यथा,—

"यस्य वै स्नातमात्रस्य हृदयं घीयते भृशम्।
जायते दन्तहर्षश्च तं गतायुषमादिशेत्॥"
इति वायुपुराणम्॥)

दन्तहर्षकः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ण्वुल्।) जम्बीरः। इति शटाधरः॥

दन्तहर्षणः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ल्युः।) जम्बीरः। इति त्रिकाण्डशेषः॥

दन्ताघातः, पुं, (दन्तानाहन्तीति। आ+हन+अण्।) निम्बूकः। इति राजनिर्घण्टः॥ दशनाघातः। (यथा, गीतगोविन्दे।

"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्॥")

रतिक्रीड़ायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि॥

दन्तार्ब्बुदं, क्ली, पुं, (दन्तस्य अर्ब्बुदमिव।) दन्तरोगभेदः। तत्पर्य्यायः। दन्तमूलम् २ दन्तशोफः ३ द्विजव्रणः ४। इति राजनिर्घण्टः॥

दन्तायुधः, पुं, (दन्त एव आयुधं यस्य।) शूकरः। इति त्रिकाण्डशेषः॥

दन्तालिका, स्त्री, (दन्तान् अलति पर्य्याप्नोतीति। अल+ण्वुल्। टापि अत इत्वम्।) बल्गा। इति त्रिकाण्डशेषः॥

दन्तावलः, पुं, (अतिशयितौ दन्तौ अस्य। दन्त+"दन्तशिखात् संज्ञायाम्।" ५।२।११३।

इति वलच्। "वले।" ६।३।११८। इति दीर्घः।) हस्ती। इत्यमरः। २।८।३४॥ (यथा, मनुटीकायां कुल्लूकभट्टः। ७।१०६। "सिंहः प्रबलमतिस्थूलमपि दन्तावलं हनुमाक्रमति॥")

दन्तिका, स्त्री, (दन्ती एव। स्वार्थे कन् टाप् पूर्वह्रस्वश्च।) दन्तीवृक्षः। इत्यमरः। २।४।१४४॥

दन्तिजा, स्त्री, दन्तिका। इति शब्दरत्नावली॥

दन्तिनी, स्त्री, (दन्तस्तदाकारो मूलेऽस्त्यस्याः। दन्त+इनिः+ङीप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

दन्तिमदः, पुं, (दन्तिनो मदः।) हस्तिमदः। इति राजनिर्घण्टः॥

दन्ती, स्त्री, (दान्त्यत्वनयेति। दम+"हसिमृग्रिण्वेति।"उणा।३।८६। इति तन्।ततो गौरादित्वात् ङीष्।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। प्रौढ्रा २ श्येनघण्टा ३ निकुम्भी ४ नागस्फोता ५ दन्तिनी ६ उपचित्रा ७ भद्रा ८ रूक्षा ९ रेचनी १० अनुकूला ११ निःशल्या १२ चक्रदन्ती १३ विशल्या १४ मधुपुष्पा १५ एरण्डफला १६ तरुणी १७ एरण्डपत्रिका १८ अशुरेवती १९ विशोधनी २० कुम्भी २१ उडुम्बरदला २२। इति राजनिर्घण्टः॥ निकुम्भः २३। दन्तिका २४ प्रत्यक्पर्णी २५ उदुम्बरपर्णी २६। इत्यमरः। २।८।३४॥ अस्या गुणाः। कटुत्वम्। उष्णत्वम्। शूलामत्वगदोषार्शोव्रणाश्मरीशल्यशोधनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अस्थीलिकाभानगुल्मोदरनाशित्वम्। सारकत्वञ्च। इति राजवल्लभः॥ अथ लघुदन्ती।

"लघ्वी दन्ती विशल्या च स्याद्वृड्डुम्बरपर्ण्यपि।
अधैरण्डफला प्रौढ्रा श्येनघण्टा घुणप्रिया॥
वाराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः॥"

अथ वृहद्दन्ती।

"एरण्डपत्रविटपा द्रवन्ती सम्वरी वृषा।
चित्रोपचित्रा न्यग्रोधी प्रत्यक्पर्णाखुकर्ण्यपि॥*॥
दन्तोद्भवं सरं पाके रसे च कटु दीपनम्।
गुदाङ्कुराश्मशूलासकण्डूकुष्ठविदाहनुत्॥
तीक्ष्णोष्णं हन्ति पित्तासक्कफश्लीपदोदरक्रिमीन्॥
लघुदन्तीफलगुणाः।
क्षुद्रदन्तीफलं तु स्याच्चपलं रसपाकयोः।
शीतलं रक्तविण्मूत्रगरश्लीपककफापहम्॥"

इति भावप्रकाशः॥

दन्ती, [न्] पुं, (प्रशस्तौ दन्तौ रदौ यस्येति। दन्त+इनिः।) हस्ती। इत्यमरः।२।८।३४॥ (यथा, देवीभागवते। २।६।४५। "मन्त्रिपुत्रः स्थितस्तत्र स्थापयामास दन्तिनः॥" स्त्रियां ङीप्। यथा, आर्य्यासप्तशत्याम्। ६५२। "स्नेहस्तातिर्जगौधा समरः प्राणक्षयावधिः करिणाम्।
न वितनुते कमनर्थं दन्तिनि! तव यौवनोद्भेदः॥")

दन्तीबीजं, क्ली, (दन्त्या इव बीजमस्य।) जयपालः। इति राजनिर्घण्टः॥

दन्तुरः, त्रि, (उन्नता दन्ताः सन्त्यस्येति। "दन्त उन्नत उरच्।" ५।२।१०६। इति उरच्।) उन्नतदन्तः। दाँतो इति भाषा॥

"कदाचिद्दन्तुरो मर्त्यः कदाचिल्लोमशः सुखी।
कदाचित् तुन्दिलो दुःखी कदाचिच्चपला सती॥"

इति सामुद्रकम्॥

उन्नतानतः। इति मेदिनी। रे, १६६॥

दन्तुरच्छदः, पुं, (दन्तुर उन्नतानतश्छदो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

दन्तोलूखलिकः, त्रि, (दन्त एव उलूखलः। सोऽस्यास्तीति। "अत इनिठनौ।"५।२।११५। इति ठन्।) वानप्रस्थविशेषः। दन्तमात्रेण क्षित्वा यो भक्षति सः। इति श्रीभागवतम्॥ (यथा, मनुः। ६।१७।

"अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा॥")

दन्त्यः, त्रि, (दन्तेषु भवः। दन्त+"शरीरावयवाच्च।" ४।३।५५। इति यत्।) दन्तोद्भवः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७। "स्वुर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")

दन्त्योहितः। "शरीरावयवाद्यत्।" ५।१।६। इति यत्। दन्तहितजनकः। यथा, सुश्रुते। १।४६।

"दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्तन्योऽथ केश्योऽनिलहा गुरुश्च॥")

दन्दशूकः, पुं, (गर्हितं दशतीति। दन्दश+यङ्+"यजजपदशां यङः।" ३।२।१६६। इति ऊकः।) सर्पः। (यथा, वैद्यकरत्नमालायाम्। "चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः॥") राक्षसः। इति मेदिनी। के, १६३॥ (हिंसे, त्रि। यथा, भट्टिः। १।२६।

"इक्ष्वाकुवंशे रघुनिर्दहे दन्दशूकान् निधांसौ
धनुरारिभिरस्त्रं सृष्टिपीड़ं दधाने॥")

दन्दभ, उ न दम्भे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) दम्भः परवञ्चनहेतुव्यापारः। उ, दम्भित्वा दम्भ्वा। न, दम्भोति खलश्छलयति इत्यर्थः। इति दुर्गादासः॥

दन्दभ, क ड संघाते। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) क ड, दम्भयते। सङ्घातो राशीकरणम्। इति दुर्गादासः॥

दन्दश, औ दंशने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अदाङ्क्षीत्। दशति विम्बफलं शुकशावकः। दंशनमित्यनुस्वारहीनं पठित्वा तन्निर्देशात् अनटि नकारलोप इत्याहुः। अतएव दशनो दन्तः। नाहिर्दंश्यते कश्चिद्विद्यया गरुड़ाख्यया। इति हलायुधः। भट्टमल्लमते दंशनमिह सन्नाहः। तेन अदंश्यपन्नवहितशौर्य्यदंशनास्तनूरयं नय इति वृष्णिभूभृतः। इति माघः। तनूः कवचवृताच्चकुरित्यर्थः। अत्र परस्मैपदं चिन्त्यमिति वल्लभः। वस्तुतस्तु दंशं करोतीति णौ साध्यम्। इति दुर्गादासः॥

दभ, इ क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, दम्भयति। गोदः प्रेरणम्। इति दुर्गादासः॥

दभ, क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, दाभयति। इति दुर्गादासः॥

दम्भ, त्रि, (दभ्नोतीति। दभ दम्भे+"स्फायितञ्चीति।"उणा। २।१३। इति रक्।) अल्पम्। इत्यमरः। ३।१।६१॥ (यथा, निघण्टुः।३।२। "ऋहन्। इक्षः। निष्टप्वः। मायुकः। प्रतिष्ठा। क्षधु। वन्धकः। दभ्रम्। अभकः। क्षुल्लकः। अल्प इत्येकादशैतानामानि॥"यथा, ऋग्वेदे। १।८१।२।

"असि दभ्रस्य चिद्वृधः॥")

समुद्रे, पुं। इत्युणादिकोषः॥

दम, भ य उ इर् श्रमे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सकच्च-सेट्। उदित्वात् क्त्वावेट्।) भ य, दाम्यति। उ, दमित्वा दान्त्वा। इर्, अदमत् अदमीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। श्रमः श्रान्तीभावः। दाम्यति मुनिः। श्रम इतिपदस्य श्रान्तस्यापि सम्भवे श्रान्तीकरणेऽप्ययमिति धातुप्रदीपः। दमित्वाप्यरिसङ्घातान्। इति दुर्गादासः॥

दमः, पुं, (दमनमिति। दम+भावे घञ्।"नोदात्तोपदेशस्येति।"७।३।३४। इति वृद्धाभावः।) दण्डः। इत्यमरः। २।८।२१॥

दण्डस्य लक्षणं यथा,—

"दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः।
यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥"

इति मत्स्यपुराणम्॥

(यथा, मनुः। ८।१८२।

"निग्रहेष्वपहर्त्तारं तत्समं दापयेद्दमम्॥")

तपःक्लेशसहिष्णुता। तत्पर्य्यायः। शान्तिः २ दमथः ३। इत्यमरः। ३।२।३॥ दमनम्। तत्तु बाह्येन्द्रियनिग्रहः। इति वेदान्तसारः॥ विषयाद्ग्राह्यतस्य मनसो यथेष्टविनियोगयोग्यता। इति केचित्॥ दमस्य लक्षणं यथा,—

"कृतसिद्धात् कर्म्मणो विप्र! यच्च चित्तनिवारणम्।
स दमः कीर्त्तितो दमः प्राज्ञैः समस्ततत्त्वदर्शिभिः॥"

इति पाद्मे क्रियायोगसारः॥

(यथा, मनुः। ६।९२।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्॥")

कर्षणम्। इति मेदिनी। मे, १४॥ (यज्ञम्। इति निघण्टुः।३।४॥ यथा, ऋग्वेदे।१।७५।५।

"अग्ने यज्ञं नः दमम्॥"

महर्षिविशेषः। यथा, महाभारते। १३।२६।५।

"विश्वामित्रः स्थूलशिराः सम्वर्त्तः प्रमतिर्दमः॥"

मरुत्तस्य राज्ञः पुत्रः। यथा, भागवते।९।२।२६।

"मरुत्तस्य दमः पुत्रस्तस्यापीद्राजवर्द्धनः॥"

मरुत्तस्य पौत्रः। इति मार्कण्डेयपुराणम्। यथा तत्रैव। १३४।१—५।

"एवं स राजा धर्म्मात्मा नरिष्यन्तोऽभवत् पुरा।
मरुत्ततनयो विप्र! विख्यातबलपौरुषः॥"
"नरिष्यन्तस्य तनयो दुष्टारिदमनो दमः।
शक्रस्येव बलं तस्य दयाशीलं सुनेरिव॥
वाभ्रव्यामिन्द्रसेनायां स जज्ञे तस्य भूभृतः।
नववर्षाणि जठरे स्थित्वा मातुर्महायशाः॥
यदृच्छाह्वयामास दमं मातरं जठरे स्थितः।
दमशीलश्च भविता यतश्चायं नृपात्मजः॥
ततश्चिकालविज्ञानः स हि तस्य पुरोहितः।
दम इत्यकरोत् नाम नरिष्यन्तसुतस्य तु॥
स दमो राजपुत्रस्तु धनुर्वेदमशेषतः।
जग्राह नरराजस्य सकाशाद्दृषपर्व्वणः॥"
अस्य विशेषविवरणन्तु तत्रैवाध्याये विशेषतो द्रष्टव्यम्॥ भीमस्य राज्ञः पुत्रविशेषः। यथा, महाभारते। ३। ५३। ६।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥"
विष्णुः। यथा, तत्रैव। १३। १४६। १०५।
"धनुर्धरो धनुर्व्वेदो दान्तो दमयिता दमः॥")

दमकः, त्रि, (दमयतीति। दम+णिच्+ण्वुल्।) दमनकर्त्ता। इति व्याकरणम्॥ (यथा मनुः। ३। १६२।
"हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति॥")

दमघोषः, पुं, चन्द्रवंशीयराजविशेषः। स चेदिदेशपतिः शिशुपालपिता च। इति पुराणम्॥ (यथा, भागवते। ६। २४। ३६।
"दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत्॥")

दमघोषसुतः, पुं, (दमघोषस्य सुतः।) शिशुपालः। इति त्रिकाण्डशेषः॥

दमथः, पुं, (दसु उपशमे+"वाहुलकात् दृशमिदमिभ्यश्च।" ३। ११४। इति अथः। इत्युज्ज्वलदत्तः।) दमः। दक्षः। इत्युणादिकोषः॥

दमन, क्ली, (दम+भावे ल्युट्।) दक्षः। यथा,
"अनुच्छ्रितस्य दमनमुच्छ्रितस्य शमो मतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

दमनः, पुं, (दाम्यतीति। दम+ल्युः।) पुष्पविशेषः। दोना इति भाषा। तत्पर्य्यायः। पुष्पशेखरः २। इति त्रिकाण्डशेषः॥ (यथा,
"दमनस्तु वरस्तिक्तो हृद्यो दृष्यः सुगन्धिकः।
ग्रहबाधाविषकुष्ठास्रदोषकण्डूत्रिदोषजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वीरः। उपशान्तः। इति शब्दरत्नावली॥
कुन्दवृक्षः। इति राजनिर्घण्टः॥ (ऋषिविशेषः। यथा, महाभारते। ३। ५३। ६।
"तमभ्यगच्छत् ब्रह्मर्षिर्दमनो नाम भारत!।
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित्॥"
अस्य भीमस्य पुत्रविशेषः। यथा, तत्रैव। ३। ५३। ६।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥"
विष्णुः। यथा, महाभारते। १३। १४६। ३४।
"मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः॥"

"स्वाधिकारात् प्रमाद्यन्तीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण स दमनः।" इति तद्भाष्ये शङ्कराचार्य्यः॥ महादेवः। यथा, महाभारते। १३। १७। १३६।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः॥")

दमनकः, पुं, (दमन एव। स्वार्थे कन्।) वृक्षविशेषः। दोना इति भाषा। तत्पर्य्यायः। दमनः २ दान्तः ३ गन्धोत्कटः ४ सुनिः ५ जटिला ६ दक्षी ७ पाण्डुरागः ८ ब्रह्मजटः ९ पुष्करीकः १० तापसप्रभौ ११ पत्री १२ पवित्रकः १३ देवशेखरः १४ कुलप्रभः १५ विनीतः १६ तपस्विपत्रः १७। इति राजनिर्घण्टः॥ मुनिपुत्रः १८ तपोधनः १९ गन्धोत्कटः २० ब्रह्मजटी २१ कुलपुत्रकः २२। इति भावप्रकाशः॥ अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। कषायत्वम्। कटुत्वम्। कुष्ठदोषद्वन्द्वत्रिदोषविषविस्फोटविकारहरत्वञ्च। इति राजनिर्घण्टः॥ रूक्षत्वम्। दृष्यत्वम्। सुगन्धित्वम्। ग्रहबाधसकोदकण्डूनाशित्वञ्च। इति भावप्रकाशः॥ (स्त्री, वृक्षवरच्छन्दोविशेषः। यथा, चिन्तामणिधृतवचनम्।
"द्विगुणनगणमिह वितनु हि।
दमनकमिति गदति मुनि हि॥"
एकादशाक्षरच्छन्दोविशेषोऽपि। यथा, तत्रैव।
"द्विनवरगणयुगममलं तदनु च कलय करतलम्।
पतिपतिवरपरिगदितं दमनकमिदमतिललितम्॥")

दमनकारोपणोत्सवः, पुं, (दमनकस्य आरोपणार्थे य उत्सवः।) श्रीकृष्णस्य दमनकार्पणार्थमहापूजारूपोत्सवः। यथा,—
"चैत्रस्य शुक्लद्वादश्यां दमनारोपणोत्सवम्।
विदध्यात्तद्विधिर्वैधायनादुक्तोऽत्र लिख्यते॥
मधोः सितैकादश्याञ्च प्रातःकृत्यं समाप्य च।
गत्वा दमनकारामं तत्राशोकं स्मरं यजेत्॥
तत्र मन्त्रः।
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन!।
शोकार्त्तिं हर मे नित्यमानन्दं जनयस्व मे॥
नेष्यामि त्वां पूजनार्थं त्वां त्वत्प्रीतिकारकम्।
इति संप्रार्थ्य नत्वा च गृह्णीयाद्दमनं शुभम्॥
प्रोक्ष्य तत् पञ्चगव्येन प्रपाल्याङ्गैः प्रपूज्य च।
वस्त्रेणाच्छाद्य वेदादिघोषेण गृहमानयेत्॥*॥

अथ दमनकाधिवासविधिः।
छत्त्रस्याग्रे समुद्धृत्य सर्व्वतोभद्रमण्डलम्।
निधाय दमनं तत्र रात्रौ तदधिवासयेत्॥
तत्र मन्त्रः।
पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः।
दमन! त्वमिहागच्छ सान्निध्यं कुरुते नमः॥ इति सबीजं कामदेवञ्च तथा भक्तशरीरकम्।
अनङ्गं मन्मथञ्चैव वसन्तसखमेव च॥
स्मरं तथैक्षुचापञ्च पुष्पबाणञ्च पूजयेत्।
प्रागादिदिक्षु रत्याद्यं विधिवद्दमने क्रमात्॥

अशोकरक्तं कामगायत्र्या चाभिमन्त्र्य ततः।
दत्त्वा पुष्पाञ्जलिं कामदेवं वन्देत मन्त्रवत्॥
मन्त्रश्चायम्।
नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने॥ इति॥
आमन्त्रितोऽसि देवेश! पुराणपुरुषोत्तम!।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव!॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम्।
सर्व्वथा सर्व्वदा विष्णो! नमस्तेऽस्तु प्रसीद मे॥
इत्यामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः।
गीतवृत्यादिना रात्रौ कुर्य्याज्जागरणं सदा॥*॥

अथ दमनकार्पणविधिः।
प्रातःस्नानादि निर्व्वर्त्य नित्यपूजां विधाय च।
दमनारोपणार्थञ्च महापूजां समाचरेत्॥
ततो दमनकं भक्त्या पाणिभ्यां परिगृह्य च।
घण्टादिवाद्यघोषेण श्रीकृष्णाय समर्पयेत्॥
तत्र मन्त्रः।
देवदेव जगन्नाथ वाञ्छितार्थप्रदायक!।
छत्त्रत्वान् पूरय मे सर्व्वा कामान् कामेश्वरीप्रिय!॥
इदं दमनकं देव गृहाण मदनुग्रहात्।
इमां सांवत्सरीं पूजां भगवन्निह पूरय॥ इति॥
ततो दामनकीं मालां गन्धादीनि समर्प्य च।
गीतादिनोत्सवं कृत्वा श्रीकृष्णं प्रार्थयेदिदम्॥
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज!॥
वनमालां यथा देव! कौस्तुभं सततं हृदि।
तद्वद्दामनकीं मालां पूजाञ्च हृदये वहेत्यादि॥
भगवन्तं प्रणम्याथ गुरुं संपूज्य भक्तितः।
संपूज्य ब्राह्मणान् भक्त्या भुञ्जीत सह बन्धुभिः॥
पारणाहे न लभ्येत द्वादशी घटिकापि चेत्।
तदा त्रयोदशी ग्राह्या पवित्रा दमनार्पणे॥
न कृतो दमनारोपः स्वाम्भौ विघ्नतो यदि।
वैशाख्यां श्रावणे मासि कर्त्तव्यं वा तदैकमम्॥
अतएवोक्तं ब्रह्मणा देवीपुराणे।
चैत्रादौ कारयेत् पूजां सम्यक्तस्य! यथाविधि॥
गन्धधूपार्घ्यनैवेद्यैर्माल्यैर्दमनकोद्भवैः।
सहोमं पूजयेद्देवं सर्व्वान् कामानवाप्नुयात्॥
सर्व्वतीर्थाभिषेकस्य फलं प्राप्नोति मानवः॥"
इति श्रीहरिभक्तिविलासे १४ विलासः॥

दमनी, स्त्री, (दम्यतेऽनयेति। दम+ल्युट्। स्त्रियां ङीप्।) अग्निदमनीवृक्षः। इति राजनिर्घण्टः॥

दमयन्ती, स्त्री, (दमयति नाशयति अमङ्गलादिकमिति। दम+णिच्+अच्+ङीप्।) भद्रमल्लिका। इति शब्दमाला॥ नलराजपत्नी। सा विदर्भदेशीयभीमराजकन्या। (यथा, महाभारते। ३। ५३। ५-६।
"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः।
शूरः सर्व्वगुणैर्युक्तः प्रजाकामः स चाप्रजः॥
स प्रजार्थे परं यत्नमकरोत् सुसमाहितः।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत!॥
तं स भीमः प्रजाकामस्तोष्यामास धर्म्मवित्।

महिष्या सह राजेन्द्र ! सत्कारेण सुवर्चसम् ॥
तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम् ।
उपपन्नान् गुणैः सर्व्वैर्भीमान् भीमपराक्रमान् ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥"
अस्या विशेषविवरणन्तु तमेवाधिकृत्य विस्तरशो द्रष्टव्यम् ॥)

दमितः, त्रि, (दम्यते स्म इति । दम+क्तः । "वा दान्तशान्तेति ।" ७ । २ । २७ । इति पक्षे इट् ।) दान्तः । इत्यमरः । ३ । १ । ६७ ॥ (यथा, हरिवंशे । ६७ । ५६ ।
"यथेयं सरिदम्भोदा भवेच्छिवजलाश्रया ।
त्रयोपभोग्या च यथा नागे वै दमिते मया ॥")
क्लेशसहमात्रम् । इति भरतः ॥ भारवाहनादि-क्लेशसहः । इति सुभूतिः ॥

दमी, [न्] त्रि, (दमोऽस्यास्तीति । दम+इनिः ।) दमनविशिष्टः । (तीर्थविशेषे, क्ली । तत्प्रवर्त्तक-ऋषिभेदे, पुं । यथा, महाभारते । ३ । ८२ । ७१—७४ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
सौर्यं कुरुवरश्रेष्ठ ! त्रिषु लोकेषु विश्रुतम् ॥
दमीति नाम्ना विख्यातं सर्व्वपापप्रमोचनम् ।
यत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम् ॥
तत्र स्नात्वार्च्चयित्वा च रुद्रं देवगणैर्वृतम् ।
जन्मप्रभृति यत् पापं तत् स्नातस्य प्रणश्यति ॥
दमी चात्र नरश्रेष्ठ ! सर्व्वदेवैरभिष्टुतः ।
तत्र स्नात्वा नरश्रेष्ठ ! ह्ययमेधमवाप्नुयात् ॥"
दमीत्यत्र त्रिमीति क्वचित् पाठः ॥)

दमुनाः, [स्] पुं, (दाम्यतीति । अन्तर्भूतण्यर्थात् दमधातोः + "दमेरुनसिः ।" उणा० । ३ । २३४ । इति उनसिः ।) अग्निः । इत्यमरः । १ । १ । ५६ ॥ शुक्राचार्य्यः । इत्युणादिकोषः ॥

दमूनाः, [स्] पुं, (दमूनस्+अन्येषामपि दृश्यते इति पक्षे दीर्घः । यद्वा, दमेरूनसिरिति पठित्वा ऊनसिप्रत्ययः ।) अग्निः । इति शब्दरत्नावली ॥ (त्रि, दमनीयः । यथा, ऋग्वेदे । १ । १४१ । ११ ।
"अक्षे रथिं न खर्ये दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ॥"
दानमनाः । दान्तचित्तः । यथा, तत्रैव । ५ । ४ । ५ ।
"सुहो दमूना अतिथिर्दुरोण इमं नो यज्ञ-मुपयाहि विद्वान् ॥")

दम्पती, पुं, (जाया च पतिश्च । राजदन्तादिगणे पाठात् जायाया दम्भावो वा निपात्यते ।) भार्य्यापती । इत्यमरः । २ । ६ । ३८ ॥ (यथा, मनुः । ३ । ११६ ।
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ।
भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती ॥")

दम्भः, पुं, (दभ्यते इति । दभ दम्भे+घञ् ।) कपटः । (यथा, पञ्चतन्त्रे । १ । २२९ ।
"सुगुप्तस्यापि दम्भस्य ब्रह्मण्यन्तं न गच्छति ॥"
अयन्तु अधर्म्मात् त्वष्टागर्भे संजातः । यथा, भागवते । ४ । ८ । २ ।
"त्वष्टाऽधर्म्मस्य भार्य्यासीद्दम्भं मायाच सूनृतम् ॥
असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजाः ॥")
कल्कम् । शाठ्योपाधिकृतिः । इति शब्दरत्नावली ॥ (यथा, गीतायाम् । १६ । ४ ।
"आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥"
धर्म्माशुतृसाहः । यथा, मनुः । ४ । १६३ ।
"नास्तिक्यं वेदनिन्दाच देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत् ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ७८ ।
"दम्भो ह्रदम्भो वेदम्भो वह्नो वह्नकरः कविः ॥")

दम्भोलिः, पुं, (दम्भ नोदे + भावे असुन् । दम्भसि प्रेरणे अलति पर्य्याप्नोतीति । अल+इन् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥

दम्यः, पुं, (दम्यते इति । दम+यत् ।) वत्सतरः । स तु प्राप्तदमनकालो गौः । इत्यमरः । २ । ६ । ६२ ॥ अनड्वान् । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ६६ । ४ ।
"शुकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥")
दमनीये, त्रि ॥

दय, णि ङ अदये । गतौ । वधे । दाने । अवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) अवनं पालनम् । णि, दयितोऽस्ति । ङ, दयते दीनं दयालुः । तेषां दयसे न कस्मात् । अत्र कर्म्मणि षष्ठी । इति दुर्गादासः ॥

दय, पुं, (दय+बाहुलकात् अप् ।) दया । इति शब्दरत्नावली ॥

दया, स्त्री, (दय+भिदादित्वाङ् । ततष्टाप् ।) करुणा । अस्या लक्षणं यथा, पाद्मे क्रियायोगसारे ।
"यदापि परसौख्यं हर्त्तुं या हृदि जायते ।
इच्छा भूमिसुरश्रेष्ठ ! सा दया परिकीर्त्तिता ॥
अपि च मत्स्यपुराणे ।
"आत्मवत् सर्व्वभूतेषु यो हिताय शुभाय च ।
वर्त्तते सततं हृष्टः क्रिया सैषा दया स्मृता ॥"*॥
"परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा ।
आत्मवद्भावितव्यं हि दयेषा परिकीर्त्तिता ॥"
इत्येकादशीतत्त्वम् ॥
(दयं हि शुक्लीनामन्यतमा । यथा, देवीभागवते । १ । १५ । ६० ।
"श्रद्धा मेधा स्वधा स्वाहा क्षुधा निद्रा दया गतिः ।
"संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक् पृथक् ॥")

दयाकूर्च्चः, पुं, (दयायां कूर्च्चः श्रीर्यमिव प्रधानम् ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥

दयालुः, त्रि, (दयते इति । दय+"सृदिरदीति ।" ३ । २ । १५८ । इति आलुच् ।) दयायुक्तः । तत्पर्य्यायः । कारुणिकः २ कृपालुः ३ करतः ४ । इत्यमरः । ३ । १ । १५ ॥ (यथा, रघुः । १० । १६ ।
"दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥")

दयितं त्रि, (दयते स्मेति । दय+क्तः ।) प्रियम् । इत्यमरः । ३ । १ । ५३ ॥ (यथा, आर्य्यासप्तशत्याम् । २८८ ।
"हृदमहृदयायं दयितं ज्ञात्वा प्रकाशितस्वनया ।
हृदयं करेण ताडितमथ मिथ्याचक्षितजपया ॥"
यथा च पञ्चतन्त्रे । २ । १८६ ।
"दयितजनविप्रयोगो वित्तवियोगश्च केन तुल्याः स्युः ।
यदि सुमहौषधकल्पो वयस्यजनसङ्गमो न स्यात् ॥")

दयितः, पुं, (दय+क्तः ।) पतिः । इति जटाधरः ॥

दयिता, स्त्री, (दयित+टाप् ।) भार्य्या । इति हलायुधः ॥ (यथा, रघुः । २ । ३ ।
"निवर्त्तय राजा दयितां दयालु-स्तां सौरभेयीं सुरभिर्यशोभिः ॥")

दर, य, (दीर्य्यते इति । दृ+अप् ।) ईषद्भेदः । इति मेदिनी । रे, ४७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०० ।
"दरतरलेऽधिबि वचसि दरोन्नते तव सुखे च दरहसिते ।
आस्तां कुसुमं वीरः सरोऽधुना चिबचबुरापि ॥"
"अधिबि नेचे ईषच्चञ्चले सति । तवेषदुन्नमिते वचसि सुखे च किञ्चिद्धसितवति सति ।" इति तट्टीका ॥)

दरं, क्ली, शूकः । यथा । विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिमिति क्रमदीपिका ॥

दरः, पुं क्ली, (दीर्य्यते वयोऽनेन । दृ+"यङ्हृदृविभिभ्यश्च ।" ३ । ३ । ५८ । इति अप् ।) भयम् । (यथा, आर्य्यासप्तशत्याम् । २६५ ।
"दरविद्राणस्यापि स्मरस्य शिखिनेव निर्गता-ञ्जनु मे ।
मुग्धे ! तव दृष्टिरसावर्जुनयन्नेहुरिव हन्ति ॥")
गर्त्तः । इत्यमरः । ३ । ३ । १८४ ॥ (शूकः । यथा, भागवते । १ । ११ । २ ।
"स उच्चकाशे धवलोदरो दरो-ऽरुणत्रिकस्वाधरशोणशोभिमा ।
दाधायमानः करकञ्जसंपुटे
यथाब्जखण्डे कलहंस उत्स्वनः ॥")
कन्दरे, पुं क्ली । इत्यमरटीकायां भरतः ॥ (स्त्रियां ङीप् । यथा, ऋतुसंहारे । १ । २५ ।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ॥")

दरकशिका, स्त्री, (दर ईषत् कशिपुः यस्याः कप् । टापि अत इत्वम् ।) शृतावरी । इति राजनिर्घण्टः ॥

दरणिः, पुं, (दृ विदारणे + "इञ्शीर्षदरिभ्यनिः ।" २ । १०३ । इति उञ्प्रत्यये अनिः ।) कुलभङ्गः । भाङ्गर इति भाषा । तत्पर्य्यायः । कुलहन्ता २ । इति शब्दरत्नावली ॥ कुलतण्डुलः ३ । इति भूरिप्रयोगः ॥

दरः, [द] स्त्री, (दृ द्यातीति। दृ विदारणे + "गृदृभसोऽदिः।" उणा। १। १२६। इति अदिः।) प्रपातः। भयम्। पर्व्वतः। इति मेदिनी। दे, ३०॥ क्लेच्छजातिः। इति लिङ्गादिसंग्रहे अमरः॥ (देशविशेषः। यथा, राजतरङ्गिण्याम्। १५७।

"दरदुरस्काधिपयोर्यः केशरिवराहयोः।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त्त इवान्तरे॥")

हृत्। तीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दरदं, क्ली, (दर ईषत् दायति शुध्यतीति। दै + कः।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (क्वचित् पुंस्त्वेऽपि दृश्यते। अस्य पर्य्यायो यथा,—

"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः॥"
इति वैद्यकरत्नमालायाम्॥

पर्य्यायान्तरं यथा,—

"हिङ्गुलन्दरदं क्लेच्छं चिताङ्गचूर्णमारदम्।
दरदश्चिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः॥
हंसपादस्तृतीयः स्यादगुणवानुत्तरोत्तरम्।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः॥
अवाङ्मुखसमङ्गाभो हंसपादो महोत्तमः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"दरदं तच्चसूर्णं क्षत्वा क्षत्पाकके त्रिदिनम्।
भावं जम्बीररसेक्षाक्ष्म्यैर्या वा रसेवंङ्गुधा॥
ततश्च जम्बीरवारिणा चाक्ष्म्यैर्या रसेन परिप्लुतम्।
क्षत्वा स्थालीमध्ये निधाय तदुपरिकठिनीष्टरम्॥
चाद्य ग्ररावं तच्च चिंग्रद्धारं चर्कं देयं उर्ध्वे देयं तथैव तदूर्द्धपातनेन विर्म्मलं ग्रिवणः॥"

"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः।
रसगन्धसमभूतो हिङ्गुलो वैद्यरत्नकः॥
अम्लवर्गद्रवैः पिष्ट्वा दरदो माहिषैरज च।
दुग्धेन सप्तधा पिष्टः शुद्धीभूतो विशुध्यति॥
अन्यच्च।
मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम्।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम्॥
अन्यमतम्।
दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवैः।
सप्तवारमथास्त्रैर्भावितं शुद्धिमेति हि॥"
इति वैद्यकरसेन्द्रसारसंग्रहे आरग्वधारग्वधाधिकारे॥)

दरदः, पुं, (दरं भयं ददातीति। दा + कः।) देशविशेषः। भयम्। क्लेच्छजातिभेदः। इति ग्रन्दरत्नावली॥ (अयन्तु पूर्व्वं क्षत्रिय आसीत् पश्चात् क्रमशः उपनयनादिक्रियालोपात् म्लेच्छादिकं प्राप्तः। यदुक्तं मनौ। १०। ४३-४४।

"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदा पह्लवाश्चीनाः किराता दरदाः खशाः॥")

दरिः, स्त्री, (दृ + इन्।) दरी। इति ग्रन्दरत्नावली॥ (तच्चकुलोत्पन्ने सर्पे, पुं। इति महाभारतम्॥)

दरितः, त्रि, (दरो भयमस्य सञ्जातः। दर + तारकादित्वात् इतच्।) भीतः। इति हेमचन्द्रः। ३। २६॥

दरिद्रः, पुं, (दरिद्राति दुर्गच्छतीति। दरिद्रा + अच्।) निर्धनः। तत्पर्य्यायः। निस्वः २ दुर्विधः ३ दीनः ४ दुर्गतः ५। इत्यमरः। ३।२। ४६॥ कौकटः ६ दुस्थः ७। इति जटाधरः॥ अस्तमितः ८। इति दानधर्म्मः। तस्य कारणं यथा,—

"अशुचीश्च चिराचारि तीर्थान्यनभिगम्य च।
अदत्वा हेमधेनूनां दरिद्रो जायते नरः॥"
इति पाद्मे भूखण्डम्॥

"दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः॥"
इति श्रीभागवतम्॥

दरिद्रा, च सु दुर्गत्यां। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) दुर्गतिरकिञ्चनीभावः। च सु, उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति। इति दुर्गादासः॥

दरिद्रायकः, त्रि, (दरिद्रातीति। दरिद्रा + ण्वुल्।) दरिद्रः। इति मुग्धबोधम्॥

दरिद्रितः, त्रि, (दरिद्रा + कर्त्तरि क्तः।) दरिद्रः। दारिद्र्ययुक्तः॥

दरिद्रिता, [त्र] त्रि, (दरिद्रा + इच्।) दरिद्रायकः। दरिद्राधातोः कर्त्तरि ल्युप्रत्ययः॥

दरोदरं, क्ली, (दरो भयं तज्जनकं उदरं यस्य। प्रायशः सर्व्वयासकत्वादेवास्य तथात्वम्।) दुरोदरम्। इत्यमरटीकायां भरतः॥

दरोदरः, पुं, (दरजनकमुदरं यस्य।) दुरोदरः। इत्यमरटीकायां भरतः॥ (यथा, उद्भटादिसत्रटीकायां उज्ज्वलदत्तधृतगोवर्द्धनः। ५।१६।

"आश्रित्य दुर्गं गिरिकंदरोदरं
क्रीड़न्त्यमुस्मिन् सततं दरोदरम्॥")

दर्द्दरः, पुं, पर्व्वतः। (यथा, रामायणे। २। ६१। २४।

"मलयं दर्द्दरञ्चैव ततः स्वेदमुदो गिरः॥"
क्वचित् दर्द्दरोऽपि पाठः॥) ईषद्भयभाजने, त्रि। इति मेदिनी। रे, १६६॥

दर्द्दराह्वः, पुं, ब्रह्मनवविशेषः। तत्पर्य्यायः। मीनाह्वौषः २। इति ग्रन्दमाला॥

दर्द्दरीकं, क्ली, (दारयतीव कर्णौ। दृ + क्विप् + "पर्परीकादयश्च।" उणा। ४। २०। इति ईकनुप्रत्ययेन साधुः।) वाद्यम्। इत्युणादिकोषः॥

दर्द्दरीकः, पुं, (दारयतीव कर्णौ इति। दृ + क्विप् + "पर्परीकादयश्च।" उणा। ४। २०। इति ईकनुप्रत्ययेन साधुः।) मेघः। वाद्यभेदः। भेकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

दर्द्दुरं, क्ली, धामजालम्। इति मेदिनी। रे, १६७॥

दर्द्दुरः, पुं, (दृणाति कर्णौ ग्रन्देनेति। दृ + "मकुरदर्द्दुरौ।" उणा। १। ४१। इति उरच् प्रत्ययेन निपातनात् साधुः।) भेकः। इत्यमरः। १। १०। २४॥ (यथा,—

"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।
दर्द्दुरा यत्र वक्तारश्च मौनं हि शोभनम्॥"
इत्युद्भटः॥)

मेघः। वाद्यभाण्डभेदः। पर्व्वतविशेषः। इति मेदिनी। रे, १६७॥ (यथा, रघौ। ४। ५१।

"स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ।
स्तनाविव दिशस्तस्याः श्रेणी मलयदर्द्दुरौ॥")

राक्षसः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अभ्रकधातुभेदः। यथा, भावप्रकाशे।

"पिनाकं दर्द्दुरं नागं वज्रमिति चतुर्व्विधम्॥"
"दर्द्दुरं खनिनिक्षिप्तं कुरुते दर्द्दुरध्वनिम्।
गोखकान् बहुशः क्षत्वा स खान्मृत्युप्रदायकः॥")

दर्द्दुरा, स्त्री, (दृणाति दारयति वा असुरानिति। दृ + उरच् प्रत्ययेन निपातनात् साधुः। ततष्टाप्।) चण्डिका। इति मेदिनी। रे, १६७॥

दर्द्दुरः, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति। दरिद्रा + "दरिद्राते र्योलोपः।" उणा। १।८०। इति कुः। रकारेकारयकारार्द्धा लोपश्च।) दद्रुरोगः। इति ग्रन्दरत्नावली॥

दर्द्दुः, पुं, (दरिद्रा + बाहुलकात् कुः। र्योलोपश्च।) दद्रुरोगः। इत्युणादिकोषः॥

दर्द्दुरः, पुं, (दर्द्दुं हन्तीति। दर्द्दु + हन् + टक्।) चक्रमर्द्दकः। इति ग्रन्दरत्नावली॥

दर्द्दुरः, त्रि, (दर्द्दुरस्यास्तीति। दर्द्दु + "लोमादिपामादिपिच्छिलादिभ्यः शनेलचः।" ५।२।१००। इति पामादिषु पाठात् नः। ततो मत्वर्थे।) दद्रुरोगी। इत्यमरटीकायां भरतः॥

दर्द्दूः, पुं, (दरिद्रा + कुः। र्योलोपश्च।) दद्रुरोगः। इत्युणादिकोषः॥

दर्द्दूरः, त्रि, (दर्द्दूरस्यास्तीति। दर्द्दू + नः।) दद्रुरोगी। इत्यमरटीकायां भरतः॥

दर्द्दूरोगी, [न्] त्रि, (दर्द्दूरोगोऽस्यास्तीति। दर्द्दूरोग + इनिः।) दद्रुरोगी। इत्यमरटीकायां भरतः॥

दर्पः, पुं, (दृप्यते इति। दृप् + भावे घञ्।) उच्छृङ्खलत्वम्। इति शब्दरत्नावली। कस्तूरी। इति मेदिनी। पे, ७॥ उक्तिः। इति त्रिकाण्डशेषः॥ अहङ्कृतिः। तत्पर्य्यायः। गर्व्वः २ अहङ्कारः ३ अवलिप्तता ४ अभिमानः ५ ममता ६ मानः ७ चित्तोन्नतिः ८ स्मयः ९। इति हेमचन्द्रः। २। २३१॥ * ॥

"अहङ्कारश्च सर्व्वेषां पापबीजसमङ्गलम्।
ब्रह्मादेषु च सर्व्वेषां गर्व्वपर्य्यन्तसुन्नतिः॥
येषां येषां भवेद्दर्पो ब्रह्मादेषु परात्परे।
विज्ञाय सर्व्वे सर्व्वात्मा तेषां ग्रासाहमेव च॥
क्षुद्राणां महतां चैव येषां गर्व्वो भवेत् प्रिये!।
एवंविधमहं तेषां चूर्णीभूतं करोमि च॥
चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः।
ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च॥
धर्म्मस्य च यमस्यापि ग्राम्यस्य चन्द्रसूर्य्ययोः।
मरुतश्च च वह्नेश्च गुरोर्दुर्व्वाससस्तथा॥
दौवारिकस्य भक्तस्य जयस्य विजयस्य च।

सुरायामसुरायाञ्च भवतः कामशुक्रयोः ॥
लैङ्गस्यार्ज्जुनस्यापि वाजस्य च भृगोस्तथा ।
सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च ॥
सरस्वत्याञ्च दुर्गायाः पद्मायाञ्च भुवस्तथा ।
सावित्र्याञ्चैव गङ्गाया मनसायास्तथैव च ॥
प्राणाधिष्ठात्रदेवायाञ्च प्रियायाः प्राणतोऽपि च ।
प्राणाधिकायां राधायां अन्येषामपि का कथा ।
हत्वा दर्पञ्च सर्व्वेषां प्रसादञ्च चकार सः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्पकः, पुं, (दर्पयति हर्षयति मोहयति वेति । दृप दर्पमोहनयोः + णिच् + ण्वुल् ।) कामदेवः । इत्यमरः । १ । १ । २३ ॥

दर्पणं, क्ली, (दर्पयति सन्दीपयतीति । दृप् + णिच् + ल्युः) चक्षुः । इति जटाधरः ॥ (भावे ल्युट् ।) सन्दीपनम् । इति दृपधात्वर्थदर्शनात् ॥

दर्पणः, पुं, क्ली, (दर्पयति सन्दीपयतीति । दृप् + णिच् + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः ।) रूपदर्शनाधारः । आर्शि इति भाषा । तत्पर्य्यायः । सुकुरः २ आदर्शः ३ । इत्यमरः । २ । ७ । १४० ॥ आत्मदर्शः ४ मन्दरः ५ दर्शनम् ६ प्रतिबिम्बातम् ७ । इति शब्दरत्नावली ॥ कर्कः ८ कर्करः ९ । इति जटाधरः ॥ (यथा, भावप्रके । १०६ ।

"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥")

अस्य गुणः । आयुःश्रीकारित्वम् । पापनाशित्वञ्च । इति राजवल्लभः ॥ पुं, पर्व्वतभेदः । तद्विशेषः । यथा,—

और्व्व उवाच ।

"ततः पूर्व्वे महाराज ! दर्पणो नाम पर्व्वतः ।
कुबेरो यत्र वसति धनपालैः समं सदा ।
यस्मिन्नग्रे मध्यभागे रोहिणो रोहिताकृतिः ।
यस्मिँल्लोहादिकं सृष्टं सर्व्वतां याति तत्क्षणात् ॥
यन्नातिदूरे स्रवति दर्पणो नाम वै नदः ।
हिमाद्रिप्रभवो नित्यं लौहित्यसदृशः पये ॥
समुत्पन्नं हि लौहित्यं सर्व्वेदं वपुषे हरेः ।
सर्व्वतीर्थोदकैः स्नपयामास तं सुतम् ॥
तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः ।
तेनायं दर्पणो नाम पुरा देवगणैः कृतः ॥
तस्मिन् स्नात्वा नदवरे नोऽन्यैरेहैर्नवाप्यते ।
कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः ॥
स याति ब्रह्मसदनमिह भूतिशतैर्युतः ॥"

इति कालिकापुराणे ८१ अध्यायः ॥

दर्पारम्भः, पुं, (दर्पस्य आरम्भः) अहङ्कारारम्भः । तत्पर्य्यायः । मटस्फाटिः २ । इति जटाधरः ॥

दर्भः, पुं, (दृभाति विदारयतीति । "दृभिभ्यां भः ।" उणां ३ । १५१ । इति भः ।) कुशः । इत्यमरः । २ । ४ । १६६ ॥ उलपलक्षम् । इति रत्नमाला ॥ काशः । इति शब्दरत्नावली ॥ * ॥

("कुशो दर्भस्तथा बर्हिः स्तरणो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् शरपत्रस्तथैव च ॥
दर्भस्तूयं त्रिदोषघ्नं मधुरानुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीरक्तपित्तविस्फोटकप्रदरान्नजित् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

"हरिताः सपिञ्जलाश्चैव पुष्पाः स्निग्धाः समाहिताः ।
गोकर्णमात्रास्तु कुशाः सक्थिच्छिन्नाः समूलकाः ॥
पिप्पलतीर्थेन देयाः स्रुवूर्व्वाग्भागाकमेव च ।
काशाः कुशा वल्वजाश्च तथान्ये तीक्ष्णरोमशाः ॥
मौञ्जाश्च शाद्वलाश्चैव षड्दर्भाः परिकीर्त्तिताः ॥
सपिञ्जलाः साग्राः तीक्ष्णरोमशा इति वल्वजानां विशेषणम् । शाद्वला इति सर्व्वेषां विशेषणम् । तेन तेषामभावे मूलकाग्रशून्यैर्यवखलजनलशुष्कवर्जं सर्व्वत्रयानीति गोभिलेन तद्व्यतिरिक्तवल्वजानां निषेधो बोद्धव्यः । मूलानि फलपुष्पमञ्जर्य्यस्तानि येषां तृणानां सन्ति तानि मूलकानि इति भट्टनारायणचरणाः ॥ गोकर्णमिता विस्तृताङ्गुष्ठानामिकापरिमाणाः ।
रत्निप्रमाणाः ग्रस्ता वै पिप्पलतीर्थेन संस्कृताः ।
उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः ॥

इति वायुपुराणम् ॥ * ॥

वध्यप्रतिप्रसवमाह हारीतः ।

पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
क्षारणासनपिण्डेषु षड्दर्भान् परिवर्जयेत् ॥
पिण्डार्थं ये स्मृता दर्भा ये क्रतं पिप्पलतर्पणम् ।
मूत्रोच्छिष्टप्रलिप्ते च त्यागस्तेषां विधीयते ॥
क्षुते: क्षते च विण्मूत्रे त्यागस्तेषां विधीयते ।

क्षुतैरित्युपलक्षणेन क्षतोथा क्षुतैर्दैवैरुपलक्षितेन युक्तेषु ॥

नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः ।
पवित्रांस्तान् विजानीयादृथा कार्यस्तथा कुशाः ॥
आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टस्तु भवेत्तस्तु सुस्थस्तेनं विवर्जयेत् ॥
क्रतं समापितमित्यर्थः ॥ * ॥

दर्भषट्कलक्षणमाह रत्नाकरे यज्ञसंग्रहः ।

अग्रमेको भवेद्ब्रह्मा मध्यकेऽग्रस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥

शान्तिदीपिकायाम् ।

सप्तभिर्नवभिर्वापि सार्द्धद्वितयवेष्टितम् ।
ओंकारेणैव मन्त्रेण द्विजः कुर्य्यात् कुशग्रहिम् ॥

नवभिरित्यत्र पञ्चभिरिति कर्म्मोपदेशिन्यां पाठः । दर्भसंख्याविशेषाभिधानं छन्दोगेतरपरम् ।

यज्ञवास्तुनि सुत्याच्च स्नाने ब्रह्मवटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥

इति गोभिलपरिशिष्टीयवचनात् ।" इति आह्निकतत्त्वम् ॥

दर्भटं, क्ली, (दृभ्यते निभृतस्थाने विरच्यते इति । दृभ भृत्यने + बाहुलकात् अटन् ।) निभृतगृहम् । इति त्रिकाण्डशेषः ॥

दर्भपत्रः, पुं, (दर्भस्य कुशस्येव पत्राणि यस्य ।) काशः । इति राजनिर्घण्टः ॥

दर्भाङ्कयः, पुं, (दर्भे आङ्क्यते सङ्क्षते सङ्कृत्वात् । आ + अङ्के + अच् ।) सुक्षः । इति राजनिर्घण्टः ॥ (सुक्षशब्दस्यास्य विवरणं ज्ञातव्यम् ॥)

दर्भः, पुं, (दृभाति विदारयतीति । दृ + "कृगृदृभ्यो वः ।" उणां १ । १५५ । इति वः ।) राक्षसः । हिंस्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जातिविशेषः । यथा, महाभारते । २ । ५१ । १३ ।

"कैरता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्व्विभागाः पारदाः सह बाह्लिकैः ॥"

स्त्रियां टाप् । उशीनरपत्नीभेदः । यथा, हरिवंशे । ३१ । २२ ।

"उशीनरस्य पत्न्यास्तु पञ्च राजर्षिवंशजाः ।
वृषा क्रमी नवा दर्व्वा पञ्चमी च दृषद्वती ॥")

दर्व्वरीकः, पुं, (दृ विदारे + "पर्व्वरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातात् साधुः ।) इन्द्रः । वायुः । वाद्यभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्व्वटः, पुं, (दर्व्वाय हिंसायै अटतीति । अट + अच् । शकन्ध्वादित्वात् पररूपम् ।) दस्युवादी । इति हारावली । १२८ ॥

दर्व्विः, स्त्री, (दृभाति विदारयत्यनेनेति । दृ + "दृदृभ्यां क्विन् ।" उणां ४ । ५३ । इति क्विन् ।) यज्ञपात्रादिदारकः । हाता इति भाषा । तत्पर्य्यायः । कम्बिः २ खजाका ३ । इत्यमरः । २ । ६ । ३४ ॥ दर्व्वी ४ कम्बी ५ खजाकः ६ । पर्वा । इति शब्दरत्नावली ॥

दर्व्विकः, पुं, (दर्व्वि + स्वार्थे कन् । अभिधानात् पुंस्त्वम् ।) दर्व्वी । इति द्विरूपकोषः ॥

दर्व्विका, स्त्री, (दर्व्वि + स्वार्थे कन् + टाप् ।) दार्व्विका । इत्यमरटीकायां रायमुकुटः ॥ खजाका । इति द्विरूपकोषः । कञ्चलम् । यथा,

"सौवीरं जाम्बलं तुत्थं मयूरग्रीवकं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥"

तल्लक्षणम् यथा, कालिकापुराणे ६८ अध्याये ।

"सवङ्गपत्रं सौवीरं जाम्बलं प्रस्तरं तथा ।
मयूरग्रीवकं रत्नं मेघनीलन्तु तेजसम् ॥
दृष्ट्वा निघ्नाद्य चैतानि शिलायां तैलसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ! ॥
घृततैलादियोगेन तन्मात्रादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥

दर्व्वी, स्त्री, (दर्व्वि + वा ङीष् ।) दर्व्विः । इति शब्दरत्नावली ॥ (यथा, उत्तरगीतायाम् । २ । ३० ।

"आलोड्य चतुरो वेदान् धर्म्मशास्त्राणि सर्व्वदा ।
योऽन्नं ब्रह्म न जानाति दर्व्वी पाकरसं यथा ॥")

दर्व्वीकरः, पुं, (दर्व्वीं पर्वां करोतीति ट + "कृञो हेतुताच्छील्यानुलोम्येषु ।" ३ । २ । २० । इति टः । यद्वा, दर्व्वीं पर्वा कर इवास्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।

"दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः ।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः ॥"

"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः॥"
तत्र दर्व्वीकरभेदा यथा,—
"दर्व्वीकराः कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो गृहाकपोतो बलाहको महासर्पः शुक्लप्रालीं गोहिताक्षो गवेधुकः परिसर्पः खरुकण्यः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः शुक्लरीको भृकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पः अनुसर्पः श्वेतोदरो महाशिरा अलगर्दः आशीविष इति॥"
एतद्दष्टविषजनितलक्षणादिकं यथा,—
"तत्र दर्व्वीकरविषेण लङ्घनयननखदशनमलपुरीषदंशक्षणात्तं रोक्षं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्ब्बल्यं शूनाक्षं वेपथुः स्वरावसादो घुर्घुरको जृम्भा शुष्कोष्ठः कासश्वासौ हिक्का वायोरूर्द्धगमनं मूलोद्देहनं क्षणाल्लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति॥" दर्व्वीकरदष्टानां विषवेगादिकमाह यथा,—
"तत्र सर्व्वेषां सर्पाणां विषस्य सप्तवेगा भवन्ति। तत्र दर्व्वीकराणां प्रथमे वेगे विषं श्लेष्मितं दूषयति तत् प्रदुष्टं क्षणात्तासुपैति तेन कार्ष्ण्यंपिपीलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं क्षणात् श्लेष्मो मन्यास्तम्भश्चाङ्गे भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चतुर्थेऽस्थि। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्रा प्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमे अस्थीन्यनुप्रविशति प्राणमेवैव दूषयति तेन पर्व्वभेदो हिक्कादाहश्च भवति। षष्ठे मज्जानमनुप्रविशति यद्दंशात्तत्वं दूषयति। तेन गात्राणां गौरवमतिसारो मूर्च्छा तृट्पीडा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति यानत्वात्यर्थं कोपयति। तत्र च क्षणात्स्रोतोभ्यः प्रधावयति तेन स्त्रैणवर्त्मिप्रादुर्भावः कटिपृष्ठभङ्गश्च सर्व्वेन्द्रियविघातो मर्म्मस्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति॥"
अथ दर्व्वीकरदष्टस्य चिकित्सामाह तत्रैव।
"पक्षिणां विषवेगे तु प्रथमे श्लेष्मितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेत्सागदं भिषक्॥
नस्यं कर्म्माञ्जने युक्त्यात् तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ पाययेत्॥
श्लीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे लवणक्षीरैर्घृतक्षीरेण श्लोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णशृङ्गेण मूर्द्धनि च॥
कुर्य्यात् काकपदं पश्चात् साधयित्वा घृतं क्षिपेत्॥")
व्यञ्जनाकारके, त्रि॥
दर्शः, पुं, (दृश्यते उभयोर्भागयोरुपलक्षणतयात्रेण रात्र्यवयवेनैकदेशेन सहावस्थितो चन्द्रसूर्य्यौ यत्र। दृश् + आधारे घञ्।) अमावस्या। इत्यमरः। १। ४। ८॥

"अन्योन्यं चन्द्रसूर्य्यौ तु दर्शनाद्दर्श उच्यते॥"
इति मत्स्यपुराणम्॥
(अयं शिनीवाल्यां विद्धाऽपरान्हे लक्षणात् ज्ञेयः। यथा, भागवते। ६। १९। ३।
"धातुः कुहूः शिनीवाली राका चानुमतिस्तथा।
सायं दर्शमयं प्रातः पूर्णमासमनुक्रमात्॥"
दृश + भावे घञ्।) अवलोकनम्। इति मेदिनी। शे, ७॥ (यथा, महाभारते। १३। १४४। ४५।
"दुर्दर्शाः केचिदाभान्ति नराः काष्ठमया इव।
प्रियदर्शास्तथा चान्ये दर्शनादेव मोक्षदाः॥")
पक्षान्तकृतयागविशेषः। स यागश्चयात्मकः। यथा। "आग्नेयाष्टाकपालेन्द्रदर्शेन्द्रपयोयागाक्षयोऽमावास्यायां च यावज्जीवं कर्त्तव्यः कौरुपायिकर्त्तव्यो मासश्चाधश्च।" इति मलमासतत्त्वम्॥
दर्शकः, पुं, (दर्शयति नृपादिसमीपगमनपथमिति। दृश् + णिच् + ण्वुल्।) द्वारपालः। इत्यमरः। २। ८। ६॥ (जातिविशेषः। यथा, महाभारते। ६। ८। ५३। [तथा॥")
"काश्मीरा सिन्धुसौवीरा गान्धारा दर्शका वि, दर्शयिता। (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकैः॥")
प्रवीणः। इति मेदिनी। के, १०३॥ (प्रकाशकः। यथा, हितोपदेशे। १। ११।
"अज्ञैकसंग्रयोच्छेदि गरीयोऽर्थस्य दर्शकम्।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥")
दृश + ण्वुल्। द्रष्टा। यथा, महाभारते। १। १४१। १७।
"दक्षाः स्यादविधातो नित्यं विवरदर्शकः।
राजन्यानां सपत्नेषु नित्योद्विग्नः समाचरेत्॥")
दर्शतः, पुं, (दृश्यते गगनमार्गे इति। दृश + "भ्रस्जदृशीति।" उणां। ३। ११०। इति अतच्।) सूर्य्यः। चन्द्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (दर्शनीये, त्रि। यथा, ऋग्वेदे। १। ६१४। ७।
"यो विश्वतः प्रत्यङ्ङसि दर्शतो रथः संदृशो पितुर्न रूपं॥")
दर्शनं, क्ली, (दृश्यतेऽनेनेति। दृश + करणे ल्युट्।) नयनम्। स्वप्नः। बुद्धिः। धर्म्मः। उपलब्धिः। दर्पणः। (दृश्यते यथार्थतत्त्वमनेनेति।) ज्ञानम्। इति मेदिनी। ने, ७३॥ ज्ञानञ्च द्विविधम्। वैशेषिकन्यायमीमांसासाङ्ख्यपातञ्जलवेदान्तरूपम्। एतानि तत्त्वज्ञानार्थं वेदान् विचार्य्य कणादगोतमजैमिनिकपिलपतञ्जलिव्यासाख्यैर्मुनिभिः कृतानि॥ दृश्या। इत्यमरः। ३। ३। १६३॥ वर्षः। इति त्रिकाण्डशेषः॥ चाक्षुषज्ञानम्। देखा इति भाषा। तत्पर्य्यायः। निर्व्यर्णनम् २ निध्यानम् ३ आलोकनम् ४ ईक्षणम् ५। इत्यमरः। १। २। ३१॥ निभालनम् ६। इति जटाधरः॥ *॥ (यथा, माघे। १। ६। ३४।
"आकृत इव मे श्रोत्रं दर्शनं याति चेतसि॥")
पुण्यदर्शनानि यथा,—
नन्द उवाच।
"येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने।
तत् सर्व्वं वद सर्व्वज्ञ! श्रोतुं कौतूहलं हि मे॥
श्रीभगवानुवाच।
सुब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः॥
सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा।
सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम्॥
भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः।
गजेन्द्राणाञ्च सिंहानां श्वेताश्वानान्तथैव च॥
शुकानाञ्च शिकानाञ्च खञ्जनानान्तथैव च।
हंसानाञ्च मयूराणां चासानां शुक्लपक्षिणाम्॥
वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च।
पतिपुत्रवतीनाञ्च नराणां स्त्रीयुतानाम्॥
प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः।
मुक्तानां हीरकाणाञ्च माणिक्यानां महात्मनः।
तुलसीशङ्खपद्मानां दर्शनं पापनाशनम्॥
कर्म्माणि शुक्लधान्यानि दूर्वां दधि क्षुधूनि च।
पूर्णकुम्भञ्च लाजाञ्च राजेन्द्रं दर्शनं जलम्॥
मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः॥
गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्।
पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः॥
देवाश्रितं देवगृहं सुगन्धिपवनं तथा।
शुक्लञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः॥
शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा।
कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द! पुण्यं लभेन्नरः॥
पताकामक्षयवटं तरुं देवोत्थितं शुभम्।
देवालयं देवखातं दृष्ट्वा पुण्यं लभेन्नरः॥
मुक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम्।
गङ्गाम्बुदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः॥
पुराणपुस्तकं शुद्धं सबीजं विष्णुयन्त्रकम्।
स्निग्धदूर्व्वाक्षतं रत्नं दृष्ट्वा पुण्यं लभेन्नरः॥
तपस्विनं सिद्धमन्त्रं सस्यं क्षत्रसारकम्।
यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः॥
गोमूत्रं गोमयं दुग्धं गोघृतं गोष्ठगोशयम्।
पञ्चगव्यान्वितं चैव दृष्ट्वा पुण्यं लभेन्नरः॥
रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्।
सुवेशकां सुवसनां दिव्यभूषणभूषिताम्॥
वेश्यां वेशमकरीं गन्धं सदूर्व्वाक्षततण्डुलम्॥
सिद्धान्नं घृतमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम्॥
कार्त्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्।
संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम्॥
हिङ्गुलायां तथाष्टम्यामश्वे माघि सिते दिने।
गौरीप्रतिमां दृष्ट्वा करोति जन्मखण्डनम्॥
शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम्।
कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम्॥
जन्माष्टमीदिने भक्त्या दृष्ट्वा मां विष्णुमायिनम्।
प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम्॥
उपोष्य व्रजभूमौ च भाद्रे मासि सिते दिने।
संपूज्य राधां माधवं करोति जन्मखण्डनम्॥

पौषे मासि शुक्लरात्रौ यत्र तत्र स्थले नरः।
पद्मायाः प्रतिमां दृष्ट्वा करोति जन्मखण्डनम्॥
सप्तजन्म भवेत्तस्य पुत्रः पौत्रो धनेश्वरः॥
उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने।
दृष्ट्वा काञ्चनपद्मानां करोति चर्म्मखण्डनम्॥
दत्त्वा विष्णुपदे पिण्डं विष्णुं यत्र प्रपूजयेत्।
पितॄणां स्वात्मनश्चैव करोति जन्मखण्डनम्॥
प्रयागे क्षौरकर्म्मं कृत्वा यत्र पितॄन् प्रतर्पयेत्।
उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्॥
उपोष्य पुष्करे स्नात्वा किंवा वदरिकाश्रमे।
संपूज्य दृष्ट्वा मामेव करोति जन्मखण्डनम्॥
सिद्धां कृत्वा च वदरीं मुक्तां वदरिकाश्रमे।
दृष्ट्वा मत्प्रतिमां नन्द! करोति जन्मखण्डनम्॥
दोलायमानं गोविन्दं दृष्ट्वा वृन्दावने च माम्।
दृष्ट्वा संपूज्य नत्वा च करोति जन्मखण्डनम्॥
भाद्रे दृष्ट्वा च मथुरां मामेव मधुसूदनम्।
संपूज्य नत्वा भक्त्या च करोति जन्मखण्डनम्॥
रथस्थञ्च जगन्नाथं यो वीक्षति कलौ नरः।
संपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम्॥
उत्तरायणसंक्रान्त्यां प्रयागे स्नानमाचरेत्।
संपूज्य नत्वा मामेव करोति जन्मखण्डनम्॥
कार्त्तिकीपूर्णिमायाञ्च दृष्ट्वा मत्प्रतिमां शुभाम्।
उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम्॥
चन्द्रभागासमीपे च माघ्यान्तु मां नयेत् क्वचित्।
राधया सह मां दृष्ट्वा करोति जन्मनः क्षयम्॥
रामेश्वरं सेतुबन्धे आषाढ़ीपूर्णिमादिने॥
उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम्॥
दीनगाथं दिनकरं लोलार्के चोत्तरायणे।
उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम्॥
कपिलोष्ठे सुवसने कपिले सुगन्धरे।
विस्रन्दके राजकोष्ठे नन्दके पुण्यभद्रके॥
पार्व्वतीप्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम्।
नन्दिनं शङ्करं दृष्ट्वा करोति जन्मनः क्षयम्॥
त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ।
समुपोष्य दधि प्राश्य मां दृष्ट्वा मुक्तिमाप्नुयात्॥"

इति मत्स्यवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

दर्शनीयः, त्रि, (दृश्यते इति। दृश्+अनीयर्।) मनोज्ञः। इति भरतः॥ (यथा, महाभारते। ११। १५। ६०

"अकुप्यद्यावि दद्यो देवी पटान्तरेण सा।
ततः स कृतशोभूतो दर्शनीयतनो नृपः॥")

दर्शनयोग्यः। इति शब्दरत्नम्॥ (यथा, पञ्चतन्त्रे। ४। ४०।

"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक!।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते॥")

दर्शयामिनी, स्त्री, (दर्शस्यामावास्याया इव यामिनी रात्रिः।) तमिस्रा। अन्धकाररात्रिः। इति हेमचन्द्रः। २। ५०॥ (दर्शस्य यामिनी इति विग्रहे। अमावास्यारात्रिश्च॥)

दर्शयिता, [तृ] त्रि, (दर्शयतीति। दृश्+णिच्+"ण्वुल्तृचौ।" ३। १। १३३। इति तृच्।) दर्शकः। (यथा, महाभारते। ६। ३। ६१।

"प्रसादये त्वामतुलप्रभाव!
त्वं नो गतिर्दर्शयिता च धीरः॥")

प्रतीहारः। इति भरतः॥

दर्शविपत्, [द्] पुं, (दर्शे अमावास्यायां विपत् प्रणाशोऽदर्शनं यस्य।) चन्द्रः। इति हारावली। १३॥

दर्शितः, त्रि, (दृश्+णिच्+क्तः।) दर्शनं कारितः। तत्पर्य्यायः। प्रकाशितः २ आविष्कृतः ३ प्रकटितः ४। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। २८६।

"दर्शितसयनोक्काये भूविभ्रमभाजि वलति तव नयने।
चिन्नहले हलधर इव सर्व्वं पुरमर्ज्जितं सुतनु॥")

दल, क भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, दालयति गात्रं बाणः। इति दुर्गादासः॥

दल, मि भेदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अकं च सेट्।) मि दलयत्यहौ कुलद्म्याभृतः। इति मुरारिः। दालयति। भेदो विदारणम्। दलति कुठारः काष्ठम्। क्वचिद्विदीर्णीभावे विकसने चायम्। श्रीमद्बाहुदण्डविदलत्कोदण्डचण्डध्वनिरिति महानाटकम्। दरविदलितमल्लीवल्लिपत्रत्परागेति जयदेवः। इति दुर्गादासः॥

दलं, क्ली, (दलतीति। दल+अच्।) उत्सेधः। खण्डम्। (यथा, मनुः। ८। २६६।

"भार्य्या पुत्रश्च दासश्च स्त्रियो भ्राता च सोदरः।
प्राप्तापराधास्ताड्याः स्युरुज्ज्वेणुदलेन वा॥")

शस्त्रीच्छदः। अपत्रथम्। पत्रम्। इति मेदिनी। ले, २६॥ (यथा, आर्य्यासप्तशत्याम्। ६६२।

"कृत्वा तटिनि! तरङ्गैर्भमितक्रकचेषु नाग्रये निहितः।
फलदलवल्कलरहितक्षयान्तरीचे तरुस्वत्वः॥")

घनम्। इति शब्दरत्नावली॥ तमालपत्रम्। इति राजनिर्घण्टः॥ अर्द्धम्। इति जटाधरः॥ (पुं, इक्ष्वाकुकुलोत्पन्नपरिप्लवराजपुत्रः। स च मरुकराजकन्यासम्भूतः। यथा, महाभारते। ३। १६२। ४४।

"अथ कस्यचित् कालस्य तस्यां कुमारीराज्यस्य राज्ञः सम्बभूवुः शूलो दलो बलश्चेति॥")

वृत्तविशेषः। तत्पर्य्याया यथा,—

"वातपोतः पलाशः स्याद्दानप्रस्थश्च किंशुकः।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोत्तरः॥"

इति वैद्यकरत्नमालायाम्॥)

दलकोषः, पुं (दलानामेव कोषो यस्य। तस्य पुष्पेषु कोषाभावात् तथात्वम्।) कुन्दपुष्पवृक्षः इति शब्दमाला॥

दलनिर्म्मोकः, पुं, (दलति विदारयतीति दलं वल्कलम्। तदेव निर्म्मोक इवास्य।) भूर्ज्जवृक्षः। इति शब्दमाला॥

दलनी, स्त्री, (दल्यते अनेनेति। दल+करणे ल्युट्। ङीप्।) लोष्टम्। इति शब्दरत्नावली।

डेला इति भाषा॥ (दलति विदारयतीति। दल+कर्त्तरि ल्युः ङीप् च।) भेदकर्त्तरि, त्रि। यथा,—

"सा दुर्गा भवभीतिरीतिशमनी लोकत्रयत्रायिणी
भूयाद्वः प्रतिपक्षपक्षदलनी वाञ्छाफलोल्लासिनी॥"

इति विद्धशालभञ्जिकायां प्रथमोऽङ्कः॥

दलपः, पुं, (दल्यते असौ दलति अनेन वा। दल+"उषिकुटिदलिकटिखलिभ्यः कपन्।" उणा। ३। १४३। इति कपन्।) स्वर्णम्। शुल्बम्। इत्युणादिकोषः॥ (दलं यूथं पातीति। पा+कः। दलपतिः॥)

दलपुष्पा, स्त्री, (दलानि पत्राणीव पुष्पाण्यस्याः।) केतकी। इति राजनिर्घण्टः॥ (केतकीशब्देऽस्या विवरणं विलोक्यम्॥)

दलसारिणी, स्त्री, (सारोऽस्त्यस्या इति। सार+इनिः। ङीप् च। दले पत्रे सारिणी।) केसुकः। इति रत्नमाला॥

दलसुचिः, पुं, (दलस्य सुचिरिव।) कण्टकम्। इति हारावली। ६१॥

दलसुषा, स्त्री, (दलस्य सुषा स्रावः।) पत्रग्निरा। तत्पर्य्यायः। माढ़िः २। इति हेमचन्द्रः। ४। १६०॥

दलाढ़कः, पुं, (दलैराढ़क इव।) स्वयं जातलिङ्गः। वृक्षी। गैरिकम्। फेनः। खातकम्। नागकेशरः। महत्तरः। इति मेदिनी। के, १८२॥ कुन्दः। करिकर्णः। गिरीषः। वाह्या। इति हेमचन्द्रः॥

दलाढ्यः, पुं, (दलेन भेदेन आढ्यः।) मङ्गलङ्घटः। इति त्रिकाण्डशेषः॥ दलढक इति भाषा॥

दलामलं, क्ली, (दलैः अमलम्।) मदनवृक्षः। दमनवृक्षः। इति भैरिकी। ले, १५५॥ मदनवृक्षः। इति शब्दरत्नावली॥

दलाम्बं, क्ली, (दलेषु अम्बो रसो यस्य।) पुङ्खम्। इति राजनिर्घण्टः॥

दलिः, स्त्री, पुं, (दल्यते इति। दल+"सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) लोष्टम्। इति शब्दरत्नावली॥ दला इति डेला इति च भाषा॥

दलिकं, क्ली, (दल्यते भिद्यते इति। दल+इन्+स्वार्थे कन्।) काष्ठम्। इति हेमचन्द्रः। ४। १८८॥

दलितं, त्रि, (दलस्य जातम्। दल+तारकादित्वात् इतच्।) प्रफुल्लम्। इति हेमचन्द्रः। ४। १६४॥ (दल+क्तः।) खण्डितम्। यथा,—

दलिताञ्जनमेचकपुञ्जेत्यादि क्रमदीपिका॥ (यथा च प्रबोधचन्द्रोदये। २। ३५।

"दलितकुवलयाङ्गमङ्गपाली
रचय ममाङ्गरुचेव मीवरोधे!॥"

विचित्रम्: यथा, आर्य्यासप्तशत्याम्। ३०५।

"दलिते पलाशपुञ्जे दृषभं परिभक्षयन् वहत्पतौ
दुदिने।")

दग्धगन्धि:, पुं, (दग्धे गन्धो यस्य समासान्त इच्।
"सप्तच्छदा अश्वक्ण च।") सप्तपर्णवृक्ष:। इति
त्रिकाण्डशेष:॥

दग्धभ:, पुं, (दलति विशीर्णो भवत्यनेनेति। दल+
"इदलिभ्यां भ:।" उणा०। ३। १५१। इति
भ:।) प्रतारणा। पापम्। सुनिषेद:। इत्यु-
णादिकोष:॥ चक्रम। इति सिद्धान्तकौमुदा-
यज्ञविधिप्रक्रिया:॥

दग्धि:, पुं, (दलति विदारयति असुरानिति।
दल+"दल्लि:।" उणा०।४।३७। इति मि:।)
इन्द्र:। इति हेमचन्द्र:। २। ८६॥ (दल्यते
अनेनेति।) वज्रम्। इति सिद्धान्तकौमुदा-
सुबादिवृत्ति:॥

दघ, इ ब्रणे। इति कविकल्पद्रुम:॥ (भ्वा-परं-
सकं-सेट्।) इ, दन्वाते। ब्रणो गति:। इति
दुर्गादास:॥

दघि:, पुं, (दुनोति पीड़यतीति। दु+अधि।)
वनम्। वनाग्नि:। इत्यमर:। २। ३। २०५॥
(यथा, भागवते। ८। ६। १३।
"दृष्ट्वा गता निर्वृतिमद्य सर्व्वे
गणा दवार्त्ता इव गाङ्गमम्भ:॥")
अग्नि:। इत्यमरटीकायां मौलक्षक:॥ (दु
उपतापे+"ऋदोरप्।"३। ३। ५७। इत्यप्।)
उपताप:। इति केचित्॥

दवथु:, पुं, (दवनमिति। दु दु उपतापे+"इतो-
ऽथुच्।" ३।३।८६। इति भावे अथुच्।) परि-
ताप:। इति जटाधर:॥ (यथा, काशीखण्डे।
२६। ८६।
"दुरोदरघ्नी दावार्च्चिर्दवथ्वैकशेवधि:।
दीनसन्तापशमनी दात्री दवथुवैरिणी॥"
दूयतेऽनेनेति। करणे अथुच्।) चक्षुरादि-
दाह:। इति राजनिर्घण्ट:॥

दवाग्नि:, पुं, (दवानां वनानां अग्नि:। यद्वा, दव
एवाग्नि:।) दावानल:। इति द्विरूपकोष:॥
(यथा, मेघदूते। ५५।
"क्षेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा-
वाधीतोल्का क्षपितचमरी बालभारो दवाग्नि:॥")

दविष्ठ:, त्रि, (अयमेषामतिशयेन दूर इति। दूर+
इष्ठन्। "स्थूलदूरयुवेति।" ६। ४। १५६। इति
रस्य लुप् ऊकारस्य च गुण:।) सुदूर:।
अत्यन्तदूरवर्त्ती। इत्यमर:। ३। १। ६६॥

दवीयान्, स्[ि] त्रि, (इदमनयोरतिशयेन दूरम्।
दूर+ईयसुन्। स्थूलदूरेत्यादिना साधु:।)
सुदूर:। इत्यमर:। ३। १। ६६॥ (यथा,
प्रद्युम्नविजये। २। १६।
"कोऽमान् दवीयांसमपीन्दुबिम्बं
न वेद पद्मासनिमिन्दुमौले:।
पातालधामानमपि प्रवृद्धं
न वाड़वं सुन्दरि! वेद को वा॥")

दघ्र, इ क लिघि। इति कविकल्पद्रुम:॥ (चुरां-
परं-अकं-सेट्। इ क, दंघ्रयति। लिघि दौर्ब्बल्ये।
इति दुर्गादास:॥

दघ्र, इ क ड दर्शे। दंघ्रणे। इति कविकल्पद्रुम:॥
(चुरां-आत्मं-सकं-सेट्।) इ क ड, दंघ्रयते।
दर्शो दर्शनम्। इति दुर्गादास:॥

दघ्र, [न्] त्रि, (दंघ्रयति दीर्य्यते इति। दघ्रि
+बाहुलकात् कनिन्। "दघ्र दंघ्रणे। न
लोप:।" इत्युज्ज्वलदत्त:। १। १५६।) संख्या-
विशेष:। द्विगुणितदश १०। (यथा, महाभारते।
३। १३४ १०।
"दिशो दशोक्ता: पुरुषस्य लोके
सहस्रमाहुर्दशपूर्णं शतानि।
दशैव मासान् बिभर्त्ति गर्भवत्यो
दशैरका दश दाम्ना दशार्हा:॥")
दशकाम्रकाणि यथा। हस्तपुङ्गुलि: १ ग्रम्भुबाहु:
२ रावणमस्तकम् ३ कृष्णावतार: ४ दिक् ५
विश्वदेव: ६ अवस्था ७ चन्द्राश्व: ८ पंक्ति: ९।
इति कविकल्पलता॥ बहुवचनान्तोऽयं शब्द:।
ततसंख्याविशिष्ट:। इत्यमर:। २। ६। ६१॥

दशकण्ठ:, पुं, (दश कण्ठा गला यस्य।)
रावण:। इति शब्दरत्नावली॥ (यथा, रघु:।
८। २६।
"दशपूर्व्वरथं यमाख्यया
दशकण्ठारिरिपुं विदुर्बुधा:॥")

दशकन्यजित्, पुं, (दशकन्यं रावणं जयतीति।
जि+क्विप् तुक् च।) राम:। इति त्रिकाण्ड-
शेष:॥

दशकन्धर:, पुं, (दश कन्धरा ग्रीवा यस्य।) रावण:।
इति हेमचन्द्र:। ३। ३७०॥ (यथा, भागवते।
२। ७। २३।
"असत्प्रसादसुमुख: कलया कलेश
इक्ष्वाकुवंश अवतीर्य्य गुरोर्निदेशे।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत्॥")

दशग्रीव:, पुं, (दश ग्रीवा यस्य।) रावण:। इति
शब्दमाला॥ (यथा, महाभारते। ३। २७४। १०।
"दशग्रीवस्तु सर्व्वेषां श्रेष्ठो राक्षसपुङ्गव:।
महोत्साहो महावीर्य्यो महासत्त्वपरा-
क्रम:॥")
एकादशमन्वन्तरीयदशनामकेन्द्रशत्रुविशेष:।
यथा,—
"रुद्रपुत्रस्य ते पुत्रान् वक्ष्याम्येकादशस्य तु।
सर्व्वत्रग: सुधर्म्मा च देवानीक: पुरुर्गुरु:॥
चित्रवज्रो दृढ़ायुध आर्द्रक: पुत्रकस्तथा।
हविष्मांश्च हविष्यश्च वरुणो विश्वविस्तर:॥
विष्णुश्चैवाग्नितेजाश्च ऋषय: सप्त कीर्त्तिता:।
विहङ्गमा: कामगमा निर्म्माणरुचयस्तथा॥
एकैकस्मिंश्चकस्मेधौ गणाश्चैव च वै दश:।
दशग्रीवो रिपुस्तस्य स्त्रीरूपो घातयिष्यति॥"
इति गरुड़े ८७ अध्याय:॥
(असुरविशेष:। यथा महाभारते। २। ६। १४।
"दशग्रीवश्च बाली च मेघवासा दशारुध:॥"
दमघोषस्य पुत्रविशेष:। यथा, हरिवंशे।
११६। २२।
"दमघोषश्च पुत्रास्तु पञ्च भीमपराक्रमा:।
भार्य्या वासुदेवस्य श्रुतश्रवसि जज्ञिरे।
शिशुपालो दशग्रीवो रेभोऽथोपदिशो
ऽनघ॥")

दशति:, स्त्री, (दशाहत्या दश। निपातनात्
साधु:।) शतम्। इति महाभारते दानधर्म्म:॥
(यथा, महाभारते। १। १६। १३।
"कालेन महता कद्रूरवाप्तानां दशतीर्दश।
जनयामास विप्रेन्द्र! ते चाक्षे विनता तथा॥"
"यथा नव दशाहत्या भवतिस्तथा दश दश-
हत्या दशति: शतमित्यर्थ:। दश दशतीर्दश-
शतानीत्यर्थ:॥" इति तत्र नीलकण्ठ:॥)

दशधा, अ, (दशानां प्रकार:। दश+"संख्याया
विधार्थे धा।" ५। ३। ४२। इति धा।) दश
प्रकारम्। इति व्याकरणम्॥ (यथा, मनु:।
६। १५२।
"सर्व्वं वा रिक्थजातन्तु दशधा परिकल्पय च।
धर्म्यं विभागं कुर्व्वीत विधिनानेन धर्म्म-
वित्॥")

दशन, क्ली, (दश्यते इव शरीरमनेनेति। दंश+
करणे ल्युट्। दहदश्नेति निर्द्देशात् छदि-
त्वमपि नलोप:।) कवचम्। शिखरे, पुं।
इति मेदिनी। ने, ७४॥

दशन:, पुं, क्ली, (दश्यतेऽनेनेति। दंश+
ल्युट्। दहदश्नेति निर्द्देशात् अत्र अकित्वमपि न-
लोप:।) दन्त:। इत्यमरभरतौ॥ (यथा,
रघु:। ५। ५२।
"उवाच वाग्मी दशनप्रभाभि:
संवर्द्धितोर:स्थलतारहार:॥")

दशनवास:, [स्] क्ली, (दशनानां वास इव आच्छा-
दकत्वात्।) ओष्ठ:। इत्यमर:। २। ६। ८०॥

दशनाढ्या, स्त्री, (दशन: आढ्यो यस्या:।
एतत् सेवनेन हि दन्तस्य दार्ढ्यात् अस्य तथा-
त्वम्।) चुक्रिका। इति शब्दचन्द्रिका॥

दशनोच्छिष्ट:, पुं, निश्वास:। (दशनेन उच्छिष्ट:।)
अधरचुम्बनम्। इति मेदिनी। टे, ६२। दन्त-
त्यक्ते, त्रि॥

दशधारमिताधर:, पुं, बुद्ध:। इति हेमचन्द्र:। २।
१४७॥

दशपुर, क्ली, (दश दिश: पिपर्त्तीति। प+
क:।) कैवर्त्तीमुस्तकम्। इत्यमर:। २। ४।
१३१॥ (दश पुरो यत्र। "अक्षपूरब्ध:
पथामानर्थे।" ५। ४। ७४। इति अ:।)
देशभेद:। स मालवदेशैकदेश:। पुरभेद:।
इति मेदिनी। रे, २६६॥ (यथा, मेघदूते।
४६।
"कुन्देशेषानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम्॥")

दशपूरम् क्ली, (दश दिश: पूरयतीति। पूर+
अच्।) दशपुरम्। इत्यमरटीकायां भरत:॥

दशफल:, पुं, (दशत दिक्षु फलं यस्य। यद्वा,
"दानशीलक्षमाशौर्य्यमाधवप्रज्ञा बलानि च।

सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः।'इति स्कान्दे प्रतिपदादिदशमीपर्य्यन्तदिनदृष्टिसंज्ञया पठनीयमिति श्रिष्टाः। अत्र सर्व्वोऽपि विस्तरः स्कान्दादिके भट्टकृततिथिनिर्णयसीसेतोरवधेयः। विस्तरभीतेरस्माभिर्न लिख्यते। * । एवं कुर्व्वतः फलमुक्तं काश्मीरखण्डे।

'एवं ज्ञात्वा विधानेन वित्तशाठ्यविवर्ज्जितः।
उपवासी वत्सरादेर्दशपापैः प्रमुच्यते।
सर्व्वान् कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते॥'
इति।

अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वात् विशेषेण पूजा कार्य्या। तदुक्तं स्कान्दे सेतुमाहात्म्ये।

'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ।
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम्।
रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति॥"
इति निर्णयसिन्धुद्वितीयपरिच्छेदे संवत्सरकृत्यम्। किञ्च।

"अद्य हस्ते तु नक्षत्रे दशम्यां ज्येष्ठके सिते।
दशपापहरायाश्च अदत्तादानकस्य च॥
विग्रहाचरणं हिंसा परदारोपसेवनम्।
पारुष्यानृतपैशुन्यमसम्बद्धञ्च भाषणम्॥
परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम्।
एतद्दशाघघाताय गङ्गाम्भश्च करोम्यहम्॥"
इति गारुडे २१५ अध्यायः। * ॥

अपरञ्च।

"ज्येष्ठे दशहरायान्तु निष्णोरिष्टिं नृप! ब्रह्मन्।
येन वा विधिना कार्य्या सेष्टिर्विष्णोर्नृपैः सदा॥
प्रत्यब्दं पार्थिवः कुर्य्यात् प्रतिमां काष्ठवीं हरेः।
अन्यतेजोमयीं वापि दारवीं वा शिलामयीम्॥
प्रतिष्ठां विधिवत्तस्याः कुर्य्याद्विप्रः पुरोहितः।
तां संस्थाप्य हरागारे स्वयं वा यत्नतः क्षिते॥
वासुदेवस्य बीजेन पूर्व्वोक्तविधिना तथा।
सर्व्वोपचारैर्भक्त्या तु वासुदेवं प्रपूजयेत्॥
पूजान्ते संस्कृते वह्नौ कुण्डमध्ये स्थितो द्विजः।
आज्यैः सहस्रं जुहुयाद्धुतीनां हरेः क्षिते॥
संपूर्ण्य वासुदेवन्तु होमं कृत्वा ततो द्विजः।
नृपस्त्वाज्ञापयेत्तान्तु प्रतिमां मन्त्रपूतया॥
प्रतिमायाः कपोलौ द्वौ कृत्वा दक्षिणपाणिना।
प्राणप्रतिष्ठां कुर्व्वीत तस्यां देवस्य वै हरेः॥
कृतायान्तु प्रतिष्ठायां प्राणानां नृपसत्तम!।
विष्णोः प्राणास्तु प्रतिमामायान्ति नियतं स्वयम्॥
प्राणेष्वथागतेषु स्याद्देवत्वं नियतं भवेत्।
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च॥
यथा पूर्व्वं तथा भावः सर्व्वादीनां न विद्यते॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव!।
प्राणप्रतिष्ठा कर्त्तव्या तस्या देवत्वसिद्धये॥
सुवर्णेन सुवर्णं स्यात् शिला दारु तथा शिला।
अन्यच्च मृद्रूपं स्यात् प्राणस्थानन्तु सर्व्वदा॥
वासुदेवस्य बीजेन तद्विष्णोरिष्टिजेन च।
तत्रैवाज्ञाङ्गिसन्ताभां प्रतिष्ठामाचरेद्धरेः॥
तत्रैव हृदयेऽभीष्टं दत्त्वा मन्त्रवित्तमः।
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत्॥
अस्मे प्राणाः प्रतिष्ठन्तु अस्मे प्राणाः सरन्तु च।
अस्मे देवत्वसञ्जाये स्वाहेति यजुरुच्चरन्॥
अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरितरेण च।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत्॥
प्रतिमापूजने कुर्य्यादात्मन्यपि च मन्त्रवित्।
प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये॥
अस्मिंस्तु प्राणप्रतिष्ठान्तु प्रतिमापूजनादते।
न क्वचित्तु बुधः कुर्य्यात् ज्ञात्वा तत्त्वमवाप्नुयात्॥
विष्णोरिष्टिमिमां ज्ञात्वा दशम्यां पार्थिवोत्तमः।
तस्यामेव तु पूर्व्वायां प्रतिमां स्थापयेत्ततः॥
एवं दशहरायान्तु ज्ञात्वेष्टिं पार्थिवो हरेः।
सर्व्वान् कामानवाप्नोति निर्व्विघ्नोऽपि स
जायते॥"
इति कालिकापुराणे ८८ अध्यायः॥

दशा, स्त्री, (दशतीव। दनश्च+ऋज्वादिभ्यः कः। जश्त्वभदङ्दशेति निर्देशात् अकित्वेऽपि नलोपः। यद्वा, दशते इति। गुरोश्चेत्यङ्। ततष्टाप्।) अवस्था। (यथा, पञ्चतन्त्रे १।१३८।

"आपदि येनोपकृतं येन च हसितं दशासु विषमासु।
उपकृत्य तयोरुभयोः पुनरपि जातं गतं मन्ये॥")

दीपवर्त्तिः। (यथा, कुमारे। ४। ३०।

"अहमस्य दशेव पक्ष्म मा-
मविषह्यव्यसनेन धूमिताम्॥")

वस्त्राग्ने बहुवचनान्तोऽयं शब्दः। इति मेदिनी। शे, ८॥ (यथा, मनुः। ३। ४४।

"वसनस्य दशा गाव्या भूषयोत्कृष्टवेतने॥")

चेतः। इत्यमरपालः। * ॥ शरीरस्य दशा दशा यथा,—

गर्भवासः १ जन्म २ बाल्यम् ३ कौमारम् ४ पौगण्डम् ५ यौवनम् ६ स्थाविर्य्यम् ७ जरा ८ प्राग्भारोधः ९ नाशः १०। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥*॥ कामजदशदशा यथा,

"पञ्चरागरक्तदृश मनसः सङ्कल्पिभावना च
चाटुक्तिः स्वाप्तदृश विषयव्यामतप्तेवसोऽपि।
निद्राक्षेदक्षदृश तनुता निष्फलं ततोऽनु-
न्मादो मूर्च्छा तदनु मरणं स्मुर्दशाः प्रक्रमेण॥"
इत्यलङ्कारश्राद्धम्॥ * ॥

कर्म्मणो नराणां यथोक्तायुषः सूर्य्यादग्रहभोग्यादिभागविशेषः। तत्र वार्षिकी दशा यथा,—

"षट् सूर्य्यस्य दशा ज्ञेया मुनेश्च दशपञ्च च।
अष्टावङ्गारके प्रोक्ता बुधे सप्तदश स्मृताः॥
शुक्रेषरे दश प्रोक्ता गुरोरेकोनविंशतिः।
राहोर्द्विदशवर्षाणि शनेरेकविंशतिः।"*॥

जन्मकालीननक्षत्रविशेषघटितग्रहाणां दशानियमो यथा,—

"कृत्तिकादित्रये सूर्य्यः शशी रौद्रचतुष्टये।
मघादाश्लेषतये भौमो बुधो हस्तचतुष्टये॥
अनुराधात्रये शौरिर्गुरुः पूर्व्वचतुष्टये।
धनिष्ठात्रितये राहुः शेषे शुक्रचतुष्टये॥ * ॥

सूर्य्योपप्लवभौमार्किदशातिकष्टदा नृणाम्।
गुरुचन्द्रज्ञशुक्राणां यथेप्सितफलप्रदाः॥"

दशाफलम्।

"उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघातैः।
संक्षोभितं स्वजनबन्धुवियोगदुःखै-
र्भोगोर्दशा भवति कष्टकरी नराणाम्॥१॥
सौख्यं विभूतिं वरवाहनयानरत्न-
कीर्त्तिप्रतापबलवीर्य्यसुभान्वितञ्च।
मिष्टान्नपानशयनासनभोजनानि
चन्द्रो ददाति धनकाञ्चनभूमिसंघम्॥२॥
ज्ञाज्ञाभिघातवधबन्धनरेन्द्रपीड़ां
चित्तास्थैर्य्यं विकलतां च गृहे करोति।
चौराग्निदाहभयभङ्गविपत्तिरोग-
कीर्त्तिप्रतापधनहा च दशा कुजस्य॥३॥
दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासशयनासनभोजनञ्च।
नानाप्रकारविभवागमकोषवृद्धिः
शिघ्रं भवेद्बुधदशासु हितार्थसिद्धिः॥४॥
मिथ्यापवादवधबन्धनशार्य्यङ्गानि-
र्मानस्वर्य्ययुक्प्रियसुखस्त्रविनैर्विहीनः।
मैत्रे च वैरमभिवाञ्छति वैरयुक्तः
कष्टासु पापदृदशासु शनैश्चरस्य॥५॥
रम्यं गृहं विनयसञ्चयमागवृद्धिं
प्राप्नोति सौख्यधनधान्यविभूतियुक्तम्।
धर्म्मार्थकामसुखभोगवधूपयोगं
यावद्दृहस्पतिदृशा पुरुषो हि तावत्॥६॥
बुद्धा विहीनमतिनाशवियोगदुःख-
नष्टार्थसिद्धिभयभङ्गविषार्त्तिरोगम्।
सन्तापशोकपरदेशगतं करोति
राहोर्दृशा भवति जीवनसंशयाय॥७॥
मन्त्रप्रभावनिपुणाः प्रमदाविलासाः
श्वेतातपत्रनृपपूजितदेशलाभाः।
हस्त्यश्वलाभधनपूर्णमनोरथश्च
शौक्रीदृशा भवति निश्चितराजलक्ष्मीः॥८॥

रवेरन्तर्दशा मासाः ६ तस्य फलम्।

उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघातम्।
दुःखप्रयोगवधबन्धभयानि चैव
भानोर्दृशा प्रकुरुते खलु राजपीड़ाम्॥१॥

सोमस्य मासाः १० फलम्।

गदसङ्कटसंत्रासं स्वेच्छाहानिं मनःक्षतिम्।
कुरुते रजनीनाथो भानोरन्तर्दशां गतः॥२॥

मङ्गलस्य मासाः ५ दिनम् १० फलम्।

सर्व्वेषां तिलको भूत्वा मणिरत्नप्रधानकम्।
प्राप्नोति धनधान्यानि रवेरन्तर्गते कुजे॥३॥

बुधस्य मासाः ११ दिनम् १० फलम्।

व्याधिः शत्रुभयं नित्यं सर्व्वगात्रे विचर्च्चिका।
नश्यन्ति सर्व्वकार्य्याणि भानोरन्तर्गते बुधे॥४॥

शनैर्मासाः ६ दिनम् २० फलम्।

सन्तापं वित्तनाशञ्च बन्धुनाशं पराभवम्।
सौरिः करोति वैकल्यं भानोरन्तर्दशां गतः॥५॥

दशा

गुरोर्वर्षः १ दिनम् २० फलम् ।
धर्मार्थकर्मसाख्यानि ददाति विबुधार्चितः ।
कृष्णादिगन्धिहस्ता च भानोः पाकदशाफलम् ॥१॥
राहोर्मायुः ८ फलम् ।
चक्षुर्भानुभवं द्वेषं चारभीतिसंततक्षयान् ।
कुरुते सिंहिकासूनू रविपाकदशां गतः ॥७॥
शुक्रस्य वर्षः १ मासौ २ फलम् ।
कौक्षीवाश्मिशिरोरोगज्वरान् शूलादिदारुणान् ।
शोकं करोति भगुजः सूर्यस्यान्तर्दशां गतः ॥८॥
एवं वर्षाः ८ ॥ * ॥ चन्द्रस्य स्थूलदशावर्षाः १५
तस्येष्टान्तर्दशार्क्षे २ मासः १ फलम् ।

कर्णादिमनिष्टरवाङ्गवमस्तपत्र-
क्षेत्रप्रतापबलवीर्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्रे दशा प्रचुरकाञ्चनभूमिदात्री ॥

कुजस्य वर्षः १ मासः १ दिनानि १० फलम् ।
पित्तप्रकोपितपीडाश्च चौरादीनां भयन्तथा ।
मङ्गलः कुरुते नित्यं विधोरन्तर्दशां गतः ॥
बुधस्य वर्षे २ मासाः ४ दिनानि १० फलम् ।
सर्वत्र द्रव्यलाभश्च गजाश्वौषधानि च ।
चन्द्रजः कुरुते सौख्यं विधोरन्तर्दशाङ्गतः ॥
गुरोर्वर्षः १ मासः ४ दिनानि २० फलम् ।
बन्धुक्लेशं नृपाद्भीतिं व्यसनं शोकसम्भवम् ।
विनाशं कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः २ मासाः ७ दिनानि २० फलम् ।
दानसौख्यानि सम्भोगं वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्यो विधोरन्तर्दशाङ्गतः ।
राहोर्वर्षः १ मासः ८ फलम् ॥
वह्निशत्रुभयं दुःखं शोकं बन्धुधनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशाङ्गतः ॥
शुक्रस्य वर्षौ २ मासाः ११ फलम् ।
सेव्यते वरनारीभिर्नरो लक्ष्मीश्च वर्धते ।
मुक्ताहारमणिप्राप्तिर्विधोरन्तर्गते सिते ॥
रवेर्मासाः १० फलम् ।
ऐश्वर्यं बन्धुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
नृपतेर्नो रविः कुर्याद्विधोः पाकदशाङ्गतः ॥
एवं वर्षाः १५ ॥*॥ कुजस्य स्थूलदशावर्षाः ८ ।
तस्यान्तर्दशामासाः ७ दिनानि ३।२०। फलम् ।

क्रूराभिधानवधबन्धभयानि धत्ते
चित्ताकुलं विकलभूषयदाश्रमञ्च ।
चौराग्निभीतिधनहानिकरेन्द्रपीडाः
कुर्याद्दिनाथतनयस्य निधनञ्च दशा कुजस्य ॥

बुधस्य वर्षा १ । ३ । ३ । २० । फलम् ।
परमैश्वर्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्रश्च क्षितिजान्तर्दशाङ्गतः ॥
शनेर्मासाः ८ । २६ । ४० । फलम् ।
रिपुचौराग्निभीतिश्च रोगमन्तरसम्भवम् ।
महाजनकलहो द्वेषः कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्षः १ । ४ । २३ । ४० । फलम् ।
पुष्पधूपान्नवस्त्राद्यैर्देवब्राह्मणपूजनम् ।
नृपतुल्यत्वमाप्नोति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासाः १० । २० । फलम् ।

दशा

आत्मकार्यार्थसुहृदं बन्धचौरादिसाध्वसम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशाङ्गतः ॥
शुक्रस्य वर्षः १ । ६ । २० । फलम् ।
धनर्द्धिं सुखादींश्च नानावस्त्रं वरस्त्रियः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५ । १० । फलम् ।
नानारत्नञ्च सौख्यञ्च भूमिलाभमथापि वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षः १ । १ । १० । फलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
लोकानन्दागमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८ ॥ * ॥ बुधस्य स्थूलदशावर्षाः १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । फलम् ।

दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासवरभोगसुखोदयश्च ।
नानाप्रकारविभवागमकोषवृद्धिं
क्षिप्रं भजेद्बुधदशा प्रबलाश्च सिद्धिम् ॥

शनेर्वर्षः १ । ५ । २६ । ४० । फलम् ।
वातश्लेष्मजता पीडा विरहो बन्धुभिः सह ।
विदेशगमनञ्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । फलम् ।
व्याधिशत्रुभयत्रस्तो धनाढ्यो नृपवल्लभः ।
लभेद्भार्यां सुपुत्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्षः १ । १० । २० । फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ॥
शुक्रस्य वर्षाः ३ । ३ । २० । फलम् ।
धनाढ्यं बन्धुपुत्रञ्च धर्मवस्त्रं धनागमम् ।
कुरुते दानवाचार्यो बुधपाकदशाङ्गतः ॥
रवेर्मासाः ११ दिनानि १० । फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
सोमस्य वर्षौ २ । ४ । १० । फलम् ।
कण्ठकादिप्रवेशश्च ऋक्षिभ्यो भयमेव च ।
निशाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
कुजस्य वर्षः १ । ३ । ३ । २० । फलम् ।
कफपित्तसमुद्भूता शिरःपीडा भयावहाम् ।
भाग्येशः कुरुते शोकं बुधस्यान्तर्दशाङ्गतः ॥
एवं वर्षाः १७ ॥*॥ शनेः स्थूलदशावर्षाः १० ।
अस्यान्तर्दशामासाः ११ । ३ । २० । फलम् ।

मिथ्यापवादवधबन्धनिराश्रयत्वं
चौरादिभूपतिशुजङ्गभभीतिसुग्राम् ।
व्याधानिराश्रमथ चाज्ञनकार्यहानिं
यच्छेदशा प्रकुरुते नियतं नराणाम् ॥

गुरोर्वर्षः १ । ६ । ३ । २० । फलम् ।
देवतागुरुतं प्राप्तं नानाप्राप्तिं करोति च ।
तुङ्गसौख्यसमायुक्तं शनेरन्तर्गतो गुरुः ॥
राहोर्वर्षः १ । १ । १० । फलम् ।
नृपाद्भयं ज्वरं घोरं दुःखञ्च प्राणसंशयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तमः ॥
शुक्रस्य वर्षः १ । ११ । १० । फलम् ।
सुहृद्बन्धुधनैः पूर्णो भार्यावित्तसमन्वितः ।

दशा

स्वर्गं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासाः ६ । २० । फलम् ।
परदाराभिगमनं करोति खरदीधितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गतः ॥
सोमस्य वर्षः १ । ४ । २० । फलम् ।
स्त्रीनाशं कुष्ठिरोगञ्च कफपित्तगदं शशी ।
बन्धुद्वेषञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
कुजस्य मासाः ८ । २६ । ४० । फलम् ।
देहक्लेशं महारोगं नानादुःखानि भूमजः ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २६ । ४० । फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सौम्यजः ।
करोति चादरं लोके शनेरन्तर्दशाङ्गतः ॥
एवं वर्षाः १० ॥*॥ गुरोः स्थूलदशावर्षाः १६ ।
तस्यैवान्तर्दशावर्षाः ३ । ४ । ३ । २० । फलम् ।

राज्यासादं तनयवित्तविलासभोगान्
पर्य्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । फलम् ।
बन्धुद्वेषं ऋषावादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः ३ । ८ । १० । फलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनःक्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गतः सितः ॥
रवेर्वर्षः १ । दिनानि २० । फलम् ।
बहुमित्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः प्राप्तिं गुरोरन्तर्दशाङ्गतः ॥
सोमस्य वर्षौ २ । ७ । २० । फलम् ।
भोगाढ्यो बहुभार्यः स्यादग्निपुरोगविषर्क्षितः ।
नृपतुल्यो भवेच्चैव गुरोरन्तर्दशाङ्गतः ॥
कुजस्य वर्षः १ । ४ । २६ । ४० । फलम् ।
तीक्ष्णरोषो रिपोर्हन्ता गजवह्नीभदर्शनः ।
सुखसौभाग्यसंयुक्तः कुजे चान्तर्गते गुरोः ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । फलम् ।
सुखी सुखः सुखी दुःखी शत्रुवृद्धिः पुनः पुनः ।
देवाराधनरतं नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षः १ । ६ । ३ । २० । फलम् ।
वेश्यासङ्गात्सुखं सौख्यं भवेद्वित्तविवर्जितः ।
सुप्रतीतिमना नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षाः १६ ॥ * ॥ राहोः स्थूलदशावर्षाः १२ । तस्यान्तर्दशावर्षः १ । ४ । फलम् ।

भार्यादिदूषण-निदानविवादवस्त्र-
शस्त्राभिघातभयदीनपराक्रमञ्च ।
अप्राप्तसौख्यधनकाञ्चनदीनदेहो
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासाः ४ । फलम् ।
शिरोरोगं कुदेहञ्च कुर्याद्भार्याञ्च चञ्चलाम् ।
बान्धवैः कलहो नित्यं राहोरन्तर्गते भृगौ ॥
रवेर्मासाः ८ । फलम् ।
शिरोरोगभयं घोरं ज्वरं शोकञ्च दारुणम् ।
हृद्रुजमिभयं कुर्याद्राहोरन्तर्गतो रविः ॥

सोमस्य वर्षं: १ । ८ । फलम् ।
स्त्रीपुत्रकलहश्चैव वित्तनाशं मनःक्षतिम् ।
करोति क्षीणमत्यर्थं राहोरन्तर्गतो विधुः ॥
कुजस्य मासाः १० । २० । फलम् ।
विषशस्त्राग्निचौरेभ्यो नियतं दारुणं भयम् ।
अन्तस्थान्तर्गतः कुर्याद्भ्रातॄणां भूमिनन्दनः ॥
बुधस्य वर्षं: १ । १० । २० । फलम् ।
ज्वरक्षुदग्निसंपीडा कलहं स्वजनैः सह ।
भृत्यापत्तेषु विद्वेषं कुर्यात् पाताल्तरे बुधः ॥
शनेर्वर्षं: १ । १ । १० । फलम् ।
स्त्रीपुत्रैः कलहो नित्यं बान्धवैः सह वैरिता ।
भवेत्तु बहुधा दुःखं राहोरन्तर्गते शनौ ॥
गुरोर्वर्षाः २ । १ । १० । फलम् ।
व्याधिदुःखभयैश्वर्यक्षतो देवद्विजार्चनपूजकः ।
कार्यसिद्धिर्भवेदिष्टा राहोरन्तर्गते गुरौ ॥
एवं वर्षाः १२ ॥*॥ शुक्रस्य स्थूलदशावर्षाः २१ ।
तस्यान्तर्दशावर्षाः ४ । १ । फलम् ।

मन्त्रप्रचारस्थिरप्रमाविलास-
सम्मानदानकृषिपूजनकर्मबलाभान् ।
हस्त्यश्वयानपरिपूर्णमनोरथश्च
प्रौढ़ी दशां स्वजति निश्चलराजलक्ष्मीम् ॥

रवेर्वर्षं: १ । फलम् ।
देहस्त्रीव्रणाक्रान्तस्त्रीव्रतापो ज्वरान्वितः ।
त्यक्तः स्वाद्बान्धवैः सर्वैर्भार्गवान्तर्गते रवौ ॥
सोमस्य वर्षौ २ । ११ । फलम् ।
सम्मानलाभो रोगश्च कार्यनाशश्च नित्यशः ।
शुक्रस्यान्तर्गते चन्द्रे स्त्रीलाभो नियतं भवेत् ॥
कुजस्य वर्षं: १ । ६ । २० । फलम् ।
उत्साही बलधान्याढ्यः कल्यश्च सुमनाः सुधीः ।
भूमिलाभो भवेच्चैव शुक्रस्यान्तर्गते कुजे ॥
बुधस्य वर्षाः ३ । ३ । २० । फलम् ।
सर्वत्र लभते सौख्यं मानसत्वयभूषणम् ।
भार्यां सुशीलतामेति भार्गवान्तर्गते बुधे ॥
शनेर्वर्षं: १ । ११ । १० । फलम् ।
शुचुत्वयमवाप्नोति मित्रदृद्धिश्च जायते ।
चौराद्धितस्य लाभः स्यात् शुक्रस्यान्तर्गते शनौ ॥
गुरोर्वर्षाः ३ । ८ । १० । फलम् ।
राजपूजा सुखं प्रीतिः कन्याजननमेव च ।
भार्गवान्तर्गते जीवे चौरान्नरुच लभ्यते ॥
राहोर्वर्षौ २ । ४ । फलम् ।
बन्धनं बन्धुपुत्राद्यैर्बन्धुनाशो रिपोर्भयम् ।
शरीरं देन्यमाप्नोति शुक्रस्यान्तर्गतस्तमः ॥
एवं वर्षाः २१ । इत्यन्तर्दशाकथनम् ॥ * ॥
अथ प्रत्यन्तर्दशा ।
यद्दशान्तरं दिनं कृत्वा लब्धिलब्धं ध्रुवं भवेत् ।
ध्रुवाब्धि गजयेद्भक्तान् रव्यादेः क्रमतो यथा ।

रवौ च वेदा वसवः सुधांशौ
कुजे च बाणाः शशिजे तथाङ्काः ।
गुरावृतुर्दिक् च दृहस्पतौ स्या-
द्राह्वौ तुरङ्गा भृगुजे च रुद्राः ॥

यद्दशस्यान्तर्दशामासान् दिनीकृत्य गुणाहतान् ।
सप्तभक्तं विजानीयात् प्रत्यन्तर्दशवासरान् ॥

इति प्रत्यन्तर्दशा ।" इति ज्योतिस्तत्त्वम् । * ॥
युगभेदे दशाविशेषा यथा,—
"सत्ये लक्ष्मदशा चैव त्रेतायां हरगौरिका ।
द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा ।"
इति समयान्ततम् । * ॥
दशधा दशा यथा,—
योगिनी १ वार्षिकी २ नाक्षत्रिकी ३ लाग्निकी ४ सुकन्दा ५ विंशोत्तरा ६ चिंशोत्तरा ७ पताकी ८ हरगौरी ९ दिनदशा १० । इति जातरत्नम् ॥
दशाकर्षः, पुं. (दशया वर्षेण आकर्षति तेजादिकमिति । आ+कृष्+घञ् ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥
दशाकर्षी, [न्] पुं, (दशया आकर्षतीति । दशा+कृष्+णिनिः ।) प्रदीपः । इति हारावली ।२४॥
दशाङ्गुलं, क्ली, (दश अङ्गुलय इव शिराचिह्नानि फलतलयुपरि सन्त्यस्येति । अच् ।) खर्जूरम् । इति भावप्रकाशः ॥ (दश अङ्गुलयः परिमाणमस्येति तद्धितार्थद्विगोः ठञ् तस्य लुक् समासान्तः अच्प्रत्ययः । दशाङ्गुलपरिमिते, त्रि । यथा, मनुः । ८ । २७१ ।
"नामजातिग्रहं स्त्रीणामभिद्रोहेण कुर्वतः ।
निःक्षेपोऽयमयःशङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥"
यथा च ऋग्वेदे । १० । ९० । १ ।
"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥"
"विश्वतः सर्वतो वृत्वा परिवेष्य दशाङ्गुलं दशाङ्गुलपरिमितं देशमत्यतिष्ठत् ।" इति तद्भाष्ये सायणः ॥")
दशानन:, पुं, (दश आननानि वदनानि यस्य ।) रावणः । इति शब्दरत्नावली । (दश आननानि इति विग्रहे दशवदनेऽपि, स्त्री । यथा,
"युद्धात् क्षते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि याति यातु ।
लूनानि नूनं जगकालजार्थे
दशाननेनापि दशाननानि ॥"
रत्नकोषः ।)
दशानिकः, पुं, (अश्यते इति भावे घञ् आशो जीवनम् । तस्मिन् हितः आशिकः । दशाया अवस्थाविशेषे आशिकः ।) दन्तोष्ठः । इति शब्दचन्द्रिका ॥
दशारोहा, स्त्री, (दशसु दिक्षु आरोहति अङ्गैर्व्याप्नोतीति । आ+रुह+कः ।) केवर्तिका । इति राजनिर्घण्टः ॥
दशार्णः, पुं, (दश ऋणानि दुर्गभूमयो जलाधारा वा यत्र । "एत्वेधत्यूट्सु ।" ८ । ३ । ६५ । इत्यस्य "प्रवृत्तसरकमलवसनार्णदशार्णगन्धे ।" इति वार्त्तिकोक्त्या दृद्धिः ।) देशविशेषः । स विन्ध्यपर्वतस्य पूर्व्वदक्षिणस्यां दिशि वर्त्तते । (यथा, बृहत्संहितायाम् । १४ । १० ।
"किष्किन्धकाष्टकस्थलनिषादराङ्गलि पुरिक-
दशार्णाः ।"

तदस्याभिजनः तस्य राजा वा अण् । तद्देशवासिनि तन्नृपतौ च त्रि । यथा महाभारते । १ । ११३ । २५ ।
"पूर्वभागास्कृतो गत्वा दशार्णान् समरे जितान् ।
पाण्डुना नारसिंहेन कौरवाग्र्येण धीमता ॥"
दश अर्णानि वर्णानि यस्य । दशाक्षरमन्त्रविशेषः । यथा, गौतमीयतन्त्रे । २ अध्याये ।
"दशार्णानामपि तत्त्वानां सारं वेत्ता तथाक्षरम् ।
दशाक्षर इति ख्यातो मन्त्रः परात्परः ॥
लुप्तबीजस्वभावत्वात् दशार्ण इति कथ्यते ॥")
नदीविशेषे, स्त्री । इति मेदिन्यर्थकल्पतरुः ॥
दशार्हः, पुं, (दश्यते दानादिबलेषु अर्हः ।) वृद्धः । यदुदेशः । (क्रोष्टुवंशीयराजपुत्रविशेषः । यथा, हरिवंशे । ३८ । २५ ।
"भृतस्य जज्ञिरे शूरा लय: परमधार्मिकाः ।
आवन्त्यश्च दशार्हश्च बली विष्टरश्च यः ॥")
तद्देशवासिनि, पुं भूमि । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । १६ । २० ।
"तमर्चितं धन्विदशार्हपूगै-
राजीविवाग्भिश्चलनप्रकाशम् ॥")
दशावतारः, पुं, (दश अवतारा यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ तस्य दशावतारा यथा,—
मत्स्यः १ कूर्मः २ वराहः ३ नृसिंहः ४ वामनः ५ जामदग्न्यः ६ रामः ७ कृष्णः ८ बुद्धः ९ कल्किः १० ।
इति वराहपुराणम् ॥ अपि च ।
"धर्म्मनारायणस्यांशः संभूतश्चाक्षुषेऽन्तरे ।
यज्ञश्च वर्त्तयामास देवैर्वा वैवस्वतेऽन्तरे ॥
प्रादुर्भावे ततस्तस्य ब्रह्मा श्रीतः पुरोहितः ।
युगाख्यायाच्च संख्यान्ते आपन्नेषु सुरेषु वै ॥
संभूतः स बलस्यान्ते हिरण्यकशिपोर्वधे ।
द्वितीये नरसिंहाख्ये बली श्रुत्वीत पुरोहितः ॥
बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति ।
तृतीये वामनस्यार्थे धर्म्मेण तु पुरोधसा ॥
एतास्तिस्रः सृतास्तस्य दिवाः संभूतयो द्विजाः ।
मानुष्याः सप्त वैवस्वे तु ग्रामण्यास्तान्निबोधत ॥
त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह ।
नष्टे धर्म्मे चतुर्थांशे मार्कण्डेयपुरःसरः ॥
पञ्चमः पञ्चदश्यान्तु त्रेतायां समभूत ह ।
मान्धाता चक्रवर्त्ती तु सत्यौतथ्यः पुरःसरः ॥
एकोनविंश्यां त्रेतायां सर्व्वक्षत्रान्तकृद्विभुः ।
जामदग्न्यस्तथा बह्वो विश्वामित्रपुरःसरः ॥
चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा ।
सप्तमो राक्षसध्वंसार्थं सङ्क्षये समुपस्थिते ॥
अष्टमे द्वापरे विष्णुरहं विंशे पराशरात् ।
वेदव्यासस्तदा जज्ञे सर्वज्ञानप्रदर्शकः ॥
कर्त्तुं धर्म्मव्यवस्थानं सुराणां प्रभवाप्ययम् ।
बुद्धो नवमके जज्ञे कलेः प्रथमसन्धिके ॥
देवक्यां वसुदेवेन कल्किर्यास्यपुरःसरः ।
सन्धिस्त्रेव युगे चौर्ण सन्ध्याग्निष्टे भविष्यति ॥
कल्की विष्णुयशा नाम पाराशर्य्यपुरःसरः ।
दशमो भाव संभूतो याज्ञवल्क्यपुरःसरः ॥"
इति मत्स्यपुराणम् ॥

दशाश्वः, पुं, (दश्व अश्वा रथे यस्य।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, यज्ञयागतत्त्वे सोमध्याने।
"दशाश्वं श्वेतपद्मस्थं विचिन्योमाधिदैवतम्।
जलप्रत्यधिदैवञ्च सूर्य्याश्वमाहरेत्तथा॥"
दक्षाकोर्दशमपुत्रः। यथा, महाभारते। १३। २। ६।
"दशमस्तस्य पुत्रोऽभूद् दशाश्वो नाम भारत!॥")
दशास्यः, पुं, (दश आस्यानि वदनानि यस्य।) रावणः। इति भूरिप्रयोगः॥ (यथा, रसिकरञ्जने। ५।
"अकलियुगमखर्व्वमत्र हृद्यं
अचरदपापघनो यतः कुटुम्बी।
मम रुचिरिह लक्ष्मबाणयेन
प्रभवति भूम्नि दशास्यमर्द्दनेन॥")
दशास्यजित्, पुं, (दशास्यं जयतीति। दशास्य+जि+क्विप्। तुगागमश्च।) श्रीरामः। इति भूरिप्रयोगः॥
दशेक्षणः, पुं, (दशा वर्त्तिका इक्षणं काष्ठमिव यस्य।) प्रदीपः। इति त्रिकाण्डशेषः॥
दशेरः, पुं, (दशतीति। दनश+"पतिकठिकुठिगडिगुडिदंशिभ्य एरक्।" उणा। १। ५६। इति एरक्।) हिंसः। इत्युणादिकोषः॥
दशेरकः, पुं, (दशति दुःखं ददातीति। दनश+एरक्। ततः कन्।) मरुदेशः। तद्देशजे, पुं भूम्नि। इति हेमचन्द्रः॥ (यथा, महाभारते। ७। ६। १६। [कान्॥")
"आवन्त्यान् दाक्षिणात्यांश्च पार्व्वतीयान् दशेरदशेरकः, पुं, (दशति दुःखानि ददातीति। दश+बाहुलकात् एरक् ततः स्वार्थे कन्।) मरुदेशः। इति भूरिप्रयोगः॥
दस, इ क भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) इ क, दंसयति दंसति। भाषि दौप्तौ। इति दुर्गादासः॥
दस, इ ड क दंशौ। दंशे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) इदमितेरौणादिकक्विप्प्रत्यये रूपम्। इ ड क, दंसयते स्वं शिशुः पश्यति दशति वेत्यर्थः। भट्टमल्लमते दंश दह सन्नाहः। इति दुर्गादासः॥
दस, य उ ऋ उत्क्षेपे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्त्वात् क्त्वेट्।) य, दस्यति धूलिं वायुः। उ, दसित्वा दस्त्वा। ऋ, अदसत् अदासीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥
दस्रः, पुं, (दस्यति उत्क्षिपति दस्यादिकमिति। दस+"इषियुधीन्दिसिशंसेति।" उणा। १। १४४। इति मक्।) यजमानः। चौरः। कृताघ्नः। इति मेदिनी। से, १५॥ खलः। इति शब्दरत्नावली॥ (त्रि, उपक्षेपकः। यथा, ऋग्वेदे। १। १४८। ४।
"पुरूणि दस्रो नि रिणाति जम्भैराद्रोचते दक्षा विभाता॥"
"दस्र उपक्षयतिनायमिः।" इति तद्भाष्ये सायनः॥ दर्शनीयः। यथा, ऋग्वेदे। १। ७७। ३।
"तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्रमारीः॥"
"दस्रं दर्शनीयं तमग्निमारीर्गच्छन्त्यः।" इति तद्भाष्ये सायनः॥)
दस्युः, पुं, (दस्यति परस्वान् नाशयतीति। दस+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा। ३। २०। इति युच्। बाहुलकादनादेशाभावः।) चौरः। (यथा, मनुः। ७। १४३।
"विक्रोशन्त्यो यस्य राष्ट्राद्विलुप्यन्ते दस्युभिः प्रजाः।
संपश्यतः सभृत्यस्य क्षतः स न तु जीवति॥")
रिपुः। (यथा, ऋग्वेदे। २। १२। १०।
"यः शर्द्धते नानुददाति शर्द्धते यो दस्योर्हन्ता स जनास इन्द्रः॥"
"दस्योरुपक्षपयितुः शत्रोर्हन्ता घातकः॥" इति तद्भाष्ये सायनः॥) महासाहसिकः। इति शब्दरत्नावली॥ असुरः। यथा, तत्रैव। ८। ४७। २।
"शतानीदस्य कर्णा चेतते दस्युतर्ह्वया॥"
"दस्युतर्ह्वया दस्यूनामसुराणां तर्ह्वया॥" इति तद्भाष्ये सायनः॥ कर्म्मवर्ज्जिते, त्रि। यथा, ऋग्वेदे। ६। २४। ८।
"न वीळवे नमते न स्थिराय न शर्द्धते दस्युजूताय स्तवान्॥"
"शर्द्धते उत्सहमानाय दस्युजूताय कर्म्मवर्ज्जिते; प्रेरिताय।" इति तद्भाष्ये सायनः॥)
दस्रं, क्लीं, (दंसयते क्षयादीन् दशतीति। दसि दंशे+"स्फायितञ्चिवञ्चिप्रकीति।" उणा। २। १३। इति रक्।) शिशिरम्। इति संक्षिप्तसारे उणादिवृत्तिः॥
दस्रः, पुं, (दस्यति उत्क्षिपति पांशूनिति। दस उत्क्षेपे+"स्फायितञ्चीति।" उणा। २। १३। इति रक्।) खरः। (दस्यति रोगान् क्षिपतीति।) अश्विनीसुतः। इति मेदिनी। रे, ४०॥ (यथा, हरिवंशे। ६। ५३।
"नासत्यश्चैव दस्रश्च सूतौ द्वावश्विनीसुतौ।"
दर्शनीये, त्रि। यथा, ऋग्वेदे। ६। ६६। ७।
"इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम्॥"
"दस्रा दर्शनीयाविन्द्राविष्णू॥" इति तद्भाष्ये सायनः॥)
दस्रौ, पुं, (दस्यतः क्षिपतो रोगानिति। दस+"स्फायितञ्चीति।" उणा। २। १३। इति रक्।) अश्विनौ। इत्यमरः। १। १। ५४॥ द्विवचनान्तोऽयं शब्दः॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दक्षादधीत्य दस्रौ वितनुतः संहितां स्वयाम्।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम्॥
"देवासुरस्थे देवा दैत्यैर्यै सङ्गताः क्षताः।
अधावन्तो क्षताः सद्यो दस्राभ्यामक्षतं महत्॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः।
सोमाग्निप्रतिमचन्द्रस्ताभ्यामेव सुखीकृतः॥")
दस्रदेवता, स्त्री, (दस्रौ अश्विनौ अधिष्ठातृदेवते यस्याः।) अश्विनीनक्षत्रम्। इति हेमचन्द्रः। २। २२॥
दस्रसू, स्त्री, (दस्रौ अश्विनौ सूते इति। सू प्रसवे+क्विप्।) संज्ञा। सा सूर्य्यपत्नी अश्विनीकुमारमाता च। इति त्रिकाण्डशेषः॥
दह, औ दाहे। इति कविकल्पद्रुमः॥ (भां-परं-सकं-अनिट्।) औ, अधाक्षीत्। दाहो भस्मीकरणम्। दहत्यग्निः काष्ठम्। इति दुर्गादासः॥
दह, इ क दीप्तौ। दाहे। इति कविकल्पद्रुमः॥ (चुरां-परं-दीप्तौ अकं-दाहे सकं-सेट्।) इ क, दंहयति। इति दुर्गादासः॥
दहनं, क्लीं, (दहौ दाहे+भावे ल्युट्।) दाहः। भस्मीकरणम्। पोड़ान इति भाषा॥ (यथा, रघुः। ८। २०।
"इतरो दहने स्वकर्म्मणां
वहते ज्ञानमयेन वह्निना॥")
दहनः, पुं, (दहतीति। दह दाहे+ल्युः।) अग्निः। (यथा, आर्य्यासप्तशत्याम्। ३०४।
"धूमैरश्रु निपातय दह शिखया दहन! मलिनयाङ्गारैः।
जागरयिष्यति दुर्गतयहिवौ त्वां तदपि शिशिरनिशि॥"
तृतीयसंख्या। यथा, सूर्य्यसिद्धान्ते। १२। ८५।
"खत्रयाग्निदहनाः कला तु हिमदीधितेः॥"
कृत्तिकानक्षत्रस्य अधिष्ठातृदेवत्वात् कृत्तिकानक्षत्रम्। यथा, ज्योतिस्तत्त्वे।
"दहनविधिश्चतास्वा मैत्रभं सौम्यवारे॥")
चित्रकः। भल्लातकः। इङ्गुदीवृक्षे, त्रि। इति मेदिनी। ने, ७५॥ (दह्यते कामाग्निना इति। दह+ल्युट्।) कपोतः। इति राजनिर्घण्टः॥ (रुद्रविशेषः। यथा, महाभारते। १। ६६। ३।
"दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः॥"
स्कन्दस्यानुचरविशेषः। यथा तत्रैव। ६। ४५। ३३।
"दहतिं दहनश्चैव प्रपतौ वीर्य्यसम्मतौ।
अंशोऽप्यपाचरन् पञ्च ददौ स्कन्दाय धीमते॥"
दाहकमात्रे, त्रि। यथा, भागवते। ८। ७। २१।
"त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाग्निवात्॥")
दहनकेतनं, क्लीं, (दहनस्य केतनं भवनं इव।) धूमः। इति हेमचन्द्रः। ४। १७॥
दहनप्रिया, स्त्री, (दहनस्यार्य्यः प्रिया।) स्वाहा। इति त्रिकाण्डशेषः॥
दहनागुरु, क्लीं, (दहनाय अगुरु।) दाहागुरु। इति राजनिर्घण्टः॥
दहनारातिः पुं, (दहनस्यार्य्यः अरातिः शत्रुः।) जलम्। इति राजनिर्घण्टः॥
दहनीयः, त्रि, (दह्यते इति। दह+कर्म्मणि अनीयर्।) दाह्यः। दहनार्हः॥
दहनोपलः, पुं, (दहनाय वह्न्युत्पादनाय उपलः प्रस्तरखण्डः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः। ४। १३३॥ दहनोपलोऽपि पाठः॥

दहरं, क्ली, (दह+बाहुलकात् अरः।) सूक्ष्मम्। यथा, श्रीभागवते। १०। ८७। १८।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः।
परिसरपद्धतिं हृदयमारुण्यो दहरम्॥"
"आरुण्यस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते।" इति तट्टीकायां श्रीधरस्वामी॥

दहरः, पुं, (दहति ग्रहदयनाग्निनेन सन्तापयतीति। दह+अरः।) भ्रमिका। सूक्ष्मम्। भ्राता। बालकः। इति विश्वमेदिनौ॥

दहः, पुं, (दहतीति। दह+"स्फायितञ्चीति।" उणां २। १३। इति रक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ दावानलः। इत्यमरादिकोषः॥ नरकम्। वनम्। इति संक्षिप्तसारे उणादिवृत्तिः॥ हृदयाकाशम्। यथा, श्रीभागवते। ३। १२। ३३।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं चातुरयविद्यास्तु प्रणवो ह्यस्य दहृतः॥"
"दहृतः हृदयाकाशात्।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ जठरम्। यथा, तत्रैव। ४। १। ३६।
"पुनर्ग्रयोऽजनयत् पत्न्यामग्नेश्च हविर्भुवि।
सोऽन्यजन्मनि दहाग्निर्विश्रवाश्च महातपाः॥"
"दहाग्निः जठराग्निः।" इति श्रीधरस्वामी॥

दा, दाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) दा तु दाने दान दाने प्रसिद्धोऽयम्। अस्यैव यच्छादेशः। यच्छति। इति दुर्गादासः॥

दा, दुं ञ लि दाने। इति कविकल्पद्रुमः॥ (ह्वां-उभं-सकं-अनिट्।) दु, दत्त्विमम्। ञ लि, ददाति दत्ते। इति दुर्गादासः॥

दा, ल लूनौ। इति कविकल्पद्रुमः॥ (क्र्यादां-परं-सकं-अनिट्।) ल, दाति। लूनिरुक्तेदः। केचित्तु दाप लवने इति पठित्वा पित्त्वाद्दासंज्ञाभावे यगादौ दायते इत्यादि मन्यन्ते। स्वमते तु पित्त्वाभावाद्दासंज्ञायां दीयते इत्येव। इति दुर्गादासः॥

दा, स्त्री, (दा+क्विप्।) शोधनम्। दानम्। छेदः। उपतापः। रक्षा। इति मेदिनी। दे, १॥

दाकः, पुं, (ददाति दक्षिणामिति। दा+"ल्यदाघाद्वार्त्विकलिभ्यः कः।" उणां ३। ४०। इति कः।) यजमानः। इत्यमरादिकोषः॥ दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दाक्षकं, क्ली, (दक्ष+वुञ्।) दक्षाणां समूहः। इत्यमरटीकायां रायमुकुटः॥ (दाक्षीणां विषयोदेशः। दाक्षि+"राजन्यादिभ्यो वुञ्।" ४। २। ५३। इति वुञ्। दाक्षेर्विषये। इति व्याकरणम्॥)

दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री। दक्ष+ञिण्। गौरादित्वात् ङीष्।) अश्विन्यादयो रेवत्यन्ताः सप्तविंशतितारकाः। इत्यमरः। १। ३। २१॥ दुर्गा। इति मेदिनी। णे, ६६॥ रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (दक्षकन्यामात्रम्। यथा, मार्कण्डेये। ५०। २१।
"वृद्धिर्लक्ष्मीः वपुः शान्तिः सिद्धिः कीर्तिक्षयो-दशी।
पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः॥"
अदितिः। यथा, महाभारते। १। ७५। ६।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा।
मारीचः कश्यपस्तस्यामादित्यान् समजीजनत्॥"
कद्रूः। विनता। यथा, तत्रैव। १। २२। ५।
"जग्मतुः परया प्रीत्या परं पारं महोदधेः।
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा॥")
"दक्षश्च तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः।
तत्र दाक्षायणीपुत्राः सर्व्वे देवाः सवासवाः॥
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा।
सापि दृष्ट्वा सुरूपौ गौरी दक्षाय ब्रह्मणा॥
दुहितॄंस्ते पुरा याहि रुद्रेणोढ़ा महात्मना।
सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम!॥"
इति वराहपुराणम्॥
इन्द्रीवृक्षः। इति रत्नमाला॥ *॥

दाक्षायणीपतिः, पुं, (दाक्षायणीनां अश्विन्यादिनक्षत्राणां पतिः।) चन्द्रः। इति त्रिकाण्डशेषः॥

दाक्षायणीरमणः, पुं, (रमयतीति। रम+ल्युः। दाक्षायणीनां रमणः।) चन्द्रः। इति हलायुधः॥

दाक्षायण्यः, पुं, (दक्षाय एव। स्वार्थे अण्।) गृध्रः। इत्यमरः। २। ५। २१॥

दाक्षिकन्या, स्त्री, (दाक्षीणां कन्या। "संज्ञायां कन्योशीनरेषु।" २। ४। २०। इति उशीनरत्वाभावात् न ङीषन्ता।) वार्ष्णीकेषु ग्रामसंज्ञा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

दाक्षिणात्यः, त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः। दक्षिणा+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ६८। इति त्यक्।) दक्षिणदेशोद्भवः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ३। २२६। ३।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्य-वासिनः॥")
नारिकेलः। इति राजनिर्घण्टः॥

दाक्षिण्यं, क्ली, (दक्षिणस्य भावः। दक्षिण+ष्यञ्।) अनुकूलता। इति हेमचन्द्रः। ६। १२॥ (सरलता। यथा, आर्य्यासप्तशत्याम्। ६०१।
"सौभाग्यं दाक्षिण्यान्नेत्युदितं हरेण तरुणी-नाम्।
वामार्द्धमेव देयाः खलु पुंभिश्चेष्टे निवेशयता॥"
परेच्छानुवर्त्तनम्। यथा, रघुः। १। ३१।
"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥")
भावविशेषः। तत्तु दक्षिणाचाररूपम्। यथा,
"राजानु वामदाक्षिण्यभावाभ्यामपि पूजयेत्।
ब्रह्मज्ञानभैरवीं देवीमन्यतारां तथैव च॥"
अपि च।
"ऋषीन् देवान् पितॄंश्चैव मनुष्यान् भूतसङ्घयान्।
यो यजत् पञ्चभिर्यज्ञैर्ब्रह्मणि परिशोधयन्॥
विधियत् स्नानदानाद्यां कुर्व्वन् यद्विधिपूजनम्।
क्रियते मरहस्यन्तु तद्दाक्षिण्यमिहोच्यते॥
सर्व्वत्र पितृदेवादौ यस्माद्भवति दक्षिणः।
देवी च दक्षिणा यस्मात्तस्माद्दाक्षिण्यमुच्यते॥"
इति कालिकापुराणे ७७ अध्यायः॥
दाक्षिणात्यार्हे, त्रि। इत्यमरः। ३। १। ५॥ (दक्षिणे भवम्। दक्षिण+ष्यञ्। दाक्षिणभवे। दक्षिणदिक्सम्बन्धिनि च। यथा, आर्य्यासप्तशत्याम्। २८२।
"दाक्षिण्यात् स्निह्यमानं दधतं सा भानुमेन-मवमंस्था:।")

दाक्षीपुत्रः, पुं, (दाक्ष्याः पुत्रः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥ (यथा, नैषधे। १८। ६१।
"दाक्षीपुत्रस्य तर्क्ष्ये ध्रुवमयमभवत् कोऽप्यधीती कपोतः॥")

दाक्षेयः, पुं, (दाक्ष्या अपत्यं पुमान्। दाक्षी+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) पाणिनिमुनिः। इति हेमचन्द्रः। ३। ५१५॥

दाक्ष्यं, क्ली, (दक्षस्य भावः कर्म्म वा। दक्ष+ष्यञ्।) दक्षता। निपुणता। दक्षशब्दात् भावे ष्यञ्प्रत्ययः॥ (यथा, महाभारते। २। ३८। २०।
"दानं दाक्ष्यं श्रुतं शौर्य्यं ह्रीः कीर्त्तिर्बुद्धिरुत्तमा।
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते॥")

दाड़कः, पुं, (दालयति सुखाभ्यन्तरस्थद्रव्यं विचूर्णीकरोतीति। दल+णिच्+ण्वुल्। लस्य ड़ः।) दन्तः। इति शब्दार्थकल्पतरुः॥

दाड़िम, त्रि, (दलनमिति दाल्। तेन निर्वृत्तः। भावप्रत्ययान्तादिमप्। लयोरैक्यम्।) रक्तः। इति मेदिनी मे, ४४॥ फलवृक्षविशेषः। (यथा, देवीभागवते। १। १२। ८।
"दाड़िमैर्नारिकेलैश्च माधवीमक्षपाटलम्॥")
तत्पर्य्यायः। करकः २। इत्यमरः। २। ४। ६५॥ पिच्छपुष्पः ३ दाड़िमः ४ पर्व्वरुक् ५ खाड़ुवः ६ पिक्कीरः ७ फलशाखः ८ शुकवल्लभः ९। इति त्रिकाण्डशेषः॥ रक्तपुष्पः १०। इति रत्नमाला॥ दाड़िमीसारः ११ कुट्टिमः १२ फलसाखः १३ गुर्ह्यन्थमश्चोऽपि। रक्तबीजः १४ सुफलः १५ दन्तबीजकः १६ मधुबीजः १७ कुचफलः १८ रोचनः १९ मणिबीजः २० कक्कफलः २१ वृत्तफलः २२ सुनीलः २३ नीलपत्रः २४। अस्य गुणाः। मधुराम्लत्वम्। कषायत्वम्। कासवातकफश्रमपित्तविनाशित्वम्। ग्राहित्वम्। दीपनत्वम्। लघुत्वम्। उष्णत्वम्। शीतलत्वम्। रुचिदाहत्वञ्च। इति राजनिर्घण्टः॥ हृद्यत्वम्। अम्लत्वम्। श्वासारुचिप्लवानाशित्वम्। कण्ठशोधनत्वम्। कफपित्तादिरोधित्वञ्च॥*॥
"द्विविधं तत्तु विज्ञेयं मधुराम्लमेव च।
मधुरं तत्तु त्रिदोषघ्नमम्लं वातकफापहम्॥"
इति राजवल्लभः॥
तापहारि मधुरं लघु पथ्यम्। इति राजनिर्घण्टः॥
"तत्फलं त्रिविधं खाड्डु खाड्डुं देवताम्बकम्।

तत्तु खादु त्रिदोषघ्नं लघ्वग्निदीपनं परम् ॥
कृतकक्षसुखरोगघ्नं तर्पणं शुक्रलं लघु ।
कषायानुरसं ग्राहि स्निग्धं मेदोबलावहम् ॥
स्वादुस्निग्धं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।
अम्लन्तु पित्तजनकमम्लं वातकफापहम् ॥"
इति भावप्रकाशः ॥

दाड़िमपुष्पकः, पुं, (दाड़िमस्य पुष्पमिव पुष्पं यस्य । कन् ।) रोहितकवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ रोहड़ा इति ख्यातः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"रोही रोहितकः श्रीहपुनर्दाड़िमपुष्पकः ॥")

दाड़िमप्रियः, पुं, (दाड़िमफलं प्रियं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

दाड़िमभक्षकः, पुं, (भक्षयतीति । भक्षि+ण्वुल् । भक्षको भक्षकः । दाड़िमस्य भक्षकः ।) कीरपक्षी । इति शब्दचन्द्रिका ॥ (दाड़िम-भक्षके, त्रि ॥)

दाड़िमीसारः, पुं, (दाड़िमीं दाड़िमीशब्दं सरति प्राप्नोतीति । दाड़िमी+सृ+अण् ।) दाड़िमः । इति राजनिर्घण्टः ॥

दाड़िम्बः, पुं, दाड़िमः । इति त्रिकाण्डशेषः ॥ (दाड़िमशब्दोऽस्य विशेषो ज्ञातव्यः ॥)

दाढ़ा, स्त्री, (देप् शोधने, दा दाने वा+किप् । दे शुद्धये दानाय वा ढौकते इति । ढौक+डः ।) दन्तविशेषः । तत्पर्य्यायः । दंष्ट्रा २ जम्भः ३ । इति हेमचन्द्रः ।३।२४७ ॥ प्रार्थना । समूहः । इति शब्दार्थकल्पतरुः ॥

दाढ़िका, स्त्री, (दाढ़ाये केशसमूहाय प्रभवतीति । ठक् ततष्टाप् ।) सुखावयवविशेषः । दाड़ि इति भाषा । (यथा, मनुः । ८ । २८३ ।
"पादयोर्दाढ़िकायाञ्च गोवायां वृषणेषु च ॥"
"दाढ़िकायां श्मश्रुणि ॥" इति तट्टीकायां कुल्लूकभट्टः ॥ दाढ़ा+स्वार्थे कप् कापि अत इत्वञ्च ।) दंष्ट्रिका । इति हेमचन्द्रः ।३।२४७ ॥

दाक्षाजिनिकः, त्रि, (दक्षाजिनेन ग्राह्येण दम्भेन वा अर्थानन्विच्छतीति । दक्षाजिन+"अयः-शूलदक्षाजिनाभ्यां ठक्ठञौ ।" ५।२।७६ । इति ठञ् ।) कुहकः । इति हेमचन्द्रः । ३ । ४१ ॥

दात, त्रि, (दायते स्म इति । दा लवने+क्तः) छिन्नम् । इत्यमरः । ३।१।१०३ ॥ (देप् शोधने कर्म्मणि क्तः । शुद्धम् ॥)

दाता, [तृ] त्रि, (ददातीति । दा दाने+"ख्युल्तृचौ ।" ३।१।१३३ । इति तृच् ।) दान-कर्त्ता । तत्पर्य्यायः । दारुः २ सुचिरः ३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे ।७।२०।२।
"कर्त्ता सुदासे अह वा उ लोकं
दासा वसु सुष्वुरादाशुषे भूत् ॥")

दात्यूहः, पुं क्ली, (दाप् लवने+क्त्यून् । दा रत्नं ऊहते इति । दाति+ऊह+अण् । यद्वा, दो अवखण्डने क्त्यून् । दित्यं वहतीति । वह+क+ऊट् । दित्यूहः । ततः स्वार्थे अण् । ततः "देविकाग्निंग्रपात्यित्यवाहदीर्घसत्रश्रेयसामात्॥"

७।३।१। इति आत्वम् ।) पक्षिविशेषः । डाउक इति भाषा । तत्पर्य्यायः । कालकण्ठकः २ । इत्यमरः ।२।५।२१॥ अत्यूहः ३ दात्यौहः ४ कालकण्ठः ५ मासङ्गः ६ अग्नितिकण्ठः ७ कचाटुरः ८ । इति शब्दरत्नावली ॥ काकमद्गुः ९ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १२ ।
"सारसं रज्जुबालञ्च दात्यूहं शुकसारिके ॥"
(अस्य गुणा यथा,—
"दात्यूहो मरुतञ्च नाशनकरो वृष्योऽतिशुक्रप्रदः
श्रेष्ठः सर्व्वगुणः श्रमोपशमनः तुष्टिप्रदो वातहा ॥"
इति हारीते प्रथमेस्थाने एकादशेऽध्याये ॥)
"प्रावृट्काले सुखी भूत्वा को वा कुत्र न गच्छति ।
इति वदति दात्यूहः को वा को वा क वा क वा ॥"
इत्युद्भटः ॥)
जलकाकः । इति राजनिर्घण्टः ॥ पातकः । इति मेदिनी । हे, १७ ॥ मेघः । इति शब्दरत्नावली ॥

दात्यौहः, पुं, स्त्री, (दित्यौह+स्वार्थे अण् । देविकाग्निंग्रपेत्यादिना आत्वम् ।) दात्यूहः । इति शब्दरत्नावली ॥

दात्रं, क्ली, (द्यति दाति वानेनेति । दो अवखण्डने दा लवने वा+"दात्रीशूर्पेति ।" ३ । २ । १८२ । इति ष्ट्रन् । यादिभ्यश्छन्दसीति व्यन् वा ।) अस्त्रविशेषः । इति भरतः ॥ दा इति काश्यां इति च भाषा । तत्पर्य्यायः । लवित्रम् २ । इत्यमरः । २।८।१३॥ खड्गीकम् ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५।१५४।७ ।
"सम्पूर्णपिटकाः सर्व्वे सदात्राङ्कुशतोमराः ॥"
भावे व्यन् । दानम् । यथा, ऋग्वेदे ।१।११६।६।
"तद् वां दात्रं महिकीर्त्तेन्यम् ।"
"तद्दात्रं दानम् महि महदतिगम्भीरम् ।" इति तद्भाष्ये सायनः ॥ दानकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । १० । ६ ।
"सोमस्य दात्रमसि ॥")

दात्री, स्त्री, (ददातीति । दा+ष्ट्रन्+ङीप् ।) दानकर्त्री । इति व्याकरणम् ॥ (गङ्गा । यथा, काशीखण्डे ।२६।८६। तस्याः सहस्रनामकीर्त्तने ।
"दीनसन्तापशमनी दात्री दयुवैरिणी ॥")

दात्रः, पुं, (ददातीति । दा+"जनिदाच्युमिति ।" उणां १ । १०४ । इति त्रन् ।) दाता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (स्त्री, यज्ञ कर्म्म । इत्युज्ज्वलदत्तः ॥)

दाधिकं, त्रि, (दधि दध्ना वा संस्कृतं दध्ना चरति दधि+"चरति ।" ४ । ४ । ८ । इति ठक् । (दध्ना उपसिक्तम् । "व्यञ्जनैरुपसिक्ते ।" ४ । ४ । २६ । इति ठक् वा ।) दधिसंस्कृतवस्तु । इति हेमचन्द्रः । ३ । ७४ ॥ (औषधविशेषे, क्ली । यथा, सुश्रुते उत्तरतन्त्रे । ४२ ।
"बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥")

दान, न आर्जवे । छिदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं सेट् ।) ऋजुरवक्रस्य भाव आर्জ্জবं ऋजुकरणम् । न, दीदांसति दीदांसते काष्ठं वर्द्धकिः ऋजु करोतीत्यर्थः । ऋजु-भावः इति विद्यानिवासः । दीदांसति साधुः । ऋजुः स्वादित्यर्थः । छेदे दानति दानते । इति बोपदेवः । तत्र तिवादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

दानं, क्ली, (दा दाने दो अवखण्डने वेप शोधने भावादौ ल्युट् ।) गजमदः । (यथा, माघे । ५ । ३७ ।
"दानं दद्यादपि जलैः सहचाधिरूढ़े
को विद्यमानगतिरासितुमुत्सहेत ॥"
"दीयते इति दानं धनं गजमदश्च ।" इति तट्टीकायां मल्लिनाथः ॥) पालनम् । छेदनम् । शुद्धिः । इति मेदिनी । ने, १० ॥ वृक्ष-कोटरकीटजमधु । अस्य गुणाः । रूक्षत्वम् । दीपनत्वम् । कफच्छर्दिमेहनाशित्वञ्च । इति राजवल्लभः ॥ देवब्राह्मणादिसम्प्रदानकद्रव्यमोचनम् । तत्पर्य्यायः । त्यागः २ विहापितम् ३ उत्सर्जनम् ४ विसर्जनम् ५ विश्राणनम् ६ विसरणम् ७ सर्गणम् ८ प्रतिपादनम् ९ प्रादेशनम् १० निर्व्वपणम् ११ व्यवसर्जनम् १२ अंहतिः १३ । इत्यमरः ।२।७।२९। दायः १४ । इति त्रिकाण्ड-शेषः ॥ प्रदानम् १५ दत्तम् १६ विश्राणनम् १७ दत्तिः १८ अंहती १९ उत्सर्गः २० अति-सर्जनम् २१ सर्गः २२ विसर्गः २३ चयनम् २४ प्रदेशनम् २५ । इति शब्दरत्नावली ॥ * ॥
तस्य लक्षणादि यथा,—
"अर्थीनामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्द्दिष्टं व्याख्यानं तस्य वक्ष्यते ॥
सम्प्रदानस्वत्वापादकद्रव्यत्यागो दानमिति ॥*॥
दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥
मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥
परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु ॥
यस्य तु न सकाशः स्यान्न च सम्बन्धिबान्धवाः ।
दद्यात् स्वजातिग्रिष्येभ्यस्तदभावेषु निःक्षि-
पेत ॥
स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते ।
वसित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम् ॥*॥
एकां गां दशगुर्द्दद्यात् दश दद्याच्च गोयुतौ ।
शतं सहस्रगुर्द्दद्यात् सहस्रं बहुगोधनः ॥
यासादर्द्धमपि यासमर्थिभ्यः किन्न दीयते ।
इच्छाभुक्रूपो विभवः कदा कस्य भविष्यति ॥
अपरावाधमक्लेशं प्रयत्नेनार्জ্জितं धनम् ।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥*॥
विक्रयस्त्वेव दानञ्च न नेयाः सुरनिच्छवः ।
दाराः पुत्राश्च सर्व्वस्वमात्मन्येव च योजयेत् ॥
आपत्काले च कर्त्तव्यं दानं विक्रय एव च ।
अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चयः ॥*॥
यज्ञो दानं तपो जाप्यं श्राद्धञ्च सुरपूजनम् ।

यदृगङ्गायां कृतं सर्व्वं कोटि कोटि गुणम्भवेत् ।
शिवस्य विष्णोरग्रेच सन्निधौ दत्तमक्षयम् ।
ग्रालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
तत्र दानच होमच कोटिकोटिगुणम्भवेत् ।
यदृयत्र दुर्लभं द्रव्यं यस्मिन् काले ऽपि वा पुनः ।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा ।
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं धर्म्मबुद्धा यद्धर्म्मदानं प्रचक्षते ।
सहस्रगुणितं दानं भवेद्दत्तं युगादिषु ।
कर्म्मश्राद्धादिकञ्चैव तथा मन्वन्तरादिषु ॥*॥
आहारं मैथुनं निद्रां सन्ध्याकाले विवर्जयेत् ।
कर्म्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ ॥*॥
तामसेन तु यत्नेन दानेन तपसा तथा ।
देवलोके ध्रुवं वासो देवसायुज्यमेव च ॥*॥
गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचिते च तदर्द्धकम् ।
आशां दत्त्वा ह्रदातारं दानकाले निवेधकम् ।
दत्त्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम् ।
योऽसद्भ्यः प्रतिगृह्यापि पुनः सङ्गः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः ॥*॥
यस्य यद्दीयते वस्त्रमलङ्कारादि किञ्चन ।
तेषां दैवतमुद्धार्य्य कृत्वा प्रोक्षणपूजने ।
उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना निवेदयेत् ।
योऽर्चितः प्रतिगृह्णाति दद्यादर्चितमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकञ्च विपर्य्यये ।"

इति मुद्गितत्तम् ॥*॥

दानं त्रिविधं सात्त्विकं राजसं तामसञ्च ।
सात्त्विकं यथा,—
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
राजसं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं विदुः ॥"
तामसं यथा,—
"अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"

इति श्रीभगवद्गीता ॥*॥

"हस्त्यश्वं गामजाश्वं मणिमुक्तादिकाञ्चनम् ।
परोक्षं हरते यस्तु पश्चाद्दानं प्रयच्छति ।
न स गच्छति वै स्वर्गं दातारो यत्र भागिनः ।
अनेन कर्म्मणा युक्ताः पच्यन्ते नरकेऽधमाः ॥"

इति मत्स्यपुराणम् ॥*॥

नित्यनैमित्तिकादिभेदेन तच्चतुर्व्विधं यथा,—
"नित्यं नैमित्तिकं काम्यं त्रिविधं दानमुच्यते ।
चतुर्थं विमलं प्रोक्तं सर्व्वदानोत्तमोत्तमम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलन्तत् स्याद्ब्राह्मणाय च नित्यकम् ॥
यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुत्तमम् ॥
अपत्यवित्तैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानन्तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थं ब्रह्मवित्सु प्रदीयते ।
चेतसा धर्म्मयुक्तेन दानं तद्विमलं शिवम् ॥"

इति कूर्म्मपुराणम् ॥

रोगोपशमनाय दानविधिर्यथा,—
"गोदानं भूमिदानच सर्व्वदानं सुरार्चनम् ।
कृत्वा पश्चात् प्रतीकारं कुर्य्यात् पाकूपशान्तये ॥
महापापेषु सर्व्वेषु तदर्द्धं सुखदोषजे ।
अथवापि षड़ष्टांशात् कल्पं वाधिबलाबलात् ॥
कुर्य्यात् सर्व्वं कृतं कर्म्म कुष्ठरोगोपशान्तये ।
गोभूहिरण्यदानच तथामिश्रान्नभोजनम् ॥
चतुर्व्विधं दानमिदं दत्त्वा कुर्य्यात् प्रतिक्रियाम् ।
कदाचिदपि सिध्येत आयुश्च बलक्रिया ॥
मेहे सुवर्णदानच शूले श्वासे भगन्दरे ।
अग्निमान्द्यक्षयान्नदानेन श्वासात् कासाद्विमुच्यते ॥
ज्वरेचेश्वरपूजा च रुद्रजाप्यं समाचरेत् ।
मतिदानान्नदानच ग्राह्यदानं क्षमातुरे ।
अग्निहोमश्चाग्निमान्द्ये कन्यादानच गुल्मके ।
मेहाश्मरीविनाशाय लवणच्च प्रदापयेत् ॥
बहुभोजनदानेन शूलरोगाद्विमुच्यते ।
घृतमधुप्रदानेन रक्तपित्तं प्रशाम्यति ॥
चतुर्व्विधेन दानेन साध्यः स्याद् ग्रहजोगदः ।
सुवर्णदानात् कुनखी ग्रावदन्तः सुखी भवेत् ॥
रौप्यदानाच्छ्वित्रकुष्ठं साध्यं वापि प्रशाम्यति ।
सिध्यते नृपदानच वत्सरे लोहदानकम् ॥
सुखव्रणे ददेन्नागं गोदानं बहुमूत्रके ।
नेत्ररोगे घृतं दद्यात् सुगन्धं नासिकागदे ॥
तैलदानं कफरोगे रसदानच जिह्वके ।
उष्ट्रं दद्यात् पित्तरोगे लूतारोगे च दैवतः ॥"

इति हारीते द्वितीयस्थाने प्रथमेऽध्याये ॥

दानकर्म्मन्, क्ली, (दानमेव कर्म्म ।) दानक्रिया ।
तत्पर्य्यायः । दाति १ दाशति २ दासति ३ राति ४ रासति ५ पृणक्ति ६ पृणाति ७ शिक्षति ८ तुञ्जति ९ मंहतः १० । इति दश दानकर्म्माणः । इति देवनिघण्टौ ३ अध्यायः ॥

दानधर्म्मः, पुं, (दानाख्यो धर्म्मः दानरूपो धर्म्मो वा मध्यलोपिसमासः ।) दानस्य फलम् । यथा,

ब्रह्मोवाच ।

"अथातः संप्रवक्ष्यामि दानधर्म्ममनुत्तमम् ।
अर्थानासुचिते पात्रे श्रद्धया प्रतिपादनम् ॥
दानन्तु कथितं तज्ज्ञैर्भुक्तिमुक्तिफलप्रदम् ।
न्यायेनोपार्ज्जयेद्वित्तं दानभोगफलञ्च तत् ॥
अध्यापनं याजनच वृत्तमाहुः प्रतिग्रहम् ।
कुसीदं कृषिवाणिज्यं चक्रवृत्तोऽथ चार्ज्जयेत् ॥
यद्दीयते च पात्रेभ्यस्तद्दानं परिकीर्त्तितम् ।
नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम् ॥
यत्तु पापोपशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यवित्तैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते ।
चेतसा सत्त्वयुक्तेन दानं तत् विमलं स्मृतम् ॥
रत्नुभिः सन्ततां भूमिं यवगोधूमशालिनीम् ।
ददाति वेदविदुषे स न भूयोऽभिजायते ।
भूमिदानात् परं दानं न भूतं न भविष्यति ॥
विद्यां दत्त्वा ब्राह्मणाय ब्रह्मलोके महीयते ।
दद्यादहरहस्तान्तु श्रद्धया ब्रह्मचारिणे ।
सर्व्वपापविनिर्म्मुक्तो ब्रह्मस्थानमवाप्नुयात् ॥
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च च ।
उपोष्याभ्यर्च्चयेद्विद्वान् मधुना तिलशर्क्करैः ॥
गन्धादिभिः समभ्यर्च्च वाचयेद्वा स्वयं वदेत् ।
प्रीयतां धर्म्मराजेति यथा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
कृष्णाजिने तिलान् कृत्वा हिरण्यमधुसर्पिषा ।
ददाति यस्तु विप्राय सर्व्वं तरति दुष्कृतम् ॥
छत्रान्नसुदकुम्भच वैशाख्याच्च विशेषतः ।
निर्द्दिश्य धर्म्मराजाय विप्रेभ्यो सुखने भयात् ॥
द्वादश्यामर्च्चयेद्विष्णुमुपोष्याघप्रशान्तये ।
सर्व्वपापविनिर्म्मुक्तो नरो भवति निश्चितम् ॥
यो हि यां देवतामिच्छेत् समाराधयितुं नरः ।
ब्राह्मणान् भोजयेद्यत्नाद्भोगाय तोषिताः
सुराः ॥
सन्ततिकामः सततं पूजयेद्वै पुरन्दरम् ।
ब्रह्मवर्च्चसकामस्तु ब्राह्मणान् ब्रह्मणिष्यात् ॥
आरोग्यकामोऽथ रविं धनकामो हुताशनम् ।
कर्म्मणां सिद्धिकामस्तु पूजयेद्वै विनायकम् ॥
भोगकामो हि श्रियिनं धनकामः समीरणम् ।
मुमुक्षुः सर्व्वसंसारात् प्रयत्नेनार्च्चयेद्धरिम् ॥
अकामः सर्व्वकामो वा पूजयेत्तु गदाधरम् ।
वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः ॥
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमिदः सर्व्वमाप्नोति दीर्घमायुर्हिरण्यदः ॥
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥
अनड्वाहं श्रियं पुष्टां गोदो ब्रह्मस्व पिष्टपम् ।
यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः ।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ।
वेदवित्सु ददद्दानं स्वर्गलोके महीयते ॥
गवां घासप्रदानेन सर्व्वपापैः प्रमुच्यते ।
इन्धनानां प्रदानेन दीप्ताग्निर्जायते नरः ॥
औषधं क्षेममाहारं रोगिणो रोगशान्तये ।
ददानो रोगरहितः सुखी दीर्घायुरेव च ॥
असिपत्रवनं मार्गं क्षुरधारासमन्वितम् ।
तीक्ष्णातपञ्च तरति छत्रोपानत्प्रदानतः ॥
यद्यदिष्टतमं लोके यच्चास्य हृदयं प्रिये ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
संक्रान्त्यादिषु कालेषु दत्तं भवति चाक्षयम् ॥
प्रयागादिषु तीर्थेषु गयायाच्च विशेषतः ।
दानधर्म्मात् परो धर्म्मो भूतानां नेह विद्यते ॥
स्वर्गायुर्भुक्तिकामेन देयं पापोपशान्तये ।
दीयमानन्तु यो मोहात् गोविप्राग्निसुरेषु च ।
निवारयति पापात्मा तिर्य्यग्योनिं व्रजेन्नरः ॥

यस्तु दुर्भिक्षवेलायामन्नार्थं न प्रयच्छति ।
स्त्रियमाणेषु विप्रेषु ब्रह्महा स तु गर्हितः ॥"
इति गारुडे दानधर्म्मनाम ५१ अध्यायः ॥*॥
अन्यत् महाभारते ग्लानिपर्व्वणि द्रष्टव्यम् ॥

दानपतिः, पुं, (दाने पतिः श्रेष्ठः ।) सततदाता ।
इति जटाधरः ॥ (यथा, महाभारते । ५ । ११६ । २२ ।
"जातो दानपतिः पुत्रस्त्वया शूरस्तथापरः ॥")
अक्रूरः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ७८ । ८४ ।
"गच्छ दानपते ! क्षिप्रं तावित्यानयितुं व्रजात् ।
नन्दगोपञ्च गोपांश्च करदान् मम शासनात् ॥"
देवभेदः । यथा, हरिवंशे । २३२ । ७ ।
"सहस्रपादः सुमुखः क्षत्रश्चैव महासुरः ।
रथोत्कटो दानपतिः शैलकर्णी कुलाकुलः ॥")

दानफलं, क्ली, (दानस्य फलम्) दानजन्यफलम् ।
तद्विवरणं यथा,—
"श्रद्धया यद्दीयते दानं भक्त्या पात्रे विधानतः ।
तदनन्तफलं विद्धि अवस्थात्रितये नृप ! ॥
तमोवृतस्तु यो दद्यात् भयात् क्रोधात्तथैव च ।
नृप ! दानन्तु तत् सर्व्वं सुरूक्ते गर्भस्थ एव तु ॥
ईर्षामत्सुमनाश्चैव दम्भार्थं चार्थकारणात् ।
यो ददाति द्विजातिभ्यः स वाञ्छी तु तदश्नुते ॥
वैष्णवैर्देवविहीनैश्च सन्ध्योपासनवर्ज्जितम् ।
यद्दानं दीयते तस्मै दृढकाले तदश्नुते ॥
वृथा जन्मानि चत्वारि वृथा दानानि षोड़श ।
साश्वमेधं प्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्रस्य वृथा जन्म धर्म्मवाह्या नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ॥
देवपित्रविहीनं यत् ईश्वरेभ्यः सदोषतः ।
दत्त्वानुकीर्त्तनाच्चैव वेदाग्निव्रतत्यागिने ॥
अन्यायोपार्ज्जितं दानं अर्थं ब्रह्महणे तथा ।
गुरवेऽनृतवक्त्रे च स्तेनाय पतिताय च ॥
क्षत्रघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्व दृषल्याः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र ! वृथादानानि षोड़श ॥"
इत्याद्ये वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दानवः, पुं, (दनोरपत्यम् । दनु + "तस्यापत्यम् ।" ४ । १ । १२ । इति अण् ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, ऋग्वेदे । २ । ११ । १० ।
"नि मायिनो दानवस्य माया
अपादयत् पपिवान्त्सुतस्य ॥")
स दनुकन्यादनुगर्भे कश्यपाज्जात एकषष्टिसंख्यकास्तेष्वष्टादश प्रधानास्तेषां नामानि यथा,
द्विमूर्द्धा १ शम्बरः २ अरिष्टः ३ हयग्रीवः ४ विभावसुः ५ अयोमुखः ६ शङ्कुशिराः ७ स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११ वृषपर्व्वा १२ एकचक्रः १३ तापनः १४ धूम्रकेशः १५ विरूपाक्षः १६ विप्रचित्तिः १७ दुर्जयः १८ । इति श्रीभागवतम् ॥ (महाभारते चत्वारिंशदनोः पुत्रा उक्ताः । यथा, तत्रैव । १ । ६५ । २१—२२ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत ॥
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेतिविश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥"
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

दानवजः, पुं, (दाने वज्र इव ।) वैश्यः । इति पुराणम् ॥ (वैश्यजातिको गान्धर्व्वो देवश्च अश्वविशेषः । यथा, महाभारते । १ । १७१ । ५१ ।
"वज्रमाणिर्व्रजश्रुत्यः स्यात् चक्रं वज्रमथ स्रुतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥")

दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्यमरः । १ । १ । ६ ॥ (विष्णुः । यथा, काशीखण्डे । २६ । ८० ।
"दर्शितानेककुतुका दुष्टदुर्ज्जयदुःखहृत् ।
दैत्यकुद्दुरितघ्नी च दानवारिपदाब्जजा ॥"
"दानवारिपदाब्जजा विष्णुपादार्घ्यसम्भूतेति स्मृतेः ।" इति तट्टीका ॥ दानमेव वारि इति विग्रहे गजमदजले, क्ली ॥)

दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधानम् । यथा,—
"अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
अन्येभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मवेत्ता च तेभ्योऽपि पात्रं विद्यातपोन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्थितम् ॥
विद्यातपोभ्यां हीनेन न तु याच्ञाः प्रतीयहः ।
याचन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रार्थितं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतन्तु शक्तितः ॥
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सर्व्वास्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
दशसौवर्णिकं शृङ्गं शफं सप्तपलैः कृतम् ।
पञ्चाशत्पलिकं पात्रं कांस्यं वत्सञ्च कौशिके ॥
स्वर्णपिप्पलपात्रेण वतसो वा वतसिकापि वा ।
तस्यामपि च दातव्यं अपत्यं रोगवर्ज्जितम् ॥
दाता स्वर्गमवाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चेत्तारयते भूयश्चासप्तमं कुलम् ॥
यावद्वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते ।
तावन्नौः पृथिवी ज्ञेया यावद्गर्भे न सुच्यते ।
यथाकथञ्चिद्दत्त्वा गां क्षेत्रं वाधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
आप्तसंवाहनं रोगिपरिचर्य्या सुरार्चनम् ।
पादशौचं द्विजोच्छिष्टमार्জ্জनं गोप्रदानवत् ॥
द्विजाय यदभीष्टन्तु दत्त्वा स्वर्गमवाप्नुयात् ।
भूदीपाश्वान्नवस्त्राम्बिलस्त्रीप्रतिश्रयान् ॥
गृहधान्यच्छत्रमालायानवस्त्रकृतं जलम् ।
शय्याशूलेपनं दत्त्वा स्वर्गलोके महीयते ॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्ल्लभम् ॥
वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येनापि लिखित्वापि ब्रह्मलोकमवाप्नुयात् ॥
एतन्मूलं जगत् यस्मादश्नुते भूमेश्वरः ।
तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणोन्नतिम् ।
लोकायतं कुतर्कञ्च प्राहतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तदधो नयति द्विजम् ॥
समर्थो यो न रक्षीयात् दाहलोकमवाप्नुयात् ॥
कृष्णाः शाकं पयो गव्यं प्रत्याख्येयं न वारि च ।
अयाचितादृतं ग्राह्यमपि दुष्कृतकर्म्मणः ॥
अन्यत्र कुलटाषण्डपतितेभ्यो द्विषस्त्रियाः ।
देवार्तिश्रयचैनस्ते पिण्डभृत्यर्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मदत्यर्थमेव च ॥"
इति गारुडे ६८ अध्यायः ॥

दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा, दानस्य शीलं सन्ततमनुष्ठानं यस्य ।) दाता । तत्पर्य्यायः । वदान्यः २ वदन्यः ३ । इति हेमचन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ । १२२ । ५ ।
"यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥")

दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः ।
"सप्तमी शौण्डैः ।" २ । १ । ४० । इति समासः ।)
बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, माघे । १४ । ४६ ।
"निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥")

दानसागरः, पुं, (दानानां सागर इव ।) षोड़शसङ्ख्यकषोड़शः । यथा,—
"यः कश्चित् कुरुते देवि ! यद्दानं दानसागरम् ।
वृषोत्सर्गे महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चरणं तथा होमं यः कुर्य्याद्विधिबोधितम् ।
सर्व्वं तस्य वृथा देवि ! श्रीगुरोरर्चनं विना ॥"
इति श्रीकामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्पणे देवदेवीसंवादे २५ पटलः ॥

दानीयः, त्रि, (दीयतेऽसौ इति । दा दाने + "ऋत्यक्लृपृजि वृहुलम् ।" ३ । ३ । ११३ । इति सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति सुग्धबोधम् । (यथा, तत्रैव कारकप्रकरणे ।
"सर्व्वोऽर्थो जीवनं पाता दानीयः प्रभवो लयः ॥")

दानुः, त्रि, (ददातीति । दा + "दाभाभ्यां नुः ।" उणा० । ३ । ३२ । इति नुः ।) दाता । विक्रान्तः । इति मेदिनी । ने, १० ॥ शूरे । वायुः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः । यथा, ऋग्वेदे । २ । १२ । ११ ।
"ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥"
दीयते इति कर्म्मणि नुः । देयः । यथा, ऋग्वेदे । ८ । २५ । ६ ।
"सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ॥")

दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।) तपःक्लेशसहः । (यथा, मनुः । ४ । ३५ ।
"कूलघ्नकेशनखघ्नमृदन्तः शुक्लाम्बरः शुचिः ॥")

दमितः। इत्यमरः। २। ७। ४३॥ (यथा, महाभारते। १। २२२। ४६।
"तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम्॥"
दम्नेन निर्वृत्तम्। दम्न+"तेन निर्वृत्तम्।" ४। २। ६८। इति अण्। दम्ननिर्म्मितम्। यथा, महाभारते। ५। ४६। ५।
"रुचिरैरासनैर्लीनो काञ्चनैर्दारवैरपि।
अक्षसारमयैर्दान्तैः स्वास्तीर्णैःशोत्तरच्छदैः॥")
दाता। इति संक्षिप्तसारे उणादिवृत्तिः॥
पुं, दमनकवृक्षः। श्रिक्षितवृक्षः। इति राजनिर्घण्टः॥ (विदर्भराजपुत्रविशेषः। यथा, महाभारते। ३। ५३। ८—६।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥")
स्त्री, अक्षरोविशेषः। यथा, महाभारते। १३। १६। ४५।
"विद्युता प्रथमा दान्ता विद्योता रतिरेव च॥")
दान्तिः, स्त्री, (दम+क्तिन्। "अशुनासिकस्येति।" ६। ४। १५। इति दीर्घः।) तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दमथुः २ दमः ३। इत्यमरः। ३। २। ३॥
दापितः, त्रि, (दाप्यते स्म इति। दा+णिच्+कर्म्मणि क्तः।) साधितः। इत्यमरः। ३। १। ४०॥ धनादिना आयत्तीकृतः। इति भरतः॥ श्रुती इति ख्यातं वस्त्रे दत्तं स इति रमानाथः॥ दक्षितः। इति विद्याविनोदः॥ शोधितद्रव्यम्। इति नयनानन्दः॥ दायित इति पाठोऽपि। इति कालिङ्गपुरुषोत्तमौ॥
दाम, [न्] क्ली स्त्री, (दीयते इति। दा दाने दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन्।" उणा। ४। १४५। इति मनिन्।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते तत्। दाउनि इति दौंरा इति च भाषा। तत्पर्य्यायः। सन्दानम् २। इत्यमरः। २। ६। ७३॥ रज्जुः। इति दामोदरदर्शनात्॥ (यथा, भागवते। १। ८। ३१।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम्।
वक्त्रं निनीय भयभावनयास्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति॥"
माला। यथा, माघे। ४। ५०।
"चञ्चलचुबिलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानुयन्ति॥"
दातरि, त्रि। यथा, ऋग्वेदे। ६। ४४। २।
"यः शग्मस्तविशग्म ते रायो दामा मतीनाम्॥"
"रायो धनस्य दामा दाता भवति।" इति तद्भाष्ये सायणः॥)
दामनपर्व्व, [न्] क्ली, (दमनो दमनवृक्षस्तस्येदमित्यण्प्रत्यये दामनं तद्भञ्जनसम्बन्धि पर्व्व यस्मिन्।) दमनभञ्जननिधिः। सा चैत्रशुक्लचतुर्दश्यौ। इति तिथ्यादितत्त्वम्॥
दामनी, स्त्री, (दामैव। दामन्+स्वार्थे प्रज्ञादित्वात् अण्। "अन्।" ६। ४। १६७। इति प्रकृतिभावः। "टिड्ढेति।" ४। १। १५। इति ङीप्।) पशुबन्धनरज्जुः। तत्पर्य्यायः। पशुरज्जुः २। इत्यमरः। २। ६। ७३॥ (यथा, हरिवंशे। ६५। २४।
"कीलैरारोप्यमाणेषु दामनीपाशपाशिते॥")
दामलिप्तं, क्ली, तमोलिप्तदेशः। इति हेमचन्द्रः। ४। ४५॥
दामा, स्त्री, (दामन्+"दामबाभ्यामन्यतरस्याम्।" ४। १। १३। इति पक्षे ङाप्।) दाम। इति भरतः॥
दामाक्षनं, क्ली, (दामाक्षवम्। पृषोदरादित्वात् लस्य नः।) अश्वादेः पादबन्धनरज्जुः। इति हेमचन्द्रः। ४। ३१७॥
दामाक्षलं, क्ली, (दाम्नः अक्षलमिव।) एकग्रफाङ्गबन्धः। अश्वादिपादबन्धनरज्जुः। इति हारावली। ६१॥ (यथा, माघे। ५। ६१।
"सस्नुः सरोवपरिधारकवार्य्यमाणा
दामाक्षवस्खलितलोलपदं तुरङ्गाः॥")
दामोदरः, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्यत्र तया गम्यते इति दामोदरः। 'दाम्नादामोदरं विदुः।' इति भगवद्वचनात्। यशोदया दाम्नोदरे बद्ध इति वा दामोदरः। 'दामानि लोकनामानि तानि यस्योदरान्तरे। तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः॥' इति वा।" इति विष्णुसहस्रनामभाष्ये शङ्करः॥ ५३॥ तथा, महाभारते। ५। ७०। ८।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः॥")
विष्णुः। इत्यमरः। १। १। १८॥ (दाम रज्जुरुदरे यस्य। श्रीकृष्णः। यथा, महाभारते। १। १६०। १६।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे॥"
यशोदयासौ उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम। यथा, हरिवंशे। ६३। १४, २६।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धद्दुदूखले।
यदिप्रकृष्टोऽसि गच्छेति तस्मात्ता कर्म्म साकरोत्॥"
"स च तेनैव नाम्ना तु लोको वै दामबन्धनात्।
गोष्ठे दामोदर इति गोपीभिः परिगीयते॥")
भूताहंदृविशेषः। इति हेमचन्द्रः। २। १३०॥ (ग्रालग्रामस्मूर्त्तिविशेषः। तल्लक्षणं यथा, पद्मपुराणे।
"स्थूलो दामोदरो ज्ञेयः सच्चक्रो भवेत्तु सः।
चक्रं तु मध्यदेशेऽस्य पूजितः सुखदः सदा॥"
अस्य अन्यद्दृविवरञ्तु ग्रालग्रामशब्दे द्रष्टव्यम्॥*॥ काश्मीरस्य नृपविशेषः। यथा, राजतरङ्गिण्याम्। १। ६४।
"गतिं प्रवीरसुतभां तस्मिन् सुचरित्रिये गते।
श्रीमान् दामोदरो नाम ततस्तुरुरभूत क्षितिम्॥")
दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति। दम्भ+"चरति।" ४। ४। ८। इति ठक्।) वक
पक्षी। इति राजनिर्घण्टः॥ दम्भयुक्ते, त्रि॥ (यथा, मनुः। ३। १५६।
"पाषण्डिगणिनश्चैव दाम्भिको रसविक्रयी॥")
दाय, ऋ ङ दाने। इति क्रविकल्पद्रुमः॥ (भ्वादयः-सकः-सेट्।) ऋ, अददायत्। ङ, दायते। इति दुर्गादासः॥
दायः, पुं, (दीयते इति। दा दाने+घञ्।"आतो युक्चिण्कृतोः।" ७। ३। ३३। इति युक्।) यौतुकादिदेयधनम्। (यथा, महाभारते। २। ५१। १।
"दायन्तु विविधं तस्मै द्रव्यं मे गदतोऽनघ!।
यज्ञार्थं राजभिर्दत्तं महान्तं धनसञ्चयम्॥")
कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत्। इति भरतः॥ तत्पर्य्यायः। हरद्यम् २। इत्यमरः। २। ८। २८॥ सोद्धुरुद्धारद्रव्यम्। विभक्तव्यपित्रद्रव्यम्। (यथा, मनुः। ६। १६४।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा॥"
विभागार्हधनमात्रम्। यथा, तत्रैव। ६। ७०।
"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः।
ऊर्द्धं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत्॥"
दा दाने+भावे घञ्।) दानम्। इति मेदिनी। ये, ३०॥ (यथा, मनुः। ८। १६६।
"अस्वामिना कृतो यस्तु दायो विक्रय एव वा।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥")
स्थानम्। (दो छेदे+घञ्।) खण्डनम्। इति शब्दरत्नावली॥ क्षयः। इत्यजयपालः॥ (ददातीति। दा+"श्राद्धग्येति।" ३। १। १४१। इति घः। दातरि, त्रि। इति व्याकरणम्॥)
दायकः, त्रि, (ददातीति। दा+ण्वुल्।) दाता। यथा। इतारिगतिदायक इति भक्तिरसाश्रितसिन्धुः॥ (यथाच महाभारते। ३। १६३। ३३।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः॥")
दायबन्धुः, पुं, (दाये बन्धुः।) भ्राता। इति शब्दरत्नावली॥
दायभागः, पुं, (दायस्य भागः।) सम्बन्धिभ्रात्रोः सम्बन्धिधनविभागः। पूर्व्वद्रव्यस्वामिसम्बन्धाधीनं ततस्त्याज्यपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दस्तस्य विभागः। एकदेशगतस्यैव भूदिरण्यादेरुत्पन्नस्य स्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतयाव्यवस्थितस्य गुटिकापातादिना यद्भजनम्। अथवा विशेषेण भजनं स्वत्वज्ञापनं वा। यत्र चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते॥*॥ अथ दायाधिकारक्रमे पुंधनाधिकारिणः। तत्रादौ मृतधने औरसपुत्रस्याधिकारः। तदभावे पौत्रस्य। तदभावे प्रपौत्रस्य। मृतपितृकपौत्रस्तत्पितामहकप्रपौत्रयोः पुत्रेण सह तुल्याधिकारः। एषामभावे पत्नी धनाधिकारिणी। तत्रायं विशेषः पत्नी धनं गृह्णीत

एव न तु तस्य दानाधमनविक्रयान् कर्त्तुमर्हति। किन्तु भर्त्तुरौर्द्धदेहिकक्रियार्थं दानादिकमप्यनुमतम्। वर्त्तनाशक्तौ आधमनमप्यनुमतं तदशक्तौ विक्रयमपि। भर्त्तुरौर्द्धदेहिकक्रियार्थमर्थानुरूपं भर्तृसपिण्डभर्तृगुरुभर्तृदौहित्रसन्तानभर्तृभागिनेयभर्तृमातुलेभ्यो दद्यात्। एतेषामभावे स्वपितृकुले दद्यात्॥ पत्यभावे दुहिता। तत्रापि प्रथमं कुमारी। अत्रायं विशेषः कन्या जातादिकारा पञ्चात् परिणीता सती अविद्यमानपुत्रा यदि मृता तदा ततपितृदाये सपुत्रायाः सम्भावितपुत्रायाः भगिन्यास्तुल्याधिकारः। कुमार्यभावे चोढ़ायाः पुत्रवत्या; सम्भावितपुत्रायाश्च तुल्याधिकारः। एतयोरेकतराभावे अन्याधिकारिणी। एतयोरभावेऽपि वन्ध्यापुत्रहीनविधवयोर्नाधिकारः। सर्व्वदुहित्रभावे दौहित्रस्याधिकारः। तदभावे पितुरधिकारः। तदभावे मातुरधिकारः। तदभावे सोदरस्याधिकारः। सोदराभावे सजातीयवैमात्रेयाधिकारः। तदभावे सौदरभ्रातृपुत्राणामधिकारः। संसर्ग्यसंसर्गिसोदरभ्रातृपुत्रेषु संसर्गिभ्रातृपुत्रस्याधिकारः। एवं संसर्ग्यसंसर्गिवैमात्रेयभ्रातृपुत्रे सति संसर्गिवैमात्रेयभ्रातृपुत्रस्याधिकारः। यदा त्वसंसर्गी सोदरभ्रातृपुत्रः संसर्गी चासोदरभ्रातृपुत्रस्तदा तयोर्युगपदधिकारः। यदा पुनः सोदरवैमात्रेयभ्रातृपुत्रौ संसर्गिणावसंसर्गिणौ वा तदा उभयथैव सोदरभ्रातृपुत्रस्याधिकारः। भ्रातृपुत्राभावे भ्रातृपौत्रस्याधिकारः। अत्रापि सोदरवैमात्रेयभ्रातृपुत्रवत् क्रमो द्रष्टव्यः। भ्रातृपौत्राभावे पितृदौहित्रस्याधिकारः। अत्र सोदरभगिनीपुत्रवैमात्रेयभगिनीपुत्रयोस्तुल्यवदधिकारः। पितुर्दौहित्राभावे पितामहस्याधिकारः। पितामहाभावे पितामह्या अधिकारः। पितामह्यभावे पितृव्यस्याधिकारः। तदभावे पितृव्यपुत्रस्याधिकारः। तदभावे पितृव्यपौत्रस्याधिकारः। पितृव्यपौत्राभावे पितामहदौहित्रस्याधिकारः। पितामहदौहित्राभावे पितृव्यदौहित्रस्याधिकारः। तदभावे प्रपितामहस्याधिकारः। तदभावे प्रपितामह्या अधिकारः। ततः पितामहभ्रातृाधिकारी। तदभावे पितामहभ्रातृपुत्रः। तदभावे पितामहभ्रातृपौत्रः। ततः प्रपितामहदौहित्रोऽधिकारी। ततः पितामहभ्रातृदौहित्रोऽधिकारी। तदभावे मातामहः। तदभावे मातुलः। तदभावे मातृष्वसीयः। तदभावे मातुलपुत्रः। तदभावे मातुलपौत्रः। एषामभावे सकुल्याः। सकुल्योऽपि द्विविधः अधस्तन ऊर्द्धतनश्च तत्र प्रपौत्रपुत्रावधयोऽधस्तनाश्चयः वृद्धप्रपितामहादिश्च ऊर्द्धतनास्तत्राप्यादावधस्तनानां सकुल्यानां क्रमेणाधिकारः। तेषामभावे ऊर्द्धतनानां क्रमेणाधिकारः। एवंविधसकुल्याभावे समानोदकाः। तदभावे आचार्यः। तदभावे शिष्यः तदभावे सहवेदाध्यायिब्रह्मचारिणः। तदभावे ग्रामस्थाः सगोत्राः। तदभावे तथाविधाः समानप्रवराः। उक्तपर्य्यन्ताभावे तद्ग्रामस्थाश्चविद्यादिगुणयुक्ता ब्राह्मणा धनाधिकारिणः। एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी। ब्राह्मणधनस्य तु गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्थस्यापि अधिकारः। वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभ्रातृसच्छिष्याचार्य्या गृह्णीयुः। तदभावे चैकचरवासी एकाश्रमी वा गृह्णीयात्। ब्रह्मचारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च। तत्र नैष्ठिकधने आचार्य्यस्याधिकारः। उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम्। इति पुंधनाधिकारिणः॥ * ॥

अथ स्त्रीधनाधिकारक्रमः।

तत्र कुमारीधने प्रथमं सोदरभ्रात्राधिकारी। तदभावे माता तदभावे पिता। क्वदत्तधने वरोऽधिकारी॥ * ॥

अथोढ़ास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते। विवाहकाले लब्धं यौतुकं धनम् १ भर्त्तृनीयमाना पितृभ्रातृकुलात् यद्धनं लभते तत् २ भर्त्तृदत्तम् ३ भ्रातृदत्तम् ४ पितृदत्तम् ५ मातृदत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रिये पारितोषिकं यद्दत्तं तत् ७ अन्वाधानम् ८ अलङ्करणम् ९ गृहादिकर्म्मिरूपग्निष्विसभर्त्तृद्वारेणान्येषां गृहादिनिष्पादनादुत्कोचविधयान्येभ्यो यद्धनं लब्धं तत् १० पुत्रदत्तम् ११ मातुलादिदत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रादिना च यद्दत्तम् १३। भर्तृदत्तस्यावरातिरिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तुमर्हति॥ * ॥

तदेवं स्त्रीधने निरूपिते तस्यां मृतायां तद्धनाधिकारो निरूप्यते। तत्र यौतुकधने कुमार्याः प्रथममधिकारः। तदभावे वाग्दत्तायाः तदभावे चोढ़ायाः पुत्रवत्याः सम्भावितपुत्रायाश्च युगपदधिकारः। तदभावे वन्ध्याविधवयोस्तुल्यवदधिकारः। तत्र कुमारी वाग्दत्ता जाताधिकारानन्तरं परिणीता सती पश्चाद्वन्ध्यात्वेनावधृता पुत्रमप्युत्पाद्यैव विधवा भूता वा तदा तस्यां मृतायां ततसंक्रान्तमाल्यधने तद्भगिन्योः पुत्रवतीसम्भावितपुत्रयोरभावे वन्ध्याविधवयोरप्यधिकारः। सर्व्वदुहित्रभावे पुत्रस्याधिकारः। पुत्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः। तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रः। एततपर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्रधिकारः। भर्त्तुरभावे भ्रातुः। तदभावे मात्राधिकारिणी। तदभावे पितुः। सपत्नीप्रपौत्रपर्य्यन्ताभावे आसुरराक्षसपैशाचाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातुरधिकारः। तदभावे पितुः। पितुरभावे भर्त्तुः॥ अथायौतुकस्त्रीधनाधिकारिक्रमः। तत्र विवाहपूर्व्वापरकालपितृदत्तयौतुकाभ्यामतिरिक्तस्त्रीधने कन्यापुत्रयोर्युगपदधिकारः। तयोरेकतराभावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे जरावाः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्यवदधिकारः। एतयोरेकतराभावे अन्यस्या अधिकारः। एतयोर्द्वयोरभावे पौत्रः। पौत्राभावे दौहित्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रोऽधिकारी। ततो वन्ध्या विधवा च तुल्यवदधिकारिण्यौ। एतयोरेकतराभावे चान्यतरस्याः। वन्ध्याविधवापर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चकविवाहिताया धने भर्त्तृभ्रातृमातृपितृणां क्रमशोऽधिकारः। विवाहकाले ततपूर्व्वापरकाले वा स्त्रिये यद्धनं पित्रा दत्तं तत्र धने प्रथमं कुमार्य्याः। तदनन्तरमूढ़यो; पुत्रवतीसम्भावितपुत्रयोः। तदनन्तरं वन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्राटेर्यौतुकधनान्तरवत् क्रमेणाधिकारः। ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुकधनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिकलब्धयौतुकधनेषु च भर्त्तृपर्य्यन्ताभावे देवराद्यैरधिकारः। तदभावे देवरभ्रातृश्वशुरयोः सुतानां युगपदधिकारः। एतेषामभावे असपिण्डोऽपि भगिनीपुत्रः। तदभावे भर्त्तृभागिनेयः। तदभावे भ्रातृसुतः। तदभावे जामाता। जामातृपर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृश्वशुरादीनां सपिण्डानामधिकारः। सपिण्डाभावे सकुल्याः समानोदकाः सगोत्राः समानप्रवराश्च पुंधनवत् क्रमेणाधिकारिणः। एतत्सर्व्वाभावे ब्राह्मणधने स्वग्रामश्रोत्रियादेरधिकारः। क्षत्रियादिधने राज्ञ एवाधिकारः। इति स्त्रीधनाधिकारिणः॥ * ॥

अथ विभागानधिकारिणः।

क्लीवपतितजात्यन्धजन्मबधिर-उन्मत्तजड़-मूकपङ्गुपितृद्विट्निरिन्द्रियौपपातिकाचिकित्स्यरोगार्त्ताः। पतितवर्ज्जं एते भरणीयाः। पतितपुत्रवर्ज्जमेतेषां पुत्रा यदि निर्दोषाः तदांशभाजिनः। क्लीवादीनां अपुत्रा भार्य्याः यदि सहृत्ताऋदा भर्त्रा। एषां दुहितरो विवाहपर्य्यन्तं भरणीयाः॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः।

तत्र पैतामहं पित्रर्ज्जितं साधारणधनोपघातेनार्ज्जितमेति त्रिविधं धनं सर्व्वैरेव विभाज्यम्। किन्तु तत्रार्ज्जकस्य द्वावंशौ अन्येषामेकैकांशः साधारणधनाद्युपघातेन शौर्य्यप्राप्तं धनं एवं साधारणधनाद्युपघातेनार्ज्जितविद्याधनं पितृपितृव्यादिप्रसादादिना लब्धं धनं भार्य्याप्राप्तिकाले लब्धं धनं मित्रताप्राप्तं धनं आर्ज्जित्यलब्धं एतान्यविभाज्यानि। विद्याधनन्तु समविद्याधिकविद्येभ्यो देयं एवं यदि विद्याभ्यस्यतो भ्रातुः कुटुम्बभरो भ्राता स्वधनव्ययशरीरायासाभ्यां बिभर्त्ति तदा तद्विद्यार्ज्जितधने न्यूनस्यापि अपरभ्रातुरंशित्वम्। स्वकुलात् पित्रादितो

लब्धविद्यार्जितधने तु सर्व्वेषां मूर्खामूर्खाणामंशित्वम्। विद्याधनं यथा, यदि भवान् भद्रमुपन्यस्यति तदा भवते एतावद्धनं दातव्यं इति पणितं तच्च भद्रोपन्यासेन यत् पणितं धनं लब्धं तत्। अध्यापितशिष्याद्यल्लब्धम्। ऋत्विक्कर्म्मकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम्। यत्किञ्चित् विद्यायाः प्रश्ने ज्ञते तच्च सम्यगुत्तरेण परितोषादपणितमेव किञ्चिद्धनं ददाति तत्। यो ह्यस्मिन् श्राद्धार्थे मम संशयमपनयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य संशयमपनीय यल्लब्धम्। वादिनोः कुत्रचिद्वादविषयसन्देहे न्यायकरणार्थमागतयोः सभ्यद्दिरूपणेन यल्लब्धम्। श्राद्धादिषु खन्नानं प्रकाश्य प्रतिग्रहादिना यल्लब्धम्। तथात्यर्थवादाद्वादविचारे वा परं निर्जित्य यल्लब्धम्। एकस्मिन् देये वस्तुनि बहूनां ब्राह्मणानां सप्तत्याने येन प्रकृष्टं वेदमधीत्य यल्लब्धम्। चित्रकरसुवर्णकारादिभिः शिल्पिभिर्मूल्यादधिकं यल्लब्धम्। द्यूतेनापि परं निर्जित्य यल्लब्धम्। एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन ज्ञतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन इतरथापारणैरपेक्षेण च धनमुद्धरति तदा तद्धनमुद्धारकर्त्तुरेव। भूमिस्तु यदि अन्यैर्ज्ञता एकेनोद्धृता तदा स तुरीयांशं गृहीत्वा अवशिष्टभागत्रयं अन्यैः सह समं विभजेत्। अयं निष्कर्षः विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरथापारणैरपेक्षेण येन यदर्ज्जितं तदर्ज्जकस्यैव न तु तद्विभाज्यमितरैः। किन्तु विद्याजब्धनमात्रे विशेषः स च प्रागेवाभिहितः। अङ्गयोजितं वस्त्रालङ्कारं अश्वादिवाहनं लङ्घुकादिकूपवाप्यादिगतं पित्र्यादिसम्बन्धिजलं दासीयतिरिक्ता स्त्री गोप्रचारः स्त्र्या एतानि नान्यधनवद्विभाज्यानि किन्तु स्वव्यापारेण तदुपार्ज्जितयं एवं स्वस्वव्यापारोपयुक्तशयनभोजनपात्रादि न विभजनीयं येन यदुपार्ज्जितं तत्तस्यैव। पुत्रकन्यु मूर्खेण यात्रां किन्तु पण्डितेन तदन्तर्गतस्वांशतुल्यद्रव्यान्तरं मूल्यमेव वा दत्त्वा ग्रहीतव्यं एवं शिल्पिनां शिल्पोपयुक्तद्रव्यं नाशिल्पिनां तत्रापि पुत्रकबन्धुव्यवस्था। पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं ज्ञतं तस्य न विभागः यद्यपरेणापि वास्तुन्तरे तथा ज्ञतम् ॥ * ॥

अथ संसृष्टविभागक्रमार्थमादौ संसर्गो निरूप्यते।

पितृभ्रातृपितृव्याणामन्यतरेण सह विभक्तः सन् पुनरन्योन्येच्छया पूर्व्वज्ञतविभागमपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एकसृष्टिरूपतयावस्थानं संसर्गः। अथ संसृष्टविभागः। अत्र भ्रातॄणां अन्येषां तुल्यसम्बन्धिनां वा संसर्ग्यसंसर्गिणां मध्ये संसर्गिणामेव प्रथमं ज्ञतसंसर्गिधनेऽधिकारः। तदभावे तथाविधसंसर्गिणामिति क्रमः ॥ * ॥ एवं यदा पिता पुत्रान् विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्रैः सहासंसृष्ट एव पुत्रान्तरसुतपादि ज्ञतस्तदा विभागानन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्तः एवं पूर्व्वभ्रातृविभागेऽपि विभक्तजस्य नांशित्वम्। यदि तु येन केनचित् पुत्रेण संसृष्टः सन् पिता ज्ञतः तदा तद्धनं संसृष्टविभक्तज्ञाभ्यां समं विभाज्यं यथा धने तथांशेऽपि। यद्यविज्ञातगर्भायामेव स्त्रियां पुत्रा विभक्तास्तद्गर्भजातो विभक्तद्रव्याण्येकोद्दिश्य पुनर्विभज्य स्वांशं गृहीयात् न तु विभक्तेन सह पितृद्रव्येऽंशित्वम्॥ * ॥

अथ पितृज्ञतविभागो निरूप्यते।

यत्र पितृज्ञतविभागस्तत्र स्वोपार्ज्जितधने पितुरिच्छैव नियामिका। पितामहधने तु मातरजोनिवृत्तिसहज्ञता तदिच्छा नियामिका। स्वोपार्ज्जितधने पिता इच्छया धनं ग्रहीतुं शक्नोति कस्मैचिदधिकं कस्मैचिन्न्यूनं दातुमर्हति। पैतामहधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा पुत्रेभ्य एकैकांशं दद्यात्। किन्तु पैतामहभक्षिसुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्धद्विपदान्यतमे न स्वाच्छन्द्यम्। स्वार्ज्जितधनविभागे पित्रा अपुत्रपत्नीभ्यः पुत्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्धं देयम्। पुत्रकर्त्तृकविभागे तु विमातुरंशाभावः ॥ * ॥ शूद्रस्य दासीपुत्रोऽपि पितुरिच्छया परिणीतस्त्रीजातपुत्रेण सह तुल्याधिकारी मृते पितरि तदंशार्द्धाधिकारी। तथाविधभ्रात्रभावे दौहित्रे वासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥ * ॥ पितरि मृते मातरि जीवन्त्यां पुत्राणां विभागो न धर्म्म्यः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्रतुल्यांशभागिनी। विमातुरंशाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या। एवं पितामहधने पौत्रैर्विभाज्यमाने पितामह्याः पौत्रतुल्यांशभागिन्याः ॥ * ॥ औरसेन दत्तकादीनां विभागे औरसस्य द्वयंशित्वं सर्व्वदत्तकादेरेकैकांशित्वम्। विभागस्तु पित्रादेर्धनिनः स्वयं परिशोध्य तदवशिष्टधनस्य करणीयः। उत्तमर्णेच्छया विभज्य वा तद्धनं परिशोधनीयम्। एकेन भ्रात्रादिना बहुपोष्यतया यत्राधिकं भुक्तं तत्र न विभक्तांशो विभागमध्ये प्रवेशनीयः। किन्तु भुक्तावशिष्टस्य विद्यमानधनस्यैव विभागः कार्य्यः ॥ * ॥ असंस्कृतभ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः। विभागकाले केनचिन्निह्नुतस्य पश्चात् प्राप्तस्य समभागः कर्त्तव्यः। भ्रमादिना ज्ञताशास्त्रीयविभागधनस्य पुनः शास्त्रीयविभागः कार्य्यः ॥ * ॥

अथ विदेशागतस्य विभागः।

विभक्तादप्यायां देशान्तरगतस्य चिरकालानन्तरागतस्य सप्तमपुरुषपर्य्यन्तं तत्सन्ततेरपि मौलसामन्तादिना वा स्वज्ञापनपूर्व्वकं क्रमागतधनात् यथाशास्त्रमंशभागित्वमिति स्थितं। एषा व्यवस्था विदेशागतविषयिणी देशस्थविषये तु धनिनश्चतुर्थपर्य्यन्त एव तद्धनविभागार्हता। साधारणधनेऽपि खांशदानं कर्त्तव्यम्। इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ * ॥

"देशस्थ ज्ञातेः संस्थस्य धर्म्मो यामस्य यो भृगुः।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत्॥"

इति दायतत्त्वम्॥

दायविभागः, पुं, (दायस्य विभागः।) दायभागः। यथा। "किं दायस्य विभागो विभक्तावयवत्वं किंवा दायेन सह विभागोऽसंयुक्तत्वम्।" इति जीमूतवाहनः॥

दायादः, पुं, (आदत्ते इति। आ+दा+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। दायस्य आदः ग्राहकः।) सपिण्डः। पुत्रः। इत्यमरः। ३।३।८८॥ (यथा, महाभारते। १। ८५। २।
"पुरुषा तु ज्ञतं वाक्यं मानितश्च विशेषतः।
कनीयान् मम दायादो भूता येन जरा मम॥")

दायादी, स्त्री, (दायं अर्त्तीति। ऋ+अच्। स्त्रियां ङीष्।) कन्या। इति शब्दार्थकल्पतरुः॥

दायितः, त्री, (दाय दाने+क्विप्+क्तः।) दापितः। इत्यमरटीकायां भरतः॥

दारकः, पुं, (दारयति नाशयति जनकस्य प्रतृबमिति। दृ+क्विप्+ण्वुल्।) पुत्रः। इति हेमचन्द्रः। ३।२०६॥ (यथा, महाभारते। १। ८३। १३।
"कल्पेते दारका राजन् देवपुत्रोपमाः शुभाः।
वर्च्चसा रूपतश्चैव सदृशा मे मताश्चव॥")

बालकः। इति मेदिनी। के, १०३॥ (यथा, महाभारते। १। ८३। १६।
"भूमिष्ठां मातरश्चैव तथा चक्षुश्च दारकाः॥")

दारकः, इति शब्दार्थकल्पतरुः॥ ग्राम्यशूकरः। इति राजनिर्घण्टः॥

दारकः, त्रि, (दारयतीति। दृ+क्विप्+ण्वुल्।) भेदकः। इति मेदिनी। के, १०३॥ (यथा,—

"व्यूहेषदुर्नामकरोगदारकं
करोति दुष्टं सहसैव दारकम्॥"

इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे॥")

दारकर्म्म, क्ली, (दारार्थं पत्न्यर्थं यत् कर्म्म।) विवाहः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। १। १४। २६।

"दारकर्म्म ततो व्यासः शुकस्य पर्य्यचिन्तयत्॥")

दारणं, क्ली, (दारयति नाशयति जलमलमनेनेति। दृ+क्विप्+करणे ल्युट्।) कतकम्। इति शब्दचन्द्रिका॥ (दृ+क्विप्+भावे ल्युट्।) विदारणम्। यथा, "दारुदारणपर्व्वेः" समाहृतम्। इति लीलावती॥ (ब्रणादिस्फोटनसम्पादकौषधविशेषः। यथा, सुश्रुते। १। ३६।
"चिरबिल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतबङ्कङ्कानां पुरीषाणि च दारणम्॥
चारदव्याणि वा यानि क्षारो वा दारणं परम्॥")

दारयतीति। दृ+क्विप्+कर्त्तरि ल्युः। विदारके, त्रि। यथा, महाभारते। ८। ४६। १७।
"समाधत्तास्त्रितं वाणं गिरीणामपि दारणम्॥")

दारदः, पुं, (दरदे देशविशेषे भवः। दरद+ष्यञ्।) दरददेशोद्भवविषभेदः। इत्यमरः। १। ८। ११॥ पारदः। हिङ्गुलम्। इति मेदिनी। दे, ३१॥ ससुद्रः। इति हारावली। ५६॥

दारबलिभुक्, पुं, (दारेण चक्षुराघातजन्यविदारणेन बलिं भुङ्क्ते इति। भुज+क्विप्।) वकपक्षी। इति त्रिकाण्डशेषः॥

दारः, पुं, (दारयन्ति स्वात्मबन्धूनिति। दृ+"दारजारौ कर्त्तरि णिलुक् च।" ३। ३। २०। इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च।) भार्य्या। बहुवचनान्तोऽयम्। इत्यमरः। २। ६। ६॥ (यथा, महाभारते। १। १५६। २७।

"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि॥")

दारा, स्त्री, (दारयति ज्ञातिबन्धूनिति। दृ+णिच्+अच्+टाप्।) दारः। इत्यमरटीकायां भरतः॥ (यथा, भागवते। ७। १४। ११।

"अर्थोकामात्मनो दारां वृथां स्वप्नयतो यतः॥")

दारिः, स्त्री, (दारयतीति। दृ+णिच्+इन्।) विदारकः। इति शब्दार्थकल्पतरुः॥

दारिका, स्त्री, (दारक+टाप्। अत इत्वम्।) कन्या। इति जटाधरः॥ (यथा, हरिवंशे। ४१। १५६।

"अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्॥")

दारितः, त्रि, (दार्य्यते स्मेति। दृ+णिच्+क्तः।) छेदितदारुकः। तत्पर्य्यायः। भिन्नः २ भेदितः ३। इत्यमरः। ३। १। १००॥ विदारितः ४। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १०७। ४६।

"अंशुमानेवमुक्तस्तु सगरेण महात्मना।
जगाम दुःखात् तं देशं यत्र वै दारिता मही॥"

ताड़ितः। यथा, कालिकापुराणे ६० अध्याये।

"ततः सुदर्शनो राजा गदया दारितोऽपतत्॥")

दारिद्र्य, क्ली, (दरिद्रस्य भावः। दरिद्र+ष्यञ्।) दरिद्रता। यथा,—

"प्रणीय दारिद्र्यादरिद्रतां नृपः।"

इति नैषधे। १। १५॥

(यथा, रुक्मकाटिके १ अङ्के।

"दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम्॥")

निर्यकारान्तोऽप्ययम्॥

दारी, स्त्री, (दारयति पदतलमिति। दृ+णिच्+"सर्व्वधातुभ्य इन्।" उणां ४। ११८। इति इन्। ङीदिकरादिति पक्षे ङीष्।) क्षुद्ररोगविशेषः। विवाई इति लोके। तल्लक्षणम् यथा,—

"परिक्रमणशीलस्य वायुरत्यर्थरूक्षणैः।
पादयोः कुरुते दारीं सरुजां तलसंश्रिताम्॥"

तच्चिकित्सा यथा,—

"पाददार्य्यां शिरां प्राज्ञो मोक्षयेत्तलशोधिनीम्।
स्नेहस्वेदोपपन्नौ च पादौ वा लेपयेन्मुहुः।
मधूच्छिष्टवसामज्जाघृतैः क्षारविमिश्रितैः॥
क्षारो यवक्षारः।
सर्ज्जाङ्गसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतैः।
निर्म्मथ्य कटुतैलाक्तं क्षितं पादप्रमार्ज्जने॥
मधुसिक्थकगैरिकक्षतगुग्गुलुमहिषाज्य-साल-निर्य्यासैः।
गैरिकसहितैर्लेपः पादस्फुटनापहः सिद्धः॥
मधुसिक्थकं मोम। प्रथमं गैरिकं शिलाजतु। द्वितीयं गैरिकं गेरु इति लोके। सालनिर्य्यासो राजः।
उन्मत्तकस्य बीजेन माणकक्षारवारिणा।
विपक्वं कटुतैलन्तु हन्याद्दारीं न संशयः॥
इति धन्वन्तरेतैलम्॥" इति भावप्रकाशः॥

दारु, क्ली, पुं, (दीर्य्यते इति। दृ+"दृसनिजनीति॰" उणां। १। ३। इति उण्।) काष्ठम्। इत्यमरभरतौ॥ (यथा, महाभारते। १। १४५। १२१।

"घृतं तैलं घृतञ्चैव जतु दारूणि चैव हि।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः॥")

दारु, क्ली, (दृ+उण्।) देवदारु। (यथा, सुश्रुते उत्तरतन्त्रे। १७।

"दारुपद्मकशुण्ठीभिरेवमेव श्रृतोऽपि वा॥"

अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"सुरदारु हकिलिमं सुराङ्गं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥")

पित्तलम्। इति मेदिनी। रे, ४७॥

दारुः, त्रि, (दृ+उण्।) शिल्पी। दारकः। इति धरणी॥ (यथा, ऋग्वेदे। ७। ६। १।

"इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि॥"

"दारुं पुरां भेत्तारं वन्दे।" इति तत्र सायणः॥) दाता। इति त्रिकाण्डशेषः॥

दारुकं, क्ली, (दारु+स्वार्थे कन्।) देवदारु। इति राजनिर्घण्टः॥

दारुकः, पुं, श्रीकृष्णसारथिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। २। २। २८।

"दारुकेण च सूतेन सहितो देवकीसुतः॥"

योगाचार्य्यविशेषः। स तु महादेवस्य अवतारविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। ४।

"जटामाली चाट्टहासो दारुको लाङ्गली तथा॥")

दारुकदली, स्त्री, (दारुवत् कठिना कदली।) वनकदली। इति राजनिर्घण्टः॥

दारुका, स्त्री, (दारुणा काष्ठेन कायतीति। कै+कः। टाप्।) काष्ठमयस्त्री। काठेर पुतुल इति भाषा। तत्पर्य्यायः। पुत्रिका २ दारुस्त्री ३ शालभञ्जिका ४ शालभञ्जी ५ शालाञ्जी ६। इति शब्दरत्नावली॥ दारुपुत्रिका ७ सूत्रगण्डी ८ दारुगर्भा ९। इति हारावली। ७१॥

दारुगन्धा, स्त्री, (दारुणि गन्धो यस्याः।) नीलागामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दारुगर्भा, स्त्री, (दारुमयो गर्भो यस्याः।) दारुमयस्त्री। इति हारावली। ७१॥

दारुणः, पुं, (दारुणो जायते इति। जन+डः।) महेशः। इति शब्दरत्नावली॥ कालनिर्म्मिते, त्रि॥ (यथा, कालिकापुराणे। ६७ अध्याये।

"आसनं प्रथमं दद्यात् पौष्यं दारुणमेव वा॥")

दारुणः, पुं, (दारयतीति। दृ+णिच्+"कृदृदारिभ्य उनन्।" उणां ३। ५३। इति उनन्।) चित्रकः। इति राजनिर्घण्टः॥ भयानकरसः। (विष्णुः। यथा, महाभारते। १३। १४६। ७४

"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः॥"

"सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात्) दारुणः।" इति तट्टीकायां श्रीधरः॥) भयङ्करौ, त्रि। इत्यमरः। १। ७। २०॥ (यथा, देवीभागवते। ५। ४। २७।

"हाहाकारो महानासीत् सम्मुहाराश्च दारुणः।
उत्पपात ततः सिंहो नृपस्योपरि दारुणः॥"

कठोरः। यथा, तत्रैव। १। ४। ५२।

"दारुणं देहदमनं सर्व्वलोकभयङ्करम्॥")

दारुणकं, क्ली, (दारुणवत् कायतीति। कै+कः।) मस्तकजातक्षुद्ररोगविशेषः। लोके रूसी इति ख्यातः। तस्य लक्षणमाह।

"दारुणा कठुरा रूक्षा केशभूमिः प्रजायते।
मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत्॥
दारुणा कर्कशा॥"

तस्य चिकित्सा यथा,—

"कार्य्यो दारुणके सद्भिः प्रलेपो मधुसंयुतः।
पियालबीजमधुककुष्ठमाषैः ससैन्धवैः॥
आम्रबीजं तथा पथ्या हृयं स्यात् मात्रया समम्।
दुग्धेन पिष्टं तल्लेपो दारुणं हन्ति दारुणम्॥
दुग्धेन खाखसं बीजं प्रलेपाद्दारुणं हरेत्।
गुञ्जाफलैः श्रृतं तैलं भृङ्गराजरसेन च॥
कण्डुदारुणदुष्टत् कुष्ठकण्डूलत्वाधिनाशनम्॥"

इति गुञ्जातैलम्।" इति भावप्रकाशः॥

(अथ भृङ्गराजतैलम्।

"भृङ्गराजत्रिफलोत्पलशारि
लौहपुरीषसमन्वितकारि।
तैलमिदं पच दारुणहारि
कुष्ठितकेशघनस्थितकारि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे॥)

दारुनिशा, स्त्री, (दारुवल्ला निशा हरिद्रा।) दारुहरिद्रा। इति रत्नमाला॥ (अस्या गुणा यथा,—

"दार्व्वीनिशागुणां किन्तु नेत्रकर्णास्यरोगनुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

दारुपत्री, स्त्री, (दारुणः पत्रमिव पत्रमस्याः। ङीष्।) हिङ्गुपत्री। इति राजनिर्घण्टः॥

दारुपीता, स्त्री, (दारुणा पीतेव। काष्ठप्रधानत्वात् तथात्वम्।) दारुहरिद्रा। इति राजनिर्घण्टः॥

दारुपुत्रिका, स्त्री, (दारुमयी पुत्रिका।) दारुका। इति हारावली। ७१॥

दारुसुखाह्वया, स्त्री, (दारुसुखमाह्वयते खण्डते इति। आ+ह्वे+कः+अच्।) गोधा। इति राजनिर्घण्टः॥

दारुसिता, स्त्री, (दारुणि सिता शर्करेव।) त्वक्। दारुचिनि इति भाषा। तन्नामगुणाः। "त्वक्खाड्डो तु ततुत्वक् स्यात् तथा दारुसिता मता।
उक्ता दारुसिता खाड्डी तिक्ता वातानिलापित्तहृत्।
सुरभिः शुक्रला बल्या सुखशोषव्रणापहा॥"
इति भावप्रकाशः॥

दारुस्त्री, स्त्री, (दारुमयी स्त्री।) दारुका। इति त्रिकाण्डशेषः॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा।) स्वनामख्यातवृक्षविशेषः। तत्पर्य्यायः। पीतद्रुः २ कालेयकः ३ हरिद्रुः ४ दार्व्वी ५ पचम्पचा ६ पर्ज्जनी ७। इत्यमरः। २।४।१०२॥ पीतिका ८ पीतदारु ९ स्थिरारागा १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ काञ्चीयकम् १६ कामवती १७ दारुपीता १८ कर्कटिनी १९ दारु २० निशा २१ हरिद्रा २२। इति शब्दरत्नावली॥ अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। व्रणमेहकफकृमिविसर्पत्वग्दोषविषकर्णाक्षिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ कफपित्तप्रशोथनाशित्वम्। विशेषेण कफाभिष्यन्दनाशित्वञ्च। इति राजवल्लभः॥

दारुहस्तकः, पुं, (हस्त इव प्रतिकृतिः। "हस्ते प्रतिकृतौ।" ५।३।९९। इति कन्। दारवो हस्तकः।) काष्ठनिर्म्मितहस्तः। काठेर हाता इति भाषा। तत्पर्य्यायः। तर्द्दूः २। इत्यमरः। ९। २। ३४

दार्घसत्रः, त्रि, (दैर्घसत्रे भवः। दीर्घसत्र+अण्। "देविकाशिंशपेति।" ७।३।१। इति आद्यच आत्।) दीर्घसत्रयागे भवः। इति सिद्धान्तकौमुदी॥

दार्ढ्यं, क्ली, (दृढस्य भावः। दृढ+"वयसिदृढादिभ्यः ष्यञ् च।" ५।१।१२३। इति ष्यञ्।) दृढता। (यथा, पञ्चदश्याम्। ६।१०४।
"वाक्यान्यपि यथाप्रत्र दार्ढ्यायोदाहरन्ति हि॥")

दार्दुरं, क्ली, दक्षिणावर्त्तशङ्खः। जतु। जलम्। इति शब्दार्थकल्पतरुः॥ दर्दुरधर्म्मश्च॥

दार्व्वटं, क्ली, चिक्कावेश्म। इति हारावली॥१६८॥

दार्व्वकः, पुं, (दारुवत् कठिनमङ्गं यस्य।) मयूरः। इति शब्दकल्पतरुः॥

दार्व्वाघाटः, पुं, (दारु काष्ठं आहन्तीति। आ+हन्+"दारावाहनोऽन्तस्य च टः संज्ञायाम्।" ३।२।४६। इत्यस्य वार्त्तिकोक्त्या अण टश्चान्तादेशः।) घृतपक्वकपत्नी। इत्यमरः। २। ५। १७॥ काठठोक्रा इति भाषा। (यथा, महाभारते। १०। ७। १८।
"दार्व्वाघाटमुखाश्चापि शस्त्रवन्तश्च भारत!॥")

दार्व्वाघातः, पुं, (दारूणि आधातो यस्मात्।) दार्व्वाघाटपक्षी। इति शब्दरत्नावली॥

दार्व्विका, स्त्री, (दारयतीति। दृ+उत्खादिभ्यात् षाधुः। दार्व्वी च हरिद्राविकारः। ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) क्रोष्टोञ्जवतुल्यम्। गोजिह्वा। इत्यमरः। २। ४। १९६॥

दार्व्विपत्रिका, स्त्री, (दार्व्व्याः पत्रमिव पत्रमस्याः। दार्व्विपत्रा ततः स्वार्थे कन् टापि अत इत्वञ्च।) गोजिह्वा। इति रत्नमाला॥

दार्व्वी, स्त्री, (दारयति। दृ+"उत्खादयश्च।" उणा ४। ६७। इति निपातनात् साधुः।) दारुहरिद्रा। (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च।
ख्याता दारुहरिद्रा च पर्ज्जनी च पचम्पचा॥"
अस्या गुणा यथा,—
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गोजिह्वा। इति मेदिनी। वे, ११॥ देवदारु। हरिद्रा। इति विश्वः॥

दार्व्व्याक्षाथोद्भवं, क्ली, (दार्व्व्याः दारुहरिद्रायाः क्षाथादुद्भवो यस्य।) रसाञ्जनम्। इति राजनिर्घण्टः॥ क्षत्रिमरसाञ्जनम्। इति रत्नमाला॥

दार्षदः, त्रि, (दृषदि पिष्टः। दृषद्+"शैषिके।" ४।२।६२। इत्यण्।) दृषद्भवः। इति सिद्धान्तकौमुदी॥

दार्व्वं, क्ली, (दर्व्वेभ्यः स्वार्थितम्। दर्व्व+अण्। यद्वृक्षम्,—
"संस्तृत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम्।
मधुराम्लकषायञ्च तद्दार्व्वं मधु कीर्त्तितम्॥")
वन्यमधु। इति शब्दार्थकल्पतरुः॥ इन्द्रनीलश्लोकारक्षमक्षिकोत्पन्नं वृक्षकोटरान्तरभवं मधु। अस्य गुणाः। कटुत्वम्। कषायत्वम्। अम्लत्वम्। मधुरत्वम्। पित्तदोषकारित्वञ्च। इति राजनिर्घण्टः॥

दालः, पुं, (दले जातम्। दल+अण्।) कोद्रवः। इति हेमचन्द्रः॥

दालवः, पुं, स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६६॥

दाला, स्त्री, (दल्यते स्थूलमतिभिरिति। दल+घञ्+टाप्।) महाकालः। इति भावप्रकाशः॥

दालिका, स्त्री, (दालेव। स्वार्थे कन् टाप् अत इत्वञ्च।) महाकालः। इति भावप्रकाशः॥

दालिमः, पुं, (दाड़िमः। डस्य लः।) दाड़िमः। इत्यमरटीकायां भरतः॥

दाली, स्त्री, (दाल्यते इति। दल+णिच्+इन्। ङीदिकारादिति ङीष्।) देवदाली लता। इति राजनिर्घण्टः॥

दाल्भ्यः, पुं, (दलभस्य सुनेर्गोत्रापत्यम्। "गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) मुनिविशेषः। (यथा, महाभारते। १।४।११।
"वको दाल्भ्यः स्थूलशिरः कृष्णद्वैपायनः शुकः॥")

दाल्भिः, पुं, (दालयति व्यसुरानिति। दल+णिच्+बाहुलकात् मिः।) इन्द्रः। इति त्रिकाण्डशेषः॥

दावः, पुं, (दुनोति उपतापयतीति। दु+"दुञ्रोरनुपसर्गे।" ३।१।१४२। इति घः।) वनम्। (यथा, महाभारते।१।२२४।६।
"इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति॥")
वनवह्निः। इत्यमरः। ३। ३। २०५॥ (यथा, महाभारते। ३। ६६। १।
"उत्सृज्य दमयन्ती तु नलो राजा विशांपते!।
ददर्श दावं दह्यन्तं महान्तं गहने वने॥")
अग्निः। इत्यमरटीकायां नीलकण्ठः॥ उपतापः। इति भरतकृतद्विरूपकोषः॥

दावाग्निः, पुं, (दावोद्भवोऽग्निः। प्राकपार्थिवादिषतृसमासः।) वनोद्भवाग्निः। तत्पर्य्यायः। दवाग्निः २ दावानलः ३। इति शब्दरत्नावली॥ दवः ४ दावः ५। इत्यमरः। ३। ३। २०५॥ (यथा, महाभारते। १। १५५। १५।
"दावाग्निधूमसङ्घातं चक्रतुः पार्थिवं रजः॥")

दावानलः, पुं, (दावोद्भवः अनलः। दाव एवानलो वा।) दावाग्निः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। २६। ६६।
"यद्दावानलतप्तस्य सुधाह्रदनिमज्जने॥")

दाविकः, त्रि, (देविकायां भवः। अण्। "देविकाशिंशपेति।" ७। ३। १। इति आद्यच आत्।) देविकानदीसम्भवः। इत्यमरः। १। १०। ३६॥

दाश्, ऋ ङ क दाने। इति कविकल्पद्रुमः॥ (पुरां-अत्मं-सकं-सेट्।) द्वितीयस्वरी। ऋ, अददाशत्। क ङ, दाशयते। इति दुर्गादासः॥

दाश्, ऋ ञ दाने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ऋ, अददाशत्। ञ, दाशति दाशते। इति दुर्गादासः॥

दाश्, न र हिंसने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) द्वितीयस्वरी। न, दाश्नोति। र वैदिकः। इति दुर्गादासः॥

दाशः, पुं, (दाश्यते दीयते भृतिमन्नमस्मै। दाश दाने+सम्प्रदाने घञ्।) भृत्यः। इत्यमरटीकायां रमानाथः॥ (दशति हिनस्ति मत्स्यानिति। दंशृ+"दंशेश्च।" उणा ५। ११। इति टः नस्य आत्वञ्च। धीवरः। यथा, देवीभागवते। २। १। ३६।
"मत्स्यगन्धेति नाम्ना वै गुणेन समजायत।
विवर्द्धमाना दाशस्य गृहे सा वासवी सुता॥")

दाशपुरं, क्ली, (दाशान् कैवर्त्तान् पिपर्त्ति पालयतीति। पॄ+कः। "उदोष्ठ्यपूर्व्वस्य।" ७। १। १०२। इति उत्वम्।) दशपुरम्। इत्यमरटीकायां स्वामी॥

दाशरथः, पुं, (दशरथस्य अयम्। तस्येदमिति पितापुत्रत्वरूपसम्बन्धार्थे अण्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, महानाटके।
"प्रदीयतां दाशरथाय मैथिली॥"
दशरथसम्बन्धिनि, त्रि। यथा, भट्टिः। २। ५३।
"अजीगणद्दाशरथं ग वाक्यम्॥")

दाशरथिः, पुं, (दशरथस्य अपत्यं पुमान्। "अत इञ्।" ४। १। ९५। इतीञ्।) श्रीरामः

इति हेमचन्द्रः ॥ (यथा, रामायणे ।२।४५।११।
"यथा यथा दाशरथिर्धर्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")
दाशार्हः, पुं, (दाश दाने + भावे घञ् । दाशं दानमर्हतीति । अर्ह + अच् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।१४८।६७।
"विजयो जयः सत्वसत्वो दाशार्हः सात्वतां पतिः ॥")
दशार्हदेशश्च ॥
दाशेरकः, पुं, मालवदेशः । इति त्रिकाण्डशेषः ॥
दाश्वः, त्रि, (दाशति ददातीति । दाश + वाहुलकात् वन् ।) दाता । इति जटाधरः ॥
दाश्वान्, [स्] त्रि, (दाश दाने + "दाश्वान् साङ्गृत् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबोधम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राभियमित्युवाच ॥")
दास, ऋ च दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥
दास, र न वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं सेट् ।) र वैदिकः । न, दाश्नोति । इति दुर्गादासः ॥
दासः, पुं, (दसतीति । दसि + "दंसेष्टनौ नः ।" उणां ५ । १० । इति टः नकारस्य चाकारः ।) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥"
अधुना कायस्थानां उपाधिभेदः । स तु अष्टसिद्धौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौड़े२ौ कौर्त्तिमन्तश्चिरयसतिकृता मौलिका ये हि सिद्धाः
ख्याते दत्ता सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
ज्ञातात्मा । धीवरः । इति मेदिनी । से, ६ ॥
दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्तप्रयोज्यपदविशेषः । यथा,—
"शर्म्मान्तं ब्राह्मणस्यात् वर्म्मान्तं क्षत्रियस्य च ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
दास्यते दीयते भूतिमूल्यादिकं यस्मै सः । चाकर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रेष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रेष्यः १२ प्रेषः १३ प्रेषः १४ । इति भरतः ॥ परिकर्म्मा १५ परिचरः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिगरः २० अनुगः २१ । स पञ्चदशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायाद्यागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोचितो महतश्चार्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाकृतः ।
विक्रेता चात्मनः प्राज्ञैर्दासाः पञ्चदश स्मृताः ॥"
अस्यार्थः । गृहजातो दास्यासुतपुत्रः । दायाद्यागतः क्रमागतः । अन्नाकालभृतः दुर्भिक्षपोषितः । स्वामिना आहितो बन्धकीकृतः । मोचितः ऋणमोचनेनाङ्गीकृतदासः । तवाहमित्युपगतः कस्याप्यहं सन् स्वयं दासत्वेन दत्तरूपः । प्रव्रज्यावसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सुभिक्षेऽपि भक्तार्थमङ्गीकृतदासः । वडवाकृतः वडवा दासी तल्लाभादङ्गीकृतदासः । इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
यद्द्वारापशुमित्यागरथावस्करगोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिपः ।
सर्व्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
दासनन्दिनी, स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥
दासपूरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तासुखकम् । इति शब्दरत्नावली ॥
दासिका, स्त्री, (दासति ददाति आत्मानमिति । दास दाने + ण्वुल् । टाप् अत इत्वञ्च ।) दासी । इत्यमरटीकायां भरतः ॥
दासी, स्त्री, (दासति ददात्यात्मानमिति । दास + अच् । गौरादित्वात् ङीष् ।) भुजिष्या । इति मेदिनी । से, ४ । तत्पर्य्यायः । कर्म्मकरी २ । इति मुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अस्याः पर्य्यायशब्दा भवन्ति ॥ (यथा, देवीभागवते । २ । २० । ७२ ।
"न गता च वधूस्तत्र प्रेष्या संप्रेषिता तया ।
तस्याश्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाञ्जनः । नीलभिण्टी । इति राजनिर्घण्टः ॥ पीतभिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास + ङीप् ।) शूद्रपत्नी कैवर्त्तपत्नी च ॥ (नदीभेदः । यथा, महाभारते । ६ । ९ । ३१ ।
"सरयां तमसां दार्शीं सामान्यां वरणासतीम् ॥")
दासीघटः, पुं, (दासीपादनिक्षेप्यो घटः । मध्यपदलोपिसमासः ।) गवर्य्या महापातकिनः परित्यागार्थं सपिण्डसमानोदकनियुक्तदधिज्ञाभिमुखदासीपादनिःक्षेप्यजलपूर्णकलसः । तदनुष्ठानं यथा, मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञातीनामेव सन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायाद्यस्य प्रदानञ्च याज्ञा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्त्तव्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै श्राद्धप्रदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहार एतानि निवर्त्तेरन् ॥" इति कुल्लूकभट्टः ॥
दासीसभं, क्ली, (दासीनां सभा । "अश्वशालाश्च ।"२।४। २४। इति क्लीवत्वम् ।) दासीनां सभा । इत्यमरः । ३ । ५ । २७ ॥
दासेयः, पुं, (दास + स्वार्थे ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दासस्य अपत्यमिति ।) दासीतनये, त्रि ॥
दासेयी, स्त्री, (दासेय + स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १०० । ४६ ।
"समीक्ष्य राजा दासेयीं कामयामास भारत ॥")
दासेरः, पुं, (दासी अपत्यम् । ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास + बाहुलकात् एरच् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६६ ॥
दासेरकः, पुं, (दासेर + स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि संवलितं निषादै-
र्विप्रं पुरा पतगराडिव निर्जगार ॥")
दासीसुतः । इति हारावली । २४८ ॥ (जातिभेदः । यथा, महाभारते । ६ । ४७ । ४६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")
दास्यं, क्ली, दासस्य भावः । (दास + ष्यञ् ।) दासत्वम् । यथा,—
"अर्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुरुभक्तिवशंगतम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
दास्यमानः, त्रि, दाधातोः कर्म्मणि स्यमानप्रत्ययेन निष्पन्नः । भविष्यद्दानसम्बन्धिवस्तु । इति व्याकरणम् । "अपि च ऊनविंशतिदास्यमानपिण्डस्थानानि यथा ।" इति तिथ्यादितत्त्वम् ॥
दाहः, पुं, (दह + भावे घञ् ।) दहनम् । भस्मीकरणम् । (यथा, मार्कण्डेये । ३० । २३ ।
"तदभावे च नृपतिः कारयेत् सकुटुम्बिनः ।

तच्चातीयैर्नरैः सम्यक्दाहादाः सकलाः क्रियाः॥")
अथ ध्रुवदाहविधिर्यथा,—
"गतप्राणं स्नात्वा पुत्रादिः स्नात्वा अन्नं क्षत्वा स्थापयेत्। ततो गतप्राणं स्थापयित्वा वाससा सर्व्वशरीरमाच्छाद्यास्तीर्णकुशायां भूमौ दक्षिणाग्निरसं स्थापयेत्। ततो घृतेनाभ्यज्य,
ॐ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम्॥
कौशिकीं चन्द्रभागाञ्च सर्व्वपापप्रणाशिनीम्।
भद्रावकाशां गण्डक्यां सरयूं पनसां तथा॥
वेश्यवञ्च वराहञ्च तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा॥
इति चिन्तयित्वा पुनः स्नापयेत्। वस्त्रान्तरं परिधाप्य उपवीतमुत्तरीयञ्च दत्त्वा चन्दनादिनोपलिप्य कर्णनासिकानेत्रद्वयमुखात्मकेषु सप्तच्छिद्रेषु सप्तसुवर्णखण्डिकास्तदभावे कांस्यादिखण्डिका निःक्षिपेत् ततो वस्त्रान्तरेणाच्छाद्य वहेयुः। वहनकाले ग्रामपार्श्वं तदर्द्धं वर्त्मार्द्धं त्यजेत् अर्द्धं पिण्डार्थमवशेषयेत्। ततोऽग्निदाता पुत्रादिश्चिताभूमौ गत्वा तदर्द्धं तिलसहितं पिण्डदानेतिकर्त्तव्यतया उत्सृजेत्। सा यथा,—गोमयेनोपलिप्तायां भूमौ प्राक्ततवामजानुः प्राचीनावीती कुशमूलेन ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्रेरेखां कुर्य्यात् तदुपरि कुशानास्तीर्य ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्विणेभिर्देवयानैर्ह्यसाभ्यं हविषेह भद्रं दधिच्च नः सर्व्ववीरं नियच्छ इत्यावाह्य सतिलजलपात्रं वामहस्तादक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोच प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं क्षीरघृतमधुसहितं स्वधा नमस्तुभ्यं तिलोदकं तवाक्षय्यमुपतिष्ठतां इति वामहस्तगृहीतामपात्रादन्नं सतिलं दक्षिणहस्तेन गृहीत्वा कुशोपरि दद्यात्। पिण्डपात्रप्रक्षालनजलेन तदुपरि प्रत्यवनेजनं तूष्णीं गन्धादिदानं सामगेतरेषान्तु नावाहनमिति विशेषः। ततः पुत्रादिः स्नात्वा चितां रचयित्वा तच्च दारुचयं कुर्य्यात्। तदुपरि वस्त्रद्वयसहितं दक्षिणाग्रिरसं सामगमधोमुखं पुमांसं न्यसेत्। नार्य्यास्तूत्तानदेहत्वं सामगेतरेषां उत्तराग्रिरस्त्वम्। ततो देवाद्याग्निमुखाः सर्व्वे हुताशनं गृहीत्वा एनं दहन्तु इति मनसा ध्यात्वाग्निं गृहीत्वा,
ॐ कृत्वा तु दुष्करं कर्म्म जानतावाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिवान् लोकान् स गच्छतु॥
इति पठित्वा त्रिः प्रदक्षिणीकृत्य दक्षिणमुखः शिरःस्थाने दद्यात्। स्त्रीदाहे नरमित्येव पाठः नृ. नारीमित्यूहः। ततो दाहे दग्धे प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चितामिं सप्तवारान् प्रदक्षिणीकृत्य सप्तकाष्ठिका एकैकक्रमेण चितायौ प्रक्षिपेत्। ततः कुठारेण क्रव्यादाय नमस्तुभ्यमिति मन्त्रं सकृत् पठित्वा चितास्थव्यक्तदेहोपरि सप्तप्रहारा देयाः तमग्निमपश्यन्निर्व्वामावर्त्तेन स्नातुं नदीं गन्तव्या। नग्नं ध्रुवं न दहेत् ध्रुवसन्निवस्त्रादि श्मशानवासिचाण्डालादिभ्यो दद्यात्। स्नुतिकां रज्जुखलाञ्च वस्त्रान्तरावृतां सतिलपक्वगर्त्तं जलपूर्णकुम्भं आपोहिष्ठीयवामदेव्यादिभिरभिमन्त्र्य स्नापयित्वा दहेदिति विशेषः। गर्भवत्यास्तु गर्भं निःसार्य्य स्थानान्तरे निःक्षिप्य तस्या दाहः कार्य्यः। ततो जलसमीपं गत्वा पुत्रादयः प्रयोगदानाभिज्ञं श्यालकादिकं प्राधयेयुः। उदकं करिष्याम इति तेन च कुरुध्वं मा चैवं पुनरित्यभ्यर्थवर्षे प्रेते कुरुध्वमेवेतरस्मिन् इत्युत्तरे दत्ते दृढपुरःसरमवतरणं जले। ततः परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय प्राचीनावीतिनो दक्षिणामुखाः ॐ अपसः श्रोत्रुचदघमित्यनेन मन्त्रेण वामहस्तानामिकया अप आलोड्य एकवस्त्राः सप्तन्निमज्योन्मज्याचम्य दक्षिणामुखास्तर्पयेयुः। ततः ॐ अमुकगोत्रं प्रेतममुकदेवशर्म्माणं तर्पयामीति सामगानां प्रयोगः यजुर्व्वेदिनान्तु अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं क्षीरघृतं स्वधेति एकाञ्जलिदानमावश्यकं अञ्जलित्रयदाने फलातिशयः। ततः पुनः स्नात्वा जलादुत्थानं बालपुरःसरं कार्य्यम्। ततः साश्मके उपविश्य,
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स संमूढो जलबुद्बुदसन्निभे॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः।
कस्मैभिः स्वशरीरोत्थैश्च का परिदेवना॥
गन्धर्व्वी वसुमती नागश्रुदधिर्देवतानि च।
फेनप्रख्यः कथं गार्ग्य मर्त्यलोको न यास्यति॥
श्रेयांस्यु वान्यवेर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः॥
इति चिन्तयित्वा गृहद्वारं समागत्य निम्बपत्राणि दन्तैः खण्डयित्वा भूमौ पापं भूमयत्विति भूमौ क्षिप्त्वा अश्मेव स्थिरो भूयासं इत्यश्मानं पदा स्पृष्ट्वा अग्निनः भूम्मे यच्छतु इति अग्निं स्पृष्ट्वा घृतभक्षणार्थोम्मेधे स्थित्वा लोगिति मन्त्रेण द्वावपि स्पृष्ट्वा गोमयसुदकं गौरसर्षपांश्च स्पृष्ट्वा बालपुरःसरा गृहं विशेयुः। दिवा चेद्दाहस्तदा रात्रौ ग्रामप्रवेशः रात्रौ चेत्तदा दिवसे। अग्रतो ब्राह्मणानुमतिं गृहीत्वा कालप्रतीक्षणं विना प्रवेष्टव्यम्।" इति शुद्धितत्त्वम्॥

दाहकः, पुं, (दहतीति। दह + ण्वुल्।) चित्रकः। रक्तचित्रकः। इति राजनिर्घण्टः॥ दाहकर्म्मन्, क्ली॥ (यथा, याज्ञवल्क्ये। २।२८५।
"चैत्रवैशाखवनग्रामविवीतखलदाहकाः।
राजपत्न्यभिगामी च दग्ध्वास्तु कटाग्निगा॥"
उष्णगुणः। यथा, राजनिर्घण्टे।
"काङ्क्षिकं दधितैलन्तु वह्नीपक्षितनाशनम्।
दाहकं गात्रशैथिल्यं वह्नं चन्द्रार्पणं परम्॥")

दाहज्वरः, पुं, (दाहप्रधानो ज्वरः।) गात्रज्वालायुक्तज्वररोगः। तस्यौषधम्। यथा,—
"पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै।
दाहं विनाशयेद्दाहज्वरञ्च परमेश्वर!॥"
इति गारुडे १८३ अध्यायः॥

दाहनं, क्ली, (दह + णिच् + भावे ल्युट्।) भस्मीकरणप्रेरणम्। दाहकराम इति भाषा॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १। ६२।
"कलौ कलुषभूयिष्ठे दाहनायाग्निरूपिणौ॥")

दाहसरः, पुं, (दाहार्थं सियते गम्यतेऽस्मिन्निति। सि + अप्।) श्मशानम्। इति त्रिकाण्डशेषः॥

दाहहरणं, क्ली, (दाहस्य हरणं यस्मात्।) वीरणमूलम्। इति शब्दचन्द्रिका॥

दाहागुरु, क्ली, (दाहाय यदगुरु।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। दाहनागुरु २ दाहकाष्ठम् ३ धूपागुरु ४ तैलागुरु ५ पूरम् ६ वनवल्लभम् ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। केशवर्द्धनत्वम्। वर्ण्यत्वम्। केशदोषनाशित्वम्। सततसौगन्ध्यविस्तारकारित्वञ्च। इति राजनिर्घण्टः॥

दिक्, [श्] स्त्री, (दिशति अवकाशं ददाति या। दिश् + "ऋहलोर्ण्यत्।" ३। १। १२४। इति क्विन्-प्रत्ययेन साधुः।) पूर्व्वपश्चिमदक्षिणोत्तरादिरूपा। तत्पर्य्यायः। ककुप् २ काष्ठा ३ आशा ४ हरित् ५। इत्यमरः। १।३।८॥ निदेशिनी ६ दिशा ७ ककुभः ८ हरितः ९ गौः १०। इति शब्दरत्नावली॥ अपि च।
आताः १ आशाः २ उपराः ३ आष्ठाः ४ काष्ठाः ५ योमः ६ ककुभः ७ हरितः ८ इत्यष्टौ दिङामानि। इति वेदनिघण्टौ १ अध्यायः॥ अस्या युत्पत्तिर्यथा,—
"क्षत्वैवमवधिं तस्मादिदं पूर्व्वञ्च पश्चिमम्।
इति देशो निदिश्येत यया सा दिगिति स्मृता॥"
तस्या वायोर्गुणाः।
"विश्वस्यायुरनायुष्यः प्राणिनां नैकदोषकृत्।
सर्व्वदुःनिन्दको हन्ता क्षतोत्पातपुरःसरः॥"
इति राजवल्लभः॥ * ॥
सा दशधा यथा। पूर्व्वा १ आग्नेयी २ दक्षिणा ३ नैर्ऋती ४ पश्चिमा ५ वायवी ६ उत्तरा ७ ऐशानी ८ ऊर्द्धम् ९ अधः १०॥ * ॥ तासां उत्पत्तिर्यथा,—
मङ्कणक उवाच।
"शृणु राजन्नवहितः प्रजापालः! कथामिमाम्।
यथा दिशः ससृत्पन्नाः श्रोत्रेभ्यः पृथिवीपते!॥
ब्रह्मणः सृजतः सृष्टिमादिसर्गे ससृत्यिते।
चिन्ताभून्महती को मे प्रजाः सृष्टा धरिष्यति॥
एवं चिन्तयतस्तस्य अवकाशं व्रजत्यिह।
प्रादुर्ब्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः॥
पूर्व्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा।
ऊर्द्धाध एव यमुखाः कन्या ह्यासंस्तदा नृप!॥
तासां मध्ये चतसस्तु कन्याः परमशोभनाः।
याःपश्यन्त्यो महाभागा गाम्भीर्य्येण समन्विताः॥

ता ऊचु: प्रणयाद्देवं प्रजापतिमकल्मषम् ।
अवकाशन्तु नो देहि देवदेव प्रजापते ! ॥
यत्र तिष्ठामहे सर्व्वा भर्तृभि: सहिता: सुखम् ।
पतयश्च महाभाग ! देहि नोऽयक्तसम्भव ! ॥
ब्रह्मोवाच ।
ब्रह्माण्डमेतत् सुश्रोण्य: शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥
भर्तॄंश्च व: प्रयच्छामि दृष्ट्वा रूपमिनोऽनघा: ।
यथेष्टं गम्यतां देशो यस्या यो रोचतेऽधुना ॥
एवमुक्ताश्च ता: सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज तूर्णं तान् लोकपालान् महा-
बलान् ॥
दृष्ट्वा तु लोकपालांस्तु ता: कन्या: पुनराद्रयन् ।
विवाहं कारयामास ब्रह्मा लोकपितामह: ॥
एकामिन्द्राय स प्रादादन्येभ्यो यमाय च ।
निर्ऋताय च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ! ।
ऊर्द्धं स्वयमधिष्ठाय ग्रेषावाधोवस्थिताम् ॥
एवं दत्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुन: ।
दशमीं भर्तृनाम्नस्तु अर्द्धनाम्नोदन: प्रभु: ॥
तत:प्रभृति ता: देव: सेन्द्राद्या: परि-
कीर्त्तिता: ॥"
इति वराहपुराणम् ॥*॥
न्यायमते अस्या: सर्व्वगतत्वम् । परममहत्त्व-
परिमाणम् । दूरान्तिकादिधीहेतुत्वम् । नित्य-
त्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यप-
देशभाक्त्वम् । अस्या गुणा: । संख्या १ परि-
मिति: २ पृथक्त्वम् ३ संयोग: ४ विभाग: ५ ।
इति भाषापरिच्छेद: ॥ (सामान्यम् । यथा,
सुश्रुते । १ । ४३ ।
"वसनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता ॥")
दिक्र:, पुं, (दिशि कायते शब्दायते इति । कै+
क: ।) करभ: । इति शब्दरत्नावली ॥
दिक्कर:, पुं, (दिशं आदेशं करोति उत्साहान्वि-
तत्वात् । क+ट: ।) युवा । इति माधवीकाश्-
धृतकोष: ॥ (महादेव: । यथा, कलिकापुराणे ।
८२ अध्याये ।
"दिक्करस्तरुण: प्रोक्तस्तथा शम्भुश्च दिक्कर: ॥")
दिक्करवासिनी, स्त्री, (दिक्करे शम्भौ वसतीति ।
वस+णिनि:+ङीप् ।) देवीविशेष: । यथा,
"एवं दिक्करवासिन्या: कथित: पूर्व्ववत् क्रम: ।
यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रत: ॥
दिक्करस्तरुण: प्रोक्तस्तथा शम्भुश्च दिक्कर: ।
तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी ॥"
इति कालिकापुराणे ८२ अध्याय: ॥
दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य सका-
शात् कायते शोभते इति । दिक्करिन्+कै+
क: । ततष्टाप् ।) नदीविशेष: । यथा,—
"अस्ति ताटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीड़ां सदा हर: ॥
कुरुते नरशार्दूल ! स्वर्णपङ्कजशोभिते ।
तस्य पञ्चाम्रपूर्व्वभागेभ्यश्च सरित्त्रयम् ॥
अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजस्पर्शसंजाता तेन दिक्करिका स्मृता ॥"
इति कालिकापुराणे ८२ अध्याय: ॥
दिक्करी, स्त्री, (दिक्कर+ङीष् ।) युवती । इति
हेमचन्द्र: । ३ । १७५ ॥
दिक्पति:, पुं, (दिशां पति: ।) दिगधीश्वर: ।
तद्यथा । प्राच्यधिपो रवि: । अग्निकोणाधिप:
शुक्र: । दक्षिणाधिप: कुज: । नैर्ऋतकोणाधिपो
राहु: । प्रतीच्यधिप: शनि: । वायुकोणाधिप-
श्चन्द्र: । उत्तराधिपो बुध: । ईशानकोणाधिपो
गुरु: । तस्य प्रमाणं यथा,—
"सूर्य्य: शुक्र: क्षमापुत्र: सैंहिकेय: शनि: शशी ।
सौम्यश्चेदग्रमन्त्री च प्राच्यादिदिगधीश्वरा: ॥"
इति ज्योतिस्तत्त्वम् ॥
दिक्पाल:, पुं, (दिश: पालयतीति । दिश्+पालि
+अण् ।) पूर्व्वादिदशदिशां पालक: । यथा ।
पूर्व्वस्यां दिशि इन्द्र: । अग्निकोणे वह्नि: ।
दक्षिणस्यां दिशि यम: । नैर्ऋतकोणे निर्ऋत: ।
पश्चिमस्यां दिशि वरुण: । वायुकोणे मरुत् ।
उत्तरस्यां दिशि कुबेर: । ईशानकोणे ईश: ।
ऊर्द्धदिशि ब्रह्मा । अधोदिशि अनन्त: । इति
पुराणम् ॥ यथा, मत्स्यपुराणे ।
"यच्चार्घ्यन्ति विधिना दिक्पालादींस्तु कर्म्मिण: ।
तच्च प्रपूजयेदेनं विधिं भागवतं शुकम् ॥"
दिक्शूलं, क्ली, (दिशि शूलमिव ।) दिग्विशेष-
गमने निषिद्धवार: । यथा,—
पश्चिमायां शुक्ररवी । उत्तरस्यां बुधमङ्गलौ ।
पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां दृहस्पति: ।
तथा च ।
"शुक्रादित्यदिने न वारुणदिशं न क्षे कुजे चोत्तरां
मन्दीन्दोश्च दिने न शुक्रकुजौ याम्यां गुरौ न
व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्त-
लाभाशया
भग्नाशा: पुनरापतन्ति यदि ते शुक्रेण तुल्या
अपि ॥"
इति ज्योति:सारसंग्रह: ॥
कैश्चिदुक्तं ।
"————बौधे गुरौ दक्षिणाम् ।
ईशाने ज्वलने चैव नैर्ऋते मारुते तथा ।
न गन्तव्यं सुराचार्य्ये प्रतीच्यां रविशुक्रयो: ॥"
इति सुखबोध: ॥
दिगम्बर:, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्-
लात् तथात्वम् ।) शिव: । क्षपण: । (स तु
जैनविशेष: । यथा, पद्मपुराणे । ६ । ८२ ।
"दिगम्बरा मध्यमलम्बमाहुरापादमस्रक्कम् ।
चैतन्यमात्रासंदृष्टेरानखाग्रश्रुतेरपि ॥")
तम: । इति मेदिनी । रे, २६७ ॥ (नग्ने, त्रि ।
यथा, पञ्चतन्त्रे । ५ । १४ ।
"एकाकी गृहसन्यक्त: पाणिपात्रो दिगम्बर: ।
कोऽपि संवाह्यते लोके लक्ष्यया पश्य कौतुकम् ॥")
दिगम्बरी, स्त्री, (दिगम्बर+ङीष् ।) दुर्गा ।
दिगम्बरस्य पत्नी । इति कुलार्णव: ॥ नग्ने, त्रि ।
इत्यमर: । ३ । १ । ३६ ॥ (यथा, कालीध्याने ।
"महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥")
दिग्गज:, पुं, (दिशो गज: ।) दिग्हस्ती । यथा,—
"ऐरावत: पुष्करीको वामन: कुमुदोऽञ्जन: ।
पुष्पदन्त: सार्व्वभौम: सुप्रतीकश्च दिग्गजा: ॥"
इत्यमर: । १ । ३ । ४ ॥
एते क्रमेण पूर्व्वाद्यदिशां हस्तिन: ॥
दिग्ध:, पुं, (दिह्यते लिप्यते स्म विधादिना इति ।
दिह+क्त: ।) विषाक्तबाण: । तत्पर्य्याय: ।
लिप्तक: २ । इत्यमर: । २ । ८ । ८८ ॥ (यथा,
रामायणे । २ । ३० । २३ ।
"सा विद्धा बहुभिर्बाणैर्दिग्धैरिव गजाङ्गना ॥")
स्नेह: । अग्नि: । इति हेमचन्द्र: ॥ प्रबन्ध: ।
इत्यजयपाल: ॥
दिग्ध:, त्रि, (दिह+क्त: ।) लिप्त: । इति मेदिनी ।
धे, ७ ॥ (यथा, भट्टि: । ३ । २१ ।
"सचन्दनोशीरलवालदिग्ध:
श्रीकाश्मिनागाद् द्युनिवासभूयम् ॥")
दिग्वासा:, [स्] पुं, (दिगेव वासो वस्त्रं यस्य ।)
शिव: । इति हेमचन्द्र: । २ । ११२ ॥ (यथा,
महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासा: काम एव च ॥")
नग्ने, त्रि ॥ (यथा, मनु: । ११ । २०२ ।
"स्नात्वातुविप्रोदिग्वासा: प्राणायामेन शुध्यति ॥")
दिग्विजय:, पुं, (दिशां दिक्स्थितलोकानां विजय: ।)
विद्यया युद्धेन वा दिशां विजय: । यथा शङ्कर-
दिग्विजय: पाण्डवदिग्विजय इत्यादि ॥
दिङ्ना:, पुं, (स्फोटनकाले दिङ् इति शब्दं कायति
शब्दायते इति । कै+क: ।) उतुकुणडिभ: ।
इति शब्दार्थकल्पतरु: ॥
दितं, त्रि, (दीयते स्मेति । दो अवखण्डने+क्त:
"द्यतिस्यतीति ।" ७ । ४ । ४० । इति इत्वम् ।)
छिन्नम् । इत्यमर: । ३ । १ । १०३ ॥
दिति:, स्त्री, दैत्यमाता । सा दक्षकन्या (यथा,
महाभारते । १ । ६५ । १२ ।
"अदितिर्दितिर्दनु: काला दनायु: सिंहिका
तथा ॥")
इयं कश्यपपत्नी च । (दो+भावे क्तिन् ।)
खण्डनम् । इति मेदिनी । ते, २४ ॥ राजविशेषे,
पुं । इति शब्दार्थकल्पतरु: ॥ (दातरि, त्रि ।
यथा, ऋग्वेदे । ४ । २ । ११ ।
"राये च न: स्वपत्याय देव दितिं च रास्वा-
दितिमुरुष्य ॥"
"दितिं दातारं च रास्व देहि ।" इति तद्भाष्ये
सायण: ॥)
दितिज:, पुं, (दितेर्जायते इति । दिति+जन+
ड: ।) दैत्य: । इति हेमचन्द्र: । २ । १५२ ॥
(यथा, महाभारते । १ । २३१ । १७ ।
"ऋतस्य कर्त्ता दितिजान्तकस्य
जेता रिपूणां प्रवर: सुराणाम् ॥")

दितिसुतः, पुं, (दितेः सुतः ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, नैषधे । १६ । १५ ।
"दितिसुतगुरुः प्राग्यैर्युक्तं न किं कथयत्तमः ॥")
दित्यः, पुं, (दितौ भवः । दिति + यत् ।) दैत्यः । इति शब्दार्थकल्पतरुः ॥ (छेदनार्हे धान्यादौ, क्ली । यथा, वाजसनेयसंहितायाम् । १४ । १० ।
"दित्यवाड्यो विराट् छन्दः ॥"
"दोऽवखण्डने क्तिन्प्रत्ययः । दितिं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् ।" इति तद्भाष्ये महीधरः ॥)
दिद्युत्, त्रि, (द्योतते दीप्यतीति । द्युत् + "द्युतिगामिस्तुहोतीनां दे च ।" ३ । २ । १७८ । इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम् ।" ७ । ४ । ६७ । इत्यभ्यासस्य सम्प्रसारणम् ।) दीप्तिविशिष्टः । इति मुग्धबोधम् ॥ (स्त्री, दीप्तिः । यथा, ऋग्वेदे । २ । १३ । ७ ।
"यच्चासमा अजनो दिद्युतो दिवः ।"
"असमा विषमा नानाप्रकारा दिद्युतः दीप्तीरजनः अजनयः ।" इति तद्भाष्ये सायनः ॥ वज्रम् । इति निघण्टुः । २ । २० ॥ यथा, ऋग्वेदे । १ । ६६ । ७ ।
"अस्तुर्न दिद्युद्भिधप्रतीका ॥")
दिधिषाय्यः, पुं, (दधाति आनन्दमिति । धा + "दिधिषाय्यः ।" उणां ३ । ६७ । इति आय्यः धातोर्द्वित्वं हस्वं युक् च ।) आरोपितबन्धुः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (धारके, त्रि । यथा, ऋग्वेदे । २ । ४ । १ ।
"मित्र इव यो दिधिषाय्यो भूद्देव आदेव जने जातवेदाः ॥"
"दिधिषाय्यो धारयिता भूत् ।" इति तद्भाष्ये सायनः ॥ उज्ज्वलदत्तस्तु "दधिषाय्यः" इति उणादिसूत्रं कल्पयित्वा दधिपूर्व्वात् स्थतेराय्यः यत्वञ्च इति व्याख्याय दधिषाय्यो घृतम् इत्युक्तवान् ॥)
दिधिषुः, पुं, (दिधिं धैर्य्यं स्यतीति । सो + बाहुलकात् कुः । यद्वा, दिधिषूं आत्मन इच्छतीति । सुप आत्मनः क्यच् । क्विप् । बाहुलकात् ह्रस्वः ।) द्विरूढ़ापतिः । इत्यमरः । २ । ६ । २३ ॥ (गर्भाधानकर्त्ता । यथा, ऋग्वेदे । १० । १८ । ८ ।
"हस्तग्राभस्य दिधिषोरुतेदं पत्युर्जनित्वमभि सं बभूव ॥"
"दिधिषोर्गर्भस्य निधातुः ।" इति तद्भाष्ये सायनः ॥ यथा च भागवते । ६ । ६ । ३५ ।
"ब्राह्मणो वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् । शोचन्त्यात्मानमुर्व्वीशमग्रपत् कृपिता सती ॥"
"दिधिषुं गर्भाधानकर्त्तारम् ।" इति श्रीधरः ॥) द्विरूढ़ायाम्, स्त्री । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, ऋग्वेदे । १० । ७८ । ५ ।
"अश्वासो न ये श्वसनास आशवो दिधिषवो न रथ्यः सुदानवः ।"
"तथा दिधिषवो न वहनाः धारका इव ।" इति तद्भाष्ये सायनः ॥)

दिधिषूः, स्त्री, (दधाति धार्यं यद्वा दिधिं धैर्यं इन्द्रियदौर्ब्बल्यात् स्यति त्यजतीति । दा वा सो + "अन्येष्वपि दृश्यते ।" उणां । १ । ६५ । इति कूप्रत्ययेन साधुः ।) द्विरूढ़ा । वारद्वयविवाहिता स्त्री । तत्पर्य्यायः । दिधीषूः २ पुनर्भूः ३ दिधिषुः ४ । इति शब्दरत्नावली ॥ विवाहितायां कनिष्ठायां सत्यां अविवाहिता ज्येष्ठा भगिनी । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठायां विद्यमानायां कन्यायामसंस्कृतेऽगुणा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता ॥" (धारके, त्रि । यथा, ऋग्वेदे । १ । ७१ । ३ ।
"इषन्नृतं धनयन्नस्य धीतिमादिद्यौं दिधिषो विभृत्राः ॥")
दिधिषूपतिः, पुं, दिधिषूर्द्विरूढ़ा तस्याः पतिः स्वामी । द्विरूढ़ापतिः । (यथा, मनुः । ३ । १७३ ।
"भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥")
दिनं, क्ली, (द्यति खण्डयति महाकालमिति । दो छेदे + "बहुलमन्यत्रापि ।" उणां २ । ६६ । इति इनच् ।) कालविशेषः । तत्पर्य्यायः । घस्रः २ अहः ३ दिवसः ४ वासरः ५ । इत्यमरः । १ । ४ । २४ भास्करः ६ दिवा ७ । इति राजनिर्घण्टः ॥ वारः ८ अंशकः ९ द्यु १० अंशकम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ८ ।
"दिनेषु गच्छत्सु नितान्तपीवरं तदीयमालीनमुखं स्तनद्वयम् ॥")
तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पित्रमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरात्मकम् । ब्रह्ममाने दिव्यद्विसहस्रयुगात्मकम् । मनुष्यमाने ब्रह्मणो दिनस्य संख्या ८,६४०,०००,००० । इति पुराणम् ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्व्विधम् । यथा,—
सावनं दण्डाः षष्टिरहः खलयखगुणांशाप्तास्तदैनं भवेत् । १ ।
उदयादुदयाज्ज्ञानोर्भौमसावनवासराः । २ ।
तिथिनैकेन दिवसश्चान्द्रमासे प्रकीर्त्तितः । ३ ।
आयुर्द्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकम् ॥४॥
जीमूतवाहनमते तु सूर्य्यकिरणावच्छिन्नचतुर्य्यामयुक्तम् ॥
दिनं, क्ली, (दो छेदे + इनच् ।) सूर्य्यकिरणावच्छिन्नकालः । तद्वैदिकपर्य्यायः । वस्वः १ द्युः २ भाद्यः ३ वासरम् ४ खसराणि ५ ध्रंसः ६ धर्म्मः ७ घृणः ८ दिनम् ९ दिवा १० दिवे-दिवे ११ द्यविद्यवि १२ । इति द्वादशाहर्नामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥ सिंह-कन्यातुलाधनुष्कुम्भमीनलग्नानि । यथा,—
"अजगोपतियुग्मञ्च कर्किधन्विघटास्तथा । निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥"
इति ज्योतिस्तत्त्वम् ॥
दिनकरः, पुं, (करोतीति । कृ + अच् । दिनस्य करः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् पीयतोयाः समन्तात् विदधति भयमुच्चैर्यौवनारम्भवत्यः ॥")
दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्य्यस्य आत्मजा ।) यमुना । इति हलायुधः ॥
दिनकेशरः, पुं, (दिनस्य केशर इव ।) अन्धकारः । इति शब्दरत्नावली ॥
दिनज्योतिः, [स्] क्ली, (दिनस्य ज्योतिः ।) आतपः । इति राजनिर्घण्टः ॥
दिनदुःखितः, पुं, क्ली, (दिने दिवसे दुःखितः । दिवाभागे वियोगित्वात्तथात्वम् ।) चक्रवाकः । इति शब्दरत्नावली ॥
दिनप्रणीः, पुं, (दिनं प्रणयतीति । प्र + नी + क्विप् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)
दिनबलः, पुं, (दिने बलं यस्य ।) षष्ठमण्डलसप्तमाष्टमैकादशद्वादशराशयः । इति ज्योतिषम् ॥ (सूर्य्यगुरुशुक्रचन्द्राः । इति दृङ्नातकम् ॥)
दिनमणिः, पुं, (दिनस्य मणिरिव ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । १८ ।
"दिनमणिमण्डलमण्डन ! भवखण्डन ! मुनिजनमानसहंस ! जय जय देव हरे ! ॥"
अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)
दिनमूर्द्धा, [न्] पुं, (दिनस्य मूर्द्धा मस्तकमिव । दिनस्य आदिस्थानत्वादस्य तथात्वम् ।) पूर्व्वाह्णः । उदयाचलः । इति त्रिकाण्डशेषः ॥
दिनांशुः, पुं, (दिनस्य अंशुः ।) प्राङ्मध्याह्नापराह्णसायाह्नादिः । इति राजनिर्घण्टः ॥
दिनादिः, पुं, (दिनस्य आदिः ।) प्रभातम् । इति राजनिर्घण्टः ॥
दिनान्तः, पुं, (दिनस्य अन्तः ।) सायम् । दिवावसानम् । इत्यमरः । १ । ४ । ३ । (यथा, ऋतुसंहारे । १ । १ ।
"दिनान्तरम्योरुभुपप्रान्तमन्मथो निदाघकालः समुपागतः प्रिये ! ॥")
दिनान्तकः, पुं, (दिनस्य अन्तकः नाशकः ।) अन्धकारः । इति त्रिकाण्डशेषः ॥
दिनावसानं, क्ली, (दिनस्य अवसानं यत्र ।) दिनान्तः । इति हेमचन्द्रः । २ । ५४ ॥ (यथा, रघुः । २ । ४५ ।
"दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥")
दिनिका, स्त्री, (दिनं ज्ञत्यहेतुतया अस्त्यस्येति । दिन + ठन् ।) एकदिनसाध्यकर्म्मसूत्रम् । इति शब्दमाला ॥
दिनुभ, क ड संघाते । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं सकं-सेट् ।) क ड, दिम्भयते । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥
दिभ, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, दिम्भयति । नोदः प्रेरणम् । इति दुर्गादासः ॥
दिम्य, ष क संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । तृतीय-

स्वरौ। अ क, दिम्यति दिम्यते। सङ्गतो राशीकरणम्। एषः केचिन्न मन्यते। इति दुर्गादासः॥

दिलीपः, पुं, सूर्य्यवंशीयराजविशेषः। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ एकः अंशुमतः पुत्रः भगीरथपिता अपरः दशरथप्रपितामहश्च। इति रामायणम्॥ (यथा च हरिवंशे। १५। १२-१४, २३-२५।

"सुतः पञ्चजनस्यासीदंशुमान्नाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः॥
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽशुसन्निता लोका बुद्धा सत्येन चानघ!॥
दिलीपस्य तु दायादो महाराजो भगीरथः।
यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः॥"

"अनमित्रस्य धर्म्मात्मा विद्वान् दुलिदहोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामहः॥
दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाभवत् सुतः।
अयोध्यायां महाराजो रघुश्चासीत् महाबलः॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दशरथात् जज्ञे धर्म्मात्मा सुमहायशाः॥")

दिलीपराट्, [ज्] पुं, (दिलीप एव राट् राजा।) दिलीपराजः। इति त्रिकाण्डशेषः॥

दिलीरं, क्ली, श्लिलीन्द्रकम्। इति हारावली। २५॥

दिव, इ प्रीतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, दिव्यते। प्रीतिरिह प्रीतीकरणम्। दिव्यति लोकः पितरम्। इति दुर्गादासः॥

दिव, क अर्हे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, देवयति। अर्हं इह पीडनमिति मैत्रेयः। यातनं गमनं वेति रमानाथः। इति दुर्गादासः॥

दिव, क ड परिकूजने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) क ड, परिदेवयते कश्चित्तस्य राष्ट्रे न दुःखितः। इति हलायुधः। इति दुर्गादासः॥

दिव, य उ जिगीषेच्छयोः। पत्यौ। द्यूतौ। क्रीड़ायाम्। गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सकं-च सेट्। उदित्त्वात् क्त्वायेट्।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमानं शितात् वाणात्। इति भट्टौ साक्षीस्थे श्रुतेः प्रागः। पणित्वव्यवहारः स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूपः। द्यूतावेवाकर्म्मकः। क्रीड़ायान्तु दीव्यतेः करणस्य नित्यं कर्म्मत्वम्। तच्च तृतीयाविभक्तिरेव विभाव्यते। इति साम्प्रदायिकम्। तेन अक्षा दीव्यन्ते क्षत्रेण इति कर्म्मणि प्रत्ययः स्यात्। अक्षैर्दीव्यते क्षत्रेणेति भावे प्रत्ययो न स्यात् अक्षैर्देवयति क्षत्रेण गुरुरित्यत्राप्यभ्यस्तस्य कर्तुः कर्म्मत्वं न स्यात्। तेनाद्यूद्यूषयद्राम इत्यत्र द्यूतक्रीड़ना। इति भट्टौ तु तेनेतिकरणं दुष्टप्रेरेव न तु दीव्यतेः। तेनाकर्म्मकत्वात् रामभित्यभ्यस्तकर्तुः कर्म्मत्वम्। इति दुर्गादासः॥

दिव, क्ली, (दीव्यन्त्यस्मिन्निति। दिवु क्रीड़ायाम्+घञर्थे अधिकरणे कः।) स्वर्गः। (यथा, देवीभागवते। ५। ३। १०।

"गच्छ वीर! महाबाहो दूतत्वं कुरु मेऽनघ!!
ब्रूहि शुम्भं दिवं गत्वा निःशुम्भः सुरसन्निधौ॥")

आकाशम्। इति मेदिनी। वे, ११॥ वनम्। दिवा। इति हेमचन्द्रः। २। ५२॥

दिवस, पुं, क्ली, (दीव्यत्यत्रेति। दिव+"दिवः कित्।" उणां। ३। १२१। इति असच् स च कित्।) दिनम्। इत्यमरः। १। ४। २॥ (यथा, आर्य्यासप्तशत्याम्। २७८।

"द्राघयता दिवसानि त्वदीयविरहेण तीव्रतापेन।
ग्रीष्मेणेव नलिन्या जीवनमल्पीकृतं तस्याः॥")

दिवसकरः, पुं, (करोतीति। कृ+अच्। दिवसस्य करः।) सूर्य्यः। इति हेमचन्द्रः। २। ११॥ (यथा, आर्य्यासप्तशत्याम्। ६३६।

"सुन्दरि सखी दिवसकरबिम्बे तुहिनांशुरेखेव॥")

दिवसमुखं, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुधः॥

दिवस्पतिः, पुं, (दिवः पतिः। अलुक्समासः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, महाभारते। ५। १२। ६।

"इन्द्राणीमानयिष्यामो यदि चक्रमि दिवस्पते!॥")

दिवस्पृथिवौ, क्ली, (द्यौश्च पृथिवी च। "दिवसश्च पृथिव्याम्।" ६। ३। ३०। इति दिवो दिवसादेशः।) रोदसी। स्वर्गभूम्यौ। इति हेमचन्द्रः। ३। ४॥ द्विवचनान्तोऽयम्। (यथा, ऋग्वेदे। २। २। ३।

"तं देवा युज्ञे रजसः सुदंस संदिवस्पृथिवोः
ररतिं श्रेरिरे॥")

दिवा, अ, दिनम्। इत्यमरः। ३। ४। ६॥ (यथा, महाभारते। २। ११। ३४।

"त्वया लवा सुहूर्त्ताश्च दिवा रात्रिरहश्च॥")

दिवा, [न्] पुं, (दिव्यत्यस्मिन्निति। दिव+"कनिन् युवृषीति।" उणां। १। १५६। इति कन्।
"बहुलवचनात् कैवलादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिनम्। हलायुधादिकोषः॥

दिवाकरः, पुं, (दिवा दिनं करोतीति। कृ+"दिवाविभेति।" ३। २। २१। इति टः।) सूर्य्यः। (यथा, देवीभागवते। २। ६। १८।

"उदितश्च तदा भानुस्तया दृष्टो दिवाकरः॥")

अर्कवृक्षः। इत्यमरः॥ काकः। पुष्यविशेषः। इति शब्दचन्द्रिका॥

दिवाकीर्त्तिः, पुं, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ चौरकर्म्मनिषेधात्।) नापितः। चण्डालः। ("रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥"
१०। ५४। इति मनुवचनात् अस्य दिवाचरत्वात् तथात्वम्॥ यथा, मनुः। ५। ८५।

"दिवाकीर्त्तिरुदक्याञ्च पतितं क्षतिकञ्जघा।
प्रव्रजन्तं सूचिनञ्चैव सृष्ट्वा स्नानेन शुध्यति॥"

स्मृत्याच काश्मीरखण्डे। ७६। ८७।

"दीक्षितो वा दिवाकीर्त्तिः पण्डितो वाप्यपण्डितः।
तुल्यो मे मोचरीच्छायां संप्राप्य मणिकर्णिकाम्॥")

उलूकः। इति हेमचन्द्रः। ३। ५६७॥

दिवाटनः, पुं, (दिवा अटतीति। अट गतौ+ल्युः।) काकः। इति शब्दार्थकल्पतरुः॥ (चाण्डालः। "दिवाचरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥"१०।५४। इति मनुशासनात्॥)

दिवातनः, त्रि, (दिवा भवः। दिवा+"सार्वचिरंप्राह्णेप्रगेयथेभ्यष्ठाट्ठाौ तुट् च।" ४। ३। २३। इति ट्ठाः तुट् च।) दिनभवः। यथा, भट्टिः। ५। ६५।

"सायन्तनीं तिथिप्रथः पङ्कजानां दिवातनीम्।
कान्तिं कान्ता सदातन्या क्षेपयन्ती रुचिस्मिता॥"

दिवान्धः, पुं, (दिवा दिवसे अन्धः।) पेचकः। इति त्रिकाण्डशेषः॥ (यथा, पञ्चतन्त्रे। ३। ७५।

"यत्र मयूरहंसकोकिलचक्रवाकशुकसारङ्गहारीतकसारसादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेकः क्रियते नैतत् मम मतम्॥") दिगन्धे, त्रि। यथा,—

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदर्शनाः॥"

इति चण्डी॥

दिवान्धा, स्त्री, (दिवा दिवसे अन्धा।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिवान्धकी, स्त्री, (दिवा अन्धकी दर्शनक्रियावर्जिता।) कुक्कुन्दरी। इति पुराणम्॥

दिवाभीतः, पुं, (दिवा दिवसे भीतः।) उलूकः। कुसुदाकरः। चौरः। इति मेदिनी। ते, १६७॥ (दिवसभीते, त्रि। यथा, कुमारे। १। १२।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥")

दिवाभीतिः, स्त्री, (दिवा दिवसे भीतिर्भयं यस्याः।) पेचकः। इति शब्दरत्नावली॥

दिवामणिः, पुं, (दिवा दिनस्य मणिरिव।) सूर्य्यः। इति शब्दरत्नावली॥

दिवामध्यं, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्नः। इति हेमचन्द्रः। २। ५३॥

दिवास्वापः, स्त्री, (दिवा दिवसे स्वापो निद्रा यस्याः।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिविः, पुं, (दीव्यतीति। दिवु क्रीड़ायाम्+"इगुपधात् कित्।" उणां ४। १२६। इति इन् स च कित्।) चाषपक्षी। इति शब्दमाला॥

दिविजः, त्रि, (दिवि स्वर्गे जायते इति। दिव+जन+डः। "प्रावृट्शरत्कालदिवो जे।" ६। ३। १५। इति सप्तम्या अलुक्।) स्वर्गीयः। इति संक्षिप्तसारः॥

दिविषत्, [द्] पुं, (दिवि सीदतीति। षद्+क्विप्। सप्तम्या अलुक्। षत्वञ्च।) देवः।

दिवौकाः

इत्यमरः ।१।१।८॥ (यथा, गीतगोविन्दे ।६।११।
"सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दी-
वरम् ॥"
स्वर्गवासिनि, त्रि । यथा, अथर्ववेदे ।१८।४।८०।
"स्वधा पितृभ्यो दिविषद्भ्यः ॥")

दिविषः, त्रि, (दिवि स्वर्गे तिष्ठतीति । स्था + कः । अयुक् । "अमाभ्यगोभूमीति ।" ८ । ३ । ६७ । इति षत्वम् ।) स्वर्गस्थः । इति संक्षिप्तसारः ॥ (यथा, महाभारते ।३।१००।२४।
"ततो हतारिः सगणं सुखं वै
प्रयाधि क्षत्तर्दिवं त्रिदिवः ॥"
क्वचित् अशतबलोऽपि दृश्यते । यथा, भागवते ।४।२३।२०।
"नत्वा दिविस्पृङ्मिदृगङ्घ्रिः परीत्य
विवेश वह्निं ध्यायती भर्तृपादम् ॥")

दिवी, स्त्री, (दिव + इन् । क्वादिकारादिति वा ङीष् ।) उपनिष्किकाकोटः । इति हारावली । १६० ॥

दिवौकाः, [स्] पुं, (द्यौः स्वर्गं आकाशो वा ओको यस्य ।) देवः । चातकः । इति मेदिनी । से, ५४ ॥

दिवोदासः, पुं, (दिवः स्वर्गात् दासो दानं यस्मै ।) काशीराजः । स चन्द्रवंशीयभीमरथराजपुत्रः ।
इति पद्मपुराणम् ॥
("अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काशीराजातो वाहुजेऽजनि ॥
गत्वा तु सोऽभवत् ख्यातो दिवोदास इति
क्षितौ ॥"
"वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र गत्वा दिवोदासः काशिराजोऽस्ति
वाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविदांवरः ॥"
"अथ धन्वन्तरिं सर्वे वाराणस्याश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति प्राह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
"अथ खलु भगवन्तममरवरन्दिगणवरिवृत-
मास्थमस्यं काशिराजं दिवोदासं धन्वन्तरि-
मौपधेनवकैतरथौरभ्रपौष्कलावतकरवीर्यगोपुर-
रक्षितसुश्रुतप्रभृतय ऊचुः ।"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दिवोद्भवा, स्त्री, (दिवे वने उद्भवो यस्याः ।) एला । इति शब्दार्थकल्पतरुः ॥ (दिवे स्वर्गे उद्भवो यस्य ।) दिविजाते, त्रि ॥

दिवौकाः, [स्] पुं, (दिवं स्वर्गं आकाशो वा ओको यस्य ।) देवः । इत्यमरः ।१।१।७॥ (यथा, महाभारते ।३।८४।११।
"दिवौकसां पुष्करिणीं समासाद्य नराधिप ! ।
न दुर्गतिमवाप्नोति वाजिमेधञ्च विन्दति ॥")

दिव्यः

चातकः । इति मेदिनी । से, ५४ ॥ स्वर्गवासिनि, त्रि । यथा, महाभारते ।१।६६।६।
"सा तु विध्वस्तवपुषः कश्मलाभिहतस्य च ।
ददर्श पथि गच्छन्ती वसून् देवान् दिवौकसः ॥")

दिव्यं, क्ली, (दिवे वने भवम् । दिव + यत् ।) लवङ्गम् । इति मेदिनी । ये, ३१ ॥ हरिचन्दनम् । इति राजनिर्घण्टः ॥ शुभपथः । तद्भेदो यथा, दिव्यतत्त्वे हरिस्मृतिः ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
तण्डुलः सप्तमश्चैव सप्तमं सप्तमायकम् ॥
अष्टमं फलमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"
एषां विवरणं तत्तच्छब्दे केषाञ्चित् परीक्षाशब्दे च द्रष्टव्यम् ॥* गङ्गाजलस्पर्शपूर्व्वकशपथस्य च मिथ्याकथने दोषश्च यथा,—
"ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनांवरः ।
गङ्गातोयं करे कृत्वा स्वीकारञ्च चकार सः ॥
गङ्गातोयमुपस्पृश्य मिथ्या यदि वदेज्जनः ।
स याति कालसूत्रञ्च यावद्वै ब्रह्मणो वयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥*॥
गङ्गाजलादिस्पर्शपूर्व्वकशपथे दोषो यथा ।
"तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा ।
सत्यं वा यदि वासत्यं यदि दिव्यं करोति यः ॥
कर्त्ता च रौरवं याति तथा कारयिता प्रिये ! ।
उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै ॥
तस्मात्ति पुनरावृत्तिर्यात्यूकरयोनिषु ।
दिव्यं कर्त्तुः कारयितुर्जपपूजा वृथा यथा ॥
गायत्रीरहितस्यापि नरकश्चोत्तरोत्तरम् ॥"
इति गायत्रीतन्त्रे पञ्चमपटलः ॥

दिव्यः, त्रि, (दिवि भवः । यत् ।) मनोज्ञः । दिवि भवः । इति मेदिनी । ये, ३१ ॥ (यथा, विष्णुपुराणे । १।६।१०४ ।
"दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ वक्षःस्थलं हरेः ॥")

दिव्यः, पुं, (दिवे वने भवः । दिव + यत् ।) यवः । गुग्गुलुः । इति राजनिर्घण्टः ॥ भावविशेषः । यथा,—
"शृणु भावमथ दैवि ! दिव्यवीरपशुक्रमात् ।
दिव्यस्तु देववत् प्रायो वीरश्चोद्दतमानसः ॥
सत्यत्रेताद्वापर्य्यन्तं दिव्यभावविनिर्णयः ।
त्रेताद्वापरपर्य्यन्तं वीरभाव इतीरितम् ॥
मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च ।
श्मशानसाधनं भद्रे ! चितासाधनमेव च ॥
एतत्ते कथितं सर्व्वं दिव्यवीरमतं प्रिये ! ।
दिव्यवीरमतं नास्ति कलिकाले सुलोचने ! ॥"
इति कालीविलासतन्त्रम् ॥
नायकभेदः । यथा,—
"यत्तु तासां दिव्या अदिव्या दिव्यादिव्याभेदेन गणनया द्विपञ्चाशदधिकशतयुतसङ्ख्यं भेदा भवन्ति । दिव्या इन्द्राण्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या द्रौपद्यादय इति वदन्ति तन्न तत्र अवस्थाभेदेनैव नायिकानां

दिव्यच

भेदात् जातिभेदेन भेदस्वीकारे अनन्तनायिकानामिव नायकानामप्यानन्त्यं स्यात् । तथा हि इन्द्रादयो दिव्याः । अदिव्या माधवादयः । दिव्यादिव्या अर्জ্জুनादयः ।" इति रसमञ्जरी ॥ (सात्वतस्य पुत्राणामन्यतमः । यथा, भागवते । ६ । २४ । ६ ।
"भजमानो भजिर्दिव्यो वृष्टिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ! ॥")

दिव्यकुण्डं, क्ली, (दिव्यं पुण्यप्रदत्वात्स्युतञ्च कुण्डमिति कर्म्मधारयः ।) कामरूपे चोभकशैलपूर्व्वभागस्थपुष्करिणीविशेषः । यथा,—
"तदुदक्षिणे महाशैलः क्षोभको नाम नामतः ।
तस्मिन् गिरौ शिलापृष्ठे वक्त्रं देवी व्यवस्थिता ॥
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ।
एकत्र पञ्चभिर्दुर्गायोनिभिः पञ्चवक्त्रकम् ॥
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ।
तच्छैलपूर्व्वभागात्तु कान्ता नाम महानदी ॥
दक्षिणं सागरं याति प्रथमा चोत्तरस्रवा ।
दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकां गता ।
संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत् ।
दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम् ॥
यः पूजयेन्महाभागः स योनौ न हि जायते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यगन्धं, क्ली, (दिव्यो मनोहरो गन्धोऽस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दिव्यगन्धः, पुं, (दिव्यः गन्धो यस्य ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य विवृतिर्विज्ञेया ॥)

दिव्यगन्धा, स्त्री, (दिव्यो गन्धोऽस्याः ।) शूलेला । महाचक्षुष्काः । इति राजनिर्घण्टः ॥

दिव्यगायनः, पुं, (दिव्यः स्वर्गीयः गायनः ।) गन्धर्व्वः । स्वर्गगायकः । इति शब्दरत्नावली ॥

दिव्यचक्षुः, [स्] त्रि, (दिव्यमलौकिकं चक्षुर्यस्य ।) ज्ञानचक्षुः । यथा, नीलकण्ठस्तोत्रे ।
"नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे ।"
क्ली, ज्ञानात्मकचक्षुः । यथा,—
"न तु मां शक्यते द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥"
इति श्रीभगवद्गीतायाम् । ११ । ८ ॥ "अतो दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्त्वां ददामि ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ (दिव्यं स्वर्गीयं मनोज्ञं वा चक्षुः ।) स्वर्गीयचक्षुः । सुन्दरलोचनम् । उग्रचक्षुः । चक्षुष्मा इति भाषा । इति लोकप्रसिद्धम् ॥ (पुं, दिव्यं मनोज्ञं चक्षुर्यस्य । यद्वा, दिव्यं दक्षयज्ञनेत्रं यस्मात् । ऊर्জ্জनाभस्य सूत्रसर्জ্জनभक्षणमवलोक्येश्वरस्य सर्জ্জनसंहरणपरित्यागात् तथात्वम् ।) मर्कटः । इति शब्दमाला ॥ सुगन्धभेदः । त्रि, (दिव्ये आकाशभूते चक्षुषी यस्य ।) अन्धः । (दिव्ये सुन्दरे चक्षुषी यस्य ।) सुलोचनः । इति मेदिनी । से, ६८ ॥

दिव्यतेजाः, [स्] स्त्री, (दिव्यं स्वर्गीयं देवतुल्यं तेजो यस्याः । अस्याः सेवनेन दिव्यतेजोवत्तेजआधायकत्वात् तथात्वम् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ (दिव्यं तेजो यस्य । अलौकिकतेजस्के, त्रि ॥)

दिव्यदोहदं, त्रि, (दिव्यं स्वर्गीयं दोहदम् अभिलाषो यत्र ।) उपयाचितम् । देवदेयवस्तु । इति त्रिकाण्डशेषः ॥ यथा, हारावली । २१ ॥

"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये ।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः ॥

दिव्यपञ्चाङ्गं, स्त्री, (पञ्चानां अङ्गतानां तत्तुल्यत्वादङ्गत्ववद्व्यानां समाहारः पञ्चाङ्गम् । दिव्यं पञ्चाङ्गमिति कर्म्मधारयः ।) मिश्रितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकघृतैराख्यम् । इति राजनिर्घण्टः ॥

दिव्यपुष्पः, पुं, (दिव्यं मनोरमं पुष्पं यस्य ।) करवीरः । इति राजनिर्घण्टः ॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पाण्यस्याः ।) महाद्रोणा । इति राजनिर्घण्टः ॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प + संज्ञायां कन् टाप् अत इत्वञ्च ।) लोहितवर्णाकैतुकः । इति रत्नमाला ॥

दिव्ययमुना, स्त्री, (दिव्या यमुना तत्तुल्यफलप्रदत्वात् ।) कामरूपे दमनिकाया नद्याः पूर्ब्वभागस्थसरिद्विशेषः । यथा,—

"तस्या नद्याः पूर्ब्वभागे गङ्गेव फलदायिनी ।
माघस्नु सकलं मासं तस्यां स्नात्वा नरोत्तमः ॥
तथा दमनिकायाश्च परं निर्व्वाणमाप्नुयात् ।
ततः पूर्ब्वे परा देवी नाम्ना सा सरिदुत्तमा ॥
महती दिव्ययमुना यमुनावत् फलप्रदा ।
दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी ॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यरत्नं, स्त्री, (दिव्यं चिन्तामात्रं तदर्थप्रदायकत्वादलौकिकं रत्नम् ।) चिन्तामणिः । इति शब्दार्थकल्पतरुः ॥

दिव्यरथः, पुं, (दिव्यः स्वर्गीयः अन्तरीक्षचरो वा रथः ।) व्योमयानम् । देवविमानः । इति शब्दरत्नावली ॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः ।) पारदः । इति राजनिर्घण्टः ॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता ।) सूर्व्वालता । इति राजनिर्घण्टः ॥

दिव्यवस्त्रः, पुं, (दिव्यं वस्त्रमिव । अभिधानात् पुंस्त्वम् ।) सूर्य्यप्रभा । इति शब्दरत्नावली ॥ (दिव्यं सुन्दरं वस्त्रमस्य ।) सुन्दरवस्त्रयुक्ते, त्रि । दिव्यं सुन्दरं वस्त्रम् ।) क्लीं, सुन्दरवस्त्रम् ॥ दिवि भवम् । यत् । दिव्यं वस्त्रमिति कर्म्मधारयः ।) दिविभववस्त्रम् ॥

दिव्यसारः, पुं, (दिव्यो मनोज्ञः सारो यस्य ।) श्रीवृक्षः । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । मनोज्ञत्वगुणवत्त्वात् दिव्यैवेत्यर्थः ।) धात्री । इति मेदिनी । ये, ३१ ॥ वन्ध्या कर्कोटकी । घृतावरी । महामेदा । ब्राह्मी । स्थूलजीरकः । श्वेतदूर्व्वा । हरीतकी । पुरा । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । यत् । ततष्टाप् ।) नायिकाभेदः ॥ (सा च इन्द्राण्यादिः ॥)

दिव्यादिव्यः, पुं, (दिव्यः स्वर्गीयः अदिव्यश्च ।) नायकभेदः ॥ (स च अर्জ্জुनादिः ॥)

दिव्यादिव्या, स्त्री, (दिव्या अदिव्या च ।) नायिकाभेदः । अस्याः प्रमाणं दिव्यादिव्यशब्दे द्रष्टव्यम् ॥ उपदेवीविशेषः । इति शब्दार्थकल्पतरुः ॥

दिव्योदकं, क्लीं, (दिव्यमान्तरीक्षसुदकम् ।) आकाशजलम् । तत्पर्य्यायः । खवारि २ आकाशसलिलम् ३ व्योमोदकम् ४ अन्तरीक्षजलम् ५ । अस्य गुणाः । त्रिदोषनाशित्वम् । मधुरत्वम् । पथ्यत्वम् । परमरुच्यत्वम् । अग्निदत्वम् । श्रमापमेहापहारकत्वम् । वाचापेचित्वगुणत्वञ्च ॥ अनार्त्तवस्य तस्य गुणः । सर्व्वेषां देहिनां त्रिदोषजनकत्वम् । सद्योभूमिष्ठस्य तस्य गुणः । कलुषत्वम् । दोषदायकत्वञ्च । चिरस्थितस्य गुणाः । लघुत्वम् । स्वच्छत्वम् । पथ्यत्वम् । स्वादुत्वम् । सुखापहत्वञ्च । इति राजनिर्घण्टः ॥

दिव्योपपादुकः, त्रि, (दिवि भवः । दिव + "द्युप्रागपागुदक्प्रतीचो यत् ।" ४।२।१०१। इति यत् । उपपद्यते इति । उप + पद् + "अन्यतरस्यामदस्यतेति ।" ३।२।१५४। इति उकञ् । ततो दिव्यश्चासौ उपपादुकश्चेति ।) देवता । इत्यमरः । ३ । १ । ५० ॥ ("मानुषित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते ।" इति शब्दार्थचिन्तामणिः ॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुणानामोघः समूहो यत्र ।) गुरुविशेषः । यथा, मुक्तिरत्नाकरतन्त्रे ।

"महादेवो महाकालश्चिपुरश्चैव भैरवः ।
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते ॥"

अपि च ।

"अथ तारागुरून् वक्ष्ये इष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघान् सिद्धिदान् वत्स ! शृणुष्वावहितो सदा ॥"

अपि च ।

"शृणु वत्स ! महादेव ! गुरून् दुर्गामनुज्ञवान् ।
परमात्मा परानन्दः परमेष्ठी शुभोदयः ॥
छाया कालः कलानाथो दिव्यौघा भैरवा दिकाः ॥"

इति तन्त्रसारः ॥

दिश, औ न श्र ओचे । इति कविकल्पद्रुमः ॥ (तुदां-उभं अकं-सकं च-अनिट् ।) ओं, अदिशत् । न श्र, दिशति दिशते । ओच इति उचिर्य समवायने इत्यस्य अति रूपम् । धातूनामनेकार्थत्वादोष इह दानमाज्ञापनं वा । दिदेशे कौतुकाय समस्तमेवेति रघुः । कथनेऽप्ययम् । धर्म्मं दिशति वैशिकः । इति दुर्गादासः ॥

दिशा, स्त्री, (दिश् + टाप् ।) दिक् । इति व्याकरणम् ॥ (यथा महाभारते । ४ । ५३ । १६ ।

"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः ।
दिशासु च तथा राजन् ! न संख्याताः शरास्तदा ॥")

दिशाः, [स्] स्त्री, (दिशतीति । दिश् + बाहुलकात् कसुन् ।) दिक् । इत्यमरटीकायां मथुरानाथः ॥

दिश्यं, त्रि, (दिशि भवमिति । दिश् + "दिगादिभ्यो यत्" ।४।३।५४। इति यत् ।) दिग्भववस्तु । इत्यमरः । १ । ३ । २ ॥

दिष्टं, क्लीं, (दिशति इष्टानिष्टफलं ददातीति । दिश् + "क्तिच्क्तौ च संज्ञायाम् ।" ३।३।१७४। इति क्तः ।) भाग्यम् । इत्यमरः । १ । ४ । २८ ॥ (यथा, महाभारते । १४ । ५३ । १६ ।

"तत्सर्व्वं निधनं प्राप्ताः सर्व्वे संसृतबान्धवाः ।
न दिष्टमतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ॥"

दिश + कर्म्मणि क्तः ।) उपदिष्टे, त्रि । इति त्रिकाण्डशेषः ॥ (कथितं च । यथा, भट्टौ । २।३२।

"गाधेयदिष्टं विरसं रसज्ञं
रामोऽपि भायाजनमत्यभुङ्क्त ॥")

दिष्टः, पुं, (दिशतीति । दिश् + संज्ञायां क्तः ।) कालः । इत्यमरः । १ । ४ । १ ॥ (वैवस्वतमनोः पुत्रविशेषः । यथा, भागवते । ८ । १३ । २ ।

"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥")

दारुहरिद्रा । इति शब्दमाला ॥

दिष्टान्तः, पुं, (दिष्टस्य भाग्यस्य अन्तो यत्र ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ (यथा, महाभारते । १ । ५८ । २७

"मोक्षयित्वा तु सुजगान् सर्पसत्राद्द्विजोत्तमः ।
जगाम काले धर्म्मात्मा दिष्टान्तं पुरुषैर्नृतः ॥")

दिष्टिः, स्त्री, (दिश् + क्तिन् संज्ञायां क्तिच् वा ।) दर्शः । परिमाणम् । इति मेदिनी । टे, १८ ॥

दिष्ट्या, व, (दिशतीति सम्पदादित्वात् भावे क्विप् दिश्म् । देश्मनं स्थायति । स्थे + किप् । ह्रस्वम् । संज्ञापूर्ब्वकत्वात् अशूर्त्तं न । यद्वा, दिशतीति । दिश् + "अन्नाद्यादिभ्यश्चेति ।" वक्ष्यमाणेन साधुः ।) आनन्दः । इत्यमरः । ३ । ३ । १०० ॥ भाग्येन । यथा,—

"दिष्ट्यान्न ! ते कृचिगतः परः पुमान् ॥"

इति श्रीभागवतम् ॥

दिष्णु, त्रि, (ददातीति । दा + बाहुलकात् क्विप्णु ।) दाता । इत्युणादिकोषः ॥

दिह, उ न श्र औ क्लिं । इति कविकल्पद्रुमः ॥ (अदां-उभं अकं-सकं च-अनिट् ।) दिह उपचये इति प्राचः । उपचयो वृद्धिस्तत्करणञ्च । उ न श्र, देग्धि दिग्धे दिग्धः प्रतिदिनमुपचितः स्यादित्यर्थः । देग्धि दौग्धं गवया लेपकः । उपचितं करोतीत्यर्थः । अदिग्ध, अदिग्धत् इति दुर्गादासः ॥

दी, ओ ड य चये। इति कविकल्पद्रमः। (दिवां-आत्मं-अकं-सेट्।) ओ, दीनः। ड य, दीयते। इति दुर्गादासः।

दीक्ष, ड मौण्ड्ये। इच्यायाम्। क्षोऽर्थे। इति कविकल्पद्रमः। (भ्वां-आत्मं-अकं-क्षोऽर्थे अकं-सकं च-सेट्।) मौण्ड्यं मुण्डितमस्तकीभावः। इच्या यजनम्। क्षोऽर्थो नियमव्रतादेग्रोपनीतयः। ड, दीक्षते वटुर्मुण्डितमस्तकः स्यादित्यर्थः। दीक्षते जनो यजतीत्यर्थः। दीक्षते याज्ञिको नियमं स्यादित्यर्थः। दीक्षते पण्डितो जनं व्रतमुपदिशतीत्यर्थः। दीक्षते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः।

दीक्षणीयेष्टिः, स्त्री, (दीक्षणीया इष्टिः।) यज्ञविशेषः। तत्पर्य्यायः। सौमिकी २। इति हेमचन्द्रः। ३।४८०।

दीक्षा, स्त्री, (दीक्ष+भावे अ। स्त्रियां टाप्।) यजनम्। पूजनम्। इत्यजयपालः। व्रतसंग्रहः। इति हेमचन्द्रः। ३।४८०। गुरुमुखात् स्वेष्टदेवमन्त्रग्रहणम्। (एतन्निरुक्तिर्यथा, गौतमीयतन्त्रे। २।२।

"ददाति ज्ञानमत्यन्तं क्षीयते पापसञ्चयः।
तेन दीक्षेति विख्याता मुनिभिस्तत्त्वदर्शिभिः।")

यथाच,—

"दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः।
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः।
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः।"

इत्यत्र गुरुशिष्ययोर्लक्षणं तत्तच्छब्दे द्रष्टव्यम्।

योगिनीतन्त्रे।

"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च।"

रुद्रयामले।

"न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम्।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत्।
सिद्धमन्त्रो यदि पतिस्तस्य पत्नी च दीक्षयेत्।
शक्तिरूपेण वरारोहे! न च सा कन्यका भवेत्॥"

तथा गन्धर्वग्रहविमर्शिन्याम्।

"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः।
विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका॥"

इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः। इति तु सिद्धेतरविषयम्। सिद्धमन्त्रो न दुष्यतीति वचनात्॥*॥ शक्तियामले।

"तीर्थाचारव्रतो मन्त्री ज्ञानवान् सुसमाहितः।
नित्यनिष्ठो यतिः ख्यातो गुरुः स्याद्यौगिकोऽपि च॥"

सिद्धयामले।

"यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये!।
तदैव तान्तु दीक्षेत त्यक्त्वा गुरुविचारणम्॥"

गन्धर्वग्रहविमर्शिन्याम्।

"प्रमादाच्च तथाज्ञानात् पितुर्दीक्षां समाचरन्।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत्॥"

पितुरित्युपलक्षणम्। मातामहादीनामपि। प्रायश्चित्तन्तु अयुतसावित्रीजपः। सर्व्वत्र तथा दर्शनात्। तथा च भृङ्गः।

"दशसाहस्रजप्येन सर्व्वकल्मषनाशिनी।"

श्रीक्रमेऽपि।

"मनुर्विन्द्यः दातव्यो ज्येष्ठपुत्राय धीमते॥"

मत्स्यसूक्ते।

निर्वीर्य्यश्च पितुर्मन्त्रं ग्रहे ग्राह्ये न दुष्यति॥"

इति कौलिकमन्त्रदीक्षापरम्। योगिनीतन्त्रे ग्रन्थादिविद्यामधिकृत्य दीक्षानिषेधात्। यद्वा ग्राह्ये तारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात्। तथा च।

"शतसुशतसहस्रानेकजन्मप्रभावै-
र्भवति यदि मनुष्यो गुर्व्वधीनश्चिराय।
कथमपि मनुमेनं प्राप्य शिष्यः परस्मै
निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्॥"

इति॥ महातीर्थे उपरागे सति सर्व्वत्र न दोषः। तथा च विष्णुमन्त्रमधिकृत्य।

"साधु पृष्टं त्वया ब्रह्मन्! वक्ष्यामि सकलं तव।
ब्रह्मणा कथितं पूर्व्वं वशिष्ठाय महात्मने॥
वशिष्ठोऽपि स्वपौत्राय मत्पित्रे दत्तवान् स्वयम्।
प्रयत्नहृदयः स्वच्छः पिता मे करुणानिधिः॥
कुरुक्षेत्रे महातीर्थे सूर्य्यपर्व्वणि दत्तवान्॥"

इत्यादि वैष्णम्पायनसंहितायां शौनकं प्रति आश्वलायनम्॥*॥ योगिनीतन्त्रे।

"निर्वीर्य्यश्च पितुर्मन्त्रं तथा मातामहस्य च।
स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति॥"

मनुः।

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता॥
गुरुयोग्या भवेत् सा हि विधवापरिवर्जिता।
स्त्रिया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता॥"

इदन्तु गुरोरुपासितमन्त्रपरम्। तथा च भैरवीतन्त्रे।

"स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद्गुरुचिन्तनम्।"

मातुरित्युपासितेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः। सिद्धमन्त्रविषयं वा। वस्तुतस्तु योगिनीतन्त्रे स्त्रीपदं विधवापरम्। एकवाक्यतावशात्॥ दीक्षायां विधवादीनामधिकारं विशेषयति कुलार्णवे।

"विधवायाः सुतादेग्रात् कन्यायाः पितुराज्ञया।
नाधिकारः स्वतो नार्य्या भार्य्याया भर्त्तुराज्ञया॥"

योगिनीतन्त्रे।

"स्वप्नलब्धे तु कलसे गुरोः प्राप्तं निवेदयेत्।
वटपत्रे कुङ्कुमेन लेखित्वा गुरुकं शुभम्॥
ततः शुद्धिमवाप्नोति चान्यथा विफलं भवेत्॥"

इदन्तु सद्गुरोरभावे तत्सत्त्वे तस्मादेव ग्रहीयात् स्वप्ने तु नियमो न हीति नारदवचनात्॥*॥ तथा विद्याधराचार्य्यधृतजाबालवचनम्।

"मध्यदेशमुखक्षेत्रनाटकोड्रयवभाषाः।
अन्तर्व्वेदिप्रतिष्ठागा आवान्त्याश्च गुरुत्तमाः॥
गौड़ाः प्राच्योद्भवाः सौरा मागधाः कैरलास्तथा।
कोसलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥
कर्णाटगर्ज्जरीरेवाकच्छातीरोद्भवास्तथा।
कालिङ्गाश्च कलम्बाश्च कामोजाश्चाधमा मताः॥"*॥

तथा।

"वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः॥"

दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते।

"दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥"

मन्त्रलक्षणमाह। पिङ्गलामते।

"मननं विश्वविज्ञानं त्राणं संसारबन्धनात्।
यतः करोति संसिद्धौ मन्त्र इत्यथते ततः॥"

अन्यच्च।

"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः॥"

सर्व्वाश्रमेषु दीक्षायाः आवश्यकत्वम्। तथा च।

"दीक्षामूलं जपं सर्व्वं दीक्षामूलं परं तपः।
दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्॥
अदीक्षिता ये कुर्व्वन्ति जपपूजादिका क्रियाः।
न भवन्ति फलं प्रिये! तेषां निष्फलमाप्नुयात्॥
देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्।
तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात्॥
मन्त्रं दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः।
मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते॥
नादीक्षितस्य कार्य्यं स्यात्तन्त्रोक्तैर्नियमव्रतैः।
न तीर्थगमनेनापि न च शारीरयत्नतः॥"

मत्स्यसूक्ते।

"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने!।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम्॥
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम्॥"

शूद्रस्य मन्त्रविशेषनिषेधमाह।

"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाभयसंज्ञकम्॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः।
शूद्रो भवति मर्त्यानां ब्राह्मणो याति चाधोगतिम्॥"

श्रुतिरपि। "ब्राह्मणीं प्रणवं मनुर्लक्ष्मीं क्षीरशूद्रो यदि जानीयात् स भ्रष्टोऽधो गच्छति।" इति॥*॥ विशेषमाह वाराहीये।

"गोपालस्य मनुर्देयो महेशस्यापि पार्व्वते।
तत्पत्न्याश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत्॥"

इति॥*॥ गोविन्दस्तवने।

"अदीक्षितस्य मरणे प्रेतत्वं न च मुञ्चति॥"

नक्षत्रेश्वरे।

"सर्व्वासामपि दीक्षाणां मुक्तिः फलमसङ्कितम्।
अविरोधात् भवत्येव प्रासङ्गिकस्तु भक्तयः॥"

तथा।
"उपपातकलक्षाणि महापातककोटयः।
क्षणात् दहति देवेशि दीक्षा हि विधिना कृता॥"
यामले।
"आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः॥"
अतः सद्गुरोराहितदीक्षः सर्व्वकर्म्माणि साधयेत्।*। तत्राप्यनुकूलमन्त्रं दीक्षेत। तथा च सारदायाम्।
"खतारराशिकोष्ठागमनुकूलान् भवेन्मनून्॥"
तथा वाराहीये।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत्॥"
इति तु प्रधानतया बोद्धव्यम्। तथा च।
"धनिमन्त्रं न गृह्णीयात् अकुलञ्च तथैव च।"
इत्यादिदर्शनात् तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते॥* तत्र सिद्धसारस्वते।
"वृषिंहार्कवराहाणां प्राथादग्रभवस्य च।
संपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत्॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च चाक्षरे।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत्॥"*॥
मालामन्त्रस्तु वाराहीये।
"विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च।
एकद्व्यादिवीजस्य सिद्धादीन्नैव शोधयेत्॥
तथा एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति!।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥"*॥
तथा सुखसालातन्त्रे।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥"
मालिनीविजये।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फले सदा॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका।
वाग्वादिनी चाम्रपूर्णा तथा प्रत्यङ्गिरा पुनः॥
कामाख्यावासिनी बाला मातङ्गी शैलवासिनी।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः।
तथा चैता महाविद्याः कलिदोषान्न बाधिताः॥"
चासुरुद्धारतन्त्रे।
"कलौ काली तथा तारा भैरवी छिन्नमस्तका।
त्रिकूटा त्रिपुटा दुर्गा तथा महिषमर्द्दिनी॥
कात्यायनी च चासुरुद्धा महाविद्याः प्रकीर्त्तिताः।
नात्र सिद्धाद्यपेक्षास्ति न कुलत्वविचारणा॥
कालादिदोषनं नास्ति न चाग्निवायादिदूषणम्।
सिद्धविद्यातया नात्र युगसेवापरिश्रमः॥
नास्ति सिद्धिर्मनाद्देवि! दुःखसाध्यं कथञ्चन॥"
इत्यादिवचनादेषु विचारो नास्ति। वस्तुतस्तु इदं प्रधानापरम्। सर्व्वत्र विचारस्यावश्यकत्वम्। दुरदृष्टवशात् कदाचिदेरिमन्त्रस्य स्वप्नादौ प्राप्तौ तत्तद्दोषस्य दुरत्वात्।" इति तु साम्प्रदायिकाः॥*॥ अत्र कुलाकुलचक्रम्। राशिचक्रम्। नक्षत्रचक्रम्। अकथहचक्रम्। अकडमचक्रम्। ऋणिधनिचक्रम्। एतानि चक्राण्यष्टौ तत्तच्छब्दे च द्रष्टव्यानि॥*॥

अथ दीक्षाकालनियमः।
"मन्वारम्भस्तु चैत्रे स्यात् सप्तस्वपुरुषार्थदः।
वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं भवेत्।
आषाढ़े धनधान्याढ्यः स्यात् पूर्णार्थः श्रावणे भवेत्।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः॥
कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तु तद्भवेत्।
पौषे तु शत्रुपीड़ा स्यात् माघे मेधाविवर्द्धनम्॥
फाल्गुने सर्व्वकामाः स्युर्मन्त्रमासं विवर्ज्जयेत्॥"
चैत्र इति गोपालविषयम्। गौतम्युक्तत्वात्। मधुमासे भवेद्दीक्षा दुःखाय मरणाय चेतिवचनान्नान्यत्र। तथा,—
"ज्येष्ठे मृत्युप्रदा विद्या आषाढ़े सुखसम्पदः।"
इति योगिनीहृदयादाषाढ़े श्रीविद्यायां न दोषः। अत्र च मासः सौर एव। सौरे मासि शुभा दीक्षा न चान्द्रे न च तारके। इति गौतमीयात् ५ अध्यायात्॥
वैशम्पायनसंहितायाम्।
"मन्त्रस्यारम्भणं मेषे धनधान्यप्रदं भवेत्।
वृषे मरणमाप्नोति मिथुनेऽपत्यनाशनम्॥
कर्कटे सर्व्वसिद्धिः स्यात् सिंहे मेधाविनाशनम्।
कन्यालक्ष्मीप्रदा नित्यं तुलायां सर्व्वसिद्धयः॥
वृश्चिके स्वर्णलाभः स्यात् धनुर्मानविनाशनम्।
मकरः पुत्रदः प्रोक्तः कुम्भो धनसमृद्धिदः॥
मीनो दुःखप्रदो नित्यं एवं मासविधिक्रमः॥"
प्रतिप्रसवमाह। रुद्रयामले।
"कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके।
फाल्गुने श्रावणे दीक्षा पुरश्चर्य्या प्रशस्यते॥"

अथ वारनियमः।
"रविवारे भवेद्वित्तं सोमे प्राप्तिर्भवेत् क्षिप्रम्।
आयुरङ्गारके हन्ति तत्र दीक्षां विवर्ज्जयेत्॥
बुधे सौन्दर्य्यमाप्नोति ज्ञानं स्यात् बृहस्पतौ।
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे॥"

अथ तिथिनिर्णयः।
आगमकल्पद्रुमे।
"प्रतिपदि कृता दीक्षा ज्ञाननाशकरी मता।
द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत्॥
चतुर्थ्यां विघ्ननाशः स्यात् पञ्चम्यां बुद्धिवर्द्धनम्॥
षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने॥
अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्षयः।
दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत्॥
द्वादश्यां सर्व्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता।
तिथ्यन्तयोर्निषुतुर्दश्यां चैतान्निर्मासावसानके॥
पञ्चान्ते धर्म्मवृद्धिः स्यात् अष्टाध्यायं विवर्ज्जयेत्।
सप्ताग्नगर्ज्जतनिर्घोषभूकम्पोल्कानिपातने॥
एतान्यर्ज्यानि दिवसान् शुभशुक्लान् परिवर्ज्जयेत्।
द्वितीया पञ्चमी चैव षष्ठी चैव विशेषतः॥
द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा॥"
इति यत् त्रयोदशी विधानं तद्विष्णुविषयं रामार्च्चनचन्द्रिकाधृतत्वात्।
"पञ्चमी सप्तमी षष्ठी द्वितीया पूर्णिमा तिथा।
त्रयोदशी तु दशमी प्रशस्ता सर्व्वकामदा॥"
इति सनत्कुमारवचनाच्च॥*॥
शिवविषये सप्तम्यादिनिषेधमाह।
"शुक्लपक्षस्य दशमी सप्तमी च विशेषतः।
निन्दा सदैव षष्ठी स्यादिति शैवागमान्तरे॥"

अथ नक्षत्रनिर्णयः।
"अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम्।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत्॥
मृगशीर्षे सुखावाप्तिरार्द्रायां वन्धुनाशनम्।
पुनर्व्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम्॥
अश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम्।
सौन्दर्य्यं पूर्व्वफल्गुन्यां प्राप्नोति च न संशयः॥
ज्ञानञ्चोत्तरफल्गुन्यां हस्तायाञ्च धनी भवेत्।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम्॥
विशाखायां सुखञ्चानुराधायां बन्धुवर्द्धनम्।
ज्येष्ठायां सुतहानिः स्यात् मूलायां कीर्त्तिवर्द्धनम्॥
पूर्व्वाषाढ़ोत्तराषाढ़े भवेतां कीर्त्तिदायिके।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता॥
वृद्धिः शतभिषायां स्यात् पूर्व्वभाद्रे सुखी भवेत्।
सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्त्तिवर्द्धनम्॥"
आर्द्राश्लेषास्वातिकृत्तिकायोर्निषेधस्तु शिवव्यतिरिक्तविषये।
तथा च।
"आर्द्रायां कृत्तिकायाञ्च मन्त्रारम्भः प्रशस्यते।
यदीश्वरस्य ज्ञानार्थं मन्त्रारम्भो यथाक्रमम्॥"
तन्त्रान्तरे।
"अश्विनीभरणीस्वातीविशाखाहस्तभेषु च।
ज्येष्ठोत्तराचयेष्वेवं कुर्य्याज्जन्माभिषेचनम्॥"
इति ज्येष्ठाभरण्योर्यद्विधानं तन्नामविषयं जगन्नयसंहितोक्तत्वात्॥*॥

अथ योगादिनिर्णयो विष्णुसारे।
"शुभः सिद्धस्तथायुष्मान् ध्रुवयोगस्ततः परम्।
प्रीतिः सौभाग्ययोगश्च बृहियोगस्ततः परम्॥
हर्षश्चैव तथा योगः सर्व्वमन्त्रशुभावहः॥"
रुद्रयामले।
"योगश्च प्रीतिरायुष्मान् सौभाग्यः शोभनो धृतिः।
बृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः॥
वरीयांश्च शिवः सिद्धो ब्रह्म ऐन्द्रश्च षोड़श॥"

अथ करणनिर्णयः।
"वणवालवकौलवतैतिलगरवणिजस्तदनन्तरम्।
करणानि शुभान्येव सर्व्वमन्त्रेषु भामिनि!॥"

अथ लग्ननिर्णयः।
"वृषे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके।
नक्षत्रताराशुद्धे च कुर्य्याद्दीक्षाप्रवर्त्तनम्॥"

तथा,—
"शिरलग्नं विष्णुमन्त्रे ग्रीवमन्त्रे चरं शुभम्।
हृदःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते॥"
अगस्त्यसंहितायाम्।
"त्रिषष्ठायगताः पापाः शुभाः केन्द्रत्रिकोणगाः।
दीक्षायान्तु शुभाः सर्व्वे बन्धुस्थाः सर्व्वनाशकाः॥"

अथ पक्षनियमः।

"शुक्लपक्षे भवेद्दीक्षा लक्ष्मोत्पापक्षमाहिनात्।
तिथिहीनेष्वपि मासेषु विशेषो सुनिभेदतः॥"
रत्नावल्याम्।
"षष्ठी भाद्रपदे दर्शे तथा कृष्णचतुर्दशी।
कार्त्तिके नवमी शुक्ला मार्गे शुक्ला त्रयोदशिका॥
पौषे तु नवमी शुक्ला माघे शुक्ला चतुर्थिका।
फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी॥
वैशाखे पञ्चमी चैव ज्येष्ठे दशहरा तिथिः।
आषाढ़े पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी।
एतानि देवपर्व्वाणि तीर्थकोटिफलं लभेत्॥
अत्र दीक्षा प्रकर्त्तव्या न मासस्य परीक्षयेत्॥
न वारं न च नक्षत्रं न तिथ्यादिकदूषणम्।
न योगकरणञ्चैव ग्रहणेषु च भाषितम्॥"
अन्यच्च मतम्।
"चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता।
ज्येष्ठे चतुर्दशी कृष्णा आषाढ़े नागपञ्चमी॥
श्रावणैकादशी भाद्रे रोहिणीसहिताष्टमी।
आश्विने च महापुण्या महाश्वमेधभोदया॥
कार्त्तिके नवमी शुक्ला मार्गशीर्षे सिते तथा।
षष्ठी चतुर्दशी पौषे माघेऽप्येकादशी सिता॥
फाल्गुने च सिता षष्ठी चैति कालविनिर्णयः॥"
योगिनीतन्त्रे।
"अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः।
रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि!॥
मन्वन्तरासु सर्व्वासु महापूजादिने तथा।
चतुर्थी पञ्चमी चैव चतुर्दशमष्टमी तथा॥
तिथयः शुभदाः प्रोक्ता दीक्षायामृक्षकर्म्मणि॥"
इत्यादिवचनात् चतुर्दशमष्टमीति शक्तिविषयम्।
चतुर्थीति गणेशविषयम्। तत्तत्कल्पोक्तत्वात्।
"निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा।
सूर्य्यग्रहणकालस्य समानो नास्ति भूतले॥
विशेषतो महादेवि! दीक्षायामृक्षकर्म्मणि।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत्॥
रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा।
तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन॥
रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्।
न वारतिथिमासादिशोधनं सूर्य्यपर्व्वणि॥"
एवं चन्द्रग्रहणेऽपि। तथा रुद्रयामले।
"न कुर्य्याच्छाक्तिकीं दीक्षामुपरक्ते विभावसौ।
न कुर्य्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः॥"
एतच्च गोपालश्रीविद्येतरविषयम्।
"अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्य्ययोः।"
इति गौतमीयात्।
"सूर्य्यग्रहणकाले च नान्यदन्वेषितं भवेत्।"
इति योगिनीहृदयाच्च॥*॥

तारादौ तु विशेषो यथा,—
"दीक्षाकालं प्रवक्ष्यामि नीलतन्त्रानुसारतः।
लक्षणञ्चैव चाष्टम्यां शुभे लग्ने शुभे दृश्ये॥
पूर्व्वभाद्रपदा युक्ते मित्रतारादिसंयुते।
अथवा अनुराधायां रेवत्यां वा प्रशस्यते॥
जानीयाच्छोभनङ्कालं मन्त्रस्य ग्रहणं प्रति।
दृश्ये चैव विशेषेण कार्त्तिके च विशेषतः॥"
यामले।
"श्रीपरा कालीबीजानि लोपो दीर्घश्च योनुः।
सूर्य्यस्योपग्रहे लब्धो वृथा मुक्तिफलप्रदः॥
अमावास्या सोमवारे भौमवारे चतुर्दशी।
सप्तमी रविवारे च सूर्य्यपर्व्वोच्यते: समा॥"
कुलार्णवे।
"सप्तमी रविवारे च सोमे दर्शस्तथैव च।
चतुर्थी कुजवारे च अष्टमी च दृष्टसती॥
देवपर्व्वसमा ज्ञेयास्तासु दीक्षां समाचरेत्॥"
यामले।
"पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये।
प्रयागे श्रीगिरौ काञ्च्यां कालाकालं न शोधयेत्॥"
विष्णुयामले।
"देवीबोधं समारभ्य यावत् स्नानवती तिथिः।
क्षता तासु बुधैर्दीक्षा सर्व्वाभीष्टफलप्रदा॥
शुक्लपक्षे विशेषेण तत्रापि तिथिरष्टमी।
तत्रापि शारदी दुर्गा यत्र देवी गृहे गृहे।
तत्र दीक्षा प्रकर्त्तव्या मासवर्षादीन्न शोधयेत्॥"
तथा।
"बोधने चैव दुर्गायाः कालाकालं न शोधयेत्॥
अशोकाष्टम्यष्टमी यत्र रामाख्या नवमी तथा।
लग्ने वाप्यथवालग्ने यत्र स्यात्तिथिरष्टमी॥
गुरोराज्ञानुरूपेण दीक्षा कार्य्या विशेषतः॥"
समयाचारतन्त्रे।
"युगाद्यायां मन्वादिने विवाहदिवसे तथा।
विष्णुवायनयोर्दत्ते नैव किञ्चिद्विचारयेत्॥"
तथा,—
"ग्रियाणामुदय गुरुणा क्षपया दीयते यदा।
तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन॥
सर्व्वे तारा ग्रहाः सर्व्वे नक्षत्राणि च राशयः।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्व्वे शुभावहाः॥"
सारसंग्रहे योगिनीतन्त्रे च।
"ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः।
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्व्वते॥
चट्टले च मतङ्गे च तथा कन्याश्रमेषु च।
न शोधयेत्ततो दीक्षां तीर्थेष्वेतेषु पार्व्वति!॥"
वाराहीतन्त्रे।
"शुक्रोऽस्तो यदि वा वृद्धो गुर्व्वादित्यो भवेद्यदि।
मेषस्थिकसिंहेषु तदा दोषो न विद्यते॥"*॥
महाविद्यासु सर्व्वासु कालादिविचारो नास्ति।
तदुक्तं सुरूपभाजातन्त्रे।
"कालादिशोधनं नास्ति न चामित्रादिदूषणम्।"
अत्र मालानिर्णयो मालाशब्दे द्रष्टव्यः। पुरश्चरणं तच्छब्दे द्रष्टव्यम्। कलावतीदीक्षा कलावतीशब्दे द्रष्टव्या।

अथ पञ्चायतनीदीक्षा। यामले।
"भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत्।
आग्नेय्यां पार्व्वतीनाथं नैर्ऋत्यां गणनायकम्॥
वायव्यां तपनञ्चैव पूजाक्रम उदाहृतः।
यदा तु मध्ये गोविन्दं ऐशान्यां शङ्करं यजेत्॥
आग्नेय्यां गणनाथञ्च नैर्ऋत्यां तपनं तथा।
वायव्यामम्बिकाञ्चैव भोगमोक्षैकभूमिकाम्॥
शङ्करञ्च यदा मध्ये ऐशान्यामच्युतं यजेत्।
आग्नेय्यां तपनञ्चैव नैर्ऋत्यां गणनायकम्॥
वायव्यां पार्व्वतीञ्चैव स्वर्गमोक्षप्रदायिनीम्।
आदित्यञ्च यदा मध्ये ऐशान्यां शङ्करं यजेत्।
आग्नेय्यां गणनाथञ्च नैर्ऋत्यां केशवं यजेत्॥
वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम्॥
गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत्।
आग्नेय्यामीश्वरञ्चैव नैर्ऋत्यां तपनं तथा॥
वायव्यामीश्वरीञ्चैव पूजयेच्छोकसाधनीम्।
सस्थानवर्त्तिता देवा दुःखशोकभयप्रदाः॥"
तथा च गणेशग्रहविमर्षिण्याम्।
"शुभौ मध्यगते हरीशहरभूदेवौ हरौ शङ्करे
भास्ये नागसुता रवौ हरगणेशाज्ञाम्बिकाः
स्थापिताः।
देयां विष्णुहरैकदन्तरवयो लक्ष्मीहरेऽजेश्वरे
नार्य्याः शङ्करभागतोऽतिसुखदा यस्तासु ते
हानिदाः॥"
रामार्च्चनचन्द्रिकायां गौतमीये च।
"यदा तु मध्ये गोविन्दं आग्नेय्यां गणनायकम्।
नैर्ऋत्यां हंसमभ्यर्च्य वायव्यामर्च्चयेच्छिवाम्॥
ऐशान्यां शङ्करं चैव भोगमोक्षफलाप्तये॥"इति।
यद्यङ्गदेवताया: पूजने आग्नेय्यादौ गणेशादिपूजनमुक्तं तदामगोपालविषयमिति केचित्।
वस्तुतो वैकल्पिकमिति सम्प्रदायः। एतेषां पूजनन्तु गौतमीये।
"गन्धादिभिरथाभ्यर्च्च षड़ङ्गार्च्चनमेव च।
विंशल्लक्षो जपेन्मन्त्रं नमस्कृत्य समापयेत्॥"*॥
अङ्गदेवतापूजाकालस्तु पीठपूजानन्तरम्।
तथा च सनत्कुमारतन्त्रे।
"पीठस्यार्च्चनमङ्गदेवयजनं प्राणप्रतिष्ठा तथा
आह्वानं निजमुद्रिकाविरचनं ध्यानं प्रभोः
पूजनम्।"
यस्तु देवे पुष्पाञ्जलिं दत्त्वा अङ्गदेवान् समर्च्चयेत्।
तस्तु प्रतिष्ठितयन्त्रादिविषयम्॥*॥
यन्त्रातिरिक्ताधारे पूजने तु कुलार्णवे।
"एकपीठे पृथक्पूजां विना यन्त्रं करोति यः।
अङ्गाङ्गित्वं परित्यज्य देवताग्रासमाप्नुयात्॥"
एवच्च।
"आवाह्य देवतामन्यामर्घ्यपात्रस्थदेवताम्।
उभाभ्यां सभते शापं मन्त्री तरलदुर्म्मतिः॥"
तदेतदतिरिक्तविषयम्॥*॥
सर्व्वेषामङ्गमन्त्राणां विद्धादिविचारो नास्ति।
तथा च,
"विद्धादिशोधनं नैषां अङ्गत्वे सति राजत
श्यामादौ तु प्रपञ्चायतनाभावः।

तथा च रुद्रयामले ।
"श्यामायां भैरवीतारास्छिन्नमस्तासु भैरवे ।
मञ्जघोषे तथा रौद्रे प्रयोज्यं नेष्यते बुधैः ॥
उपविद्यासु सर्व्वासु षट्कर्म्मादिषु साधने ।
नात्र दीक्षादयेच्चास्ति नाचाङ्गादिप्रपूजनम् ॥"
तन्त्रसारे ।
"उपविद्यासु सर्व्वासु तथा प्रयोगसाधने ।
दीक्षां विनैव कर्त्तव्य उपदेशः सदैव हि ॥"*॥

अथ सङ्क्षेपदीक्षा ।

"सङ्कल्पे सर्व्वतोभद्रे नवं कुम्भं निधाय च ।
सोदकं गन्धपुष्पाभ्यामर्चितं वस्त्रसंयुतम् ॥
सर्व्वौषधिनवरत्नपञ्चपल्लवसंयुतम् ।
ततो देवार्चनं कृत्वा हुनेदष्टोत्तरं शतम् ॥"
पञ्चपल्लवमिति । पनसाश्वत्थयवटवकुलानि ।
तथा च वाग्भिष्टे ।
"पनसान्नं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः ॥"*॥
नवरत्नमिति ।
"मुक्तामाणिक्यवैदूर्य्यं गोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"*॥
निवन्धे ।
"शिष्यं स्नानकृतं वेद्यासुपाग्निसुपवेशयेत् ।
मन्त्रितं प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा ॥
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥"
अष्टशतम् अष्टोत्तरशतम् ।
"अथ सम्पादयेन्मन्त्रं हस्तं शिरसि धारयन् ।
समोऽस्त्रिक्षत्रचतान् दद्यात् ततः शिष्योऽर्चयेद्-
गुरुम् ॥"
यद्वा दीक्षान्तरम् । ब्रह्मभ्यश्च साचतं तदस्त्र-
नादस्त्रवारं मूलेन शिरसि करं निधाय अष्टौ
वारान् कर्णे जपेत् । तथा च ।
"तत्राप्यशक्तः कक्षिचेदब्रह्मभ्यश्च साचतम् ।
तदस्त्रनाभिषिच्याष्टवारं मूलेन केवलम् ॥
निधायाष्टौ जपेत् कर्णे उपदेशे त्वयं विधिः ॥"

इति सङ्क्षेपदीक्षा ॥

उपदेशान्तरमाह । विश्वसारे ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥"
विश्वसारे ।
"महादीक्षा तथा दीक्षा उपदेशस्ततः परम् ।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे ॥"

इति क्षेमानन्दकृततन्त्रसारः ।

दीक्षान्तः, पुं, (दीक्षायाः प्रधानयज्ञस्य अन्तः अन्तोपलक्षितो यज्ञः ।) अवभृथः । इत्यमरः । २।७।२७ ॥ "प्रधानयागो दीक्षा तस्याः अन्तः समाप्तौ योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्रधानयागस्य पूरणार्थं प्रतिष्ठार्थं क्रियते सोऽवभृथ उच्यते । अवहीनं बिभर्त्ति श्रीमतीति मान्नीति यक् । यज्ञावशेषे स्नाने चावभृथः । यज्ञावशेषे स्नानं यत् तदेवावभृथं विदुरिति चिकाकशेषः ॥ यज्ञान्ते तमवभृथाभिषेकपूत-मिति रघुः ।" इत्यमरटीकायां भरतः ॥

दीक्षितः, त्रि, (दीक्ष+कर्त्तरि क्तः । यद्वा, दीक्षा सञ्जाता अस्येति । तारकादित्वात् इतच् ।) सोमपानविशिष्टयागकर्त्ता । यथा । स सोम-वति दीक्षितः । इत्यमरः । २।७।८ ॥ "स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते । अन्यत्राप्युपचारात् । दीक्ष मौण्ड्ये-ज्योपनयनव्रतादेशेषु क्तः दीक्षाशब्दादितो वा ।" इति तट्टीकायां भरतः ॥ * ॥ गुरुमुखाद्-गृहीतमन्त्रः । यथा,—
"अदीक्षिता ये कुर्व्वन्ति जपपूजादिका क्रियाः ।
न भवन्ति प्रिये ! तेषां शिलायामुप्तबीजवत् ॥
देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ॥"

इति तन्त्रसारः ॥ * ॥

काम्पिल्यनगरस्थयज्ञदत्तनामब्राह्मणः । यथा,
"आसीत् काम्पिल्यनगरे सोमयाजिकुलोद्भवः ।
दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः ॥
वेदवेदाङ्गवेदार्थवेदोक्ताचारचतुरः ।
राजमान्यो बहुधनो वदान्यः कीर्त्तिभाजनः ॥
अग्निशुश्रूषणरतो वेदाध्ययनतत्परः ॥"

इति स्कान्दे काशीखण्डे गन्धवत्यलकावर्णनं नाम १३ अध्यायः ॥*॥ (क्षीणतदीक्षः । यथा, महाभारते । २ । ७३ । १ ।
"ततः पराजिताः पार्था वनवासाय दीक्षिताः ।
अजिनाम्बुत्तरीयाणि जगृहुश्च यथाक्रमम् ॥")

दीक्षिता, [ऋ] पुं, (दीक्ष+"ऋदृदीपदीक्षश्च ।" ३।२।१५३। इति युचं वाधित्वा ग्रीनार्थे इतच् ।) सोमयाजी । इति केचित् ॥ दीक्षाविशिष्टः । दीक्षधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥

दीक्षितायनी, स्त्री, (दीक्षितः स्वनामख्यातब्राह्मण एव अयनं गतिर्यस्याः । स्त्रियां टित्वात् ङीप् ।) काम्पिल्यनगरस्थदीक्षितनामकब्राह्मणपत्नी । यथा, काशीखण्डे १३ अध्याये ।
"महाएतिव्रतां सम्यक् पत्नीं श्रोवाच तामथ ।
दीक्षितायनि ! कुत्रासि क्व ते गुणनिधिः सुतः ॥
अथ तिष्ठतु किन्तेन क्व सा मम शुभोर्म्मिका ।
अङ्गोद्वर्त्तनकाले या त्वया मेऽङ्गुलिका हृता ॥
नवरत्नमयी शीघ्रं तामानीय प्रयच्छ मे ।
इति श्रुत्वाय तद्वाक्यं भीता सा दीक्षितायनी ॥"

दीदिविः, पुं क्ली, (दिद्यत्यनेनेति । दिव+"दिवो द्वे दीर्घश्चाभ्यासस्य ।" उणा । ४ । ५५ । इति किन् अभ्यासस्य दीर्घश्च ।) अन्नम् । इत्यमरः । २ । ६ । ४८ ॥ (दिद्यतीति किन् ।) दृढस्नायौ, पुं । इति मेदिनी । वे, ३७ ॥ (स्वर्गे भक्षे च । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

दीदिविः, त्रि, (दिव्+किन् ।) उद्दीप्तः । इति शब्दरत्नावली ॥ (पुनःपुनर्द्योतकः । यथा, ऋग्-वेदे । १ । १ । ८ ॥
"राजन्तमध्वराणां गोपामृतस्य दीदिविम् ॥"
"दीदिविं पौनःपुन्येन भृशं वा द्योतकम् ।"
इति तद्भाष्ये सायणः ॥)

दीधितिः, स्त्री, (दीधीते दीप्यते इति । दीधी+संज्ञायां क्तिच् । इट् । "अयङादीनाम् ।" इति वार्त्तिकसूत्रात् "यीवर्णयोर्दीधीवेव्योः ।" ३।४।५३। इति अन्त्यस्य लोपः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघुः । ३ । २२ ।
"पुमोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥")

दीधी, र ङ लु च देवने । दीप्तौ । इति कविकल्प-द्रुमः ॥ (अदां-आत्मं-अकं-सेट् ।) दीर्घमध्यः । र वेदिकः । ङ लु, दीधीते । च, अदीधयुः । बहुलं ब्रह्मणीति परस्मैपदे अनुसुस्विड्डेरिति अन् उस् गुरुरस्यामिति गुणः । इति दुर्गादासः ॥

दीनं, क्ली, (दीयते स्म इति । दी+क्तः । ततः निष्ठा-तस्य नः ।) तगरपुष्पम् । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा,—
"कालानुसारिवा वक्रं तगरं कुटिलं शठम् ।
मद्गोरगं नतं जिह्मं दीनं तगरपादिकम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

दीनः, त्रि, (दीयते स्मेति । ओ दीङ् क्षये+"गत्यर्थाकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठा-तस्य नः । यद्वा, दी+"इण्भिज्जिदीडुभ्य-विभ्यो नक् ।" उणा । ३ । २ । इति नक् ।) दरिद्रः । इत्यमरः । ३ । १ । ४६ ॥ (यथा, मनौ । ६ । २३८ ।
"चरेयुः पृथिवीं दीनाः सर्व्वधर्म्मबहिष्कृताः ॥")
भीतः । इति मेदिनी । ने, २१ ॥ (दुःखितः । यथा, रघुः । २ । २५ ।
"सप्त यतीयुस्तिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

दीना, स्त्री, (दीन+टाप् । सततं भीतभीतेव दृश्यत्वात् तथात्वम् ।) भूधिकस्त्री । इति मेदिनी । ने, १० ॥

दीनारः, पुं, (दीयते इति । दी+"दीङो युट् च ।" उणा । ३ । १४० । इति आरन् युट् च ।) स्वर्णभूषा । सुद्रा । इत्युणादिकोषः ॥ (यथा, पञ्चतन्त्रे ३ । १३६ ।
"अथ प्रातर्यावदेव पश्यति तावद्दीनारमेकं शरावे दृष्टवान् ॥") निष्कपरिमाणम् । इत्य-मरः । ३ । ३ । १४ ॥ सुवर्णकर्षद्वयम् । इति तट्टीकासारसुन्दरी ॥ सम्यग्व्यवहारार्थं मान-वस्तु । लौकिकः । द्वात्रिंशद्रक्तिकापरिमितं काञ्चनम् । इति भरतः ॥

दीप, ई ङ य ऋ दीपने । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) दीपनसुज्ज्वलीभावः । ई, दीप्तः । ङ य, दीप्यते निशि चन्द्रमाः । ऋ, अदीदिपत् अदिदीपत् । इति दुर्गादासः ॥

दीपः, पुं, (दीप्यते दीपयति वा स्वं परञ्चेति । दीप् दीपि वा+"इगुपधज्ञाप्रीकिरः कः ।" ३। १।१३५। इति कः ।) वर्त्तिस्नेहज्वलदग्निशिखा । तत्पर्य्यायः । प्रदीपः २ स्नेहाग्रः ३ दीपकः ४ कज्जलध्वजः ५ शिखातरः ६ गृहमणिः ७

ज्योत्स्नाहरः ८ दर्शेन्धनः ९ दीपातिलकः १० दीपाख्यः ११ नयनोत्सवः १२ । इति शब्दरत्नावली ॥ (यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थं स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थं स्नेहान्यन्यानि वर्जयेत् ।"
इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः ॥
अन्यच्च ।
"पुरश्चरणकृत्यञ्च दीपं प्रस्थिह्य भैरव ! ।
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ॥
चतुर्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः ।
सार्षपः फलनिर्यासजातो वा राजिकोद्भवः ॥
दधिजक्षारजश्चैव प्रदीपाः सप्त कीर्त्तिताः ।
पद्मबिल्वभवा दर्भगर्भसूत्रभवाथवा ॥
शृङ्गजा वादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥*॥
तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम् ।
लवणक्षोद्भवं वापि दीपपात्रं प्रशस्यते ॥*॥
दीपदश्चाज्य कर्त्तव्यास्तैलजास्तेषु भैरव ! ।
वृत्तेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्मादृषया तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेवे अन्येभ्योऽपि च भैरव ! ॥
कुर्वन्तं पृथिवीतापं यो दीपस्तृह्यते नरः ।
स ताम्रतापं नरकमाप्नोत्येव शतं समाः ॥
सुवर्णवर्णसङ्काशपात्रेऽभ्यर्च्य सदर्शने ।
मध्याह्ने वृषकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ज्योतिर्वह्निस्तु स स्मृतः ॥
नेत्राञ्जादकरः स्वर्धैर्दूरतापविवर्जितः ।
सुस्निग्धः शब्दरहितो निर्धूमो नातिदीर्घकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये ।
दीपवृक्षस्थिते पात्रे शुद्धक्षेत्रप्रपूरिते ॥
दक्षिणावर्त्तवर्त्ता तु बारदीपः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
वृत्तेन वर्त्तितो दीपो मध्यमः परिकीर्त्तितः ।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥
ग्राव्णां वा बादरं वाथ्नं जौर्णं मलिनमेव वा ।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः ॥
उपादद्यान्नूतनमेव सततं श्रीविवृद्धये ॥*॥
कोषजं रोमजं वस्त्रं वर्त्तिकार्थं न चादयेत् ।
न मिश्रीकृतं दद्यात्तु दीपं स्नेहान् घृतादिकान् ॥
हत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ।
वसामज्जास्थिनिर्य्यासैः स्नेहैः प्राणिशरीरसम्भवैः ॥
प्रदीपं नैव कुर्य्यात्तु हत्वा पङ्के विशीदति ।
अस्थिपात्रेऽथवा गर्त्ते दुर्गन्धादुपवासिनि ॥
नैव दीपः प्रदातव्यो विदुषः शैवविवृद्धये ।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नतः ॥
सततं लक्षणोपेतं देवार्थंसुपकल्पितम् ।
न हरेज्जानतो दीपं तथा लोभादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ।
उद्दीप्तदीपप्रतिमः काष्ठकाञ्चनसङ्गवः ॥
विस्फोधोद्भवमेवाथ दीपाङ्गानि निवेदयेत् ।
उत्तमूर्कं नैव दीपार्थे कदाचिदपि योजयेत् ॥
प्रसन्नार्थन्तु तं दद्यादुपचाराहृदिःस्थितम् ।
एवं वा कथितो दीपो धूपश्च श्रूयतां सुतौ ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
आद्ये वस्त्रवर्त्तियुक्तदीपनिषेधो यथा,—
"दीपं वर्त्तेन वस्त्रस्य प्रज्वलं तैलमेव च ।"
इति योगिनीतन्त्रे प्रथमखण्डे २ भागे ५ पटलः ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"श्रृणु दीपस्य माहात्म्यं कार्त्तिके मम हरि-
प्रिय ! ।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां प्रयागके ।
तुलादानस्य यत् पुण्यं तदूर्ज्जे दीपदानतः ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुनः ।
ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वैः स्नातं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवालये ॥
तावद्गर्ज्जन्ति पापानि देहेऽस्मिन् मुनि-
सत्तम ! ।
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ॥
तावन्नृत्यन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावत्तु ज्वलते दीपः कार्त्तिके केशवालये ॥
श्रूयतेऽत्रापि पिङ्गाभिर्गाथा गीता महात्मने ! ।
भविष्यन्ति कुले अस्माकं कदाचित्ते सुता भुवि ।
कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम् ।
अपि नस्ते भविष्यन्ति कुले सच्चरिता शुभैः ।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयार्था पिण्डदानेन कृतं न प्रीणनं सुतैः ।
येऽप्यत्र कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः ।
कार्त्तिके तैर्मुनिश्रेष्ठ ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्द्दन ! ।
व्रतं संपूर्णतां यातु कार्त्तिके दीपदानतः ॥
अनेनैव हि मन्त्रेण दीपं संकल्पयेच्छुने ! ।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गव ! ॥"
इति पाद्मे उत्तरखण्डे ॥
अपि च ।
"दास्यते देवदेवाय दीपपुण्यानुलेपनम् ।
अपि नः स कुले भूयादेकादश्यां तिथौ नरः ॥
करिष्यत्युपवासन्तु सर्व्वपातकहानिदम् ।
इत्थं पितॄणां वचनं श्रुत्वा भृगुपतिस्तदा ॥
ददौ च दीपान् विधिवत् विष्णोरायतने द्विजः ।
सुगन्धतैलसंपूर्णान् दीपान् सप्ततिलकान् ॥
सर्षपस्य सुतैलेन मधुकासिसिसम्भवैः ।
दीपप्रदानान्नरकान्न्यतामिस्रसंज्ञकान् ।
गौत्वा सभार्य्यया ब्रह्मन् ! विष्णुलोकमगात्ततः ॥"
इति वामनपुराणम् ॥

दीपं सृष्ट्वा वैधकर्म्मकरणे दोषो यथा,—
"दीपं सृष्ट्वा तु यो देवि ! मम कर्म्माणि कारयेत् ।
तस्यापराधदोषे भूमे ! पापं प्राप्नोति मानवः ।
तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे ! ॥
जायते वधिरश्चापि कुष्ठी गात्रपरिप्लुतः ।
चाण्डालस्य गृहे तत्र एवमेव न संशयः ॥
एवं भूत्वा तु तत् कर्म्म मम सेवे स्थितो यदि ।
ब्रह्मक्षत्रैव जायेत शुद्धे भागवते गृहे ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य सर्ग्गनाशुचि ।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिम् ॥
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥
दीपं दत्त्वापराधार्हे तरन्ति मनुजा भुवि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्म पथे स्थितः ॥
एतत्ते कथितं देवि ! सर्ग्गनाशं दीपकस्य तु ।
संसारग्रोधनञ्चैव यत् श्रुत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ * ॥
पुरुषस्य दीपनिर्व्वापणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंसः क्षुद्राक्षच्छेदनात् स्त्रियः ।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥*॥
देवार्थकल्पितदीपस्य निर्व्वापणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थंसुकल्पितम् ।
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ॥
कार्त्तिककल्याणचतुर्दश्यां नरकनिष्कृतये दीपदानं यथा,—
"नरकाय प्रदातव्यो दीपः संपूज्य देवताः ।"
इति तिथितत्त्वधृतलिङ्गपुराणम् ॥ * ॥
पृथिव्यां दीपो न संस्थाप्यः । यथा,—
"सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ॥
दीपक, क्ली, (दीपयतीति । दीप् + णिच् + ण्वुल् ।) वाक्यालङ्कारः । दीप्तिकारके, त्रि । इति मेदिनी । के, १०४ । कुङ्कुमम् । इति शब्दरत्नावली ॥*॥
वाक्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा, माघे ।
बलावलेपादधुनापि पूर्ब्ववत्
प्रसह्यते तेन जगत्त्रिगौरवा ।
सती च योगिनि प्रकृतिश्च निष्कला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६७॥
अपि च काव्यलिङ्गायाम् ।
"जातिक्रियागुणद्रव्यवाचकेन पदेन तु ।
एकत्र वर्त्तिना सर्व्ववाक्यार्थो दीपकम्भवेत् ॥"
यथा,—
भ्रमद्भ्रमरझङ्कारयुक्तोत्फुल्लकदम्बकः ।
मन्दचञ्चलवातोऽपि हरति हृदयं मुनाम् ॥

दीपकः, पुं, (दीपयति जठराग्निमिति । दीपि + ण्वुल् ।) यमानी । इति रत्नमाला । (गुणाश्चास्य यमानीशब्दे ज्ञेयाः ।) लोचमस्तकः । इति शब्दरत्नावली । दीपः । (यथा, ब्रह्माण्डपुराणे ।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अश्विशेषसहस्रस्य फलमाप्नोति मानवः ॥")

येन पश्चिमाग्ये पश्चिमो ग्रहस्तेन सः । इति हेमचन्द्रः । ४ । ४०८ ॥ वाज् इति श्रिकरा इति च भाषा । रागविशेषः । अयं हनूमन्मते षड्रागेषु द्वितीयरागः । सूर्य्यनेत्रान्निर्गतः । अस्य जातिः सम्पूर्णा । ग्रहस्तु षड्जस्वरः । गानसमयस्तु ग्रीष्मर्त्तौ मध्याह्नः । अस्य रूपं यथा । वर्णौ रक्तः । वस्त्रं पाटलवर्णम् । गलभूषणं रुद्राक्षमुक्तामाल्यम् । मत्तहस्त्यारूढोऽयम् । बहुस्त्रीपरिवृतश्च । कस्यचिन्मते । लज्जया दीपनिर्व्वापणेनान्धकारमयं गृहं कृत्वा स्त्रीभी रमते । अस्य रागिण्यः पञ्च यथा । देशी १ कामोद २ नट ३ केदारा ४ कानरा वा कर्णाटी ५ । पुत्राश्चाष्टौ यथा । कुन्दलः १ कमलः २ कलिङ्गः वा कलिन्द्रः ३ चम्पकः ४ कुसुम्भः वा कुसुमः ५ रामः ६ जहिलः ७ हिमालः ८ । भरतमते अस्य रागिण्यो यथा । केदारा १ गौरा २ गौड ३ गुज्जरी ४ रत्नाङ्गी ५ । तस्यते पुत्रा यथा । कुसुमः १ टङ्कः २ नटनारायणः ३ विहागराः ४ किरोदत्तः ५ रहसमङ्गला वा रभसमङ्गला ६ मङ्गलाख्यः ७ आढानुः वा आढाना ८ । इति तहफतोलहिन्दाख्यसंगीतशास्त्रसंग्रहः ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।

"प्लुतो लघुः प्लुतश्चैव ताले दीपकनामनि ॥")

दीपकिट्टं, क्ली, (दीपस्य किट्टम् ।) दीपजातकज्जलम् । इति शब्दार्थकल्पतरुः ॥

दीपकूपी, स्त्री, (दीपस्य कूपीव तैलधारकत्वात् ।) दीपवर्त्तिः । शलिता इति भाषा । तत्पर्य्यायः । तैलमाली २ दीपखोरी ३ विदाहिका ४ । इति शब्दमाला ॥

दीपखोरी, स्त्री, (दीपं खोरयति गर्त्ताघातं करोति स्थिरीकरोतीति । खोर् गर्त्ताघाते + क्विप् + अच् । गौरादित्वादिति ङीष् ।) दीपकूपी । इति शब्दमाला ॥

दीपध्वजः, पुं क्ली, (दीपस्य ध्वज इव ।) कज्जलम् । इति जटाधरः ॥

दीपनं, क्ली, (दीपयति वह्निमिति । दीप + णिच् + ल्युः ।) तगरमूलम् । इति रत्नमाला ॥ कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (मन्त्रसंस्कारविशेषः । यथा, शारदातिलके ।

"मन्त्राणां दश कथ्यन्ते संस्कारा सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने तथा ।
तर्पणं दीपनं गुप्तिर्दशैते मन्त्रसंस्क्रियाः ॥"
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥")

दीपनः, पुं, (दीप्यते इति । दीप + ल्युः ।) मयूरशिखा । (दीप + णिच् + ल्युः ।) शालिञ्चशाकः । इति शब्दचन्द्रिका ॥ कासमर्दः । पलाण्डुः । इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा, ऋतुसंहारे । १ । ३ ।

"सुवासितं हर्म्यतलं मनोरमं
प्रगाढसुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, (दीप्यते जठरवह्निरनया । दीप + णिच् + ल्युट् । स्त्रियां ङीप् ।) मेथिका । (अस्याः पर्य्यायाः यथा,—

"मेथिका मिथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मित्रपुष्पा च केरवी ।
कुक्षिका बहुपर्णी च पीतबीजा सुनिच्छदा ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) पाठा । यवानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप + णिच् + अनीयर् ।) यवानी । इति राजनिर्घण्टः ॥ दीपनयोग्ये, त्रि । (यथा सुश्रुते । १ । ४५ ।

"दीपनीयमचक्षुष्यं वाङ्मेधं वातलम् ॥")

औषधवर्गविशेषः । यथा,—

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"

इति चक्रदत्तः ॥

दीपपादपः, पुं, (दीपस्य पादप इव ।) दीपवृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, (दीप इव पुष्पं यस्य ।) चम्पकवृक्षः । इति राजनिर्घण्टः ॥

दीपवती, स्त्री, (दीपवत् तेजस्वित्वं अस्त्यस्या इति । दीप + मतुप् । मस्य वः ।) कामाख्यायां नदीविशेषः । यथा,—

ब्रह्मोवाच ।

"ग्राम्यती कथिता या तु नदी मत्स्यध्वजा सिता ।
तस्याः पूर्ब्बे समाख्याता नदी दीपवती मता ॥
एषा च हिमवज्जाता क्षिप्ता दीपवतस्ततः ।
तेन देवमनुष्येषु नदी दीपवती स्मृता ॥
दीपवत्याः पूर्ब्बतस्तु शृङ्गाटो नाम पर्ब्बतः ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपाधारः । पिलसुज् इति देशुका इति च भाषा । तत्पर्य्यायः । दीपतरुः २ ज्योतिष्कवृक्षः ३ । इति त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते ।१२।२०२।६।

"यथा प्रदीप्तः पुरुषः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथैव पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परदर्शन एव ॥")

दीपशिखा, स्त्री, (दीपस्य शिखा कारणत्वेन अस्त्यस्याः । अच् । टाप् ।) कज्जलम् । इति शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीप्तज्वाला ॥ (यथा, रघुः । ६ । ६७ ।

"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपश्रेणी, स्त्री, (दीपानां श्रेणीव ।) दीपाली । इति हारावली । १२४ ।

दीपान्विता, स्त्री, (दीपैरन्विता युक्ता ।) गौणचान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्यपुराणम् ।

"येयं दीपान्विता राजन्! ख्याता पञ्चदशी शुभा ।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शुक्लायां देवगेहेषु च ।
रथ्यापण्यप्रसृतानेषु नदीपर्ब्बतसानुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपान्विता ख्याता येयमिति विशेषणाच्च ।" इति आह्निकतत्त्वम् ॥* ॥ तत्र कर्म्माणि यथा,—

"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि ॥
चतुष्पथे गजस्थानेषु नदीपर्ब्बतसानुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभव्य च बुभुक्षितान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मृगैर्विदग्धैश्च बान्धवैर्बन्धुकैः सह ॥"

इति तिथितत्त्वम् ॥

तत्र श्यामापूजाप्रमाणं यथा,—

"दीपान्विता पार्ब्बणाय स्मृता काल्यर्चनाय च ।
महानिशि द्वितीयं स्यात् पूर्ब्बेद्युर्याम्ययामयोः ॥
महानिशि याम्ययामयोः पूर्ब्बेद्युरेव द्वितीयं काल्यर्चनं स्यात् इत्यर्थः । प्रथमं पार्ब्बणं द्वितीयं काल्यर्चनमिति द्वितीयशब्दस्य तात्पर्य्यार्थः ।" इति स्मृतिसारसंग्रहधृतयोगकेश्वरतन्त्रम् ॥* ॥

अपरञ्च ।

"दीपोत्सर्गं चतुर्दश्यां संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या कालौ तारा प्रियङ्करी ॥"

इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, (दीपानां आली श्रेणी ।) दीपमाला । तत्पर्य्यायः । दीपश्रेणी २ । इति हारावली । १२४ ॥ (दीपानां आली यत्र ।) दीपान्वितामावास्या । तत्पर्य्यायः । यक्षरात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, (दीपयति प्रकाशयति गृहादीनिति । दीप + णिच् + ण्वुल् । टापि अत इत्वम् ।) महिन्तापनीयश्रीनिवासभक्तज्योतिर्व्यन्थविशेषः । यथा, अस्तं गतवति मिहिरे अतिमलिनदोषाकुले च गोविप्रे । उद्वाहादिह शुद्धिग्रहणार्थं दीपिका क्रियते ॥ एतद्विप्रा भुवनचण्डजातकशुद्ध्यादिदीपिकाः सन्ति ॥ राजी-

विशेषः। सा हिल्लोलरागस्य पत्नी। अस्या ध्यानं यथा,—
"प्रदोषकाले गृहसम्प्रविष्टा
प्रदीपहस्तारुणगात्रवस्त्रा।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम्॥"
तस्या गानकालः सायाह्नः। इति सङ्गीतदामोदरः॥ (प्रदीपः। यथा, रघुः।८।७०।
"स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपवासनाथाम्॥")
प्रकाशिकायाम्, त्रि॥
दीपिता, [ऋ] त्रि, (दीपयतीति। दीप+णिच्+तृच्।) दीप्तिकर्त्ता। इति व्याकरणम्॥
दीप्तं, क्ली, (दीपी दीप्तौ+क्तः। "श्वीदितो निष्ठायाम्।" ७।२।१४। इति नेट्।) स्वर्णम्। हिङ्गु। इति राजनिर्घण्टः॥ (स्वर्णशब्दे हिङ्गुशब्दे च विवृतिरस्य ज्ञेया॥)
दीप्तः, पुं, (दीप+क्तः।) निम्बुकः। सिंहः। इति राजनिर्घण्टः॥ (नासागतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे २२ अध्याये।
"घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायुः।
नासा प्रदीप्तेव च यस्य जन्तो-
र्याधिस्तु तं दीप्तमुदाहरन्ति॥"
अस्य प्रतिषेधमाह तत्रैव २३ अध्याये।
"दीप्ते रोगे पैत्तिकं संविधानं
कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च॥")
दीप्तः, त्रि, (दीप+क्तः।) निर्भासितः। दग्धः। ज्वलितः। इति मेदिनी। ते, २५॥ (यथा, हरिवंशे। १६८। ३।
"ततः प्रकुपितो दीप्तो रुद्रश्च क्रूरभाषितः।
दीप्तायां दिशि भावन्तो भयमावेदयन्ति मे॥")
दीप्तकं, क्ली, (दीप्तमेव। स्वार्थे कन्।) स्वर्णम्। इति राजनिर्घण्टः॥
दीप्तजिह्वा, स्त्री पुं, (दीप्ता जिह्वा यस्याः।) उल्कामुखी द्रव्यगाली। इति हारावली।७६॥ (प्रदीप्तजिह्वे, त्रि। यथा, महाभारते। १। २२६। ३७।
"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥")
दीप्तपिङ्गलः, पुं, (दीप्तः पिङ्गलश्च। दीप्तं स्वर्णं तद्वत् पिङ्गलो वा।) सिंहः। इति राजनिर्घण्टः॥
दीप्तरसः, पुं, (दीप्त उष्णलो रसो यस्य।) किण्वलुकः। इति शब्दचन्द्रिका॥
दीप्तलोचनः, पुं, (दीप्ते लोचने नेत्रे यस्य।) विड़ालः। इति राजनिर्घण्टः॥
दीप्तलोहं, क्ली, (दीप्तं लोहमिव।) कांस्यम्। इति राजनिर्घण्टः॥
दीप्ता, स्त्री, (दीप्त+टाप्।) लाङ्गलिकावृक्षः। इति रत्नमाला॥ ज्योतिष्मती। शातला। इति राजनिर्घण्टः॥
दीप्ताक्षः, पुं, (दीप्ते अक्षिणी यस्य।) विड़ालः। इति शब्दरत्नावली॥ (प्रदीप्तनेत्रे, त्रि। यथा, महाभारते। १। २२६। ३७।
"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥")
दीप्ताग्निः, पुं, (दीप्तः अग्निर्जठराग्निर्यस्य।) अगस्त्यः। इति त्रिकाण्डशेषः॥ (प्रदीप्तो वह्निः। यथा, भट्टिः। २। २।
"सधूमदीप्ताग्निरुचीनि रेणु-
स्ताम्रोत्पलान्याकुलषट्पदानि॥")
तीक्ष्णजठरानलयुक्ते, त्रि॥ (यथा, सुश्रुते। १। २०।
"सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च॥")
दीप्ताङ्गः, पुं, (दीप्तं भासितमङ्गमस्य।) मयूरः। इति शब्दरत्नावली॥
दीप्तिः, स्त्री, (दीप+क्तिन्।) दीपनम्। तत्पर्य्यायः। प्रभा २ रुक् ३ रुचिः ४ त्विट् ५ भा ६ भाः ७ छविः ८ द्युतिः ९ रोचिः १० श्रीचिः ११। इत्यमरः।१।४।३४॥ वाग्देवेगस्य तीव्रता। स्त्रिया आयतलम्बगुणः। इति हेमचन्द्रः।२।१३॥
"कान्तिरेव वयोभोगदेशकालगुणादिभिः।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, साहित्यदर्पणे। ३। १३१।
"कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते॥")
लाक्षा। कांस्यम्। इति राजनिर्घण्टः॥
दीप्तिकः, पुं, (दीप्तिरस्त्यस्येति। कै+कः।) दुग्धपाषाणवृक्षः। इति राजनिर्घण्टः॥
दीप्तोपलः, पुं, (दीप्तः सूर्य्यकिरणसम्पर्कात् ज्वलितः उपलः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥
दीप्यः, पुं, (दीपाय अग्निदीपनाय हितमिति। दीप+"तस्मै हितम्।" ५। १। ४। इति अपूपादित्वात् पक्षे यत्।) यमानी। (अस्य पर्य्यायो यथा,—
"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)
जीरकः। इति राजनिर्घण्टः॥ (दीपाय साध्विति। दीप+"तत्र साधुः।" ४। ४। ९८। इति यत्।) मयूरशिखा। रङ्गजटा इति ख्याता। इत्यमरः। २। ४। १११॥
दीप्यकं, क्ली, (दीपाय हितं साध्विति वा। दीप+यत्। ततः स्वार्थे कन्।) अजमोदा। यमानी। (यथा भावप्रकाशे क्षुद्ररोगाधिकारे।
"सैन्धवं चन्दनं कुष्ठं दीपकश्च फलं पृथक्॥")
बर्हिचूड़ा। इति मेदिनी। के, १०५॥
दीप्यकः, पुं, (दीप्य+संज्ञायां स्वार्थे वा कन्।) अलङ्कारः। यमानी। (अस्य पर्य्याया यथा,—
"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)
लोचमस्तकः। इति भरतधृतधरणिः॥ (अजमोदा। तत्पर्य्यायो यथा,—
"अजमोदा खरास्वा च मायूरो दीप्यकस्तथा।
तथाऽजकुशा प्रोक्ता कारवी लोचमस्तका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)
दीप्रः, त्रि, (दीप्यते इति। दीप+"नमिकम्पिस्म्यजसकमहिंसदीपो रः।" ३। २। १६७। इति रः।) दीप्तिविशिष्टः। इति व्याकरणम्॥ (यथा कथासरित्सागरे। २५। १३५।
"क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम्॥")
दीयमानः, त्रि, (दीयते इति। दा+कर्म्मणि शानच्।) वर्त्तमानदानसम्बन्धिवस्तु। इति व्याकरणम्। यथा, स्मृत्यधिकृतायाम्।
"विवाहोत्सवयज्ञेषु श्राद्धरा ऋतुष्वके।
पूर्व्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति॥"
इति तिथ्यादितत्त्वम्।
दीर्घ, त्रि, (दृणातीति। दृ विदारणे+बाहुलकात् घञ्।) आयतम्। इत्यमरः। ३।१।६८। (यथा मेघदूते। १०३।
"दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः॥")
दीर्घः, पुं, (दृ+बाहुलकात् घञ्।) लताशालवृक्षः। (यथा, वैद्यकरत्नमालायाम्।
"ताल्वोष्ठकर्णः कुशिको वल्ली दीर्घो लतातरुः॥")
इतकटः। इति रत्नमाला॥ रामशरः। उडुः। इति राजनिर्घण्टः॥ पञ्चमषडष्टसप्तमाष्टमराशयः। यथा। वृश्चिककन्याधनुर्गपतिवह्नयो दीर्घाः। इति ज्योतिषतत्त्वम्॥ द्विमात्रवर्णः। तदुयथा। आ ई ऊ ॠ ॡ ए ऐ ओ औ। गुरुवर्णः। इति व्याकरणम्॥ (दीर्घलक्षणं यथा,—
"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥")
दीर्घकन्या, स्त्री, (दीर्घा कन्येति नित्यकर्म्मधारयः।) गौरजीरकः॥ इति राजनिर्घण्टः॥
दीर्घकण्टकः, पुं, (दीर्घः कण्टकोऽस्य।) वल्वुरः। इति राजनिर्घण्टः॥
दीर्घकण्टकः, पुं, (दीर्घः कण्टोऽस्य। कप्।) वकपक्षी। इति शब्दचन्द्रिका॥
दीर्घकन्दकं, क्ली, (दीर्घः कन्दो यस्य। कप्।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्दे ऽस्य गुणादयो विज्ञेयाः॥)
दीर्घकन्दिका, स्त्री. (दीर्घकन्दक+टाप् अत इत्वञ्च।) सुवली। इति राजनिर्घण्टः॥
दीर्घकन्धरः, पुं, (दीर्घः कन्धरो यस्य।) वकः। इति राजनिर्घण्टः॥
दीर्घकाण्डः, पुं, (दीर्घः काण्डो यस्य।) गुञ्जटवृक्षः। इति राजनिर्घण्टः॥
दीर्घकाण्डा, स्त्री, (दीर्घः काण्डोऽस्याः।) पातालगरुड़लता। इति राजनिर्घण्टः॥
दीर्घकीलः, पुं, (दीर्घः कीलः प्राखादको यत्र।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥
दीर्घकीलकः, पुं, (दीर्घकील+स्वार्थे कन्।) अङ्कोठवृक्षः। इति जटाधरः॥
दीर्घकूरकं क्ली, (दीर्घं कूरकमन्नम्।) राजान्नम्। इति राजनिर्घण्टः॥

दीर्घकेशः, पुं, (दीर्घाः केशा इव लोमान्यस्य।) भल्लूकः। इति राजनिर्घण्टः॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। २१।
"एकविलोचनमूलिकदीर्घग्रीवास्यकेशाश्च॥")
दीर्घाः केशा यस्य।) आयतकेशे, त्रि॥ (स्त्रियां वा ङीष् खाङ्गत्वात्। यथा, महानाटके।१६१।
"विम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या॥")
दीर्घकोशिका, स्त्री, (दीर्घः कोशो यस्याः। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) दीर्घकोशिका। इत्यमरटीकायां भरतः॥
दीर्घकोषिका, स्त्री, (दीर्घः कोषोऽस्याः। कापि अत इत्वम्।) भिण्डिका। भिण्डुक इति ख्याता। तत्पर्य्यायः। दुर्गभा २। इत्यमरः। १। १०। २५॥
दीर्घगतिः, पुं, (दीर्घा आयतस्थानगता गतिः पादविक्षेपो यस्य।) उष्ट्रः। इति राजनिर्घण्टः॥
दीर्घग्रन्थिः, पुं, (दीर्घो ग्रन्थिः पर्व्वास्य।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवृतिरस्य गजपिप्पलीशब्दे विज्ञेया॥)
दीर्घग्रीवः, पुं, (दीर्घा ग्रीवास्य।) उष्ट्रः। इति हेमचन्द्रः।४।३२६॥ नीलक्रौञ्चः। इति राजनिर्घण्टः॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। २१।
"एकविलोचनमूलिकदीर्घग्रीवास्यकेशाश्च॥")
दीर्घघाटिकः, पुं, (दीर्घा घाटास्त्राक्षीति। ठन्।) उष्ट्रः। इति शब्दरत्नावली॥
दीर्घजङ्घलः, पुं, (दीर्घे यथा तथा जङ्घलो गतिशीलः।) भल्लातमत्स्यः। इति शब्दमाला॥
दीर्घजङ्घः, पुं, (दीर्घा जङ्घास्य।) वकः। इति त्रिकाण्डशेषः॥ उष्ट्रः। इति जटाधरः॥ आयतजङ्घायुक्ते, त्रि॥
दीर्घजिह्वः, पुं, (दीर्घा जिह्वा यस्य।) सर्पः। इति हेमचन्द्रः। ४। ३६६॥ (दानवविशेषः। यथा, महाभारते। १। ६५। ३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः॥"
स्त्रियां टाप्। राक्षसीविशेषः। यथा, महाभारते। ३। २८६। ४४।
"द्वाभ्यां बाभ्यां ललाटाभ्यां दीर्घजिह्वामजिह्मिकाम्॥")
दीर्घतरुः, पुं, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः।) तालः। इति शब्दार्थकल्पतरुः॥
दीर्घतिमिषा, स्त्री, (दीर्घस्तिमिषः। अभिधानात् स्त्रीत्वम्।) कर्कटी। इति शब्दमाला॥
दीर्घतुण्डा, स्त्री, (दीर्घं तुण्डं यस्याः।) छुछुन्दरी। इति कोषान्तरम्॥
दीर्घदलः, पुं, (दीर्घं दलमिति नित्यकर्म्मधारयः। अभिधानात् पुंस्त्वम्।) पलाशवृक्षः। इति राजनिर्घण्टः॥
दीर्घदण्डः, पुं, (दीर्घो दण्ड इव काण्डावच्छेदेन।) एरण्डवृक्षः। इति भावप्रकाशः॥
दीर्घदण्डकः, पुं, (दीर्घदण्ड+स्वार्थे कन्।) एरण्डवृक्षः। इति जटाधरः॥
दीर्घदण्डी, स्त्री, (दीर्घदण्ड+गौरादित्वात् ङीष्।) गोरक्षी। इति राजनिर्घण्टः॥
दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति। णिनिः।) पण्डितः। इत्यमरः। २। ७। ६॥ गृध्रः। इति शब्दरत्नावली॥ भल्लूकः। इति राजनिर्घण्टः॥ दूरदर्शके, त्रि॥ (यथा, महाभारते। २। ३८। ४६।
"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम्॥")
दीर्घदृष्टिः, पुं, (दीर्घा दृष्टिर्दर्शनमस्य।) दीर्घदर्शी। इति हलायुधः॥
दीर्घद्रुः, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः।) तालवृक्षः। इति शब्दचन्द्रिका॥
दीर्घद्रुमः, पुं, (दीर्घो द्रुम इति नित्यकर्म्मधारयः।) प्राक्शालिः। इति राजनिर्घण्टः॥
दीर्घनादः, पुं, (दीर्घो दूरगो नादोऽस्य।) गृध्रः। इति राजनिर्घण्टः॥
दीर्घनालं, क्ली, (दीर्घं नालमस्य।) दीर्घरोहितकम्। इति राजनिर्घण्टः॥
दीर्घनालः, पुं, (दीर्घं नालं यस्य।) वृक्षगुग्गुलुः। यावनालः। इति राजनिर्घण्टः॥
दीर्घनिद्रा, स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः।) मृत्युः। इति हेमचन्द्रः। २। २१८॥ (यथा, मार्कण्डेये। ७। १३।
"सोऽयं मत्कार्म्मुकाक्षेपविदीपितदिगन्तरैः। शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति॥")
दीर्घपटोलिका, स्त्री, (दीर्घा पटोलिका।) लतापटोलविशेषः। घुण्डुल इति भाषा। अस्य गुणाः। स्निग्धत्वम्। कटुत्वम्। विदग्धित्वम्। गुरुत्वम्। वायुपित्तश्लेष्मरुचिभेदकारित्वम्। मधुरत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥
दीर्घपत्रः, पुं, (दीर्घं पत्रमस्य।) राजपलाण्डुः। विष्णुकन्दः। हरिदर्भः। कुन्दरः। तालः। इति राजनिर्घण्टः॥ कुपीलुः। इति भावप्रकाशः॥ (इक्षुभेदः। यथा, सुश्रुते सूत्रस्थाने ४५ अः।
"कान्तारस्थापसेच्छ्य काष्ठेक्षुः सूचिपत्रकः। नेपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत्॥")
दीर्घपत्रकः, पुं, (दीर्घपत्र+संज्ञायां कन्।) रक्तलशुनः। एरण्डः। हिञ्जलः। वेतसः। इति राजनिर्घण्टः॥ करीरवृक्षः। इति शब्दचन्द्रिका॥ जलजमधूकः। इति जटाधरः॥ लशुनः। इति हेमचन्द्रः। ४। २५६॥ (इक्षुभेदः। यथा, सुश्रुते सूत्रस्थाने ४५ अः।
"सूचिपत्रो नीलपोरो नेपालो दीर्घपत्रकः। वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥")
दीर्घपत्रा, स्त्री, (दीर्घपत्र+टाप्।) चित्रपाठेका। चाकुलियाभेदः। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"शालिपर्णी स्थिरा सौम्या त्रिपर्णी गौरवी गुरुः। विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि॥")
इक्षजम्बुः। इति रत्नमाला॥ गन्धपत्रा। केतकी। डोङ्गीक्षुपः। इति राजनिर्घण्टः॥ (चित्रापरपर्य्याय उद्भिद्भेदः। यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"चित्रा चक्षुश्चक्षुकी च दीर्घपत्रा सतिक्तका॥")
दीर्घपत्रिका, स्त्री, (दीर्घपत्र+संज्ञायां कन् टाप् अत इत्वञ्च।) श्वेतवचा। घृतकुमारी। शालपर्णी। इति राजनिर्घण्टः॥
दीर्घपत्री, स्त्री, (दीर्घपत्र+गौरादित्वात् ङीष्।) पलाशशीलता। महाचक्षुष्काः। इति राजनिर्घण्टः॥
दीर्घपर्णी, स्त्री, (दीर्घं पर्णमस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इति राजनिर्घण्टः॥ (पृश्निपर्णीशब्देऽस्या विवरणं ज्ञातव्यम्॥)
दीर्घपल्लवः, पुं, (दीर्घः पल्लवो यस्य।) शालवृक्षः। इति राजनिर्घण्टः। आयतच्छदे, क्ली। तद्वति, त्रि॥
दीर्घपात्, पुं, (दीर्घौ पादावस्य। समासे अन्यलोपः।) कङ्कपक्षी। इति शब्दरत्नावली॥
दीर्घपादः, पुं, (दीर्घौ पादौ यस्य। समासान्तविधेरनित्यत्वात् अन्यलोपाभावश्च।) कङ्कपक्षी। इति हेमचन्द्रः। ४। ४००॥
दीर्घपादपः, पुं, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः।) तालः। पूगः। इति राजनिर्घण्टः॥
दीर्घपृष्ठः, पुं, (दीर्घं पृष्ठं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥
दीर्घफलः, पुं, (दीर्घं फलं यस्य।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः। आरेवतो व्याधिघातः कृतमालः सुवर्णकः॥ कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दीर्घफलकः, पुं, (दीर्घफल+संज्ञायां कन्।) अगस्त्यवृक्षः। इति राजनिर्घण्टः॥ (गुणादयोऽस्यागस्त्यशब्दे व्याख्याताः॥)
दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः।) कपिलद्राक्षा। जतुका। इति राजनिर्घण्टः॥
दीर्घबाला, स्त्री, (दीर्घः बालो यस्याः।) चमरी। इति राजनिर्घण्टः॥
दीर्घमारुतः, पुं, (दीर्घः अधिकसमयव्यापी मारुतो निःश्वासवायुर्यस्य।) हस्ती। इति त्रिकाण्डशेषः॥
दीर्घमूलं, क्ली, (दीर्घं मूलं यस्य।) लामज्जकम्। इति राजनिर्घण्टः॥
दीर्घमूल., पु, (दीर्घं मूलं यस्य।) मोरटलता। विख्यातवृक्षः इति राजनिर्घण्टः॥
दीर्घमूलकं, क्ली, (दीर्घमूल+संज्ञायां कन्।) मूलकम्। इति राजनिर्घण्टः॥
दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः। टाप्।) श्यामालता। शालपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते। १। ३८।
"प्रियङ्गु समङ्गधातकी पुन्नागरक्तचन्दनकुचन्दन-

मोचरसरसाञ्जनकुम्भीकसोतोऽञ्जनपद्मकेसर-मोचनवल्को दीर्घमूला चेति ॥")

दीर्घनली, स्त्री, (दीर्घं नलमस्याः । ङीप् ।) दुरालभा । इति शब्दमाला ॥

दीर्घरदः, पुं, (दीर्घौ रदौ दन्तौ यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ आयतदन्ते, त्रि ॥

दीर्घरसनः, पुं, (दीर्घा रसना जिह्वा यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

दीर्घरात्रं, क्ली, (दीर्घाः प्रभूता रात्रयः समत्रत्र । अर्च आदिलात् अच् ।) चिरकालम् । इति त्रिकाण्डशेषः ॥ (पुं. दीर्घा चासौ रात्रिश्चेति विग्रहे । "सर्व्वैकदेशसङ्खातपुण्यवर्षादीर्घरात्रेः।" इति सुश्रुतोक्तलात् यः । पुंस्त्वमभिधानात् ।) दीर्घा निशा च ॥

दीर्घरोमा, [न्] पुं, (दीर्घाणि रोमाणि यस्य ।) भल्लूकः । इति शब्दार्थकल्पतरुः ॥ (महादेवस्य भूतानामन्यतमः । यथा, हरिवंशे भविष्यपर्व्वणि ।१४।२ "तस्याग्रे समपद्यन्त भूतसङ्घाः सहस्रशः ।" "दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः ॥")

दीर्घरोहिषकं, क्ली, (दीर्घं रोहिषम् । ततः स्वार्थे संज्ञायां वा कन् ।) कत्तृणभेदः । सुगन्धिद्रव्यविशेषः । बड़ रोहिष इति भाषा । तत्पर्य्यायः । डुण्डकाख्यम् २ डुण्ड्रदम् ३ यज्ञेष्टम् ४ दीर्घनालम् ५ तिक्तसारम् ६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातभूतयक्ष्मविषनाशित्वम् । व्रणशोथतृषिरोपशमत्वञ्च । इति राजनिर्घण्टः ॥

दीर्घवंशः, पुं, (दीर्घो वंश इव ।) नलः । इति राजनिर्घण्टः ॥ आयते ह्रस्वजङ्घे कुले च ॥

दीर्घवक्त्रः, पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य ।) हस्ती । इति शब्दमाला ॥ (लम्बवदने, त्रि ॥)

दीर्घवल्किका, स्त्री, कुम्भीरः । इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली, स्त्री, (दीर्घा वल्ली ।) महेन्द्रवारुणी । पातालगरुड़ी । पलाशी । इति राजनिर्घण्टः ॥ आयता लता च ॥

दीर्घवृन्तः, पुं, (दीर्घं वृन्तं यस्य ।) श्लोणाकवृक्षः । इत्यमरः ।२। ४। ५७ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"श्लोणाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः ।
दीर्घवृन्तश्च कट्फलो भल्लूकवृष्टकोऽरुणः ॥")

दीर्घवृन्तकः, पुं, (दीर्घवृन्त+स्वार्थे कन् ।) श्लोणाकः । इति शब्दमाला ॥ श्लोणाकभेदः । इति राजनिर्घण्टः ॥ (श्लोणाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्य इत्र-चिर्भिटी । इति राजनिर्घण्टः ॥

दीर्घवृन्तिका, स्त्री, (दीर्घं वृन्तं यस्याः । कप् । टापि अत इत्वम् ।) एलापर्णी । इति शब्दचन्द्रिका ॥

दीर्घव्रणः, पुं, (दीर्घैः व्रणः ।) यावनालः । इति राजनिर्घण्टः ॥

दीर्घशाखः, पुं, (दीर्घा शाखा यस्य ।) वृक्षवृक्षः । इति राजनिर्घण्टः ॥ प्राणवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः । कापि अत इत्वम् ।) नीलाम्बीक्षुपः । इति राजनिर्घण्टः ॥

दीर्घशिम्बिकः, पुं, (दीर्घा शिम्बिर्यस्य । कप् ।) शवः । इति राजनिर्घण्टः ॥

दीर्घशूककं, क्ली, (दीर्घं शूकं यस्य । कप् ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घसक्थ, त्रि, (दीर्घे सक्थिनी यस्य । "बहुव्रीहौ सक्थ्यक्ष्णोः खाङ्गात् षच् ।" ५ । ४ । ११३। इति षच् ।) दीर्घोरु । इति व्याकरणम् ॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य । खाङ्गादित्वात्तीरत्र न षच् ।) शूकटम् । इति व्याकरणम् ॥

दीर्घसत्रं, क्ली, (दीर्घं बहुकालसाध्यं सत्रम् ।) यज्ञविशेषः । (यथा, भागवते । २ । १ । २१ । "कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् । आसीना दीर्घसत्रेण कथायां सत्रया हरेः ॥") तीर्थविशेषः । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ३ । ८२ । १०३—१०४ । "ततो गच्छेत राजेन्द्र ! दीर्घसत्रं यथाक्रमम् । तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः । दीक्षयन्त्रसुपासन्ते दीक्षिता नियमव्रताः ॥ गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ! । राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥")

दीर्घसुरतः, पुं, (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

दीर्घसूत्रः, त्रि, (दीर्घैण बहुकालेन सूत्रं कार्य्यारम्भो यस्य ।) चिरक्रियः । इत्यमरः ।३।१।१७॥ "अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिव ! दीर्घसूत्रस्य दृप्तेः कर्म्महानिर्ध्रुवं भवेत् ॥ रागे द्वेषे च कामे च क्रोधे पापे च कर्म्मणि । अप्रिये चैव कर्त्तव्ये दीर्घसूत्रश्च दृश्यते ॥" इति मत्स्यपुराणम् ॥ (आयतसूत्रकम् । यथा, माघे । १० । ६१ । "मेखलागुणविलम्बमस्यां दीर्घसूत्रमकरोत् परिधानम् ॥") विस्तृते तन्तौ, क्ली ॥

दीर्घसूत्री, [न्] त्रि, (दीर्घसूत्रं बहुकालं व्याप्य कर्म्मारम्भोऽस्यास्तीति । दीर्घसूत्र+इनिः ।) दीर्घसूत्रः । इति हलायुधः ॥ (यथा, गीतायाम् । १८ । २८ । "क्रियादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥")

दीर्घस्कन्धः, पुं, (दीर्घः स्कन्धो यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

दीर्घा, स्त्री, (दीर्घ+टाप् ।) एलापर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"एलापर्णी एथकपर्णी लाङ्गली क्रोष्टुपुच्छिका ।
धामनिः कलशी तन्वी गूढा क्रोष्टुकमेखला ॥
दीर्घा श्वगालविन्ना सा श्रीपर्णी सिंहपुच्छिका ।
दीर्घपत्रा लतिशुद्धा वृतिला चित्रपर्णिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

दीर्घाध्वगः, त्रि, (दीर्घमध्वानं गच्छतीति । गम+डः ।) खेखहारः । घाउड़िया इति भाषा । उष्ट्रः, पुं । इति मेदिनी ॥ गे, ५७ ॥

दीर्घायुः, [स्] पुं, (दीर्घं आयुर्यस्य ।) शाल्मलिवृक्षः । काकः । जीवकवृक्षः । मार्कण्डेयः । चिरजीविनि, त्रि । इति मेदिनी । से, ५५ ॥ (यथा, महाभारते । ७ । ५७ । १४ । "दीर्घायुषः प्रजाः सर्व्वा युगा न म्रियते तदा ॥" "तत्र महापाणि-पाद-पार्श्वपृष्ठस्तनाग्रदशन-वदनस्कन्धललाटं दीर्घाङ्गुलिपर्व्वोच्छ्वासग्रैवबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रवृषणं गम्भीरसत्त्वस्वरनाभिमनुद्वेवह्रस्वसुपचितमहारोमशुक्लकेशं प्रशस्तस्निग्धं स्नायुसुश्लिष्टं सुहृदनुपूर्व्वाग्रं विशुष्यमाणशरीरं प्रशस्त विशुष्यमाणहृदयं पुरुषं जानीयादीर्घायुः खल्वयमिति ।" "गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुश्लेष्मा यः स दीर्घायुरुच्यते ॥ गर्भात् प्रभृत्यरोगो यः शुनैः समुपचीयते । शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

दीर्घायुधः, पुं, (दीर्घं आयुधः ।) कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ (दीर्घौ आयुधौ इव दन्तौ यस्य ।) शूकरः । इति शब्दमाला ॥

दीर्घायुष्यः, पुं, (दीर्घं आयुष्यं जीवनं यस्य ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घार्कः, पुं, (दीर्घं अर्कवृक्ष इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घिका, स्त्री, (दीर्घैव । दीर्घा+संज्ञायां कन् । टापि अत इत्वम् ।) चिरप्रतिष्ठबहुपरिमितजलाशयः । दीघि इति भाषा । तत्पर्य्यायः । वापी २ । इत्यमरः ।१।१०।२८॥ (यथा, रघुः । १६ । १३ । "वनेरिदानीं महिषैरसेदभः
श्रद्धाहतं क्रोशति दीर्घिकाणाम् ॥")

तन्त्रलगुणाः । गुरुत्वम् । कटुत्वम् । क्षारत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । हिक्कापत्री । इति राजनिर्घण्टः ॥

दीर्घेर्वारुः, पुं, (दीर्घा इर्वारुः ।) डङ्गरी । इति राजनिर्घण्टः ॥

दीर्णः, त्रि, (दॄ विदारे+क्तः ।) विदारितः । (यथा, गोः रामायणे । २ । ३६ । २६ । "आर्यसं हृदयं नूनं राममातुः सुसंहतम् । यन्न दीर्णं प्रिये पुत्रे वनवासाय निर्गते ॥") भीतः । इति मेदिनी । णे, १६ ॥ (यथा, महाभारते । ६ । ३ । ७६ । "एको दीर्णां दारयति सेनां सुमहतीमपि । तां दीर्णामनु दीर्य्यन्ते योधाः शूरतरा अपि ॥")

दीवि:, पुं, किकीदिविः । इति शब्दमाला ॥

दु, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट ।) दवति । इति दुर्गादासः ॥

दु, ट् ओ न उपतापे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-अकं च-अनिट्।) टु, दवथुः। ओ, दून:। न, दुनोति। उपताप इहोपतप्तीभावः उपतप्तीकरणञ्च। मन्मथेन दुनोमीति जयदेवः। वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः। इति कालिदासः। इति दुर्गादासः॥

दुः, [र्] अ, निषेधः। दुःखम्। निन्दा। अवक्षेपणम्। इति दुर्गादासधृतपुरुषोत्तमदेवः॥

दुः, [स्] अ, दुःखभावनम्। कोमः। इति दुर्गादासधृतमेदिनी॥

दुःकूलः, पुं, (दुर्दुःखं तच्चनकं कूलं रोधो यस्मात्। एतदुत्पत्त्या तटस्य विघ्नत्वात् अस्य तथात्वम्।) चोरनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दुःख, तृ क तत्कृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) विसर्गमध्यः।

"काले तड़ित्प्रभाजाले घनपीनपयोधरे।
कान्तः सर्व्वगुणोपेतो बालेन्दुः खे न लभ्यते॥"

इति विन्दुधृतकम्। अस्यार्थः। तड़ित्प्रभासमूहवति घनस्थूलमेघे काले कमनीयः सर्व्वगुणोपेतो बालेन्दुः खे आकाशे न लभ्यते पक्षे हे बाले सर्व्वगुणोपेतः कान्तः प्रतिदुःखेन लभ्यते। दुःखयति दुःखापयति। मूढैन्यमथः। इति केचित्। तत्कृतिर्दुःखकरणम्। इति दुर्गादासः॥

दुःखं, क्ली, (दुर् दुष्टं खनतीति। खन+डः। यद्वा, दुःखयतीति। दुःख+पचाद्यच्।) संसारः। इति चिकाण्डशेषः॥ (रोगः। यथा, भावप्रकाशे अर्शोरोगाधिकारे।

"मेकाभः पीड्यते दुःखैः श्लोणितक्षयसम्भवैः।"

"दुःखैः रोगैः।" इति तट्टीका॥) मनोधर्म्मविशेषः। व्यायमते आत्मगुणभेदः। तत् अधर्म्मजन्यं सचेतसां प्रतिकूलम्। इति भाषापरिच्छेदः॥ तत्पर्य्यायः। पीड़ा २ बाधा ३ व्यथा ४ व्यसनम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः॥१।१०।३॥ अर्त्तिः १० आर्त्तिः ११ पीड़नम् १२ अवाधा १३ बाधनम् १४ व्यसनम् १५ व्यासनम् १६ विबाधनम् १७ पीड़ितम् १८ विद्वेषणम् १९। इति शब्दरत्नावली॥ *॥

"सुखं दुःखञ्च हर्षञ्च शोकञ्च मङ्गलालयम्।
मया दत्तञ्च तत्सर्व्वं योगिनामपि दुर्लभम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥ *॥

(दुःखन्तु आध्यात्मिकाधिदैविकाधिभौतिकभेदात् त्रिविधम्। यदुक्तं तत्त्वकौमुद्याम्। "दुःखत्रयाभिघातात्।" इति।

"दुःखानां चयं दुःखचयं तत् खलु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च। तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्षाविषादविषयाविशेषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च। तत्र आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणाममेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखविकेचाग्नाः करणवर्त्तिना चेतनाग्रहीः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः॥")

"दुःखमेवं प्रवक्ष्यामि सच्छृणुष्व वसुन्धरे!।
उच्चितेनोपचारेण दुःखं मोक्षविनाशनम्॥
अहङ्कारकृतो नित्यं नरो मोहेन चावृतः।
ये मां नैव प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
सर्व्वाग्नौ सर्व्वविक्रेता नमस्कारविवर्जितः।
ये च मां न प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
सर्व्वान्नानि तु सिद्धानि पाकभेदन्तु कारयेत्।
अवैश्वदेवे नरोऽश्नन्ति तत्र दुःखतरन्तु किम्॥
प्राप्तकाले वैश्वदेवे दृष्टमतिथिमागतम्।
अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्तु किम्॥
असत्पुरुषसेवायै परदाराभिमर्शकः।
नरोपतापी मन्दात्मा तत्र दुःखतरन्तु किम्॥
अकृत्वायुर्व्वलं कर्म्म यदि संवसते नरः।
स्वल्पकालवयं प्राप्तस्तत्र दुःखतरन्तु किम्॥
हस्त्यश्वरथयानानि गच्छमानानि पश्यति।
न वै तस्याग्रतः पृष्ठे तत्र दुःखतरन्तु किम्॥
अश्नन्ति पिण्डितं केचित् हृतशालिसमन्वितम्।
शुष्कान्नं केचिदश्नन्ति तत्र दुःखतरन्तु किम्॥
वरवस्त्रावृतां शुभ्रां सभासेवन्ति भूषिताः।
केचित् क्षयेषु शीर्य्यन्ते ततो दुःखतरन्तु किम्॥
विद्वान् क्षती गुणज्ञश्च सर्व्वशास्त्रविशारदः।
केचिन्मूकाश्च जड़ाश्च तत्र दुःखतरन्तु किम्॥
विद्यमाने धने केचित् कृपणा भोगवर्जिताः।
दरिद्रो जायते दाता तत्र दुःखतरन्तु किम्॥
पुरुषस्य द्वये भार्य्ये तयोरेकां प्रपूजयेत्।
एकापि दुर्भगा तत्र ततो दुःखतरन्तु किम्॥
लब्ध्वा तु मानुषीं संज्ञां पञ्चभूतसमन्विताम्।
धर्म्मेव न प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
लब्ध्वा ब्राह्मणभावन्तु त्रयो वर्णाः सुमध्यमे!।
पापकर्म्मरता ह्यार्यास्ततो दुःखतरन्तु किम्॥
एतत्ते कथितं भद्रे! दुःखकर्म्म विनिश्चयम्।
सर्व्वभूतहितार्थाय यत्त्वया परिपृच्छति॥"

इति वराहपुराणम्॥ *॥

दुःखदानि यथा,—

"पारतन्त्र्यम् १ व्याधिः २ व्याधिः ३ मानच्युतिः ४ शत्रुः ५ कुभार्य्या ६ नैःस्वम् ७ कुग्रामवासः ८ कुस्वाभिसेवनम् ९ बहुकन्या १० दरिद्रत्वम् ११ परगृहवासः १२ वर्षाप्रवासः १३ भार्य्याद्वयम् १४ कुपुत्रः १५ दुर्जनकरग्रहणम् १६। इति कविकल्पलता॥ (तद्विशिष्टे, त्रि। इत्यमरः। १।४।२६॥ यथा, हरिवंशे। २२३। ४८।

"सुखानि न च दुःखानि सा न शीता न च क्षमा॥")

दुःखदोह्या, स्त्री, (दुःखेन दुह्यते इति। दुह+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) दुर्दोहगवी। तत्पर्य्यायः। करटा २। इति हेमचन्द्रः। ४। ३३५॥

दुःखित:, त्रि, (दुःखं सञ्जातमस्येति तारकादित्वादितच्।) यद्वा, दुःखधानोः कर्त्तरि क्तप्रत्ययः। दुःखी। (यथा, मनौ। ६। २८८।

"बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्।
दुःखिता यत्र दृश्येरन् विक्रियाः पापकारिणः॥")

भावे क्ते, दुःखम्। तत्र क्ली॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनिः।) दुःखान्वितः। दुःखितः। यथा,—

"दुःखिनोऽदुःखिनो वापि प्राणिनो लब्धचक्षुषः।
आत्मवत् परिपश्यन्ति ते यान्ति परमां गतिम्॥
त्यक्त्वात्मसुखभोगेच्छां सर्व्वसत्त्वसुखैषिणः।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः॥"

इति वह्निपुराणे शिवैकपाख्याननामाध्यायः॥)

दुःखमम्, अ, (दुर्दुष्टं सम्यक्। "तिरोऽन्तर्द्धौ।" इत्यव्ययीभावः। "सुविनिर्दुर्भ्यः सुपि।" ८।३।८८। इति षत्वम्।) निन्दनीयम्। तत्पर्य्यायः। निःषमम् २ गर्ह्यम् ३। इत्यमरः। ३।४।१४॥

दुःषमम्, त्रि, (दुःषमम्। बाहुलकात् षत्वाभावः।) असमञ्जसम्। इति त्रिकाण्डशेषः॥

दुःसङ्घा, स्त्री, (दुःखेन सङ्घतेऽसौ। दुः+सङ्घ+अच्। टाप् च।) नागदमनी। इति राजनिर्घण्टः॥ (दुःसङ्घे, त्रि। यथा, रघुः।११।२०।

"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्वधिरचन्दनोक्षिता
भौमितेयवसतिं जगाम सा॥")

दुःसाधो, [न्] पुं, (दुर्दुष्टं कर्म्म साधयतीति। दुः+साधि+किपि:।) दौस्साधिकः। इति शब्दरत्नमाला॥

दुःसाध्यः, त्रि, (दुःखेन साध्यते इति। दुः+साध+ण्यत्।) दुःखसिध्यादयः। दुःखेन साध्यते सिध्यादयते यः॥ (यथा, पञ्चतन्त्रे। १। २५८।

"ततो दुर्गस्थो दुःसाध्यो रिपुर्भवति॥")

दुःस्थः, त्रि, (दुर्दुःखेन दुष्टं वा तिष्ठतीति। स्था+कः।) दुर्गतः। रुग्णः। दुःखेन तिष्ठति यः। इति मेदिनी। थे, ८॥ (यथा, भागवते। १। १६। २४।

"स्त्रां दुःस्थगतपदमाप्नुहि पौरवेन्द्र
सम्यग्वसन्ति यदुवृष्ण्यविभवदृक्षम्॥")

दुःस्थः, त्रि, (दुःस्थितः।) दुरवस्थः॥

दुःस्पर्शः, पुं, (दुःखेन स्पृश्यते इति। दुः+स्पृश्+"ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।" ३।३।१२६। इति कर्म्मणि खल्।) दुरालभा। इत्यमरः। २।४। ८१॥ (अस्य पर्य्याया यथा;—

"यावो यवासो दुःस्पर्शो बहुवर्षाशो दुरालभा॥"

इति वैद्यकरत्नमालायाम्॥)

लताकरञ्जः। इति राजनिर्घण्टः॥ खरस्पर्शे, त्रि। इति मेदिनी। शे, २१॥ (यथा, भागवते। १। १७। ५।

"रथौ वायुः सुदुःस्पर्शः फूत्कारानीरयन् मुहुः।
उन्मूलयन्नगपतीन् वात्यानीको रथध्वजः॥")

दुःस्पर्शा, स्त्री, (दुःखेन स्पृश्यते इति। स्पृश्+खल्+टाप् च।) कपिकच्छुः। आकाशगङ्गा। कण्टकारी। (अस्याः पर्य्यायो यथा,—

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्डालिका कण्टिकिनी धावनी दहती तथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

दुरालभा। इति राजनिर्घण्टः॥

दुःस्फोटः, पुं, (दुर्दृष्टं स्फोटयतीति। स्फोटि+अच्।) गुच्छभेदः। इति हेमचन्द्रः॥३। ४५१॥

दुकूलं, क्ली, (दुष्टं कूलति आच्छोतीति। कूल+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। पृषोदरात् साधुः। यद्वा, दु+"खनिपिभ्यां डिच्च उरोलोचौ।" उणा०। ४। ६०। इति ऊलच्। धातोः कुक् च।) चौमवस्त्रम्। (यथा, रघौ। ७। १६।

"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः॥")

सूक्ष्मवस्त्रम्। इति मेदिनी। के, ६६॥

दुगूलम्, क्ली, (दुकूलं पृषोदरात् कस्य गः।) दुकूलम्। मङ्गल्यवस्त्रम्। इति हेमचन्द्रः॥३। ३३३॥

दुग्धम्, क्ली, (दुह्यते स्मेति। दुह+कर्म्मणि क्तः।) स्त्रीजातिस्तनजनितस्तन्यवस्त्रविशेषः। दुध इति भाषा। तत्पर्य्यायः। क्षीरम् २ पीयूषम् ३ उधस्यम् ४ स्तन्यम् ५ पयः ६ अन्नतम् ७। इति राजनिर्घण्टः॥ बालजीवनम् ८। इति भावप्रकाशः॥ अस्य सामान्यगुणाः। स्वादुरसत्वम्। स्निग्धत्वम्। ओजःकारित्वम्। धातुवर्द्धनत्वम्। वातपित्तहरत्वम्। दृष्यत्वम्। शैत्यगुणत्वम्। गुरुत्वम्। श्लैष्मलत्वम्। पिच्छिलादिगुणगुरुत्वच॥ ॥ गोदुग्धगुणाः। प्राणधारकत्वम्। बलायुःपुरुषत्वशुक्रकारित्वम्। मेध्यत्वम्। रक्तपित्तरोगघ्नायुनाग्नित्वम्। रसायनत्वच॥॥ छागीदुग्धगुणाः। मधुरत्वम्। शीतलत्वम्। मलबन्धनकारित्वम्। रक्तपित्तविकारश्वासकाससर्व्वदोषनाशित्वच॥ ॥ मेषीदुग्धगुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कफपित्तनाशित्वच॥ ॥ माहिषदुग्धगुणाः। अतिस्निग्धत्वम्। निद्राकारित्वम्। अग्निनाशित्वच॥ ॥ उष्ट्रीदुग्धगुणाः। रूक्षत्वम्। उष्णत्वम्। श्लेष्मवातकफनाशित्वम्॥ ॥ अश्वीदुग्धगुणाः। बलवत्त्वम्। मधुराम्लरसत्वम्। लघुत्वच॥ ॥ हस्तिनीदुग्धगुणाः। मधुरत्वम्। शुक्रकारित्वम्। कषायानुरसत्वम्। गुरुत्वच॥ ॥ मानुषदुग्धगुणाः। प्राणधारकत्वम्। शरीरहितकारित्वम्। दृंहणत्वम्। स्तन्यजनकत्वच॥ ॥ प्रत्यूषकाले गोदुग्धपानगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्जरत्वम्। तस्मात् सूर्य्योदयात् परं यामं यामार्द्धमेव वा उत्तार्य्य पयो ग्राह्यम्। ततपथ्यं दीपनं लघु॥ धिवनृसावालवत्सानां पयः दोषलम्। एकवर्षवत्सगोर्दुग्धं श्वेतवर्णञ्चवर्षगोदुग्धञ्च प्रशस्तम्॥ ॥ रक्तभक्षकमावपर्षभक्षकीर्द्वयङ्गोदुग्धं पञ्चमपक्षं वा हितकारकम्॥ ॥ पर्य्युषितदुग्धगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्जरत्वच॥ ॥ अपक्वदुग्धगुणाः। प्रायोऽभिष्यन्दित्वम्। गुरुत्वच॥ ॥ घृतोद्धृतं कफवातनाशनम्। घृतशीतं पित्तनाशनम्। धारोष्णदुग्धं अन्नतुल्यम्। क्षीरस्थदुग्धं विना सर्व्वमपक्वं दुग्धं त्याज्यम्। सलवणदुग्धं विषधर्षितं नट इति ख्यातं दुग्धञ्च त्याज्यम्॥ ॥ दुग्धान्नगुणाः। पुष्टिहितत्वम्। बलकारित्वम्। पित्तनाशित्वम्। रसायनत्वच॥ ॥

"घृताक्षाम्रपनसपिण्याककुलत्थलवणामिषैः।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते॥"

इति राजवल्लभः।

अथ चतुर्व्विधक्षीरगुणः।

"कैरव्याविकं पञ्चतमं घृतोष्णं
क्षीरं त्वजानां घृतशीतमाहुः।
दोहान्तशीतं महिषीपयस्यं
गव्यन्तु धारोष्णमिदं प्रशस्तम्॥

दृष्यं दृंहणमग्निवर्द्धनकरं पूर्व्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं शुक्रस्य विच्छेदनम्। वार्द्धे वह्निकरं ततो बलकरं वीर्य्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा॥

क्षीरं सुकूर्म्मत्रितयोषितं य-
दत्तप्तमेतद्विगतिं प्रयाति।
यस्मात्तु दोषं कुरुते तदूर्द्धं
विषोपमं स्यादुषितं दशानाम्॥

क्षीरेऽम्बरे कपे क्षीरे क्षीरं स्यादन्नतोपमम्। तदेव तरुणे पीतं विषवद्वह्नि मार्दवम्॥

क्षीरस्याधगुणः।

चतुर्थभागं सलिलं निधाय
यन्नादृयदावर्त्तितसुत्तमं तत्।
सर्व्वामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम्॥

गव्यं पूर्व्वाह्णकाले स्यादपराह्णे तु माहिषम्। क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्व्वदा॥

क्षीरं न सुञ्चीत कदाप्यतप्तं
तप्तञ्च नैतल्लवणेन सार्द्धम्।
पिष्टान्नसत्यागकमाषसुङ्-
मोद्गातकीकन्दफलादिकेच॥

तथा च,

मत्स्यमांसगुडक्षत्रमूलकैः
कुष्ठमावहति सेवितं पयः।
शाकजाम्बवरसूदिसेवितं
मारयत्यनुधमात्र संशयः॥ ॥

स्निग्धं शीतं गुरु क्षीरं सर्व्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नरमेव च॥ निम्बजीराधिना सेव्यं सुपक्वं माहिषं पयः। पुष्णाति मातरं वर्च्चं बलपुष्टिविवर्द्धनम्॥ क्षीरं शशाजमाहैमधुरं क्षारं नवप्रसूतानाम्। रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते॥

मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्। लवणं मधुरं क्षीरं त्रिदाहजननं चिरप्रसूतानाम्॥ गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्। मध्यमवयसां रसायनसुक्तमिदं दुर्ब्बलतु दहानाम्॥

तासां मासत्रयादूर्द्धं गुर्व्विणीनाञ्च यत् पयः। तद्धि लवणं क्षीरं मधुरं पित्तश्लेष्महरम्॥॥ दुग्धाम्लं शीतलं स्वादु दृष्यं वर्णकरं गुरु। वातपित्तापहं श्रेष्ठं दृंहणं बलवर्द्धनम्॥"

इति राजनिर्घण्टः॥ ॥

अथ भावप्रकाशोक्तसामान्यदुग्धगुणाः।

"दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम्। सद्यःशुक्रकरं शीतं सात्म्यं सर्व्वशरीरिणाम्॥ जीवनं दृंहणं वल्यं मेध्यं वाजीकरं परम्। वयःस्थापकमायुष्यं सन्धिकारि रसायनम्॥ विरेकवान्तिबस्तीनां तुल्यमोजोविवर्द्धनम्। शोषेऽम्बरे मनोरोगे शीतसूर्च्छाभ्रमेषु च॥ यक्ष्मण्यां पाण्डुरोगे च दाहे छर्दि तृदामये। शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे॥ रक्तपित्तातिसारे च योनिरोगे भ्रमे क्लमे। गर्भस्रावे च सततं हितं सुनिवरैः स्मृतम्॥ बालवृद्धक्षतक्षीणाः क्षुद्रव्यायकृशाश्च ये। तेभ्यः सदातिप्रथितं हितमेतदुदाहृतम्॥"

इति भावप्रकाशः॥

(दुग्धोत्पत्तिर्विवृतिर्यथा,—

"यद् यदाहारजातन्तु रसं क्षीरशिरागुगम्। सरं जलञ्च शुक्लञ्च तथा पित्तेन संयुतम्॥ पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम्। पच्यमानं शिराप्राप्तं क्षीरं तद्धि पुलक!॥ तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः। अन्नतं सर्व्वभूतानां जीवनं बलवर्द्धनम्॥ हारीतः संशयापन्नः पप्रच्छ पितरं पुनः। कथं रसस्य सम्पत्तिः कथं सञ्जायते विभो!॥ कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते। कथं तत्र कुमारीणां वन्ध्यानां न कथं भवेत्॥ एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः। अति हर्षप्रदं पुत्र! परिपृष्टं भिषग्वर!॥ सितास्निग्धं तथा रक्तं पित्तेन पाकतां गतम्। रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत्॥ क्षीरनाथः कुमारीणां वन्ध्यानां न कथं भवेत्। अल्पधातुबलं यस्मात्तस्मात् क्षीरं न जायते॥ वन्ध्यानां क्षीरनाथस्तु वातेन परिपूरितः। क्षीरञ्च न भवेत्तस्मादार्त्तवक्षयाधिकं यतः॥ प्रसूतासु च नारीषु बलेन सह क्षयते। तेन स्रोतो विमुह्यन्ति क्षीरमासु प्रवर्त्तते॥ तस्मात् सद्यः प्रसूतायां जायते शैष्मिकं पयः। तेन काठिन्यमायाति तस्मात्तत् परिवर्ज्जयेत्॥ पयश्चाविकृतं ग्राह्यं बलशुक्रौजनाशनम्॥"

इति हारीते प्रथमे स्थाने अष्टमेऽध्याये॥)

(कृष्णम्। तत्पर्य्यायाश्च यथा,—

"कृष्णं श्यामकं दुग्धम्।" इति च वैद्यकरत्नमालायाम्॥

दुग्धः, त्रि, (दुह + क्तः ।) प्रपूरितः । इति मेदिनी । धे, ८ । क्षतदोहः । (यथा, हरिवंशे । २ । २५ ।
"तेनेयं गौर्मेहाराज ! दुग्धा ग्रस्यानि भारत ! ॥"
दुह + भावे क्तः ।) दोहने, क्ली ॥

दुग्धकूपिका, स्त्री, (दुग्धकूपः साधनत्वेनास्त्यस्या इति । दुग्धकूप + ठन् । टाप् ।) पिष्टकविशेषः । यथा,—
"तण्डुलचूर्णविमिश्रितनवचीरेण साम्रपिष्टेन ।
डुकूपिकां विदध्यात्ताम्र पचेत् सर्पिषा सम्यक् ॥
अथ तां कौरितमध्यां घनपयसा पूर्णगर्भाच्च ।
भ्रष्टकसुस्निग्धवदनां तप्तघृतेन पक्वदनाच्च ।
अतिपाकुखण्डपाके क्षपयेत् कर्पूरवासिते
कुशलः ॥"
अस्या गुणाः ।
"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा ।
हृद्या प्रीता गुर्व्वी शुक्रकरी तर्पणी रुच्या ।
विदधाति कायपुष्टिं दाहं दूरप्रसारिणीरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे २ भागे ॥

दुग्धतालीयं, क्ली, (दुग्धस्य तालाय प्रतिष्ठायै हितम् । दुग्धताल + छः ।) दुग्धाश्मम् । चीरफेनः । इति मेदिनी । ये, १३३ । दुग्धाश्यम् । इति हेमचन्द्रः ॥

दुग्धपाचनं, क्ली, (पच्यतेऽस्मिन्निति । पच् + अधिकरणे ल्युट् । दुग्धस्य पाचनं पात्रम् ।) दुग्धपाकपात्रम् । तत्पर्य्यायः । वटकम् २ । इति हारावली । २२० ॥

दुग्धपाषाणः, पुं, (दुग्धं चीरं पाषाण इव कठिनं यस्य ।) दृषविशेषः । शिरगोला इति भाषा । तत्पर्य्यायः । दुग्धपाषाणकः २ दुग्धाश्मा ३ चीरी ४ गोमेदसन्निभः ५ वज्राभः ६ दीप्तिकः ७ दुग्धी ८ चीरवयः ९ । अस्य गुणाः । रुच्यत्वम् । ईषदुष्णत्वम् । ज्वरपित्तरक्तदोषगरशूलकासवातनाशित्वम् । इति राजनिर्घण्टः ॥

दुग्धपुच्छी, स्त्री, (दुग्धवत् शुभ्रं पुच्छं मूलदेशो यस्याः । गौरादित्वात् ङीष् ।) दृषविशेषः । दुग्धपेया इति ख्याता । तत्पर्य्यायः । क्षीरकाकुः २ निशा ३ भद्रा ४ नखदूरी ५ । इति शब्दचन्द्रिका ॥

दुग्धफेनः, पुं, (दुग्धस्य फेन इव फेनो यत्र ।) चीरद्विक्षीरः । तत्पर्य्यायः । शार्करः २ । इति राजनिर्घण्टः ॥

दुग्धफेनी, स्त्री, (दुग्धवत् शुभ्रः फेनो यस्याः । गौरादित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयःफेनी २ फेनदुग्धा ३ पयस्विनी ४ तूतारिः ५ ब्रह्मकेतुस्त्री ६ गोजापर्णी ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । विषव्रणनाशित्वम् । रुच्यत्वम् । युक्ता रसायनत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धबीजा, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।) यावनालाद्यलतातप्रतण्डुलचिपिटः । अस्या गुणाः । सुमधुरत्वम् । दुर्जरत्वम् । वीर्य्यपुष्टिदाढत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धाक्षः, पुं, (दुग्धवत् शुभ्रं अक्षं नेत्रं चिह्नविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ॥

दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ॥

दुग्धाश्मा, [न्] पुं, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुग्धिका, स्त्री, (दुग्धं निर्य्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) वृक्षविशेषः । दुधी इति दुधाचीर इति च भाषा । तत्पर्य्यायः । स्वादुपर्णी २ क्षीरावी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीरालिका ७ । इति शब्दरत्नावली ॥ अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलमूत्रोपसर्गकारित्वम् । पटुत्वम् । स्वादुत्वम् । विदग्धित्वम् । दृष्यत्वम् । कफकुष्ठव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ वृक्षभेदः । गन्धिका इति ख्याता । तत्पर्य्यायः । उत्तमा २ युग्मफला ३ उत्तमफलिनी ४ । इति रत्नमाला ॥

दुग्धिनिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ॥

दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्श आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । धे, ८ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि ॥")
दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुच्छकः, पुं, (दुः उपतापे + भावे क्विप् तुक् च । दुत् उपतापः । तन्निराकरणे शक्नोतीति । शक् + पचाद्यच् ।) सुरागमगन्धद्रव्यम् । विहारादावकाशकः । इति मेदिनी । के, १०५ ॥

दुड़िः, स्त्री, (दुलि: + लस्य डः ।) दुलिः । कच्छपी । इत्यमरटीकायां रायमुकुटः ॥

दुड्डुकः, त्रि, दुष्टचित्तः । इति शब्दार्थकल्पतरुः ॥

दुड्डुभः, पुं, (द्रोढति मज्जतीति । दृढ़ मज्जने + "उभः कित् कुकिद्रडिभ्यां कनुग्भ्यौ रलोपश्च ।" १ । ४४० । इति उणादिकोषटीकाधृतसूत्रात् उभः क्नुन् रलोपश्च ।) डुड्डुभसर्पः । इत्युणादिकोषः ॥ (यथा, महाभारते । ६ । १५४ । १०० ।
"शरभौनां महारौद्रां प्रासशक्त्युग्रदुड्डुभाम् ।"
"श्रोणितौघवहां घोरां द्रोणिः प्रावर्त्तयन्नदीम् ॥")

दुदमः, पुं, (दुर् दुष्टो दमः । पृषोदरादित्वात् रलोपः ।) हरितपलाङ्कुः । इत्यमरः ॥ २ । ४ । १४८ ॥

दुन्दमः, पुं, (दुन्द इत्यव्यक्तशब्देन मदति शब्दायते इति । मद शब्दे + डः ।) दुन्दुभिः । इति शब्दरत्नावली ॥

दुन्दुः, पुं, वसुदेवः । इति त्रिकाण्डशेषः । दुन्दुभिवाद्यम् । इति शब्दरत्नावली ॥

दुन्दुभिः, पुं, (दुन्द इत्यव्यक्तशब्देन भाषते । भा + बाहुलकात् किः ।) हरहरढक्का । तत्पर्य्यायः । भेरी २ आनकः ३ । इत्यमरः । १ । ७ । ६ ॥ (यथा, महाभारते । १ । १२३ । ४६ ।
"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ॥")
वरुणः । दैत्यभेदः । इति मेदिनी । मे, १६ । (दानवविशेषः । यथा, हरिवंशे । ३ । ८१ ।
"अभवन् दशपुत्राश्च ग्रसं तीव्रपराक्रमाः ।"
"शुष्कर्णो विदारश्च गवेष्ठो दुन्दुभिस्तथा ॥")
रथभेदः । वाद्यभेदः । इति शब्दरत्नावली ॥ विषम् । इति हेमचन्द्रः । २ । २०७ ॥ (कुकुरवंशीयस्य अन्धकस्य पुत्रः । यथा, भागवते । ९ । २४ । २० ।
"अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्वसुः ॥"
क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्राणामन्यतमः ।
क्रौञ्चद्वीपस्य देशभेदश्च । यथा, ब्रह्माण्डे ३६ अध्याये ।
"सुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ।
तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ॥"
"सुनेस्तु सुनिर्देशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ॥"
पर्व्वतविशेषः । यथा, मत्स्यपुराणे । १२१ । १६ ।
"स एव दुन्दुभिर्नाम श्यामपर्व्वतसन्निभः ।
शब्दवद्भः पुरा तस्मिन् दुन्दुभिस्ताडितः
सुरैः ॥"
असुरविशेषः । यथा, रामायणे । ४ । ६ । ४ ।
"मायावी नाम तेजस्वी पूर्व्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं बलिनः क्षीवतं पुरा ॥")

दुन्दुभिः, स्त्री, अण्डः । पाण्डकः । इत्यमरः । ३ । ३ । १३५ ॥ अण्डे पाण्डकविषये दानविशेषो विधिः इति ख्यातः । इति केचित् ॥ अण्डविन्दुविकारयम् । इति रभसः ॥ विन्दुस्तिलचतुर्थ्यार्थे सर्षपब्रह्मादिमयत्वात्तेषामण्डकरत्वं पाण्डटो इति ख्याता । इति केचित् ॥ इति तट्टीकायां भरतः ॥

दुन्दुमारः, पुं, शुन्शुमारः । इति शब्दार्थकल्पतरुः ॥

दुरदृष्टं, क्ली, (दुर्दृष्टमेवस्वार्थे ।) दुर्भाग्यम् । इति स्मृतितत्त्वे ॥

दुरध्वः, पुं, (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ॥

दुरभियहः, पुं, (दुर्दुःखेन आभिमुख्येन ग्रहणमस्यति । दुर् + अभि + ग्रह + खल् ।) अभागः । इति राजनिर्घण्टः ॥ (दुरभि + ग्रह + कर्म्मणि खल् ।) दुःखग्राह्ये, त्रि ॥

दुरभियहा, स्त्री, (दुरभियह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्टः ॥

दुराकः, पुं, (दुःखेनोतीति । दु न उपतापे + "आकः । खजादेः स तु कित् ।" १ । २१६ । इति उणादिकोषटीकाधृतसूत्रात् आकप्रत्ययेन निपातनात् साधुः ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

दुराचारः, पुं, (आचर्य्यते इति भावे घञ् । दुर्दुष्ट आचारः इति प्रादिसमासः ।) विरुद्धाचरणम् । यथा, अध्यात्मरामायणे ।
"प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः ॥"

(दुष्टः आचारो यस्य।) निन्दिताचारवति, त्रि॥ (यथा, देवीभागवते। १। ११। १६।
"महापातकयुक्तत्वं दुराचारोऽतिगर्हितः॥")

दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति। धृष्+अच्।) गौरसर्षपः। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४६। २२।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः।" इति तद्भाष्ये शङ्करः। दुःखेन वा ईषदपि धर्षयितुमशक्यः इति। धृष्+"ईषद्दुःसुष्विति। ३। ३। १२६। इति खल्।) अधर्षणीये, त्रि॥ (यथा, महाभारते। ६। १६। ३२।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम्।
प्रकर्षं महासैन्यं दुराधर्षो महामनाः॥")

दुराधर्षा, स्त्री, (दुराधर्ष+स्त्रियां टाप्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

दुरारुहः, पुं, (दुःखेन आरुह्यते इति। दुर्+आ+रुह+घञर्थे कर्म्मणि कः।) विल्वः। नारिकेलः। इति राजनिर्घण्टः॥ (दुःखारोहणीये, त्रि। यथा, महाभारते। ३। १४७। ६१।
"क्व वा त्वयाद्य गन्तव्यं ब्रूहि पुरुषर्षभ!।
अतःपरमगम्योऽयं पर्वतः सुदुरारुहः॥")

दुरारुहा, स्त्री, (दुरारुह+टाप्।) खर्জ্জুरी। इति राजनिर्घण्टः॥

दुरारोहः, पुं क्ली, (दुःखेन आरुह्यते इति। रुह+कर्म्मणि खल्।) प्ररटः। इति राजनिर्घण्टः॥ दुःखारोहणीये, त्रि॥ (यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गहने महती ग्रमी।
भौमग्राखा दुरारोहा ग्रग्राणस्य समीपतः॥")

दुरारोहा, स्त्री, (दुरारोह+टाप्।) ग्राम्यालिङ्गः। इति त्रिकाण्डशेषः॥ श्रीवल्ली। इति राजनिर्घण्टः॥

दुरालभा, स्त्री, (दुःखेन आलभ्यते गृह्यते खण्ड्यते वासौ। दुर्+आ+लभ+खल्+टाप्। आगमविधेरनित्यत्वात् न नुम्।) खनामख्यातकण्टकयुक्तक्षुद्रवृक्षविशेषः। स यथासप्रभेदः। हिङ्गुया इति ख्याता। तत्पर्य्यायः। दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कक्कुरा ५ दुष्प्रधर्षा ६ धन्वी ७ धन्वयवासकः ८ प्रबोधनी ९ क्षुद्रपत्रा १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुःप्रधर्षा १४। इति राजनिर्घण्टः॥ यासः १५ यवासः १६ दुष्प्रधर्षः १७ कुनाशकः १८ गोदन्ती १९ अनन्ता २० वसुदात्री २१। इत्यमरः। २। ४। ६२॥ गान्धारी २२ काषाया २३। इति भावप्रकाशः॥ धनुर्यासः २४ युवसः २५ कच्छुरा २६। इति शब्दरत्नावली॥ विकण्टकः २७। इति जटाधरः॥ (पद्मसखी २८। इति शब्दचन्द्रिका॥) अस्या गुणाः। सारत्वम्। ज्वरच्छर्द्दिश्लेष्मपित्तविसर्पवेदनानाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। चारत्वम्। अम्लत्वम्। मधुरत्वम्। वातगुल्मप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा॥"
इति भावप्रकाशः॥
(गङ्गा। यथा, काशीखण्डे। २६। ८८।
"दीर्घव्रता दीर्घदृष्टिर्दीर्घतोया दुरालभा॥")

दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति। दुर्+आ+लभ+खल्+नुम् च।) दुरालभा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ६८। ३१।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सकण्टकाः।
रक्तभूयिष्ठवर्णाश्च क्षणाच्चैवोपहारयेत्॥")

दुरालापः, पुं, (दुष्टः आलापः इति प्रादिसमासः।) गालिः। इति शब्दार्थकल्पतरुः॥

दुरासदः, त्रि, (दुःखेन आसद्यते इति। दुर्+आ+सद्+"ईषद्दुःसुष्विति।" ३। ३। १२६। इति खल्।) दुष्प्राप्यः। यथा,—
"दुरासदो दुर्विषहो भूतानां स बभूव ह॥"
इति श्रीभागवतम्॥
(यथा च, देवीभागवते। १। १०। ३२।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे॥"
(दुष्प्रवेशः। यथा, माघे। १६। १०।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनजैर्मृगादिभिः॥")

दुरितं, क्ली, (दुष्ट भावे+क्तः। दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात्।) पापम्। इत्यमरः। १। ४। २३॥ (यथा, रघौ। ८। २।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत्॥")
तद्वति, त्रि॥

दुरितदमनी, स्त्री, (दुरितं पापं दम्यते यया इति। दम+करणे ल्युट्। ङीप् च।) भ्रमी। इति राजनिर्घण्टः॥ (दम+ल्युः।) पापनाशिनी च॥

दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति। दुरिष्ट+कृ+क्विप् तुगागमश्च।) अभिचारकर्त्ता। तस्य नरकं यथा,—
"देवद्विषमपितॄन् हित्वा रतदूषिता च यः।
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत्॥"
इति विष्णुपुराणे। २। ६। १४॥
"दुरिष्टकृत् अभिचारकर्त्ता।" इति तट्टीका॥

दुरिष्टः, त्रि, (दुर्+इष्टन्।) अतिमन्दः। अयमनयोरेषां वा अतिग्रयेन दुः निन्दितः। इति व्याकरणम्॥

दुरीषणा, स्त्री, (दुष्टा ईषणा इच्छाभिलाषणम्। प्रादिसमासः।) ग्रामः। इति शब्दार्थकल्पतरुः॥

दुरूहः, त्रि, (दुःखेन ऊह्यते इति। दुर्+ऊह+कर्म्मणि खल्।) दुर्विज्ञेयः। यथा,—
"काव्यप्रकाशस्य दुरूहपङ्क्ती-
र्गदाधरो व्याकुरुते प्रयत्नात्।"
इति गदाधरभट्टाचार्य्यकृतकाव्यप्रकाशटीका॥

दुरोदरं, क्ली, (दुर्दुष्टमासमन्तादुदरं यस्य। दुष्टमुदरमस्य वा। दृषोदरादित्वात् साधुः।) द्यूतभेदः। पाशकक्रीड़ा। इत्यमरः। २। ३। १७१॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। २६।
"अर्थं किं तनुषे दुरोदरमिदं नाशापतेयं तव॥")

दुरोदरः, पुं, (दुष्टं व्या समन्तात् उदरं यस्य।) द्यूतकृत्। (यथा, महाभारते। २। ५६। ६।
"दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञा॥")
पणः। इति मेदिनी। रे, २६०॥

दुर्ग, क्ली, (दुःखेन गच्छत्यत्र। दुर्+गम+"शुदुरोरधिकरणे।" ३। २। ४८। इतस्य वार्त्तिकोक्त्या डः।) पर्व्वतादिभिर्दुर्गमं पुरम्। इत्यमरः। २। ८। १७॥ गढ़ इति केल्লা इति च भाषा। तत्पर्य्यायः। कोट्टम् २। यथा,—
"स्कन्धावारो राजधानी कोट्टदुर्गे पुरः समे॥"
इति हेमचन्द्रः॥
"अथ कोट्टो राजधानी राजधानकमित्यपि।"
इति शब्दरत्नावली।
"पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि।"
इति जटाधरः॥
तत्तु षड्विधम्। यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् वक्ष्यामेकतमं बुधः।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव!।
सर्व्वेषाञ्चैव दुर्गाणां गिरिदुर्गं प्रशस्यते॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम्।
शतघ्नीयन्त्रसम्पन्नं शतशस्त्र समावृतम्॥"
इति मात्स्ये २६१ अध्यायः॥
राजसत्करणावश्यकत्वं तच्छुभाशुभत्वञ्च यथा,—
"दुर्गाणि सततं कुर्य्यात् प्राकाराट्टालतोरणैः।
दूषितान्नगराद्राजा दुर्गं दुर्गाश्रयं चरेत्॥
दुर्गं वज्रं नृपाणान्तु नित्यं दुर्गं प्रशस्यते।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते।
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च॥
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम्।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति॥
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत्।
शतदण्डाकृति दुर्गेच्च सततं कुलनाशनम्॥
यथा राक्षसराजस्य लङ्कादुर्गा जिता पुरा॥
बले पुरी शोणिताख्यं तेजो दुर्गे प्रतिष्ठितम्।
यस्मात्तु चपलाकारमतो भद्रश्रियो बलः॥
सौभाग्यं शाल्वराजस्य नगरं मधुकोणकम्
दिवि यद्भ्रमते राजंस्तच्च भद्रं भविष्यति॥

यत्रायोध्याऽयं भूप! पुरमिक्ष्वाकुभूसुताम्।
धनुराकृति तत्रापि ततोऽभूद्विजयप्रदम्॥
दुर्गेभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात्॥
अतो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये॥"
इति कालिकापुराणे राजनीतिविशेषः ८५ अ॰॥
(शैलभेदः। यथा, कालिकापुराणे। ७४ अ॰।
"यत्र दुर्गाऽऽख्यं शैलं शिवस्यास्ते महत्तरम्॥")

दुर्गः, पुं, असुरभेदः। यं हत्वा चण्डिकाया दुर्गेति नामाभूत्। इति काशीखण्डम्॥ (यथा, हरिवंशे। १६४। ६।
"विन्ध्यवासिनीं दुर्गान्नीं रणदुर्गां रणप्रियाम्॥"
विष्णुः। यथा, महाभारते। १३। १४६। ६६।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥")
गुगगुलुः। इति राजनिर्घण्टः॥ (दुःखेन गम्यते अत्रेति। दुर्+गम्+अधिकरणे डः।) दुर्गमे, त्रि। इति मेदिनी। गे, ६॥

दुर्गकारकं, क्ली, (निजकृतवेष्टनेन दुर्गं करोतीति। कृ+"ण्वुल्तृचौ।"३। १। ३३। इति ण्वुल्।) वृक्षविशेषः। इति शब्दमाला। दुर्गकर्त्तरि, त्रि॥

दुर्गतः, त्रि, (दुर् दुरवस्थां गच्छति स्मेति। दुर्+गम्+"गत्यर्थाकर्म्मकश्लिषेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) दरिद्रः। इत्यमरः। ३। १। ४६॥ (यथा आर्य्यासप्तशत्याम्। २६६।
"दुर्गतगृहिणी तनये करुणार्द्रा प्रियतमे च रागमयी।
सुखा रताभियोगं न मन्यते न प्रतिक्षिपति॥")

दुर्गतिः, स्त्री, (दुष्टा क्लेशदायिनी गतिः।) नरकः। इत्यमरः। १। ६। १॥ (यथा, देवीभागवते। ३। १२। ६८।
"कृत्वा यज्ञं विधानेन दत्त्वा पुरुषं मखार्ज्जितम्।
समुद्धर महाराज! पितरं दुर्गतिं गतम्॥")
दारिद्र्यम्। इति मेदिनी। ते, ११५॥ (यथा, महाभारते। १३। ७०। ८।
"कथं भवान् दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम्॥")

दुर्गतिनाशिनी, स्त्री, (दुर्गतिं नाशयतीति। नश+णिच्+णिनिः+ङीप्।) दुर्गा। यथा,—
"ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम्॥

दुर्गन्धं, क्ली, (दुष्टो गन्धो यस्य।) सौवर्चललवणम्। इति हेमचन्द्रः। ६। २७॥

दुर्गन्धः, पुं, (दुष्टो गन्धः।) दुष्टगन्धः। तत्पर्य्यायः। पूतिगन्धिः २। इत्यमरः। १।५।१२॥ (यथा, सुश्रुते। १। ३०।
"सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्।
यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत्॥")
आम्रवृक्षः। इति शब्दचन्द्रिका॥ पलाण्डुः। इति भावप्रकाशः॥ (दुर्दुष्टो गन्धो यत्र।) दुष्टगन्धयुक्ते, त्रि॥ (यथा, मार्कण्डेये। ८। ८१।
"अथाजगाम त्वरितो धर्म्मश्चाङ्गालरूपधृक्।
दुर्गन्धो विकृतो रूक्षः श्मश्रुलो दुन्दुरो घृणी॥")

दुर्गन्धी, [न्] त्रि, (दुर्गन्धोऽस्यस्येति। दुर्गन्ध+इनिः।) दुर्गन्धयुक्तः। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ६। ७६।
"अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः॥")

दुर्गपृष्पी, स्त्री, (दुर्गं दुष्प्राप्यं पुष्पं यस्याः। जातित्वात् ङीष्।) वृक्षविशेषः। केशपुष्पा इति ख्याता। तत्पर्य्यायः। मानसी २ वालाची ३ केशधारिणी ४। इति शब्दचन्द्रिका॥

दुर्गमः, त्रि, (दुर्दुःखेन गम्यते इति। दुर्+गम+"इषुगमियमो छः।" ३। ३। १२६। इति खल्।) दुर्गः। दुःखेन गमनीयस्थानादि। इति शब्दमाला॥ (यथा, महाभारते। ६। १४। ३५।
"पार्श्वतः केऽभरक्षन्त गच्छन्तो दुर्गमां गतिम्॥"
दुर्दुःखेन गम्यते ज्ञायते इति। दुर्ज्ञेयः। यथा, महाभारते। १३। १४। २६५।
"नमो वृषभवाहाय गजेन्द्रगमनाय च।
दुर्गमाय नमस्तुभ्यमगम्यागमनाय च॥"
पुं, विष्णुः। यथा, तत्रैव। १३। १४६। ६६।
विष्णुसहस्रनामकीर्त्तने।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥"
असुरविशेषः। यथा, मार्कण्डेये। ८१। ४४।
"तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥"
क्ली, वनम्। सङ्कटस्थलम्। यथा, महाभारते। १। ८१। ३०।
"राजायं नाहुषस्तात दुर्गमे प्राक्षिपत्यहीत्॥")

दुर्गलङ्घनः, पुं, (दुर्गं दुर्गमस्थानं मरुभूम्यादि लङ्घतेऽनेनेति। लङ्घ+करणे ल्युट्।) उष्ट्रः। इति हेमचन्द्रः। ४। ३२०॥

दुर्गसञ्चरः, पुं, (दुर्गं दुर्गमस्थानं नद्यादिपरपारं सञ्चर्य्यतेऽनेनेति। सम्+चर+पुंसीति घः।) संक्रमः। इत्यमरः। ३। २। २५॥ साँको इति भाषा॥

दुर्गसञ्चारः, पुं, (दुर्गं नद्यादिपारदुर्गमस्थानं सञ्चर्य्यते गम्यतेऽनेनेति। सम्+चर+घञ्।) दुर्गसञ्चरः। इत्यमरटीकायां स्वामी॥

दुर्गा, स्त्री, (दुर्दुःखेन गम्यते प्राप्यतेऽसौ। गम+अन्यत्रापि दृश्यते। इति डः। दुर्दुःखेन गम्यतेऽस्यामिति। दुर्+गम+"सुदुरोरधिकरणे।" ३।२।४८ इत्यस्य वार्त्तिकोक्त्या डः। ततष्टाप्।) नीली। इति मेदिनी। गे, ६॥ अपराजिता। इति शब्दचन्द्रिका॥ श्यामापक्षी। इति राजनिर्घण्टः॥ (नववर्षा कुमारी। यथा, देवीभागवते। ३। २६। ४३।
"नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी॥"
अस्याः पूजाफलमाह। तत्रैव। ३। २६। ५०।
"दुःखदारिद्र्यनाशाय संग्रामे विजयाय च।
क्रूरग्रहविनाशार्थं तथोग्रकर्म्मसाधने॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च॥"
अस्याः पूजामन्त्रं यथा, तत्रैव। ३। २६। ६०।
"दुर्गां त्रायति भक्तं या सदा दुर्गार्त्तिनाशिनी।
दुर्ज्ञेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम्॥")
हिमालयकन्या। सा शिवभार्य्या गणेशकार्त्तिकेयोर्माता च। तत्पर्य्यायः।
उमा २ कात्यायनी ३ गौरी ४ काली ५ हैमवती ६ ईश्वरी ७ शिवा ८ भवानी ९ रुद्राणी १० सर्व्वाणी ११ सर्व्वमङ्गला १२ अपर्णा १३ पार्व्वती १४ दुर्गा १५ चण्डिका १६ अम्बिका १७। इत्यमरः। १।१।३८॥ शारदा १८ चण्डी १९ चण्डवती २० चण्डा २१ चण्डनायिका २२ गिरिजा २३ मङ्गला २४ नारायणी २५ महामाया २६ वैष्णवी २७ महेश्वरी २८ महादेवी २९ शिवदूती ३० ईश्वरी ३१ कौट्टवी ३२ षष्ठी ३३ माधवी ३४ नगनन्दिनी ३५ जयन्ती ३६ भार्गवी ३७ रम्भा ३८ सिंहरथा ३९ सती ४० भ्रामरी ४१ दक्षकन्या ४२ महिषमर्द्दिनी ४३ हैरम्बजननी ४४ सावित्री ४५ कृष्णपिङ्गला ४६ वृषाकपायी ४७ लम्बा ४८ हिमशैलजा ४९ कार्त्तिकेयप्रसूः ५० आद्या ५१ नित्या ५२ विद्या ५३ शुभङ्करी ५४ सात्त्विकी ५५ राजसी ५६ तामसी ५७ भीमा ५८ नन्दनन्दिनी ५९ महामायी ६० शूलधरा ६१ सुनन्दा ६२ शुम्भघातिनी ६३। इति शब्दरत्नावली॥ श्रीः ६४ पर्व्वतराजतनया ६५ हिमालयसुता ६६ महेश्वरवनिता ६७। इति कविकल्पलता॥ सत्या ६८ भगवती ६९ ईशाना ७० सनातनी ७१ महाकाली ७२ शिवानी ७३ हरवल्लभा ७४ उग्रचण्डा ७५ चामुण्डा ७६ विधात्री ७७ आनन्दा ७८ महामात्रा ७९ महासुद्रा ८० माकरी ८१ भौमी ८२ कल्याणी ८३ क्षमा ८४ मानदात्री ८५ मदालसा ८६ मानिनी ८७ चार्व्वङ्गी ८८ वाणी ८९ ईशा ९० बलेशी ९१ भ्रमरी ९२ भूम्या ९३ फाल्गुनी ९४ यती ९५ ब्रह्ममयी ९६ भाविनी ९७ देवी ९८ अचिन्ता ९९ त्रिनेत्रा १०० त्रिशूला १०१ चर्चिका १०२ तीव्रा १०३ नन्दिनी १०४ नन्दा १०५ धरित्रिणी १०६ मालका १०७ चिदानन्दस्वरूपिणी १०८ मनस्विनी १०९ महादेवी ११० निद्रारूपा १११ भवानिका ११२ तारा ११३ नीलसरस्वती ११४ कालिका ११५ उग्रतारा ११६ कामेश्वरी ११७ सुन्दरी ११८ भैरवी ११९ राजराजेश्वरी १२० भुवनेशी १२१ त्वरिता १२२ महालक्ष्मीः १२३ राजीवलोचनी १२४ धनदा १२५ वागीश्वरी १२६ त्रिपुरा १२७ ज्वालामुखी १२८ बगलामुखी १२९ सिद्धविद्या १३० अन्नपूर्णा १३१ विशालाक्षी १३२ सुभगा १३३ सगुणा १३४ निर्गुणा १३५ धवला १३६ गीतिः १३७ गीतवाद्यप्रिया १३८ अट्टालवासिनी १३९ अट्टहासिनी १४० घोरा १४१ प्रेमा १४२ वटेश्वरी १४३ कौशिकी १४४ वृद्धिदा १४५ अवीरा १४६ पक्षितालयवासिनी १४७ मक्षिका १४८ संवत्सरा १४९ क्षणरूपा १५० बलि-

प्रिया १५१ तुलसी १५२ कामिनी १५३ कामरूपा १५४ पुण्यदा १५५ विष्णुचक्रधरा १५६ पञ्चमी १५७ वृन्दावनस्वरूपिणी १५८ अयोध्यारूपिणी १५९ मायावती १६० जीमूतवसना १६१ जगन्नाथस्वरूपिणी १६२ क्षत्रियवसना १६३ त्रियामा १६४ जमलार्जुनी १६५ यामिनी १६६ यशोदा १६७ यादवी १६८ जगती १६९ छाया-जाया १७० सत्यभामा १७१ सुभद्रिका १७२ लक्ष्मणा १७३ दिगम्बरी १७४ एणुका १७५ तीक्ष्णा १७६ आचारा १७७ अक्रूरा १७८ जाह्नवी १७९ गङ्गकी १८० धेया १८१ नृमणी १८२ मोहिनी १८३ विकारा १८४ अक्षरवासिनी १८५ अंशका १८६ पत्रिका १८७ पवित्रिका १८८ तुलसी १८९ अतुला १९० जानकी १९१ वन्द्या १९२ कामगा १९३ नारसिंही १९४ गिरीशा १९५ साध्वी १९६ कल्याणी १९७ कमला १९८ कान्ता १९९ भ्रान्ता २०० कुला २०१ वेदमाता २०२ कर्म्मदा २०३ सन्ध्या २०४ त्रिपुरसुन्दरी २०५ रासेशी २०६ दक्षयज्ञविनाशिनी २०७ अनन्ता २०८ धर्म्मेश्वरी २०९ चक्रेश्वरी २१० खञ्जना २११ विदग्धा २१२ कृत्तिका २१३ चित्रा २१४ सुवेशा २१५ चतुर्भुजा २१६ राका २१७ प्रज्ञा २१८ ऋद्धिदा २१९ तापिनी २२० तपा २२१ सुमनसा २२२ दूती २२३ । इति तस्याः शतसङ्गामान्तर्गतः ॥

अथ दुर्गानाम्नो व्युत्पत्तिर्यथा,—

"दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्म्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि ।
महाभयेऽतिरोगे चाप्याकारो हन्तृवाचकः ।
एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥"

अपि च ।

"दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः ।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः ॥
रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः ।
भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥
श्रुत्युक्तिश्रवणाद्यस्या ऋते नश्यन्ति निश्चितम् ।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥
दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः ।
दुर्गं नाशयति या नित्यं सा दुर्गा वा प्रकीर्त्तिता ॥
विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः ।
तं नशाश पुरा तेन दुर्गेदुर्गा प्रकीर्त्तिता ॥"

अस्याः स्वरूपं यथा, नन्दं प्रति श्रीकृष्णवाक्यम् ।

"आद्या नारायणी शक्तिः सृष्टिस्थित्यन्तकारिणी ।
करोमि च यया सृष्टिं यया ब्रह्मादिदेवताः ॥
यया जयति विश्वञ्च यया सृष्टिः प्रजायते ।
यया विना जगन्नास्ति मया दत्ता शिवाय सा ।
दया निद्रा च तृष्णा च क्षुधा ब्रह्मा क्षमा धृतिः ।
तुष्टिः पुष्टिस्तथा भ्रान्तिर्जन्माधिदेवता हि सा ।
वैकुण्ठे सा महालक्ष्मीर्गोलोके राधिका सती ।
सर्व्वे लक्ष्म्यश्च क्षीरोदे दक्षकन्या सतीं च सा ॥
सा दुर्गा मेनकाकन्या दैत्यदुर्गतिनाशिनी ।
सर्व्वलक्ष्म्यश्च दुर्गा सा प्रकाशिता मया मया ।
सा वाणी सा च सावित्री विप्राधिष्ठातृदेवता ।
वह्नौ सा दाहिका शक्तिः प्रभाशक्तिश्च भास्करे ॥
शोभा शक्तिः पूर्णचन्द्रे जले शक्तिश्च शीतला ।
क्षत्यप्रसूतिशक्तिश्च धारणा च धरासु सा ॥
ब्राह्मण्यशक्तिर्विप्रेषु देवशक्तिः सुरेषु सा ।
तपस्विनां तपस्या सा गृहिणां गृहदेवता ॥
मुक्तिशक्तिश्च मुक्तानां माया सांसारिकस्य सा ।
मद्भक्तानां भक्तिशक्तिर्मयि भक्तिप्रदा सदा ॥
कृपाणां राज्यलक्ष्मीश्च वणिजां लभ्यरूपिणी ।
पारे सांसारसिन्धूनां तरी दुस्तरतारिणी ॥
सतां सद्बुद्धिरूपा च मेधाशक्तिस्वरूपिणी ।
आख्याशक्तिः श्रुतौ शास्त्रे दाक्षशक्तिश्च दाक्षयु ।
चन्द्रादीनां विप्रभक्तिः पतिभक्तिः सतीषु च ।
एवंरूपा च या शक्तिर्मया दत्ता शिवाय सा ॥"

अपि च, शङ्करं प्रति पार्व्वतीवाक्यम् ।

"वैकुण्ठे चाहं महालक्ष्मीर्गोलोके राधिका स्वयम् ॥
शिवाहं शिवलोकेऽपि ब्रह्मलोके सरस्वती ।
अहं निहत्य दैत्यांश्च दक्षकन्या सती पुरा ।
तस्मिन्न्या पुरा त्यक्ता सा चाहं शैलकन्यका ।
रत्नवीजस्य युद्धे च काली च मूर्त्तिभेदतः ॥
सावित्री वेदमाताहं सीता जनककन्यका ।
रुक्मिणी द्वारवत्याञ्च भारते भीष्मकन्यका ।
सुदामः शापतो देवात् तुलभागुसुतापुना ।
धर्म्मपत्नी च लक्ष्मस्य पुण्ये वृन्दावने वने ॥"

अपरञ्च, लक्ष्मीं प्रति पार्व्वतीवाक्यम् ।

"एकाहं राधिकारूपा गोलोके रासमण्डले ।
रासशून्यञ्च गोलोकं परिपूर्णं कुरु प्रभो ! ॥
परिपूर्णतमाहञ्च तव वक्षःस्थलस्थिता ।
तवाज्ञया महालक्ष्मीरहं वैकुण्ठवासिनी ।
सरस्वती च तत्रैव वामपार्श्वे हरेरपि ।
तवाहं मनसा जाता सिन्धुकन्या तवाज्ञया ।
सावित्री वेदमाताहं कलया विधिसन्निधौ ॥
तेजःसु सर्व्वदेवानां पुरा सत्ये तवाज्ञया ।
अधिष्ठानं कृतं तत्र धृतं दिव्यं शरीरकम् ।
शुम्भादयश्च दैत्याश्च निहताश्चावलीलया ।
दुर्गां निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे ।
निहत्य रक्तबीजञ्च रक्तबीजविनाशिनी ।
तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी ।
योगेन त्यक्ता देहञ्च शैलजाहं तवाज्ञया ।
त्वया दत्ता शङ्कराय गोलोके रासमण्डले ।
विष्णुभक्तिरहं तेन विष्णुमाया च वैष्णवी ।
नारायणस्य मायाहं तेन नारायणी स्मृता ।
लक्ष्म्याधाधिकाहञ्च राधाधिष्ठातृदेवता ।
महद्विष्णोश्च रासे च जननी राधिका स्वयम् ।
तवाज्ञया पञ्चधाहं पञ्चप्रकृतिरूपिणी ।
कलाकलांशयाश्चैव देवपत्न्यो यदे यदे ॥"

अथ तस्याः पूजाप्रकाशः ।

"प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
वृन्दावने च वृक्षाधो गोलोके रासमण्डले ॥
मधुकैटभभीतेन ब्रह्मणा सा द्वितीयतः ।
त्रिपुरप्रेषितेनैव तृतीये त्रिपुरारिणा ॥
अरण्यिया महेन्द्रेण शापादुर्व्वाससः पुरा ।
चतुर्थे पूजिता देवी ब्रह्मणा भगवती सदा ॥
तदा मुनीन्द्रैः सिद्धेन्द्रैर्देवैश्च मनुमानवैः ।
पूजिता सर्व्वविश्वेषु वसुषु सर्व्वतः सदा ।
तेजःसु सर्व्वदेवानामाविर्भूता पुरा मुने ! ॥
सर्व्वे देवा ददुस्तस्यै शस्त्राण्यि भूषणानि च ।
दुर्गादयश्च दैत्याश्च निहता दुर्गया तया ।
दत्तं स्वाराज्यं देवेभ्यो वरञ्च यदभीप्सितम् ।
कालान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसश्शिष्येण नद्यामाश्च सरित्तटे ।
मेधादिभिश्च महिषैः छाग्यसारैश्च गण्डकैः ।
छागैर्मौनैश्च कृष्णाङ्गैः पक्षिभिर्वलिभिर्मुने ।
वेदोक्तानि च दत्त्वैवमुपचाराणि षोडश ।
धृत्वा च कवचं ध्यात्वा संपूज्य च विधानतः ॥
राजा लब्ध्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं सम्प्राप वैश्यश्च संपूज्य च सरित्तटे ।
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विससर्ज्ज नद्यामेतां गभीरे निर्म्मले जले ।
नद्यामेतां जगन्मेतां दृष्ट्वा जलधौतां नराधिपः ।
ववरोद तत्र वैश्यश्च ततः स्थानान्तरं ययौ ।
त्यक्त्वा देहञ्च वैश्यश्च पुष्करे दुष्करं तपः ।
लब्ध्वा जगाम गोलोकं दुर्गादेवीवरेण च ।
राजा ययौ स्वराज्यञ्च पूज्यो निष्कण्टकं बली ।
भोगञ्च भुक्त्वे भूपः षष्टिवर्षसहस्रकम् ।
भार्य्यां स्वराज्ये संन्यस्य पुत्रे च कालयोगतः ।
मनुर्बभूव सावर्णिस्तत्रा च पुष्करे तपः ॥
इत्येवं कथितं वत्स ! समासेन यथागमम् ।
दुर्गाख्यानं मुनिश्रेष्ठ ! किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्तपुराणम् ।

अथ दुर्गापूजाविधिः ।

"शरत्काले महापूजा क्रियते या च वार्षिकी ।
शारदीया महापूजा चतुःकर्म्ममयी शुभा ।
तां तिथित्रयमासाद्य कुर्य्याद्भक्त्या विधानतः ।
चतुःकर्म्ममयी स्नपनपूजनबलिदानहोमरूपा सा च प्रतिवर्षं कर्त्तव्या ।

'द्विशरीरे वरे चैव लग्ने केन्द्रगते रवौ ।
वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्ज्जनम् ।
यो मोहादथवालस्यादेवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा देवाद्वाप्यथ भैरव ! ॥
क्रुद्धा भगवती तस्य कामानिष्टान् निहन्ति वै ॥'

दीक्षा अकरणे प्रत्यवायश्रुतेश्च सा पूजा नित्या विधिसमभिव्याहृतफलश्रुतेः काम्या च ।

यथा,—

'इत्येवं परमामापुर्निर्वृतिं त्रिदिवौकसः ।
एवमन्यैरपि सदा देवाः कार्य्यं प्रपूजनम् ।
विभूतिमतुलां लब्धुं चतुर्व्वर्गप्रदायकम् ।'

काम्यतया पूजने तु प्रसङ्गान्नित्यपूजासिद्धिः । तत्तद्वचनात् कृष्णजन्माष्टमीप्रतिपदादिषष्ठ्यादिसंप्रत्यादिमहाष्टम्यादिकैवलमहाष्टमीकैवलमहानवमीपूजारूपाः कल्पा उन्नेयाः । तदनन्तरमशौचमपि न प्रतिबन्धकम् ॥ * ॥ सा पूजा त्रिविधा । यथा,—

'शारदी चण्डिकापूजा त्रिविधा परिगीयते ।

सात्त्विकी राजसी चैव तामसी चेति विश्रुतिः ॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितम् ॥
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ।
देवीसूक्तजपश्चैव यज्ञो वह्नितु तर्पणम् ॥
राजसी बलिदानैश्च नैवेद्यैः सामिषैस्तथा ।
सुरामांसादुपाहारैर्जपयज्ञैर्विना तु या ॥
विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मता ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ॥
एवं नानाविधैर्यज्ञैः पूज्यते सर्व्वदस्तुभिः ।
स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा ॥
अर्च्चकस्य तपोयोगादर्च्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति ॥'

अथ नवम्यादिकल्पः ।

'इषे मास्यसिते पक्षे कन्याराशिगते रवौ ।
नवम्यां बोधयेद्देवीं क्रीड़ाकौतुकमङ्गलैः ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्व्वाषाढ़युतायान्तु पूजाहोमादुपोषणम् ।
उत्तरेण नवम्यान्तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यान्तु प्रतिपत्य विसर्जयेत् ॥'

प्रतिवर्षं कन्यार्के कर्त्तव्यत्वानुपपत्तेः सिंहार्केऽपि बोधनं तुलार्केऽपि स्नापनादिकं क्रियते चान्द्रत्वात् कन्यार्के मलमासे न तदारभ्यते यदि पूर्व्वमारब्धं तदा मलमासेऽपि पूजादेवीमाहात्म्यपाठादिकं प्रवृत्तं कर्त्तव्यमेव ।

'यावद्भूर्वायुराकाशं जलं वह्निश्च तिष्ठति ।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥'

तत्र ज्येष्ठानवम्यां देवत्वात्वेन पूर्व्वाह्णे बोधनम् । उभयदिने पूर्व्वाह्णे नवमीलाभे पूर्व्वदिने आर्द्रानुरोधे तु पूर्व्वाह्णं विना दिवामात्रे युग्मादरं विनापि परदिने बोधनं उभयदिने पूर्व्वाह्णे नवम्यार्द्रालाभे पूर्व्वदिने बोधनं युग्मात् ।

'कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः ।
तत्र बोधः प्रकर्त्तव्यो देवा राज्ञां शुभप्रदः ॥'

बोधनमन्त्रो यथा,—

'इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीदुर्गे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ।
अहमप्यात्मने तद्वद्बोधयामि सुरेश्वरीम् ।
प्रक्रियापि च सम्बोध्य प्राप्तं राज्यं सुरार्चये ॥
तस्मादहं त्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपादनेतोः ॥
यथैव रामेण हतो दशास्य-
स्तथैव मन्त्रून् विनिपातयामि ॥

षष्ठीबोधने तु अहमप्यात्मने षष्ठ्यां सायाह्ने बोधयामीत्र इति पठनीयम् ॥ * ॥

अथ प्रतिपदादिकल्पः ।

'आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिकल्पेनैव यावच्च नवमी भवेत् ॥'

प्रतिपदादितत्तत्तिथिषु ज्ञात्यमाह भविष्ये ।

'केशसंस्कारदत्याभि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ।
दर्पणञ्च तृतीयायां सिन्दूराक्तकं तथा ॥
मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमञ्जनम् ।
पञ्चम्यामङ्गरागञ्च शुक्लाम्बरयुगानि च ॥
षष्ठ्यां विल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ॥
उपोषणमथाष्टम्यामष्टशूक्तैः प्रपूजनम् ।
नवम्यासुपचक्रायास्त्रिदेवाचैनं दिवा ॥
पूजा च बलिदानञ्च तद्वन्मातृः प्रपूजयेत् ।
कुमारी पूजनीया च भूषणीया च भूषणैः ॥
संपूज्य प्रेषणं कुर्य्यात् दशम्यां श्रावरोत्सवैः ।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥
स्कन्दवत् पालयेत्तस्तु देवी सर्व्वापदि स्थितम् ।
पुत्रदारधनर्द्धीनां संख्या तस्य न विद्यते ।
भुक्त्वेह परमान् भोगान् प्रेत्य देवीगणो भवेत् ॥'

अथ षष्ठ्यादिकल्पः ।

'बोधयेद्विल्वशाखायां षष्ठ्यां देवीं नवेषु च ।
सप्तम्यां विल्वशाखान्तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरञ्च स्वयं कुर्य्यात् बलिदानं महानिशि ॥
प्रभूतबलिदानञ्च नवम्यां विधिवच्चरेत् ।
श्वेतेदृशभुजां देवीं दुर्गामन्त्रेण पूजयेत् ॥
विसर्जनं दशम्यान्तु कुर्य्याद्वै श्रावरोत्सवैः ।
धालकर्दमविप्लवैः क्रीड़ाकौतुकमङ्गलैः ॥
भगलिङ्गाभिधानेन भगलिङ्गप्रगीतकैः ।
भगलिङ्गाभ्यधाभिश्च कुर्य्याच्च दशमीदिने ॥'*॥

नवमीबोधनासामर्थ्ये षष्ठ्यां सायं बोधनं यथा,

'षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥'

षष्ठ्यां बोधनामन्त्रकरणेऽपि पत्रीप्रवेशपूर्व्वदिने सायं षष्ठीलाभे एकादेवोभयकरत्वं यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभस्तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम् । यदा तूभयदिने सायं षष्ठीलाभस्तदा परेऽह्नि षष्ठ्यां बोधनम् । उभयदिने सायं षष्ठ्यभावे पूर्व्वाह्णेऽपि षष्ठ्यां बोधनम् । आमन्त्रणमन्त्रस्तु ।

'मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशृङ्गिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतयोऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः ॥
सायं षष्ठ्यान्तु कर्त्तव्यं पार्व्वत्या अधिवासनम् ।
षष्ठ्यभावेऽपि कर्त्तव्यं सप्तम्यामपि नारद ! ॥'*॥

अथ सप्तम्यादिकल्पः ।

'आश्विने शुक्लपक्षे तु सप्तम्यादिदिनत्रये ।
तत्र पूजा विशेषेण कर्त्तव्या मम मानवैः ॥
विशेषं तत्र वक्ष्यामि शृणु पुत्रक ! मन्मतम् ।
सप्तम्यां पत्रिकापूजा रम्भादिनवभिर्युता ॥
महीमयी च मूर्त्तिर्मे पुत्रायुधनवह्नये ।
अष्टमी वा महापुण्या तिथिः प्रीतिकरी मम ॥
कुर्य्यात्तत्र महाज्ञानं पशुबलियुतैस्तथा ।
गायत्रीभिः कवायैश्च मन्त्रादैश्चौषधारिभिः ॥
ओषधीभिश्च सर्व्वाभिर्भृङ्गराजैः कलसैस्तथा
पुष्परत्नादितोयैश्च गन्धैर्मंलयजैस्तथा ॥
गीतवादित्रनादेन स्नापयेन्माञ्च भक्तितः ।
पूजा सदुपहारैश्च नैवेद्यैश्च मनोहरैः ॥
विल्वपत्रैर्घृतास्तैश्च तिलधान्यादिसंयुतैः ।
जुहुयान्ज्वलिते वह्नौ तस्य पुण्यफलं शृणु ॥
संसारे यानि सौख्यानि कान्यानि नरपुङ्गव ! ।
दीर्घमायुर्यशः पुत्रं विपुलं धनधान्यकम् ॥
लभते मत्प्रसादेन अन्ते मम पुरं व्रजेत् ।
बलिस्तत्र विशेषेण देयो मत्प्रीतये नरैः ॥
अनेन विधिना यस्तु नवमीमतिवाहयेत् ।
भुक्त्वेह च विपुलान् भोगानन्ते शिवपुरं व्रजेत् ॥
ततः सप्तम्यां मूलयुक्तायां केवलायां वा पूर्व्वाह्णे पत्रीप्रवेशः उभयत्र पूर्व्वाह्णे सप्तमीलाभे परत्र

'युगाद्या वर्षर्तूद्विश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'

पूर्व्वाह्णे नवपत्रिका शुभकरी सर्व्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने जनपीड़नक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनादि कलहं सर्पन्तं सर्व्वदा ॥
सप्तम्यामक्षतायां यदि विशति गृहं पत्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ।
तस्मात् सूर्य्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राज्यवर्षं विधाय ॥

लिङ्गस्थां पूजयेद्देवीं मङ्गलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।
चित्रे च विल्विखे खड्गे जलस्थाञ्चापि पूजयेत् ॥'

स्नात्वा यथाविधि विधौतकरानवाङ्मुराचम्य सम्यगमलाम्बरयुग्मधृक्षः प्रागाननो धनददिग्वदनोऽथवापि बद्धासनो गणपतिञ्च गुरुञ्च नत्वा ।

'कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या नवमे वासरेऽपि वा ।
पशुघातश्च कर्त्तव्यो गवालाबधवर्जया ॥'

उक्तवचने पशुघातश्च कर्त्तव्य इति श्रुतेः ।

'अष्टम्यां रुधिरैर्मांसैः कुसुमैश्च सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥'

इति कालिकापुराणाच्च ॥

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवम् ।'

इति देवीपुराणीयं सन्धिपूजाबलिदानपरम् ॥ ततपूजाया उभयतिथिकर्त्तव्यत्वेन तद्विधिवाक्यस्य नवम्यां सावकाशत्वात् । ततपूजाविधानन्तु कालिकापुराणे वचनान्तरम् ।

'अष्टमीनवमीसन्धौ द्वितीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्र ! योगिनीगणसंयुता ॥
उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥

मूलेन प्रतिपूजयेद्भगवतीं चण्डीं प्रचण्डाकृति-
चाष्टाभिर्मुण्डसंयतधिया भक्त्या समा-
राध्य च।
ग्रामापामृगमज्जमांसरुधिरैः छत्वा नवम्यां
बलिं
नैवेद्यं भवनं तिथिश्च दशमीं संप्राप्य संप्रेषयेत्।
भगवत्याः प्रवेशादिविसर्गान्तांश्च याः क्रियाः।
तिथाद्दयगामिन्यां सर्वास्ताः कारयेद्बुधः॥'
अशौचयक्षाशौचघटिकामात्रतिथौ सम्यक्पूज-
नासामर्थ्ये कालिकापुराणम्।
'सम्यक् कर्त्तोदिता पूजा यदि कर्त्तुं न शक्यते।
उपचारांस्तदा दातुं पञ्चैतान् वितरेत्तदा।
गन्धं पुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च।
अभावे गन्धपुष्पाभ्यां तदभावे च भक्तितः।
संक्षेपपूजा कथिता तथा वस्त्रादिकं पुनः॥
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत्॥'
अत्र प्रातःपदं पूर्वाह्णपरम्।
'अतो प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये।
शक्त्या चतुरहोभिर्वा ह्यथवाहर्दिवयुक्तिये:॥'
अशक्त्यादुपवासः पुत्रवतो गृहस्थस्य निषिद्धः।
यथा कालिकापुराणम्।
'उपवासं महाष्टम्यां पुत्रवान् समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्।
नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाविधि।
अयं होमश्च विधिवत् कुर्यात्तत्र विभूतये॥'
अथ नवम्यां होमश्रुतेः पूर्वाह्णाद्युत्तरार्द्धां
पूजाहोमाद्युपोषणं इति श्रुतेश्च उभयत्र एक-
तरस्मिन् वा होमः शारदायाः पूजाया नवम्यामेव
दक्षिणा देया॥*॥
अथाष्टम्यादिकेवलमहाष्टमी केवलमहानवमी-
कल्पा यथा,—
'भद्रकाली पटे छत्वा तत्र संपूजयेद् द्विजः।
आश्विने शुक्लपक्षस्य चाष्टम्यां नियतव्रतः।
उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्॥'
इति विष्णुधर्म्मोत्तरम्॥
'यस्यैकस्यामथाष्टम्यां नवम्यां वाथ साधकः।
पूजयेद्वरदां देवीं शुद्धभावेन चेतसा॥'
इति कालिकापुराणम्॥*॥
दुर्गायाः ध्यानं यथा,—
'घटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
त्रिनेत्रपञ्चसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम्॥
दक्षवामायतसंस्थदशभुजसमन्विताम्।
त्रिशूलं दक्षिणे भागे खड्गं चक्रं क्रमादधः॥
तीक्ष्णबाणं तथा शक्तिं दक्षभागे निवेशयेत्।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥
घण्टां वा परशुं वापि वामतः संनिवेशयेत्।
अधस्तान्महिषं तद्वच्छिरस्कं प्रदर्शयेत्॥
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम्॥
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम्।
वेष्टितं नागपाशेन भृकुटीभीषणाननम्॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया।
वमद्रुधिरवक्त्रञ्च देयाः सिंहं प्रदर्शयेत्॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्।
किञ्चिदूर्द्धं तथा वाममङ्गुष्ठं महिषोपरि॥
प्रभुशक्तयकरीं देवीं देवदानवदर्पहाम्।
प्रसन्नवदनां देवीं सर्वकामफलप्रदाम्॥
स्तूयमानञ्च तद्गणमरैः सन्निवेशयेत्॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका॥
आभिः शक्तिभिरताभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥'
इति ध्यात्वा महाज्ञानपूर्व्वकषोढ़ोपचारा-
दिना बलिदानादिभिः पूजयित्वा आवरणं
पूजयेत्॥*॥

अथ दशमीकृत्यम्।

'संपूज्य प्रेषणं कुर्याद्दशम्यां श्रावणोत्तरे।'
देवीयात्राकाले निर्म्मल्यविधिमाह पूजारत्ना-
करे देवीपुराणम्।
'भक्त्या पितृप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः॥
नवम्यां पर्व्वकाले तु यात्राकाले विशेषतः।
यः कुर्य्यात् अहया वीर! देव्या नीराजनं नरः॥
ग्रहभेर्य्यादिनिर्घोषैर्जयशब्दैश्च पुष्कलैः।
यावतो दिवसान् वीर! देव्या नीराजनं कृतम्॥
तावत्कालसहस्राणि दुर्गालोके महीयते।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोके महीयते॥'
तद्दिने अपराजितापूजनम्। यथा,—
'आश्विने शुक्लपक्षस्य दशम्यां पूजयेत्तथा।
एकादश्यां न कुर्व्वीत पूजनञ्चापराजितम्॥'
तद्दिने राजा यात्रां कुर्य्यात्। यथा,—
'दशमीं यः समुद्दिश्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत्॥'
स्वयमशक्तौ खड्गादियात्रा कर्त्तव्या। यथा,—
'कार्य्यवशात्स्वयमक्षमे भूभर्त्तुः केचिदाहुरा-
चार्य्याः।
छत्रायुधाद्यमिश्रं वैजयिकं विर्गमे कुर्य्यात्॥'*॥
खड्गलक्षणफलादिर्यथा,—
'हस्तागते तु मित्रे यया दिशा खड्गं यात्रां
नृपः पश्येत्।
तया प्रयातस्य क्षिप्रमरातिर्व्वश्यमुपैति।
छत्रा नीराजनं राज्ञा बलदृष्ट्या यथाबलम्।
शोभनं खड्गं पश्येत् जलगोगोलसन्निधौ।
अश्वेषु गोषु गजवाजिमहीरगेषु
राज्यप्रदः कुशलदः क्षितिपाङ्गनेषु
भक्षास्थिकेशनखलोमसु वेषु दृष्टो
दुःखं ददाति बहुशः खलु खड्गरीटः॥
अशुभं खड्गं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्व्वीत कुर्याच्च स्नानं सर्व्वौषधीजलैः॥

अथ विसर्জ্জনম্।

'नौयानेनेरयानैर्व्वा नीत्वा भगवतीं शिवाम्।
स्रोतोजले प्रक्षिपेयुः क्रीड़ाकौतुकमङ्गलैः॥
परैर्नाक्षिप्यते यस्तु परं नाक्षिपते तु यः।
तस्य दत्ता भगवती शापं दद्यात् सुदारुणम्॥"
इति तिथ्यादितत्त्वदुर्गार्चातत्त्वे॥
विसर्জ্জनमन्त्रो यथा,—
"दुर्गे देवि जगन्मातः! स्वस्थानं गच्छ पूजिते।
संवत्सरव्यतीते तु पुनरागमनाय वै॥
निमज्जाम्भसि देवि त्वं चण्डिकाप्रतिमा शुभा।
पुत्रायुर्धनदृद्ध्यर्थं स्थापितासि जले मया॥"*॥
विसर्জ্জनानन्तरं गृहमागत्य अक्षिस्रावधारणं
कृत्वा घटस्थजलेन एभिर्म्मन्त्रैर्यजमानमभि-
षिञ्चेत्। यथा,—
"ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञमरक्षन्तमे उप-
प्रयन्तु मरुतः सुदानव इन्द्रप्रातर्भवासचा॥
ॐ सुराक्षामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितो ह्येते दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः सुसंयताः।
आदित्यश्चन्द्रमा भौमो बुधश्चोशनसार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
औषधानि च रत्नानि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा ह्रदाः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"
इति तन्त्रान्तरेश्वरपुराणपद्धतिः॥*॥

अथ दुर्गानाममाहात्म्यम्।

"सवर्गस्य तृतीयोऽर्णः पञ्चमस्वरसंयुतः।
कवर्गस्य तृतीयोऽर्णो बिन्दुस्तस्योपरि स्थितः॥
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम्।
आरोग्यस्य च सम्पत्तेर्नामेदं परमो हेतुर्मुक्तये भवभक्तिनाम्।
कलिकाले विशेषेण महापातकिनामपि।
निस्सारबीजं विज्ञेयं नामसंसारतारणं प्रिये!॥
परदारहरोऽपि स्यात् परद्रव्यापहारकः।
सोऽपि पापात् प्रमुच्येत यदि स्यादतिपामरः॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
एतेभ्योऽपि विमुच्येत यदि नाम स्मरेत् सुधीः॥"
इति रुद्रयामले॥
"दुर्गा दुर्गेति दुर्गेति दुर्गानाम परं मनुम्।
यो जपेत् सततं भक्त्या जीवन्मुक्तः स मानवः॥
महोत्पाते महारोगे महाविपदि सङ्कटे।
महाभये महाशोके महाभयसमुत्थिते॥

यः स्मरेत् सततं दुर्गां जपेत् यः परमं मनुम् ।
स जीवन्मोक्षो देवेशि! नीलकण्ठत्वमवाप्नुयात् ॥"
इति सुरूपमाहात्म्यम् ।

दुर्गाध्यक्षः, पुं, (दुर्गस्य अध्यक्षः ।) दुर्गरक्षकः । तस्य लक्षणं यथा,—
"अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञस्तदयुक्तः सर्व्वकर्म्मसु ॥"
इति मत्स्यपुराणम् ॥

दुर्गानवमी, स्त्री, (दुर्गायाः पूजोपलक्षिता नवमी ।) कार्त्तिकशुक्लनवमी । सा चैत्रादियुगाद्या । तत्र जगद्धात्रीपूजा कर्त्तव्या । यथा, योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यान्तु विशेषतः ।
प्रगत्भाञ्च जगद्धात्रीं पूजयेद्दीपमालया ॥
तन्त्रान्तरे ।
'त्रिकाल पूजयेद्दुर्गां मनुनैकाक्षरेण च ।
नानाबलिविधानेन गीतवाद्यपुरःसरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्यान्तु विशेषतः ।
लक्षैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम् ॥'
कुब्जिकातन्त्रे ।
'कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥'
शक्तिसङ्गमतन्त्रे ।
'कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्जयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः ।
पुत्रपौत्रधनैश्वर्य्यसंयुताश्च भवेत् पुरौ ॥
दासदासीगजैर्युक्तो मुक्तः स्यात् पापसङ्कटात् ।
विशेषतो वसुयुता नवमीं प्राप्य साधकः ।
पूजयित्वा जगद्धात्रीं तां लभते वाञ्छितं फलम् ॥'
भविष्ये ।
'मासेऽतुभिर्यजेत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर! नवम्यां कार्त्तिकस्य च ॥"
इति तिथितत्त्वम् ॥

दुर्गाशः, पुं, (दुर्गाया आज्ञा आज्ञा आज्ञा यस्य ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

दुर्घोषः, पुं, (दुर्दुष्टः घोषो निनादो यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ निन्दितरवः । तद्वति, त्रि ॥

दुर्जनः, त्रि, (दुर्दुष्टो जनः । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः ।) खलः । इत्यमरः । १ । १ । ४७ ॥ (यथा, चाणक्यशतके । २४—२५ ।
"दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")

दुर्जयः, पुं, (दुःखेन जीयतेऽसौ । जि जये + खल् ।) कार्त्तवीर्य्यराजतनयोऽवागस्तपुत्रः । इति भूमिपुराणम् ॥ (विष्णुः । यथा, महाभारते । १३ । १४८ । ६६ ।
"समावर्त्ती निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥"

दानवविशेषः । यथा, महाभारते ।१।६५।२२।
"असिलोमा च केशी च दुर्जयश्चैव दानवः ॥"
राक्षसविशेषः । यथा, रामायणे ।३।२६।३०।
"तं दृष्ट्वा निःसृतं पूर्व्वं राक्षसा अपि निःसृताः ।
दुर्जयः कालकाक्षश्च परुषः कालिकामुखः ॥")
त्रि, दुर्जयः । (यथा, देवीभागवते ।५।८।२२।
"वरदानेन धातुः स दुर्जयो मधुसूदन ! ॥")

दुर्जरा, स्त्री, (दुर्दुःखेन जीर्य्यतीति । दुर् + जृ + अच् । ततष्टाप् ।) ज्योतिष्मती लता । इति राजनिर्घण्टः ॥ त्रि, दुर्जरः । (यथा, सुश्रुते ।१।४६।
"स्वादु पाकरसं शीतं दुर्जरं हरिमन्थजम् ॥"
दुर्जयः । यथा, देवीभागवते । १ । १८ । २६ ।
"दुर्जरं वायुराजानं न शान्तिमुपयाति वै ॥")

दुर्जातं, क्ली, (दुर्दुष्टं यथा तथा जातम् । प्रादिसमासः ।) असनम् । (यथा, रघुः ।१३।०२।
"दुर्जातवन्नुरयन्दक्षदरीश्वरो मे
मौलस्त्र एष समरेषु पुरः प्रहर्त्ता ॥")
असमञ्जसम् । इति त्रिकाण्डशेषः ॥ असन्मञ्जाते, त्रि । इति मेदिनी । ते, ११४ ॥ (यथा, महाभारते । १२ । २२४ । ६३ ।
"दौष्कुलेयस्तथा मूढो दुर्जातः शक्र उच्यते ॥")

दुर्दान्तः, पुं, (दुर्दुःखेन दान्तो दमितः ।) कजदः । वृषभतरः । इति राजनिर्घण्टः ॥ अप्राप्ते, त्रि । (यथा, माघे । १२ । २२ ।
"दुर्दान्तसुतमुल्बण निरङ्कुशादिनं
सहसाहङ्कारमशोकयज्जनः ॥")

दुर्दिनं, क्ली, (दुर्दुष्टं दिनम् ।) मेघाच्छन्नदिनम् । इत्यमरः । १ । ३ । १२ ॥ (यथा, हरिवंशे । १६० । १८ ।
"सुसुखं दुर्दिनञ्चासीत् सविद्युत्स्तनयित्नुमत् ।
तदुर्दिनतमं भित्त्वा नारदः प्रत्यदृश्यत ॥"
घनान्धकारः । यथा, कुमारे । ६ । ४१ ।
"यन्नौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥")
दृष्टिः । यथाह साङ्गः ।
"घनान्धकारे दृष्टौ च दुर्दिनं कवयो विदुः ॥"
(यथा, रघुः । ४ । ४१ ।
"स्त्रियां विषक्तकाञ्चीकृत्सक्तञ्च नाराचदुर्दिनम् ।
सम्मुखक्षतात इव प्रतिपेदे जयश्रियम् ॥"
कृत्सितदिनम् ।)
"सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्मोद्भवे भव ।
तत् कर्म्म तपसा साध्यं कर्म्मणाञ्च शुभाशुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
"यदद्युतकथालापरसपीयूषवर्जितम् ।
तद्दिनं दुर्दिनं मन्ये मेघाच्छन्नं न दुर्दिनम् ॥"
दुष्टुष्टः ॥
(दुर्दिनं वर्षः, घनान्धकारो वा अस्त्यस्येति । अच् । वर्षयुक्ते घनान्धकारविशिष्टे च, त्रि । यथा, हरिवंशे । ६० । ६६ ।
"सम्प्राप्ते दुर्दिने काले दुर्दिनं भाति वै नभः ॥"
तथा, महाभारते । ८ । ६१ । २३ ।
"नीलतोयेव दिग्वः सर्व्वाश्चक्रे तिमिरदुर्दिनाः ॥")

दुर्दुरूटः, पुं, (दोलयति उत्क्षिपति आस्तिकतामिति । दोलि + बाहुलकात् कूटप्रत्ययेन साधुः ।) नास्तिकः । इति जटाधरः ॥

दुर्दृता, स्त्री, लताविशेषः । इति जटाधरः ॥

दुर्द्दमः, पुं, (दुर्दुष्टो दमः ।) हरितपलाण्डुः । इति राजनिर्घण्टः ॥

दुर्धर्(र्ष)रः, पुं, (दुर्दुःखेन ध्रियते इति । दुर् + धृ + "ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।" ३ । ३ । १२६ । इति खल् ।) नरकविशेषः । ऋषभौषधिः । इति मेदिनी । रे, १६८ ॥ पारदः । भल्लातकः । इति राजनिर्घण्टः ॥ महिषासुरस्य सेनापतिविशेषः । यथा, मार्कण्डेये ।८३।१६।
"दुर्द्धरं दुर्मुखञ्चोभौ शूरैर्निर्ऋत्य यमक्षयम् ॥"
(धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । ७ । १२३ । ६० ।
"नाश्नन्त महेष्वासाः सोदर्य्याः पञ्च भारत ! ।
दुर्म्मर्षणो दुःसहश्च दुर्म्मदो दुर्द्धरो जयः ।
पाण्डवं चित्रसन्नाहाः प्रतीपमुपायन्वन् ॥"
असुरासुरस्य मन्त्रिविशेषः । यथा, हरिवंशे । १६२ । १८ ।
"दुर्द्धरः केतुमाली च शत्रुहन्ता प्रमर्द्दनः ।
एते परिवृतोऽमात्यैर्युतुत्सुः प्रस्थितो रथी ॥"
विष्णुः । यथा, महाभारते । १३ । १४८ । ८६ ।
तस्य सहस्रनामकथने ।
"दर्पहा दर्पदो दृप्तो दुर्द्धरोऽथापराजितः ॥"
"न शक्या धारणा यस्य प्रविधानादिह सर्व्वोपाधिविनिर्म्मुक्तलाक्षणापि तत्प्रसादादतः किञ्चिद्दुःखेन धार्य्यते अनन्तरसहस्रेषु भावनात् तस्मात् दुर्द्धरः ।
'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥'
इति भगवद्वचनात् ॥" इति तद्भाष्ये शङ्करः ॥
तथा तत्रैव । ४२ श्लोके ।
"सुसुखो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥"
"पृथिव्यादीनि धारकाण्यनेन धारयितुमशक्यत्वात् न केनापि धारयितुं शक्यते इति दुर्द्धरः । दुःखेन ध्यानसमये सुसूक्ष्मबुद्ध्यादिभिर्दुःखेन धार्य्यते इति दुर्द्धरः ॥" इति तद्भाष्यम् । एतेन व्युत्पत्तिभेदात् नामभेदोत्पत्त्या न द्विरुक्तिः सहस्रनामपूर्त्तिश्च ज्ञाता ।) दुःखधार्य्ये, त्रि । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १३४ । ६८ ।
"अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
एतद्धीदं महाबाहो! विप्रिष्टमिति दुर्द्धरम् ॥
अस्त्रं ब्रह्मशिरो नाम सम्प्रयोगनिवर्त्तनम् ॥"
दुर्जये च । यथा, महाभारते । ७।११७।६ ।
"निर्जित्य दुर्द्धरं शौरिं सपदानुगमाहवे ।
हार्दिक्यं योधयध्यञ्च प्राप्तं मन्ये धनञ्जयम् ॥")

दुर्धा(र्द्धा)नी, स्त्री, (दुर्दुःखेन ध्रियतेऽसौ । दुर् + धृ + खल् ।) नागदमनी । कन्यारीवृक्षः । इति राजनिर्घण्टः ॥ (पुं, धृतराष्ट्रपुत्रविशेषः । यथा, महाभारते । १ । ११७ । ३ ।
"विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥")

दुःखधर्षबोधे, त्रि ॥ (यथा, महाभारते । ६ । १२ । ६ ।
"सुनामा नाम दुर्धर्षो द्वितीयो हेमपर्व्वतः ॥"
दुर्ज्जयः । तथा, तत्रैव । १ । १३४ । ८० ।
"ततः प्रीतमना ब्रह्मो सुकूर्त्तादिव तं पुनः ।
प्रत्यभाषत दुर्धर्षः पाञ्चवानां महारथम् ॥")
दुर्द्रुरूटः, पुं, (दोलयति उत्क्षिपति युक्त्यादिकमिति । दुल क उत्क्षेपे + बाहुलकात् कूटप्रत्ययेन साधुः तस्य रः ।) युक्तिं विना गुरुवाक्यममन्यमानः । इति तत्त्वबोधनी ॥
दुर्नाम, [न्] क्ली, (दुर्द्रुरं नाम यस्य ।) अर्शोरोगः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ४५ ।
"दध्यामं कफपित्तघ्नं लघु वातक्षयापहम् ।
दुर्नामग्रासकासेषु हितमग्नेः प्रदीपनम् ॥"
पित्तजशोणितजयोरनयोर्हेतुर्यथा,—
"कट्वम्ललवणोष्णानि विदाहीनि गुरूणि च ।
सेवनानिलतोयेन श्रमाद्व्यायामपीड़या ।
यानयायामदोषाद्वा दुर्नाम पित्तसम्भवम् ॥
अत्यायामात्तस्य ग्रीलादजस्रं
ग्रीताद्वान्यद्वातसंसेवनाच्च ।
गौण्यात्यम्लात्तैलसम्यिच्छिखेन
दुर्नामा सञ्जायते स्नेहदोषात् ॥"
इति हारीते चिकित्सितस्थाने द्वादशेऽध्याये ॥
चिकित्सास्य यथा,—
"घोषाण्यरुष्करविड़ङ्गतिलाभयानां
चूर्णं गुड़ेन सहितन्तु सदोपयोज्यम् ।
दुर्नामकुष्ठगरग्रोथग्रहद्विवन्धा-
नर्म्मेक्ष्यत्यवलतां क्रिमिपाण्डुताञ्च ॥"
इति घोषादिचूर्णम् ॥
पञ्चेन्द्रियचतुर्दोषे कष्टकार्य्यन्तु शोणितम् ।
तत्रापि चिपलाघोषपूतिकलककलिङ्गकैः ॥
स काश्मर्य्यविड़ङ्गैस्तु सिद्धं दुर्नाममेहनुत् ।
घृतं सिंह्मन्तं नाम घोषिसत्त्वेन भाषितम् ॥
इति सिंह्मन्तं घृतम् ॥"
इति वैद्यकचक्रपाणि संग्रहे अर्शोऽधिकारे ॥
"श्लक्ष्णं शौरभं कन्दं पक्वाशौ पुटपाकवत् ।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये ॥"
"चूर्णीकृता: षोड़श शूरवल्ल्या
भागास्ततोऽर्द्धेन च चित्रकस्य ।
महौषधाद्वौ मरिचस्य चैको
गुड़ेन दुर्नामभयाय पिण्डी ॥"
इति शूरवल्लीपिण्डी ॥
इति वाभटे चिकित्सास्थाने अष्टमेऽध्याये ॥
"मांसशूरणभक्षात्तिन्दुकीसमन्वितम् ।
चिरव्रणसमायुक्तं शौरं दुर्नामनाशनम् ॥
इति मांसाद्यं शौरम् ॥"
इति वैद्यकरत्नसारसंग्रहे अर्शोऽधिकारे ॥
"सर्व्वाः स्युर्वलयो येषां दुर्नामभिरुपद्रुताः ।
तेषु प्रतिहतो वायुरपानः सन्निवर्त्तते ॥
ततो यानेन सङ्गम्य ज्योतिर्मुद्गति देहिनाम् ॥"
इति सुश्रुते चिकित्सास्थाने तृतीयेऽध्याये ॥)

दुर्नामकं, क्ली, (दुर्नाम + स्वार्थे संज्ञायां वा कन् ।) अर्शोरोगः । इत्यमरः । २ । ६ । ५४ ॥ (यथा,—
"सनागराड्यकरट्टहारकं
गुड़ेन यो मोदकमत्युदारकम् ।
अर्शोदुर्नामकरोगदारकं
करोति दृढं सहसैव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे ॥)
दुर्नामा, [न्] पुं, क्ली, (दुर्निन्दितं नाम यस्य ।) दीर्घकोविदारः । इत्यमरः । २ । १० । २५ ॥ श्लिष्मक् इति भाषा ॥
दुर्नामारिः, पुं, (दुर्नाम्न अर्शोरोगस्य अरिः शत्रुः ।) शूरणः । इति राजनिर्घण्टः ॥
दुर्नाम्नी, स्त्री, (दुर्निन्दितं नाम यस्याः । ङीप् ।) दुर्नामा । इति शब्दरत्नावली ॥
दुर्बल, त्रि, (दुर्निन्दितं बलं यस्य ।) क्षीणः । तत्पर्य्यायः । अमांसः २ क्षीतः ३ । इत्यमरः । २ । ६ । ४४ ॥ क्षान्तः ४ क्षीतः ५ क्षितः ६ अबलः ७ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ६ । ५६ ।
"सबलो जयमाप्नोति दैवाच्चयति दुर्बलः ॥"
शिथिलः । यथा, रघुः । ५ । १२ ।
"स्वार्थोपपत्तिं प्रति दुर्बलाश्च-
स्वामित्यवोचद् वरतन्तुशिष्यः ॥"
दुष्कर्म्मा । यथा, मनुः । ३ । १५१ ।
"जटिलञ्चानधीयानं दुर्बलं क्षितवन्तथा ।
याजयन्ति च ये पूगांस्तांश्च श्राद्धेन भोजयेत् ॥")
दुर्बला, स्त्री, (दुर्दुरं खल्वमित्यर्थः, बलं यस्याः ।) अश्वशिरीषिका । इति भावप्रकाशः ॥
दुर्भगा, स्त्री, (दुर्दुरं भगं भाग्यं यस्याः ।) पतिस्नेहरहिता । दुया इति भाषा । तत्पर्य्यायः । विरक्ता २ । इति त्रिकाण्डशेषः । विरक्ता ३ निस्वा ४ सौभाग्यरहिता ५ । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १७ । २६ ।
"ग्रीवत्यशुक्ला साध्वी दुर्भगेवोज्झिता सती ॥"
भाग्यहीने, त्रि । यथा, महाभारते । १ । १३० । ७ ।
"कर्म्मभिः स्वकृते: सा तु दुर्भगा समपद्यत ॥")
दुर्भिक्षं, क्ली, (भिक्षाया अभावः ।) भिक्षाया अप्राप्तिकालः । अकाल इति भाषा । यथा,
"दुर्भिक्षमल्पं क्षरणं चिराय ।" इत्युद्भटः ॥
भिक्षायाः प्रायो निष्फलत्वमित्ययीभावसमासः । यद्देशे यत्कालं तद्देशतत्कालयोग्यशस्यादिकं न जायते तद्देशे तदा याच्यमानदयालाभात् दुर्भिक्षं जातमिति व्यवह्रियते सन्निरिति । तत्कारकवर्षाणि यथा,—
"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीड़नम् ।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने ! ॥१३॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम् ।
अनावृष्टिः समाख्याता धात्रे संवत्सरे प्रिये ॥२०॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संक्षिप्तमण्डलः ।
दुर्भिक्षं वत्सरीवर्षे व्यवहारो विपर्य्ययः ॥ ६४ ॥
दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये ! ।
व्रते व्रवन्ति लोकानि पीड़िता मानवा भुवि ॥२५॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्याता नात्र कार्य्या विचारणा ॥५०॥
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि ! दुर्भिक्षं वर्म्मशातटे ॥५१॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्वै मध्यमा वृष्टिर्दुर्म्मतौ वसुपस्थिते ॥ ५५ ॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीड़नम् ।
पापरोगो भवेद्देवि ! रक्ताक्षेऽमरवन्दिनि ! ॥५८॥
रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ! ॥५६॥
मेदिनी चलते देवि ! सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये सङ्गीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! ॥"५०॥
इति ज्योतिस्तत्त्वधृतवशिष्ठवर्षाज्ञानगर्गतथर्वविशेषफलबोधकभविष्यपुराणीयवचनानि ॥ * ॥
अद्भुतेऽपि दुर्भिक्षं भवति यथा,—
"मांसास्थिनी समादाय श्वशृगालादयश्चवायसाः ।
श्वा शृगालोऽथवा मर्त्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति गृहादौ च श्वशृगानं सा मही भवेत् ।
चौरेश्च हन्यते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रदृश्यन्ते तत्र देशस्य विप्लवः ॥
अकाले फलपुष्पादि देशविद्रवकारकम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
"तत्राग्नौचिभिक्षाग्रहणे दोषाभाव इति हारलताप्रभृतयः ॥ कौर्म्मे ।
सद्यःशौचं समाख्यातं दुर्भिक्षे चाग्न्युत्पत्तौ ।
विप्लवाहवे हताशाच विद्युता पार्थिवेहिंसे ॥
सद्यःशौचं समाख्यातं ग्रामादिमरणे तथा ॥"
इति शुद्धितत्त्वम् ॥
अपि च गारुड़े २२६ अध्याये ।
"दुर्भिक्षयुक्तराष्ट्रे च व्रतके व्रतकेऽपि वा ।
नियमाश्च न दुष्यन्ति दानधर्म्मरताश्च ये ॥
दीक्षिताश्चाभिषिक्ताश्च व्रततीर्थपराश्च ये ।
दीक्षाकाले विवाहादौ देवद्रोणां निमन्त्रिते ॥
पूर्व्वसङ्कल्पिते चापि नाशौचं व्रतव्रतके ॥"
दुर्म्मनाः, [स्] त्रि, (दुर्दुरं मनो यस्य ।) चिन्तादिव्याकुलचित्तः । तत्पर्य्यायः । विमनाः २ अन्यमनाः ३ । इत्यमरः । ३ । १ । ८ ॥ (यथा, भागवते । १ । ६ । १६ ।
"रूपं भगवतो यत्तत्मनः कामं शुचापहम् ।
अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्म्मना इव ॥"
शतावर्य्याम्, स्त्री । इति राजनिर्घण्टः ॥ (दुर्दुरं मनः इति विग्रहे । दुष्टचित्ते, क्ली । यथा, रामायणे । २ । ३१ । २० ।
"यदि दुःखो न रक्षेत भरतो राज्यमुत्तमम् ।
प्राप्य दुर्म्मनसा वीर गर्व्वेण च विशेषतः ॥")
दुर्म्मरा, स्त्री, (मृ + भावे अप् । दुर्दुरं मरणं यस्याः । क्षिप्तायामपि पुनरुत्पत्तेरस्यास्तथात्वम् ।) दूर्व्वा । इति जटाधरः ॥ श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

दुर्म्मुखः, पुं, (दुर्निन्दितं मुखं यस्य।) वानरविशेषः। (यथा, रामायणे। ४। ३६। ३३।
"अयुतेन शतेनैव सहस्रेण शतेन च।
ततो यूथपतिर्वीरो दुर्म्मुखो नाम वानरः॥")
नागभेदः। इति मेदिनी। खे, १०॥ (यथा, हरिवंशे। ३। ११४।
"कुहरः पुष्पदंष्ट्रश्च दुर्म्मुखः सुमुखस्तथा॥")
अग्निः। इति हेमचन्द्रः। ३। १५॥ (सर्पः। इति त्रिकाण्डशेषः। ३। ३। ५६॥) महिषासुरसेनापतिविशेषः। यथा, मार्कण्डेये। ८३। १६।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम्॥"
नृपविशेषः। यथा, महाभारते। २। ४। २१।
"संग्रामजिद्दुर्म्मुखश्च उग्रसेनश्च वीर्य्यवान्॥"
धृतराष्ट्रस्य पुत्रविशेषः। यथा, तत्रैव। १। ११७। ३।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च॥"
राक्षसविशेषः। यथा, भागवते। ६। १०। १८।
"रथः पतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तकनरान्तकादीन्॥"
यक्षविशेषः। इति ब्रह्मपुराणम्॥ गणपतेर्गणानामन्यतमः। यथा, महागणपतिस्तोत्रे। ११।
"षट्कोणाग्निषु षट्सु षड्गणसखाः पाशाङ्कुशाभीरवान्-
विभ्राणाः प्रमदासखाः पृथुमहाप्रोद्यन्मदस्रुत्स्रुचः।
आमोदः पुरतः प्रमोदसुखौ तं चाभितो दुर्म्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्त्तेति च॥"
वर्षविशेषः। यथा, ज्योतिषतत्त्वधृतभविष्यपुराणवचनम्।
"तुषधान्यक्षयो देवि! सर्व्वशस्यमहार्घता।
अवहारात्च नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः॥")

दुर्म्मुखः, त्रि, (दुर्दुःखजनकं सुखं सुखनिःसृतवचनादिकं यस्य।) अप्रियवादी। तत्पर्य्यायः। सुखरः २ अवद्यसुखः ३। इत्यमरः। ३। १। ३६॥ (अप्रियदर्शनम्। यथा, कथासरित्सागरे। १२। ५२।
"चक्रे वसन्तकस्यापि रूपं दन्तुरदुर्म्मुखम्॥")

दुर्म्मूल्यं, क्ली, (दुर्दुःस्थितं मूल्यम्। प्रादिसमासः।) महार्घम्। इति लोकप्रसिद्धम्॥

दुर्म्मेधाः, त्रि, (दुर्निन्दिता मेधा धारणावती बुद्धिर्यस्य। "नित्यमसिच् प्रजामेधयोः।" ५। ४। १२२। इति असिच्।) मन्दमेधाः। इति व्याकरणम्। (यथा, महाभारते। ३। १०। २६।
"न किञ्चिदुक्ता दुर्म्मेधास्तस्यौ किञ्चिदवाङ्मुखः॥")

दुर्म्मोहः, पुं, (दुर्निन्दितो मोहो यस्मात्।) काकतुण्डी। इति राजनिर्घण्टः॥

दुर्य्योधनः, पुं, (दुर्दुःखेन युध्यतेऽसौ। युध+"भाषायां शासियुधीति।" युच्।) स्वनामख्यातकुरुवंशप्रभवराजविशेषः। स धृतराष्ट्रस्येक्षपुत्रः कुरुपाण्डवयुद्धे भीमेन हतः। तत्पर्य्यायः। कुरुराट् २ गान्धारेयः ३ सुयोधनः ४। इति त्रिकाण्डशेषः॥ (अयं कलेरंशेन पृथिव्यामवतीर्णः। यथा, महाभारते। १। ६७। ८८-८६।
"कलेरंशस्तु संजज्ञे सुवि दुर्य्योधनो नृपः।
दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः॥
जगतो यस्तु सर्व्वस्य विद्विट्कलिपुरुषः।
यः सर्व्वा घातयामास पृथिवीं पृथिवीपते!॥")

दुर्लभः, त्रि, (दुर्दुःखेन लभ्यते इति। दुर्+लभ+"दुरुपसर्गाल्लभेरिति।" ३। ३। १२६। इति खल्।) दुष्प्रापः। इति मेदिनी। भे, १६॥ यथा,—
"दुर्लभं प्राप्तं वाक्यं दुर्लभः क्षेमकृत् सुतः।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः॥"
इति चाणक्ये। ५४॥
अतिप्रशस्तः। इति शब्दरत्नावली॥
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे॥"
इति कूर्म्मपुराणम्॥
प्रियः। इति हेमचन्द्रः॥

दुर्लभः, पुं, (दुर्+लभ+खल्।) कचुरः। इति मेदिनी। भे, १६॥ कर्च्चूरः। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४८। ६६।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥"
"दुर्लभस्तथा दुर्लभः।
'बह्वीभिर्जन्मभिर्यस्य तपोदानसमाधिभिः।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते।'
इति वचनात् भक्त्या लभ्य इति भगवद्वचनाच्च।"
इति तत्र श्रीधरभाष्यम्॥)

दुर्लभा, स्त्री, (दुर्लभ+टाप्।) श्वेतकण्टकारी। दुरालभा। इति राजनिर्घण्टः॥

दुर्व्व, ईं वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। ईदित्त्वात् निष्ठायामनिट्।) पञ्चमस्वरौ। दूः दुरौ दुरः। ईं, दूर्णः। इति दुर्गादासः॥

दुर्व्वचं, त्रि, (दुर्दुःखेन उच्यते। दुर्+वच्+खल्।) दुःखकथ्यम्। यथा, भारविः। २। २।
"अपि वागधिपस्य दुर्व्वचं
वचनन्तद्विदधीत विस्मयम्॥"

दुर्व्वचः, [स्] क्ली, (दुर्निन्दितं वचः।) मन्दवाक्यम्। यथा,—
"असह्यं दुर्व्वचो भ्रातुर्मेघान्तरितरौद्रवत्॥"
इत्युद्भटः॥
(दुष्टवक्तरि, त्रि॥)

दुर्व्वर्णं, क्ली, (दुर्निन्दितं सुवर्णादपेक्षयेत्यर्थः वर्णो यस्य।) रजतम्। इत्यमरः। २। ६। ६६॥ (यथा, माघे। ४। २८।
"दुर्व्वर्णभित्तिरिह सान्द्रसुधासवर्णा॥")
एलवालुकम्। इति मेदिनी। णे, ५२॥ मन्दवर्णे, त्रि। (यथा, भागवते। ३। १४। ४४।
"योगेर्द्धेमेव दुर्व्वर्णं भावयिष्यन्ति साधवः॥")

दुर्व्वर्णकं, क्ली, (दुर्व्वर्ण+स्वार्थे संज्ञायां वा कन्।) रजतम्। इति हेमचन्द्रः॥

दुर्व्वाक्, [च्] त्रि, (दुर्दुष्टा वाक् यस्य।) कटुवादी। इति हेमचन्द्रः। ३। ११॥ (यथा, अथर्व्ववेदे। ४। १७। ५।
"दुर्व्वाच्यां सर्व्वां दुर्व्वाचस्या अशान्ताय्या-
मसि॥")
दुर्दुष्टा वाक्। दुष्टवाक्ये, स्त्री॥ (यथा, महाभारते। २। ७४। ८८॥
"अतीव जल्पन् दुर्व्वाचो भवतीह विहेठकः॥")

दुर्व्वादः, पुं, (दुर्दुष्टो वादः।) स्तुतिपूर्व्वकदुर्व्वाक्यम्। इति जटाधरः॥ निन्दितवाक्यञ्च॥

दुर्व्वासाः, [स्] पुं, (दुर्दुष्टं निगूढमित्यर्थः वास इव धर्म्मावरणत्वं यस्य। तथा च महाभारतवचनम्।
"निगूढनिश्चयं धर्म्मं यं तं दुर्व्वाससं विदुः॥")
मुनिविशेषः। स अत्रिमुनिपुत्रः ब्रह्मरातांशजातः। इति श्रीभागवतम्॥ (यथा, विष्णुपुराणे। १। ६। २।
"दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम्॥")
तत्पर्य्यायः। कुशारणिः २। इति त्रिकाण्डशेषः॥ तस्य भार्य्या और्व्वमुनिकन्या कन्दली। इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥ (महादेवः। यथा, महाभारते। १३। १७। ६२।
तस्य सहस्रनामकीर्त्तने।
"साक्षात्प्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः॥")

दुर्व्विनीतं वाक्यो वक्त्रं यस्य।) मन्दवक्त्रयुक्ते, त्रि॥ (यथा, ऋग्वेदे। ७। १। १६।
"मा नो अस्मेऽवीरते परा दा दुर्व्वासेऽमतये
मा नो अस्मे॥")

दुर्व्विधः, त्रि, (दुर्दुष्टा विधा यस्य।) दरिद्रः। इत्यमरः। ३। १। ४६॥ खलः। इति मेदिनी। धे, ३१॥ मूर्खः। इति शब्दरत्नावली॥ (यथा, गोः रामायणे। २। १०६। ३०।
"ग्राम्येष्वन्येषु सुखेषु विद्यमानेषु दुर्व्विधाः।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते॥")

दुर्व्विनीतः, पुं, (वि+नी+भावे क्तः। दुर्दुष्टं विनीतं विनयो यस्य। यद्वा, दुर्+वि+नी+क्तः।) अविनीतान्यः। तत्पर्य्यायः। शूकलः २। इति हेमचन्द्रः। ४। ३०१। अविनीतमात्रे त्रि॥ (यथा, पञ्चतन्त्रे। ५। १७।
"कुपुत्रोऽपि भवेत् पुंसां हृदयानन्दकारकः।
दुर्व्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी
खलः॥")

दुर्व्वृत्तः, त्रि, (दुर्दुष्टं वृत्तं चरित्रं यस्य।) दुर्जनः। यथा,—
"दुर्व्वृत्तदुष्टगमनं तव देवि! शीलम्॥"
इतिचण्डी॥
दुश्चरित्रे, क्ली। (यथा, महाभारते। १। १। १००।
"दुर्व्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः॥")

दुर्हृत्, [द्] त्रि, (दुर्दुष्टं हृदयं यस्य। "सुहृद्दुर्हृदौ मित्राभित्रयोः।" ५। ४। १५०। इति निपातनात् हृदयस्य हृद्भावः।) शत्रुः। इत्यमरः। २। ८। १०॥ (यथा, मार्कण्डेये। २६। ३४।

"मित्राणामुपकाराय दुर्हृदां नाशनाय च ।")
दुष्टचित्ते, त्रि । (यथा, महाभारते ।३।३१२।१२।
"अश्मसारमयं नूनं हृदयं मम दुर्हृदः ।
यन्नौ यदेनौ दृष्ट्वाद्य पतितौ नावदीर्य्यते ।")
दुर्हृदयः, त्रि, (दुर्हृष्टं हृदयं यस्य । अश्वपुर्वपदेन न हृद्भावः ।) दुष्टान्तःकरणः । इति शब्दार्थकल्पतरुः ।
दुल, क उत्क्षेपे । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) क, दोलयति धूलिं वायुः । इति दुर्गादासः ।
दुलिः, पुं, (दोलतीति । दुल + "इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् ।) सुनिविग्नेषः । कमठाम् स्त्री । इति मेदिनी । ले, २६ ।
दुली, स्त्री, (दुल + इन् । वा ङीष् ।) दुलिः । इत्यमरटीकायां भरतः ।
दुश्चरः, पुं, (दुर्दुःखेन चरतीति । दुर् + चर + अच् ।) ग्रामूक । इति हारावली । ११२ । भल्लूकः । इति राजनिर्घण्टः । (दुर्दुःखेन चर्य्यते इति । खल् ।) दुष्कर्म्मे, त्रि । (यथा, रामायणे । ३ । २६ । ७ ।
"प्रविष्टो सीतया सार्द्धं दुश्चरं दण्डकं वनम् ।"
दुश्चरणीये, त्रि । यथा, महाभारते । १२ । २३ । ६ ।
"त्वच्चरात्र विधिं पार्थ! दुश्चरं दुर्जितेन्द्रियैः ।")
दुश्चर्म्मा, [न्] पुं, (दुष्टं चर्म्म यस्य ।) अप्राप्ततमेढ्रः । "यथा, दुश्चर्म्मा गुरुतल्पगः ।" इति स्मृतिः । तत्पर्य्यायः । द्विनयकः २ षण्डः ३ शिपिविष्टः ४ । इति हेमचन्द्रः । १ । ११८ । कोढरोगः । इति राजनिर्घण्टः ।
दुश्चिक्यं, क्ली, त्र्यात् स्तृतीयस्थम् । यथा,—
"खं मेघरन्ध्रमाषाढं मदनभे यामित्रमस्तदुने
दूनत्वापि सुहृद्दृष्टे तु द्विदुकं पातालमम्भोऽपि च ।
दृश्चिक्यं सहजे वदन्ति सुनयो रिपुर्धं ततो द्वादशे
षट्कोणं रिपुमन्दिरे नवमभे त्र्याद्यं त्रिकोणं पुनः ॥"
इति दीपिका ॥
दुश्च्यवनः, पुं, (दुर्दुःखेन च्यवनं बहुकालानन्तरं पतनं यस्य । दुर्दुष्टश्च्यवनः शिरो यस्य । शिरेण व्यभिचारात्तथात्वम् । यद्वा, दुर्दुःखेन च्यवते इति । च्यु ङ गतौ + "कृन्दसि गत्यर्थेभ्यः ।" ३ । ३ । १२६ । इति युच् ।) इन्द्रः । इत्यमरः । १ । १ । ४७ ॥ (अविचार्य्ये, त्रि । यथा, ऋग्वेदे । १० । १०३ । २ ।
"युतकारेण दुश्च्यवनेन धृष्णुना ॥")
दुष, ईर् य ओ वैक्लवे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-अनिट् ।) वैक्लवमसुद्धौभावः ॥ ईर्, अदुषत् अदुषत् । अस्मात् पृषादित्वान्निद्धं ङ इत्यन्ये । य, दुष्यति लोकः पापात् । ओ, दोष्टा । इति दुर्गादासः ॥
दुष्करं, क्ली, (दुर्दुःखेन क्रियते इति । कृ + खल् ।) आकाशम् । इति शब्दार्थकल्पतरुः ॥ (भावे खल् ।) दुःखेन करणम् । (कर्म्मणि खल् ।) दुष्कृच्छ्रं क्रियायाञ्च, त्रि । इति सुग्धबोधम ॥ (यथा, देवीभागवते । ५ । १ । ३ ।
"वने गत्वा तपस्तप्तं वासुदेवेन दुष्करम् ।
विष्णोरंशावतारेण शिवस्याराधनं कृतम् ॥")
दुष्कर्म्मन्, [न्] क्ली, (दुष्टं कर्म्म ।) पापम् । यथा,
"दुष्कर्म्मजा नृणां रोगा यान्ति चैव क्रमाच्छमम् ।
जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत् ॥"
इति श्रातातपीयकर्म्मविपाकः ॥
(निन्दितकर्म्म ॥* दुष्टं कर्म्म अस्येति विग्रहे । दुष्कर्म्मकारके, त्रि । यथा, महाभारते । ५ । १३२ । २० ।
"ततो वसति दुष्कर्म्मा नरके शाश्वतीः समाः ।")
दुष्कुलीनः, पुं, चोरनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥ (दुष्कुले भवः । दुष्कुल + पक्षे खः । दुष्कुलोद्भवे, त्रि । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ५ । ३६ । ४६ ।
"दुष्कुलीनः कुलीनो वा मर्य्यादां यो न लङ्घयेत् ।")
दुष्कृतं, क्ली, (दुष्टं कृतम् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ तत्तु तत्कर्त्तुर्मरणानन्तरं तेन सह गच्छति । यथा,—
"गृहादर्थो निवर्त्तन्ते श्मशानादपि बान्धवाः ।
सुकृतं दुष्कृतं लोके गच्छन्तमनुगच्छति ॥
तस्माद्धर्म्मं समासाद्य देवाद्या पौरुषादथ ।
दद्यात् सम्यक् द्विजातिभ्यः कीर्त्तनानि च कारयेत् ॥"
इति वह्निपुराणे यमानुशासनमाध्यायः ॥
(दुष्टकृते, त्रि । यथा, महाभारते ।८।४३।२०।
"युष्माकञ्चाप्रसादेन दुष्कृतेन च कर्म्मणा ।
यत्पापं वर्द्धतेऽस्माकं यतः स्त्री ब्रह्मराक्षसाः ।")
दुष्क्रीत त्रि, (दुर्दुःखेन क्रीयते स्म इति । दुर् + क्री + क्तः ।) महार्घम् । यथा,—
"क्रीत्वा म्लेच्छेन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत् तस्मिन्नेवाङ्गविच्छतम् ॥"
इति प्रायश्चित्ततत्त्वे नारदः ॥
दुष्खं क्ली, (दुष्टं खनति आविष्करोतीति । खन + ड । "इगुपधज्ञाः कः ।" ८ । ३ । ३८ । इति विसर्गस्य षः ।) दुःखम् । इत्यमरटीकायां भरतः ॥
दुष्खदिरः पुं, (दुष्टः खदिर इति प्रादिसमासः ।) खदिरवृक्षभेदः । तत्पर्य्यायः । काम्बोजी २ । कालस्कन्धः ३ गोरटः ४ अमरजः ५ पत्ततरुः ६ वज्रसारः ७ सारखदिरः ८ महासारः ९ क्षुद्रखदिरः १० । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रक्तव्रणोत्थदोषकण्डूति विषवीसर्पज्वरकुष्ठोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥
दुष्टं, क्ली, (दुष् + क्तः ।) कुष्ठम् । इति शब्दचन्द्रिका ॥ कुड़ इति ख्यातम् ॥
दुष्टः, त्रि, (दुष्यतीति + दुष् + कर्त्तरि क्तः ।) दुर्ब्बलः । अधमः । इति विश्वः ॥ (यथा, महाभारते ।३।२३३।११ ।
"महाकुलीनाभिरपापिकाभिः
स्त्रीभिः सतीभिस्तव सख्यमस्तु ।
चक्राय शौक्राय महाशनाय
चौराय दुष्टाय शठाय वर्ष्मणः ॥)
दुष्टदः, पुं, (दुष्टो दष्ट इति कर्म्मधारयः ।) ग्रस्तोऽप्यसुर्व्वेदः । गड़ा गरु इति भाषा । तत्पर्य्यायः । गलिः २ । इति हेमचन्द्रः ।४।२६॥
दुष्टा, स्त्री, (दुष्यति स्म योनिदोषेणेति । दुष् + क्त + टाप् ।) पुंश्चली । इति शब्दरत्नावली ॥
दुष्टु, अ. (दुर् निन्दितं तिष्ठतीति + दुर् + स्था + "अपदुःसुषु स्थः ।" उणां । १।२६ । इति कुः । "सुषमादिषु च ।" ८।३।९८ । इति सुषमादित्वात् षत्वम् ।) निन्दा । इत्यमरः । ३ । ४ । १६ ।
दुष्टः, त्रि, (दुर्निन्दितस्तिष्ठतीति + दुर् + स्था + कुः षत्वञ्च ।) अविनीतः । इत्युणादिकोषः ॥
दुष्पत्रः, पुं, (दुष्टानि पत्राणि यस्य ।) चोरनामगन्धद्रव्यम् । इत्यमरः ।२।४।१२८ ॥
दुष्प्रधर्षणी, स्त्री, (दुर्दुःखेन प्रधृष्यते इति । धृष् + कर्म्मणि ल्युट् स्त्रियां ङीप् । यद्वा, भावार्थां दुष्प्रधर्षतीति युच् ।) वार्त्ताकी । इत्यमरः । २ । ४ । १२४ ॥ (पुं, धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । १ । ६७ । ६४ ।
"विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥"
दुःखेन धर्षणीये, त्रि । यथा, रामायणे । ३ । १८ । ६ ।
"प्रविश्य चाश्रमपदं महर्षिं दुष्प्रधर्षणम् ।
तपोलक्ष्माश्रमपदं प्रविवेश निवेदितुम् ॥")
दुष्प्रधर्षा, स्त्री, (दुःखेन प्रधृष्यते इति । प्र + धृष + अच् + टाप् ।) दुरालभा । खर्ज्जूरी । इति राजनिर्घण्टः ॥ (पुं, धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । १ । ६७ । २५ ।
"उग्रो भीमरथो भीमो वीरबाहुरलोलुपः ।
दुर्म्मुखो दुष्प्रधर्षश्च विवित्सुर्विकटः समः ॥"
(दुःखेन पराभवनीये, त्रि । यथा, महाभारते । ५ । १५१ । ४६ ।
"सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदम् ॥")
दुष्प्रधर्षिणी, स्त्री, (पौनःपुन्येन दुःखेन धृष्यते इति । धृष् + आभीक्ष्ण्ये णिनिः ।) दुष्प्रधर्षणी । इत्यमरटीकायां भरतः ॥ कण्टकारी । इति राजनिर्घण्टः ॥ दृष्टतो । इति भावप्रकाशः ॥
दुष्प्रवेश्या, स्त्री, (दुःखेन प्रविश्यते इति । प्र + विश् + कर्म्मणि अच् । टाप् च ।) कन्यारीवृक्षः । इति राजनिर्घण्टः ॥ (दुष्प्रवेश्यनीये, त्रि । यथा, रामायणे । ३ । ६ । २ ।
"कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् ।
दुष्प्रवेशं दुराधर्षं सूर्य्यमण्डलवर्च्चसम् ॥")
दुष्मन्तः, पुं, (दुष्ट दोषवतीं मन्यते शकुन्तलामिति । दुष् + मन् + क्तः । निपातनात् साधुः ।) चन्द्रवंशीयराजविशेषः । स ऐलिपुत्रः । तस्य पुत्रो भरतराजचक्रवर्त्ती । पत्नी शकुन्तला । इति श्रीभागवतम् ॥ (यथा, महाभारते ।१।६८।३।
"पौरवाणां वंशकरो दुष्मन्तो नाम वीर्य्यवान् ।

पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ।॥"
विवरणमस्य तदध्यायात् विस्तरशो द्रष्टव्यम् ।
दुह्यन्त इत्यपि पाठः ॥)

दुस्पर्शः, पुं, (दुःखेन स्पृश्यते इति । दुर्+स्पृश+कर्म्मणि खल् । विसर्गस्य वा लोपः ।) दुरालभा । इत्यमरटीकायां भरतः ॥ (पर्य्यायोऽस्य यथा,
"यासो यवासो दुस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा वसुदात्री च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दुःस्पृश्, त्रि ॥

दुस्थः, पुं, (दुःखेन तिष्ठतीति । दुः+स्था+कः ।) कुक्कुरः । कुक्कुटः । इति शब्दार्थकल्पतरुः ॥ (दुःस्थिते, त्रि । यथा, भट्टौ । २ । ३६ ।
"बलिर्देवत्वे जलधिर्मथने
जङ्घालत्वं दैत्यकुलं विजिग्ये ।
कल्पान्तदुस्था वसुधा तथोद्धे
येनैव भारोऽति गुरुर्न तस्य ॥")

दुह, इर् अर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इर्, अदुहत् अदोहीत् । अर्द्दनमिह वधः । इति दुर्गादासः ॥

दुह, ल न च दुहि । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) धुक् दोहनम् । तच्च वस्त्रीकरणमिति धातुपारायणिकाः । न ल, दोग्धि दुग्धे गां दुग्धं गोपः । स्वयं प्रदुग्धास्य गुर्व्वरुपस्तुता वसूपमानस्य वसूनि मेदिनीति किराते वसूनीति कर्म्मणो विद्यमानतया कर्म्मकर्तृत्वाभावात् स्खलितमित्येके । दुहादेरप्रधानकर्म्मविषये कर्म्मकर्तृत्वे प्रधानकर्म्मप्रयोगो दुर्निवारः । इति कुलचन्द्रः ॥ क्षमते तु अतएवानयोर्द्वयोरपि दुग्धमिति वचनात् पचदुहोः कर्म्मणि विद्यमानेऽपि कर्म्मकर्तृत्वम् । इति दुर्गादासः ॥

दुहिता, [ऋ] स्त्री, (दोग्धि विवाहादिकाले धनादिकमाकाङ्क्ष्य यच्छतीति । यद्वा, दोग्धि गा इति । आर्षकाले कन्यासु एव गोदोहनभारस्थितेस्तथात्वम् । दुह+"नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० । २ । ९६ । इति तृच् । निपातनात् गुणाभावः ।) कन्या । इत्यमरः । २ । ६ । २८ ॥ कन्यादानपात्रापात्रं यथा,—
"ज्ञात्वा परीक्षां कान्यस्य वृणोति कामिनी वरम् ।
वराय रूपहीनाय वृद्धायाज्ञानिने तथा ॥
दरिद्राय च मूर्खाय योगिने कुत्सिताय च ।
अत्यन्तकोपयुक्ताय चाल्पदुर्भगाय च ॥
चापलायाङ्गहीनाय चान्याय वधिराय च ।
जडाय चैव मूर्खाय क्लीवतुल्याय पापिने ॥
ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च ।
घ्राताय गृहिणे चैव धूर्त्ते च विक्रयेण च ॥
वैद्याय सुतां दत्त्वा दशवापैरफलं लभेत् ।"॥
कन्यादिक्रये दोषो यथा,—
'यः कन्यापालनं कृत्वा करोति विक्रयं यदि ।
विपदा धनहीनेव कन्योपार्कं स गच्छति ।
कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी ।
क्रमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश ॥
नरके याधयोनौ च स लभेच्चस्य निश्चितम् ।
विक्रीणीते मांसभारं वहत्येवं दिवानिशम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
कन्यादानफलं यथा,—
"दशवापीसमा कन्या दीयते ब्राह्मणाय तत् ।
वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने ॥
सन्ध्यायज्ञवेदपाठकारिणे सत्यवादिने ।
अग्नये प्रदत्ता कन्या च दशवापीफलप्रदा ॥
त्रिसन्ध्याकारिणे सत्यवादिने गृहशालिने ।
वेदज्ञाय च विप्राय दत्तार्द्धफलदायिनी ॥
प्रतिग्रहग्रहीताय सन्ध्याहीनाय नित्यशः ।
मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी ॥
परदारग्रहीताय याजकाय द्विजाय च ।
ग्रहाय सन्ध्याहीनाय वार्द्धुषिफलदा सुता ॥
सर्व्वसन्ध्याखगायत्रीविहीनाय ग्रहाय च ।
विप्रोद्वाहाय दत्ता या वाप्यर्द्धफलदा सुता ॥
पापिने मूढजाताय विप्रचोद्वाहाय च ।
दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा ॥
विष्णुभक्ताय विदुषे विप्राय सत्यवादिने ।
जितेन्द्रियाय दत्ता या विंशद्ग्रामीफलप्रदा ॥
षष्टिवर्षसहस्राणि दिव्यरूपं विधाय च ।
एवम्भूताय दत्ता च मोदते विष्णुमन्दिरे ॥
दत्त्वा कन्यां सुशीलाञ्च हराय हरयेऽथवा ।
नारायणस्वरूपञ्च भवेदेव श्रुतौ श्रुतम् ॥
विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये ।
स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्वाहाय च ।" * ॥
विवाहानन्तरं कन्याया भर्त्तृगृहगमनसमये पित्रादीनां रोदनं ग्राम्यसिद्धम् । यथा दुर्व्वासस, सह और्व्वकन्यायाः कन्दल्या विवाहे ।
"कन्यासमर्पणं कृत्वा मोहाद्दक्षे ररोद च ।
मूर्च्छामवाप स मुनिः स्वकन्याविरहातुरः ॥
अपत्यमेदश्लोकौघः स्वात्मारामं न सृजति ।
अचेन चेतनां प्राप्य बोधयामास कन्यकाम् ॥
मूर्च्छितां तातविच्छेदाद्दन्दीं शोकसंयुताम् ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे श्रीकृष्णजन्मखण्डे ॥

दुहितुःपतिः, पुं, (दुहितुः सुतायाः पतिः । "विभाषा स्वस्रादेः ।" ६ । ३ । २४ । इति विभक्तेरलुक् ।) जामाता । इत्यमरटीकासारसुन्दरी ॥

दुह्य, क्ली, (दुह्यते इति । दुह+"ऋतिसु ग्राम्-दृडजुषः क्यप् ।" ३ । १ । १०६ । इत्यत्र "ग्रंसि दुहिगुहिभ्यो वा ।" इति काशिकोक्तेः क्यप् ।) दोहनयोग्यम् । दोह्यम् । इति शाकरभाष्यम् ॥

दू, ओ ड य खेदे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सकं च-सेट् ।) खेद इह उपतापोत्करणमुपतापीभावश्च । ओ, दूनः । ड य, दूयते देहं जनम् । इति चतुर्भुजः । मां कथं पश्यन्न दूयसे इति रघुः । इति दुर्गादासः ॥

दूडभः, त्रि, (दुर्द्दुःखेन दभ्यते इति । दुर्+दभ+खल् । "दुरो दाग्नाग्नदभध्येषूत्तरपदादेः डुलच् ।" ६ । ३ । १०६ । इत्यस्येति वार्त्तिकोक्त्या ऊत्वं ह्रस्वश्च ।) व्यसनप्राप्तः । विपद्युक्तः । इति संक्षिप्तसारः ॥ (दुर्दृढः । यथा, ऋग्वेदे । १ । १५ । ६ ।
"युवं दक्षं धृतव्रतमिन्नावरुणदूळभम् ॥"
"दूडभं दुर्दृढं ग्रन्थुभिर्दंग्धुं विनाशयितुमशक्यमित्यर्थः ।" "दूडभं दृढ भक्षीकरणे दुःखेन दह्यते इति दुर्दृढं ईषद्दुःसुष्विद्यादिगाडुरित्युपपदे दृहेः खल् बाहुलकात् दृहस्य ऊकारो रेफस्य लोपः दकारस्य डकारो हकारस्य च भकारः ॥" इति तद्भाष्ये सायणः ॥)

दूढ्याः, त्रि, (दुःखेन ध्यायतीति । दुर्+ध्यै+खल् । "दुरो दाग्नाग्नदभध्येषूत्तरपदादेः डुलच् ।" ६ । ३ । १०६ । इत्यस्य वार्त्तिकोक्त्या ऊत्वं डुलच् ।) अधमः । इति सिद्धान्तकौमुदी ॥

दूनाग्नः, त्रि, (दुःखेन नाग्नयते ऽसौ । दुर्+नाग्नि+खल् । "दुरो दाग्नाग्नेति ।" ६ । ३ । १०६ इत्यस्य वार्त्तिकोक्त्या ऊत्वं डुलच् ।) दुःखेन नदः । इति सिद्धान्तकौमुदी ॥ (नाग्नयितुमशक्यः । यथा, ऋग्वेदे । ६ । ६३ । ११ ।
"यो दूनाग्नो वसुष्यसा ॥")

दूतः, पुं, (दूयते वार्त्तावहनादिनेति । दू+"दूतनिष्ठ्यां दीर्घश्च ।" उणा० । ३ । ६० । इति क्तः दीर्घश्च ।) वार्त्ताहरः । तत्पर्य्यायः । सन्देशहरः २ । इत्यमरः । २ । ८ । १६ ॥ सन्दिष्टकथकः ३ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"यथोक्तवादी दूतः स्यादेङ्गिताकारविग्रहः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीपतेः ।
वक्ता नयस्य यः काले स दूतो नृपतेर्भवेत् ॥"
इति मत्स्यपुराणम् ॥
अपि च ।
"मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः ।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥"
इति चाणक्ये । १०६ ॥
अन्यच्च ।
"परेङ्गितज्ञः परवाक्यशास्त्रार्थस्यापि तत्त्ववित् ।
सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः ॥
दूतश्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ।
इङ्गितज्ञं तथा सभ्यं दक्षं स्वकुलसम्भवम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ।
दूत एव हि सन्धत्ते भिनत्त्येव हि सङ्गतान् ।
सिद्ध्यार्थी मितार्थञ्च तथा ग्राम्यसहारकः ॥

दूतास्त्रयोऽमात्यगृहे समे पादार्द्धवर्जिते ।
विस्तार्थं कार्य्यवशात् ग्रासनं न करोति यः ॥
मितार्थः कार्य्यमाचष्टौ न कुर्य्यादुत्तरोत्तरम् ।
यथोक्तवादी सन्देशहारको लेखहारकः ॥
तत्र दूतो व्रजन्नेव चिन्तयेदुत्तरोत्तरम् ।
वार्त्ताविशेषं भूपाय भटिन्निलङ्घवेशनि ॥
दूतो हि न लिखेत् किञ्चित् निर्ग्रन्थो विनिसंग्रयम् ।
पृच्छ्यमानोऽपि न ब्रूयात् स्वामिनः क्वापि वैग्रसम् ॥"

इति युक्तिकल्पतरुः ॥ * ॥

अथ दूते वर्ज्जनीयानि । निजप्रभुतेजः श्रीविक्रमौन्नत्यकरत्वाक्षम् १ प्रभुक्षोभकरचेष्टा २ अधर्म्मशीलता ३ दक्षता ४ निर्भयत्वम् ५ । इति कविकल्पलता ॥ (वैद्यकोक्तदूतो यथा,—

"आतुरोपक्रमार्थन्तु दूतो याति भिषग्गृहे ।
तस्य परीक्ष्यं कार्य्यं येन संलक्ष्यते गदः ॥
खञ्जान्धमूकं बधिरञ्च वामनं
स्त्रियञ्च कुब्जं लुलितञ्च जीर्णम् ।
श्रान्तं क्षुधार्त्तं श्रमितञ्च दीनं
ग्रस्तं न वै वेदविदो वदन्ति ॥"
"यः कर्कशः क्रोधनपाग्रपाणि-
भिषग्विगर्हीक्षितग्रीहृतश्च ।
एते न ग्रस्ताः प्रवदन्ति धीरा
दूता विकारं प्रतिवर्द्धयन्ति ॥
यः काष्ठहस्तोहतपाग्रपाणि-
क्षुधातुरो दीर्घवपाहि रोदितः ।
प्रक्षिप्ननेत्रोग्रमनोत्सुकोऽपि
पर्ज्जन्या राजार्त्तोऽशुभकारिदूतः ॥"

"नकटहस्तोऽवक्त्र वक्रपादेन तिष्ठति ।
तस्मादाकुरुवादी यो न ग्रस्तो वैद्यकर्म्मणि ॥
यथा गच्छति ग्रीव्रेण व्याविश्लोत्याय सुस्खति ।
पादौ प्रसार्य्य विग्रति मस्तके विन्यसेत् करम् ॥
भिनत्ति लोष्टकाष्ठञ्च लवं स्फोटयते क्वचित् ।
व्यर्थवा सृग्यते नार्ग्या स्तनं वा सृग्यते पुनः ॥
भूमिं लिखति पादेन रेखां वापि करोति यः ।
निद्रां वा कुरुते यस्तु स दूतोऽरिष्टकारकः ॥
यः श्वेतवस्त्रावृतपूर्व्वपाणिः
सम्पूर्णताम्बूलमुखः प्रशस्तः ।
द्विजस्तथा मागधकः सुशीलः
प्रज्ञाधिकश्चाङ्कयते सुखाय ॥"

"आगत्योदीच्यपूर्व्वाभ्यं वरुणदिग्भमेग्रमाश्रित्य ग्राम्यो
दृष्ट्वा वैद्यं प्रहस्य प्रवदति निपुणं नातिनीचं न चोच्चम् ।
उत्तिष्ठेति प्रवादं कुरु वचनमिदं सौख्यवार्त्तां तनोति
ग्राम्यैः खार्य्यं प्रहरं सुखमगदहरं रोगिणां वैद्यलाभम् ॥
पूर्व्यां दिशं समासाद्य प्रशान्तः ग्राम्यया गिरा ।
वदन्ति वैद्यलाभाय रोगिणाञ्च सुखावहम् ॥
यद्यामत्योप्रविष्टोऽपि श्लोकं वाथ सुभाषितम् ।
वदत ग्राम्यया वाचा वैद्यलाभञ्च ग्राम्यये ॥
योऽभिवाद्यापि वैद्यस्य क्षेमं संपृच्छते पुनः ।
फलं ददाति पुष्पं वा रोगिणाञ्च सुखावहम् ॥
तस्य सौख्यं वदां ग्राम्यां तस्य दूता इदं विदुः ।
किमत्र बहुनोक्तेन रम्यो दूतः सुखावहः ॥"

इति हारीते द्वितीयस्थाने षष्ठेऽध्याये ॥)

दूतन्नी, स्त्री, (दु उपतापे + भावे औणादिकक्तः दीर्घश्च । दूतं उपतापं हन्तीति । हन + टक् । ङीप् ।) कदम्बपुष्पी । इति शब्दचन्द्रिका ॥

दूतिः, स्त्री, (दूयते नायकादिवार्त्ताहरणादिनेति । दु + बाहुलकात् तिः दीर्घश्च । इत्युज्ज्वलदत्तः । ४।१७६ ।) दूती । इति शब्दरत्नावली ॥ (यथा, रघुः । १८ । ५३ ।

"प्रतिक्षतिरचनाभ्यो दूतिसन्धिर्गिताभ्यः
समधिकतररूपाः सुहृत्सन्तानकामैः ॥")

दूतिका, स्त्री, (दूतिरेव । स्वार्थे कन् । ततष्टाप् ।) दूती । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । १ । १७८ ।

"जम्बुको हुडुयुद्धेन वयं आवाढ़भूतिना ।
दूतिका परकार्य्येण वयो दोषाः स्वयं कृताः ॥")

दूती, स्त्री, (दूतिः । ङीदिकादिति वा ङीप् ।) सारिका । इति राजनिर्घण्टः ॥ दौत्यकर्म्मणि नियुक्ता स्त्री । स्त्रीपुंसोः सन्देशप्रापिका । तत्पर्य्यायः । सञ्चारिका २ । इत्यमरः । २ । ६ । १७ ॥ दूतिः ३ दूतीका ४ दूतिका ५ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २८० ।

"दयितप्रहिता दूतीमालम्ब्य करेण तमसि गच्छन्ती ।
स्खेदच्युतलवणाभिर्दूराद्गौराङ्गि ! द्रक्ष्यसि ॥")

दौत्यव्यापारपारङ्गमा । तस्याः संघट्टनविरहनिवेदनादीनि कर्म्माणि । इति रसमञ्जरी ॥ (तद्गुणा यथा, साहित्यदर्पणे । ३ । १२६-१२७ ।

"दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा ॥
कलाकौशलसुतृसाहो भक्तिचित्तज्ञता स्मृतिः ।
माधुर्य्यं नर्म्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्याद्दत्तमाधममध्यमाः ॥")

दूतीका, स्त्री, दूती । इति शब्दरत्नावली ॥

दूत्यं, क्लो, (दूतस्य भावः कर्म्म वा । दूत + "दूतवणिग्भ्याञ्च ।" ५।१।१२६। इत्यस्येति वार्त्तिकोक्त्या यः । वैदिके तु "दूतस्य भागकर्म्मणी ।" ४ । ४ । १२० । इति यः ।) दूतकर्म्म । (यथा, हरिवंशे । १०६ । ४१ ।

"वचनञ्च यथाभाषिदूत्ये नः क्षत्रविग्रहे ॥"

तथा च ऋग्वेदे । १ । १६१ । १ ।

"किमीयते दूत्यम् ॥") दूतस्य भावः । इत्यमरः । २।८।१६ ॥ दूतस्वभावः । इति मेदिनी । ये, ३२॥

दून, त्रि, (ओ दूङ् य खेदे + क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः । यद्वा, दु गतौ + क्तः । "दुस्वोर्दीर्घश्च ।" इति वार्त्तिकोक्त्या तस्य नः दीर्घश्च ।) अध्वादिना श्रान्तः । इत्यमरः । ३ । १ । १०२ ॥ उपतप्तः । यथा, नैषधे । ३ । ६४ ।

"पित्तेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ! ॥"

दूरं, त्रि, (दुर्दुःखेनेयते प्राप्यते इति । दुर् + इण् + "दुरीणो लोपश्च ।" उणा २ । २० । रक् धातोर्लोपश्च ।) अनिकटम् । असन्निकृष्टम् । तत्पर्य्यायः । विप्रकृष्टम् २ । इत्यमरः । ३ । १ । ६८ ॥ अनासन्नम् ३ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । ४३ ।

"शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥")

आके १ पराके २ पराचे ३ आरे ४ परावत ५ । इति पञ्च दूरनामानि । इति वेद्यनिघण्टौ ३ अध्यायः ॥

दूरदर्शनः, पुं. (दूरेऽपि दर्शनं दृष्टिर्यस्य ।) गृध्रः । इति राजनिर्घण्टः ॥ (दूरदर्शने, त्रि । यथा, भागवते । १ । ११ । ८ ।

"अहो सनाथा भवता स्म यद्वयं
वैपिष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम् ॥")

दूरदर्शी, [न्] पुं, (दूरात् दूरमपि वा पश्यतीति । दृश् + णिनिः ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥ गृध्रः । इति त्रिकाण्डशेषः ॥ दीर्घदर्शके, त्रि ॥

दूरदृक्, [श्च्] पुं, (दूरं दूरात् पश्यतीति । दृश् + क्विप् ।) पण्डितः । इति शब्दरत्नावली ॥ गृध्रः । इति हेमचन्द्रः । ४ । ४०१ ॥ दीर्घदर्शके, त्रि ॥

दूरमूलः, पुं, (दूरे असन्निकटे मूलं यस्य ।) सुश्लक्षणम् । इति राजनिर्घण्टः ॥

दूरवेधी, [न्] त्रि, (वेधोऽस्यास्तीति । इनिः । दूरात् वेधी ।) दूरात् लक्ष्यभेदकः । तत्पर्य्यायः । दूरापाती २ । इति हेमचन्द्रः । ३ । ४३७ ॥

दूरेरितेक्षणः, त्रि, (दूरे ईरिते ईक्षणे यस्य ।) केकरः । इति शब्दमाला ॥

दूर्य्यं, क्लो, (दूरे परित्याज्यम् । दूर + यत् ।) विष्ठा । इति शब्दरत्नावली ॥ (दूराय रोगदूरीकरणाय साधु इति यत् ।) शुटी । इति राजनिर्घण्टः ॥

दूर्व्वा, स्त्री, (दुर्व्वते दुर्व्वति वा । दुर्व्व हिंसायाम् + ऋदृ धन् वा । "उपधायाञ्च ।" ८।२।७८ । इति दीर्घः ।) खगामखातघासः । तत्पर्य्यायः । शतपर्व्विका २ सहस्रवीर्य्या ३ भार्गवी ४ रुहा ५ अनन्ता ६ । इत्यमरः ।२।४।५५८॥ तिक्तपर्व्वा ७ दुर्म्भरा ८ । बहुवीर्य्या ९ हरिता १० हरितालो ११ कच्छरुहा १२ ॥ शुक्लायाः पर्य्यायः । शतवीर्य्या १ गन्धाली २ शुक्लपुष्पकः ३ गोलोमी ४ । इति भरतधरः ॥ शतपर्व्वा ५ सितदूर्व्वा ६ सिता ७ । इति रत्नमाला ॥ नन्दा ८ महावरा ९ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ११० । १७ ।

"कृष्णाकारेव दूर्व्वेयं संस्तीर्णैव च भूरियम्।") अस्या गुणः। रक्तपित्तकफकुलग्दोषनाशित्वम्। इति राजवल्लभः॥

दूर्व्वाष्टमी, स्त्री, (दूर्व्वा तद्रूपा गौरी तत्प्रिया अष्टमी।) भाद्रशुक्लाष्टमी। तत्र कर्त्तव्यव्रतविधिर्यथा.—

"ब्रह्मन् भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः। दूर्व्वां गौरीं गणेशञ्च फलाकारं शिवं यजेत्। फलत्रीह्यादिभिः सर्व्वैः शम्भुं नमः शिवाय च। अनग्निपक्वमश्नीयाद्युध्यते ब्रह्महत्यया।"

इति संवत्सरकौमुदीधृतगरुडपुराणवचनम्॥* तद्व्रतप्रयोगविधिर्यथा,—

पूर्व्वदिने संयमं विधाय तद्दिने प्रातः स्नातः कृतह्नागादिः आसने चोपविश्यात्मन्य ब्राह्मणान् खस्तिवाच्य सूर्य्यार्घ्यं दत्वा सङ्कल्पं कुर्य्यात्। विष्णुर्नमोऽद्य भाद्रे मासि शुक्ले पक्षे अष्टम्यां तिथावारभ्यासुककोत्रा श्रीअसुकी मर्त्यलोकाधिकरणकसुखसौभाग्याविच्छिन्नपुत्रपौत्रादिलाभपूर्व्वकब्रह्मलोकप्राप्तिकामा श्रीविष्णुप्रीतिकामा वा भविष्यपुराणोक्ताष्टावर्षनिष्पादितदूर्व्वाष्टमीव्रतमहं करिष्ये। इति सङ्कल्प्य सङ्कल्पं पठित्वासनशुद्ध्यादिकं विधाय गणेशादिदेवताः संपूज्य ध्यानं कुर्य्यात्। *। यथा,—

"नीलोत्पलदलश्यामं चतुर्बाहुं किरीटिनम्। शङ्खचक्रगदापद्मधारिणं वनमालिनम्॥ श्रीवत्सलक्ष्मसंयोपेतं श्रिया वाण्या समन्वितम्॥" इति ध्यात्वा स्वशिरसि पुष्पं दत्वा मानसैरुपचारैः संपूज्यार्घस्थापनं कृत्वा पुनर्ध्यात्वावाह्य पाद्यादिभिः पूजयेत्। एतत् पाद्यं ॐ कृष्णाय नमः। एवं क्रमेण संपूज्य आवरणदेवताः पूजयेत्। यथा ॐ गणेशाय नमः। एवं दुर्गायै गौर्य्यै श्रियै सरस्वत्यै गङ्गायै दित्यै अदित्यै सुषेणायै अरुन्धत्यै मन्दोदर्य्यै सुभद्रायै ह्रीकिल्यै जयायै विजयायै रमायै दीप्तायै रेवत्यै दमयन्त्यै प्रीतायै सुकेशायै रम्भायै वासुदेवाय देवक्यै विष्णवे महादेवाय सर्व्वेभ्यो देवेभ्यः सर्व्वाभ्यो देवीभ्यः। ततो दूर्व्वां ध्यायेत्। *।

ॐ नीलोत्पलदलश्यामां सर्व्वदेवशिरोधृताम्। विष्णुदेहोद्भवां पुण्यामन्तैरभिषिञ्चिताम्॥ सर्व्वदेवाचरां दूर्व्वाममरां विष्णुरूपिणीम्। दिव्यस्नानसंदार्द्रां धर्म्मार्थकाममोक्षदाम्॥ एवं ध्यात्वा षोढ़ोपचारैः पूजयेत्।

इदमासनं ॐ दूर्व्वायै नमः। एवं क्रमेण संपूज्य अष्टग्रन्थियुक्तडोरकं फलानि यज्ञोपवीतादिकं दत्वा प्रणमेत्।

"त्वं दूर्व्वेऽमृतनामासि पूजितासि सुरासुरैः। सौभाग्यसन्ततिं दत्वा सर्व्वकार्य्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि सन्तानं देहि त्वमजरामरम्॥" ततो भोज्यमुत्सृजेत्। डोरकं वामहस्ते बद्धा कथां शृणुयात्॥ *॥

अथ कथा।

युधिष्ठिर उवाच।

"व्रतमेकं समाचक्ष्व विचार्य्य मधुसूदन!। येन सन्ततिविच्छेदो जायते न कदाचन॥

श्रीकृष्ण उवाच।

मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे युधिष्ठिर!। दूर्व्वाष्टमीव्रतं नाम या करोति पतिव्रता॥ न तस्याः क्षयमाप्नोति सन्तानं साम्प्रपौरुषम्। नन्दते वर्द्धते नित्यं यथा दूर्व्वा तथा कुलम्॥

युधिष्ठिर उवाच।

कथमेषा समुत्पन्ना कस्माद्दूर्व्वा चिरायुषी। कस्मादवन्द्या पवित्रा च लोके धन्या महीतले॥ केन वा तद्व्रतं देव! चरितं केन हेतुना॥

श्रीकृष्ण उवाच।

क्षीरोदसागरे पूर्व्वं मथ्यमानेऽमृतार्थिना। विष्णुना बाहुजङ्घाभ्यां विधृतो मन्दरो गिरिः॥ भ्रमता तेन वेगेन लोमान्याघर्षितानि वै। ऊर्ध्वमिश्रितानि रोमाणि क्षीरोत्क्षिप्तानि तटान्तरे॥

जज्ञाये शुभा दूर्व्वा रम्या हरितशाद्वला। एवमेषा समुत्पन्ना दूर्व्वा विष्णुतनूद्भवा॥ तस्या उपरि विन्यस्तं मथितामृतमुत्तमम्। देवदानवगन्धर्व्वयक्षविद्याधरोरगैः॥ तत्र येऽमृतकुम्भस्य निपेतुर्व्वारिबिन्दवः। तैरियं सम्भवमासाद्य दूर्व्वा चैवाजरामरा॥ वन्द्या पवित्रा देवेषु सर्व्वदाभ्यर्चिता तथा। पूजयेत्तां प्रयत्नेन द्रव्यैर्नानाविधैरपि॥ अष्टम्यां फलपुष्पेषु गुवाकैर्नारिकेलकैः। द्राक्षाक्षरोतकीभिश्च मोचकैर्जायकैस्तथा॥ नागरङ्गैश्च जम्बीरैर्बीजपूरैश्च शोभनैः। दध्यक्षतैः पयोभिश्च धूपदीपैर्वेद्यदीपकैः॥ मन्त्रेणानेन राजेन्द्र! शृणुष्व कथितं मया। त्वं दूर्व्वेऽमृतनामासि वन्दितासि सुरासुरैः॥ सौभाग्यं सन्ततिं दत्वा सर्व्वकार्य्यकरी भव। यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले॥ तथा ममापि सन्तानं देहि त्वमजरामरम्। एवमेव पुरा पार्थ! पूजिता त्रिदशोत्तमैः॥ तेषां पत्नीभिरनिशं भगिनीभिस्तथैव च। पूजिता च तथा गौर्य्या देया रत्ना श्रिया तथा॥ सरस्वत्या गङ्गया च दित्यादित्या सुशीलया। विघ्नहर्त्रा वेदमात्रा रुद्रमात्रा सुशीलया॥ मन्दोदर्य्या चक्षिकया मायया दीप्तया तथा। मर्त्यलोके च रेवत्या दमयन्त्या सुशीलया॥ सुकेश्या घृताच्या च रम्भया मिश्रकेश्या। मज्जनन्या मेनकया तथैव सानिकादिभिः॥ स्त्रीभिरभ्यर्चिता दूर्व्वा सौभाग्यसुखदायिनी। स्नाताभिः शुचिवस्त्राभिर्दूर्व्वा संपूजिता जनैः॥ दत्वा पिष्टानि विप्रेभ्यः फलानि विविधानि च। तिलपिष्टानि गोधूमधान्यपिष्टानि पायसम्॥ भोजयित्वा सुहृच्चित्रं सम्बन्धिस्वजनं तथा। ततो भुञ्जीत तच्छेषं स्वयं भक्त्या समाहिता॥ नारी चैव प्रकुर्व्वीत चाष्टमीव्रतमुत्तमम्।

सर्व्वतः सुखसौभाग्यपुत्रपौत्रादिभिर्युता॥ मर्त्यलोके चिरं स्थित्वा चतुर्व्वर्गं गता पुनः। वसते रमया सार्द्धं यावच्चन्द्रदिवाकरौ॥

मेषार्कतेऽमरतले विशूद्दे च पञ्चे याचाष्टमीव्रतमदो नभसीह कुर्य्युः। दूर्व्वां तदत्ततिलैः प्रतिपूजयेयुस्ता प्राप्नुयुः सकलसिद्धिसमृद्धिमृद्धिम्॥"

इति भविष्योत्तरे दूर्व्वाष्टमीव्रतकथा समाप्ता॥

दूलिका, स्त्री, (दूली+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) नीली। इति शब्दरत्नावली॥

दूली, स्त्री, (दूरं दूरत्वमस्या अस्तीति। दूर+अच्। रस्य लः। गौरादित्वात् ङीष्।) नीली। इति शब्दरत्नावली॥

दूष्यं, क्ली. (दूयते इति। भावे क्यप्। दूः खेदस्तं श्यायते अन्तर्भूतण्यर्थाद्गमयतीति। दू+श्यै+कः।) दूष्यम्। वस्त्रगृहम्। इत्यमरटीकासारसुन्दरी॥

दूषकः, त्रि, (दूषयतीति। दुष्+णिच्+"ण्वुल्तृचौ।" ३।१।१३३। इति ण्वुल्।) दोषोत्पादकः। तत्पर्य्यायः। पांसनः २। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ६। २६२।

"कूटशासनकर्त्तॄंश्च प्रकृतीनाञ्च दूषकान्। स्त्रीबालब्राह्मणघ्नाञ्च हन्याद्विट्सेविनस्तथा॥")

दूषणः, पुं. (दूषयतीति। दूषि+ल्युः।) रावणभ्रातृखरसेनापतिः। इति रामायणम्॥ (यथा, रघुः। १२। ४६।

"असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्। न चक्षमे शुभाचारः स दूषणमिवाजनः॥"

दूषि+भावे ल्युट्।) दोषः, स्त्री॥ (यथा, देवीभागवते। १। १७। २४।

"वक्ष्यतोऽहं स्वयं पित्रा दूषणं कस्य दीयते॥")

दूषणारिः, पुं, (दूषणस्य राक्षसस्य अरिः।) श्रीरामः। इति शब्दरत्नावली॥

दूषिः, स्त्री, (दूषयतीति। दुष+णिच्+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) दूषिका। इति शब्दरत्नावली॥

दूषिका, स्त्री, (दूषि+स्वार्थे कन्। टाप्। यद्वा, दूषि+खुल्+टाप् अत इत्वञ्च।) नेत्रमलम्। इत्यमरः। २। ६। ६७॥ पिचुटि इति भाषा॥ तत्पर्य्यायः। पिच्चोड़कम् २ दूषिः ३ दूषी ४। इत्यमरटीकायां भरतः॥ दूषीका ५ पिञ्जेटः ६ पिच्चटः ७। इति शब्दरत्नावली॥ (यथा, मनौ। ५। १३५।

"वसाशुक्रमसृङ्मज्जामूत्रविट्श्लेष्मकर्णविट्। श्वेताक्ष्णोर्दूषिकास्वेदो द्वादशैते नृणां मलाः॥")

तूलिका। इति मेदिनी। के, १०५॥ (दूषयत्यनेन दूषि+करणे ल्युट्। यथा, महाभारते। १२।३५।३०।

"स्त्रियास्तथापचारिण्या निष्कृतिः स्याद्दूषिका।
अपि सा पूयते तेन न तु भर्त्ता प्रदुष्यति॥")

दूषितः, त्रि, (दुष्+णिच्+क्तः।) प्राप्तदोषः। (यथा, महाभारते। १। १४०। २६।

"ततो वलमिति ख्यातं विज्ञाय दृढ़धन्विनाम्। दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु॥") मैथुनापवादयुक्तः। तत्पर्य्यायः। अभिग्रस्तः २ वाधः ३ चारितः ४। इति हेमचन्द्रः।३।१००॥ आचारितः ५। इति शब्दरत्नावली॥

दूषिता, स्त्री, (दूषित+टाप्।) दूषणप्राप्ता कन्या। तत्पर्य्यायः। सखेदा २ धर्षकारिणी ३ प्रमादिका ४। इति शब्दरत्नावली॥

दूषी, स्त्री, (दूषि+"ऋदिकारादिति।" वा ङीष्।) दूषिका। इत्यमरटीकायां भरतः॥

दूषीका, स्त्री, (दूषयतीति+दूषि+"कृषिदूषिभ्यामीकन्।" उणा ४। १६। इति। ईकन् ततष्टाप्।) दूषिका। इति शब्दरत्नावली॥

दूषीविषं, क्ली, (दूषयतीति। दूषि+बाहुलकात् ईः। ततः कर्म्मधारयः।) औषधादिभिरवीर्य्यं विषम्। इति हेमचन्द्रः। ४। ३८०॥ आदिपदात्तदावाग्निवायुरौद्रग्रोषितविषम्। स्वभावतो गुणहीनं विषम्। अस्य गुणः। उदररोगग्रीहगुल्मकुष्ठप्रमेहनाशित्वम्। इति राजवल्लभः॥ यथा,—

"जीर्णं विषन्नौषधिभिर्हतं वा
दावाग्निवातातपप्रद्योषितं वा।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतासुपेति॥"

इति माधवकरः॥

दूष्यं, क्ली, (दूष्यते इति। दुष्+णिच्+"अचो यत्।" ३। १। ९७। इति यत्। "दोषो णौ।" ६। ४। ६०। इति उपधाया ऊत्वम्।) वस्त्रम्। वस्त्रयुग्मम्। इति मेदिनी। ये, ३१॥ पूयम्। इति हेमचन्द्रः। ३। २८८॥

दूष्यः, त्रि, (दुष+णिच्+यत्।) दूषणीयः। इति मेदिनी। ये, ३१॥ (यथा, महाभारते। १२। १६५। ३२।

"क्षीरं दुग्धुलाद्यापि विषादप्यमृतं पिबेत्।
अदूष्या हि स्त्रियो रक्षमाप दृष्टेव धर्म्मतः॥"

निन्द्यः। इति त्रिकाण्डशेषः। ३। ३। ३१३॥ यथा, कामन्दकीयनीतिसारे। ६। ६।

"राज्ञोपघातं कर्व्वाणा ये प्रापा राजवल्लभाः।
एकैकशः संहता वा दूष्यास्तान् परिचक्षते॥")

दूष्या, स्त्री, (दूष्यते इति। दुष+णिच्+यत्+टाप्।) हस्तिकक्षरज्जुः। कांचदड़ि इति भाषा॥ तत्पर्य्यायः। कक्षा २ वरत्रा ३। इति हेमचन्द्रः।४।२६८॥ चूषा ४। इत्यमरः।२।८।४२॥

दृ, ड भ्र आदरे। इति कविकल्पद्रुमः। (तुदादयात्मं-सकं-अनिट्।) आदरः प्रीत्या सम्भ्रमः। ड भ्र, द्रियते गुरुं लोकः। मानुवन्धोऽयमित्येके। इति दुर्गादासः॥

दृक्, [श्] स्त्री, (पश्यत्यनेनेति। दृश्+करणे क्विप्।) चक्षुः। इत्यमरः। २। ६। ८४। (यथा, साहित्यदर्पणे।

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य ललिनीस्ताः स्तुमो वामलोचनाः॥"

भावे क्विप्।) दर्शनम्। वृद्धिः। इति मेदिनी। शे, ८॥ (यथा, भागवते। २। ६। ५।

"तां नाथ्यगच्छद्दृढ़मत्र सम्मतां
प्रपद्यनिर्म्माणविधिर्यया भवेत्॥")

दृक्, [श्] त्रि, (पश्यतीति। दृश्+कर्त्तरि क्विन्।) वीक्षकः। इति मेदिनी। शे, ८॥ (यथा, भागवते। ४। २२। ६।

"यथा सर्व्वदृशं सर्व्व आत्मानं येऽस्य हेतवः॥")

ज्ञाता। इति शब्दरत्नावली॥

दृकं, क्ली, (दीर्य्यते इति। दृ विदारे+बाहुलकात् कक् इत्वञ्च।) छिद्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

दृकाणः, पुं, द्रेक्काणः। इति ज्योतिषम्॥

दृक्कर्णः, पुं, (दृशौ नेत्रावेव कर्णौ यस्य।) सर्पः। इति हेमचन्द्रः। ४। ३६६॥ यदाह कश्चित्।

"दृक्कर्णो मशकः शिला सरसिजं वाणो जलौकाः शुकः
शुभ्रांशुर्गगनं कुलोत्तमबली पाद्मो नभश्चातकः।
वादी चक्रचरो वको मधुलिहो लालाटिको लम्पटः
श्रीमद्भोज! भवन्तु विंशतिरमी सदृशिरिणां सेवकाः॥")

दृक्काणः, पुं, द्रेक्काणः। इति ज्योतिषम्॥

दृक्प्रसादा, स्त्री, (दृशौ नेत्रौ प्रसादयतीति। दृश्+प्र+सद्+णिच्+अच्।) कुलत्था। कुलत्थाञ्जनम्। इति राजनिर्घण्टः॥

दृक्प्रिया, स्त्री, (दृशोर्नेत्रयोः प्रिया।) शोभा। इति राजनिर्घण्टः॥

दृक्स्रुतिः, पुं, (दृशौ एव स्रुती कर्णौ यस्य।) सर्पः। इति हलायुधः॥

दृग्धथः, पुं, (दृशोर्नेत्रयोरधथः अधिष्ठातृदेवः।) सूर्य्यः। इति शब्दार्थकल्पतरुः॥

दृग्गोलः, पुं, खगोलान्तर्गतगोलविशेषः। यथा,

"खस्वस्तिके चाधःस्वस्तिके चान्तःकीलकौ ज्ञात्वा तयोः प्रोतं सूत्रं दृङ्मण्डलं कार्य्यं तत् पूर्व्ववृत्तस्थः किञ्चिन्यूनं कार्य्यं यथा खगोलान्तर्भ्रमति यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम्। यो यो ग्रहो यत्र यत्र वर्त्तते तस्य तस्योपरि परिभ्राम्येदमेव विम्बस्य दृग्ज्याग्रङ्कादिकं दर्शनीयम्। अथवा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत्। तच्चार्द्धं विम्बिभलम्बस्य तत्र दृक्क्षेपमण्डलं तस्मिन् खगोले ध्रुवचिह्नयोर्मेलिकाद्वयं दत्त्वा तन्मलिकाधारमेव खगोलाद्बहिरङ्कुलत्रयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलवृत्तैर्व्वलयमार्गैर्भगोलवृत्तैः क्रान्तिमण्डलादैर्यो विबध्यते स दृग्गोलः। यतोऽस्या कुण्ड्याकृतिग्रहवृत्तचक्राणि द्विगोलजातानि भगोलवृत्तानि खगोलवृत्तमिलितानि उत्पद्यन्ते गोलबन्धे सम्यङ्नोपलक्ष्यत इति दृग्गोलः स्मृतः।" इति सिद्धान्तशिरोमणिः॥

दृग्विषः, पुं, (दृशि नेत्रे विषं यस्य।) नागः। इति हेमचन्द्रः। ४। ३७८॥

दृढ़ं, क्ली, (दृह वृद्धौ+क्तप्रत्ययेन निपातनात् साधुः।) लौहम्। इति शब्दचन्द्रिका॥ अतिशूरः। इत्यमरः। ३। १। ७६॥

दृढ़ः, त्रि, (दृह+क्तः। निपातनात् साधुः।) स्थूलः। अतिशूरः। प्रगाढ़ः। (यथा, देवीभागवते। १। ६। ३१।

"तदाकाशे श्रुतं साध्यं वाग्बीजं सुमनोहरम्।
गृहीतञ्च ततस्ताभ्यां तस्माभ्यां दृढ़ः सुतः॥")

बलवान्। इति मेदिनी। ढे, २॥ कठिनः। इत्यमरः। ३। ३। ४४॥

दृढ़ः, पुं, रूपकभेदः। यथा,—

"दृढ़ः प्रौढ़ोऽथ खचरो विभवश्चतुरक्रमः।
निर्य्यासरूपकः प्रतिसालः कथितः सप्त रूपकाः॥"

तल्लक्षणं यथा,—

"दृढ़ाख्यः स्यात्रिभुवृत्तं तासे च हंसलीलके।
चतुर्दशाक्षरैर्युक्तः शब्दारे परिकीर्त्तितः॥"

इति सङ्गीतदामोदरः॥

(क्षयोदग्रमनो रौच्यस्य पुत्रविशेषः। यथा, हरिवंशे। ७। ८३।

"सुनेत्रः क्षत्रवृद्धिश्च सुतपा निर्भयो दृढ़ः।
रौच्यस्येते मनोः पुत्रा अन्तरे तु क्षयोदग्रे॥")

दृढ़कण्टकः, पुं, (दृढ़ानि कठिनानि कण्टकानि यस्य।) क्षुद्रफलकण्टः। इति शब्दचन्द्रिका॥ धलकाँकड़ा इति भाषा॥

दृढ़काण्डं, क्ली, (दृढ़ं काण्डं यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्टः॥

दृढ़काण्डः, पुं, (दृढ़ः कठिनः काण्डो यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़काण्डा, स्त्री, (दृढ़ः कठिनः काण्डो यस्याः।) पातालगरुडलता। इति राजनिर्घण्टः॥

दृढ़क्षुरा, स्त्री, (दृढ़ः क्षुर इवाग्रभागो यस्याः। यद्वा, दृढ़ः क्षुर इव फलमस्त्यस्या इति अर्शआदिभ्योऽच् ततष्टाप्।) वल्लजा। इति राजनिर्घण्टः॥

दृढ़गात्रिका, स्त्री, (दृढ़ं गात्रमस्याः। कप्। ततष्टापि अत इत्वम्।) मत्स्यखण्डी। इति शब्दचन्द्रिका॥

दृढ़ग्रन्थिः, पुं, (दृढ़ो ग्रन्थिर्यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़च्छदं, क्ली, (दृढ़च्छदो यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्टः॥

दृढ़तरुः, पुं, (दृढ़स्तरुश्च।) धवतरुः। इति राजनिर्घण्टः॥

दृढ़त्वगः, पुं, (दृढ़ं कठिनं त्वगस्य।) सुवृत्तत्वगम्। इति राजनिर्घण्टः॥

दृढ़त्वगा, स्त्री, (दृढ़ं त्वग्यस्याः।) वल्लजा। इति राजनिर्घण्टः॥

दृढ़त्वक्, [च्] पुं, (दृढ़ा त्वक् यस्य।) यावनालशरः। इति राजनिर्घण्टः॥

दृढ़दंशकः, पुं, (दृढ़ं यथा तथा दशतीति। दृढ़श+ण्वुल्।) जलजन्तुविशेषः। इति शब्दार्थकल्पतरुः॥ हाङ्गर इति भाषा॥

दृढनीरः, पुं, (दृढं प्रचुरं नीरं यस्मिन्निति।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥
दृढपत्रः, पुं, (दृढानि कठिनानि पत्राणि यस्य।) वंशः। इति राजनिर्घण्टः॥
दृढपत्री, स्त्री, (दृढानि पत्राणि यस्याः। गौरादित्वात् ङीष्।) वल्लजा। इति राजनिर्घण्टः॥
दृढपादा, स्त्री, (दृढः पादो मूलं यस्याः।) यवतिक्ता। इति राजनिर्घण्टः॥
दृढपादी, स्त्री, (दृढः कठिनः पादो मूलं यस्याः।) गौरादित्वात् ङीष्।) भूम्यामली। इति राजनिर्घण्टः॥
दृढप्ररोहः, पुं, (दृढः प्ररोहोऽङ्कुरो यस्य।) न्यग्रोधवृक्षः। इति राजनिर्घण्टः॥
दृढफलः, पुं, (दृढं कठिनं फलं यस्य।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥
दृढबन्धिनी, स्त्री, (दृढं यथा तथा बध्नातीति। बन्ध+णिनिः। ङीप्।) श्यामालता। इति शब्दचन्द्रिका॥
दृढमुष्टिः, पुं, (दृढा मुष्टिर्धारणाय यस्य।) खड्गादिः। (दृढा दानाद्यभावात् कठिना मुष्टिर्यस्य।) कृपणे, त्रि। इति विश्वः। टै, ६५॥ (दृढमुष्टिधारकः। यथा, हरिवंशे। २०।६८।
"नियहीतः कन्धरायां शिशुना दृढमुष्टिना॥")
दृढमूलः, पुं, (दृढं मूलं यस्य।) सुश्लक्ष्णम्। मन्थानकटम्। इति राजनिर्घण्टः॥ नारिकेलः। इति शब्दार्थकल्पतरुः॥
दृढरङ्गा, स्त्री, (दृढः स्थिरः रङ्गो रागो यस्याः।) स्फटी। इति राजनिर्घण्टः॥
दृढलता, स्त्री, (दृढा कठिना लता।) पातालगरुडी। इति राजनिर्घण्टः॥
दृढलोमा, [न्] पुं, (दृढानि लोमानि यस्य।) शूकरः। इति शब्दचन्द्रिका॥ कठिनलोमयुक्ते, त्रि॥
दृढवल्कलः, पुं, (दृढं वल्कलं त्वग् यस्य।) जक्षुपः। पूगः। इति राजनिर्घण्टः॥
दृढवल्का, स्त्री, (दृढं वल्कं यस्याः।) अम्बष्ठा। इति राजनिर्घण्टः॥
दृढवीजः, पुं, (दृढं वीजमस्य।) चक्रमर्दः। वदरः। वर्बरः। इति राजनिर्घण्टः॥
दृढसन्धिः, त्रि, (दृढः स्थूलः सन्धिर्यस्य।) निश्छिद्रः। तत्पर्य्यायः। संहतः २। इत्यमरः। ३।१।७५॥
दृढस्त्रिका, स्त्री, (स्त्रमस्त्यस्या इति। स्त्र+ठन्। दृढा कठिना स्त्रिका चेति कर्म्मधारयः।) मूर्व्वा। इति शब्दचन्द्रिका॥
दृढस्कन्धः, पुं, (दृढः स्कन्धो यस्य।) शौरिकावृक्षः। इति जटाधरः॥ (दृढस्कन्धविशिष्टे, त्रि॥)
दृढाङ्गं, क्ली, (दृढं अङ्गं यस्य। तद्विशेषणादर्थादस्य कठिनत्वात् तथात्वम्।) हीरकम्। इति राजनिर्घण्टः॥ (कठिनाङ्गविशिष्टे, त्रि॥)
दृत, त्रि, (दृ+क्तः।) आहतः। आदरार्थदृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥
दृता, स्त्री, (म्रियते स्मेति। दृ+कर्म्मणि क्तः। टाप्। भिषग्भिर्वैद्युवाधिप्रयोगेषु सत्कारत्वादस्याः तथात्वम्।) जीरकः। इति शब्दचन्द्रिका॥
दृतिः, पुं, (दृणातीति। दृ विदारे+"दृणातेर्ह्रस्वश्च।" उणां।४।१८३। इति तिः ह्रस्वश्च।) चर्म्मपुटकः। अस्य पर्य्यायः। खल्लः २। इति हेमचन्द्रः। ४। ६१॥ (यथा, मनुः।२। ६६।
"इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम्।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्॥")
मत्स्यः। इति मेदिनी। ते, २६॥ (गलकम्बलः। यथा, महाभारते। १३। ७६। १८।
"सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम्।
वैश्वदेवमसंबाधं स्थानं श्रेष्ठं प्रपद्यते॥"
"दृतिकण्ठो प्रलम्बगलकम्बलाम्।" इति तट्टीकायां नीलकण्ठः॥ मेघः। इति निघण्टुः।१।१०॥ यथा, ऋग्वेदे। ७। १०३। २।
"दिवा वापो अभि यदेनमायन्
दृतिं न शुष्कं सरसी शयानम्॥")
दृतिधारकः, पुं, (दृतिश्चर्म्मपुटकस्तदाकारं धारयतीति। धारि+"ण्वुल् तृचौ।" ३।१।१३३। इति ण्वुल्।) वृत्तविशेषः। आकनपाता इति भाषा। तत्पर्य्यायः। आनन्दी २ स्रविकारावृ ३ वामनः ४। इति शब्दचन्द्रिका॥
दृतिहरिः, पुं, (दृतिं चर्म्ममयद्रव्यं हरतीति। दृति+हृ+"हरतेर्दृतिनाथयोः पशौ।" ३।२। २५। इति इन्।) कुक्कुरः। इति सुग्धबोधव्याकरणम्॥
दृन्, य, हिंसा। इति सुग्धबोधटीकायां दुर्गादासः॥
दृनृप, प अ उत्क्लेशे। इति कविकल्पद्रुमः॥ (तुदां-परं सकं सेट्।) दन्त्यवर्गद्वितीयादिः। सप्तमस्वरी। प अ, दृम्फति। अ, दृफति चौरं राजा क्लिशातीत्यर्थः। ददृम्फ ददर्फ। इति दुर्गादासः॥
दृनृभूः, स्त्री, (दृम्फतीति। दृनृफ+"अन्दूदृनृभूजन्बूकम्बूकफेलूककर्कन्धूदिधिषूः।" उणां।१।६५।) इति कूप्रत्ययान्तो निपातितः।) सर्पः। चक्रम्। इति मेदिनी। भे, ५॥ (क्वचित् दनृपूरिति पाठोऽपि दृश्यते।)
दृनृभूः, पुं, (दृनृफ+कूः। निपातनात् साधुः।) चक्रम्। सर्पः। इति हेमचन्द्रः॥ राजा। इति शब्दरत्नावली॥ अन्तकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
दृप, कि सन्दीपने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट्।) कि, दर्पयति दर्पति। इति दुर्गादासः॥
दृप, ण य ऊ दर हर्षे। गर्व्वे। इति कविकल्पद्रुमः॥ (दिवां-उभं-अकं-वेट्।) ण, दृप्नोत्ति। य, दृप्यति। ऊ, दर्पयति दर्पूयति। दर, अदृपत् अदार्षीत् अदार्षीत् अदर्पीत्। इति दुर्गादासः॥
दृप, भ्र वाधने। इति कविकल्पद्रुमः॥ (तुदां-परं सकं-सेट्।) भ्र, दृपति दर्पिता। वाधनं विहृतिः। इति दुर्गादासः॥
दृप्तः, त्रि, (दृप्यतीति। दृप्+कर्म्मणि क्तः।) गर्व्वितः। इति धरणिः॥ (यथा, महाभारते। १। १। १६२।
"यदाश्रौषं कालकेयास्तदानीं
पौलोमानो वरदानाच्च दृप्ताः।
देवैरजेया निर्ज्जिताश्चार्জ্জुनेन
तदा नाशंसे विजयाय सञ्जय!॥")
दृप्रः, त्रि, (दृपति बाधते इति। दृप्+"स्फायितञ्चीति।"उणां। २। १३। इति रक्।) दृप्तः। इत्युणादिकोषः॥ (बलवान्। इत्युज्ज्वलदत्तः॥)
दृभ, प भ्र उत्क्लेशे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) प भ्र, दृम्फति। भ्र, दृफति चौरं राजा क्लिशातीत्यर्थः। ददर्फ। इति दुर्गादासः॥
दृब्धः, त्रि, (दृभ्यते ग्रथ्यते इति। दृभ+कर्म्मणि क्तः।) ग्रथितः। इत्यमरः। ३। १। ८६॥ (दृभ+कर्म्मणि क्तः।) भीतः। इति भयाधदृभधातुदर्शनात्॥
दृभ, ईं कि भये। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-अकं-सेट्।) कि, दर्भयति दर्भति। ईं, दृब्धः। रमानाथस्तु ड भौ इति धातुद्वयं मत्वा दारयति दरति भाययति भयति इत्याह। इति दुर्गादासः।
दृभ, भ्र ईं कि गुम्फने। इति कविकल्पद्रुमः॥ (तुदां-चुरां पक्षे भ्वां-सकं-सेट्।) भ्र, दृभति। ईं, दृब्धः। कि, दर्भयति दर्भति। गुम्फनं ग्रथनम्। इति दुर्गादासः॥
दृम्प, भ क ङ संघाते। इति कविकल्पद्रुमः॥ (चुरां-उभं-आत्मं च-सकं-सेट्।) ओष्ठ्यवर्गपञ्चमोपधः। सप्तमस्वरी। भ क, दृम्पयति दृम्पयते। ङ, दृम्पयते। संघातो राशीकरणम्। एषः केषिन्न मन्यते। इति दुर्गादासः॥
दृमूः, स्त्री, (दृम्फति क्लिशातीति। दृनृफ+"अन्दूदृमूजन्बूमिति।" उणां। १। ६५। इति कूः। निपातनात् साधुः।) सर्पः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
दृभूः, स्त्री, (दृम्फतीति+दृनृफ्+कूः। निपातनात् साधुः।) दृनृभूः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
दृश्, दृर् औ प्रेक्षे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) दृर अदर्शत् अद्राक्षीत्। औ, द्रष्टा। प्रेक्षणाच्चक्षुर्ज्ञानम्। पश्यति चन्द्रं लोकः। ततः स दद्रशे च तौ इति अतीहारे द्यालनेपदम्। कदा द्रक्ष्येऽहं परमेश्वरि विपक्षे भागरथि! खं वपुरिति गणक्षतानित्यत्वात्। इति दुर्गादासः॥
दृश्यत्, [द्] स्त्री, (दृश्यत्। इकोदरादित्वात् साधुः।) पाताशः। इत्यमरः। २। ६। ४॥ निर्य्यासगुग्गुलापद्मम्। इति मेदिनी। शे, १२॥

दृश्वती, स्त्री, (दृश्वत् पाषाणोऽस्त्यस्यामिति । दृश्वत्+मतुप् मस्य वः ।) नदीविशेषः । सा आर्य्यावर्त्तस्य पूर्ब्बसीमा । (यथा, महाभारते । ३ । ८३ । ४ ।
"दक्षिणेन सरस्वत्या दृश्वदुत्तरेण च ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे ॥")
कात्यायनी । इति मेदिनी । ते, १६८ ॥

दृशा, स्त्री, (दृश्+पाषिकटाप् ।) चक्षुः । इति शब्दचन्द्रिका ॥

दृशाकाङ्क्षं, क्ली, (दृशा दृश्यया वा आकाङ्क्षं अभिलषणीयम् ।) पद्मम् । इति शब्दचन्द्रिका ॥

दृशानं, क्ली, (दृश्यते अनेनेति । दृश्+आनच् ।) ज्योतिः । इति मेदिनी । ने, ७५ ॥

दृशानः, पुं, (पश्यतीति । दृश्+"युधिबुधिदृशः किच्च ।" उणां । २ । ६० । इति आनच् । स च कित् ।) आचार्य्यः । इत्युणादिकोषः ॥ लोकपालः । ब्राह्मणः । उपाध्यायः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ विरोचनः । इति मेदिनी । ने, ७५ ॥ (दृश्यते इति । कर्म्मणि आनच् । दृश्यमाने, त्रि । यथा, ऋग्वेदे । १० । ४५ । ८ ।
"दृशानो रुक्म उर्व्या व्यद्यौद्दुर्म्मर्षमायुः श्रिये रुचानः ॥")

दृशिः,) स्त्री, (दृश्यतेऽनयेति । दृश्+इन् । स च
दृशी,) कित् । वा ङीष् ।) चक्षुः । इति शब्दरत्नावली ॥ (यथा,—
"किं सम्भृतं रुचिरयोर्द्विजदृक्प्रयोस्ते
मध्ये क्षणो वहसि यच्च दृशिः श्रिता मे ॥"
इति भागवते । ५ । २ । १२ ।
चेतनः पुरुषः । यथा, पातञ्जलसूत्रम् । २।२५ ।
"तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ।"
"तस्या अविद्याया अभावात् नाशात् संयोगाभावः संयोगस्य नाशो भवतीति शेषः । तच्च हानं संयोगविगमः । दृशेः पुरुषस्य कैवल्यं मुक्तिरिति चोच्यते ।" दृक्शक्तिः । यथा, तत्रैव । २ । २० ।
"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ।"
दृशिमात्र इति दृक्शक्तिरेव विशेषेण परान्दृश्यान्पश्यतीत्यर्थः ।" इति भाष्यम् । दर्शनम् । यथा, ऋग्वेदे । ५ । ८० । ५ ।
"एषा सुम्ना न तन्वो विदानोर्ऽवं ज्ञाती दृशये नो अख्यात् ॥"
"दृशये दर्शनाय" इति तद्भाष्ये सायनः ॥")

दृशोपमं, क्ली, (दृशाया नेत्रस्य उपमा यत्र ।) श्वेतपद्मम् । इति शब्दचन्द्रिका ॥

दृश्यं, त्रि, (दृश्यते इति । दृश्+कर्म्मणि क्यप् ।) दर्शनीयम् । द्रष्टव्यम् । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १३० । ५ ।
"एष वै चमसोद्भेदो यत्र दृश्या सरस्वती ॥"
कायविशेषः, क्ली । यथा, साहित्यदर्पणे । ६।१।
"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ॥")

दृषत्, [द्] स्त्री, (दीर्य्यते असाविति । दृ+"इगातेः षुग् दृक्षच्च ।" उणां । १ । १३१ । इति क्विप् षुक् दृक्षच्च ।) पाषाणः । (यथा, मेघदूते । ५० ।
"तत्र स्कन्दं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ॥")
निष्पेषशिला । इति मेदिनी । दे, ३२ ॥
("मांसं निरस्थि सुस्निग्धं पुनर्दृषदि चूर्णितम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥)

दृषत्सारं, क्ली, (दृषदः पाषाणस्य सार इव सारो यत्र ।) सुवर्णायसम् । इति राजनिर्घण्टः ॥

दृष्टं, क्ली, (दृश्+कर्म्मणि क्तः ।) स्वपरचक्रजभयम् । इत्यमरः । २ । ८ । ३० ॥ ईक्षिते, त्रि । यथा, मार्कण्डेये ।
"दृष्टदोषेऽपि विषये ममत्वाक्षप्तचेतनः ॥"

दृष्टरजाः, [स्] स्त्री, (दृष्टं रजो यस्याः ।) प्राप्तरजस्का । सतृपर्य्यायः । मध्यमा २ । इत्यमरः । २ । ६ । ८ ॥ प्रौढ़ा । इति राजनिर्घण्टः ॥

दृष्टान्तः, पुं. (दृष्टः अन्तो निश्चयो यस्मिन् ।) उदाहरणम् । (यथा, माघे । २ । ३१ ।
"दृष्टियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णचन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥")
प्रत्यक्षम् । सदृशम् । इति मेदिनी । ते, ११५ ॥ (अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ६६८ ।
"दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिबिम्बनम् ॥"
सधर्म्मस्येति प्रतिवस्तूपमाव्यवच्छेदः । अयमपि साधर्म्म्यवैधर्म्याभ्यां द्विधा । क्रमेणोदाहरणं यथा,—
अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥")

दृष्टिः, स्त्री, (पश्यत्यनेनेति । दृश्+करणे क्तिन् ।) चक्षुः । इत्यमरः । २ । ६ । ८३ ॥ (यथा, साहित्यदर्पणे । ३ । ६८ ।
"दृष्टा दृष्टिमधोददाति कुरुते गात्रापमाभाषिता ॥")
दृष्टिः । (दृश्+भावे+क्तिन् ।) दर्शनम् । इति मेदिनी । टे, १० ॥ (यथा, मनुः । ६ । ४६ ।
"दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ॥")
यद्दाभ्यां दृष्टिकथनम् । यथा,
तृतीयपञ्चमे दृष्टमष्टमे च गुरोः पूर्णदृष्टिरन्येषां पाददृष्टिः । पञ्चमपञ्चमे नवमपञ्चमे च गुरोः पूर्णदृष्टिरन्येषामर्द्धदृष्टिः । चतुर्थपञ्चमे अष्टमपञ्चमे च कुजस्य पूर्णदृष्टिरन्येषां त्रिपाददृष्टिः । सप्तमपञ्चमे सर्व्वेषां पूर्णदृष्टिः । पञ्चमपञ्चमे सप्तमे नवमे द्वादशे च राहोः पूर्णदृष्टिः । द्वितीये दशमे च त्रिपाददृष्टिः । तृतीये षष्ठे चतुर्थे अष्टमे चार्द्धदृष्टिः ॥* ॥ यद्दाभ्यां दृष्टाभावनिर्णयो यथा,—
स्थितिभवने एकादशे च राहोर्दृष्टाभावः । स्थितिभवने द्वितीये षष्ठे एकादशे द्वादशे चान्येषां दृष्टाभावः ॥* ॥ एषां प्रमाणं यथा,—
"तृतीये दशमे चैव पाददृष्टिरुदाहृता ।
अर्द्धदृष्टिश्च नवमे पञ्चमे च प्रकीर्त्तिता ॥
चतुर्थे चाष्टमे चैव पादोना परिकीर्त्तिता ।
सप्तमे परिपूर्णा च फलमेवं प्रकल्पयेत् ॥
तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः ।
त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः ॥
सुतमदननवान्त्ये पूर्णदृष्टिः सुरारे-
र्युगलदशमराशौ दृष्टिमात्राच्चयार्कः ।
सहजरिपुचतुर्थैश्चाष्टमे चार्द्धदृष्टिः
स्थितिभवनसुपान्त्यं नैव दृश्यं हि राहोः ॥
खस्थाच्च द्वितीयश्च षष्ठमेकादशस्तथा ।
द्वादशाख्यं न पश्यन्ति शेषं पश्यन्ति ते ग्रहाः ॥"
इति ज्योतिषतत्त्वम् ॥

दृष्टिकृत्, क्ली, (दृष्टिं दृष्टिप्रसादं करोतीति । कृ+क्विप् तुगागमश्च । अतीवशोभया लोकानां नेत्राकर्षकत्वादस्य तथात्वम् ।) स्वर्णपद्मम् । इति शब्दचन्द्रिका ॥ (दर्शनकारके, त्रि ॥)

दृष्टिकृतं, क्ली, (दृष्टेः दर्शनाय कृतमिव । अतीवशोभाकरत्वात् तथात्वम् ।) स्वर्णपद्मम् । इति शब्दरत्नावली ॥

दृष्टिगुणः, पुं, (दृष्ट्या गुण्यते अभ्यस्यते यत्र । गुणत् क अभ्यासे+घञ् ।) व्याधादिलक्ष्यम् । इति शब्दमाला ॥

दृष्टिबन्धुः, पुं, (दृष्टेश्चक्षुषो बन्धुरिव ।) खद्योतः । इति शब्दरत्नावली ॥

दृष्टिविक्षेपः, पुं. (दृष्टेर्विक्षेपः ।) कटाक्षः । इति हलायुधः ॥

दृह, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) सप्तमस्वरी दर्हति । इति दुर्गादासः ॥

दृह, द वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) सप्तमस्वरी । द, दंह्यते । इति दुर्गादासः ॥

दृहितः, त्रि, दृहधातोः कर्त्तरि क्तेन निष्पन्नः । वृद्धिप्राप्तः ॥

दृ, गि भिये । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) गि, द्रयाति दीर्घः दीर्घिः । भिये भये । इति दुर्गादासः ॥

दृ, म भिये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, दरयति । भिये भये । इति दुर्गादासः ॥

दृ, य गि विदारे । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-सकं-सेट् ।) य, दीर्य्यति । गि, द्रयाति दीर्घः दीर्घिः । इति दुर्गादासः ॥

दे, ड पालने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ड, दीनान् यो दयते नित्यम् । इति हलायुधः । इति दुर्गादासः ॥

देदीप्यमानः, त्रि, पुनःपुनरतिशयेन वा दीप्यते यः । (दीप+यङ्+शानच् ।) अतिशयदीप्तिविशिष्टः । इति व्याकरणम् ॥

देयं, त्रि, (दा+"अचो यत् ।" ३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति

इत् ।) दातव्यम् । दानीयम् । इति व्याकरणम् ॥
यथा, हितोपदेशे । १ । ३६ ।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ॥")
देव, ऋ ड देवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) देवनमिह क्रीड़ा । ऋ. अदिदेवत् । ड, देवते बालः कन्दुकेनिल्यमिति हलायुधः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥
देवं, क्ली, (दीव्यत्यनेनेति । दिव + करणे घञ् ।) इन्द्रियम् । इति मेदिनी । वे, १२ ॥ (यथा, सुश्रुतोपनिषदि । ३ । १ । ८ ।
"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥")
देवः, पुं. (दीव्यति आनन्देन क्रीड़तीति । दिव + अच् ।) देवता । (यथा, मनुः । ३ । १२७ ।
"देवान्पूर्वं मनुष्यांश्च पितॄन् यत्नाच्च देवताः ।
पूजयित्वा ततः पश्चात् गृहस्थः श्रेयसृग् भवेत् ॥")
नाग्नोक्तौ राजा । इत्यमरः । १ । ७ । १३ ॥ राजा । (यथा, काद्म्बरी । १८ ।
"सकलभूतलरत्नभूतोऽयं वैश्वम्पायनो नाम शुकः । सर्व्वरत्नानामुदधिरिव देवो भाजनमिति श्लेनमादायास्मत्स्वामिदुहिता देवपाद-मूलमायाता तदयमात्मीयः क्रियतामिति ॥")
मेघः । इति मेदिनी । वे, १२ ॥ (यथा, महाभारते । ३ । २३५ । २३ ।
"क्षेत्रे सुकृष्टे क्षुपिते च बीजे
देवे च वर्षत्यृतुकालयुक्तम् ॥"
केचित्तु देवशब्देन इन्द्र इति व्याचक्षते ॥)
पारदः । इति राजनिर्घण्टः ॥ ब्राह्मणानामुपाधिभेदः । यथा, स्मृतिः ।
"देवपूर्व्वं नराख्यं स्यात् शर्म्मवर्म्मादिसंयुतम् ॥"
(ऋत्विक् । यथा, ऋग्वेदे । ६ । ६६ । ६ ।
"ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां महिषो मृगाणाम् ॥"
"देवानां स्तोत्रकारिणाम्त्विजां ब्रह्मा ब्रह्मा-ख्यर्त्विक्स्थानीयो भवति ।" इति तद्भाष्ये सायनः ॥) कायस्थादीनां पदवृत्तिविशेषः । तस्य विवरणं कायस्थशब्दे द्रष्टव्यम् ॥ (चि, दाता । द्योतयिता । दीपयिता । यथा, ऋग्वेदे ।१।१।१।
"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥"
"देवशब्दो दानदीपनद्योतनानामन्यतममर्थ-माचष्टे । यज्ञस्य दाता दीपयिता द्योतयिता यमग्निरित्युक्तं भवति ।" इति तद्भाष्ये सायनः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ५४ ।
"उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥"
"दीव्यति यत् क्रीड़ति सर्गादिति विजिगीषति असुरान् व्यवहरति सर्व्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्व्वत्र गच्छति तस्माद्देवः । एको-देव इति मतुवर्णात् ॥" इति तद्भाष्ये शङ्करः ॥ महादेवः । यथा, महाभारते ।१३।१७।९८।
"परश्वधायुधो देवः अनुकारी सुबान्धवः ॥")
देवकः, पुं, यदुवंशीयराजविशेषः । स श्रीकृष्णस्य मातामहः । इति श्रीभागवतम् ॥ (अयन्तु गन्धर्व्वपतेरंशावतारः । यथा, महाभारते । १ । ६७ । ६६ ।
"यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः ॥")
देवकर्दमः, पुं, (देवप्रियः कर्दम इव ।) सुगन्धि-द्रव्यविशेषः । स श्रीखण्डागुरुकर्पूरकुङ्कुमसंमिश्रितेर्भवति । इति राजनिर्घण्टः ॥
देवकात्मजा, स्त्री, (देवकस्य आत्मजा कन्या ।) देवकी । इति शब्दरत्नावली ॥
देवकाष्ठं, क्ली, (देवप्रियं काष्ठम् ।) देवदारु । इति रत्नमाला ॥ देवदारुप्रभेदः । तत्पर्य्यायः । पूतिकाष्ठम् २ भद्रकाष्ठम् ३ सुकाष्ठकम् ४ स्निग्ध-दारुकम् ५ काष्ठदारु ६ । अस्य गुणाः । तिक्त-त्वम् । उष्णत्वम् । रूक्षत्वम् । श्लेष्मानिलापहर-त्वञ्च । इति राजनिर्घण्टः ॥
देवकिरी, स्त्री, (देवं मेघं किरतीति । कृ + "इगुप-धज्ञेति ।" ३ । १ । १३५ । इति कः । गौरादि-त्वात् ङीष् ।) मेघरागस्य भार्य्या । यथा,—
"ललिता मालवी गौरी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
अस्याः स्वरूपं यथा,—
"भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा ।
ख्याता देवकिरी श्लेषा करार्पितसखीकरा ॥"
इति सङ्गीतदामोदरः ॥
देवकी, स्त्री, (देवक + ङीष् ।) देवकराजकन्या । सा वसुदेवपत्नी श्रीकृष्णमाता । तत्पर्य्यायः । दैवकी २ कृष्णजननी ३ देवकात्मजा ४ । इति शब्दरत्नावली ॥ इयं कश्यपपत्नी अदित्यंशजाता । यथा,—
"देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत् ॥"
अपि च ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्व्वपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
देवकीनन्दनः, पुं, (देवक्या नन्दनः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । ८ । २१ ।
"कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥"
क्वचिदीकारस्य ह्रस्वोऽपि दृश्यते । यथा, महाभारते । २ । २४ । ३१ ।
"नैतच्चित्रं महाबाहो ! त्वयि देवकिनन्दने ॥")
देवकीसुतः, पुं, (देवक्याः सुतः पुत्रः ।) श्रीकृष्णः । इति हेमचन्द्रः । २ । १३२ ॥ (यथा, भविष्ये ।
"तुष्ट्यर्थं देवकीसूनोर्जयन्ती संज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥")
देवकुरुजा, स्त्री, महाद्रोणा । इति राजनिर्घण्टः ॥
देवकुलं, क्ली, (देवाय कोलतीति । कुल संहतौ + कः ।) विनासुखम् । इति हारावली । १६८ ॥ देउल इति भाषा ॥ (यथा, कथासरित्-सागरे । १२ । १२७ ।
"सोऽहं दारिद्र्यसन्तप्तश्च नारायणाश्रयः ।
निराहारः स्थितोऽकार्षं गत्वा देवकुलं तपः ॥")
अस्य विवरणं चैत्यशब्दे द्रष्टव्यम् ॥
देवकुसुमं, क्ली, (देवप्रियं कुसुमं पुष्पं यस्य ।) नवङ्गम् । इत्यमरः । २ । ६ । १२५ ॥
देवखातं, क्ली, (देवेन खातम् । अकृत्रिमत्वादस्य तथात्वम् ।) देवखातकम् । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ४ । २०३ ।
"नदीषु देवखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च ॥")
देवखातकं, क्ली, पुं, (देवखातमेव । स्वार्थे कन् ।) अकृत्रिमजलाशयः । अपौरुषेयं देवकृत-मित्यन्ये । इति सुभूतिः ॥ नागादिकृतमकृत्रिम-मिति स्वामी ॥ तत्पर्य्यायः । आखातम् २ । इति भरतः ॥ अखातम् । इत्यमरः । १ । १० । २७ ॥ दैवविनिर्म्मितम् ३ । इति शब्दरत्नावली । गुहा । इत्यमरटीकायां भरतः ॥
देवखातविलं, क्ली, (देवखातं अकृत्रिमं विलम् । नित्यकर्म्मधारयः ।) गुहा । इत्यमरः ।२।३।६॥
देवगन्धा, स्त्री, (देवप्रियो गन्धो यस्याः ।) मह-मेदा । इति राजनिर्घण्टः ॥
देवगान्धारी, स्त्री, श्रीरागस्य भार्य्या । यथा,—
"गान्धारी देवगान्धारी मालवश्रीश्च सारवी ।
रामकिर्य्यपि रागिण्यः श्रीरागस्य प्रिया इमाः ॥"
इति सङ्गीतदामोदरः ॥
अस्या गानसमयः शिशिरे ऋतौ तृतीयप्रहरा-वधिरात्रार्द्धपर्य्यन्तम् ॥
देवगायनः, पुं, (देवानां गायनः ।) गन्धर्व्वः । इति हेमचन्द्रः । २ । ६७ ॥
देवगिरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ सा सोमेश्वरमते वसन्तरागस्य भार्य्या वसन्त-ऋतौ सदा गेया । भरतमते हिन्दोलरागपुत्र-नागध्वनिभार्य्या । सङ्गीतदर्पणमते तु नटकल्याण-भार्य्या । अस्याः स्वरूपं यथा, अत्यभिरामवपु-श्यामतनुः उत्तुङ्गपीनस्तनी हारकरुभूषणा क्षीणकटिमध्यस्था मत्तचकोरनयना सुभङ्गभ्रूश्च । अस्या गानसमयः हेमन्ते दिवाचतुर्थ-प्रहरार्द्धावधिरात्रार्द्धपर्य्यन्तम् ॥
देवगुरुः, पुं, (देवानां गुरुः ।) बृहस्पतिः । इति पुराणम् ॥ (देवानां गुरुः पिता । कश्यपः । यथा, हरिवंशे । २६६ । ८ ।
"अपश्यन् कश्यपं तत्र मुनिं दीप्ततपोनिधिम् ।
आद्यं देवगुरुं दिव्यं क्षिप्रं चिन्तयतामुभिः ॥")
देवगृहं क्ली, (देवानां सूर्य्यादीनां गृहमिव ।) सूर्य्यचन्द्रादीनां ज्योतिर्म्मण्डलानि । यथा,—
"मन्वन्तरेषु सर्व्वेषु ऋक्षे सूर्य्यग्रहास्तथा ।
तानि देवगृहाणि स्युः स्थानास्थानि भवन्ति हि ॥"
इति मत्स्यपुराणम् ॥

देवालयः ॥ (यथा, कथासरित्सागरे । ४।१०२।
"शून्ये देवगृहे देहमिन्द्रदत्तस्य रक्षितुम् ॥")
देवचिकित्सकौ, पुं, (देवानां चिकित्सकौ ।) अश्विनीकुमारौ । इति हलायुधः ॥ द्विवचनान्तोऽयम् ॥
देवच्छन्दः, पुं, (देवैश्छन्द्यते आकाङ्क्ष्यते इति । छन्द + घञ् ।) हारविशेषः । स च शतयष्टिकः । इत्यमरः । २ । ६ । १०५ ॥ अष्टोत्तरशतयष्टिकोऽयमिति केचित् । इति भरतः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३२ ।
"शतमष्टयुतं हारो देवच्छन्दो ह्यशीतिरेकयुता । अष्टाधिकोऽर्द्धहारो रश्मिकलापश्च नवषट्कः ॥")
देवजग्धं, क्ली, (देवैरद्यते इति । अद् + क्तः । "अदोजग्धिर्लुगिति ।" २ । ४ । ३६ । इति जग्धादेशः ।) देवजग्धकम् । इति हेमचन्द्रः । ४ । २५७ ॥
देवजग्धकं, क्ली, (देवजग्ध + स्वार्थे कन् ।) कसृणम् । इत्यमरः । २ । ४ । १६६ ।
देवटः, त्रि, (दिवतीति । दिव + "शकादिभ्योऽटन् ।" उणा । ४ । ८१ । इति अटन् ।) शिल्पी । इत्युणादिकोषः ॥
देवट्टी, स्त्री, (देवं देवगृहं अट्टते अतिक्रामतीति । अट्ट + अण् । शकन्ध्वादित्वात् लोपः । गौरादित्वात् ङीष् ।) गङ्गाचिल्ली । इति हारावली । ८५ ॥
देवतरुः, पुं, (देवानां तरुः ।) मन्दारः । पारिजातः । सन्तानः । कल्पवृक्षः । हरिचन्दनम् । इत्यमरः । १ । १ । ५३ ॥ चैत्यवृक्षः । इति त्रिकाण्डशेषः ॥
देवता, स्त्री, (देव एव । स्वार्थे तल् ।) देवं द्युतिं क्रीड़ां वा तनोति या । तत्पर्य्यायः । अमरः २ निर्ऋतिः ३ देवः ४ त्रिदशः ५ विबुधः ६ सुरः ७ सुपर्व्वा ८ सुमनाः ९ त्रिदिवेशः १० दिवौकाः ११ आदितेयः १२ दिविषत् १३ लेखः १४ अदितिनन्दनः १५ आदित्यः १६ ऋभुः १७ अक्षयः १८ अमर्त्यः १९ अन्धतामाः २० बर्हिर्मुखः २१ क्रतुभुक् २२ गीर्व्वाणः २३ दानवारिः २४ वृन्दारकः २५ दैवतम् २६ । इत्यमरः । १ । १ । ९ ॥ स्वाहाभुक् २७ दनुजहित् २८ द्युषत् २९ दौषत् ३० स्वर्गी ३१ प्रौषः ३२ निलिम्पः ३३ शुचिराषुः ३४ स्थिरः ३५ । इति शब्दरत्नावली ॥ तस्याः संख्या त्रयस्त्रिंशत्कोटयः । यथा,—
"सदारा विबुधाः सर्व्वे स्वानां स्वानां गणैः सह ।
त्रैलोक्यं तत्त्रयस्त्रिंशत्कोटीसंख्या यथा भव ॥"
इति प्राग्भोत्तरखण्डम् ॥ * ॥
गणदेवता यथा,—
"आदित्यास्तुषिता भास्वत्प्रभाभास्वरभास्वताः ।
महाराजिकवह्नाद्य वसवो गणदेवताः ॥
आदित्या द्वादश प्रोक्तास्तुषिताख्यिंशदेव हि ।
विश्वेदेवा दश प्रोक्ताः साध्या द्वादश कीर्त्तिताः ॥
आभास्वरास्तु षट्त्रिंशत्पञ्चाशद्दूनकाः ।
महाराजिकनामानो हि शते विंशतिस्तथा ।
रुद्रा एकादश प्रोक्ता वसवोऽष्टौ समीरिताः ॥"
इति शब्दरत्नावली ॥ * ॥
तेषां चत्वारो वर्णा यथा, —
"आदित्याः क्षत्रियास्तेषां विप्रश्च मरुतस्तथा ।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥
स्मृतास्त्वङ्गिरसा देवा ब्राह्मणा इति निश्चयः ।
इत्येतत् सर्व्वदेवानां चातुर्व्वर्ण्यं प्रकीर्त्तितम् ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
वैश्यवर्णानां पञ्चदेवता यथा,—
"यत्र यत्र सुराः पूज्या गणीग्राह्यास्तु कर्म्मिणाम् ।
विष्णुर्ब्रह्मेन्द्र तत्र तत्र वैश्यवर्णा हि वैश्यवाः ॥
विश्वक्सेनं सगणकं सगातनमतःपरम् ।
सगन्धं सगतक्रमारभ्य पञ्चैवं पूजयेत्ततः ॥"
इति यामले उत्तरखण्डम् ॥ * ॥
देवषट्कं यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
देवषट्कञ्च संपूज्य नमस्कृत्य विचक्षणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
अपि च ।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम् ।
नारायणं विष्णुमाख्यमग्नेश्च कुलदेवताः ॥"
इत्याह्निकतत्त्वम् ॥ * ॥
शक्तिविशेषस्य उपास्यदेवता यथा,—
"या यस्याभिमता पुंसः सा हि तस्यैव देवता ।
किन्तु कार्य्यविशेषेण पूजिता चेष्टदा नृणाम् ॥
विघ्नेशात् सर्व्वदा नार्य निघ्नमो ह्यन्यथा कृपाः ।
कृपार्णां देवतं विष्णुस्तथैव च पुरन्दरः ॥
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक् ।
देवानां देवतं विष्णुर्दानवानां त्रिशूलभृत् ॥
गन्धर्व्वाणां तथा सोमो यक्षाणामपि कथ्यते ।
विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः ॥
रक्षसां भूतरो रुद्रः किन्नराणाञ्च पार्व्वती ।
ऋषीणां देवतं ब्रह्मा महादेवश्च शूलभृत् ॥
मनूनां स्यादुमा देवी तथा विष्णुः सभास्करः ।
ग्रहाणाञ्च सर्व्वे सुब्रह्मा वै ब्रह्मचारिणाम् ॥
वैखानसाम्बिका स्यादृयतीनाञ्च महेश्वरः ।
भूतानां भगवान् रुद्रः कुष्माण्डानां विनायकः ॥
सर्व्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः ।
इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत ॥"
इति कूर्म्मपुराणम् ॥ * ॥
सामान्यदेवप्रतिष्ठादिनं यथा,—
तत्रोक्तनक्षत्राणि । उत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदारोहिणी चित्रानुराधा मृगशिरो रेवती पुष्योऽश्विनी हस्ता श्रवणा स्वाती पुनर्व्वसुर्धनिष्ठा । तत्र तिथयः शुभाः । तत्र चन्द्रस्तृतीयदशमसप्तमलग्नेकादशस्थः शोभनः ॥ अथ सामान्यदेवप्रतिष्ठादिनम् । तत्र मासाः । माघफाल्गुनचैत्रवैशाखज्यैष्ठाः हरिशयनात् पूर्व्वमाषाढ़श्च । तत्र नक्षत्राणि धनिष्ठाशतभिषाश्लेषामघापुनर्व्वस्वश्विनीभरणीरोहिणीविशाखाभिन्नानि । तत्र तिथयः शुभाः । तत्र लग्नानि वृषमिथुनकन्याधनुर्मीनसंज्ञकानि । तत्र चन्द्रः शोभनः । लग्नादपेक्षया दृष्टस्तिथिः केन्द्रस्थः शोभनः लग्नादपेक्षया शुक्रस्तृतीयषष्ठैकादशस्थः शोभनः । इति ज्योतिषम् ॥
(देव + भावे तल् । देवत्वम् । यथा, ऋग्वेदे । १० । २४ । ६ ।
"मधुमन्मे परायणं मधुमत् पुनरायनम् ।
ता नो देवा देवतया युवं मधुमतस्कृतम् ॥"
"हे देवा देवौ द्योतमानौ तौ युवं युवां नोऽस्मान् मधुमतः प्रीतियुक्तान् कृतम् कुरुतम् । केनेति उच्यते । देवतया देवत्वेन अग्निमादिदेवतमर्थ्ययोगेनेत्यर्थः ।" इति तद्भाष्ये सायनः ॥)
देवताड़ः, पुं, (देवी दीप्तिस्ताल इति । तस्य डः ।) वृक्षविशेषः । देताड़ा इति ख्यातः । तत्पर्य्यायः । वेणी २ खरा ३ गरी ४ भीमतः ५ । इत्यमरः । २ । ४ । ६६ ॥ अगरी ६ खरागरी ७ गरागरी ८ । इति तट्टीकायां भरतः ॥ देवताड़ी ९ आखुविषहा १० । इति जटाधरः ॥ आखुः ११ विषनिघ्नः १२ महाच्छदः १३ कदमः १४ खड्गाकः १५ देवताड़कः १६ । इति रत्नमाला ॥ (देवौ चन्द्रार्कौ ताड़यतीति । ताड़ि + कर्म्मणि अण् ।) राहुः । अग्निः । इति मेदिनी । ड़े, ३६ ॥ घोषकलता । इति विश्वः ॥
देवताड़कः, पुं, (देवताड़ + स्वार्थे कन् ।) देवताड़ः । इति रत्नमाला ॥
देवताधिपः, पुं, (देवतानां अधिपः ।) इन्द्रः । इति शब्दरत्नावली ॥
देवत्वं, क्ली. (देवस्य भावः कर्म्म वा । "तस्य भावस्त्वतलौ ।" ५।१।११९। इति त्वप्रत्ययः ।) देवभूयम् । देवसाधुत्वम् । इत्यमरः । २।७।५२॥ देवस्य भावः कर्म्म वा । इति संक्षिप्तसारव्याकरणम् ॥
देवदग्धा, स्त्री, (देवात् मेघाद्दग्धोऽस्याः ।) नागबला । इति राजनिर्घण्टः ॥
देवदत्तः, पुं, बुद्धानुजः । इति चिकाण्डशेषः । अर्জ্জुनशङ्खः । (यथा, महाभारते । ६।२४।१५ ।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥")
शरीरवाय्वन्तर्गतवायुविशेषः । इति शब्दार्थकल्पतरुः ॥ विशदे देवदत्तः शुद्धस्फटिकसन्निभः । इति सारदातिलकटीका ॥ (देवा एनं देयासुरिति । "क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति आधिषि क्तः । "दो दद्घोः ।" ७।४।४६ । इति ददादेशश्च ।) संज्ञाविशेषः । यथा, देवदत्तादिसंज्ञाशब्दस्य सर्व्वलिङ्गभाजित्वाभावात् जातित्वमायाति । इति दुर्गादासः ॥ (नागभेदः । यथा, भागवते । ५ । २४ । ३१ । "ततोऽधस्तात् पातालेनागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षाः निवसन्ति ॥" देवेन दत्ते, त्रि । यथा,
"अश्वमारुगमारुह्य देवदत्तं जगत्पतिः ।

अखिलाशाधृदमनमष्टैश्वर्यगुणान्वितः ॥"
इति कल्किपुराणेऽनुभागवते भविष्ये कल्कि-जन्मोपनयने २ अध्यायः ॥)

देवदत्ताग्रजः, पुं, (देवदत्तस्य अग्रजो ज्येष्ठः।) बुद्धः। इति हेमचन्द्रः। २। १५१।

देवदानी, स्त्री, (देव प्रोधने + भावे ल्युट्। देव-स्येव दानं शुद्धिर्यस्याः। गौरादित्वात् ङीष्।) घोषकाकृतिः। हस्तिघोषा इति भाषा। इति रत्नमाला॥

देवदारु, क्ली, (देवानां दारु। तेषां प्रियत्वात्।) वृक्षविशेषः। (यथा, महाभारते। ३। १७८। १०।
"वनानि देवदारूणां मेघानामिव वागुराः॥")
तत्पर्य्यायः। भद्रपादपः २ परिभद्रकः ३ भद्र-दारु ४ इकिलिमम् ५ पीतदारु ६ दारु ७ पूतिकाष्ठम् ८। इत्यमरः। २। ४। ५४॥ सुर-दारु ९ हरदारुकम् १० स्निग्धदारु ११ अमरदारु १२ स्निग्धदारु १३ ग्राम्यभवम् १४ भूतहारि १५ भवदारु १६ भद्रदारु १७ इन्द्रदारु १८ मस्तदारु १९ सुरभूरुहः २०। इति भावप्रकाशः॥ सुराष्ठम् २१ देवकाष्ठम् २२। इति रत्नमाला॥ अस्य गुणाः। तिक्तत्वम्। रूक्षत्वम्। श्लेष्मानिलभूत-दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कटुपाकित्वम्। विब-न्धाध्मानशोथामतन्द्राहिक्काज्वरश्वासप्रमेहपीनस-श्लेष्मश्वासकासकण्डूसभीरनाशित्वञ्च। इति भाव-प्रकाशः॥ तस्य लेपनगुणः। कान्तिदत्वम्। आमदोषविषघ्नार्थः प्रमेहज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ ज्वररक्तपाजन्यशीरघोविन्न-नाशित्वम्। इति राजवल्लभः॥

देवदारुः, पुं, (देवप्रियं दारु यत्र।) खनामख्यात-वृक्षः। स च पार्व्वतीप्रियः। यथा,—
"अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽयं वृषभध्वजेन।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥"
इति रघौ। २। ३६॥

देवदालिका, स्त्री, (देवदालीव कायतीति। कै + कः। टाप् पूर्व्ववद्ह्रस्वः।) महाकालः। इति राजनिर्घण्टः॥

देवदाली, स्त्री, (दैवेन मेघोदयेन दालो दलनं यस्याः। गौरादित्वात् ङीष्।) लताविशेषः। घघरवेल इति खोनेया इति च हिन्दीभाषा। खस्रसावतृप्यवृत्ता। (यथा, सुश्रुते, सूत्रस्थाने। ४६ अध्याये।
"कोशातकी घण्टला घण्टिनी देवदालीकार-वेल्लिका मेत्युभयतो भागहराणि॥")
तत्पर्य्यायः। जीमूतकः २ कण्टफला ३ गरा ४ गरी ५ वेणी ६ महाकोषफला ७ कटफला ८ घोरा ९ कल्मी १० विधड्डा ११ कर्कटी १२ सारमूषिका १३ वृत्तकोषा १४ व्याघ्रविघड्डा १५ दाली १६ रोमशपत्रिका १७ कुरङ्गिका १८ सुतकारी १९ देवताड़ः २०॥ अस्या गुणाः। तिक्तत्वम्। उष्णत्वम्। कटुत्वम्। पाण्डुकफ-दुर्नामश्वासकासकामलाभूतनाशित्वञ्च। तस्याः फलस्य गुणाः। तिक्तत्वम्। कृमिश्लेष्मगुल्मशूला-र्शोवातनाशित्वम्। संसनत्वञ्च।
"पीता गरा खरस्पर्शा विषघ्नी गरनाशिनी॥"
इति राजनिर्घण्टः॥
तस्या गुणाः। यथा, भावप्रकाशे।
"देवदाली तु वेणी स्यात् कर्कटी च गरागरी।
देवताड़ी वृन्तकोशरूक्षधा जीमूत इत्यपि॥
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी।
देवदाली रसे तिक्ता कफार्शःशोथपाण्डुता॥
गाढ़श्वेष्टामनी तिक्ता क्षयहिक्काक्षमिज्वरान्।
देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम्॥
संसनं गुल्मशूलघ्नमर्शोघ्नं वातजित् परम्॥"

देवदासी, स्त्री, (देवं देवस्त्रियं दास्यति ददाति।
देव + दासृ + अण्। गौरादित्वात् ङीष्।) वन-वीजपूरकः। इति राजनिर्घण्टः। (देवाय क्रीड़ायै दासी इव।) वेश्या। इति शब्दार्थ-कल्पतरुः॥ (देवपरिचारिका च॥)

देवदीपः, पुं, (देवं दीप्तिशीलं दीपयति प्रकाश-यति बुद्धिस्थं करोतीति। दीप् + णिच् + अण्। यद्वा, देवेषु इन्द्रियेषु दीपः प्रकाशकः।) लोच-नम्। इति शब्दरत्नावली॥

देवदुन्दुभिः, पुं, (देवानां दुन्दुभिरिव हर्षजनक-त्वात्।) गन्धपर्णासः। स रक्ततुलसी। इति रत्नमाला॥ देवानां दुन्दुभिवाद्यञ्च॥

देवदूती, स्त्री, (देवानिन्द्रियाणि दूयन्ते अवसाद-यन्तीति। दूङ् उपतापे + "स्त्रियां क्तिच्क्तौ च संज्ञा-याम्।" ३। ३। १७४। इति क्तिच् ततो ङीष्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

देवदेवः, पुं, (दीव्यतीति। दिव् + अच्। देवानां देवेषु वा देवः श्रेष्ठत्वात्।) शिवः। (यथा, महाभारते। १। १। १६०।
"यदाश्रौषमर्জ্জুनं देवदेवं
किरातरूपं त्र्यम्बकं तोष्य युद्धे॥")
ब्रह्मा। इति शब्दरत्नावली॥ (यथा, देवी-भागवते। १। ५। १८।
"स वक्त्रो सन्दिदेशाथ देवदेवः सनातनः॥"
"देवदेवो ब्रह्मेति।" तट्टीका॥ विष्णुः। यथा, देवीभागवते। १। ४। ३५।
"कारणं सर्व्वलोकानां देवदेवं जगद्गुरुम्।
वासुदेवं जगन्नाथं तथ्यमानं महत्तपः॥"
गणेशः। यथा, कथासरित्सागरे। २०। ५५।
"अस्तीह प्रमदोद्याने तरुमण्डपमध्यगः।
इष्टप्रभावो वरदः देवदेवो विनायकः॥")

देवद्रोणी, स्त्री, देवयात्रा। इति हारावली।१२६॥ (देवानां द्रोणी द्रोण्याकारत्वात् अवस्थान-गह्वरम्। ग्रिवलिङ्गादीनामवस्थानगह्वरम्। यथा, प्रायश्चित्ततत्त्वे रघुनन्दनधृतसम्वर्त्तवचनम्।
"देवद्रोण्यां विहारे च कूपेष्वायतनेषु च।
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते॥"
"देवद्रोणी स्वयम्भूलिङ्गादयस्थानगह्वरम्।"
इति रघुनन्दनः॥)

देवद्रुड्, [क्विप्] वि, (देवानद्रुह्यति पूजयतीति। द्रुङ् गतिपूजनयोः + "ऋत्विग्दधृक्" इति।" ३। २। ५९। इति क्विप्। "विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये।" ६। ३। ९२। इति अद्रादेशः।) देवपूजकः। देवसमीपगन्ता। इत्यमरः। ३। १। ३४॥

देवधान्यं, क्ली, (देवयोग्यं धान्यमिति मध्यलोपी समासः।) धान्यविशेषः। देधान इति भाषा। जोयार इति हिन्दीभाषा। तत्पर्य्यायः। यव-नालः २ योगलः ३ जूर्णाह्वयः ४ जोन्नाला ५ बीजपुष्पिका ६। इति हेमचन्द्रः। ४। २४४॥

देवधूपः, पुं, (देवप्रियो धूप इति मध्यलोपी समासः।) गुग्गुलुः। इति रत्नमाला॥

देवनं, क्ली, (दिव् + भावे ल्युट्।) अवहारः। लिगीषा। क्रीड़ा। इति मेदिनी। ने, ७६॥ (दीव्यति अस्मिन्निति अधिकरणे ल्युट्।) खीलो-द्यानम्। इति त्रिकाण्डशेषः॥ (दीव्यति अने-नेति। दिव + करणे ल्युट्।) पद्मम्। इति शब्दचन्द्रिका॥ परिदेवनम्। इत्यमरटीकायां भरतः॥ स्तुतिः। स्तुतिः। कान्तिः। गतिः। शोकः। इत्यमरटीकायां मथुरेशः॥ द्यूतम्। इति स्वामी॥ (यथा, मनौ। ६। २२२।
"प्रकाशमेतत् तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतिघाते नृपतिर्यत्नवान् भवेत्॥")

देवनः, पुं, (दीव्यत्यनेनेति। दिव + करणे ल्युट्।) पाशकः। इत्यमरः। २। १०। ४५॥

देवनद्धी, [न्] पुं, (देवमिन्द्रं नन्दयतीति। नन्दि + णिनिः।) इन्द्रद्वारपालः। इति हेम-चन्द्रः। २। ६०॥

देवनलः, पुं, (देवः आकारवर्णोत्कर्षेण श्रेष्ठो नलः।) नलभेदः। तत्पर्य्यायः। देवनालः २ महानलः ३ नन्दः ४ नलोत्तमः ५ स्थूलनालः ६ स्थूलदण्डः ७ सुरनालः ८ सुरदृमः ९। अस्य गुणाः। अतिमधुरत्वम्। दृढत्वम्। ईषत्-कषायत्वम्। नलादधिकवीर्य्यत्वम्। रक्तकफमेदि गुरुत्वञ्च। इति राजनिर्घण्टः॥

देवना, स्त्री, (दिव् + भावे युच् टाप् च।) क्रीड़ा। सेवा। इति शब्दरत्नावली॥

देवनालः, पुं, (देवो दीप्तिशीलः श्रेष्ठो वा नालः।) देवनलः। इति राजनिर्घण्टः॥

देवपतिः, पुं, (देवानां पतिः।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥ (यथा, महाभारते। ४। २१। ३३।
"सत्यं भ्रातश्च धर्म्मेण्च पुरस्कृत्य ब्रवीमि ते।
कौचकं निहनिष्यामि वृत्रं देवपतिर्यथा॥")

देवपत्नी, स्त्री, (देवानां पत्नीव प्रियदर्शनादित्वात्।) मध्वालुकम्। इति त्रिकाण्डशेषः। (देवानां पत्नी।) देवभार्य्या॥ (यथा, महाभारते। १३। १४। ३६३।
"देवानां मातरः सर्व्वा देवपत्न्यः सकन्यकाः॥")

देवपथः, पुं, (देवानां पन्थाः। "ऋक्पूरब्धूः पथामानक्षे।५।४।७४। इति अः।) देवानां पन्थाः। तत्पर्य्यायः। क्षायापथः २ सोमधारा ३ नभःसरित् ४। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १४८। २०।

"दिवो देवपथो ह्येष नात्र गच्छन्ति मानुषाः॥"

तीर्थविशेषः। यथा, महाभारते। ३। ८५। ४५।

"ततो देवपथं गत्वा नियतो नियतासनः।
देवसत्रस्य यत् पुण्यं तदवाप्नोति मानवः॥")

देवपर्ण्णं क्ली, (देवानां प्रियं पर्ण्णमस्य।) सुरपर्ण्णम्। इति राजनिर्घण्टः॥

देवपुत्रिका, स्त्री, (देवानां पुत्रिकेव प्रियत्वात्।) पृक्का। इति राजनिर्घण्टः॥

देवपुत्री, स्त्री, (देवानां पुत्रीव प्रियत्वात्।) पृक्का। इति जटाधरः॥

देवपूः, [र्] स्त्री, (देवानां पूः पुरी।) अमरावती। इति जटाधरः॥

देवप्रश्नः, पुं, (देवानां ग्रहदेवतानां प्रश्नः।) ग्रहनक्षत्रादिघटितजिज्ञासा। तत्पर्य्यायः। उपश्रुतिः २। इति हेमचन्द्रः। २। १७७॥

देवप्रियः, पुं, (देवानां प्रियः।) प्रीतभङ्गराजः। वकपुष्पः। इति राजनिर्घण्टः॥

देवबला, स्त्री, (देवप्रिया बला।) सहदेवी। चायमाना। इति राजनिर्घण्टः॥

देवब्रह्मा, [न्] पुं, (देवेषु ब्रह्मा इव। देवर्षित्वादस्य तथात्वम्।) नारदमुनिः। इति हेमचन्द्रः। ३। ५१३॥

देवभवनं, क्ली, (देवानां भवनं गृहमिव। देवानां आश्रयत्वादस्य तथात्वम्।) अश्वत्थः। इति शब्दचन्द्रिका॥ स्वर्गः॥ (देवप्रतिमा-निकेतनञ्च॥)

देवभूः, पुं, (देवं देवत्वं भवते प्राप्नोतीति। भू प्राप्तौ + क्विप्।) देवः। इति शब्दरत्नावली॥ (देवानां भूनिवासभूमिरुत्पत्तिर्वा यत्र।) स्वर्गश्च॥

देवभूतिः, स्त्री, (देवात् देवलोकात् भूतिरुत्पत्तिर्यस्याः।) मन्दाकिनी। इति शब्दरत्नावली॥ (देवानां भूतिरिति विग्रहे। देवैश्वर्य्यम्॥)

देवभूयं, क्ली, (देवस्य भावः। भू + "सुवो भावे।" ३। १। १०७। इति क्यप्।) देवत्वम्। देवसायुज्यम्। इत्यमरः। २। ७। ५२॥

देवमणिः, पुं, (देवेषु मणिरिव।) भगः। (देवीद्योतनग्रीवो मणिः।) कौस्तुभः। अश्वरोमावर्त्तः। इति मेदिनी। णे, ६७॥ (यथा, शिशुपालवधे। ५। ४।

"आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः
सम्पन्नदेवमणयो भृतरत्नभागाः।
अम्भाः व्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः॥")

महाभेदाः। इति राजनिर्घण्टः॥

देवमाता, [ऋ] स्त्री, (देवानां माता।) अदितिः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ३। १। ३३।

"कश्चिच्छिवं देवकभोजपुत्र्या
विष्णुप्रजाया इव देवमातुः॥"

देवमातृमाचम्। यथा, महाभारते। १३। १४। ३८।

"देवपत्न्यो देवकन्या देवमातर एव च॥")

देवमातृकः, त्रि, (देवो दृष्टिर्मातेव ग्रस्योत्पादनेन पालकत्वात् जननीव यस्य। कप्।) दृष्टाम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥ (यथा, महाभारते। २। ५। ७८।

"कश्चिद्राष्ट्रे तडागानि पूर्णानि च दृहन्ति च।
भागशो विनिविष्टानि न क्षुद्भिर्देवमातृकाः॥")

देवमानकः, पुं, (देवेषु मानो यस्य। कप्। संज्ञायां कन् वा।) कौस्तुभमणिः। इति शब्दरत्नावली॥

देवमासः, पुं, (देवाय भूभुवस्य क्रीड़नाय यो मासः। अत्र हि क्षुतेरोणस्य प्रादुर्भावात् गर्भस्य क्रीड़नादित्वात् तथात्वम्।) गर्भस्याष्टममासः। तत्पर्य्यायः। गर्भाष्टमः २। इति त्रिकाण्डशेषः॥ देवानां मासः। स मनुष्यमाने चिंशद्वर्षात्मकः॥

देवयजिः, पुं, (देवान् यजते इति। यज + "सर्व्वधातुभ्य इन्।" उणां ४। ११७। इति इन्।) देवपूजकः। मुनिः। यथा, भट्टिः। २। ३४।

"अग्नौ द्विजान् देवयजीन् निहन्मः॥"

देवयज्ञः, पुं, (देवानां यज्ञः।) होमः। इति हेमचन्द्रः। ३। ४८५॥ (यथा, मनुः। ४। २१।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा॥")

देवयात्रा, स्त्री, (देवानां यात्रा।) देवगमनम्। तत्पर्य्यायः। देवक्रीडी २। इति हारावली। १२६॥ देवोत्सवादि॥ (यथा, कथासरित्सागरे। २५। १२१।

"एकदा देवयात्रायां तत्र मल्लसमागमे।
अगादेको महामल्लः ख्यातिमान् दक्षिणापथात्॥")

देवयानं, क्ली, (देवानां यानम्।) देवविमानम्। देवरथः। इति शब्दार्थकल्पतरुः॥ (त्रि, देवप्रापनीयम्। यथा, ऋग्वेदे। १। १६२। ४।

"यद्वविष्यन्तुग्रो देवयानं
त्रिर्मानुषा पर्य्येषं नयन्ति॥"

देवप्रापकम्। यथा, तत्रैव। ७। ७६। २।

"प्र मे पन्था देवयाना अदृश्र-
न्नमर्द्धन्तो वसुभिरिष्कृतासः॥")

देवयानी, स्त्री, शुक्राचार्य्यकन्या। सा ययातिराजपत्नी। इति श्रीभागवतम्॥ (पुरा किल बृहस्पतिपुत्रः कचो देवकार्य्यार्थं सञ्जीवनविद्यार्थी असुरगुरुमुपागमत्। देवयानीयं तं युवानं मनोहरञ्चावलोक्य तेन सङ्गता भवितुमिच्छेत्। कचस्तु गुरुकन्यामेनां ज्ञात्वा पाणिमस्या ग्रहीतुं न स्वीचकार। अस्मादेवासौ देवयानी प्राप्तविद्यं "न ते विद्या सिद्धिमेषा गमिष्यति" इति शशाप। कचस्तु निरपराधोऽपि शापाहतः क्रुद्धश्च "ऋषिपुत्रो न ते कश्चित्पाणिं ग्रहीष्यति" इत्येनां शशप्तवान्। अयमेवास्या ब्राह्मणकन्याया अपि क्षत्रियपत्नीत्वे हेतुः।

अथ कदाचित् क्रीड़न्तीनां कन्यानां वस्त्रवैपरीत्यं जातम्। देवयानी स्वीयवस्त्रग्रहणेन वृषपर्व्वणोऽसुरराजस्य सुतां शर्म्मिष्ठां शुक्रोऽग्र। शर्म्मिष्ठा तु तदसहमाना तां कूपमध्ये प्राक्षिपत्। अथ गच्छति काले ययातिर्मृगयां गतस्तृषार्तो जलमन्विष्यन् तत्रैव कूपसमीपमागत्य देवयानीं तन्मध्यस्थां दृष्ट्वा तस्या दक्षिणं पाणिं गृहीत्वा उत्थापयामास। अथ देवयानी कूपात् सुक्ता पितृसमीपमागत्य सर्व्वं विज्ञापितवती। अथ शुक्रे क्रोधादसुरराज्यात् गन्तुमुद्यते वृषपर्व्वासुरराजः स्वीयकन्यां शर्म्मिष्ठां कन्यासहस्रपरिवृतां परिचारकत्वेन प्रदाय स्वगुरुं देवयानीञ्च प्रसादयामास। अथ कदाचित् देवयानी पितृशुश्रूषया नाडुषं ययातिं पतित्वेन स्वीकृत्य तेन सह विजहार। अस्याः पुत्रौ द्वौ यदुस्तुर्व्वसुश्च।

गच्छति काले देवयानी राज्ञा सह वनं गत्वा त्रीनपरान् कुमारान् क्रीड़तश्च दृष्ट्वा तृषौरसात् शर्म्मिष्ठागर्भे जातांश्च तान् विज्ञाय क्रोधपरवशा पितृसमीपं प्रस्थितवती। शुक्रस्तु दुहितरमवमानितां विदित्वा राजानं जरया योजयामास॥ एतद्विशेषविवरणविस्तृतिस्तु महाभारते। १। ७६-८३। अध्यायेषु ज्ञातव्या॥ ११)

देवयुः, त्रि, (देवं याति उपास्यत्वेन प्राप्नोतीति। या + "नृनयायद्यश्च" उणां १। ३८ इति कुः।) धार्म्मिकः। (यथा, ऋग्वेदे। १। १५४। ५।

"तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति॥"

"देवयवो देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरः।" इति तद्भाष्ये सायणः॥) लोकयात्रिकः। इति मेदिनी। ये, ८६॥ देवे, पुं। इति शब्दरत्नावली॥

देवयोनिः, पुं, स्त्री, देव एव योनिर्निदानभूतो यस्य सः। तद्यथा, विद्याधराः १ अप्सरसः २ यक्षाः ३ राक्षसाः ४ गन्धर्व्वाः ५ किन्नराः ६ पिशाचाः ७ गुह्यकाः ८ सिद्धाः ९ भूतगणाः १०। इत्यमरः। १। १। ११॥ (देवानां योनिः। देवस्थानम्। यथा, महाभारते। ३। ११४। २८।

"अन्यथा हि कुरुश्रेष्ठ! देवयोनिरपापतिः।
कृशार्थेऽपि कौन्तेय! न प्रदेयो महोदधिः॥")

देवरः, पुं, (दीव्यत्यनेनेति। दिवु क्रीड़ायाम् + "अर्त्तिकमिभ्रमीति।" उणां ३। १३२। इति अरः।) पत्युः कनिष्ठभ्राता। देओर इति भाषा। ("देवरः कस्मात् द्वितीयो वर उच्यते।" इति निरुक्तेः। ३। १५॥) तत्पर्य्यायः। देवा २। इत्यमरः। २। ६। ३२॥ देवृः ३ दवारः ४ देवान्ः ५। इति जटाधरः॥ तुरागावः ६ देवक्षी ७। इति शब्दरत्नावली॥ (यथा, मनुः। ९। ५९।

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")

पत्युर्ज्येष्ठो भ्राता तु श्वशुरः। इति भरतः॥

देवरथ:, पुं, (देवानां रथ: ।) देवानां विमान: । इति हलायुध: ॥ स च पुष्पकादि: ॥

देवराज:, पुं, (देवानां राजा । "राजाह:सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्र: । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते ।१।८६।७।

"देवराजसमो ह्यासीत् ययाति: पृथिवीपति: ॥")

तस्य नामानि यथा,—

"इन्द्र: सुरपति: शक्रो दितिज: पवनाग्रज: ।
सहस्राक्षो भगाङ्क: कश्यपाङ्गज एव च ॥
विडोजाश्च सुनासीरो मरुत्वान् पाकशासन: ।
जयन्तजनक: श्रीमान् शचीशो दैत्यसूदन: ॥
वज्रहस्त: कामसखा गौतमीव्रतनाशन: ।
वृत्रहा वासवश्चैव दधीचिदेहभिक्षुक: ॥
जिष्णुश्च वामनभ्राता पुरुहूत: पुरन्दर: ।
दिवस्पति: शतमख: सुत्रामा गोत्रभिद्विभु: ॥
खेखर्षभो बलारातिर्जम्भभेदी सुराश्रय: ।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहन: ॥
आखण्डलो हरिहयो नमुचिप्राणनाशन: ।
वृद्धश्रवा वृषश्चैव दैत्यदर्पनिसूदन: ॥
षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम्॥"

इति ब्रह्मवैवर्ते जन्मखण्डम् ॥

देवरात:, पुं, (दे+क्त: । देवेन श्रीकृष्णेन रात: रक्षित: ।) परिक्षित् राजा । इति श्रीभागवतम् ॥ सारसपक्षिविशेष: । इति शब्दार्थकल्पतरु: ॥ (विश्वामित्रपुत्र: । यथा, हरिवंशे । २७ । ४७ ।

"विश्वामित्रस्य पुत्रास्तु देवरातादय: स्मृता: ॥"

एतन्निरुक्तिर्यथा भागवते । ९ । १६ । ३२ ।

"यो रातो देवयजने देवैर्गाधिषु तापस: ।
देवरात इति ख्यात: शुन:शेफस्तु भार्गव: ॥"

निमेर्ज्येष्ठ: पुत्र: । यथा, रामायणे । १ । ६६ । ८ ।

"देवरात इति ख्यातो निमेर्ज्येष्ठो महीपति: ॥"

युधिष्ठिरस्य सभास्थक्षत्रियाणामन्यतम: । यथा, महाभारते । २ । ४ । २६ ।

"चानूरो देवरातश्च भोजो भीमरथश्च य: ॥")

देवर्षि:, पुं, (देव ऋषिश्च । देवानां ऋषिर्वा ।) सुरर्षि: । तद्यथा । नारद: १ अत्रि: २ मरीचि: ३ भरद्वाज: ४ पुलस्त्य: ५ पुलह: ६ क्रतु: ७ भृगु: ८ वशिष्ठ: ९ प्रचेता: १० । इत्यमरटीकासारसुन्दरी ॥ (यथा, महाभारते । १२ । २१० । २१ ।

"देवर्षिचरितं गार्ग्य: कथयाञ्चक्रेऽसितसुतम्॥"

तुम्बुरुभरतादि: । इति तट्टीकायां भरत: ॥ कश्यपादि: । इति त्रिकाण्डशेष: ॥ (महादेव: । यथा, महाभारते । १३ । १७ । १४४ ।

"देवादिदेवो देवर्षिर्देवासुरवरप्रद: ॥")

देवल:, पुं, (देवं लाति गृह्णाति निजजीविकार्थमिति । देव+ला आदाने+"आतोऽनुपसर्गे ।" ३ । २ । ३ । इति क: ।) देवाजीव: । जीविकार्थं यो देवान् गृहीतवान् । इत्यमर: । २ । १० । ११ ॥ पूजारि वामन इति भाषा ॥ देवोपजीवजीवी । यथा,—

"देवोपजीवजीवी च देवलश्च प्रकीर्त्तित: ॥"

इति ब्रह्मवैवर्तपुराणम् ॥

"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्या: स्युर्हव्यकव्ययो: ॥"

इति मनु: । ३ । १५१ ॥

"देवल: प्रतिमापरिचारक: वर्णनार्थलेनैतत् कर्म्म कुर्व्वतोऽयं निषेध: न तु धर्म्मार्थम् । देवकोशोपजीवी च नाम्ना देवलोको भवेदिति देवलवचनात् ।" इति तट्टीकायां कुल्लूकभट्ट: ॥ * ॥ (दीव्यति आनन्देनेति । दिव+"वृषादिभ्यश्चित् ।" उणा० १ । १०८ । इति कलच् ।) धार्म्मिक: । इत्युणादिकोष: ॥ नारदमुनि: । इति त्रिकाण्डशेष: ॥ (रलयोरैक्यात् ।) ईश्वर: । इति शब्दरत्नावली ॥ धर्म्मशास्त्रवक्ता मुनिविशेष: । इति भगवद्गीता ॥ स असितमुनिपुत्र: रम्भाप्रापेनाष्टावक्रो बभूव । इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डम् ॥ (व्यासस्य वेदव्यासस्य शिष्य: । यथा, देवीभागवते । १ । २० । ३ ।

"असितो देवलश्चैव वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च गता: सर्व्वे तपोधना: ॥"

प्रत्यूषस्य ऋषे: पुत्र: । यथा, विष्णुपुराणे । १ । १५ । ११५ ।

"प्रत्यूषस्य विद: पुत्रं ऋषिं नाम्नाथ देवलम् ॥")

देवलक:, पुं, (देवल एव । स्वार्थे कन् ।) देवल: । इति जटाधर: ॥ (यथा,महाभारते ।१३।७६।६।

"आढ्यायका देवलका नक्षत्रग्रामयाजका: ।
एते ब्राह्मणचाण्डाला महापथिकपक्षमा: ॥")

देवलता, स्त्री, (देवप्रिया लता ।) नक्तमालिका । इति शब्दचन्द्रिका ॥

देवलाङ्गुलिका, स्त्री, (देवयति परिदेवयत्यनेनेति । देव+णिच्+घञ् । देव: लाङ्गुलिक: मूको यस्या: ।) वृश्चिकालि: । इति राजनिर्घण्टु: ॥

देवलोक:, पुं, (देवानां लोक: ।) स्वर्ग: । इति त्रिकाण्डशेष: ॥ (यथा, देवीभागवते ।५।३।४६।

"तस्मात् सञ्जा भवन्त्यत्र देवलोकजयाय वै ॥") अपि च । मत्स्यपुराणे ।

"भूर्लोकोऽथ भुवर्लोक: स्वर्लोकोऽथ महर्जन: ।
तप: सत्यञ्च सप्तैते देवलोका: प्रकीर्त्तिता: ॥")

देववक्त्र, क्ली, (देवानां वक्त्रम् । तद्वारित्वेन यज्ञादौ हव्यादिभोजनात् तथात्वम् ।) अग्नि: । इति शब्दचन्द्रिका ॥ देवानां मुखञ्च ॥

देववर्द्धकि:, पुं, (देवानां वर्द्धकिरिव ।) विश्वकर्म्मा । इति हेमचन्द्र: । २ । ६६ ॥

देववल्लभ:, पुं, (देवानां वल्लभ: प्रिय: ।) पुन्नागवृक्ष: । इत्यमर: । २ । ४ । २५ ॥

देववृक्ष:, पुं, (देवप्रियो वृक्ष: ।) सप्तपर्णवृक्ष: । मन्दारवृक्ष: । गुग्गुलु: । इति मेदिनी: । षे, ५२ ॥ अदग्धिष्टा देवतरुशब्दे पुं द्रष्टव्या: ॥

देवव्रत:, पुं, (देवं व्यपरिग्रहादिरूपत्वात् द्योतनशीलं व्रतं यस्य । यद्वा, देवस्येव व्रतं स्थिरप्रतिज्ञा यस्य ।) भीष्म: । इति त्रिकाण्डशेष: ॥ (यथा, देवीभागवते । १ । २० । १६ ।

"चित्राङ्गदं ततो राज्ये स्थापयामास वीर्य्यवान् ।
स्वयं न लतवान् राज्यं तस्माद्देवव्रतोऽभवत् ॥")

देवानां व्रतञ्च ॥

देवशेखर:, पुं, (देव: क्रीड़ाप्रद: शेखरो यस्य ।) दमनक: । इति राजनिर्घण्टु: ॥ देवानां मस्तकञ्च ॥

देवश्रुत:, पुं, (देवेषु श्रुत: विख्यात: ।) ईश्वर: । शास्त्रम् । नारद: । इति शब्दार्थकल्पतरु: ॥ (शुकस्य पुत्रविशेष: । यथा, देवीभागवते । १ । १६ । ४१ ।

"स तस्माज्जनयामास पुत्रांश्चतुर एव हि ।
कृष्णं गौरप्रभञ्चैव भूरिं देवश्रुतं तथा ॥")

देवश्रेणी, स्त्री, (देवानां श्रेणीव ।) रम्भा । इति राजनिर्घण्टु: ।

देवसभा, स्त्री, (देवानां सभा ।) देवानां समाज: । तत्पर्य्यायं: । सुधर्म्मा २ । इत्यमर: । १ । १ । ५१ ॥ शुभा ३ । सुधर्म्मा [न्] ४ । इति शब्दरत्नावली ॥ सुधर्म्मा ५ । इत्यमरटीकायां भरत: ॥

देवसभ्य:, त्रि, (देवस्य क्रीड़ाया: सभा तस्यां साधुरिति । यत् ।) क्रीड़ासभास्थ: । तत्पर्य्यायं: । सभिक: २ । इति त्रिकाण्डशेष: ॥ देवसामाजिकञ्च ॥

देवसर्षप:, पुं, (देवप्रिय: सर्षप: ।) वृक्षप्रभेद: । तत्पर्य्यायं: । अम्बाय: २ वदर: ३ रक्तफलक: ४ सुरसर्षपक: ५ क्षुद्रफल: ६ निर्ज्जरसर्षप: ७ कुररादि: ८ । अस्य गुणा: । कटुत्वम् । उष्णत्वम् । कफजन्तुदोषरक्तामयनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टु: ॥

देवसहा, स्त्री, (सहते या । सह+अच्+टाप् । देवस्य सहा ।) दर्भोत्पत्तौषधि: । भिक्षाभाजनम् । इति विश्व: ॥

देवसात्, य, (देवाय देयं देवाधीनं वा करोतीति । देव+सात् ।) सकलजना देवभावाश्रया: । देवाधीनम् । देवदेयम् । यथा,—

"साकल्याधीनत्वदेवार्थेषु असंपूर्णपदभूधातुषु परेषु यसात्प्रत्ययो भवति । देवेऽर्थे पूर्व्वोक्तधातुषु परेषु चाच्प्रत्ययोऽपि । यथा देवाय देयं करोति देवसात्करोति ।" इति सुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । ७ । १८७ । ५८ ।

"जित्वा वा बहुभिर्यज्ञैर्यजध्वं भूरिदक्षिणै: ।
हता वा देवसाद्भूत्वा लोकान् प्राप्स्थ पुष्कलान् ॥")

देवसायुज्यं, क्ली, (देवेन सायुज्यं संमिलनम् ।) देवत्वम् । इत्यमर: । २ । ७ । ५२ ॥

देवस्थली, स्त्री, (देवाय क्रीड़ार्थं स्थली ।) मठम् । इति हेमचन्द्र: । ३ । ५६७ ॥

देवसेना, स्त्री, इन्द्रकन्या । इति मेदिनी: । ने, १८७ ॥ (प्रजापते: कन्या । इति महाभारतम् । ३ । २२३ । १ ॥) सा षष्ठी । (यथा, ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे । १ । ७२—७४ ।

"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मालकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिबिम्बेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥"
इयं हि यथा यथा कार्त्तिकेयस्य पत्नी जाता तद्विवरणं महाभारते ।३।२२३ अध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥) देवानां सेना । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २२२ । ५ ।
"देवसेनां दानवेभ्यो भयाद् दृष्ट्वा महाबलः ।
पालयेद्वीर्य्यमाश्रित्य स क्षेयः पुरुषो मया ॥")

देवसेनापतिः, पुं, (देवसेनायाः पतिः ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥

देवस्वं, क्ली, (देवस्य स्वं धनम् ।) देवस्वतास्यादिधनम् । यथा,—
"ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्च हरेत्तु यः ।
कन्यां ददाति शुल्केन स प्रेतो जायते ध्रुवः ॥"
इति महाभारते पञ्चप्रेतोपाख्यानम् ॥
(यथा च मनुः । ११ । २६ ।
"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥"
यज्ञगृहीधनम् । यथा, मनुः । ११ । २० ।
"यद्वृत्तं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥")

देवहूः, पुं, (हू + भावे क्विप् । देवानां हूराह्वानमनेनेति ।) वामकर्णः । यथा,
"आपस्तो व्यवहारोऽत्र चित्रमन्यो बहूदनम् ।
पिङ्गदूर्देवहूश्चित्र कर्ण उत्तरो देवहूः स्मृतः ॥"
इति श्रीभागवते । ४ । २६ । १२ ॥
(त्रि, देवानाह्वयतीति । हे + कर्त्तरि क्विप् । देवानां आह्वाता । यथा, वाजसनेयसंहितायाम् । १७ । ६२ ।
"देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् ॥")

देवा, [ऋ] पुं, (दीव्यत्यनेनेति । दिव + "दिवेर्द्यः ।" उणां २ । १०० । इति द्यः ।) देवरः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, ऋग्वेदे । १० । ८५ । ४६ ।
"ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥")
रक्षापतिः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

देवा, स्त्री, (दियते ऽनया । दिव + घञ् । ततष्टाप् ।) पद्मचारिणी । अश्वनपर्णी । इति शब्दचन्द्रिका ॥ (मूर्व्वा । अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"तेजनी पिलुनी देवा तिक्तवल्ली दृयक्लचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥")

देवाजीवः, त्रि, (देवेन देवप्रतिमासेवनेन आजीवतीति । आ + जीव + अच् ।) देवलः । इत्यमरः । २ । १० । ११ ॥

देवाजीवी, [न्] त्रि, (देवेन आजीवतीति । आ + जीव + णिनिः ।) देवलः । इत्यमरटीकायां रमानाथः ॥

देवाटः, पुं, (अट गतौ + भावे घञ् । देवानां आटो गमनं यत्र ।) हरिहरक्षेत्रम् । यथा,
"यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवान् सह्निनादेव क्षेत्रं हरिहरात्मकम् ।
देवानामटनाच्चैव देवाट इतिसंज्ञितम् ॥"
इति वराहपुराणम् ॥

देवात्मा, [न्] पुं, (देव आत्मा अधिष्ठातृदेवता यस्य ।) अश्वत्थः । इति शब्दचन्द्रिका ॥

देवानाम्प्रियः, पुं क्ली, (देवानां प्रियः । "देवानां प्रिय इति च मूर्खे ।" ६ । ३ । २१ । इत्यस्येति वर्त्तिकोक्त्या षष्ठ्या अलुक् । छागस्य पशुत्वादेव मूर्खत्वं बोध्यम् ।) छागः । इति चिकाण्डशेषः ॥ त्रि, जाल्मः । इति हेमचन्द्रः । ३ । १७ ॥

देवापिः, पुं, प्रतीपराज्ञः पुत्रः । स सुमेरुसमीपे कलापग्रामे योगी भूत्वा आस्ते स कलौ लुप्तं चन्द्रवंशं पुनः सत्ययुगे भावयिष्यति । इति श्रीभागवतम् ॥ स च कुष्ठी प्रजाभिरप्रधार्त्तः । इति मत्स्यपुराणम् ॥ (यथा, महाभारते । १ । ६५ । ४४—४५ ।
"प्रतिश्रवसः प्रतीपः प्रतीपः खलु शैव्यासुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकञ्चेति । देवापिः खलु बाल एवारण्यं विवेश शान्तनुस्तु महीपालो बभूव ॥"
वैदिकमते तु अयं ऋष्टिषेणस्य पुत्रः । यथा, निरुक्ते । २ । १० ।
"देवापिर्ऋष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शन्तनुः कनीयानभिषेचनायाचक्रे देवापिस्तपः प्रतिपेदे । ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तस्मुः ब्राह्मणा अधर्म्मस्त्वया चरितो ज्यैष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात् ते देवो न वर्षतीति । स शन्तनुर्देवापिं शिश्रिये राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्मै तद्वर्षकामस्तथेति ।" तथा च ऋग्वेदे । १० । ६८ । ५ ।
"आर्ष्टिषेणो होत्रमृष्टिर्निधीदन् देवापिर्देव-सुमतिं चिकित्वान् ॥")

देवाभीष्टा, स्त्री, (देवानामभीष्टा प्रिया ।) ताम्बूली । इति शब्दचन्द्रिका ॥

देवायतनं, क्ली, (देवानामायतनं गृहम् ।) देवालयः । यथा, कूर्म्मपुराणे ।
"न देवायतनं गच्छेत् कदाचिद्वाप्रदक्षिणम् ।
न पीड़येद्वा वस्त्राणि न देवायतनेष्वपि ॥")

देवायुधं, क्ली, (देवस्य इन्द्रस्य आयुधम् ।) शक्रधनुः । इति हेमचन्द्रः । २ । ८३ ॥ देवानामस्त्रञ्च ॥

देवार्हं, क्ली, (देवमर्हतीति । अर्ह + अण् ।) सुरपर्णम् । इति राजनिर्घण्टः ॥

देवार्हा, स्त्री, (देवार्ह + टाप् ।) सहदेवी लता । इति राजनिर्घण्टः ॥

देवालयः, पुं, (देवानामालय आवासः ।) स्वर्गः । (यथा, देवीभागवते । ५ । ४ । ४ ।
"त्वञ्च देवालयं शक्र ! यथेष्टं व्रज वासव ! ॥")
देवगृहम् । इति शब्दार्थकल्पतरुः ॥ (यथा, साहित्यदर्पणे । ३ । ८६ ।
"क्षेत्रं वाटो भयदेवालयो दूतीगृहं वनम् ॥")

देवाला, स्त्री, (देवानपि आलाति खायत्तीकरोतीति । आ + ला + कः ।) रागिणीविशेषः । इति हलायुधः ॥

देवावासः, पुं, (देवानां आवासो वासस्थानम् ।) अश्वत्थवृक्षः । इति चिकाण्डशेषः ॥

देवाश्वः, पुं, (देवस्य इन्द्रस्य अश्वः ।) इन्द्रघोटकः । उच्चैःश्रवाः । इति हलायुधः ॥

देविका, स्त्री, (दीव्यतीति । दिव + ण्वुल् । टापि अत इत्वम् ।) नदीविशेषः । इति शब्दरत्नावली ॥ तस्याः परिमाणं यथा,—
"अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् ।
एतावद्देविकामाहुर्देवर्षिपरिसेविताम् ॥"
इति पाद्मे भूमिखण्डम् ॥
(इयं हिमवत्पादगिःसृता । इति मत्स्यपुराणम् । ११३ । २१ ॥ अनया सह सरयूः सङ्गता । इति कालिकापुराणम् । २३ अः ॥ इयन्तु तीर्थस्थानानामन्यतमा । अत्र नरः स्नात्वा महादेवं समभ्यर्च्य यथाशक्ति चरुं निवेद्य च सर्व्वकामसमृद्धस्य यज्ञस्य फलं लभते । इति महाभारतम् । ३ । ८२ । ६६ ॥ इयं हि पीठस्थानानां अन्यतमा । अत्र भगवती नन्दिनीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ॥"
युधिष्ठिरस्य पत्नीविशेषः । यथा, महाभारते । १ । ६५ । ७६ ।
"युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयंवरां लेभे । तस्यां पुत्रं जनयामास यौधेयं नाम ॥") धुस्तूरः । इति भावप्रकाशः ॥ देवसम्बन्धिनि, त्रि ॥

देविलः, त्रि, (दीव्यति आनन्देनेति । दिव + "गुपादिभ्यः कित् ।" उणां १ । ५७ । इति इलच् ।) धार्म्मिकः । इत्युणादिकोषः ॥

देवी, स्त्री, (दीव्यतीति । दिव + अच् ततो ङीप् ।) दुर्गा । इति धरणी ॥ (यथा, मार्कण्डेये । ८४ । २ ।
"देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ॥")
नाथोक्तौ स्नानाभिषेका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ मूर्व्वा । (यथा, भावप्रकाशे । १ । १ ।
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ॥")
पृक्का । इति मेदिनी । वे, १२ ॥ (देवानां पत्नी । ङीप् ।) सामान्यदेवपत्नी । यथा, देवीनां दक्षिणायने इति स्मृतिः ॥ ब्राह्मणस्त्रीनामोपपदम् । यथा, देवन्ता हि स्त्रियो मताः । इत्युद्वाहतत्त्वम् ॥ अपि च, कर्म्मविपाके ।
"देवन्ताश्च स्त्रियः सर्व्वा दास्यन्ता शूद्रयोनयः ॥"
आदित्यभक्ता । लिङ्गिनी । वन्ध्याकर्कोटकी । शालिपर्णी । महाद्रोणी । पाठा । नागरमुस्ता । स्तोर्व्वारुः । हरीतकी । अतसी । श्यामानामप्यस्ति जातिः । इति राजनिर्घण्टः ॥ (उपनिष-

द्विशेषः। स तु अथर्ववेदान्तर्गतः। यथा, सुक्तिकोपनिषदि।
"त्रिपुरातापनं देवी त्रिपुराकटभावना॥")
देवकोटः, पुं, (देवाः कोटौ दुर्गमिव।) वाण-पुरम्। इति त्रिकाण्डशेषः॥
देवेज्यः, पुं, (देवानामिज्यः पूज्यः।) बृहस्पतिः। इति शब्दरत्नावली॥
देवेष्टः, पुं, (देवानामिष्टः प्रियः।) महामेदा। गुग्गुलुः। इति राजनिर्घण्टः॥ देववाञ्छिते, त्रि॥
देवेष्टा, स्त्री, (देवानामिष्टा।) वनवीजपूरकः। इति राजनिर्घण्टः॥
देवोद्यानं, क्ली, (देवानां उद्यानं वनम्।) देवानां वनम्। तदृथा। वैभ्राजम्। मिश्रकम्। शिल्प-कारण्यम्। चैत्ररथम्। इति त्रिकाण्डशेषः॥
देशः, पुं, (दिश्यते निर्दिश्यते इति। दिश निर्देशे + कर्मणि घञ्।) भूगोलभागविशेषः। इति सिद्धान्तमञ्जरी॥ जनपदे जनपदसमुदाये जनपदैकदेशे सजलनिर्जलस्थानमात्रे च। इत्य-मरटीकायां भरतः॥ स त्रिविधः। जाङ्गलः, अनूपः, साधारणश्च। तत्पर्य्यायः। जनपदः २ नीवृत् २ विषयः ३ उपवर्त्तनम् ४। इति राज-निर्घण्टः॥ प्रदेशः ५ राष्ट्रम् ६। इति शब्द-रत्नावली॥ * ॥ अथ देशे वर्णनीयानि। रत्नम् १ खनिः २ द्रव्यम् ३ पण्यम् ४ धान्यम् ५ करोद्भवः ६ दुर्गग्रामः ७ जनाधिक्यम् ८ नदी-मालकतादि॥ * ॥ अथ ग्रामे वर्णनीयानि। धान्यम् १ लता २ वृक्षः ३ सरः ४ पशुपुष्टिः ५ क्षेत्रम् ६ वरवृक्षः ७ केदारः ८ ग्रामेयीसुखम् ९ विभ्रमः १०। इति कविकल्पलता॥ * ॥
अथ मध्यदेशीयजनपदा यथा,—
"तार्क्षिमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः।
शूरसेना भद्रकारा बोधकाः सपटच्चराः॥
मत्स्याः किराताः कुल्याश्च कुन्तयः कान्ति-कोशलाः।
आवन्त्याश्च सुलिङ्गाश्च लोकाश्चैवान्धकैः सह॥
मध्यदेश्या जनपदाः प्रायशः परिकीर्त्तिताः॥"
अथ उदीच्या देशा यथा,—
"बाह्लीका वाटधानाश्च आभीराः कालतोयकाः।
परन्त्राश्चैव शूद्राश्च पह्लवाश्चात्मखड्किकाः॥
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः।
शका दर्व्वाः पुलिन्दाश्च पारदा हारमूर्त्तिकाः॥
रामठाः कण्ठकाराश्च केकया देशमानिकाः।
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च॥
आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरकाः।
जम्बकास्तलगानाश्च सैनिकाः सह साङ्गजैः॥
एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत॥"
अथ प्राच्या देशा यथा,—
"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः।
ततः प्रवङ्गा मातङ्गा मलया मलवर्त्तकाः॥
सह्योत्तराः प्रविजया भार्गवाङ्गेयमालवाः।
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलि-प्तकाः॥
प्राच्या मागधगोनर्दा प्राच्या जनपदाः स्मृताः॥"
अथ दक्षिणापथदेशा यथा,—
"तथापरे जनपदा दक्षिणापथवासिनः।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च॥
सेतुका मूलकाश्चैव कुपथाश्चारवासिकाः।
नवराष्ट्रा माहिषका कलिङ्गाश्चैव सर्व्वशः॥
कावेराश्च सहेलीकेराटयाः शवरास्तथा।
पुलिन्द्रा विन्ध्यमूलीका वैदर्भा दण्डकैः सह॥
कुलीयाश्च शिरालाश्च रूपसास्तापसैः सह।
तथा तैत्तिरकाश्चैव सर्व्वे कारस्करास्तथा॥
नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः।
भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा॥
कच्छीयाश्च सुराष्ट्राश्च आभीर्त्ताश्चार्बुदैः सह।
इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः॥"
अथ विन्ध्यवासिदेशा यथा,—
"मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह।
उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धिकैः सह॥
तोषलाः कोशलाश्चैव चेदिपुरा वैदिकास्तथा।
तुम्बुरास्तुम्बुराश्चैव पटुमान्निषधैः सह॥
अनूपास्तुण्डिकेराश्च वीतिहोत्राश्च आवन्त्याः॥
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः॥"
पर्व्वताश्रयिदेशा यथा,—
"अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये।
निर्झारा हंसवर्णाश्च कुपथा अपथाः खशाः॥
कुथप्रावरणाश्चैव ऊर्णा दर्भाः समूहकाः।
त्रिगर्त्ता मण्डलाश्चैव किराताश्चामरैः सह॥"
इति मत्स्यपुराणम्॥
अपि च।
"देशव्यवस्था देवेशि! कथ्यते शृणु तत्परा।
वैद्यनाथं समारभ्य सुवनेशान्तगं शिवे!॥
तावदङ्गाभिधो देशो यात्रायां नहि दृश्यति।
रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे!।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः॥
जगन्नाथात् पूर्व्वभागात् कण्ठतीरान्तगं शिवे।
कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः॥
कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे!।
दक्षिणस्यां महेशानि! कालिङ्गः परिकीर्त्तितः॥
सुवर्णाख्यं समारभ्य यावद्देवी जनार्दनः।
तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः॥
रामेश्वरात् चक्रटेशात् हंसकेरलनामकः।
अनन्तशैलमारभ्य यावत् स्यादव्ययं परे॥
तावत् सर्व्वेगुणामा तु केरलः परिकीर्त्तितः।
शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम्॥
तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनाऽऽयकम्॥
कालेश्वरं श्वेतगिरिं चेपुरं नीलपर्व्वतम्॥
कामरूपाभिधो देशो गणेशगिरिरिङ्गनि।
त्रिपक्षकं समारभ्य मध्ये चोज्जयिनी शिवे!॥
मार्ण्डारतीर्थं राजेन्द्र! कोलापुरनिवासिनी।
तावद्देशो महाराष्ट्रः कर्णाटस्त्वामिगोचरः॥
जगन्नाथादूर्द्धभागमर्व्वाक् श्रीभमरालिकात्।
तावदन्त्याभिधो देशः सौराष्ट्रं शृणु सादरम्॥
कोङ्कणात् पश्चिमं तीर्थं सप्तद्रव्यान्तगोचरम्।
हिङ्गुलाजान्तको देवि! दशयोजनदेशतः॥
सौराष्ट्रदेशो देवेशि! तस्मात्तु गुर्ज्जराभिधः।
श्रीशैलन्तु समारभ्य चोलेशाम्बधभागतः॥
तैलङ्गदेशो देवेशि! धानाध्ययनतत्परः।
सुराम्बिकां समारभ्य मलयाद्रान्तगं शिवे!।
मलयालाभिधो देशो मन्त्रसिद्धिप्रवर्त्तकः।
रामनाथं समारभ्य श्रीरङ्गान्तं विलेश्वरि!॥
कर्णाटदेशो देवेशि! साम्राज्यभोगदायकः।
ताम्रपर्णीं समासाद्य शैलाङ्गेश्वरोद्भवः॥
अवन्तीसंज्ञको देशः कालिकात्र तिष्ठति।
भद्रकालीमहापूर्व्वे रामदुर्गाच्च पश्चिमे।
श्रीविदर्भाभिधो देशो वैदर्भी तत्र तिष्ठति॥
गुर्ज्जरात् पूर्व्वभागे तु द्वारकातो हि दक्षिणे।
मरुदेशो महेशानि! उद्भोत्पत्तिपरायणः॥
श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे।
आभीरदेशो देवेशि! विन्ध्यशैले व्यवस्थितः॥
अवन्तीतः पूर्व्वभागे गोदावर्य्याश्चयोत्तरे।
मालवाख्यो महादेशो धनधान्यपरायणः॥
द्रविडतैलङ्गयोर्मध्ये चोलदेशः प्रकीर्त्तितः।
जलकर्णाच्च ते प्रोक्तास्तद्देशो वामरे भवेत्॥
कुरुक्षेत्रात् पश्चिमे तु तथा चोत्तरभागतः।
इन्द्रप्रस्थान्महेशानि! दशयोजनकन्तये॥
पाञ्चालदेशो देवेशि! सौन्दर्य्यगर्व्वभूषितः।
पाञ्चालदेशमारभ्य म्लेच्छाद्रिशिखरान्तकः॥
काम्बोजदेशो देवेशि! वाजिराजिपरायणः।
वैदर्भदेशादूर्द्धञ्च इन्द्रप्रस्थाच्च दक्षिणे॥
मरुदेशात् पूर्व्वभागे वैराटः परिकीर्त्तितः।
काम्बोजादूर्द्धभागे तु इन्द्रप्रस्थाच्च पश्चिमे॥
पाञ्चालदेशो महेशानि! महाशूरत्वकारकः।
गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे!॥
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु।
काम्बोजदेशमारभ्य महाम्लेच्छात्तु पूर्व्वके।
बाह्लीकदेशो देवेशि! अश्वोत्पत्तिपरायणः।
तप्रकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे!।
किरातदेशो देवेशि! विन्ध्यशैलेऽवतिष्ठते॥
करतोयां समारभ्य हिङ्गुलाजान्तकं शिवे!।
सुलतानदेशो देवेशि! महाम्लेच्छपरायणः॥
हिङ्गुपीठं समारभ्य मक्केशान्तं महेश्वरि!।
खुरासानाभिधो देशो म्लेच्छमार्गपरायणः॥
तन्मध्ये चोत्तरे देवि! ऐराकः परिकीर्त्तितः।
काश्मीरन्तु समारभ्य कामरूपान्तु पश्चिमे।
भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे॥
मानसेशादूर्द्धपूर्व्वे चीनदेशः प्रकीर्त्तितः।
कैलासीरं समारभ्य सरयूं परितः परे॥
अमरणां महेशानि महाचीनाभिधो भवेत्।
जटेश्वरं समारभ्य योगिन्यन्तं महेश्वरि!॥
नेपालदेशो देवेशि! शिलहट्टं शृणु प्रिये!।
गणेश्वरं समारभ्य महोदध्यन्तगं शिवे!॥
शिलहट्टाभिधो देशः पर्व्वते तिष्ठति प्रिये!।
वङ्गदेशं समारभ्य सुवनेशान्तगं शिवे!॥

गौड़देशः समाख्यातः सर्व्वविद्याविशारदः।
गोकर्णेशात् पूर्व्वभागे चार्य्यावर्त्तात्तु चोत्तरे॥
तैरभुक्तात् पश्चिमे तु महापूर्व्याच्च सर्व्वतः।
महाकोशलदेशश्च सूर्य्यवंशपरायणः॥
त्र्यासेश्वरं समारभ्य तप्रकुब्जान्तकं शिवे।
मगधाख्यो महादेशो यात्रायां न हि दुष्यति॥
दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ।
चरणाद्रिं समारभ्य शृङ्गकूटान्तकं शिवे!॥
तावत् कीकटदेशः स्यात्तदन्तर्मागधो भवेत्।
जगन्नाथप्रान्तदेशश्चोत्कलः परिकीर्त्तितः॥
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!।
मौकुन्तलाभिधो देशो दूरं ह्रस्वं महेश्वरि!॥
कामगिरेर्दक्षभागे मरुदेशात्तथोत्तरे।
हूनदेशः समाख्यातः शूराश्च रमन्ति च॥
अघाग्यङ्गं समारभ्य कोटिदेशस्य मध्यगे।
वसुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः॥
ब्रह्मपुत्रात् कामरूपात् मध्यभागे तु कैकयः।
मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे!॥
सौरसेनाभिधो देशः सूर्य्यवंशप्रकाशकः।
हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे॥
पाञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः।
मरुदेशात् पूर्व्वभागे कामाद्रेर्दक्षिणे शिवे!॥
सिंहलाख्यो महादेशः सर्व्वदेशोत्तमोत्तमः।
शिलहट्टात् पूर्व्वभागे कामरूपात्तथोत्तरे॥
पुलिन्ददेशो देवेशि! नरनारायणः परः।
गणेश्वरात् पूर्व्वभागे वसुद्राद्दक्षिणे शिवे!॥
कच्छदेशः समाख्यातः सुदेशं शृणु सादरम्।
पुलिन्दाद्दक्षिणे भागे कच्छाच्च पश्चिमे शिवे!॥
मत्स्यदेशः समाख्यातो मत्स्यबाहुल्यकारकः।
वैराटपाञ्चाय्योर्म्मध्ये पूर्व्वदक्षक्रमेण तु॥
मद्रदेशः समाख्यातो माद्रीहा तत्र तिष्ठति।
शूरसेनात् पूर्व्वभागे गङ्गकक्षात् पश्चिमे शिवे!॥
सौवीरदेशो देवेशि! सर्व्वदेशाधमाधमः।
अवन्तीतः पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे॥
नाटदेशः समाख्यातो वर्व्वरं शृणु पार्व्वति!॥
मायापुरं समारभ्य यमद्रङ्गात्तथोत्तरे॥
वर्व्वराख्यो महादेशः सैन्धवं शृणु सादरम्।
लङ्काप्रदेशमारभ्य मक्कान्तं परमेश्वरि!॥
सैन्धवाख्यो महादेशः पर्व्वते तिष्ठति प्रिये!।
एते षट्पञ्चाशद्देशा मया प्रोक्ता महेश्वरि!॥
एतन्मध्येऽपि देवेशि! देशभेदा ह्यनेकशः।
कोटिशः सन्ति देवेशि! एते मुख्याः प्रकीर्त्तिताः॥
रहस्यातिरहस्यञ्च गोप्यं पशुसङ्कटे।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः॥

देशकः, त्रि, (दिशतीति। दिश् + आदेशे + "खुल् तृचौ।" ३। १। १३३। इति खुल्।) आज्ञाता। इति हेमचन्द्रः। ३। १५२। ८
"तथोन्मार्गप्रवृत्तस्य यात्तु सन्मार्गदेशकः।
सन्तु मेऽतिथयः श्रद्धा वित्तदाने तथार्चये॥"
इति मार्कण्डेये। १६। १७॥

देशकारी, स्त्री, रागिणीविशेषः। इनूमन्मते मेघरागस्य भार्य्या। अस्या जातिः संपूर्णः। ग्रहं षड्जस्वरः गानसमयः वर्षर्त्तौ निशान्तः। अस्याः स्वरूपं सुन्दरस्त्री तिलपुष्पाननना कमलपत्राक्षी दाड़िमस्तनी गौराङ्गी बिम्बोष्ठी मुक्ताहारकण्ठी कर्पूरचन्दनलिप्ताङ्गी सालङ्कारा नायकेन सहोपविश्य हावभावकटाक्षान् कुर्व्वती। सङ्गीतदर्पणमते अस्या गानसमयः प्रातर्वैराटीरागिण्या सह। अस्याः स्वरूपं नायकेन सह केलिकौतुकरता श्यामकेशभारा जितशरत्पूर्णचन्द्राननना अनङ्गराजिलाङ्गी काञ्चनकलशद्युतिहारिकुचा कमलनयना मृदुभाषिणी। इति सङ्गीतशास्त्रम्।

देशरूपं, क्ली, (दिश्यते इति। दिश् + कर्म्मणि घञ्। देशस्य हेतुयुक्तिदेशकालपात्रादिभिर्दिश्यमानस्य रूपम्। यद्वा, देशस्य देशानुरूपाचारस्य रूपम्।) उचितम्। इत्यमरः।२। ८। २४॥ (यथा, महाभारते। १२। १०७। ५।
"चीर्णव्रतवृत्तिश्च यथा धर्म्मं प्रकीर्त्तितम्।
लघुना देशरूपेण तन्मयोगेन भारत!॥")

देशाखी, स्त्री, रागिणीविशेषः। इनूमन्मते हिन्दोलरागस्य द्वितीयरागिणी। तस्या जातिः षाड़वः ग्रहं गान्धारस्वरः गानसमयः वसन्तर्त्तौ पूर्व्वाह्णः। अस्याः स्वरूपम्। सुरूपा नारी चन्द्रवदना क्रोधना कलहप्रिया रोमहर्षा निष्कोपकरवालकरा भस्मवत् धूल्यवगुण्ठितबाहुवक्षाः बलमर्द्दितकक्षस्थापितशत्रुपक्षा सर्व्वदा स्वसमीपस्थापितनायका च। रागमालामते तु तस्याः स्वरूपं मल्लवत् परस्परमल्लक्रीड़ायां नियुक्ता। सा क्रीड़ामल्लकालोत्तेपणप्रस्तराद्युत्तोलनभूमिलुण्ठनादिरूपा। कल्लिनाथमते वसन्तरागस्य भार्य्या। सङ्गीतदर्पणमते अस्या जातिः संपूर्णः। अस्याः स्वरूपं कर्पूरादपि कमनीयाङ्गी कमलरागितनयना हर्षयुक्ता रसिका अतिधीरा किञ्चित्सङ्कुचिता दीर्घभुजा मल्लद्युतिमोचिनी च। इति सङ्गीतशास्त्रम्।

देशान्तरं, क्ली, (अन्यो देशः। मयूरव्यंसकादिवत् समासः।) सुमेरुलङ्कयोर्मध्यरेखास्वरूपदेशस्वदेशयोरन्तरयोजनम्। इति सिद्धान्तरहस्यम्। ये उदयान्तरकर्म्मणा लङ्कायामौदयिका ग्रहा ज्ञातास्ते देशान्तरकर्म्मणा स्वपुरोदयिकाः स्युः। तच्च द्विविधं एकं पूर्व्वापरं द्वितीयं याम्योत्तरं तत्तरसंज्ञमुक्तम्। यथा,—
"येनैन लङ्कोदयकालिकास्ते
देशान्तरेण स्वपुरोदये स्युः।
देशान्तरं प्राग्यपरं तथान्यत्
याम्योत्तरं तत्तरसंज्ञमुक्तम्॥"
इति सिद्धान्तशिरोमणिः॥*॥
देशान्तरपरिभाषायां वृद्धमनुः।
"वाचो यत्र विभिद्यन्ते गिरिर्व्वा व्यवधायकः।
महान्तदन्तरं यत्र तद्देशान्तरमुच्यते॥

देश्यं
देशनामनदीभेदान्निकटोऽपि भवेद्यदि।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा॥
दशरात्रेण या वार्त्ता यत्र न श्रूयतेऽथवा॥
दृश्यतिः।
देशान्तरं वदन्त्येके षष्टियोजनमायतम्।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च॥"
इत्युद्वाहतत्त्वम्॥
"मुनिश्चयवचनोक्तवागादियोजनादिभेदसामञ्जस्यार्थं एवं व्याख्यायते त्रितयवेशिष्ट्ये त्रिंशद्योजनाभ्यन्तरे द्वितयवेशिष्ट्ये तदुपरि एकवेशिष्ट्ये चत्वारिंशद्योजनोपरि वाजीगिरिमहानदभ्यन्तरितत्वभेदाभावेऽपि षष्टियोजनोपरि वेदेश्यम्।" इति शुद्धितत्त्वमणिः॥

देशिकः, पुं, (देशे प्रसितः इति। देश + ठक्।) पथिकः। इति हेमचन्द्रः। ३। १५७॥ (यथा, महाभारते। ७। ५। १०।
"अदेशिको यथा सार्थः सर्व्वं दुःखं समश्नुते।
अनायका तथा सेना सर्व्वान्दोषान् समश्नुते॥")
गुरुः। यथा देशिको मूलमन्त्रेण इत्यागमः॥ (यथा, महाभारते। १३। १४७। ४२।
"धर्म्माणां देशिकः साक्षात् स भविष्यति धर्म्मभाक्।
धर्म्मविद्भिः सदैवेशो नमस्कार्य्यः सदोद्यतैः॥")

देशिनी, स्त्री, (दिशतीति। दिश् आदेशे + णिनिः। स्त्रियां ङीप्।) तर्ज्जनी। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। १६।
"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यं करस्य च।
प्रजापतितिपित्र्यदेवतीर्थान्यशुक्रमात्॥")

देशी, स्त्री, रागिणीविशेषः। इनूमन्मते दीपकरागस्य भार्य्या। अस्या जातिः षाड़वः ग्रहं ऋषभस्वरः गानसमयः श्रीग्रत्तौ मध्याह्नः। अस्याः स्वरूपं सुरूपा नारी हरिद्रसना अलङ्कृता यौवनमदेन कामासक्ता सती नायकस्यागारमागत्य निधुवनरता च। भरतमते तु मेघरागस्य पत्नी। सङ्गीतदर्पणमते हिन्दोलरागस्य भार्य्या। तस्या गानसमयः यामयुगलम्। तस्याः स्वरूपम्। निद्रायुक्तनयना आलस्ययुक्ता प्रियाभिमुखी नायकस्य निद्राभञ्जनार्थं मनोरञ्जनतानं गायन्ती रमणीक्रिया रचितवेशा। भूषणगणशोभिता गौराङ्गी परिहितहरिद्वर्णशाटिका। इति सङ्गीतशास्त्रम्॥ (सङ्गीतभेदः। यथा, सङ्गीतदर्पणे। १। ३—६।
"गीतं वाद्यं तथा नृत्तञ्च त्रयं सङ्गीतमुच्यते।
मार्गदेशी विभागेन सङ्गीतं द्विविधं मतम्॥
दक्षिणेन यदन्विष्टं प्रयुक्तं भरतेन च।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम्॥
तदृग्रहस्यया रीत्या यत् स्यात्लोकानुरञ्जनम्।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते॥")

देश्य, क्ली, (दिश्यते इति। दिश् + कर्म्मणि ण्यत्।) पूर्व्वपक्षः। इति शब्दरत्नावली॥ देशार्हे, त्रि॥ (देशे भवः। देश + "दिगादिभ्यो यत्।" ४।

३। ५४। इति यत्।) देशभवे। यथा, राजतरङ्गिण्याम्। ३। ६।
"भोगाय देश्यमिच्छूनां वल्लभास्याप्तप्रभा॥")
देशुः, त्रि, (ददातीति। दा+-"शादाभ्यामिण्णुच्।" उणां ३। १६। इति इण्णुच्।) दाता। दुर्दमः। इति हेमचन्द्रः॥ रजकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
देहः, पुं क्ली, (देग्धि प्रतिदिनम्। दिह् वृद्धौ+अच्।) शरीरम्। इत्यमरः। २। ६। ७१। न्यायमते पृथिव्या देहं योनिजम् अयोनिजञ्च। योनिजं जरायुजमण्डजञ्च। अयोनिजं स्वेदजोद्भिदादिकम्। नारकिणां शरीरमप्ययोनिजम्। जलीयं देहमयोनिजं वरुणलोके प्रसिद्धम्। तेजसं देहमयोनिजं सूर्य्यलोके प्रसिद्धम्। वायोर्देहमयोनिजं तदेव पिशाचादीनाम्। इति सिद्धान्तमुक्तावली॥ *॥
अथ नरकभोगदेहविवरणम्। तत्र यमं प्रति सावित्रीप्रश्नः।
"स्वदेहे भस्मसाद्भूते यान्ति लोकान्तरं नराः।
केन देहेन वा भोगं भुञ्जते च शुभाशुभम्॥
सुचिरं क्लेशभोगेन कथं देहो विनश्यति।
देहो वा किंविधो ब्रह्मन्! तन्मे व्याख्यातुमर्हसि॥"
यमस्योत्तरम्।
"शृणु देहविवरणं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्॥
देहिनां देहबीजञ्च सप्तः सृष्टिविधौ परम्।
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्॥
स क्षत्रियो नश्वरञ्च भस्मसाच्च भवेद्दिह॥
वृद्धाङ्गुष्ठप्रमाणञ्च यो जीवपुरुषः स्मृतः।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये।
जले न नष्टो देही वा प्रहारे सुचिरे कृते॥
न शस्त्रे च न चास्त्रे च न लौहशकटे तथा।
तप्तदवे तप्तलौहे तप्तपाषाण एव च॥
प्रतप्तप्रतिमास्थेऽप्यूर्द्धपतनेऽपि च।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च॥
कथितं देहवृत्तान्तकारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्तपुराणम्॥
ईश्वरदेहस्य प्रमाणं यथा,—
"यन्मे गुह्यतमं देहं सर्व्वगं तत्त्वदर्शिनः।
प्रविष्टा मम सायुज्यं लभन्ते योगिनोऽव्ययम्॥"
इति कूर्म्मपुराणम्॥
देहकोषः, पुं, (देहस्य कोष इव आवरकत्वात्।) पक्षः। इति शब्दचन्द्रिका॥ पाखा इति भाषा॥
देहक्षयः, पुं, (देहस्य क्षयो हानिर्यस्मात्।) रोगः। इति शब्दचन्द्रिका॥
देहदः, पुं, (देहं ददाति यद्वा दायति क्षतादेः शोधयतीति। दा दाने दैप शोधने वा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पारदः। इति राजनिर्घण्टः॥ (देहदातरि, त्रि॥)
देहदुर्गन्धता, स्त्री, (देहस्य दुर्गन्धता) शरीरदौर्गन्ध्यम् तन्नाशकौषधं यथा,—
"अर्जुनस्य च पुष्पाणि जम्बुपत्रयुतानि च।
सलोध्राणि च तक्रेपो देहदुर्गन्धतां हरेत्॥"
इति गारुडे १६४ अध्यायः॥
देहधारकं, क्ली क्ली, (देहं धारयतीति। धारि+"खुलृचौ।" १। ३। १३३। इति खुल्।) अस्थि। इति हेमचन्द्रः। ३। २६०॥
देहधिः, पुं, (देहो धीयते अस्मिन्निति। देह+धा+आधारे किः।) पक्षः। इति शब्दचन्द्रिका॥ पाखा इति भाषा॥
देहधृक्, [ञ्] पुं, (देहे धर्त्तरि सञ्चरतीति। धृञ्+क्विप्।) वायुः। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते। २। १।
"वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्॥")
देहभृत्, पुं, (देहं बिभर्त्तीति। देह+भृ+क्विप् तुगागमश्च।) जीवः। इति हेमचन्द्रः। ६। २॥ (यथा, रघौ। ८। ५१।
"धिगिमं देहभृतामसारताम्॥")
देहयात्रा, स्त्री, (देहस्य यात्रा लोकान्तरगमनम्।) यमपुरीगमनम्। मरणम्। (देहाय देहरक्षणाय या यात्रा उद्यमादिः।) भोजनम्। इति मेदिनी। रे, २६८॥ (यथा, भागवते। ४। २३। २०।
"अतीव भर्त्तुर्व्रतधर्म्मनिष्ठया
शुश्रूषया चारुदेहयात्रया।
नाविन्दतार्त्तिं परिकर्शितापि सा
प्रेयस्करस्पर्शनमाननिर्वृतिः॥")
देहला, स्त्री, (देहं लाति देहस्य पुष्टिं ददातीति। देह+ला+कः टाप्। सेवनेन प्रथमं पुष्टिवर्णादिप्रदानादस्यास्तथात्वम्।) मद्यम। इति शब्दचन्द्रिका॥
देहलिः, पुं, (देह+भावे घञ्। देहो लेपस्तं लाति गृह्णातीति। देह+ला+बाहुलकात् किः।) देहली। इति शब्दरत्नावली॥
देहली, स्त्री, (देहं लेपं लातीति। देह+ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। गौरादित्वात् ङीष्।) गृहावयवभेदौ। इत्यमरः। २। २। १३॥ द्वारप्रिक्किका। द्वारावयवभेदः। इति केचित्॥ द्वातिना इति ख्याता इति केचित्॥ अथ उडुम्बरम्। तत्पुष्पिलाया अधोदारुपाषाणो वा। इति स्वामी॥ इत्यमरटीकायां भरतः॥ (यथा, मेघदूते। ८०।
"श्रेयान् मासान् गमनदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः॥")
देहसारः, पुं, (देहस्य सारः।) मज्जा। इति राजनिर्घण्टः॥
देहात्मवादी, [न्] त्रि, (देहमेवात्मानं परब्रह्म वदतीति। वद्+णिनिः।) चार्व्वाकः। तस्येदं मतम्। शरीरमेवात्मा प्रज्वलितत्वहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहमित्यनुभवाच्च। अत्र प्रमाणम्। देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताः। इति शारीरिकसूत्रभाष्यम्॥
अपि च।
"आत्मास्ति देहाद्व्यतिरिक्तभूर्त्ति-
र्भोक्ता स लोकान्तरितः फलानाम्।
आम्रेयमाकाम्रतरोः प्रसूनात्
प्रथीयसः स्वादुफलप्रसूतौ॥"
इति प्रबोधचन्द्रोदयः॥
देहिका, स्त्री, (देग्धीति। दिह् वृद्धौ+ण्वुल्। टापि अत इत्वम्।) कौटविशेषः। तत्पर्य्यायः। वटिः २ उपादिकः ३। इति त्रिकाण्डशेषः॥ उपजिक्किका ४ उत्पादिका ५ उद्देहिका ६ दिवी ७। इति हारावली॥
देही, [न्] (देहोऽस्यस्येति। देह+इनिः।) शरीरी। प्राणी। अस्य गुणा यथा,—
"बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा।
धर्म्माधर्म्मौ गुणा एते आत्मनः सुखचतुर्थ॥"
अयं इन्द्रियाद्यधिष्ठाता पुण्यपापाश्रयः। ज्ञानसुखादियोगतो मानसप्रत्यक्षविषयः। परदेहादौ प्रवृत्त्यादिनानुमेयः। अहमित्याकारप्रत्ययाश्रयः। मनोमात्रस्य गोचरः। विभुः परममहत्त्ववान्। इति भाषापरिच्छेदः॥
तथा च। श्रीभगवद्गीतायाम्।
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत!।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"
अपि च।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥"
दे, प शोधने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) पित्त्वादासंज्ञाभावे यगादौ दायते इत्यादि। शोधनमिह शुद्धीकरणम्। दायति ताम्रमम्लेन लोकः। अवपूर्ब्बः शुद्धौ भावे (अच अकर्म्मकः।) श्निद्यते श्यतते शौचि स्युः शुक्लत्वेऽवदायते। इति भट्टमल्लः। इति दुर्गादासः।
दैतेयः, पुं, (दितेरपत्यं पुमान्। दिति+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) दैत्यः। इत्यमरः। १। १। १२॥ (यथा, हरिवंशे। १८२। ७६।
"जय वार्य्य महाबाहो! दैतेयं देवपूजित!।
यदर्थमवतीर्णोऽसि तत् कर्म्म सफलीकुरु॥")
दैत्यः, पुं, दितेरपत्यं ("दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।" ४। १। ८५। इति ण्यः।) असुरः। इत्यमरः। १। १। १२॥ (यथा, मनुः। १२। ४८।
"तापसा यतयो विप्रा ये च वैमानिका गणाः।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः॥")
दितिसम्बन्धिनि, त्रि॥
दैत्यगुरुः, पुं, (दैत्यानां गुरुः।) शुक्रः। इत्यमरः। १। ३। २५॥ (यथा, बृहत्संहितायाम्। १०४। ३४।
"आङ्गार्थमानास्यदभूतिवक्त्र-
ग्रन्थुक्षयान् दैत्यगुरुस्तुतीये॥")
दैत्यदेवः, पुं, (दैत्यानां देवः।) वरुणः। इति त्रिकाण्डशेषः॥ वायुः। इति हेमचन्द्रः। ४। १७१

दैत्यनिसूदनः, पुं, (निसूदयतीति । नि+सूदि+ल्युः । दैत्यानां निसूदनः नाशकः ।) विष्णुः । इति पुराणम् ॥

दैत्यपुरोधाः, [स्] पुं, (दैत्यानां पुरोधाः पुरोहितः ।) शुक्रः । इति हारावली । ३६ ॥

दैत्यमाता, [तृ] स्त्री, (दैत्यानां माता ।) दितिः । इति त्रिकाण्डशेषः ॥ (दैत्यमात्रमात्रम् । यथा, हरिवंशे । १६६ । १२ ।
"अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः ॥") दैत्यपरिमाणकर्त्तरि, त्रि ॥

दैत्यमेदजः, पुं, (दैत्यमेदात् जायते इति । दैत्यमेद+जन्+डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ एथिव्याम्, स्त्री । मधुकैटभमेदजातत्वात् ॥

दैत्ययुगं, क्ली, (दैत्यानां युगम् ।) दैत्यानां युगविशेषः । तत् दैवपरिमाणेन द्वादशसहस्रवर्षाणि । मनुष्यमानेन चतुर्युगसंख्यम् । इति शब्दार्थकल्पतरुः ॥

दैत्या, स्त्री, (दितेरियमिति यत् । ततष्टाप् ।) सुरागामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२३ ॥ चक्रौषधिः । इति मेदिनी । ये, ३२ ॥ मद्यम् । इति त्रिकाण्डशेषः ॥ दैत्यभार्य्या च ॥

दैत्यारिः, पुं, (दैत्यानामरिः ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, प्रबोधचन्द्रोदये । २ । २८ ।
"दैत्यारिः कमलाकपोलमकरीलेखाङ्कितोरःस्थलः ।
श्रीतैरश्रावितरेषु जन्तुषु पुनः का नाम श्रान्तेः कथा ॥")
देवता । इति मेदिनी । रे, १७० ॥

दैत्याहोरात्रः, पुं, (दैत्यानामहोरात्रः ।) दैत्यानां दिवानिशम् । स मनुष्यमानेन वर्षैकसंख्यः । इति शब्दार्थकल्पतरुः ॥

दैनं, क्ली, (दीनस्य भावः । अण् ।) दीनता । (दिनस्य दिवसस्य इदम् । दिन+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दिनसम्बन्धिनि, त्रि ॥

दैनन्दिनं, त्रि, (दिनं दिनं भवं इत्यच् निपातनात् साधुः ।) दिनेदिने भवम् । (यथा, भागवते । ३ । १९ । २६ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥") स्वार्थेऽण् प्रतिदिनम् । इति निपातनसाध्यम् ॥

दैनन्दिनप्रलयः, पुं, (दैनन्दिनश्चासौ प्रलयश्चेति कर्म्मधारयः ।) प्रलयविशेषः । यथा,—
"चतुर्दशेन्द्रावच्छिन्ने ब्रह्मणो दिनमुच्यते ।
तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ! ॥
कालरात्रिश्च सा ज्ञेया वेदेषु परिकीर्त्तिता ।
इदं सप्रकल्पजीवी मार्कण्डेयो महातपाः ॥
ब्रह्मलोकादधः सर्व्वे लोका दग्धाश्च तत्र वै ।
उत्पतितेनैव सहसा सङ्घर्षसुखार्त्तिना ॥
चन्द्रार्कमण्डलपुटाश्च ब्रह्मलोकं गता द्रुतम् ।
ब्रह्मरात्रे व्यतीते तु पुनश्च सृष्टजे विधिः ॥
तस्य ब्राह्मीनिशायाश्च क्षुद्रप्रलय उच्यते ।
देवाश्च मुनयश्चैव तत्र दग्धा नरादयः ॥
एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च ।
वर्षं द्वादशमासैश्च ब्रह्मसम्मित एव हि ॥
एवं पञ्चदशाब्दे च गते च ब्रह्मणो नृप ! ।
दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्त्तितः ॥
अहो रात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः ।
तत्र सर्व्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः ॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः ॥
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पैप्पलश्चिरजीविनः ।
इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः ।
नाड़ीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा ।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादयस्तथा ॥
गते दैनन्दिने ब्रह्मा लोकांश्च सकलान् पुनः ।
एवं शतायुःपर्य्यन्तं परमायुश्च ब्रह्मणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैनारं, त्रि, दीनारमितमर्घ्यजातवस्तु । दीनारे भवं दीनारखैदं वेति (अण्) ण्यप्रत्ययः ॥

दैनिकी, स्त्री, (दिने भवः । दिन+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् । गौरादित्वात् ङीष् ।) दिनभृतिः । एकदिनकर्म्ममूल्यम् । इति शब्दमाला ॥ (दिनभवे, त्रि ॥)

दैन्यं, क्ली, (दीनस्य भावः । दीन+ष्यञ् ।) कार्पण्यम् । इति हेमचन्द्रः । २ । २३३ ॥ दीनता । यथा, मार्कण्डेयपुराणे ।
"याच्ञादैन्यपराणि यस्य कलाहायन्ते मित्रस्वं दृश
त्वं दुःखिन्यभितो सुखानि स दृशग्रीवः कथं कथ्यताम् ॥"
इति सुरारिमिश्रः ॥
(अलङ्कारोक्तव्यभिचारिगुणभेदः । यथा, साहित्यदर्पणे । ३ । १४१ ।
"दौर्गत्याद्वैरनैर्लज्जं दैन्यं मलिनतादिकृत् ॥")

दैर्घं, त्रि, दीर्घसम्बन्धि । दीर्घस्येदमित्यर्थे (अण्) ण्यप्रत्ययः ॥

दैर्घ्यं, क्ली, (दीर्घस्य भावः । दीर्घ+ष्यञ् ।) दीर्घत्वम् । तत्पर्य्यायः । आयामः २ । आरोहः ३ । इत्यमरः । २ । ६ । ११४ ॥ आरोहस्थाने आनाह इति भरतः ॥ (यथा, सुश्रुतसंहितायाम् । ११ । ३३ ।
"अपरस्यां चलकेतुः
ग्रिवया याम्यगयाङ्गुलोच्छ्रितया ।
गच्छेद्यथा यथोदक्
तथा तथा दैर्घ्यमायाति ॥")

दैलीपिः, पुं, दिलीपराजपुत्रो रघुः । दिलीपस्यापत्यमिति ञिप्रत्ययः (इञ्) ॥

दैवं, क्ली, (दैवस्येदम् । दैव+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दैवतीर्थम् । तत् दक्षिणहस्ताङ्गुल्यग्रवर्त्ति । इत्यमरः । २ । ७ । ५१ ॥ (यथा, मनुः । २ । ५६ ।
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥")

दैवसम्बन्धिनि, त्रि । यथा,—
"प्रमीतौ पितरौ यस्य देहस्तस्यापशुर्भवेत् ।
यावद्दैवं न वा पित्र्यं यावत् पूर्णं न वत्सरः ॥"
इति शुद्धितत्त्वम् ॥

विवाहविशेषे, पुं । इत्युद्वाहतत्त्वम् ॥ अस्य विवरणं उद्वाहशब्दे द्रष्टव्यम् । (दिवि भवः । दिव्+अण् ।) दिविभवे, त्रि ॥

दैवं, क्ली, पुं, (दैवात् नियतादागतम् । देव+अण् ।) भाग्यम् । इत्यमरः । १ । १ । २८ ॥
"दैवाधीनं जगत् सर्व्वं जन्मकर्म्मसुभाशुभम् ।
संयोगाश्च वियोगाश्च न च दैवात् परं बलम् ॥
क्षणायात्तश्च तद्दैवं स दैवात् परतस्ततः ।
भजन्ति सततं सन्तः परमात्मानमीश्वरम् ॥
दैवं बहुयितुं शक्तः स्वयं कर्त्तुं स्वलीलया ।
न दैवबहुस्तद्भक्तश्चाविनाशी च निर्गुणः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
मनुरुवाच ।
"दैवे पुरुषकारे च किं व्यायस्तद्ब्रवीतु मे ।
अत्र मे संशयो देव ! छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलं यथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यसत्यानशीलिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेय विना तेषां कैश्चिदृष्टयते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवेन सफलं भवेत् ।
पौरुषं दैवसम्पन्नं काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
चयमेव मनुष्यस्य सिद्धिकृत् स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलसिद्धयः ।
तासु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं बुधैः ।
एवन्ते प्राप्नुवन्तीह परलोके फलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सदैव यत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्तालसान्दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नादुपयाति भूपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मत्स्यपुराणे १९५ अध्यायः ॥

दैवकी, स्त्री, (देवकी एव । स्वार्थे अण् । ततो ङीष् ।) कृष्णमाता । वसुदेवपत्नी । इति श्रीभागवतम् ॥

दैवकीनन्दनः, पुं, (दैवक्याः नन्दनः पुत्रः ।) श्रीकृष्णः । इत्यमरः । १ । १ । २१ ॥ (यथा, पाद्मोत्तरखण्डे १९९ अध्याये ।
"दैवकीनन्दनः श्यामः श्रीश्यामाप्राणवल्लभः ॥")

दैवकोविदा, स्त्री, (दैवे दैवनिमित्तशुभाशुभज्ञाने कोविदा विज्ञा।) दैवज्ञा। इति शब्दरत्नावली॥ दैवपण्डिते, त्रि॥

दैवज्ञः, त्रि, (दैवं जानातीति। ज्ञा+कः।) गणकः। इत्यमरः। २।८।१४॥ (यथा, देवीभागवते। १। २०। ३४।

"दैवज्ञान् वेदविदुषः पर्य्यपृच्छत्क्षमं दिनम्॥") अस्योत्पत्तिर्यथा, देवज्ञाह्मणधनापहारी धूमान्धनरकं भुक्त्वा शतजन्मसु धिक-नानाविधपक्षिक्रमिदृक्षभार्य्यावंशहीनत्वाधियुतश्चरस्वर्णकारसुवर्णवणिग्यवनसेविविप्रब्राह्मणगणका भूत्वा दैवज्ञो गणनोपजीविविप्रो भवति॥ *॥

अपि च।

"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः।
स याति नागवेश्म नागैर्वेष्टित एव च॥
वसेत् स्वलोममानाब्दं तत्रैव नागदंशितः।
ततो भवेत् स गणको वेदज्ञश्च सप्तजन्मसु॥
गोपश्च चर्म्मकारश्च रङ्गकारस्तथा शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

दैवज्ञा, स्त्री, (दैवं जानातीति। ज्ञा+कः। ततष्टाप्।) दैवज्ञभार्य्या। प्रश्नादिना शुभाशुभज्ञा। लक्षणादिना शुभाशुभनिरूपिणी। तत्पर्य्यायः। विप्रस्त्रिका २ ईक्षणिका ३। इत्यमरः। २।६।२०॥

दैवतः, पुं क्ली, (देवता एव। स्वार्थे अण्।) देवता। इत्यमरः। १। २। ६॥ (यथा, रामायणे। २। ५०। २।

"आपृच्छे त्वां पुरश्रेष्ठे! काकुत्स्थपरिपालिते!।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च॥"

दैवतानां समूहः। देवता+अण्।) देवतासमूहे, क्ली। (देवतायाः इदम्। अण्।) देवसम्बन्धिनि, त्रि॥

दैवदीपः, पुं, (दैवः सूर्य्याधिष्ठाढको दीपः। दर्शनेन्द्रियस्य सूर्य्याधिष्ठाढत्वात्तथात्वम्।) चक्षुः। इति त्रिकाण्डशेषः॥ दैवसम्बन्धिप्रदीपश्च॥

दैवपरः, त्रि, (दैवमेव परं प्रधानं यस्य।) दैवनिष्ठः। तत्पर्य्यायः। यज्ञविघ्नः २। इति हेमचन्द्रः। ३। ४७॥ (यथा, मार्कण्डेये। ४३।८८।

"सार्द्धं न बलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः।
न सर्व्वशङ्किभिर्नित्यं न च दैवपरैर्नरैः।
कुर्व्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः॥")

दैवप्रश्नः, पुं, (दैवे दैवनिमित्तशुभाशुभविषये यः प्रश्नः।) प्राक्तनशुभाशुभकर्म्मजिज्ञासा। तत्पर्य्यायः। उपश्रुतिः २। इति त्रिकाण्डशेषः॥ (दैववाणी। यदुक्तं हारावल्याम्। २२।

"नक्तं निर्गत्य यत्किञ्चित् शुभाशुभकरं वचः।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्॥")

दैवयुगं, क्ली, (दैवं देवसम्बन्धि युगम्।) देवानां युगम्। तच्च देवमानेन द्वादशसहस्रवर्षम्। मनुष्यपरिमाणेन चतुर्युगमानम्। इति शब्दार्थकल्पतरुः॥ (यदुक्तं मनौ। १। ७१।

"यदेतत् परिसंख्यातमादावेव चतुर्युगम्।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते॥")

दैवलकः, पुं, (देवल इव कायतीति। कै+कः। ततः स्वार्थे अण्।) भौतः। भूतसेवकः। इति हारावली। १५०॥ देवलसम्बन्धिनि, त्रि॥

दैवलेखकः, पुं, (दैवं दैवनिमित्तशुभाशुभं लिखतीति। लिख+ण्वुल्।) मौकूर्त्तः। गणकः। इति त्रिकाण्डशेषः॥

दैववाणी, स्त्री, (दैवी आकाशसम्बन्धिनी वाणी।) आकाशवाणी। अमानुषी वाक्। तत्पर्य्यायः। चित्तोक्तिः २ पुष्पशुकटी ३ दैवप्रश्नः ४ उपश्रुतिः ५। इति त्रिकाण्डशेषः॥ संस्कृतवाक्यम्। यथा, दक्षौ।

"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः॥"

"गीर्वाणवाणीवदनं सुकुन्द-
संकीर्त्तनश्चेत्युभयं हि लोके।
सुदुर्लभं तच्च न सुग्धबोधा-
न्न लभ्यतेऽतः पठनीयमेतत्॥"

इति बोपदेवः॥

दैवाकरिः, पुं, (दिवाकरस्य अपत्यं पुमान्। दिवाकर+इञ्।) मुनिः। यमः। यमुनायां, स्त्री। एतेषामुदाहरणं यथा,—

"सम्प्रति दैवाकरिताः पारमिताहरितारुणकरिताः।
नायं कोऽपि विशेषः स्वाहितराश्विवशात्तनुशेषः॥"

इति काव्योदयधृतसङ्गीतकम्॥

दैवात्, अ, हठात्। यथा, "दैवादपाङ्गबलनं किल मानवत्याः।" इति काव्योदयः॥

दैवाहोरात्रः, पुं, (दैवः देवसम्बन्धी अहोरात्रः।) देवानामेकदिवसः। स मनुष्याणां संवत्सरः। इति शब्दार्थकल्पतरुः॥

दैविकः, त्रि, (दैवस्य अयं दैवे भवो वा। दैव+ठक्।) देवसम्बन्धी। (यथा, मनुः। १। ६५।

"अहोरात्रे विभजते सूर्य्यो मानुषदैविके।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः॥")

दैवे भवः। इति व्याकरणम्॥

दैवी, स्त्री, (दैवस्य इयम्। दैव+अण् अञ् वा। ततो ङीप्।) देवसम्बन्धिनी। यथा,—

"ब्रह्मोपास्यमिति स्फुरत्यपि हृदि यावत्तिका वासना
का नामेयमतर्क्यसेतुगहना देवी सतां यातना।"

इति भ्रान्तिशतके। ७॥

चिकित्साविशेषः। यथा, वैद्यके।

"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता॥"

दैव्यं, क्ली, (दैवस्य इदम्। "देवाद्यञञौ।" ४। १। ८५। इत्यस्य वार्त्तिकोक्त्या यञ्।) दैवम्। भाग्यम्। इत्यमरटीकायां भरतः॥ (देवसम्बद्धे, त्रि। यथा, ऋग्वेदे। २। ३०। ११।

"तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम्॥")

दैशिकं, त्रि, (देशे भवं देशस्य इदं वा। देश+ठञ्।) देशसम्बन्धि। भवार्थे ष्ठिकप्रत्ययेन सिद्धम्। सम्बन्धविशेषः। यथा। कालभावयोः सप्तमीति सूत्रं भाष्ये। सत्त्वं तच्च द्विविधं कालिकं दैशिकञ्चेति कारकचक्रे भवानन्दसिद्धान्तवागीशः॥ देशनिष्ठविशेषणता। इति नैयायिकाः॥

दैष्टिकः, पुं, दिष्टेन भवः। (दिष्ट+ठक्।) भाग्याधीनजातः। कालेन जातः। इति व्याकरणम्॥ (दिष्टं भागधेयमिति मतिर्यस्य। "अस्ति नास्ति दिष्टं मतिः।" ४। ४। ६०। इति ठक्। देवपरः। इति सिद्धान्तकौमुदी॥)

दैहिकं, त्रि, (देहस्य इदं देहे भवं वा। देह+ठञ्।) देहसम्बन्धि। यथा,—

"भीरूणां भैरवाणां भवति सुविहिता दैहिकी गोपितार्त्ता।"

इति कूर्च्चिकातन्त्रेऽन्त्यागः॥

दो, य छेदे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) यः, शिरोऽवयवति विद्विषां यः। इति दुर्गादासः॥

दोः, [स्] पुं, (दाम्यत्यनेनेति। दम उपशमे+"दमेर्डोसिः।" उणां २। ६६। इति डोसिः।) बाहुः। इत्यमरः। २। ६। ८०॥ (यथा, अनर्घराघवे। २। ४४।

"दातव्येयमवश्यमेव दुहिता कस्मैचिदेनामसौ
दोर्लीलामहणीकृतत्रिभुवनो लङ्केश्वरो याचते॥")

दोःशिखरं, क्ली, (दोष्णः शिखरम्।) स्कन्धः। इति राजनिर्घण्टः॥

दोःसहस्रभृत्, पुं, (दोःसहस्रं बाहुसहस्रं बिभर्त्तीति। भृ+क्विप्।) कार्त्तवीर्य्यार्জ্জुनः। इति हेमचन्द्रः। ३। ३६६॥ राजराजा च॥

दोग्धृ, [ऋ] पुं, (दोग्धीति। दुह+तृच्।) अर्थोपजीविकविः। वत्सः। गोपालः। इति मेदिनी। धे, ८॥ दोहनकर्त्तरि, त्रि॥ (यथा, कुमारे। १। २।

"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे॥")

दोग्ध्री, स्त्री, (दोग्धृ+ङीप्।) गौः। इति राजनिर्घण्टः॥ (यथा, रघुः। २। २३।

"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छ्रिम्भरिपुर्निषण्णाम्॥")

दोदुल्यमानः, त्रि, (दुल+यङ्+शानच्।) पुनः-पुनरतिशयेन वा दोलनविशिष्टः। इति व्याकरणम्॥

दोघः, पुं, (दोग्धीति। दुह+क्यच्। निपातनात् साधुः।) गोवत्सः। यथा,—

"देव सदोधकदम्बतलस्थ-
श्रीधर तारकनामपदं मे।
कण्ठतलेऽसुविनिर्गमकाले
स्वल्पमपि क्षणमेष्यति योगम्॥"

इति छन्दोमञ्जरी॥

दोधकः, पुं, छन्दोविशेषः। यथा, श्रुतबोधे।

"आद्यचतुर्थमहीनतमत्वे
सप्तमकं दशमञ्च तथान्त्यम्।

यत्र गुरु प्रकटसररागे
तत् कथितं तव दोधकवृत्तम् ॥"

दोधयमानः त्रि, (पुनः पुनरतिशयेन वा धूयते। धु कम्पने + "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।" ३।१।२२। इति यङ्। "गुणो यङ्लुकोः।" ७। ४। ८२। इति अभ्यासस्य गुणः। ततः अभ्यासस्रञ्चाद्यनुसारेण दोधूयधातुः। यङन्तत्वादात्मनेपदम्। ततः शानच्।) पुनः-पुनरतिशयेन वा कम्पविशिष्टः। यथा,—

"नभस्वदासङ्गभयेव साध्वी
दोधयमाना वडभीपताका।"

इति शब्दमञ्जरी ॥

"प्रलयेऽपि दोधूयमानाः परमाणवः तिष्ठन्ति।"

इति शिरोमणिः ॥

दोरकः पुं, (डोरक + निपातनात् डस्य दः।) कौशातन्तुबन्धनरज्जुः। इति शब्दार्थकल्पतरुः ॥

दोर्गडुः, पुं, (दोषा बाहुना गडुः कुक्षितः।) कुक्षितहस्तः। तत्पर्य्यायः। कुन्यः २ बाहुकुण्ठः ३। इति जटाधरः ॥

दोर्ग्रहः, त्रि, (दोर्गृह्यते अनेनेति। ग्रह + करणे वन्।) बलवान्। तत्पर्य्यायः। कैरातः २ शाम्भः ३। इति हारावली। १२७ ॥ (दोष्णो ग्रहः।) भुजस्य ग्रहणं तस्य यथा च ॥

दोर्दण्डः, पुं, (दोर्दण्ड इव।) बाहुरूपदण्डः। यथा। "दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम्।" इत्युद्भटः ॥

दोर्मध्यं, क्ली, (दोष्णो मध्यम्।) बाहुमध्यभागः। इति शब्दार्थकल्पतरुः ॥ बाहु इति भाषा ॥

दोर्मूलं, क्ली, (दोष्णो मूलम्।) कक्षः। बगल इति भाषा। तत्पर्य्यायः। भुजकोटरः २ खण्डिकः ३ कक्षा ४। इति हेमचन्द्रः। ३। २५३ ॥

दोलः, पुं, दोलनम्। दुलधातोर्भावे घञ्प्रत्ययेन निष्पन्नः। (दोल्यते अस्मिन् क्षणेनेति। दोलि + अधिकरणे घञ्।) श्रीकृष्णस्य यात्राविशेषः। अस्य प्रमाणं यथा, पाद्मे पातालखण्डे।

"विशेषतः कलियुगे दोलोत्सवो विधीयते।
फाल्गुने च चतुर्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ।
पूजयेद्विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्विधैः ॥
सिन्दूरकुङ्कुमैर्गौरपीतैः कर्पूरादिविमिश्रितैः।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम्।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्र्याहानि स्युर्दोलोत्सवो विधीयते।
दक्षिणाभिमुखं कृष्णं दोलयानं सहोदराः ॥
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥"

अपि च।

जैमिनिरुवाच।

"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै ॥
प्रत्यक्षं देवदेवस्य गोविन्दास्यान्तु कारयेत्।
प्रासादं पुरतः कुर्य्यात् षोड़शस्तम्भसुश्छितम् ॥
चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम्।
चारुचन्द्रातपं माल्यचामरध्वजशोभितम् ॥
भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्म्मितम्।
फल्गूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्याहाणि वा ॥
फाल्गुन्याः पूर्व्वतो विप्रास्तुर्द्दश्यां निशामुखे।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः ॥
एतत् सर्व्वं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः।
गोविन्दागुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम् ॥
आचार्य्यवरणं कृत्वा वह्निं निर्म्मथनोद्भवम्।
भूमिं संस्कृत्य विधिवत् तत्रराग्निं सन्धुक्षितम् ॥
सपर्य्यां कारयित्वा तु वह्निं तत्र विनिक्षिपेत्।
पूजयित्वा विधानेन कुशाण्डविधिना हुनेत् ॥
गोविन्दं पूजयित्वा तु भ्रामयेत् सप्त तं विभुम्।
तस्मिन् काले हरिं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥
यत्रास्तं रचयेद्वह्निं यावद्यात्रा समाप्यते ॥*॥
प्रान्तयामे चतुर्द्दश्यां गोविन्दप्रतिमां शुभाम् ॥
वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम्।
उपचारावशिष्टैस्तु प्रत्यहं तामपि पूजयेत् ॥
ततो वरञ्च वसनं मालाञ्च द्विजसत्तमाः।
अर्च्चायां विन्यसेन्मन्त्रं परं ज्योतिर्विभावयन् ॥
ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः।
रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम् ॥
नानातूर्य्यनिनादैश्च शङ्खध्वनिपुरःसरम्।
जयशब्दैस्तथा स्तोत्रैः पुण्यदृष्टिभिरेव च ॥
छत्रध्वजपताकाभिश्चामरव्यजनैस्तथा।
निरन्तरं दीपिकाभिस्तथा कुर्य्याच्छोभोत्सवम् ॥
आगच्छन्ति तदा देवाः पितामहपुरोगमाः।
द्रष्टुन्दधिगणैः सार्द्धं गोविन्दस्य महोत्सवम् ॥
भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः ॥
महास्नानस्य विधिना स्नपनं तस्य कारयेत्।
पञ्चाश्चतैश्च सर्व्वैर्वै तेषामन्यतमेन वा।
स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत् ॥
संप्रोक्ष्य भूषयेद्देवं वस्त्रालङ्कारमाल्यकैः।
नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत् ॥
सप्तप्रदक्षिणं देवं दोलमञ्चमानयेत्।
सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः ॥
अधोदेशे मण्डपं तं सप्तधा भ्रामयेत्ततः।
ऊर्द्ध्वदेशे पुनः सप्तस्तम्भवेद्यान्तु सप्त वै ॥
यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम्।
इयं लीला भगवतः पितामहसुखेरिता ॥
राजर्षिशेखरतुल्येन कारिता पूर्व्वमेव हि।
फलपुष्पावनम्रैश्च शाखाभिः परिकल्पिते ॥
वृन्दावनान्तरे रम्ये मत्तसारसवारिणि।
कोकिलारावमधुरे नानापक्षिगणाकुले ॥
नानोपग्रोभारचिते कालागुरुसुधूपिते।
प्रफुल्लकेतकीषण्डगन्धामोदि-दिगन्तरे ॥
मल्लिकाशोकपुन्नागचम्पकैरुपशोभिते।
तन्मध्यनानान्तर्घटिते मण्डपे चारुतोरणे ॥
भूषिते माल्यवसनचामरैरुपशोभिते।
रत्नखट्वान्दोलिकायां तन्मध्ये वासयेत् प्रभुम् ॥
अनर्घ्यरत्नघटितकुण्डलोद्भासितश्रुतिम्।
यथास्थानं यथाशोभं दिव्यालङ्काररञ्जनम् ॥
विकचाम्बुजमध्यस्थं विश्वधात्रा श्रिया युतम्।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
सुप्रसन्नं सुनासाभ्रूपीनवक्षःस्थलोज्ज्वलम्।
पुरो योगस्थितैर्देवैर्ब्रह्माद्यैर्नतकन्धरैः ॥
कृताञ्जलिपुटैर्भक्त्या जयशब्दैरभिष्टुतम्।
गन्धर्व्वैरप्सरोभिश्च किन्नरैः सिद्धचारणैः ॥
हाहाहूहूप्रभृतिभिः सत्वरं दिव्यगायनैः।
अग्रपूर्व्विकया वृत्यगीतवादित्रकारिभिः ॥
नेत्राम्बुजसहस्रैश्च पूज्यमानं सुदान्वितैः।
विकिरद्भिः सर्व्वदिक्षु गन्धचन्दनजं रजः ॥
उपवेश्याथ गोविन्दं पूजयेदुपचारकैः।
वल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम् ॥
भावहास्यविलासैश्च क्रीड़मानं वनान्तरे।
गोपीभिश्चैव गोपालैर्लीलान्दोलिकया नगम् ॥
चिन्तयित्वा जगन्नाथं विकिरेन्नन्दचूर्णकैः।
सकर्पूरै रक्तपीतसुक्लैर्दिव्यैस्तु सन्नतः ॥
दिव्यैर्वस्त्रैर्दिव्यमाल्यैर्दिव्यगन्धैः सुधूपकैः।
चामरान्दोलनैर्गानैः स्तुतिभिश्च समर्चितम् ॥
आन्दोलयेत् दोलिकास्थं सप्तवारान् मुनेः मुनेः।
तदा पश्यन्ति ये कृष्णं मुक्तिस्तेषां न संशयः ॥
ब्रह्महत्यादिपापानां पञ्चानां संक्षयो भवेत्।
त्रिवारं दोलयेद्देवं सर्व्वपापापनोदनम् ॥
भक्तानुग्रहकं पुंसां मुक्तिमुक्तिप्रकाशकम्।
लीलाविचेष्टितं यस्य कृत्रिमं सहजं यथा ॥
अंहःसंघक्षयकरं मूलाविद्यानिवर्त्तकम्।
पश्यन् द्वितीयं हरति गोहत्यादुपपातकम् ॥
त्रिगुणेत्यग्नेषपापानि तृतीयं नात्र संशयः।
दृष्ट्वा दोलास्थितं देवं सर्व्वपापैः प्रमुच्यते ॥
आध्यात्मिकैराधिदैवैराधिभूतैर्विमुच्यते।
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृपः ॥
ब्राह्मणस्तु चतुर्व्वेदी ज्ञानवान् जायते ध्रुवम् ॥"

इति स्कान्दे उत्कलखण्डे ४२ अध्यायः ॥*॥

तस्य संक्षेपव्यवस्था यथा,—यदा अरुणोदयकाले पौर्णमासीलाभस्तत्रैव दोलयात्रा। उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्व्वदिने। सङ्गवमध्याह्नकालव्यापित्वात् त्रिमुहूर्त्तव्यापित्वेन तिथेर्बलवत्त्वाच्च। यदा तिथिक्षयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सहायभावेन चतुर्द्दश्यादयः। एतेन पूर्व्वदिने अरुणोदयं विना पूर्व्वाह्णे पौर्णमासीलाभः परदिने सुहूर्त्तान्यूनतिथिलाभस्तदा फल्गूत्सवः पूर्व्वदिने युग्मवचनानुरोधादिति शिरस्थम्। उभयदिने कर्म्मयोग्यप्रशस्तकालप्राप्तितिथिसन्देह एव युग्मवचनप्रवृत्तेः। एवं पञ्चमीपर्य्यन्तासु तिथिषु तत्करणे अन्यथैव दिशा व्यवस्थोन्नेयेति। इति दोलयात्रातत्त्वम् ॥*॥

चैत्रे मासि दोलस्य प्रमाणं गारुड़े।

"चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम्।
दोलारूढ़ं समभ्यर्च्च मासमान्दोलयेत् कली ॥"

तन्निन्दया च पद्मपुराणे।

"ऊर्ज्जे रथं मधौ दोलां श्रावणे तन्तु पर्व्व च।
चैत्रे मदनकारोपमकुर्व्वाणो व्रजत्यधः ॥

विष्णुं दोलास्थितं दृष्ट्वा त्रैलोक्यस्योत्सवो भवेत्।
तस्मात् कार्य्यव्रतं त्यक्त्वा दोलाहे उत्सवं कुरु॥"

अथ दोलोत्सवविधिः।

"चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च।
नित्यपूजां विधायाथ कुर्य्याद्दोलोत्सवं व्रती॥
तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत्।
संमान्य वैष्णवांस्तेभ्य गीतवृत्यादि कारयेत्॥
महानीराजनं कृत्वा प्रक्षिपेदच्युतोपरि।
गन्धानुलेपचूर्णानि विचित्राणि विभागशः॥
सन्तोष्य वैष्णवांस्तेभ्य गीतवृत्यादिभिः प्रभुम्।
नत्वाभ्यर्च्याप्रमत्तः सन् दोलामारोहयेच्छुभाम्॥
नीत्वा बहिर्व्रेदिकायासुत्तुङ्गायां यथाविधि।
अभ्यर्च्यान्दोलयेत् कृष्णं सर्व्वलोकावलोकितम्॥
एवमभ्यर्चयन् यामे यामे त्वान्दोलयन् प्रभुम्।
महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः॥
एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः।
प्रणम्य प्रार्थ्य निर्म्मल्यं कृष्णं स्वालयमानयेत्॥
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम्।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ॥
यत् फाल्गुनस्य राकादावुत्तराफाल्गुनी यदा।
तदा दोलोत्सवः कार्य्यस्तत्र श्रीपुरुषोत्तमे॥"

इति हरिभक्तिविलासः॥

दोला, स्त्री, नीलिनी। दोल्यते अस्यामिति। दोलि+घञ्+टाप्, उद्यानादिषु क्रीड़ार्थं काष्ठादिमयो हिन्दोलकः, हिँदला इति भाषा। वाह्यखट्वा। डुली इति भाषा। तत्पर्य्यायः। प्रेङ्खा २। इत्यमरः। २। ८। ५३॥ दोली ३ खट्वाला ४ दोलिका ५। इति शब्दरत्नावली॥ प्रेङ्खः ६। इति भरतधृतरत्नकोषः॥ हिन्दोला ७। इति हारावली। २१४॥ (यथा, महाभारते। ३। ६२। २७।

"द्विधैव हृदयं तस्य दुःखितस्याभवत् तदा।
दोलेव सुहृदायाति याति चैव सभां प्रति॥")

दोलाद्वाराभ्रमणगुणः। वातकोपनत्वम्। अङ्गस्थैर्य्यबलायिकारित्वञ्च। इति राजवल्लभः॥ अस्य विवरणं चतुर्दोलशब्दे द्रष्टव्यम्॥

दोलायमानः, त्रि, (दोलां करोतीति। दोला+क्यङ्। ततः शानच्।) दोलनविशिष्टः। यथा,

"दोलायमानं गोविन्दं मत्स्यं मधुसूदनम्।
वामनं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥"

इत्युत्कलखण्डम्॥

दोलिका, स्त्री, (दोला+स्वार्थे कन्। टापि अत इत्वम्।) हिन्दोला। इति हारावली। १८१॥

दोली, स्त्री, (दोल्यते अनयेति। दोलि+इन्। ङीष्। ङादिकारादिति वा ङीष्।) दोला। इति शब्दरत्नावली॥ डुली इति भाषा॥

दोषः, पुं, (दूष्यते इति। दुष वैकृत्ये+घञ्+भावे घञ्।) दूषणम्। यथा,—

"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता॥"

इति चानक्यम्। ४८॥

(दुष्यत्यनेनेति करणे घञ्।) पापम्। इति मेदिनी। षे, ४॥ वातपित्तकफाः। इति शब्दचन्द्रिका॥ (यथा,—

"नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः।
अयुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्॥"

इति सुश्रुते। १। ३५ अध्यायः॥)

गोवत्सः। इति शब्दरत्नावली॥ (दुष्यतेऽन्धकारेणेति। दुष्+घञ्। प्रदोषः। यथा, भागवते। ६। ८। १६।

"देवोऽपराह्णे मधुहोऽग्रतो वा
सायं त्रिधामावतु माधवो माम्।
दोषे हृषीकेश उताऽर्द्धरात्रे
निशीथ एकोऽवतु पद्मनाभः॥")

काव्यगुणेतरः। स च रसाद्यपकर्षकः। यथा,

"सुख्यार्थहतिर्दोषो रसस्य सुखरूपताश्रयाद्वाच्यः।"

तत्र पददोषा यथा,—

"दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्।
निहतार्थमनुचितार्थं निरर्थकमप्रयोजकं त्रिधाश्लीलम्॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव॥"

वाक्यदोषो यथा,—

"प्रतिकूलवर्णमुपहतरसप्रविसर्गं विसन्धि हतवृत्तम्।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्॥
अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम्।
अपदस्थपदसमासं सङ्कीर्णगर्भितं प्रसिद्धिहतम्॥
भग्नप्रक्रममतपरार्थञ्च वाक्यमेवं तथा॥"

अर्थदोषा यथा,—

"अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्करग्राम्याः।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च॥
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्तः।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः॥
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः॥"

रसदोषा यथा,—

"अभिचारिरसस्थायिभावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः॥
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्य्ययः।
अनङ्गस्याभिधानञ्च रसे दोषाः सुदुर्द्धराः॥"

उक्तपदादिदोषाः स्युरविशेषे क्वचित् गुणा भवन्ति। इति काव्यप्रकाशः॥ * ॥ दोषविशेषा यथा, राजधर्म्मे।

"यतः प्रभवति क्रोधः कामो वा भरतर्षभ!।
शोकमोहौ विधित्सा च परासुत्वञ्च तद्वद॥
लोभो मात्सर्य्यमीर्ष्या च कृत्सासूया कृपा भयम्॥"

आचमनं विना भक्षणे दोषाभावो यथा,—

"मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे।
फलमूले चैक्षुदण्डे न दोषं प्राह वै मनुः॥"

इति कूर्म्मपुराणम्॥ * ॥

हाविंशुतप्रकारा दोषा यथा,—

"यानेनैवा पादुकैर्व्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम्।
एकहस्तप्रणामस्तु तथा चैकं प्रदक्षिणम्॥
पादप्रसारणञ्चापि तथा पर्य्यङ्कबन्धनम्।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च॥
उच्चैर्भाषो मिथोजल्पो रोदनादि च विग्रहः।
निग्रहानुग्रहौ चैव स्त्रीयूथक्रूरभाषणम्॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा॥
अपराधास्तथा विष्णोर्हाविंशुतप्रकीर्त्तिताः॥"

इति पाद्मे पातालखण्डम्॥ * ॥

(आततायिमारणे अधर्म्मदण्डो दोषो न भवति। यथा, मनुः। ८। ३५१।

"नातताय्यवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥"

"न कश्चिदपि अधर्म्मदण्डः प्रायश्चित्ताख्यो दोषो वा भवति।" इति तट्टीकायां कुल्लूकभट्टः॥ अष्टवस्वनामन्यतमः स च वसुः। यथा, भागवते। ६। ६। ११।

"द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः॥")

दोषकः, पुं, (दोष एव। स्वार्थे कन्।) गोवत्सः। इति शब्दरत्नावली॥

दोषग्राही, [न्] त्रि, (दोषं गृह्णातीति। ग्रह+णिनिः।) दोषग्रहणकर्त्ता। तत्पर्य्यायः। खलः २ पूरोभागी ३ द्विजिह्वः ४ मत्सरी ५। इति हलायुधः॥

"विहाय सर्व्वदोषान् गुणान् गृह्णन्ति साधवः।
दोषग्राही गुणत्यागी चालनीव हि दुर्ज्जनः॥"

इत्युद्भटः॥

दोषज्ञः, त्रि, (दोषं जानातीति। दोष+ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा, रघुः। १। ६३।

"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सूनुः सूनृतवाक् सूतः विससर्जोदितश्रियम्॥"

दोषान् वातपित्तकफान् जानातीति। कः।) चिकित्सकः। इति हेमचन्द्रः। ३। ५॥ दोषविषयकज्ञानयुक्तश्च॥

दोषचयः, क्ली, (दोषाणां वातपित्तकफानां चयः।) वातपित्तकफाः। इति राजनिर्घण्टः॥ (दोषाणां चयः। यथाह वाग्भटः।

"रूपं रूपविवर्ज्जितस्य भवतो ध्यानेन यद्वर्ण्यते
स्तुत्या निर्व्वचनीयताखिलगुरोर्दूरीकृता यन्मया।
व्यापित्वञ्च विनाशितं भगवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश! तत् विकलतादोषत्रयं मामकम्॥")

दोषा, स्त्री, (दुष्यतेऽन्धकारेणेति। दुष् + घञ् + टाप्।) रात्रिः। (यथा, आर्य्यासप्तशत्याम्। २६८।
"दोषदग्धा कुलयुवतिर्वैदग्ध्येनैव मलिनतामेति।
दोषा अपि भूषाये गणिकायाः ग्रन्थिकलायाश्च॥"
दान्यत्रनेनेति। दम् + "दमेर्डोसिः।" उणा। २। ६८। इति डोसिः। भागुरिमते टाप्।) भुजः। इति मेदिनी। षे, १५॥

दोषा, य, (दुष्यत्यत्रेति। दुष् + "आः समिण्-निकषिभ्यः।" उणा। ४। १७४। इत्यच। "बाहुलकात् दिविदुषिभ्यश्च।" इत्युज्ज्वलदत्तोक्तेः आः।) "खरादिनिपातमव्ययम्।" १। १। ३७। इति खरादिपाठात् अव्ययत्वम्।) नक्तम्। रजन्याम् इत्यर्थः। इत्यमरः। ३।४।३॥ (यथा, माघे। ४। ४६।
"दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्यः॥")
निशासुखम्। इति हेमचन्द्रः॥

दोषाकरः, पुं, (दोषा रात्रौ करो यस्य। यद्वा, दोषां करोतीति। दोषा + कृ + बाहुलकात् टः।) चन्द्रः। यथा, ज्योतिषतत्त्वे।
"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते॥"
(यथा च, प्रद्युम्नविजये। ६। ३।
"दोषाकराङ्कमलिनान्तरक्षिता ते
पक्षप्रसूनशरता च मनोभवस्य।
प्राणात्मनस्य जगताञ्च समीरणस्य
मन्येऽद्य पुण्यजनतेव निशाचराणाम्॥")
दोषाणामाकरश्च॥

दोषालेखी, स्त्री, (दोषां सुखं लिखतीति। लिख् + ण्वुल्। गौरादित्वात् ङीष्।) वनवर्त्तिका। इति राजनिर्घण्टः॥

दोषातन, त्रि, (दोषा रात्रौ भवः इति। दोषा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट्च च।" ४। ३। २३। इति ट्युः तुट् च।) रात्रिभवः। इति व्याकरणम्॥

दोषातिलकः, पुं, (दोषाया रजन्यास्तिलक इव।) प्रदीपः। इति त्रिकाण्डशेषः॥

दोषास्यः, पुं, (दोषा रात्रिरास्यमिव यस्य। दोषातिलकत्वादस्य तथात्वम्।) प्रदीपः। इति शब्दचन्द्रिका॥

दोषिकः, पुं, (दोषाः वातपित्तकफाः कारणत्वेन सन्त्यस्येति। ठन्।) रोगः। इति शब्दचन्द्रिका॥

दोषी, [न्] त्रि, (दुष्यतीति। दुष् + "संपृचानुरुधाङ्याङासपरिस्विदःकिदिति।" ३। २। १४२। इति घिनुण्।) दोषयुक्तः। अपराधी। दोषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नः इति वा॥

दोषैकदृक्, [श्] त्रि, (दोषि एवैकस्मिन् न तु गुणवंशे दृक् ज्ञानमस्येति। यद्वा, दोषमेव एकं केवलं पश्यतीति। दृश् + क्विप्।) दोषमात्रदर्शी। यो गुणं त्यक्त्वा केवलं दोषमेव पश्यति सः। दोषे एकस्मिन्नेव ज्ञानं यस्य सः। इति भरतः॥ तत्पर्य्यायः। पुरोभागी २। इत्यमरः। ३। १। ४६॥

दोष्यः, पुं, (दोषि हस्ते लक्षणया दोर्व्यापारे वा तिष्ठतीति। स्था + कः।) क्रीड़ा। क्रीड़कः। सेवा। सेवकः। इति त्रिकाण्डशेषः॥ दोःस्थिते, त्रि॥

दोहः, पुं, (दोग्धि अस्मिन्निति। दुह + आधारे घञ्।) दोहनपात्रम्। इति शब्दचन्द्रिका॥ (यथा, भागवते। ४। १८। २७।
"एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः।
दोहवत्सादिभेदेन चीरभेदं कुरूद्वह!॥"
दुह्यते इति। दुह् + कर्म्मणि घञ्।) दुग्धम्। ("दुह्यते इति दोहः क्षीरं क्ष्मा गोदोहस्य विकारः हेयङ्गवीनम्।" इति सिद्धान्तकौमुदी॥ दुह् + भावे घञ्।) दोहनम्॥ (यथा, रघुः। २। २३।
"दोहावसाने पुनरेव दोग्ध्रीं
भेजे शुचोच्छिन्नरिपुर्निषण्णाम्॥")

दोहदं, क्ली, (दोहात् दोहनाज्जायते इति। दोह + अन् + डः।) दुग्धम्। इति शब्दार्थकल्पतरुः॥

दोहड़िका, स्त्री, छन्दोविशेषः। इति छन्दोमञ्जरी॥ दोहा इति भाषा। अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्॥

दोहदं, क्ली, (दोहमाकर्षणं ददातीति। दोह + दा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) इच्छा। इत्यमरः। १। ७। २७॥

दोहदः, पुं, क्ली, (दोहमाकर्षं ददातीति। दा + कः।) गर्भिण्यभिलाषः। साद इति भाषा। तत्पर्य्यायः। दौर्हृदम् २ अद्भा ३ लालसा ४। इति हेमचन्द्रः। ३। २०५॥ जातुजः ५। इति रत्नकोषः॥ (यथा, याज्ञवल्क्यसंहितायाम्। ३। ७६।
"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः॥")
गर्भचिह्नम्। इति भरतधृतकोषान्तरम्॥ (पुष्पोद्गमकौषधम्। यथा, रघौ। ८। ६२।
"कुसुमं क्षतदोहदस्त्रया
यदशोकोऽयमुदीरयिष्यति।
अलकाभरणं कथं नु तत्
तव नेष्यामि निवापमाल्यताम्॥"
यथा च, मेघदूते। ७८।
"रक्ताशोकश्चलकिसलयः केसरश्च कान्त,
प्रत्यासन्नः कुरुवकवृतेर्मालतीमालभस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः॥"
अत्र यस्य यो दोहदः स धृतो मल्लिनाथेन यथा,—
"स्त्रीणां अपदात् प्रियङ्गुर्बकुलः मुखासवेकात् गण्डूषसेकात् पादाघातादशोकस्तिलककुरुवको वीक्षणालिङ्गनाभ्याम्।
मन्दारो नर्म्मवाक्यात् पटुरदुरुषनात् चम्पको वक्त्रवातात्
चूतो गीतान्नमेरुर्विकसति च पुरो नर्त्तनात् कर्णिकारः॥")

दोहदलक्षणं, क्ली, (दोहदस्य गर्भस्य लक्षणं यत्र।) व्यधिकरणसन्धिः। गर्भः। इति मेदिनी। णे, ११७॥

दोहदवती, स्त्री, (दोहदो गर्भिण्यभिलाषोऽस्यस्या इति। दोहद + मतुप् मस्य वः। ङीप् च।) अन्नपानादिद्रव्यविशेषाभिलाषवती गर्भवती। इति भरतः॥ तत्पर्य्यायः। अद्भालुः २। इत्यमरः। २। ६। २१॥*॥ गर्भिणीकर्त्तव्याकर्त्तव्यं यथा,—
"दित्सा गर्भमथाधत्त कश्यपः प्राह सां पुनः।
त्वया यत्नो विधातव्यः अस्मिन् गर्भे वरानने!॥
संवत्सरव्रतन्त्वेकमस्मिन्नेव तपोवने।
सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि!॥
न स्नातव्यं न गन्तव्यं वृक्षमूलेषु सर्व्वदा।
नोपस्करेषूपविशेन्मुषलोलूखलादिषु॥
जलञ्च नावगाहेत शून्यागारञ्च वर्জ्जयेत्।
वल्मीकेषु न तिष्ठेत न चोद्विग्नमना भवेत्॥
विलिखेन्न खनेद्भूमिं नाङ्गारेण न भस्मना।
न शून्यालः सदा तिष्ठेद्द्वारायाञ्च विवर्জ्जयेत्॥
न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत्।
वर्জ्जयेत् कलहं लोके गात्रभङ्गञ्च वर्জ्जयेत्॥
न सुक्तकेशा तिष्ठेत नाशुचिः स्यात् कदाचन।
न शून्यौत्तरशीरा न चापरशिराः क्वचित्॥
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती।
नामाङ्गल्यां वदेद्वाचं न च हास्याधिका भवेत्॥
कुर्य्याच्च गुरुशुश्रूषां नित्यमङ्गलतत्परा।
सर्व्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत्॥
कृतरक्षा सुभूषा च वास्तुपूजनतत्परा।
तिष्ठेत् प्रसन्नवदना भर्त्तुः प्रियहिते रता॥
दानशीला तृतीयायां पार्व्वत्या नक्तमाचरेत्।
इतिवृत्ता भवेन्नारी विशेषेण तु गर्भिणी॥
यस्तु तस्या भवेत् पुत्रः शतायुर्बुद्धिसंयुतः।
अन्यथा गर्भपतनमवाप्नोति न संशयः॥
तस्मात्त्वमनया वृत्त्या गर्भेऽस्मिन् यत्नमाचर।"
इति मत्स्यपुराणम्॥

दोहदान्विता, स्त्री, (दोहदेन गर्भजनिताभिलाषेण अन्विता।) दोहदवती। इति हेमचन्द्रः। ३। २०३॥

दोहनं, क्ली, (दुह + भावे ल्युट्।) स्तनादुग्धनिःसारणम्। दोया इति भाषा। दुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ (दुह्यतेऽस्मिन्निति। दुह + आधारे ल्युट्। दोहनपात्रम्। यथा, महाभारते। १३। ६४। ४१।
"बालत्वेन निदानेन कांस्यं भवतु दोहनम्।
दुह्यते परवत्त्वेन यस्मै हरति पुष्करम्॥")

दोहनी, स्त्री, (दुह्यते अस्यामिति। दुह् + आधारे ल्युट्। ङीप्।) दोहनपात्रम्। तत्पर्य्यायः।

लेपनम् २ पारी ३ दोहः ४ दोहनम् ५ । इति शब्दरत्नावली ।

दोहलः, पुं, (दोहमाकर्षं लातीति । ला + "आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) दोहदः । इच्छा । इति शब्दार्थकल्पतरुः ॥ (यथा, मालविकाग्निमित्रनाटके । ८ । ४७ ।

"अशोक ! यदि सत्य एव सुकुमारेण सम्पत्स्यते सुभ्रा वहसि दोहलं ललितकामिसाधारणम् ॥")

दोहलवती, स्त्री, (दोहलोऽस्यस्या इति मतुप् । मस्य वः । ङीप् ।) दोहदवती । इति शब्दार्थकल्पतरुः ॥

दोहली, स्त्री, (दोहं लातीति । ला + कः । गौरादित्वात् ङीष् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अशोकशब्देऽस्या विवरणं ज्ञेयम् ॥)

दोहापनयः, पुं, (दोहं दोहनमपनयति खनिः-सरत्वेनेति । अप + नी + अच् ।) दुग्धम् । इति त्रिकाण्डशेषः ॥

दोहीयान्, [स्] त्रि, (अयमनयोरतिशयेन दोग्धा । "तुरिष्ठेमेयःसु ।" ६ । ४ । १५८ । इति ईयसुन् । "तुरिष्ठेमेयःसु ।" ६ । ४ । १५४ । इति ऌशब्दस्य लोपः ।) अतिशयदोहकः ॥

दोह्यं, त्रि, (दुह्यते इति । दुह् + ण्यत् ।) दोहनीयम् । दुह्यम् । दोग्धव्यम् । इति व्याकरणम् । (दुह्यतेऽस्या इति । गोमहिष्यादिः । इति मिताक्षरा ॥ यथा, याज्ञवल्क्यः । २ । १८० ।

"दशैकपञ्चसप्ताहमासचाद्धार्द्धमासिकम् ।
बीजायोद्वाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥")

दौःसाधिकः, पुं, (दुर्दुष्टः साधः कर्म्म तत्र नियुक्तः । ठक् ।) द्वाःस्थितः । द्वारपालः । इति त्रिकाण्डशेषः ॥

दौकूलं, त्रि, (दुकूलेन परिवृतो रथ इति । "परिवृतो रथः ।" ४ । २ । १० । इति अण् ।) दुकूलेनावृतरथादि । इत्यमरटीकायां भरतः ॥

दौत्यं, क्ली, (दूतस्य भावः कर्म्म वा । ष्यञ् ।) दूत्यम् । दूतस्य भावः । दूतस्य कर्म्म । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । १७२ । १८ ।

"दौत्यञ्च तत् कृतं घोरे विग्रहे जनमेजय ! ॥")

दौरात्म्यं, क्ली, दुर्निन्दित आत्मा यस्य धृतिः बुद्धिः स्वभावः शरीरं वा यस्य स दुरात्मा । तस्य भावकर्म्मार्थे ष्यञ्प्रत्ययः । (ष्यञ् ।) दुरात्मनो भावः । दुरात्मनः कर्म्म । (यथा, महाभारते । २ । १५ । ७ ।

"शङ्किताः स्म महाभाग ! दौरात्म्यात् तस्य पानघ ! ॥")

दौर्गन्ध्यं, क्ली, (दुर्दुष्टो गन्धोऽस्य दुर्गन्धः । ततो भावे ष्यञ् ।) दुर्गन्धता । (यथा, महाभारते । ३ । २६० । १३ ।

" न संक्लेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा ॥")

तन्नाम्नकतैलं यथा,—

"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीफलोशीरपूगानां खदिरस्य फलानि च ॥
अगुरुश्चीरकाश्मर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्च्चूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"

इति गारुडे १९८ अध्यायः ॥

दौर्ग्यं, क्ली, दुर्गवृत्तिधर्म्मः । दुर्गसम्बन्धि । दुर्गस्य भावः दुर्गस्येदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ्) ॥

दौर्ज्जन्यं, क्ली, दुर्ज्जनस्य भाव इदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ् ।) दुर्ज्जनत्वम् । (यथा, महाभारते । ६ । १८ । ७६ ।

"तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि ।
क्षन्तुमर्हति मातस्त्वं दिष्ट्या गर्भो न्यतोत्थितः ॥")

दौर्ब्बल्यं, क्ली, दुर्ब्बलस्य भाव इत्यर्थे ष्यञ्प्रत्ययः (ष्यञ् ।) दुर्ब्बलता । अल्पबलत्वम् । (यथा, मनुः । ८ । १७१ ।

"अनादेयस्य चादानादेयस्य च विवर्ज्जनात् ।
दौर्ब्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥")

दौर्भागिनेयः, पुं, (दुर्भगाया अपत्यं पुमान् । दुर्भगा + "कल्याणयादीनामिनङ् च ।" ४ । १ । १२६ । इति ढक् इनङादेशश्च ।) दुर्भगापुत्रः । इति शब्दरत्नावली ॥ दुर्भगायाः कन्या दौर्भागिनेयी ॥

दौर्भाग्यं, क्ली, दुर्भगस्य दुर्भगाया वा भावः । (ष्यञ् । "दुर्भगसिंहयन्मूर्खे पूर्वपदस्य च ।" ७ । ३ । १६ । इत्युभयपदवृद्धिः ।) दुर्भगत्वम् । यथा, ज्योतिस्तत्त्वे ।

"शुक्रा पिटयदे नारी शुक्रे स्वामियदे यदि ।
दौर्भाग्यं जायते तस्याः प्रयन्ति कुलदेवताः ॥"

दुर्भाग्यमेव दौर्भाग्यम् । इति स्वार्थे ष्यञ्प्रत्ययः ॥

दौर्मनस्यं, क्ली, दुर्मनसो भावः (ष्यञ्) । दुःखनिबन्धनचित्तावसादः । इति चक्रपाणिटीकायां नागोजीभट्टः ॥ (यथा, मार्कण्डेये । ८१ । २६ ।

"तेषां श्रुते मे निःश्वासा दौर्मनस्यञ्च जायते ॥")

दौर्व्वीर्यं, क्ली, (दुर्व्वीरस्य इदम् । दुर्व्वीर + ष्यञ् ।) दुष्टपराक्रमः । दुर्व्वीरस्य । इति मेदिनी । र्यं, ५३ ॥

दौर्हृदं, क्ली, (दुर्हृदो भावः । युवादित्वात् अण् । बाहुलकात् न द्विपदवृद्धिः ।) इच्छा । दोहदम् । इति हेमचन्द्रः । ३ । २०५ ॥ ("लब्धदौर्हृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति ।" इति सुश्रुते ॥ दूषितहृदयत्वम् । यथा, महाभारते । ५ । २६ । १४ ।

"दुर्भाविनो मनुष्यस्य
कामात्मनो दौर्हृदे भावितस्य ॥")

दौलेयः, पुं, (दुलेरपत्यमिति । "इतश्चानिञः ।" ४ । १ । १२२ । इति ढक् ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१५ ॥

दौल्मिः, पुं, (दुल्मस्यापत्यम् । दुल्म + इञ् ।) इन्द्रः । इति शब्दार्थकल्पतरुः ॥

दौवारिकः, पुं. (द्वारि नियुक्तः । "तत्र नियुक्तः ।" ४ । ४ । ६६ । इति ठक् । ततः "द्वारादीनाञ्च ।" ७ । ३ । ४ । इति न वृद्धिः औ-आगमश्च ।) द्वाररक्षकः । (यथा, राजतरङ्गिण्याम् । ५ । १८ ।

"राजदौवारिकः श्रीमाञ्छूरस्यासीन्महोदयः ॥")

तत्पर्य्यायः । द्वाःस्थः २ चेत्ता ३ दण्डी ४ वेत्रधरः ५ । इति हलायुधः ॥ प्रतीहारः ६ प्रतिहारः ७ दर्शकः ८ द्वारी ९ वेताल: १० द्वारपालकः ११ दौःसाधिकः १२ वर्षरूढः १३ गर्व्वाटः १४ दण्डपाशुलः १५ । इति शब्दरत्नावली ॥ द्वाःस्थितः १६ वेत्रधारकः १७ वर्षरूढकः १८ दण्डवासी १९ । इति त्रिकाण्डशेषः ॥

तस्य लक्षणं यथा,—

"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तज्ञश्च सर्व्वेषां प्रतीहारो विधीयते ॥"

इति मत्स्यपुराणम् ॥

"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥"

इति गारुडम् । १०८ ॥

दौष्कुलेयः, त्रि, (दुष्कुलस्यापत्यम् । "दुष्कुलात् ढक् ।" ४ । १ । १४२ । इति ढक् ।) दुष्कुलोद्भवः । निन्दितवंशजातः । दुष्कुलशब्दात् भवार्थे वा ढ्यप्रत्ययः ॥ (यथा, महाभारते । ३ । १६३ । २३ ।

"कुले जातास्च क्रियन्ते दौष्कुलेयवशानुगाः ॥")

दौष्मन्तिः, पुं, (दुष्मन्तस्यापत्यं पुमान् । दुष्मन्त + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) दुष्मन्तराजपुत्रः । स तु भरतराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ७४ । २ ।

"रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय ! ॥")

दौहित्रः, पुं, स्त्री, (दुहितृ + "अवृद्धाभ्यन्तर्य्ये विदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) दुहितुरपत्यम् । इति हेमचन्द्रः । १ । २०८ ॥ तत्पर्य्यायः । कुतपः २ । इति शब्दरत्नावली ॥

"श्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
दौहित्रं खड्गमिश्राञ्च कुरुपत्रं दुहितुस्तिलाः ॥
कपिलाया इतश्चैव दौहित्रमिति घोष्यते ॥"

इति मार्कण्डेयपुराणम् ॥

"पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"

इति दायभागः ॥

दौहित्रोऽपि स्वतुल्यैनं सन्तारयति पौत्रवदिति मनुः ॥ तदुत्पत्तौ कन्यायां पितुर्भोजने दोषाभावो यथा,—

"कन्यायां ब्रह्मदेयायामशुद्धः शुद्धमश्नुते ।
अथ शुद्धति यो मोहात् शुद्धो स नरकं व्रजेत् ॥
अप्रजायाञ्च कन्यायां न शुद्धीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महाशस्त्रसमाकीर्णात् नास्ति ते नरकाद्भयम् ।
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ।
दौहित्रस्य तु दानेन तन्दन्ति पितरः सदा ॥
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ।
मातुः पितुश्च विप्रेयं तच्छ्रुत्वाभिगमिष्यसि ।
मातुः पितुर्द्विजस्यैव दौहित्रोऽर्हमवाप्नुते ॥"

इत्याद्ये वह्निपुराणे कन्यादानमाहात्म्यं ११ ॥

शूद्रमात्रस्य दौहित्रो दत्तको भवति । यथा,—
"दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयसुतः क्वचित् ॥"
इति दत्तकमीमांसाधृतशौनकवचनम् ॥
तस्य मातामहधनाधिकारित्वम् । यथा,—
"दुहितृभावे दौहित्रः ।
'पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥'
इति मनुवचने पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
अपि च, सर्व्वदुहितृभावे दौहित्रस्य अधिकारः ।
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च ॥
इत्यादिवचनात् । अपुत्रस्य इति दुहितृपर्य्यन्ताभावोपलक्षणम् ॥ १ ॥ भ्रातृपौत्रस्याभावे पितुर्दौहित्रस्याधिकारः । धनिपित्रादित्रयपिण्डदातृत्वात् ॥२॥ पितुर्दौहित्राभावे भ्रातृदौहित्रोऽधिकारी । धनिभोग्यपितृपितामहपिण्डदातृत्वात् ॥३॥ पितृत्रयपौत्राभावे पितामहदौहित्रस्य अधिकारः धनिभोग्यपितामहप्रपितामहपिण्डदातृत्वात्॥४॥ पितामहदौहित्राभावे पितृत्रयदौहित्रस्याधिकारः । धनिभोग्यतत्पितामहप्रपितामहपिण्डत्रयदातृत्वात् ॥ ५ ॥ तदभावे पितामहभ्राता तदभावे पितामहभ्रातृपुत्रः तदभावे पितामहभ्रातृपौत्रः । तेषां धनिभोग्यतत्प्रपितामहपिण्डदातृत्वात् । ततः प्रपितामहदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥६॥ प्रपितामहदौहित्राभावे पितामहभ्रातृदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥७॥ पितामहभ्रातृदौहित्राभावे मातामहः । तदभावे मातुलः । तदभावे मातुलपुत्रः । तदभावे मातुलपौत्रः । तदभावे मातामहदौहित्रोऽधिकारी ॥ ८ ॥ मातामहदौहित्राभावे प्रमातामहः । तदभावे प्रमातामहपुत्रः । तदभावे प्रमातामहपौत्रः । तदभावे प्रमातामहप्रपौत्रः । तदभावे प्रमातामहदौहित्रोऽधिकारी ॥ ९ ॥ प्रमातामहदौहित्राभावे वृद्धप्रमातामहोऽधिकारी । तदभावे वृद्धप्रमातामहपुत्रः । तदभावे वृद्धप्रमातामहपौत्रः । तदभावे वृद्धप्रमातामहप्रपौत्रः । तदभावे वृद्धप्रमातामहदौहित्रोऽधिकारी ॥१०॥ स्त्रीधने तु पुत्राभावे दौहित्रोऽधिकारी । पुत्राधिकारात् प्राक् दाहत्रयोक्तेः । तद्बाधकाया दाहतः पुत्रश्राद्धाप्युत्तरश्राद्धेऽप्यन्वयात्॥११॥
इति श्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रहः ॥
श्राद्धे दानाद्यनन्तरप्राशस्त्यम् । यथा,—
"व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ।
कुतपश्चासने दद्यात्तिलैश्च विकिरेन्महीम् ॥"
इति मानवे । ३ । २३४ ॥

द्यावाचमे, स्त्री, (द्यौश्च चमा च । "दिवो द्यावा।" ६ । ३ । २६ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ द्विवचनान्तोऽयम् ॥
द्यावापृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च । "दिवश्च पृथिव्याम् ।" ६ । ३ । ३० । इति सात् दिवो द्यावा ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ (यथा, मनुः । ३ । ८६ ।
"कूपे चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिवीभ्यां तथा स्विष्टकृतेऽन्ततः ॥")
तद्वैदिकपर्य्यायः । खधे १ पुरन्धी २ धिषणे ३ रोदसी ४ व्योमी ५ अम्बसी ६ नभसी ७ रजसी ८ सदसी ९ सद्मनी १० घृतवती ११ बहुले १२ गभीरे १३ गम्भीरे १४ ओमन्वती १५ चर्म्मी १६ पार्श्वी १७ मही १८ ऊर्व्वी १९ पृथ्वी २० अदिती २१ अद्री २२ दूरे २३ अन्ते २४ अजारे २५ अरे २६ पारे २७ । इति सप्तविंशतिर्द्यावापृथिव्योर्नामधेयानि । इति वैद्यनिघण्टौ ३य्यः ॥
द्यावाभूमी, स्त्री, (द्यौश्च भूमिश्च । "दिवो द्यावा।" ६ । ३ । २६ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ (यथा, ऋग्वेदे । ३ । ५५ । १ ।
"को वस्त्राता वसवः को वरूता
द्यावाभूमी अदिते त्रासीथां नः ॥")
द्यु, ल अभिसर्पणे । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-अनिट् ।) अभिसर्पणं आभिमुख्येन गमनम् । ल, द्यौति सिंहो मृगानिव । इति दुर्गादासः ॥
द्युः, क्ली, (द्यौतीति । द्यु+क्विप् ।) दिनम् । गगनम् । स्वर्गः । इति विश्वः ॥ [ये, २ ॥
द्युः, पुं, (द्यु+क्विप् ।) अग्निः । इति मेदिनी ।
द्युगः, पुं, (द्युनि गगने गच्छतीति । गम+डः ।) पक्षी । इति राजनिर्घण्टः ॥
द्युगयः पुं, (द्यूनां दिनानां गयः ।) अहर्गणः । तल्लक्षणयजनमाह ।
"कथितकल्पगतोऽर्कसमा गया
रविगुणो गतमासयुतान्वितः ।
खदहनैर्गुणितस्त्रिभिसंयुतः
पृथगतोऽधिकमासयुताहतात् ॥
रविदिनाप्तगताधिकमासकैः
क्षतदिनैः सहितो द्युगणो विधोः ।
पृथगतः पठितावमसंगुणा-
द्विधुदिनाप्तगतावमसञ्चितः ॥
भवति भास्करवासरपूर्व्वको
दिनगणो रविमध्यमसाधनः ।
अधिकमासदिनक्षयशेषतो
द्युघटकादिकमत्र न यत्नते ॥"
इति सिद्धान्तशिरोमणिः ॥
द्युत्, ल ड दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ल, अद्युतत् । ड, द्योतते दिद्युते । इति दुर्गादासः ॥

द्युतः, पुं, (द्युत् दीप्तौ+क्विप् ।) किरणः । इति हेमचन्द्रः । २ । १४ ॥ (द्योतमाने, त्रि । यथा, ऋग्वेदे । १० । ६६ । २ ।
"स हि द्युता विद्युता वेति साम ॥"
द्यु ल अभिसर्पणे+क्विप् तुगागमश्च । अभिगामिनि । यथा, भट्टिः । ५ । ४७ ।
"हरामि रामसौमित्री मृगो भूत्वा मृगद्युतौ॥")
द्युतिः, स्त्री, (द्योततेऽनयेति । द्युत् दीप्तौ+"इगुपधात् कित्।" उणा ४ । ११६ । इति इन् स च कित् ।) दीप्तिः । शोभा । इत्यमरः । १ । ३ । १७ ॥ (यथा, भागवते । ८ । ५ । ३२ ।
"श्लोभोऽधरात् प्रीतिरूपर्य्यभूद्द्युतिर्नस्तः पद्मतः स्वर्गतः कामः ॥")
रश्मिः । इति मेदिनी । ते, २५ ॥ (पुं, चतुर्थस्य मनोः ऋषिविशेषः । यथा, हरिवंशे । ७ । ७५ ।
"चतुर्थस्य तु सावर्णेर्ऋक्षान् सप्त निबोध मे ।
द्युतिर्वपुष्मान् पुत्रश्च आत्रेयः सुतपास्तथा ॥"
तामसस्य मनोः पुत्रविशेषः । यथा, तत्रैव । ७ । २३ ।
"पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृपः ।
द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः ॥")
द्युतिकरः, पुं, (करोतीति । कृ+अच् । द्युतेः करः ।) ध्रुवः । इति भूरिप्रयोगः । दीर्घिकारके, त्रि ॥
द्युतितं, त्रि, (द्युत+क्तः । बाहुलकात् न गुणः ।) दीप्तिविशिष्टम् । द्योतितम् । इति मुग्धबोधव्याकरणम् ॥
द्युनं, क्ली, (द्यवते सप्तमराशिः । इति ज्योतिषतत्त्वम् ॥
द्युनिशं, क्ली, (द्यु च निशा च द्वयोः समाहारः ।) अहोरात्रः । इति व्याकरणम् । यथा,—
"भवति किं द्युनिशं द्युनिवासिनाम् ।"
इति सिद्धान्तशिरोमणिः ॥
द्युनिवासी, [न्] पुं, (द्युनि स्वर्गे निवसतीति । नि+वस+घिनिः ।) देवता । स्वर्गवासी । इति सिद्धान्तशिरोमणिः ॥
द्युपतिः, पुं, (द्युनो दिनस्य पतिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (द्युनो स्वर्गस्य पतिः ।) इन्द्रः ॥
द्युमणिः, पुं, (द्युनो गगनस्य मणिरिव ।) सूर्य्यः । (यथा, भागवते । ८ । १० । ३८ ।
"रेणुर्दिग्रः खं द्युमणिश्च छादयन्
व्यदृश्यताक्ष्वस्तुतिभिः परिप्लुतात् ॥")
अर्कवृक्षः । इत्यमरः ॥ (परिप्लवोधिसंज्ञकम् । यथा,—
"विषमहौषधभागमधिकोषणा
द्युमणिरक्तकमार्हकभार्हतम् ॥"
द्युमणिः मारितं ताम्रम् ॥" इति भावप्रकाशस्य मध्यखण्डे १ भाग वातव्याध्यधिकार ॥)
द्युमयी, स्त्री, विश्वकर्म्मकन्या । सा सूर्य्यपत्नी । इति चिकित्साशेषः ॥

द्यूतं, क्ली, (द्युमयिं मनति अभ्यसत्यस्मै इति। स्वा+कः। "धनमिच्छेत् हुताशनात्।" इति वचनात् धनकामानां अग्न्याराधनादस्य तथात्वम्।) धनम्। इत्यमरः। २। ६। ६०॥ (यथा, ऋग्वेदे। २। २। १०।

"अक्षाकं द्युम्नमधि पक्षं क्षत्रिभृषा खर्गं शुचीत दुष्टरम्॥"

द्युं तेजो मनतीति।) बलम्। इति मेदिनी। मे, ११॥ (बलाधायकत्वात् अन्नम्। यथा, ऋग्वेदे। ६। ८। ८।

"वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि॥")

द्युवा, [न्] पुं, (द्यौतीति। द्यु+"कनिन् युवृषीति।" उणां १। १५६। इति कनिन्।) सूर्य्यः। इत्युणादिकोषः॥ द्यौः। इति संक्षिप्तसारे उणादिवृत्तिः॥

द्युष(ष)त्, [द्] पुं, (दिवि स्वर्गे सीदतीति। सद्+क्विप्। छन्दसि बत्वम्। लोके ऽबत्वम्।) देवः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १। ४३।

"भयस्य पूर्व्वावतरन्तरक्षिणा
मनःसु येन दुःसहां व्यधीयत॥")

यद्वः। इति गोलाध्यायः॥

द्यूतः, पुं, क्ली, (देवनमिति। दिवु क्रीड़ायाम्+भावे+क्तः। ऊट् च।) पाशकादिक्रिया। अप्राणिकरणकक्रीड़ा। जुया इति भाषा। तत्पर्य्यायः। अक्षवती २ कैतवम् ३ पणः ४। इत्यमरः। २। १०। ४५॥ (यथा, देवीभागवते। १। १८। ५१।

"द्यूतक्रीड़ा तथा प्रोक्ता व्रतानि विविधानि च॥")

"द्यूतं समाह्वयश्चैव राजा राष्ट्रान्निवर्त्तयेत्।
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतसञ्ज्ञितं।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः॥
द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्॥"

इति मनुः। ६। २२१-२२७॥

कङ्क उवाच।

"किमत्र द्यूतेन राजेन्द्र! बहुदोषेण मानद!।
देवने बहवो दोषास्तस्मात्तत् परिवर्ज्जयेत्॥
श्रुतस्ते यदि वा दृष्टः पाण्डवो हि युधिष्ठिरः।
स राज्यं सुमहत् स्फीतं भ्रातॄंश्च त्रिदशोपमान्॥
द्यूते हारितवान् सर्व्वं तस्माद्द्यूतं न रोचये॥"

इति महाभारते। ४। ६६। ३३-३५॥

द्यूतकरः, त्रि, (करोतीति। कृ+अच्। द्यूतस्य करः।) द्यूतकर्त्ता। जुयारी इति भाषा। तत्पर्य्यायः। धूर्त्तः २ शूर्तः ३ अक्षधूर्त्तः ४ अक्षदेवी ५ टुण्टारकः ६ द्यूतकृत् ७ कितवः ८ लक्षणकोकलः ९। इति शब्दरत्नावली॥

द्यूतकारः, त्रि, (द्यूतं कारयतीति। कृ+णिच्+अच्।) द्यूतकारयिता। सहियार इति ख्यातः। इति भरतः॥ तत्पर्य्यायः। सभिकः २। इत्यमरः। २। १०। ४४॥ सभीकः ३। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। १। ४३१।

"मुहुर्व्विचिन्तितकर्म्मागं द्यूतकारं पराजितम्॥")

द्यूतकारकः, त्रि, (द्यूतं कारयतीति। द्यूत+कृ+णिच्+ण्वुल्।) द्यूतकारयिता॥

द्यूतकृत्, त्रि, (द्यूतं करोतीति। कृ+क्विप् तुगागमश्च।) द्यूतकरः। अक्षक्रीड़कः। इत्यमरः। २। १०। ४४॥

द्यूतपूर्णिमा, स्त्री, (द्यूतस्य या पूर्णिमा।) कोजागरपूर्णिमा। इति त्रिकाण्डशेषः॥

द्यूतपौर्णमासी, स्त्री, (द्यूतस्य या पौर्णमासी।) द्यूतपूर्णिमा। इति भूरिप्रयोगः॥

द्यूतप्रतिपत्, [द्] स्त्री, (द्यूतस्य क्रीड़ार्थं या प्रतिपत्।) कार्त्तिकशुक्लप्रतिपत्। सा च कौमुदी। यथा,—

"तुष्ट्यर्थं कार्त्तिके तस्य शुक्ला या प्रतिपत्तिथिः।
विष्णोर्देहा मही तत्र कौमुदी सा स्मृता बुधैः॥
कुशब्देन मही ज्ञेया सदा हर्षे च वै द्विज!।
धातुज्ञैः सर्व्वशब्देज्ञैः सा च वै कौमुदी स्मृता॥"

इति पाद्मोत्तरखण्डम्॥ *॥

अत्र तिथौ बलिदैत्यपूजादि कार्य्यम्। तद्यथा, "वामनपुराणे कार्त्तिकशुक्लपक्षमधिकृत्य बलिस्मृति भगवद्वाक्यम्।

वीरप्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल! जुष्टाः पुष्टाः स्रजस्कृताः॥
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः॥
अत्र मन्त्रः।
बलिराज! नमस्तुभ्यं विरोचनसुत! प्रभो।
भविष्येन्द्र सुराराते! पूजेयं प्रतिगृह्यताम्॥
ब्रह्मपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
मन्त्रेणानेन राजेन्द्र! समन्त्री सपुरोहितः॥
इत्यर्द्धम्। पश्चादपि।
एवं पूजां नृपः कृत्वा रात्रौ जागरणं चरेत्।
इत्युक्तम्॥ पुनर्ब्रह्मपुराणे।
शुक्रस्य पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते!॥
जितश्च शुक्रस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्चयच्छुक्रो दुःखी गौरी नित्यं सुखोचिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धश्च सत्यनाशकरो भवेत्॥
भविष्योत्तरे।
यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि॥
महापुण्या तिथिरियं बलिराज्यप्रवर्द्धनी।
स्नानं दानं व्रतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥"

इति तिथितत्त्वम्॥

द्यूतबीजं, क्ली, (द्यूतस्य बीजं कारणम्।) कपर्द्दकः। इति त्रिकाण्डशेषः॥ द्यूतस्य कारणञ्च॥

द्यूनं, क्ली, (क्षयात् सप्तमराशिः। यथा—

"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्यूनं द्यूनं तथास्त्राख्यं षष्ठकोणं रिपुर्भान्दः॥"

इति ज्योतिस्तत्त्वम्॥

(दिव्+क्तः। "दिवोऽविजिगीषायाम्।" ८। २। ४६। इति निष्ठातस्य नः। च्छ्वोरित्यूट्। छीणे, त्रि॥)

दैव, व्यकरणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अन्त्यस्याद्ययुक्तः। दायति दुष्टं लोकः। इति दुर्गादासः॥

द्योतः, पुं, (द्युत्+भावे घञ्।) प्रकाशः। (यथा, हरिवंशे। २३३। २४।

"विद्युद्द्योतनिकाशेन मुकुटेनार्कवर्चसा॥")

ख्यातपः। इत्यमरः। १। ४। ३४॥

द्योतनं, क्ली, (द्युत्+भावे ल्युट्।) दर्शनम्। इति हेमचन्द्रः। ३। २४१॥ प्रकाशनम्॥ (द्यूत्+युच्। द्योतमाने, त्रि। यथा, भट्टिः। ७। १५।

"विलोक्य द्योतनं चन्द्रं लक्षणं प्रोच्यनोऽवदत्॥")

द्योतनः, पुं, (द्योतयतीति। द्युत्+"बहुलमन्यापि।" उणां २। ७८। इति युच्।) दीपः। इत्युणादिकोषः॥

द्योतितं, त्रि, (द्युत्+क्तः।) द्युतितम्। दीप्तम्। इति सुग्धबोधव्याकरणम्॥ (यथा, रामायणे। २। ८२। २।

"वक्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा॥")

द्योभूमिः, पुं, (द्यौराकाशं भूमिरिव यस्य।) पक्षी। इति शब्दचन्द्रिका॥ स्वर्गपृथिव्योः स्त्री। तत्र द्विवचनान्तः॥

द्योषत्, [द्] पुं, (द्यवि स्वर्गे सीदतीति। सद्+क्विप्।) देवः। इति शब्दरत्नावली॥

द्यौः, [द्यो] स्त्री, (द्योतन्ते देवा यत्र। द्युत्+बाहुलकात् डोः।) स्वर्गः। (यथा, महाभारते। १। ७३। २८।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मश्च जानाति नरस्य वृत्तम्॥")

आकाशम्। इत्यमरः। १। १। ६॥ (पुं, अष्टवसूनामन्यतमः। यथा, देवीभागवते। २। ३। ३५।

"पृथ्वादीनां वसूनाञ्च अष्टौ कोऽपि वसूत्तमः।
द्यौर्गामा तस्य भार्य्या या नन्दिनीं गां ददौ ह॥"

अयमेव वसुरुद्भवात् पृथिव्यां जन्म परिग्रहन् भीष्म इति ज्ञात्वा विख्यात आसीत्॥ अस्य विवरणन्तु देवीभागवते २ स्कन्धे ३ अध्याये तथा महाभारते। १। ६६ अध्याये द्रष्टव्यम्॥)

द्यौत्नं, क्ली, (द्यौरत्नमिति। दिव+"दिवेर्द्युञ्।" उणां ४। १६०। इति द्यून् द्युदादेशो दृष्टिश्च।) ज्योतिः। इति संक्षिप्तसारे उणादिवृत्तिः॥

द्रगड़ः, पुं, वाद्यविशेषः। दगड़ इति भाषा। तत्पर्य्यायः। प्रतिपत्पूर्णिमम् २। इति त्रिकाण्डशेषः॥

द्रङ्गणं, क्ली, (द्राङ्गत्यनेनेति। द्राङ्ग आकाङ्क्षायाम् + ल्युट्। एषोदरादित्वात् डस्यः।) तोलकम्। इति शब्दमाला॥ तत्पर्य्यायः। कोलम् २ वटकम् ३ कर्षार्द्धम् ४। इति वैद्यकपरिभाषा॥ (पुंलिङ्गेऽपि। यथा,—

"————————तद्द्वयं कोल उच्यते।
चुद्रको वटकश्चैव द्रङ्गणः स निगद्यते॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये धान्वन्तरेरुक्तम्॥)

द्रङ्गः, त्रि, पुरौ। इति हेमचन्द्रः। ४।३७॥ (यथा, राजतरङ्गिण्याम्। ८। २०११।

"तेन खनाग्ना भाक्तेषु द्रङ्गे सिन्धुरसद्रशा॥")

द्रढिमा, [न्] पुं. (दृढस्य भावः। दृढ+"पृथ्वादिभ्य इमनिज्वा।" ५। १। १२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ६।४।१६१। इति ऋकारस्य रकारः।) दृढ़ता॥ (यथा, शिवशतके। ४३।

"लघुगुरुतुलनातुलाप्रकाण्ड-
द्रढिमगुणः स भवद्गुणव्रजस्य॥")

द्रढिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन दृढ़ः। इत्यर्थे इष्ठप्रत्ययेन साध्यः। द्रढीयान्॥

द्रप्पः, क्ली. (लप्यन्त्यनेनेति। लप+अन्नादयश्च। इति निपातनात् साधुः।) घनेतरदधि। वया दर इति भाषा। इत्यमरः। २। ९। ५१॥ अस्य रूपान्तराणि। द्रप्सम् २ द्राप्सम् ३ चप्साम् ४। इति तट्टीकायां भरतः॥ (युक्तम्। इति निरुक्तम्। ५। १७॥ त्रि, हुतगमनशीलः। हुतहननशीलः। यथा, ऋग्वेदे। ९। ६९। २।

"पवमानः सन्तनिः प्रप्रतामिव
मधुमान् द्रप्सः परिवारमर्षति॥")

द्रम, गतौ। इति कविकल्पद्रमः। (भ्वां-परं-सकं-सेट्।) दन्त्यवर्गद्वितीयादिः। द्रमति। इति दुर्गादासः॥

द्रवः, पुं. (द्रु+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) परीहासः। पलायनम्। इत्यमरः। १। ७। ३२॥ (यथा, हरिवंशे। २११। १०।

"ततो दैत्यद्रवकरं पौराणं शक्रसुत्तमम्॥")

रसः। गतिः। इति विश्वः॥ वेगः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १९३। ५।

"तत्र शब्दगतिर्भूत्वा मारुतद्रवसम्भवः॥"

द्रवत्वरूपो गुणविशेषः। यथा, भाषापरिच्छेदे। २८।

"गुरुत्वी द्रवे रसवती द्वयोर्नैमित्तिको द्रवः॥"

आर्द्रे, त्रि। यथा, रघुः। ७। ७।

"प्रसाधिकालम्बितमग्रपाद-
मात्तिष्य कांचित् द्रवरागमेव॥")

द्रवजः, पुं, (द्रवात् जायते इति। जन्+डः।) गुड़ः। इति राजनिर्घण्टः॥ द्रवजातवस्तुमात्रञ्च॥

द्रवणं, क्ली, (द्रु+भावे ल्युट्।) गमनम्। (यथा, हरिवंशे। १९९। ३९।

"ते रुदन्तो द्रवन्तञ्च भगवन्तं पितामहम्।
रोदनाद्द्रवणात् चैव ततो रुद्रा इति स्मृताः॥")

चरणम्। अनुतापः॥ द्रुधातोर्भावेऽनट्॥

द्रवत्वं, क्ली, (द्रव+त्व।) द्रवस्य भावः। तद्विविधम्। यथा,—

"सांसिद्धिकं द्रवत्वं स्यात् नैमित्तिकमुदाहृतम्।
सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः॥
परमाणौ जले नित्यमन्यतोऽनित्यमुच्यते।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं संश्रये तु तत्॥"

इति भाषापरिच्छेदः॥

द्रवत्पच्ची, स्त्री, (द्रवत् पत्रं यस्याः। ङीष्।) शिग्रुवृक्षः। इति राजनिर्घण्टः॥

द्रवन्ती, स्त्री, (द्रवतीति। द्रु+शतृ+ङीप्।) नदी। इति शब्दरत्नावली॥ अस्यधिकपर्य्यायौ। नद्याकाशौ छोटा इति भोयनी इति च हिन्दी भाषा। तत्पर्य्यायः। शम्बरी २ चित्रा ३ त्र्यवोधी ४ शतमूलिका ५ प्रत्यक्श्रेणी ६ दृषा ७ चक्रा ८ पत्रश्रेणी ९ आखुकर्णिका १० अधिककर्णी ११ प्रतिपर्णशिफा १२ सहस्रमूली १३ विक्रान्ता १४। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रसवन्धकारित्वम्। ज्वरक्रिमिनाशित्वम्। शूलशमनत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

द्रवरसा, स्त्री, (द्रवो रसो यस्याः।) लाक्षा। इति राजनिर्घण्टः॥

द्रवाधारः, पुं, (द्रवाणां द्रव्याणामाधारः।) चुलुकः। इति शब्दार्थकल्पतरुः॥ द्रवद्रव्यरक्षापात्रञ्च॥

द्रविड़ी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

द्रविणं, क्ली, (द्रवति गच्छति द्रूयते प्राप्यते वेति। द्रु+"इदन्धिभ्यामिनन्।" उणा। २। ५०। इति इनन्।) धनम्। (यथाह कश्चित्।

"द्रविणं परिमितममितव्ययिनं जनमाकुलीकुरुते।
क्षीणाम्बुलमिव प्रीनस्तनजघनाया:कुलीनाया:॥")

काञ्चनम्। बलम्। इत्यमरमेदिनीकरौ॥ (यथा महाभारते। १। १०३। १६।

"एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा।
माता सत्यवती भीष्मसुवाच तदनन्तरम्॥"

पुं, घरनाम्नो वसोः पुत्रविशेषः। यथा, महाभारते। १। ६६। २१।

"धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा॥"

पृथोः पुत्रविशेषश्च। यथा, भागवते। ४।२२।५४।

"पुत्रानुत्पादयामास पञ्चार्चिष्यात्मसम्मतान्।
विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम्॥"

कुशद्वीपस्थितसीमागिरिभेदः। यथा, भागवते। ५। २०। १५।

"तेषां वर्षेषु सीमागिरयो नद्यश्चाभिख्याताः सप्त सप्तैव बभूवतुः प्रङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति॥" क्रौञ्चद्वीपस्थवर्षपुरुषविशेषः। यथा, भागवते। ५।२०।२२।

"यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषर्षभद्रविणदेवकसंज्ञा वर्षपुरुषाः॥")

द्रविणनाशनः, पुं, (नाशयतीति। नाश+ल्युः। द्रविणानां नाशनः। तत्सेवनेन धनविनाशात् अस्य तथात्वम्।) श्वेतभाङ्गनष्टः। इति शब्दरत्नावली॥

द्रविणोदाः, [स्] पुं, अग्निः। अस्य निरुक्तिर्यथा,—

"द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः।
ददाति तद्भवानेव द्रविणोदास्ततो भव॥"

इति वराहपुराणम्॥

(धनप्रदे, त्रि। यथा, ऋग्वेदे। १। १५। ७।

"द्रविणोदा द्रविणसो यावहसासो अध्वरे॥"

"कीदृशं देवं द्रविणोदाः धनप्रदम्। यद्वा, धनप्रदोऽग्निः सोमं पिबत्विति शेषः। तमेतं मन्त्रं यास्क एवं निर्वक्ति,—द्रविणोदाः कस्मात् धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्मैषा भवति द्रविणोदा द्रविणं स इत्यादि सोऽयं यास्कोक्तो निर्व्वचनप्रपञ्चः तस्मिन्नेव ग्रन्थेऽवगन्तव्यः। द्रविणोदाः द्रुदक्षिभ्यामिनन् नित्त्वादाद्युदात्तोद्रविणशब्दः तद्दातीति द्रविणोदाः। क्विप्चेति क्विप्। पूर्व्वपदस्य सकारोयजनश्चान्दसः। रुत्वोत्वे। ह्रदुत्तरपदप्रकृतिस्वरत्वम्। देवविशेषत्वेनैकवाक्यतापक्षे द्वितीयायाः सुखादेशः। अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति। सुप आत्मनः क्यच् सर्व्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति क्यचि परतः सुगागमः द्रविणस्यते: सम्यदादित्वाद्भावे क्विप्। अतो लोपः। क्लौलुप्तं न स्थानिवद्भवतीति तस्य स्थानिवत्त्वप्रतिषेधाल्लोपः एवंद्रविणस्यशब्दो धनेच्छावचनः। द्रविणेच्छान्दस्यति यथेष्टधनप्रदानेनोपक्षयतीत्यर्थे तसु उपक्षये इत्यस्मादन्तर्भावितण्यर्थात् क्विप्त्वेति क्विप्। एवं द्रविणोदःशब्दः सकारान्तो भवति। तथा हाविणोदसः प्रवाहा भवन्तीतिनैरुक्तो व्यवहार उपपद्यते अतोद्रविणोदस्शब्दः भिन्नवाक्यत्वे स्वार्थे प्रथमा। एकवाक्यत्वे तु वत्ययेन द्वितीयार्थो भवति द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपलक्षश्चान्दसः। आद्युदात्तत्वन्तु नियमेन स्थितम्। ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षे तु त्वदन्तात् क्विप्। अतो लोपादिपूर्व्ववत्। अत्र तु पक्षे व्यत्ययश्चित्त्वेनान्तोदात्तत्वे प्राप्ते वत्ययेनाद्युदात्तम्॥" इति सायणः॥)

द्रवीकरणं, क्ली, अद्रवस्य द्रवकरणम्। इति क्विप्प्रत्ययेन साध्यम्॥ गलान इति भाषा॥

द्रष्टं, क्ली, (दृशिरेव। दृ+"द्रष्टश्च भवे।" ५। ३। १०४। इति यत्प्रत्ययेन निपातनात् साधुः।) वस्तु। (यथा, मनुः। ७। ९।

"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्॥")

तस्य क्रियाविशेषे नवपुराणभेदेन प्रशस्तत्वं यथा,—

"प्रथाख्यभिनवाख्येव प्रशस्तानि क्रियाविधौ।
ऋते गृहप्रवेशौ द्वौ धान्यक्षत्राविवृद्धकृतः॥"

इति नारायणदासकृतपरिभाषा॥

("केचिदाचार्या ब्रुवते द्रव्यं प्रधानं कस्माद्-व्यवस्थितत्वादिह खलु द्रव्यं व्यवस्थितम्। न रसादयो यथा ये फले ये रसादयस्ते पक्वे न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो वापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्-गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्य-माश्रिता रसादयो भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। घ्राणप्रामाण्याच्च घ्राणे हि द्रव्यं प्रधानमुप-देशे हि योगानां यथा मातुलुङ्गाग्रिमन्यौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसाद्यो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति। एकदेश-साध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयःसाध्यन्ते यथा महाद्रुचन्दनेरेणेति तस्माद्द्रव्यं प्रधानं द्रव्य-लक्षणन्तु क्रियागुणवत्समवायिकारणमिति।"

"पाको नास्ति विना वीर्याद्वीर्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥"
"वीर्यसंज्ञा गुणा येऽपौ तेऽपि द्रव्याश्रयाः स्मृताः।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न चेतराः।
श्रेष्ठं द्रव्यमतो ह्येषां भावास्तदाश्रयाः॥"
इति सुश्रुते। १। ४०॥)

पित्तलम्। वित्तम्। पृथिव्यादि। विक्षेपनम्। क्षीवम्। भेषजम्। भक्ष्यम्। (द्रोर्विकारः। "द्रोश्च।" ४। ३। १६९। इति यत्।) द्रुम-विकारे, त्रि। इति मेदिनी। ये, २६॥ (द्रुमा-वयवः। इति सिद्धान्तकौमुदी॥) द्रुह्। विनयः। इति हेमचन्द्रः॥ मद्यम्। यथा,—

"सद्यश्चैनं न पिबेद्द्रव्यम्।" इति भावप्रकाशस्य पूर्वखण्डम्॥

न्यायमते तन्नवविधं यथा,—

"क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनौ मनः।"

तेषां साधर्म्यमादि यथा,—

"क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता।
क्षितिर्जलं तथा तेजः पवनो मन एव च॥
परापरत्वसंस्कारक्रियावेगाश्रया अमी।
कालस्त्वात्मदिशां सर्व्वगतत्वं परमं महत्॥
क्षित्यादिपञ्चभूतानि चत्वारि खलु वै हि।
द्रव्यारम्भचतुर्थं स्यादथाकाशशरीरिणाम्॥
अथाप्यवृत्तिः क्षणिको विशेषगुण इष्यते।
रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्॥
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः।
आत्मानो भूतवर्गाच्च विशेषगुणयोगिनः॥"
इति भाषापरिच्छेदः॥

द्रव्यहस्तभक्षणादिदोषादोषौ यथा,—

"उच्छावचाभ्रपात्रेषु द्रव्यहस्तो भवेन्नरः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युच्चयेत्तु ततः॥
तैलक्तं वै समादाय यदुच्छिष्टो भवेद्द्विजः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युच्चयेत्तु ततः॥
यद्यद्द्रव्यं समादाय भवेदुच्छेषणान्वितः।
अनिधायेतरद्दृश्यमाचान्तः शुचितामियात्॥
वस्त्रादिषु विकल्पः स्यात्तत् स्पृष्ट्वा चाचमेद्द्विज।
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि।
क्षालयेन्मूत्रपुरीषं वा द्रव्यहस्तो न दुष्यति॥"
इति कूर्म्मपुराणम्॥

द्रा, ल स्वप्ने। पलायने। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-अनिट्।) स्वप्नो निद्रा। निपूर्व्वे एव निद्रायामिति रमानाथः। ल, निद्राति निद्रालुः। द्राति चौरः पलायते इत्यर्थः। इति दुर्गादासः॥

द्राक्, व्य, (द्रातीति। द्रा+बाहुलकात् कुः।) द्रुतम्। शीघ्रम्। इत्यमरः। ३। ४। २॥ (यथा, नैषधे। ३। २।

"आकस्मिकः पक्षपुटाहतायाः
क्षितेस्तदा यः खल उच्चचार।
द्रागन्यविघ्नस्तदभूः स तस्याः
सम्भ्रान्तमन्तःकरणं चकार॥")

द्राक्ष, इ काङ्क्षे। घोररवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकंच-सेट्।) रेफयुक्तः। घोर-रवमिह तिरश्चामेव घोरशब्दः। इ, द्राक्षति काकः। नमश्यपाठेनैवेहसिद्धे एतस्य इदुपधस्यो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

द्राक्षा, स्त्री, (द्राक्षयते काङ्क्षते इति। द्राक्षि काङ्क्षि+घञ्। आगमशासनस्यानित्यत्वात् न लोपः।) फलविशेषः। दाख इति किशमिश इति च भाषा। आङ्गूर इति यवनभाषा। तत्पर्य्यायः। गोस्तनी २ खाद्वी ३ मधुरसा ४। इत्यमरः। २। ४। १०७॥ चारु-फला ६ क्षुण्णा ७ प्रियाला ८ तापसप्रिया ९ गुच्छफला १० रसाला ११ अम्लफला १२ क्षुण्णा १३ चारुफला १४। इति जटाधरः॥ रसा १५। इति शब्दरत्नावली॥ अस्य गुणाः। अतिमधुरत्वम्। अम्लत्वम्। शीत-पित्तार्शिदाहमूत्रदोषनाशित्वम्। रुच्यत्वम्। तृप्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। शीतबलकारित्वम्। वृष्यत्वम्। हृद्यत्वम्। क्षयावायुरक्तपित्तक्षतक्षीणतानाशित्वञ्च। इति राजवल्लभः॥

द्राख, ऋ ओखार्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दन्त्यवर्गलतीयादिः। रेफ-युक्तः। ऋ, अदद्राखत्। ओखार्थे शोषाल-मर्थयोः। इति दुर्गादासः॥

द्राघ, ऋ ङ आयामे शब्दे। इति कविकल्प-द्रुमः॥ (भ्वां-परं-अकं-दीर्घीकरणे सकं-सेट्।) श्रमः खेदः। आयामो दीर्घीकरणम्। शब्दः सामर्थ्यम्। ऋ, अदद्राघत्। ङ, द्राघते जनः खेदयते इत्यर्थः। द्राघते वस्त्रं जनो दीर्घं करोति इत्यर्थः। द्राघते धावितुं वाजी समर्थः स्यादि-त्यर्थः। इति दुर्गादासः॥

द्राघिमा, [न्] पुं, दीर्घस्य भावः। (दीर्घ+इमनिच्। "प्रियस्थिरस्फिरोरुबहुलेति।" ६। ४। १५७। इति द्राघादेशः।) दीर्घत्वम्। इति व्याकरणम्॥ भूगोलस्य दीर्घता। इत्याधुनिक-ज्योतिर्विदाः॥

द्राघिष्ठः, त्रि, (अतिशयेन दीर्घः इति। दीर्घ+इष्ठन्। दीर्घस्य द्राघादेशः।) अतिदीर्घः। इत्यमरः। ३। १। ११२॥

द्राङ्, ऋ ङ शीर्णौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। ऋ, अदद्राङ्क्त। ङ, द्राङ्क्ते। शीर्णौ विभेदे। इति दुर्गादासः॥

द्राढः, त्रि, (द्रा+कर्त्तरि क्तः। निष्ठातस्य नः। ढत्वञ्च।) सुप्तः। पलायितः॥

द्रापः, पुं, (द्रापयतीति। द्रा+णिच्। पुगागमे द्रापि+अच्।) पङ्कः। आकाशः। कर्पटः। मूर्खः। इति शब्दार्थकल्पतरुः॥

द्रामिलः, पुं, (द्रमिलाख्यो देशोऽभिजनोऽस्येति। अण्।) चाणक्यमुनिः। इति हेमचन्द्रः॥३।५१७॥

द्रावः, पुं, द्रुधातोर्भावे घञ् प्रत्ययः। गमनम्। स्रवणम्। अनुतापः॥

द्रावकं, क्ली, (द्रवति द्रावयति वा। द्रु द्रावि वा+ण्वुल्।) सिक्थकम्। इति राजनिर्घण्टः॥ क्षीहरोगस्य औषधविशेषः। (यथा,—

"स्फटिकारीद्वयञ्चैव पलं द्विपलिकन्तथा।
नरसारं पलं देयं टङ्कणञ्च पलार्द्धकम्॥
कासीशं क्षारयुग्मञ्च प्रत्येकं श्लक्ष्णचूर्णितम्।
सपञ्चलवणक्षारं कर्षमानं पृथक् पृथक्॥
अपामार्गत्रयस्यापि तथा कुष्माण्डकस्य च।
रम्भावल्कलजं क्षारं प्रत्येकञ्चार्द्धभागकम्॥
श्लक्ष्णचूर्णीकृतञ्चैतत् लिम्बाकस्वरसे क्षिपेत्।
सर्व्वमेतत् सुपिष्ट्वाथ रौद्रे दद्याद्विचक्षणः॥
आनीय काचपात्रन्तु तत्र तत् पाचयेत् भिषक्।
प्रहरार्द्धं ददौ ज्वालां सालकाष्ठाग्निना मृदु।
सुतप्ते काचकुम्भे च ततो ज्वालां निवारयेत्॥
शीतं गते तदुद्धृत्य प्रक्षिपेच्च वराटकम्।
वराटे द्रवतां याते ततः कर्म्मसु योजयेत्॥
द्रावकस्य परीक्षेयं नान्यथा च भवेत्फलम्।
गुञ्जैकं खादयेच्चापि चूर्णेन माक्षिकेण च॥
शरपुङ्खेन वा देयं तोयसुक्तं पिबेदनु॥
पथ्यमेतदृतं देयं दुःशीतास्रुग्विवर्जितम्॥"
इति वैद्यककायाग्रसंग्रहे शीहसर्व्वोदरयक्ष-दधिकारे॥) अस्य अन्यद् विवरणं महाद्रावक-शब्दे द्रष्टव्यम्॥

द्रावकः, पुं, (द्रवति चन्द्रांशुसम्पर्कादिति। द्रु+ण्वुल्।) प्रस्तरभेदः। (द्रावयतीति+द्रु+णिच्+ण्वुल्।) विदग्धः। (द्रवति क्षयायते इति। द्रु+ण्वुल्।) मोचकः। इति मेदिनी। के, १०४॥ शिङ्गः। इति शब्दमाला॥ रस-भेदः। इति शब्दरत्नावली॥ (द्रावि+ण्वुल्।) हृदयग्राही। द्रवकारकः। इति धरणिः॥

द्रावकन्दः, पुं, (द्रावकः कन्दो यस्य।) तैलकन्दः। इति राजनिर्घण्टः॥

द्रावकरं, क्ली. (दावं सुवर्णादेर्द्रवं करोति चसंयोगेनेति। द्राव+ल+टः।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥

द्रावणं, क्ली, (द्रावयति जलमलं खसम्पर्केणेति। द्रु+णिच्+ल्युट्।) कतकफलम्। इति रत्नमाला॥ निर्मली इति भाषा॥ (द्रावि+ल्युट्।) विद्रावणञ्च॥ (द्रावयतीति। द्रावि+ल्युः। पलायनकारयितरि, त्रि। यथा, महाभारते। ८। ३४। ६८।

"स देवयुक्तो रथसत्तमो नो
दुराधरो द्रावकः शात्रवाणाम्॥")

द्राविका, स्त्री, (द्रावक+टाप्। अत इत्वञ्च।) लाला। इति शब्दरत्नावली॥

द्राविड़ः, त्रि, (द्राविड़ो देशोऽभिजनोऽस्येति। अण्।) देशविशेषजातः। (यथा, महाभारते। ८। १२। १४।

"सात्यकिस्तेकितानश्च द्राविडैः सैनिकैः सह॥")

पञ्चद्राविड़ाः। यथा, द्रविड़ः १ कर्णाटः २ गुर्ज्जराटः ३ महाराष्ट्रः ४ तैलङ्गः ५। यथा, स्कन्दपुराणे।

"कार्णाटाश्चैव तैलङ्गा गुर्ज्जरा राष्ट्रवासिनः।
आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः॥"

संख्याभेदः। वेधसुखः। इति मेदिनी। ड़े, ३०॥ कर्पूरः। इति राजनिर्घण्टः॥

द्राविड़कं, क्ली, (द्रविड़े देशे भवः। अण् ततः संज्ञायां कन्।) विड़ङ्गवृक्षः। इति राजनिर्घण्टः॥

द्राविड़कः, पुं, (द्राविड़ एव। स्वार्थे कन्।) वेधसुखकः। इत्यमरः। २। ४। १३५। जिँयच्च यली इति भाषा॥

द्राविड़भूतिकः, पुं, (द्राविड़ एव भूतिरुत्पत्तिस्थानं यस्य। कप्।) द्राविड़कः। इति शब्दरत्नावली॥

द्राविड़ी, स्त्री, (द्रविड़े भवा। द्रविड़+अण्। ङीप्।) एला। इति राजनिर्घण्टः॥ (इयं एला तु गुजरातीति ख्याता॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"स्थूलैलोपकुल्या तुच्छा कोरङ्गी द्राविड़ी गुटिः॥")

द्राव्यं, त्रि, (द्रु+ण्यत्।) अवश्यगमनीयम्। अवश्यचरणीयम्। अवश्यश्रुतपनीयम्। इति द्रुधातोरवश्यम्भावार्थे ण्यत्प्रत्ययः॥

द्राह्, ऋ ड जागरे। निद्रोपे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अद्राहत्। ड, द्राहते। इति दुर्गादासः॥

द्रु, स्रुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) द्रवति। इति दुर्गादासः॥

द्रु, र न उपतापे। इति कविकल्पद्रुमः॥ (स्वां-परं-अकं सकं च-अनिट्।) र, वैदिकः। न, द्रुणोति। उपतापः इह उपतप्तीभावः उपतप्तीकरणञ्च। इति दुर्गादासः॥

द्रुः, पुं, (द्रवति ऊर्द्धं गच्छतीति। द्रु+मितद्रादित्वात् डुः।) वृक्षः। इत्यमरः। २। ४। ५॥ (यथा, मनुः। ७। १३१।

"आददीताथ षड्भागं दुमांसमधुसर्पिषाम्॥")

गतौ, स्त्री। इति शब्दरत्नावली॥

द्रुकिलिमं, क्ली, (किल्यतेऽनेनेति। किल श्वेत्यक्रीड़नयोः+बाहुलकात् किमच्। द्रुश्च्छेषु किलिमम्।) देवदारुवृक्षः। इत्यमरः। २। ४। ५३॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम्।

"देवदारुद्रुकिलिमं सुराङ्कं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥")

द्रुघणः, पुं, (द्रुर्वृक्षः हन्यतेऽनेनेति। हन+"करणेऽयोविद्रुषु।" ३। ३। ८२। इति अप् घनादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्। इममयो घनः इति वा।) मुद्गरः। इत्यमरः। २। ८। ६५॥ खड्गधारादिसप्तप्रकारलौहमयास्त्रभेदः। इति भरतः॥ (वैशम्पायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लौहास्त्रम्। यदुक्तम्।

"द्रुघणस्त्रायसाङ्गः स्यात् वक्रग्रीवो दृढच्छिराः।
पञ्चाशद्दङ्गुलोत्सेधो मुष्टिसम्मितमण्डलः॥"

अस्य चतसः क्रियाः। यथा,—

"उन्नामनं प्रपातश्च स्फोटनं दारणं तथा।
चतार्य्येतानि द्रुघणे वल्गितानि श्रितानि वै॥"

द्रुः संसारवृक्षो हन्यतेऽनेनेति।) ब्रह्मा। कुठारः। इति मेदिनी। घे, ५३॥ भूमिचम्पकः। इति शब्दचन्द्रिका॥ दन्त्यनान्तोऽपि॥

द्रुड, मज्जने। इति कविकल्पद्रुमः॥ (चुरां परं-अकं-सेट्।) रेफयुक्तः। मज्जनमिति मस्जधातोरूपम्। द्रोड़ति प्रस्तरो जले। द्रुड्रोड़यति। इति दुर्गादासः॥

द्रुड, द्रि मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) द्रि, द्रुड्रति अद्रुड्रीत् दुद्रोड़। एषः केषाञ्चिन्मतः। क्रमदीश्वरस्तु कुटादिमेव मन्यते। इति दुर्गादासः॥

द्रुण, द्रु चैक्ष्ये। गतौ। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) दन्त्यवर्गद्वितीयादिः। द्रु, द्रुणति-दुद्रोणिषति। चैक्ष्ये कुटिलीकरणम्। इति दुर्गादासः॥

द्रुण्, क्ली, (द्रुणति हिनस्तीति। द्रुण+कः।) वृश्चिकः। भृङ्गः। इति हेमचन्द्रः। ४। २७७॥ त्रि, पिशुनः। इति शब्दमाला॥

द्रुणसः, त्रि, (द्रुरिव दीर्घा नासिका यस्य। "अव्यूनसिकायाः संज्ञायां नसं चास्यूलात्।" ४। ४। ११८। इति अच्। नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) दीर्घनासिकायुक्तः। इति संक्षिप्तसारव्याकरणम्॥

द्रुणहः, पुं, (द्रुणं खड्गं हन्ति गच्छतीति। हन् गतौ+डः।) खड्गपिधानम्। इति हारावली। १२५॥

द्रुता, स्त्री, (द्रुणं धनुराश्रयत्वेनास्त्यस्याः। अच्। टाप्।) व्या। इति हेमचन्द्रः। ३। ४३६॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति। द्रुण गतौ+"द्रुगुपधात् कित्।" उणां। ४। ११८। इति इन्।) द्रोणी। इत्यमरटीकायां भरतः॥

द्रुणी, स्त्री, (द्रुण+इन्। वा ङीप्।) कर्ज्जलौकाः। कच्छपी। इति लिङ्गादिसंग्रहे अमरभरतौ॥ काष्ठाम्बुवाहिनी। इति द्रोणीशब्दटीकायां भरतः॥

द्रुतं, त्रि, (द्रवति स्मेति। द्रु+गत्यर्थेति कर्त्तरि क्तः।) जातद्रवीभावघृतसुवर्णादि। तत्पर्य्यायः। अवदीर्णम् २ विलीनम्३ विद्रुतम् ४। इत्यमरः। ३। १। १००॥ शीघ्रम्। (यथा, महाभारते। १३। २६। ८१।

"वायुरीरितामिः सुमनोहराभि-
र्हंसाभिरत्यर्थसमुत्थिताभिः।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धाः
सहस्ररश्मिप्रतिमा भवन्ति॥")

विद्रावम्। पलायितम्। इति मेदिनी। ते, २५॥ (यथा रघुः। ६। ५६।

"जग्राह स द्रुतवराहकुलस्य मार्गं
सद्यस्कभार्द्रदृषदुक्तिभिरायताभिः॥")

द्रुतं, क्ली, (द्रु+क्तः।) मृत्यविषयकशीघ्रगमनम्। तत्पर्य्यायः। ओघः २। इत्यमरः १। २। ६८॥ शीघ्रनयः। इति मधुः॥ मृत्यगीतादौ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽच। इति भरतः॥ साङ्गे।

"द्रुतामध्ययने वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामनुरोधार्थे विलम्बितां समाचरेत्॥"

इति वेदव्यवस्था॥

(शिघ्रम्। यथा, मनुः। ६। १७२।

"अभ्याघातेषु मध्यस्थान् शिष्यान्वैराणिव द्रुतम्॥"

क्रियाविशेषणत्वादस्य क्लीवता॥)

द्रुतः, पुं, (द्रवति स्म उड़ैमिति। द्रु+क्तः।) द्रुमः। इति धरणिः॥

द्रुनखः, पुं, (द्रोर्वृक्षस्य नख इव। असंज्ञात्वात् अच् ह्रस्वाभावः।) कण्टकम्। इति त्रिकाण्डशेषः॥

द्रुपदः, पुं, पञ्चालदेशीयचन्द्रवंशीयराजविशेषः। तस्य कन्या द्रौपदी। पुत्रौ शिखण्डिधृष्टद्युम्नौ। इति महाभारतम्॥ (क्ली, यूपैकदेशः। यथा, ऋग्वेदे। १। २४। १६।

"शुनःशेपो ह्यह्वद्गृभीतस्त्रिषु आदित्यं द्रुपदेषु बद्धः।"

"द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः।" इति तद्भाष्ये सायनः॥ काष्ठपादुका। यथा, वाजसनेयसंहितायाम्। २०। २०।

"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव॥"

"द्रुस्तरुस्तन्मयं पदं द्रुपदं पादुका तस्मान्मुमुचानः एवग् भवन्।" इति वेददीपः॥)

द्रुपदा, स्त्री, ऋक्। सा च वैदिकमन्त्रविशेषः। यथा, उच्छिष्टस्य चाण्डालादिस्पर्शे आपस्तम्बः।

"भुक्तोच्छिष्टखनाचान्तस्नाखालैः श्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्॥
गायत्र्याश्चसहस्रन्तु हुत्वा वा घृतं जपेत्॥"
इत्याह्निकाचारतत्त्वम्॥

द्रुमः, पुं, (समुदाये वृक्षाः शब्दा अवयवेष्वपि वर्त्तन्ते इति न्यायात् द्रुः शाखा विद्यतेऽस्य। "द्रुद्रुभ्यां मः।" ५।२।१०८। इति मः।) वृक्षः। इत्यमरः। २।४।५॥ (यथा, मनुः। ६।२५५।

"निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्।
तस्य तद्वर्द्धते नित्यं विषमान इव द्रुमः॥")
पारिजातः। कुबेरः। इति मेदिनी। मे, १५॥ (खनामख्यातः किम्पुरुषेश्वरः। यथा, महाभारते। २।१०।२८।

"द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्॥"
खनामख्यातनृपविशेषः। स तु गिरिनामदैत्यस्यांशात् जातः। यथा, तत्रैव।१।६७।८।

"यस्तु राजन्! गिरिर्नाम दैतेयः परिकीर्त्तितः।
द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः॥"
रुक्मिणीगर्भजातः कृष्णस्य पुत्रविशेषः। यथा, हरिवंशे। १६०।६।

"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च॥")
द्रुमनखः, पुं, (द्रुमस्य नख इव।) कण्टकम्। इति हारावली॥

द्रुमरः, पुं, (द्रुन्निंयतेऽनेनेति। द्रु+करके अप्।) कण्टकम्। इति हारावली। ६१॥

द्रुमव्याधिः, पुं, (द्रुमस्य व्याधिरिव।) काचा। इति राजनिर्घण्टः॥

द्रुमश्मश्रुः, क्ली, (द्रुमस्य श्मश्रुरिव श्मश्रु यस्य।) कृत्रिमभेदः। यथा,—

"कपिश्मश्रुः द्रुमश्मश्रुः तथा चाखोटश्मश्रुकम्।
इति कृत्रिमभेदाः स्युः शास्त्रिके समुदाहृताः॥"
इति शब्दरत्नावली॥

(द्रुमस्य श्मश्रुः इति विग्रहे वृक्षाग्रम्॥)

द्रुमश्रेष्ठः, पुं, (द्रुमेषु लक्षणवृक्षेषु श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ वृक्षश्रेष्ठश्च॥

द्रुमामयः, पुं, (द्रुमस्य आमयो व्याधिः।) काचा। इत्यमरः। २।६।१२५॥

द्रुमारिः, पुं, (द्रुमस्य अरिः। वृक्षनाशकत्वात् तथात्वम्।) हस्ती। इति राजनिर्घण्टः॥

द्रुमाश्रयः, पुं, (द्रुमः आश्रयो यस्य।) खरटः। इति राजनिर्घण्टः॥ वृक्षाश्रितमात्रेषु, त्रि॥

द्रुमेश्वरः, पुं, (द्रुमेषु ईश्वरः श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ (द्रुमाणां ओषधीनामीश्वरः।) चन्द्रः। इति हरिवंशः॥

द्रुमोत्पलः, पुं, (द्रुमे उत्पलमिव पुष्पं यस्य।) कर्णिकारवृक्षः। इत्यमरः। २।४।६०॥

द्रुवयं, क्ली, (द्रोर्वृक्षस्य विकारभूतं प्रस्थादिपरिमाणम्। द्रु+"माने वयः।" ४।३।१६२। इति वयः।) परिमाणम्। इत्यमरः। २।८।८५॥ (पुंलिङ्गेऽपि। यथा, अथर्ववेदे। ५।२०।२।

"सिंह इवाक्षानीदृद्रुवयो विवद्धः॥")

द्रुसक्तकः, पुं, (द्रुषु सक्तक इव।) पियालवृक्षः। इति शब्दरत्नावली॥

द्रुह, ह्रु य ऊ जिघांसे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-वेट्।) जिघांस इच्छानिष्टाचरणमिति विद्वानिवासः। ह्रु, अद्रुहत्। य, द्रुह्यति खलः साधवे। ऊ, द्रोहिष्यति द्रोग्धि। इति दुर्गादासः॥

द्रुहः, पुं, (द्रुह्यति धनादिलाभाशया पिण्डविनाशं चिन्तयतीति। द्रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) पुत्रः। इति शब्दार्थकल्पतरुः॥ (द्रोहकारके, त्रि। यथा, ऋग्वेदे। ७।१०४।१७।

"नक्तमप द्रुहा तन्वं गूहमाना।"
"या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेण युक्ता।"
इति तद्भाष्ये सायनः॥)

द्रुहण, पुं, (द्रुं संसारगतिं हन्तीति। हन्+अच्।) "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) ब्रह्मा। इति भरतद्विरूपकोषः॥

द्रुहिणः, पुं, (द्रुह्यति दुष्टेभ्य इति। द्रुह+"बहुलमन्यत्रापि।" उणां २।४६। इति इनन्। गुणाभावश्च।) ब्रह्मा। इत्यमरः। १।१।१७॥ (यथा, देवीभागवते। १।८।२८।

"द्रुहिणे सृष्टिशक्तिञ्च हरौ पालनशक्तिता॥")

द्रुही, स्त्री, (द्रुह्यति पित्रे विवाहकालीनधनाग्रहणादिना। द्रुह+कः। ततो ङीष्।) दुहिता। इति शब्दार्थकल्पतरुः॥

द्रू, गं ग ण वधे गतौ। इति कविकल्पद्रुमः॥ (स्वां-क्र्यां च-उभं-सकं-सेट्।) ग ण, द्रूणोति द्रूणुते। ग ण, द्रूणाति द्रूणीते। इति दुर्गादासः॥

द्रूः, पुं, (द्रवति खवतीति। द्रु+"क्विप् वचिप्रच्छीति।" उणां २।५७। इति क्विप् दीर्घश्च।) खर्जूम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

द्रूघणः, पुं, (द्रूघणः। पृषोदरादित्वात् दीर्घः।) हननः। इति भरतद्विरूपकोषः संक्षिप्तसारश्च॥

द्रूणः, पुं, (द्रूणः। पृषोदरादित्वात् दीर्घः।) हननः। इक्षिकः। इति शब्दार्थकल्पतरुः॥

द्रेक, ऋ ङ खनोत्साहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) तवर्गळतीयादिः। रेफयुक्तः। ङावर्थौ। उत्साहो वृद्धिरिति चन्द्रः। औन्नत्यमिति चौरस्वामी। ऋ, व्यद्रेकत्। ङ, द्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः। खनेनोत्साहः खनोत्साहः। इति केचित्। तन्मते शब्देनोत्सहते इत्यर्थः। इति दुर्गादासः॥

द्रेकः, द्रेकाणः } पुं, लग्नसप्तमीयभागैकभागः। यथा, ज्योतिस्तत्त्वे।

"खपञ्चनवमानां ये राशीनामधिपा यदा।
ते द्रेकाणाधिपा ज्ञेया द्रेकाणास्तय एव हि॥"

द्रै, खप्ने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) द्रायति। इति दुर्गादासः॥

द्रोणः, पुं, क्ली, (द्रवतीति। द्रु गतौ+"कृवृजिसिद्रुस्फुन्यनिखनिभ्यो नित्।" उणां ३।१०। इति नः।) आढकपरिमाणम्। आढकचतुष्टयम्। इति शब्दरत्नावली॥ ३२ शेर इति लौकिकमानम्। तत्पर्य्यायः। घटः २ कलसः ३ उन्मानम् ४ लक्षणः ५ अर्म्मणः ६। इति वैद्यकपरिभाषा॥ "द्रोणस्तु खार्य्याः खलु षोड्शांशः।" इति लीलावती॥ (अरणीकाष्ठम्। यथा, ऋग्वेदे। ६।२।८।

"क्रत्वा हि द्रोणे अध्यसेऽग्ने वाजी न जिग्युः।"
"हे अग्ने क्रत्वा कर्म्मणा मन्थनरूपेण द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वमध्यसे हि।" इति तद्भाष्ये सायनः॥ काष्ठनिर्म्मितकलशः। यथा, तत्रैव। ६।३७।२।

"प्रो द्रोणे हरयः कर्म्मागमन् पुनानास ऋज्यन्तो अभूवन्॥"
"द्रोणे द्रोणकलशे ऋज्यन्त ऋजु गच्छन्तोऽभूवन्।" इति सायनः॥ द्रुममयरथः। इति निरुक्तम्। ५।२६॥ यथा, ऋग्वेदे।६।४४।२०।

"आ ते वृषन् वृषणो द्रोणमस्थुः।"
"द्रोणं द्रुममयं रथमस्थुः।" इति सायनः॥)

द्रोणः, पुं, (द्रोणः कलस उत्पत्तिस्थानत्वेनास्यास्य। द्रोण+अच्।) द्रोणाचार्य्यः। (अयं कुरुपाण्डवानां आचार्य्यः। अस्य पिता भरद्वाजः। अस्य जन्मवृत्तान्तं यदुक्तं महाभारते। १। १३१।६-१६।

"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः।
भरद्वाज इति ख्यातः सततं संशितव्रतः॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम्।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा॥
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतान्धिः।
रूपयौवनसम्पन्नां मदहृष्टां मदालसाम्॥
तस्याः पुनर्नदीतीरे वसनं प्रस्थे वर्त्तत।
अपकृष्टाम्बरां दृष्ट्वा तान्द्विजश्चकमे ततः॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः।
ततोऽस्य रेतश्चस्कन्द तद्द्रोण्यां व्यधद्धृषि॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः॥
अग्निवेशं महाभागं भरद्वाजः प्रतापवान्।
प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः॥
अग्नेस्तु जातः स तु निशातो भरतसत्तम!।
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्॥"
अस्य पत्नी कृपाचार्य्यभगिनी कृपी पुत्रस्तु अश्वत्थामा। अयं हि भारतयुद्धे दुर्य्योधनस्य पक्षमवलम्ब्य पञ्चदशदिनं यावत् युद्धमकरोत्। तत्र पूर्व्वं दशदिनं भीष्मदेवस्यार्द्धनत्वेन स्थित्वा पश्चादस्य शरशय्याशरणागमनानन्तरं एकादशदिनात् स्वयं सेनापतिरभवत्। तत एनं अधर्म्मयुद्धनिरतं दृष्ट्वा ऋषयः समागत्य सम्यगं ऋतुकालं विज्ञापयामासुः। यथा, महाभारते। ७।१८८। ४६-५२।

"त एनमब्रुवन् सर्व्वे द्रोणमाहवशोभिनम्।
अधर्म्मतः कृतं युद्धं समयो निधनस्य ते॥
न्यस्यायुधं रणे द्रोण! समीक्ष्यानवशिष्यताम्।
ज्ञातः क्रूरतरं कर्म्म पुनः कर्त्तुमिहार्हसि॥

वेदवेदाङ्गविदुष: सत्यधर्मरतस्य ते ।
ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥
त्यजायुधममोघेषो ! तिष्ठ वत्मनि मा भ्रथा: ।
परिपूर्णश्च कालस्ते वस्तुं लोके त्वमायुषे ॥
ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा युधि ।
यदेतदीदृशं विप्र ! कृतं कर्म्म न साधु तत् ॥
नास्यायुधं रथे क्षिप्रं द्रोण ! मा त्वं चिरं कृथा: ।
मा पापिष्ठतरं कर्म्म करिष्यसि पुनर्हि ! ॥"
अयं हि जमदग्निप्रभृतिभिरृषी व्यस्तश्चस्त्रश्च द्रुपदपुत्रेण धृष्टद्युम्नेन निहत: । यथा, तत्रैव । ७ । १६० । २२—४० ।
"तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्न: प्रतापवान् ।
सशरं तद्धनुर्घोरं संन्यस्याथ रथे तत: ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥
हाहाकृतानि भूतानि मानुषाणीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥
हाहाकारं भृशञ्चक्रुरृषो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्रमाधुत्तृष्ण्य परमं ब्राह्ममास्थित: ॥
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपा: ।
पुराणं पुरुषं विष्णुं जगाम मनसा परम् ॥
सेखं किञ्चित्समुन्नाम्य विष्टभ्य उरमयत: ।
निमीलिताक्ष: सत्त्वस्थो निधिध्यौ हृदि धारणाम् ॥
ओम् इत्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपा: ।
स्मरित्वा देवदेवेशमक्षरं परमं विभुम् ॥
दिवमाक्रामदाचार्य: सद्भि: सह दुराक्रमम् ।
द्वौ सूर्य्याविव नो बुद्धिरासीत्तस्मिंस्तथागते ॥
एकाग्रमिव चासीच्च ज्योतिभि: पूरितं नभ: ।
समपद्यदथार्काभं द्रोणस्य निधने तथा ॥
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत ।
आसीत् किलकिलाशब्द: प्रहृष्टानां दिवौकसाम् ।
ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते ॥
वयमेव तदाद्राक्ष्म पञ्च मानुषयोनय: ।
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ॥
अहं धनञ्जय: पार्थ: कृप: शारद्वतस्तथा ।
वासुदेवश्च वार्ष्णेयो धर्म्मपुत्रश्च पाण्डव: ॥
अथैते तु सर्व्वे नापश्यन् भारद्वाजस्य धीमत: ।
महिमानं महाराज ! योगयुक्तस्य गच्छत: ॥
ब्रह्मलोकं महद्दिव्यं देवगुह्यं हि तत्परम् ।
गतिं परमिकां प्राप्तमजानन्तो वृथोनय: ।
नापश्यन् गच्छमानं हि तं भारद्वाजमृषिपुङ्गवै: ।
आचार्य्यं योगमास्थाय ब्रह्मलोकमरिन्दमम् ॥
वितुन्नाङ्गं शरव्रातैर्व्यस्तायुधमसक्कृशम् ।
धिक्कृतं पार्षतस्तेन सर्व्वभूतै: पराभ्यधात् ॥
तस्य मुहूर्त्तमालम्ब्य गतसत्त्वस्य देहिन: ।
किञ्चिदभ्यवत: कायाद्दिव्यकर्म्मासिना शिर: ॥"
"क्रोशमानेऽर्जुने चैव पार्थिवेषु च सर्व्वश: ।
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ॥
शोणितेन परिक्लिन्नो रथाङ्गमिरिन्दम: ।
लोहिताङ्ग इवादित्यो दुर्द्दर्श: समपद्यत ॥"*॥)
दग्धकाक: । इति मेदिनी । णे, १७ ॥ (यदुक्तम् ।
"के शब्दं कुर्वतं दृष्ट्वा द्रोणो हर्षमुपागत: ।
रुदन्ति पाण्डवा: सर्व्वे हाहा के शब्द के शब्द ॥")
दुष्किक: । इति राजनिर्घण्टः ॥ चतु:शतधनु:-परिमितजलाशय: । यथा, शतेन धनुर्भि: पुष्करिणी । त्रिभि: शतैर्दीर्घिका । चतुर्भिर्द्रोण: । पञ्चभिस्तडाग: । द्रोणाद्द्विगुणा वापी । इति जलाशयतत्त्वम् ॥ मेघनायक: । यथा,—
"त्रिद्युते शाकवर्षे तु चतुर्भि: प्रेषित: क्रमात् ।
आवर्त्तो विद्धि सम्वर्त्तो पुष्करं द्रोणमम्बुदम् ॥
आवर्त्तो निर्जलो मेघ: सम्वर्त्तश्च बहूदक: ।
पुष्करो दुष्करजलो द्रोण: शस्यप्रपूरक: ॥"
इति ज्योतिस्तत्त्वम् ॥
श्वेतवर्णक्षुद्रपुष्पवृक्षविशेष: । चलचसिया इति हलकसिया इति च भाषा ॥ यथा,—
"ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तस्मै दुर्गे ! प्रयच्छामि पवित्रन्ते सुरेश्वरि ! ॥"
इति स्वार्थकृतदुर्गापूजाप्रयोग: ॥
(शाकद्वीपान्तर्गतपर्व्वतविशेष: । यथा, मात्स्ये । १२१ । ५६ ।
"चतुर्थ: पर्व्वतो द्रोणो यत्रौषध्यो महागिरौ ।
विशल्यकरणी चैव सञ्जीवकरणी तथा ॥"
वसुपुत्रविशेष: । यथा भागवते । ६ । ६ । ११ ।
"वसवोऽष्टौ वसो: पुत्रास्तेषां नामानि मे शृणु ।
द्रोण: प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसु: ॥")
द्रोणकाक:, पुं, (द्रोण एव काक: ।) वनकाक: । दाँड़काक इति भाषा । तत्पर्य्याय: । काकोल: २ । इत्यमर: । २ । ५ । २१ ॥ द्रोण: ३ अरण्यवायस: ४ वनवासी ५ महाप्राण: ६ क्रूरराबी ७ पलप्रिय: ८ । इति राजनिर्घण्टः ॥ काकल: ९ । इति शब्दरत्नावली ॥
द्रोणगन्धिका, स्त्री, (द्रोणस्य द्रोणपुष्पस्य गन्ध इव गन्धो यस्या: । कप् । टापि अत इत्वम् ।) राखा । इति चटाधर: ॥
द्रोणघा, स्त्री, (द्रोणदुघा । पृषोदरादित्वात् दुलोप: ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणदुग्धा, स्त्री, (द्रोणपरिमितं दुग्धं यस्या: ।) द्रोणक्षीरा । इति हैमचन्द्र: । ४ । ३३५ ॥
द्रोणदुघा, स्त्री, (द्रोणं दोग्धीति । दुह+"दुह: कप् घश्च ।" ३।२।७०। इति कप् घश्चान्तादेश: ।) द्रोणपरिमितदुग्धदात्री गवी । तत्पर्य्याय: । द्रोणक्षीरा २ । इत्यमर: । २।९ । ७२ ॥ द्रोणमाना ३ द्रोणघा ४ पयस्विनी ५ । इति शब्दचन्द्रिका ॥ द्रोणदुग्धा ६ । इति हैमचन्द्र: । ४ । ३३५ ॥ द्रोणमानपयस्विनी ७ । इति शब्दरत्नावली ॥
द्रोणपुष्पी, स्त्री, (द्रोणवत् पुष्पं यस्या: ङीष् ।) क्षुद्रक्षुपविशेष: । गूमा इति ख्याता । तत्पर्य्याय: । खर्व्वपत्रा २ कुम्भयोनि: ३ कुरुम्बिका ४ चित्राक्षुप: ५ कुरुम्बा ६ सुपुष्पा ७ चित्रपत्रिका ८ । इति राजनिर्घण्टः ॥ द्रोणा ९ फलेपुष्पा १० । इति भावप्रकाश: ॥ अस्या गुणा: । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । वातकफाग्निमान्द्यपक्षतनाशित्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् । वातपित्तकारित्वम् । सत्वारत्वगुणत्वम् । स्वादुपाकित्वम् । मेदकत्वम् । आमकामलाश्लीपतमकश्वासजन्तुनाशित्वञ्च । इति भावप्रकाश: ॥ गोशीर्षकवृक्ष: । इति रत्नमाला ॥ चलचसिया इति भाषा । अस्य गुण: । कफार्शःकामलाक्रिमिश्लीपनाशित्वम् । इति राजवल्लभ: ॥
द्रोणमाना, स्त्री, (द्रोणो मानं दुग्धस्य यस्या: ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणसुखं, क्ली, चतु:शतग्राममध्ये मनोहरग्राम: । इति हारावली । १२० ॥
द्रोणस्थ:, त्रि, (द्रोणं द्रोणपरिमितं पचतीति । द्रोण+पच+"परिमाणे पच: ।" ३ । २।३३। इति खश् ।) द्रोणपरिमितवस्तुपाककर्त्ता । इति सुश्रुतोक्तपाककरणम् ॥
द्रोणा, स्त्री, (द्रोण+टाप् ।) द्रोणपुष्पी । इति भावप्रकाश: ॥
द्रोणाचार्य्य:, पुं, (द्रोण एव आचार्य्य: ।) भरद्वाजपुत्र: । स: अश्वत्थामपिता कुरूणामुपति: । पाण्डवानामस्त्रशिक्षागुरुश्च । तत्पर्य्यायः । द्रोण: २ गुरु: ३ आचार्य्य: ४ कौरविभाक् ५ भारद्वाज: ६ कुम्भयोनि: ७ द्रोणाचार्य्यक: ८ । इति शब्दरत्नावली ॥ (विशेषविवरणमस्य द्रोणशब्दे द्रष्टव्यम् ॥)
द्रोणि:, स्त्री, (द्रवतीति । द्रु गतौ+"वहिश्रिश्रुयुद्रुस्रुभ्य इ:।" उणा ४।५१ । इति नि: स च नित् ।) द्रोणी । इत्यमरटीकायां भरत: ॥ (पुं, अश्वत्थामा । स तु अष्टममन्वन्तरगतानां ऋषीणामन्यतम: । यथा, मार्कण्डेये । ८० । ४ ।
"ऋष्यशृङ्गस्तथा द्रोणिस्तच सप्तर्षयोऽभवन् ॥")
द्रोणिका, स्त्री, (द्रोणिरिव कायति प्रकाशते इति । कै+क+टाप् ।) नीलीवृक्ष: । इति शब्दरत्नावली ॥
द्रोणी, स्त्री, (द्रोणि+ऋदिकारादिति वा ङीष् ।) देशविशेष: । काष्ठाम्बुवाहिनी । गर्त्तादनी । इति मेदिनी । णे, १७ ॥ (कलग्रामाकारग्रामविशेष: । यथा, महाभारते । १ । ६३ । १०३ ।
"भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥")
नीलीवृक्ष: । इति शब्दरत्नावली ॥ शैलभेद: । शैलयो: सन्धि: । इति हैमचन्द्र: । ४ । २०० ॥ इन्द्रचिर्भिटी । द्रोणीलवणम् । इति राजनिर्घण्टः ॥ नदीविशेष: ॥ इत्युणादिकोष: ॥ द्विरूर्षपरिमाणम् । १२८ शेर इति भाषा । तत्पर्य्याय: । वाह: २ गोणी ३ । इति वैद्यकपरिभाषा ॥
द्रोणीदल:, पुं, (द्रोण्या इव दलं यस्य ।) केतकीपुष्प: । इति हारावली । ६२ ॥
द्रोणीसुखं, क्ली, (द्रोण्यीव सुखं यस्य ।) द्रोणसुखम् । इति भूरिप्रयोग: ॥
द्रोणीलवणं, क्ली, (द्रोणीसम्भूतं लवणम् ।) उपकर्षाटदेशप्रसिद्धलवणविशेष: । तत्पर्य्याय: । द्रोणेयम् २ वार्द्धेयम् ३ द्रोणीजम् ४ वारिजम्

५ वार्ड्डिभवम् ६ द्रोणी ७ त्रिकूटलवणम् ८। अस्य गुणाः। पाकेनाल्पगुणत्वम्। अविदाहित्वम्। भेदनत्वम्। स्निग्धत्वम्। शूलनाशित्वम्। अल्पपित्तलत्वञ्च। इति राजनिर्घण्टः॥

द्रोहः, पुं, (द्रुह्+भावे घञ्।) जिघांसा। अनिष्टचिन्तनम्। तत्पर्य्यायः। अपक्रिया २। इति हेमचन्द्रः। ३।१५१॥ यथा, कूर्म्मपुराणे।

"देवद्रोहाद्गुरोर्द्रोहः कोटिकोटिगुणाधिकः॥"

(कुत्रवधः। यथा, मनौ। ७। ४८।

"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्चापि पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥"

"द्रोहस्त्रुवधः।" इति तट्टीकायां कुल्लूकभट्टः॥)

द्रोहचिन्तनं, क्ली, (द्रोहस्य चिन्तनम्।) परानिष्टचिन्ता। तत्पर्य्यायः। व्यापादः २। इत्यमरः। १। ५। ४॥

द्रोहाटः, पुं, (द्रोहाय अटतीति। अट्+अच्।) गाथाप्रभेदः। व्यगलुब्धकः। वेड़ालव्रतिकः। इति मेदिनी। टे, ४६॥

द्रोही, [न्] पुं, (द्रोहोऽस्यास्तीति इनिः। यद्वा, द्रुह्यतीति णिनिः।) द्रोहकः। परानिष्टचिन्तकः। यथा,—

"मित्रद्रोही कृतघ्नश्च ये च विश्वासघातकाः।
ते नरा नरके यान्ति यावच्चन्द्रदिवाकरौ॥"

इति सर्ब्बमिरोपाख्यानम्॥

(यथा च, कथासरित्सागरे। ५। ६३॥

"तच्छ्रुत्वाचिन्तयद्राजा नूनं द्रोही स एव मे॥")

द्रौणायनः, पुं, (द्रोणस्यापत्यम्। द्रोण+फक्।) अश्वत्थामा। इति त्रिकाण्डशेषः॥

द्रौणिः, पुं, (द्रोणस्यापत्यम्। द्रोण+इञ्।) अश्वत्थामा। इति शब्दरत्नावली॥ (यथा, महाभारते। ४। ५६। ७४।

"आहत्य तु महाबाहुर्यतो द्रौणिस्ततो ह्ययान्॥"

अयं हि एकोनचिंशद्द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। २३।

"एकोनचिंशत्संप्राप्ते द्रौणिर्व्यासो भविष्यति॥")

द्रौणिकः, त्रि, (द्रोणस्य द्रोणपरिमितबीजस्य वापः इति। द्रोण+"तस्य वापः।" ५। १। ४५। इति ठक्।) द्रोणपरिमितबीजवपनयोग्यक्षेत्रम्। इत्यमरः। २।४।१०॥ (द्रोणेन क्रीतः। निष्कादित्वात् ठक्। द्रौणक्रीतः॥ द्रोणं द्रोणपरिमितद्रव्यं पचतीति। द्रोण+"संभवत्यवहरति पचति।" ५। १। ५२। इति ठञ्। द्रौणपाचकः। इति सिद्धान्तकौमुदी॥)

द्रौपदी, स्त्री, (द्रुपदस्यापत्यं स्त्री। द्रुपद+अण्। ङीप्।) द्रुपदराजकन्या। तत्पर्य्यायः। याज्ञसेनी २ कृष्णा ३ सैरिन्ध्री ४ नित्ययौवना ५ वेदिजा ६ यज्ञसेनी ७। इति हेमचन्द्रः। ३। ३७४॥ अस्याः पञ्चस्वामिकारणं यथा,—

वह्निरुवाच।

"शृणु राम! महाभाग! सीतासंगोपनं कुरु।
समाहाभ्यन्तरे चैव रावणो दुष्टराक्षसः।
दुर्निवार्य्यः प्राक्तनेन जानकीञ्च हरिष्यति॥

राम उवाच।

सीतां गृहीत्वा त्वं गच्छ छायाञ्चैव तु तिष्ठतु।
कलत्रवर्ज्जनं कर्म्म सर्ब्बेषाञ्च जुगुप्सितम्॥
सीतां गृहीत्वा प्रययौ रुदन्तीञ्च हुताशनः।
सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ॥
सा च छाया हृता पूर्ब्बं रावणेन बलीयसा।
समुद्धार तां रामो निहत्य तं सबान्धवम्॥
वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह।
अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम्॥
सा च छाया तपश्चक्रे नारायणसरोवरे।
तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः॥
वरं वृणुष्व भद्रे! तमुवाच शङ्करश्च ताम्।
उवाच सा शिवं यथा भर्त्तुर्दुःखेन दुःखिता॥
पतिन्देहि पञ्चधा वा वरं वव्रे त्रिलोचनम्।
सर्ब्बसम्मतप्रदस्तुष्टस्तस्यै शूली वरं ददौ॥

महादेव उवाच।

साध्वि! त्वं पञ्चधाऽऽत्मानं पतिन्देहीति व्याकुला।
पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव॥
ते च सर्ब्बे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः।
सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा॥
कृते युगे वेदवती चेतायां जनकात्मजा।
द्वापरे द्रौपदी छाया तेन कृष्णा चिरायुषी॥
वैश्यावी कृष्णभक्ता च तेन कृष्णा प्रकीर्त्तिता।
स्वर्गलक्ष्मीर्भवेन्द्राणां सा च पञ्चत्वमेष्यति॥
राजा ददौ फाल्गुनाय कन्यायाञ्च स्वयंवरे।
प्रपच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह।
शूरश्रेष्ठेन पूर्ब्बञ्च परञ्च मातुराज्ञया॥
द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः।
चतुर्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

द्वन्द्वं क्ली, (द्वन्द्वं एवोदरादित्वात् वस्य लोपः।) मिथुनम्। इति शब्दरत्नावली॥

द्वन्द्वं, क्ली, (द्वौ द्वौ सहाभियत्तौ। "द्वन्द्वं रहस्यमर्य्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिलक्षिष्वं।" ८। १। १५। इति द्विशब्दस्य द्विर्वचनं पूर्ब्बपदस्यामभावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते।) रहस्यम्। कलहः। (यथा, स्थितोपतेर्ग्वे। ३। ३२।

"शूलं दद्यान्न विषदेदिति प्राज्ञस्य लक्षणम्।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम्॥")

मिथुनम्। (यथा, रघुः। १। ४०।

"परस्परातिसादृश्यमदूरोन्नतिवर्त्मसु।
व्यद्वन्द्वेषु प्रयत्नौ स्खन्दनावद्वहद्विषु॥")

युग्मम्। इति मेदिनी। वे, १०॥ (यथा, महाभारते। १। १३०। १५।

"द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो!॥"

प्रीतोत्थादि। यथा, माघे। ४। ६४।

"सर्ब्बत्तुंनिर्वृतिकरे निवसन्नुपेति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि॥")

दुर्गगृ। (अत्र पुंस्त्वमपि।) अथ द्वन्द्वयुक्तिः।

"राज्ञो बलं न हि बलं द्वन्द्वमेव बलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"

तथा च।

"एकः शतं योधयति प्राकारस्थो धनुर्द्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्।
यद्दैवस्थितं द्वन्द्वं गिरिनद्यादिसंश्रितम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह।
कृत्रिमं नाम विज्ञेयं लङ्घालङ्घ्यं वैरिणाम्॥"

तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा,—

"अत्युच्चविस्तीर्णगिरिर्दुरारोहः सकाननः।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यदन्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम्॥
तन्मध्यरचिता भूमिर्द्वन्द्वलेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्ब्बं महत्तरम्॥"*॥

कृत्रिमद्वन्द्वयुक्तिर्यथा,—

"यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वलेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकिसङ्कटम्।
द्वन्द्वलेन समादिष्टं विस्तीर्णं विषमं बलम्॥
अधोऽधोवध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वलेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्ब्बतः परिखां कृत्वा निबन्धोपरि कन्दरम्।
तज्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्थ भूप्रदेशस्य बन्धनात्।
वर्षासु प्रवते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यच्च कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्विविधो रिपुः॥
सर्ब्बो हि त्रिविधो युद्धः समासादुपदिश्यते।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"

अथ सामान्यतो गुणाः।

तथा हि। नीतिशास्त्रम्।

"सप्रवेशापसरणं द्वन्द्वसत्तममुच्यते।
अन्यच्च वन्दिशालेव न ताडगवरोधमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वरद्वन्द्वञ्च सप्तमं॥"

अन्ये तु।

"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्वृद्वन्द्वं प्रकीर्त्तितम्।
योद्वृशून्यं हि यत् द्वन्द्वं मृतकायसमं हि तत्॥"

अथाऽत्रापि।
"यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
चिंशत्तदर्द्धोत्तरयोत्तरेण
चिदेशचानां धरणीपतीनाम्॥"
गर्गस्तु।
"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
ताभ्यामेवातिरिच्येत मल्लद्वन्द्वं विशेषतः॥
अन्येषु देवाद् भिन्नेषु मल्लद्वन्द्वात् जयेन्नृपः।
मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥"
भोजस्तु।
"यदेव वैरिदुर्लक्ष्यं विस्तीर्णं विषमञ्च तत्।
सप्रवेशापसरणं तद्वन्द्वमुत्तमं विदुः॥"
इति भोजराजकृतयुक्तिकल्पतरुः॥

द्वन्द्वः, पुं, (द्वौ द्वौ सहाभिधत्ते इति। निपातनात् साधुः। चार्थे द्वन्द्व इति निर्देशात् पुंस्त्वम्।) रोगविशेषः। समासभेदः। इति शब्दरत्नावली॥ स तु भिन्नार्थानां पदानां समासः। बोपदेवेनास्य चसंज्ञा कृता। स इतरेतरयोगसमाहारभेदेन द्विधा भवति। इतरेतरद्वन्द्वो यथा। हरिश्च हरश्च हरिहरौ। अत्र प्रत्येकपदप्राधान्यात् द्विवं बहुवं शेषशब्दलिङ्गभाजित्वञ्च भवति। समाहारद्वन्द्वो यथा। वाक् च त्वक् च द्वयोः समाहारः वाक्त्वचम्। अत्र संहतेरेकत्वादेकवचनं नित्यक्लीवलिङ्गत्वञ्च भवति। इति मुग्धबोधम॥ (यदुक्तं,— [भावः॥")
"द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययो-

द्वन्द्वचरः, पुं, (द्वन्द्वेन चरतीति। चर+अच्।) चक्रवाकः। इति हेमचन्द्रः। ४। ३६६॥ (यथा, रघुः। १६। ६३।
आवर्जशोभा नतनाभिकान्ते-
र्भङ्गो भुवां द्वन्द्वचराः स्तनानाम्।
जातानि रूपावयवोपमाना-
न्यपूरवस्तूनि विलासिनीनाम्॥")

द्वन्द्वचारी, [न्] पुं, (द्वन्द्वेन चरतीति। चर+णिनिः।) चक्रवाकः। इति चिकाण्डशेषः॥

द्वन्द्वजः, पुं, (द्वन्द्वात् जायते इति। जन+डः।) द्विदोषजरोगः। इति निदानम्॥ कलहजाते, त्रि॥

द्वयं, क्ली, (द्वौ अवयवौ यस्य। द्वि+"संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्। "द्वित्रिभ्यामन्यतरस्यामूर्ध्वा।" ५। २। ४३। इति तयस्यायच्।) द्वितालकम्। दुइ इति भाषा। तत्पर्य्यायः। उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युग्मम् १० यमलम् ११ यामलम् १२। इति हेमचन्द्रः। ६। ५६॥

द्वयाधिः, पुं, (द्वयो द्विरूपोऽधिर्यत्र। यद्वा द्वयो द्विरूपोऽधिः।) वृक्षभेदः। दोचिता इति भाषा। तत्पर्य्यायः। पाटी २ वृक्षाधिः ३। इति शब्दचन्द्रिका॥

द्वयातिगः, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति। अति+गम+डः।) रजस्तमोगुणशून्यः। सत्त्वगुणयुक्तः। इत्यमरः। २। ७। ४५॥

द्वारः, [र्] क्ली, (द्वारयतीति। वृ वरणे+णिच्+बाहुलकात् किप्।) द्वारम्। इत्यमरः। २। २। १३॥ (यथा, भागवते। ३। ५। १।
"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम्॥")
उपायः। यथा, ज्ञानद्वारा भवेन्मुक्तिरिति ज्ञानशास्त्रम्॥

द्वारः, पुं, (द्वारि तिष्ठतीति। स्था+कः।) द्वारपालः। इति शब्दरत्नावली॥ (यथा, भागवते। १। १८। ३४।
"ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः।
स कथं तद्गृहे द्वाःस्थः सभाङ्गं भोक्तुमर्हति॥")
नन्दिकेश्वरः। इति भूरिप्रयोगः॥

द्वाःस्थितः, त्रि, (द्वारि स्थितः।) द्वारपालः। इत्यमरकोषशब्दरत्नावल्यौ॥

द्वाःस्थितदर्शकः, त्रि, (द्वाःस्थितः सन् पश्यतीति। दृश्+ण्वुल्।) द्वारपालः। इत्यमरटीकायां भरतः॥

द्वाःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितः सन् पश्यतीति। दृश्+णिनिः।) द्वारपालः। इति भरतधृतधरणिः॥

द्वाचत्वारिंशत्, स्त्री, (द्व्यधिका चत्वारिंशत्। द्विशब्दस्य वा आत्वम्।) द्विचत्वारिंशत्। इति व्याकरणम्॥ ४२ बेयालिश इति भाषा॥

द्वाचिंशत्, स्त्री, (द्व्यधिका विंशत्। "द्वादशन्यः संख्यायामिति।" ६।३।४७। इति आत्वम्।) द्व्यधिकविंशत् संख्या। तत्संख्येयाच्च। ३२ बत्तिश इति भाषा। यथा, द्वाचिंशत्प्रसवे नार्य्याश्चतुस्त्रिंशद्गृहे नृणामित्यादि ज्योतिस्तत्त्वम्॥

द्वाचिंशदक्षरी, [न्] पुं, (द्वाचिंशदक्षराणि सन्ति अत्र। बाहुलकात् इनिः।) मन्त्रः। इति चिकाण्डशेषः॥

द्वाचिंशल्लक्षणोपेतः, पुं, (द्वाचिंशल्लक्षणैरुपेतः।) महापुरुषः। इति शब्दार्थकल्पतरुः॥ तल्लक्षणानि यथा,—
"रागः सप्तसु चाष्टसूपि स्निग्धोरक्तेष्वलं तुङ्गता
विस्तारश्चिषु खर्व्वता त्रिषु तथा गम्भीरता च त्रिषु।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु सखे! संश्लेष्यते कृष्णता
द्वाचिंशद्वरलक्षणः कथमसौ गोपेषु सम्भाव्यते॥"
इति श्रीहरिभक्तिरसाब्धतसिन्धुः॥
"राग इति। श्रीमद्व्रजेश्वरं प्रति कस्यचित् सवयसो गोपस्य वाक्यमिदम्। सप्तसु नेत्रान्तप्रादकरतललालाक्षधरौष्ठजिह्वानखेषु षट्सु वक्षःस्थलनखनासिकाकटिमुखेषु। त्रिषु कटिललाटवक्षःसु। केचित् कटिस्थाने शिरः पठन्ति।

द्वादश, [न्] त्रि, (द्व्यधिको दश। "दशन् इति।" ६।३।४७। इति आत्वम्।) द्व्यधिका दश। १२ बार इति भाषा। द्वादशसंख्या तत्संख्येयाच्च। अयं नित्यबहुवचनान्तः। त्रिलिङ्गे समानरूपः। इति व्याकरणम्॥ द्वादशवाचकानि यथा। सूर्य्यः १ मासः २ राशिः ३ संक्रान्तिः ४ गुहबाहुः ५ सारिकोष्ठः ६ गुहनेत्रम् ७ राशिमण्डलम् ८। इति कविकल्पलता॥

द्वादशः, त्रि, (द्वादशानां पूरणः। "तस्य पूरणे डट्।" ५।२।४८। इति डट्।) द्वादशानां पूरणः। इति व्याकरणम्॥ बारइ इति भाषा। (यथा, मनुः।
"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः॥"
महादेवः। यथा, महाभारते। १३।१७।६३।
"द्वादशस्याग्नयश्चाद्यो यज्ञो यज्ञसमाहितः॥")

द्वादशकरः, पुं, (द्वादश करा भुजा यस्य।) द्वादशभुजः। इति त्रिकाण्डशेषः॥ कार्त्तिकेयश्च॥

द्वादशपञ्चकं, क्ली, (द्वादश अक्षराणि मन्त्राणि एव यस्य।) योगविशेषः। यथा,—
"पितामहोऽपि तं पुत्रं साध्यं सङ्गिनये रतम्।
सनत्कुमारं प्रोवाच योगं द्वादशपञ्चकम्॥
शिखासंस्थानु ओंकारं मेधोऽस्य शिरसि स्थितः।
भासो वैश्वानराख्यश्च प्रथमं पञ्चकं स्मृतम्॥
नकारः शिरसि प्रोक्तो द्वयोऽस्य शिरसि स्थितः।
ज्येष्ठमासश्च तत् पञ्चं द्वितीयं परिकीर्त्तितम्॥
मोकारो भुजयोर्युग्मं मिथुनं तच्च संस्थितम्
मास आषाढ़नामा च तृतीयं पञ्चकं स्मृतम्॥
भकारो नेत्रयुगलं कर्कटस्तच्च संस्थितः।
मासः श्रावण इत्युक्तश्चतुर्थं पञ्चकं स्मृतम्॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च।
मासो भाद्रस्तथा प्रोक्तः पञ्चमं पञ्चकं स्मृतम्॥
वकारं कथितं विद्यात् कन्या तत्र प्रतिष्ठिता।
मासश्चाश्वयुजो नाम षष्ठं तत्पञ्चकं स्मृतम्॥
तेकारमन्त्रयामश्च तुलाराशिश्चताश्रयः।
मासश्च कार्त्तिको नाम सप्तमं पञ्चकं स्मृतम्॥
वाकारो नाभिसंयुक्तः स्थितस्तत्र च वृश्चिकः।
मासो मार्गशिरो नाम त्वष्टकं पञ्चकं स्मृतम्॥
सुकारो जघनः प्रोक्तस्तत्रश्च धनुर्धरः।
पुष्येति गदितो मासो नवमं परिकीर्त्तितम्॥
देकारश्चोरुयुगलं मकरोऽप्यत्र संस्थितः।
माघो निगदितो मासः पञ्चकं दशमं स्मृतम्॥
वाकारो जानुयुगलं कुम्भस्तत्रापि संस्थितः।

पत्रकं फाल्गुनः प्रोक्तं तदेकादशसुत्तमम् ॥
पादौ यकारो मीनो हि स चेचे वसते सुने ! ।
इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ॥
द्वादशारन्तथा चक्रं यत्राभिहितमुत्तथा ।
त्रिपृथून्त्वेकमूर्त्तिश्च तथोक्तः परमेश्वरः ॥
एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् ।
यस्मिन् ज्ञाते मुनिश्रेष्ठ ! न भूयो मरणं भवेत् ॥"
इति वामनपुराणेऽपक्षाशत्तमोऽध्यायः ॥

द्वादशलोचनः, पुं, (द्वादश लोचनानि नेत्राणि यस्य । बहुव्रीहौ लोचनादेरास्य तथात्वम् ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥

द्वादशांशुः, पुं, (द्वादश अंशवः किरणानि यस्य ।) दृढसूतिः । इति भूरिप्रयोगः ॥ (यदुक्तं मात्स्ये । १२७ । ५५ ।
"लोहितो नवरश्मिस्तु स्थापमापन्न तस्य वै ।
दृष्ट्वा द्वादशरश्मीकं हरिद्राभन्तु वेधसः ॥")

द्वादशाक्षः, पुं, (द्वादश अक्षीणि यस्य ।) कार्त्तिकेयः । (द्वादशविषयेषु अक्षिणी यस्य ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ६ । ४५ । ५६ ।
"एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥")

द्वादशाक्षरमन्त्रः, पुं, (द्वादश अक्षराणि अस्य । ताडशो मन्त्रः ।) द्वादशवर्णात्मकविष्णुविषयकमन्त्रविशेषः । यथा,—
"नमो भगवते वासुदेवायोङ्कारपूर्व्वकम् ।
महामन्त्रमिमं प्राहुस्तत्त्वज्ञा द्वादशाक्षरम् ॥"
इति आग्ने क्रियायोगसारः ॥

द्वादशाख्यः, पुं, (द्वादश ज्ञानकर्म्मादिविषयान् आख्यातीति । ख्या कथने + कः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

द्वादशाङ्गुलः, पुं, (द्वादश अङ्गुलयः परिमाणमस्य । "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ।" ५ । ४ । ८६ । इति अच् ।) वितस्तिः । इत्यमरः । २ । ६ । ८४ ॥

द्वादशात्मा, [न्] पुं, (द्वादश आत्मानो मूर्त्तयो यस्य ।) सूर्य्यः । (यथा, महाभारते । ३ । ३ । २६ ।
"द्वादशात्मारविन्दाक्षः पिता माता पितामहः ॥")
अर्कवृक्षः । इत्यमरः ॥

द्वादशायुः, [स्] पुं, (द्वादशवर्षपर्य्यन्तं आयुर्यस्य ।) कुक्कुरः । इति शब्दमाला ॥

द्वादशार्चिः, [स्] पुं, (द्वादश अर्चींषि किरणानि यस्य ।) दृढसूतिः । इति हेमचन्द्रः । २ । ३२ ॥

द्वादशी, स्त्री, (द्वादश + टित्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णुतिथिः । यथा,—
"त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ॥
धृताग्निको भवेद्यस्तु द्वादश्यां तत्परायणः ।
स्वर्गवासी स भवतु, पुमान् स्त्री वा विशेषतः ॥"
मार्गशीर्षीया शुक्लद्वादशी मत्स्यद्वादशी १ पौषी कूर्म्मद्वादशी २ माघी वराहद्वादशी ३ फाल्गुनी नृसिंहद्वादशी ४ चैत्री वामनद्वादशी ५ वैशाखी जामदग्न्यद्वादशी ६ ज्यैष्ठी रामद्वादशी ७ आषाढ़ी शयनद्वादशी ८ श्रावणी वुद्धद्वादशी ९ भाद्री कल्किद्वादशी १० आश्विनी पद्मनाभद्वादशी ११ कार्त्तिकी नारायणद्वादशी १२ । एतासां नाम धरणीव्रतम् । एतत्करणे महापातकम् । इति वराहपुराणम् ॥

अथ पिपीतकद्वादशी । नारदीये ।
"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां प्रीतजलोयेन स्नापयेत् केशवं शुचिः ॥"
इयं पिपीतकद्वादशी । अत्र ।
"षष्ठीसमेता कर्त्तव्या सप्तमी नात्रभीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥
एकादश्यां प्रकुर्व्वन्ति उपवासं मनीषिणः ।
उपासनाय द्वादश्यां विष्णोर्यद्वदियं तथा ॥"
इति भविष्यपुराणेन एकादश्युपवासानन्तरं द्वादश्यां विष्णूपासनाया उक्तत्वात् । अत्रापि तथा सवत्सरन्नीति नाच शुभादरः । द्वादशीक्षये तूपवासानन्तर्य्ये विनापि पूजेति । इयं पूर्व्ववचनोक्ता षष्ठीयुता सप्तमी ॥ आषाढ़ादिद्वादशीषु व्रतयनादिकम् ॥ * ॥

अथ श्रवणद्वादशी ।
सा भाद्रशुक्लद्वादश्यामेव सम्भवति । "भविष्योत्तरे ।
'द्वादशी श्रवणोपेता सर्व्वपापहरा तिथिः ।
बुधवारसमायुक्ता ततः शतगुणा भवेत् ।
तासुपोष्य समाप्नोति द्वादशद्वादशीफलम् ॥'
उभयदिने तल्लाभे तु एकादशीयुतैव ग्राह्या ।
'द्वादशी च प्रकर्त्तव्या एकादश्यन्विता विभो ।
सदा कार्य्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः ॥'
इति स्कान्दात् ॥
यदा त्वेकादश्यामेव श्रवणा तदा तासुपवसेत् । तथा च नारदः ।
'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
तासेव तद्व्रतं कुर्य्यात् श्रवणद्वादशीं विना ॥'
भविष्योत्तरेऽपि ।
'एकादशी यदा तु स्यात् श्रवणेन समन्विता ।
विजया सा सदा प्रोक्ता भक्तानां विजयप्रदा ॥
तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल ! श्रवणं वर्त्तते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥'
तिथिक्षयेण एकादशीतिथिक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः । अत्र हेतुर्द्वादशीमित्यादि । यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां श्रवणं तदोपवासद्वयमाह ब्रह्मवैवर्त्तः ।
'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥'
अत्र असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरमिति स्मृतेः ॥ पारणस्याकरणेन पूर्व्वोपवासाद्वादशीव्रतं न समाप्यते उपवासान्तरारम्भे विधिलोपो न भवेदित्यर्थः, हेतुमाह उभयोरित्यादि । उभयोरुपवासासामर्थ्ये तु श्रवणद्वादश्येवोपोष्या । तथा च स्मृतिः ।
'वरमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्व्वोपवासजं पुण्यं सर्व्वं प्राप्नोत्यसंशयम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥'
द्वादश्युपवासः काम्यः । तथा च मार्कण्डेयपुराणम् ।
'द्वादश्युपवासेन शुद्धात्मा भूप ! सर्व्वदा ।
चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ॥'
कार्त्तिकशुक्लद्वादशी मन्वन्तरा । "तथा च भविष्यव्रतस्थयोः ।
'अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।'
इत्यादिवचनात् ।" इति तिथितत्त्वम् ॥ * ॥
"अग्रहायणशुक्लद्वादशी अखण्डद्वादशी । तत्रोपोष्य विष्णुपदप्राप्तिकामोऽखण्डद्वादश्यां विष्णुं पूजयिष्ये इति संकल्प्य पञ्चगव्येन स्नापयित्वा यथाशक्त्युपचारेण संपूज्य यवत्रीहिपूर्णपात्रं गृहीत्वा ।
'ॐ सप्तजन्मसु यत्किञ्चिन्मया खण्डव्रतं कृतम् ।
भगवंस्तत्प्रसादेन तदखण्डमिहास्तु मे ॥
यथा खण्डं जगत् सर्व्वं त्वमेव पुरुषोत्तम ! ।
ततोऽखिलान्यखण्डानि व्रतानि मम सन्तु वै ॥'
इति प्रार्थ्य दक्षिणां दद्यात् ।" इति कृत्यचन्द्रिका ॥
भैमीपरद्वादश्यां षट्तिलाचरणम् । यथा विष्णुधर्म्मोत्तरे ।
"नभस्यमासे शुक्लपक्षे माघे मासि प्रशस्यते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ॥
तिलस्नायी तिलोदर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥
सकृत्तु षट्तिली भूत्वा सर्व्वपापैः प्रमुच्यते ।
चिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"
अथ गोविन्दद्वादशी ।
"फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥"
अत्र गङ्गायां पद्मपुराणीयो मन्त्रः ।
"महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ! ॥"
इति तिथ्यादितत्त्वम् ॥

अथ द्वादशीजातफलम् ।
"बन्धुप्रियः सर्व्वजनानुरागी
भूपालमान्यस्तिथिप्रियः स्यात् ।
चैत्रे द्वादश्यां यस्य जनस्य जन्म
प्रवासशीलो व्यवहारदक्षः ॥"
इति फोलीप्रदीपः ॥

द्वापरः, पुं, (द्वयोर्विषययोः परस्तात्परं आसक्तः इत्यर्थः । पृषोदरादित्वात् साधुः ।) सन्देहः । (द्वौ सत्यत्रेतायुगौ परौ श्रेष्ठौ यस्मात् ।) युगविशेषः । इत्यमरः । ३ । ३ । १६१ ॥ तद्युगपरिमाणं यथा,—

"अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥"
८६४,००० ॥ तस्य धर्म्मो यथा,—
"अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे चीर्णे द्वापरं प्रतिपद्यते ॥
द्वापरादौ प्रजानान्तु विद्यिक्षतायुगे तु या ।
परिवृत्ते युगे तस्मिंस्तता सा विप्रणश्यति ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः ।
लोभो धृतिर्वैग्रिग्युद्धं तत्त्वानामविनिश्चयः ॥
प्रध्वंसश्च वर्णानां कर्म्मणाञ्च विपर्य्ययः ।
यज्ञे वधः पशोर्दैष्टो मानो दर्पः क्षमा बलम् ॥
तथा रजस्तमो भूयः प्रवर्त्तते द्वापरे पुनः ।
आद्ये हते न धर्म्मोऽस्ति स त्रेतायां प्रवर्त्तितः ॥
द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे ध्वंसः संक्षीयन्ते तथाश्रमाः ॥
त्रैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृतौ ।
द्विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते ॥
अनिश्चयोऽधिगमनाद्धर्म्मतत्त्वं न विद्यते ।
धर्म्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते ॥
परस्परविभिन्नैस्तैर्दृष्टीनां विभ्रमेण तु ।
ततो दृष्टिविभिन्नैस्तैः कृतं शास्त्राकुलं त्विदम् ॥
एकं वेदं हि वै व्यासः संक्षिप्य तु पुनः पुनः ।
संक्षेपादायुषश्चैव दृश्यते द्वापरे त्विह ।
वेदश्चैकश्चतुर्द्धा तु व्यस्यते द्वापरादिषु ॥
ऋषिपुत्रैः पुनर्भेदाद्विद्यन्ते दृष्टिविभ्रमैः ।
मन्त्रब्राह्मणविन्यासैः स्वरक्रमविपर्य्ययैः ॥
संहिता ऋग्यजुःसाम्नां सहितास्तैः श्रुतर्षिभिः ।
सामान्यादेकतश्चैव दृष्टिभिन्नैः क्वचित् क्वचित् ॥
ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च ।
अन्ये तु प्रस्थितास्तत्र वै केचिन्न प्रत्यवस्थिताः ॥
द्वापरेषु प्रवर्त्तन्ते भिन्नार्थैस्तैः सुदर्शनैः ।
एवमाध्वर्य्यवं पूर्व्वमासीद्वेधं ततः पुनः ॥
सामान्यविपरीतार्थैः कृतं शास्त्राकुलं त्विदम् ।
आध्वर्य्यवस्य प्रस्थानैर्बहुधा व्याकुलीकृतम् ॥
तथैवाथर्व्वणां साम्नां विकल्पैः स्वस्य संक्षयैः ।
व्याकुलो द्वापरेष्वर्थः क्रियते भिन्नदर्शनैः ॥
द्वापरे त्वनिवृत्तास्ते वेदा नश्यन्ति वै कलौ ।
तेषां विपर्य्ययोत्पन्ना भवन्ति द्वापरे पुनः ॥
अदृष्टिमरणञ्चैव तथैव व्याधयश्चवाः ।
वाङ्मनःकर्म्मभिर्दुःखैर्निर्वेदो जायते ततः ।
निर्वेदाज्जायते तेषां दुःखं मोक्षविचारणा ।
विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् ॥
दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिश्च जायते ।
तेषां मेधाविनां पूर्व्वमाद्ये स्वायम्भुवेऽन्तरे ।
उत्पद्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः ॥
आयुर्व्वेदविकल्पाश्च ज्ञानां ज्योतिषस्य च ।
अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम् ॥
प्रक्रियाकल्पसूत्राणां भाष्यविद्याविकल्पनम् ।
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् ॥
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम् ।
मनसा कर्म्मणा वाचा लुब्धाद्यैर्न्न यतिष्यते ॥
द्वापरः सर्व्वभूतानां कायक्लेशपुरस्कृतः ।

लोभो धृतिर्वैग्रिग्युद्धन्तत्त्वानामविनिश्चयः ॥
वेदशास्त्रप्रणयनं धर्म्माणां सङ्करस्तथा ।
वर्णाश्रमपरिध्वंसः कामहेतौ तथैव च ॥
पूर्व्वे वर्षसहस्रे द्वे परमायुस्तदा नृणाम् ।
निःशेषे द्वापरे तस्मिन् तस्य सन्ध्या तु पादतः ॥
गुणहीनाश्च तिष्ठन्ति धर्म्मस्य द्वापरस्य तु ।
तथैव सन्ध्यापादेन अंशुस्तस्य प्रतिष्ठितः ॥"
इति मत्स्यपुराणे १२० अध्यायः ॥

द्वापरयुगं, क्ली, (द्वापर एव युगम् ।) तृतीययुगम् । तस्योत्पत्त्यादि यथा । "भाद्रकृष्णत्रयोदश्यां गुरुवासरे द्वापरयुगोत्पत्तिः । तत्र अवतारद्वयम् । कृष्णबुद्धौ । पुण्यमर्द्धम् । पापमर्द्धम् । नैमिषारण्यं तीर्थम् । नाड़ीत्रयं ब्राह्मणः । रक्तगताः प्राणाः । सप्तहस्तपरिमितो मानवदेहः । सहस्राब्दमायुः । ताम्रपात्रे भोजनम् । इति द्वापरयुगस्य लक्षणम् । द्वापरयुगाब्दाः ८६४,००० । द्वापरयुगस्य राजानः शाल्वविराटहंसध्वजकंसध्वजमयूरध्वजवत्सवाहनरुक्माङ्गदजरासन्धदुर्य्योधनयुधिष्ठिराः । धर्म्माधर्म्मरतो लोकः प्रजासी चपलः सदा । ज्ञाननिष्ठः कपटवाक् द्वापरे राजविस्तरः ॥ तत्र तारकब्रह्मनाम ।

हरे ! मुरारे मधुकैटभारे
गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो !
निराश्रयं मां जगदीश ! रक्ष ॥"

इति सुब्राह्मणपञ्जिकातः संगृहीतम् ॥

द्वापरयुगाद्या, स्त्री, (द्वापरयुगस्य आद्या आरम्भिका तिथिः ।) द्वापरयुगारम्भतिथिः । सा च गौणभाद्रकृष्णत्रयोदश्यौ । तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम् ॥

द्वारं, क्ली, (द्वरति निर्गच्छति गृहाभ्यन्तरादनेनेति । द्वृ + घञ् ।) निर्गमनम् । उपायः । इति मेदिनी । रे, ४८ ॥ आद्यस्य पर्य्यायः । द्वाः २ प्रतीहारः ३ । इत्यमरः । २ । ३ । १६ ॥ वारकम् ४ । इति शब्दरत्नावली ॥

"गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिन्यूनाधिकं शुभम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकः, पुं, (द्वारेण प्रशस्तप्रतीहारेण कायति शोभते इति । कै + कः) द्वारका । इति शब्दरत्नावली ॥

द्वारकण्टकः, पुं, (द्वारस्य कण्टक इव ।) कवाटम् । इति शब्दरत्नावली ॥

द्वारका, स्त्री, (द्वारेण बहुना प्रशस्तेन च प्रतीहारेण कायतीति । कै + कः । स्त्रियां टाप् ।) खनामख्यातपुरी । तत्पर्य्यायः । द्वारावती २ द्वारवती ३ वनमालिनी ४ द्वारिका ५ अब्धिनगरी ६ द्वारकः ७ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १३२ । ४६ ।

"सत्यकं प्रेषयामास द्वारकां द्वारमालिनीम् ॥")

तस्या निर्म्माणप्रकारो यथा,—

श्रीकृष्ण उवाच ।

"हे सखद्र महाभाग ! स्मरत्व शतयोजनम् ।
देहि मे नगरार्थञ्च यत्राहास्यामि निश्चितम् ॥
नगरं कुरु हे कारो त्रिषु लोकेषु दुर्ल्लभम् ।
रमणीयञ्च सर्व्वेषां कमनीयञ्च योषिताम् ॥
वाञ्छितञ्चापि भक्तानां वैकुण्ठसदृशं परम् ।
सर्व्वेषामपि स्वर्गाणां परं परमभीप्सितम् ॥
दिवानिशं स्वगश्रेष्ठ ! सन्निधौ विश्वकर्म्मणः ।
स्थितिं कुरु भद्राभाग ! यावन्निर्म्माति द्वारकाम् ॥

विश्वकारुरुवाच ।

द्वारकाञ्च किमाकारां करोमि जगतां विभो ! ।
कथयस्व महाभाग ! निर्म्माणक्षमतीश्वर ! ॥

भगवानुवाच ।

शतयोजनपर्य्यन्तं नगरं सुमनोहरम् ।
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ॥
रत्नकैः पारिभद्रैश्च पालङ्कैश्च सुमन्तकैः ।
गन्धकैर्गालिमैश्चैव चन्द्रकान्तादिभिस्तथा ॥
सूर्य्यकान्तादिभिश्चैव पुत्तैश्च स्फटिकाहतैः ।
हरिदर्णैश्च मणिभिः श्यामैर्गैरिसुखैश्च वै ॥
गोरोचनाभैः पीतैश्च दाड़िम्बबीजरूपकैः ।
पद्मबीजनिभैश्चैव नीलैः कमलवर्णकैः ॥
मणिभिः कञ्चलाकारैरञ्जनैश्च परिष्कृतैः ।
श्वेतचम्पकवर्णाभैस्तप्तकाञ्चनसन्निभैः ॥
स्वर्णमल्लयूथगुञ्जैरीषद्रक्तैश्च रूपकैः ।
गरिष्ठैश्च वरिष्ठैश्च मणिश्रेष्ठैश्च पूजितैः ॥
यथाविधानं यद्योग्यं यच्च यद्युक्तमीप्सितम् ।
मणीनां हरणञ्चैव यत्नसंघा हिमालयात् ॥
दिवानिशं करिष्यन्ति यावन्निर्म्माणपूर्व्वकम् ।
यत्नेश्च सप्तभिर्लक्षैः कुबेरप्रेरितैरपि ॥
वेतालसङ्घैः कुष्माण्डलक्षैः गुह्यकयोनितैः ।
दानवैर्व्वज्रदंष्ट्राभिः श्येनकन्यानियोजितैः ॥
कुरु दिव्यञ्च पत्नीनां सहस्राणाञ्च षोड़श ।
अन्यपत्नीजनस्यापि चाष्टाधिकशतस्य च ॥
शिविरं परिखायुक्तसुखैःप्राकारवेष्टितम् ।
युक्तं द्वादशसारञ्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च क्षत्रिमैश्च कवाटकैः ।
निबिड़वज्रदृढ़ितं प्रविड़ैश्च पुरस्कृतम् ॥
सुलक्षणं चन्द्रवेधं प्राङ्गनञ्च तथैव च ।
यदूनामाश्रमं दिव्यं किङ्कराणान्तथैव च ॥
सर्व्वप्रसिद्धं निलयसुग्रसेनस्य भूभृतः ।
आश्रमं सर्व्वतोभद्रं वसुदेवस्य मत्पितुः ॥
कथितः लोकशिक्षार्थं कुरु कार्य्यं विना पुरीम् ।
शुभक्षणञ्चाप्यधुना गच्छ वत्स ! यथासुखम् ॥
विश्वकर्म्मा हरिं नत्वा जगाम पक्षिणा सह ।
समुद्रस्य समीपञ्च वटमूलं मनोहरम् ॥
सुस्वाप तत्र नक्षत्रं कारुश्च पक्षिणा सह ।
स्वप्ने द्वारवतीं रम्यां ददर्श गरुड़स्तथा ॥
यत्किञ्चित् कथितः कारुः कृष्णेन परमात्मना ।
तदेव लक्षणं सर्व्वं ददर्श नगरे सुने ! ॥
कारुं हसन्ति स्वप्ने च सर्व्वे ते शिल्पकारिणः ।
गरुड़ं गरुड़ाद्यान्ये बलवन्तञ्च पक्षिणः ॥
बुद्ध्वा ददर्श गरुड़ो विश्वकर्म्मा च लज्जितः ।

अतीव द्वारकां रम्यां शतयोजनविस्तृताम् ॥
ब्रह्मादीनाञ्च नगरं विजित्य च विराजिताम्।
तेजसाच्छादितां सूर्य्ये रत्नानाञ्च परिष्कृताम् ॥
वासुदेव उवाच।
पैत्रकीतीर्थतुल्या सा किं तीर्थं द्वारकापरम्।
सर्व्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा ॥
यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् ॥
दानञ्च द्वारकायाञ्च श्राद्धञ्च देवपूजनम्।
चतुर्गुणञ्च तीर्थानां गङ्गादीनाञ्च भूमिप ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकेशः, पुं, (द्वारकाया नगर्य्या ईशः।) श्रीकृष्णः। इति शब्दरत्नावली ॥

द्वारदातुः, पुं, (द्वारं ददातीति। दा+तुन्।) वरदातुः। भूमीसहदृच्यः। इति भावप्रकाशः ॥

द्वारपालः, त्रि, (द्वारं पालयतीति। पालि+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) द्वाररक्षकः। दरवान्। इति पारस्य भाषा। तत्पर्य्यायः। प्रतीहारः २ द्वाःस्थः ३ द्वाःस्थितः ४ दौर्गिकः ५। इत्यमरः। २। ८। ६ ॥ वेत्रधारकः ६ द्वौःसाधिकः ७ वर्षवरूकः ८ गर्व्वाटः ९ दण्डवाशी १०। इति त्रिकाण्डशेषः ॥ द्वारस्थः ११ चक्री १२ द्वारपालकः १३ दौवारिकः १४ वेत्री १५ उत्सारकः १६ दण्डी १७। इति हेमचन्द्रः ॥ अस्य विवरणं दौवारिकशब्दे द्रष्टव्यम् ॥

द्वारपालकः, पुं, (पालयतीति ण्वुल्। द्वाराणां पालकः। यद्वा, द्वारपाल+स्वार्थे कन्।) द्वारपालः। इति शब्दरत्नावली ॥

द्वारपिण्डी, स्त्री, (द्वारस्य पिण्डी पिण्डिकेव।) देहली। इति जटाधरः ॥

द्वारबलिभुक्, [ज्] पुं, (द्वारदत्तं बलिं भुङ्क्ते इति। भुज्+क्विप्।) वकः। इति त्रिकाण्डशेषः ॥

द्वारयन्त्रं, क्ली, (द्वारबन्धकं यन्त्रं मध्यलोपी समासः।) तालकम्। इति हेमचन्द्रः। ४। ७१॥ ताला इति कुलुप इति च भाषा ॥

द्वारवती, स्त्री, (द्वाराणि सन्त्यत्र। यद्वा, चतुर्व्वर्णानां मोक्षद्वाराणि सन्ति अत्रेति। द्वार+मतुप्। मस्य वः।) द्वारका। इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे। १०। ३४।
"श्रुतां द्वारवतीं नाम बहुद्वारां मनोरमाम् ॥"
तथा च तत्रैव,—
"चतुर्णामपि वर्णानां यत्र द्वाराणि सर्व्वतः।
अतो द्वारवतीयुक्ता विद्वद्भिस्तत्त्ववेदिभिः ॥"
इयं हि पीठस्थानानामन्यतमा। अत्र भगवती रुक्मिणीरूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥")

द्वारस्थः, पुं, (द्वारे तिष्ठतीति। स्था+कः।) द्वारपालः। इति हेमचन्द्रः। ३। ३८५ ॥ (द्वारस्थिते, त्रि। यथा, कथासरित्सागरे। १८।११६।
"सुप्ते च तस्मिन् द्वारस्थो जागरामास स द्विजः ॥")

द्वारावती, स्त्री, (द्वाराणि प्रशस्तबहुलप्रतीहाराः सन्त्यत्र। द्वार+मतुप् मस्य वः। निपातनात् पूर्व्वदीर्घश्च।) द्वारका। इति हेमचन्द्रः। ४। ४६॥
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥
एतासु पृथिवीमध्ये न गण्यन्ते कदाचन।
पुरी द्वारावती विष्णोः पाञ्चजन्योपरिस्थिता ॥
मुक्तिदा एताः सर्व्वाश्च एकत्र गणिताः सुरैः।
यानि यानि च क्षेत्राणि काश्मीप्राप्तिकराणि षट् ॥"
इति भूतशुद्धितत्त्वम् ॥

द्वारिकः, पुं, (द्वारं पाल्यत्वेनाऽस्त्यस्येति ठन्।) द्वारपालः। इत्यमरटीकासारसुन्दरी ॥ (यथा, पञ्चतन्त्रे। १। ८५।
"यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत्।
मिथ्यावादं विशेषेण तस्य कार्य्यं न सिध्यति ॥")

द्वारिका, स्त्री, (प्रशस्तानि द्वाराणि सन्त्यस्यामिति। ठन् टाप् च।) द्वारकापुरी। इति शब्दरत्नावली ॥

द्वारी, [न्] त्रि, (द्वारं पाल्यतयास्त्यस्येति इनिः।) द्वारपालः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। १२६। १०।
"द्वारिणं तापसा ऊचू राजानञ्च प्रकाशय ॥")

द्वाविंशतिः, स्त्री, (द्वाधिका विंशतिरिति। "द्वादशन्संख्यायामबहुव्रीह्यशीत्योः।" ६। ३। ४७। इति आत्प्रत्ययः।) द्वाधिकविंशतिः। इति व्याकरणम् ॥ बाइश इति भाषा। (यथा, महाभारते। ७। ४६। १८।
"कर्म्मा द्वाविंशतिं भक्तान् क्षतवर्म्मा चतुर्दश ॥")

द्वासप्ततिः, स्त्री, (द्वाधिका सप्ततिरिति। "षिभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम्।" ६। ३। ४८। इति पाक्षिक आत्प्रत्ययः।) द्विसप्ततिः। यथा, द्वासप्ततिश्च वन्ध्यायामिति ज्योतिस्तत्त्वम् ॥

द्वास्थः, पुं, (द्वारि तिष्ठतीति। स्था+"सुपिस्थः।" ३। २। ४। इति कः। "खर्परे शरि वा विसर्गलोपो वक्तव्यः।" ८। ३। ३६। इत्यस्य वार्त्तिकोक्त्या विसर्गस्य पाक्षिकलोपः।) द्वारपालः। इत्यमरटीकायां भरतः ॥

द्वास्थितः, पुं, (द्वारि स्थितः। विसर्गस्य पाक्षिकलोपः।) द्वारपालः। इत्यमरटीकायां भरतः ॥

द्वास्थितदर्शकः, पुं, (प्रश्नतीति। दृश्+ण्वुल्। द्वास्थितः सन् दर्शकः।) दौवारिकः। इत्यमरटीकायां भरतः ॥

द्विः, अ, द्वौ वारौ, इति सुच्प्रत्ययेन साधम्। (यथा, रामायणे। २। १८। ३०।
"करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥")
सर्व्वनामान्तर्गतद्विशब्दस्य पुंसि रूपं दौ। स्त्रियां स्त्रीत्वे च द्वे। तद्वाचकानि यथा, पद्मः १ नदीकूलम् २ असिधारा ३ रामपुत्रः ४ चक्षुः ५ हस्तः ६ स्तनः ७। इति कविकल्पलता ॥ सहचरौ यथा, इन्द्राणी १ नारदश्चैतौ २ अश्विनीकुमारौ ३ भार्य्यापती ४। इति महाभारते वनपर्व्व ॥

द्विकं, क्ली, (द्वाभ्यां कायतीति। कै+कः।) हयम्। यथा,—
"अग्नीतिभागं गृह्णीयान्मासाद्वाह्निकः शतात्।
द्विकं शतं वा गृह्णानो न भवेदर्थकिल्बिषी ॥"
इत्याह्निकतत्त्वम् ॥
(द्वितीयेन रूपेण ग्रहणमिति। "नावतिघ ग्रहणमिति लुग्वा।" ५। २। ७७। इति कन् पूरणप्रत्ययस्य च लुक्। द्वितीयके, त्रि। इति सिद्धान्तकौमुदी ॥)

द्विकः, पुं, (द्वौ कौ ककारवर्णौ यत्र।) काकः। कोकः। इति मेदिनी। के, २६ ॥

द्विककारः, पुं, (द्वौ ककारौ यत्र।) काकः। इति शब्दरत्नावली ॥

द्विककुत्, [द्] पुं, (द्वे ककुदौ यस्य।) उष्ट्रः। इति हेमचन्द्रः। ४। ३२०॥

द्विगुः, पुं, षट्समासान्तर्गतसमासविशेषः। स तु संख्यापूर्व्वपदानां समासः। वोपदेवेनास्य गसंज्ञा कृता। स च त्रिविधः। तद्धितार्थः १ समाहारः २ उत्तरपदपरश्च ३। तद्धितार्थोऽपि त्रिविधः। तद्धितप्रत्ययमात्रस्य अजादेर्हलादेर्वा अर्थे विषये एकः। अपत्यार्थप्राग्दिगं वृद्धा अजादेस्तद्धितस्यार्थे वाच्ये इत्यमरः। तद्धितार्थविषयो यथा, द्वयोर्मात्रोरपत्यं द्वैमातुरः। पञ्चानां गोमितागामपत्यं पाञ्चगोमितिः। तद्धितार्थवाच्यो यथा, पञ्चभिर्गोभिः क्रीतः पञ्चगुः। समाहारो यथा, त्रयाणां सखीनां समाहारः त्रिसखम्। समाहारे अदन्तानां क्लीवत्वं मात्रादेस्तु क्लीवत्वम्। उत्तरपदपरो यथा,—
पञ्च गावो धनं यस्य स पञ्चगवधन इत्यादि।
इति सुग्धबोधटीकायां दुर्गादासः ॥ (द्वौ द्वे वा गावौ यस्य इति विग्रहे गौशब्दे गोशब्दस्य ह्रस्वः। द्विगवखामिके, त्रि। यथा,—
"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत् पुरुष कर्म्म धारय येनाहं स्यां बहुव्रीहिः॥"
इत्युक्तेः॥)

द्विगुणं, त्रि, द्वाभ्यां पूरणम्। अङ्कद्वयाभ्यां घातः। इति लीलावती ॥ (यथा, आर्य्यासप्तशत्याम्। ४६१।
"बहुसरसप्रसवस्रालिभिरयं नतं प्रियं प्रति मे।
स्रोतस इव निम्नं प्रतिरागस्य द्विगुण आवेगः॥")

द्विगुणाकृतं, त्रि, (द्विगुणं कर्षणं कृतम्। "संख्यायाश्च गुणानायाः।" ५। ४। ५६। इति डाच्।) वारद्वयकृतच्छेत्रम्। इत्यमरः। २। ६। ६। दोचसा भूँइ इति भाषा ॥

द्विजः, पुं, (द्विर्जायते इति। जन+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) संस्कृतब्राह्मणः। यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।"
इति स्मृतिः ॥
सदृत्तब्राह्मणः। तल्लक्षणं यथा,—

अम्बरीष उवाच ।
"कीदृशाय प्रदातव्यं महादानं द्विजातये ।
विदुषे वा निराधारे साचारेऽविदुषे सुने ! ॥
एतन्मे सर्व्वमाख्याहि यथातथ्यं द्विजोत्तम ! ।
उत्तारयति संग्रह्य दातारं दानमेव हि ॥
वशिष्ठ उवाच ।
जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यश्छिष्टेत् नित्यं स द्विज उच्यते ॥
न जातिर्न कुलं राजन् ! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
क्षत्रियः । वैश्यः । इति मेदिनी । जे, १० ॥ (यथा, याज्ञवल्क्ये । १ । ३६ ।
"मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
दन्तः । (यथा,—
"न क्षिपेत् द्विजैर्भक्षयेत् ॥" इति श्राद्धे सूत्रस्थाने ऽष्टमेऽध्याये ॥) अखजः । स पक्षिसर्पमत्स्यादिः । इत्यमरः । ३ । ३ । ३० ॥ (यथा, रघुः । १२ । २२ ।
"ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ॥")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ द्विर्जातः, त्रि ॥
द्विजकुत्सितः, पुं, (द्विजानां द्विजेषु वा कुत्सितः । द्विजानां तद्वत्तत्वनिषेधात् तथात्वम् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः शब्दमाला च ॥
द्विजदासः, पुं, (द्विजानां दासः ।) शूद्रः । इति राजनिर्घण्टः ॥ द्विजानां दासे, त्रि ॥
द्विजन्मा, [न्] पुं, (द्वे जन्मनी यस्य ।) ब्राह्मणः । (यथा, देवीभागवते । ५ । ५ । ३ ।
"यतीनां भूषणं ज्ञानं सन्तोषो हि द्विजन्मनाम् ॥")
इन्द्रः । पक्षी । इति शब्दरत्नावली ॥ क्षत्रियः । वैश्यश्च । त्रि, द्विवारजन्मयुक्तः । (द्वाभ्यां जायमानः । यथा, ऋग्वेदे । १ । १४० । २ ।
"अभिद्विजन्मा त्रिवृदन्नमश्नुते ।
संवत्सरे वावृधे जग्धमीयुषः ॥"
"द्वाभ्यामरणीभ्यां जायमानत्वात् यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वम् ।"
इति तद्भाष्ये सायणः ॥)
द्विजपतिः, पुं, (द्विजानां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागते ।१।१२।२६।
"क्रूराणि चैवमादीनि भाषमाणानि दृश्यते ।
श्रुत्वा द्विजपतिः शीघ्रं निर्गतं सदनाद्बहिः ॥")
द्विजप्रपा, स्त्री, (द्विजानां पक्षिणां प्रपा ।) आलवालम् । तत्पर्य्यायः । तक्रम् २ विक्रम् ३ तलम् ४ । इति त्रिकाण्डशेषः ॥
द्विजप्रिया, स्त्री, (द्विजानां याज्ञिकब्राह्मणादीनां प्रिया ।) सोमलता । इति राजनिर्घण्टः ॥ द्विजस्य प्रियवस्तुनि, त्रि ॥
द्विजबन्धुः, पुं, (द्विजस्य बन्धुरिव ।) अब्राह्मणः स भट्टदेवज्ञादिः । यथा,—
"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।"
इति स्मृतिः ॥
द्विजब्रुवः, पुं, (आत्मानं द्विजं ब्रूते इति । ब्रू+कः ।' ब्राह्मणब्रुवः । स च जातिमात्रोपजीवी ब्राह्मणः । इति हेमचन्द्रः । ३ । ५१६ ॥ यथा,—
"सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रमनन्तं वेदपारगे ॥"
इति स्मृतिः ॥
द्विजराजः, पुं, (द्विजानां राजा । "राजाहःसखिभ्यष्टच् ।"५ । ४ । ९ । इति टच् ।) चन्द्रः । (यथा, देवीभागवते । १ । ११ । ७२ ।
"द्विजराजस्तु तच्छ्रुत्वा भृगोर्ब्रह्मन्नमद्भुतम् ।
ददावतप्रियां भार्य्यां गुरोर्गर्भवतीं शुभाम् ॥")
कर्पूरः । इत्यमरः ॥ अनन्तः । गरुड़ः । इति मेदिनी । जे, ३२ ॥
द्विजलिङ्गी, [न्] पुं, (द्विजस्य लिङ्गं चिह्नमस्यास्येति । इनिः ।) क्षत्रियः । इति त्रिकाण्डशेषः ॥ ब्राह्मणवेशधारिणि, त्रि ॥ (यथा, मनुः । ९ । २२४ ।
"द्यूतं समाजयञ्चैव यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥")
द्विजवरः, पुं, (द्विजस्य दन्तस्य वरः ।) दन्तार्बुदः । इति राजनिर्घण्टः ॥
द्विजश्रमः, पुं, (द्विजैः श्रमः ।) राजयक्ष्मा । इति शब्दचन्द्रिका ॥ वरवटी इति भाषा ॥
द्विजसेवकः, पुं, (द्विजानां सेवकः ।) शूद्रः । इति शब्दरत्नावली ॥ त्रिवर्णसेवाकर्त्तरि, त्रि ॥
द्विजा, स्त्री, (द्विर्जायते इति । जन्+डः । टाप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः ।२।४।१२०॥ (अस्याः पर्य्यायो यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भार्गी । इति मेदिनी । जे, १० ॥ पालङ्की । इति शब्दचन्द्रिका ॥
द्विजाङ्गी, स्त्री, (द्विजस्य पक्षिणोऽङ्गमिव अङ्गं यस्याः । ङीप् ।) कटुका । इति राजनिर्घण्टः ॥
द्विजातिः, पुं, (द्वे जाती यस्य ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥ (यथा, महाभारते । ९ । ७४ । ६१ ।
"वेदेष्वपि वदन्तीमं मन्त्रजातं द्विजातयः ॥")
अखजः । इति मेदिनी । ते, ११४ ॥ क्षत्रियः । वैश्यः । यथा,—
"शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्हति ।"
इति स्मृतिः ॥
(यथा च मनुः । १० । ४ ।
"ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥")
द्विजायनी, स्त्री, (द्विजः अयतेऽनयेति । अय+करणे ल्युट् । स्त्रियां ङीप् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
द्विजालयः, पुं, (द्विजानां पक्षिणामालयः ।) कोटरम् । इति शब्दचन्द्रिका ॥ द्विजानां गृहञ्च ॥
द्विजिह्वः, पुं, (द्वे जिह्वे यस्य ।) सर्पः । (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"व्याडाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढ़पात्पन्नगोरगाः ॥")
खलः । इति मेदिनी । वे, १२ ॥ चौरः । दुःसाधुः । इति शब्दरत्नावली ॥ (रोगविशेषः । यथा, सुश्रुते निदानस्थाने १४ अध्याये ।
"श्रेयो द्विजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"
त्रि, द्विजिह्वाविशिष्टः । यथा, महाभारते । १ । ३४ । २४ ।
"द्विजिह्वाश्च स्मृताः सर्पा गरुड़ेन महात्मना ॥")
द्विजोत्तमः, पुं, (द्विजेषु उत्तमः ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, मनुः । २ । ४६ ।
"भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥")
दिट्, [ष्] पुं, (द्देष्टीति । द्विष्+क्विप् ।) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ (यथा, महाभारते । ४ । १६ । ७ ।
"तस्मिन् जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत् कर्म्म कृतवत्यद्य कथं निद्रां निषेवसे ?")
द्वेष्टरि, त्रि । (यथा, रघौ । ३ । ४५ ।
"त्रिलोकनाथेन सदा मखद्विष-
क्षया नियम्या ननु दिग्यचक्षुषा ॥")
दिठः, पुं, वह्निजायाः स्वाहा । विसर्गः । इति पैतृकारीयतन्त्रम् ॥ ठकारद्वयम् ॥
दितयं, क्ली, (द्वौ अवयवौ अस्य । द्वि+"संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) द्वयम् । इति हेमचन्द्रः । २ । ५० । १२ ॥ (यथा, भागवते । ५ । २२ । ४ ।
"अत ऊर्द्धमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानलक्षिभिर्लक्षिभिः पञ्चभिरेकैकशो राशीन् द्वादशानुभुङ्क्ते ॥" द्वित्वसंख्याविशिष्टे, त्रि । यथा, रघुः । ८ । ६० ।
"इमसानुमतां किमन्तरं
यदि वायौ दितयेऽपि तेऽचलाः ॥")
द्वितीयं, त्रि, (द्वयोः पूरणम् । द्वि+"द्वेस्तीयः ।" ५ । २ । ५४ । इति तीयः ।) द्वयम् । इति हेमचन्द्रः । ३ । १०७ ॥ (यथा, रघुः ।२।४६।
"तथा विदुर्मां सुनयः श्रुतक्रतुं
द्वितीयगामी न हि शब्द एष नः ॥")
द्वितीयः, पुं, (द्वयोः पूरणः । आत्मनो द्वितीयत्वादेवास्य तथात्वम् ।) पुत्रः । इति त्रिकाण्डशेषः ॥
द्वितीया, स्त्री, (द्वितीय+टाप् ।) गेहिनी । भार्य्या । इत्यमरः । २ । ६ । ५ ॥ तिथिविशेषः । सा चन्द्रस्य द्वितीयकलाक्रियारूपा । शुक्लपक्षे २ कृष्णपक्षे १७ एतद्रूपोधिता । इति ज्योतिषम् ॥ * ॥ सा च अश्विनीकुमारयोर्जन्मतिथिः यथा,—

ब्रह्मोवाच ।
"रूपं कान्तिरनौपम्यं भिषक्त्वं सर्व्ववस्तुषु ।
सोमपत्वञ्च लोकेषु सर्व्वमेतद्भविष्यति ॥
महातपा उवाच ।
एतत् सर्व्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ।
दत्तं यस्मात्ततस्त्वेषा तिथीनामुत्तमा तिथिः ॥
एतस्यां रूपकामस्तु पुष्याहारो भवेन्नरः ।
संवत्सरं शुचिर्नित्यं सुखरूपी भवेन्नरः ॥
अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च॥"
इति वराहपुराणम् ॥
अत्र जातफलम् ।
"निखिलगुणगभीरो दानशीलो दयालुः
सकुलकुमुदचन्द्रः स्वच्छचित्तोऽतिशूरः ।
निजभुजबलगर्व्वाच्छादितारातिवर्गो
भवति विपुलकीर्त्तिर्यो द्वितीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥
अथ रथद्वितीया । स्कन्दपुराणे ।
"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रकुर्व्वाथ प्रीणयेच्च द्विजान् बहून् ।
कृष्णाभावे तिथौ कार्य्या सदा सा प्रीतये मम ॥
सा यात्रा । मां जगन्नाथम् ॥
अथ मनोरथद्वितीया ।
सा श्रावणशुक्लद्वितीया । 'मनोरथद्वितीयायां दिवा वासुदेवार्च्चनं रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तञ्च भोजनादिकम् ॥' यथा विष्णुधर्म्मोत्तरे ।
'देवमभ्यर्च्च पुष्पैस्तु धूपदीपानुलेपनैः ।
उन्नच्छतञ्च वालेन्दोर्दद्यादर्घ्यं समाहितः ॥
नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ।
अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः ॥'
अथ भ्रातृद्वितीया । लिङ्गपुराणे ।
'कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥'
तस्या इति शेषः ॥ महाभारते ।
'कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम् ॥
तस्यां निजगृहे पार्थ ! न भोक्तव्यमतो बुधैः ।
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥'
तथा ।
'यमश्च चित्रगुप्तश्च यमदूतांश्च पूजयेत् ।
अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वये ॥'
सहजद्वयेभगिनीभ्रातृभिः । अर्घ्यमन्त्रः ।
ॐ एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
प्रणाममन्त्रः ।
ॐ धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते ॥
यमुनाञ्च संपूज्य नमस्कुर्य्यात् ।
ॐ यमुनायै नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि ! नमोऽस्तु ते ॥
अन्नं दत्त्वा पठति ।
भ्रातस्त्वयानुज्ञाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
ज्येष्ठा तवाग्रजाताहमिति वदेत् ।
तथा यमद्वितीयायां यात्रायां मरणं भवेत् ॥
अनध्यायद्वितीया यथा ।
प्रे-को-चै-चाद्वितीयास्तु प्रेतपक्षे गते तु या ।
या च कोजागरे जाते चैत्रावल्याः परेऽपि या ॥
चातुर्म्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
परास्तेताखनध्याय पुराणैः परिकीर्त्तितः ॥"
इति तिथितत्त्वम् ॥
"पक्षयोर्म्मासमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
इति विष्णुपुराणम् ॥
द्वितीयाक्षतं, त्रि, (द्वितीयं कर्षणं क्षतमिति । "क्षुधो द्वितीयक्षतीयगृध्नवीणात् क्षधौ । ५ । ४ । ५८ । इति ङाच् ।) वारद्वयकृतक्षेत्रम् । इत्यमरः ।२।४।६॥ दोचसा भूँइ इति भाषा ॥
द्वितीयाभा, स्त्री, (द्वितीया हरिद्रावत् आभातीति । आ+भा+कः ।) दारुहरिद्रा । इति शब्दचन्द्रिका ॥
द्विधा, त्रि, (द्वौ वा त्रयो वा । "संख्याव्ययासन्नादूराधिकसंख्याः संख्येये ।" २ । २ । २५ । इति समासः । "बहुव्रीहौ संख्येये डजबहुगणात् ।" ५ । ४ । ७३ । इति डच् ।) द्वौ वा त्रयो वा इमे । इति संक्षिप्तसारः । नित्यबहुवचनान्तोऽयम् ॥ (यथा, रघुः । ५ । २५ ।
"द्विधाप्रयत्नान्यर्हसि सोढुमर्हन्
यावद् यते साधयितुं तदर्थम् ॥")
द्विदन्, [त्] त्रि, (द्वौ दन्तौ यस्य । "वयसि दन्तस्य दत्त ।"५।४।१४१। इति दन्तस्य दत्त-आदेशः ।) दन्तद्वययुक्तद्व्यादिः । इति हेमचन्द्रः ।४।३२६॥
द्विदाम्नी, स्त्री, (द्वे दामनी बन्धनरज्जू यस्याः । "दामद्वयनान्ताच्च ।" ४।१।२७। इति ङीप् ।) रज्जुद्वययुक्ता गौः । इति शब्दचन्द्रिका ॥
द्विदेहः, पुं, (द्वाभ्यां देहोऽस्येति । गजाननत्वाद्देवास्य तथात्वम् ।) गणेशः । इति त्रिकाण्डशेषः ॥ (द्व्यात्मकराशिः । इति ज्योतिषम् ॥)
द्विधा, अ, (द्वि+"संख्याया विधार्थे धा ।" ५।३। ४२ । इति धा ।) द्विप्रकारम् । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । ३ । ६ । ५ ।
"यथा दीपस्तयोपाधेर्थैर्गात् सञ्जायते द्विधा ।
छायेवादर्शमध्ये वा प्रतिबिम्बं तथावयोः ॥")
द्विधागतिः, पुं, (द्विधा द्विप्रकारा गतिर्यस्य ।) कुम्भीरः । इति हेमचन्द्रः ।४।४१८॥ द्विप्रकारगतियुक्ते, त्रि ॥
द्विधातुः, पुं, (द्वौ धातू यस्य । देवगजदेहत्वाद्देवास्य तथात्वम् ।) गणेशः । इति शब्दरत्नावली ॥ (द्वौ धातू ताम्रादिधातुद्वये यच्च ।) धातुद्वये, क्ली ॥
द्विधात्मकं, क्ली, (द्विधा आत्मा यस्य । कप् ।) जातीकोषम् । इति शब्दचन्द्रिका ॥
द्विधालेख्यः, पुं, (द्विधा लिख्यते यत्र । लिख+आधारे ण्यत् ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥ द्विप्रकारलेखनीये, त्रि ॥
द्विनयकः, पुं, (द्विर्द्वितीयो नयक इव ।) दुर्जनः । इति हेमचन्द्रः ॥
द्विपः, पुं, (द्वाभ्यां शुण्डसुखाभ्यां पिबतीति । पा+कः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, माघे । ३ । ६० ।
"तेजोमहद्विस्तमसेव दीपै-
र्द्विपैरसम्बाधमयाम्बभूवे ॥")
पुं, नागकेशरः । इति रत्नमाला ॥
द्विपथं, क्ली, (द्वयोः पथोः समाहारः । तद्धितार्थेत्यादिना समासः । "ऋक्पूरब्धूः पथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) पथद्वयम् । दोमाता पथ इति भाषा । तत्पर्य्यायः । चारुपथः २ । इति हेमचन्द्रः । ४ । ५२ ॥ द्वौ पन्थानौ यत्रेत्यर्थे, त्रि ॥
द्विपदः, पुं, (द्वे पदे यस्य ।) मनुष्यः । (यथा, महाभारते । १ । ७४ । ५६ ।
"ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठचतुष्पदाम् ॥")
देवः । पक्षी । राक्षसः । यथा, प्रसन्नसारे ।
"द्विपदेऽपि चतुर्भेदा वृदेवपक्षिराक्षसाः ॥"
द्विपदराशिः, पुं, (द्वे पदे यस्य । स चासौ राशिश्चेति ।) मिथुनम् । तुला । कुम्भः । कन्या । धनुषः पूर्व्वार्द्धम् । यथा, ज्योतिस्तत्त्वे ।
"मिथुनतुलाघटकन्याद्विपदाख्याश्चापपूर्व्वभागश्च ॥"
द्विपमदः, पुं, (द्विपस्य हस्तिनो मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥
द्विपर्णी, स्त्री, (द्वे द्वे पर्णे यस्याः । ङीप्) वनकोली । इति रत्नमाला ॥ पर्णद्वययुक्ते, त्रि ॥
द्विपात्, [द्] त्रि, द्वौ पादौ यस्य सः । (पादस्य पाद्भावः ।) पादद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥
द्विपाद्यं, क्ली, (द्वौ पादौ परिमाणमस्य । "पथपादमानग्रन्थात् यत् ।" ५।१ । ३४ । इति यत् ।) द्विगुणदण्ड. । इत्यमरः । २ । ८ । २७ ॥
द्विपायी, [न्] पुं, (द्वाभ्यां मुखशुण्डाभ्यां पिबतीति । पा+णिनिः ।) हस्ती । इति हारावली । २४ ॥
द्विपृष्ठः, पुं, (द्वौ पृष्ठौ यस्य ।) राजभेदः । तत्पर्य्यायः । ब्रह्मसम्भवः २ । इति हेमचन्द्रः । २ । ३५६ ॥
द्विबिन्दुः, पुं, (द्वौ बिन्दू यत्र ।) विसर्गवर्णः । यथा, बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमानुधौ संज्ञौ स्तः । इति मुग्धबोधव्याकरणम् ॥ ग्रन्थद्वयञ्च ॥
द्विमातृजः, पुं, (द्वाभ्यां मातृभ्यां जायते इति । जन+डः ।) गणेशः । इति हेमचन्द्रः ।३।२२०॥
द्विमुखः, पुं, (द्वे मुखे यस्य ।) राजसर्पः । इति शब्दरत्नावली ॥ मुखद्वययुक्ते, त्रि ॥
द्विमुखा, स्त्री, (द्वे मुखे यस्याः ।) कर्करी । इति शब्दचन्द्रिका ॥ गाडु इति भाषा । चकौडा: ।

इति हलायुधः ॥ जोँक इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ५४ अध्याये ।
"चूरवो द्विरसखाखेव सम्प्रवेते पुरीषजाः ॥")

द्विरसखाहिः, पुं, (द्विरसखः अहिः सर्पः ।) सर्पविशेषः । ग्वाँखिनी इति भाषा । तत्पर्य्यायः । अहीरलिः २ राजाहिः ३ राजसर्पः ४ द्विरसखः ५ सर्पभुक् ६ । इति हलायुधः ॥

द्विरसखोरगः, पुं, (द्विरसखः उरगः सर्पः ।) राजसर्पः । इति जटाधरः ॥

द्विमूर्द्धः, त्रि, (द्वौ मूर्द्धानौ यस्य । "द्वित्रिभ्यां ष मूर्द्धनः ।" ५ । ४ । ११५ । इति ष ।) मस्तकद्वययुक्तः । इति सुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ४ । ४१ ।
"बहुमूर्द्धो द्विमूर्द्धोच त्रिमूर्द्धोबाहतां गधे ॥")

द्विरदः, पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य । हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ७ । २६ । २७ ।
"क्षोभयन्तं तथा सैन्यं द्विरदं नलिनीमिव ।
धनञ्जयं भूतगणाः साधु साध्वित्यपूजयन् ॥")

द्विरदान्तकः, पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ॥

द्विरशनं, क्ली, (द्विर्वारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मलवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति तिथ्यादितत्त्वम् ॥

द्विरसनः, पुं, (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ॥

द्विरागमनं, क्ली, (द्विर्वारं विवाहात् परं आगमनं स्वामिगृहे इत्यर्थः ।) विवाहानन्तरं वध्वाः पितृगेहात् पतिगृहं पुनरागमनम् । यथा, नारदीयपद्धतौ ।
"इत्थं पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्विरागमनं विदुः ॥"
तस्य शुभकालदिनादि यथा । दीपिकायाम् ।
"खोमुक्ताक्षालिघटाढ्यसंयुतरवौ काष्ठे विशुद्धे भृगुं संस्थाप्य प्रतिलोमगं शुभदिने याचाप्रवेशोचिते ।
लक्षाद्यस्तु निरंशुकं नववधूयाचाप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभगोर्नेच्छन्ति दोषं बुधाः ॥
पैचागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धो न भवति यदा संशुद्धो वापि शुक्रः ।
मेघे कुम्भेऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नववधूं वेश्मयेन्मन्दिरं स्वम् ॥
भर्त्तर्गोचरशोभने दिनपतौ नाके गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च शुक्लेतरे ।
हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा
चानीता शुभशालिनी नववधूर्नित्योत्सवा मोदते ॥
एकयामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरः शुक्रो न दुष्यति ॥"

तथा,—
"काश्यपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसु च ।
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिसंहितायां प्रचेताः ।
"पुष्यादित्यसमीरणादिति वसुश्वघ्नोत्तरारेवतीतारानायकरोहिणीषु शुभदे मेषालिकुम्भे रवौ ।
वारेष्विन्द्वसितेन्द्रवित्तु शुभदे तारे प्रशस्ते विधौ कन्यामन्मथमीनतौलिजनभे स्याद्भर्तृनाशागमः ॥"

ज्योतिःसारसंग्रहे ।
"विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माब्दं विचक्षणैः ॥"
लग्नचिन्तामणौ ।
"श्मश्रूं हन्त्यथमे वर्षे श्वशुरश्च दशान्धिके ।
सम्प्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥"
मत्स्यसूक्ते ।
"शुक्रा पिहितगेहे कन्या भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः प्रपन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

निष्कर्षस्तु ।
"विवाहमासि प्रथममनागतायां वध्वा अष्टमदशमद्वादशेतरवर्षे कालशुद्धौ वैशाखमार्गशीर्षफाल्गुनान्यतममासे रविशुद्धौ सोमबुधगुरुशुक्रान्यतमवारे चन्द्रतारानुकूले रोहिणीपुनर्व्वसुश्वग्निरःपुष्योत्तराचयहस्तस्वातीधनिष्ठारेवतीषु विदिभिन्नकरणेषु निधिरिक्तेतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् । कस्यचिन्मते बुधवारोऽपि निषिद्धः ।
दधिघृतदिङ्मुखगमनं गमनमभिनवनारीणाम् ।
वयमपि धान्यादीनां न बुधो बुधवासरे कुर्य्यात् ॥"
इति सत्तत्त्वसुक्तावली ॥

द्विरापः, पुं, (द्विर्द्विवारं सुखमुखाभ्यामित्यर्थः । आ सम्यक् पिबतीति । पा + कः ।) हस्ती । इति शब्दमाला ॥

द्विराषाढः, पुं, (द्विः आषाढः ।) मिथुनस्थरवेरश्वयुक्तप्रतिपदादिदर्शान्तमासद्वयम् । स च आषाढमलमासे भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं भवेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
मिहिरश्च ।
"माधवादिषु षट्केषु माधि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ॥

अन्यच्च ।
"पौर्णमास्या द्वयं यत्र पूर्व्वाषाढाद्वयं भवेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति गारुडे ६० अध्यायः ॥

द्विरुक्तः, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तयश्चादौ द्विः । इति सुग्धबोधलक्षणम् ॥

द्विरुक्तिः, स्त्री, (वच् + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति संक्षिप्तसारः ॥

द्विरूढा, स्त्री, (उह्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढा विवाहिता ।) द्विवारविवाहिता । तत्पर्य्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १८६ ॥

द्विरूपः, पुं, (द्वौ रूपौ आकारौ यस्य ।) व्याकारग्रन्थादिः । यथा । द्विरूपकोषादिः । द्विवारयत्साहृत्तिः । यथा । द्विरूपपञ्चाध्यादिपाठः । रूपद्वययुक्ते, त्रि ॥

द्विरेफः, पुं स्त्री, (द्वौ रेफौ रकारवर्णौ यस्य भ्रमरवाचि ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"निवेशयामास मधुद्विरेफान्
नागाश्वराजीव मनोभवस्य ॥")
वर्ब्बरे, त्रि । इत्यमरः ॥

द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + आर्हीयष्ठक् तस्य लुक् च ।) द्विहायनी । द्विवर्षवयस्का गौः । इत्यमरः ।२।९।६८॥

द्विवर्षिका, स्त्री, (द्विवर्षैव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः ।४।३३८॥

द्विवर्षीयः, त्रि, (द्वौ वर्षौ वयःपरिमाणमस्य । द्विवर्ष + खः ।) द्विवार्षिकः । द्विवर्षवयस्कः । इति पाणिनीयव्याकरणम् ॥

द्विवार्षिकः, त्रि, (द्विवर्षे भवः । ठक् ।) द्विवर्षभवः । वत्सतरद्वयजातः । इति व्याकरणम् ॥

द्विवाहिका, स्त्री, (द्वाभ्यां पार्श्वाभ्यां वाह्यतीति । वह + णिच् + खुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ॥

द्विविदः, पुं, वानरविशेषः । इति हेमचन्द्रः ॥ (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्यो द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा, तत्रैव ।५।३६।२०।
"ततो बलेन कोपेन सुहृदि साहसः ।
पपात रुधिरोद्गारी द्विविदः स्रोत्रजीवितः ॥"
श्रीरामस्य सचिववानरराजमन्यतमः । यथा, महाभारते । ३ । २७६ । २३ ।
"मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः ।
ऋक्षवानृक्षराजश्च सुग्रीवः सचिवाः कृताः ॥")
"समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाहिकव्यरं हन्ति तस्य वामानुकीर्त्तनात् ॥"
इति ज्योतिषम् ॥

द्विवेग्रहा, स्त्री, (द्वौ वेग्रौ गमनावस्थानरूपौ राति ददातीति । रा दाने + कः ।) लघुरथः । तत्पर्य्यायः । गन्त्री २ वधूः ३ । इति हारावली । १६२ ॥

द्विशः, [स्] अ, (द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे शसुप्रत्ययः ॥ (यथा, सुश्रुते । १ । ४१ ।
"द्विशो वा बहुशो वापि शस्त्रा दोषेऽवचारयेत् ॥")

द्विग्रपः, पुं, (द्वौ द्वौ ग्रपौ यस्य ।) द्विखुरपशुः । यथा, श्रीभागवते । ३ । १० ।२२ ।
"गौरजो महिषः खड्गः शूकरो गवयो रुरुः ।
द्विग्रपाः पशवश्चेमे अदिरुष्ट्रश्च सत्तमः ॥"

द्विष, ल ञ् व्यौ वैरे । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) ल ञ्, देष्टि दिष्टे । व्यौ, अद्विषत् । द्विषन्ति मन्दाचरितं महात्मनाम् । इति कुमारः । इति दुर्गादासः ॥

द्विषतीतापः, त्रि, (द्विषतीं तपति तापयतीति वा । द्विषती + तप + अण् । तप + णिच् + अच् वा ।) स्त्रीग्रन्थतापकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विषन्, [त्] त्रि, (द्वेष्टीति । द्विष + "द्विषोऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"वियच्चमाखेनाहूतः पार्थेनाथ द्विषन् सुरम् ॥")

द्विषन्तपः, त्रि,(द्विषन्तं तापयतीति । तप + णिच् + "द्विषतृपरयोस्तापेः ।" ३ । २ । ३६ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ६४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ ।६७। इति मुम् । ततः संयोगान्ततकारलोपः ।) शत्रुतापनः । शत्रुतापजनकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विष्टं, क्ली, (द्विष + क्तः ।) ताम्रम् । इत्यमरटीकासारसुन्दरी ॥ द्वेषविषये, त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्वेषात् द्विष्टसाधनताधियः ॥"
तथाच ।
"अचोष्यं दुष्टसुच्छिष्टं पाषाणलवणोद्भवम् ।
द्विष्टं युषितमखाद्यं पूति चान्नं विवर्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठः, त्रि, द्वयोस्तिष्ठति यः । (द्वि + स्था + कः ।) उभयस्थः । यथा । संयोगस्य द्विष्ठतयेति जगदीशः ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४६ । इति पक्षे न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् ॥ ७२ वाच्योत्तर इति भाषा ॥ (यथा, मनुसंहितायाम् । ७ । १५७ ।
"प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥")

द्विसहस्राक्षः, पुं,(द्विसहस्रं अक्षीणि यस्य । बहु समासे ।) अग्निदेवः । इति हेमचन्द्रः ॥

द्विसीत्यं, त्रि, (द्वित्रिं सीतया सहितम् । द्विसीता + "नौ वयोधर्म्मेति ।"४ । ४ ।६१ । इति यत् ।) द्वात्रिंशद्यवपरिमाणम् । दोचसा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाक्षतम् २ द्वितीयाक्षतम् ३ अग्राक्षतम् ४ सम्राक्षतम् ५ द्विहल्यम् ६ । इत्यमरभरतौ ॥

द्विसूक्ष्मिश्राद्धं, क्ली, (द्विसूक्ष्मिणं द्विःपक्वं अन्नं तण्डुलम् ।) द्विःसिद्धतण्डुलम् । यथा,—
"द्विसूक्ष्मिश्राद्धमन्नं पृथुकं शुष्कं देशविशेषके ।
नाश्नन्नग्रसं विप्राणां भक्षयेच्च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहल्यं, त्रि, (द्विवारं हलेन कृष्टम् । द्विहल + "मतजनहलादिति ।" ४ । ४ ।६७। इति यत् ।) द्विधाकृष्टक्षेत्रम् । इत्यमरः । २ । ६ । ६ ॥

द्विहा, [न्] पुं, (द्वाभ्यां शुष्कदन्ताभ्यां हन्तीति । द्विहन् + क्विप् ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री, (द्वौ हायनौ वत्सरौ वयःक्रमौ यस्याः । "दामहायनान्नाच्च ।" ४।१।२७ । इति ङीप् ।) द्विवर्षा गौः । इत्यमरः । २ । ६ । ६८ ॥ (द्विवर्षवयस्के,, त्रि । यथा, मनुः । ११।१३४ ।
"शुक्रे द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् ॥")

द्वीन्द्रियग्राह्यः, पुं, (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्रहणीययुक्तः । स तु संख्यादिसप्तद्रव्यलक्षेहस्वरूपः । यथा,—
"संख्यादिपरमाणवो द्रव्यं स्नेह एव च ।
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥"
इति भाषापरिच्छेदः ॥

द्वीपं, क्ली, (द्वौ वर्त्तौ इयते इति । इ गतौ + बाहुलकात् पः ।) याज्ञवल्क्यम् । इति द्वैपिग्रन्थटीकायां भरतः ॥

द्वीपः, पुं क्ली, (द्विर्गता द्वयोर्दिग्रोर्वा गता आपो यत्र । काकाक्षिगोलकन्यायेन द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः ।"ऋक्पूरब्धूरिति ।"५।४। ७४ । इति यत् । "द्वान्तरुपसर्गेभ्योऽप ईत् ।" ६।३।६७ । इति ईत् ।) वारिमध्यतटम् । जलवेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम्२ । इत्यमरः ।१।१०।८॥ द्वीपोत्पत्तिर्यथा । सूर्य्यः सुमेरुं प्रदक्षिणीकुर्व्वन् अर्द्धां पृथ्वीं प्रकाशयति अर्द्धां तमसा आवृणोति । तदा भगवदुपासनोपचितातिक्रान्तपुरुषप्रभावः प्रियव्रतो राजा सूर्य्यरथसमवेगेन ज्योतिर्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीयसूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । अस्य रथचरणनेमिपरिखाताः सप्तसिन्धव आसन् । तैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य यद्विस्तारमानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसमं रचिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपानामपि बहिःसिन्धवः । स प्रियव्रतः बर्हिष्मतीगर्भेणाननुगतानात्मजान् आग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञकान् यथासंख्येन एकैकस्मिन् द्वीपे एकैकमधिपतिं विदधे । इति श्रीभागवतीयपञ्चमस्कन्धात् संगृहीतम् ॥ * ॥
अपि च ।
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः ।
यैरिदं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ॥
यवसुद्राकरवती प्रतिवर्षं निषेविता ।
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये चेतायुगे तदा ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तो वीरात् काम्याभ्यजायत ॥
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दशपुत्राश्च सम्राट् कुक्षिश्च ते उभे ॥
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरञ्चापि तेन मेधातिथिः कृतः ॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥
"भूमेरर्द्धं खारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपयटक्षस्य याम्ये
खारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र क्रौञ्चं
क्रौञ्चश्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकनेकं
सप्तद्वयोर्द्वीपसदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकपूरजः, पुं, (द्वीपकर्पूरवत् जायते इति । जन + डः ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूरं, क्ली, (द्वीपजातम् खर्ज्जूरम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपजं, क्ली, (द्वीपात् जायते इति । जन + डः ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपः अस्त्यस्या इति । द्वीप + मतुप् मस्य वः । ङीप् ।) नदी । (यथा, महाभारते । १ । ७० । २८ ।
"अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया ॥")
भूमिः । इति मेदिनी । ते, १६८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप + मतुप् मस्य वः ।) सप्तसंख्याः । वटः । इति मेदिनी । ते, १६८ ॥

द्वीपश्रुचुः, पुं, (द्वीपस्य द्वीपिनः श्रुचुः ।) श्रुतावरी । इति राजनिर्घण्टः ॥ (श्रुतमूलीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

द्वीपिका, स्त्री, (द्वीपी द्वीपी नाम्नतया अस्त्यस्या इति । द्वीप + ठन् ।) श्रुतावरी । इति राजनिर्घण्टः ॥

द्वीपिनखः, पुं,(द्वीपिनो व्याघ्रस्य नखः ।) बालनखः । इति राजनिर्घण्टः ॥ (स तु बालानां कण्ठभूषणविशेषः । यथा, अध्यात्मरामायणे ।२।३।४८ ।
"कण्ठे चाष्टसहस्रातमध्यद्वीपिनखार्चितम् ॥")

द्वीपिश्रुचुः, पुं, (द्वीपिनो व्याघ्रस्य श्रुचुः ।) श्रुतमूली । इति शब्दरत्नावली ॥

द्वीपी, [न्] पुं, (द्वीपं चर्म्म अस्त्यस्येति । द्वीप + "अस इति ठनौ ।" ५।२।११५ । इति ठन् ।)

पिञ्जकः। व्याघ्रः। इति राजनिर्घण्टः॥ (यथा, रामायणे। २। ६४। ७।
"नानाव्यालगणैर्द्वीपितरक्षुत्तगणैर्वृतः॥")

द्वैप्यः, त्रि, द्वीपे भव इत्यर्थे ष्यञ्प्रत्ययः॥ ("तत्र भवः।" ४। ३। ५३। इति यत्।) द्वैप्यः। (यथा, वाजसनेयसंहितायाम्। १६। ३१।
"नमो गादेयाय च द्वैप्याय च॥")

द्वृ, स्यगने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) वकारोपधः। द्वरति। स्यगनं संवरणम्। वरणे इति प्राचः। वरणं स्वीकारः स्यगनमेति गोविन्दभट्टः। इति दुर्गादासः॥

द्वैधा, अ, (द्वि+"संख्याया विधार्थे धा।" ५। ३। ४२। इति धा। "एधाच।" ५। ३। ४५। इति तस्य एधाच्।) द्विप्रकारम्। इति व्याकरणम्॥

द्वैषः, पुं, (द्विष+भावे घञ्।) शत्रुता। तत्पर्य्यायः। वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५। इति शब्दरत्नावली॥ (यथा, मनुः। ४। १६३।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्জ্জयेत्॥")
अस्य कारणं द्विट्साधनताज्ञानम्। इति भाषापरिच्छेदः॥ स च आत्मनो विशेषगुणः। इति सिद्धान्तमुक्तावली॥ तदप्रवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम्। ३। ३४।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥"
"इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम्। अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ।" इति तट्टीकायां श्रीधरस्वामी॥

द्वेषणं, क्ली, (द्विष+भावे ल्युट्।) द्वेषः। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ६२। २७।
"अकस्मादेव पार्थानां द्वेषणं नोपपद्यते॥")

द्वेषणः, त्रि, (द्विष+"क्रुधमन्वार्थेभ्यश्च।" ३। २। १५१। इति युच्।) शत्रुः। इत्यमरः। २। ८। १०॥ (यथा, महाभारते। १२। १६८। १५।
"पानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा॥")

द्वेष्टी, [न्] त्रि, (द्वेष्टि तच्छीलः। द्विष+"संज्ञायामनुरुधेति।" ३। २। १४२। इति घिनुण्।) शत्रुः। इति हेमचन्द्रः। ३। ३६३॥ (यथा, रघुः। १७। ७३।
"तथापि वव्रुधे तस्य तत्कारिद्वेषिणो यशः॥")

द्वेष्टा, [ऋ] त्रि, (द्वेष्टीति। द्विष+तृच्।) विद्वेषकर्त्ता। इति द्विषधातोस्तृनृप्रत्ययेन साध्यः॥ (यथा, महाभारते। १। ४६। ६।
"द्वेष्टारस्तस्य नैवासन् स च द्वेष्टि न कञ्चन॥")

द्वेष्यः, त्रि, (द्वेष्टुमर्हः। यत्।) द्वेषविषयः। विद्वेषार्हः। तत्पर्य्यायः। अप्रियगतः २। इत्यमरः। ३। १। ४५॥ (यथा, महाभारते। ४। १६। १८।
"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम्।
यथावत् सर्व्वमाचष्व श्रुत्वा धास्याभि यत्क्षमम्॥")
द्विष्यतेऽसाविति। द्विष+ण्यत्। शत्रुः। यथा, रघुः। १। २८।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥")

द्वैगुणिकः, त्रि, (द्विगुणार्थं क्रयं द्विगुणम्। तत्प्रयच्छति द्विगुणं गृहीत्वेमेकगुणं ददातीत्यर्थः। द्विगुण+"प्रयच्छति गर्ह्यम्।" ४। ४। ३०। इति ठक्।) वृद्धजीवः। इति हेमचन्द्रः। ३। ५४४॥ द्विगुणं गृह्णाति यः इत्यर्थे ष्ठिकप्रत्ययः॥

द्वैतं, क्ली, (द्विधा इतं द्वीतम्। तस्य भावः। युवादित्वात् अण्। स्वार्थे अण् वा।) द्वयम्। इति हेमचन्द्रः। ६। ६०॥ (यथा, भागवते। १०। १५। ३०।
"विप्रोको ब्रह्मसम्पन्ना संछिन्नद्वैतसंशयः।
लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः॥")
लोकादिरूपम्। एकायनोऽसाविति श्लोकव्याख्यायां श्रीधरस्वामी॥ (वनविशेषः॥ मेतद्विके, त्रि। यथा, किराते। १। १।
"सवर्ष्मिलिङ्गौ विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥")
"द्वैतवने द्वैताख्ये तपोवने। यद्वा, द्वे इते गते यस्मात् तत् द्वीतम्। द्वीतमेव द्वैतं तच्च तद्वनमेति तस्मिन्। श्लोकमोहादिरहिते इत्यर्थः॥" इति तट्टीकायां मल्लिनाथः॥)

द्वैतवादी, [न्] त्रि, (द्वैतं जीव ईश्वरश्चेति द्वयं वदतीति। वद+णिनिः।) जीवेश्वरयोर्भेदवादी। ईश्वरातिरिक्तजीववक्ता। तस्य मतं यथा, परमात्मनो जीवात्मा पृथक् तत्कार्य्ये केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरद्वैतमाचे पर्य्यवसिता एवं जीवश्च पृथक्। अत्र प्रमाणम्।
जन्मकर्म्ममरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव॥
इति साङ्ख्यमतम्॥
तत्रेश्वरः सर्व्वज्ञः परमात्मा एक एव। जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च। इति गोतममतम्॥
इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैतं नाभिमतम्। नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्च सूत्रोऽप्यस्य व्यपदेशादाकाशोऽर्थान्तरत्वादिव्यपदेशाद्भोगमात्रसाम्यलिङ्गाच्चेति सूत्रैर्मोक्षेऽपि तयोर्द्वैतनिरूपणाच्च। इति गोविन्दभाष्यमतम्॥
यतो द्वैतमते युक्तिरेव प्रमाणं युक्त्या यत् फलति तदेव सर्व्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्य्यम्। इति रामानुजमतञ्च॥

द्वैतीयीक, त्रि, (द्वितीय+तीयादीकक्। स्वार्थे वा ईकक्।) द्वितीयः। यथा,—
"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥"
इति नैषधम्। २। ११०॥

द्वैधं, अ, (द्वि+"संख्याया विधार्थे धा।" ५। ३। ४२। इति धा। "द्वित्रिभ्यां धमुञ्।" ५। ३। ४५। इति धा इत्यस्य धमुञ्।) द्विप्रकारम्। इति व्याकरणम्॥ (यथा, हरिवंशे। १। ३०।
"तदक्षमकरोद्वैधं दिवं भुवमथापि च॥"
क्ली, "धमुञन्तात् स्वार्थे ङदर्थनम्।" इति वार्त्तिकोक्त्या ङः। राज्ञां षड्गुणानामन्यतमः। इत्यमरः। २। ८। १८॥) एकेन सन्धिरपरेण विग्रहः इति द्वौ प्रकारौ द्वैधं निपातितम्। इत्यमरटीकायां भरतः॥ (तच्च द्विविधम्। यथा, मनुः। ७। १६७।
"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥")
विवादः। इति त्रिकाण्डशेषः॥ (द्विप्रकारम्। यथा, मनुः। ८। ७३।
"बहुत्वं परिगृह्यीयात् साध्विद्वैधे नराधिपः।
समेषु तु गुणोत्कृष्टान् गुणद्वैधे द्विजोत्तमान्॥"
त्रि। यथा, "पथि द्वैधानि त्यजानि।" इति सिद्धान्तकौमुदी॥)

द्वैपः, पुं, (द्वीपिनो विकारः द्वैपम्। द्वीप+"प्राग्दीव्यतोऽण्।" ४। ३। १५४। इति अण्। तेन परिवृतः। "द्वैपवैयाघ्राद्यञ्।" ४। २। १२। इत्यञ्।) द्वीपिचर्म्मावृतरथः। इत्यमरः। २। ८। ५३॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"द्वैपं दग्धं चर्म्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः॥")

द्वैपायनः, पुं, (द्वीपं अयनं उत्पत्तिस्थानं यस्य। स एव। स्वार्थे प्रज्ञादित्वात् वा अण्।) व्यासः। इति हेमचन्द्रः। ३। ५११॥ (निरुक्तिरस्य जन्मकथा यथा महाभारते। १। ६३। ८३—८५।
"इति सत्यवती हृष्टा श्रुत्वा वरमनुत्तमम्।
पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा॥
जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान्।
स मातरमनुज्ञाप्य तपस्येव मनो दधे॥
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्॥
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्।
न्यस्तो द्वीपे स यद्बालस्तस्माद्वैपायनः स्मृतः॥"
हृदविशेषः। अत्र दुर्य्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः। यथा, महाभारते। ६। ३१। २।
"व्यासाद्य च कुरुश्रेष्ठ! तदा द्वैपायनं ह्रदम्।
स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम्।
वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः॥")

द्वैप्यं, त्रि, (द्वीपे भवम् द्वीपस्य इदम् वा। द्वीप+"द्वीपादनुसमुद्रं यञ्।" ४। ३। १०। इति यञ्।) द्वीपसम्बन्धि। द्वीपशब्दात् इदमर्थे

ष्णप्रत्ययेन साध्यम्। इति व्याकरणम्॥ (यथा, माघे। ३। ७६।

"विक्रीय दिग्वासनि धनान्युरूणि
द्वैध्यानसावुत्तमलाभभाजः।
तरीषु तत्त्वमफलगुभाक्षं
सांयात्रिकानावपतोऽभ्यनन्दत्॥")

दैमातुरः, पुं, (दयोर्मात्रोरपत्यम्। द्विमात्र+ "मातुरुत्संख्यासंभद्रपूर्व्वायाः।" ४। १। ११५। इति अण् उत्वञ्च।) गणेशः। इत्यमरः। १। १। ४०॥ (अस्य द्विमात्रत्वकथा स्कन्दपुराणे गणेशखण्डे उक्ता यथा,—

"आविर्भविष्ये सदने वरेण्यस्य महीपतेः।
त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये।
पालनाय स्वभक्तानां साधुत्राणाय भूसुराः॥
शिव उवाच।
इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः।
आगते नवमे मासि प्रासूत पुष्पका शिशुम्॥
चतुर्बाहुमिभास्यञ्च दन्तुरं सुन्दरेक्षणम्।
आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्॥
दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम्।
श्रुत्वा चाक्रन्दनं तस्या वरेण्यः सगणो ययौ॥
ददर्श बालकं सोऽपि विस्मितः सह तैर्गणैः।
उवाच सेवकान् राजा त्यजतैनं सरोवरे॥
शिशुमादाय ते याताः पार्श्वस्थैवाश्रमे शुभे।
कासारे तं शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम्॥
अपरस्मिन् दिने पार्श्वमुनिः स्नानाय चागतः।
तदैव दृष्टो तेन बालकोऽद्भुतदर्शनः॥
आश्चर्यमदरोत्तत्र भयभीतस्तथाभवत्।
आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम्॥
तपसा तु फलं दातुमीदृशीं धृतवांस्तनुम्।
रचितुं सर्व्वलोकानां परमात्मा निजेच्छया॥
सुन्दरो बालकः केन त्यक्तोऽयमीदृशो वहिः।
नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः॥
इत्युक्त्वा जगृहे बालमालिलिङ्ग मुदा मुनिः।
तमानीतं मुनेः पत्नी ददर्श दीपवत्सला।
उवाच निजभर्त्तारं सुप्रसन्ननानाम्बुजा॥
दीपवत्सलोवाच।
किमानीतं महत् स्वामिन् भग्नमाश्चर्यकारकम्।
इदं वैनायकं रूपं समाभाति द्विजर्षभ!॥
इदमेव श्रियः स्थानं इदमेव तपःफलम्।
इदमेव परं ब्रह्म योगिध्येयं सनातनम्।
इदमेव परं तेज आदित्ये यदधिष्ठितम्।
इदमेव हि वेदान्ता नेति नेति प्रचक्षते॥
शिवउवाच।
इत्युक्त्वा हर्षसम्पन्ना भर्तुरादाय बालकम्।
स्तनपानं ददौ तस्मै ततः सा दीपवत्सला।
द्वितीयाचन्द्रवद्बालो वृद्धिं यातो दिने दिने॥") जरासन्धः। इति मेदिनी। रे, २६८॥ (अस्य द्विमात्रत्वकारणं जरासन्धशब्दे द्रष्टव्यम्॥) द्विमात्रे, त्रि। इति हेमचन्द्रः। ३। २१०॥ (यथा, राजतरङ्गिण्याम्। ४। ३५५।

"भिन्नशीला तयोर्भात्रोर्धीर्दैमातुरयोः पुनः॥")

दैमातुरकः, पुं, (द्वे मात्रके इव यस्यासौ द्विमात्रकः। स एव स्वार्थे अण्।) नदीदृष्टिजलोद्भूतधान्यभक्षी देशः। इति राजनिर्घण्टः॥

दैषणीया, स्त्री, (दैषणं दैषमर्हतीति। छः।) नागवल्लीभेदः। इति राजनिर्घण्टः॥

द्व्यक्षरं, क्ली, (द्वयोरक्षरयोः समाहारः।) वर्णद्वयम्। द्वयोरक्षरम्। (द्वे अक्षरे यत्र।) अक्षरद्वययुक्तशब्दादौ, त्रि॥ (यथा, भागवते। २। ८। ६।

"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः॥")

द्व्यङ्गुलं, त्रि, (द्वे अङ्गुली प्रमाणमस्य। "तत्पुरुषस्याङ्गुलेरिति।" ५। ४। ८६। इति अच्।) अङ्गुलिद्वयपरिमितम्। यथा, ज्योतिषतत्त्वे।

"अर्काङ्गुलाथ सप्तघ्ना काष्ठी द्व्यङ्गुलमूलिका।
शङ्कुच्छाया भवेत्तत्र तच्छायां परिकल्पयेत्॥"

द्वयोरङ्गुल्योः समाहारः इति वाक्ये अङ्गुलिद्वयमात्रे, क्ली। इति सुग्धबोधम्॥ (द्वे अङ्गुली यस्य इति विग्रहे। "अङ्गुलेर्दारुणि।" ५। ४। ११४। इति षच्। द्व्यङ्गुलं दारु॥ इति व्याकरणम्॥)

द्व्यञ्जलं, त्रि, (द्वावञ्जली परिमाणमस्य ("द्वित्रिभ्यामञ्जले।" ५। ४। १०२। इति टच्।) अञ्जलिद्वयपरिमितम्। द्वयोरञ्जल्योः समाहारः इति वाक्ये अञ्जलिद्वयमात्रे, क्ली। इति सुग्धबोधम्॥

द्व्यणुकं, क्ली, (द्वौ अणू कारणे यस्य। कप्।) परमाणुसमवेतद्वयम्। परमाणुद्वयात्मकम्। तच्च प्रत्यक्षादिविषयम्। यथा, भाषापरिच्छेदे। ३८।

"विषयो द्व्यणुकादिस्तु ब्रह्माद्यन्त उदाहृतः॥"

तस्य परिमाणमनित्यम्। यथा,—

"अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्॥"

इति भाषापरिच्छेदे। १११॥

द्व्यन्यः, त्रि, द्वाभ्यामन्यः इति पञ्चमीतत्पुरुषे कृते। द्विभिन्नः॥ द्वे अन्ये यस्य। इति बहुव्रीहौ। द्विभिन्नकः। द्वयोरन्ययोः समाहारः। इति वाक्ये, क्ली॥

द्व्यर्थः, त्रि, (द्वौ अर्थौ यस्य।) अर्थद्वययुक्तशब्दादिः। अस्य प्रमाणं राघवपाण्डवीयादिग्रन्थे द्रष्टव्यम्॥

द्व्यष्टं, क्ली, (हेमरूप्ये द्वे अश्नुते इति। अश्+गत्यर्थेति क्तः। इडभावः।) ताम्रम्। इत्यमरः। २। ६। ६७॥

द्व्यहः, पुं, अहर्द्वयम्। द्वे अहनी समाहृते। इति पुंलिङ्गसंग्रहे भरतः॥

द्व्यात्मकः, पुं, (द्वौ रूपौ आत्मानौ यस्य।) मिथुनकन्याधनुर्मीनराशयः। यथा, ज्योतिस्तत्त्वे।

"चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

द्व्याहिकः, त्रि, (द्व्यहे भवः। ठञ्। वाहुलकात् न ऐच्।) दिनद्वयभवः। द्व्यहे भव इत्यर्थे ण्विकप्रत्ययः॥

ध

ध, धकारः। स तवर्गचतुर्थो वर्णो व्यञ्जनोनविंशश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"दन्त्या ऋतुलसाः स्मृताः।" इति॥) अस्य स्वरूपं यथा,—

"धकारं परमेशानि! कुण्डली मोक्षरूपिणी।
आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि! चिच्छक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं धकारं हृदि भावय॥
पीतविद्युल्लताकारं चतुर्व्वर्गप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

"त्रिकोणरूपरेखायां त्रयो देवा वसन्ति च।
विश्वेश्वरी विश्वमाता वामतः स्खलतः स्थिता॥"

इति वर्णोद्धारतन्त्रम्॥

अस्य ध्यानं यथा,—

"षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम्।
वरदां शोभनां रम्यां चतुर्व्वर्गप्रदायिनीम्॥
एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत्॥"

अस्य नामानि यथा—

"धोधनार्थो रुचिः स्थाणुः सात्वतो योगिनीप्रियः।
मीनेशः शङ्खिनी तोयं नागेशो विश्वपावनी॥
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः।
पीतवासा त्रिवर्णा च धाता धर्म्मप्रवञ्चमः॥
सन्दर्शो मोहनो लज्जा वक्त्रतुण्डाधरं धरा।
वामपादाङ्गुलेर्मूलं व्येष्ठा सुरपुरं भवः॥
सुपर्णात्मा दीर्घजङ्घश्च धनेशो धनसञ्चयः॥"

इति नानातन्त्रशास्त्रम्॥

धं, क्ली, (दधाति सुखमिति। धा+डः।) धनम्। इति मेदिनी। धे, १॥

धः, पुं, (दधाति धरति विश्वमिति। धा+डः।) ब्रह्मा। (दधाति निधिमिति।) कुबेरः। (दधाति जीवानां शुभाशुभमिति।) धर्म्मः। इति मेदिनी। धे, १॥

धक्क, क नाशने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। नाशनं नद्यीकरणम्। क, धक्कयति पापं गङ्गा। इति दुर्गादासः॥

धटः, पुं, (धं धनं अटति गच्छति प्राप्नोति तोल्यत्वेनेति। ध+अट्+अच्। प्रकन्यादित्वात् साधुः।) तुला। इत्यमरः। ३। ५। १७॥ तराजु इति घाड़ा इति च भाषा। ("इतन्निरुक्तिर्यथा,—

"धकाराद्धर्म्मसद्दिष्टं टकारात् कुटिलं नरम्।
धृतो धारयसे यस्माद्दटस्तेनाभिधीयते॥"

इति दियतत्त्वधृतवचनम्॥)

तुलाराशिः। यथा, ज्योतिस्तत्त्वे।

"सिंहो दृश्यश्च मेषश्च कन्या धन्वी घटो घटः।
अर्कादीनां त्रिकोणानि मूलानि राशयः
क्रमात्॥"

तुलापरीक्षा। इति परीक्षातत्त्वम्॥

अस्य विवरणं तुलाशब्दे द्रष्टव्यम् । (धर्म्मः । इति विष्णुनारदौ । यथा,—
"अर्च्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत् ।"
इति दिवतत्त्वधृतवचनम् ।)
घटकः, पुं, (घटेन तुलया कायतीति । कै + कः ।) चतुर्द्रोणपरिमाणम् । इत्यमरटीकायां भरतः । इति लीलावती । नन्दिसूत्रः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"घनो घटो नन्दितरः स्थिरो गौरो धुरन्धरः ।"
घटपरीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा ।) तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा । "पितामहः ।
'छित्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥'
यूपवदिति यूपच्छेदनविहितसर्व्वैतिकर्त्तव्यतातिदेशः । सा च ॐ खधिते मैनं हिंसीरिति-च्छेदनमन्त्रविशेषादिरूपा इति व्यवहारप्रदीपः ॥
'मन्त्रः सौम्यो वानस्पत्यच्छेदने अप्य एव च ।
चतुरस्रा तुला कार्य्या दृढा रज्ज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु पार्थिवत् ॥'
कटकानि बलयानि ।
'चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ।'
अत्र साधारणत्वेन प्रारदातिलकोक्तो हस्तो ग्राह्यः । यथा,—
'चतुर्विंशत्यङ्गुलाढ्यं हस्तं तत्त्वविदो विदुः ।
यवानामष्टभिः कृष्णं मानाङ्गुलमितीरितम् ॥'
यवानां तण्डुलीकृतानाम् ।
'यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अष्टाधिकोनितैर्हस्तश्चतुर्भिरङ्गुलैः ॥'
इति कालिकापुराणात् ॥
प्रमाणन्तु पार्श्वेन यवानाम् । 'षड्यवाः पार्श्वसञ्ज्ञिताः ।' इति कात्यायनवचनात् ॥ * ॥
अनयोर्व्यवस्थामाह कापिलपञ्चरात्रम् ।
'अष्टभिस्तैर्भवेद्धस्तं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरङ्गुष्ठमङ्गुलं सुनिशम्य ! ॥'
कन्यसं कनिष्ठम् । पादौ स्तम्भौ । उपरि शृङ्गिकोपरि । तत्समौ चतुर्हस्तावित्यर्थः । वस्तुतस्तु उपरितत्समौ उपरि तत्समं काष्ठान्तरं ययोः पादयोस्तौ ॥ * ॥ स्तम्भप्रमाणमाह व्यासः ।
'हस्तद्वयं निखेयन्तु प्रोक्तं तुल्यकयोर्द्वयोः ।
षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः ॥'
तुल्यकयोः स्तम्भयोः । षड्हस्तं निखातहस्तद्वयेन धर्म्मं अर्थान्मृत्तिकोपरि हस्तचतुष्टयमित्यर्थः ।
'अन्तरन्तु तयोर्ज्ञेयं भवेदध्यर्द्धमेव वा ।'
तयोः स्तम्भयोः । हस्तावन्तरं हस्तद्वयपरिमितमध्यमित्यर्थः । अध्यर्द्धं सार्द्धहस्तद्वयम् । एतत्तु शृङ्गिकोन्नया कार्य्या पञ्चहस्तायता तुला । इति विष्णुक्तपञ्चहस्तायततुलाविषयम् । व्यवहारदीपिकाप्येवम् । ० ॥
अथ घटारोपणविधिः । पितामहः ।
'हस्तद्वयं निखेयन्तु पादयोरुभयोरपि ।'
अत्र हस्तद्वयं मृत्तिकाभ्यन्तरे । हस्तचतुष्टयं मृत्तिकोपरि । तथा,—
'तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ॥
घटाङ्गुलतरे स्थाता नित्यं दृग्भिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥
दृढमयौ ऋजुसम्भौ घटमस्तकसन्निभौ ।
प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटस्तथा ॥'
नारदः ।
'शिक्यद्वयं समासाद्य घटकर्कटयोर्दृढम् ।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥'
पितामहः ।
'प्राङ्मुखान् कल्पयेत् दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत् कर्त्तुर्नन्यस्मिन् मृत्तिकां शुभाम् ॥
पिटकं पूरयेत्तस्मिन् इष्टकाग्रावपांशुभिः ॥'
अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः ।
'परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हैमकाराश्च कांस्यकारास्तथैव च ।
कार्य्याः परीक्षकैर्नित्यमवलम्बसमो घटः ॥
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ।
यस्मिन्न श्रवते तोयं स विज्ञेयः समो घटः ॥
तोलयित्वा नरं पूर्व्वं पश्चात्तमधतार्य्य तु ।
घटस्तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥
तत आवाहयेद्देवान् विधिनानेन मन्त्रवित् ।
वादित्रतूर्य्यघोषेण गन्धमाल्यानुलेपनैः ॥
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥'
प्राड्विवाकसमाख्या तु पृच्छतीति प्राट् विवेचयतीति विवाकः । इति व्यवहारमालाकारः ॥ * ॥
तथा च बृहस्पतिः ।
'विवादे पृच्छति प्रश्नं प्रतिपन्नं तथैव च ।
प्रियपूर्व्वं प्रावदति प्राड्विवाकस्ततः स्मृतः ॥'
वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः ।
'व्यवहारार्थितं प्रश्नं पृच्छति प्राड्इति स्थितिः ।
विवेचयति यस्मिन्न प्राड्विवाक इति स्मृतः ॥'
अभिप्रायं पृच्छतीति प्राट् तदनुरूपं दिव्यं विविनक्ति इति विवाकः । प्राट् चासौ विवाकश्चेति कर्म्मधारयः ॥ * ॥
अस्य कात्यायनेन नवग्रहपूजामाह मत्स्यपुराणम् ।
'नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥'
ततश्च प्राड्विवाकः पूर्व्वं कार्य्यं पृच्छेत् निर्देदिशेच्च विवेचयेत् । ततोऽभियुक्तं तोलयित्वा अवतार्य्य धर्म्मादाहरणादि कुर्य्यात् । पितामहः ।
'एह्येहि भगवन् धर्म्म दिव्ये शुक्लिन् समाविश ।
साक्षितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य च घटे धर्म्मं पञ्चादङ्गानि विन्यसेत् ॥'
अङ्गानि परिवारदेवताः ।
'इन्द्रं पूर्व्वे तु सम्पाद्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुबेरं उत्तरे तथा ॥
अन्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥'
इन्द्रः पीतो यमः श्यामो वरुणः स्फाटिकप्रभः ।
कुबेरश्च सुवर्णाभो वह्निश्चापि सुवर्णभः ॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेत् शुक्ल अनन्तः शुक्ल एव च ॥
ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ * ॥
देवेशेशानयोर्मध्ये आदित्यान् तथायनम् ।
धात्यर्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा ॥
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरनघन्यो अघन्यजः ॥
इत्येते द्वादशादित्या मनुना परिकीर्त्तिताः ॥'
अजघन्यो अघन्यजः । इति विष्णोर्विशेषणम् ॥ ॥
'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥
अजैकपादहिब्रध्नः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥
स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः ॥'
महायशाः विशांपतिर्भगवांश्चेति विशेषणानि ॥
'प्रेतेशस्यत्वसोर्मध्ये मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥'
गणसंयुतेति विशेषणम् ॥ * ॥
'निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥
असनः सर्पनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजौवौ च मरुतोऽष्टौ प्रकीर्त्तिताः ॥
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां देवतानाञ्च स्नानान्तं पूजनं विदुः ॥'
विशेषमाह ब्रह्मपुराणम् ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु ॥'
मन्त्र इत्यभिधानादनेनैवेत्येवकारश्रुतेश्च इदं द्रव्यं ओमुकाय नमः इति योज्यं न तु धर्म्मायार्थ्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम् । प्रमाणाभावादनन्तयाच्च । पितामहः ।
'भूषावसानं धर्म्माय दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पञ्चादङ्गानां भूषान्तमुपकल्पयेत् ॥
गन्धादिकां नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ।'
एतत् सर्व्वं प्राड्विवाकः कुर्य्यात् । यथा,—
'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतव्रतोपपन्नश्च शान्तचित्तो विमत्सरः ॥
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः ।
उपोषितः शुक्लवासाः शतदन्तादिधावनः ॥
सर्व्वासां देवतानाञ्च पूजां कुर्य्यादृषाविधिं ॥'
रक्तगन्धपुष्पादीनाह नारदः ।
'रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः ।
अर्च्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत् ॥'
घटं धर्म्मम् । तथा च विष्णुनारदौ ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।'
शिष्टानिन्द्रादीन् । अविशेषात् सर्व्वत्र रक्तो-

न्वयः । मिताक्षरायान्तु धर्म्मपूजन एव रक्तत्व-नियमः । तथा,—
'चतुर्हिस्तु ततो होमः कर्त्तव्यो वेदपारगैः ।
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥
सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत् ॥'
सावित्र्या गायत्र्या । तेन प्रणवादिकां गायित्रीमुच्चार्य्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य्य समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति मिताक्षरा । वस्तुतस्तु गायत्रीहोमे योगियाज्ञवल्क्याः ।
'प्रणवव्याहृतिभ्याञ्च स्वाहान्ते होमकर्म्मणि ।
तेन प्रणवादिकां सव्याहृतिकां गायत्रीमुच्चार्य्य स्वाहाकारान्तं पुनः प्रणवमुच्चार्य्य आज्य-पायससमिधो मिलित्वा अष्टोत्तरशतं जुहुयात् लाघवात् । अतएव देवतैक्ये हि दधिपयसो-स्तन्त्रेणानुष्ठानम् । ऐन्द्रं दध्नमावास्यायामैन्द्रं पयोऽमावास्यायामिति श्राद्धविवेकः ॥ * ॥
यत्तु पद्मलाङ्गलमहादाने ।
'पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेच्चरुम् ।
एकस्मिन्नेव कुम्भे च गुरवेऽसौ निवेदयेत् ॥
पलाशसमिधस्तद्वदाज्यं क्षौद्रतिलांस्तथा ॥'
इति मत्स्यपुराणात् ॥
चतुर्णां होतृणां मध्ये यस्मै गुरुः पर्ज्जन्यादिभ्यो होमं कुर्व्विति आज्ञां करोति स एव पर्ज्जन्याय आदित्याय रुद्रेभ्यस्तत्तन्मन्त्रैः पायसं पलाश-समिदाज्यक्षौद्रतिलांश्च । प्रत्येकं जुहुयादिति भूपालप्रभृतिभिरुक्तम् । तदयुक्तं तद्वदिति तथेत्याभ्यां प्रत्येकक्रियेव होमविधानात् । अत-एव रत्नाकरकृद्भिरुक्तं जुहुयादित्युक्ता तद्वदिति पलाशादि जुहुयादित्युक्तम् । अतएव वृषोत्-सर्गे वाचस्पतिमिश्रप्रभृतिभिरप्याज्यादिहोमशेष-पायसपूपहोमशेषपिष्टकाभ्यां मिलिताभ्यां सकृत् स्विष्टकृद्धोमो विहितः । अग्रन्तौ तु ।
'होमो ग्रहादिपूजायां घृतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा शक्त्यपेक्ष्यमथापि वा ॥'
इति देवीपुराणीयादिपदर्शनात् अचाप्यन्या सङ्ख्या उन्नेया । एवं मत्स्यपुराणे ।
'शृणु राजन् महाबाहो तडागादिषु यो विधिः ।
वेद्यास्तु परितो गर्त्तारत्निमात्रास्त्रिमेखलाः ॥
नव सप्तथवा पञ्च योनिवक्त्रा नृपात्मज ।
इति नवादिकुण्डानुक्त्वा,—
'स्वल्पेऽप्येकाग्निमत्कार्य्यो वित्तशाठ्याद्बुधैर्नृभिः ॥'
इति दर्शनादत्रापि अग्रक्रावेकाग्निविधिरिति वदन्ति । अत्र प्राड्विवाकस्त्वेवैव होमः ।
'दिवसेषु सर्व्वकार्य्येषु प्राड्विवाकः समाचरेत् ।
अध्वरेषु यथाध्वर्य्युः सोपवासो नृपाज्ञया ॥'
इति मिताक्षराधृतपितामहवचनात् । अध्वर्यु-र्यजमानमात्रम् । न चात्र भिन्नशाखिनाश्व-त्थिवां रथकारवह्निद्वाप्रयुक्तिकल्पनेति वाच्यम् । ब्राह्मणमात्रस्य नानाशाखाध्याठावधानेन कल्प्य-नानुपपत्तेः । तथा च मनुः ।
'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाचरेत् ॥' इति ।
प्रायश्चित्तहोमस्तु सामगानां महाव्याहृतिभिः ।
'यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रश्च कर्त्तव्याः स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः ।
होतव्या त्रिर्विकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥'
इति छन्दोगपरिशिष्टात् ॥
न तु शाट्यायनहोमो भवदेवभट्टोक्तः । त्रिर्वि-कल्प इत्यनेन तस्य निरासात् । भट्टनारायणा-दिभिरप्रमाणीकृतत्वाच्च ॥ * ॥ पितामहः ।
'तोलयित्वा नरं पूर्व्वं तस्मात्तमवतार्य्य च ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्तदा वदेत् ॥
एह्येहि भगवन् धर्म्म ! दिवं त्वञ्च समाविश ।
सहितो लोकपालैश्च दक्षादित्यमरुद्गणैः ॥
तत्पार्श्वमभियुक्तस्य लेखयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोत्तमम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥
इमं मन्त्रविधिं कृत्स्नं सर्व्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ * ॥
घटमामन्त्रयेच्चैवं विधिनानेन मन्त्रवित् ।
त्वं घटो ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकारान्मृत्तिसृष्टिं टकारात् कुटिलं नरम् ।
धृतो धारयसे यस्माद्घटस्तेनाभिधीयते ॥
त्वं वेत्थ सर्व्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभियुक्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्ब्रह्मंस्तत्त्रातुमर्हसि ॥'* ॥
लेखनप्रकारमाह नन्दिपुराणम् ।
'शुभे नक्षत्रदिवसे शुभे राशिदिनग्रहे ।
लेखयेत् पूज्यदेवेभ्यान् ब्रह्मब्रह्मजनार्हनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तवाक्शोच मसीपत्रविधारणे ॥
मत्स्यपुराणञ्च ॥
'ग्रीवोपेतान् सुसम्पन्नान् समश्रेणिगतान् समान् ।
अक्षरान् लेखयेद्यस्तु स नरो लेखकः स्मृतः ॥'
इति दानसागरः ॥
धारयसे इत्यत्र भावयसे इति पाठोऽनुपयुक्तः । तथा हि । कुटिलं पापिनं संशयोपपन्नं वा । आद्ये पापिनमित्येतावन्मात्राभिधानमनुपपन्नं जहंगत्या शुद्धस्यापि ज्ञापनात् द्वितीये पूर्व्व-सिद्धत्वेन ज्ञापनानुपपत्तिः । तस्मात् कुटिलं व्यवहाराभियुक्तं धारयसे इत्येवार्थः । अतएव उपसंहारे संशयादस्मादित्युक्तम् । अतएव कालिकापुराणेऽपि । मानुषस्तोलते त्वयीत्युक्त-मिति ॥ * ॥ स्मृतिसमुच्चयव्यवहारदीपिकयो-र्विष्णुः । घटश्च समयेन ग्रहीयात् तुलाधारकश्च ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।
त्वमेव घट जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभियुक्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्ब्रह्मंस्तत्त्रातुमर्हसि ॥
ब्रह्मन्ना ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतो व्रज ॥'
समयेन त्वमेव घट इत्यादिनियमेन । घटं गृह्णी-यात् योजयेत् । तुलाधारकश्च ब्रह्मन्ना ये इत्यादि-ना नियमेनेत्यर्थः । अत्र नानासुनिप्रणीत-मन्त्राणाम् एकतरप्राप्तानां समानप्रयोजनानां यत्रैकोद्दिष्टविकल्प इति न्यायगौरवात्ते न लिखिताः । अभियुक्तप्राड्विवाकप्राप्तानान्तु इष्टार्थानां समुच्चयः । पितामहः ।
'नित्यं देयानि देयानि शुचये चार्द्रवाससे ।'
शुचये जननमरणाशौचरहिताय । यतिनं प्रति याज्ञवल्क्यादीपकलिकायां नारदः ।
'हस्तत्रयेषु सर्व्वेषु कुर्य्याद्दानपदानि च ।
तान्येव पुनरालक्ष्येद्दत्तो विन्दुर्विचिह्नितौ ॥'
इत्यग्निविधौ हस्तत्रयेनौ हस्तत्रयमलक्षादिना चिह्नितं कृत्वा यतान्तरं ज्ञातं न वा इति ज्ञातव्यमिति सुतरां यतिनो देयाधिकारः ।
नारदः ।
'अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्व्वाह्णे सर्व्वदेयानां प्रदानमनुकीर्त्तितम् ॥'* ॥
घटानुमन्त्रणात् प्रागपि पुनस्तोलनमाह कालिकापुराणम् ।
'उपोषितं तथा स्नातं नृत्तसमं प्रथमं तुलाम् ।
सन्तोल्य कारयेद्रेखामवतार्य्यानुमन्त्रयेत् ॥'
याज्ञवल्क्यः ।
'तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां लङ्घावतारितः ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्म्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मिन् पापकृन्मात्रस्तत्तो मां त्वमधो नय ।
शुद्धश्चेत् समयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥'
तुलाधारणाभिज्ञैर्ब्राह्मणादिभिः पाषाणादि-प्रतिमानसमीकृतसुवर्णाधिरूढः अभियुक्तो दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमी-करणदशायां यत्र पादादयो व्यवस्थिताः स्निग्ध-रज्वश्च तत्र पाण्डुलेखेनाङ्कयित्वा पिटकादव-तारितः त्वन्तुलेति मन्त्रेण तुलां प्रार्थयेत् । सत्यं सन्दिग्धार्थस्य स्वरूपं वद दर्शय । पापकृद-सत्यवादी शुद्धश्च सत्यवादी । मन्त्रश्चायं सार्त्तः पौराणिकत्वात् शूद्रेरपि पाठ्यः । वेदमन्त्रवर्ज्यं शूद्रस्येति छन्दोगाह्निकधृतस्मृतौ वेदेति विशे-षणात् आह्निकश्राद्धादौ तु विशेषतो नमस्कार-मन्त्रविधानात् स्मार्त्तमन्त्रोऽपि निषिद्धः । प्रप-क्षस्तु तिथितत्त्वेऽनुसन्धेयः । स्त्रीपरीक्षायामपि अविकृत एव प्रयोज्यः । दिव्यानीह विशुद्धये इत्यनेन सन्दिग्धार्थसन्देहनिवृत्तिफलकतयाविधे-येन स्त्रीपुंकर्तृकदिव्यविधानेन मानुषः शुद्धि-मिच्छतीत्यनेन च प्रकृतावृद्धायोगात् । अतएव पत्नीं सत्यशपथं नो धेह्येति मन्त्रे दिव्यकुशलीक-यजमानकर्तृकप्रयोगेऽपि न दिव्यकुशवचनोक्त इत्युक्तम् ॥ * ॥ पक्षस्यप्रतिज्ञेयार्थस्य शोधाय

तस्य स्वस्य बोधाय आवणमाह नारदः।
'यसुमर्थेच पत्रस्थमभियुक्तं यथार्हतः।
संश्राव्य मूर्द्धि तस्यैव न्यस्य देयो यथाक्रमम्॥'
देयो दिव्यविशेषः प्राड्विवाकेनेति शेषः॥ * ॥
ततः शिरोऽवस्थितपत्रकं शोधं नरं घटे पुनरारोपयेत्। पुनरारोपयेत्तस्मिन् शिरोऽवस्थितपत्रकमिति स्मरणात्। तुलारोपितच्च नरं विनाड़ीपञ्चककालं घृतत्रयगुर्व्वक्षरोच्चारणयोग्यम्।
'मा कान्ते पत्रस्थान्ते पर्य्यंकाग्रे देशे स्वामीः।
कान्तं वक्तुं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
चुतचामः प्राटंसेतश्चेतो राहुः क्रूरः प्राद्यात्तस्माद्दान्ते हर्म्यस्थान्ते शय्यैकान्ते कर्त्तव्या॥'
इति श्लोकस्य पञ्चधा पाठयोग्यकालं पञ्चपलात्मकं यावत् तावत् स्थापयेत्॥ यथा, स्मृतिः।
'ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्य्यात् कालपरीक्षणम्।
विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः॥'
तत्कालश्च ज्योतिषे।
'दशगुर्व्वक्षराः प्राणाः षट् प्राणाः स्याद्विनाड़िका।
तासां षष्ट्या घटी ज्ञेयाहोरात्रं घटिकाशतया॥'
तथा षष्ट्या॥ * ॥ पितामहः।
'साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु॥
शंसन्ति साक्षिणः सर्व्वे शुद्धाशुद्धौ नृपे तथा।
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः॥
समो वा हीयमानो वा न विशुद्धो भवेन्नरः।
अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते॥'
अल्पत्वं यभिचारे आलिङ्गनादिना। चौर्य्ये तद्देशगमनादिना॥ * ॥ तत्र पुनस्तोलनमाह दक्षः;।
'घटेऽभियुक्तस्तुलितो हीनश्चेद्दानिमाप्नुयात्।
तत्समस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेत्॥'
शोध्यः स्वल्पदोषाङ्गीकारेऽपि प्रधानदोषनिर्णयार्थं तत्रैव पुनस्तोलनीयः। अङ्गवैगुण्यसम्भावनायान्तु प्रयोगान्तरमिति। यदा चानुपलभ्यमानदष्टकारणक एव कचादीनां छेदनादिस्तदाप्यशुद्धिः।
'कचच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा।
रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत्॥'
इति दक्षस्मृतिवचनात्॥
कर्त्तं शिक्यतलम्। घटकर्कटौ तुलान्तयोः। शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशब्दनिभौ। अक्षः पादः। स्तम्भयोरुपरिनिविष्टस्तुलाधारयष्टिरिति मिताक्षरा॥ दाष्टीप्रयोजकः कीलकः। इति हलायुधः॥ मध्यकटकमिति पारिजातः॥ यदा तु दह्यमानकारणक एवैषां भङ्गस्तदा पुनरारोपयेत्। शिक्यादिच्छेदभङ्गेषु पुनरारोपयेन्नरमिति स्मृतेः। तत्रैव।
'अत्विक्पुरोहिताचार्य्यान्तैलक्षाभिश्च तोषयेत्।
एवं कारयिता राजा शुद्धो भोगान् मनोरमान्।
महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते॥ * ॥
तदयं सङ्क्षेपः। प्राड्विवाको लोकपालादिनमस्कारपूर्व्वकं यथोक्तलक्षणां तुलां कुर्य्यात्। ततः षड्हस्तौ सुदृढौ स्तम्भौ कृत्वा हस्तद्वयव्यवधानेन दक्षिणोत्तरयोर्द्विशोर्हस्तद्वयनिखननं कृत्वा पट्टधारकीलकाग्रस्तम्भयोरुपरि मध्ये पार्श्वद्वये च विहितच्छिद्रं मध्यच्छिद्रनिवेशितलोहाङ्कुशपट्टकं निधाय उपरि कीलकस्य ततपट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यवलयस्थलोहाङ्कुशं संयुञ्जात्। एवञ्च मध्ये स्तम्भयोरन्तरा तिर्य्यक् तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यद्वयरज्ज्वबन्धनं कुर्य्यात्। तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरि सूत्रसम्बद्धौ दण्डन्यायावधोमुखौ घटमस्तकचुम्बितौ अवलम्बौ कार्य्यौ। यथावलम्बविश्लेषाभ्यां तुलायामवनतिरुन्नतिश्च ज्ञेया तथा जलद्वारापि।"
इति दिव्यतत्त्वम्॥ * ॥ अस्य प्रयोगस्तुलाशब्दे द्रष्टव्यः॥
घटी, स्त्री, (घन + अच्। निपातनात् नस्य टः। गौरादित्वात् ङीष्।) चीरवस्त्रम्। इति मेदिनी। टे, १६॥ कौपीनम्। इति त्रिकाण्डशेषः॥
घटीदानं, क्ली, (घट्या चीरवस्त्रस्य दानम्।) गर्भाधानानन्तरस्त्रीसम्प्रदानकचीरवस्त्रदानम्। यथा, ज्योतिःसारसंग्रहे।
"मूलश्रवणहस्तेषु पुष्यादित्युत्तरासु च।
नगपौष्णे घटी देया सौम्यवारे शुभे तिथौ॥"
घण, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) घणति शब्दङ्गः। इति दुर्गादासः॥
घत्तूरः, पुं, (धयति पिबतीव प्रज्ञतिम्। धे + बाहुलकात् उरच्। एषोदरादित्वात् साधुः।) धुस्तूरः। इति हेमचन्द्रः। ३। २१७॥ (यथा, काशीखण्डे। २६। ६३।
"धर्म्माधर्म्मैगुणक्षेत्री धत्तूरकुसुमप्रिया॥")
घन, रवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) घनति शब्दङ्गः। इति दुर्गादासः॥
घन, लिङ् र धान्ये। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) धान्यमिह धान्यक्रिया। र, वैदिकः। लि, दधन्ति भूमिर्धान्यमनेनोत्पादयति इत्यर्थः। इति दुर्गादासः॥
घनं, क्ली, (घनति रौतीति। घन रवे + पचाद्यच्।) मेघपाचम्। इति शब्दरत्नावली॥ गोधनम्। इति मेदिनी। ने, १२॥ (यथा, हरिवंशे। ७२।३३।
"अनुजग्मुश्च गोपालाः कालयन्तो धनानि च॥")
जीवनोपायः। (दधन्ति धान्यादिकमनेनोत्पादयन्तीति। धन + अच्। यद्वा, दधति सुखमिति। धा + "कृपृवृजिमन्दिनिधाञः क्युः।" उणा० २। ८१। इत्यत्र "बाहुलकात् केवलादपि क्युः।" इत्युज्ज्वलदत्तोक्तेः क्युः।) द्रविणम्। (यथा, उद्भटे।
"धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति।
धनेभ्यः परो नास्ति बन्धुर्हि लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम्॥")
तत्पर्य्यायः। द्रव्यम् २ वित्तम् ३ स्वापतेयम् ४ रिक्थम् ५ ऋक्थम् ६ वसु ७ हिरण्यम् ८ द्रविणम् ९ द्युम्नम् १० अर्थः ११ रा; १२ विभवः १३। इत्यमरः। २। ९। ९०॥ काञ्चनम् १४ लक्ष्मीः १५ भोग्यम् १६ सम्पत् १७ ऋद्धिः १८ श्रीः १९ अवहार्य्यम् २०। इति राजनिर्घण्टः॥ रेः २१ भोगः २२। इति जटाधरः॥ स्वम् २३। इति शब्दरत्नावली॥ तस्य वैदिकपर्य्यायाः। मघम् १ रेक्णः २ रिक्थम् ३ वेदः ४ वरिवः ५ श्वात्रम् ६ रत्नम् ७ रयिः ८ चत्रम् ९ भगः १० मीलुम् ११ गयः १२ द्युम्नम् १३ इन्द्रियम् १४ वसु १५ रायः १६ राधः १७ भोजनम् १८ तना १९ तृमूणम् २० बन्धुः २१ मेधाः २२ यज्ञः २३ ब्रह्म २४ द्रविणम् २५ अवः २६ तृतम् २७ तृतम् २८। इत्यष्टाविंशतिरेव धननामानि। इति वेदनिघण्टौ २ अध्यायः॥ * ॥
तत्त्रिविधं यथा,—
"धनन्तु त्रिविधं ज्ञेयं शुक्लं शबलमेव च।
लक्षणञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक्॥
क्रमायत्तं प्रीतिदायं प्राप्तञ्च सह भार्य्यया।
अविशेषेण सर्व्वेषां वर्णानां त्रिविधं धनम्॥
वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम्।
याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः॥
त्रिविधं क्षत्रियस्यापि प्राड्विवैशेषिकं धनम्।
युद्धार्जितञ्च करजं दण्डाद्वधापहारतः॥
वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम्।
कृषिगोरक्षवाणिज्यं शूद्रस्येभ्यस्य कर्म्मतः॥
कुशीदकृषिवाणिज्यं प्रकुर्व्वीत स्वयं कृतम्।
आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः॥"
इति गारुड़े २१६ अध्याये क्वचित् २१० अध्याये॥ *॥
धनभागिनो दायशब्दे द्रष्टव्याः। धनाभागिनो यथा,—
"कुलवामनखञ्जानां क्लीवानां श्वित्रिणामपि।
उन्मत्तानां तथान्धानां धनभागो न विद्यते॥
ग्रन्थासनस्थानमात्रच्छाया चान्नं सुजिक्रिया।
एतावदीयते देव नार्थभागहरा हि ते॥"
इति वामनपुराणे ७५ अध्यायः॥ * ॥
अधना यथा,—
"त्रय एवाधना राजन्! भार्य्या दासस्तथा सुतः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥"
इति मात्स्ये ३१ अध्यायः॥ * ॥
धनस्य प्राणतुल्यत्वसूक्तं यथा,—
"यद्देहद्रविणं नाम प्राणा एते बहिश्चराः।
स तस्य हरते प्राणान् यो यस्य हरते धनम्॥"
इति कूर्म्मे २६ अध्यायः॥ * ॥
"अपराधार्जितं क्लेशं प्रयत्नेनार्जितं धनम्।
स्वल्पं वा बहुलं वापि देयमित्यभिधीयते॥"
अपराधः परपीड़ारहितम्। अक्लेशं पात्रक्लेशाजनकम्॥ * ॥ तामसधनं यथा,—
"पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः।
यालेगोपार्जितं यत्तु तत् क्षणं वसुदाहृतम्॥"
पार्श्विकेन पात्रतया योऽर्जयति। आर्त्तया पर-

पौड्या । प्रतिरूपेण लक्षमिरत्नादिना । साहसेन समुद्रयानगिर्य्यारोहणादिना । आर्येण ब्राह्मणवैश्येन शूद्रादिना । लब्धं तामसम् ॥ * ॥ राजसधनं यथा,—

'कृषीदकृषिवाणिज्यशुल्कगानानुवृत्तिभिः ।
लतोपकारादाप्तञ्च राजसं समुदाहृतम् ॥'

अनुवृत्त्या सेवया ॥ * ॥ सात्त्विकधनं यथा,—

'श्रुतग्रौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुद्धं सुनिभिः समुदाहृतम् ॥'

श्रुतेनाध्ययनेन । ग्रौर्य्येण जयादिना । तपसा जपहोमदेवार्चादिना । कन्यागतं कन्यया सहागतं श्वशुरादेर्द्रव्यम् । शिष्यागतं गुरुदक्षिणादिना । याज्यागतं आर्त्विज्यलब्धम् । अन्वयागतं दायादेर्थो लब्धम् । शुद्धं सात्त्विकम् ।"इति शुद्धितत्त्वे देवलनारदौ ॥ * ॥ धनप्रयोगनक्षत्राणि यथा,

अश्विनी । पुनर्व्वसुः । पुष्यः । उत्तरफल्गुनी । हस्ता । पूर्व्वाषाढ़ा । उत्तराषाढ़ा । श्रवणा । धनिष्ठा । शतभिषा । उत्तरभाद्रपत् । रोहिणी । इति ज्योतिषम् ॥ * ॥ धनप्रयोगनिषेधो यथा,

"आर्द्रं यमइन्द्रमहिश्रयञ्च
ग्रनुद्वयं वातयुगं महेग्रः ।
कार्य्यो न चैतेषु धनप्रयोगो
ऋणी गवे याञ्चलबं न देयम् ॥"

इति समयप्रदीपः ॥

अर्थप्रशंसा यथा,—

"अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः ॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः ।
विप्रकीर्य्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखेधितः ।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥
यस्यार्थाः स च विद्वान्तो यस्यार्थाः स च बुद्धिमान् ।
यस्यार्थाः स महाबाहुर्यस्यार्थाः स गुणाधिकः ॥
अर्थक्षेते परित्यागे दोषाः प्रत्यक्षता मया ।
राज्यसुतवधता घोरा ! येन बुद्धिक्षया लता ॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम् ।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥
दर्पः कामश्च दर्पश्च धर्म्मः क्रोधः श्रमो दमः ।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिपे ॥
येषां गच्छत्यये लोकश्चरतां धर्म्मचारिणाम् ।
तेऽर्थाक्षये न दृश्यन्ते दृष्टिनेषु यथा यथाः ॥
इति रामायणे युद्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मणवाक्यम् ॥ * ॥

अर्थनिन्दा यथा,—

"अर्थेमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता नीतिः ॥"

रत्नादि मोक्षसञ्जरी द्रष्टव्यम् ॥ * ॥

अनुग्रहार्थं भगवता धनहरणम् । यथा,—

"राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः ।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥"

इति श्रीभागवतम् ।

धनकेलिः, पुं, (धनैः केलिः क्रीड़ा यस्य ।) कुबेरः । इति त्रिकाण्डशेषः ॥

धनच्छूः, स्त्री, (धनं क्षति गाधयतीति । छो य लुनौ + वाहुलकात् क्सः ।) करेटुपत्नी । इति त्रिकाण्डशेषः ॥

धनञ्जयः, पुं, (धनं जयति सम्पादयतीति । जि + खच् + मुम् । "धनमिच्छेत् हुताशनात् ।" इत्युक्तेरस्य तथात्वम् ।) अग्निः । त्रिकाण्डशेषः । इत्यमरः । १ । १ । ५६ ॥ (धनं जयति अरीन् निर्जित्य अर्ज्जयतीति । जि + खच् + मुम् च ।) अर्ज्जुनः । (अस्य निरुक्तिर्यथा, महाभारते । ४ । ४२ । १९ ।

"सर्व्वान् जनपदान् जित्वा वित्तमाश्रित्य केवलम् ।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥")

नागभेदः । स तु जलाशयाधिपतिः । (यथा, महाभारते । २ । ९ । ९ ।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥")

देहमारुतः । स च शरीरवाह्यप्रचवायुर्नागतः । इति मेदिनी । ये, १२० ॥ ("धनञ्जयः पोषणकरः ।" इति वेदान्तसारः । ३३ ॥

"न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ॥"

इति सुबोधिनी ॥)

"धनञ्जयस्तथा घोषे महारजतवर्णकः ।
जलाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु ॥"

इति शारदातिलकटीकायां राघवभट्टः ॥ अर्ज्जुनवृक्षः । इति रत्नमाला । * ॥ (गोत्रविशेषः । तद्गोत्रीये, त्रि । यथा, महाभारते । २ । ३३ । ३४ ।)

"धनञ्जयानान्तमः सुसामा सामगोऽभवत् ॥"

विष्णुः । यथा, महाभारते । १३ । १४८ । ८३ ।

"अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥"

"यतु दिग्विजये धनं प्रभूतं अनयत्तेन धनञ्जयः ।
'पाण्डवानां धनञ्जयः ।' इति भगवद्वचनात् ।"

इति शाङ्करभाष्यम् । षोढ़ग्रहापरस्य नाशः । यथा, देवीभागवते । १ । ३ । ३० ।

"अन्यारुणिः पञ्चदशे षोढ़शे तु धनञ्जयः ॥")

धनदः, पुं, (धनं ददाते पालयतीति । दे ड प्राणने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ५ । ३ । ४० ।

"त्रिविष्टपं यद्दास्यामि त्रिलोकं वरदं यमम् ।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विजित्य च ।"

ब्रह्मा अस्य तपसा सन्तुष्ट एनं धनेशं चकार । यथा, अध्यात्मरामायणे । ७ । १ । ३८ ।

"ददौ तस्यतपसा तुष्टो ब्रह्मा तस्मै वरं शुभम् ।
मनोऽभिलषितं तस्य धनैश्वर्य्यमक्षयितम् ॥")

हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (धनदः आश्रयितेनास्येति अच् । हिमवत एकदेशः । यथा, महाभारते । १३ । १६ । १६ ।

"धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम् ॥"

धनं ददातीति । दा + कः ।) दातरि, त्रि । इति मेदिनी । दे, १२ ॥ (यथा, कामन्दकीयनीतिसारे । ३ । २३ ।

"उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥")

धनदाची, स्त्री, (धनदस्य कुबेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः । षच् समासे । ङियां ङीप् ।) लताकरञ्जः । इति राजनिर्घण्टः ॥

धनदानुजः, पुं, (धनदस्य कुबेरस्य अनुजः कनिष्ठः ।) रावणः । इति शब्दरत्नावली ॥ (यथा, रघुः । १२ । ५३ ।

"नियतात् खसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्द्धसु ॥")

धनदायी, [न्] पुं, (धनं ददाति उपासकायेति । दा + णिनिः । "धनमिच्छेत् हुताशनात् ।" इति वचनादेवास्य तथात्वम् ।) अग्निः । इति शब्दरत्नावली ॥ धनदातरि, त्रि ॥

धनन्ददा, स्त्री, (येन धनेन भर्त्रा आनन्दं ददातीति । दा + कः ।) युङ्मशक्तिभेदः । इति त्रिकाण्डशेषः ॥

धनपतिः, पुं, (धनानां पतिः ।) कुबेरः । इति धनञ्जयः ॥ (यथा, महाभारते । २ । १२ । ३ ।

"तथा धनपतेर्यज्ञा गुह्यका राज्यसाश्चया ॥")

अस्य उत्पत्तिर्यथा,—

महादेव उवाच ।

"शृणु चार्य्यां वसुपतेरुत्पत्तिं पापनाशिनीम् ।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह ॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तस्थितोऽभवत् ।
प्रयोजनाभ्यां नित्यत्वादिश्च चैवदेवताः ॥
तत्राभूत्तस्य वायोस्तु उत्पत्तिः कीर्त्यते मया ।
तां शृणुष्व महाभाग ! कथ्यमानां मयानघ ! ॥
ब्रह्मणः क्षणतः सृष्टिं सुखादायुर्विनिर्ययौ ।
प्रत्यक्षमूर्त्तैरावर्त्तो तं ब्रह्मा प्रत्यषेधयत् ॥
मूर्त्तो भवस्व शान्तश्च तत्रोक्तो मूर्त्तिमान् भवन् ।
सर्व्वेषाञ्चैव देवानां यद्दित्तं फलमेव च ॥
तत् सर्व्वं याहि येनोक्तं तस्याक्षणपतिर्भवेत् ।
तस्य ब्रह्मा ददौ तुष्टश्चिधिमेकादशीं प्रभुः ॥
तस्यामनग्निभक्ताश्चो यो भवेन्नियतः शुचिः ।
तस्यास्तु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति ॥
इदं धनपतेर्मूर्त्तिः सर्व्वकिल्बिषनाशिनी ।
य एतां श्रद्धयाश्रुत्वा पुटयः पठतेऽपि वा ॥
सर्व्वकाममवाप्नोति स्वर्गलोकञ्च गच्छति ॥"

इति वराहपुराणम् ॥

धनपिशाचिका, स्त्री, (धने पिशाचिकेव ।) धनाशा । तत्पर्य्यायः । लक्ष्मा २ । इति शब्दरत्नावली । १२५ ॥

धनपिशाची, स्त्री, (धने पिशाचीव ।) लक्ष्मा । धनलोभः । इति त्रिकाण्डशेषः ॥

धनप्रिया, स्त्री, (धनवत् प्रिया ।) लाक्षलम् । इति राजनिर्घण्टः ॥

धनफलं, क्ली, (धनानां फलम् ।) दानभोगादि । यथा, अग्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तमुक्तफलं धनम् ।
रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम् ।"
इति वह्निपुराणे दानविधिनामाध्यायः ॥
धनवती, स्त्री, (धनमस्या अस्तीति । धन + मतुप् । मस्य वः । स्त्रियां ङीप् ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥
धनवान्, [त्] त्रि, (धनमस्यस्येति । धन + मतुप् । मस्य वः ।) धनविशिष्टः । धनी । इति हलायुधः ॥ (यथा, रामायणे ।२ । ६७ । १८ ।
"गोराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः क्षत्रियोरक्षजीविनः ॥")
धनस्यकः, पुं, गोक्षुरः । इति शब्दचन्द्रिका ॥ (लालसया धनमिच्छतीति । धन + क्यच् । "सर्व्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ।" ३ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातुः + क्विप् । लालसया धनेच्छौ, त्रि ॥)
धनहरी, स्त्री, (धनं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ६ । इति अच् । गौरादित्वात् ङीष् ।) चोरनामगन्धद्रव्यम् । तत्पर्य्यायः । राक्षसी २ चक्रा ३ क्षेमः ४ दुष्पत्रः ५ गन्धहासकः ६ । इत्यमरः । २ । ४ । १२८ ॥ दुष्कुलीनः ७ विरोधः ८ क्रोधमूर्च्छितः ९ । इति शब्दरत्नावली ॥ क्षेमकः १० कितवः ११ कोरकः १२ । इति जटाधरः ॥ धनहारके रत्नम्, त्रि ॥
धनाधिपः, पुं, (धनानामधिपः ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ५ । ७ । १८ ।
"सङ्करं सम्परित्यज्य गते शक्रे शचीपतौ ।
यमो धनाधिपः पाशी जग्मुः सर्व्वे भयातुराः ॥")
अस्य ध्यानं यथा,—
"कुबेरञ्च प्रवक्ष्यामि कुङ्कुलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सितास्बरधरं शुभम् ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
वरयुक्तविमानस्थं मेघस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन शुक्लकैः परिवारितम् ।
महोदरं महाकायं नवहस्तसमन्वितम् ॥
शुक्लकैर्बहुभिर्युक्तं धनधान्यकरेस्तथा ॥"
इति मत्स्यपुराणम् ॥
धनाध्यक्षः, पुं, (धनानामध्यक्षः ।) कुबेरः । इति हलायुधः ॥ (यथा, अध्यात्मरामायणे । ७ । २ । ४७ ।
"ततः क्रुद्धो दशग्रीवो जगाम धनदालयम् ।
विनिर्जित्य धनाध्यक्षं जहारोत्तमपुष्पकम् ॥")
धनाधिक्षतः । तद्विलद्वार इति खानाच्चि इति च भाषा । तस्य लक्षणं यथा,—
"लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फलगुसाराणामगाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता ॥"
इति मत्स्यपुराणे १८६ अः ॥
धनाशा, स्त्री, (धनानां आशा ।) धनलोभः । यथा, विष्णुपुराणे तथा हरिवंशे । ३० । ४६ ।
"जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥"
धनाश्रीः, स्त्री, रागिणीविशेषः । धानसी इति भाषा । इदमुक्तमते श्रीरागस्य तृतीयभार्य्या । अस्या जातिः षाडवः । ग्रहांशः षड्जस्वरः । गानसमयः हिमर्त्तौ द्वितीयप्रहरः कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियोगिनी रमणी रक्तवसना विच्छेदवेदनया दुर्ब्बला क्षुण्णा च एकाकिनी वकुलवृक्षतलोपविष्टा रुदन्ती । कल्लिनाथमते मेघरागस्य चतुर्थभार्य्या । भरतमते मालकोषपुत्रगान्धाररागस्य पत्नी । इति सङ्गीतग्रन्थम् ॥
धनिकः, पुं, (धनेन कायतीति । कै + कः ।) धन्याकम् । इति मेदिनी । के, १०६ । अस्मिन्नर्थे क्लीबमिति राजनिर्घण्टः ॥ (धनमस्यस्येति । ठन् ।) धवः । इति हेमचन्द्रः ॥
धनिकः, त्रि, (धनं अस्यस्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) साधुः । धनी । इति मेदिनी । के, १०६ ॥ (यथा, कलाविलासे ।१ । १८ ।
"घूर्णकरकङ्कणानां वारवधूचरणनूपुरमणीनाम् ।
धनिकग्रहोत्पन्नानां मुक्तिर्नास्त्येव सुग्धानाम् ॥"
उत्तमर्णः । यथा, मनुः । ८ । ४७ ।
"अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥")
धनिका, स्त्री, (धनिक + टाप् ।) साधुनारी । इति मेदिनी । के, १०६ । वधूः । इति हेमचन्द्रः ॥ युवती । इति शब्दरत्नावली ॥ प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
धनिष्ठा, स्त्री, (अतिशयेन धनवती । धन + इष्ठन् + टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोविंशनक्षत्रम् । तत्पर्य्यायः । श्रविष्ठा २ । इत्यमरः । १ । ३ । २२ ॥ वसुदेवता ३ । इति ज्योतिषम् ॥ भूतिः ४ निधानम् ५ धनवती ६ । इति जटाधरः ॥ अस्याः स्वरूपं यथा,—
"मस्तकोपरि समागते धने
मङ्गलातिनि पञ्चतारके ।
यान्ति कान्तिमति मेषलग्नतः
सारसाचिरसघस्रलिप्रिकाः ॥"
इति कालिदासस्य तरालिलग्ननिरूपणम् ॥
तत्र जातस्य फलम् ।
"आचारजातादरचारुशीलो
धनाधिगामी बलवान् दयालुः ।
यस्य प्रकृतौ च भवेद्धनिष्ठा
महत्प्रतिष्ठासहितो नरः स्यात् ॥"
इति कोष्ठीप्रदीपः ॥
धनी, [न्] त्रि, (धनमस्यस्येति । धन + इनिः ।) धनवान् । (यथा, देवीभागवते । १ । १५ । १३ ।
"गत्वा च धनिनां कार्य्या स्तुतिः सर्व्वात्मना बुधैः ॥")
तत्पर्य्यायः । इभ्यः २ आढ्यः ३ । इत्यमरः । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १२० अः ।
"आढ्यो वा दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्व्वकस्तेनमभिभाषेत धर्म्मवित् ॥"
"यद्धं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥"
इति श्रीभागवतम् ॥
(उत्तमर्णः । यथा, मनुः । ८ । ६१ ।
"याडशा धनिभिः कार्य्या व्यवहारेषु साक्षिणः ।
ताडशान् सम्प्रवक्ष्यामि यथावाच्यमृतञ्च तैः ॥")
धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥
धनीयकं, क्ली, (धनाय हितम् । धन + छः । संज्ञायां कन् ।) धन्याकम् । इति शब्दरत्नावली ॥
धनुः, पुं, (धनतीति । धन + "शन्धनीतृचरीति ।" उणां । १ । ७ । इति उः ।) चापः । (यथा, हितोपदेशे ।
"धनुर्वंशशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥")
राशिविशेषः । पियाजतृचः । इति सिद्धान्तकौमुदीसुबादिवृत्तिः ॥
धनुः, [स्] पुं, (धन + "अर्त्तिपृधमीति ।" उणां । २ । ११८ । इति उसिः स च नित् ।) पियाजतृचः । धनुर्धरे, त्रि । इति मेदिनी । से, २६ ॥
धनुः, [स्] क्ली, (धनतीति । धन शब्दे + "अर्त्तिपृधमीति ।" उणां । २ । ११८ । इति उसिः स च नित् ।) शरनिःक्षेपयन्त्रम् । धनुक इति भाषा । तत्पर्य्यायः । चापः २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्मुकम् ६ इष्वासः ७ । इत्यमरः । २ । ८ । ८१ ॥ स्थावरम् ८ शुल्बी ९ शरावापः १० ह्रस्वता ११ त्रिशता १२ । इति त्रिकाण्डशेषः । अक्षम् १३ धनूः १४ । इति जटाधरः ॥ तारकम् १५ काण्डम् १६ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं बार्हं तथैव च ।
कोमलं वर्ष्मवृत्तता तयोर्गुण उदाहृतः ॥
सुखसम्पत्तिकरणं समसुश्लायतं धनुः ।
विपदो सृष्टिवैषम्ये तदङ्गे भङ्गमावहेत् ॥"
इति युक्तिकल्पतरुः ॥
धनुर्विद्यारम्भदिनं यथा,—
"शनिभौमबुधान्येषु वारेषु सितयौ हरौ ।
प्रबुद्धे चापविद्याया आरम्भः शुभदो मतः ॥"
इति ज्योतिःसारसंग्रहः ॥
विद्यारम्भोक्तनक्षत्राणि तत्र शुभानि ॥
(एतदस्त्रविद्यां ब्रह्मा पृथुनाम्ने महीपतये प्रथमं दत्तवान् । असौ एव लोकेषु अस्याः प्रचारमकरोत् । यदुक्तम् वैशम्पायनेन ।
"असिः पूर्व्वं मया सृष्टो दुष्टनिग्रहकारणात् ।
भवाङ्गसमीपस्थो लोकान् रक्षन् चरत्यसौ ॥
धनुराद्यायुधयुक्तौ त्वमेवादिः सृतो मया ।

तस्मात् गृह्णामि चाखाणि दहानि तव पुत्रक ।"
अस्य प्रमाणं यथा, हस्तिशास्त्रधरे ।
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
तद्धनुर्विज्ञानवं चापं सर्व्वलक्षणसंयुतम् ॥"
तथा आग्नेयधनुर्व्वेदे ।
"चतुर्हस्तं धनुः श्रेष्ठं त्रिभिः सार्द्धैस्तु मध्यमम् ।
कनिष्ठन्तु त्रिभिः प्रोक्तं नित्यमेव पदातिनः ॥"
धनुस्तु गार्ङ्गवांशभेदेन द्विविधम् । यथा, युक्तिकल्पतरौ ।
"धनुस्तु द्विविधं प्रोक्तं गार्ङ्गं वांशं तथैव च ।"
एतयोः प्रकारमाह धनुर्व्वेदे ।
"गार्ङ्गिकं त्रिगतं प्रोक्तं वैणवं सर्व्वसाधितम् ॥"
गार्ङ्गधनुषः प्रमाणमाह हस्तिशास्त्रधरे ।
"गार्ङ्गं पुनर्धनुर्दिव्यं तद्विज्ञेयं परमायुधम् ॥
वितस्तिसप्तमं मानं निर्म्मितं विश्वकर्म्मणा ।
न स्वर्गे न च पाताले न भूमौ कस्यचित् करे ।
तद्धनुर्वंशमायाति त्वत्तैकं पुरुषोत्तम ॥
पौरुषेयन्तु यच्चार्द्धं बहुधा तत्सरग्रोभितम् ।
वितस्तिभिः सार्द्धषड्भिर्निर्म्मितं धनुषोऽधमम् ॥
प्रायो योध्यं धनुः गार्ङ्गं गजयोधाश्वसादिनाम् ।
रथिनाञ्च पदातीनां वांशं चापं प्रकीर्त्तितम् ॥"
वांशधनुषः प्रमाणमाह तत्रैव ।
"त्रिपर्व्वं पञ्चपर्व्वं वा सप्तपर्व्वं प्रकीर्त्तितम् ।
नवपर्व्वञ्च कोदण्डं चतुर्हस्तं शुभकारणम् ॥
चतुष्पर्व्वञ्च षट्पर्व्वं अष्टपर्व्वं विवर्ज्जयेत् ॥"
"अतिजीर्णमपक्वञ्च ग्रातिशुष्कं तथैव च ।
दग्धं छिन्नं न कर्त्तव्यं बाह्याभ्यन्तरदूषकम् ॥
गुणच्छेदं गुणाक्रान्तं वास्तुदोषसमन्वितम् ।
मणिबन्धिनं कर्त्तव्या तलमध्ये तथैव च ॥"
"अपक्वं भङ्गमायाति अतिजीर्णन्तु कर्कशम् ।
ग्रातिशुष्कन्तु सोदेगं दलहो बान्धवैः सह ।
दग्धेन दह्यते वैरि छिन्नं युद्धविनाशनम् ।
बाह्यं तस्यं न लभ्येत तथैवाभ्यरेऽपि च ॥
हीने तु सन्धिते बाणे संग्रामे भङ्गकारकम् ।
आक्रान्ते च पुनः कापि न लक्ष्यं प्राप्नुते दृढम् ॥"
"गलग्रन्थितलग्रन्थि धनुहानिकरं धनुः ।
एभिर्दोषैर्विनिर्म्मुक्तं सर्व्वकार्य्यकरं स्मृतम् ॥"
उपलक्षेपकधनुषः प्रकारमाह तत्रैव ।
"उपलक्षेपकं चापं वैणवं तद्विरञ्जुकम् ।
त्रिहस्तोत्सेधसहितं द्व्यङ्गुलीविस्तृतं तु तत् ॥"
आसनविशेषः । यथा, हठयोगप्रदीपिकायाम् । १ । २५ ।
"पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्य्यादेतद्धनुरासनमुच्यते ॥"*॥
चतुर्हस्तपरिमाणम् । काठा इति भाषा । यथा,
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥"
इति जलाशयतत्त्वम् ॥
मेघादिद्वादशराशिस्थगैसनवमराशिः । तत्पर्य्यायः । तौक्षिकः २ । इति दीपिका । अस्य देवता पूर्व्वाषाढामनुष्याकारशैवार्द्धाश्वाकारधनुर्धारी पुरुषः । स मूलापूर्व्वाषाढासहोदयोत्तराषाढप्रथमपादेन भवति । स च शीर्षोदयः पीतः स्वर्णवर्णो वा पर्व्वतचरः महाशब्दकरः पूर्व्वदिक्स्वामी दृढाङ्गः रूक्षः क्षत्रियवर्णः उग्रः पित्तप्रकृतिरित्यर्थः अल्पसन्तानः अल्पस्त्रीसङ्गः अग्निराशिः । * । एतद्राशिजातफलं यथा, "क्रोधी हुतवाक् पुण्यमतिः शुचिः प्राज्ञः सुखी सर्व्वलोकालापी च ।" इति जातकचन्द्रिकादयः । * । अपि च ।
"बहुकलाकुशलः प्रबलो महान्
विमलसाकलितः सरलोक्तिभाक् ।
शशधरे हि धनुर्धरगे नरो
धनकरो न करोति धनव्ययम् ॥"
तल्लग्नजातफलं यथा,—
"धनुर्लग्ने सुतृप्तो नीतिमान् धनवान् सुखी ।
कुलमध्ये प्रधानश्च शास्त्रः सर्व्वस्य पोषकः ॥"
इति कोष्ठीप्रदीपः ॥
धनुःपटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) प्रियालवृक्षः । इति शब्दचन्द्रिका । (पर्य्यायोऽस्य यथा,—
"प्रियालस्तु खरस्कन्धचारी बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुर्धनुःपटः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
धनुःशाखा, स्त्री, (धनुरिव शाखा यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥
धनुःश्रेणी, स्त्री, (धनुषः श्रेणीव ।) मूर्व्वा । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"तैक्ष्णी पिचुमी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च ॥")
धनुर्गुणा, स्त्री, (धनुषो गुणो यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥ (मूर्व्वाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)
धनुर्द्रुमः, पुं, (धनुषो द्रुमः ।) वंशः । इति राजनिर्घण्टः ॥
धनुर्धरः, पुं, (धरतीति । धृ + अच् । धनुषो धरः ।) धनुर्धारी । तिरन्दाज इति भाषा । तत्पर्य्यायः । धन्वी २ धनुष्मान् ३ धानुष्कः ४ निषङ्गी ५ इषुधी ६ तूणी ७ धनुर्भृत् ८ । इति हेमचन्द्रः । २ । ४३५ ॥ (यथा, महाभारते । ९ । २३४ । २७ ।
"प्रयतिष्ये तथा कर्त्तुं यथा नान्यो धनुर्धरः ।
तत्समो भविता लोके सत्यमेतत् ब्रवीमि ते ॥"
खगामस्थातो धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ११७ । ११ ।
"कवची निषङ्गी कुण्डी च कुण्डधारो धनुर्धरः ॥")
धनुर्धारी, [न्] त्रि, (धनुर्धरतीति । धृ + णिनिः ।) धनुर्धरः । तस्य लक्षणं यथा,—
"शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राजा सर्व्वसैन्यसहः शुचिः ॥"
इति मत्स्यपुराणे १८६ अः ॥
धनुर्भृत्, पुं, (धनुर्बिभर्त्तीति । भृ + क्विप् ।) धनुर्धरः । इति हेमचन्द्रः । २ । ४३५ ॥ (यथा, रघुः । ९ । ११ ।
"अवनिमेकरथेन वरूथिना
जितवतः किल तस्य धनुर्भृतः ॥")
धनुर्मध्यं, क्ली, (धनुषो मध्यम् ।) चापमध्यभागः । तत्पर्य्यायः । लक्षकः २ । इत्यमरः । २ । ८ । ५५ ॥
धनुर्माला, स्त्री, (धनुषो माला श्रेणीव ।) मूर्व्वा । इति शब्दचन्द्रिका ॥
धनुर्य्यासः, पुं, (धनुरिव यासः ।) धन्वयासः । दुरालभा । इत्यमरटीकायां रायमुकुटः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"यासो यवासो दुस्पर्शो धनुर्य्यासो दुरालभा ॥")
धनुर्लता, स्त्री, (धनुषो लतेव ।) सोमवल्ली । इति राजनिर्घण्टः ॥
धनुर्वृक्षः, पुं, (धनुषो वृक्षः ।) धन्वनवृक्षः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वनः पिच्छिलत्वक् च धनुर्वृक्षश्च धन्वजः ॥")
वंशः । भल्लातकः । अश्वत्थः । इति राजनिर्घण्टः ॥
धनुर्व्वेदः, पुं, (धनूंषि उपलक्षयेण धनुरादीन्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेनेति । विद् + करणे घञ् ।) धनुर्विद्याबोधकशास्त्रम् । तत्तु यजुर्व्वेदस्योपवेदः । इति चरणव्यूहः ॥ (यथा, मधुसूदनसरस्वतीकृतप्रस्थानभेदे ।
"यजुर्व्वेदस्योपवेदो धनुर्व्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्वेदस्याधिकारिनिरूपणञ्च कृतम् । तत्र धनुःशब्दस्यापि रूढ्योऽपि चतुर्विधायुधवाचको वर्त्तते । तत्र चतुर्विधम् । मुक्तमसुक्तं मुक्तामुक्तं यन्मुक्तञ्च । तत्र मुक्तं चक्रादि । असुक्तं खड्गादि । मुक्तामुक्तं शस्त्रास्त्रान्तरभेदादि । यन्मुक्तं शरादि । तत्र मुक्तमस्त्रमित्युच्यते । असुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्यादिभेदादनेकविधम् । एवं साधिदैवतेषु समग्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनाञ्च ते सर्व्वे चतुर्विधाः । पदातिरथगजतुरगारूढाः । एवं दीक्षाभिषेकशास्त्राकृतमङ्गलकरणादिकञ्च सर्व्वमपि प्रथमे पादे निरूपितम् । सर्व्वेषामस्त्रशस्त्रविद्येषाणां आचार्य्यस्य लक्षणपूर्व्वकं संग्रहणं संग्रहपादे द्वितीये दर्शितम् । गुरुसम्प्रदायसिद्धानां शास्त्रविद्येषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणादिकं तृतीये पादे । एवं देवतार्च्चनाभ्यासादिभिः सिद्धानां अस्त्रशस्त्रविद्येषाणां प्रयोगश्चतुर्थे पादे निरूपितः ॥")
धनुष्करः, पुं, (धनुः करोतीति । धनुस् + क + "दिवाविभेति ।" ३ । २ । २१ । इति टः ।) धनुः करे यस्य इति बधिकरबबहुव्रीहिसमासो वा । धानुष्कः ॥
धनुष्पटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) प्रियालवृक्षः । इत्यमरः । २ । ४ । ३५ ॥
धनुष्मान्, [त्] पुं. (धनुर्विद्यते यस्य । धनुस् + मतुप् ।) धनुर्धरः । इत्यमरः । २ । ८ । ९८ ॥

(यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इयं स राजन्यकमेकवीरः ॥")
धनूः, स्त्री, (धन धान्ये शब्दे वा + "छ्रधिचमितनि-धनीति ।" उणा १ । ८२ । इति ऊः ।) धनुः । इति जटाधरः ॥ धान्यसञ्चये धनुषि च पुं । इति संक्षिप्तसारोणादिवृत्तिः ॥
धनेयकं, क्ली, धन्याकम् । इत्यमरटीकायां भरतः ॥
धनेश्वरः, पुं, (धनागामीश्वरः ।) कुबेरः । इति हेमचन्द्रः । २ । १०४ ॥ (यथा, महाभारते । १ । २२८ । ३२ ।
"जगदुः सर्व्वशस्त्राणि खानि खानि सुरास्तथा ।
कालदण्डं यमो राजन् ! गदाञ्चैव धनेश्वरः ॥"
विष्णुः । यथा, तत्रैव । १३ । १४६ । ६३ ।
"वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥"
सुश्रुतोषधप्रणेतुर्वोपदेवस्य गुरुः । यदुक्तम् ।
"विश्वन्तनेश्वरच्छात्रो भिषक्केशवनन्दनः ।
वोपदेवश्चकारेदं विप्रो वेदपदात्सदम् ॥")
धन्यः, पुं, (धनाय हितः । धन + यत् ।) अश्वकर्ण-वृक्षः । इति राजनिर्घण्टः ॥
धन्यः, त्रि, (धनाय हितः । धन + यत् ।) पुण्य-वान् । सुकृती । इत्यमरः । ३ । १ । ३ ॥
"खनामा पुरुषो धन्यः पितृनामा च मध्यमः ।
अधमो मातृनामा च मातृनामाधमाधमः ॥"
इति गोयीचन्द्रधृतपद्यम् ॥
धन्यत्वकथनं यथा,—
सनत्कुमार उवाच ।
"विस्तीर्णवालुकामध्ये कच्छपः शतयोजनः ।
भीतश्च कम्पितश्चैव दृष्टो दुःखी च शुष्कितः ॥
निःसारितो राघवेण मौनेन च महात्मना ।
धन्योऽसीति मयोक्तश्च नाहं धन्य उवाच सः ॥
क्षीरोदसागरो धन्यो जन्तवो यत्र सङ्घिधाः ।
भवान् धन्योऽसि क्षीरोद ! तेनोक्तो नाहमेव च ॥
धन्या वसुन्धरा देवी यत्रैव सप्त सागराः ।
धन्यास्ति वसुधेत्युक्ता नाहमेवेत्युवाच सा ॥
धन्योऽनन्तो समाधारः कूर्म्माणो नागराड्विभुः ।
धन्योऽसीत्युक्तः परमो धन्यो नाहमुवाच सः ॥
धन्यश्च भगवान् ब्रह्मा विधाता जगतामपि ।
धन्योऽसि तत्र धाता च धन्यो नाहमुवाच सः ॥
धन्यो महेश्वरो देवो योगीन्द्राणां गुरोर्गुरुः ।
धन्योऽसीत्युक्तः प्रभुश्च धन्यो नाहमुवाच सः ॥
धन्यो गणेश्वरो देवो देवानां प्रवरः परः ।
धन्यो धन्यो मान्योऽसीत्युक्तो गजपतिर्मया ॥
नाहं धन्यो मुनिश्रेष्ठ ! सस्मितश्चेत्युवाच सः ।
धन्या वेदाश्च चत्वारः कर्म्माणि यदृच्छया ॥
तस्माद्धन्याश्च ते वेदा गच्छ तत्र मनीषिणः ।
यूयं धन्याश्च मान्याश्चेत्युक्ता वेदा मया ततः ॥
ऊचुस्ते न वयं धन्या यज्ञसंघश्च साम्प्रतम् ।
वयं यत्राकरोरो यज्ञौघः फलदः स्वयम् ।
तस्माद्धन्यः स एवापि गच्छ गच्छ महामुने ! ॥
धन्योऽसि यज्ञसंघोऽसीत्युक्तश्च मया विभो ! ।
ऊचुस्ते न वयं धन्या धन्यं कर्म्म शुभं मुने ! ॥
शुभकर्म्मासि धन्यं त्वं नाहं धन्यस्तुवाच तत् ।
श्रीकृष्णः परमात्मा च धन्यो मान्यश्च निश्चितम् ॥
धन्योऽसीति मयोक्तश्च दक्षिणाभिः सहेति च ।
इत्युक्तो भगवताप्यत्र कथितं सर्व्वकारणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अः ॥
(धनं लब्धा । धन + "धनगणं लब्धा ।" ४ । ४ । ८४ । इति यत् । धनलब्धा ॥ पुं, धनस्य निमित्तं संयोगो उत्पातो वा । "गोद्व्यचोऽसंख्या परि-माणाश्वादेर्यत् ।" ५ । १ । ३६ । इति यत् ॥)
धन्यव्रतं, क्ली, (धन्यं धनजनकं व्रतम् ।) धन-जनकव्रतविशेषः । कुबेरः पूर्व्वं शूद्र आसीत् एतद्व्रतं कृत्वा धनपतिरभूत् । इति वराह-पुराणम् ॥
धन्या, स्त्री, (धन्य + टाप् ।) आमलकी । इति मेदिनी । ये, ३३ ॥ धान्यकम् । इति हेमचन्द्रः । ३ । ८३ ॥ (मनोः कन्या । इयमेव ध्रुवस्य पत्नी । यथा, मत्स्यपुराणे । ४ । ३८ ।
"धन्या नाम मनोः कन्या ध्रुवाच्छिष्टमजीजनत् ॥")
धान्याकं, क्ली, (धान्यते भक्षार्थिभिरिति । धन + "पिनाकादयश्च ।" उणा ४।१५। इत्याकप्रत्ययेन निपातनात् साधुः ।) धनिया इति ख्यातं शस्यम् । तत्पर्य्यायः। छत्रा २ वितुन्नकम् ३ कुस्तुम्बुरु ४ । इत्यमरः । २ । ६ । ३८ ॥ धान्यकम् ५ धन्यम् ६ धनिकम् ७ धनीयकम् ८ कुस्तुम्बुरी ९ धान्या-कम् १० तुम्बुरु ११ धन्या १२ तुम्बुरी १३ धने-यकम् १४ । इति भरतधृतकोषान्तरम् ॥ धान-कम् १५ धान्यम् १६ धानेयम् १७ धनिका १८ छत्राधान्यम् १९ सुगन्धि २० घ्राणयोग्यम् २१ सूक्ष्मपत्रम् २२ जनप्रियम् २३ धान्यबीजम् २४ बीजधान्यम् २५ वेधकम् २६ । इति राज-निर्घण्टः ॥ कुलटी २७ धेनिका २८ धन्यकम् २९ धाना ३० धानेयकम् ३१ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कषा-यत्वम् । पित्तज्वरकासछर्द्दिकफनाशित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ स्निग्धत्वम् । दृढत्वम् । सूक्ष्मत्वम् । लघुत्वम् । तिक्तत्वम् । कटुत्वम् । वीर्य्यकारित्वम् । पाचनत्वम् । रोच-नत्वम् । ग्राहित्वम् । स्वादुपाकित्वम् । त्रिदोष-दाहश्वासार्शः क्षमिनाशित्वञ्च ॥
"आर्द्रन्तु तद्गुरु स्वादु विशेषात् पित्तनाशनम् ॥"
इति भावप्रकाशः ॥
"शिलायां साधु संपिष्टं धान्यकं वस्त्रगालितम् ।
शर्करोदकसंमिश्रं कर्पूरादिसुसंस्कृतम् ॥
नवीने नृणये पात्रे स्थितं पित्तहरं परम् ॥"
राजनिर्घण्टः ॥
धन्व, [न्] क्ली, (धन्वाते गम्यते दुर्गमादिस्थले-ऽनेनेति । धन्व गतौ सौत्रो धातुः + कनिन् ।) धनुः । (धन्वाते गम्यतेऽत्र इति ।) स्थलम् । इति मेदिनी । ने, ७८ ॥ (यथा,—
"चरोरुपजलाकाशधन्वाद्यो भक्षसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥"
इति चरके सूत्रस्थाने २७ अः ॥)
धन्वं, क्ली, (धनतीति । धन शब्दे + "उखास्यश्च ।" उणा ४ । ६५ । इति वनप्रत्ययेन निपातनात् साधुः ।) धनुः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २०० । ४३ ।
"धनुर्धराय देवाय प्रियधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्य्याय ते नमः ॥")
धन्वङ्गः, पुं, (धनोर्धनुष इव अङ्गं यस्य ।) धन्वन-वृक्षः । इति भावप्रकाशः ॥ धामिनी इति हिन्दी भाषा । तत्पर्य्यायगुणाः ।
"धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ।
धन्वङ्गः कफपित्तास्रकासच्छर्त्तुवरो लघुः ।
दृंहणो बलशुद्धास्यसन्धिशुद्ध्रणरोपणः ॥"
इति भावप्रकाशः ॥
पुस्तकान्तरे धन्वगोऽपि पाठः ॥
धन्वदुर्गं, क्ली, (धन्वना निर्जलस्थलेन वेष्टितं दुर्गम् ।) चतुर्द्दिग्धं मरुवेष्टितपञ्चयोजनपरि-मितमनुदकस्थलम् । निर्जलदेशः । इति महा-भारते राजधर्म्मः ॥ (यथा, मनुः । ७ । ७० ।
"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥")
धन्वनः, पुं, (धन्वति दृढत्वं गच्छतीति । धन्व गतौ सौत्रधातुः + क्युः ।) वृक्षविशेषः । इति रत्न-माला ॥ धामनि इति भाषा । (यथा, रामा-यणे । २ । ६४ । ६ ।
"वदर्य्यामलकैर्नीपैर्वेतसैश्च धन्वनबीजकैः ॥")
तत्पर्य्यायः । रक्तकुसुमः २ धनुवृक्षः ३ महा-बलः ४ रणप्रियः ५ पिच्छिलकः ६ रूक्षखादु-फलः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । कफनाशित्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । कण्ठामयश्रमनुत्वञ्च । इति राज-निर्घण्टः ॥ (फले, क्ली । यथा, महाभारते । ३ । ११९ । १३ ।
"कक्षेषकाणीङ्गुदधन्वनानि
पिण्याकानां कामकारं कुरुष्व ॥")
धन्वन्तरिः, पुं, (धनुरुपलक्षणत्वात् शस्त्रादि-चिकित्सास्त्राणि तस्य अन्तं ऋच्छतीति । ऋ गतौ + "अच इः ।" उणा ४ । १३८ । इति इः ।) देववैद्यः । स भगवदवतारः । यथा,—
"धन्वन्तरिश्च भगवान् स्वयमेव कौर्मि-र्नाम्ना नृणां पुररुजां रुज आशु हन्ति ।
यज्ञे च भागमृततायुरवावरुन्ध
आयुष्यवेदमनुशास्त्यवतीर्य्य लोके ।
स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः ।
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक् ॥"
इति श्रीभागवतम् ॥ * ॥
"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् ।
पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥
सर्व्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः ।
शिष्यो हि वैनतेयस्य शङ्करस्योपशिष्यकः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५१ अध्यायः ॥

अन्यच्च। "काश्यस्य काशिराजः तस्य दीर्घतमाः पुत्रोऽभूत्। धन्वन्तरिस्तु दीर्घतमसोऽभूत्। न हि संविद्वकार्य्यकारणः सकलसम्भूतिव्यापिब्रह्मज्ञानवित्। भगवता नारायणेन चातीतसम्भूतौ तस्मै वरो दत्तः। काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्भगायुर्व्वेदं करिष्यसि। यज्ञभाक् त्वं भविष्यसीति। तस्य च धन्वन्तरेः पुत्रः केतुमान् केतुमतो भीमरथः। तस्यापि दिवोदासः।" इति विष्णुपुराणम् ।४।८।२-५॥*॥ अस्यार्थः। "संविद्वकार्य्यकारणः जरादिरहितदेहेन्द्रियः। संयतदेहेन्द्रिय इति वा। सकलसम्भूतिषु सर्व्वेष्वपि जन्मसु। अशेषज्ञानवित् सर्व्वज्ञावित्। अतीतसम्भूतौ चीराब्धौ जन्मनि। अष्टधा अष्टाङ्गमायुर्व्वेदम् तदुक्तं लघुवाग्भटे। कायबालग्रहोर्द्धाङ्गशल्यदंष्ट्राजरावियम्। अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थितेति।" इति तट्टीकायां स्वामी॥*॥ दिवोदासः। इति त्रिकाण्डशेषः॥ (धन्वन्तरिप्रादुर्भावो यथा, "एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः॥ तान् दृष्ट्वा हृदयन्तस्य दयया परिपीडितम्। दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह॥ धन्वन्तरे! सुरश्रेष्ठ! भगवन्! किञ्चिदुच्यते। योग्यो भवसि भूतानामुपकारपरो भव॥ उपकाराय लोकानां केन किन्न कृतं पुरा। त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान्॥ तस्मात्वं पृथिवीं याहि काश्यीमध्ये नृपो भव। प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय॥ इत्युक्ता सुरशार्दूलः सर्व्वभूतहितेच्छया। समस्तमायुषो वेदं धन्वन्तरिरुपादिशत्॥ अधीत्य चायुषो वेदमिन्द्रधन्वन्तरिः पुरा। आगत्य पृथिवीं काश्यामजातो वासुदेवमृषिम्। नत्वा तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ। बाल एव विरक्तोऽभूच्चचार सुमहत्तपः॥ यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्। ततो धन्वन्तरिर्लोके काश्यीराजोऽभिधीयते॥ हिताय देहिनां क्षौणां संहिता विहितासुना। अयं विद्यार्थिनो लोकान् संहितामाम-पाठयत्॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) विक्रमादित्यराजस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नम्॥

(धनोर्धनुर्व्वेदस्य अन्तन्द्यक्षतीति। महादेवः। यथा, महाभारते। १३। १७। १०३।

"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥")

धन्वन्तरियक्षा, स्त्री, (धन्वन्तरिणा यक्षा।) कटुकी। इति शब्दचन्द्रिका॥

धन्वयवासः, पुं, (धन्वदेशोद्भवो यवासः।) दुरालभा। इत्यमरटीकायां भरतः॥ (दुरालभाशब्दस्यास्य विवरणं ज्ञातव्यम्॥)

धन्वयवासकः, पुं, (धन्वयवास+स्वार्थे कन्।) दुरालभा। इति राजनिर्घण्टः॥

धन्वयासः, पुं, (धन्वदेशोद्भवो यासः यवासः।) दुरालभा। इत्यमरः। २। ४। ८१॥

धन्वा, [न्] पुं, (धन्वन्ति जलाभावं गच्छन्तीति। धन्व+"कनिन् युवृषीति।" उणा १। १५६। इति कनिन्।) मरुदेशः। इत्यमरः। २। १। ५॥ (यथा, ऋग्वेदे। ६। ३४। ४।

"अजं न धन्वन्नभि सं यदापः सत्रा वाजं दधिरे सहस्रा यत्रैः॥"

अन्तरिक्षम्। यथाह, उदकमपि। यथा, ऋग्वेदे। १। १६८। ५।

"धन्वच्युत इवा न यामन्नि पुरुप्रेषा अहन्नो नैतशः॥"

"धन्वच्युतो न धन्वनशब्दोऽन्तरिक्षस्य वचनः तेन ततस्थसुदकं लक्षते उदकस्राविणो मेघा इव।" इति तद्भाष्ये सायनः॥)

धन्वी, [न्] त्रि, (धनुश्चापोऽस्यस्येति। ब्रीह्यादित्वात् इनिः।) धनुर्द्धरः। इत्यमरः। २। ८। ६६॥ (यथा, कुमारे। ३। १०।

"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये॥")

विदग्धः। इति विश्वः॥

धन्वी, [न्] पुं, (धन्वमस्यस्येति। धन्व+इनिः।) दुरालभा। अर्ज्जुनतरुः। (अस्य पर्य्यायो यथा,—

"धन्वी धनञ्जयः पार्थो बीभत्सुः कपिकेतनः।"
इति वैद्यकरत्नमालायाम्॥)

वज्रम्। इति राजनिर्घण्टः॥ पार्थः। इति त्रिकाण्डशेषः॥ (विष्णुः। यथा, महाभारते। १३। १४८। २२।

"ईश्वरो विक्रमो धन्वी मेधावी विक्रमः क्रमः॥"

महादेवः। यथा, तत्रैव। १३। १७। ४२।

"कमण्डलुधरो धन्वी वाग्विदग्रः कपालवान्॥"

तामसमनोः पुत्रविशेषः। यथा, हरिवंशे। ७। २४।

"तपोरतिरकल्माषस्त्वन्वी धन्वी परन्तपः।
तामसस्य मनोरेते दश पुत्रा महाबलाः॥")

धम, भ्वादौ। ध्माने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) धमति। सौत्रधातुरयम्। इति दुर्गादासः॥

धमः, त्रि, (धमतीति। धम+अच्।) अग्निसंयोगकर्त्ता। शब्दकर्त्ता। इति धमधातोः पचाद्यजादावनुप्रत्ययेन साध्यः॥

धमकः, पुं, (धमतीति। ध्मा शब्दाग्निसंयोगयोः+"ध्मो धम च।" उणा २। ३५। इति कुन् धमादेशश्च।) कर्म्मकारः। इत्युणादिकोषः॥

धमनः, पुं, (ध्मायतेऽग्निरनेनेति। धम+करणे ल्युट्।) नलः। इत्यमरः। २। ४। १६२॥ (अस्य पर्य्यायो यथा,—

"नलः पोटगलः शून्यमथाथ धमनस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

धमतीति। धम+ल्युः।) भस्त्राभ्रामके क्रूरे च त्रि। इति मेदिनी। ने, ७८॥

धमनिः, स्त्री, (धम्यते इति। धम+"अर्त्तिस्रुधृधमीति।" उणा २।१०३। इति अनिः।) धमनी। इति शब्दरत्नावली॥ (यथा, अथर्व्ववेदे। ६। ६०। २।

"यास्ते धृतं धमनयोऽङ्गान्यनु विसिताः॥"

ब्रह्मादक्षातुर्द्दादश्च पत्नी। सा तु वातापेरिक्षवस्य च जननी। यथा, भागवते। ६। १८। १५।

"द्वादश धमनिर्भार्य्यास्तत वातापिरिक्षवम्॥"

धमतिर्गतिकर्म्मा। गत्यर्थाः बुद्ध्यर्थाः। गम्यते ज्ञायतेऽर्थोऽनया। ज्ञायते वा विद्वद्भिः साध्वसाधुविभागेन। यद्वा, 'धमति' इति वधकर्म्मस्वपि पठ्यते धमति हन्यतया ज्ञापाक्रोशादिरूपयेति। वाक्। शब्दः। इति निघण्टुः। १। ११॥ यथा, ऋग्वेदे। २। ११। ८।

"दूरे पारे वार्य्यां वर्धयन्त
इन्द्रेषितां धमनिं पप्रथन्ति॥")

धमनी, स्त्री, (धमनि+वा ङीप्।) नाड़ी। (यथा, महाभारते। १२। २१४। १७।

"दश विद्यात् धमन्योऽत्र पञ्चेन्द्रियगुणावहाः।
याभिः स्रष्टाः प्रजायन्ते धमन्योऽन्याः सहस्रशः॥"

यथा,—

"ओजोवहाः शरीरे वा विधन्यन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
वहते सर्व्वभूतानां जीवितं यावतिष्ठते।
यतुसारमादौ गर्भस्य यौ यौ गर्भरसाग्रसः॥
संवर्त्तमानं हृदयं समाविशति यत् पुरा।
तस्य नाभ्याम नाड्योऽस्मिन् धारि यद्धृदयाश्रितम्॥
यच्छरीरवलं देहः प्राणा यत्र प्रतिष्ठिताः।
ततस्ताः विविधा जाताः प्रवहन्तीति महाप्रभाः॥
ज्ञानाङ्गमन्याः स्रवणात् स्रोतांसि सरणात् सिराः॥"

इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥

"चतुर्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः। तत्र केचिदाहुः सिरा धमनी स्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति। तन्तु न सम्यक्। अन्या एवहि धमन्यः स्रोतांसि च सिराभ्यः कस्माद्व्रणान्यत्वाभ्यूहसन्निपातसंसर्गवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् बहुत्वागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मसामान्यविभाग इव कर्म्मसु भवति॥

तासान्तु नाभिप्रभवानां धमनीनामूर्द्ध्वगा दश-दश चाधोगामिन्यश्चतस्रश्चैर्य्यगाः। ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रज्ञावहाश्छ्वासनभृमितच्छर्दितच्छुधितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति। तासु हृदयमभिप्रपन्नाश्चिधा

जायन्ते ताक्ष्यिंशत्। तासान्तु वातपित्तकफशोणितरसात् दे दे वहतस्रो दश शुक्रस्रोरसवाहिन्यौ। ताभ्यां भावते च ह्राभ्यां घोषं करोति ह्राभ्यां स्वपिति ह्राभ्यां प्रतिबुध्यते दे चाम्बुवाहिन्यौ। दे स्तन्यं क्षिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्वेताक्ष्यिंशत् सविभागा यास्ताता एताभिरूर्द्धं गामेदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च।"

"अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तासु पित्ताशयमभिप्रतिपन्नास्तस्यान्नपानरसं विपक्वमौष्ण्यादिवेपयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यर्पयन्ति चोर्द्धगतानां तिर्यग्गतानां रसस्थानान्यभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते ताक्ष्यिंशत्। तासान्तु वातपित्तकफशोणितरसात् द्वे द्वे वहतस्रो दश द्वे अन्नवाहिन्यावन्नाश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञम्। द्वे चर्म्मो विरसस्त्वौ स्थूलान्नप्रतिवहे। अदावन्याक्ष्यिंशन्नाड्यो धमनीर्नाभिं खेदमर्पयन्ति। तास्वेताक्ष्यिंशत् स विभागा यास्ताता एताभिरधोनाभेः पक्वाशयवङ्क्षणमूत्रपुरीषगुदवस्तिमेढ्रसक्थीन्यभि धार्य्यन्ते याप्यन्ते च।"

"तिर्य्यग्गासासु शतसहस्रं धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्वसंख्येयास्वाभिरिदं शरीरं गवाक्षितं विवद्धमाततञ्च। तासां सुक्ष्माणि रोमकूपप्रतिवहानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च तैरेव चाभ्यङ्गपरिषेकावगाहोपनद्धोष्माणमन्तः शरीरमभिप्रतिपद्यन्ते लघि विपक्वानि तैरेव स्वर्गसुखमसुखं वा यच्छति। तास्वेताततसो धमन्यः सर्व्वाङ्गगताः सविभागा यास्ताताः।"

इति सुश्रुते शरीरस्थाने नवमेऽध्याये ॥७॥)

धरणिवाचिनी। (अमरः॥ धरित्री। योवा। इति हेमचन्द्रः। ३। ३८५॥ पृथिवी। इति राजनिर्घण्टः॥ नदिका। इति भावप्रकाशः॥

धम्मिल्लः, पुं. (धमतीति। धम+किल्। मिलतीति। मिल+कः। पृषोदरादित्वात् साधुः। ततः कर्म्मधारयः।) संयताः कचाः। (अमरः। २।६।८७॥ स्त्रीपा इति भाषा। कुसुमगर्भो मौक्तिकपक्षरागखचितादिका वद्धिःसंयतो बहुः वेणीकलापः। इति भरतः॥ (यथा, गीतगोविन्दे। २। २९।

"बाकूतस्मितमाकुलाकुलमरुद्धम्मिल्लसुज्जासित-भूवल्लीकमलीकदर्पितसुधावासार्द्रहस्तस्तनम्॥")

धरः, पुं, (धरति पृथिवीमिति। धृ+अच्।) पर्व्वतः। (यथा, माघे। ४। ९८।

"उत्तर्कं धरं द्रष्टुमवेक्ष्य गौरिम्
उत्कन्धरंदाशत्र दशुवाच॥")

चापासनूलकः। कूर्म्मराजः। वसुभेदः। इति मेदिनी। रे, ४८॥ (यथा, हरिवंशे। ३। ३६।

"आपो ध्रुवश्च सोमश्च धरश्चैवानिलानलौ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः॥"

महादेवः। यथा, महाभारते। १३।१७।१०३।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥"

विष्णुः। श्रीकृष्णः। यथा, तत्रैव।६।६३।३३।

"सर्व्वग्रीवमयो नित्यः शास्ता धाता धरो ध्रुवः॥"

धारके, त्रि॥ यथा, काकपक्षधरः॥)

धरकं, क्लो, (धरतीति। धृ+ण्वुः।) मानभेदः। स तु चतुर्विंशतिरक्तिकारूपः। इति जीमूतवती॥ पलद्वयमानम्। इति वैद्यकम्॥ ("अथ मध्यमनिष्पावा वा एकोनविंशतिर्धरकम्॥"

इति सुश्रुते चिकित्सितस्थाने ३१ अः॥ धृ+ण्वुट्।) धारकम्। इति मेदिनी। के, ५४॥ (यथा, कुमारे। १। १७।

"यश्चाक्षयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमस्य॥")

धरकः, पुं, (धृ+ण्वुः।) अद्रिपतिः। लोकः। स्तनः। धान्यम्। दिवाकरः। इति हेमचन्द्रः॥ सेतुः। इति त्रिकाण्डशेषः॥ (वैद्यकमानविशेषः। यथा, पूर्व्वखण्डे प्रथमेऽध्याये ग्रन्थेधरेणोक्तम्।

"माषैश्चतुर्भिः प्राणः स्याद्धरकः स निगद्यते॥")

धरणिः, स्त्री, (धरति लोकानिति। धृ+"अर्त्तिस्तुधृञीति।" उणा। २। १०१। इति अनिः।) पृथिवी। (अमरः। २। १। २॥ (यथा, महाभारते। १२। ३३९। ४।

"ज्योतिषरविवायुरहिते अग्नौ जलेकार्णवे लोके॥")

धरणिधरः, पुं, (धरतीति। धृ+अच्। धरण्याः धरः।) विष्णुः। इति हलायुधः॥ (कच्छपः। पर्व्वतः। शेषः। इति युतपत्तिलक्ष्योर्थः॥)

धरणी, स्त्री, (धरति+ल्युट् ङीष्।) पृथिवी। इति मेदिनी। णे, ५४॥ (यथा, विष्णुपुराणे। १। ६। १४१।

"यदा तु भागवो रामस्तदाभूद्धरणीत्रियम्॥")

ग्राम्यक्षिद्रुः। इति शब्दचन्द्रिका॥ दाढ़ी। कन्दविशेषः। तत्पर्य्यायः। धारणीया २ धौरपत्री ३ सकन्दरः ४ कन्दालुः ५ वनकन्दः ६ कन्दाढ्यः ७ दक्षकन्दकः ८। अस्या गुणः। मधुरत्वम्। कफपित्तामयरक्तदोषकुष्ठकफकृतिनाशित्वञ्च। इति राजनिर्घण्टः॥

धरणीकन्दः, पुं, (धरण्यां एव कन्दः।) धरणीनामकन्दविशेषः। इति राजनिर्घण्टः॥

धरणीकीलकः, पुं, (धरण्याः पृथिव्याः कीलकः इव।) पर्व्वतः। इति शब्दरत्नावली॥

धरणीधरः, पुं, (धरण्या धरः।) विष्णुः। इति हेमचन्द्रः। २। १९१॥ (यथा, महाभारते। १३। १३६। ३८।

"अधः सप्तार्णवो बह्निरनिलो धरणीधरः॥")

कच्छपः। इति राजनिर्घण्टः॥ पर्व्वतः। यथा, "यो जातो धरणीधरेन्द्रतनयायाताद्भिपायोरुहासक्तः।" इत्यादिगोपीनाथतर्काचार्य्यः॥ (पृथिवीधारके, त्रि। यथा, हरिवंशे। ५३। ६८।

"देवानचोदयद् ब्रह्मा निग्रहार्थं सुरद्विषाम्।
नरसिंहं पुराणर्षिं ग्रीवाच धरणीधरम्॥")

धरणीपूरः, पुं, (धरणीं पूरयति आश्रयतीति। पूर+अण्।) ससुद्रः। इति शब्दरत्नावली॥

धरणीभवः, पुं, (भू+भावे अप्। धरण्याः पृथिव्याः भवः आवो यस्मात्।) ससुद्रः। इति त्रिकाण्डशेषः॥

धरणीश्वरः, पुं, (धरण्या ईश्वरः।) क्षितिः। इति शब्दरत्नावली॥

धरणीसुता, स्त्री, (धरण्याः सुता।) सीता। इति हेमचन्द्रः। ३। ३६७॥ (एतदुत्पत्तिकथा यथा, कालिकापुराणे ३० अध्याये।

"नारदस्योपदेशेन यज्ञभूमिं ततो नृपः।
हलेन दारयामास यज्ञवाटावधि स्वयम्॥
तद्भूमिजातसीतायां शुभां कन्यां ससुत्थिताम्।
लेभे राजा सुदा युक्तः सर्व्वलक्षणसंयुताम्॥
तस्यास्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्।
जगाद वचनञ्चेदं गौतमं नारदं नृपम्॥

पृथिव्युवाच।

एषा सुता मया दत्ता तव राजन्! मनोहरा।
एनां गृहाण सुभगां कुलद्वयसुभावहाम्॥")

धरा, स्त्री, (धरति लोकसंघातमिति। धृ+अच्। यद्वा, त्रियते ग्रीवेव इति। धृ+अप्। टाप्।) पृथिवी। (अमरः। २। १। २। (यथा, देवीभागवते। ३। २६। ८।

"धारकाच धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")

गर्भाशयः। मेदः। इति मेदिनी। रे, ३६॥ गाढ़ी। इति राजनिर्घण्टः॥ महादारुविशेषः। तद्यथा,—

"अथातः संप्रवक्ष्यामि धरादारुमनुत्तमम्।
पापक्षयकरं नृणामसङ्ख्यविगुणम्॥
धारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम्।
मर्य्यादापर्व्वतवतीं मध्ये मेरुसमन्विताम्॥
लोकपालाष्टकोपेतां नवखण्डसमाचिताम्।
नदीनदशतोपेतां सप्तसागरवेष्टिताम्॥
महारत्नसमाकीर्णां वसुधाद्रार्कसंयुताम्।
दैवः पक्षसहस्रेण तदर्द्धेनाथ मानुषः।
शतत्रयेण वा कुर्य्यात् दिव्यतेन शतेन वा।
कुर्य्यात् पक्षपलादूर्द्धमशक्तोऽपि विचक्षणः॥
तुलापुरुषवत् कुर्य्यालोकेऽयावाहनं बुधः।
अस्थिचूर्णरसभारभूषणाच्छादनादिकम्॥
पेषां कृत्वाजिनं छत्रं तिलद्रुपरि विन्यसेत्।
तथादारुमयान्यत्र रत्नञ्च सर्व्वदारयः॥
तथाष्टौ पूर्व्वकलशान् धर्मतात् परिकल्पयेत्।
वितानञ्च कौशेयं पताकाः विविधाः च॥
तथांशुकानि रत्नानि श्रीखण्डागुरुणानि च।
रत्नैवं रत्नविद्वान् तामधिवासनपूर्व्वकम्॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः।
प्रदक्षिणं ततः कृत्वा गृहीतकुसुमाञ्जलिः॥
पुण्यं कालमथासाद्य मन्त्रान्ते तामुदीरयेत्।
नमस्ते सर्व्वदेवानां त्वमेव भवनं यतः॥
धात्री च सर्व्वभूतानामतः पाहि वसुन्धरे!।

वसून् धारयसे यस्माद्वसुधात्वेन निर्म्मला ॥
वसुन्धरा ततो ज्ञाता तस्मात् पाहि भवार्णवात् ।
चतुर्मुखोऽपि नाशक्तस्तस्मात्त्वयत्र तत्रोच्यसे ॥
अनन्तायै नमस्तस्मात् पाहि संसारकर्दमात् ।
त्वमेव लक्ष्मीर्गोविन्दे शिवे गौरीति संस्थिता ॥
गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ।
बुद्धिर्बृहस्पतौ ख्याता मेधा सुनिशु संस्थिता ॥
विश्वं व्याप्य स्थिता यस्मात्ततो विश्वम्भरा स्थिता ।
धृतिः क्षमा स्थिरा धात्री पृथ्वी वसुमती रसा ॥
एताभिर्भूमिभिः पाहि देवि ! संसारकर्दमात् ।
एवमुच्चार्य्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ॥
धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ।
शेषञ्चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्ज्जयेत् ॥
अनेन विधिना यस्तु दद्याद्देवीं धरां बुधः ।
पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवम् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमथो वसेत् ॥
पितृपुत्रप्रपौत्रांश्च तारयेदेकविंशतिम् ॥
इति पठति य इत्थं यः शृणोतीह नित्यं
गतकलुषविमानैर्मुक्तदेहः समन्तात् ।
दिवममरवधूभिर्याति संप्रार्थ्यमानः
पुरममरसहस्रैः सेवितं चन्द्रमौलेः ॥"

इति मत्स्यपुराणे २५८ अः ॥

धराकदम्बः, पुं, (धरायां वर्षाकाले जातः कदम्बः ।) धाराकदम्बवृक्षः । इति हारावली । १७७ ॥

धरात्मजः, पुं, (धरायाः आत्मजः ।) मङ्गलग्रहः । इति हेमचन्द्रः ॥ (नरकासुरः । इति कालिकापुराणे ३७ अध्यायः ॥ स्त्रियां टाप् । सीता ॥)

धराधरः, पुं, (धरायाः धरो धारकः ।) विष्णुः । (यथा, महाभारते । १३ । १४६ । ८३ ।
"सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥"
"अङ्गैरङ्गेषु शेषाद्यैरङ्गेषां धरां धरतीति धराधरः ।" इति शाङ्करभाष्यम् ॥) पर्व्वतः । इति मेदिनी । रे, २६६ ॥ (यथा, हरिवंशे । २०४ । २१ ।
"चराचरांश्च वसुधा धातारञ्च धराधरः ॥"
धरायाः उद्धारकर्त्तरि, त्रि । यथा, भागवते । ४ । १७ । ३५ ।
"स वीरमृत्तिः समभूद्धराधरो
यो मां पयस्युग्रशरो जिघांसधि ॥")

धरामरः, पुं, (धरायाः पृथिव्या अमरो देवः ।) ब्राह्मणः । यथा,—
"येन श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः पुराणः ।
मुखे हुतं येन धरामरार्थां
तेषां वृथा जन्म नराधमानाम् ॥"

इति पौराणिकाः ॥

धरित्री, स्त्री, (धरति जीवजातमिति धियते शेषेण वा । धृ + "अग्रिचादिभ्य इनीनौ ।" उणां ४ । १७२ । इति इन् । गौरादित्वात् ङीष् ।) पृथिवी । इत्यमरः । २ । ५ । २ । (यथा, रघुः । १४ । ५४ ।
"स्वमूर्त्तिनाभप्रभवं धरित्रीं
लतेव सीता सहसा जगाम ॥")

धरिमा, [न्] पुं, (धियते दधात्यनेनेन्द्रियेणेति । धृ + "कृधृधृसृभ्य इमनिच् ।" उणां ४ । १४७ । इति इमनिच् ।) रूपम् । इत्यादिकोषः ॥ तुला । यथा, मनुः । ८ । ३२१ ।
"तथा धरिममेयानां ग्रहादभ्यधिको वधः ॥"

धरणः, पुं, (धरतीति । धृ + बाहुलकात् ल्युन् । "धृञ् धारणे । हेतुमति च इति णिच् । धारेर्णिलुक् ल्युप्रत्ययः । धारयति जगत् ।" इति देवराजयज्वा । १ । १२ । २४ ।) ब्रह्मा । स्वर्गः । नीरम् । (निघण्टुमते, क्लीं । यथा, ऋग्वेदे । १० । ५ । ६ ।
"पथा विसर्गो धरुणेषु तस्थौ ॥")
सम्यक् । इति मेदिनी । णे, ५५ ॥ (ऋषिः । यथा, वाजसनेयसंहितायाम् । ८ । ५१ । –
"उपश्रुतन्धरुणं मात्रे धरुणो मातरं धयन् ॥"
धारके, त्रि । यथा, ऋग्वेदे । १० । १११ । ४ ।
"दाधार यो धरुणं सत्यताता ॥"
"सत्ये द्युलोके धरुणं धारकं बलं दाधार अधारयत् ।" इति तद्भाष्ये सायनः ॥)

धर्त्तव्यं, त्रि, धृधातोः कर्म्मणि तव्यप्रत्ययेन साध्यम् । धारणीयम् । ख्यातव्यम् । पतनीयम् । भावे, क्लीं ॥

धर्त्रं, क्लीं, (धरति म्रियते वा । धृ + "शृधृवीपचीति ।" उणां ४ । १६६ । इति त्रः ।) गृहम् । इत्यमरादिकोषः ॥ क्रतुः । धर्म्मः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (धारके, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १८ ।
"धर्त्रमसिद्यौर्द्दंहनस्यवनि वधाय ।"
"हे कपाल ! त्वं धर्त्रं धारकमसि ।" इति वेददीपः ॥)

धर्म्मः, पुं क्लीं, (धरति लोकान् म्रियते पुण्यात्मभिरिति वा । धृ + "अर्त्तिस्तुहुसृधृति ।" उणां १ । १६६ । इति मन् ।) शुभादृष्टम् । (यथा, हितोपदेशे । १ । ५६ ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥")
तत्पर्य्यायः । पुण्यम्२ श्रेयः३ सुकृतम्४ दृष्टः५ । इत्यमरः । १ । ४ । २४ ॥ न्यायः । स्वभावः । आचारः । उपमा । क्रतुः । (यथा, महाभारते । १४ । ८८ । २१ ।
"श्रुत्वा प्रवर्त्स्ये धर्म्माख्यं यथावत् द्विजसत्तमाः ।
चकृषे विधिवद्राजंस्तथैवाभिभवं द्विजाः ॥")
अहिंसा । उपनिषत् । इति मेदिनी । से, १६ । दानादिके, क्लीं । इति हेमचन्द्रः ॥ (यथा, योगसारे ।
"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
सारश्चैव योगोऽस्मिन् पञ्च धर्म्माः प्रकीर्त्तिताः ॥")

धर्म्मः, पुं, (धृ + मन् ।) धनुः । यमः । सोमपः । इति मेदिनी । मे, १६ । सत्यसङ्गः । अर्हन् । इति हेमचन्द्रः । ६ । १५ । देवताविशेषः । स ब्रह्मणो दक्षियज्ञनाशात् । (यथा, मत्स्यपुराणे ३ । १० ।
"अक्रुधाद्दक्षिणाद्दक्षः प्रजापतिरजायत ।
धर्म्मस्तस्यान्वयादभवत् हृदयात् कुसुमायुधः ॥")
तस्य भार्य्या दक्षस्य चतस्रोऽप्यकन्याः । तस्य चतुर्दशापत्यानि यथा । पत्न्यां श्रद्धायां सुतम् १ मैत्र्यां प्रसादः २ दयायां अभयम् ३ शान्त्यां सुखम् ४ तुष्ट्यां मुदं ५ पुष्ट्यां दर्पः ६ क्रियायां योगः ७ उन्नतौ दर्पः ८ बुद्ध्यां अर्थः ९ मेधायां स्मृतिः १० ह्रीमां नरनारायणौ ११ । १२ तितिक्षायां क्षेमम् १३ ह्रीसंज्ञायां प्रश्रयः १४ । इति श्रीभागवतम् ॥ * ॥ अपि च ।
"श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिरयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥"
विष्णुपुराणमते सिद्धिस्थाने ऋद्धिरत्यत्र तुल्यम् ॥
तासामपत्यानि यथा,—
"श्रद्धा कामस्य श्रीर्दर्पस्य नियमं धृतिरात्मजम् ।
सन्तोषश्च तथा तुष्टेर्लोभं पुष्टिरसूयत ॥
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धेर्यशः कीर्त्तिरित्येते धर्म्मसूनवः ॥
कामो नन्दी सुतं हर्षं धर्म्मपौत्रमसूयत ॥"* ॥
अधर्म्मवंशो यथा, मार्कण्डेयपुराणे ।
"हिंसा भार्य्या त्वधर्म्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां सुतौ द्वौ नरकं भयम् ॥
माया च वेदना चैव मिथुनं द्वयमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥
वेदना त्वसुतश्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिश्चराधीकलक्षणाः क्रोधश्च जज्ञिरे ॥
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मसन्ततयः ।
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ह्यूर्द्धरेतसः ॥"
धर्म्मोत्पत्तिर्यथा, वराहपुराणे ।
"अथोत्पत्तिं प्रवक्ष्यामि धर्म्मस्य महतो नृप ! ।
माहात्म्यञ्च तिथेश्चैव तन्निबोध नराधिप ! ।
सर्व्वे ब्रह्मात्मयः शुद्धपरादरपरसंज्ञितः ।
स सिसृक्षुः प्रधानादौ पालनञ्च चिन्तयन् ॥
तस्य चिन्तयतस्तस्माद्दक्षिणाच्छ्रुतकुण्डलः ।
प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः ।
तं दृष्ट्वोवाच भगवांश्चतुर्व्यात् स्वात् क्षते युगे ।
श्वेतायां त्रिपदश्चासौ द्विपदो द्वापरेऽभवत् ।
कलावेकेन पादेन प्रजाः पालयते प्रभुः ।
यद्गेहो ब्राह्मणानां स त्रिधा चक्रे व्यवस्थितः ॥
द्विधा त्रिधैकधा मूर्त्ते स्थितः सर्व्वगतः प्रभुः ।
गुणदक्षक्रियाजातिचतुर्व्याद्यः प्रकीर्त्तितः ।
त्रिशृङ्गोऽसौ स्मृतो वेदे सर्व्वसंहितपद्धतिः ।
तथा चात्मन ओङ्कारद्विशिराः सप्तहस्तवान् ॥
उदात्तादित्रिभिर्बद्ध एवं धर्म्मो व्यवस्थितः ।

ब्रह्मोवाच ।

अद्यप्रभृति ते धर्म्म ! त्रिशिरस्तु त्रयोदशी ॥
यस्मात्तपोऽथ पुत्रो भवन्तं तपसाप्स्यति ।
त्यक्त्वा पापसमाचारं तस्मात्तुष्यति मानवः ॥"
तस्य पुत्रा यथा, वामनपुराणे ।

"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम्।
सम्यक्तं सुनिशादूल! योगशास्त्रविचारकम्॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
साङ्ख्यवेत्तारमपरं कपिलं योगमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्॥
ज्ञानयोगं न ते दद्युर्न्यायांशोऽपि कनीयसाम्॥"
(चतुर्दशप्रदापरे वेदव्यसनाद्यमेव व्यास आसीत्।
यथा, देवीभागवते। १। ३। २८।
"त्रयोदशे चान्तरिणो धर्म्मेऽपि चतुर्दशे॥"
यथा, च ब्रह्मखण्डे। २० अध्याये।
"धर्म्मो नारायणो नाम वासस्तु भविता यदा।
तदाप्यहं भविष्यामि भविष्यामि महामुनिः॥
बालखिल्याश्रमे पुण्यपर्व्वते गन्धमादने।
तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः॥
सुधामा कथपश्चैव वसिष्ठो विरजास्तथा।
मम योगबलोपेता विमना ऊर्द्ध्वरेतसः॥
प्राप्य माहेश्वरं तेजो रुद्रलोकाय संस्थिताः॥"
क्वचित् युगस्य वैपरीत्यकथनन्तु कल्पभेदादविरुद्धमित्यधिगन्तव्यम्॥) धर्म्मलक्षणं यथा,—
"दाने दानं मतिः शास्त्रे मातापित्रोश्च पूजनम्।
श्रद्धा बलिर्गवां ग्रासः षड्विधं धर्म्मलक्षणम्॥"
इति पाद्मोत्तरखण्डम्॥ *॥
धर्म्मांङ्गानि यथा, पाद्मभूमिखण्डे।
"ब्रह्मचर्य्येण सत्येन तपसा च प्रवर्त्तते।
दानेन नियमेनापि क्षमाशौचेन वल्लभ!॥
अहिंसया सुशान्त्या च अक्लेशेनापि वर्त्तते।
एतैर्द्वादशभिर्योगैस्तु धर्म्ममेव प्रकल्पयेत्॥"
धर्म्मलक्षणं यथा, मत्स्यपुराणे।
"अद्रोहात्याणलोभश्च दमो भूतदयातपः।
ब्रह्मचर्य्यं ततः सत्यमक्रोधः क्षमा धृतिः।
सनातनस्य धर्म्मस्य मूलमेतदुदाहृतम्॥"
कलेर्दशसहस्रान्ते धर्म्मादयो हरेः पदं गमिष्यन्ति। यथा,—
"ग्रासन्नामो हरेर्मूर्त्तिर्जनत्राणाय भारतम्।
कलेर्दशसहस्रान्ते ययौ ब्रह्मा हरेः पदम्॥
सत्यञ्च धर्म्मः शौचञ्च वेदाश्च श्यामदेवताः।
एतं तपन्तमनुयुर्योगेः सार्द्धमेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
धर्म्माधारस्थानादि यथा,—
"यत्र स्नानं तवाधारो वदामि भूवतां विभो!।
वेणायेषु च वर्म्मेषु व्रतेषु ब्रह्मचारिषु॥
पतिव्रतासु प्राज्ञेषु दानग्रहेषु भिक्षुषु।
वृषेषु धर्म्मशीलेषु चतुरे सङ्गेऽनुजातिषु।
द्विजसेविषु शूद्रेषु सतुर्यसंस्थितेषु च।
यद्यत्तं वर्त्तते पूर्वो धर्म्मराज! विराजसे॥
युगे युगे तवाधारा एते पुण्यतमा जनाः॥"
अपि च।
"अश्वत्थवटविल्वेषु तुलसीचन्दनेषु च।
देवार्च्चेषु च पुण्येषु विद्यमानोऽपि शाश्वतः॥
देवालयेषु तीर्थेषु सतां ग्रन्थदृयेषु च।
वेदवेदाङ्गयज्ञेषु च सभासु च॥
श्रीकृष्णगुणनामोक्तश्रुतिगीतस्थलेषु च।
व्रतपूजातपोन्यायध्यानाधिष्ठानेषु च॥
दीक्षापरीक्षाग्रमथगोष्ठगोब्दभूमिषु।
गवां गृहेषु गोष्ठेषु विद्यमानो हि पक्षसि॥
ज्ञप्तया ते न भविता धर्म्मस्तेषु स्थलेषु च॥"
धर्म्मागम्यस्थानानि यथा,—
"एतदन्येषु ज्ञप्तया गम्यश्च तत् ब्रह्म।
पुंश्चलीषु तदुत्पन्नेषु २ षु नरघातिनाम्॥
नरघातिषु गोघ्नेषु मद्यैषु च खलेषु च।
देवतागुरुविप्रेषु पाखण्डानां धनहारिषु।
असन्नरेषु धूर्त्तेषु चौरेषु रतिभूमिषु।
दुरोदरसुरापानकलहानां स्थलेषु च॥
ग्रामयाम्यसाधुतीर्थपुराणरहितेषु च।
दस्युयक्षेषु देवेषु तालच्छायासु गर्व्विषु॥
अविधीविमसीलोविदेवलग्रामवासिषु।
दयावाक्यसर्व्वकारजीवहिंसोपजीविषु॥
भर्तृनिन्दितनारीषु स्त्रीजितेषु च पुंसु च।
दीक्षासन्धिविच्छुभक्तिविहीनेषु द्विजेषु च॥
खड्गकन्याविक्रयिषु स्वयोनिविक्रयिष्वच।
ग्रामयाम्यसुरण्यभूमिविक्रयिषु प्रभो!॥
मित्रद्रोहिक्षतघ्नेषु सत्यविश्वासघातिषु।
ग्ररागतहीनेषु आमिषतल्पेषु तेषु च॥
ग्रन्थन्थियोक्तिग्रीवेषु तथा सीमापहारिषु।
जामातृद्रोधात्तथा लोभाभिज्ञासाधिप्रवादिषु॥
पुण्यकर्म्मविहीनेषु पुण्यकर्म्मविरोधिषु।
स्थातुमेतेषु निन्द्येषु नाधिकारस्तव प्रभो!॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४२ अध्यायः॥
देवादीनां धर्म्मो यथा,—
सुकेशिरुवाच।
"क्षिप्रञ्चायो मनुष्येभ्यः क्षिमाचरणसत्क्रियः।
धर्म्माश्चित्र न सीदन्ति देवाद्यास्तु तदुच्यताम्॥
ऋषय ऊचुः।
देवानां परमो धर्म्मः सदा यज्ञादिकाः क्रियाः।
स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः॥
देवानां बाहुजातत्वं मातृवर्य्ये सुहृत्सत्क्रिया।
विघ्नं नीतिशास्त्राणां हरभक्तिरुदाहृता॥
सिद्धानासुदितो धर्म्मो योगयुक्तिरनुत्तमा।
स्वाध्यायं ब्रह्मविज्ञानं भक्तिर्दाभ्याभपि स्थिरा॥
उत्तमोपासनं श्रेयं कृष्णवाक्येषु वादिता।
वरस्त्रीणां स्थिरा भक्तिर्गान्धर्व्वो धर्म्म उच्यते॥
विद्याधरत्वमतुलं विज्ञानं पौरुषी मतिः।
विद्याधराणां धर्म्मोऽयं भवान्यां भक्तिरेव च॥
गान्धर्व्वविद्यावैदित्यं भक्तिः स्वाध्यो तथा स्थिरा।
कौशल्यं सर्व्वशिल्पेषु धर्म्मः केशुरुदाहृतः॥
ब्रह्मचर्य्यसमाधित्वं योगाभ्यासरतिर्दृढा।
सर्व्वत्र कामचारित्वं धर्म्मोऽयं पैटकः स्मृतः॥
ब्रह्मचर्य्यं व्रताधित्वं सत्यज्ञानञ्च राक्षस!।
नियमो धर्म्मवेदित्वमार्षे धर्म्मे प्रचक्षते॥
स्वाध्यायं ब्रह्मचर्य्यञ्च दानं यजनमेव च।
ऊर्द्ध्वरेतस्यमनायासं दयाधिक्यः प्रभाद्यः॥
जितेन्द्रियत्वं शौचञ्च माङ्गल्यं ३० तरुच्यते।
ग्रहरे भास्करे देवो धर्म्मोऽयं भागवः स्मृतः॥
धनाधिपत्यं भोगानि स्वाध्यायं ग्रहरार्घनम्।
अहङ्कारमशौचञ्च धर्म्मोऽयं गुह्यकेश्वरि॥
परदाराभिमर्षित्वं परार्थेऽपि च लोलुपा।
स्वाध्यायस्यात्मके भक्तिर्धर्म्मोऽयं राक्षसः स्मृतः॥
अविवेकताधाधानं शौचहानिरलज्जता।
पिशाचानामयं धर्म्मः सदा चामिषभुताम्॥
योनयस्तु द्वादशैताः सह धर्म्माश्च राक्षस!।
ब्रह्मणा कथिताः पुण्या द्वादशैव गतिप्रदाः॥"
इति वामनपुराणे २१ अध्यायः॥
धर्म्माधर्म्मलक्षणम्। यथा,—
"अहिंसालक्षणो धर्म्मो हिंसा चाधर्म्मलक्षणा॥"
इति महाभारतम्॥
"वेदप्रविहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः॥"
इति श्रीभागवतम्॥
"विहितक्रियया साध्यो धर्म्मः पुंसां गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म्म उच्यते॥"
इति धर्म्मदीपिका॥
(इक्ष्वंशीयनृपविशेषः। यथा, भागवते। ९। २३। १४।
"इक्षोस्तु तनयो वभूः सेतुस्तस्यात्मजस्ततः।
आरब्धस्तस्य भान्धारस्तस्य धर्म्मस्ततो धृतः॥")
धर्म्मकर्म्मन्, [न्] क्ली, (धर्म्माय धर्म्मस्य वा कर्म्म कार्य्यम्।) धर्म्मकार्य्यम्। शुभादृष्टप्रतिपादकक्रिया। यथा,—
"वेदप्रविहितं धर्म्मकर्म्म तन्मङ्गलं परम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥
धर्म्मकायः, पुं, (धर्म्माय कायो देहो यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥
धर्म्मकीलः, पुं, (धर्म्मस्य कील इव।) शासनम्। राजशासनम्। इति पुरुषोत्तमदेवः॥
धर्म्मकीलकः, पुं, (धर्म्मकील+संज्ञायां कन्।) ब्रह्मशासनम्। इति पुरुषोत्तमदेवः। अमरमालाकोषौ॥
धर्म्मकेतुः, पुं, (अहिंसारूपो धर्म्मः केतुरिव यस्य।) बुद्धः। इति शब्दरत्नावली॥
धर्म्मक्षेत्रं, क्ली, (धर्म्मस्य क्षेत्रम्।) कुरुक्षेत्रम्। यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं मघरामह्रदान्तरम्।
धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि॥"
इति हेमचन्द्रः॥
अपि च।
"तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाञ्च मघन्तुकस्य च।
एतत् कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते॥"
इति भारतपाद्मे॥
धर्म्माधारे, त्रि॥
धर्म्मघटः, पुं, (धर्म्माय घटः सुगन्धोदकपरिपूर्णो-घटस्यः।) सौरवैष्णवे प्रत्यहदातव्यसुगन्धोदकपूरितकलसः। यथा, काशीखण्डे १२ अध्याये।
"इदुर्धर्म्मघटांश्चापि सुगन्धोदकपूरितान्॥"
तद्विधिर्यथा। अथ धर्म्मघटव्रतम्।
तत्र प्रथमं स्वस्तिवाचनं कृत्वा कुर्य्यः सोम इति प्रतिष्ठां सङ्कल्पं कुर्य्यात्। यथा,—

अद्येत्यादि वैशाखे मासि अमुकपक्षे अमुकतिथौ महाविषुवसंक्रान्त्यां अमुकगोत्रा श्रीअमुकी देवी यमालयगमननिवारणपूर्व्वकश्रीविष्णुप्रीतिकामा अद्यारभ्य वर्षचतुष्टयं यावत् प्रतिवर्षीयमेवस्थरवौ प्रत्यहं गन्धपत्रादिनागादेवतापूजापूर्व्वक-श्रीविष्णुपूजा-सभोज्यघटदान-कथाश्रवण-ब्राह्मणभोजनरूपधर्म्मघटव्रतमहं करिष्ये ॥ * ॥ वारान्तरे अद्येत्यादि महाविषुवसंक्रान्त्यां मत्संकल्पितधर्म्मघटव्रतकर्म्मणि यथाविधिकगन्धपत्रादिनानादेवतापूजापूर्व्वकं श्रीविष्णुपूजासभोज्यघटदानकथाश्रवणमहं करिष्ये। इति सङ्कल्प्य तत्सूक्तं पाठयेत्। ततो ब्राह्मण: प्रतिनिधीभूत: सामान्यार्घ्यासनशुद्धिभूतशुद्ध्यादिकं विधाय घ्राणयामादौ घटे वा गणेशादीन् नवग्रहान् दिक्पालांश्च संपूज्य वां हृदयाय नम: इत्याद्यङ्गन्यासकरन्यासौ कृत्वा ॐ ध्येय: सदा इत्यादिना विष्णुं ध्यात्वा खड्गिरसि पुष्पं दत्त्वा मानसोपचारै: संपूज्यार्घ्यं संस्थाप्य पुनर्ध्यात्वावाह्य षोड़शोपचारै: ॐ भगवते विष्णवे नम इति मन्त्रेण संपूज्य यथाशक्ति ॐ विष्णवे नम इति मन्त्रं जप्त्वा जपं समर्प्य ॐ नमो ब्रह्मण्यदेवायेत्यादिना प्रणम्य लक्ष्मीं सरस्वतीं आवरणदेवताश्च पूजयेत्। तत: एते गन्धपुष्पे ॐ सभोज्यवारिपूर्णघटाय नम:। इति चिरभ्यर्च्य—

"ॐ घट त्वं धर्म्मरूपोऽसि ब्रह्मणा निर्म्मित: पुरा।
त्वयि लिप्ते सन्तु लिप्ताश्चन्दने: सर्व्वदेवता: ॥"

इति चन्दनेनानुलिप्य अद्येत्यादि अमुकगोत्रा श्रीअमुकी देवी श्रीविष्णुप्रीतिकामा धर्म्मघटव्रतकर्म्मणि इमं सभोज्यवारिपूर्णघटमर्चितं श्रीविष्णुदेवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे। इत्युत्सृज्य कृताञ्जलि: पठेत्।

"ॐ धर्म्मे त्वं घटरूपेण ब्रह्मणा निर्म्मित: पुरा।
त्वयि दत्तेऽक्षया लोका मम सन्तु निरामया: ॥
यथा त्वं प्रीतलो नित्यं संपूर्ण: प्रीतवारिणा।
तथा मां सुरशार्दूल ! प्रीतं कुरु धर्म्मराट् ॥
एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मक:।
अस्य प्रदानात् सफला मम सन्तु मनोरथा: ॥
पानीयं प्राणिनां प्राणा: पानीयं पावनं महत्।
पानीयस्य प्रदानेन तृप्तिर्भवतु शाश्वती ॥"

इति पठित्वा दक्षिणां दत्त्वाच्छिद्रावधारणं कृत्वा कथां शृणुयात् ॥ * ॥

अथ कथा। श्रीकृष्ण उवाच।

"शृणु राजन्! प्रवक्ष्यामि व्रतानां व्रतमुत्तमम्।
चन्द्रकेतुरिति ख्यातो राजाधीद्धार्म्मिक: सुधी: ॥
सुशीला तस्य भार्य्यासीत् मालावत्यतिविश्रुता।
सा सर्व्वगुणसंयुक्ता साध्वीयं द्रौपदी यथा ॥
एकस्मिन् समये राजन्! लोमशस्य च सन्निधौ।
सैषा पुटाञ्जलिर्भूत्वा लोमशं परिपृच्छति ॥

मालावत्युवाच।

शृणु त्वं मुनिशार्दूल! सर्व्वधर्म्मपरायण!।
यमालयं न गच्छामि तदुपायं ब्रवीहि मे ॥
समाख्याहि व्रतं देव! सफलं प्रापणाग्रणम् ॥

लोमश उवाच।

शृणु राज्ञि! महाभागे! येन तत्र न गच्छति।
तदुपायं प्रवक्ष्यामि शृणु त्वं हि समाहिता ॥
जन्मजन्मकृतात् पापान्मुच्यते नात्र संशय:।
विष्णुरत्नमात्रेण हन्ति पापं पुराकृतम् ॥
येन धर्म्मप्रसादेन तुष्टो देवो जनार्द्दन:।
पूजयेद्देवदेवेशं सर्व्वकामफलप्रदम् ॥
समारोप्य ततो देवं चन्दनेन विलेपितम्।
पूजयेत् परया भक्त्या गन्धपुष्पादिभिस्तथा ॥
अयने कोटिगुणितं लक्षं विष्णुपदीषु च।
षड़शीतिसहस्रन्तु षड़शीत्यासुदाहृतम् ॥
विषुवे शतसाहस्रं व्रतं तच्च समाचरेत् ॥

मालावत्युवाच।

ममैतत् कथितं सर्व्वं यद्व्रतञ्च त्वया प्रभो!।
किं विधानं फलं किं वा केन लोके कृतं पुरा ॥

लोमश उवाच।

शृणु देवि! महाभागे! पूर्व्वकालस्य या कथा।
विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रवि:॥
दोषादिरहिते काले चतुर्व्वर्षं समाचरेत्।
तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम् ॥
चन्दनेन समालिप्तं दधिक्षीरादिभिरन्वितम्।
व्रतमेतत् समाकुर्य्यात् यावत् वर्षचतुष्टयम् ॥
अनेनैव विधानेन यो व्रतञ्च समाचरेत्।
सर्व्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ॥
द्रौपद्याचरितं यत्तत् शृणु त्वं ध्याननत्परा।
द्रौपद्या तदिदं पूर्व्वं न कृतं व्रतमुत्तमम् ॥
हृता गता च सा साध्वी न लभेत दिवं पुन:।
अथ शीघ्रं समागत्य तान्मृत्युर्यमकिङ्करा: ॥
विषुवे च त्वया साध्वि! न कृतं तद्व्रतं किल।
ततो मरणकाले स्यात् स्वर्गद्वारं विरोधितम् ॥
यमदूतै: समाक्रान्ते गले पाशो निवेशित: ॥

द्रौपद्युवाच।

के यूयमिति तद्भूत कुत्र वा नीयतेऽधुना।
कथं पाशो गले दत्त: कथयस्व मम ध्रुवम् ॥

यमदूता ऊचु:।

मा भैषीर्नीयते देवि! धर्म्मराजस्य सन्निधौ।
पृथिव्यां यानि तीर्थानि व्रतानि विविधानि च ॥
यज्ञदानविधानञ्च त्वया सर्व्वं प्रतिष्ठितम्।
किन्त्वत्र न कृतं पूर्व्वं माधवे मासि सुव्रते!॥
व्रतं धर्म्मघटं वाम तेन यासि यमालयम्॥

द्रौपद्युवाच।

यमदूता महाभागा नयन्तु मां यमालयम्।
तत्प्रसादेन मे शीघ्रं गले पाशो विमुच्यतु ॥
ततो विधृत्य सकरे समानीता यमान्तिकम् ॥

यम उवाच।

शृणु त्वं द्रौपदी साध्वि! सर्व्वं त्वया प्रतिष्ठितम्।
न कृतो देवदेवस्य व्रतं धर्म्मघटस्त्वया ॥
तथापि तुष्टो भद्रेऽहं वरं वृणु यथेप्सितम्॥

द्रौपद्युवाच।

वरं दद्यास्त्वमे नाथ! गच्छामि पुनरालयम्।
कृतेयं तद्विधानेन व्रतं तव प्रसादत: ॥

यम उवाच।

व्रतं धर्म्मघटं देवि! कुरु गत्वा निजालयम्।
नागन्तव्यं त्वया देवि! पुनर्म्मम पुरीं शुभे!॥
ततो गता च सा चैव तुष्टोऽभूदन्तकस्तदा।
भूयो भूमिगतं प्राप्य तदेव च तथा सती ॥
सा तत्र तद्व्रतचक्रे दानं होमं यथाविधि।
संपूर्णे तु व्रते तत्र प्रतिष्ठामाचरत् सती ॥
ददौ द्वादशविप्रेभ्यो दानानि द्वादशानि च।
चत्वारि जलपात्राणि वस्त्रेण सहितानि च ॥
दानानि च ततो दत्त्वा ततस्सङ्काघटांस्तथा।
आसनोनि च चत्वारि पादुकासहितानि च ॥
दक्षिणान्तु ततो दत्त्वा वस्त्राणि विविधानि च।
तद्व्रतञ्च सुसम्पन्नं विष्णुहस्तेऽर्पयत्तत:॥
एवं कृत्वा व्रतं साध्वी द्रौपदी सुसमाहिता।
अन्तकालं समासाद्य सा गता वैष्णवं पुरम्॥
इत्युक्ता लोमशेनाथ कथा मालावती तथा।
कृत्वा चैव व्रतं साध्वी देवाराधनपूर्व्वकम्॥
सा नित्यं गर्गरीं दत्त्वा सभोज्यदधिसान्वितां।
देवोद्देशेन विप्राय श्रद्धया प्रत्यपादयत्॥
एवं या कुरुते नारी पुत्रपौत्रसमन्विता॥

पुस्तकान्तरे।

'एवं करोति या नारी नरो वा व्रतसत्तमम्।'
इति वा पाठ:।
आयुरारोग्यमैश्वर्य्यं श्रियञ्च लभते सुखम्।
अन्ते याति परं स्थानं यत्र देवो निरञ्जन:॥"

इति भविष्यपुराणोक्ता धर्म्मघटव्रतकथा समाप्ता॥

क्वचित् क्वचित् पद्धतौ विष्णुधर्म्मोत्तरयमपुराणोक्ता च लिखिता।

धर्म्मचक्र:, पुं, (धर्म्मस्य चक्रं समूहो यत्र।) बुद्ध:। इति शब्दरत्नावली (धर्म्मस्य चक्रं समूह:। धर्म्मसमूहे, क्ली। यथा, महाभारते। १। १०६। १४।

"भीष्मेण विहितं राज्ञे धर्म्मचक्रमवर्त्तत॥"

अत्रविशेष:। यथा, हरिवंशे। २२६। ७।

"धर्म्मचक्रं महाचक्रमिति नाम गतम:॥")

धर्म्मचक्रवृत्, पुं, (धर्म्मचक्रं धर्म्मसङ्घं विभर्त्तीति। भृ+क्विप्। तुगागमश्च।) बुद्ध:। इति धरणि:॥

धर्म्मचारिणी, स्त्री, (धर्म्मं चरतीति। चर+णिनि+ङीप्।) जाया। इति शब्दरत्नावली॥

धर्म्मचिन्तनं, क्ली, (धर्म्मस्य चिन्तनं भावना।) धर्म्मचिन्ता। इति हेमचन्द्र:। ६। १७॥

धर्म्मचिन्ता, स्त्री, (धर्म्मस्य चिन्ता भावना।) पुण्यभावना। तत्पर्य्यायः। उपाधि: २। इत्यमर:। १। ७। २८॥

धर्म्मज्ञ:, त्रि, (धर्म्मं जानातीति। ज्ञा+क:।) धर्म्मज्ञानविशिष्ट:। यथा,—

"धर्म्मज्ञश्च कृतज्ञश्च दीर्घवैरी दृढ़व्रत:॥"

इति विराटपर्व्व॥

धर्म्मण्य:, पुं, (धर्म्मेभ्यो धार्म्मिकबहिरर्थेभ्य: नमतीति। नम+अन्येभ्योपीति ड:।) हंसभेद:।

धामिनिया इति भाषा। (यथास्य पर्य्यायः।
"धन्वनः पिच्छिलत्वक्च धनुर्वृक्षश्च धर्म्मजः॥"
इति वैद्यकरत्नमालायाम्॥)
सर्पविशेषः। इति मेदिनी। षे, ५३॥ टेमरा।
इति भाषा॥

धर्म्मत्वं, क्ली, (धर्म्मस्य भावः। धर्म्म+त्व।) वृत्तिमत्त्वम्। आधेयत्वमिति यावत्। यथा, गगनादेर्वृत्तिमत्त्वलक्षणधर्म्मत्वाभावादिति जगदीशः॥

धर्म्मदानं, क्ली, (धर्म्माय दानम्।) प्रयोजनमनपेक्ष्य केवलधर्म्मबुद्ध्या पात्रेभ्यो दानम्। यथा, देवलः।
"पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्म्मबुद्ध्या यत् धर्म्मदानं प्रचक्षते॥"
इति शुद्धितत्त्वम्॥

धर्म्मद्रवी, स्त्री, (धर्म्मजनको द्रवो वारिरूपो यस्याः। गौरादित्वात् ङीष्।) गङ्गा। इति त्रिकाण्डशेषः॥ (यदुक्तं गङ्गास्तोत्रे।
"विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि!।
धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि!॥")

धर्म्मधातुः, पुं, (अहिंसारूपो धर्म्म एव धातुः प्रकृतिर्यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥

धर्म्मध्वजी, [न्] त्रि, (धर्म्मो ध्वजश्चिह्नम्। स एवास्यास्तीति। धर्म्मध्वज+इनिः।) जीविकार्थंजटादिधारी न तु परमार्थतो धर्म्मानुष्ठानकारी। तत्पर्य्यायः। लिङ्गवृत्तिः २। इत्यमरः। २। ७। ५४॥ (यथा, मनुः। ४। १६५।
"धर्म्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धकः॥")

धर्म्मपत्तनं, क्ली, (धर्म्मपत्तने जातम्। "तत्र जातः।" ४। ३। २५। इत्यण्। संज्ञापूर्व्वकत्वात् न वृद्धिः।) मरिचम्। इत्यमरः। २। ६। ३६॥ (पर्य्यायोऽस्य यथा,—
"रेणुकं मरिचं कृष्णसुवर्णं धर्म्मपत्तनम्॥"
इति वैद्यकरत्नमालायाम्॥

धर्म्मस्य पत्तनम्।) धर्म्मपुरी। तत्पर्य्यायः। अवन्ती २। इति त्रिकाण्डशेषः॥

धर्म्मपत्रं, क्ली, (धर्म्माय यज्ञादिकार्य्यार्थं पत्रं यस्य।) यज्ञोडुम्बरः। इति शब्दचन्द्रिका॥

धर्म्मपुत्रः, पुं, (धर्म्मस्य पुत्रः।) युधिष्ठिरराजः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २३५। १८।
"न पावकं धास्यति धर्म्मपुत्रो
धनञ्जयश्चाप्यनुवर्त्तते तम्॥")
नरनारायणाहयौ। इति पुराणम्॥ (यथा, देवीभागवते। ४। ७। १६।
"तापसौ धर्म्मपुत्रौ द्वौ सुशान्तमनसावुभौ॥")
धर्म्मतः कृतपुत्रः। धरमपुत्रो इति भाषा॥ यथा,—
"यावद्भुजेटिधर्म्मपुत्रपरश्वसुखाखिलक्षत्रिय-
श्रेणीशोणितपिच्छिला वसुमती कोऽस्यामधास्यत् पदम्।
चैलोक्याभयदानदक्षिणभुजावष्टम्भदिग्जोदयो
देवोऽयं दिनकृत्कुलैकतिलको न प्राभविष्यद् यदि॥"
इति महाभाटके। २। २५॥

धर्म्मवाणिजिकः, पुं, (धर्म्मे वाणिजिक इव। फलकामनया धर्म्माचरणादेवास्य तथात्वम्।) पुण्यकर्म्मफलकामी। यथा,—
"धर्म्मवाणिजिका मूढाः फलकामा नराधमाः।
अर्च्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्युत॥"
इति भक्तमालसत्त्वधृतविष्णुधर्म्मोत्तरखतीयकाक्कीयवचनम्॥

धर्म्मभाक्तकः, पुं, (धर्म्मार्थं भजतीति। भज+ण्वुल्।) भारतादिपाठकः। इति त्रिकाण्डशेषः॥

धर्म्ममूलं, क्ली, (धर्म्मस्य मूलम्।) शुभाचरकारणम्। पुण्यहेतुः। यथा,—
"इत्थं मूलं फलं प्राकसदपाद्यं तपोधनाः।
दानं विभवतो दत्त्वा नराः स्वर्य्यान्ति धर्म्मिणः॥
एष धर्म्मो महांस्त्यागो दानं भूतदया तथा।
ब्रह्मचर्य्यं सदा सत्यं अनृक्रोशो धृतिः क्षमा॥
सनातनस्य धर्म्मस्य मूलमेतत् समासतः॥"
इति वह्निपुराणे स्नानविधिनामाध्यायः॥
(यथा च मनुः। २। ६।
"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

धर्म्मयुः, त्रि, (धर्म्मं याति गच्छतीति। या+कृगृदृक्षिदृशिभ्यः उः।) धर्म्मविशिष्टः। धार्म्मिकः। धर्म्मग्रन्थादस्त्यर्थे युग्प्रत्ययेन निष्पन्नः इति सुबोधः॥

धर्म्मयुक्, [ज्] त्रि, (धर्म्मं युनक्तीति। युज्+क्विप्।) धर्म्मयुक्तः। धार्म्मिकः। (यथाह देवलः।
"दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक्।
देशकालौ च दानानामङ्गान्येतानि बहुविदुः॥")

धर्म्मराजः, पुं, (धर्म्मश्च राजते इति। राज+अच्।) यमः। इत्यमरः। १। ३। २१॥ (यथा, महाभारते। ३। २६६। ५४।
"धर्म्मराज! प्रकृष्टात्मा सावित्रीमिदमब्रवीत्॥")
नरपतिः। युधिष्ठिरः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १६। ८।
"अपृच्छत् धर्म्मराजो हि शरतल्पगतं पुरा॥"
धर्म्मप्रधाने, त्रि। यथा, महाभारते। १। १५५। १२।
"धृत्वा च ते प्रीतमनाः सदाहं
त्वं वा वरुणो धर्म्मराजो यमो वा॥")

धर्म्मराजपरीक्षा, स्त्री, (धर्म्मराजस्य परीक्षा।) धर्म्माधर्म्मपरीक्षणम्। यथा,
अथ धर्म्मराजविधिः। वक्ष्यतिः।
"पत्रद्वये लेखनीयौ धर्म्माधर्म्मौ सितासितौ।
जीवदानादिकैर्मन्त्रैर्गायत्र्याद्यैश्च सामभिः॥
आमन्त्र्य पूजयेत्तत्रैः कुसुमैश्च सितासितैः।
अभ्युक्ष्य पञ्चगव्येन घृतपिण्डान्तरितौ ततः॥
क्रमौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ।
ततः कुम्भात् पिण्डमेकं गृह्णीयादविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यात् संपूज्यश्च परीक्षकैः॥
जीवदानमन्त्रस्तु शारदायाम्।
'पाशाङ्कुशपुटा शक्तिर्नायुर्बिन्दुविभूषितः।
याद्याः सप्तसकारान्ता वोमसत्त्वेन्दुसंयुतम्॥
तदन्ते हंसमन्त्रः स्यात् ततोऽस्य पदं वदेत्।
प्राणा इति वदेत् पश्चादिह प्राणास्ततःपरम्॥
असुख जीव इह स्थितस्ततोऽस्य पदं वदेत्।
सर्व्वेन्द्रियाण्यसुखान्ते वाङ्मनश्चक्षुरन्ततः॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्त्विति वधूरन्ते प्राणमन्त्रोऽयमीरितः॥
प्रत्यसुख पदात् पूर्व्वं प्राणाद्यानि प्रयोजयेत्।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः॥'
प्राणाङ्कुशपुटा शक्तिरित्यनेन प्रथमं प्राणबीजं आम्। ततः शक्तिबीजं ह्रीँ। ततोऽङ्कुशबीजं क्रोम्। वायुर्यकारो बिन्दुविभूषितः। तेन यं। याद्याः सप्तसकारान्ता उद्धृतयकारमादाय सप्त। अङ्कुशवायुनलावनी वरुणबीजानीत्यन्वयोक्तेः। अत्र वायोरेकस्य पूर्व्वं पृथगुपन्यासः सप्तानां सबिन्दुत्वार्थः। अतएवान्यत्र बीजानीत्युक्तम्। वोमसत्त्वेन्दुसंयुतम्। वोम हकारः। सत्त्वं ओकारः। इन्दुर्बिन्दुः। तेन हौं। असुख इति षष्ठ्यन्तदेवतानामोपलक्षणम्।
'अदः पदं हि यद्रूपं यत्र मन्त्रे प्रदृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥'
इति नारायणीयात्। अग्निवधूः स्वाहा॥ * ॥
गायत्र्यादिसामान्याने तु सप्तव्याहृति गायत्रीमात्रं पठितव्यम्। जपहोमादि यत्किञ्चित् कृतमुक्तं सम्भवेन्न चेत् सर्व्वं व्याहृतिभिः कुर्य्यात् गायत्र्या प्रणवेन च॥ इति मिताक्षराधृतषट्त्रिंशन्मतवचनदर्शनात् अत्रापि तथा कल्प्यते॥ * ॥ पितामहः।
'अधुना संप्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम्।
हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम्।
राजतं कारयेद्धर्म्ममधर्म्मं सीसकायसम्।
लिखेद्धर्म्मे पटे वापि धर्म्माधर्म्मौ सितासितौ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्।
सितपुष्पस्तु धर्म्मः स्यात् अधर्म्मोऽसितपुष्पकः॥
एवं विधायोपलिप्ते पिण्डयोस्तौ निधापयेत्।
गोमयेन सदा वापि पिण्डौ कार्य्यौ समौ ततः॥
सदक्षाङ्कक्रमेणैव स्थाप्यौ चानुपलक्षितौ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ॥
आवाहयेत्ततो देवान् लोकपालांश्च पूर्व्ववत्।
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत्॥
यदि पापविमुक्तोऽहं धर्म्मस्यायाच्ञया मे करम्।
अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे स तु हीयते।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम्॥'
हन्तॄणामिति साहसाभियोगेषु। याचमानानामिति अत्यन्तार्थाभियोगेषु। प्रायश्चित्तार्थिनामिति पातकाभियोगेषु॥ * ॥
तत्र प्रयोगः। पत्रद्वये शुक्लं धर्म्मे कृष्णमधर्म्मे पुत्तलकद्वयरूपं निधाय ओम् आं ह्रीं क्रों यं

रं लं वं शूं षं सं हौं हंसः धर्म्मस्य प्राणा इह प्राणाः। पुनरागमित्यादि धर्म्मस्य जीव इह स्थितः। पुनरागमित्यादि धर्म्मस्य सर्व्वेन्द्रियाणि। पुनरागमित्यादि धर्म्मस्य वाङ्मनश्चक्षुः-श्रोत्रघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इत्यनेन जीवदानं धर्म्मप्रतिमायां एवमधर्म्मप्रतिमायां कृत्वा गायत्र्यादिसामञ्चाने तेनैव नो चेत् सप्रणवव्याहृतिगायत्रीं पठित्वा धर्म्मस्यावाहनादि कृत्वा यथाक्रमं शुक्लपुष्याभ्यां धर्म्माधर्म्मौ संपूज्य प्रणवेन पञ्चगव्यमुपादायाभ्युक्ष्य शुक्लपुष्ययुक्तं धर्म्मं कृष्णपुष्ययुक्तमधर्म्मं श्रुतिपिटके कृत्वा नवे कुम्भे स्थापयेत्। प्राङ्मुखोदङ्मुखो देवब्राह्मणसन्निधौ धर्म्मावाहनादिहवनान्तं कर्म्म कृत्वा दक्षिणां दत्त्वा समन्त्रकप्रतिज्ञापत्रं लिखित्वा ग्रीष्मशिरसि दद्यात्। ग्रीष्मस्थ ग्रीष्म यदि पापविमुक्तोऽहं धर्म्मस्यायाच मे करं दद्याद्यं कृष्णात्तयोरेकं यद्गीयात्। धर्म्मो यद्गीते मुहुः अन्यथा अन्यद्गः।" इति दिवतत्त्वम्॥

धर्म्मवान् [त्] त्रि, (धर्म्मोऽस्यस्येति। धर्म्म + मतुप्। मस्य वः।) धर्म्मविशिष्टः। पुण्यवान्। इति शब्दरत्नावली॥ (यथा, रामायणे। २। १०४। २६।

"जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रतम्॥")

धर्म्मवासरः, पुं, (धर्म्मस्य धर्म्माचरणस्य वासरः। पौर्ब्बमासी। इति त्रिकाण्डशेषः॥

धर्म्मवाहनः, पुं, (धर्म्मं वाहयतीति। वह + णिच् + ल्युः। यद्वा, धर्म्मो वृषो वाहनं यस्य। धर्म्मस्य वृषरूपत्वादेव तथात्वम्।) शिवः। इति त्रिकाण्डशेषः॥ धर्म्मस्य याने, स्त्री॥

धर्म्मवैतंसिकः, पुं, (धर्म्मे वैतंसिक इव। आत्मनो धार्म्मिकत्वविज्ञापनाय पाखिकः कपटाचारी वैतंसिकः।) पापकर्म्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्ता। तत्पापफलं यथा,—

"धर्म्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्॥
पापेन कर्म्मणा विप्रो धनं लब्ध्वा निरङ्कुशः।
रागमोहान्वितोऽशान्तः कङ्कयोनिमाप्नुयात्॥"

इति वह्निपुराणे दानविधिनामाध्यायः॥

धर्म्मव्याधः, पुं, (धर्म्मप्रधानो व्याधः। व्याकरणार्थिवादिवत् मध्यपदलोपिसमासः।) पापपुरुषविशेषः। स तु काश्मीरदेशाधिपवसुनामनृपदेहनिर्गतव्याधरूपिब्रह्महत्यात्मकः। तस्य राज्ञो वरेण तस्य धर्म्मव्याध इति संज्ञाभूत्। यथा,—

"ततः पुत्रं विवस्वन्तं श्रेष्ठं भालग्रतस्य ह।
अभिषिच्य स्वके राज्ये तपोवनमुपागमत्॥
पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः।
पुष्करीकाक्षनामा तु पूज्यते तत्परायणैः॥
तत्र गत्वा स राजर्षिः काश्मीराधिपतिर्म्महः।
अतितीव्रेण तपसा स्वशरीरमशोषयत्॥
पुष्करीकाक्षपारं तु सर्व्वं भक्त्या जपन् बुधः।
नमस्ते पुष्करीकाक्ष नमस्ते मधुसूदन!।
नमस्ते सर्व्वलोकेश! नमस्ते तिग्मचक्रिके॥"
इत्यादि।

"एवन्तु वदतस्तस्य मूर्त्तिमान् पुरुषः किल।
निर्गत्य देहान्मौलाभो घनचक्रो भयङ्करः॥
उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप!॥

राजोवाच।

कोऽसि किं कार्य्यमिह ते कस्मादागतवानसि।
एतन्मे कथय व्याध! इतिच्छामि वेदितुम्॥

व्याध उवाच।

पूर्व्वं कलियुगे राजन्! राजा त्वं दक्षिणासुखे।
अरण्यमागतो हन्तुं श्वापदानि विशेषतः॥
तत्र त्वयान्धकामेन मृगवेश्मधरो मुनिः।
दण्डयुग्मेन दूरे तु पातितो धरणीतले॥
ततस्त्वया महाराज! सप्तमारायणं प्रभुम्।
संचिन्त्य द्वादशी मुहूर्त्ता त्वया राजन्! उपोषिता॥
गौरैत्ता विधिना सद्यो ऋतोरस्मरमूर्जितः।
अद्यश्च तव देहस्थः सर्व्वं जानासि चाक्षयम्॥
स्वर्गस्थस्यापि राजेन्द्र! स्थितोऽहं स्वेन तेजसा।
इदानीमादिदेशौ तु क्षतिं नृपतिसत्तम!॥
सम्भृतस्त्वं महाराज! राज्ञः सुमनसो यष्टे।
इदानीं यतु त्वया स्तोत्रं पुष्करीकाक्षपारगम्॥
पठितं तत्प्रभावेण विहायाङ्गरुहाण्यहम्।
एकीभूतः पुनर्ज्जातो व्याधरूपो नृपोत्तम!॥
एतत् श्रुत्वा वचो राजा परं विस्मयमागतः।
वरेण छन्दयामास तं व्याधं राजसत्तमः॥

राजोवाच।

स्मारितोऽसि महाव्याध! त्वया जन्मान्तरं गतम्।
तथा त्वं मत्प्रसादेन धर्म्मव्याधो भविष्यसि॥"

इति वाराहे आदिष्टतदुत्तान्तनामाध्यायः॥ (अपरो धार्म्मिको व्याधविशेषः। अस्य विवरणन्तु महाभारते। ३। २०६ अध्यायमारभ्य विशेषतो द्रष्टव्यम्॥)

धर्म्मशास्त्रं, क्ली, (धर्म्मस्य धर्म्माय वा शास्त्रम्।) मन्वादिप्रणीतशास्त्रम्। तत्पर्य्यायः। स्मृतिः २ धर्म्मसंहिता ३। इति हेमचन्द्रः॥ धर्म्मशास्त्रप्रयोजका यथा, याज्ञवल्क्यः। १। ५-६।

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"

एते प्रधानानि अन्येऽपि सन्ति॥ रघुनन्दनधृतधर्म्मशास्त्राणि यथा,—

"मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवादे च तिथौ जन्माष्टमीव्रते॥
दुर्गोत्सवे अवहृतावेकादश्यादिनिर्णये।
तड़ागभवनोत्सर्गे वृषोत्सर्गत्रये व्रते॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुसंज्ञके।
दीक्षायामाह्निके श्राद्धे चैत्रे श्रीपुरुषोत्तमे।
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे।
द्रव्यादिंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः॥"

इति रघुनन्दनभट्टाचार्य्यः॥

धर्म्मशीलः, त्रि, (धर्म्मे धर्म्माचरणे शीलं स्वभावो यस्य।) धार्म्मिकः। यथा, विराटपर्व्वणि।

"धर्म्मशीलो वदान्यश्च दृढ़श्च सुमहाधनः॥"

धर्म्मसंहिता, स्त्री, (धर्म्मस्य संहिता।) स्मृतिशास्त्रम्। इत्यमरः। १। ६। ६॥

धर्म्मसावर्णिः, पुं, (धर्म्म एव सावर्णिः सूर्य्यपुत्रो मनुः।) एकादशो मनुः। अस्मिन्मन्वन्तरे धर्म्मसेतुवरदाराः। वैधृत इन्द्रः। विहङ्गमकामगमाद्या देवाः। अरुणादयः सप्तर्षयः। सत्यधर्म्मादयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्॥ ●॥

"भविष्यधर्म्मपुत्रस्य सावर्णस्यान्तरं शृणु।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा॥
त्रिप्रकारा भविष्यन्ति एकैकस्मिंश्चको गणः।
मासर्त्तुदिवसा ये तु निर्म्माणरतयस्तु ते॥
विहङ्गमा राजयोऽथ मुहूर्त्ताः कामगो गणः।
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः॥
वृषिर्ज्ञाश्च धनिष्ठश्च ऋषिरन्यस्तथाऽपरः॥
निर्म्मोहवानघश्चैव वृष्टिमान्यो महामुनिः॥
सप्तर्षयोऽत्रैव तस्मिन्नमितेनाथ सप्तमः॥
सर्व्वागुगः सुधर्म्मा च देवानीकः पुरुन्दरः॥
देवधन्वा दृढ़ायुश्च विभानुश्चेत्यसुता नृपाः॥"

इति मार्कण्डेयपुराणम्॥

धर्म्मसारः, पुं, (धर्म्मस्य सारः।) श्रेष्ठपुण्यकर्म्म। यथा। ब्रह्मोवाच।

"धर्म्मसारमहं वक्ष्ये सङ्क्षेपान्मुनि शृणु।
मुक्तिमुक्तिप्रदं कृत्स्नं सर्व्वपापविनाशनम्॥
श्रुतं ब्रह्म बलं धैर्य्यं सुखमृत्युरुहमेव च।
श्लोको हरति वै मर्त्यां तस्माच्छ्लोकं परित्यजेत्॥
कर्म्मदेवाः कर्म्मलोकाः कर्म्मसम्भवबान्धवाः।
कर्म्मैव प्रेरयत्येष पुरुषं सुखदुःखयोः॥
दानमेव परो धर्म्मो दानात् सर्व्वमवाप्यते।
दानान्मुक्तिश्च राज्यञ्च स्वर्गोहानं ततो नरः॥
एकतः क्रतवः सर्व्वे समग्रवरदक्षिणाः।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम्॥
तपसा ब्रह्मचर्य्येण यज्ञेस्त्यागेन वा पुनः।
गतिन्तु लभते जन्तुर्नात्र संशेय यो लभेत्॥
अश्रद्धा परमं पापं श्रद्धा पापप्रणाशिनी।
जहाति पापं श्रद्धावान् जीर्णां त्वचमिवोरगः॥
न पुरावृत्तपुण्यानां नराणामिह दुर्ल्लभः।
जीर्य्यन्तेऽपि प्रयत्नेन श्रद्धादानसमर्थिनः॥
दूरादतिथयो यस्य गृहमायान्त्यवारिताः।
स गृहस्थ इति प्रोक्तः शेषास्तु गृहरक्षकाः॥
न चिन्तयन्ति ये विष्णुं नार्च्चयन्ति च ये नराः।
धर्म्मस्य नाशका ये च ते वै निरयगामिनः॥
ये च होमजपध्यानदेवतार्च्चनतत्पराः।
सत्यशौचदयायुक्तास्ते नराः स्वर्गगामिनः॥
न दाता सुखदुःखानां न च हर्त्तास्ति कश्चन।
स्वकृतान्येव भुज्यन्ते दुःखानि च सुखानि च॥
धर्म्मार्थं जीवितं येषां धर्म्मार्थञ्च मैथुनम्।

देवार्थं तर्पणं येषां दुर्गाद्यभितरन्ति ते ॥
सन्तुष्टः को न प्रयाति फलमूलेश्च जीवितुम् ।
सर्व्व एव हि साम्येन प्रकृटान्यवगाहते ॥
लोभात् क्रोधः प्रभवति लोभाद्द्वेषः प्रवर्त्तते ।
लोभान्मोहश्च माया च मानो मत्सर एव च ॥
रागर्द्द धातृतक्रोधलोभमोहमदोज्झितः ।
यः स शान्तः परं लोकं याति पापविवर्ज्जितः ॥
दैवता मुनयो नागा गन्धर्व्वा गुह्यका नराः ।
धार्म्मिकं पूजयन्तीह न धनाढ्यं न कामिनम् ॥
न मन्त्रबलवीर्य्येण प्रभुत्वा पौरुषेण वा ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥
यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैवं तथा सर्व्वत्र वित्तवान् ॥
सर्व्वसत्त्वदयावन्तं सर्व्वेन्द्रियविनिग्रहः ।
सर्व्वत्रानित्यतुष्टिञ्च श्रेयः परमिदं स्मृतम् ॥
प्रज्ञाग्निवायतो ज्ञातुं यो धर्म्मं नाचरेन्नरः ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥
भ्रूणहा ब्रह्महा गोघ्नः पितृहा गुरुतल्पगः ।
भूमिं सर्व्वगुणोपेतां दत्त्वा पापैः प्रमुच्यते ॥
न गोदानात् परं दानं किञ्चिदस्तीति मे मतिः ।
सा गौर्य्यायाञ्चिता दत्त्वा कृतं तारयते कुलम् ॥
नास्ति दानात् परं दानं किञ्चिदस्ति वदस्व च ! ।
अन्नेन धार्य्यते सर्व्वं चराचरमिदं जगत् ॥
कन्यादानं हयातुर्य्यं जपस्तौर्य्यं श्रुतं तथा ।
हस्त्यश्वरथदानानि मणिरत्नवसुन्धराः ॥
अन्नदानस्य सर्व्वाणि कलां नार्हन्ति षोड़शीम् ।
अन्नात् प्राणो बलं तेजश्चान्नादीर्य्यं इति स्मृतिः ॥
कूपवापीतड़ागादि आरामाणि च कारयेत् ।
त्रिःसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥
साधूनां दर्शनं पुण्यं तीर्थादपि विशिष्यते ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥
सत्यं दमस्तपः शौचं सन्तोषः क्षान्तिरार्জ্জवम् ।
ज्ञानं ध्रुवो दया दानमेष धर्म्मः सनातनः ॥"
इति गारुड़े २२५ अध्यायः ॥

धर्म्मसुतः, पुं, (धर्म्मस्य सुतः ।) युधिष्ठिरराजः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । २ । ७ । १६ ।
"एकान्ते विदुरेणोक्तो राजा धर्म्मसुतः शुचिः ॥"
नरनारायणमुनी । यथा, देवीभागवते । ४ । ७ । १२ ।
"इति सञ्चिन्तयन्तं तं भ्रातरं दीनमानसम् ।
उवाच वचनं तथ्यं नरो धर्म्मसुतोऽनुजः ॥")

धर्म्मस्थः, पुं, (धर्म्मे स्थित इति । स्था + किप् ।) धर्म्माटपक्षी । इति शब्दरत्नावली ॥ (धर्म्मप्रेरके, त्रि । यथा, तैत्तिरीयब्राह्मणे । १ । ७ । ८ । ३ ।
"सोमो राजा वरुणः । देवा धर्म्मसुवश्च ये ॥")

धर्म्मात्मा, [न्] पुं, (धर्म्मे आत्मा स्वभावो यस्य । कुमारपालः । स तु आर्हतविशेषः । इति हेमचन्द्रः । ३ । ३७७ ॥) त्रि, धर्म्मशीलः । यथा,—
"महर्षिर्भगवान् व्यासः कलेर्मां संहितां पुरा ।
श्रोत्रेचतुर्भिर्धर्म्मात्मा पुत्रमध्यापयत् शुकम् ॥"
इति महाभारतम् ॥

धर्म्माधर्म्मपरीक्षणं, क्लो, (धर्म्मश्च अधर्म्मश्च तयोः परीक्षणम् ।) परीक्षाविशेषः । यथा,—
"अधुना संप्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम् ।
हन्तुकामा याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥
राजतं कारयेत् धर्म्ममधर्म्मं सीसकायसम् ।
लिखेत् भूर्জे पटे वापि धर्म्माधर्म्मौ सितासितौ ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्च्चयेत् ।
सितपुष्पस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पकृत् ॥
एवं विधायोपलिप्ते पिष्टयोस्तौ निधापयेत् ।
गोमयेन रहे वापि पिष्टौ कार्य्यौ समन्ततः ॥
रहाङ्कक उपहृते स्थाप्यौ चानुपलक्षितौ ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ॥
आवाहयेत् ततो देवान् लोकपालांश्च पूर्ব্ববत् ॥
धर्म्मावाहनपूर्ব্বन्तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविसृष्टोऽहं धर्म्मस्त्वायातु मे करे ॥
अशुद्धस्त्वेमम करे पापमायातु धर्म्मतः ।
अभियुक्तस्तयोश्चैकं प्रयच्छीताविलम्बितः ॥
धर्म्मे गृहीते शुद्धः स्याद्धर्म्मे तु स ह्रीयते ।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम् ॥"
इति मिताक्षरा ॥

धर्म्माधिकरणं, क्लो, (अधिक्रियते अस्मिन्निति । अधि + कृ + अधिकरणे ल्युट् । धर्म्मस्य अधिकरणम् ।) राज्ञो विचारस्थानम् । यथा,—
"धर्म्मशास्त्रानुसारेण अर्थशास्त्रानिरूपणम् ।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत् ॥"
इति वीरमित्रोदये कात्यायनवचनम् ॥*॥
"पुरुषान्तरतत्त्वज्ञाः प्राज्ञवत्साप्तलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाक्षानकरा नराः ॥"
इति मत्स्यपुराणे १८६ अध्यायः ॥

धर्म्माधिकरणः, पुं, (धर्म्माधिकरणं आश्रयत्वेनास्त्यस्येति । अच् ।) धर्म्माध्यक्षः । तस्य लक्षणम् । यथा, मत्स्यपुराणे १८६ अध्याये ।
"समः शत्रौ च मित्रे च सर्व्वशास्त्रविशारदः ।
विप्रसक्तः कुलीनश्च धर्म्माधिकरणो भवेत् ॥"

धर्म्माधिकरणी, [न्] पुं, (धर्म्माधिकरणं विचार्य्यस्थानत्वेनास्त्यस्येति । धर्म्माधिकरण + इनिः ।) धर्म्माधिकरणविशिष्टः । जज् इति इंराजी भाषा । तत्पर्य्यायः । धर्म्माध्यक्षः २ धार्म्मिकः ३ । इति हेमचन्द्रः । ३ । ३८६ ॥ प्राड्विवाकः ४ अक्षदर्शकः ५ । इत्यमरः । २ । ८ । ५ ॥

धर्म्माध्यक्षः, पुं, (धर्म्मे धर्म्माधिकरणे अध्यक्षः ।) धर्म्माधिकरणी । इति हेमचन्द्रः । ३ । ३८८ ॥
"कुलशीलगुणोपेतः सर्व्वधर्म्मपरायणः ।
प्रवीणः प्रेक्षणाध्यक्षो धर्म्माध्यक्षो विधीयते ॥"
इति चाणक्ये । १०२ ॥
(विष्णुः यथा, महाभारते । १३ । १४६ । २८ ।
"लोकाध्यक्षः सुराध्यक्षो धर्म्माध्यक्षः कृताकृतः ॥"
"धर्म्माधर्म्मौ साक्षादीक्षते अनुरूपं फलं दातुम् । तस्माद्धर्म्माध्यक्षः ।" इति शाङ्करभाष्यम् ॥)

धर्म्मारण्यं, क्लो, (धर्म्माय धर्म्मस्य वा यदरण्यम् ।) पुण्यवनविशेषः । तस्य नामकारणं यथा,—
"स धर्म्मः पीड़ितः सर्व्वैः सोमेनाद्भुतकर्म्मणा ।
तारां जिघृक्षता पत्नीं भ्रातुराङ्गिरसस्य च ॥
सोऽप्यद्याङ्गीकृतस्तेन बलिना क्रूरकर्म्मणा ।
अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः ॥
ब्रह्मोवाच ।
यच्चारण्यमिदं धर्म्म ! त्वया व्याप्तं चिरं विभो ! ।
नाम्ना भविष्यति क्षेत्रमिदं धर्म्मारण्यमिति प्रभो ! ॥"
इति वराहपुराणम् ॥
(गयास्थतीर्थविशेषः । यथा, वायुपुराणे गयामाहात्म्ये ।
"प्रथमेऽह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत् ।
धर्म्मारण्यं तच्च धर्म्मो धर्म्मादृयमकारयत् ॥")

धर्म्मासनं, क्लो, (धर्म्माय व्यवहारकार्य्यसाधनाय यदासनम् ।) विचारासनम् । चेयर् इति इंराजीभाषा । यथा,—
"धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रज्ञाप्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥"
इति मनुः । ८ । २३ ॥

धर्म्मिणी, स्त्री, (धर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥

धर्म्मी, [न्] (त्रि, धर्म्मोऽस्यास्तीति । धर्म्म + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) धर्म्मवान् । पुण्यशीलः । इति शब्दरत्नावली ॥ (पुं, विष्णुः । यथा, महाभारते । १३ । १४६ । ६४ ।
"धर्म्मगुप् धर्म्मकृद्धर्म्मी सदसत्क्षरमक्षरम् ॥"
"धर्म्माधारतया धर्म्मी ।" इति शाङ्करभाष्यम् ॥)

धर्म्मोपदेशकः, पुं, (धर्म्मसुपदिशतीति । उप + दिश + ण्वुल् ।) गुरुः । इति हेमचन्द्रः । २ । ७७ ॥

धर्म्म्यः, त्रि, (धर्म्म + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) धर्म्मादनपेतः । धर्म्मयुक्तः । यथा, श्रीभगवद्गीतायाम् ।
"धर्म्माद्धि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥"
"न्यूनाधिकविभक्तानां धर्म्म्यः पित्र्यः स्मृतः ॥"
इति दायभागः ॥
(धर्म्मेण प्राप्यः । "नौवयोधर्म्मेति ।" ४ । ४ । ९२ । इति यत् धर्म्मलभ्यः । इति सिद्धान्तकौमुदी ॥)

धर्म्म्यविवाहः, पुं, (धर्म्म्यो धर्म्मार्हो विवाहः ।) विवाहविशेषः । स च पञ्चविधः । ब्राह्मदैवार्षगान्धर्व्वप्राजापत्यरूपः । अधर्म्म्यविवाहस्त्रिविधः । असुरराक्षसपैशाचरूपः । यथा,
"धर्म्म्येष्वेव विवाहेषु कालपरीक्षणं नाधर्म्म्येषु ।' इत्युद्धाहतत्त्वम् ॥ (यस्य वर्णस्य यो विवाहो धर्म्म्यः स उक्तो यथा, मनौ । ३ । २१—२५ ।
"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
यो यस्य धर्म्म्यो वर्णस्य गुणदोषौ च यस्य तौ ।
तदः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥
षड़ानुपूर्व्व्या विप्रस्य चतस्रस्य चतरोऽवराः ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्म्यान्न राक्षसान् ॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥
प्रशस्तान् त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह ।

पेशाचराक्षसरक्षेव न कर्त्तव्यौ कदाचन ॥
पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्व्वचोदितौ ।
गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ॥")

धर्षः, पुं. (धर्षणमिति । धृष्+भावे घञ् ।) प्रागल्भ्यम् । (यथा, महाभारते ९।१८६।७।
"यद्येव दर्पाद् धर्षाद्वाप्य ज्ञात्वाज्ञानात्पलात् ।
प्रस्थितो धनुरायन्तुं वार्य्यतां साधु मागमत् ॥")
अमर्षः । शक्तिवन्धनम् । संहतिः । हिंसा । इति धृषधातोर्भावेऽल्प्रत्ययेन साध्यः ॥

धर्षकः, पुं. (धृष्णोति प्रगल्भो भवतीति । धृष्+ण्वुल् ।) नटः । इति शब्दरत्नावली ॥ (अभिभवकर्त्तरि, त्रि. यथा, हरिवंशे।१५३।२४।
"विधार्य्य सर्व्वे यत्नेन मर्षयेते यदधर्षकाः ॥")

धर्षकारिणी, स्त्री, (धर्षं कुलदूषणं करोतीति । कृ+णिनि+ङीप् ।) दूषिता कन्या । इति शब्दरत्नावली ॥

धर्षणं, क्ली, (धृष्+ल्युट् ।) परिभवः । (यथा, महाभारते । ९ । २१४ । १६ ।
"सर्व्वमन्यत् परिक्षन्तं धर्षणन्तु महीपतेः ॥")
रतिः । इति मेदिनी । ने, ५४ ॥ धर्षशब्दार्थोऽप्यत्र ॥

धर्षणिः, स्त्री, (कर्षतीति । कृष+"कृषेरादेश्च धः ।" उणां । २ । १०५ । इति अनिः आदेश्च धः ।) वन्ध्यकी । वृक्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धर्षणी, स्त्री, (धर्षणि+कृदिकारादिति वा ङीष ।) धर्षिणी । असती । इत्यमरटीकायां भरतः ॥

धर्षिणी, स्त्री, (धर्षति हिनस्ति कुलमिति । धृष+णिनि+ङीप् ।) पुंश्चली । इत्यमरः । २ । ६ । १० ॥

धर्षितं, क्ली, (धृष्यतेऽनेनेति । धृष+क्तः ।) रतिः । मैथुनम् । इति त्रिकाण्डशेषः ॥ (धृष+कर्म्मणि क्तः ।) तिरस्कृते, त्रि ॥ (अभिभूतः । यथा, महाभारते । ३ । ५५ । १५ ।
"आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥")

धर्षिता, स्त्री, (धृष्यतेऽसौ । धृष+क्तः । टाप् ।) असती । इति शब्दरत्नावली ॥

धलक्कः, पुं, (दधातीति । धा+डः । धं धारकं लक्कति उत्क्षिपतीति । लक्क उत्क्षेपे+अच् । कुत्वकान्तित्वादस्य तथात्वम् ।) ढक्कवृक्षः । इति शब्दचन्द्रिका ॥ धलक्याँकड़ा इति भाषा ॥

धव, इ त्रजे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ, धन्वाते । त्रजो गतिः । इति दुर्गादासः ॥

धवः, पुं, (धुनोति धवतीति वा । धु धू वा+अच् ।) पतिः । (यथा, हरिवंशे भविष्यपर्व्वणि । १५ । ४५ ।
"मम विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् ।
तस्माच्चाधवनामासि धवः स्वामीति शब्दितः ॥")
नरः । इत्यमरः । ३ । ३ । २०५ ॥ (यथा,—पञ्चतन्त्रे । २ । १०६ ।
"शौचविशिष्टयाप्यस्ति किञ्चित् कार्य्यं कृचिन्मृता ।
निर्धनेन धवेनेह न तु किञ्चित् प्रयोजनम् ॥")
धूर्त्तः । इति मेदिनी । वे, १३ ॥ खनामख्यातवृक्षः । (यथा, महाभारते । १ । ६८ । १७ ।
"विल्वार्कखदिराकीर्णं कपित्थधवसङ्कुलम् ॥")
तत्पर्य्यायः । धुरन्धरः २ शाकटाख्यः ३ । इति रत्नमाला ॥ ढक्करः ४ गौरः ५ कषायः ६ मधुरस्कन्धः ७ शुष्कवृक्षः ८ पाण्डुतरुः ९ धवलः १० पाण्डुरः ११ । अस्य गुणाः । कषायत्वम् । कटुत्वम् । कफानिलनाशित्वम् । पित्तप्रकोपकर्त्तृत्वम् । रुच्यत्वम् । दीपनत्वञ्च । अन्यच्च । शीतत्वम् । प्रमेहार्शःपाण्डुपित्तकफापहत्वम् । मधुरत्वम् । तुवरत्वम् । तिक्तत्वञ्च । तन्नामगुणाः ॥
"धवो घटो नन्दितरुः स्थिरो धौरो धुरन्धरः ।
धवः शीतप्रमेहार्शःपाण्डुपित्तकफापहः ॥
मधुरस्तुवरस्तस्य पत्रञ्च मधुरं मतम् ॥"
इति भावप्रकाशः ॥
तत्पत्रं ह्रैवन्मधुरम् । इति राजनिर्घण्टः ॥ (धु कम्पने+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् । कर्म्मणि ।)

धवलः, पुं, (धावतीति । धाव गु जवगत्योः+"धावतेर्वाकुलकात् डवलच्च ।" १ । १०८ । इत्युज्ज्वलदत्तोक्त्या कलः डवलच्च ।) धववृक्षः । चीनकर्पूरः । इति राजनिर्घण्टः ॥ रागविशेषः । भरतमते हिन्दोलरागस्यात्मजपुत्रः । इति सङ्गीतशास्त्रम् ॥ वृषश्रेष्ठः । शुक्लः । सुन्दरे, त्रि । इत्युणादिकोषः ॥ श्वेतगुणयुक्ते, त्रि । इत्यमरः । १ । ५ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०६ । [पिहिताख्याः ॥")
"धवलनखलक्ष्म दुर्ब्बलमकलितनेपथ्यमलकश्वेतमरिचे, क्ली । इति राजनिर्घण्टः ॥

धवलपक्षः, पुं, (धवलौ शुक्लौ पक्षौ यस्य ।) हंसः । इति राजनिर्घण्टः ॥ (धवलः शुक्लः पक्षः ।) शुक्लपक्षश्च ॥ (शुक्लपक्षविशिष्टे, त्रि । यथा,माघे।
"धवलपक्षविहङ्गमकूजितैः ॥")

धवलपाटली, स्त्री, (धवला पाटली ।) श्वेतपाटलिका । इति राजनिर्घण्टः ॥

धवलवल्लिका, स्त्री, (धवला वल्लिका ।) खटिनी । इति राजनिर्घण्टः ॥

धवलयावनालः, पुं, (धवलो यावनालः ।) यावनालविशेषः । तत्पर्य्यायः । पाण्डुरः २ तारतण्डुलः ३ नक्षत्रकान्तिविस्तारः ४ वृत्तः ५ मौक्तिकतण्डुलः ६ । अस्य गुणाः । गौल्यत्वम् । बल्यत्वम् । वृष्यत्वम् । रुच्यत्वम् । पथ्यत्वम् । त्रिदोषाग्निमुखव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

धवला, स्त्री, (धावतीति । धाव+कलः डवलच्च । अनुदात्तत्वाभावात् न ङीष् ।) शुक्ला गौः । इत्यमरः । २ । ९ । ९७ ॥

धवली, स्त्री, (धवल+गौरादित्वात् ङीष् ।) शुक्ला गौः ॥ इत्यमरः । २ । ९ । ९७ ॥

धवलोत्पलं, क्ली. (धवलमुत्पलम् ।) कुसुदम् । इति राजनिर्घण्टः ॥

धवाग्नकः, पुं, (धुनाति कम्पयति वृक्षादीनीति । धू+"आग्नको लघूग्निन्धिधाग्भ्यः ।" उणां ३ । ८३ । इति आग्नकः ।) वायुः । इत्युणादिकोषः ॥

धवित्रं, क्ली, (धूयतेऽनेनेति । धू+"अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) नगचर्म्मरचितव्यजनम् । इत्यमरः । २ । ७ । २३ ॥

धा, डु ञ् लि धारणे । पुष्टौ । दाने । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-अनिट् ।) डु, हित्रिमम् । ञ लि, दधाति धत्ते । धारणं धरणम् । दाने, दिवता विहितं त्वयायवेति किराते विहितं दत्तमित्यर्थः । इति दुर्गादासः ॥

धाः, पुं, (दधातीति । धा+क्विप् ।) ब्रह्मा । धारकः । इति मेदिनी । धे, १ ॥ बृहस्पतिः । इत्येकाक्षरकोषः ॥

धाकः, पुं, (दधातीति । धा+"ऋदाधारार्च्चिकलिभ्यः कः ।" उणां ३ । ४० । इति कः ।) वृक्षः । आधारः । इत्युणादिकोषः ॥ अन्नम् । स्तम्भः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (आधारः । इत्युज्ज्वलदत्तः ॥)

धाटी, स्त्री, शुनुसम्मुखगमनम् । तत्पर्य्यायः । प्रपातः २ अभ्यवस्कन्दः ३ अभ्यासादनम् ४ । इति हेमचन्द्रः । ३ । ४६४ ॥

धाणकः, पुं, (दधातीति । धा+"आग्नको लघूग्निन्धिधाग्भ्यः ।" उणां ३ । ८३ । इति आग्नकः ।) दीनारभागः । इत्युणादिकोषः ॥

धातकी, स्त्री, (धातुं करोतीति । धा+तत्करोतीति णिच् । टिलोपः । ततः कुन् । ततः पिप्पलादित्वात् ङीष् ।) पुष्पविशेषः । धाइफुल इति भाषा । तत्पर्य्यायः । बह्विपुष्पी २ ताम्रपुष्पी ३ धावनी ४ अग्निज्वाला ५ सुभिक्षा ६ पार्व्वती ७ बहुपुष्पिका ८ कुसुदा ९ सौधुपुष्पी १० कुञ्जरा ११ मद्यवासिनी १२ गुच्छपुष्पी १३ संधपुष्पी १४ रोधपुष्पिणी १५ तीव्रज्वाला १६ वह्निशिखा १७ मद्यपुष्पा १८ । इति राजनिर्घण्टः ॥ धाल्पुष्पी १९ धातुपुष्पी २० धाल्पुष्पिका २१ धात्री २२ धातुपुष्पिका २३ । इति शब्दरत्नावली ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मदकारित्वम् । विषप्रवाहिकातिसारविसर्पव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ शीतत्वम् । रक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

धाता, [तृ] पुं, (दधातीति । धा+तृच् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, रघुः । १० । ४३ ।
"धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात् सर्गादवध्यत्वं मर्त्त्येभ्यस्त्यागराङ्मुखः ॥")

विष्णुः। इति हलायुधः॥ (यथा, महाभारते। १३। १४६। ११५।
"आधारनिलयो धाता पुष्पहासः प्रजागरः॥"
"संहारसमये सर्व्वाः प्रजा धयति पिबतीति वा धाता। धेट् पाने इति धातुः।" इति भाष्टर-भाष्यम्॥ महादेवः। यथा, तत्रैव।३३।१०।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥")
भृगुमुनिपुत्रः। तस्य भार्य्या मेरुकन्या आयतिः। तस्य सुतः रुकदुः तस्य च मार्कण्डेयः। इति श्रीभागवतम्॥ ऊनपञ्चाशद्वायूनामन्यतमवायुविशेषः। यथा, वह्निपुराणे गजमेदनामाध्याये।
"धाता दुर्गो धितिर्भौमखभियुक्तस्त्वपात्यजः।
द्युतिर्वपुरनाथ्योयवासः कामो जयो विराट्॥
रत्नकोनाच मध्याग्नमरतः पूर्व्वसम्भवाः॥"
(आदित्यविशेषः। यथा, महाभारते। १। ६५। १४-१५।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः।
ये राजन्! नामतस्तांस्ते कीर्त्तयिष्यामि भारत!॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च॥"
ब्रह्मणः पुत्रविशेषः। यथा, महाभारते। १। ६६। ५१।
"द्वौ पुत्रौ ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम्।
लोके धाता विधाता च यौ स्थितौ मनुना वृतौ॥")
पालके, त्रि। इति मेदिनी। ते, २७॥ धारकः। इति धरणिः॥

धातुः, पुं, (धीयते सर्व्वमस्मिन्निति। धा+"सितनिगमीति।" उणा। १। ७०। इति तुन्।) शरीरधारकवस्तुनि। तद्यथा। कफः। वातः। पित्तम्।
"शरीरदूषणाद्दोषा मलिनीकरणान्मलाः।
धारणाद्धातवस्ते स्युर्वातपित्तकफाख्यः॥"
इति वैद्यकम्॥
("रसाद्रक्तं ततो मांसं मेदोऽस्थिमज्जशुक्राणि धातवः। सप्त दूष्याः मलास्त्वक्शुक्रतृक्स्वेदादयोऽपि च॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये॥
धातुशब्देनात्र शुक्रार्त्तवे अभिधीयते तद् यथा।
"तथाहि पुष्पसंकुलस्तो गन्धो न शुक्रमिहास्तीति वक्तुं नैव शक्यते यथा सतां भावानां अभिव्यक्तिरिति ज्ञात्वा केवलं सौष्म्यात्तदभिधत्ते स एव गन्धो विकसितपद्मकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयःपरिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोयौवनविशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोरभिवृद्धिर्भवति। स एवान्तरस्थो वृद्धानां जराग्रस्तशरीरत्वात् प्रीणनो भवति। त एते शरीरधारणाद्धातव उच्यन्ते॥" इति सुश्रुते सूत्रस्थाने १४ अध्यायः॥
अथ धातुशब्दस्य निरुक्तिमाह।
"एतं सप्त स्वयं स्थित्वा देहन्धारयति यद्गुणान्।
रसाद्रक्तं ततो मांसमेदोऽस्थिमज्जशुक्राणि धातवः॥"
अथ धातूनां कर्म्माण्याह।
"प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे।
गर्भोत्पादश्च कर्म्माणि धातूनां कथितानि हि॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रसः। रक्तम्। मांसम्। मेदः। अस्थि। मज्जा। शुक्रम्। महाभूतानि। तद्यथा। पृथिवी। जलम्। तेजः। वायुः। आकाशः। तद्गुणाः यथा। गन्धः। रसः। रूपम्। स्पर्शः। शब्दः। इन्द्रियाणि यथा। चक्षुः। श्रोत्रम्। घ्राणम्। जिह्वा। त्वक्। अक्षविप्तिः। सा तु शैरिकमनःशिलादि। (यथा, कुमारे। १। ४।
"अकाण्डसन्ध्यामिव धातुमत्ताम्॥")
शब्दयोनिः। सा च धातुशब्दप्रकृतिः। भूपचपठप्रभृतिः। स्वर्णादिः। इत्यमरभरतौ॥ *॥ यथा, शब्दमालायाम्।
"सुवर्णरूप्यमाक्षिकहरितालमनःशिलाः।
शैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः॥
नान्वकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः॥"
नव धातवो यथा, सुखबोधे।
"हेमतारारनागाश्च ताम्रवङ्गे च तीक्ष्णकम्।
कांस्यकं कान्तलौहञ्च धातवो नव कीर्त्तिताः॥"
अष्टधातवो यथा, दानसागरे।
"हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च।
रङ्गमायसरैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः॥"
अपि च वैद्यके।
"सुवर्णं रजतं ताम्रं लौहं कृष्णञ्च पारदम्।
वङ्गञ्च सीसकञ्चैव रत्नष्टौ देवसम्भवाः॥"
सप्तधातवो यथा, भावप्रकाशे।
"स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशोदमेव च।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः॥"
ताम्राद्युत्पत्तिर्यथा,—
"ब्रूहि तत्त्वेन मे भूमे! कथमुत्पन्नं मयानघे!।
एकाग्रं चित्तमाधाय येन ताम्रं मम प्रियम्॥
पूर्व्वं कमलपत्राक्षि! गुडाकेशो महासुरः।
ताम्ररूपं समादाय ममैवाराधने रतः॥
तच्च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना।
गुडाकेश! महाभाग ब्रूहि किं करवाणि ते॥
चक्रेण वधमिच्छामि त्वया सुरुचिरेण केशव!।
वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशीम्॥
मम तेजोमयं चक्रं बाधयिष्यत्यसंशयम्।
तदेव चक्रेण विपाटितोऽसौ
प्राणोऽपि मां भागवतप्रधानः॥
ताम्रन्तु तत्कांसमरुक्सुवर्ण-
मर्णांसि रूप्यं बहुधातवश्च।
रङ्गश्च सीसं चपुधातुसंज्ञं
कांस्यञ्च रीतिश्च मलस्तु तेषाम्॥
एतद्भागवतैः कार्य्यं मम प्रियकरैः सदा।
एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत्॥"
इति वराहपुराणम्॥ *॥
"हरितालं हरेर्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला।
पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः॥"
इति वैद्यकम्॥ *॥

सप्तोपधातवो यथा,—
"माक्षिकं तुत्थिकाभ्रे च नीलाञ्जनशिलालकाः।
रसकश्चेति विज्ञेया एते सप्तोपधातवः॥" *॥
शरीरस्थसप्तधातुभवसप्तोपधातवो यथा,—
"स्तन्यं रजश्च नारीणां काले भवति शुक्लति।
शुद्धमांसभवः स्नेहो यः सा संकीर्त्यते वसा॥
स्नेहो दन्तास्तथा केशाश्मश्रुस्वेदोऽथ सप्तमम्।
इति धातुभवा ज्ञेया एते सप्तोपधातवः॥"
इति सुखबोधः॥
धातुकासीसं, क्ली, (धातुरूपं कासीसम्।) कासीसम्। इति हेमचन्द्रः। ४। १२२॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"कासीसं धातुकासीसं हरितं तच्च लोहितम्॥")
धातुघ्नं, क्ली, (धातुं स्वर्णादिकं हन्तीति। हन+टक्।) काञ्जिकम्। इति हेमचन्द्रः।३।८०॥
धातुनाशनं, क्ली, (धातुं स्वर्णादिकं नाशयतीति। नश्+णिच्+ल्युः।) काञ्जिकम्। इति त्रिकाण्डशेषः॥
धातुपः, पुं, (धातुं अस्थिमज्जामांसोत्पादकपदार्थविशेषं पाति रक्षतीति। पा+कः।) शरीरस्थप्रथमधातुः। रस इति ख्यातः। इति शब्दचन्द्रिका॥
धातुपुष्पिका, स्त्री, (धातुरिव पुष्पं यस्याः। जातौ ङीष्। स्वार्थे कन् पूर्व्वह्रस्वः। यद्वा कप्। टापि अत इत्वम्।) धाइपुष्पिका। इति शब्दरत्नावली। धाइफुल इति भाषा॥
धातुपुष्पी, स्त्री, (धातुरिव पुष्पमस्याः। जातित्वात् ङीष्।) धातकी। इति भावप्रकाशः॥
धातुभृत्, पुं, (धातुं शैरिकादिकं बिभर्त्तीति। भृ+क्विप्। तुगागमश्च।) पर्व्वतः। इति शब्दरत्नावली॥ धातुपोषके, त्रि॥
धातुमाक्षिकं, क्ली, (धातुरूपं माक्षिकम्।) माक्षिकम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"माक्षिकं धातुमाक्षिकं ताप्यं ताप्युत्थसंज्ञकम्॥")
धातुमारिणी, स्त्री, (धातुं स्वर्णादिकं मारयतीति। मृ+णिच्+णिनि+ङीप्।) सर्ज्जिका। इति शब्दचन्द्रिका। सोहागा इति भाषा॥
धातुराजकं, क्ली, (धातुषु राजते इति। राज+क्विप्। यद्वा, धातूनां राजा इति समासान्तः टच्। ततः स्वार्थे कन्।) रेतः। इति शब्दचन्द्रिका॥
धातुवल्लभं, क्ली, (धातुषु वल्लभम्।) टङ्कणम्। इति राजनिर्घण्टः॥ (टङ्कणशब्दोऽस्य गुणादिकं ज्ञेयम्॥)
धातुवादी, [न्] पुं, (धातुं वदति उपायान्तरेण कर्त्तुं कथयतीति। वद+णिनिः।) कारन्धमी। इति हारावली। १८६॥
धातुवैरी, [न्] पुं, (धातूनां वैरीव दूषकत्वात्।) गन्धकः। इति शब्दचन्द्रिका॥
धातुश्रेष्ठरं, क्ली, (धातूनामुपधातूनां श्रेष्ठरमिव श्रेष्ठत्वात्।) कासीसम्। इति हेमचन्द्रः। ४। १२२॥

धातूपलः, पुं, (धातुः उपधातुरूप उपलः पाषाणः।) कटिनिका। इति हारावली।२१२॥
धात्रपुत्रः, पुं, (धातुर्ब्रह्मणः पुत्रः।) सनत्कुमारः। इति शब्दरत्नावली॥ ब्रह्मजः सुतमात्रश्च॥
धात्रपुष्पिका, स्त्री, (धात्रपुष्पी। स्वार्थे कन् पूर्व्वह्रस्वः। यद्वा, कप्। टापि अत इत्वम्।) धातकी। इत्यमरः। २। ४। १२४॥
धात्रपुष्पी, स्त्री, (धात्र पुष्पिकर्त्तृ पुष्पमस्याः। ङीप्।) धातकी। इति शब्दरत्नावली॥
धात्रं, क्ली, (धीयते अन्नाद्यमत्रेति। धा+आधारे ष्ट्रन्।) भाजनम्। इति संक्षिप्तसारोणादिवृत्तिः॥
धात्रिका, स्त्री, (धात्री। स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) आमलकी। इति राजनिर्घण्टः॥
धात्री, स्त्री, (धीयते पीयते इति। धेट पाने+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति कर्म्मणि ष्ट्रन्। णित्वात् ङीष्। अस्या स्तनदुग्धपानात्तथात्वम्। यद्वा, दधाति धरतीति। धा+ष्ट्रच्+ङीप्।) माता। (यथा, याज्ञवल्क्यसंहितायाम्। ३। ८२।
"पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति।
अष्टमे मास्यतो गर्भो जातः प्राणैर्विमुच्यते॥") उपमाता। (यथा, रघुः। १०। ७८।
"कुमाराः क्षतसंस्कारास्ते धात्रीस्तनपायिनः।
आन्दोलनायसैनेव सभं वर्द्धिरे पितुः॥"
(कुमाररक्षाकर्त्री। धाइ इति भाषा॥ तस्या परीक्षा यथा,"अतो धात्रीपरीक्षामुपदेक्ष्यामः। अथ ब्रूयात् धात्रीमानयेति समानवर्णां यौवनस्थां निश्चितामनातुरामयङ्गामव्यङ्गनामविरूपामजुगुप्सितां देशजातीयामक्षुद्रां अक्षुद्रकर्म्मिणीं कुले जातां वत्सलां जीववत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामप्रायिनीमनुचारप्रायिनीमनन्तावग्रायिनीं कुशलोपचारां शुचिमशुचिदेषिणीं स्तन्यसम्पदुपेतामिति।"
"धात्री तु यदा स्वादुबहुलशुद्धदुग्धा स्यात्तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधायेन्द्रीं ब्राह्मीं ध्रुवधीर्य्यां सहस्रवीर्य्यां मोघामयघ्नीं शिवामरिष्टां वाद्यपुष्पीं विष्वक्सेनकान्तामिति विमन्त्र्याधोः कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेदिति धात्रीकर्म्म।" इति चरके शारीरस्थानेऽष्टमेऽध्याये॥*॥ (दधाति धारयति सर्व्वमिति। धा+ष्ट्रच्+ङीप्।) क्षितिः। (गायत्रीस्वरूपिणी भगवती। यथा, देवीभागवते। १२। ६। ७८।
"धात्रीधनुर्धरा धेनुर्धारिणी धर्म्मचारिणी॥"
गङ्गा। यथा, काशीखण्डे। २६। ६२।
"धर्म्मोर्म्मिवाहिनी धुर्य्या धात्री धात्रीविभूषणम्॥")
आमलकीवृक्षः। इति मेदिनी। रे, ४६॥
(अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"धात्री कर्षफला तिष्या वयस्यामलकी शिवा॥")

अथ धात्र्याद्युत्पत्तिकारणम्।

वृन्दारमरवान्नुग्धस्य विष्णोर्मोहापनोदाय ब्रह्मवाक्यादाद्यां भक्तिं स्तुवतो देवान् प्रति सा आह।

"अहमेतत्त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ताः सुराः।
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः॥
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तदा।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठते॥
निर्विघ्नं ततः कार्य्यं भवतां सिद्धिमेष्यति।
त्रिभ्यश्चैव बीजेभ्यो वनस्पत्यः स्त्रियोऽभवन्॥
धात्री च मालती चैव तुलसी च नृपोत्तम!।
धात्युद्भवा स्मृता धात्री माधवा मालती स्मृता॥
गौर्याभवा च तुलसी तमःसत्त्वरजोगुणाः।
स्त्रीरूपिण्यो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप!॥
उत्तस्थौ सम्भ्रमादुत्थारुत्पातिग्रयविधमात्॥"
अस्या माहात्म्यं यथा,—
"शृणुष्व धात्रीमाहात्म्यं सर्व्वपापहरं शुभम्।
यत् पुरा हरिणा प्रोक्तं वह्निं प्रति नारद!॥
धात्री वत्स! शृणां धात्री मातृवत् कुरुते कृपाम्।
ददात्यायुः पयः पानं स्नानाद्धे धर्म्मसञ्चयम्॥
अलक्ष्मीनाशनं सद्योऽप्यन्ते निर्व्वाणमेव च।
विघ्नानि नैव जायन्ते धात्रीस्नानेन वै नृणाम्॥
तस्मात् त्वं कुरु विप्रेन्द्र! धात्रीस्नानं हि यत्नतः।
प्रयास्यसि हरेर्धाम देवैरपि सुदुर्लभम्॥
यत्र यत्र मुनिश्रेष्ठ! धात्रीस्नानं समाचरेत्।
तीर्थे वापि गृहे वापि तत्र तत्र श्रियः स्थिताः॥
धात्रीस्नानानि दिवसे यस्यास्थीनि कलेवरे।
प्रक्षालितानि विप्रेन्द्र! न स स्याद्गर्भसम्भवः॥
धात्रीफलेन विप्रेन्द्र! येषां केशाश्च रञ्जिताः।
ते नराः केशवं यान्ति नास्यित्वा कलेर्मलम्॥
धात्रीफलं महापुण्यं स्नाने पुण्यतरं स्मृतम्।
पुण्यात् पुण्यतरं वत्स! भक्षणे मुनिपुङ्गव!॥
न गङ्गा न गया पुण्या न काशी न च पुष्करम्।
एकैव च यथा पुण्या धात्री माधववासरे॥
कार्त्तिके मासि विप्रेन्द्र! धात्रीस्नानं समाचरेत्।
यच्च तज्जन्मशतीयात् सोऽश्वमेधमवाप्नुयात्॥
धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम!।
प्राग्जन्मनि कृतात् पापात् मुच्यते नात्र संशयः।
संस्मरेद्यस्तु धात्रीं तामहन्यहनि मानवः॥
मुच्यते पातकैः सर्व्वैर्मनोवाक्कायसम्भवैः॥
धात्रीफलान्यमावास्यामष्टमीनवमीषु च।
रविवारे च संक्रान्तौ संस्मरेन्मुनिपुङ्गव!॥
यस्य गेहे मुनिश्रेष्ठ! धात्री तिष्ठति सर्व्वदा।
तस्य गेहं न गच्छन्ति प्रेतकूष्माण्डराक्षसाः॥
धात्रीस्नाने हरेर्नाम्नि जागरे हरिवासरे।
जन्मबन्धो विनश्येत हयमेधायुतं फलम्॥
स्नायादामलकैर्यस्तु कार्त्तिके हरिवत्सल!।
परितोषं समायाति तस्य वै माधवः स्वयम्॥
धात्रीच्छायां समासाद्य कुर्य्यात् श्राद्धन्तु यो मुने!।
मुक्तिं प्रयान्ति पितरः प्रसादात्तस्य वै हरेः॥
मुक्तिं धात्रीफलं यस्तु स महात्मा च पुण्यभाक्॥
धत्ते धात्रीफलं यस्तु स महात्मा च पुण्यभाक्॥

धात्रीफलविलिप्ताङ्गो धात्रीफलावभूषितः।
धात्रीफलकृताहारो नरो नारायणो भवेत्॥
यः कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं मुने!।
प्रियो भवति विष्णोः स मनुष्याणाञ्च का कथा॥
धात्रीफलानि यो नित्यं वहते करसंपुटे।
तस्य नारायणो देवो वरमेकं प्रयच्छति॥
धात्रीफलं न मोक्तव्यं कदाचित् करसंपुटात्।
यः कश्चिद्दिपुलान् भोगानन्ते यो मुक्तिमिच्छति॥
धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि।
स वैष्णवो न विज्ञेयो विष्णुभक्तिपरोऽपि च॥
न त्याज्या तुलसीमाला धात्रीमाला विशेषतः।
तथा रुद्राक्षमालापि धर्म्मकामार्थमिच्छता॥
यावन्मुञ्चति कण्ठस्था धात्रीमाला नरस्य हि।
तावन्मनसि कृत्स्नोऽपि सदा मुञ्चति केशवः॥
यावद्दिनानि वहते धात्रीमालां करे नरः।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत्॥
सर्व्वदेवमयी धात्री वासुदेवमनःप्रिया।
आरोपणीया सेव्या च सेचनीया सदा बुधैः॥
एतत्ते सर्व्वमाख्यातं धात्र्या माहात्म्यमुत्तमम्।
श्रोतव्यञ्च सदा सद्भिश्चतुर्व्वर्गफलप्रदम्॥"

इति पाद्मोत्तरखण्डे १२७ अध्यायः॥

अपि च।

"तुलसीदृक्समाश्रित्य या यास्यिष्ठन्ति देवताः।
आमलक्या अपि प्राज्ञ! ताश्चा एव वसन्ति च॥
अशुभं वा शुभं वापि यत् कर्म्मामलकीतले।
क्रियते मानवैर्विप्र! भवेत्तत् सर्व्वमक्षयम्॥
पवित्रैर्नूतनैः पत्रैर्धात्र्या यः पूजयेद्धरिम्।
स मुक्तः पापजालेन सायुज्यं लभते हरेः॥
धात्री च तुलसी देवी न तिष्ठेद्यत्र जैमिने!।
स्थानं तदपवित्रं स्यान्न च पुण्यक्रिया फलेत्॥
धात्र्या हीनं तुलस्या च निलयं यस्य भूसुर!।
अलक्ष्मीः पातकं सर्व्वं कलिश्च तेन तोषितः॥
धात्रीकाष्ठस्य मालाञ्च यो वहेन्नतिमान्नरः।
तत् सर्व्वमक्षयं प्रोक्तं शुभं वाशुभमेव वा॥
यस्तु धात्रीफलं शुष्कं भक्षयेन्मानवोऽखिलतत्त्ववित्।
तद्देहाभ्यन्तरस्थानि सर्व्वं पापं विनश्यति॥
धात्रीफलमयीं मालां वहते द्विजसत्तमः।
ब्रवीमि ब्रह्मणो मात्रात्मं सर्व्वपापहरं शुभम्॥
श्मशानेऽपि यदा स्थित्वस्तस्य स्याद्देवयोगतः।
गङ्गास्नानजं पुण्यं स प्राप्नोति न संशयः॥
नित्यं यजति यो धात्रीतुलसीमूलकर्द्दमम्।
दिने दिने लभेत् पुण्यं सोऽश्वमेधशतोद्भवम्॥
धात्रीतरुञ्च यो हन्ति सर्व्वदेवगणाश्रयम्।
स दहति हरेरङ्गे घातं नास्त्यत्र संशयः॥
सर्व्वदेवमयी धात्री विशेषात् केशवप्रिया।
सत्यवक्त्रं गुणं तस्या ब्रह्मणापि न शक्यते॥"

इति क्रियायोगसारे २३ अध्यायः॥

यथा स्कान्दे।

"न धात्री सदृशा यत्र न विष्णोस्तुलसीदलम्।
तं क्षेत्रदेशं जानीयात् यत्र गायन्ति वैष्णवाः॥")

इत्येकादशीतत्त्वम्॥

अथ धात्रीसेचनफलम्।
"पिता पितामहाश्चान्ये पुत्रा ये च गोत्रिणः।
वृक्षयोनिं गता ये च ये च कीटत्वमागताः॥
रौरवे नरके ये च महारौरवसंज्ञके।
विद्योनिञ्च गता ये च ये च ब्रह्माण्डमध्यगाः॥
पिशाचत्वं गता ये च ये च प्रेतत्वमागताः॥
ते पिबन्तु मया दत्तं धात्रीमूले सदा पयः॥
ते सर्व्वे तृप्तिमायान्तु धात्रीमूलनिषेचनात्॥
इति धात्रीं समभिषिच्य वारानष्टोत्तरं शतम्।
तान्त्र प्रदक्षिणीकृत्य कुर्य्याज्जागरणं व्रती॥
जागरञ्चानु प्रक्रान्तव्रतविषयम्।" इति श्रीहरिभक्तिविलासे १३ विलासः॥

धात्रीपत्रं, क्ली, (धात्रीपत्रमिव पत्रमस्य।) तालीशपत्रम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"तालीशं सुस्नग्धाढ्यं धात्रीपत्रञ्च तत् स्मृतम्॥"
धात्र्याः पत्रम्।) आमलकीदलञ्च॥

धात्रीपुत्रः, पुं, (धात्र्या उपमातुः पुत्रः।) वटः। इति हेमचन्द्रः। २।२४२। उपमातृसुतश्च॥

धात्रीफलं, क्ली, (धात्र्या आमलक्याः फलम्।) आमलकी। इति जटाधरः॥ (विवरणमामलकीशब्दे ज्ञातव्यम्॥)

धात्रेयिका, स्त्री, (धात्रेयी+स्वार्थे कन् टाप्। पूर्व्वह्रस्वश्च।) धात्री। धाइ इति भाषा। यथा, तिथितत्त्वे चतुर्थीप्रकरणे।
"पठेद्धात्रेयिकावाक्यं प्राज्ञको वाप्युदङ्मुखः॥"

धात्रेयी, स्त्री, धात्रीशब्दात् स्वार्थे (ढक्) ङीप्(ङीष्)-प्रत्ययेन निष्पन्ना॥ धात्रेयिका। (यथा, देवीभागवते। २। ६। ३२।
"करे श्लाघ्ये धात्रेयी तावच्च सुलक्षिताम्।
कां चिन्तां करभोरु! त्वमाधत्सेऽस्य क्षितासाग्रम्॥")

धानकं, क्ली, (धान्याकं पृषोदरादित्वात् साधुः।) धान्याकम्। इति राजनिर्घण्टः॥ (अस्य विषयो यथा, वाभटे चिकित्सास्थाने नवमेऽध्याये,
"ग्रैष्मातिसारवातोत्थं विशेषादामपाचनम्।
कर्षेयमनुवस्यस्य पिबेत् पञ्चाग्निदीपनम्॥
बिल्वकर्कटिकासुक्तप्राक्तरा विल्वमेव वा॥")

धाना, स्त्री, (धीयते इति। धा+"धापॄवस्यज्यतिभ्यो नः।" उणा। ३। ६। इति नः टाप् च।) भक्ष्यवः। धान्यकम्। (पर्य्यायो यथा,
"धान्यकं धानकं धान्यं धाना धानेयकन्तथा।
कुनटी धेनुकाच्छत्रा कुस्तुम्बुरु वितुन्नकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) आनभवः। अङ्कुरः। भिन्नः। पूर्व्वसक्तवः। इति मेदिनीहेमचन्द्रौ॥

धानाः, स्त्री, (धीयन्ते इति। धा+"धापॄवस्यज्यतिभ्यो नः।" उणा। ३। ६। इति नः टाप् च।) भक्ष्यवः। बहुवचनान्तोऽयं शब्दः। इत्यमरः। २। ६। ४०॥ (यथा, ऋग्वेदे। ३। ३५। १।
"यसेतामश्वा वि सुचेह शोणा दिवे दिवे ईड्यो रहिर्धानाः॥"
"तन्तु सक्थ्नोरेकरूपान् धाना भक्ष्यवान् दिवे दिवे प्रतिदिवसमहि भक्षय।" इति तद्भाष्ये सायणः।)
"यवास्तु निस्तुषा भृष्टाः स्रुता धाना इति स्त्रियाम्।
धानाः खुर्ज्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः॥
तथा मेदःकफच्छर्द्दिनाशन्यः संप्रकीर्त्तिताः॥"
इति राजनिर्घण्टः॥
("धानासंज्ञास्तु मे भक्ष्याः प्रायस्ते लेखनात्मकाः।
शुष्कत्वात्तर्षणा चैव विष्टम्भिताश्च दुर्ज्जराः॥
विरूढधानाः ग्रथ्नुल्यो मधुक्रोड़ाः सपिष्टकाः।
क्षपाः पूपलिकाद्याश्च गुरवः पैष्टिकाः परम्॥"
"धाना पर्पटपूपाद्यास्तान् बुद्धा निर्द्दिशेत्तथा॥"
इति चरके सूत्रस्थाने २७ अध्यायः॥)

धानाकाः, स्त्री, (धाना+स्वार्थे कन् टाप्।) धानाः। नित्यबहुवचनान्तोऽयं शब्दः। इति शब्दरत्नावली॥

धानाचूर्णं, क्ली, (धानानां चूर्णम्।) भक्ष्यवचूर्णम्। सक्तवः। इति हेमचन्द्रः। २। ६५॥

धानी, स्त्री, (धीयते धार्य्यतेऽत्र। धा+आधारे ल्युट्। टिलातुङीप्।) आधारः। यथा, मत्स्यधानी राजधानी। इत्यादि भरतः॥ पौलुत्सः। इति राजनिर्घण्टः॥

धानुष्कः, त्रि, (धनुः प्रहरणमस्येति। धनुः+तदस्य इत्यधिकत्वे "प्रहरणम्।" ४। ४। ५७। इति ठक्। यद्वा, धनुषा जीवतीति। "वेतनादिभ्यो जीवति।" ४। ४। १२। इति ठक्।
"इसुसुक्तान्तात् कः।" ७। ३। ५१। इति ठस्य कः।) धनुर्द्धरः। इत्यमरः। २। ८। ६६॥ (यथा, महाभारते। ६। २०। १७।
"अन्येन्ये दृढ़ धानुष्का धानुष्के दृढ़चर्म्मिणः।
एवं व्यूढ़ान्यनीकानि भीष्मेण तव भारत!॥")

धानुष्का, स्त्री, (धनुरिव अवयवोऽस्या इति ठक् टाप् च।) अपामार्गवृक्षः। इति शब्दचन्द्रिका। (अपामार्गशब्दे विवरणं ज्ञातव्यम्॥)

धानुष्कः, पुं, (धनुषि साधुरिति। धनुष्+अण्।) वंशः। इति राजनिर्घण्टः॥

धानेयं, क्ली, (धाना एव। स्वार्थे ढक्।) धान्याकम्। इति राजनिर्घण्टः॥

धानेयकं, क्ली, (धानेय+स्वार्थे कन्।) धान्याकम्। इति जटाधरः॥

धान्या, स्त्री, पृथ्वीका। इति शब्दचन्द्रिका॥ एलादृश इति भाषा॥

धान्यं, क्ली, चतुस्तिलपरिमाणम्। इति शुभङ्करः। धान्याकम्। धनीया इति यस्य भाषा। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"धान्याकं धान्यकं धान्यं कुस्तुम्बुरुधनीयकम्।
धन्या कुस्तुम्बुरी चान्या वेधलोया वितुन्नकम्॥")
परिपेलम्। (धाने भवे साधु इति। धान+"तत्र साधुः।" ४। ४। १८। इति यत्।
यद्वा, दधातीति। धा+"दधातेर्यन् डुट् च।" उणा। ५। ४८। इति यन् डुट् च।) सस्यतण्डुलादि। धान इति भाषा॥ तत्पर्य्यायः। भोग्यम् २ भोगार्हम् ३ अन्नम् ४ अद्यम् ५ जीवसाधनम् ६ सम्भरिः ७ श्रीहिः ८। (यथा, ऋग्वेदे। ६। १३। ४।
"विश्वं स देव प्रति वारमर्ये धत्ते धान्यं पयते वसवे॥")
तत्र शूकधान्यगुणः। त्रिदोषघ्नमनल्पम्। तेजोबलातिघ्नयवीर्य्यबृंहिदाहत्वच्च॥* ॥ शमीधान्यगुणाः। गुरुत्वम्। हिमत्वम्। विष्टम्भित्वञ्च॥* ॥ शुण्ठधान्यगुणः। वातात्मकत्वम्। श्लिग्धरत्वञ्च। इति राजनिर्घण्टः॥ * ॥ धान्यं त्रिविधम्। हैमन्तीकञ्च ग्राम्यं१ शैलजः यष्टिकः २ प्रावृट् कालभव आयुः ३। एतेषां गुणास्तत्तद्ग्रन्थे द्रष्टव्याः॥* ॥ वापितधान्यगुणः। गुरुत्वम्॥ अवापितधान्यगुणः। वापितधान्यगुणात् किञ्चिद्धीनः॥ * ॥ रोप्यातिरोप्यधान्यगुणाः। लघुत्वम्। ग्रीष्मपाकित्वम्। गुणोत्तरत्वम्। अदाहित्वम्। दोषहरत्वम्। बल्यत्वम्। मूत्रविबद्धनत्वञ्च॥ * ॥ नवं धान्यं अभिष्यन्दि। संवत्सरोत्थितं धान्यं लघु। संवत्सरपरद्यार्द्धं धान्यं वातप्रकोपि रूक्षं लघुतरं पुंस्त्वघाति। शूकधान्यं शमीधान्यञ्च वत्सरादूर्द्धं प्रशस्तम्। शमीधान्यं वर्षादतीतं वातलञ्च रूक्षम्। अभिनवं तत्प्रायेण गुरु। नवा यवगोधूममाषतिला हिताः। पुराणा विरसा रूक्षा न तथार्थकराः॥ अनार्त्तवं आधिहृतं अपर्य्याप्तं अभूमिजं नवञ्च धान्यं न गुणवत्॥ अकालजातं धान्यं विरसं सर्व्वधातुप्रदूषणञ्च। इति राजवल्लभः॥ * ॥ व्रतादौ अन्नत्यागे वर्जनीयधान्यानि यथा,—
"एकादश्यां विशेषेण स्नानमात्रं परित्यजेत्।
फलं मूलं जलादीनि किञ्चिद्भक्ष्यं प्रकल्पयेत्॥
अन्नन्तु धान्यसम्भूतं गिरिजे यदि जायते।
धान्यानि विविधान्यीह जगत्यां हरयु यत्नतः॥
श्यामाश्यामकराज धान्यकोद्रवसर्षपाः।
सुरको राजमाषाश्च तुसरी तुमरस्तथा॥
यवगोधूमसस्ताश्च तिलकङ्गुकुलत्थकाः।
गवेधुकाश्च नीवारा आतकश्च कलायकाः॥
माकुको वनकोरङ्गः कीचको वड़कस्तथा।
तिलकाश्चणकाद्याश्च धान्यानि कथितानि वै॥
रङ्गकान्यसमुद्भूतमन्नं भवति शोभने!।
अन्नत्यागे व्रते भक्ष्यमेतदेव विवर्ज्जयेत्॥"
इति प्रायोत्तरखण्डम्॥ * ॥

अथ धान्यच्छेदनदिनम्। तत्र तिथयः रिक्तातिरिक्ताः। वाराः रविशुक्रसोमबुधबृहस्पतीनाम्। नक्षत्राणि क्षत्तिका भरणी अश्लेषा पूर्व्वभाद्रपत् धनिष्ठा पूर्व्वाषाढ़ा ज्येष्ठा चित्रा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् एतानि। तत्र चन्द्रः शोभनः। लग्नानि वृषसिंहवृश्चिककुम्भमिथुनतुलाकन्याधनुःपूर्व्वार्द्ध-

स्वकीयजन्मलग्नमकरसंज्ञकानि ॥*॥ अथ धान्यस्थापनदिनम्। तत्र नक्षत्राणि। भरण्यश्लेषार्द्राकृत्तिकाविशाखापूर्ब्बफल्गुनीपूर्ब्बाषाढ़ापूर्ब्बभाद्रपद्भिन्नाष्टाभिन्नानि। तत्र वाराः शुभग्रहाणाम्। लग्नादि मकरवृषसिंहवृश्चिककुम्भमिथुनकन्याधनुर्मीनसंज्ञकानि ॥*॥ अथ धान्यादिदक्षिणदिनम्। तत्र नक्षत्राणि श्रवणा धनिष्ठा शतभिषा विशाखा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी रेवती पुनर्ब्बसुः पुष्यः अश्विनी ज्येष्ठा एतानि। वाराः बुधभिन्नाः। इति ज्योतिषम् ॥

धान्यकं, क्ली, (धान्यमिव प्रतिष्ठतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) धान्याकम्। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥" अस्य गुणा यथा,—

"धान्यकञ्चाजगन्धा च सुसुखाचेति रोचनाः।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति तु ॥"

इति चरके सूत्रस्थाने सप्तविंशोऽध्याये ॥

धान्यमेव स्वार्थे कन्। धान्यम्। पुं, क्षत्रियवृषप्रतिविशेषः। यथा, राजतरङ्गिण्याम्। ८।९०५।

"राजन्यावित्थिटकुलोद्भूतावुदयधान्यकौ ॥")

धान्यकोष्ठकं, क्ली, (धान्याय धान्यरक्षणाय यत् कोष्ठकं गृहम्।) धान्यरक्षार्थगृहम्। इति हलायुधः ॥ गोला इति भाषा ॥

धान्यचमसः, पुं, (चम्यते भक्ष्यते इति। चम+असन्। धान्यं खिन्नधान्यमेव चमसः।) पिपिटकः। इति त्रिकाण्डशेषः ॥

धान्यधेनुः, स्त्री, (धान्यनिर्म्मिता धेनुः।) दानार्थधान्यनिर्म्मितधेनुः। यथा,—

"विष्णवे चायने वापि कार्त्तिक्यान्तु विशेषतः।
तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम ॥
यां दत्वा सर्ब्बपापेभ्यः मुच्यते नात्र संशयः ॥
दुग्धधेनुप्रदानेन यत् फलं राजसत्तम !।
तत् सर्ब्बमेवमाप्नोति व्रीहिधेनुप्रदो नरः ॥
कृष्णाजिनं ततः कृत्वा प्राग्वदत् संन्यसेद्बुधः।
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्ब्बतं कुर्य्यादिष्कम्भपर्ब्बतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्मन्दारो हिमयस्तु मध्ये
सुवर्णशृङ्गत्रयसंयुतः स्यात्।
पूर्ब्बेण शुक्लाफलवस्त्रयुक्तो
याम्ये च गोमेदकपुष्यरागैः ॥
पश्चाच्च मारकतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाल-
लताञ्चितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माय विष्णुर्भगवान् पुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात्;
मूर्द्धन्यवस्थागतमत्सरेण
कार्य्यार्थनैके च पुनर्हि लोभाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेऽपि राजतः स्यात्।
तथेक्षुदण्डाहतकन्दरेषु
क्षतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराख्यस्नुधरावली स्यात्
पूर्ब्बेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्ब्बुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्याभ्रहेन्द्रप्रसुखानथाद्रौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या
ज्जानोरमं माल्यविलेपनञ्च ॥
वितानकस्योपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितञ्च।
दत्वं निवेश्यामरशैलमध्ये
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्हि शृङ्ग
संस्थापयेत् पुष्यविलेपनाढ्यान् ॥
पूर्ब्बेण मन्दरमनेकफलावलीभि-
र्वैल्लं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरोदधोदसरसाथ वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यच्चपतिनाहृतमासनेन
वस्त्रेण राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्ण्यपिप्पलदिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथार्थे ।

तव विप्र ! महाभाग ! वेदवेदाङ्गपारग !।
यामेतान्च मया दत्तां गृहीत्वा त्वं द्विजोत्तम !।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥
त्वमेका लक्ष्मीर्गोविन्दे स्वाहा या च विभावसौ।
शक्रे शचीति विख्याता मेधा सुनिशु सत्तम !॥
तस्मात् सर्ब्बमयी देवी धान्यरूपेण संस्थिता।
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
दत्वा प्रदक्षिणं कृत्वा तं समाप्य द्विजोत्तमम्।
यावच्च पृथिवी सर्ब्बा वसुरत्नानि भूपते !।
तावत् पुण्यं समाधिक्यं व्रीहिधेनोश्च तत् फलम् ॥
तस्मान्नरेन्द्र ! दातव्या मुक्तिमुक्तिफलप्रदा।
इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥
विमानेनार्कवर्ब्बेण किङ्किणीरत्नमालिना।
स्तूयमानोऽमरोभिश्च प्रयाति शिवमन्दिरम् ॥
यावच्च स्मरते जन्म तावत् स्वर्गे महीयते।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
एवं हरेण चोद्गीर्णं श्रुत्वा वाक्यं नरोत्तम।
सर्ब्बपापविशुद्धात्मा रुद्रलोके महीयते ॥"

इति वराहपुराणम् ॥

धान्यबीजं, क्ली, (धान्यस्य बीजमिव बीजं यस्य।) धन्याकम्। इति राजनिर्घण्टः ॥

धान्यमायः, पुं, (धान्यं मातीति। मा+"क्ताघञौ च।" ३। २। २। इति अण्।) धान्यविक्रयी। इति संक्षिप्तसारव्याकरणम् ॥

धान्यराजः, पुं, (धान्यानां राजा। टच् समासे। यद्वा, धान्येषु राजते इति। राज दीप्तौ+अच्।) यवः। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यवशब्दे ज्ञातव्याः ॥)

धान्यवर्द्धनं, क्ली, (धान्यस्य वर्द्धनं वृद्धिर्यस्मात्।) वार्द्धुष्यम्। इति त्रिकाण्डशेषः ॥ धानेर वाड़ी इति भाषा ॥

धान्यवीरः, पुं, (धान्येषु वीर इव बलाधायकत्वात्।) माषः। इति राजनिर्घण्टः ॥

धान्यशीर्षकं, क्ली, (धान्यस्य शीर्षकं अग्रभागः।) धान्यमञ्जरी। इति जटाधरः ॥ धानेर शीष इति भाषा ॥

धान्याकं, क्ली, (धान्यमकति खादश्यत्वेन प्राप्नोतीति। अक गतौ+अण्।) धन्याकम्। इति हेमचन्द्रः। २। ८३ ॥

धान्याचलः, पुं, (धान्यनिर्म्मितोऽचलः पर्ब्बतः।) दानार्थधान्यनिर्म्मितपर्ब्बतः। तस्य विधानं यथा,—

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्ब्बतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्ब्बतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वदृश्यम शर्करापलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्ब्बशः ॥
अयने विषुवे पुण्ये चतौपाते दिनक्षये।
शुक्लपक्षे तृतीयायासुपरागे ग्रहिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥

धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्रम्यं चतुरस्रसुदक्सुखम्।
प्रागुदक्प्रवणं तद्वत् प्राङ्मुखञ्च विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्ब्बतं कुर्य्यादिष्कम्भपर्ब्बतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्मन्दारो हिमयस्तु मध्ये
सुवर्णशृङ्गत्रयसंयुतः स्यात्।
पूर्ब्बेण शुक्लाफलवस्त्रयुक्तो
याम्ये च गोमेदकपुष्यरागैः ॥
पश्चाच्च मारकतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाल-
लताञ्चितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माय विष्णुर्भगवान् पुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात्;
मूर्द्धन्यवस्थागतमत्सरेण
कार्य्यार्थनैके च पुनर्हि लोभाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेऽपि राजतः स्यात्।
तथेक्षुदण्डाहतकन्दरेषु
क्षतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराख्यस्नुधरावली स्यात्
पूर्ब्बेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्ब्बुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्याभ्रहेन्द्रप्रसुखानथाद्रौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या
ज्जानोरमं माल्यविलेपनञ्च ॥
वितानकस्योपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितञ्च।
दत्वं निवेश्यामरशैलमध्ये
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्हि शृङ्ग
संस्थापयेत् पुष्यविलेपनाढ्यान् ॥
पूर्ब्बेण मन्दरमनेकफलावलीभि-
र्वैल्लं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरोदधोदसरसाथ वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यच्चपतिनाहृतमासनेन
वस्त्रेण राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्ण्यपिप्पलदिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथार्थे ।

संस्थाप्य तं विपुलशैलमधोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुवर्णम्
पूर्व्वेण देवमवटादपशैखरन्त-
माकारयेत् कनकधेनुविराजमानम् ॥
माध्वीकभद्रसरसा च वनेन तद-
द्दौग्ध्येन भास्वरवता च युतं विधाय ।
होमैश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरितान्वितिभिर्द्विजेन्द्रैः ॥
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यस्त्रिभिर्यवकृतेन समित्कुशैश्च ।
रात्रौ च जागरमनुद्धतगीततूर्य्य-
रावाहनञ्च कथयामि शिलोच्चयानाम् ॥
त्वं सर्व्वदेवगणधामनिधे! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत नाशयाशु ।
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानग्नी ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीज! त्वं नः पाहि सनातनः ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादमूल्यमरणैर्नारीभिश्च शिवस्तव ।
तस्माच्छान्तिं प्रयच्छ त्वं संसारसागरात् ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन विभीषतः ॥
शोभसे मन्दर! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माज्जम्बूमणिर्जम्बुद्वीपे त्वं गन्धमादन! ।
गन्धर्व्ववनशोभावान् कीर्त्तिर्द्धत्तां मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन वा ।
हिरण्मयाच्चत्यशिरस्तस्मात् पुष्टिं प्रयच्छ मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व! राजसे नित्यमतः श्रीरत्र्यास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।
स्नात्वाथ गुरवे दद्यान्मथमं पर्व्वतोत्तमम् ॥
विघ्नभूपर्व्वतान् दद्याद्दत्विग्भ्यः क्रमशो मुने! ॥
गाञ्च दद्याच्चतुर्विंशद्धवा दश्च नारद! ।
शक्तितः सप्त वाष्टौ वा पञ्च दद्यादशक्तिमान् ॥
एकापि गुरवे देया कपिलाथ पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
न एव पूजने मन्त्रास्त एवोपस्करा मताः ।
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रैरेव सर्व्वेषु होमः शैलेषु पठ्यते ॥
उपवासी भवेन्नित्यमग्रतो नक्तमिष्यते ।
विधानं सर्व्वशैलानां क्रमशः शृणु नारद! ॥
दानकाले च ये मन्त्राः पर्व्वतेषु च यत्फलम् ।
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ॥
अन्नाङ्गवन्ति भूतानि जगदन्नेन वर्त्तते ।
अन्नमेव ततो लक्ष्मीरन्नमेव जनार्द्दनः ॥
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम! ।
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥
मन्वन्तरशतं साग्रं देवलोके महीयते ।
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजता ॥
विमानेन दिवः पृष्ठमायाति सुरसेवितः ।
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥"
इति मत्स्यपुराणम् ॥

धान्याम्लं, क्ली, (धान्यात् धान्यविकारात् जातं अम्लम् ।) काञ्जिकम् । इत्यमरः ।२।९। ३९ ॥
"धान्याम्लं ग्राहिचूर्णानां कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम् ॥
अरुचौ वातरोगेषु सर्व्वेष्वास्थापने हितम् ॥"
इति भावप्रकाशः ॥
("धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्शशीतलम् ।
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ।
ग्रहणास्यापने हृद्यं लघुवातकफापहम् ॥"
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

धान्यारिः, पुं, (धान्यस्य अरिः ।) मूषिकः । इति राजनिर्घण्टः ॥ त्रि, धान्यस्य शत्रुश्च ॥

धान्योत्तमः, पुं, (धान्येषु उत्तमः ।) शालिधान्यम् । इति राजनिर्घण्टः ॥

धाम, [न्] क्ली, (दधाति गृहस्थादिकं धीयते द्रव्यजातमस्मिन्निति वा । धा+"सर्व्वधातुभ्यो मनिन् ।" उणां ४ । १४४ । इति मनिन् ।) गृहम् । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ॥")
देहः । त्विट् । प्रभावः । इत्यमरः । ३ । ३ । १२३ ॥ (यथा, किराते । २ । ४७ ।
"सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥")
रश्मिः । (यथा, माघे । १ । २ ।
"पतत्यधो धाम विसारि सर्व्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥")
स्थानम् । (यथा, पञ्चदश्याम् । ७ । २१४ ।
"त्रिषु धामसु यज्ञोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥")
जन्म । इति मेदिनी । मे, ८० ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ३६ ।
"गुरुर्गुरुतरो धाम सत्यः सत्यपराक्रमः ॥"
"धाम ज्योतिः नारायणः परं ज्योतिरिति मन्त्रवर्णात्। सर्व्वलोकक्रमाश्रयत्वात् वा धाम । परं ब्रह्म परं धाम इति श्रुतेः ॥" इति तद्भाष्यम् ॥

धामकः, पुं, माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

धामनिधिः, पुं, (धामानि किरणानि निधीयन्ते ऽत्र । नि+धा+किः ।) सूर्य्यः । इति जटाधरः ॥

धामनी, स्त्री, (धमन्येव । धमनी+स्वार्थे अण् । ततो ङीष् ।) धमनी । इति शब्दचन्द्रिका ॥

धामार्गवः, पुं, (धान्यो मार्गे पन्थानं वातीति । वा गतौ+कः ।) अपामार्गः । इत्यमरः ।२।४।८८॥ (रक्तापामार्गोऽयम् । अस्य पर्य्यायो यथा,—
"रक्तोऽन्यो वसिरो दृक्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
घोषकः । इति मेदिनी । वे, ५६ ॥ (अस्य पर्य्यायो यथा,—
"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतघोषा । इति रत्नमाला ॥

धायः, त्रि, (दधाति धारयतीति । धा+"ग्रहाद्यधीति ।" ३ । १ । १४९ । इति गः ।) धारणकर्त्ता । इति सुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ६ । ७६ ।
"दद्दे दुःखस्य माद्यद्भ्यो धायेरामोदसुत्तमम् ॥")

धायाः, [स्] त्रि, (दधातीति । धा+"वहिहाधाभ्यश्छन्दसि ।" उणां ४ । २२० । इत्यसुन् वाहुलकात् युक् ।) धारणकर्त्ता । पोषणकर्त्ता । यथा, वाजसनेयसंहितायाम् । १३ । १८ ।
"भूरसि भूमिरस्यदितिरसि विश्वस्य धायाः ॥"

धाय्यः, पुं, (धीयते आश्रियते मङ्गलार्थमिति । धा+कर्म्मणि ण्यत् ततो युक् ।) पुरोहितः । इति सुग्धबोधव्याकरणम् ॥

धाय्या, स्त्री, (धीयतेऽनया समित् । धा+करणे ण्यत् ।) अग्निसमिन्नामार्थं ऋक् । अग्निप्रक्षालनमन्त्रः । इत्यमरः । २ । ७ । २२ ॥

धारं, क्ली, (धारायाः इदम् । धारा+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वर्षोद्भवं जलम् । तद्विविधम् । गाङ्गम् १ सामुद्रञ्च २ । यथा,—
"यदा स्यादाश्विने मासि सूर्य्यः स्वातीविभाखयोः ।
तदासु जलदैर्मुक्तं गाङ्गसुक्तं मनीषिभिः ॥
अन्यदा त्वगस्त्यौर्षादिनक्षत्रेषु यदम्बुदैः ।
अभिवृष्टमिदं तोयं सामुद्रमिति संस्मृतम् ॥"
तयोर्गुणाः । यथा,—
"गाङ्गं जलं स्वादु सुशीतलञ्च
रुचिप्रदं पित्तकफापहञ्च ।
निर्दोषमिष्टं लघु तच्च नित्यं
गुणाधिकं योग्नि गृहीतमाहुः ॥
सामुद्रसलिलं शीतं कफवातकरं गुरु ।
चित्रायामाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥
पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा ।
स्वस्राश्रयवशाद्भेदमन्यदन्यद्रसादिकम् ॥"
इति राजनिर्घण्टः ॥

धारः, पुं, (धार्य्यते इति । धृ+घञ्+घञ् ।) आवारणम् । ऋणम् । इति मेदिनी । रे, ५१ ॥ जलधरासारवर्षणम् । इति हेमचन्द्रः ॥ प्राप्तः । गम्भीरः । इति शब्दरत्नावली ॥

धारकः, पुं, (धरति जलादिकमिति । धृ+ण्वुल् ।) कलसः । तस्योत्पत्त्यादि यथा,—
ब्रह्मोवाच ।
"उत्पत्तिं लक्षणं मानं कथयामि महासुने ! ।
धारकाः कलसाश्चैव येन लोके प्रकीर्त्तिताः ॥
मथ्यमाने तु सर्व्वदेवैः सदानवैः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥
उत्पन्नमन्दरं तत्र महावीर्य्यपराक्रमम् ।
तस्यायं धारणार्थाय कलसः परिकीर्त्तितः ॥

कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा ।
निर्म्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते ॥
कलसस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
ग्रीवास्तु देवताः सर्व्वा वेष्टयन्ति चतुर्दिशम् ।
कुक्षौ तु सागराः सप्त सप्त द्वीपास्तु संश्रिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
हिमवान् हेमकूटश्च निषधो मेरुरेव च ॥
रोहितो मान्यवन्तश्च गन्धमादनश्च पर्व्वताः ।
गङ्गा सरस्वती सिन्धुः सुभगा यमुना नदी ॥
ऐरावती शतद्रुश्च तथा वैतरणी नदी ।
गोदावरी नर्म्मदा च सही नाम महानदी ॥
कुरुक्षेत्रं प्रयागश्च एकदंसं पृथूदकम् ।
अमरेश्वरः पुष्करीकं गङ्गासागर एव च ॥
पृथिव्यां यानि तीर्थानि कलसे निवसन्ति ते ।
ग्रहाः ग्रान्तिश्च पुष्टिश्च प्रीतिर्गायत्रिरेव च ॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च ।
अथर्व्ववेदसहिताः सर्व्वे कलससंस्थिताः ॥
नवैव कलसाः पुण्याः पृथग्भूर्म्मिससुद्भवाः ।
गोभ्योपगोभ्यो मरुतः खड्गश्च तथा परः ॥
मनोहरः खड्गभद्रः पञ्चमः परिकीर्त्तितः ।
विरजस्तनुदूषश्च षष्ठसप्तमकावुभौ ॥
अष्टमस्त्रिन्द्रियोपेतो नवमो विजयः स्मृतः ।
नवैव कलसाः ख्याता अधिदेवं निबोधत ॥
ब्रह्मन् वत्स ! यथा तेषां दिग्भ्यां न्यासो व्यवस्थितः ।
नवमो यः समाख्यातो विजयो नाम नामतः ॥
ग्रिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
ग्रितीन्द्रो ज्येष्ठकलसो द्वितीयो जलसम्भवः ॥
तृतीयः पवनश्चैव चतुर्थस्तु हुताशनः ।
पञ्चमो यजमानस्तु षष्ठस्त्वाकाशसम्भवः ॥
सोमस्तु सप्तमः प्रोक्त आदित्यश्च तथाष्टमः ।
एते चोत्पादिता देव्या ग्रिवेनाधिष्ठिताः पुरा ॥
इन्द्रस्य मूर्त्तयश्चाष्टौ सूर्य्यान्ता नवमः ग्रिवः ।
ग्रितीन्द्रः पूर्व्वतो न्यास्यः पश्चिमे जलसम्भवः ॥
वायव्ये वायवो न्यास्य आग्नेये वह्निसम्भवः ।
नैर्ऋते यजमानस्तु ऐशान्याकाशसम्भवः ॥
सौम्यमुत्तरतो योज्यं सौरं दक्षिणतो न्यसेत् ।
न्यस्येवं कलसानान्तु पूर्व्वरूपं विचिन्तयेत् ॥
कलसानां मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि ।
मध्ये मातृगणाः सर्व्वे सेन्द्रा देवाश्च पन्नगाः ॥
कुक्षौ तु सागरास्तेषां सप्तद्वीपा च मेदिनी ।
श्रिया चैव तथोमा च गन्धर्व्वा ऋषयस्तथा ॥
पञ्चभूतास्तथा धारास्तेषामवस्थिताः स्थिताः ।
पूर्णाः पूतेन तोयेन सिद्धास्त्वेकान्ततो सुने ! ॥
सरित्सरःसखातेन तड़ागेन जलेन वा ।
वापीकूपोद्दृतेनैव सामुद्रेण सुखावहाः ॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्बिषनाशकाः ।
अभिषेके सदा ग्राह्याः कलसा ईडशाः शुभाः ॥
यात्राविवाहकाले वा प्रतिष्ठायज्ञकर्म्मणि ।
योजनीया दिशोषेषु सर्व्वकामप्रसाधकाः ॥
ग्रहान् धारयते यस्मात्तस्मात्तेषां विधारकाः ।
दुरितानि महाघोरास्तेन ते धारकाः स्मृताः ॥

एकैकान्तु कलां मूर्त्तौ ग्रिवाद्यानां यथाक्रमम् ।
संगृह्य संस्थिता यस्मात्तेन ते कलसाः स्मृताः ॥
हेमराजततास्रा वा मृण्मया लक्षणान्विताः ।
पञ्चमाङ्गुलविपुलसुत्सेधः षोड़शाङ्गुलः ॥
कलसानां प्रमाणन्तु सुखमष्टाङ्गुलं भवेत् ॥"
इति देवीपुराणम् ॥

धारयत्यनेन, त्रि ॥ (यथा, पञ्चतन्त्रे । २ । १७५ ।
"अप्रियाण्यपि पथ्यानि ये वदन्ति शृणोमिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥")

धारणं, क्ली, (धृ + णिच् + भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ ॥ धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
"तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् ॥"

पुं, कश्यपपुत्रो नागविशेषः । यथा, महाभारते । ५ । १०३ । १६ ।
"विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥"
धारयतीति । धृ + णिच् + ल्युः । धारके, त्रि । यथा, महाभारते । १२ । ३३५ । ५४ ।
"जन्मर्युधेषितं देवं तपसे कृतनिश्चयः ।
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रवर्त्तकाः ॥")

धारणा, स्त्री, (धार्य्यते या सा । धृ + णिच् + युच् । टाप् ।) बुद्धिः । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ७३ ।
"इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाद्वार एव च ॥")
न्याय्यपथस्थितिः । तत्पर्य्यायः । संज्ञा २ मर्य्यादा ३ स्थितिः ४ । इत्यमरः । २ । ८ । २६ ॥ (यथा, मनुः । ४ । ३८ ।
"न लङ्घयेत् वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥")
योगाङ्गविशेषः । इति मेदिनी । णे, ५६ ॥
"स तु अविच्छितीयवस्तुन्यन्तरेन्द्रियधारणम् ।" इति वेदान्तसारः ॥ ध्येये चित्तस्य स्थिरबन्धनम् ।
इति हेमचन्द्रः ॥
"तस्मात् समस्तग्रक्तीनामाधारे सच्च चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥"
इति विष्णुपुराणे । ६ । ७ । ७४ ॥
ब्रह्मणि मनोधारणम् । यथा,—
"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"
इति गारुड़े ४६ अध्यायः ॥
अष्टादशप्राणायामादिरूपधारणा यथा,—
"प्राणायामा दशाष्टौ च धारणा साभिधीयते ।
हे धारणे स्मृते योगे मुनिभिस्तत्त्वदर्शिभिः ॥
प्राङ्नाभ्यां हृदये चाथ ग्रतीया च तथोरसि ।
कण्ठे मुखे नासिकायां नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणाः परमाः स्मृताः ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥"
इति गारुड़े २३० अध्यायः ॥
अपि च ।
"प्राणायामैर्दशभिर्यावत्कालो हुतो भवेत् ।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादशधारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु स यतो मुक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम् ।
प्राप्यावधि हृतं कालं यावत् सा धारणा स्मृता ॥"
इति च गारुड़े २४० अध्यायः ॥

धारणी, स्त्री, (धार्य्यते शरीरमनया । धृ + णिच् + ल्युट् । स्त्रियां ङीप् ।) गोड़िका । बुद्धोक्तमन्त्रभेदः । इति मेदिनी । णी, ५५ ॥ श्रेणी । इति हेमचन्द्रः ॥

धारणीया, स्त्री, (धार्य्यतेऽसाविति । धृ + णिच् + अनीयर् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥ धार्य्ये, त्रि ॥

धारयित्री, स्त्री, (धारयति सर्व्वमिति । धृ + णिच् + तृच् । स्त्रियां ङीप् ।) पृथिवी । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, महाभारते । ५ । ६५ । ८ ।
"त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ! ॥")

धारा, स्त्री, (धार्य्यन्ते अम्भो यया । धृ + णिच् + अड़् । स्त्रियां टाप् ।) अम्भसां पञ्चधागतिः । तद्यथा । आस्कन्दितम् १ धौरितकम् २ रेचितम् ३ वलितम् ४ प्लुतम् ५ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, माघे । ५ । ६० ।
"अथाकुलं प्रसृतसुत्तरधैयकर्म्म
धाराः प्रसाधयितुमथतिकीर्णरूपाः ।
सिद्धं सुखे नवसु वीथिषु कश्चिदस्य
वर्गाविभागकुशलो गमयाम्बभूव ॥"
"अथतिकीर्णरूपा असंकीर्णरूपा धारा गतिभेदाः ।
'अम्भसान्तु गतिर्धारा विभिन्ना सा च पञ्चधा ।
आस्कन्दितं धौरितकं रेचितं वलितं प्लुतम् ॥'
इति वैजयन्ती ॥
'जलयोरुभः पञ्च धाराः ।' इत्यमरश्च ॥ अन्यशास्त्रे तु संज्ञान्तरेणोक्ताः ।
'गतिः पुरा चतुष्का च सङ्कीर्णार्द्धजवा परा ।
पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥
एकैका त्रिविधा धारा ह्यग्निचाविधौ मता ।
ज्येष्ठी मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमात् ॥'
तथा च पञ्चदशविभेदा भवन्ति । ताः पञ्च धाराः प्रसाधयितुं परिक्षेतुं - नवसु वीथिषु सञ्चारस्थानेषु गमयाम्बभूव ॥" इति तट्टीकायां मल्लिनाथः ॥) सैन्याग्निमस्कन्दः । घटादिच्छिद्रम् । सन्ततिः । (यथा, महाभारते । ६ । ११८ । २४ ।
"उत्पपात ततो धारा वारिणो विमला शुभा ॥")
जलस्य प्रपातः । (यथा, महाभारते । १ । २२४ । ५८ ।
"त्वया द्वादश वर्षाणि वसोर्द्धारा हुतं हविः ।
उपयुक्तं महाभाग ! तेन त्वां ग्लानिराविशत् ॥")
खड्गादेर्निशितमुखम् । इति मेदिनी । रे, ५० ॥

(यथा, शाकुन्तले १ अङ्के ।
"ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
उत्कर्षः । रथचक्रम् । इति हेमचन्द्रः ।३।४१६॥
(यथा, रघुः । १३ । १५ ।
"आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥")
यशः । अतिदृष्टिः । (यथा, पञ्चतन्त्रे । २।६२ ।
"पर्जन्यस्य यथा धारा यथा च दिवि तारकाः।
सिकतारेणवो यद्वत् संख्यया परिवर्जिताः।
गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः ॥")
समूहः । इति शब्दरत्नावली ॥ घनासारवर्षणम् । सङ्घः । इति विश्वः ॥ (प्रवाहः । यथा,
याज्ञवल्क्ये । १ । २८० ।
"सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥")
दक्षिणदेशस्थपुरीविशेषः । इति विक्रमचरितम् ॥ * ॥ (तीर्थविशेषः । यथा, महाभारते । १ । ८४ । २३ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
धारां नाम महाप्राज्ञ ! सर्वपापप्रमोचनीम् ।
तत्र स्नात्वा नरव्याघ्र ! न शोचति नराधिप ॥")
अथ व्वरादिग्राम्यार्थं श्रीनरसिंहादिमन्त्रैः जलधारापातनविधिः । यथा, नृसिंहपुराणे ।
"तथा महाज्वरग्रस्ते धारां देवस्य मन्त्रतः ।
सप्ततां नारसिंहस्य कुर्याद्वा कारयेत् द्विजैः ॥
होमश्च भोजनञ्चैव तस्य दोषः प्रशाम्यति ॥"
धाराकदम्बः, पुं, (धारा कालोपलक्षितः कदम्बः । वर्षाकाले जायमानत्वादस्य तथात्वम् ।) कदम्बवृक्षभेदः । केलिकदम् इति भाषा ॥ तत्पर्य्यायः । प्रावृष्यः २ पुलकी ३ भृङ्गवल्लभः ४ मेघावासः ५ प्रियकः ६ नीपः ७ प्रावृषेण्यः ८ कलम्बकः ९ । इति राजनिर्घण्टः ॥ धाराकदम्बकः १० । इति त्रिकाण्डशेषः ॥
धाराङ्कुरः, पुं, (धारायां वृष्टेः अङ्कुर इव ।) शीकरः । वनोपजः । नाग्घोरः । इति मेदिनी । रे, २६६ ॥
धाराङ्गः, पुं, (धारा उत्कर्ष इव अङ्गं यस्य । श्रेष्ठत्वादस्य तथात्वम् ।) तौर्यम् । (धारान्वितमङ्गमस्य ।) खड्गः । इति हेमचन्द्रः ॥
धाराटः, पुं, (धारायै वृष्ट्यै अटतीति । अट+अच् ।) वासकः । (धारामटति वर्षाशीयत्वेन प्राप्नोतीति ।) मेघः । (धारां गतिं अटतीति ।) तुरङ्गः । मत्तहस्ती । इति शब्दरत्नावली ॥
धाराधरः, पुं, (धरतीति । धृ+अच् । धारायाः धरः ।) मेघः । (यथा, उत्तरचातकाष्टके । ४ ।
"रे धाराधर ! धीरनीरनिकरैरेवा रवा नीरसा
श्रेया पूषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्मनन्तरगतं स्वान्तेन सञ्चिन्तयन्
आश्चर्यं परिपीड़िलोऽभिरमते यच्चातकः स्तृष्णया ॥"
खड्गः । इति मेदिनी । रे, २६६ ॥
धाराफलः, पुं, (धारा फले यस्य ।) मदनवृक्षः । इति राजनिर्घण्टः ॥ (मदनशब्देऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
धारावनिः, पुं, (धारायाः वृष्टेः अवनिः पृथ्वीव । अभिधानात् पुंस्त्वम् ।) वायुः । इति त्रिकाण्डशेषः ॥
धाराविषः, पुं, (धारा एव विषमिव यस्य प्राणनाशकत्वात् ।) खड्गः । इति त्रिकाण्डशेषः ॥
धारासम्पातः, पुं, (धाराणां सम्यक् पातो यत्र ।) महावृष्टिः । तत्पर्य्यायः । धारा १ सम्पातः २ आसारः ३ । यथा,—
"धारा सम्पात आसारस्तितयश्चापि कुत्रचित् ॥"
इति शब्दरत्नावली ॥
(यथा, प्रबोधचन्द्रोदये ५ अङ्के ।
"ततो देवि ! परस्परं करितुरगरथपदातीनां निरन्तर-शरनिकर-धारासम्पातोपदर्शितदुर्दिनानां तेषामस्माकं च योधानां तुमुलः सम्प्रहारः प्रावर्त्तत ॥")
धाराकुही, स्त्री, (धारान्विता कुही ।) त्रिधारकुही । इति राजनिर्घण्टः ॥ तेकाँटासिज इति भाषा ॥
धारिणी, स्त्री (धरतीति । धृ+णिनिः+ङीप् ।) धरणी । इति शब्दरत्नावली ॥ प्राग्व्यलिङ्गवृक्षः । इति शब्दचन्द्रिका ॥ चतुर्दशदेवयोषिद्भेदः । यथा,—
"शची वनस्पती गार्गी धूम्रोर्णा रुचिराकृतिः ।
सिनीवाली कुहू राका तथा चानुमतिः शुभा ॥
आयतिर्नियतिः प्रज्ञा सेला वेला च नामतः ।
एताश्चतुर्दश प्रोक्ता धारिण्यो देवयोषितः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(धारणकर्त्री । यथा, विष्णुपुराणे । १।१३।८८।
"प्राणग्रहणात् च पृथुर्यस्मात् भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥"
आधारस्वरूपा । यथा, तत्रैव । २ । १३ । ६१ ।
"सैषा धात्री विधात्री च धारिणी पोषणी तथा ।
सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥"
"धात्री माता विधात्री कर्त्री धारिणी आधारः पोषणी पोषयकर्त्री ।" इति तट्टीकायां श्रीधरस्वामी ॥)
धारी, [न्] पुं, (धरतीति । धृ+णिनिः ।) पीलुवृक्षः । इति जटाधरः ॥ त्रि, धारयिष्णुः ॥ (धारकः । यथा, महाभारते ।५ । ३१ । ११ ।
"तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणम् ॥"
यत्नवतात्पर्य्यवान् । यथा, मनुः । १२ । १०३ ।
"अङ्गेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥")
धारुः, त्रि, (धयति पिबतीति । धे ट पाने+"दाधेट्सिधदृधद्रुः ।" ३ । २ । १५६ । इति रुः ।) पानकर्त्ता । इति जटाधरः ॥ (यथा, अथर्ववेदे । ३ । १८ । २ ।
"वत्सो धारुरिव मातरं तं प्रत्यृषयोऽस्राम् ॥")
धारोष्णं, क्ली, (धारायां दोहनप्रभृतौ उष्णम् ।) दोहनेनोष्णधारया पतितदुग्धम् । तस्य गुणाः ।
"धारोष्णमुल्लघुतं पयो भ्रमहरं निद्राकरं कान्तिदं
दृष्यं दृङ्हृदयग्निवह्निमतिस्वादु त्रिदोषापहम् ॥"
इति राजनिर्घण्टः ॥
("धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्धाराग्निगिरं त्यजेत् ॥
धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
धार्त्तराष्ट्रः, पुं, (कृष्णवर्णचञ्चुचरणयुक्तहंसः । गेड़ि हाँस इति भाषा ॥ इत्यमरः । २ । ५ । २४ ॥
(यथा, वेणीसंहारे १ अङ्के सूत्रधारस्य प्रवेशनायाम् ।
"सत्पक्षा मधुरगिरः प्रसाधिताग्र्या मदोद्धता रम्याः ।
निपतन्ति धार्त्तराष्ट्राः कालवशाग्न्यिदीपिते ॥")
सर्पविशेषः । धृतराष्ट्रपुत्रः । इति मेदिनी । रे, २७० ॥ (यथा, वेणीसंहारे १ अङ्के ।
"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिवहेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ॥")
धार्त्तराष्ट्रपदी, स्त्री, (धार्त्तराष्ट्रस्य पाद इव पादो मूलं यस्याः । ङीष् पक्षे वः ।) हंसपदी । इति राजनिर्घण्टः ॥ (विवृतिविशेषो हंसपदीशब्दे ज्ञातव्यः ।)
धार्म्मिकः, त्रि, (धर्म्मं चरतीति । धर्म्म+"धर्म्मं चरति ।" ४ । ४ । ४१ । इति ठक् । यद्वा, धर्म्ममधीते वेद वा । "क्रतूक्थादिसूत्रान्तात् ठक् ।"४ । २ । ६० । इति ठक् ।) धर्म्मशीलः । तत्पर्य्यायः । देवयुः २ । इति जटाधरः ॥ (यथा, महाभारते । १ । १२२ । ४९ ।
"धार्म्मिकश्च कुरूणां स भविष्यति न संशयः ॥")
धार्य्यं, त्रि, (धियते इति । धृ+ण्यत् ।) धारणीयम् । यथा,—
"धातासुराध्वसुपुष्यविशाखहस्ता-
चित्रोत्तराम्बिपवनार्दितिरेवतीषु ।
ऊर्जाकृतीवसुधनुश्चरदिनोत्तमवादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्टौ ॥"
इति समयप्रदीपः ॥
(धियते परिधीयते इति । वस्त्रे, क्ली । यथा, भागवते । ६ । १८ । १४ ।
"वयं तत्रापि भगवः शिष्योऽस्या नः पितासुरः ।
असम्भाव्यं धृतवती मूढो वेदमिवासती ॥")
धाव, उ अ गतौ । शुद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-अकं-शुद्धौकरणे सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, धावित्वा धौत्वा । अ, धावति धावते । अवः शीघ्रगतिः । प्राग्व्यापिः पुनस्तच्च यमदूतोऽपि धावतीति श्रुत्याशुधः । स्फुट् शुद्धिभावः शुद्धीकरणञ्च । धावति तान्त्रमन्त्रेण शुध्यतीत्यर्थः ।
'दधावङ्गिरसतनूः सुग्रीवस्य विभीषणः ।'
अस्य गतौ निष्ठाया अप्रयोगः । धौतं वासः ।
इति दुर्गादासः ॥

धावकः, त्रि, (धावति शीघ्रं गच्छतीति । धाव + ण्वुल् ।) धावनकर्त्ता । शीघ्रगमनकर्त्ता । घाउडिया इति भाषा । धावधातोर्णकप्रत्ययेन निष्पन्नः ॥ (यथा, गोः रामायणे ।२।३२।२२ ।
"संवाहकाः सलिलदाः पुरतो धावकाश्च ये ।
तेषां निष्कसहस्रं त्वं दत्त्वार्थेसुपकल्पय ॥")

धावनं, क्लो, (धाव + भावे ल्युट् ।) गमनम् । (यथा, राजतरङ्गिण्याम् । १ । ११४ ।
"ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् ॥") शुद्धिः । इति मेदिनी । ने, ७६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३८ अध्यायः ॥)

धावनिः, स्त्री, (धाव + बाहुलकात् अनिः ।) पृश्निपर्णी । इत्यमरः ।२।४।६३॥ (पर्य्यायोऽस्या यथा,
"पृश्निपर्णी पृथक्पर्णी चित्रपर्णश्च पिप्पर्यपि ।
क्रोष्टुविघ्ना सिंहपुच्छी कलशी धावनिर्गुहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
कण्टकारी । इति राजनिर्घण्टः ॥)

धावनिका, स्त्री, (धावनिरिव प्रतिभाति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । यद्वा, स्वार्थे कन् ।) कण्टकारिका । इति रत्नमाला ॥

धावनी, स्त्री, (धावनि + ङीदादिकारादिति वा ङीष् ।) पृश्निपर्णी । इति मेदिनी । ने, ७६ ॥ कण्टकारी । धातकी । इति राजनिर्घण्टः ॥

धावितः, त्रि, (धाव + क्तः ।) गतः । (यथा, कथासरित्सागरे । ३ । ५२ ।
"एवमस्त्विति तौ मूढौ धावितौ सोऽपि पादुके ।
अध्यास्योदपतद्व्योम यष्टीत्वा यष्टिभाजने ॥")
मार्ज्जितः ॥

धासः, [स्] पुं, (दधाति पृथिवीमिति । धा + "वहिश्रिधासक्तिष्वन्दसि ।" उणां । ४ । २२० । इति असुन् तस्य सुट् च ।) पर्व्वतः । इति वैदिकप्रयोगः ॥

धि, ग्र धृतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ग्र, धियति । इति दुर्गादासः ॥

धिक्, य. निर्भर्त्सनम् । निन्दा । इत्यमरः । ३ । ३ । २३६ ॥ (यथा, विष्णुपुराणे । १ । १५।३५।
"धिङ्मां धिङ्मामतीवेर्त्थं निनिन्दात्मान-
मात्मना ॥")

धिक्कारः, पुं, (धिक् इत्यस्य कारः करणम् ।) धिक् । तत्पर्य्यायः । नीकारः २ अवहेलम् ३ अमाननम् ४ क्षेपः ५ निकारः ६ अनादरः ७। इति शब्दरत्नावली ॥ (यथा, भागवते ।४।१४।१३।
"लोकधिक्कारसन्दग्धं दहिष्यामः स्वतेजसा ॥")

धिक्कृतः, त्रि, (धिक् + कृ + कर्म्मणि क्तः ।) निर्भर्त्सितः । असत्करणादिना धिगित्यस्य करणं धिक्कारो निन्दा धिगितः धिक्कृतः धिक् त्वां इति भर्त्सितो धिक्कृत इति यावत् । इति भरतः ॥ तत्पर्य्यायः । अपध्वस्तः २ । इति

प्राणिवर्गे अमरः । ३ । १ । ३६ ॥ (यथा, भागवते । ७ । ८ । ५३ ।
"वयं किम्पुरुषास्त्वन्तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिः सदा ॥")
निन्दितमात्रम् । क्षतधिक्कारस्य प्राणिवर्गोक्तस्य पर्य्यायान्तरमिदम् अप्राणिविषयार्थम् । धिगस्तु त्वां इति क्षतः ग्रन्थितो धिक्कृतः । इति भरतः ॥ तत्पर्य्यायः । अवरीणः २ । इति विश्वप्रकाशनिघण्टौ अमरः । ३ । १ । ६४ ॥

धिक्क्रिया, स्त्री, (धिगित्युच्चारणमेव क्रिया ।) निन्दा । इति हेमचन्द्रः । २ । १८५ ॥

धिक्ष, ऊ सन्दीपे । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) क्षतौ यस्करौ । ऊ, धिक्षते वह्निः सन्दीप्यते इत्यर्थः । जनः क्लिश्यति जीवतीति वा अर्थः । इति दुर्गादासः ॥

धिग्वजः, पुं, वर्णसङ्करविशेषः । तस्य चर्म्मकार्य्यं वृत्तिः । स तु ब्राह्मणादायोगव्यां जातः । इति मनुः ॥

धियाम्पतिः, पुं, (धियां बुद्धीनां पतिः । अलुक् समासः ।) पूर्व्वाञ्जनविशेषः । मञ्झघोष इति ख्यातः । इति त्रिकाण्डशेषः । आत्मा । ध्यात एव धियाम्पतिरिति प्रयोगदर्शनात् ॥

धिव, इ न प्रीतौ । गतौ । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीतिरिह प्रीतीकरणम् । इ, धिन्वाते । न, धिनोति हर्षेण हिरण्यरेतसमिति किराते । गतिः केचिन्न मन्यते । इति दुर्गादासः ॥

धिष, र लि रव । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) र, वैदिकः । लि, दिधेष्टि । रवः शब्दः । इति दुर्गादासः ॥

धिषणः, पुं, (धृष्णोति प्रागल्भ्यं ददातीति । धृष् + "धृषेर्धिष च संज्ञायाम् ।" उणां २ । ८२ । इति क्युः ।) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥

धिषणा, स्त्री, (धृष्णोत्यनयेति । धृष प्रागल्भ्ये + ल्युः । धिषादेशश्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, ऋग्वेदे । १ । ३२ । १४ ।
"विवेष यन्मा धिषणा जजान स्वेः पुरा पार्य्या-
दिन्नमङ्गूः ॥"
स्तुतिः । यथा, ऋग्वेदे । ८ । १५ । ७ ।
"तव त्वदिन्द्रियं बृहत्तव ओजसुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥"
"धिषणा स्तुतिः ।" इति तद्भाष्ये सायनः ॥
वाक् । यथा, ऋग्वेदे । ३ । ४६ । ४ ।
"ऋषां वस्त्रा जनिता सूर्य्यस्य विभक्ता भागं
भागं धिषणेव वाजम् ॥"
"धिषणेव । यथाऽज्ञानां वाक् अस्येदमिति विभागं करोति तद्वत् ।" इति तद्भाष्ये सायनः ॥
प्रस्तरः । यथा, ऋग्वेदे । ६ । ५६ । २ ।
"पवस्व धिषणाभ्यः ।"
"किञ्च धिषणाभ्यो ग्रावभ्यः पवस्व क्षर ॥" इति तद्भाष्ये सायनः ॥

धारयित्री । द्यावापृथिव्योः द्विवचनान्तः । यथा, ऋग्वेदे । ३ । ४६ । १ ।
"यं सुक्रतं धिषणे विश्वतष्टं धनं दृक्षाणां जन-
यन्त देवाः ॥"
"धिषणे देवमनुष्यादीनां धारयित्र्यौ । यद्वा प्रगल्भे समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ ॥" इति तद्भाष्ये सायनः ॥*॥
हविर्द्धानस्य पत्नी । यथा, मात्स्ये । ४ । ४५ ।
"हविर्द्धानात् षडाग्नेयी धिषणा जनयत् सुतान् ।
प्राचीनबर्हिषं साङ्गं यमं शुक्रं बलं शुभम् ॥"
क्लो । स्थानम् । यथा, भागवते । ३ । १६ । ३२ ।
"तदा विकुण्ठधिषणात् तयोर्निपतमानयोः ।
हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥"
"विकुण्ठस्य धिषणात् स्थानात् ।" इति तट्टीकायां श्रीधरस्वामी ॥)

धिष्ण्यं, क्लो, (धिषणा + निपातनात् यस्य टः ।) स्थानम् । गृहम् । नक्षत्रम् । अग्निः । इत्यमरः । ३ । ३ । १५४ ॥ शुक्तिः । इति मेदिनी ॥

धिष्ण्यः, पुं, (धृष्णोति प्रगल्भो भवतीति । धृष + ण्यः । निपातनात् साधुः ।) अग्निः । शुक्राचार्य्यः । इति पुंस्काण्डेऽमरदत्तः ॥

धिष्ण्यं, क्लो, (धृष्णोति प्रगल्भो भवतीति । धृष् + "सानसिवर्णसिपर्णसीति ।" उणां । ४ । १०७ । इति ण्यप्रत्ययः निपातनात् ऋकारस्य च इकारः । स्थानम् । (यथा, भागवते ।२।१।३० ।
"द्यौरच्छिन्नी चक्षुरभूत् पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च ।
तदभ्रविभ्रमः परमेष्ठिधिष्ण्या-
मापोऽस्य तालू रस एव जिह्वा ॥"
"परमेष्ठिधिष्ण्यं ब्रह्मपदम् ॥" इति तट्टीकायां स्वामी ॥ गृहम् । (यथा, महाभारते ।१७।३।१०।
"स्वर्गे लोके श्वतां नास्ति धिष्ण्या-
मिष्टापूर्त्तं क्रोधवशा हरन्ति ॥")
नक्षत्रम् । (यथा, सूर्य्यसिद्धान्ते । ११ । २१ ।
"सार्पेन्द्रपौष्णधिष्ण्यानामन्त्या: पादा: भस-
न्त्रयः ॥")
अग्निः । इत्यमरः । ३।३।१५४ ॥ (यथा अथर्ब्ववेदे । २ । ३५ । १ ।
"ये भक्षयन्तो न वसून्यारुधुर्ध्यानमयो अन्वतप्यन्त
धिष्ण्याः ॥")
शुक्तिः । इति मेदिनी । ये, ३४ ॥ (उल्काभेदः । यथा, बृहत्संहितायाम् । ३३ । १ ।
"दिविभुक्तशुभफलानां
पतितां रूपाणि यानि तान्युल्काः ।
धिष्ण्योल्काग्निविद्युत्तारा
इति षड्धा भिन्नाः ॥"
प्राणाभिमानी देवः । यथा, ऋग्वेदे ।३।२२।३।
"अग्ने ! दिवो अर्णमच्छा जिगास्यच्छा देवाँ
ऊचिषे धिष्ण्या ये ॥"
"धियं बुद्ध्युपहितं देहं उच्चान्ति उच्चीकुर्व्वन्तीति धिष्ण्याः प्राणाभिमानिनो देवाः ।"
इति तद्भाष्ये सायनः ॥)

धी, ञी ङ य आराधे । नादरे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) अनादर इति कालन्तादौ । ञी, धीनः । ङ य, धीयते त्वं लोकः । इति दुर्गादासः ॥

धीः, स्त्री, (धेंै चिन्तने + भावे क्विप् । सम्प्रसारणञ्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, मनौ । ६ । ९२ ।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥")

धीतः, त्रि, पीतः । इति धेधातोः क्तप्रत्ययेन निष्पन्नः ॥

धीतिः, स्त्री, (धेट पाने + क्तिन् ।) पिपासा । इति हेमचन्द्रः । ३ । ५८ ॥

धीदा, स्त्री, (धियं ददातीति । दा + कः । स्त्रियां टाप् ।) कन्या । मनीषा । इति हेमचन्द्रः ॥

धीन्द्रियं, क्ली, (धीजनकमिन्द्रियम् ।) ज्ञानेन्द्रियम् । तद्यथा । मनः १ नेत्रम् २ श्रोत्रम् ३ त्वक् ४ रसना ५ घ्राणम् ६ । इत्यमरः । १ । ५ । ८ ॥

धीमान्, [त्] पुं, (धीरस्त्यस्मीति । धी + मतुप् ।) दृढस्मृतिः । पण्डितः, त्रि । इति मेदिनी । ते, ११५ ॥ (यथा, मनुः । १ । १०२ ।

"तस्य कर्म्मविवेकार्थं धीषाणामनुपूर्व्वशः ।
स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥"

वरपुत्रस्य विराजः पुत्रः । यथा,—

"नरो गयस्य तनयः ततपुत्रोऽभूत् विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥"

इति विष्णुपुराणे । २ । १९ ।

पुरूरवसः उर्व्वशीगर्भजातः पुत्रविशेषः । यथा, महाभारते । १ । ७५ । २४ ।

"षट्सुता जज्ञिरेऽमेलादायुर्धीमानमावसुः ।
दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः ॥")

धीमती, स्त्री, (धीमत् + स्त्रियां ङीप् ।) बुद्धिमती । इत्यमरः । २ । ६ । १२ ॥

धीरं, क्ली, (धियं राति ददाति यत्तदिति वा । रा + कः ।) कुङ्कुमम् । इति मेदिनी । रे, ५१ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनन्धीरं वाह्लीकं शोणिताभिधम् ॥")

धीरः, पुं, (धियं राति ददाति यत्नातीति वा । रा + कः ।) ऋषभौषधिः । इति राजनिर्घण्टः ॥ बलिराजः । इति शब्दरत्नावली ॥

धीरः, त्रि, (धियं ईरयतीति । ईर + अच् । यद्वा, धियं रातीति । रा + कः ।) धैर्य्यान्वितः । स्थैर्यः । पण्डितः । इति मेदिनी । रे, ५९ ॥ (यथा, भागवते । ३ । ६ । ४५ ।

"तथापरं चात्मसमाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति
तेषां श्रमः स्यान्न तु सेवया ते ॥"

बलयुतः । इति शब्दरत्नावली ॥ मन्दः । इति त्रिकाण्डशेषः ॥ (यथा,—

"देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"

इति रसमञ्जर्य्याम् ।)

विनीतः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (गम्भीरः । यथा, रघुः । ३ । ४४ ।

"अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव ॥")

धीरत्वं, क्ली, (धीरस्य भावः । धीर + त्व ।) धीरता । यथा,—

"प्रागल्भ्यौदार्य्यमाधुर्य्यस्थैर्याधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलाः स्त्रियोऽङ्गजाः ॥"

इति हेमचन्द्रः । ३ । १७३ ॥

धीरपत्नी, स्त्री, (धीरं मनोहरं पत्त्रमस्याः । स्त्रियां ङीष् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

धीरस्कन्धः, पुं, (धीरः अचञ्चलः भारसह इति यावत् स्कन्धो यस्य ।) महिषः । इति हेमचन्द्रः । ४ । ३१८ ॥

धीरा, स्त्री, (धीर + टाप् ।) काकोली । महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (गुडूची । अस्याः पर्य्यायाः यथा,—

"गुडूची मधुपर्णी स्यादमृतास्तन्तवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विश्वल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मानावस्थायां मध्याप्रगल्भानायिकाभेदः । अस्या लक्षणम् । यद्यत्कोपप्रकाशा धीरा । मध्याया धीरायाः कोपव्यञ्जिका गीः । प्रौढ़ाधीरायास्तु रतावौदास्यम् । सा द्विविधा ज्येष्ठा कनिष्ठा च । मध्या धीरा यथा,—

"लोलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधारा ।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥

प्रौढ़ा धीरा यथा,—

"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशं क्षणात् ।
इत्थं केतकगर्भगौरि ! दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत साचिस्मितम् ॥"

इति रसमञ्जरी ॥

धीराधीरा, स्त्री, (धीरा अधीरा च ।) मानावस्थायां मध्याप्रगल्भा नायिकाभेदः । अस्या लक्षणम् । यद्यदवज्ञाकोपप्रकाशा । मध्यायाः धीराधीरायाः कोपव्यञ्जिके वचनरुदिते । प्रौढ़ाधीराधीरायाः रतावौदास्यं तर्ज्जनताड़नादि च कोपस्य प्रकाशकम् । सा द्विविधा । ज्येष्ठा कनिष्ठा च । मध्याधीराधीरा यथा,—

"कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य मुदया वदने प्रियस्य
निःश्वस्य वाष्पलुलिता निहिता दृगन्ता: ॥

प्रौढ़ाधीराधीरा यथा,—

"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचिसाचिहसितस्फुर्जत्कपोलश्रिया ।
हस्तन्यस्तकरे पुनर्मृदुतया लोलारसच्चालित-
प्रौष्ठी प्रेङ्खमयूखमांसलरुचो विस्फारिता हृदयः ॥"

इति रसमञ्जरी ॥

धीलटिः, स्त्री, (धिया बुद्ध्या लटति बालोक्या मोहयतीति । लट् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) दुहिता । इति हारावली ॥ २१९ ॥

धीवा, [न्] पुं स्त्री, (ध्यायतीति । धै + "ध्याधैः संप्रसारणञ्च ।" उणा० । ४ । २१५ । इति कनिप् । संप्रसारणञ्च ।) धीवरः । यथा, बहुधीवरी बहुधीवा । इति मुग्धबोधम् ॥

धीवरः, पुं, (दधाति मत्स्यानिति । धा + "छित्वरच्छत्वरधीवरपीवरेति ।" उणा० । ३ । १ । इति क्वरप् प्रत्ययेन निपातनात् साधुः ।) कैवर्त्तः । इत्यमरः । १ । १० । १५ ॥ (यथा, महाभारते । २ । २० । १७ ।

"यतो हि निम्नं भवति नयन्ति हि ततो जलम् ।
यतश्चिह्नं ततश्चापि नयन्ते धीवरा जलम् ॥")

धीवरी, स्त्री, (धीवर + ङीष् ।) धीवरपत्नी । कैवर्त्ती । इति मुग्धबोधम् ॥ मत्स्यवेधिनी । इत्यादिकोषः ॥

धीशक्तिः, स्त्री, (धियः शक्तिः ।) बुद्धिसामर्थ्यम् । तत्पर्य्यायः । निष्क्रमः २ । इत्यमरः । ३ । २ । २५ ॥ सा चाष्टधा यथा,—

"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥"

इति भरतः ॥

धीसखः, पुं, (धियः सखा सहायः । "राजाहःसखिभ्यष्टच् । इति टच् ।) मन्त्री । इति हेमचन्द्रः । ३ । ३८३ ॥

धीसचिवः, पुं, (धियि बुद्धौ मन्त्र्यादौ सचिवः सहायः ।) मन्त्री । इत्यमरः । २ । ८ । ४ ॥

धु, ञ न कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-उभं-सकं-अनिट् ।) ञ न, धुनोति धुनुते । कम्प इह आन्तस्य रूपम् । धुनोति चम्पकवनानि धुनोत्यशोकं वायुरिति च वायुधः । इति दुर्गादासः ॥

धुः, स्त्री, (धवनमिति । धु कम्पने + भावे डुः ।) कम्पनम् । इत्येकाक्षरकोषः ॥

धुच्च, ड सन्दीपने । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-चकं-सेट् ।) पक्षमखरी । ड, धुच्चते वह्निः सन्दीप्यते इत्यर्थः । धुच्चते जनः क्लिश्यति जीवति वेत्यर्थः । इति दुर्गादासः ॥

धुतः, त्रि, (धु+क्तः।) त्यक्तः। विधूतः। इति मेदिनी। ते, २८॥ (यथा, रघुः। ११। १६।
"तीव्रवेगधुतमार्गवृक्षया
प्रेतचीवरवसा खनोग्रया।
अभ्यभावि भरताग्रजस्तया
वात्यया इव पिप्पलाननोत्यया॥")

धुनिः, स्त्री, (धुनोति वेतसादिनदीजातवृक्षानिति। धु कम्पने+बहुलवचनात् निः स च कित्।) नदी। इत्यमरटीकायां भरतः॥ (यथा, ऋग्वेदे। २। ३०। २।
"पथोदरन्धीरनुजोषमस्मे
दिवे दिवे धुनयो यन्त्यर्थम्॥"
पुं, जलप्रतिरोधकोऽसुरविशेषः। यथा, तत्रैव। १। १७४। ६।
"त्वं धुनिरिन्द्रधुनिमतीर्ऋणोरपः सीरान्
स्रवन्तीः॥"
"हे इन्द्र त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेतस्तरङ्गवतीः अथवा धुनिनां मज्जलप्रतिरोधकार्य्यं ऋरः स एव प्रतिबन्धकतया यासां ताद्दशीरपः॥" इति तद्भाष्ये सायनः। धूनयति कम्पयति शत्रूनिति। मरुद्विशेषः। यथा, वाजसनेयसंहितायाम्। ३६। ७।
"उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च॥"
कम्पयितरि, त्रि। यथा, ऋग्वेदे। १। ७६। १।
"हिरण्यकेशो रजसोविसारेऽहिर्धुनिर्वात इव
ध्रजीमान्॥")

धुनी, स्त्री, (धुनि+ङादिकारादिति वा ङीष्।) नदी। इत्यमरः। १। १०। ३०॥ (यथा भागवते। ४। २६। ५५।
"सत्वं विचस्व भगवन्नेतन्मनोऽन्त-
श्चित्तं नियच्छ हृदि कर्णधुनीच चित्ते॥")

धुनीनाथः, पुं, (धुनीनां नदीनां नाथः।) समुद्रः। इति राजनिर्घण्टः॥

धुन्धुमारः, पुं, (धुन्धुं तन्नामकं राक्षसं मारयतीति। मारि+अण्।) कुवलयाश्वराजः। स तु बृहदश्वपुत्रः। इति पद्मपुराणम्॥ (अस्य धुन्धुमारणकथा यथा, हरिवंशे। २१। ३६—५५।
"स एवमुक्तो राजर्षिस्तङ्केन महात्मना।
कुवलाश्वं सुतं प्रादात् तस्मै धुन्धुनिवारणे॥
बृहदश्व उवाच।
भगवन्! न्यस्तशस्त्रोऽहमयन्तु तनयो मम।
भविष्यति द्विजश्रेष्ठ! धुन्धुमारो न संशयः॥
स तं आदिश्य तनयं राजर्षिर्धुन्धुमारणे।
जगाम पर्वतायैव तपसे संशितव्रतः॥
कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिव!।
प्रायाद्दृढाश्वसहितो धुन्धोस्तस्य परिग्रहे॥
तमाविशत्तदा विष्णुर्भगवांस्तेजसा विभुः।
उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत्।
एष श्रीमान्नृपसुतो धुन्धुमारो भविष्यति॥
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन्।
देवदुन्दुभयश्चापि प्रणेदुर्भरतर्षभ!॥
स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान्।
समुद्रं खानयामास वालुकार्णवमव्ययम्॥
नारायणेन कौरव्य! तेजसाप्यायितः स वै।
बभूव सुमहातेजा भूयो बलसमन्वितः॥
तस्य पुत्रैः खनद्भिस्तु वालुकान्तर्हितस्तदा।
धुन्धुरासादितो राजन्! दिग्रमाश्रित्य पश्चिमाम्॥
मुखजेनाग्निना क्रोधात्लोकानुद्दहतीवयत्।
वारि सुस्राव वेगेन महोदधिरिवोदये॥
सोमस्य भरतश्रेष्ठ! धारोर्म्मिकलिलं महत्।
तस्य पुत्रशतं दग्धं त्रिभिरुज्झन्तु रक्षसा॥
ततः स राजा कौरव्य! राक्षसं तं महाबलम्।
आससाद महादेवा धुन्धुं धुन्धुनिवर्हणः॥
तस्य वारिमयं वेगमापीय स नराधिपः।
योगी योगेन वह्निञ्च शमयामास वारिणा॥
निहत्य तं महाकायं बलेनोदकराक्षसम्।
उतङ्कं दर्शयामास कृतकर्म्मा महायशाः॥
उतङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने।
अदद्याच्चयं वित्तं शत्रुभिश्चापराजयम्॥
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयम्।
पुत्राणाञ्चाक्षयाल्लोकाँ कान् स्वर्गे ये राक्षसा
हताः॥"*॥)
शत्रुगोपः। शलभधूमः। पदातिकः। इति मेदिनी। रे, २७०॥

धुरन्धरः, पुं, धववृक्षः। इति रत्नमाला॥ (पर्य्यायोऽस्य यथा,—
"धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
धुरं धरतीति। धृ+खच्+मुम्।) रथलाङ्गलादिभारवोढ़ा। तत्पर्य्यायः। धुर्व्वहः २ धुर्य्यः ३ धौरेयः ४ धुरीणः ५। इत्यमरः। २। ६। ६५॥ यथा,—
"धुरन्धरो धुरीणश्च धौरेयधुर्य्यधुर्व्वहाः।
यत्र काम्यरथस्यापि लाङ्गलस्यापि वा धुरम्॥
वहत्येकधुरीणः स्यात्तथा चैकधुरोऽपि च।
स तु सर्व्वधुरीणः स्यात् सर्व्वा वहति यो धुरः॥"
इति शब्दरत्नावली॥
(आदित्यवृषस्य मन्त्री। स तु कौशलेन राजानं हत्वा स्वयमेव राज्यमकरोत्॥ यथा, राजावल्याम् २ परिच्छेदे।
"आदित्यस्य तदा मन्त्री अदूरान्वयसम्भवः।
धुरन्धराभिधो धीरो बलबुद्धिनिकेतनः॥
सेनापतीन् वशीचक्रे धनमानप्रदानतः।
एकदा स तमादित्यमादित्यसमवर्च्चसम्॥
एकान्ते नृपमासीनं हत्वा कृतमतिस्तदा।
तदासनं समारुह्य राज्यं प्राप्तादुधुरन्धरः॥
भूमिवेदमितान्वर्षान्भुक्त्वा भोगानयुक्तमान्।
सेनोद्धतं सुतं राज्ये स्थापयित्वा लयं गतः॥"
राक्षसविशेषः। स तु प्रहस्तस्य सचिवविशेषः। यथा, गोः रामायणे। ६। ३२। १५।
"एतस्मिन्नन्तरे शूरः प्रहस्तस्य वशानुगः।
धुरन्धरः कुम्भहनुर्महानादः समुद्गदः।
एते प्रहस्तसचिवाः सर्व्वे जग्मुर्वनौकसः॥")

धुर्व्वाष्टकमाचे, त्रि॥ (यथा, महाभारते। ३। १८६। १०।
"अनड्वाहं सुव्रतं यो ददाति
हलस्य वोढ़ारमनन्तवीर्य्यम्।
धुरन्धरं बलवन्तं युवानं
प्राप्नोति लोकान् दशधेनुदस्य॥"
श्रेष्ठः। यथा, तत्रैव। १३। १३७। ३१।
"दत्त्वा तु सततं तेषु कौरवाणां धुरन्धर!।
दानयज्ञक्रियायुक्ता बुद्धिर्धर्म्मोपचायिनी॥")

धुरा, स्त्री, (धुर्+पचे टाप्।) धूः। भारः। इत्यमरटीकायां भरतः॥

धुरीणः, त्रि, (धुरं वहतीति। "खः सर्व्वधुरात्।" ४। ४। ७८। इत्यत्र योगविभागवत् खः।) भारवाहः। इत्यमरः। २। ६। ६५॥ (श्रेष्ठः। यथा, पद्मपुराणे। ३। २०७।
"हे ब्रह्मन्नवधारणां धुरीण! त्वयापि मय्युपेक्षातिमात्रादुक्ता स्कन्धादुत्तार्य्य यच्च यच्च खजनग्रहद्वारादिषु बभ्राम॥")

धुरीयः, पुं, (धुरमर्हतीति। छः।) अनड्वान्। इति राजनिर्घण्टः॥ भारयोग्ये, त्रि॥

धुर्य्यः, त्रि, (धुरं वहतीति। धुर्+"धुरो यड्ढकौ।" ४। ४। ७७। इति यत्। "न भकुर्छुराम्।" ८। २। ७६। इति न दीर्घः।) धुरन्धरः। इत्यमरः। २। ६। ६५॥ (यथा, रघुः। ५। ६६।
"तामेकतस्तव बिभर्त्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्य्यपदावलम्बी॥"
श्रेष्ठः। यथा, भागवते। ४। २२। ४६।
"वयन्तु धुर्य्या महतां संस्थित्याध्यात्मशिक्षया॥"
ऋषभौषधौ अनड्वहि च पुं। इति राजनिर्घण्टः॥ (अश्वादिरपि। यथा, महाभारते। ३। १६७। १२। "पुनरपि चान्योऽश्वार्थी ब्राह्मण आगच्छत्। त्वरितोऽथ तस्मै अपनस्य वामं धुर्य्यमददत् अथ प्रायात्॥")

धुर्व, ई हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) हस्वी। धूः धुरौ धुरः। ई, धूर्णः। कितवे वाच्ये धूर्त्तः। इति मनीषादित्वान्निपात्यः। इति दुर्गादासः॥

धुवका, स्त्री, (धवति पुनः पुनरुच्चारणेन गीतं कम्पयतीवेति। धू कम्पने+"कृञ्श्रिछिसंज्ञयोरपूर्व्वस्यापि।" उणां २। ३२। इति क्वुन्। ततष्टाप्।) ध्रुवका। इत्युणादिकोषः॥ धूवा इति भाषा॥

धुवनः, पुं, (धवतीति। धू+"भूसूधूभ्यस्त्रिभ्यश्छन्दसि।" उणां २। ८०। इति क्युन्।) अग्निः। इति सिद्धान्तकौमुदी॥ (यथा, शतपथब्राह्मणे। १३। २। ८। ५।
"ये यज्ञे धुवनं तन्वते॥")

धुवित्रं, क्ली, (धूयतेऽनेनेति। धू+इत्र।) यज्ञाग्निज्वालनार्थमृगचर्म्मरचितव्यजनम्। इत्यमरः। २। ७। २३॥

धुस्तुरः, पुं, धुस्तूरः। इत्यमरटीकायां भरतः॥

धूस्तरः, पुं, (धूनोति कम्पयति चित्तं सेवनेन । धू कम्पने + "खर्जिपिञ्जादिभ्य उरोलचौ ।" उणा ४ । ६० । इति ऊरः । "धुनोतेः स्तुट् च ।" इत्यच्यलदन्तोक्त्या स्तुट् ।) क्षुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हैमचन्द्रः ॥ शठः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूपः १३ काष्ठनापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ क्लमः १८ मत्तः १९ ग्रैवेयः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुस्तूरः २५ धुस्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मदवर्णाग्निवातकारित्वम् । ज्वरकुष्ठयकालिक्षारक्लेदश्लेष्मकण्डूकृमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

"अर्कक्षीरं खुहीक्षीरं तथैव कालहारिका ।
करवीरकधुस्तूरौ पञ्च क्षीरविषाणि तत् ॥
अर्कक्षीरं खुहीक्षीरं लाङ्गलीकरवीरकम् ।
गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धू, अ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणमेव । अ, धवति धवते । धवति चन्दनमञ्जरीत्येति हलायुधः । इति दुर्गादासः ॥

धू, न अ णि कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-क्र्यां च-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणम् । न अ, धूनोति धूनुते । णि अ, धुनाति धुनोति । धूनः धूनिः । धूनोति चम्पकवनानीति हलायुधः । धुनाति वायुरश्वत्थम् । धूनोते वल्भूकं तिलकुसुमनाम्ना हि पवनः । इति दुर्गादासः ॥

धू, णि क कम्पे । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-च-सकं-सेट् ।) कम्प इह भ्वन्तस्य रूपम् । णि, धूवति मारुतो मालतीलताम् । अधूवीत् । क, धावयति । वायुर्विधूनयति केशरपुष्परेणूनिति चुरादौ हलायुधः । प्रीधूनोर्नन् वा इत्यत्र धूग्रहणादस्य कथं ग्रहणमिति चेन्न । स्वार्थविहितस्य णेर्णकारेण समत्वस्य वाच्यत्वात् । अन्यथा कम्पप्रेरणे धूनयति इत्यादिप्रयोगा न स्युः । धूनोतीत्यादीनां साध्या इति चेत् स्वभावात् कम्पप्रेरणार्थानां तेषां नौ कृते कम्पप्रेरणस्य प्रेरणभेदार्थः स्यात् । किञ्च कम्पनार्थायां धूनयतीत्यादीनामावश्यकत्वात् ततश्चुरे णकारः प्राचीनमतानुवादार्थ एव । इति दुर्गादासः ॥

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानसुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १३६ । २१ । "क्षणात् प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः ॥") भारः । (यथा, रघुः । १० । ३४ । "तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥") चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ ।

"अपांगुलानां धुरि कीर्त्तनीया ॥"

हिंसके, त्रि । यथा, ऋग्वेदे । १० । ६४ । ७ ।

"दशधुरो दशयुक्ता वहन्ति ॥"

"दशभिर्धुरो धूर्भिर्हिंसिद्भिः । तृतीयार्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥)

धूकः, पुं, (धूनोति कम्पयतीति । धू + "अजिदृधूनीभ्यो दीर्घश्च ।" उणा ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । काकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू + क्तः ।) कम्पितः । (यथा, मेघदूते । ३५ ।

"धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडाविरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥")

भर्त्सितः । इति मेदिनी । ते, २८ ॥ व्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धून, त्रि, (धू + "क्तादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तः खादित्वात्तस्य नादेशः । इति संक्षिप्तसारव्याकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू + णिच् + ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूननं क्ली, (धू + णिच् + ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति भ्वन्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ । "क्रूरात्मा भक्तिशून्यैलश्रीनिषेधं सधैधूनने ॥")

धूनिः, स्त्री, कम्पनम् । धूधातोः क्तिस्थाने खादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) षष्ठस्वरी । धूपायति धूपायते । आयन्तत्वादुभयपदमिति बोपदेवः । अरे तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अधूपीत् दुधूप इत्यादि । तापः सन्तापीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति सुगन्धेन प्रीणयित्वा दोषं तापयति । धूप + अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तद्वर्त्तिश्च । तत्पर्य्यायः । गन्धपिण्डिका २ । इति हेमचन्द्रः । ३ । ३१३ ॥ * ॥ यथा,—

"एवं वां कथितो दीपो धूपञ्च शृणुतं सुतौ ।
नासाश्चिरन्ध्रसुखदः सुगन्धोऽतिमनोहरः ॥
दह्यमानस्य काष्ठस्य प्रयतस्येतरस्य वा ।
परागस्याथवा धूमो निस्तापो यस्य जायते ॥
स धूप इति विज्ञेयो देवानां तुष्टिदायकः ।
राज्ञीहतेन चैकेन तैर्द्रव्यैः परिधूपयेत् ॥
ओषधिवर्त्तथा कृत्वा न तत्फलमवाप्नुयात् ।
श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा ॥
उदयः सुरथः कन्दो रक्तविद्रुम एव च ।
पीतसालः परिमली विमर्द्दोकासनस्तथा ॥
नमेरुर्देवदारुश्च विल्वसारोऽथ खादिरः ।
सन्तानः पारिजातश्च हरिचन्दनवल्लभौ ॥
एतेषु धूपाः सर्व्वेषां प्रीतिदाः परिकीर्त्तिताः ।
अरालः सह सल्लक्या श्रीवासः पटवासकः ॥
कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ ।
सर्व्वौषधिरजोजातो वाराहश्चूर्ण उत्कलः ॥
जातीकोषस्य चूर्णश्च गन्धः कस्तूरिका तथा ।
घोदे वृक्षे च गादता धूपा एते उदाहृताः ॥
यश्चधूपो ढकधूपः श्रीपिण्डोऽगुरुभर्करः ।
पत्रिवाहः पिण्डधूपः सुगोलः कण्ठ एव च ॥
अन्योन्ययोगनिर्य्यासा धूपा एते प्रकीर्त्तिताः ।
एतैर्विधूपयेद्देवान् धूमिभिः क्षणवर्त्मना ॥
येषां धूपोद्भवैर्गन्धैस्तुष्टिं गच्छन्ति जन्तवः ।
निर्य्यासश्च परागश्च काष्ठं गन्धं तथैव च ॥
क्षत्रिमश्चेति पञ्चैते धूपाः प्रीतिकरा मताः ।
न यश्चधूमं वितरेत् माधवाय कदाचन ॥
न रक्तविद्रुमं मह्यं सुरथं स्कान्दनं तथा ।
यश्चधूपः पत्रिवाहः पिण्डधूपः सुगोलकः ॥
क्षणागुरुः सकर्पूरो महामायाप्रियः स्मृतः ।
यश्चधूपेन वा देवीं महामायां प्रपूजयेत् ॥
यश्चधूपेनेत्यत्र ढकधूपेनेति च पाठः ॥
मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत् ।
परकीर्य्यांस्तथा भ्रातॄन् स्त्रीनीकृत्याभिमर्हितान् ॥
पुण्यं धूपञ्च गन्धञ्च उपचारांस्तथापरान् ।
भ्रातॄन्निवेद्य देवेभ्यो नरो नरकमाप्नुयात् ॥
न भूमौ वितरेत् धूपं नासने न घटे तथा ।
यथा तथाधारगतं कृत्वा तद्विनिवेदयेत् ॥
रक्तविद्रुमशालौ च सुरथः सरलस्तथा ।
सन्तानको नमेरुश्च कालागुरुसमन्वितः ॥
जातीकोषाद्यसंयुक्तो धूपः कामेश्वरीप्रियः ।
त्रिपुरायास्तथैवायं मातॄणामपि नित्यशः ॥
सर्व्वेषां पीठदेवानां कान्तादीनाञ्च पुत्रक ! ।
एष वां कथितो धूपः शृणु तं नेत्ररञ्जनम् ॥"

इति कालिकापुराणे ६८ अध्यायः ॥

अपि च ।

"पुष्पाणि च सुगन्धीनि धूपश्च घृतसंयुतम् ।
गुग्गुलुं कुन्दुरुं चैव देवदारु तुरुष्ककम् ॥
सिल्हकं चन्दनं काष्ठं श्रीवासं चागुरुं तथा ।
सर्व्वरसं नखं चैव देवे पैत्रे च कर्म्मणि ॥"

इति वह्निपुराणे भोजनविधाननामाध्यायः ॥*॥

रोगनाशकधूपो यथा,—

"कुक्कुरमत्स्याखुमहिषगोघ्नगालाश्ववानराः ।
विड़ालबर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एषाञ्च विण्मूत्रं मांसं वा रोम शोणितम् ।
धूपं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये ॥

धूपः

एतान्योषधजातानि धूपितानि महेश्वर ! ।
निघ्नन्ति रोगजातानि दृष्टमिन्द्राग्निर्यथा ॥"
इति गारुडे १६६ अध्यायः ॥

(यथा,—
"पुरध्यामवचासर्ज्जनिम्बार्कागुरुदारुभिः ।
सर्व्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

षड़ङ्गधूपो यथा,—
"गुग्गुल्वगुरुउशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ॥"
अन्यच्च ।
"सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम् ।
षड़ङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ॥"

दशाङ्गो यथा,—
"रोमरोगकरीरोगदकेशाः
सुरतरुजतुलसुपत्रविशेषाः ।
वल्कविवर्ज्जितवारिजसुद्रा
धूपवर्त्तिरिह सुन्दरि ! भद्रा ॥"
अन्यच्च ।
"मधु सर्ज्जं घृतं गन्धो गुग्गुलागुरुशैलजम् ।
सरलं चिञ्चिड़ार्थे दशाङ्गो धूप उच्यते ॥"

षोड़शाङ्गो यथा,—
"गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुड़ं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं देवे पित्र्ये च कर्म्मणि ॥"
इति तन्त्रसारः ॥ * ॥

केशवार्य्यायां षोड़शाङ्गधूपो यथा,—
"सर्ज्जकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
देवदारु जटामांसी जातीकोषञ्च वालकम् ॥
सरा मांसी त्वगुरुकं त्वगुशीरञ्च केशरम् ।
एला तथा तेजपत्रं सर्व्वमेतद्घृतान्वितम् ॥
धूपोऽयं षोड़शाङ्गः स्यादृगोविन्दप्रीतिकारकः ॥"

द्वादशाङ्गो यथा,—
"गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
जातीकोषञ्च कर्पूरं जटामांसी च वालकम् ।
त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥"

दशाङ्गो यथा,—
"कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
केशरं वालकं पत्रं त्वक्जातीकोषसुत्तमम् ॥
सर्व्वमेतद्घृतयुतं दशाङ्गो धूप ईरितः ॥"

अष्टाङ्गो यथा,—
"गुग्गुलागुरुकं तैलपर्णं मलयसम्भवम् ।
कर्पूरं वालकं कुष्ठं नूतनं कुङ्कुमं तथा ॥
अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥"

षड़ङ्गो यथा,—
"चन्दनं कुङ्कुमं नूत्नं कर्पूरं गुग्गुलोर्गुड़ ।
धूपोऽयं घृतसंयुक्तः षड़ङ्गः सर्व्वदाऽनघ ॥"

सकुन्दधूपे वर्জ্জनीयद्रव्यम् । यथा,—
"शैवलं ग्राम्यनिर्य्यासं पद्मकं धरलञ्च तु ।
वचा मधुरिका तैलं गन्धकाष्ठं वलामकम् ॥
गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।

धूपाङ्गः

कक्कोलमुशीरं दार्व्वी गन्धमाद्री रसाञ्जनम् ॥
अरुवर्गः शटी मेथी शिलाजिन्नन्दचन्दनम् ।
कुन्दरु रेणुकं राजाजमोदा घृतपुष्पिका ॥
हरिद्रा जीरकं दृष्टचोरच्च रक्तचन्दनम् ।
कर्पूरकं मरुवकं यवानी ग्रन्थिकन्तथा ॥
शैलजं धातकीपुष्पं नखी मोचरसादिकम् ।
सकुन्दधूपे देवर्षे ! सर्व्वमेतदुदीरयेत् ॥"
इति पाद्मोत्तरखण्डम् ॥

धूपदानविधिर्यथा,—
"मध्यमानामिकाभ्यान्तु मध्यपर्व्वभि देशिकः ।
आहृत्याग्नेय देवेशि ! दृष्ट्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्च्य तर्জ্জन्या वामयाभृशम् ।
धूपभाजनमालेभ्य प्रोक्षाभ्यर्च्च्य हृदाशुना
उत्तीर्य्य दक्षिणं पर्य्यन्तं घण्टां वामदिशि स्थिताम् ॥
वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत् ॥"
इति तन्त्रसारः ॥

गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
"अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कुब्जो जायते भूमे यातुधानो न संशयः ॥
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।
तिष्ठतेऽत्र महाभागे ! एवमेतन्न संशयः ॥"
इति वराहपुराणम् ॥ * ॥

विप्रधूपो यथा,—
"सक्तुः सर्व्वरसोपेतः सर्व्वगन्धसमन्वितः ।
सुवर्णा तस्करतरोः कुसुमैरर्চ্চनस्य तु ॥
धूपो वाक्यदृष्टे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्দুरसरीसृपाः ॥
न लाला कर्म्मणस्तत्र धूपोऽयं यत्र दृश्यते ॥"*॥

सर्व्वनिर्म्मोचनधूपो यथा,—
"कार्पासास्थिसुजस्यस्य यथा निर्म्मोचनं भवेत् ।
सर्व्वनिर्म्मोचनो धूपः प्रशस्तः सततं गृहे ॥"
इति मत्स्यपुराणे १६२ अध्यायः ॥

धूपनः, पुं, (धूपयति संधुक्षयति वह्निमिति । धूप+ल्युः ।) श्रालवृक्षनिर्य्यासः । धूना इति भाषा । तत्पर्य्यायः । श्रालवेष्टः २ सर्ज्जरसः ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ (यथा, महः । ७ । २१६ ।
"परीक्षिताः स्त्रियश्चैनं अगरोदकधूपनैः ।
वेषाराभरणसंगुप्ता सूपैश्चैः सुसमाहिताः ॥"
स्त्री, धूप+ल्युट् । धूपादिना सन्धुक्षणम् । यथा, महाभारते । १३ । ६६ । ७ ।
"अग्निकार्य्याणि समिधः कुशाः सुमनसस्तथा ।
वलयश्चाग्निशालाभिर्धूपनं दीपकर्म्म च ॥")

धूपवृक्षः, पुं, (धूपोत्पादको वृक्षः ।) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ (सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

धूपवृक्षकः, पुं, (धूपवृक्ष+स्वार्थे कन् ।) सरल वृक्षः । इति शब्दरत्नावली ॥

धूपागुरु, क्ली, (धूपाय सन्धुक्षणाय यदगरु ।) दाहागुरु । इति राजनिर्घण्टः ॥

धूपाङ्गः, पुं, (धूपस्याङ्गमङ्गं यस्य ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

धूमः

धूपायितः, त्रि, (धूप्यते स्मेति । धूप सन्तापे+ "आयादय आधारधातुके वा ।" ३ । १ । ३१ । इति आयः । ततः क्तः ।) सन्तप्तः । अध्यादिना आन्तः । इत्यमरभरतौ ॥ दत्तधूपयुक्तादि । यथा, तत्रैव प्रमोदे ।
"प्रदीपमरिदीपिते विविधधूपधूपायिते ॥"

धूपार्हः, क्ली, (धूपाय अर्হ्यते पूज्यते इति । अर्ह पूजायाम्+घञ् ।) लक्षागुरु । इति राजनिर्घण्टः ॥ धूपयोग्ये, त्रि ॥

धूपितः, त्रि, (धूपयते स्मेति । धूप+क्तः ।) सन्तापितः । (यथा, हरिभक्तिविलासे ।
"ततो गन्धप्रदित्सुश्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥")
अध्यादिना आन्तः । इत्यमरभरतौ ॥ दत्तधूपः । यथा,—
"अवादिना दोहदधूपितो द्रुमः ।"
इति हरिवंशे ॥

धूमः, पुं, (धूनोति धूयते वा । धू+ मन् कर्म्मणि+ "इषियुधीन्धीति ।" उणां १ । १४४ । इति मक् ।) आग्नेयजलभवः । धूँआ इति भाषा । तत्पर्य्यायः । भस्मः २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ७ । २६ ।
"हविःग्रमीपक्लवलाजगन्धी
पुरुषः क्षणानीरुदियाय धूमः ॥")
अस्य गुणः । वातपित्तहरित्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्জनकः ॥ (यथा, मेघदूते । ५ ।
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥"
भौमादिवदुत्तरपदलोपे धूमकेतुः । यथा, मार्कण्डेये ।
"उल्कापाते च निर्दिशं धूमे पञ्चदिनानि च ॥"
उत्पातजनायुविशेषः । चौंया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
"धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥"
चिकित्साविशेषः । यथा,—
"श्वेता श्रीतिघ्नती चैव हरितालं मनःशिला ।
गन्धाश्चागुरुपत्राद्या धूमो गर्भविरेचनम् ॥
गौरवं शिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः सोत्क्लेशाश्चापि दोषजाः ।
पूतिघ्राणास्यगन्धत्वं दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः कृमयः पाण्डुता मुखे ।
श्लेष्मप्रसेको वैस्वर्य्यं गलमुष्कुण्डिकाः ॥
क्लान्तिं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
क्षयश्च जातिसन्ना च वृद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
शिरोरुहकषायाणामिन्द्रियाणां स्वरस्य च ॥"
"स्नाता सुक्ता यशुक्लिस्थ क्षुत्वा दन्तान्
प्रधृष्य च ।
नावनाञ्जननिद्रान्ते वातघ्नान् धूमपो भवेत् ॥
तथा वातकफात्मानो न भवन्त्यरुजाः ।
रोगास्तस्य तु पेयाः सुरापायोसस्त्रकृताः ॥

परं द्विकालपायी स्यादृक्षः कालेषु बुद्धिमान् ।
प्रयोगे स्नेहिके लेकं वैरेयं चिन्तयेत् पिबेत् ॥
नु तुकक्षेन्द्रियसंशुद्धिर्लघुत्वं शिरसः शमः ।
यथेरितानां दोषाणां सम्यक् पीतस्य लक्षणम् ॥
आधिर्यमान्द्यं सूकत्वं रक्तपित्तं शिरोऽमम् ।
वकत्रे चातिपीतश्च धूमः कुर्यादुपद्रवान् ॥"
"न विरिक्तः पिबेद्धूमं न क्षते वस्तिकर्मणि ।
न स्त्री न विषेवार्त्तो न क्षीणो न च गर्भिणी ॥
न श्रमे न मदे न्यासे न पित्ते न प्रजागरे ।
न मूर्च्छा भ्रमतृष्णासु न क्षीणे नापि च क्षते ॥
न मद्यदुग्धे पीत्वा च न क्षेहं नस्य माचिकम् ।
धूमं न सुक्ष्मा दृक्षा च न रूक्षः क्रुद्ध एव च ॥
न तालुशोषे तिमिरे शिरस्यभिहते न च ।
न ग्रहके न रोहिण्यां न भेदे न मदालये ॥
रक्त धूमस्यकालेऽपि मोहात् पिबति यो नरः ।
रोगास्तस्य प्रवर्द्धन्ते दारुणा धूमविभ्रमात् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"धूमः पञ्चविधो भवति तद्यथा, प्रायोगिकः स्नेहनो वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवर्गेण सूक्ष्मपिष्टेन द्वादशाङ्गुलं शुल्काकारं शौमेऽष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्तिः प्रायोगिके । स्नेहपलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नेहने । शिरोविरेचनद्रव्यैर्वैरेचने । दृक्षतीक्ष्णटकारिकाविकटुककासमर्दहिङ्गुहरीतक्यङ्गधूलिप्रभृतिभिः कासघ्नैश्च कासघ्ने । खायुचर्म्मखरशङ्खकर्कटकास्थिगुष्कमत्स्यवल्कूरलमिप्रभृतिभिर्वामनीयैश्च वामनीये ॥"
"सुखेन तं पिबेत् पूर्व्वं नासिकाभ्यां ततः पिबेत् ।
सुखपीतं सुखेनैव वमेत् पीतश्च नासया ॥
सुखेन धूममादाय नासिकाभ्यां न निर्हरेत् ।
तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते ॥"
"अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः ।
ग्राम्यौचाग्निजिह्वानासुपघातञ्च दारुणम् ॥"
"तत्र स्नेहनो वातं शमयति स्नेहादुपवेशाच्च । वैरेचनः श्लेष्मास्रपित्तमपकर्षति रौक्ष्यात्तेक्ष्ण्यादौष्ण्याद्देश्याच्च । प्रायोगिकः श्लेष्मास्रपित्तलेशयत्वमक्लिष्टं चापकर्षति साधारणत्वात् पूर्व्वेभ्यः ॥"
नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुर्गन्धविद्वदानन ॥"
नैमित्तिकं नौक्तिकोक्षावशादीत । अस्य-
प्रयोगः स्नेहवत्तुरा वैरि ॥
अहिकं यावदस्रप्रवृत्तिः वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पानतो वामनाद्वा यासान्तरेण कासघ्न इति ।" इति सुश्रुते चिकित्सितस्थाने ४० अध्यायः ॥

धूमकेतनः, पुं, (धूमः केतनं ध्वजचिह्नं यस्य ।) अग्निः । (यथा, रघुः । ११ । ८२ ।
"निष्प्रभश्च रिपुराश भूपतेः
धूमशेष इव धूमकेतनः ॥")
केतुग्रहः । इति मेदिनी । ने, २३८ ॥ (महादेवः । यथा, महाभारते । ९३ । १७ । ८२ ।
"दृषदः शङ्करो नित्यं वर्त्तसी धूमकेतनः ॥")

धूमकेतुः, पुं, (धूमः केतुश्चिह्नं यस्य ।) अग्निः । (यथा, महाभारते । १ । १०३ । १७ ।
"प्रभां ससृजतुस्तेजोदर्शो धूमकेतुसमद्युतीनाम् ॥")
उत्पातविशेषः । स धूमाभा तारका । इत्यमरभरतौ ॥ (यथा, कुमारे । २ । ३२ ।
"भवत्यवरोधेर्व्वसारकाक्षो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥")
ग्रहभेदः । इति विश्वः ॥ * ॥ केतवश्च शिखावन्ति ज्योतींषि स्थिराण्युत्पातरूपाणि । तदुदये कालाशुद्धिर्यथा,—
"धूमकेतौ समुत्पन्ने ग्रहयुद्धे चन्द्रसूर्ययोः ।
ग्रहणार्द्धास्तरे चैव न कुर्य्याच्छुभक्रियाम् ॥
उल्कापाते च विदिशं धूमे पश्च दिनानि च ।
वज्रपाते दिनयुगं वर्ज्जयेत् सर्व्वकर्म्मसु ॥"
इति गर्गवचनम् ॥
भोजराजः ।
"अर्के रवीन्दोर्हरवीप्रकम्पे
केतूद्गमोल्कापतनादिदोषे ।
इति द्वयाहानि वदन्ति तज्ज्ञा-
स्त्रयोदशाहानि वदन्ति केचित् ॥
वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्ययोः ।
प्रयाणञ्च न कुर्व्वीत चक्रं सप्तदिनात्परम् ॥
ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म चिराचरितम् ।
शूद्रस्त्वेका चैकराजं सर्व्वकर्म्म समाचरेत् ॥"
इति मलमासतत्त्वम् ॥
अथ केतूनां संस्थानम् ।
"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥"
तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोड़श मुख्यनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविलये रुद्रक्रोधजाः । सप्त पैतामहाः । पञ्चदश वर्षे वौद्दालिकस्य पुत्राः । सप्तदश मरीचिकश्यपललाटजाः । पञ्च च प्राजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्दश मध्यमानेऽन्हते सोमेन सह समूताः । एकस्तु ब्रह्मकोपजः ॥"* ॥ गर्गादयः सहस्रं वदन्ति । तथा च गर्गः ।
"अमित्रोदयचाराख्यामशुभानाञ्च दर्शनम् ।
आगन्तूनां सहस्रं स्यादृक्षाणां संविबोध मे ॥"
नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । यथा,—
"दिवाभास्करीयभौमस्य एकः केतुः प्रकीर्त्तितः ।
शुभाशुभफलं लोके ददात्यस्तमयोदये ॥"
तत्र धूमकेतुलक्षणम् ।
"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
दृक्षानुधानुकारी विशेषतो दिविचूलो वा ॥"
"दृक्षतनुः प्रसन्न दृक्षमाद्रुक्षात् यो विपरीतो विशेषतः शुक्लचापरूपकेतुरुत्पन्नः स धूमकेतुः

स च न शुभकरः पापं करोतीत्यर्थः दृक्षधनुःसदृशो न शुभकर एव तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः । तथा च समयसंहितायाम् । अचिरस्थितोऽतिदृक्षस्तमितः स्निग्धर्क्षगोऽदगुदितः । दृक्षतनुः प्रसन्नः केतुर्लोकक्षयाभावाय न शुभो विपरीतो विशेषतः शुक्लचापसङ्काशः । द्विशिखस्त्रिशूलो वा दक्षिणसंस्थश्च दृक्षकरः ।" इति भट्टोत्पलकृतवराहसंहिताटीका ॥ (अन्यविशेषः । यथा, नकुलकृताश्ववैद्यके । ४ । २६ ।
"पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो बुधैः ॥"
तथाच युक्तिकल्पतरौ ।
"पृष्ठवंशे यदावर्त्त एकः संपरिलक्ष्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो बुधैः ॥"
महादेवः । यथा, महाभारते । १३।१७।१०३।
"धन्वन्तरिर्धूमकेतुस्तन्त्रो वैश्रवणस्तथा ॥")

धूमगन्धिकं, क्ली, (धूमस्येव गन्धो यस्य । समासे इत् । ततः स्वार्थे कन् ।) रोहिषतृणम् । इति भावप्रकाशः ॥

धूमजाङ्गं, क्ली, (धूमजस्य मेघस्य अङ्गम् धूमजाङ्गं वर्षं तज्ज्ञायते इति । जन + डः ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥

धूमध्वजः, पुं, (धूमः ध्वजचिह्नं यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६३ ॥ (यथा, सर्व्वदर्शनसंग्रहे चार्व्वाकदर्शने ।
"कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत ॥")

धूमप्रभा, स्त्री, (धूमस्य प्रभा इव प्रभा यस्याः ।) धूमान्धकारनरकः । इति हेमचन्द्रः । ५ । ३ ॥

धूममहिषी, स्त्री, (धूमस्य महिषीव ।) कृष्णझटी । इति त्रिकाण्डशेषः ॥

धूमयोनिः, पुं, (धूम एव योनिरुत्पत्तिकारणं यस्य ।) मेघः । (धूमविशेषोद्भवमेघफलं यथोक्तं चिन्तामणिधृतवचने ।
"यत्नधूमोद्भवं स्वभ्रं द्विजानाञ्च हितं स्मृतम् ।
दावाग्निधूमसम्भूतमभ्रं वनहितं स्मृतम् ॥
स्तनधूमोद्भवं स्वभ्रमशुभाय भवेद्ध्रुवम् ।
अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः ॥")
सूत्रकः । इत्यमरः ॥

धूमलः, पुं, (धूमवद्वर्णं लातीति । ला + कः ।) लाक्षालोहितवर्णः । (यथा, नैषधे । १६ । ५ ।
"अपि मधुकरी कालिमन्या विराजति धूमल-
च्छविरिव रवेर्बालाचार्च्चीः करैरतिमातुकैः ॥")
तद्युक्ते, त्रि । इत्यमरः । १ । ५ । १६ ॥

धूमसंहतिः, स्त्री, (धूमस्य संहतिः समूहः ।) धूमसमूहः । इति हलायुधः ॥

धूमसी, स्त्री, रोटिकाविशेषः । यथा, भावप्रकाशे ।
"मायानां दलयुक्तोये स्थापितास्वच्छकच्छुका ।
भ्राष्टगे घोषिता पार्श्वे भ्रिष्टासा धूमसी स्मृता ॥
धूमसी रुचिता सैव प्रोक्ता सुर्भुरिका बुधैः ।
सुर्भुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"

धूमाभः, पुं. (धूमस्य आभा इव आभा यस्य ।) धूम्रवर्णः । इति शब्दमाला ॥ तद्वति, त्रि ॥

धूमावती, स्त्री, दशमहाविद्यान्तर्गतविद्याविशेषः । अस्या ध्यानं यथा,—

"विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा ।
विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा ।
काकध्वजरथारूढ़ा विलम्बितपयोधरा ॥
सूर्पहस्तातिरूक्षाक्षा धृतहस्तवराश्रिता ।
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा ॥
क्षुत्पिपासार्द्दिता नित्यं भयदा कलहासक्ता ।
जपेत् सप्तशतीर्द्यां पुरश्चरणसिद्धये ॥"

इति तन्त्रसारः ॥

(अस्या मन्त्रो यथा, मन्त्रकोषे ।

"दान्तावर्णोग्निवल्लभा ततो धूमावताहिटः ।
धूमावती मनुः प्रोक्तो वैरिनिग्रहकारकः ॥"

धूँ धूँ धूमावती स्वाहा । ॥)

धूमिका, स्त्री, (धूम इव अलीयपदार्थोऽस्त्यस्या इति । धूम + ठन् । स्त्रियां टाप् ।) कृष्णझटिका । इति त्रिकाण्डशेषः ॥ (पक्षिविशेषः । झिङ्गा इति ख्याता । तद्यथा,—

"ग्रध्रश्येनी भासकुररगृध्रोलूककुलिङ्गिकाः ।
धूमिका मधुहा चेति प्रसह्या रात्रपक्षिणः ॥"

इति वामटे सूत्रस्थाने षष्ठेऽध्याये ॥)

धूमोर्ण्य, स्त्री, (धूमादुत्थितेति परम्परासम्बन्धेनेति । धूम + स्था + क । धूमयोनिसम्बन्धोत्पन्नवस्त्रजातत्वाद् परम्परासम्बन्धत्वम् ।) वस्त्रभारम् । इति राजनिर्घण्टः ॥ (धूमोत्थिते, त्रि ॥)

धूमोर्णा, स्त्री, यमपत्नी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । १४५ । १२ ।

"ग्रध्रः ग्रध्रीपतिर्देवो यमो धूमोर्णया सह ।
वरुणः सह गौर्या च सहर्क्षेण च धर्मेश्वरः ॥")

धूमोर्णापतिः, पुं, (धूमोर्णायाः पतिः ।) यमः । इति हारावली । ५७ ॥

धूम्या, स्त्री, (धूमानां समूहः इति । धूम + पाशादित्वात् यः ।) धूमसमूहः । इत्यमरः । ३ । ३ । ४३ ॥

धूम्याटः, पुं, (धूम्या इव अटतीति । अट + अच् ।) पक्षिविशेषः । झिङ्गा इति भाषा । तत्पर्य्यायः । कलिङ्गः २ भृङ्गः २ । इत्यमरः । २ । ५ । १६ ॥

धूम्रः, पुं, (धूमं धूमवर्णं रातीति । रा + कः । पृषोदरादित्वात् साधुः ।) श्यामरक्तमिश्रितवर्णः । तत्पर्य्यायः । धूमलः २ ताम्रलोहितः ३ । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा, रघौ । १५ । १६ ।

"धूमधूम्रो ऽथागन्धो ज्वालावभ्रुगिरोरुहः ।
अथाङ्गपरीवारश्चितामिरिव जङ्गमः ॥")

तुरुष्कः । इति राजनिर्घण्टः ॥ (असुरविशेषः । यथा हरिवंशे । २३२ । ८ ।

"समुद्री रभसश्चण्डो धूम्रश्चैव महासुरः ॥"

स्कन्दस्य सैनिकविशेषः । यथा, महाभारते । ६ । ४५ । ६२ ।

"ग्रह्य नामानि वाप्येषां येऽन्ये स्कन्दस्य सैनिकाः ।"
"धूम्रः श्वेतकलिङ्गश्च सिद्धार्थो वरदस्तथा ॥")

धूम्रकः, पुं, (धूम्रवर्णेन कायतीति । कै + कः ।) उष्ट्रः । इति जटाधरः ॥

धूम्रपत्रा, स्त्री, (धूम्रं धूम्रवर्णं पत्रं यस्याः । अजादेराकृतिगणत्वात् टाप् ।) क्षुपविशेषः । तत्पर्य्यायः । धूम्राङ्गा २ सुलभा ३ खरमञ्जरी ४ गृध्रपत्रा ५ गृध्राणी ६ क्षमिन्नी ७ श्रीमतापत्रा ८ । अस्या गुणाः । रसे तिक्तत्वम् । श्लेष्मरक्तमिकासनाशित्वम् । उष्णत्वम् । रूक्षत्वम् । अग्निदीपनकारित्वञ्च । इति राजनिर्घण्टः ॥

धूम्रमूलिका, स्त्री, (धूम्रं मूलमस्याः । कप् । टापि अत इत्वम् ।) मूलीशाकम् । इति राजनिर्घण्टः ॥

धूम्रलोचनः, पुं, (धूम्रे लोचने यस्य) कपोतः । इति राजनिर्घण्टः ॥ शुम्भासुरसेनापतिः । यथा, मार्कण्डेयपुराणे । ८६ । ३ ।

"हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥"

धूम्रवर्णः, पुं. (धूम्रं वर्णमस्य ।) तुरुष्कः । इति राजनिर्घण्टः ॥ (पर्व्वतविशेषः । यथा, हरिवंशे । २२८ । ७३ ।

"हेमाद्रितुर्यसंस्थश्च तथा वै वालुको गिरिः ।
क्रौञ्चः सप्तर्षिशृङ्गश्च धूम्रवर्णश्च पर्व्वतः ॥")

धूम्रवर्णा, स्त्री, (धूम्रं वर्णमस्याः टाप् ।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः । इति जटाधरः ॥ (यदुक्तं सुरकोपनिषदि । २ । ४ ।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुपी च देवी
लेलायमाना इति सप्त जिह्वाः ॥")

धूम्रा, स्त्री, (धूम्र + टाप् ।) ग्रन्थाकुञ्जी । इति राजनिर्घण्टः ॥ (धरनामवसोर्माता यथा, महाभारते । १ । ६६ । १६ ।

"धूम्रायास्तु धरः पुत्रो ध्रुवस्त्वथ ॥")

धूम्रिका, स्त्री, झिंग्रपाशुचः । इति राजनिर्घण्टः ॥

धूर, हूर्छ च वधे । गतौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ।) दीर्घौ । हूर्छ, धूर्णः । ड च, धूर्य्यते । इति दुर्गादासः ॥

धूर्जटिः, पुं, (धूर् भारभूता जटिर्यस्य । यद्वा, जट संघाते + इन् । धूर्जङ्गा जटिरस्येति । दुरक्षेत्रोक्तचिन्तायां जटिः संघातो यस्य वा ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, भागवते । ४ । ५ । २ ।

"क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटि-
र्जटां तडिद्वह्निसटोग्ररोचिषम् ॥")

धूर्त्त, त्रि, (धूर्वतीति । धूर्व + "इसिमसिकषिखनिगदिधूमादिभ्यस्तन् ।" उणा । ३ । ८६ । इति तन् ।) द्यूतकृत् । वञ्चकः । शैवस्य पर्य्यायः । मायी २ । इति हेमचन्द्रः । ३ । १४६ ॥ विटः ३ । इति मेदिनी । ते, २८ ॥ (यथा, महाभारते । ४ । ६ । १२ ।

"प्रिया हि धूर्त्ता मम देविनः सदा
भवांश्च देवोपम ! राज्यमर्हति ॥"

यथा च पञ्चतन्त्रे । १ । ७३ ।

"परार्थां नापितो धूर्त्तः पक्षिणां चैव वायसः ।
दंडिनाञ्च छगालश्च चेतभिश्चुलपाकुलाम् ॥")

धूर्त्तकः, पुं, (धूर्त्त + कप् स्वार्थे ।) शृगालः । इति शब्दरत्नावली ॥ धूर्त्तश्च ॥ (नागभेदः । यथा, महाभारते । १ । ५७ । १३ ।

"वासुकिः शङ्खपालश्च धृतराष्ट्रबलाहकौ ।
कौरव्यकुञ्जरावन्तौ प्रविष्टा ह्यर्यवाहनम् ॥")

धूर्त्तकृत्, पुं, (धूर्त्त + भावे तन् । धूर्त्तनं हिंसनं करोतीति । क + क्विप् । तुगागमश्च । धुस्तूरः । इति शब्दमाला ॥ वञ्चकारके, त्रि ॥

धूर्त्तजनुः, पुं. (धूर्त्तजातौ जनुर्यस्येति ।) मानुषः । इति शब्दचन्द्रिका ॥

धूर्त्तमातृका, स्त्री, (धूर्त्तो हिंसितो मातृवोऽनयेति ।) राक्षसी । इति शब्दचन्द्रिका ॥

धूर्धरः, पुं, (धरतीति । धृ + अच् । धुरं धरः । पृषोदरादित्वात् दीर्घः ।) धुरन्धरः । इत्यमरटीकायां रमानाथः ॥

धूर्व्वहः, त्रि, (वहतीति । वह् + अच् । धुरं वहः । पृषोदरादित्वात् दीर्घः ।) धुरन्धरः । इत्यमरः । २ । ८ । ६५ ॥

धूर्व्वी, स्त्री, (धुरं व्रजतीति । व्रज + क्विप् । ततः ङीः । वौभावः ।) रथाद्यंशभागः । तत्पर्य्यायः । यानमुखम् २ वधूः ३ । इति हेमचन्द्रः । ३ । ४२१ ॥

धूलकं, क्ली, (धू + बाहुलकात् लकः ।) विषम् । इति शब्दचन्द्रिका ॥

धूलिः, स्त्री, (धुवति धूयते वेति । धू + बाहुलकात् लिः ।) पार्थिवचूर्णम् । धूला इति भाषा ॥ (यथा, भागवते । ३ । १४ । २७ ।

"ब्रह्मानपघ्नन्नलिधूलिधूम्र-
विकीर्णविद्योतजटाकलापः ।
भस्मावगुण्ठासलदक्षदेहो
देवस्त्रिभिः पश्यति देवरत्नैः ॥")

तत्पर्य्यायः । रेणुः २ पांसुः ३ रजः ४ । इत्यमरः । २ । ८ । ६८ ॥ धूली ५ पांसुः ६ । इति भरतः ॥ क्षितिकणः ७ क्षौद्रः ८ चूर्णम् ९ तूलम् १० मही[ह्व]रः ११ वालुकाः १२ शर्करा १३ क्षिताश्रयः १४ । इति शब्दरत्नावली ॥ ॥

दीप्रखड्गातनुच्छायाङ्गिन्नकेशनखादिकम्।
अनमार्जारेरेवच हन्ति पुण्यं पुराकृतम्॥"
इति कर्म्मलोचनः॥
"अजरजः खररजस्तथा सम्मार्ज्जनीरजः।
स्त्रियः पादरजो राजन्! शक्रादपि हरेत् श्रियम्॥"
इति लक्ष्मीचरित्रम्॥

धूलिका, स्त्री, (धूलिरिव प्रतिभातिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्। टाप्।) कुब्जभटिका। इति शब्दरत्नावली॥ (नीहारः। यथा, नीहारे वाणग्रन्थे यथा, नीहारे धूलिकायामिति मनुटीकायां कुल्लूकभट्टः॥)

धूलिकेदारः, पुं, (धूलिप्रधानः केदारः। इति मध्यलोपिसमासः।) वप्रः। क्षेत्रम्। इति त्रिकाण्डशेषः॥

धूलिगुच्छकः, पुं, (धूलीनां गुच्छक इव। इवार्थे कन्।) पटवासकः। फलगुचूर्णम्। इति त्रिकाण्डशेषः॥

धूलिध्वजः, पुं, (धूलिरेव ध्वजो यस्य।) पवनः। इति त्रिकाण्डशेषः॥

धूलिपुष्पिका, स्त्री, (धूलिः परागस्तत्प्रचुरं पुष्पं यस्याः। काप्यत इत्वम्।) केतकी। इति राजनिर्घण्टः॥

धूलीकदम्बः, पुं, (धूलीनां कदम्बमिव।) नीपः। निनिम्बः। वरणवृक्षः। इति मेदिनी। बे, १०॥ (धूलिसमूहे, स्त्री॥)

धूलीकदम्बकः, पुं, (धूलीकदम्ब+स्वार्थे कन्।) नीपः। इति जटाधरः॥

धूलीपटलः, पुं, (धूलीनां पटल यत्र।) उड्डीयमानधूलीसमूहः। यथा, धूलीपटले धूमलभ्रमे तत्रासता धूमलेन। इत्यादि सामान्यलक्षणायां गिरीशभट्टः॥ (धूलीसमूहे, स्त्री॥)

धूम्र, क कान्तिगतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) वल्लरी। कान्तिगतिः शोभितकरञ्जम्। चन्दनो धूम्रयत्यङ्गम्। इति दुर्गादासः॥

धूम्र, क धूम्रे। इति कविकल्पद्रुमः॥ (चुरां परं-सकं-सेट्।) वल्लरी। धूम्रः कान्तिगतिः। चन्दनो धूम्रयत्यङ्गम्। इति दुर्गादासः॥

धूम्र, क धूम्रे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) वल्लरी। धूम्रः कान्तिगतिः। क, धूम्रयत्यङ्गं चन्दनः। महिषधूसरितः सरितस्तटमिति भानकीहरणमकाण्डभान एवायमिति रमानाथः। रमते तालयमर्द्धभागो ऽप्ययम्। इति दुर्गादासः॥

धूसरः, पुं, (धुनातीति। धू+"कृधूमदिभ्यः कित्।" उणां ३। ७३। इति सरन्। स च कित्।) ईषत्पाण्डुवर्णः। तद्वति, त्रि। इत्यमरः। २। ५। १३॥ (यथा, रघौ। ११।६०।
"श्लेषपक्षिपरिधूसरासका-
सान्ध्यमेघरुधिराईवाससः॥")
खरः। मेषभेदः। कपोतः। इति राजनिर्घण्टः॥ तैलकारः। इति हेमचन्द्रः। ६। २६॥ ❀॥

धूसरवस्तूनि यथा। धूलिः १ लूता २ करभः ३ गृहगोधिका ४ कपोतः ५ धूधिकः ६ रङ्गम् ७ काककङ्कः ८ खरादिः ९। इति कविकल्पलता॥

धूसरच्छदा, स्त्री, (धूसरं ईषत् पाण्डुवर्णच्छदो यस्याः।) श्वेतवृक्षा। इति रत्नमाला॥

धूसरपत्रिका, स्त्री, (धूसरं पत्रमस्याः। ङीप्। स्वार्थे कन्। टापि पूर्वह्रस्वः।) हस्तिशुण्डीक्षुपः। इति राजनिर्घण्टः॥

धूसरा, स्त्री, (धूसर+टाप्।) पाण्डुरपलाशक्षुपः। इति राजनिर्घण्टः॥

धूसरी, स्त्री, (धूसर+ङीप्।) किन्नरीभेदः। इति मेदिनी। रे, १७०॥

धूस्तूरः, पुं, (धूञ् कान्तिवरणे+भावे किप्। तं तूर्य्यते हिनस्तीति। तूर हिंसे+"इगुपधज्ञेति।" ३।१। १३५। इति कः।) धूस्तूरवृक्षः। इत्यमरटीकायां भरतः॥

धृ, क धृत्वान्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-अनिट्।) क, धारयति। इति दुर्गादासः॥

धृ, ड अवध्वंसे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) अवध्वंसः पतनम्। ड, धरते पत्रं वृक्षात्। गोविन्दभट्टस्तु अविध्वंसने इति पठित्वा विध्वंसनं ध्वंसनं तस्याभावोऽविध्वंसनं ध्रापनमिति व्याख्याति। इति दुर्गादासः॥

धृ, ङ ध्र स्थितौ। धृतौ। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-स्थितौ अकं-धृतौ सकं-अनिट्।) ङ ध्र, ध्रियते। इति दुर्गादासः॥

धृ, च धृत्वाम्। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-अनिट्।) च, धरति धरते। इति दुर्गादासः॥

धृष, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) धर्ष्णोति। इति दुर्गादासः॥

धृष, ट गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। इदित्।) सप्रसरणे। ट, धृष्णुते। इति दुर्गादासः॥

धृतः, त्रि, धृधातोः कर्म्मणि कर्त्तरि च क्तप्रत्ययेन निष्पन्नः॥ धारकविशिष्टः। धरा इति भाषा। (यथा, महाभारते। १। ७४। १०३।
"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥")
अवध्वस्तः। पतित इति यावत्। स्थितः। (स्थिरीकृतः। निश्चितः। यथा, महाभारते। ७। १६। ६८।
"धृतां धनञ्जयवधे प्रतिज्ञामपि चक्रिरे॥")
पुं, वयोदग्रमनो रौप्यस्य पुत्रविशेषः। यथा, हरिवंशे। ७। ८२।
"चित्रसेनो विचित्रश्च नयो धर्म्मधृतो धृतः।
सुनेत्रः सुव्रतश्चित्र धृतया निर्भयो दृढः।
रौप्यस्येते मनोः पुत्रा अमरे तु त्रयोदशे॥"
हरिवंशीयधर्म्मस्य पुत्रः। कश्या, भाजवते। ८। २२। १७।

"इक्ष्वाकुतनयो बभ्रुः सेतुरस्यात्मजस्ततः।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः॥")
धृतराष्ट्रः, पुं, (धृतं राष्ट्रं येन।) दुर्य्योधनपिता। स जन्मान्धः शान्तनुपुत्रः विचित्रवीर्य्यक्षेत्रे व्यासाज्जातः। इति महाभारते। १। ६५। ५५॥ (अयं हि गन्धर्व्वपतेर्हंसस्य अंशावतारः। यथा, महाभारते। १। ६७। ८४।
"अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः।
स गन्धर्व्वपतिर्जज्ञे कुरुवंशविवर्द्धनः॥")
सुराजा। नागभेदः। इति मेदिनी। रे, २७१॥ (यथा, महाभारते। २। ६। ६।
"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ॥")
पक्षिभेदः। इति विश्वहेमचन्द्रौ॥ (गन्धर्व्वविशेषः। यथा, विष्णुपुराणे। २। १०। १५।
"ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सप्तमः॥")
बलिराजस्य पुत्रविशेषः। यथा, हरिवंशे। ३। ७४।
"बले: पुत्रशतस्यासाद्बाणज्येष्ठं नराधिप!।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः॥"
जनमेजयस्य ज्येष्ठपुत्रः। यथा, महाभारते। १। ६४। ५३।
"जनमेजयस्य तनया श्रुत श्रुता महाबलाः।
धृतराष्ट्रः प्रथमजः पाण्डुर्वाल्हीक एव च॥")
धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी। ङीप्।) हंसपत्नी। इति मेदिनी। रे, २७२॥ (यथा, महाभारते। १। ६६। ५७, ५८।
"काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम्।
ताम्रा तु सुषुवे देवी पत्नेता लोकविश्रुता:॥"
"धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्व्वशः।
चक्रवाकांश्च भद्रं ते जनयामास सैव तु॥"
हंसपदीलता। इति हेमचन्द्रः॥)
धृतिः, पुं, (ध्रियते इति। धृ+क्तिन्। अभिधानात् पुंस्त्वम्।) दृष्टिः। इति मेदिनी। ते, २८॥ (विश्वेदेवविशेषः। यथा, महाभारते। १३। ६१। ३०।
"बलं धृतिर्विभाषा च पुण्यश्लोक: पावनस्तथा॥")
चन्द्रवंशीयनृपविशेषस्य विजयस्य पुत्रः। यथा, हरिवंशे। ३१। ५५।
"विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः॥"
निमिवंशीयानामेकतमः। यथा, भागवते। ९। १३। २९।
"सुनक्षत्रसुतो यज्ञे वीतहव्यो धृतिस्ततः॥"
यदुवंशीयवभ्रोः पुत्रः। इति विष्णुपुराणे। ४। १२। १५। "रोमपादाद्बभ्रु: वभ्रोः पुत्रो धृतिः॥")
धृतिः, स्त्री, (धृ+क्तिन्।) तुष्टिः। (यथा, मनुः। ६। ९२।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्॥")
योगभेदः। वैराग्यम्। (यथा, वाजसनेयसंहितायाम्। ३८। १।

"यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ॥")
धारणम्। इति मेदिनी। ते, २६। सुखम्। इति हेमचन्द्रः। २। २२२॥ (क्रतुः। यथा, कात्यायनश्रौतसूत्रे। २०। २। ८।
"राजन्यो धृतिमु युङ्क्तपयुक्तः॥")
षोड़शमाढकान्तर्गतचतुर्दशमाढकम्। इति भरतः॥ अष्टादशाक्षरापृक्तिच्छन्दोभाक्तम्। इति छन्दोमञ्जरी॥ * ॥ धृतियोगजातफलं यथा,—
"धृतियोगसमुत्पन्नः प्राज्ञः संहृष्टमानसः।
वावदूकः सभायाञ्च सुशीलो विनयान्वितः॥"
इति कोष्ठीप्रदीपः॥
धारणा। सा त्रिधा। यथा,—
"धृत्वा यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥
यया तु धर्म्मकामार्थान् धृत्वा धारयतेऽर्জ্জুন!।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता॥"
इति श्रीभगवद्गीतायाम् १८।३३-३५॥
धृत्वरी, स्त्री, (धृत्वन्+"वनो रच।"४। १। ७७। इति ङीप् रच्चान्तादेशः।) भूमिः। इति संक्षिप्तसारोणादिवृत्तिः॥
धृत्वा, [न्] पुं, (धरतीति। धृ+"ग्रीड्कुधि-रुहिजिचीति।" उणां ४।१२३। इति क्वनिप्।) धर्म्मः। विप्रः। समुद्रः। ब्रह्मरीषम्। मेधावी। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः॥
धृष, आ कि अमर्षे। क्रोध इति यावत्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) आ, धर्षितं धृष्टं तेन। कि, धर्षयति धर्षति। अमर्ष इह अभिभवः। इति भट्टमल्लः। न धर्षति निजाः प्रजाः। तमेव धर्षयत्येकं यस्तासु प्रतिकूलवतीति हलायुधः। इति दुर्गादासः॥
धृष, उ संहतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-संहतौ अकं-हिंसे सकं-सेट्। उदित्वात् क्त्वेट्।) उ, धर्षित्वा धृष्ट्वा। संहतिः। समूहः। इति दुर्गादासः॥
धृष, क ड प्रक्तिबन्धे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) प्रक्तेर्बन्धनं प्रक्तिबन्धः। क ड, धर्षयते वह्निं पयः। इति दुर्गादासः॥
धृष, णि आ न प्रागल्भ्ये। इति कविकल्पद्रुमः॥ (स्वां-परं-अकं-सेट्।) णि, धृष्टोऽस्ति। आ, धर्षितं धृष्टं तेन। न, धृष्णोति गुरोरग्रे यः। इति हलायुधः। इति दुर्गादासः॥
धृष्णुः, पुं, (धृष्णोतीति। धृष्+"भृमिदिधृषीति।" उणां १। २४। इति क्नुः।) दक्षः। इक्ष्वाकुवंशीये कुन्तेः पुत्रः। प्रगल्भः। इति संक्षिप्तसारोणादिवृत्तिः॥
धृष्टः, त्रि, (धृष+क्तः।) प्रगल्भः। इति मुग्धबोधव्याकरणम्॥ (यथा, भागवते। ५। १२।७।
"जनस्य गोप्तासि विकत्थमानो
न ग्रोभसे वृद्धसभासु धृष्टः॥")
निर्लज्जः। तत्पर्य्यायः। धृष्णुक् २ वियातः ३। इत्यमरः। ३। १। २५॥ धृष्णुः ४ दक्षक् ५। इति त्रिकाण्डशेषः। धर्षितः ६। इति शब्दरत्नावली॥ चतुर्विधपत्न्यन्तर्गतपतिविशेषे, पुं। तस्य लक्षणं यथा, "भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः।" इति रसमञ्जरी॥ (चेदिवंशीयकुन्तेः पुत्रः। यथा, हरिवंशे। ३६। २४।
"कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान्॥")
सप्तममनोः पुत्रविशेषः। यथा, भागवते। ८। १३। २।
"मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु॥
इक्ष्वाकुनृगशर्य्याति दिष्टधृष्टकरूषकान्।
नरिष्यन्तं पृषध्रञ्च नाभागं कविमेव च॥")
धृष्णुरिति कुत्रापि ङीष्यते॥)
धृष्टा, स्त्री, (धृष्यते स्मेति। धृष् प्रक्तिबन्धे+क्तः। टाप्।) असती। इति शब्दरत्नावली॥
धृष्णुक्, [च्] त्रि, (धृष्णोतीति। धृष प्रागल्भ्ये +"खजिधृषेर्नक्विड्।" ३। २। १७२। इत्यत्र "धृषेश्च।" इति काशिकोक्तेर्नक्विड्।) निर्लज्जः। इत्यमरः। ३। १। २५॥
धृष्णिः, पुं, (धर्षति अभिभवति अन्धकारमिति। धृष् अमर्षे+बाहुलकात् निः। स च कित्।) किरणः। इत्यमरः। १। ४। ३२॥
धृष्णुः, त्रि, (धृष्णोतीति। धृष्+"ऋसिगृधिधृषिक्षिपेः क्नुः।"३। २। १४०। इति क्नुः।) धृष्टः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। ६। २५। ५।
"न हि त्वा शूरो न तुरो न धृष्णु-
र्न त्वा योधो मन्यमानो युयोध॥")
पुं, कश्यिका। इति शब्दचन्द्रिका॥ (वैवस्वतमनुपुत्रः। यथा, हरिवंशे। १०। १।
"मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च॥"
सावर्णस्य मनोः पुत्रविशेषः। यथा, तत्रैव। ७। ६०।
"वरिष्ठुरार्य्यो धृष्णुश्च राधः सुमतिरेव च।
सावर्णस्य मनोः पुत्रा भविष्या दश्च भारत!॥"
चन्द्रवंशोद्भववक्रकुरराजस्य सुतः। यथा, तत्रैव ३७। १८।
"क्रुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्॥"
कवेः पुत्रविशेषः। यथा, महाभारते। १३। ८५। १३३।
"कविः काव्यश्च धृष्णुश्च बुद्धिमानुग्रगास्तथा।
भृगुश्च विरजाश्चैव काग्र्यो योगश्च धर्म्मवित्॥
अष्टौ कविसुता ह्येते सर्व्वमेभिर्जगत्ततम्॥")
धे, ट पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) धयति। टः स्त्रियामीदर्थः। स्तन-त्यर्थौ। इति दुर्गादासः॥

धेनः, पुं, (धीयते इति धयत्यस्मादिति वा। धेट पाने+"धेट रच।" उणां ३। ११। इति न रच्चान्तादेशः।) समुद्रः। इति हेमचन्द्रः॥ नदः। इति मेदिनी॥
धेना, स्त्री, (धेन+टाप्।"टिड्ढाणञीति ङीप्। इति हरदत्तोक्तेर्न ङीप्।" इति केचित्।) नदी। (दधातेर्लटः शानचि यत्वेन एत्वाभ्यासलोपौ दधाना स्वमभिधेयं वर्षप्रदानेन लौकिकाय वा। यद्वा, धेट पाने 'धेट् रच' इति नप्रत्ययः इकारोपान्तादेशः गुणः। धयन्ति तामिति धेना। पानमत्र स्वीकारः। यद्वा, आस्वादः। धीयते पीयते आस्वाद्यते वानेन धयन्ति प्राणमिति धेना।" इति देवराजयज्वा। १। ११। ३६।) भारतीभेदः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। ३। १। ६।
"यस्य धारा अक्षरन्धि धेनाः।"
"धेना माध्यमिका वाचश्च विदन्ति।" इति तद्भाष्ये सायणः॥)
धेनिका, स्त्री, (धेनो नदः। लक्षणया जलसमीपस्थानम्। स उत्पत्तिस्थानत्वेनास्यस्था इति। धेन+ठन्। टाप्।) घण्टाकम्। इति भावप्रकाशः॥
धेनुः, स्त्री, (धयति धेट्टि सुतान् धीयते वत्सैरिति वा। धेट पाने+"धेट रच।" उणां ३। ३४। इति नुः रच्चान्तादेशः।) नवप्रसूता गौः। तत्पर्य्यायः। नवप्रसूतिका २। इत्यमरः। २। ६। ७१॥ नवप्रसूतिका ३। इति शब्दरत्नावली॥ दानीयदशधेनवो यथा,—
"यासु पापविनाशिन्यः पञ्चस्वं दशधेनवः।
तासां स्वरूपं वक्ष्यामि नामादि च धनाधिप!॥
प्रथमा गुड़धेनुः स्यादृतधेनुरथापि वा।
तिलधेनुस्तृतीया च चतुर्थी जलसंज्ञिका॥
क्षीरधेनुश्च विख्याता मधुधेनुरथापि वा।
सप्तमी शर्कराधेनुर्दधिधेनुरथाष्टमी॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः॥
कुम्भाः स्युर्नवधेनूनामितरासान्तु राशयः।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः॥
नवनीतेन तैलेन तथान्ये तु महर्षयः।
एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः॥
मन्त्रावाहनसंयुक्ताः सदा पर्व्वणि पर्व्वणि।
यथाशक्त्या प्रदातव्या मुक्तिमुक्तिफलप्रदाः॥
गुड़धेनुप्रसङ्गेन सर्व्वास्वेव मयोदिताः।
अशेषयज्ञफलदाः सर्व्वपापहराः शुभाः॥
व्रतानामुत्तमं यस्माद्विप्रोत्कादग्र्यव्रतम्।
तदङ्गत्वेन चैवात्र गुड़धेनुः प्रशस्यते॥
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः।
गुड़धेन्वादयो देयास्तूपरागादिपर्व्वसु॥"
इति मत्स्यपुराणे ७६ अध्यायः॥
पूर्व्वोक्तधेनूनां दानविधयस्तत्तच्छब्दे द्रष्टव्याः॥*॥
अथ कपिलाधेनुदानादिफलम्।
ईश्वर उवाच।
"अथातः संप्रवक्ष्यामि कपिलाधेनुमुत्तमाम्।

यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
पूर्व्वोक्तेन विधानेन दद्याद्धेनुं सवत्सकाम् ।
सर्व्वालङ्कारसंयुक्तां सर्व्वरत्नसमन्विताम् ॥
कपिलायाः शिरोग्रीवे सर्व्वतीर्थानि भामिनि ! ।
पितामहनियोगाच्च निवसन्ति हि नित्यशः ॥
प्रातरुत्थाय यो मर्त्यः कपिलागलमस्तकात् ।
च्युतन्तु भक्षयेत् पानीयं शिरसा वन्दते शुचिः ॥
स तेन पुण्यतोयेन ततक्षणाद्दग्धकिल्बिषः ।
चिंशद्वर्षकृतं पापं दहत्यग्निरिवेन्धनम् ॥
कल्यमुत्थाय यो मर्त्यः कुर्य्यात्तासां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी स्यात् वसुन्धरे ! ॥
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन तत्क्षणात् ।
दग्धजन्मकृतं पापं तस्य नश्यत्यसंशयम् ॥
कपिलायास्तु मूत्रेण स्नात्वा चैव शुचिव्रतः ।
स गङ्गादिषु तीर्थेषु स्नातो भवति मानवः ॥
तेन स्नानेन चैकेन भावयुक्तेन वै नरः ।
यावज्जीवकृतात् पापात् मुच्यते नात्र संशयः ॥
गोसहस्रन्तु यो दद्यादेकाञ्च कपिलां नरः ।
समभेतत् पुरा प्राह ब्रह्मा लोकपितामहः ॥
गवामस्थि न लङ्घेत स्पृशेत् गन्धं न दूषयेत् ।
यावच्छिन्नति तं गन्धं तावत् पुण्येषु पूर्य्यते ॥
गवां कण्डूयनं श्रेष्ठं तथा च परिपालनम् ।
तुल्यं गोव्रतदानस्य भयरोगादिपालने ॥
दत्त्वोदकानि यो दद्यात् क्षुधितानां गवाह्निकम् ।
सोऽश्वमेधफलं दिव्यं लभते मानवोत्तमः ॥
विमानैर्विविधैर्दिव्यैः कन्याभिरभिरर्च्चितैः ।
सेव्यमानस्तु गन्धर्व्वैर्गीयमानो यथाक्रमः ॥" * ॥
एकादशप्रकारकपिलालक्षणं यथा,—
"सुवर्णकपिला पूर्व्वे द्वितीया गौरपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी क्षारपिङ्गला ॥
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
एकादशी खुरश्वेता एतासां सर्व्वलक्षणा ॥
सर्व्वलक्षणसंयुक्ता सर्व्वालङ्कारसुन्दरी ।
ब्राह्मणाय च दातव्या सर्व्वमुक्तिप्रदायिनी ।
मुक्तिमुक्तिप्रदा तेषां विष्णुमार्गप्रदायिनी ॥"
इति कपिलामाहात्म्यम् ॥ * ॥
अथोभयमुखीधेनुदानादिविधानम् ।
होता उवाच ।
"अतःपरं महाराजोभयमुखाः समासतः ।
विधानं यद्वरारोहे ! धरण्याः कथितं पुरा ।
तदहं संप्रवक्ष्यामि तव पुण्यफलञ्च यत् ।
धरण्युवाच ।
यत्त्वया कपिला नाम पर्व्वमेतदुपादिता प्रभो ! ।
होमधेनुः सदा पुण्या सा ज्ञेया कपिलक्षणा ।
कियन्त्यः कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ॥
प्रश्रयमाणा दानेन किं पुण्यं स्याच्च माधव ! ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण जगद्गुरो ! ॥
श्रीभगवान् उवाच ।
शृणुष्व भद्रे ! तत्त्वेन पवित्रं पापनाशनम् ।
यं श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
कपिला अग्निहोत्रार्थे यज्ञार्थे च वरानने ! ।
उद्धृत्य सर्व्वतेजांसि ब्रह्मणा निर्म्मिता पुरा ॥
पवित्राणां पवित्रेषु मङ्गल्यानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ! ॥
तपसस्तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानामुत्तमं दानं निधीनां क्षेतरक्षयम् ॥
पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ।
पवित्राणाञ्च पुण्यानि सर्व्वलोकेषु सुन्दरि ! ॥
हूयतेऽग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलायाः पृतेनेह दग्धा क्षीरेण वा पुनः ॥
जुहुते ह्यग्निहोत्राणि मन्त्रैश्च विविधैः सदा ।
पूजयन्तितिथौ चैव परां भक्तिमुपागताः ॥
ते यान्त्यादित्यवर्णेन विमानेर्द्विजसत्तमाः ।
सूर्य्यमण्डलमध्ये च ब्रह्मणा निर्म्मिता पुरा ॥
कपिला या पिङ्गलाक्षी सर्व्वसौख्यप्रदायिनी ।
सिद्धिबुद्धिकरी देवी कपिलारूपिणी ॥
पूर्व्वोक्ता यासु कपिलाः सर्व्वलक्षणलक्षिताः ।
एतद्वराः समाख्याताः कपिलास्ते वरानने ! ॥
सर्व्वा क्षेता महाभागास्तारयन्ति न संशयः ।
सङ्गमेषु प्रशस्ता च सर्व्वपापप्रणाशिनी ॥
अग्निपुच्छा अग्निमुखा अग्निलोमानलप्रभा ।
तथाग्नेयी सदा देवी सुवर्णाख्या प्रवर्त्तते ॥"* ॥
शूद्रात् कपिलाप्रतिग्रहे दोषो यथा,—
"शूद्रीत्वा कापिलां शूद्रात् कामतः सदृशो भवेत् ।
पतितः स द्विजातीनां चाण्डालसदृशो हि सः ॥
न तस्मात् प्रतिगृह्णीयात् शूद्रादिप्रः प्रतिग्रहम् ।
दूरात्ते प्रतिहर्त्तव्याः श्वभिर्मुल्या इवाध्वरे ॥
सर्व्वकाले हि सर्व्वे वै वर्ज्जिताः पितृदेवतैः ।
असभाष्याप्रतिग्राह्याः शूद्रास्ते पापकर्म्मिणः ॥
पिबन्ति यावत् कपिलां तावत्तेषां पितामहाः ।
भूमेर्मलं समश्नन्ति जायन्ते विड्भुजश्चिरम् ॥"*
शूद्रस्य कपिलाक्षीरादिपाने दोषो यथा,—
"तासां क्षीरं घृतं वापि नवनीतमथापि वा ।
उपजीवन्ति ये शूद्रास्तेषां गतिमधो व्रज ॥
कपिलाजीविनः शूद्राः क्रूरा गच्छन्ति रौरवम् ।
रौरवे तु महारौद्रे वर्षकोटिशतं धरे ! ॥
ततोऽपि मुक्ताः काकेन श्वानयोन्यां व्रजन्ति ते ।
श्वानयोन्या विमुक्तस्तु विष्ठायां जायते क्रिमिः ॥
विष्ठास्थानेषु पापिष्ठा दुर्गन्धिषु च नित्यशः ।
भूयो भूयो जायमानास्तत्रोत्तारं न विन्दति ॥
ब्राह्मणश्चैव यो विद्वान् कुर्य्यात्तेषां प्रतिग्रहम् ।
ततःप्रभृतमेश्नान्तः पितरस्तस्य शेरते ।
न तं विप्रन्तु सम्भाषेन्न चैवैकासनं विशेत् ।
स नित्यं वर्ज्जनीयो हि दूरात्तु ब्राह्मणोऽध्वरे ॥
यस्तेन सह संभाषेत्तथा चैकासनं व्रजेत् ॥
प्राजापत्यं चरेत् कृच्छ्रं तेन शुध्यति स द्विजः ॥"
अथासन्नप्रसवकपिलादानफलादि ।
"एकस्य गोप्रदानस्य सहस्रन्तु तु पूर्य्यते ॥
किमन्यैर्बहुभिर्दानैः कोटिसंख्यातविस्तरैः ।
श्रोत्रियाय दरिद्राय कृतविद्याय तपस्विने ॥
आसन्नप्रसवां धेनुं दातारं प्रतिपालयेत् ।
कपिलाङ्गैप्रसूता वै दासवा च द्विजन्मने ॥
जायमानस्य वत्सस्य सुखं योन्या प्रदृश्यते ।
तावत् सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
धेन्वा यावन्ति रोमाणि सवत्साया वसुन्धरे ! ॥
तावतो वर्षकोट्यस्तु ब्रह्मवादिभिरर्च्चिताः ।
वसन्ति ब्रह्मलोके वै ये च वै कपिलाप्रदाः ॥
सुवर्णशृङ्गीं यः कृत्वा रौप्यशुक्लाखुरान्तथा ।
ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ॥
कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ।
उदकञ्च करे दद्यादाचम्य शुद्धयादितं ॥
ससमुद्राटवी तेन सशैलवनकानना ।
रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥
पृथिवीदानतुल्येन दानेनैतेन वै नरः ।
नन्दितो याति मित्रैर्विष्णोश्च परमं पदम् ॥
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा पापदेहकः ।
सदापातकयुक्तोऽपि वृषली ब्रह्मदूषकः ॥
निन्दको ब्राह्मणानाञ्च तथा कर्म्मोपदूषकः ।
एतैः पातकयुक्तोऽपि गवां दानेन शुध्यति ॥
यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
तद्दिनं पयसाहारः पायसेनापि वा भवेत् ॥
सुवर्णस्य सहस्रेण तदर्द्धेनापि भामिनि ! ।
तस्यार्द्धमूल्यतेनापि पश्चाच्च तदर्द्धकम् ॥
यथाशक्ति प्रदातव्या वित्तशाठ्यं विवर्ज्जयेत् ॥
इमां यज्ञोभयमुखीमुभयत्र शमोस्तु वै ।
मम वंशविवृद्ध्यर्थं सदा स्वस्तिकरी भव ॥"
गोशरीरे देवतानिवेशो यथा,—
"दन्तेषु मरुतो देवा जिह्वायान्तु सरस्वती ।
खुरमध्ये तु गन्धर्व्वाः खुराग्रेषु तु पन्नगाः ॥
सर्व्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदि सर्व्वनक्षत्रं लाङ्गूले धर्म्म आश्रितः ॥
अपाने सर्व्वतीर्थानि प्रस्रावे जाह्नवी नदी ।
नानाद्वीपसमाकीर्णाश्चत्वारः सागरास्तथा ॥
ऋषयो रोमकूपेषु गोमये पद्मधारिणी ।
रोमसु सन्ति विद्याश्च लक्ष्मीश्चैवयनद्वयम् ॥
धैर्य्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथैव च ।
स्मृतिर्मेधा तथा लज्जा वपुः कीर्त्तिस्तथैव च ॥
विद्या भ्रान्तिर्मतिश्चैव सन्ततिः परमा तथा ।
गच्छन्तीमनुगच्छन्ति एता गां वै न संशयः ॥
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ।
यत्र गावस्तत्र लक्ष्मीः सांख्यधर्म्मश्च शाश्वतः ॥
सर्व्वरूपेषु तां गावस्तिष्ठन्त्यभिमताः सदा ।
गावः पवित्रा मङ्गल्या देवानामपि देवताः ॥
यस्याः सुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥"
इति वराहपुराणम् ॥

धेनुकः, पुं, (धेनुरिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) असुरविशेषः । स बलरामेण हतः । इति श्रीभागवते १५ अध्यायः ॥ (अयन्तु गर्द्दभरूपी गोवर्द्धनस्योत्तरपार्श्वस्थतालवनवासी । यथा, हरिवंशे । ६६ । २—२३ ।
"आजग्मतुस्तौ सहितौ गोवर्द्धनं सहगामिनौ ।
गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ॥
गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम् ।

दृष्ट्वातेऽथ तौ वीरौ रम्यं तालवनं महत् ॥
तौ तालपर्वप्रकरे रम्ये तालवने रतौ ।
चेरतुः परमप्रीतौ दृप्तपोताविवोन्नतौ ॥
स तु देशः समः स्निग्धः सुमहान् लक्षणान्वितः ।
दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्जितः ॥
तालैस्तैर्विपुलस्कन्धैरुच्छ्रितैः श्यामपर्वभिः ।
फलाग्रशाखिभिर्भाति नागहस्तरिवोच्छ्रितैः ॥
तच्च दामोदरो वाक्यमुवाच वदतांवरः ।
अहो तालफलैः पक्वैर्वासितेयं वनस्थली ॥
स्वादून्यार्य ! सुगन्धीनि श्यामानि रसवन्ति च ।
पक्वतालानि सहितौ पातयामो लघुक्रमौ ॥
यद्येषामीदृशो गन्धो माधुर्य्यमाघ्रातपर्व्वणः ।
रसेनाऽनुत्तमकल्पेन भवितव्यञ्च मे मतिः ॥
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव ।
पातयन् पक्वतालानि चालयामास तांस्तरून् ॥
तत्तु तालवनं नाम्नासेयं दुरतिक्रमम् ।
निर्म्माणभूतमौरिणं पुरुषादानयोपमम् ॥
दारुणो धेनुको नाम दैत्यो गर्दभरूपधृक् ।
खरयूथेन महता वृतः समनुवर्त्तते ॥
स तत्तालवनं घोरं गर्दभः परिरक्षति ।
नृपचिश्चापदगणांस्त्रासयन् सुदुर्म्मतिः ॥
तालशब्दं च तं श्रुत्वा संक्षुब्धं फलपातनात् ।
नामर्षयत संक्रुद्धस्तालस्वनमिव द्विपः ॥
शब्दानुसारी संक्रुद्धो दर्पाविष्टसटानन्नः ।
खञ्चाद्यो हेषितपटुः खुरैर्निर्द्दारयन्महीम् ॥
आविद्धपुच्छो दृप्तितो व्यात्तानन इवान्तकः ।
आपतन्नेव दृष्टो रौहिणेयमुपस्थितम् ॥
तालानां तमधो दृष्ट्वा सञ्चयाकारसंयतम् ।
रौहिणेयं खरो दुष्टः सोऽदशद्दृप्तनायुधः ॥
पश्चात्रासुभाभ्याञ्च पुनः पश्चिमाभ्यां पराङ्मुखः ।
अधानोरसि देवेन्द्रो रौहिणेयं निरायुधम् ॥
ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्दभम् ।
आवर्च्छितमुखस्कन्धं प्रेरयंस्तालमूर्द्धनि ॥
स भस्मोरुकटिग्रीवो भग्नदृष्टो दुरासदः ।
खरस्तालफलैः सार्द्धं पपात धरणीतले ॥
तं गतासुं गतक्लीकं पतितं वीक्ष्य गर्दभम् ।
ज्ञातीनांस्तथापरांस्तस्य हलराजनि सोऽक्षिपत् ॥
सा भूगर्द्दभदेहैश्च तालैः पक्वैश्च पातितैः ।
बभासे कृष्णजलदा दीप्तिवायुक्तशारदी ॥
तस्मिन् गर्दभदैत्ये तु सानुगे विनिपातिते ।
रम्यं तालवनं तद्धि भूयो रम्यतरं बभौ ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । ८१—८३ ।
"ततो गच्छेत राजेन्द्र ! धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो राजन् ! प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चित्रं महाराज ! अद्यापि हि न संशयः ।
कपिला सह दत्तसा वै पर्व्वते विचरत्युत ॥
सवत्साया पदान्यस्या दृश्यन्तेऽद्यापि भारत ! ।
तेषूपस्पृश्य राजेन्द्र ! पदेषु नृपसत्तम ! ।
यत् किञ्चिदशुभं पापं तत् प्रणश्यति भारत ॥")
धोड्रशरतिबन्धान्तर्गतद्वादशबन्धः । यथा,—

"सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः ।
लघुलिङ्गं चालयेद्यो बन्धोऽयं धेनुकः स्मृतः ॥"
इति रतिमञ्जरी ॥
(अपरविधलक्षणं यथा,—
"न्यस्तहस्तयुगला निले परे
योषितेति कटिरूढवल्लभा ।
अयतो यदि धैर्यैरधोमुखी
धेनुकं दृषवदुद्वहेत् प्रिये ! ॥")
धेनुकस्दनः, पुं, (धेनुकं गोवर्द्धनोत्तरपार्श्वस्थतालवनवासिनमसुरं निसूदयति बलरामद्वारेति । सूद + णिच् + ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (बलरामः । इति पुराणम् ॥)
धेनुका, स्त्री, (धेनुरिव प्रतिकृतिः । धेनु + कन् । टाप् ।) दन्तिनी । (धेनुरेव । स्वार्थे कन् ।) गौः । इति मेदिनी । के, १७६ ॥ (यथा, महाभारते । ७ । ७६ । १८ ।
"इमां ते तरसौ भार्य्यां त्वदाधिभिरभिप्लुताम् ।
कथं सन्तारयिष्यामि विवत्सामिव धेनुकाम् ॥")
धेनुदुग्धं, क्ली, (धेनोर्दुग्धमिव शुभ्रं फलमस्य ।) चिर्भिटः । इति राजनिर्घण्टः ॥ (धेनोर्दुग्धम् ।) गोक्षीरम् ॥
धेनुदुग्धकरः, पुं, (करोति वर्द्धयतीति । कृ + अच् । धेनोर्दुग्धस्य करः । एतद्वृक्षभेदेन धेनुदुग्धवर्द्धनादस्य तथात्वम् ।) गर्ज्जरः । इति राजनिर्घण्टः ॥
धेनुष्या, स्त्री, (धेनु + "संज्ञायां धेनुष्या ।" ४ । ४ । ८६ । इति ष्ठगागमो यत्प्रत्ययश्च निपात्यते ।) वन्ध्याकेऽपि स्थिता गौः । इत्यमरः । २ । ६ । ७२ ॥ यां वन्ध्यैकेन दत्ता अर्थं नीतवान् सा । गौर्म्मृतेयी वा या दुग्धवन्ध्यैके स्थिता सा धेनुष्यति उच्यते । इति भरतः ॥
धेनुकं, क्ली, (धेनूनां समूहः । "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ । इति ठक् ।) धेनुसमूहः । इत्यमरः । २ । ६ । ६० ॥ (स्त्रीणां करणभेदः । इति मेदिनी । के, १०६ ॥)
धैर्य्यं, क्ली, (धीरस्य भावः कर्म्म वा । धीर + ष्यञ् ।) धीरता । धीरस्य भाव इत्यर्थे ष्यञ्प्रत्ययः ॥ तस्य लक्षणं यथा,—
"स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति कीर्त्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
(इदं नायकसत्त्वगुणानामन्यतमः । यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
तल्लक्षणं यथा, तत्रैव । ३ । ६३ ।
"अवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥"
उदाहरणं यथा,—
"श्रुताश्वरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसक्तप्रणयपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥")

धैवतः, पुं, (धीमतामयम् । धीमत् + अण् । एषोदरादित्वात् मस्य वत्वम् ।) सप्तस्वरान्तर्गतषष्ठस्वरः । स तु नारदमते अष्टस्वरतुल्यः । (अष्टसु धैवतं रौतीति वचनात् ॥) तानसेनमते मेकश्वरतुल्यः । अस्योच्चारणस्थानं ललाटम् । याज्ञवल्क्यमते दन्ताः । अयं क्षत्रियवर्णः । अस्य जातिः षाड्वः । अस्य तानम् ७२० प्रत्येकतानम् ४८ समुदायेन ३४,५६० भवन्ति । इति संगीतशास्त्रम् ॥
"गत्वा नाभेरधोभागं वह्निं प्राप्योर्द्ध्वगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥"
अस्य श्रुतयोऽस्रिसः । इति संगीतदामोदरः ॥ (यथा च सङ्गीतदर्पणे । १ । ५१ ।
"मद्रन्ती रौहिणी रम्येत्येता धैवतसंश्रयाः ॥"
अस्य ऋषिकुले उद्भवः । क्षत्रियो जातिः । पीतो वर्णः । श्वेतद्वीपे जन्म । ऋषिस्तुम्बुरुः । गणेशो देवता । उष्णिक् छन्दः । वीभत्सभयानकरसयोरुपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)
धोड़ः, पुं, (धोरति चातुर्य्येण गच्छतीति । धोर गतिचातुर्य्ये + घञ् । रस्य डत्वम् ।) सर्पविशेषः । धोड़ा इति भाषा । तत्पर्य्यायः । राजिलः २ डुण्डुभः ३ दुण्डुभः ४ । इति शब्दरत्नावली ॥
धोर, ऋ गतिचातुर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अदुधोरत् । गतौ चातुर्य्ये गतिचातुर्य्यम् । धोरन्त्या धोरणाक्रान्ता विनीता यस्य वारणाः । इति दुर्गादासः ॥
धोरणं, क्ली, (धोरति गच्छत्यनेनेति । धोर + करणे ल्युट् ।) सर्व्ववाहनम् । इत्यश्वरघदोलादि । इत्यमरः । २ । ८ । ५८ ॥ (धोर + भावे ल्युट् ।) अश्वप्रथमगतिः । तत्पर्य्यायः । धौरितकम् २ धौर्य्यम् ३ धोरितम् ४ । इति हेमचन्द्रः । ४ । ३१२ ॥
धोरणिः, स्त्री, (धोरति क्रमशः प्राप्नोतीति । धोर् + अनिः ।) परम्परा । इति जटाधरः ॥
धोरितं, क्ली, (धोर् + क्तः ।) धोरणम् । अश्वप्रथमगतिः । इति हेमचन्द्रः । ४ । ३१२ ॥
धोरितकं, क्ली, (धोरितमश्वप्रथमगतिस्तेन कायतीति । कै + कः ।) धौरितकम् । इत्यमरटीकायां रमानाथः ॥
धौतं, त्रि. (धाव्यते स्मेति । भाव + कर्म्मणि क्तः ।) मार्ज्जितम् । धोया इति भाषा । तत्पर्य्यायः । निर्णिक्तम् २ क्षौधितम् ३ स्नष्टम् ४ क्षालितम् ५ । इति हेमचन्द्रः । ६ । ७३ ॥ *॥
"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च ।
अधौतं तद्विजानीयाद्यत्रा दक्षिणपश्चिमे ॥"
इति कर्म्मलोचनम् ॥
धौतं, क्ली, (धाव + क्तः ।) रूप्यम् । इति राजनिर्घण्टः ॥
धौतकटः, पुं, (धौतः कटः । नित्यकर्म्मधारयः ।) क्षत्रचर्म्मितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । खोलः २ स्यूतः ३ प्रसेवकः ४ । इति

जटाधरः ॥ सूनुः ५ स्रोतः ६ । इति भरतधृतकोषान्तरम् ॥

धौतकोषजं, क्ली, (कोषाज्जायते इति । कोष + जन + डः । धौतं कोषजम् ।) पत्रोर्णम् । इति शब्दरत्नावली ॥

धौतकौषि(शे)यं, क्ली, (धौतं क्षालितं कौषियम् ।) पत्रोर्णम् । इत्यमरः । २ । ६ । ११३ ॥ कौषियमेव धौतं प्रक्षालितं पत्रोर्णाख्यं वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः क्षतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति पत्रोर्णम् । इति भरतः ॥

धौतशिलं, क्ली, (धौतेव शिला यस्य ।) स्फाटिकम् । इति त्रिकाण्डशेषः ॥

धौमकः, पुं, (धूमे धूमप्रधानदेशे भवः । धूम + "धूमादिभ्यश्च ।" ६ । २ । १२० । इति वुञ् ।) देशविशेषः । इति केचित् ॥

धौरः, पुं, धवदृक्षः । इति भावप्रकाशः ॥

धौरितकं, क्ली, (धौरितक + प्रज्ञादित्वात् ञ् ।) अश्वानां पञ्चविधगत्यन्तर्गतगतिविशेषः । इत्यमरः । २ । ८ । ४८ ॥ तत्र यत्किञ्चित् अतिरस्कन्दितं गाम इति ख्यातं तल्लेऽधिका बहुदा गतिः । इति भरतः ॥

धौरेयः, त्रि, (धुरं वहतीति । "धुरो यड्ढकौ ।" ४ । ४ । ७७ । इति ढक् ।) रथशाङ्गादिभारवोढ़ा । इत्यमरः । २ । ८ । ६५ ॥ अगडुहि, पुं । इति राजनिर्घण्टः ॥

धौर्त्तिकं, त्रि, धूर्त्तस्येदम् । धूर्त्तस्य भावः । इति धूर्त्तशब्दात् ष्ठिकप्रत्ययेन निष्पन्नम् ॥

धौर्य्यं, क्ली, (धुर्यस्य कर्म्म । धुर्य + ष्यञ् ।) अश्वस्य प्रथमगतिः । इति हेमचन्द्रः । ३ । ३१२ ॥

ध्रा, अग्नियुतौ । ध्रौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) युतिरिति बाहुलकान्न दीर्घः । अग्नियुतिरग्निसंयोगः । ध्रमि, ग्रन्थोत्पत्तिहेतुभावः । धमति सुवर्णं वणिक् अग्निसंयुक्तं करोतीत्यर्थः । धमति ग्रन्थं जनः सम्पादं करोतीत्यर्थः । अग्निपृक्तत्वात् च । सुखेनैव धर्मेदग्निम् । इति दुर्गादासः ॥

ध्राकारः, पुं, (ध्रा अग्निसंयोगकर्त्तं करोतीति । ध्र + अण् ।) लोहकारकः । इति हलायुधः ॥

ध्रामा, [न्] पुं, (ध्रा + "नामन्सीमन्मिति ।" उणां ४ । १५० । इति मनिन्प्रत्ययेन निपातनात् साधुः । उज्ज्वलदत्तस्तु ध्रायतेर्मनिन् इत्युक्त्वा ध्रामन् इति शब्दमिच्छति ।) परिणामम् । आलोकः । ध्रानम् । इति सिद्धान्तकौमुद्यासुज्ज्वलादित्तिः ॥

ध्रात, त्रि, (ध्रै चिन्तने + क्तः ।) चिन्तितम् । यथा, भागवते । ६ । [तम् ॥"

"ध्रातं चित्तमभूच्चिरं च च पुनर्विष्णोः पदं प्राप्य-

ध्रानं, क्ली, (ध्रै + भावे ल्युट् ।) चिन्तनम् । (यथा, मनुः । १ । १२ ।

"तस्मिन्नर्के स भगवानुषित्वा परिवत्सरम्
स्वयमेवात्मनो ध्रानात्तद्रूपमकरोद्विधा ॥")

धारणाविषये एकप्रत्ययसन्ततिः । इति हेमचन्द्रः । २ । २३४ ॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरेन्द्रियवृत्तिप्रवाहः । इति वेदान्तसारः ॥ * ॥ यथा, विष्णुपुराणे ।

"तद्रूपप्रत्ययैकसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ! ॥"

अस्यार्थः । "तद्रूपस्य धारणासिद्धस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एकावच्छिन्ना सन्ततिः । अन्यनिस्पृहा विषयान्तरेणाव्यवधीयमाना । विजातीयप्रत्ययान्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः । तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते ।" इति तट्टीका ॥ * ॥

श्रीलक्ष्मण उवाच ।

"सर्व्वे देवाः प्राकृतिका यावन्तो मूर्त्तिधारिणः ।
अहमात्मा नित्यदेही भक्तध्यानानुरोधतः ॥"

इति ब्रह्मवैवर्त्ते ज्ञन्मखण्डम् ॥

ब्रह्मचिन्ता । यथा, गारुड़े ४६ अध्याये ।

"ब्रह्मालम्बिचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"

अपि च ।

"प्राणायामैर्द्वादशभिर्यावत्कालो हुतो भवेत् ।
यत्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तत्तेव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुरे तु स यतो मुक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलति यस्य मनोऽभिध्यायतो भृशम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्मृता ॥
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनोनिश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥"

इति गारुड़े २३० अध्यायः ॥

ध्यानयोगः, पुं, (ध्यानमेव योगः ।) ध्यानरूपयोगः । यथा,—

"विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥"

इति श्रीभगवद्गीतायां १८ अध्यायः ॥

ध्यामं, क्ली, (ध्यायते पशुभिरिति । ध्यै चिन्तने + बाहुलकात् मक् ।) दमनकवृक्षः । गन्धलवम् । (यथा, सुश्रुते । १ । २८ ।

"ध्यामशुक्लमकक्षुक्षवर्णाः पित्तकोपतः ॥")

श्यामले, त्रि । इति मेदिनी । मे, १७ ॥

ध्यामकं, क्ली, (ध्यामस्येव प्रतिकृतिः । ध्याम + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ३८ ।

"गलातगरकुष्ठमांसीध्यामकालशपत्रनागपुष्पप्रियङ्गुरेणुका-त्वगेलनख-युक्तिपत्त्राख्यौशीरयक-

श्रीवेष्टकचोचचोरकवालकागुरुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुसृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति ॥")

ध्यामा, [न्] पुं, (ध्यै + "नामन्सीमन्मिति ।" उणां ४ । १५० । इति मनिन्प्रत्ययेन निपातनात् साधुः ।) परिणामः । चिन्तायाम्, क्ली । इत्युणादिकोषः ॥

ध्येयः, त्रि, (ध्यायते इति । ध्य + यत् ।) ध्यातव्यः । ध्यानीयः । चिन्तनीयः । यथा,—

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ॥"

इति श्रीनारायणध्यानम् ॥

ध्यै, चिन्तने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-ऋनिट् ।) ध्यायति विष्णुं वैष्णवः । इति दुर्गादासः ॥

ध्रज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ध्रजति । इति दुर्गादासः ॥

ध्रज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) इ, ध्रञ्जति । इति दुर्गादासः ॥

ध्रञ्ज, भाने । इति कविकल्पद्रुमः । (भ्वां-परं-अकं-सेट् ।) ध्रञ्जति ऋदङ्गः । इति दुर्गादासः ॥

ध्रस, क उत्क्षेपे । उच्छे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, ध्रासयति । इति दुर्गादासः ॥

ध्रस, ग उ उच्छे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) ग, ध्रस्नाति ध्रस्यं दीर्घः । उ, ध्रसिता ध्रस्ता । इति दुर्गादासः ॥

ध्राङ्क्ष, इ काङ्क्षे । घोरयते । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) रेफयुक्तः । घोरयतमिच्छतिरत्वामेव घोरशब्दः । इ, ध्राङ्क्षति पक्षी । नमश्चपाठेनैवेदसिद्धे अस्य इदुपधस्यो वेदेषु दारणभेदार्थः । इति दुर्गादासः ॥

ध्राख, ऋ ओखार्थे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं सेट् ।) रेफयुक्तः । ऋ, अदध्राखत् । ओखार्थे शोषालमर्थयोः । इति दुर्गादासः ॥

ध्राघ, ङ ऋ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, ध्राघते । ऋ, अदध्राघत् । इति दुर्गादासः ॥

ध्राजि:, स्त्री, (ध्राजयतीति । ध्रज गतौ + जि-ञ् + इन् ।) वातालिः । इत्युणादिकोषः ॥ चूरश्च वातास इति भाषा ॥ (ध्राजि + भावे इन् । गतिः । यथा, ऋग्वेदे । १० । १३६ । २ ।

"मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥"

"वातस्य वायोर्ध्राजिं गतिमनुयन्ति यमुत्क्रामन्ति ॥" इति तद्भाष्ये सायनः ॥)

ध्राड, ऋ ङ ग्रीर्व्यौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) रेफयुक्तः । ऋ, अदध्राङ्त । ङ, ध्राङ्ते । ग्रीर्व्यौ: विभेदः । इति दुर्गादासः ॥

ध्राड़िः, पुं, (धाड़ते ग्रीष्मो भवतीति । धाड़+ "सर्व्वधातुभ्य इन् ।" उणा ।४।११८। इति इन् ।) पुण्यक्षयः। इत्युणादिकोषः ॥

ध्रिज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ध्रेजति । इति दुर्गादासः ॥

ध्रु, णि } स्थैर्य्ये । सर्पणे । इति कविकल्पद्रुमः ॥
ध्रु, ग्रि } (भ्वां-तुदां च-स्थैर्य्ये अकं-सर्पणे सकं-परं-अनिट् ।) द्वौ रेफयुक्तौ । आद्यो दीर्घान्त इति कश्चित् । णि, ध्रुतोऽस्ति । ग्रि, ध्रुवति अध्रुवीत् । ध्रुवति ग्रैव्यः । इति दुर्गादासः ॥

ध्रुवं, क्ली, (ध्रुवति स्थिरीभवतीति । ध्रु+"सुवः कः ।" उणा । २ । ६१ । इत्यच । "बाहुलकात् ध्रु स्थैर्य्ये अतोऽपि कः ।" इत्युज्ज्वलदत्तोक्त्या कः ।) निश्चितम् । (यथा, ग्राकुन्तले १ अङ्के ।

"ध्रुवं स नीलोत्पलपत्रधारया
ग्रमीलतां क्षेतुमुदिर्यवस्यति ॥")

तर्कः । इति मेदिनी । वे, १३ ॥ आकाशम् । इति हेमचन्द्रः ॥

ध्रुवं, त्रि, (ध्रु गतिस्थैर्य्ये + बाहुलकात् कः ।) सन्ततम् । ग्राश्वतम् । इति मेदिनी । वे, १३ ॥ स्थिरम् । निश्चितम् । इति हेमचन्द्रः ।६।८६ ॥ (यथा, चाणक्यशतके । ६३ ।

"यो ध्रुवाणि परित्यज्य ग्रध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति ग्रध्रुवं नष्टमेव हि ॥")

ध्रुवः, पुं, (ध्रुवति स्थिरीभवतीति । ध्रु+बाहुलकात् कः ।) ग्रङ्कुः । हरः । (यथा, महाभारते । १३ । १७ । १०३ ।

"धाता ग्रङ्कश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")

विष्णुः । (यथा, महाभारते । १३ ।१४६।१६ ।

"विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥")

वटः । उत्तानपादजः । (अस्य विवरणन्तु यथात् द्रष्टव्यम् ॥) वसुभेदः । (यथा, मात्स्ये । ५ । २१ ।

"ग्रापो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")

योगभेदः । इति मेदिनी । वे, १३ ॥ (यथा, ज्योतिषे ।

"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")

स्थाणुः । इत्यमरः । २ । ७ । ८ ॥ मुरारिपत्नी । इति त्रिकाण्डशेषः ॥ ध्रुवकः । इति सङ्गीतदामोदरः ॥* ॥ (रोहिणीगर्भे वसुदेवाज्ञातः पुत्रविशेषः । यथा, भागवते ।६।१८।४६।

"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥"

पाण्डवपक्षीयः कश्चित् क्षत्रियवीरः । इति महाभारते । ७ । १५६ । ३७ ॥ नहुषस्य पुत्रविशेषः । यथा, महाभारते । १ । ७५ । ३० ।

"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट् सुतान् प्रियवाससि ॥"

पुरुवंशीयराजभेदस्य पुत्रविशेषः । यथा, भागवते । ९ । २० । ६ ।

"ऋतेयो रन्तिनावोऽभूत् त्रयस्त्यात्मजा नृप ! ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥"

रोमावर्त्तविशेषः । यथा, ग्रन्थान्तरे ।

"ग्रावर्त्तसाम्यादावर्त्ता रोमसंस्थानसङ्ख्यानाम् ॥"

ते च दशधा यथा,—

"द्वादशस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः ।
एको भाले ललाटे च दशावर्त्ता ध्रुवाः स्मृताः ॥"

यज्ञीयग्रहपात्रविशेषः । यथा, कात्यायनश्रौतसूत्रे । ६ । ५ । १७ ।

"यजमानस्ततो ग्रहग्रहणमा ध्रुवात् ॥")

नासाग्रम् । तत्तु ग्रासन्नत्वेन पश्यति । यथा,

"ग्ररुन्धतीं ध्रुवञ्चैव विष्णोस्तिष्ठि पदानि च ।
ग्रासन्नत्वेन पश्येच्च तुर्थं मासमखण्डम् ॥
ग्ररुन्धती भवेज्जिह्वा ध्रुवो नासाग्रसंस्थितः ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्म्मासमण्डलम् ॥"

इति कालीखण्डे । १२ । १३—१४ ॥

ध्रुवलोकोत्पत्तिर्यथा,—

"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
ग्रभीष्टायामभूद्वत्स ! ध्रुवस्त्वन्यवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ! ।
स नातिप्रीतिमांस्तस्यां तस्याञ्चाभूद्ध्रुवः सुतः ॥
राजासनस्थितस्याङ्के पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पुत्रं पितुस्तथाऽरूढुं सुरुचिर्वाक्यमब्रवीत् ॥
एतदासनसं सर्व्वभूभृतसंश्रयकेतनम् ।
योग्य मेव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥
उत्तमस्य पितुः पार्श्वं बालस्तत् श्रुत्वा माहभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज ! मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वेत्स ! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्व्विता ॥

सुनीतिरुवाच ।

सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक ! ।
न हि पुण्यवतां वत्स ! सपत्नैरेवमुच्यते ॥
यदि चेदुःखमत्यर्थं सुरुच्या वचनात्तव ।
ततः पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥

पराशर उवाच ।

निर्ज्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्वाक्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः ।
निर्ज्जगाम वनात्तस्मात् प्रणिपत्य स तान्मुनीन् ॥
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ।
यत्रैव देवदेवस्य सान्निध्यं हरिमेधसः ॥
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ।

पदाङ्गुष्ठेन संपीड्य यदा स्थ वसुधां स्थितः ।
तदा समस्तवसुधा चचाल सह पर्व्वतैः ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥
ग्रौत्तानपादे भद्रन्ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ! ॥

ध्रुव उवाच ।

भगवन् सर्व्वभूतेश ! सर्व्वज्ञस्त्वं भवान् हृदि ।
किमज्ञातं तव स्वामिन् ! मनसा यन्नयेच्छितम् ॥
नेतद्राज्ञासनं योग्यमज्ञातस्य ममीदृशात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥
ग्राधारभूतं जगतः सर्व्वेषामसुरोत्तमम् ।
प्रार्थयामि प्रभो ! स्थानं त्वत्प्रसादादनीश्वरम् ॥

श्रीभगवानुवाच ।

त्रैलोक्यादधिके स्थाने ग्रवतारान्मदाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद्भवान् ध्रुव ! ॥
सूर्य्यात् सोमात् तथा भौमात् सोमपुत्राद्बुधादृषेः ।
सितार्कतनयादीनां सर्व्वर्क्षाणां तथा ध्रुवम् ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।
सर्व्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ! ॥"

इति विष्णुपुराणे १ ग्रंशे १२ ग्रध्यायः ॥*॥

ध्रुवयोगजातफलं यथा,—

"नरीनर्त्ति वाणी सदा वक्त्रपद्मे
चरीकर्त्ति कार्य्यं वरीभर्त्ति वन्धून् ।
ध्रुवाख्ये प्रसूतिर्ध्रुवा तस्य कीर्त्ति-
र्दिगन्ते नितान्तं भवेद्वारुमूर्त्तिः ॥"

इति क्रोष्टीप्रदीपः ॥ * ॥

ध्रुवगणो यथा । उत्तरफल्गुनी १ उत्तराषाढ़ा २ उत्तरभाद्रपद ३ रोहिणी ४ । इति ज्योतिषम् ॥ * ॥ ताराविशेषः । यथा,—

"मेरोरुभयतो मध्ये ध्रुवतः पे नभःस्थिते ।
निरयदेशसंस्थानामुभये ते ग्रतिग्राश्रिते ॥
भचक्रं ध्रुवयोर्बद्धमाश्रित्यं प्रव वर्त्तते ।
पर्य्येत्यहर्निशं तत्रस्था ग्रदृश्यन्ता य चक्रमम् ॥"

इति सूर्य्यसिद्धान्ते १२ ग्रध्यायः ॥

ध्रुवकः, पुं, (ध्रुव+स्वार्थे कन् ।) स्थाणुः । इति हेमचन्द्रः । ३ । १८८ ॥ गीताङ्गविशेषः । धुवा इति भाषा । तस्य लक्षणं यथा,—

"उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः ।
कनिष्ठश्च चतुर्भिः स्याद्ध्रुवकोऽयं मयोदितः ॥
उक्तं द्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् ।
ततो द्विखण्डमाभोगे तालमानरसैः सह ॥
ग्राभोगे कविनाम स्यात्तथा नायकनाम च ।
उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत्ततः परम् ॥
ततोऽन्तरा ध्रुवस्तस्मादाभोगध्रुवकौ ततः ।
उद्ग्राहः प्रथमः पादः कथितः पूर्व्वसूरिभिः ॥
गीत्वा पूर्व्वपदं न्यासो यत्र स ध्रुवको भवेत् ।
यत्रैव कविनाम स्यात् स आभोग इतीरितः ॥
ध्रुवकादिषु सर्व्वेषु भवेदेवंविधः क्रमः ॥"

स तु षोड़शविधः । यथा,—

"जयन्तः शेखरोत्साहो मधुरो निर्म्मलस्तथा ।

ध्वंसी

कुमुदः कमलश्चैव सामन्तश्चन्द्रशेखरः ॥
सुखदः कुमुदो नायी कन्दर्पो जयमङ्गलः ।
तिलको ललितश्चेति ध्रुवकाः षोड़श स्मृताः ॥
एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः ।
सर्व्वेध्रुवाः षोड़श स्युः षड्विंशत्यक्षरावधि ॥
द्विगुर्व्वैरक्षरैरेव पदमेकमिहेष्यते ।
तदग्राहध्रुवकाभोगैरित्थं षट्पदनिर्णयः ॥
पञ्चपादे तु ध्रुवके पदैरेकेन तद्ध्रुवः ।
चतुष्पादे तु ध्रुवके एथड्नाम्नैव तद्ध्रुवः ॥"

इति सङ्गीतदामोदरः ॥

ध्रुवका, स्त्री, (ध्रुवक + टाप् ।) ध्रुवका । ध्रुया इति भाषा । संज्ञा । इत्युणादिकोषः ॥

ध्रुवा, स्त्री, (ध्रुवत्यनयेति । ध्रु स्थैर्य्ये + वाहुलकात् कः । ततष्टाप् ।) स्रुक् । स्रुचः । वटपत्राकृतियज्ञपात्रम् । इत्यमरः । २ । ७ । २५ ॥ मूर्व्वा । आड़ी । ग्रामपर्य्यौ । गीतभेदः । इति मेदिनी । वे, १४ ॥ ध्रुया इति भाषा ॥ साध्वी स्त्री । इति शब्दरत्नावली ॥

ध्रेक, ऋ ङ गतौ । उत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) रेफमध्यः । द्वावर्थौ । उत्साहो दृढ़तिरिति चक्रः । औत्सव्यमिति क्षीरस्वामी । ऋ, ऋदिधेकत् । ८, धेकते लोकः ग्रन्थायते उत्सहते वेत्यर्थः । खनेनोत्साहः खनात्साहः । इति केचित् । तन्मते खनेनोत्सहते इत्यर्थः । इति दुर्गादासः ॥

ध्रै, शब्दौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) रेफोपधः । ध्रायति लाभालोकः प्रीतः स्यादित्यर्थः । इति दुर्गादासः ॥

ध्वंसः, पुं, (ध्वन्स + भावे घञ् ।) नाशः । यथा,—
जन्माभावत्वं ध्वंसत्वमिति सिद्धान्तमुक्तावली ॥
(यथा, पञ्चतन्त्रे । १ । ११७ ।
"दर्शितभयेऽपि धातरि
धैर्य्यध्वंसो भवेन्न वीराणाम् ।
ग्रीवितसरसि निदाघे
नितरामेवोद्धतः सिन्धुः ॥")

ध्वंसनं, क्लीं, (ध्वंस + भावे ल्युट् ।) ध्वंसः । (यथा, भागवते । ५ । १ । २३ ।
"इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्म्माधिकारोऽखिलजगद्गुरुध्वंसनापराधुभावस्तं भगवतः इति ॥") गमनम् । अधःपतनम् । इति ध्वन्धातोर्भावेल्युट्प्रत्ययः ॥ (ध्वंसयतीति । ध्वंस + णिच् + ल्युः । ध्वंसके त्रि । यथा, महाभारते । ५ । १५६ । ३ ।
"प्रजापतिमिवादित्यं तेजसा भास्करोपमम् ।
महेन्द्रमिव शूरूणां ध्वंसनं पुरदृड्भिभिः ॥")

ध्वंसी, [न्] पुं, (ध्वंसते विनश्यतीति । ध्वन्स + णिनिः ।) पञ्चमसम्भवपीयूषवृक्षः । इति शब्दरत्नावली ॥ (ध्वंसोऽस्यास्तीति । ध्वंस + इनिः ।) वरदपिशाचे, त्रि ॥ यथा,—
ज्वालाजरठते ह्यंसरे ध्वंसी विलोकते ।
नगरेऽस्य विघ्नैर्विविधैर्ना परमाणुभिः ॥"

इति वैद्यकपरिभाषा ॥

ध्वजः

ध्वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) वकारयुक्तः । ध्वजति । इति दुर्गादासः ॥

ध्वज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं सकं-सेट् । इदित् ।) वकारयुक्तः । इ, ध्वङ्क्षते । इति दुर्गादासः ॥

ध्वजः, पुं, (ध्वजोऽस्यस्येति । ध्वज + अर्शआदित्वादच् ।) ग्रौष्किकः । इति मेदिनी । जे, १० ॥ (यथा, मनुः । ४ । ८५ ।
"दशचक्रसमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥")

ध्वजः, पुं क्लीं, (ध्वजति उच्छ्रितो भवतीति । ध्वज + पचाद्यच् ।) पताका । (यथा, पञ्चतन्त्रे ।१।३२ ।
"किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति नयः स्वस्य वंशस्याग्रे ध्वजो यथा ॥")
खड्गाङ्गम् । मेढ्रम् । (यथा, सुश्रुते चिकित्सितस्थाने १६ अध्याये ।
"विद्धेषु सिराक्षायुसङ्कोचैः क्षीयते ध्वजः ॥")
चिह्नम् । इति मेदिनी । जे, ११ ॥ (यथा, महाभारते । १ । ३३ । १७ ।
"तं वव्रे वाहनं विष्णुर्गरुडाङ्कं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति सः ॥")
गर्व्वः । दर्पः । इति शब्दरत्नावली ॥ पूर्व्वदिग्रोगृहम् । इति हेमचन्द्रः ॥ पताकादण्डः । तत्पर्य्यायः । केतनम् २ । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २७ । ६ ।
"ततोऽर्জ্জुनः सुपुङ्खानां विद्धा सप्तभिरायुधैः ।
ध्वजं धनुश्चास्य तथा क्षुराभ्यां समलूनत ॥")
ध्वजयुक्तिर्यथा.—
"सेनाचिह्नं स्थितीग्राणां दण्डो ध्वज इति स्मृतः ।
सपताको निष्पताकः स ज्ञेयो द्विविधो बुधैः ॥
पताका सार्द्धदैर्घ्येण दण्डस्तु पृथिवीभुजाम् ।
सपताकध्वजस्याग्रे यदा दण्डं परित्यजेत् ॥
जयदण्डो ध्वजो नाम नैनं सामान्यमर्हति ।
वंशोऽथ वाकुलः शालः पालाशश्चाप्यकल्पथा ॥
नेपो नैमोऽथवा दण्डस्तथा वैराजवारजः ।
अवष्टादिकसंज्ञानां वर्णरूपप्रकाशितः ॥
सर्व्वेषामेव वंशस्तु दण्डः सम्पत्तिकारकः ॥"
अ क च ट त प य ग्राः ॥
"प्रतापाय पताकासु अष्टावेव प्रकाशिताः ।
पञ्चहस्तायता हस्तपरिणाहा जयाभिधा ॥
जया च विजया भीमा चपला वैजयन्तिका ।
दीर्घा विशाला लोला च ज्ञेया दण्डैकदन्तिताः ॥
परिणाहे पादहीनश्च वर्णस्य निर्णयः ।
रक्तः श्वेतोऽरुणः पीतश्चित्रो नीलोऽथ कर्व्वुरः ॥
क्षणश्चेति पताकानां वर्णरूपप्रकाशितः ।
अवष्टादिकसंज्ञानामष्टानामरकक्षयम् ॥
कलसो दर्पणश्चन्द्रः पद्मकोष्ठो यथाक्रमम् ।
ब्रह्मक्षत्रियविट्शूद्रजातीनां संप्रकाशितः ॥
गजादियुक्ता सा प्रोक्ता जयन्ती सर्व्वमङ्गला ।
गजः सिंहो हयो द्वीपी चतुर्थी पृथिवीभुजाम् ॥
हंसादियुक्ता विज्ञेया राज्ञां सेवाश्रमङ्गला ।
हंसः केकी शुकश्चासौ ब्रह्मादीनां यथाक्रमम् ॥
चामरादिसमायुक्ता सा ज्ञेया सर्व्वबुद्धिदा ।
चामरश्वासपक्षाणि चित्रवस्त्रं तथा सितम् ॥
चतुर्णां वेदनयनपक्षेभ्रगणितक्रमात् ।
तदग्रे यदि विघ्नस्तं पताकाहितयं भवेत् ॥
इयं हि सर्व्वतो भद्रा पताका चक्रवर्त्तिनः ।
तद्वर्णः पूर्व्ववज्ज्ञेयः प्रमाणं विधिबोधितम् ॥
काञ्चनं राजतं ताम्रं नागधातुमयं क्रमात् ।
कुम्भादिकं प्रशंसन्ति पताकार्थे महीभुजाम् ।
तत्रापि रत्नविन्यासो विधेयो राजतक्रमः ।
चतुर्भिर्मकरास्याद्यैर्युक्ता चेत् सर्व्वसिद्धिदा ।
तदा श्रेयस्करी नाम सा पताका विजायते ॥
मकरोऽथ गजः सिंहो व्याघ्रो वाजी मृगः शुकः ।
शुचिश्चेति समुद्दिष्टमादित्यादिदृशां सदा ॥
इति प्रोक्तः पताकानां निर्णयः पृथिवीभुजाम् ॥"
अथ निष्पताकध्वजः ।
"पूर्व्ववद्दण्डनियमस्तत्र दैर्घ्ये विशेषणम् ।
दण्डः पञ्चादि पञ्चत्व कुम्भत्व विहगो मणिः ॥
निष्पताको ध्वजो राज्ञां षड्भिरेतैः समन्वितैः ।
जयः कपाली विजयः शैलस्तत्र शिवः क्रमात् ॥
राज्ञः पुरुषमानेन दण्डमानं प्रकीर्त्तितम् ।
ऊर्द्धाधःक्रमयोगेन तद्दण्डादिकमुच्यते ॥
केकी चासौ मतस्यरङ्कस्त्रिविधानां महीभुजाम् ।
ध्वजाग्रेषु विधेयानि पञ्चादि श्रेयमिच्छताम् ॥
पद्मः कुम्भश्च विहगो मणिश्च यथाक्रमात् ।
उपर्य्युपरितो ध्येयो निष्पताके महीभुजाम् ॥
अष्ट षोड़श द्वात्रिंशच्चतुःषष्टिदलाम्बुजम् ।
दृष्टादृष्टिग्रहेष्टाढ्यः कुम्भः सम्पत्तिकारकः ॥
हंसश्चासः शुकः केकी पञ्चिश्च यथाक्रमम् ।
वज्रश्च पद्मरागश्च नीलो वैदूर्य्यमेव च ॥
ब्रह्मक्षत्रियविट्शूद्रजातीनां स्यात् यथाक्रमम् ।
कनकं रजतं युग्मं त्रिविधानां महीभुजाम् ॥
निष्पताकध्वजाद्यादिनिर्म्माणे योग इष्यते ।
पताका यदिहास्त्येका सर्व्वाग्रे योग्यवर्णिनी ॥
अयं ध्वजो विघ्नालाख्यो विज्ञेयश्चक्रवर्त्तिनः ।
तत्रैव चामरे योग्ये विज्ञेयाः सर्व्वसम्पदः ॥
इति राज्ञां समुद्दिष्टमन्येषां ध्वज उच्यते ।
नीर्द्वे विंशतिहस्तेभ्यो न चार्व्वाक् दण्डहस्तकात् ॥
हस्तहस्तैकसंवृद्धा ध्वजो दण्डविधो मतः ।
सहस्राधिपमारभ्य यावत् स्याद्युताधिपः ॥
न सहस्राधिपाल्पर्द्धेर्ध्वजधारणमर्हति ।
अपि कोटिपतेर्ज्ञेयो ध्वजो विंशतिहस्तकः ॥
तत्रापि वस्त्रवर्णादिनिर्णयः पूर्व्ववन्मतः ।
स्थिरता चित्रता चेति निष्पताकध्वजे गुणौ ॥
यद्येतदुभयं चिह्नमुभयोः संप्रकाशितम् ।
तत्प्रमाणध्वजे ज्ञेयमप्रधाने न निर्णयः ॥
निष्पताकध्वजोद्देशः प्रोक्तोऽयं भोजभूभुजा ।
एतद्विदित्वा मतिमान् चिरं सुखमवाप्नुयात् ॥
यो दम्भादथवाज्ञानादविलङ्घयति मानवः ।
स विधीदति नश्येत तस्य कीर्त्तिः कुलं बलम् ॥"

इति युक्तिकल्पतरुः ॥ * ॥

मातृके ।

"घण्टाविताननवरतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विधिवद्द्विजाग्र्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"

ध्वजयष्ट्यादिमानमाह हयशीर्षपञ्चरात्रम् ।

"ध्वजदण्डः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः ।
तद्दृढं ताम्रजं चक्रं छत्रं कुर्य्याद्विजोत्तम ! ॥
प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम् ।
ध्वजयष्टिर्दैवगृहे ऐशान्यां दिशि देशिकैः ॥
स्थापनीयाथ वायव्ये साम्प्रतं ध्वजमुच्यते ।
पङ्क्तिकार्पासशौमाद्यैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं विचित्रं वा घण्टाचामरभूषितम् ।
किङ्किणीजालकोपेतं बर्हिपत्रविभूषितम् ।
शुक्लादिवर्णैर्विप्रादिः क्रमाद्वा कारयेत् ध्वजम् ॥
दण्डाग्राद्वरणीं यावत् हस्तैकं विस्तरेण तु ।
महाध्वजन्तु विख्यातं सर्व्वकामप्रदं शुभम् ॥
ध्वजेन रहितो विप्र प्रासादस्तु वृथा भवेत् ।
पूजाहोमादिकं सर्व्वं जपाद्यं यत् कृतं नरैः ॥"

शिवसर्व्वस्वे ।

"देवेभ्यश्च गृहं दद्याद् वाहनैरुपशोभितम् ।
तुरङ्गमेध सदृशस्य हरस्य वृषचिह्नितम् ॥
विष्णवे गरुडाङ्कन्तु दुर्गायै सिंहचिह्नितम् ।
कार्य्यं ध्वजपताकाद्यमन्यथा न कथञ्चन ॥"

गरुडलक्षणमाह नारदपञ्चरात्रे ।

"उपेन्द्रस्याग्रतः पक्षी गुडाकेशः क्षताञ्जलिः ।
सव्यजानुगतो भूमौ मूर्द्धादौ मणिमण्डितः ॥
प्रश्लिष्टपक्षो नराङ्गिघ्र तुङ्गनासो नराङ्कः ।
द्विबाहुः पद्मयुक्तश्च कर्त्तव्यो विनतासुतः ॥"

विष्णुधर्म्मोत्तरे ।

"प्रतिपाद्य द्विजे दद्यात् ध्वजं चिदग्निदेवतम् ।
निर्दहत्याशु पापानि महापातकजान्यपि ॥"

इति प्रतिष्ठातत्त्वम् ॥ * ॥

अथ ध्वजचिह्नविधिः ।

"सिंहारूढा ध्वजे यस्य वृषस्थ रिपुहा उमा ।
दारस्था पूज्यते वत्स ! न तस्य रिपुजं भयम ॥
कपिसंस्था महामाया सर्व्वग्रहविनाशिनी ।
वृषे यथेप्सितं दद्यात् कलसे श्रेय उत्तमम् ॥
हंसे विद्यार्थकामस्तु वर्हिणे सुतमिच्छति ।
गरुत्मगा महामाया सर्व्वरोगविनाशिनी ॥
महिषस्था महामारी: शमयेत् ध्वजसंस्थिता ।
करिणा सर्व्वकार्य्येषु वृद्धैः कार्य्या विभूतिनी ॥
पद्मस्था चर्चिका रौद्रा धर्म्मकामार्थमोक्षदा ।
प्रेतस्था सर्व्वभयदा नित्यं पशुनिपातनात् ॥
पूजिता देवराजेन्द्रनीलोत्पलकरावरा ।
भवते सिद्धकामस्य चिह्नाग्रे संव्यवस्थिता ॥
गन्धपुष्पार्चितं कृत्वा वस्त्रहेमसुचर्चितम् ।
फलशालियवस्रक्चिवर्द्धमानविभूषितम् ॥
शोभने उच्छ्रयेद्धस्ते पताकां वा मनोरमाम् ॥
चामरं कलसं छत्रमातपत्रं वितानकम् ।
भवते सिद्धकामस्य वृषस्य फलदायकम् ॥
नमो विश्वेश्वरि दुर्गे ! त्रासुरुक्षे चतुर्द्धारिणि ॥
ध्वजं ससुच्छ्रयिष्यामि वसोर्धारां सुखावहाम् ॥"

अथ ध्वजदानविधिः ।

विश्वेश्वर उवाच ।

"यद्येवं सा महाभागा ब्रह्मविष्णुपरापरा ।
तदहं श्रोतुमिच्छामि ध्वजदानं विधानतः ॥

अगस्त्य उवाच ।

यथा त्वं पृच्छसे वत्स ! तथा शुक्रेण ब्रह्मणि ।
पृष्टः पूर्व्वं तथा तेन यदुगीतं प्रकाशितम् ॥
शुक्रस्य भावयुक्तस्य तदहं ते महामुने ! ।
कथयामि यथान्यायं ध्वजदानं महाफलम् ॥

शुक्र उवाच ।

देव्या ध्वजप्रमाणन्तु विधिदत्तस्य लाञ्छनम् ।
दीयते च यथा नाथ ! तदेषं ब्रूहि नः ॥

ईश्वर उवाच ।

अखण्डं क्रमिकं वापि ध्वजं केशविवर्ज्जितम् ।
नवं समञ्च शस्तञ्च प्रासादाद्दण्डवर्द्धितम् ॥
मर्म्मं छत्रं गुरुं शुभ्रं श्लेष्मलं वा धातुजं हि वा ॥
तस्मिन् पटे लिखेत् सिंहं सर्व्वलक्षणलक्षितम् ।
रोचनां सह चन्द्रेण हेमलेखाद्यदूर्व्वया ॥
प्रासादाद्दोलमारुह्य चित्तं विस्तरतः करम् ।
ध्वजापादेन कर्त्तव्या दर्शयेद्दिक्षु देवताः ॥
सर्व्वा वाहनलाञ्छेन लाञ्छिताः सहसेन च ।
किङ्किणीचामरोपेता घण्टादर्पणशोभिताः ॥
कुसुमोमो महाप्राज्ञः सङ्कारदलान्वितान् ।
महामङ्गलशब्देन देव्याः कृत्वानु प्रपूजयेत् ॥
नृगन्धपुष्पनैवेद्यथथाविभवविस्तरैः ।
कन्यका ब्राह्मणान् भोज्य दधिपायसशर्करैः ॥
भूतानान्तु बलिं दत्त्वा तथा तत्परोहयेत् ।
सर्व्वकामानवाप्नोति विद्याधरपतिर्भवेत् ।
मोदते विधिधान् भोगान् सर्व्वविद्यार्थपारगः ॥
अथवा हेमं रौप्यं वा वार्षं पार्थिवशैलजम् ।
कारयेन्नृगराजन्तु महाकरिमदाप्लुतम् ॥
मघानक्षत्रकरोत्खातसुक्तापलपदप्रदम् ।
एवंविधं ततः कृत्वा नवम्यां पूजयेच्छिवाम् ॥
सोपवासः शुचिर्दक्षः चर्म्मखड्गविवर्ज्जितः ।
कन्यकाः पूजयित्वा तु विप्रान् वेदविदस्तथा ॥
देव्या भक्ताः सदाचारा शिवकालव्रते रताः ।
ते यथाशक्तितस्तोषा ज्ञात्वारोहेद्ध्वजं शिवे ॥
कन्या देव्या स्वयं प्रोक्ता: कन्याश्चया नुभूमिगी ।
यावदब्दसयोनिः स्यात्तावद्देवी सुरारिहा ॥
द्विजो ब्रह्मा शिवो विष्णुः स्वकीयव्रतपारकः ।
पूजितैस्तैः सदा शुक्र सर्व्वदेवासु पूजिताः ॥
दीनान्धकृपणानान्तु अन्नं देयन्तु शक्तितः ।
यथा सर्व्वगता देवी तद्दिग्भाग्यं भवेत ॥
नानाभक्ष्यान्नतदधिदूर्व्वाततण्डिकान्वितम् ।
बलिं वै सर्व्वभूतेभ्यो दद्यादिक्षु निवेदयेत् ॥
पञ्चघोषा तथा जम्भा अष्टविघ्नाश्चरापि वा ।
सिंहं स्वर्भे समारोप्य सर्व्वमङ्गलशब्दितम् ॥
वेदध्वनिमहामन्त्रकालिकाचण्डिकापरम् ।
न्यस्य सिंहं परं ध्यात्वेदृयाद्धं पूर्व्वकथितम् ।
एवन्तु वस्त्रसंवीतं सर्व्वाभरणभूषितम् ।
देव्या महाध्वजं न्यस्य ग्रीवायामपि विन्यसेत् ॥
ब्रह्मविष्णुरुद्रदाता सोमसूर्य्यदिवौकसाम् ।
ध्वजदानं महादानं सर्व्वदानोत्तमं मतम् ॥
यावन्नो दीयते शुक्र ! ध्वजः प्रासादमूर्द्धनि ।
तावत्तु न भवेद्वत्स ! प्रासादो देवसञ्ज्ञितः ॥
शून्यभूतं सदा भूता नागगन्धर्व्वराक्षसाः ।
विद्रवन्ति महात्मानो नानाबाधाश्च कुर्व्वते ॥
तस्माद्देवगृहद्वारपुरपर्व्वतपत्तने ।
उच्छ्रिताः शान्तिकामाय ध्वजाः शुक्र ! सदा हिताः ॥
न हि चान्यद्ध्वजदानादुत्तमं भारते क्वचित् ।
दानमिदञ्च पुत्रञ्च देया दीयन्तथैव च ॥
अनेन विधिना यस्तु ध्वजं शुक्र ! निवेदयेत् ।
सर्व्वकामानवाप्नोति स नरः शिवतां व्रजेत् ॥
तस्य दर्शनसम्भाषादपि पापरता नराः ।
विमुक्ताः सर्व्वपापेभ्यो दिवं यान्ति न संशयः ॥
राज्ञा शास्त्रेण विधिना देवीभाञ्जनराजताम् ।
शुक्लचक्रदशम्यार्द्धं सर्वर्क्षेष्ववारणैः ।
साचारो भक्तिमास्थाय ध्वजयष्टिं समुच्छ्रयेत् ।
न तस्य सङ्करे शुक्र ! बाधयो न च वैरिणः ।
नैव ग्रहव्रणपीड़ा भवेच्छां स समुच्छ्रयेत् ॥"

इति देवीपुराणम् ॥

ध्वजद्रुमः, पुं, (ध्वज इव उन्नतो द्रुमः । दीर्घत्वात् तथात्वम् ।) तालवृक्षः । माडवृक्षः । इति राजनिर्घण्टः ॥

ध्वजप्रहरः, पुं, (ध्वजं प्रहरति नाशयति भनक्तीति । प्र + हृ + खुः । ध्वजस्य प्रहरो वा ।) वायुः । इति शब्दरत्नावली ॥

ध्वजभङ्गः, पुं, (ध्वजस्य मेढ्रस्य भङ्गः ।) क्लीवत्वजनकरोगविशेषः । तस्य निदानं यथा,—

"अत्यम्ललवणक्षारविरुद्धाशनभोजनात् ।
तथानुपानाद्विषमात् पिराक्षशुरभोजनात् ॥
दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् ।
कल्याणीगमनाच्चापि वियोनिगमनादपि ॥
दीर्घरोगी चिरोत्कृष्टां तथैव च रजस्वलाम् ।
दुर्गन्धां दुष्टयोनिञ्च तथैव च परिप्लुताम् ॥
ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः ।
चतुःपदाभिगमनाच्छेफसश्चाभिघातनात् ।
अधोवायोश्च मेढ्रस्य शुक्लदग्धलवक्षयात् ॥
कालप्रकारनिर्व्वेषमूकाभाव निषेवणात् ।
रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥"

इति चरकः ॥ * ॥

तस्य चिह्नं यथा,—

"शुक्रे चिरात् प्रविशति शुक्रं श्लेष्मितमेव वा ।
तोदोऽल्पशः वृषणयोर्मेढ्रं धूपायतीव च ॥"

इति वाभटः ॥ * ॥

अपिच ।

"तेषैभावैरहृद्यैश्च रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यशक्तो नृणां क्लैब्यं सदा प्रजायते ॥
अश्वैरश्वोक्षलवणैरसिमाषोपसेवितैः ।
सौम्यधातुक्षयाद्दृष्टः क्लैब्यं तदपरं रसतम ॥
अतिव्यवायग्लपितो यो न कं याजिप्रियारसः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥

असाध्यं सहजं क्लेयं मर्म्मच्छेदोद्भवञ्च यत्।
असाध्यानां विशिष्टानां कार्य्यो वाजिकरो विधिः॥

तस्य चिकित्सा यथा, वैद्यके।

"सुवर्णासुवत्सासुभाधिदुधन्या-
ष्टतं योगयोगे प्रशस्तं सप्रस्थम्।
न्दौ वा दरात्मौ पचेत् पाकसूर-
स्तदा तेजपत्रं हरिद्रासुपिष्टम्॥
विधौ शुद्धिहेतौ ससुस्तं सुपिष्टं
विधेयं सुगन्धाय वृद्धोपदेशात्।
सम्लाम्बगन्धामप्रस्थं विचूर्ण्य
शुभं वारि दत्वा शुभं वेदयुक्तम्॥
यदा श्लेष्मभूतं तदा योगयोगे
पचेत् पाकविज्ञो भृशं दर्व्विचालात्।
पचेन्नाविदुग्धं घृतस्यापि तुल्यं
विदारीं सप्रस्थां तथा तैन वैद्यः॥
तथा शालमलीसोयदस्तं सप्रस्थं
वितार्य्यावतिंस्तेदृष्टं योगराजः॥"

ध्वजवान्, [त्] त्रि, (ध्वजोऽस्यास्तीति। ध्वज+मतुप्। मस्य वः।) केतनयुक्तः। ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय नौर्याच्चतुश्चरेत्। यथा,—

"शिरःकपाली ध्वजवान् भिक्षार्थी कर्म वेदयन्।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्॥
ध्वजवान् सन्ना शवशिरोध्वजमिति मनुस्मरणात् अन्यच्छिरःकपालन्दण्डाग्रसमारोपितध्वजशब्दवाच्यं ग्रहीयात्॥" इति मिताक्षरा॥ (ध्वजः शौल्किकविपणिपताका विद्यतेऽस्येति। शौल्किकः। यथा, मनुः। ४। ८४।

"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः।
स्तनाचक्रध्वजवतां वेणेनैव च जीवताम्॥")

ध्वजिनी, स्त्री, (ध्वजोऽस्यस्याः। ध्वज+इनिः। ङीप्।) सेना। इत्यमरः। २। ८। ७८॥ (यथा, रघुः। ७। ४०।

"मत्स्यध्वजा वायुवशादिदीर्घै-
र्मुखैः प्रवृद्धध्वजिनीरजांसि।
बभुः पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नदीमुखानि॥")

ध्वजी, [न्] पुं, (ध्वजोऽस्यस्येति। ध्वज+"अत इनिठनौ।" ५।२।११५। इति इनिः।) ब्राह्मणः। पर्व्वतः। रथः। सर्पः। घोटकः। इति मेदिनी। ने, ७७॥ मयूरः। इति राजनिर्घण्टः॥ शौल्किकः। इति हेमचन्द्रः॥ (यथा, याज्ञवल्क्ये। १।१४९।

"प्रतिग्रहे सूनिचक्रिध्वजिवेश्याजराधिपाः॥"

ध्वजविशिष्टे, त्रि। यथा, महाभारते। १। २२६। २८।

"कृताक्षौ शस्त्रसम्पन्नौ रथिनौ ध्वजिनावपि॥"

चिह्नयुक्ते च। यथा, मनुः। ११। ६३।

"सुरामांसापशुस्त्रीषु बालवासा जटी ध्वजी॥")

ध्वजोत्थानं, क्ली, (ध्वजस्य इन्द्रध्वजस्य उत्थानम्।) इन्द्रोत्सवः। इति त्रिकाण्डशेषः॥ एतत् भाद्रशुक्लाद्यां भवति। इति स्मृतिः॥

ध्वण, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। ध्वणति नदङ्गः। इति दुर्गादासः॥

ध्वन, तृ क शब्दे। इति कविकल्पद्रुमः॥ (अदन्तुरां परं-अकं-सेट्।) दन्त्योपधः। भावकर्मादीनां प्रयोगादन्यत्र शब्दे ध्वनादित्यादि यत्र श्रूयते प्रायेण तत्रायं शब्दे इति बोध्यम्। ध्वनयति नदङ्गः। इति दुर्गादासः॥

ध्वन, मि रवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। मि, ध्वनयति ध्वानयति नदङ्गः। इति दुर्गादासः॥

ध्वनः, पुं, (ध्वन ध्वाने+भावे बाहुलकात् अप्।) शब्दः। इति भरतहिरूपकोषः॥

ध्वनमोदी, [न्] पुं, (ध्वनेन शब्देन मोदयतीति। मुद+णिनिः।) भ्रमरः। इति शब्दरत्नावली॥

ध्वनिः, पुं, (ध्वननमिति। ध्वन+"खनिकष्यञ्जसीति।" उणां ४। १३६। इति इः।) शब्दः। इत्यमरः। १। ७। २२॥ नदङ्गादिशब्दः। यथा,—

"शब्दो ध्वनिश्च वर्णश्च नदङ्गादिभवध्वनिः।
कण्ठसंयोगजस्थानो वर्णास्ते कादयो मताः॥"

इति भाषापरिच्छेदः॥

(ध्वन्यतेऽस्मिन्निति। ध्वन+अधिकरणे इः।) उत्तमकाव्यम्। यथा,—

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः
कथितः॥"

इति काव्यप्रकाशः॥

(यथाच साहित्यदर्पणे। ४। २—३।

"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिरुत्तम काव्यमुत्तमम्।
वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्॥
भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥
तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः।
लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम्। विवक्षितान्यपरवाच्यस्त्वभिधामूलः।
अतएवात्र वाच्यं विवक्षितम्। अन्यपरं व्यङ्ग्यनिष्ठम्। अत्र हि वाच्योऽर्थः स्वरूपं प्रकाश्यैवव व्यङ्ग्यार्थस्य प्रकाशकः। यथा प्रदीपो घटस्य।
अभिधामूलस्य बहुविधत्वेन पञ्चाभिर्भेदैः॥"
अस्य बहवो भेदाः सन्ति। ते तु तत्रैव चतुर्थपरिच्छेदे विस्तरशो द्रष्टव्याः॥)

ध्वनिग्रहः, पुं, (ग्रह+भावे अप्। ध्वनेः शब्दस्य ग्रहो ग्रहणं यस्मात्।) श्रोत्रम्। इति त्रिकाण्डशेषः॥ शब्दज्ञानञ्च॥

ध्वनितः, त्रि, (ध्वन्यते स्मेति। ध्वन+क्तः।) शब्दितः। क्षतक्षवनन्नदङ्गादिः। इति भरतः॥ तत्पर्य्यायः। क्वणितः २। इत्यमरः। १। १। ६८॥ (यथा राजतरङ्गिण्याम्। २। ८६।

"समीरणसमाकीर्णसुस्वरध्वानगर्भितैः।
ध्वनितैरनुयोक्तव्यमिवावस्थां तथाविधाम्॥")

ध्वनिकाव्ययुक्तवाक्यादिश्च॥

ध्वनिनाला, स्त्री, (ध्वन्युत्पादकं नालं यस्याः।) वीणा। वेणुः। काहलः। इति मेदिनी। ले, १५५॥

ध्वनिविकारः, पुं, (ध्वनेर्विकारः।) काकुः। शोकभयादिना शब्दविकृतिः। इति हेमचन्द्रः। ६। ४६॥

ध्वन्स, उ ल ड गतौ। भंशे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-गतौ सकं-भंशे अकं-सेट्। उदितात् क्त्वावेट्।) उ, ध्वंसित्वा ध्वस्त्वा। ल, अध्वसत्। ड, ध्वंसते। भंशः अधःपतनम्। इति दुर्गादासः॥

ध्वस्तं, त्रि, (ध्वस्यते स्मेति। ध्वन्स भंशे+क्तः।) च्युतम्। गलितम्। इत्यमरः। ३। १। १०४॥ (यथा, भागवते। ७। २। ३०।

"प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम्॥")

नष्टम्। (यथा, पद्मदशाम्। ७। १४१।

"क्षुधया शीर्य्यमाणोऽपि न विधं क्षत्तुमिच्छति।
निशान्नध्वस्तलड्डानान्नाम्नष्टसञ्चितवत्सति॥")

ध्वा(भा)क्ष, इ काङ्क्षे। घोरशब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं-च सेट्।) घोरशब्दमिह तिरस्कारमेव घोरशब्दः। इ, ध्वा(भा)क्षतीति काकः। नमश्यपाठेनैव सिद्धे अस्येदमुदात्तो वेदे सूचारणभेदार्थः। इति दुर्गादासः॥

ध्वा(भा)क्षः, पुं, (ध्वा(भा)क्षतीति उच्चैः शब्दयतीति। ध्वा(भा)क्षि घोरशब्दे+अच्।) काकः। (यथा, रुक्मकटिके ६ अङ्के।

"शुष्कवृक्षस्थितो ध्वा(भा)क्ष आदित्याभिमुखस्तथा।
मयि चोदयते वामं चक्षुर्घोरमशुभ्रयम्॥")

मत्स्यभक्षकपक्षी। इत्यमरः। ३। ३। २१८॥ तक्षकः। भिक्षुकः। इति मेदिनी। षे, १६॥

ध्वाङ्क्षजङ्घा, स्त्री, (ध्वाङ्क्षस्य जङ्घेव आकृतिर्यस्याः।) काकजङ्घा। इति राजनिर्घण्टः॥

ध्वाङ्क्षजम्बूः, स्त्री, (ध्वाङ्क्षः काकस्तद्वत् कृष्णवर्णा जम्बूः। यद्वा, ध्वाङ्क्षप्रिया जम्बूः।) काकजम्बूः। इति राजनिर्घण्टः॥

ध्वाङ्क्षतुण्डी, स्त्री, (ध्वाङ्क्षस्य तुण्डमिवाकृतिः फलेऽस्यस्याः। ध्वाङ्क्षतुण्ड+अच्। ततो ङीष्।) काकनासालता। इति राजनिर्घण्टः॥

ध्वाङ्क्षदन्ती, स्त्री, (ध्वाङ्क्षस्य दन्त इवाकृतिरस्यस्याः। अच्। ङीष्।) काकतुण्डी। इति राजनिर्घण्टः॥

ध्वाङ्क्षनखी, स्त्री, (ध्वाङ्क्षस्य नखमिवाकृतिरस्यस्याः। अच्। ङीष्।) काकतुण्डी। इति राजनिर्घण्टः॥

ध्वाङ्क्षनाम्नी, स्त्री, (ध्वाङ्क्षस्य नाम नाम यस्याः।) काकोदुम्बरिका। इति राजनिर्घण्टः॥

ध्वाङ्क्षनाशिनी, स्त्री, (ध्वाङ्क्षं नाशयतीति। नश+णिनि। ङीप्।) हपुषा। इति भावप्रकाशः॥

ध्वाङ्क्षनासा, स्त्री, (ध्वाङ्क्षस्य नासा इव फलमस्याः।) काकनासालता। इति राजनिर्घण्टः॥

ध्वाङ्क्षनासिका, स्त्री, (ध्वाङ्क्षस्य नासिका इव फलमस्याः।) काकनासालता। इति राजनिर्घण्टः॥

ध्वाङ्क्षपुष्टः, पुं, (ध्वाङ्क्षेण काकेन पुष्टः प्रतिपालितः।) कोकिलः। इति हारावली। ४३॥

ध्वाङ्क्षमाची, स्त्री, (ध्वाङ्क्षान् काकान् मञ्चते पूजयति फलदानेनेति। मच पूजायाम्+अण्। गौरादित्वात् ङीष्।) काकमाची। इति राजनिर्घण्टः॥

ध्वाङ्क्षवल्ली, स्त्री, (ध्वाङ्क्षवत् वल्ली लता।) काकनासा। इति राजनिर्घण्टः॥

ध्वाङ्क्षादनी, स्त्री, (अद्यते भक्ष्यते या सा। अद+ल्युट्। स्त्रियां ङीप्। ध्वाङ्क्षाणां काकानामदनी।) काकतुण्डी। इति राजनिर्घण्टः॥

ध्वाङ्क्षारातिः, पुं, (ध्वाङ्क्षाणामरातिः शत्रुः।) पेचकः। इति हलायुधः॥

ध्वाङ्क्षी, स्त्री, (ध्वाङ्क्षवदाकृतिरस्यस्याः। अच्। ङीष्।) ककोलिका। इति मेदिनी। षे, १६॥

ध्वाङ्क्षोली, स्त्री, काकोली। इति राजनिर्घण्टः॥

ध्वानः, पुं, (ध्वन+भावे घञ्।) शब्दः। इत्यमरः। १। ७। २२॥ (यथा, राजतरङ्गिण्याम्। ३। १८।

"ग्रसामाक्रन्दितध्वानो न च चौरो दभाषत॥")

ध्वान्तं, क्ली, (ध्वन+"शुष्कखान्तध्वान्तेति।" ७। २। ९८। इति क्तप्रत्ययेन निपातनात् साधुः।) अन्धकारः। इत्यमरः। १। ८। ३॥ (यथा, भागवते। ३। ८। २१।

"कथातपत्रायुतमूर्द्धरत्न-
द्युभिर्हतध्वान्तयुगान्ततोये॥")

ध्वान्तवित्तः, पुं, (ध्वान्ते अन्धकारे वित्तः प्रथितः।) खद्योतः। इति शब्दरत्नावली॥

ध्वान्तशात्रवः, पुं, (ध्वान्तस्य शात्रवः।) प्रदीपाकादयः। इति शब्दचन्द्रिका॥ सूर्य्यचन्द्रमायश्च॥

ध्वान्तारातिः, पुं, (ध्वान्तस्य अरातिः।) सूर्य्यः। इति हेमचन्द्रः। २। १०॥ चन्द्रमाश्च॥

ध्वान्तोन्मेषः, पुं, (ध्वान्ते उन्मेषः प्रकाशो यस्य।) खद्योतः। इति त्रिकाण्डशेषः॥

ध्रुं, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) वकारोपधः। कौटिल्यमिह कुटिलीकरणम्। ध्वरति लक्षं वायुः। इति दुर्गादासः॥

न

न, नकारः। तवर्गपञ्चमवर्णः। अञ्जनविंशद्वर्णश्च। अस्योच्चारणस्थानं दन्तः। इति शाकटायनम॥ (यथा, श्रुतबोधायाम्। १७। "दन्त्या लृतुलसाः स्मृताः॥") तत्पर्य्यायः। नेषः २ दीर्घौ ३ चौरः ४। इति जैनाभिधानम्। तत्स्वरूपम्। यथा,—

"नकारं ब्रह्म चार्व्वङ्गि! कोटिविद्युल्लतालसिम्।
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली॥
पञ्चप्राणात्मकं वर्णं हृदि भावय पार्व्वति!॥"
इति कामधेनुतन्त्रम्॥

"वामतः कुण्डली रेखा ऊर्द्ध्वाधःक्रमतः स्थिता।
चन्द्रसूर्य्याग्निरूपा सा मात्रा वाणी प्रकीर्त्तिता॥"

तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।

"ध्यानमस्य नकारस्य वक्ष्यते शृणु भाविनि!।
दलिताञ्जनवर्णाभं लसल्लिङ्गं त्रिलोचनम्॥
चतुर्भुजं कोटरार्द्धं पारुचन्दनचर्चितम्।
क्षणाम्बरपरीधानामीषद्धास्यसुखीं सदा॥
एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत्॥"

अस्य नामानि यथा,—

"नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः॥
ऊर्द्ध्वगामी हिरण्यञ्च वामपादाङ्गुलेर्मुखम्।
वैनतेयस्तुतिर्व्वल्मेश्वरग्निर्व्वालिरागमः॥
वामनो व्यालिनी दीर्घो निरीहः सुगतिर्व्विभुः।
ग्रन्थात्मा दीर्घघोणश्च हस्तिनापुरमेचकौ॥
गिरिनायकजीलौ च ग्रिवोऽनादिर्म्मेहामतिः॥"
इति नामतन्त्रग्राह्यम्॥

(अण्डजविशेषः। यथा, कविकल्पद्रुमे।

"नः खादिः पो सुचादिः।" इति॥ कायादौ अस्य प्रथमप्रयोगे फलं यथा, हरिहरटीकायाम्।

"दो धः सौख्यं सुदं नः सुखभयमरणक्लेशदुःखं पवर्गः॥")

न, अ, निषेधः। (यथा, मनुः। ६। ४७।

"अतिवादांस्तितिक्षेत नावमन्येत कञ्चन।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥")

उपमा। इति मेदिनी। ने, १॥ आद्यस्य पर्य्यायः। नहि २ अ ३ नो ४ अभावः ५। इत्यमरः। ३। ४। ११॥ अना ६ ना ७। इति भरतः॥ अनर्थश्च॥

नंशुकः, त्रि, (नश्यतीति। नश+"पचिनशोर्ङुकनकुमौ च।" उणा २। ३०। इति शुकन् कुमागमश्च।) नाशकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तेः॥

नंष्टा, [ष्ट्र] त्रि, (नश+लृच्। "मसृजिनशोर्झलि।" ७। १। ६०। इति नुम्।) नाशकः। इति नशधातोरुणादिवृत्तौ नुमागमश्च।) नाशकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तेः॥

नः, पुं, (नमतीति। नम+अन्येष्वपीति डः।) सुगतः। ब्रह्मा। हिरण्यः। स्तुतिः। इति मेदिनी। ने १। रत्नम्। इत्येकाक्षरकोषः॥ द्वितीयाचतुर्थीषष्ठीबहुवचनानामस्मच्छब्दस्य सानुरूपोऽयञ्च॥ (यथा, सुग्धबोधे।

"पुष्णातु वो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वसुभानि वो नः॥")

नःस्रुक्, त्रि, (नसा नासिकया स्रुक्।) स्रुक्-नासिकः। इति हेमचन्द्रः। ३। ११५॥

नकुटं, क्ली, नासिका। इति शब्दमाला॥

नकुलः, पुं, (नास्ति कुलं यस्य। "नञ्याद्यनपादिति।" ६। ३। ७५। इति नञो न लोपादिः।) अन्तुविशेषः। नेउल। इति बेजी इति च भाषा। तत्पर्य्यायः। पिङ्गलः २ सर्पहा ३ बभ्रुः ४। इति हेमचन्द्रः। ४। ३६८॥ श्वपीवदनः ५ सर्पारिः ६ लोहितानः ७। (यथा, महाभारते। १२। १५। २०।

"सत्त्वैः सत्त्वा हि जीवन्ति दुर्बलैर्बलवत्तराः।
नकुलो मूषिकानत्ति बिडालो नकुलन्तथा।
बिडालमत्ति श्वा राजन्! श्वानं व्याघ्रस्तथा॥")

तस्य मांसगुणाः। पिच्छिलत्वम्। वातनाशित्वम्। श्लेष्मपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ पाण्डुराजस्य चतुर्थपुत्रः स माद्रीगर्भे अश्विनीकुमाराभ्यां जातः। इति महाभारतम्॥ पुत्रः। इति शब्दमाला॥ शिवः। यथा, विदग्धमुखमण्डने।

"युधिष्ठिरस्य या कन्या नकुलेन विवाहिता।
पूजिता सहदेवेन सा कन्या वरदा भवेत्॥"

कुलरहिते, त्रि॥

नकुलाढ्या, स्त्री, (नकुलेन नकुलगन्धेन आढ्या प्रचुरा।) गन्धनाकुली। इति राजनिर्घण्टः॥

नकुली, स्त्री, (नकुल+ङीष्।) कुक्कुटी। मांसी। इति मेदिनी। ले, १००॥ ग्रन्थिनी। इति शब्दरत्नावली॥ कुङ्कुमम्। इति हेमचन्द्रः॥ हकारः। इति बीजाभिधानम्॥ नकुलस्य भार्य्या च॥

नकुलीशः, पुं, (नकुल्या ईशः।) भैरवविशेषः। यथा, पीठमालायाम्।

"नकुलीशः कालिपीठे दक्षपादाङ्गुली मम॥"

हकारः। यथा,—

"हकारो नकुलीशोऽपि हंसः प्राणोऽकुशः प्रिये!।
महेशो नकुली चैव वराहो गगनं रविः॥
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि!॥"
इति हकारपर्य्याये बीजाभिधानम्॥

नकुलेष्टा, स्त्री, (नकुलानामिष्टा प्रिया।) राखा। इत्यमरः। २। ४। १९५॥ भेदगाछ इति भाषा। एतत्पर्य्यायो यथा,—

"नाकुली सुरसा नागसुगन्धा गन्धनाकुली।
नकुलेष्टा भुजङ्गाक्षी सर्पघ्नी विषनाशिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नक्, क नाशने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट।) कोपधः। नाशनं नष्टीकरणम्। क, नक्यति पापं गङ्गा। इति दुर्गादासः॥

नक्तं, [न्] अ, रजनौ। इत्यमरः। ३। ४। ६॥ (यथा, माघे। १। २१।

"रथाङ्गपाणेः पटलेन रोचिषा-
मधिक्षिपः संवलिता विरेजिरे।
चलत्पलाशान्तरगोचरास्तरो-
स्त्वषारमर्त्तेरिव नक्तमंशवः॥")

नक्तं, क्ली, (नञ+क्तः।) रात्रिः। लक्षणया नक्तव्रतम्। यथा,—

"उपवासात् परं भैक्षं भैक्षात् परमयाचितम्।

अयाचितात् परं नक्तं तस्मान्नक्तेन वर्त्तयेत् ॥
दैवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥
सर्व्ववेलामतिक्रम्य नक्तं भुक्तममोजनम् ।
वामाचारो महादेवो नक्तेनैवोद्धरेन्नृणाम् ॥"
इति देवीपुराणम् ॥

व्रतविशेषः । यथा,—
"दशम्याञ्चैकभक्तन्तु शुद्धचित्तो दृढव्रतः ।
नक्तं वापि तथा कृत्वा दशम्यां नियतः सदा ॥
क्रियते चासमर्थेन नक्तमेकादशीदिने ।
नक्ते चापि विधिः प्रोक्तः फलाहारे तथैव च ॥
दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
नक्तं तच्च विजानीयान्न नक्तं निशि भोजनम् ॥
नक्षत्रदर्शनान्नक्तं गृहस्थेन विधीयते ।
यतेर्दिनाष्टमे भागे रात्रौ तस्य निषेधनम् ॥"
इति मात्स्ये एकादशीमाहात्म्यम् ॥ * ॥

अथ नक्तव्रतम् ।

"तथा च स्कन्दपुराणे ।
'प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।
उदयात्तु सदा पूज्या हरेर्नक्तव्रते तिथिः ॥
नियमश्च सामान्यव्रतधर्म्मत्वेनोक्तः ।
'ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्জ্জनम् ॥'
इत्यादिर्ग्राह्यः ॥
नक्तलक्षणञ्च भविष्यदेवीपुराणयोः ।
'हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्या नक्तभोजी सदाचरेत् ॥'
एवं नक्तव्रतस्य गुरुत्वेन प्रागुक्तवायुपुराणवचने नक्तमिति हविष्यान्नादिभोजनस्य कालपरं न तु नक्तव्रतपरं तथात्वे उत्तरोत्तरगुरुव्रतोपदेशप्रस्तावे तदनन्तरं केवलं हविष्यान्नोपदेशानुपपत्तेः । स्मृतिः ।
'नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात्तत् सदिवाकरम् ॥
सदिवाकरन्तु तत् प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तन्तु विज्ञेयं यामार्द्धे प्रथमे सदा ॥'
मार्कण्डेयः ।
'एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन नैवाहादग्निको भवेत् ॥'
अत्र विष्णुपूजापारण्ययोरङ्गान्तरापेक्षया प्राधान्यमवगम्यते । आनुकल्पिकेऽपि आवश्यकत्वात् ।" इत्येकादशीतत्त्वम् ॥ * ॥ सौरनक्तकालो यथा,—
"कुशमूलं यवमाचं खच्छायादिगुणं शुचौ ।
भक्ष्यं मितौदनं नक्तं शुद्धोपवसनं तथा ॥"
इति विधानसप्तमीप्रकरणे तिथ्यादितत्त्वम् ॥
(महादेवः । यथा, महाभारते ।१३।१७।६३।
"नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥"
पुं, एथोः पुत्रः । यथा, ब्रह्माण्डे । ३६ ।
"एथोश्चापि सुतो नक्तो नक्तस्यापि गयः स्मृतः ॥")

नक्तकः, पुं, (नक्तमिव कायति मलिनतयेति । के + कः । यद्वा, नञ + क्त । ततः स्वार्थे कन् ।) कर्पटः । इत्यमरटीकायां भरतः ॥ न्याकड़ा इति भाषा ॥

नक्तचारी, [न्] पुं, (नक्ते रात्रौ चरतीति । चर + णिनिः ।) विड़ालः । पेचकः । इति त्रिकाण्डशेषः ॥ राक्षसः ॥ रात्रिचरमात्रे, त्रि ॥

नक्तञ्चरः, पुं, (नक्तं चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः ।) राक्षसः । इति हलायुधः ॥ गुग्गुलुः । इति जटाधरः ॥ चौरः । पेचकः । (रात्रिचरमात्रे, त्रि । यथा, मार्कण्डेयपुराणे । २६ । २० ।
"नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाङ्क्षतो हरेत् ॥")

नक्तमालः, पुं, (नक्तं रात्रौ आ सम्यक्प्रकारेण अलति पर्य्याप्नोतीति । आ + अल + अच् ।) करञ्जवृक्षः । इत्यमरः । २ । ४ । ४७ ॥ (यथा, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि शीकराद्रै-
र्मरुद्विरानर्त्तितनक्तमाले ॥")

नक्तसुखा, स्त्री, (नक्तं नक्तव्रताङ्गं सुखं यस्याः भागो यस्याः ।) रात्रिः । इति हलायुधः ॥

नक्तव्रतं, क्ली, (नक्ते रात्रौ भोजनरूपं यद्व्रतम् ।) दिवाभोजनाभाववशिष्टरात्रिभोजनम् । यथा,
"हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्या नक्तभोजी सदाचरेत् ॥"
इति भविष्यपुराणम् ॥

नक्ता, स्त्री, (अनिष्टकारित्वात् नक्तवत् मलिनत्वमस्यस्येति । अच् । टाप् ।) कलिकारी । इति राजनिर्घण्टः ॥ इंगलाङ्गला इति भाषा ॥ (कलिकारीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

नक्रं, क्ली, (नक्रवत् आकृतिरस्यस्येति । अच् ।) अग्निदारु । भाजकाठ इति भाषा । नासिका । इति मेदिनी । रे, ५२ ॥

नक्रः, पुं, (न क्रामति दूरस्थजनमिति । क्रम + अन्येष्वपीति डः । नञ्वाड्डाति ञलोपो न ।) कुम्भीरः । इत्यमरः । १ । १० । २१ ॥ (यथा, पञ्चतन्त्रे । १ । ४३ ।
"नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥"
मकरः । यथा, कादम्बर्याम् । "तथा चैनाचरेयं नयेत नक्रकेतनः यथैनैकेनाकीर्त्तनीयां दशां जनं चैनम् ॥" व्याहः । यथा, रघुः । १६।५५।
"स तीरभूमौ विहितोपकार्या-
मानाभिमिक्तामपहृतनक्राम् ॥")

नक्रराजः, पुं, (नक्राणां कुम्भीरादीनां राजा श्रेष्ठत्वात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) जलजन्तुविशेषः । हाङ्गर इति भाषा । तत्पर्य्यायः । ग्राहः २ जलकिराटः ३ जलाटकः ४ । इति हारावली । ७७ ॥

नक्रा, स्त्री, (नक्रवदाकृतिरस्यस्या इति अच् । टाप् ।) नासिका । इति शब्दरत्नावली ॥

नक्षत्रं, क्ली, (नक्षति श्रीभां गच्छति स्थानात् स्थानान्तरं गच्छति वा । नक्ष गतौ + "अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणा । ३ ।१०५। इति अत्रन् ।) तारा । इति राजनिर्घण्टः । तारा । तत्पर्य्यायः । ऋक्षभ्२ भम्३ तारा४ तारका५ उडु६ । इत्यमरः । १ । ३ । २१ । तारकम् ७ । इति शाश्वतः ॥ तारः ८ । इति वाडिः ॥ दाक्षायण्यः । तासु अश्विनी १ भरणी २ कृत्तिका ३ रोहिणी ४ मृगशिरः ५ आर्द्रा ६ पुनर्व्वसुः७ पुष्यः८ अश्लेषाः९ मघा १० पूर्ब्बफल्गुनी११ उत्तरफल्गुनी१२ हस्ता१३ चित्रा १४ स्वातिः१५ विशाखा१६ अनुराधा१७ ज्येष्ठा१८ मूला १९ पूर्ब्बाषाढ़ा २० उत्तराषाढ़ा २१ श्रवणा २२ धनिष्ठा २३ शतभिषा २४पूर्ब्बभाद्रपदा २५ उत्तरभाद्रपदा २६ रेवती २७ इत्यमरः ज्योतिषञ्च ॥ एता अभिजिता सह अष्टाविंशतिनक्षत्राणि भवन्ति ॥ * ॥ आसां क्रमेणाधिदेवता यथा । अश्वि-१ यम-२ दहन-३ कमलज-४ अग्नि-५ भूखण्डभृत्-६ अदिति-७ जीव-८ फणि-९ पितरः-१० । योन्य-११ र्य्यम-१२ दिनकृत्-१३ त्वष्टृ-१४ पवन-१५ इन्द्राग्नि-१६ मित्राच्य१७ । इन्द्रो १८ निर्ऋति १९ स्तोयम् २० विश्वविरिञ्चौ २१ हरि-२२ वसु-२३ वरुणः-२४। अजपदो २५ ऽहिब्रध्नः २६ पूषा २७ चेतीश्वरा भानाम् ॥ * ॥ आसां गणा यथा ।
"उग्राः पूर्ब्बमघाजन्तकाः ११ । २० । २५ । १० । २ । ध्रुवगणस्त्रीण्युत्तराणि खभू-१२ । २१।२६ । ४ । व्रातादित्यहरित्वयं चरगणः १५ ।७। १२ । २३ । २४। पुष्याग्निहस्ता ८ । १ । १३ । लघुः । चित्रामित्रदृगान्त्यभम् १४ । १७ । ५ । २९ । मृदुगणस्त्रीस्त्रीण्यहिर्बुध्न्ययुक् ६ । ६ । १८ ।१६। मिश्रोऽग्निः सविशाखाभः । ३ । १६ । शुभसंज्ञाः सर्व्वे खलग्ने गणाः ॥" * ॥
अधोमुखनक्षत्राणि यथा ।
"अश्लेष-९ वह्नि-३ यम-२ मित्र-१७ विशाख-१६ युक्तम्
पूर्ब्बात्रयम् ११ । २० । २५ शतभिषा २४ च नवाप्युडूनि ।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्याव्यधूमिखननेषु च भूषितानि ॥"* ॥
खनत्रनक्षत्रावधिनक्षत्राणां जन्मसम्पदादिकथनं यथा,—
"जन्म सम्पत्प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मभाच्च पुनः पुनः ॥
सर्व्वमङ्गलकार्य्याणि चित्र जन्मसु कारयेत् ।
विवादश्राद्धभैषज्ययात्राचौराणि वर्জ্জयेत् ॥
यात्रायां पथि वस्त्रान्नं क्षणि विधौ सर्व्वार्थनाशो भवेत्
भैषज्ये मरणं तथा शुनियतं दाहो गृहारम्भणे ।
चौरे रोगसमागमो बहुविधः श्राद्धेऽर्थनाशः स्मृता
वादे बुद्धिविनाशनन्त्वरिभयं प्राप्नोत्यसौ जन्मभे ॥
नक्षत्रोत्पन्नरोगेषु भोगादि यथा,—

"जन्माधाने निधनभे प्रत्यरौ च विपत्करे।
यदि व्याधिः समुत्पन्नः क्लेशाय मरणाय वा॥
कृत्तिकासु यदा व्याधिर्नृणाञ्च प्रतिपद्यते।
नवरात्रं भवेत् पीड़ा चिरात्रं रोहिणीषु च॥
मृगशीर्षे पञ्चरात्रमार्द्रायां सप्तरात्रिभिः॥
पुनर्वसौ तथा पुष्ये सप्तरात्रं विधीयते।
नवरात्रं तथाश्लेषे मासमेकं मघासु च।
द्वौ मासौ पूर्व्वफल्गुन्यामुत्तरासु त्रिपञ्चकम्।
हस्तेषु सप्तमे मोक्षश्चित्रायामर्द्धमासकम्॥
मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिम्।
मैत्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्॥
मूले न जायते मोक्षः पूर्व्वाषाढ़े त्रिपञ्चकम्।
उत्तरा दिनविंशत्या अवशे द्वौ च मासकौ॥
धनिष्ठायामर्द्धमासं वारुण्याञ्च दशाहकम्।
न च भाद्रपदे मोक्ष उत्तरासु त्रिपञ्चकम्॥
रेवत्यां दिनविंशत्या चाहोरात्रं तथाश्विनी।
प्राणैर्विमुच्यते नित्यं मरणं नात्र संशयः॥
कौशिकेन सदादिष्टा नक्षत्रव्याधिसम्भवः।
नक्षत्रे प्रतिकर्त्तव्यं नक्षत्रपथजानता॥"

नक्षत्रचतुर्भागबोधकानि चत्वारि नामाद्यक्षराणि यथा। अ इ उ ए ३। ओ व वि वु ४। वे वो क कि ५। कु घ ङ छ ६। के को ह हि ७। हु हे हो ड ८। डि डु डे डो ९। म मि मु मे १०। मो ट टि टु ११। टे टो प पि १२। पु ष ण ठ १३। पे पो र रि १४। रु रे रो त १५। ति तु ते तो १६। न नि नु ने १७। नो य यि यु १८। ये यो भ भि १९। भु ध फ ढ २०। भे भो ज जि २१। जु जे जो ख २०। अभिजित्। खि खु खे खो २२। ग गि गु गे २३। गो ग्र शि शु २४। शे शो द दि २५। दु थ झ ञ २६। दे दो च चि २७। चु चे चो ल १। लि लु ले लो २। अ ल युक्ताकारयुक्तेन ज्ञेयः। ह्रस्वेन दीर्घो ज्ञेयः। तालव्यप्रकारेण दन्त्यसकारो ज्ञेयः।" इति ज्योतिस्तत्त्वम्॥

नक्षत्रकान्तिविस्तारः, पुं, (नक्षत्राणां कान्तिस्तस्या विस्तारो यत्र।) धवलयावनालः। इति राजनिर्घण्टः॥

नक्षत्रचक्रं, क्ली, (नक्षत्राणां चक्रं यत्र।) मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रविशेषः। तथा च दुष्टस्फोटक्रमे।

"उत्तराद्दक्षिणाग्रान्तु रेखां कुर्य्याच्चतुष्टयीम्।
दश रेखाः पश्चिमाग्राः कर्त्तव्या वीरवन्दिते!॥
अकारादिक्षकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्दुनेत्रचन्द्रांश्च अर्द्धयाम्यं खगौ प्रिये!॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्दुनेत्राग्निचन्द्रकान्।
मघादिश्लेषपर्य्यन्तं द्वितीयं नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युगेन्दुनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यग्रगताः क्रमात्॥"
निगमे।

"पूर्व्वोत्तराश्चयश्चैव भरण्यार्द्रा च रोहिणी।
इमान्येव मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठा शतभिषाश्लेषाधनिष्ठाश्चैषसंज्ञिकाः।
चित्रास्वातिविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः।
अनुराधा मृगशिरः श्रवणा देवतारकाः॥"
तथा।
"सजातौ परमा प्रीतिर्मैध्यमा भिन्नजातिषु।
रक्षोभानुमयोर्नाशो वैरं दानवदेवयोः॥"
गणापवादमाह गर्गाचतन्त्रे।
"प्रथवस्त्राचरी माया योमयापी षड़क्षरः।
प्रासादो बहुरूपी च सप्त साधारणाः स्मृताः॥"
शारदायाम्।
"जन्म सम्पत् विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः॥"
जन्मत्रिपञ्चसप्तानि वर्ज्जनीयानि नक्षत्राणि।
तथा च राघवभट्टः।
"रसाष्टनवभद्राणि युगयुग्मगतान्यपि।
इत्तराणि न भद्राणि नक्षत्राणि॥" स्वनक्षत्रादेवनक्षत्रं गणनीयम्। तदज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्राद्गणनीयम। तथा च।
"प्रादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः॥"
इति तन्त्रसारः॥

नक्षत्रनेमिः, पुं, (नक्षत्रस्य नक्षत्रचक्रस्य नेमिरिव।) विष्णुः। (यथा, महाभारते। १३। १४६। ६०।
"नक्षत्रनेमिर्नक्षत्री क्षमः क्षाम समीहनः॥"
"नक्षत्रैस्तारकैः सार्द्धं चन्द्रसूर्य्यादयो ग्रहाः।
वायुनाकाशमयैर्बद्धैर्निबद्धा ध्रुवसंश्रिते॥
स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे ध्रुवस्तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तकः स्थितो विष्णुरिति नक्षत्रनेमिः शिशुमारवर्णने विष्णुहृदयमिति श्रुतेः॥" इति श्रीधरभाष्यम्॥) चन्द्रः। ध्रुवः। रेवत्यां स्त्री। इति मेदिनी। मे, ६३॥

नक्षत्रपः, पुं, उडुपः। चन्द्रः। नक्षत्रं पातीति युतुपत्ता। (नक्षत्र+पा+कः॥)

नक्षत्रपुरुषः, पुं, (नक्षत्रैः पुरुष इव।) व्रतविशेषः। यथा,—
"शृणुष्व कथयिष्यामि नक्षत्रपुरुषव्रतम्।
नक्षत्राङ्गानि देवस्य यानि यानीह नारद!॥
मूलञ्चैव चरणौ विष्णोर्जङ्घे रोहिणी स्थिता।
द्वे जानुनी तथाश्विन्यौ संश्रिते रूपधारिणः॥
आषाढ़े द्वे तथा चोरू गुह्यञ्च फल्गुनीद्वयम्।
कटिस्था कृत्तिकाश्चैव वासुदेवस्य संस्थिता॥
श्रोणिपक्षद्वयं पार्श्वे कुक्षिस्था रेवती स्थिता।
उरःसंस्था त्वनुराधा श्रविष्ठा पृष्ठसंस्थिता॥
विशाखा भुजयोर्हस्तः करद्वयसुदाहृतम्।
पुनर्व्वसुरथाङ्गुल्यो नखाः सर्व्वे मयोच्यते॥
ग्रीवास्थिता तथा ज्येष्ठा श्रवणः कर्णयोः स्थितः।
मुखसंस्थस्तथा पुष्यः स्वातिर्दन्ताः प्रकीर्त्तिताः॥
हनू द्वे वारुणश्चोष्ठौ नासा पैत्र्यसुदाहृतम्।
प्राजापत्यञ्च नेत्राभ्यां रूपधाम्नः प्रतिष्ठितम्॥
शिरो रौद्रस्तथा चैव नक्षत्राङ्गमिदं हरेः।
विधानं संप्रवक्ष्यामि यथायोगेन नारद!॥
संपूजितो हरिः कामान् विदधाति यथेप्सितान्।
चैत्रे मासि सिताष्टम्यां यदा मूलगतः शुभे॥
भगवन्तं सह लक्ष्म्या पूजयेच्च विधानतः।
नक्षत्रसन्निधौ दद्याद्विप्रेभ्यश्च भोजनम्॥
जानुनी चाश्विनीयोगे पूजयेदथ भक्तितः।
दोहदे च हविष्यान्नं पूर्व्ववद्द्विजभोजनम्॥
आषाढ़ाभ्यां तथा द्वाभ्यां द्वावूरू पूजयेद्बुधः।
सलिलं शिशिरं तत्र दोहदे च प्रकीर्त्तितम्॥
फल्गुनीदितये गुह्यं पूजनीयं विचक्षणः।
दोहदे च पयो गव्यं देयञ्च द्विजभोजनम्॥
कृत्तिकासु कटिः पूज्या सोपहारैर्व्विभेन्द्रियैः।
देयञ्च दोहदे विष्णोः सुगन्धिकुसुमोदकम्॥
पार्श्वे भाद्रपदायुग्मे पूजयित्वा विधानतः।
गुड़ं सघृतकं दद्याद्दोहदे देवप्रीतिदम्॥
द्वे कुक्षी रेवतीयोगे दोहदे मुद्गमोदकम्।
अनुराधासु जठरं कुलत्थांस्तत्र दोहदे॥
श्रविष्ठायां तथा पृष्ठं घृतभक्तञ्च दोहदे।
पुष्ये सुखं पूजयेत दोहदे घृतपायसम्॥
श्लेषायोगे च दशनान् दोहदे तिलभक्तुनी।
भुजयुग्मं विशाखासु दोहदे परमोदनम्॥
हस्ते हस्तौ तथा पूज्यौ यावकं दोहदे स्मृतम्॥
पुनर्व्वसावङ्गुलीश्च पटोलं तत्र दोहदे॥
दातव्यं केशवप्रीत्यै ब्राह्मणस्य च भोजनम्।
हनू घृतभिधायां वै पूजयेत्तु प्रयत्नतः॥
प्रियङ्गुरक्तशाल्यन्नं दोहदञ्च मघाद्विधः।
मघासु नासिका पूज्या मधु दद्याच्च भोजनम्॥
मृगोत्तमाङ्गे नयने मृगमांसञ्च दोहदे।
चित्रायोगे ललाटञ्च दोहदे चारु भोजनम्॥
भरणीषु शिरः पूज्यं चारु भक्तञ्च दोहदे।
सम्पूजनीया विद्वद्भिरार्द्रायोगे शिरोरुहाः॥
विप्रांश्च भोजयेद्भक्त्या दोहदे च गुड़ान्नकम्।
नक्षत्रयोगेष्वेतेषु संपूज्य जगतः पतिम्॥
ततस्तु रुचिरां दद्यात् स्त्रीपुंसोश्चारु वाससम्।
क्षीरोपानद्युगञ्चैव सप्त धान्यानि काञ्चनम्॥
घृतपात्रञ्च गां दोग्धीं ब्राह्मणाय निवेदयेत्।
प्रतिनक्षत्रयोगेन पूजनीया द्विजातयः॥
नक्षत्रज्ञाय विप्राय पृथग्दद्याच्च दक्षिणाम्।
नक्षत्रपुरुषाख्यं हि व्रतानां व्रतसुत्तमम्॥
एवं विधानतो ब्रह्मन्! नक्षत्राङ्गो जनार्द्दनः।
पूजितो रूपधारी वैस्तैः प्राप्ता च सुकामिता॥
एतत्तवोक्तं परमं पवित्रं
धन्यं यशस्यं शुभरूपदायि।
नक्षत्रपुंसः परमं विधानं
श्रृणुष्व प्रवक्ष्यामिह तीर्थयात्राम्॥"
इति वामनपुराणे ७७ अध्यायः॥

नक्षत्रमाला, स्त्री, (नक्षत्रसंख्यका माला।) सप्तविंशतिमौक्तिकस्रक्तद्धारः। इत्यमरः। २।६।१०६।
"सप्तविंशतिरूपाढ्ये रूपके रूपरूपकौ।
वृत्ते नक्षत्रमाला स्यान्मुक्तावालिरवोज्ज्वला॥
इति सञ्जीवनीकोषः॥
(नक्षत्राणां माला सङ्ख्या।) नक्षत्रश्रेणी

(यथा, बृहत्संहितायाम्। १०५। १३।
"यावन्नक्षत्रमाला विचरति गगने भूधयन्तीह भासा
तावन्नक्षत्रभूतो विचरति सह तैर्ब्रह्मणो ब्रह्मो-
द्यमेषम्॥")
नक्षत्रेशः, पुं, (नक्षत्राणामीशः।) चन्द्रः। (यथा, साहित्यदर्पणे। २। २०।
"नक्षत्रेशप्रतेजाश्च गिरिगुरोर्गाढ़ां रुचिं धारयन्
ग्रामाक्रम्य विभूतिभूषिततनू राजत्युमा-वल्लभः॥")
कर्पूरः। इत्यमरः। २। ६। ११०॥
नख, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) प्रनखति। इति दुर्गादासः॥
नखं, क्ली, पुं, (नखति इव शरीरे। नह बन्धे+"नहेर्हलोपश्च।" उणा ५। २३। इति खः हलोपश्च।) अङ्गुलीकण्टकः। नह इति हिन्दी भाषा। तत्तु उपधातुविशेषः गर्भस्थ-बालकस्य षष्ठमासे भवति। इति सुखबोधः॥ तत्पर्य्यायः। पुनर्भवः २ करजः ३ नखरः ४ इत्यमरः। २। ६। ८३॥ कामाङ्कुशः ५ करजः ६ पाखिजः ७ अङ्गुलीसम्भूतः ८ पुनर्नवः ९। इति राजनिर्घण्टः॥ करायजः १० करकण्टकः ११ शराङ्कुशः १२ रतिरुहः १३ करेन्द्रः १४ कराङ्कुशः १५। इति शब्दरत्नावली॥ * ॥ रतिक्रीड़ायां नखाघातस्थानानि यथा,—
"नखाघातः प्रदातव्यो यथास्थानानि कर्म्मसु।
पार्श्वयोः स्तनयोश्चैव ऊरौ चैव नितम्बके॥
कक्षस्थले च कर्णान्ते कपोले बाहुमूलके।
ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत्॥
तथा सर्व्वशरीरेषु नखं दद्यात् शनैः शनैः॥"
इति कामशास्त्रम्॥
"न नखैर्विलिखेद्भूमिं गात्रं सदशयेन्नहि।
न स्नाने नखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत्॥"
इति कूर्म्मे उपविभागे १५ अध्यायः॥
नखं, क्ली, स्त्री, (नखमिव आकृतिरस्यास्येति। अच्।) नखीनामगन्धद्रव्यम्। नखी इति ख्यातः। तत्पर्य्यायः। शुक्तिः २ शुक्लः ३ खुरः ४ कोलदलम् ५। इत्यमरः। २। ४। १३०॥ करजाख्यः ६ अश्वखुरः ७ नखः ८ याघ्रनखः ९ नखी १०।
"द्विधा शुक्लनखाख्योऽन्यः शुक्लाख्यो वदरीच्छदः।"
इति रत्नमालायाम्। १४४॥
करुहः ११ सिम्बी १२ शुक्लः १३ चलः १४ कोशी १५ करजः १६ हनुः १७ नागदन्तः १८ पाखिजः १९ वदरीपत्रः २० रूप्यः २१ नख-विलासिनी २२ सन्धिनालः २३ पाणिरुहः २४। इति राजनिर्घण्टः॥ याघ्रायुधम् २५ चक्रकारः कम् २६ शुक्लनखः २७ नखरी २८। इति शब्द-रत्नावली॥ जापे च। अथ नखनखीगन्ध-द्रव्यम्।
"नखं याघ्रनखं याघ्रायुधं तच्चक्रकारकम्।
नखं खल्वं नखी प्रोक्ता हनुर्हट्टविलासिनी॥
नखदयं गन्धशेम्बातासज्वरकुष्ठजित्।
लघूष्णं शुक्लं वर्ण्यं स्वादुव्रणविषापहम्॥
अलक्ष्मीसुखदौर्गन्ध्यं कृत्पाकरसयोः कटुः॥"
इति भावप्रकाशः॥
खल्वनखस्य पर्य्यायः। नखी १ हनुः २ हट्ट-विलासिनी ३। तयोर्गुणाः। गन्धशेम्बातास-ज्वरकुष्ठनाशित्वम्। लघुत्वम्। उष्णत्वम्। शुक्ल-त्वम्। वर्ण्यत्वम्। स्वादुत्वम्। व्रणविषालक्ष्मी-सुखदौर्गन्ध्यनाशित्वम्। पाकरसयोः कटुत्वञ्च। इति भावप्रकाशः॥ कक्षुभूतविनाशित्वम्। इति राजनिर्घण्टः॥ रक्षोघ्नत्वम्। इति राज-वल्लभः॥ * ॥
"ग्रैवेरकं याघ्रनखं हनुर्हट्टविलासिनी।
सुषिराञ्जनकेशी च कपोताङ्घ्रिर्नखी खुरः॥
स्वल्पपत्रस्त्रजौ शुक्तिर्नखरी वदरीच्छदा।
महांस्त्रजौ शुक्लनखः शुक्लाख्यो गन्धसारकः॥"
इति भरतधृतवाचस्पतिः॥
नखः, पुं, (नखतेऽनेनेति। नह+खः। हस्य लोपः।) खड्गम्। इति हेमचन्द्रः। ३। २५८॥ (नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥)
नखकृट्, पुं, (नखं कृन्तयति छिनत्तीति। कृत्+क्विप्।) नापितः। इति त्रिकाण्डशेषः॥
नखनिष्पावः, पुं, (नखं निष्पवते फलसाङ्गेन अनुकरोतीति। निर्+पू+अण्। यद्वा, नख-वत् निष्पावः शिम्बी यस्य।) निष्पावीभेदः। तत्पर्य्यायः। अङ्गुलिफला २ वृत्तनिष्पाविका ३ श्यामा ४ नखशुक्लफला ५ श्यामनिष्पावी ६ नखफलिनी ७। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। कण्ठशुद्धिकरत्वम्। मेध्यत्वम्। दीप-नत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥
नखपर्ण्यौ, स्त्री, (नख इव पर्णमस्याः। ङीष्।) हस्तिकाशुपः। इति राजनिर्घण्टः॥
नखपुष्पी, स्त्री, (नख इव पुष्पमस्याः। ङीष्।) एला। इति राजनिर्घण्टः॥
नखमुच्, क्ली, (नखं मुञ्चतीति। मुच+"क-प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्।" ३। २। ५। इत्यस्य वार्त्तिकोक्त्या कः।) धनुः। इति संक्षिप्तसारव्याकरणम्॥ नखस्य मोचके, त्रि॥
नखरः, पुं, क्ली, (नखं राति। रा+कः।) नखः। इत्यमरः। २। ६। ८३॥ (यथा, साहित्यदर्पणे।
"किं पुनरद्भुतमेतत् सम्प्रति नखरक्षतैस्तस्याः।"
अन्यविशेषः। यथा, महाभारते। ७। २६। १७।
"सक्तमन्यद्दिनखरा सुघनानि परस्परधाः॥"
तथा, तत्रैव। ६। १८। १७।
"पादाताड्यामनोऽगच्छन् धनुस्तस्मात्सिपाद्यवः।
अनेकशतसाहस्रा नखरप्रासयोधिनः॥")
नखरञ्जनी, स्त्री, (रज्यतेऽनयेति। रञ्ज+ल्युट्। ङीप्। नखस्य रञ्जनी।) नखच्छेदनास्त्र-विशेषः। नरुण इति भाषा। यथा,—
"शस्त्रास्त्रचरणोपान्तचारिणी मलहारिणी।
पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी॥"
इति द्वयर्थोक्तिः॥
नखरायुधः, पुं, (नखरेनेव आयुधं यस्य।) सिंहः। याघ्रः। कुक्कुटः। इति राजनिर्घण्टः॥
नखराङ्कः, पुं, (नखरं आङ्कयते लक्ष्यते इति। आ+कै+कः।) करवीरवृक्षः। इति राज-निर्घण्टः॥
नखरी, स्त्री, (नखराः आकृतिसाङ्घ्रेर्नास्त्यस्या इति। अच्। गौरादित्वात् ङीष्।) नखी। इति शब्दमाला॥ क्षुद्रनखी। इति काण्डिद्रव्यमाला॥
नखरुचः, पुं, (नख सर्पणे+अच्। नखो हृषः। इति नित्यकर्म्मधारयः।) नीलवृक्षः। इति राजनिर्घण्टः॥ (नीलवृक्षशब्दस्यास्य विवरणं ज्ञातव्यम्॥)
नखशुक्लः, पुं, (नख इव शुक्लः।) क्षुद्रशुक्लः। इति शब्दरत्नावली॥
नखाङ्गं, क्ली, (नखमिव अङ्गं यस्य।) याघ्रनखी। इति शब्दरत्नावली॥
नखाङ्गः, क्ली, (नखस्य अङ्गमिव अङ्गं यस्य।) नखी। इति काण्डिद्रव्यमाला॥
नखायुधः, पुं, (नखमेव आयुधं यस्य।) याघ्रः। इति राजनिर्घण्टः॥ सिंहकुक्कुटौ च॥
नखालिः, पुं, (नखमिव अलतीति। अल पर्य्याप्तौ+इन्।) क्षुद्रशुक्लः। इति शब्दचन्द्रिका॥ (नखस्य आलिः।) नखश्रेणी च॥
नखालुः, पुं, (नखतीति। नख सर्पणे+आलुच्।) नीलवृक्षः। इति राजनिर्घण्टः॥
नखाशी, [न्] पुं, (नखमश्नातीति। अश्न भोजने+णिनिः।) पेचकः। इति त्रिकाण्ड-शेषः॥ नखभक्षकमात्रे, त्रि॥
नखी, स्त्री, (नख+गौरादित्वात् ङीष्।) नख-नामगन्धद्रव्यम्। इत्यमरः। २। ४। १३०॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"करजाख्यश्वाश्वखुरो नखो याघ्रनखो नखी॥")
नखी, [न्] पुं, (नखमस्त्यस्येति। नख+इनिः।) सिंहः। इति राजनिर्घण्टः॥ विदारयत्यश्म-नखयुक्तपशुमात्रम्। यथा, याज्ञवल्क्ये। २०।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शृङ्गपाणिनाम्।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च॥"
नगः, पुं, (न गच्छतीति। न+गम्+डः। यद्वा, दह्यते इति। दह+"दहेर्गो लोपो दश्च नः।" उणा। ५। ६१। इति गः। धातोरन्तलोपः। दस्य च नः।) पर्व्वतः। (यथा, कुमारे। ७। ७२।
"नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्व्वमलङ्घनीयम्॥")
वृक्षः। इत्यमरः। ३। ३। १६॥ (यथा, महा-भारते। १। १। ४३। ६।
"तं दृष्ट्वा स नगं नागः कश्यपं पुनरब्रवीत्।
कुरु यत्नं द्विजश्रेष्ठ! जीवयैनं वनस्पतिम्॥"
स्थावरमात्रम्। यथा, विष्णुपुराणे। १। ५। ६।
"सुखा नगा यतश्चोक्ता सुखसर्गस्ततस्त्रयम्।"
"नगाः स्थावराः।" इति तट्टीकायां स्वामी॥)

नगजः, पुं, (नगे पर्व्वते जायते इति। जन+ड:।) हस्ती। इत्यमरटीकायां भारतसुन्दरी॥ पर्व्वतजातवस्तुमात्रे, त्रि॥

नगजा, स्त्री, (नगे जायते या। जन+ड:। टाप्।) क्षुद्रपाषाणभेदा। इति राजनिर्घण्टः॥

नगडा, स्त्री, (नास्ति गर्डो यस्याः।) लताविशेषः। नयाफट्की इति भाषा। तत्पर्य्यायः। पारावतपदी २ पिण्या ३ स्फुटवल्लनी ४ ज्योतिष्मती ५ पूतितैला ६ दुर्ग्रही ७। इति रत्नमाला॥

नगनन्दिनी, स्त्री, (नगस्य हिमालयस्य नन्दिनी। दुर्गा। इति शब्दरत्नावली॥

नगपतिः, पुं, (नगानां पतिः।) हिमालयपर्व्वतः। इति त्रिकाण्डशेषः॥ (नगानां ओषधीनां पतिः।) चन्द्रः॥

नगभित्, पुं, (नगं भिनत्तीति। भिद्+क्विप्।) पाषाणभेदनः। इति राजनिर्घण्टः॥ इन्द्रश्च॥

नगभूः, पुं, (नगे भूरुत्पत्तिर्यस्य।) क्षुद्रपाषाणभेदा। इति राजनिर्घण्टः॥ पर्व्वतजाते, त्रि॥

नगरं, क्ली, नगा इव प्रासादादयः सन्ति यत्र। ("नगपांसुपाण्डुभ्यश्च।" ५।२।१०७। इत्यस्य वार्त्तिकोक्त्या रः।) बहुलोकवासस्थानम्। शहर इति भाषा। तत्पर्य्यायः। पूः २ पुरी ३ पुरिः ४ पुरम् ५ नगरी ६ पत्तनम् ७ पट्टनम् ८ पट्टनी ९ पुटभेदनम् १० पटभेदनम् ११ स्थानीयम् १२ निगमः १३ इत्यमरभरतौ॥ कटकम् १४ पट्टम् १५। इति शब्दरत्नावली॥ केचित्तु नगरपत्तनस्थानीयानां भेदमाहुः। तत्र पुरादित्रयं पुरे। पत्तनादित्रयं पत्तने। स्थानीयादित्रयं स्थानीये। इति मन्यन्ते। यत्राष्टशतयामीयशतव्यवहारस्थानं मध्यवर्त्ति तत् नगरम्। यत्र राजा तत्परिचारकाश्च तिष्ठन्ति तत् पत्तनम्। प्राकारादिना दुर्गं योजनविस्तीर्णं नगरं स्थानीयम्। केचित्तु पुरनगरयोरपि भेदमाहुः। बहुयामीयशतव्यवहारस्थानं पुरम्। तत्र प्रधानभूतं नगरम्। इति भरतः॥ *॥

अथ नगरनिर्म्माणकालः।

"क्षिरराशिगते भानौ चन्द्रे च क्षिरभोदये। शुद्धे काले दिने चैव नगरं कारयेन्नृपः॥"*॥

तस्य लक्षणं भविष्योत्तरे।

"दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः। तत्रायं वर्त्तुलं वापि कदाचिदपि कारयेत्॥ दीर्घं पादैकप्रसरचतुरस्रं समोचितम्। त्रिभिः पादैः समं त्र्यस्रं वर्त्तुलं बलयाकृति॥ दीर्घं स्यादीर्घकालाय सुखसम्पत्तिहेतवे। चतुरस्रं चतुर्वर्गफलाय पृथिवीभुजः॥ त्र्यस्रं चिन्तक्षिणायाय वर्त्तुलं बहुरोगदम्। राज्ञः खड्गैर्दशभी राजहस्त उदाहृतः॥ राजहस्तैश्च दशभी राजदण्ड उदाहृतः। राजदण्डैश्च दशभी राजच्छत्रमुदाहृतम्॥ राजच्छत्रैश्च दशभी राजकाण्ड उदाहृतः। राजकाण्डैश्च दशभी राजपूरुष उच्यते॥ राजधानी तु कथिता दशभी राजपूरुषैः। राजधानी दशगुणा राजक्षेत्रमुदाहृतम्॥ सप्तैव परिमाणानि प्रोक्तानि पुरपत्तने। भयव्याधिभयव्यक्तिमर्म्मपीडाकीर्त्तिसुखार्थिनाम्। राजक्षेत्रेण नृपतिः पुरपत्तनमारभेत्॥ लक्ष्मीर्जयः क्षमा सौख्यं पक्षत्वं भङ्ग एकता। सम्बन्धिवित्तं गाढ्यञ्च मङ्गलञ्च बलं क्षयः॥ साम्राज्यं भोगसम्पत्तिरिति षोढ्यं कीर्त्तिताः॥ यथार्थसंज्ञा नगरा मुनिना तत्त्वदर्शिना॥"

इति युक्तिकल्पतरुः॥ *॥

अपि च।

"नृपावासः पुरी प्रोक्ता विप्राभ्युरसपीष्यते। एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम्॥ ग्रामस्तु सर्व्वतः प्राम्य ग्रहीगिरिसमाश्रयम्। विप्राश्च विप्रभक्ताश्च यत्र चैव वसन्ति हि॥ स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च। पण्यक्रियादिविपुलैश्चातुर्वर्ण्यजनैर्युतम्॥ अनेकजातिसम्बन्धं नैकशिल्पसमाकुलम्। सर्व्वदेवतसम्बन्धं नगरन्त्वभिधीयते॥"

इति विष्णुपुराणटीकायां श्रीधरस्वामिधृतशङ्खवचनम्॥ *॥

अन्यच्च।

"नगरं सर्व्वतोभद्रं कर्त्तव्यं रोधकं हि वा। स्वस्तिकं मध्यगं कार्य्यं कुमारीपुरमेव वा॥ चतुष्यचतुर्युक्तं सर्व्वकामसुखावहम्। छिन्नकर्त्रं विनाशञ्च दुःस्थितं क्षयदुर्व्वलम्॥ नगरं न प्रशंसन्ति गर्गवित्तं विभेदितम्। अग्रतः खल्वप्रासादं छिन्नाग्रं विदुर्बुधाः॥ छिन्नसूत्रं कर्त्तृहीनन्तु क्षयमध्यं क्षयं विदुः। दुःस्थितं निश्चयाग्र्यन्तु नैर्ऋतं धनदुर्व्वलम्॥ सौम्यं सर्व्वसुखाढ्यादपूरितं वारुणं वपुः। याम्यमायुःप्रदं पूर्णनगरं प्रीतिवर्द्धनम्॥ ईशवासवसंपूर्णं सर्व्वारोग्यसुखप्रदम्। मध्यचतुष्यहीनं न च तं पीड़येत् क्वचित्॥ ब्रह्मस्थानं हि तं विप्र शिवस्तत्र सदा स्थितः। चतुर्व्विंशतिनाड्यस्तु हस्तान्यष्टशतं परम्॥ अत्र मध्यं प्रशंसन्ति हस्तोत्तरशतविवर्द्धितम्। अथ किञ्चुग्रतान्यष्टौ प्राङ्मुखं निवेशयेत्तम्॥ नगरार्द्धञ्च विष्कम्भं खेटं ग्रामं ततोऽर्द्धतः। नगरादृयोजनं खेटं खेटाद्ग्रामोऽर्द्धयोजनः॥ दिक्षोग्रं परमा सीमा क्षेत्रसीमा चतुर्धनुः। चिंशद्धनूंषि विस्तीर्णो देशो मार्गस्तु सैः कृतः॥ विंशद्धनुर्ग्रामसमो मार्गः सीमामार्गो दशैव तु। धनूंषि दश विस्तीर्णः श्रीमान्राजपथः स्मृतः॥ कृषिकिरणगानामसम्बाधः सुखसरः। धनूंषि चैव चत्वारि ग्राम्यमार्गस्तु निर्म्मितः॥ चिकराद्योपरथ्यास्तु द्विकराद्युपरथ्यिका। अङ्गुलपथचतुष्यादक्षिपादस्य ग्रहान्तरम्॥ तृतीयपादस्त्वर्द्धपादः प्रागंशग्रपादकः स्मृतः॥"

इति देवीपुराणम्॥

नगरकीर्त्तनं, पुं, (नगरे कीर्त्तनं नगरपरिभ्रमणेन हरिनामसंघोषणम्।) नगरादिभ्रमणकरब्रह्महरिसङ्कीर्त्तनम्। यथा,—

"नाचारो नाधिकारो च न स्थाननियमस्तथा। ग्रामे वा नगरे साधुर्ब्रूयने वा कीर्त्तयेद्धरिम्॥"

इति हरिनाममाहात्म्यम्॥

नगरघातः, पुं, (नगरं हन्तीति। हन+घञ्।) हस्ती। इति संक्षिप्तसारव्याकरणम्॥

नगरी, स्त्री क्ली, (नगर+ङीष्।) नगरम्। इत्यमरः। २। १। १॥ (यथा, महाभारते। १२। ५। ६।

"प्रीत्या ददौ स कर्त्ताय मालिनीं नगरीमथ। अङ्गेषु नरशार्द्दूल! स राजासीत् सपत्नजित्॥")

नगरीवकः, पुं, (नगर्यां वक इव।) काकः। इति त्रिकाण्डशेषः॥

नगरोत्था, स्त्री, (नगरादुत्तिष्ठतीति। उत्+स्था+कः। टाप्।) नगरसुस्ता। इति राजनिर्घण्टः॥

नगरौषधिः, स्त्री, (नगरजाता ओषधिः मलयाकाशन्तत्वः।) कदली। इति शब्दचन्द्रिका॥

नगाटनः, पुं, (नगे वृक्षे अटति भ्रमतीति। अट+ल्युः।) वानरः। इति त्रिकाण्डशेषः॥ (पर्व्वतचारिणि, त्रि॥)

नगाधिपः, पुं, (नगानां पर्व्वतानामधिपः।) हिमालयपर्व्वतः। इति जटाधरः॥

नगाश्रयः, पुं, (नगः पर्व्वतः आश्रय उत्पत्तिस्थानं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥ नगाश्रयिणि, त्रि॥

नगौकाः, [स्] पुं, (नगो वृक्षः पर्व्वतो वा ओक आश्रयस्थानं यस्य।) पक्षी। इत्यमरः। २। ५। ३३॥ सरभः। सिंहः। इति मेदिनी। से, ५६॥ काकः। इति शब्दचन्द्रिका॥ नगरवासिनि, त्रि॥

नग्नः, त्रि, (नञते क्षिपति। यो नञ क्षिपि+अकर्म्मकत्वात् कर्त्तरि क्तः। "ओदितश्च।" ८।२। ४५। इति निष्ठातस्य नः।) विवस्त्रः। नेंटो इति भाषा॥ तत्पर्य्यायः। अवासाः २ दिगम्बरः ३। इत्यमरः। ३। १। ९९॥ तथा च भागुरिः।

"विकच्चोऽनुत्तरीयश्च नग्नश्चावस्त्र एव वा। यौतं स्यात्तं तथा कर्म्म न नग्नश्चिन्तयेदपि॥ विकच्चः परिधानार्थवृतकच्चः। तथा च योगियाज्ञवल्क्यः।

"परिधानाद्बहिःकक्षा निबद्धा आसुरी भवेत्॥"

स्मृतिः।

"वामे पृष्ठे तथा नाभौ कक्षत्रयसमाकृतम्। एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः॥"

बौधायनः।

"नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जाह्नवीं। अन्तरीयं प्रशस्तं तदाच्छन्नमुभयोस्तयोः॥"

आचारचन्द्रिकायाम्।

"द्विकच्चः कक्षयोश्चैव तृतीयकक्षयोरेव च। एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः॥"

इत्याह्निकतत्त्वम्॥

"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन। न च मूत्रं पुरीषं वा न दे संस्कृतमैथुनम्॥

नोच्छिष्टः संविशेन्निद्रां न नग्नः स्नानमाचरेत्।
न गच्छेन्न पठेद्वापि न चैव स्त्रग्धरः शुचेत्॥"
इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः॥
पारिभाषिकनग्ना यथा,—
"येषां कुले न वेदोऽस्ति न श्राद्धं नैव च व्रतम्।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम्॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥
"ऋग्यजुःसामसंज्ञेयं त्रयी वर्त्तातिहिंस च॥
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः॥
यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते।
परिव्राड्वापि मैत्रेय! स नग्नः पापसञ्चरः॥"
इति विष्णुपुराणे १८ अध्यायः॥

नग्नः, पुं, (नञ्+ग्नः। निष्ठातस्य नः।) वन्दी। (यथा, नैषधे। १६। २१।
"रतिरतिपतिहेतश्रीकौ धुरं विभ्रमङ्गरां
प्रियवचसि यन्नग्नाचार्य्या वदामतमां ततः॥")
चपलकः। इति विश्वमेदिन्यौ॥ शैवस्य पर्य्यायः।
नग्नाटकः २ निर्ग्रन्थकः ३ भदन्तः ४ दिगम्बरकः ५। इति हारावली। ११५॥

नग्नकः, पुं, (नग्न एव। स्वार्थे कन्।) नग्नः। नजते लज्जते इति नग्नकः। ओ नञ डो ह्रियि इत्यस्मात् क्तः सुखाद्योर्दिदिति नः मनीषादित्वात् अस्य गः स्वार्थे कः। इति व्याकरणम्॥

नग्नजित्, पुं, राजविशेषः। स च श्रीकृष्णपत्न्या नाग्नजित्या जनकः। यथा, श्रीभागवते। १०। ५८। २३।
"नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः।
तस्य सत्याभवत् कन्या देवी नाग्नजिती नृप!॥"

नग्नहु, [क्] स्त्री, (नग्नं ह्वयति स्पर्द्धते अनेनेति। ह्वे+करणे क्विप्।) नग्नहूः। इति भरतधृतामरमाला॥ (बाहुलकात्कुप्रत्यये कृते पुंलिङ्गेऽपि ह्वयते। यथा, त्राजसनेयसंहितायाम्। १६। १४।
"अतिथ्यरूपं मासरं महावीरस्य नग्नहुः॥"
"सर्ज्जलकुचिपलाशुङ्खीपुनर्भवाचतुर्जातकपिप्पलीगजपिप्पलीवंशपत्रावकाष्टहच्छवाचित्रकेन्द्रवारुण्यश्वगन्धाधान्यकयवानीवीरकदग्धहरिद्राद्वयविरूढ्यवक्षीरैय एकौकृता नग्नहुः॥" इति। १६। १। मन्त्रटीकायां वेददीपः॥)

नग्नहूः, पुं, (नग्नं ह्वयति स्पर्द्धते येनेति। ह्वे+क्विप्।) नागदमनवृक्षसुरावीजम्। वाखर इति ख्यातम्। इति भरतः॥ तत्पर्य्यायः। किण्वम् २ इत्यमरः। २। १०। ४२॥ कण्वम् ३ नग्नहु ४ इति तट्टीका॥

नग्ना, स्त्री, (नग्न+टाप्।) विवस्त्रा नारी। तत्पर्य्यायः। कोट्टवी २ कोटवी ३ नग्निका ४ नग्नयोषित् ५। इति शब्दरत्नावली॥ (अनुद्भिन्नकुचा कन्या। यथा, पञ्चतन्त्रे। ३। २१७।
"ऋतुमत्यान्तु तिष्ठन्त्यां स्वेच्छादानन्तु दीयते।
तस्मादुद्वाहयेत् नग्नां मनुः स्वायम्भुवोऽब्रवीत्॥")

नग्नाटः, पुं, (नग्नः सन् व्रजतीति। व्रज्+अच्।) दिगम्बरः। इति हलायुधः॥

नग्नाटकः, पुं, (नग्नाट एव। स्वार्थे कन्।) दिगम्बरयोगी। इति हारावली। ११५॥

नग्निका, स्त्री, (नग्नैव। स्वार्थे कन्। टापि अत इत्वम्।) विवस्त्रा। तत्पर्य्यायः। कोट्टवी २ कोटवी ३ कोटरी ४। अप्राप्तरजस्का। तत्पर्य्यायः। गौरी २ अप्राप्तरजस्का ३। इत्यमरस्तट्टीका च। गौरिका ४। इति शब्दरत्नावली॥ (अप्राप्तकुचा कन्या। यथा, पञ्चतन्त्रे। ३। २१३।
"अप्राप्तकुचा कन्या कुचहीना तु नग्निका॥")

नङ्गः, पुं, (नं नतिं गच्छतीति। गम+डः। बाहुलकात् सुम्।) जारः। नां इति भाषा॥

नञ, ओ ई ङ ह्रियि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्। ईदित्वात् निष्ठायामिट्।) ओ ई. नग्नः। ङ, नजते। ह्रियि लज्जायाम्। इति दुर्गादासः॥

नञ्, य, अभावसंज्ञकम्। समासे स्थितस्यास्य स्थाने स्वरे परेऽन् अञ्जने परे अकारो विकल्पेन भवति। यथा। अनग्नः नाग्नः। अच्युतः नच्युतः। अस्यार्थाः षट्। सादृश्यम् १ यथा अब्राह्मणः॥ अभावः २ यथा अपापम्॥ अन्यत्वम् ३ यथा अघटः पटः॥ अल्पत्वम् ४ यथा अनुदरी कन्या॥ अप्राशस्त्यम् ५ यथा अकेशी॥ विरोधः ६ यथा असुरः। इति सुग्धबोधटीकायां दुर्गादासः॥ यथा, मेदिनी।
"नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे।
ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः॥"
नकारश्च॥

नट, तृल्ये। हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-तृल्ये अकं-हिंसे सकं-सेट्।) नटति। इति दुर्गादासः॥

नट, क भंग्रे। त्विषि। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) भंग्रोऽधःपतनम्। स्यन्दनार्थोऽयमिति रामः। क, नाटयति। इति दुर्गादासः॥

नट, म वृतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) म, प्रनटयति। इति दुर्गादासः॥

नटः, पुं, (नमतीति। नम+"जनिदाच्युञ्जिति।" उणां ४। १०४। इति डटः।) ग्रहोपागकवृक्षः। (नटति वृत्यतीति। नट+अच्। यदा, नमतीति। नम+डटः) नर्त्तकः। नेटुया इति भाषा। (यथा, देवीभागवते। १। ७। ४२।
"तं क्रीड़से निजविनिर्म्मितमोहजाले
नाथो यथा विहरसे खलते नटो वै॥")
तत्पर्य्यायः। शैलालो २ शैलूषः ३ आयाजीवः ४ कृशाश्वी ५ भदन्तः ६। इत्यमरः। २। १०। १२॥ सर्व्वसेवी ७ भरतपुत्रकः ८ धात्रीपुत्रः ९ रङ्गजीवः १० रङ्गावतारकः ११। इति हेमचन्द्रः। २। २४२॥ अशोकवृक्षः। इति मेदिनी। टे, २०॥ किण्वपर्व्वा। इति जटाधरः॥ नल इति भाषा॥ (मदनफलम्। तत्पर्य्यायो यथा,—
"मदनश्छर्दनः पिण्डी नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शुक्लको विषपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
अशोकः। अस्य पर्य्यायो यथा,—
"अशोको हेमपुष्पश्च वञ्जुलश्चाक्षपल्लवः।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥")
वर्णसङ्करजातिविशेषः। यथा, पराशरपद्धतौ।
"शौण्डिक्यां शौण्डिकाज्जातो नटो वरुड एव च।"
व्रात्यायां क्षत्रियाज्जातः। (यथा, मनुः। १०। २२।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड़ एव च॥")
हनूमन्मते दीपकरागस्य रागिणी। अस्या जातिः संपूर्णा। ग्रहांशौ षड़्जस्वरः। शृङ्गारो दिवसान्तो गानसमयः। रागमालायामस्याः स्वरूपं रक्तवर्णा नारी नवयौवना सालङ्कृता अश्वारूढ़ा पुरुषवत् परिच्छिन्नवसना निष्कोषकरवालं धृत्वा शुचुनाक्रममाणा। इति सङ्गीतशास्त्रम्॥ नारदपुराणमते श्रीरागस्य पुत्रः॥

नटनं, क्ली, (नट+भावे ल्युट्।) वृत्तम्। इत्यमरः। १। ७। १०॥ (यथा, पञ्चतन्त्रे। ३। २३०।
"किं गाण्डीवस्फुरगुरुवचःस्खालनक्रूरपाणिर्नासौ लीलानटनविलसन्मेखली सव्यसाची॥")

नटनारायणः, पुं, (नटानां नारायण इव।) रागविशेषः। हनूमन्मते मेघरागस्य तृतीयपुत्रः। भरतमते दीपकरागस्य तृतीयपुत्रः। सोमेश्वरमते कल्लिनाथमते च षड़्रागानां शैवरागः। तस्य भार्य्याः षट्। यथा, चोटकी १ त्रिभङ्गी २ पूर्ण्णी ३ गान्धारी ४ वराभा ५ विन्ध्यमञ्जारी ६। सोमेश्वरमते तस्य रागिण्यो यथा। कामदा १ कल्याणी २ आभीरी ३ गाटकी ४ सारङ्गी ५ नटहमीरी ६। रागिण्यौ सिः सहास्य हिमर्त्तौ गानसमयः। इति सङ्गीतशास्त्रम्॥

नटभूषणं, क्ली, (नटानां भूषणं मण्डनं यस्मात्।) हरितालम्। इति रत्नमाला॥

नटमण्डनं, क्ली, (नटानां मण्डनं यस्मात्।) हरितालम्। इति हेमचन्द्रः। ४। १२५॥

नटवरः, पुं, (नटेषु वरः श्रेष्ठः।) नटश्रेष्ठः। यथा,
"बर्हापीड़ं नटवरवपुः कर्णयोः कर्णिकारम्॥"
इति श्रीभागवतम्॥

नटसंज्ञकः, पुं, (नटस्य संज्ञा संज्ञा यस्य। कप्।) गोदन्तास्यहरितालम्। इति त्रिकाण्डशेषः॥ (स्वार्थे कन्। नटस्य॥

नटान्तिका, स्त्री, (अन्तयति नाशयतीति। अन्त+ण्वुल्+टापि अत इत्वम्। नटस्य नटकार्य्यस्य अन्तिका।) लज्जा। इति हारावली। १५३॥

नटी, स्त्री, (नटति शोभते इति। नट्+अच्। ङीष्।) नलीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२६॥ (नटति वृत्यतीति। नट्+अच्। ङीष्।) वेश्या। इति शब्दरत्नावली॥ नटपत्नी च॥ (यथा, भागवते। ८। ८। १२।

"जगुर्भद्राणि गन्धर्व्वा ननृतुश्चाप्सरोगणाः ॥"
एवं हि पञ्चमकारपूज्यकुलनायिकान्तर्गता।
यथा, तन्त्रसारे।
"नटी कापालिनी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः ॥")

नटेश्वरः, पुं, (नटानामीश्वरः। शृङ्गप्रियत्वात् तथात्वम्।) शिवः। इति हेमचन्द्रः।२।११२॥

नड़, क भंग्रे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं सेट्।) क, नाड़यति। भंग्रोध इत्यर्थम्। इति दुर्गादासः॥

नड़ः, पुं, (नलतीति। नल+अच्। यद्वा नड़लम्।) नलशब्दार्थम्। इत्यमरः। २। ४। १६५॥ (यथा, वेदे। ६। १३८। ५।
"यथा नडं कश्मिपुने स्त्रियो भिन्दन्त्यश्मना॥")
जातिभेदः। इति पुंनपुंसकसंग्रहटीकायां मधुसूदनसरस्वतीदेवैः॥

नड़कीयः, त्रि, (नड़ाः सन्त्यत्र। नड़+"नड़ादीनां कुक् च।" ४। २। ९१। इति छः कुगागमश्च।) नलसम्बन्धिदेशः। इति हेमचन्द्रः। ४। २०॥

नड़प्रायः, त्रि, (नड़ः प्रायेण यत्र।) नलबहुलदेशः। तत्पर्य्यायः। नड़कीयः २ नड़्वान् ३ नड़लः ४। इति हेमचन्द्रः। ४। २०॥

नड़मीनः, पुं, (नलस्थितो मीनः। अस्य ह्रस्वम्।) चिलिचिममत्स्यः। नलमीन इत्यमरदर्पणात् ह्रस्वयोरैक्यम्॥

नड़संहतिः, स्त्री, (नड़ानां संहतिः समूहः।) नड़समूहः। तत्पर्य्यायः। गथा २। इत्यमरः। २। ५। १६८॥ नड़सञ्चयः ३। इति शब्दरत्नावली॥

नड़हः, त्रि, (नड़ं अपरिष्कृतस्थानं हन्तीति। हन+कः।) कान्तः। ललितः। इति भूरिप्रयोगः॥

नड़ा, स्त्री, (नड़ानां समूहः। "प्राग्वतीयादिभ्यो यः।" ४। २। ३९। इति यः।) नड़समूहः। इत्यमरः। २। ५। १६८॥

नड़ुल, त्रि, (नड़ाः सन्त्यत्र। नड़+"नड़ादात् ह्रस्वश्च।" ४। २। ८८। इति ह्रस्वश्च।) नलबहुलदेशः। इत्यमरः। २। १। ६॥ (यथा, रघुः। १८। ५।
"यो नड़ुलानीव गजः परेषां
बलान्यधृष्टद्रुतलिलाभुवज्रः॥")

नड़्वान्, [त्] त्रि, (नड़ाः सन्त्यत्र। नड़+"कुसुदनड़वेतसेभ्यो ह्मतुप्।" ४। २। ८७। इति ह्मतुप्। ह्मित्त्वात् टिलोपः। मस्य वः।) नलबहुलदेशः। इत्यमरः। २। १। ६॥

नड़्वाभूः, स्त्री, कुड़िभः। इति भूरिप्रयोगः॥

नतं, क्ली, (नम+क्तः।) तगरपादौ। तगरमूलम्। इति मेदिनी। तें, २६॥ (पर्य्यायोऽस्य यथा,—
"कालानुसारिवावक्रं तगरं कुटिलं शठम्।
महीरुहं नतं जिह्मं दीर्घं तगरपादिकम्॥"
इति वैद्यकरत्नमालायाम्॥)

नतः, पुं, (नमति सोति। नम+क्तः।) जम्बनाड़िकाविशेषः। तद्यथा,—
"अथक्षतुकर्म्मजा येन यान्ति दृक्तुल्यतां दिवि।
नतोन्नतौ ततः साध्यौ भावः खेटवशादि वट्॥
दिनार्द्धान्तरिता जम्बनाड़िका नतनाड़िका।
पूर्व्वापरार्द्धे जातस्य प्राक्परार्द्धा दिने भवेत्॥
रात्रेर्गतघटीशेषघटीदिनार्द्धसंयुता।
परपूर्व्वाभिधा शेषा रात्र्यां नतनाड़िका॥"
इति कोष्ठीप्रदीपः॥

नतः, त्रि, (नम+क्तः।) कुटिलः। नम्रः। इति मेदिनी। तें, २६॥ (यथा, हरिवंशे। २०१। ३६।
"नतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः॥")

नतद्रुमः, पुं, (नतो द्रुमः।) बेतसवृक्षः। इति रत्नमाला॥

नतनासिकः, त्रि, (नता नासिका यस्य।) अल्पनासिकायुक्तः। खाँदा इति भाषा। तत्पर्य्यायः। अवटीटः २ अवनाटः ३ अवखटः ४। इत्यमरः। २। ६। ४५॥

नतालुी, स्त्री, (नतमङ्गमस्याः। ङीष्।) नारी। इति राजनिर्घण्टः॥

नतिः, स्त्री, (नम+भावे क्तिन्।) नमस्कारः। नम्रता। यथा,—
"नौतिर्भूमिसुतां नतिर्गुरुवतां क्षीरङ्गनानां स्तुतिर्दैन्यात्यौ; स्निग्धयो रहस्य कविता वृद्धेः प्रसादो गिराम्।
लावण्यं वपुषः क्षतिः सुमनसः भ्रान्तिर्द्विजस्य क्षमा
भक्तस्य द्रविणं गृहाश्रमवतां खाद्यं सतां सङ्गमम्॥"
इति नवरत्नम्॥
(नतिलक्षणादिकन्तु नमस्कारशब्दे द्रष्टव्यम्।)

नद, टु इ संहृधि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टु, नन्द्युः। इ, नन्दते। संहृधि आनन्दयुक्तभावे। नमन्दे पारिप्लवनेत्रया नृपः। नन्दते च कुलं पुंसाम्। इति गणरत्नावलित्वात्। इति दुर्गादासः॥

नदः, पुं, (नदति प्रवाहवेगेन शब्दायते इति। नद+अच्।) पुंवाचकाम्बुनिमग्नावच्छिन्नजलप्रवाहः। (यथा, मनुः। ६। ६०।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिनः सर्व्वे गृहस्थे यान्ति संस्थितिम्॥")
स च सिन्धुभेदवशोणहामोदरब्रह्मपुत्रादिः। तत्पर्य्यायः। पुनर्भवः २ भिदः ३ उद्यः ४ सरस्वान् ५। इति हेमचन्द्रः। ४। १५६॥
"अष्टषष्टिस्तु तीर्थानि नदाश्च दशकोटयः॥"
इति पाद्मे भूखण्डे ८५ अध्यायः॥

नदुः, पुं, (नदतीति। नद+"अनुङ् नदेश्च।" उणां ३। ५२। इति अनुङ्।) मेघः। इत्युणादिकोषः॥ (यथा ऋग्वेदे। ८। २१। १४।
"यदा क्षोणीषि नदनुं समुद्रस्यादित् पितेव दूयसे॥")
सिंहः। इति शब्दमाला॥ (नद+भावे अनुङ्।
शब्दः। यथा, ऋग्वेदे। ६। १८। २।
"स युधः सखा खजत्कृत्समदा
तुविष्वणो नदनुमाँ ऋजीषी॥")

नदी, स्त्री, (नदतीति। नद+अच्। पृषोदरादित्वात् टिड्ढेत्यादि ङीप्।) अष्टसहस्रधनुरन्यूनव्याप्तलोया। सा च गङ्गायमुनासरस्वतीकावेरीगोदावरीप्रभृतिः। तस्या लक्षणमाह हलायुधपरिशिष्टम्।
"धनुःसहस्रायतौ च गतिर्यासां न विद्यते।
ता नदीशब्दवहा गर्गाद्याः परिकीर्त्तिताः॥"
इति तिथितत्त्वम्॥
तत्पर्य्यायः। सरित् २ तरङ्गिणी ३ शैवलिनी ४ तटिनी ५ ह्रदिनी ६ ध्वनी ७ स्रोतस्वती ८ द्वीपवती ९ स्रवन्ती १० निम्नगा ११ आपगा १२। इत्यमरः। १। १०। ३०॥ ह्रादिनी १३ ध्वनिः १४ स्रोतस्विनी १५ स्रोतोवहा १६ सागरगामिनी १७ अपगा १८। इति भरतः॥ निर्झरिणी १९ सरस्वती २० समुद्रगा २१ कूलङ्कषा २२ कूलवती २३ शैवालिनी २४ सिन्धुः २५ समुद्रकान्ता २६ सागरगा २७ क्षरा २८ रोधोवती २९ वाहिनी ३०। तज्जलगुणाः। स्वच्छत्वम्। बहुलत्वम्। दीपनत्वम्। प्राचनत्वम्। हृद्यत्वम्। हृद्यापथ्यत्वम्। पथ्यत्वम्। मधुरत्वम्। दोषहरत्वञ्च॥ ॥
"सर्व्वा गुर्व्वी प्राङ्मुखी वाहिनी स्या-
न्नद्यो नद्यादाहिनी निम्नयेव।
देशे देशे तद्गुणा सा विशेषा-
त्तेषा धत्ते गौरवं लाघवञ्च॥
प्रायो नद्यहरा गुर्व्वी लघ्वः श्रोत्रवहाः स्मृताः।
नद्यः पाषाणशिकतावाहिन्यो विमलोदकाः॥
हिमवत्प्रभवा याश्च जलं तासन्तोपमम्॥
विन्ध्यात् प्राची प्राग्वाची प्रतीची
या चोदीची स्यान्नदी सा क्रमेण।
वातारोग्यं श्लेष्मपित्तार्त्तिलोपं
पित्तोद्रेकं पथ्यपाकञ्च धत्ते॥
पारिपात्रभवा याश्च विन्ध्याक्षप्रभवाश्च याः।
ऋक्षोद्भवोपगकुलाना ता हेतुः क्षीणदक्षश्च॥"
इति राजनिर्घण्टः॥
(यथा च।
"तथा प्राच्यां गमाश्चाद्याः पश्चिमाशुगमास्तथा।"
"सप्तैकता सप्तवाहा द्विविधा चानुवाहिनी।
एवं चतुर्विधा नद्यो वातपित्तकफापहाः॥
संदावहायास्खनवद्यसुखं
मरुत्कफानां शमनञ्च तस्याः।
नीरं वसन्ते हितकृद्विशेषात्
नदीभवं नैव हिमागमे च॥
घनविमलशिलानां स्खालनाच्चारुवेगं
बहुलसलिलवीचिच्छन्नसंक्षोभदक्षम्।

नतु लघु च सुशीतं नैव चोष्णं घनञ्च
हरति पवनपित्तं श्लेष्मदोषारि सम्यक् ।
इति पाषाणनदीवारिगुणाः । ॥ ।
सुघनविमलतोयं सैकतायाः प्रवाहं
न च भवति लघुत्वं श्लेष्मदोषान्हन्ति पित्तम् ।
भवति मधुरमेवं किञ्चिदुष्णं कषायं
भवति च सुखशीतच्छोषमूर्च्छा निहन्ति ॥
इति सवालुकानदीवारिगुणाः ॥॥
हिमवत्प्रभवा नद्यः पुण्या देवर्षिसेविताः ।
घनपाषाण्यसिकतावाहिन्यो विमलोदकाः ॥
हन्ति वातकफं तोयं श्रमशोषविनाशनम् ।
किञ्चित् करोति वा पित्तं त्रिदोषघ्नमनञ्जलम् ॥
मलयप्रभवा नद्यः शीततोयाल्पतोपमाः ।
हन्ति वातञ्च पित्तञ्च श्रमशोषश्रमापहम् ॥
गङ्गा सरस्वती शोणं यमुना सरयूः सची ।
वेगा इरावती नीला उत्तरात् पूर्ववाहिनी ॥
हिमवत्प्रभवा ह्येता हिमसम्भवशीतलाः ।
समाः सर्वगुणैर्नद्यो वातश्लेष्महरा नृणाम् ॥
आसां नवशतैर्युक्ता गङ्गा पूर्वसमुद्रगा ।
तथा चर्मण्वती वेत्रवती पारावती तथा ॥
सिप्रा महाप्रदीप्ता च ऋषिकुल्या पयस्विनी ।
शोवन्ती शोवलिन्यश्च सिन्धुयुक्ताः ससप्तगाः ।
वातपित्तहरं नीरं त्रिदोषघ्नमतःपरम् ।
श्रमस्खलिहरं हृद्यं उत्तरापथगामिनी ॥
इति नद्य उत्तरापथगाः । ॥ ॥
तापी तापा च गोलोमी गोमती शालिला मही ।
सरस्वतीयुता नद्यो नर्मदा पश्चिमापगाः ॥
आसां जलं घनं शीतं पित्तघ्नं कफकृत्तथा ।
वातदोषहरं हृद्यं कण्डूकुष्ठविनाशनम् ॥
पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना ।
अस्याः शीतं जलं वापि कफवातविकारकृत् ॥
पित्तश्रमहरं वल्यं त्रिदोषविषकारकृत् ।
पुण्या पयस्विनी वेता प्रशीता च वरानना ॥
दोषा गोवर्द्धनी चान्या गौतम्यानुगता इमाः ।
आसां जलं घनं नातिवातश्लेष्मविकारकृत् ॥
पूर्वसागरगाश्चैव नद्यो नवशतैर्युताः ।
कावेरी वीरकाम्पा च भीमा चैव पयोष्णिका ।
विभाण्डरी विशाला च गौरीदा मदनक्षमा ।
कर्वती चापरा नद्यो दक्षिणाद्रिगमा हिमाः ।
एतासां परिसङ्ख्या च शतानाञ्चैकविंशतिः ।
क्रोशं क्रोशं भवेत् कुल्या योजने योजने नदी ।
योजनद्वयतो ज्ञेया महानीरा बुधैर्नदी ।"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥
"पश्चिमोदधिगाः शीघ्रवहा याम्यामलोदकाः ।
यथाः समासाक्ता नद्यो विपरीताश्चतोऽन्यथा ।
उपलास्खालनाच्छैवविच्छेदैः खेदितोदकाः ॥
हिमवन्मलयोद्भूताः पथ्याक्षा एव च स्थिराः ।
कृमिश्लीपदकृत्कण्ठग्रिरोरोगान् प्रकुर्वते ॥
प्रत्यावृत्या परान्योत्या दुर्नामानिमतेन्द्रजाः ।
श्लीपदार्तान् सदाविन्ध्योद्भवाः पुनः ॥
कुष्ठपाण्डुग्रिरोरोगान् दोषजाः पारिपात्रजाः ।
वलपौरुषकारिण्यः————————————।"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
"तत्र नद्यः पश्चिमाभिमुखाः पथ्या लघूदकत्वात् ।
पूर्वाभिमुखास्तु न प्रशस्यन्ते गुरूदकत्वात् ।
दक्षिणाभिमुखा नातिदोषलाः साधारणत्वात् ।"
"प्रायेण नद्यो मरुषु सतिक्ता लवणान्विताः ।
ईषत्कषाया मधुरा लघुपाका बले हिताः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥
"वसुधा कीटसर्पाखुमलसन्दूषितोदकाः ।
वर्षाजलवहा नद्यः सर्वदोषसमीरणाः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)
भारतवर्षे नद्यो यथा । गङ्गा सिन्धुः सरस्वती शुतद्रुः वितस्ता विपाशा चन्द्रभागा सरयूः यमुना इरावती देविका कुहूः गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निखीरा गण्डकी चक्षुमती लोहिता । इत्येता हिमवत्पादनिर्गताः । वेदस्मृती वेदवती सिन्धुः अपर्णा चन्दना सदाचरा रोहिपारा चर्मखती विदिशा वेत्रवती वयस्था । इत्येताः पारिपात्रोद्भवाः । शोणा ज्योतीरथा नर्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पला करतोया पिशाचिका चित्रोत्पला विशाला वङ्कुका वालुका वाहिनी शुक्तिमती विरजा पङ्किनी दिवी । इत्येता ऋक्षप्रसूताः । मक्षिकाक्षा शुभा तापी पयोष्णी शोणोदा वेत्रा पाशा वैतरणी वेदी पाला कुसुद्वती तोया दुर्गा अन्या गिरा । एता विन्ध्यपादोद्भवाः । गोदावरी भीमरथी कृष्णा वेणा वञ्जुला तुङ्गभद्रा सुप्रयोगा ब्रह्मकावेरी शुतमाला ताम्रपर्णी पुष्पावती उत्पलावती । इत्येता मलयजाः । त्रियामा ऋषिकुल्या इक्षुरा त्रिविदाला मूलिनी वंशधरा महेन्द्रतनया ऋषिका लघुवती मन्दगामिनी पलाशिनी । इत्येताः शुक्तिमत्प्रभवाः । एताः प्राधान्येन कुलपर्वतनद्यः । शेषाः क्षुद्रनद्यः । इति वराहपुराणम् । ॥ ॥
"कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ।
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ॥
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ।
दिव्यञ्च चन्दनवनं तस्यास्तीरे महद्वनम् ॥
प्रागुत्तरेण कैलासात् दिव्यं सौगन्धिकं गिरिम् ।
सर्वधातुमयं दिव्यं शुवलं पर्वतं प्रति ॥
चक्रप्रभो नाम गिरिः शशुक्लो रत्नसन्निभः ।
ततस्समीपे सरो दिव्यमक्षोदसम विश्रुतम् ॥
तस्मात् प्रभवते दिव्या नदी ह्यक्षोदका शुभा ।
तस्यास्तीरे वनं दिव्यं महद्वैचरथं शुभम् ॥
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ।
यक्षः सेनापतिः क्रूरैर्गुह्यकैः परिवारितः ॥
पुण्या मन्दाकिनी चैव नदी ह्यक्षोदका शुभा ।
महीमण्डलमध्ये तु प्रविष्टे ते महोदधिम् ॥
कैलासाद्दक्षिणप्राच्यां शिवं सर्वौषधिं गिरिम्
मनःशिलामयं दिव्यं शुवलं पर्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदी महान् ।
देवारण्यं विशोकश्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यैः सधाभिक्षैश्चैव शुक्लकैः परिवारितः ॥
कैलासात् पश्चिमोदीच्यां ककुद्मानोषधीगिरिः ।
ककुद्मति च रुद्रस्य उत्पत्तिस्त्रिककुद्मतः ॥
तदङ्गनलकेककुदं शैलं त्रिककुदं प्रति ।
सर्वधातुमयस्तत्र सुमहद्दीप्तितो गिरिः ॥
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ।
यस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ॥
कैलासात् पश्चिमामाशां दिशं सर्वौषधिर्गिरिः ।
अरुणः पर्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्वतो हेमसन्निभः ।
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा वङ्क्षुशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।
अभ्युत्तरेण कैलासं शिवं सर्वौषधिं गिरिम् ॥
गौरम्बु पर्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं विन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरवाप बहुलाः समाः ।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥
सोमपादात् प्रसृता सा सप्तधा प्रतिभण्यते ।
भवस्य सङ्गे पतिता संरुद्धा योगमायया ॥
ततो विसर्जयामास सप्त स्रोतांसि गङ्गया ।
नीलं प्राचीमभिमुखं प्रतीचीं चोरुमेव च ॥
स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्तधा ।
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ॥
शीता वङ्क्षुश्च सिन्धुश्च तिसस्ता वै प्रतीच्यगा ।
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ॥
तस्माद्भागीरथी चापि प्रविष्टा दक्षिणोदधिम् ।
सप्तैताः स्रावयन्ति स्म वर्षन्तीमामकाश्यम् ॥
प्रसृताः सप्त नद्यस्तु शुभा विन्दुसरोद्भवाः ।
तान् देशान् स्रावयन्ति स्म म्लेच्छप्रायांश्च सर्वशः ॥
सलिलान् कुसुरांश्चोलान् वर्बरान् यवनान् खशान् ।
स्रुघ्नकुलांश्च कुलत्थांश्च अङ्गलौक्यावरांश्च यान् ॥
लवा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम् ।
अथ चीनमरूंश्चैव कालकांश्चैव चूलकान् ॥
तुषारान् बर्बरान् कारान् पल्हवान् पारदान् शकान् ।
एतान् जनपदान् वङ्कुः स्रावयन्त्युदधिं गता ॥
वरदान् कूटलांश्चैव गान्धारानौरसान् कुरून् ।
शिबिसौवीरनिन्दमरून् वसातीन् समतेषवः ॥
सैन्धवारट्टकावेरान् कुपथान् भीमरौरुकान् ।
सुगासुखांश्चोर्द्धमरून् सिन्धुरन्ताश्रिताश्चये ॥
गन्धर्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान् ।
कलापग्रामकांश्चैव तथा किंपुरुषान्नरान् ॥

किरातांश्च पुलिन्दांश्च कुरून् वै भरतानपि ।
पाञ्चालकौशिकान् मत्स्यान्मागधाङ्गांस्तथैव च ॥
ब्रह्मोत्तरांश्च वङ्गांश्च तामलिप्तांस्तथैव च ।
एतान् जनपदान्पुण्यान् गङ्गा तारयते शुभा ॥
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम् ।
ततस्तु ह्लादिनी पुण्या प्राचीमभिमुखा ययौ ॥
भावयन्त्यपरांश्चैव निषादानपि सर्व्वशः ।
धीवरान्नृषिकांश्चैव तथा लोमसुखानपि ॥
केकरानेकवर्णांश्च किरातानपि चैव हि ।
कालन्दरान् विवर्णांश्च कुक्षिकान् स्वर्गभूमिकान् ॥
सा मरुत्ते समुद्रस्य तिरोभूत्वा तु सर्व्वशः ।
ततस्तु पावनी चैव प्राचीमेव दिशं ययौ ॥
कुपथान् भावयन्ती सा इन्द्रद्युम्नसरांस्यपि ।
तथा खरपथान् देशान् वेत्रवत्कुपथानपि ॥
मध्ये चोल्लानकमरून् कुथप्रावरणानपि ।
इन्द्रद्वीपात् समुद्रं सा प्रविष्टा लवणोदधिम् ॥
ततस्तु पावनी प्रायात् प्राचीमाशां जवेन तु ।
तोमरान् भावयन्ती सा हंसमार्गान् सदृङ्कान् ॥
पूर्णान् दर्भांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम् ।
कर्षप्रावरणान् प्राप्य गता साम्बसुखानपि ॥
सिकतापर्व्वतमरून् गत्वा विद्याधरान् ययौ ।
वामिमङ्गलकोष्ठन्तु सा प्रविष्टा महत् सरः ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
उपगच्छन्ति तां नद्यो यतो वर्षति वासवः ॥
हेमकूटस्य पृष्ठे तु सर्पाण्यासुतुरुत्सवः स्मृतः ।
सरस्वती प्रभवति तस्मात् ज्योतिश्चती तु या ॥
अवगाहेतोमयतः समुद्रौ पूर्व्वपश्चिमौ ।
सरो विष्णुपदं नाम निषधे पर्व्वतोत्तमे ॥
तस्मात् हयं प्रभवति गन्धर्व्वी नदुला च ते ।
मेरोः पार्श्वात् प्रभवति हृदश्चन्द्रप्रभो महान् ॥
जम्बुश्चैव नदी पुण्या यस्यां जाम्बुनदं स्मृतम् ।
पयोदस्तु ह्रदो नीलः स शुभः पुष्करीकवान् ॥
पुष्करीका पयोदा च तस्माद्वै संप्रसूयते ।
सरस्तु सरसश्चैव स्मृतसुत्तरमानसम् ॥
सरयू च रथाकान्ता च तस्माद्वै संप्रसूयते ।
ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः ॥
नाम्ना ते विजया नाम द्वादशोदधिसन्निभाः ।
तेभ्यः स्रान्ता च माध्वी च ते नद्यौ संप्रसूयतः ॥"

इति मत्स्यपुराणे १०१ अध्यायः ॥ * ॥

अथ सिप्रादिसप्तनद्युत्पत्तिकारणम् ।
"एवं विवाह्य विधिवत् सौवर्ण्ये मानसाचले ।
अरुन्धती वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृथार्थाय स्नान्त्यर्थं वसुधाकृतम् ॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् ।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हैमाद्रेः कन्दरे स्थानौ सरस्याश्च पृथक् पृथक् ।
तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे ॥
तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ।
महाकोशीप्रयाते च यद्वारि पतितन्तु तैः ॥
कौशिकी नाम सा जाता विश्वामित्रावतारिता ।
उमाक्षेत्रे यत् पतितं तोयं तेन महानदी ॥
कावेरी नाम सा जाता तदा कावेरसंस्थिता ।
महाकाले सरःश्रेष्ठे पतितं तज्जलं गिरेः ॥
हिमाद्रेः पार्श्वभागे तु दक्षिणे शुभ्रसन्निधौ ।
गोमन्ति नाम तेर्ष्याता नदी गोमत्युदीरिता ॥
मैनाको नाम यः पुत्रः शैलराजस्य च प्रियः ।
यस्तु तस्मिन् समुत्पन्नो मेनकोदरतः पुरा ॥
तत्तत्र पतितं तोयं तस्माज्जाता महानदी ।
दैविकाख्या महादेवप्रेरिता सागरं प्रति ॥
तत्तोयं सङ्गतं कुर्याद्गंसा वड्वसन्निधौ ।
तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा ॥
यान्यम्भांसि महापार्श्वे खाण्डवारण्यसन्निधौ ।
हिमवत्कन्दरे यानि इरावद्वदमन्यतः ।
इरावती नाम नदी तेषु जाता सरिद्वरा ॥
एताः सर्व्वाः स्नानपानात् स्मरणैर्व्वाङ्मयी यथा ।
फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा ॥
धर्म्मार्थकाममोक्षाणां बीजभूताः सनातनाः ।
महानद्यस्तु सप्तैताः सर्व्वदा देवभोगदाः ॥
एवं नद्यः सप्त जाताः सदा पुण्यतमोदकाः ।
अरुन्धत्या वशिष्ठस्य विवाहे देवसन्निधौ ॥"

इति कालिकापुराणे २३ अध्यायः ॥ * ॥

नद्यादीनां रूपवर्णं यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपास्ते स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्लीनामथ कर्म्मणां तथैवान्तर्गता तनूः ॥
बहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्यायते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्यायते सदा ।
नदीनाँ कामरूपित्वं पर्व्वतानान्तथैव च ।
जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः ॥
तोयहानौ नदीदुःखं जायते सततं द्विजाः ।
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥"

इति कालिकापुराणे २२ अध्यायः ॥

तस्या वैदिकपर्य्यायः । अयनयः १ यष्ट्या २ खाः ३ सीराः ४ सोत्याः ५ एन्यः ६ धुनयः ७ रजानाः ८ वत्सगाः ९ खादोऽर्णाः १० रोधचक्राः ११ हरितः १२ सरितः १३ अयुवः १४ नभन्यः १५ वध्यः १६ हिरण्यवर्णाः १७ रोहितः १८ सुतः १९ अर्णाः २० सिन्धवः २१ कुल्याः २२ वर्त्याः २३ उर्व्याः २४ इरावत्यः २५ पार्वत्यः २६ सवन्त्यः २७ ऊर्ज्जस्वत्यः २८ पयस्वत्यः २९ सरस्वत्यः ३० तरस्वत्यः ३१ हरस्वत्यः ३२ रोधस्वत्यः ३३ भास्वत्यः ३४ अजिराः ३५ मातरः ३६ नद्यः ३७ । इति सप्तविंशन्नदीनामानि । इति वेदनिघण्टौ । १ । १३ ॥ (चतुर्द्दशाक्षरवृत्तविशेषः । तल्लक्षणं यथा,—
"नगतनगुरुगैः सप्तयतिर्नदी स्यात् ॥")

नदीकदम्बः, पुं, (नदीनां कदम्बं समूहो यत्र ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ (नदीनां कदम्बम् ।) नदीसमूहे, क्ली ॥

नदीकान्तः, पुं, (नदीनां कान्तः पतिः ।) समुद्रः । (नदी कान्ता प्रिया यस्य ।) हिज्जलवृक्षः । सिन्धुवारकः । इति मेदिनी । ते, २०० ॥

नदीकान्ता, स्त्री, (नदी कान्ता यस्याः ।) जम्बुवृक्षः । काकजङ्घौषधिः । इति मेदिनी । ते, २०१ ॥ (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लता । इति हेमचन्द्रः ॥

नदीकूलप्रियः, पुं, (नदीकूलं प्रियं यस्य । नदीकूलजातत्वादस्य तथात्वम् ।) जलवेतसः । इति शब्दरत्नावली ॥

नदीज, क्ली, (नद्यां जायते इति । जन+डः ।) स्रोतोऽञ्जनम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"स्रोतोऽञ्जनं नदीजञ्च ज्ञेयं स्रोतोजलाञ्जनम् ॥")

नदीजः, पुं, (नद्यां जायते इति । जन+डः ।) अर्জ্জুনवृक्षः । इति रत्नमाला ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्জ্জुनः ॥")
यावनालग्ररः । हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥ यथा, सुश्रुते उत्तरतन्त्रे । ९० ।
"नदीजश्लिग्धीकटुकान्यथाञ्जनं
मनःशिला हे च निशे यकृद्रसे ॥"
नृपतिविशेषः । यथा, महाभारते । ५ । ४।१६ ।
"सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥"
भीष्मः । गङ्गागर्भजातत्वात् तथात्वम् । यथा, तत्रैव । ५ । १४८ । ३२ ।
"अयन्तु धर्म्मसमयो महात्मा
न राज्यकामो वृषरो नदीजः ॥")

नदीजात, त्रि । (यथा, महाभारते । ७।१०२।८ ।
"पार्व्वतीयैर्नदीजैश्च सैन्धवैश्च महाहयैः ॥")

नदीजा, स्त्री, (नद्यां जायते या सा । जन+डः+टाप् ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

नदीतरस्थानं, क्ली, (नद्यास्तरस्थानमधतरश्चलम् ।) घट्टः । इति भूरिप्रयोगः ॥ (नद्या इतरस्थानम् ।) नदीभिन्नस्थानम् ॥

नदीनः, पुं, (नदीनां इनः पतिः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ वरुणः । यथा । अयं नदीन इत्यादुत्तरनैषधः ॥ (अनेनोवंशीयस्य सहदेवस्य पुत्रः । यथा, हरिवंशे । २६ । ४ ।
"सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः ।
नदीनस्य जयत्सेनो जयत्सेनस्य सत्कृतिः ॥"
न दीनः इति नञ्समासे दरिद्रभिन्ने, त्रि ॥)

नदीनिम्नावः, पुं, (नदीसम्मुखजातो निम्नावः ।) धान्यभेदः । तत्पर्य्यायः । कुक्कुनिम्नावः २ कर्बुरः ३

नदीश: ४। अस्य गुणा:। तिक्तत्वम्। कटुत्वम्। व्रणप्रदत्वम्। गुरुत्वम्। वातलत्वम्। कफप्रदत्वम्। रूक्षत्वम्। कामायत्वम्। विषदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नदीमातृकः, त्रि, (नदी मातेव पोषिका यस्य। कप्।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥

नदीवङ्कः, पुं, (नद्या वङ्कः।) वङ्कुरः। इति शब्दमाला॥ बाँक इति भाषा।

नदीवटः, पुं, (नदीसमीपजातो वटः।) वटीवृक्षः। इति राजनिर्घण्टः॥

नदीष्णः, त्रि, (नद्यां स्नातीति। स्ना+"सुपि स्थः।"३।२।४। इति कः। "निगदीष्णां स्नाते: कौशले।" ८। ३। ८६। इति षत्वम्।) नद्यवगाहनदक्षः। नदीस्नानकुशलः। इति भट्टिटीकायां भरतः॥ नदीशः। इति पुरुषोत्तमः॥ यथा,—

"ततो नदीष्णान् पथिकान् गिरिष्णान्।"

इति भट्टिः॥

नदीसर्ज्जः, पुं, (नद्याः सर्ज्ज इव। नदीतीरजातत्वादस्य तथात्वम्।) अर्ज्जुनवृक्षः। इत्यमरः। २। ४। ४५॥ (पर्य्यायोऽस्य यथा,—

"ककुभोऽर्ज्जुननामाख्यो नदीसर्ज्जश्च कीर्त्तितः। इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नदेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्। एयोरादित्वात् ङीष्।) नादेयी। भूमिभेदः। इति शब्दचन्द्रिका॥

नद्धः, त्रि, (नह्यते स्मेति। नह+क्तः।) बद्धः। (यथा, हरिवंशे। २३२। १७।

"दिव्यैश्च कवचैर्नद्धा दिव्यैश्चैवोच्छ्रितैर्ध्वजैः॥")

उद्वृत्तः। इति मेदिनी। धे, ६॥

नद्धी, स्त्री, (नह्यतेऽनया। नह+दाम्नीति कृन्। ततो ङीप्।) चर्म्मरज्जुः। इत्यमरः। २।१०।१२॥ (यथा, प्रद्युम्नविजये चतुर्थाङ्के।

"अत्रापि धिग्जनुषि पुत्रकलत्रमित्र-नद्धावनद्धहृदयो न च तं स्मरामि॥")

नद्यात्मः, पुं, (नद्या आत्म इव।) समष्टिजातवृक्षः। इति राजनिर्घण्टः॥

नद्युत्तरः, त्रि, (नद्या उत्तरः।) नदीकर्त्तृकलङ्घनवस्तु। तट्पभृखण्डस्य पर इति चड़ा इति च भाषा॥ नद्युत्तरा भूमिषु यस्याधिकारे जाता तस्यैव भवति। यथा,—

"नद्युत्तरा राजदत्ता यस्य तस्यैव वा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः॥ क्षयोदयौ जीवनञ्च दैवराजवशाद्भवेताम्। तस्मात् सर्व्वेषु कार्य्येषु तत्तत्तं न विचालयेत्॥"

इति विवादचिन्तामणिविवादरत्नाकरवीरमित्रोदयप्रभृतिग्रन्थधृतवचनम्॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सैव यापि। नन्द्+नन्द+"नञि च नन्देः।" उणा० २। ८८। इति ऋन्। केषाञ्चिन्मतेन उड्डाभावः।) भर्तृभगिनी। ननद इति भाषा॥ तत्पर्य्यायः। ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५। इति शब्दरत्नावली॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सैवयापि। नन्द+"नञि च नन्देः।" उणा० २। ८८। इति ऋन् उड्डश्च।) ननन्दा। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। ८५। ४६।

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥")

नन्तु, अ, (न तुदति प्रेरयतीति। तुद्+मितद्वादित्वात् डुः।) प्रश्नः। इच्छा। अवधारणम्। (यथा, रघुः। १। ६०।

"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे। देवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥")

निश्चयः। (यथा, महाभारते। २३। ६। १६।

"लोको देवे समालोक्य उदासीनो भवेन्ननु॥")

अनुज्ञा। (यथा, शिशुपालवधे। ६। ६१।

"ननु सन्दिश्यते मुद्रयोद्यतया जपया न किञ्चन किलाभिदधे॥")

अनुमतिः। अनुनयः। सान्त्वनम्। आमन्त्रणम्। सम्बोधनम्। (यथा, कुमारे। ४। ३२।

"विधुरां त्वजनातिसर्ज्जनात् ननु मां प्रापय पत्युरन्तिकम्॥")

एवार्थसदाद्यरव्ययानि यथा,—

"प्रश्ने नन्वर्थेष्यामहे। अवधारणे ननु गच्छामः। अनुज्ञायां सर्व्वेणैनं ज्ञायताम्। अनुनये ननु चक्षि! प्रसीद। आमन्त्रणे ननु त्वेत्र। विरोधोक्तिः। इत्यमरभरतौ॥ विनियोगः। अनुप्रश्नः। परजल्पितः। अधिकारः। सम्भ्रमः। इति मेदिनी। ने, ४४॥ आक्षेपः। प्रत्युक्तिः। वाक्यारम्भः। इति हेमचन्द्रः। ६। १७८॥ उत्प्रेक्षालङ्कारस्यञ्जकम्। यथा,—

"मन्ये शङ्के ध्रुवं नूनं किंवा प्रायोऽनुवेद्मि च। ननु नाम हि जानामि उत्प्रेक्षाव्यञ्जकानि च॥"

इति काव्यचन्द्रिका॥

ननुच, अ, विरोधोक्तिः। इत्यमरः। ३। ४। १४॥ ननुचेति पदमिदं विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा। इति भरतः॥

नन्दः, पुं, (नन्दतीति। नन्द+घञ्।) विष्णुः। यथा। "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३। १४६। ६६॥ नरपतिभेदः। स तु महानन्दिसुतः क्षत्रियवंशजः। (यथा, भागवते। १२। १। ७—११।

"महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्रायास्तधार्मिकाः॥ स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः। शासिष्यति महापद्मो द्वितीय इव भार्गवः॥ तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः॥ नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ॥")

आनन्दः। निधिविशेषः। इति पुराणशब्दरत्नावली॥ गोपभेदः। स च श्रीकृष्णपिता। नन्दः पुरा द्रोणनामा वसुरासीत्। यथा,—

"द्रोणो वसूनां प्रवरो धरया सह भार्य्यया। करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह॥ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिः स्यात् परमा लोको ययाञ्जो दुर्गतिन्तरेत्॥ स्वस्तीत्युक्तः स भगवान् व्रजे द्रोणो महायशाः। जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत्॥"

इति श्रीभागवते। २०। ८। ४८—५०॥

वेशविशेषः। यथा,—

"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंश्या मातङ्गसुनिसम्मताः॥ दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः॥"

इति सङ्गीतदामोदरः॥

(रुद्रविशेषः। यथा, महाभारते। ७।२२।८५।

"रुद्रश्चैत्र विपुलो दिव्यो नन्दीश्वरस्तथा॥"

स्कन्दस्यानुचरविशेषः। इति महाभारते। ६। ४५। ६१॥ नागविशेषः। इति महाभारते। ५। १०१। १२॥ यक्षेश्वरस्यानुचरविशेषः। यथा, भागवते। ४। ७। २२।

"दृष्ट्वा गृहीताईणसादनोत्तमं यक्षेश्वरं विश्वसृजां परं गुरुम्। सुनन्दनन्दाद्यनुगैर्वृतं सदा एकन्तु प्रपेदे प्रयतः कृताञ्जलिः॥"

धृतराष्ट्रस्य पुत्राख्यामनुजतमः। इति महाभारतम्। १। ६७। ६६। मन्दिरागर्भजातो वसुदेवस्य पुत्रविशेषः। इति भागवतम्। ६। २४। ४८॥ क्रौञ्चद्वीपस्य वर्षपर्व्वतविशेषः। इति भागवतम्। ५। २०। २१॥ ख्यातः स्मार्त्तो दत्तकमीमांसायन्थप्रणेता। यथा,—

"अभिवन्द्य जगद्वन्द्यपदद्वन्द्वविनायकम्। पुत्रीकरणमीमांसां कुरुते नन्दपण्डितः॥")

नन्दकः, पुं, (नन्दयतीति। नन्द+ण्वुल्।) विष्णुखड्गः। इत्यमरः। १। १। ६०॥ (यथा, हरिवंशे। १२०। ४४।

"रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च। प्रहरावस्य गरुड़ं द्रुतो भूत्वा जनार्द्दन!॥")

भेकः। इति त्रिकाण्डशेषः॥ हर्षके कुलपालके च त्रि। इति मेदिनी। के, १०६॥ ख्यापिता आनन्दः। आनन्दकारकश्च॥ (नागविशेषः इति महाभारतम्। ५। १०१। ११॥ स्कन्दस्यानुचरविशेषः। इति महाभारतम्। ६। ४५। ६६॥ धृतराष्ट्रस्य पुत्रविशेषः। इति महाभारतम्। १। १८७। ३॥)

नन्दकिः, स्त्री, पिप्पली। इति शब्दचन्द्रिका॥

नन्दकी, [न्] पुं, (नन्दकः खड्गोऽस्यास्तीति। नन्दक+इनिः।) विष्णुः। यथा,—

"शङ्खश्चक्रगदी चक्री शार्ङ्गधन्वा गदाधरः॥"

इति महाभारते शान्तिपर्व्व॥

नन्दगोपिता, स्त्री, (नन्दाय हर्षाय गोपिता रक्षिता।) राधा। इति शब्दचन्द्रिका॥

(नन्दगोपः अस्या जातः। तारकादित्वात् इतच्।) नन्दगोपजभूम्यादिः॥

नन्दथुः, पुं, (नन्दनमिति। नन्द+"हिलोऽथुच्।" ३।३।८८। इति अथुच्।) आनन्दः। इति शब्दरत्नावली॥

नन्दनं, क्ली, (नन्दयतीति। नन्द+"नन्दिग्रहि-पचादिभ्यो ल्यूण्यिन्यचः।" ३।१।१३४। इति ल्युः।) इन्द्रवनम्। इत्यमरः। १।१।४८॥ (यथा, कुमारे। ९। ४१।

"अभिज्ञानप्रेदपालानां क्रियन्ते नन्दनद्रुमाः॥"

अष्टादशाक्षरवृत्तिविशेषः। अस्य विवरणन्तु छन्दःशब्दे द्रष्टव्यम्। आनन्दः। यथा, महाभारते। २। २५। ६।

"लब्धिवाशीर्तो विप्रान् प्रयाहि भरतर्षभ!। दुर्दमप्रहर्षाय सुहृदां नन्दनाय च॥")

हर्षके, त्रि। इति मेदिनी। ने, ८०॥ (यथा, महाभारते। ३। १४६। ५।

"पश्य दिथं सुचिरं भीम पुण्यमश्नुतमम्। गन्धसंस्थानसम्पन्नं मनसो मम नन्दनम्॥")

नन्दनः, पुं, (नन्दयतीति। नन्द+ल्युः।) पर्व्वत-भेदः। यथा, कालिकापुराणे ७५ अध्याये।

"तीरे तु चन्द्रशुक्लस्य नन्दनो नाम वै गिरिः। तस्मिन् वसति शुक्रस्तु कामाख्यासेवने रतः॥ मर्त्यभावं समासाद्य सर्व्वदेवेश्वरो हरिः। सेवितुं त्रिदशेशानीं सततं वर्त्तते नतः॥ चन्द्रशुक्लस्य तु गिरेर्नन्दनस्य तथा गिरेः। प्रतिदर्शं तथा चक्रं प्रदक्षिणयति त्रिधा॥ चन्द्रशुक्लजले स्नात्वा समारुह्य च नन्दनम्। आराध्य शुक्रं लोकेशं महापद्ममवाप्नुयात्॥"

(विभक्तिविशेषः। इति हेमचन्द्रः। ३। २६३॥ अत्रार्थे, पुं स्त्री, इति वाचस्पतिः॥ यथा, सुश्रुते कल्पस्थाने २ अध्याये।

"अम्लपाचकवर्गीयसौरीयककरघाटकरम्भ-नन्दनवराटकानि सप्त क्षत्क्षारनिर्य्यासविधाने॥"

स्कन्दस्यानुचरविशेषः। यथा, महाभारते। ९। ४५। ३६।

"वर्द्धनं नन्दनञ्चैव सर्व्वविद्याविशारदौ। स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ!॥"

सिद्धपुरुषविशेषः। यथा, भागवते। ४।६।३२।

"स नन्दगादयेमेऽथासिद्धेः प्राप्तेः संप्राप्त-विग्रहम्। उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम्॥"

जिनवरविशेषः। इति हेमचन्द्रः। २।३६२॥ वृत्त-सरविशेषः। यथा, बृहत्संहितायाम्। ८।३८।

"नन्दनोऽथ विजयो जयस्तथा मन्थनोऽथ परतश्च दुर्मुखः॥"

महादेवः। यथा, महाभारते। १३।१७।७५।

"नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः॥")

विष्णुः। यथा, "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३। १४९। ६९॥

नन्दनः, पुं, क्ली, (नन्दयतीति। नन्द+ल्युः।) सुतः। इति मेदिनी। ने, ८०॥ (यथा, रघुः। ३।४१।

"अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः॥")

मेकः। इति शब्दरत्नावली॥

नन्दनजं, क्ली, (नन्दने जायते इति। जन+डः।) हरिचन्दनम्। इति राजनिर्घण्टः॥ (नन्दनात् आनन्दाज्जायते इति।) हर्षजाते, त्रि॥ (पौत्रश्च॥)

नन्दनन्दनः, पुं, (नन्दस्य नन्दनः सुतः आनन्द-जनको वा।) श्रीकृष्णः। इति शब्दरत्नावली॥ तस्य लीलासंवरणान्ते तन्महिषीणां दस्यु-हस्तगतत्वकारणं यथा,—

व्यास उवाच।

"कः अद्यात् सगाङ्गेयान् द्रव्याणि सर्व्वकौर-वान्। त्वामीरेभ्यश्च भवतः कः अद्यात् पराभवम्॥ पार्थैतत् सर्व्वभूतस्य हरेर्लीलाविचेष्टितम्। त्वया यत् कौरवा व्यस्ता यदाभीरैर्भवान् जितः॥ यद्गोपा दस्युभिर्याच्य भवता ग्रोचिताः स्त्रियः। तदप्यहं यथावृत्तं कथयामि तवार्जुन!॥ अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्। बहून्नद्यगणान् पार्थ! गत्वा ब्रह्म सनातनम्॥ जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः। बभूव तत्र गच्छन्त्यो ददृशुस्तं वरस्त्रियः॥ रम्भातिलोत्तमाद्यास्तु घृताच्योऽथ सहस्रशः। तुष्टुवुस्तं महात्मानं प्रणम्यांश्च पाण्डव!॥ आकाशमयं सलिले जटाभारधरं मुनिम्। विनयावनताश्चेनं प्रणेमुः स्तोत्रतत्पराः॥ यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा। सर्व्वास्ताः कौरवश्रेष्ठ! वरिष्ठं द्विजसत्तमम्॥

श्रीअष्टावक्र उवाच।

प्रसन्नोऽहं महाभागा भवतीनां यदीप्सितं। मत्तस्तद्गृह्यतां सर्व्वं प्रदास्याम्यतिदुर्लभम्॥

श्रीपराशर उवाच।

रम्भातिलोत्तमाद्यास्तं वैदिकोऽस्मरसोऽब्रुवन्। प्रसन्ने त्वयसंप्राप्तं किमस्माकमिति द्विज!॥ ऊचुस्ताश्चाब्रुवन् विप्र! प्रसन्नो भगवान् यदि। तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र! पुरुषोत्तमम्॥

श्रीव्यास उवाच।

एवं भविष्यतीत्युक्ता प्रोत्तस्तार जलाच्मुनिः। ततस्तीर्त्वा च ददृशुर्विरूपं वक्रमरुधा॥ तद्दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत्। ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन!॥

श्रीअष्टावक्र उवाच।

यस्माद्विरूपरूपं मां मत्वा हासावमानवा। भवतीभिः कृता तस्मादेष शापं ददामि वः॥ मत्प्रसादेन भर्त्तारं लब्ध्वा तु पुरुषोत्तमम्। मच्छापोपहताः सर्व्वा दस्युहस्तं गमिष्यथ॥"

"एवमस्य सुनेः शापादष्टावक्रस्य कैशवम्। भर्त्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः॥ तत्रया नाथ वर्त्तध्वं शोकोऽस्मोऽपि हि पाण्डव!॥ तेनैवाखिलनाथेन सर्व्वमेतदुपसंहृतम्॥"

इति विष्णुपुराणे। ५। ३८। ६८—८५॥

नन्दनन्दिनी, स्त्री, (नन्दस्य नन्दिनी कन्या।) "नन्दगोपगृहे जाता यशोदागर्भसम्भवा।" इति मार्कण्डेयपुराणोक्तदेवीवचनात् तथात्वम्।) दुर्गा। इति शब्दरत्नावली॥

नन्दनमाला, स्त्री, (नन्दना आनन्दजनिका माला।) कृष्णप्रीतिजन्यालिकाविशेषः। यथा,

"भूय नन्दनमालान्तु कुरुते कृष्णवेश्मनि। देवदन्याहतेवर्षैः सेव्यते सुरनायकैः॥"

इति द्वारकामाहात्म्ये हरिभक्तिविलासधृत-विष्णुधर्म्मोत्तरम्॥

नन्दना, स्त्री, (नन्दयतीति। नन्दि+ल्युः। टाप्।) दुहिता। इति जटाधरः॥

नन्दनः, पुं, (नन्दत्यनेनेति। नन्द+"हृदिनन्दि-जीविप्राशिभ्यः विदाग्रिभि।" उणा ३।१२७। इति भक्प् सच्च णित्।) पुत्रः। राजा। मित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥

नन्दपालः, पुं, (नन्दं आनन्दं निधिविशेषं वा पालयतीति। पालि+अच्।) वरुणः। इति शब्दरत्नावली॥

नन्दपुत्री, स्त्री, (नन्दस्य पुत्री।) दुर्गा। इति त्रिकाण्डशेषः॥

नन्दयन्तः, त्रि, (नन्दयतीति। नन्दि+"तृभू-वहीति।" उणा ३। १२८। इति झच् सच्च णित्।) आनन्दजनकः। इति सिद्धान्तकौमुदी-धातुपाठदृत्तिः॥

नन्दा, स्त्री, (नन्दयतीति। नन्दि+अच्+टाप्।) गौरी। अलिञ्जरः। नादा इति भाषा। तिथि-विशेषः। ताश्च उभयपक्षयोः प्रतिपत्षष्ठीका-दश्यः। इति मेदिनी। दे, ६॥ (यथा,—

"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्।"

इति ज्योतिषम्॥)

नगनन्दा। इति शब्दरत्नावली॥ सम्पत्। इति हेमचन्द्रः॥ ✱॥ दुर्गाया नन्दानामकारणं यथा,—

"एवमुक्ता भवं ब्रह्मा पुनर्देवीं च चाब्रवीत्। त्वया देवि! महत् कार्य्यं कर्त्तव्यञ्चात्मदक्षि नः॥ भविष्यं महिषाख्यस्य असुरस्य विनाशनम्। एवमुक्ता ततो ब्रह्मा सर्व्वे देवाश्च पार्थिव!॥ यथागतास्ततो जग्मुर्देवीं स्थाप्य हिमे गिरौ। संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दा तु सा भवेत्॥"

इति वराहपुराणम्॥ ✱॥

अपि च।

"नन्दते सुरलोकेषु नन्दने वसतेऽथवा। हिमाचले महापुण्ये नन्दा देवी ततः स्मृता॥"

तस्या माहात्म्यादि यथा,—

"यथा गङ्गा नदीनान्तु उत्तमत्वे व्यवस्थिता। तद्वद्भगवती नन्दा उत्तमत्वेन संस्थिता॥ मासे भाद्रपदे देवि! शुक्लपक्षे व्रजेत् सदा। तस्येच्छा श्रावणाषाढे अन्यथा न कदाचन॥ तेषाञ्च चन्द्रनागस्तु पीड़ां कुर्य्यात् सुलोचने। न गच्छन्ति सुराः सिद्धाः किं पुनर्मानुषादयः॥ विषवातहताः केचित् विषवातप्रपीड़िताः।

विमुक्तपापा नरा देवि यान्ति देवाः प्रसादतः ॥"
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-प्रदाननामाध्याये ।
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्मला मथ्यमानेऽब्धौ उषःस्नानं शुभप्रदम् ॥"
अस्या दानविधिस्तु कामधेनुशब्दे द्रष्टव्यः ॥
धर्मपुत्रस्य हर्षस्य पत्नी । आनन्दस्वरूपतया एवास्यास्तथात्वम् । यथा, महाभारते । १ । ६६ । ३३ ।
"नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ॥"
ग्राकडीपान्तर्गततनदीविशेषः । यथा, मात्स्ये । १२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥"
"एताः सप्तमहाभागाः प्रतिवर्षं शिवोदकम् ।
भावयन्ति जगं सर्व्वं ग्राकडीपनिवासिनम् ॥"
हिमालयहृदविशेषः । यथा, विष्णुधर्म्मोत्तरे २ अध्याये ।
"नन्दायां तद्धिमालय धनदं शोभनं स्मृतम् ॥")
नन्दात्मजः, पुं, (नन्दस्य आत्मजः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
दुर्गायाम्, स्त्री ॥
नन्दिः, पुं, स्त्री, (नन्दयतीति । नन्दि + "सर्व्वधातुभ्य इन्" उणा ४ । ११७ । इति इन् ।) द्यूताङ्गम् । (भावे इन् ।) आनन्दः । (यथा, महाभारते । २ । १८ । ११ ।
"सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः ।
मातापितोर्नन्दिकरः शुक्लपक्षे यथा शशी ॥"
एतदर्थे स्त्रीलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ५ । १३५ । २० ।
"अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि ॥")
नन्दिकेश्वरे, पुं । इति मेदिनी । दे, ६ ॥ (यथा, महाभारते । १३ । १४ । २०५ ।
"पुरस्ताच्चैव देवस्य नन्दिं पश्यान्धवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शूकरम् ॥")
विष्णुः । यथा, महाभारते । १३ । १४६ । ७६ ।
"स्वधः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥"
(महादेवः । यथा, तत्रैव । १३ । १७ । ७४ ।
"निमिषस्तो निमिषश्च नन्दिर्नन्दिकरो हरिः ॥")
नन्दिकः, पुं, (नन्द आनन्दः हेतुतयास्यास्तीति । नन्द + ठन् ।) नन्दीश्वरः । इति शब्दरत्नावली ॥ (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ॥
नन्दिका, स्त्री (नन्द आनन्द अस्यस्यास्मिन्निति । ठन् ।) इक्षुक्रीड़ास्थानम् । इति शब्दमाला ॥ (नन्दा + स्वार्थे कन् । टापि अत इत्वम् ।) अलिक्षरः । इति शब्दरत्नावली ॥ षष्ठीतिथिः । यथा, तिथितत्त्वे ।
"कन्यासंस्थे रवौ शुक्ल शुक्लामारभ्य नन्दिकाम् ॥"
प्रतिपदेकादश्यौ च ॥

नन्दिकेश्वरः, पुं, (नन्दिक ईश्वरश्च ।) शिवद्वारपालः । तत्पर्य्यायः । नन्दी २ ग्रालङ्कायनः ३ ताण्डवतालिकः ४ । इति त्रिकाण्डशेषः ॥ नन्दीश्वरः ५ तण्डुः ६ । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १८२ । ८६ ।
"ततो नन्दिं महादेवः प्राह गम्भीरया गिरा ।
नन्दिकेश्वर ! संयाहि यतो वायो रथे स्थितः ॥")
उपपुराणविशेषश्च ॥
नन्दिघोषः, पुं, (नन्दिरानन्दजनको घोषो यस्य ।) अर्জ্জুনस्य रथघोषः । वन्दिजनघोषः । इति मेदिनी । षे, ५३ ॥ मङ्गलघोषश्च ॥ (हर्षघोषयुक्ते, त्रि । यथा, महाभारते । १३ । १०७ । १०५—१०८ ।
"पञ्चविंशे तु दिवसे यः प्राप्तेदेकभोजनम् ।
सदा द्वादशमासांस्तु पुष्कलं यानमाप्नुयात् ॥
सिंहव्याघ्रप्रयुक्तेषु मेघनिस्वनवादितैः ।
स रथैर्नन्दिघोषैश्च हृष्टतोऽनुगम्यते ॥
देवकन्यासमारूढैः काञ्चनैर्विमलैः शुभैः ।
विमानसुत्तमं दिव्यमास्थाय सुमनोहरम् ॥
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ।
सुधारसञ्चोपजीवन्नप्सरोपमसुत्तमम् ॥")
नन्दितरः, पुं, (नन्दिरानन्दजनकस्तरः ।) ध्रुवतरुः । इति भावप्रकाशः ॥
नन्दिनी, स्त्री, (नन्दयतीति । नन्दि + णिनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशे ।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥"
जटामांसी । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"जलदं नन्दिनी पेत्री मांसी लक्ष्म्यजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥")
उमा । गङ्गा । जगद्धात्री । वशिष्ठधेनुः । इति मेदिनी । ने, ८१ ॥ सा च धेनुः सुरभिकन्या । यथा, दिलीपं प्रति वशिष्ठवाक्यम् ।
"पुरा ग्रक्रतुपक्षाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
इमां देवीमनुव्रजां श्रुत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियार्थायां तस्यां त्वं साधुमाचरः ॥
अवज्ञानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां ग्रशाप सा ॥"
"इति वादिन एवास्य होतुराहुतिसाधनम् ।
अदित्सा नन्दिनीं नाम धेनुरावव्रते वनात् ॥"
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य लब्धवरो दिलीपो रघुनामानं वंशतिलकं पुत्रं लब्धवान् ॥ * ॥
द्रोणनाम्ना वसुः पत्नीवाक्यात् इमां श्रुत्वा वशिष्ठग्रापतः पृथिव्यां भीष्मनाम्ना विख्यात आसीत् । एततृकथा यथा, महाभारते ।१।६६ ।११-३६।
"अथ तद्वनमाजग्मुः कदाचिदृषरतर्षभ ! ।
पृथ्वाद्या वसवः सर्व्वे देवा देवर्षिसेवितम् ॥
ते सदारा वनं तच्च सचरन्तः समन्ततः ।
रेमिरे रमणीयेषु पर्व्वतेषु वनेषु च ॥

तत्रैकस्याथ भार्य्यां तु वसोर्वासवविक्रम ! ।
सचरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ॥
नन्दिनीं नाम राजेन्द्र ! सर्व्वकामदुघुत्तमाम् ॥
सा विस्मयसमाविष्टा श्रीलद्रविणसम्पदा ।
द्यवे वै दर्शयामास तां गां गोदशभेत्तमाम् ॥
स्वापीनाञ्च सुदोग्ध्रीञ्च सुवालधिखुरां शुभाम् ।
उपपन्नां गुणैः सर्व्वैः श्रीलेनाद्युत्तमेन च ॥
एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र पुरा पौरवनन्दन ! ॥
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रविक्रम ! ।
उवाच राजंस्तां देवीं तस्या रूपगुणान् वदन् ।
एषा गौरुत्तमा देवी वारुणैरभिसंवृता ।
ऋषेस्तस्य वरारोहे ! यस्येदं वनमुत्तमम् ॥
अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे ! ।
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥
एतत् श्रुत्वा तु सा देवी नृपोत्तम ! सुमध्यमा ।
तमुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ॥
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जितवती नाम रूपयौवनशालिनी ॥
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसम्पदा ॥
तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्वामरश्रेष्ठ ! त्वरितं गुरुवर्द्धन ! ॥
यावदस्याः पयः पीत्वा सा सखी मम मानद ! ।
मानुषेषु भवत्येका जरारोगविवर्জ্জिता ॥
एतत्कुरु महाभाग कर्त्तुमर्हस्यनिन्दित ।
प्रियं प्रियतरं ह्यस्मान्नास्ति मेऽन्यत् कथञ्चन ॥
एतत् श्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
एभ्राद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा तामथाहरत् ॥
तथा कमलपत्राक्षो नियुक्तो द्यौस्तदा नृप ! ।
ऋषेस्तस्य तपस्तीव्रं न शशाक गिरीक्षितुम् ।
हृता गौः सा तदा तेन प्रधानस्तु न तर्कितः ॥
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत् स तां तत्र सवत्सां कामनोत्तमे ॥
ततः स चरयामास वने तस्मिंस्तपोधनः ।
नाधिगच्छत्य मगयंस्तां गां सुनिवरादधीः ॥
ज्ञात्वा तथापनीतां तां वसुभिर्दिव्यदर्शनैः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥
यस्मान्मे वसवो ह्यद्य गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः ॥
एवं शशाप भगवान् वसूंस्तान् भरतर्षभ ! ।
वज्रं क्रोधस्य संग्राह्य आपवो मुनिसत्तमः ॥
श्रुत्वा च तान् महाभागस्तपस्येव मनो दधे ।
एवं स शप्तवान् राजन् ! वसूनष्टौ तपोधनः ।
महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः ॥
अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः ।
शप्तः स इति जानन्त ऋषिं तमुपचक्रमुः ॥
प्रसाद्यमानास्तन्नर्षिं वसवः पार्थिवर्षभ ! ।
नेमिरे न च तच्छान्तं प्रसादन्नृषिसत्तमात् ।
आपवात् पुरुषव्याघ्र ! सर्व्वधर्म्मविशारदात् ॥
उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः ।
अनुसंवत्सरात् सर्व्वे शापमोक्षमवाप्स्यथ ॥

अयन्तु यत्क्षते यूयं मया शप्ता: स वक्ष्यति ।
दौस्तो मानुषे लोके दीर्घकालं स्वकर्म्मणा ॥
नाशुतं तच्चिकीर्षामि युष्मान् क्रुद्धो यदब्रवम् ।
न प्रजास्यति चाप्येष मानुषेषु महामना: ॥
भविष्यति च धर्म्मात्मा सर्व्वशास्त्रविशारद: ।
पितु: प्रियहिते युक्त: स्त्रीभोगान् वर्ज्जयिष्यति॥")
तस्या: प्रभावो यथा,—
"वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
अपश्यच्छयतां श्रेष्ठो विश्वामित्रो महामना: ॥
ततो वशिष्ठो भगवान् कथान्ते मुनिसत्तम: ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
आतिथ्यं कर्त्तुमिच्छामि बलस्यास्य महाबल: ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यताम् ॥
वाढमित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
एवमुक्तो महातेजा वशिष्ठो जपतां वर: ॥
आजुहाव ततः प्रीत: कल्माषीं धुतकल्मषाम् ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥
एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ! ।
विदधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
सान्त:पुरजनो राजा सब्राह्मणपुरोहित: ।
भुक्त: परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
गवां शतसहस्रेण दीयतां शबला मम ।
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तम: ॥
विश्वामित्रेण धर्म्मात्मा प्रत्युवाच महीपतिम् ।
कारणैर्बहुभी राजन् दास्ये नन्दिनीं तव ॥
कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनि: ।
ततोऽस्य शबलां राजा विश्वामित्रस्तदाहरत् ॥
तस्या हुम्भारवोत्पन्ना: काम्बोजा रविसन्निभा: ।
ऊधसश्चाभिसंजाता: पह्लवा: शस्त्रपाणय: ॥
योनिदेशाच्च यवना: शकृद्देशाच्छकास्तथा ।
रोमकूपेषु च म्लेच्छास्तथा रामकिरातका: ॥
तैस्तन्निसूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं सार्त्वं सरथं रघुनन्दन ! ॥"
इति रामायणे आदिकाण्डम् ॥
(एतद्विवरणं महाभारते । १ । १७७ । अध्याये च विस्तरशो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे । १७६ । ७ ।
"मेध्यां गोकुलसम्भूतां नन्दगोपस्य नन्दिनीम् ॥"
आनन्दजननात् पत्न्यपि । यथा, महाभारते । १ । ६६ । १६ ।
"एवं गुणसमायुक्तां वसदे वसुनन्दिनीं ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दन: ॥"
"वसुनन्दिनी वसुप्रिया !" इति नीलकण्ठ: ॥
स्कन्दानुचरमातृगणविशेष:। यथा, महाभारते । ६ । ४६ । ५ ।
"शृणु मातृगणान् राजन् ! कुमारानुचरानिमान् ॥"
"वसुदामा सुदामा च विशोका नन्दिनी तथा ॥"
तीर्थविशेष: । यथा, महाभारते । ३ । ८४ । १४५ ।
"नान्दन्यान्च समासाद्य कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप । ॥"

याड़िमुनिमाता । इति हेमचन्द्र: । ३ । ५१६ ॥
चयोदशाक्षरवृत्तिविशेष: । अस्य विवरणं छन्द:-शब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३३ । ६६ ।
"शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ॥")
नन्दिनीतनय:, पुं, (नन्दिन्यास्तनय: ।) याड़िमुनि: । स च अभिधानकारक: । इति हेमचन्द्र: । ३ । ५१६ ॥
नन्दिनीसुत:, पुं, (नन्दिन्या: सुत: ।) याड़िमुनि: । इति जटाधर: ॥
नन्दिवर्द्धन:, पुं, (नन्दिं वर्द्धयतीति । वृध् + णिच् + ल्यु: ।) शिव: । (नन्दिं आनन्दं वर्द्धयतीति ।) पश्चात: । पुत्र: । इति मेदिनी । ने, २३८ ॥ (यथा, गो: रामायणे । २ । ६६ । १४ ।
"सुषुवे यममित्रघ्नं कौशल्या नन्दिवर्द्धनम् ॥")
मित्रम् । इति शब्दरत्नावली ॥ (विमानविशेष: । यथा, विश्वकर्म्मप्रकाशे । ६ अध्याये ।
"विमानं क्रन्दकं तद्वदनेकशिखरान्वित: ।
स चाष्टभूमिकस्तद्वत् सप्ततिर्नन्दिवर्द्धन: ॥"
निमिवंशीयविशेष: । इति भागवतम् । ६ । १३ । १४ ॥) आनन्दवर्द्धके, त्रि ॥ (यथा, हरिवंशे । ६८ । २६ ।
"कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन !।
दम्यतामेष वै शिघ्रं सर्षराजो विषायुध: ॥")
नन्दिवृक्ष:, पुं, (नन्दिरानन्दस्तज्जनको वृक्ष: । यद्वा, नन्द + इन् । तस्या: वृक्ष: ।) नन्दीवृक्ष: । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"नन्दिवृक्षो मेघपुष्पी तथा मेघविधानिका ।
चक्षुर्ब्रह्मनचक्षुष्य मेघपुष्पी यशस्विनी ॥")
नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।
"सुरा: क्षुब्धिदृशा देवा नन्दिनी दुन्दुभिर्मता ।
तेषाञ्च वादिनी नन्दी ईश्वरात् त्रिदशेश्वरी ॥"
नन्दी, [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनि: ।) गर्दभाण्डवृक्ष: । (यथा,—
"करीरं कुलकं नन्दी कुचेला शकुलादनी ।
कठिल्लं केम्बुकं प्रीतं सकोशातककर्कशम् ॥
तिक्तं पाके कटुग्राही वातलं कफपित्तजित् ॥"
इति वाभटे । १ । ६ अध्याये ॥)
वटवृक्ष: । इति मेदिनी । नै, ८२ ॥ शिवगणविशेष: । स च त्रिविध: । यथा,—
"आद्य: कनकनन्दी च गिरिकाख्यो द्वितीयक: ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रय: ॥"
इति वह्निपुराणे गणभेदनामाध्याय: ॥
शिवद्वारपाल: । स शिवांश: शालङ्कायनमुनिपुत्र: । यथा,—
"अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ! ।
तप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ॥
तं प्राप्स्यामि परं भावं ज्ञात्वा देवो महेश्वर: ।
सुन्दरत्वपरं रूपं दत्वा दृष्टिसुखावहम् ॥
शालङ्कायनपुत्रत्वं योगमायासुपाश्रित: ।

प्राप्नोति तं न जानाति दृष्टिघ्नं पार्श्वमाश्रित: ॥
मायायोगबलोपेतस्त्रयाणां वै मूलपाग्निधृक् ।
रूपवान् गुणवांश्चैव वपुषादित्यसन्निभ: ॥
स तं न ज्ञायते जातं ममैवाराधने स्थित: ।
अथ नन्दी प्रहस्याह महादेवाश्रयं मुनिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथ: ।
त्वदृष्टिपाताज्ञाप्तोऽस्मि पुत्रस्ते शृणु मां प्रभो ! ॥
त्वया तप: समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन ॥
विचार्य्येति तदाहं वै जातोऽस्मि स्वयमेव हि ॥"
इति धराहपुराणम् ॥
स एव कल्पान्तरे शिवांशजशिलादमुने: पुत्र: । यथा,—
"जजाप रुद्रमनिशं यत्र नन्दी महागण: ।
प्रीतस्तस्य महादेवो देवा सह पिनाकधृक् ॥
दत्त्वा चात्मसमानत्वं स्वयुवचनमेव च ।
अभूद्ऋषि: स धर्म्मात्मा शिलादो नाम धर्म्मवित्॥
आराधयन् महादेवं पुत्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
पूर्व्व: सोमौघविधृतो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशानं वरेण्यं गिरिजापतिम् ॥
अयोनिजं स्वयम्भूतं तया चैवोमया समम् ।
तथास्त्वित्याह भगवान् देवा सह महेश्वर: ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभु: ।
ततो विधत्तु: स्वां भूमिं शिलादो धर्म्मवित्तम: ॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वाऽदृश्यत शोभन: ।
सवर्णैकानलप्रख्य: कुमार: प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम् ।
कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलादं तात तातेति प्राह नन्दी पुन: पुन: ।
तं दृष्ट्वा नन्दिनं जातं शिलाद: परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिन: ॥"
इति कूर्म्मे ४० अध्याय: ॥
(द्विजप्रतिसाधर्म्मौलिककायस्थानामन्यतम: । यथा, घटककारिकायाम् ।
"गुह: कौत्तिर्यय: कुण्डुर्नन्दी श्रीलो धनुर्गुण: ॥")
नन्दीमुखी, स्त्री, (नन्दी मुखे यस्या: । ङीष् ।) तन्द्रा । इति हेमचन्द्र: । २ । २२७ ॥
नन्दीवृक्ष:, पुं, (नन्दि + वा ङीष् । नन्द्या: वृक्ष: । ~~नन्दीलताको वृक्षो वा ।~~)कोङ्कणदेशप्रसिद्धसुगन्धि वृक्षविशेष: । तत्पर्य्यायः । तूणीक:२ तूणिक:३ तूणी ४ पीतक: ५ कच्छप: ६ नन्दी ७ कुटेरक: ८ कान्त: ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तरक्तदाहशिरोऽग्निस्वेदकुष्ठनाशित्वम् । सुगन्धित्वम् । पृथिवीपर्य्यायश्च । इति राजनिर्घण्ट: ॥ * ॥ अश्वत्थाकार: क्षीरवान् स्वनामप्रसिद्धो वृक्ष: । इति भरत: ॥ तुं इति ख्यातो वृक्ष इति केचित् ॥ तत्पर्य्यायः । तुन्न: २ कुवेरक: ३ कुशि: ४ कच्छ: ५ कान्तलक: ६ । इत्यमर: । २ । ४ । १०८ ॥ तुशि: ७ । इति भरत: ॥ नन्दिवृक्ष: ८ कुशि: ९ तुन्द: १०

नन्दिकः ११ नन्दिवृक्षकः १२। इति शब्दरत्नावली ॥* ॥ मेषशृङ्गीवृक्षः। इति रत्नमाला ॥ स्थालीवृक्षः। इति भावप्रकाशः ॥

नन्दीशः, पुं, (नन्दी ईशश्च।) नन्दी। इति हेमचन्द्रः। २।१२४॥ भरतोक्तलालप्रभेदः। यथा,—

"सिंहनन्दननन्दीशचन्द्रविम्बद्वितीयकाः ॥"

तस्य लक्षणं यथा,—

"गो लघुर्गौर्लघुः प्रुतस्ताले नन्दीश्वरे मताः।"

इति सङ्गीतदामोदरः ॥

(नन्दिनो नन्दिगणस्य ईशः। इति विग्रहे शिवः ॥)

नन्दीश्वरः, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली ॥ नन्दीशतालः। इति सङ्गीतदामोदरः ॥ (नन्दी ईश्वरश्च।) शिवद्वारपालः। तस्य शिवपार्श्वदत्वकारणं यथा,—

"ततस्त्रेतायुगे काले नन्दी नाम महामुनिः।
आराधयिषुः शर्व्वं तपस्तेपे सुदारुणम् ॥
ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः।
उवाच च वचः साक्षात्तच्छिवं वरदः प्रभुः ॥
वरान् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने!॥
तांस्ते सर्व्वान् प्रयच्छामि दुर्लभानपि मानिष ॥
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गव।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥
यदि प्रीतोऽसि भगवन्! अशुक्रोऽयतया मम।
अमृत्युर्मो ह्यहं देव त्वयावश्यं सुराधिप!॥
यथा नान्यं भवेद्भक्तिस्त्वयि नित्यं महेश्वर!।
तथाहं भक्तिमिच्छामि सर्व्वभूताश्रये त्वयि ॥
श्रुत्वा तु वचनं तस्य नन्दिनः स महेश्वरः।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥
मद्गणधारी मत्तोऽप्यात्मजः सर्व्वगुणोत्तमः।
भविष्यसि न सन्देहो देवदानवपूजितः ॥
अनेनैव शरीरेण अजरामरवर्जितः।
दुष्प्राप्यैरमवाप्या ते देवैर्गाणेश्वरी गतिः ॥
पार्श्वदानां वरिष्ठश्च मामकानां द्विजोत्तम!।
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः ॥
अद्यप्रभृति देवाद्य! देवकार्य्येषु सर्व्वतः।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वर!॥
त्वामेवाभ्यर्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः।
मत्तः समभिवाञ्छन्नः प्रसादं पार्श्वदाधिप!॥
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरं किञ्चिदस्मरान्निशयोरिव ॥
द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप!।
वामेन विष्णुना वापि महाकालेन सर्व्वदा ॥"

इति वराहपुराणम् ॥

नन्दीसरः, [स्] स्त्री, (नन्द+इन्+वा ङीष्। नन्दये आनन्दार्थं यत् सरः।) इन्द्रसरोवरः। इति शब्दमाला ॥

नन्द्यावर्त्तः, पुं, (नन्दिजनक आवर्त्तो यत्र।) ईश्वरसमाधिविशेषः। इत्यमरः। २।२।१०॥ तस्य लक्षणं यथा,—

"दक्षिणानुगतालिन्द्वत्रयं यत् पश्चिमासुखम्।
पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति तत् ॥"

इति भरतधृतसाङ्गः ॥

तगरद्रुमः। इति विश्वः ॥ मत्स्यभेदः। तस्य गुणः। संग्राहित्वम्। कफपित्तविनाशित्वञ्च। इति राजवल्लभः ॥

नपुंसकं, क्ली, (न स्त्री न पुमान्। "नभाऽनपादिति।" ६। ३। ७५। इति निपातनात् क्लीपुंसयोः पुंसक-आदेशः।) क्लीवम्। इत्यमरः। २। ६। ३६॥ हिजड़ा इति भाषा॥ तस्य कारणं यथा,—

"उभयोर्म्मौनसामान्ये जायते वै नपुंसकम्॥"

इति सुश्रुतोक्तः॥ * ॥

(नपुंसको भवेदिति भाष्यप्रयोगात् पुंलिङ्गोऽपि भवति। तथा, च पद्यतन्त्रे। १। ३६४।

"परदेशभयाद्विना बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः॥")

नपुंसकगर्भस्य चिह्नं यथा,—

"नपुंसकं यदा गर्भो भवेन्नर्भोऽवृंदाक्षति।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत्॥"*॥

नपुंसकविशेषानाह।

"व्यासेक्यच्च सुगन्धिच्च कुम्भीकस्त्रैर्यकस्तथा।
अमी सशुक्रा बोद्धव्या अशुक्रो भूणसंज्ञकः॥"

तेषां लक्षणान्याह।

"पित्तोत्तु खल्पवीर्य्यत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राप्य लभते ध्वजोन्नतिमसंशयम्॥
यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स्त्रे गुदेऽब्जवर्य्याढ्यः स्त्रीषु पुंवत् प्रवर्त्तते।
य कुम्भीक इति ज्ञेयो गुदयोनिषु स स्मृतः॥
दृष्ट्वा यथायमन्येषां यथावे यः प्रवर्त्तते।
ईर्षकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः॥
यो भार्य्यायाश्चरौ मोहादङ्गनेव प्रवर्त्तते।
तच्च स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः॥"

इति भावप्रकाशः॥

(अस्य विवृतिर्यथा,—

"समयोर्म्मरजस्त्रेन नरः स्त्रीप्रकृतिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत्॥"

"समदोषबलेनापि प्रज्ञया विक्षतेरपि।
समो भवेदशक् शुक्रो नपुंसकसमुद्भवः॥"

इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)

नप्ता, [तृ] पुं, (न पतन्ति पितरो येनेति। पत+"नप्तृनेष्टृत्वष्टृति।" उणां २। ६६। इति तृच्प्रत्ययेन निपातनात् साधुः।) पुत्रकन्ययोः पुत्रः। नाति इति भाषा। तत्पर्य्यायः। पौत्रः २ सुतस्य सुतः ३। इति हेमचन्द्रः॥ (यथा, महाभारते। १। ८५। २०।

"कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो!।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यति॥")

नप्त्री, स्त्री, (नप्तृ+"यञ्ञेभ्यो ङीष्।" ४। १। ५। इति ङीष्।) पुत्रकन्ययोः पुत्री। नातिनी इति भाषा। तत्पर्य्यायः। पौत्री २ सुतात्मजा ३। इत्यमरः। २। ६। २६॥ नप्ता ४ पौत्रिका ५।

हरि रभसः॥ सुतस्य सुतायाश्चात्मजायां नप्त्री पुत्रस्य पुत्र्याश्चापत्यं पौत्री अतएव पौत्रोऽपि नप्ता। इत्यमरटीकायां भरतः॥

नभः, पुं, (नभति हिनस्ति कीटादीनिति। नभ हिंसायाम्+पचाद्यच्।) श्रावणमासः। इति शब्दरत्नावली॥ (द्वितीयमनोः स्वारोचिषस्य पुत्रविशेषः। इति हरिवंशे। ७। १४॥ तृतीयमन्वन्तरदेवविशेषः। इति च तत्रैव। ७। १६॥ कुशप्रपौत्रतनयस्य पुत्रः। इति च हरिवंशे। १५। २७॥)

नभः, [स्] क्ली, (नह्यते मेघैरिति। णह बन्धने+"नहेर्दिवि भश्च।" उणां ४। २१०। इति असुन् भश्चान्तादेशः।) आकाशम्। इत्यमरः। १। २। १॥ (यथा, मनुः। ४। ३७।

"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्॥")

नभःक्रान्तिः, [न्] पुं, (नभः क्रान्तं गगनाक्रमणमस्यस्येति। इनिः।) सिंहः। इति शब्दमाला॥

नभःप्राणः, पुं, (नभसः प्राण इव।) पवनः। इति त्रिकाण्डशेषः॥

नभःसत्, [द्] पुं, (नभसि सीदतीति। सद्+क्विप्।) देवः। इति त्रिकाण्डशेषः॥

नभःसरित्, स्त्री, (नभसः सरित् नदी।) स्वर्गङ्गा। इति त्रिकाण्डशेषः॥

नभःस्थितः, पुं, (नभसि स्थितः।) नरकविशेषः। इति हेमचन्द्रः। ५।२॥ आकाशस्थिते, त्रि॥

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्य्यः। इति शब्दमाला॥

नभश्चमसः, पुं, (नभश्चमस इव।) चन्द्रः। चित्रापूपः। इन्द्रजालम्। इति मेदिनी। से, ६८॥

नभश्चरः, पुं, (नभसि चरतीति। चर+टः।) पक्षी। विद्याधरः। (गन्धर्व्वादिः। यथा, रघुः। १८। ६।

"नभश्चरैर्गीतयशाः स शेषे
नभस्तलश्यामतनुं तनूजम्॥")

मेघः। वायुः। इति मेदिनी। रे, २०२॥ (आकाशचारिणि, त्रि। यथा, कुमारे। ५। २१।

"निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा॥")

नभसं, क्ली, (नभते व्याप्नोतीति। नभ+"अन्यविन्दमितमीति।" उणां। ३। ११७। इति असच्।) आकाशम्। यथा। नभसं खं मेघवर्त्म विहायसमिति निगमः॥ (पुं, दशममन्वन्तरीयसप्तर्षीणामन्यतमः। यथा, हरिवंशे। ७। ६७।

"अङ्गिरा नभसः सत्यं सत्येव परमर्षयः॥")

नभसङ्गमः, पुं, (नभसं गच्छतीति। गम+गमेः सुपीति खच्। ततो मुम्।) पक्षी। इत्यमरः। २। ४। ३४॥

नभस्तलं, पुं क्ली, (नभसस्तलम्।) गगनमण्डलम्। यथा, नैषधे। २। ६६।

"तद्दीधितिधारया रयाद्-
गतया लोकविलोकनामसौ।
छदहेमकपत्रिवालसत्
कपपाषाणनिभे नभस्तले॥"

नभस्यः, पुं, (नभसे मेघाय साधुः। नभस्+"तत्र साधुः।" ४। ४। ६८। इति यत्।) भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा, हरिवंशे। १५२। १।

"नभो नभस्येऽथ निरीक्ष्य मासि
कामस्तदा तोयदवृन्दकीर्णम्॥")

नभस्वान्, [त्] पुं, (आकाशाद्वायुरिति श्रुतेः नभः उत्पत्तिकारणत्वेनास्यास्तीति। नभस्+मतुप् मस्य वः।) वायुः। इत्यमरः। १। १। ६६॥ (यथा, रघुः। ४। ८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥")

नभाः, [स्] पुं, (नभति हिनस्ति कीटादीनिति। नभ+"सर्व्वधातुभ्योऽसुन्।" उणा। ४। १८८। इति असुन्।) श्रावणमासः। (यथा, रघुः। १२। २६।

"स लङ्घार तयोर्मध्ये मैथिलीं लोकशोभनः।
नभोनभस्ययोर्वृष्टिसवग्रह इवान्तरे॥")

मेघः। आकाशम्। वर्षाः। विसतन्तुः। पतद्ग्रहः। इति मेदिनी। से, २६॥ पलितशीर्षम्। इति धरणी॥

नभाकं, क्ली, (नभ्नाति व्याप्नोतीति। नभ+"पिनाकादयश्च।" उणा। ४। १५। इति आकः।) तमः। इत्युणादिकोषः॥

नभोगजः, पुं, (नभसि आकाशे गज इव।) मेघः। इति त्रिकाण्डशेषः॥

नभोगतिः, स्त्री, (नभसि गतिर्गमनम्।) आकाशगमनम्। यथा,—

"प्रह्लीनोद्भीनसक्थीनडयनानि नभोगतौ॥"

इति हेमचन्द्रः। ४। ३८४॥

नभोदुहः, पुं, (नभसः दोग्धि प्रपूरयति नद्यादिकमिति। दुह प्रपूरणे+कः।) मेघः। इति शब्दमाला॥

नभोद्वीपः, पुं, (नभसि द्वीप इव।) मेघः। इति शब्दमाला॥

नभोधूमः, पुं, (नभसि धूम इव।) मेघः। इति शब्दमाला॥

नभोनदी, स्त्री, (नभसो नदी।) स्वर्गङ्गा। इति भूरिप्रयोगः॥

नभोमणिः, पुं, (नभसो मणिरिव।) सूर्य्यः। इति हेमचन्द्रः। २। ८॥

नभोमण्डलदीपः, पुं, (नभोमण्डले दीप इव।) चन्द्रः। यथा, तिथ्यादितत्त्वे।

"नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः।
कलाभिर्व्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

नभोम्बुपः, पुं, (नभसः अम्बु जलं पिबतीति। पा+कः।) चातकपक्षी। इति हेमचन्द्रः। ४। ३६५॥

नभोरजः, [स्] क्ली, (नभसो रज इव।) अन्धकारः। इति शब्दमाला॥

नभोरेणुः, स्त्री, (नभसि रेणुरिव।) कृष्णभ्रटिका। इति त्रिकाण्डशेषः॥

नभोजयः, पुं, (नभसि लयो यस्य।) धूमः। इति शब्दरत्नावली॥

नभ्यं, त्रि, नभस्येदमित्यर्थे यञ्प्रत्ययः। नभसम्बन्धि। (नाभये हितम्। नाभि+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। "नाभि नभश्च।" इति नभादेशः। रथाङ्गम्। "नभ्योऽग्रेः। नभ्यमञ्जनम्। रथनाभावेवेदम्॥" इति सिद्धान्तकौमुदी॥)

नभ्राट्, [ज्] पुं, (न भ्राजते इति। भ्राज दीप्तौ+किप्।) मेघः। इति हेमचन्द्रः। २। ७८॥

नमः, [स्] क्ली, (नम शब्दनत्वोः+भावे असुन्।) नतिः। इत्यमरः। ३। ४। १८॥ (यथा, मार्कण्डेये।

"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"

क्लीवलिङ्गेऽपि दृश्यते। यथा, भागवते। ३। १३। ४२।

"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः॥")

त्यागः। हतम्। इत्युणादिकोषः॥ (क्ली, अन्नम्। इति निघण्टुः। २। ७॥ वज्रम्। इति निघण्टुः। २। २०॥ स्तोत्रम्। यथा, ऋग्वेदे। ७। १६। १।

"एना वो अग्निं नमसोर्जो नपातमा हुवे॥")

नमतः, पुं, (नम्यते इति। नम+"शृण्टृग्निजनीति।" उणा। ३। ११०। इति अतच्।) प्रसुः। धूमः। नटः। इत्युणादिकोषः॥

नमसः, पुं, (नमतीति। नम+"अत्यविधिमितमीति।" उणा। ३। ११७। इति असच्।) अनुकूलः। इत्युणादिकोषः॥

नमसित, त्रि, (नमः हतमिति। नमस्+"नमोवरिवः।" ३। १। १६। इति क्यच्। क्तः। "क्यस्य विभाषा।" ६। ४। ५०। इति वा यलोपः।) हतनमस्कारः। पूजितः। तत्पर्य्यायः। नमस्यितः २ अर्हितः ३ अपचायितः ४ अर्च्चितः ५ अपचितः ६। इत्यमरः। ३। १। १०१॥

नमस्कारः, पुं, (नमः शब्दस्य कारः करणं यत्र।) विधभेदः। इति शब्दचन्द्रिका॥ (नमः करणम्। नमस्+कृ+घञ्।) नतिः। स च त्रिविधः। कायिकः वाचिकः मानसिकश्च। यथा,—

"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः॥"

कायिकादिरपि त्रिविधो यथा,—

"प्रणम्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम्॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः॥
जानुभ्याञ्च क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम्।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः॥
पुटीकृत्य करौ शीर्षे दीयते यदथवा तथा।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते॥
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तैर्व्वा वाचिकस्त्रूत्तमः स्मृतः॥
पौराणिकैर्व्वैदिकैर्व्वा मन्त्रैर्या क्रियते नतिः।
मध्यमोऽसौ नमस्कारो भवेदाचनिकः सदा॥
यत्तु मानुषवाक्येन नमनं क्रियते सदा।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ॥
इष्टमन्त्रानिशंगतैर्मनोभिश्चिन्तविधं पुनः।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः।
प्रणाम इति विज्ञेयः स पूर्व्वप्रतिपादितः॥"

इति कालिकापुराणे ७० अध्यायः॥ * ॥

रात्रौ तन्निषेधो यथा,—

"रात्रौ नैव नमस्कुर्य्यात्तेनाग्नेरभिचारिका।
अतः प्रातःपदं दत्त्वा प्रयोक्तव्ये च ते उभे॥"

इति भट्टभारतमिति केचित्॥

नतिकरणम्। तच्च करशिरःसंयोगादि। स्वापकर्षबोधकव्यापारविशेषः। इति मुग्धबोधटीकायां दुर्गादासः॥

"सर्व्वे चापि नमस्कार्य्याः सर्व्वावस्थासु सर्व्वदा॥"

अभिवादयेदित्यनुवृत्तौ शूद्रः। नाप्रयतायाप्रयतश्च। इति शुद्धितत्त्वम्॥

"स्त्रियो नमस्या हन्ताश्च वयसा पञ्चमेरव ताः॥"

इति स्मृत्यर्थसारः॥ * ॥

"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात्।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ॥
ब्राह्मणञ्च गुरुं दृष्ट्वा न नमेद्यो नराधमः।
यावज्जीवनपर्य्यन्तमशुचिर्य्यवनो भवेत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

"देवतायतनं दृष्ट्वा दृष्ट्वा तु दक्षिणन्तथा।
नमस्कारं न कुर्य्यादयः प्रायश्चित्ती भवेन्नरः॥
सभायां यज्ञशालायां देवतायतनेषु च।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम्॥
उपविश्य नमेत् शूद्रो दीर्घायुर्ब्राह्मणो वदेत्।
स शूद्रो नरकं याति ब्राह्मणो यात्यधोगतिम्॥
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम्।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत्॥
पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गो जलस्थितः।
आमीः कर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत्॥"

इति कर्म्मलोचनम्॥ * ॥

"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः।
नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजायां विमातरम्॥"

यमः।

"अभिवादयतः पूर्व्वमाशिषं न प्रयच्छति।
यदुच्छ्वसति भवेत्तस्य तस्याङ्गं प्रपद्यते॥
स्वस्तीति ब्राह्मणो ब्रूयात् चायुष्मानिति राजनि।
वर्द्धतामिति वैश्येषु शूद्रे त्वारोग्यमेव च॥"

इति मलमासतत्त्वम्॥ * ॥

"गुरुपत्नीन्तु युवतीं नाभिवादयेत पादयोः।
कुर्वीत वन्दनं भूयो भगो वोऽहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्॥
अभिवादनशीलः स्यादित्यं वृद्धेषु धर्मतः।
असावहमो नामेति सम्यक् प्रणतिपूर्ब्बकम्॥
आयुरारोग्यविद्यार्थं तन्द्रादिपरिवर्ज्जितः।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने॥
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्ब्बाक्षरः प्लुतः।
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥
सव्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः प्रष्टव्यो दक्षिणेन तु दक्षिणः॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्ब्बमभिवादयेत्॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"*॥

अभिवादनीया गुरवो यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ।
बन्धुज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः॥
माता मातामही ज्यैष्ठी पितुर्मातुश्च सोदराः।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम्।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः।
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः।
गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः॥"

इति कूर्म्मपुराणे ११ अध्यायः॥ *॥

अथ सप्रधा नतिलक्षणानि।

"त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम्।
दण्डमष्टाङ्गसञ्चैव सप्रधा नतिलक्षणम्॥
ऐशानी वाथ कौबेरी दिक् कामाख्याप्रपूजने।
प्रशस्ता स्फटिलादौ च सर्ब्बमूर्त्तेषु सर्ब्बतः॥
त्रिकोणादियवस्थाच्च यदि पूर्ब्बसुखो यजेत्।
पश्चिमात् ग्राम्भवीं गत्वा वायव्यां निर्दिशेत्तदा॥
यदोत्तरासुखः कुर्य्यात् साधको देवपूजनम्।
तदा याम्यात्तु वायव्यां गत्वा कुर्य्यात्तु संस्थितिम्॥
दक्षिणाद्दायवीं गत्वा दिग्यं तस्माच्च ग्राम्भवीम्।
ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत्।
त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः॥१॥
दक्षिणाद्दायवीं गत्वा वायव्यात् ग्राम्भवीं ततः।
ततोऽपि दक्षिणं गत्वा तां त्यक्त्वायौ प्रविश्य च॥
अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम्।
उत्तराच्च तथामेयीं भ्रमणं द्वित्रिकोणवत्।
षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः॥२॥
दक्षिणाद्दायवीं गत्वा तस्माद्दाग्नेय दक्षिणम्।
गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः॥३॥
सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृतिसाधकः।
नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः॥४॥
त्यक्त्वा स्वमानगन्धानं पश्चात्कृत्वा नमस्कृतिः।
प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत्।
दण्ड इत्यच्यते देवैः सर्ब्बदेवौघमोददः॥५॥

पूर्ब्बवद्दण्डवद्भूमौ निपत्य हृदयेन तु।
चिबुकेन मुखेनाथ नासया ललिकेन च॥
ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात्।
तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः॥६॥
प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृतिः।
ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यान्नमस्कृतौ।
स उग्र इति देवीघैरुच्यते विष्णुदृष्टिदः॥७॥
नदानां सागरो यादृग्द्विपदां ब्राह्मणो यथा।
नदीनां जाह्नवी यादृग्देवानामिव चक्रधृक्।
नमस्कारेषु सर्ब्बेषु तथैवोग्रः प्रशस्यते॥
त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः।
चतुर्वर्गं लभेद्भक्तो न चिरादेव साधकः॥
नमस्कारो महायज्ञः प्रीतिदः सर्ब्बतः सदा।
सर्ब्बेषामपि देवानामन्येषामपि भैरव!॥
योऽसावुग्रो नमस्कारः प्रीतिदः सततं हरेः।
महामायाप्रीतिकरः स नमस्करणोत्तमः॥"

इति कालीपुराणम्॥

नमस्कारी, स्त्री, (नमस्कारस्तदञ्जलिरिव पत्रमस्त्रोचोऽस्यस्या इति। अच्। गौरादित्वात् ङीष्।) खदिरिकाप्राकः। लाजालु इति ख्यात इति केचित्॥ किन्तु रभसेन वराहक्रान्ता लज्जालुः भमङ्गा जलकारिकेति खदिरिकायाम्। सङ्कोचपत्री लज्जालुरिति लज्जालुकायां पठितम्। अञ्जलिरूपपत्रत्वादञ्जलेर्नमस्कारयञ्जकत्वात् नमस्कारग्रीवेव नमस्कारी। इत्यमरटीकायां भरतः॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम्।

"गण्डकाली नमस्कारी समङ्गा खदिरी क्षितिः॥")

नमस्यः, त्रि, (नमस्य नामधातुः+कर्म्मणि यत्।) नमस्कारयोग्यः। यथा,—

"स्त्रियो नमस्या वृद्धाश्च वयसा पल्लवेव ताः॥"

इति मलमासतत्त्वम्॥

नमस्या, स्त्री, (नमस्य+भावे यः। स्त्रियां टाप्।) पूजा। इत्यमरः। २। ७। ३५॥

नमस्यितः, त्रि, (नमःकृतमिति। नमस्+"नमोवरिवः इति।" ३। १। १६। इति क्यच्।) पूजितः। इत्यमरः। ३। १। १०१॥

नमितः, त्रि, नमोऽस्य जात इत्यर्थे इतच्प्रत्ययनिष्पन्नः। जातनमस्कारः। नामितः। यथा,—

"अपः शालग्रामाम्भवनगरिमाङ्कारसरसाः
सुधीः को वा कौपीरपि नमितमूर्द्धा न पिबति॥"

इति विदग्धमाधवनाटकम्॥

नमुचिः, पुं, (न मुञ्चतीति। मुच+इन्। स च कित्।) कन्दर्पः। दैत्यभेदः। इति मेदिनी। चे, १४॥ यथा,—

"कश्यपस्य दनुर्नाम भार्य्यासीद्दिजसत्तम!।
तस्यान्तु द्वौ सुतावास्तां सहस्राच्चाद्बलाधिकौ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः।
तृतीयो नमुचिर्नाम महाबलसमन्वितः॥"

इति वामने ५२ अध्यायः॥

(इन्द्र एनं निहतवान्। यथा, भारते। ९। ४३। ३३—३६।

"नमुचिर्वासवाज्जीतः सूर्य्यरश्मिं समाविशत्।
तेनेन्द्रः सख्यमकरोत् समयश्चेदमब्रवीत्॥
न चार्द्रेण न शुष्केण न रात्रौ नापि चाह्नि।
वधिष्यान्यसुरश्रेष्ठ! सखे! सत्येन ते शपे॥
एवं स समयं कृत्वा दृष्ट्वा नीहारमीश्वरः।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः॥
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वयात्।
भो मित्रघ्न! पापेति ब्रुवाणं शक्रमन्तिकात्॥")

नमुचिसूदनः, पुं, (नमुचिं दैत्यविशेषं सूदयतीति। सूदि+ल्युः।) इन्द्रः। इत्यमरः। १। १। ४६॥

नमेरुः, पुं, (नम्यते इति। नम+बाहुलकात् एरुः।) रुद्राक्षः। इति भूरिप्रयोगः॥ सुरपुन्नागः। इति राजनिर्घण्टः॥ (यथा, रघुः। ४। ७४।

"विष्वग्रमुनमेरूणां छायास्वध्यास्य सैनिकाः॥")

नमोगुरुः, पुं, (नमस्करणीयो गुरुः।) नमस्कारैर्गुरुः। ब्राह्मणः। इति काश्चित् ग्रन्थरत्नावली॥

नम्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ओष्ठ्यवर्गेऽयोषधः। नम्रति। इति दुर्गादासः॥

नम्रः, त्रि, (नमतीति। नम+"नमिकम्पीति।" ३।२।१६७। इति रः।) नतः। इति हलायुधः॥ (यथा, पञ्चतन्त्रे। २। १८६।

"यन्नम्रं सरलञ्चापि तच्चापत्सु न सीदति।
धनुर्मित्रं फलञ्चास्य दुर्लभं शुद्धवंशजम्॥")

नम्रकः, पुं, (नम्र इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) वेतसः। इति भावप्रकाशः॥ (नम्र एव। स्वार्थे कन्।) नते, त्रि॥)

नय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, नयते। इति दुर्गादासः॥

नयः, पुं, (नीयतेऽनेनेति। नी+"अरच्।" ३।३। ५६। इत्यच्।) नीतिः। तत्पर्य्यायः। नायः २ इत्यमरः। १।२।६॥ (यथा, पञ्चतन्त्रे। १।३८५।

"कथञ्चिन्न विकल्प्यन्ते विद्वद्भिश्चिन्तिता नयाः॥")

द्यूतविशेषः। इति मेदिनी। ये, ३४॥ नैगमादेः। इति हेमचन्द्रः॥ न्याये नेतरि च त्रि। इति ग्रन्थरत्नावली॥

नयनं, क्ली, (नीयते ऽहिविषयोऽनेनेति। नी+करणे ल्युट्।) चक्षुः। इत्यमरः। २। ६। ८३॥ (यथा, मार्कण्डेये। १८। ४०।

"नीलोत्पलाभनयनां पीनश्रोणिपयोधराम्॥")

नी च प्रापणे इत्यस्माद्भावे ल्युट्प्रत्ययः॥ प्रापणम्। (आनयनम्। यथा, हरिवंशे। १२७। ११।

"तत्त्वं हितञ्च देवेश! श्रूयतां वदतो मम।
नयनं पारिजातस्य द्वारकां मम रोचते॥")

नयनी, स्त्री, (नीयतेऽनयेति। नी+करणे ल्युट्+ङीप्।) कनीनी। इति शब्दचन्द्रिका॥

नयनोत्सवः, पुं, (नयनयोरुत्सवो यस्मात्।) प्रदीपः। इति शब्दरत्नावली॥ चक्षुरुत्सवश्च॥

नयनोपान्तः, पुं, (नयनयोरुपान्तः प्रान्तभागः।) अपाङ्गः। इति राजनिर्घण्टः॥

नयनौषधं, क्ली, (नयनयोरौषधम्।) पुष्पकासीसम्। इति हेमचन्द्रः। ४। १२३॥

नयपीठी, स्त्री, (नयस्य पीठीव।) अष्टकाङ्गम्। इति चिकाख्यशेषः॥ छक् इति भाषा॥

नयविशारदः, पुं, (नये नीतौ विशारदो विज्ञः।) नीतिशास्त्रज्ञः। यथा,—

"षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः।
सान्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः॥"

इति मात्स्ये ८६ अध्यायः॥

नरं, क्ली, (नृणाति प्रापयति आनन्दमिति। नृ प्रापणे+अच्।) रामकर्पूरलवणम्। इति मेदिनी। रे, ५२॥

नरः, पुं, (नृणातीति। नृ+अच्।) मनुष्यः। इत्यमरः। २। ६। १॥ (यथा, मनुः। १। ६६।

"बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥")

पुरुषः। इति राजनिर्घण्टः॥ (यथा, देवीभागवते। ५। २। १४।

"यदा कदापि दैत्येन्द्र! नार्य्यास्ते मरणं ध्रुवम्।
न नरेभ्यो महाभाग! स्मृतिस्ते महिषासुर!॥")

विष्णुः। (महादेवः। यथा, महाभारते। १३। १७। ११५।

"गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः॥")

अर्জ্জুनः। इति मेदिनी। रे, ५२॥ (नरसुनेरंशजातत्वादस्य तथात्वम्।) शुक्रः। इति लीलावती॥*॥ अथ नरजन्मकारणम्। "पितुः शुक्रोत्तरो नरः॥" अन्यच्च। सुखबोधे।

"विषमायां तिथौ क्षिप्रं कुर्य्याद्बीजन्तु कन्यकाम्।
समायां पुरुषं नूनं केचिदाहुर्मनीषिणः॥
चतुरश्रीकृतिस्थान्ते गोजन्मा तत्परं नरः।
ततस्तु ब्राह्मणश्च स्यादभयं नात्र संशयः॥"

इति पाद्मोत्तरखण्डे १५ अध्यायः॥

(स्वनामख्यातो हरेरंशभूतो धर्म्मपुत्रःऋषिः। यथा, देवीभागवते। ४। ५। १५।

"हरेरंशौ स्थितौ तत्र नरनारायणावृषी।
पूर्णं वर्षसहस्रन्तु चक्राते तप उत्तमम्॥"

अस्य विवरणन्तु तत्रैव विशेषतो द्रष्टव्यम्॥*॥ देवयोनिविशेषः। यथा, विष्णुपुराणे। १। ५। ५८।

"नरकिन्नरराक्षांसि वयःपशुमृगोरगान्॥")

नरकः, पुं, (नृणाति क्लेशं प्रापयतीति। नृ+"क्लृनिदिभ्यः संज्ञायां वुन्।" उणां। ५। ३५। इति वुन्।) देवरात्रिप्रभेदः। इत्युणादिकोषः॥ (नरस्य मनुष्यस्य कं शिरो यत्र।) दैत्यविशेषः। स पृथिव्या गर्भे वराहदेवाज्जातः। यथा,—

"रसातलाया गोत्राया गर्भे वीर्य्येण पोषितः।
यतो जातस्ततो भूतो देवपुत्रोऽपि सोऽसुरः॥"

तस्य नामकारणं यथा,—

"मानुषस्य शिरस्तच्च मृतस्य प्राप्य बालकः।
खशिरस्तच्च विन्यस्य रुदंस्तस्थौ चयं तदा॥
नरस्य शीर्षे खशिरो निधाय स्थितवान् यतः।
तस्मात्तस्य मुनिश्रेष्ठो नरकं नाम वै ददात्॥"

तस्य राज्यं यथा,—

श्रीभगवानुवाच।

"करतोया सदागङ्गा पूर्व्वभागावधिश्रिता।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा॥
अत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना॥
अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्व्वे क्रीड़ार्थमायाता रहस्यं देशमुत्तमम्।
अत्र श्रीः सर्व्वतोभद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्मुखश्चैत्र संसर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते त्वमभिषिक्तो मया स्वयम्।
हतदारः सहामात्यो राजा भूत्वा महाबल!॥"

तस्य महिषी माया यथा,—

"ततो विदर्भराजस्य पुत्रीं मायाख्यां हरिः।
पुत्रार्थे वरयामास नरकस्य समां गुणैः॥
तासुद्वाह्य कृषीकेशस्तस्मिन् पुरवरे स्वयम्।
तया समं स्वतनयं राजत्वेनाभ्यषेचयत्॥"

तस्य पुत्रा यथा,—

"ऋतुमत्यां च जायायां कालेन नरकः क्रमात्।
भगदत्तं महावीर्य्यं मदवन्तं सुमालिनम्॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः।
महासत्त्वान् महावीर्य्यान् देवैरप्यैर्दुरासदान्॥"

इति कालीपुराणे ३६ अध्यायः॥

पापिनां यातनास्थानम्। तत्सङ्ख्या यथा,—

"पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुचिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥
अष्टाविंशतिं विख्यातास्ततो नरककोटयः।
नरकाणामधस्तात्तु घूमः कालाग्निसम्भवः॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

तत्पर्य्यायः। गारकः २ निरयः ३ दुर्गतिः ४। इत्यमरः। १। १। ६। १॥ *॥ नरकसंख्या यथा,—

"ऊर्द्ध्वं नरकाः शक्र! कोट्यः पञ्चाशदायताः।
चत्वारिंशत्तथा सप्त तेषां प्रधानं तन्निबोधत॥"
ऊर्द्ध्वे पाताले कालाग्निरुद्रस्य पुरोर्द्ध्वं।
"अवीचिः कृमिभक्षश्च तथा वैतरणी महान्।
कूटशाल्मलिरुक्षासयुग्मपर्व्वतरौरवम्॥
निरुच्छ्वासः पूतिमांसस्तप्तलोहाग्नितं जलम्।
क्रकच्छेदस्तथा पङ्कः कषायसमुतापिवम्॥
पूतिपूर्णस्तथा मेदस्तप्तश्च रुधिरं वसां।
सामिसस्तप्तपुरुषश्च तीक्ष्णासिश्च नपुंसकः।
लौहतप्तस्त्रियो भीमा अङ्गारराशिकोपरि।
कुम्भीपाकः क्षुरस्तोयः सञ्जीवनसुतापनम्॥
कालसूत्रं महापङ्कः शीतोष्णं क्षुरमेव च।
अम्बरीषं तथा घोरं महारौरवसंज्ञकः॥
सूचीमुखेक्षुयन्त्रञ्च तैलं तप्तञ्चपुस्तथा।
असिपत्रं तथा शाल्मं भूमिर्वागपहारिका॥"

इति देवीपुराणम्॥

नरकागामिनो यथा,—

यम उवाच।

"न गच्छन्ति नरा घोरान् बहवोऽधर्म्मनिर्म्मितान्।
वधांश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन!॥
विस्तरेण तु तत् सर्व्वं ब्रवीमि मुनिसत्तम!।
श्रूयतां तन्महाभाग! श्रुत्वा चैवोपधारय॥
नाभिचिन्नरकं याति न सतृप्तो न भूमिदः।
शूरश्च श्रुतवर्षी च वेदानाञ्चैव पारगः॥
पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः।
अजिताश्चाश्रुताश्चैव स्वामिभक्ताश्च ये नराः॥
तिलं गाञ्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः॥
स्वदारनिरता दान्ताः परदारविवर्ज्जकाः।
सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकाः॥
न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम्।
यातनास्थानसंपूर्णं हाहाप्रतिभयस्वनम्॥
ज्ञानवन्तो द्विजा ये च ये च विद्यापरं गताः।
उदासीना न गच्छन्ति स्वार्थे च हता नराः॥
न गच्छन्त्यत्र दातारः सर्व्वभूतहिते रताः।
शुश्रूषका मातृपित्रोर्न गच्छन्ति न संशयः॥
अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्यवस्थिताः।
पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः॥
यथोक्तं यजमानाश्च सत्रयाजिन एव च।
चातुर्म्मास्यकरा ये च ये द्विजा आहिताग्नयः॥
गुरुचित्तानुपालाश्च क्षतिनो मौनयन्त्रिताः।
नित्यस्वाध्यायिनो दान्ताः सदा सभ्याश्च ये नराः॥
मानवान् पूजयन्तो वै आत्मभावेन भाविताः।
अपर्व्वमैथुना ये च न गच्छन्ति द्विजोत्तमाः॥
ब्राह्मणा अमरत्वञ्च प्राप्नुवन्ति न संशयः।
निराशाः सर्व्वकामेभ्यो निराशाः सुजितेन्द्रियाः।
न गच्छन्ति हि तं घोरं यत्र ते पापकर्म्मिणः॥"

इति वराहपुराणम्॥ *॥

नरकगामिनो यथा,—

नारद उवाच।

"दुष्कर्म्माण्यपि वक्ष्यामि नरकं यैः प्रयान्ति हि।
सर्व्वेष्वेव तु कार्य्येषु देवपूर्व्वेषु भूमिप!॥
हन्ति पुत्रान् पशून् क्षत्रान् ब्राह्मणातिक्रमः कृतः।
गुर्व्वर्थं वा भयार्त्तो वा वर्ज्जयित्वा महीपते!॥
योऽनृतं कथयन्ति स्म ते वै निरयगामिनः।
प्रपाणाञ्च सभानाञ्च संक्रमाणाञ्च भारत।
आगाराणाञ्च भेत्तारो नरा निरयगामिनः॥
ये परस्वापहर्त्तारः परस्यानाञ्च नाशकाः।
सूचकाश्च परेषां हि ते नरा नरकानुगाः॥
सूचकाः सन्धिभेत्तारः परदत्तप्रणीविनः।

व्रतघ्नाश्च मित्राणां ते वै निरयगामिनः ॥
पाषण्डा दूषकाश्चैव समयानाञ्च दूषकाः ।
ये प्रत्यवस्थितास्चैव ते वै निरयगामिनः ॥
वृत्तिच्छेदं गृहच्छेदं दारच्छेदञ्च पार्थिव ! ।
मित्रच्छेदं तथाघ्राया: कृत्वा नरकगामिनः ॥
विषमस्यवहाराश्च विषमाश्चैव वृद्धिषु ।
लाभेषु विषमाश्चैव नरा निरयगामिनः ॥
क्षताग्नं क्षतनिर्व्वेशं क्षतभक्तं क्षतश्रमम् ।
भेदैर्ये व्यवकर्षन्ति ते वै निरयगामिनः ॥
द्यूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः ।
प्राणिहिंसाप्रसक्ताश्च ते वै निरयगामिनः ॥
वेदविक्रयिणश्चैव वेदानाञ्चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥
केशविक्रायका राजन् ! विषविक्रायकाश्च ये ।
क्षीरविक्रायकाश्चैव ते वै निरयगामिनः ॥
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्म्मभिश्च जीवन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां गवाञ्चैव कन्यानाञ्च महामते ! ।
येऽन्तरं यान्ति कार्य्येषु ते वै निरयगामिनः ॥
शस्त्रविक्रायकाश्चैव कर्त्तारश्च महीपते ! ।
शल्यानां धनुषाञ्चैव ते वै निरयगामिनः ॥
शिलाभिः शस्त्रभिर्व्वापि श्वभ्रैर्व्वा मनुजर्षभ ! ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥
श्रान्तान् दान्तानथ प्रश्नान् दीर्घकालसहोषितान् ।
त्यजन्ति कृतलक्ष्या ये ते वै निरयगामिनः ॥
बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥
इत्येतत् कथितं राजन् ! धर्म्माधर्म्मविनिर्णयम् ।
विज्ञेय पुरुषः कर्म्म धर्म्ममेव समाचरेत् ॥"

इति पाद्मे स्वर्गखण्डे ३४ अध्यायः ॥

नरकविशेषगामिपापिनो यथा,—

"कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदृतं वक्ति स नरो याति रौरवम् ॥
भ्रूणहा पुरुषज्ञश्च गोघ्नश्च सुनिश्चितम् ! ।
यान्ति ते नरके रोधे यश्चोच्छ्वासनिरोधकः ॥
सुरापो ब्रह्महा हर्त्ता सुवर्णस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥
राजन्यवैश्यहा तालं तथैव गुरुतल्पगः ।
तप्तकुम्भे स्वयंगामी हन्ति राजभटांश्च यः ॥
साध्वीविक्रयकृच्छूद्रयाजकः केशविक्रयी ।
तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत् ॥
'केशरी अयः ।'
क्षुधा सुतांश्चापि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोशे नराधमः ॥
वेददूषयिता यश्च वेदविक्रायकश्च यः ।
अगम्यागामी यश्च स्यात्ते यान्ति रौरवं द्विज ! ॥
चौरो विमोदे पतति मर्य्यादादूषकस्तथा ।
देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः ॥
स याति क्षमिभक्षे वै क्षमीशे च दुरिष्टकृत् ॥

पिण्डदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः ।
लालाभक्षे स याम्यस्य किङ्करस्य च रोधके ॥"
'पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते ।'
करोति कर्णिनो यस्तु यस्तु खड्गादिलक्षणः ॥
प्रयान्ति ते विशसने नरके भृशदारुणे ।
असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे ॥
अयाज्ययाजकश्चैव तथा नक्षत्रसूचकः ।
वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः ॥
'वेगी साहसकारी । पुत्रादीन् वर्ज्जयित्वा एक एव मिष्टान्नभुक् ।'
लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥
माञ्जारकुक्कुटच्छागान् श्वराहविहङ्गमान् ।
पालयन्नरकं याति तमेव द्विजसत्तम ! ॥
रङ्गोपजीवी कैवर्त्तः कुक्कुटाग्नी गरदस्तथा ।
क्षत्री माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥
'पत्नी जीवति जाराज्ञात: कुक्कुः तदन्नभोजी माहिषो महिषोपजीवी । यद्वा,—
महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम् ।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः ॥
इति स्मृतिः ॥
पर्व्वकारी धनादिलोभेनापर्व्वसु अमावास्यादिक्रियाप्रवर्त्तकः ।'
अगारदाही मित्रघ्नः ग्रामनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते क्षया यान्त्यशौचाश्च कुहकाजीविनश्च ये ।
असिपत्रवनं याति वनच्छेदी वृथैव यः ॥
औरभ्रिको ह्यगव्याधो वह्निज्वाले पतन्ति वै ।
यान्त्येते द्विज ! तत्रैव यत्रापाकेषु वह्निदः ॥
व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ।
सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवास्वप्नेषु स्वप्न्ति ये नरा ब्रह्मचारिणः ।
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शूलशोथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥
तत्रैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति वै ॥
अधःशिरोभिर्द्रश्यन्ते नारकैर्द्दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधःपश्यन्ति नारकान् ॥
स्थावराः क्रमयोऽलाश्च पक्षिणः पशवो नराः ।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥
सहस्रभागाः प्रथमा द्वितीयाद्युक्रमास्तथा ।
सर्व्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापक्षयादयाति नरकं प्रायश्चित्तपराङ्मुखः ॥"

इति विष्णुपुराणे । २ । ६ । ७—३२ ॥

अपि च ।

"कथयामि विचित्राणां कर्म्मणां विविधा गतीः ।

ता: शृणुष्व महाराज ! याः श्रुत्वा मोक्षमाप्नुयात् ॥
परवित्तं परापत्यं कलत्रं पारकञ्च यः ।
हरते बुद्धिमोहेन सोऽन्धे तमसि मज्जति ॥
कालपाशेन संबद्धो यमदूतैर्भृशबलैः ।
तामिस्रे पात्यते तावत् यावद्वर्षसहस्रकम् ॥
तत्र ताड़नसम्भूताः कुर्व्वन्ति यमकिङ्कराः ।
पापभोगेन सम्भक्तस्ततो योनिन्तु शौकरीम् ॥
तत्र भुक्त्वा महादुःखं मानुषत्वं गमिष्यति ।
रोगादिचिह्नितं तत्र दुर्यशोग्राहकं सकम् ॥
भूतद्रोहं विधायैवं केवलं सकुटुम्बकम् ।
पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत् ॥
ये नरा इह जन्तूनां वधं कुर्व्वन्ति वै मृषा ।
ते रौरवे निपात्यन्ते खाद्यन्ते रुरुभिर्भृशम् ॥
यः खादरार्थं भूतानां वधमाचरति स्फुटम् ।
महारौरवसंज्ञे तु पात्यते स यमाज्ञया ॥
यो वै निजन्तु जनकं ब्राह्मणं हन्ति पापकृत् ।
कालसूत्रे महादुष्टे योजनायतविस्तृते ॥
यावन्ति पशुरोमाणि गवां हिंसं करोति यः ।
तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः ॥
यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत् ।
करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः ।
स शूकरमुखैर्दुष्टैः पीड्यते यमकिङ्करैः ॥
पश्चाद्दासु योनीषु जायते पापसञ्चये ।
ब्राह्मणानां गवां ये तु द्रव्यं वित्तं तथाल्पकम् ॥
वृत्तिं वा हरते मोहाद्भ्रम्यन्ति खलवान्नराः ।
ते परत्रान्धकूपे च पात्यन्ते च महार्हिताः ॥
योऽर्थं स्वयमुपाहृत्य मधुरत्वात्ति लोलुपः ।
न देवाय न गुरुवे ददाति रसनातुरः ॥
स पतत्येव नरके क्रमिभोजनसंज्ञके ।
अनापदि नरो यस्तु हिरण्यादीनपाहरेत् ॥
ब्रह्मस्वं वा महादुष्टः स दंशे नरके पचेत् ।
यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढधीः ॥
मनसा कल्पितं द्रव्यं विदुषे यो ददाति न ।
स पुमान्नरकं याति यावदिन्द्राश्चतुर्दश ॥
पश्चाद्दासु योनीषु जायते वर्षशूकरः ।
दानानि वाड़वे दत्त्वा पुनः शुद्धो भविष्यति ॥
वाचा दत्तं मनोदत्तमिति साधू वदेदृषिः ।
कल्प्यन्ते पितरस्तस्य नरकाय मुमुक्षुकाः ॥
वाचा दत्तं मनोदत्तं दत्तं प्राणिक्षुधोदकम् ।
एतद्दत्तमदत्तं स्यात् जिह्वासृत्पाटयेदृषभः ॥
स याम्यते तैलतप्ते कुम्भीपाकेऽतिदारुणे ॥
यो नगम्यां स्त्रियं मोहाद्योषिद्भावाच्च कामयेत् ।
तं तया किङ्करः मूर्ख्या परिवङ्क्ष्य कुर्व्वते ॥
ये बलाद्देहमर्य्यादां लुम्पन्ति खलमोहिताः ।
ते वैतरण्यां पतिता मांसशोणितभक्षकाः ॥
वृषलीं यः स्त्रियं कृत्वा तया गार्हस्थ्यमाचरेत् ।
पूयोदे निपतत्येव महादुःखसमन्वितः ॥
ये दम्भनाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने ।
वेष्टसे नरके मूढाः पतन्ति यमताड़िताः ॥
ये सवर्णां स्त्रियं मूढाः पाययन्ति स्वतेजसम् ।

रेतःकुल्यासु ते पाल्या रेतःपानेषु तत्पराः ॥
ये चौरा वह्निना दग्धा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥
कूटसाक्ष्यं वदत्यद्धा पुरुषः पापसम्भृतः ।
पारकीयन्तु द्रव्यं यो रक्षति प्रसभं बली ॥
स वीचिनरके पापे ह्यवाक्शृङ्गः पतत्यधः ।
तत्र दुःखं महद्भुङ्क्ते पापिष्ठां योनिमाव्रजेत् ॥
यो नरो रसनास्वादात् सुरां पिबति मूढधीः ।
तस्यायस्यति लोहस्य रसं धर्म्मस्य किङ्करः ॥
यो गुरूनवमन्येत स्वविद्याचारदर्पितः ।
स मृतः पात्यते घोरसंज्ञके ऽधोमुखः पुमान् ॥
विश्वासघातं कुर्व्वन्ति ये नरा धर्म्मनिष्कृताः ।
शूलप्रोते तु नरके पात्यन्ते बहुयातनाः ॥
येनैतं श्रुता रामकथा न परोपहृतिः कृता ।
तेषां सर्व्वाणि दुःखानि भवन्ति नरकान्तरे ॥
अत्र यस्य सुखं भूयस्तस्य स्वर्गं इतीर्य्यते ।
ये दुःखिनो रोगयुता नरकादागतास्तु ते ॥"

इति पाद्मे पातालखण्डे ४८ अध्यायः ॥

(अथ महारौरवादिनरकाख्यानम् । यथा, मार्कण्डेये । १२ । ३-३६ ।

पुत्र उवाच ।

"रौरवस्ते समाख्यातः प्रथमं नरको मया ।
महारौरवमज्ञन्तु शृणुष्व नरकं पितः ! ॥
योजनानां सहस्राणि सप्त पञ्च समन्ततः ।
तत्र ताम्रमयी भूमिरधस्तस्य हुताशनः ॥
तप्तायतप्ता सर्व्वाशा प्रोद्दिद्दीप्तसमप्रभा ।
विभात्यति महारौद्रा दर्शनस्पर्शनादिषु ॥
तस्यां वहुः करास्याश्च पक्षाश्चैव यमानुगैः ।
क्षिप्यते पापलब्धेषु लुठमानः स गच्छति ॥
काकैर्व्वृकैर्व्वृकोलूकैर्व्वृश्चिकैर्म्मशकैस्तथा ।
भक्ष्यमाणस्तथा गृध्रैर्दुर्गं मार्गं विलङ्घ्यते ॥
दह्यमानः पितर्मातर्भ्रातस्तातेति चाकुलः ।
वदत्यसकृदुद्विग्नो न शान्तिमधिगच्छति ॥
एवं तस्मान्नरेमोंचो ह्यतिक्रान्तैरवाप्यते ।
वर्षायुतायुतैः पापं यैः कृतं दुरनुद्विभिः ॥
तथान्यस्तु तमो नाम सोऽतिशीतः स्वभावतः ।
महारौरववद्घोरस्तथा स तमसा वृतः ॥
शीतार्त्तास्तत्र धावन्तो नरास्तमसि दारुणे ।
परस्परं समासाद्य परिरभ्याश्रयन्ति च ॥
दन्तास्तेषाञ्च भज्यन्ते शीतार्त्तिपरिकम्पिताः ।
क्षुत्तृष्णा प्रबला तत्र तथैवान्येष्युपद्रवाः ॥
हिमखण्डवहो वायुर्भिनत्त्यस्थीनि दारुणः ।
मज्जाहृग्गलितन्तस्मादश्नुवन्ति क्षुधान्विताः ॥
लेलिह्यमाना भाष्यन्ते परस्परसमागमे ।
एवं तत्रापि सुमहान् क्लेशग्रस्तमसि मानवैः ॥
प्राप्यते ब्राह्मणश्रेष्ठ ! यावद्दुष्कृतसंचयः ॥
निकृन्तन इति ख्यातस्ततोऽन्यो नरकोत्तमः ।
तस्मिन् कुलालचक्राणि भ्राम्यन्त्यविरतं पितः ! ॥
तेष्वारोप्य निकृत्यन्ते कालसूत्रेण मानवाः ॥
यमानुगाङ्गुलिस्थेन शापादतलमस्तकम् ।
नचैषां जीवितभ्रंशो जायते द्विजसत्तम ! ॥
छिन्नानि तेषां पूयन्ति खण्डान्येकं व्रजन्ति च ।
एवं वर्षसहस्राणि छिद्यन्ते पापकर्म्मिणः ॥
तावद्यावदशेषं वै तत्पापं हि क्षयं गतम् ।
अप्रतिष्ठश्च नरकं शृणुष्व गदतो मम ॥
यत्रस्थैर्नारकैर्दुःखमसह्यमनुभूयते ।
तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यतः ॥
दुःखस्य हेतुभूतानि पापकर्म्मकृतां नृणाम् ।
चक्रेष्वारोपिताः केचिद्भ्राम्यन्ते तत्र मानवाः ॥
यावद्वर्षसहस्राणि न तेषां स्थितिरन्तरा ।
घटीयन्त्रेषु चैवान्यो वह्नस्तोये यथा घटी ॥
भ्राम्यन्ते मानवा रक्तसृक्किरन्तः पुनः पुनः ।
असेमुखविनिष्क्रान्तैर्नेत्रैश्चैरसुविलम्बिभिः ॥
दुःखानि ते प्राप्नुवन्ति यान्यसह्यानि जन्तुभिः ॥
असिपत्रवनं नाम नरकं शृणु चापरम् ।
योजनानां सहस्रं यो ज्वलदग्न्यातपावनिः ॥
तप्ताः सूर्य्यकरैश्चण्डैर्यत्रातीव सुदारुणैः ।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः ॥
तन्मध्ये च वनं रम्यं क्षिप्तपत्रं विभाव्यते ।
पत्राणि तत्र खड्गानां पतन्ति द्विजसत्तम ! ॥
श्वानश्च तत्र सबलाः खनन्त्यायुतशोभिताः ।
महावक्त्रा महादंष्ट्रा व्याघ्रा इव भयानकाः ॥
ततस्तद्वनमालोक्य शिशिरच्छायमद्भुतः ।
प्रयान्ति प्राणिनस्तत्र तीव्रवट्परिपीड़िताः ॥
हा मातर्हा तात ! इति क्रन्दन्तोऽतीव दुःखिताः ।
दह्यमानाङ्घ्रियुगला धरणीस्थेन वह्निना ॥
तेषां गतानां तत्रासिपत्रपातोसमीरणः ।
प्रवाति तेन पात्यन्ते तेषां खड्गान्यधोपरि ॥
ततः पतन्ति ते भूमौ ज्वलत्पावकसञ्चये ।
लेलिह्यमाने चान्यत्र व्याघ्राग्नेयमहौतसे ॥
सारमेयास्ततः शीघ्रं घातयन्ति शरीरतः ।
तेषामङ्गानि रक्तानामनेकान्यतिभीषणाः ॥
असिपत्रवनं तात ! मयैतत् कीर्त्तितं तव ।
अतः परं भीमतरं तप्तकुम्भं निबोध मे ॥
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृताः ।
ज्वलदग्निचयोद्दृप्ततेलायश्चूर्णपूरिताः ।
तेषु दुष्कृतकर्म्माणो यान्ति क्षिप्ता ह्यधोमुखाः ॥
क्वाथ्यन्ते विस्फुटद्गात्रगलच्चर्म्मजलाविलाः ।
स्फुटत्कपालनेत्रास्थिक्षिद्यमाना विभीषणैः ॥
यमैरुत्पाद्य सुथ्यन्ते पुनस्तेष्वेव वेगितैः ।
पुनः सिमसिमायन्ते तैलेनैवं व्रजन्ति च ॥
क्रव्यीभूतैः शिरोगात्रचक्षायुमांसत्वगस्थिभिः ।
ततो यान्यैर्नरैराशु दर्व्वया घट्टनक्षिप्तैः ॥
क्षतावर्त्ते महातैले भक्ष्यन्ते पापकर्म्मिणः ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः ! ॥")

नरककुण्डं, क्ली, (नरकस्य कुण्डम् ।) यातनास्थानम् । तदृथा, यम उवाच । "नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च । नानापुराणभेदेन नामभेदानि तानि च ॥ विस्तृतानि गभीराणि क्लेशदानि च जीविनाम् । भयङ्कराणि घोराणि हे वत्से ! कुत्सितानि च ॥ षड्शीतिश्च कुण्डानि संयमन्याञ्च सन्ति च । निबोध तेषां नामानि प्रसिद्धानि श्रुतौ सति ॥" इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ । २८ अध्यायौ ॥

तत्र नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः	
वह्निकुण्डम्	१	कटुवाचा वान्धवदग्धकृत्	१
तप्तकुण्डम्	२	ब्राह्मणातिथिभोजनाप्रदः	२
क्षारकुण्डम्	३	निषिद्धदिने वस्त्रे क्षारसंयोजकः	३
विट्कुण्डम्	४	ब्रह्मदत्तापहारकः	४
मूत्रकुण्डम्	५	परतडागं खनित्वोत्सर्ज्जकः	५
श्लेष्मकुण्डम्	६	एकाकी मिष्टभोजी	६
गरकुण्डम्	७	पिष्टमाल्यगुरुभार्य्याद्यघोषकः	७
दूषिकाकुण्डम्	८	अतिथिं दृष्ट्वा वक्रचक्षुःकारी	८
वसाकुण्डम्	९	विप्राय दत्त्वा तद्द्रव्यमन्यस्मै दाता	९
शुक्रकुण्डम्	१०	परस्त्रीगामी परपुंगामिनी च	१०
असृक्कुण्डम्	११	गुर्व्वादिताड़कस्तद्रक्तपातकारकश्च	११
अश्रुकुण्डम्	१२	हरिसङ्गीतरुदन्नायन्नृदभक्तोपहासकृत्	१२
गात्रमलकुण्डम्	१३	ग्रन्थदूषणचित्तः खलताकारी च	१३
कर्णविट्कुण्डम्	१४	बधिरोपहासकृत्	१४
मज्जकुण्डम्	१५	लोभात् स्वभोजनार्थं जीवहन्ता	१५

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः	
मांसकुण्डम्	१६	अर्थलोभात् कन्याविक्रायकः	१६
नखकुण्डम्	१७	श्राद्धोपवासादिषु संयमत्यागी	१७
लोमकुण्डम्	१८		१८
केशकुण्डम्	१९	सकेशग्रपार्थिवश्वलिङ्गार्चकः	१९
अस्थिकुण्डम्	२०	विष्णुपदे पिण्डपिण्डादाता	२०
ताम्रकुण्डम्	२१	गुर्व्विणीगामी	२१
लौहकुण्डम्	२२	ऋतुस्नातावीर्य्योरन्नभुक्	२२
तीक्ष्णकण्टककुण्डम्	२३	कटुवाचा स्वामिताड़िका	२३
विषकुण्डम्	२४	विषेण जीवनहन्ता	२४
धर्म्मकुण्डम्	२५	सधर्म्महरणेन देवद्रव्यस्वर्णहृत्	२५
तप्तसुराकुण्डम्	२६	शूद्रानुज्ञातः शूद्रान्नभोजी	२६
प्रतप्ततैलकुण्डम्	२७	दर्शेन घृतताड़कः	२७
कुन्तकुण्डम्	२८	कुन्तलौहवर्द्धिश्चौर्य्यहन्ता	२८
क्षमिकुण्डम्	२९	मत्स्यासृग्घिप्रो घृतामांसासृक् हरिनैवेद्यासृक् च	२९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः
पूयकुण्डम्	३०	शूद्रयाजी तत्श्राद्धभुक् तच्छवदाही च ब्राह्मणः ३०
सर्पकुण्डम्	३१	श्रीकृष्णपदचिह्नमस्तकस्थ सर्पस्य हन्ता ३१
मग्नकुण्डम्	३२	विधिं दत्त्वा क्षुद्रजन्तुहन्ता ३२
दंशकुण्डम्	३३	विधिं दत्त्वा जीवहन्ता ३३
गरलकुण्डम्	३४	मक्षिकां हत्वा मधुग्राही ३४
वज्रदंष्ट्रकुण्डम्	३५	व्यदण्डविप्रयोर्हन्ता ३५
वृश्चिककुण्डम्	३६	अर्थलोभात् प्रजादण्डकृत् ३५
शूरकुण्डम्	३७	शूलधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः ३७
शूलकुण्डम्	३८	३८
खड्गकुण्डम्	३९	३९
गोलकुण्डम्	४०	अल्पदोषेण कारायां प्रजाबन्धनकृत् ४०
नक्रकुण्डम्	४१	जलादुत्थितनक्रादि हन्ता ४१
काककुण्डम्	४२	कामेन परस्त्रीवधः श्रोत्रास्यद्रष्टा ४२
सन्दानकुण्डम्	४३	स्वर्णचौरः ४३
वालकुण्डम्	४४	ताम्रलौहचौरः ४४
वज्रकुण्डम्	४५	देव-देवद्रव्ययोश्चौरः ४५
तप्तपाषाणकुण्डम्	४६	देव-द्विजयो रौप्य-गो-वस्त्राणां चौरः ४६
तीक्ष्णपाषाणकुण्डम्	४७	देव-द्विजयोः पित्तल-कांस्यपात्रचौरः ४७
लालाकुण्डम्	४८	वेश्यान्नभुक् तद्वृत्तिजीवी च ४८
मसीकुण्डम्	४९	म्लेच्छसेवी मसीजीवी च ब्राह्मणः ४९
चूर्णकुण्डम्	५०	देव-द्विजयोः ग्रस्तताम्बूलासनचौरः ५०
चक्रकुण्डम्	५१	विप्रद्रव्यं हृत्वा चक्रकारी ५१
वक्रकुण्डम्	५२	विप्र-बान्धवयोर्व्यक्रताकारी ५२
कूर्मकुण्डम्	५३	हरिशयने कूर्ममांसभुक् ब्राह्मणः ५३
ज्वालाकुण्डम्	५४	देवद्विजयोर्घृततैलादिहृत् ५४
भस्मकुण्डम्	५५	५५
दग्धकुण्डम्	५६	देवद्विजयोर्ह्रस्वीमन्यतैलद्रव्याणामपहर्त्ता ५६
तप्तशूर्म्मीकुण्डम्	५७	बलखलत्वादिना परभूमिहरः ५७
असिपत्रकुण्डम्	५८	अर्थलोभात् खड्गेन जीविच्छेदी नरघाती च ५८
क्षुरधारकुण्डम्	५९	ग्रामनगरादिदाहकृत् ५९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः
सूचीमुखकुण्डम्	६०	परकर्मे सुखं दत्त्वा परनिन्दकः परदोषग्राही वेदब्राह्मणनिन्दकश्च ६०
गोधामुखकुण्डम्	६१	गृहं भित्त्वा वस्तुगोच्छागमेषचौरः ६१
नक्रमुखकुण्डम्	६२	सामान्यद्रव्यचौरः ६२
गजदंशकुण्डम्	६३	गजतुरगनरचौरः ६३
गोमुखकुण्डम्	६४	जलपिबहोवारकः ६४
कुम्भीपाककुण्डम्	६५	गो-स्त्री-भित्तु-भ्रूण-ब्रह्महा अगम्यागामी दीक्षासन्ध्याहीनस्तीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारो वृषलीपतिश्च ६५
कालसूत्रकुण्डम्	६६	वेश्यान्नभुक् तत्संसर्गी च ६६
अवटोदकुण्डम्	६७	कुलटादिगड्वेश्यागामी द्विजः ६७
अरुन्तुदकुण्डम्	६८	चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी ६८
पांशुभोजकुण्डम्	६९	एकस्मै वाक्प्रदत्तकन्याया अन्यस्मै दाता ६९
पाशवेष्टकुण्डम्	७०	दत्तापहारी ७०
शूलपोतकुण्डम्	७१	अभक्ष्या शिवलिङ्गपूजकः ७१
प्रकम्पनकुण्डम्	७२	विप्रदण्डकृत् तत्कम्पफलदायी च ७२
उल्कामुखकुण्डम्	७३	सकोपवदना स्वामिनि कटुवादिनी ७३
अकूपकुण्डम्	७४	शूद्रभोग्या ब्राह्मणी ७४
वेधनकुण्डम्	७५	वेश्या। सा च पञ्चघट्पुंगमनाङ्गवति ७५
दण्डताडनकुण्डम्	७६	युङ्गी। सा च सप्तपुंगमनाङ्गवति ७६
जालवह्निकुण्डम्	७७	महावेश्या। साचाष्टाधिकपुंगमनाङ्गवति ७७
देहचूर्णकुण्डम्	७८	कुलटा। सा च पुंद्वयगमनाङ्गवति ७८
दलनकुण्डम्	७९	खेरिणी। वृषली। सा चतुःपुंगमनाङ्गवति ७९
शोषणकुण्डम्	८०	धृष्टा। पुंश्चली। सा च त्रिपुंगमनाङ्गवति ८०
कषकुण्डम्	८१	सवर्णपरदारी ८१
सर्पकुण्डम्	८२	ब्राह्मणीगामी क्षत्रियो वैश्यश्च ८२
ज्वालामुखकुण्डम्	८३	करे तुलसीगङ्गाजलदेवशिलाश्च कृत्वा प्रतिज्ञाकृत्यदपालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च ८३
जिह्वकुण्डम	८४	नित्यक्रियाहीनो देववागनास्तिको मन्दोपहासी च ८४
धूमान्धकुण्डम्	८५	देवविप्रयोर्द्वेषहारी ८५
नागवेष्टनकुण्डम्	८६	वेददेवव्रतिकारी ब्राह्मणोद्वेषापारी रसादिविक्रयी च ब्राह्मणः ८६

नरकजित्, पुं, (नरकं तन्नाम्ना विख्यातमसुरं जयतीति। जि + क्विप्। तुक् च।) विष्णुः। इति त्रिकाण्डशेषः॥

नरकदेवता, स्त्री, (नरकस्य अधिष्ठात्री देवता।) निरयदेवी। तत्पर्य्यायः। अलक्ष्मीः२ निर्ऋतिः३ कालपर्णी४। इति शब्दरत्नावली॥

नरकसुक्तः, त्रि, (नरकात् सुक्तः।) नरकागतः। यथा,—

"नरकात् प्रतिसुक्तस्तु पापयोनिषु जायते।
प्रतितात् प्रतियत्नाच्च खरयोनिं व्रजेद्बुधः॥
नरकात् प्रतिसुक्तस्तु क्षमिर्भवति पातकी।
उपाध्यायं बलीकन्तु हत्वा स्त्री भवति द्विजः॥
नज्ञायां मनसा वाञ्छंस्तद्गृहं वाप्यसंशयम्।
गर्दभो जायते जन्तुस्तत्रैवोपमानकृत्॥
शत्रोरितरमाक्रम्य शारिका संप्रजायते।
पितरौ पीड़यित्वा तु कच्छपत्वञ्च जायते॥
भर्तुः पिण्डसुपात्रस्थो हित्वान्यानि च सेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते क्षमिः।
अक्षयकश्च नरकान्मुक्तो भवति राक्षसः॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः॥
परदाराभिमर्शी तु दृको घोरेऽभिजायते।
भ्रातृभार्य्याप्रसङ्गे तु कोकिलो जायते नरः॥
गुर्वादिभार्य्यागमनाच्छूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् क्षमिः॥
देवतापितृविप्राणामदत्वा योऽन्नमश्नुते।
प्रसक्तो नरकादापि वायसः स प्रजायते॥
म्लेच्छभाक्चवमानाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रञ्च ब्राह्मणीं गत्वा क्षमियोनौ प्रजायते॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
क्षतघ्नः क्षमिकः कीटः पतङ्गो वृश्चिकस्तथा॥
अगम्यं पुरुषं हत्वा नरः संजायते खरः।
क्षमिः स्त्रीवधकर्त्ता च बालहन्तावजायते॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः।
हृत्वान्नञ्चैव मार्ज्जारस्तिलहृच्चैव मूषिकः॥
घृतं हृत्वा च नकुलः काको मद्गुरमांसिघम्।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः॥
अपो हृत्वा तु पापात्मा वायसः संप्रजायते।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः॥
कुक्कुन्दरिः सुगन्धान् गन्धान् वंशं हृत्वा गृध्रो भवेत्।
बकः कलापहरश्चे काष्ठहृत् काष्ठकीटकः॥
पुष्पापहृद्धरिद्रस्तु पङ्गुर्यवापहृन्नरः।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च शातकः॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान्।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत्॥

एष एव क्रमो दृष्टो गोसुवर्णादिहारिणाम्।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून्॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः संप्रजायते।
परनिन्दाकृतघ्नत्वं परमर्म्मावघातनम्।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम्।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम्॥
निश्चित्य वचनं नृणां कार्पण्यञ्च वृथा बुधः।
उपलक्षणादि जानीयात् सूक्ष्मान्नरकादपु॥"
प्रसङ्गात् स्वर्गागतलक्षणमप्याह।
"दया भूतेषु संवादः परलोकं प्रतिक्रिया।
सत्यं भूतहितं चोक्तिर्वेदप्रामाण्यदर्शनम्॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः॥
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम्॥"
इति गारुडे कर्म्मविपाकः २२६ अध्यायः॥

नरकस्था, स्त्री, (नरके तिष्ठतीति। स्था+"सुपि स्थः।"३।२।४। इति कः।) वैतरणी नदी। इति हेमचन्द्रः। ४। १५२॥ निरयस्थिते, त्रि। यथा,
"नरकस्थोऽपि देहं वै न पुनस्त्वक्तुमिच्छति॥"
इति श्रीभागवतम्॥

नरकान्तकः, पुं, (नरकस्य तन्नाम्नो ख्यातस्यासुरस्य अन्तकः।) विष्णुः। इति पुराणम्॥ (यथा, सङ्कुन्दमालायाम्। ७।
"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम्।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥")

नरकामयः, पुं, (नरकः आमय इव यस्य।) प्रेतः। इति शब्दरत्नावली॥ (नरकरूप आमयः।) निरयरोगश्च॥

नरकीलकः, पुं, (नरेषु कीलक इव निश्चलत्वात्।) गुरुघ्नः। तत्पर्य्यायः। गुरुहा २। इति हेमचन्द्रः। ३। ५२२॥

नरगणः, पुं, (नरस्य गणो यस्मात्।) नवनक्षत्रविशेषः। तज्जातजनः। यथा,—
"हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादितिश्चार्द्रा रोहिणि चोत्तराणि भरणी पूर्व्वाणि भानि त्रयम्।
श्रेष्ठाश्लेषविशाखकृत्तिकवरुणातक्षमित्रामघाः
कथ्यन्ते मनिभिर्यथाक्रमवशाद्देवा नरा राक्षसाः॥"
इति दीपिका॥
अस्य फलम्। यथा, कोष्ठीप्रदीपे।
"मानुष्ये मृदुकर्म्मसङ्गतमनाः स्त्रीलान्वितो धीयुतः॥"
(नराणां गणः।) नरसमूहः॥

नरङ्गः, पुं, (नृणाति प्रापयतीति। नृ+"प्रतादेरङ्गच्।" इति उणादिकोषटीकाधृतसूत्रात् अङ्गच्।) वरस्त्रकः। नाराङ्गा इति भाषा॥ (नृः पुरुषस्य अङ्गम्।) मेहने, क्ली। इत्यादिकोषः॥

नरदेवः, पुं, (नरो देव इव।) राजा। इति हलायुधः॥ (यथा, हरिवंशे। ३२। १२।
"रेतोधाः पुत्र उन्नयति नरदेव! यमक्षयात्॥")

नरनारायणौ, पुं, (नरश्च नारायणश्च तौ।) ऋषिविशेषौ। तावेव श्रीकृष्णार्জ्जुनौ सम्भूतौ। इति महाभारतम्॥ (यथा. देवीभागवते। ४। ५। १३।
"नरनारायणौ चैव चैरतुस्तप उत्तमम्।
प्राहेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे॥")
तयोरुत्पत्तिर्यथा,—
"अथ चित्तमयतत्तस्य स्वाभं गत्वा जनार्दनः।
ततः सर्व्वं न्यायामास वराहवपुषो हितम्॥
तसो देहपरित्यागं कर्त्तुं समभवद्यदा।
तदा दंष्ट्राघातेन नरसिंहं महाबलम्॥
सरभो भगवान् भर्गो द्विधा मध्ये चकार ह।
नरसिंहे द्विधाभूते नरभागेन तस्य तु॥
नर एव समुत्पन्नो दिव्यरूपो महाऋषिः।
तस्य पद्मास्यभागेन नारायण इति श्रुतः॥
अभवत् स महातेजा मुनिरूपो जनार्दनः।
नरो नारायणश्चोभौ सृष्टिहेतू महामती॥
ययोः प्रभावो दुर्द्धर्षः शास्त्रे वेदे तपःसु च॥"
इति कालिकापुराणे २६ अध्यायः॥
कल्पभेदौ तौ धर्म्मपुत्रौ। यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्ता
नारायणो नर इति सुतपःप्रभावः।
दृष्ट्वात्मनो भगवतो नियमावलोपं
देवस्त्रियः कृतनता घटितुं न शेकुः॥"
इति श्रीभागवते। २। ७। ६॥
(अनयोर्विशेषविवरणन्तु देवीभागवते ४ स्कन्धस्य ५ अध्यायमारभ्य द्रष्टव्यम्॥)

नरपतिः, पुं, (नरान् पातीति। पा+डतिः। नराणां पतिर्वा।) राजा। इति शब्दरत्नावली॥ (यथा, रघुः। २। ७५।
"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञो
गुरुभिरभिनिविष्टं लोकपालानुभावैः॥")

नरप्रियः, पुं, (नराणां प्रियः।) नीलवृक्षः। इति राजनिर्घण्टः॥ नरस्य प्रियवस्तुनि, त्रि॥

नरभूः, स्त्री, (नराणां मनुष्याणां भूर्भूमिः।) भारतवर्षः। इति त्रिकाण्डशेषः॥ नरोत्पत्तिश्च॥

नरभूमिः, स्त्री, (नराणां मनुष्याणां भूमिः।) भारतवर्षः। इति शब्दरत्नावली॥

नरमानिनी, स्त्री, (नरं पुरुषमिव मन्यते इति। मन+णिनिः+ङीप्।) असमृद्धनारी। इति त्रिकाण्डशेषः॥

नरमानिका, स्त्री, (नरं मन्यते या। मन+ण्वुल्। टापि अत इत्वम्।) नरमानिनी। इति शब्दरत्नावली॥

नरमाला, स्त्री, (नराणां तन्मुण्डानां माला।) मनुष्यमुण्डमाला। यथा, मार्कण्डेये। ८७। ६।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥"

नरमालिनी, स्त्री, (नरस्येव माला केशसमूहो सुखेऽस्यस्या इति। इनिः+ङीप्। यद्वा,

नरमानिनी प्रयोगानुरोधात् निपातनेन नस्य लत्वम्।) असमृद्धनारी। इति हेमचन्द्रः। ३। १६५॥ (नरस्य तन्मुण्डस्य मालास्त्यस्या इति।) नरमालायुक्ता॥

नरमेधः, पुं, (मिध हिंसायाम्+भावे घञ्। नराणां पुरुषाणां मेधो हिंसनं यत्र।) नरवधात्मकयज्ञविशेषः॥ (यज्ञोऽयं वाजसनेयसंहितायाम् ३०—३१ अध्यायवीर्य्यितः। तत्र अधिकार्य्यादिकं ३० अध्याये वेददीपे उक्तम्। यथा,—
"ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति। सर्व्वभूतान्यतिक्रम्य स्थानमतिष्ठा। चैत्रशुक्लदशम्यामारभ्यः। अत्र चयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति। अत्र यूपैकादशिनी भवति एकादशाक्षिणीमीयाः पशवो भवन्ति तेषाञ्च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम्। आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति॥") स तु कस्यां वर्ष्मनीयः। यथा,—
"समुद्रयात्राखीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्याद्यपयमस्तथा॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्व्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्तायाश्चैव कन्याया: पुनर्दानं वरस्य च।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः।
इमान् धर्म्मान् कलियुगे वर्জ্জयानाहुर्म्मनीषिणः॥"
इत्युद्वाहतत्त्वे दृष्टव्यम्॥

नरवाहनः, पुं, (नरो वाहनं यस्य। "शुभ्रादिषु च।" ८। ३। ६८। इति न षत्वम्।) कुबेरः। इत्यमरः। १।२।७२॥ (यथा, रघुः। ६। ११।
"विजयदुन्दुभिनां ययुर्ध्वनिं
घनरवा नरवाहनसम्पदः॥")
नृपतिविशेषः। यथा, राजतरङ्गिण्याम्। ५। २१६।
"सोऽनुगैः सह निर्द्दोहं जघान द्रोहशङ्कया।
सूरं दार्व्वाभिसारेशं शूर्व्वर्य्यो नरवाहनम्॥")
पुरुषयानविशिष्टे, त्रि॥ (यथा, महाभारते। ३। २८। ५।
"जग्मे धनपतिर्यत्र कुबेरो नरवाहनः॥")

नरविध्वंसः, पुं, (नरं विध्वंसयति भक्षयतीति। वि+ध्वंस+अच्।) राक्षसः। इति त्रिकाण्डशेषः॥

नरसारः, पुं, (नरवत् शुद्धः सारो यत्र।) वणिग्द्रव्यविशेषः। नौसादर इति निशादल इति च भाषा। तस्य पर्य्यायः। यथा. रत्नमालायाम्।
"दिदलो गोपकः पिण्डो वोलो गन्धरसो रसः॥"
तस्य गुणदोषौ यथा,—
"नरसारो भवेच्छुद्धश्चूर्णतोये विशोषितः।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगभिद्यते॥"
इति सारसङ्गिका॥

स तु द्रव्यान्तरयोगेन महाद्रावको भवति यथा,
"नरसारयवक्षारस्फटिकारित एव काचवकयवक्षैः।
बहुशः पात्यं सत्त्वं तद्धि महाद्रावकं नाम॥"
इति रत्नावली॥
यथाच वैद्यकभैषज्यरत्नावल्यां यकृत्प्लीहाधिकारे।
"वृषचित्रमपामार्गं पिष्ट्वा कुष्माण्डनाडिकाम्।
कुडो तालस्य पुष्पाणि वर्षाभूर्वेतसन्तथा॥
एतेषां चारमाकृष्य लिम्पाकक्षारसेन च।
क्षालयित्वा क्षारताम्रं वस्त्रपूतञ्च कारयेत्।
चण्डातपेन संशोष्य गृह्णन्द्रव्यानुरूपितम्।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम्॥
स्फटिकारिपलक्षेद नरसारपलन्तथा।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम्॥
कासीसं तोलकञ्चैव शुद्धाग्रञ्च तोलकम्।
दारुमोचं कर्षकञ्च तोलं समुद्रफेनकम्॥
सर्व्वमेकत्र सचूर्ण्य वकयन्त्रेण साधयेत्।
महाद्रावकमेतद्धि योज्यञ्च रसजारणे॥
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च॥")

नरसिंहः, पुं, (नर इव सिंह इव च आकृतिर्यस्य।) विष्णुः। इति शब्दरत्नावली॥ स तु हिरण्यकशिपुवधार्थं भगवद्भावतारान्नवमचतुर्थः पूर्व्वावतारः। इति वराहपुराणम्॥ (नरेषु सिंहः। नरः सिंह इव इत्युपमितसमासो वा।) नरश्रेष्ठः। यदुक्तम्।
"सुरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः॥"
इति विशेष्यनिघ्ने अमरः॥
(यथा, महाभारते। १०। १०। १६।
"कुरुणां नरसिंहस्य संग्रामेष्वपलायिनः।
ये यमस्यान्त कर्णस्य प्रमादात् इमे हताः॥")

नरहरिः, पुं, (नरः इव हरिः सिंह इव च आकृतिर्यस्य।) नृसिंहावतारः। यथा,—
"केशव धृतनरहरिरूप जय जगदीश हरे॥"
इति गीतगोविन्दे। १। ८॥

नराधिपः, पुं, (नराणामधिपः।) नराधिपतिः। राजा। यथा, "नराणाञ्च नराधिपः।" इति श्रीभगवद्गीता॥ (वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये।
"काकोलीक्षीरयष्ट्याह्वमेदायुग्मनराधिपैः॥")

नरान्तकः, पुं, (नराणां अन्तको नाशकः।) राक्षसविशेषः। स तु रावणपुत्रः। इति रामायणम्॥ (यथा, भागवते। ६। १०। १८।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्॥")

नरायणः, पुं, (नराणां जीवानां अयनं आश्रयस्थानम्।) श्रीनारायणः। इति शब्दरत्नावली॥

नरी, स्त्री, (नरस्य पत्नी। ङीष्।) नारी। इति जटाधरः॥

नरेन्द्रः, पुं, (नर इन्द्र इव नराणामिन्द्रो वा।) राजा। (यथा, मनुः। ६। २५३।
"रत्नानामार्य्यवृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्राखिदिवं यान्ति प्रजापालनतत्परा॥")
विबुधेन्द्रः। इति मेदिनी। रे, १७१॥ (यथा, माघे। २। ८८।
"सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥")
वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। ६ अध्याये।
"पूतीकार्कक्षुरनरेन्द्रद्रुमार्णा
मूलैः पिष्टाः पल्लवाः सौमनाश्च॥"
एकविंशत्यक्षरवृत्तविशेषः। इति चिन्तामणिः॥ यथा,—
"चामररत्नरज्जुवरपरिगतविप्रगणाहितशोभः
पाणिविराजिपुण्ययुगविरचितकङ्कणसङ्गतगन्धः।
चारुसुवर्णकुण्डलयुगलक्षतरोचिरलङ्कृतवर्णः
पिङ्गलपक्षगेश इति निगदति राजति वृत्तनरेन्द्रः॥")

नर्कुटकं, क्ली, नासिका। इति हेमचन्द्रः॥

नर्त्तकः, पुं, (नृत्यतीति। नृत्+"शिल्पिनि ष्वुन्।" ३। १। १४५। इति ष्वुन्।) नटः। गोटगलः। चारणः। कैलकः। नटपर्य्यायः। सर्व्वदेवी २ लयालम्बः ३ तालरेचनकः। इति शब्दरत्नावली॥ द्विपः। इति हेमचन्द्रः॥ नृत्यकर्त्तुलक्षणं यथा,—
"यादृग्गं नृत्यपाठ्यं स्यादभीतं योज्यञ्च तादृग्गम्।
नृत्यस्य धारणात् पाठ्यं नर्त्तकः परिकीर्त्तितः॥"
अपि च।
"असम्बद्धप्रलापी च सदा भ्रूकुटितत्परः।
हासप्रहासचतुरो वाचालो नृत्यकोविदः॥"
इति सङ्गीतदामोदरः॥
(नर्त्तयतीति। नृत्+णिच्+ष्वुल्। नृत्यकारके, त्रि। यथा, साहित्यदर्पणे ३ परिच्छेदे।
"तर्कौ विचारः सन्देहात् भूग्निरोऽङ्गलि-
नर्त्तकः॥")

नर्त्तकी, स्त्री, (नृत्यतीति। नृत्+ष्वुन्। स्त्रियां ङीष्।) नृत्यकारिणी। बाइ इति भाषा॥ तत्पर्य्यायः। लासिका २। इत्यमरः। १। ७। ८॥ लयपुत्री ३ नटी ४ लस्या ५। इति शब्दरत्नावली॥ (यथा, रघुः। १६। १४।
"नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत्॥")
करेणुः। इति मेदिनी। के, १०८॥ नलिकानामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

नर्त्तनं, क्ली, (नृत्+भावे ल्युट्।) नृत्यम्। इत्यमरः। १। ७। १०॥ (यथा, मनुः। २।१७८।
"कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥"
नृत्यतीति। नृत्+ल्युः। नर्त्तके, त्रि। यथा, महाभारते। ४। ३५। २२।
"गायनो नर्त्तनो वापि वादनो वा पुनर्भवः।
क्षिप्रं मे रथमास्थाय नियच्छैव हयोत्तमान्॥")

नर्द्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) नर्द्दति। इति दुर्गादासः॥

नर्द्द, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्॥)

नर्द्दटकं, क्ली, छन्दोविशेषः। तस्य लक्षणं यथा,—
"यदि भवतो नजौ भजजला गुरुर्नर्द्दटकम्"
इति छन्दोमञ्जरी॥

नर्द्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) रेफोपधः। नर्द्बति। इति दुर्गादासः॥

नर्म्म, [न्] क्ली, (नृ नये+"सर्व्वधातुभ्यो मनिन्।" उणां ४। १४६। इति मनिन्।) परीहासः। इत्यमरः। १। ७। ३२॥ (यथा, महाभारते। १। ८२। १७।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥")

नर्म्मकीलः, पुं, (नर्म्मणः परीहासस्य कील इव।) पतिः। इति त्रिकाण्डशेषः॥

नर्म्मटः, पुं, (नर्म्मणेव अटति गच्छतीति। अट+अच्। पृषोदरादित्वात् साधुः।) खर्परः। खर्य्यः। इति हारावली॥ २५४॥

नर्म्मठः, पुं, (नर्म्मणि कुशलः। नर्म्म+अटच्।) चूचुकम्। विड्गः। परीहासरतः। इति शब्दरत्नावली॥

नर्म्मदः, पुं, (नर्म्म ददातीति। दा+कः।) केलिसचिवः। इति मेदिनी। दे, ३१॥

नर्म्मदा, स्त्री, (नर्म्म ददातीति। दा+कः। स्त्रियां टाप्।) पृक्का। इति हेमचन्द्रः। ४। १४६॥ नदीविशेषः। सा विन्ध्यपर्व्वतान्निःसृता पश्चिमे तमसानद्यां प्रविष्टा। तस्याः पर्य्यायः। रेवा २ मेकलकन्या ३ सोमसुता ४। अस्या जलगुणाः। लघुत्वम्। शीतलत्वम्। सुपथ्यत्वम्। दाहपित्तश्रमनत्वम्। वातदाहत्वञ्च। इति राजनिर्घण्टः॥* तस्या जलं दशभिर्मासैर्जीर्य्यति। यथा,—
"त्रिभिः सारस्वतं तोयं सप्तभिश्चैव यामुनम्।
नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति॥"
इति प्रायश्चित्ततत्त्वम्॥
तस्या उत्पत्तिमाहात्म्ये यथा,—
"नर्म्मदा सरितां श्रेष्ठा रुद्रदेहादिनिःसृता।
तारयेत् सर्व्वभूतानि स्थावराणि चराणि च॥
सर्व्वपापहरा नित्यं सर्व्वदेवनमस्कृता।
संस्तुता देवगन्धर्व्वैरप्सरोभिस्तथैव च॥"*॥
तस्याः स्तवो यथा,—
"नमः पुण्यजले! आद्ये! नमः सागरगामिनि!
नमस्ते पापशमनि! नमो देवि! वरानने!॥
नमोऽस्तु ते ऋषिगणसंघसेविते!
नमोऽस्तु ते शुक्लरदेहनिःसृते!।
नमोऽस्तु ते धर्म्मभृतां वरप्रदे!
नमोऽस्तु ते सर्व्वपवित्रपावने!॥
यस्त्विदं पठते स्तोत्रं नित्यं शुद्धमना नरः।
ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत्॥
वैश्यस्तु लभते लाभं शूद्रश्चैव शुभां गतिम्।
व्यभिचारी लभते ह्यघं स्मरणादेव निश्चयः॥
नर्म्मदां सेवते नित्यं स्वयं देवो महेश्वरः।

तेन पुण्या नदी श्रेया ब्रह्महत्यापहारिणी ॥
नर्म्मदाया जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिञ्च न पश्यन्ति तस्य तीर्थप्रभावतः ॥
एतत्तीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
सर्व्वपापविशुद्धात्मा व्रजते रुद्रमन्दिरम् ॥
जलप्रवेशं यः कुर्य्यात् तस्मिंस्तीर्थे नराधिप ! ।
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ।
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ॥
अनश्नन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ! ।
गर्भवासे तु राजेन्द्र ! न पुनर्जायते नरः ॥"

इति मात्स्ये १९५ । १९६ अध्यायौ ॥

सा च पुरुकुत्सभार्य्या । तस्याः स्मरणे विषनाशो भवति । यथा, "सकलपन्नगशतयज्ञ नर्म्मदायै वरं ददुः । यस्तेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति न तस्य सर्पविषं भविष्यतीति । अत्र च ।

"नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः ॥"

इति विष्णुपुराणे । ४ । ३ । ६—१० ॥

नल, श बन्धे । इति नलग्रन्थस्य धातुपत्तौ भरतः ॥ (भ्वां-परं-सकं-सेट् ॥)

नलं, क्ली, (नलतीति । नल + अच् ।) पद्मम् । इति राजनिर्घण्टः ॥

नलः, पुं, (नल बन्धे + पचाद्यच् ।) तृणविशेषः । तत्पर्य्यायः । धमनः २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ नालः ४ नडः ५ कुचिरन्ध्रः ६ कौचकः ७ दीर्घवंशः ८ शून्यमध्यः ९ विभीषणः १० छिद्रान्तः ११ वृद्धपत्रः १२ वंशपत्रः १३ वृद्धच्छदः १४ नाजवंशः १५ । अस्य गुणाः । शीतत्वम् । कषायत्वम् । मधुरत्वम् । रुचिकारित्वम् । रक्तपित्तप्रशमनत्वम् । दीपनत्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ तस्यामगुणाः ।

"नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥
उष्णो वृद्धस्तियोन्यर्शिदाहपित्तविषप्रणुत् ॥"

इति भावप्रकाशः ॥

सूर्य्यवंशीयनिषधराजपुत्रः । यथा,—

"अतिथिस्तु कुशाच्छ्रेष्ठे निषधस्तस्य चात्मजः ।
नलस्तु नैषधस्तस्मान्नभस्तस्मादजायत ॥"

वीरसेनराजपुत्रः । यथा, मात्स्ये १२ अध्याये ।

"बली द्वावेव विख्यातौ वंशे कञ्जप्रसम्भवे ।
वीरसेनसुतस्तद्वन्नैषधश्च नराधिपः ॥"

(तथा, हरिवंशे । १५१ ३४ ।

"नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ ! ।
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥"

एतौ द्वावेव सूर्य्यवंशीयौ ॥) चन्द्रवंशीयनिषधराजपुत्रः । (अयन्तु दमयन्तीपतिः ।) यथा, दमयन्तीं प्रति नलवाक्यम् ।

"सुधांशुवंशस्य करीरमेव मां
निगूह्य किन्नासि फलेग्रहि ग्रहा ॥"

इति नैषधः ॥

(यथा, भारते । ३ । ५३ । १ ।

"आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवान्नकोविदः ॥"

अयं वीरसेनस्तु सूर्य्यवंशीयवीरसेनाद्भिन्न एवेत्यवगन्तव्यम् ॥ * ॥

आसीत् पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा । गच्छति काले स हि हंससुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य हंससुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमान एनं प्रति रुषः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्राता पुष्करेण सह द्यूतक्रीडनात् सर्व्वस्वमहारयत् । ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अस्य दमयन्तीसहवाससुखमसहिष्णुः दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् कलादेशितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह माल्यवन्तमगात् । गच्छति काले स हि हंससुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं चिभुवनैकसुन्दरीमाकर्ण्य हंससुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमान एनं प्रति रुषः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्राता पुष्करेण सह द्यूतक्रीडनात् सर्व्वस्वमहारयत् । ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अस्य दमयन्तीसहवाससुखमसहिष्णुः दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् कलादेशितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह माल्यवन्तमगात् । नानाविधक्लेशात् क्षीणदेहा सा माल्यवतोऽपि अविज्ञाता तद्वने तस्थौ । अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास । दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन् । भीमस्तु तां स्वगृहमानयत् । नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं कर्कोटकनागं विपद उज्जहार । कर्कोटकस्तु नलस्य प्रत्युपकर्त्तुमिच्छन् शरीरस्थस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास । नलस्तु केवलं रूपान्तरत्वमाप्तवान् । ततोऽसौ ऋतुपर्णस्य राज्ञः सारथ्ये नियुक्त आसीत् । अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयंवरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास । दमयन्ती तु पाकादिकौशलेनान्यजनावेद्येन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास । अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्य्ये गृहीते भैम्या सह मेलनं सञ्जातम् । भीमनृपतिस्तु एतत् सर्व्वमाकर्ण्यातिप्रयत्नसन्तोषमवाप्तवान् प्रेषयामास च तं बहुसम्भारोद्देशं निषधदेशान् प्रति । ततोऽयं स्वदेशमागत्य भ्रातरं पुष्करं पुनर्द्यूताय आकूय पराजित्य च तं पुनर्लब्धराज्यो दमयन्त्या सह सुखमवास । एतद्विवरणविस्तृतिस्तु महाभारते वनपर्व्वणि ५३—७६ अध्यायेषु विशेषतो द्रष्टव्या ॥ * ॥)

वानरविशेषः । स तु ऋतध्वजसुनिष्पापात् वानररूपविश्वकर्म्मण औरसेन घृताच्यप्सरोगर्भे गोदावरीतीरे जातः । इति वामने ६२ अध्यायः ॥ (अयन्तु रामवाक्येन समुद्रमध्ये सेतुं बबन्ध । यथा, अध्यात्मरामायणे । ६ । ३ । ८४—८६ ।

"ततोऽब्रवीत् रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्यस्मिन् जले मे विश्वकर्म्मणः ॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लङ्घवरो हरिः ।
कीर्त्तिं जानन्तु ते लोकाः सर्व्वलोकमलापहाम्
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥")

पिप्पलदेवः । इति मेदिनी । ले, २० ॥ दैत्यविशेषः । यथा,—

"दैत्यदानवसंयोगाज्जातास्तेऽप्रतिमक्रमाः ।
सैंहिकाया इति ख्याताश्चयोदश महाबलाः ॥
वंशः शुल्वश्च बलवान् नलश्चैव तथा बलः ।
वातापिर्नमुचिश्चैव इल्वलः खड्गमस्तथा ॥
अश्वको नरकश्चैव कालनाभस्तथैव च ।
सवमानस्तथा चैव सुरकल्पश्च वीर्य्यवान् ॥"

इति ब्रह्मपुराणे २ अध्यायः ॥

नलकं, क्ली, (नल इव प्रतिभाति । "इवे प्रतिकृतौ ।"५ । ३ । ९६ । इति कन् ।) प्राखास्थि । इति हेमचन्द्रः । ३ । २६१ ॥ (यथा, सुश्रुते निदानस्थाने १५ अध्याये ।

"तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु ॥")

नलकिनी, स्त्री, (नलकानि सन्त्यस्याः । नलक + इनिः । ङीप् ।) जङ्घा । इति हेमचन्द्रः । ३ । २७८ ॥

नलकीलः, पुं, (नलवत् कीलो यत्र ।) जानुः । इति हेमचन्द्रः । ३ । २७८ ॥

नलकूबरः, पुं, कुबेरपुत्रः । इत्यमरः । १ । १ । ७१ ॥ (यथा, राजेन्द्रकर्णपूरे । ६६ ।

"विलोकनकथापि मे न नलकूबरे न स्मरे
किमन्यदनुतद्युतेरपि न दर्शनं प्रार्थये ।
अयं नयनगोचरं व्रजति चेद्दृढप्रासुतस्रवः
समग्ररमणीमनो मधुपमाधवः माधवः ॥")

स भ्राता मणिग्रीवेण सह वारुणीं पीत्वा कैलासोपवने गङ्गायां स्त्रीजनैः क्रीडितवान् । असंवृतवस्त्रौ तौ दृष्ट्वा नारदः शशाप । तच्छापेन तौ यमलार्জ्जुनौ भूत्वा श्रीवृन्दावने आसतुः । ततो दामोदरेण शापनिर्म्मुक्तौ तं स्तुत्वा स्वगृहं जग्मतुः । इति श्रीभागवतीयदशमस्कन्धः ॥

नलदं, क्ली, (नलं ददाति अवखण्डयतीति । दो + कः ।) पुष्परसः । उशीरम् । (यथा, किराते । ५ । २५ ।

"इह सिन्धवश्च वरणावरणाः
करिणां सुरे सनलदानलदाः ॥")

जटामांसी । इति मेदिनी । दे, ११ । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"नलदं नन्दिनी पेषी मांसी लम्बजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥"

नलं ददातीति । दा + आतोऽनुपेति कः ।) नल दातरि, त्रि, ॥

नलदम्बुः, पुं, निम्बवृक्षः। इति भूरिप्रयोगः॥
नलदा, स्त्री, (नलद+टाप्।) जटामांसी। इति हेमचन्द्रः॥
नलपट्टिका, स्त्री, (नलनिर्म्मिता पट्टिका।) तलाशी। इति हारावली। १०७॥ एरमा इति भाषा॥
नलमोनः, पुं, (नलाश्रयो मोनः।) चिलिचिममत्स्यः। इत्यमरः। १। १०। १८॥ ("नलमोनः कपालकः।" इति हारीते प्रथमे स्थाने ११ अध्याये॥)
नलिका, स्त्री, (नल इव आकारोऽस्यस्या इति। नल+टन्।) नाड़ी। नली इति ख्यातः। सा च उत्तरापथे प्रसिद्धा सुगन्धा प्रवालालतिः प्रवालीति क्वचित् प्रसिद्धा। पैंठारी इति क्वचित् प्रसिद्धा। तत्पर्य्यायः। विद्रुमलतिका २ कपोतपाका ३ नलिनी ४ निर्म्मिथ्या ५ सुषिरा ६ व्याघ्रानी ७ सुत्वा ८ रक्तदला ९ नर्म्मकी १० नटी ११। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। तीक्ष्णत्वम्। मधुरत्वम्। क्लमिवासोदरार्म्मार्शःशूलनाशित्वम्। मलग्रोधनत्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"नलिका विद्रुमलता कपोतचरणा नटी।
भ्रमन्यङ्गनकेशी च निर्म्मिथ्या सुषिरा नली॥
नलिका प्रीतला लघ्वी चक्षुष्या कफपित्तजित्।
क्रिमिकासश्वासतृष्णाकफकण्डूव्रणापहा॥"
इति भावप्रकाशः॥
(अस्यविशेषः। यथा, आर्य्यासप्तशत्याम्। ४३७।
"मधुमथनवदनविनिहितवंशीसुषिरासुसारिणो रागाः।
हन्त हरन्ति मनो मम नलिकाविधिरसाः सरस्येव॥"
इयं हि आलातालुकयादिना आधुनिकनलास्थः 'वन्दूक' इति ख्यातस्य साडश्यं गच्छति। यथा, वैद्यग्रन्थायनीलकण्ठधनुर्व्वेदे।
"नलिका ऋजुदेहा स्यात्तन्वङ्गी मध्यरन्ध्रिका।
मर्म्मच्छेदकरी नीला————————॥"
"गच्छन्तं भापनञ्चैव सूतयेति गतित्रयम्।
तामाश्रितं विदित्वा तु जेतासन्नान् रिपून् युधि॥"
अस्या विशेषविवरणन्तु नालिकाशब्दे द्रष्टव्यम्॥ कल्पितनलनिर्म्मपथः। यथा, यन्त्रविधिधृतके १ अध्याये।
"वेदाङ्गुलं मस्तकीर्द्धं कार्य्यं तोयस्य धारणे।
समर्थो तत्र नलिकां कुर्य्यात्तोयविमोचनीम्॥")
नलितः, पुं, (नल्यते इति। नल ज बन्धे+क्तः।) शाकविशेषः। नालिता इति भाषा॥ अस्य गुणाः। मधुरत्वम्। पित्तनाशित्वम्। शुक्रवर्द्धकत्वञ्च। इति द्रव्यगुणः॥
नलिनं, क्ली, (नल्यते इति। नल वन्धे+"वहुलमन्यत्रापि।" उणां। २। ३६। इति इनच्।) पद्मम्। इत्यमरः। १। १०। ३६॥ (यथा, भागवते। २। ६। २२।
"यदाख नाभ्याम्बलिनादहमासं महात्मनः।
नाविदं यज्ञसम्भारान् पुरुषावयवाऋते॥")
नीलिका। जलम्। इति हेमचन्द्रः। ४। २२६॥
नलिनः, पुं, (नल+इनच्।) सारसपक्षी। इत्यमरः। १। ९०। ४०॥ क्षुद्रपाकफलः। इति शब्दचन्द्रिका॥ पानीयामला इति भाषा॥
नलिनी, स्त्री, (नलानि पद्मानि सन्त्यत्र। नल+"पुष्करादिभ्यो देशे।" ५। २। १३५। इति इनिः। ङीप्।) पद्मयुक्तदेशः। (नलानां पद्मानां समूहः। "खलादिभ्यः इनिर्वक्तव्यः।" ४। २। ५१। इत्यस्य वार्त्तिकोक्त्या इनिः।) पद्मसमूहः। पद्मलता। इति भरतः॥ (अस्याः पर्य्यायो यथा,—
"नलिनी स्यात् पङ्कजिनी विसिनी च सरोजिनी।
पद्मिनीति च पर्य्यायः पद्मषण्डे तदाकरे॥"
इति वैद्यकरत्नमालायाम्॥)
पद्ममात्रम्। इति रायमुकुटाद्यः॥ तत्पर्य्यायः। विसिनी २ पद्मिनी ३। इत्यमरः। १। १०। ३६॥ (यथा, मराठके। ८।
"राज्ञिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम्।
इत्यं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥")
व्योमनिम्नगा। (इयन्तु गङ्गायाः पूर्व्वदिग्गतशाखानामन्यतमा। यथा, मात्स्ये। १२०। ४०।
"त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव च।
सीतासि त्रिपथगायास्तु प्रत्यपद्यन्त सप्रधा॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा॥")
कमलाकरः। इति मेदिनी। ने, ८२॥ नलिका। इति राजनिर्घण्टः॥ नारिकेलसुरा। इति त्रिकाण्डशेषः॥ (वामनासिका। यथा, भागवते। ४। २५। ४८।
"नलिनी नालिनी च प्राग्द्वारावेकत्र निर्म्मिते॥"
"नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके॥" इति तट्टीकायां स्वामी॥)
नलिनीरुहं, क्ली, (नलिन्यां रोहतीति। रुह+कः।) पद्मालम्। इति राजनिर्घण्टः॥ ब्रह्मणि, पुं॥
नलिनेशयः, पुं, (नलिने शेते इति। शी+अच्।) विष्णुः। इति त्रिकाण्डशेषः॥
नली, स्त्री, (नल+अच्। गौरादित्वात् ङीप्।) मनःशिला। इति विश्वः॥ नलिका। इति भावप्रकाशः॥ तत्पर्य्यायः। सुषिरा २ विद्रुमलता ३ कपोतास्त्रिः ४ नटी ५। इत्यमरः। २। ४। १२६॥ (एतद्गुणा मनःशिलानलिकाशब्दयोः ज्ञातव्याः॥)
नलोत्तमः, पुं, (नलेषु उत्तमः।) देवनलः। इति राजनिर्घण्टः॥
नल्वः, पुं, (नल्यते इति। नल+उल्वादयश्चेति वः।) किष्कुचतुःशतम्। चतुःशतहस्तपरिमितदेशः। इत्यमरभरतौ॥ (यथा, हरिवंशे। २२४। १।
"तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा।
आसीन आसने चित्रे नल्वमात्रे प्रमाणतः॥")
नल्ववर्त्मगा, स्त्री, (नल्वपरिमितं वर्त्म गच्छतीति। गम+डः।) काकाङ्गी। इति शब्दचन्द्रिका॥ नल्वपरिमितपथगामिनि, त्रि॥
नव, [न्] त्रि, (नूयते स्तूयते प्रधानसंख्यावाचकत्वेन। णु स्तवने+वाहुलकात् कथिन् गुणश्च। इत्युज्ज्वलदत्तः। १। १५६।) संख्याविशेषः। ९ नय इति भाषा। वहुवचनान्तोऽयम्। इति व्याकरणम्॥ (यथा, रघुः। ३। ६८।
"इति चिन्तयतो नवतिं नवाधिकां
मघवत्क्रतूनां महनीयशासनः॥")
नववाचका यथा। अङ्कद्वारम् १ भूखण्डम् २ क्षत्तरावयवस्तक्षकः ३ सुधाकुण्डम् ४ व्याघ्रीस्तनः ५ सेवधिः ६ चक्रम् ७ रसः ८ ग्रहः ९। इति कविकल्पलता॥ (वहति, त्रि। यथा, मनुः। ३। २६६।
"यज्ञार्थात् पशवः सृष्टा स्वयमेव स्वयम्भुवा।
यज्ञोऽस्य भूत्यै सर्व्वस्य तस्माद्यज्ञे वधोऽवधः॥")
नवः, पुं, (णु स्तुत्रि स्तवने+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) स्तवः। इति मेदिनी। वे १५॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥
नवः, त्रि. (नूयते स्तूयते इति। णु स्तुतौ+"ऋदोरप्।" ३। ३। ५७। इति अप्।) नूतनः। इत्यमरः। ३। १। ७७॥ (यथा, हितोपदेशे। १। २३४।
"न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम्॥")
व्यभिनवार्थबोधकानि प्रशस्तानि। यथा,—
"द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ।
ऋते घृतगुडक्षौद्रधान्यकृष्णाविडङ्गतः॥"
इति नारायणदासकृतवैद्यपरिभाषा॥ तदैदिकपर्य्यायः। "नवम् १ नूतम् २ नूतनम् ३ नव्यम्४ इदाम् ५ इदानीम् ६। षट् नवनामानि।" इति वैद्यनिघण्टौ ३ अध्यायः॥
नवकारिका, स्त्री, (नवं करोतीति। कृ+ण्वुल्। टापि अत इत्वम्।) नवोढ़ा। इति शब्दमाला॥ नूतनः संक्षिप्तो विवरणश्लोकः। नवीनकर्त्री च॥
नवकालिका, स्त्री, (नवं कलति प्राप्नोतीति। कल+ण्वुल्। टाप्। अत इत्वम्।) नवीनः। इति हारावली। १०६॥
नवग्रहाः, पुं, (नव ग्रहाः।) सूर्य्यादयो नव। यथा, तिथितत्त्वे।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत्।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित्॥"
(यथा च,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः॥")
तेषां संस्थानम्। यथा,—
"भूमेर्योजनलक्षे तु सौरं मैत्रेय। मण्डलम्।
लक्षे दिवाकरस्यापि मण्डलं शशिनः स्थितम्॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात्।

नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥
द्विलक्षे चोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना: स्थित: ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थित: ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहित: ॥
सौरिर्वृहस्पतेश्चोर्द्ध द्विलक्षे समवस्थित: ॥"
इति विष्णुपुराणे । २ । ७ अध्याय: ॥

तेषां रथादि यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ! ॥
सार्द्धकोटिस्तथा सप्तनियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षचक्रं यत्र प्रतिष्ठितम् ॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो व्यवस्थित: ।
प्रधान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥
अक्षप्रमाणसमयो: प्रमाणं तदुयुगार्द्धयो: ।
दक्षोऽक्षस्तदुयुगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥
हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च ॥
अनुष्टुप् पंक्तिरित्युक्ताश्छन्दांसि हरयो रवे: ।
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसै: ॥
स्तुवन्ति सुनय: सूर्यं गन्धर्वैर्गीयते पुर: ।
नृत्यन्त्यप्सरसो यान्ति सूर्यस्यानु निशाचरा: ॥
वहन्ति पन्नगा यत्ते: क्रियते भीषु संग्रह: ।
बालखिल्याख्यमैर्वेनं परिवार्य समासते ॥
सोऽयं सप्तगण: सूर्यमण्डले मुनिसत्तम ! ।
हिमोष्णवारिवृष्टीनां हेतुत्वं समुपागत: ॥
रथस्त्रिचक्र: सोमस्य कुन्दाभास्तस्य वाजिन: ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ * ॥
वायुस्त्रिरथसम्भूतो रथश्चन्द्रसुतस्य च ।
पिशङ्गैस्सुरगैर्युक्त: सोऽष्टाभिर्वायुवेगिभि: ॥*॥
सवरूथ: सानुकर्षो युक्तो भूसम्भवैर्हयै: ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥*॥
अष्टास्र: काञ्चन: श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागमयैरश्वै: संयुक्तो वह्निसम्भवै: ॥ * ॥
अष्टाभि: पाण्डुरैर्युक्ते वाजिभि: काञ्चने रथे ।
तस्मिंस्तिष्ठति वर्षं वै राशौ राशौ वृहस्पति: ॥
आकाशसम्भवैरश्वै: ग्रथते: स्यन्दनं युतम् ।
समारुह्य शनैर्याति मन्दगामी शनैश्चर: ॥ * ॥
सभ्राभीनीलरागा ह्यष्टौ भङ्गाभा धूसरं रथम् ।
सकृदयुक्तास्तु मैत्रेय ! वहन्त्यनिरतं सदा ॥*॥
तथा केतुरथस्याश्वा अष्टौ ते वातरंहस: ।
पलाशधूमवर्णाभा लाक्षारसनिभारुणा: ॥ * ॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्वे ध्रुवे महाभाग ! प्रबद्धा वायुरश्मिभि: ॥"
इति विष्णुपुराणे २ अंशे ८।१०।१२ अध्याय: ॥

ग्रहाणामशुभप्रतीकार: । राजमार्त्तण्डे ।
"दोषो न स्याद्ग्रहाणामग्निरविरथे ताम्रमिन्दौ च शृङ्गं पृथ्वीपुत्रे प्रवालं शशधरतनये स्नातकुम्भं भुजेन ।
देवाचार्ये च सूक्तां मणिमसुरगुरौ नीलकं सूर्यसूनौ राहौ लौहं त्वनिष्टे कमलजतनये राजपट्टं विभर्त्तु: ॥"
स्नातकुम्भं सुवर्णम् । राजपट्टं कर्पूराख्यीति ख्यातम् । अपि च । बुद्धिप्रकाशे ।
"त्रिभूलीं क्षीरिकामूलं गोजिह्वां वृहदारकम् ।
ब्रह्मयष्टिं सिंहपुच्छीं वाराहीं चन्दनं सितम् ।
अश्वगन्धां क्रमात् सूर्यादद्याद्धोधोपशान्तये ॥"
इति ज्योतिषतत्त्वम् ॥

स्वजन्मराश्यवधिनवग्रहशुद्धिर्यथा,—
"केतूपसूवभौममन्दगतय: षष्ठाष्टसंस्था: शुभा-
श्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्र: पुन: सप्तम: ।
जीव: सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मज:
शुक्र: षड्दशसप्तवर्जमितरे सर्व्वेऽपुराशे शुभा: ॥"
इति दीपिका ॥

रवि: ३।६।१०।११।राशय: । सोम: ३।६।७।१०।११ शुक्रपक्षे २।५।६ । जन्मार्क्षवर्ज्जितजन्मचन्द्र: शुभ: । मङ्गल: ३।६।१०।११ । बुध: २।४।६।८।१०।११।१२ । बृहस्पति: २।५।७।९।११ । शुक्र: १।२।३।४।५।८।९।११।१२ । शनि: ३।६।१०।११। राहु: ३।६।१०।११ । केतु: ३।६।१०।११राशय:॥
ग्रहाणां राशिभोगनिर्णय: । यथा,—
"रविर्मासं निशानाथ: सपादद्विसहयम् ।
पञ्चत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशदिनं भृगु: ।
शनि: सार्द्धदयं वर्षं स्वर्भानु: सार्द्धवत्सरम् ॥"
रवि: १ मास: । सोम: २।० दिनम् । कुज: ४५ दिनम् । बुध: १८ दिनम् । बृहस्पति: १ वत्सर: । शुक्र: २८ दिनम् । शनि: २।० वत्सर: । राहु: १।० वत्सर: । केतु: १।० वत्सर: । इति ज्योतिषम् ॥ * ॥ अथ चन्द्रादिषड्ग्रहाणामस्तोदयज्ञानम् । यथा,—
"अथोदयास्तमययो: परिज्ञानं प्रकीर्त्यते ।
दिवाकरकराक्रान्तमूर्त्तीनामस्यतेजसाम् ॥
सूर्य्यादयधिका: पश्चादस्तं जीवकुजार्कजा: ।
ऊना: प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा ॥
अल्पा विवस्वत: प्राच्यामस्तं चन्द्रभृगुवा: ।
त्रिजन्यधिका: पश्चादुदयं शीघ्रयायिन: ॥"*॥
एषां कालांशा यथा,—
"एकादशारेरभ्यस्य तिथिसंख्यार्कजस्य च ।
अस्तांशा भूमिपुत्रस्य दशसप्ताधिकास्तत: ॥
पञ्चादस्तमयोऽष्टाभिरुदय: प्राङ्महत्तया ।
प्रागस्त उदय: पञ्चादस्तत्वाद्ग्रहभिर्भृगो: ॥
एवं बुधो द्वादशभिश्चतुर्दशभिरंशकै: ।
वक्रशीघ्रगती चार्कात् करोत्यस्तमयोदयौ ॥
एषाधिकै: कालभागैर्दृश्या ध्रुवैरदर्शना: ।
भवन्ति लोके खचरा भानुभाग्यस्तकर्मणि: ॥"
इति सूर्य्यसिद्धान्त: ॥

तेषामस्तोदयदिनसंख्याज्ञानम् । यथा,—
"भुजाक्षिचन्द्रा-१२२ क्षिदशाब्ध ३३ दस्रा १२
वेदाचला ४७ रामहते ४३ क्रमेण ।
भौमादिकस्यास्तदिनानि वक्रे
बुधस्य भूपा १६ दश भार्गवस्य ॥"
एषां एकसादस्तमयादुदयाद्वा अभ्युदयास्तज्ञानम् । यथा,—
"तथास्तवक्रात् कुजतोऽस्तवक्रे
जात्य-२२ ब्धि-४ विश्वे-१३ हिंगि-१० नेत्र १२
मासै: ।
मदास्तवक्रास्तविधौ सितस्य
क्रमेण वक्रस्तु नवेन्दुमासै: १६ ॥"
गुरोरुदयस्य प्राक् पश्चात् शुक्रस्य तु उदयवक्रमहास्तानां प्राक् पश्चात् बाल्यवृद्धदिनज्ञानम् । यथा,—
"वृद्ध: पुरस्तादुदयस्य पश्चात्
बालश्च पञ्चं १५ वचसां पति: स्यात् ।
एवं सित: पञ्चदिनानि वृद्धो
बालो भवेत्त्रीणि दिनानि वक्रे ॥
वृहस्तु पञ्चं १५ भृगुजो महास्ते
बाल: पुरस्तच्च दशाहमेव ॥"
इति सिद्धान्तमञ्जरी ॥

अथ नवग्रहस्तोत्रम् ।
"जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम् ॥
धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्व्वगुणोपेतं नमामि शशिन: सुतम् ॥
देवतानामृषीणाञ्च गुरुं कनकसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥
हिमकुन्देन्दुवर्णाभं दैत्यानां परमं गुरुम् ।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥
नीलाञ्जनचयप्रख्यं रविपुत्रं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
अर्द्धकायं महाघोरं चन्द्रादित्यविमर्द्दकम् ।
सिंहिकाया: सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥
पलाशधूमसङ्काशं ताराग्रहविमर्द्दकम् ।
रौद्रं रुद्रात्मजं क्रूरं तं केतुं प्रणमाम्यहम् ॥
व्यासेनोक्तमिदं स्तोत्रं य: पठेत् प्रयत: शुचि: ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशय: ॥
ऐश्वर्य्यमतुलञ्चापि आरोग्यं पुष्टिवर्द्धनम् ।
नरनारीप्रियत्वञ्च नित्यं तस्योपजायते ॥
तच्चकोऽग्नियमो वायुर्यें चान्ये यद्दपीड़का: ।
ते सर्व्वे प्रशमं यान्ति व्यासो ब्रूयान्न संशय: ॥"
इति श्रीव्यासभाषितं नवग्रहस्तोत्रं समाप्तम् ॥
(ग्रहाणामग्निवरणन्तु ग्रहशब्दे द्रष्टव्यम् ॥*॥
नवं नूतनं ग्रहो ग्रहणं यस्येति विग्रहे नव वहे, त्रि । यथा, रामायणे । २ । ५८ । ३ ।
"वृद्धं परमसम्मानं नवग्रहमिव द्विपम् ।")

नवच्छात्रः, पुं, (नवो नूतनश्छात्रः ।) प्रथममध्ययने प्रवृत्तः । नवीनविद्यार्थी । तत्पर्य्यायः । क्रियाकारः २ । इति त्रिकाण्डशेषः ॥

नवतः, पुं, (नूयते स्तूयते इति । नु + बाहुलकात् अतच् ।) ऋषभः । करिकलभः । इति हेमचन्द्रः । ३ । ३४४ ॥

नवतिः, स्त्री, (नव दशतः परिमाणमस्य । "षड्क्तिविंशतिचिंशद्भ्यदिति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । इति शब्दरत्नावली ॥ ९० नब्बइ इति भाषा ॥ (यथा, रघुः । ३ । ६९ ।

"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥"

नवतिसंख्यान्विते च । यथा, मनुः । ३ । १७७ । "वीक्षान्वो नवतेः काणः षष्टेः श्वित्री प्रतस्य तु । पापरोगी सहस्रस्य दातुर्नाश्नाति फलम् ॥")

नवतिका, स्त्री, (नवं नूतनं तेकते करोतीति । तिक + कः । टाप् ।) तूलिका । इति हारावली । १३७ ॥ (नवतिरेव । स्वार्थे कः । ततष्टाप् । नवतिसंख्या ॥)

नवतिघ्नः, [स्] य, बहुनवति । नवति नवतीति वीप्सायां घ्नसूत्रप्रत्ययः ॥

नवती, स्त्री, (नवतिः + ऋष्यादिकारादिति वा ङीष् ।) नवतिः । इति शब्दरत्नावली ॥

नवदण्डं, क्ली, (नवो दण्डो नव दण्डा वा यत्र ।) राज्ञां क्षत्रविशेषः । यथा, युक्तिकल्पतरुः ।

"मनोहरं त्रिकनकदण्डञ्च नवदण्डकम् ।
छत्रञ्च त्रिविधं श्रेयं त्रिविधानां महीभुजाम् ॥"

अस्य विवरणं छत्रशब्दे द्रष्टव्यम् ॥

नवदलं, क्ली, (नवं दलमिति कर्म्मधारयः ।) पद्मस्य क्षीररसमीपस्थदलम् । पद्मादीनां जटिकाकारनवपत्रम् । तत्पर्य्यायः । संवर्त्तिका २ । इत्यमरः । २ । १० । ४३ ॥ संवर्त्तिः २ संवर्त्ती ३ । इति भरतः ॥ सामान्यनूतनपत्रम् । इति हेमचन्द्रः ॥ दलमात्रम् । इति मेदिनी ॥

नवदीधितिः, पुं, (नव दीधितयः किरणानि यस्य ।) मङ्गलग्रहः । इति जटाधरः ॥

नवदुर्गा, स्त्री, (नवसंख्यान्विता दुर्गा ।) नवपत्रिका । (यदुक्तम् ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

यथा, वृहन्नन्दिकेश्वरपुराणे ।

"पत्रिके नवदुर्गे त्वं महादेवमनोरमे ।
पूजां समस्तां संयच्छ रक्ष मां विदशेश्वरि ! ॥"

कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ कालिका ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ भद्रा ९ इति नवनामिका कन्या । यथा,—

"यन्नाक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥"

इति निर्णयसिन्धुः ॥

नवदोला, स्त्री, (नवा नूतना दोला ।) नूतनप्रेङ्खा । अस्या विवरणं चतुर्दोलशब्दे द्रष्टव्यम् ॥ तदारोहणदिनं यथा,—

"उत्तरेन्द्रमूलाहिश्रिवाग्निवर्जं
शुक्लेन्दुतारातिथिलग्नयोगे ।
विशिष्टमासुत्तमयाहवर्जे
दोलादिकारोहणमाद्यमिष्टम् ॥"

इति समयप्रदीपः ॥

नवधा, य, (नव + प्रकारे धाच् ।) नवप्रकारः । यथा,—

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥"

नवनाड़ीचक्रं, क्ली, (नवनक्षत्रयुक्तं नाड़ीचक्रम् ।) राज्ञो नवनक्षत्रयुक्तवक्ररेखात्मकचक्रम् । यथा, ज्योतिषतत्त्वे ।

"जन्मादि कर्म्म ततोऽपि दशमं सांघातिकं षोड़शभम् ।
सप्तदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
त्राद्यः स्युः पञ्चविंशं मानसमेवं नरः षड्ऋक्षः स्यात् ।
नवनक्षत्रो नृपतिः खजातिदेशाभिषेकर्क्षैः ॥"

नवनी, स्त्री, (नवं नीयते इति । नी + डः । गौरादित्वात् ङीष् ।) नवनीतम् । यथा,—

"अहो हैयङ्गवीनानां नवनीनां परं सदा ।
लड्डुकानां शर्करार्णां खस्तिकानाञ्च यत्नतः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४५ अध्यायः ॥

नवनीतं, क्ली, (नवं नीयतेऽनेनेति । नी + क्तः ।) गव्यविशेषः । माखन इति ननी इति च भाषा । तत्पर्य्यायः । नवोद्धृतम् २ । इत्यमरः । २ । ९ । ५२ ॥ सरजम् ३ मन्थजम् ४ हैयङ्गवीनम् ५ । इति रत्नमाला । दधिजम् ६ सारम् ७ हैयङ्गवीनकम् ८ । अस्य सामान्यगुणाः । शीतलत्वम् । वर्ण्यबलावहत्वम् । सुमधुरत्वम् । वृष्यत्वम् । संग्राहकत्वम् । कफरुचिकारकत्वम् । वातसर्व्वाङ्गमूलकाशश्रमनाशित्वम् । सुखकरत्वम् । कान्तिपुष्टिप्रदत्वम् । चक्षुष्यत्वम् । सर्व्वदोषापहरत्वञ्च ॥ * ॥ नवोद्धृतगव्यमाहिषनवनीतगुणाः । बालवृद्धानां प्रशस्तत्वम् । बलकारित्वम् । वातवर्द्धनत्वञ्च ॥ * ॥ माहिषनवनीतगुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । वृष्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । सुन्दरत्वञ्च ॥ * ॥ छागनवनीतगुणाः । क्षयकासश्वेतामयकफनाशित्वम् । बल्यत्वम् । दीपनत्वञ्च ॥ * ॥ आविकनवनीतगुणाः । हिमत्वम् । लघुत्वम् । योनिमूले कण्ठे वाते गुदमूले हितत्वञ्च ॥ * ॥ ऐड़कनवनीतगुणाः । क्लिन्नगन्धत्वम् । शीतलत्वम् । मेधानाशित्वम् । गुरुत्वम् । पुष्टिश्लोलकारित्वम् । मन्दाग्निदीपनत्वञ्च ॥ * ॥ हस्तिनीनवनीतगुणाः । कषायत्वम् । शीतलत्वम् । लघुत्वम् । तिक्तत्वम् । विदग्धित्वम् । जन्तुघ्नित्वम् । कफक्लमनाशित्वञ्च ॥ * ॥ अश्वीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । चक्षुष्यत्वम् । कटुत्वम् । उष्णत्वम् । दृग्दहातापहारकत्वञ्च ॥ गर्द्दभीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । सूत्रदोषनाशित्वञ्च ॥ * ॥ औष्ट्रनवनीतगुणाः । पाके शीतलत्वम् । व्रणक्रिमिकफास्रवातनाशित्वञ्च ॥ * ॥ नारीनवनीतगुणाः । रुच्यत्वम् । पाके लघुत्वम् । चक्षुष्यत्वम् । दीपनत्वम् । सर्व्वरोगविषनाशित्वञ्च ॥ * ॥

अथ साधारणनवनीतगुणाः ।

"शीतं रुच्यनवोद्धृतं सुमधुरं वृष्यञ्च वातापहं
कासघ्नं क्रिमिनाशनं कफहरं संग्राहि शूलापहम् ।
बल्यं पुष्टिकरं क्षयार्त्तिशमनं सन्तापविच्छेदनं
चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं पित्तजित् ॥
एकाहाध्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् ।
अरुच्यं सर्व्वरोगाढ्यं दाधनं सहितं स्मृतम् ॥"

इति राजनिर्घण्टः ॥

अपि च । गव्यनवनीतगुणाः ।

"नवनीतं हितं गव्यं वृष्यं वर्ण्यमलापहम् ।
संग्राहि वातपित्तास्रक्षयार्शोऽर्दितकासजित् ॥
तद्धितं बालके वृद्धे विशेषादग्नितं स्त्रियोः ॥"*॥

माहिषनवनीतगुणाः ।

"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"

अथ पयसो नवनीतस्य गुणाः ।

"दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् ।
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥"

अथ सद्यःसमुद्धृतनवनीतगुणाः ।

"नवनीतञ्च सद्यस्कं खादु ग्राहि हिमं लघु ।
मेध्यं किञ्चित् कषायान्त्रमौषत्तक्रांशसंक्रमात् ॥"

अथ चिरन्तननवनीतगुणाः ।

"सञ्चारकटुकाम्लत्वाच्चर्ब्बरैः क्षुरकारकम् ।
श्लेष्मलं गुरुमेदस्यं नवनीतं चिरन्तनम् ॥"

इति भावप्रकाशः ॥

"नवनीतं नवं वृष्यं ग्राहि वर्ण्यबलाप्रदम् ।
चक्षुष्यं दीपनं स्निग्धं गव्यमग्न्यर्शोविकारनुत् ॥
शीतोत्थितं हिमं ग्राहि रक्तपित्तातिरोगनुत् ॥"

इति राजवल्लभः ॥

नवनीतकं, क्ली, (नवनीतात् कायति प्रकाशते इति । कै + कः ।) घृतम् । इति राजनिर्घण्टः ॥ (नवनीत + स्वार्थे कन् । नवनीतम् । यथा, हारीते द्वितीयस्थाने १० अध्याये ।

"सर्पिः प्रयुक्तं नवनीतकञ्च ॥"

पर्य्यायोऽस्य यथा,—

"रुच्यं सरजं हैयङ्गवीनं नवनीतकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

नवनीतधेनुः, स्त्री, (नवनीतेन कृता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) दानार्थकृतनवनीतमयधेनुविशेषः । यथा,—

"नवनीतमयीं धेनुं शृणु राजन् ! प्रयत्नतः ।
यां श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
गोमयेनानुलिप्तायां भूमौ गोचर्म्मसंस्तृतः ।

कृष्णचर्म्मेन्द्रगस्यैव तस्योपरि च धारयेत् ॥
कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् ।
वस्त्रं चतुर्थभागस्य तस्या उत्तरतो न्यसेत् ॥
ह्यत्वा विधानेन च राजसिंह-
सुवर्णशृङ्गी सुसुखी च कार्य्या ।
नेत्रे च तस्या मणिमौक्तिकेन्तु
कृत्वा तथान्यच्च गुडेन जिह्वाम् ॥
ओष्ठौ च पुष्पैश्च फलैश्च दन्ता:
प्रकल्प्य सास्नाञ्च सितैश्च खुरै: ॥
नवनीतस्थनीं राजन्निक्षुपादां प्रकल्पयेत् ।
ताम्रपृष्ठीं कांस्यदोहां दर्भरोमकृतच्छवीम् ॥
स्वर्णशृङ्गीं रौप्यखुराम् पद्मरत्नसमन्विताम् ।
चतुर्भिश्शिलपात्रैस्तु संयुतां सर्व्वतो दिश: ॥
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलङ्कृतम् ।
दित्सु दीपांश्च प्रज्वाल्य ब्राह्मणाय निवेदयेत् ॥
वेदवेदाङ्गविदुषे आहिताग्निर्ज्जितात्मवान् ।
मन्त्रास्त्र एव जप्तव्या: सर्व्वधेनुषु ये स्मृता: ॥
पुरा देवासुरै: सर्व्वै: सागरस्य तु मन्थने
उत्पन्नं दिव्यमन्दस्तं नवनीतमिदं शुभम् ॥
आप्यायनञ्च भूतानां नवनीत ! नमोऽस्तु ते ।
एवमुच्चार्य्य तां दद्यात् ब्राह्मणाय कुटुम्बिने ॥
धेनुञ्च दत्त्वा सुसुदां सोपधानां
नयेद्गृहं विप्रवर्य्यस्य भूय:।
हविष्यमेव सरसञ्चोपभुक्ता
तिष्ठेद्दिनं धेनुदस्त्रीणि विप्र: ॥
य: प्रयच्छति तां धेनुं दीयमानां नरोत्तम ।
सर्व्वपापविनिर्म्मुक्त: शिवसायुज्यतां व्रजेत् ॥
पितृभि: पूर्व्वजै: सार्द्धं भविष्यञ्च मानव: ।
विष्णुलोकं व्रजत्याशु यावदाकृतसंप्लवम् ॥
य इदं शृणुयाच्छ्रद्धा श्रावयेद्वापि मानव: ।
सर्व्वपापविशुद्धात्मा विष्णुलोके महीयते ॥"
इति वराहपुराणम् ॥

नवपाठक:, पुं, (नवो नूतन: पाठकोऽध्यापक:।) नूतनाध्यापक: । इति सिद्धान्तकौमुदी ॥

नवफलिका, स्त्री, (नवं फलं यस्या: । कापि अत इत्वम् ।) नवम् । नवजातरजोऽङ्गना । इति मेदिनी । के, २३० ॥

नवम:, त्रि, (नवन्+"तस्य पूरणे डट्।" ५ । २ । ४८ । इति डट्। ततो "नान्तादसंख्यादेर्म्मट्।" ५ । २ । ४९ । इति डटो मट् ।) नवानां पूरण: । इति व्याकरणम् ॥ नयइ इत्यादि भाषा ॥

नवमल्लिका, स्त्री, (नवा नूतना स्तुत्या वा मल्लिका ।) नवमालिका । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । १ । १२ ।
"रम्यं हर्म्यातलं नवा: सुनयना गुञ्जद्विरेफा लता: ।
प्रोन्मीलन्नवमल्लिका: सुरभयो वाता: सचन्द्रा निशा: ॥")

नवमालिका, स्त्री, (नवा नूतना मालिका मल्लिकापुष्पम् ।) नवमल्लिकापुष्पम् । वासन्ती नेवारी इति लोके । नेयालि इति नेओयार इति च भाषा । तत्पर्य्याय: । अतिमोदा २ ग्रेष्मी ३ ग्रीष्मोद्भवा ४ सप्तला ५ सुकुमारी ६ सुरभि: ७ सुचिमल्लिका ८ सुगन्धा ९ शिखरिणी १० नवाली ११। इति राजनिर्घण्ट: ॥ भद्रवर्म्मा १२ देवलता १३ । इति शब्दचन्द्रिका ॥ गन्धनिलया १४ मालिका १५ नवमल्लिका १६ । इति शब्दरत्नावली ॥ तस्या गुणा: । अतिश्लेष्मत्वम् । सुरभित्वम् । सर्व्वरोगहरत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।
"नेपाली कथिता तज्ज्ञै: सप्तला नवमालिका ।
वासन्ती श्लीतला लघ्वी तिक्ता दोषत्रयाजित्॥"
इति भावप्रकाश: ॥

नवमी, स्त्री, (नवम+टित्त्वात् ङीप् ।) तिथिविशेष: । सा चन्द्रस्य नवमकलाक्रियारूपा । शुक्लपक्षे ९ कृष्णपक्षे २४ पञ्जिकाकारसङ्केतेन एतदङ्कबोधिता ॥ अथ नवमीव्रतम् । "सा चाष्टमीयुता ग्राह्या युग्मात् । भविष्ये ।
'मासैश्चतुर्भिर्यैत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर नवम्यां कार्त्तिकस्य च ॥'
तथा भविष्ये ।
'माघे मासि तु या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरै: ॥'
तथा कालिकापुराणम् ।
'नवम्यां नवरात्राणि राजन् ! पिष्टाग्नयो भवेत् ।
तस्य तुष्टा भवेद्गौरी सर्व्वकामप्रदा शुभा ॥'
यद्येत्यादि नवम्यान्तिथावारभ्य नव वर्षाणि यावत् प्रतिशुक्लनवम्यां पिष्टेतरभोजननिवृत्तिव्रतमिति सङ्कल्पे विशेष: । सर्व्वकामप्रदगौरीतोष: फलम् ।" इति तिथितत्त्वम् ॥ श्रीरामनवमीव्यवस्था तच्छब्दे द्रष्टव्या ॥*॥ इयं दुर्गातिथि: । तत्र तस्या: पूजा कर्त्तव्या । यथा,—
ब्रह्मोवाच ।
"इयं देवी वरारोहा यातु शैलं हिमाचलम् ।
तत्र यूयं सुरा: सर्व्वे गत्वा नन्दत माचिरम् ॥
नवम्याञ्च सदा पूज्या इयं देवी समाधिना ।
वरदा सर्व्वलोकानां भविष्यति न संशय: ॥
नवम्यां यच्च पिष्टान्नं भविष्यति हि मानव: ।
नारी वा तस्य सम्पन्नं भविष्यति मनोगतम् ॥"
इति वराहपुराणम् ॥
कार्त्तिकशुक्लनवम्यां जगद्धात्रीपूजाप्रमाणानि यथा,—
"प्रपूजयेज्जगद्धात्रीं कार्त्तिके शुक्लपक्षके ।
दिनोदये च मध्याह्ने सायाह्ने नवमेऽहनि ॥"
इति मायातन्त्रे १७ पटल: ॥
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उपस्थङ्घोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्रारोग्यधनं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुज: श्रवणिभौमदिने यदि ।
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ॥"
इति कात्यायनीतन्त्रे ७८ पटल: ॥

"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्यक्प्रयत्नत: ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटल: ॥
अथ नवमीजातफलम् । यथा, कोष्ठीप्रदीपे ।
"विरोधकर्त्ता सुजनैरगम्य:
परापकारार्थमति: कुशील: ।
आचारहीन: कृपण: कठोर:
प्रसूतिकाले नवमी यदि स्यात् ॥"

नवयौवना, स्त्री, (नवं यौवनं यस्या: ।) युवती । तत्पर्य्याय: । दिक्करी २ । इति हारावली । १५४ ॥ तारुणी ३ कुहेली ४ । इति शब्दमाला ॥

नवरङ्ग, क्ली, (नव रङ्गा यस्मात् ।) कायस्थसुवर्णकुलीनानां पञ्चदानचतुर्थहयात्मककुलविशेष: । तद्यथा,—
"समाने प्रथमं दानं द्वितीयञ्च कनिष्ठके ।
षड्भ्रातरि तृतीयञ्च मध्यश्रेष्ठे चतुर्थकम् ॥
तेष्वोजे पञ्चमं दानं कुर्य्यादेतद्विधानत: ।
अङ्गजं जन्मनि समे कनिष्ठे च द्वितीयकम् ॥
तृतीयं जन्ममध्यांशे तेष्वोजेऽपि चतुर्थकम् ।
नवरङ्गमिति प्रोक्तं सुखानां हि महागुणम् ॥"
इति कुलाचार्य्यकारिका ॥

नवरत्न, क्ली, (नवानां रत्नानां समाहार: ।) नवप्रकारमणय: । तद्यथा,—
"मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"
इति तन्त्रसार: ॥
(यथा च,—
"वज्रञ्च मौक्तिकञ्चैव माणिक्यं नीलमेव च ।
तथा मरकतं ज्ञेयं महारत्नानि पञ्चधा ॥
गोमेद: पद्मरागश्च वैदूर्य्यञ्च प्रवालकम् ।
चत्वारि उपरत्नानि नवरत्नमिदं स्मृतम् ॥"
"रत्नं गारुत्मतं पुष्यं रागो माणिक्यमेव च ।
इन्द्रनीलञ्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ॥
रत्नं हीरा । गारुत्मतं पान्না । माणिक्यं पद्मराग: । इन्द्रनील: नीলা ।"इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा,—
"वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च शनालाञ्छने ।
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे ॥
गुरौ मुक्तां भृगौ वज्रं शनौ नीलं विदुर्बुधा: ।
राहौ गोमेदकं धार्य्यं केतौ मरकतन्तथा ॥"
इति दीपिका ॥
विक्रमादित्यराजसभास्थनवसंख्यकपण्डिता: । यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासा: ।
ख्यातो वराहमिहिरो नृपते: सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नम् ॥

नव श्लोका: । यथा,—
"मित्रमर्थो तथा गोत्रिर्धर्म्मकार्य्यस्मृर्थका: ।

क्रौर्यां विद्वान् तथोत्खातान् नवरत्नमिदं क्रमात् ॥
मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं कार्य्यैश्च द्विजमादरेण युवतीं प्रेम्णा समै-र्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं विद्याभी रसिकं रसेन सकलं श्लीलेन कुर्य्याद्-वशम् ॥ १ ॥
अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं
क्षुब्धोऽकीर्त्तिमसङ्करः परिभवं दुष्टोऽन्य दोषे रतिम् ।
निःस्वो वञ्चनसज्ञना विकलतां शोकाकुलः संशयं
दुर्भागप्रियतां दुरोदरवशः प्राप्नोति कष्टं सदुः ॥ २ ॥
नीतिर्भूमिभुजां नतिर्गुणवतां दीर्घज्ञतां धृति-र्दम्भलोः श्रियो यशस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्तुतिः सुमनसां भ्रान्तिर्द्विजस्य क्षमा भक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मज्जनम् ॥ ३ ॥
धर्म्मः प्रागेव चिन्त्यः सचिवमतिगतिर्भावनीया सदैव
श्रेयं लोकाद्वृत्तं वरचरनयनैर्मङ्गलं वीक्ष-णीयम् ।
प्रच्छाद्यौ रागरोषौ सदुपरुषगुणौ योजनीयौ च काले
आत्मा यत्नेन रक्ष्यो रंध्रशिरसि पुनः सोऽपि नापेक्षणीयः ॥ ४ ॥
कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्य्यादा व्यसनैर्धनानि विपदा स्थैर्यं प्रमादे-र्द्विजः ।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हृतः ॥ ५ ॥
मूर्खो ग्राम्यसखी क्षितिपतिरलसो मत्सरी धर्म्मशीलो
दुःस्थो मानी यशस्यः प्रसरतिशयवान् शास्त्र-विद्धर्म्महीनः ।
आज्ञाहीनो नरेन्द्रः शुचिरपि सततं यः परा-न्नोपभोगी
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिक्तमं-प्रकारम् ॥ ६ ॥
क्रौर्यां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
स्वं स्वस्यधनस्य सचिंतिरसदृत्तस्य वाग्-डम्बरः ।
आचारस्य मनोदमः परिणतेर्विद्या कुलस्यैकता
छलाया धनमुन्नतेर्गुणचयः भ्रान्तेर्विवेको बलम् ॥ ७ ॥

विद्वान् संसदि प्राज्ञिकः परवशो मानी दरिद्रो गृही
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाश्रितः ।
राजा दुःसचिवः प्रियः कुलभवो मूर्खः पुमा-स्त्रीजितः
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥ ८ ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् फलिष्यून् वहेयन्
प्रोत्तुङ्गान् नमयन् नतान् समुदयन् विश्लेषयन् संहतान् ।
तोयान् कण्टकिनो बहिर्नियमयन् म्लानान् सदुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥ ९ ॥)

नवरात्रं, क्ली, (नवानां रात्रीणां समाहारः । तत् साधनत्वेनास्त्यस्येति अच् ।) आश्विनशुक्ल-प्रतिपदादिनवमीपर्य्यन्तनवदिनकर्त्तव्यदुर्गाव्रत-विशेषः । तस्यारम्भः । देवीपुराणे डामरतन्त्रे च देवीवचः ।
"अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम ।
सुपूर्णमासी कर्त्तव्या द्वितीयादिगुणान्विता ॥"
मार्कण्डेयदेवीपुराणयोः ।
"पूर्व्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ॥"
अथोपवासादिकमुक्तं हेमाद्रौ भविष्ये ।
"एवञ्च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
स्नातैः समुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥"
मदनरत्ने देवीपुराणेऽपि ।
"कन्यासंस्थे रवौ शुक्ल ! शुक्लामारभ्य नन्दिकाम् ।
अप्राप्तौ श्रवणैकाप्तौ नक्ताप्तौ वाथ वायुदः ॥
भूमौ शयीत चाम्लान्न कुमारीर्भोजयेन्मुदा ।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ॥
बलिञ्च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥"
स्कान्दे ।
"मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गाञ्च नक्तं कुर्य्यात् समाहितः ॥
नवरात्राभिधं कर्म्म नक्तव्रतमिदं स्मृतम् ।
तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ॥
अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षयः ॥"*॥
तत्र पूजाविधिः । सा च जयन्त्यादिमन्त्रेण नवाक्षरेण वा कार्य्या । यथा । "सङ्कल्पं विधाय घटं संस्थाप्य तत्र देवीमावाह्य षोडशोपचारैः पूजयित्वा मायभक्तबलिं कुष्माण्डादिबलिं वा निवेदयेत् ॥ * ॥ ततः कुमारीपूजा । यदुक्तं हेमाद्रौ स्कान्दे ।
"एकैकां पूजयेन् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकन्तु वा ॥"
तथा,—
"नवभिर्लभते भूमिमैश्वर्य्यं द्विगुणेन तु ।
एकवृद्ध्या लभेन् क्षेममेकैकेन श्रियं लभेत् ॥"
अथ कुमारीनिर्णयः ।
"एकवर्षा तु या कन्या पूजार्थे तां विवर्ज्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"
तेन द्विवर्षमारभ्य दशवर्षपर्य्यन्तम् । कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ सुभद्रा ९ इति नवनामभिस्ताः पूजनीयाः । आसामावाहन-मन्त्राः । यथा,—
"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
एवमभ्यर्च्चनं कुर्य्यात् कुमारीणां प्रयत्नतः ।
कच्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ॥"
तासां वयोभेदमाह ।
"यन्थिस्फुटितशीर्षाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरां काणीं कुरूपां तनुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"
तासां जातिविशेषे फलविशेषो यथा,—
"ब्राह्मणीं सर्व्वकार्य्येषु च जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्यजातानां पूजयेद्विधिना नरः ॥"
अत्र वेदचण्डीपाठ उक्तः । रुद्रयामले ।
"एवं चतुर्व्वेदविदो विप्रान् सर्व्वान् प्रसादयेत् ।
तेषाञ्च वरणं कार्य्यं वेदपारायणाय वै ॥"
तथा,—
"एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥"*॥
अथाश्वयुतोऽश्वपूजनमुक्तम् । मदनरत्ने देवी-पुराणे ।
"अश्वयुक्शुक्लप्रतिपत्स्वातियोगे शुभे दिने ।
पूर्व्वसूचेः अथवा नाम प्रथमं श्रियमाहरत् ॥
तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ अश्वया सह ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥
शान्तिः स्वस्ययनं कार्य्यं तथा तैषां दिने दिने ।
धान्यं भक्षातकं कुष्ठं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिन्तेषान्तु बन्धयेत् ।
वायव्येवारुणैः सौरैः शाक्रैमैत्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्य्यो दिने दिने ॥"
तत्र गजपूजापि । कल्पतरौ ।
"ज्येष्ठायोगे पुरा तत्र गजाश्चार्द्रौ महाबलाः ।
पृथिवीमवहन् पूर्व्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥"
अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये ।
"केशसंस्कारदध्यादि प्रदद्यात् प्रतिपद्दिने ।
पक्वतैलं द्वितीयायां केशसंयमहेतवे ॥
दर्पणञ्च तृतीयायां सिन्दरालक्तकन्तथा ।

मधुपर्के चतुर्थ्यां तु तिलकं नेत्रमञ्जनम् ॥
पञ्चम्यामङ्गरागश्च ग्रन्थालङ्करणानि च ।
षष्ठ्यां विस्तरतो बोधं सायंसन्ध्यासु कारयेत् ॥
सप्तम्यां प्रातरानीय गृहमध्ये प्रवेशयेत् ।
उपोषणमथाष्टम्यामात्मग्रन्था तु पूजनम् ॥
नवम्यामुग्रचण्डायाः पूजां कुर्याद्बलिस्तथा ।
संपूज्योपोषणं कुर्यात् दशम्यां शावरोत्सवैः ॥
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत् पालयेद्देवी तं पुत्रधनकीर्तिभिः ॥"
आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनम् ।
यथोक्तं निर्णयामृते देवीपुराणे ।
"मूलेषु स्थापनं देयाः पूर्वाषाढासु पूजनम् ।
उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयेत् ॥"
रुद्रयामलेऽपि ।
"मूलऋक्षे सुराधीश पूजनीयां सरस्वतीम् ।
पूजयेत् प्रत्यहं देव यावद्देयावलक्षकम् ॥
नाधापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देवि ! विद्याकामो द्विजोत्तमः ॥"
स्त्रीणाञ्च नवरात्रे ताम्बूलचर्वणादिकं न निषिद्धम् । तदुक्तं व्रतहेमाद्रौ गारुडे ।
"गन्धालङ्कारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"
एतत् सभर्तृकोपवासविषयम् ॥ * ॥ हेमाद्रौ ।
आश्विनमाघचैत्रश्रावणमासचतुष्टये कृष्णाष्टम्यादिपक्षद्वयरात्रव्रतमभिधाय । अथवा नवरात्रञ्च सप्तपक्षत्रिकं दिवा । इत्युक्तम् । देवीपुराणे ।
"नवरात्रव्रतेऽप्यक्तस्त्रिरात्रैकरात्रकम् ।
व्रतञ्चरति यो भक्त्या तस्मै दास्यामि वाञ्छितम्॥"*
(यथाच देवीभागवते । ३ । २६—२७ ।
"शृणु राजन् ! प्रवक्ष्यामि नवरात्रव्रतं शुभम् ।
शरत्काले विशेषेण कर्त्तव्यं विधिपूर्व्वकम् ॥
वसन्ते च प्रकर्त्तव्यं तथैव प्रेमपूर्व्वकम् ।
द्वाविमौ यमदंष्ट्रौ तौ सर्व्वजनेषु वै ॥
शरद्वसन्तनामानौ दुर्गमौ प्राणिनामिह ।
तस्मादुभयकालेषु कार्य्यं सर्व्वत्र शुभमिच्छता ॥
द्वावेव सुमहाघोरावेतौ रोगकरौ नृणाम् ।
वसन्तशरदावेव जगतामुग्रकारयुभौ ॥
तस्मात्तत्र प्रकर्त्तव्यं चण्डिकापूजनं बुधैः ।
चैत्राश्विने शुभे मासे भक्तिपूर्व्वं नराधिप ! ॥
अमावस्यान्तु सम्प्राप्य सम्भारं कल्पयेच्छुभम् ।
हविष्यान्नञ्च कार्य्यमेकभुक्तन्तु तद्दिने ॥
मद्यपस्तु प्रकर्त्तव्यः सने देशे शुभे स्थले ।
हस्तषोड्शमानेन कुण्डमध्वनसमन्वितः ॥
गौरम्मृद्गोमयाभ्याञ्च लेपनं कारयेत्ततः ।
तन्मध्ये वेदिका शुभ्रा कर्त्तव्या च समा स्थिरा ॥
चतुर्हस्ता च हस्तोच्छ्रा पीठार्थे स्थानमुत्तमम् ।
तोरणानि विचित्राणि वितानञ्च प्रकल्पयेत् ॥
रात्रौ द्विजानयामन्त्र्य देवीतन्त्रविशारदान् ।
आचारनिरतान् दान्तान् वेदवेदाङ्गपारगान् ॥
प्रतिपद्दिवसे कार्य्यं प्रातःस्नानं विधानतः ।
नद्यां नदे तड़ागे वा वाप्यां कूपे गृहेऽथ वा ॥
प्रातर्नित्यं पुरः कृत्वा द्विजानां वरणं ततः ।
अर्घ्यपाद्यादिकं सर्व्वं कर्त्तव्यं मधुपूर्व्वकम् ॥
वस्त्रालङ्करणादीनि देयानि च स्वशक्तितः ।
वित्तशाठ्यं न कर्त्तव्यं विभवे सति कर्हिचित् ॥
विप्रैः सन्तोषितैः कार्य्यं सम्पूर्णं सर्व्वथा भवेत् ।
नव पञ्च त्रयञ्चैको देयाः पाठे द्विजाः स्मृताः ॥
वरयेद्ब्राह्मणं प्राज्ञं पारायणकृते तदा ।
स्वस्तिवाचनकं कार्य्यं वेदमन्त्रविधानतः ॥
वेद्यां सिंहासनं स्थाप्य चौमवस्त्रसमन्वितम् ।
तत्र स्थाप्यास्विका देवी चतुर्हस्तायुधान्विता ॥
रत्नभूषणसंयुक्ता मुक्ताहारविराजिता ।
दिव्याम्बरधरा सौम्या सर्व्वलक्षणसंयुता ॥
शङ्खचक्रगदापद्मधरा सिंहे स्थिता शिवा ।
अष्टादशभुजा वापि प्रतिष्ठाप्या सनातनी ॥
अर्चाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम् ।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः ॥
पञ्चपल्लवसंयुक्तं वेदमन्त्रैः सुसंस्कृतम् ।
सुतीर्थजलसम्पूर्णं हेमरत्नैः समन्वितम् ॥
पार्श्वे पूजार्थसम्भारान् परिकल्प्य समन्ततः ।
गीतवादित्रनिर्घोषान् कारयेन्मङ्गलाय वै ॥
तिथौ हस्तान्वितायाञ्च नन्दायां पूजनं वरम् ।
प्रथमे दिवसे राजन् ! विधिवत् कामदं नृणाम् ॥
नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत् ।
उपवासेन नक्तेन चैकभक्तेन वा पुनः ॥
करिष्यामि व्रतं मातर्नवरात्रमनुत्तमम् ।
साहाय्यं कुरु मे देवि ! जगदम्ब ! ममाखिलम्॥
यथाशक्ति प्रकर्त्तव्यो नियमो व्रतहेतवे ।
पश्चात् पूजा प्रकर्त्तव्या विधिवन्मन्त्रपूर्व्वकम् ॥
चन्दनागुरुकर्पूरैः कुसुमैश्च सुगन्धिभिः ।
मन्दारकरवीराग्रोकचम्पकैः करवीरकैः ॥
मालतीव्रजकापुष्पैस्तथाबिल्वदलैः शुभैः ।
पूजयेच्चण्डिकां धात्रीं धूपैर्दीपैर्विधानतः ॥
फलैर्नानाविधैर्घ्यं प्रदातव्यञ्च तत्र वै ।
नारिकेलैर्मातुलिङ्गैर्दाडिमीकदलीफलैः ॥
नारङ्गैः पनसैश्चैव तथा पूर्णफलैः शुभैः ।
अन्नदानं प्रकर्त्तव्यं भक्तिपूर्व्वं नराधिप ! ॥
नैवेद्यानि विचित्राणि सर्व्वान्नसंयुतानि च ।
ओदनं पायसञ्चैव पूपांश्च वटकांस्तथा ।
मांसाशनं ये कुर्व्वन्ति तैः कार्य्यं पशुहिंसनम् ।
महिषाजवराहाणां बलिदानं विधीयते ॥
देवयज्ञे निहता यान्ति पशवः स्वर्गमक्षयम् ।
न हिंसा पशुजा तत्र निहता तत्ततेऽत्र च ! ॥
अहिंसा यागिकी प्रोक्ता सर्व्वशास्त्रविनिर्णये ।
देवतार्थे विहन्तानां पशूनां स्वर्गतिर्ध्रुवा ॥
होमार्थञ्चैव कर्त्तव्यं कुण्डञ्चैव त्रिकोणकम् ।
स्रुक्स्रुवं वा प्रकर्त्तव्यं त्रिकोणं मानतः शुभम् ॥
त्रिकालं पूजनं नित्यं नानाद्रव्यैर्मनोहरैः ।
गीतवादित्रतूर्यैश्च कर्त्तव्यश्च महोत्सवः ॥
नित्यं भूमौ च शयनं कुमारीणाञ्च पूजनम् ।
वस्त्रालङ्करणैर्हृद्यैर्भोजनैश्च सुधामयैः ॥
एकैकां पूजयेन्नित्यमेकरूपा तथा पुनः ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकञ्च वा ॥
विभवस्यानुसारेण कर्त्तव्यं पूजनं किल ।
वित्तशाठ्यं न कर्त्तव्यं राजन्भक्तिमखे सदा ॥
एकवर्षा न कर्त्तव्या कन्या पूजाविधौ नृप ! ।
परमज्ञा तु भोगानां गन्धादीनाञ्च बालिका ॥
कुमारिका तु सा प्रोक्ता द्विवर्षा या भवेदिह ।
त्रिमूर्त्तिश्च त्रिवर्षा च कल्याणी चतुरब्दिका ॥
रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ।
चण्डिका सप्तवर्षा स्यादष्टवर्षा च शाम्भवी ॥
नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ।
अत ऊर्द्धं न कर्त्तव्या सर्व्वकार्य्यविगर्हिता ॥
एभिश्च नामभिः पूजा कर्त्तव्या विधिसंयुता ।
तासां फलानि वक्ष्यामि नवानां पूजने सदा ॥
कुमारी पूजिता कुर्याद्दुःखदारिद्र्यनाशनम् ।
शत्रुक्षयं धनायुर्य्यबलवृद्धिं करोति वै ।
त्रिमूर्त्तिपूजनादायुस्त्रिवर्गस्य फलं भवेत् ।
धनधान्यागमश्चैव पुत्रपौत्रादिवृद्धयः ॥
विद्यार्थी लभते विद्यां धन्यार्थी धनमश्नुते ।
सुखार्थी पूजयेन्नूनं कल्याणीं सर्व्वकामदाम् ॥
रोहिणीं रोगनाशाय पूजयेद्भक्तिपूर्व्वकम् ।
कालिकां शत्रुनाशार्थं पूजयेद्भक्तिपूर्व्वकम् ॥
ऐश्वर्य्यधनकामश्च चण्डिकां परिपूजयेत् ।
पूजयेच्छाम्भवीं नित्यं नृप ! संमोहनाय च ॥
दुःखदारिद्र्यनाशाय संग्रामे विजयाय च ।
क्रूरशत्रुविनाशार्थं तथोग्रकर्म्मसाधने ॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च ।
वाञ्छितार्थस्य सिद्ध्यर्थं सुभद्रां पूजयेत् सदा ॥
श्रीरस्तिति च मन्त्रेण पूजयेद्भक्तितत्परः ।
श्रीयुक्तमन्त्रैरथवा बीजमन्त्रैरथापि वा ॥
कुमारस्य च तत्त्वानि या स्तवत्यपि लीलया ।
कादीनपि च देवांस्तां कुमारीं पूजयाम्यहम् ॥
सत्त्वादिभिस्त्रिमूर्त्तिर्यां तेषिं नानास्वरूपिणी ।
त्रिकालव्यापिनी शक्तिस्त्रिमूर्त्तिं पूजयाम्यहम् ॥
कल्याणकारिणी नित्यं भक्तानां पूजितानिशम् ।
पूजयामि च तां भक्त्या कल्याणीं सर्व्वकामदाम् ॥
रोहयन्ती च रोगाणि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्व्वभूतानां रोहिणीं पूजयाम्यहम् ॥
काली कालयते सर्व्वं ब्रह्माण्डं सचराचरम् ।
कल्पान्तसमये या तां कालिकां पूजयाम्यहम् ॥
चण्डिकां चण्डरूपाञ्च चण्डमुण्डविनाशिनीम् ।
तां चण्डपापहरिणीं चण्डिकां पूजयाम्यहम् ॥
अकारणात् समुत्पत्तिर्यस्याः परिकीर्तिता ।
यस्यास्तां सुखदां देवीं शाम्भवीं पूजयाम्यहम् ॥
दुर्गा नाशयति भक्तं या सदा दुर्गार्त्तिनाशिनी ।
दुर्ज्ञेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम् ॥
सुभद्राणि च भक्तानां कुरुते पूजिता सदा ।
अभद्रनाशनीं देवीं सुभद्रां पूजयाम्यहम ॥
एभिर्मन्त्रैः पूजनीया कन्यकाः सर्व्वदा बुधैः ।
वस्त्रालङ्करणैर्माल्यैर्गन्धैरुच्चावचैरपि ॥"
"हीनाङ्गीं वर्ज्जयेत् कन्यां कुष्ठयुक्तां व्रणाङ्किताम् ।
गम्यस्फुरितहीनाङ्गीं विलासकुलसम्भवाम् ॥
स्वालज्यां कैकरां काणीं कुरूपां बहुरोमशाम् ।
श्वश्रूश्वशुरभोगिनीं कन्यां रक्तपुष्पादिनाङ्किताम् ॥

दासीगर्भसमुद्भूतां गोलकां कन्यकोद्भवाम् ।
वर्ज्जनीयाः सदा चैताः सर्व्वपूजादिकर्म्मसु ॥
अरोगिणीं सुरूपाङ्गीं सुन्दरीं वस्त्रवर्ज्जिताम् ।
एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् ॥
ब्राह्मणी सर्व्वकार्य्येषु जयार्थे नृपवंशजा ।
लाभार्थे वैश्यवंशोत्था क्षेमे च शूद्रवंशजा ॥
ब्राह्मणैर्ब्राह्मणाः पूज्याः राजन्यैर्राजवंशजाः ।
वैश्यैश्चैववर्गजाः पूज्याश्चतस्रः पादसम्भवैः ॥
कौलैश्चैव प्रयत्नेन यथायोग्यं प्रपूजयेत् ।
नवरात्रविधानेन भक्तिपूर्व्वं सदैव हि ॥
अशक्तो नियतं पूजां कर्त्तुं चैत्रवरात्रके ।
अश्वयुजे विशेषेण कर्त्तव्यं पूजनं सदा ॥
पुराण्यां भद्रकाल्यां दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽश्वयुजे विप्रैर्वै कर्त्तव्यं पूजनं सदा ।
नानाविधोपहारैश्च गन्धमाल्यानुलेपनैः ॥
पायसैरामिषैर्होमैर्नैवेद्यानाञ्च भोजनैः ।
फलपुष्पोपहारैश्च तोषयेज्जगदम्बिकाम् ॥
उपवासे शक्तानां नवरात्रव्रते पुनः ।
उपोषणत्रयं प्रोक्तं यथोक्तं फलदं नृप ! ॥
सप्तम्याञ्च तथाष्टम्यां नवम्यां भक्तिभावतः ।
चिरात्रकरणात् सर्व्वं फलं भवति पूजनात् ॥
सम्पूर्णं तद्व्रतं प्रोक्तं विप्राणाञ्चैव भोजनैः ।
व्रतानि यानि चान्यानि दानानि विविधानि च ॥
नवरात्रव्रतस्यास्य नैव तुल्यानि भूतले ।
धनधान्यप्रदं नित्यं सुखसन्तानवृद्धिदम् ॥
आयुरारोग्यदञ्चैव स्वर्गदं मोक्षदं तथा ।
विद्यार्थी वा धनार्थी वा पुत्रार्थी वा भवेन्नरः ।
तेनेदं विधिवत् कार्य्यं व्रतं सौभाग्यदं शिवम् ॥
विद्यार्थी सर्व्वविद्यां वै प्राप्नोति व्रतसाधनात् ।
राज्यभ्रष्टो नृपो राज्यं समवाप्नोति सर्व्वथा ॥
पूर्व्वजन्मनि यैर्नूनं न ज्ञातं व्रतमुत्तमम् ।
ते व्याधिनो दरिद्राश्च भवन्ति पुत्रवर्ज्जिताः ॥
वन्ध्या च या भवेन्नारी विधवा धनवर्ज्जिता ।
अनुमा तत्र कर्त्तव्या नेयं ज्ञातवती व्रतम् ॥
नवरात्रव्रतं प्रोक्तं न ज्ञातं येन भूतले ।
स कथं विभवं प्राप्य मोदतेऽत्र तथा दिवि ॥
रक्तचन्दनसंमिश्रैः कोमलैर्विल्वपत्रकैः ।
भवानी पूजिता येन स भवेन्नृपतिः क्षितौ ॥"*॥)
अथ नवरात्रपारणानिर्णयः । सा च दशम्यां कार्य्या ॥ * ॥ दशम्यां विशेषस्तु भार्गवार्चनदीपिकायां भविष्ये ।
"ग्रभीयुक्तं जगन्नाथं भक्तानामभयङ्करम् ।
अर्च्चयित्वा ग्रभीदृग्भमर्च्चयेच्च ततः पुनः ॥"
ग्रभीमन्त्रः । स्कान्दे हेमाद्रौ गोपथब्राह्मणे ।
'अमङ्गलानां ग्रमनीं ग्रमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं ग्रभीं शुभाम् ॥"
तथा भविष्ये ।
"ग्रभी ग्रमयते पापं ग्रभी ग्रहविनाशिनी ।
अर्জ্জुनस्य धनुर्द्धारी रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र विघ्नप्रकर्त्री त्वं भव श्रीरामपूजिते ॥"
अथ बलनीराजनम् । कक्षपरते । तत्र मन्त्रः ।
"चतुरङ्गं बलं मह्यं निरमित्रं प्रजायिह ।
सर्व्वत्र विजयो मेऽस्तु त्वत्प्रसादात् सुरेश्वरि ॥"
गौड़निबन्धे ज्योतिषे ।
"कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम् ।
शोभनं खञ्जनं पश्येत् जलगोधस्य सन्निधौ ॥"
इति निर्णयसिन्धुः ॥
नवरात्रिकं, क्ली, (नवरात्रेण निर्वृत्तम् । नवरात्र + "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) नवरात्रम् । यथा, भविष्योत्तरे ।
"आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रिकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥"
नववधूः, स्त्री, (नवा नूतना वधूः ।) नवोढ़ा । नवीना भार्य्या । यथा,—
"असम्भवद्वनरसा ग्रसालिगजसेविता ।
करं न सहते राजन् ! भूमिर्नववधूरिव ॥"
इति द्व्यर्थकाव्यम् ॥ * ॥
नववध्वागमनदिनं यथा । तत्र अष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । (यदुक्तं ज्योतिषे ।
"अश्वं हन्त्यष्टमे वर्षे अश्वरश्च दशाब्दिके ।
संप्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥
विवाहमासि प्रथमं वध्वा नागमनं यदि ।
सदा सर्व्वमिदं चिन्त्यं युग्माब्दादि विचक्षणैः ॥")
मासा मार्गशीर्षफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । विहितनक्षत्राणि पुष्यस्वातीहस्ताश्विनीशतराषाढोत्तरफल्गुन्युत्तरभाद्रपदारेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढाः । वाराः इन्दुहस्पतिबुधशुक्रसोमानाम् । तिथयो यात्राप्रकरणोक्ताः । चन्द्रसूर्य्यबारवेलादिकशूलादीन् परित्यज्य ताराचन्द्रशुद्धौ कालशुद्धौ च कार्य्यम् ॥
इति ज्योतिषम् ॥ अपि च ।
"स्वातीमूलपुनर्व्वसूत्तरकराश्चित्रानुराधाश्विनी
रोहिण्यः श्रवणा द्विरागमविधौ पुष्या धनिष्ठा तथा ।
भर्त्तुर्गोचरशोभने दिनपतौ लग्ने पुनः शोभने
कुम्भाजालिरवौ शुभे शुभतिथौ वारादियोगोदिते ॥
वैशाखे मार्गशीर्षे हि फाल्गुने हि शुभे रवौ ।
नववध्वागमं कुर्य्यादन्यमासे विवर्ज्जयेत् ॥"
इति मथुरेशचक्रवर्त्तिकृतसारसंग्रहः ॥
(अन्यद्विरागमनशब्दे द्रष्टव्यम् ॥)
नववध्वागमनं, क्ली, (नववध्वा आगमनम् ।) नवोढ़ायाः प्रथमपतिगृहगमनम् । तद्दिनं यथा,
"स्त्रीशुद्धाब्जघटालिसंयुतरथौ काले विशुद्धे भृगुं सन्त्यज्य प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते ।
लग्नाद्दारुं निरंशकं नववधूयात्राप्रवेशौ पतिः
कुर्य्यादेकपुरादिषु प्रतिभृगोर्नैच्छन्ति दोषं बुधाः ॥
एकग्रामे चतुःप्राले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नोद्वहमानायाः पुरः शुक्रो न दुष्यति ॥"
इति दीपिका ॥
अन्यत् नववधूशब्दे द्रष्टव्यम् ॥
नववरिका, स्त्री, (नवो वरोऽस्यस्या इति । नववर + ठन् ।) नवोढ़ा । इति हारावली । १५४ ॥
नववल्लभं, क्ली, (नवानां नवीनानां वल्लभम् ।) दाड़िमगुड़ । इति राजनिर्घण्टः ॥ (नवो वल्लभो यस्य ।) नवीनप्रिये, त्रि ॥
नववस्त्रं, क्ली, (नवं वस्त्रम् ।) नवीनवसनम् । नूतन कापड़ इति भाषा ॥ तत्पर्य्यायः । अनाहतम् २ आहतम् ३ अहतम् ४ तन्त्रकम् ५ निष्पावाभि ६ । इति शब्दरत्नावली ॥ नवाम्बरम् ७ इत्यमरः । २ । ६ । ११२ ॥
अथ नववस्त्रपरिधानदिनम् ।
तत्र वाराः बुधेज्यसितशुक्राणाम् । नक्षत्राणि रोहिणीमृगपुष्यपुनर्व्वसुहस्तानुराधाधनिष्ठापुष्यविशाखाहस्तस्वात्यश्विनीचित्रोत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदाश्विनीस्वातीपुनर्व्वसुरेवत्यः ॥
"धनिष्ठा रोहिणी हस्ता विशाखा चोत्तरासु च ।
ज्येष्ठा पुनर्व्वसुस्वाती चित्राश्विनी च रेवती ॥"
इति सारसंग्रहः ॥
अपि च ।
"धातानुराधवसुपुष्यविशाखहस्ता-
श्चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीववुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्टौ ॥
श्रीर्य्ये रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचं बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥"
इति समयप्रदीपः ॥
नवग्रायकः, पुं, (नवविधः ग्रायक इव ।) नवधा गोपादिजातिविशेषः । नवग्राक इति भाषा ॥ यथा, पराशरसंहितायाम् ।
"गोपमाली तथा तैली तन्त्री मोदकवारुणी ।
कुलालः कर्म्मकारश्च नापितो नवग्रायकाः ॥"
नवसूतिका, स्त्री, (नवा सूतिः प्रसवो यस्याः । कप् ।) धेनुः । इत्यमरः । २ । ९ । ७१ ॥ नूतनप्रसवायाञ्च ॥
नवांग्रः, पुं, (नवमोंऽग्रः ।) मेषादिद्वादशलग्नानां नवभागः । यथा, दीपिकायाम् ।
"चराणां सचिकोणानां तच्चराद्या नवांग्रकाः ॥"
"मेषकेग्रद्विधुर्घां मेषाद्यास्तु नवांग्रकाः ।
वृषकन्याग्रगाणाञ्च मकरादिनवांग्रकाः ॥
तुलामिथुनकुम्भानां तूलाद्याः ससुदाहृताः ।
कर्कितृश्चिकमीनानां कर्कटाद्या नवांग्रकाः ॥
खनवांग्रस्तु राशीनां वर्गोत्तम इति स्मृतः ॥"
इति ज्योतिस्तत्त्वम् ॥
(नवभागमात्रम् ॥)
नवाङ्गा, स्त्री, (नवमिव अङ्गं यस्याः । टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (नवविधेन द्रव्येण व्यङ्गं यस्येति विग्रहे ।) पाचनविशेषे, क्ली । यथा, वैद्यके ।
"विश्वाष्टताब्दभृद्भिस्तैः पञ्चमूलीसमन्वितैः ।
क्षतः कषाये हन्यादु कासमप्योषवं ज्वरम् ॥"

नवान्नं, क्ली, (नवं नूतनं अन्नम् ।) नूतनान्नम् । तन्निमित्तश्राद्धम् । यथा,—

वराह उवाच ।

"अकृत्वा यो नवान्नानि मम कर्म्मपरायणः ।
भुञ्जन्ति ये नवान्नानि परैः प्रक्तानि केन ह ॥
नाहं लोभेन चेच्छामि पुनर्भोगेन सुन्दरि ! ।
अवश्यमेव कर्त्तव्यं मम कर्म्मपरायणैः ॥
ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च ॥
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कथञ्चन ।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः ॥
अन्यच्च ते प्रवक्ष्यामि येन तत्र प्रसक्ष्यते ।
प्रायश्चित्तं महाभागे ! मम भक्तसुखावहम् ॥
उपवासं चिरात्तन्तु तत एकेन वा पुनः ।
आकाशशयनं कृत्वा चतुर्थेऽहनि शुध्यति ॥
एवं तत्र विधिं कृत्वा उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शुचिः सुश्चेत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥"

इति नवान्नभोजनापराधप्रायश्चित्तम् ॥ इति वराहपुराणम् ॥*॥ तस्य निषिद्धदिनं यथा,—

"सूर्य्ये चैव विशाखर्क्षे सारतिथौ पापे त्रिजन्मान्विते
नन्दामन्दमहीजकाव्यदिवसे पौषे मधौ कार्त्तिके ।
मेषूयाहिशिवेषु विष्णुशयने कृष्णे प्रशिन्यष्टमे
श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रदम् ॥"

सूर्य्ये चैव विशाखर्क्षे मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयावस्थिते सूर्य्ये । सारतिथौ चयोदश्याम् । पापे पञ्चमतारायाम् । उग्रः पूर्व्वाचयमधाभरण्यः । अहिरश्लेषा । शिव आर्द्रा ।

"व्यतीपाघेषार्द्रगे सूर्य्ये भरणेज्यानिशाल्लके ।
नवान्नभोजनं श्राद्धं जन्मचन्द्रे तिथौ न च ॥
अश्लेषाकृत्तिकाश्लेषामूलाजपदकेषु च ।
भृगुभौमदिने रिक्ततिथौ नाद्यान्नवौदनम् ॥"

तस्य विधिर्यथा,—

"प्राग्भीयाद्धिसंयुक्तं नवं विप्राभिमन्त्रितम् ॥"

दीपिकायाम् ।

"मेषूयाहिशिवाश्वेषु त्रिभौमशनिवासरे ।
अन्नप्राशनवत् कुर्य्यान्नवान्नप्रथमभक्षणम् ॥"

अधिकन्तु ।

"पुष्या स्वातिपुनर्व्वस्वृ मृगशिरःपुष्याश्विराधा तथा
मूलायां श्रवणे च रेवतिधने चित्रामघे वारुणे ।
ब्राह्मे शक्रविशाखयोश्च सुरगे सौम्येन्दुचौवाहके
चन्द्रे शोभनतारके च शुभदं श्राद्धं नवान्नैः कृतम् ॥"

भोजराजः ।

"ब्रह्मा विष्णुश्च रुद्रश्च सूर्य्यश्च मासैकपौष्णादितौ
मैत्रे चैव विशाखवासुधनभे मूलाश्विवह्नौ तथा ।
शक्रे वारुण ऋक्षके शुभदिने श्राद्धं नवं शस्यते
नद्यम्भोगर्भवभूमिजेषु न भवेच्छ्राद्धं नवान्नोद्भवम् ॥"

इति ज्योतिस्तत्त्वम् ॥

आश्विनाधिकारे ।

"शुक्लपक्षे नवं धान्यं ज्ञात्वा पक्वं सुशोभनम् ।
गच्छेत् क्षेत्री विधानेन गीतवाद्यपुरःसरः ॥"

इत्यादिना ब्रह्मपुराणेन श्राद्धविधानात् ॥

अपि च ।

"शूरद्रुसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशाद्यत्र श्यामाको वर्णिनः स्मृतः ॥"

इति मलमासतत्त्वम् ॥

नवाम्बरं, क्ली, (नवं नूतनमम्बरं वस्त्रम् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११९ ॥ (यथा, समयप्रदीपे ।

"ग्रीष्मे रवौ सततमम्बुभिराप्लवेभ्यो
भौमे शुचौ बुधदिने च भवेद्दुनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥")

नवार्चिः, [स्] पुं, (नव अर्चींषि यस्य ।) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥ (क्ली, नवं नूतनं अर्चिः ।) नवशिखा । (नव अर्चींषि इति विग्रहेण तु नवसंख्यकाकिरणार्थे बहुवचनम् ।)

नवाह्नः, पुं, (नवं अह्नः । समासे टच् ।) नवदिनम् । प्रतिपत्तिथिः । इति त्रिकः ॥

नवीका, स्त्री, (नवोऽस्यस्या इति । नव+ठन्+टाप् । नवं नवं कायति इति वा ।) नवशुक्ला । इति स्त्रीत्वप्रकरणे दुर्गादासः ॥

नवीन, त्रि, (नवमेव । नव+"नवस्य नादेशोऽप्रत्ययपूर्व्वश्च अक्षया वक्तव्याः ।"५ । ३ । ७५ । इत्यस्य वार्त्तिकोक्त्या नः नादेशश्च ।) नूतनम् । इत्यमरः । ३ । ९ । ७७ ॥ (यथाच गदाधरः ।

"गदाधरविनिर्म्मिता विविधदुर्गतर्काटवी
नवीनपदवीसुदं वितनुतां सतां धीमताम् ॥")

नवोढ़ा, स्त्री, (नवा नूतना ऊढ़ा) नवविवाहिता । तत्पर्य्यायः । वधूः २ जनी ३ । इति जटाधरः ॥ नववरिका ४ दिक्करी ५ नवयौवना ६ । इति हारावली । ९५४ ॥ सुग्धानायिकाभेदः । तस्या लक्षणं यथा । "लज्जाभयपराधीनरतिर्नवोढ़ा ।" तस्या उदाहरणं यथा, रसमञ्जर्य्याम् ।

"बलान्नीता मार्गे सुखमसुखं नैव कुरुते
धुनानाग्रहस्तं क्षिपति वदनं घुम्मनविधौ ।
मुहुः श्वस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च ॥"

नवोदकं, क्ली, (नवमुदकम् ।) नूतनजलम् । यथा, मिताक्षरायां स्मृतिः ।

"स्नाने नवोदकं शुद्धं न प्रातश्च तदुच्यते ।
अकाले तु दशाहानि पीत्वा नाद्यादहर्निशम् ॥"

इति शुद्धितत्त्वम् ॥

तन्निमित्तकं श्राद्धं कर्त्तव्यम् । यथा, श्राद्धतत्त्वे ।

"नवोदके नवान्ने च शस्यप्रच्छादने तथा ।
पितरः सूदयन्त्यन्नमशक्तास्तु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्तासु श्राद्धेषु च ॥
नवोदके वर्षोपक्रमे । आर्द्रागते रवाविति यावत् ।
'आर्द्रादितो विशाखान्तं रविश्चरेच्च वर्षति ।'

इति नयवर्द्धमानधृतात् ॥

'प्राविट्काले समायाते रौद्रर्क्षगते रवौ ।
नाड़ीवेधसमायोगे जलयोगं वदाम्यहम् ॥'

इति रत्नमालाच ॥

रौद्रमार्द्रा ॥ * ॥ नवोदकश्राद्धस्य सावकाशत्वात् त्रयोदश्यादिकनिषेधमाह दीपिकायाम् ।

'त्रयोदश्यौ जन्मदिनञ्च नन्दा
जन्मर्क्षतारा सितवासरश्च ।
व्रता हरीन्दूत्तरान्त्यमैत्र-
ध्रुवेषु च श्राद्धविधानमिष्टम् ॥'

सितवासरं शुक्रवारम् । ऋक्षं राशिः । ऋक्षादयः अवश्यपुष्यहस्तशतभिषोत्तराषाढोत्तराभाद्रपदोत्तराफल्गुनीरोहिण्यः । जन्मर्क्षे चेत्रवोदकश्राद्धाकरणदोषयोः श्राद्धयोरेकत्रात् विधिः ।" इति तिथ्यादितत्त्वम् ॥

नवोद्धृतं, क्ली, (नवमुद्धृतम् ।) नवनीतम् । इत्यमरः । २ । ९ । ५२ ॥ नूतनोत्थिते, त्रि ॥

नव्यं, त्रि, (नूयते स्तूयते इति । नु स्तुतौ+"अचो यत् ।" ३ । १ । ९७ । इति यत् । यद्वा, नवमेव । "प्राग्वतीयो यत् ।" ५ । १ । १०१ । इति स्वार्थे यत् ।) नूतनम् । इत्यमरः ।३।१।७७॥ (यथा, ऋग्वेदे । १ । ५५ । १६ ।

"नव्या नव्या सुयतवो भवन्तीर्महे वाजाय द्रविणोदामनेमम् ।"

स्तुत्यम् । यथा, ऋग्वेदे । ५ । ११ । १ ।

"कथा नो अस्य क्षुतयस्य नव्याः
सुतो मघोदा उचथस्य शस्याः ॥")

क्ली, स्तुतिः । नु ज स्तुतौ भावे अच् नवशब्दात् स्वार्थे वे निष्पन्नः ॥

नक्यः, पुं, (नूयते इति । नु+यत् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

नक्राकः, पुं, (नक्रवतीति । नक्र वाप्ते+"आकः खलादेः स च कित् ।" २।२२१। इति उणादिकोषटीकाधृतसूत्रात् आकः ।) काकभेदः । इत्युणादिकोषः ॥

नक्षिता, [क्ष] त्रि, (नक्षतेर्गतिकर्म्मणः । इति नक्षधातोः कर्त्तरि क्तृच्प्रत्ययनिष्पन्नः ॥

नक्षत्रप्रकृतिका, स्त्री, (नक्षत्राणी प्रकृतिः सन्ततिर्यस्याः । कप् । ततष्टाप् ।) शतवतृसा । तत्पर्य्यायः । नक्तः २ क्षतपुष्पिका ३ । इति हेमचन्द्रः । ३ । १८५ ॥

नश्वरः, त्रि, (नक्षतीति । नक्ष+"इष्णुशसिभ्यः क्वरप् ।"३ । २ । १६३ । इति क्वरप् ।) वाक्प्रतियोगी । अनयोरर्थः । इति नक्षधातोः कर्त्तरि वरप्प्रत्ययनिष्पन्नः ॥ (यथा, भागवते । ५ । १८ । ४ ।

"वदन्ति विश्वं कवयः स नश्वरं
पश्यन्ति चाध्यात्मविदो विपश्चितः।
तथापि मुह्यन्ति तवाज मायया
सुविस्मितं ह्यत्यमजं नतोऽस्मि तम्॥")

नष्टः, त्रि, (नश्+क्तः।) अदर्शनविशिष्टः। तत्पर्य्यायः। तिरोहितः २। इत्यमरः। २। ८। ११२॥ (यथा, पञ्चतन्त्रे। १। ३७८।
"नष्टं मृतमतिक्रान्तं दातुं शोचन्ति पण्डिताः।
पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः॥"
अधमः। यथा, चाणक्ये। ८०।
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जास्तु कुलस्त्रियः॥"
भ्रान्तः। यथा, हरिवंशे। १७४। १२३।
"ततीये तु मुहूर्त्ते सा नष्टा बाष्पपुरात् तदा।
सखीप्रियं विकीर्षन्ती पूजयन्ती तपोधनान्॥"
पलायितः। यथा, रत्नावल्याम्।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम्॥"
विप्लवः। यथा, मनुः। ३। १८०।
"नष्टं देवलके दत्तं अप्रतिष्ठन्तु वाहुषौ॥")
नाशाश्रयः। यथा। "योगो नष्टः परन्तप॥"
इति श्रीभगवद्गीता॥ नाशे, स्त्री॥

नष्टचन्द्रः, पुं, (नष्टो दुष्टश्चन्द्रः।) सौरभाद्रशुक्लभयपक्षे चतुर्थ्यामुदितचन्द्रः। यथा,—
"नष्टचन्द्रो न द्रष्टव्यश्चाद्रे मासि सितासिते।
चतुर्थ्यामुदितोऽशुद्धः प्रतिषिद्धो मनीषिभिः॥
चन्द्रसारापहरणं कलङ्कमतिदुष्करम्।
तस्मै ददाति हे नन्द! कामतो यदि पश्यति॥
अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत्।
तदा शुद्धो भवेत् सद्यो निष्कलङ्की महीतले॥
'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मारोदीस्तव ह्येष स्यमन्तकः।'
इति मन्त्रेण पूतञ्च जलं साधुः पिबेद्ध्रुवम्॥
पुरा तारा गुरोः पत्नी नवयौवनसंयुता।
रत्नभूषणभूषाढ्या रत्नस्रग्वस्त्रधारा सती॥
सुश्रोणी सुस्मिता रम्या सुन्दरी सुमनोहरा।
अतीवकबरीरम्या मालतीमाल्यभूषिता॥
सिन्दूरविन्दुना सार्कं चारुचन्दनविन्दुभिः।
कस्तूरीविन्दुनाधश्च भालमध्यस्थलोज्ज्वला॥
रत्नेन्द्रसारनिर्म्माणकणञ्चत्काञ्चीररञ्जिता।
सुवक्त्रलोचना श्यामा सुचारुकज्जलोज्ज्वला॥
रुचारुचारुसुस्ताभदन्तपङ्क्तिमनोहरा।
रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला॥
कामिनीष्वतुला बाला गजेन्द्रमन्दगामिनी।
सुकोमला चन्द्रमुखी कामाधारा च कामुकी॥
स्वर्गमन्दाकिनीतीरे स्नाता स्निग्धाम्बरा वरा।
ध्यायन्ती गुरुपादं सा स्वगृहं गमनोन्मुखी॥
दृष्ट्वा तस्याश्च सर्व्वाङ्गमनङ्गबाणपीडितः।
भाद्रे चतुर्थ्यांचन्द्रश्च जहार चेतनं व्रज!॥
ज्ञानं क्षणेन संप्राप्य रथस्थो रसिकी बली।
रथमारोहयामास करे धृत्वा च तारकाम्॥
कामोन्मत्तः कामिनीन्तां समाश्लिष्य चुचुम्ब सः।
शृङ्गारं कर्त्तुमुद्यन्त तस्या वाञ्च गुरुप्रिया॥

तारकोवाच।
त्यज मां त्यज मां चन्द्र! सुरेषु कुलपांसक!।
गुरुपत्नीं ब्राह्मणीञ्च पतिव्रतपरायणाम्॥
गुरुपत्नीसङ्गमने ब्रह्महत्याशतं लभेत्।
पुत्रस्त्वं तव माताहं धैर्य्यं कुरु सुरेश्वर!॥
धिक् तां श्रुत्वा सुरगुरुर्भस्मीभूतं करिष्यति।
गुरुपत्नी विप्रपत्नी यदि सा च पतिव्रता॥
ब्रह्महत्यासहस्रञ्च तस्याः सङ्गमने लभेत्।
पुत्राधिकञ्च शिष्यञ्च प्रियो मत्स्वामिनो भवान्॥
स्वधर्म्मं रक्ष पापिष्ठ! मामेव मातरं व्रज।
दास्यामि स्त्रीवधं तुभ्यं यदि मां संग्रहीष्यसि॥
विलक्ष्य तारावचनं ताञ्च सम्भोक्तुमुद्यतम्।
शशाप तारा कोपेन निष्कामा सा पतिव्रता॥
राहुग्रस्तो घनग्रस्तः पापयुक्तो भवान् भव।
कलङ्की यन्त्रणा ग्रस्तो भविष्यसि न संशयः॥
चन्द्रमेवं तदा तूर्णं कामदेवं शशाप सा।
तेजस्विना केनचित्त्वं भस्मीभूतो भविष्यसि॥
चन्द्रसारां गृहीत्वा च त्यक्त्वा च रमणं व्रज!।
क्रोड़े निधाय प्रययौ रुदन्तीं तां शुचिस्मिताम्॥
निर्जने निर्जने रम्ये शैले शैले मनोहरे।
तत्र दृष्ट्वासुरगुरुं बलिगेहात् समागतम्॥
प्रणम्य सर्व्वसक्त्या च चन्द्रस्त्वं शरणं ययौ।
शुक्रस्तं बोधयामास वचनं नीतियुक्तितः॥

शुक्र उवाच।
शृणु वत्स! प्रवक्ष्यामि गुरवे देहि तारकाम्।
गुरुपत्नीं मातृपरां त्यज महत्पनाधिनो!॥
कुरु पापक्षयोपायं निवृत्तिस्तु महाफला।
सतीनां गुरुपत्नीनां ग्रहणेन बलेन च॥
ब्रह्महत्यासहस्राणां पातकं लभते जनः।
कुम्भीपाके पच्यते च यावद्वै ब्रह्मणः शतम्॥
दहिष्यतिञ्च तेजस्वी त्वां भस्मीकर्त्तुमीश्वरः।
न चकार कृपालुश्चेत् प्रियशिष्यस्य हेतुना॥
उतथ्यपत्नीं दृष्ट्वा स पुरा रेमे सकामतः।
ततपतेः शापतोऽस्यैव परगस्ता प्रिया सती॥"
"एतस्मिन्नन्तरे ब्रह्मा बोधयित्वा कविं विभुः।
समानीय निधानाथं तारकासहितं व्रज!॥
शम्भोश्च चरणाम्भोजे चकार च समर्पणम्॥
शम्भुस्तं प्रीतियुक्तश्च वासयामास वक्षसि॥
दत्त्वा तस्मै पादरेणुं निष्पापञ्च चकार सः।
दत्त्वा तन्मस्तके हस्तं कृपालुरभयं ददौ॥
क्षीरोदे स्नापयित्वा च प्रायश्चित्तेन शङ्करः।
चकार चन्द्रं निष्पापं ब्रह्मणा सहितः शुचिम्॥
योगेन चन्द्रं योगीन्द्रो द्विखण्डञ्च चकार सः।
ररक्षार्द्धं ललाटे च सोऽर्द्धं ब्रह्मणः पुरः॥
अतश्च महादेवो बभूव चन्द्रशेखरः।
स्नानाङ्गो लक्षितस्तत्र कलङ्की देवसंसदि॥
लक्ष्म्या च स्वयोगेन देहत्यागञ्चकार सः।
तच्छरीरञ्च क्षीरोदे ब्रह्मणा च समर्पितम्॥
ररोदाचिच्च कृपया सुधा क्षीरोदशैलटे।
अत्रेचक्षुर्जलं तस्य पपात च जगौ व्रज!॥
भस्माङ्गभूव चन्द्रश्च निष्पापो देवसंसदि।
ब्रह्मा च भगवान् शम्भुरभिषेकञ्चकार तम्

उवाच च महादेवो निर्भयं देवसंसदि॥

महादेव उवाच।
स्वस्थानं गच्छ पुत्र! त्वं कुरु स्वविषयं सुदा।
पश्चात् श्वशुरशापेन यक्ष्मग्रस्तो भविष्यसि॥
वर्षे पतिव्रताशापं कर्त्तुमीशश्च को भुवि।
ममाशिषा यक्ष्मणश्च प्रतिकारो भविष्यति॥
यक्ष्माक्रान्तचतुर्थ्यान्तु गुरुपत्नी व्रता कृता।
तस्यास्तस्मिन्दिने वत्स! पापदृश्यो युगे युगे॥
मा शुक्लं क्षीयते कर्म्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥
देहत्यागेन हे वत्स! कर्म्मभोगो न गच्छति।
प्रायश्चित्तान्न सन्देहो ह्यस्तमेव भविष्यति॥
तारापहरणं वत्स! कलङ्कश्चन्द्रमण्डले।
न्यगाल्लुतं विलयञ्च भविष्यति युगे युगे॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ८०-८१ अः॥

नष्टचेष्टता, स्त्री, (नष्टा चेष्टा यस्य। तस्य भावः। तल्।) प्रलयः। इत्यमरः। १। ७। ३३॥ शोकादिना परिस्पन्दनाशो नष्टचेष्टता तच्च प्रलयः प्रलीयतेऽनेन प्रलयः ली ड य ञो श्लिषि अल्। प्रलयः सात्त्विको भावः मूर्च्छेत्यर्थः। इति सर्व्वस्वम्॥ हर्षशोकादिभिरप्येषचेष्टानाशः प्रलय इत्यर्थः। इति भरतः॥ ईहाशून्यता च॥

नष्टाग्निः, पुं, (नष्टः प्रमादात् निर्व्वाणमाप्तः अग्निर्यस्य।) यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् सः। तत्पर्य्यायः। वीरहा २। इत्यमरः। २। ७। ५३॥

नष्टाग्निहोत्रं, क्ली, (नष्टस्य चौरेणापहृतस्य वस्तुन आग्निः तस्याः स्रुचमिव।) किञ्चित्प्राप्तचौरनीतद्रव्यम्। तत्पर्य्यायः। लोभ्रम् २। इति हारावली। १५८॥

नष्टेन्दुकला, स्त्री, (नष्टा इन्दुकला यस्याम्।) कुहूः। इत्यमरः। १। ४। ६॥

नसा, स्त्री, (नस्+वा टाप्। यद्वा, नसते कुटिलतां प्रकाशयतीति। नस कौटिल्ये+अच्। टाप्।) नासिका। इति त्रिकाण्डशेषः॥

नस्तः, पुं, (नसते कुटिलतां प्रकाशयत्यनेनेति। नस्+क्तः। बाहुलकात् डुभावः।) नासिका। इति शब्दमाला॥ (यथा, महाभारते। ५। १३१। १०।
"नेत्राभ्यां नस्ततश्चैव श्रोत्राभ्याञ्च समन्ततः।
प्रादुरासन् महारौद्राः सधूमाः पावकार्चिषः॥")
नस्ये, क्ली। इति रत्नमाला॥ पञ्चविधनस्यकर्म्माणि यथा,—
"प्रतिमर्शोऽवपीड़श्च नस्यं प्रधमनन्तथा।
शिरोविरेचनञ्चैव नस्तकर्म्म तु पञ्चधा॥
ईषदुष्णसनात् स्नेहो यावान् वक्त्रं प्रपद्यते।
नस्ये निषिक्तस्यं विद्यात् प्रतिमर्शं प्रमाणतः॥
प्रतिमर्शश्च नस्यार्थं करोति च न दोषभाक्।
शोधनः स्नेहनस्तु स्यादवपीड़ो द्विधा मतः॥
रूक्षपोथ दीयते यस्मादवपीड़स्ततः स्मृतः।

स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा ॥
बलार्थं दीयते स्नेहो नस्यशब्दोऽत्र वर्त्तते ।
नस्यस्य स्नेहिकस्यात्र देयास्त्रयो तु बिन्दवः ॥
प्रत्येकशो नस्यकयोर्नृणामिति विनिश्चयः ॥"
इति वैद्यकपरिभाषा ॥
"शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकीर्त्तिताः ।
दार्विंशुद्विन्दवश्चात्र शुक्तिरित्यभिधीयते ॥
द्विशुक्ती पाणिशुक्तिश्च देयास्तु कुशलैर्नरैः ।
तैलं कफे च वाते च केवले पवने वसाम् ॥
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानं समारुते ।
भावनं रेचनं चूर्णं युञ्जयात्तं सुखवायुना ॥
षड्ङ्गुलद्विमुखया नाड्या मेषजगर्भया ।
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ॥
शिरोविरेचनद्रव्यैः स्नेहैर्वातैः प्रसाधितैः ।
शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान् ॥
गौरवे शिरसः शूले जाड्ये स्वप्ने गलामये ।
ग्रीवागलशिरिमिग्रन्थिकुष्ठापस्मारपीनसे ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्तशिरः स्नातस्नातुकामसुतास्त्रजाम् ॥
नवपीनसरोगार्त्तश्वासकासिनाम् ।
सुप्तानां दत्तबस्तीनां तथा नार्त्तवदुर्दिने ॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत् ।
न नस्यं न्यूनसप्ताब्दे नातीताप्रीतिवत्सरे ।
न चोनद्वादशे धूमः कवड़ो नोनपञ्चमे ॥
न शुद्धिर्न्यूनवमने न चातिक्रान्तसप्तौ ।
आजन्ममरणं शूलं प्रतिमर्शस्तु वस्तिवत् ॥"
इति सारकौमुदी ॥

नस्ता, स्त्री, (नस्+टाप् ।) नासाछिद्रम् ।
इति नस्तितशब्दटीकायां भरतः ॥
"नस्ताभेदनदाहाभ्यां कर्णदाहादिभेदनैः ।
अतिदाहातिवाहाभ्यां वधे चान्द्रायणञ्चरेत् ॥"
इति स्मृतिः ॥

नस्तितः, पुं, (नस्ता नासाच्छिद्रं जाता अस्य । तारकादित्वादितच् ।) नासानिछिद्रलम्बुलीवर्द्दादि । नाकफोँड़ा बलद इति भाषा । तत्पर्य्यायः । नस्तोतः २ । इत्यमरः ।२ । ६ । ६३॥

नस्तोतः, पुं, (ये च तन्तुसन्ताने+भावे क्तः । नस्ते नासिकायां ऊतं वयनं यस्य ।) नस्तितः । इत्यमरटीकायां रमानाथः ॥

नस्यं, क्ली, (नासिकायै हितम् । नासिका+यत् । नसादेशश्च ।) नासिकादेयचूर्णादि । तत्पर्य्यायः । नस्तम् २ लावण्यम् ३ । इति रत्नमाला ॥ यथा, वैद्यकपरिभाषायाम् ।
"वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
ज्ञेयं पञ्चविधं कर्म्म मात्रा तस्य प्रवक्ष्यते ॥"
नासाद्वारा देयौषधविशेषः । यथा,—
"प्रस्थे हे गण्डमालानां क्वाथयेत् द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्नवां गोक्षुरकं सैन्धवं चित्रकं वचा ॥
सरलं सुरदारुञ्च दहती कण्टकारिका ।
नस्यप्रानाहरत्नैव कर्णशूलं हनुग्रहम् ॥"
इति गारुड़े १६८ अध्यायः ॥
अपि च ।
"सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बचिकट गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रहबालग्रहज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"
इति गारुड़े १६६ अध्यायः ॥
(यथा च ।
"नस्यन्तत् कथ्यते धीरैर्नासायाञ्च तद्दीयते ।
नावनं नस्यकर्म्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनन्तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥
कफपित्तानिलध्वंसे पूर्व्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रौ वाप्युत्कटे गदे ॥
नस्यं त्वजीर्णभोजनान्ते दुर्दिने चापि तर्पणे ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तबस्तिश्च पीतस्नेहोदकासवः ।
क्षुद्रः श्रोकाभिभूतश्च लब्धार्त्तो वृद्धबालकौ ॥
वेगावरोधी तापी च स्नातुकामश्च वर्ज्जयेत् ।
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ॥
अप्रीतिवर्षादूर्द्धञ्च नावनं नैव दीयते ।
अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥
तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथे रसेस्तथा ।
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ॥
प्रत्येकं रेचने योज्या सूक्ष्ममध्यान्तमात्रया ।
नस्यकर्म्मणि दातव्यं ग्राह्यैकं तीक्ष्णमौषधम् ॥
द्विधुः स्याद्दयवमात्रस्तु माषैकं सैन्धवं मतम् ।
क्षीरस्नेहाक्तग्राह्यं स्यात् पानीयञ्च त्रिकार्षिकम् ॥
कार्षिकं मधुरं द्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीड़ः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरो विरेचनस्थाने तौ तु देयौ यथायथम् ॥
कल्कौऽतादौषधाद्दयः पीड़ितो निःसृतो रसः ।
सोऽवपीतः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षड्ङ्गुला द्विवक्त्राया नाड़ीचूर्णन्तया धमेत् ।
तीक्ष्णक्षोलमितं वक्त्रवातैः प्रधमनं हितम् ॥
ऊर्द्धजत्रुगते रोगे कफजे स्वरसंक्षये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥
ग्रीवाप्रसारकुष्ठेषु नस्यं वैरेचनं हितम् ।
भीरुक्षीणग्रबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे कृमिषु युज्यते चावपीड़नम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनन्तीक्ष्णतरं यतः ॥
नस्यं स्याद्गुड़शुण्ठीभ्याम्पिप्पल्या सैन्धवेन च ।
कलपिष्टेन तेनाक्तिकर्णनासाशिरोगदाः ॥
हनुमन्यागलशोफ्नुता गच्छन्ति सुजष्टजाः ।
मधूकसारकृष्णाभ्यां वचा मरिचसैन्धवैः ॥
नस्यक्षोणजले पिष्टं दद्यात् संज्ञा प्रबोधनम् ॥
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥"
इति मधुखण्डे विष्णोरध्याये ग्रार्ङ्गधरेणोक्तम् ॥
"नस्यकर्म्म यथाकालं यो यथोक्तं निषेवते ।
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ॥
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ।
न च केशाः प्रलुप्यन्ते वर्द्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरःशूलमर्द्दितं हनुसंग्रहः ॥
पीनसार्द्धावभेदौ च शिरःकम्पश्च शाम्यति ।
शिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ॥
सुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ।
सर्व्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ॥
न चास्य रोगाः सहसा प्रभवन्त्यूर्द्धजत्रुजाः ।
जीर्य्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्विविधं शिरोविरेचनं स्नेहनञ्च । तद्विविधमपि पञ्चधा । तद्यथा । नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीड़ः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीड़ः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः । तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशशूलशुप्रपातदारुणकर्णशूलकर्णक्ष्वेड़ितिमिरस्वरोपघातनासारोगस्य श्रोषापवाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रवाधेषु वातपैत्तिकेषु सुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥"
"तच्चैतद्विविधमशुक्तवतोऽकाले पूर्व्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥"
इति सुश्रुते चिकित्सितस्थाने ४० अध्याये ॥)
नासाया हिते तत्सम्बन्धिनि च, त्रि । प्रग्रहे, पुं । इति संक्षिप्तसारव्याकरणम् ॥

नस्या, स्त्री, (नासिकायै हिता । नासिका+"शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ततो नसादेशः ।) नासिका । यथा,—
"घ्राणं गन्धवहा नासा नसा नस्या च नासिका ॥"
इति भरतधृतसाहसाङ्कः ॥
(नासाछिद्रम् । इति कश्चित् ।)

नस्योतः, पुं, (नस्यया नासारज्ज्वा ऊतः ।) नस्तितः । इत्यमरः । २ । ६ । ६३ ॥ (यथा, महाभारते । ३ । ३० । २६ ।
"मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ॥")

नहि, व्य, निषेधः । (यथा,—
"इयं सख्या दूरादुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति ! नेष्यामि रजनीम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धूनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)

अभावः। तत्पर्य्यायः। अ २ नो ३ न ४। इत्यमरः॥ अन ५ अना ६ ना ७। इति भरतः॥ (यथा, महाभारते। ४। २४। १३।
"नहि विघ्नो गतिं तेषां वासं हि नरसत्तम!॥")
नहुषः, पुं, (नह्यते इति। नह+"पृनहिकलिभ्य उषच्।" उणां। ४। ७५। इति कर्म्मणि कर्म्मणि वा उषच्।) नागभेदः। (यथा, महाभारते। १। ३५। ६।
"आप्तः करोटकश्चैव ह्रदो वालिखिलस्तथा।
निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा॥")
चन्द्रवंशीयराजभेदः। इति मेदिनी। षे, ३८॥ स च पुरूरवसो ज्येष्ठपुत्रस्यायुषः सुतः। इति पुराणम्॥ (अयं हि अगस्त्यशापात् अजागरत्वमापन्नो वनमध्ये बहुकालं स्थितवान् ततः कदाचित् भीमं प्रग्रह्य युधिष्ठिरात् सकाशमाप। इतिवरणं यथा, महाभारते। ३। १८१। ३३+४५।
"अहं हि दिवि दिव्येन विमानेन चरन् पुरा।
अभिमानेन मत्तः सन् किञ्चिन्नाग्यदचिन्तयम्॥
ब्रह्मर्षिदेवगन्धर्व्ययक्षराक्षसपन्नगाः
बराग्रम प्रयच्छन्ति सर्व्वे चैवोक्थवाहनः॥
चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीश्वर!।
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं मम॥
ब्रह्मर्षीणां सहस्रं हि उवाह शिबिकां मम।
स मामपनयो राजन्! अंशयामास वै श्रियः॥
तत्र ह्यगस्त्यः प्रादेन वहन् सृष्टो मया मुनिः।
अगस्त्येन ततोऽस्मुक्तो ध्वंस सर्पेति वै रुषा॥
ततस्तस्मादिमानाप्तात् प्रच्युतश्चुतभूषणः।
प्रपतन् वुद्धिनाशं वाजीभूतमधोमुखम्॥
अयाचन्तमहं विप्रं ग्रापस्यान्तो भवेदिति।
प्रमादात् संप्रमूढस्य भगवन्! क्षन्तुमर्हसि॥
ततः स मामुवाचेदं प्रपतन्त कृपान्वितः।
युधिष्ठिरो धर्म्मराजः ग्रापान्तो मोक्षयिष्यति॥
अभिमानस्य घोरस्य पापस्य च नराधिप!।
पश्ये चीर्णे महाराज! फलं पुण्यमवाप्स्यसि॥
ततो मे विस्मयो जातस्तदृष्ट्वा तपसो बलम्।
ब्रह्म च ब्राह्मणत्वञ्च येन लाभमचूचुदम्॥
सत्यं दमस्तपो दानमहिंसा धर्म्मनित्यता।
साधकानि सदा पुंसां न जातिर्न कुलं नृप!॥
अरिष्ट एष ते भ्राता भीमसेनो महाबलः।
स्वस्ति तेऽस्तु महाराज! गमिष्यामि दिवं पुनः॥
वैशम्पायन उवाच।
इत्युक्त्वाजगरं देहं त्यक्त्वा स नहुषो नृपः।
दिव्यं वपुः समास्थाय गतस्त्रिदिवमेव हि॥"*॥
(नह्यति सर्व्वाणि भूतानि माययेति। विष्णुः। यथा, महाभारते। १३। १४६। ४०।
"इष्टो विशिष्टैः शिष्टेश्च शिखण्डी नहुषो वृषः॥")
नहुषाख्यं, क्ली, (नहुष आख्या यस्य।) नगरपुष्पम्। इति राजनिर्घण्टः॥
नहुषात्मजः, पुं, (नहुषस्य आत्मजः।) ययातिराजा। इति पुराणम्॥ (वाधूलिङ्गेऽपि दृश्यते। तथाहि महाभारते। १। ७८। १४।
"अथ तं देशमभ्यागादृषयातिर्नहुषात्मजः॥")
ना, व्य, (नह बन्धे+वाहुलकात् डा।) नहि। अभावः। इत्यमरटीकायां भरतः॥
ना, [नृ] पुं, (नयति नीयते वा। नी प्रापणे+"नयतेर्डिच्च।" उणां २।१०१। इति नृ प्रत्ययः। स च डित्।) पुरुषः। इत्यमरः। २। ६। १॥ (यथा, माघः। २। ४२।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते।
प्रविष्योदर्चिषं कक्षे शैरते तेऽभिमारुतम्॥")
नाकः, पुं, (न कं सुखमिति अकं दुःखम्। तन्नास्त्यत्रेति।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, भट्टिः। १। ४।
"सन्तर्पणो नाकसदां वरेण्यः॥"
नभः। इति निघण्टुः। १। ४॥ यथा, महाभारते। १। १७२। ६।
"य एष दिवि धिष्ण्येन नाकं धारयति तेजसा॥")
क्ली, अव्ययजातिविशेषः। यथा, महाभारते। ५। ६६। ४०।
"काकुदीकं सुखं नाकमविसन्ध्यञ्च तथा।
सन्तानं नर्त्तकं घोरमास्रमोदकमक्षमम्॥
एतैर्विद्वान् सर्व्व एव मरणं यान्ति मानवाः॥")
नाकनाथः, पुं, (नाकस्य स्वर्गस्य नाथः।) इन्द्रः। इति त्रिकाण्डशेषः॥
नाकनायकः, पुं, (नाकस्य नायकः।) इन्द्रः। यथा, नैषधे ५ सर्गः।
"स यत्तौर्य्य विवस्वन्तमगाधं
नाकनायकनिकेतनमाप॥"
नाकनायकपुरोहितः, पुं, (नाकनायकस्य इन्द्रस्य पुरोहितः।) बृहस्पतिः। यथा,—
"क्षीणधर्म्मेतनयदुःखितो
नाकनायकपुरोहितः शुभः॥"
इति ज्योतिषतत्त्वम्॥
नाकी, [न्] पुं, (नाकः स्वर्गो वासस्थानत्वेनास्त्यस्येति। नाक+इनिः।) देवता। इति हेमचन्द्रः॥ (यथा, राजेन्द्रकर्णपूरे। ६।
"देवाकार्य्यं नाकिनां पुरि नृणां लोके पुरे
भोगिनाम्॥")
नाकुः, पुं, (नश्यतेऽनेनेति। नश+"शलिपाटिनमिमनिजनां शुक्पटिगाकिशतक्ष।" उणां १। १६। इति उः धातोर्नाकिः। इकार उच्चारणार्थः।) वल्मीकः। इत्यमरः। २। १। १४॥ मुनिविशेषः। पर्व्वतः। इति मेदिनी कं, २०॥
नाकुलः, पुं, (नकुलस्य गोत्रापत्यम्। नकुल+"अत्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इत्यण्।) नकुलपुत्रः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ६। ४०। ५१।
"भ्रुवरः कुरुकाश्चैव वत्सयाश्च सह नाकुलैः।
नकुलः सहदेवश्च वामं पार्श्वं समाश्रिताः॥"
तन्नदविशेषे, क्ली। यथा, कूर्म्मपुराणे।
"एवं सम्बोधितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम्।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः॥")
नकुलस्येदम्। तस्येदमित्यण्।) नकुलसम्बन्धिनि, त्रि॥ (न आकुलः इति विग्रहे। अनाकुलञ्च॥)
नाकुली, स्त्री, (नकुलेन दृष्टा पीता वा। नकुल+अण्+ङीप्।) कुक्कुटीकन्दः। रास्ना। चविका। इति मेदिनी। ले, १०१॥ श्वेतकण्टकारी। कन्दविशेषः। गाद इति ख्याता॥ तत्पर्य्यायः। सर्पगन्धा २ सुगन्धा ३ रक्तपत्रिका ४ ईश्वरी ५ नागगन्धा ६ अहिभुक् ७ सरसा ८ सर्पादनी ९ नागगन्धा १०। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। त्रिदोषानेकविषनाशित्वञ्च। इति राजनिर्घण्टः॥
नाक्षत्रं, क्ली (नक्षत्रस्येदमिति। नक्षत्र+"तस्येदम्।" ४। ३। १२०। इति अण्।) नक्षत्रसम्बन्धि। (यथा, सूर्य्यसिद्धान्ते। १४। १५।
"भक्षक्षभक्तं नित्यं नाक्षत्रं दिनमुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः॥")
मासविशेषे, पुं। स च द्विविधः। सप्तविंशतिनक्षत्रात्मक एकः। यथा, विष्णुधर्म्मोत्तरे।
"नक्षत्रसञ्चाराध्ययनानि चेन्दो-
र्मानेन कुर्य्यादृभगणात्मकेन।"
सप्तविंशतिनक्षत्रात्मकेन।
"सर्व्वर्क्षपरिवर्त्तेन नाक्षत्र इह गीयते।'
सप्तविंशतिनक्षत्राधिक्षिप्तो नाक्षत्रः। अस्य प्रयोजनं नक्षत्रसवादौ। जन्मनक्षत्रे शनिभौमवारयोगे मनोदुःखदाने च। यथा, दीपिकायाम्।
"जन्मन्यर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ।
स मासः कलसो नाम मनोदुःखप्रदायकः॥"
द्वितीयः, ऋक्षरूपात्मकनक्षत्रभोगकालरूपदिनचिह्नात्मकः। यथा, सूर्य्यसिद्धान्ते। १। १२।
"गाढ़ीवद्या तु नाक्षत्रमहोरात्रं प्रचक्षते।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा॥"
द्वितीयस्य प्रयोजनं आयुर्गणनायाम्। यथा,
"आयुर्दायै स्मृतं प्राज्ञैर्नाक्षत्रं दिनादिकम्॥"
इति मलमासतत्त्वम्॥
नाक्षत्रिकः, पुं, (नक्षत्रादागतः। नक्षत्र+ठञ्।) नाक्षत्रमासः। यथा, ग्रन्थरत्नावल्याम्।
"नक्षत्रमण्डलेनैव नाक्षत्रिक उदाहृतः॥"
नाक्षत्रिकी, स्त्री, (नाक्षत्रिक+ङीष्।) नक्षत्रदशा। यथा। "कलौ नाक्षत्रिकी दशा।" इति ज्योतिषम्। अस्या विवरणं दशाशब्दे द्रष्टव्यम्॥
नक्षत्रसम्बन्धिनि, त्रि॥
नागं, क्ली, (नगे पर्व्वते भवम्। नग+अण्।) रङ्गम्। सीसकम्। (अस्य पर्य्यायो यथा,—
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)
करविशेषः। इति मेदिनी। गे, ६॥ नागकरस्यैतत्फलम्। तथा,—

"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिशाली नितरां कुशीलः।
क्रोधाग्निसन्तापितबन्धुवर्गो
भर्गोपमः स्यात् किल रङ्गभूमौ॥"
इति कौष्ठीप्रदीपः॥

रङ्गसीसकार्थे क्वचित् पुंलिङ्गोऽपि दृश्यते। पाकहीनयोस्तयोर्दोषो यथा,—
"पाकहीनौ नागवङ्गौ कुष्ठगुल्मकरौ नृणाम्।
मेहपाण्डुकरौ वातकफच्छर्द्युदरौ पुनः॥"
तयोर्मारणं यथा,—
"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्।
रूतपात्रे विद्धते नागे लौहदर्व्या च चालयेत्॥
यामैकेन भवेद्भस्म तत्सुखाद्य मनःशिलाम्।
काञ्जिकेन दृयं पिष्ट्वा पचेद्दृढ़पुटेन च॥
खाङ्गशीतं पुनः दृष्ट्वा शिलया काञ्जिकेन च॥
पुनः पुटेच्छरावाभ्यामेवं षड्भिः पुटैर्भवेत्॥"
नागः सिन्दूरवर्णाभो म्रियते सर्व्वकार्य्यकृत्।
सतिक्तमधुरो नागो मृतो भवति भस्मसात्॥
आयुःकीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात् सदा।
रोगान् हन्ति मृतो नागो वङ्गवद्गुणकारकः॥"
इति सुखबोधः॥

नागः, पुं, (नगे भवः। नग+अण्। यद्वा, दह्यत्यसात् विषाग्निनेति। दह+"दहेर्गो लोपो दश्च नः।" उणा ५। ६१। गः। अन्तलोपः। दस्य नः। बाहुलकात् नकारस्य गः।) पन्नगः। (यथा, विष्णुपुराणे। २। ६। ६६।
"जगद्धृष्टञ्च विधं नागाः क्षीरोदाच्च समुत्थितम्॥")
हस्ती। (यथा, रघुः। ४। ८२।
"भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः॥")
क्रूरचारी। मेघः। नागकेशरः। पुन्नागः। वासुदत्तकः। सुस्तकः। देहानिलप्रभेदः।
"उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः॥"
इति शारदातिलकटीका॥
उत्तरपदस्थिते श्रेष्ठः। इति मेदिनी। गे, १०॥
(सौसकम्। अस्योत्पत्तिर्नामानि गुणाश्च। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु समोच यत्।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्॥"
"नागस्तु नागग्रततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति।
वह्निं प्रदीपयति कामबलं करोति
स्तम्भञ्च नाशयति सन्ततसेवितः सः॥
पाकेन हीनौ किलवङ्गनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान्।
कण्डूं प्रमेहानिलसादशोथः
भगन्दरादीन् कुरुतः प्रयुक्तौ॥")
ताम्बूली। देशभेदः। इति नानार्थटीकायां भरतः॥ पर्व्वतविशेषः। (यथा, विष्णुपुराणे। २। २। २८।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः।
कालञ्जराद्याश्च तथा उत्तरे केसराचलाः॥")
नगे गिरौ चन्दनादितरौ वा भवः। न गच्छतीति अगः न अगः नागः इति वा। तक्षककर्कोटप्रभृतिर्देवयोनिर्मनुष्याकारः पन्नगाकुलयुक्तः। इति भरतः॥ तत्पर्य्यायः। काद्रवेयः। २। इत्यमरः। १।८।४॥ नागोत्पत्तिर्यथा,—
"ब्रह्मणा ब्रह्मणा दृष्टिं मरीचिः सृतिकारणम्।
प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः॥
तस्य दाक्षायणी भार्य्या कद्रूर्नाम सुचिस्मिता।
मारीचो जनयामास तस्यां पुत्रान्महाबलान्॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम्।
कर्कोटकञ्च राजेन्द्र! पद्मं चान्यं सरीसृपम्॥
महापद्मं तथा शङ्खं कुलिकञ्चापराजितम्।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः।
एतैर्व्याप्तञ्च तु दृष्ट्वा पूरितं जगत्॥
कुटिला क्षीनकर्म्माणस्तीक्ष्णास्तोत्यविषोल्बणाः।
दृष्ट्वा खंदश्य मनुजान् भस्म कुर्य्युः क्षणादुवम्॥
ब्रह्मदण्डी यथा सर्पो मनुष्याणां नराधिप!।
अहन्यहनि जायेत क्षयः परमदारुणः॥
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः समन्ततः।
जग्मुः शरण्यं शरणं परन्तु परमेश्वरम्॥
इदं स्तोत्रार्थसहितं श्रुत्वा प्रजाः सर्व्वा महीपते!।
ऊचुः कमलजं देवं पुराणं ब्रह्मसंज्ञितम्॥
देवा ऊचुः।
देव देवेश लोकानां प्रसूतिः परमेश्वर।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गानां महात्मनाम्॥
अहन्यहनि ये देव! पश्येयुरुरगा दृशा।
मनुष्यं म्रियतां वा तत् सर्व्वं भस्मसाद्भवेत्॥
त्वया सृष्टिः कृता देव नीयते सा भुजङ्गमैः।
एतन्त्राता तु दुर्वृत्तं तत् कुरुष्व महामते॥
ब्रह्मोवाच।
अहं रक्षां विधास्यामि भवतीनां न संशयः।
व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः ससाध्वसाः॥
एवमुक्ताः प्रजास्तेन ब्रह्मणाव्यक्तजन्मना।
आगतासु प्रजास्वाद्यस्तानुवाच भुजङ्गमान्॥
शृणुध्वं परमक्रुद्धो वासुकिप्रमुखांस्तथा।
ब्रह्मोवाच।
यतो मत्प्रभवान्नित्यं क्षयं नयत मानुषान्॥
भवान्तरे तथाप्यस्मिन्मातुः शापात् सुदारुणात्।
भवितातिक्षयो घोरो नूनं क्षयमुवान्तरे॥
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः।
निपत्य पादयोस्तस्य इदमूचुर्व्यचक्षदा॥
नागा ऊचुः।
भगवन्! कुटिला जातिरस्माकं भवता कृता।
विषोल्बणत्वं क्रूरत्वं दृक्शूलत्वञ्च तथा॥
सम्पादितं त्वया देव इदानीं शमयाच्युत!॥
ब्रह्मोवाच।
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः।
ततः किं मनुजान्नित्यं भक्षयध्वं गतव्यथाः॥
नागा ऊचुः।
मर्य्यादां कुरु देवेश! स्थानञ्चैव पृथक् पृथक्।
नागानां वचनं श्रुत्वा देवो वचनमब्रवीत्॥
अहं करोमि वो नागाः स्वस्थं मद्भक्तैः सह।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम्॥
पातालं वितलञ्चैव सुतलाख्यं तृतीयकम्।
दत्तं वै वसुकामानां यूयं तत्र गमिष्यथ॥
तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात्।
तिष्ठध्वं सप्तमं यावद्राज्यान्ते पुनः पुनः॥
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ।
दायादाः सर्व्वदेवानां सपर्णस्य च धीमतः॥
तदा प्रभृतिर्व्वः सर्व्वा भोक्ष्यते चित्रभानुना।
भवतां नैव दोषोऽयं भविष्यति न संशयः॥
ये वै क्रूरा भोगिनो दुर्विनीता-
स्तेषामन्तो भविता नात्यथैतत्।
कालं प्राप्तं भक्षयध्वं दशध्वं
तथा परान् चापकृतो मनुष्यान्॥
मन्त्रौषधैर्गारुडमन्त्रकैश्च
बद्धेर्ष्टा मानवा ये चरन्ति।
तेषां भीतैर्व्वर्जितव्यं नचान्य-
च्चिन्त्यं कार्य्यं चान्यथा वो विनाशः॥
इतीरिते ब्रह्मणा ते भुजङ्गा
जग्मुः स्थानं ज्ञातलाख्यं हि सर्व्वे।
तस्युर्भोगान् भुञ्जमानाः समग्रान्
रसातले लीलया संश्रितास्ते॥
एवं प्राप्तं ते तु लब्ध्वा प्रसादञ्च चतुर्म्मुखात्।
तस्युः पातालतलिये सृष्टितोन्मत्तरात्मना॥
एतत् सर्व्वञ्च पप्रच्छ तेषां जातं महात्मनाम्।
अस्तिकेयं तिथिर्धन्या सर्व्वपापहरा शुभा॥
एतस्यां संयतो यस्तु जन्मनु परिवर्ज्जयेत्।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम्॥"
इति वराहपुराणम्॥

एषां शिवभूषणप्रमाणं यथा,—
"वासुक्याद्याश्च ये सर्पा यथास्थानञ्च ते धृतम्।
भूषणाश्चक्रुरङ्गस्य शिरोबाहादिषु स्थितम्॥"
इति कालिकापुराणे शिवविवाहे १८ अः।
कम्बलाश्वतरनागयोः सरस्वत्या नागवरप्राप्तिविवरणं यथा,—
"एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।
प्रत्युवाच महात्मानं नागमश्वतरं ततः॥
सरस्वत्युवाच।
वरन्ते कम्बलभ्रातः! प्रयच्छाम्युरगाधिप!।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते॥
अश्वतर उवाच।
सहायं देहि देवि! त्वं पूर्व्वं कम्बलमेव मे।
समक्षाक्षरसम्बन्धसुभगैः संप्रयच्छ च॥
सरस्वत्युवाच।
सन्ति खरा ग्रामरागाः सन्ति पन्नगसत्तम!।
गीतकानि च सन्त्येव तावत्यश्चापि मूर्च्छनाः॥
तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत्।
एतत् सर्व्वं भवान् ज्ञाता कम्बलश्चैव ते सखा॥
ज्ञास्यते मत्प्रसादेन भुजङ्गेन्द्र परन्तथा।
चतुर्व्विधं पदं तालं त्रिप्रकारं लयत्रयम्॥
यतिञ्च तत्र तोद्यं मया दत्तं चतुर्व्विधम्॥
एतद्ब्रवान् मत्प्रसादात् पन्नगेन्द्राः स्व यद्
अस्यान्तर्गतमाप्नुहि स्वरयङ्गमयोश्च यत्॥
तदप्येषं मया दत्तं भवतः कम्बलस्य च।

यथा नाग्यस्य भूर्लोके पाताले वापि पन्नग ! ॥
प्रणेतारौ भवन्तौ च सर्व्वस्यास्य भविष्यतः ।
पाताले देवलोके च भूर्लोके चैव पन्नगौ ॥
इत्युक्ता सा तदा देवी सर्व्वज्ञिका सरस्वती ।
जगामादर्शनं सद्यो नागस्य कमलेक्षणा ॥"
इति मार्कण्डेयपुराणम् ॥

कालियवधप्रसङ्गे नागहनने दोषो यथा,—
"नदंग्रजातान् सर्पांश्च हन्ति यो मानवाधमः ।
ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ॥
मत्पादपद्मचिह्ने यः करोति दण्डताडनम् ।
द्विगुणं ब्रह्महत्याया भविता तस्य किल्बिषम् ॥
लक्ष्मीर्यास्यति तद्गेहात् शापं दत्त्वा सुदारुणम् ।
वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ॥
ध्रुवं वर्षशतं कालसूत्रं यास्यति मङ्क्षिया ॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे १६ अः ॥

वासुनागप्रवृद्धिर्यथा,—
"वासुप्रमाणेन तु गात्रकेण
वामेन पीते खलु नित्यकालम् ।
त्रिभिस्तु मासैः परिवृत्य पार्श्वं
तं वासुनागं प्रवदन्ति विद्वाः ॥
भाद्रादिके वासवदिक्त्रिरात्रः स्या-
न्मार्गादिकेषु त्रिषु यामभूर्द्धा ।
प्रत्यक्त्रिरात्रः स्यात् खलु फाल्गुनादौ
ज्येष्ठादिकौवेरत्रिरात्रः स नागः ॥
मूर्द्धि घाते भवेन्मृत्युः पृष्ठे स्यात् पुत्रभार्य्ययोः ।
जघने ऽर्थक्षयं विद्यात् सर्व्वसम्पत्तथोदरे ॥
एकं नागोडुसंयुक्तौ द्वे चेद्दक्षिणपश्चिमे ।
त्रिभागं पूर्व्वतो हीनं कुर्य्याद्वा सौम्यवर्जितम् ॥
केचिद्दक्षिणभागे तु वदन्त्येकं गृहं बुधाः ।
न कोणेषु गृहं कुर्य्यान्नाप्यन्त्ये नापि मध्यतः ॥
कोणे च धनहानिः स्यादन्ते रिपुभयं भवेत् ।
मध्ये च सर्व्वनाशः स्यात्तस्मादेतद्विवर्ज्जयेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

नागकन्दः, पुं, (नाग इव कन्दं मूलं यस्य । हस्त-मूलत्वादेव तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

नागकर्णः, पुं, (नागकर्ण इव आकृतिः पर्णेऽस्य-स्येति । अच् ।) रक्तैरण्डः । इति राज-निर्घण्टः ॥

नागकिञ्जल्कं, क्ली, (नागस्येव किञ्जल्को यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

नागकुमारिका, स्त्री, (नागस्य कुमारीव । कन् टाप् पूर्व्वह्रस्वश्च ।) गुडूची । मञ्जिष्ठा । इति राजनिर्घण्टः ॥

नागकेशरः, पुं, (नागस्येव केशरोऽस्य ।) नाग-केसरवृक्षः । इति भरतः ॥ (यथा, हारीते चिकित्सितस्थाने १० अध्याये ।
"नलपैत्तेयकं पृक्का पद्मकं नागकेशरम् ॥")

नागकेसरः, पुं, (नागस्येव केसरो यस्य ।) पुष्पवृक्ष-विशेषः । नागेश्वर इति भाषा ॥ तत्पर्य्यायः । नागपुष्पः २ केसरः ३ वारिजः ४ । इत्यमरः । २ । ४ । ४५ ॥ केशरः ५ नागकेशरः ६ । इति भरतः ॥ किञ्जल्कः ७ नागकिञ्जल्कः ८ नागीयः ९ काञ्चनम् १० सुवर्णम् ११ हेमकिञ्जल्कः १२ रक्तम् १३ हेम १४ पिञ्जरः १५ फणिकेसरः १६ पन्नगकेसरः १७ । तत्पुष्पगुणाः । अस्रपित्त-त्वम् । लघुत्वम् । तिक्तत्वम् । कफवस्तिवातामय-कण्डूश्वीर्त्तरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"नागपुष्पः स्मृतो नागः केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
खुरकण्डूत्वगाक्षेदच्छर्द्दिकृच्छ्रासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥"
त्रिजातकं नागकेशरसंयुक्तं चतुर्जातकं भवति यथा,—
"त्वगेलापत्रकेसुक्ष्मैश्चिसुगन्धिश्चिजातकम् ।
नागकेशरसंयुक्तं चतुर्जातकमुच्यते ॥
तद्धृद्यं रोचकं रूक्षं तीक्ष्णोष्णं सुखगन्धकृत् ।
लघु पित्तास्रिद्धृदयं कफवातविषापहम् ॥"
इति भावप्रकाशः ॥

नागगन्धा, स्त्री, (नागस्य गन्ध इव गन्धो यस्याः ।) नाकुलीकन्दः । इति राजनिर्घण्टः ॥ (नाकुली-शब्देऽस्या विशेषो ज्ञातव्यः ॥)

नागगर्भं, क्ली, (नागः सीसकं गर्भे उत्पत्ति-कारणं यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागच्छत्रा, स्त्री, (नागस्य फणेव छत्रं छादनं पत्रे यस्याः ।) नागदन्ती । इति राजनिर्घण्टः ॥

नागजं, क्ली, (नागात् सीसकात् जायते इति । जन + डः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ रङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥ नाग-जाते, त्रि ॥

नागजिह्वा, स्त्री, (नागस्य सर्पस्य जिह्वेव ।) प्रारिवा । अनन्तमूलम् । इति रत्नमाला ॥

नागजिह्विका, स्त्री, (नागस्य जिह्वेव रक्तता यस्याः । कप् । टापि अत इत्वम् ।) मनः-शिला । इत्यमरः । २ । ६ । १०८ ॥ (यथास्याः पर्य्यायः ।
"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोला शिला द्वियौषधिः स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागजीवनं, क्ली, (नागः सीसकं जीवनं यस्य ।) वङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥

नागदन्तः, पुं, (नागस्य गजस्य दन्तः ।) हस्ति-दन्तः । (यथा, महाभारते । १२ । ६८ । १६ ।
"द्वीपिचर्म्मोत्तरच्छद नागदन्तकृतत्सरुः ॥"
नागदन्तः साधनत्वेनास्त्यस्येति अच् ।) गृहान्त-र्गतदारु । इति मेदिनी । ते, २०१ ॥ दाँतिया इति दाड्डा इति च भाषा ॥

नागदन्तकः, पुं, (नागदन्त + स्वार्थे कन् ।) नाग-दन्तः । (नागदन्तेन कायतीति । के + कः ।) भित्तिदारुद्वयम् । तत्पर्य्यायः । निर्यूहः २ । इति जटाधरः ॥

नागदन्तिका, स्त्री, (नागस्य सर्पस्य दन्त इव पीड़ादायकं पत्रं यस्याः । कापि अत इत्वम् ।) वृश्चिकाली । इति रत्नमाला ॥ बिछूटी इति भाषा ॥

नागदन्ती, स्त्री, (नागस्य गजस्य दन्त इव फलाद्याकारे यस्याः । ङीष् ।) कुम्भा । श्रीह-स्तिनी । इति मेदिनी । ते, २०१ ॥ हाति शुण्डा इति भाषा ॥ अस्य पर्य्यायः । विशल्या २ पर्व्वपुष्पी ३ विषौषधी ४ शुक्लपुष्पा ५ इभ-दन्ताद्या ६ काण्डेरी ७ कामदूतिका ८ । इति रत्नमाला ॥ श्वेतपुष्पा ९ मधुपुष्पा १० विशो-धिनी ११ नागस्फोता १२ विशल्याख्या १३ नागच्छत्रा १४ विचक्षणा १५ सर्पपुष्पी १६ शुक्लपुष्पी १७ खादुका १८ घृतदन्तिका १९ सितपुष्पी २० सर्पदन्ती २१ नागिनी २२ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । रूक्ष-त्वम् । वातकफगुल्मशूलोदरव्याधिकण्डूदोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥

नागदमनी, स्त्री, (नागो दम्यतेऽनयेति । दम + ल्युट् + ङीप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जम्बूः २ जाम्बवती ३ दक्षा ४ रक्तपुष्पा ५ जाम्बवी ६ मलाशी ७ दुर्द्धर्षा ८ दुःसहा ९ । अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कटु-त्वम् । त्रिदोषोदराध्मानदोषनाशित्वम् । कोष्ठ-शोधनकारित्वञ्च । इति राजनिर्घण्टः ॥*॥ तन्नामगुणाः ।
"विज्ञेया नागदमनी बला मोटा विषापहा ।
नागपुष्पी नागपत्रा महायोगेश्वरीति च ॥
बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा ।
मूत्रकृच्छ्रव्रणानाहो नाशयेच्चालगर्द्दभम् ॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी ।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा ॥"
इति भावप्रकाशः ॥

नागदलोपमं, क्ली, (नागदलस्य ताम्बूल्या उपमा यत्र ।) परूषफलम् । इति रत्नमाला ॥ (परूष-शब्देऽस्य गुणादयो ज्ञातव्याः ॥)

नागदः, पुं, (नागप्रियो दूर्व्वश्च ।) सस्यदुग्धा । इति शब्दचन्द्रिका ॥ सिज इति भाषा ॥

नागनिर्य्यूहः, पुं, (नाग इव निर्य्यूहो नागदन्तः ।) नागदन्तकः । इति जटाधरः ॥

नागपञ्चमी, स्त्री, (नागप्रिया पञ्चमी । प्राक-पार्थिवादित्वात् समासः ।) आषाढ़ी शुक्ला पञ्चमी । तत्र मनसापूजा कर्त्तव्या । यथा,—
"देवीपुराणे ।
'सुप्ते जनार्द्दने क्षीरे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं खुहीविटपसंस्थिताम् ।
पद्मनाभे गते मृत्यौ देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥'
मनसादेवीं विषहरीम् । खुही सिजवृक्षः । देवैरिति सहार्थे तृतीया ।
'देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्तादान् महोरगान् ॥

चीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम् ॥'
मनसाध्यानम्। यथा, पद्मपुराणे।
'देवीमम्बामहीनां शुभ्रधरवदनां चारुकान्तिं वदान्यां
हंसारूढासदारामरचितवसनां सर्व्वदा सर्व्वदैव।
क्षीराब्धां मध्यताङ्गीं कनकमणिगणैर्नागरत्नैरनेकै-
र्वन्देऽहं सार्द्धनागासुरकुचयुगलां भोगिनीं कामरूपाम् ॥'
पुराणान्तरे।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥
शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः॥
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥'
गारुडेऽपि।
'अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्।
यत्नेत्तानसितान्नागान् दृष्ट्वस्तो दिवं व्रजेत्॥'
अत्र च।
'योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्यवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः॥'
इत्यनेन प्रणवपूर्ब्बेण मत्स्यपुराणोक्तेनानन्तं पूजयेत्॥ रत्नाकरे।
'पिप्पुमर्द्दस्य पत्राणि २ पयेद्भवनोदरे।
स्वयञ्चापि तदश्नीयात् ब्राह्मणांश्चैव भोजयेत्॥'
पिप्पुमर्द्दस्य मिश्रस्य॥" इति तिथ्यादितत्त्वम्॥

नागपत्रा, स्त्री, (नागदमनं पत्रं यस्याः। टाप्।) नागदमनी। इति भावप्रकाशः॥

नागपत्री, स्त्री, (नागवत् पत्रं यस्याः। ङीष्।) लक्ष्मणा। इति राजनिर्घण्टः॥

नागपदः, पुं, (नागवत् पदं स्थानं यस्य।) षोड़शरतिबन्धान्तर्गतद्वितीयबन्धः। तस्य लक्षणं यथा,—
"पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु।
कामयेत् कामुको नारीं बन्धो नागपदो मतः॥"
इति रतिमञ्जरी॥

नागपाशः, पुं, (नागपाश इव आकृतिरस्यस्येति। अच्।) स्त्रीणां करणम्। (नागः पाश इव।) वरुणायुधः। इति मेदिनी। शे, ३५॥
"सार्द्धद्व्यावर्त्तनात्तु नागपाश इति स्मृतः।
ब्रह्मग्रन्थिमथो दद्यान्नागपाशमथापि वा॥"
इत्यागमः॥
"वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥"
इति देवीपुराणीयदुर्गाध्यानम्॥

नागपाशकः, पुं, (नागपाश इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। यद्वा, नागपाश इव कायतीति। के+कः।) रतिबन्धविशेषः। तस्य लक्षणं यथा,—
"खञ्जाङ्घयमध्यस्थां हस्ताभ्यां धारयेत् कुचौ।
रमेत्तिर्यग्भ्रुवः कामी बन्धोऽयं नागपाशकः॥"
इति रतिमञ्जरी॥

नागपुरं, क्ली, (नागनामकं पुरम्। शाकपार्थिवादित्वात् समासः।) देशविशेषः। तद्विवरणं यथा,—
"जटाजूटात् पपातोर्द्धं मेरोरुत्तुङ्गशृङ्गतोऽगमत्।
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम्॥
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम्।
तामायान्तीन्तु रोधाय खलीलो नाम दानवः॥
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः।
ततो भगीरथो राजाराधयामास कौशिकम्॥
स तुष्टः प्रददौ नागं वाहनं तं भगीरथः।
समारुह्यागमत्तत्र यत्र राजा भगीरथी॥
तेन नागेन तं देशं संविदार्य्य स सङ्गतः।
शतधा तं समाधाय रुद्धैरावतो गजः॥
महीतलं समापेदे स यावन्नागसाह्वयम्॥
तस्मात् खाघटनाद्विप्रा अभून्नागपुरं वरम्॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः॥

नागपुष्पः, पुं, (नागस्य हस्तिनो मदगन्धयुक्तं पुष्पं यस्य।) पुन्नागवृक्षः। नागकेशरः। (यथा, महाभारते। १। २०८। ४०।
"पुन्नागैर्नागपुष्पैश्च नकुलैः पनसैस्तथा॥")
चम्पकः। इति मेदिनी। पे, २५॥ (पुन्नागपुष्पे तु क्ली। तत्र गुणा यथा,—
"नागपुष्पं कषायोष्णं रुच्यं लघ्वामपाचनम्।
ज्वरकण्डूव्रणस्वेदकृच्छ्रहृल्लासनाशनम्॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

नागपुष्पफला, स्त्री, (नागस्य नागकेशरस्येव पुष्पफले यस्याः।) कूष्माण्डी। इति राजनिर्घण्टः॥

नागपुष्पिका, स्त्री, (नागस्य पुष्पमिव पुष्पं यस्याः। कप्। टापि अत इत्वम्।) खञ्जयूथी। इति राजनिर्घण्टः॥

नागपुष्पी, स्त्री, (नागस्य नागकेशरस्य पुष्पमिव पुष्पं यस्याः। ङीष्।) नागदमनी। इति भावप्रकाशः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।
"नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका॥"
अस्या गुणा। यथा,—
"नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तजुत्॥")

नागफलः, पुं, (नागस्य पुन्नागस्येव फलं यस्य।) पटोलः। इति राजनिर्घण्टः॥

नागबन्धुः, पुं, (नागानां हस्तिनां बन्धुरिव प्रियत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ नागानां बान्धवश्च॥

नागबलः, पुं, (नागानामिव बलं यस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥ (अस्य नागबलाग्निकथा। यथा, महाभारते। १। १२८। ६५—७०।
"एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत।
यदि नागेन्द्र! तुष्टोऽसि किमस्य धनसञ्चयैः॥
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः।
बलं नागसहस्रस्य यस्मिन् कुक्षौ प्रतिष्ठितम्॥
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत॥
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः।
प्राङ्मुखस्तूपविष्टः स रसं पिबति पाण्डवः॥
एकोच्छ्वासात्ततः कुक्षिं पिबति स्म महाबलः।
एवमष्टौ स कुक्षीनि ह्यपिबत् पाण्डुनन्दनः॥
ततस्तु शयने दिव्ये नागदत्ते महाभुजः।
अशेत भीमसेनस्तु यथासुखमरिन्दमः॥"
तथा च तत्रैव। १। १२६। १६—२१।
"ततोऽस्मै तु दिवसे प्रत्यबुध्यत पाण्डवः।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली॥
तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते सुजङ्गमाः।
साधुयामासुरव्यग्रा वचनञ्चेदमब्रुवन्॥
यत्ते पीतो महाबाहो! रसोऽयं वीर्य्यसंभृतः।
तस्मान्नागायुतबलो रसोऽभ्यो भविष्यति॥")
हस्तितुल्यबलवति, त्रि॥

नागबला, (नागस्येव बलं यस्याः।) बलाप्रभेदः। गोरक्षचाकुलिया इति गुलञ्चकरी इति ककहरी इति च भाषा॥ (यथा, गारुड़े १७६ अध्याये।
"लब्ध्वा नागबलां चूर्णं श्वासकासादिमुच्यते॥")
तत्पर्य्यायः। गाङ्गेरुकी २ भसा ३ हस्तिगवेधुका ४। इत्यमरः। २। ४। ११७॥ गाङ्गेरुकी ५ गोरक्षतण्डुला ६। इति भरतः॥ भद्रौदनी ७ खरगन्धा ८ चतुःपत्रा ९ महौदया १० महापत्रा ११ महाशाखा १२ महाफला १३ विश्वदेवा १४ अनिष्टा १५ देवदत्ता १६ महागन्धा १७ घण्टा १८। अस्या गुणाः। मधुराम्लत्वम्। कषायत्वम्। उष्णत्वम्। गुरुत्वम्। कण्डूतिकुष्ठवातव्रणपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। आयुष्यत्वम्। हृद्यत्वम्। ग्राहित्वम्। शुक्रधीबलयरोगेषु हितत्वञ्च। इति राजवल्लभः॥

नागभृत्, पुं, (नागः क्रूरचारी सन् बिभर्त्ति आत्मानमिति। भृ+क्विप्।) कुक्कुरसर्पः। इति त्रिकाण्डशेषः॥

नागमल्लः, पुं, (नागेषु हस्तिषु मल्लः।) ऐरावतः। इति शब्दरत्नावली॥

नागमाता, [तृ] स्त्री, (नागानां हस्तिनां मातेव भूयत्वात्।) मनःशिला। इति हेमचन्द्रः। ४। १२६॥ (नागानां सर्पाणां माता।) मनसादेवी। इति शब्दरत्नावली॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ६०।
"नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी॥"
सुरसा। इयं हि सागरोल्लङ्घनसमये हनुमतः परीक्षार्थं देवैरादिष्टा तस्य विघ्नमाचरितुं गता तेन वञ्चिता च। यथा, रामायणे। ४।१।१६८।
"ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम्॥"
यथा, च अध्यात्मरामायणे। ६। १।८—२३।

ह्रिद्वानिलसुतं देवा गच्छन्तं वायुवेगतः।
परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन्॥
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः।
लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम्॥
एवं विचार्य नागानां मातरं सुरसाभिधाम्।
अब्रवीद्देवताश्चन्द्रः कौतूहलसमन्वितः॥
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर।
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता॥
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात्।
आरुह्य मार्गं पुरतः स्थित्वा वानरमब्रवीत्॥
एहि मे वदनं शीघ्रं प्रविश्यश्च महामते!।
देवैरहं कल्पितो भक्षः क्षुधासम्पीडितात्मनः॥
तामाह हनुमान् मातरहं रामस्य शासनात्।
गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः॥
रामाय कृत्यं तस्याः कथयित्वा तदाननम्।
निवेक्ष्ये देहि मे मार्गं सुरसाये नमोऽस्तु ते॥
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहम्।
प्रविश्य गच्छ मे वक्त्रं नोचेत् त्वां भक्षयाम्यहम्॥
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय।
प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः॥
इत्युक्ता योजनायामदेहो भूत्वा पुरः स्थितः।
दृष्ट्वा हनुमतो रूपं सुरसा पञ्चयोजनम्॥
मुखं चकार हनुमान् द्विगुणं रूपमादधत्॥
ततश्चकार सुरसा योजनानाञ्च विंशतिम्।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम्॥
ततश्चकार सुरसा पञ्चाशद्योजनायतम्।
वक्त्रं तदा हनूमांस्तु बभूवाद्रिसन्निभः॥
प्रविश्य वदनं तस्याः पुनरेत्य पुरः स्थितः।
प्रविष्टो निर्गतोऽहं ते वदनं देवि! ते नमः॥
एवं वदन्तं दृष्ट्वा सा हनुमन्तमथाब्रवीत्।
गच्छ साधय रामस्य कार्यं बुद्धिमतां वर!॥
देवैः सम्पूजिताहं ते बलं जिज्ञासुभिः कपे!।
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भो॥"
कद्रूः। इति महाभारतम्॥)

नागमारः, पुं, (नागं मारयतीति। मृ+णिच्+अण्।) केशराजः। इति त्रिकाण्डशेषः॥ हस्तिमारके सर्पमारके च त्रि॥

नागयष्टिः, स्त्री, (नागाधिष्ठिता यष्टिः।) पुष्करिण्यादिस्थितकाष्ठविशेषः। रहकाट इति भाषा॥ तत्पर्य्यायः। नागाह्वा २। इति जटाधरः॥ (यथा, हयग्रीवे।

"वैद्यैव वारुणश्चैव पुन्नागं नागकेशरम्।
वकुलं चम्पकश्चैव विल्वश्चैवाथ खादिरम्॥
एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता।
सवल्कलकोटरं त्यक्त्वा तस्मात् कुर्य्यात् यथेप्सितम्॥")

नागरं, क्ली, (नगरे भवम्। नगर+अण्।) शुण्ठी। इत्यमरः। २। ६। १८॥ (अस्य गुणा यथा,—

"नागरं दीपनं रुच्यं याहि वर्च्यं विबन्धजुत्।
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥

यथा च गारुडे। १८६ अध्याये।

"सुक्तीतकवचायुक्तं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्॥")
सुस्ता। इति मेदिनी। रे, १७२॥ रसवन्धः। इति विश्वः॥ (क्वचित् पुं।) नागरदेशीयाश्चरच्च॥

नागरः, पुं, (नागरो विदग्धस्तद्भावोऽस्यस्येति। अण्।) देवरः। इति त्रिकाण्डशेषः॥ नागरङ्गः। इति शब्दरत्नावली॥ त्रि, (नगरे भवः। "तत्र भवः।" ४।३।५३। इत्यण्।) विदग्धः। (यथा, आर्य्यासप्तशत्याम्। ३२३।

"नागर गीतिरिवासौ यामस्थित्यापि भूषिता सुतनुः।
कस्तूरी न मृगोदरवासवशाद्विसतामेति॥")
नगरोद्भवः। इति मेदिनी। रे, १७२॥ (यथा, देवीभागवते। २। ६। ६६।

"नागरा धृतराष्ट्रस्य सर्व्वे तत्र समाययुः॥"
नगरस्थितश्च। यथा, महाभारते। २।५।१२२।

"धनुर्व्वेदस्य सूत्रं वै यन्त्रसूत्रञ्च नागरम्॥")

नागरकः, पुं, (नागर एव। स्वार्थे कन्। यद्वा, नागरेषु कायतीति। कै+कः।) रतिबन्धविशेषः। यथा,—

"ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं यदि।
शीर्षां धृत्वा कराभ्याञ्च बन्धो नागरको मतः॥"
इति रतिमञ्जरी॥

नागरक्तं, क्ली, (नागश्चतं रक्तम्।) सिन्दूरम्। इति हेमचन्द्रः। ४।१२७॥ नागस्य शोणितञ्च॥

नागरघनः, पुं, (नागर एव घनो मुस्ता।) नागरमुस्ता। इति राजनिर्घण्टः॥ (नागरमुस्ताशब्दे ऽस्य विवृतिर्ज्ञातव्या॥)

नागरङ्गः, पुं, (नागस्य नागसम्भूतस्य सिन्दूरस्येव रङ्गो यस्य।) वृक्षविशेषः। नारङ्गीलेबुर गाछ इति भाषा॥ इत्यमरः। २। ४। ६८॥ तत्पर्य्यायः। नारङ्गः २ नार्य्यङ्गः ३ नागरः ४ ऐरावतः ५ नागरुकः ६ चक्राधिवासी ७। इति शब्दरत्नावली॥ तत्फलगुणाः। सुरभित्वम्। विपाके गुरुत्वम्। दुर्जरत्वम्। अत्यम्लत्वम्। ईषन्मधुरत्वम्। वृष्यत्वम्। वातविनाशित्वञ्च। तत्केशरगुणः। रुच्यत्वम्। वातहरत्वञ्च। इति राजवल्लभः॥

नागरमुस्ता, स्त्री, (नागर एव मुस्ता।) मुस्ताप्रभेदः। नागरमुता इति भाषा॥ तत्पर्य्यायः। नागरोत्था २ नागरादिघनसंज्ञका ३ चक्राङ्गा४ नादेयी ५ चूड़ाला ६ पिण्डमुस्ता ७ शिखिशिरा८ वृषभाक्षी ९ कच्छुरुहा १० चारुकेसरा ११ उच्चटा १२ पूर्णकोशसंज्ञा १३ कलापिनी १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। शीतलत्वम्। कफपित्तज्वरातिसारारुचिक्षयादाहभ्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

नागराजः, पुं, (नागानां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) शेषः। अनन्तः। यथा, कविकल्पद्रुमे।

"पातालेषु नागराजं भुजगयुवतयो यस्य गायन्ति कीर्त्तिम्।"
नागराङ्कं, क्ली, (नागरमिति आङ्का आख्या यस्य।) शुण्ठी। इति राजनिर्घण्टः॥ (विवृतिरस्या शुण्ठीशब्दे ज्ञातव्या॥)

नागरी, स्त्री, (नगरे भवा। नगर+अण्+ङीप्।) शुण्ठी। इति शब्दचन्द्रिका॥ विदग्धा नारी। यथा, उद्धवदूतः।

"हन्ताभीरीः सरतु स कथं संवृतो नागरीभिः॥"
नागरपत्नी। नगरभवे, त्रि॥

नागरुकः, पुं, (नागं रवते शब्दयेन प्राप्नोतीति। रु गतौ+बाहुलकात् कप्रत्ययेन साधुः।) नागरङ्गः। इति शब्दरत्नावली॥

नागरेणुः, पुं, (नागस्य सीसकस्य रेणुः।) सिन्दूरम्। इति राजनिर्घण्टः॥

नागरेयकः, त्रि, (नगरे भवः नगरस्यायं वा। "कन्थादिभ्यो ठकञ्।" ४।२।६५। इति ठकञ्।) नगरसम्बन्धी। नगरस्यायमिति स्त्रीप्रत्ययान्तात् स्वार्थे कः॥

नागलता, स्त्री, (नागः सर्पस्तद्वत् लता।) लिङ्गम्। इति त्रिकाण्डशेषः॥

नागलोकः, पुं, (नागानां लोकः।) पातालम्। इत्यमरः। १।८।१॥ (यथा, हरिवंशे। ८२। ८४।

"रसातले स दृष्टश्च नागलोकमिमं यथा।")

नागवल्लरी, स्त्री, (नाग इव दीर्घा वल्लरी।) नागवल्ली। इति भावप्रकाशः॥

नागवल्लिका, स्त्री, (नागवल्लि+स्वार्थे कन्।) नागवल्ली। इति रत्नमाला॥

नागवल्ली, स्त्री, (नाग इव दीर्घा वल्ली लता।) ताम्बूली। इत्यमरः। २। ४। १२०॥ अस्याः पर्य्यायास्ताम्बूलवल्लीशब्दे गुणाश्च ताम्बूलशब्दे द्रष्टव्याः। सा च श्रीवाटाम्रवाटादिनानास्थानभेदादेव भिन्ना।

"एकाप्येषा देशभेदतृस्नाविशेषा-
न्नागाकारं याति काये गुणे च।
श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा।
रसाढ्या च रसा रुच्या विपाके स्निग्धिरा स्मृता॥
स्यादम्रवाटी कटुकाम्लतिक्ता
तीक्ष्णा-सतोक्ष्णा सुखपाककर्त्री।
विदाहपित्तासविकोपनी च
विदम्भदा वातनिवर्हणी च॥
सप्रभी मधुरा तीक्ष्णा कटुरुष्णा च पाचनी।
गुल्मोदरार्शोघ्नहरा रुचिकृद्दीपनी परा॥"
अन्यच्च।

"गुहागरे सप्तशिरा प्रसिद्धा
तत्पर्णचूर्णातिरसातिरुच्या।
सुगन्धितीक्ष्णा मधुरातिहृद्या
सन्दीपनी पुंस्त्वकरी च वल्ल्या॥
विरेचनी वक्त्रसुगन्धिकारिणी।
नाम्ना याम्बसरा सतीक्ष्णमधुरा रुच्या हिमा दाहजुत्
पित्तोद्रेककरा सुदीपनकरी वल्ल्या सुखामोदिनी।

स्त्रीसौभाग्यविवर्द्धिनी मदकरी ग्रेया सदा वल्लभा
गुल्माभागविबन्धनिच कथिता सा मालवे तु
क्षिता ॥
अग्निपुष्पिका नाम कषायोष्णा कटुस्तथा ।
मलापकर्षा कण्ठस्य पित्तकृद्दहनाग्निनी ॥
देवघोषा कटुस्तीक्ष्णा हृद्या दीर्घदला च सा ।
कफवातहरा रुच्या कटुदीपनपाचनी ॥"
इति राजनिर्घण्टः ॥

नागवारिकः, पुं, (नागानां हस्तिनां वारो वारणम् । स कार्य्यत्वेनास्त्यस्येति । नागवार + ठन् ।) राजकुञ्जरः । हस्तिपः । गणस्यराजः । (नागानां सर्पाणां वारो वारणमस्त्यस्येति ।) गरुड़ः । मयूरः । इति मेदिनी । के, २३० ॥

नागवीटः, पुं, (नाग इव विशेषेण एटति इतस्ततो भ्रमतीति । वि + इट गतौ + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) टाङ्करः । इति त्रिकाण्डशेषः ॥ आकरा इति ख्यातः ॥

नागवीथी, स्त्री, (नागस्येव वीथी पन्थाः ।) अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषः । यथा,—
"सर्व्वग्रहाणां वीथ्येव स्थानानि द्विजसत्तमाः ।
स्थानं नागस्य मध्यं तथैरावतसुत्तरम् ।
वैश्वानरं दक्षिणतो निर्हिक्कमिह तत्त्वतः ॥
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथाहि त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथाचोक्तम् ।
अश्विनी क्षत्तिका याम्या नागवीथीति
ग्रन्थिता ॥"
इति विष्णुपुराणे । २ । ८ । ७६ श्लोकटीकायां श्रीधरस्वामी ॥ कश्यपापत्यविशेषः । यथा,—
"नागवीथी च यामिन्याम् ।" इति ब्रह्मपुराणे द्वितीयोऽध्यायः ॥ (धर्म्मस्य यामिपत्नीगर्भजाता कन्या । यथा, मत्स्यपुराणे । ५ । १८ ।
"लम्बायां घोषनामानो नागवीथी तु यामिजा ॥")

नागशुण्डी, स्त्री, (नागस्य शुण्डवत् आकृतिरस्त्यस्येति । अच् । ततो गौरादित्वात् ङीष् ।) शुण्ठीफलम् । इति राजनिर्घण्टः ॥

नागसम्भवं, क्ली, (नागात् सीसकात् सम्भवो यस्य ।) सिन्दूरम् । इत्यमरः । २ । ६ । १०५ ॥

नागसुगन्धा, स्त्री, (नागस्येव सु शोभनो गन्धो यस्याः ।) भुजङ्गाक्षी । सर्पसुगन्धा । इति भरतधृतस्वामी ॥ (राजभेदः । तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

नागस्तोकं, क्ली, (नागस्य नागविषस्य स्तोकः स्वल्पता यत्र । कप् । स्थावरविषत्वादेवास्य तथात्वम् ।) वत्सनाभः । इति राजनिर्घण्टः ॥

नागस्फोता, स्त्री, (नाग इव स्फोता ।) दन्ती । नागदन्ती । इति राजनिर्घण्टः ॥

नागहनुः, पुं, (नागस्य हस्तिनो हनुरिव ।) नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

नागहन्त्री, स्त्री, (नागान् हन्तीति । हन + ट्रच् + ङीप् ।) वन्याककोटकी । इति राजनिर्घण्टः ॥

नागाक्षः, पुं, (नाग एव आक्षा यस्य ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

नागाक्षला, स्त्री, नागयष्टिः । इति जटाधरः ॥

नागाङ्गना, स्त्री, हस्तिनी । (नागस्येव अङ्गनं लक्षणवर्त्तनं यस्याः ।) नागयष्टिः । इति मेदिनी । ने, १८८ ॥

नागाधिपः, पुं, (नागानां अधिपः ।) अनन्तः । इति हेमचन्द्रः । ३ । ३०३ ॥

नागान्तकः, पुं, (नागानां अन्तको विनाशकः ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥

नागारातिः, पुं, (नागानां अरातिः शत्रुः ।) वन्याककोटकी । इति राजनिर्घण्टः ॥

नागालाबुः, स्त्री, (नाग इव अलाबुः ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

नागाशनः, पुं, (अश्नातीति । अश + ल्युः । नागानां अशनो भक्षकः ।) गरुड़ः । इति हारावली ।१०॥

नागाह्वं, क्ली, (नागस्य आह्वा नाम आह्वा यस्य ।) हस्तिनागपुरम् । इति त्रिकाण्डशेषः ॥

नागाह्वा, स्त्री, (नागं नागकेशरं आह्वयते सङ्गच्छते इति । आ + ह्वे + अच् । टाप् ।) सह्याख्याकन्दः । इति राजनिर्घण्टः ॥

नागी, स्त्री, (नागस्य स्थूला पत्नी । नाग + जानपदेति स्थौल्यार्थे ङीष् ।) नागपत्नी । इति सुग्धबोधम् ॥ (अस्याः दधिगुणा यथा,—
"बहु पाके बलासघ्नं वीर्य्योष्णं पक्तिनाशनम् ।
कषायानुरसं नाग्या दधि वर्च्चो विवर्द्धनम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

नागोदरं, क्ली, (नागवदुदरं यस्मात् । पृषोदरादित्वात् रलोपः ।) उदरत्राणम् । इति हेमचन्द्रः । ३ । ४३२ ॥

नागोदरं, क्ली, (नागवदुदरं यस्मात् ।) उरस्त्राणम् । इति हारावली ।१६८॥ (गर्भिण्या गर्भोपद्रवविशेषः । यथा, सुश्रुते शारीरस्थाने । १० अध्याये ।
"शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाधायत्युदरं तत् कदाचित् यदृच्छया उपशान्तं नैगमेयापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः । तत्रापि लीनवत् प्रतीकारः ॥")

नाचिकेतः, पुं, नचिकतसः । अग्निः । यथा,—
"स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥
प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेनं निहितं गुहायाम् ॥
लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्त-
मथास्य मृत्युः पुनराह तुष्टः ।
तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥
त्रिभिस्त्रिभिर्नाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥
त्रिणाचिकेतस्त्रयमेतदिदित्वा
य एवं विद्वाँश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य
शोकातिगो मोदते स्वर्गलोके ॥"
इति कठोपनिषदि प्रथमा वल्ली । १३-१८ ॥
(ऋषिविशेषः । अस्य विवरणं यथा, महाभारते । १३ । ७१ । २—२१ ।
"अथाप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्ब्राह्मं नाचिकेतस्य धीमतः ॥
ऋषिरुद्दालकिर्धीमानुपगम्य ततः सुतम् ।
तं मामुपचरस्वेति नाचिकेतमभाषत ॥
समाप्ते नियमे तस्मिन् महर्षिः पुत्रमब्रवीत् ।
उपस्कुर्ब्वनग्नीक्षस्य स्वाध्यायाभिरतस्य च ॥
इमा दर्भाः सुमनसः कलसश्चातिभोजनम् ।
विस्तृतं मे तदादाय नदीतीरादिहाव्रज ॥
गत्वानवाप्य तत् सर्व्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येव पितरं सोऽब्रवीन्मुनिः ॥
क्षुत्पिपासाश्रमाविष्ट ऋषिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्रमशपत्तं स मङ्गतपाः ॥
तथा स पित्राभिहितो बाष्पकण्ठेन कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥
तस्य दुःखपरीतस्य सं पुत्रमनुशोचतः ।
यतीतं तदहःशेषं सा रात्री तत्र शर्व्वरी ॥
पित्रेनाभ्यनुपातेन नाचिकेतः कुरूद्वह ।
प्राक्षन्दच्छयने कौशे दृष्ट्वा शस्त्रमिवाद्भुतम् ॥
स पर्य्यपृच्छत्तं पुत्रं क्वेयं पर्य्यागतं पुनः ।
दिष्ट्यैवन्ये: समादिष्टं-क्वोऽसत्प्रमिवोत्थितम् ॥
अपि पुत्र जिता लोकाः शुभाक्षे स्वेन कर्म्मणा ।
दिष्ट्या चासि पुनः प्राप्तो नहि ते मानुषं
वपुः ॥
प्रत्यवदद्यथा सर्व्वस्य पित्रा दृष्टो महात्मना ।
स तां वार्त्तां पितुस्तथ्यं महर्षीणां न्यवेदयत् ॥
कृत्वा भवच्छासनमाशु यातो
ह्यहं विप्राणां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहेमभासम् ॥
दृष्ट्वैव मामभिसुखमापतन्तं
देहीति स ह्यासनमादिदेश ।

वैवस्वतोऽर्घ्यादिभिरर्हणैश्च
भवत्सुते पूजयामास मां सः ।
ततस्त्वहं तं शुनकैरवोचं
दृतः सदस्यैरभिपूज्यमानः ।
प्राप्तोऽसि ते विषयं धर्मराज!
लोकानर्हंयानहं तान् विधत्स्व ।
यमोऽब्रवीन्मां न मतोऽसि सौम्य
यमं पश्येत्याह स त्वान्तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृत विपक्तुम् ।
दृश्ये त्वहं प्रतिगच्छस्व तात
ब्रोचत्यसौ तव देहस्य कर्त्ता ।
इदानि किञ्चापि मनःप्रकीतं
प्रियातिथेरस्तव कामान् दृणीष्व ।
तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽसि ते विषयं दुर्निवर्त्यम् ।
इच्छाम्यहं पुण्यकृतां सलोकान्
लोकान् द्रष्टुं यदि तेऽहं वरार्हः ।
यानं समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभं भानुमत्तत् ।
सम्पूजयामास तदात्मलोकान्
सर्वांस्तथा पुण्यकृतां दिवेन्द्र ! ।")

नाचिकेतुः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

नाटः, पुं, (नट + भावे घञ् ।) दृश्यम् । देशविशेषः । कर्णाटक इति ख्यातः । इति शब्दरत्नावली ॥ (तद्देशवासिनि, त्रि । यथा, राजतरङ्गिण्याम् । १ । ३०२ ।

"याटश्च चोलकर्णाटगाटादींश्च नरेश्वरान् ॥")

नाटकं, क्ली, (नाटयतीति । नट + णिच् + ण्वुल् ।) गद्यपद्यप्राकृतभाषादिमयग्रन्थविशेषः । तत्पर्य्यायः । महारूपकम् २ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—

"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुत्पत्तिनानारससमन्वितम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवानायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्व्वे कार्य्यं निर्व्रहणेऽद्भुतम् ॥
चत्वारः पञ्च वा सन्धयः कार्य्यवाप्तपूरणाः ।
गोपुच्छाग्रसमाग्रन्तु वस्तु तस्य कीर्त्तितम् ॥"

इति साहित्यदर्पणे । ६ । २७७ ।

अपि च ।

"नाटकं स्यात् प्रकरणं व्यायोगोऽङ्कसमा डिमः ।
ईहामृगः प्रहसनं भाणः समरकारकः ॥
वीथीति भरतः प्राह नाट्यांशु दशरूपकम् ।
नाटिका प्रेङ्खणञ्चैव त्रोटकं ग्राकटं तथा ।
गोष्ठीसंलापगण्यानि भाणीङ्कोऽथ रासकौ ।
उल्लाप्यकं श्रीगदितं प्रस्थानं नाट्यरासकम् ॥
दुर्म्मल्लिका लासिका च काव्यञ्चेत्युपरूपकम् ।
स्यात् सप्तदश संक्षेपात् लक्षणञ्चास्य कथ्यते ॥

प्रख्यातोत्तमनायकं रसमयं राजर्षिवंशोद्भवं
साङ्गं भङ्गिशतान्वितं नयमयं तत्तत्पुराद्याश्रयम् ।
भाषाविभवसुन्दरं प्रविलसन्नानाविलासं बलद्-
वृत्तिग्राममशेषसन्धिसहितं सप्ताङ्कवन्नाटकम् ॥"

अन्ये तु ।

"देवतानां मनुष्याणां राज्ञां लोके महात्मनाम् ।
पूर्व्ववृत्तानुचरितं प्रख्यातोदात्तनायकम् ॥
प्रवेशकविष्कम्भाद्यैः सन्धिभिरन्वितम् ।
इतिहासकथोद्भूतं सुखदुःखोदयैर्युतम् ॥
षट्पञ्चदशसप्तानवाङ्कैरनुभूषितम् ।
नानाविलासललितैः सर्व्वसन्धिष्वन्वितम् ॥
नानाभावरसैराढ्यं नाटकं सूरयो विदुः ।
किञ्चिदङ्गविहीनन्तु न ज्ञाप्यं नाटकं क्वचित् ॥
आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च ।
नियता च फलप्राप्तिः फलयोगस्तथापरः ॥
इत्यवस्थापञ्चकं स्यात् नाटके कार्य्यवस्तुनः ।
संस्कृतं प्राकृतं भूतभाषाप्रकृतिका गिरः ।
नाटके नियताः प्रोक्ता एषा भाषा रसावहा ॥
भाषाविभाषाभेदेन प्राकृतन्तु चतुर्दश ॥
मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी ।
बाल्हीका दाक्षिणात्याच्च भाषाः सप्त च प्राकृते ॥
शकाराभीरचाण्डालशबरद्रविड़ौड्रजाः ।
वनौकसौविचातीनां विभाषाः सप्त कीर्त्तिताः ॥
कैकेयी शौरसेनी च काञ्ची पाञ्चालमागधी ।
द्राविड़ी पाण्ड्रदेश्यौ च भूतभाषा प्रकीर्त्तिताः ॥
वैदर्भी मागधी नाटी काम्बोजी चोपनागरी ।
पाञ्चाली षड्विधभ्रंशभाषा स्युर्द्वयभेदतः ॥
देवतादर्शनाद्यच्च कर्त्तव्यं नाटकं बुधैः ।
राजर्षिदर्शनाद्यं वा तेऽपि देवैः समा मताः ॥

उदाहरणम् । मुरारिकवेरनर्घराघवं भवभूतेरुत्तररामचरितं कालिदासस्याभिज्ञानशकुन्तलञ्चेत्यादि । इति नाटकलक्षणम् ।" इति सङ्गीतदामोदरः ॥

नाटकः, पुं, (नाट्यते दृश्यते देवयोनिभिरत्र । नट + घञ् । ततः स्वार्थे कन् । यद्वा, नाटयतीति नट + णिच् + ण्वुल् ।) कामाख्यास्थपर्व्वतभेदः । यथा,—

"ऐन्द्र्यां नाटके शैले शृङ्गरस्य महाश्रमम् ।
नित्यं वसति तत्रेशः शक्तिधीना तु पार्व्वती ॥"

इति कालिकापुराणम् ॥

(नाटकग्रामः । यथा, रामायणे । १ । ५ । १२ ।

"वधूनाटकसङ्घैश्च संयुक्तां सर्व्वतः पुरीम् ॥"

नटतीति । नट + ण्वुल् ।) नर्त्तके, त्रि । इति शब्दरत्नावली ॥

नाटाल्वः, पुं, तरुभेदः । तत्पर्य्यायः । चेलालः २ चित्रपत्रः ३ सुखाग्रः ४ राजतैमिषः ५ लताफलः ६ सैदुः ७ । इति त्रिकाण्डशेषः ॥

नाटारः, पुं (नट्या नटस्य वा अपत्यम् । "आरगुदीचाम् ।" ४ । १ । १३० । इति आरक् ।) नट्या अपत्यम् । इति मुग्धबोधव्याकरणम् ॥

नाटिका, स्त्री, (नाटक + टापि अत इत्वम् ।) नाटकविशेषः । यथा,—

"कैशिकीवृत्तिसंयुक्ता नारीपरिजनोज्ज्वला ।
चतुर्थसन्धिहीना च नाटिका नृपनायिका ॥
इयं शृङ्गारबहुला ततः स्यात् कैशिकीमयी ।
नृत्तीयं कैशिकीवृत्तिर्न स्यादन्यरसाश्रया ॥
न कुञ्जरकराघातमात्रं गृह्णाति कन्दली ।
साक्षां विटः पीठमर्द्दः सचयो वाद्यसञ्चयः ॥
अन्तःपुरचरो राज्ञ ईषद्धिद्यो विदूषकः ।
अत्र भार्य्याजितो राजा निभृतः काममाचरेत् ॥
अन्तःपुरगतां कन्यां देवीगुप्तां नियासति ।
मन्त्रिणि न्यस्तराज्यस्तु सुखसंस्थापितः प्रभुः ॥
युवा भूमिपतिः प्रायो निभृतः काममाचरेत् ॥
कन्यामिह परिणयविधयां देवीगुप्तां मन्त्रिणं
ज्ञानविरहेण ॥ एके तु ।
चतुर्भिरङ्कैरुत्पाद्यन्तिरभिर्नृपनायकम् ।
यत् कैशिकीरसप्रायं नाटकं सैव नाटिका ॥
पूर्व्वक्रमाभावाटकक्रमादत्रावली नाटिका ।
एवमन्यत्रेदीदृशयः ।" इति सङ्गीतदामोदरः ॥
(अस्या लक्षणं यथा, साहित्यदर्पणे । ६।५३६ ।
"नाटिका कुञ्जभट्टत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसम्बन्धा सङ्गीतयाद्यतायवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
सम्पूर्व्वर्त्तेत नेतास्यां देवाख्यासेन गूहितः ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तदग्रः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कौशिकी सस्यविमर्शाः सन्धयः पुनः ॥")

नाटेयः, पुं, (नट्या अपत्यम् । नटी + ढक् ।) नटीसुतः । इति मुग्धबोधव्याकरणम् ॥

नाटेरः, पुं, (नट्या अपत्यमिति । नटी + ढक् ।) नटीसुतः । इति हेमचन्द्रः । ३ । २१२ ॥

नाट्यं, क्ली, (नटानां कार्य्यम् । नट + "छन्दोगौक्थिकयाज्ञिकबह्वृचनटात् ष्यञ् ।" ४ । ३ । १२६ । इति ष्यञ् ।) दृश्यगीतवाद्यम् । तत्पर्य्यायः । तौर्य्यत्रिकम् २ । इत्यमरः । १ । ७ । १० ॥ (यथा, देवीभागवते । १ । ७ । ३० ।

"नाट्यं तनोति सगुणा विविधप्रकारं
को वेत्ति कोऽपि तव लास्यविधानयोगम् ॥")

नटानां समूहः । इति व्याकरणम् ॥ नाट्यारम्भनक्षत्राणि यथा । अनुराधा १७ धनिष्ठा २३ पुष्यः ८ हस्ता १३ चित्रा १४ स्वाती १५ ज्येष्ठा १८ शतभिषा २४ रेवती २७ । इति ज्योतिषम् ॥ ॥ नाट्यफलं यथा,—

"देवर्षिचरितपालपूर्व्वचरितान्यालोक्य धर्म्मोदय-
स्तत्तत्स्थानाश्रितभूमिकाभिनयने स्यादर्थसिद्धिः परा ।
संगीतायुतचित्तवृत्तिभरजा यज्ञा भवन्त्यङ्गना
ज्ञान शृङ्गरसेवयेति कथितं नाट्यं चतुर्व्वर्गदम् ॥
यो यस्य हृदयो भावः स तं नाट्ये निरीक्षते ।
अतः सर्व्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥"

नाट्योत्पत्तिर्यथा,—
"इहानुश्रूयते ब्रह्मा प्रकृष्टैरभ्यर्थितः पुरा।
चकारान्यं वेदेभ्यो नाट्यवेदन्तु पञ्चमम्॥
उपवेदोऽथ वेदाश्च चत्वारः कथिता स्मृतौ।
तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे॥
तेनापि भरतायोक्तस्तेन मर्त्ये प्रचारितः।
शिवाज्ञयोनिभरतास्तत्सादस्य प्रयोजकाः॥"
इति सङ्गीतदामोदरः॥

नाट्यधर्मिका, स्त्री, (नाट्यधर्मोऽस्त्यस्याः क्रियाया इतिठन्।) दृश्यं नार्यश्राव्योक्तनाट्यम्। यथा, हेमचन्द्रः।
"गीतवाद्यवृत्तत्रयं नाट्यं तौर्यत्रिकञ्च तत्।
संगीतं प्रेक्षणार्थेऽस्मिन् श्राव्योक्ते नाट्यधर्मिका॥"

नाट्यप्रियः, पुं, (नाट्यं प्रियं यस्य।) शिवः। इति हेमचन्द्रः। २। ११२॥

नाट्यशाला, स्त्री, (नाट्यस्य कृत्यगीतादेः शालागृहम्।) प्रासाददारसमीपगृहम्। नाटमन्दिर इति भाषा। यथा,—
"नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया॥"
इति गरुड़पुराणम्॥

नाट्यालङ्कारः, पुं, (नाट्यस्य अलङ्कारः।) नाट्यभूषणहेतुः। स तु अष्टषष्टिप्रकारः। यथा,—
"सिद्धिर्लक्षणोद्देशो निरुक्तिश्च विशेषणम्।
गुणाभिपात उद्दिष्टविचारप्राप्तिनीतयः॥
अभिप्रायः परीहारो गर्हणानुनयौ तथा।
अर्थापत्तिः प्रसिद्धिश्च दाक्षिण्यं प्रियभाषणम्॥
अभिमानाख्यानगर्व्वा हर्षद्योभोद्यमाश्रयाः।
पश्चात्तापः सृहाक्रन्दौ कपटश्च प्रवर्त्तनम्॥
उत्तेजनश्च दृष्टान्तः श्लोभोदाहरणे अपि।
संग्रहोऽथरसंघातो विमलोक्तिः पदोच्चयः॥
परीवादोऽथुक्तसिद्धिरथमाध्यवसायकौ।
प्रेक्षासाहनं तुल्यतर्कौ उपपत्त्यनुतर्कणे॥
निवेदनञ्च साहाय्यं याच्ञा पृच्छा विशेषणम्।
अभिज्ञानञ्च स्वारूप्यं गुणकीर्त्तनसंस्तवः॥
विपर्य्ययश्चातिशयो भूयोहेतुनिदर्शनम्।
मानालेशश्च संक्षेपसमीहाशीर्विषर्षकाः॥
उल्लेख उपदिष्टौ चेत्यष्टषष्टिमिता अमी।
अलङ्कारा मता नित्यं नाटकादिषु सूरिभिः॥"
इति सङ्गीतदामोदरः॥
(साहित्यदर्पणमते चतुःषष्टिरेते नाट्यालङ्काराः। यथा, तत्रैव। ६। २००—२३२।
"आक्षीराक्रन्दकपटाश्चमागर्वोद्यमाश्रयाः।
उत्प्रासनं सृहाद्योभपश्चात्तापोपपत्तयः॥
आक्षेपसाध्यवसायौ च विसर्पोल्लेखसङ्गतौ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम्॥
प्रेक्षासाहनञ्च साहाय्यमभिमानोऽथुवर्त्तनम्।
उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम्॥
प्रवर्त्तनाख्यानयुक्तिप्रहर्षाद्योपदेशनम्।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः॥
आक्षीरिदञ्जनाक्षेपाक्रन्दः प्रलपितं शुचा।
कपटं मायया यत्र रूपमन्यद्विभाव्यते॥
अक्षमा सा परिभवः खल्वोऽपि नाभिसज्यते।
गर्वोऽवज्ञेपनं वाक्यं कार्य्यसारम्भ उद्यमः॥
यद्दृश्यं गुरुवत्कार्य्यहेतोराश्रय उच्यते।
उत्प्रासनन्नूपहासो योऽसाधौ साधुमानिनि॥
आकाङ्क्षा रमणीयत्वादस्तुनो या सृहा तु सा।
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु॥
मोहावधीरितार्थस्य पश्चात्तापः स एव तु।
उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये॥
आक्षेपनं स्यादाक्षेपः प्रतिज्ञाध्यवसायकः।
विसर्पो यत्नमारब्धं कर्म्मानिष्टफलप्रदम्॥
कार्य्यग्रहणसङ्केत उत्तेजनमितीष्यते।
स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्॥
भर्त्सना तु परीवादो नीतिः श्लाघ्येन वर्त्तनम्॥
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।
उपालम्भस्तरूपेण तत् स्यादर्थविशेषणम्॥
प्रेक्षासाहनं स्यादुत्साहगिरा कस्यापि योजनम्।
साहाय्यं सङ्कटे यत् स्यात् साधुकूल्यं परस्य च॥
अभिमानः स एव स्यात् प्रश्रयादनुवर्त्तनम्।
अनुवृत्तिर्भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्॥
याच्ञा तु क्वापि याच्ञायाः स्वयं दूतसुखेन वा।
परीहार इति प्रोक्तः कृतानुचितमार्ज्जनम्॥
अवधीरितकर्त्तव्यकथनन्तु निवेदनम्।
प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम्॥
आख्यानं पूर्ब्बवृत्तोक्तिः युक्तिरर्थावधारणम्।
प्रहर्षः प्रमदाधिक्यं श्लिष्टा स्यादुपदेशनम्॥"
एतेषामुदाहरणन्तु तत्रैव द्रष्टव्यम्॥)

नाट्योक्तिः, स्त्री, (नाट्ये कृत्यगीतादौ या उक्तिः।) नाटकविषयकवचः। नटानां कर्म्म नाट्यं तदुक्तिः नाट्योक्तिः। इति भरतः॥ तद्यथा।
आर्य्येति ब्राह्मणम्। क्षत्रियं महाराजेति। सखीं हलेति। वैश्यं हञ्जे इति। चेटीं हञ्जे इति। स्वामिनमार्य्यपुत्रेति। राजश्यालं राज्ञीति। समानं हंहो इति। राजानं देवेति। सार्व्वभौमं भट्टेति। भगिनीपतिमायुष्मतेति सम्बोधयेत्। इति सङ्गीतदामोदरः॥ गणिकायां अज्जुका। विदूषि भाव्यः। जनके आयुकः। कुमारे युवराजभर्त्तृदारकौ। राज्ञि देवभट्टारकौ। राजसुतायां भर्त्तृदारिका। स्नाताभिषेकायां राज्ञ्यां देवी। इतरासु राज्ञीषु भट्टिनी। अवधौक्तौ अय्यहण्यम्। मातरि अम्बा। बालायां वाल्हः। आर्य्ये मारिषः। ज्येष्ठाभगिन्यां अत्तिका। निष्ठायां निर्व्वहणम्। इत्यमरः। १।७।२१—१५॥ (यथाच साहित्यदर्पणे। ६। १५४—१६०।
"अश्राव्यं खलु यद्दृश्यं तदिह खगतं मतम्।
सर्व्वश्राव्यं प्रकाश्यं स्यात्तद्भवेदपवारितम्॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते।
त्रिपताकाकरेणान्यानपवार्य्यान्तरा कथाम्॥
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।
किं ब्रवीषीति यत् नाट्ये विना पात्रं प्रयुज्यते॥
श्रुत्वेवाशुक्तमप्यर्थं तत् स्यादाकाशभाषितम्॥

दत्ता सिद्धाश्च सेनाश्च वेश्यानां नाम दर्शयेत्।
दत्तप्रायाश्च वणिजां चेटचेट्योस्तथा पुनः॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत्॥
नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम्
नायिकानायकाख्यानां संज्ञाप्रकरणादिषु॥
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्।
प्रायेण दृश्यकः साधुर्गमैः स्थाने प्रयुज्यते॥
राजा स्वामीति देवेति भर्त्तेति चाधमैः।
राजर्षिभिर्वयस्येति तथा विदूषकेण च॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः।
सूत्रधारो मारिषेति हञ्जे इत्यधमैः समाः॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चायजः।
भगवन्निति वक्तव्या सर्व्वैर्दैवविलिङ्गिनः॥
वदेद्राज्ञीश्च चेटीश्च भवतीति विदूषकः।
आयुष्मन्नृषिभिः स्तुतो हञ्जे तातेति चेतरैः॥
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः॥
विप्रैरयममात्येति सचिवेति च भण्यते।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः॥
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः॥
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः।
सौम्य भद्रसुखेत्येवमधमैस्तु कुमारकः॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैस्त्रियः।
हञ्जेति सट्टयी प्रेष्या हञ्जे वेश्याऽञ्जिका तथा॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च भरतीजनैः।
आमन्त्रणेषु पात्रस्था वाच्याः स्वसमयागतैः॥
शूद्रकादयश्च सम्भाव्या भद्रदत्तादिनामभिः।
यस्य यत् कर्म्म शिल्पं वा विद्या वा जातिरेव वा॥
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम्॥")

नाड़िः, स्त्री, (नाड़यतीति। नड़ भंशे + क्विप् + इन्।) नाड़ी। इत्यमरटीकायां भरतः॥

नाड़िकं, क्ली, (नाड़िरिव प्रतिज्ञातिः। नाड़ि + "इवे प्रतिज्ञातौ।" ५। ३। ८६। इति कन्।) कालशाकम्। इति भावप्रकाशः॥

नाड़िका, स्त्री, (नाड़ी एव। स्वार्थे कन्।) घटिकाद्वयम्। घड़ि इति भाषा। तत्पर्य्यायः। साधारिका २ घटिका ३। इति हेमचन्द्रः। २।५२॥
घटिकाज्ञानोपायो यथा,—
"निमेषो मानुषो योऽयं मात्रामात्रप्रमाणकः।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला॥
नाड़िका तु प्रमाणेन कला दश च पञ्च च।
उन्मानेनाम्भसः सा तु पलान्यर्द्धचतुर्दश॥
हैममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः।
मागधेन प्रमाणेन यच्चप्रस्थस्तु संस्कृतः॥"
इति विष्णुपुराणम्॥

"नैमित्तिकलयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमा-
ध्रोक्तमेव कल्पप्रमाणमनुस्मारयति निमेष इति
सप्तभिः। मात्रैव मात्रं प्रमाणं यस्य। एक-
मात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः।
निमेषकालतुल्या हि मात्रा लघ्वक्षरस्य यदिति
ब्रह्माण्डोक्तेः। नाड़िकाज्ञानोपायमाह। उन्मानेनेति सार्द्धेन। अम्भस उन्मानेन उन्मी-
यते अनेनेत्युन्मानं पात्रम्। अर्द्धेन योगे त्रयो-
दशसार्द्धादशेत्यर्थः। उन्मानरूपेण घटितानि
सार्द्धद्वादशपलानि सा नाड़िका। सार्द्धद्वादश-
पलताम्रनिर्म्मितपात्रेण सा नाड़िका ज्ञातव्ये-
त्यर्थः। किं प्रमाणं तत् पात्रं कार्य्यं तदाह
मागधेन प्रमाणेन जलप्रस्थस्तु संस्कृत इति।
सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते।
तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धम्। नन्
तथापि पात्रेण कथं नाड़िकाज्ञानं क्रियापरि-
च्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये॥
प्रस्थादि विग्रिनहि हेमेति। माषः पञ्चगुञ्जः।
हेम्नो माषेश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण
रचितैः छतच्छिद्रा। एतदुक्तं भवति सार्द्ध-
द्वादशपलताम्रमयं मागधप्रस्थसंमितमर्द्धायतं
पात्रं चतुर्म्माषश्चतुरङ्गुलहेमशलाकया छताध-
श्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन
पूर्य्यते तावान् कालो नाड़िकेति। तथा च शुक्रः।
द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः।
स्वर्णमाषैः छतच्छिद्रं यावत् प्रस्थजलप्लुतमिति॥")
इति तट्टीकायां श्रीधरस्वामी। (यथा, सूर्य्य-
सिद्धान्ते। १। १९।
"षड्भिः प्राणैर्विनाड़ी स्यात् तत् षष्ट्या नाड़िका
स्मृता॥"
"षड्भिरिति। षट्प्रमाणैरङ्गुलैः पानीयपलं
भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः॥"
इति तट्टीका॥)
नाड़िकेलः, क्ली, (नारिकेलः। रस्य ड़त्वम्।)
नारिकेलः। इत्यमरटीकायां भरतः॥
नाड़िचीरं, क्ली, (नाड़िरिव चीरं यत्र।) निर्व्वे-
ष्टनम्। इति हारावली। २१४॥ नली इति
भाषा॥
नाड़िन्धमः, पुं, (नाड़ीं धमनीं धमतीति। धा
ग्रन्थाग्निसंयोगयोः+"नाड़ीसूत्रोच्च।" ३।
२। ३०। इति खग्।) "पाप्राध्माधेति।" ७।
३। ७८। इति धमादेशः। "खिल्लनयस्य।"
६। ३। ६६। इति पूर्व्वपदस्य ह्रस्वः।) खर्व-
कारः। इत्यमरः। २। १०। ८॥ (उच्चनीचा-
धिरोहणात् सुहुर्मुहुर्निश्वासेनाड़ीं धमति उप-
तापयतीति। श्वासकारके, त्रि। यथा, भट्टिः।
६। ६४।
"सत्वमेवयसिंहाद्यान् क्षणक्षयसमत्विषौ।
कथं नाड़िन्धमान् मार्गानागतो विषमो-
पलान्॥")
नाड़िन्धयः, त्रि, (नाड़ीं धयतीति। धेट पाने+
"नाड़ीसूत्रोच्च।" ३। २। ३०। इति खग्।
"खिल्लनयस्य।" ६। ३। ६६। इति ह्रस्वः।)
नाड़ीपानकर्त्ता। इति सुग्धबोधव्याकरणम्॥
नाड़िपत्रं, क्ली, (नाड़िरिव पत्रं यस्य।) नाड़ी-
पत्रम्। इति शब्दमाला॥
नाड़ी, स्त्री, (नाड़ि+"ह्रस्वादिकारादक्तिनः।"
इति वा ङीष्।) नालम्। प्रणालम्। (नाली
वा इति भाषा। यथा, सुश्रुते निदानस्थाने १०
अध्याये।
"तस्यातिमात्रगमनाद्गतिरित्यत्र
नाड़ीव यद्वहति तेन मता तु नाड़ी॥"
दन्तमूलगता नाड्यो यथा, तत्रैव १६ अध्याये।
"नालास्रावी कफश्चतो विज्ञेयः सोऽधिमांसकः।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः॥")
शिरा। गरुडपुराणं। कुहनचर्य्या। षट्त्रिंश-
त्कालः। इति मेदिनी। डे, १९६॥ शिरार्थे
पर्य्यायः। धमनिः २ सिरा ३। इत्यमरः। २।
६। ६५॥ नाड़िः ४ नालिः ५ नाली ६ धमनी
७ शिरा ८। इति भरतः॥ धरणी ९ धरा १०
तनुजा ११ जीवितप्रिया १२ सिंहा १३। इति
राजनिर्घण्टः॥ * ॥ कायनाड़ी त्रिविधा।
एका वायुवहा। अपरा सूत्रविड्झिरस-
वाहिनी। अपरा आहारवाहिनी। इति
भरतः॥ "सा तु गर्भस्थबालकस्य सप्तभिर्मासै-
र्भवति।" इति सुश्रुतोक्तेः॥ (यथा, तोड़लतन्त्रे
८ उल्लासे।
श्रीदेव्युवाच।
"सार्द्धत्रिकोटिनाड़ीनामालयश्च कलेवरम्।
क्रमेण श्रोतुमिच्छामि तद्दयं मयि प्रभो!॥
श्रीशिव उवाच।
जोन्धि कूपे सपादार्द्धकोटयश्चैव सुन्दरि!।
हस्तास्थे च तथा पादेऽखिलाश्चनाड़यः स्थिताः॥
उदरे च तथा पार्श्वे पञ्चसप्ताः प्रकीर्त्तिताः।
हृदादिसर्व्वगात्रेषु नवसप्ताः प्रकीर्त्तिताः॥
अथ पार्श्वे तथा चर्म्मे तथैव सर्व्वसन्धिषु।
दशाण्डूनं स्थितं सप्तं शरीरे नाड़यः प्रिये!॥
इड़ा च पिङ्गला चैव सुषुम्ना चित्रिणी तथा।
ब्रह्मनाड़ी च यन्मध्ये पञ्च नाड्यः प्रकीर्त्तिताः॥
कुहूश्च शङ्खिनी चैव गान्धारी हस्तिजिह्विका।
नर्द्दिनी च तथा निद्रा रुद्रसंख्या व्यवस्थिता॥
एता नाड्यः परेशानि! सुषुम्नायाः प्रजायते॥")
नाड़ीक्रममाह।
"सार्द्धत्रिकोट्यो नाड्यो हि सूक्ष्माः सूक्ष्माश्च
देहिनाम्।
नाभिकन्दनिबद्धास्ताश्चित्र्यंगूर्द्धमधःस्थिताः॥
द्विसप्ततिसहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः।
देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः॥
तासाञ्च सूक्ष्मशुषिराणि घृतानि सप्त
स्थूलानि तैरसकृदग्ररसं वहद्भिः।
आप्यायते वपुरिदं हि नृणाममीषा-
मम्भःस्रवद्भिरिव सिन्धुगतैः ससप्तः॥
आपादतः प्रततगात्रमशेषमेषा-
मामस्तकादपि च नातिपुरःस्थितेन।

एतन्मृदङ्ग इव चर्म्मचयेन नद्धं
कार्यं वृथामिह शिराशतसप्तकेन॥
सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटा
तासां एका परीक्षणीया या दक्षिणकरचरण-
विन्यस्ता। चतुरधिकेति तदुक्तम्।
तिर्य्यक् कूर्म्मो देहिनां नाभिदेशे
वामे वङ्क्षं तस्य पुच्छञ्च याम्ये।
ऊर्द्धे भागे हस्तपादौ च वामौ
तस्माधस्तात् संस्थितौ दक्षिणौ तौ॥
वङ्क्षे नाड़ीद्वयं तस्य पुच्छे नाड़ीद्वयन्तथा।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः॥
तासां मध्ये एकैति एकस्या एव पादादूर्द्धगम-
नात् दक्षिणेति प्राधान्ये पुरुषाश्रया। यदुक्तम्।
वामे भागे स्त्रिया योज्या नाड़ी पुंसस्तु दक्षिणे।
इति प्रोक्तो मया देवि! सर्व्वदेहेषु देहिनाम्॥"
नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटता-
मपेक्ष्य परीक्षा। साम्यन्तु न स्यादेव। ह्रस्वि-
मस्य तु प्रकृतिस्थता। चरणेति वामस्य तु
दक्षिणगुल्फात् पार्श्वस्था दक्षिणस्य तु वाम-
गुल्फात् पार्श्वस्थैव सदुपदेशात्। करस्था
तु वक्ष्यते॥ * ॥
परीक्षाप्रकारमाह।
सयत्नं रोगधृतिकृत्परभागभाजा
पीड्याथ दक्षिणकराङ्गुलिकाचयेन।
अङ्गुष्ठमूलमधिपश्चिमभागमध्ये
नाड़ीं प्रभञ्जनगतिं सततं परीक्षेत्॥
सयत्नं करेण। रोगधृतिर्गदधारणमित्यापीड़ने
हेतुः। रोगाणां वातादिपिशुनवायूनां धारणं
यथा स्यात्तथा पीड्येति कश्चित्। भाग इति
सप्तदितकफोल्बणपरं भाजेति परीक्षाकालेऽपि
तत्र हस्तस्थितये। आपीड्येत्यर्थान्नाड़ीं एतच्चा-
पीड़नं वातादिपीड्यापर्य्यवेक्षणाय। अथेत्या-
पीड़नानन्तरं न तु परीक्षाकालेऽप्यापीड़न-
स्थितिः। दक्षिणेति प्रायिकं स्वपरीक्षाया-
मन्यथात्वात्। त्रयेति योग्यतया तर्ज्जनीमध्यमा-
नामिकाग्रहणम्। पश्चिमेत्यङ्गुष्ठस्याधोभागः।
मूलेति तदुक्तम्।
अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी।
तस्या गतिवयाद्यात्वात् सुखं दुःखञ्च देहिनाम्॥
प्रभञ्जनगतिर्यत्नेति नाथान्तरनिरासः। सततमि-
ति सुखदशायामपि। तदुक्तम्। भावि-
रोगाभिबोधाय सुखनाड़ीपरीक्षणमिति॥ * ॥
परीक्षणीयमाह।
वातं पित्तं कफं द्वन्द्वं सन्निपातन्तथैव च।
साध्यासाध्यविवेकञ्च सर्व्वं नाड़ी प्रकाशयेत्॥
सन्निपातमिति सामान्यतः। साध्यासाध्यमिति
विशेषतश्चेत्यर्थः। सर्व्वमित्येतदन्यच्च रोगादिक-
मित्युपसंहारः।" इति नाड़ीप्रकाशे प्रथमो-
द्योतः॥ * ॥ अथ नाड़ीज्ञानसमयमाह।
"प्रातः कृतसमाचारः कृताचारपरिग्रहम्।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत्॥
प्रातरिति प्रायिकं मध्याह्ने उक्तता इत्युक्तेः॥ * ॥

निषिद्धकालमाह ।
सद्यः स्नातस्य सुक्तस्य क्षुत्तृष्णातपसेविनः ।
आयामाक्रान्तदेहस्य सम्यङ्नाड़ी न बुध्यते ॥
तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाड़ी यथा दुर्गतरा नदी ॥
सुप्ते निद्राकाले भोजनान्तरे भोजनमध्ये भोजनावसानमात्रे च । वातमूर्च्छादिसन्निकरोगे नायं विधिः ॥ * ॥

अथ वातादिस्वभावक्रममाह ।
आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाड़िकात्रयलक्षणम् ॥
आदाविति कपोलिपीड़ितहितीयत्रये । न तु तर्ज्जनीनिरोधस्थले स्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात् ॥ * ॥
सुस्थतालक्षणार्थमाह ।
भूलतागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा ।
प्रायेति बाहुल्येन । स्वच्छा परितो बाह्यरहिता । स्वास्थ्यमयी सुस्थतायञ्जिका च । तथा ।
प्रातः स्निग्धमयी नाड़ी मध्याह्ने चोष्णतान्विता ।
सायाह्ने धावमाना च शिरानोगविवर्जिता ॥
शिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः पथाश्रितानामेव ॥ * ॥
वातादीनां क्रमेण गतिमाह ।
वाताङ्कगता नाड़ी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥
वक्रेति वायोस्तिर्य्यग्गमनात्तिरो वहन्तीति । एवं तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातव्या ।
चपलेति वह्नेरहर्व्वल्लनादूर्द्ध्वचपला । स्थिरेति जलस्य नीचगमनादधोवहा । मिश्रिते मिश्रचिह्ना भवति । तेन द्विदोषजे उभयचिह्ना । सर्व्वजे सर्व्वचिह्नेति । चपलता स्थिरतयोः समयभेदेनाविरोधः ॥ * ॥
उक्तवक्रादिसामान्यस्य क्रमेण विशेषमाह ।
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाड़ीम् ।
पित्ते च काकलावकमेकादिगतिं विदुः सुधियः ॥
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥
आदिना वाते वृश्चिकगतिर्दोलायिता । आदिग्रहणेन पित्ते कलिङ्गकलविङ्कादिगतिः । कफे गजवराङ्गनादिगतिः ॥ * ॥
द्वन्द्वस्यापि क्रमेणैव भेदानाह ।
सहजः सर्पगतिं नाड़ीं सहजैकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥
भुजगादिगतिञ्चैव राजहंसगतिं धराम् ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥
मण्डूकादिगतिं नाड़ीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥
त्रिदोषजामप्याह ।
उरगादिलावकादिहंसादीनाञ्च विभ्रतीं गमनम् ।
वातादीनाञ्च समं धमनीसम्बन्धमाधत्ते ॥
समेति न्यूनाधिकतानिरासः ॥ क्रमगत्या तु नासाध्यत्वम् । तथा,—
लावतित्तिरिवार्त्ताकगमनं सन्निपातजः ।
कदाचिन्मन्दगा नाड़ी कदाचिच्छीघ्रगा भवेत् ॥
त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः ।
पित्तक्रमतया क्षुद्रसाध्यत्वमसाध्यत्वञ्च ॥ * ॥
सामान्यतः सुखसाध्यत्वमाह ।
यदार्यं धातुमाप्नोति तदा नाड़ी तथा गतिः ।
तथाहि सुखसाध्यत्वं नाड़ीज्ञानेन बुध्यते ॥
अयमर्थः । अपराह्णादौ नाड़ी वातोल्बणा प्रथमं वातगत्यैव वहति ततो यथायथं पित्तादिगत्या न तु पित्तोल्बणत्वे वातादिगत्या तदा सुखसाध्यत्वं व्यतिरेकेण व्यतिरेकः । तदुक्तमन्यैः ।

नाड़ी यथाकालगतिस्त्रयाणां
प्रकोपशान्त्यादिभिरेव भूयः ॥ * ॥

तथासाध्यरूपमाह ।
मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्खित्वा स्खित्वा वहति धमनी याति नाशञ्च
सद्मा ।
गत्वं स्थानात् स्खलति पुनरप्यङ्गुलिं संपृणेद्वा
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥
मन्दं मन्दं सुदुरनुद्गटं अप्रखरमिति यावत् । शिथिलेति स्खलद्गतिरूपम् । व्याकुलेति त्रस्तवदितस्ततः । वाशब्दः समुच्चये । स्खित्वा स्खित्वेत्यादृत्या च तद्रूपैव गतिः । नाशमदर्शनम् । गच्छति कदाचिन्नाड़ीस्पन्दोऽपि न सम्भाव्यते इत्यर्थः । सद्मेति यदि लभ्यते तदा तथैवानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मात् स्खलति कदापि तत्र न स्पन्दत इत्यर्थः । तदुक्तम् । इन्ति च स्थानविच्युतेति किञ्चित् स्फुरती कुत्रापि । पुनरपीति कियद्विलम्बन अङ्गुलीमङ्गुलीमूलमेवमित्यवंरूपैर्बहुभिर्भावैर्धर्म्मैः । उक्तञ्चान्यत्र ।
महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नागाविधगतिर्यस्य तस्य ऋत्युर्न संशयः ॥
महेत्यादिग्रयाङ्गदपित्तादिजततापनिरासः शीतत्व इत्यत्रापि महेति सम्बध्यते । तथा,—
त्रिदोषे स्पन्दते नाड़ी ऋत्युकालेऽपि निश्चला ।
निश्चला स्पन्दसामान्याभाववती । अतीसारादौ हस्तपादादिखेदादिना स्पन्दोपलम्भात् । तथा ।
पूर्व्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माद्यमाविभ्रतीं सन्तानभ्रमणं सुदुर्विदधतीं चक्राधिरूढ़ामिव ।
तीव्रत्वं दधतीं कदापि गतिकां क्षुद्रत्वमातन्वतीं
नोऽसाध्यां धमनीं वदन्ति सुधियो नाड़ीगतिज्ञानिनः ॥
अयमर्थः । पूर्व्वमिति क्रमविपर्य्यये पित्तादिगतिमतीं वारं वारमेवं क्रमेण चक्रोपरिभ्राम्यमाणामिव । तथा तीव्रत्वमतिद्रुतवेगं एवञ्च कदाचिन्मयूरवद्गमनाम् । तथोत्तरोत्तरं क्षुद्रतामापादयन्तीति विशिष्टो हेतुः । तथा चान्यत्र ।
"वातुला च शिरात्वन्ना या चेयं मांसवाहिनी ।
या च क्षुद्रा च वक्रा च तामसाध्यां विदुर्बुधाः ॥
अत्युल्बा सहजतोऽप्युल्बतरा पृथगिवोद्गता वा कदाचिदिति स्थिरा प्रणिधानेनैव गम्यमानस्पन्दा च । मांसवाहिनी मांसाहार इव गतिमती लगुड़प्रायेति । तदुक्तं मांसेन लगुड़ाकृतिः । मांसेन समं वहतीति न युक्तं तद्रूपपरिज्ञापकप्रकारस्यानुक्तत्वात् । इयमपि विशिष्टबोधनाय । या च क्षुद्रा च वक्रा चेति पृथगिव वाक्यान्तरमिति ॥ * ॥
असाध्यत्वापवादमाह ।
भारप्रवाहमूर्च्छाभयशोकप्रसुखकारणान्नाड़ी ।
संमूर्च्छितापि गाढ़ं पुनरपि सा जीवितं धत्ते ॥
चिरतरवहुलभारोद्वहनेन वा विषवेगधारावाहिरुधिरदर्शनादिजनितमूर्च्छया वा राज्ञसादिसम्दर्शनादिभयेन वा पुत्रादिविरहजनितशोकातिरेकेण वा संमूर्च्छितापि अतिनिस्पन्दापि । गाढ़मिति सुतरां कार्य्यादियोगेऽपीत्यर्थः । पुनरिति साध्यतां यातीत्यर्थः । भावानां रत्यादीनां प्रवाह इति न युक्तं भयशोकयोः पृथग्विधानात् । प्रसक्तेत्यनेन हेत्वन्तराभिधानम् । तदुक्तम् ।
पतितः सन्धितो भेदी नष्टशुक्रश्च यो नरः ।
ग्राम्यते विषयस्तस्य न किञ्चिन्मृत्युकारणम् ॥
पतितः उच्चादितः सन्धितः अस्थ्यादिसन्धानेन संहितः भेदी अतीसारवान् नष्टशुक्रो यक्ष्मादिनातिरमणेन वा शुक्रक्षयवान् । विषयोऽसाध्यत्वानुमानं ग्राम्यति नावतरति । कारणं प्राग्युक्तं तत्तदेव । अन्यत्रापि ।
तथा भूताभिषङ्गेऽपि त्रिदोषदुरुपस्थिता ।
समाङ्गा वहते नाड़ी तथा च न क्रमं गता ॥
अपगल्बल रोगाङ्गा नाड़ी तत्सन्निपातवत् ।
भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे च देवासुराद्दी नाड़ी सन्निपातधर्म्मशालिनी उपस्थिता । आपातत एव भवति न तु तत्फलप्रदा । भेदमाह । समेति वातपित्तकफस्वभावक्रमवती तथाक्रमं अतिक्रमं न गता । तस्मादेव अपगल्बः अपगतो ऋत्युर्यस्याः सा तथा । परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् इति । तदुक्तम् ।
स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदाः ।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणमिति ॥
स्वस्थानहीन उच्चादितः पतने । अङ्गुष्ठमूलतश्चरत इति तुल्यार्थः । निर्गदा दूष्यसङ्गतिः निर्गदा अपि निश्चला भवन्ति । दूषणमसाध्यत्वभ्रमः । अन्यै लाक्षुः ।
शोकं वातकफौ दुष्टौ पित्तं वहति दारुणम् ।
पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति ॥
अयमर्थः । वातकफाभ्यां नाड़ी किञ्चिद्वहति दुष्टौ शीतत्वाधिक्याभ्यामपि विशेषादुक्तम्

पित्तं विषमवेगेन वहति तदा तत्प्रतिकारार्थं भेषजं कुर्यात्। असाध्यता न स्यादिति यावत्। अत्र कश्चित्।

स्वस्थानच्यवनं यावद्वह्मन्या नोपजायते।
तावच्चिकित्सासत्त्वेऽपि नासाध्यत्वमिति स्थितिरिति।

तच्च प्रायिकं बहुधा व्यभिचारदर्शनात्। ह्रस्ति च स्थानविच्युतेत्यत्र चकारस्यायोगव्यवच्छेदकत्वमित्यर्थः। ॥ * ॥ प्रसङ्गात् कालनिर्णयमाह।

भूलताभुजगाकारा नाड़ी देहस्य संक्रमात्।
विप्रौर्वा चौरगतां याति मासान्ते मरणं भवेत्॥

कदाचित् मण्डीलतावत् ह्रस्वा तनुतिवहति-मन्दवक्रगमना च। कदाचित् सर्पवत् परिपुष्टा तनुतिवहलवत्तरवक्रगमना च इति वैग्निरेन सुखदग्राह्यो भेदः। इत्यत्र कदाचिदलक्षतामतिलङ्घनताच्च यदा गच्छति। देहेऽतिदेहक्रममपेक्ष्य तेन देहोऽपि यदा स्थूलः श्रोथादिना कदाचिच्च ह्रस्वः स्यात् तदा द्वितीये मासि म्रियत इति। तथा,—

चत्वारिंशच्छति वेगेन शान्ततां लभते चलात्।
सप्ताहान्मरणं तस्य यत्रक्षे श्रोथवर्जितः॥

चत्वारिंशदिति हतं हतं न तु कदाचिदिति। शान्ततामनुपलभ्यमानत्वम्। श्रोथेति तन्मात्रस्थस्यैव तु नाचिरं मरणाय चिरमेवेत्यर्थः। तथा,—

हिमवद्विग्रहा नाड़ी ज्वरदाहेन तापिनाम्।
त्रिदोषस्यार्थभजतां तदा म्रियुर्दिनत्रयात्॥

यदा निरन्तरं ज्वरदाहतापौ श्लैष्मिकश्च नाड्याः। त्रिदोषेति। सन्निपातलक्षणसत्त्व एव भवति॥ तदा,—

निरीक्ष्या दक्षिणे पादे तदा चैवा विशेषतः।
सुखे नाड़ी वहेन्नित्यं ततस्तु दिवतूर्ध्वकम्॥
गतिस्तु भ्रमरस्येव वहेदेकदिनेन तु।
कण्ठेन स्रन्दते नित्यं पुनर्लंगति चाङ्गुलौ॥
मध्ये द्वादशयामानां म्रियुर्भवति निश्चितम्।
दक्षिण इति पुंसः। स्त्रियास्तु वाम एव तथेति करस्यैव विशेषतो विशेषज्ञानार्थम्। यदि नोभयनाथापि सुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं प्राप्य भ्रमरस्य परिभ्रमणरूपं गमनमिव सुख एव यदि वहति तदैकदिनेन। कण्ठे मूले स्रन्दनस्थाने कदाचित् न स्रन्दते स्वल्पं स्रन्दत इति च भाषायते। नित्यं प्रायः पुनश्चाङ्गुलौ तन्मूले कदापि लगति तदा तस्मादारभ्य द्वादशप्रहरमध्य एव म्रियुरिति। तथा,—

स्थित्वा नाड़ी सुखे वस्य विद्युद्द्योतरिवेक्ष्यते।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम्॥
स्थित्वेत्यादत्ता स्थित्वा स्थित्वा विद्युत्स्फुरणमिव लक्ष्यते द्वितीय इत्यहोरात्रादूर्ध्वमित्यर्थः। तथा,—

स्वस्थानविच्युता नाड़ी यस्य वहति वा न वा।
ज्वाला च हृदये तीव्रा तदा ज्वालावधिः स्थितिः॥

न वेति स्थित्वा स्थित्वेत्यर्थः। इत्यत्र यदसाध्यलक्षणसूत्रमवस्थानादपवादविरहे सति तस्यार्थप्रवेशो यथायथमार्ष्यमतिभिरवगन्तव्य इति नेह प्रतन्यते ग्रन्थगौरवभयात्। मन्दं मन्दमिति अनेन न च भूलतागमनाकारेति विरुध्यते तस्य तात्कालिकमरणविषयत्वात्। सर्वमिदं सर्वरोग एव वेदितव्यं ज्वरमात्रे तु भ्रम एवेति।" इति नाड़ीप्रकाशे द्वितीयोद्योतः॥ * ॥

अथ रोगेषु निरूपणीयेषु प्रधानतया प्रथमं ज्वरनिरूपणमाह। तत्र ज्वरपूर्वरूपे।

"अङ्गमर्दश्च नाड़ीनां भवन्ति मन्थराः ध्रुवाः।
ध्रुवः प्रबलतां याति ज्वरदाहोऽभिभूतये॥
सान्निपातिकरूपेण भवन्ति सर्ववेदनाः॥

ज्वररूपमाह।

ज्वरकोपे च धमनी सोष्मा वेगवती भवेत्।
उष्मा पित्ताद्भते नास्ति ज्वरो नास्त्युष्मणा विना॥
उष्मा वेगधरा नाड़ी ज्वरकोपे प्रजायते॥

अन्यत्र च।

ज्वरे च वक्रा धावन्ती तथा च मरुतः ध्रुवे।
रसमान्ते निधौ प्रातस्तप्ता दीपशिखा यथा॥

तत्रापि विशेषमाह।

सौम्या रूक्षा स्थिरा मन्दा नाड़ी सहज-वातजा।
स्थूला च कठिना शीघ्रा स्रन्दते तीव्रमारुते॥
द्रुता च सरला शीघ्रा दीर्घा पित्तज्वरे भवेत्।
श्लैष्मज्वरे तु नाड्याः काठिन्याद्य चला तथा॥
मलाजीर्णेऽतितरां स्रन्दनञ्च प्रकीर्तितम्।
नाड़ी तनुसमा मन्दा श्लैष्मिका श्लेष्मदोषजा॥

द्वन्द्वजमाह।

चञ्चला तरला स्थूला कठिना वातपित्तजा।
ईर्षच्च द्रुश्यते तूष्मा मन्दा स्यात् श्लेष्मवातजा॥
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातजम्।
रूक्षवातभवे तस्य नाड़ी स्यात् पित्तसन्निभा॥
रूक्षा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा॥

प्रसङ्गादाह।

मध्ये करे वहेन्नाड़ी यदि सन्तापिता ध्रुवम्।
तदा नूनं मनुष्यस्य रुधिरापूरिता मलाः॥

आगन्तुकरूपभेदमाह।

भूतज्वरे सैक इवातिवेगा
धावन्ति नाड्यो हि यथाग्निगामाः।

तथा,—

ऐकाहिकेन कथन प्रदूरे
शमान्तगामा विषमज्वरेण।
द्वितीयके वापि तृतीयतूर्ये
गच्छन्ति तप्ता भ्रमिवत् क्रमेण॥

अन्यत्रापि।

उष्मा वेगधरा नाड़ी ज्वरकोपे प्रजायते।
उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च॥
भवेत् चौरगतिर्नाड़ी ज्ञातव्या वैद्यसत्तमैः॥

प्रसङ्गादाह।

व्यायामे भ्रमणे चैव चिन्तायां श्रमशोकतः।
नानाप्रभावगमना शिरा गच्छति विज्वरे॥

अजीर्णरूपमाह।

अजीर्णे तु भवेन्नाड़ी कठिना परितो जड़ा।
प्रसन्ना च हता शुद्धा त्वरिता च प्रवर्तते॥

तत्र विशेषमाह।

पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जड़ा।
अष्टकपूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी॥

प्रसङ्गाद्रसज्ञानमाह।

पुष्टिस्तैलगुड़ाहारे मांसे च जगुड़ाकृतिः।
क्षीरे च स्निग्धिता वेगा मधुरे भेकवद्गतिः॥
रम्भागुड़वटाहारे रूक्षशुष्कादिभोजने।
वातपित्तार्तिरूपेण नाड़ी वहति निष्क्रमम्॥

अथ रसज्ञानम्।

मधुरे वर्हिगमना तिक्ते स्याद्भूलतागतिः।
अम्ले कोष्णा प्लवगतिः कटुके भृङ्गसन्निभा॥
कषाये कठिना ह्यामा लवणे सरला द्रुता।
एवं द्विचित्रतुर्योगे नानाधर्मवती धरा॥

तथा,—

द्रवेऽतिकठिना नाड़ी कोमला कठिनाशने।
द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च॥
क्षौद्रे पृथग्ग्रन्थिलेव पिष्टे पुष्टेव जायते॥

अग्निमान्द्यधातुक्षयलक्षणमाह।

मन्दाग्नेः क्षीणधातोश्च नाड़ी मन्दतरा भवेत्॥

तदुक्तम्।

क्षीणधातौ च मन्दाग्नौ नाड़ी क्षीणतमा ध्रुवम्॥

तथा,—

मन्देऽग्नौ क्षीणतां याति नाड़ी हंसाकृतिस्तथेति॥

अन्ये तु।

आमाश्रये पुष्टिविवर्द्धनेन
भवन्ति नाड्योऽग्नियुजाभिवृत्ताः।
आहारमान्द्यादुपवासतो वा
तथैव नाड्यो भुजगायमानाः॥

प्रसङ्गाद्दोषाग्निज्ञानमाह।

लक्ष्मी भवति दोषाग्नेस्तथा वेगवती मता।
प्रसङ्गाद्ग्रहणीमध्याह।

पादे च हंसगमना करे मण्डूकसंभवा।
तस्माग्नेर्मन्दता देहे तथवा ग्रहणीगदे॥

तथा,—

भेदेन भ्रान्ता ग्रहणीगदेन
निर्वीर्यरूपा खलिसारभेदे।
विलम्बिकायां प्लवगा कदाचि-
दामातिसारे पृथुता जड़ा च॥ * ॥

अथ विसूचिकाज्ञानम्।

निरोधे मूत्रशकृतोर्विड्ग्रहे त्वितराश्रिताः।
विसूचिकाभिभूते च भवन्ति भेकवत् क्रमाः॥ *॥

प्रसङ्गादानाहमूत्रशकृज्ज्ञानमाह।

आनाहे मूत्रशकृते च भवेन्नाड़ी गरिष्ठता॥ *॥

मूलज्ञानमाह।

वातेन मूलेन मरुत्प्रवेन
सदैव वक्रा हि शिरा वहन्ती।
ज्वालामयी पित्तविचेष्टितेन
साध्या न मूले न च पृष्ठरूपा॥ * ॥

अथ प्रमेहज्ञानम्।
प्रमेहे ग्रन्थिरूपा सा सुतप्ता त्वामदूषये ॥*॥
विषविष्टम्भगुल्मज्ञानमाह।
उत्पित्तुरूपा विषरिष्टिकार्या
विष्टम्भगुल्मेन च वक्रूरूपा।
अत्यर्थवातेन अधः स्फुरन्ती
उत्तानभेदिन्यसमाग्निकार्ये ॥*॥
गुल्मे विशेषमाह कश्चित्।
गुल्मेन कस्योऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥*॥
अथ भगन्दरज्ञानम्।
त्रयार्धं कटिने देहे प्रयाति पैत्तिकं क्रमम्।
भगन्दरानुरूपेण नाड़ीव्रणनिवेदने।
प्रयाति वातिकं रूपं नाड़ी पावकरूपिणी ॥
अथ वान्तादिज्ञानम्।
वान्तस्य ग्लान्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः।
गतिं विधत्ते धमनी गजेन्द्र-
मरालमानेव कफोल्वणेन ॥
स्त्रोरोगादिकमपि रक्तादिज्ञानक्रमेण ज्ञातव्यम्।
क्वचित्प्रकरणोल्लेखात् क्वचिदौचित्यमाश्रितः।
क्वचिद्हेतुतः क्वचित् कालात् सङ्कीर्णगदनिर्णयः॥
नाड़ीपरिचयज्ञानं प्रायशो नैव दृश्यते।
तेन धात्र्या मयोक्तं यत्तत् समाधेयमुक्तमैः॥"
इति श्रीगुरुरसेनकविराजकृते नाड़ीप्रकाशे तृतीयोद्योतः॥
नाड़ीकः, पुं, (नाड़ीव कायतीति। कै+कः।) घ्राणकविशेषः। पाट्घ्राक इति नालिताघ्राक इति च भाषा॥ तत्पर्य्यायः। षट्घ्राकः २ नाड़ीघ्राकः ३। अस्य गुणाः। रक्तपित्तनाशित्वम्। विष्टम्भित्वम्। वातकोपनत्वञ्च। इति भावप्रकाशः॥
नाड़ीकलापकः, पुं, (नाड़ीनां नाड़ीवन्मालानां कलापः समूहो यत्र। कप्।) सर्पाक्षी। इति भावप्रकाशः॥
नाड़ीकेलः, पुं, (नारिकेलः। पृषोदरादित्वात् साधुः।) नारिकेलः। इति शब्दरत्नावली॥
नाड़ीघः, पुं, (नाड्या घीयते इति। घि+वाहुलकात् डः।) घ्राणकविशेषः। नालिता इति भाषा। तत्पर्य्यायः। केचुकम् २ पेचुली ३ पेचुः ४ विश्वरोचनः ५। इति त्रिकाण्डशेषः॥
"नाड़ीघघ्राकं द्विविधं तिक्तं मधुरमेव च।
रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम्।
मधुरं पित्तिकं शीतं विष्टम्भि कफवातजित्॥"
इति राजवल्लभः॥
नाड़ीचरणः, पुं, (नाड़ीवच्चरणौ यस्य।) पक्षी। इति त्रिकाण्डशेषः॥
नाड़ीजङ्घः, पुं, (नाड़ीवत् जङ्घा यस्य।) काकः। इति त्रिकाण्डशेषः॥ मुनिविशेषः। यथा।
"नाड़ीजङ्घः सुरगुरुसुनिर्व्वक्ति दृष्टेरकालौ
मासावेतौ न शुभफलदौ पौषमाघौ न शेषान्।"
इति मलमासतत्त्वम्॥

वक्रविशेषः। यथा, महाभारते। १२। १६८। १६—२०।
"ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः॥
नाड़ीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा।
वकराजो महाप्राज्ञः काश्यपस्यात्मसम्भवः॥"
नाड़ीतरङ्गः, पुं, (नाड्यां नालायां तरङ्गो यत्र।) काकोलः। हिञ्जकः। रतहिञ्जकः। इति मेदिनी। गे, ५६॥
नाड़ीतिक्तः, पुं, (नाड्या तिक्तः।) नेपालनिम्बः। इति राजनिर्घण्टः॥ (नेपालनिम्बशब्देऽस्य विशेषो ज्ञेयः॥)
नाड़ीदेहः, पुं, (नाड़ीसारो देहो यस्य। ह्रस्वत्वात् तथात्वम्।) भृङ्गी। इति त्रिकाण्डशेषः॥
नाड़ीनक्षत्रं, क्ली, (नाड़ीस्थितं नक्षत्रम्।) नरस्य जन्मदग्धमयोड्याद्यदग्धत्रयोविंशपञ्चविंशनक्षत्राणि। राज्ञः पूर्व्वोक्तानि जातिदेशाभिषेकनक्षत्राणि च। यथा,—
"जन्माद्यं कर्म्म ततोऽपि दग्धमं साङ्घातिकं
षोड़शभम्।
सप्तदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम्॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्भ्यः
स्यात्।
नवनक्षत्रो नृपतिः स्वजातिदेशाभिषेकर्क्षैः॥"*॥
जात्यृक्षञ्च।
"पूर्व्वाक्षयं सागलमग्यजानां
राज्ञान्तु पौष्णेन सहोत्तराणि।
सपौष्णमित्रं पितृदैवतञ्च
प्रजापतेर्भञ्च क्षपीवलानाम्॥
आदित्यहस्ताभिजिदश्विभानि
तान्यन्यजातेः प्रभविष्णुतायाम्।
देशभं देशनामर्क्षम्। नाड़ीनक्षत्राणि॥*॥
ईहा देहार्थहानिः स्याज्जन्मर्क्षे उपतापिते।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे॥
मृत्तिद्रविणबन्धूनां हानिः साङ्घातिके तथा।
सम्पन्ने सासुदायिके मित्रभत्यार्थसङ्क्षयः।
वैनाशिके विनाशः स्याद्हेद्रविणसम्पदाम्॥
नाड़ीनक्षत्रफलम्॥*॥
जातिभे कुलनाशः स्यादन्यनक्षत्राभिषेकभे।
देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्॥
यस्मिन् राजाभिषेको भवति तदाभिषेचनिकभम्। अ इ उ ए क्षत्रिका। ओ व वि वु रोहिणीत्यादि देशभम्।
सर्व्वेषां पीड़ायां दिनमेवमुपोषितोऽगदं जुहुयात्।
सावित्र्या चीरतरोः समिद्भिरमरद्विजागुरतः॥"
इति ज्योतिस्तत्त्वम्॥
नाड़ीविग्रहः, पुं, (नाड़ीसारो विग्रहो यस्य। ह्रस्वत्वात् तथात्वम्।) भृङ्गी। इति हेमचन्द्रः। २। १२४॥

नाड़ीव्रणः, पुं, (नाड़ीसंलग्नो व्रणः।) सर्व्वदागलद्व्रणः। नाली घा इति भाषा। इत्यमरः। २। ६। ५४॥ तस्य निदानं यथा,—
"यः स्रोतसामसमिति पक्वमुपेक्षतेऽन्नो
यो वा व्रणं प्रचुरपूयमवाधुदृक्तः।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः सपूयः॥
तस्यातिमात्रगमनाद्गतिरिच्यते तु
नाड़ीव यद्वहति तेन मता तु नाड़ी॥"*॥
वातादिदोषभेदेन तस्य रूपाणि यथा,—
"दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संसृष्टितेरपि च शल्यनिमित्तसोऽन्या।
तत्रानिलात् परुषसूक्ष्मसुखी सफूला
फेनानुविद्धमधिकं स्रवति त्वपासु॥
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकसूष्मरुजश्च तापि।
श्लेष्मा कफाद्बहुघनाञ्जनपिच्छिलासा
स्निग्धा सकण्डुरुरुजा रजनीप्रवर्णा॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसूच्यकरीमिव कालरात्रिम्॥
दोषद्वयाभिहतलक्षणदर्शनेन
तिस्रो गतीर्यतिकरप्रभवासु विद्यात्॥"
शल्यनिमित्तलक्षणं यथा,—
"नष्टं कथञ्चिदणुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति।
सा फेनिलं मथितमच्छमसृग्विमिश्र-
मुष्णं करोति सहसा स्रवञ्च नित्यम्॥"
असाध्यलक्षणसाध्ययोर्लक्षणं यथा,—
"नाड़ी त्रिदोषप्रभवा न सिध्येत्
श्लेष्मान्वितस्तु खलु यत्नसाध्यः॥"
इति माधवकरः॥*॥
"विड्वराहवसा क्षाराचूर्णं लीढं समाक्षिकम्।
हन्ति कुष्ठं क्रमीन्भिन्नं नाड़ीव्रणभगन्दरान्॥"
इति गरुड़पुराणम्॥
(अस्य चिकित्सान्तरं यथा,—
"नाड़ीनां गतिमन्विष्य शल्येनापास्य कर्म्मवित्।
सर्व्वव्रणक्रमं कुर्य्यात् शोधनं रोपणादिकम्॥
नाड़ीं वातहतां साधु पाटितां लेपयेद्भिषक्।
प्रत्यक् पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत्॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुतैः।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः॥
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम्।
आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता।
क्षत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशनी॥
घोण्टाफलत्वङ्मदनात् फलानि
पूगस्य च त्वक् लवणञ्च सूक्ष्मम्।
क्षुत्सर्षपैर्दुग्धेन सहैव कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम्॥
वर्त्तीकृतं माक्षिकसंप्रयुक्तं
नाड़ीव्रणघ्नं लवणोत्तमं वा।

दुरन्ने यद्विहितञ्च तैलं
तत् सेव्यमानं गतिमाशु हन्ति ॥
जात्यर्कसम्याककरञ्जदग्धी-
सिन्धूत्थसौवर्चलयावशूकैः ।
वह्निः कृता हन्त्यचिरेण नाड़ीं
क्षुक्षीरपिष्टा सह चित्रकेण ॥
महिषदधिकोद्रवान्नमिश्रं हरति चिरविरूढ़ाम्।
मुक्तं कटुनिकामूलचूर्णमतिदारुणां हन्ति ॥
क्षणवुब्जबलभीरुकां गतिर्मर्म्माश्रिता च या ।
क्षारक्षत्रेण तां भिन्द्यान्न शस्त्रेण कदाचन ॥
व्रणस्य गतिमन्विष्य क्षारक्षत्रानुसारिणीम् ।
सूचीं विदध्यादत्यन्तं तीक्ष्णाग्रां च निर्हरेत् ॥
क्षत्रस्याग्रं समानीय गाढ़बन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य क्षत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न च्छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
गुग्गुलुस्नुक्षिफलाक्षीरैः समांशैरान्ययोजितः ।
नाड़ीदुरन्नयं मूल-भगन्दरविनाशनः ॥
इति सम्राङ्गुग्गुलुः ॥
खर्ज्जिका सिन्धुदन्त्यर्कमूलिकानलनीलिका ।
खरमञ्जरीबीजैश्च तैलं गोमूत्रपाचितम् ॥
दुरन्नव्रणप्रशमनं कफनाड़ीव्रणापहम् ॥
इति खर्ज्जिकाद्यं तैलम् ॥
वन्यलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु ।
तेन सिद्धं घृतं तैलं नाड़ीदुरन्नव्रणापहम् ॥
हितं पामापचीनान्तु पाणाभ्यञ्जननावनैः ।
विविधेषु च स्फोटेषु तथा सर्व्वव्रणेषु च ॥
इति निर्गुण्डीतैलम् ।
हंसपादारिष्टपत्रं जातीपत्रं ततो रसैः ।
ततकल्केन पक्वैतैलं नाड़ीव्रणविशोधनम् ॥
इति हंसपादादितैलम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारः ॥)

नाड़ीशाकः, पुं, (नाड़ीप्रधानः शाकः ।) नाड़ीकः ।
इति भावप्रकाशः ॥ पाटशाक इति भाषा ॥

नाड़ीसन्दंशः, पुं, (नाड्यामेव संदंशो यस्य । नाड़ी-सारत्वादेवास्य तथात्वम् ।) भङ्गी । इति शब्दरत्नावली ॥

नाड़ीहिङ्गु, क्ली, (नाड़ीप्रधानं हिङ्गु ।) हिङ्गु-भेदः । कलःपतिहिङ्गु इति हिन्दीभाषा । तत्-पर्य्यायः । पलाशाग्रः २ जन्तुकः ३ रामठः ४ वंशपत्रः ५ पिण्डाङ्गः ६ सुवर्च्चः ७ हिङ्गु-नाड़िका ८ । (यथाच वैद्यकरत्नमालायाम् ।
"हिङ्गुपर्णी वेणुपत्री नाड़ीहिङ्गु शिवाटिका ॥")
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफ-वातनिर्गमान्तिकारित्वम् । विष्ठाविबन्धदोषा-नाहामयनाशित्वञ्च । इति राजनिर्घण्टः ।

नाणकं, क्ली, (अणति शब्दायते इति । अण शब्दे + ण्वुल् । न आणकम् ।) सुद्राचिह्नित-निष्कादि । यथा,—
"तुलाशासनमानानां कूटक्षत्राणकस्य च ।
एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥"
इति मिताक्षरायां साहसप्रकरणीययाज्ञवल्क्य-वचनम् ॥

नाद्यं, क्ली, (नद्यते आख्यायते प्रशस्यते सर्व्वै-रिति । नद्य + ष्ट्रन् । बाहुलकात् अन्तलोप आलच्च ।) विचित्रम् । प्रशस्यः । शिवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

नाथ, ऋ ङ आशिषि । दैवैश्वर्य्ये । इति कवि-कल्पद्रुमः ॥ (भ्वां-परं-आत्मं च-सकं-ऐश्वे अकं-सेट् ।) दन्त्यादिरयम् । ऋ, अननाथत् । ङ, प्रणाथते प्रनाथते । दैव उपतापः । आशीरि-त्यर्थाशंसनम् । डित्त्वेऽपि अपथाग्रीर्गत्वनु-कारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मै-पदम् । नाथति शत्रुं बली उपतापयतीत्यर्थः । नाथते श्रियं लोकः आशंसते इत्यर्थः । नाथति धनी ईश्वरः स्यादित्यर्थः । नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः । मार्गणेरथ तव प्रयो-जनं नाथसे किन्तु न भूभृतः प्रतिमिति भारवौ याचनमप्याशंसाविशेषः । आशिषि नित्य-मात्मनेपदमन्यत्र विभाषयेति केचित् । इति दुर्गादासः ॥

नाथः, पुं, (नाथति ईश्वरो भवतीति । नाथ ऐश्वे + अच् ।) ऐश्वर्य्ययुक्तः । तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ आर्य्यः १० प्रभुः ११ भर्त्ता १२ ईश्वरः १३ विभुः १४ ईश्वितृ १५ इन्द्रः १६ नायकः १७ । इति हेमचन्द्रः ॥३।२३॥ (यथा, रामायणे । २ । ४८ । १७ ।
"स हि नाथो जनस्यास्य सगतिः स परायणम् ॥")

नाथवान्, [त्] त्रि, (नाथो विद्यतेऽस्येति । नाथ + मतुप् । मस्य वः ।) पराधीनः । इत्यमरः ॥३। १ । १६ ॥ प्रभुविशिष्टः ॥ (ऋग्वेदवान् । यथा, रामायणे । १ । ६२ । १२ ।
"नाथवांश्च मुनिश्रेष्ठो यत्नश्चाविफलो भवेत् ॥"
स्त्रियां ङीप् । यथा, रामायणे । २ । ६८ । १ ।
"तस्यां चीरं वसानायां नाथवत्यामनाथवत् ।
प्रचुक्रोश जनः सर्व्वो धिक् त्वां दशरथस्त्रियति ॥")

नाथहरिः, पुं, (नाथं हरति स्थानात् स्थानान्तरं नयतीति । नाथ + हृ + "हरतेर्द्दतिनाथयोः पशौ ।" ३ । २ । ३५ । इति इन् ।) पशुः । इति सुग्धबोधव्याकरणम् ॥

नादः, पुं, (नद शब्दे + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २६ ॥ (यथा, हरिवंशे । २३५ । ५६ ।
"विभान्ति ते देववराः ससाध्याः
प्रभातशुक्रस्तनसंहनादाः ॥")
अर्द्धचन्द्राकृतिवर्णः । स चाष्टस्वरदुरार्य्यः । यथा अर्द्धचन्द्रोऽनुस्वारः । इति भुवनेश्वरीमन्त्र-व्याख्यानन्दः ॥ तत्पर्य्यायः । अर्द्धेन्दुः २ अर्द्ध-मात्रा ३ कलाराज्ञी ४ सदाशिवः ५ अनुचार्य्या ६ तुरीया ७ विश्वमातृकला ८ परा ९ । इति बीजवर्णाभिधानम् ॥ ब्रह्मस्वरूपघोषविशेषः । यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादस्तस्माद्विन्दुसमुद्भवः ॥
नादो विन्दुश्च बीजञ्च स एव त्रिविधो मतः ।
भिद्यमानात् पराद्विन्दोरुभयात्मा रवोऽभवत् ॥
स रवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत् परम् ॥
सकलादिति मूर्त्तात् । नादो घोषः । विन्दुः प्रणवः स च बीजञ्च सर्व्ववर्णप्रभवत्वात् । तथा च ।
समाहितात्मनो ब्रह्मन् ! ब्रह्मणः परमेष्ठिनः ।
हृदाकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
ततोऽभूत्त्रिविदोङ्कारो योऽव्यक्तः प्रभवः स्वराट् ।
इत्यारभ्य ततोऽचरसमाम्नायमरुद्भगवानजः ॥
इति श्रीभागवतम् ॥"
इत्यलङ्कारकौस्तुभस्य द्वितीयस्तवकः ॥ * ॥
"नाभेरूर्द्धं हृदि स्थानान्मारुतः प्राणसंज्ञकः ।
नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥
अपि च ।
आकाशाग्नियुरुच्चातो नाभेरूर्द्धं समुच्चरन् ।
सुखेऽतियक्तमायाति यः स नाद इतीरितः ॥
स च प्राग्भवोऽप्राग्भवश्चोभयसम्भवः ॥
आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ।
तृतीयोऽपि च वंशादिभव इत्यं त्रिधा मतः ॥
यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः ।
तस्मादूर्द्धे संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ।
वह्निमारुतसंयोगान्नादः समुपजायते ॥
न नादेन विना गीतं न नादेन विना स्वरः ।
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ॥
न नादेन विना ज्ञानं न नादेन विना शिवः ।
नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥"
इति सङ्गीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे ।
"गीतं नादात्मकं वाद्यं नादश्चक्रा प्रशस्यते ।
तद्द्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् ॥
नादेन व्यज्यते वर्णः पदं वर्णात् पदाद्रसः ।
वाक्यतो व्यवहारोऽयं नादाधीनमतो जगत् ॥
आहतोऽनाहतश्चेति द्विधा नादो निगद्यते ॥
सोऽयं प्रकाशते पिण्डे तस्मात् पिण्डोऽभिधीयते ॥
तच्चानाहतनादन्तु मुनयः समुपासते ।
गुरूपदिष्टमार्गेण मुक्तिदं न तु रञ्जकम् ॥
स नादस्त्वाहतो लोके रञ्जको भवभञ्जकः ।
शुत्यादिप्रकारतस्तस्मात्तदुत्पत्तिर्निरूप्यते ॥"
किञ्च,—
"धर्म्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥
नादविद्या परा लब्धा सरस्वत्याः प्रसादतः ।
कम्बलाश्वतरौ नागौ ध्रुवो कुम्बलतां गतौ ॥
पशुः शिशुर्मृगो वापि नादेन परितुष्यति ।
अतो नादस्य माहात्म्यं व्याख्यातुं केन शक्यते ॥"
आञ्जनेयः ।
"नादाब्धेस्तु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात्तुम्बं वहति वक्षसि ॥"
अथ नादोत्पत्तिप्रकारः ।
"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥

पावकप्रेरितः सोऽथ क्रमादूर्ध्वपथे चरन्।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः॥
पृष्ठं ग्रीवे त्वपुष्टञ्च क्लृप्तिमं वदने तथा।
आविर्भावयतीत्येवं षड्धा कीर्त्यते बुधैः॥"
"नकारं प्राणनामानं दकारमनलं विदुः।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते॥"
अयन्तु योगिसंवेद्य एव। अस्य अवस्थादिकं यदुक्तं हठयोगप्रदीपिकायाम्। ४। ६५-१०७।
"अथ्रुक्षतत्त्वबोधानां मूढानामपि संमतम्।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते॥
श्रीआदिनाथेन सपादकोटि-
लयप्रकाराः कथिता जयन्ति।
नादानुसन्धानकमेकमेव
मन्यामहे सुखतमं लयानाम्॥
सुक्तासने स्थितो योगी सुद्रां सन्धाय शाम्भवीम्।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः॥
श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं
कार्य्यम्।
गुह्यसुसूक्ष्मासरणौ स्फुटममलः श्रूयते नादः॥
आरम्भश्च घटश्चैव तथा परिचयोऽपि च॥
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याचतुष्टयम्।
आरम्भावस्था।
ब्रह्मग्रन्थेर्भवेद्भेदो ज्ञानन्दः शून्यसम्भवः।
विचित्रः क्वणको देहेनाहतः श्रूयते ध्वनिः॥
दिव्यदेहश्च तेजस्वी दिव्यगन्धस्वरोगवान्।
संपूर्णहृदयः शून्य आरम्भो योगवान् भवेत्॥
अथ घटावस्था।
द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दलक्षकः।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत्॥
तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः।
महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम्॥
चित्तानन्दं तदा लिप्सा सहजानन्दसम्भवः।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्जितः॥
रुद्रग्रन्थिं यदा भित्त्वा शून्यपीठगतोऽनिलः।
निष्पत्तौ वैष्णवः शब्दः क्वणद्वीणाकणो भवेत्॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम्।
सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्॥
अस्तु वा मास्तु वा मुक्तिरत्रैवास्खलितं सुखम्।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते॥
राजयोगमजानन्तः केवलं हठकर्मिणः।
एतानभ्यासिनो मन्ये प्रयासफलवर्जितान्॥
उन्मन्युत्थाप्तये शीघ्रं भूयानं मम संमतम्।
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम्॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः॥
नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्द्धमानम्।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः॥
कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः।
तत्र चित्तं स्थिरीकुर्य्यादावत्स्थिरपदं व्रजेत्॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम्।
पक्षादित्रैपक्षमखिलं जित्वा योगी सुखी भवेत्॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्।
ततोऽभ्यासे वर्द्धमाने श्रूयते सूक्ष्मसूक्ष्मकः॥
आदौ जलधिजीमूतमेरोर्झर्झरसम्भवः।
मध्ये मर्दलशङ्खोत्था घण्टाकाहलजास्तथा॥
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः॥
महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ।
तत्र सूक्ष्मात् सूक्ष्मतरं नादमेव परामृशेत्॥
घनसुतृप्तेऽथ वा सूक्ष्मे सूक्ष्मसुतृप्तेऽथ वा घने।
रममाणमपि क्षिप्रं मनो नान्यत्र चालयेत्॥
यत्र क्वचापि वा नादे लगति प्रथमं मनः।
तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते॥
मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा।
नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षते॥
मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः।
नियमने समर्थोऽयं निनादनिशिताङ्कुशः॥
बद्धं तु नादबन्धेन मनः संत्यक्तचापलम्।
प्रयाति सुतरां स्थैर्यं छिन्नपक्षः खगो यथा॥
सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च॥
अन्तरङ्गस्य यमिनो वारिणः परिधायते।
नादोपासिरतो नित्यमवधार्य्या हि योगिना॥
बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारभात्।
मनः पारवश्यमाप्नोति निरालम्बाम्बुखेटनम्॥
नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः।
विस्मृत्य सर्व्वमेकाग्र्यः कुत्रचिन्नहि धावति॥
काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते॥
घण्टादिनादसक्तस्वान्तः करणहरिणस्य।
प्रहरणमपि सुकरं शरसन्धानप्रवीणस्य॥
अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः॥
मनस्तत्र लयं याति तद्विष्णोः परमं पदम्॥
तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते॥
यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा।
यस्तस्यान्तो निराकारः स एव परमेश्वरः॥
सर्व्वं हठलयोपायाः राजयोगस्य सिद्धये।
राजयोगसमारूढः पुरुषः कालवञ्चकः॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः।
उन्मनी कल्पलतिका सद्य एव प्रवर्त्तते॥
सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः।
निरञ्जने विलीयेते चित्तमारुतौ॥
शृङ्गदुन्दुभिनादश्च न शृणोति कदाचन।
काष्ठवल्लायते देह उन्मन्यावस्थया ध्रुवम्॥
सर्व्वावस्थाविनिर्मुक्तः सर्व्वचिन्ताविवर्जितः।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः॥"*॥
स्वनामख्यातमुनिविशेषः। अयन्तु ईश्वरसुतः पुत्रः। आयतत्त्वयोगरहस्ययोः प्रणेता। अस्य वासस्थानं दाक्षिणात्यप्रदेशः॥)

नादेयं, क्ली, (नद्या नदस्य वा इदं तत्र भवं वा। नदी वा नद+ढक्।) सैन्धवलवणम्। इति रत्नमाला॥ सौवीराञ्जनम्। इति राजनिर्घण्टः॥ नदीनदसम्बन्धिजलादौ, त्रि। यथा,—
("नादेयं नादेयं शरदि वसन्ते च नादेयम्।
पानीयं पानीयं शरदि वसन्ते च पानीयम्॥"
इति वैद्यकराजवल्लभीयशब्दरत्ने॥)
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्॥"
अस्य गुणाः। यथा, भावप्रकाशे।
"नादेयमुष्णं रूक्षं वातलं लघु दीपनम्।
अग्निभिष्यन्दि विशदं कटुकं कफपित्तजुत्॥"
(न आदेयमिति विग्रहे अण्यञ्जे, त्रि। यथा,—
"सौगन्ध्यहीनं नादेयं पुष्पं कालमपि क्वचित्॥")

नादेयः, पुं, (नद्यां भवः। नदी+ढक्।) काश्मलङ्गम्। वानीरवृक्षः। इति राजनिर्घण्टः॥

नादेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक् ततो ङीप्।) अम्बुवेतसः। भूमिजम्बुका। वैजयन्तिका। इत्यमरः। २। ४। ६५॥ नागरङ्गः। जवा। बहुदुग्धः। इति मेदिनी। ये, ८६॥ अग्निमन्थः। (अस्याः पर्य्यायो यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका।
जवा जयन्ती तर्कारी नादेयी वैजयन्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
काकजङ्घः। इति राजनिर्घण्टः॥

नाध, ऋ उ ङ नाधे। इति कविकल्पद्रुमः॥ (भ्वां-आर्द्ध-सर्व ऐश्वे अकं-सेट्।) ऋ, अवनाधत्। उ, नाधते। नाथो दवाग्नीरेत्रार्थनानि। इति दुर्गादासः॥

नाना, य, (न+"विनञ्भ्यां नानाञौ न सह।" ५।३।२७। इति नाञ्प्रत्ययः।) अनेकार्थम्। (यथा, मनुः। ८। १४८।
"बहीषु चैकजातानां नानाक्षीषु निबोधत॥")
उभयार्थम्। विनार्थम्। इति मेदिनी। ने, ४५॥ (यथा, सुग्धबोधे। [दरः॥")
"न नाना श्रद्धया रागात् वर्षैकाधोऽच्जो-

नानाकन्दः, पुं, (नाना बहवो कन्दा यस्य।) पिण्डालुः। इति राजनिर्घण्टः॥ बहुकन्दयुक्ते च॥ (बहुकन्दयुक्ते, त्रि॥)

नानाध्वनिः, पुं, (नाना ध्वनिर्यत्र। नानाविधो ध्वनिर्वा।) काहलावेणुवीणादिशब्दः। इति हारावली। २४६॥

नानारूपः, त्रि, (नाना रूपाणि यस्य।) अनेकप्रकारः। तत्पर्य्यायः। विविधः २ बहुविधः ३ पृथग्विधः ४। इत्यमरः। ३। १। ६२॥ (यथा मनुः। ६। ३८।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः॥
नाना रूपाणि इति विग्रहे। बहुविधरूपे, क्ली। यथा, गोः रामायणे। ३। ५। ३१।
"नानारूपैर्विरूपाक्षं रूक्षैरसुभदर्शनैः॥")

नान्दीक

नानावर्णः, पुं. (नानाविधो वर्णः ।) बहुविधशुक्लादिवर्णः । इति भरतः ॥ तत्पर्य्यायः । चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शबलः ५ एतः ६ कर्व्वुरः ७ । इत्यमरः ।१।५।१७॥ विचित्रम् ८ शारङ्गम् ९ कम्बरः १० कर्म्मारः ११ चित्रलः १२ । इति शब्दरत्नावली ॥ ब्राह्मणक्षत्रियादिश्च ॥ (नानाविधो वर्णो यस्येति । विचित्रवर्णयुक्ते, त्रि । यथा, सुश्रुते । १ । ३८ । "नानावर्णा लघ्वञ्जवती प्रविरलाख्यपाण्डुश्चक्रपरोहाभिगुणभूयिष्ठा ॥")

नानाविधः, त्रि, (नाना विधाः प्रकारा यस्य ।) अनेकप्रकारः । विविधः । यथा,—

"तथा नानाविधैः पुण्यैर्व्रतैर्वीरक्षयाद्गते ॥"

इति हरिभक्तिविलासे १६ विलासः ॥

नानुष्ठेयं, त्रि, (न अनुष्ठेयम् ।) अननुष्ठेयम् । अकर्त्तव्यम् । इति व्याकरणम् ॥

नान्नं, क्ली, (नमत्यनेनेति । नम + "भ्रमृजिगमिनमिहनिविश्यद्यां ट्टिच्च ।" उणा । ४ । १५६ । इति ट्टन् ट्टिच्च ।) स्तोत्रम् । इत्युणादिकोषः ॥

नान्दिकरः, पुं, (करोतीति । क + अच् । नान्द्याः नान्दीश्लोकस्य करः पाठकः । "ड्याप्पोः संज्ञाछन्दसोर्बहुलम् ।" ६ । ३ । ६३ । इति ह्रस्वः ।) नान्दीकरः । इत्यमरटीकायां रमानाथः ॥

नान्दी, स्त्री, (नन्दन्त्यनयेति । नन्द + घञ् । निपातनात् दीर्घः । ततो ङीप् ।) नाटकादादौ मङ्गलार्था देवद्विजादीनामाशीः । यथा,—

"आशीर्व्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता ॥
केचित्तु । भेरीप्राया नान्दी ।" इत्यमरटीकायां भरतः ॥ * ॥ नाटके विघ्नविघातायादौ नान्दी कार्य्या । यदाह भरतः ।

"यद्यप्यङ्गानि भूयांसि पूर्व्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥
देवद्विजनृपादीनामाशीर्व्वादपरायणा ।
नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता ॥"

अन्यच्च ।

"देवद्विजनृपादीनामाशीर्व्वन्दनपूर्व्विका ।
नान्दी कार्य्या बुधैर्यत्नान्नमस्कारेण संयुता ॥
गङ्गा नागपतिः सोमः सुधा नन्दा जयाग्निजः ।
अभिनामपदैः कार्य्या नान्दी धाराभिरङ्किता ॥
प्रशस्तपदविन्यासा चन्द्रसंकीर्त्तनान्विता ।
आशीर्व्वादपरा नान्दी योज्येयं मङ्गलात्मिका ॥
काचिद्गद्यपदा नान्दी काचिदुभयपदा तथा ।
सूत्रधारः पठेन्नान्दी मध्यमस्वरमाश्रितः ॥"

इति मालतीमाधवटीका ॥

सन्दृष्टिः । यथा । "नान्दी सन्दृष्टिरिति कथ्यते ।" इत्युदाहृतत्वे ब्रह्मपुराणम् ॥

नान्दीकः, पुं. (नान्दै नान्दार्थं कायतीति । कै + कः ।) सोरवस्तम्भः । इति चिकित्साशेषः ॥

नान्दीकरः, त्रि, (नान्दीं करोतीति । क + "दिवाविभेति ।" ३ । २ । २१ । इति टः ।) नान्दीश्लोकपाठकारी । तत्पर्य्यायः । नान्दीवादी २ । इत्यमरः । ३ । १ । ३८ ॥ "केचित्तु भेरीप्राया नान्दी तद्वादनशीलः अत्र वदिष्ठनौ वादनार्थावित्याहुः ।" इति भरतः ॥

नान्दीपटः, पुं, (नान्दै वृद्ध्यर्थं पटो यत्र ।) कूपादिसुखबन्धनम् । तत्पर्य्यायः । नान्दीसुखः २ वीनाहः ३ । इति हेमचन्द्रः । ४ । १५८ ॥

नान्दीसुखः, पुं, (नान्दै वृद्ध्यर्थं सुखं यस्य ।) कूपादिसुखबन्धनम् । इति हेमचन्द्रः । ४ । १५८ ॥ वृद्धिश्राद्धभुक् पितृगणः । यथा,—

"नान्दीसुखं पितृगणं पूजयेत् प्रयतो गृही ॥"

इति विष्णुपुराणम् ॥

स च पित्रादित्रिकं मातामहादित्रिकञ्च । इति गोभिलसूत्रम् ॥ (नान्द्या वृद्धेर्मुखम् ।) वृद्धिश्राद्धे, क्ली । यथा,—

"नान्दीमुखे विवाहे च प्रपितामहपूर्व्वकम् ।
अत्र नान्दीमुखपदस्य श्राद्धपरत्वे इत्युदाहृतत्वलेखनादत्रापि श्राद्धपरत्वम् ।" तदितिकर्त्तव्यता यथा । "तत्र गोभिलः । अथाभ्युदयिकश्राद्धे युग्मानासादयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थैः सम्पन्नमिति लब्धप्रक्षः दधिवदराक्षताभ्यमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तामिति न स्वधाच्च प्रयुञ्जीतेति ॥ अपि च ।

स्वधयेतिपदस्थाने पुण्याशब्दं वदेद्गृही ।
पितृनितिपदात् पूर्व्वं वदेन्नान्दीमुखानिति ॥
कर्म्मादिषु च सर्व्वेषु मातरः खगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
प्रतिमासु च शुभासु लिखिता वा पटादिषु ।
अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥
कृष्णलवा वसोर्धारा सप्तवारान् घृतेन तु ।
कारयेत् पञ्च वारान् वा मातृनीत्वा न चोच्छ्रिताम् ॥
आयुष्यानि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पिण्डेभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥
वक्ष्यिष्टोक्तो विधिः कृत्स्नो ब्रह्मणोऽत्र निरामिषः ।
अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् ॥
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।
उपवेश्य कृशान् दद्याद्दर्भानेव हि पाणिना ॥
विपत्तौ न हि सत्यस्य जातुषो विद्यते क्वचित् ।
सदा परिचरेद्भक्त्या पितृनप्यत्र देववत् ॥
पिण्डेभ्य इति दत्तेषु उपवेश्य कुशेषु तान् ।
गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत् ॥
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पाद्यार्घ्यं पूरणादीनि दैवे नैव तु कारयेत् ॥
त्र्येष्टोत्तरकरान् युग्मान् कराग्र्यपवित्रकान् ।
कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्मात्र दीयते ॥
मधु मधित्रि यस्तत्र चिर्व्वपोद्गीतुमिच्छताम् ।
गायत्र्यानन्तरं सोऽत्र मधुमन्त्रविवक्षितः ॥
न चात्रतुस्तु जपेदत्र कदाचित् पिण्डसंहिताम् ।

नान्दीमु

अन्य एव जपः कार्य्यः सोमसामादिकः शुभः ॥
यस्तत्र प्रकरोन्नस्य तिलवद्दर्शववत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र लुप्तेषु विपरीतकः ॥
सम्पन्नमिति लुप्ताः स्युः प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते प्रीयमन्नं निवेदयेत् ॥
प्रागग्रेष्वथ दर्भेषु आत्ममामन्त्र्य पूर्व्ववत् ।
अपः क्षिपेन्मूलदेशेऽवनेर्निर्ऋतिं लिखेत् ॥
द्वितीयश्च तृतीयश्च मध्यदेशाग्रदेशयोः ।
मातामहप्रभृतीस्तु एतेषामेव वामतः ॥
सर्व्वस्मादन्नसन्तृप्त यज्ञनैरूपशिष्य च ।
संयोज्य यवकर्कन्धुदधिभिः प्राङ्मुखस्ततः ॥
अवनेजनवत् पिण्डान् दत्त्वा विश्वप्रमाद्यकान् ।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ॥
उत्तरोत्तरदानेन पित्रादामुत्तरोत्तरम् ।
भवेदक्षाक्षरत्वादधोऽधः श्राद्धकर्म्मसु ॥
तस्मात् श्राद्धेषु सर्व्वेषु वृद्धिमत्सत्तरेषु च ।
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् ॥
गन्धाद्यैर्निक्षिपेत्तूष्णीं तत आचामयेत् द्विजान् ॥"

"अथाग्नभूमिमासिञ्चेत् सु सम्प्रोक्षितमक्षिति ।
ग्विा आपः सन्त्विति च युग्मानेवोदकेन च ॥
सौमनस्यमस्त्विति च पुष्पादानमनन्तरम् ॥
अक्षतश्चारिष्टश्चास्त्वित्यक्षतानपि दापयेत् ।
अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते ॥
षष्ठेऽह्नि नित्यं तत् कुर्य्यान्न चतुर्थ्यां कदाचन ।
प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ॥
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपाचलत्
युग्मानेव स्वस्तिवाच्यानङ्गुष्ठयङ्गं सदा ॥
लब्ध्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः ॥"* ॥

तन्निमित्तानि यथा, विष्णुपुराणे ।

"कन्यापुत्रविवाहे च प्रवेशे नववेश्मनः ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥"

मत्स्यपुराणे ।

"अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुंसवने निषेके च नववेश्मप्रवेशने ॥
देवव्रतव्रतादीनां प्रतिष्ठायां विशेषतः ।
तीर्थयात्रादृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् ॥"

कूर्म्मपुराणे ।

"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम् ॥"

इति श्राद्धतत्त्वम् ॥

नान्दीमुखी, स्त्री, (नान्दै वृद्ध्यर्थं मुखं यस्याः । ङीप् ।) सामगेतरवृद्धिश्राद्धसञ्चालकगणः । इति यजुर्व्वेदीयवृद्धिश्राद्धपद्धतिः ॥ (कुधान्यविशेषः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"कोरदूषकश्यामाकनीवारश्यामाकतुवरकोद्दालकप्रियङ्गुमधुलिकानान्दीमुखीकुरविन्दगवेधुकवरकोदर्पणीसकुन्दकरेणुयवप्रभृतयः कुधान्यविशेषाः ॥" चतुर्हस्तान्तरवृत्तिविशेषः । अस्य लक्षणादिकन्तु छन्दःग्रन्थे द्रष्टव्यम् ॥* ॥ नान्दी-

सुखं करिष्यमाणत्वेनास्यस्येति। अच्। अभ्युदयप्रारम्भयुक्ते, त्रि। यथा, रामायणे। २। ८१। १।

"ततो नान्दीमुखीं रात्रिं भरतं सूतमागधाः।
तुष्टुवुः सविशेषज्ञास्तवैर्मङ्गलसंस्तवैः॥")

नान्दीवादी, [न्] त्रि, (नान्दीं वदतीति। वद+णिनिः।) नान्दीश्लोकपाठकारी। नान्दीवादनशीलः। भेरीवादनशीलः। इत्यमरटीकायां भरतः॥

नापितः, पुं, (न आप्नोति सरलतामिति। न+आप्+"नञ्याप इट् च।" उणा ३। ८७। इति तन् इट् च।) वर्णसङ्करजातिविशेषः। स तु पट्टिकार्य्यां कुवेरिणो जातः। इति पराशरपद्धतिः॥ शूद्रायां क्षत्रियाज्जातः। इति विवादार्णवसेतुः॥ तस्य क्षौरं कर्म्म। तत्पर्य्यायः क्षुरी २ मुण्डी ३ दिवाकीर्त्तिः ४ अन्तावसायी ५। इत्यमरः। २।१०।१०॥ कृत्ती ६ वातृत्तीसुतः ७ नखकुट्टः ८ ग्रामणीः ९। इति शब्दरत्नावली॥ चन्द्रिलः १० मुण्डः ११ भाण्डपुटः १२। इति जटाधरः॥ (यथा, पद्मतन्त्रे। ३। ७३।

"नराणां नापितो धूर्त्तः पक्षिणाञ्चैव वायसः।
दंष्ट्रिणाञ्च शृगालस्तु श्वेताभिज्ञस्तपस्विनाम्॥")

नापितशालिका, स्त्री, (नापितस्य शालिका गृहम्।) नापितशाला॥ नापितगृहम्। तत्पर्य्यायः। खरकुटी २। इति त्रिकाण्डशेषः॥

नाभिः, पुं, (नह्यते बध्नाति विषयादौनिति। नह बन्धे+"नहो भश्च।" उणा ४। १२५। इति इण् भश्चान्तादेशः।) सुखवृषः। चक्रमध्यम्। (यथा, पद्मतन्त्रे। १। ६३।

"अरेः सन्धार्य्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते॥")

क्षत्रियः। इति मेदिनी। भे, ५॥ प्रियव्रतराजपौत्रः। (अग्नीध्रस्य पुत्रः। यथा, ब्रह्माण्डे। ३५ अध्याये।

"तस्य पुत्रा बभूवुस्तु प्रजापतिसमा नव।
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः॥"
"नाभये दक्षिणं वर्षं हिमवन्तं पिता ददौ॥")

गोत्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (प्रधानम्। इति विश्वः॥ यथा, रघुः। १८। २०।

"सुतोऽभवत् पद्मजनाभकल्पं
क्रतुक्षम नाभिरमण्डलस्य॥"

महादेवः। यथा, महाभारते। १३। १७। ६२।

"नाभिर्नन्दिकरो भावः पुष्करः स्थपतिः
स्थिरः॥")

नाभिः, पुं क्ली, (नह बन्धे+इण् भश्चान्तादेशः।) प्राणयज्ञम्। इति मेदिनी। भे, ६॥ नाइ इति भाषा। तत्पर्य्यायः। नाभी २ तुन्दकूपी ३। इति शब्दरत्नावली॥ उदरावर्त्तः ४। इति राजनिर्घण्टः॥ (यथा, पद्मदण्डाम्। ६। ११७।

"विष्णुर्नाभेः समुद्भूतो वेधाः कमलजन्मतः।
विष्णुरेवेश इत्याहुर्लोके भागवता जनाः॥")

"स च गर्भस्थस्य सप्तभिर्मासैर्भवति।" इति सुश्रुतबोधः॥ ("तस्य चैतन्नाभिः पच्यते तां लोध्रमधुकप्रियङ्गुदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यञ्जयेदाभ्यामेवतैलौषधानां चूर्णेनावचूर्णयेदेषनाडीकल्पनविधिरुक्तः सम्यक्॥" इति चरके शारीरस्थाने अष्टमेऽध्याये॥) अस्मिन् स्थाने मणिपूरनामदशदलपद्मम्। यथा,—

"तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम्।
मेघाभं विद्युदाभञ्च वहुतेजोमयं ततः॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
अग्निनाधिष्ठितं पद्मं विश्वालोकनकारणम्॥"

इति तन्त्रम्॥

कस्तूरिकामदे, स्त्री। इति मेदिनी। मे, ६॥

नाभिकण्टकः, पुं, (नाभेः कण्टक इव।) आवर्त्तः। इति शब्दरत्नावली॥ गोँड़ इति भाषा॥

नाभिका, स्त्री, (नाभिरिव कायतीति। कै+कः।) कटभीवृक्षः। इति राजनिर्घण्टः॥

नाभिगुड़कः, पुं, (नाभौ गुड़को गोल इव।) स्फीतनाभिः। गोँड़ इति भाषा। तत्पर्य्यायः। गर्भण्डः २। इति त्रिकाण्डशेषः॥ नाभिकण्टकः ३ आवर्त्तः ४। इति शब्दरत्नावली। गोण्डः ५ नाभिगोलकः ६। इति जटाधरः॥

नाभिगोलकः, पुं, (नाभौ गोलकः।) नाभिगुड़कः। इति जटाधरः॥

नाभिजः, पुं, (नाभौ जायते इति। जन्+डः।) ब्रह्मा। इति धरणिः॥

नाभिजन्मा, [न्] पुं, (नाभौ जन्म यस्य।) ब्रह्मा। इति त्रिकाण्डशेषः॥

नाभिनाला, स्त्री, (नाभिस्थिता नाला नाड़ी।) नाभिसम्बन्धिनी नाडी। तत्पर्य्यायः। अमला २। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १५। ७।

"तदङ्गमुद्याच्युतनाभिनाला
कचित् स्मगीनामनघा प्रसूतिः॥")

नाभिभूः, पुं, (नाभौ भूरुत्पत्तिर्यस्य।) ब्रह्मा। इति हेमचन्द्रः। १। १२७॥

नाभिवर्षः, पुं, (नाभेरग्नीध्रपुत्रस्य वर्षः।) भारतवर्षः। यथा, "योऽसौ मनुसुतः प्रियव्रतो नाम सम्राडधिपतिर्बभूव तस्य चाग्नीध्रादयो दश पुत्रा बभूवुः तयः प्रव्रजिताः श्रिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः। तत्र जम्बूद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा बभूवुः। नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः। रम्यो हिरण्मयश्चैव कुरुर्भद्राश्वकेतुमान्॥ नव वर्षाणि तेभ्यः पित्रा दत्तानि वर्षं प्रविभूता चाग्नीध्रेण। हिमालयस्याधिपतेर्नाभेर्ऋषभः पुत्रो बभूव ऋषभाद्भरतः भरतेन चिरकालं धर्म्मेण शासितत्वादिदं भारतं वर्षमभूत्।" इति नारसिंहे ३० अध्यायः॥

नाभी, स्त्री, (नाभि+वा ङीष्।) नाभिः। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ६०८।

"सनखपदमधिकगौरं नाभीमूलं निरंशुकं
कृत्वा।
अनया सेवित पवन त्वं किं क्षतमलयभृगुपातः॥")

नाभीलं, क्ली, (नाभौ लातीति। ला+कः।) नार्य्या वङ्क्षणः। क्षुक्षुम। गर्भाण्डम्। इति मेदिनी। ले, १०१॥ नाभिगाम्भीर्य्यम्। इति हेमचन्द्रः॥

नाभ्यं, त्रि, (नाभेरिदमिति। नाभि+यत्।) नाभिसम्बन्धि। इति व्याकरणम्॥ (यथा, भागवते। २। ४। १६।

"पुरा मया प्रोक्तमजाय नाभ्ये
पद्मे निषण्णाय ममादिसर्गे॥"

नाभये हितम्। "शरीरावयवात् यत्।" ५। १। ६। इति यत्। "नाभि नभश्च।" ५। १। २। इत्यस्य वार्त्तिकोक्त्या भिन्नभादेशस्तु न भवति। अस्य गवादितया सां योगशिष्टत्वात् रथनाभावेव प्रवृत्तेः। नाभिमाहते च॥ महादेवे, पुं। यथा, महाभारते। १२। १८४। १६।

"नमो नाभाय नाभ्याय नमः कटकटाय च॥")

नाम, व्य, (नामयतीति नाम्यतेऽनेन वा। नम+णिच्+बाहुलकात् डः।) प्राकाश्यम्। सम्भावना। क्रोधः। उपगमः। कृतसनम्। इत्यमरः। ३। ३। २५०॥ प्रकाशे यथा। हिमालयो नाम नगाधिराजः। हिमालयः प्रकाशोऽतिप्रसिद्ध इत्यर्थः॥ सम्भावे सम्भावनायाम्। इह नाम सीता भविष्यति॥ क्रोधे ममापि नाम दशाननस्य परैरभिभवः॥ उपगमः सास्यस्वीकारः एवं नामाशु॥ कृतसने को नामायं सचिवोदये स्वामभेवं विभक्ते॥ विस्मये च। अन्यो नाम गिरिमारोहति॥" इति टीकायां भरतः॥ स्मरणम्। विकल्पः। इति मेदिनी। मे, ५३॥

नाम, [न्] क्ली, (नायते अभ्यस्यते यत् तत्। (ज्ञा अभ्यासे+"गामन् सोमन् व्योमन्निति।" उणा ४। १५०। इति मनिन्प्रत्ययेन निपातनात् साधुः।) संज्ञा। तत्पर्य्यायः। आख्या २ आह्वा २ अभिधानम् ४ नामधेयम् ५। इत्यमरः। १। ६। ८॥ आह्वानम् ६ लक्षणम् ७ व्यपदेशः ८ आख्यः ९ संज्ञा १० गोत्रम् ११ अभिख्या १२। इति शब्दरत्नावली॥ लिङ्गम्। तच्च स्यादिविभक्त्यन्तं शब्दः। तच्च पञ्चविधं यथा,—

"उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्।
शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्॥"

इति गोयीचन्द्रः॥

अवक्तव्यनामानि यथा,—

"आत्मनाम गुरोर्नाम नामानि क्षपणस्य च।
प्राज्ञस्तेऽपि न वक्तव्यं श्रेष्ठपुत्रकलत्रयोः॥"

इति कर्म्मलोचनम्॥

नामकरणं, क्ली, (नाम्नः करणं यत्र।) संस्कारविशेषः। तत्रोक्तनक्षत्राणि यथा। अश्विनी १ रोहिणी ४ मृगशिराः ५ पुनर्व्वसुः ७ उत्तरफल्गुनी १२ स्वाती १५ अनुराधा १७ उत्तरा-

षाढ़ा२१ श्रवणा २२ धनिष्ठा २३ शतभिषा२४ उत्तरभाद्रपदा२५ रेवती २७ ॥ तच्च लग्नं यथा। यल्लग्नस्य प्रथमचतुर्थसप्तमदशमस्थाने शुभग्रहास्तिष्ठन्ति तल्लग्ने नामकरणं कार्य्यम् ॥ तच्च दिननियमः। दश १० एकादश ११ द्वादश १२ शत १०० दिनानि। इति ज्योतिःसारसंग्रहः ॥ संवत्सरे वेति गोभिलः ॥ एतच्च प्रशस्ततरतमापरपरकालकर्म्मान्तरपरम्। एकादशाह इति सुखः कल्प इति रघुनन्दनमतम् ॥ * ॥ तदनुष्ठानं यथा। "जन्मगृहाभ्यन्तरे चन्द्रदर्शनात् प्राक् माता शुचिना वस्त्रेण कुमारमाच्छाद्य भर्त्तुर्दक्षिणतः स्थित्वा प्रयच्छत्युदक्शिरसं पश्चिमदेशं गत्वा उत्तरत उदयेषु कुशेषु उपविशति अतः पितैवाधिकारी। अथ जुहोति प्रजापतये कुमारस्य तिथये नक्षत्राय। तिथिनक्षत्रयोर्देवताये ताश्च ब्रह्मत्वष्टृविष्णुयमसोमकुमारसवितृमित्राग्न्यधर्म्मेरुद्रवायुमन्मथयक्षपितरः पौर्णमास्यां विश्वेदेवाः। एषां होमे विशेषमाह छन्दोगपरिशिष्टम्।

'नामधेये सवितृमित्राग्नी बहुवत् सदा।
यक्षाय पितरो देवा यथास्तिथिदेवताः ॥'

तेन सन्नादयो बहुवचनान्ता होतव्याः। शेषा एकवचनान्ता होतव्याः। नक्षत्राणि अश्विन्यादीनि। तद्देवताश्च ज्योतिषे। अश्वियमेत्यादयः। नक्षत्रहोमे छन्दोगपरिशिष्टम्।

'आश्लेषादेश्च सर्पादि विशाखादे तथैव च।
आषाढ़ादे धनिष्ठादे अश्विन्यादे तथैव च ॥
इन्द्राग्न्यतानि बहुवदृचाणां जुहुयात् सदा।
इन्द्रवयं द्विवच्छेषमवशिष्टान्यथैकवत् ॥'

तद्देवताहोमे विशेषः।

'देवता अपि हूयन्ते बहुवत् सर्पवस्वपः।
देवाश्च पितरश्चैव द्विवद्धात्रग्नी तथा ॥'

देवाः विश्वेदेवाः। कवर्गादिपञ्चतीयादिवर्ग्यान्तसमवर्णाद्यन्तरस्थं यरलवाद्यन्तसमवर्णमध्यं विन्दुभरादिवत् ह्रस्वदीर्घं सम्बोधनान्तं दीर्घविसर्गान्तं च नाम कुर्य्यात्। एतच्च स्वगृह्योक्तत्वात् प्रशस्तपरम्। कुलदेवतानक्षत्राभिधेयं च नाम कुर्य्यात्। तच्च ब्रह्मलिखितवचनान्नामान्तरकरणव्यवहारः। अथ नक्षत्रसम्बन्धेन नामकरणं शतपदब्राह्मणानुरोधात् स्वनक्षत्रपादानुसारेण। ततश्च कुमारस्य सुखभवान् प्राङ्मुखनिर्गमोपायभूतान् छिद्रविशेषान् सम्प्र सुखमञ्चिनी नासिकं कर्णाविति व्याभिमुख्येन स्पृशन् कोऽसि कतमोऽसीति मन्त्रं जपेत् ॥ तच्च नाम धर्म्मवर्म्मान्तुपपदान्तत्वेन कर्त्तव्यम्। यथा,—

'ततस्तु नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥
नार्थहीनं न चाप्रश्स्तं नाप्रशब्दयुतं तथा।
नामाक्रूरं जुगुप्सं वा नाम कुर्य्यात् समाचरम्॥
नातिदीर्घं नातिह्रस्वं नातिगुर्व्वक्षरान्वितम्।
सुखोच्चार्य्याक्षरं नाम कुर्य्याच्च प्रवणाक्षरम् ॥'

इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥

प्रवणाक्षरं लघूत्तराक्षरम्। इति टीकाकारः॥ गोभिलः। 'अयुग्मकदान्तं तथा स्त्रीणाम्।' अयुग्मकम् अयुगक्षरम्। दान्तं दकारान्तम्। यथा यशोदेत्यादि ॥ * ॥ तस्य श्रीपूर्व्वकत्वं यथा,—

'देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥'

इति राघवभट्टधृतप्रयोगदर्शनात् स्वर्गकामित्वादिना सिद्धोऽधिकारी येषां नरागामित्यनेन जीवतां श्रीग्रहणादित्यं नाम्नो न मृतानां तथेति गृह्याचारः ॥ * ॥ गोभिलः। माघे चैनं प्रथमं नामधेयमाख्याय यथार्थमुदीच्यं वामदेयगानानां कुर्य्यात् गौर्दक्षिणा।" इति संस्कारतत्त्वम्॥

नामद्वादशी, स्त्री, (नाम्नः द्वादशी।) व्रतविशेषः। यथा,—

"गौरी काली उमा भद्रा दुर्गा क्षान्तिः सरस्वती।
मङ्गला वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात्।
मार्गशीर्षतृतीयामारभ्य पूर्व्वोक्तं लभते फलम् ॥
पूर्व्वोक्तं फलं मार्गादिद्वादशमासे क्षणाष्टमीव्रतफलम्।
अर्द्धनारीश्वरं रुद्रमथवा उमशङ्करम् ॥
पूजयेद्विधिवन्नारी न वियोगमवाप्नुयात्।
अथवा विष्णुरूपेण पूजयेच्चेश्वरं सदा ॥
शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात्।
मार्गशीर्षादौ केशवनारायणमाधवान् पूजयेत्। धूपपुष्पदीपाद्यैरुपोष्य संपूज्य दक्षिणाभिश्च नामभिः। अश्वमेधकृपसूयवाजपेयमतिरात्रवल्लमथाग्निष्टोमोपवासमेव। पुरुषमेवसौचामणिं पञ्चयज्ञहोमगोलक्षं सर्व्वमथाख्याप्यान्ते नित्यं स्मरणार्च्चनात्तन्नाम्नो। इत्याद्ये नामद्वादशी।" इति देवीपुराणम्॥

नामधेयं, क्ली, (नामैव। नाम+"भागरूपनामभ्यो धेयः।" ५। ४। २५। इत्यस्य वार्त्तिकोक्त्या धेयः।) नाम। इत्यमरः।१। ६। ८॥ (यथा, मनुः। २। ३०।

"नामधेयं दशम्यान्तु द्वादश्यां वास्य कारयेत्।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते॥")

नामधेयः, त्रि, (नाम्नः धेयो यस्य। नाम आख्या एव धेयो यस्येति वा।) स्तुतः। इति हेमचन्द्रः। ३। ३८॥ मरणे, पुं।

नामापराधः, पुं. (नाम्नि नामविषये अपराधः। नाम्नः सकाशात् अपराधो वा।) साधुनिन्दादिरूपदुरदृष्टजनकव्यापारविशेषः। यथा,—

श्रीनारद उवाच।

"के तेऽपराधा विप्रेन्द्र! नाम्नो भगवतः स्मृताः।
विदिन्वन्ति नृणां क्लेशं प्राक्तनं ज्ञानयन्ति च ॥
तत् कथ्यतां महाभागाऽपराधं नाम्नि केशवे।
केन केन प्रकारेण भवेद्वै तज्जनादिषु ॥

सनत्कुमार उवाच।

सतां निन्दा नाम्नः परममपराधं वितनुते
यतः ख्यातिं यातस्तमुपहसते गर्हयति च।
तथा विष्णोरिशं य इह गुणनामादि सकलं
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः॥
गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं
तथार्थवादो हरिनाम्नि कल्पनम्।
नाम्नो बलाद्यस्य हि पापबुद्धि-
र्न विद्यते तस्य यमैर्हि शुद्धिः ॥
द्विजोकसां गुरोः पित्रोर्भूसुराणाञ्च गर्हणम्।
नामापराधं यत्तत् स्याद्वैष्णवानां तथा नृणाम् ॥
गोऽश्वत्यतुलसीधात्रीनृपाग्निन्दन्ति नारद!।
नामापराधी स भवेन्नाम गोविन्दवैष्णवान् ॥
सर्व्वतीर्थानि क्षेत्राणि चावमन्यति निन्दति।
गङ्गासरस्वतीयामौक्षापराधी भवेन्नरः ॥
श्रीमद्भागवतं महाभारतं ब्राह्मणान् गुरुम्।
मन्त्रं महाप्रसादञ्च योऽवमन्यति नारकी ॥
अवतारान् हरेस्तन्नामभक्तांश्च निन्दति।
अवमन्यति देवर्षे नारकी स जनोऽधमः ॥
गोविन्दस्यार्च्चनं कुर्य्यादवमन्यति वैष्णवान्।
निन्दतीह च नामानि स नाम्नोऽप्यपराधकृत ॥
वर्णाश्रमाणामन्त्यजांश्च जातिदुष्टावमन्यति।
वैष्णवान् कुरुते निन्दामपराधी नराधमः ॥
द्विजबन्धुं स्त्रियं शूद्रं जातिभेदेन वैष्णवम्।
येऽवमन्यन्ति निन्दन्ति ते वै निरयगामिनः ॥
अर्च्चे विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धि-
र्विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः।
विष्णोर्नाम्नाभिधानात्सकलकलुषदुःशब्दसामान्यबुद्धि-
र्विष्णौ सर्व्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः ॥
पूज्यते देवसामान्यं श्रुत्वा नारायणं नरः।
नामापराधी स भवेद्वैष्णवान् यो न सेवते ॥

नारद उवाच।

नामापराधा बहवः सन्ति सन्ति तपोधन!।
तत् कथ्यतां मे सकलं यदि योग्यो भवामि ते ॥

सनत्कुमार उवाच।

वैष्णवे गुरुतां विप्रौ गुरौ पित्रोश्च भूसुरे।
निन्दां यः कुरुते मोहादपराधी स नारकी ॥"

इति पाद्मोत्तरखण्डे। १०२—१०३ अध्यायौ॥

अपि च।

"धर्म्मव्रतत्यागहुतादिसर्व्व-
शुभक्रियासाम्यमपि प्रमादः।
श्रद्धादधाने विमुखेऽप्यश्रृण्वति
यश्चोपदेशः शिवनामापराधः ॥
श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितो नरः।
अहं ममादि परमो नाम्नि सोऽप्यपराधकृत

अपराधभञ्जनमाह।

"जाते नामापराधेऽपि प्रमादेन कथञ्चन।
सदा संकीर्त्तयेन्नाम तदेकशरणो भवेत् ॥

नायकः

नामापराधयुक्तानां नामान्येव हरन्त्यघम्।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥
नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं
गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव
सत्यम्।
तच्चेद्देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र!॥"
इति श्रीहरिभक्तिविलासः॥

नामापराधी, [न्] त्रि, (नामापराधोऽस्यास्येति। इनिः।) नामापराधकृत्। यथा,—
"नास्तो जनार्दनस्यापराधान् यः कुरुतेऽनिशम्।
नामापराधकृल्लोको याति सत्यमधोगतिम्॥
विनाशयति नामस्रोऽपराधं नामतो जनः।
नामापराधी ज्ञाणे स्यादात्मनश्चेति नारकी॥
पापस्तो दुर्ज्जनः पापी भवेन्नास्तो हरेः खलः।
नामापराधी मनुजो सुने! भवति नारकी॥
अपराधास्तुकुन्दस्य विदूरयति नामभिः।
नाम्नोह लोकः कुर्व्वंस्तास्महापाप्यधमाधमः॥"
इति पाद्मोत्तरखण्डे १०२ अध्यायः॥

नायः, पुं, (नीयतेऽनेनेति। नी+"अयोभुवो ऽनुपसर्गे।" ३। ३। २४। इति करणे घञ्।) नयः। नीतिः। इत्यमरः। ३। २। ६॥ (यथा, भट्टिः। ७। ३६।
"यात यूयं यमस्यायं दिशं नायेन दक्षिणाम्॥"
नी+भावे घञ्।) प्रापणम्। इति नीधातुदर्शनात्॥ (नयति प्रापयतीति। नी+"दुञोरनुपसर्गे।" ३। १। १४२। इति णः। उपायः। यथा, भट्टिः। ६। ८२।
"नायः कोऽत्र स येन स्यां वताहं विगतज्वरः॥"
नेतरि, त्रि। यथा, ऋग्वेदे। ६। २४। १०।
"सचस्व नायमवसे अभीक इतो वा तमिन्द्र
प्राहि रिषः॥")

नायकः, पुं, (नयति प्रापयतीति। नी+ण्वुल्।) नेता। (यथा, गीतायाम्। १। ७।
"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥")
श्रेष्ठः। (यथा, भागवते। ४। ७। १६।
"तमुपागतमालक्ष्य सर्व्वे सुरगणादयः।
प्रयेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः॥")
हारमध्यमणिः। इति मेदिनी। के, ११०॥
अग्रे सरिकः। सेनापतिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २२२। ४।
"वध्यमानं बलं दृष्ट्वा वहुशस्ते पुरन्दरः।
स्वसैन्यनायकार्थाय चिन्तामाप भृशं तदा॥")
शृङ्गारसाधकः। स च त्रिविधः। पतिरुपपतिर्वैशिकश्चेति। विधिवत् पाणिग्राहकः पतिः। अनुकूलदक्षिणधृष्टशठभेदात् पतिश्चतुर्द्धा। सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः। सकलनायिकाविषयसमसङ्गाजनुरागो दक्षिणः। भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः। कामिनीविषयकपटपटुः शठः। आचारहानिहेतुः पतिरुपपतिः। बहुलवेश्याभोगोपरसिको वैशिकः। वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविधः। दयिताश्रमप्रकोपेऽपि उपचारपरायण उत्तमः। प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः। भयकृपालज्जाशून्यः कामक्रीड़ायामकृतकृत्याकृत्यविचारोऽधमः॥*॥
मानी चतुरश्च शठ एवान्तर्भवति। वाक्चेष्टायश्चधमागमश्चतुरः। प्रोषितपतिरुपपतिर्वैशिकश्च भवति। अनभिज्ञनायको नायकाभास एव। तेषाञ्च नर्म्मसचिवपीठमर्द्दविटचेटकविदूषकभेदाच्चतुर्धा। कुपितस्त्रीप्रसादकः पीठमर्द्दः। नर्म्मसचिवोऽप्ययमेव। कामतन्त्रकलाकोविदो विटः। सन्धानचतुरश्चेटकः। अङ्गादिवेकृत्यैर्हासकारी विदूषकः॥*॥ तेषामष्टसात्त्विकगुणाः। यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः॥"*॥
तेषां दशावस्था यथा,—
"अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम्।
उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च।
जड़ता निधनान्येव दशावस्थाः प्रकीर्त्तिताः॥"
इति रसमञ्जरी॥
(अस्य लक्षणभेदादिकं यथा, साहित्यदर्पणे।
३। ३३—३८।
"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता॥
धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्यथसुक्तः प्रथमश्चतुर्भेदः॥
अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थैर्य्यान् निगूढ़मानो धीरोदात्तो दृढ़व्रतः कथितः॥
मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥
निश्चिन्तो दृढ़रनिशं कलापरो धीरललितः
स्यात्।
सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः
स्यात्॥"
एषाञ्च शृङ्गारिरूपत्वे भेदानाह तत्रैव। ३।
३६—४४।
"एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोड़शधा।
रघु त्वनेकमहिलासु समरागो दक्षिणः कथितः॥
कृतागा अपि निःशङ्कस्तर्জितोऽपि न लज्जितः।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः॥
अनुकूल एकनिरतः शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढ़माचरति॥
एषाञ्च त्रैविध्यात् सर्व्वेषामुत्तममध्याधमत्वेन।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च॥"
एषामुदाहरणादिकं तत्रैव द्रष्टव्यम्॥)

नायकाधिपः, पुं, (नायकानां नेतॄणां सेनापतीनां वा अधिपः।) नरेन्द्रः। राजा। इति शब्दरत्नावली॥

नायका

नायिका, स्त्री, (नयति या। नी+ण्वुल्। टाप्। अत इत्वञ्च।) दुर्गाशक्तिः। सा अष्टधा। यथा,—
"ततोऽष्टनायिका देया यत्नतः परिपूजयेत्॥
उग्रचण्डां प्रचण्डाञ्च चण्डोग्रां चण्डनायिकाम्।
अतिचण्डाञ्च चामुण्डां चण्डां चण्डवतीन्तथा॥
पद्मे चाष्टदले चेताः प्रागादिक्रमतस्तथा।
पद्मोपचारैः संपूज्य भैरवान्मध्यदेशतः॥"
इति प्रकृतिखण्डे ६१ अध्यायः॥

शृङ्गाररसालम्बनविभावरूपा नारी। सा च त्रिविधा। स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवानुरक्ता स्वीया। स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तथा अङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा। सैव क्रमशो ज्ञातप्रश्रया विश्रब्धनवोढ़ा। समानलज्जामदना मध्या। एवैव चातिप्रश्रयादतिविश्रब्धनवोढ़ा। पतिमात्रविषयकैलिकलापकोविदा प्रगल्भा। मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे। धीरा अधीरा धीराधीरा चेति। अत्यल्पकोपप्रकाशा धीरा। अत्यल्पकोपप्रकाशा अधीरा। अल्पाल्पकोपप्रकाशा धीराधीरा। एते धीराद्यास्त्रयो भेदा द्विधा भवन्ति। ज्येष्ठा कनिष्ठा च। परिणीतत्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा। परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा॥
अप्रकटपरपुरुषानुरागा परकीया। सा च द्विविधा। परोढ़ा कन्यका च। गुप्ता विदग्धा लक्षिता कुलटा अनुशयानासुदिताप्रभृतीनां परकीयायामेवान्तर्भावः। गुप्ता त्रिविधा। उत्तसुरतगोपना च। वर्त्तिष्यमाणसुरतगोपना। वर्त्तमानसुरतगोपना च। विदग्धा द्विविधा। वाग्विदग्धा क्रियाविदग्धा चेति। अनुशयाना त्रिविधा। वर्त्तमानस्यानविघट्टनेन भाविस्यानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तुर्गमनानुमानेन॥*॥
वित्तमात्रोपाधिकसकलपुरुषाभिलाषा सामान्यवनिता। एता अन्यसम्भोगदुःखिता। वक्रोक्तिगर्व्विता मानवत्यश्च तिस्रो भवन्ति। वक्रोक्तिगर्व्विता द्विविधा। प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च। मानवती यथा। प्रियापराधरुचिका चेष्टा मानः। स च लघुर्मध्यमो गुरुश्चेति। अल्पापनेयो लघुः। कष्टापनेयो मध्यमः। कष्टतमापनेयो गुरुः॥*॥ एताः षोड़श अष्टाभिरवस्थाभिः प्रत्येकमष्टधा। प्रोषितभर्त्तृका खण्डिता उत्कण्ठिता कलहान्तरिता विप्रलब्धा वासकसज्जा स्वाधीनपतिका अभिसारिका चेति गणनादष्टाविंशत्यधिकं शतं भेदा भवन्ति। तासासुत्तममध्याधमगणनया चतुरधिकाशीतिशतत्रयं भेदा भवन्ति। तत्रासां दिव्य-अदिव्य-दिव्यादिव्यभेदेन गणनया द्विपञ्चाशदधिकशततयुतसहस्रं भेदा भवन्ति। इति रसमञ्जरी॥*॥

नायिका

(यथा च साहित्यदर्पणे । ३ । ६५—६३ ।
"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥
विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।
सापि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति॥
प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥
मध्या विचित्रसुरता प्ररूढ़स्मरयौवना।
ईषत्प्रगल्भवचना मध्यमव्रीड़िता मता ॥
स्मरान्धा गाढ़तारुण्या समस्मरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका ॥
ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे।
प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्द्वया ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः।
प्रगल्भा यदि धीरा स्याच्छमकोपाकृतिस्तदा ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः।
धीराधीरा तु सोल्लुण्ठभाषिते: खेदयेदसुम् ॥
तर्जयेत्ताड़येद्वाऽन्या प्रत्येकं ता अपि द्विधा।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥
मध्याप्रगल्भयोर्भेदास्तस्माद् द्वादश कीर्तिताः।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥
परकीया द्विधा प्रोक्ता परोढ़ा कन्यका तथा।
यात्रादिगिरतास्त्वन्योढ़ा कुलटा गलितत्रपा ॥
कन्या त्वजातोपयमा सलज्जा नवयौवना।
धीरा कलाप्रगल्भा स्यादेषा सामान्यनायिका ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ॥
काममङ्गीकृतमपि परित्यागधनं नरम्।
मात्रा निष्क्रामयेद्देषा पुनः सन्धानकाङ्क्षया ॥
तस्कराः पण्डका मूर्खाः सुखप्राप्यधनास्तथा।
लिङ्गिनश्चाप्रकामाद्या आसां प्रायेण वल्लभाः ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥
अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः।
स्वाधीनभर्तृका तद्वत् खण्डिताऽथाभिसारिका ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका।
अथा वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥
पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥
अभिसार्यां कान्तं या मन्मथवशंवदा।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥
संलीना स्वेद गात्रेषु मृक्षीकृतविभूषणा।
अवगुण्ठनसंवीता कुलजाऽभिसरेत् यदि ॥
विचित्रोज्ज्वलवेषा तु वेश्याऽभिसरेत् यदि ॥
प्रमोदम्भेरवदना स्याद् वेश्याऽभिसरेत् यदि ॥
मदस्खलितसंलापा विभ्रमत्फुल्ललोचना।
व्याविद्धगतिसञ्चारा स्यात् प्रेष्याभिसरेद् यदि ॥*
प्रस्तावादभिसारस्थानानि कथ्यन्ते।
क्षेत्रं वाटी भयदेवालयो दूतीगृहं वनम्।
मालयश्च श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने।
स्थानान्यन्यानि तथा ध्वान्तच्छन्नेषु क्वचिदाश्रयः ॥*॥
चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥
प्रियः कृत्वापि सङ्केतं यस्या नायाति सन्निधिम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥
नानाकार्य्यवशाद् यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका ॥
कुरुते मण्डनं यस्याः सञ्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥
आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा ॥
इति साहित्यदर्पणे प्रथमपरिच्छेदे नायिकाभेदाः
चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदानां
स्यात् ॥

क्वचिदन्योन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते।
इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया ॥"
एतासामुदाहरणानि तत्रैव विस्तरशो द्रष्टव्यानि॥
अथासामलङ्काराः। यथा, तत्रैव । ३ । ६४ ।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ॥
लीलाविलासौ विच्छित्तिर्विब्बोकः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः।
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ॥"
अथ मुग्धाकन्ययोरनुरागेङ्गितानि। यथा,
तत्रैव। ३। १२३।
"ह्रिया दर्शयति व्रीड़ां सम्मुखं नैव पश्यति।
प्रच्छन्नं वा भ्रमन्तं वा तिर्यक् तं पश्यति प्रियम्॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते ॥
अन्यैः प्रवर्त्तितां गूढ़ां सावधाना च तत्कथाम्।
शृणोत्यन्यच्च दत्ताक्षी प्रिये बालानुरागिणी ॥"
अथ सकलानामपि नायिकानामनुरागेङ्गितानि।
यथा, तत्रैव। ३। १२४—१२५।
"चिराय सविधे स्थानं प्रियस्य बहु मन्यते।
विलोचनपथेऽस्य न गच्छत्यनवहित्था ॥
कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥
आच्छादयति वासाद्यैः प्रियस्य परिचारकान्।
विश्वसितस्य भित्त्वेषु बहुमानं करोति च ॥
सखीमध्ये गुणान् ब्रूते स्वभर्तुः प्रददाति च।
सुप्ते स्वपिति दुःखस्य दुःखं धत्ते सुखे सुखम् ॥
स्थिता दृष्टिपथे गूढ़ं प्रिये पश्यति दूरतः।
आभाषते परिजनं सम्मुखे स्मरविक्रियम् ॥
यत् किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा।
कर्णकण्डूयनं तद्वत् कबरीमोचसंयमौ ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति।
भावे तथा वयस्याया आरभेत् तिलकक्रियाम् ॥

अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी ॥
न सृजति च तं देशं नायको यत्र दृश्यते।
आगच्छति गृहं चास्य कार्य्यव्याजेन केनचित् ॥
दत्तं किमपि कान्तेन धृत्वाङ्गे सुचिरीक्षते।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥
मन्यते बहु तच्छीलं ततृप्रियं मन्यते प्रियम्।
प्रार्थयतेऽल्पमूल्यानि सुप्ता न परिवर्त्तते ॥
विकारान् सात्त्विकानस्य सम्मुखी नाधिगच्छति।
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः।
मध्यव्रीड़ानि मध्यायाः संसमानत्रपाणि तु ॥
अन्यस्त्रियाः प्रगल्भायास्तथा सुवर्य्ययोषितः ॥
लेख्यप्रस्तावनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः।
दूतीसम्भर्षणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥"*॥)
कस्तूरीविशेषः। यथा, राजनिर्घण्टे।
"चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलत्यबीजसदृशी च कुलत्थिकाख्या।
स्थूला यतः कियदियं किल पिण्डिका स्या-
त्तस्माच्च किञ्चिदधिकापि च नायिकेषा ॥"

नारं, क्ली, (नराणां समूहः। नर+समूहे अण्।) नरसमूहः। इति व्याकरणम् ॥ (नरस्येदमिति। नर+"तस्येदम्।" ४। ३। १२०। इत्यण्।) नरसम्बन्धिनि, त्रि। यथा,—
"मलमूत्रपुरीषास्थिनिर्गतं त्वशुचि स्मृतम्।
नारं सृष्ट्वा तु सस्नेहं सचेलो जलमाविशेत् ॥"
इति सामान्यनिरूपी जगदीशभृतस्मृतिवचनम्॥

नारः, पुं, (नरस्यायमिति। नर+अण्।) तर्णकः। जलम्। इति मेदिनी। रे, ५३ ॥

नारकः, पुं, (नरक एव। प्रज्ञाद्यण्।) नरकः। (नरके भवः। "तत्र भवः।" ४। ३। ५३। इत्यण्।) नरकस्थप्राणिनि, त्रि। इत्यमरः। १। ६। १ ॥
(यथा, मार्कण्डेये। १५। ७३।
"अनुकम्पामिमामद्य नारकेष्विह कुर्वतः।
तदेव भूतसाहस्रं संस्मासुपगतं तव ॥")

नारकी, [न्] त्रि, (नरको भोग्यतया अस्त्यस्येति। नरक+इनिः।) नरकस्थः। यथा,—
"परेण विहितं कर्म स्वकर्मेति वदेच्च यः।
स उच्यते ब्रह्मघाती महानारकिनारकी ॥"
इति बृहद्धर्म्मपुराणे उत्तरखण्डे ७८ अध्यायः॥

नारकीटः, पुं, अग्निकीटः। (नरेषु नरसमूहेषु कीट इव तृणार्हत्वात्।) खद्योताग्निविहङ्गा। इति मेदिनी। टे, ६३ ॥

नारङ्गं, क्ली, (नृणातीति। नृ नये+बाहुलकात् अङ्गच् धातोर्द्वित्वञ्च। इदुज्ज्वलदत्तः। १।१२१।) गन्धरसम्। इति राजनिर्घण्टः॥

नारङ्गः, पुं, (नृ नये+अङ्गच्। द्वित्वञ्च।) पिप्पलीरसः। यमजप्राणी। वटः। इति मेदिनी। गे, ३६ ॥ फलवृक्षविशेषः। नारङ्गी इति भाषा। तत्पर्य्यायः। नागरङ्गः २ सुरङ्गः ३ त्वग्गन्धः ४ ऐरावतः ५ वक्त्रवासः ६ योगारङ्गः ७ योगरङ्गः ८ मरङ्गः ९ गन्धाढ्यः १० गन्धप्रियः ११

वरिष्ठः १२। अस्य गुणाः। मधुरत्वम्। अच्छत्वम्। गुरुत्वम्। उष्णत्वम्। रोचनत्वम्। वातामक्तमिश्लश्रमनाशित्वम्। बल्यत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥ तत्कैशरगुणाः।

"अत्यम्लमीषन्मधुरं तृष्यं वातविनाशनम्।
रुच्यं वातहरञ्चैव नागरङ्गस्य कैशरम्॥"

इति राजवल्लभः॥

नारदः, पुं, (नारं परमात्मविषयकं ज्ञानं ददातीति। दा+कः। यद्वा, नारं नरसमूहं त्रायति खण्डयति कलहेनेति। दो+कः। नारं जलं ददाति पिबद्भ्य इति वा। तदुक्तम्,—

"नारं पानीयमित्युक्तं तत् पिबद्भ्यः सदा भवान्।
ददाति तेन ते नाम नारदेति भविष्यति॥")

देवर्षिविशेषः। स तु भोगाग्नौ ब्रह्मशापादुपबर्हणनामा गन्धर्व्वो भूत्वा पुनर्ब्रह्मवीर्य्यात् शूद्रपत्न्यां जातः। यथा,—

शौनक उवाच।

"ब्रह्मवीर्य्यात्शूद्रपत्न्यां गन्धर्व्वश्चोपबर्हणः।
जातः केन प्रकारेण तद्भवान् वक्तुमर्हति॥

सौतिरुवाच।

कान्यकुब्जे च देशे च हुमिलो गोपराजकः।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता॥
स्वामिदोषेण सा वन्ध्या काले च भर्त्तुराज्ञया।
उपस्थितं वने घोरे नारदं काश्यपं मुनिम्॥
क्रोशमात्रञ्च श्रीकृष्णं ज्वलन्तं ब्रह्मवर्चसा।
तस्थौ सुवेषं कृत्वा सा ध्यानान्तञ्च मुनेः पुरः॥
उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि।
गोपिकाहं द्विजश्रेष्ठ! हुमिलस्य च कामिनी।
पुत्रार्थिनी चागताहं तन्मूलं भर्त्तुराज्ञया॥
वीर्य्याधानं कुरु मयि! स्त्री नोपेक्षा त्वयुपस्थिता।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा॥
वृषलीवचनं श्रुत्वा चुकोप मुनिपुङ्गवः।
वृषली तत्पुरस्तस्थौ शुष्ककण्ठौष्ठतालुका॥
एतस्मिन्नन्तरे तेन पथा यास्यति मेनका।
तस्या ऊरुस्थलं दृष्ट्वा मुनिवीर्य्यं पपात ह॥
ऋतुस्नाता च वृषली कृत्वा तद्वचनं सदा।
सा विप्र! गेहे साध्वी च सुषुवे तनयं वरम्॥
तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा।
अनाद्यवयवेषे च काले बालो बभूव ह॥
नारं ददौ जन्मकाले तेनायं नारदाभिधः॥
ददाति नारं ज्ञानञ्च बालकेभ्यश्च बालकः।
जातिस्मरो महाज्ञानी तेनायं नारदाभिधः॥
वीर्य्येण नारदस्यैव बभूव बालको मुने!।
मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः॥
कल्पान्तरे ब्रह्मकण्ठाद्भभूवुर्बहवो नराः।
नरान्ददौ ततः कण्ठश्च तेन तन्नारदः स्मृतः॥
ततो बभूव कालश्च नारदात् कण्ठदेशतः।
ततो ब्रह्मा नाम चक्रे नारदश्चेति मङ्गलम्॥
एतस्मिन्नन्तरे विप्रा आययुर्विप्र मन्दिरम्।
शिशवः षष्टवर्षीया महातेजस्विनो यथा॥
चतुर्व्वक्त्रो मुनिस्तस्मै ब्राह्मणाश्च कृपालवः।
ब्रह्मपुत्रं शिशुं ज्ञात्वा विष्णुमन्त्रं ददौ मुदा॥
महाज्ञानी शिशुरूस्थौ गङ्गातीरे मनोहरे।
तत्र स्नात्वा विप्रदत्तं विष्णुमन्त्रं जजाप सः॥
दिव्यं वर्षसहस्रञ्च निराहारः कृशोदरः।
ददर्श बालको ध्याने दिव्यं लोकञ्च बालकम्॥
द्विभुजं मुरलीहस्तचन्दनेन विचर्चितम्।
विरराम च शोकार्त्तो यदा यद्दृष्टमक्षमः॥
रुरोदाश्वत्यमूले च न दृष्ट्वा बालकं शिशुः।
बभूवाकाशवाणीति रुदन्तं बालकं प्रति॥
सत्यदृष्टिर्भवतं रूपं तदेव नाधुना पुनः।
पुनर्द्रक्ष्यसि गोविन्दं जन्ममृत्युहरं हरिम्॥
इति श्रुत्वा बालकश्च विरराम सुदान्वितः।
काले तत्याज तीर्थे च तनुं कृष्णं हृदि स्मरन्॥
बभूव ग्रामसुक्तिश्च नारदस्य महामुने!।
तनुं त्यक्त्वा स जीवश्च विलीनो ब्रह्मविग्रहे॥
कतिकल्पान्तरेऽतीते सृष्टुं सृष्टिविधौ पुनः।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः॥
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २१—२२ अध्यायौ॥

तस्य सर्व्वदा भ्रमणकारणं यथा,—

"तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षप्रजापतिः।
क्रोधञ्चक्रे महाभाग! नारदं स शशाप च॥"

नारदशापश्च श्रीभागवतोक्तः।

"तस्माल्लोकेषु ते मूढ़ न भवेद्भ्रमतः पदम्।"

इति विष्णुपुराणे १ अंशे १५ अध्यायस्य टीका च॥ (पञ्चविंशतिसहस्रश्लोकात्मक उपपुराणविशेषः। यथा, देवीभागवते। १। ३। ६।

"षोडशैव सहस्राणि पुराणस्यास्य संमितम्।
पञ्चविंशतिसाहस्रं नारदं परमं मतम्॥"

शाकद्वीपस्थ पर्व्वतविशेषः। यथा, मात्स्ये। १२१। ११।

"नारदो नाम चैवोक्तो दुर्गशैलो महाश्चितः।
तत्राश्चर्ये समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ॥"

विश्वामित्रपुत्रविशेषः। यथा, महाभारते। १३। ४। ५८।

"उर्ध्वयोनिरुदापेक्षी नारदश्च महाऋषिः।
विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः॥")

नारा, स्त्री, (नरस्य सूनेरियम्। नर+"तस्येदम्।" ४। ३। १२०। इति अण्। ततष्टाप्।

"यद्यपि अणि कृते ङीप्प्रत्ययः प्राप्नुतस्तथापि छान्दसत्वाच्चैरपि स्मृतिषु व्यवहारात् सर्व्वे विधयश्छन्दसि विकल्पन्ते इति पाक्षिको ङीप् प्रत्ययः। तस्याभावपक्षे सामान्यलक्षणप्राप्ते टापि कृते नारा इति रूपसिद्धिः।" इति मनुसंहिताटीकायां कुल्लूकभट्टः। १।१०।) जलम्। इति शब्दरत्नावली॥ (यथा, मनुः। १। १०।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः॥")

नाराचः, पुं, (नारं नरसमूहं आचामतीति। चमु अदने+"अन्येष्वपि दृश्यते।" ३।२।१०१। इति डः।) समुदायलौहमयबाणः। तत्पर्य्यायः। प्रचुड़नः २। इत्यमरः। २। ८। ८७॥ लोहनालः ३। इति शब्दरत्नावली॥ (यथा, हरिवंशे भविष्यपर्व्वणि।

"सर्व्वलौहास्तु ये बाणा नाराचास्ते प्रकीर्त्तिताः।
पञ्चभिः पृथुलैः पर्व्वैर्युक्ताः सिध्यन्ति कस्यचित्॥")

दुर्दिनम्। इति शब्दमाला॥ (अक्षरवृत्तविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥ वैद्यकोक्तौषधविशेषः। यथा, भावप्रकाशे उदररोगाधिकारे।

"स्नुक्क्षीरदन्तीत्रिफलाविडङ्ग-
सिंहीत्रिवृच्चित्रकसर्ज्यकल्कैः।
घृतं विपक्वं कुड़वप्रमाणं
तोयेन तस्यात्समेन कर्षम्॥
पीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः।
नाराचमेनं जठरामयानां
सूक्तं प्रयुक्तं प्रवदन्ति सन्तः॥"

इति नाराचघृतम्॥ *॥)

नाराचिका, स्त्री, (नाराचस्येदमाकारोऽस्यस्या इति। नाराच+ठन्। टाप्।) नाराची। इति शब्दरत्नावली॥ (अक्षरवृत्तविशेषः। तल्लक्षणं यथा,—

"नाराचिका तरौ लगौ॥")

नाराची, स्त्री, (नाराचवदाकृतिरस्यस्या इति। अच्। गौरादित्वात् ङीष्।) स्वर्णकारादीनां नाराचाकृतिलौहतुला। निक्ति इति भाषा। तत्पर्य्यायः। नाराचिका २ एषणिका ३ एषणी ४। इति शब्दरत्नावली॥

नारायणः, पुं, (नारा जलं अयनं स्थानं यस्य। अय गतौ+भावे ल्युट्। सर्व्वे गत्यर्थाः प्राप्त्यर्थाश्च इति नियमात् नारस्य ज्ञानस्य सूक्तेर्वा अयनं प्राप्तिर्यस्मात् इति वा। "नराणां समूहो नारं तत्रायनं स्थानं यस्य नारायणः रेफात् परनकारस्य णत्वविधानात् सर्व्वप्राणिबुद्धिगुहानिवासाच्छुद्धचैतन्यमित्यर्थः।" इति शब्दरत्नावलिः।) विष्णुः। तस्य चत्वारो यूहाः। वासुदेवसङ्कर्षणप्रद्युम्ननिरुद्धाख्याः। इति महाभारतम्॥ वेदान्तमते। शुद्धान्तर्यामिसूत्रविराड़ाख्याः॥ तन्नामश्रुत्युत्पत्तिर्यथा,—

"सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः॥
नाराच्च कृतपापाच्चाप्ययनं गमनं स्मृतम्।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः॥
नारस्य मोक्षणं पुण्यमयनं ज्ञानमीप्सितम्।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः स्मृतः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०६ अः॥

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः॥"

इति विष्णुपुराणम्॥

यद्वा।

"नाराजातानि तत्त्वानि नारमीति विदुर्बुधाः।
तान्येव चायनं तस्य तेन नारायणः स्मृतः॥"

तथा ।
"यच्च किञ्चिज्जगत् सर्व्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्व्वं व्याप्य नारायणः
स्थितः ॥"
तथा ।
"प्रकृतेः पर एवात्मा स नरः पञ्चविंशकः ।
तस्येमानि च भूतानि नाराणीति प्रचक्षते ।
तेषामप्ययनं यस्मात्तस्मान्नारायणः स्मृतः ॥"
अत्रिकल्पान्तरे नरनामऋषेरपत्यतां गतः इति
नारायणः । इत्यमरटीकायां भरतः । * ।
("नराणामयनाच्चापि ततो नारायणः स्मृतः ॥"
इति महाभारते । ५ । ७० । १० ॥)
अस्य स्वरूपो यथा,—
"श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ।
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥
चतुर्भुजस्य पत्नी च महालक्ष्मीः सरस्वती ।
गङ्गा च तुलसी चैव देवी नारायणप्रिया ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६४ अध्यायः ॥
तस्य ध्यानं यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥"
इत्यादिध्यानहृदयम् ॥
अपि च ।
"शङ्खचक्रगदापद्मधरं कमललोचनम् ।
शुद्धस्फटिकसङ्काशं शशिकोटिसमप्रभम् ॥
गरुडोपरिसुखासीनपद्मासनगतं हरिम् ।
श्रीवत्सवक्षसं ग्राह्यं वनमालाधरं परम् ॥
केयूरकुण्डलधरं किरीटमुकुटोज्ज्वलम् ।
निराकारं ज्ञानगम्यं साकारं देहधारिणम् ॥
चिदानन्दं निरानन्दं सूर्य्यमण्डलमध्यगम् ।
मन्त्रेणानेन देवेशं विष्णुं भज सुभावने ! ॥"
इति कालिकापुराणे २२ अध्यायः ॥
तन्नाममाहात्म्यं यथा,—
"नारायणाच्युतानन्तवासुदेवेति यो नरः ।
सततं कीर्त्तयेत् भूमे ! याति मद्भवतां प्रिये ! ॥"
इति वराहपुराणम् ॥
"सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥"
इति श्रीकृष्णजन्मखण्डे १०८ अध्यायः ॥
"नारायणेति शब्दोऽस्ति वाचस्ति वशवर्त्तिनी ।
तथापि नरके मूढाः पतन्तीह किमद्भुतम् ॥"
इति महाभारतम् ॥
तस्य तुष्टिजनककर्म्माणि यथा,—
श्रीकृष्ण उवाच ।
"कर्म्मणा येन विप्रेन्द्र ! तुष्टिर्म्मे हृदि जायते ।
क्रोधश्च तत् समस्तं ते कथयामि समासतः ॥
यो दयालुर्द्विजश्रेष्ठ ! सर्व्वभूतेषु सर्व्वदा ।
व्यपहारेण हीनश्च तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणे कर्म्मणाम्नेऽर्थे यो धर्म्मे भक्तिसंयुतः ।
इति यथार्थं दृष्टान्तं तस्य तुष्टोऽस्म्यहं सदा ॥
मिष्टं वस्तु समासाद्य दत्त्वा मे योऽत्ति मानवः ।
मानापमानसङ्गस्तस्य तुष्टोऽस्म्यहं सदा ॥
सर्व्वभूतशरीरस्थं यो मां जानाति मानवः ।
परहिंसाविहीनो यस्तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्माणि कुरुते यस्तु सुविचार्य्य पुनः पुनः ।
गोब्राह्मणहितैषी च तस्य तुष्टोऽस्म्यहं सदा ॥
स्वयं निरस्तं वचनं यत्नाद् यः परिपालयेत् ।
प्रपन्नं पाति यत्नाद्यस्तस्य तुष्टोऽस्म्यहं सदा ॥
दानान्यनुपकारिभ्यो यो ददाति द्विजोत्तम ! ।
मयि चित्तं सदा यस्य तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणा येन तुष्टोऽसि निरस्तं तत् समासतः ॥"
तस्य रोषजनककर्म्माणि यथा,—
"रुष्टोऽस्मि कर्म्मणा येन विप्र ! वक्ष्यामि श्रृणुष्व
तत् ॥
परहिंसारतो यस्तु निर्हृयः सर्व्वजन्तुषु ।
अहंयुः सर्व्वदा क्रुद्धः स मां नयति शत्रुताम् ॥
असत्यभाषी क्रूरश्च परनिन्दापरस्तु यः ।
परवर्त्मनविध्वंसी स मां नयति शत्रुताम् ॥
अदृष्टदोषौ पितरौ स्त्रीभ्रातृभगिनीस्तथा ।
मोहात्त्यजति मूढो यः स मां नयति शत्रुताम् ॥
पिष्टनिर्भर्त्सनं यस्तु कुरुते मूढधीर्नरः ।
गुर्व्यवज्ञश्च विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
दम्भत्योर्भेदनं यस्तु हेतुमात्रेण केनचित् ।
कुरुते ब्राह्मणश्रेष्ठ ! स मां नयति शत्रुताम् ॥
विप्रस्वं देवतास्वं परद्रव्यञ्च मानवः ।
हरते यस्तु विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
आरामक्षेत्रिणो ये च जलाशयविलोपिनः ।
ग्रामनाशकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
परस्त्रियं समालोक्य विषादं यान्ति ये जनाः ।
हृष्यन्ति पापचर्च्चां ये तेषां रुष्टोऽस्म्यहं सदा ॥
द्विपन्त्यनाथं ये मूढा अनाथस्त्वं हरन्ति ये ।
विश्वासघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ये च गोवीर्य्यहन्तारो वृषलीपतयश्च ये ।
अश्वत्थघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ब्रह्मविष्णुमहेशानां मध्ये ये भेदकारिणः ।
वेदनिन्दाकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
एकादश्यां भुञ्जते ये मोहात् पापधियो नराः ।
परदाराहरक्ता ये तेषां रुष्टोऽस्म्यहं सदा ॥
पापबुद्धिप्रदा ये च ये च मिथ्याद्विजाः ।
धार्म्मिकत्वञ्च ये ब्रूयुस्तेषां रुष्टोऽस्म्यहं सदा ॥
दिवसे मैथुनं ये च कुर्व्वते काममोहिताः ।
रजस्वलां स्त्रियं यान्ति तेषां रुष्टोऽस्म्यहं सदा ॥
ये च दुष्टासुरां नारीं मोहात्प्रच्छन्ति सत्तम ! ।
व्रतस्थाश्च सदा ते मां नयन्ति शत्रुतां भुवि ॥
अमावास्यातिथौ ये च कुर्व्वते निशिभोजनम् ।
भोजनद्वयमेकार्के तेषां रुष्टोऽस्म्यहं सदा ॥
आमिषं मैथुनं तैलममावास्यादिने द्विजाः ।
न ये त्यजन्ति विप्रेन्द्र ! तेषां रुष्टोऽस्म्यहं सदा ॥
बहुनात्र किमुक्तेन संक्षेपात्तं वदाम्यहम् ।
निन्दन्ति वैष्णवान् ये च तेषां रुष्टोऽस्म्यहं
सदा ॥"
इति क्रियायोगसारे २८ अध्यायः ।

अजामिलपुत्रः । यथा,—
"कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥
तस्य प्रवयसः पुत्रा दश तेषान्तु योऽवमः ।
बालो नारायणो नाम्ना प्रियोऽभूच्च दयितो भृशम् ॥
दूरे क्रीड़नकासक्तं पुत्रं नारायणाह्वयम् ।
प्राविशेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥
म्रियमाणस्य सुखतो हरिकीर्त्तनम् ।
भर्त्तुर्नाम महाराज ! पार्श्वदाः सहसापतन् ॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥"
इति श्रीभागवते षष्ठस्कन्धे प्रथमाध्यायः ॥
सैन्यविशेषः । यथा,—
"मत्तसंहननतुल्यानां गोपानामर्ब्बुदं महत् ।
नारायणा इति ख्याताः सर्व्वे संग्रामयोधिनः ॥"
"दुर्य्योधनश्च तत् सैन्यं सर्व्वमावारयत्ततः ।
सहस्राणां सहस्रञ्च योधानां प्राप्य भारत ! ॥"
इति महाभारते । ५ । ७ अध्यायः ॥
धर्म्मपुत्रर्षिविशेषः । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥
"दक्षयज्ञक्षमाचैव नरो नारायणो भवेत् ॥"
इति यतिधर्म्मः ॥
(लक्षणयुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा.
मुक्तिकोपनिषदि ।
"गर्भो-नारायणो हंसो विष्णुर्नादशिरःशिखा ॥"
चूर्णौषधिविशेषः । यथा, भावप्रकाशे उदर-
रोगाधिकारे ।
"यवानी हपुषा धान्यं चित्रका चोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
घृताक्षा जीरको योधं स्वर्ज्जीरी च चित्रकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विड्भक्ष्य समांशानि दत्त्वा भागत्रयं भवेत् ।
चित्रद्विघ्नाले द्विगुणे सातला क्षाचतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोग गणापहः ।
एवं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्व्वादरानुगा ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड्बन्धे दाड़िमाम्बुभिरर्शसि ।
परिकर्त्तिषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
छर्द्दीरोगे वह्निरोगे कुष्ठे मन्देऽनले ज्वरे ॥
एंद्राविधे मूलविधे सगरे क्षत्रिमे विधे ।
यथार्हं स्निग्धकोष्णेन पेयमेतद्विरेचनम् ॥")
नारायणचैत्यं, क्ली, (नारायणस्य चैत्यं स्थानम् ।
गङ्गाप्रवाहावधिहरक्षेत्रचतुष्टयमितनारायणस्वा-
मिकस्थानम् । यथा, ब्रह्मपुराणे ।
"प्रवाहमवधिं कृत्वा यावद्धरक्षेत्रचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥"
"अत्र किञ्चिन्न दत्तञ्च साक्षात् पापाय पुण्य-
वान् ।

अत्र प्रतिग्रहे राजन्! विक्रीता जाङ्घयी भवेत्॥
विक्रीतायाच्च जाङ्घायां विक्रीतोऽभूज्जनार्दनः।
जनार्दने च विक्रीते विक्रीतं भुवनत्रयम्॥
कोऽपि न त्राणकर्त्तास्य निःसम्बन्धप्रसङ्गतः॥"
तत्र कर्त्तव्यानि यथा,—
"दीक्षायाञ्च देवपूजायाञ्च जपं गङ्गातटे चरेत्।
शुष्कवासः-पिधायापि सावित्रीजपमाचरेत्॥
आद्यञ्च तर्पणञ्चैव परोपकारकर्म्म च।
परोद्वेगञ्च मनसा व्यक्तव्यस्य दापने।
स्तवपाठञ्च मौनञ्च नीचालापविवर्জ্জनम्॥
केवलं वारिपानञ्च कर्त्तव्यं ब्रह्मभावतः।
एतानि किल कर्म्माणि त्रीणि नारायणे चरेत्॥"
इति हरिहरर्म्मपुराणे ४५ अध्यायः॥
अवघ्रिष्टं गङ्गाशब्दे द्रष्टव्यम्॥
नारायणतैलं, क्ली, (नारायणाख्यं तैलम्।) औषध-पक्वतैलप्रभेदः। तत्त्रिविधम्। खल्पं हरितं महच्च। यथा,—
"विष्वाग्भृङ्गन्यग्रोधार्कपाटलापारिभद्रकाः।
प्रसारणश्वगन्धा च हरितो कण्टकारिका॥
बला चातिबला चैव स्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषं परिस्राव्य तैलप्रस्थं प्रदापयेत्।
घृतपुष्पा देवदारु मांसी श्रेयेयकं वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिः-क्षिपेत्।
घृतावरी रसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्॥
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः॥
पङ्गुलः पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तमूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥
बधिरा लक्षजिह्काश्च मन्दमेधस एव च।
अल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्ता वृषणौ येषामन्नद्वेषश्च दारुणा।
एतत्तैलवरं तेषां ज्ञात्वा नारायणं स्मृतम्॥"
इति खल्पनारायणतैलम्॥ १॥ *॥
"घृतावरी चांशुमती वृश्चिपर्णी शटी बला।
एरण्डस्य च मूलानि हरितो: पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भे चैनं समावपेत्।
पुनर्नवा वचा दारु घृताक्ता नन्दनागुरु॥
श्रेयेयं तगरं कुष्ठं एला मांसी स्थिरा बला।
अश्वाक्ता सैन्धवं रास्ना पलार्द्धानि च पेषयेत्।
गव्याजपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्॥
घृतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य प्रस्थं वीर्य्यमतःपरम्॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्।
तैलमेतत् प्रयोक्तव्यं सर्ब्बवातनिवारणम्॥
आयुष्मांश्च नरः पीत्वा निरुजेन दृढो भवेत्।
गर्भमस्वतरी विन्द्यात् किं पुनर्मानुषी तथा॥
हृत्कूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्।
अपर्ची गण्डमालाञ्च वातरक्तं हनुग्रहम्॥
कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्।
तैलमेतद्भगवता विष्णुना परिकीर्त्तितम्।
नारायणमिति ख्यातं वातान्तकरणं शुभम्॥"
इति हरिहरनारायणतैलम्॥ २॥ *॥
"विष्वाग्भृङ्गन्यग्रोधार्कपाटलापारिभद्रकाः।
प्रसारणश्वगन्धा च हरितो कण्टकारिका॥
बला चातिबला चैव स्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषं परिस्राव्य तैलप्रस्थं प्रदापयेत्।
घृतपुष्पा देवदारु मांसी श्रेयेयकं वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिः-क्षिपेत्।
घृतावरी रसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्॥
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः॥
पङ्गुलः पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तमूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥
बधिरा लक्षजिह्काश्च मन्दमेधस एव च।
अल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्ता वृषणौ येषामन्नद्वेषश्च दारुणा।
एतत्तैलवरं तेषां ज्ञात्वा नारायणं स्मृतम्॥"
इति खल्पनारायणतैलम्॥ १॥ *॥
"घृतावरी चांशुमती वृश्चिपर्णी शटी बला।
एरण्डस्य च मूलानि हरितो: पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भे चैनं समावपेत्।
पुनर्नवा वचा दारु घृताक्ता नन्दनागुरु॥
श्रेयेयं तगरं कुष्ठं एला मांसी स्थिरा बला।
अश्वाक्ता सैन्धवं रास्ना पलार्द्धानि च पेषयेत्।
गव्याजपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्॥
घृतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य प्रस्थं वीर्य्यमतःपरम्॥
प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं
जीवेच्चिरं चापि भवेद्युवैव॥
देवासुरे युद्धवरे समीक्ष्य
त्रायुस्त्रिभयानसुरैः सुरांश्च।
नारायणोऽपि स्वहितार्थं
स्वनामतैलं विहितन्तु तेषाम्॥"
इति महानारायणतैलम्॥१॥ इति सुश्रुतोक्तः॥
नारायणप्रियः, पुं, (नारायणस्य प्रियः। नारायणः प्रियो यस्य इति वा।) शिवः। यथा,—
"नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्॥"
इति शिवस्तोत्रम्॥
नारायणबलिः, पुं, (नारायणाय नारायणसदृशाय देयो बलिः।) मृतपतितादीनां प्रायश्चित्तात्मककर्म्मविशेषः। यथा। "नारायणबलिस्तु हैमाद्याद्यनुसारेणोच्यते। तत्रादौ क्रियाङ्गिवर्म्मे गारुडे तर्पणमुक्तम्।
'कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि।
दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अक्षयः पुष्करीकाक्षः प्रेतमोक्षप्रदो भव॥'
इति मुक्तेकादश्यां देशकालौ सङ्कीर्त्य अमुकगोत्रस्यामुकस्य दुर्म्मरणजातपातजदोषनाशार्थं और्द्धदेहिके संप्रदानलक्षयोग्यताविद्वारार्थं नारायणबलिं करिष्ये। इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतं पञ्चकुम्भेषु स्थापयेत्।
'विष्णुः सर्ब्बमयः कार्य्यो रुद्रस्तात्ममयस्तथा।
ब्रह्मा रौप्यमयस्तत्र यमो लौहमयो भवेत्॥
प्रेतो दर्भमयः कार्य्यः।' इति गारुडोक्तासु सर्ब्बासु हैमीषु वा प्रतिमासु षोड़शोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन श्रपयित्वा नारायणायेदमिति हुत्वा देवतानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान् दशपिण्डान् यज्ञोपवीत्येव अमुकगोत्र अमुकशर्म्मन् प्रेत विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा कुशैः पुरुषसूक्तेनाभिमन्त्र्य यत्ते यममिति सूक्तेन पिण्डानुमन्त्र्य शुल्लोदकेन चाभिषिच्याभ्यर्च्यामुकशर्म्मन्नमस्ते अमुकगोत्र विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन श्रपयित्वा एकमामान्नं ब्रह्मादिपञ्चभ्यो दद्यात्। मन्त्रस्तु।
'ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः।
बलिं गृह्णीत्वा कुर्वन्तु प्रेतस्य च शुभां गतिमिति॥'
मिताक्षरायान्तु होमवर्ज्जादिना उक्तम्। ततः प्रतिदेवतं त्रिविधं फलं शर्करामधुगुडहृतानि च निवेद्य पिण्डानभ्यर्च्य नद्यां चित्रा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितेन जागरणं कृत्वा श्वोभूते पुनर्ब्रह्मणे यम इत्यूनकोटिविधिना आद्धपक्षं करिष्ये इत्युक्त्वा ब्रह्मविष्ण्वियमप्रेतान् स्मरन् विप्रान् उत्थाप्य प्रेतस्थाने चैकं विष्णुं स्मरन् आचाद्धगोत्रमुक्त

दग्निप्रज्वालनं कृत्वोल्लेखनादि कृत्वान्नग्रहेण ब्रह्मणे विष्णवे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाभ्यर्च्याचार्यान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विश्वेशतः संतोष्य विप्रैः प्रेतायेदं तिलोदकसुपतिष्ठतामिति सतिलमुदकं दापयित्वा भुञ्जीतेति। अत्र विशेषान्तरं भट्टकृतान्येष्टिपद्धतौ ज्ञेयम्। * । सर्पदष्टे तु वर्षपर्य्यन्तं पूर्व्वं त्र्येकभक्तपूर्व्वं शुक्लपञ्चम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं नागमनन्तवासुकिशङ्खपद्मकम्बलकर्कोटकाश्वतरधृतराष्ट्रशङ्खपालकालियतक्षककपिलेति नामभिः प्रतिमासं संपूज्य प्रायेण विप्रान् संभोज्य वत्सरान्ते हैमं नागं गाञ्च प्रत्यब्दञ्च दत्त्वा नारायणबलिं कुर्य्यात्। मूलन्तु हेमाद्रौ ज्ञेयम्। * । वौधायनसूत्रे सर्पेभ्यस्तानां नमोऽस्तु सर्पेभ्य इति तिस्र आहुतीर्हुत्वोदके स्नानां समुदाय वरुणाय हुतेति क्रियां कुर्य्यादिति शेषः। व्यासः।

सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम्।
शस्त्राय दत्त्वा विधिवत् पितुरानृण्यमाप्नुयात्॥'
हेमाद्रौ भविष्ये।

'प्रशस्यां पन्नगं हेम्ना स्वर्णेनैकेन कारयेत्।
शौरान्यपात्रमध्यस्थं पूज्यविप्राय दापयेत्॥
प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शुभ्रुनेति॥'
अपरार्कस्मृत्यन्तरे।

तदेव शुध्यति प्रेतो नारायणबली कृते।
यो ददाति क्रियापिण्डं तस्मै प्रेताय वै सुतः।
तस्यैवाप्यौर्द्धदेहिकं चाहमेव न संशयः॥
विष्णुश्राद्धसमाप्तौ तु त्रयोदश्यां दिनत्रयम्।
अशौचं पिण्डदः कुर्य्यान्न तु तद्बन्धुगोत्रजाः॥
यस्य वै मृत्युकाले तु युच्छिन्ना सन्ततिर्भवेत्।
स वसेन्नरके नित्यं पञ्चमन्वः करो यथा॥'
इत्युपक्रम्य,—
'बलिं नारायणं कुर्य्यात्तस्योद्देशेन भक्तिमान्॥'
इति गारुडोक्तेरपुत्रस्यापि पत्न्यादेः कार्य्यमित्युक्तं देवयाज्ञिकेन।" इति निर्णयसिन्धौ ५ परिच्छेदः॥

नारायणास्त्रं, क्ली, (नारायणस्यास्त्रम्।) विष्णोरस्त्रभेदः। तत्स्वरूपं यथा, देवीपुराणे।
"तदा दानवनाथेन युक्तं नारायणं परम्।
शङ्खचक्रगदाहस्तं खड्गपृष्ठधनुस्थितम्॥"
अपि च।
"ततो हरिहरं युद्धमभवद्रोमहर्षणम्।
रुद्रः पाशुपतास्त्रेण विव्याध हरिमोजसा॥
हरिर्नारायणास्त्रेण रुद्रं विव्याध कोपवान्।
नारायणं पाशुपतेसुभेऽस्त्रे द्योतिते रोषिते॥
युयुधाते भृशं दिव्यं परस्परनिघांसया।
दिव्यं वर्षसहस्रन्तु तयोर्युद्धमभूत्तदा॥
तत्रैकं शृङ्गटोद्दीप्तं सङ्ख्यं जटजालकम्।
शुक्लं प्रभापयच्छ्रेष्ठमन्यं डमरुकं शुभम्॥
एकं खड्गधरं तत्र तथान्यं दक्षधारिणम्।
एकं कौस्तुभभोगाढ्यमन्यं भूतिविभूतिकम्॥
एकं गदां भ्रामयन्तं द्वितीयं दक्षमेव च।
एकः शोभति कण्ठस्थैर्मणिभिस्त्रिभिः परः।
एकं पीताम्बरं तत्र द्वितीयं सर्पमेखलम्॥
एवन्तौ सङ्गिनावस्त्रौ रुद्रनारायणात्मकौ।
अथोत्पातिशयोपेतौ तदा लोकपितामहः॥
उवाच शाम्यतामस्त्रे स्वस्वभावेन सुव्रते।
एवन्ते ब्रह्मणा प्रोक्ते शान्तभावं प्रजग्मतुः॥
तथा विष्णुहरौ ब्रह्मा वाक्यमेतदुवाच ह।
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यतः॥"
इति वराहपुराणम्॥

नारायणी, स्त्री, (नारायणस्येयमिति। नारायण+अण्+ङीप्।) दुर्गा। (यथा, मार्कण्डेये। ८१। ६।
"सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥"
इयं सुपार्श्वस्थपीठस्थाने एतन्मूर्त्त्या विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
लक्ष्मीः। शतावरी। इति हेमचन्द्रः॥ * ॥
तस्या निरुक्तिर्यथा,—
"यशसा तेजसा रूपैर्नारायणसमा गुणैः।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥
अपि च।
"नारायणार्द्धाङ्गभूता तेन तुल्या च तेजसा।
तदा तस्य शरीरस्था तेन नारायणी स्मृता॥"
इति तत्रैव श्रीकृष्णजन्मखण्डे २७ अध्यायः॥*॥
गङ्गा। यथा, तत्रैव।
"गङ्गायै विश्वसुखायै शिवायै शान्तायै नारायण्यै नमः॥"
(यथा च काशीखण्डे। २६। ६७।
"नमोऽङ्गनचरी नृतिर्नम्या नारायणी तुता॥")
सुफलतुनिपत्रौ। इति पुराणम्॥ (स्वनामख्याता श्रीकृष्णसम्बन्धिनी सेना। इयं हि भारतयुद्धे दुर्य्योधनपक्षमाश्रितवती॥)

नारिकेरः, पुं, (नारिकेलः+लस्य रः।) नारिकेलः। इति शब्दरत्नावली॥

नारिकेलः, पुं, (किल स्वैर्थे क्रीड़ने च+भावे घञ्। नार्य्या रमण्याः केल इव सुखदायी केलो यस्य। पृषोदरादित्वात् ह्रस्वः।) स्वनामप्रसिद्धफलवृक्षविशेषः। तत्पर्य्यायः। लाङ्गली२। इत्यमरः।२। ४। १६८॥ नारिकेरः३ नाड़िकेलः४ नारीकेलः५ नारीकेली६ नारिकेरी७। इत्यादि भरतः। नारिकेलिः८ सदापुष्पः९ शिरःफलः१०। इति शब्दमाला॥ नालिकेरः११ रसफलः१२ सुतुङ्गः१३ कूर्च्चशेखरः१४ दृढ़नीलः१५ नीलतरुः१६ मङ्गल्यः१७ उच्चतरुः१८ लवराजः१९ स्कन्धतरुः२० दाक्षिणात्यः२१ दुरारुहः२२ त्राम्बकफलः२३ दृढ़फलः२४। इति राजनिर्घण्टः॥ कूर्च्चशीर्षकः२५ तुङ्गः२६ स्कन्धफलः२७ उच्चः२८ सदाफलः२९। इतिभावप्रकाशः॥ शिराफलः३० करकाभः३१ पयोधरः३२ मत्कुणः३३ कौधिकफलः३४ फलशुष्कः३५ चटाफलः३६ शुष्कफलः३७ विश्वामित्रप्रियः३८। इति शब्दरत्नावली॥ नारकेरः३९ सुभङ्गः४० फलकेसरः४१। इति जटाधरः॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। शीतत्वम्। पित्तनाशित्वञ्च॥ * ॥ अर्द्धपक्वस्य तस्य गुणाः। लघ्वग्नीषशमनत्वम्। दुर्ज्जरत्वञ्च॥ * ॥ बालनारिकेलजलगुणाः। लघुत्वम्। शीतलत्वम्। रसपाके मधुरत्वम्। पित्तशीतसदाम्लविदाहभ्रान्तिशोषशमनत्वम्। सुखदायित्वञ्च॥ * ॥ एकनारिकेलजलगुणाः। किञ्चित्पित्तकारित्वम्। रुचिदत्वम्। मधुरत्वम्। दीपनत्वम्। बलकरत्वम्। गुरुत्वम्। वृष्यत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ * ॥
"नारिकेलफलं शीतं दुर्ज्जरं वस्तिशोधनम्।
विदग्धि वृंहणं बल्यं वातपित्तास्रदाहजित्॥
विशेषतः कोमलनारिकेलं
निहन्ति पित्तोल्वरमम्लदोषान्।
तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः॥
तस्याम्भः शीतलं स्निग्धं दीपनं शुक्रलं लघु।
पिपासापित्तजित् स्वादु वस्तिशुद्धिकरं परम्॥"
तस्य मस्तिष्कगुणाः।
"नारिकेलस्य तालस्य खर्ज्जूरस्य शिरांसि तु।
कषायस्निग्धमधुरं हृद्यानि गुरूणि च॥"
इति भावप्रकाशः॥ * ॥
"बालस्य नारिकेलस्य जलं प्रायो विरेचनम्॥"
इति राजवल्लभः॥ * ॥
कांस्यपात्रे तज्जलं मद्यतुल्यम्। यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥"
इति कर्म्मलोचनम्॥

नारिकेलक्षीरी, स्त्री, (नारिकेलोद्भवा क्षीरी।) सिताशर्कराव्यंसंयुक्तगोदुग्धपक्वक्षीरितनारिकेलखण्डम्। यथा,—
"नारिकेलं तनूकृत्य छिद्रं पयसि गोः क्षिपेत्।
सिताशर्कराव्यंसयुक्तं ततपक्वेक्षुवनाग्निना॥"
तस्या गुणाः।
"नारिकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा।
गुर्व्वी सुमधुरा तृप्या रक्तपित्तानिलापहा॥"
इति भावप्रकाशः॥

नारी, स्त्री, (नृनरस्य वा धर्म्मज्ञा। नृ+"ऋतोऽङ्।" ४।१।६६। इति ङीष्। नर+"नराछेति वक्तव्यम्।" इति वार्त्तिकोक्त्या ङीष्। "ग्रामणीरादयो ङीन्।" ४। १। ७३। इति ङीन्।) नृनरस्य वा धर्म्माचारोऽस्याम्। नृनरस्य वेयम्। नरधर्म्माचारयुक्ता। तत्पर्य्यायः॥ स्त्री २ योषित् ३ अबला ४ योषा ५ सीमन्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११। इत्यमरः। २। ६।२॥ प्रिया १२ रामा १३ अनिः १४ अनी १५

योषिता १६ जोषित् १७ जोषा १८ जोषिता १९ धनिका २० महैलिका २१ महैला २२। इति शब्दरत्नावली॥ शर्ब्बरी २३ योषीत् २४ सिन्दूरतिलका २५ सुभ्रू: २६। इति जटाधर:॥

अस्या उत्पत्तिकारणं यथा,—

"माहरक्तोत्तरा नारी।" अन्यच्च।

"विषमायां तिथौ चित्रं कुर्य्याद्यदि तु कन्यकाम्॥"

इति सुखबोध:॥

तस्याश्चतस्रो जातय:। यथा,—

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।
चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषत:॥"

इति रसमञ्जरी॥

(आसां लक्षणादिकं यद्उक्तं रतिमञ्जर्य्याम्। ३—१३।

"भवति कमलनेत्रा नासिका चारुरन्ध्रा
अविरलकुचयुग्मा चारुकेशी केशाङ्गी।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥
भवति रतिरसज्ञा नातिखर्व्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी।
घनकठिनकुचाढ्या सुन्दरी बह्वशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामीप्रभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया या
नितान्तभोक्त्री करिणी मता सा॥

शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।
शङ्खिनी चारगन्धा च मृगगन्धा च हस्तिनी॥
बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा॥
या षोड़शाद् भवेद्बाला तरुणी चित्रका मता।
पञ्चपञ्चाशका प्रौढ़ा भवेद्वृद्धा तत: परम्॥
फलमूलादिभिर्बाला तरुणी रतियोगत:।
प्रेमदानादिभि: प्रौढ़ा वृद्धा च दृढ़ताड़नात्॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्॥") सा त्रिविधा यथा,—

"योषितस्त्रिविधा ब्रह्मन्! गृहिणां गृहसेवितासु।
साध्वी भोग्या च कुलटा ता: सर्व्वा: स्वार्थतत्पराः।
परलोकभयात् साध्वी तथैव यत्नसात्मन:।
कामस्नेहाच्च कुरुते भर्तु: सेवाञ्च सन्ततम्॥
भोग्या भोग्यार्थिनी शश्वत् कामस्नेहेन केवलम्।
कुरुते पतिसेवाञ्च न च भोग्या दृढ़व्रतम्॥
वस्त्रालङ्कारसम्भोगं सस्निग्धाहारसुत्तमम्।
यावत् प्राप्नोति सा भोग्या तावच्च वशगा प्रिया॥२॥
कुलाङ्गारसमा नारी कुलटा कुलकामिनी।
कपटात् कुरुते सेवां स्वामिनो न च भक्तित:॥
सदा पुंयोगमाशंसुर्मनसा मदनातुरा।
आहारादधिकं जारं प्रार्थयन्ती नवं नवम्॥
जारार्थे स्वपतिं तात! हन्तुमिच्छति पुंश्चली।
तस्यां यो विश्वसेन्मूढ़ो जीवनन्तस्य निष्फलम्॥
कथिता योषित: सर्व्वा उत्तमाधममध्यमा:।
स्वात्मारामा विजानन्ति मनसा तां न पण्डिता:॥"३॥

तस्या: स्वभावो यथा,—

"हृदयं क्षुरधाराभं शरत्पद्मोत्पलं सुखम्।
सुधोपमं सुमधुरं वचनं स्वार्थसिद्धये॥
प्रकोपे विषतुल्यं तदनूहं शीलकुत्सितम्।
दुर्ज्ञेयं तदभिप्रायं निगूढ़ं कर्म्म केवलम्॥
तंदा तासामविनयं प्रबलं साहसं परम्।
दद्यौ कार्य्यच्छलात् कार्य्यं शश्वन्माया दूरत्यया॥
पुंसश्चाष्टगुण: काम: शश्वत्कामो जगद्गुरो!।
आहारो द्विगुणो नित्यं नैर्घृण्यञ्च चतुर्गुणम्॥
कोप: पुंस: षड्गुणश्च अध्यवसायश्च निश्चितम्॥
यत्रैते दोषनिवहा: कास्था तत्र पितामह!।
का क्रीड़ा किं सुखं पुंसो विश्वम्भ्रान्त्याश्रयेऽमुनि॥
तेज: प्रनष्टं सम्भोगे दिवालापे यश:क्षय:।
धनक्षयस्तिप्रीतौ रत्यासक्तौ वपु:क्षय:॥
साहित्यं पौरुषं नष्टं कलहे माननाशनम्।
सर्व्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम्॥
यावद्धनी च तेजस्वी सश्रीको योग्यतापर:।
पुमान्नारीं वशीकर्त्तुं समर्थस्तावदेव हि॥
रोगिणं निर्गुणं वृद्धं योषिन्नाप्नेच्छते प्रियम्।
लोकाचारतया तस्मै ददात्याहारमल्पकम्॥"

इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २३ अध्याय:॥

(नारीचरित्रदूषणकारणानि यथा, हितोपदेशे। १। १३१—१३२।

"स्नातव्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गति:
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा।
संसर्ग: सह पुंश्चलीभिरसकृत् तृप्तेर्निजाया: पतिः
पत्युर्वार्द्धकमीर्षितं प्रवसनं नाशस्य हेतु: स्त्रिया:॥"

अपरञ्च,—

"पानं दुर्ज्जनसंसर्ग: पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगृहे वासो नारीणां दूषणानि षट्॥"

इयन्तु यथानियमं प्रतिपालिता कल्याणकरी श्रीवृद्धिकारिणी च। यदुक्तं मनौ।३।५५—६०।

"पितृभिर्भ्रातृभिश्चैता: पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभि:॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफला: क्रिया:॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम्।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिता:।
तानि कृत्याहतानीव विनश्यन्ति समन्तत:॥
तस्मादेता: सदा पूज्या भूषणाच्छादनाशनै:।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥")

अगम्या नार्य्यो यथा,—

"माता माहस्वसा श्वश्रूर्मातुलानी पितृस्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा॥
भागिनेयी तथा चैव राजपत्नी तथैव च।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च॥
इत्यगम्यास्तु निर्दिष्टास्तासान्तु गमने नर:।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति॥"

इति मत्स्यपुराणे २०१ अध्याय:॥

तस्या: शुभलक्षणं यथा,—

"निगूढ़गुल्फौ पतितौ पद्मकान्तितलौ शुभौ।
अस्वेदिनौ मृदुतलौ मत्स्याङ्कुशकरान्वितौ॥
वज्रालङ्कलक्षिह्नौ च दास्या: पादौ ततोऽन्यथा।
जङ्घे च रोमरहिते सुवृत्ते विभ्रिते शुभे॥
अनुल्बणं सन्धिदेशं समं जानुद्वयं शुभम्।
ऊरू करिकराकारावरोमौ च समौ शुभौ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्।
श्रोणीललाटकं स्त्रीणामुरु कूर्म्मोन्नतं शुभम्॥
गूढ़ो मणिश्च शुभदा नितम्बश्च गुरु: शुभ:।
विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा॥
नाभि: प्रदक्षिणावर्त्ता मध्यं त्रिवलिशोभनम्।
अरोमशौ स्तनौ पीनौ घनाविषमौ शुभौ॥
कठिनारोम उरो वृत्तग्रीवा च कम्बुता।
आरक्तावधरौ श्रेष्ठौ मांसलं वर्त्तुलं सुखम्॥
कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम्।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम्॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा।
नीलोत्पलनिभं चक्षुर्नासंलग्नौ न लम्बकौ॥
न पृथू बालेन्दुनिभे भ्रुवौ चाथ ललाटकम्।
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम्॥
अमांसलं कर्णयुगं समं मृदु समाहितम्।
स्निग्धा नीलाश्च मृदवो मूर्द्धजा: कुञ्चितेक्षणा:॥
स्त्रीणां समं शिर: श्रेष्ठं पादे पाणितले तथा।
वाजिकुञ्जरश्रीवृक्षयूपेषु यवतोमरै:॥
ध्वजचामरमालाभि: शैलकुण्डलवेदिभि:।
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्मभि:।
लक्षणैरङ्कुशाद्यैश्च स्त्रिय: स्यू राजवल्लभा:॥
निगूढ़मणिबन्धौ च पद्मगर्भोपमौ करौ।
न निम्नं नोन्नतं स्त्रीणां भवेत् करतलं शुभम्॥
रेखान्विता: शस्त्रविधिं कुर्य्यात् सम्भोगिनीं स्त्रियम्।
रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे॥
गता पाणितले या च योद्धा पादतले स्थिता।
स्त्रीणां पुंसां तथा सा स्याद्राज्याय च सुखाय च॥
कनिष्ठिका मूलरेखा कुर्य्याच्चैव शतायुषम्।
प्रदेशिनीमध्यमाभ्यामन्तरालगता सती॥
ऊना ऊनायुषं कुर्य्याद्रेखा चाङ्गुष्ठमूलगा।

नारीष्टा

दृष्टय: पुत्रान्वास्तु प्रमदा: परिकीर्त्तिता: ॥
अल्पायुषि लघु छिन्ना दीर्घा छिन्ना महायुषि ।
शुभन्तु लक्षणं स्त्रीणां प्रोक्तं वसुभमन्यथा ।"●॥
तस्या अशुभलक्षणं यथा,—
"कनिष्ठिकानामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गतौ यस्यास्तर्ज्जनी कुलटा च सा ॥
जङ्घाभ्यां पिण्डिकाभ्यां जङ्घे चातिशिरालके ।
रोमशे चातिमांसे च कुभाकारं तथोदरम् ॥
वामावर्त्ते निम्नमध्यं दु:खितानाञ्च गुह्यकम् ।
श्रोण्या हस्या निम्ना दीर्घया च कुलक्षय: ॥
एथुलया प्रचण्डाश्च स्त्रिय: स्युर्नात्र संशय: ।
केकरे पिङ्गले नेत्रे श्यावे लोलेक्षणासती ॥
सिते कूपे गण्डयोश्च सा ध्रुवं व्यभिचारिणी ।
प्रलम्बिनि ललाटे च देवरं हन्ति चाङ्गना ॥
उदरे श्वसुरं हन्ति पतिं हन्ति स्फिचोर्द्वयो: ।
या तु रोमोत्तरोष्ठी स्यान्न शुभा भर्त्तुरेव हि ॥
स्तनौ सरोमावशुभौ कर्णौ च विषमौ तथा ।
करालविषमा दन्ता: क्लेशाय च भयाय च ॥
पौर्य्याय कृष्णमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ।
कथादरूपैर्हसैश्चैव वृककाकादिसन्निभै: ॥
विरालैर्विषमै: शुष्कैर्वित्तहीना भवन्ति हि ।
वसुन्नतोत्तरोष्ठी या कलहे रूक्षकेशिनी ॥
स्त्रीषु दीना विरूपाच्च यत्राकारो गुणस्ततः ।"
इति गरुड़पुराणम् ॥
(अन्यच्चरवृत्तिविशेष: । इति कल्पद्रुमञ्जरी ॥)

नारीकवच:, पुं, (नार्य्या: कवच: सन्नाह इव यस्य ।) सूर्य्यवंशीयमूलकराज: । स च अश्मक-पुत्र: । सौदासपौत्रश्च । "योऽसौ निःक्षत्रे प्रातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विरचिताभि: परिवार्य्य रक्षित: । ततस्तं नारीकवचमुदाहरन्ति ।" इति विष्णुपुराणे । ४ । ४ । ३८ ॥

नारीकेल:, पुं, (किल क्रीड़ने + भावे घञ् । नार्य्या केल इव केलो सम्मोदो यत्र ।) नारिकेल: । इति शब्दरत्नावली ॥

नारीकेली, स्त्री, (नारीकेल + गौरादित्वात् ङीष् ।) नारिकेल: । इति शब्दरत्नावली ॥

नारीचं, क्ली, (नाड़ीच + ङस्य रत्वम् ।) शाक-विशेष: । नालिता इति भाषा ॥ तद्विविधं तिक्तं मधुरञ्च । तिक्तस्य गुण: । रक्तपित्तहर-त्वम् । कृमिकुष्ठविनाशित्वञ्च । मधुरस्य गुणा: । पिच्छिलत्वम् । शीतत्वम् । विष्टम्भिकफवात-कारित्वञ्च । इति राजवल्लभ: ॥

नारीतरङ्गक:, पुं, (नारीं तरङ्गयति चञ्चलचित्तां करोतीति । तरङ्ग + कृतौ णिच् + ण्वुल् ।) विट्ङ्ग: । इति शब्दमाला ॥

नारीदूषणं, क्ली, (नारीणां दूषणम् ।) स्त्रीणां दोष: । स च षड्विध: । यथा,—
"पानं दुर्ज्जनसंसर्ग: पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥"
इति मनु: ॥

नारीष्टा, स्त्री, (नारीणां इष्टा प्रिया ।) मल्लिका । इति राजनिर्घण्ट: ॥

नालिक:

नार्य्यङ्ग:, पुं, (नारीणामङ्गमिव शोभनं अङ्गं यस्य ।) नागरङ्ग: । इति शब्दरत्नावली ॥ (नार्य्या अङ्गे, क्ली ॥)

नालं, क्ली, (नलतीति । नल बन्धे + "क्वलिति-कसन्तेभ्यो घञ्:" ३ । २ । १४० । इति णञ् ।) उत्पलादिदण्ड: । तत्पर्य्याय: । नाला २ । इत्यमर: । २ । ६ । २२ ॥ नाली ३ नालिका ४ । इति भरत: ॥ (यथा, रघु: । ६ । १३ ।
"कञ्चित् कराभ्यामुपगूहनाल-
मालोलपत्त्राभिहतद्विरेफम् ।
रजोभिरन्त:परिवेष्टबन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥"
अर्च्चादित्वात् पुंलिङ्गोऽपि ॥) हरितालम् । इति स्वामी ॥ नले, पुं । इति राजनिर्घण्ट: ॥

नालवंश:, पुं, (नालो वंश इव ।) नल: । इति राजनिर्घण्ट: ॥

नाला, स्त्री, (नल बन्धे + अ: । ततष्टाप् ।) नालम् । इत्यमरभरतौ ॥ डाँटा इति नाड़ा इति च भाषा । (नलति जलादिर्निर्गच्छत्यनयेति । नल + करणे घञ् । जलनिर्गममार्ग: । यथा, मार्कण्डेये । ३ । ४३ ।
"यथा तोयार्थिनस्तोयं यन्त्रनालादिभि: घनै: ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रम: ॥")

नालि:, स्त्री, (नालयतीति । नल + णिच् + इन् ।) नाड़ी । सिरा । इति द्विरूपकोष: ॥

नालिक:, पुं, (नल एव नालस्तृणविशेष: । स भोक्तव्यत्वेनास्त्यस्येति ठन् ।) महिष: । इति त्रिकाण्डशेष: ॥ क्ली, (नालमस्त्यस्येति ।) पद्मम् । इति शब्दरत्नावली ॥ (नाल: कार्य्यसाधनत्वे-नास्त्यस्येति । नाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् । अस्त्रविशेष: । तन्तु आकृतिकार्य्यादिना अधुनातनस्य 'बन्दूक' इति ख्यातस्यास्त्रस्य सादृश्यं लभते । अस्य आकृत्यादिकन्तु शुक्रनीतौ उक्तम् । तद्यथा,—
"अस्त्रन्तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं दृष्टतत्क्षुद्रप्रभेदत: ।
तिर्य्यग्दृङ्निच्छिद्रमूलं नालं पञ्चवितस्तिकम् ॥
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।
यन्त्राघातासहत्वं स्यात्तच्चूर्णैष्टक कर्णमूलकम् ॥
सुकाष्ठोपाङ्गयुग्मञ्च मध्याङ्गुलविलान्तरम् ।
खाग्नेयचूर्णसन्धात्र गोलाकारसंयुतं दृढम् ॥
लघुनालिकमध्येतत् प्रधार्य्यं पत्तिसादिभि: ।
यथा यथा तु त्वक्सारं यथा स्थूलविलान्तरम् ॥
यथा दीर्घं दृढत् गोलं दूरभेदि तथा तथा ।
स्थूलकीलभ्रमात् लक्ष्यसमसन्धानभाजि यत् ॥
दृढन्नालिकसंज्ञन्तत् काष्ठयुग्मविवर्ज्जितम् ।
प्रयात्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदम् ॥"
अस्य कार्य्यं यथा,—
"नालास्त्रं शोधयेदादौ दद्यात्तत्रामिचूर्णकम् ।
निवेश्यवेत्तु दण्डेन गोलमूले यथादृढम् ॥
तत: सुगोलकं दद्यात् तत: कर्णेऽमिचूर्णकम् ।

नालीक:

यन्त्रचूर्णमिदानेन गोलं लक्ष्ये निपातयेत् ॥
लक्ष्यभेदो यथा बाणो धनुर्ज्याविनियोगत: ।
भवेत्तथा तु सन्धाय————————————।")

नालिका, स्त्री, (नाला एव । स्वार्थे कन् । टापि अत इत्वम् ।) नाला । इति शब्दरत्नावली ॥ नालिताशाक: । इति शब्दमाला ॥ (यथा, सुश्रुते । १ । ४६ ।
"वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥")
चर्म्मकषा । इति जटाधर: ॥ हस्तिकर्णवेधनिका । इति हारावली । ३० ॥ (यथा, माघे । १७।३५ ।
"गजा: सहस्रत्करतललोलनालिका
हता मुहु: प्रणदितघण्टमाययु: ॥")

नालिकेर:, पुं, (नारिकेल: । रलयोरैक्यात् रस्य ल: । लस्य रत्वं ।) नारिकेल: । इत्यमरटीकायां रमानाथ: ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथास्य गुणा: ।
"नालिकेरं सुमधुरं गुरुस्निग्धञ्च शीतलम् ।
वृष्यं संदंहणं वस्तिशोधनं रक्तपित्तनुत् ॥
विष्टम्भि पक्वं मतिमन्नपक्वं कफवातलम् ।
दृंहणं शीतलं वृष्यं नालिकेरफलं विदु: ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
अस्य तोयगुणा यथा,—
"नालिकेरोदकं स्निग्धं स्वादु वृष्यं हिमं लघु ।
क्षुत्पिपासानिलहरं दीपनं वस्तिशोधनम् ॥"
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

नालिकङ्ग:, पुं, (रोगकारक: । इति हारावली ।८४॥

नालिता, स्त्री, (नालमिता प्राप्ता ।) स्वनाम-ख्यातशाक: । यथा,—
"नालिता पट्टशाकञ्च मिश्रपत्रे तु नालिका ॥"
इति शब्दमाला ॥
अस्य गुणा: नारीचशब्दे द्रष्टव्या: ॥

नाली, स्त्री, (नालि + वा ङीष् ।) शाककड़-वक: । डाँटा इति भाषा । इति मेदिनी । ले, २८ ॥ हस्तिकर्णवेधनी । घटी । इति त्रिकाण्ड-शेष: ॥ नाड़ी । इत्यमरटीकायां भरत: ॥ (यथा,—
"रसवाहिनीश्च नालीर्जिह्वामूलगलतालुओष्ठान: ।
संशोष्य तृषां देहे कुरुतस्तृषां महावलावेतौ ।
पीतं पीतं हि जलं शोधयतस्तमतो न याति
शमम् ॥"
इति चरके चिकित्सास्थाने चतुर्विंशेऽध्याये ॥)
पद्मम् । इति शब्दरत्नावली ॥

नालीक:, पुं, (नाल्या नलयन्त्रात् कायति शब्दायते इति । के + क: । घोरशब्देन निर्गमनादेवास्य तथात्वम् ।) शर: । (यथा, महाभारते । ३ । ३१०५ । १७ ।
"कर्णिनालीकनाराचाञ्शुतृष्णञ्जो महारथा: ।
नाविध्यन् पाण्डवास्तत्र पश्यन्तो ऽगमन्ति-
कात् ॥"
तथा च शार्ङ्गधरसंगृहीतधनुर्व्वेदे ।
"नालीका लघवो बाणा नलयन्त्रेण नोदिता: ।
अल्पच्छदरपातेषु दुर्गयुद्धेषु ते मता: ॥")

प्रत्याङ्गम्। चक्षुरधर्के, क्ली। इति मेदिनी। के, १२०॥ (न त्रालीकमिति। सत्यम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४२।
"नालीकाश्रयमेतदेव वचनं वाणाश्रयं किं वचः॥")
नालीकिनी, स्त्री, (नालीकमस्त्यस्या इति। नालीक+इनिः। ङीप्।) पद्मसमूहः। इति शब्दरत्नावली॥
नालीव्रजः, पुं, (नालीगतो व्रजः।) नाड़ीव्रणः। इति शब्दरत्नावली॥
नाविकः, पुं, (नावा तरतीति। नौ+"नौद्यच-ष्ठन्।" ४। ४। ७। इति ठन्। नौरस्यस्येति। "प्रज्ञादिभ्यश्च।" ५। २। ११६। इति ठन् वा।) कर्णधारः। इत्यमरः। १। १०। १२॥ (यथा, महाभारते। ८। ७७। ७५।
"भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृताः। भजन्ति पुरुषव्याघ्र! नाविकाः कालपर्य्यये॥")
नाव्यं, त्रि, (नावा तार्य्यम्। नौ+"नौवयो-धर्म्मेति।" ४। ४। ६१। इति यत्।) नौकागम्यदेशादि। इत्यमरः। १। १०। १०॥ (यथा, रघुः। ४। ३१।
"मरुपृष्ठान्युदग्राणि नाव्याः सुप्रतरा नदीः। विपिनानि प्रकाशानि प्रक्षिप्तस्त्वाचकार सः॥")
नवस्य भावः। नव+ष्यञ्।) नवत्वञ्च॥
नाशः, पुं, (नश+भावे घञ्।) पलायनम्। निधनम्। (यथा, महाभारते। १। १२०। १६।
"पित्राद्यादनिर्मुक्तस्तेन तप्ये तपोधनाः। देहनाशे ध्रुवो नाशः पितृणामेष निश्चयः॥")
अनुपलम्भः। अदर्शनम्। इति मेदिनी। शे, ६॥ परिध्वंसः। इति हेमचन्द्रः। २। २३८॥
जीवानां नाशहेतुर्यथा,—
"सङ्गात् संजायते कामः कामात् क्रोधोऽभि-जायते।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥"
इति श्रीभगवद्गीता॥
कुलनाशकारणं यथा,—
"अनृतात् पारदार्य्याच्च तथाभक्ष्यस्य भक्षणात्। अशौचधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अश्रोत्रिये वेददानात् द्रव्येषु तथैव च। विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
नश्यतां पूर्व्वरूपाणि यथा,—
अत्रिरुवाच।
"नश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे। नगराणां तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि॥
गर्ग उवाच।
पुरुषाचारनियमात् परित्यजति देवता। ततोऽपरागाद्देवानामुपसर्गः प्रवर्त्तते॥
दिव्यान्तरीक्षं भौमञ्च विविधं परिकीर्त्तितम्। यद्दृश्यदेवतं दिव्यमन्तरीक्षं निबोध मे॥
उल्कापातो दिशां दाहः परिवेषस्तथैव च। गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता च या। एवमादीनि लोकेऽस्मिन् नाशेष्वानां विनिर्द्दिशेत्॥
परः स्थिरस्तु भूमौ च भूकम्पश्चापि भूमिजः। जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥"
इति मात्स्ये २०३ अध्यायः॥
नाशी, [न्] त्रि, (नाशोऽस्त्यस्येति। नाश+इनिः।) नाशविशिष्टः। नाशशब्दादस्त्यर्थे इनुप्रत्ययनिष्पन्नः॥
नासत्यौ, पुं, (नास्ति असत्यं ययोस्तौ। "नभाग्-नपादिति।" ६। ३। ७५। इति नञः प्रकृति-भावः।) अश्विनीकुमारौ। नित्यद्विवचनान्तो-ऽयम्। इत्यमरः। १।१।५४॥ एतौ सूत्रौ। यथा,
"आदित्याः क्षत्रियास्तेषां विप्रश्च मरुतस्तथा। अश्विनौ च स्मृतौ सूत्रौ तपस्युग्रे समास्थितौ॥
स्मृताश्चाङ्गिरसा देवा ब्राह्मणा इति निश्चयः॥"
इति महाभारते मोक्षधर्म्मः॥
("सन्दृश्य दस्रयोरिन्द्रः कर्म्मारण्येतानि यत्नवान्। आयुर्व्वेदं निरुद्देशं तौ ययाचे शचीपतिः॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ। आयुर्व्वेदं यथाधीतं ददतुः घृतमन्थवे॥
नासत्याभ्यामधीतेन आयुर्व्वेदं घृतव्रतुः। अध्यापयामास बहून्नानाशेयप्रमुखान् मुनीन्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
नासा, स्त्री, (नासते शब्दायते इति। नास शब्दे+"गुरोश्च हलः।" ३। ३। १०३। इति अः। ततष्टाप्। नासतेऽनयेति। नास+करणे घञ् वा।) नासिका। नाक् इति भाषा। सा च गर्भस्थबालकस्य पञ्चभिर्मासैर्भवति। इति सुश्रुतबोधः॥ तस्याः शुभाशुभलक्षणं यथा,—
"शुकनासः सुखी स्याच्च शुष्कनासोऽतिजीववम्। छिन्नाग्ररूपनासः स्यादग्र्यागमने रतः॥
दीर्घनासे च सौभाग्यं चौरे चाकुञ्चितेन्द्रियः। स्त्रीनस्तुधिषिटनासे ऋजुभाग्यवती भवेत्॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे। क्रूरे दक्षिणवक्रा स्यान्नतिनाच्च सुतं सक्तम्॥"
इति गरुड़पुराणम्॥
दारोपरिस्थितदारु। काष्ठ काठ इति कपालि इति च भाषा। इत्यमरः।२। २।१३॥ वासक-वृक्षः। इति राजनिर्घण्टः॥
नासाच्छिन्नी, स्त्री, (छिद+भावे क्तः। नासायां छिन्नं छेदो यस्याः। ङीप्।) पूर्व्विकापत्नी। इति त्रिकाण्डशेषः॥
नासादारु, क्ली, (नासायै यद्दारु। नासैव दारु इति वा।) दारोर्द्दारुस्थितकाष्ठम्। इत्यमर-टीकायां स्वामी॥ कपालि इति भाषा॥
नासारोगः, पुं, (नासाया रोगः।) नासिका-व्याधिः। "अथ नासारोगाधिकारः। तत्र नासा-रोगाणां नामानि संख्याञ्चाह।
आदौ च पीनसः प्रोक्तः पूतिनस्यस्ततः परम्। नासापाकोऽथ गलितः पूयशोणितमेव च॥
क्षवथुर्भेदशुष्कौ च प्रतीनाहः परिस्रवः। नासाशोषः प्रतिश्यायः पञ्च सङ्घाश्च दारुणाः॥
चत्वार्य्यर्शांसि चत्वारः शोथाश्चत्वारितानि च। रक्तपित्तानि नासायां चतुस्त्रिंशद्गदाः स्मृताः॥
तेषु पीनसस्य लक्षणमाह।
आनह्यते शुष्यति यस्य नासा प्रक्लेदमायाति च धूप्यते च। न वेत्ति यो गन्धरसांश्च जन्तु-र्ज्ञेयः क्षवस्येदृश पीनसेन॥
आनह्यते श्लेष्मशोणितकफेनावध्यते क्षवरुद्ध इति यावत्। प्रक्लेदं आर्द्रताम्। धूप्यते सन्ता-प्यते। गन्धरसान् गन्धान् सुरभीनसुरभींश्च न वेत्ति। नासाया आनद्धत्वं तत्र हेतुः। तथा रसान् मधुरादींश्च न वेत्ति। नासारोगा-रम्भकदोषैश्च रसनाया अपि दुष्टेः। क्षवस्येन् जानीयात्। अपीनसपीनसौ द्वावपि ग्रन्थौ स्तः॥ *॥ अनुक्तसंग्रहार्थमाह।
तत्रानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम्।
तं विकारं पीनसं प्रतिश्यायसमानलिङ्गं वात-श्लेष्मकप्रतिश्यायतुल्यलक्षणम्॥
पूतिनस्यमाह।
दोषैर्विदग्धैर्गलतालुमूले सन्दूषितो यस्य समीरणस्तु। निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम्॥
दोषैः पित्तकफरक्तैः। अत्र रक्तस्यापि दोषत्व दोषसाहचर्य्यात्। विदग्धैर्दुष्टैः। संदूषितः पूतिभावं नीतः। पूतिनस्यं नासायां भवो नस्यो वायुः पूतिर्नस्यो यत्र स पूतिनस्यस्तम्॥ *॥
नासापाकमाह।
घ्राणाश्रितं पित्तमरूंषि कुर्य्यात् यस्मिन् विकारे बलवांश्च पाकः। तं नासिकापाकमिति क्षवस्येत् विद्रेदकोपावथवापि यत्र॥
विद्रेद आर्द्रता। कोथः पूतिभावः॥ *॥
पूयरक्तमाह।
दोषैर्विदग्धैरथवापि जन्तो-र्ललाटदेशेऽभिहतस्य तैस्तैः। नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्॥
क्षवथुमाह।
घ्राणाश्रिते मर्म्मणि संप्रदुष्टो यस्यानिलो नासिकया निरेति। कफानुगानो बहुशोऽतिशब्द-स्तं रोगमाहुः क्षवथुं गदज्ञाः॥
घ्राणाश्रिते मर्म्मणि शृङ्गाटके। *॥
दोषं क्षवथुमभिधायागन्तुं क्षवथुमाह।
तीक्ष्णोपयोगादतिनिष्टतो वा भावान् कटूनकंनिरीक्षणाद्वा। कृत्रादिभिर्वा तरुणास्थिमर्म्मे-ष्वभिहतेभ्यः क्षवथुर्निरेति॥
तीक्ष्णोपयोगात् राजिकादिभक्षणात्। अर्क-निरीक्षणात् सूक्ष्मदृश्यत्वात् तेन कफविशेषणात्।

तरुणास्थि नासावंशास्थि। मर्म्मणि शङ्खाटके। द्वन्द्वैकत्वम्। अन्यः आगन्तुजः॥ * ॥

भंग्रथुमाह।

प्रभंग्रते नासिकया तु यस्य
सान्द्रो विदग्धो लवणः कफस्तु।
प्राक् सञ्चितो मूर्द्धनि पित्तसंज्ञे
तं भंग्रथुं व्याधिसुदाहरन्ति॥

दीप्तिमाह।

व्याप्ते भ्रुवं दाहसमन्विते तु
विनिःसरेत् धूम इवेह वायुः।
नासाप्रदीप्तेव च यस्य जन्तो-
र्व्याधिन्तु दीप्तिं तमुदाहरन्ति॥

प्रदीप्तेव प्रज्वलितेव॥ * ॥

प्रतीनाहमाह।

उच्छ्वासमार्गन्तु कफः सवातो
रुन्ध्यात् प्रतीनाहमुदाहरेत्तम्॥

स्रावमाह।

व्याप्याहनः पीतसितस्तनुर्वा
दोषः स्रवेत् स्रावमुदाहरेत्तम्॥

नासाशोषमाह।

व्याप्ताश्रिते श्लेष्मणि मारुतेन
पित्तेन गाढं परिशोषिते च।
क्षुच्छ्वाक्ष्णिसिद्ध्यूर्द्धमधश्च जन्तु-
र्यस्मिन् स नासापरिशोष उक्तः॥

प्रतिश्यायमाह। तस्य निदानं द्विविधम्। एकं सद्योजनकं तद्वल वस्तुन यथं नापेक्षते। यत उक्तम्।

न केवलं चयं प्राप्य दोषाः कुप्यन्ति देहिनाम्।
अन्यदापि हि कुप्यन्ति हेतुवाहुल्यतोरणात्॥

हेतूनां वाहुल्येन त्वराकरणात्। अपरं चयादिक्रमेण जनकम्। चयादिक्रमो यथा। निदानात् सञ्चयः सञ्चयात् प्रकोपः प्रकोपात् प्रसरः प्रसरात् स्थानसंश्रयः। ततो व्यक्तिः। ततो भेद इति॥ * ॥ एत्र प्रतिश्यायस्य सद्योजनकनिदानपूर्व्विकां संप्राप्तिमाह।

संधारणा जीर्णरजोऽति भावात्
क्रोधस्तथैवाम्यशिरोऽभितापैः।
संजागरात्तिस्वपनाम्बुशीता-
वश्यायकैर्मैथुनवाम्यसैकैः॥
संस्थानदोषैः शिरसि प्रदुष्टो
वायुः प्रतिश्यायमुदीरयेत्तु।

सन्धारणा मूत्रपुरीषधारणा। रजो धूलिः। तस्य नासाप्रविष्टं हेतुः। ऋतुवैषम्यं ऋतुचर्य्याविपरीताचरणम्। शिरोऽभितापः शिरसोऽभितापो येन धूमादिना सः। व्यवश्यायः तुषारः। वाम्यसैको रोदनम्। संस्थानदोषैः शिरसि संदूषितकफैः॥ * ॥ चयादिक्रमजनकनिदानपूर्व्विकां संप्राप्तिमाह।

चयं गता मूर्द्धनि मारुतादयः
पृथक् समस्ताश्च तथैव श्लेष्मणम्।
प्रकोप्यमाणा विविधैः प्रकोपकै-
स्ततः प्रतिश्यायकरा भवन्ति हि॥

पूर्व्वरूपमाह।

च्यवप्रवृत्तिः शिरसोऽभिपूर्णता
स्तब्धोऽङ्गमर्दः परिहृष्टरोमता।
क्षुत्प्रद्वेषाच्याप्यपरे पृथग्विधा
वृणां प्रतिश्यायपुरःसरा स्मृताः॥

शिरसोऽभिपूर्णता शिरसो भारेणेव व्याप्तिः। अपरे पृथग्विधाः घ्राणधूमायनतानुविदारणनासासुखस्रावादयो विदेहोक्ता बोद्धव्याः॥ * ॥

वातिकस्य प्रतिश्यायस्य लक्षणमाह।

आनद्धापिहिता नासा तनुस्रावप्रसेकिनी।
गलताल्वोष्ठशीर्षञ्च निस्तोदः शुष्कयोस्तथा।
च्यवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके॥

आनद्धास्रस्रावा। अपिहिता न पिहिता। अतएव तनुस्रावप्रसेकिनी॥ * ॥

पैत्तिकमाह।

उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके।
तप्तोऽतिपाकुः सन्तप्तो भवेदुष्णाभिपीड़ितः।
नासया तु सधूमाग्निं वमतीव स मानवः॥
सपीतकः ईषत्पीतकः॥ * ॥

श्लैष्मिकमाह॥

घ्राणात् कफक्लेदः श्वेतः कफः शीतः सवेदबहुः।
शुक्लावभासः स्तब्धो भवेदुग्धशिरा नरः।
गलताल्वोष्ठशिरसां कण्डूभिरतिपीड़ितः॥ * ॥

सान्निपातिकमाह।

भूत्वा भूत्वा प्रतिश्यायो योऽकस्मात् सन्निवर्त्तते।
संपक्को वाष्पपक्को वा स सर्व्वप्रभवः स्मृतः॥

अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथापि तानि ज्ञेयानि त्रिदोषजत्वात्। अयमसाध्यः। अतएवाह।

वृणां दुष्टः प्रतिश्यायः सर्व्वजश्च न सिध्यति॥

दुष्टप्रतिश्यायलिङ्गमाह।

प्रक्लिद्यति मुहुर्नासा पुनश्च परिमुच्यति।
पुनरायम्यते वापि पुनर्विस्रियते तथा॥
निःश्वासो वाति दुर्गन्धो नरो गन्धान् न वेत्ति च।
एवं दुष्टं प्रतिश्यायं जानीयात् क्षुच्छ्वसाधनम्॥

आयम्यते विवद्धा भवति। विस्रियते अविवद्धा स्यात्। क्लेदशोषविवन्धा नैककालं भवन्ति किन्तु यदा यदा यद्यत् दोषाधिक्यं भवति तदा तदा तत्तद्दोषजतः स स बोद्धव्यः इति न विरोधः। क्षुच्छ्वसाधनं असाध्यं कष्टसाध्यञ्च॥ * ॥

रक्तजमाह।

रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते।
पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः॥
ताम्राक्षश्च भवेत् जन्तुररोचातप्रपीड़ितः।
दुर्गन्धोच्छ्वासवक्त्रश्च गन्धानपि न वेत्ति सः॥
ऊरोघातप्रपीड़ितः ऊरोघातेनेव प्रपीड़ितः॥

अप्रतीकारेण कालान्तरे सर्व्व एव प्रतिश्याया असाध्या भवन्तीत्याह।

सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः।
दुष्टतां यान्ति कालेन तदासाध्या भवन्ति हि॥

प्रतिश्यायेषु क्रमयोऽपि भवन्तीत्याह।

मूर्च्छन्ति क्रमयश्चात्र श्वेताः स्निग्धास्तथाण्डवः।
क्रमितो यः शिरोरोगस्तुल्यं तेनात्र लक्षणम्॥

अत्र एषु प्रतिश्यायेषु कफस्य प्राधान्यात् सर्व्वेषु प्रतिश्यायेषु कफजा एव क्रमयो भवन्तीति॥ * ॥ श्वेताः स्निग्धाश्च वृद्धाः प्रतिश्याया अपरानपि विकारान् कुर्व्वन्ति तानाह।

वाधिर्य्यमान्ध्यमम्लत्वं घोरांश्च नयनामयान्।
श्लोषाग्निमान्द्यकासांश्च वृद्धाः कुर्व्वन्ति पीनसम्॥

घोरांश्च नयनामयान् इति वचनेऽप्यान्ध्यग्रहणं विशेषार्थम्। अम्लत्वं न जिह्वतीत्यम्लस्य भावः अम्लत्वम्॥ * ॥ चतुर्व्विंशतिसंख्यापूरणायाह।

अर्व्बुदं सप्तधा श्लोषाश्चत्वारोऽर्शांसि तुर्व्विधम्।
चतुर्व्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः॥

अर्व्बुदानि सप्त वातपित्तकफसन्निपातरक्तमांसमेदोजानि। श्लोषाश्चत्वारो वातपित्तश्लेष्मसन्निपातजाः। अर्शांसि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। एतानि यथोक्तलिङ्गानि घ्राणेऽपि सम्भवन्ति॥ * ॥ चिकित्सामेदात् पीनसंस्यामस्य लक्षणमाह।

शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः।
श्यामः क्ष्वेडति चाभीक्ष्णमामपीनसलक्षणम्॥

नासास्रावस्तनुस्वरः श्याम इत्यन्वयः॥ * ॥

अथ पक्वस्य पीनसस्य लक्षणमाह।

आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम्॥

आमलिङ्गान्वितः श्लेष्मा आमलिङ्गैः शिरोगुरुत्वादिभिर्युक्तः पश्चात् घनः निविड़ः अथच खेषु नासारन्ध्रेषु निमज्जति सक्तो भवति। वर्णविशुद्धिः श्लेष्मणः प्रकृतिवर्णता॥ * ॥

अथ नासारोगाणां चिकित्सा।

सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु।
मरिचं गुड़ेन दत्त्वा भुञ्जीत नरः सुखं लभते॥१॥
कट्फलं पौष्करं शृङ्गी योषं यासञ्च कारवी।
एषां चूर्णं कषायं वा दद्यादार्द्रकजे रसे॥
पीनसे स्वरभेदे च नासास्रावे शिरोमके।
सन्निपाते कफे वाते कासे श्वासे च शस्यते॥२॥
कलिङ्गहिङ्गुमरिचलाक्षास्वरसकट्फलैः।
कुष्ठोग्राग्निगुणजन्तुघ्नैरवपीड़ः प्रशस्यते॥
पीनसादिषु॥ ३॥
श्लोषचित्रकतालीशगुडत्रिपलिकाम्बुवेतसम्।
सक्षयाजाजितुल्यांशमेलात्वक्पत्रपादिकम्॥
श्लोषादिकमिदं चूर्णं पुराणगुड़मिश्रितम्।
पीनश्वासकासघ्नं रुचिस्वरकरं परम्॥

इति श्लोषादिवटी॥ ४॥

व्याघ्रीदन्तीवचाग्निसुरसाश्लोऽसिन्धुजैः।
सिद्धं तैलं नसि क्षिप्तं पूतिनस्यगदापहम्॥

इति व्याघ्रीतैलम्॥ ५॥

शिग्रुसिंहीनिकुम्भानां बीजैः सश्लोषसैन्धवैः।
विल्वपत्ररसैः सिद्धं तैलं स्यात् पूतिनस्यजुत्॥

निकुम्भा दन्ती। पूतिनस्यजुत् नस्यात्। इति शिग्रुतैलम्॥ ६॥

हृतगुग्गुलुमिश्रस्य सिक्थकस्य प्रयत्नतः ।
धूमं स्रवथुरोगघ्नं भंग्यर्बुदघ्नञ्च निर्दिशेत् ॥ ७ ॥
मुष्टीकुष्ठकणाविल्वद्राक्षाचाकल्ककषायवत् ।
तैलं पक्कमथाज्यं वा नस्यात् स्रवथुनाशनम् ॥८॥
नस्यं हितं निम्बरसाञ्जनाभ्यां
दीप्ते शिरःस्वेदनमल्पशस्तु ।
नस्ये कृते क्षीरजलावसेकान्
शंसन्ति भुञ्जीत च सूपधूपैः ॥ * ॥
नासास्रावे घ्राणयोश्चूर्णमुक्तं
नाड्या देयं ये च पीड़ाश्च पथ्याः ।
तीक्ष्णा धूमा देवदार्व्यम्बिकाभ्यां
मांसं त्याज्यं पथ्यमन्नादिशन्ति ॥ १० ॥
प्रतिश्यायेषु सर्व्वेषु गृहं वातविवर्ज्जितम् ।
वस्त्रेण वारुणात्येन शिरसो वेष्टनं हितम् ॥११॥
विड़ङ्गं सैन्धवं हिङ्गुगुग्गुलुः समनःशिलाः ।
वचेतचूर्णमाघ्रातं प्रतिश्यायं विनाशयेत् ॥१२॥
घृततैलसमायुक्तं शुक्तधूमं पिबेन्नरः ।
मधूमः स्यात्प्रतिश्यायकासहिक्काहरः परः॥१३॥
प्रतिश्यायेषु सर्व्वेषु शीतलं परमौषधम् ।
प्रतिश्याये पिबेद्धूमं सर्व्वगन्धसमायुतम् ॥ १४॥
चातुर्जातकचूर्णं वा क्षौद्रं वा कृष्णजीरकम् ।
कृष्णजीरकमत्र कलौजी ॥ १५ ॥
पुटपक्वं जयापत्रं तैलसैन्धवसंयुतम् ।
प्रतिश्यायेषु सर्व्वेषु शीतलं परमौषधम् ॥
जयात्र विजया भङ्गेति यावत् । शीतलं शुक्तम् ॥ १६ ॥
पिप्पल्याः शिग्रुबीजानि विड़ङ्गमरिचानि च ।
अवपीड़ः प्रशस्तोऽयं प्रतिश्यायनिवारणे ॥१७॥
शिरसोऽभ्यञ्जनैः स्वेदैर्नस्यैर्मन्दोष्णभोजनैः ।
वमनैर्धूतपानैश्च नान्यथा समुपाचरेत् ॥१८॥
कृमिघ्ना ये क्रमाः प्रोक्तास्तान् वै कृमिषु योजयेत् ।
लावणानि कृमिघ्नानि भेषजानि च बुद्धिमान्॥१९॥
रक्तपित्तानि शोथाश्च तथार्शांस्यर्बुदानि च ।
नासिकायां स्युरेतेषां स्वं स्वं कुर्य्यात् चिकित्सितम् ॥
गृहधूमकणादारुवचोरनक्तान्धसैन्धवैः ।
सिद्धं शिखरिबीजेश्च तैलं नास्यार्शसां हितम् ॥"
इति भावप्रकाशे मध्यखण्डे चतुर्थभागः ॥
(अथातो नासारोगविज्ञानीयमध्यायं व्याख्यास्यामः ।
"अवश्यायानिलरजो भाष्यातिस्वप्नजागरैः ।
शौचाल्पोपधानेन पीतेनान्नेन वारिणा ॥
अत्यम्बुपानरमणच्छर्द्दिवाय्वग्न्यादिभिः ।
क्रुद्धा वातोल्बणा दोषा नासायां स्थानतां गताः ॥
जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम् ।
तत्र वातात् प्रतिश्याये सुखस्रोधो भृशं स्रवः ॥
घ्राणोपरोधनिस्तोदस्तब्धशिरोव्यथाः ।
कौटका इव सर्पन्ति मन्यते परितो भ्रुवौ ॥
स्वरसादक्षिरात् पाकः शिग्रिराच्छकफस्रुतिः ।
पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः ॥
नासाग्रपाको रुष्णोष्णस्ताम्रपीतकफस्रुतिः ।
कफात् कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ॥
माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः ।
सर्व्वजो लक्षणैः सर्व्वैरकस्माद्दृष्टिघ्राणिमान् ॥
दुष्टं नासा शिरा प्राप्य प्रतिश्यायं करोत्यरुक् ।
उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता ॥
कण्डूः श्रोत्राक्षिनासासु पित्तोक्तञ्चात्र लक्षणम् ।
सर्व्व एव प्रतिश्याया दुस्तरा यान्त्युपेक्षिताः ॥
यथोक्तोपद्रवाधिक्यात् सर्व्वेन्द्रियतापनः ।
साग्निसादज्वरश्वासकासोरःपार्श्ववेदनः ॥
कृच्छ्रात्यकस्माद्दुष्टो सुखदौर्गन्ध्यशोफकृत् ।
नासिकाक्लेदसंशोषशुद्धिरोधकरो मुहुः ॥
पूयोपमा सितारक्तग्रथिता श्लेष्मसंस्रुतिः ।
मूर्च्छन्ति चात्र क्रमयो दीर्घस्निग्धसिताश्रवः ॥
पक्वलिङ्गानि तेष्वङ्गलाघवं स्रवधोः भ्रमः ।
श्लेष्मा सचिक्कणः पीतो घ्राणञ्च रसगन्धयोः ॥
तीक्ष्णप्राग्योपयोगार्करश्मिसूचिक्षणादिभिः ।
वातकोपिभिरन्यैर्वा नासिका तरुणास्थनि ॥
विघट्टितेऽनिलः क्रुद्धो रुद्धः शब्दाटकं व्रजेत् ।
निवृत्तः कुरुतेऽत्यर्थं स्रवधुं स भृशं स्रवः ॥
शोषयत्रासिकास्रोतः कफञ्च कुरुतेऽनिलः ।
शूकपूर्णाभनासान्तं क्षवाद्युच्छ्वसनन्ततः ॥
स्रुतोऽसौ नासिकाशोषो नासानाहे तु जायते ।
नद्धत्वमिव नासायाः श्लेष्मरुद्धेन वायुना ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ।
पचेन्नासापुटे पित्तं लब्धांसं दाहशूलवत् ॥
सप्राणपाकः सास्रस्तु ततसंज्ञः श्लेष्मसम्भवः ।
अच्छोजलोपमोऽजस्रं विशेषान्निशि जायते ॥
कफः प्रद्रङ्गो नासायाः रुद्धा स्रोतांस्यपीनसम् ।
कुर्य्यात् सघुर्घुरं श्वासं पीनसाधिकवेदनम् ॥
स्रवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका ।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥
रक्तेन नासादग्धेन वाह्यान्तःस्वर्ण्णनासहा ।
भवेद्धूमोपमोच्छ्वासा सा दीप्तिर्हृतेव च ॥
तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात् ।
श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम् ॥
निचयादभिघाताद्वा पूयास्रङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥
पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयेन्मरुत् ।
कफं स शुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥
अर्शोऽर्बुदानि विभजेत् दोषलिङ्गैर्यथायथम् ।
सर्व्वेषु क्षवाच्छ्वसनं पीनसः प्रततं स्रवः ॥
साधुनासिकवादित्वं पूतिनासः शिरोव्यथा ।
अष्टादशानामित्येषां यापयेद्दुष्टपीनसम् ॥"
इत्युत्तरस्थाने एकोनविंशेऽध्याये वाभटेनोक्तम् ॥
"शुद्धसूतं समादाय गन्धभागद्वयं ततः ।
त्रिभागं टङ्कणस्यापि विधभागचतुष्टयम् ॥
पञ्चभागं यथा देयं मरिचस्य प्रयत्नतः ।
शृङ्गवेररसैः पिष्ट्वा गुड़िका पञ्चरक्तिका ॥
अनुपानं हितं योज्यं सर्व्वरोगप्रशान्तये ।
जलदोषोद्भवे रोगे महत्यूर्ध्वे जलोदरे ॥
सन्निपातेषु रोगेषु नासाधाधौ सपीनसे ।
व्रणशोथे व्रणे चैव उपदंशे भगन्दरे ॥
नीड़ीव्रणे ज्वरे चैव नखदन्तविघातके ।
पश्चाष्टतरसो योज्यः सर्व्वरोगप्रशान्तये ॥
इति पश्चाष्टतो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे नासारोगाधिकारः ॥)

नासालुः, पुं, (नासायै अलतीति । अल + उण् ।) कटफलवृक्षः । इति शब्दचन्द्रिका ॥ (कटफलशब्दे विवरणमस्य ज्ञातव्यम् ॥)

नासासंवेदनः, पुं, (संविद्यतेऽनेनेति । सं + विद् + ल्युट् । नासायाः संवेदनः पीड़ादायकः ।) काष्ठीरलता । इति राजनिर्घण्टः ॥

नासिकन्धमः, त्रि, (नासिकां धमति शब्दायमानां करोतीति । नासिका + धमा + "नासिकास्तनयोर्धमेटोः ।" ३ । २ । २६ । इति खश् । "खित्यनव्ययस्य ।" ६ । ३ । ६६ । इति पूर्व्वपदस्य ह्रस्वः । ततो मुम् ।) नासिकां शब्दायमानां करोति यः । नासिकया शब्दकर्त्ता च । नासिकोपपदात् धमधातोः खश् प्रत्यये धमादेशे निष्पन्नः । इति व्याकरणम् ॥

नासिकन्धयः, त्रि, (नासिकां नासास्थजलं धयति पिबतीति । नासिका + धे ट पाने + "नासिकास्तनयोर्धमेटोः ।" ३ । २ । २६ । इति खश् । ततो पूर्व्वपदस्य ह्रस्वत्वं च ।) नासिकया पिबति यः । नासिकया पानकर्त्ता । नासिकोपपदाद्धेटधातोः खश् प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

नासिका, स्त्री, (नासते शब्दायते इति । नास शब्दे + "खुलृचौ ।" ३ । १ । १३३ । इति खुल् । टापि अत इत्वम् ।) घ्राणेन्द्रियम् । नाक् इति भाषा । तत्पर्य्यायः । घ्राणम् २ गन्धवहा ३ घोणा ४ नासा ५ । इत्यमरः । २ । ६ । ८६ ॥ शिङ्घिणी ६ । इति राजनिर्घण्टः ॥ नासिक्यम् ७ नस्या ८ गन्धनाली ९ गन्धवन्या १० नक्रा ११ । इति शब्दरत्नावली ॥ (यथा, मनुः । २ । ६० ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥")
तस्याः शब्दो द्योतकारः । यथा,—
"शृयात् रावणं हत्वा तत्पत्नीं मैथिलीं वानरः ।
नासायूथैस्तु द्योतकारैर्विशङ्कैर्वायुसेवकैः ॥"
इति नारसिंहे ४५ अध्यायः ॥

नासिकामलं, क्ली, (नासिकाया मलम् ।) नासास्थितमलम् । शिङ्कनि इति भाषा । तत्पर्य्यायः । शिङ्घाणकम् २ शिङ्घाणम् ३ शिङ्कणम् ४ । इति शब्दरत्नावली ॥ सिंहानम् ५ । इति भरतः ॥

नासिक्यं, क्ली, (नासिका एव । नासिका + स्वार्थे ष्यञ् ।) नासिका । इति त्रिकाण्डशेषः ॥ (त्रि. नासिका + "वृन्दारकेति ।"४ । २ । ८० । इति संज्ञायादित्वात् ष्यञ् । नासिकानिवृत्तादौ ॥ नासिकायां भवम् । "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् । नासाभवे च ॥)

नासिक्यकं, क्ली, (नासिक्यमेव। नासिक्य + स्वार्थे कन्।) नासिका। इति शब्दमाला॥

नासिक्यौ, पुं, (नासिकायां भवौ। नासिका + "शरीरावयवात् यत्।"५। १। ६। इति यत्।) अश्विनीकुमारौ। द्विवचनान्तोऽयम्। इति हेमचन्द्रः। २। ६६॥

नासीरं, क्ली, (नास् शब्दे + भावे क्विप्। नासा शब्देन ईर्त्ते गच्छतीति। ईर गतौ + कः। जयशब्दानुचारणेन गमनादेवास्य तथात्वम्।) नायकस्यायेसारिका सेना। (यथा, श्रीकण्ठचरिते। २१। ४४।

"नासीरपार्श्वदभटेषु सतः प्रतोली
लोलीकृतासिषु हठादधिरूढवत्सु।
वामभ्रुवः पुरपुरेष्वभवन्नकाण्डे
मद्या भियेव निजवाष्पजलद्रवेषु॥

तथा च, राजेन्द्रकर्णपूरे। ३६।

"नासीरप्रसरन्ति दिक्परिसरे भूमण्डले मौक्तिक-
प्रस्तारन्ति सुधाकरन्ति गगनोत्सङ्गे भवत्-कीर्त्तयः॥")

अग्रसरे, पुं। इति शब्दरत्नावली॥

नास्ति, व्य, अस्तित्वाभाववत्। अविद्यमानता। इति नास्तिकताशब्दटीकायां भरतः॥ नाइ इतिभाषा। यथा, चाणक्ये,

"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः॥"

नास्तिकः, पुं, (नास्ति परलोक ईश्वरो वेति मतिर्यस्य। "अस्तिनास्तिदिष्टं मतिः।" ४।४।६०। इति ठक्। यद्वा, नास्ति परलोको यज्ञादिफलं ईश्वरो वेत्यादिवाक्येन कायति शब्दायते इति। कै शब्दे + कः।) पाषण्डः। ईश्वरनास्तित्ववादी। वेदाप्रामाण्यवादी। (यथा, मनुः। २। ११।

"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।
स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः॥"

तथा च तत्रैव। ३। १५०।

"ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥"

तथाच तत्रैव। ८। २२, ३०६।

"यदाहं मूढभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनयग्राह्यात्तु तनुज्ञतुरं दुर्भिक्षव्याधिपीडितम्॥"

"अनपेक्षितमर्य्यादं नास्तिकं विप्रलुम्पकम्।
अरक्षितारमत्तारं नृपं विद्यादधोगतिम्॥")

तत्पर्य्यायः। वार्हस्पत्यः २ चार्व्वाकः ३ लौकायतिकः ४। इति हेमचन्द्रः। ३। ५२६॥ स च षड्विधः। माध्यमिकः १ योगाचारः २ सौत्रान्तिकः ३ वैभाषिकः ४ चार्व्वाकः ५ दिगम्बरः ६॥

नास्तिकता, स्त्री, (नास्तिकस्य भावः। नास्तिक + तल्।) कर्म्मफलापवादकज्ञानम्। तत्पर्य्यायः। मिथ्यादृष्टिः २। इत्यमरः। १। ५। ४॥ "नास्ति यज्ञफलं नास्ति परलोक इत्यादिकं कायति नास्तिकः। सदसत्त्वे अस्ति नास्तीत्यव्ययं के शब्दे डः। नास्तीति मन्यते इति ण्विको वा तस्य भावो नास्तिकता त्वतौ भावे इति तः। नास्ति सुकृतं नास्ति परलोक इति बुद्धिर्नास्तिकता।" इति भरतः॥ (यथा, महाभारते। १२। १२३। १५।

"प्रज्ञानाज्ञात्मको मोहस्तथा धर्म्मार्थनाशकः।
तस्मान्नास्तिकता चैव दुराचारश्च जायते॥")

नास्तिदः, पुं, आम्रवृक्षः। इति शब्दचन्द्रिका॥

नास्यं, त्रि, नासायां भवम्। (नासा + "शरीरावयवात् यत्।"५। १। ६। इति यत्।) नासाभवम्। यथा, मनुः। ८। २६१।

"छिन्ननासे भिन्नयुगे तिर्य्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च॥"

नाहः, पुं, (नह बन्धने + भावे घञ्।) बन्धनम्। कूटम्। इति मेदिनी। हे, ५॥

नाहुषः, पुं, (नहुषस्य अपत्यं पुमानिति। नहुष + "अत इञ्।" ४। १। ६५। इति इञ्।) ययातिराजः। इति भूरिप्रयोगः॥

नि, व्य, उपसर्गविशेषः। अस्यार्था यथा। निषेधः। निश्चयः। इति मुग्धबोधटीकायां दुर्गादासः॥ निषेधः। भृशार्थः। नित्यार्थः। संशयः। क्षेपः। कौशलम्। उपरमः। सामीप्यम्। आश्रयः। दानम्। मोक्षः। अन्तर्भावः। बन्धनम्। राशब्धीभावः। विन्यासः। इति मेदिनी। ने, ४०॥

निः, [र्] व्य, (तृणातीति। नॄ नये + क्विप्। "ऋत इद्धातोः।" ७। १। १००। इति धातोरङ्गस्य इत्।) निर्णयः। निषेधः। इति मेदिनी। रे, ६६॥ (अभावः। यथा, हरिवंशे। भविष्यपर्व्वणि। ८। ८७।

"नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनम्।
निर्व्यातस्थो यथा दीपः प्रोच्चरेत् प्रणवं सदा॥")

निः, [स्] व्य, निश्चयः। निषेधः। साकल्यम्। अतीतम्। इति मेदिनी। से, ८०॥

निःकासितः, त्रि, (निर् वा निस् + कस् + णिच् + क्तः।) निष्कासितः। बहिष्कृतः। से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःक्रामितः, त्रि, (निर् वा निस् + क्रम + णिच् + क्तः।) निष्क्रामितः। इत्यमरटीकायां भरतसुन्दरी॥

निःक्षत्रः, त्रि, (निर्गतं क्षत्रः क्षत्रियो यत्र।) क्षत्रियशून्यदेशादि। यथा,—

"अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान्।
निःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम्॥"

इति श्रीभागवतप्रथमस्कन्धः॥

निःप्रभः, त्रि, निष्प्रभः। निर्गतो प्रभा यस्येति समासे से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःश्लब्दः, त्रि (निर्गतः शब्दो यस्मात्।) शब्दरहितः। चुप् इति भाषा॥ यथा, मार्कण्डेयपुराणे।

"निःशब्दं कारयित्वा तत्सदः प्राह महासुनेः॥"

(यथा च हठयोगप्रदीपिकायाम्। ४। १०१।

"तावदाकाशसंकल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत् परं ब्रह्म परमात्मेति गीयते॥")

निःशलाकः, त्रि, (निर्गता शलाका यस्मात् शलाकाया निर्गतो वा।) रहः। निर्ज्जनम्। इत्यमरः। २। ८। २२॥

निःशल्या, स्त्री, (निर्गतं शल्यं यस्याः।) दर्भीवृक्षः। इति राजनिर्घण्टः॥

निःशूकः, पुं, (निर्गतं शूकं यस्य।) शुष्कधान्यादिः। इति राजनिर्घण्टः॥

निःशेषं, त्रि, (निर्गतः शेषो यस्मात्।) समस्तम्। सम्पूर्णम्। इत्यमरः। ३। १। ६५॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ३२।

"उच्छिन्नसर्व्वसङ्कल्पो निःशेषाशेषचेष्टितः।
स्वावगम्यो लयः कोऽपि जायते वागगोचरः॥")

शेषरहितश्च॥

निःशोधं, त्रि, (निर्गतं शोधं यस्मात्। शोध्यान्निर्गतमिति वा। निरादय इति समासः।) शोधितम्। शुद्धम्। इत्यमरः। ३। १। ५६॥

निःश्रयणी, स्त्री, (निर्निश्चितं श्रीयते आश्रीयते ऽनयेति। श्रि + करणे ल्युट्। टित्त्वात् ङीप्।) काष्ठघटितसोपानम्। काठेर सिड़ी इति भाषा। तत्पर्य्यायः। निःश्रेणिः २ अधिरोहिणी ३ निःश्रेणी ४ निःश्रयिणी ५। इति शब्दरत्नावली॥

निःश्रयिणी, स्त्री, (निःश्रयति आश्रयति प्राङ्नादिस्थानमिति। श्रि + णिनि + ङीप्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेणिः, स्त्री, (निर्निश्चिता श्रेणिः सोपानपङ्क्तिः यत्र।) अधिरोहिणी। (यथा, रघुः। १५। १००।

"चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम्॥")

खर्ज्जूरीवृक्षः। इति मेदिनी। णे, ५७॥ (पुं, घोटकविशेषः। यथा, नकुलकृताश्वचिकित्सिते ४ अध्याये।

"उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः।
निःश्रेणिः स तु विज्ञेयो राष्ट्रवृद्धिकरः परः॥")

निःश्रेणिका, स्त्री, (निःश्रेणिरिव कायतीति। कै + कः। टाप्।) लतविशेषः। निःश्रेणी इति कोङ्कणे प्रसिद्धा। तत्पर्य्यायः। श्रेणिबला २ निरसा ३ वनवल्लरी ४। अस्या गुणाः। नीरसत्वम्। उष्णत्वम्। पशुनामबलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (निःश्रेणिरेव। स्वार्थे कन्। अधिरोहिणी। यथा, देवीभागवते। ४।१३।४०।

"मानुष्यं दुर्लभं प्राप्य सेविता न महेश्वरी।
निःश्रेणिकाप्यात् पतिता अध इत्येव विद्महे॥")

निःश्रेणी, स्त्री, (निःश्रेणि + स्वार्थिकारादिति वा ङीष्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेयसं, क्ली, (निर्निश्चितं श्रेयः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) शुभम् । (यथा, भागवते । १।३।४० । "इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमश्लोकचरितं चकार भगवानृषिः । निःश्रेयसाय लोकस्य धन्यं स्वस्ययनं परम् ॥") मोक्षः । (यथा, मनुः । १२ । ८३ । "वेदाभ्यासस्तपोज्ञानमिन्द्रियाणाञ्च संयमः । अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥") विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयसः, पुं, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःश्वसं, श, (निर्गतं श्वसं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्ययीभावत्वम् । सुविनिर्दुर्भ्यः इति षत्वम् ।) निन्दा । तत्पर्य्यायः । गर्ह्यम् । दुःषसम् ३ । इत्यमरः । ३ । ४ । १४ ॥ श्लोकः । इति शब्दरत्नावली ॥

निःसङ्गः, त्रि, (निर्नास्ति सङ्गो यत्र ।) मेलनरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।

"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरोगो सुधितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥"

फलानभिनिवेशवान् । यथा,—

"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुतिः ॥"

इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धिः, त्रि, (निर्नास्ति सन्धिर्यत्र ।) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः, पुं. (निर्नास्ति सम्पातो गमनागमनं यत्र ।) निर्द्वारः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८० । १३—१४ ।

"तेन दुष्प्रचारेण दूषितं तद्वनं महत् ।
न वृभिर्गोधनैर्वापि सेव्यते वनवृत्तिभिः ।
निःसम्पातः कृतः पन्थास्तेन तद्विषयाश्रयः ॥")

निःसरणं, क्ली, (निर्+सृ+ल्युट् ।) मरणम् । उपायः । गेहादिसुखम् । निर्व्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ४ । २ । २८ ।

"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पुं, (निर्गतः सारो यस्मात् ।) प्राखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्लेष्मातकप्रभेदः । इति राजनिर्घण्टः ॥ साररहिते, त्रि । यथा,—

"मानुष्ये कदलीस्तम्बनिःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"

इति सुहितत्त्वम् ॥

"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते क्षणादेतत् क्षणादेतद्विपद्यते ॥
यथैवोत्पद्यते सारान्निःसारं जगदङ्गसा ।
पुनस्तस्मिन् विलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः ।
शम्भवे दर्शयामास भावेन जगतां पतिः ॥"

इति कालिकापुराणे २७ अध्यायः ॥

निःसारणं, क्ली, (निर्+सृ+णिच्+भावे ल्युट् ।) निःसरणम् । (निःसार्य्यतेऽनेनेति । निर्+सृ+णिच्+करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमादिपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, (निर्नास्ति सारो यस्याः ।) कदलीवृक्षः । इति राजनिर्घण्टः ॥

निःसारितः, त्रि, (निर्+सृ+णिच्+कर्म्मणि क्तः ।) बहिष्कृतः । तत्पर्य्यायः । अवक्षुतः २ निष्कासितः ३ । इति जटाधरः ॥ सारभावयुक्तश्च ॥

निःस्नेहः, त्रि, (निर्नास्ति स्नेहो यस्य ।) स्नेहशून्यः । यथा । निःस्नेहं कीटदूषितमित्यादि स्मृतिः ॥ (यथा, रामायणे । २ । ४८ । ७ ।

"अहो दशरथो राजा निःस्नेहः सुतं प्रति॥"

रसहीनः । यथा, मनुः । ५ । ८७ ।

"नारं शुष्कानि सर्व्वाणि स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥"

तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ६१ ।

"शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा, स्त्री, (निर्गतः स्नेहः रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।

"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥")

निःस्रावः, पुं, (निःस्रवतीति । निर्+स्रु+घञ् ।) भक्तरसः । भक्तसंसृज्यमण्डः । माड़ इति फेन इति च भाषा ॥ तत्पर्य्यायः । आयामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्वः, त्रि, (निर्नास्ति स्वं धनं यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४८ ॥ तस्य लक्षणं यथा,—

"स्फुटाकारौ विरूक्षौ च वक्रौ पादौ शिरालकौ ।
संशुष्कौ पाण्डरनखौ निःस्वस्य विरलाङ्गुली ॥"

इति गारुडे सामुद्रकम् ॥

ज्ञातिरहितश्च ॥

निकटं, त्रि, (नि समीपे कटतीति । नि+कट+अच् ।) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीड़म् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्यासः ६ सवेशः ७ अन्तः ८ अन्तिकः ९ समर्य्यादः १० सदेशः ११ अभ्यसः १२ अभ्यर्णः १३ सविधा १४ उपकक्षः १५ अभितः १६ । इति शब्दरत्नावली ॥ (यथा, प्रायश्चित्ततत्त्वे । ३ । २ ।

"दिवसरजनीकूलच्छेदैः पतद्भिरहर्मुखं
वहति निकटे कालः स्रोतःसमरयावहम् ।
इह हि पततां नाद्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोयं मोहो यदेष मदाविलः ॥"

तद्वैदिकपर्य्यायः । तलिन् १ आसान् २ अम्बरम् ३ ओर्व्वसे ४ अन्तमीकेऽ५ आकेह् उपाके ७ अन्तिके ८ अन्तमागाम् ९ अवमे १० उपमे११ । इत्येकादशप्रान्तिकनामानि । इति वेदनिघण्टौ २ अध्यायः ॥

निकरः, पुं. (निकरोति व्याप्नोतीति । नि+कृ+अच् ।) समूहः । इत्यमरः ।२ । ५ । ३६ ॥ (यथा, कलाविलासे । २ । १६ ।

"इत्यादिसुग्धबुद्धेरसमञ्जसवर्णनं रहः श्रुत्वा ।
यज्ञाति कनकनिकरं तृणंस्तत्तत्यजे रोषः पापः ॥")

सारः । न्यायदेयधनम् । निधिः । इति मेदिनी । रे, १७२ ॥

निकर्षणं, क्ली, (निर्नास्ति कर्षणं यत्र ।) सन्निवेशः । इत्यमरः । २ । ३ । १६ ॥ पत्तनादिषु दिगादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पूर्व्वदिगाद्यवच्छिन्नग्रहाणामपीति कलिङ्गः ॥ पुराद्यैर्बहिर्निहरणभूमिः । इति स्वाम्यादयः ॥ प्राङ्गणादिसन्निवेशः । इति सारसुन्दरी ॥

निकषः, पुं, (निकषति घिनष्टि स्वर्णादिकं यत्रेति । नि+कष+"गोचरसञ्चरेति ।" ३ । ३ । १९ । इति घकारात् घः ।) ग्रावा । इत्यमरः । २ । १० । ३२ ॥ कष्टिपातर इति भाषा) (यथा, रघुः । १७ । ४६ ।

"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥") ।

निकषा, स्त्री,(निकषति घिनष्टीति । कष हिंसे+पदाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्यमरः ॥ सा सुमालिकन्या विश्रवसो भार्य्या च । इति रामायणम् ॥

निकषा, अ, (नि+कष गतौ+"आ; समिनिकषिभ्याम् ।" उणा । ४ । १७४ । इति आः ।) निकटम् । इत्यमरः । ३ । ४ । १६ ॥ (यथा, माघे । १ । ६८ ।

"पयोधिमावद्धजलज्वलाविलां
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")

मध्यम् । इति मेदिनी । षे, ७६ ॥

निकषात्मजः, पुं, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥

निकषः, पुं, (निकषति घिनष्टि स्वर्णादिकं यत्र । नि+कस+घः ।) निकषः । इत्यमरटीकायां भरतः ॥

निकामं, क्ली, (नि+कम इच्छायाम्+घञ् ।) इष्टम् । यथेप्सितम् । इत्यमरः । २ । ६ । ५७ ॥ (यथा, देवीभागवते । १ । ७ । ४० ।

"कुर्व्वन्ति देवि ! भवनं सकलं निकाम
मात्मा समस्तजननी किल कामधेनुम् ॥")

निकायः, पुं. (निचीयते इति । नि+चि+"सङ्घे चानौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः ।) लक्ष्यम् । सधर्म्मिप्राणिसंघातः । (यथा, महाभारते । १ । १२३ । ४५ ।

"तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम्॥")

संहतानां समुच्चयः। (यथा, श्रीकण्ठचरिते। ६। १८।
"नीरन्ध्रनिर्यत्सुमनोनिकाय-
काषायपट्टप्रभयादशोकः॥")
निलयः। (यथा, मनुः। १। ३६।
"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः॥")
परमात्मा। इति मेदिनी। ये, ८७॥
निकाय्यः, पुं, (निचीयतेऽस्मिन् धान्यादिकमिति। नि+चि+"पाय्यसांनाय्यनिकाय्येति।" ३। १। १२६। इति ण्यत्प्रत्ययेन निपातनात् साधुः।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, भट्टिः। ६। ६६।
"न प्रणाश्यो जनः कश्चिन्निकाय्यं तेऽधितिष्ठति।
देवकार्यविघाताय धर्म्मद्रोही महोदये॥")
निकारः, पुं, (नि+कृ+घञ्।) विप्रकारः। अपकारः। उत्कारः। धान्यस्योर्द्ध्वोपणम्। इत्यमरभरतौ॥ खलीकारः। इति स्वामी॥ धिक्कारः। इति शब्दमाला॥
निकारणं, क्ली, (निकारयति क्षिप्रमनेनेति। नि+कृ+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११२॥
निकाषः, त्रि, (निकाषते शोभतेऽनेन इति। काष दीप्तौ+करणे घञ्।) नीकाशः। इत्यमरटीका॥ (तालव्यशकारान्तोऽपि दृश्यते॥)
निकुञ्चकः, पुं, (निकुञ्चतीति। नि+कुञ्च कौटिल्ये+ण्वुल्।) परिमाणविशेषः। कुड़वपादः। स च प्रस्थ इति ख्यातः। इति भरतधृतसर्व्वस्वम्॥ वानीरवृक्षः। इति भावप्रकाशः॥ (जलवेतसः। तत्पर्य्यायो यथा,—
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
निकुञ्चितं, क्ली, (नि+कुञ्च+क्तः।) अङ्गहारान्तर्गतशिरोविशेषः। यथा,—
"आकम्पितं कम्पितञ्च धुतं विधुतमेव च।
परिवाहितमाधूतमवधूतं तथाञ्चितम्॥
आकुञ्चितं परावृत्तसृतविप्रकीर्णकम्।
लोलितं प्रलतञ्चेति चतुर्दशविधं शिरः॥"
इति सङ्गीतदामोदरः॥
निकुञ्ज, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति। जन्+डः। पृषोदरादित्वात् समासमे साधुः।) कुञ्जम्। इत्यमरः। २। ३। ८॥ (यथा, आर्य्यासप्तशत्याम्। ४६३।
"रचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति साधवम्।
पर्य्युषितमपि सुलीक्ष्णाम्लकटुलं वधूरत्नम्॥")
निकुञ्जिकाम्बा, स्त्री, (निकुञ्जिका कुञ्जोद्भवा अम्बा।) कुञ्जिकावृक्षभेदः। तत्पर्य्यायः। कुञ्जिका २ कुञ्जवल्लरी ३ इयं गुणैः श्रीवल्लीसदृशी। इति राजनिर्घण्टः॥
निकुम्भः, पुं, कुम्भकर्णपुत्रः। (यथा, रामायणे। ६। ७५। ४६।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ।
प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह॥")
दन्तिकाष्ठवृक्षः। इति मेदिनी। मे, १७॥
(अस्य पर्य्यायो यथा,—
"चित्रादन्ती निकुम्भः स्यादुपचित्रा सुकूलकः।
दाक्षायणी विशल्या च तथोडुम्बरपर्ण्यपि॥"
इति वैद्यकरत्नमालायाम्॥)
(प्रह्लादस्य पुत्रविशेषः। यथा, महाभारते। १। ६५। १६।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत!।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत!॥")
दनोः पुत्राणामन्यतमः। यथा, तत्रैव। १। ६५। २५।
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः॥"
खनामख्यातः क्षत्रियविशेषः। इति सह्याद्रिखण्डे। ३४। ४४॥ महादेवस्य पार्श्वानुचरविशेषः। यथा, हरिवंशे। २६। ७५।
"पार्श्वे तिष्ठन्तमासाद्य निकुम्भमिदमब्रवीत्।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु॥"
तथा च रघुः। २। ३५।
"अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्॥"
स्कन्दस्य सैनिकविशेषः। यथा, महाभारते। ६। ४५। ५३।
"इमानि नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः।
विविधायुधसन्नद्धाश्चित्राभरणवर्म्मिणः।
शङ्खकर्णो निकुम्भश्च पद्मः कुमुद एव च॥"
हर्य्यश्वपुत्रविशेषः। यथा, हरिवंशे। १२। २।
"धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्य चात्मजः।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्रधर्म्मरतः सदा॥")
निकुम्भाख्यबीजं, क्ली, (निकुम्भाख्यस्य दन्तिकाष्ठस्य बीजवत् बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥ (जयपालशब्दस्यास्य गुणादिकं ज्ञेयम्॥)
निकुम्भितं, क्ली, वृत्यविषयकाधोत्तरशृतकरणान्तर्गतकरणविशेषः। यथा, सङ्गीतदामोदरे।
"करणानान्तु सर्व्वेषां सामान्यं लक्षणञ्चिदम्।
प्रायो वामकरो यत्नःस्थितोऽन्यः पुरतोऽनुगः॥
पादाभ्यां करणं ज्ञेयं तदिहाधोत्तरं शृतम्।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम्॥
विद्युद्भ्रान्तं गजक्रीड़ं क्रान्तञ्च गरुड़प्लुतम्॥"
निकुम्भी, स्त्री, (निकुम्भ+गौरादित्वात् ङीष्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥
निकुरम्बं, क्ली, (निकुरतीति। नि+कुर+बाहुलकात् अम्बच्।) समूहः। इत्यमरः। २। ५। ४०॥ (पुंलिङ्गेऽपि दृश्यते। यथा, श्रीकण्ठचरिते। १८। ४०।
"आरक्तगण्डरुचिविद्रुमदण्डभाजो
यस्याक्षि पेतनिकुरम्ब इवाट्टहासः॥")
निकृतः, त्रि, (नि+कृ+क्तः।) प्रत्याख्यातः। शठः। इत्यमरः। ३। १। ४६॥ वञ्चितः। नीचः। इति मेदिनी। ते, ११६॥
निकृतिः, स्त्री, (नि+कृ+क्तिन्।) भर्त्सनम्। क्षेपः। शठः। शाठ्यम्। इति मेदिनी। ते, ११६॥ (यथा, किराते। १। ४५।
"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधाम्नः॥")
दैन्यम्। इति शब्दरत्नावली॥
निकृष्टः, त्रि, (नि+कृष+क्तः।) अधमः। इत्यमरः। ३। १। ५४॥ जात्याचारादिनिन्दितः। इति भरतः॥
निकेतः, पुं, (निकेतति निवसत्यस्मिन्निति। नि+कित निवासे+अधिकरणे घञ्।) निकेतनम्। इत्यमरटीकायां भरतः॥ (यथा, देवीभागवते। ४। ११। १२।
"तदस्य विनयं कृत्वा सामपूर्व्वं कृतेन वै।
तिष्ठध्वं खनिकेतेषु मदागमनकाङ्क्षया॥")
निकेतनं, क्ली, (निकेतति निवसत्यस्मिन्निति। नि+कित+अधिकरणे ल्युट्।) गृहम्। इत्यमरः। २। २। ४॥ (यथा, देवीभागवते। १। २०। ४२।
"विसर्ज्जितश्च सा तेन गता शाखनिकेतनम्।
उवाच तं वरारोहा राजानं मनसेप्सितम्॥")
पलाण्डौ, पुं। इति शब्दचन्द्रिका॥
निकोचकः, पुं, (निकोचति शब्दायते। नि+कुच शब्दे+ण्वुल्।) अङ्कोठवृक्षः। इत्यमरः। २। ४। २६॥ (यथा, सुश्रुते। १। ४६।
"वातामाषोड़ाभिषुककनिषुलपिचुनिकोचकोरुमाणशम्यष्टतीनि॥" क्वचित् क्लीवलिङ्गेऽपि दृश्यते। यथा,—
"वातामाषोड़ाभिषुकं सकूलकनिकोचकम्।
उरुमाणं प्रियालञ्च दृढ़ञ्च गुरुशीतलम्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)
निकोठकः, पुं, (निकोचकः+पृषोदरादित्वात् चस्य ठः।) निकोचकः। इत्यमरटीकायां भरतः॥ (यथा,—
"तिलः प्रियालाभिषुकौ विभीतकाश्चित्राभयेरण्डमधूकसर्षपाः।
कुसुम्भविल्वारुकमूलकातसी-
निकोठकाक्षोड़करञ्जिगुग्गुलाः॥
क्षेड़ाग्र्यशाखावरसंज्ञितास्तथा-
स्युर्ज्जङ्गमा मत्स्यमृगाः सपक्षिणः॥"
इति चरके सूत्रस्थाने त्रयोदशेऽध्याये॥)
निक्कणः, पुं, (नि+क्कण शब्दे+"क्कणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणाया अन्यस्य च किन्नरादेः शब्दः। तत्पर्य्यायः। निक्काणः २ क्काणः ३ क्कणः ४ क्कणनम् ५। इत्यमरः। १। ७। २४॥ प्रादेरप्युपसर्गादुत्तरस्य क्कणधातोः प्रक्काणः ६ प्रक्कणः ७ इत्यादयः प्रयोगा भवन्ति। आदिना सुक्काणः सुक्कणः उपक्काणः उपक्कणः इत्यादयः। इति भरतः॥

निकायः, पुं, (नि + कै शब्दे + पचे घञ् ।) निकरः । इत्यमरः । १ । ७ । २४ ॥

निखर्ब्ब, क्ली, (निखर्ब्बति वहुलसंख्यां गच्छतीति । नि + खर्ब्ब गतौ + पचाद्यच् ।) दशखर्ब्बसंख्या । दशसहस्रकोटयः । इति लीलावती हेमचन्द्रश्च । (यथा, महाभारते । २ । ६१ । ३ । "शङ्खश्चैव महापद्मं निखर्ब्बं कोटिरेव च ॥") पुंलिङ्गोऽप्ययम् । यथा । वृन्दः खर्ब्बो निखर्ब्बश्चेत्यादि ॥

निखर्ब्बः, त्रि, (नितरां खर्ब्बः ।) वामनः । इति हेमचन्द्रः । ३ । ११८ ॥

निखिलं, त्रि, (निष्टत्तं खिलं शैथिल्यं यस्मात् ।) समस्तम् । इत्यमरः । ३ । १ । ६५ ॥ (यथा, देवीभागवते । १ । २ । ४० ।

"निखिलमलगणानां नाशकृत् कामकन्दं प्रकटय भगवत्या नामयुक्तं पुराणम् ॥")

निगडः, पुं क्ली, (निगलति वध्नातीति । नि + गल + अच् । लस्य डत्वम् ।) हस्तिनां लोहमयपादवन्धोपकरणम् । इति भरतः ॥ आँडु इति दाँडुका इति च ख्यातः ॥ तत्पर्य्यायः । शृङ्खलः २ अन्दुकः ३ । इत्यमरः । २ । ८ । ४१ ॥ हिङ्गीरः ४ अन्दुः ५ । इति शब्दरत्नावली ॥ (यथा, माघे । ५ । ४८ ।

"वद्धापराधि परितो निगडान्यलावीत् स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः ॥")

निगडितः, त्रि, (नि + गल + क्तः । लस्य डत्वम् । यद्वा, निगडो जातोऽस्येति । तारकादित्वात् इतच् ।) वद्धः । इति हेमचन्द्रः । ३ । १०३ ॥

निगरः, पुं, होमधूमः । इति त्रिकाण्डशेषः ॥

निगदः, पुं, (नि + गद भाषे + "नौ गदनदपठस्वनः ।" ३ । ३ । ६४ । इति अप् ।) भाषणम् । कथनम् । तत्पर्य्यायः । निगादः २ । इत्यमरः । ३ । २ । १२ ॥ (यथा, भागवते । ५ । ३ । १६ ।

"इति निगदेनाभिष्टूयमानो भगवान्निमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥") उच्चैर्जपः । यथा । निगदस्तु जनैर्वेद्य इत्यागमः ॥

निगमः, पुं, (निगमे पुर्य्यां भवः । निगम + "तत्र भवः ।" ४ । ३ । ५३ । इत्यण् । संज्ञापूर्व्वकत्वात् वृद्धयभावः ।) वाणिजः । (निगम्यतेऽत्रेति । नि + गम + "गोचरसञ्चरेति ।" ३ । ३ । ११८ । इति घप्रत्ययेन साधुः ।) पुरी । कटः । (निगम्यते ज्ञायतेऽनेनेति ।) वेदः । (यथा, देवीभागवते । १ । ५ । ६१ ।

"कथङ्कारं वाच्यः सकलनिगमागोचरगुणप्रभावः स्वं यस्मात् स्वयमपि न जानाति परमम् ॥")

वणिक्पथः । हट्ट इति यावत् । इति मेदिनी । मे, ४५ । निश्चयः । (यथा, "तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना ॥" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

II

अध्वा । इति हेमचन्द्रः । ४ । ३८ ॥ (उपदेशः । यथा, भागवते । १ । ५ । ३६ ।

"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् । अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः ॥")

निगरः, पुं, (नि + गॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) भोजनम् । इति राजनिर्घण्टः ॥

निगरणं, क्ली, (नि + गॄ भक्षणे + भावे ल्युट् ।) भक्षणम् । इति मेदिनी । णे, ६८ ॥

निगरणः, पुं, (निगीर्य्यते भक्ष्यतेऽनेनेति । नि + गॄ + करणे ल्युट् ।) गलः । इति मेदिनी । णे, ६८ ॥ होमधूमः । इति शब्दरत्नावली ॥

निगादः, पुं, (नि + गद भाषे + पचे घञ् ।) कथनम् । इत्यमरः । ३ । २ । १२ ॥

निगारः, पुं, (नि + गॄ भक्षणे + भावे घञ् ।) निगरणम् । भक्षणम् । इत्यमरः । ३ । २ । ३७ ॥

निगालः, पुं, (निगलति भक्षयत्यनेनेति । नि + गल भक्षणे + करणे घञ् ।) अश्वगलोद्देशः । इत्यमरः । २ । ८ । ४८ ॥ (यथा, अश्ववैद्यके । २ । १४ ।

"घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः । अधस्ताच्च निगालस्य गलमाहुर्मणीषिणः ॥")

निगालवान्, पुं, (निगालोऽस्यास्तीति । निगाल + मतुप् मस्य वः ।) अश्वः । इति शब्दचन्द्रिका ॥

निगुः, पुं, (निगम्यते विद्यतेऽनेनेति । नि + गम + बाहुलकात् डुः ।) मनः । इति त्रिकाण्डशेषः ॥ मलम् । मूलम् । मनोज्ञम् । चित्रकर्म्म । इति संक्षिप्तसारोणादिवृत्तिः ॥

निगूढः, पुं, (निगुह्यते संव्रियते इति । नि + गुह + क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति । नेट् ।) वनसूरणः । इति हेमचन्द्रः । ४ । २३६ ॥ गुप्ते, त्रि । यथा,—

"आस्ते विभुः परमनिर्वृत एव मौली ग्रन्थोरिति त्रिजगतीजनचित्तवृत्तिः । अन्तर्निगूढनयनानलदाहदुःखं जानाति कः खयमदो वत शूलिरभ्रे ॥"

इत्युद्भटः ॥

निग्रहः, पुं, (नियमेन ग्रहणमिति । नि + ग्रह + "ग्रहवृदृनिश्चि ।" ३ । ३ । ५८ । इति अप् ।) अनुग्रहाभावः । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मनुः । ७ । १७५ ।

"नियहं प्रकृतीनाञ्च कुर्य्याद् योऽरिबलस्य च । उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥")

बन्धनम् । (यथा, महाभारते । १ । १।९७४ ।

"यदाग्नौमं कर्णदुर्य्योधनाभ्यां बुद्धिं कृतां नियहे केशवस्य ॥")

भर्त्सनम् । सीमा । इति मेदिनीकरहेमचन्द्रौ ॥ (निराकरणम् । यथा, रघुः । ९ । २५ ।

"दिनक्षयान्ते रविर्हिमनिग्रहे- र्विमलयन् मलयद्रुमलज्जतु ॥")

दण्डः । यथा, रघुः । ११ । ५५ ।

"ते चतुर्दशसहस्राण्यो वसुः स्तनयो नववधपरिग्रहात् ।

सामदानविधिभेदनिग्रहाः षड्विधमन्त्र इव तस्य भूपतेः ॥")

चिकित्सा । इति राजनिर्घण्टः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ६४ ।

"प्रग्रहो निग्रहो व्यायो नैकशृङ्गो गदाग्रजः ॥" ("सर्व्वं प्रलये निगृह्णातीति निग्रहः ।" इति शाङ्करभाष्यम् ॥ महादेवः । इति महाभारतम् । १३ । १७ । ६४ ॥)

निग्राहः, पुं, (नि + ग्रह + "व्याक्रोशेऽवन्योर्ग्रहः ।" ३ । ३ । ४५ । इति घञ् ।) निग्रहः । आक्रोशः । यथा । निग्राह्यस्ते भूयात् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा च भट्टिः । ७ । ४३ ।

"संदृशायान्तु वैदेह्यां निग्राहो वोऽर्थवानरैः ॥")

निघः, पुं, (नियमितं निर्व्विघ्नेषेण वा हन्यते ज्ञायते इति । नि + हन + "निघो निमितम् ।" ३ । ३ । ८७ । निपातनात् साधुः ।) विश्वक्सेनः । समन्तात् तुल्यारोहपरिणाहः । इत्यमरभरतौ ॥

निघण्टिका, स्त्री, गुलञ्चकन्दः । इति राजनिर्घण्टः ॥

निघण्टुः, पुं, (निघण्टति शोभते इति । घण्टृ दीप्तौ + "सृगयादयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययेन साधुः ।) नामसंग्रहः । इति हेमचन्द्रः । २ । १७२ ॥

निघसः, पुं, (अदनमिति । नि + अद् भक्षणे + "नौ ज च ।" ३ । ३ । ६० । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घसृलादेशः ।) आहारः । इत्यमरः । २ । ६ । ५६ ॥

निघातिः, स्त्री, (निहन्यतेऽनयेति । नि + "वसिवपियजीति ।" उणां । ४ । १२४ । इति इञ् ततः कुत्वम् ।) लोहधानी । लौहमयदण्डः । इत्युणादिकोषः ॥

निघुष्टं, क्ली, (निघुष्यते स्मेति । नि + घुष् + भावे क्तः ।) घुष्टम् । घोषणम् । इति शब्दरत्नावली ॥

निघृष्वः, पुं, (नि + घृषु संघर्षे + "सर्व्वनिघृष्वरिष्वेति ।" उणां । १ । १५३ । इति वनुप्रत्ययेन निपातनात् साधुः ।) खरः । इत्युणादिकोषः ॥ वायुः । खरः । मार्गः । वराहः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (दृष्टः । इति निघण्टुः । ३ । २ ॥)

निघ्नः, त्रि, (निहन्यते नियम्यते इति । नि + हन + घञर्थे कः । नियम्यत्वादेवास्य तथात्वम् ।) अधीनः । इत्यमरः । ३ । १ । १६ ॥ (यथा, रघुवंशे । १४ । ५८ ।

"आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः । निघ्नस्य मे भर्त्तुनिदेशरौक्ष्यं देवि ! क्षमस्वेति बभूव नम्रः ॥")

अङ्गपूरणम् । इति लीलावती ॥ (यथा, सूर्य्यसिद्धान्ते । ३ । २६ ।

"पुनर्ह्रासप्रनिघ्नाच्च लभ्यते यत फलं बुधैः ।"

पुं। सूर्य्यवंशीयनृपभेदः। यथा, हरिवंशे। १५। २२।
"अनरण्यसुतो निम्नो निम्नपुत्रौ बभूवतुः॥")

निचयः पुं. (नि+चि+"एरच्।" ३। ३। ५६। इत्यच्।) समूहः। (यथा, महाभारते।४।२।३।
"आहरिष्यामि दारूणां निचयान् महतो-
ऽपि च॥")

निश्चयः। इति शब्दरत्नावली॥

निचिकी, स्त्री, (निचिना कायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नैचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥

निचितं, त्रि, (निचीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, महाभारते।३।१२६।४।
"पश्य नानाविधाकारैरग्निभिर्निचितां महीम्॥")

सञ्चितम्। यथा, भावप्रकाशे अतिसाराधिकारे।
"वायुः प्रवृद्धो निचितं बलाग्नं
गुदत्यधस्तादहिताशनस्य॥"

नदीभेदे, स्त्री। यथा, महाभारते।६।६।१८।
"कौशिकीं त्रिदिवां चैव निचितां रोहिता-
रणीम्॥")

निचुलः, पुं, (निचोलति समुच्छ्रयतीति। नि+चुल+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) वञ्जुलवृक्षः। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्य यथा,—
"वञ्जुलो हिञ्जलश्चापि निचुलश्चाम्बुजस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४। २११॥

निचुलकं, क्ली, (निचुल इव प्रतिभाति। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति हारावली। १६२॥

निचोलः, पुं, (निचोल्यत इति। नि+चुल+घञ्।) येन स्यूतेनास्यूतेन वा वस्त्रान्तरमाच्छाद्यते। इत्यमरभरतौ॥ पाछुड़ि इति ख्यातः। तत्पर्य्यायः। निचुलः २। उत्तरच्छदः ३ प्रच्छदपटः ४॥ इति हेमचन्द्रः। ३। ३४०॥ (यथा, राजतरङ्गिण्याम्। ३। १५६।
"सन्ततध्वान्तमिषत्स्त्रीप्रयोनवशीकृताः।
आशाशंकाशिरे नीलनिचोलाच्छादिता इव॥")

निचोलकः, पुं, (निचोल इव कायतीति। कै+क।) भटादेर्नीलाकृतिवस्त्रादेः। तत्पर्य्यायः। कूर्पासः २ वारवाणः ३ कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३१॥

निच्छविः, स्त्री, (निष्क्रान्ता छविः सादृश्यं यस्याः।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ तिरहुत इति भाषा॥

निच्छविः, पुं, वर्णसङ्करजातिभेदः। इति जटाधरः॥ यथा,—
"स्तब्धो मल्लश्च राजन्याद्व्रात्यात् निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड एव च॥"
इति मनुः। १०। २२॥

निजं, त्रि, (निजयेन जायत इति। नि+जन+डः।) स्वकीयम्। (यथा, हितोपदेशे।
"अयं निजः परो वेति गणना लघुचेतसाम्॥")
नित्यम्। इत्यमरः। ३। ३। ३२॥

निट्, [ट्] स्त्री, (नितरां ग्यति तनूकरोति व्यापारानिति। ग्रो+कः। पृषोदरादित्वात् साधुः।) निशा। यथा,—
"वास्तवोषा निशाख्या च वासतेयी तमा-
निशौ॥"
इति राजपर्य्याये त्रिकाण्डशेषः॥
(यथा, मनुः। ६। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन॥")

निडीनं, क्ली, (नीचैर्डीनं पतनमस्यस्मिन्।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।
"निडीनमथ संडीनं तिर्य्यग्डीनगतानि च॥")
श्येनैर्यानम्। इति जटाधरः॥

निष्किका, स्त्री, कलायविशेषः। तेओड़ा इति भाषा॥ तत्पर्य्यायः। सतीला २ तिक्ती ३। इति शब्दचन्द्रिका॥

नितम्बः, पुं, (निभृतं तम्यते आकाङ्क्ष्यते कामुकैरिति। तम् आकाङ्क्षायाम्+उच्चादयश्चेति साधुः। यद्वा, नितम्बति पीड़यति नायकचित्तमिति। नि+तम्ब हिंसायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ९१। ५।
"विपुलतरनितम्बाभोगरुद्धे रमण्याः
श्रयितुमनधिगच्छन् जीवितेशोऽवकाशम्॥")
स्कन्धः। रोधः। कटकः। (यथा, भट्टीकाव्ये। २। ८।
"गिरेर्नितम्बे मरुता विभिन्नं
तोयावगूढेषु हिमाभमभ्रम्॥")
कटिभागम्। इति मेदिनी। बे, १२॥ (यथा, विदग्धमुखमण्डने।
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति सुहुर्मुहुः॥")

नितम्बिनी, स्त्री, (अतिशयितो नितम्बोऽस्त्यस्या इति। नितम्ब+"अत इनिठनौ।" ५।२।११५। इति इनिः स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।३॥ (यथा, आर्य्यासप्तशत्याम्। ५५४।
"वेणुरणेऽपि महता विनिर्मितं भवति कर्म्म
शोभायै।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनी-
वृत्तम्॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, कुमारसम्भवे। ३। ७।
"नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयं ग्राहयितुं भुजाभ्याम्॥")
नितम्बविशिष्टे, त्रि। यथा, रघुः।१६।२६।
"लोभ्यमाननयनः सुधांशुकै-
र्मेखलागुणपदैर्नितम्बिभिः॥")

नितरां, [म्] अ, (नि+तरप्+"किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे।" ५।४।११। अमुप्रत्ययः।) सुतराम्। यथा,—
"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिजालो नितरां कुशीलः॥"
इति कौटीप्रदीपः॥

नितलं, क्ली, (नितरां तलमधोभागो यस्मिन्।) सप्तपातालान्तर्गतपातालविशेषः। इति शब्दरत्नावली॥

नितान्तं, क्ली, (नितान्यतीति। तम+कर्त्तरि क्तः। "अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) अतिशयः। (यथा, कुमारसम्भवे। ३। ४।
"कैलाभ्यस्या पदकाङ्क्षिणा ते
नितान्तदीर्घैर्ज्जनिता तपोभिः॥")
तद्वति, त्रि। इत्यमरः। १। १। ७०॥

नित्यं, क्ली, (नियमेन भवम्। नि+"अव्ययात् त्यप्।" ४।२।१०४। इति त्यप्।) निरन्तरक्रियावचनम्। तत्पर्य्यायः। सततम् २ अनारतम् ३ अजस्रम् ४ सन्ततम् ५ अविरतम् ६ अनिशम् ७ अनवरतम् ८ अजस्रम् ९। इत्यमरः। १। १। ६६॥ प्रसक्तम् १० आसक्तम् ११ अलब्धम् १२। इति जटाधरः॥ तद्वति, त्रि। इत्यमरः॥ प्रत्यवायजनकीभूताभावप्रतियोगि। यथा एकादश्यासुपोषणं नित्यम्। ध्वंसप्रागभावाप्रतियोगि। यथा, गगनं नित्यम्। अहरहर्ज्ज्यायमानम्। यथा, नित्यं क्रीड़न्ति कुमाराः। अहरहःक्रियमाणत्वेन विधिबोधितम्। यथा, स्नानतर्पणादिकं नित्यम्। अनवच्छिन्नपरम्पराकः। यथा, वर्षा नित्याः॥

नित्यः, त्रि, (नियमेन भवः। नि+"अव्ययात् त्यप्।" ४। २। १०४। इत्यत्र "त्यप् नेर्ध्रुव इति वक्तव्यम्।" इति वार्त्तिकोक्त्या त्यप्।) कालत्रयस्थायी। तत्पर्य्यायः। शाश्वतः २ ध्रुवः ३ सदातनः ४ सनातनः ५। इत्यमरः। ३।१।७२॥ (यथा, महाभारते। १। १००। २।
"दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम्।
नित्याध्यासन् महासत्त्वे ग्राम्यान्वै पुरुषर्षभे॥")
समुद्रे, पुं। इति राजनिर्घण्टः॥

नित्यकर्म्म, [न्] क्ली, (नित्यं कर्म्म।) प्रत्यवायजनकाभावप्रतियोगिकार्य्यम्। इति स्मृतिः॥ तद्यथा,—
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा।
गृह्यस्यस्य विधा कर्म्म तन्निबोधाम्य पुत्रक!॥
प्रत्यवायाश्रितं नित्यं यदेतत् कथितं तव।
नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम्॥
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि पण्डितैः॥"
इति मार्कण्डेयपुराणम्॥ * ॥

तत्त्यागे दोषो यथा,—
"नित्यानां कर्म्मणां विप्र! तस्य हानिरहर्निशम्।
अकुर्व्वन् विहितं कर्म्म ग्रसः पतति तद्दिने॥
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि।
पक्षं नित्यक्रियाहानेः कर्त्ता मैत्रेय! मानवः॥

संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा॥
सूतके स्नानं सचैलस्य शुद्धिहेतुर्महामुने ! ।
पुंसो भवति तस्योक्ता न शुद्धिः पापकर्म्मणः ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥

अतादौ नित्यकर्म्मकरणनिषेधो यथा,—
"जानूर्द्ध्वं सूतके जाते नित्यकर्म्म न चाचरेत् ।
नैमित्तिकञ्च तदधःसवदक्षो न चाचरेत् ॥
सूतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत् ॥
श्राद्धे भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
कणादिपिण्यल्यन्तञ्च फलं भुक्ता न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाद्वेषजाद्दते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥
जलौकां गूढ़पादञ्च लमिगखड्गपदादिकम् ।
कामाद्भेन संस्पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विशेषतः शिवापूजां प्रमीतपितृको द्विजः ।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवव्रतञ्च यत् ॥
गुरुमाचम्य विप्रञ्च प्रकृत्यैव च याचिना ।
न कुर्य्यान्नित्यकर्म्माणि रेतःपाते च भैरव ! ॥"
इति कालिकापुराणे ५४ अध्यायः ॥

नित्यचौरं, क्ली, (नित्यं कालाकालाभावतो रागप्राप्तत्वात् सदातनं चौरम् ।) वेधेतरचौरम् । रागप्राप्तकैशरुक्षेदनम् । यथा.—
"चूड़ोदिते तिथावृक्षे बुधेज्योर्हवसे नरः ।
नित्यचौरं प्रकुर्व्वीत जन्ममासे न तु क्वचित् ॥"
इति ज्योतिःसागरसारः ॥ * ॥

राजमार्त्तण्डे तु ।
"न स्नानमात्रगमनोत्सुकभूमितानां
मभ्यक्तमुक्तरणकालनिवासनानाम् ;
सन्ध्या निशाग्रनिकुजार्कदिनेषु रिक्ते
चौरं हितं प्रतिपदद्वि न चापि विद्याम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

तत्र मासाः सौराः भाद्रपौषचैत्रा निषिद्धाः जन्ममासोऽपि निषिद्धः तदितरे विहिताः । वारस्तु बुधसोमयोर्विहितः। सामगानां मङ्गलवारोऽपि। तिथयस्तु नन्दारिक्तापूर्णिमामावास्याष्टमीभिन्ना विहिताः। नक्षत्राणि रेवत्यश्विनी पुष्यः धनिष्ठा श्लेषा श्रवणा स्वाती हस्ता मृगशिरः मृगभिधा पुनर्व्वसुः चित्रा। राजादेशे द्विजादेशे विवाहे मृतसूतकाशौचे बन्धमोक्षे यज्ञकर्म्मणि परीक्षायां निषिद्धमासादिष्वपि कार्य्यम्। अप्राप्तचैषिद्धेऽपि दिने ।
"केशवमानर्त्तपुरं पाटलिपुत्रं पुरीमहीच्छाम् ।
दितिमदितिञ्च स्मरतां चौरविधौ भवति कल्याणम् ॥"
इत्युक्तार्थं कार्य्यम् । इति ज्योतिषम् ॥

नित्यगतिः, पुं, (नित्यं गतिरस्येति ।) वायुः । इति हेमचन्द्रः । ४ । १७२ ॥ (यथा, महाभारते । ७ । ४५ । २२ ।
"यथा वायुर्नित्यगतिर्जलदान् धृतशोऽम्बरे ॥")
नित्यदा, व्य, (नित्य+दाच् ।) सर्व्वदा। यथा,—
"पुण्यं मधुवनं तत्र सान्निध्यं नित्यदा हरेः ॥"
इति श्रीभागवते ४ स्कन्धः ॥

नित्यदानं, क्ली, (नित्यं दैनन्दिनं दानम् ।) प्रतिदिनकर्त्तव्यदानम् । यथा, गरुड़पुराणे ।
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ।
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तत् स्याद्ब्राह्मणाय तु नित्यकम् ॥"

नित्यप्रलयः, पुं, (नित्यः प्रलयः ।) चतुर्व्विधप्रलयान्तर्गतप्रलयविशेषः । यथा,—
"नित्यः सदैव जातानां यो विनाशो दिवानिशम्॥"
इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥
"सदैव दीपज्वालावत् सातत्येन जातानां दिवानिशं यो विनाशः स नित्यः ॥" इति तट्टीकायां स्वामी ॥

नित्ययौवना, स्त्री, (नित्यं स्थिरं यौवनं यस्याः ।) द्रौपदी । इति हेमचन्द्रः । ३ । ३७४ ॥ (नित्यं यौवनं यस्येति ।) स्थिरयौवने, त्रि ॥

नित्यवैकुण्ठः, पुं, (नित्यः सनातनो वैकुण्ठः ।) विष्णोः स्थानविशेषः । यथा,—
"ऊर्द्धं नभसि संविष्टो नित्यवैकुण्ठ एव च ।
आत्माकाशसमो नित्यो विस्तृतश्चन्द्रविम्बवत् ॥
ईश्वरेच्छासमुद्भूतो निलयश्च निराश्रयः ।
आकाशवत् सुविस्तारश्चामलरत्ननिर्म्मितः ॥
तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः ।
लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्श्वादिभिरन्वितः ।
सर्व्वैश्वर्य्यसंसिद्धेशो भक्तानुग्रहकारकः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायः ॥

नित्या, स्त्री, (नित्य+टाप् ।) पार्व्वती (यथा, मार्कण्डेये । ८५ । ८ ।
"रौद्राये नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः॥")
मनसा देवी । इति शब्दरत्नावली ॥ शक्तिविशेषः । अस्या मन्त्रो यथा,—
"वाग्भवं कामबीजञ्च नित्यक्लिन्ने मदद्रवे ।
द्रवे वह्निवधूमन्त्रो द्वादशार्णोऽयमीरितः ॥"
ध्यानं यथा,—
"अर्द्धेन्दुमौलिमरुणाममराभिवन्द्या-
मम्भोजपाशवरदाभयपूर्णकपालहस्ताम् ।
रक्ताङ्गरागरसनाभरणां त्रिनेत्रां
ध्यायेच्छिवस्य वनितां मदविह्वलाङ्गीम् ॥"
इति तन्त्रसारः ॥
(तन्त्रविशेषः । यथा, महासिद्धसारस्वते ।
"गणेशविष्णुशिवसूर्य्यतन्त्रं नित्यातन्त्रं शिवागमम्॥")

नित्यानध्यायः, पुं, (नित्यं सर्व्वथा यथा तथा अनध्यायः अध्ययनाभावः ।) सर्व्वथा वर्জ্জनीयवेदपाठकालादिः । यथा.—
"इमान्नित्यमनध्यायानधीयानो विवर्জ্জयेत् ।
अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम् ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमृतौ चाभ्रदर्शने ॥
निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्জ্জने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सन्ध्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्यादृग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্জने ।
उच्छिष्टः श्राद्धसुक् चैव मनसापि न चिन्तयेत्॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्याहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकानुद्दिश्य मन्त्रो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
ग्रयाणः प्रौढ़पादश्च स्नात्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥
नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्জ্জयेत् ॥
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति षड्ऋतौ च न पठेद्द्विजः ॥
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥
प्राणि वा यदि वाप्राणि यत् किञ्चित् श्राद्धिकं भवेत् ।
तदालभ्याप्यनध्यायः प्राण्यास्यो हि द्विजः स्मृतः ॥
चौरैरुपद्रुते ग्रामे सम्भ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात् सर्व्वासृतेषु च ॥
उपाकर्म्मणि चोत्सर्गे चिरात्रं श्रेष्ठयं स्मृतम् ।
अष्टकासु त्वहोरात्रमष्टमास्यां च रात्रिषु ॥
नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
न विवादे न कलहे न सेनायां न सङ्गरे ।
न शुक्तमात्रे नाजीर्णे न वमित्वा न सूतके ॥
अतिथिश्चानुगुप्याय मारुते वाति वा भृशम् ।
रुधिरे च सुते गात्राच्छस्त्रेण च परिक्षते ॥
सामध्वनावृग्यजुषी नाधीयीत कदाचन ।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥
ऋग्वेदः देवदैवत्यो यजुर्व्वेदस्तु मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥
एतद्विद्वान् विद्वांसमयोनिर्ऋषमन्वहम् ।
क्रमतः पूर्व्वमभ्यस्य प्रधार्य्येदमधीयते ॥

प्रयुमष्ठकमार्ज्जारश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम्॥
दावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः।
स्वाध्यायभूमिमाशुद्धामात्मानञ्चाशुचिं द्विजः॥"
इति मानवे। ४। १०१—१२७॥

नित्यानित्यवस्तुविवेकः, पुं, (नित्यानित्ये वस्तुनी तयोर्विवेकः विवेचनम्।) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। इति वेदान्तसारः॥

नित्याभैरवी, स्त्री, (नित्या तदाख्या प्रसिद्धा भैरवी।) भैरवीविशेषः। अस्या ध्यानादिकं षट्कूटाभैरवीध्यानादिवत्॥ ध्यानं यथा,—
"बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम्।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम्॥
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम्॥"
दधतीमिति ध्येयः। इति तन्त्रसारः॥ (अस्या बीजं यथा, 'हसकलरङे' 'हसकलरङी' 'हसकलरङौं॥')

निर्दं, क्ली, (नेदतीति। निद कुत्सायाम्+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) विषम्। इति शब्दचन्द्रिका॥

निर्दहः, पुं, (निदात् विघात् द्राति पलायते इति। द्रा+ष्टगयादित्वात् कुप्रत्ययेन साधुः।) मनुष्यः। इति शब्दचान्द्रिका॥ (निर्नास्ति दहुर्यस्येति विग्रहे। दहरोगरहिते, त्रि॥)

निदर्शनं, क्ली, (निदृश्यतेऽनेनेति। नि+दृश्+ल्युट्।) दृष्टान्तः। उदाहरणम्। यथा,—
"यक्तः प्राज्ञेऽपि दृष्टान्तावुभे ग्राह्यनिदर्शने॥"
इति नानार्थटीकायां भरतः॥
("दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम्॥ यथाग्निर्वायुना सहितः कोष्ठे वृद्धिङ्गच्छति तथा वातपित्तकफदुष्टो व्रण इति॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

निदर्शना, स्त्री, (निदर्श्यतीति। नि+दृश्+णिच्+ल्युः। टाप्।) काव्यालङ्कारविशेषः। तस्य लक्षणम्।
"अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम्।
सतसत्त्वान्निदर्श्येत यदि सा स्यान्निदर्शना॥"
उदाहरणं यथा, दण्डी।
"उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्।
विभावयितुमुद्दीपां फलं सुकृतदुष्कृतम्॥"
(यथा च साहित्यदर्पणे। १०। ७०।
"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना। यथा,—
'कोऽयं भूमिवलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम्।
वेदयन्निति दिनेन भानुमा-
नस्ताद्रिशिखरमारुरोह तत्॥'
अत्र रवेरिदमार्यवेदनक्रियायाः कर्तृत्वेनान्वयः सम्भवत्येव इदमार्यज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात्। स च रवेरस्ताचलगमनस्य प्रस्तावित्वं विषयत्वञ्चेत्थं बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा,—
'कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः।
अधरः किसलयलीला-
माननमस्याः कलानिधेर्विलासम्॥'
अत्रान्यस्य धर्म्मं कथमन्यो वहतीति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति। यथा वा।
'प्रयाणे तव राजेन्द्र! सुक्ता वैरीष्टगौदृशाम्।
राजहंसगतिः पद्मामाननेन ग्रहिष्यति॥'
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते। स चासम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा,—
'इदं किलाव्याजमनोहरं वपुः
तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति॥'
अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृग्वपुष्त्वतपः क्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताछेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति। यथा वा।
'जन्मेदं बन्धतां नीतं भवभोगोपलिप्सया।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया॥'
अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यवसानम्। एवम्।
'क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥'
अत्र मन्मता सूर्य्यवंशवर्णनसुडुपेन सागरतरणमिवेति पर्य्यवसानम्। इयं क्वचिदुपमेयवृत्तस्योपमानेऽसम्भवेऽपि भवति। यथा,—
'योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे।
समास्वादि स दृष्टीकारसे रसविशारदैः॥'
अत्र प्रस्तुतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षारसेऽसम्भवात्। पूर्ब्बवत् साम्ये पर्य्यवसानम्। मालारूपापि यथा मम।
'शिखसि मुक्तं दृषदंशुकवदने
शशमर्पयसि शशादनरदने।
वितरसि तुरगं महिषविषाणे
निदधत्सेसो भोगवितानेः॥'
इह बिम्बप्रतिबिम्बतात्वेपं विना वाक्यार्थापर्य्यवसानम्। दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्यादिम्बप्रतिबिम्बताप्रत्ययनम्। नापीयमर्थापत्तिस्तत्र 'हारोऽयं हरिणाक्षीणाम्।' इत्यादौ सादृश्यपर्य्यवसानाभावात्॥)

निदाघः, पुं, (नितरां दह्यतेऽत्र अनेन वा। नि+दह+घञ्। न्यङ्वादित्वात् कुत्वम्।) ग्रीष्मकालः। (यथा, रघुः। १०। ८३।
"ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च।
मनो जहुर्निदाघान्ते श्यामाभा दिवसा इव॥")
उष्णः। घर्म्मः। इत्यमरमेदिनीकरौ॥ (यथा, रघुः। १२। ३२।
"रावणावरजा तत्र राघवं मदनातुरा।
अभिपेदे निदाघार्त्ता आलीव मलयद्रुमम्॥")
निदाघे वर्ज्जनीयानि यथा। पाटलपुष्पम् १ मल्लिकापुष्पम् २ तापः ३ सरः ४ पथिकश्रोणः ५ वायुः ६ सेकः ७ शुक्लः ८ प्रपा ९ स्त्री १० रम्भलक्षणा ११ आम्रादिफलपाकः १२। इति कविकल्पलता॥
("ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्यात्तनुत्वाद्दौर्ब्बल्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षैरतो वातिकान् व्याधीन् जनयति॥" इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥
"निदाघोपचितस्त्वेव प्रकुप्यन्तं समीरणम्।
निहन्यादनिलक्षेण विधिना विधिकोविदः।
नदीजलं रूक्षमुष्णसुदमन्थं तथातपम्॥
व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्ज्जयेत्॥"
इति चोत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

निदाघकरः, पुं, (निदाघा उष्णाः करा किरणानि यस्य। निदाघस्य उष्णस्य करो वा।) सूर्य्यः। इति हारावली। ११॥

निदाघकालः, पुं, (निदाघ एव कालः। निदाघस्य कालो वा।) ग्रीष्मर्त्तुः। स तु ज्येष्ठाषाढ़मासौ। यथा,—
"प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये!॥"
इति ऋतुसंहारे। १। १॥

निदानं, क्ली, (नि निश्चयं दीयतेऽनेनेति। नि+दा+करणे ल्युट्।) आदिकारणम्। इत्यमरः। १। ४। २८॥ (यथा, रघुः। ३। १।
"निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दोर्द्दललक्षणं दधौ॥")
कारणम्। वनस्पतादामादि। (यथा, ऋग्वेदे। ६। ३२। २।
"उदग्रिया आसन्दीवतो नि+दो छेदे+भावे ल्युट्।) कारणक्षयः। इति मेदिनी। ने, ८३॥ (नि+दै शोधने+भावे ल्युट्।) शुद्धिः। तपःफलयाचनम्। अवसानम्। इति हेमचन्द्रः। ६। १५०॥ रोगनिर्णयः। इति विश्वः॥ तत्पर्य्यायः। रोगः

लक्षणम् २ आदानम् ३ रोगहेतुः ४। इति राजनिर्घण्टः॥ * ॥
"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते॥"
इति माधवकरः॥
("सेति कर्त्तव्यताको रोगोत्पादकहेतुर्निदानम्।"
इति रुग्विनिश्चयव्याख्याने विजयरक्षितः॥
"इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः सङ्घात्मानं निदानमित्यनर्थान्तरम्। तच्चिविधं असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेत्यतस्त्रिविधविकल्पा व्याधयः प्राडुर्भवन्त्यात्मेयसौम्यवायव्याः।" इति निदानस्थाने प्रथमेऽध्याये चरकेणोक्तम्॥ पैलसुनिकृतचिकित्सायन्थविशेषः। यथा, ब्रह्मवैवर्त्ते। ६। १६। २१।
"पैलो निदानं करथस्तन्त्रं सर्व्वधरं परम्।
देधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः॥")
निदिग्धं, त्रि, (निदिह्यते स्मेति। दिह उपचये+क्तः।) लेपादिना वर्द्धितम्। तत्पर्य्यायः। उपचितम् २। इत्यमरः। ३। १। ८६॥
निदिग्धा, स्त्री, (निदिग्ध+टाप्।) एला। इति शब्दचन्द्रिका॥ (विष्टतिरस्या एलाशब्दे ज्ञातव्या॥)
निदिग्धिका, स्त्री, (निदिग्धा+स्वार्थे संज्ञायां वा कन्। कापि अत इत्वम्।) एला। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते। ३। १७।
"कपित्थदृहतीविल्वपटोलेषु निदिग्धिकाः॥")
कण्टकारिका। इत्यमरः। २। ४। ६३॥
(अस्याः पर्य्यायो यथा,—
"व्याघ्रीक्रान्ता स्मृहो व्याघ्री भण्टाकी च निदिग्धिका।
सिंही धामनिका क्षुद्रा दृहती कण्टकारिका॥"
इति वैद्यकरत्नमालायाम्॥)
निदिध्यासनं, क्ली, (पुनः पुनरतिशयेन वा निध्यायतीति। नि+ध्यै+सन्। ततो भावे ल्युट्।) पुनःपुनःस्मरणम्॥ अद्वितीयवस्तुनि तदाकाराकारितायाः वृत्तेः स्वजातीयप्रवाहः। इति वेदान्तसारः॥
निदेशः, पुं, (नि+दिश+घञ्।) आज्ञा। इत्यमरः। २। ८। २५॥ (यथा, देवीभागवते। २। १०। ४६।
"प्रत्यूचुस्तान् द्विजान् मत्वा निदेशं भूपतेर्य्यथा॥")
कथनम्। उपालम्भः। इति मेदिनी। शे, २३॥ (यथा, मनुः। २। १६७।
"पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥")
भाजनम्। इति धरणिः॥
निदेशिनी, स्त्री, (निदिश्यतीति। नि+दिश+णिनि ङीप्।) दिक्। इति राजनिर्घण्टः॥

निदेष्टा, [ष्टृ] त्रि, (निदिश्यतीति। नि+दिश+तृच्।) निदेशकर्त्ता। निदिशति इति व्युत्पत्त्या तृजन्तो निष्पन्नः। इति सुग्धबोधमतम्॥
निद्रा, स्त्री, (निन्द्यते इति। निदि कुत्सायाम्+"निन्देर्नलोपश्च।" उणां। २। १७। इति रक् नलोपश्च।) मेध्यामनःसंयोगः। इति जगदीशः॥ सुप्तप्रबुद्धावस्थान्यावस्था। इति चक्रपाणिटीकायां नागभट्टः॥ घुम इति भाषा॥ तत्पर्य्यायः। शयनम् २ स्वापः३ स्वप्नः४ संवेशः५। इत्यमरः। २। ७। ३६॥ सुप्तिः ६ स्वपनम् ७। इति शब्दरत्नावली॥ यथाकाले सेवितनिद्रागुणाः। धातुसाम्यत्वम्। अतन्द्रितत्वम्। पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च॥ * ॥ दिवास्वप्नगुणः। स्निग्धत्वम्। श्लेष्मलहिक्काजीर्णातिसारित्वं स्थितत्वञ्च॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्रावग्राहोलायमानस्य गुणः। अरूक्षत्वम्। अनभिष्यन्दित्वञ्च॥ * ॥ निद्रासात्म्यीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति। इति राजवल्लभः॥ * ॥ निद्रारहिता यथा,—
"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च।
परनारीप्रसक्तस्य परद्रव्यहरस्य च॥" * ॥
सुखसुप्ता यथा,—
"सुखं स्वपित्यदृग्वान् यो व्याधिसुक्तश्च यो नरः।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः॥"
इति गारुडे नीतिसारः॥
("सत्त्वाच्च तम एव स्यात् जायते स्वपते प्रभुः।
तमसा प्रावृतो देही योगा च शून्यताङ्गतः॥
देहं विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता।
नासार्द्धे च भ्रुवोर्म्मध्ये लीयते चान्तरात्मना॥
तस्माच्चेतो भवेत्तत्र निद्रायालीयते नृणाम्॥"
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥
"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता।
सुखायुषी परा कुर्य्यात् कालरात्रिरिवापरा॥"
इति वाभटे उत्तरस्थाने सप्तमेऽध्याये॥
"पुष्करीकेव सदृशं हृदयं स्यादधोमुखम्।
जायतस्तद्विकसति स्वपतश्च निमीलति॥
निद्रानु वैष्णवीं प्राभानसुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिसृपति॥ तत्र यदा संज्ञावहानि स्रोतांसि तमो भूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले। तमोभूयिष्ठानामहःसु निष्ठासु च भवति। रजो भूयिष्ठानामनिमित्तम्। सत्त्वभूयिष्ठानामर्द्धरात्रे। शीतश्लेष्मणामनिलबहुलानां मनःशरीराभितापवतान्च नैव सा वैकारिकी भवति॥
हृदयचेतनास्थानमुक्तं सुश्रुत! देहिनाम्।
तस्मोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम्॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्यते॥
पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः।
रजोयुक्तेन मनसा यद्यत्पश्यति शुभाशुभान्॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते॥
सर्व्वसुप्तेषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
निद्राणः, त्रि, (नि+द्रा+क्तः। "संयोगादेरातो धातोर्यण्वतः।" ८। २। ४३। इति तस्य नः।) निद्रागतः। तत्पर्य्यायः। शयितः २। इत्यमरः। ३। १। ३३॥ (यथा, आर्य्यासप्तशत्याम्। ५२६।
"विहितविविधाद्भुवन्धो मानोन्नतयावधीरितो मानी।
लभते कुतः प्रबोधं स जागरित्वेव निद्राणः॥")
निद्रालुः, त्रि, (निद्रातीति। नि+द्रा+"सृदृशिभृहीति।" ३। २। १५८। इति आलुच्।) निद्राशीलः। निद्रा विद्यते अस्य गोहेतीत्यादिना आलुः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। स्वप्नक् २ शयालुः ३। इत्यमरः। ३। १। ३३॥ तन्द्रालुः ४। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। ५। ४१।
"काशी विवर्ज्जयेच्छौर्य्यं निद्रालुश्चर्म्मचौरिकाम्।
निष्कालौल्यञ्च रोगाढ्यो जीवितं योऽच वाञ्छति॥")
निद्रालुः, स्त्री, (निद्रा देयत्वेनास्त्यस्या इति। निद्रा+बाहुलकात् आलुः।) वार्त्ताकी। वनवर्व्वरिका। इति राजनिर्घण्टः॥ नलीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥
निद्रान्धः, पुं, (निद्राया इव इव।) अन्धकारः। इति शब्दमाला॥
निद्रासंजननं, क्ली, (निद्रां संजनयतीति। सं+जन+णिच्+ल्युः।) श्लेष्मा। इति शब्दमाला॥
निधनं, क्ली, (नि+धा+"ऋदृशिगमिन्दि धाञः क्युः।" उणां। २। ८२। इति क्युः।) नाशः। तत्तु अदर्शनं मरणञ्च। (यथा, विष्णुपुराणे। १। १३। ७३।
"एकस्मिन् यत्र निधनं प्रापिते दुष्कारिणि।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥")
कुलम्। तत्तु कुलस्थानं कुलसुखञ्च। इत्यमरभरतौ॥
निधनः, पुं क्ली, (नि+धा+क्युः।) मरणम्। इत्यमरः। २। ८। १६॥ वधतारा। सा तु जन्मनक्षत्रतात् सप्तमी तारा। यथा, जन्मसम्पदिपत् क्षेमः प्रत्यरिः साधको वध इत्यादि। प्रत्यरौ लवणं दत्वाग्निधने तिलकाष्ठनम्। इति ज्योतिस्तत्त्वम्॥ (निहतं धनं यस्य।) धनहीने, त्रि॥
निधानं, क्ली, (निधीयतेऽत्रेति। नि+धा+आधारे ल्युट्।) निधिः। इति हेमचन्द्रः। २। १०६॥ (यथा, पञ्चतन्त्रे। २। १६४।
"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम्॥")
आधारः। यथा,—

"निधानभागतं सद्यः सर्व्वं समधिगच्छति ।"
इत्यागमः ॥
(यथा, देवीभागवते । १ । १६ । ३४ ।
"ब्रह्मविद्यानिधानन्तु संसारार्णवतारकम् ॥")
कार्य्यावसाने प्रवेशस्थानम् । यथा,—
"एतन्नागावतारार्य्या निधानं बीजमव्ययम् ॥"
इति श्रीभागवतम् ॥

निधिः, पुं, (निधीयतेऽत्रेति । नि + धा + किः ।)
नलिकानामगन्धद्रव्यम् । समुद्रः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । ३ । २२ । १० ।
"कन्यां सुकेशीं निधिकन्यकासमां
मेने तदात्मानमनुत्तमञ्च ॥")
जीवकौषधिः । इति शब्दचन्द्रिका ॥ आधारः । यथा । गुणनिधिः । जलनिधिः । इत्यादयः ॥
चिरप्रनष्टस्वामिकभूजातधनविशेषः । इति प्राचः ॥ अज्ञातस्वामिकचिरनिखातस्वर्णादि । यथा । अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह ।
"राजा लब्धा निधिं दद्यात् द्विजेभ्योऽर्द्धं द्विजः पुनः ।
विद्वानशेषमादद्यात् सर्व्वस्यासौ प्रभुर्यतः ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥"
"उत्तमञ्च निधिं राजा लब्धार्हं ब्राह्मणेभ्यो दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्व्वमेव गृह्णीयात् । यस्मादसौ सर्व्वस्य जगतः प्रभुः । इतरेण तु, राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्तुं दत्त्वा शेषं निधिं स्वयमाहरेत् । यथाह वशिष्ठः । अप्रज्ञायमानं वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्तुं षष्ठमांशं प्रदद्यात् इति । गौतमोऽपि निध्यधिगमी राजधनं न ब्राह्मणस्याभिरूपस्याबन्धोऽप्याख्याता षष्ठं अंशं लभेतेत्येक इति । अनिवेदित इति कर्त्तरि निष्ठा । अनिवेदितस्वामी विज्ञातश्च राजा इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्धा राज्ञे न निवेदितवान् विज्ञातश्च राजा स सर्व्वं निधिं दाप्यो दण्डञ्च गृह्णीयात्तथा । अथ निधेरपि स्वाम्यागत्यरूपसङ्ग्रादिभिः स्वत्वं भावयति सदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् । यथाह मनुः ।
"ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वेति ॥
अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः ।"
इति मिताक्षरायां व्यवहाराध्यायः ॥
कुबेरस्य नवधा रत्नविशेषः । तत्पर्य्यायः । शेवधिः २ । इत्यमरः । १ । १ । ७४ ॥ सेवधिः ३ । इति भरतः ॥ तद्भेदा यथा,—
"पद्मोऽब्धिन्यां महापद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च वर्च्चोऽपि निधयो नव ॥"
इति हारावली ॥
मार्कण्डेयपुराणे तु वर्च इति हित्वा अष्टावेव उक्ताः । इति भरतः ॥ * ॥ तल्लक्षणं यथा,—
"पद्मिनी नाम या विद्या लक्ष्मीस्तस्याधिदेवता ।
तदाधाराश्च निधयस्तान्मे निगदतः शृणु ॥
तत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दनीलौ नन्दश्च शङ्खश्चैवाष्टमो निधिः ॥
सत्त्वाद्यैर्द्रव्यं भवन्त्येते सङ्गिः सह भवन्त्यमी ।
एते त्रयौ समाख्याता निधयस्तव क्रोष्टके ! ॥
एभिरालोकितं चित्तं मनुष्यस्य महामते ! ।
यादृक् स्वरूपं भवति तन्मे निगदतः शृणु ॥
पद्मो नाम निधिः पूर्व्वः स यस्य भवति द्विज ! ।
स तस्य तत्सुतानाञ्च तत्पौत्राणाञ्च नान्यगः ॥
दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठितो भवेत् ।
सत्त्वाधारो महाभागो यतोऽसौ सात्त्विको निधिः ॥
सुवर्णरौप्यताम्रादिधातूनाञ्च परिग्रहम् ।
करोत्यतितरां सोऽथ तेषाञ्च क्रयविक्रयम् ॥
करोति च यथा यज्ञान् यज्विनाञ्च प्रयच्छति ।
सम्पादयति कामांश्च सर्व्वानेव यथाक्रमम् ॥
सभादेवनिकेतांश्च स कारयति तज्ज्ञनाः । * ।
सत्त्वाधारो निधिश्चान्यो महापद्म इति श्रुतः ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो नरः ।
करोति पद्मरागादिरत्नानाञ्च परिग्रहम् ॥
सौक्तिकप्रवालानां तेषाञ्च क्रयविक्रयम् ।
ददाति योगशीलेभ्यस्तेषामावसथांस्तथा ॥
स कारयति तच्छीलः स्वयमेव च जायते ।
तत्प्रसक्तास्तथाशीलाः पुत्रपौत्रक्रमेण च ॥
पूर्व्वर्द्धिमांश्च सम्पन्नो पुरुषांश्च न मुञ्चति ।
महापद्मस्तु विप्राणां यत्रे समुपजायते ॥ * ॥
तामसो मकरो नाम निधिस्तेनावलोकितः ।
पुरुषोऽथ तमःप्रायः सुशीलोऽपि हि जायते ॥
बाणखड्गर्ष्टिधनुषां चर्म्मणाञ्च परिग्रहम् ।
दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः ॥
ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः ।
क्रयविक्रयञ्च शस्त्राणां नान्यत्र प्रीतिमेति च ॥
एकस्त्रेव भवत्येष नरस्य न सुतानुगः ।
द्रव्यार्थं दस्युतो नाशं संग्रामे वापि संव्रजेत् ॥ *॥
कच्छपाख्यो निधिर्योऽन्यो नरस्तेनाभिवीक्षितः ।
तमःप्रधानो भवति यतोऽसौ तामसो निधिः ॥
व्यवहारा न शिष्टेषु पण्यजातं करोति च ।
कर्म्मान्तानखिलांश्चैव न विश्वसिति कस्यचित् ॥
पञ्चस्वानि यथाङ्गानि निगृह्यान्ते हि कच्छपः ।
तथावश्यं रत्नानि तिष्ठत्याकुलमानसः ॥
न ददाति न वा भुङ्क्ते तद्दिनाशभयाकुलः ।
निधानमुर्व्यां कुरुते निधिः सोऽप्यीकपुरुषः ॥ *॥
रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधिः ।
नरोऽवलोकितस्तेन तद्गुणो भवति द्विज ! ॥
वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम् ।
करोति वाद्यतां वित्तं नृत्यताञ्च प्रयच्छति ॥
वन्दिमागधसूतानां विटानां लास्यपाठिनाम् ।
ददात्यहर्निशं भोगान् भुङ्क्ते तैस्तु समं द्विज ! ॥
कुलटासु रतिश्चास्य भवत्यन्येषु तद्विधैः ।
प्रयाति सङ्गमेकस्य स निधिर्भजते नरम् ॥ * ॥
रजःसत्त्वमयश्चान्यो नन्दो नाम महानिधिः ।
उपैति सप्तमधिकं नरस्तेनावलोकितः ॥
समस्तधातुरत्नानां पण्यवाद्यादिकस्य च ।
प्रतिग्रहं करोत्येष तथैव क्रयविक्रयम् ॥
आधारः स्वजनानाञ्च आगताभ्यागतस्य च ।
सहते नावमानोक्तिं स्वल्पामपि महामुने ! ॥
स्तूयमानश्च महतीं प्रीतिं वध्नाति यच्छति ।
यं यमिच्छति वै कामं मृदुलमुपयाति च ॥
वक्त्रा भार्य्या भवत्यस्य सुतिमत्योऽतिशोभनाः ।
सन्ततौ सप्त च नरान्निधिर्नन्दोऽनुवर्त्तते ॥
प्रवर्द्धमानोऽनु नरमष्टभागेन सत्तम ! ।
दीर्घायुष्यञ्च सर्व्वेषां पुरुषाणां प्रयच्छति ॥
बन्धूनामेव भवनं ये च दूरादुपागताः ।
तेषां करोति व नन्दः परलोके न चाहतः ॥ *॥
भवत्यस्य न च स्नेहः सहवासिषु जायते ।
पूर्व्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च ॥
तथैव सत्त्वरजसी यो बिभर्त्ति महानिधिः ।
स नीलसंज्ञस्तत्सङ्गी नरस्तच्छीलभाग्भवेत् ॥
वस्त्रकार्पासधान्यादिफलपुष्पपरिग्रहम् ।
सुक्ताविद्रुमशङ्खानां शुक्त्यादीनां महामुने ! ॥
काष्ठादीनां करोत्येष यत्रान्यच्चलसम्भवम् ।
क्रयविक्रयमर्थेषां नान्यत्र रमते मनः ॥
तड़ागान् पुष्करिण्यश्च तथारामान् करोति च ।
वन्यश्च सरितां वृत्तांस्तथा रोपयते नरः ॥
अनुलेपनपुष्पादिभोगसुक् वापि जायते ।
त्रिपौरुषश्चापि निधिर्नीलो नामेति विश्रुतः ॥
रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः ।
तेनापि नीयते विप्र ! तद्गुणत्वं निधीश्वरः ॥
एकस्त्रेव भवत्येष नरं नान्यमुपैति च ।
यस्य शङ्खो निधिस्तस्य स्वरूपं शृणु क्रोष्टके ! ॥
एक एवाशना ह्येनमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नभुक् परिजनो न च शोभनवस्त्रभृत् ॥
न ददाति सुहृद्भार्य्यासुतपौत्रक्षुधादिषु ।
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥
इत्येते निधयः ख्याता नराणामर्थदेवताः ॥
मिश्रावलोकिनो मिश्रस्वभावफलदायिनः ।
यथाख्यातः स्वभावस्तु भवत्येषां विलोकनात् ।
सर्व्वेषामाधिपत्ये च श्रीरेषां द्विज पद्मिनी ।"
इति मार्कण्डेयपुराणे ६८ अध्याये निधिलक्षणम् ॥
(पौरववंशीयनृपविशेषः । अयं हि दक्षपाणेः पुत्रः । मत्स्यपुराणादिमते निरामित्रनाम्ना विख्यातः । ५० । ८७ ॥ यथा, राजावल्यां प्रथमपरिच्छेदे ।
"बुभुजे पृथिवीमेनां दक्षपाणिमहाबलः ।
राजासने ततः सोऽपि स्थापयित्वा निधिं सुतम् ॥
स्मरन्नारायणं देवं तपसे स वनं ययौ ।
निधिस्तु विधिवद्राज्यं चकार नीतिपण्डितः ॥"
विष्णुः । यथा, महाभारते । १३ । १४८ । १७ ।
"सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥"
"प्रलयकालेऽस्मिन् सर्व्वं निधीयते इति निधिः ।"
इति तद्भाष्ये शङ्करः ॥

महादेवः। यथा, महाभारते। १३। १७।४३।
"श्रुतहस्तः सुरूपश्च तेजस्तेजस्करो निधिः॥")
निधिनाथः, पुं, (निधीनां नाथः।) कुबेरः। इति चिकाण्डशेषः॥ निधीशः। निधीश्वरः। निधिप्रभुः। इत्यादयः॥
निधुवनं, क्ली, (नितरां धुवनं हस्तपदादिकम्पनं यत्र।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, शिशुपालवधे। ११। १८।
"अनिमिषमविरामारागिणां सर्व्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य।
इदमुदवसितानामस्फुटालोकसन्पत्
नयनमिव सनिद्रं धूर्व्वते दीपमर्चिः॥")
नर्म्म। केलिः। इति शब्दरत्नावली॥ (नितरां धुवनं कम्पनम्।) कम्पः। इति मेदिनी। ने, १८८॥
निध्यानं, क्ली, (नि+ध्यै+ल्युट्।) दर्शनम्। इत्यमरः। ३। २। ३१॥
निध्यानः, पुं, (नि+ध्यन शब्दे+घञ्।) शब्दः। इति शब्दरत्नावली॥
निनदः, पुं, (नि+नद+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) शब्दः। इत्यमरः। १।६।२२॥ (यथा, देवीभागवते। ३।२२।३७।
"ह्रस्वस्तु तूर्य्यनिनदान् किल वाद्यमानान्॥")
निनादः, पुं, (नि+नद+पचे घञ्।) शब्दः। इत्यमरः।१।६।२२॥(यथा, रामायणे।२।३४।१६।
"स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि॥")
निन्दकः, त्रि, (निन्दति तच्छीलः। निदि कुत्सायाम्+"निदिहिंसेति।" ३। २। १३६। इति ण्वुल्।) निन्दाकारकः। यथा,—
"न भाराः पर्व्वता भारा न भाराः सप्तसागराः।
निन्दका हि महाभारा भारा विश्वासघातकाः॥"
इति कर्म्मलोचनम्॥
निन्दतलः, त्रि, (निन्द्यं निन्दार्हं तलं हस्ततलं यस्य।) निन्दितहस्तः। इति शब्दरत्नावली॥
निन्दनं, क्ली, (निदि कुत्सायाम्+भावे ल्युट्।) निन्दा। इति शब्दरत्नावली॥
निन्दा, स्त्री, (निन्दनमिति। निदि+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः।) अपवादः। दुष्कृतिः। इति शब्दरत्नावली॥ निन्दनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ कुत्सा ९ गर्हणम् १०। इत्यमरः॥ गर्हा ११ कुत्सनम् १२ परिवादः १३ जुगुप्सनम् १४ अपक्रोशः १५ भर्त्सनम् १६ अववादः १७। इति शब्दरत्नावली॥ गर्हणा १८ धिक्क्रिया १९। इति हेमचन्द्रः॥ (यथा, मनुः। २। २००।
"गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥")
हरकेशवभक्तादिनिन्दायां दोषो यथा,—
"हरकेशवयोर्भक्तं ये च निन्दन्ति पापिनः।
भूदेवान् ब्राह्मणांश्चैव स्वगुरूंश्च पतिव्रताः॥
यतिभिक्षुकब्रह्मचारिद्विजीवान् सुरांस्तथा।
पश्यन्ते कालसूत्रे ते यावच्चन्द्रदिवाकरौ॥
सैन्धवपुरीषेषु घोरन्ते ते दिवानिशम्।
भक्षिताः कीटनिकरैः शूकरं कुर्व्वन्ति कातराः॥
ये निन्दन्ति च ब्रह्माणं शङ्करं जगतां गुरुम्।
शिवं सुराणां प्रवरं दुर्गां सर्व्वां सरस्वतीम्॥
सीतां च तुलसीं गङ्गां वेदांश्च वेदमातरम्।
व्रतं तपस्यां पूजां च मन्त्रं मन्त्रप्रदं गुरुम्॥
ते पश्यन्त्यन्धकूपे वै चायुषोऽन्ते विधेरहो!
भक्षिताः सर्पसंघैश्च शूकरं कुर्व्वन्ति सन्ततम्॥
ये निन्दन्ति क्षुधीकेशं देवसाम्यं विधाय च।
विष्णुभक्तिप्रदञ्चैव पुराणञ्च श्रुतेः परम्॥
राधां तदङ्गना गोपीर्ब्राह्मणांश्च सदार्चितान्।
ते पश्यन्त्यन्धकूपे वै विधातुरायुषः क्षयम्॥
अधोमुखा ऊर्द्धपदा सर्पसंघैश्च वेष्टिताः।
भक्षिता विकृताकारैः कीटैः सर्पैः समाकुलैः॥
अतीवकातरा भीताः शूकरं कुर्व्वन्ति सन्ततम्।
सैन्धवपुरीषाणि ध्रुवं भक्षन्ति लोभिताः॥
उल्कां ददति यमराट् तन्मुखे यमकिङ्कराः।
विसन्ध्यं तर्जनं कृत्वा कुर्व्वन्ति दण्डताडनम्॥
कुर्व्वन्ति शस्त्रपातञ्च प्रहारैर्मुषिता भिया।
तदा कल्पान्तरे सृष्टे र्भवेच्च प्रथमे पुनः॥
तेषां भवेत् प्रतीकार इत्याह कमलोद्भवः।
परनिन्दा विनाशाय स्वनिन्दा यशसे परम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।४०।४१ अः॥
"वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा।
द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत्॥
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्জ्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्জ्जयेत्॥
यस्तु देवार्षीश्चैव वेदं वा निन्दति द्विजः।
न तस्य निष्कृतिर्दृष्टा शास्त्रेष्विह सुनीश्वरैः॥
निन्द्येदे गुरुं देवं वेदं वा सोपहसनम्।
कल्पकोटिशतं सार्द्धं रौरवे पच्यते नरः॥
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम्।
कर्णौ पिधाय गन्तव्यं न चैनामवलोकयेत्॥
वर्জ्जयेद्वे परेषान्तु यत्रेषु गर्हणां बुधः।
न निन्देदूर्द्धयोगिनः सिद्धान् व्रतिनो वा यतीं-
स्तथा॥
देवतायतनं प्राज्ञो देवानामालयं तथा॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
निन्दास्तुतिः, स्त्री, (निन्दया स्तुतिः।) आक्षस्तुतिः। यथा,—
"निन्दास्तुतिभ्यां वाच्याभ्यां गम्यते स्तुति-
निन्दयोः।"
निन्दया स्तुतिर्गम्यते आक्षेप स्तुतिरिति च युतुपत्ता आक्षस्तुतिः। इति साहित्यदर्पणः।
अपि च।
"यदि निन्दन्निव स्तौति आक्षस्तुतिरसौ मता।
उदाहरणम्।
"तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता मा भूदहङ्कृथाः॥"
इति दण्डी॥

"कथमवनिपः! दर्पो यन्निशातासिधारा-
दलनगलितमूर्द्धां विद्विषां क्षोणितश्रीः।
नयु तव निहतारेरप्यसौ किन्न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः॥
इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य।" इति काव्यप्रकाशः॥
निन्दितः, त्रि, (निन्दास्य जातेति। निन्दा+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ६। इति इतच्।) निन्दायुक्तः। तत्पर्य्यायः। धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सितः ४। इति जटाधरः॥ (यथा, देवीभागवते। ४। ७। ४६।
"मद्भ पश्यति स्वात्मा प्रपातं नैव पश्यति।
करोति निन्दितं कर्म्म नरकान्न विमेति च॥")
निन्दुः, स्त्री, निन्दतेऽन्यस्त्रीसङ्गौ। निदि कुत्सायामित्यादौ औणादिक उप्रत्ययः। ङीप्। इति हेमचन्द्रः। ३। १६५॥
निपः, पुं क्ली, (नियतं पिबत्यनेनेति। नि+पा+घञर्थे कः।) कलसः। इत्यमरः। २। ६। ३२॥ कदम्बवृक्षे, पुं। इति शब्दचन्द्रिका॥
निपठः, पुं, (निपठनमिति। नि+पठ+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) पाठः। इत्यमरः। ३। २। २६॥
निपत्या, स्त्री, (निपतत्यस्यामिति। नि+पत+"संज्ञायां समजनिषदनिपतेति।" ३। ३। ६६। इति क्यप्। ततष्टाप्।) युद्धभूमिः। इति मुग्धबोधटीकायां दुर्गादासः॥ (पिच्छिला भूमिः। इति सिद्धान्तकौमुदी॥)
निपाकः, पुं, (नियमेन पचनमिति। नि+पच+घञ्।) पाकः। इति शब्दरत्नावली॥
निपाठः, पुं, (नि+पठ+पचे घञ्।) पठनम्। इत्यमरः। ३। २। २६॥
निपातः, पुं, (नितरां पतनमिति। नि+पत+घञ्।) क्षयः। इति चिकाण्डशेषः॥ (यथा, महाभारते। ५। १२२। ६।
"सङ्गरेषु निपातेषु तथापद्व्यसनेषु च॥")
पतनम्। यथा, आनन्दलहर्य्याम्। ५७।
"घने वा हर्म्ये वा समकरनिपातो हिमकरः॥"
निपातनं, क्ली, (निपात्यतेऽनेनेति। नि+पत+णिच्+करणे ल्युट्।) स्वीकारः। इति भरतः॥ अधोनयनम्। इति सर्व्वस्वम्। तत्पर्य्यायः। अवनायः २। इत्यमरः। ३। २। २६॥ निपातनम् ३। इति भरतानन्दः॥ व्याकरणसिद्धशब्दानुत्पन्नपदसाधनम्। यथा, निपातनादिसिद्धिः। यङ्लुगन्तेनानुत्पन्नं तत् सर्व्वं निपातनात् सिद्धमिति भाष्यम्॥ निपातनलक्षणं यथा,
"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥
इति प्राचः।" इति दुर्गादासः। तद्यथा,—
"वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्य्ययः।

षोड़शादौ विकारः स्यात् वर्णनाशः पृथोदरे ॥"
इति कलापपञ्जी ॥

निपानं, क्ली, (निपीयते अस्मिन्निति। नि+पा+आधारे ल्युट्।) कूपसमीपस्थिलादिनिबद्धपशुपानार्थकृतकूपोद्धृताम्बुस्थानम्। इति भरतः। तत्पर्य्यायः। आहावः। इत्यमरः। २।१०।२६॥ निपानकम् ३। इति शब्दरत्नावली॥ गोदोहनमात्रम्। इति त्रिकाण्डशेषः॥ (जलाशयमात्रम्। यथा, विष्णुसंहितायाम्। ६४। १।
"परनिपानेषु न स्नानमाचरेत्॥")

निपुणः, त्रि, (नि+पुण राशीकरणे+क।) कार्य्यक्षमः। (यथा, नागानन्दे सूत्रधारोक्तिः।
"श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी॥"
अन्यच्च, देवीभागवते। १। ५। ५६।
"न ते रूपं वेत्तुं सकलभुवने कोऽपि निपुणो
न नाम्नां संख्यां ते कथितुमिह योग्योऽस्ति
पुरुषः॥")

तत्पर्य्यायः। प्रवीणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृतसुखः ८ कृती ९ कुशलः १०। इत्यमरः। ३।१।४॥ संख्यावान् ११ मतिमान् १२ कृशाग्रीयमतिः १३ ऋष्टिः १४ विदुरः १५ बुधः १६ दक्षः १७ नेदिष्ठः १८ कृतधीः १९ सुधीः २० विद्वान् २१ कृतकर्म्मा २२ विचक्षणः २३ विदग्धः २४ चतुरः २५ प्रौढ़ः २६ बोद्धा २७ विशारदः २८ सुमेधाः २९ सुमतिः ३० तीक्ष्णः ३१ प्रेक्षावान् ३२ विबुधः ३३ विदन् ३४। इति राजनिर्घण्टः॥ विज्ञानिकः ३५ कुशली ३६। इति शब्दरत्नावली॥

निफला, स्त्री, (निष्टप्तं फलं यस्याः।) ज्योतिष्मती। इति भावप्रकाशः॥ (ज्योतिष्मतीशब्देऽस्या गुणादयो व्याख्याताः॥)

निफेनं, क्ली, (निष्टप्तः फेनो यस्मादिति।) अफेनम्। इति राजनिर्घण्टः॥

निबन्धं, क्ली, (नितरां बन्धः तानलयादिसहितबन्धनं यत्र।) गीतम्। इति शब्दरत्नावली॥

निबन्धः, पुं, (निबध्नातीति। नि+बन्ध घञ्।) आनाहरोगः। ग्रन्थस्य वृत्तिः। इति हेमचन्द्रः॥ निबन्धः। इति जटाधरः॥ बन्धनम्। यथा,—
"देवी सम्यग्विमोक्षाय निबन्धायासुरी मता॥"
इति श्रीभगवद्गीता॥
(यथा, भागवते। ६। २। ४६।
"नातःपरं कर्म्मनिबन्धकृन्तनं
मुमुक्षतां तीर्थपदानुकीर्त्तनात्॥")

निबन्धनं, क्ली, (निबध्यतेऽनेनास्मिन् वा। नि+बन्ध ल्युट्।) हेतुः। इति हेमचन्द्रः॥ उपनाहः। स तु वीणातन्त्रीनिबन्धनोर्द्ध्वभागः। इत्यमरः। २। ७। ७॥ (नि+बन्ध+भावे ल्युट्।) बन्धनञ्च॥

निबन्धा, [ऋ] पुं, निबन्धकर्त्ता। ग्रन्थकर्त्ता। इति व्याकरणम्॥

निबन्धितः, त्रि, बद्धः। निबन्धोऽस्य जातः इत्यर्थे इतच्प्रत्ययनिष्पन्नः॥

निबर्हणं, क्ली, (निबर्हते इति। नि+बर्ह+ल्युट्।) मारणम्। इत्यमरः। २। ८। ११२॥ (यथा, मार्कण्डेयपुराणे। ६२। २२।
"युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्॥")

निभः, त्रि, (नियतं भातीति। नि+भा+क।) सदृशः। इत्यमरः। २। १०। ३८॥ (यथा, रघुवंशे। १०। ६।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं प्रारदमिव प्रारम्भसुखदर्शनम्॥")
प्रकाशः। व्याजे, पुं। इति शब्दरत्नावली॥

निभालनं, क्ली, (नि+भल+णिच्+भावे ल्युट्।) दर्शनम्। इति त्रिकाण्डशेषः॥

निभृतं, त्रि, (नि+भृ+क्त।) अतीतम्। भूतकालः। इति राजनिर्घण्टः॥

निभृतः, त्रि, (नि+भृ+क्त।) विनीतः। निर्जनः। यथा,—
"निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।"
इति श्रीजयदेवः। २। ११॥
(अस्तमयासन्नः। यथा, रघुवंशे। ८। १५।
"नभसा निभृतेन्दुना तुलां
सुदितार्केण समारुरोह तत्॥")

निमज्ज्युः, पुं, (नि+मस्ज+अथुच्।) शयनम्। यथा, भट्टिः।
"तल्पे कान्तान्तरैः सार्द्धं मन्येऽहं धिङ्निमज्ज्युम्॥"

निमज्जनं, क्ली, (निमज्ज्यतेऽनेनेति। नि+मस्ज+भावे ल्युट्।) स्नानम्। अवगाहनम्। यथा,
"नास्ति जन्यजनकव्यतिभेदः
सत्यमम्भजनितो जगदेहः।
वीक्ष्य वः खलु तनुमज्जतादां
ह्रदिमज्जनमवैमि सुधायाम्॥"
इति नैषधे पञ्चमसर्गः॥

निमन्त्रणं, क्ली, (निमन्त्र्यते इति। नि+मन्त्र+ल्युट्।) नियोजनविशेषः। "अत्र यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम्। यथा, इह भुञ्जीत भवान्। यस्याकरणे प्रत्यवायो न स्यात् तदामन्त्रणम्। यथा, इह भुञ्जीत भवान्। इति निमन्त्रणामन्त्रणयोर्भेदः।" इति मुग्धबोधटीकायां दुर्गादासः॥

निमयः, पुं, (निमीयतेऽनेनेति। नि+मि+"इरच्।" ३। ३। ५६। इत्यच्।) विनिमयः। इत्यमरः। २। १। ६०॥ (यथा, महाभारते। १२। ७८। ७।
"पक्वेनामस्य निमयं न प्रशंसन्ति साधवः।
निमयेत् पक्वमामेन भोजनार्थाय भारत!॥")

निमिः, पुं, इक्ष्वाकुराजपुत्रः। तस्य निमेषे स्थितिकारणं यथा,—
"निमिर्नाम नृपः स्त्रीभिः पुरा द्यूतमदीव्यत।
तत्रान्तरेऽभ्याजगाम वशिष्ठो ब्रह्मसम्भवः॥
तस्य पूजामकुर्व्वन्तं शशाप स मुनिर्नृपम्।
विदेहाख्यं भवस्वेति शशस्तेनाप्यसौ पुनः॥
अन्योन्यशापाच्च तयोर्विशरीरे विचेतसी।
जग्मतुः शापनाशाय ब्रह्माणं जगतः पतिम्॥
अथ ब्रह्मण आदेशाल्लोचनेषु वसन्निमिः।
निमेषाः स्युश्च लोकानां तदिशामाय नारद॥"
इति मत्स्यपुराणे ५५ अध्यायः॥ * ॥
मतान्तरं यथा,—
"निमिः सहस्रसंवत्सरं सत्रमारेभे। वशिष्ठश्च होतारं वरयामास। तमाह वशिष्ठः। अहमिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमतरं वृतः। आगतस्तावपि ऋत्विग् भविष्यामीत्युक्ते सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत्। समाप्ते चामरपतियागे त्वरायान् वशिष्ठ आजगाम। तत्कर्म्मकर्तृत्वं गौतमस्य दृष्ट्वा अयं विदेहो भविष्यतीति शापं ददौ। निमेः शरीरं सद्यो मृतमिव तस्थौ। यज्ञसमाप्तौ भागग्रहणायागतान् देवान् ऋत्विज ऊचुः। यजमानाय वरो दीयतामिति। देवेश छन्दितो निमिराह। नश्येतावति जगत्यन्यदुःखमस्ति यच्छरीरात्मनोर्वियोगे भवति। तदहमिच्छामि सकललोचनेषु वस्तुम्। न पुनः शरीरग्रहणं कर्त्तुमित्येवमुक्ते देवैरसावग्रेषभूतानां नेत्रेष्वासां कारितः। ततो भूतान्युन्मेषनिमेषं चक्रुः।" इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥

निमित्तं, क्ली, (नि+मिद्+क्त। संज्ञापूर्व्वकत्वान्न त्वम्।) हेतुः। (यथा, देवीभागवते। १।१०।५।
"किं निमित्तं महाभाग! निःसृतस्य च मां प्रति।
जातं त्वागमनं ब्रूहि कार्य्यं तन्मुनिसत्तम!॥")
चिह्नम्। इत्यमरः। ३।३।७६॥ शकुनः। यथा,
"निमित्तानि च पश्यामि विपरीतानि केशव!।
इति श्रीभगवद्गीता॥

निमित्तकं, क्ली, (निमित्त+संज्ञायां कन्।) निमित्तनिश्चयादागतम्। शुभनम्। इति शब्दमाला॥ निमित्तच॥

निमित्तकारणं, क्ली, (निमित्तं कारणम्।) समवायिकारणासमवायिकारणाभ्यां भिन्नम्। तृतीयकारणम्। यथा। घटं प्रति कुलालदण्डचक्रसलिलसूत्रादि। इति भाषापरिच्छेदसिद्धान्तमुक्तावल्यौ॥

निमित्तकृत्, पुं, (निमित्तं सूचनेन शुभाशुभशकुनं करोतीति। कृ+क्विप्।) काकः। इति राजनिर्घण्टः॥

निमित्तवित्, [द्] पुं, (निमित्तं शुभाशुभलक्षणं वेत्तीति। विद्+क्विप्।) दैवज्ञः। गणकः। इति हेमचन्द्रः। ३। १४६॥

निमिषः, पुं, विष्णुः। यथा, महाभारते। १। १४६। ३६।
"निमिषोऽनिमिषः श्रग्वी वाचस्पतिरुदारधीः॥"
(निमिषतीति। नि+मिष+"इगुपधेति।"

३।१।१३५। इति कः।) कालविशेषः। चक्षुर्निमीलनम्। इति मेदिनी। षे, ३६॥ (यथा, महाभारते। १। १८६। १६।

"सव्यञ्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्द्धसंख्यान्॥"

वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।

"निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः। चालयेदतिवर्त्मानि निमिषः स गदो मतः॥")

निमीलनं, क्ली, (निमीलत्यनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः। ३। २४२॥ (यथा, कलाविलासे। १। ४७।

"नयननिमीलनमूलः सुचिरं स्नानार्द्रचूलजलसिक्तः।
दन्तरुचिकुसुमसुखप्रतग्राखाग्रतैः फलितः॥"

कालविशेषः। यथा, सूर्य्यसिद्धान्ते। ४। १७।

"तदेव विमर्दार्द्धनाड़िकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ६। ७३।

"नीतश्च मण्डलेशत्वं वेलावित्तस्य भूभुजा।
देवीः कामयमानस्य चक्रे गजनिमीलिका॥")

निमीलनञ्च॥

निमेयः, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति ईत्।) नेमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते। १३। ५१। ६।

"नाहं शतसहस्रेण निमेयः पार्थिवर्षभ!।
दीयतां सदृशं मह्यममात्ये! सह चिन्तय॥")

निमेषः, पुं, (नि+मिष+भावे घञ्।) पद्मस्यन्दनकालः। पलक् इति भाषा॥ तत्पर्य्यायः। निमिषः २ दृष्टिनिमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावत्कालमक्षत्रिमनेत्रविकाशाग्रानन्तरं पद्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥

"अक्षिपद्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम ते द्वे त्रुटी तु लवः स्मृतः॥"
इत्यग्निपुराणम्॥

(पद्मस्यन्दनम्। यथा, रघुः। २। १६।

"अपौ निमेषालसपद्मपङ्क्ति-
रूपोषिताभ्यामिव लोचनाभ्याम्॥"

रोगविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। ३६ अध्याये।

"नेत्रस्तम्भं निमेषं वा क्षयं कासं प्रणागरम्।
लभते दन्तचालञ्च तांस्तांश्चाप्यनुपद्रवान्॥"

खनामख्यातयक्षविशेषः। इति नीलकण्ठः॥

यथा, महाभारते। १। ३२। १६।

"उलूकश्वसनाभ्याञ्च निमेषेण च पक्षिराट्।
प्ररुजेन च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणकार्य्यं यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं यावद्व्यर्थः रोचते दीप्यते इति। रुच् दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्नं, त्रि, निकृष्टा म्ना अभ्यासः श्लीलमत्र। (यद्वा, निकृष्टं म्नासोति। म्ना+कः।) नीचम्। निचु इति नावाल इति च भाषा॥ तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः। १। १०। १५॥ गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ५।

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"

पुं, अनमित्रपुत्रः। स तु सत्राजितप्रसेनयोः पिता। यथा, भागवते। ६। २४। १२।

"ग्निनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः। १। १०। ३०॥ (यथा, मनुः। ६। २२।

"यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥")

नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति खाद्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्दः ६। इत्यमरः। २। ४। ६२॥ अर्कपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरतरुः ९ कृष्णिः १०। इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कौरेष्टः १४ नेता १५ सुमनाः १६ विप्रौर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ भूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। कफव्रणक्रिमिवमिशोफप्रशान्तिकारित्वम्। बलासबहुविधपित्तदोषहृद्यविदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। शीतत्वम्। कटुपाकित्वम्। अक्षिवातकारित्वम्। अरुच्यत्वम्। भ्रमक्षटकासज्वरारुचिच्छर्द्दिकुष्ठकृच्छ्रासमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। क्रिमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलगुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःक्रिमिमेहनाशित्वञ्च।

"निम्बः शीतो लघुर्ग्राही कटुपाकोऽक्षिवातजुत्।
अरुच्यः भ्रमक्षटकासज्वरारुचिक्रिमिप्रणुत्॥
व्रणपित्तकफच्छर्द्दिकुष्ठकृच्छ्रासमेहजुत्।
निम्बपत्रं स्मृतं नेत्र्यं क्रिमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठजुत्।
नेम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःक्रिमिमेहजुत्॥"
इति भावप्रकाशः॥*॥

तत्तैलगुणाः। नाड़ीव्रणत्वम्। क्रिमिकुष्ठकफत्वग्दोषव्रणकण्डूतिप्रशोफहारित्वम्। पित्तजत्वञ्च। इति राजनिर्घण्टः॥ *॥

"निम्बं पित्तकफच्छर्द्दिव्रणकृच्छ्रासकुष्ठजुत्।"
निम्बपत्रं इति वा पाठः॥ *॥

"करञ्जनिम्बजपलं क्रिमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं क्रिमिहरं परम्॥"
इति राजवल्लभः॥

अथ महानिम्बः। वकाइन इति हिन्दीभाषा॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"महानिम्बः स्मृतो रेका रम्यको विषसुष्टिकः।
केशमुष्टिर्निम्बरकः कासघ्नः शीर इत्यपि॥
महानिम्बो हिमो रूक्षश्चक्षुष्यो ग्राही कषायकः।
कफपित्तक्रिमिच्छर्द्दिकुष्ठकृच्छ्रासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"
(षष्ठ्यां तिथौ तद्दिवसे तिर्य्यक्योनिर्न स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब एव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्दिवसनिषेधो यथा, तिथितत्त्वे।

"कण्डूरी जायते क्षिप्रं तिर्य्यग्योनिञ्च निम्बके॥")

निम्बतरुः, पुं, (निम्ब एव तरुर्यत्रः।) मन्दारवृक्षः। इत्यमरः। २। ४। २६॥

निम्बबीजः, पुं, (निम्बस्य बीजमिव बीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(नु)म्बूकं, क्ली, (निम्बति सिञ्चतीव रसेनेति। निम्ब सेचने+बाहुलकात् कः। प्राधिको ह्रस्वश्च। ततः कन्।) वृक्षविशेषः। आमजी लेबु इति भाषा॥ तत्पर्य्यायः। अम्लजम्बीरः २ वह्निः ३ दीप्तः ४ वह्निबीजः ५ अम्लसारः ६ दन्तशातः ७ शोधनः ८ जम्बुशारी ९ निम्बूः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"निम्बूः स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्त्तितम्॥")

तत्फलगुणाः। अम्लरसत्वम्। कटुत्वम्। उष्णत्वम्। गुल्मानिलकासकफार्शिःकृच्छ्रविच्छर्द्दिहरत्वम्। अग्निदीप्तिकारित्वम्। चक्षुष्यत्वम्। परिपक्वे अतीव रुच्यत्वञ्च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। क्रिमिसमूहोदरग्रहनाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफमूलिनो हितत्वम्। कण्डूदद्रुरुचिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीड़ितानां विषविकलानां मनुष्यहे बहुशो विशुचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥ *॥

"भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम्।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम्॥
निम्बूफलभवं पानमत्यन्तं वातनाशनम्।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम्॥"
इति राजनिर्घण्टः॥

नियतः, त्रि, (नि+यम+क्तः।) संयतः। यथा,
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां नराधिप!।
पुण्याहारो वर्षमेकं तत्रैव नियतात्मवान्॥"
इति भविष्यपुराणे द्वितीयकल्पः॥
(सेवापरः। यथा, रामायणे। १।२।७।
"प्रायश्चित्तं सुनेस्तस्य वल्कलं नियतो गुरोः॥")
नित्यः। यथा,—
"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम्॥"
इति भाषापरिच्छेदे। १६॥
(यथा च कश्चित्।
"चन्द्रे लक्ष्मीः प्रभा सूर्य्ये गतिर्वायौ भुवि क्षमा।
एतत्तु नियतं सर्व्वं त्वयि चानुत्तमं यशः॥"
निपूर्ब्बयमधातोर्बद्धार्थकत्वात् बद्धोऽपि। यथा,
नियताञ्जलिः। संयुक्तः। आसक्तः। यथा,
महाभारते। १। १३४। ५६।
"प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा॥")
नियतिः, स्त्री, (नियम्यते आत्मा अनयेति। नि+यम+करणे क्तिन्।) भाग्यम्। दैवम्। इत्यमरः।१।४।२८॥ (यथा, माघे। ४। ३४।
"आसादितस्य तमसा नियतेर्नियोगा-
दाकाङ्क्षतः पुनरपक्रमणेन कालम्॥")
नियमः। इति मेदिनी। ते, १२०॥ (चतुर्दशधारिणीदेवीयोविघ्ननाशनमन्त्रतमा। इति वह्निपुराणे गणेशदीनामाध्यायः॥)
नियती, स्त्री, (नियम्यते कालो यया। नि+यम+क्तिच्। वा ङीष्।) दुर्गा। यथा,—
"स्मृतिः संसारबाहेवी नियती च नियामता॥"
इति देवीपुराणे निरुक्ताध्यायः॥
नियतेन्द्रियः, त्रि, (नियतानि संयतानि इन्द्रियाणि येन।) संयतेन्द्रियः। इन्द्रियदमनशीलः। यथा, मार्कण्डेये। ८४। ८।
"अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः॥"
नियन्ता, [तृ] पुं, (नियच्छति अश्वादीनिति। नि+यम+तृच्।) सारथिः। इत्यमरः। २। ८। ५८॥ (यथा, महाभारते। ७। १३। २२।
"स नियन्तृध्वजरथं विषाद निपिते शरैः॥"
विष्णुः। यथा, महाभारते। १३। १४८। १०५।
"अपराजितः सर्व्वसहो नियन्ता नियमो यमः॥")
त्रि, शास्ता। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥"
नियन्त्रितः, त्रि, (नि+यन्त्रि+क्तः।) अवरुद्धः। अनर्गलः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। २। ६। ५२।
"आगच्छेत् सर्व्वथा सोऽपि मम पार्श्वे नियन्त्रितः॥")

नियमः, पुं, (नियमनमिति। नि+यम+"यमः समुपनिविषु च।" ३। ३। ९३। इति अप्।) शौचं सन्तोषः तपः स्वाध्यायः ईश्वरप्रणिधानञ्च। इति वेदान्तसारः॥ प्रतिज्ञा। अङ्गीकार इति यावत्। व्रतम्। तच्चोपवासादि। अनित्यमागन्तुसाधनं कर्म्म। इत्यमरः।२।७।३८॥ (सङ्कल्पः। यथा, देवीभागवते। ३। २६। २५।
"नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत्॥"
बन्धनम्। यथा, मनुः। ८। १२२।
"धर्म्मस्यायमिचारार्थमधर्म्मनियमाय च॥")
मन्त्रणा। निश्चयः। इति मेदिनी। मे, ४६॥
"नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः॥
स्नानमौनोपवासेज्यास्वाध्यायोपस्थनियहः।
तपः क्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः॥
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम्।
सन्तोषस्तपसा जप्यं वासुदेवार्चनं दमः॥"
इति गरुड़पुराणम्॥
"ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान्।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः।
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥ *॥
"तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्।
सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च जपो हुतम्।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः॥"
इति तन्त्रसारे (हठयोगप्रदीपिकायाञ्च। १। १७॥ कवितानियमाः। यथा,—
"वर्णयेन्न सदोत्तानियमोऽथ प्रदर्श्यते।
भूर्ज्जत्वगधिमवत्यैव मलये श्लेव चन्दनम्॥
सामान्यवर्णने शौक्ल्यं कृत्स्नाभ्रःपुष्पवाससाम्।
लघुत्वं केशकाकाक्षिपयोनिधिपयोसुचाम्॥
रक्तत्वं रत्नबन्धूकविद्याम्भोजविवस्वताम्।
तथा वसन्त एवान्यपुष्टानां कलकूजितम्॥
वर्षास्वेव मयूराणां रुतं गुरुच्च वर्ण्यते।
नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते॥
कमलासम्बदोः श्लक्ष्णहरितोर्नागसर्पयोः।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु॥
चन्द्रेशुशुक्लयोः कामध्वजे मकरमत्स्ययोः।
दानवासुरदत्यानामैक्यमेवाभिसम्मतम्॥
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता।
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः॥"
इति कविकल्पलतायाम् १ स्तवके वर्ण्यस्थितिर्नाम प्रतीयं कुसुमम्॥ (विष्णुः। यथा, महाभारते। १३। १४६। ३०।
"व्रतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥"
महादेवः। यथा, तत्रैव तस्य सहस्रनामकीर्त्तने। १३। १७। ३५।
"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")
नियमनं, क्ली, (नि+यम+भावे ल्युट्।) नियमः। यथा। "न तत्राभिधानियमनात्तस्याः।" इति काव्यप्रकाशे द्वितीयोल्लासः॥ बन्धनम्। यथा। बलेर्न्नियमनमित्युद्भटः॥ (नियहः। यथा, रघुः। ६। ६।
"समतया वसुधविसर्ज्जने-
र्नियमनादसतान्च नराधिपः॥"
नियच्छतीति। नि+यम+ल्युः। नियामके, त्रि। यथा, हरिवंशे। १८१। ५३।
"दक्षयज्ञविनाशाय बलेर्न्नियमनाय च॥")
नियमसेवा, स्त्री, (नियमेन भगवतः सेवा।) कार्त्तिकमासे नियमपूर्ब्बकभगवदाराधना। यथा,
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः त्रिपेन्नरः।
तत्कार्त्तितस्य पुण्यस्य फलं नाप्नोति नारद!॥"
किञ्च।
"नियमेन विना चैव यो नयेत् कार्त्तिकं सुने!।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः॥"
तत्रोपक्रमकालश्लोकः श्रीहयशीर्षपञ्चरात्रीयकार्त्तिकमाहात्म्ये।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः॥"
इति श्रीहरिभक्तिविलासे १६ विलासः॥ अन्यत् कार्त्तिकशब्दे द्रष्टव्यम्॥
नियमितः, त्रि, (नि+यम+णिच्+क्तः।) कृतनियमः। यतः। यथा,—
"क्षुद्राः सन्त्रासमेते विजहतु हरयः क्षुण्णशूकैभकुम्भा
युग्मद्देहेषु लब्धां दधति परममी ग्रायका निष्यतन्द्राः।
सौमित्रे! तिष्ठ पात्रं त्वमपि न हि वृथा नन्वहं सेवनाद्रेः
किञ्चिद्भूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥"
इति महानाटकम्॥
नियातनं, क्ली, (नि+यत+णिच्+ल्युट्।) निपातनम्। इत्यमरटीकायां नयनानन्दः॥
नियामः, पुं, (नि+यम+घञ्।) नियमः। इति शब्दरत्नावली॥
नियामकः, पुं, (नियामयतीति। नि+यम+णिच्+ण्वुल्।) पोतवाहः। इत्यमरः। १। १०। १२॥ त्रि,। नियन्ता। इति मेदिनी। के, १६४॥ (यथा, महाभारते। ३। २७१। ३७।
"ततोऽभिं नाशयामासुः धर्म्मसाभिनियामकाः॥")
नियुक्तः, त्रि, (नि+युज+क्तः।) नियोगदिशिष्टः। (यथा, मनुः। ६। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन॥")
अवधारितः। आज्ञप्तः। यथा,—
"जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः।
त्वया हृषीकेश! हृदिस्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥"
इत्याह्निकतत्त्वम्॥

नियुतं, क्ली, (नियूयते बहुसंख्या प्राप्यतेऽनेनेति। नि+यु+क्त।) लक्षम्। इत्यमरः। ३। ५।२४॥ यथा।"धेनूनां नियुते प्रादादिति नियुते लक्षे।" इति श्रीधरस्वामी॥

"प्रयुतं सहस्रमयुतं नियुतं प्रयुतं मतम्।
क्ली कोटिरर्बुदमिति क्रमाद्दशगुणोत्तरम्॥
इति रत्नकोषः।" इति भरतः॥ दशलक्षम्। यथा,—

"एकं दश शतञ्चैव सहस्रमयुतन्तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्बुद एव च॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः।
अन्त्यं मध्यं परार्द्धञ्च दशघ्नाद्या यथोत्तरम्॥"
इति पुराणम्॥

नियुद्धं, क्ली, (नि+युध्+क्त।) बाहुयुद्धम्। इत्यमरः। २। ८। १०६॥ (यथा, हरिवंशे। १४२। ७१।

"नियुद्धकुशलान् मल्लान् देवो मल्लप्रियस्तदा।
योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्मवान्॥")

नियोगः, पुं, (नि+युज्+घञ्।) अवधारणम्। इति दुर्गादासः॥ (निश्चयः। यथा, रघुः। १७। ४६।

"तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः॥")
आज्ञा। इति हेमचन्द्रः। २। १६०॥ (यथा, रामायणे। २। २१। ४६।

"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः॥"
अपुत्रभ्रातृपत्नीपुत्रार्थे नियोजनम्। यथा, मनुः। ९। ६२।

"विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम्॥")

नियोगी, [न्] त्रि, (नियोगोऽस्यास्तीति। नियोग+इनिः।) नियोगविशिष्टः। नियुक्तः। तत्पर्य्यायः। कर्म्मसचिवः २ आयुक्तः ३ व्याप्तृतः४। इति हेमचन्द्रः। ३। ३८३॥ (यथा, राजतरङ्गिण्याम्। ६। ८।

"क्षध्यश्चलसुतस्यास्य क्षत्रं नान्यन्नियोगिनाम्॥")

नियोज्यः, त्रि, (नियोक्तुमर्हः। नि+युज+ण्यत्।) नियोगार्हः। प्रभुः। इति मुग्धबोधव्याकरणम्॥ (यथा, प्रद्युम्नविजये। ५ अङ्के।

"एते वयं नियोज्या नियोजयतु नियोग्यः॥")

नियोजनं, क्ली, (नि+युज+ल्युट्।) नियोगः। (यथा, महाभारते। १२। ३६४। २।

"स्मरणीयोऽस्मि भवता संप्रेषणनियोजनैः॥")
प्रेरणम्। यथा। त्वयैतत् क्रियतामिति क्रियासु नियोजनं प्रेरणम्। इति दुर्गादासः॥

नियोज्यः, त्रि, (नियोक्तुं शक्यः। नि+युज+"प्रयोज्यनियोज्यौ शक्यार्थे।" ७। ३। ६८। इति ण्यत्प्रत्ययेन निपातनात् साधुः।) प्रेष्यः। किङ्करः। इत्यमरः। २। ९०। १७॥ (यथा, भागवते। ४। १२। २८।

"निग्रह्य वैक्लवनियोज्यसुखयोर्-
मैधुयुतं वाचसुरुक्रमप्रियः॥"
नियोजनीये, त्रि। यथा, महाभारते। १२। ३२७। ४६।

"न नियोज्याश्च वः स्त्रिया अनियोगे महाभये॥")

नियोद्धा, [द्धृ] पुं, (नियुध्यते इति। नि+युध+तृच्।) कुक्कुटः। इति राजनिर्घण्टः॥ बाहुयुद्धकारी च॥

निरञ्चदेशः, पुं, (निरञ्चो देशः।) यत्रदेशः। पलभाभून्यस्थानम्। स तु पूर्व्वे भद्राश्ववर्षे यमकोटिः। दक्षिणे भारतवर्षे लङ्का। पश्चिमे केतुमालवर्षे रोमकः। उत्तरे कुरुवर्षे सिद्धपुरी। एताः भूवृत्तपादविवराः अन्योऽन्यं प्रतिष्ठिताः। तासासुपरितो विषुवस्थो दिवाकरो याति। तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते। तत्र दिवामानं रात्रिमानञ्च चिंशद्घटिकाः। इति सूर्य्यसिद्धान्तमतम्॥ (यथा, सिद्धान्तशिरोमणौ गोलाध्याये। १५।

"निरञ्चदेशात् क्षितिषोड़शांशे
भवेदवन्ती गणितेन यस्मात्॥")

निरङ्कुशः, त्रि, (निर्गतोऽङ्कुश इव प्रतिबन्धको यस्य।) अनिवार्य्यः। बाधाशून्यः। इति जटाधरः॥ (यथा, भागवते। १। १७। १५।

"अनागःस्विह भूतेषु य आगस्कृन्निरङ्कुशः।
आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम्॥")

निरञ्जना, स्त्री, (निर्गतोऽञ्जनमिव अन्धकारो यत्र।) पूर्णिमा। इति शब्दमाला॥ (निर्गतोऽञ्जनं यत्र।) अञ्जनशून्ये, त्रि। (निर्गतमञ्जनमिवाज्ञानं यत्र। अज्ञानरहिते च। यथा, देवीभागवते। १। १८। ३६।

"स कथं बध्यते ब्रह्मन्निर्विकारो निरञ्जनः॥"
पुं, योगिविशेषः। यथा, हठयोगप्रदीपिकायाम्। ७।

"कानेरी पूज्यपादश्च नित्यनाथो निरञ्जनः॥"
महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। १४। २।

"दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः॥")

निरतं, त्रि, (नि+रम+क्तः।) नियुक्तम्। यथा। दानरत्नाकरे देवलः।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"
इति शब्दरत्नावलिः॥

निरन्तरं, त्रि, (निर्गतमन्तरं यस्मिन् यस्माद्वा।) निबिड़म्। घनम्। इत्यमरः। ३। १। ६६॥ अनवकाशः। (यथा, आर्य्यासप्तशत्याम्। ४३८।

"सज्जनयोः खलयोरिव निरन्तरं सङ्गतं भवति॥")
अनवधिः। अपरिधानम्। अनन्तर्धानम्। अभेदः। अतादर्थ्यम्। अच्छिद्रम्। (यथा,कुमारसम्भवे। ५। २५।

"शिलाशयात्मानमनिकेतवासिनं
निरन्तराखन्तरवातदृष्टिषु॥")
अविना। अवहिः। अनात्मीयम्। अनवसरः। अमध्यम्। अनन्तरात्मा। एते निरुपसर्गपूर्व्वकान्तरशब्दार्थाः॥

निरन्तराभ्यासः, पुं, (निरन्तरः सततोऽभ्यासो यत्र।) स्वाध्यायः। इति चिकाकश्रेष्यः। सततादृष्टिश्च॥

निरपत्रपः, त्रि, (निर्गता अपत्रपा लज्जा यस्येति।) धृष्टः। निर्लज्जः। इति जटाधरः॥ (यथा, भागवते। ३। २०। २४।

"ततो हसन् स भगवानसुरैर्निरपत्रपैः।
अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत्॥")

निरपेक्षः त्रि, (निर्गता अपेक्षा यस्य।) अनपेक्षः। यथा, मलमासतत्त्वे।

"अभिधातुं पदैरन्यैस्त्रिभिर्निरपेक्षरत्ना स्मृतिः॥"
(यथा, रामायणे। ६। ६६। ४२।

"कालज्ञनिरपेक्षेण पैष्टितेरस्य दारुणैः॥")

निरयः, पुं, (निर्गतः अयो गमनं यत्र।) नरकः। इत्यमरः। १।८।१॥ (यथा, हरिवंशे। १६। १६।

"कथञ्च शक्तास्ते दातुं निरयस्थाः फलं पुनः॥")

निरर्गलः, त्रि, (निर्गतोऽर्गलमिव प्रतिबन्धको यत्र।) अनर्गलः। अबाधः। इत्यमरः। ३। १। ८३॥ (यथा, महाभारते। ७। ६। ६२।

"इष्ट्वाश्वमेधानाजह्रे स्वन्नपागान्महाक्रतून्।
निरर्गलान् सर्व्वमेधान् पुत्रवत् पालयन् प्रजाः॥")

निरर्थकं, त्रि, (निर्गतोऽर्थो यस्मात्। कप्।) निष्फलम्। तत्पर्य्यायः। मोघम् २। इत्यमरः। ३। १। ८१॥ विफलम् ३। इति जटाधरः॥ (यथा, भागवते। ४। १६। १६।

"अयन्तु साक्षाद्भगवांल्लाधीशः
कूटस्थ आत्मा कलयावतीर्णः।
यस्मिन्नविद्यारचितं निरर्थकं
पश्यन्ति नानात्वमपि प्रतीतम्॥")

निरवः, पुं, (नि+रु+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) नीरवः। रवाभावः। इति निपूर्ब्बरुधातोरलि निष्पन्नः। अपालनञ्च॥ (निर्गतरवकः। यथा, ऋक्संहितायाम्। १। १२२। ११।

"नभो न्वो यज्ञियस्य राधः।"
"निरवस्य निर्गतरवकस्य।" इति तद्भाष्ये सायणः॥)

निरवग्रहः, पुं, (निर्गतोऽवग्रहः प्रतिबन्धो यस्मात्।) स्वतन्त्रः। इत्यमरः। ३। १। १५। (यथा, हरिवंशे। ८०। ६।

"दुर्दमः कामचारी च स कैशी निरवग्रहः॥")
दृष्टिप्रतिबन्धाभावश्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८२।

"नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः॥")

निरवहालिका, स्त्री, (निर्+अव+हल+ण्वुल्। टापि अत इत्वम्।) प्राचीरम्। इति शब्दमाला॥

निरग्नं, क्ली, (निर्+अग्न+क्युट्।) भोजनाभावः। अनग्नम्। (निर्गतं अग्नं भोजनादिकं यस्मात्। भोजनरहिते, त्रि॥)

निरसः, त्रि, (निष्टो रसो यस्मात्।) नीरसः। पुं, रसाभावः। रसस्य अभावः इति तत्पुरुषसमासनिष्पन्नः॥

निरसनं, क्ली, (निरस्यते क्षिप्यते इति। निर्+अस+ल्युट्।) प्रत्याख्यानम्। इत्यमरः। ३।२। ३१॥ (यथा, महाभारते। १४। ४। ९०।

"स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनञ्च तत्। नियतो वर्षयामास प्रजाहितचिकीर्षया॥")

वधः। निष्ठीवनम्। इति मेदिनी। ने, १६१॥

निरसा, स्त्री, (निष्टो रसो यस्याः।) निःश्रेणिकालक्ष्म। इति राजनिर्घण्टः॥

निरस्तः, त्रि, (निर्+अस्+क्तः।) प्रहितवाक्यः। त्यक्तशरः। त्वरितोदितम्। प्रौढोच्चारितवचः। निराकरणविशिष्टः। तत्पर्य्यायः। प्रत्यादिष्टः २ प्रत्याख्यातः ३ निराकृतः ४ निक्षिप्तः ५ विप्रक्षिप्तः ६। इत्यमरः। ३।१।४०॥ प्रतिक्षिप्तम् ७ अपविद्धम् ८। इति हेमचन्द्रः॥ निष्क्रान्तः। प्रेषितः। संत्यक्तः। प्रतिहतः। इति मेदिनी। ते, ११७॥ (यथा, हितोपदेशे। १। ४८।

"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"

यथाच मार्कण्डेयपुराणे। ८६। २३।

"आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया॥")

निराकरणं, क्ली, (निर्+आ+कृ+ल्युट्।) निवारणम्। निरसनम्। इति निराकरिष्णुशब्दटीकायां भरतः॥

निराकरिष्णुः, त्रि, (निराकरोति तच्छीलः। निर्+आ+कृ+"अलंखल्वोर्णमुलाक्षेपे।" ३। २। १३६। इति ष्णुच्।) निराकरणशीलः। तत्पर्य्यायः। चिक्षुः २। इत्यमरः। ३। १। ३०॥ (यथा, भट्टिकाव्ये। ५। १।

"निराकरिष्णुर्वसनेष्वबर्हिषु: परितो रजः॥")

निराकारः, पुं, (निर्गतः आकारो देहादिरूपस्वरूपं यस्मादिति। निरादय इति समासः।) परमेश्वरः। ब्रह्म। यथा,—

"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्। सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"

अपि च।

"तेजःस्वरूपो भगवान् निराकारो निराश्रयः। निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः॥ ध्यायन्ति योगिनस्तेजस्तदीयमघरोरिणम्। वेदवाक्यैव साकारं कमनीयं मनोहरम्॥ केचित्तदुभयं ध्यान्ति लक्ष्मीकान्तं मनोहरम्। शङ्खचक्रगदापद्मधरं पीताम्बरं परम्॥ द्विभुजं कमनीयञ्च किशोरं श्यामसुन्दरम्। ध्यायन्तं गोपाङ्गनाकान्तं रत्नभूषणभूषितम्॥ एवं तेजस्विनं भक्ता सेवन्ते सततं मुदा। ध्यायन्ति योगिनो यन्तु कृतस्तेजस्विनं विना॥" अपि च।

"यो निर्गुणः स निर्लिप्तः प्रकृतिभ्यो नहि संयुतः। सिद्धत्वराश्रितः प्रकृतौ निर्गुणः सगुणो भवेत्॥ यावन्ति च शरीराणि भोगार्हाणि महामुने!। प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना॥ ध्यायन्ति योगिनस्तच्च शुद्धं ज्योतिःस्वरूपिणम्। हस्तपादादिरहितं निर्गुणं प्रकृतेः परम्॥ वेदवाक्यं न मन्यन्ते तत्त्वज्ञाः सूक्ष्मदर्शिनः। कृतो बभूव तज्ज्योतिरहो तेजस्विनं विना॥ ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्। अतीवाश्चर्य्यसदृशभूषणेन विभूषितम्॥ एवं भक्ताश्च ध्यायन्ति शुभ्रचरणसेविनः। योगिनो योगरूपञ्च काले भक्तिविपाकतः॥ ज्योतिरभ्यन्तरे मूर्त्तिं पश्यन्ति कृपया प्रभोः॥" इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३२।७।४२ अः॥

तस्य द्विचत्वारिंशन्नामानि यथा,—

"जगद्योनिरयोनिश्च मनन्तोऽव्यय एव च। ज्योतिःस्वरूपो ह्यनघः सगुणो निर्गुणो महान्॥ भक्तानुरोधात् साकारो निराकारो निरङ्कुशः। निर्मूलो निखिलाधारो निःशङ्को निरुपद्रवः॥ निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः। स्वात्मारामः पूर्णकामोऽनिमेषो नित्य एव च॥ सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः। वेदहेतुश्च वेदाश्च वेदाङ्गो वेदविद्विभुः॥ द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत्। दृढां भक्तिं हरेर्दास्ये लभते वाञ्छितञ्च यत्॥" इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥

आकारशून्ये, त्रि॥

निराकृतः, त्रि, (निर्+आ+कृ+क्तः।) प्रत्याख्यातः। निरस्तः। इत्यमरः। ३। १। ४०॥

निराकृतिः, स्त्री, (निर्+आ+कृ+क्तिन्।) निरसनम्। निराकरणम्। इत्यमरः। ३। २। ३१॥ (निर्गता आकृतिर्यस्मादिति।) अनाकारे असाध्वाये च त्रि। इति मेदिनी। ते, २०३॥ (पुं, पञ्चमहायज्ञानुष्ठानरहितः। यथा, मनुः। ३। १५४।

"यज्ञी च पशुपालश्च परिवेत्ता निराकृतिः॥"

"निराकृतिः पञ्चमहायज्ञानुष्ठानरहितः। तथा च छन्दोगपरिशिष्टम्।

निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः॥" इति कुल्लूकभट्टः॥

"निराकृतिः सत्यधिकारे महायज्ञानुष्ठानरहितः। अनङ्गा निराकृतिरुच्यते। एवं हि श्रुतपथे। यो न देवानर्चति न पितॄन् न मनुष्यानिति। यस्तु पठ्यते असाध्वाद्यश्रुतधनैर्निराकृतिरुदाहृतः।" इति मेधातिथिः॥ * ॥ रोहितमनुपुत्रः। यथा, हरिवंशे। ७। ६३।

"दत्तपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः। मनोः पुत्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः॥")

निराचारः, त्रि, निर्गतो विद्यते आचारो यस्य सः। अनाचारः। आचारशून्यः॥

निरातपा, स्त्री, (निर्गतं आतपो यस्याः।) रात्रिः। इति शब्दचन्द्रिका॥ आतपशून्ये, त्रि॥

निराबाधः, त्रि, (निर्गता आबाधा प्रतिबन्धो यस्मात्।) पक्षाभासविशेषः। यथा,—

"अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्॥ निराबाधं असदृग्दृष्टप्रदीपप्रकाशेनायं घटवद्व्यवहरति।" इति मिताक्षरा॥

निरामयः, त्रि, (निर्गत आमयो व्याधिर्यस्मात्।) रोगरहितः। तत्पर्य्यायः। वार्क्षः २ कल्यः ३। इत्यमरः। २। ६। ५७॥ नीरुजः ४ पटुः ५ उल्लाघः ६ लघुः ७ अगदः ८ निरातङ्कः ९। अनातङ्कोऽपि पाठः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४६।

"निरामयार्थां चिन्त्यन्तु भक्तमध्ये प्रकीर्त्तितम्॥" उपद्रवादिशून्यः। यथा, महाभारते। १। १५७। ११।

"इदं नगरमभ्यासे रमणीयं निरामयम्। वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः॥"

रोगनाशकः। यथा, सुकुन्दमालायाम्। २१।

"किमौषधैः क्षिप्यसि मूढ दुर्म्मते! निरामयं क्षारकषायपं पिब॥")

निरामयः, पुं, (निर्गतः आमयो यस्मात्।) इङ्गिकः। वनच्छगलः। इति मेदिनी। ये, १२१॥ शूकरः। इति शब्दमाला॥ (नृपविशेषः। यथा, महाभारते। १। १। २३४।

"धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः॥" महादेवः। इति महाभारतम्। १३।१७।१४८॥ क्ली, कुङ्कुमम्। यथा, तत्रैव। ५। ७८। ८।

"कुङ्कुमं पाण्डवानाञ्च प्रतिपत्तस्य निरामयम्॥")

निरामानुः, पुं, (नितरां रमतेऽनेनेति। निः+रम+बाहुलकात् आनुः दीर्घश्च।) कपित्थः। इति शब्दचन्द्रिका॥ (विवरणमस्य कपित्थशब्दे ज्ञातव्यम्॥)

निरालम्बा, स्त्री, (निर्गतं आलम्बो यस्याः।) आकाशमांसी। इति राजनिर्घण्टः॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः। इति मुक्तिकोपनिषत्॥ अवलम्बनशून्ये, त्रि। यथा, हठयोगप्रदीपिकायाम्। ३। ५४।

"एको देवो निरालम्ब एकावस्था मनोन्मनी॥")

निराशः, त्रि, (निर्गता आशा यस्मादिति।) आशाशून्यः। यथा, तिथितत्त्वे।

"भूताहे ये प्रकुर्व्वन्ति उल्काग्रहमचेतनः। निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥"

निरासनं, क्ली, (निर्+आस+ल्युट्।) निरसनम्। (निर्गतं आसनं यस्मात्।) आसनाभावविशिष्टे, त्रि॥

निराहारः, त्रि, (निर्गत आहारो यस्य।) आहाररहितः। यथा,—

"निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये।" इति तर्पणप्रकरणीयाह्निकाचारधृतवचनम्॥

निरिङ्गिणी, स्त्री, (निर्निर्भतं जनं इङ्गति प्राप्नोतीति। निर्+इङ्ग+णिनिः ततो ङीप्।) तिरश्चरिणी। तत्पर्य्यायः। अयगुण्डिका २ पटी ३ यवनिका ४। इति त्रिकाण्डशेषः॥

निरिन्द्रियः, त्रि, (निर्गतानि इन्द्रियाणि यस्मात्।) इन्द्रियशून्यः। यथा, मनुः। ६। २०१।

"अनग्नौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥"

निरीक्षणं, क्लो, (निर्+ईक्ष+भावे ल्युट्।) दर्शनम्। यथा,—

"ध्रुवात्तथाग्नान्निग्नि सेवितात्च
विण्मूत्रघातक्रमनिग्रहाच्च।
वाय्वग्रहात् सूर्य्यनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः॥"

इति माधवकरः॥

(निरीक्षते इति। निर्+ईक्ष+क्युः। दर्शके, त्रि। यथा, भागवते। ७। १५। ३२।

"प्राणापानौ संनिरुन्ध्यात् पूरकुम्भकरेचकैः।
यावत् मनस्यजेत् कामान् खनासाग्यनिरीक्षणः॥")

निरीक्षितं, त्रि, (निर्+ईक्ष+क्तः।) अवलोकितम्। यथा,—

"निरीक्षितं चाङ्गमवीक्षितञ्च
दृग्भा पिबन्ती रभसेन तस्य।
समानमागन्दमियं दधाना
विवेद भेदं न विदर्भसुभूः॥"

इति नैषधः॥

निरीशं, क्लो, (निर्गता ईशा यस्मात्।) फालः। इत्यमरः। २। ६। १३॥ (निर्नास्ति ईश ईश्वरो यस्य।) ईशशून्ये नास्तिके च त्रि॥

निरीशं, क्लो, (निर्गता ईशा यस्मात्। निरादय इति समासः।) निरीशम्। इत्यमरटीकायां भरतः॥

निरीहः, पुं, (निर्गता ईहा चेष्टा यस्मात्।) विष्णुः। यथा,—

"निरुपाधिश्च निर्लिप्तो निरीहो निग्नात्मकः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे चत्वारिंशत्तमाध्याये ७ अध्यायः॥ ईहाशून्ये, त्रि॥ (यथा, देवीभागवते। ४। १०। ११।

"निरीहः पुरुषः कस्मात् प्रकृत्यादृ युद्धमीहतम्॥")

निरुक्तं, क्लो, (निर्निश्चयेन उक्तम्।) वेदवेदाङ्गशास्त्रविशेषः। यथा,—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषन्तथा।
छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः॥"

इति शब्दरत्नावली॥

(तथाहि,—

"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥"

यदुक्तं देवराजयज्वना निर्व्वचने, तद्यथा,—

"अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तविनियोगस्योपलक्षितकर्म्माङ्गभूतकालस्योपदर्शितलक्षणस्येतरैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते। प्रधानत्वेदमितरेभ्योऽङ्गेभ्यः सर्व्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानम्। तदधीनाः शब्दाः। स चेतरेषु व्याकरणादिषु चिन्त्यते। कर्म्मणि खल्वपि विनियोगश्चिन्त्यते। स च पुनरर्थाभिधानद्वारेण मन्त्राणाम्। यो यमर्थमभिधानेन संस्कर्त्तुं समर्थो मन्त्रः स तत्र विनियुज्यते। तदुक्तं अर्थाभिधानसंयोगात्तल्लेषु श्रेषभावः स्यात् इति। न च निरुक्ताद्ते ऽन्यदङ्गमन्यद्वा वाच्यं शास्त्रमस्ति तात्पर्य्येण यदर्थवान् शब्दान् निर्ब्रूयात्। यद्यपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्व्वचनम्। अतएव तद्विप्रलम्भम्। यथा शब्दलक्षणपरिज्ञानं सर्व्वशास्त्रेषु व्याकरणात् एवं शब्दार्थनिर्व्वचनपरिज्ञानं निरुक्तात्। वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थवादरूपमर्थैकमन्त्रार्थश्रेषभूतमेव। मन्त्रब्राह्मणार्थपरिज्ञानबहुत्वाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्म्मार्थकाममोक्षाख्योऽखिलपुरुषार्थः। न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति। तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम्। अथास्येवमखिलपुरुषार्थोपकारकत्वसमर्थस्य संग्रहः। तद्यथा,—

नामाख्यातोपसर्गनिपातलक्षणम्। भावविकारलक्षणम्। नामान्याख्यातजानि सर्व्वाणि च यथोपन्यस्य पञ्चप्रतिपत्तयो विचार्य्यावधारणम्। सर्व्वाण्याख्यातजानि कानिचिद्देवानेक-धातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम्। पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदेवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा। अर्थप्रप्रशंसा। अनर्थकभावधारणम्। वेदवेदाङ्गव्यूहः। सप्रयोजननिघण्टुसमाम्नायविरचनम्। प्रकरणत्रयविभागेन नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम्। निर्व्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः। अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्य्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्य्ययाद्यन्तवर्णद्यापत्तिवर्णोपजनोदाहरणचिन्ता। अस्तस्यान्तर्द्धातुनिमित्तेन सम्यसार्य्यासम्यसार्य्योभयप्रकृतिधातुनिर्व्वचनोपदेशः। भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः। नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः। देशग्रामवस्थया शब्दरूपव्यपदेशः। तद्धितसमासनामनिर्व्वचनलक्षणम्। शिष्यलक्षणम्। विशेषेण व्याख्यया तत्त्वपर्य्यायभेदसङ्ग्रासन्धिभेदोदाहरणान्निर्व्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम्। अनेकार्थानवगतसंस्कारानुक्रमणम्। परोक्षकृताध्यात्मिकमन्त्रलक्षणम्। स्तुत्याग्नेः प्रयथाभिप्रायाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेशः। निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रक्रान्तिभूमत्वम्। इतरेतरजन्मत्वम्। स्थानत्रयभेदतः तिस्रणामेकैकस्या माहाभाग्यकृतोऽनेकनामधेयप्रतिलम्भः। पृथगभिधानन्तूत्पत्तिसम्बन्धात्। देवतानामाकारचिन्तनम्। भक्तिसाहचर्य्यसंस्तवकर्म्मस्तुत्यभाक्त्वहविर्भाक्त्वयज्ञनभाक्त्वानि। पृथिवस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्रुत्युदाहरणम्। तन्निर्व्वचनविचारोपपत्त्यवधारणायानुक्रमेण व्याख्याय देवतप्रकरणनिर्णयः। विद्यापारम्पर्य्यप्रयोजनोपदेशः। मन्त्रार्थनिर्व्वचनद्वारेण देवताभिधाननिर्व्वचनफलं देवतात्माख्यम्। इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः॥"*॥

"वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम्।" इत्यमरटीकायां भरतः॥

पदभञ्जनम्। यथा,—

"प्रश्नावस्तु प्रकरणं निरुक्तं पदभञ्जनम्॥"

इति हेमचन्द्रः॥

कथिते, त्रि। यथा। "निरुक्ता प्रकृतिर्द्वेधा।" इति जगदीशः॥

निरुद्धः, त्रि, (नि+रुध+क्तः।) संरुद्धः। रोधविशिष्टः। इति अमरभरतशब्दटीकायां भरतः॥ (यथा, देवीभागवते। ३। २६। १५।

"मया निरुद्धः पापात्मा पतितोऽहं नधे पुनः॥")

निरुद्धप्रक(का)शः, पुं, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।

"वातोपरुद्धे मेढ्रे तु चर्म्म संश्रयते मणिम्।
मणिस्थर्म्मोपनद्धञ्च मूत्रस्रोतो रुणद्धि च॥
निरुद्धप्रकशे तस्मिन्नन्धकारमवेदनम्।
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्विद्रवते न च॥
निरुद्धप्रकशं विन्द्यात् सरुजं वातसम्भवम्।
निरुद्धप्रकाश इत्यस्य स्थाने निरुद्धप्रकशपाठस्तु॥ *॥

अथ तस्य चिकित्सा।

"निरुद्धप्रकशे नाड्यौ लौहीस्तुभयतोमुखीम्।
दारवीं वा जतुकृतां घृताक्तां संप्रवेशयेत्॥
परिषिच्येङ्गसां मध्ये स्निग्धमारवराहयोः।
चक्रतैलं तथा योज्यं वातघ्नक्षयसंयुतम्॥
आहरेत् स्थूलतरां सम्यक् नाड्यां गर्भे प्रवेशयेत्।
स्रोतो विवर्द्धयेदेव स्निग्धमन्नञ्च भोजयेत्॥
भिक्षां वा सेवनीं शुक्लां सद्यः क्षतवदाचरेत्॥"

इति भावप्रकाशः॥

निरुद्योगः, त्रि, (निर्नास्ति उद्योगो यस्य।) निरुद्यमः। उद्योगाभावविशिष्टः। (यथा, भागवते। ८। ८। ३.

"निःसत्त्वा लोलुपा राजन्! निरुद्योगागतत्रपाः।
यदा चोपेक्षिता लक्ष्मीर्बभूवुर्दैत्यदानवाः॥")

निरुपद्रवः, त्रि, (निर्गत उपद्रवो यस्मादिति।) उत्पातरहितः। यथा,—
"जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा विकले च शुभं वदेत्॥"
इति ज्योतिस्तत्त्वम्॥

निरुपमः, त्रि, (निर्गता उपमा सादृश्यं यस्मात्।) उपमारहितः। अनुपमः। यथा,—
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।"
इति प्रतीधचन्द्रोदयः॥

निरुपेक्षः, त्रि, (निर्गता उपेक्षा यस्मात्।) यद्वा निर्नास्ति उपेक्षा यस्य सः। अनुपेक्षः। उपेक्षाशून्यः॥

निरूढ़ः, पुं, (नि+रुह+क्तः।) निरूढ़लक्षणाकः शब्दः। यथा,—"पूर्व्वस्मिन्सम्बन्धाधीनं तत्स्वाम्युपरमे यत्र ह्यर्थे स्वत्वं तत्र निरूढ़ो दायशब्दः।" इति दायभागः॥

निरूढ़लक्षणा, स्त्री, (निरूढ़ा लक्षणा।) शक्तितुल्यलक्षणा। यथा,
"निरूढ़लक्षणाःकाश्चित् काश्चिन्नैव त्वशक्तितः।"
इति काव्यप्रकाशटीकायां महेश्वरः॥

निरूढ़ा, स्त्री, (निरूढ़+स्त्रियां टाप्।) लक्षणाविशेषः। यथा। "काश्चित् लक्षणावच्छेदकीभूततत्तद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढ़ा। यथा आरुण्यादिप्रकारेण तदाश्रयत्वयथानुभावकत्वादरुणादिपदस्य।" इति शब्दशक्तिप्रकाशिका॥

निरूपणं, क्ली, (नि+रूप+णिच्+ल्युट्।) आलोकः। विचारः। निदर्शनम्। इति मेदिनी। णे, ६६॥ (यथा, महाभारते। ३। ७१।३१।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्।
दैवेन विधिना युक्ताः शास्त्रोक्तेन निरूपणैः॥"
निरूपयतीति। नि+रूप+णिच्+ल्युः। निरूपके, त्रि। यथा, मार्कण्डेये। १६। ६६।
"एते देवा महेन्द्रेण मामुपागम्य दुःखिताः।
तद्वाक्यापाशसंयुक्तं निरूपणाः॥
याचन्तेऽहर्निशं संख्यां यथावद्विखण्डिताम्॥")

निरूपितः, त्रि, (नि+रूप्+णिच्+क्तः।) कृतनिरूपणः। नियुक्तः। इति श्रीधरस्वामी॥ यथा, श्रीभागवते। १। ५। २१।
"निरूपितो बालक एव योगिनां
सुश्रूषणे प्राट्धि निर्विविक्षताम्॥"

निरूहः, पुं, (निर्+ऊह शून्ये+घञ्।) वस्तिभेदः। यथा,—
"वस्तिर्द्विधानुवासाख्यो निरूहश्चेतिसंज्ञितः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः।
क्वाथक्षीरतैलैर्यो निरूहः स निगद्यते॥"
इति सारकौमुदी॥

अथ निरूहवस्तिकर्म्मविधिः।
आत्रेय उवाच।
"चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्षणं कृत्वा तया वस्तिप्रतिकर्म्म कुर्य्यात्। नातिचोष्णे च काले च न भुक्ते नच भोजिते। न निद्रादौ न मूत्रार्त्ते विष्टार्त्ते नच वेदभाक्॥ वस्तिकर्म्मनिरूहश्च कारयेत्तं निरस्य च। आदौ मूत्रविशोत्सर्गं कृत्वा गुदं प्रक्षाल्य नातिशिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत्। ततः शनैः शनैः वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात्। निरूहानन्तरं शनैः शनैरुत्तानं शाययित्वोर्द्धीकृत्य च पश्चात् सङ्कोच्य पाणिभिः पञ्चवारान् स्फिक्पिण्डान् त्रोटयेत्। ततः स्वस्थं कृत्वा शयनाभ्यामाशयं मलस्थानं बोधयति। वस्तुदरवातान् दोषान् निवारयति। पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः।" इति हारीतोत्तरे सूत्रस्थाने तृतीयोऽध्यायः।
"नरो विरिक्तस्तु निरूहदानं
विवर्ज्जयेत् सप्तदिनान्यवश्यम्।
शुद्धो विरेकेण निरूहदानं
तद्वास्य मूत्रं विषवेच्छरीरम्॥"
"विश्वक्स्थितं दोषचयं निरस्य
सर्व्वान् विकारान् शमयेन्निरूहः।
देहे निरूहेण विशुद्धमार्गे
सस्नेहनं वर्णबलप्रदञ्च॥"
इति सिद्धिस्थाने प्रथमेऽध्याये॥
"ससैन्धवक्षौद्रयुतः सतैलो
देयो निरूहो बलवर्णकारी।
आनाहपार्श्वामयगोनिदोषान्
गुल्माशुदावर्त्तरुजश्च हन्यात्॥
यष्ट्याह्वमूलाष्टपलेन सिद्धं
पयः घृताक्तफलपिण्डलीभिः।
युक्तं ससर्पिर्मधुवातरक्तः
वैस्वर्य्यवीसर्पहितो निरूहः॥"
इति सिद्धिस्थाने तृतीयेऽध्याये चरकेणोक्तम्॥)

ऊहशून्यः। निश्चितम्। इति मेदिनी। हे, १८॥ नियहः। तर्कः। इति हेमचन्द्रः॥

निर्ऋतिः, स्त्री, (निर्नियता ऋतिर्वृद्धा अशुभं वा यत्र।) अलक्ष्मीः। इत्यमरः। १। ८। २॥ (यथा, महाभारते। १। ८७। ६।
"अरुन्तुदं परुषं तीक्ष्णवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान्।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम्॥")

अस्या उपाख्यानं यथा,—
"समुद्रमथनादूर्द्धं रत्नान्यापुः सुरोत्तमाः।
श्रेष्ठश्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः॥
यावद्ददौ च कारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम्॥
लक्ष्मीरुवाच।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठां परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन!॥
विवाह्योऽहं मां पश्चादेष धर्म्मः सनातनः।
तस्माद्धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन!॥
सूत उवाच।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा।
आज्ञावाक्यानुरोधेन तामलक्ष्मीं ददौ किल॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम्॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य क्षमाश्रमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्॥
होमधूपसुगन्धाढ्यं वेदघोषैश्च नादितम्।
आश्रमं तं विलोक्याथ यथिता साब्रवीदिदम्॥
ज्येष्ठोवाच।
नहि वासानुरूपोऽयं वेदध्वनियुतो मम।
नात्रागमिष्ये भो ब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्॥
उद्दालक उवाच।
कथं नायासि किंहात्र वर्त्तते खलतं तव।
तव योग्या च वसतिः का भवेत् तद्वद त्वं माम्॥
ज्येष्ठोवाच।
वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम्॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम्॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादपमानणम्।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम्॥
सूत उवाच।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह॥
उद्दालक उवाच।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि त्वं वसस्व तम्।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः॥
सूत उवाच।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता।
तत्रस्थाः क्रन्दितं श्रुत्वा लक्ष्मीर्वैकुण्ठभवनेऽश्रृणोत्॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा॥
लक्ष्मीरुवाच।
स्वामिन्नङ्गिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो! यदहं प्रिया॥
सूत उवाच।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्॥
विष्णुरुवाच।
अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
असृग्भोऽसौ भवेत्तस्मान्मन्दवारं विना किल॥
प्रत्यब्दमर्च्चयिष्यन्ति तां ज्येष्ठां शुद्धधर्म्मिणः।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया॥"
इति पाद्मोत्तरखण्डे १६१ अध्यायः॥

(पापदेवता। यथा, ऋग्वेदे। १०। १६५। १।
"दूतो निर्ऋत्या इदमागमम्।"
"निर्ऋत्याः पापदेवताया दूतोऽग्निचरः।" इति तद्भाष्ये सायनः॥)
निर्ऋतिः, स्त्री, (निर्गता ऋतिरृतुर्भं यस्मात्।) निरुपद्रवः। इति धरणिः॥ दिक्पालविशेषे, पुं। इति मेदिनी। ते, ११६॥ स तु नैर्ऋत-कोणाधिपतिः। तस्य विवरणं यथा,—
"पूर्व्वस्यान्तु सुकान्तस्य रक्तकूटाद्यो गिरिः।
यत्रास्ते सततं देवो निर्ऋतो राक्षसेश्वरः॥
खड्गहस्तो महाकायो वामे चर्म्मधरस्तथा।
जटाजूटसमायुक्तः प्रांशुकृष्णानलोपमः॥
द्विभुजः शववक्त्रस्तु गर्द्दभोपरिसंस्थितः।
प्रान्तोपान्तौ विन्धुसर्गसहितौ वादिरेव च॥
नैर्ऋत्यं कथितं बीजं तेन तं परिपूजयेत्।
रक्तकूटं समारुह्य निर्ऋतिं राक्षसेश्वरम्॥
यः पूजयेद्विधानेन चण्डिकां राक्षसेश्वरीम्।
न तस्य राक्षसेभ्योऽस्ति भयं वापि कदाचन॥
राक्षसाश्च पिशाचाश्च वेताला गणनायकाः।
तं दृष्ट्वा पुरुषं राजन्! सर्व्वदैव प्रविभ्यति॥"
इति कालिकापुराणे ८१ अध्यायः॥
(राक्षसः। यथा, ऋग्वेदे। ८। २४। २४।
"वेत्था हि निर्ऋतीनां वज्रहस्तपरिष्टनम्॥"
स्तुतुः। यथा, भागवते। १। १६। ४।
"स चिन्तयन्नित्यमधाक्षजोदयं
सुनेः सुतोक्तो निर्ऋतिस्तच्चकाक्ष॥")
निर्ऋथः, पुं, (निरन्तरं ऋच्छतीति। निर्+ऋ गतौ+"अर्त्तेर्निरि।" उणा २। ८। इति थक्।) सामवेदः। इत्युणादिकोषः। २। १०८॥ (हिंसा। यथा, ऋग्वेदे। ७। १०४। १३।
"किमस्मभ्यं जातवेदो हृणीषे
द्रोघवाचेऽवचाधो राक्षसास्ते।
निर्ऋथं नः पिशाचि हिंसायां वर्त्तते। निर्ऋथं निःशेषेणास्मि हिंसां सचन्तां सेवन्ताम्।" इति तद्भाष्ये सायनः॥)
निरोढव्यं, त्रि, (नि+रुध+तव्य।) रुधनीयम्। (यथा, महाभारते। १२। ८६। १५।
"आग्नयाधेयोपदानाच्च प्रभूतसलिलाकराः।
निरोढव्याः सदा राज्ञा चौरिवच्च महीरुहाः॥")
निरोधः, पुं, (नि+रुध+घञ्।) नाशः। (यथा, हरिवंशे। २। ५४।
"उत्पत्तिश्च निरोधश्च नित्यं भूतेषु पार्थिव!।
ऋषयोऽन्न न मुह्यन्ति विद्वांसश्चैव ये नराः॥")
रोधः। इति मेदिनी। धे, ३२॥ (यथा, पञ्चतन्त्रे। २। १६७।
"निरोधाच्चेतसोऽप्यासि निरुद्धान्यखिलान्यपि।
व्याच्छादिते वरौ मेघैराच्छन्नाः स्युर्गभस्तयः॥")
नियहः। इति हेमचन्द्रः। ६। १४४॥ (यथा, मनुः। ६। ६०।
"इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।
अहिंसया च भूतानाममृतत्वाय कल्पते॥")
निर्गः, पुं, (निरन्तरं गच्छत्यनेति। निर्+गम+"अन्यत्रापि दृश्यते इति वक्तव्यम्।" इति डः।) देशः। इति हेमचन्द्रः। ४। १३॥
निर्गतः, त्रि, निःशेषेण गतः। बहिःप्राप्तः। यथा, मार्कण्डेये। ८२। १०।
"निर्गतं सुमहत्तेजस्तच्चैवं समगच्छत॥"
निर्गन्धं, त्रि, (निर्गतो गन्धो यत्र।) गन्धशून्यम्। यथा, चाणक्ये। ७।
"रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥"
निर्गन्धनं, क्ली, (निर्+गन्ध अर्दने+भावे ल्युट्।) निर्यन्त्रणम्। मारणम्। इत्यमरटीकायां स्वामी।
निर्गन्धपुष्पी, स्त्री, (निर्गतं गन्धशून्यं पुष्पं यस्याः। ङीष्।) शालमलिवृक्षः। इति शब्दचन्द्रिका॥ (शाल्मलिशब्देऽस्या विवृतिर्ज्ञातव्या॥)
निर्गुणः, पुं, (निर्गता गुणा यस्मात्।) सत्त्वरजस्तमोगुणातीतः। परमेश्वरः। यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे १३ अध्यायः॥
"गुणभृन्निर्गुणो महान्।" इति महाभारते। १३। १४६। १०३॥ विद्यादिशून्ये, त्रि। यथा,—
"सगुणो निर्गुणो वापि सहायो बलवत्तरः।
तुषेणापि परिभ्रष्टस्तण्डुलो नाङ्कुरायते॥"
इत्युद्भटः॥
(व्यारहिते। यथा, निर्गुणं धनुः॥)
निर्गुण्डी, स्त्री, (निर्गता गुण्डात् गुण्डनात्। गौरादित्वात् ङीष्।) निर्गुण्डी। इत्यमरटीकायां मधुः। २। ४। ६८॥
निर्गुण्डी, स्त्री, (निर्गतं गुण्डं वेष्टनं यस्याः। ङीष्।) नीलझिण्टिकालिका। तत्पर्य्यायः। झिण्टिकालिका २ झिण्टाली ३ नीलिका ४ मलिका ५ सुवहा ६ रजनीहासा ७ निशिपुष्पिका ८। इति शब्दरत्नावली॥ वृक्षविशेषः। निसिन्दा इति भाषा॥ तत्पर्य्यायः। सिन्धुकः २ सिन्धुवारः ३ इन्द्रसुरभिः ४ इन्द्राणिका ५। इत्यमरः। २। ४। ६८॥ सिन्धुकः ६ सिन्धुवारः ७ इन्द्रसुरसः ८ निर्गुण्डी ९। इति भरतः॥ इन्द्राणी १०। इति शब्दः॥ पौलोमी ११ शक्राणी १२ कासनाशिनी १३। इति रत्नकोषः॥ विसुन्धकः १४ सिन्धुकम् १५ सुरसः १६ सिन्धुवारितः १७ सुरसा १८ सिन्धुवारकः १९। इति च शब्दरत्नावली॥ करहाटः। इति विश्वः। ङ, ३६॥
निर्गूढः, पुं, (निर्निश्चयेन गुह्यते संव्रियते आत्मा अत्रेति। निर्+गुह+अधिकरणे क्तः।) वृक्षकोटरम्। इति शब्दरत्नावली॥ (संवृते, त्रि॥)
निर्ग्रन्थः, पुं, (ग्रन्थेभ्यः स्रुत्यादिनियमेभ्यो निर्गतः।) नग्नकः। निखः। वालिघ्नः। इति मेदिनी। थे, २०॥ मुनिः। इति हेमचन्द्रः॥ १। ७६॥ द्यूतकारः। इति जटाधरः॥ त्रि, ग्रन्थेभ्यो निर्गतः। निहृतहृदयग्रन्थिः। यथा, भागवते। १। ७। १०।
"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे॥"
("निर्ग्रन्थाः ग्रन्थेभ्यो निर्गताः। सदुक्तं गीतासु।
'यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥'
इति। "यदा, ग्रन्थिरेव ग्रन्थः निहृतः क्रोधाहङ्काररूपो ग्रन्थिर्येषां ते निहृतहृदयग्रन्थय इत्यर्थः।" इति तट्टीकायां स्वामी॥)
निर्ग्रन्थकः, पुं, (निर्ग्रन्थ एव। स्वार्थे कन्।) क्षपणः। निष्फलः। अपरिच्छदः। इति मेदिनी॥ के, १६५॥
निर्ग्रन्थनं, क्ली, (निर्+ग्रथि कौटिल्ये+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११३॥
निर्ग्रन्थिकः, पुं, (निर्गतो ग्रन्थिर्हृदयग्रन्थिर्यस्य। कप्।) क्षपणः। निपुणे हीने च त्रि। इति शब्दरत्नावली॥
निर्घटं, क्ली, बहुमाधुर्यसङ्घीर्णं हृदम्। इति हारावली। ७०॥ करभूम्यहृदम्। इति शब्दरत्नावली॥ घटभूम्यहृदे॥ (निर्गतो घटो यस्मादिति विग्रहे। घटभूम्यहृदादौ, त्रि॥)
निर्घण्टः, पुं, (निर्+घण्ट दीप्तौ+घञ्।) निर्घण्टनम्। निघण्टुः। गणसंग्रहः। यन्त्राणां स्फोटीति ख्यातः। यथा,—
"धन्वन्तरीयमदनादिहलायुधादीन्
विश्वप्रकाशममरकोषमशेषराजान्।
आलोक्य लोकविदितांश्च विचिन्त्य ग्रन्थान्
द्रव्याभिधानगणसंग्रह एष रब्धः॥
निर्घण्टशब्दगणपरीक्षणनिर्णयेन
नानाविधौषधविचारपरायणो यः।
सोऽधीत्य यत् सकलमेनमवैति सर्व्वं
तस्मादयं जगति भाति निघण्टुराजः॥"
इति राजनिर्घण्टः॥
निर्घातः, पुं, (निर्+हन+घञ्।) वायुभिहतवायुप्रपतनजन्यशब्दविशेषः। यथा,—
"वायुनाभिहते वायौ गगनाच्च पतत्यधः।
प्रचण्डघोरनिर्घोषो निर्घात इति कथ्यते॥"
इति शब्दमाला॥
अपि च।
"यदान्तरीक्षे बलवान् मारुतो मरुताहतः।
पतत्यधः स निर्घातो जायते वायुसम्भवः॥"
इति ज्योतिषम्॥
(एतस्य लक्षणादिकं यथा, बृहत्संहितायां ३६ अध्याये।
"पवनः पवनाभिहतो गगनादवनौ यदा समापतति।
भवति तदा निर्घातः स च पापो दीप्तविहगरुतः॥
अर्कोदयेऽधिकरणिकनृपधनियोधाङ्गनाबणिग्वेश्याः।
आम्रहरांशेऽजाविकसुहृच्चाक्षूद्रगौरांश्च॥
आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति।
वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे च॥

अस्तं याते नीचान् प्रथमे यामे निहन्ति शस्त्राणि ।
रात्रौ द्वितीययामे पिशाचसङ्घान्निपीड़यति ॥
तुरगकरिरथसृतीये विनिहन्यादयायिनश्चतुर्थे च ।
भैरवजम्बरशब्दे याति यतस्तां दिशं हन्ति ॥")

निर्घोषः, पुं, (निर् + घुष शब्दे + घञ् ।) शब्दमात्रम् । इत्यमरः । १ । ६ । २३ ॥ (यथा, रघुः । १ । ३६ ।

"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ॥"

निर्गोप्ति घोषो यत्रेति । शब्दभूम्नि, त्रि । यथा, महाभारते । १४ । १६ । ३६ ।

"संनियम्येन्द्रियग्रामं निर्घोषे निर्जने वने ।
कायमभ्यन्तरं कृत्स्नमेवाग्रः परिचिन्तयेत् ॥")

निर्जनः, त्रि. (निर्गतो जनो यस्मात् ।) जनशून्यस्थानादिः । विजनः । इति विवित्तादिशब्दटीकायां भारसुन्दरी ॥ (यथा, देवीभागवते । २ । ६ । ५६ ।

"एकस्मिन् समये पाण्डुर्मार्द्रीं दृष्ट्वाथ निर्जने ।
आश्रमे चातिकामार्त्तो जग्राहागतवेपसः ॥")

निर्जरः, पुं, (जराया निष्क्रान्तः । निरादयः क्रान्ताद्यर्थे पञ्चम्या इति समासः ।) देवः । इत्यमरः । १ । १ । ७ ॥ (यथा, देवीभागवते । ५ । ८ । १८ ।

"विघ्नन्तु निर्जराः सर्व्वे कुशलं कथयन्तु वः ॥")

जरारहिते, त्रि । इति मेदिनी । रे, १७३ ॥ सुधायाम्, क्ली । इति शब्दरत्नावली ॥

निर्जरसर्षपः, पुं, (निर्जरप्रियः सर्षपः । प्राकपार्थिववत् समासः ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

निर्जरा, स्त्री, (निर्जर + टाप् ।) गुडूची । तालपर्णी । इति मेदिनी । रे, १७२ ॥

निर्जलः, त्रि, (निर्गतं जलं यस्मात् ।) जलशून्यदेशादिः । इति भरतशब्दटीकायां भरतः । २ । १ । ५ । यदुक्तम् ।

"सम्यान्ना दग्धमध्वजाद्यगतिना संमूर्च्छिता निर्जले
तुर्य्यह्नादशवद्द्वितीयमतिमन्नेकादशाभक्तनी ।
सा षष्ठी नृपपक्षमस्य नवमभूः सप्तमीवर्ज्जिता
प्राप्नोत्यष्टमवेदनां प्रथम हे तस्यास्तृतीयो भव ॥"

इति वल्लालसेनः ॥

निर्जलैकादशी, स्त्री, (निर्जला एकादशी ।) ज्येष्ठमासीयशुक्लैकादशी । यथा, पाद्मे ।

श्रीभीमसेन उवाच ।

"पितामह ! त्वयोक्तोऽहमुपवासे करोमि किम् ।
अतो वदुपफलं ब्रूहि व्रतमेकमपि प्रभो ! ॥

श्रीव्यास उवाच ।

वृषस्थे मिथुनस्थेऽर्के शुक्ला ज्ञेकादशी हि या ।
ज्येष्ठे मासि प्रयत्नेन सोपोष्या जलवर्ज्जिता ॥
स्नाने चाचमने चैव वर्ज्जयित्वोदकं बुधः ।
उपयुञ्जीत नैवान्यद्व्रतभङ्गोऽन्यथा भवेत् ॥
उद्धरादुदयं यावद्वर्ज्जयित्वा जलं बुधः ।
अप्रयत्नाद्वाप्नोति द्वादशद्वादशीफलम् ॥
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ।
जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ।
एवं कृते तु यत् पुण्यं भीमसेन ! प्रजायते तत् ॥
संवत्सरस्य या मध्ये एकादश्यो भवन्ति हि ।
तासां फलमवाप्नोति पुत्र ! मे नात्र संशयः ॥
इति मां केशवः प्राह शङ्खचक्रगदाधरः ॥"

किञ्च ।

"धनधान्यवहा पुण्या पुत्रभाग्यसुखप्रदा ।
उपोषिता नरव्याघ्र ! इति सत्यं ब्रवीमि ते ॥
यमदूता महाकायाः कराला कालरूपिणः ।
दण्डपाशधरा रौद्रा नोपसर्पन्ति तं नरम् ॥
पीताम्बरधराः शुद्धचक्रहस्ता मनोजवाः ।
अन्तकाले नयन्त्येनं वैष्णवा वैष्णवीं पुरीम् ॥"

किञ्च ।

"तोयस्य नियमं यस्तु कुरुते वैष्णवोत्तमः ।
पलकोटिसुवर्णस्य याने याने स पुण्यभाक् ॥
स्नानं दानं जपं होमं यदत्रां कुरुते नरः ।
तत् सर्व्वमाप्नुयं प्राप्तमेतत् कृष्णस्य भाषितम् ॥
किंवापरेण धर्म्मेण निर्ज्जलैकादशीं नृप ! ।
उपोष्य सम्यग्विधिना वैष्णवं पदमाप्नुयात् ॥"

किञ्च ।

"यैः कृता भीमसेनैषा निर्ज्जलैकादशी शुभा ।
स्वकुलं तारितं सर्व्वं कुलातीतं तथा शतम् ॥
आत्मना सह तैर्नीतं वासुदेवस्य मन्दिरे ॥"

किञ्च ।

"आत्मद्रोहः कृतस्तेन यैरेषा नोपोषिता ।
पापात्मानो दुराचारा दुष्टास्ते नात्र संशयः ॥"

किञ्च ।

"यश्चैमां शृणुयाद्भक्त्या यश्चापि परिकीर्त्तयेत् ।
उभौ तौ स्वर्गमाप्नौ हि नात्र कार्य्या विचारणा ॥"

अथ निर्ज्जलव्रतविधिः । यथा,—

"यथाप्राङ्लिखितं कृत्वा मङ्गल्यनियमं व्रते ।
जलमादाय शक्तीयान्नक्तेनाने वैष्णवः ॥
एकादश्यां निराहारो वर्ज्जयिष्यामि वै जलम् ।
केशवप्रीणनार्थाय अत्यन्तदमनेन च ॥" इति ॥
"वर्ज्जयेच्चाम्बुहोराद्यं विना चाचमनार्थकम् ।
विना च प्राशनं यादोदकस्यात्यन्तपावनम् ॥
एकादश्यां निशायान्तु नित्यपूजां विधाय हि ।
हैमीं वैविक्रमीं मूर्त्तिं स्थापयेत् पयआदिभिः ॥
वस्त्रादिकं समभ्यर्च्याथाभ्यर्च्य गन्धादिभिश्च ताम् ।
प्रणम्य जागरं कुर्य्यात् तदग्रे गर्त्तनादिना ॥
प्रातःस्नानादि निर्व्वर्त्य तं विविक्रममर्चयेत् ।
शुक्लाम्बुकुम्भान् विप्रेभ्यो दद्यात् गन्धाद्यलङ्कृतान् ॥"

तत्र मन्त्रः ।

"देवदेव हृषीकेश संसारार्णवतारक ! ।
जलकुम्भप्रदानेन यास्यामि परमां गतिमिति ॥
दद्याच्च कनकं कृत्वं वस्त्रयुग्मसुपानहौ ।
जलपात्राणि दिव्यानि विभवे सति वैष्णवः ॥
शक्त्या विप्रान् भोजयित्वा पीत्वा साढकरात्र्यलम् ।
स्वयं वाग्नीय मौनी सन् भुञ्जीत सह बन्धुभिः ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

निर्ज्जितः, त्रि, (निर् + जि जये + क्तः ।) प्राप्तपराजयः । तत्पर्य्यायः । पराजितः २ पराभूतः ३ विजितः ४ जितः ५ । इति शब्दरत्नावली ॥ वशीकृतः । यथा,—

"ध्यायतस्वरणाम्भोजं भावनिर्ज्जितचेतसा ।"

इति श्रीभागवते ।१।६। अध्यायटीकायां स्वामी ॥

निर्ज्जितेन्द्रियग्रामः, त्रि, (निर्ज्जितः पराजित इन्द्रियग्राम इन्द्रियसमूहो येन ।) यतिः । इत्यमरः । २ । ७ । ४४ ॥

निर्ज्जीवः, त्रि, (निर्गतो जीवो जीवात्मा यस्मात् ।) जीवात्मरहितः । प्राणिभून्यः । यथा,—

"चिता चिन्ता द्वयोर्म्मध्ये चिन्ता एव गरीयसी ।
चिता दहति निर्ज्जीवं चिन्ता दहति जीवितम् ॥"

इति प्राहुः ॥

निर्झरः, पुं, (निर्झरणाति क्षीर्णीभवति उच्चस्थानपतनादिति । निर् + झृ + अच् ।) पर्व्वतावतीर्णजलप्रवाहः । इति भरतः ॥ सुस्रा अन्यथा वा गिरौ जलप्रवाहः । इति मधुः ॥ पर्व्वताद्देशेन पतज्जलं झोरा इति ख्यातम् । इति कोकटः ॥ तत्पर्य्यायः । झरः २ । इत्यमरः । २।३।५ ॥ निर्झरी ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ६४ । ८ ।

"सरितो निर्झरांश्चैव दर्शयांस्तदर्शनात् ॥")

तज्जलगुणाः । लघुत्वम् । पथ्यत्वम् । दीपनत्वम् । कफनाशित्वञ्च । कफनाशित्वञ्च । राजवल्लभः ॥ (यथा च ।

"शैलसानुसवहारि प्रवाहे निर्झरो झरः ।
स तु प्रस्रवणस्यापि तत्त्वं नैर्झरं जलम् ॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकञ्च वातं स्यादतिपित्तलम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) खद्योतः । तुषानलः । इति मेदिनी । रे, १७ ॥

निर्झरी, स्त्री, (निर्झरणादि उच्चस्थानपातात् क्षीर्णीभवतीति । निर् + झृ + अच् । गौरादित्वात् ङीष् ।) निर्झरः । इति शब्दरत्नावली ॥ (निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । अच् । ङीष् ।) नदी । यथा,—

"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥"

इति रावणकृतशिवस्तोत्रम् ॥

निर्झरी, [न्] पुं. (निर्झरोऽस्त्यस्येति । निर्झर + इनिः ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥

निर्झरिणी, स्त्री, (निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । इनिः । ङीष् ।) नदी । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १७ । ७ ।

"सोऽपि तां वीक्ष्य लावण्यरसनिर्भरिणीं नृपः।
यत्र प्राप परिष्वङ्गं हयाक्रान्तो सुमूर्च्छ तत्॥")
निर्णयः, पुं, (निर्णयनमिति। निर् + नी + "अरच्।" ३। ३। ५६। इति भावे अच्।) अवधारणम्। तत्पर्य्यायः। निश्चयः २। इत्यमरः। १। ५। ३॥ निर्णयनम् ३ निचयः ४। इति शब्दरत्नावली॥ (यथा, मनुः। १२। २।
"स तानुवाच धर्म्मात्मा महर्षीन् मानवो भृगुः।
अस्य सर्व्वस्य शृणुत कर्म्मयोगस्य निर्णयम्॥")
विचारः। तत्पर्य्यायः। तर्कः २ युक्तिः ३ चर्चा ४। इति त्रिकाण्डशेषः॥ विरोधपरिहारः। इति मिताक्षरा॥ चतुर्व्यादव्यवहारान्तर्गतशेषपादः। क्यसला इति आरबीयभाषा॥ डिक्री इति इङ्गरेजीयभाषा॥ तद्विवरणं यथा। "अथ निर्णयः। तत्र नारदः।

यस्योभुः साक्षिणः सन्ति प्रतिज्ञा च जयी भवेत्।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः॥
स्वयमभ्युपपन्नोऽपि स्वकर्य्यावसितोऽपि सन्।
क्रियावसन्नोऽर्हेत परं सभ्यावधारणम्॥
सभ्यैरवधृतः पश्चात् राज्ञा ग्राह्यः स ग्राह्यतः॥'
यस्य वादिनः प्रतिवादिनो वा साक्षिणः इत्युपलक्षणम्। साक्षिलिखितमुक्तिग्रन्थानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रतीतत्वम्। स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः। स्वकर्य्यावसितः कन्यखेदवैवर्ण्यादिना पराजितत्वेनावधृतः। क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः। परमनन्तरम्। सभ्यावधारणं सभासदां मिलितानामयं पराजितः इति निर्णयं अर्हेत। स ग्राह्यविधिना ग्राह्यः॥ * ॥ निर्णयस्य फलमाह बृहस्पतिः।
'प्रतिज्ञाभावनाद्यादौ प्राड्विवाकादिपूजनात्।
जयपत्रस्य दानात् जयी लोके निगद्यते॥'
जयपत्रस्य लेखनप्रकारमाह स एव।
'यदृष्टं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम्।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत्॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते॥'
कात्यायनः।
'अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा।
निर्णयश्च तथा तस्य यथा व्यवहृतं स्वयम्॥
एतद्यथाक्रमं लेख्यं यथापूर्व्वं निवेशयेत्।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा॥'

ततश्च भाषोत्तरे क्रिया च पत्रसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितमध्यस्थाश्च इत्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्प्रदर्शनार्थम्। तथाहि भाषोत्तरलेखनं हेत्वन्तरेण पुनर्व्यवहारप्रत्यवस्थाननिषेधार्थम्। नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति। प्रमाणलेखनन्तु पुनः प्रमाणान्तरोपन्यासनिरासार्थम्। तदाह कात्यायनः।
'क्रियां बलवतीं लब्ध्वा दुर्ब्बलां योऽवलम्बते।
स जयेऽवधृते सभ्यैः पुनर्न्यां नाप्नुयात् क्रियाम्॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत्।
लिखितं साक्षिणो वापि पूर्व्वभावेदितं न चेत्॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः।
निर्णीतव्यवहारायां प्रमाणमफलन्तथा॥'
निर्णयोत्तरत्वमाह मनुः।
'अर्थे ह्यन्यमानन्तु कारणेन विभावितम्।
दापयेद्वनिकस्यार्थं दण्डलेशञ्च शक्तितः॥'
अन्यमानं अपलपन्तम्। कारणेन साक्ष्यादिप्रमाणेन। याज्ञवल्क्यः।
'ज्ञात्वापराधं देशञ्च कालं बलमथापि वा।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत्॥'*।
मनुः।
'तीरितं चानुशिष्टञ्च यत्र क्वचन सभ्यवेत्।
कृतं तद्धर्म्मतो विद्यात् न तद्भूयो निवर्त्तयेत्॥'
अनुशिष्टं साक्ष्यादिनिर्णीतम्। अतएव तीरितं प्राड्विवाकादिभिः समापितम्। तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः॥ यत्र तु तीरितानुशिष्टयोरप्यधर्म्मकृतत्वमत्वा पराजयी पुनर्दिगुणदण्डमङ्गीकृत्य प्रत्यवतिष्ठते तत्र पुनर्न्यायदर्शनमाह नारदः।
'तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत्॥'
असद्विचारे तु विचारान्तरमाह स एव।
'असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम्।
असम्मतमतेर्दृष्टं पुनर्दर्शनमर्हति॥'
असाक्षिकमित्यप्रमाणोपलक्षणम्॥ * ॥
याज्ञवल्क्यः।
'दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु।
सभ्याः सचिवनो दृष्ट्वा विवादाद्दिगुणं दमम्॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः।
स्वकर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः॥'
साक्षिवचनेन सभ्यावधारितेन च प्राप्तावसादानां दोषदर्शने पुनर्न्यायदर्शनम्। स्वव्यापारेण विरुद्धभावादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः॥ बृहस्पतिरपि।
'पक्षायनानुत्तरत्वादन्यपक्षाश्रयेण च।
हीनस्य दण्डते वादी न स्वदावञ्चितस्य च॥'
मनुः।
'बलाद्दत्तं बलाद्भुक्तं बलादा लिखितञ्च यत्।
सर्व्वान् बलकृतानर्थान्नकृतान् मनुरब्रवीत्॥'
याज्ञवल्क्यः।
'बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत्।
स्त्रीबालमन्दरोगारण्यवहिर्ग्रामस्थितांस्तथा॥
मत्तोन्मत्तार्त्तशपथव्यसनिबालभीतादियोजितः।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति॥'
उपाधिरङ्गमिति मूलपाठः। उपाधिर्भेदे हिरिति विश्वप्रकाशेश्वरः। तस्मात् भीतादियोजितः इत्युक्तवचनेन पौनरुक्त्यम्। बहिर्ग्रामः बहिर्देशः। मत्तो मदादिना। उन्मत्तो वातादिना। शपथो दूषणाद्यासक्तः। व्यसनी द्यूतादासक्तः। असम्बन्धो वादिसन्निधुक्तव्यतिरिक्त उदासीनः। आदिपदाद्रोगस्तम्बदासपुत्राद्यैर्ग्रहणम्। तथा च नारदः।
'स्वतन्त्रोऽपि हि यत्कार्य्यं कुर्य्याच्चाप्रकृतिं गतः।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः॥
कामक्रोधाभिभूता ये भयव्यसनपीड़िताः।
रागद्वेषपरीताश्च क्रियास्वप्रकृतिं गताः॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः॥
पुत्रेण च कृतं कार्य्यं यत् स्यादज्ञस्य तः पितुः।
तदप्यकृतमेवाहुर्दासपुत्रौ च तौ समौ॥'
एतच्च कुटुम्बभरव्यतिरिक्तविषयम्।
'कुटुम्बार्थेऽधमर्णोऽपि व्यवहारं यमाचरेत्॥
स्वदेशे वा विदेशे वा तं न्यायान्न विचालयेत्॥'
इति मनुवचनात्।
कुटुम्बमवश्यं भरणीयम्। अधमर्णः परतन्त्रः पुत्रदासादिः। व्यवहारस्त्रीत्वादिकम्। न्यायान्न्यायतः। न विचालयेत् अशुभमन्यैतेत्यर्थः। तथा च नारदः।
'स्वातन्त्र्यान्तु कृतं ज्ञेयं ज्ञेयं गुरुवयःकृतम्।
अकृतन्तत्प्रभोः सर्व्वं स्वतन्त्रः पृथिवीपतिः॥
अकृतन्तत्कृतं शिष्यं आचार्य्यस्य स्वतन्त्रता।
अकृतन्तत्प्रभोः स्त्रियः सर्व्वाः पुत्रा दासाः परिग्रहाः॥
स्वतन्त्रस्तत्र तु ग्रही यस्य तत् स्यात् क्रमागतम्।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सरादधः॥
बाल आमोऽप्राद्वर्षात् पौगण्डोऽपि निगद्यते।
परतो व्यवहारज्ञः स्वतन्त्र पितराहृते॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्॥
अभावे बीजिनो माता तदभावे च पूर्व्वजः॥'
परिग्रहाः अनुजीविप्रभृतयः। तथा च बृहस्पतिः।
'पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः।
यदृणं गृहीतं कुटुम्बार्थे तदृणी दातुमर्हति॥'
कात्यायनः।
'कुटुम्बार्थमृणं तु गृहीतं व्याधितेऽथवा।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत्॥
कन्यायै वाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम्।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः॥'
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः॥ बृहस्पतिः।
'यः स्वामिना नियुक्तोऽपि धनाय व्ययकर्म्मणे।
कुरुतेऽन्यधियाकार्य्यं निरूप्यार्थेषु सक्षमः॥
प्रमाणं तत्कृतं सर्व्वं लाभालाभव्ययोदयम्।
स्वदेशे वा विदेशे वा स्वामी तन्न विचालयेत्॥'
सम्मतस्तस्य स्वामिन इत्यर्थः।" इति व्यवहारतत्त्वम्॥ अधिकरणविशेषः। यथा,—
"विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं ग्राह्योऽधिकरणं स्मृतम्॥"
इति स्मृतिमीमांसा॥
न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारक-

ज्ञानम्। यथा। वह्निमान् पर्व्वत इत्यादिबोधः। इति भाषापरिच्छेदः॥ तद्धर्म्मावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितज्ञानम्। इति जगदीशः॥

निर्णयनं, क्ली, (निर्+नी+भावे ल्युट्।) निर्णयः। इति शब्दरत्नावली॥

निर्णयपादः, पुं, (निर्णयात्मकः पादो भागविशेषः।) चतुष्पाद्व्यवहारान्तर्गतव्यवहारविशेषः। तस्य रूपम्। मिलितानां सभासदां पराजितोऽयमित्यवधारणम्। इति व्यवहारतत्त्वम्॥

निर्णायनं, क्ली, (निर्+नी+णिच्+ल्युट्।) मातङ्गापाङ्गदेशः। तत्पर्य्यायः। निर्याणम् २। इति शब्दरत्नावली॥

निर्णिक्तं, त्रि, (निर्णिज्यते शुध्यते स्मेति। निर्+णिज्+क्तः।) अपनीतमलम्। शोधितम्। इत्यमरः। ३। १। ५६॥ (यथा, चिन्तामणिधृतस्मृतिवचनम्।

"बलदेवव्रतश्चैव स्नानं गोद्विजालयम्।
निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचन॥")

निर्णीतं, त्रि, (निर्+नी+क्तः।) ज्ञातनिर्णयः। निश्चयीकृतः। यथा,—

"निर्णीते व्यवहारे तु प्रमाणमपलं भवेत्।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्॥
यथा पक्वेषु धान्येषु निष्फलाः प्राटवो गुणाः।
निर्णीतव्यवहाराणां प्रमाणमपलं तथा॥"

इति व्यवहारतत्त्वम्॥

तद्वैदिकपर्य्यायः। "निश्चयम् १ सत्यः २ सत्यतः ३ हिरक् ४ प्रतीत्यम् ५ अपीत्यम् ६। इति यस्मिन्निर्णीतान्तर्हितनामधेयानि।" इति वेदनिघण्टौ। ३। २५॥

निर्णेजकः, पुं, (निर्णेनेक्ति निर्म्मलीकरोति वस्त्रमिति। निर्+णिज शौचे+ण्वुल्।) रजकः। इत्यमरः। २। १०। १०॥ (यथा, मनुः। ४। २१६।

"कारुकान्नं प्रजां हन्ति वलं निर्णेजकस्य च।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति॥")

निर्दंष्टः, त्रि, परापवादरक्तः। दयाशून्यः। क्रौरः। भग्नः। नियमयोजनः। इति शब्दरत्नावली॥

निर्दयः, त्रि, (निर्गता दया यस्मात्।) दयाशून्यः। इति जटाधरः॥ (यथा, रघुः। ११। ८४।

"न प्रहर्त्तुमलमसि निर्दयं
विप्र इत्यभिभवत्यपि त्वयि॥"

निर्गता दया यस्मिं यमुद्दिश्य दया तिरोहिता इत्यर्थः। अदयार्हः। यथा, मनुः। ६। २३६।

"ज्ञातिसम्बन्धिभिर्क्षिप्ते त्यक्तया क्षतज चया।
निर्दया निर्नमस्कारास्तज्जनोरनुशासनम्॥")

निर्दरं, क्ली, (निर्+दृ+अप्।) निर्भरम्। (निर्गतो दरश्छिद्रं यस्मात्।) सारम्। त्रि, कठिनम्। (यथा, रामायणे। २। ८५। १६।

"ध्याननिर्दग्धपापेन विनिःश्वसितधातुना॥")

अपचये च त्रि। इति मेदिनी। रे, १७५॥

(निर्दीर्य्यते विदीर्य्यते पतनस्थलमिति। निर्+दृ विदारे+अप्। निर्भरः। इति कश्चित्॥ निर्गाक्षि दरो भयो यस्येति निर्भये, त्रि॥)

निर्दहनः, पुं, (नितरां दहतीति। निर्+दह+ल्युः।) भल्लातकः। इति राजनिर्घण्टः॥ (भल्लातकशब्देऽस्य गुणादिकं ज्ञातव्यम्॥ निर्गाक्षि दहनो वह्निर्यत्र।) अग्निशून्यञ्च॥

निर्दहनी, स्त्री, (निर्गतं दहनं यस्याः। स्त्रियां ङीप्।) मूर्व्वालता। इति रत्नमाला॥ (यथा,

"तुरुं वचा तिक्तकरोहिणीञ्च
तथाभया निर्दहनीञ्च तुल्याम्।
पिबेच्च गोमूत्रयुतां कफार्त्ति
मूले तथामस्य च पाचनार्थम्॥"

इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे॥)

निर्दिग्धः, त्रि, (निर्+दिह+क्तः।) बली। मांसलः। इति हेमचन्द्रः। ३। ११३॥

निर्दिष्टः, त्रि, (निर्+दिश+क्तः।) निश्चितः। यथा,—

"निर्दिष्टविषयं किञ्चिदुपात्तविषयन्तथा।
अपेक्षितक्रियञ्चैव त्रिधापादानमिष्यते॥"

इति रामतर्कवागीशः॥

(आदिष्टः। यथा, रघुः। १। ६५।

"निर्दिष्टां कुलपतिना स पर्य्यङ्काम-
मध्यास्य प्रयतपरिग्रहद्वितीयः॥")

निर्देशः, पुं, (निर्+दिश+भावे घञ्।) आज्ञा। इत्यमरः। २। ८। १५॥ (यथा, भागवते। ६। १। ३८॥

"यूयं वै धर्म्मराजस्य यदि निर्देशकारिणः।
ब्रूत धर्म्मस्य नस्तत्त्वं यच्च धर्म्मस्य लक्षणम्॥")

कथनम्। (यथा, गीतायाम्। १७। २३।

"ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥")

उपालम्भः। इति मेदिनी। शे, २३॥

निर्देष्टा, [ष्टृ] त्रि, (निर्दिशतीति। निर्+दिश+तृच्।) निर्देशकर्त्ता। यथा, "तथाहि अर्थी नाम साध्यस्य अर्थस्य निर्देष्टा तत्प्रतिपक्षस्तदभाववादी प्रत्यर्थी।" इति मिताक्षरायां व्यवहाराध्याये साक्षीप्रकरणम्॥

निर्दोषः, त्रि, (निर्गतो दोषो यस्मात्।) दोषरहितः। यथा,—

"निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु॥"

इति मिताक्षरा॥

निर्धनः, पुं, (निर्गतं धनं यस्मात्।) जरठवः। इति शब्दचन्द्रिका॥ धनशून्ये, त्रि। यथा,—

"ब्रह्मज्ञापि नरः पूज्यो यस्यास्ति विपुलं धनम्।
अग्निहोत्रसमोवंशोऽपि निर्धनः परिभूयते॥"

इति चाणक्ये। ८२॥

निर्धर्म्मः, त्रि, (निर्गतो धर्म्मो यस्मात्।) धर्म्मरहितः। यथा,—

"महापराधे निर्धर्म्मे क्षतघ्ने क्लीवकुत्सिते।
नास्तिकघ्नात्यदासेषु कोपप्रायं विवर्ज्जयेत्॥"

इति मिताक्षरा॥

निर्धारः, पुं, (निश्चियतेऽनेनेति। निर्+धृ+घञ्।) निश्चयः। "जातिगुणक्रियाणां उत्कर्षापकर्षौ वा सजातीयात् पृथक्करणम्। यथा। मनुष्याणां ब्राह्मणः श्रेष्ठः। गवां क्षीरा बहुक्षीराः। अश्वगानां धावन्तः शीघ्रतमाः।" इति दुर्गादासः॥ धारारहितञ्च॥

निर्धारणं, क्ली, (निर्धार्य्यते इति। निर्+धृ+णिच्+भावे ल्युट्।) निश्चयः। निर्धारः। यथा, निर्द्धारणे षष्ठ्याः समासो न स्यादिति दुर्गादासः॥

निर्धारितं, त्रि, (निर्धार्य्यते स्थिरीक्रियते इति। निर्+धृ+णिच्+कर्म्मणि क्तः।) ज्ञातनिश्चयः। यथा। "किन्त्वनिर्धारितैकत्वानेकत्वविशेषस्य।" इति विषयरचितः॥

निर्धार्य्यं, त्रि, (निर्धार्य्यते इति। निर्+धृ+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। धारि+ण्यत् वा।) निर्धारणीयम्। निर्धारितव्यम्। निर्भयकर्म्मकर्त्ता। इति विशेषनिघ्ने निर्वाप्यशब्दटीकायां रमानाथः॥

निर्धूतं, त्रि, (निर्+धू+क्तः।) खण्डितम्। (यथा, मार्कण्डेये। ८५। ७४।

"केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि॥")

परित्यक्तम्। यथा, ज्योतिषतत्त्वे।

"नित्यं निर्धूतनुद्धिं प्रवलरिपुभयं विघ्ननाशञ्च जीवः॥"

(निरस्तम्। यथा, अध्यात्मरामायणे। १। ३।

"पठन्ति ये नित्यमनन्यचेतसः
शृण्वन्ति चाध्यात्मकसंज्ञितं शुभम्।
रामायणं सर्व्वपुराणसम्मतं
निर्धूतपापा हरिमेव यान्ति ते॥")

भर्त्सितम्। यथा, रामायणे। ४। ८। ३२।

"पुराहं वालिना राम! राज्यात् स्वाद्-
वरोपितः।
परुषाणि च संश्राव्य निर्धूतोऽस्मि बलीयसा॥")

निर्धौतं, त्रि, (निर्+धाव+कर्म्मणि क्तः। "क्ष्वोः शूड्दुनासिके च।" ६। ४। १६। इति वकारस्योठादेशः। "रल्वेधव्यूट्सु।" ६।१।८६। इति वृद्धिः।) प्रक्षालितम्। यथा,—

"तस्याः पाटलपाणिजाङ्कितसुरोनिद्राकषाये दृशौ
निर्धौतोऽधरशोभिमा विजुलितंसस्तस्रजो मूर्द्धजाः॥"

इति श्रीजयदेवः॥

निर्बन्धः, पुं, (निर्+बन्ध+भावे घञ्।) अभिनिवेशः। निबन्धोऽपि पाठः। इति हेमचन्द्रः। ६। १३६॥ (यथा, भागवते। ३। १४। २६।

"स विदित्वाथ भार्य्यायास्तं निर्बन्धं विकर्म्मणि।
नत्वा दिष्टाय रहसि तयाथोपविवेश ह॥")

अभिलषितप्राप्तौ भूयो यत्नः। (यथा, च कुमारसम्भवे। ५। ६६।

"अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमासुक्तविवाहकौतुकः॥")

यथा शिवस्य हः। शिवस्य स्वेच्छाविग्रहः। आखटि इति ख्यातः। इति केचित्। इति ग्रहशब्दटीकायां भरतः॥

निर्म्बर्हणं, क्ली, (निर्+बर्ह+भावे ल्युट्।) निवर्हणम्। मारणम्। इत्यमरटीकायां नीलकण्ठः॥

निर्भटः, त्रि, (निर्+भट्+अच्।) दृढ़ः। इति त्रिकाण्डशेषः॥

निर्भयः, त्रि, (निर्गतं भयं यस्य यस्माद्वा।) भयरहितः। तत्पर्य्यायः। अजानेयः २। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे। ८३। ११।

"रजकः स तु तौ प्राह युवां कस्य वनेचरौ।
राज्ञो वासांसि यौ मौढ्यादुपायेते निर्भयावुभौ॥"

पुं, रौच्यमनुपुत्रे। यथा, हरिवंशे। ७। ८३।

"सुनेत्रः चित्रहविश्च सुतपा निर्भयो दृढ़ः।
रौच्यस्येते मनोः पुत्रा अन्तरे तु त्रयोदशे॥")

निर्भरं, क्ली, (निःशेषेण भरो भरणं यत्र।) अतिशयः। (यथा, गीतगोविन्दे। १। ३६।

"रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा
मभ्यर्च्चे परिरभ्य निर्भरसुरः प्रेमान्धया राधया।
साधु तद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिः
पातु वः॥")

तद्वति, त्रि। इत्यमरः। ३। ४। २॥ (यथा, भागवते। ६। १८। २०।

"तं वीरमाहौशनसी प्रेमनिर्भरया गिरा॥")

निर्भर्त्सनं, क्ली, (नितरां भर्त्सनम्। निर्+भर्त्स+ल्युट्।) खलीकारः। अवलक्तकम्। इति मेदिनी। ने, १८६॥ भर्त्सनञ्च॥ (यथा, महाभारते। ३। ३०४। ५।

"निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
ब्राह्मणस्य पृथा राजन्! न चकारा प्रियन्तदा॥")

निर्भर्त्सितं, त्रि, (निर्+भर्त्स+क्त।) कृतनिर्भर्त्सनः। तत्पर्य्यायः। निन्दितः २ धिक्कृतः ३ अपध्वस्तः ४। इति जटाधरः॥ (यथा, कुमारसम्भवे। ३। ५३।

"अधोऽनिर्भर्त्सितपद्मरागम्॥")

निर्भाग्यः, त्रि, (निकृष्टं भाग्यं यस्य।) भाग्यरहितः। यथा, "मूढ़ास्तापटुनिर्भाग्या मन्दाः स्युः।" इत्यमरः। ३। ३। १४॥

निर्म्मदः, पुं, (निर्गतो मदो दानवारि गर्व्वो वा यस्मात्।) कालवशान्निर्गलितमदहस्ती। तत्पर्य्यायः। उदान्तः २। इत्यमरः। २। ८। ३६॥ मदशून्ये, त्रि॥ (यथा, महाभारते। ३। ६६। ६६।

"ततः संवत्सरेऽतीते कृतौजसमवस्थितम्।
निर्म्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्॥")

निर्म्मध्या, स्त्री, (निर्गतं मध्यं यस्याः। शून्यमध्यत्वादेवास्यास्तथात्वम्।) नलिका। इति भावप्रकाशः॥ (नलिकाशब्दटीकायां विवृतिविशेषो ज्ञातव्यः॥)

निर्म्मन्थ्यदारु, क्ली, (निर्म्मन्थ्यं यज्ञार्थं घर्षणीयं दारु।) अरणिः। यज्ञे अग्न्युत्पादनार्थं घर्षणीयकाष्ठम्। इत्यमरः। २। ७। १६॥

निर्म्मलं, क्ली, (निर्गतं मलमस्मात्।) निर्म्माल्यम्। अभ्रकम्। त्रि, मलहीने। इति मेदिनी। ले, १०२॥ (यथा, महाभारते। ३। ६५। ४।

"निर्म्मलस्वादुसलिलं मनोहारि सुशीतलम्॥"

निष्पापे। यथा, मनुः। ८। ३१८।

"राजनिर्द्धूतदण्डास्तु कृत्वा पापानि मानवाः।
निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥"

यथा, देवीभागवते। १। १८। ३७।

"मनस्तु सुखदुःखानां महतां कारणं द्विज!।
जाते तु निर्म्मले ह्यस्मिन् सर्व्वं भवति निर्म्मलम्॥")

निर्म्मलोपलः, पुं, (निर्म्मलः विशुद्धः उपलः।) स्फटिकः। इति राजनिर्घण्टः॥

निर्म्माणं, क्ली, (निर्म्मीयते इति। निर्+मा ल्युट्।) निर्म्मितिः। (यथा, भागवते। २। ५। ३२।

"यदेतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम!॥")

सारः। समञ्जसम्। इति मेदिनी। णे, ५८॥

निर्म्माल्यं, क्ली, (निर्+मल+ण्यत्।) देवोच्छिष्टद्रव्यम्। देवस्वत्वनिवृत्तिविशिष्टं देवदत्तं वस्तु। यथा,—

"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति ध्रुवात्॥"

इति गरुड़पुराणम्॥*॥

तस्य स्थापनं शेषणञ्च यथा। "ऐशान्यां मण्डलं कृत्वा निर्म्माल्यशेषं दद्यादिति। वैष्णवे तु ॐ विष्वक्सेनाय नमः। शक्तौ तु ॐशेषिकायै नमः। शिवे ॐचण्डेश्वराय नमः। सूर्य्ये ॐ तेजश्चण्डाय नमः। गणेशे ॐउच्छिष्टगणेशाय नमः। कालिकादौ ॐउच्छिष्टचाण्डालिन्यै नमः। तथा च विद्यानन्दनिबन्धे।

'सूर्य्ये गणपतौ दुर्गे शक्तौ शैवेऽथ वैष्णवे।
तेजश्चण्डमथोच्छिष्टसोजसमुच्छिष्टपूर्ब्विकाम्॥
चाण्डालीं शैविकां चण्डं विष्वक्सेनं क्रमाद्यजेत्॥'

सोजो गणेशः।

'हृदये च बहिर्देवीं समर्च्य विधिवत्ततः।
निर्म्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः॥'

तन्त्रान्तरे।

निर्म्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम्।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्वस्त्रमालिने॥"

इति तन्त्रसारः॥*॥

"उदके तरुमूले वा निर्म्माल्यं तत्र संत्यजेत्॥"

इति कालिकापुराणे ५५ अध्यायः॥

निर्म्माल्यकालो यथा,—

"मणिमुक्तासुवर्णानां देवदत्तानि यानि च।
न निर्म्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च॥
प्रटी शराटी च षण्मासं नैवेद्यं दत्तमात्रतः।
मोदकं क्षीरखण्डञ्च यामार्द्धेन महेश्वरि!॥
पट्टवस्त्रं त्रिमासञ्च यज्ञसूत्रन्त्वहः स्मृतम्
यावदङ्गं भवेद्दृष्ट्या परमान्नन्तथैव च॥"

इत्येकादशीतत्त्वे योगिनीतन्त्रम्॥

शिवनिर्म्माल्ये विशेषो यथा, स्कान्दे।

"निर्म्माल्यं यो हि मे भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः।
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते॥
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते!॥
शुचिः स्नानादिनेति शेषः। एवञ्च स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिरिति कालिकापुराणं अशुचिविषयम्॥ अनुपनीतविषयमिति श्रीदत्तः। वस्त्रयज्ञोपवीतम्। अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
ग्रामग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥"

इति तिथितत्त्वम्॥

तस्य उत्तारणकालो यथा,—

अथ निर्म्माल्योत्तारणम्। अत्रिस्मृतौ।
"प्रातःकाले सदा कुर्य्यान्निर्म्माल्योत्तारणं बुधः।
क्षपिताः पशवो बह्वः कन्यका च रजस्वला॥
देवता च सनिर्म्माल्या हन्ति पुण्यं पुराकृतम्॥
नारसिंहे श्रीयमोक्तौ।
देवमाल्यापनयनं देवागारे समूहनम्।
स्नापनं सर्व्वदेवानां गोप्रदानसमं स्मृतम्॥
नारदपञ्चरात्रे।

यः प्रातरुत्थाय विधाय नित्यं
निर्म्माल्यमीशस्य निराकरोति।
न तस्य दुःखं न दरिद्रता च
नाकालमृत्युर्न च रोगमात्रम्॥

अरुणोदयवेलायां निर्म्माल्यं ग्रल्यतां व्रजेत्।
प्रातस्तु स्नाह्नकाग्रल्यं घटिकामात्रयोगतः॥
अतिग्रल्यं विजानीयात्ततो वज्रप्रहारवत्।
अरुणोदयवेलायां ग्रल्यं तत् क्षमते हरिः॥
घटिकायामतिक्रान्तो क्षुद्रं पातकमावहेत्।
सुहूर्त्ते समतिक्रान्ते पूर्णे पातकमुच्यते॥
अतिपातकमेव स्यात् घटिकानां चतुष्टये।
सुहूर्त्तेऽतिते पूर्णे महापातकमुच्यते॥
ततः परं ब्रह्मवधो महापातकपञ्चकम्।
प्रहरे पूर्णतां याते प्रायश्चित्तं ततो न हि॥
निर्म्माल्यस्य विलम्बे तु प्रायश्चित्तमथोच्यते।
अतिक्रान्ते सुहूर्त्तार्द्धे सहस्रं जपमाचरेत्॥
पूर्णे सुहूर्त्ते सञ्जाते सहस्रं सार्द्धमुच्यते॥
सहस्रद्वितयं कुर्य्यात् घटिकानां चतुष्टये।
सुहूर्त्तेऽतिते तीते अयुतं जपमाचरेत्॥
प्रहरे पूर्णतां याते पुरश्चरणमुच्यते।
प्रहरे समतिक्रान्ते प्रायश्चित्तं न विद्यते॥"

इति श्रीहरिभक्तिविलासे ३ विलासः॥

निर्म्माल्या, स्त्री, (निर्म्माल्यते इति। निर्+मल+ण्यत्। ततष्टाप्।) एकका। इति शब्दरत्नावली॥

निर्म्मितं, त्रि, (निर्+मा+क्तः।) कृतनिर्म्माणम्। गठितम्। रचितम्। यथा, सिद्धान्तमुक्तावल्याम्।

"निजनिर्म्मितकारिकावलीमतिसंक्षिप्तरुचिरं
मनोक्तिभिः।
विशदीकरवाणि कौतुकात् मनु राजीवदया-
वशंवदः॥"

निर्म्मितिः, स्त्री, (निर्+मा+क्तिन्।) निर्म्माणम्। गठनम्। रचनम्। यथा,—

"नियतिक्षतनियमरहितां ह्लादैकमयीमनन्य-
परतन्त्राम्।
नवरसरुचिरां निर्म्मितिमादधती भारती कवेर्
व्वयति॥"

इति काव्यप्रकाशः॥

निर्म्मुक्तः, पुं, (निर्+मुच्+क्तः।) सत्कञ्चुकः। अहिरात् त्यक्तत्वक् सर्पः। इत्यमरः।१।८।६॥ त्यक्तसंयोगे, त्रि। इति मेदिनी। ते, ११७॥ (यथा, देवीभागवते। ३। ८। २०।

"रागद्वेषान्न निर्म्मुक्तः कामक्रोधवशमाश्रितः।
पुनरेव यहं प्राप्तो यथा पूर्व्वं तथा स्थितः॥")

निर्म्मुटं, क्ली, (निर्म्मुटति आच्छिपतीति। निर्+मुट आच्छेपे+कः।) करभूत्यवहृतः। तत्पर्य्यायः। पण्याग्रिरम् २ कचङ्गनम् ३। इति शब्दरत्नावलीत्रिकाण्डशेषौ॥

निर्म्मुटः, पुं, (निर्+मुट+"इगुपधेति।" ३। १। १३५। इति कः।) वनस्पतिः। अपुष्पवृक्षः। इति त्रिकाण्डशेषः॥ सूर्य्यः। खर्परः। इति हारावली। २५५॥

निर्म्मोकः, पुं, (नितरां मुच्यते इति। निर्+मुच्+घञ्।) सर्पत्वक्। तत्पर्य्यायः। अहिकोषः २ निर्ल्वयनी ३ कञ्चुकः ४। इति हेमचन्द्रः। ४। ३८१॥ (यथा, आर्य्यासप्तशत्याम्। ३२८।

"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिल-
माहाय।
निर्म्मोकश्च भुजङ्गी मुञ्चति पुरुषश्च वारवधूः॥"

त्वक्मात्रम्। यथा, महाभारते। १३। १४१। १०१।

"त्यजनिर्म्मोकवसनाक्षीरवल्कलवाससः।
निर्द्दन्ताः सततं प्राणा बालिशिल्याश्चपोषणाः॥"

भावे घञ्।) मोचनम्। आकाशः। सन्नाहः। इति मेदिनी। के, १११॥ (सावर्णिमनोः पुत्रविशेषः। यथा, भागवते। ८। १३। ११।

"अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप॥")

निर्म्मोचः, पुं, (नितरां मोचः।) त्यागः। इति नानार्थसर्गशब्दार्थे अमरः॥ (यथा, रघुः। १०। २।

"न चोपलेभे पूर्व्वेषामन्यनिर्म्मोचसाधनम्।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम्॥")

निर्यन्त्रणं, त्रि, (निर्+यन्त्र+ल्युट्।) अबाधम्। निर्गोलम्। उच्छृङ्खलम्। इति जटाधरः॥ (यन्त्रणाशून्यम्। यथा, सुश्रुते। १। ३४।

"ततः खादेदुचितोयसेवी निर्यन्त्रणाखिनमे॥")

निर्यातं, क्ली, (निर्यांति निर्गच्छति मदोऽनेनेति।) निर्+या+करणे क्तः।) गजापाङ्गदेशः। (यथा, माघे। ५। ४१।

"प्रत्यग्रदन्तिनिर्य्यातक्रुम्भदूरविभिन्न-
निर्य्यासनिर्यदच्छं चलितं निषादी॥")

मोक्षः। अध्वनिर्गमः। इति मेदिनी। ते, ५७॥ (यथा, महाभारते। १३। ५५। ६।

"निर्य्यातश्च रथेनाशु सहसा यत् कृतं त्वया॥"

पशुपादबन्धनरज्जुः। इति वैजयन्ती॥ यथा, माघे। १२। ४१।

"निर्य्यातहस्तस्य पुरो दुधुक्षतः॥")

निर्यातनं, क्ली, (निर्+यत+णिच्+ल्युट्।) वैरशुद्धिः। प्रत्युपकारः। (यथा, हरिवंशे। १७७। ४७।

"तत्रानिरुद्धहरणं कृतं भगवता स्वयम्।
न ह्यन्यस्य भवेच्छक्तिर्व्वैरनिर्यातनं प्रति॥")

दानम्। त्यागः। न्यासार्पणम्। न्यस्तद्रव्यस्य समर्पणम्। इत्यमरः। ३। ३। २१६॥ ऋणादिशुद्धिः। इति भरतः॥ भारणम्। इति हेमचन्द्रः। ३। ४६८॥

निर्यामः, पुं, (निर्यन्यतेऽनेनेति। निर्+यम+घञ्।) पोतवाहः। इति हेमचन्द्रः। ३।५४०॥

निर्य्यासः, पुं, (निर्+यस+घञ्।) कषायः। क्वाथः। इति शब्दमाला॥ वृक्षादिक्षीरम्। आटा इति भाषा॥ तत्पर्य्यायः। वेष्टकः २। इति रत्नमाला॥ (यथा, मनुः। ५। ६।

"लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत्॥"

अर्शआदित्वात् क्लीवेऽपि दृश्यते॥ *॥ क्वचित् स्वरसोऽपि वाच्यः। यथा, वैद्यकचिकित्सासंग्रहे दलीकन्दवृत्तौ।

"कदलीकन्दनिर्य्यासे तत्प्रस्थतुलां पचेत्।
चतुर्भागावशेषेऽस्मिन् घृतप्रस्थं विपाचयेत्॥")

निर्युक्तिकं, त्रि, (निर्गता युक्तिर्यस्मात्। कप्।) युक्तिरहितम्। यथा। "नहि क्रियारहितं वाक्यमस्तीति प्राचां प्रवादो निर्युक्तिकत्वादश्रद्धेयः।" इति शब्दशक्तिप्रकाशिका॥

निर्यूथः, पुं, (नितरां यूथः।) निर्यासः। इति शब्दमाला॥

निर्यूहः, पुं, (शेखरम्। आपीड़म्। हारम्। निर्यासः। क्वाथरसः। (यथास्य पर्य्यायो वैद्यकरत्नमालायाम्॥ "क्वाथः कषायो निर्यूहः॥") नागदन्तः। अवलम्बनार्थं गेहादिभित्तिनिर्गतं काष्ठद्वयम्। इत्यमरमेदिनीकरौ॥

निर्लक्षणः, त्रि, (निर्गतं लक्षणं यस्मात्।) लक्षणहीनः। तत्पर्य्यायः। पाकुरपृष्ठः २। इति हेमचन्द्रः। ३। १०१॥ (यथा, गोः रामायणे। २। ११८। ५।

"निर्लक्षणो लक्षणवान् दुःग्रीवः ग्रीवानपि॥")

निर्लिप्तः, पुं, (निर्+लिप+क्तः।) श्रीकृष्णः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्याये।

"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः॥"

लेपरहिते, त्रि॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ४६।

"निर्गुणा च निराकारा निर्लिप्तात्मस्वरूपिणी॥")

निर्लेपः, त्रि, (निर्गतो लेपो यस्मात्।) लेपशून्यः। आसङ्गरहितः। यथा,—

"निर्लेपः कृपमण्डलो मृगदृशां हारावली
निर्गुणा
नेत्राम्भोरुहमञ्जनेन रहितं नीरागमोष्ठाधरम्॥"

इत्यानन्दचम्पूग्रन्थे विंशतिस्तवकः॥ पापशून्यः। यथा, "लोकवेदविरुद्धैरपि निर्लेपः खलन्त्रयेति महापापशुपतः।" इति कुसुमाञ्जलिः॥

निर्ल्वयनी, स्त्री, (नितरां लीयते संलीनो भवति अहिरस्यामिति। निर्+ली+ल्युट्। पृषोदरादित्वात् वागमः।) कञ्चुकः। सर्पत्वक्। इति हेमचन्द्रः। ४। ३८१॥

निर्व्वचनं, क्ली, (निर्+वच+भावे ल्युट्।) निरुक्तिः। निश्चयकथनम्। यथा, श्रीभागवते। ६। २०। ३७।

"नामनिर्व्वचनं तस्य श्लोकमेकं सुरा जगुः॥"

(प्रशंसा। यथा, महाभारते। १। १०६। २३।

"प्रणम्य शान्तनोर्वीर्य्यं समीक्ष्य पुनरुद्भवम्।
ततो निर्व्वचनं लोके सर्व्वराष्ट्रेष्ववर्त्तत॥"

निर्गतं वचनं यत्र। तूष्णीम्। यथा, कुमारे। ७। १६।

"पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्व्वम्।
सा रञ्जयित्वा चरणौ कृताग्री-
र्माङ्गल्यैर्न तां निर्व्वचनं जघान॥"

वाक्यातीते, त्रि। यथा, महाभारते। ३। १६६। ३६।

"येषां तड़ागानि महोदकानि
वाप्यश्च कूप्याश्च प्रतिश्रयाश्च।
अन्नस्य दानं मधुरा च वाणी
यमस्य ते निर्व्वचना भवन्ति॥")

निर्व्वपणं, क्ली, (निर्+वप+भावे ल्युट्।) दानम्। इत्यमरः। २। ७। ३०॥ (यथा, मनुः। ३। २४८।

"अनवेक्षेतदा कार्य्यं पिण्डनिर्व्वपणं सुतैः॥"

पिण्डदानम्। यथा, तत्रैव। ३। २६०।

"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्।
गां विप्रमग्निमिं वा प्राश्नयेदप्सु वा क्षिपेत्॥"

यथा च गोः रामायणे। ६। १०८। ३२।

"एषा मन्दाकिनी पुण्या नदी सुविमलोदका।
पितुर्निर्व्वपणं यत्र मया स्वलपलैः कृतम्॥"

पिण्डः। यथा, महाभारते। १३। ८४। १४।

"तत् समाप्य यथोद्दिष्टं पूर्व्वकर्म्म समाहितः।
दातुं निर्व्वपणं सम्यक् यथावदुपचक्रमे॥"

श्राद्धादिसंविभागः। इति श्रीधरस्वामी॥ यथा, भागवते। ५। १२। १२।

"रङ्गभूमौ तत् तपसा न याति
न चेज्यया निर्व्वपणाद् गृहाद् वा॥")

निर्व्वर्णनं क्ली, (निर्+वर्ण+"सत्यापपाशेति।" ३।१।२५। इति णिच्+भावे ल्युट्।) दर्शनम्। इत्यमरः। ३।२।३१॥

निर्व्वहः, क्ली क्लौ, (निर्+वह+भावे क्विप्।) निष्ठा। इत्यमरः। १।७।१५॥ तत्तु प्रक्रान्ताभिनयनिर्व्वाहः। किंवा नाटके पञ्च सन्धयो भवन्ति। यथा,—

"मुखं प्रतिमुखञ्चैव गर्भो विमर्ष एव च।
तथा निर्व्वहणञ्चेति नाटके पञ्च सन्धयः॥"

तत्र पञ्चमस्य सन्धेः संज्ञाद्वयमिदम्। इति भरतः॥ सुकुटञ्चाह हे पञ्चमसन्धिसमाप्तौ। प्रस्तुतकथासमाप्ताविति यावत्। यथैतदुक्तौ ग्रन्थार्थवः। निर्व्वहणन्तु निष्ठा क्ली संहारश्च समापने। प्रक्रान्तकथानिर्व्वाहः। इति मधुमाधवादयः॥

निर्व्वार्यं, क्ली, (निर्+वा गमने+क्तः। तस्य नः।) व्यक्तगमनम्। निर्व्वृतिः। गजमञ्जनम्। (यथा, रघुः। १।७१।

"असह्यपीड़ं भगवन्नगमन्त्यमवेहि मे।
अरन्तुदमिवालानमनिर्व्वार्यस्य दन्तिनः॥")

सङ्गमः। अपवर्गः। इति मेदिनी। र्ये, ५८॥ (यथा, भागवते। ३।२८।३५।

"सत्त्वाश्रयं यर्हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्चिः॥")

विश्रान्तिः। इति हेमचन्द्रः॥ (समाप्तिः। यथा, भागवते। १।६।२६।

"आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिकः॥")

निश्चलम्। शून्यम्। विद्योपदेशगृहम्। इति शब्दरत्नावली॥ नाभिदेशे जप्यप्रणवपुटितमालकापुटितमूलमन्त्रम्। यथा,—

"कुलुकां मूर्द्धि संजप्य हृदि सेतुं विचिन्तयेत्।
महासेतुं विशुद्धे तु षोड़शारे समुद्धरेत्॥
मणिपूरे तु निर्व्वाणं महाकुण्डलिनीमयः।
स्वाधिष्ठाने कामबीजं राकिणी मूर्द्धि संस्थितम्।
विचिन्त्य विधिवद्देवि! मूलाधारान्तिकाच्छिवे!॥
विशुद्धान्तं स्मरेद्देवि! विद्युत्तन्वुतनीयसीम्।
देवीस्थानं द्विजिह्वान्तं मन्त्रमूलाद्वतं सुधुः॥"

निर्व्वाणं यथा,—

"अथ वक्ष्यामि निर्व्वाणं शृणु सावहितानघे!।
प्रणवं पूर्व्वमुच्चार्य्य मालकाञ्च समुच्चरेत्॥
मालकार्णां समस्तान्च पुनः प्रणवमुच्चरेत्।
एवं पुटितमूलन्तु प्रजपेन्मन्त्रिपुङ्गवः।
एवं निर्व्वाणमीशानि! यो न जानाति पामरः।
कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते॥"

इत्यागमतत्त्वविलासः॥ (विष्णुः। यथा, महाभारते। १३।१४६।७५

"त्रिसामा सामगः साम निर्व्वार्यं भेषजं भिषक्॥")

निर्व्वार्यः, त्रि, (निर्+वा+क्तः। "निर्व्वार्णोऽवाते।" ८।२।५०। इति निष्ठातस्य नः।) मुक्तः। यथा। निर्व्वार्णो मुनिः। नष्टः। यथा। निर्व्वार्णो वह्निः। (यथा, कुमारे। ३।५२।

"निर्व्वार्णभूयिष्ठमथास्य वीर्य्यं
सन्तुक्षयन्तीव वपुर्गुणेन॥")

निमग्नः। यथा। निर्व्वार्णो ह्रदः। इति विश्वप्रकाशे अमरः। ३।१।६६॥ वायुशून्यञ्च॥

निर्व्वातः, त्रि, (निर्गतो वातो वायुर्यस्मात्।) वायुरहितः। इत्यमरः। ३।१।६६। (यथा, महाभारते। २।३६।२८।

"असूर्य्यमिव सूर्य्येण निर्व्वातमिव वायुना।
भासितं क्रादितञ्चैव ज्ञात्वेदं सदो हि नः॥"

निर्व्वाति स्रोतः। निर्+वा+गत्यर्थेति क्तः। "निर्व्वार्णोऽवाते।" ८।२।५०। इति निष्ठातस्य नः।) गते वायौ, पुं॥

निर्व्वादः, पुं, (निर्व्वदनमिति। निर्+वद्+भावे घञ्।) परीवादः। जनवादः। इत्यमरः। ३।३।८६॥ (यथा, रघुः। १४।६७।

"किमात्मनिर्व्वादकथासुपेक्षे
जायामदोषामसुत सन्त्यजामि॥")

अवज्ञा। (निर्निश्चितं वादः कथनम्।) निश्चितवादः। वादाभावः। इति भरतः॥

निर्व्वापः, पुं, (निर्व्वपणमिति। निर्+वप+घञ्।) निवापः। प्रेतभिन्नस्तपित्रुद्देश्यकदानम्। इत्यमरटीकायां तर्कवागीशः॥ (यथा, देवीभागवते। २।७।१६।

"पुत्रेभ्योऽहं ददाम्यद्य निर्व्वापं विधिपूर्व्वकम्॥"

भिक्षार्थदानम्। यथा, पद्मपुराणे। ५।२०।

"एतस्मिन्नवसरे ब्राह्मणोऽपि कुतश्चित् यदृच्छात्।
निर्व्वापः परिभ्रम्य यावदागतः पश्यति तावत् पुत्रशोकाभिभूता ब्राह्मणी विलपति॥" भक्षणम्। इति रामानुजः॥ यथा, रामायणे। २।६१।८०।

नीलवैदूर्य्यवर्णांश्च मृदून् यवससञ्चयान्।
निर्व्वापार्थं पशूनां ते दण्डमुक्तञ्च सर्व्वशः॥")

निर्व्वापणं, क्ली, (निर्+वप+क्विप्+ल्युट्।) दर्भः। इत्यमरः। २।८।११४॥ दानम्। इति हलायुधः। २।३२३॥ (निर्व्वापणतासम्पादनम्। निवाण इति भाषा॥ यथा, तिथितत्त्वे।

"दीपनिर्व्वापणात् पुंसः कुलाक्षच्छेदनात् स्त्रियः॥"

स्वार्थे णिच्। वपनम्। यथा, पद्मपुराणे। १।४०५। "मया तावन्नीतिबीजनिर्व्वापणं कृतम्। परन्तद्धैवपर्य्यवायतम्॥")

निर्व्वार्य्यः, त्रि, (निश्चयेन व्रियते इति। निर्+वृ+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) सत्कर्त्तव्यतया सम्यतन कार्य्यकर्त्ता। इत्यमरः। ३।१।१३॥ "भयविक्रमयत्नसनाथ्यदवादौ निजसारं मन सत्त्वं ततसम्यदा सम्यतन उद्यमं कुर्व्वन् यो नि स्पृहो भूत्वा कर्म्म करोति स निर्व्वार्य्य उच्यते।" इति भरतः॥ स्वावरणीयश्च॥

निर्व्वासनं, क्ली, (निर्+वस+क्विप्+ल्युट्।) वधः। इत्यमरः। २।८।११३॥ नगरादेर्व्वहिष्करणम्। इति मेदिनी। ने, १८६॥ (यथा, महाभारते। ५।६०।५८।

"निर्व्वासनञ्च नगरात्, प्रव्रज्या च परन्तप!।
नानाविधानां दुःखानामभिघातिन जनार्दन॥")

निर्व्वाहः, पुं, (निर्+वह+घञ्।) निष्पत्तिः। समाप्तिः। यथा। "खलिया कर्म्मनिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशाद्दुपवासाद्याचरणञ्च।" इति तिथितत्त्वम्॥ अपि च।

"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित्।
आधिक्ये न्यूनतायाञ्च श्वयते परमार्थतः॥"

इति भक्तिरसामृतसिन्धौ नारदीयपुराणम्॥

निर्व्वाहणं, क्ली, (निर्+वह+स्वार्थे णिच्+ल्युट्।) निर्व्वहणम्। नाट्योक्तौ प्रस्तुतकथासमाप्तिः इत्यमरटीकायां भरतः॥

निर्व्विकल्पकं, क्ली, (निर्गतो विकल्पो नानाधिकल्पना यस्मात्। कप्।) प्रकारतादिविशेषशतानापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञानम्। यथा,—

"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम्।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत्॥"
"ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते॥"

इति च भाषापरिच्छेदः॥

निर्व्विकल्पसमाधिः, पुं, (निर्व्विकल्पः समाधिः।) ग्राह्यग्राहादिभेदशून्ये अद्वितीयवस्तुनि सदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम्। इति वेदान्तसारः॥

निर्व्विकारः, त्रि, (निर्गतो विकारो विक्रतिर्यस्मात्।) विकारशून्यः। यथा,—

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम्।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम्॥"

इत्यध्यात्मरामायणम्॥

निर्व्विद्धः, त्रि, (निर्+विद+क्तः। निर्व्विद्धस्योपसंख्यानात् परस्य अत्वम् पूर्व्वस्य धुत्वम्।) निर्व्वित्तिविशिष्टः। निर्व्वेदयुक्तः। यथा,—

"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥"

इति भक्तिरसामृतसिन्धुः॥

निर्व्विन्ध्या, स्त्री, (निर्गता विन्ध्यादिति निर्व्विन्ध्यतत्पुरुषः।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः। इति श्रीभागवते। ५।१६ अः॥ (यथा, मेघदूते। ३०।

"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य॥")

निर्व्विषा स्त्री, (निर्गतं विषं यस्याः।) क्षयविशेषः। निर्व्विषी इति भाषा। तत्पर्य्यायः। अपविषा २ निर्व्विषी ३ विषघ्ना ४ विषापहा ५ विषघ्नी ६ विषाभावा ७ अविषा ८ विषवैरिणी ९। अस्या गुणाः। कटुत्वम्। शीतत्वम्। कफवातासदोषनाशित्वम्। अनेकविषघ्नत्वम्। व्रणनिर्म्मूलकारित्वञ्च। इति राजनिर्घण्टः॥

निर्व्विश, त्रि, (निर्+विश+क्तः।) क्षतनिर्व्वेशः प्राप्तः। यथा, श्रीभागवते।

"यत्र निर्व्विश्यमरं क्षतात्मो नाभिमन्यते॥"

स्थितः। यथा, भागवते। १। २। ३३।
"खनिर्म्मितेषु निर्व्विण्णो भुङ्क्ते भूतेषु तद्-
गुणान्।"
विषादितः। ज्ञतात्मिद्रोचः। यथा। "श्रेष्ठे-
निर्व्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति।"
इत्युदाहृतत्वम्॥
निर्व्वीजा, स्त्री, (निर्गतं बीजं यस्याः।) काकली-
द्राक्षा। इति राजनिर्घण्टः॥
निर्व्वीरं, त्रि, (निर्गतो वीरो यस्मात्।) वीर-
शून्यम्। यथा,—
"नाक्षतं न च टङ्कितं न गमितं नीत्यापितं
स्थानतः
केनापीदमहो महद्वतरतो निर्व्वीरसुर्व्वी-
तलम्॥"
इति महानाटकम्॥
निर्व्वीरा, स्त्री, (निर्गतो वीरवत् पतिः पुत्रो वा
यस्याः।) अवीरा। पतिपुत्रविहीना। इति
हेमचन्द्रः। ३। १६४॥
निर्वृतिः, स्त्री, (निर्+वृ+क्तिन्।) सुस्थितिः।
अस्वङ्गमनम्। सुखम्। इति मेदिनी। ते,
१२०॥ (यथा, देवीभागवते। १। १६। ३६।
"जनकस्य दशां दृष्ट्वा राज्यस्थस्य महात्मनः।
स निर्वृतिं परां प्राप्य पितुराश्रमसंस्थितः॥")
मोक्षः। ह्लादः। इति हेमचन्द्रः। १। ७५॥
(ग्लानिः। यथा, सुश्रुते। १। ४१।
"भूतेजोवारिजैर्देवैः शमं याति समीरजः।
भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिम्॥"
विदर्भवंशीयराजस्य पुत्रे, पुं। यथा, भागवते।
९। २४। ३।
"क्रथस्य कुन्तिः पुत्रोऽभूत् तस्मिंस्तस्याथ
निर्वृतिः॥")
निर्वृत्तः, त्रि, (निर्+वृत्+क्तः।) निष्पन्नः। इत्य-
मरः। ३। १। १००॥ (यथा, रघुः। १७।९८।
"सा तस्य कर्म्मनिर्वृत्तेर्दूरं पश्चात् ज्ञता पत्युः॥")
निर्वृत्तिः, स्त्री, (निर्+वृत्+क्तिन्।) निष्पादः।
तथा च।
"यथा दृष्टेन दोषेण यथा चानुविसर्पता।
निर्वृत्तिरामयस्यासौ संप्राप्तिर्ज्ञातिरागतिः॥"
इति माधवकरः॥
(निर्गता वृत्तिर्यस्मादिति।) वृत्तिरहिते, त्रि॥
निर्व्वेदः, पुं, (निर्+विद्+घञ्।) खावमान-
नम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते।
४। १०। ३७।
"दैवेर्युद्धं ज्ञतं चोयं प्रह्लादस्तु पराजितः।
निर्व्वेदं परमं प्राप्तो ज्ञात्वा धर्म्मं सनातनम्॥")
स तु त्रयस्त्रिंशद्व्यभिचारिभावानामादिमः।
ग्लानेरस्य स्थायिभावश्च। यथा,—
"निर्व्वेदःस्थायिभावोऽस्ति ग्लानोऽपि नवमो
रसः॥"
इति काव्यप्रकाशः॥
तस्य लक्षणं यथा,—
"तत्त्वज्ञानाप्रदीप्यादेर्निर्व्वेदः खावमानजम्॥"
तदुदाहरणम्। यथा,—
"ऋतुपिण्डबालुकारन्ध्रविधानरचनार्थिना।
दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया॥"
इति साहित्यदर्पणम्॥
परवैराग्यम्। यथा,—
"ततः कदाचिन्निर्व्वेदान्निराकाराश्रितेन च।
लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मया॥"
इति मोक्षधर्म्मः॥
वैराग्यम्। यथा, श्रीभगवद्गीतायाम्।
"तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥"
(निर्गतो वेदो यस्मादिति।) वेदरहिते, त्रि॥
निर्व्वेशः, पुं, (निर्+विश्+भावे घञ्।) भृतिः। भोगः। इत्यमरः। ३। ३। २१४॥
"भृतिर्व्वेतनं भोगः सुखं पालनमभ्यवहारो वा॥"
इति भरतः॥ (यथा, भागवते। ६। २। ७।
"अयं हि ज्ञतनिर्व्वेशो जन्मकोट्यंहसामपि।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥")
मूर्च्छनम्। इति मेदिनी। शे, २२॥ विवाहः।
निर्पूर्व्वविश्धातुर्व्विवाहार्थः। इति स्मृतिः॥
निर्व्वेष्टनं, क्ली, (नितरां वेष्टनमत्र।) गाढ़ि-
चीरम्। इति हारावली। २१४॥ (निर्गतं
वेष्टनं यस्मात्।) वेष्टनरहिते, त्रि॥
निर्व्यथनं, क्ली, (निर्+व्यथ+भावे ल्युट्।)
क्षिप्रम्। इत्यमरः। १। ८। २॥ व्यथाभावः।
निश्चयेन व्यथनञ्च॥
निर्व्यूढं, त्रि, (निर्+वि+वह+क्तः।) व्यक्तम्।
इति त्रिकाण्डशेषः॥ समाप्तम्। यथा,—
"अवदातन्तु यत् कर्म्म निर्व्यूढमतिशोभनम्॥"
इति भटाधरः॥
(स्थिरम्। यथा, "स्त्रीणां पतिपुत्रादिधने न
निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढं अप्रतिबन्धकतया
यथेष्टविनियोगार्हत्वात्॥" तथा च राज-
तरङ्गिण्याम्। ३। ४७२।
"स एव भूपतिर्भूत्वा सप्तवर्षशतत्रयम्।
निर्व्याबाधाध्वनिर्व्यूढपातालेश्वरमासदत्॥")
निर्हरणं, क्ली, (निश्चयेन हरणम्। निर्+हृ+
ल्युट्।) शवदाहः। यथा, शुद्धितत्त्वे।
"तस्य निर्हरणादीनि सम्यरेतस्य भार्गव!।
युधिष्ठिरः कारयित्वा सुकृत्तं दुःखितोऽभवत्॥"
(दहनम्। यथा, भागवते। ७। ७। २८।
"बीजनिर्हरणं योगः प्रवाहोपरमो धियः॥")
निःश्रेयस हरणञ्च॥
निर्हारः, पुं, (निर्+हृ+घञ्।) प्रह्लादेरुत्-
पाटनम्। इति भरतः॥ तत्पर्य्यायः। अभ्यव-
कर्षणम् २। इत्यमरः। ३। २। १७॥ मल-
मूत्रादित्यागः। यथा, आह्निकतत्त्वे।
"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्या॥"
दाहः। इति स्मृतिः॥ (दाहार्थं नयनम्। इति
स्वामी॥ यथा, भागवते। ७। २। ३५।
"एवं विलपतीनां वै परिदह्य पतिं चितिम्।
व्यनिच्छतीनां निर्हारमर्कोऽस्तं सन्ध्यवर्णत॥")
यथेष्टविनियोगः। यथा,—
"न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात्।
स्वकादपि च दृत्तार्हाद्दस्य भर्त्तुरनाज्ञया॥"
इति मनुः॥
निर्हारी, [न्] त्रि, (निःश्रेयेण हरति दूरं गच्छ-
तीति। निर्+हृ+णिनि।) दूरगामिगन्धः।
इत्यमरः। १। ५। ११॥ (यथा, महाभारते।
१२। १८४। २८।
"इष्टानिष्टगन्धस्य मधुरः कटुरेव च।
निर्हारी संहतः स्निग्धो रूक्षो विषद एव वा॥")
निर्ह्रादः, पुं, (निर्+ह्राद अव्यक्तशब्दे+घञ्।)
ध्वनिः। इत्यमरः। १। ३। २३॥ (यथा,
रघुवंशे। १। ४१।
"श्रेणीबन्धादितन्वद्भिः अस्माभीतोरणध्वजम्।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमितानना॥")
निलयः, पुं, (निलीयते अस्मिन्निति। नि+ली+
"ग्रहवृ।" ३।३।६६। इति अधिकरणे अच्।)
गृहम्। इत्यमरः। २। २। ५॥ (यथा, रघु-
वंशे। २। १५।
"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम्॥"
आश्रयस्थानम्। यथा, भागवते। ८। १। ११।
"तं भूतनिलयं देवं सुपर्णभुजधावत॥")
निलिम्पः, पुं, (निलिम्पन्तीति। नि+लिप्+"नौ
लिम्पेर्वाच्यः।" ३।१।१३८। इत्यस्य वार्त्तिकोक्त्या
ग्पः। सुधादित्वान्नुम्।) देवः। इति त्रिकाण्ड-
शेषः॥
निलिम्पनिर्झरी, स्त्री, (निलिम्पानां देवानां निर्झरी
नदी।) गङ्गा। यथा,—
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी॥"
इत्यादिरावणकृतशिवस्तोत्रम्॥
निलिम्पा, स्त्री, (नि+लिप+ग। सुधादित्वा-
न्नुम्। स्त्रियां टाप्।) स्त्रीगवी। इति त्रिकाण्डशेषः॥
निलिम्पिका, स्त्री, (निलिम्पा एव। स्वार्थे कन्
टापि अत इत्वम्।) सौरभेयी। इति हेम-
चन्द्रः। ४। ३३२॥
निलीनं, त्रि, (निःश्रेयेण लीनं संलग्नम्। नि+
ली+क्तः।) निःश्रेयेण लीनम्। संलग्नम्।
(यथा, भट्टिः। २। ५।
"वनानि तोयानि च नेत्रकान्ते:
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परं विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥"
निवपनं, क्ली, (नि+वप+भावे ल्युट्।) पित्रु-
देशकदानम्। इति शब्दरत्नावली॥ (यथा,
महाभारते। १३। ८२। २।
"ऋषयो धर्म्मनित्यास्तु ज्ञात्वा निवपनान्युत।
तपैवाप्याप्नुवन्त्यत्र तीर्थाम्भोभिर्यतव्रताः॥")
निवरा, स्त्री, (नितरां व्रियत इति। नि+वृ+
"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति कर्म्मणि
यप्। ततष्टाप्।) कुमारी। अविवाहिता।
इति मिताक्षरा॥

निवसतिः, स्त्री, (निवसत्यत्रेति। नि+वस्+"वहिवस्यर्त्तिभ्यश्चित्।" उणा ४। ६०। इति अतिच्।) गृहम्। इति शब्दरत्नावली॥

निवसथः, पुं, (निवसत्यत्रेति। नि+वस् आधारे अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २३॥

निवसनं, क्ली, (न्युप्यतेऽत्र। नि+वस्+आधारे ल्युट्।) गृहम्। इति शब्दरत्नावली॥ वस्त्रम्। इति हलायुधः॥ (यथा, गोः रामायणे। २।३०।
"द्वितीयं च परीदधौ चीरमादाय मैथिली।
चीरस्याकुशला देवी सम्यङ्निवसने शुभा॥")

निवहः, पुं, (नितरासुह्यते इति। नि+वह+पुंसीति घः।) समूहः। इत्यमरः। २। ५। ३८॥ (यथा, पञ्चतन्त्रे। ५। ८।
"सुकुलं कुशलं सुजनं
विहाय कुलकुशलग्रहीलधिकलेऽपि।
आप्तो कल्पतरावि
नित्यं रज्यन्ति जननिवहाः॥"
नितरां वहतीति। नि+वह+पचाद्यच्।) सप्तवायून्तर्गतवायुविशेषः। यथा,—
"निवहो यत्र वातेशः केषाञ्चिन्न सुखप्रदः।
न प्रवहो न च व्यहः प्रमादी च प्रभञ्जनः॥"
इति ज्योतिषम्॥

निवातः, त्रि, (नितरां वाति गच्छत्यत्र। नि+वा+अधिकरणे क्तः।) आश्रयः। निवासः। (निहतो वातो यस्मिन्।) अवातः। वातशून्यः। (यथा, रघुवंशे। १। १७।
"निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम्।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि॥")

ग्रस्त्राभेद्यं वर्म्म। ग्रस्त्रेण न भिद्यते यत् वर्म्म कवचम्। इत्यमरभरतौ। ३। ३। ८४॥

निवातकवचः, पुं, दैत्यविशेषः। स तु हिरण्यकशिपोः पौत्रः संह्लादपुत्रः। इत्यग्निपुराणम्॥ (निवातं ग्रस्त्राभेद्यं कवचं येषामिति। दानवविशेषे, पुंलिङ्गो बहुवचनान्तः। ते तु इन्द्रादिदेवैरार्জ্জুनेन निहताः। यथा, महाभारते। ३। १६८। ७०—७२।
"ततो मामब्रवीद्राजन्! प्रहस्य वलहन्हा।
नाविषह्यमस्त्रवाक्येति त्रिषु लोकेषु किञ्चन॥
निवातकवचा नाम दानवा देवशत्रवः।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्ति नु॥
तिस्रः कोट्यः समाख्याता स्तुल्यरूपबलप्रभाः।
तांस्तत्र जहि कौन्तेय! गुर्व्वर्थेस्ते भविष्यति॥"
एतद्विवरणविस्तृतिस्तु तत्रैव विशेषतो द्रष्टव्या॥)

निवापः, पुं, (नितरासुप्यते इति। नि+वप+घञ्।) म्रतोदेश्यकदानम्। तत्पर्य्यायः। पिण्डदानम्२। इत्यमरः। २। ७। ३१॥ पिण्डतर्पणम्३। इति हेमचन्द्रः। ३। ४०॥ निवपनम्४ पिण्डदानकम्५। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ८। ८६।
"अपश्चोकमनाः क्षुत्क्षिनीं
अनुयस्त्रीव्य निवापदक्षिभिः॥")

दानमात्रम्। यथा। "येभ्यो निवापाञ्जलयः पितॄणाम्।" इति भरतः॥ (न्युप्यते बीजमस्मिन्निति। क्षेत्रम्। इति भौलिकश्चः॥ यथा, महाभारते। ३। ३०६। ६।
"अवनिं प्रमदा गाश्च निवापं बहुवार्षिकम्।
तस्ते विप्र! प्रदास्यामि न तु धर्म्मं सकुञ्जलम्॥")

निवारः, पुं, निवारणम्। इति निपूर्ब्बवृधातोर्भावे घञ्प्रत्ययनिष्पन्नः॥

निवारणं, क्ली, (नि+वृ+णिच्+करणे ल्युट्।) निश्चयेन वारणम्। निराकरणम्। यथा,—
"यदाक्षतो धर्म्मे इतीतरस्थितो
न मन्यते तस्य निवारणं जनः॥"
इति श्रीभागवते प्रथमस्कन्धः॥

निवारितः, त्रि, (नि+वृ+णिच्+क्तः।) क्षतनिवारकः। यथा,—
"निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितोऽतिहृष्यः॥"
इति नैषधे। १। ११॥

निवास, तृ क क्षुत्याम्। इति कविकल्पद्रुमः॥ (अदन्त पुरां-पुरं-सर्क-सेट्।) अनिनिवासतृ। स्तृतिराच्छादनम्। निवासयति यच्चित्रं चीनांशुकमिति हलायुधः। इति दुर्गादासः॥

निवासः, पुं, (निवसति अस्मिन्। नि+वस्+अधिकरणे घञ्।) गृहम्। इति हेमचन्द्रः। ४। ५७॥ (यथा, विष्णुपुराणे। १। १३। ८४।
"तत्र तत्र प्रजानां हि निवासं समरोचयत्॥"
आश्रयस्थानम्। यथा, भागवते। १। ११। २७।
"श्रियो निवासो यस्योरः पानपात्रं मुखं द्वयाम्।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम्॥"
वस्त्रम्। यथा, हरिवंशे। १८१। ३८।
"नमस्तस्मैनिवासाय नमस्ते पीतवाससे॥"
भावे घञ्। वासः। यथा, महाभारते। १। १८६। ६।
"कुम्भकारस्य शालायां निवासं चक्रिरे तदा॥")

निवासी, [न्] त्रि, (निवसतीति। नि+वस्+णिनि।) निवासविशिष्टः। निवासकर्त्ता। यथा,—
"ते तु कावेरमन्ति देवेः प्रतिश्रुतकर्त्ता।
धन्याः कालीदहतीरे कान्यकुब्जनिवासिनः॥"
इति काव्योदयः॥

निविड़, त्रि, (नितरां विड़तीति। नि+विड़ आक्रोशे+क।) निरवकाशम्। तत्पर्य्यायः। निरन्तरम्२ निविरीषम्३ घनम्४। सान्द्रम्५ गौरवम्६ बहुलम्७ दृढम्८ गाढम्९ अविरलम्१०। इति हेमचन्द्रः। ६। ८२॥ (यथा, आर्य्यासप्तशत्याम्। ३२०।
"निविड़घटितोरुयुगलां श्वासोत्तब्धस्तनार्पितवदनाम्॥"
यथा, च रघुवंशे। ६। ५८।
"तस्यापरेष्वपि न्यगेषु गुरान् सुसन्धोः
कर्णान्तमेत्य विभिदे निविड़ोऽपि सद्यः॥"
नासिकायां नतम्। नि+"नेर्विड़चविरीसचौ।" ५। २। ३९। इति विड़च्। अवटीटम्। "तदयोगात् नासिका निविड़ा।" इति सिद्धान्तकौमुदी॥)

निविरीसं, त्रि, (नि नता नासिका यस्य। "नेर्विड़चविरीसचौ।" ५। २। ३९। इति विरीसच्। अवटीटः। इति शाकरणम्॥) निविड़म्। इति जटाधरः॥ (यथा, माघे। ७। ३०।
"उरुनिविरीषनितम्बभारखेदि॥")

निविष्टं, त्रि, (नि+विश्+क्तः।) निवेशयुक्तम्। (यथा, कुमारसम्भवे। ५। ३१।
"भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वभिमानगौरवाः क्रियाः॥")
आविष्टम्। प्रविष्टम्। यथा,—
"उडुगणपरिवारो नायकोऽप्योषधीना-
मन्तमयशरीरः क्षालियुक्तोऽपि चन्द्रः।
भवति विकलमूर्त्तिर्मण्डलं प्राप्य भानोः
परमदनिविष्टः को लघुत्वं न याति॥"
इलुप्तटः॥
(आवद्धम्। यथा, देवीभागवते। ९। १५। ४५।
"ब्रह्मोऽहमिति मे बुद्धिर्नापसर्पति चिन्तनः।
संसारवासनाजाले निविष्टा दृढगामिनी॥"
स्थितम्। यथा, रामायणे। १। ५। ५।
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥")

निवीतं, त्रि, (निवीयते स्मेति। नि+व्ये आच्छादने+क्तः। सम्प्रसारणम्।) आच्छादनवस्त्रम्। उड़नी इति भाषा॥ तत्पर्य्यायः। प्रावृतम्२। कक्षलम्बितयज्ञसूत्रे, क्ली। इत्यमरः। २। ७। ५०॥ यथा,—
"उपवीतं भवेन्नित्यं निवीतं कक्षसञ्जनम्॥"
इति युक्तिपुराणम्॥

निवीती, [न्] पुं, (निवीतमस्यास्तीति।) निवीतयुक्तः। कक्षलम्बितयज्ञसूत्रविशिष्टः। यथा,—
"कृतोपवीती देवेभ्यो निवीती च भवेत्ततः।
मनुष्यांस्तर्पयेच्चैव ऋषिपुत्रान्ऋषींस्तथा॥"
इत्याह्निकतत्त्वम्॥

निवृतं, त्रि, (निव्रियते आच्छाद्यते स्मेति। नि+वृ+क्तः।) निवीतम्। उड़नी इति भाषा॥ इत्यमरटीकायां स्वामी॥ परिवेष्टितम्। इति हेमचन्द्रः॥

निवृत्तः, त्रि, (नि+वृत्+क्तः।) निवृत्तिविशिष्टः। विरतः। यथा, श्रीभागवते। १०। २। ३।
"निवृत्ततर्षैरुपगीयमानाद्-
भवौषधाच्छ्रोत्रमनोऽभिरामात्।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात्॥"

निवृत्तात्मा, [न्] पुं, (शरीरबन्धनात् निवृत्त आत्मा स्वरूपं यस्येति।) विष्णुः। (यथा, महाभारते। १३। १४६। १८।
"आवर्त्तनो निवृत्तात्मा संवृतः संप्रमर्द्दनः॥")

निवृत्तिः, स्त्री, (नि+वृत्+क्तिन्।) निर्वृतिः। अप्रवृत्तिः। तत्पर्य्यायः। उपरमः२ विरतिः३

अपरतिः ४ उपरतिः ५ आरतिः ६। इति हेमचन्द्रः॥ (यथा, गरुडपुराणे १६६ अध्याये।
"वास्तोष्पतश्च समधु पीतमस्तर्गतस्य वै।
पापरोगस्य सन्तापनिवृत्तिं कुरुते ध्रुवः॥")
प्रवृत्तिप्रागभावः। यथा, "प्रवृत्तुपाधिना विनाश्यं प्राग्भाव्यान् प्रागभाव एव स्वनिवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते।" इत्येकादशीतत्त्वे फलश्राधिकरणविचारः॥

निवेदनं, क्ली, (निविद्यते विज्ञाप्यतेऽनेनेति। नि+विद्+ल्युट्।) आवेदनम्। विज्ञापनम्। समर्पणम्। यथा,—
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा॥"
इति श्रीभागवतम्। ७। ५। २३॥

निवेदितं, त्रि, (नि+विद्+कर्म्मणि क्तः।) ज्ञातनिवेदनम्। यथा, नन्दिकेश्वरपुराणे।
"मया निवेदितं भक्त्या गृहाण परमेश्वरि!॥"

निवेशः, पुं, (नि+विश्+घञ्।) विन्यासः। (निविश्यतेऽस्मिन्निति। अधिकरणे घञ्।) शिविरम्। (यथा, महाभारते। ५। ८। २।
"तस्य सेनानिवेशोऽभूदध्यर्द्धमिव योजनम्॥")
उदाहः। इति मेदिनी। शे, २१॥ (यथा, महाभारते। १। १४। १।
"ततो निवेशाय तदा स विप्रः संप्रस्थितव्रतः।
महीमचार दारार्थी न च दारानविन्दत॥")
निवेशनम्। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ३। १६। ४४।
"निवेशार्थं गृहं दत्तमन्नपानादिकं तथा।
सेवकं समनुज्ञाप्य परिचर्य्यार्थमेव च॥")

निवेशनं, क्ली, (निविश्यतेऽस्मिन्निति। नि+विश्+अधिकरणे ल्युट्।) गृहम्। इति जटाधरः॥ (यथा, देवीभागवते। ३। २४। ४६।
"स्त्रियोपसंयुतः सोऽथ प्राप्यायोध्यां सुदर्शनः।
सम्मान्य सर्व्वलोकांश्च ययौ राजा निवेशनम्॥")
नगरम्। इति हेमचन्द्रः॥ (यथा, रामायणे। ७। ७५। १८।
"यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने।
न विधत्ते नृपं तत्र नरकं स हि गच्छति॥")
प्रवेशः। निवेशनमस्य यातुरिति भट्टौलिरिति स्मृतिः॥ (नि+विश्+णिच्+भावे ल्युट्। स्नापनम्। यथा रामायणे। ७। ७५। १७।
"निवेशय महाबाहो भरतं यदपेक्षसे।
शूरस्य स्मृतवृत्तस्य समर्थस्य निवेशने॥"
प्रवेशके, त्रि॥ यथा, हरिवंशे भविष्यपर्व्वणि। १८। १३।
"आकाशेऽवस्थितः शब्दः सर्व्वशोभनिवेशनः।
नमस्ते भगवन्! विष्णो तुभ्यं शब्दात्मने नमः॥")

निवेशनीयः, त्रि, (नि+विश्+अनीयर्।) निवेशनार्हः यथा। तत्पुरुषाद्यत्नात्रारण्यात्ख्यरे निवेशनीय इति मार्गे घोषः। इति सद्याभचारे गदाधरः॥

निवेश्यः, त्रि, (नि+विश्+ण्यत्।) निवेशनीयः। यथा, वाघटीकायां गदाधरः। प्रतिबन्धकतायां निवेश्यत्वादिति ग्रन्थे॥ (यथा, हरिवंशे। ११५। २८।
"तदियं पूः प्रकाशार्थं निवेश्या मयि सुव्रते!॥"
शोधनीयः। यथा, महाभारते। ३। ३६। १६।
"अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः॥"
"निवेश्यः आहरणार्थं शोधनीयः।" इति तट्टीकायां नीलकण्ठः॥ विवाहार्हः। यथा, महाभारते। १। १६२। ६।
"भवान्निवेश्यः प्रथमं ततोऽयं
भौमो महाबाहुरचिन्त्यकर्म्मा॥"
"निवेश्यः विवाह्यः।" इति तत्र नीलकण्ठः॥)

निश्चठः, पुं, बलदेवपुत्रः। यथा, "बलदेवोऽपि रेवत्यां निश्चठोल्मुकौ पुत्रावजनयत्।" इति विष्णुपुराणे। ४ अंशे १५ अध्यायः॥

निश्चमनं, क्ली, (नि+श्चम+ल्युट्।) दर्शनम्। अवलम्। इति मेदिनी। ने, १६०॥

निशा, स्त्री, (नितरां श्यति तनूकरोति शोभारात्रिमिति। नि+शो+कः। टाप्।) रात्रिः। तत्पर्य्यायः। रात्री २ रथोजननी ३ शर्वरी ४ चक्रभेदिनी ५ घोरा ६ श्यामा ७ याम्या ८ दोषा ९ तुङ्गी १० भौती ११ शताक्षी १२ वास्तवा १३ उषा १४ वासतेयी १५ तमा १६ निट् १७। इति त्रिकाण्डशेषः॥ अवशिष्टो रात्रिशब्दे द्रष्टव्यः॥ (यथा, ऋतुसंहारे। १। ६।
"सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि सुवक्त्रचन्द्रमाः।
विलोक्य निर्य्यन्तमसक्तमुत्सुकश्चिरं
निशात्यये याति दिवैव पाण्डुताम्॥")
हरिद्रा। दारुहरिद्रा। इति मेदिनी। शे, ६॥ (अस्याः पर्य्यायो यथा,—
"हरिद्रा पौतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्षिणी रात्रिनामिका॥"
इति वैद्यकरत्नमालायाम्॥)
मेघदर्शनमधुनकर्कटघनुर्मकरलग्नानि। यथा,—
"अजगोपतियुग्मञ्च कर्किधन्विन्मृगास्तथा।
निशासंज्ञाः स्मृताश्चैते ग्रीष्माद्यान्ये दिनात्मकाः॥"
इति ज्योतिस्तत्त्वम्॥

निशाकरः, पुं, (निशां करोतीति। निशा+कृ+"दिवाविभानिशेति।" ३। २। २१। इति टः।) चन्द्रः। इत्यमरटीका॥ (यथा, पद्मतन्त्रे। २। २०।
"रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम्।
मतिमतश्च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः॥")
कुङ्कुमः। इति शब्दरत्नावली॥ (त्रिशाकरश्चन्द्रः शिरोदेशेऽस्यस्येति। अच्। महादेवः। यथा, महाभारते। १३। १७। ७७।
"रातहासः सकल्पश्च गौतमोऽथ निशाकरः॥")

निशागमः, पुं, (निशायाः रात्रेर्गमः।) रात्रिसमूहः। तत्पर्य्यायः। गणरात्रम् २। इति हेमचन्द्रः॥

निशाचरः, पुं, (निशायां रात्रौ चरतीति। निशा+चर+"चरेष्टः।" ३। २। १६। इति टः।) राक्षसः। (यथा, रघुः। १०। ४५।
"अचिरात् यज्ञभिर्भागं कल्पितं विधिवत् पुनः।
मायाविभिरनालीढमादास्यध्वे निशाचरैः॥")
शृगालः। पेचकः। सर्पः। इति मेदिनी। रे, २७२॥ चक्रवाकः। इति शब्दरत्नावली॥ भूतः। इति धरणिः॥ चोरकः। इति राजनिर्घण्टः॥ (अयन्तु यत्रिपर्य्यस्य भेदः। भटेउर इति नेपालदेशे भवति।
"निशाचरो धनहरः क्षितवो गणहासकः।
रोचको मधुरस्निग्धः कटुपाके कटुर्लघुः॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफान्
निलान्।
रक्तश्रीखेदमेदोऽक्षव्रणान्विषव्रणान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
महादेवः। यथा, महाभारते। १३। १७। ६७।
"वसुवेगो महावेगो मनोवेगो निशाचरः॥")
रात्रिचरमात्रे, त्रि॥

निशाचरी, स्त्री, (निशायां चरतीति। चर+टः। स्त्रियां ङीप्।) कुलटा। इति मेदिनी। रे, २७३॥ केशिनीनामगन्धद्रव्यम्। इति जटाधरः॥ राक्षसी। यथा,—
"अनिर्वृतनिशाचरी मम गृहान्तराले स्थिता
निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम्।
क्रियां तदनुगा सखी हृदय एव चिन्ताविशत्तथोर्द्दमनकारणं त्वमसि केवलं भूपते॥"
इत्युद्भटः॥
(यथा च रघुः। ११। २०।
"रामस्यथधुरश्च ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्वधिरचन्दनोचिता
नीतिरेवमसतां जगाम सा॥"
"अत्र ताडकायाः अभिसारिकया समाधिरभिधीयते रामेति। निशासु चरतीति निशाचरी राक्षसी अभिसारिका च।" इति तत्र मल्लिनाथः॥)

निशाचर्म्म, [न्] क्ली, (निशायाश्चर्म्मेव आवरकत्वात्।) अन्धकारः। इति त्रिकाण्डशेषः॥

निशाजलं, क्ली, (निशोद्भवं जलम्। मध्यपदलोपिसमासः।) हिमम्। इति त्रिकाण्डशेषः॥

निशाटः, पुं, (निशायां रात्रौ अटतीति। अट+अच्।) पेचकः। इति हेमचन्द्रः। ४। ६६०॥
निशाचरे, त्रि॥

निशाटकः, पुं, (निशायां अटति निशावत् कृष्णत्वं अटतीति वा। अट+खुल्।) गुगुगुसुः। इति राजनिर्घण्टः॥ (राक्षसे, त्रि॥)

निशाटनः, पुं, (निशायां अटतीति। अट गतौ+ल्युः।) पेचकः। इति हलायुधः॥ निशाचरे, त्रि॥

निशातः, त्रि, (नि+शो निशाने+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति पक्षे इत्वाभावः।) शाणितः। इति हेमचन्द्रः॥

निशादः, पुं, (निशायां अत्तिभक्षयतीति। अद्+अच्।) निषादः। इत्यमरटीकायां रमानाथः॥ स्त्री, निशाशक्॥

निशादिः, स्त्री, (निशाया आदिर्यत्र।) सन्ध्या। इति राजनिर्घण्टः॥

निशान्तं, क्ली, (निशन्यते विश्रम्यतेऽस्मिन्निति। नि+शम+अधिकरणे क्तः।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, रघुः। १६। ४०।
"तस्याः स राजोपपदं निशान्तं
कामीव कान्तान्हृदयं प्रविश्य॥"
निशाया अन्तो यत्र।) उषा। (यथा, मनुः। ४। ६८।
"न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः
स्वपेत्॥")
शान्ते, त्रि। इति मेदिनी। ते, ११६॥

निशान्धा, स्त्री, (निशायां अन्धयति उपसंहरति आत्मानमिति। अन्ध उपसंहारे+अच्+टाप्।) जतुकाजता। इति राजनिर्घण्टः॥ (निशायां अन्धः।) रात्र्यन्धे, त्रि॥

निशापतिः, पुं, (निशायाः पतिः।) चन्द्रः। (यथा, सूर्य्यसिद्धान्ते। २। ४७।
"खमन्दशुक्तिसंशुद्धो मध्यशुक्तिर्निशापतेः।
दोर्ज्यान्तरादिकं लब्धा शुक्लाष्टभ्यधनं भवेत्॥")
कर्पूरः। इत्यमरः॥ (निशायामेव पतिरिति विग्रहे कश्चित् यक्षनाशाय उपपतिरपि। यथा, आर्य्यासप्तशत्याम्। ३५२।
"प्राङ्मयकोऽपि निशापतिः स तापं सुधामयो हरति।
यदि मां रजनिञ्चर इव सखि! स न निरुणद्धि गेहपतिः॥")

निशापुष्पं, क्ली, (निशायां रात्रौ पुष्यति विकसतीति। पुष्य विकासे+अच्।) उत्पलम्। इति राजनिर्घण्टः॥

निशाबलः, पुं, (निशायां रात्रौ बलं यस्य।) श्येनश्वमिथुनकर्कटधूर्मकरराक्षयः। इति ज्योतिषम्॥

निशाभङ्गा, स्त्री, (निशा हरिद्रा तद्वत् भङ्गो यस्याः।) दुग्धपुच्छी। इति शब्दचन्द्रिका॥ दुग्धपेया इति भाषा॥

निशामणिः, पुं, (निशाया मणिरिव।) चन्द्रः। इति त्रिकाण्डशेषः॥

निशामनं, क्ली, (नि+शम+णिच्+ल्युट्।) दर्शनम्। आलोचनम्। इति मेदिनी। ने, १६०॥ श्रवणम्। इति हेमचन्द्रः। ३। २७०॥

निशाम्बरः, पुं, (निशाचरो रात्रः पशुः।) शृगालः। इति शब्दरत्नावली॥

निशारकं, क्ली, (नि+शॄ गि हिंसे+णिच्+ल्युट्।) मारणम्। इत्यमरः। २। ८। ११२॥ (निशाया रक्तम्।) रात्रियुद्धम्॥ (निशाया रवः शब्दः।) रात्रिशब्दे, पुं॥

निशारत्नं, क्ली, (निशाया निशायां वा रत्नमिव।) चन्द्रः। इति हेमचन्द्रः। ३। २। १६॥

निशारुकः, पुं, रूपकभेदः। यथा,—
"द्रुतः प्रौढोऽथ खचरो विभवश्चतुरक्रमः।
निशारुकः प्रतितालः कथिताः सप्त रूपकाः॥"
तस्य लक्षणं यथा,—
"लघुर्द्विन्द्वं गुरुर्द्विन्द्वं तत्त्रासतालकः स्मृतः।
चतुर्विंशतिवर्णेषु रसे हास्ये निशारुकः॥"
तालविशेषः। यथा,—
"प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम्।
निशारुकेण तालेन कोमलं वृत्तमाचरेत्॥"
इति सङ्गीतदामोदरः॥

निशावनः, पुं, (निशावत् अन्धकारजनकं वनं यत्र।) शूद्रः। इति राजनिर्घण्टः॥

निशाशृङ्गं, क्ली, (निशायां शृङ्गं सम्बन्धः।) रात्रियुद्धम्। इति शब्दरत्नावली॥

निशावेदी, [न्] पुं, (निशां निशापरिमाणं वेत्ति वेदयति वा। विद् वा वेदि+णिनिः।) कुक्कुटः। इति हेमचन्द्रः। ४। ३६०॥

निशाहसः, पुं, (निशायां रात्रौ हसो हासो विकासो यस्य।) कुसुदम्। इति त्रिकाण्डशेषः।

निशाह्वा, स्त्री, (निशाया आह्वा आख्या आह्वा यस्याः।) हरिद्रा। इत्यमरः। २। ६। ४१॥

निशितं, क्ली, (नि+शो+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति इत्वम्।) लौहम्। इति राजनिर्घण्टः॥

निशितः, त्रि, (नि+शो+क्तः।) शाणितः। इत्यमरः। ३। १। ६१॥ (यथा, महाभारते। १। १३४। ६५।
"तद्वाक्यसमकालन्तु वीभत्सुर्निशितैः शरैः।
अवार्ष्णैः पञ्चभिर्व्याहं मर्म्मभ्यस्ताडयत्॥")

निशिपुष्पा, स्त्री, (निशि पुष्यति विकाशते इति। पुष्य+अच्। टाप्।) श्वेतालिका। इति त्रिकाण्डशेषः॥

निशिपुष्पिका, स्त्री, (निशिपुष्पा+स्वार्थे कन्।) श्वेतालिका। इति शब्दरत्नावली॥

निशिपुष्पी, स्त्री, श्वेतालिका। निशि रात्रौ विकशितं पुष्पमस्या इति व्युत्पत्त्या मध्यपदलोपः ङप्रत्ययो ह्रस्वश्च ततो जातेरत इति ईप्॥

निशीथः, (नितरां शेतेऽत्रेति। नि+शी+"निशीथगोपीथावगथाः।" उणा। २। ६। इति थक्प्रत्ययेन निपातनात् साधुः।) अर्द्धरात्रः। इत्यमरः। १। ४। ६॥ (यथा, रघुः। ३। १५।
"निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव॥")
रात्रिमात्रम्। इति मेदिनी। थे, २०॥ (यथा, ऋतुसंहारे। १। ३।
"सुतल्पगीतं मदनस्य दैवतं
सुखौ निशीथेऽनुभवन्ति कामिनः॥")

निशीथिनी, स्त्री, (निशीथोऽस्त्यस्या इति। इनिः। ङीप्।) रात्रिः। इत्यमरः। १। ४। ४॥

निशीथिनीनाथः, पुं, (निशीथिन्या नाथः।) चन्द्रः। इति हलायुधः॥

निशीथ्या, स्त्री, रात्रिः। इति भूरिप्रयोगः॥

निशुम्भः, पुं, (नि+शुम्भ हिंसायाम्+भावे घञ्।) वधः। इति हेमचन्द्रः। २। ३६३॥ दानवविशेषः। यथा,—
"कश्यपस्य दनुर्नाम भार्य्यासीद्दिव्यसत्तम!।
तस्यास्तु द्वौ सुतावास्तां सहस्राच्चाहजाधिकौ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरासुरः।
हतौ यौ वसुचिर्नाम महाबलसमन्वितः॥"
इति वामनपुराणे ५२ अध्यायः॥
(अयं हि भगवता निहतः। इति मार्कण्डेयपुराणम्॥ अपरोऽसुरविशेषः। यदुक्तं मार्कण्डेये। ८१। ३६—४०।
"वैवस्वतेऽन्तरे प्राप्ते ऽष्टाविंशतिमे युगे।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥")

निशुम्भनं, क्ली, (नि+शुम्भ हिंसायाम्+भावे ल्युट्।) मारणम्। इति हलायुधः॥

निशुम्भमर्द्दिनी, स्त्री, (निशुम्भं मर्द्दयतीति। मृद्+णिनिः। ङीप्।) दुर्गा। इति हेमचन्द्रः॥

निशुम्भशुम्भमथनी, स्त्री, (निशुम्भं शुम्भञ्च मथ्नातीति। मन्थ विलोडने+ल्युः। नलोपः। ततो ङीप्।) दुर्गा। यथा, देवीपुराणे।
"निशुम्भशुम्भमथनी देवी देवैः सु गीयते॥"

निशुम्भी, [न्] पुं, (निशुम्भो मोहनाद्योऽस्त्यस्येति। इनिः।) शुम्भविशेषः। तत्पर्य्यायः। हेरम्बः २ हैरुकः ३ चक्रसम्बरः ४ हेवः ५ वज्रकपाली ६ ग्रन्थिश्रेश्वरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

निशेतः, पुं, (निशायामपि शेतं श्वेतदृगमनं यस्य।) वकः। इति त्रिकाण्डशेषः॥

निश्चयः, पुं. (निश्चीयतेऽनेनेति। निर्+चि+"गहरुहनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) निःसंशयज्ञानम्। तत्पर्य्यायः। निश्चयः २। इत्यमरः। १। ५। ३॥ निर्णयनम् निश्चयः ४। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। १६। ३५।
"देहोऽयं मम बन्धोऽयं न ममेति च सुस्थता।
तथा धनं गृहं राज्यं न ममेति च निश्चयः॥")
"तद्भावाप्रकारो धीस्तत्प्रकारा तु निश्चयः॥"
इति भाषापरिच्छेदः॥
(अर्थालङ्कारविशेषः। लक्षणञ्चास्यादिकं यथा, साहित्यदर्पणे। १०। ५६।
"अन्यन्निषिध्य प्रकृतस्यापनं निश्चयः पुनः॥"
उदाहरणं यथा,—
"इदमिदं न सरोजं नयने नेन्दीवरे इते।
इह विधिं सुखदौ मधुकर! न सुधा परिभाव्य॥")

निश्चला, स्त्री, (निश्चलतीति। निर्+चल+अच्। टाप्।) शालपर्णी। इति राजनिर्घण्टः॥

पृथिवी ॥ (नदीविशेषः । यथा, मातृखे । ११३ । ३२ ।
"कौशिकी तु तृतीया च निश्चला गण्डकी तथा।
इक्षुकौशिकमित्येता हिमवत्पार्श्वनिःसृताः ॥")
अचले, त्रि । यथा,—
"निवसतु तव गेहे निश्चला सिन्धुपुत्री ॥"
इत्यादुल्लटः ॥
निश्चलाङ्गः, पुं, (निश्चलवत् अङ्गं यस्य ।) बकः । इति राजनिर्घण्टः ॥ पर्व्वतादिः । स्पन्दरहिते, त्रि ॥
निश्चायकः, त्रि, (निश्चिनोतीति । निर् + चि + ण्वुल् ।) निश्चयकर्त्ता । निर्णायकः । यथा, अनुपाधिनिश्चायकदर्शनत्वं न हेतुत्वमिति वाग्विदग्धमाधुरी ॥
निश्चारकः, पुं, (निश्चरतीति । निर् + चर + ण्वुल् ।) पुरीषत्यागः । वायुः । स्वच्छन्दम् । इति मेदिनी । के, १६५ ॥
निश्चिन्तः, त्रि, (निर्गता चिन्ता यस्मात् ।) चिन्तारहितः । यथाह कश्चित् ।
"मूर्खत्वं सुलभं भजस्व सुमते ! मूर्खस्य नान्या गुणा
निश्चिन्तो बहुभोजनोऽतिसुखरो रात्रिन्दिवा स्वप्नभाक् ।
कार्य्याकार्य्यविचारणादिरहितो मानापमाने समे
दत्वा सर्व्वजनस्य मर्द्दनपरो मूर्खश्चिरं जीवतु ॥"
निश्चीयमानः, त्रि, (निर् + चि + कर्म्मणि यक्यानच् ।) निश्चयविषयः । यथा । ननु तथापि एवकारस्य निश्चीयमानस्यैव सार्थकत्वलाभात् कुतः प्रवृत्तिरित्यामिति ग्रन्थसङ्गतिप्रकाशिकाटीकायां रामभद्रः ॥
निश्चुक्यं, क्ली, (निःशेषेण चुक्यम् ।) दन्तशाकम् । इति त्रिकाण्डशेषः । मिसी इति भाषा ॥
निश्चेष्टः, त्रि, (निर्गता चेष्टा यस्मात् ।) चेष्टारहितः । निश्चेष्टितः । यथा,—
"गलयन्नञ्जनश्चेष्टो देव्या निर्गतलोचनः ।
अवक्षरावो न्यपतत् सङ्घवालो वसुन्धरे ॥"
इति श्रीभागवते दशमः ॥
निश्वासः, पुं, (नि + श्वस + भावे घञ् ।) बहिर्मुखश्वासः । तत्पर्य्यायः । प्राणः २ असनः ३ । इति हेमचन्द्रः ॥ (यथा, ब्रह्मवैवर्त्ते । २।१।८६ ।
"संहर्त्तुं सर्व्वब्रह्माण्डं ग्रस्ता निःश्वासमात्रतः ॥")
निश्वाससंहिता, स्त्री, (निश्वासाख्या संहिता ।) शिवप्रणीतशास्त्रविशेषः । यथा,—
"एवमभ्यर्थितस्तेषु पुराणं द्विजसत्तमाः ।
वेदनिश्वासमायुक्तां ससर्जानन्दसंहिताम् ।
निश्वासाख्यां ततस्तस्यां लीना वाक्यप्रशाखिकाः ।
निश्वाससंहितायां हि लक्षमात्रप्रमाणतः ॥
सैव पाशुपती दीक्षा योगः पाशुपतस्य हि ।
इतस्तादृदमार्गाहि यदन्यदिह जायते ॥
तत् सूत्रकर्म्म विज्ञेयं रौद्रं शौचविवर्जितम् ॥"
इति वराहपुराणम् ॥

निषङ्गः, पुं, (नितरां सज्जन्ति शूरा यत्र । नि + सञ्ज + अधिकरणे घञ् ।) तूणीरः । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रघुः । २ । ३० ।
"ततो नगेन्द्रस्य नगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ॥")
सङ्गः । इति मेदिनी । गे, ४० ॥
निषङ्गधिः, पुं, (नि + सञ्ज + "नौ यत्तञ्जेर्धेथिन् ।" उणा० । ४ । ८७ । इति भावे धेथिन् । धित्वात् कुत्वम् । ततः षत्वम् ।) समालिङ्गनम् । आलिङ्गनम् । इत्युज्ज्वलदत्तः ॥ (आलिङ्गके, त्रि । इत्युणादिकोषः । १ । २६९ ॥ धन्वी । रथः । स्कन्धः । ढक्कम् । सारथिः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (आलिङ्गके, त्रि । इत्युज्ज्वलदत्तः ॥)
निषङ्गी, [न्] पुं स्त्री, (निषङ्गोऽस्यास्तीति । निषङ्ग + इनिः ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६६ ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इमः स राजन्यकमेकवीरः ॥"
खनामख्यातो धृतराष्ट्रपुत्रः । इति महाभारतम् । १ । ११७ । ११ ॥)
निषण्णः, त्रि, (निषीदति स्मेति । नि + सद् + क्तः । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति निष्ठातस्य धातोर्दकारस्य च नः ।) उपविष्टः । यथा,—
"पादावसुचयन्नौ श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पुण्या नमो देव्यै श्रिया इति ॥"
इति तिथ्यादितत्त्वम् ॥
निषण्णकं, क्ली, (निषण्ण + संज्ञायां कन् ।) सुनिषण्णकम् । इति शब्दरत्नावली ॥
निषदः, पुं, (निषीदन्ति बहवोऽत्र खरा यत्र । नि + सद् + बाहुलकात् अप् ।) निषादस्वरः । इत्यमरटीकायां स्वामी ॥ (खनामख्यातनृपविशेषः । यथा, महाभारते । २ । ६ । १५ ।
"भङ्गासुरिः सुनीथश्च निषदोऽथ वहीनरः ॥")
निषद्या, स्त्री, (निषीदत्यस्यामिति । नि + सद् + "संज्ञायां समजनिषदेति ।" ३ । ३ । ६६ । इति अधिकरणे यप् ।) पण्यविक्रयशाला । इत्यमरः । २ । २ । २ । हट्टः । इत्यन्ये । इति भरतः । क्षुद्रखट्टा । इति त्रिकाण्डशेषः ॥
निषद्वरः, पुं, (निषीदन्ति विषया भवन्ति अत्रेति । नि + सद विषादे गतौ + "नौ सदेः ।" उणा० । २ । १२४ । इति क्वरप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) कर्द्दमः । इत्यमरः । १ । १० । ६ ॥
निषद्वरी, स्त्री, (नि + सद विषादे + अधिकरणे क्वरप् । धित्वात् ङीप् ।) रात्रिः । इति मेदिनी । रे, २७३ ॥
निषधः, पुं, पर्व्वतविशेषः । इत्यमरः । २ । ३ । ३ ॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमापर्व्वतः । प्रागायतः अयुतयोजनोत्सेधः । द्विसहस्रयोजनविस्तीर्णः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ कठिनम् । वेगवद्विशेषः । (यथा, महाभारते । ३ । ५३ । ३ ।
"ब्रह्मण्यो वेदवित् शूरो निषधेषु महीपतिः ॥")
तद्देशीयराजः । इति मेदिनी । धे, ३३ ॥ निषादस्वरः । इति हेमचन्द्रः । ६ । ३७ ॥ (रामप्रपौत्रे कुशवंशीयनृपभेदे । यथा, हरिवंशे । १५ । २६ ।
"रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ॥")
निषादः, पुं, (निषीदते ग्रामेऽवसीमायाम् । यद्वा, निषीदन्ति पापमत्र । नि + सद् + कर्म्मणि अधिकरणे वा घञ् ।) चण्डालः । इत्यमरः । २ । १० । २० ॥ वेनजङ्घोरुसम्भवजातिविशेषः । यथा, अग्निपुराणे ।
"मथ्यमाने ततो राज्ञस्तस्मिन्नूरौ प्रजाक्षयात् ।
कृष्णोऽतिपरुषः क्षत्रक्षयात् प्राञ्जलिः स्थितः ॥
ते मन्थैर्विकलं दृष्ट्वा निषीदेत्यब्रुवंस्तदा ।
निषादवंशकर्त्ता स बभूव सुनिसत्तमाः ! ॥
धीवरान्धकजान् वापि वेनकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयाः शूरवर नाङ्गलादयः ॥
अधर्म्मरुचयो ये च विप्लवान् वन्यसम्भवान् ॥"
पारिभाषिकचण्डालो यथा, मार्कण्डेयपुराणे ।
"आघ्राणार्त्तुं वदान्यं च दातुञ्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चण्डालोऽधमो नरः ॥"
धीवरविशेषः । इति मेदिनी । दे, ३४ ॥ (निषीदन्ति बहवोऽत्र खरा यत्र । नि + सद् + घञ् ।) सप्तस्वरान्तर्गतशेषस्वरः । स तु नारदमते हस्तिस्वरतुल्यस्वरः । अस्योच्चारणस्थानं ललाटम् । जातिरत्नमते दन्तः । अयं वैश्यवर्णः । सप्तस्वराणां मध्ये उग्रः । अस्य जातिः सन्यूर्णा । अस्य मूर्च्छनाः ५०४० । प्रत्येकतानम् ५६ समुदायेन २८२२४० भवन्ति । अस्य स्वरूपः गवीश्रुतुल्यः । ज्ञात्यृषिर्नवर्षः । स्थानं पुष्करद्वीपः । देवता सूर्य्यः । वारः शनिः । समयः निशान्ते ८ दण्ड—२४ पलानि । अस्य श्रुतिः उग्रा भीभिणी च । मूर्च्छना मन्दरस्थाने सखा । मध्यस्थाने अङ्कुता । तारस्थाने लोचना च । निषादवर्णेता रात्रिञ्चरी आसावरी मञ्जारी च । नादपुराणमते । निःसन्देहोऽयम् । वीणायां धैवतावधिषड्जस्थानपर्य्यन्तं प्रथमं सप्तकद्वितीयांशस्य शेषसमुदायवीणातन्त्रीनिषादस्थानं भवति । इति सङ्गीतशास्त्रम् । * ॥
"षड्जादयः षड्जेऽत्र स्वराः सर्व्वे मनोहराः ।
निषीदन्ति यतो लोकं निषादस्तेन कथ्यते ॥
ततश्च पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
अथमे धैवते तिस्रो द्वे गान्धारनिषादके ॥"
इति सङ्गीतदामोदरः ॥
(अस्य असुरवंशे उत्पत्तिः । वेनस्य जातिः । विचित्रो वर्णः । पुष्करद्वीपे जन्म । ऋषिः सुमुरुः । सूर्य्यो देवता । जगती छन्दः । करणे उपयोगित्वम् । इति सङ्गीतदर्पणम् ।)

निषादौ, [न्] पुं, (निषीदत्यवरुह्यमिति। नि+सद्+आवश्यके णिनिः।) हस्त्यारोहः। इत्यमरः। २। ८। ५१॥ माहुत इति ख्यातः॥ (यथा, माघे। ५। ४१।

"प्रत्यग्रदन्तिनिगृहीतकुम्भदूरभिन्न-
निर्य्याणनिर्य्यदसृजं चलितं निषादी॥"

उपविष्टे, त्रि। यथा, रघुः। १। ५२।

"आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।
न्यग्रोधसंक्षितरोमन्थसुप्तहारीतबर्हिषु॥")

निषिद्धं, त्रि, (निषिध्यते स्मेति। नि+सिध+क्तः।) निषेधविषयम्। यथा,—

"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम्॥"

इति तिथितत्त्वम्॥

निषिद्धकर्म्माणि यथा,—

मान्धातोवाच।

"ब्रूहि कर्म्माण्यशेषाणि मद्विधानां सुखावहान्।
निषिद्धमपि यत्तेषां तदेव प्रथमं वद॥

नारद उवाच।

व्याकर्षणं ग्रन्थिनिवर्हणञ्च
क्षत्रिय्यविश्यां पशुपालनञ्च।
शुश्रूषणञ्चापि तथार्थहेतो-
रकार्य्यमेतत् परमं ब्राह्मणस्य॥

राजप्रेष्यं क्षत्रियस्य जीवनञ्च वणिज्यया।
कौटिल्यं कौलटेयञ्च कृषेश्च विवर्ज्जयेत्॥
मूलो राजन्! स भवति धर्म्मापेतो दुराचरः।
दृषलीं रमते यस्तु पिशुनो नर्त्तनस्तथा॥
ग्रामप्रेष्यो विकर्म्मा च यो द्विजश्चरितादपुतः।
वेदानपि जपन् मूढः समः स परिकीर्त्तितः।
क्षत्रेषु वर्ज्जनीयोऽसौ वैदिके तान्त्रिकेऽपि च॥
निर्म्मर्य्यादे चापुत्रौ क्रूरवृत्ते
हिंसात्मके लुप्तधर्म्मे चरित्ते।
हव्यञ्च कव्यञ्च न देयमेव
दानञ्च दत्तं विफलं नरेन्द्र!॥
राजन्यानां करादानं विना वेवाहिकञ्च यः।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः॥
युद्धे पलायनञ्चैव तथा कातरतार्थिषु।
अपालनं प्रजानाञ्च दाने धर्म्मे विरक्तता॥
अनवेक्षा खराद्यस्य ब्राह्मणागमनादरः।
असत्यागमसम्मानं तेषां कर्म्मानवेक्षणम्॥
श्रुत्यागाच्च परीहासो निषिद्धः क्षत्रजन्मनाम्॥
वैश्यानां धनलोभेन मिथ्यामूल्यप्रकाशनम्।
अपालनं पशूनाञ्च अनिच्छा विभवे सति॥
मूढाद्याच्च महाराज! वृद्धेव धनसञ्चयः।
शुश्रूषोः कृतकार्य्यस्य कृतसन्तानकर्म्मणः॥
अन्यनुज्ञातराज्यस्य शूद्रस्य जगतीपते!।
अल्पान्तरगतस्यापि दग्धधर्म्मगतस्य च॥
आश्रमा विहिताः सर्व्व वर्ज्जयित्वा गिरा-
ग्रियम्॥"

इति पाद्मे स्वर्गखण्डे २० अध्यायः॥

अपि च।

"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः।
अभ्युत्थानं न कुर्व्वीत अहं तेनापि हिंसितः॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः।
अष्टौ पितृगवास्तेन हिंसिता नात्र संशयः॥
भार्य्यां प्रियसखीं ये तु साध्वीं हिंसन्ति निर्घृणाः।
न ते वृत्तां प्राप्नुवन्ति हिंसका दुष्टयोनिजाः॥
ब्रह्मघ्नश्च क्षतघ्नश्च गोघ्नश्च क्षतपापकाः।
एतान् ग्रिघ्नान् विवर्ज्जेत उक्ता ये चान्य-
पातकाः॥
ग्राममध्ये न भोक्तव्यं न क्षेत्तव्यं कदाचन।
अश्वत्थो वटवृक्षश्च न क्षेत्तव्यौ कदाचन॥
न क्षेत्तव्यो विल्ववृक्ष उदुम्बरश्च कदाचन।
कर्म्मण्यानेव ये वृक्षा न क्षेत्तव्या: कदाचन॥
यदीच्छेत् परमां सिद्धिं मोक्षधर्म्मं सनातनम्।
भक्ष्याभक्ष्यञ्च ते ग्रिघ्न वेदितव्यं तदन्तरे॥—
करीरस्य वधः श्रुतः पलाण्डोदुम्बरस्य च।
सद्योभक्षी भवेत्तेन अभक्ष्याः पूतिवासिकाः॥
न भक्षयीयं वाराहं मांसं मत्स्यस्य सर्व्वशः।
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितैर्हि न संशयः॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन।
पैशुन्यञ्च न कर्त्तव्यं स्तेयं वापि कदाचन॥
अतिथिश्चागतं दृष्ट्वा दूराध्वागागमं क्वचित्।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक!॥
गुरुपत्नी राजपत्नी ब्राह्मणी वा कदाचन।
मनसापि न गन्तव्या एतं विष्णुः प्रभाषते॥
कनकादीनि रत्नानि यौवनस्था च कामिनी।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते॥
दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनन्तथा।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः॥"

इति वराहपुराणम्॥

(निषारितम्। यथा, देवीभागवते। २। ६। ६०।

"मा मा मा मेति बहुधानिषिद्धोऽपि तथाऽग्रहम्।
आलिलिङ्ग प्रियां दैवात् पपात धरणीतले॥")

निषेकः, पुं, (निषिच्यते प्रक्षिप्यत इति। नि+सिच्+घञ्।) गर्भाधानम्। इति निषेकादि-शब्दतत्त्वटीकायां भरतः॥ *॥

"निषेकाद्भवते पत्नी गुरुर्भर्त्ता शुभाशुभम्।
मन्त्रग्रिक्ष्यसमत्वञ्च सर्व्वमेतत्न संशयः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः॥ (यथा, मनुः। २। १६।

"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य-
चित्॥"

क्ली, रेतः। यथा, मनुः। ४। १५१।

"दूरादावसथान्मूत्रं दूरात् पादावसेचनम्।
उच्छिष्टान्नं निषेकञ्च दूरादेव समाचरेत्॥"

"निषिच्यत इति निषेकं रेतश्चोत्सृजेत्।"

इति तट्टीकायां कुल्लूकभट्टः॥ (चरकम्। यथा, रघुः। ८। ६८।

"नन्वेतेनैकविन्दुना
सह दीपार्चिरुपैति मेदिनीम्॥")

निषेकादिसंस्कर्त्तृ, पुं, (निषेकादिं गर्भाधानादिकं करोतीति। निषेकादि+कृ+क्विप्।) गर्भाधानादिकर्त्ता। आदिना सीमन्तोन्नयनादेर्मन्त्र-विद्यादानादेश्च ग्रहणं तत्कर्त्ता पित्रादिर्गुरुः स्यात्। इत्यमरभरतौ॥

निषेधः, पुं, (नि+सिध्+घञ्।) प्रतिषेधः। निवृत्तिः। विधिविपरीतः। यथा,—

"तिथीनां पूर्व्वता नाम कर्म्मानुष्ठानतो मता।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते॥"

इति तिथितत्त्वम्॥

निषेवणं, क्ली, (नि+सेव+भावे ल्युट्।) सेवा। यथा, भागवते। १। २। १६।

"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्॥"

निषेव्यः, त्रि, (नि+सेव+भावे ण्यत्।) सेवनीयः। यथा, भागवते। १। १२। २२।

"न्यग्रोध इव विक्रान्तो निषेव्यो द्विसमानिव॥"

निष्क, क ङ मार्गे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) म्लेच्छन्यायमार्गः। क ङ, निष्कयते स्वर्गं वणिक्। इति दुर्गादासः॥

निष्कः, पुं क्ली, (निष्कयेन क्रीयते क्रीणातीति। निस्+कै+आतश्चेति कः।) चत्वारः सुवर्णाः। चारि मोहर इति भाषा॥ यथा, मनुः। ८। १३७।

"धरणानि दश ज्ञेयः शतमानस्तु राजतः।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः॥"

साष्टशतसुवर्णः। हेम। उरोभूषणम्। (यथा, रामायणे। १। ६। ११।

"नाष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक्॥")

पलम्। दीनारः। इत्यमरः। १। ३। १४॥ अस्य टीका यथा। "शास्त्रीयषोड़शमाषकपरिमितं स्वर्णं सुवर्णं तेषां सुवर्णानां अष्टाधिकशतम्। हेम स्वर्णमात्रम्। उरोभूषणं वक्षोऽलङ्कारः। पलं शास्त्रीयमानविशेषः। उरोभूषणं पलञ्च हेम्न एवेति केचित्। दीनारः सम्प्रत्यवहारार्थं मागधस्तु एतु निष्कः। केचित्तु दीनार इति पल इत्यस्य विशेषणम्। दीनारे पले लौकिक-पले न तु शास्त्रीये इत्याहुः॥ स्वार्त्तास्तु द्वात्रिंशद्रक्तिकापरिमितं काञ्चनं दीनारः। तथाहि।

'दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः।
सुवर्णस्तप्ततितमो भागो रोपक उच्यते॥'

इति विष्णुगुप्तः॥

सुवर्णोऽशीतिरक्तिकापरिमितं काञ्चनं तस्य सप्ततितमो भागः सप्तमांशाधिकत्रेमरक्तिकायां रोपकः तदष्टाविंशत्या द्वात्रिंशद्रक्तिकापरिमितं हेम दीनार इति पर्य्यवसतीत्याहुः।" इति भरतः॥ *॥ स्वर्णकर्षः। स्वर्णपलम्। इति हेमचन्द्रः॥ कक्षभूषा। इति जटाधरः॥ माषकचतुष्टयम्। इति वैद्यकपरिभाषा॥ (यथा, "स्याच्चतुर्माषकैः शाणः स निष्कश्चत्र एव च॥" इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम्॥)

षोढ़ग्रन्थः। षोल काहन इति भाषा॥ (यथा, लीलावत्याम्। २।
"वराटकानां दशकद्वयं यत्
सा काकिनी ताच्च पञ्चतयः।
ते षोढ़ग्रन्थ इहावगम्यो
ग्रन्थेस्तथा षोढ़ग्रभिच्च निष्कः॥")

निष्कण्ठः, पुं, (निर्गतः कण्ठः स्कन्धो यस्य।) वरुणवृक्षः। इति ग्रन्थचन्द्रिका॥

निष्कर्षः, पुं, (निर् वा निस्+कृष्+भावे घञ्।) निश्चयः। यथा, अत्रायं निष्कर्षः इत्याद्यापरार्द्धिकश्राद्धादिव्यवस्थायां स्मृतिः॥ (कराधेः प्रजापीड़नम्। इति गौडकाण्डः॥ यथा, महाभारते। २। १३। १३।
"अनुकर्षच्च निष्कर्षं व्याधिपावकमूर्च्छनम्।
सर्व्वमेव न तत्राधौ नौनिले युधिष्ठिरे॥")

निष्कलं, त्रि, (निर्गता कला यस्मात्।) कलाशून्यम्। (यथा, महाभारते। ३। २०८। ६।
"संयताश्चापि दक्षाश्च मतिमन्तश्च मानवाः।
दृश्यन्ते निष्कलाः सप्त प्रहीणाः स्वकर्म्मभिः॥")
नपुंसकम्। इति मेदिनी। ले, १०२॥ ब्रह्म। यथा,—
"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना॥"
इत्येकादशीतत्त्वे नामस्यावचनम्॥ आधारे, पुं। इति ग्रन्थचन्द्रिका॥

निष्कला, स्त्री, (निर्गता कला यस्याः।) विगतार्त्तवा। इति ग्रन्थरत्नावली॥ दक्षा। इति राजनिर्घण्टः॥

निष्कली, स्त्री, (निष्कल+ङीष्।) ऋतुहीना। निकृष्टरजस्का। इति ग्रन्थरत्नावली॥

निष्कालकः, पुं, (निष्कालयतीति। निर्+कालि+ण्वुल्।) सुस्थितलोमा हुताभ्यक्तः प्रायश्चित्तार्हः। यथा। सुस्थितलोमकेशेन हुताभ्यक्तेन च कर्त्तव्यम्। निष्कालको हुताभ्यक्तस्तप्तां मूर्म्नीं परिष्वज्य मरुद्भात् पूतो भवतीति विज्ञायते। इति वशिष्ठस्मरणात्। इति मिताक्षरा॥

निष्काशः, पुं, (निर्गतं काशते श्लोभते प्रासादादाविति। निर्+काश+अच्।) प्रासादादुपस्थानम्। इति महाभारते राजधर्म्मः॥ राजा इति चाराजा इति च भाषा॥

निष्काशितः, त्रि, (निर् वा निस्+काश+णिच्+क्तः।) निष्कासितः। इत्यमरटीकायां भरतः॥

निष्कासनः, त्रि, (निस्+कस+णिच्+ल्युः।) बहिष्कृतः। दूरीकृतः। तत्पर्य्यायः। अवसृतः २। इत्यमरः। ३। १। ३६॥ निःसारितः ३। डांग जटाधरः॥ निर्गमितः। आधितः। अधिक्षतः। इति मेदिनी। ते, २०२॥

निष्कुटः, पुं, (कुटात् गृहात् निष्क्रान्तः।) गृहसमीपोपवनम्। इत्यमरः। २। ३। २९॥ (क्वचित् क्लोवेऽपि दृश्यते। यथा, महाभारते। १२। ६८। १५।
"परिखाश्चैव कौरव्य! प्रलेलीनिष्कुटानि च।
नगाश्चात्र प्रपद्यन्ते गुल्मेतदयुधिष्ठिर!॥")
क्षेत्रम्। (यथा, महाभारते। २। ५०। ६।
"इन्द्रप्रस्थे वर्त्तयन्ति धार्म्मिर्ये च नदीसुखैः।
समुद्रनिष्कुटे जाताः पारेसिन्धु च मानवाः॥")
कपाटः। इति मेदिनी। टे, ४८॥ पलाण्डुः। इति हारावली॥ जागानामहल इति भारस्यभाषा॥

निष्कुटिः, स्त्री, (कुट कौटिल्ये+"इगुपधात् कित्।" उणा ४। ११६। इति इन्। निर्गता कुटिः कौटिल्यं यस्याः।) एला। इत्यमरः। २। ४। १२५॥ (पर्य्यायोऽस्या यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला हृद्यदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

निष्कुटी, स्त्री, (निष्कुटि+ऋदिकारादिति वा ङीष्।) निष्कुटिः। इत्यमरटीकायां भरतः। २। ४। १२५॥

निष्कुम्भः, पुं, (निस्+कुम्भ+अच्।) दम्भीवृक्षः। इत्यमरटीकायां रायमुकुटः॥ (निर्गतः कुम्भो यस्मात्।) कुम्भशून्ये, त्रि॥

निष्कुञ्चितः, त्रि, (निस्+कुञ्च+क्तः।) निष्कासितः। यथा,—
"काकैर्निष्कुञ्चितं नभः क्वचलितं वीचीभिरान्दोलितम्॥"
इत्यादि वाल्मीकिकृतगङ्गास्तोत्रम्॥

निष्कुष, पुं, (नितरां कुष्यते इति। कुष विस्रापने+घञर्थे क।) वृक्षकोटरम्। इत्यमरः। २। ४। १३॥

निष्कृतिः, स्त्री, (निर्+कृ+क्तिन्।) निर्मुक्तिः। निस्तारः। यथा,—
"ब्रह्मघ्ने चैव मित्रघ्ने सुरापे गुरुतल्पगे।
सर्व्वत्र विहिता दृष्टिः कृतघ्ने नास्ति निष्कृतिः॥"
इति प्रायश्चित्ततत्त्वम्॥
(अग्निविशेषे, पुं। यथा, महाभारते। ३। २१८। १४।
"आक्रोशतान्तु भूतानां यः करोतीह निष्कृतिम्।
अग्निः स निष्कृतिर्नाम श्लोभयत्यभिवेक्षितः॥")

निष्क्रमः, पुं, (निष्क्रम्यतेऽनेनेति। निस्+क्रम+घञ्। "गोदाग्नोपदेशश्चेति।" ७। ३। ३४। इति न वृद्धिः।) धीशक्तिः। इत्यमरः। ३। २। २५॥ निर्गमः। (यथा, कथासरित्सागरे। २५। ४३।
"क्वचित् कार्य्यं प्रतीक्षे च प्राणायामस्य निष्क्रमम्।
क्षतीयेऽह्नि गते प्राप्य यास्येतस्य हि नासवः॥")
दुष्कुलः। इति मेदिनी। मे, ४५॥ निष्क्रमणसंस्कारः।
"अष्टम्येकादशे मासि चतुर्थे मासि निष्क्रमः॥"
इति याज्ञवल्क्यः। १। १२॥
(क्रमरहिते, त्रि। यथा, पद्मपुराणे पातालखण्डे।
"निष्कलं निष्क्रमं शान्तं सच्चिदानन्दविग्रहम्॥")

निष्क्रमणं, क्ली, (निस्+क्रम+भावे ल्युट्।) दृश्यसंस्कारान्तर्गतसंस्कारविशेषः। तदनुष्ठानं यथा, जाते कुमारे जन्मवासरादृक्षतृतीयः शुक्लपक्षस्थस्य क्षतीयायां तिथौ प्रातः कुमारं स्नापयित्वा सायं सन्ध्यायामतीतायां चन्द्राभिमुखः क्षताञ्जलिः पिता तिष्ठेत्। अथ माता शुचिर्गा वस्त्रेण कुमारमाच्छाद्य दक्षिणस्यां दिशि भर्त्तुर्वामपार्श्वे पश्चिमाभिमुखीभूय उत्तरशिरसं कुमारं पित्रे समर्पयति। ततो माता भर्त्तुः पृष्ठदेशेन उत्तरस्यां दिशि गत्वा चन्द्राभिमुखीभूय भर्त्तुर्दक्षिणपार्श्वे तिष्ठति। अथ पिता जपति प्रजापतिर्ऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यत्ते सुशीमे हृदयं हितमन्तः प्रजापतौ वेदाहं मन्ये तद्वत्तमाशं पौत्रमघं रिगाम्। ततः प्रजापतिर्ऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यत् पृथिव्या अणावतं दिवि चन्द्रमसि श्रितं वेदन्तत्तस्याहं नाममाहं पौत्रमघं ऋषम्। ततः प्रजापतिर्ऋषिरनुष्टुप्छन्द इन्द्राग्नी देवते कुमारस्य चन्द्रदर्शने विनियोगः। ॐ इन्द्राग्नी अग्नी यच्छतं प्रजायै मे प्रजापतौ यथायं न प्रमीयेत पुत्रो जनित्र्या अधि। इति मन्त्रत्रयं जप्त्वा कुमारं चन्द्रं दर्शयति। पिता चन्द्राय अर्घ्यं ददाति च। ततः पिता तथाभूतमेव कुमारमुत्तरशिरसं मात्रे दत्त्वा वामदेवगानात्तं कर्म्म कृत्वाच्छिद्रमवधार्य्य गृहं प्रविशेदिति। अत ऊर्द्धमपरशुक्लपक्षत्रयेऽपि तृतीयस्यां तिथौ सायंसन्ध्यामतिक्रम्य चन्द्राभिमुखः पिता जलाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यदद्यचन्द्रमसि कृष्णं पृथिव्या हृदयं श्रितं तदहं विद्वांस्तत् पश्यन्नाहं पौत्रमघं रुदमिति पठित्वा जलाञ्जलिं त्यजेत्। वारद्वयं तूष्णीम्। ततो वामदेयं गीत्वाच्छिद्रमवधार्य्य गृहं प्रविशेदिति। एतच्च निष्क्रमणकर्म्माङ्गभूतसुदीर्घं कर्म्म यत्नो पुत्रोपादानविरहात् प्रवासिनापि कर्त्तव्यमेव। इति निष्क्रमणम्॥ इति भवदेवभट्टः॥*॥ तत्र विहितदिनं यथा। रिक्तातिरिक्तास्त्रियुताः। शुनिमङ्गलवासरेतरे वाराः। आर्द्राश्लेषाहस्तित्रिकाभरणीमघाविशाखापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदशतभिषाभिन्नानि नक्षत्राणि। कन्यातुलाकुम्भसिंहसंज्ञकानि लग्नानि। बालकस्य चतुर्थे मासि क्षतीये वा चन्द्रादिशोभने कर्त्तव्यम्। इति ज्योतिषम्॥

निष्क्रयः, पुं, (निष्क्रीयते विनिमीयतेऽनेनेति। निर्+क्री+"एरच्।" ३। ३। ५६। इति करणे अच्।) भृतिः। वेतनम्। इति हेमचन्द्रः। ६। २६॥

वृद्धियोगः। सामर्थ्यम्। निर्गतिः। इति माधवीकाश्चतवैजयन्तौ। प्रत्युपकारः। विनिमयः। यथा, माघे। १। ५०।

"वसुतृप्तिपन् यः पृथिवीभृतामरं
वरप्रदानस्य चकार मूलिनः।
नवसप्तधारादिसुतासमक्षमं-
स्वयंग्रहश्चेद्वसुखेन निष्क्रयम्॥"

(विक्रयः। यथा, मनुः। ८। ४६।

"न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्या विमुच्यते॥")

निष्क्रान्तः, त्रि, (निर्+क्रम+क्तः।) निर्गतः। यथा, मार्कण्डेये। ८७। ५।

"भ्रुकुटीकुटिलात्तस्या ललाटफलकादुद्गतम्।
काली करालवदना विनिष्क्रान्तासिपाशिनी॥"

(यथाच, महाभारते। १३। २। ४५।

"निष्क्रान्ते मयि कल्याणि तथा सन्निहितेऽनघे।
नातिथिस्तेऽवमन्तव्यः प्रमाणं यदहं तव॥")

निष्क्रियं, क्ली, (निर्गता क्रिया यस्य।) ब्रह्म। यथा, वेदान्तसूत्रभाष्यम्।

"निष्क्रियं निर्गुणं शान्तं निरपेक्षं निरञ्जनम्॥"

क्रियाशून्ये, त्रि। यथाह कश्चित्।

"बन्धनानि यदि सन्ति बहूनि
प्रेमरज्जुकृतबन्धनमन्यत्।
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निष्क्रियो भवति पङ्कजबद्धः॥"

निष्क्वाथः, पुं, (निःशेषतः क्वाथो यत्र।) मांसादिक्वाथः। झोल इति भाषा। तत्पर्य्यायः। रसकः २। इति हेमचन्द्रः। ३। ७०॥

निष्ठाः, पुं, (वर्णाश्रमादिभ्यो निर्गतः। निस्+"अयथातु त्यप्।" ४। २। १०४। इत्यस्य "निसो गते।" इति वार्त्तिकोक्त्या त्यप्। "इकारान्तादौ तद्धिते।" ८। ३। १०१। इति षत्वम्।) म्लेच्छजातिविशेषः। इति हेमचन्द्रः। ५। ५६८॥ (पुन्नादिः। इति महीधरः। यथा, वाजसनेयसंहितायाम्। ५। २३।

"यं मे निष्ठो यमसाधो निचस्कन्द॥"

"ष्ठा क्ये शब्दसंघातयोः। नितरां क्ष्यायति संघातरूपेण वर्द्धते इति निष्ठाः। यद्वा, निर्गत्य शरीरात् क्ष्यायति विक्षीणो भवतीति निष्ठाः पुन्नादिः। यद्वा, निर्गतो वर्णाश्रमेभ्यो निष्ठाचरकालादिः। निसो गते इति वार्त्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम्।" इति तत्र वेददीपः॥)

निष्ठः, त्रि, (नितरां तिष्ठतीति। नि+स्था+कः।) स्थितः। नितिष्ठतीति स्थाधातोर्डप्रत्ययनिष्पन्नः॥

निष्ठा, स्त्री, (नितरां तिष्ठतीति। नि+स्था+"आतश्चोपसर्गे।" ३। १। १३५। इति कः। "उपसर्गादिति।" ८। ३। ६५। इति षत्वम् ततष्टाप्।) निष्पत्तिः। नाशः। (यथा, भागवते। ५। १२। ८।

"यदा चितावेव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम्॥")

अन्तः। निर्वहणम्। इत्यमरः। ३। ६। ४०॥ याच्ञा। इति मेदिनी। ठे, ६॥ क्तक्तवतू प्रत्ययौ। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ (यथा, "क्तक्तवतू निष्ठा। १। १। २६। एतौ निष्ठासंज्ञौ स्तः।" इति सिद्धान्तकौमुदी॥) धर्म्मादौ श्रद्धा। यथा,—

"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः कुलम्।
ग्रसते नैष्ठिकः स्वीयं धर्म्मं त्रातुं न चेतरः॥
एकस्य देवस्य विहाय मन्त्र-
मेकं परश्चेद्वनतेऽपि तस्य।
तदा भवेन्नष्टयुरनैष्ठिकत्वा-
न्निष्ठाविहीनस्य न कापि सिद्धिः॥"

इति वैद्यकुलतत्त्वे भरतमल्लिकः॥

प्राप्यम्। यथा,—

"भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः।
तेषामश्रान्तकामानां का निष्ठा विजितात्मनाम्॥")

इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोकटीकायामाख्यायां श्रीधरस्वामी॥ (नि+स्था+क्विप्। स्थितिः। यथा, ऋग्वेदे। १। ३१। १०।

"आते निष्ठामदधुर्गोषु वीराः॥"

"निष्ठां पूर्व्वं यथास्थितिम्।" इति सायणः॥)

निष्ठानं, क्ली, (नि+स्था+करणे ल्युट्।) भक्षणम्। इत्यमरः। ३। ३। ११५॥ (यथा, रामायणे। २। ६१। ६७।

"आजेयापि च वाराहैर्निष्ठानवरसञ्चयैः।
पलनिर्य्यूहसंसिद्धैः सूपैर्नानारसान्वितैः॥")

निष्ठितं, त्रि, (नि+स्था+क्तः।) नितरां स्थितम्। यथा, भागवते। २। ७। ३६।

"देवर्षिभूताप्तनृणां पितॄणां
न किङ्करो नायमृणी च राजन्।
सर्वात्मना यः शरणं शरण्यं
गतो मुकुन्दं परिहृत्य कर्त्तम्॥"

"देवर्षिभूतेत्यादि। देवानां ऋषीणां भूतानां निष्ठितानां नितरां स्थितानाम्।" इति श्रीधरस्वामी॥ (निष्ठा जातास्थेति। तारकादित्वादितच्।) निष्ठाविशिष्टः। निश्चयेन स्थितश्च। (सम्यक्ज्ञाता। यथा, रामायणे। २। १। १४।

"रचिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः॥")

निष्ठीवः, पुं, (नि+ष्ठिव+भावे घञ्। एधोदरादित्वात् दीर्घः।) निष्ठीवनम्। इति हिरूपकोषः॥ (यथाह वाभटः।

"निष्ठीवः पार्श्वतो यायादेकस्मात्तस्तो निमीलनम्॥")

निष्ठीवनं, क्ली, (नि+ष्ठिव+भावे ल्युट्। ष्ठिवसिध्योर्ल्युटि दीर्घो वेति स्वामी। एधोदरादित्वादिति सुबुटः।) श्लेष्मादीनां मुखेन वमनम्। छेप इति थुथु इति च भाषा॥ तत्पर्य्यायः। निष्ठेवः २ निष्ठूतिः ३ निष्ठेवनम् ४। इत्यमरः। ३। २। ६८॥ निष्ठेवा ५। निष्ठेवम् ६। इति तट्टीका॥ (यथा, मार्कण्डेयपुराणे। ३४। ७०।

"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु।
कृत्यादाचमनं सूर्य्यं गोएडस्यार्कदर्शनम्॥")

निष्ठुरं, त्रि, (नि+स्था+महुरादयश्चेति उरच्।) परुषम्। कठिनम्। इत्यमरः। ३। १। ७६॥ (यथा, माघे। ५। ४६।

"अङ्गे जनैर्मुकुलिताञ्चमनादरागे
संरम्भहस्तिपकनिष्ठुरचोदनाभिः॥")

निष्ठूतं, त्रि, (नि+ष्ठिव+क्तः। "ष्ठ्यूः सूक्ष्मिति।" ६। ४। १६। इत्यूठ्।) क्षिप्तम्। इत्यमरः। ३। १। ८७॥

निष्ठूतिः, स्त्री, (नि+ष्ठिव+क्तिन्। "ष्ठ्यूः सूक्ष्मिति।" ६। ४। १६। इत्यूठ्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्ठेवः, त्रि, (नि+ष्ठिव+घञ्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्ठेवनं, क्ली, (नि+ष्ठिव+भावे ल्युट्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्णातः, त्रि, (नितरां स्नाति स्नौति। नि+स्ना+क्तः। "निनदीभ्यां स्नातेः कौशले।" ८। ३। ८६। इति षत्वम्।) विज्ञः। निपुणः। इत्यमरः। ३। १। ४॥ (यथा, सुश्रुते सूत्रस्थाने द्वितीयेऽध्याये।

"वस्तु कर्म्मसु निष्णातो धात्र्यांश्चाधवहिश्चरेत्।
स वस्तुषु पूजां नाप्नोति वधमर्हति राजतः॥")

पारं गतः। यथा, भागवते। १। ४। २१।

"वैयास्यायन एवैको निष्णातो यजुषामृत॥"

निष्पक्वं, त्रि, (नितरां पक्वम्।) अतिपक्वयवगोधूमादि। इति भरतः॥ तत्पर्य्यायः। जर्घटितम् २। इत्यमरः। ३। १। ६५॥ पक्वताशून्यञ्च॥

निष्पताकध्वजः, पुं स्त्री, राज्ञां पताकाशून्यध्वजविशेषः। इति युक्तिकल्पतरुः॥ तद्विपरीतं ध्वजशब्दे द्रष्टव्यम्॥

निष्पत्तिः, स्त्री, (निर्+पद+क्तिन्।) समाप्तिः। सिद्धिः। यथा,—

"क्रियायाः परिनिष्पत्तिर्व्यापारादनन्तरम्।
विवक्षते यदा तज्ज्ञैरुक्तं क्तं तदा स्मृतम्॥"

इति रामतर्कवागीशगृधृतकारिका॥

(नाट्यालङ्कारविशेषः। यथा, हठयोगप्रदीपिकायाम्। ४। ६८।

"आरम्भश्च घटश्चैव तथा परिचयोऽपि च।
निष्पत्तिः सर्व्वयोगेषु ज्ञातव्याश्चतुरुत्तमाः॥"

तथा, तत्रैव। ४। ७६।

"यदग्निं यदा भित्त्वा सर्व्वपीठगतोऽनिलः।
निष्पत्तौ वैखरी शब्दः क्रमशोऽक्रमगो भवेत्॥")

निष्पत्तिकृतिः, स्त्री, (निष्पन्न+क्त+भावे क्तिन्+टाप्।) सपत्नाकृतिः। अत्यन्तपीड़ा। इति हेमचन्द्रः। ६। ८॥

निष्पत्तिका, स्त्री, (निष्पन्नमस्या अस्तीति। ठन्।) करीरवृक्षः। इति राजनिर्घण्टः॥

निष्पदयानं, क्ली, (निष्पदं पदरहितं यानम्।) पदरहितवाहनम्। तच्च नौकादिकम्। इति

युक्तिकल्पतरुः ॥ तल्लक्षणादि नौकाशब्दे द्रष्टव्यम् ॥

निष्पन्नः, त्रि, (निर्+पद्+क्तः ।) निष्पत्तिविशिष्टः । सम्पन्नः । तत्पर्य्यायः । सिद्धः २ निर्वृत्तः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, देवीभागवते । ३ । ८ । २२ ।

"निष्पापत्वं फलं विद्धि तीर्थस्य सुनिसत्तम ! ।
क्षीरः फलं यथा लोके निष्पन्नान्नस्य भक्षणम् ॥")

निष्पादनं, क्ली, (निर्+पद्+णिच्+ल्युट् ।) निष्पत्तिः । निष्पत्तिनिमित्तम् । यथा, धात्वर्थतावच्छेदकफलनिष्पादकतया दर्शयित्वानुमतिप्रकाशनेन कर्तृरिच्छासत्पाद्य ज्ञाननिष्पादनेन वेति कारकचक्रे भवानन्दसिद्धान्तवागीशः ॥

निष्पादना, क्ली, (निर्+पद+णिच्+युच् । स्त्रियां टाप् ।) निष्पत्तिप्रेरणम् । यथा,—

"यदा निष्पादनार्थस्तदा क्रियते कटः स्वयमेवेति ।"

इति रामतर्कवागीशः ॥

निष्पादितं, त्रि, (निर्+पद+णिच्+क्तः ।) ज्ञातनिष्पादनम् । यथा,—

"निष्पादितं देवकुलमवघ्नेषं प्रतीयते ॥"

इति भाषते ।१।१३।५०॥

निष्पाद्यं, त्रि, (निर् निश्चयेन पाद्यते समाप्यते इति । निर्+पद्+णिच्+यत् ।) निष्पादनीयम् । (यथा, राजतरङ्गिण्याम् ।२ । १५८ ।

"हन्त बहूनि निष्पाद्ये श्रमात् कौसीद्यमाश्रयत् ।
प्रारब्धीवाध्वगो दिष्ट्या मोहितोऽस्मि न निद्रया ॥")

साध्यम् । यथा, चेदाद्यापारेण ज्ञेदनादेर्निष्पाद्यत्वात् साधनत्वमिति रामतर्कवागीशः ॥

निष्पावः, पुं, (निष्पूयते सुखात्पवनयनेन शोध्यते इति । निर्+पू+णिच्+घञ् ।) धान्यादीनां निस्तुषीकरणम् । बहुलीकरणम् । तत्पर्य्यायः । पवनम् २ पवः ३ । इत्यमरः । ३ । २ । २४ ॥ पूतीकरणम् ४ । यथा,—

"धान्यादिनिस्तुषीकार्य्यबहुलीकरणादिषु ।
तथा च पूतीकरणे निष्पावः पवनं पवः ॥"

इति शब्दरत्नावली ॥

राजशिम्बीबीजम् । भटवास इति भटयांसु इति वा हिन्दीभाषा ॥ तत्पर्य्यायगुणाः ।

"निष्पावो राजशिम्बी स्याद्वल्लकः श्वेतशिम्बिकः ।
निष्पावो मधुरो रूक्षो विषाकेऽम्लो गुरुः सरः ॥
कषायस्तन्यपित्तास्रमरुद्वातविबन्धजित् ।
विदाह्यृद्धो विषश्लेष्मशोथकृच्छ्रकृमाग्नुत् ॥"

इति भावप्रकाशः ॥

(निष्पूयतेऽनेनेति । करणे घञ् ।) सूर्पवायुः । राजमाषः । (यथा, मार्कण्डेयपुराणे ।५५।२४।

"मधु कृत्वा नरो दंशः पूपं कृत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते मूषकोलकः ॥")

कङ्कुरः । वमीरुहः । शिम्बिका । निर्लिकल्के, त्रि । इति मेदिनी । पे, ३८ । श्वेतशिम्बी । इति रत्नमाला ॥ (यथा,—

"चारातितीक्ष्णोग्रविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः ॥"

इति माधवकरविनिश्चये मूलाधिकारे ॥)

निष्पावकः, पुं, (निष्पाव एव । स्वार्थे कन् ।) श्वेतशिम्बी । अस्य भक्षणगुणः । मलवन्धकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (अस्य गुणा यथा,—

"निष्पावको वैश्वबलासशोफ-
मुक्तान्तको रूक्षगुणो विदाही ।
कषायकः स्यान्मधुरो गुरुश्च
स्तन्यास्रपित्तञ्च करोति वातम् ॥"

इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

निष्पावी, स्त्री, (निष्पाव + स्त्रियां ङीष् ।) शिम्बीविशेषः । वोड़ा इति भाषा ॥ सा द्विधा । तत्र हरिद्वर्णायाः पर्य्यायः । श्यामला २ फलिनी ३ नखपूर्विका ४ मञ्जरी ५ फलिका ६ शिम्बी ७ गुच्छफला ८ विप्रालब्धफलिका ९ निष्पावि: १० पिण्डिटा ११ ॥ शुभ्रायाः पर्य्यायः । अङ्गुलिफला १ नखनिष्पाविका २ वृन्तनिष्पाविका ३ श्यामा ४ नखपुञ्जफला ५ अग्रफला ६ । एतयोर्गुणाः । कषायत्वम् । मधुररसत्वम् । कफशुद्धिकरत्वम् । मेध्यत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

निष्प्रतिभः, त्रि, (निर्गतास्ति प्रतिभा बुद्धिर्यस्य ।) अज्ञः । जड़ः । इति जटाधरः ॥ (निर्गता प्रतिभा दीप्तिरस्येति । दीप्तिशून्यः । यथा, हरिवंशे । ८२ । ३४ ।

"क्षीणाकाराश्च ताराश्च सुप्तनिष्प्रतिभाश्च ये ।
नेत्रमन्त्रर्द्धये रूपसृदृगच्छद्दिवाकरः ॥")

निष्प्रभूहः, त्रि, (निर्गतः प्रभूहो बाधा अस्येति ।) निर्विघ्नः । यथा,—

"निष्प्रभूहसुपारब्धे भगवतः कौमोदकीजन्मनः ॥"

इति मुरारिः ॥

(स्त्री, गङ्गा । यथा, काशीखण्डे । २६ ।१०३ ।

"निष्प्रभूहा गाकनदी निरयार्णवदीर्घनौः ॥")

निष्प्रभः, त्रि, (निर्गता प्रभा अस्येति ।) प्रभाशून्यः । दीप्तिरहितः । तत्पर्य्यायः । विगतः २ अरोकः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, रघुवंशे । ११ । ८१ ।

"निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ॥")

निष्प्रयोजनं, त्रि, (निर्गतं प्रयोजनं यस्मिन्निति ।) प्रयोजनरहितम् ।

"अन्यथा हि महावाहो वचनासुपदेशतः ।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा, हरिवंशे । ६१ । १५ ।

"निरानन्दं निराखादं निष्प्रयोजनमातुरम् ॥")

निष्प्रवाणं, त्रि, (नितरां प्रकर्षेण क्रयते इति । निर्+प्र+पे+करणे ल्युट् ।) तत्कालविक्रयार्हः । नूतनवस्त्रम् । इति हारावली । ६६ ॥

निष्प्रवाणि, त्रि, (निर्गता प्रवाणी तन्तुवायशलाका यस्मादस्य वा । "निष्प्रवाणिश्च ।" ५।४।१६०। इति कप्रत्ययाभावो निपात्यते ।) नूतनवस्त्रम् । तत्पर्य्यायः । अनाहतम् २ तन्तकम् ३ नवाम्बरम् ४ । इत्यमरः । २ । ६ । ११२ ॥ आहतम् ५ अहतम् ६ नववस्त्रम् ७ । इति शब्दरत्नावली ॥

निष्फलः, त्रि, (निर्गतं फलं यस्मात् ।) फलशून्यः । यथा, "फलालोऽस्त्री स निष्फलः ।" इत्यमरः । २ । ४ । २२ ॥ (यथा, देवीभागवते । ३ । ८ । २५

"क्षते तीर्थे यदेतानि देहान्न निर्गतानि वै ।
निष्फलः श्रम एवैकः कर्षकस्य यथा तथा ॥")

निष्फला, स्त्री, (निष्टतं फलं यस्या इति ।) पञ्चपञ्चाशद्देश्य छन्दसि गतरजस्का । इत्यमरः ॥ तत्पर्य्यायः । निष्फली २ निष्फली ३ निष्फलाः ४ विफली ५ विफला ६ ऋतुहीना ७ । इति शब्दरत्नावली ॥ विरजाः ८ विगतार्त्तवा ९ । इति जटाधरः ॥

निष्फली, स्त्री, (निष्टतं फलं यस्याः । ङीष् ।) निष्फला । इति शब्दरत्नावली ॥

निसम्पातः, पुं, (निष्टतः सम्पातो यत्र ।) निष्पीषः । निःसम्पातः । इति शब्दरत्नावली ॥

निसर्गः, पुं, (नि+सृज्+घञ् ।) स्वभावः । इत्यमरः । १ । ७ । ३८ ॥ (यथा, किरातार्जुनीये । १ । ६ ।

"निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ॥")

रूपम् । सर्गः । इति मेदिनी । गे, ४० ॥ (यथा, महाभारते । १३ । ८५ । १२३ ।

"निसर्गादुत्तमश्चापि वरुणो यादसां पतिः ॥")

दानम् । । यथा, मनुः । ८ । १४३ ।

"न लेखाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥")

निसिन्धुः, पुं, वृक्षविशेषः । निसिन्धा इति भाषा । तत्पर्य्यायः । सिन्धुकः २ सिन्धुः ३ तापिञ्जः ४ सुवृक्षकः ५ सिन्धुवारः ६ इक्ष्वसुरिषः ७ निर्गुण्डी ८ इन्द्राणिका ९ । इति शब्दचन्द्रिका ॥

निसूदनं, क्ली, (नि+सूद्+भावे ल्युट् ।) निर्हिंसनम् । वधः । इत्यमरः । २ । ८ । ११३ ॥ (यथा, "प्रवासनं निसूदनं निर्हिंसनमिति वधपर्य्यायं प्रवासनशब्दं पठन्त्याभिधानिकाः ।" इति । ९ । २४२ मनुश्लोकटीकायां कुल्लूकभट्टः ॥ त्रि, नि+सूद+ल्युः । विनाशकः । यथा, रघुवंशे । ९ । ३ ।

"उभयमेव वदन्ति मनीषिणः
समयवर्धितया कृतकर्मणाम् ।
बलनिसूदनमर्थपतिञ्च तं
श्रमनुदं मनुदक्षधरान्वयम् ॥")

निसृता, स्त्री, (नितरां सृता । नि+सृ+क्तः ।) त्रिसृता । इति रत्नमाला ॥ तेउड़ि इति भाषा ॥ (त्रिसृताशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

निसृष्टं, त्रि, (नि+सृज्+क्तः ।) त्यक्तम् । इत्यमरः । ३ । १ । ८८ ॥ (यथा, मनुः । ८ । ४९ ।

निस्तार

"न स्वामिना निसृष्टोऽपि मूढो दास्यादिमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति॥")
मध्यस्थम्। इति त्रिकाण्डशेषः॥

निसृष्टार्थः, पुं, (निसृष्टो न्यस्तोऽर्थः प्रयोजनं यस्मिन्निति।) दूतविशेषः। यथा,—
"निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः।
कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यञ्चापि तथा त्रिधा॥"
तल्लक्षणं यथा,—
"उभयोर्भाषमाणयोः स्वयं वदति चोत्तरम्।
सुस्थिरं कुरुते कर्म्म निसृष्टार्थस्तु स स्मृतः॥"
इति भाषाविच्छेददर्पणे ३ परिच्छेदः॥
धनायव्ययशासनकर्त्ता नियुक्तः। यथा हेमचन्द्रः।
"यः स्वामिना नियुक्तोऽपि धनायव्ययपालने।
कुरुतेऽन्यधिकाधिक्ये निसृष्टार्थस्तु स स्मृतः॥"
इति व्यवहारतत्त्वम्॥
पुरुषविशेषः। तस्य लक्षणं यथा,—
"धीरः स्थिरमतिः शूरः स्वामिकार्य्यविधायकः।
प्रभौरुषप्रकाशी च निसृष्टार्थः स उच्यते॥"
इति सङ्गीतदामोदरः॥

निस्नवी, स्त्री, (नितरां स्रवतीत्यस्यां स्रवतीति। अच्। गौरादित्वात् ङीष्।) वटिका। इति शब्दचन्द्रिका॥ बड़ि इति भाषा॥ (निर्गतौ स्रवौ यस्या इति।) स्रवहीना च॥

निस्तरणं, क्ली, (निस्तीर्य्यतेऽनेनेति। निर्+तॄ+करणे ल्युट्।) उपायः। निस्तारः। तरणम्। इति मेदिनी। ने, ६६॥ निर्गमः। इति विश्वः॥

निस्तर्हणं, क्ली, (निर्+तृह् हिंसायाम्+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११४॥

निस्तलं, त्रि, (निरस्तं तलं स्वरूपमस्येति।) वर्त्तुलम्। इत्यमरः। ३। १। ६६॥ (यथा, कुमारसम्भवे। १। ३२।
"कक्षस्थस्य तस्याः स्तनयुगुरस्य
सूक्ष्मांशुकाभासस्य च निस्तलस्य॥")
तलम्। इति मेदिनी। ले, १०६॥ (नितरां तलम्।) तलम्। इति हेमचन्द्रः॥

निस्तारः, पुं, (निर्+तॄ+घञ्।) निस्तरणम्। उद्धारः। (यथा, भट्टारगुप्तके। ७१।
"संसार तव निस्तारपदवी न दवीयसी।
अमरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः॥")

निस्तारबीजं, क्ली, (निस्तारस्य संसारसमुद्रोत्तरणस्य बीजम्।) संसारसरणकारणम्। तद्यथा,—
"स्मरणं कीर्त्तनं विष्णोर्वन्दनं पादसेवनम्।
चन्दनं स्तवनं नित्यं भक्त्या नैवेद्यभक्षणम्॥
चरणोदकपानञ्च तन्नामजपनं तथा।
इदं निस्तारबीजञ्च सर्व्वेषामीप्सितं भवेत्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः॥
(अपि च महानिर्व्वाणतन्त्रे।
"कलौ पापयुगे घोरे तपोदानैरतिदुस्तरे।
निस्तारबीजमेतावद् ब्रह्ममन्त्रस्य साधनम्॥
साधनानि बहूक्तानि यागयज्ञव्रतादिषु।
कलौ दुर्ब्बलजीवानामसाध्यानि महेश्वरि!॥"

निस्तेज

उद्धारकारणमात्रम्। यथा,—
"जीर्णा तरिः सरिदतीवगभीरनीरा
वाता वयं सकलमित्यमनर्थहेतुः।
निस्तारबीजमिदमेव जगोदरीणां
यद्माधव त्वमसि सम्प्रति कर्णधारः॥"
इत्युक्तटः॥)

निस्तितीर्षत्, त्रि, (निर्+तॄ+सन्+शतृ।) निस्तरितुमिच्छत्। यथा,—
"तन्नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम्॥"
इति श्रीभागवते। १। १। २२॥

निस्तुषक्षीरः, पुं, (निस्तुषं परिष्कृतं क्षीरं यस्येति।) गोधूमः। इति राजनिर्घण्टः॥

निस्तुषरत्नं, क्ली, (निस्तुषं निर्म्मलं रत्नम्।) स्फटिकः। इति राजनिर्घण्टः॥

निस्तुषितं, त्रि, (निस्तुष+इतौ क्विप्+क्तः।) त्यक्तिहीनम्। त्यक्तम्। तुषशून्यतम्। इति मेदिनी। ते, २०२॥

निस्तेजाः, [स्] त्रि, (निर्गतं तेजो यस्मादिति।) तेजोरहितः। यथा,—
"इदं कवचमज्ञात्वा कवचार्द्धं पठेत्तु यः।
सर्व्वं तस्य वृथा देवि! निस्तेजो न च सिद्धिदम्॥"
इति ब्रह्मजामलीयगायत्रीकवचभेदतम्॥
(यथा च देवीभागवते। २। ८। ११।
"शस्त्रपन्नास्त्रदा मार्गे चौराभीरैश्च लुण्ठिताः।
धनं सर्व्वं गृहीतञ्च निस्तेजाश्चार्त्तुनोऽभवत्॥")

निस्त्रिंशः, पुं, (निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्य इति। निरादय इति समासः। "संख्यायास्तावतुरुषस्य त्रयवयवाः।" ५।४।१५३। इत्यस्य वार्त्तिकोक्त्या त्रच्।) खड्गः। इत्यमरः। २। ८। ८६॥ (यथा, महाभारते। ७। ४१। २४।
"वक्त्रलक्ष्येव निस्त्रिंशो गुरुभारसहो दृढः॥")
निर्दये, त्रि। इति मेदिनी। शे, २१॥ (यथा, अमरुशतके। ५।
"दृष्टोऽस्याः प्रणयस्त्वयैव भवता सैवं गिरं लालिता
दैवादद्य किलत्वमेव कृतवानस्या वधं निष्प्रियम्।
मद्भुर्दुःसह एष वाल्युपगतं नो ग्राह्यतां हेः
स्फुटम्।
हे निस्त्रिंश! विमुक्तकङ्कणकरं तावत् सखी रोदितु॥")
त्रिंशत्तमूल्यः। इति त्रात्तरत्नम्॥

निस्त्रिंशधारी, [न्] त्रि, (निस्त्रिंशं धरतीति। निस्त्रिंश+ध+णिनि।) खड्गधारी। तल्लक्षणं यथा, मात्स्ये २८८ अध्यायः।
"सुरूपसत्त्वः प्राज्ञोदृढभक्तिः कुलोचितः।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः॥"

निस्त्रिंशपञ्जिका, स्त्री, (निस्त्रिंशः खड्ग इव पक्षोऽस्या अस्तीति। उन्।) क्षुद्रपक्षिविशेषः। इति राजनिर्घण्टः॥

निस्त्रैंशपुत्रिकः, पुं, (राजधानूरकः। इति राजनिर्घण्टः॥

निस्राव

निस्नेहफला, स्त्री, (निस्नेहं तैलविहीनं फलं यस्याः।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

निस्पन्दः, पुं, (नि+स्पन्द+भावे घञ्।) स्पन्दनम्। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १२। ३३५। ६।
"मेरोः सहस्रैः सं हि योजनानां
द्वाविंशतिर्हैं कविभिर्निरुक्तः।
अनिन्द्रियाश्चानगमाश्च तत्र
निस्पन्दहीनाः सुसुगन्धिनस्ते॥")

निस्पन्दः, त्रि, (निर्गतः स्पन्दश्चक्षुष्पक्ष्मादिस्पन्दनं यस्मात्।) स्पन्दरहितः। ईषत्तुल्यमूल्यः। यथा,
"कावेरीनीरभूमीरुहसुभगवधूशुल्कसुस्रावधिष्णः
कार्ष्णाटीचीणपीनस्तनवसनदशाग्रोल्लसन्निस्पन्दः॥"
इति विक्रमादित्यराजसभायां रत्नपद्यम्॥

निस्पन्दतरं, त्रि, (निस्पन्द+तरप्।) एकान्तस्पन्दरहितम्। यथा, नैषधे। ८। १३।
"कक्षे घने नैषधकेशपाशे
निपत्य निस्पन्दतरी भवङ्गाम्।
तस्याश्चुचुम्बं न विमोच्य गन्तु-
मपारि तल्लोचनखञ्जनाभ्याम्॥"

निसृष्टः, त्रि, (निर्गता सृष्टा इष्टाऽनिष्टविषयवासना यस्येति।) सृष्टामूल्यः। यथा,—
"निसृष्टः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा॥"
इति श्रीभगवद्गीतायाम्। ६। १८॥

निसृष्टा, स्त्री, अग्निशिखावृक्षः। यथा,—
"अग्निजा निसृष्टा चापि मालिनी विष्णुवल्लभा॥"
इति शब्दचन्द्रिका॥
सृष्टाया अभावः। (अभावेऽव्ययीभावः।)

निस्र(स्र)ष्टः, पुं, (नि+स्रज्+क्त चरणे+भावे घञ्। "अनुविपर्य्यभिनिभ्यः स्यन्देरप्राणिषु।" ८। ३। ७२। इति वा षत्वम्।) स्यन्दनम्। क्षरणम्। यथा,—
"भाकन्दरसनिस्यन्दसुन्दरोदारकारिणौ।
अवष्टब्धस्थिरावेतौ बन्धिनाविव राजतः॥"
इति प्रसन्नराघवनाटके पञ्चक्षरमिश्रः॥
(यथा च रामायणे। २। ६६। १३।
"जलप्रपातैरुद्भेदैर्निःस्यन्देश्च क्वचित् क्वचित्।
अवङ्गिर्भात्यसौ शैलः स्रवन्मद इव द्विपः॥"
निस्यन्दते इति कर्त्तरि अच्। क्षरणशीले, त्रि। यथा, रघुः। ३। ४१।
"तदङ्गनिस्यन्दजलेन लोचने
प्रमृज्य पुण्येन पुरस्कृतः सताम्।
अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिशीपनन्दनः॥")

निस्रावः, पुं, (निस्रावयते इति। नि+स्रु+णिच्+घञ्।) भक्तसमुज्झवलक्षम्। फेन इति भाषा। तत्पर्य्यायः। मासरः २ आयामः ३। इत्यमरः। २। ९। ४८॥ (नि+स्रु+घञ्। स्रवः। यथा, हरिवंशे। ६६। ६।
"धातुनिस्रावदिग्धाङ्गं धातुप्रस्रवभूषितम्॥")

निखनः, पुं, (नि+खन+"नौ गदनदपठखनः।" ३।२।६४। इति अप्।) शब्दः। इत्यमरः। २।६।२३॥ (यथा, महाभारते। ७। २६। ३।
"यथा प्राग्ज्योतिषो राजा भगेन मधुसूदन।
त्वत्माधोऽभिनिष्क्रान्तो ध्रुवं तस्येव निखनः॥")
निखातः, पुं, (नि+खन+पचे घञ्।) शब्दः। इत्यमरः। १। ६। २३॥
निहननं, क्ली, (नि+हन+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११४॥
निहन्ता, [तृ] त्रि, (नि+हन+तृच्।) हननकर्त्ता। यथा, भट्टिः।
"निहन्ता वैरकारीणां सतां बहुकरः सदा।
पारम्पर्यधिकरामस्य शस्त्रैरन्तकरो रणे॥"
(महादेवे, पुं। यथा, महाभारते। १३। १७। ७५ [महः॥")
"भगहारी निहन्ता च कालो ब्रह्मा पिता-
निहाका, स्त्री, (नियतं जहाति सुखमिति। नि+हा त्यागे+"नौ हः।" उणा ३। ४४। इति कन्।) गोधिका। इत्यमरः।१।१०।२२॥ (यथा, ऋग्वेदे। १०। ६७। १३।
"सार्कं वातस्य ध्राज्या सार्कं नक्ष निहाकया॥")
निहारः, पुं, (नितरां हियन्ते पदार्था येन। नि+हृ+घञ्।) नीहारः। इति शब्दरत्नावली॥
निहितं, त्रि, (नि+धा+क्त। "दधातेर्हिः।" ७। ४। ४२। इति हिः।) स्थापितम्। इति हलायुधः॥ यथा, महाभारते।३।३१२।११२।
"धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः॥"
निहिंसनं, क्ली, (नि+हिंस+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११३॥
निहीनः, त्रि, (नितरां हीनः। कुगतीति समासः।) नीचः। पामरः। इत्यमरः।३।१०।१६॥ (यथा, महाभारते। ३। १२। ११६।
"त इमे सिंहविक्रान्ता वीर्येणाभ्यधिकाः परैः।
निहीनैः परिक्लिश्यन्ती वसुपेक्षन्ति मां कथम्॥")
निह्नवः, पुं, (निह्नूयते सत्यवाक्यमनेनेति। नि+ह्नु+"ह्नुदोरप्।" ३। ३।५७। इति अप्।) अपलापः। येन वचनं निह्नूयते सः। यथा, धारयन्नेव न धारयामीति। इत्यमरभरतौ॥ तत्पर्य्यायः। निह्नुतिः २ अपह्नुतिः ३ अपह्नवः४। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्ये।२।११।
"निह्नवे भाषितो दण्डार्द्धं राज्ञे च तत्समम्॥")
निह्नुतिः। अविश्वासः। इति मेदिनी। वे, ३८॥ (यथा, महाभारते। ५। ३७। ३०।
"न निह्नवं मन्त्रमतस्य गच्छेत्
संवत्सरमन्त्रस्य कुसङ्गतस्य।")
गुप्तः। इति शब्दरत्नावली॥ (मुद्रितः। यथा, मनुः। ८। २१।
"ध्यायन्त्यनिष्टं यत्तु किञ्चित् प्राक्रियाफलस्य चेतसा।
तस्येव चाभिचारस्य निह्नवः सम्प्रयुज्यते॥")
निह्नुतिः, स्त्री, (नि+ह्नु+क्तिन्।) निह्नवः। इति शब्दरत्नावली॥
निह्रादः, पुं, (नि+ह्राद अव्यक्तशब्दे+घञ्।) शब्दः। इत्यमरः।१।६।२३॥ (यथा, रघुः।१।४१।
"सारसैः कलनिह्रादैः क्वचिदुन्नमिताननौ॥")
निचुकं, क्ली, (निच चुम्बने+भावे क्युट्।) चुम्बनम्॥
निचा, स्त्री, (निचीयते चुम्बतीव मस्तकमिति। निच+अच्+टाप्।) लिक्षा। यूकः। हलायुधादिकोषः॥ निकी इति भाषा॥
निचिप्तं, त्रि, (निचिप्यते स्मेति। नि+क्षिप+क्तः।) न्यस्तम्। तत्पर्य्यायः। परिचिप्तम् २ निहितम् ३ परीतम् ४ परिवेष्टितम् ५ न्यस्तम् ६ निह्नुतम् ७। इति जटाधरः॥ स्थापितधनादि। यथा,—
"निचिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च।
राजा विनिर्णयं कुर्य्यादचिरस्थास्थधारिणम्॥"
इति मनुः। ८। १६६॥
निक्षेपः, पुं, (नि+क्षिप्+घञ्।) क्षेपणम्। त्यागः। समर्पितवस्तु। गच्छितद्रव्य इति भाषा। तत्पर्य्यायः। उपनिधिः २ न्यासः ३। इति हेमचन्द्रः॥ यथा,—
"स्वद्रव्यं यत्र विश्रम्भान्निक्षिप्यविनियुङ्क्ते।
निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः॥
असंख्यातमविज्ञातं समुद्रं यन्निधीयते।
तज्ज्ञानीयादुपनिधिं निक्षेपं गणितं विदुः॥
निक्षेपं दृष्टिश्रेष्यञ्च क्रयं विक्रयमेव च।
याच्यमागो न चेद्दद्याद्दण्ड्यते पञ्चकं शतम्॥"
इति मिताक्षरायां नारदः॥ ॥
"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः॥
आधिः सीमा बालधनं निक्षेपोपनिधी स्त्रियः।
राजस्वं श्रोत्रियस्वञ्च न भोगेन प्रणश्यति॥
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम्॥"
इति मनुः। ८ अध्याये॥
नौकः, पुं, (नौयते इति। नौ प्रापणे+"अजिशुधूनीभ्यो दीर्घश्च।" उणा ३। ४०। इति कन्।) वृक्षविशेषः। इलुआदिकोषः॥
नीकारः, पुं, (नि+कृ+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इति उपसर्गस्य दीर्घः।) व्यक्तारः। इति शब्दरत्नावली॥
नीकाशः, त्रि, (नितरां काशते इति। नि+काश+अच्। "एकः काशे।" ६। ३। १२३। इति उपसर्गस्य दीर्घः।) तुल्यः। उपमा। इत्यमरः।२। १०। ३७॥ (यथा, महाभारते। १। १८२। १३।
"आकाशनीकाशतटां तीरवानीरसङ्कुलाम्।
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम्॥")
निक्षये, पुं। इति मेदिनी। ग्रे, २३॥
नीचः, त्रि, (निकृष्टामीं गतिं श्रीभां चिनोतीति। चि+"अन्येभ्योऽपि दृश्यते।"इति कः।) हीनजातिकर्म्मा। वर्व्वरः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। विवर्णः २ पामरः ३ प्राकृतः ४ पृथग्जनः ५ निहीनः ६ अपसदः ७ जाल्मः ८ क्षुल्लकः ९ इतरः १० । इत्यमरः। २।१०।१६॥ अपशदः ११ खुल्लकः १२। इति भरतः॥ हीनः १३ क्षुद्रः १४ क्षुद्रः १५ वेतकः १६। इति शब्दरत्नावली॥ नीचसङ्गदोषो यथा,—
"न प्राप्नोति सुखं किञ्चिन्नीचसङ्गान्महानपि।
प्रेतसङ्गान्महादेवो नग्नो भस्मविभूषितः॥
प्रविश्य निलयं नीचः स्त्रीधनादिकमिच्छते।
स्वयं नेतुं न शक्नोति तदा नाशयति ध्रुवम्॥
स्थिते गुणेऽपि नीचस्तु यत्नादोषं प्रपद्यते।
किञ्चित्तु सङ्गमासाद्य तदुक्तं स्यात् सनातनम्॥
सतां श्रुत्वा गुणं नीचः श्रोतुमायाति बन्धुवत्।
ततः समयमासाद्य प्रकाशयति तद्वसु॥
मनस्येकं वचस्येकं कर्म्मण्येकं महात्मनाम्।
मनस्यन्यद्वचस्यन्यत् कर्म्मण्यन्यद्दुरात्मनाम्॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः॥
अपि च।
"बुद्धिश्च क्षीयते पुंसां नीचैः सह समागमात्।
मध्यमे मध्यतां याति श्रेष्ठतां याति चोत्तमे॥"
इति भ्रान्तिपर्व्व॥ ॥
अनुजः। तत्पर्य्यायः। वामनः २ व्यङ्ग ३ खर्व्वः ४ ह्रस्वः ५। इत्यमरः।३।१।७०॥ (यथा,—
"नीचरोमनखश्मश्रुर्निर्मलाङ्गमलायनः।
स्नानशीलः सुसुरभिः सुवेषोऽनुद्धतोज्ज्वलः।
धारयेत् सततं रत्नसिद्धमन्त्रमहौषधीः॥"
इति वाभटे सूत्रस्थाने द्वितीयोऽध्याये॥)
निम्नः। यथा,—
"श्लैष्यं नाम गुणस्त्वेष सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सार्थेन यस्यापरे।
किं वान्यत् कथयामि ते स्तुतिपदं त्वं जीवितं जीवनं
त्वय्येवोपचयेन गच्छसि पयः कस्तां निषेद्धुं क्षमः॥"
इति लक्ष्मणसेनः॥ ॥
चौरकर्म्मागन्तव्ये, पुं। इति राजनिर्घण्टः॥
नीचकः, त्रि, (नीच एव। नीच+स्वार्थे कन्।) वामनः। खर्व्वः। इति शब्दरत्नावली॥
नीचका, स्त्री, (निकृष्टामीं श्रोभां चकति प्रतिहन्तीति। चक प्रतिघाते+अच्। टाप्।) नेपिकी। उत्तमगवी। इत्यमरटीकायां भरतः॥
नीचकी, [न्] पुं, उच्चः। उपरिभागः। इति हलायुधः॥ उत्तमगवीमांसञ्च॥
नीचकैः, [स्] अ, (नीचैस्+"अव्ययसर्व्वनाम्नामकच् प्राक् टेः।" ५। ३। ७१। इति टेः प्रागकच्।) नीचैः। नीचैः शब्दस्य टेः पूर्व्वमकतेनाका निष्पन्नः। यथा, उच्चकैरित्यादि॥
नीचगं, क्ली, (नीचं निम्नदेशं गच्छतीति। गम+डः।) जलम्। इति कोषान्तरम्॥ पामरे, त्रि॥

यथा, भूतडामरतन्त्रे ।
"नीचगामङ्गनां प्राप्य चन्दनैर्मस्तकं लिखेत् ॥"
(निम्नगे च । यथा, बृहत्संहितायाम् ।१६।२२।
"अणुरपटुमयूखो नीचगोऽन्येर्जितो वा
न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः ॥")
नीचगा, स्त्री, (नीचं निम्नं गच्छतीति । गम+ड । टाप् ।) निम्नगा । नदी । यथा,—
"नीचगा तु नदी नीचो नीचगो नीचगं जले ।"
इति कोषः ॥
अपि च ।
"सङ्गमयति विद्वेषं नीचगापि नरं सरित् ।
सप्तद्रमिव दुर्वर्षं नृपं भाग्यमतः परम् ॥"
इति हितोपदेशः ॥
नीचभोज्यः, पुं, (नीचैर्यवनादिभिर्भोज्यः ।) पलाण्डुः । इति शब्दचन्द्रिका ॥ पामरभक्ष्ये, त्रि ॥
नीचवर्त्म, क्ली, (नीचमनुत्कृष्टं वर्त्म ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥
नीचिकी, स्त्री, नैचिकी । इत्यमरटीकायां भरतः ॥
नीचैः, [स्] अ, (नि+चि+"नौ दीर्घश्च ।" उणा० । ५ । १३ । इति डैसिः निगुश्च दीर्घश्च ।) अल्पम् । अनुच्चम् । इत्यमरः ॥ (यथा, मेघदूते । १०८ ।
"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥")
नीड़ः, पुं क्ली, (नितरां ईयते स्तूयते सुखप्राप्तयेऽनेनेति । नि+ईड़ स्तुतौ+घञ् ।) पक्षिवासस्थानम् । पाखीरवासा इति भाषा ॥ तत्पर्य्यायः । कुलायः २ । इत्यमरः । २ । ५ । ३० ॥ (यथा, भागवते । ३ । ५ । ३६ ।
"मार्गन्ति यत्ते सुखपद्मनीड़-
श्मश्रुश्रमापनयनं मधवो विविक्ते ॥")
स्थानम् । इति मेदिनी । डे, १७ ॥ (रथाधिष्ठानस्थानम् । यथा, रामायणे ।५ । ४८ । ३२ ।
"स भग्ननीड़ः परिभग्नकूबरः
पपात भूमौ हतवाजिसारथिः ॥")
नीड़जः, पुं, (नीड़े जायते इति । जन+डः ।) पक्षी । इति हेमचन्द्रः । ४ । ३८३ ॥
नीड़जेन्द्रः, पुं, (नीड़जानां पक्षिणामिन्द्रः ।) गरुड़ः । यथा,—
"अनडुहि जिघ्रनीड़जेन्द्रवेगे
क्षतनिविड़ासनसुप्तताधपीड़े ।
स्मरश्रमनुदितृकड़ारदृष्टिं
वृषसुकुरादिव श्रोभिषूड़मीड़े ॥"
इति प्राचीनग्रन्थस्तुतिः ॥
नीड़ोद्भवः, पुं, (नीड़े कुलाये उद्भव उत्पत्तिर्यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥
नीतं, त्रि, (नी+क्तः ।) प्राप्तम् । नेओया इति भाषा ॥ यथा,—
"नीतं यदि नवनीतं नीतं नीतं किमेतेन ।
आतपतापितभूमौ माधव! मा धाव मा धाव ॥"
इत्युद्भटः ॥
नीतिः, स्त्री, (नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था वाक्यामनया वा । नी+अधिकरणे करणे वा क्तिन् ।) नयः । (नी+भावे क्तिन् ।) प्रापणम् । इति मेदिनी । ते, ३० ॥ अथ नीतिग्रन्थं लिख्यते ।
"नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ।
विनयो ह्रीन्द्रियजयस्तदयुक्तशास्त्रमिच्छति ॥
आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ततोऽमात्यान् ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥
एर्यकरणसामर्थ्यात् संयम्यात्मानमात्मना ।
नयानयनविद्वाना कुर्व्वीत हितमात्मनः ॥
जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः ।
भवन्त्युज्ज्वलिता लक्ष्माः कौस्तुभस्य नभस्वतः ॥"
इति नीतिमयूखद्वितीयप्रयोगः ॥
सगर उवाच ।
"यया नीत्या प्रयोक्तव्यः सुत आत्मा प्रिया तथा ।
तेषां विशेषैः सहितं सदाचारं वदस्व मे ॥"
और्व्व उवाच ।
क्रमेण शृणु राजेन्द्र ! यया नीत्या नियुज्यते ।
आत्मा सुतो वा भार्य्या वा तद्विशेषं शृणुष्व मे ॥
शास्त्रदृष्टांस्तपोदृष्टान् वयोवृद्धान् सुदक्षिणान् ।
सेवेत प्रथमं विप्रानसूयापरिवर्ज्जितान् ।
तेभ्यश्च शृणुयान्नित्यं वेदशास्त्रविनिर्णयम् ।
यदनुक्तं च तत् कार्य्यं प्राज्ञैरेतन्नृपश्चरेत् ।
पञ्चेन्द्रियाणि पञ्चाश्वाः शरीरं रथ उच्यते ।
आत्मा रथी कशा ज्ञानं सारथिर्म्मन उच्यते ।
अश्वान् सुदान्तान् कुर्व्वीत सारथिं चात्मनो वशम् ।
कशा भूप! दृढ़ा कार्य्या शरीरस्थिरता तथा ।
अदान्तांस्तु समारुह्य सैन्धवान् स्यन्दनो यथा ।
अश्वानामिच्छया गच्छन्नृतुपथं प्रतिपद्यते ।
यत्नावग्रः सारथिस्तु स्वेच्छया प्रेरयन् हयान् ।
नयेत् परवग्रं सम्यक् प्रथितं वीरमध्युत ॥
यथेन्द्रियाणि नृपतिर्विषयार्थां परित्यजेत् ।
स्ववशानि प्रकुर्व्वीत मनोज्ञानं दृढं तथा ॥
ज्ञाने दृढे कशायां वा दृढायां नृपसत्तम ! ।
सारथिः स्ववशो दान्तोऽनीशः प्रेरयितुं हयान् ॥
अतो नृपः स्वेन्द्रियाणि वशे कृत्वा मनस्तथा ।
ज्ञानमार्गमधिष्ठाय प्रकुर्व्वीतात्मनो हितम् ॥
भोक्तव्यं स्वेच्छया भूपो न कुर्य्यादृतुपथे रतिम् ।
द्रष्टव्यमिति द्रष्टव्यं न द्रष्टव्यञ्च स्वेच्छया ॥
श्रोतव्यमिति श्रोतव्यं नाधिकं श्रवणे चरेत् ।
शास्त्रतत्त्वज्ञते धीरः स्मृतिवश्यो भवेन्नहि ।
एवं स्पर्शं रसं रूपं वपुश्चैवात्मेच्छया नृपः ।
स्वेच्छयैवोपसृजीत नोद्दामं विषयं व्रजेत् ॥
एवं यदि भवेद्राजा तदा स स्याज्जितेन्द्रियः ।
जितेन्द्रियत्वे हेतुश्च शास्त्रवृद्धोपसेवनम् ॥
अवृद्धसेवयाशास्त्रो नृपः शश्वद्भवेत् ।
तस्माच्छास्त्रमधिष्ठाय भवेद्राजा जितेन्द्रियः ॥
धृतिः प्रागल्भ्यसत्यादो वाक्पटुत्वं विवेचनम् ।
दक्षत्वं धारयिष्णुत्वं दानं मैत्री क्षतज्ञता ॥
दृढ़शासनता सत्यं शौचं मतिविनिश्चयः ।
पराभिप्रायवेदित्वं चारित्रं धैर्य्यमापदि ॥
लोकधार्य्यमशक्लिष्टं गुरुदेवद्विजार्च्चनम् ।
अनलस्या ह्यकोपित्वं गुणानेतान्नृपोऽभ्यसेत् ॥
कार्य्याकार्य्यविभागश्च धर्म्मार्थौ काममेव च ।
दानस्य विषये सामयोगमेवोपलक्षयते ॥
सततं प्रतिबुध्येत कुर्य्यादवसरेऽपि तत् ।
साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम् ॥
शास्त्रोपायांस्तु तत्स्थाने तानुपायान् प्रयोजयेत् ।
साम्नस्तु विषये भेदो मध्यमः परिकीर्त्तितः ॥
दानस्य विषये दण्डो ह्यधमः परिकीर्त्तितः ।
दण्डस्य विषये दानं तदप्यधममुच्यते ॥
साम्नस्तु गोचरे दण्डो ह्यधमाद्यधमः स्मृतः ।
सौजन्यं सततं ज्ञेयं भूभृतो भेददण्डयोः ॥
साम्नो दानस्य च तथा सौजन्यं याति गोचरे ।
कामः क्रोधश्च लोभश्च हर्षो मानमदौ तथा ।
एतानरिषड्वर्गान् शत्रूनिव विशातयेत् ॥
सेवाः कार्य्येषु युञ्जीत लोभगर्व्वौ विवर्ज्जयेत् ।
तेज एव नृपाणान्तु तीव्रं क्रूरस्य वै यथा ॥
तत्र गर्व्वं रोगयुक्तकायवत्तन्तु संत्यजेत् ।
आखेटकाक्षौ स्त्रीसेवा पानञ्चैवात्मदूषणम् ॥
वाग्दण्डयोश्च पारुष्यं सप्तैतानि विवर्ज्जयेत् ।
परस्त्रीषु विरक्तासु सेवामेकान्ततश्चयेत् ॥
सतीषु निजनारीषु प्रेम्णा कुर्य्याच्च सेवनम् ।
रतिपुत्रप्रदा दारास्तांस्तु नैकान्ततश्चयेत् ॥
तयोः सिद्धेऽपि स्त्रियः सेवा वर्ज्जयित्वातिसक्तताम् ।
द्यूतयानं प्रमादानां स्थानं नित्यं विवर्ज्जयेत् ॥
अर्च्चास्तथा न कुर्व्वीत सतकार्य्यावज्ञिनाग्रगान् ।
अन्यैः कृतं कदाचित्तु सेवेत नात्मनाचरेत् ॥
अकार्य्यकरणे बीजं ज्ञात्वानार्य्य विवर्ज्जनम् ।
वर्जयेत् सततं पानं शौचमाङ्गल्यनाशनम् ।
अर्थक्षयकरं नित्यं त्यजेच्चैवात्मदूषणम् ॥
अभिग्रस्तेषु चौरेषु घातकैश्चाततायिषु ।
सततं पृथिवीपालो दण्डपारुष्यमाचरेत् ॥
नान्यत्र दण्डपारुष्यं कुर्य्यान्नृपतिसत्तमः ।
वाक्पारुष्यन्तु सर्व्वत्र नैव कुर्य्यात् कदाचन ॥
रक्षणीयं सदा सत्यं सत्यमेकं परायणम् ।
क्षमां तेजस्विताञ्चैव प्रज्ञावानपि आचरेत् ॥
यानासनाश्रयद्वैधसन्धयो विंशदीरिताः ।
अभ्यसेत् षड्गुणानेतान् तेषां ज्ञानञ्च साधयेत् ॥
यः प्रमादं न जानाति स्वामे दृष्टौ तथा व्यये ।
कोषे जनपदे दण्डे न च राज्येऽवतिष्ठते ॥
कोषे जनपदे दण्डे चैकैकञ्च त्रयं त्रयम् ।
प्रज्ञावादिनियुञ्जीत रक्षेन्नैकान्ततश्चिमान् ॥
मित्रे शत्रावदासीने प्रभावं विध्वपोरयेत् ।
उत्पत्तौ विजिगीषायां धर्म्मज्ञेऽरिवर्गके ॥
शरीरयात्रानिर्व्वाहे क्रियेत सततं नृपैः ।
मन्त्रनिश्चयसम्भूतां बुद्धिं सर्व्वत्र योजयेत् ॥
अमात्ये शासने राज्ये पुत्रेष्वन्तःपुरेषु च ।
छद्मदर्शनञ्च भाविन्यां स्वस्यानां परसाधनम् ।
आदानं सैन्यकरयोर्व्वन्धनं गजवाजिनोः ।
मूल्यसञ्जसुखानाञ्च योजनं सततं जनैः ।
प्रपाशागारसेतूनां रक्षणञ्चेति चरमम् ॥

एतदर्थासु वर्गेषु चारान् सम्यक् प्रयोजयेत् ॥
कार्य्याकार्यविभागाय चाष्टवर्गाधिकारिणाम् ।
अष्टौ चारान्नियुञ्जीयादष्टवर्गेषु पार्थिवः ॥
दशसन्धेषु युञ्जीत क्रमतः शृणु तानि मे ।
स्वामिसचिवराष्ट्राणि मित्रं कोषो बलन्तथा ॥
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ।
दुर्गयुक्तस्वाष्टवर्गे चारं नाम्नि योजयेत् ॥
तस्मादिमानि ज्ञेयानि पञ्च चारपदानि तु ।
शुद्धान्तेष्वेव पुत्रेषु सक्तूपादौ महानसे ॥
शस्त्रादाशीनयोश्चैव बलाबलविनिश्चये ।
आदौ दशसु चैतेषु चाराञ्छास्त्रा प्रयोजयेत् ॥
न यत्र प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् ।
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत् ॥
यथा नियोगसेवेषां यो यो यत्रान्यथाचरेत् ।
ज्ञात्वा तत्र नृपचारैर्दण्डयेद्वा नियोजयेत् ॥
चारैरेषु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः ।
प्रदोषसमये एकैकशदानीमेव साधयेत् ॥
स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे ।
नियुक्तास्तान् मध्यरात्रौ एकैकशयत्रापि मन्त्रिणि ॥
एतान् चारान् स्वयं पश्येन्नृपतिर्मन्त्रिणा विना ।
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् ॥
नैकवेषधरश्चारो नैको नीतिसाहवर्जितः ।
संस्तुतो नहि सर्वत्र नातिदीर्घो न वामनः ॥
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ।
न वित्तविभवैर्हीनो न भार्य्यापुत्रवर्जितः ॥
कार्य्यचारो नृपतिना शुद्धतत्त्वविनिर्णये ।
अनेकवेषग्रहणक्षमं भार्य्यासहितेष्वंतम् ॥
बहुदेशश्रवोभिज्ञं पराभिप्रायवेदकम् ।
दृढभक्तं प्रकुर्व्वीत चारं शस्त्रमयाभयम् ॥
अधिष्ठितेत् स्वयं राजा कृषिमात्मसमैक्षया ।
वणिक्पथे च दुर्गादौ तैस्तैः शस्त्रातियोजयेत् ॥
अन्तःपुरे पितृसुल्यान् प्रौढान् दृष्टान्नियोजयेत् ।
वक्तान् प्रकाशया दृष्टान् स्त्रियो या बुद्धितत्-
पराः ॥ * ॥
शुद्धान्तचारि युञ्जीयात् स्त्रियो दृष्टा मनीषिणीः ।
नैकः स्वपेत् कदाचित्तु नैको भुञ्जीत पार्थिवः ॥
नैकाकिनीञ्च महिषीं प्रवेष्टेचाय नैकवः ।
अमात्यानुपधाशुद्धान् भार्याः पुत्रांस्तथैव च ॥
प्रकुर्य्यात् सततं भूपः स्वप्रसादं समाचरन् ।
धर्म्मार्थैकाममोक्षेषु प्रत्येकपरिशोधनैः ॥
उपेत्य स्त्रीयते यस्मादुपधा परिकीर्त्तिता ।
अथ कामोपधाशुद्धान् भार्याः पुत्रांस्तु शोधयेत् ॥
धर्म्मोपधाभिर्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः ।
एभिर्थैस्तथा दानैरिङ्गितैश्च नृपता भवेत् ॥ * ॥
तस्माच्छास्त्रेषु राज्यार्थी धर्म्ममेवं समाचरेत् ।
अनेनैवाभिचारेण यज्ञैर्वा पार्थिवो ह्ययम् ।
प्राप्नोत्यश्नाति राजा त्वं भविष्यसि न संशयः ॥
इति धर्म्मो नृपस्यैव अश्वमेधादिकञ्च यत् ।
स्वर्गं न कुरुते भूपस्तस्मात्तं कुरु सत्तम ! ॥
एवं मन्त्रैस्तथा यत्नात् नृपः कार्य्यान्तिकान् दिशान् ।
तैरज्ञातान् स्वयं ज्ञात्वा शक्नोयात्तस्य तेजसः ॥
यदि राज्याभिलाषेण सचिवो धर्म्ममाचरेत् ।
नृपतौ वाधिकं कुर्य्याद्धर्म्मे तं हीनतां नयेत् ॥
आभिचारिकमत्यर्थं कुर्व्वाणन्तु विघातयेत् ।
प्रवासयेदृत्विजन्तु पार्थिवो ह्याभिचारिकम् ॥
एषा धर्म्मोपधा ज्ञेया तैरमात्यान् सदा चरेत् ।
एताद्दशीं तथैवान्यामुपधां धर्म्मतश्चरेत् ॥ * ॥
कोषाध्यक्षान् समामन्त्र्य राजामात्यान् प्रतीक्ष-
येत् ।
पुत्रानन्यान् प्रति तथामन्त्र्य संवरवत्तमान् ॥
अयं हि प्रचुरः कोषो सदायत्तो नरोत्तम ।
आनये तव सम्मत्या तदयं त्वं प्रतीच्छसि ॥
तवाप्यलब्धदक्षाकं जीवनञ्च भविष्यति ।
त्वत्तापि प्रचुरैः कोषैः किं किं नो वा करिष्यसि ।
एवमन्यैः कोषगतैरुपायैरुपसत्तम ॥
पुत्रामात्यादिकान् सर्व्वान् सततं परिशोधयेत् ।
कोषदोषकरान् हन्याद्वर्त्तुमिच्छूंश्चिवारयेत् ॥
देवचित्तान् विमन्येत कुर्य्याद्वै कोषरक्षणम् ॥ * ॥
दासीञ्च शिल्पिनीवृंदा मेधाधृतिमतीः स्त्रियः ।
अन्तर्ग्रहेषु या यान्ति विदिता सचिवादिभिः ।
ता राजा रहसि स्थित्वा भार्य्यादिभिरलक्षितः ॥
अभिमन्त्र्याथ संमन्त्र्य प्रेरयेत् सचिवान् प्रति ।
ता गत्वा हृदयं बुद्ध्वा स्त्रियो वै ज्ञाततत्परा ॥
महिषीप्रमुखा राज्ञस्ता वै कामयते शुभाः ।
तत्राहं योजयिष्यामि यदि ते वर्त्तते सुहृत् ।
सचिवस्त्वां कामयते तदयोग्यो वरवर्णिनि ! ।
तं सङ्गमयितुं शक्ता यदि श्रद्धा तवास्त्यहम् ॥
इत्यनेन प्रकारेण नानोपायैस्तथेतरैः ।
भार्य्याः पुत्रीर्दुहितृश्च क्षुधाश्च प्रमुखास्तथा ॥
शोधयेत् सचिवान् पुत्रान् पौत्रादीन् सेवकां-
स्तथा ।
कामोपधाविशुद्धासु ज्ञातयेदविचारयन् ॥
स्त्रियश्च दृष्ट्वा योग्येन ब्राह्मणांस्तु प्रवासयेत् ।
मोक्षमार्गावसक्तासु हिंसापैशुन्यवर्जितम् ।
धर्म्मैकसारं नृपतिः सचिवं परिवर्ज्जयेत् ॥
मोक्षमार्गावसक्तासु दक्षानपि न दक्षयेत् ।
दक्षबुद्धिस्तु सर्व्वत्र तस्मात्तं परिवर्ज्जयेत् ॥ * ॥
इति ऊनं चोपधाभिरुपधां बहुधा पुनः ।
विवेचिता चोग्रसत्त्वा तच्छास्त्रे तत्र बोधयेत् ॥
विग्रहं सततं राजा परैर्न सम्यगाचरेत् ।
भूवित्तमित्रलाभेषु निश्चितेष्वेव विग्रहः ॥
सप्ताङ्गेष्वप्रमादश्च सदा कार्य्यो नृपोत्तमैः ।
कोषस्य सञ्चयं रक्षां सततं सम्यगाचरेत् ॥ *
मन्त्रिणस्तु नृपः कुर्य्याद्विप्रान् विद्याविशारदान् ।
विषयज्ञान् कुलीनांश्च धर्म्मार्थकुशलाञ्शुचीन् ॥
मन्त्रयेत्तैः सभं काले नात्यर्थं बहुभिश्चरेत् ।
एकैकशैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
तस्यैवैव समस्तेषु धान्यस्य व्यपदेशतः ।
सप्तङ्गं मन्त्रयेत् स्वस्थमारब्धं मन्त्रयेत्तु ॥
अरण्ये गिरिशृङ्गे वा न यामिन्यां कदाचन ।
शिशून् शास्त्रान्तगान् पङ्गून् मूकान् ये चारि-
कास्तथा ॥
वर्ज्यन्तेष्वन्तरगतेषु मनुष्यानुद्धतांस्तथा ।
दूरस्थं मन्त्रभेदेन नृपाणां यत्र जायते ॥
न तच्छक्यं समाधातुं दक्षैर्नृपशतैरपि ।
दक्षांस्तु दक्षयेद्दक्षैरदक्षान् दक्षयेन्नहि ॥
अदक्षयन्नृपो दक्षानदक्षांश्चापि दक्षयन् ।
नृपतिर्याचतां प्राप्य चौरकिल्बिषमाप्नुयात् ॥ *
दुर्गन्तु सततं कुर्य्यात् प्राकारादृशतोरणैः ।
दूषिताम्बुगराद्राणा दूरे दुर्गाश्रयं चरेत् ॥
दुर्गे बलं नृपाणान्तु नित्यं दुर्गे प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ॥
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ।
अरण्यवनदुर्गञ्च शैलदुर्गं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गङ्कुर्व्वन् पुरङ्कुर्य्यात्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरञ्चरेत् ॥
अदृष्टाकृतिदुर्गञ्च सततं कुलगाश्रयम् ।
यथा राक्षसराजस्य लङ्का दुर्गा विशा पुरा ॥
यथैः पुरं श्रोत्रियाख्यं तेजो दुर्गे प्रतिष्ठितम् ।
यतस्तदाजनाकारमतो भद्रः श्रिया वृतः ॥
सौभाख्यं शाल्वराजस्य नगरं पञ्चकोद्यकम् ।
दिवि यद्गमते राज्ञस्तच्च भद्रं भविष्यति ॥
दशायोध्याश्रयं भूप ! पुरमिक्ष्वाकुभूभुजाम् ।
धनुराकृति तच्चापि ततो भूरिजयप्रदम् ॥
दुर्गभूमौ यतेद्दुर्गां दिक्पालांश्चैव द्वारतः ।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ।
ततो दुर्गं नृपः कुर्य्यात् सततं जयहृद्ये । * ॥
न ब्राह्मणान् सदा राजा कदाचिदवमन्यते ।
अवमत्य नृपो विप्रान् प्रेत्येह दुःखभाग्भवेत् ॥
न विरोधस्तु तैः कार्य्यः स्वजि तैर्वा न चादरैः ।
ज्ञात्वाकालेषु सततं तानेव परिपूजयेत् ।
नैषां निन्दां प्रकुर्व्वीत नाभ्यसूयां तथाचरेत् ॥
एवं नृपो महाबुद्धिस्सङ्गमङ्गलसंयतः ।
अष्टमादौ चारचक्षुर्गुणवान् सुधिर्यवः ॥
प्रेत्येह महतीं सिद्धिं प्राप्नोति सुखभोगवान् ।
वैर्गुणैर्योजितश्चात्मा तैः पुत्रानपि योजयेत् ॥
नृपस्य च सततञ्च सततं स्वं विनाशयेत् ।
सततञ्च भूपतनयो विकारं याति विषयम् ॥
निर्विकाराय सततं तस्मै परिपूजयेत् ।
भोजने शयने याने पुरुषाणाञ्च वीक्षणे ॥
नियोजयेत् सदाचारान् भूपः कामविचेष्टने ।
अस्वतन्त्राः स्त्रियो नित्यं ज्ञानये संभवन्ति हि ॥
तस्मात् कुमारं महिषीसुपधाभिर्मनोहरैः ।
शोधयित्वा नियुञ्जीत यौवराज्यावरोधयोः ।
अन्तःपुरपरीवेषे तु सततञ्च निषेधयेत् ॥
भूपपुत्रस्य भार्यायाः परिचारे तथैव च ।
अयं विशेषः संक्षेपान्नृपधर्म्मो मयोदितः ॥
पुत्राणां शुश्रूषायां भार्य्यायामपि भूपते ।
उग्रदा राजनीतीनां तत्राणि च वदिष्यति ॥
चकारान्यान् विशेषांस्तु तयोक्तव्येषु शोधयेत् ।
एवं राजा महाभागो राजनीतौ विशेषतः ॥
कुर्व्वन्न सीदति सदा भूयश्चीं श्रियमश्नुते ॥"
इति कालिकापुराणे राजनीतिविधिर्ने ८५
अध्यायः ॥ * ॥

अन्यत्तु औशनसस्मृत्यर्थकामन्दकपञ्चतन्त्रनीतिमयूखहितोपदेशग्रन्थावलम्बभारतीय-राजधर्म्मादौ द्रष्टव्यम् ॥

नीतिघोषः, पुं, (नीतिरेव नीत्यात्मको वा घोषो रवो यस्येति ।) दृढस्तिरथः । इति त्रिकाण्डशेषः ॥ (नीतेर्नयस्य घोषः ।) नयध्वनिश्च ॥

नीतिसारः, पुं, (नीतिरेव सारो यस्येति ।) इन्द्रं प्रति दृढस्यत्युक्तनीतिग्राह्यविशेषः । अयं चाणक्यसंग्रहमूलम् । गरुड़पुराणे अष्टाध्यायेष्वस्ति । बाहुल्यभिया तत् ससुदायं न लिखित्वा अष्टानामध्यायानां प्राथमिकाष्टश्लोका लिख्यन्ते । यथा,—

"सङ्गिः सङ्गं प्रकुर्व्वीत सिद्धिकामः सदा नरः ।
नासङ्गिरिह लोकाय परलोकाय वा हितम् ॥१॥
आपदर्थं धनं रक्षेदारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेदारैरपि धनैरपि ॥ २ ॥
यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते ।
ध्रुवाणि,तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ३ ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥४॥
भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥ ५ ॥
गुणवत्सु नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डिते च गुणाः सर्व्वे सर्व्वे दोषाश्च केवलम् ॥६॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥७॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुवस्तुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"८॥

इति गारुड़े ॥

नीथः, पुं, (नयति प्रापयतीति । नी+"हनिकुषिनीरमिकाशिभ्यः क्थन् ।" उणा २ । २ । इति क्थन् ।) नियन्ता । प्रापयिता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (नी+भावे क्थन् । नयनम् । इति उज्ज्वलदत्तः ॥ यथा, ऋग्वेदे । १ । १०० । १२ ।

"सहस्रचेताः घृतनीथ ऋभ्वा ॥"

क्लीबम् । यथा, ऋग्वेदे । ३ । १२ । ५ ।

"नीथाविदो ऽवितारः ॥"

"नीथाविदस्तोत्राभिज्ञाः ।" इति तद्भाष्ये सायनः ॥)

जले, क्ली । इति संक्षिप्तसारोणादिवृत्तिः ॥ (नीयतेऽनेनेति । करणे+क्थन् । प्रापणहेतुभूते, त्रि । यथा, ऋग्वेदे । १ । १०४ । ५ ।

"प्रत्न यत्स्था नीथादर्शि ॥"

"यद्यदा नीथा नयनहेतुभूता स्था सा पदवी प्रत्यदर्शि ।" इति तद्भाष्ये सायनः ॥)

नीध्रं, क्ली, (नितरां ध्रियत इति । नि+धृ+मूलविभुजादित्वात् कः ।) वल्लीकम् । वनम् । नेमिः । चन्द्रः । रेवतीनक्षत्रम् । इति हेमचन्द्रः ॥ नीत्रमपि पाठः ॥

नीपः, पुं, (नी+"पानीवेत्यादिभ्यः पः ।" उणा ३ । २१ । इति पः । बाहुलकात् गुणाभावः ।) कदम्बवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (यथा, ऋतुसंहारे । ३ । १२ ।

"त्यजा कदम्बकूटजार्জ্জुनसर्জ্জनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥"

क्वचित् क्ली । यथा,—

"नीपं सभार्गकं पीलु लवणभूम्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नङ्गरहारि च ॥"

इति चरके सूत्रस्थाने सप्तविंशोऽध्याये ॥

"गरदोषहरं नीपं प्राचीनामलकन्तथा ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

धाराकदम्बः । इति राजनिर्घण्टः ॥ वन्यकदम्बवृक्षः । नीलाशोकवृक्षः । इति मेदिनी । पे, ८ ॥

नीयमानं, त्रि, (नीयते इति । नी+कर्म्मणि यानच् ।) प्राप्यमाणम् । यथा, कालिकापुराणे ।

"नीयमानो न गच्छेच्चेन्महिषीमरणं तदा ॥"

नीरं, क्ली, (नयति प्रापयति स्थानात् स्थानान्तरमिति । नी प्रापणे+"स्फायितञ्चीति ।" उणा २ । १३ । इति रक् । यद्वा, "अयेरापः ।" इति श्रुतेः निर्गतं रादस्मेरिति, "अङ्गोऽधिरङ्गेरक्षः स्वरूपम् ।" इति स्मृतेः निर्गतो रोऽग्नियंस्मादिति वा । "ह्रस्वोपे पूर्व्वस्य दीर्घोऽणः ।" ६ । ३ । १११ । इति रस्योपे पूर्व्वदीर्घः ।) जलम् । इत्यमरः । १ । १० । ४ । (यथा, गीतगोविन्दे । १ । ८ ।

"क्षितिरति विपुलतरे तिष्ठति तव पृष्ठे
धरणिधारणकिणचक्रगरिष्ठे ।
केशव धृतसूकररूप
जय जगदीश हरे ॥")

रसः । इत्युणादिकोषः ॥ नीरे अन्नप्रशस्यानि यथा, गरुड़पुराणे ।

"निष्ठीवाद्यक्तमूत्रास्थिविषाण्यस्थु न संक्षिपेत् ॥"

(अस्य पानविधेयता विधीयते यथा,—

"वाप्युद्भवन्तत् प्रवदन्ति धीरा
नीरं समासेन निगद्यतेऽत्र ।
यत् श्रीमतां चैव महायतीनां
बलप्रदं पथ्यतरं प्रदिष्टम् ॥"

"विपक्वे लवणीकृता विषयुतं तप्तं घनं पेशिलं
दत्तयाऽम्लमनार्त्तवं हि सलिलं दुर्गन्धि वै
गर्हितम् ।
नानाजीवदिमिश्रितं गुरुतरं पर्य्यायपङ्काविल-
चन्द्रार्कांशुसुगोपितं न च पिबेन्नीरं सदोषान्वितम् ॥"

इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥)

नीरजं, क्ली, (नीरे जले जायते इति । जन+डः ।) कुठौषधिः । (यथा, सुश्रुते चिकित्सितस्थाने । २५ ।

"पञ्चत्वयं लौहरजोऽञ्जनञ्च
यष्ट्याह्वयं नीरजसारिवे च ॥")

पद्मम् । इति मेदिनी । जे, २४ ॥ (यथा, भमरशतके । ४ ।

"नीतं नम्र नवीननीरजवने पीतं मधु स्वेच्छया ॥")

मुक्ता । इति राजनिर्घण्टः ॥ जलजाते, त्रि ॥

नीरजः, पुं, (नीरे जायते इति । जन+डः ।) उदञ्जनुः । इति शब्दरत्नावली ॥ उशीरं । इति राजनिर्घण्टः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ९४६ ।

"उद्भिन्निविक्रमो वैद्यो विरजो नीरजोऽमरः ॥")

नीरजः, [स्] त्रि, (निर्गतो रजो धूलिः कुसुमपरागादिर्वा यत्र ।) निर्भूलिदेशपुष्पादि । (यथा, महाभारते । १३ । ८१ । २० ।

"सर्व्वा मणिमयी भूमिः सर्व्वकाञ्चनवालुका ।
सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का नीरजाः शुभाः ॥")

अरजस्कायाम् स्त्री ॥

नीरतः, त्रि, (निर्गतं रतं रमणं यस्मात् ।) विरतः । रमणाभाववान् । यथा,—

"दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि हृदयेशः ।
आकाताः खलु वर्षा वर्षादपि यासु बाबरो दीर्घः ॥"

इत्युद्भटश्लोकमञ्जरी ॥

नीरदः, पुं, (नीरं जलं ददातीति । नीर+दा+कः ।) मेघः । यथाह चटकपरः ।

"निश्चितं खलुपेत्य नीरदैः प्रियशीला हृदयावनीरदैः ।"

मुस्तकम् । इति राजनिर्घण्टः ॥ (निर्गच्छति रदो दन्तो यस्य ।) रदशून्ये, त्रि ॥ यथा,—

"आस्वाद्य निरवद्यैर्यं विरहिवधूनां हृदूनि मांसानि ।
करकामिषेव मन्ये निर्हीवति नीरदोऽस्त्रीणि ॥"

इत्युद्भटः ॥

नीरधिः, पुं, (नीराणि धीयन्तेऽस्मिन्निति । नीर+धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति शब्दरत्नावली ॥

नीरनिधिः, पुं, (नीराणि निधीयन्तेऽत्रेति । नीर+नि+धा+किः ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, माघे । ३ । ७० ।

"पारे जलं नीरनिधेरपश्य-
न्नुरारिरारोलपलाशराशीः ॥")

नीरन्ध्रं, त्रि, (निर्गतं रन्ध्रं छिद्रं यस्मिन् ।) घनम् । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा, माघे । ८ । ३ ।

"नीरन्ध्रद्रुमशिंशिरां भुवं व्रजन्तो:
साशङ्कं सुहुरिव कौतुकात् करेणाः ।
पस्पर्श द्रुमलिनाकुलीलतानां
शाखानामतुहिनरश्मिरन्तराले: ॥")

छिद्ररहितम् । यथा,—

"श्रीमन्नाथ तवार्जितोर्জितयशःसंग्रहसुक्तावली-
मादायैव विधिर्व्विधित्सुरमलं हारं त्वदीये-
र्गुणैः ।
नीरन्ध्रामवलोक्य तामपि ततो नान्तं गुणानामहो
उत्पित्सुर्मुमुचे गलान्तरे सकिरन्नाक्षाक्षतक्षारकाः ॥"

इति कालीदासः ॥

नीरसः, पुं, (नितरां रसो यत्र।) दाडिमः। इति हारावली। (निर्गतो रसो यस्य।) रसशून्ये, त्रि। यथा,—
"ब्रह्मचारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव चेदब्रह्मचारी नीरसं सर्व्वमेव तत्॥"
इति प्राचः॥

नीराडुः, पुं, (नीरस्य आडुः।) उष्ट्रः। उट्टिकाल इति भाषा॥ तत्पर्य्यायः। जलनकुलः २ जलविड्वालः ३ जलश्वः ४। इति हारावली। ५॥ उष्ट्रः ५ जलाडुः ६ नीरजः ७ नकुलः ८। इति शब्दरत्नावली॥

नीराजनं, क्ली, } (राज दीप्तौ+ल्युट्।
नीराजना, स्त्री, } नितरां राजनं यत्र। निर्+राज्+णिच्+"शासिवसिघसीनां च।" ३। ३। १०७। इति भावे युच्।) वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना। नीरस्य शान्त्युदकस्य जलनं क्षेपो यत्र सा नीराजना वा। इत्यमरटीकायां भरतः॥ *॥

तद्विधानं यथा,—
"शरत्काले महारुद्रां दुर्गायाः परिपूजनम्।
नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये॥
विधिं नीराजनस्य त्वं शृणु पार्थिवसत्तम!।
कृतेन येन चाश्वानां गजानामपि चेष्टनम्॥
आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी।
ऐशान्यां खपुरस्यैव यात्रीयात् स्थानमुत्तमम्॥
नीराजनं ततः कुर्य्यात् संप्राप्ते दिवसेऽमले।
नीराजनस्य कालस्तु पूर्व्वमुक्तस्तु ते मया॥
विधानमत्र शृणु मे कृतज्ञो भविष्यसि।
एकं वृषं महाशल्यं सुमनोहरमेव वा॥
पूजयेत् सप्तदिवसान् गन्धपुष्पादिकांशुभिः।
कृतीयादौ पूजयित्वा नयेत्तं यज्ञमण्डपम्॥
चेष्टां विरूपयत्नस्य जानीयाच्च शुभाशुभम्।
परराष्ट्रविमर्दः स्याद्यदि पलायते॥
म्रियते राजपुत्रस्तु यदि चाम्बुधिं सुप्यति।
नीयमानो न गच्छेत्तन्महिषीमरणं तदा॥
तथैव सुखनाशाधिशृङ्गं कुर्य्याद्यदि यदि।
वृषाद्याभिमुखः कुर्य्यात्तत्काल्यां जयेद्रिपून्॥
उत्तीर्य्य दक्षिणाग्रन्तु पदमग्रे भवेत् पुरा।
तदा जयेत् समस्तांश्च नृपतिर्विजयेद्रिपून्॥
प्रातर्नीराजनं कुर्य्याद्दशम्यां नृपसत्तम!।
तदग्रतो तु दातव्या तस्यामेव समाचरेत्॥
कार्त्तिके पञ्चदश्यां वा तदभावे तु पार्थिवः।
ऐशान्यां खपुरस्योर्द्धसमाने वोद्धृय॥
दशहस्तन्तु विपुलं कुर्य्याद्वै तत्र तोरणम्।
दार्व्विग्रहसमायुक्तं दृढबोद्धृयविस्तृतम्॥
यत्राग्नेयं मण्डपं कुर्य्यात् मध्ये वेदिं विनिर्म्मयेत्।
वेद्याश्चोत्तरतश्चाश्ववेदिं कुर्य्यादनुत्तमाम्॥
यत्र संस्थाप्य चाश्वञ्च पूजितव्यः पुरोहितैः।
सर्व्वालङ्करणायुक्तानामश्वानस्यार्थवा नृपः॥
मन्त्रसंग्राहितैश्चक्रैर्भ्रमणायापि विभूषयेत्।
तोरणं कनकैः रत्नैस्तथा नानाविधैर्म्मणैः॥
भल्लातकं प्राणिकृतं सिद्धार्थं सैन्धवस्य तु।
कण्डदेशे निबध्नीयात् पृष्टिग्रान्यर्द्धमेव च॥
वैद्यवं मण्डलं कृत्वा दिक्पालांश्च नवग्रहान्।
विश्वेदेवांस्तु मन्त्रेण विष्णुमुखान् प्रपूजयेत्॥
आग्नेयस्तिलैश्च पुष्पैश्च मिश्रीकृत्य पुरोहितः।
रवेस्तु वरुणस्यैव प्रजेशस्य तथैव च॥
पृथक्कृतस्य विप्रोक्त होमं सप्ताहमाचरेत्।
एकैकस्य सहस्रं वा अष्टोत्तरशतस्य वा॥
कुर्य्यात्तु प्रत्यहं होमं चतुर्व्वर्गस्य सिद्धये।
समिधश्चापि होतव्याः पलाशं खदिरं तथा॥
औदुम्बरश्च काश्मर्य्यमश्वत्थश्च पुरोहितः।
सौवर्य्यान् राजतान् वापि मार्त्तिकान् वा यथेच्छया॥
कुर्य्यात्तु कलसानष्टौ फलपल्लवयोजितान्।
छिपेत्तेषु घटेष्वेव समङ्गां हरितामकम्॥
चन्दनञ्च तथा कुष्ठं प्रियङ्गुञ्च मनःशिलाम्।
अञ्जनञ्च हरिद्राञ्च श्वेतां दन्तीं तथैव च॥
भल्लातकं पूर्व्वकोक्तं सहदेवीं शतावरीम्।
वर्षां सनागकुसुमां सोमराजीं खगुप्तिकाम्॥
तुल्यञ्च करवीरञ्च तुलसीदलमेव च।
एतानि निःक्षिपेन्मध्ये कलसानां पुरोहितः॥
कनकैरसुजैर्यैश्च दलाभिः सुकुसुमौ तथा।
कर्त्तव्यौ भ्रान्तिकामेन नीराजनविधौ नृप!॥
एवं सप्ताहपर्य्यन्तं पूजाभिर्हवनेन च।
पूर्व्वोक्तान् पूजयित्वा तु नृपः सप्ताहमाचरेत्॥
यावन्नीराजनं कुर्य्यात्तावद्राजा वसेद्गृहे।
राज्ञो न यत्रभूमौ तु निवसेच्छान्तिमिच्छुकः॥
नारोहयेत्तु तुरगं गजं वा तत्र पार्थिवः।
यावत् सप्ताहपर्य्यन्तं यानेनान्येन वै व्रजेत्॥
भक्ष्यैर्नानाविधैश्चैव मधुपायसयावकैः।
मोदकैर्व्वा बलिं कुर्य्याच्चान्नयञ्जनसम्भवैः॥
पूर्व्वोक्तानान्तु देवानां सप्ताहं यावदुत्तमम्।
सप्तमेऽह्नि तु रेमन्तं पूजयेत्तोरणान्तरे॥
सूर्य्यपुत्रं महाबाहुं दिशुभं कवचोज्ज्वलम्।
ज्वलन्तं शुक्लवस्त्रेण केशाशुदृश्य वाससा॥
कक्षां वामकरे बिभ्रद्धिबन्धुं करं पुनः।
खड्गं चर्म्म तस्य वलगायां सितसैन्धवसंस्थितम्॥
एवंविधन्तु रेमन्तं प्रतिमायां घटेऽपि वा।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे॥ *॥
पूजयित्वा तु रेमन्तं दिरदं तुरगन्तथा।
आहताम्बरसंवीतं रक्तचन्दनसन्नितम्॥
सुवर्णाबद्धनिस्त्रिंशं विचित्रकवचादिभिः।
युक्तन्तु होमकुण्डस्य ऐशान्यामश्ववेदिकाम्॥
पूर्व्वं स्नात्वा नयेदश्वगजपालः पृथक् पृथक्।
नीयमाने गजे चाग्रे पूर्व्वोक्तञ्च निमित्तकम्॥
यत्राद्रीक्षेत नृपतिः पलं चैवावधारयेत्।
होमकुण्डस्योत्तरस्यां वेद्यान्ते चर्म्मणि स्थितः॥
दैवविदा चाश्वविदा सहितो वीक्ष्य सैन्धवम्।
नीताय तुरगायाशु भक्तपिण्डौ सुगन्धिनौ॥
दद्यात् पुरोहितस्तत्र संमन्त्र्य भ्रान्तिमन्त्रकैः।
ततश्चाद्यदि निर्व्वेत्तदनीयाद्वा हयः स च॥
तदा स्यात् सर्व्वकल्याणं विपरीतमतोऽन्यथा॥
शाखामौदुम्बरीमाद्यां सकुशाञ्च घटोदके।
आघ्राप्याघ्राप्य तुरगान् गजान् भूपञ्च सैनिकान्।
रथांश्च संशृणोन्मन्त्रैः भ्रान्तिकैः पौष्टिकैस्तथा॥
सेचयन् सहितैर्विप्रैश्चतुरङ्गं पुरोहितः।
दिक्पालानां यहाणाञ्च मन्त्रैश्चैव सर्व्वदैः॥
बहुधा चाभिषिञ्चाथ ततः सौवर्णदर्पणम्।
वीक्षयित्वा नृपश्चर्त्विक् ततो मन्त्रिगणमेव च॥
राजपुत्रांस्तथामात्यानन्यानपि च पौरवान्।
कल्पयन् द्विजशार्दूलः सर्व्वानेव तु दर्शयेत्॥*॥
चतुरङ्गबलस्यापि कृत्वैवं भ्रान्तिपौष्टिके।
दृष्ट्वायं भ्राम्यतां कृत्वा भिचारकमन्त्रकैः॥
हृदि शूलेन विद्ध्वा तं शिरः खड्गेन छेदयेत्।
आचार्य्यः कविकां पश्चादभिमन्त्र्य हयाय वै॥
ऐन्द्रैः प्राभाकरैर्मन्त्रैर्दद्याद्दक्षे स्वयं पुनः।
तमनेन तु मन्त्रेण समारुह्य नृपस्तदा॥
गच्छेदुत्तरपूर्व्वांशु दिशं सर्व्वबलैर्युतः।
ऋत्विक्पुरोहिताचार्य्याः सर्व्व एव नृपस्तथा॥
अनुगच्छेयुरव्यग्रा निमित्तानि बलोकयन्।
वादित्रघोषैस्तुमुलैरातपत्रैश्च तस्तथा॥
गच्छेन्नीराजने राजा दारबन्निव मेदिनीम्।
मन्त्रिविद्वत्समुत्साहस्वर्णरत्नैरलङ्कृतः॥
क्रोशमात्रं ततो गत्वा पूर्व्वद्वारेण पार्थिवः।
खपुरं प्रविशेद्विप्रैर्यज्ञं यायात् पुरोहितः॥
तत्र गत्वा दक्षिणाशु हिरण्यं गां तथा तिलम्।
दत्वा पञ्चाद्द्विजेभ्यस्तु दद्याद्दानानि शक्तितः॥
एवं नीराजनं कृत्वा बलानाञ्च महीपतिः।
प्रवेशेद्वै च स्थितां कक्षीं नृपतिः प्राप्नुयात्तथा॥
क्षमश्चाक्षतसंजात सागरोद्भव सैन्धव।
येन सत्येन वहसे शत्रून् तेनेह मां वह॥
येन सत्येन रेमन्तं येन सत्येन भास्करम्।
वहसे तेन सत्येन विजयाय वहस्व माम्॥
आघ्राप्य नृपमन्त्राभ्यामश्वारोहणमाचरेत्।
आरुह्याग्रे महिष्यास्तु शुद्धान्तं प्रविशेत्ततः॥
महिषीं च ततो भूपं पर्य्यङ्कोपरिसंस्थितम्।
दूर्व्वाक्षतैः सविद्वार्थैः स्त्रीभिः सह समर्चयेत्॥
क्षते तु भूमियज्ञे तृतीयायां नीराजने।
क्षतकं यदि जायेत तन्न दुष्यति केवलम्॥
क्षतके क्षतके वापि पार्थिवस्तु यथा तथा।
कृत्वं नीराजनं कुर्य्यात्तन्मात्रञ्च विधेयतः॥
सद्यःशौचं भवेद्राज्ञां व्यवहारविलोकने।
तथा विवासिते यज्ञे परराष्ट्रविमर्द्दने॥
जयन्ते कथितो राज्ञां नीराजनक्रमो मया॥"
इति कालिकापुराणे ८६ अध्यायः॥*॥

(निर्+राज+भावे ल्युट्।) निर्मञ्छनम्। आरति इति भाषा। तच्च पञ्चनीराजनं यथा.
"पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया।
द्वितीयं सोदकाक्षेण तृतीयं धौतवाससा॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम्।
पञ्चमं प्रक्षिपातेन साङ्गेन यथाविधि॥"
इति कालोत्तरतन्त्रम्॥

तस्य वर्त्तिकादिप्रमाणं यथा,—
"कुङ्कुमागुरुकर्पूरघृतचन्दननिर्म्मिताः।
वर्त्तिकाः सप्त वा पञ्च कृत्वा वन्दापनीयकम्॥

कुर्य्यात् सप्तप्रदीपेन गरुडध्वजादिवाग्रके:।
हरे: पञ्चप्रदीपेन बहुधो भक्तितत्पर:॥"
इति पाद्मोत्तरखण्डे १०७ अध्याय:॥*॥

अथ नीराजनमाहात्म्यम्।

स्कान्दे ब्रह्मनारदसंवादे।
"बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवोपरि।
कुर्य्यादाराचिकं यस्तु कल्पकोटिं वसेद्दिवि॥
कर्पूरेण तु य: कुर्य्यान्नक्षत्रा केशवस्य तु।
आराचिकं मुनिश्रेष्ठ! प्रविशेद्विष्णुमव्ययम्॥"
तदेवान्यत्र।
"दीप्तिमन्तं शकर्पूरं करोत्याराचिकं नृप!।
क्षणस्य वसते लोके सप्तकल्पानि मानव:॥"
तत्रैव शिवोमासंवादे।
"मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरे:।
सर्व्वं सम्पूर्णतामेति कृते नीराजने शिवे!॥"
हरिभक्तिसुधोदये।
"कृत्वा नीराजनं विष्णोर्दीपावल्या सुभक्तया।
तमोविकारं जयति जिते तस्मिंश्च को भय:॥"
अन्यत्र च।
"कोटयो ब्रह्महत्यानामगम्यागमकोटय:।
दृष्ट्वालोकमात्रेण विष्णो: साराचिकं सुखम्॥
यच्च दीपस्य माहात्म्यं पूर्व्वं लिखितमस्ति तत्।
द्रष्टव्यं सर्व्वमत्रापि प्रायेणाभेदतोऽनयो:॥
अत: सादरमुत्थाय महानीराजनञ्चेदम्।
द्रष्टव्यं दीपवत् सर्व्वैर्वन्ध्यमाराचिकञ्च यत्॥"
तदुक्तं श्रीपुलस्त्येन विष्णुधर्म्मे।
"धूपं चाराचिकं पश्येत् करान्याञ्च प्रवन्दते।
कुलकोटिं समुद्धृत्य याति विष्णो: परं पदम्॥"
मूलागमे च।
"नीराजनञ्च य: पश्येत् देवदेवस्य चक्रिण:।
सप्तजन्मनि विप्र: स्यादन्ते च परमं पदम्॥"
इति हरिभक्तिविलास:॥
अवश्यिष्टं आराचिकशब्दे द्रष्टव्यम्॥

नीरिन्द्र:, पुं, (नि+ईर् कम्पने+भावे क्विप्। नीरा नितरां कम्पनेन इन्द्रति सुभगेन शोभते इति। इदि परमैश्वर्य्ये+उन्।) अश्वत्थवृक्ष:। इति शब्दचन्द्रिका॥ आश्वेओड़ा इति भाषा॥

नीरुक्, [ज्] पुं स्त्री, (निर्+रुज+भावे क्विप्।) रोगाभाव:। तत्पर्य्याय:। स्वास्थ्यम् २ वार्त्तम् ३ अगामयम् ४ आरोग्यम् ५। (रुज+भावे क्विप्। निर्गतो रुक् रोगो यस्य।) रोगशून्ये, त्रि। तत्पर्य्याय:। पटु: २ उल्बण: ३ वार्त्त: ४ कल्य: ५। इति हेमचन्द्र:॥२।१३८॥ (यथा, सुश्रुते चिकित्सितस्थाने २५ अध्याये।
"एतेन पाल्यो बहुर्न्नो नीरुजो निरुपद्रवा:॥")

नीरुजं, क्ली, (निर्गता रुजा रोगो यस्मात्।) कुष्ठौषधि:। इति शब्दरत्नावली॥

नीरुज:, त्रि, (निर्गता रुजा रोगो यस्य।) रोगाभाववान्। यथा, ग्राम्यपुराणे।
"ग्राम्योऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम्।
मृतात्मा नीरुज: श्रीमांस्तस्मात्रोगाद्विमुक्तवान्॥"

नीरूपं, त्रि, (निर्गतं रूपमस्येति।) रूपाभावविशिष्टम्। यथा। नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेनेति वेदान्तपरिभाषा॥

नीरेणुक:, त्रि, (निर्गतो रेणु: पांशुर्यस्मात्। कप्।) धूलिशून्यभूम्यादि:। यथा। नीरेणुकभूरभूदिति सतृपद्यरत्नाकर:॥

नीलं, क्ली, (नीलतीति। नील+अच्।) नीली। इति मेदिनी। ले, ३३॥ काचलवणम्। तालीशपत्रम्। विषम्। सौवीराञ्जनम्। (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्॥")
तुत्थम्। इति राजनिर्घण्ट:॥ मृत्याङ्गाष्टोत्तरघृतकरणान्तर्गतकरणविशेष:। इति सङ्गीतदामोदर:॥

नील:, पुं, पर्व्वतविशेष:। स तु इलावृतस्योत्तरतो रम्यकवर्षस्य सीमापर्व्वत:। प्राग्वायत उभयत: क्षीरोदावधि द्विसहस्रयोजनपृथु:। अयुतयोजनोत्सेध:। इति श्रीभागवते ५ स्कन्धे १६ अध्याय:॥ (तथाच विष्णुपुराणे।२।२।१०।
"नील: श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वता:।
तत्प्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे॥"
"तत्प्रमाणौ द्वौ प्राक्पश्चिमतो र्दैर्घ्येण निषधनीलौ। यद्यपि जम्बुद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखायामेव सुखलक्षप्रमाणत्वं निषधनीलौ तु तन्मध्यरेखातो दक्षिणोत्तरञ्च सलक्षयोजनसहस्रान्तरितत्वादीषन्न्यूनौ तथापि स्थूलदृष्ट्या लक्षप्रमाणावित्युक्तम्॥" इति तट्टीकायां स्वामी॥*॥
(नीलाश्मनदृश्य:। तत्पर्य्यायो यथा,—
"नील: स्यान्नीलपत्रिका॥"
इति वैद्यकरत्नमालायाम्॥)
मणिविशेष:। नीलम् इति पारस्यभाषा॥ अस्याधिष्ठातृदेवता शनि:। यथा,—
"भाविकसुलक्षणविद्दमाभि
रारक्तमतं पुष्पकवचनीलम्।
गोमेदवैदूर्य्यकमर्कतै: स्यू
रत्नान्यथोऽस्य सुदे सुवर्णम्॥"
इति सुकुमारचिन्तामणि:॥

तत्पर्य्याय:। सौरिरत्नम्२ नीलाश्मा३ नीलोत्पल: ४ इन्द्रनीलो५ महानील:६ सुनीलक:७। अस्य गुणा:। तिक्तत्वम्। उष्णत्वम्। कफपित्तानलापहत्वम्। शरीरे धृते सौरिमङ्गलदो भवति। इति राजनिर्घण्ट:॥*॥
अथ इन्द्रनीलमणेरुत्पत्तिपरीक्षादि यथा,—
"तत्रैव सिंहलवधूकरपल्लवाग्र-
व्यालम्बबालनवनीकुसुमप्रवाले।
दैत्ये प्रपात दितिजस्य सितान्तकाग्नं
प्रोत्पुल्लनीरजसमद्युतिनेत्रयुग्मम्॥
तत्प्रत्ययाद्भुवभयग्रीभनवीचिभाषा
विस्तारिणी जलनिधेरुपकच्छभूमि:।
प्रोद्भिन्नकेतकवनप्रतिबद्धलेखा
सान्द्रेन्द्रनीलमणिरत्नवती विभाति॥

सद्यासितालदलभृङ्गसनाभिभङ्ग-
प्राग्भारयुद्धाभहरकण्ठकलायपुष्पै:।
शुकैतरैश्च कुसुमैर्गिरिकर्णिकाया-
स्तस्मिन् भवन्ति मणय: सदृशावभास:॥
अन्ये प्रसन्नपयस: पयसां निधातु-
रस्मुत्थि: शिखिगलप्रतिमास्तथान्ये।
नीलीरसप्रभवबुद्बुदभाश्च केचित्
केचित्तथा समदकोकिलकण्ठभास:॥
एकप्रकारा विसदृशवर्णश्रीभावभासिन:।
जायन्ते मणयस्तस्मिन् इन्द्रनीला महागुणा:॥
स्तनपायाश्रिलावधकर्कराभासंयुता:।
अभ्रिकापटलच्छायावर्णदोषैश्च दूषिता:॥
तत एव हि जायन्ते मणयस्तत्र भूरय:।
शास्त्रसंबोधितधियस्तान् प्रशंसन्ति सूरय:॥
धार्य्यमाणस्य ये इष्टा: पद्मरागमणेर्गुणा:।
धारयादिन्द्रनीलस्य तानेवाप्नोति मानव:॥
यथा च पद्मरागाणां जातुकर्त्तृभयं भवेत्।
इन्द्रनीलेष्वपि तथा द्रष्टव्यमविशेषत:॥
परीक्षाप्रत्ययैर्यैश्च पद्मराग: परीक्ष्यते।
त एव प्रत्यया इष्टा इन्द्रनीलमणेरपि॥
यावत्तत्र क्रमेदर्च्चिं पद्मराग: प्रयोगत:।
इन्द्रनीलमणिस्तस्तात् क्रमेत सुमहत्तरम्॥
तथापि न परीक्षार्थं गुणानामतिदृष्टये।
मणिरयौ समाधेय: कथञ्चिदपि कश्चन॥
अग्निमात्रापरिज्ञाने दाहदोषैश्च दूषित:।
सोऽनर्थाय भवेद्गर्त्तु: कर्त्तु: कारयितुस्तथा॥
काचोत्पलकरवीरस्फटिकाद्या इह बुधै: सर्व्वे-
दूर्य्या:।
कथिता विजातय इमे सदृशा मणिनेन्द्रनीलेन॥
गुरुभावकठिनभावावेतेषां नित्यमेव विज्ञेयौ।
काचाद्यथावदुत्तरविवर्द्धमानौ विशेषेण॥
इन्द्रनीलो यदा कश्चित् विभर्त्तिगात्रवर्णताम्।
रथवीथौ तथा ताम्रौ करवीरोत्पलाभौ॥
यस्य मध्यगता भाति नीलस्निग्धायुधप्रभा॥
तदिन्द्रनीलमित्याहुर्मणेरार्घं सुवि दुर्लभम्॥
यस्तु वर्णस्य भूयस्त्वात् क्षीरे शुद्धे स्थित:।
नीलतां तन्नयेत् सर्व्वं महानील: स उच्यते॥
यत् पद्मरागस्य महागुणस्य
रूक्षं भवेच्चाससमुत्थितस्य।
तदिन्द्रनीलस्य महागुणस्य
सर्व्वर्त्तुसंस्थासुसितस्य रूक्षम्॥"
इति गरुडपुराणे इन्द्रनीलपरीक्षा॥*॥
वाणरान्तर:। इति मेदिनी। ले, २६॥ नीलवर्ण:। नीलौषधि:। निधिविशेष:। लाञ्छनम्। इति हेमचन्द्र:॥ मङ्गुघोष:। इति त्रिकाण्डशेष:॥ वटवृक्ष:। इति राजनिर्घण्ट:॥ नीलवर्णयुक्ते, त्रि। इत्यमर:॥ (यथा, देवीभागवते।५।८।६८।
"नीलं सत्त्वगुणोपेतं प्रादुरास महद्युति॥")
नीलवर्णवस्तूनि यथा। शुक:१ शैवालम्२ दूर्व्वा३ बालछत्रम्४ बुध:५ वंशाङ्कुर:६ मरकत:७ इन्द्रनीलमणि:८ सूर्य्यकान्तादीनि९

इति कविकल्पलता ॥ अजमीढस्य राज्ञः नीलिन्यां पत्न्यां जातः पुत्रः । यथा । "अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्रोऽभवत् ।" इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (माहिष्मतीवासी नृपतिविशेषः । अग्निस्तु अस्य दुहितरमुपसंयम्य वरेणेनं छन्दयामास परनृपादभयञ्चास्मै ददतां । गच्छति काले पाण्डवः सहदेवस्तु दिग्विजयक्रमेण अस्य नगरमवरोध्य वैश्वानरात् महद्भयमवाप्तवान् । ततो हयवाहनं स्तुत्वा शान्तिमलभत । एतद्विवरणं महाभारते । २ । ३१ । अध्याये विस्तरतो द्रष्टव्यम् ॥ * । नागविशेषः । यथा, महाभारते । १ । ३५ । ७ ।

"नीलानीलौ तथा नागौ कल्माषशबलौ तथा॥"

नीलकं, क्ली, (नीलमेव । स्वार्थे कन् ।) काचलवणम् । वर्णलोहम् । असनवृक्षे, पुं । इति राजनिर्घण्टः ॥

नीलकण्ठः, पुं, (नीलः नीलवर्णः कण्ठो यस्य ।) शिवः । (यथा, महाभारते । १।१८।४३—४४।

"त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषम् ।
प्राणसञ्जीवकरणार्थं ब्रह्मणो वचनाच्छिवः ॥
दधार भगवान् कण्ठे मन्त्रमूर्त्तिर्महेश्वरः ।
तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुतः ॥")

मयूरः । इत्यमरः । ३ । ३ । ३६ । (यथा, मेघदूते । ७६ ।

"यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥")

पीतसारः । दात्यूहः । यामघटकः । खञ्जरीटः । इति हेमचन्द्रः ॥ मूलके, क्ली । इति राजनिर्घण्टः ॥ * ॥ विजयदशम्यां नीलकण्ठदर्शनविधिर्यथा,—

"कृत्वा नीराजनं राजा बलवृद्धौ यथाबलम् ।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ ॥"

दर्शनानन्तरं नमस्कारमन्त्रो यथा,—

"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट ! नमोऽस्तु ते ॥
त्वं योगयुक्तो मुनिपुङ्गवस्य-
मद्यप्रभृतामेषि शिखोऽग्रमेव ।
त्वं दृश्यसे प्रावृषि निर्गतायां
त्वं खञ्जनाख्यमयो नमस्ते ॥"

दर्शविशेषोपरिस्थितस्य तस्य दर्शनफलं यथा,—

"अश्वेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिभाद्रलेषु ।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः ॥"

दिग्विशेषे फलं यथा,—

"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला अग्नौ हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः ससुद्राजये ।
वायव्यां वरवल्कलान्वसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥"

अशुभखञ्जनदर्शनप्रायश्चित्तं यथा,—

"अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम् ।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः ॥"

इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

(पीतशालवृक्षः । अस्य पर्य्यायो यथा,—

"नीलकण्ठः पीतशालः पीतकः प्रियकोऽसनः॥"

इति वैद्यकरत्नमालायाम् ॥)

नीलकण्ठाक्षं, क्ली, (नीलकण्ठो महादेवस्तत्प्रियोऽक्षो यत्र ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥ (नीलकण्ठः खञ्जनस्तस्य अक्षिणीव अक्षिणी यस्य । बहु समासे ।) खञ्जनाक्षे, त्रि ॥

नीलकन्दः, पुं, (नीलः कन्दो मूलं यस्य ।) महिषकन्दभेदः । तत्पर्य्यायः । सर्पाक्षः२ वनवासी ३ विषकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयसुखजाठराग्नित्वम् । रुच्यत्वम् । सितस्य तस्य महासिद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णमूलञ्च ॥

नीलकमलं, क्ली, (नीलं कमलं पद्मम् ।) नीलवर्णपद्मम् । तत्पर्य्यायः । उत्पलम् २ नीलपङ्कजम् ३ नीलपद्मम् ४ नीलाब्जम् ५ । अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । रुच्यत्वम् । रसायने श्रेष्ठत्वम् । देहदार्ढ्यकेश्यदत्त्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णजलञ्च ॥

नीलकुन्तला, स्त्री, (नीला नीलवर्णाः कुन्तला यस्याः ।) गौर्य्याः सखीविशेषः । यथा,—

"सखी रत्नसखी नाम जगदेवं सुचिस्मिता ।
तां निवार्य्यापरा प्राह सखी सा नीलकुन्तला ॥"

इति दुर्गाभक्तितरङ्गिण्यां दुर्गापूजापद्धतौ ॥

नीलकुरण्टकः, पुं, (नीलः कुरण्टकः ।) नीलझिण्टी । इति रत्नमाला ॥ (विस्तृतिरस्य नीलझिण्टीशब्दे ज्ञातव्या ॥)

नीलक्रान्ता, स्त्री, (नीलेन नीलवर्णेन क्रान्ता ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलक्रौञ्चः, पुं, (नीलः क्रौञ्चः ।) नीलबकः । तत्पर्य्यायः । नीलाङ्गः २ दीर्घग्रीवः ३ अतिजागरः ४ । इति राजनिर्घण्टः ॥

नीलगर्गेण्डः, पुं, (नीलो नीलवर्णो गर्गेण्डः ।) नीलवर्णगण्डपतिः । इति भूतडामरः ॥ अपिच ।

"लीलागलत्कुलल्लोलकालव्यालविलासिने ।
गर्गेण्डाय नमो नीलकमलामलकान्तये ॥"

इति लीलावती ॥

नीलग्रीवः, पुं, (नीला नीलवर्णा ग्रीवा यस्य ।) महादेवः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ३६ । ७४ ।

"देवदेव महादेव नीलग्रीव जटाधर ॥")

नीलवर्णग्रीवायुक्ते, त्रि ॥

नीलङ्गुः, पुं, (निलङ्गति गच्छतीति । नि+लगि गतौ + "खरुग्रङ्कुपीयुनीलङ्गुलिगु ।" उणा० ।२। ३७। इति कुप्रत्ययेन निपातनात् पूर्व्वदीर्घे साधुः ।) अतिक्षुद्रजन्तुमात्रम् । इत्यमरटीकायां भरतः ॥ क्रिमिभेदः । शृगालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (भ्रमरावली । प्रस्थनम् । इति विश्वः । गे, ५० ॥)

नीलचर्म्म, [न्] क्ली, (नीलं चर्म्म फलत्वग् यस्य ।) परूषकम् । इति राजनिर्घण्टः ॥ (नीलञ्च तत् चर्म्म चेति ।) नीलवर्णाजिनञ्च ॥ (नीलचर्म्मविशिष्टे, त्रि ॥)

नीलजं, क्ली, (नीलात् जायते इति । जन+डः ।) वर्णलोहम् । इति राजनिर्घण्टः ॥ नीलजाते, त्रि ॥ (स्त्री, नीलात् नीलपर्व्वतात् जायते इति । वितस्ता नदी । यथा, राजतरङ्गिण्याम् । ५ । ६६ ।

"पाषाणसेतुबन्धेन सुर्य्येणाद्भुतकर्म्मणा ।
सम्प्राप्तमभवद्ब्रह्म निखिलं नीलजा सरित् ॥")

नीलझिण्टी, स्त्री, (नीला नीलवर्णा झिण्टी ।) नीलवर्णझिण्टीपुष्पवृक्षः । तत्पर्य्यायः । नीलकुरण्टः २ नीलकुसुमा ३ वाला ८ वाणा ५ दासी ६ करण्टार्त्तगला ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयमूलवातकफकासत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलतरुः, पुं, (नीलस्तरुः ।) नारिकेलः । इति राजनिर्घण्टः ॥

नीलताल:, पुं, (नीलस्तालः ।) हिन्तालः । तमालः । इति राजनिर्घण्टः ॥

नीलदूर्व्वा, स्त्री, (नीला दूर्व्वा ।) हरितदूर्व्वा । तत्पर्य्यायः । हरिता २ शाम्भवी ३ श्यामा ४ प्रीता ५ घृतपर्व्विका ६ अग्रता ७ पूता ८ घृतग्रन्थिः ९ अनुग्रवल्लिका १० शिवा ११ शिवेष्टा १२ मङ्गला १३ जया १४ सुभगा १५ भूतघ्नी १६ घृतमूला १७ महौषधी १८ विजया १९ गौरी २० शान्ता २१ ॥ (यथा निघण्टौ धन्वन्तरिः ।

"नीलदूर्व्वा स्मृता श्यामा शाद्वलं हरितं तथा ।
घृतपर्व्वा प्रीतकुम्भी प्रीतला वामनी तथा ॥")

तस्या गुणाः । हिमत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । लघुत्वम् । रक्तपित्तातिसारकफवान्तिज्वरनाशित्वञ्च । पुंस्कान्तरे रोचनत्वम् । वातापहत्वञ्च । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायान्तरं गुणान्तरञ्च यथा,—

"नीलदूर्व्वारुहानन्ता भार्गवी घृतपर्व्विका ।
श्यामा सहस्रवीर्य्या च घृतवल्ली च कीर्त्तिता ॥
नीलदूर्व्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तासवीसर्पश्लेष्मादाहश्रमान्वयान् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलध्वजः, पुं, (नीलः नीलवर्णः ध्वज इव ।) तमालवृक्षः । इति राजनिर्घण्टः ॥ (नीलो ध्वजो यस्य ।) राजविशेषः । अस्य पुरी माहिष्मती । भार्य्याज्वाला । कन्या स्वाहा लक्ष्मीप्रापाप्ज्ञाता ।

"अर्জ্জुनस्य हयो राजन्! पुरीं माहिष्मतीं ययौ ।
नीलध्वजेन वीरेण रक्षितां दुर्गमश्मिताम् ॥
नीलध्वजस्य महिषी ज्वालानाम्नी सुमध्यमा ।
स्वाहां कन्यां प्रसूता सा सुन्दरीं धर्म्मतत्परा ॥"

इति जैमिनिभारते आश्वमेधिके पर्व्वणि १५ अध्यायः ॥ नीलध्वजाविग्निष्टे, त्रि ॥

नीलनिर्गुण्डी, स्त्री, (नीला निर्गुण्डी ।) नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

नीलनिर्य्यासकः, पुं, (नीलः निर्य्यासो यस्य । कप् ।) नीलासनवृक्षः । इति राजनिर्घण्टः ॥ क्षणवर्णनिर्य्यासश्च ॥

नीलपङ्कं, क्ली, (नीलं पङ्कमिव ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ क्षणवर्णकर्दमश्च ॥

नीलपत्रं, क्ली, (नीलं पत्रं पुष्पदलं यस्य ।) इन्दीवरम् । इति शब्दचन्द्रिका ॥ नीलवर्णपत्रयुक्ते, त्रि ॥

नीलपत्रः, पुं, (नीलानि पत्राणि यस्य ।) गुञ्जालशाकम् । अञ्जनकवृक्षः । नीलासनवृक्षः । दाड़िमः । इति राजनिर्घण्टः ॥

नीलपद्मं, क्ली, (नीलं पद्मम् ।) नीलकमलम् । इति शब्दचन्द्रिका ॥ (नीलकमलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नीलपिङ्गला, स्त्री, (नीला पिङ्गला चेति कर्म्मधारयः ।) गोजातिविशेषः । यथा,—

"शर्वां जातिन्तु वक्ष्यामि शृणुष्वैकमना द्विज ! ।
प्रथमा गौरकपिला द्वितीया गौरपिङ्गला ॥
तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला ।
पञ्चमी शुक्लपिङ्गाची षष्ठी तु शुक्लपिङ्गला ॥
सप्तमी चित्रपिङ्गाची अष्टमी वभ्रुरोहिणी ।
नवमी श्वेतपिङ्गाची दशमी श्वेतपिङ्गला ॥
ताडग्रास्तेऽप्यनड्वाहः कपिलास्तु प्रकीर्त्तिताः ॥"

इति बृहद्धर्म्मपुराणे उत्तरखण्डे १५ अध्यायः ॥

नीलपिच्छः, पुं, (नीलं पिच्छं यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

नीलपुनर्नवा, स्त्री, (नीला पुनर्नवा ।) क्षणवर्णपुनर्नवाप्राकम् । नीलगदपड़ोया इति हिन्दी भाषा ॥ तत्पर्य्यायः । नीलार २ श्यामाश्र ३ क्षणाख्या ४ नीलवर्षाभूः ५ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । व्रणरोगपाण्डुश्वयथुश्वासवातकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलपुष्पं, क्ली, (नीलं पुष्पमस्य ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥ (नीलञ्च तत् पुष्पञ्चेति ।) नीलवर्णकुसुमञ्च ॥

नीलपुष्पः, पुं, (नीलं पुष्पं यस्य ।) नीलभृङ्गराजः । नीलाख्यानः । इति राजनिर्घण्टः ॥

नीलपुष्पा, स्त्री, (नीलं पुष्पं यस्याः ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलपुष्पिका, स्त्री, (नीलं पुष्पं यस्याः । कप् । कापि अत इत्वम् ।) असती । इति राजनिर्घण्टः ॥ नीली । इति रत्नमाला ॥

नीलपुष्पी, स्त्री, (नीलं पुष्पं यस्याः । ङीष् ।) नीलवृक्षा । इति रत्नमाला ॥ (श्लेष्मालिका । तत्पर्य्यायो यथा,—

"नीलपुष्पी तु निर्गुण्डी श्लेष्माली सुवहा च सा ॥"

अतसी । तस्याः पर्य्यायो यथा,—

"अतसी नीलपुष्पी च पार्व्वती स्यादुमाचमा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलफला, स्त्री, (नीलं फलं यस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

नीलभृङ्गराजः, पुं, (नीलो भृङ्गराजः ।) नीलवर्णभृङ्गराजः । नीलकेशूरिया इति नीलभेगरिया इति च भाषा । तत्पर्य्यायः । महाभृङ्गः २ महानीलः ३ सुनीलकः ४ नीलपुष्पः ५ श्यामलः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामग्रोफश्चित्रनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

नीलमणिः, पुं, (नीलो मणिः ।) खनामख्यातमणिः । तत्पर्य्यायः । मसारः २ । इति हारावली ।१४५॥ अस्य विवरणं नीलशब्दे द्रष्टव्यम् ॥

नीलमाधवः, पुं, (नीलो नीलवर्णो माधवः । नीलपर्व्वतस्थो माधवो वा ।) विष्णुः । जगन्नाथः । यथा,—

"प्रेषितोऽहं हरिं द्रष्टुमत्यं नीलमाधवम् ।
दृष्ट्वा यावत् सुपतितं वार्त्तां नेष्यामि सोऽप्यहम् ॥"

इत्युत्कलखण्डे ७ अध्यायः ॥

नीलमाषः, पुं, (नीलो नीलवर्णो माषः ।) राजमाषः । इति राजनिर्घण्टः ॥

नीलमौलिकः, पुं, (नीलमौलं नीलवर्णमिमीलनमस्यस्येति । नीलमील + ठन् ।) खद्योतः । इति शब्दमाला ॥

नीलयष्टिका, स्त्री, (नीला नीलवर्णा यष्टिकेव ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ क्षणवर्णयष्टश्च ॥

नीललोहं, क्ली, (नीलं नीलवर्णं लोहम् ।) वर्त्तलोहम् ।) इति राजनिर्घण्टः ॥

नीललोहितः, पुं, (नीलश्चासौ लोहितश्चेति । "वर्णो वर्णेन ।" २ । १ । ६८ । इति समासः । नीलः कण्ठे लोहितस्य यस्येति स्वामी ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, कुमारे । २ । ५७ ।

"संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः ।
अंशादते निधिक्षस्य नीललोहितरेतसः ॥")

चैत्रे मासि तस्य व्रतविधानं यथा,—

"चैत्रे शिवोत्सवं कुर्य्यान्नृत्यगीतमहोत्सवैः ।
स्नाला दिनत्रयं रात्रौ च हविष्याशी जितेन्द्रियः ॥
किमत्रार्घ्यं भगवति प्रसन्ने नीललोहिते ।
उपोष्य हुत्वा संक्रान्त्यां व्रतमेतत् समर्पयेत् ॥"

इति मासकृत्ये बृहद्धर्म्मपुराणम् ॥ कल्पविशेषः । इति महाभारतम् ॥ अस्य विवरणं कल्पशब्दे द्रष्टव्यम् ॥) नीलरक्तमिश्रितवर्णश्च ॥

नीललोहिता, स्त्री, (नीला लोहिता च ।) भूमिजम्बुः । इति शब्दचन्द्रिका । शिवा च ॥

नीलवर्षाभूः, स्त्री, (नीला नीलवर्णा वर्षाभूः ।) नीलपुनर्नवा । इति राजनिर्घण्टः ॥ क्षणभेके, पुं ॥

नीलवल्ली, स्त्री, (नीला नीलवर्णा वल्ली ।) वन्दाकम् । इति रत्नमाला ॥

नीलवसनः, पुं, (नीलं वसनं वस्त्रं यस्य ।) श्रीनेश्वरः । इति हारावली । १२ ॥ (बलरामः । परिधेयनीलवस्त्रत्वादस्य तथात्वम् ॥) नीलवस्त्रयुक्ते, त्रि ॥

नीलवस्त्रः, पुं, (नीलं वस्त्रं यस्य ।) बलरामः । इति हेमचन्द्रः । २ । १३६ ॥ (नीलं वस्त्रम् ।) नीलवर्णवसने, क्ली । यथा,—

"स्त्रीक्रीड़ाश्रयनीयादौ नीलवस्त्रं न दूष्यति ।
नीलीवस्त्रं न सूतेश्च नीलीमनिरयं व्रजेत् ॥"

इति गारुड़े प्रायश्चित्ताध्यायः ॥

तस्य धारणप्रायश्चित्तादि यथा । यत्र भविष्यपुराणम् ।

"शृणुष्वेति महाबाहो ! नीलीरक्तस्य धारणात् ।
वाससो गणश्रार्दूल ! गदतो मम कृतुक्षणः ॥
पालनाद्विक्रयाच्चैव उद्दृत्तेरुपजीवनात् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥
नीलीरक्तेन वस्त्रेण यत् कर्म्म कुरुते द्विजः ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥
वृथा तस्य भवेद्यज्ञो नीलीवस्त्रस्य धारणात् ।
नीलीरक्तं यदा वस्त्रं कश्चिद्विप्रस्तु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
इदमज्ञाने । ज्ञाने तु द्वैगुण्यम् । अत्रापवादः ।
नीलीत्यक्तदृक्तावापरुत्वः ।
स्त्रीणां क्रीड़ार्थसंयोगे शयनीये न दूष्यति ॥

इति प्रायश्चित्तविवेकः ॥

नीलवासाः, पुं, (नीलं वासो वस्त्रं यस्य ।) ग्रहिग्रहः । इति त्रिकाण्डशेषः ॥ (नीलवस्त्रयुक्ते त्रि । यथा, हरिवंशे । ८२ । ४३ ।

"श्रीमत्खलिकमूर्द्धानं प्रणमिष्यामि भोगिनम् ।
सहस्रशिरसं देवमनन्तं नीलवाससम् ॥")

नीलवृक्षा, स्त्री, (नीला नीलवर्णा वृक्षा ।) नीलवृक्षा । नीलवर्णवोना इति भाषा ॥ तत्पर्य्यायः । अजशृङ्गी २ नीलपुष्पी ३ अतिलोमशा ४ । इति रत्नमाला ॥ (यथा,—

"नीलवृक्षारसस्नैलसिन्धुकाक्षिकसंयुतः ।
कटुतैलं पूरयात् कर्णे निःशेषक्रिमिपातनः ॥"

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥)

नीलवृन्तः, पुं, (नीलो वृन्तः ।) वृन्तप्रभेदः । तत्पर्य्यायः । नीलः २ वातारिः ३ श्लोफनाशनः ४ नरनामा ५ नखवृन्तः ६ नखालुः ७ नरप्रियः ८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । वातामयनाशित्वम् । अग्निवृद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥

नीलवृन्तकं, क्ली, (नीलवर्णं वृन्तं यस्य । कप् ।) तूलम् । इति राजनिर्घण्टः ॥

नीलवृषः, पुं, क्षणवर्णवृषः । वृषविशेषः । तस्य लक्षणं यथा,—

"लोहितो यस्य वर्णेन मुखे पुच्छे च पाण्डरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥"

इति शुद्धितत्त्वम् ॥

अपि च।
"लोहितो यस्तु वर्णेन गुञ्जवर्णः खरो दृषः।
लाङ्गूलग्निरसोक्षेव स वै नीलदृषः स्मृतः॥"
तस्योत्पत्तिर्यथा यत्राद्यादितुल्यफलं यथा,—
"जायेरन् बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेद्वा अश्वमेधेन नीलं वा दृषमुत्सृजेत्॥"
इति देवीपुराणम्॥

नीलदृषा, स्त्री, (नीलं नीलवर्णं पुष्पफलादिकं वर्षति प्रसूते इति। दृष+इगुपधेति कः। ततष्टाप्।) वार्ताकी। इति राजनिर्घण्टः॥ (वार्ताकीशब्दोऽस्या गुणाः पर्यायाश्च ज्ञेयाः॥)

नीलव्रतं, क्ली, व्रतविशेषः। यथा,—
"यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम्।
एकान्तरितनक्ताशी समान्ते दृषभं युतम्।
वैष्णवं स परं याति नीलव्रतमिदं स्मृतम्॥"
इति मात्स्ये ८३ अध्यायः॥
नीललोहितव्रतञ्च॥

नीलशिखुः, पुं, (नीलः शिखुः।) शोभाञ्जनः। इति राजनिर्घण्टः॥

नीलसारः, पुं, (नीलः सारो यस्य।) तिन्दुकवृक्षः। इति राजनिर्घण्टः॥

नीलसिन्धुवारः, पुं, (नीलः सिन्धुवारः।) श्यामवर्णसिन्धुवारवृक्षः। नीलसिन्धुयार इति भाषा। तत्पर्य्यायः। श्रीतसहा २ निर्गुण्डी ३ नीलसिन्धुकः ४ सिन्धुकः ५ कपिका ६ भूतकेशी ७ इन्द्राणी ८ नीलिका ९ नीलनिर्गुण्डी १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। रूक्षत्वम्। कासश्लेष्मशोफसमीरकार्शिःप्रदराध्मानना शित्वञ्च। इति राजनिर्घण्टः॥

नीला, स्त्री,(नीलो नीलवर्णोऽस्त्यस्या इति। अच्। ततष्टाप्।) नीलवर्णमक्षिका। इत्यमरः। २। ५। २६॥ नीलपुनर्नवा। नीली। इति राजनिर्घण्टः॥ (कुलकः। तत्पर्य्यायो यथा,—
"कुलको भद्रतरश्चिर्टहत्पुष्पोऽतिकेसरः।
महासहा कण्टकाख्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"नीलानामौषधिस्तु नीलचीरा नीलपुष्पीलता प्रतानवहुला।" इति चरके चिकित्सितस्थाने। १ अध्यायः॥ नदीविशेषः। यथा,—
"वेणा इरावती नीला उत्तरात् पूर्ब्बवाहिनी॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये॥
यथा च महाभारते। ६। ८। ३१।
"नीला पृथिकरीचैव पर्णाशाच महानदीम्॥")
मल्लाररागस्य स्त्री। इति दृहद्धर्म्मपुराणे ४४ अः॥

नीलाङ्गः, पुं, (नीलमङ्गं यस्य।) सारसपक्षी। चासपक्षी। इति राजनिर्घण्टः॥

नीलाङ्गुः, पुं, (नितरां लिङ्गतीति। नि+लिगि गतौ+कुः। केचित् धातूपसर्गयोर्दीर्घमाहुः। इत्युज्ज्वलदत्तोक्त्या धातूपसर्गयोर्दीर्घत्वम्।) कृमिः। इत्यमरः। २। ५। १३॥ भ्रमराख्यो स्त्री। इति मेदिनी। गे, ४०॥ शुषिरम्। इति विश्वः॥

नीलाञ्जनं, क्ली, (नीलमञ्जनम्।) सौवीराञ्जनम्। (यथा, नवग्रहस्तोत्रे शनैश्चरप्रणाममन्त्रम्।
"नीलाञ्जनचयप्रख्यं रविपुत्रं महाग्रहम्।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम्॥")
तस्य उपधातुविशेषः। तस्य गुणाः। कटुत्वम्। श्लेष्मसुखरोगनेत्ररोगव्रणदाहनाशित्वम्। उष्णत्वम्। रसायनत्वम्। तिक्तत्वम्। भेदकत्वञ्च। इति राजवल्लभः॥ (अस्य शोधनविधिर्यथा,—
"नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम्।
दिनैकमातपे शुष्कं भवेत् कार्य्येषु योजयेत्॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे॥) तुत्थम्। इति राजनिर्घण्टः॥

नीलाञ्जना, स्त्री, (नीलं मेघं अञ्जयतीति। अञ्ज+णिच्+ल्युः।) विद्युत्। इति जटाधरः॥

नीलाञ्जनी, स्त्री, (नीलवत् अञ्जयतीत्यनयेति। अञ्ज+करणे ल्युट्। ततो ङीष्।) कालाञ्जनीक्षुपः। इति राजनिर्घण्टः॥

नीलाञ्जसा, स्त्री, अप्सरोभेदः। नदीविशेषः। विद्युत्। इति मेदिनी। से, ५७॥

नीलापराजिता, स्त्री, (नीला अपराजिता।) नीलवर्णापराजितालता। तत्पर्य्यायः। नीलपुष्पी२ महानीली ३ नीलगिरिकर्णिका ४ शवादनी ५ वक्तगन्धा ६ नीलसन्ध्या ७ नीलाद्रिकर्णी ८। अस्या गुणाः। शिशिरत्वम्। तिक्तत्वम्। रक्तातिसारज्वरदाहच्छर्द्युन्मादमदश्रमार्त्तिश्वासतिकासामयनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाब्जं, क्ली, (नीलमब्जमिति कर्म्मधारयः।) नीलोत्पलम्। इति रत्नमाला॥ (नीलोत्पलशब्दोऽस्य विशेषो ज्ञेयः॥)

नीलाम्बरं, क्ली, (नीलमम्बरमिव। नीलमम्बतीति वा। अबि+अरच्।) तालीशपत्रम्। इति राजनिर्घण्टः॥ (नीलश्च तदम्बरञ्चेति। नीलवस्त्रञ्च॥)

नीलाम्बरः, पुं, (नीलमम्बरं यस्येति।) बलदेवः। राक्षसः। शनैश्चरः। इति मेदिनी। रे, २७४॥ नीलवस्त्रयुक्ते, त्रि॥

नीलाम्बुजन्मन्, [न्] क्ली, (अम्बुनि जन्मास्य। ततः नीलवर्णं अम्बुजमिति।) नीलोत्पलम्। इत्यमरः। १। १०। ३७॥

नीलाम्लानः, पुं, (आम्लायति यथाकालमिति। आ+म्लै+ल्युः। नीलो नीलवर्णं आम्लानः।) पुष्पवृक्षभेदः। काला कोराटा इति हिन्दी भाषा॥ तत्पर्य्यायः। दासी २ क्षुद्रनः ३ वाला ४ आर्त्तगला ५ नीलपुष्पः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफभारुतमूलकृच्छ्रकुष्ठव्रणश्लीपित्वगदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाम्बी, स्त्री, (नीला अम्बी।) क्षुपभेदः। नल्लचुलगुड़ इति हिन्दी भाषा॥ तत्पर्य्यायः। नीलपिण्डी २ श्यामाम्बी ३ दीर्घग्राविका ४। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। कफवातहरत्वञ्च। इति राजनिर्घण्टः॥

नीलालुः, पुं, (नीलवर्णं आलुरिति कर्म्मधारयः।) कन्दभेदः। तत्पर्य्यायः। असितालुः २ श्यामालुकः ३। अस्य गुणाः। मधुरत्वम्। शीतत्वम् पित्तदाहश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाश्मा, [न्] पुं, (नीलवर्णः अश्मा प्रस्तरभेदः।) नीलमणिः। इति राजनिर्घण्टः॥

नीलासनः, पुं, (नीलवर्णः असनो वृक्षभेदः।) असनवृक्षविशेषः। पियाशालप्रभेदः। तत्पर्य्यायः। नीलबीजः २ नीलपत्रः ३ सुनीलकः ४ नीलद्रुमः ५ नीलसारः ६ नीलनिर्य्यासकः ७। अस्य गुणाः। कटुत्वम्। शीतत्वम्। कषायत्वम्। कुष्ठकण्डूदहनाशित्वम्। सारकत्वम्। तत्र सितस्य श्रेष्ठत्वञ्च। इति राजनिर्घण्टः॥ रतिबन्धविशेषः। यथा,—
"लिङ्गोपरिस्थिता नारी ग्रथ्यां कृत्वा पदद्वयम्।
हृदये दत्तहस्ता च बन्धो नीलासनो मतः॥"
इति सारदीपिका॥

नीलिका, स्त्री, (नीलक+टाप्। कापि अत इत्वम्। नीलीव इवार्थे कन् टाप् पूर्ब्बह्रस्वः। इति केचित्।) नीलसिन्धुवारः। इति राजनिर्घण्टः॥ नीलिनी। (पर्य्यायोऽस्या यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुच्छा श्यामीया मधुपर्णिका॥
क्षीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
श्वेफालिका। इति मेदिनी। के, १११॥ नेत्ररोगविशेषः। यथा,—
"दोषे दृष्ट्याश्रिते तिर्य्यगेकं वै मन्यते द्विधा।
तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः॥
यत्तद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम्।
अस्मिन्नपि तमोभूते नातिरूढे महागदे॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः।
निर्म्मलानि च तेजांसि भास्वितानि च पश्यति।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः॥"
क्षुद्ररोगभेदः। यथा,—
"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
सुखमागत्य सहसा मण्डलं विवृणोत्यतः॥
नीरुजं तनुकं श्यावं तं यत्नमिति निर्दिशेत्।
कृष्णमेवं गुरुं गात्रे सुखे वा नीलिकां विदुः॥"
इति माधवकरः॥
जलस्य ज्वरः। यथा, "भूमेरूषरा वृक्षस्य कोटरः जलस्य नीलिका इत्यादि।"
इति ज्वरप्रकरणे विजयरक्षितः॥
क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"कृष्णमेवं गुरुं वक्त्रे गात्रे वा नीलिकां विदुः।"
एवं गुरुं नीरुजं तनुकं मण्डलम्॥
तच्चिकित्सा यथा,—
"शिरावेधैः प्रलेपैश्च तथान्यैरुपाचरेत्।
यत्नश्च नीलिकां वापि न्यच्छश्च तिलकालकम्॥
वटाङ्कुरो मधूकश्च प्रलेपादुत्थनाशनाः।
यत्नं मञ्जिष्ठया लेपः प्रशस्तो मधुयुक्तया॥

अथवा लेपनं शस्तं शशस्य रुधिरेण च ।
यङ्गकुङ्कुमयष्ट्यक् स्यादनामूत्रेण पेषिता ॥
जातीफलस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम् ।
अर्कक्षीरहरिद्राभ्यां मर्दयित्वा प्रलेपनात् ॥
सुखकार्ष्ण्यं समं याति चिरकालोद्भवं द्रुतम् ।
मक्षरैः क्षीरसंपिष्टैर्लिम्पमाखं हृताम्बितैः ॥
सप्तरात्रात् भवेत् सत्यं पुष्करीकदलोपमम् ।
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ॥
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ।
युवानपिड़कानाशु व्यङ्गानाञ्च विनाशनम् ।
स्यादेतेन सुखञ्चापि वर्जितं नीलिकादिभिः ॥
कालीयकं कलम्बक इति लोके । युवानपिड़का युवानन्तत्र पिड़का एषोदरादित्वान्नकारलोपः।
कुङ्कुमं चन्दनं लोध्रं पत्राङ्गं रक्तचन्दनम् ।
कालीयकसुगोरञ्च मञ्जिष्ठा मधुयष्टिका ।
पञ्चकं पद्मकं कुष्ठं पद्मं गोरोचना त्रिफा ।
लाक्षा दारुहरिद्रा च गैरिकं नागकेशरम् ॥
पलाशकुसुमञ्चापि प्रियङ्गुश्च वटाङ्कुराः ।
मालती च मधूच्छिष्टं सर्षपाः सुरभिर्व्यंशा ॥
चतुर्गुणपयःपिष्टैरेतैरुचमिते पृथक् ।
प्रलेपनान्नाशिना वैद्यस्तैलं प्रस्थद्वयोन्मितम् ॥
वदनाभ्यङ्गनादेतद्व्यङ्गं नीलिकया सह ।
तिलकं मार्षकं व्यच्छं नाशयेन्नुखदूषिकाम् ॥
पद्मिनीकण्टकं वापि हरेच्छतुमञ्चिं तथा ।
विदधाद्वदनं पूर्णचन्द्रमण्डलसुन्दरम् ॥
पत्तङ्गं वकम् इति लोके। कालीयकं कलम्ब इति लोके। सुरभिर्व्यंशा महाभरी इति लोके।
कुङ्कुमाद्यं तैलम् ।" इति भावप्रकाशः ॥

नीलिनी, स्त्री, (नीलः प्रशस्ततयाऽस्त्यस्या इति। इनिः। ततो ङीप् ।) नीलीवृक्षः। इत्यमरः। २ । ४ । ६५ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"नीलिनीक्षगलाम्बी स्यादन्तःकोटरपुष्पापि ।
अजाजी नीलपुष्पा स्यान्नीलपुष्पातिलोमशा ॥"
यथा च ।
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था श्यामीश्या मधुपर्णिका ॥
स्फोतका कालकेशी च नीलपुष्पा च सा स्मृता ।
नीलिनी रेचनी तिक्ता केश्या मोहघ्नमापहा ॥
उष्णा हन्त्युदरश्लीपवातरक्तकफानिलान् ।
आमवातसदावर्त्तं मन्दञ्च विषमुल्बणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्यामशिपुटा। इति शब्दरत्नावली ॥
अजमीढस्य पत्नी। इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (तथा च हरिवंशे। ३२ । ४५ ।
"अजमीढस्य पत्नास्तु तिस्रो रूपसमन्विताः ।
नलिनी केशिनी चैव धूमनी च वराङ्गना ॥")

नीली, स्त्री, (नीलो निष्पाद्यत्वेनाऽस्त्यस्याः इति। नील + अच् ततो ङीष् ।) वृक्षभेदः। नीलेर गाछ इति भाषा ॥ तत्पर्य्यायः। काञ्जा २ स्फोतकिका ३ श्यामीश्या ४ मधुपर्णिका ५ रञ्जनी ६ श्रीफली ७ तुत्था ८ तूली ९ दोला १० नीलिनी ११ । इत्यमरः। २ । ४ । ६४ ॥ नीला १२ तूली १३ द्रोली १४ मेला १५ । इति भरतः ॥ नीलपत्री १६ राज्ञी १७ नीलिका १८ नीलपुष्पी १९ काली २० श्यामा २१ द्रोधनी २२ श्रीफला २३ श्याम्या २४ भद्रा २५ भारद्वाजी २६ मोचा २७ छाया २८ वञ्जनकेशी २९ महाफला ३० असिता ३१ स्फोतनी ३२ केशी ३३ चारटिका ३४ गन्धपुष्पा ३५ श्यामलिका ३६ रञ्जपत्री ३७ महाबला ३८ स्थिररञ्जा ३९ रञ्जपुष्पी ४० तूली ४१ तूलिका ४२ द्रोलिका ४३। इति शब्दरत्नावली ॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। केश्यत्वम्। कासकफमरुद्विषोदरव्याधिगुल्मानुव्रणाग्निजित्व । इति राजनिर्घण्टः ॥ नीलिकारोगः। इति मेदिनी। ले, २९ ॥

नीलीरागः, पुं, स्थिरप्रेमपुरुषः। तत्पर्य्यायाः। स्थिरसौहृदः २। इति हेमचन्द्रः। १ । १४० ॥ (नीलीसङ्घातो रागः।) नीलवर्णः। इति नीलशब्दस्य नानार्थे शब्दरत्नावली ॥ नायकनायिकयोः पूर्व्वरागविशेषः। यथा,—
"नीलीकुसुम्भमञ्जिष्ठाः पूर्व्वरागोऽपि च त्रिधा ।"
तल्लक्षणोदाहरणे ।
"न चातिशोभते यत्नापेति प्रेम मनोगतम् ।
नीलीरागः स विज्ञेयो यथा श्रीरामसीतयोः ॥"
इति साहित्यदर्पणम् ॥

नीलोत्पलं क्ली, (नीलं नीलवर्णंसुत्पलमिति ।) नीलवर्णोत्पलम्। नीलशापला इति भाषा। तत्पर्य्यायः। उत्पलकम् २ कुवलयम् ३ इन्दीवरम् ४ कन्दोट्यम् ५ सौगन्धिकम् ६ सुगन्धम् ७ कुड्मलकम् ८ असितोत्पलम् ९ ॥ (यथा, भागवते । ५ । २४ । १० ।
"भयकुलेक्षणकञ्जसुभितनीरनीरवकुसुदकुवलयकञ्जारनीलोत्पललोहितशतपत्रादिवनेषु ॥")
अस्य गुणाः। अतिस्वादुत्वम्। शीतत्वम्। सुरभित्वम्। सौस्थकारित्वम्। पाके अत्यन्ततिक्तत्वम्। रक्तपित्तहरत्वञ्च। इति राजनिर्घण्टः ॥

नीलोत्पली, [न्] पुं, (नीलोत्पलं नीलोत्पलवर्णं मनोहरत्वेनाऽस्त्यस्य इति इनिः।) मञ्जुघोषः। इति त्रिकाण्डशेषः ॥

नीवरः, पुं, (नयत्यात्मानं यत्र कुत्रचित् देहयात्रानिर्व्वाहणायेति। नी + "हिनीवरश्चलरेति ।" उणा ३ । १ । इति वरच् प्रत्ययेन निपातनात् गुणाभावात् साधुः।) भिक्षुः। इत्युणादिकोषः ॥ वञ्जिनकम्। वाल्कम्। इति मेदिनी। रे, १७५ ॥ परिव्राट्। पङ्कः। जले, क्ली। इति संक्षिप्तसारोणादिवृत्तिः ॥

नीवाकः, पुं, (निरन्नं नियतं वा उप्यते इति। नि + वप् + घञ् कुत्वं उपसर्गस्य दीर्घत्वं च।) महार्घहेतोर्धान्यादिषु जनानामादरातिशयः। तुलाधरण्याधिक्यम्। क्रमाक्रमादरः। मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम्। इति भरतः॥ तत्पर्य्यायः। प्रयामः २। इत्यमरः। ३ । २ । २३ ॥

नीवारः, पुं, (नि + व + घञ् उपसर्गस्य दीर्घत्वं च।) तृणधान्यभेदः। इत्यमरः। २ । ९ । २५ ॥ उड़ीधान इति वङ्गभाषा। तीनी इति हिन्दीभाषा। तत्पर्य्यायः। अकृष्यधान्यम् २ मुनिधान्यम् ३ तृणोद्भवम् ४ अरण्यशालिः ५ । (यथा, शाकुन्तले । १ अङ्के ।
"नीवाराः शुकगोटरार्भकसुखभ्रष्टास्तरूणामधः ॥")
अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। पथ्यत्वम्। पक्वत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः ॥ तन्नामगुणाः।
"प्रसाधिका तु नीवारस्तृणाग्नमिति च स्मृतम्।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातहृत् ॥"
इति भावप्रकाशः ॥

नीविः, } स्त्री, (निश्चयति निवीयते वा। नि +
नीवी, } वेञ् + "नौ वो यलोपः पूर्व्वस्य च दीर्घः।" उणा । ४ । १३५ । इति इन् यलोपः निश्चब्दस्य दीर्घत्वञ्च। ततः ङीप्रकारादिति वा ङीष् ।) परिधेयम्। वस्त्रिका ग्रन्थनम्। राजपुत्रादेर्वस्त्रकः। इति भरतः ॥ स्त्रीकटीवस्त्रबन्धः। कोँचड़ी इति भाषा। (यथा, महाभारते । २ । ६१ । १८ ।
"एकवस्त्रा त्वधोनीवी रोदमाना रजस्वला ॥")
स्त्रीत्पलवस्त्रं पुंस्कटीवस्त्रबन्धेऽपि। इत्यमरटीकायां भरतः। तथा च। "नीवीं विस्रंस्य परिहितवस्त्रस्य वामाङ्गन्यस्तिं मोचयित्वा आचमनमाह बौधायनः।" इति यजुर्व्वेदिभाष्यधृतवस्त्रम्। मूत्रस्य पिचादिभाण्डे मोटकबन्धनम्। इति मधुरेशः ॥

नीवृत्, पुं, (नियतं वर्त्तते वसत्यत्र जनसमूह इति। नि + वृत् + अधिकरणे क्विप्। "वहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः।) जनपदः। इत्यमरः। २ । १ । ८ ॥ "ये अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मङ्गलत्वेन ख्याते ग्रामसमूहे।" इति भरतः ॥

नीव्रं, क्ली, (नितरां व्रियते इति। नि + वृ + बाहुलकात् कप्रत्ययेन साधुः।) छदिप्रान्तभागः। छाँचि इति भाषा। तत्पर्य्यायः। वलीकम् २ पटलप्रान्तम् ३। इत्यमरः ॥ नीव्रम्। इति भरतः। नेमिः। चक्रः। रेवतीनक्षत्रम्। वनम्। इति मेदिनी। रे, ५३ ॥

नीशारः, पुं, (निःशेषेण नितरां वा शीर्य्यन्ते हिमवाय्वादयोऽनेन अस्मादस्य वा। शॄ + घञ्। उपसर्गस्य दीर्घत्वञ्च।) हिमानिलनिवारकप्रावरणम्। इत्यमरः। २ । ६ । ११८ ॥ हिमानिलप्रावरणं वनं मङ्गलञ्च। इति रमानाथः ॥ काञ्जारः। इति नयनानन्दः ॥ मशारि इति कश्चित्। काञ्जपटः। कानात् इति कश्चित्। इति भरतः ॥ (यथा,—
"गौरिवाङ्गतनीशारः प्रायेण शिशिरे शुभः ॥"
इति सिद्धान्तकौमुद्याम् । १ । १ । २१ । इत्यस्य वृत्तौ ॥)

नीहारः, पुं. (निर्हियते इति। निर्+हृ+घञ्। उपसर्गस्य घञीति दीर्घत्वम्।) घनीभूतग्निग्धिरम्। तत्पर्य्यायः। अवश्यायः २ तुषारः ३ तुहिनम् ४ हिमम् ५ प्राले यम् ६ महिका ७। इत्यमरः। १। ३। १८॥ खजलम् ८ निग्धाजलम् ९। इति त्रिकाण्डशेषः॥ निहारः १० मिहिका ११। इति शब्दरत्नावली॥ (यथा, महाभारते। १। २५८। २।

"खाण्डवञ्च वनं सर्व्वं पाण्डवो बहुभिः शरैः।
प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः॥")

अस्य गुणः। कफवायुवर्द्धकत्वम्। इति राजवल्लभः॥

नु, अ, (नौति शुदति वा। णु स्तुद वा+यथायथं कर्त्तरीदिति मितद्वादित्वात् डुः।) वितर्कः। (यथा, शाकुन्तले। १।

"निष्क्रम्यचामरशिखाच्युतकर्णभङ्गाः
यावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते॥")

अपमानः। विकल्पः। (यथा, महाभारते। ५। १०५। ३।

"किं नु गर्हाम्यथात्मानमथ भीष्मं दुरासदम्॥")

अनुनयः। अतीतः। प्रश्नः। (यथा, महाभारते। ३। ६३। १२।

"कथं नु राजसूयेन क्षुधितः श्रमकर्षितः॥")

हेतुः। अपदेशः। इति मेदिनी। अव्ययं, ४१॥

नुः, पुं, अनुकारः। इति दोषदेवः। यथा,—

"नुवौ पूर्व्वेण सम्बन्धौ सन्यौ तु परगामिनौ।"

इति दुर्गादासः॥

नुद, णि वधे। इति कविकल्पद्रुमः॥ (तुदां-कुटां-परं-सकं-सेट्।) णि, नुदति अनुनौत् नुनोद। इति दुर्गादासः॥

नुतं, त्रि, (नु+क्तः।) स्तुतम्। यथा,—

"तं वेदशास्त्रपरिनिष्ठितबुद्धिबुद्धिं
धर्म्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम्।
लक्ष्मीसिखं कवकपिञ्जलटाकलापं
वासं नमामि शिरसा तिलकं मुनीनाम्॥"

इति पुराणम्॥

नुतिः, स्त्री, (नु+भावे क्तिन्।) स्तुतिः। इत्यमरः। १। ६। ११॥ (यथा, भर्त्तृहरिः।

"परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः॥")

पूजा। इति शब्दरत्नावली॥

नुन्नः, त्रि, (नुद्+क्तः। "नुदविदेति।" ८। २। ५६। इति पाक्षिको नत्वाभावः।) क्षिप्तः। प्रेरितः। इत्यमरः। ३। १। ८७॥

नुन्नः, त्रि, (नुद+क्तः। निष्ठातस्य पूर्व्वदस्य च नत्वम्।) नुत्तः। इत्यमरः। ३। १। ८७॥ (यथा, माघे। १। २७।

"प्रसह्य तेजोभिरसङ्ख्यातां गतेरदक्षया नुन्नमनुत्तमं तमः॥")

नृतः, त्रि, नृ गि स्तवने+कर्म्मणि क्तप्रत्ययः। स्तुतः। इति व्याकरणम्॥

नूतनः, त्रि, (नव एव। "भवसर्व्वजरादेशो नप्तनप्त्राश्च प्रत्यया वक्तव्याः।" ५। ४। २५। इत्यस्य वार्त्तिकोक्त्या तनप् नवस्य नूरादेशश्च।) अपुरातनम्। तत्पर्य्यायः। प्रत्यग्रः २ अभिनवः ३ नव्यः ४ नवीनः ५ नवः ६ नूतनः ७। इत्यमरः। ३। १। ७७॥ सद्यस्कः ८ अनीर्णः ९। इति हेमचन्द्रः। ३। ८४॥ अभ्यग्रः १० प्रतिनवः ११। इति जटाधरः॥ (यथा, रघौ। ८। १५।

"प्रश्रमस्मितपूर्व्वमपार्थिवं
कुलमभ्युदयत्ननूतनेश्वरम्॥")

नूतनः, त्रि, (नव एव। नव+नप् नूरादेशश्च।) नूतनः। इत्यमरः। ३। १। ७८॥ (यथा, ऋग्वेदे। ७। १८। २०।

"न त इन्द्र सुमतयो न रायः
संचक्षे पूर्व्वा उषसो न नूनाः॥"

"न नूना नूतनाश्च।" इति सायनभाष्यम्॥")

नूदः, पुं, (नुदति रोगाद्यनिष्टमिति। नुद+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः। पृषोदरादीर्घः।) ब्रह्मदारुवृक्षः। इत्यमरः। २। ४। ४२॥ (ब्रह्मदारुशब्दे ऽविशेषोऽस्य ज्ञातव्यः॥)

नूनं, अ, (नु ऊनयतीति। ऊन परिहाणे+अम्।) तर्कः। ऊहः। यथा, ओजसापि खलु नूनमनूनम्। अर्थनिश्चयः। (यथा, देवीभागवते। २। १०। ३६।

"स्वर्गदञ्च तथा प्रोक्तं ज्ञानिनां मोक्षदं तथा।
न भविष्यति तन्नूनमनया देवकन्यया॥")

अवधारणम्। यथा, नूनं हन्ति स रावणम्। इत्यमरभरतौ॥ सत्यम्। वाक्यपूरणम्। इति मेदिनी॥

नूपुरं, पुं, क्ली, (नू+क्विप्। नुवि पुरति इति। पुर अग्रगमने+"इगुपधेति।" ३। १। १३५। इति कः।) खनामख्यातपादभूषणम्। नेपुर इति भाषा। तत्पर्य्यायः। पादाङ्गदम् २ तुलाकोटिः ३ मञ्जीरः ४ हंसकः ५ पादकटकः ६। इत्यमरः॥ पदाङ्गदम् ७। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ८२। २५।

"नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम्॥"

"गुरुत्वादपि मौक्तिकस्य पादे लुठति नूपुरः।
हारस्तु हृदयावेश कण्ठवक्षसतां गतः॥"

इत्युक्तटः॥)

नृकेशरी, [न्] पुं, (केशरः प्राचुर्य्येणास्त्यस्येति इनिः। गौ चासौ केशरी चेति।) नरसिंहावतारः। इति पुराणम्॥ (गौ केशरोवेति उपमितिसमासे तु "सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः।" इत्यमरोक्तेः। पुरुषश्रेष्ठः॥)

नृगः, पुं, राजविशेषः। यथा, श्रीभागवते।

"नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो॥"

(अस्य राजप्रवरस्य कदाचिद् गोदानप्रमादजनितपापात् शकलाशत्वप्राप्तिर्वृष्णिकुमारगणानुरुद्वेग पुनर्भगवता वासुदेवेनोद्धारादिकथा च महाभारते। १३। ६०। अध्यायस्य प्रथमश्लोकादासमाप्तेर्द्रष्टव्या॥ नृन् जीवान् गच्छति प्राप्नोति जानाति वेति युत्पत्त्या परमात्मा॥)

नृचक्षाः, [स्] पुं, (नृन् पश्यति मत्त्यत्वेन पश्यतीति। चक्ष दृ दर्शने+"सर्व्वधातुभ्योऽसुन्" उणां ४। १८८। इत्यसुन्। यद्वा, "चक्षेर्बहुलं ङिच्च।" उणां। ४। २१२। इत्यसिः। असनयोश्चेति न खात्वादेशः।) राजसः। इति हेमचन्द्रः। २। १०१॥ (नृन् पश्यति पश्यतीति नृन् शुभाशुभकर्म्मन् पश्यति जानातीत्यर्थः। देवः। यथा, ऋग्वेदे। १०। १०७। ३।

"घृतधारं वायुमर्कं स्वर्विदं
वृषचक्षसं अभिषचते हविः॥"

"वृषचक्षसः नृणां द्रष्टॄनन्यानिन्द्रादीन देवांश्च।" इति भाष्यञ्च तत्रायम्॥ नृणां कर्म्मणेतृणामध्वर्य्वादीनासुपद्रष्टा। यथा, ऋग्वेदे। ३। ५३। ६।

"अस्तभ्नात् सिन्धुमर्णवं वृषचक्षाः॥")

वृषचक्षुः, [स्] पुं, (नृणां प्रजानामानां चक्षुरिव।) सुनीथराजपुत्रः। इति महाभारतम्॥ (यथा, भागवते। ६। ६२। ४१।

"सुनीथस्तस्य भविता वृषचक्षुर्यतः सुखोनलः॥"

विष्णुपुराणे तु। ४। २१। ३।

"तस्मादपि सुनीथः सुनीथाद्वेनः ततो वृषचक्षुः॥")

वृत, य वर्त्तने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, वृत्यति वर्त्तकः। इति दुर्गादासः॥

वृतिः, स्त्री, (वृत वर्त्तने+"इगुपधात् कित्।" उणां ४। ११६। इति इन् स च कित्।) वर्त्तनम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। १८। ३।

"प्राचो अगाय वृतये हसाय
द्राघीय आयुः प्रतरं दधानाः॥")

वृतुः, पुं, (वृत्यतीति। वृत+बाहुलकात् कुः।) वर्त्तकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ८। २४। ६।

"इन्द्र यथा ह्यसि तेऽपरीतं वृतो ग्रवः॥")

वृत्यत्वत्रेति। अधिकरणे कुः।) भूमिः। दीर्घः। क्रिमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

वृत्तं, क्ली, (वृत+भावे क्तः।) वृत्यम्। इत्यमरटीकायां भरतः॥ (यथा, हरिवंशे। ५। ७३।

"वृत्तघ्नवृक्षप्रवराङ्गनानां
धनुष्करत्वञ्चतपक्षिणाञ्च॥")

वृत्यं, क्ली, (वृत+"ऋदुपधाच्चाकृल्लिपिवृतेः।" ३। १। ११०। इति क्यप्।) तालमानरसाश्रयसविलासाङ्गविक्षेपः। नाच इति भाषा। तत्पर्य्यायः। ताण्डवम् २ नटनम् ३ नाट्यम् ४ लास्यम् ५ नर्त्तनम् ६। इत्यमरः। ४। ७। १०॥ वृत्तम् ७। उद्वृत्तं वृत्यं ताण्डवम्। सुकुमारन्तु लास्यम्। भावाश्रयं वृत्तम्। ताललयाश्रयं वृत्यमिति भेदोऽत्र नाटतः। इति भरतः॥ नाटः ८ लास्यः ९ लास्यकम् १० वृतिः ११ इति शब्दरत्नावली॥ *॥ तस्य लक्षणादि यथा,—

"देवस्तुत्या प्रतीतो यस्तालमानरसाश्रयः।
सविलासोऽङ्गविक्षेपो वृत्यमित्युच्यते बुधैः॥ *॥

ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते ।
पेवलिर्वैकुरूपञ्च ताण्डवं द्विविधं मतम् ॥
अङ्गविक्षेपबाहुल्यं तथाभिनयशून्यता ।
यत्र सा पेवलिस्तस्याः सङ्गादेषेति लोकतः ॥
छेदनं भेदनं यत्र बहुरूपा सुखावली ।
ताण्डवं बहुरूपस्तद्धारणागलसुद्भवम् ॥ * ॥
छरितं यौवतत्वेति लास्यं द्विविधमुच्यते ।
यत्राभिनयतात्पर्य्यभावे रसेराश्रयेषुभवेत् ॥
नायिकानायकौ रङ्गं नृत्यतस्फुरितं हि तत् ।
मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥ * ॥
गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः ।
लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते ॥"
इति सङ्गीतदामोदरः ॥

अरूपस्य नृत्यं वर्णम् । यथा,—
"नृत्येनालमरूपेण सिद्धिर्नास्यरूपतः ।
चार्व्वधिष्ठानवन्नृत्यं नृत्यमन्यद्विडम्बना ॥"
इति मार्कण्डेयपुराणम् ॥

विष्णुपदे नृत्यफलं यथा,—
"नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
मनुजा येन गच्छन्ति क्षिप्त्वा संसारसागरम् ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य मोदन्ते वै यदृच्छया ॥
पुष्कराच्च परिभ्रष्टः स्वच्छन्दगमनालयः ।
फलं प्राप्नोति सुश्रोणि ! मम कर्म्मपरायणः ॥
रूपवान् गुणवान् शूरः श्रीलवान् सुपथे स्थितः ।
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥"
इति वाराहे श्रीकरमाहात्म्यम् ॥

"दृष्ट्वा संपूजितं देवं नृत्यमानोऽनुमोदयेत् ।
अयंशून्यमतिः शुद्धः परं ब्रह्म च गच्छति ॥"
इत्यग्निपुराणम् ॥

अपि च । द्वारकामाहात्म्ये श्रीभागवते ।
"यो नृत्यति प्रहृष्टात्मा भावैर्बहुसुभक्तितः ।
स निर्हरति पापानि जन्मान्तरशतैरपि ॥"
हरिभक्तिसुधोदये ।
"बहुधोत्साह्यते हर्षाद्विष्णुभक्तस्य नृत्यतः ।
पद्भ्यां भूमेर्दिशोऽक्षिभ्यां दोर्भ्यांखामङ्गलं दिवः ॥"
विष्णुधर्म्मोत्तरे ।
"नृत्यं दत्त्वा तथाप्नोति ब्रह्मलोकमसंशयम् ।
स्वयं नृत्येन संपूज्य तस्यैवानुचरो भवेत् ॥"
अन्यत्र च नारदोक्तौ ।
"नृत्यतां श्रीपतेरग्रे तालिकावादनैर्भृशम् ।
उद्धरन्ति प्ररीरस्थाः सर्व्वे पातकपञ्चिकाः ॥"
इति हरिभक्तिविलासः ॥

नृदेवः, पुं, (नृषु नरेषु मध्ये देवः । नृ देव इव इत्युपमितसमासो वा ।) राजा । यथा, नैषधे । ९० । ३३ ।
"अज्ञानमालाविपुलातपत्रै-
र्देवा नृदेवाश्च भिदां न मेतुः ॥"

नृधर्म्मा, [न्] पुं, (नृणां नरस्य इव धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति अनिच् ।) कुबेरः । इति हेमचन्द्रः । २ । १०३ ॥ नरधर्म्मयुक्ते, त्रि ॥

नृपः, पुं, (नॄन् नरान् पाति रक्षतीति । नृ + पा रक्षणे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) नरपतिः । इत्यमरः । २ । ८ । १ । तस्य लक्षणं यथा,—
"चतुर्योजनपर्य्यन्तमधिकारी नृपस्य च ।
यो राजा तच्चतुर्गुणः स एव मण्डलेश्वरः ।
तत्तद्गुणयुतो राजा राजेन्द्रः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अः ॥

तत्प्रमाणं यथा,—
"अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः ।
अमातुर्जननी राजा अतातस्य पिता नृपः ॥
अनाथस्य नृपो नाथो ह्यभर्त्तुः पार्थिवः पतिः ।
अभृत्यस्य नृपो भृत्यो नृप एव नृणां सखा ॥
सर्व्वदेवमयो राजा तस्मात्त्वामर्च्चये नृप ! ॥"
इति कालिकापुराणे ५० अध्यायः ॥

नृपदर्शनदिनं यथा । तत्र तिथयः शुभाः ।
वाराः शनिमङ्गलभिन्नाः । नक्षत्राणि उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीपुष्याश्विनीहस्तात्रिचानुराधाश्वनीमृगशिरोरेवतीज्येष्ठाश्रवणाः । लग्नानि मिथुनकन्याधनुर्मीनवृषभसिंहसंज्ञकानि । तत्र चन्द्रः शोभनः । इति ज्योतिषम् ॥

नृपकन्दः, पुं, (नृपप्रियः कन्दः । कन्दानां नृपः श्रेष्ठो वा । राजदन्तादिवत् समासः ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥

नृपतिः, पुं, (नॄन् पातीति । पा रक्षणे + डतिः । यद्वा, नृणां पतिः ।) राजा । (यथा, मनुः । ७ । ३४ ।
"यस्तस्य विपरीतश्च नृपतेरजितात्मनः ।
संधिर्यते यज्ञो लोके हतविद्धरिवाम्भसि ॥")
कुबेरः । इति शब्दरत्नावली ॥

नृपतिवल्लभः, पुं, (नृपतीनां वल्लभः प्रियः ।) औषधविशेषः । नृपवल्लभ इति ख्यातः । यथा,
"जातीफलं लवङ्गाब्दलगेलाटङ्गरामठम् ।
जीरकञ्च यमानी च विश्वसैन्धवपञ्चकम् ॥
लौहमभ्रं रसं गन्धं ताम्रं प्रत्येकशः पलम् ।
मरिचं त्रिपलं दत्त्वा छागीदुग्धेन पेषयेत् ॥
धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नतः ।
श्रीमद्भृङ्गनाथेन विचित्य परिनिर्म्मितः ॥
सर्व्ववह्नितेजसा चायं रसो नृपतिवल्लभः ।
अष्टाङ्गग्रहणीं हन्ति पवित्रः सूर्य्यदर्शकः ॥
हन्ति मन्दानलं सर्व्वमामदोषं विरूचिकाम् ।
प्लीहगुल्मोदराष्ठीलायकृत्पाण्डुहलीमकम् ॥
हृत्शूलं कण्ठशूलञ्च चक्षुःशूलञ्च कामलाम् ।
शिरःशूलं कटीशूलमानाहमोष्ठशूलकम् ॥
कासश्वासमवातञ्च श्लीपदं श्लीपमर्ब्बुदम् ।
गलगण्डं गण्डमालामग्निपित्तञ्च गर्हणीम् ॥
क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम् ।
उपदंशमतीसारं ग्रहणीशूलं प्रमेहकम् ॥
अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातमधोगुदम् ।
ज्वरं जीर्णज्वरं कण्डूं तन्द्रालस्यं वमिं भ्रमिम् ॥
दाहविद्रधिहिक्काञ्च जडगद्गदमूकताः ।
वाधिर्य्यं स्वरभेदञ्च दृष्टहृद्विसर्पकान् ॥
ऊरुस्तम्भं रक्तपित्तं गुदभ्रंशारुचिं क्षयम् ।
कर्णनासाक्षिशूलार्त्तान् दन्तरोगञ्च पीनसम् ॥
स्त्रैण्यञ्च शीतपित्तञ्च स्थावराणि विषाणि च ।
वातपित्तकफोत्थांश्च दृष्टजान् सान्निपातिकान् ॥
सर्व्वरोगघ्नयान् हन्ति चक्षुष्यमुदरि पापहा ।
बलवर्णकरो ह्येष आयुष्यो वीर्य्यवर्द्धनः ॥
परं वाजीकरः श्रेष्ठः पटुतामग्निचिद्धरः ।
अरोगीदीर्घजीवी स्यात् रोगी रोगं विमुञ्चति ।
रसस्यास्य प्रसादेन सुदृष्टिर्जायते नरः ॥"
इति रत्नावली ॥

नृपद्रुमः, पुं, (नृपप्रियो द्रुमो वृक्षः ।) आरग्वधः । राजादनीवृक्षः । इति राजनिर्घण्टः ॥

नृपप्रियः, पुं, (नृपाणां प्रियः ।) वेतसवृक्षः । इति शब्दचन्द्रिका । बेड़ बाँश इति भाषा । राजपलाण्डुः । रामशरः । शालिधान्यम् । आम्रम् । इति राजनिर्घण्टः ॥

नृपप्रियफला, स्त्री, (नृपप्रियं फलं यस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

नृपप्रिया, स्त्री, (नृपाणां प्रिया ।) केतकी । राजवल्लभी । इति राजनिर्घण्टः ॥

नृपबदरः, पुं, (नृपप्रियो बदरः ।) राजबदरवृक्षः । तत्फले, क्ली । इति राजनिर्घण्टः ॥

नृपमन्दिरं, क्ली, (नृपस्य मन्दिरम् ।) राजसदनम् । तत्पर्य्यायः । सौधम् २ । इति हेमचन्द्रः । ४ । ५२ ॥

नृपमाङ्गल्यकं, क्ली, (नृपस्य माङ्गल्यं मङ्गलं यस्मादिति । कप् ।) आडुम्बरवृक्षः । इति राजनिर्घण्टः ॥

नृपलक्ष्म, [न्] क्ली, (नृपस्य लक्ष्म चिह्नम् ।) राजचिह्नम् । इत्यमरः । २ । ८ । १२ । राजचिह्नञ्च ॥

नृपलिङ्गधरः, पुं, (धरतीति । धृ + अच् । नृपलिङ्गस्य धरः ।) राजवेषधारी । यथा,—
"निजबाहौजसा वीरः कलिं दिग्विजये क्वचित् ।
नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥"
इति श्रीभागवते । १ । १५ ॥

नृपवल्लभः, पुं, (नृपाणां वल्लभः प्रियः।) राजाश्वः । इति राजनिर्घण्टः ॥ राजप्रिये, त्रि ॥

नृपवल्लभा, स्त्री, (नृपस्य वल्लभा ।) केविकापुष्पम् । इति राजनिर्घण्टः ॥ राजमहिषी च ॥

नृपसभं, क्ली, (नृपाणां सभा । "सभा राजमनुष्यपूर्व्वा ।" २ । ४ । २३ । इति क्लीवत्वम् ।) नृपाणां राज्ञां संहतिर्व्वा । इत्यमरभरतौ ॥

नृपात्मजा, स्त्री, (नृपस्य आत्मजेव । सुदृश्यत्वात् तथात्वम् ।) कटुतुम्बी । इति रत्नमाला ॥ (नृपस्य आत्मजा कन्या ।) राजकन्या । यथा,
"स्वयम्वरं भीमनृपात्मजाया
दिग्भ्यः पतिं प्रविवेश्य शेषः ॥"
इति नैषधे १० सर्गः ॥

नृपाम्बरः, पुं, (नृपाणामम्बरो यत्रः ।) राजक्षयरोगः । इति त्रिकाण्डशेषः ॥

नृपान्नं, क्ली, (नृपप्रियं अन्नम् ।) राजान्नसमानाम्नम् । इति राजनिर्घण्टः ॥ राज्ञ ओदनश्च ॥

नृपाभीरं, क्ली, (अभीरयति क्षपयति भोजनकालमिति । अभि + ईर् + कः । नृपस्य अभीरं भोजनकालक्षपकवाद्यविशेषः ।) भक्ततूर्यम् । राजभोजनकालीनवाद्यविशेषः । इति त्रिकाण्डशेषः ॥

नृपामयः, पुं, (आमयानां नृपः । राजदन्तादिवत् पूर्वनिपातः ।) राजयक्ष्मा । क्षयरोगः । इति राजनिर्घण्टः ॥ (नृपस्य आमयो व्याधिः ।) राज्ञो रोगश्च ॥

नृपावर्त्तं, क्ली, (नृप इव आवर्त्यते इति । आ + वृत् + घञ् ।) राजावर्त्तरत्नम् । इति राजनिर्घण्टः ॥

नृपासनं, क्ली, (नृपस्य आसनम् ।) राजासनम् । तत्पर्य्यायः । भद्रासनम् २ सिंहासनम् ३ । इत्यमरः । २ । ८ । ३१ ॥ (यथा, भागवते । ३ । १ । २८ ।

"यमध्वरिभ्यश्छृतपञ्चनेत्रो
नृपासनाग्रां परिरभ्य दूरात् ॥")

नृपाह्वयः, पुं, (नृपं आह्वयते गर्व्वेणेति । आ + ह्वे + घञ् ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥ नृपनामा च ॥

नृपोचितः, पुं, (नृपाणामुचितो योग्यः ।) राजभावः । इति राजनिर्घण्टः । राजयोग्ये, त्रि ॥

नृयज्ञः, पुं, (ना मनुष्यसमूहो यो यज्ञः ।) अतिथिसेवा । यथा, मनुः । ७ । ७० ।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

नृवराहः, पुं, (ना चासौ वराहश्चेति ।) वराहरूपधृग्भगवदवतारः । यथा,—

"नृवराहस्य वसतिर्मन्त्रोऽयं प्रतिष्ठिता ।
नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः ॥"

स एव वर्णोद्धारो । यथा,—

"शौकरं रूपमास्थाय हार्त्तस्य च पुरात्मनः ।
अविष्यामि न सन्देहो त्वं शुक्ल! त्वरान्वितः ॥"

इति पाद्मे क्रियाखण्डे २८ अध्यायः ॥

अपि च ।

"दैत्यस्तोऽसौ नृवराहमाहवे
निपातयामास कृपा त्वलन्तीम् ।
शक्तिं यथा विद्युतमाशु कुम्भे
प्रवर्षमाणोऽपि गिरिं सुमेघः ॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं नृवराहमूर्त्तिः ।
प्रजापतेः सेतुमिमं निहत्य
त्वमेव कः स्वस्ति यथासुरेश ॥"

इत्यग्निपुराणम् ॥

नृशंसः, त्रि, (नृन् नरान् शंसति हिनस्तीति । नृ + शन्स हिंसायाम् + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) क्रूरः । परद्रोही । इत्यमरः । ३ । १ । ३० ॥ (यथा, पञ्चतन्त्रे । ३ । १४२ ।

"ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥")

नृसिंहः, पुं, (ना चासौ सिंहश्चेति । नरसिंहनृर्त्तिधरत्वादेवास्य तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ विष्णोर्दशावतारान्तर्गते चतुर्थे पूर्व्वावतारः । तस्य रूपं यथा,—

"सिंहस्य हत्वा वदनं मुरारिः
सदा करालञ्च सुरक्तनेत्रम् ।
अर्द्धं वपुर्म्मे मनुजस्य हत्वा
ययौ सभां दैत्यपतेः पुरस्तात् ॥"

इत्यग्निपुराणम् ॥

महाविष्णुः । तन्मन्त्रादि यथा,—

अथ नृसिंहमन्त्राः । निगर्भे ।

"उग्रं वीरं वदेत् पूर्व्वं महाविष्णुमनन्तरम् ।
ज्वलन्तं पदमाभाष्य सर्व्वतोमुखमीरयेत् ॥
नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः ।
नमाम्यहमिति प्रोक्तो मन्त्रराजोऽयमुद्दमः ॥
अयं मन्त्रो मायापुटितोऽपि भवति तदा सर्व्वफलप्रदः । तथा च निगर्भे

"मूलेनापुटितश्चेत् स्यात् सर्व्वकामफलप्रदः ।"

अस्य पूजा प्रातःस्नात्वादिदेवयोक्तपीठमन्त्रान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखे अनुष्टुप्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । ततः करान्यासौ ।

"चतुर्भिर्हृदयं वर्णैः शिरस्तावद्भिरक्षरैः ।
शिखाद्याभिः वसुद्विद्वा षड्भिः कवचमीरितम् ।
तावद्भिर्नयनं प्रोक्तं अस्त्रं स्यात् दशाक्षरैः ॥"

ततो मन्त्रन्यासः ।

"शिरोललाटनेत्रेषु मुखबाहूरुवक्षिषु ।
जानुपादेषु कुक्षौ हृदये गले मार्द्धदये पुनः ॥
अपराङ्गे च कक्षादि यथेष्टवर्णान् यथाक्रमम् ॥"

ध्यानम् ।

"माणिक्याद्रिसमप्रभं त्रिनयनं रक्तोत्पलद्भूषणम् ।
बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्-
ज्वालाजिह्वसुदारकेशरचयं वन्दे नृसिंहं विभुम् ॥
एवं ध्यात्वा मानसैः संपूज्य गुरुस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च यथा । हृदयादिना षडङ्गानि पूजयेत् । ततः पत्रेषु पूर्व्वादिषु शङ्खं चक्रं पाशं अङ्कुशं वज्रं गदां खड्गं खेटकञ्च प्रणवादिनमोऽन्तेन पूजयेत् । तथा च निगर्भे ।

"अङ्गादशैर्व्वह्निसंख्यं शङ्खं पाशाङ्कुशौ पुनः ।
वज्रं सौमोदकीं खड्गखेटौ पत्रेषु पूजयेत् ॥"

ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविसर्জ্জनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं षड्लक्षजपः । तथा च ।

"अतुलं जपेन्मन्त्रं घृतेन जुहुयात्ततः ।
तत्सहस्रं समिद्भोजी तोषयेद्हुतभुग्वरम् ॥"

मन्त्रान्तरं यथा,—

"चकारो वह्निमारूढो मनुर्विन्दुसमन्वितः ।
एकाक्षरो मनुः प्रोक्तः सर्व्वकामफलप्रदः ॥"

अस्य पूजा प्रातःस्नात्वादिदेवयोक्तध्यानार्घ्यादिकं सर्व्वं मन्त्रराजवत् । विशेषस्तु ऋषिरत्रिर्गायत्री छन्दो नृसिंहो देवता चकारो बीजं औकारः शक्तिः षड्दीर्घभाजा बीजेनाङ्गकल्पना । अस्य पुरश्चरणमष्टलक्षजपः । तथा च । अष्टलक्षं जपेन्मन्त्रमित्यादि ॥ * ॥

मन्त्रान्तरं यथा । कश्यपे ।

"जयद्वयं समुच्चार्य श्रीपूर्व्वो नृसिंहेऽपि ।
अष्टाक्षरो मनुः प्रोक्तो भक्तानां कामदो नृणाम् ॥
अस्य ब्रह्मा ऋषिर्गायत्री छन्दो नृसिंहो देवता षड्दीर्घयुक्तबीजेनाङ्गकल्पना । ध्यानार्चनं मन्त्रराजवत् । अस्य पुरश्चरणमष्टलक्षजपः ।

वसुलक्षं जपेन्मन्त्रमित्यादित्यपुराणात् ।"इति तत्सारः॥ * ॥ षोड़शरतिवत्यान्तर्गततनवमवत्यः। तस्य लक्षणं यथा, रतिमञ्जर्याम्।
"पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम्।
हस्तयोर्वेष्ट्येद्वाक्षं बन्धो नृसिंहसंज्ञकः॥"
(खनामख्यातनृपविशेषः। यथा, सह्याद्रिखण्डे। ३१। ४०।
"नागात् नृसिंहभूपालस्तत्सुतो गाढ़भाषणः॥"
नृ सिंह इव इत्युपमितसमासः।) नरश्रेष्ठः॥
(यथा, महाभारते। ६। ५३। २४।
"दृष्ट्वा महार्हैः क्रतुभिर्नृसिंहाः
सन्त्यज्य देहान् सुगतिं प्रपन्नाः॥")
नृसिंहचतुर्दशी, स्त्री, (नृसिंहप्रिया नृसिंहव्रतोपलक्षिता वा चतुर्दशी।) वैशाखशुक्लचतुर्दशी। तत्र व्रतविधिर्यथा,—
"वैशाखस्य चतुर्दश्यां शुक्लायां श्रीनृकेशरी।
जातस्तदह्नां तत्पूजोत्सवं कुर्वीत सव्रतम्॥"
अथ श्रीनृसिंहचतुर्दशीव्रतनित्यता। दक्षनारसिंहपुराणे श्रीभगवन्नृसिंहप्रह्लादसंवादे व्रतविधिकथने।
"वर्षे वर्षे तु कर्त्तव्यं मम सन्मुखिकारणम्।
महापुण्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः॥"
किञ्च।
"विज्ञाय महिमं यस्तु लङ्घयेत् स तु पापभाक्।
इदं ज्ञात्वा प्रकर्त्तव्यं महिने व्रतसत्तमम्।
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ॥"७॥
तत्राधिकारिनिर्णयः। तत्रैव।
"सर्वेषामेव लोकानामधिकारोऽस्ति मद्व्रते।
मद्भक्तेषु विशेषेण ज्ञेयं मत्परायणैः॥" * ॥
अथ तन्माहात्म्यम्। तत्रैव।
श्रीप्रह्लाद उवाच।
"नमस्ते भगवन् विष्णो नृसिंहवपुषे नमः।
लङ्घनोऽहं सुरश्रेष्ठं त्वां पृच्छामि च तत्त्वतः॥
स्वामिंस्त्वयि ममोत्पन्ना भक्तिर्नैकविधा कथम्।
कथं ते सुप्रियो जातः कारणं वद मे प्रभो!॥
श्रीनृसिंह उवाच।
कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः।
भक्तेर्यत् कारणं वत्स! प्रियत्वस्य च तत् पुनः॥
पुराकल्पे त्वभूद्विप्रः किञ्चित्कं नाप्यधीतवान्।
गत्वा च वसुदेवो हि वेश्यायां तत्परो ह्यभूः॥
तस्मिन् जन्मनि नैव त्वं चकर्थ सुव्रतं कियत्।
मृत्वा तु मद्व्रतं चैकं वेश्यासङ्गतिलालसः॥
मद्व्रतस्य प्रभावेण भक्तिर्ज्ञाता तवेदृशी।
श्रीप्रह्लाद उवाच।
श्रीनृसिंहाच्युत स्वामिन् कस्य पुंसश्च किं कृतम्।
वेश्यायां वर्त्तमानेन कथं तद्धि कृतं मया॥
आख्यानं विस्तरेणेदं वक्तुमर्हसि साम्प्रतम्।
श्रीनृसिंह उवाच।
पुरावन्तीपुरे ह्यासीद्द्विजाग्र्यो वेदपारगः।
तन्नाम वसुधर्मेति सर्वलोकेषु विश्रुतम्॥
नित्यं होमक्रियामेव करोति द्विजसत्तमः।
ब्रह्मक्रियासु सततं सर्व्वासु किल तत्परः॥
अग्निहोमादिभिर्यज्ञैरिष्टाः सर्व्वे सुरोत्तमाः।
तेनापि विद्यमानेन न ज्ञातं दुष्कृतं कियत्॥
तस्य भार्य्या सुशीलाभूद्विख्याता भुवनत्रये।
पतिव्रता सदाचारा पतिभक्तिपरायणा॥
जज्ञिरे च सुताः पञ्च तस्यां द्विजवरात्ततः।
सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः॥
तेषां मध्ये कनिष्ठस्त्वं वेश्यायां तत्परः सदा।
तां सन्निवेशमानेन सुरापानं कृतं त्वया॥
सदा पापरतस्त्वं हि नाज्ञताध्ययनं क्वचित्।
विलासिनीगृहे नित्यं वसतिस्त्वभवत्तव॥
एकदा तद्गृहे ह्यासीत्तया सह महान् कलिः।
ततः कलहभावेन भोजनं न कृतं त्वया॥
अभ्यागान्मद्व्रतं चक्रे व्रतानामुत्तमं व्रतम्।
तया सह विवादेन रात्रौ जागरणं कृतम्॥
वेश्याया अपि तत् सर्व्वं ज्ञातं तु त्वया समम्।
रात्रौ जागरणे तस्याः सङ्गतं कायशोधनम्॥
युवयोर्मद्व्रतं जातमज्ञानाद्बहुपुण्यदम्।
येन पौर्णव्रतैर्नाद्य मोदन्ते दिवि देवताः॥
दृष्ट्वार्थंस्तु ततो ब्रह्मा चक्रे मद्व्रतसुत्तमम्।
मद्व्रतस्य प्रभावेण निर्म्मितं सचराचरम्॥
ईश्वरेणापि तत्त्वीर्य्यं वधार्थं त्रिपुरस्य च।
महिम्नैव व्रतस्यास्य त्रिपुरं संनिपातितम्॥
अन्यैश्च बहुभिर्देवैर्ऋषिभिश्च पुरातनैः।
राजभिश्च महाप्राज्ञैर्विहितं व्रतसुत्तमम्॥
एतद्व्रतप्रभावेण सर्व्वे सिद्धिमुपागताः॥
वेश्यापि मत्प्रिया जाता त्रैलोक्ये सुखचारिणी।
इदृशं मद्व्रतं वत्स! त्रैलोक्ये चैव विश्रुतम्॥
धूर्त्तायाश्च विलासिन्या व्रतमेतदुपस्थितम्।
प्रह्लाद! तेन ते भक्तिर्ज्ञाता ह्यतुलसा।
सा वेश्या त्वत्वरा जाता दिवि भोगाननेकशः।
भुक्त्वा कामं विलोना तु त्वं प्रह्लाद विविद्ध माम्॥
कार्य्यार्थमवतारस्ते मच्छरीरात् पृथक् त्वसौ।
विधाय सर्व्वकार्य्याणि शीघ्रं मयि गमिष्यसि॥
य इदं व्रतमद्यानु प्रविधास्यन्ति मानवाः।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि॥
अपुत्रो लभते पुत्रान्मुक्तांश्च सुवर्चसः।
दरिद्रो लभते लक्ष्मीं धनदस्य च यादृशीं॥
तेजस्कामो लभेत्तेजो राज्येप्सुः राज्यसुत्तमम्।
आयुष्कामो लभेत्तायुर्यादृशं ह्यस्ति वस्य च॥
स्त्रीणां व्रतमिदं साधु पुत्रदं भाग्यदं तथा।
अवैधव्यकरं तासां पुत्रशोकविनाशनम्॥
धनधान्यफलञ्चैव पतिप्रियकरं सुखम्।
सार्व्वभौमसुखं तासां दिव्यसौख्यं भवेत्ततः॥
स्त्रियो वा पुरुषा वापि कुर्व्वन्ति व्रतसुत्तमम्।
तेभ्यो ददाम्यहं सौख्यं मुक्तिमुक्तिफलं तथा॥
बहुनोक्तेन किं वत्स! व्रतस्यास्य फलस्य हि।
यद्व्रतस्य फलं वक्तुं नाहं शक्तो न शङ्करः।
ब्रह्मा चतुर्भिर्व्वक्त्रैश्च फलं स्वाभ्यीवितावधि॥"
किञ्च तत्रैव व्रतविधिकथने।
"यथा यथा प्रवृत्तिः स्यात् पातकस्य कलौ युगे।
तथा तथा विधास्यन्ति मद्व्रतं विरलं जनाः॥
मद्व्रतस्य विधाने च मतिर्नं स्यात् दुरात्मनाम्।
सदा पापरतानान्तु पुरुषाणां विकर्म्मणि॥
विचार्य्यैवं प्रकर्त्तव्यं माधवे मासि मद्व्रतम्।
प्राप्ते भूतदिने वत्स! सर्व्वकल्मषनाशनम्॥
येनैव क्रियमाणेन सहस्रादश्वमेधफलम्।
जायते नात्र वक्तव्यं मानुषाणां महात्मनाम्॥"
तदन्ते च।
"य इदं शृणुयान्नित्यं व्रतं पापप्रणाशनम्।
तस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति॥
पवित्रं परमं गुह्यं कीर्त्तयेत् यस्तु मानवः।
सर्व्वान् कामानवाप्नोति व्रतस्यास्य फलं लभेत्॥"
अथ तद्व्रतदिननिर्णयः। आगमे।
"वैशाखे शुक्लपक्षे च चतुर्दश्यां महातिथौ।
सायं प्रह्लादधिकारमसहिष्णुः परो हरिः॥
सद्यः कटकटाशब्दविस्फारितसभाजनः।
लीलया स्तम्भगर्भात्तादुद्भूतः शब्दभीषणः॥
दृष्टरेरवतारार्त्तां यजतः समुपीयेत्।
महापुण्यतमायाञ्च सायं विष्णुं प्रपूजयेत्॥"
दक्षनारसिंहे।
"वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत्।
मध्याह्नसमये पुण्यं व्रतं पापप्रणाशनम्॥"
किञ्च।
"स्वातीनक्षत्रयोगे तु शनिवारे हि मद्व्रतम्।
सिद्धयोगस्य योगे च लभ्यते दैवयोगतः॥
सर्व्वैरेतैस्तु संयुक्तैर्हन्याकोटिविनाशनम्।
केवलञ्च प्रकर्त्तव्यं महिनं फलकाङ्क्षिभिः।
वैष्णवैर्न तु कर्त्तव्या शरद्विद्धा चतुर्दशी॥"
अथ तद्व्रतविधिः। तत्रैव।
"प्रातरुत्थाय कुर्व्वीत नियमं मनसा स्मरन्।
मामेव महिने वत्स! दन्तधावनपूर्व्वकम्॥"
नियममन्त्रम्।
"श्रीनृसिंह महोग्रेयं दयां कुरु ममोपरि।
अद्याहं ते विधास्यामि व्रतं निर्विघ्नतां नयेति॥
व्रतस्थेन न वक्तव्यं महिने पापिभिः सह।
मिथ्यालापो न कर्त्तव्यः समग्रफलकाङ्क्षिभिः॥
स्त्रियं दूतं विहायोक्तैर्व्रतस्थेन महात्मना।
कर्त्तव्यं मम रूपञ्च महिने सकले शुभे॥
ततो मध्याह्नवेलायां नद्यादौ विमले जले।
गृहे वा देवखाते वा तड़ागे वातिशोभने॥
वैदिकेन च मन्त्रेण स्नानं कुर्य्यादिचक्षणः।
मृत्तिकागोमयेनैव तथा धात्रीफलेन वा॥
तिलैर्व्वा सर्व्वमापन्नैः स्नानं कृत्वा महात्मभिः।
परिधाय शुचिर्व्वस्त्रे नित्यकर्म्म समाचरेत्॥
ततो गृहं समागत्य स्मरन् मां भक्तियोगतः।
गोमयेन विलिप्याथ कुर्य्यादष्टदलाम्बुजम्॥
कलसं तत्र संस्थाप्य ताम्ररत्नसमन्वितम्।
तस्योपरि न्यसेत् पात्रं तण्डुलैः परिपूरितम्॥
हैमी मूर्त्तिस्तु तत्रैव स्थाप्या लक्ष्मीस्तथैव च।
धनेन च तदर्द्धेन तदर्द्धेन वा पुनः॥
यथाशक्ति तथा कार्य्यं वित्तशाठ्यविवर्जितैः।
पश्चात्तेन ते स्थाप्य पूजनन्तु समाचरेत्॥
ततो ब्राह्मणमाकृष्य तमाचार्य्यमलोलुपम्।
कुर्य्याच्छास्त्रसमायुक्तं शान्तं दान्तं जितेन्द्रियम्॥

तेनैव कारयेत् पूजां दत्त्वा ग्राह्यानुसारतः ।
आचार्य्यवचनाद्धोमान् पूजां कुर्य्याच्चरन् व्रतम्॥"
तत्रार्घे प्रह्लादः पूजनीयः । तथा चागमे-
"प्रह्लादश्लेष्मनाशाय वा हि पुण्या चतुर्दशी ।
पूजयेत्तत्र यत्नेन हरेः प्रह्लादमव्ययः ॥"
इहत्तारसिंहे ।
"मण्डपं कारयेत्तत्र पुण्यस्तवकशोभितम् ।
ऋतुकालोद्भवैः पुष्पैः पूजोक्तैश्च यथाविधि ॥
उपचारैः षोड़शभिर्मन्त्रैर्नामभिस्तथा ।
ततः पौराणिकैर्मन्त्रैः पूजनीयो विशेषतः ॥"
तत्र चन्दनमन्त्रः ।
"चन्दनं शीतलं दिव्यं चन्द्रकुङ्कुमसंश्रितम् ।
ददामि ते प्रसीदार्थं नृसिंह परमेश्वरेति ॥"
पुष्पमन्त्रः ।
"कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो! ।
पूजयामि नृसिंहेश! लक्ष्म्या सह नमोऽस्तु ते ॥"
धूपमन्त्रः ।
"कालागुरुमयं धूपं सर्व्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो! सर्व्वकामसमृद्धये ॥"
दीपमन्त्रः ।
"दीपः पापहरः प्रोक्तस्तमसां राशिनाशनः ।
दीपेन लभते तेजस्त्वमतो दीपं ददामि ते ॥"
नैवेद्यमन्त्रः ।
"नैवेद्यं सौख्यदं वस्तु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्व्वपापक्षयं कुरु ॥"
अर्घमन्त्रः ।
"नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः सन्त्वमनोरथाः ॥"
पूजामन्त्रः ।
"पीताम्बर महाविष्णो प्रह्लादभयनाशन ।
यथा भूतार्चने नाथ यथोक्तफलदो भवेति ॥
रात्रौ जागरणं कुर्य्यात् गीतवाद्यादिभिर्जनैः ।
पुराणपठनं वृत्तं श्रोतव्यं भक्तिभावतः ॥
ततः प्रभातसमये स्नानं कृत्वा कृतव्रतः ।
पूर्व्वोक्तेन विधानेन पूजयेच्च प्रयत्नतः ॥"
किञ्च ।
"अर्द्धरात्रे ये नरा जाताः ये जनिष्यन्ति मत्पुरः ।
तान्क्षमस्व देवेश! दुःखहात् भवसागरात् ॥
प्रातर्व्वर्षसमस्य व्याधिदुःखासुराशिभिः ।
तीव्रैस्तु परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीरार्णवनिवास त्वं प्रीयमाणो जनार्द्दन ।
व्रतेनानेन मे देव मुक्तिमुक्तिप्रदो भव ॥
एवं प्रार्थ्य ततो देवं विसर्ज्जय च यथाविधि ।
उपहारादिकं सर्व्वमाचार्य्याय निवेदयेत् ॥
दक्षिणाभिः सुसन्तोष्य ब्राह्मणांश्च विसर्ज्जयेत् ।
समध्यानसमायुक्तो सुस्नीत सह बन्धुभिरिति ॥"

इति श्रीनृसिंहभक्तिविलासे १३ विलासः ॥

नृसेनं, क्ली स्त्री, (नृणां सेना । "विभाषा सेनेति ।" २ । ४ । २५ । इति प्राप्तिकं क्लीवत्वम् ।) नृणां सेना । इत्यमरः । २ । ५ । ४० ॥

नृसोमः, पुं, (ना सोमश्चन्द्र इव । इत्युपमितसमासः ।) नरश्रेष्ठः । यथा, रघौ । ५ । ५६ ।
"तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सहितो नृसोमः ।
उदङ्मुखः सोऽक्षविदक्षमक्षं
जग्राह तस्मान्नियतग्रहीतग्राभात् ॥"

नृहरिः, पुं, (ना चासौ हरिश्चेति ।) नृसिंहावतारः । यथाह गोपदेवः ।
"ग्रीते स चित्तग्रथने मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनयामदस्याः ।
योऽभूद्बभूव भरताग्रजजह्नुजावृद्धः
कल्की मताश्च भविता ग्रहरिष्यतेऽरीन् ॥"
(यथा च भागवते । ७ । ८ । २७ ।
"तं मन्यमानो निजवीर्य्यशङ्कितं
यद्वस्तमुक्तो नृहरिं महासुरः ॥")

नृ, गि नौतौ । कविकल्पद्रुमः ॥ (क्र्यां-पृ-गर्-सर्व-सेट् ।) गि, नृणाति नीर्णः । नीतिः प्रापणा । इति दुर्गादासः ॥

नृ, म नौतौ । इति कविकल्पद्रुमः ॥ (स्वां-लिटि घटां-सर्व-सेट् ।) म, नरयति । नीतिः प्रापणा । इति दुर्गादासः ॥

नेचक, पुं, (निज शुद्धौ + ण्वुल् ।) निर्म्मलकः । रचकः । (यथा, मनौ । ८ । ३६६ ।
"ग्राह्यंशे फलके शस्ते नेचिग्यात्तेचकः शुभैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
(प्रौधके, त्रि ॥)

नेता, [तृ] पुं, (नयतीति । नी + तृच् ।) प्रभुः । इत्यमरः । ३ । १ । ११ ॥ (यथा, रघौ । १ । ७५ ।
"व्यासङ्गोपधयो नेतुर्नक्तञ्चरदीपिकाः ॥")
निम्बवृक्षः । इति राजनिर्घण्टः ॥ प्रापके, त्रि । (यथा, महाभारते । २ । ६६ । ६ ।
"तिल त्वं स्थावर इव यावदेव बलः क्वचित् ।
इतो नेता हि तत्र त्वं ग्राहाणामुत्सिसि यत्-
क्षतात् ॥")

नेत्रं, क्ली, (नीयते नयति वानेनेति । "दाम्नीशसीति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।) चक्षुः । (यथा, मनुः । ४ । ३३ ।
"नाक्षण्वतीं सखे नेत्रे नद्याश्चैकामनाश्रुताम् ।
न पश्येत् प्रसवन्तीञ्च तेजस्कामो द्विजोत्तमः ॥")
जटा । अंशुकम् । इत्यमरः । २ । ६ । ६३, ३२३ । ७८ । मद्यगुणः । (यथा, महाभारते । १ । १८ । १३ ।
"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ।
देवा मथितुमारब्धाः क्षुब्धं निधिमम्भ-
सामृ ॥")
वृत्तचत्वरम् । रथः । नेतरि, त्रि । इति मेदिनी । रे, ५४ ॥ (यथा, महाभारते । २ । ६० । ४ ।
"नावं समुद्र इव वातनेत्रा-
मारुह्य घोरे व्यसने निमग्नेत् ॥")
नाड़ी । इति विश्वः ॥ वस्त्रिग्रलोकाः । इति राजनिर्घण्टः ॥

नेत्ररोगः, पुं, (नेत्रस्य चक्षुषो रोगः ।) चक्षुरोगः । तस्य निदानं यथा,—
"उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् खप्नविपर्य्ययाच्च ।
खेदाद्रजोधूमनिषेवणाच्च
क्षुद्भिर्व्विघाताद्मनातियोगात् ॥
द्रवान्नशाकान्नगुरु सेवितात्च
विरूक्षवातातपमारुताच्च ।

प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाञ्च विपर्ययेण
नेत्राभिघातादतिमैथुनाच्च।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥
वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
तस्य सम्प्राप्तिर्यथा,—
"निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यगुरुशोभिताषाः।
विमुष्कभावः शिशिराभुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताशिशोथः
कण्डूपदेहाल्पनिगीतता च।
स्रावो बहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च
नासूः समन्तादतिलोहितत्वं।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥"
इति माधवकरः ॥
(अस्य निदानादिपूर्ब्बकं लक्षणं चिकित्सा च यथा,—
"उष्णातितीक्ष्णकटुकैरभिघातेन वा पुनः।
सूक्ष्मवस्तूपयोगेनापि दोषाः कुप्यन्ति नेत्रजाः ॥
सङ्ख्या ये परा नेत्रे वक्ष्यामि शृणु लक्षणम्।
रूक्षः कण्डूल लोदश्च मुष्कशीतासनन्ततिः।
वातिकं तं विजानीयात् पैत्तिकं शृणुतः परम् ॥
सरक्तदाहे नेत्रे च उष्णस्रावश्च पैत्तिके।
शोफकण्डूः सन्निपाते शीतलार्त्ते कफात्मके ॥
सङ्गजो मिश्रलिङ्गैश्च सर्व्वैस्तैः सान्निपातिकः।
एतद्धि लक्षणं ज्ञात्वा चोपचारं प्रशस्यते ॥
मुष्कौ सुराङ्गसुरसाः सङ्ग . काञ्जिकेन
चोष्णेन धावनमिदं सङ्गपैत्तिके च।
नेत्रोद्भवे त्रिफलकल्कमिदं सभृङ्ग-
मन्थैस्तथा कथितमन्त्रभिषग्वरैस्तत् ॥
मुष्कौ शृटी च रजनी त्रिफला सनिम्बा
पद्मानि सैन्धवयुतानि तुषाम्बुकेन।
शस्तं वदन्ति नयने च सरक्तपित्ते
रक्तोद्भवे च सरजे च तथा प्रशस्तम् ॥
फलत्रिकं दारु निशासु धूमो
वचासु वर्षाभवसैन्धवेन।
प्रलेपनं श्लेष्मभवे विकारे
सवातिके वा हितमेव शस्तम् ॥
मुष्कौ सैन्धवतक्रेण ताम्रभाण्डे विघर्षितम्।
अपामार्गस्य मूलं वा मूलं धूसूरकस्य वा ॥
अञ्जनञ्च हितं तेषां वातनेत्रामयापहम् ॥
दुग्धोत्पन्नं नवनीतं यष्टीनिम्बसिताक्ष
संयोज्याः।
त्रिफला गुडसंयुक्ता लेपनं कफनेत्ररोगघ्नम् ॥
मुष्कौ सैन्धवतुल्यं मागधिका ताम्रभाजने घृष्टम्।
दध्ना घृतेनाञ्जनकं निहन्ति सर्व्वांश्च नेत्ररोगान् ॥
वातपित्तकफदोषसम्भवान्
नेत्रयोर्बहुपीड़नं भृशात्।
एक एव हरति प्रयोजितः
शिग्रुपल्लवरसः समाक्षिकः ॥"
इति हारीते चिकित्सितस्थाने ४४ अध्यायः ॥)
नेत्ररोगहा. [न्] पुं,(नेत्ररोगं हन्तीति। हन्+क्विप्।) दृष्टिकाकोदुम्बरः। इति राजनिर्घण्टः॥ चक्षूरोगनाशके, त्रि॥
नेत्रामयः, पुं, (नेत्रस्य आमयो रोगः।) चक्षूरोगः। तस्य निदानं यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
इति माधवकरः ॥
(अस्य लक्षणं यथा.—
"अल्पासुरागाऽनुपदेहता च
प्रस्यन्दलोदातिरुजश्च वातात्।
पित्तात्तु दाहार्त्ति रुजोऽतिरागाः
पीतोऽतिदेहः सुभृशोष्णमस्रु ॥
मुक्तोपदेहो बहुपिच्छिलास्रु
नेत्रं कफात् स्यात् गुरुता सकण्डूः।
सर्व्वाणि रूपाणि तु सन्निपाता
नेत्रामयाः षण्णवतिस्तु भेदात् ॥
तेषामभिव्यक्तिरभिप्रदिष्टा
शूलाक्षयत्वेषु चिकित्सितञ्च।
परमधिकारे तु न विस्तरोक्तिः
शस्तेति तेषाञ्च न नः प्रयासः ॥"
इति चिकित्सितस्थाने षड्विंशतितमेऽध्याये चरकेनोक्तम् ॥)
नेत्रास्रु, क्ली, (नेत्रस्य अस्रु अश्रु।) अश्रु। इत्यमरः। २। ६। ८३ ॥
नेत्रारिः, पुं, (नेत्रस्य अरिः शत्रुः।) सेदुकवृक्षः। इति राजनिर्घण्टः॥
नेत्री, स्त्री, (नीयतेऽनयेति। नी+"दात्रीशस्यसेति।" ३। २। १८२। इति करणे ष्ट्रन्। स्त्रियां ङीष्।) लक्ष्मीः। गाड़ी। इति शब्दरत्नावली॥ नदी। इति मेदिनी। रे, ५४ ॥ (नयतीति। नी+ष्ट्रच्+ङीप्।) प्रापयत्कर्त्री ॥ (शिग्रुयष्टिर्नी। इति नीशब्दरत्नावली॥ यथा, गङ्गाभारते। ५। १३६। १३।
"यस्य मे भवती नेत्री भविष्यत्यूरुदर्शिनी॥")
नेत्रोपमफलः, पुं, (नेत्रोपमं नयनतुल्यं फलं यस्य।) बादामवृक्षः। इति भावप्रकाशः॥ बादाम इति भाषा॥
नेत्रौषधं, क्ली, (नेत्रस्य औषधम्।) पुष्पकाशीसम्। इति राजनिर्घण्टः॥ चक्षुरोगौषधमात्रञ्च॥
नेत्रौषधी, स्त्री, (नेत्रस्य औषधी।) अजशृङ्गी। इति रत्नमाला॥ कौंच इति भाषा॥
नेदिष्ठं, त्रि, (अयमेषामतिशयेनान्तिकः। अन्तिक+"अतिशायने तमबिष्ठनौ।" ५। ३। ५५। इति इष्ठन्। "अन्तिकबाढ़योर्नेदसाधौ।" ५। ४। ६३। इति नेदादेशः।) अन्तिकतमम्। अतिनिकटम्। इत्यमरः। ३। १। ६८॥ (यथा, ऋग्वेदे। ४। १। ५।
"स नो अग्नेऽवमो भवोती नेदिष्ठो अस्या
उषसो व्युष्टौ॥"
यथाच, उद्धवसन्देशे। १।
"सोत्कण्ठोऽभूदभिमतकथां संश्रुतुं कंसमेदी
नेदिष्ठाय प्रणयसहरी बद्धवाग्डम्बराय॥")
निपुणम्। इति राजनिर्घण्टः॥ अङ्गीकर्त्तरि, पुं। इति जटाधरः॥
नेदीयान्, [स्] त्रि, (अयमनयोरतिशयेनान्तिकः। अन्तिक+इयसुन्। नेदादेशः।) नेदिष्ठः। अत्यन्तसमीपः। इति जटाधरः॥ (यथा, सर्व्वदर्शनसंग्रहे आर्हतदर्शने।
"न चेदभिप्रायादनमेष्यं दवीयान् महीधरो नेदीयान् दीर्घो बाहुरिति व्यवहारस्य निराबाधं जागरूकत्वात्॥")
नेपः, पुं, (नयति प्रापयति शुभमिति। नी+"पानीविभिभ्यः पः।" उणा। ३। २३। इति पः।) पुरोहितः। उदकम्। इति संक्षिप्तसारोणादिवृत्तिः॥
नेपथ्यं, क्ली, (नी+क्विप्+शुक्। नेः नेता तस्य पथ्यम्।) वेषः। इत्यमरः। २। ६। ६६॥ (यथा, रघुः। १४। ६।
"राजेन्द्रनेपथ्यविधानशोभा
तस्योदितावौत् पुनरुक्तदोषा॥")
अलङ्कारः। रङ्गभूमिः। इति मेदिनी। थे, ८८। (यथाह भरतः।
"वाक्यस्यार्थतया यत्र पात्रं नैव प्रवेश्यते।
नेपथ्यमिति प्राकाश्ये प्रयोज्यं तत्र नाटके॥")
नेपालः, पुं, स्वनामप्रसिद्धदेशः। इति जटाधरः॥ (यथा, शुक्लिसङ्गमतन्त्रे।
"जटेश्वरं समाराध्य योगेशाख्यं महेश्वरि!।
नेपालदेशो देवेशि! साधकानां सुसिद्धिदः॥")
नेपालनिम्बः, पुं, (नेपालोद्भवो निम्बः।) नेपालदेशोद्भवनिम्बः। तत्पर्य्यायः। नेपालः २ ज्वरनिम्बः ३ ज्वरान्तकः ४ गाढ़ौतिक्तः ५ निम्बारिः ६ सन्निपातहृत्। ७। अस्य गुणाः। शीतलत्वम्। उष्णत्वम्। योगवाहित्वम्। लघुत्वम्। तिक्तत्वम्। अतिकफपित्तासृग्दोषज्वराम्बरापहत्वञ्च। इति राजनिर्घण्टः॥
नेपालिका. स्त्री, (नेपाल: उत्पत्तिस्थानत्वेनास्यस्या इति। नेपाल+अण्+टाप्।) मनःशिला। इति राजनिर्घण्टः॥
नेमः, पुं, (नयतीति। नी+"अर्त्तिस्तुसुहीति।" उणा। १। १४८। इति मन्।) कालः। अवधिः। खण्डम्। प्राकारः। कैतवम्। इति मेदिनी। मे, ९८॥ अर्द्धम्। भागः। इति हेमचन्द्रः। ६। ७०॥ नाभ्यादिः। अन्यः। इति

शब्दरत्नावली । सायंकालः । ऋलम् । ऋदृम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

नेमिः, स्त्री, (नयति चक्रमिति । नी + "नियो मिः ।" उणा० । ४ । ४३ । इति मिः ।) चक्रपरिधिः । रथचक्रस्य भूमिसंस्पृशिभागः । तत्पर्य्यायः । प्रधिः २ । इत्यमरः । २ । ८ । ५६ ॥ नेमी ३ । इति भरतः ॥ (यथा, रघुः । १ । ३६ ।

"मनोऽभिरामाः ध्वजिनौ रथनेमिस्वनोन्मुखैः ।
बहूनसंवादिनीः केका दिधा भिन्नाः शिखण्डिभिः ॥")

कूपोपरिस्थयष्टिप्रान्तभागः । इति भरतः ॥ (प्रान्तभागः । यथा, रघुः । ६ । १० ।

"अजयद्धेकरथेन स मेदिनी-
मुदधिनेमिमधिज्यशरासनः ॥")

भूमिस्थकूपपट्टः । इत्यन्ये । कूपस्य समीपे रज्जुधारणार्थं चिरादृश्यत्वम् । इति स्वामी ॥ तत्पर्य्यायः । त्रिका २ । इत्यमरः । १ । १० । २० ॥ कूपनिकटसमानस्थानम् । यथा,—

"नेमिर्नेमीतिका चैव स्यात् कूपान्तिकसमस्थले ॥"

इति शब्दरत्नावली ॥

नेमिः, पुं, जिनविशेषः । इति हेमचन्द्रः । १ । २८ ॥ तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ मथुरादौ तिनाश इति ख्यातः ॥ (दैत्यविशेषः । यथा, भागवते । ८ । २१ । १६ ।

"हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ।
मा युध्यत निवर्त्तध्वं नः कालोऽयमर्थसाधनः ॥"

नयति शत्रून् विनाशमिति । नी + "नियो मिः ।" उणा० । ४ । ४३ । इति मिः । वज्रः । इति निघण्टुः । २ । २० ॥)

नेमिचक्रः, पुं, परीक्षिद्वंशजः अखीमत्कस्य पुत्रः । स हस्तिनानगरे गङ्गा क्षते कौशाम्बां पुर्य्यां राजासीत् । इति श्रीभागवते । ६ । २२ । ३६ ॥ (अस्यैव राज्यशासनसमयनिर्णयो यथा, राजावल्याम् १ परिच्छेदे ।

"गजाह्वये हृते गङ्गा कौशाम्यां निवसन् सुधीः ।
षट्पञ्चतिमितान् वर्षान् तथा मासत्रयाधिकान् ।
सुखं भोगान् गतः स्वर्गं सुतं राज्येऽभिषिच्य च ॥")

नेमी, [न्] पुं, (नेम अर्हमस्यास्तीति । नेम + इनिः ।) तिनिशवृक्षः । इत्यमरटीकायां भरतः ॥

नेमी, स्त्री, (नेमि + वा ङीष् ।) नेमिः । इत्यमरटीकायां भरतः ॥ (तिनिशवृक्षः । पर्य्यायोऽस्या यथा,—

"स्यन्दनस्थितिनिघ्नो नेमौ ————— ॥"

इति वैद्यकरत्नमालायाम् ॥)

नेष्टा, [ष्टृ] पुं, (नयति शुभमिति । नी + "नप्तृनेष्टृत्वष्टृ" इति । उणा० २ । ९६ । इति तृनृप्रत्ययेन साधुः ।) ऋत्विक् । इति संक्षिप्तसारोणादिवृत्तिभरतप्रयोगश्च ॥ (तद्देवः । इति सायणः ॥ यथा ऋग्वेदे । १ । १५ । ३ ।

"अभित्यं देवं सवितारमोण्योः क्रविक्रतुम् ।
नेष्टारमग्निं पितरं भगं नृचक्षसं धिय ॥")

नैकटिकः, त्रि, (निकट + "निकटे वसति ।" ४ । ४ । ७१ । इति ठक् ।) निकटवर्त्ती । यथा,—

"प्रातीनग्यालदीप्राख्यः सुबलः परिपूजयन् ।
पर्यदलाच्चहात्रक्षेराटनैकटिकाश्रमान् ॥"

इति भट्टिः । ४ । १२ ॥

नैकट्यं, क्ली, निकटस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । निकटत्वम् ॥ (यथा, कथासरित्सागरे । १५ । १२५ ।

"बाधते तत्र नैकट्यात् सर्व्वं स मगधेश्वरः ।
तत्तत्र रक्षाहेतोश्च विनोदाय च गम्यताम् ॥")

निकटभवे, त्रि ॥

नैकभेदः, त्रि, (न एको भेदोऽत्रेति ।) उक्तावयवम् । अनेकप्रकारः । इत्यमरः । ३ । १ । ८३ ॥

नैकषेयः, पुं. (निकषाया अपत्यमिति । निकषा + ढक् ।) निकषापुत्रः । राक्षसः । इति हलायुधः ॥

नैगमः, पुं, (निगम एव । स्वार्थे अण् ।) उपनिषत् । वणिक् । (यथा, रामायणे । १ । ७७ । २३ ।

"एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥"

"नैगमा वणिजः ।" इति तट्टीकायां रामानुजः ॥) नागरः । इति मेदिनीशब्दरत्नावल्यौ ॥ नयः । (यथा, महाभारते । १२ । १०० । ४ ।

"तेषां प्रतिविधानार्थं प्रवक्ष्याम्यथ नैगमम् ॥")

ऋतिः । इति हेमचन्द्रः । ३ । ५३१ ॥ त्रि निगमसम्बन्धिनि, ॥ (निगमशास्त्रवेत्तरि । यथा, महाभारते । १३ । १६० । ४ ।

"द्विजेभ्यो बलमुख्येभ्यो नैगमेभ्यश्च नित्यशः ॥")

नैचिकं, क्ली, (नीच + ठक् ।) गोः शिरोदेशः । इति हेमचन्द्रः । ४ । ३३६ ॥

नैचिकी, स्त्री, (नीचैश्चरतीति ठक् । यद्वा निचिः कर्कशिरोदेशः । ततः स्वार्थे कन् । प्रशस्तं निचिकमस्याः । ततो ज्योत्स्नादित्वं इत्यण् ततो ङीप् ।) उत्तमा गौः । इत्यमरः । २ । ६ । १६ ॥

नैजं, त्रि, (निजस्येदमिति । निज + अण् ।) निजसम्बन्धि । स्वीयम् । यथा,—

"ब्रह्मक्षत्रस्य च ब्रह्मक्षत्रं वायव्यस्य च पार्थ्वतम् ।
आग्नेयस्य च पार्थ्नं नैजं प्राजापतस्य च ॥"

इति श्रीभागवते १० स्कन्धे वाणयुद्धे ॥ (यथा च हरिवंशे भविष्ये । ३३ । ६ ।

"स दृष्ट्वा दर्शनं नैजं व्याघ्रचर्म्माम्बरो हरः ॥")

नैत्यं, क्ली, नित्यत्वम् । नित्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (नित्यसम्बन्धि । नित्यकरणीयं वा ॥)

नैपालः, पुं, (नेपाले नेपालाख्यदेशे भवः अण् ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ नेपालदेशसम्बन्धिनि, त्रि ॥ (भूनिम्बविशेषः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।

"किरातकोऽन्यो नैपालः सोऽर्हतिक्तो ज्वरान्तकः ॥"

इक्ष्वाकुजातिभेदः । यथा तत्रैव २ भागे । अथ क्षुद्रौषधवैपालीदीर्घपत्रनीलपोरीणां गुणाः ॥

"क्षुद्रौषधी नीलपोरो नैपाली दीर्घपत्रकः ।
वातश्लेष्मकफपित्तघ्नाः सकषाया विदाहिनः ॥")

नैपालिकं, क्ली, (नेपाले नैपालाख्यदेशे भवम् । इति ठक् ।) ताम्रम् । इति राजनिर्घण्टः ॥ (ताम्रशब्दस्यास्य गुणादिकं आख्यातम् ॥)

नैपाली, स्त्री, (नेपाले भवा इत्यण् ङीप् च ।) नवमल्लिका । (नेवारि इति लोके । यथास्याः पर्य्यायः ।

"नैपाली कथिता तज्ज्ञैः सप्तला नवमल्लिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मनःशिला । (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोला शिलादिव्यौषधिः स्मृता ॥"

इति भाषाप्रकाशः । १ । १ ॥)

शैवालिका । इति मेदिनी । ले, १०४ ॥ नीली । इति शब्दरत्नावली ॥

नैपुणं, क्ली, (निपुणस्य भावः कर्म्म वा इति । "हायनान्तयुवादिभ्योऽण् ।" ५ । १ । ३० । इत्यण् ।) नैपुण्यम् । यथा, माघे । १६ सर्गः ।

"प्रकटान्यपि नैपुणं महत्
परवाच्यानि चिराय गोपितुम् ।
विपरीतमथात्मनो गुणान्
श्रुतमाकौशलमार्य्यचेतसा ॥"

(यथा, महाभारते । १३ । १८ । ८१ ।

"वैश्यो लाभं प्राप्नुयान्नैपुणञ्च
शूद्रो गतिं प्रेत्य तथा सुखञ्च ॥")

नैपुण्यं, क्ली, (निपुणस्य भावः कर्म्म वा । "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) निपुणता । निपुणस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । यथा,—

"अशक्यः सहसा राजन् भावो बोद्धुं परस्य वै ।
अन्तःस्वभावैर्गतिस्तैस्तैर्नैपुण्यं यत्नतो भजेत् ॥"

इति रामायणे लङ्काकाण्डे १७ सर्गः ॥

नैमित्तिकं, त्रि, (निमित्तादागतं निमित्तभवं वा । इति ठक् ।) निमित्तजन्यम् । यथा,—

"नैमित्तिकानि कार्य्याणि निपतन्ति यथा यथा ।
तथा तथैव कार्य्याणि नात्र कालं विचारयेत् ॥"

इति यद्दृच्छागतत्वम् ॥

माससंवत्सरादिविशेषेण नियम-शून्यावश्यककर्म्मकादाचित्ककनिमित्तोत्पन्नं पुत्रजन्मादिनिमित्तकश्राद्धादि । यथा,—

"नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥"

इति मलमासतत्त्वम् ॥

(निमित्तं वेत्ति निमित्तबोधकग्रन्थमधीते वा इति ठक् । निमित्तशास्त्राभिज्ञे तदध्ययनकर्त्तरि च ॥)

नैमित्तिकक्रिया, स्त्री, (नैमित्तिकी चासौ क्रियेति निमित्तजन्या क्रियेत्यर्थः ।) निमित्तनिश्चयवदधिकारिकर्त्तृकयज्ञकर्म्म । यथा,—

"नित्यां नैमित्तिकीं काम्यां क्रियां पुंसामशेषतः ।
समाख्याहि द्विजश्रेष्ठ सर्व्वज्ञो ह्यसि मे मतः ॥

ऊर्व्व उवाच ।

यदेतदुक्तं भवता नित्यनैमित्तिकाश्रितम् ।
तदहं कथयिष्यामि शृणुष्वैकमना मम ॥

जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्रस्य कुर्व्वीत पिता श्राद्धाभ्युदयात्मकम् ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥
(यथा, मार्कण्डेये । ३० । १ ।
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ।
गृहस्थस्य तु यत् कर्म्म तन्निष्ठामय पुत्रक ! ॥")

नैमित्तिकदानं, क्ली, (निमित्तमाश्रित्य दीयते इति दा + भावे ल्युट् । अस्य निरुक्तिर्यथा ।) निमित्तनिश्चयवदधिकारिकर्म्मोद्देश्यदानम् । यथा,—
"यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥"
इति गरुड़पुराणम् ॥

नैमित्तिकलयः, पुं, (नैमित्तिकः ब्रह्मणो दिवावसाननिमित्तत्वात् यो लयः ।) प्रलयविशेषः । यथा,—
"चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ।
अनावृष्ट्या कल्पान्ते जायते शतवार्षिकी ॥
उत्तिष्ठन्ति तदा रौद्रा दिवि सप्त दिवाकराः ।
ते तु पीत्वा जलं सर्व्वं शोषयन्ति जगत्त्रयम् ॥
भूर्भुवःस्वर्म्महर्लोकसंस्था यान्ति जनं जनाः ।
रुद्रो भूत्वा तथौ विष्णुः पातालानि दहत्यधः ॥
विष्वग्दहेत्त्रिलोकञ्च सुखाम्भोधान् हजत्यलम् ।
वर्षन्ति च वर्षशतं नानावर्णा महाघनाः ॥
विष्णुस्रजः शतं वाति वर्षाणां वायुरूर्ज्जितः ॥
विष्णुरेकार्णवे पीत्वा सर्व्वं ब्रह्मस्वरूपधृक् ।
शेतेऽनन्तासने विष्णुर्नष्टे स्थावरजङ्गमे ।
सुप्त्वा युगसहस्रं स जगदुत्थोऽखिलहरिः ॥"
इति गरुड़पुराणम् ॥
(तथा च भागवते । ८ । २४ । ७ ।
"आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥")

नैमित्तिकस्नानं, क्ली, (नैमित्तिकञ्च तत् स्नानञ्चेति । निमित्तमाश्रित्य विधेयं स्नानमित्येके ।) निमित्तनिश्चयवदधिकारिकर्म्मोद्देश्यस्नानम् । यथा,—
"चाण्डालशवस्पर्शादि श्रुत्वा स्नातां रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥"
इति गरुड़पुराणम् ॥

नैमिषारण्यं, क्ली, (निमिषान्तरमात्रेण निहतं दानवं बलं यत्र ततस्तत् नैमिषं अरण्यमिति ।) अरण्यविशेषः । तस्योत्पत्तिर्यथा,—
"तेन चक्रेण तत्सैन्यमासुरं दौर्ब्बलं गतम् ।
निमिषान्तरमात्रेण भस्मसद्भूधा कृतम् ॥
एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ॥
अरण्येऽस्मिंस्ततस्त्वेदन्नैमिषारण्यसंज्ञकम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥"
इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ अपि च ।
"देशं वः संप्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।
उद्धृत्य मनोमयं चक्रं स हत्वा तानुवाच ह ॥
क्षिप्रमेतन्मया चक्रमनुव्रजत माचिरम् ।
यत्रास्य नेमिः शीर्य्येत स देशः पुण्यवर्द्धनः ॥
ततो सुमोच तच्चक्रं ते च तत् समनुव्रजन् ।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत ॥
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्व्वत्र पूजितम् ।
सिद्धचारणसङ्कीर्णं यज्ञमन्त्रैरलंकृतम् ॥
स्थानं भगवतः शम्भोरेतन्नैमिषमुत्तमम् ।
यत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
तपस्तप्त्वा पुरा देवा लेभिरे प्रचुरान् भगान् ॥"
इति कौर्म्मे ४० अध्याये षट्कुलीयान् प्रति ब्राह्मवाक्यम् ॥ (ऋचि त्वालयश्चान्तोऽपि पाठो दृश्यते तत्र तु ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्य्यते यत्रेति युतपत्त्या नेमिशं नैमिशमेव नैमिशं तदाख्यमरण्यमिति बोध्यम् । तथा च वायवीये ।
"एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्य्यते नेमिः स देशः तपसः शुभः ॥
इत्युक्त्वा सृज्यसङ्घातं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः ॥
तेऽपि सृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्य्यत ॥
तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥"
तथा च देवीभागवते । १ । २ । २८-३२ ।
"कलिकालविभीताः स्मो नैमिशारण्यवासिनः ।
ब्रह्मणाच्च समादिष्टाच्चक्रं दत्त्वा मनोमयम् ॥
कथितं तेन नः सर्व्वान् गच्छन्त्येतस्य पृष्ठतः ।
नेमिः संशीर्य्यते यत्र स देशः पावनः स्मृतः ॥
कलेस्तत्र प्रवेशो न कदाचित् संभविष्यति ।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः ॥
तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्कथानकम् ।
चालयन्निर्गतास्तूर्णं सर्व्वदेशादिदृक्षया ॥
प्रेत्याच्च चालयच्चक्रं नेमिः शीर्य्यो ऽथ पश्यतः ।
तेनेदं नैमिशं प्रोक्तं क्षेत्रं परमपावनम् ॥")

नैमेयः, पुं, (नि + मेङ् प्रणिदाने + अचो यत् इति यत् । ततः स्वार्थे प्रज्ञादयः । सिधातुना निष्पन्नमिति केचित् ।) परिवर्त्तः । दिनिमयः । इत्यमरः । २ । ६ । ८० ॥

नैयग्रोधं, क्ली, (न्यग्रोधस्य विकारः ततः प्रज्ञादिभ्योऽण् ।" ४ । ३ । १६४ । इत्यण् । तस्य विधानसामर्थ्यात् फले न लुक् । "न्यग्रोधस्य च केवलस्य ।" ७ । ३ । ५ । इति न वृद्धिरागमश्च ।) न्यग्रोधफलम् । इत्यमरः । २ । ४ । १८० ॥ न्यग्रोधजातषण्डसादि । इति वोपदेवरामतर्कवागीशौ ॥

नैयङ्गवं, त्रि, (न्यङ्गोर्व्विकार इति । "प्राग्धितादिभ्योऽण् ।" ४ । ३ । १५४ । इति विकारेऽण् ।) न्यङ्गुरजातवस्त्रचर्म्मादि । इति वोपदेवरामतर्कवागीशौ ॥

नैयत्यं, क्ली, (नियतस्येति । नियत + ष्यञ् ।) नियतत्वम् । नियतस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैयायिकः, पुं, (न्यायं गोतमादिप्रणीतं तर्कशास्त्रविशेषं अधीते वेत्ति वा । न्याय + "क्रतूक्थादिसूत्रान्ताट्ठक् ।" ४ । २ । ६० । इति ठक् ।) न्यायवेत्ता । न्यायाधीता । तत्पर्य्यायः । सात्त्वतादः २ सात्त्वादिकः २ आर्हितः ३ । इति जटाधरः ॥
(यथा, महाभारते । १ । २ । १६६ ।
"नैयायिकानां सुखेन वरञ्चात्मजेन च ।
पराजितो यत्र बन्दी विवादेन महात्मना ॥")

नैरन्तर्य्यं, क्ली, (निरन्तरस्य भाव इति । निरन्तर + ष्यञ् ।) निरन्तरत्वम् । निरन्तरस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (यथा मनौ । ६ । २७१ श्लोकस्य टीकायां कुल्लूकभट्टः ।
"ये च ददति तानपि नैरन्तर्य्याद्यपराधगोचरापेक्षया घातयेत् ॥")

नैराश्यं, क्ली, (निराशस्य निरभिलाषस्य भावः इति । निराश + ष्यञ् ।) आशायाः अभावः । यथा,—
"आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
आशया पिङ्गला वेश्या त्यक्त्वा जग्मे निरर्थकम् ॥"
इति ब्रह्मवैवर्त्तीयश्रीकृष्णजन्मखण्डे ६७ अः ।
(यथा, महाभारते । १ । २२५ । १ ।
"स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् संक्रुद्धो हयवाहनः ॥")

नैरुक्तं, त्रि, (निरुक्तस्येदं निरुक्तो भवं वा । "अवृद्धाद्गायनादिभ्यः ।" ४ । ३ । ७३ । इति अञ् ।) निरुक्तसम्बन्धि । यथा, "वर्द्धत्यत्र दुःभिर्द्धेति यस्य ठः न डः इति नैरुक्तम् ॥" इति रामतर्कवागीशः ॥
(निरुक्तं यत्यधिगेयं वेत्ति अधीते वा । निरुक्तवेत्ता । यथा, मनुः । १२ । १११ ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ॥")

नैर्ऋतः, पुं, (निर्ऋतेरपत्यम् । इत्यण् ।) राक्षसः । (यथा, महाभारते । १ । ६६ । ५५ ।
"तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः ॥")
पश्चिमदिग्धिपकोबाधिपतिः । इत्यमरः । १ । १ । ६३, १ । ३ । २ ॥ ज्योतिषमते तत्कोणाधिपतौ राहुः । यथा,—
"सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यश्चेदृग्गमन्त्री च प्रागादिदिग्गधीश्वराः ॥"
इति ज्योतिस्तत्त्वम् ॥

नैर्ऋती, स्त्री, (निर्ऋतेरियमिति । निर्ऋतोऽधिष्ठाता यस्यां वा । अण् ङीप् च ।) अवाचीप्रतीच्योर्मध्या दिक् । नैर्ऋतकोणः । इति राजनिर्घण्टः जटाधरश्च ॥ (यथा, मनुः । ११ । १०५ ।
"स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ।
नैर्ऋतीं दिशमातिष्ठेदनिवर्त्तन् जितेन्द्रियः ॥")

नैर्गुण्यं, क्ली, (निर्गुणस्य भावः कर्म्म वा । निर्गुण + ष्यञ् ।) निर्गुणत्वम् । यथा, श्रीभागवते । २ । १ । ६ ।
"परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥"
(यथा, महाभारते । २ । १६ । २५ ।

"गुणात्तिः संप्रयाद्राजन् नैर्गुण्यं मन्यसे कथम्॥
न चास्ति प्रकृतेः सत्त्वादि गुणा यत्र ज्ञानयोगे।
तत्त्वज्ञानयोगः। यथा, भागवते। ३। ३२।३२।
"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो मदपाश्रयः॥")

नैर्मल्यं, क्ली, (निर्मलस्य भावः। इति ष्यञ्।) निर्मलत्वम्। (तथा च हारीतेनोक्तम्।
"जिह्वाग्रेहं जनयति तथा नेत्रनैर्मल्यकारी॥")
विषयवैराग्यम्। यथा,—
"विषयेष्वतिसंरागो मानसो मल उच्यते।
तस्मिन्नेव हि विरागस्तु नैर्मल्यं समुदाहृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥

नैर्ऋत्यं, क्ली, (नीलस्य भावः। ष्यञ्।) नीलिमा।
इति सुबोधटीकायां भरतसेनगोस्वामी॥

नैविद्यं, क्ली, (नवानां पूरणः। नवन्+डट्। नवानां पूरणं तत्। तस्य विकारः। नवन्+विद्+ष्यञ्।) नवसंख्यापूरणविकारः। यथा,—
"नैविद्यं पौष्टता चापि सुखरत्वञ्च श्रोत्रता।
माधुर्य्यमिति पञ्चाभी पुनुक्तैस्तु गुणाः स्मृताः॥"
इति सङ्गीतदामोदरः॥
(निविड़स्य भावः। निविड़+ष्यञ्।) निविड़ता च।

नैवेद्यं, क्ली, (निवेदं निवेदनमर्हतीति। निवेद+ष्यञ्।) देवाय निवेदनीयद्रव्यम्। तस्य विवृत्तिर्यथा,—
"चतुर्विधं कुलेशानि द्रव्यं ते षड्रसान्वितम्।
निवेदनात् भवेत्तस्मिन्नैवेद्यं तदुदाहृतम्॥"
इति कुलार्णवे १७ उल्लासः॥
तदृद्रव्याणि यथा,—
"सशितेन सुमुद्गेन पायसेन ससर्पिषा।
सितोदनं सकदलिदध्याद्यैश्च निवेदयेत्॥"
इति प्रपञ्चसारः॥
तत् पञ्चविधम्। यथा,—
"निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा।
तद्भक्ष्यार्हं पञ्चविधं नैवेद्यमिति कथ्यते॥
भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चूष्यञ्च पञ्चमम्।
सर्व्वत्र चैतन्नैवेद्यमाराध्यायै निवेदयेत्॥" *॥
तत् पात्रं यथा,—
"तैजसेषु च पात्रेषु सौवर्णे राजते तथा।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥
यद्वदासमये वापि नैवेद्यं स्थापयेद्बुधः।
सर्व्वाभावे च माड़िये खड़ुत्तघटिते यदि॥"
इति तन्त्रसारः॥ * ॥
तद्दानफलं यथा,—
"नैवेद्येन भवेत् स्वर्गो नैवेद्येनाक्षयं भवेत्।
धर्म्मार्थकाममोक्षाश्च नैवेद्येषु प्रतिष्ठिताः॥
सर्व्वयज्ञफलं नित्यं नैवेद्यं सर्व्वतुष्टिदम्।
ज्ञानदं मानदं पुण्यं सर्व्वभोग्यमयं तथा॥
मनसापि महादेवे नैवेद्यं दातुमिच्छति।
यो नरो भक्तियुक्तः सन् धीर्घायुः स सुखी भवेत्॥
महामायां कदा देवीमर्चयिष्यामि भक्तितः।
नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः।
स सर्व्वकामान् संप्राप्य मम लोके महीयते॥"
इति कालिकापुराणे। १६८।१७०। अध्यायः॥
तत्कालो यथा,—
"अर्व्वाक् विसर्ज्जनादूर्द्धं नैवेद्यं सर्व्वसुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति ध्रुवात्॥
पञ्चरात्रविदो मुख्या नैवेद्यं भुञ्जते सुखम्॥"
इति गरुड़पुराणम्॥
तस्य स्थापनक्रमो यथा,—गौतमीये।
"नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः॥
दक्षिणभागस्तु देवताया एव न तु साधकस्य।
पक्वञ्च देवतावामे आमान्नञ्चैव दक्षिणे॥
पुरश्चरणचन्द्रिकायाम्।
दक्षिणन्तु परित्यज्य वामे चैव निधापयेत्।
अभोज्यं तद्भवेदन्नं प्राणीयञ्च सुरोपमम्॥"
इति तन्त्रसारः॥
तन्मुद्रा यथा,—
"नैवेद्यमुद्रामङ्गुष्ठकनिष्ठार्थां प्रदर्शयेत्।
कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता॥
तर्ज्जनीमध्यमाङ्गुष्ठैरपानस्य तु मुद्रिका।
अनामामध्यमाङ्गुष्ठैरुदानस्य तु सा स्मृता॥
तर्ज्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका।
सर्व्वाभिः सा समानस्य प्राणाद्यन्नेषु योजिता॥
तारपूर्व्वां जपेन्मुद्रां प्राणादीनां प्रदर्शयेत्॥"
इति यामलः॥
ब्राह्मणाय तत्समर्पणं यथा,—
"साक्षात् खादति नैवेद्यं विप्ररूपी जनार्द्दनः।
ब्राह्मणे परितुष्टे च सन्तुष्टाः सर्व्वदेवताः॥
देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति।
भक्षीभूतञ्च नैवेद्यं पूजनं निष्फलं भवेत्॥
देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः।
प्रशस्तं सर्व्वदेवेषु विष्णोर्नैवेद्यभोजनम्॥"
शूद्रस्य तन्नैवेद्यविधिर्यथा,—
"शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति॥"
इति श्रीकृष्णजन्मखण्डे २१ अध्यायः॥ * ॥
विष्णुनैवेद्यभोजनफलादि स्कान्दे।
"कृत्वा चैवोपवासन्तु भोक्तव्यं द्वादशीदिने।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम्॥
पाद्मे।
हृदि रूपं मुखे नाम नैवेद्यसदरे हरेः।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः॥
स्कान्दे।
अग्निष्टोमसहस्रेण वाजपेयशतेन तथा।
तुल्यं फलं भवेद्देवि! विष्णोर्नैवेद्यभक्षणात्॥
पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः।
महाप्रसाद इत्युक्ता याह्यं विष्णोः प्रयत्नतः॥
वृहत्पद्मपरिशिष्टे।
पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम्।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत्॥
स्वदत्तमिति विप्रेण्यमीयम्॥ स्मृतौ।
ब्रह्मचारिगृहस्थैश्च वनस्थयतिभिस्तथा।
भोक्तव्यं विष्णुनैवेद्यं नात्र कार्य्या विचारणा॥"
इत्येकादशीतत्त्वम्॥
अपि च।
"विष्णोर्निवेदितं पुष्पं नैवेद्यं वा फलं जलम्।
प्राप्तिमात्रेण भोक्तव्यं त्यागेन ब्रह्महा नरः॥
भक्षणैर्भक्षणाद्विप्र अश्नतो भवेन्नरः।
यस्यनैवेद्यनैवेद्यं भाग्येनोपस्थितं शुभम्॥
प्राप्तिमात्रेण यो भुङ्क्ते भक्त्या विष्णुनिवेदितम्।
पुंसां शतं समुद्धृत्य जीवन्मुक्तः स्वयं भवेत्॥
विष्णुनैवेद्यभोजी यो नित्यं वा प्रत्यहेहरिम्।
पूजयेत् स्तौति वा भक्त्या स विष्णुसदृशो भवेत्॥
पुंश्चल्यन्नभवीरान्नं शूद्रश्राद्धान्नमेव च।
यद्धरेरनिवेद्यञ्च तथामांसमभक्ष्यम्॥
शिवलिङ्गप्रदत्तान्नं यदन्नं शूद्रयाजिनाम्।
चिकित्सकद्विजान्नञ्च देवलान्नं तथैव च॥
कन्याविक्रयिणामन्नं यदन्नं योनिजीविनाम्।
अशुद्धान्नं पर्य्युषितं सर्व्वमभक्ष्यावशेषकम्॥
शूद्रापतिद्विजान्नञ्च शवदाहद्विजान्नकम्।
अदीक्षितद्विजान्नञ्च यदन्नं शवदाहिनाम्॥
अगम्यागामिनाञ्चैव द्विजानामन्नमेव च।
मिथ्यादृशां क्षत्रियाणामन्नं विश्वासघातिनाम्॥
मिथ्यासाक्ष्यप्रदानाच्च ब्राह्मणानान्तथैव च।
एतत् सर्व्वं विशुध्येत विष्णोर्नैवेद्यभक्षणात्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३० अध्यायः॥ * ॥
"विष्णोर्निवेदितान्नेन यष्टव्याः सर्व्वदेवताः।
पितरोऽतिथयश्चैवमिति वेदेषु विश्रुतम्॥
अन्नं सर्व्ववसूनां हि इदं सारं सुदुर्लभम्।
विष्णोर्नैवेदितान्नस्य कलां नार्हन्ति षोड़शीम्॥
यदृच्छया तन्नैवेद्यं यो भुङ्क्ते साधुसन्नतः।
यद्दिवर्षसहस्राणां प्राप्नोति तपसां फलम्॥
यो निवेद्य हरिं भुङ्क्ते भक्त्या भुक्तञ्च नित्यशः।
किं वा तपस्या सुतरां स हरेस्तेजसा समः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३७अध्यायः॥
शिवनैवेद्ये विशेषो यथा, वृहच्चयज्ञपरिशिष्टे।
"अघास्त्रं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
घ्राणेनाघ्रायते यद्यत् सर्व्वं याति पवित्रताम्॥
घ्राणेनाघ्रायते यद्यत् शिवपूजने तदुत्तमम्
इत्याह्निकतत्त्वम्॥" कालिकापुराणे।
"यो यद्देवार्चनरतः स तन्नैवेद्यभक्षकः।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्॥"
वैष्णवपदमन्यदेवोपासकपरम्।
'समानन्त्वन्यनैवेद्यं भक्षयेदन्यदेवतः।'
एतदप्युत्तरपरम्। नन्दिकेश्वरपुराणे।
'दत्त्वा नैवेद्यवस्त्रादि नादद्यात् क्रयक्रयम्।
वस्त्रं शिवसुहृद्भिश्च तदादाने न तत्फलम्॥'
इति शिवदत्ते विशेषः।" इत्येकादशीतत्त्वम्॥
खदत्तशिवनैवेद्यस्यापि भक्त्या भक्षणसूक्तं यथा,
"रोगं हरति निर्म्माल्यं शोकन्तु चरणोदकम्।
अघौघं पातकं हन्ति शम्भोर्नैवेद्यभक्षणम्॥"
इति शब्दकल्पद्रुमधृतशिवरहस्यवचनम्॥
शिवनैवेद्यस्याग्राह्यत्वकारणं यथा,—
राधिकोवाच।
"एवम्भूतस्य च विभो! सर्व्वेशस्य महात्मनः।
न ग्राह्यं कथमुच्छिष्टं ब्रूहि सर्व्वेहभञ्जन!॥
श्रीकृष्ण उवाच।
शृणु देवि! प्रवक्ष्येऽहमितिहासं पुरातनम्।

पापेन्धनानां दहने ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श सुखवसन्तं नारायणं द्विजः ॥
तुष्टाव गूढैः स्तोत्रैश्च प्रबन्धं भक्तितो मुदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव सुखं तेनैव किञ्चन ।
किञ्चिदन्यच्च वस्तूनां भक्षणाय च दुर्लभम् ॥
सिद्धाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्षणेकाश्च तत् सर्वं भुक्तश्च प्राप्तिमात्रतः ॥
सुक्त्वा सुदुर्लभं वस्तु नगत्ते प्रेमविह्वलः ।
पुलकाञ्चितसर्वाङ्गः साश्रुनेत्रो मुदान्वितः ॥
गायन्नाम गुरोर्भक्त्या सुकण्ठः पञ्चवक्त्रतः ।
रागभेदैकतानेन तालमानेन सुन्दरम् ॥
पपात हसदूर्ध्वस्तात् शूलश्च व्याघ्रचर्म्म च ।
स्वयं निपत्य पश्चाच्च रुदन्मूर्च्छामवाप च ॥
अतीवकमनीयैतद्रूपध्यानैकमानसः ।
सहस्रदलमध्यस्थं मां पश्यन् क्षुत्तरोरुचे ॥
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ।
मुदा जगाम शीघ्रं तत् प्रसन्नवदनेक्षणा ॥
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वार्त्तां पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
तां शशुमुद्यतां देवीं हत्याय च त्रिलोचनः ।
बोधयामास विविधं तुष्टाव संपुटाञ्जलिः ॥
श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ।
दुरुच्चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥

पार्व्वत्युवाच ।

सुचिरञ्च तपस्तप्तं मया तत्प्राप्तमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चिताहं कथं विभो ॥
यतो न दत्तनैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो ग्रहाणैतत् फलमेव महेश्वर ! ॥
अद्यप्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते भक्षेकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्ता पार्व्वती मानाद्रुरोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
सदा शिवः शिवां भक्त्या कृत्वा वक्षसि सादरम् ।
तत्क्षणभङ्गं स्तोत्रेण विनयेन चकार ह ॥
करेण चक्षुषोर्नीरं संगृह्य च पुनः पुनः ।
बोधयामास विविधैर्नीतिवाक्यैर्मनोहरैः ॥
परितुष्टा च सा देवी भर्त्तारं ससुवाच ह ।
कलेवरञ्च त्यक्ष्यामि नैवेद्येन विना हरेः ॥
बिभर्म्मि देहं सततं तव सौभाग्यवर्द्धितम् ।
कथं वहामि सौभाग्यरहितञ्च कलेवरम् ॥
अपूर्व्वं तव नैवेद्यं जन्मजन्मजराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्र्यमहेश्वर ! ।
सुपवित्रं भवेत्तत्र विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवमुक्ता सा देवी देहं त्यक्तुं समुद्यता ।
चस्तो हरस्तत्पुरतः स्तुत्वा च स्तोत्रकार ह ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३० अः ॥

ततः कारणान्तरं यथा,—

श्रीदेव्युवाच ।

"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ! ।
तत् कथं परमेशान ! निर्म्माल्यं तव दूषितम् ॥

ईश्वर उवाच ।

माभैर्माभैर्महादेवि ! ज्ञानसारं शृणु प्रिये ।
एतज्ज्ञानं महादेवि ! सारात्सारं परात्परम् ॥
पञ्चभूतात्मकं देवि सुखं मे परिकीर्त्तितम् ।
मध्यस्थानं स्थितं तत्तु तत्सुखं परमेश्वरि ! ॥
श्यामलं तत्तु ईशानं सदा ऊर्द्धे सुचिस्मिते ! ।
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि सुखमूर्द्धे वरानने ! ॥
क्षीरोदमन्थने देवि उत्थितं गरलं विषम् ।
उत्थितं गरलं यत्तु ब्रह्माण्डनाशकारकम् ॥
तदेव गरलं देवि हस्ते कृत्वा तु तद्विषम् ।
कृष्णाञ्जननिभं दिव्यं गरलं जलवत्तदा ।
मम हस्ते महेशानि आविरासीत् सुचिस्मिते ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
पिपीय तद्विषं रूक्षं तीक्ष्णं ब्रह्माण्डनाशकम् ।
ततः श्यामसुखे देवि न पीत्वा तद्विषं प्रिये ॥
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ।
ततःप्रभृति देवेशि सुखं व्याजायते सदा ॥
कण्ठे तु कलुषं भूत्वा सदा तिष्ठति कामिनि ।
ततःप्रभृति देवेशि नीलकण्ठत्वमाप्नुयाम् ॥
ईशानं मनुसुखं देवि परं ब्रह्म वरानने ।
प्रत्यङ्गिरामयं देवि मनुसुखं कमलानने ॥
साक्षात् ज्योतिर्मयी देवी सदा मे सुखसंस्थिता ।
पत्रं वा यदि वा पुष्पं जलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो ददात् परमेशानि मनुसुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं ततः ।
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तस्य वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं मनुसुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि ! शृणीयात् शिरसा सदा ॥
स ब्रह्मतेजसा तस्य समतां याति सुन्दरि ! ।
न दद्यादृषये देवेशि ! उपचारं सुचिस्मिते ! ॥
लिङ्गोपरि वरारोहे ! यच्च तस्य सुचिस्मिते ।
गिरादामि शृणु प्रौढ़े वचनं मम कामिनि ॥
स एव नारकी भूत्वा नरकं सर्व्वदाप्नुयात् ।
अशौचनरकं भुक्त्वा अशौचयोनिमाव्रजेत् ॥
अशौचस्यावरं देवि चक्रमत्र तथा प्रिये ।
भुक्त्वा तु सर्व्वपापान् स अशौचक्रिमितां व्रजेत् ॥
शृणु देवि प्रवक्ष्यामि उच्छिष्टं मम पार्व्वति ।
उपचारं स्थापयित्वा पूतं पात्रान्तरे प्रिये ॥
कृत्वा तु मन्त्रपूतं हि उपचारं निवेदयेत् ।
वामदेवादि देवेशि सुखेषु वरवर्णिनि ॥
भक्ष्यं मम देवेशि ब्रह्माण्डसंहिकारकम् ।
एतद्धि परमेशानि ! ब्रह्मादीनां सुदुर्लभम् ॥
अशुचिर्व्वा शुचिर्व्वापि उच्छिष्टं भक्षयेद्यदि ।
स एव परमाराध्यः साक्षाद्ब्रह्म सुचिस्मिते ॥
उच्छिष्टभक्षणे कामी च एव श्रीसदाशिवः ।

निर्म्माल्यं दृढभक्तित्वादृषीणामपि दुर्लभम् ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण सुन्दरि ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वाः किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ॥
निर्म्माल्येषु च देवेशि ! अधिकारी कथं भवेत् ॥"

इति लिङ्गार्चनतन्त्रे । १३ । १४ । पटलः ॥

नैवेद्यिकं, क्ली, (निवेद्याय गार्हस्थ्याय हितम् । निवेद्य + ठक् ।) निवेद्यनार्थे गार्हस्थ्याय यत् कल्पा दीयते तत् । इति मिताक्षरा । यथा, याज्ञवल्क्यः । १ । २१० ।

"भूदीपांशान्नवस्त्राम्भस्तिलसर्पिःप्रतिग्रहान् ।
नैवेद्यिकं स्वबन्धुभ्यो दत्त्वा स्वर्गे महीयते ।

निवेद्यसम्बन्धिनि, त्रि ॥

नैष्यं, त्रि, (निशायाः इदम् । निशा + "तत्रेदम् ।" ४ । ३ । १२० । इति अञ् ।) निशासम्बन्धि । (यथा, हरिवंशे तायाम् । ४ । २ ।

"सलिलमये ग्रथिते रवेर्दीधितयो मूर्च्छिता-
स्तमो नैष्यम् ।
उपयन्ति दर्पणोदरनिहिता इव मन्दिर-
स्थाः ॥" * ॥

निशायां भवम् । निशा + "निशाप्रदोषाभ्याच्च ।" ४ । ३ । १४ । इति छप्रत्ययेऽञ् ।) निशाभवम् ।

इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । ६ । १०२ ।

"पूर्व्वां सन्ध्यां जपंस्तिष्ठन्नैष्यमेनो व्यपोहति ।
पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥")

नैष्किकं, त्रि, (निशायां भवम् । निशा + "निशाप्रदोषाभ्याच्च ।" ४ । ३ । १४ । इति ठञ् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (निशायापकम् ॥ स्त्रियां ङीप् । यथा, मनुः । ५ । ६७ ।

"नृशामक्षत्रचूड़ाणां विशुद्धिर्नैष्किकी स्मृता ॥")

नैष्किलं, त्रि, निष्किलस्य भावः कर्म्म वा ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैषधः, पुं, (निषधानां राजा । निषध + अण् ।) नलराजा । इति त्रिकाण्डशेषः ॥ (यथा महाभारते । ३ । ५६ । १६ ।

"तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्ती पुनः पुनः ॥"

निषधदेशाधिपतिः । यथा, रघुः । १८ । १ ।

"स नैषधस्यार्थपतेः सुतायां
सुतमुत्पादयामास निषिद्धबधुः ॥"

वर्षविशेषः । जम्बुद्वीपेश्वरोऽग्नीध्रस्तु स्वपुत्राय हरिवर्षाय वर्षमेतदत्तवान् । यथा, विष्णुपुराणे । २ । ४ । २० ।

"तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ॥"

नैषधं नलमधिकृत्य कृतो ग्रन्थः । नैषध + अण् खनामख्यातो हर्षदेवविरचितो द्वाविंशसर्गात्मकः काव्यग्रन्थविशेषः । यथा,—

"उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥"*॥

निषधानामयमिति । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) निषधसम्बन्धिनि, त्रि ॥

नैष्किकः, पुं, (निष्के सर्व्वे दीनारे तदाकारे वा नियुक्तः । निष्क + "तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) रूप्याध्यक्षः । इत्यमरः । २ । ८ । ७ ॥ टङ्कपतिः । पुरुषाश्वादिरूपं घटितं रजतं रूप्यं तस्याध्यक्षः । इति भरतः ॥ (त्रि, निष्केण क्रीतं निष्कस्य विकारो वा । "क्रीतवत् परिमाणात् ।" ४ । ३ । १५६ । इत्यनेन "असमासे निष्कादिभ्यः ।" ५ । १ । २० । इति ठक् । निष्कक्रीते । निष्कविकारे ॥)

नैष्ठिकः, त्रि, (निष्ठा विद्यतेऽस्येति । निष्ठा + मत्वर्थीयठक् ।) ब्रह्मचर्य्यं कृत्वा यावज्जीवं "गुरुकुले यो वसति सः । यथा,—

नैष्ठिको ब्रह्मचारी च वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं साधयेद्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥"

इति गरुडपुराणम् ॥

(यथा, महाभारते । ३ । २८२ । २७ ।

"शतयोजनविस्तारं न शक्ताः सर्व्ववानराः ।
क्रान्तुं तोयनिधिं वीरा नैष्ठा वो नैष्ठिकी मतिः ॥")

नैसर्गिकः, त्रि, (निसर्गादागतः । निसर्ग + ठक् ।) स्वाभाविकः । (यथा, रघुः । ५ । ३७ ।

"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकसुन्नतत्वम् ॥")

यथाच कल्किपुराणे २६ अध्याये ।

"पृच्छामस्त्वामियं भक्तिः शक्ता परमात्मनः ।
कस्य वा ग्रथिता राजन् किंवा नैसर्गिकी तव ॥"

नैस्त्रिंशिकः, त्रि, (निस्त्रिंशः खड्गः प्रहरणमस्य । निस्त्रिंश + "प्रहरणम् ।" ४ । ४ । ५७ । इति ठक् ।) खड्गधारी । निस्त्रिंशेन प्रहरति यः । तत्पर्य्यायः । असिधेनुकः २ । इत्यमरः । २ । ८ । ७० ॥ असिधेनुकः ३ । इति शब्दरत्नावली ॥

नो, व्य, (नञ् + डो ।) नहि । अभावः । इत्यमरः । ३ । ४ । ११ ॥ (यथा, अपराधभञ्जनस्तोत्रे । ७ ।

"नो शक्यं स्मार्त्तकर्म्म प्रतिदिनगहनं प्रत्यवायाकुलाख्यम् ॥")

नोधाः, [स्] पुं, (नूयते स्तूयते इति । नु + "नुवो धुट् च ।" उणा ४ । २२५ । इति असिः धुट् च । यद्वा, नवं दधातीति । नव + धा + असुन् । नवशब्दस्य नोभावश्च । इति यास्कः ।) ऋषिभेदः । इत्यादिकोषः ॥ (यथा, ऋग्वेदे । १ । ६१ । १४ ।

"उपो वेनस्य जोगुवान ओणिं
सद्यो भुवदीर्य्याय नोधाः ॥")

नोपस्थाता, [तृ] त्रि, (न उप समीपे तिष्ठतीति । स्था + ल्युच् ।) दूरस्थः । न उप समीपे तिष्ठति यः सः ॥ क्षीणाधिविशेषः । यथा,—

"अन्यवादी क्रियाहीनो नोपस्थाता निरुत्तरः ।
आकृतप्रपलायी च क्षीणः पञ्चविधः स्मृतः ॥"

इति मिताक्षरायां व्यवहारमातृकायाम् ॥

नौः, स्त्री, (नुद्यतेऽनयेति । नुद प्रेरणे + "ग्लाजिस्थाश्वसिजनिभ्यो डौः ।" उणा २ । ६४ । इति डौः ।) नौका । इत्यमरः । १ । १० । १० ॥ यथा, महाभारते । १ । १५० । ४—५ ।

"ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥
सर्व्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ग्लिष्वे भागीरथीतीरे नरैर्विश्रम्भिभिः कृताम् ॥"

एतेन यन्त्रवाहिता नौका प्रतीयते । कक्षेर नौका इति हलिमोट् इति च यस्याः प्रसिद्धिः ॥

नौका, स्त्री, (नौरेव । नौ + स्वार्थे कन् ।) नद्यादिसन्तरणार्थकाष्ठादिनिर्म्मितयानविशेषः । वारिरथः । इति त्रिकाण्डशेषः । तत्पर्य्यायः । भौः २ तरिका ३ तरणिः ४ तरणी ५ तरिः ६ तरी ७ तरण्डी ८ तरण्डः ९ पादालिन्दा १० उत्प्लवा ११ होड़ः १२ वाधूः १३ वार्ब्बटः १४ वह्नित्रम् १५ पोतः १६ । इति शब्दरत्नावली ॥ वहनम् १७ । इति जटाधरः ॥ * ॥

अथ निष्पदयानोद्देशः ।

"नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते ।
अम्बादिकस्तु यद्यानं स्थले सर्व्वं प्रतिष्ठितम् ॥
जले नौकैव यानं स्यात्तस्मात् यत्नतो वहेत् ॥"

अथ कालः ।

"सुवारदेलातिथिचन्द्रयोगे
चरे विलग्ने मकरादिषट्के ।
ऋक्षेऽम्बुसम्भवतिरेकतोऽन्ये
वदन्ति नौकाघटनादि कर्म्म ॥ * ॥
अश्विखरांशुसुधानिधिपूर्व्वा-
मित्रधनाच्युतभे शुभलग्ने ।
तारकयोगतिथीन्दुविशुद्धौ
नौगमनं शुभदं शुभवारे ॥" * ॥

"वृक्षायुर्व्वेदगदिता वृक्षजातिश्चतुर्व्विधा ।
समासेनैव गदितं तेषां काष्ठं चतुर्व्विधम् ॥"

तद्यथा,—

"लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते ।
दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥
लक्षणद्वययोगेन द्विजातिः काष्ठसंग्रहः ॥
क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पदं नौका
अन्ये लघुभिः सुदृढैर्विदधति जलदुर्व्यदे
नौकाम् ॥

विभिन्नजातिद्वयकाष्ठजाता
न श्रेयसे नापि सुखाय नौका ।
नैषा चिरं तिष्ठति पच्यते च
विभिद्यते वारिणि मज्जते च ॥
न सिन्धुगाद्यार्हति लौहवन्धं
तल्लोहकान्तैर्घ्रियते हि लौहम् ।
विपद्यते तेन जलेषु नौका
गुणेन बन्धं लभते भोजः ॥"

अथ लक्षणानि ।

"सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम् ॥"

अत्र सामान्यम् ।

"राजहस्तमितायामा तत्पादपरिवाहिनी ।
तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः ॥
अतः सार्द्धमितायामा तद्दैर्घ्यपरिवाहिनी ।
त्रिभागैकोच्छ्रिता नौका मध्यमेति प्रचक्षते ॥
क्षुद्राथ मध्यमा भीमा चपला पटलाभया ।
दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा ॥
नौकादशकमित्युक्तं राजहस्तैरनुक्रमम् ।
एकैकहस्तैः सार्द्धैश्च विज्ञानीयात् द्वयं द्वयम् ॥
उन्नतिश्च प्रवीणा च हस्तादर्द्धांशसम्मिता ।
अत्र भीमाभया चैव गर्भरा शास्त्रशुभप्रदा ॥
मन्थरापरतो यास्तु तासामेवाम्बुधौ गतिः ।
तासां गुणस्तु संक्षेपात् दृढता च प्रकीर्त्तिता ॥"

अथ विशेषः ।

"दीर्घा चैवोन्नता चेति विशेषे द्विविधा भिदा ॥"

तत्र दीर्घा यथा,—

"राजहस्तद्वयायामा अर्द्धांशपरिवाहिनी ।
नौकेयं दीर्घिका नाम दशाङ्गैर्नोन्नतापि च ॥
दीर्घिका तरणिर्लोला गह्वरा गामिनी तरिः ।
जङ्घाला प्लाविनी चैव धारिणी वेगिनी तथा ॥
राजहस्तैकैकवृद्ध्या नौकानामानि वै दश ।
उन्नतिः परिवाहश्च दशार्द्धांशमितौ क्रमात् ॥
अत्र लोला गामिनी च प्लाविनी दुःखदा भवेत् ।
लोलाया मानमारभ्य यावद्भवति गह्वरा ॥
लोलायाः फलमाधत्ते एवं सर्व्वासु निर्णयः ।
वेगिन्याः परतो या तु सा ग्रिवायोत्तरा यथा ॥"

भोजोऽपि ।

"नौकादीर्घं यथेच्छं स्यात्तत्रतानि विवर्ज्जयेत् ।
हस्तसंख्या परित्याज्या षड्वेदेष्यङ्कोत्तरे ॥
षट्त्रयरमिता नौका कुलं हन्ति बलं धनम् ।
नवतेरुत्तरे यापि या चत्वारिंशतेः परा ।
एतेन चत्वारिंशतिषडधिकनवतिसंख्या तत्परतोऽपि ।
यावदपरदशकं तावदेव तत्फलमिति ।"

इति दीर्घा ।

अथोन्नता ।

"राजहस्तद्वयमिता तावत् प्रवरयोन्नता ।
द्वयब्धिभिधा नौका श्रेयाय पृथिवीभुजाम् ॥
जङ्घानूर्द्धा स्वर्गसुखी गर्भिणी मन्थरा तथा ।
राजहस्तैकैकवृद्ध्या नाम पञ्चत्रयं भवेत् ॥
अजानूर्द्धा गर्भिणी च निन्दितं गात्रयुग्मकम् ।
मन्थरायाः परा यास्तु ताः शुभाय यथोद्भवम् ॥"

भोजोऽपि ।

"बाह्यात्युत्तरतो मानं नौकानामशुभं वहेत् ।
पञ्चाग्रदूर्द्धादुल्लासं धनगाद्यं क्षयोर्द्धतः ॥"

इत्युन्नता ॥ * ॥

"धात्वादीनामतो वक्ष्ये निर्णयं तरिसंश्रयम् ।
कनकं रजतं ताम्रं चितयं वा यथाक्रमम् ॥
ब्रह्मादिभिः परित्यक्ष्य नौकाचित्रणकर्म्मणि ।
चतुःशृङ्गा त्रिशृङ्गाभा द्विशृङ्गा चैकशृङ्गिणी ॥
सितरक्तापीतनीलवर्णान्दद्याद्यथाक्रमम् ।
केशरी महिषो नागो द्विरदो वाज्ञ एव च ॥

पञ्ची भेको मनुष्यश्च एतेषां वदनात्मकम् ।
नावां सुखे परिन्यस्य आदित्यादिदशा भुवाम् ॥
कलसो दर्पणश्चन्द्रस्वेदशानां महीभुजाम् ।
हंसः केकी शुकः सिंही गजोऽहिर्व्याघ्रघट-
पदौ ॥
आदित्यादिदशाजातनौकोपरि परिन्यसेत् ॥*॥
नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत् ।
सुस्तास्तवकैर्युक्ता नौका स्यात् सर्व्वतो भद्रा ।
तत्संख्या वेदश रसवेदद्वयसम्मिता क्रमशः ॥
कनकादीनां माला जयमालेति गद्यते सद्भिः ।
ब्रह्मक्षत्रे द्वितये एकैके वैश्यशूद्रयोनौ ॥ * ॥
निर्गुणं सगुणं वाथ तत् सर्व्वं द्विविधं भवेत् ।
निर्गुणं पूर्व्वसुदिष्टं सगुणानि यथा शृणु ॥
सगुणा त्रिविधा प्रोक्ता सर्व्वमध्याग्रमन्दिरा ।
सर्व्वतो मन्दिरं यत्र सा ज्ञेया सर्व्वमन्दिरा ॥
राज्ञां कोष्ठागारनारीणां यानमत्र प्रशस्यते ।
मध्यतो मन्दिरं यत्र सा ज्ञेया मध्यमन्दिरा ॥
राज्ञां विलासयात्रादि वर्षासु च प्रशस्यते ।
अग्रतो मन्दिरं यत्र सा ज्ञेया अग्रमन्दिरा ॥
चिरप्रवासयात्रायां रणे काले घनाद्यये ॥
मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम् ।
भोजस्तु ।
दीर्घदृत्तवसुषट्दिवाकरा-
नेकदिङ्मिता यथाक्रमम् ।
राजपञ्चभुजसम्मितोन्नति-
र्मन्दिरे तरिगते महीभुजाम् ॥
भास्करादिकदशा भुवां पुनर्धातुनिर्म्मयनमत्र नवदण्डवत् ॥
काष्ठजं धातुजश्चेति मन्दिरं द्विविधं भवेत् ।
काष्ठजं सुखसम्भूत्यै विलासे धातुजं मतम् ॥
अत्र गृह्यासनादीनां मन्त्ररोल्लोचयोरपि ।
अन्येषाञ्चैव सुनिभिर्निर्णयः पूर्व्ववन्मतः ॥
दिङ्मात्रमिदमुद्दिष्टं नौकालक्षणमग्रजम् ।
प्रधानेष्वेव नियमः अप्रधाने न निर्णयः ॥
लघुता दृढ़ता चैव गामितारुद्रता तथा ।
समतेति गुणोद्देशो नौकानां संप्रकाशितः ॥
एवं विचिन्त्य यो राजा नौकायानं करोति च ।
स चिरं सुखमाप्नोति विजयं समरे श्रियम् ॥
योऽज्ञानादन्यथा यानं नौकानां कुरुते नृपः ।
तस्यतानि विनश्यन्ति यशो वीर्य्यं बलं धनम् ॥"
इति निष्पदयानोद्देशे नौकायानम् ॥ * ॥
अघन्यजलयानानि यथा,—
"नौकान्यतो जले यानं जघन्यमिति गद्यते ।
तद्देहा बहवस्ते तु पाश्चात्यानां प्रकीर्त्तिताः ॥
द्रोणीरूपन्तु यद्यानं द्रोणीयानमुदाहृतम् ।
घटीभिर्घटितं यानं घटीनौरिति गद्यते ॥
तुम्बाद्यैस्तु फलैर्यानं फलयानं प्रचक्षते ।
चर्म्मभिस्तूलपूर्णैश्चर्म्मयानं तदुच्यते ॥
यानं यल्लघुभिर्वृक्षैर्वृक्षयानमुदाहृतम् ।
जन्तुभिः सलिले यानं जन्तुयानं प्रचक्षते ॥
बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः ॥"
इति युक्तिकल्पतरौ निष्पदयानोद्देशः ॥

नौकादण्डः, पुं, (नौकायाः परिचालनार्थं यो दण्डः ।) चेपणी । इत्यमरः ।१।१०।१३॥ चाइड़ इति ख्यातो इति नगी इति च भाषा ॥
नौतार्य्यं, त्रि, (नावा नौकया तार्य्यं तरणीयम् ।) नाव्यम् । नौकागम्यदेशादि । इत्यमरः ।१।१०।१०।
न्यकारका, स्त्री, (न्यक् क्रियतेऽसौ पृषोदरात् कलोपे साधुः ।) शूद्रजन्तुकीटः । विष्ठाकृमिः । इति हारावली । १६३ ॥ (क्वचित् अन्यकारका इति पाठः ॥)
न्यकारः, पुं, (न्यक् क्रियते इति । कृ + घञ् ।) न्यक्करणम् । तत्पर्य्यायः । अवज्ञा २ परीहारः ३ परिहारः ४ पराभवः ५ अपमानम् ६ परिभवः ७ तिरस्कारः ८ तिरस्क्रिया ९ अवहेला १० हेला ११ अवहेलनम् १२ हेलनम् १३ अनादरः १४ अभिभवः १५ खर्व्वणं १६ खर्व्वनम् १७ रीढ़ा १८ अभिभूतिः १९ निक्षतिः २० असूयनम् २१ असूर्य्यनम् २२ नीकारः २३ अवहेलम् २४ अमाननम् २५ क्षेपः २६ निकारः २७ धिक्कारः २८। इति शब्दरत्नावली ॥ विमानना । इति कालिदासः ॥ (यथा, महानाटके । ६ । १४ ।
"न्यकारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो
रावणः ॥")
न्यक्षं, क्ली, कार्त्तस्वरम् । हेमम् । निकृष्टे, त्रि । इति मेदिनी । धे, १६ ॥
न्यक्षः, पुं, (नीयते अक्षिणी यस्य । यच् समासे ।) महिषः । इति मेदिनी । धे, १६ । जामदग्न्यः ॥ इति हैमचन्द्रः ॥
न्यग्रोधः, पुं, (न्यक् रुणद्धि इति । रुध + अच् ।) वटवृक्षः । (यथा, भागवते । ४ । ६ । १६ ।
"धनसोऽम्बरात्यत्नक्षत्रन्यग्रोधहिङ्गुभिः ॥")
श्यामपरिमाणम् । इत्यमरः । २ । ४ । ३२, ३।३।६५ ॥ शमीवृक्षः । इति मेदिनी । धे, ३२ ॥ विषपर्णी । मोहनाख्यौषधिः । इति विश्वः ॥ (उग्रसेनजनृपपुत्राणामन्यतमः । यथा, हरिवंशे । ३७ । ३० ।
"नग्रोधसेनस्य सुतास्त्वेवां कंसस्तु पूर्व्वजः ।
न्यग्रोधश्च सुनामा च कङ्कः शङ्कः सुभूमिपः ॥")
न्यग्रोधपरिमण्डलः, पुं, (न्यग्रोधः श्यामः परिमण्डलं परिणाहो यस्य ।) श्यामपरिमितोच्चयपरीणाहः पुरुषः । एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा, मात्स्ये ११८ अः ।
"महाधनुर्धरास्त्वेव त्रेतायां चक्रवर्त्तिनः ।
सर्व्वलक्षणसम्पन्ना न्यग्रोधपरिमण्डलाः ॥
न्यग्रोधौ तु स्तनौ बाहू श्यामो न्यग्रोध उच्यते ।
श्यामेन उच्छ्रयो यस्य अधः ऊर्द्ध्वञ्च देहिनः ।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः ॥"
(अपिच । भट्टिकाव्ये भरतमल्लिकधृतायि-पुराणवचनम् ।
"प्रसारितभुजस्येह मध्यभागदयान्तरम् ।
उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥")

न्यग्रोधपरिमण्डला, स्त्री, (न्यक्रुणद्धि इति न्यग्रोधं अधःप्रसृतं परितो मण्डलं नितम्बमण्डलरूपं यस्याः । यद्वा न्यग्रोधस्य वटस्य इव परिमण्डलं परिणाहो नितम्बभागे यस्याः ।) अङ्गनाविशेषः । यथा,—
"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला ॥"
इति शब्दमाला ॥
(तथाच भट्टिः । ६ । १८ ।
"योषिद्वृन्दारिका तस्य दयिता हंसनादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥")
न्यग्रोधा, स्त्री, (न्यक्रुणद्धीति । रुध + अच् । टाप् ।) न्यग्रोधी । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्या यथा,—
"हस्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ सकुलकः ।
हवनी नामतश्चित्रा न्यग्रोधा सप्तिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशोऽध्याये ॥)
न्यग्रोधी, स्त्री, (न्यक् रुणद्धीति । रुध + अच् । गौरादित्वात् ङीष् इति प्राचः ।) उपचित्रा । इत्यमरभरतौ ॥ इङ्गरकानी इति भाषा । धुलकुँड़ी इति केचित् ।
न्यङ्, [च्] त्रि, (नितरामञ्चतीति । अञ्चु + क्विप् ।) नीचः । खर्व्वः इत्यमरः । ३ । १ । १० ॥ निम्नः । इति मेदिनी । चे, ५६ ॥ कार्त्तस्वरम् । इति विश्वः ॥
न्यङ्कुः, पुं, (नितरां अञ्चति गच्छतीति । अञ्चु मतौ + "नावञ्चेः ।" उणा । १ । १८ । इति उः । "न्यङ्कवादीनाञ्च ।" ७ । ३ । ५३ । इति कुत्वम् ।) मृगभेदः । इत्यमरः । २ । ५ । १० ॥ (यथा, हरिवंशे । १२१ । ४१ ।
"न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ॥")
मुनिविशेषः । इति मेदिनी । के, २७ ॥
न्यङ्कुभूरुहः, पुं, (न्यङ्कुरिव भूरुहः ।) श्लोणकवृक्षः । इति चिकाण्डशेषः ॥ (श्लोणकशब्दोऽस्य विवरणं ज्ञातव्यम् ॥)
न्यच्छं, क्ली, (नितरामच्छम् ।) क्षुद्ररोगविशेषः । मेचेता इति भाषा ॥ तल्लक्षणं यथा,—
"मण्डलं महदल्पं वा श्यावं वा यदि वा सितम् ।
सहजं नीरुजं गात्रे न्यच्छं तदभिधीयते ॥"
तच्चिकित्सा यथा,—
"शिरावेधैः प्रलेपैश्च तथाभ्यङ्गैरुपाचरेत् ।
न्यच्छं लिम्पेत् पयःपिष्टैः कल्कैः क्षीरितरूद्भवैः ॥
त्रिभुवनविजयापत्रं मूलं स्थविरस्य शिंशपा
त्वेभिः ।
उद्धर्त्तनं विरचितं न्यच्छव्यङ्गापहं सिद्धम् ॥
स्थविरस्य वृक्षदारोः ।" इति भावप्रकाशः ॥
न्यञ्चितं, त्रि, (नि + अञ्च + णिच् + क्तः ।) अधःक्षिप्तम् । इति जटाधरः ॥
न्यञ्चः, पुं, (नि + इ + "इरच्च ।" ३ । ३ । ५६ इत्यच् ।) अपचयः । इति केचित् ॥
न्यस्तं, त्रि, (नि + अस + क्तः ।) निहितम् । स्थापितम् । तत्पर्य्यायः । निहतम् २ । इत्य

मरः। ३। १। ८८॥ अस्य प्रपंचायान्तरं निबन्धग्रन्थे द्रष्टव्यम्॥

न्यस्तशस्त्रः, पुं, (न्यस्तं शस्त्रं येन। युद्धादिविरतत्वात् तथात्वम्।) पितृलोकः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ३। १९२।

"अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
न्यस्तशस्त्रा महाभागाः पितरः पूर्व्वदेवताः॥")

न्यस्तशस्त्रे, त्रि। यथा,—

"न्यस्तशस्त्रं दिलीपस्य तस्य शुश्रुवुषां प्रभुम्।
राज्ञामसुहृतनाराचे हृदि शल्यमिवार्पितम्॥"

इति रघुः॥

न्याक्यं, क्ली, (नितरामक्यते इति। नि+अक+ण्यत्।) भरतकुलम्। सुड़ी इति भाषा॥ तत्पर्य्यायः। भरत्रम् २ कुहवम् ३। इति शब्दचन्द्रिका॥

न्याद्यः, पुं, (न्यदनमिति। नि+अद भक्षणे+"नौ गद च।" ३। ३। ९०। इति यः।) आहारः। इत्यमरः। २। ९। ५६॥

न्यायः, पुं, विष्णुः। यथा,

"न्यग्रोधोऽणीयसामणीः श्रीमान्न्यायो नेता समीरणः।"

इति तस्य सहस्रनामसु गणितः॥ * ॥

(नियमेन ईयते इति। नि+इण्+"परिन्योर्नीणोर्द्यूताभ्रेषयोः।" ३। ३। ३७। इति घञ्।) उचितः। तत्पर्य्यायः। अभ्रेषः २ कल्यः ३ देशरूपम् ४ समञ्जसम् ५। इत्यमरः। २।८।२४॥ * ॥ (नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति। नी+"अध्यायन्यायोद्यावसंहाराच्च।" ३। ३। १२२। इति घञ्प्रत्ययेन निपातनात् साधुः। नीतिः। जयोपायः। भोगः। युक्तिः। इति चिन्तामणिः॥) प्रतिज्ञादेतूदाहरणोपनयनिगमनात्मकपञ्चावयववाक्यम्। तल्लक्षणं यथा। अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकग्रन्थज्ञानजनकवाक्यत्वम्। इति चिन्तामणिः॥ उचितानुपूर्व्विकप्रतिज्ञादिपञ्चकसमुदायत्वम्। इति शिरोमणिः॥ तल्लक्षं यथा। पर्व्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् यथा महानसं वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमान्। इति जगदीशः॥ * ॥

(पञ्चाङ्गमधिकरणम्। यथा, महाभारते। २। ५। ३।

"न्यायविद्भिस्तत्त्वज्ञः षड़ङ्गविदनुत्तमः।"

"न्यायः पञ्चाङ्गमधिकरणम्। यथा,—

'विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरः।
पञ्चावयवयोगश्च न्यायोऽधिकरणं विदुः॥'

अत्र, यूपस्य स्वरं करोति इति वाक्यं विषयः। तत्र वही यूपसम्बन्धिकर्त्तव्यता लक्षणार्था उत यूपावयवलक्षणार्था इति सन्देहो विषयः। एतावेव पूर्व्वोत्तरपक्षौ ज्ञेयौ। कल्पना लाघवानुग्रहादुत्तरः पक्षः सिद्धान्तः। फलं अनुष्ठानभेदः। पूर्व्वपक्षे तत्तत्कार्य्यसौ करणादिना कालान्तरं रूपसङ्गं निर्म्मातव्यम्। सिद्धान्ते एकदेशस्य पृथक् करणमात्रमिति। इदमेव पञ्चकं मीमांसाधर्म्मभूक्तम्।

'सूक्ष्मं सांख्यक्रमौ नौमौ निर्णयः सप्रयोजनः।
पक्षैतान्यङ्गानीहि वाक्यमित्युच्यते बुधैः॥"

सूक्ष्मं ग्रहणार्थत्वाद्विषयः। सांख्यः एवमेवं वेति विचारः। क्रमः अतिक्रमः सिद्धान्तस्य पूर्व्वः पक्ष इत्यर्थः। निर्णयः सिद्धान्तः। प्रयोजनं फलम्। इति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्व्वोत्तरमीमांसाधिकरणानि न्यायस्तद्विदुः॥" इति तट्टीकायां नीलकण्ठः॥ * ॥)

षड़्दर्शनान्तर्गतदर्शनविशेषः। तत्पर्य्यायः। तर्कविद्या २ आन्वीक्षिकी ३। इत्यमरभरतौ॥ एतद्दर्शनमते नित्येच्छाकृतिमतिसहितः परमात्मा ईश्वरः स तु ब्रह्मपदार्थो जीवातिरिक्तः। एतच्छास्त्रप्रयोजकं चार्व्वाकादिमतनिराकरणपूर्व्वकं जगत्कारणतया ईश्वरसंस्थापनं संभ्रमादिनिरूपणेन वेदार्थनिर्णयश्च। न्यायदर्शनकारो गौतमः। तत्तुल्ये प्रमाणादिषोड़शपदार्थनिरूपणम्। तेषां तत्त्वज्ञानान्निःश्रेयसम्। तस्य भाष्यकारो वात्स्यायनः। तद्वार्त्तिककारः काल्यायनः। तट्टीकाकारो वाचस्पतिमिश्रः। तच्छास्त्रे उदयनाचार्य्यःकुसुमाञ्जलिप्रभृतिग्रन्थकारः। कुसुमाञ्जलिटीकाकारौ हरिदासरामभद्रौ। गङ्गेशोपाध्यायः प्रत्यक्षानुमानोपमानशब्दाख्यखण्डचतुष्टयात्मकचिन्तामणिकारः। तत्सुतो वर्द्धमानोपाध्यायस्तयोश्छायौ मणिमिश्रयज्ञपत्युपाध्यायौ मणिप्रभाकरौ। यज्ञपत्युपाध्यायच्छायः पक्षधरमिश्रचिन्तामणीदालोककारः। पक्षधरमिश्रच्छायो रघुनाथशिरोमणिश्चिन्तामणिदीधितिकारः। तच्छायो मथुरानाथतर्कवागीशचिन्तामणिदीधितीटीकाकारः। तच्छायो भवानन्दसिद्धान्तवागीशो दीधितेटीकाकारः। तच्छायौ जगदीशतर्कालङ्कारगदाधरभट्टाचार्य्यौ दीधितिटीकाकारौ। एतदतिरिक्ता वादार्थकारा बहवः पण्डिता आसन्॥ तर्कशास्त्रम्। यथा, शब्दरत्नावल्याम्।

"न्यायवैशेषिकादिः स्यात् तर्कविद्या प्रतिष्ठिता।
तस्यामान्वीक्षिकी ज्ञेया तत्त्वात्मज्ञानसुन्नयेत्॥"

अथ न्यायप्रथमसूत्रं लिख्यते प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। एषां लक्षणानि यथा। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।१। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।२। समानानेकधर्म्मोपपत्तेर्व्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।३। यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्। ४। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।५। तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। ६। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। ७। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।८। विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। ९। प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। १०। यथोपपन्नच्छलजातिनिग्रहस्थानोपालम्भो जल्पः। ११। सतुप्रतिपक्षस्थापनाहीनो वितण्डा। १२। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालात्ययापदिष्टा हेत्वाभासाः। १३। वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। १४। साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं जातिः। १५। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। १६। इति गौतमसूत्रम्॥ * ॥ न्यायग्रन्थश्च पञ्चाध्यायात्मकम्। तत्र प्रत्यध्यायस्याह्निकद्वयम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गौतमेन प्रमाणादिपदार्थानवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणम्। १। द्वितीयस्य तु प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम्। २। तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणम्। द्वितीये बुद्धिमनःपरीक्षणम्। ३। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणम्। द्वितीये दोषनिमित्तत्वनिरूपणं अवयवादिनिरूपणञ्च। ४। पञ्चमस्य प्रथमे जातिभेदनिरूपणम्। द्वितीये निग्रहस्थानभेदनिरूपणम्। ५। इति सर्व्वदर्शननसंग्रहः॥ *॥ युक्तिमूलकदृष्टान्तविशेषः। स च बहुविधः। तेषां मध्ये प्रसिद्धानां नामलक्षणप्रमाणानि लिख्यन्ते॥

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
अन्धगोलाङ्गूलन्यायः १।	कश्चिदुष्टात्मा महारण्यमार्गे पतितमन्धं खञ्जनगरं जिगमिषुं बभाषे किमचायुष्मता दुःखितेन स्थीयत इति स चान्धः सुखवाणीमाकर्ण्य तमाप्तं मत्वोवाच अहो महाभागधेयं यदत्तभवान् दीनं मां स्वाभीष्टनगरं प्राप्तुमर्हं भाषत ते स च विप्रलिप्सुर्दुष्टो गोयुवानमानीय तदीय	हेत्वाभासमथुरानाथटीकादयः १।

न्यायनामानि	लक्षणानि	तत्प्रमाणानि
	लाङ्गूलमन्यं ग्राहयामास उपदिदेश चैनमन्यमेव गोयुवा त्वां नगरं नेष्यति मा त्यज लाङ्गूलमिति स चान्यः अज्ञानुतया तदत्यजन् स्वाभीष्टमप्राप्यानर्थपरम्पराम्प्राप्नः । १ ।	
अन्धपङ्गुन्यायः २ ।	अन्धस्कन्धारूढः पङ्गुर्यथा अन्धस्य पङ्गां गत्यातिक्रमसमर्थस्तथा स चान्धः पङ्गोर्दृग्भ्यां चक्षुष्मानिव भवति । २ ।	काव्यप्रकाशे चण्डीदासटीका २ ।
अन्धहस्तिन्यायः ३ ।	बहवोऽन्धा हस्तिनिरूपणार्थं प्रस्थिताः केनचित् नरकं सृष्ट्वा खम्भाकारत्वेन केनापि लाङ्गूलं सृष्ट्वा रज्ज्वाकारत्वेन परेण श्रोत्रं सृष्ट्वा सूर्पाकारत्वेनापरेण मुखं सृष्ट्वा सर्पाकारत्वेन गजो निर्णीतः । ३ ।	भागवतादयः
अशोकवनिकान्यायः ४ ।	तुल्यगुणादिशालिनामशोकादिनानावनानामशोकवनगमने सत्यप्यवनगमनापेक्षा न । अपि च । तुल्यगुणशालिनि वने सत्यपि रावणेनाशोकवने सीता स्थापिता तत्र वनान्तरे स्थापनानापेक्षा । ४ ।	भाष्यसूत्रमक्षय्याख्या ४ ।
उष्ट्रकण्टकभोजनन्यायः ५ ।	उष्ट्रस्य ग्रसीकण्टकक्षतजन्यबहुदुःखसहनपूर्वकं किञ्चित्सुखजनकसपत्रग्रसीकण्टकभक्षणम् । ५ ।	वेदान्तसूक्ष्मरभाष्यटीका ५ ।
कदम्बगोलकन्यायः ६ ।	कदम्बगोलकस्य सर्वावयवेषु युगपदेव पुष्पागासुत्पत्तिः । ६ ।	भाषापरिच्छेदादयः ६ ।
करकङ्कणन्यायः ७ ।	कङ्कणशब्देनैव करभूषणविशेषबोधसम्भवेऽपि करशब्दपूर्वककङ्कणशब्दः करसंलग्नकङ्कणबोधार्थकः । ७ ।	काव्यप्रकाशटीकादयः ७ ।
काकाक्षिगोलकन्यायः ८ ।	एकमेव चक्षुर्गोलकमुभयचक्षुःसम्बन्धिसदुभयचक्षुःकार्यकारकम् । ८ ।	अमरकोषटीकादयः ८ ।
कूर्माङ्गन्यायः ९ ।	कूर्मः स्वेच्छया अङ्गानि प्रसारयति संकोचयति तद्वत् । ९ ।	पञ्चदशीटीका ९ ।
केसुतिकन्यायः १० ।	यद्वारवहनं दुर्बलस्यापि साध्यं तद्वारवहनं सुतरां सबलस्य साध्यम् । १० ।	यधिकरणधर्मावच्छिन्नाभावजगदीशटीका १० ।
खलेकपोतन्यायः ११ ।	दृढा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति । ११ ।	सामान्यलक्षणाजगदीशटीका ११।
गुडजिह्विकान्यायः १२ ।	गुडजिह्विकासम्बन्धे रसास्वादनमेव फलम् । १२ ।	भाष्यरत्नप्रभा १२ ।
गोवलीवर्दन्यायः १३ ।	वलीवर्दशब्देन महोक्षबोधसम्भवेऽपि गोशब्दपूर्वकवलीवर्दशब्दो भटिति बोधार्थकः । १३ ।	साहित्यदर्पणादयः १३ ।
चालनीन्यायः १४ ।	चालनीभ्रामणेन तण्डुलादेः स्थानान्तरपतनं तद्वत् । १४ ।	व्याप्तिपञ्चके जगदीशः १४ ।
टङ्कारणिमणिन्यायः १५ ।	टङ्कारणिमणीनामेकमाचरणव्यवहौ अभिचारभिया नैकधर्मावच्छिन्नं प्रति कारणत्वं किन्तु वह्निनिष्ठकार्यतावच्छेदकत्वयमवलम्ब्य कार्यकारणभावत्वयम् । १५ ।	बाधग्रन्थटीका १५ ।
दग्धपचन्यायः १६ ।	पत्राद्यां दग्धानामपि पूर्वाकारेणावस्थानज्ञानमात्रं न तु वस्तुतः पक्वत्वम् । १६ ।	वेदान्तभाष्यटीका १६ ।
दण्डचक्रादिन्यायः १७ ।	घटत्वादिकधर्मावच्छिन्नं प्रति दण्डचक्रादीनां कारणत्वम् । १७ ।	परामर्शमथुरानाथटीका १७ ।
दण्डापूपन्यायः १८ ।	आखण्डभक्षितैकदेशं दण्डं पश्यतस्तदेकदेशसंलग्नपिण्डकभक्षणबुद्धिः । १८ ।	दायभागादयः १८ ।
पङ्कप्रक्षालनन्यायः १९ ।	पङ्कलेपनपूर्वकक्षालनमपेक्ष्य पङ्कस्यालेपनं श्रेयः । १९ ।	अवयवस्य गादाधरी टीका १९ ।
मणिमन्त्रादिन्यायः २० ।	दाहं प्रति जलस्य प्रतिबन्धकत्वं वह्निनाशकतया यौक्तिकं मणिमन्त्रादीनान्तु तद्विलक्षणप्रतिबन्धकत्वं स्वातन्त्र्येण । २० ।	पक्षताजगदीशटीका २० ।
राजपुरप्रवेशन्यायः २१ ।	विशदखलगमनासहिष्णुरचकसङ्कुले राजपुरे जनानां श्रेणीरूपेण प्रवेशः । २१ ।	न्यायग्रन्थखण्डमथुरानाथटीका२१
लूतातन्तुन्यायः २२ ।	लूता स्वयमुत्पाद्य जालं रचयति संहरति च तद्वत् । २२ ।	वेदान्तसारटीका २२ ।
विशेष्यविशेषणन्यायः २३ ।	भूतले आदौ केवलघटो विशेष्यं ततस्तत्र घटे जलं विशेषणं न तु जलद्विशिष्टघट एवादौ विशेषणम् । २३ ।	सामान्यलक्षणामथुरानाथटीका २३ ।
वीचीतरङ्गन्यायः २४ ।	वीचीजनितस्तरङ्गस्तज्जनितोऽपि तरङ्ग इति क्रमेण तरङ्गोत्पत्तिः । २४ ।	भाषापरिच्छेदः २४ ।
बीजाङ्कुरन्यायः २५ ।	आदौ बीजं ततोऽङ्कुरः किमादावङ्कुरस्ततो बीजमित्यनिर्णयेन बीजाङ्कुरप्रवाहोऽनादिः । २५ ।	कुसुमाञ्जलिटीकादयः २५ ।
शुक्लवेलान्यायः २६ ।	कस्यचित् शुक्लशब्देनैव वेलाविशेषनिर्णयः । २६ ।	मलमासतत्त्वादयः २६ ।
घृतपचभेदन्यायः २७ ।	उपर्युपरिस्थितघृतसंख्यकपचार्यां स्थाल्यां युगपद्भेदभ्रमविषयाणामपि वस्तुत एकभेदानन्तरभ्रमभेदः । २७ ।	प्रत्यक्षखण्डमथुरानाथटीका २७ ।
शब्दग्राहितान्यायः २८ ।	दुर्वृत्तदृषभादेः प्रथमतः कौशलेनैकशब्दग्रहणं पश्चादपरशब्दग्रहणम् । २८ ।	अवच्छेदकत्वनिरुक्तेर्जागदीशी टीका २८ ।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
सन्दंशप्रापितन्यायः २८।	सन्दंशः सँड़ाशी यस्य प्रसिद्धिः। यथा तेनोभयपार्श्वधारणेन वस्तुप्राप्तिस्तथा। तथा हि। अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥ इत्यत्र काश्याः पुरत्रयपाठानन्तरं पुरत्रयपाठपूर्वमेव पठितत्वेन तदितरषट्पुराणि काशीप्रापकाणि। २८।	काशीखण्डटीका २८।
सर्षपेक्षान्यायः ३०।	बहुषु निमन्त्रितेषु एकस्मिन्नागतेऽपि भोज्यं न दीयते सर्षपानपेक्षते तद्वत्। ३०।	भाष्यरत्नप्रभा ३०।
रुचीकटाहन्यायः ३१।	स्वल्पश्रमसाध्यरुचीनिर्म्माणानन्तरं बहुश्रमसाध्यकटाहनिर्म्माणम्।३१।	कलापव्याकरणानन्दलहरीटीकान्यायः ३१।
स्खविरलगुड़न्यायः। ३२।	द्रवद्रव्यस्यधिः सहसा लक्ष्यस्थाने क्वचित् पतति क्वचिन्न पतति तद्वत्। ३२।	कलापटीका। ३२।

(यदि च न्यायवैशेषिकसाङ्ख्यपातञ्जलप्रभृत्यास्तिकदर्शनानां साक्षात्पारम्पर्य्येणैकमाचानन्तविश्वब्रह्माण्डस्योदयस्थितिलयकारणं एकोऽद्वितीयः सर्व्वपुरुषार्थस्वरूपः सनातनपुरुषः सर्व्वशक्तिमान् परमेश्वरः परमात्मैव प्रतिपाद्यः तत्रापि चार्व्वाकादिविप्रतिपन्नमतनिराकरणेन जगत्कारणत्वेश्वरस्य संस्थापनात् न्यायदर्शनस्यैव सर्व्वप्राधान्यसिद्धिः। आत्मतत्त्वज्ञानोत्पादनाय साक्षादुपयोगितया समस्तश्रुतिमीमांसितत्वाच्च पुराणादिशास्त्रेषु वेदान्तस्य भूयसीप्रशंसादर्शनाच्च तस्यैव दर्शनस्य मुख्यत्वमायाति चेत् न अतीवसूक्ष्मतमब्रह्मतत्त्वनिरूपकजगत्पूज्यवेदान्तशास्त्रे कदापि कस्यापि विषयभोगकलुषितबुद्धिपरिमार्ज्जकन्यायदर्शनबोधादते प्रवेशानधिकारात्। अतो नितरामेव सर्व्वेभ्योऽस्यैव गौरवमभ्युपगच्छन्ति तार्किकाः। वस्तुतस्तु सर्व्वेष्वास्तिकदर्शनेषु न्यायदर्शनमेव सर्व्वोच्चसिंहासनमारोढुमर्हतीति सर्व्वेषां प्रेक्षावतां परामर्शः। विशेषतः चार्व्वाकादिदुष्टमतखण्डनपूर्व्वकमोक्षस्वरूपस्थापनायेश्वरसत्तासंस्थापनाय चैकमात्रन्यायदर्शनमेवालं तत्त्वतः। एतच्च सत्यं नवेति प्रतिपादनाय श्रीमन्माधवाचार्य्यसङ्कलितसर्व्वदर्शनसारसंग्रहग्रन्थान्तर्गतान्यपादर्शनशास्त्राण्येव समुद्धृत्य दर्शयिष्यामः। तत्र प्रथमतः ईश्वरसंस्थापनं यथा,—

"नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्ग्राहिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अप्रसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमप्यत्र अप्रकृतं नियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं नगसागरादिकं सकर्तृकं कार्य्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः नावयवत्वेन तस्य साधनत्वात्। ननु किमिदं सावयवत्वं अवयवसंयोगित्वं अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्नैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात्। अवान्तरमहत्त्वेन वा कार्य्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् नापि कालात्ययापदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षममीक्ष्यते नहि कठोरकठीरवस्य कुरङ्गन्यायः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात्। तर्कजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवो व्यनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्य्यमपि न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम्। तच्च सर्व्वं कर्तृविशेषोपहितमर्य्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्तृत्वाद्यसिद्धेस्तदुपहितसमस्तकारकव्यापृतव्यापारकारकाकार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः। तथा निरटङ्कि शङ्करकिङ्करेण।

"अनुकूलेन तर्केण सनाथे सति साधने।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव"इति।

यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात्। तदुदितमुदयनेन।

"आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।
अभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धतेति॥"

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतः स्यात्। तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थे प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्तेरुपपत्तिरित्याचक्षीत कश्चित्तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखप्रवलान् करुणाविरोधात् स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः—

"प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते।
जगच्चाक्षुजतस्तस्य किं नाम न कृतं भवेदिति।"

नास्तिकशिरोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणयाप्रवृत्तिरस्यैव न च निसर्गतः सुखमयसर्गप्रसङ्गः दृष्टप्राणिजातसुकृतदुष्कृतपरिपाकविशेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वयवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्व्वाहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमश्चात्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयव्याघ्यादि समाधत्स्वेति चेत् तस्यानुत्थानात् किन्तूत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि स्वतोनित्यत्वज्ञप्तौ आगमानित्यत्वस्य तीव्राद्यधर्म्मोपेतत्वादिना सुगमत्वात्।"

द्वितीये मोक्षस्वरूपसंस्थापनं यथा,—

"ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदप्यापकपोलगुड़ायितं वर्त्तते तत्कथं सिद्धवत्तुल्य व्यवह्रियत इति चेन्नैवं सर्व्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्व्वतन्त्रसिद्धान्तसिद्धतया चणठापथत्वात् नस्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्यौलूक्यवदविवा-

दम्। अथ मन्येथाः शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तदतिरिक्तो वा प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत् हितीये तस्य नित्यत्वे निवृत्तिरप्यक्यविधानेव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावानात्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्वो हि प्राणी मुक्त इति व्यवहरति। ननु धर्मिनिवृत्तौ निर्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधाराभावात् लक्षणाभ्यासादिवदनासादितप्रकर्षं न स्फटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते। आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः अङ्ग भवान् दृष्टो वाचटं किमावरणं धर्माधर्मौ मन्यान्त इति चेत् दृष्टमेव। अथ देहमेवावरणं तथाच तन्निवृत्तौ पञ्जराद्विमुक्तस्य शुकस्येवात्मनः सततोर्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्तोऽमूर्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मत्वादात्मधर्माणामतीन्द्रियत्वं प्रसजेत्। सावयवत्वे यत् सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम्। अमूर्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्तप्रतिबन्धात् पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेद्विवाद ऐश्वर्यं चेत् सातिशयतया सदृशतया च प्रेक्षावतां नाभिमतम्। प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं वेति एतावदवशिष्यते तच्च पुरुषाश्रयमिति न शिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापातादापि प्रकृत्याश्रयः अचेतनत्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वाद्ये अनिर्मोक्षः स्वभावस्थानपायात् हितीये सम्पूर्ति संसारोऽस्तमियात्। नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपदवीमध्यास्ते। श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा यावन्नवेपि तथा भावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुभवतीति चेत्तदेतन्नाटकपक्षपतितं त्वदुक्तं इत्युपेक्ष्यते। सुखस्य सातिशयतया प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विधानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रधावते इति न्यायेन दुःखवत् सुखमित्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गिनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्तमानेन सान्यापातात् तथा हि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न प्रक्ष्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदाङ्कुर्वन्तु विदांवरा भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषप्रेयस्य दुःखनिवृत्तिरात्यन्तिकी निश्रेयसमिति निरवद्यमिति ॥ * ॥

न्यायदर्शनन्तु पूर्वोत्तरविभागभेदेन द्विविधम्। पूर्वभागो भगवता महर्षिगोतमेन प्रणीतः उत्तरभागस्तु भगवता महर्षिकणभुजैव प्रणीतः पूर्वभागे भगवान् गोतमः जीवनिश्रेयसाधिगमाय षोड़शपदार्थान् निरूपितवान् तेषां षोड़शपदार्थानां तत्त्वज्ञानादेव निःश्रेयसाधिगम इत्युपदिदेशेति। परभागे तु भगवान् कणादः द्रव्यादिषण्णां पदार्थानां तत्त्वज्ञानादेव निःश्रेयसं स्यादित्युपदिष्टवान्। तदृयथा,—"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति।" परं एवेव षट्पदार्थेषु भगवता गोतमेनोपदिष्टाः षोड़शपदार्थाः सर्वे एवार्त्तनिवेशिता भगवता कणभुजा। इह पुनर्विशेषपदार्थस्वीकरणात् लोके वैशेषिकमित्याख्यान्तरेणैव प्रसिद्धमेतद्दर्शनमिति बोधम्॥

अतिरिक्तन्यायनामानि यथा,—

१ अग्न्यातपनन्यायः। २ अजाकृपाणीयन्यायः। ३ अजातपुत्रनामकरणन्यायः। ४ अण्डकुक्कुटीन्यायः। ५ अत्यन्तं बलवन्तोऽपि पौरजानपदा जना इतिन्यायः। ६ अदग्धदहनन्यायः। ७ अध्यारोपापवादन्यायः। ८ अनधीते महाभाष्ये इतिन्यायः। ९ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेतिन्यायः। १० अन्ते या मतिः सा गतिरितिन्यायः। ११ अन्तेरण्डाविवाहश्चेदादावेव कुतो न स इतिन्यायः। १२ अन्धगजन्यायः। १३ अन्धचटकन्यायः। १४ अन्धदर्पणन्यायः। १५ अन्धस्यैवान्धलग्नस्य विनिपातः पदे पदे इतिन्यायः। १६ अन्धशुक्लन्यायः। १७ अपराह्णच्छायान्यायः। १८ अपसारिताग्निभूतलन्यायः। १९ अपस्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति इतिन्यायः। २० अब्भक्षकन्यायः। २१ अभाखलाभन्यायः। २२ अरण्यरोदनन्यायः। २३ अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदितिन्यायः। २४ अर्द्धजरतीन्यायः। २५ अर्द्धं त्यजति पण्डितन्यायः। २६ अर्द्धवैशसन्यायः। २७ अवघ्राणेक्षितानवेक्षितयोरितिन्यायः। २८ अश्मलोष्टन्यायः। २९ अश्वतरीगर्भन्यायः। ३० अश्वभक्तन्यायः। ३१ अश्वेक्षादीपन्यायः। ३२ अहिकुण्डलन्यायः। ३३ अहिनिर्लुत्त इतिन्यायः। ३४ अहिनकुलन्यायः। ३५ अहिसकैवर्त्तन्यायः। ३६ आकाशापरिच्छन्नत्वन्यायः। ३७ आदावन्ते वेतिन्यायः। ३८ आभाणकन्यायः। ३९ आयुर्घृतमितिन्यायः ४० आषाढ़वातन्यायः। ४१ इक्षुरसन्यायः। ४२ इक्षुविकारन्यायः। ४३ इक्ष्यिमाणयोः समभिव्याहारे इयमाणस्यैव प्राधान्यमितिन्यायः। ४४ इषुवेगक्षयन्यायः। ४५ उत्पाटितदन्तनागन्यायः। ४६ उदकनिमज्जनन्यायः। ४७ उपजनिष्यमाणनिमित्तोऽप्यपवादो जातनिमित्तमप्युत्सर्गं बाधते इतिन्यायः। ४८ उपजीव्योपजीवकन्यायः। ४९ उपपन्नधर्म्मा विकरोति हि धर्म्मिणमितिन्यायः। ५० उपवासादरं भिक्षेतिन्यायः। ५१ उभयतः पाशरज्जुन्यायः। ५२ उषरवृष्टिन्यायः। ५३ उष्ट्रलगुड़न्यायः। ५४ ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोग इतिन्यायः। ५५ एकत्र निर्णीतः ग्राह्यार्थः अन्यत्रापि तथेतिन्यायः। ५६ एकदेशविकृतमनन्यवदितिन्यायः। ५७ एकसन्धित्सतोऽपरं प्रधावते इतिन्यायः। ५८ एकाकिनी प्रतिज्ञेतिन्यायः। ५९ एकामसिद्धिं परिहरतो द्वितीया आपद्यते इतिन्यायः। ६० कण्टकन्यायः। ६१ कण्डचामीकरन्यायः। ६२ कदम्बकुसुमन्यायः। ६३ करस्थविल्वन्यायः। ६४ करिदंहितन्यायः। ६५ कांस्यभोजिन्यायः। ६६ काकतालीयन्यायः। ६७ काकदधिघातकन्यायः। ६८ काकदन्तपरीक्षान्यायः। ६९ काकाक्षिन्यायः। ७० कामनागोचरत्वेन शब्दबोध एव शब्दसाधनतान्वय इतिन्यायः। ७१ कारणगुणक्रमन्यायः। ७२ कार्य्येण कारणसंप्रत्ययः इतिन्यायः। ७३ कालनाम्नि कार्य्यनाम्न्यायः। ७४ किमज्ञानस्य दुष्करमितिन्यायः। ७५ कौटभङ्गन्यायः। ७६ कुक्कुटध्वनिन्यायः। ७७ कुम्भीधान्यन्यायः। ७८ कुम्यकाग्रावलम्बनन्यायः। ७९ कूपखानकन्यायः। ८० कूपन्यायः। ८१ कूपमण्डूकन्यायः। ८२ कृताकृतप्रसङ्गी यो विधिः स नित्य इतिन्यायः। ८३ कृते कार्य्ये किं सुहृन्नप्रज्ञेन इतिन्यायः। ८४ कृदभिहितो भावो द्रव्यवत् प्रकाशते इतिन्यायः। ८५ कोषपालन्यायः। ८६ कौण्डिन्यन्यायः। ८७ कौन्तेयराद्धेयन्यायः। ८८ क्रिया हि विकल्प्यते न वस्त्विति न्यायः। ८९ खलमेचीन्यायः। ९० खादकघातकन्यायः। ९१ गजघटान्यायः। ९२ गजभुक्तकपित्थन्यायः। ९३ गड्डलिकाप्रवाहन्यायः। ९४ गणपतिन्यायः। ९५ गर्द्दभारामगणनान्यायः। ९६ गले पादुकान्यायः।

९७ गुडोपसंहारन्यायः। ९८ गोक्षीरं खादन्ते-र्घृनमितिन्यायः। ९९ गोवलीवर्दन्यायः। १०० गोमयपायसन्यायः। १०१ गोमहिषादिन्यायः। १०२ घटकुटीप्रपातन्यायः। १०३ घटप्रदीपन्यायः। १०४ घुणाक्षरन्यायः। १०५ चक्रभ्रमणन्यायः। १०६ चतुर्वेदविन्न्यायः। १०७ चम्पकपटवासन्यायः। १०८ चर्म्मतन्त्रौ महिषौ हन्तीतिन्यायः। १०९ चिताम्रतन्यायः। ११० चित्रपटन्यायः। १११ चित्राङ्गनान्यायः। ११२ चित्रानलन्यायः। ११३ चिन्तामणिं परित्यज्य काचमणियहणन्यायः। ११४ चौरापराधात् माण्डव्यनिग्रहन्यायः। ११५ जलतुम्बिकान्यायः। ११६ जलमन्थनन्यायः। ११७ जलानयनन्यायः। ११८ जलौकान्यायः। ११९ जामात्रर्थं क्लिप्तस्य रूपादेरतिथ्युपकारकत्वमिति न्यायः। १२० ज्ञानधर्म्मिण्यभ्रान्तप्रकारे तु विपर्य्यय इति न्यायः। १२१ ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्य्य इतिन्यायः। १२२ ज्योतिर्न्यायः। १२३ तण्डुलन्यायः। १२४ तत्ताद्दगवगम्यते इतिन्यायः। १२५ तदभिन्नत्वमितिन्यायः। १२६ तदागमेऽपि दृश्यते इतिन्यायः। १२७ तप्तमायकोद्दरथन्यायः। १२८ तमःप्रकाशन्यायः। १२९ तरतमभावापन्नमितिन्यायः। १३० तामसं परिवर्ज्जयेदितिन्यायः। १३१ तालसर्षपन्यायः। १३२ तिर्य्यगधिकरणन्यायः। १३३ तुलोन्नमनन्यायः। १३४ तुष्यतु दुर्ज्जन इतिन्यायः। १३५ त्यजेदेकं कुलस्यार्थे इतिन्यायः। १३६ त्यज्या दुस्तटिनीतिन्यायः। १३७ दग्धरसनान्यायः। १३८ दग्धेन्धनवह्निन्यायः। १३९ दष्टसर्पमारणन्यायः। १४० दधिपयसि प्रत्यूषो ज्वर इतिन्यायः। १४१ दन्तपरीक्षान्यायः। १४२ दानखालकटन्यायः। १४३ दाहकदाह्यन्यायः। १४४ दुर्ब्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैरितिन्यायः। १४५ देवताधिकरणन्यायः। १४६ देवदत्तहन्तृहतन्यायः। १४७ देवदत्तापुत्रन्यायः। १४८ देहलीदीपन्यायः। १४९ देहाधीसुखत्वन्यायः। १५० घटारोहणन्यायः। १५१ धर्म्मैकत्वनान्यायः। १५२ धर्म्माधर्म्मन्यायः। १५३ धर्म्मिकल्पनान्यायः। १५४ धान्यपलालन्यायः। १५५ नखाग्रदग्धरथन्यायः। १५६ न हि करकङ्कणदर्शनाय आदर्शोपेक्षेतिन्यायः। १५७ न हि दुष्टे अनुपपन्नं नामेतिन्यायः। १५८ न हि निन्दा निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमितिन्यायः। १५९ न हि प्रत्यभिज्ञामात्रेण अर्थसिद्धिरितिन्यायः। १६० न हि भिक्षुको भिक्षुकमितिन्यायः। १६१ न हि विवाहानन्तरं वरपरीक्षा क्रियते इतिन्यायः। १६२ न हि ग्राम्दमग्राम्दैर्नान्वेतीतिन्यायः। १६३ न हि सतीरुक्षाण्यधिधारा स्वयमेव क्षेतुमाहितव्यापारा भवतीतिन्यायः। १६४ नागोद्दपतिन्यायः। १६५ नाज्ञातविशेषणा विशिष्टबुद्धिः विशेष्यं संक्रामतीतिन्यायः। १६६ नारिकेलपक्वाम्बुन्यायः। १६७ निम्नगाप्रवाहन्यायः। १६८ नीरक्षीरन्यायः। १६९ नीलेन्दीवरन्यायः। १७० नृपनापितपुत्रन्यायः। १७१ नौनाविकन्यायः। १७२ पञ्जरचालनन्यायः। १७३ पटन्यायः। १७४ पटे पचित्रन्यायः। १७५ पतन्मनुधावतो बद्धोऽपि गत इतिन्यायः। १७६ पदमध्यधिकाभावात् स्मारकात् न निश्चियत इतिन्यायः। १७७ परशुग्रहणन्यायः। १७८ परिघन्यायः। १७९ पर्व्वताधित्यकान्यायः। १८० पर्व्वतोपत्यकान्यायः। १८१ पाषाणेष्टिकान्यायः। १८२ पिञ्जरसुक्तपचित्रन्यायः। १८३ पिण्डं हित्वा करं लेढीतिन्यायः। १८४ पिष्टपेषणन्यायः। १८५ पुत्रलिप्सया देवं भजन्त्या भर्त्तारोऽपि नष्ट इतिन्यायः। १८६ पुरस्तादपवादा अनन्तरान् विधीन् बाधते नेतरानितिन्यायः। १८७ पुष्टलगुडन्यायः। १८८ पूर्व्वमपवादा निविशन्ते पश्चादुत्सर्गा इतिन्यायः। १८९ पूर्व्वात् परबलीयस्त्वन्यायः। १९० प्रकल्प्यापवादविषयं पश्चादुत्सर्गोऽभिनिविशते इतिन्यायः। १९१ प्रकाशाश्रयन्यायः। १९२ प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमितिन्यायः। १९३ प्रचालनाद्धि पङ्कस्य दूरादस्पर्शनमितिन्यायः। १९४ प्रदीपन्यायः। १९५ प्रधानमङ्गलनिवर्हणन्यायः। १९६ प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपीतिन्यायः। १९७ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इतिन्यायः। १९८ प्रसङ्गपतितन्यायः। १९९ प्रासादवासिन्यायः। २०० फलवतसहकारन्यायः। २०१ बध्यघातकन्यायः। २०२ बहुच्छिद्रघटप्रदीपन्यायः। २०३ बहुदुकाक्षदन्यायः। २०४ बहुराजकपुरन्यायः। २०५ बहूनामप्युपहो न्याय इतिन्यायः। २०६ ब्राह्मणपरिव्राजकन्यायः। २०७ ब्राह्मणवसिष्ठन्यायः। २०८ ब्राह्मणश्रमणन्यायः। २०९ भक्षितेऽपि लशुने न ग्लानो व्याधिरितिन्यायः। २१० भक्षुन्यायः। २११ भामतीन्यायः। २१२ भावप्रधानमाख्यातमितिन्यायः। २१३ भ्वादिन्यायः। २१४ भिक्षुपादप्रसारणन्यायः। २१५ भूलिङ्गपचित्रन्यायः। २१६ भूग्रैवेयोष्णीषः। २१७ भैरवन्यायः। २१८ भ्रमरन्यायः। २१९ मक्षिकान्यायः। २२० मज्जनोन्मज्जनन्यायः। २२१ मण्डूकप्लुतिन्यायः। २२२ मतुस्यकण्टकन्यायः। २२३ मरणाङ्करो व्याधिरितिन्यायः। २२४ मल्लन्यायः। २२५ महिषीप्रसवोन्मुखीतिन्यायः। २२६ मातृस्यन्यायः। २२७ मुक्ताद्यिधिकान्यायः। २२८ मूकभयेन कथात्यागन्यायः। २२९ मूर्खसेवनन्यायः। २३० मृषासिक्तताम्रन्यायः। २३१ म्लेच्छभयेन ग्रस्यानाश्रयणन्यायः। २३२ म्लेच्छावगुरान्यायः। २३३ म्लेतमारणन्यायः। २३४ यः कारयति स करोत्येवेतिन्यायः। २३५ यः कुरुते स भुङ्क्ते इतिन्यायः। २३६ यत् कृतकं तदनित्यमितिन्यायः। २३७ यतुपरः शब्दः स शब्दार्थ इतिन्यायः। २३८ यत्प्रायः श्रूयते यादृक् तत्तादृगवगम्यते इतिन्यायः। २३९ यत्रोभयोः समो दोष इतिन्यायः। २४० यथासंख्यन्यायः। २४१ यदर्थो प्रवृत्तिः तदर्थः प्रतिषेध इतिन्यायः। २४२ यद्दिवाहगीतगानमितिन्यायः। २४३ यादृग्यं सुखं तादृग्यं चपेटमितिन्यायः। २४४ यादृशो यत्तस्तादृशो बलिरितिन्यायः। २४५ यस्याज्ञानं भ्रमस्तस्य भ्रातः सम्यक् च वेद स इतिन्यायः। २४६ यावच्छिरस्तावच्छिरोव्यथेतिन्यायः। २४७ येन उत्क्रम्यते येन च उपसंहियते स वाक्यार्थ इतिन्यायः। २४८ येन चाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इतिन्यायः। २४९ योजनप्राप्यायां कावेर्य्यां मल्लबन्धनन्यायः। २५० रक्तपटन्यायः। २५१ रज्जुसर्पन्यायः। २५२ रथवड्वान्यायः। २५३ रश्मिलङ्घादिन्यायः। २५४ राजपुत्रव्याधन्यायः। २५५ राजसं तामसञ्चेतिन्यायः। २५६ रासभरटितन्यायः। २५७ रूढ़ियोगमपहरतीतिन्यायः। २५८ रेखागवयन्यायः। २५९ रोगिन्यायः। २६० लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरितिन्यायः। २६१ लाङ्गलजीवनमितिन्यायः। २६२ लोहपुम्बकन्यायः। २६३ लौहायिन्यायः। २६४ वकबन्धनन्यायः। २६५ वरगोष्ठीन्यायः। २६६ वरघाताय कन्यावरणमितिन्यायः। २६७ वस्तूनि मानान्यपेक्ष्य प्रयोजनानीतिन्यायः। २६८ वह्निधुमन्यायः। २६९ वह्निन्यायः। २७० वाजिमन्दुरान्यायः। २७१ वातादिन्यायः। २७२ वायुभक्षकन्यायः। २७३ वायुग्रैवेयोष्णीषन्यायः। २७४ विधिनिषेधौ सति विशेषबाधे विशेषणमुपसंक्रामेत इतिन्यायः। २७५ विधेयं हि स्तूयते वस्त्विति न्यायः। २७६ विपरीतं बलाबलमितिन्यायः। २७७ विस्वस्खलाटन्यायः। २७८ विवाह प्रकृतभृत्यन्यायः। २७९ विशिष्टवृत्तेरितिन्यायः। २८० विशिष्टस्य वैशिष्ट्यामितिन्यायः। २८१ विषं भक्षयतुरितिन्यायः। २८२ विषभक्षणन्यायः। २८३ विषवृक्षोऽपि संवर्द्ध स्वयं छेत्तुमसाम्प्रतमितिन्यायः। २८४ वृक्षप्रकम्पनन्यायः। २८५ वृद्धकुमारीवाक्यन्यायः। २८६ वृद्धिमिच्छतो मूलं विनष्टमितिन्यायः। २८७ वृश्चिकीगर्भन्यायः। २८८ वैग्रैव्यात्तु तथाद इतिन्यायः। २८९ शङ्खकुण्डलन्यायः। २९० शाखीचीरन्यायः। २९१ शबशोधनाय शस्त्रप्रहणमितिन्यायः। २९२ शालिबीजन्यायः। २९३ शक्तिः सहकारिणीतिन्यायः। २९४ शूलोद्वर्त्तनन्यायः। २९५ शाखाचन्द्रन्यायः। २९६ शालिसन्दहो कोद्रवनाशनन्यायः। २९७ शाल्मली स्थाकाङ्क्षा शब्देनैव पूरणीयेतिन्यायः। २९८ शिरोवेष्टनेन नासिकास्पर्शं इतिन्यायः। २९९ शैलुषीन्यायः। ३०० शालशुनकन्यायः। ३०१ श्वःकर्त्तव्यमद्य कुर्व्वितिन्यायः। ३०२ श्वपुच्छोन्नामनन्यायः। ३०३ सच्छिद्रघटाम्बुन्यायः। ३०४ सति बोधे न जानातीतिन्यायः। ३०५ सन्दिग्धस्य सन्दिग्धं स

प्रयोजनं चेत् विचारमर्हतीतिन्यायः। ३०६ समुद्रदृष्टिन्यायः। ३०७ सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते इतिन्यायः। ३०८ सर्व्वं वाक्यं साधारणमितिन्यायः। ३०९ सर्व्वं कार्य्यं सकारणकमितिन्यायः। ३१० सर्व्वविशेषणं साधारणमितिन्यायः। ३११ सर्व्वशास्त्राप्रत्ययमेकं कर्म्मेतिन्यायः। ३१२ साक्षात्प्रकृतमितिन्यायः। ३१३ साधुमैत्रीन्यायः। ३१४ सार्व्वजनीनतुल्यायव्ययन्यायः। ३१५ सावकाशनिरवकाशयोर्निरवकाशो बलीयानितिन्यायः। ३१६ सिंहग्रन्थन्यायः। ३१७ सिंहावलोकन्यायः। ३१८ सुतजनिग्रहतिन्यायः। ११६ सुभगाभिक्षुकन्यायः। ३२० सुन्दोपसुन्दन्यायः। ३२१ सूचसाटिकान्यायः। ३२२ सोपानारोहणन्यायः। ३२३ स्तनन्धयन्यायः। ३२४ स्थालीपुलाकन्यायः। ३२५ स्थावरजङ्गमविषन्यायः। ३२६ स्थूणानिखनन्यायः। ३२७ शूलारुन्धतीन्यायः। ३२८ स्फटिकलौहित्यन्यायः। ३२९ स्वकरकुचन्यायः। ३३० स्वपक्षहानिकर्तृत्वात् स्वकुलाङ्गारतां गत इतिन्यायः। ३३१ स्वप्नान्यायः। ३३२ स्वग्निगुमपि पुच्छन्नमितिन्यायः। ३३३ स्वामिभृत्यन्यायः। ३३४ हस्तामलकन्यायः। इति श्रीरामदयालुशिष्यरघुनाथेन विरचितो लौकिकन्यायसंग्रहः॥)

न्यायसारिणी, स्त्री, (न्यायं सरतीति। इ+णिनि+ङीप्।) युक्तिपूर्व्वककर्म्मकारिणी तत्पर्य्यायः। लुच्ची २। इति त्रिकाण्डशेषः॥

न्यायी, [न्] त्रि, (न्यायोऽस्यास्तीति। न्याय+इनिः।) न्यायवान्। न्यायोऽस्यास्तीत्यर्थे इन्प्रत्ययनिष्पन्नः॥

न्याय्यं, त्रि, (न्यायादनपेतम्। न्याय+"धर्म्मपथ्यर्थन्यायादनपेते।" ४। ४। ९२। इति यत्।) न्यायादनपेतम्। (न्याये भवः। न्यायादागतो वा। "दिगादिभ्यो यत्।" ४। ३। ५४। इति यत्।) न्यायागतधनादिः। इति भरतः॥ तत्पर्य्यायः। युक्तम् २ औपयिकम् ३ लभ्यम् ४ भजमानम् ५ अभिनीतम् ६। इत्यमरः। २। ८। २५॥ क्रमोचितम् ७। इति शब्दरत्नावली॥ (यथा, मनुः। २। १५२।

"देवाश्चैतान् समेत्योचुर्नाय्यं वः शिशुरुक्तवान्॥")

न्यासः, पुं, (न्यस्यत इति। नि+अस+घञ्।) उपनिधिः। स्याप्यद्रव्यम्। इत्यमरः। २। ९। ८९॥ अस्य विवरणं निक्षेपशब्दे द्रष्टव्यम्॥*॥

विन्यासः। अर्पणम्। यदाह कालिदासः।

"पदन्यासैरासीत् कमलपरिपूर्णा वसुमती
दृगान्दोलैरिन्दीवरमयमभूदम्बरतलम्।
इदं याचे किञ्चिद्विरचय वचः क्षीरमधुरं
धरायामप्यास्तां विधुमुखि! सुधायाः परिचयः॥"

त्यागः। यथा, श्रीभगवद्गीतायां १८ अध्याये।

"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥"

काम्यिकाख्यपाणिनिसूत्रव्याख्यानग्रन्थविशेषः। यथा, माघे। २। ११२।

"अनुनृत्तपदन्यासा सदृत्तिः सन्निबन्धना।
ग्रन्थविन्येव नो भाति राजनीतिरपस्मृता॥"

सन्न्यासः। यथा,—

"वक्ष्ये विविदिषान्यासं विद्वन्न्यासञ्च भेदतः।
हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात्॥"

इति जीवन्मुक्तिप्रथमविवेकः॥*॥

पूजाजपादेः प्राक्विघ्ननाशमन्त्रसिद्ध्यार्थं देहान्तर्बहिर्व्वर्णादिविन्यासः। तत्र न्यासकालो यथा,

"प्रातःकालेऽथवा पूजासमये होमकर्म्मणि।
जपकालेऽपि वा तेषां विनियोगः पृथक् पृथक्।
पूजाकाले समस्तं वा कुर्य्यात् साधकसत्तमः॥"

इति योगिनीहृदयम्॥*॥

अथ मातृकान्यासः। अस्य मातृकामन्त्रस्य ब्रह्मऋषिर्गायत्री छन्दो मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयो लिपिन्यासे विनियोगः। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे ॐ गायत्रीछन्दसे नमः। हृदि ॐ मातृकासरस्वत्यै देवतायै नमः। गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नमः। पादयोः स्वरेभ्यः शक्तिभ्यो नमः। तथा च ज्ञानार्णवे।

मातृकां शृणु देवेशि! न्यसेत् यापनिवन्धनीम्।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम्।
शक्तयस्तु स्वरा देवि! षड्ङ्गन्यासमाचरेत्॥

ततः षड्ङ्गन्यासौ।

अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः।
इं चं छं जं झं ञं ईं तर्ज्जनीभ्यां स्वाहा।
उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्।
एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम्।
ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट्।
अं यं रं लं वं शं षं सं हं लं क्षं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं खं गं घं ङं आं हृदयाय नमः। इत्यादि।

तथा च ज्ञानार्णवे।

अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये।
अनुस्वारविसर्गान्तर्यश्चवर्गौ सलक्षकौ॥
हृदयन्तु शिरो देवि! शिखा कवचकं तथा।
नेत्रमस्त्रं न्यसेत् ङेऽन्तं नमःस्वाहा क्रमेण तु॥
वषट् हुं वौषड्न्तश्च फड्न्तं योजयेत् प्रिये!।
षड्ङ्गोऽयं मातृकाया सर्व्वपापहरः स्मृतः॥

अथान्तर्मातृकान्यासः।

अकारादिषोड़शस्वरान् सबिन्दून् षोड़शदलकमले कण्ठमूले न्यसेत्। ककारादिहादशवर्णान् सबिन्दून् द्वादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सबिन्दून् दशदलकमले नाभौ न्यसेत्। वकारादिषड् वर्णान् सबिन्दून् षड्दलकमले लिङ्गमूले न्यसेत्। वकारादिचतुरो वर्णान् सबिन्दून् चतुर्दलकमले मूलाधारे न्यसेत्। हृत्पद्मवर्णत्रयं सबिन्दुं द्विदलकमले भ्रूमध्ये न्यसेत्। तथा च ज्ञानार्णवे।

"द्वात्रिंशत्पद्मसुजे कण्ठे स्वरान् षोड़शं विन्यसेत्।
द्वादशच्छदहृत्पद्मे कादीन् द्वादशं विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादीन्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे वकारादीन्यसेच्च षट्॥
आधारे चतुरो वर्णान् न्यसेदादीन् चतुर्दले।
हत्पद्मे भ्रूमध्ये पद्मे द्विदले विन्यसेत् प्रिये॥"

अगस्त्यसंहितायाम्।

"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये।
एवमन्तः प्रविन्यस्य मनसातो बहिर्न्यसेत्॥"

वैष्णवे तु।

"एकैकवर्णसुद्यार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥"

अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले।

सुवर्णाभे वह्निसंस्थे चतुर्व्वर्णविभूषिते॥
षड्दले वैद्युतनिभे स्वाधिष्ठानेऽमलत्विषि।
बभमेर्यवलैर्युक्ते वर्णैः षड्भिश्च सुव्रते।
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते विन्दूद्भासितमस्तके॥
अनाहते द्वादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥
विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाङ्किते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादिचिरेखात्मदलसञ्चयभूषिते॥
तन्मध्ये परविन्दुञ्च स्थिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्मासोऽयमान्तरः॥"*॥

अथ बाह्यमातृकान्यासः।

अस्या ध्यानं यथा,—

"पद्मासनस्थिपिभिर्विभक्तसुखदोःपद्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रसकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजैर्
बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥"

एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिन्यासस्तत्रैव।

"ललाटे नासिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्ज्जनी मध्यमागामा दृङ्नामे च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाष्ठोष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमासुत्तमाङ्गके।
मुखेऽनामां मध्यमाश्च हस्तपादेषु पार्श्वयोः॥
कनिष्ठानामिकामध्यास्तासु पृष्ठे च विन्यसेत्।
ताः साङ्गुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्व्वमंसयोश्च ककुत्स्थले।
हृत्पूर्व्वं हस्तपतृकुक्षिसुखेषु तलमेव च॥
एतासु मातृकासद्मः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः॥"

गौतमीये।

"ललाटमुखवृत्तास्यनासिकाश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपतृसन्ध्यग्रकेषु च॥

पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽग्रके ।
ककुद्यंसे च हृत्पूर्व्वं पाणिपादयुगे तथा ॥
जठरानननयोर्न्यस्येन्मालकार्णान् यथाक्रमात् ॥"
तद्यथा । अं नमो ललाटे । आं नमो मुखे । इं ईं चक्षुषोः । उं ऊं कर्णयोः । ऋं ॠं नसोः । ऌं ॡं गण्डयोः । एं ओष्ठे । ऐं अधरे । ओं औं दन्तोर्ध्वे । अं अधोदन्ते । अः ब्रह्मरन्ध्रे । अः मुखे । कं दक्षबाहुमूले । खं कूर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं अङ्गुल्यग्रे । एवं चं५ वामबाहुमूलसन्ध्यग्रकेषु । एवं टं५ दक्षिणपादमूलसन्ध्यग्रकेषु । एवं तं५ वामपादमूलसन्ध्यग्रकेषु । पं दक्षिणपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं उदरे । यं हृदि । रं दक्षबाहुमूले । लं ककुदि । वं वामबाहुमूले । शं हृदादिदक्षहस्ते । षं हृदादिवामहस्ते । सं हृदादिदक्षपादे । हं हृदादिवामपादे । लं हृदादुदरे । क्षं हृदादिमुखे । सर्व्वत्र नमोऽन्तेन न्यसेत् । तथा च ।
"ओमाद्यन्तो नमोऽन्तो वा सविन्दुर्विन्दुवर्ज्जितः ।
पञ्चाग्रहार्णविन्यासः क्रमादुक्तो मनीषिभिः ॥"
इति भट्टः ॥

अथ संहारमालकान्यासः ।

तस्या ध्यानं यथा,—
"अक्षस्रजं हरिणपोतसृणिं कपालं
विद्याः करैरविरतं दधतीं त्रिनेत्राम् ।
अर्द्धेन्दुमौलिमरुणामरविन्दरागां
वर्णेश्वरीं प्रणमतस्तनभारनम्राम् ॥"
न्यासस्तु चकारात्यकारान्तः । यथा । चं नमो हृदादिमुखे इत्यादि ॥ * ॥
अपरञ्च ।
"चतुर्धा मालका प्रोक्ता केवला बिन्दुसंयुता ।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते ॥
विद्याकरी केवला च सोभया भुक्तिदायिनी ।
पुत्रदा सविसर्गा तु सबिन्दुर्वित्तदायिनी ॥"
विष्णुरहस्ये ।
"वाग्भवाद्या च वाक्सिद्धेः रमाद्या श्रीप्रदृद्वये ।
दुःखेखाद्या सर्व्वसिद्धेः कामाद्या लोकवश्यदा ॥
श्रीकण्ठाद्यानिमान् न्यस्येत् सर्व्वमन्त्रः प्रसीदति ॥"
श्रीविद्याविषये नवरत्नेश्वरे ।
"वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मालकाक्षराः ।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये ॥"
यामले ।
"भूतशुद्धिलिपिन्यासौ विना वस्तु प्रपूजयेत् ।
विपरीतफलं दद्याद्भक्त्या पूजनं यथा ॥"
सामान्यन्यासे अङ्गुलिनियमो गौतमीये ।
"मनसा विन्यसेन्न्यासान् पुष्पैर्नैवाथवा सुने ।
अङ्गुष्ठानामिकाभ्यां वा चान्यथा विफलं भवेत् ॥"
विष्णुपन्यासे तु नायं नियमः ॥ * ॥

अथ पीठन्यासः ।

ॐ आधारशक्तये नमः ॐ प्रकृतये नमः ॐ कूर्म्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः ॐ क्षीरसमुद्राय नमः ॐ श्वेतद्वीपाय नमः एवं मणिमण्डपाय कल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय एतत् सर्व्वन्तु हृदि । ततो दक्षिणस्कन्धे ॐ धर्म्माय नमः । वामस्कन्धे ॐ ज्ञानाय नमः । एवं वामोरौ वैराग्याय । दक्षिणोरौ ऐश्वर्य्याय । सुखे अधर्म्माय । वामपार्श्वे अज्ञानाय । नाभौ अवैराग्याय । दक्षिणपार्श्वे अनैश्वर्य्याय । सर्व्वत्र प्रणवादिनमोऽन्तेन न्यसेत् । तथा च शारदायाम् ।
"अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन साधकः ।
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यं क्रमशः सुधीः ॥
सुखपार्श्वनाभिपार्श्वेष्वधर्म्मादीन् प्रकल्पयेत् ॥"
पुनर्हृदि । ॐ अनन्ताय नमः । एवं पद्माय नमः । अं सूर्य्यमण्डलाय द्वादशकलात्मने नमः । उं सोममण्डलाय षोड़शकलात्मने नमः । मं वह्निमण्डलाय दशकलात्मने नमः । सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः । आं आत्मने नमः । अं अन्तरात्मने नमः । पं परमात्मने नमः । ह्रीं ज्ञानात्मने नमः । इत्यन्तं विन्यस्य हृत्पद्मस्य पूर्व्वादिकेसरेषु तत्तत्कल्पोक्तपीठशक्तीर्मध्ये पीठमनुञ्च न्यसेत् । यथा शारदायाम् ।
"अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान् ।
एषु स्वस्वकलां न्यस्य नामाद्यक्षरपूर्व्वतः ॥
सत्त्वादीन् त्रिगुणान् न्यस्य तथैवात्र गुरूत्तमः ।
"आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः ॥"

अथ ऋष्यादिन्यासः ।

ऋषिस्तु ।
"महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम् ।
संसाधयति सुज्ञात्मा स तस्य ऋषिरीरितः ॥
गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्त्तितः ।
सर्व्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते ॥
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम् ।
सर्व्वेषामेव जन्तूनां भाषणात् प्रेरणात्तथा ॥
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत् ।
ऋषिश्छन्दोऽपरिज्ञानान्न मन्त्रफलभागभवेत् ॥
दौर्ब्बल्यं याति मन्त्राणां विनियोगमजानताम् ॥"
तत्रान्तरे ।
"ऋषिं न्यसेन्मूर्द्ध्नि देशे छन्दस्तु मुखपङ्कजे ।
देवतां हृदये चैव बीजन्तु गुह्यदेशके ॥
शक्तिञ्च पादयोश्चैव सर्व्वाङ्गे कीलकं न्यसेत् ॥"

अथाङ्गन्यासः । तत्राङ्गुलिनियमः ।

त्रिद्व्येकदशकद्वित्रिसंख्यया शैलसम्भवे ।
अङ्गुलीनामिति वचनादिति सर्व्वसाधारणम् ॥
यामले ।
"हृदयं मध्यमानाम-तर्ज्जनीभिः स्मृतं शिरः ।
मध्यमातर्ज्जनीभ्यां स्यादङ्गुष्ठेन शिखा स्मृता ॥
दृग्भिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितम् ।
प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गकल्पैरियं मता ॥
तिसृभिस्तर्ज्जनीमध्यमानाभिः ॥
तर्ज्जनीमध्यमानामा प्रोक्ता नेत्रत्रये क्रमात् ।
यदि नेत्रद्वयं प्रोक्तं तदा तर्ज्जनिमध्यमे ॥"
इति भट्टधृतवचनात् ॥
"हृदयादिषु विन्यस्येदङ्गमन्त्रांस्ततः सुधीः ।
हृदयाय नमः पूर्व्वं शिरसे वह्निवल्लभा ॥
शिखायै वषट्प्रयुक्तं कवचाय हुमीरितम् ।
नेत्रत्रयाय वौषट् स्यादस्त्राय फट्तिक्रमात् ॥
षड़ङ्गमन्त्रानित्युक्तान् षड़ङ्गेषु नियोजयेत् ।
पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत् ॥"
इति शारदावचनम् ॥
वैष्णवे तु ।
"अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेत्मुद्रा हृदये शीर्षके च ।
अधोऽङ्गुष्ठा खलु सृष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्म्मणि स्युः ॥
नाराचसङ्घट्टितबाहुयुग्म-
काङ्गुष्ठतर्ज्जन्युदितो ध्वनिस्तु ।
विश्वग्विसृष्टा कथिताऽस्त्रमुद्रा
यत्राग्निगौ तर्ज्जनिमध्यमे च ॥"
शारदायाम् ।
"न्यासक्रमेण देहेषु धर्म्मादीन् पूजयेत्ततः ।
पुष्पाद्यैः पीठमन्त्रान्तं तस्मिंश्च परदेवताम् ॥"
इति दर्शनात् शरीरे पीठपूजा ।
"यद्यङ्गहीनस्य मन्त्रस्य स्वैर्नैवाङ्गानि कल्पयेत् ॥"
तथा ब्रह्मयामले ।
"स्वनामाद्यक्षरं बीजं सर्व्वेषामभिधीयते ॥"

अथ व्यापकन्यासः ।

नवधा सप्तधा वापि मूलेन पञ्चधा त्रिधेति भैरवतन्त्रवचनात् । नवधाकरणे शिरस्तः पादान्तं पादतः शिरोऽन्तम् । एवं चतुर्धा । सप्तधाकरणे तादृशं त्रिधा । पञ्चधाकरणे तादृशं द्विधा । त्रिधाकरणेऽपि तादृशमेकधा । हृदादिमुखान्तन्तु पक्षे एकधा सर्व्वत्रैव । शृतधाकरणे तु तादृशं पञ्चाङ्गहारं हृदादि मुखान्तं नास्तीति व्यापकन्यासः । इत्यागमतत्त्वविलासः ॥ * ॥ नित्यं न्यासकरणफलं यथा,—
"आगमोक्तेन विधिना नित्यं न्यासं करोति यः ।
देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते ॥
यो न्यासकवचच्छन्दो मन्त्रं जपति तं प्रिये ।
विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥"
न्यासाकरणे दोषो यथा,—
"अकृत्वा न्यासजालं यो मूढ़त्वात् प्रजपेन्मनुम् ।
सर्व्वविघ्नैः स बाधः स्यादव्याघ्रैर्मृगयुर्यथा ॥"
इति तन्त्रसारः ॥ * ॥
एते न्यासाः सामान्यपूजाप्रकरणोक्ताः ।
अन्ये च देवताविशेषे बहवः सन्ति बाहुल्यभिया तेषां प्रमाणादिकमलिखित्वा केवलं तत्र विष्णुविषये केशवकीर्त्त्यादि १ मूर्त्तिपञ्जर२ तत्त्व ३ भूतिपञ्जर ४ दृग्बन्ध ५ पञ्चाङ्ग ६ न्यासाः । शिवविषये श्रीकण्ठादि १ ईशानादिपञ्चमूर्त्ति २ मन्त्र ३ मूर्त्ति ४ गोलक ५ शुभगादि ६ भूषण ७ न्यासाः । अन्नपूर्णाविषये

पदन्यासः १। श्रीविद्याविषये वह्निन्यादि १ नवयोन्यात्मक २ पीठ ३ तत्त्व ४ पञ्चदशी ५ षोड़शी ६ संहार ७ स्थिति ८ सृष्टि ९ वाद१० षोढ़ा ११ गणेश १२ ग्रह १३ नक्षत्र १४ योगिनी १५ राशि १६ त्रिपुरा १७ षोड़शनित्या १८ कामरति १९ सृष्टिस्थिति २० प्रकटयोगिनी २१ आयुध २२ न्यासाः। तारा-विषये रुद्र १ ग्रह २ लोकपाल ३ न्यासाः। एतेषां प्रमाणानि तन्त्रसारादौ द्रष्टव्यानि॥

न्युङ्खः, पुं, (नि+उङ्ख गतौ+घञ्।) सामवेदे नियतप्रणवषट्कम्। दीर्घवानयमिति नयनानन्दः। इत्यमरभरतौ॥ सम्यक्। मनोज्ञः। इति मेदिनी। खे, २॥

न्युब्जं, क्ली, (न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्।) कर्म्मरङ्गफलम्। इति मेदिनी। जे, १२॥ आद्यादिपात्रभेदः। इति शब्दरत्नावली॥ तथा च गोभिलः। प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युब्जं कुर्य्यात् पितृभ्यः स्थानमसीति। प्रथमे पात्रे पितृपात्रे। संस्रवान् पितामहादिपक्षार्घपात्रस्थशेषजलानि। समवनीय क्रमेण स्थापयित्वा ततृपात्रस्य प्रपितामहपात्रेणाच्छादनमाह शौनकः। प्रपितामहपात्रेण पिधाय प्रतिष्ठापयतीति। याज्ञवल्क्योऽपि ततृपात्रस्याधःस्थत्वाभिधानात् पात्रान्तरेण पिधानमाचिप्रम्। तथा च याज्ञवल्क्यः।

"दत्त्वार्घं संस्रवांस्तेषां पात्रे कृत्वा विधानतः।
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥"

विधानतः यथापूर्व्वं स्थापितं क्रमेण। तेन प्रपितामहपात्रेणाधःकृतं पितृपात्रं ऊर्द्धसुखमवस्थितं न्युब्जं करोति। तत्रासक्त। पितृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत्। इति मत्स्यपुराणवचने न्यसेदित्यनाख्यातोपस्थापितकर्त्तुर्व्यापारार्थे कर्त्तव्यः। इति श्राद्धतत्त्वम्॥

न्युब्जः, पुं, (नि+उब्ज+अच्।) दर्भमयसुक्। इति मेदिनी। जे, ११॥ (यथा,—

"शूयनामनयानानामुत्तानानान्तु दर्शनम्।
न्युब्जानामितरेषाञ्च पात्रादीनामशोभनम्॥"

इति वामटे शारीरस्थाने। ६। २३॥)

कुशः। सुक्। इति हेमचन्द्रः॥

न्युब्जः, त्रि, (न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्।) कुब्जः। अधोमुखः। इति मेदिनी। जे, १२॥ (यथा, हरिवंशे। ६१। ६।

"स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत्।
न्युब्जं पयोधराकाङ्क्षी चकार च रुरोद च॥")

रुजा युक्तः। इत्यमरः। २। ६। ६१॥

न्यस्थिमालिन्, [न्] पुं, (नृणामस्थिमाला नृस्थिमाला सा अस्त्यस्येति। इनिः।) शिवः। इति त्रिकाण्डशेषः॥ नरास्थिमालाविशिष्टे, त्रि॥

रोगेण वक्रीकृतदृष्ट्याधीसुखपुरुषादिः। इति भरतः॥

न्युब्जखड्गः, पुं, (न्युब्जः खड्गः।) कुब्जखड्गः। बाँका तरवार इति भाषा॥ तत्पर्य्यायः। कटीतलः २। इति त्रिकाण्डशेषः॥

न्यूनं, त्रि, (न्यूनयति। नि+ऊन परिहाणे+अच्।) गह्यम्। (यथा, महाभारते। १३। १४३। ४६।

"एतैः कर्म्मफलैर्देवि! न्यूनजातिकुलोद्भवः।
शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः॥")

ऊनम्। इत्यमरः। ३। ३। १२७॥ (यथा, मनुः। ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्॥")

न्यूनपञ्चाङ्गुलावः, पुं, (न्यूनपञ्चाङ्गुलतः ऊनपञ्चाङ्गुलायूनां भावो यत्र।) ऊनपञ्चाङ्गुलावः। पागल इत्यर्थः। यथा,—

"उदीरितेन्द्रियो धाता वीक्षाक्षक्रे यदात्मजाम्।
तदैव न्यूनपञ्चाङ्गुलावा जाताः शरीरतः॥"

इति कालिकापुराणे द्वितीयोऽध्यायः॥

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.2

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY